।। श्रीः ।।

श्रीमद्वाल्मीकिरामायणम्

नानादेशीयकोशानुसारेण संशोधितम्।

श्रीमद्गोविन्दराजीयव्याख्यानेन तिलकप्रभृत्यनेकापूर्वव्याख्यानोद्धृतैः
गोविन्दराजीयानुक्तापूर्वविषयैश्च समलंकृतम्।

सुन्दरकाण्डम्
युद्धकाण्डम्

पद्मभूषण-आचार्य-बलदेव-उपाध्याय-भूमिकया-विभूषितम्

उत्तर प्रदेश संस्कृत संस्थान
लखनऊ

- DONATED BY -
Lt. PADMASHREE
Prof. V. VENKATACHALAM
VARANASI

प्रकाशक : **श्रीमती अलका श्रीवास्तव**
निदेशक
उत्तर प्रदेश संस्कृत संस्थान, लखनऊ

प्राप्ति स्थान : **विक्रय विभाग**
उत्तर प्रदेश संस्कृत संस्थान,
नया हैदराबाद, लखनऊ-२२६ ००७

प्रथम संस्करण : वि.सं. २०५४ (१९९८ ई.)

प्रतियाँ : १०००

मूल्य : रु. २२० (दो सौ बीस रुपये)

© उत्तर प्रदेश संस्कृत संस्थान, लखनऊ

मुद्रक : शिवम् आर्टस् निशातगंज, लखनऊ।
दूरभाष : ३८६३८९

श्रीः

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यासमलंकृतम् ।

सुन्दरकाण्डम् ५

श्रीरामचन्द्राय नमः ॥

प्रथमः सर्गः ॥ १ ॥

सीतान्वेषणाय लङ्काजिगमिषया महेन्द्रगिरिशिखराज्जलधिमुल्लङ्घयताहनुमता मध्येसमुद्रं तच्चोदनया जलमध्यादभ्युद्गच्छतःस्वशिखरे स्वस्यविश्रममर्थयतोमैनाकगिरेः स्वकरतलसंस्पर्शनेन संमाननं ॥ १ ॥ तथा देवैः स्वबलपरीक्षणाय वरदानपूर्वकं प्रेषितया राक्षसरूपधारिण्यासुरसया स्वनिगरणाय बहुयोजनपरिमाणनिजवदनव्यादाने स्वतनुतनूकरणपूर्वकं तदुदरप्रवेशेन तदर्हिंसयैव बहिर्निर्गमनं ॥ २ ॥ तथा सिंहिकाख्ययामहाराक्षस्या स्वच्छायाग्रहणपूर्वकं स्वग्रसनाय बहुयोजनविस्तीर्णनिजमुखव्यादाने स्वशरीरसंकोचनपूर्वकं तन्मुखप्रवेशेन तदुदरविदारणेन तदसुहरणपूर्वकंबहिर्निर्गमनं ॥ ३ ॥ तथा राक्षसजनासंभ्रमाय स्वशरीरतनुकरणेन लङ्कावहिस्स्थलंबगिरिशिखरे निपतनं ॥ ४ ॥

ततो रावणनीतायास्सीतायाश्शत्रुकर्शनः ॥ इयेष पदमन्वेष्टुं चारणाचरिते पथि ॥ १ ॥

तत्त्वज्ञानसमुद्भवो घनदयासारस्य सारो महान्निष्कर्षः कमलानिवासचरणद्वन्द्वानुरागस्मृतेः ॥ अक्लेशः परिपाक एष जगतामक्षय्यपुण्यावलेरस्माकं निधिरक्षयो विजयते श्रीमाञ्शठारिर्गुरुः ॥ १ ॥ श्रीरामायणभूषायै प्रवृत्तो रामभक्तितः ॥ व्याख्यां सुन्दरकाण्डस्य तिलकं कलयाम्यहम् ॥ २ ॥ उक्तं परत्वासाधारणं समस्तकल्याणगुणाकरत्वं किष्किन्धाकाण्डे । अत्र सर्वसंहर्तृत्वमुच्यते । वक्ष्यति हि तत् " ब्रह्मा स्वयंभूः " इत्यादिना । यद्वा पूर्वस्मिन्काण्डे सर्वथा मित्रसंरक्षणं कार्यमित्युक्तं । अत्र दूतेन पतिव्रतया चैवं वर्तितव्यमित्यर्थः प्रतिपाद्यते । यद्वा पूर्वत्र सर्वरक्षणप्रवृत्तस्य विष्णोराचार्यरूपपुरुषकारलाभ उक्तः । अधुना आचार्यकृत्यमुच्यते । तत्र प्रथमे सर्गे शिक्षणीयशिष्यान्वेषणमुपपाद्यते । तत इत्यादि । ततः जाम्बवत्प्रोत्साहनानन्तरं । चारणाः सञ्चारिणो देवगायकाः तैराचरिते पथि आकाशे । रावणनीतायास्सीतायाः पदं स्थानमन्वेष्टुमियेष । शत्रुकर्शनः तदन्वेषणविरोधिनिरसनसमर्थः । यद्वा चारणाचरिते पथि गत्वा सीतायाः पदमन्वेष्टुमियेष । यद्वा यथापाङ्क्तमेवान्वयः । आकाशेपि पदन्यासान्वेषणसमर्थोयमिति बुद्धिचातुर्यातिशय उच्यते । अनेन शिष्यस्थानान्वेषणपरगुरुस्वरूपमुच्यते । ततः मुद्राप्रदानपूर्वकभगवदनुज्ञालाभानन्तरं शत्रुकर्शनः । " गुशब्दस्त्वन्धकारः स्याद्रुशब्दस्तन्निरोधकः । अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते " इत्युक्तरीत्या अज्ञाननिवर्तनशीलो गुरुः । चारयन्ति आचारयन्ति धर्मानिति चारणाः पूर्वाचार्याः तैराचरिते पथि । " महाजनो येन गतस्स पन्थाः " इत्युक्तसदाचारे स्थित इति शेषः । रावयति असत्प्रलापा-

---

श्रीरामोजयति ॥ **रामानु०** श्रीमत्सुन्दरकाण्डेव्याख्येयानिव्याक्रियन्ते । पूर्वस्मिन्काण्डेमनसागमनंकृतमित्युक्तं । इदानींकायेनापिगमनंकर्तुमैच्छदित्याशयेनाह—ततइति ॥ अत्रगन्तुमितिपदमध्याहर्तव्यं । शत्रुकर्शनोहनुमान् रावणनीतायाःसीतायाः पदं निवासस्थानं अन्वेष्टुं चारणाचरितेपथि वर्त्मनि गन्तुमियेषेतियोजना । **शि०** चारणैः आचरिते अतिसंचारविशिष्टे ॥ १ ॥

दुष्करं निष्प्रतिद्वन्द्वं चिकीर्षन्कर्म वानरः ॥ समुदग्रशिरोग्रीवो गवांपतिरिवाऽऽबभौ ॥ २ ॥
अथ वैडूर्यवर्णेषु शाद्वलेषु महाबलः ॥ धीरस्सलिलकल्पेषु विचचार यथासुखम् ॥ ३ ॥
द्विजान्वित्रासयन्धीमानुरसा पादपान्हरन् ॥ मृगांश्च सुबहून्निघ्नन्प्रवृद्ध इव केसरी ॥ ४ ॥
नीललोहितमाञ्जिष्ठपत्रवर्णैस्सितासितैः ॥ स्वभावविहितैश्चित्रैर्धातुभिस्स्वमलंकृतम् ॥ ५ ॥
कामरूपिभिराविष्टमभीक्ष्णं सपरिच्छदैः ॥ यक्षकिन्नरगन्धर्वैर्देवकल्पैश्च पन्नगैः ॥ ६ ॥
स तस्य गिरिवर्यस्य तले नागवरायुते ॥ तिष्ठन्कपिवरस्तत्र ह्रदे नाग इवाबभौ ॥ ७ ॥
स सूर्याय महेन्द्राय पवनाय स्वयंभुवे ॥ भूतेभ्यश्चाञ्जलिं कृत्वा चकार गमने मतिम् ॥ ८ ॥
अञ्जलिं प्राङ्मुखः कृत्वा पवनायात्मयोनये ॥ ततोभिववृधे गन्तुं दक्षिणो दक्षिणां दिशम् ॥ ९ ॥
प्लवङ्गप्रवरैर्दृष्टः प्लवने कृतनिश्चयः ॥ ववृधे रामवृद्ध्यर्थं समुद्र इव पर्वसु ॥ १० ॥
निष्प्रमाणशरीरस्सँल्लिलङ्घयिषुरर्णवम् ॥ [प्रगृह्य बलवान्बाहू लङ्कामभिमुखः स्थितः] ॥
बाहुभ्यां पीडयामास चरणाभ्यां च पर्वतम् ॥ ११ ॥

न्कारयतीति रावणः अविवेकः तेन नीतायाः स्ववशं प्रापितायाः सीतायाः अनादिभगवत्परतन्त्रचेतनस्य । सीताशब्देनायोनिजत्वोक्तेः । स्त्रीलिङ्गेन पारतन्त्र्योक्तेश्च । स्त्रीप्रायमितरत्सर्वमिति ह्युक्तं । पदं स्थानं संसारमण्डलमन्वेष्टुं । सात्त्विकसंभाषणादिचिह्नं वा । तथोक्तं " विष्णोः कटाक्षश्चाद्वेष आभिमुख्यं च सात्त्विकैः । संभाषणं षडेतानि त्वाचार्यप्राप्तिहेतवः " इति । यद्वा पदं व्यवसायमन्वेष्टुं कस्य चेतनस्य भगवत्प्राप्तावध्यवसाय इत्यन्वेष्टुं । इयेष । " पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु " इत्यमरः । अत्रैकादशसहस्रश्लोका गताः । द्वादशसहस्रस्यादिमोयं श्लोकः । अत्र गायत्र्याः द्वादशमक्षरं प्रयुक्तं । तदवलोकनीयं विद्वद्भिः ॥ १ ॥ निष्प्रतिद्वन्द्वं यथा भवति तथा दुष्करं चिकीर्षन् समुदग्रशिरोग्रीवः समुन्नतशिरोग्रीवः । गवां पतिः वृषभः ॥ २ ॥ शाद्वलानांसलिलकल्पत्वं वैडूर्यवर्णतया ॥ ३ ॥ केसरीव बभावेति शेषः ॥ ४ ॥ नीलेति अत्र यच्छब्दोध्याहार्यः । यदेवंविधं तलं तत्र तिष्ठन्नित्यन्वयः । पत्रवर्णैः पत्रश्यामैः । " पलाशो हरितो हरित् " इति हलायुधः । सितासितैः कल्माषैः । स्वभावविहितैः स्वतस्सिद्धैः ॥ ५–७ ॥ स्वयंभुवे चतुर्मुखाय । भूतेभ्यः देवयोनिभ्यः ॥ ८ ॥ आत्मयोनये स्वकारणभूताय । दक्षिणः समर्थः । हनुमान् प्राङ्मुखःसन् आत्मयोनये पवनाय । अञ्जलिं कृत्वा ततो दक्षिणां दिशं गन्तुं ववृध इत्यन्वयः । हिः पादपूरणे । अञ्जलिं प्राङ्मुखः कुर्वन्निति पाठस्त्वयुक्तः शतृप्रत्ययेन प्राङ्मुखत्वविशिष्टाञ्जलिकरणदक्षिणदिग्गमनोद्योगयोरेककालिकत्वप्रतीत्या विरोधात् । नहि प्राङ्मुखस्यैव सतो दक्षिणदिग्गमनोद्योगो युज्यते ॥ ९ ॥ रामवृद्ध्यर्थं रामप्रयोजनार्थं ॥ १० ॥ निष्प्रमाणशरीरः निर्मर्यादशरीरः । बाहु-

रामानु० निष्प्रतिद्वन्द्वं प्रतिद्वन्द्वान्निष्क्रान्तं । प्रतिबन्धकरहितमित्यर्थः ॥ २ ॥ **रामानु०** वैडूर्यवर्णेषु हरितत्वसंवलितशौक्ल्यविशिष्टतयावैडूर्यवर्णत्वं । शाद्वलानांसलिलकल्पत्वं शैत्यमार्दवादिना ॥ ३ ॥ **स०** सूर्याय स्वस्यविद्योपदेष्टृत्वाल्लोकदृष्ट्या । महेन्द्राय व्यवहारसिद्ध्यर्थंप्रकृतसीताप्रतिकृतिसंनिहितत्वात् । यथोक्तंभगवत्पादैः—" तस्यास्तुतांप्रतिकृतिंप्रविवेशशक्रः " इत्यादि । पवनाय पितृत्वात् । स्वयंभुवे सर्वगुरुत्वात्स्वस्यवरदानाद्वा । भूतेभ्यः विघ्ननिवारकेभ्योदेवेभ्यः । अञ्जलिं हस्तद्वयमेलनं ॥ ८ ॥ **स०** वृद्ध्यर्थंस्वपितृत्वोपाधिना पुनरपिवायुंप्रणमति । अञ्जलिमिति । स्वयोनये स्वकारणाय । अथवा आत्मैवयोनिःस्वोत्पत्तिकारणं यस्य तस्मैरामायेतिवा ॥ ९ ॥ **स०** रामवृद्ध्यर्थं रामयशोवृद्ध्यर्थं । योववृधे सप्लवङ्गप्रवरैर्दृष्टइत्यन्वयः । तेन नपौनरुक्त्यं । अथवा अरामवृद्ध्यर्थमितिच्छेदः । अर्थस्तु नविद्यतेरामोयेषांस्वपक्षीयत्वेन तेअरामाः । यद्वा अरामाः रामविरुद्धाः । तेषांवृद्ध्यर्थं छेदनार्थं । ' वृधु हिंसायां ' इतिधातुव्याख्यानात् । यद्वा वृद्धिरभिवृद्धिः तस्याअर्थोनिवृत्तिस्तमुद्दिश्य । 'अर्थोऽभिधेयरैवस्तुप्रयो-

[पा०] १ क. च. छ. ज. ञ. वीरः. २ क. च.—ञ. न्भीमान्. ३ क. ङ. छ.—ट. पद्मवर्णैः. ४ ङ. ञ. ञ. ट. स्वभावसिद्धैर्विमलैः. ५ ङ. ञ. ञ. ट. दैवकल्पैस्स. ६ क. तिष्ठन्हरिवरः. ७ ञ. कुर्वन्. ८ ङ.—ट. ततोहि. ९ क. सिध्यर्थं. १० इदमर्धं च. छ. ज. पाठेषुदृश्यते.

स चचालाचलश्चापि मुहूर्तं कपिपीडितः ॥ तरूणां पुष्पिताग्राणां सर्वं पुष्पमशातयत् ॥ १२ ॥
तेन पादपमुक्तेन पुष्पौघेण सुगन्धिना ॥ सर्वतः संवृतश्शैलो बभौ पुष्पमयो यथा ॥ १३ ॥
तेन चोत्तमवीर्येण पीड्यमानस्स पर्वतः ॥ सलिलं संप्रसुस्राव मदं मत्त इव द्विपः ॥ १४ ॥
पीड्यमानस्तु बलिना महेन्द्रस्तेन पर्वतः ॥ रीतीर्निर्वर्तयामास काञ्चनाञ्जनराजतीः ॥ १५ ॥
मुमोच च शिलाश्शैलो विशालास्समनश्शिलाः ॥ मध्यमेनार्चिषा जुष्टो धूमराजीरिवानलः ॥१६॥
गिरिणा पीड्यमानेन पीड्यमानानि सर्वतः ॥ गुहाविष्टानि भूतानि विनेदुर्विकृतैस्स्वरैः ॥ १७ ॥
स महासत्त्वसन्नादश्शैलपीडानिमित्तजः ॥ पृथिवीं पूरयामास दिशश्चोपवनानि च ॥ १८ ॥
शिरोभिः पृथुभिस्सर्पा व्यक्तस्वस्तिकलक्षणैः ॥ वमन्तः पावकं घोरं ददंशुर्दशनैश्शिलाः ॥ १९ ॥
तास्तदा सविषैर्दष्टाः कुपितैस्तैर्महाशिलाः ॥ जज्वलुः पावकोद्दीप्ता विभिदुश्च सहस्रधा ॥ २० ॥
यानि चौषधजालानि तस्मिञ्जातानि पर्वते ॥ विषघ्नान्यपि नागानां न शेकुश्शमितुं विषम् ॥ २१ ॥
[अपरे तु महाकाया वमन्तोऽग्निं स्वतेजसा ॥ कन्दरेभ्यो विनिष्पेतुः कपिपादनिपीडिताः ॥ २२ ॥
गिरेराक्रममाणस्य तरवस्तरुणाङ्कुराः ॥ मुमुचुः पुष्पवर्षाणि व्यक्तमुत्पलगन्धिनः ॥ २३ ॥
गैरिकाञ्जनसंजुष्टा हरितालसमावृताः ॥ व्यदीर्यन्त गिरेस्तस्य शिलास्ताः समनश्शिलाः ॥ २४ ॥
सचन्दनारुणस्ताम्रश्चित्रः काननधातुभिः ॥ क्षिप्तः शिखिनिभैर्दीप्तैः सगैरिकधातुभिः] ॥ २५ ॥
भिद्यतेऽयं गिरिर्भूतैरिति मत्वा तपस्विनः ॥ २६ ॥
त्रस्ता विद्याधरास्तस्मादुत्पेतुः स्त्रीगणैस्सह ॥ पानभूमिगतं हित्वा हैममासवभाजनम् ॥
पात्राणि च महार्हाणि करकांश्च हिरण्मयान् ॥ २७ ॥
लेह्यानुच्चावचान्भक्ष्यान्मांसानि विविधानि च ॥ आर्षभाणि च चर्माणि खड्गांश्च कनकत्सरून् ॥२८॥
कृतकण्ठगुणाः क्षीबा रक्तमाल्यानुलेपनाः ॥ रक्ताक्षाः पुष्कराक्षाश्च गगनं प्रतिपेदिरे ॥ २९ ॥

भ्यामित्युक्तिर्वानरस्य चतुर्भिः संचारात् ॥ ११ ॥ चापीत्येकमव्ययमप्यर्थकं । अशातयत् अगच्छत् । स्वार्थे णिच् ॥ १२–१४ ॥ रीतीः रेखाः । काञ्चनाञ्जनरजतगर्भासु शिलासु विदीर्यमाणासु दृश्यमानास्तास्ता भेदधारा इत्यर्थः ॥ १५ ॥ समनश्शिलाः धातुविशेषसहिताः । मध्यमेनार्चिषा मध्यमया ज्वालया । पार्श्वज्वाला हि न धूमनिवर्तिका ॥ १६ ॥ विकृतैः विकृतिमद्भिः दैन्यव्यञ्जकैरित्यर्थः ॥ १७ ॥ सत्त्वसन्नादः भूतसन्नादः ॥ १८ ॥ स्वस्तिकंनाम फणोपरि दृश्यमानार्धचन्द्रकं । ददंशुरिति दंशनं कोपव्यापारः ॥ १९ ॥ बिभिदुः भिन्नाः ॥ २० ॥ यानीति अत्र तानीत्यध्याहार्यं । शमितुं शमयितुं ॥ २१–२५ ॥ भिद्यत इत्यर्धमेकं ॥ उत्पेतुरित्यनुषज्यते ॥ २६ ॥ त्रस्ता इत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ आसवभाजनं मद्यपात्रं । पात्राणि भोजनपात्राणि । आर्षभाणि चर्माणि ऋषभचर्मापिनद्धानि खेटकानि । त्सरुः मुष्टिबन्धनं ॥ २७–२८ ॥ कृतकण्ठगुणाः कृतकण्ठस्रजः । क्षीबाः मत्ताः । रक्ताक्षाः मधुपानात् । पुष्कराक्षाः स्वभावत इत्यर्थः ॥ २९ ॥

जननिवृत्तिषु ' इत्यमरः ॥ १० ॥ **रामानु०** अशातयत् अपातयदित्यर्थः । अत्राप्यचलःकर्ता । **ति०** अशातयत् पर्वतःकर्ता चलनंकरणं ॥ १२ ॥ **रामानु०** पुष्पौघेणेत्यत्र ' कुमतिच ' इतिणत्वं । पुष्पमयोयथा पुष्पमयइव ॥ १३ ॥ **ति०** मुमोच निपीडनात् । अतएव मध्यमेनमध्यभागेन अर्चिषाज्वालयाजुष्टोयोऽनलस्तस्यधूमराजिरिव बभावित्यर्थः । यस्येत्यध्याहारः ।

[**पा०**] १ ङ. झ. ञ. ट. श्वाशु. क. ख. च. छ. श्वारु. २ झ. सवृतः. ३ ज. सलिलंच. ४ ङ. च. ज.—ट. मदमत्तः. ५ ङ.—ट. हरिणा. ६ क. च. छ. ज. ञ. सर्वशः. ७ ट. सत्वानि. ८ ङ.च. छ. झ. ञ. ट. महान्सत्व. ९ क. शब्देनोपवनानिच. १० ङ. झ. ट. पृथुभिर्नागाः. ११ इमेचत्वारःश्लोकाः च. छ. ज. पाठेषुदृश्यन्ते. १२ क. ख. ङ. च. छ. झ. ञ. मासनभाजनं.

हारनूपुरकेयूरपारिहार्यधराः स्त्रियः ॥ विस्मितास्सस्मितास्तस्थुराकाशे रमणैस्सह ॥ ३० ॥
दर्शयन्तो महाविद्यां विद्याधरमहर्षयः ॥ सहितास्तस्थुराकाशे वीक्षांचक्रुश्च पर्वतम् ॥ ३१ ॥
शुश्रुवुश्च तदा शब्दमृषीणां भावितात्मनाम् ॥ चारणानां च सिद्धानां स्थितानां विमलेऽम्बरे ॥३२॥
एष पर्वतसंकाशो हनुमान्मारुतात्मजः ॥ तितीर्षति महावेगस्समुद्रं मकरालयम् ॥ ३३ ॥
रामार्थं वानरार्थं च चिकीर्षन्कर्म दुष्करम् ॥ समुद्रस्य परं पारं दुष्प्रापं प्राप्तुमिच्छति ॥ ३४ ॥
इति विद्याधराः श्रुत्वा वचस्तेषां महात्मनाम् ॥ तमग्रमेयं ददृशुः पर्वते वानरर्षभम् ॥ ३५ ॥
दुधुवे च स रोमाणि चकम्पे चाचलोपमः ॥ ननाद सुमहानादं सुमहानिव तोयदः ॥ ३६ ॥
आनुपूर्व्येण वृत्तं च लाङ्गूलं रोमभिश्चितम् ॥ उत्पतिष्यन्विचिक्षेप पक्षिराज इवोरगम् ॥ ३७ ॥
तस्य लाङ्गूलमाविद्धमात्तवेगस्य पृष्ठतः ॥ ददृशे गरुडेनेव ह्रियमाणो महोरगः ॥ ३८ ॥
बाहू संस्तम्भयामास महापरिघसन्निभौ ॥ ससाद च कपिः कट्यां चरणौ संचुकोच च ॥ ३९ ॥
संहृत्य च भुजौ श्रीमांस्तथैव च शिरोधराम् ॥ तेजस्सत्त्वं तथा वीर्यमाविवेश स वीर्यवान् ॥ ४० ॥
मार्गमालोकयन्दूरादूर्ध्वं प्रणिहितेक्षणः ॥ रुरोध हृदये प्राणानाकाशमवलोकयन् ॥ ४१ ॥
पद्भ्यां दृढमवस्थानं कृत्वा स सुमहाकपिः ॥ निकुञ्च्य कर्णौ हनुमानुत्पतिष्यन्महाबलः ॥
वानरान्वानरश्रेष्ठ इदं वचनमब्रवीत् ॥ ४२ ॥
यथा राघवनिर्मुक्तश्शरश्श्वसनविक्रमः ॥ गच्छेत्तद्वद्गमिष्यामि लङ्कां रावणपालिताम् ॥ ४३ ॥
न हि द्रक्ष्यामि यदि तां लङ्कायां जनकात्मजाम् ॥ अनेनैव हि वेगेन गमिष्यामि सुरालयम् ॥४४॥
यदि वा त्रिदिवे सीतां न द्रक्ष्याम्यकृतश्रमः ॥ बद्ध्वा राक्षसराजानमानयिष्यामि रावणम् ॥ ४५ ॥

पारिहार्यं वलयं । तस्थुः तस्थुश्च ॥ ३० ॥ दर्शयन्तः प्रयोजयन्तः । महाविद्यां अणिमाद्यष्टमहासिद्धिं । विद्याधरमहर्षयः विद्याधराः महर्षय इवेत्युपमितसमासः । " उपमितंव्याघ्रादिभिःसामान्याप्रयोगे " इत्यनुशासनात् । विद्याधरश्रेष्ठा इत्यर्थः । विद्याधरा महर्षयश्चेति द्वन्द्वसमासो न युक्तः । इति विद्याधराः श्रुत्वेत्युपरितनश्लोके विद्याधराणामेवोपादानात्॥३१॥ सा पुनरत्राकाशस्थितिः । शुश्रुवुः विद्याधरा इति शेषः । इति विद्याधराः श्रुत्वेत्युपसंहारात्॥ ३२–३३ ॥ समुद्रं तितीर्षतीत्युक्तं तस्य प्रयोजनकथनायोक्तमनुवदति—रामार्थमिति ॥ ३४–३६ ॥ आनुपूर्व्येण वृत्तं क्रमेण वृत्तं ॥ ३७–३८ ॥ लङ्घनोद्योगकालिकावस्थां वर्णयति बाहू इत्यादिना । बाहू संस्तम्भयामास निश्चलीचकार । कट्यां ससाद शरीरं संचुकोचेत्यर्थः । चरणौ संचुकोच च ॥ ३९ ॥ संहृत्य संकोच्य ॥४०॥ प्राणान् उच्छ्वासरूपान् । प्राणनिरोधो व्योमोत्पतनार्थं ॥ ४१–४३ ॥ हिशब्दःपादपूरणे ॥ ४४ ॥ अकृतश्रमः अप्राप्तश्रमः । राक्षसराजानमित्यत्र टजभावआर्षः ।

धूमराजिरिवेतिहस्वपाठः ॥ १६ ॥ **ति०** पारिहार्यशब्दः श्रेष्ठवाचीति । एतदग्रे ' दर्शयन्तइत्यादि विमलेंबरे ' इत्यन्तंश्लोकद्वयंप्रक्षिप्तंक्वचिदितिचकतकः ॥ ३० ॥ **शि०** महाविद्यांमहाविद्याजनितां निरवलंबनस्थितिरूपांखशक्तिंदर्शयन्तः । **स०** महाविद्याःअणिमाद्याः ॥ ३१ ॥ **रामानु०** महावेगमितिक्रियाविशेषणं ॥ ३३ ॥ **स०** परंपारं स्वगमनोद्दिष्टं ॥ ३४ ॥ **रामानु०** वीर्यवान्वीर्यमाविवेशेत्यभिधानात् पूर्वंविद्यमानमेववीर्यंविशेषतोऽधिष्ठितवानित्यवगम्यते । तेजस्सत्त्वयोरप्येवंद्रष्टव्यं । तेजः पराभिभवनसामर्थ्यं । सत्त्वं बलं । वीर्यं आकाशाद्यभिनिष्क्रमणसामर्थ्यं ॥४०॥ **रामानु०** राघवशरदृष्टान्तेनस्वस्याविलंबितत्वाप्रति-

[पा०] १ ख. सस्मितास्तस्थुः. ज. सभार्यास्तस्थुः. क. विस्मितास्तस्थुः. २ च. छ. ज. वीक्षमाणाश्च. ३ च. छ. तितीर्षुस्समहावेगं. ज. तितीर्षुस्सुमहावेगं. ४ ङ. झ. ञ. ट. वरुणालयं. ५ क. द्रष्टुमिच्छति. ६ ङ. झ. ञ. ट. विद्याधरावाचः श्रुत्वातेषां. ७ क. ङ.—ट. तपस्विनां. ८ ङ. झ. ट. चानलोपमः. ९ ङ. झ. ञ. ट. ननादच. १० ङ.—ट. आनुपूर्व्याच. ११ ङ. झ. ञ. ट. वृत्तंतल्लाङ्गूलं. १२ क. ङ. च. छ. झ. ञ. ट. लोमभिश्चितं. १३ क. ख. ङ.—ञ. मतिवेगस्य. १४ ख. ह्रियमाणइवोरगः. क. च. छ. ज. ह्रियमाणोयथोरगः. १५ ङ. छ. झ. ट. आससाद. १६ क. ख. ङ.—ट. द्रक्ष्यामिकृतश्रमः.

सर्वथा कृतकार्योऽहमेष्यामि सह सीतया ॥ आनयिष्यामि वा लङ्कां समुत्पाट्य सरावणाम् ॥ ४६ ॥
एवमुक्त्वा तु हनुमान्वानरान्वानरोत्तमः ॥ उत्पपाताथ वेगेन वेगवानविचारयन् ॥
सुपर्णमिव चात्मानं मेने स कपिकुञ्जरः ॥ ४७ ॥
समुत्पतति तस्मिंस्तु वेगात्ते नगरोहिणः ॥ संहृत्य विटपान्सर्वान्समुत्पेतुः समन्ततः ॥ ४८ ॥
स मत्तकोयष्टिभकान्पादापान्पुष्पशालिनः ॥ उद्वहन्वूरुवेगेन जगाम विमलेऽम्बरे ॥ ४९ ॥
ऊरुवेगोद्धता वृक्षा मुहूर्तं कपिमन्वयुः ॥ प्रस्थितं दीर्घमध्वानं स्वबन्धुमिव बान्धवाः ॥ ५० ॥
तमूरुवेगोन्मथिताः सालाश्चान्ये नगोत्तमाः ॥ अनुजग्मुर्हनूमन्तं सैन्या इव महीपतिम् ॥ ५१ ॥
सुपुष्पिताग्रैर्बहुभिः पादपैरन्वितः कपिः ॥ हनुमान्पर्वताकारो बभूवाद्भुतदर्शनः ॥ ५२ ॥
सारवन्तोथ ये वृक्षा न्यमज्जँल्लवणाम्भसि ॥ भयादिव महेन्द्रस्य पर्वता वरुणालये ॥ ५३ ॥
स नानाकुसुमैः कीर्णः कपिः साङ्कुरकोरकैः ॥ शुशुभे मेघसंकाशः खद्योतैरिव पर्वतः ॥ ५४ ॥
विमुक्तास्तस्य वेगेन मुक्त्वा पुष्पाणि ते द्रुमाः ॥ अवशीर्यन्त सलिले निवृत्ताः सुहृदो यथा ॥५५॥
लघुत्वेनोपपन्नं तद्विचित्रं सागरेऽपतत् ॥ द्रुमाणां विविधं पुष्पं कपिवायुसमीरितम् ॥ ५६ ॥
ताराचितमिवाकाशं प्रबभौ स महार्णवः ॥ ५७ ॥
पुष्पौघेणानुबद्धेन नानावर्णेन वानरः ॥ बभौ मेघ इवाकाशे विद्युद्गणविभूषितः ॥ ५८ ॥
तस्य वेगसमाधूतैः पुष्पैस्तोयमदृश्यत ॥ ताराभिरभिरामाभिरुदिताभिरिवाम्बरम् ॥ ५९ ॥
तस्याम्बरगतौ बाहू ददृशाते प्रसारितौ ॥ पर्वताग्राद्विनिष्क्रान्तौ पञ्चास्याविव पन्नगौ ॥ ६० ॥

आनयिष्यामि आनेष्यामि ॥ ४५—४७ ॥ तस्मिन् हनुमति । वेगात्समुत्पततिसति नगरोहिणः शैलरुहावृक्षाः । विटपान् संहृत्य आदाय समुत्पेतुरित्यर्थः ॥ ४८ ॥ संग्रहेणोक्तं विवृणोति—स मत्तेत्यादिना ॥ कोयष्टिभकः कोयष्टिः ॥ ४९—५० ॥ तमूरुवेगेति पाठः । ऊरुवेगेन उन्मथिताः सालाः सालवृक्षाः । अन्ये नगोत्तमाः अन्ये वृक्षश्रेष्ठाः । सैन्याः सेनायां समवेताः पुरुषाः । " सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते " इत्यमरः ॥ ५१—५२ ॥ सारवन्तः स्थिरांशवन्तः । " सारो बले स्थिरांशे च " इत्यमरः ॥ ५३ ॥ मेघसंकाशः स कपिरित्यन्वयः । खद्योतैः रात्राविति शेषः ॥ ५४ ॥ अवशीर्यन्त अवाशीर्यन्त । आगमशासनस्यानित्यत्वादडभावः । स्थितवन्त इत्यर्थः । निवृत्ताः बन्धूननुगम्य निवृत्ताः सुहृत्पक्षे सलिल इति सामीप्येसप्तमी । " ओदकान्तात्स्नग्घो बन्धुमनुव्रजेत् " इत्युक्तेः ॥ ५५ ॥ लघुत्वेनोपपन्नं लघुत्वेन युक्तं ॥ ५६ ॥ तारेत्यर्धमेकं वाक्यं ॥ ५७ ॥ अनुब-

हतत्वामोघत्वादिकंसूचितवान् ॥४३॥ **ति०** मत्ताःकोयष्टिभाःयेषुतान् । **स०** यद्वा कोयष्टिभिः भा शोभायस्यतत्कोयष्टिभं । तच्चततकं शिरःप्रदेशश्च । तेनसहितान् ॥ ४९ ॥ **रामानु०** तस्यवेगेनविमुक्ताःदूरगमनहेतुभूतवेगेनहेतुनाविमुक्ताःगतसंबन्धाः अवशीर्यन्त । आगमशासनस्यानित्यत्वादडभावः । पुष्पाणिमुक्त्वासलिलेअवशीर्यन्तेत्यनेनप्रस्थितेभ्यःसुहृज्जोनिवृत्तानामश्रुमोक्षणपूर्वंकंशोकसागरेनिमग्नानांसुहृदांसमाधिर्ध्वन्यते ॥ ५५ ॥ **रामानु०** हनुमन्तमनुद्गताःसारवन्तोवृक्षाःप्रथमंसागरेपतिताःअल्पसाराःततोप्यधिकंगत्वाजलेविशीर्णाइत्युक्त्वापुष्पाण्यप्यतिलघुत्ववत्तयामहद्दूरंगत्वापतितानीत्याह—लघुत्वेनेति ॥ ५६ ॥ **ति०** सर्ववर्णानां विद्युत्सुसत्त्वान्नानावर्णपुष्पोद्यानबद्धस्यसविद्युद्गणमेघोपमा ॥ ५८ ॥ **रामानु०** बाह्वोःपञ्चशाखत्वात्पञ्चास्यपन्नगदृष्टान्तः

[**पा०**] १ क. इत्येवमुक्त्वा. २ ख. वानरान्वानरर्षभः. ङ. वानरोवानरोत्तमः. ३ ङ.—ट. वेगात्तु. ख. वेगेन. क. वेगात्तुतास्मिंस्ते. ४ ठ. कोयष्टिमकान्. ५ ङ.—ट. ऊरुवेगोत्थिताः. ६ क. तदूरु. ७ क. नगादयः. ९ ख. ङ.—ट. व्यवशीर्यन्त. ९ घ. च. छ. ज. बान्धवायथा. १० क. तन्निवृत्तं. ११ ङ.—ट. पुष्पौघेणसुगन्धेन. १२ ख. नानागन्धेन. १३ क. घ.—ट. इवोद्यन्वै. १४ ख. ङ.—ट. समुद्भूतैः. १५ ङ. ञ. ट. ताराभिरिवरामाभिः.

पिबन्निव बभौ चापि सोर्मिजालं महार्णवम् ॥ पिपासुरिव चाकाशं ददृशे स महाकपिः ॥ ६१ ॥
तस्य विद्युत्प्रभाकारे वायुमार्गानुसारिणः ॥ नयने विप्रकाशेते पर्वतस्थाविवानलौ ॥ ६२ ॥
पिङ्गे पिङ्गाक्षमुख्यस्य बृहती परिमण्डले ॥ चक्षुषी संप्रकाशेते चन्द्रसूर्याविवोदितौ ॥ ६३ ॥
मुखं नासिकया तस्य ताम्रया ताम्रमाबभौ ॥ सन्ध्यया समभिस्पृष्टं यथा तत्सूर्यमण्डलम् ॥ ६४ ॥
लाङ्गूलं च समाविद्धं प्लवमानस्य शोभते ॥ अम्बरे वायुपुत्रस्य शक्रध्वज इवोच्छ्रितः ॥ ६५ ॥
लाङ्गूलचक्रेण महाञ्शुक्लदंष्ट्रोऽनिलात्मजः ॥ व्यरोचत महाप्राज्ञः परिवेषीव भास्करः ॥ ६६ ॥
स्फिग्देशेनाभिताम्रेण रराज स महाकपिः ॥ महता दारितेनेव गिरिर्गैरिकधातुना ॥ ६७ ॥
तस्य वानरसिंहस्य प्लवमानस्य सागरम् ॥ कक्षान्तरगतो वायुर्जीमूत इव गर्जति ॥ ६८ ॥
खे यथा निपतन्त्युल्का ह्युत्तरान्ताद्विनिस्सृता ॥ दृश्यते सानुबन्धा च तथा स कपिकुञ्जरः ॥६९॥
पतत्पतङ्गसंकाशो व्यायतः शुशुभे कपिः ॥ प्रवृद्ध इव मातङ्गः कक्ष्यया बध्यमानया ॥ ७० ॥
उपरिष्टाच्छरीरेण च्छायया चावगाढया ॥ सागरे मारुताविष्टा नौरिवासीत्तदा कपिः ॥ ७१ ॥
यंयं देशं समुद्रस्य जगाम स महाकपिः ॥ स तस्योरुवेगेन सोन्माद इव लक्ष्यते ॥ ७२ ॥
सागरस्योर्मिजालानामुरसा शैलवर्ष्मणाम् ॥ अभिघ्नंस्तु महावेगः प्लुप्लुवे स महाकपिः ॥ ७३ ॥
कपिवातश्च बलवान्मेघवातश्च निर्गतः ॥ सागरं भीमनिर्घोषं कम्पयामासतुर्भृशम् ॥ ७४ ॥
विकर्षन्नूर्मिजालानि बृहन्ति लवणाम्भसि ॥ प्लुप्लुवे कपिशार्दूलो विकिरन्निव रोदसी ॥ ७५ ॥

द्धेन व्याप्तेन ॥ ५८—६० ॥ अर्णवं पिबन्निव आकाशं पिपासुरिवेत्याभ्यामस्य महानुद्योगस्सूच्यते । लङ्घनवेगेन सहसा क्षीयमाणे सागरविस्तारे स पीयमान इव भवति एवमंबरं च । ततोतिवेगेन गच्छन्समहार्णवं पिबन्निव बभौ तथा आकाशमपीत्याहुः ॥ ६१—६२ ॥ पिङ्गे पिङ्गलवर्णे । पिङ्गाक्षाणां वानराणां मुख्यस्य । परिमण्डले मण्डलाकारे । चन्द्रसूर्याविव्यभूतोपमा ॥ ६३ ॥ तत्सूर्यमण्डलं सन्ध्यासूर्यमण्डलं ॥ ६४ ॥ समाविद्धं उन्नतीकृतं ॥ ६५—६६ ॥ स्फिग्देशेन वालमूलप्रदेशेन ॥ ६७ ॥ गर्जति अगर्जत् ॥ ६८ ॥ सानुबन्धा सपुच्छा । उल्का हि पुच्छयुक्ता निपतति ॥ ६९ ॥ पतङ्गः सूर्यः । व्यायतो दीर्घः । प्रवृद्ध इव दीर्घ इव । कक्ष्यायां बध्यमानायां हि मातङ्गो दीर्घो भवति ॥ ७० ॥ नौर्जलावगाढेनाधोभागेन व्योमावगाढेन चोर्ध्वभागेन गच्छति । अयं च उपरिगतशरीरेणाधोजलावगाढच्छायया चैकाकारस्सन् मारुतपूरितकटा नौरिवासीत् ॥ ७१ ॥ सोन्माद इव समुद्धर्षइव समुद्धतजल इत्यर्थः ॥ ७२ ॥ शैलवर्ष्मणां शैलतुल्यानां । " वर्ष्मदेहप्रमाणयोः " इति सज्जनः ॥ ७३—७४ ॥ विकिरन्निव विभजन्निव ।

॥ ६० ॥ **ति०** विवृतवक्त्रत्वात्पिबन्निवेति । अधोवक्त्रत्वेइयमुत्प्रेक्षा । ऊर्ध्ववक्त्रत्वेआकाशंपिपासुरिवेति । **ती०** अर्णवसमीपगमनवेलायामुदार्धिंपिबन्निवबभौ । उपरिगमनावस्थायामाकाशंपिपासुरिवदृदृशे ॥ ६१ ॥ **स०** कक्षान्तरगतःबाहुमूलमध्यगतः । ' बाहुमूलेऽभेकक्षौ ' इत्यमरः ॥ **ति०** जीमूतइतिसप्तम्यन्तमितिकतकः ॥ ६८ ॥ **रामानु०** उल्कापातोपमयारावणस्यभाव्यशुभंसूच्यते ॥ ६९ ॥ **रामानु०** कक्ष्या इभमध्यबन्धनं । ' कक्ष्याप्रकोष्ठेहर्म्यादेःकाक्ष्यांमध्येभबन्धने । ' इत्यमरः ॥ ७० ॥ **ती०** सोन्मादइव समुद्रःअपस्सारीवलक्ष्यते भ्रमणफेनजलोद्गमनघोषादिमत्त्वादियमुपमा ॥ ७२ ॥ **रामानु०** ऊर्मिजालानामित्यत्र ' नलोकाव्यय—'इतिषष्ठ्यानिषेधेपिरूपिप्रयोगात्साधुत्वं । उरसा । उरश्शब्देनोरोवेगजनितोवायुर्लक्ष्यते ॥ ७३ ॥ **स०**

[**पा०**] १ ख. श्रीमान्. २ क. ख. च. छ. ज. ञ. सोर्मिमालं. ३ घ. नयनेच. ४ च. छ. ज. चन्द्रसूर्याविवांबरे. क. घ. ङ. झ. ञ. ट. चन्द्रसूर्याविवस्थितौ. ५ ख. यथासूर्यस्यमण्डलं. ङ.—ट. तथास्यात्सूर्यमण्डलं. ६ घ. ङ. च. ज.—ट. ध्वज़मिवोच्छ्रितं. छ. ध्वजमिवोत्थितं. ख. ध्वजइवोत्थितः. ७ ङ.—ट. लाङ्गूलचक्रोहनुमान्. ८ क. ञ्शुक्लदंष्ट्रोमहाकपिः. ९ ङ. झ. नातिताम्रेण. १० क. यथातु. ११ क. घ.—ट. सतुतस्याङ्गवेगेन. १२ घ. च. ज. ञ. जालानिउरसा. ख. मालानामुरसा. १३ क. घ. च.—ञ. शैलवर्ष्मणा. १४ क. अभिघ्नन्सुमहावेगः. १५ ङ.—ट. निर्गतः. १६ ङ.—ट. भीमनिर्हादं. १७ क. हरिशार्दूलो.

मेरुमन्दरसंकाशानुद्धतान्स महार्णवे ॥ अतिक्रामन्महावेगस्तरङ्गान्गणयन्निव ॥ ७६ ॥
तस्य वेगसमुद्धूतं जलं सजलदं तदा ॥ अम्बरस्थं विभ्राज शारदाभ्रमिवाततम् ॥ ७७ ॥
तिमिनक्रझषाः कूर्मा दृश्यन्ते विवृतास्तदा ॥ वस्त्रापकर्षणेनेव शरीराणि शरीरिणाम् ॥ ७८ ॥
प्लवमानं समीक्ष्याथ भुजङ्गास्सागरालयाः ॥ व्योम्नि तं कपिशार्दूलं सुपर्ण इति मेनिरे ॥ ७९ ॥
दशयोजनविस्तीर्णा त्रिंशद्योजनमायता ॥ छाया वानरसिंहस्य जले चारुतराऽभवत् ॥ ८० ॥
श्वेताभ्रघनराजीव वायुपुत्रानुगामिनी ॥ तस्य सा शुशुभे छाया विततां लवणाम्भसि ॥ ८१ ॥
शुशुभे स महातेजा महाकायो महाकपिः ॥ वायुमार्गे निरालम्बे पक्षवानिव पर्वतः ॥ ८२ ॥
येनासौ याति बलवान्वेगेन कपिकुञ्जरः ॥ तेन मार्गेण सहसा द्रोणीकृत इवार्णवः ॥ ८३ ॥
आपाते पक्षिसंघानां पक्षिराज इव व्रजन् ॥ हनुमान्मेघजालानि प्रकर्षन्मारुतो यथा ॥ ८४ ॥
पाण्डुरारुणवर्णानि नीलमाञ्जिष्ठकानि च ॥ कपिनाकृष्यमाणानि महाभ्राणि चकाशिरे ॥ ८५ ॥
प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः ॥ प्रच्छन्नश्च प्रकाशश्च चन्द्रमा इव लक्ष्यते ॥ ८६ ॥
प्लवमानं तु तं दृष्ट्वा प्लवङ्गं त्वरितं तदा ॥ ववर्षुः पुष्पवर्षाणि देवगन्धर्वदानवाः ॥ ८७ ॥
ततापन हि तं सूर्यः प्लवन्तं वानरोत्तमम् ॥ सिषेवे च तदा वायू रामकार्यार्थसिद्धये ॥ ८८ ॥
ऋषयस्तुष्टुवुश्चैनं प्लवमानं विहायसा ॥ जगुश्च देवगन्धर्वाः प्रशंसन्तो महौजसम् ॥ ८९ ॥
नागाश्च तुष्टुवुर्यक्षा रक्षांसि विबुधाः खगाः ॥ प्रेक्ष्य सर्वे कपिवरं सहसा विगतक्लमम् ॥ ९० ॥

रोदसी द्यावापृथिव्यौ ॥ ७५ ॥ अतिक्रामत् अत्यक्रामत् ॥ ७६ ॥ तस्य हनुमतः । वेगेन ऊरुवातेन । समुद्धूतं समुत्थापितं । सजलदं जलं जलदो जलं चोद्धूतमित्यर्थः ॥ ७७ ॥ तिमयो महामत्स्याः नक्राः ग्राहाः झषाः मकराः । विवृताः जलविभेदेन प्रकाशिताः ॥ ७८—७९ ॥ दशयोजनविस्तीर्णेति । ननु त्रिंशद्योजनायतत्वे चतुर्थपदेपि लङ्काप्राप्तिः स्यात् मैनाकसंवादसुरसासंवादादिकं च विरुध्येत । नहि विम्बादधिकपरिणाहं संभवतीति न शङ्कनीयं । छायाशब्दो हि नात्र प्रतिविम्बपरः किन्त्वनातपपरः । प्रातरेव हि समुद्रतरणमुक्तं तदा तस्य छाया समुद्रे तथाप्रमाणा दृश्येतैव ॥ ८० ॥ अभ्रघनः अभ्रमूर्तिः ॥ ८१—८२ ॥ द्रोणी कटाहः ॥ ८३ ॥ आपाते मार्गे ॥ ८४—८७ ॥ रामकार्यं सीतान्वेषणं तदेवार्थः प्रयोजनं तस्य सिद्धये लाभाय तद्धेतुभूतहनुमच्छ्रमनिवर्तनायेत्यर्थः ॥ ८८—८९ ॥ रक्षांसि

मेरुमन्दरसंकाशानुत्थौल्यतारतम्येनतयोःसदृशान् । मेरुमन्दरइतिमहामेरोरवष्टंभपर्वतः । तत्सदृशान्वा ॥ ७६ ॥ **रामानु०** जलंसजलदमित्यनेनसमुद्धूतंजलंमेघमण्डलपर्यन्तमभूदित्यवगम्यते ॥ ७७ ॥ **ति०** छायाप्रमाणवर्णनेनतच्छरीरप्रमाणमपिवर्णितप्रायं । इयंमाध्याह्निकीच्छाया ॥८०॥ **ती०** श्वेताभ्रघनराजीव अत्रश्वेतशब्देनस्वच्छतोच्यते । घनशब्देनसान्द्रता । तथाचनिर्मलाभ्रसान्द्रपङ्क्तिरित्यर्थः ॥ **ति०** श्वेताभ्रघनराजीव श्वेताभ्रयुक्तमेघपङ्क्तिवत्तस्यच्छायाशुशुभे । शुक्लदंष्ट्रादिनानानावर्णत्वादुक्तोपमानिर्वाहः ॥ **स०** श्वेताभ्रघनराजीवशुभ्रमेघदीर्घपङ्क्तिरिव । छायाचसमुद्रेप्रतिफलितप्रतिविंबः । नातपाभावः । तेनशौक्ल्यं संगच्छते । " घनःसान्द्रेदृढेदीर्घे " " छायास्यादातपाभावेप्रतिविंबार्कयोषितोः " इत्युभयतोविश्वः ॥ ८१ ॥ **वि०** तस्य उपरीतिशेषः ॥ ८७ ॥ **स०** तत्रहनुमति । दानवाःसज्जनाः ॥ ८७ ॥ **रामानु०** सिषेवइत्यनेन पुत्रत्वेपिरामकार्यप्रवृत्तत्वात्पूज्यतैवद्योत्यते

[**पा०**] १ ङ. छ. झ. ट. नुद्धतान्सुमहार्णवे. २ क. घ. ङ. झ. ञ. ट. अत्यक्रामन्महा. ३ क. न्महावेगांस्तरङ्गान्. ४ क. ख. घ.—ट. समुद्भुष्टं. ५ ख. जलमध्येजलंतदा. ६ घ. ङ. छ. ज. ञ. ट. विवभ्राजे. ७ च. छ. विविधास्तदा. घ. विकृतास्तदा. ८ ङ. ज.—ट. क्रममाणं. ९ ङ. झ. ट. भुजगाःसागरंगमाः. क. च. छ. ज. भुजगाः. १० क. ङ.—ट. सुपर्णमिव. ११ ङ. झ. ट. जवे. १२ ज. वारिचरा. १३ ङ.—ट. पतिता. १४ घ. न्वेगवान्कपि. १५ ग. घ. च. आकाशे. १६ ङ.—ट. दृश्यते. १७ ग. घ. च.—ट. प्लवगं. १८ च. छ. ज. ञ. ववर्षुस्तस्यपुष्पाणि. झ. ट. ववर्षुस्तत्रपुष्पाणि. १९ क. ख. घ.—ट. वानरेश्वरं. २० ग. विहायसि. २१ ङ.—ट. वनौकसं. २२ क. ग. च. छ. ज. ञ. विविधाःखगाः. ङ. झ. ट. विविधानिच. २३ क. ख. ग. प्रेक्ष्याकाशे.

तस्मिन्प्लवगशार्दूले प्लवमाने हनूमति ॥ इक्ष्वाकुकुलमानार्थी चिन्तयामास सागरः ॥ ९१ ॥
साहाय्यं वानरेन्द्रस्य यदि नाहं हनूमतः ॥ करिष्यामि भविष्यामि सर्ववाच्यो विवक्षताम् ॥ ९२ ॥
अहमिक्ष्वाकुनाथेन [1]सगरेण विवर्धितः ॥ इक्ष्वाकुसचिवश्चायं [2]नावसीदितुमर्हति ॥ ९३ ॥
तथा मया विधातव्यं विश्रमेत यथा कपिः ॥ शेषं च मयि विश्रान्तस्सुखेनातिपतिष्यति [3]॥ ९४ ॥
इति कृत्वा मतिं साध्वीं समुद्रश्छन्नमम्भसि ॥ हिरण्यनाभं मैनाकमुवाच गिरिसत्तमम् ॥ ९५ ॥
त्वमिहासुरसंघानां पातालतलवासिनाम् ॥ देवराज्ञा गिरिश्रेष्ठ परिघस्सन्निवेशितः ॥ ९६ ॥
त्वमेषां [4]जातवीर्याणां पुनरेवोत्पतिष्यताम् ॥ पातालस्याप्रमेयस्य द्वारमावृत्य तिष्ठसि ॥ ९७ ॥
तिर्यगूर्ध्वमधश्चैव शक्तिस्ते शैल वर्धितुम् ॥ तस्मात्संचोदयामि [5]त्वामुत्तिष्ठ गिरिसत्तम ॥ ९८ ॥
स एष कपिशार्दूलस्त्वामुपर्येति वीर्यवान् ॥ हनूमान्रामकार्यार्थं भीमकर्मा खमाप्लुतः ॥ ९९ ॥
अस्य साह्यं मया कार्यमिक्ष्वाकु[6]कुलवर्तिनः ॥ [7]मम हीक्ष्वाकवः पूज्याः परं पूज्यतमास्तव ॥ १०० ॥
कुरु साचिव्यमस्माकं न नः कार्यमतिक्रमेत् ॥ [8]कर्तव्यमकृतं कार्यं सतां मन्युमुदीरयेत् ॥ १०१ ॥
सलिलादूर्ध्वमुत्तिष्ठ तिष्ठत्वेष कपिस्त्वयि ॥ अस्माकमतिथिश्चैव [9]पूज्यश्च प्लवतांवरः ॥ १०२ ॥
चामीकरमहानाभ देवगन्धर्वसेवित ॥ [10]हनुमांस्त्वयि विश्रान्तस्ततश्शेषं गमिष्यति ॥
स एष कपिशार्दूलस्त्वामुपर्येति वीर्यवान् ॥ १०३ ॥
काकुत्स्थस्यानृशंस्यं च मैथिल्याश्च विवासनम् ॥ श्रमं च प्लवगेन्द्रस्य समीक्ष्योत्थातुमर्हसि ॥ १०४ ॥

दिक्पालकरक्षस्सबन्धीनि ॥ ९० । मानार्थी बहुमानार्थी । स्वयं सागरत्वादिति भावः ॥ ९१ ॥ सर्ववाच्यः सर्वप्रकारेण निन्द्यः । विवक्षतां वक्तुमिच्छतां ॥ ९२—९४ ॥ हिरण्यनाभं हिरण्यशृङ्गं । नाभिशब्दो ह्यध्यक्षवाची । शृङ्गं च पर्वतस्याध्यक्षमेव । " नाभिरध्यक्षकस्तूर्योः " इति दर्पणः ॥ ९५ ॥ परिघः अर्गलं । " परिघो मुद्गरेऽर्गले " इति दर्पणः ॥ ९६ ॥ परिघत्वमेवाह त्वमेषामिति ॥ ९७ ॥ शक्तिः अस्तीति शेषः ॥ ९८—९९ ॥ इक्ष्वाकोः कुले वंशे वर्तते शुश्रूषत इति इक्ष्वाकुकुलवर्ती तस्य । पूज्यतमास्तव मत्संबन्धादिति भावः । यद्वा त्वदुपकारकवायुपुत्रमुद्दिश्य ॥ १०० ॥ कार्यं प्रयोजनं विश्रान्त्यादि । कर्तव्यं कार्यमकृतं सतां मन्युं कोपं उदीरयेत् प्रेरयेत् उत्पादयेत् ॥ १०१—१०२ ॥ चामीकरमहानाभ स्वर्णमयमहाशृङ्ग ॥ १०३ ॥ काकुत्स्थस्यानृशंस्यं रामस्य सीताविषयां दयां ॥१०४॥

॥ ८८ ॥ **ती०** सर्ववाच्यःसर्वनिन्दावाग्विषयः भविष्यामीत्यर्थः ॥ ९२ ॥ **ति०** सागरेणविवर्धितइत्युक्त्या कश्चिद्देशः सागरखातस्यापिएतत्संबद्धइतिज्ञायते ॥ ९३ ॥ **ती०** हिरण्यनाभं हिरण्यप्रधानं । हिरण्मयमित्यर्थः । ' नाभिःप्रधानेकस्तूर्यो ' इतिविश्वः । **स०** हिरण्यनाभं नाम्ना । मैनाकं मेनकाहिमवत्पर्वतभार्या । तत्पुत्रं ॥ ९५ ॥ **ती०** परिघःसंनिवेशितः आयुधविशेषत्वेनसंनिवेशितः । अनेन पक्षच्छेदभयात्समुद्रप्रवेशानन्तरं पातालस्थराक्षसनिरोधार्थं देवराजेनमैनाकःस्थापितइत्यवगम्यते ॥ **स०** देवराज्ञा देवराजेननिवेशितइवासि । देवराजभयात्क्षिप्तत्वात्तेनप्रक्षिप्तइत्युत्प्रेक्षा । अतो नोत्तरग्रन्थविरोधः ॥ ९६ ॥ **ति०** ज्ञातवीर्याणां देवराजेनेतिशेषः ॥ ९७ ॥ **ति०** शक्तिस्ते अस्तीतिशेषः । तस्मात्पिहितपातालमुखएवसन्वृद्धिशक्त्यावर्धमानस्सन्नूर्ध्वमुत्तिष्ठ ॥ ९८ ॥ **ति०** उपर्येति तवोपरिप्रदेशंप्राप्नोति । तस्माद्विश्रमायत्नमुत्तिष्ठेतिपूर्वेणान्वयः । एतदुत्तरं ' हनूमान्रामकार्यार्थंभीमकर्माखमाप्लुतः । श्रमंचप्लवगेन्द्रस्यसमीक्ष्योत्थातुमर्हसि ' इतिप्राचीनःपाङ्क्तःपाठः । अत्रखमाप्लुतइत्यनन्तरंकेचिच्छ्लोकाःप्रक्षिप्ताःपरैरितिकतकः ॥ ९९ ॥ **रामानु०** साहाय्यंसहायकर्म । सहकारित्वमितियावत् । ब्राह्मणादित्वात्ष्यञ् । ममइक्ष्वाकवःपूज्याहि ।

[**पा०**] १ झ. ट. सागरेण. २ ङ. झ. ट. तन्नार्हत्यवसादितुं. घ. नचार्हत्यवसादितुं. ३ ङ. ज.—ट. सुखीसोतितरिष्यति. च. सुखीसोतिगमिष्यति. घ. सुखेननिपतिष्यति. ४ ङ. झ. ट. सङ्ज्ञानंदेवराज्ञामहात्मना । पातालनिलयानांहिपरिघः संनिवेशितः. ५ ङ.—ट. ज्ञातवीर्याणां. ६ च. छ. ज. त्संबोधयामि. ७ क. ग. च. छ. ज. नगसत्तम. ख. त्वंनगोत्तम. ८ ङ. झ. ट. कार्यार्थी. ९ एतदादयः—'मैथिल्याश्चविवासनं' इत्येतदन्ताःपञ्चश्लोकाः झ. पुस्तकेनदृश्यन्ते. । ग. साहाय्यंतस्यकर्तव्यं. क. तस्यसाह्यं. १० क. वशवर्तिनः. ११ ञ. ममचेक्ष्वाकवः. ग. मयाहीक्ष्वाकवः. १२ छ. ज. कर्तव्यंनतुयत्कार्यं. ग घ. कर्तव्यंनकृतंकार्यं. १३ क. ग. मतिथिर्ह्येष. घ. मतिथिश्चैष. १४ क. हनूमांस्त्वेष.

हिरण्यनाभो मैनाको निशम्य लवणाम्भसः ॥ उत्पपात जलात्पूर्णं महाद्रुमलतायुतः ॥ १०५ ॥
स सागरजलं भित्त्वा बभूवाभ्युत्थितस्तदा ॥ यथा जलधरं भित्त्वा दीप्तरश्मिर्दिवाकरः ॥ १०६ ॥
स महात्मा मुहूर्तेन पर्वतस्सलिलावृतः ॥ दर्शयामास शृङ्गाणि सागरेण नियोजितः ॥ १०७ ॥
शातकुम्भनिभैश्शृङ्गैः सकिन्नरमहोरगैः ॥ आदित्योदयसंकाशैरालिखद्भिरिवाम्बरम् ॥ १०८ ॥
तप्तजाम्बूनदैश्शृङ्गैः पर्वतस्य समुत्थितैः ॥ आकाशं शस्त्रसंकाशमभवत्काञ्चनप्रभम् ॥ १०९ ॥
जातरूपमयैश्शृङ्गैर्भ्राजमानैः स्वयंप्रभैः ॥ आदित्यशतसंकाशस्सोभवद्गिरिसत्तमः ॥ ११० ॥
तमुत्थितमसङ्गेन हनुमानग्रतः स्थितम् ॥ मध्ये लवणतोयस्य विघ्नोऽयमिति निश्चितः ॥ १११ ॥
स तमुच्छ्रितमत्यर्थं महावेगो महाकपिः ॥ उरसा पातयामास जीमूतमिव मारुतः ॥ ११२ ॥
स तदा पातितस्तेन कपिना पर्वतोत्तमः ॥ बुद्ध्वा तस्य कपेर्वेगं जहर्ष च ननन्द च ॥ ११३ ॥
तमाकाशगतं वीरमाकाशे समुपस्थितः ॥ प्रीतो हृष्टमना वाक्यमब्रवीत्पर्वतः कपिम् ॥
मानुषं धारयन्रूपमात्मनश्शिखरे स्थितः ॥ ११४ ॥
दुष्करं कृतवान्कर्म त्वमिदं वानरोत्तम ॥ निपत्य मम शृङ्गेषु विश्रमस्व यथासुखम् ॥ ११५ ॥
राघवस्य कुले जातैरुदधिः परिवर्धितः ॥ स त्वां रामहिते युक्तं प्रत्यर्चयति सागरः ॥ ११६ ॥
कृते च प्रतिकर्तव्यमेष धर्मस्सनातनः ॥ सोयं तत्प्रतिकारार्थी त्वत्तः संमानमर्हति ॥ ११७ ॥
त्वन्निमित्तमनेनाहं बहुमानात्प्रचोदितः ॥ तिष्ठ त्वं कपिशार्दूल मयि विश्रम्य गम्यताम् ॥ ११८ ॥

निशम्य वचनमितिशेषः ॥ १०५—१०७ ॥ शातकुम्भनिभैः स्वर्णसदृशैः । आदित्योदयसंकाशैः आदित्योदयतुल्यैरित्यर्थः । शृङ्गैरुपलक्षितः शृङ्गाणि दर्शयामासेति योजना ॥ १०८ ॥ शस्त्रसंकाशं नीलमित्यर्थः । " शस्त्रमायुधलोहयोः " इतिविश्वः ॥ १०९—११० ॥ निश्चितः निश्चितवान् । कर्तरिनिष्ठा ॥ १११—११२ ॥ जहर्ष विसिष्मिये ॥ ११३ ॥ प्रीतः प्रीतिद्योतकव्यापारः ॥ ११४—११६ ॥ कृते उपकारे । त्वत्प्रतिकारार्थी त्वदातिथ्यकरणापेक्षी त्वत्तः संमाननमर्हतीति त्वया तत्कृतातिथ्यपरिग्रह एवास्य संमाननमित्यर्थः ॥ ११७ ॥ चोदनाप्रकारमाह योजनानामिति ॥ प्रक्रमतामिति प्रचोदित इति पूर्वे-

महद्धिहेतुत्वात् । तवपरंपूज्यतमाः सगरविवृद्धमदन्तःप्रवेशसुखावस्थानादिफलभोक्तृत्वादितिभावः ॥ १०० ॥ **रामानु०** जीमूतइवमारुतइत्यनेनअनायासेनपर्वतंपातितवानितिद्योत्यते ॥ ११२ ॥ **रामानु०** जहर्षचननन्दचेतिपदद्वयेनकायमनसोर्विकृतिरुच्यते । अस्यवेगेनग्लानिराहित्यंबुद्ध्वाहृष्टमनाबभूवेत्यर्थः । **ति०** सादितःअवसादितः अधःकृतइतियावत् । जहर्षचननादचेतिप्राचीनःपाठः । बलवैभवंदृष्ट्वाजहर्ष । स्वोत्थानप्रयोजनावेदनाय ननाद शब्दंकृतवान् । ननन्देतित्वाधुनिककल्पितःपाठः ॥ ११३ ॥ **रामानु०** प्रीतःसुखितः । हृष्टमनाः प्रसन्नमनाः ॥ ११४ ॥ **रामानु०** विश्रमस्वेति । श्रमिरात्मनेपदीकश्चिदस्ति । तथाचोक्तंभट्टमल्लेन— " विश्राम्यतीतिविश्रान्तौकश्चिद्विश्रमतेपिच " इति ॥ ११५ ॥ **रामानु०** त्वन्निमित्तमित्यादिश्लोकद्वयमेकंवाक्यं । एषकपिःयोजनानांशतंचापिसमाप्लुतःसमापतितुमुपक्रान्तः । तवसानुषुविश्रान्तःशेषं मार्गशेषंप्रक्रमतामितित्वन्निमित्तंअहमनेनसागरेणबहुमानात्प्रचोदितः । अतःकपिशार्दूल त्वंतिष्ठ । मयिविश्रम्यगम्यतामित्यन्वयः ।

[पा०] १ ङ. झ. ट. हिरण्यगर्भो. क. हिरण्यनाभस्तद्वाक्यंनिशम्य. २ क. उत्पपाताथवेगेनजलाद्रुम. ३ ङ. झ. ट. लतावृतः. ४ ग. च. छ. ज. ञ. सागरस्यजलं. ५ ङ. झ. ट. बभूवात्युच्छ्रितस्तदा. क. बभूवावस्थितस्तदा. ६ ख. घ.—ट. शातकुंभमयैः. ७ ङ. झ. ञ. ट. संकाशैरुल्लिखद्भिः. ८ क.—ट. तप्तजांबूनदैः. ९ क. च. समुच्छ्रितैः. १० ङ. झ. ञ. ट. महाप्रभैः. ख. खलंकृतैः. ११ झ. तमुत्थितं. १२ घ. च. छ. तथासादितस्तेन. ङ. झ. ञ. ट. तदासादितस्तेन. क. ख. ग. तथापातितः. १३ ज. बुद्ध्वास्यसुमहावेगं. १४ च. छ. महावेगं. ङ. झ. ञ. ट. हरेर्वेगं. १५ क. ग. ङ. झ. ञ. ट. ननादच. १६ च. छ. ज. समवस्थितं. ख. ग. घ. समवस्थितः. क. समुपस्थितं. १७ ग. प्रीतिहृष्टमनाः. १८ च. छ. ज. वाक्यं पर्वतःकपिमब्रवीत्. १९ ट. दुष्कृतं. २० क. वानरर्षभ. २१ ङ. झ. ट. सुखंविश्रम्यगम्यतां. २२ ग. रामहितार्थाय. २३ घ. युक्तमभ्यर्चयति. २४ क.—ज. ञ. हरिशार्दूल. २५ क. विश्रम्यमयि.

योजनानां शतं चापि कपिरेष समाप्लुतः ॥ तव सानुषु विश्रान्तश्शेषं प्रक्रमतामिति ॥ ११९ ॥
तदिदं गन्धवत्स्वादु कन्दमूलफलं बहु ॥ तदास्वाद्य हरिश्रेष्ठ विश्रान्तोनुगमिष्यसि ॥ १२० ॥
अस्माकमपि संबन्धः कपिमुख्य त्वयाऽस्ति वै ॥ प्रख्यातस्त्रिषु लोकेषु महागुणपरिग्रहः ॥ १२१ ॥
वेगवन्तः प्लवन्तो ये प्लवगा मारुतात्मज ॥ तेषां मुख्यतमं मन्ये त्वामहं कपिकुञ्जर ॥ १२२ ॥
अतिथिः किल पूजार्हः प्राकृतोपि विजानता ॥ धर्मं जिज्ञासमानेन किं पुनस्त्वादृशो महान्१२३
त्वं हि देववरिष्ठस्य मारुतस्य महात्मनः ॥ पुत्रस्तस्यैव वेगेन सदृशः कपिकुञ्जर ॥ १२४ ॥
पूजिते त्वयि धर्मज्ञ पूजां प्राप्नोति मारुतः ॥ तस्मात्त्वं पूजनीयो मे शृणु चाप्यत्र कारणम् ॥१२५॥
पूर्वं कृतयुगे तात पर्वताः पक्षिणोऽभवन् ॥ ते हि जग्मुर्दिशः सर्वा गरुडानिलवेगिनः ॥१२६॥
ततस्तेषु प्रयातेषु देवसङ्घाः सहर्षिभिः ॥ भूतानि च भयं जग्मुस्तेषां पतनशङ्कया ॥ १२७ ॥
ततः क्रुद्धः सहस्राक्षः पर्वतानां शतक्रतुः ॥ पक्षांश्चिच्छेद वज्रेण तत्र तत्र सहस्रशः ॥ १२८ ॥
स मामुपगतः क्रुद्धो वज्रमुद्यम्य देवराट् ॥ ततोऽहं सहसा क्षिप्तः श्वसनेन महात्मना ॥ १२९ ॥
अस्मिंल्लवणतोये च प्रक्षिप्तः प्लवगोत्तम ॥ गुप्तपक्षसमग्रश्च तव पित्राऽभिरक्षितः ॥ १३० ॥
ततोऽहं मानयामि त्वां मान्यो हि मम मारुतः ॥ त्वया मे ह्येष संबन्धः कपिमुख्य महागुणः ॥१३१॥
तस्मिन्नेवंगते कार्ये सागरस्य ममैव च ॥ प्रीतिं प्रीतमनाः कर्तुं त्वमर्हसि महाकपे ॥ १३२ ॥
श्रमं मोक्षय पूजां च गृहाण कपिसत्तम ॥ प्रीतिं च बहु मन्यस्व प्रीतोस्मि तव दर्शनात् ॥१३३॥
एवमुक्तः कपिश्रेष्ठस्तं नगोत्तममब्रवीत् ॥ प्रीतोस्मि कृतमातिथ्यं मन्युरेषोपनीयताम् ॥ १३४ ॥
त्वरते कार्यकालो मे अहश्चाप्यतिवर्तते ॥ प्रतिज्ञा च मया दत्ता न स्थातव्यमिहान्तरे ॥ १३५ ॥

णान्वयः ॥ ११८—११९ ॥ तत् प्रसिद्धं । कन्दः करहाटः । मूलं पादः । तत् तस्मात् ॥ १२० ॥ प्रख्यात इति संबन्धविशेषणं । महागुणानां परिग्रहो यस्मिन्स तथा ॥ १२१—१२५ ॥ संबन्धं विवृणोति पूर्वमित्यादिना ॥ पक्षिणः पक्षवन्तः । हिः पादपूरणे ॥ १२६—१२९ ॥ समग्रः समग्रपक्षः । गुप्तसमग्रपक्षश्च यथा भवामि तथा अभिरक्षितोस्मीत्यर्थः ॥ १३०—१३३ ॥ कृतमातिथ्यं तव दर्शनादिनेति भावः । मन्युः कोपः । मत्कृता पूजानगृहीतेति कोपो निरस्यतामित्यर्थः ॥ १३४ ॥ कार्यकालः त्वरते शीघ्रं गच्छेति मां प्रेरयति । अहश्चाप्यतिवर्तते अत्र विलम्बःक्रियते चेदिदमहोतिवर्तत इत्यर्थः । इह समुद्रे ।

॥ ११८—११९ ॥ **रामानु०** हनुमतःपूज्यतमत्वेहेलन्तरंदर्शयति—अस्माकमपीति । संबन्धः अतिथ्यतिथिमद्भावलक्षणः । महागुणपरिग्रहः परिगृह्यतइतिपरिग्रहः । महागुणानांसतांपरिग्रहःमहागुणपरिग्रहः ॥ **ती०** महागुणपरिग्रहःमहागुणेनवायुनापरिगृह्यतइतितथा ॥ १२१ ॥ **रामानु०** किंचातिथेस्तवपूजायांकाम्यार्थसिद्धिवद्वायोरपिप्रत्युपकारसिद्धिःस्यादित्याह—लंघीत्यादिना ॥ १२४ ॥ **रामानु०** मोक्षय मुञ्च । 'मोक्षनिरसने' इतिचौरादिकोधातुः ॥ **ति०** मान्यस्य वायुसंबन्धात्तवपूज्यस्यममप्रीतिं कुर्वितिशेषः ॥ १३३ ॥ **ती०** मन्युःपूजानङ्गीकारनिबन्धनदैन्यं ॥ १३४ ॥ **रामानु०** कार्यकालइति । कार्यःकरणयो-

[पा०] १ च. छ. ज. ञ. वापि. २ ङ. झ. ट. खमाप्लुतः. ३ च. छ. ज. ञ. तवसानुनि. ४ ङ. छ. ज. ञ. विक्रमतामिति. ५ ङ. झ. ञ. ट. विश्रान्तोथगमिष्यति. क. ग. विश्रान्तोनूत्पतिष्यति. ६ ख. घ. ञ. ट. प्लवङ्गाः. ७ ग. तेषु. ८ छ. ज. विधानतः. ९ ङ.—ज. पुत्रस्त्वंतस्य. ख. पुत्रस्तस्यच. १० ङ.—ट. धर्मज्ञे. ११ ख.—ट. तेपि. १२ क. ङ. झ. ञ. ट. गरुडाइववेगिनः. १३ ङ.—ज. ञ. सहस्रशः. ख. महर्षिभिः. ग. सुरर्षिभिः. १४ च. छ. ज. ञ. क्षणायवै. १५ घ.—ट. ततःशतसहस्रशः. ग. शतशश्चसहस्रशः. १६ क. घ. झ. मामुपागतः. १७ क. च.—झ. गुप्तपक्षःसमग्रश्च. १८ ङ. झ. ट. मान्योसिममामरुते. १९ ग. ङ. झ. ञ. ट. ममैष. २० क.—ट. अस्मिन्नेवं. २१ क.—घ. च. छ. ज. ममैवहि. २२ ख. ग. च. छ. ज. कर्तुमर्हसिलं. २३ ङ. झ. ञ. ट. महामते. २४ क. पूजांलं. २५ ङ. ञ. ट. हरिसत्तम. घ. कपिकुञ्जर. २६ ङ. झ. ट. ममामान्यस्य. २७ घ. ङ. झ. ञ. ट. मिहान्तरा.

इत्युक्त्वा पाणिना शैलमालभ्य हरिपुङ्गवः ॥ जगामाकाशमाविश्य वीर्यवान्प्रहसन्निव ॥ १३६ ॥
स पर्वतसमुद्राभ्यां बहुमानादवेक्षितः ॥ पूजितश्चोपपन्नाभिराशीर्भिरनिलात्मजः ॥ १३७ ॥
अथोर्ध्वं दूरमुत्पत्य हित्वा शैलमहार्णवौ ॥ पितुः पन्थानमास्थाय जगाम विमलेऽम्बरे ॥ १३८ ॥
भूयश्चोर्ध्वगतिं प्राप्य गिरिं तमवलोकयन् ॥ वायुसूनुर्निरालम्बे जगाम विमलेऽम्बरे ॥ १३९ ॥
तद्द्वितीयं हनुमतो दृष्ट्वा कर्म सुदुष्करम् ॥ प्रशशंसुः सुराः सर्वे सिद्धाश्च परमर्षयः ॥ १४० ॥
देवताश्चाभवन्हृष्टास्तत्रस्थास्तस्य कर्मणा ॥ काञ्चनस्य सुनाभस्य सहस्राक्षश्च वासवः ॥ १४१ ॥
उवाच वचनं धीमान्परितोषात्सगद्गदम् ॥ सुनाभं पर्वतश्रेष्ठं स्वयमेव शचीपतिः ॥ १४२ ॥
हिरण्यनाभ शैलेन्द्र परितुष्टोस्मि ते भृशम् ॥ अभयं ते प्रयच्छामि तिष्ठ सौम्य यथासुखम् ॥१४३॥
साह्यं कृतं ते सुमहद्विक्रान्तस्य हनूमतः ॥ क्रमतो योजनशतं निर्भयस्य भये सति ॥ १४४ ॥
रामस्यैष हि दूत्येन याति दाशरथेर्हरिः ॥ सत्क्रियां कुर्वता तस्य तोषितोसि दृढं त्वया ॥१४५॥
ततः प्रहर्षमगमद्विपुलं पर्वतोत्तमः ॥ देवतानां पतिं दृष्ट्वा परितुष्टं शतक्रतुम् ॥ १४६ ॥
स वै दत्तवरः शैलो बभूवावस्थितस्तदा ॥ हनुमांश्च मुहूर्तेन व्यतिचक्राम सागरम् ॥ १४७ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ [तं प्रयान्तं समुद्वीक्ष्य ह्याकाशे मारुतात्मजम् ॥]
अब्रुवन्सूर्यसंकाशां सुरसां नागमातरम् ॥ १४८ ॥
अयं वातात्मजः श्रीमान्प्लवते सागरोपरि ॥ हनुमान्नाम तस्य त्वं मुहूर्तं विघ्नमाचर ॥ १४९ ॥
राक्षसं रूपमास्थाय सुघोरं पर्वतोपमम् ॥ दंष्ट्राकरालं पिङ्गाक्षं वक्त्रं कृत्वा नभस्समम् ॥ १५० ॥

अन्तरे मध्ये । मया नस्थातव्यमिति वानरसन्निधौ प्रतिज्ञा कृता ॥ १३५ ॥ प्रहसन्निव प्रसन्नमुख इवेत्यर्थः ॥ १३६—१३७ ॥ हित्वा शैलमहार्णवौ मूर्तिमन्तौ तौ हित्वेत्यर्थः । अनेन शैलवत्समुद्रोपि मूर्तिमत्तया तत्राद्दश्यतेति सूचितं ॥ १३८—१३९ ॥ द्वितीयं समुद्रलङ्घनापेक्षया द्वितीयं तत्पर्वतजयरूपंकर्म ॥ १४०—१४३ ॥ भये सति समुद्रलङ्घनेस्य किं भवि-

---

ष्यः कालः कार्यकालः । त्वरतेत्वरयति । अहश्चाप्यतिवर्ततेतिलङ्बाद्वीपप्रवेशयोग्यमहश्चातिवर्तते । प्रतिज्ञाचेति—' यथाराघवनिर्मुक्तः शरःश्वसनविक्रमः । गच्छेत्तद्वद्भिष्यामिलङ्कांरावणपालिताम् ' इतिप्रतिज्ञादत्ता । तस्मादिहान्तरेनस्थातव्यं ॥ १३५ ॥ **ति०** प्रहसन्निवेति । एतावत्प्लवनेपिश्रममारोप्यवृथायंप्रयासएतयोरितिप्रहासः ॥ **रामानु०** आलभ्यस्पृष्ट्वा । प्रहसन्निवेत्यत्रेवशब्दोहासप्रकर्षस्यपारमार्थ्यपरःप्रीतिसूचकः । मन्दस्मितंकुर्वन्नित्यर्थः ॥ १३६ ॥ **ति०** भूयऊर्ध्वंततोपिबहूर्ध्वंतंगिरिंअधःप्रदेशवर्तिनमवलोकयन् ॥ १३९ ॥ **रामानु०** साह्यंसहायकर्मसहकारिलमितियावत् । तेत्वयानिर्भयस्यभयेसतिअतिविस्तृतसमुद्रोपर्याकाशगमनेसमुद्रपतनादिभयनिमित्तसंभावनायामपिनिर्भयस्य ॥१४४॥ **रामानु०** बभूवावस्थितस्तदा तस्मिन्कालेस्वस्थोभूदित्यर्थः । प्रतिप्रयाणवेलायापि ' पर्वतेन्द्रंसुनाभंचसमुपस्पृश्यवीर्यवान् ' इतिमैनाकावस्थानाभिधानात् । सागरं मैनाकाधिष्ठितसागरप्रदेशं ॥ १४७ ॥ **रामानु०** श्रीमान्अत्रश्रीशब्देनातिदूरसमुद्रलङ्घनेप्युपर्युपरिबलाभिवृद्धिप्रयुक्तासुषमोच्यते ॥१४९॥ **स०** रक्षसामयंराक्षसस्तं । करालंक्रूरं । पिङ्गलवर्णयुक्तेअक्षिणीयस्यतं । वक्त्रं मुखं । अर्धर्चादिनिविष्टइतिवक्त्रशब्दःपुंल्लिङ्गः । अतोनभस्स्पृशमित्युपपन्नं । अतएवार्धर्चादिगणोक्तप्रपञ्चनपरे ' वक्त्रनेत्रारण्यगाण्डीवानिनपुंसकेच ' इतिलिङ्गानुशासने चशब्देनपुंल्लिङ्गत्वमप्यनुशिष्टं ।

[**पा०**] १ ख. श्चोपहाराभिः. २ घ. ङ. झ. ञ. ट. रभिनन्दितः. ३ च. छ. ज. अतऊर्ध्वंसमुत्पत्य. ग. ङ. झ. ञ. ट. अथोर्ध्वंदूरमाप्लुत्य. क. ख. अथोर्ध्वंदूरमुत्प्लुत्य. ४ ख. ङ—ट. मासाद्य. ५ ख. ग. घ. ततश्चोर्ध्वंगतिं. झ. ततश्चोर्ध्वंगतिं. ६ ङ.—ट. वायुसूनुर्निरालंबो. ख. वायुपुत्रोनिरालंबो. ७ घ. ङ. झ. ट. कपिकुञ्जरः. ८ च. ज. कर्मणि. ९ घ. प्रदास्यामि. १० झ. ञ. ट. गच्छसौम्य. ११ ग. ङ. झ. द्विश्रान्तस्य. १२ क. च. छ. ज. रामस्यैव. १३ ङ. झ. ञ. ट. हितायैव. १४ ङ. झ. ञ. ट. दाशरथेःकपिः. १५ क. ग.—ट. शक्त्या. १६ ङ. झ. ट. सतत्प्रहर्ष. १७ क. ख. छ.—ट. मलभत्. १८ ञ. पर्वतोभृशं. १९ इदमर्धं च. छ. ज. पाठेषुदृश्यते. २० घ. अब्रुवन्देवसंकाशां. २१ ग.—झ. ट. नभस्स्पृशं. ञ. दिवस्पृशं.

बलमिच्छामहे ज्ञातुं भूयश्चास्य पराक्रमम् ॥ त्वां विजेष्यत्युपायेन विषादं वा गमिष्यति ॥ १५१ ॥
एवमुक्ता तु सा देवी दैवतैरभिसत्कृता ॥ समुद्रमध्ये सुरसा बिभ्रती राक्षसं वपुः ॥ १५२ ॥
विकृतं च विरूपं च सर्वस्य च भयावहम् ॥ प्लवमानं हनूमन्तमावृत्येदमुवाच ह ॥ १५३ ॥
मम भक्ष्यः प्रदिष्टस्त्वमीश्वरैर्वानरर्षभ ॥ अहं त्वां भक्षयिष्यामि प्रविशेदं ममाननम् ॥ १५४ ॥
[वरं एष पुरा दत्तो मम धात्रेति सत्वरा ॥ व्यादाय वक्त्रं विपुलं स्थिता सा मारुतेः पुरः]॥१५५॥
एवमुक्तः सुरसया प्राञ्जलिर्वानरर्षभः ॥ प्रहृष्टवदनः श्रीमानिदं वचनमब्रवीत् ॥ १५६ ॥
रामो दाशरथिर्नाम प्रविष्टो दण्डकावनम् ॥ लक्ष्मणेन सह भ्रात्रा वैदेह्या चापि भार्यया ॥१५७॥
अन्यकार्यविपक्तस्य बद्धवैरस्य राक्षसैः ॥ तस्य सीता हृता भार्या रावणेन यशस्विनी ॥ १५८ ॥
तस्याः सकाशं दूतोऽहं गमिष्ये रामशासनात् ॥ कर्तुमर्हसि रामस्य साह्यं विषयवासिनी ॥ १५९ ॥
अथवा मैथिलीं दृष्ट्वा रामं चाक्लिष्टकारिणम् ॥ आगमिष्यामि ते वक्त्रं सत्यं प्रतिशृणोमि ते ॥१६०॥
एवमुक्ता हनुमता सुरसा कामरूपिणी ॥ अब्रवीन्नातिवर्तेन्मां कश्चिदेष वरो मम ॥ १६१ ॥
तं प्रयान्तं समुद्वीक्ष्य सुरसा वाक्यमब्रवीत् ॥ बलं जिज्ञासमाना वै नागमाता हनूमतः ॥ १६२ ॥

ष्यतीत्यस्माकं भये सतीत्यर्थः ॥ १४४–१५७ ॥ अन्यत्कार्यविषक्तस्य मारीचमृगग्रहणव्यासक्तस्य ॥ १५८ ॥ विषयवासिनी रामराज्यवासिनी ॥ १५९—१६० ॥ नातिवर्तेन्मां ममाननमप्रविश्य न गच्छेत् । अतिवर्तेदित्यत्र परस्मैपदमार्षं । अत्र इतिकरणं द्रष्टव्यं । " अब्रवीन्नातिवर्तेन्मां कश्चिदेष वरो मम " इत्यस्यानन्तरं " तद्दृष्ट्वा व्यादितं वक्त्रं वायुपुत्रः सुबुद्धिमान् " इत्यादिश्लोकाद्रष्टव्याः । मध्ये तं प्रयान्तमित्यादयः केचन श्लोकाः प्रक्षिप्ताः असङ्गताश्च । शतयोजनायतत्वे वानरैर्लङ्कावासिभिश्च ज्ञातः स्यादिति विरोधात् । त इमे प्रक्षिप्तश्लोकाः ॥ " तं प्रयान्तं समुद्वीक्ष्य सुरसा वाक्यमब्रवीत् । बलं जिज्ञासमाना वै नागमाता हनूमतः ॥ प्रविश्य वदनं मेद्य गन्तव्यं वानरोत्तम । वर एष पुरा दत्तो मम धात्रेति सत्वरा ॥ व्यादाय विपुलं वक्त्रं स्थिता सा मारुतेः पुरः । एवमुक्तः सुरसया क्रुद्धो वानरपुङ्गवः ॥ अब्रवीत्कुरु वै वक्त्रं येन मां विषहिष्यसे । इत्युक्त्वा सुरसां क्रुद्धो दशयोजनमायतः ॥ दशयोजनविस्तारो बभूव हनुमांस्तदा । तं दृष्ट्वा मेघसंकाशं दशयोजनमायतम् ॥ चकार सुरसा चास्यं विंशद्योजनमायतम् । हनूमांस्तु ततः क्रुद्धस्त्रिंशद्योजनमायतः ॥ चकार सुरसा वक्त्रं चत्वारिंशत्तथोच्छ्रितम् । बभूव हनुमान्वीरः पञ्चाशद्योजनोच्छ्रितः ॥ चकार सुरसा वक्त्रं षष्टियोजनमायतम् । तथैव हनुमान्वीरस्सप्ततीयोजनोच्छ्रितः ॥ चकार सुरसा वक्त्रमशीतीयोजनोच्छ्रितम् । हनुमानचलप्रख्यो नवतीयोजनोच्छ्रितः ॥ चकार सुरसा वक्त्रं शतयोजनमायतं" इति । प्रकृतं विलिख्यते— तद्दृष्ट्वा व्यादितं त्वास्यं वायुपुत्रः सुबुद्धिमान् । सुसं-

---

अथवा ' यथावाचानिशादिशा' इत्यादिवत्स्पृक्छब्दस्यहलन्तत्वाट्टाबन्तताआश्रित्यनभसःस्पृशायस्यतदिति ॥१५०॥ ति० बलंज्ञानबलमुपायबलंच । पराक्रमंचज्ञातुमिच्छामहे । तदेवविवृणोति—त्वामितिभयस्यचभयावहमितिपाठेसर्वलोकभयस्यापीत्यर्थः ॥ स० बलंशारीरं । मैनाकाविश्रमेणैवज्ञातत्वाद्भूयइत्युक्तं । इच्छामहेइच्छामः । केनचिदुपायेनत्वांविजेष्यतिवाकिंवाविषादंदैन्यंगमिष्यतीतिविचारयामः । यद्वाबलं तुभ्यमस्मद्दत्तवरबलं अस्यहनुमतःपराक्रमंचज्ञातुमिच्छामः । यद्युपायेनत्वांविजेष्यतितर्हितत्पराक्रमोविज्ञातः । यदिविषादंगमिष्यतितदास्मद्वरबलंविज्ञातंभवेदिति ॥ १५१ ॥ शि० अन्यकार्यविषक्तस्यदेवादिकार्यसाधनासक्तस्य ॥ १५८ ॥ ती० विषयवासिनि रामराज्यवासिनि । त्रैलोक्यनाथत्वाद्रामस्येतिभावः ॥ १५९ ॥

[पा०] १ ख. दैवतैश्चापि. घ. देवैस्तैरभि. च. छ. ज. देवैरपिच. २ क. सहसा. ३ क. प्रविशस्व. ४ ग. ङ.—ट. पाठेष्वयंश्लोकोदृश्यते. ५ ग. छ. ज. ञ. प्राञ्जलिःपवनात्मजः. ६ ख. श्रीमान्सुरसांवाक्यमब्रवीत्. ७ क. ख. दाशरथिः श्रीमान्. ८ च. छ. ज. ञ. सीतया. ९ चैव. ट. सह. १० ङ.—ञ. अस्यकार्यं. ११ ग. ततःसीता. घ. तस्यभार्याहृतादेवी. १२ क. तपस्विनी. १३ ग. न्नातिवर्तेथाः. च. छ. ज. न्नातिवर्तेत. १४ ङ.—ट. मानासा.

प्रविश्य वदनं मेऽद्य गन्तव्यं वानरोत्तम ॥ वर एष पुरा दत्तो मम धात्रेति सत्वरा ॥
व्यादाय वक्त्रं विपुलं स्थिता सा मारुतेः पुरः ॥ १६३ ॥
एवमुक्तः सुरसया क्रुद्धो वानरपुङ्गवः ॥ अब्रवीत्कुरु वै वक्त्रं येन मां विषहिष्यसे ॥ १६४ ॥
इत्युक्त्वा सुरसां क्रुद्धो दशयोजनमायतः ॥ दशयोजनविस्तारो बभूव हनुमांस्तदा ॥ १६५ ॥
तं दृष्ट्वा मेघसंकाशं दशयोजनमायतम् ॥ चकार सुरसा चास्यं विंशद्योजनमायतम् ॥ १६६ ॥
तां दृष्ट्वा विस्तृतास्यां तु वायुपुत्रः सुबुद्धिमान् ॥ हनूमांस्तु ततः क्रुद्धस्त्रिंशद्योजनमायतः ॥१६७॥
चकार सुरसा वक्त्रं चत्वारिंशत्तथोच्छ्रितम् ॥ बभूव हनुमान्वीरः पञ्चाशद्योजनोच्छ्रितः ॥ १६८ ॥
चकार सुरसा वक्त्रं षष्टियोजनमायतम् ॥ तथैव हनुमान्वीरः सप्ततीयोजनोच्छ्रितः ॥ १६९ ॥
चकार सुरसा वक्त्रमशीतीयोजनायतम् ॥ हनुमानचलप्रख्यो नवतीयोजनोच्छ्रितः ॥ १७० ॥
चकार सुरसा वक्त्रं शतयोजनमायतम् ॥ १७१ ॥
तदृष्ट्वा व्यादितं त्वास्यं वायुपुत्रः सुबुद्धिमान् ॥ दीर्घजिह्वं सुरसया सुघोरं नरकोपमम् ॥
संसंक्षिप्यात्मनः कायं बभूवाङ्गुष्ठमात्रकः ॥ १७२ ॥
सोभिपत्याशु तद्वक्त्रं निष्पत्य च महाजवः ॥ अन्तरिक्षे स्थितः श्रीमानिदं वचनमब्रवीत् ॥१७३॥
प्रविष्टोस्मि हि ते वक्त्रं दाक्षायणि नमोस्तु ते ॥ गमिष्ये यत्र वैदेही सत्यश्चासीद्वरस्तव ॥ १७४ ॥
तं दृष्ट्वा वदनान्मुक्तं चन्द्रं राहुमुखादिव ॥ अब्रवीत्सुरसा देवी स्वेन रूपेण वानरम् ॥ १७५ ॥
अर्थसिद्ध्यै हरिश्रेष्ठ गच्छ सौम्य यथासुखम् ॥ समानयस्व वैदेहीं राघवेण महात्मना ॥ १७६ ॥
तत्तृतीयं हनुमतो दृष्ट्वा कर्म सुदुष्करम् ॥ साधुसाध्विति भूतानि प्रशशंसुस्तदा हरिम् ॥ १७७ ॥
स सागरमनाधृष्यमभ्येत्य वरुणालयम् ॥ जगामाकाशमाविश्य वेगेन गरुडोपमः ॥ १७८ ॥
सेविते वारिधाराभिः पतगैश्च निषेविते ॥ चरिते कैशिकाचार्यैरैरावतनिषेविते ॥ १७९ ॥

क्षिप्यात्मनः कायं बभूवाङ्गुष्ठमात्रकः ॥१६१–१७३॥ | दक्षस्यापत्यं दाक्षायणी । तत्त्वं च पूर्वं वरप्रदा-

ति० विंशद्योजनमायतमित्यनन्तरं 'तदृष्ट्वाव्यादितंत्वास्यं' इतिप्राचीनःपाठः । 'तांदृष्ट्वा' इत्यादयः 'शतयोजनमायतं' इत्यन्ताःश्लोकास्तुप्रक्षिप्ताइतिकतकः ॥ १६६ ॥ **रामानु०** व्यादितं व्यात्तं । इङागमस्त्वार्षः । अतिविस्तृतंवक्त्रंसूक्ष्मरूपेणप्रविश्याक्लेशेन । निर्गन्तुमयंसमीचीनःसमयइति ज्ञानयोगात्सुबुद्धिमानिति विशेषणं ॥ १७२ ॥ **रामानु०** दाक्षायणीत्यनुवादात्स्ववरप्रदानकथनसमये हनुमन्तमुद्दिश्यस्वकीयंदाक्षायणीत्वमपितयैवकथितमित्यवगन्तव्यं । सत्यंचासीद्वरंतव त्वदास्यप्रविश्यनिर्गमनाद्ब्रह्मणादत्तोवरःसत्यआसीदित्यर्थः । वरशब्दस्य नपुंसकत्वमार्षं ॥ १७४ ॥ **रामानु०** समानयस्व संगमय ॥ १७६ ॥ **रामानु०** कैशिकंरागविशेषः तदाचार्यैः तुंबुरुप्रभृतिभिरित्यर्थः । ऐरावतनिषेविते ऐरावतमितिऋजुदीर्घमिन्द्रधनुरुच्यते । तेननिषेवितेयुक्ते । 'इन्द्रायुधंत्विन्द्रधनुस्त्वदीर्घमृजुरोहितम् । ऐरावतंचविद्युत्तुचञ्चलाचपला' इतिवैजयन्ती ॥ १७९ ॥

[पा०] १ ङ. झ. ट. निविश्य. २ घ.—ट. विपुलंवक्त्रं. ३ घ. ङ. झ. ञ. ट. विषहिष्यसि. ४ ङ. झ. ञ. ट. दशयोजनमायतां. घ. पञ्चयोजनमायतः. ५ ङ. झ. ञ. ट. हनूमानभवत्तदा. ६ इदमर्धं. झ. पाठेनदृश्यते. ७ च. छ. ज. गिरिसंकाशं. ८ क. ख. ङ.—ज. ट. सुरसाप्यास्यं. ९ तांदृष्ट्वाविस्तृतास्यांतुइत्यर्धमारभ्यनवार्धानि झ. पाठेनदृश्यन्ते. १० क. अतःपरंहनूमांस्तुत्रिंशद्योजनं. ११ घ. सुरसाचास्यं. क. सुरसाप्यास्यंचत्वारिंशत्तथायतं. १२ ग.—ज. ञ. ट. मुच्छ्रितं. १३ ङ. ञ. ट. तदैव. १४ क. वक्त्रंयोजनाशीतिमायतं. १५ घ. ञ. योजनोच्छ्रितं. १६ ङ. ञ. ट. ननलप्रख्यः. १७ ख. वक्त्रं. कः घ. चास्यं. १८ क. झ. वायुपुत्रस्स. ख. वायुपुत्रस्तु. १९ घ. सुघोरनरकोपमं. ङ.—झ. सुभीमं. २० ख.—ट. ससंक्षिप्यात्मनः. क. संक्षिप्यचात्मनः. घ. ङ. झ. ञ. ट. पाठेषु. ससंक्षिप्यात्मनःकायमित्यर्धस्यस्थाने. ससंक्षिप्यात्मनःकायंजीमूतइवमारुतः । तस्मिन्मुहूर्तेहनुमान्बभूवाङ्गुष्ठमात्रकः. इत्येकःश्लोकोदृश्यते. २१ ङ.—ट. सोभिपत्याथ. ग. सन्निपत्याशु. २२ ङ.—ट. महाबलः. २३ क. ख. घ. श्रीमान्प्रहसन्निदमब्रवीत्. २४ ख. घ. संत्यंचास्तुवचस्तव. क. सत्यश्चास्तुवरस्तव. २५ ग. वातजं. २६ क. ग.—ट. समानयच. २७ घ. गरुडोयथा.

सिंहकुञ्जरशार्दूलपतगोरगवाहनैः ॥ विमानैः संपतद्भिश्च विमलैः समलंकृते ॥ १८० ॥
वज्राशनिसमाघातैः पावकैरवशोभिते ॥ कृतपुण्यैर्महाभागैः स्वर्गजिद्भिरलंकृते ॥ १८१ ॥
वहता हव्यमित्यर्थं सेविते चित्रभानुना ॥ ग्रहनक्षत्रचन्द्रार्कतारागणविभूषिते ॥ १८२ ॥
महर्षिगणगन्धर्वनागयक्षसमाकुले ॥ विविक्ते विमले विश्वे विश्वावसुनिषेविते ॥ १८३ ॥
देवराजगजाक्रान्ते चन्द्रसूर्यपथे शिवे ॥ विताने जीवलोकस्य विततेते ब्रह्मनिर्मिते ॥ १८४ ॥
बहुशः सेविते वीरैर्विद्याधरगणैर्वरैः ॥ जगाम वायुमार्गे तु गरुत्मानिव मारुतिः ॥ १८५ ॥
[हनुमान्मेघजालानि प्राकर्षन्मारुतो यथा ॥ १८६ ॥
कालागरुसवर्णानि रक्तपीतसितानि च ॥ कपिनाऽऽकृष्यमाणानि महाभ्राणि चकाशिरे ॥ १८७ ॥
प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः ॥ प्रावृषीन्दुरिवाभाति निष्पतन्प्रविशंस्तदा] ॥ १८८ ॥
प्रदृश्यमानस्सर्वत्र हनुमान्मारुतात्मजः ॥ भेजेऽम्बरं निरालम्बं लम्बपक्ष इवाद्रिराट् ॥ १८९ ॥
प्लवमानं तु तं दृष्ट्वा सिंहिका नाम राक्षसी ॥ मनसा चिन्तयामास प्रवृद्धा कामरूपिणी ॥ १९० ॥
अद्य दीर्घस्य कालस्य भविष्याम्यहमाशिता ॥ इदं हि मे महत्सत्त्वं चिरस्य वशमागतम् ॥१९१॥
इति संचिन्त्य मनसा छायामस्य समाक्षिपत् ॥ छायायां गृह्यमाणायां चिन्तमायास वानरः ॥१९२॥
समाक्षिप्तोऽसि सहसा पङ्कृतपराक्रमः ॥ प्रतिलोमेन वातेन महानौरिव सागरे ॥ १९३ ॥
तिर्यगूर्ध्वमधश्चैव वीक्षमाणस्ततः कपिः ॥ ददर्श स महत्सत्वमुत्थितं लवणाम्भसि ॥ १९४ ॥

नकथनसमये तयैव कथितमित्यनुवादात्कल्प्यते ॥ १७४—१७८ ॥ आकाशगमनमतिदुष्करमित्यमुमर्थं कथयितुं आकाशस्वरूपं वर्ण्यते सेवित इत्यादिना श्लोकसप्तकेन ॥ कैशिकाचार्यैः कैशिके रागविशेषे आचार्यैः विद्याधरविशेषैरित्यर्थः ॥१७९–१८०॥ वज्राशनिसमाघातैः पावकैः वज्राशनिसमाघातैर्हेतुभिर्जातैः पावकैः ॥ १८१ ॥ हव्यं वहता देवेभ्यो हव्यवहनार्थं गतेन । चित्रभानुना वह्निना ॥ १८२ ॥ विश्वे विश्वगते व्यापक इत्यर्थः ॥ १८३ ॥ देवराजगजाक्रान्ते ऐरावतभिन्नदिग्गजाक्रान्ते । विताने वितानतुल्ये । विवत इति वितानविशेषणं ॥१८४—१९० ॥ दीर्घस्य कालस्य दीर्घकाले गते सति । अद्य आशिता आशित्री भुक्तवती । भविष्यामि ॥ १९१ ॥ समाक्षिपत् सम्यग्गृहीतवती ॥ १९२ ॥ पङ्कृतपराक्रमः कुण्ठितगतिः । प्रतिलोमेन प्रतिकू-

---

ति० पतगोरगाः पक्षिसर्पाः ॥ १८० ॥ **रामानु०** वज्राशनिसमाघातैःवज्राशन्योःसमःतुल्यःआघातःअभिघातःयेषांतैः ॥ १८१ ॥ **ती०** आकाशस्यैकोनपञ्चाशदग्निसंबन्धमुक्त्वातत्प्रधानभूतचित्रभानुसंबन्धमाह वहतेति ॥ **ति०** वज्राशनिसमस्पर्शैः तद्वत्प्राणहरैः । पावकैःपञ्चाग्निभिरिवस्वर्गजिद्भिरधिष्ठिते ॥ **स०** स्वर्गजिद्भिःप्राप्तस्वर्गैः । धनजिते स्वर्जितेइत्यादाविवजिधातुः प्राप्त्यर्थकः ॥ १८१ ॥ **स०** नक्षत्राणिपुंनक्षत्राणि । तारागणःअश्विन्यादिसमूहः ॥ १८२ ॥ **रामानु०** विविक्तइति । विश्वेविशतीति विश्वःव्यापकइत्यर्थः ॥ १८३ ॥ **रामानु०** वितानेउल्लोचभूते । 'अस्त्रीवितानमुल्लोचः' इत्यमरः । हनुमान्मेघजालानीत्यादिसार्धश्लोकद्वयंप्रमादाल्लिखितं ॥ १८४ ॥ **ति०** महानौर्यथापङ्कृतपराक्रमास्तब्धगतिःप्रतिलोमेनवातेनक्रियते । गम्यदेशगतिनिरोधएवात्रस्तब्धगतित्वं । यद्वातेनयथाविपरीतगतिवारणायत्नैःस्तब्धगतिःकार्यतेतथाऽहंकेनचित्स्तब्धगतिःकृतः ॥ १९३ ॥

[पा०] १ ग. च. छ. ज. संपतद्भिश्चविमलैर्विमानैः. घ. विमानैर्निष्पतद्भिश्चविविधैः. २ झ. ट. समस्पर्शैः. ३ ङ. झ. ट. पावकैरिव. ४ ङ. झ. ट. रधिष्ठिते. च. छ. ज. ञ. रधिश्रिते. ५ क. ख. घ.—ट. मल्यन्तं. ६ घ. कृष्णवर्त्मना. ७ क. ख. घ. गणनिषेविते. ८ क. देवगन्धर्व. ९ ग. ङ.—ट. विमले. १० क. घ. ङ. झ. ञ. ट. गणैर्वृते. ११ ख. च. छ. ज. वायुमार्गेण. ङ. झ. ञ. ट. वायुमार्गेच. क. घ. वायुवेगेन. १२ क. वानरः. १३ इमानिपञ्चार्धानि क. ख. घ.—ट. पाठेपुदृश्यन्ते. १४ ङ—ट. पक्षयुक्तइवाद्रिराट्. १५ क. ग. प्लवमानंहि. १६ घ. अद्यैवदीर्घकालस्य. १७ ङ.—ट. इदंममहासत्वं. १८ क.—घ. संगृहीतायां. १९ क. मारुतिः. २० ङ. झ. ञ. ट. स्तदाकपिः. क. ग. घ. च. छ. ज. स्ततस्ततः. २१ ख. ददर्शच. ग. ददर्शसहसासत्वं.

तदृष्ट्वा चिन्तयामास मारुतिर्विकृताननम् ॥ [1]कपिराजेन कथितं सत्त्वमद्भुतदर्शनम् ॥
छायाग्राहि [2]महावीर्यं तदिदं नात्र संशयः ॥ १९५ ॥
स तां बुद्ध्वाऽर्थतत्त्वेन सिंहिकां मतिमान्कपिः ॥ व्यवर्धत महाकायः प्रावृषीव बलाहकः ॥१९६॥
तस्य सा कायमुद्वीक्ष्य वर्धमानं महाकपेः ॥ वक्त्रं प्रसारयामास [3]पातालान्तरसन्निभम् ॥ १९७ ॥
[4]घनराजीव गर्जन्ती वानरं समभिद्रवत् ॥ १९८ ॥
स ददर्श ततस्तस्या [5]विवृतं सुमहन्मुखम् ॥ कायमात्रं च मेधावी मर्माणि च महाकपिः ॥ १९९ ॥
स तस्या विवृते वक्त्रे वज्रसंहननः कपिः ॥ संक्षिप्य मुहु[6]रात्मानं निष्पपात महाबलः ॥ २०० ॥
आस्ये तस्या निमज्जन्तं ददृशुः सिद्धचारणाः ॥ ग्रस्यमानं यथा चन्द्रं पूर्णं पर्वणि राहुणा ॥२०१॥
ततस्तस्या नखैस्तीक्ष्णैर्मर्माण्युत्कृत्य वानरः ॥ उत्पपाताथ वेगेन मनस्संपातविक्रमः ॥ २०२ ॥
तां तु दृष्ट्वा च धृत्या च दाक्षिण्येन निपा[7]त्य च ॥ स[8] कपिप्रवरो वेगाद्ववृधे पुनरात्मवान् ॥२०३॥
हृतहृत्सा हनुमता पपात विधु[9]रांभसि ॥ [स्वयंभुवैव हनुमान्सृष्टस्तस्या निपातने] ॥ २०४ ॥
तां हतां वा[10]नरेणाशु पतितां वीक्ष्य सिंहिकाम् ॥ भूतान्याकाशचारीणि तमूचुः प्ल[11]वगोत्तमम् ॥२०५॥
भीम[12]मद्य कृतं कर्म महत्सत्त्वं त्वया हतम् ॥ साधयार्थमभिप्रेतमरिष्टं प्लवतां वर ॥ २०६ ॥
यस्य त्वेतानि चत्वारि वानरेन्द्र यथा तव ॥ धृतिर्दृष्टिर्मतिर्दाक्ष्यं स्वकर्मसु न सीदति ॥ २०७ ॥

लेन ॥ १९३—१९४ ॥ तदिदं छायाग्राहि कपिराजेन कथितं नात्र संशय इति योजना ॥ १९५—१९७ ॥ समभिद्रवत् समभ्यद्रवत् ॥१९८॥ कायमात्रं देहप्रमाणं ॥ १९९ ॥ मुहुस्संक्षिप्य संनिकर्षानुगुणं संकुच्य ॥ २००—२०१ ॥ ततः तेन रूपेण मनस्संपातविक्रमः मनोवेगतुल्यगतिः ॥ २०२ ॥ दृष्ट्या दूरादेव दर्शनेन । धृत्या अस्य नियमनजननधार्ष्ट्येन । दाक्षिण्येन पाटवेन ॥ २०३ ॥ विधुरा आर्ता ॥ २०४—२०५ ॥ अरिष्टं शुभं यथा भवति तथा । यस्य सिंहिकारूपसत्त्वस्य । दृष्टिः आयतिक्षमसूक्ष्मेक्षणं । मतिः अर्थतत्त्वनिश्चयः । क्रियावत्त्वं दाक्ष्यं यथा तव तथा यस्य चत्वारि सन्ति तत्त्वया हतं । तान्येव चत्वार्याह—धृतिरिति । या धृतिः स्वकर्मसु स्वानुकूलकार्येषु नावसीदति । या दृष्टिर्नावसीदति । या मतिर्नावसीदति । यद्दाक्ष्यं नावसीदति एतानि चत्वारि यस्य सन्ति तत्त्वया हतमिति योजना

स० कायमात्रं कायस्य स्वदेहस्य मात्रा परिमाणं यस्यतत् । स्वशरीरकबलीकरणयोग्यमितियावत् । मर्माणि सन्धिस्थानानि ॥ १९९ ॥ स० आत्मानंआत्मीयंवपुः । कंपयतिशत्रूनितिकपिः । कंपेर्नलोपश्चेतिनलोपः । कुडिकेभ्यइतीलं ॥ २०० ॥ रामानु० अथवानरःमनस्संपातविक्रमःमनोगमनसमानगतिःसन्तीक्ष्णैर्नखैःतस्यामर्माण्युत्कृत्यततःआस्यात्वेगेनोत्पपात । आस्यविधानात्पूर्वमेवोत्पपातेत्यर्थः ॥ २०२ ॥ ति० ननुप्रथमप्रवृत्तवेगस्यसुरसादिःकुण्ठीभावेसतिकथंपुनराकाशगमनंतत्राह—आत्मवान् । वायोरिवस्वाधीनएवतद्गमनविषयोयत्नः । प्रथमंलाकाशमार्गप्राप्तिमात्रायमहेन्द्रपर्वतालंबनमितरजनप्रतारणायवेत्याहुः । अत्रकविरुत्प्रेक्षते—तस्याच्छायाग्रहणमात्रेणभक्षणादिशक्तिमत्याःसिंहिकायानिपातने निपातनिमित्तं रावणनाशायस्वात्मरूपरामवत्स्वस्वरूपोहनुमान्सृष्टः । ति० महत्सत्वं महाबलाराक्षसीरावणवदशक्यसंहारा । त्वयासंहृतेत्यर्थः । अरिष्टं बाधारहितं । 'रिष हिंसायां' ॥ २०६ ॥ स० यस्यपुरुषस्यदृष्टिःअपरोक्षज्ञानं । मतिःपरोक्षज्ञानं दाक्ष्यंदक्षत्वं ॥ २०७ ॥

[पा०] १ ङ.—ट. कपिराज्ञायथाख्यातं. क. ख. घ. कपिराज्ञायदाख्यातं. २ घ. महासत्वं. ३ ग.—च. झ. ञ. ट. पातालांबरसंनिभं. क. पातालतलसंनिभं. ४ घ. मेघराजीव. ५ ङ.—ट. विकृतं. ६ ग. ङ.—ट. विकृते. ७ क. च. छ. ज. पुनरात्मानं. ८ क. ङ. झ. ञ. ट. निपपातमहाकपिः. छ. ज. निष्पपातमहाकपिः. ९ क. गृह्यमाणं. १० च. छ. ज. निहत्यसः. ङ. झ. ट. निपात्यसः. ११ ङ. छ. ञ. ट. कपिप्रवीरोवेगेनवृधे. १२ ख. ग. लवणांभसि. १३ इदमर्धं ग.—ट. पाठेषुदृश्यते. १४ च. छ. ज. ञ. वानरेणाथ. ग. वानरेन्द्रेण. १५ क.—घ. छ. ज. प्लवगर्षभं. १६ च. छ. ज. भीममत्यद्भुतंकर्म. क. भीममद्यमहत्कर्म.

स तैः संभावितः पूज्यः प्रतिपन्नप्रयोजनः ॥ जगामाकाशमाविश्य पन्नगाशनवत्कपिः ॥ २०८ ॥
प्राप्तभूयिष्ठपारस्तु सर्वतः प्रतिलोकयन् ॥ योजनानां शतस्यान्ते वनराजिं ददर्श सः ॥ २०९ ॥
ददर्श च पतन्नेव विविधद्रुमभूषितम् ॥ द्वीपं शाखामृगश्रेष्ठो मलयोपवनानि च ॥ २१० ॥
सागरं सागरानूपं सागरानूपजान्द्रुमान् ॥ सागरस्य च पत्नीनां मुखान्यपि विलोयकन् ॥ २११ ॥
स महामेघसंकाशं समीक्ष्यात्मानमात्मवान् ॥ निरुन्धन्तमिवाकाशं चकार मतिमान्मतिम् ॥२१२॥
कायवृद्धिं प्रवेगं च मम दृष्ट्वैव राक्षसाः ॥ मयि कौतूहलं कुर्युरिति मेने महाकपिः ॥ २१३ ॥
ततः शरीरं संक्षिप्य तन्महीधरसन्निभम् ॥ पुनः प्रकृतिमापेदे वीतमोह इवात्मवान् ॥ २१४ ॥
तद्रूपमतिसंक्षिप्य हनुमान्प्रकृतौ स्थितः ॥ त्रीन्क्रमानिव विक्रम्य बलिवीर्यहरो हरिः ॥ २१५ ॥
स चारुनानाविधरूपधारी परं समासाद्य समुद्रतीरम् ॥
परैरशक्यः प्रतिपन्नरूपः समीक्षितात्मा समवेक्षितार्थः ॥ २१६ ॥
ततस्स लम्बस्य गिरेस्समृद्धे विचित्रकूटे निपपात कूटे ॥
सकेतकोद्दालकनालिकेरे महाद्रिकूटप्रतिमो महात्मा ॥ २१७ ॥
ततस्तु संप्राप्य समुद्रतीरं समीक्ष्य लङ्कां गिरिवर्यमूर्ध्नि ॥
कपिस्तु तस्मिन्निपपात पर्वते विधूय रूपं व्यथयन्मृगद्विजान् ॥ २१८ ॥

॥ २०६—२०७ ॥ संभावितः पूजितः । प्रतिपन्नप्रयोजनः प्राक्प्रतिभासितकार्यसारः । सच स्त्रीत्वे दोषे समानेपि सुरसाया जयप्रतिपत्तिः सिंहिकाया वधप्रतिपत्तिश्च ॥ २०८ ॥ प्राप्तभूयिष्ठपारः प्राप्तप्रायतीरः ॥ २०९ ॥ मलयोपवनानि लङ्कामलय इति दक्षिणतीरे स्थितमलयः तस्योपवनानि ॥ २१० ॥ सागरस्य पत्नीनां नदीनां त्रिकूटोत्पन्नानां आत्मानं स्वशरीरं । मतिं चकार मेन इति यावत् ॥ २११—॥ २१२ ॥ कथं मेन इत्यत्राह कायवृद्धिमिति ॥ २१३ ॥ पुनः प्रकृतिमापेदे पुनर्निजाकारं प्राप्तवान् ॥ २१४ ॥ उक्तं शरीरसंक्षेपं दृष्टान्तार्थमनुवदति—तद्रूपमिति ॥२१५॥ प्रतिपन्नरूपः प्रतिपन्नस्वभावशरीरः । अभूदितिशेषः । समीक्षितात्मा समीक्षितदेहः । समवेक्षितार्थः निरूपितकार्यः । पूर्वोक्तोपसंहारश्लोक एषः ॥ २१६ ॥ लम्बस्य लम्बमानस्येव स्थितस्य अविज्ञाताग्रस्येत्यर्थः । विचित्रकूटे विविधाश्चर्यसमूहे । " कूटस्त्वस्त्रियां पुञ्जपालयोः " इति दर्पणः । उद्दालकाः श्लेष्मातकाः ॥ २१७ ॥ व्यथयन्मृगद्विजानित्यादिविशेषं वक्तुमुक्तमर्थमनुवदति—ततस्त्विति ॥ समुद्रतीरं तीरोपर्याकाशं । विधूय

स० प्राप्तभूयिष्ठपारः प्राप्तप्रायं भूयिष्ठपारं महालङ्काद्वीपतीरंयेनसः ॥ २०९ ॥ ति० पतन्नेवगच्छेन्नवमलयोपवनानि । अनेनोत्तरतीरइवदक्षिणतीरेपिमलयाख्यःपर्वतोस्तीतिगम्यते ॥ २१० ॥ ती० वीतमोहःनिवृत्ताविद्यः ॥ २१४ ॥ रामानु० चारुनानाविधरूपधारीतत्तत्कार्यानुगुण्येनपरिगृहीतरमणीयस्थूलसूक्ष्मादिरूपः । परैःसिंहिकादिभिः । अशक्यःअग्रधृष्यः । सःपरंसमुद्रतीरमासाद्यसमीक्षितात्मा समालोकितातिप्रमाणस्वशरीरः समवेक्षितार्थःसमालोचितकार्यः प्रतिपन्नरूपः अङ्गीकृतनिजशरीरः अभूदितिशेषः । ती० समवेक्षितार्थःआलोचितानन्तरकार्यः । प्रतिपन्नरूपःअङ्गीकृतपूर्वपदंशदेहः ॥११६ ॥ इतिप्रथमःसर्गः ॥१॥

[पा०] १ क. संपूजितःपूज्यैः. क. ज.—झ. ट. संपूजितःपूज्यः. २ ङ. झ. ञ. ट. परिलोकयन्. च. प्रविलोकयन्. ३ क. ङ. च. छ. झ. ञ. ट. सागरानूपान्. ४ ख. ग. मुखान्यभि. ५ ख. मात्मना. ६ घ. संनिरुद्धमिवा. ७ घ. दृष्ट्वैवमम. ८ ङ. ट. महागतिः. ९ ग. च. छ. ज. तद्रूपमपि. १० घ. वलियज्ञहरो. क. बलवीर्याधिको. ११ ख. ङ. झ. ट. रशक्यं. १२ क. सचित्रकूटे. १३ ङ.—ट. नारिकेले. १४ ख.—छ. झ. ञ. ट. महाभ्रकूट.

स सागरं दानवपन्नगायुतं बलेन विक्रम्य महोर्मिमालिनम् ॥
निपत्य तीरे च महोदधेस्तदा ददर्श लङ्काममरावतीमिव ॥ २१९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे प्रथमः सर्गः ॥ १ ॥

द्वितीयः सर्गः ॥ २ ॥

हनुमता लङ्काया राक्षसगणरक्षणादिनिरीक्षणेनेतरदुराधर्षत्वादिचिन्तनपूर्वकं बिडालतुल्यपरिमाणकवपुषासता चन्द्रोदयसमये लङ्काप्रवेशनं ॥ १ ॥

स सागरमनाधृष्यमतिक्रम्य महाबलः ॥ त्रिकूटशिखरे लङ्कां स्थितां स्वस्थो ददर्श ह ॥ १ ॥
ततः पादपमुक्तेन पुष्पवर्षेण वीर्यवान् ॥ अभिवृष्टः स्थितस्तत्र बभौ पुष्पमयो यथा ॥ २ ॥
योजनानां शतं श्रीमांस्तीर्त्वाऽप्युत्तमविक्रमः ॥ अनिश्वसन्कपिस्तत्र न ग्लानिमधिगच्छति ॥ ३ ॥
शतान्यहं योजनानां क्रमेयं सुबहून्यपि ॥ किं पुनस्सागरस्यान्तं संख्यातं शतयोजनम् ॥ ४ ॥
स तु वीर्यवतां श्रेष्ठः प्लवतामपि चोत्तमः ॥ जगाम वेगवाँल्लङ्कां लङ्घयित्वा महोदधिम् ॥ ५ ॥
शाद्वलानि च नीलानि गन्धवन्ति वनानि च ॥ गण्डवन्ति च मध्येन जगाम नगवन्ति च ॥६॥
शैलांश्च तरुसंछन्नान्वनराजीश्च पुष्पिताः ॥ अभिचक्राम तेजस्वी हनुमान्प्लवगर्षभः ॥ ७ ॥
स तस्मिन्नचले तिष्ठन्वनान्युपवनानि च ॥ स नगाग्रे च तां लङ्कां ददर्श पवनात्मजः ॥ ८ ॥
सरलान्कर्णिकारांश्च खर्जूरांश्च सुपुष्पितान् ॥ प्रियालान्मुचुलिन्दांश्च कुटजान्केतकानपि ॥ ९ ॥
प्रियङ्गून्गन्धपूर्णांश्च नीपान्सप्तच्छदांस्तथा ॥ असनान्कोविदारांश्च करवीरांश्च पुष्पितान् ॥ १० ॥
पुष्पभारनिबद्धांश्च तथा मुकुलितानपि ॥ पादपान्विहगाकीर्णान्पवनाधूतमस्तकान् ॥ ११ ॥
हंसकारण्डवाकीर्णा वापीः पद्मोत्पलायुताः ॥ आक्रीडान्विविधान्रम्यान्विविधांश्च जलाशयान्॥१२॥

रूपं पूर्वरूपं विहाय । वृत्तमुपजातिः ॥२१८—२१९॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने प्रथमः सर्गः ॥ १ ॥

स सागरमित्यादि ॥ १—३ ॥ समुद्रलङ्घने कुतो ग्लानिं नाध्यगच्छदित्यत्राह—शतानीति ॥ ४—५॥ गण्डवन्ति स्थूलोपलवन्ति । नामैकदेशे नामग्रहणेन गण्डशब्देन गण्डशैल उच्यते ॥ ६—७ ॥ स तस्मिन्नित्यर्धे ददर्शेत्यपकृष्यते ॥ ८ ॥ सरलान् यूपसरलान् । कर्णिकारान्परिव्याधान् । खर्जूरान् कण्टकच्छदान् । प्रियालान् धनुःपटान् । मुचुलिन्दान् जम्बीरान् ॥ ९ ॥ प्रियङ्गून् फलिनः । गन्धपूर्णान् नीपान् असनान् । कोविदारान् चमरिकान् ॥१०—११ ॥ आक्रीडान् सर्वसाधारणक्रीडास्थानानि ॥१२॥

स० स्वस्थउत्तरत्रकथंकर्तव्यमितिचित्तवैक्लव्यरहितः ॥ १० ॥ रामानु० समुद्रलङ्घनेकुतःश्रमेणाध्यगच्छत्तत्राह—शतान्यहमिति । अहंसुबहून्यपियोजनानांशतानिक्रमेयं । शतयोजनसंख्याकंसागरस्यान्तंकिंपुनरित्यमन्यतेतिशेषः ॥ ४ ॥ रामानु० अत्र शैलशब्दःशृङ्गपरः । लंबाख्यगिरेरुपरितनस्योच्यमानत्वात् ॥ ७ ॥ वनानि स्वतएवजातवृक्षसमूहान् । उपवनानिस्थापितवृक्ष-

[पा०] १ क. घ. ङ. झ. ञ. ट. त्रिकूटस्यतटे. २ क. ग. घ. ङ. झ. ञ. ट. स्थितःस्वस्थो. ३ ग. ङ. झ. ञ. ट. अभिवृष्टस्ततस्तत्र. ४ ङ. झ. ञ. ट. हरिः. ५ च. छ. ज. शतंतीर्त्वातथाप्युत्तम. ६ क. ङ. झ. ञ. ट. मधुमन्तिच. ग. च. छ. गजवन्तिच. ७ घ. छ. तरुसंपन्नान्. ८ ग. ङ.—ट. स्थितांलङ्कां. ९ ग. बकुलान्सु. १० क. ख. न्सप्तच्छदानपि. ११ ग. पनसान्को. १२ छ. ज. भारपिनद्धांश्च. ग. भारातिभारांश्च. क. भारातिबद्धांश्च. १३ झ. ञ. ट. पद्मोत्पलावृताः.

संततान्विविधैर्वृक्षैः सर्वर्तुफलपुष्पितैः ॥ उद्यानानि च रम्याणि ददर्श कपिकुञ्जरः ॥ १३ ॥
समासाद्य च लक्ष्मीवाँल्लङ्कां रावणपालिताम् ॥ परिघाभिः सपद्माभिः सोत्पलाभिरलंकृताम् ॥१४॥
सीतापहरणार्थेन रावणेन सुरक्षिताम् ॥ समन्ताद्विचरद्भिश्च राक्षसैरुग्रधन्विभिः ॥ १५ ॥
काञ्चनेनावृतां रम्यां प्राकारेण महापुरीम् ॥ गृहैश्च ग्रहसंकाशैः शारदाम्बुदसन्निभैः ॥ १६ ॥
पाण्डुराभिः प्रतोलीभिरुच्चाभिरभिसंवृताम् ॥ अट्टालकशताकीर्णां पताकाध्वजमालिनीम् ॥ १७ ॥
तोरणैः काञ्चनैर्दिव्यैर्लतापङ्क्तिविचित्रितैः ॥ ददर्श हनुमाँल्लङ्कां दिवि देवपुरीमिव ॥ १८ ॥
गिरिमूर्ध्नि स्थितां लङ्कां पाण्डुरैर्भवनैः शुभैः ॥ ददर्श स कपिश्रेष्ठः पुरीमाकाशगं यथा ॥ १९ ॥
पालितां राक्षसेन्द्रेण निर्मितां विश्वकर्मणा ॥ प्लवमानामिवाकाशे ददर्श हनुमान्पुरीम् ॥ २० ॥
वप्रप्राकारजघनां विपुलाम्बुनवाम्बराम् ॥ शतघ्नीशूलकेशान्तामट्टालकवतंसकाम् ॥
मनसेव कृतां लङ्कां निर्मितां विश्वकर्मणा ॥ २१ ॥
द्वारमुत्तरमासाद्य चिन्तयामास वानरः ॥ २२ ॥
कैलासशिखरप्रख्यामालिखन्तीमिवाम्बरम् ॥ डीयमानामिवाकाशमुच्छ्रितैर्भवनोत्तमैः ॥ २३ ॥

उद्यानानि राजयोग्यानि। सर्वर्तुफलपुष्पितैः सर्वर्तुषु फलपुष्पाण्येषां संजातानि तैः॥ १३ ॥ समासाद्य ददर्शेति क्रियाभेदाल्लङ्कापदावृत्तिः। लक्ष्मीवान् जयहेतुकान्तिमान्। उत्पलानि पद्मव्यतिरिक्तानि सरसिजानि ॥ १४ ॥ सीतापहरणं अर्थः प्रयोजनं यस्य तेन। सुरक्षितत्वे हेतुरयं। विचरद्भिश्चेत्यत्र चकारो भिन्नक्रमः। राक्षसैश्च सुरक्षितां ॥ १५ ॥ ग्रहसंकाशैः नवग्रहतुल्यैः ॥ १६ ॥ पाण्डुराभिः सुधालिप्तभूमिकत्वात्सिताभिः। प्रतोलीभिः वीथीभिः। अट्टालकाः अट्टाः। पताकाध्वजमालिनीं लतादिरेखाविचित्रितपटविशिष्टाः पताकाः। मत्स्यमकराद्याकारा ध्वजाः। त्रीह्यादित्वादिनिः ॥ १७ ॥ लतापङ्क्तयः लताकाररेखाः॥ १८—२० ॥ वप्रेत्यादावपि ददर्श हनुमान्कपिरित्यनुवर्तते। वप्रं प्राकारमूर्तिकः। प्राकारः सालः। विपुलाम्बु परिघारूपं नवाम्बरं यस्यास्सा। शतघ्नी यन्त्रविशेषः। वतंसः अवतंसः। भागुरिमतेनाल्लोपः। वस्तुतो विश्वकर्मणा निर्मितां विचार्यमाणे केनापि मनसा निर्मितामिव स्थितामित्युत्प्रेक्षा ॥२१॥ उत्तरं द्वारमासाद्य। चिन्तयामास मनसा निरूपयामास। वैदेहीदर्शनोपायमिति शेषः ॥ २२ ॥ डीयमानां गच्छन्तीं। डीङ् विहायसागतौ इत्यस्मा-

षण्डानि। सनगंवृक्षसहितंयदग्रंतस्मिन्स्थितांलङ्कांचददर्श ॥ ८ ॥ **ती०** अट्टालकशताकीर्णां प्राकारवेदिकोपरियुद्धार्थंपरिकल्पितमञ्चविशेषशतसंकुलां। ददर्शहनुमाँल्लङ्कामितिपुनर्दर्शनाभिधानंविशेषान्तरविवक्षयोपमानान्तरविवक्षयावा ॥ **स०** पताकासौभाग्यं तस्याध्वजः सूचकसचेलयष्टिविशेषः। तेनमालतेशोभतेसातथा ॥ अभिधानंतूक्तं। **ति०** गिरिमूर्धस्थत्वादेवाकाशेप्लवमानामिव। लङ्कांद्रष्टुर्हनूमतइवतद्वर्णनप्रसक्तस्यकवेरप्याश्चर्यमग्नतयाददर्शेतिपुनरुक्तिर्नदोषाय। विस्मयेनपुनःपुनर्ददर्शेतिवातात्पर्यं ॥१७—२०॥ **रामानु०** वप्रं चयः। प्राकाराधारवेदिकेतियावत्। 'स्याच्चयोवप्रमस्त्रियां' इत्यमरः। अट्टालकाःवतंसःकर्णाभरणंयस्यास्सातां। **ति०** विपुलांबुःसमुद्रोवनानिचांबरंवासोयस्यास्तां। **स०** विश्वकर्मणानिर्मितामपिमनसेवकृतां मनोमयसदृशीं ॥२१॥ **ति०** कैलासोनिलयःस्थानंयस्यअलकाद्वारस्यतत्प्रख्यंउत्तरद्वारं। उच्छ्रितैर्भवनोत्तमैःअंबरमालिखन्तमिव। आकाशंध्रियमाणमिवआकाशधारणं कुर्वंदिव ॥ **स०** कैलासरूपोयोनिलयःरुद्रभवनंतत्प्रख्यंतत्सदृशं। यद्वाकैलासनिलयोभवस्तत्प्रख्यं हरस्यापिकेवलंशुभ्ररूपत्वात्। एतादृशंद्वारमासाद्येतिपूर्वेणान्वयः। आलिखन्तं आलिखत्। 'तदशिष्यं' इतिलिङ्गस्यातत्रलोक्तेः। **रामानु०** आलिखन्तमिति लिङ्गव्यत्ययः ॥ डीयमानामिवउद्गच्छन्तीमिव। डीयमानत्वादिविशेषणविशिष्टा या तस्यालङ्कायाःमहतींगुप्तिंसागरंचरावणंघोरं

[पा०] १ छ. ज. संततैर्विविधैः. २ ज. विहायसिचरद्भिश्च. ३ क.—ट. गिरिसंकाशैः. ४ च. ज. समाकीर्णां. ५ ङ. ञ. ञ. ट. ध्वजशोभितां. घ. ध्वजशालिनीं. ६ ञ. ट. विराजितैः. ७ ङ. ञ. ञ. ट. देवोदेवपुरीमिव. ८ क. ग. च. रम्यां. ९ ग. सददर्शकपिःश्रीमान्. क. ख. घ.—ट. ददर्शसकपिःश्रीमान्. १० ङ. ञ. ट. पुरीमाकाशगामिव. ११ घ.—ट. हनुमान्कपिः. १२ घ. विपुलांबुधरांबरां. ङ. ञ. ञ. ट. विपुलांबुवनांबरां. १३ ग. मनसैवतदालङ्कां. १४ क. ख. ङ. च. छ. ञ. ञ. ट. कैलासनिलयप्रख्यमालिखन्तमिवा. १५ ङ. ञ. ट. ध्रियमाणमिवाकाशं. ख. पिबन्तीमिवचाकाशं.

संपूर्णां [1]राक्षसैर्घोरैर्नागैर्भोगवतीमिव ॥ अचिन्त्यां सुकृतां [2]स्पष्टां कुबेराध्युषितां पुरा ॥ २४ ॥
दंष्ट्रिभिर्बहुभिः शूरैः [3]शूलपट्टिशपाणिभिः ॥ रक्षितां राक्षसैर्घोरैर्गुहामाशीविषैरिव ॥ २५ ॥
तस्याश्च महतीं गुप्तिं सागरं च निरीक्ष्य सः ॥ रावणं च रिपुं घोरं चिन्तयामास वानरः ॥ २६ ॥
[4]आगत्यापीह हरयो भविष्यन्ति निरर्थकाः ॥ नहि युद्धेन वै लङ्का शक्या जेतुं [5]सुरैरपि ॥ २७ ॥
[6]इमां तु विषमां [7]दुर्गां लङ्कां रावणपालिताम् ॥ प्राप्यापि [8]स महाबाहुः किं करिष्यति राघवः ॥२८॥
अवकाशो न [9]सान्त्वस्य राक्षसेष्व[10]भिगम्यते ॥ न दानस्य न भेदस्य नैव युद्धस्य दृश्यते ॥ २९ ॥
चतुर्णामेव हि गतिर्वानराणां [11]महात्मनाम् ॥ वालिपुत्रस्य नीलस्य मम राज्ञश्च धीमतः ॥ ३० ॥
यावज्जानामि वैदेहीं यदि जीवति वा नवा ॥ [12]तत्रैव चिन्तयिष्यामि दृष्ट्वा तां जनकात्मजाम् ॥३१॥
ततः स चिन्तयामास मुहूर्तं कपिकुञ्जरः ॥ गिरि[13]शृङ्गे स्थित[14]स्तस्मिन्[15]रामस्याभ्युदये रतः ॥ ३२ ॥
अनेन रूपेण मया न शक्या रक्षसां पुरी ॥ प्रवेष्टुं राक्षसैर्गुप्ता क्रूरैर्बलसमन्वितैः ॥ ३३ ॥
[16]उग्रौजसो महावीर्या बलवन्तश्च राक्षसाः ॥ वञ्चनीया मया सर्वे जानकीं परिमार्गता ॥ ३४ ॥
लक्ष्यालक्ष्येण रूपेण रात्रौ लङ्कापुरी मया ॥ प्रवेष्टुं प्राप्तकालं मे कृत्यं साधयितुं महत् ॥ ३५ ॥
तां पुरीं तादृशीं दृष्ट्वा दुराधर्षां सुरासुरैः ॥ हनुमांश्चिन्तयामास विनि[17]श्चित्य मुहुर्मुहुः ॥ ३६ ॥
केनोपायेन पश्येयं मैथिलीं जनकात्मजाम् ॥ अदृष्टो राक्षसेन्द्रेण रावणेन दुरात्मना ॥ ३७ ॥
न विनश्येत्कथं कार्यं [18]रामस्य विदितात्मनः ॥ एकामे[19]कश्च पश्येयं रहिते जनकात्मजाम् ॥ ३८ ॥
[20]भूताश्चार्था [21]विपद्यन्ते देशकालविरोधिताः ॥ विक्लबं दूतमासाद्य तमः सूर्योदये यथा ॥ ३९ ॥

च्छानच् ॥ २३—३० ॥ एवं विचार्य नायमेतद्विचारकाल इत्यनुशेते—यावदिति ॥ यावत् यदा । जीवति वा न वेति वैदेहीं जानामि । तत्रैव काले तां जनकात्मजां दृष्ट्वा चिन्तयिष्यामि । यद्वा यावच्छब्दोवधारणे । जानाम्येव जीवति वा नवेति जानाम्येव । यदि जीवति तदा तां जनकात्मजां दृष्ट्वा तत्रैव तत्काल एव । चिन्तयिष्यामीत्यन्वयः ॥ ३१ ॥ चिन्तयामास वैदेहीदर्शनोपायमिति शेषः ॥ ३२—३४ ॥ लक्ष्यालक्ष्येति लक्ष्यशरीरत्वे राक्षसा गृह्णीयुः । अलक्ष्यशरीरत्वे सर्वा लङ्का न विचेतुं शक्या । कृत्यं साधयितुं प्रवेष्टुं कृत्यसाधनाय प्रवेष्टुं । प्राप्तकालं युक्तं ॥३५॥ विनिश्चित्य सीतान्वेषणप्रकारं विनिश्चित्य । मुहुर्मुहुस्तमेव चिन्तयामासेत्यर्थः ॥३६—३७॥ एकश्च पश्येयमिति अत्रापि कथमित्यनुषञ्जनीयं । रहिते एकान्ते ॥३८॥ पण्डितेन मुहुर्मुहुर्विचार्य कार्याणि कर्तव्यानि नतु पण्डितमानिना सकृद्विचार्य कर्तव्यानि तथासति

रिपुंचनिरीक्ष्यज्ञात्वावानरश्चिन्तयामासेतिसंबन्धः ॥ २३ ॥ **रामानु०** आगत्यापीति । अत्रापिशब्देनदुस्तरसागरलङ्घनपूर्वकमागमनमेवदुर्घटमितिसूच्यते ॥ २७ ॥ **रामानु०** सःसालगिरिभूविदलनादिपुरुषपराक्रमइत्यर्थः ॥ **स०** राघवःकिंकरिष्यतीत्येतल्लङ्कास्तुत्यर्थं । नतुरामस्यासामर्थ्याभिप्रायं । **ति०** अविषमांनविद्यतेविषमायतस्तां ॥२८॥ **रामानु०** सान्त्वस्यावकाशाभाव आसुरप्रकृतित्वात् । दानस्यावकाशाभावोऽर्थोपचितत्वात् । भेदस्यावकाशाभावो बलदर्पितत्वात् । युद्धस्यावकाशाभावो बुद्धिपराक्रमयुक्तत्वात् ॥ २९ ॥ **स०** आगत्यापीति पूर्वमङ्गीकृत्य सर्वेषामागमनमुक्तं । वस्तुतस्तदपि नसंभवतीत्याह—चतुर्णामिति ॥३०॥ **ति०** रामस्याभ्युदयं तदभ्युदयरूपसीतान्वेषणोपायं ॥ ३२ ॥ **रामानु०** विनिश्चस्यमुहुर्मुहुरित्यनेन समुद्रलङ्घनादपि लङ्काप्रवेशस्यदुष्करत्वंद्योत्यते ॥ ३६ ॥ **ती०** पृषदंशकमात्रः पृषान्मूषिकान्दशतीतिपृषदंशोमार्जारः । ' ओतुर्बिडालोमार्जारःपृषदंशकआखुभुक् ' इत्यमरः ॥ **शि०** वृषदंशकमात्रःवृषाणांमूषकाणांदंशकोमार्जारःतन्मात्रः । " वृषोगव्याखुधर्मयोः " इतिहैमः

[**पा०**] १ ट. राक्षसैर्वीरैः. २ घ. पुष्टां. ३ घ. शूलमुद्गरपाणिभिः. ४ ग. आगताश्चापि. ५ ग. सुरासुरैः. ६ ङ. झ. ञ. ट. इमांत्वविषमां. ७ क. ख. घ.—ट. लंकांदुर्गां. ८ ङ. च. छ. ञ. ट. सुमहाबाहुः. ९ सान्त्रस्तु. १० क. ग. ध्वधिगम्यते. ११ ङ. ञ. ट. तरस्विनां. १२ ञ. तदैव. १३ ख. ङ. झ. ञ. ट. गिरेःशृङ्गे. १४ च. छ. ज. स्थितःश्रीमान्. १५ ङ. झ. त्रामस्याभ्युदयंततः. १६ ङ.—ट. महौजसो. १७ झ. विनिश्चस्य. १८ क. रामस्याक्लिष्टकर्मणः. १९ झ. ञ. मेकस्तु. २० ग. च. ज. ञ. भूतार्थाश्च. २१ ङ. झ. विनश्यन्ति.

अर्थानर्थान्तरे बुद्धिर्निश्चिताऽपि न शोभते ॥ घातयन्ति हि कार्याणि दूताः पण्डितमानिनः ॥४०॥
न विनश्येत्कथं कार्यं वैक्लव्यं न कथं भवेत् ॥ लङ्घनं च समुद्रस्य कथं नु न वृथा भवेत् ॥ ४१ ॥
मयि दृष्टे तु रक्षोभी रामस्य विदितात्मनः ॥ भवेद्व्यर्थमिदं कार्यं रावणानर्थमिच्छतः ॥ ४२ ॥
न हि शक्यं क्वचित्स्थातुमविज्ञातेन राक्षसैः ॥ अपि राक्षसरूपेण किमुतान्येन केनचित् ॥ ४३ ॥
वायुरप्यत्र न ज्ञातश्चरेदिति मतिर्मम ॥ न ह्यस्त्यविदितं किंचिद्राक्षसानां बलीयसाम् ॥ ४४ ॥
इहाहं यदि तिष्ठामि स्वेन रूपेण संवृतः ॥ विनाशमुपयास्यामि भर्तुरर्थश्च हीयते ॥ ४५ ॥
तदहं स्वेन रूपेण रजन्यां ह्रस्वतां गतः ॥ लङ्कामधिपतिष्यामि राघवस्यार्थसिद्धये ॥ ४६ ॥
रावणस्य पुरीं रात्रौ प्रविश्य सुदुरासदाम् ॥ विचिन्वन्भवनं सर्वं द्रक्ष्यामि जनकात्मजाम् ॥ ४७ ॥
इति संचिन्त्य हनुमान्सूर्यस्यास्तमयं कपिः ॥ आचकाङ्क्ष तदा वीरो वैदेह्या दर्शनोत्सुकः ॥ ४८ ॥
सूर्ये चास्तं गते रात्रौ देहं संक्षिप्य मारुतिः ॥ वृषदंशकमात्रः सन्बभूवाद्भुतदर्शनः ॥ ४९ ॥
प्रदोषकाले हनुमांस्तूर्णमुत्प्लुत्य वीर्यवान् ॥ प्रविवेश पुरीं रम्यां सुविभक्तमहापथाम् ॥ ५० ॥
प्रासादमालावितताम स्तम्भैः काञ्चनराजतैः ॥ शातकुम्भमयैर्जालैर्गन्धर्वनगरोपमाम् ॥ ५१ ॥
सप्तभूमाष्टभूमैश्च स ददर्श महापुरीम् ॥ तलैः स्फटिकसंकीर्णैः कार्तस्वरविभूषितैः ॥ ५२ ॥

दोषः स्यादित्याह—भूताश्चेति ॥ भूताश्चार्थाः सम्यगुपायप्रयोगान्निष्पन्नप्राया अप्यर्थाः । विक्लबं अधीरं अविमृश्यकारिणं । दूतमासाद्य देशकालविरोधितास्सन्तः । सूर्योदये तमो यथा तम इव तद्दूतस्याविमृश्यकारित्वेन सद्य एव विपद्यन्ते । नश्यन्तीत्यर्थः ॥ ३९ ॥ न केवलं कार्यहानिः किन्तु स्वाम्यादीनां बुद्धिशून्यतापि स्यादित्याह—अर्थेति ॥ अत्रापि विक्लबं दूतमासाद्येत्यनुवर्तते । अर्थानर्थान्तरे अर्थानर्थयोः प्रयोजनसाधनयोः कार्याकार्ययोः । अन्तरे विषये । निश्चिता राज्ञा सचिवैश्च निर्णीता । बुद्धिः । विक्लबं दूतमासाद्य न शोभते अनर्थकारिणी भवतीत्यर्थः । इदमेव समर्थयते—घातयन्तीति ॥ ४० ॥ प्रागुक्तदोषाः स्वस्मिन्कथं न स्युरिति चिन्तयति—न विनश्येदिति ॥ कार्यं रामकार्यं । कथं केनोपायेन न विनश्येत् । किमद्यापराह्ण एव लङ्काप्रवेष्टव्या उत रात्रौ । किमनेनैव महता रूपेण प्रवेष्टव्या उत ह्रस्वेन रूपेणेत्यर्थः । वैक्लव्यं ममापाण्डित्यं कथं न भवेत् ॥ ४१ ॥ अपराह्णे प्रवेशेदोषमाह—मयीति ॥ ४२ ॥ महता रूपेण प्रवेशं निराचष्टे—न हीति ॥ ४३—४४ ॥ स्वेन रूपेण स्वाभाविकमहता रूपेण ॥ ४५ ॥ परिशेषाद्रात्रौ ह्रस्वरूपेणैव प्रवेष्टव्यमित्याह—तदहमिति ॥ ४६—४८ ॥ स्वेन रूपेण वृषदंशकमात्रः बिडालप्रमाणः ॥ ४९ ॥ प्रविवेश प्रवेष्टुमुपक्रान्तः । चतुर्थे सर्गे प्रवेशस्य वक्ष्यमाणत्वात् । लङ्कादर्शनं तु त्रिकूटदर्शनस्थित्या ॥ ५० ॥ काञ्चनराजतैः स्तम्भैः शातकुम्भमयैर्जालैश्च उपलक्षितां । गन्धर्वनगरोपमामिति । गन्धर्वनगरं नाम नानारत्नमयगोपुरप्रासादादियुक्तनगरादिवद्भासमानमभ्रचित्रं तद्वदाश्चर्यावहामित्यर्थः । यथोक्तं " अनेन रत्नाकृति खे विराजते पुरं पताकाध्वजतोरणान्वितम् । यदा तदा हस्तिमनुष्यवाजिनां पिबत्यसृग्भूरि रणे वसुन्धरा" इति॥५१॥ सप्तभूमाष्टभूमैश्चेति । भूमिशब्देनआसनशयनादियो-

॥ ३९ ॥ रामानु० अभ्रंलिहत्वातिविचित्रत्वाभ्यांगन्धर्वनगरौपम्यं ॥ स्फटिकसंकीर्णैःकार्तस्वरविभूषितैश्चतलैरुपलक्षितैः सप्तभौमाष्टभौमाः भूमिषुभवन्तीतिभौमानिस्थलानि । सप्त भौमानियेषांतेसप्तभौमाः । एवमष्टभौमाः । सप्तभौमाश्चाष्टभौमाश्चतैः । प्रासादैरितिशेषः । तैरुपलक्षितांपुरींददर्शेतियोजना ॥ ५१—५२ ॥

[पा०] १ घ. ङ. झ. ट. घातयन्तीह. २ ख. घ. ङ. झ. ञ. ट. नभवेद्वृथा. ३ ग. ङ. च. छ. झ. ञ. नाज्ञातः. ४ ङ. झ. ट. ह्यत्राविदितं. ५ झ. ञ. ट. हास्यति. ६ क. ख. ग. ङ. च. ज. झ. ट. लङ्कामभि. ७ च. छ. ज. ञ. रम्यां. ८ ङ.—ट. प्रविश्यभवनं. ९ ङ. च. झ. ञ. ट. निश्चित्य. १० क. च. छ. ज. हरिः. ११ क. ङ. झ. ञ. ट. मात्रोथ. १२ क. घ. च.—ट. मुत्पत्य. १३ ङ. च. छ. ञ. ट. प्रविभक्त. १४ ङ. झ. ञ. ट. काञ्चनसंनिभैः. १५ झ. सप्तभौमाष्टभौमैश्च. १६ ङ.—ट. स्थलैः. १७ च. छ. ज. ञ. परिष्कृतैः.

वैडूर्यमणिचित्रैश्च मुक्ताजालविभूषितैः ॥ तलैः शुशुभिरे तानि भवनान्यत्र रक्षसाम् ॥ ५३ ॥
काञ्चनानि विचित्राणि तोरणानि च रक्षसाम् ॥ लङ्कामुद्द्योतयामासुः सर्वतः समलङ्कृताम् ॥ ५४ ॥
अचिन्त्यामद्भुताकारां दृष्ट्वा लङ्कां महाकपिः ॥ आसीद्विषण्णो हृष्टश्च वैदेह्या दर्शनोत्सुकः ॥ ५५ ॥
स पाण्डुरोद्विद्धविमानमालिनीं महार्हजाम्बूनदजालतोरणाम् ॥
यशस्विनीं रावणबाहुपालितां क्षपाचरैर्भीमबलैः समावृताम् ॥ ५६ ॥
चन्द्रोपि साचिव्यमिवास्य कुर्वंस्तारागणैर्मध्यगतो विराजन् ॥
ज्योत्स्नावितानेन वितत्य लोकमुत्तिष्ठते नैकसहस्ररश्मिः ॥ ५७ ॥
शङ्खप्रभं क्षीरमृणालवर्णमुद्गच्छमानं व्यवभासमानम् ॥
ददर्श चन्द्रं स हरिप्रवीरः पोप्लूयमानं सरसीव हंसम् ॥ ५८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्वितीयः सर्गः ॥ २ ॥

तृतीयः सर्गः ॥ ३ ॥

लङ्काभिमानिन्यामहाराक्षस्या निशि लङ्कांप्रविशतोहनुमतः प्रत्यक्षीभूय साधिक्षेपंप्रतिषेधनपूर्वकं स्वपाणितलेन ताडनं ॥ १ ॥ ततोहनुमता नारीतिकरुणया वाममुष्टिनामन्दंताडने पतितविह्वलयातया तंप्रति कपिना स्वपराजयेसति लङ्काविनाशप्रतिपादकब्रह्मवचननिवेदनेन नगरान्तःप्रवेशाभ्यनुज्ञानं ॥ २ ॥

स लम्बशिखरे लम्बे लम्बतोयदसन्निभे ॥ सत्त्वमास्थाय मेधावी हनुमान्मारुतात्मजः ॥ १ ॥

ग्यं तलमुच्यते । सप्त भूमयो येषां ते सप्तभूमाः । "कृष्णोक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते" इत्यच् समासान्तः । एवमष्टभूमाः । सप्तभूमादिशब्देन तादृशाः प्रासादविशेषा उच्यन्ते । यद्वा प्रासादैरिति शेषः । तैरुपलक्षितां ॥ ५२—५४ ॥ विषण्णः हृष्टश्चेति । अचिन्त्या दुष्प्रवेशेति च विषण्णः । यतोद्भुताकारा अतो विस्मयनीयतया हृष्टः ॥ ५५ ॥ स इति पूर्वश्लोकेनायमेकान्वयः । सुधाधवलनिम्नोन्नतविमानाकारभवनमालिनीमित्यर्थः ॥ ५६ ॥ इदानीं चन्द्रोदयकाल इत्याह—चन्द्रोपीति ॥ मध्यगतः सन्निधानात्तारागणमध्यगतः । तारागणैरिति सहयोगे तृतीया । ज्योत्स्नावितानेन लोकं वितत्य व्याप्य । उत्तिष्ठते आविर्भवति स्म । "उदोनूर्ध्वकर्मणि" इत्यात्मनेपदं ॥ ५७—५८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वितीयः सर्गः ॥ २ ॥

लम्बे लम्बाख्ये । लम्बशिखरे लम्बगिरिशिखरे इति

रामानु० सपाण्डुरेत्यस्यदृष्ट्वेति पूर्वेणसंबन्धः । पाण्डुरोद्विद्धविमानमालिनीं सुधाधौतोन्नतसप्तभूमगृहमालिनीं । "विमानोस्त्रीदेवयानेसप्तभूमेचसद्मनि" इतिवैजयन्ती ॥ ५६ ॥ **ति०** मध्यगतःखमध्यगतः । अनेकसहस्रेत्यनेनपूर्णत्वं । अनेकेत्यस्यैवसहस्रेत्यनेनविवरणं । उत्तिष्ठते आर्षस्तङ् । ज्योत्स्नावितानेनलोकान्वितत्यआवार्यसम्यगवलोकनसाधनतयाअस्यहनूमतःसाचिव्यंसाहाय्यंकुर्वन्निव ॥ **ति०** ननुखमध्यगतस्यप्रदोषेउदयोष्टम्यांनतदापूर्णत्वं । पूर्णस्यतुनखमध्यगतस्योदयइतिचेन्न । शुक्लैकादश्यांखमध्यसमीपगतत्वेनमध्यगतत्वोपचारात् । पूर्णत्वंचपूर्णकल्पत्वेनव्यवहृतं । यद्वानेकन्यूनाः सहस्रंरश्मयोयस्येतिमध्यमपदलोपितत्पुरुषगर्भोबहुव्रीहिः । अतएवरात्रिशेषेहनूमत्प्रशोकवनिकास्थेसीतासविधेरावणस्यागमनकालेदीपिकावर्णनंकृतं । तेनहितदाचन्द्रास्तानुमानं । साचेयंमार्गशीर्षस्य । फाल्गुनेलङ्कांप्रविष्टायाःसीतायाः "वर्ततेदशमोमासोद्वौतुशेषौऽवबुध्यम" इतिहनूमन्तंप्रतिवचनात् । हरणदिनएवचसीतायालङ्काप्रवेशनंरामभयादितिस्पष्टमेव । **रामानु०** सागरमैनाकदिवाकरादिवच्चन्द्रोपिसाचिव्यंकुर्वन्प्रादुरभूदित्यपिशब्देनावगम्यते ॥ ५७ ॥ इतिद्वितीयःसर्गः ॥ २ ॥

रामानु० पूर्वसर्गोक्तंलङ्काप्रवेशोपक्रमंविस्तरेणाह । सलंबशिखरइत्यादिना । सः सागराक्लेशतरणेनप्रसिद्धः । महासत्त्वःसमुद्र-

[पा०] १ ङ. झ. ट. तैस्तैःशुशुभिरे. २ घ. भवनान्यपि. ३ ङ. छ. ज. झ. ट. पाण्डरावि्द्ध. ४ झ. ट. सुपालितां. क. दुरासदां. ५ ङ.—ट. लोकानुत्तिष्ठते. ६ क.—ट. कपिप्रवीरः.

निशि लङ्कां महासत्त्वो विवेश कपिकुञ्जरः ॥ रम्यकाननतोयाढ्यां पुरीं रावणपालिताम् ॥ २ ॥
शारदाम्बुधरप्रख्यैर्भवनैरुपशोभिताम् ॥ सागरोपमनिर्घोषां सागरानिलसेविताम् ॥ ३ ॥
सुपुष्टबलसंघुष्टां यथैव विटपावतीम् ॥ चारुतोरणनिर्यूहां पाण्डुरद्वारतोरणाम् ॥ ४ ॥
भुजगाचरितां गुप्तां शुभां भोगवतीमिव ॥ तां सविद्युद्घनाकीर्णां ज्योतिर्मार्गनिषेविताम् ॥ ५ ॥
मन्दमारुतसंचारां यथेन्द्रस्यामरावतीम् ॥ शातकुम्भेन महता प्राकारेणाभिसंवृताम् ॥ ६ ॥
किङ्किणीजालघोषाभिः पताकाभिरलङ्कृताम् ॥ आसाद्य सहसा हृष्टः प्राकारमभिपेदिवान् ॥ ७ ॥
विस्मयाविष्टहृदयः पुरीमालोक्य सर्वतः ॥ ८ ॥
जाम्बूनदमयैर्द्वारैर्वैडूर्यकृतवेदिकैः ॥ वज्रस्फटिकमुक्ताभिर्मणिकुट्टिमभूषितैः ॥
तप्तहाटकनिर्यूहै राजतामलपाण्डुरैः ॥ ९ ॥
वैडूर्यकृतसोपानैः स्फाटिकान्तरपांसुभिः ॥ चारुसंजवनोपेतैः खमिवोत्पतितैः शुभैः ॥ १० ॥
क्रौञ्चबर्हिणसंघुष्टै राजहंसनिषेवितैः ॥ तूर्याभरणनिर्घोषैः सर्वतः प्रतिनादिताम् ॥ ११ ॥
वस्वोकसाराप्रतिमां तां वीक्ष्य नगरीं ततः ॥ खमिवोत्पतितुं कामां जहर्ष हनुमान्कपिः ॥ १२ ॥
तां समीक्ष्य पुरीं रम्यां राक्षसाधिपतेः शुभाम् ॥ अनुत्तमार्द्धियुतां चिन्तयामास वीर्यवान् ॥१३॥
नेयमन्येन नगरी शक्या धर्षयितुं बलात् ॥ रक्षिता रावणबलैरुद्यतायुधधारिभिः ॥ १४ ॥
कुमुदाङ्गदयोर्वापि सुषेणस्य महाकपेः ॥ प्रसिद्धेयं भवेद्भूमिर्मैन्दद्विविदयोरपि ॥ १५ ॥

चाहुः । यद्वा लम्बे लम्बमान इव स्थिते । लम्बशिखरे त्रिकूटशिखरे । सत्त्वं व्यवसायं । धैर्यमिति यावत् । विवेश प्राप ॥ १—३ ॥ विटपावतीं अलकां । निर्यूहो मत्तवारणः । पाण्डुरद्वारतोरणां पाण्डुरे द्वारतोरणे यस्यास्तां ॥४—७॥ विस्मयाविष्टहृदयः । अभूदिति शेषः ॥ ८ ॥ पुनर्हर्षहेतूनाह—जाम्बूनदमयैरित्यादिना ॥ जाम्बूनदमयैर्द्वारैरित्यादौसहयोगे तृतीया । वज्रस्फटिकमुक्ताभिरित्यत्रापि कृतवेदिकैरिति संबध्यते । राजतामलपाण्डुरैः अवयवैः ॥९॥ स्फाटिकान्तरपांसुभिः स्फटिकमयाङ्गणपांसुभिः । संजवनं चतुश्शालं ॥ १०—११ ॥ वस्वोकसारा अलका । यद्वा वस्वोकसारा पूर्वदिगवस्थिताशक्रपुरी । " वस्वोकसारा शक्रस्य पूर्वस्यां दिशि वै पुरी " इतिपुराणवचनात् ॥ १२—१४ ॥ प्रसिद्धेयमिति । इयं लङ्का विदिता

लङ्घनादावप्रतिहतशक्तिः । हनुमान्लंबेलंबमानाकारे । लंबतोयदसंनिभेलंबशिखरे लंबपर्वतशिखरे । मेधावीतत्कालोचितकर्तव्यविषयप्रज्ञायुक्तःसन् । सत्त्वमास्थाय लङ्काप्राप्तिमात्रोपयुक्तलङ्घनशक्तिमास्थायनिशिविवेशेतिसंबन्धः ॥ **ति०** लंबशिखरेऽवतत्तशिखरेलंबेलंबाख्यपर्वते ॥ १—२ ॥ **रामानु०** सागरोपमनिर्घोषांसागरनिर्घोषोपमनिर्घोषां । विटपावतींअलकां । 'क्षयःपुण्यजनानांस्यादलकाविटपावती' इतिवचनात् । तोरणस्यनिर्यूहःतोरणनिर्यूहः । चारुःतोरणनिर्यूहोयस्यास्तां । प्राकारशब्देनप्राकारसमीपोलक्ष्यते । ' अद्वारेणमहाबाहुःप्राकारमभिपुप्लुवे ' इत्युपरिवक्ष्यमाणत्वात् ॥ २—८ ॥ **ति०** चण्डमारुतानांपरिवहादीनांशब्दोयस्यांतादृशींअमरावतीमिवस्थितां । अत्रामराःसन्त्यस्यामित्यमरावतीशब्दोः । असंज्ञायामपि ' मतौबह्वचः ' इत्यार्षोदीर्घः । नत्विहेन्द्रपुर्यमरावती । उक्तलक्षणाभावात् । लङ्कायाउक्तसादृश्यंचसालङ्काररक्षसवत्त्वाद्बलवद्घोषबाहुल्याच्चेतिकतकः ॥ **शि०** अमरावतींयथा संपत्त्याइन्द्रपुरीसदृशीं ॥ ६ ॥ **शि०** अन्येन रामभिन्नेनजनेन । बलात्पराक्रमात्धर्षयितुंनशक्या ॥ १४ ॥ **रामानु०** प्रसिद्धा दुष्प्रवेशत्वेनप्रसिद्धाइयंनगरीकुमुदाङ्गदयोःमहाकपेःसुषेणस्यापिमैन्दद्विविदयोरपिभूमिःविषयोभवेत् । **ति०**

[**पा०**] १ च. छ. ज. पाठेषु. सुपुष्टबलसंघुष्टामित्यर्धस्यस्थाने. सुपुष्टबलसंघुष्टांगुप्तांरक्षोगणैर्भृशं । वस्वोकसारप्रतिमांयथैव विटपावतीं । इत्येकःश्लोकोदृश्यते. ङ. झ. सुपुष्टबलसंपुष्टां. ग. सुदुर्गोराक्षसैर्गुप्तां. क. सुपुष्पफलसंयुक्तां. २ ञ. पाण्डुरध्वजतोरणां. ३ च. छ. ञ. गुहां. ४ ग. ङ.—ट. ज्योतिर्गण. ५ ख. ग. ङ.—ट. चण्डमारुतनिर्ह्रादां. ६ क. ङ. झ. ञ. ट. यथाचाप्यमरावतीं. ग. च. छ. ज. यथावदमरावतीं. ७ ञ. कृततोरणैः. ८ ख. ङ. झ. ञ. ट. मणिस्फटिक. ९ क. च. छ. ज. कुट्टिमवेदिकैः. १० ङ. झ. ट. परिनादितां. ११ क. ग.—ट. समीक्ष्य. १२ क. ख. ङ. छ. ट. खमिवोत्पतितांलङ्कां. १३ क. ख. ङ. झ. ञ. ट. लङ्कां. १४ क. ङ. झ. ञ. ट. मृद्धिमतीं. च. छ. ज. मृद्धियुक्तां. १५ क. वानरः. १६ ङ. झ. ट. पाणिभिः. १७ क. ख. महात्मनः.

विवस्वतस्तनूजस्य हरेश्च कुशपर्वणः ॥ ऋक्षस्य केतुमालस्य मम चैव गतिर्भवेत् ॥ १६ ॥
समीक्ष्य तु महाबाहू राघवस्य पराक्रमम् ॥ लक्ष्मणस्य च विक्रान्तमभवत्प्रीतिमान्कपिः ॥ १७ ॥
तां रत्नवसनोपेतां गोष्ठागाराश्वतंसकाम् ॥ यत्रागारस्तनीमृद्धां प्रमदामिव भूषिताम् ॥ १८ ॥
तां नष्टतिमिरां दीप्तैर्भास्वरैश्च महागृहैः ॥ नगरीं राक्षसेन्द्रस्य ददर्श स महाकपिः ॥ १९ ॥
अथ सा हरिशार्दूलं प्रविशन्तं महाबलम् ॥ नगरी स्वेन रूपेण ददर्श पवनात्मजम् ॥ २० ॥
सा तं हरिवरं दृष्ट्वा लङ्का रावणपालिता ॥ स्वयमेवोत्थिता तत्र विकृताननदर्शना ॥ २१ ॥
पुरस्तात्कपिवर्यस्य वायुसूनोरतिष्ठत ॥ मुञ्चमाना महानादमब्रवीत्पवनात्मजम् ॥ २२ ॥
कस्त्वं केन च कार्येण इह प्राप्तो वनालय ॥ कथयस्वेह यत्तत्त्वं यावत्प्राणा धरन्ति ते ॥ २३ ॥
न शक्यं खल्वियं लङ्का प्रवेष्टुं वानर त्वया ॥ रक्षिता रावणबलैरभिगुप्ता समन्ततः ॥ २४ ॥
अथ तामब्रवीद्वीरो हनुमानग्रतः स्थिताम् ॥ कथयिष्यामि ते तत्त्वं यन्मां त्वं परिपृच्छसि ॥ २५ ॥
का त्वं विरूपनयना पुरद्वारेऽवतिष्ठसि ॥ किमर्थं चापि मां रुद्ध्वा निर्भर्त्सयसि दारुणा ॥ २६ ॥
हनुमद्वचनं श्रुत्वा लङ्का सा कामरूपिणी ॥ उवाच वचनं क्रुद्धा परुषं पवनात्मजम् ॥ २७ ॥
अहं राक्षसराजस्य रावणस्य महात्मनः ॥ आज्ञाप्रतीक्षा दुर्धर्षा रक्षामि नगरीमिमाम् ॥ २८ ॥
न शक्या मामवज्ञाय प्रवेष्टुं नगरी त्वया ॥ अद्य प्राणैः परित्यक्तः स्वप्स्यसे निहतो मया ॥ २९ ॥

भवेत् ॥ १५ ॥ गतिस्तु सुग्रीवस्य कुशपर्वणः केतुमालस्य मम चैव भवेत् । पूर्वं नीलादीनामेव गतिरुक्ता । अत्र त्वन्येषामित्युक्तिश्चिन्ताप्रकारविशेषः ॥ १६—१७ ॥ तां रत्नेत्यत्र ददर्शेत्यपकृष्यते । नत्वेकं वाक्यं श्लोकद्वयं तच्छब्दद्वयप्रयोगात्प्रथमे श्लोके स्त्रीसाम्योक्तेश्च ॥ १८—२३ ॥ अभिगुप्ता समावृतेत्यर्थः ।

प्रसिद्धाप्रकर्षेण सिद्धगतिका ॥ १५ ॥ **रामानु०** अत्रइयमित्यनुषज्यते । गतिः विषयः भवेत् । ममचेतिपश्चान्निर्देशेनसर्वोत्तरेणापिहनुमतास्वस्यनैच्यमनुसंहितमित्यवगम्यते ॥ **ति०** कुशपर्वणइति । कुशपर्वसदृशलोमवतइत्यर्थकमृक्षस्यविशेषणं । अतिदीर्घकठोरलोमावृतत्वात्कपिमुख्यस्येतिविशेषणंच । तस्यैवममचैवगतिः अस्यामितिशेषः ॥ १६ ॥ **रामानु०** विक्रान्तंविक्रमं । भावेनिष्ठा । प्रीतिमानभवत् । रामलक्ष्मणाभ्यामनायासेनजेतुंशक्येतिमत्प्रीतिमानभूदित्यर्थः ॥ **स०** सर्वेषामेषां विनारामावलंबेनेयंजेतुंनशक्येत्येतत्प्रसंगात्स्मारितंरामलक्ष्मणयोर्विक्रमंस्मृत्वातुतोषेत्याह—समीक्ष्येति ॥ १७ ॥ **रामानु०** तामिति । अत्रददर्शेत्यपकृष्यते । यद्वाएकस्यतच्छब्दस्यप्रसिद्धिपरत्वेनश्लोकद्वयमेकंवाक्यं ॥ **ति०** रत्नवसनोपेतां रत्नप्राकारवाससंच । गोष्ठान्यगाराणिचावतंसोयस्यास्तां । गोष्ठंगोशाला । इदंवाजिशालादेरप्युपलक्षणं । यत्राणिप्राकारोपरिस्थापितानिक्षेपण्यादीनि । तद्वृहस्तनीं ॥ १८ ॥ **ति०** तांप्रसिद्धांलङ्कांभास्वरैश्चमहाग्रहैः । चाचन्द्रकिरणैः ॥ १९ ॥ **रामानु०** स्वेनरूपेणअधिदेवतारूपेण ॥ २० ॥ **रामानु०** अतिष्ठततस्मैस्वात्मानंप्रदर्शितवती । ' प्रकाशनस्थेयाख्ययोश्च ' इत्यात्मनेपदं ॥ २२ ॥ **रामानु०** तेतवप्राणाःयावद्धरन्तिप्रियन्तेतावत्तत्त्वं तत्कथयस्वकथय । "वृङ्अवसाने" विकरणादिप्रत्ययआर्षः । यावत्प्राणान्हरामितेइतिवापाठः ॥ २३ ॥ **रामानु०** नशक्यमिति । लिङ्गसामान्येनपुंसकं । तथाचोक्तं भगवताभाष्यकारेण—' श्वमांसेनापिशक्यंक्षुदपहन्तुंइति । रावणबलैःसमन्ततःअभिगुप्तासमन्ततःसंवृता । अतएवरक्षिता ॥ **शि०** किंच अभितःचतुर्दिक्षुगुप्ताः राक्षसविजातीयनिरीक्षणार्थंमलक्ष्यरूपेणस्थितारक्षसायस्मात्सा ॥ **स०** त्वांहल्लाऽन्तर्गच्छेयमित्याशापितवमास्त्रितिवाह—अभिगुप्तेति । अहंअन्ततःमृत्योस्सकाशादभिगुप्ताआसंअस्मि । अतोनत्वयावध्या ॥ २४ ॥ **ति०** अथतयापृष्टोहनुमांस्तांप्रतितत्प्रश्नोत्तरकथनं प्रतिज्ञायसुरसावदेषापूज्यावासिंहिकावद्वध्यावेतिनिर्णेतुंपृच्छति—कात्वमिति ॥ २६ ॥ **रामानु०** आज्ञाप्रतीक्षा आज्ञानुवर्तिनी

[**पा०**] १ ङ. झ. ञ. ट. कपिमुख्यस्य. २ ङ.—ज. ञ. ट. समीक्ष्यच. ३ ङ. झ. ञ. ट. महाबाहोः. ४ च. छ. ज. लक्ष्मणस्यापि. ५ ङ. झ. ञ. ट. रावतंसिकां. ६ ख. ङ. झ. ञ. ट. दीप्तैः. च. छ. ज. दीप्तांभास्वरैः. क. दीप्तैर्भास्वरैर्भवनैः शुभैः. ७ झ. महाग्रहैः. ८ ङ.—ञ. सददर्श. क. घ. ददर्शहनुमान्कपिः. ९ ङ. झ. ञ. ट. महाकपिं. १० क.—ट. पुरस्तात्तस्यवीरस्य. ११ क.—ङ. नशक्या. ञ. अशक्यं. १२ ङ. ज. ट. यत्तत्त्वं. क. तत्त्वेन. झ. तत्तत्त्वं. १३ क.—ट. द्वारेऽवतिष्ठसे. १४ क. ख. च. छ. ज. क्रुद्धा. ङ. ञ. ट. क्रोधान्निर्भर्त्सयसि. १५ क. ङ.—ट. दारुणे. १६ क. ग. ङ.—ञ. शक्यं. १७ ङ. ञ. ट. नगरीमिमां. क. वानरत्वया. १८ च. छ. ज. प्राणान्परित्यज्य.

अहं हि [1]नगरी लङ्का स्वयमेव प्लवंगम ॥ सर्वतः परिरक्षामि [2]ह्येतत्ते कथितं मया ॥ ३० ॥
लङ्काया वचनं श्रुत्वा [3]हनुमान्मारुतात्मजः ॥ [4]यत्नवान्स हरिश्रेष्ठः स्थितः [5]शैल इवापरः ॥ ३१ ॥
स तां स्त्रीरूपविकृतां दृष्ट्वा वानरपुङ्गवः ॥ आबभाषेऽथ मेधावी [6]सत्त्ववान्प्लवगर्षभः ॥ ३२ ॥
द्रक्ष्यामि नगरीं लङ्कां साट्टप्राकारतोरणाम् ॥ [निर्विशङ्कमिमं लोकं पश्यन्त्यास्तव सांप्रतम्] ॥
[7]इत्यर्थमिह संप्राप्तः परं कौतूहलं हि मे ॥ ३३ ॥
वनान्युपवनानीह लङ्कायाः काननानि च ॥ सर्वतो गृहमुख्यानि द्रष्टुमागमनं हि मे ॥ ३४ ॥
तस्य तद्वचनं श्रुत्वा लङ्का सा कामरूपिणी ॥ [8]भूय एव पुनर्वाक्यं बभाषे परुषाक्षरम् ॥ ३५ ॥
मामनिर्जित्य दुर्बुद्धे राक्षसेश्वरपालिताम् ॥ न शक्यमद्य [9]ते द्रष्टुं पुरीयं वानराधम ॥ ३६ ॥
ततः स [10]कपिशार्दूलस्तामुवाच निशाचरीम् ॥ दृष्ट्वा पुरीमिमां भद्रे पुनर्यास्ये यथागतम् ॥ ३७ ॥
ततः कृत्वा महानादं सा वै लङ्का [11]भयावहम् ॥ तलेन वानरश्रेष्ठं ताडयामास वेगिता ॥ ३८ ॥
ततः स [12]कपिशार्दूलो लङ्कया ताडितो भृशम् ॥ ननाद सुमहानादं [13]वीर्यवान्पवनात्मजः ॥ ३९ ॥
ततः संवर्तयामास वामहस्तस्य सोङ्गुलीः ॥ मुष्टिनाऽभिजघानैनां हनुमान्क्रोधमूर्च्छितः ॥ ४० ॥
स्त्री चेति मन्यमानेन नातिक्रोधस्स्वयं कृतः ॥ ४१ ॥
सा तु तेन प्रहारेण विह्वलाङ्गी निशाचरी ॥ पपात सहसा भूमौ विकृताननदर्शना ॥ ४२ ॥
ततस्तु [14]हनुमान्प्राज्ञस्तां दृष्ट्वा विनिपातिताम् ॥ कृपां चकार तेजस्वी मन्यमानः [15]स्त्रियं तु ताम् ॥४३॥
ततो वै [16]भृशसंविग्ना लङ्का सा गद्गदाक्षरम् ॥ उवाच गर्वितं वाक्यं हनुमन्तं प्लवङ्गमम् ॥ ४४ ॥
प्रसीद सुमहाबाहो त्रायस्व हरिसत्तम ॥ समये सौम्य तिष्ठन्ति सत्त्ववन्तो महाबलाः ॥ ४५ ॥
अहं तु नगरी लङ्का स्वयमेव प्लवङ्गम ॥ निर्जिताऽहं त्वया वीर विक्रमेण महाबल ॥ ४६ ॥
[17]इदं तु [18]तथ्यं [19]शृणु वै ब्रुवन्त्या मे हरीश्वर ॥ [20]स्वयंभुवा पुरा दत्तं वरदानं यथा मम ॥ ४७ ॥

अतो न रक्षितेत्यनेन पुनरुक्तिः ॥ २४—३३ ॥ उपवनानि गृहोद्यानानि । काननानि शून्यारण्यानि ॥ ३४ ॥ भूयः अतिशयेन । परुषाक्षरमित्यन्वयः ॥ ३५ ॥ शक्यमित्येतदव्ययं । तदाह कालिदासः—" शक्यमरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम् । अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः " इति । पुरीरूपं वस्तु शक्यमिति शक्यपुर्योस्सामानाधिकरण्यं वा ॥ ३६ ॥ यास्ये यास्यामि । इत्युवाचेति संबन्धः ॥ ३७ ॥ वेगिता संजातवेगा ॥ ३८—३९ ॥ संवर्तयामास संकोचयामास ॥ ४०—४४ ॥ समये स्त्रीवधवर्जनव्यवस्थायां । सत्त्ववन्तः धैर्यवन्तः ॥ ४५ ॥ अहं त्वित्यर्धं भिन्नं वाक्यं । एकवाक्यत्वेऽ-

---

॥ २८ ॥ **रामानु०** स्वयमेवसर्वतःसर्वंपरिरक्षामीतिसंबन्धः ॥ ३० ॥ **रामानु०** इत्यर्थंएतदर्थं ॥ ३३ ॥ **स०** वानराधमेति संबोधितेनापि भद्रेइतिसंबोधनं समर्थेनसता कार्यतएवप्रतीकारःकार्यो नवाचेतिदर्शयितुं ॥ ३७ ॥ **स०** क्रोधःमूर्च्छितः मध्यमावस्थांप्राप्तोयस्मिन् । अनुद्रिक्तइतियावत् । एवंचेदेवपूर्वोत्तरग्रन्थस्यारस्यंभवति ॥ ४० ॥ **स०** कृपांचकार पुनर्नताड ॥ ४४ ॥ **स०** सत्त्ववन्तः निश्चयवन्तः । ' सत्त्वमात्मलेव्यवसायेच ' इतिविश्वः ॥ ४५ ॥

[**पा०**] १ ङ. नगरींलङ्कां. २ ङ. छ.—ट. अतस्ते. ३ च. छ. ज. हनुमान्पवनात्मजः. घ. हनुमान्कपिकुञ्जरः. ४ घ. वीर्यवान्स. ५ घ. स्थितोगिरिरिवा. ६ घ. वीर्यवान्. ७ इदमर्धं. क. ग. च. छ. ज. ञ. पाठेषुदृश्यते. क. निर्विशङ्कमिमांलङ्कां. ८ ग. एतदर्थं. ९ क. भृशमेवपुनः. ख. ग. भूयएवहिसावाक्यं. १० ङ. ञ. ट. शक्याह्यय. ११ ङ.—ट. हरिशार्दूलः. १२ ङ. झ. ञ. ट. भयंकरं. क. च. छ. ज. भयानकं. १३ च.—ट. हरिशार्दूलो. १४ ङ. झ. ञ. ट. वीर्यवान्मारुतात्मजः. च. छ. ज. वीर्यवान्प्लवगर्षभः. १५ ङ. झ. ञ. न्वीरस्तां. १६ ख. च. ज.—ट. स्त्रियंच. ङ. स्त्रियंकपिः. ग. स्त्रियंत्विमां. १७ ग.—ट. भृशमुद्विग्ना. १८ ग. ङ. छ.—ट. इदंचे. १९ ख. सत्यं. २० ग. ङ. छ. झ. ञ. ट. शृणुमेब्रुवन्त्यावै. २१ क. ग.—च. झ. ञ. ट. स्वयंस्वयंभुवादत्तं.

यदा त्वां वानरः कश्चिद्विक्रमाद्वशमानयेत् ॥ तदा त्वया हि विज्ञेयं रक्षसां भयमागतम् ॥ ४८ ॥
स हि मे समयस्सौम्य प्राप्तोऽद्य तव दर्शनात् ॥ स्वयंभूविहितस्सत्यो न तस्यास्ति व्यतिक्रमः ॥ ४९ ॥
सीतानिमित्तं राज्ञस्तु रावणस्य दुरात्मनः ॥ राक्षसां चैव सर्वेषां विनाशः समुपागतः ॥ ५० ॥
तत्प्रविश्य हरिश्रेष्ठ पुरीं रावणपालिताम् ॥ विधत्स्व सर्वकार्याणि यानि यानीह वाञ्छसि ॥ ५१ ॥
प्रविश्य शापोपहतां हरीश्वरः शुभां पुरीं राक्षसमुख्यपालिताम् ॥
यदृच्छया त्वं जनकात्मजां सतीं विमार्ग सर्वत्र गतो यथासुखम् ॥ ५२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः ॥ ४ ॥

वामपादनिक्षेपपूर्वकमद्वारेणलङ्कांप्रविष्टवताहनुमता नगरान्तर्नानागीतवादित्रश्रवणेनसह विचित्रतरगृहाणां नानाविधायुधाकारधारिरावणमूलबलादीनांचावलोकनं ॥ १ ॥

स निर्जित्य पुरीं श्रेष्ठां लङ्कां तां कामरूपिणीम् ॥ विक्रमेण महातेजा हनुमान्कपिसत्तमः ॥
अद्वारेण महाबाहुः प्राकारमभिपुप्लुवे ॥ १ ॥
[निशि लङ्कां महासत्वो विवेश कपिकुञ्जरः] ॥ प्रविश्य नगरीं लङ्कां कपिराजहितंकरः ॥
चक्रेऽथ पादं सव्यं च शत्रूणां स तु मूर्धनि ॥ २ ॥
प्रविष्टः सत्वसंपन्नो निशायां मारुतात्मजः ॥ स महापथमास्थाय मुक्तापुष्पविराजितम् ॥ ३ ॥

हंशब्दस्य पुनरुक्तिः ॥ ४६–४७ ॥ वरदानस्वरूपमाह —यदेति ॥ अत्र रावणस्य दिग्विजये नन्दिकेश्वरादिभिर्लङ्कायाः सद्यो विनाशशापे दत्ते सा ब्रह्माणं गत्वा प्रार्थयामास । विनाशो मे माभूदिति । स च तस्यै वरमदात् । तव सद्यो विनाशो न भविष्यति । यदा तु वानरस्त्वामभिभविष्यति तदा तु विनाशो भविष्यतीति कथोन्नीयते ॥ ४८—५१ ॥ शापो नन्दिकेश्वरादिकृतः । यदृच्छयेत्यस्य गत इति संबन्धः । यदृच्छयाऽत्र प्राप्तस्त्वमित्यर्थः ॥ ५२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने तृतीयः सर्गः ॥ ३ ॥

अद्वारेणेत्यनेन लङ्कापरिभवो राक्षसैर्न ज्ञातुं शक्य इति द्योत्यते ॥ १ ॥ चक्र इति । शत्रुदेशप्रवेशे प्रथमं सव्यपादः कार्यः स तु शत्रोर्मूर्ध्नि कृतो भवेदिति राजशास्त्रं । अनेन प्रथमं सव्यं पादं लङ्कायां कृतवानित्यर्थः सिद्धः । तदाह बृहस्पतिः " प्रयाणकाले च गृहप्रवेशे विवाहकालेपि च दक्षिणाङ्घ्रिम् । कृत्वाग्रतः

ती० रावणाधिक्षेपक्षुभितनन्दिकेश्वरशापात्सद्यःप्राप्तोपिविनाशः स्वयंभूवरप्रसादाद्वानरास्कन्दनपर्यन्तं प्रतिबद्धइति कथात्रानुसंधेया ॥ ४९ ॥ **ति०** शापोपहतां सत्यसंकल्पभगवद्वचनेन नन्दिकेश्वरशापेनचप्रापितनाशकालां हरीश्वरस्त्वंप्रविश्ययदृच्छया सर्वत्ररावणान्तःपुरपर्यन्तं यथासुखंगतःसन् सतीं अप्रच्युतपातिव्रत्यांजानकींविमार्ग अन्वेषय । अनेनचवचनेन सीताऽकल्मषाऽत्रपुरेवर्ततइत्युपदिष्टम् ॥ ५२ ॥ इतितृतीयः सर्गः ॥ ३ ॥

रामानु० "ग्रामंवानगरंवापिपत्तनंवापरस्यहि । विशेषात्समयेसौम्यनद्वारेणविशेन्नृपः" इत्युक्तप्रकारेणअद्वारेणप्रविष्टवान् ॥ १ ॥ **स०** कपिराजहितंकरः कपीश्वरसुग्रीवायहितकारीत्यर्थः । हितशब्दोपपदात्करोतेः खश्विधायकाभावेपिप्रामाणिकप्रयोगानुसारेणतस्योद्यत्वात् । अतएवकाशिकायां भगंदरइतिरूपसिद्धये 'भगेचदारेः' इत्युक्तं ॥ २ ॥ **रामानु०** महापथं आस्थाय गम्यत्वेना-

[**पा०**] १ क.—ट. पुरींशुभां. २ च. छ. ज. राक्षसराज. ३ क. ग. तां. ४ घ. ङ. झ. ञ. ट. लङ्कांश्रेष्ठां. ५ छ.—ट. न्कपिकुञ्जरः. क. न्मारुतात्मजः. ६ झ. ज. ट. महावीर्यः. ङ. महाकायः. ७ ञ. प्राकारंचसपुप्लुवे. ग. ङ.—झ. ट. प्राकारमवपुप्लुवे. ८ ङ.—ट. पाठेष्विदमर्धदृश्यते. ९ छ. ज. चक्रेच. १० क. शत्रूणामपि. ११ क. घ. ङ. झ. ञ. ट. मुक्तपुष्प.

[[1]सेवितां राक्षसैर्भीमैर्बलिभिः शस्त्रपाणिभिः] ॥ ततस्तु तां पुरीं लङ्कां रम्यामभिययौ कपिः॥४॥
हसितोत्कृष्टनिनदैस्तूर्यघोषपुरस्सरैः [2]॥ वज्राङ्कुशनिकाशैश्च वज्रजालविभूषितैः ॥
[3]गृहमेधैः पुरी रम्या बभासे द्यौरिवाम्बुदैः ॥ ५ ॥
प्रजज्वाल तदा लङ्का रक्षोगणगृहैः शुभैः ॥ ६ ॥
सिताभ्रसदृशैश्चित्रैः पद्मस्वस्तिकसंस्थितैः ॥ वर्धमानगृहैश्चापि सर्वतः सुविभूषिता ॥
गृहमुख्यैः पुरी [4]रम्या बभासे द्यौरिवाम्बुदैः ॥ ७ ॥
तां चित्रमाल्याभरणां कपिराजहितंकरः ॥ राघवार्थं चरञ्श्रीमान्ददर्श च ननन्द च ॥ ८ ॥
भवनाद्भवनं गच्छन्ददर्श पवनात्मजः ॥ विविधाकृतिरूपाणि भवनानि ततस्ततः ॥ ९ ॥
शुश्राव मधुरं गीतं त्रिस्थानस्वरभूषितम् ॥ स्त्रीणां मदसमृद्धानां दिवि चाप्सरसामिव ॥ १० ॥
शुश्राव काञ्चीनिनदं नूपुराणां च निस्वनम् ॥ सोपाननिनदांश्चैव भवनेषु महात्मनाम् ॥
आस्फोटितनिनादांश्च क्ष्वेलितांश्च ततस्ततः ॥ ११ ॥
शुश्राव जपतां तत्र मन्त्रान्रक्षोगृहेषु वै ॥ १२ ॥
स्वाध्यायनिरतांश्चैव यातुधानान्ददर्श सः ॥ रावणस्तवसंयुक्तान्गर्जतो राक्षसानपि ॥ १३ ॥
राजमार्गं समावृत्य स्थितं [9]रक्षोबलं महत् ॥ ददर्श मध्यमे गुल्मे [10]रावणस्य चरान्बहून् ॥ १४ ॥
दीक्षिताञ्जटिलान्मुण्डान्गोजिनाम्बरधारिणः [12]॥ दर्भमुष्टिप्रहरणानग्निकुण्डायुधांस्तथा [13]॥ १५ ॥

शत्रुपुरप्रवेशे वामं निदध्याच्चरणं नृपालः" इति ॥ २—४ ॥ तूर्यघोषपुरस्सरैः हसितोत्कृष्टनिनदैः हसितानामुत्कृष्टस्वरैः युक्तेत्यर्थः । वज्राङ्कुशनिकाशैः वज्रमङ्कुशो यस्य सः वज्राङ्कुशः ऐरावतः तत्तुल्यैः तद्वच्छुभ्रैरित्यर्थः । वज्राङ्कुशतुल्यसंस्थानैर्वा । वज्रजालविभूषितैः वज्रो रत्नविशेषः । गृहमेधैः गृहश्रेष्ठैः । "उपमितं व्याघ्रादिभिः—" इत्युपमितसमासः ॥ ५—६ ॥ पद्मस्वस्तिकसंस्थितैः पद्मस्वस्तिकनामभ्यां संस्थानविशेषाभ्यां संस्थितैः । वर्धमानगृहैः वर्धमाननाम्ना संस्थानेन संस्थितैः गृहैः । तल्लक्षणानि वराहमिहिरसंहितायां व्यक्तानि विस्तरभयान्न लिख्यन्ते ॥ ७—९ ॥ त्रिस्थानस्वरभूषितं त्रिस्थानेषु उरःकण्ठशिरस्सु भवैः स्वरैर्भूषितं । ते च मन्द्रमध्यतारा: ॥ १० ॥ सोपाननिनदांश्च मणिहेमकृतानां सोपानानां नूपुरादिताडनेन ये निनादाः संभवन्ति तान् । आस्फोटितनिनादान् व्यत्यस्तकरतलाभ्यां भुजाग्रास्फालनशब्दान् । क्ष्वेलितान् सिंहनादान् ॥ ११ ॥ मन्त्रान् ऋग्वेदादीन् ॥ १२ ॥ स्वाध्यायनिरतान् ब्रह्मभागपाठनिरतान् ॥ १३ ॥ मध्यमे गुल्मे नगरमध्यस्थितसैन्यसमाजे । चरान् स्वजनवृत्तान्तजिज्ञासया प्रधानप्रेरितान् प्रणिधीन् ॥ १४ ॥ गोजिनाम्बरधारिणः वृषभचर्मरूपवस्त्रधारिणः । दर्भमुष्टिप्र-

वलंब्यप्रविष्टइतिसंबन्धः ॥ ३ ॥ **रामानु०** हसितोद्भुष्टनिनदैः हसितोच्चध्वनिभिः । गृहमुख्यैरितिपाठः ॥५॥ **ति०** स्वस्तिकाख्यगृहाः आकृत्याचतुरश्राः । " चतुश्शालाचतुर्द्वारासर्वतोभद्रसंज्ञिता । पश्चिमद्वाररहितामध्यावर्ताह्वयाननाः । दक्षिणद्वाररहितावर्धमाना धनप्रदा । प्राग्द्वाररहिता स्वस्तिकाख्यापुत्रधनप्रदा ' इत्युक्तेः पद्मस्वस्तिकवर्धमानाख्यगृहाः प्रभुगृहभेदाइत्यर्थः ॥ ७ ॥ **ति०** दीक्षितजटिलमुण्डाः गृहविनियतयः । गोजिनंगवाजिनं तद्वाससः । अंबरवाससः विवाससः । ननुलङ्कायाभारतखण्डाद्बहिर्भावेनकर्मभूमित्वाभावात्कथंतत्ररक्षसांदीक्षितत्वमितिचेन्न । नित्यकर्मस्वन्यदेशेप्यधिकारात् । रावणादेस्तपोमाहात्म्यात्तत्रकाम्यकर्मसिद्धिरपीत्यन्यत् । 'यथाक्षुरमेन्द्रमेवसोममाजहे' इत्यादिशतपथोक्तरीत्या । एतेनदेवानामीषद्विकृतानपियज्ञान्दर्शयतीतिभाष्यरीत्याचाङ्गवैकल्येप्यनुष्ठितात्कर्मणोवृत्रोत्पत्तिरूपकामनासिद्धिस्तथाप्रकृतेदेशरूपाङ्गवैकल्येपितत्सिद्धिः । रक्षसामपिदेवयो-

[पा०] १ इदमर्धं क. च. छ. ज. पाठेषु. २ ङ. छ.—ट. पुरस्कृतैः. ३ क. ग. घ. गृहमुख्यैः. ४ ख. पुरी. ५ क. ख. घ.—ट. विभूषितै. ६ क. घ. च. छ. ज. ञ. भूयो. ७ ख. ङ.—ज. ञ. ट. राघवार्थे. ८ ङ.—ज. ञ. ट. रुचिरं. ९ ङ.—ञ. ट. मदनविद्धानां. १० क. ख. ग. ङ.—ज. ञ. ट. रक्षोगणं. ११ क. ख. ग. ङ.—ट. राक्षसस्य. १२ च. छ. ञ. जिनांबरवाससः. १३ ख. स्तदा.

कूटमुद्गरपाणींश्च दण्डायुधधरानपि ॥ एकाक्षानेककर्णांश्च[1] लम्बोदरपयोधरान्[2] ॥ १६ ॥
करालान्भुग्नवक्त्रांश्च विकटान्वामनांस्तथा ॥ धन्विनः खड्गिनश्चैव शतघ्नीमुसलायुधान् ॥ १७ ॥
परिघोत्तमहस्तांश्च विचित्रकवचोज्ज्वलान् ॥ नातिस्थूलान्नातिकृशान्नातिदीर्घातिह्रस्वकान्[3] ॥ १८ ॥
नातिगौरान्नातिकृष्णान्नातिकुब्जान्न वामनान्[4] ॥ विरूपान्बहुरूपांश्च सुरूपांश्च सुवर्चसः ॥
ध्वजीन्पताकिनश्चैव ददर्श विविधायुधान्[5] ॥ १९ ॥
शक्तिवृक्षायुधांश्चैव पट्टिशाशनिधारिणः ॥ क्षेपणीपाशहस्तांश्च ददर्श स महाकपिः[6] ॥ २० ॥
स्रग्विणस्त्वनुलिप्तांश्च वराभरणभूषितान्[7] ॥ नानावेषसमायुक्तान्यथास्वैरगतान्बहून्[8] ॥
तीक्ष्णशूलधरांश्चैव वज्रिणश्च महाबलान् ॥ २१ ॥
शतसाहस्रमव्यग्रमारक्षं मध्यमं कपिः ॥ रक्षोधिपतिनिर्दिष्टं ददर्शान्तःपुराग्रतः ॥ २२ ॥
स तदा तद्गृहं दृष्ट्वा महाहाटकतोरणम् ॥ राक्षसेन्द्रस्य विख्यातमद्रिमूर्ध्नि प्रतिष्ठितम् ॥ २३ ॥
पुण्डरीकावतंसाभिः परिघाभिरलंकृतम्[9] ॥ प्राकाराबृतमत्यन्तं ददर्श स महाकपिः[10] ॥ २४ ॥
त्रिविष्टपनिभं दिव्यं दिव्यनादविनादितम्[11] ॥ वाजिहेषितसंघुष्टं नादितं भूषणैस्तदा[12] ॥ २५ ॥
रथैर्यानैर्विमानैश्च तथा हयगजैः शुभैः[13] ॥ वारणैश्च चतुर्दन्तैः श्वेताभ्रनिचयोपमैः ॥ २६ ॥

हरणान् । " यथा वज्रं हरेः पाणौ तथा विप्रकरे कुशः " इतिस्मरणादिति भावः । अग्निकुण्डायुधान् जयार्थं होमशीलान् ॥ १५ ॥ कूटमुद्गरपाणीन् कूटो नामायस्कारकूटसदृश आयुधविशेषः । " कूटोस्त्री पुञ्जमायाद्रिशृङ्गायोघनवेश्मसु । छले बाणान्तरे दम्भे भग्नशृङ्गवृषे तु ना " इति शब्दरत्नाकरे । मुद्गरो द्रुघणः । " मुद्गरो द्रुघणो घनः " इति वैजयन्ती ॥ १६ ॥ करालान् भीमान् । " करालो दन्तुरे तुङ्गे विशाले विकृतेऽपि च " इति भागुरिः । भुग्नवक्त्रान् कुटिलवक्त्रान् । " आविद्धं कुटिलं भुग्नं " इत्यमरः । विकटान् विषमाङ्गान् । शतघ्नी शतशङ्कुरयोगदा । " अयःकण्टकसञ्छन्ना शतघ्नी परिकीर्तिता " इति वैजयन्ती । मुसलं आयसोरत्निप्रमाणको दण्डः । "मुसलं त्वायसो दण्डो धार्योऽरत्निप्रमाणकः " इति शब्दरत्नाकरे ॥ १७ ॥ परिघः दण्डविशेषः । नातिदीर्घातिह्रस्वकानित्यत्र हकारोपरि ऋकारोच्चारणं वृत्तभङ्गपरिहाराय । एवं ध्वजिन इति वक्तव्ये ध्वर्जीनित्युक्तिश्च छन्दोभङ्गपरिहारायैव ॥ १८—१९ ॥ पट्टिशः तीक्ष्णधारो लोहदण्डः । " पट्टिशोऽयोदीर्घदण्डस्तीक्ष्णधारः क्षुरोपमः " इति निघण्टुः । क्षेपणी क्षेपणीयः ॥२०॥ वेषः अलङ्कारः । यथास्वैरगतान् यथेष्टचारिणः ॥ २१ ॥ शतसहस्रमेव शतसाहस्रं स्वार्थे अण् । आरक्षं गुल्मं । अन्तःपुराग्रतः अन्तर्नगराग्रतः । रक्षोधिपतिनिर्दिष्टं मध्यमगुल्मभूतं रावणमूलबलं ददर्शेत्यर्थः ॥ २२ ॥ स तदेत्यादिश्लोकद्वयमेकान्वयं ॥ सः कपिः । तत् आरक्षं दृष्ट्वा सः राक्षसेन्द्रस्य गृहं ददर्शेत्यन्वयः । क्रियाभेदात्तच्छब्दद्वयं ॥ २३—२४ ॥ त्रिविष्टपेत्यादि ॥ यानैः शिविकादिभिः । विमानैः व्योमयानैः । हयगजैरित्यत्र गजशब्दः द्विदन्तगजपरः । अतो न वारणैरित्यनेन पुनरुक्तिः । मृगपक्षिभिश्च भूषितमित्यन्वयः । रक्षिभिर्यातुधानैर्गुप्तमिति संबन्धः । आविवेश जगाम । गृहप्रवेशस्य दूरे वक्ष्यमाणत्वात्

नित्वात् ॥ १५ ॥ **ती०** द्वितीयस्तच्छब्दःप्रसिद्धिपरः ॥ २३—२४ ॥ **ति०** विचित्रवर्णादिमत्त्वादद्भुतत्वंहयानां । हयगजैः हयाकारैर्गजैः । स्वल्पगजैरितियावत् । **स०** वाजिशब्दसमभिव्याहाराद्धेषितशब्दोध्वनिमात्रपरः ॥ २५—२६ ॥

[पा०] १ ङ. झ. वर्णांश्च. २ ख. ङ. झ. ट. चलदेकपयोधरान्. ग. च. छ. ज. ञ. लंबकर्णपयोधरान्. क. चलल्बपयोधरान्. ३ अतिगौरान्महाकृष्णानतिकुब्जातिवामनान्. ४ ख. ग. घ. त्रातिकुब्जातिवामनान्. ५ क. च. छ. ज. ञ. पताकध्वजिनश्चैव. ख. ङ. झ. ञ. ट. ध्वजिनःपताकिनश्चैव. ग. खड्गिनःपाशिनश्चैव. ६ च. महान्कपिः. ७ क. च. छ. स्रग्विणस्त्वनु. ८ ख. ङ.—ट. खैरचरान्. घ. खैरंगतान्. ९ क. ख. घ.—ट. परिघाभिःसमावृतं. १० ग. विभूषितं. ११ ङ. झ. ट. संघुष्टमद्भुतैश्चहयैस्तथा. १२ च. छ. ज. ञ. भूषणस्वनैः. १३ च. छ. ज. ञ. तथाद्भुतहयैः.

भूषितं रुचिरद्वारं मत्तैश्च मृगपक्षिभिः ॥ रक्षितं सुमहावीर्यैर्यातुधानैः सहस्रशः ॥
राक्षसाधिपतेर्गुप्तमाविवेश महाकपिः ॥ २७ ॥

सहेमजाम्बूनदचक्रवालं महार्हमुक्तामणिभूषितान्तम् ॥
परार्ध्यकालागरुचन्दनाक्तं स रावणान्तःपुरमाविवेश ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुर्थः सर्गः ॥ ४ ॥

पञ्चमः सर्गः ॥ ५ ॥

सितकिरणे गगनाङ्गणमलङ्कुर्वाणेनानावस्थाकारगुणकराक्षसस्त्रीपुरुषकुलमवलोकयतोऽनवलोकयतश्च सतींसीतां हनुमतोदुःखोदयः ॥ १ ॥

ततः स मध्यं गतमंशुमन्तं ज्योत्स्नावितानं महदुद्वमन्तम् ॥
ददर्श धीमान्दिवि भानुमन्तं गोष्ठे वृषं मत्तमिव भ्रमन्तम् ॥ १ ॥
लोकस्य पापानि विनाशयन्तं महोदधिं चापि समेधयन्तम् ॥
भूतानि सर्वाणि विराजयन्तं ददर्श शीतांशुमथाभियान्तम् ॥ २ ॥
या भाति लक्ष्मीर्भुवि मन्दरस्था तथा प्रदोषेषु च सागरस्था ॥
तथैव तोयेषु च पुष्करस्था रराज सा चारुनिशाकरस्था ॥ ३ ॥
हंसो यथा राजतपञ्जरस्थः सिंहो यथा मन्दरकन्दरस्थः ॥
वीरो यथा गर्वितकुञ्जरस्थश्चन्द्रो विबभ्राज तथाऽम्बरस्थः ॥ ४ ॥

॥ २५—२७ ॥ हेम अन्यत्र जातं सुवर्णं । जाम्बूनदं जम्बूनद्यां जातं । चक्रवालं प्राकारमण्डलं । रावणान्तःपुरं रावणान्तर्नगरं ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुर्थः सर्गः ॥ ४ ॥

ततः स मध्यमित्यादि ॥ दिवि आकाशे मध्यं गतं आकाशमध्यगतमित्यर्थः । लङ्काप्रवेशे चन्द्रोदयोक्तेः रावणनगरप्रवेशे अर्धरात्र इति सूच्यते । उत्तरश्लोके अभियान्तमित्यनेनाभिगमनमुच्यते । दक्षिणां दिशं गच्छतोभिमुखत्वासंभवात् । किन्तु गमनमात्रं । सप्तदशे सर्गेपि प्रजगाम नभश्चन्द्र इति प्रकर्षेण गमनवचनं नभोमध्यातीतत्वमाचष्टे । अंशुमन्तमिति चन्द्र एवोच्यते । भानुमन्तं दीप्तिमन्तं । वृषं श्वेतं । अस्मिन्सर्गे च्छेकानुप्रासः नतु यमकं अर्थभेदाभावात् । तदुक्तं काव्यप्रकाशे । "भिन्नार्थानां त्र्यादीनां वर्णानां विवृत्तिर्यमक"मिति ॥ १ ॥ पापानि दुःखानि ॥ २ ॥ भुवि मन्दरो लक्ष्मीवान् । प्रदोषेषु सागरः । तोयेषु पद्मं श्रीमत् । तद्वत्तदानीं चन्द्रो विशिष्टलक्ष्मीको बभूवेत्यर्थः । अत्रान्यस्यान्यत्रासंबन्धान्मन्दरादिलक्ष्मीरिवास्य लक्ष्मीरिति सादृश्याक्षेपान्निदर्शनालङ्कारः । तदुक्तं काव्यप्रकाशे निदर्शनायाम् "अभिमान्यस्तु संबन्ध उपमापरिकल्पक" इति ॥३॥ राजतपञ्जरस्थः गगनगर्भस्य ज्योत्स्नाक्षालितत्वात् ।

ती० सहेमेतिच्छेदः । हेमसहितंजांबूनदचक्रवालसहितंस्वर्णप्राकारमण्डलयुक्तं । **स०** हेम्ना पीतवर्णसुवर्णेनसहितंयज्जांबूनदं श्वेतवर्णसुवर्णं ॥ २८ ॥ इतिचतुर्थः सर्गः ॥ ४ ॥

ती० यद्वातारामध्यंगतं ॥ **ति०** ततः अन्तःपुरप्रवेशोत्तरं । रात्रेःप्रथमयामस्यसमाप्तकल्पत्वमत्रेतिबोध्यं ॥ **स०** ज्योत्स्नारूपं वितानमुद्वमन्तमितिविशेषणबलादंशुमन्तमित्यस्यसूर्यैरूढस्यापियोगेनचन्द्रपरता । किंचतमेवचन्द्रंसीतायारामस्यवाभानुमन्तंसूर्यमिव । विरहितापकत्वगुणयोगेनददर्शेत्यर्थः । चन्द्रपक्षेभानुमन्तंदीप्तिमन्तमित्यर्थः ॥१॥ **ती०** पापशब्देनपापफलंदुःखमुच्यते । लो-

[पा०] १ ङ. झ. ट. भूषितैः. २ क.—ट. गृहंकपिः. ३ च. ज. ञ. चन्दनाङ्कितं. ङ. झ. ट. चन्दनार्हं. ४ घ. ङ. झ. ञ. ट. मुहुरुद्वमन्तं. ५ झ. ञ. ट. धीमान्भुवि. ६ ङ. झ. ट. यथा. ख. ञ. प्रदोषकालेषुच.

स्थितः ककुभानिव तीक्ष्णशृङ्गो महाचलः श्वेत [1]इवोच्चशृङ्गः ॥
हस्तीव जाम्बूनदबद्धशृङ्गो [2]रराज चन्द्रः [3]परिपूर्णशृङ्गः ॥ ५ ॥
विनष्टशीताम्बुतुषारपङ्को महाग्रहग्राहविनष्टपङ्कः ॥
प्रकाशलक्ष्म्याश्रयनिर्मलाङ्को रराज चन्द्रो भगवाञ्शशाङ्कः ॥ ६ ॥
शिलातलं प्राप्य यथा मृगेन्द्रो महारणं प्राप्य यथा गजेन्द्रः ॥
राज्यं समासाद्य यथा नरेन्द्रस्तथाप्रकाशो विरराज चन्द्रः ॥ ७ ॥
प्रकाशचन्द्रोदयनष्टदोषः प्रवृद्धरक्षःपिशिताशदोषः ॥
रामाभिरामेरितचित्तदोषः स्वर्गप्रकाशो भगवान्प्रदोषः ॥ ८ ॥
तन्त्रीस्वनाः कर्णसुखाः प्रवृत्ताः स्वपन्ति नार्यः पतिभिस्सुवृत्ताः ॥
नक्तंचराश्चापि तथा प्रवृत्ता विहर्तुमत्यद्भुतरौद्रवृत्ताः ॥ ९ ॥

मन्दरकन्दरस्थः तस्य श्वेतगिरित्वात् । गर्वितकुञ्जरस्थः नीलरूपस्य नभस उपर्यवस्थानात् । अत्र पुष्टत्वादीनां साधारणधर्माणामनुपादानाल्लुप्तोपमालङ्कारः॥४॥परिपूर्णशृङ्गः परिपूर्णकलः । अत्र शृङ्गशब्दस्य विषाणाद्यर्थभेदेपि बिम्बप्रतिबिम्बभावेनौपम्यम् ॥५॥ शीताम्बु हिमाम्बु तुषाराः पृषताः पङ्कः तमः । विनष्टाः शीताम्बुतुषारा एव पङ्काः यस्मिंस्तथा । " तुषारः शीकरे हिमे " इति विश्वः । महाग्रहाणां शुक्रबृहस्पत्यादीनां ग्राहेण ग्रहणेन आच्छादनेन विनष्टः पङ्को मलं यस्य सः महाग्रहग्राहविनष्टपङ्कः । स्वतेजसा महाग्रहतिरस्कारेण व्यक्तनैर्मल्य इत्यर्थः । यद्वा महाग्रहः सूर्यः तस्य ग्राहेण किरणपरिग्रहेण विनष्टः विनाशितः पङ्कः तमः येन सः । तदा तरणिकिरणसंक्रमणेन देदीप्यमानमण्डल इत्यर्थः । तदुक्तं वराहमिहिरेण । " सलिलसमे शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम् । क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः " इति ॥ प्रकाशलक्ष्म्याश्रयनिर्मलाङ्कः तेजस्समृद्धियोगात्स्पष्टकलङ्कः । अतिधवले चन्द्रे परभागयोगेन कलङ्कस्याप्यौज्ज्वल्यं भवतीत्यर्थः । शशाङ्क इति । भूच्छायामयः शशरूपः अङ्कः यस्य स तथा । " लोकच्छायामयं लक्ष्म तवाङ्के शशसन्निभं " इति हरिवंशोक्तेः । भगवान् महाप्रभाववान् ॥ ६ ॥ प्रकाशः प्रकाशमानः ॥ ७ ॥ प्रकाशेन चन्द्रोदयेन नष्टः दोषः तिमिरं यस्मिन्सः । प्रवृद्धः रक्षसां पिशिताशनानां च दोषः सञ्चाररूपो यस्मिन्स तथा । रामाभिः अभिरामैः कान्तैश्च ईरितः त्यक्तः चित्तदोषः कोपाभिमानरूपः यस्मिन् । स्वर्गप्रकाशः स्वर्गतुल्यः । तद्वदानन्दावह इत्यर्थः । भगवान् श्रीमान् । " भगः श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु " इत्यमरः । प्रदोषः गत इति शेषः ॥ ८ ॥ तन्त्रीति स्पष्टम् ॥ ९ ॥

काह्लादकत्वाच्चन्द्रस्यदुःखविनाशकरत्वं । यद्वासूर्यचन्द्रादीनांलोकपावनत्वादितिभावः ॥२॥ **ती०** प्रवृत्तरक्षःपिशिताशदोषः प्रवृत्तःरक्षसांपिशितभक्षणरूपदोषोयस्मिन् ।पिशितभक्षणस्यदोषत्वमविहितजनहिंसाहेतुत्वात् । स्वर्गप्रकाशःसीतान्वेषणस्यानुकूलत्वेनानन्दहेतुतयाप्रदोषकालस्यस्वर्गसदृशत्वोक्तिः । अतएवभगवान् पूज्यः आदरणीयइतियावत् ॥ **स०** भगवान् पूर्वोक्तरीत्यामाहात्म्यवान् प्रदोषः रात्रिकालः । स्वर्गप्रकाशः स्वर्गस्थानवत्सुखकरः । कीदृशः प्रकाशचन्द्रोदयनष्टदोषः प्रकाशायजातोयश्चन्द्रोदयस्तेननष्टोदोषः अन्धकाराख्यःयस्यसतथा । प्रवृद्धरक्षसांपिशिताशरूपःमांसभक्षणरूपोदोषो यस्मिन् । रामाभिःस्त्रीभिःअभिरामान्पतीन् प्रति ईरितेनवचनेनचित्तदस्यचित्तंदयतिखण्डयतीतिव्युत्पत्त्यामन्मथस्य उषःदाहः निवृत्तिरितियावत् । यस्मिन् कान्तासुरतसँल्लापजनितमन्मथोत्सववानित्यर्थः । अथवारामाभिरामाणांपरस्परमीरितरूपप्रणयकलहाख्यचित्तदोषवानित्यर्थः ॥ उषदाहे । 'घञर्थेकविधानं' इतिकः ॥ **शि०** प्रदोषेचन्द्रनियन्तृत्वमारोप्याह—प्रकाशेति । प्रकाशविशिष्टचन्द्रस्योदयेननष्टोविनाशितः दोषः स्त्रीविषयकपुरुषदयाभावोयेनसः । रामस्याभिरामाय सीतयासहरमणाय ईरितः चन्द्रोदयनेनप्रापितः चित्तदोषः सीताविषयकराममनोल्यासक्तिरूपदोषः दोषाभासोयेन । अतएव स्वर्गस्यसुखविशेषस्य प्रकाशःधर्मात्मसुप्रापकः । अतएवभगवान्समर्थः ॥ ८ ॥ **ति०** सुपृक्ताःभेदग्रहाविषयाः । स्ववृत्ताइतिपाठेस्वंस्वीयंसहजपातिव्रत्यलक्षणंवृत्तंचारित्र्यंयासांताः । नक्तंचराः उलूकादयोराक्षसाश्चतथा-

[पा०] १ ङ. झ. ञ. ट. इवोर्ध्वशृङ्गः. २ ख. ग.—ट. विभाति. ३ ख. ग. घ. च. छ. प्रतिपूर्ण. ४ ङ. झ. ट. स्सुपृक्ताः.

मत्तप्रमत्तानि समाकुलानि रथाश्वभद्रासनसंकुलानि ॥
वीरश्रिया चापि समाकुलानि ददर्श धीमान्स कपिः कुलानि ॥ १० ॥
परस्परं चाधिकमाक्षिपन्ति भुजांश्च पीनानधिनिक्षिपन्ति ॥
मत्तप्रलापानधिकं क्षिपन्ति मत्तानि चान्योन्यमधिक्षिपन्ति ॥ ११ ॥
रक्षांसि वक्षांसि च विक्षिपन्ति गात्राणि कान्तासु च विक्षिपन्ति ॥
रूपाणि चित्राणि च विक्षिपन्ति दृढानि चापानि च विक्षिपन्ति ॥ १२ ॥
ददर्श कान्ताश्च समालभन्त्यस्तथापरास्तत्र पुनः स्वपन्त्यः ॥
सुरूपवक्त्राश्च तथा हसन्त्यः क्रुद्धाः पराश्चापि विनिःश्वसन्त्यः ॥ १३ ॥
महागजैश्चापि तथा नदद्भिः सुपूजितैश्चापि तथा सुसद्भिः ॥
रराज वीरैश्च विनिःश्वसद्भिर्ह्रदो भुजङ्गैरिव निःश्वसद्भिः ॥ १४ ॥
बुद्धिप्रधानाञ्शुचिराभिधानान्सश्रद्दधानाञ्जगतः प्रधानान् ॥
नानाविधानाञ्शुचिराभिधानान्ददर्श तस्यां पुरि यातुधानान् ॥ १५ ॥
ननन्द दृष्ट्वा स च तान्सुरूपान्नानागुणानात्मगुणानुरूपान् ॥
विद्योतमानान्स तदानुरूपान्ददर्श कांश्चिच्च पुनर्विरूपान् ॥ १६ ॥
ततो वरार्हाः सुविशुद्धभावास्तेषां स्त्रियस्तत्र महानुभावाः ॥
प्रियेषु पानेषु च सक्तभावा ददर्श तारा इव सुप्रभावाः ॥ १७ ॥

मत्ताः मधुमदक्षीवाः । प्रमत्ताः प्रस्तुतकार्यविस्मारिणः । मत्तप्रमत्तजनयोगात्कुलान्यपि तथोच्यन्ते । कुलानि गृहाणि । समाकुलानि समाकुलजनानि । वीरश्रिया वीरलक्ष्म्या । वीर इति भिन्नं पदं वा कपिविशेषणं ॥ १० ॥ परस्परं चेत्यादिश्लोकद्वयमेकान्वयं ॥ ददर्शेति संबध्यते । आक्षिपन्तीत्यादीनि शत्रन्तानि रक्षोविशेषणानि । आक्षिपन्ति अपहसन्ति । अधिविक्षिपन्ति अन्योन्यस्योपरि दधति । अधिविक्षिपन्ति अधिकं मुञ्चन्ति । अधिक्षिपन्ति भर्त्सयन्ति । विक्षिपन्ति विवृण्वन्ति । चित्राणि रूपाणि विविधान्वेषान् । विक्षिपन्ति वितन्वन्ति । चापानि चापान् विक्षिपन्ति विस्फारयन्ति ॥ ११—१२ ॥ समालभन्त्यः अङ्गरागेणानुलिंपन्त्यः । समालपन्त्य इति च पाठः । सर्वत्र व्यत्ययेन द्वितीयार्थे प्रथमा ॥ १३ ॥ महागजैरिति ॥ सा पुरीति शेषः । सुसद्भिः सुतरां सद्भिः । विनिःश्वसद्भिः युद्धयोग्यवीरालाभात् ॥ १४ ॥ बुद्धिप्रधानान् बुद्ध्या श्रेष्ठान् प्रधानबुद्धीन्वा उत्तमबुद्धीनित्यर्थः । रुचिराभिधानान् शोभनव्यवहारान् सश्रद्दधानान् आस्तिकान् । नानाविधानान्नानाकारान् । रुचिराभिधानान् हृद्यनाम्नः ॥ १५ ॥ आत्मगुणानुरूपान् आत्मगुणानुरूपव्यवहारान् ॥ १६ ॥ वराणां श्रेष्ठानां अर्हाः वरार्हाः । सुविशुद्धभावाः कान्तेषु निर्मलहृदयाः । महानुभावाः पातिव्रत्यरूपमहाप्रभावाः । यद्वा महानुभावाः अनुभावाः कटाक्षभुज-

विहर्तुंप्रवृत्ताः ॥ ९ ॥ स० मत्ताः स्वभावतः । प्रमत्ताः मद्यादिना । तेचते अनिनःप्राणिनश्चतैःसमाकुलानि । चापिभिःधनुर्धारिभिःसमाकुलानीत्यर्थः ॥ १० ॥ स० सुसद्भिः विभीषणादिभिः ॥ १४ ॥ स० जगतःस्वावरलोकस्यप्रधानंज्ञानंयेषांतेतथा तान् । अलुक्समासः । 'प्रधानंस्यात्प्रज्ञायां' इतिविश्वः । जगतः उक्तरूपस्यप्रधानान् प्रकृष्टाधानाःतदुपलक्षितजीवनोपायाःयैस्ते तान् । अतोनोभयत्रलिङ्गानुपपत्तिः ॥ १५ ॥ ति कांश्चित्पुनर्विरूपानपिविद्योतमानान्सुरूपानिवददर्शेत्यन्वयः ॥ स० सरूपान्

[पा०] १ क. चापिसमाक्षिपन्ति. २ क. ख. घ. —ट. विक्षिपन्ति. ३ ग. —ट. प्रलापानधिविक्षिपन्ति. क. प्रमत्तानधिविक्षिपन्ति. ४ क. गात्रेषुच. ५ छ. ज. स्पृधापराश्चापि. ६ क. च. छ. ज. ञ. सुहृद्भिः. ७ ङ. सुनिश्चसद्भिः. ८ ञ. दृष्ट्वास्वपतः. ९ ख. घ.—ट. विद्योतमानान्सचतान्सुरूपान्. क. ग. विद्योतयन्तीःसचताःसुरूपाददर्शकान्ताश्चपुनर्विरूपाः. १० क. महार्हाः. ११ क. विशुद्धभावाः. १२ ङ. छ.—ट. सुखभावाः.

श्रिया ज्वलन्तीस्त्रपयोपगूढा निशीथकाले रमणोपगूढाः ॥
ददर्श काश्चित्प्रमदोपगूढा यथा विहङ्गाः कुसुमोपगूढाः ॥ १८ ॥
अन्याः पुनर्हर्म्यतलोपविष्टास्तत्र प्रियाङ्केषु सुखोपविष्टाः ॥
भर्तुः प्रिया धर्मपरा निविष्टा ददर्श धीमान्मदनाभिविष्टाः ॥ १९ ॥
अप्रावृताः काञ्चनराजिवर्णाः काश्चित्परार्ध्यास्तपनीयवर्णाः ॥
पुनश्च काश्चिच्छशलक्ष्मवर्णाः कान्तप्रहीणा रुचिराङ्गवर्णाः ॥ २० ॥
ततः प्रियान्प्राप्य मनोभिरामान्सुप्रीतियुक्ताः प्रसमीक्ष्य रामाः ॥
गृहेषु हृष्टाः परमाभिरामा हरिप्रवीरः स ददर्श रामाः ॥ २१ ॥
चन्द्रप्रकाशाश्च हि वक्त्रमाला वक्त्राक्षिपक्ष्माश्च सुनेत्रमालाः ॥
विभूषणानां च ददर्श मालाः शतह्रदानामिव चारुमालाः ॥ २२ ॥
न त्वेव सीतां परमाभिजातां पथि स्थिते राजकुले प्रजाताम् ॥
लतां प्रफुल्लामिव साधुजातां ददर्श तन्वीं मनसाऽभिजाताम् ॥ २३ ॥
सनातने वर्त्मनि सन्निविष्टां रामेक्षणान्तां मदनाभिविष्टाम् ॥
भर्तुर्मनः श्रीमदनुप्रविष्टां स्त्रीभ्यो वराभ्यश्च सदा विशिष्टाम् ॥ २४ ॥
उष्णार्दितां सानुसृतास्रकण्ठीं पुरा वराहोत्तमनिष्ककण्ठीम् ॥

क्षेपादयः सुप्रभावाः शोभनवैभवाः ॥ १७ ॥ प्रमदोपगूढाः हर्षोपगूढाः विहङ्गाः विहङ्गीः ॥ १८ ॥ निविष्टाः ऊढाः पाणिगृहीता इत्यर्थः । " निवेशः शिबिरोद्वाहन्यासे " इति विश्वः ॥ १९ ॥ अप्रावृताः अनवकुण्ठिताः। काञ्चनराजिवर्णाः कनकरेखाकाराः। तपनीयवर्णाः तप्तकाञ्चनवर्णाः । शशलक्ष्मवर्णाः चन्द्रपाण्डुराः । कान्तप्रहीणाः विरहिण्यः ॥ २० ॥ प्रियान्प्राप्य अभिसृत्य । सुप्रीतियुक्ताः मनोभिरामाः रामाः प्रसमीक्ष्य गृहेषु रामाश्च ददर्श । अभिसारिकाः कुलपालिकाश्च ददर्शेत्यर्थः ॥ २१ ॥ वक्त्रनेत्रदर्शनं मानुषीत्वराक्षसीत्वविवेकार्थं । आभरणदर्शनं स्वदृष्टसीताभरणतुल्याभरणदर्शनार्थं ॥२२॥ परमाभिजातां अत्यन्ताभिरामां । साधुजातां सुरूपां । मनसाभिजातां अयोनिजामित्यर्थः॥२३॥सनातने अविच्छिन्ने वर्त्मनि पातिव्रत्यधर्मे । रामेक्षणे अन्तो निश्चयो यस्यास्तां श्रीमत् सीताचिन्तनश्रीमत् । विशिष्टां उत्कृष्टां ॥ २४ ॥ सानुसृतास्रकण्ठीं अनुगतास्रेण अनुगतबाष्पेण कण्ठेन सह वर्तमानां । पुरा रामपार्श्वा-

समानरूपान् । आत्मगुणानांशौर्यादीनांअनुरूपान्अनुकूलाकृतिमतः । सुरूपान्सुन्दरान् ॥ १६ ॥ **ति०** यथाविहङ्गाःविहङ्गीरिवेत्यर्थः । इन्द्रनीलमणिमयोर्ध्वगेहेषुनीलतमस्सदृशेषुशयनात्तत्सादृश्यं ॥ **शि०** विहगेनपक्षिविशेषेणउपगूढाःविहङ्गाइवददर्श । अत्युन्नतप्रासादेषुशयनादीदृगुपमानोपमेयभावः ॥ **स०** प्रमदोपगूढाःविहगीभिरुपगूढाःविहङ्गायथाभवन्तितथाएतादृददर्श ॥१८॥ **रामानु०** वक्त्राणिअक्षिपक्ष्माणियासांताः । 'डाबुभाभ्यामन्यतरस्यां' इतिडाप् । सीतामन्वेषमाणस्यहनुमतःस्त्रीणांमुखनयनादिदर्शनंमानुषीत्वराक्षसीत्वविभागपरिज्ञानार्थं । आभरणदर्शनंरामोक्तसीताभरणस्वरूपनिरूपणार्थं । एतच्च "तांसमीक्ष्यविशालाक्षींराजपुत्रीमनिन्दिताम् । तर्कयामाससीतेतिकारणैरुपपादयन् । वैदेह्यायानिचाङ्गेषुतदारामोऽन्वकीर्तयत् । तान्याभरणजालानिशाखाशोभीन्यलक्षयत्' इति । राजपुत्रीत्वविशालाक्षीत्वाभरणदर्शनैःसीतात्वनिर्णयस्योपरिवक्ष्यमाणत्वादवगम्यते ॥ **ती०** परमाभिरामाश्च ददर्शेतिसंबन्धः । पूर्वोक्ताःनियतभर्तृकाः । अभिसारिकासमभिव्याहारात्उत्तरार्धेनस्वगृहप्राप्तरमणावाराङ्गनाउच्यन्ते ॥ **ति०** वक्त्राक्षिपक्ष्माइतिपाठेऽक्षिपदमधिकं । वक्त्रपक्ष्माइत्येवोचितं । पक्ष्मसुवक्त्रत्वमपिकिमित्यपिचिन्त्यं ॥ २२ ॥ **रामानु०** साधुजातामित्येतत्कृताविशेषणं । मनसाभिजातां 'यस्मात्तुधर्षिताचाहमपापाचाप्यनाथवत् । तस्मात्तववधार्थंवैउत्पत्स्येऽहंधुवंपुनः" इत्युत्तररामायणोक्तप्रकारेणस्वसंकल्पेनावतीर्णामित्यर्थः ॥ २३ ॥ **स०** मदनाभिविष्टां तामिवविद्यमानां । मदनोमन्मथःअभि-

[**पा०**] १ ङ. झ. स्त्रियोज्वलन्तीः. २ ङ. झ. ञ. ट. विहङ्गाविहगोपगूढाः. ३ झ. ञ. प्रियाङ्केसुसुखोप. ४ ङ. ट. पराः. ५ ङ. झ. ञ. ट. मदनोपविष्टाः. ६ झ. ञ. ट. सुमनोभिरामाः. ७ ङ. झ. ञ. ट. वक्त्राःसुपक्ष्माश्च. ८ ग. ङ झ. ट. रामेक्षणांतां. ९ ङ.—ज. स्त्रीभ्योपराभ्यश्च. झ. ञ. ट. स्त्रीभ्यःपराभ्यश्च.

सुजातपक्ष्मामभिरक्तकण्ठीं वने प्रनृत्तामिव नीलकण्ठीम् ॥ २५ ॥
अव्यक्तरेखामिव चन्द्ररेखां पांसुप्रदिग्धामिव हेमरेखाम् ॥
क्षतप्ररूढामिव बाणरेखां वायुप्रभिन्नामिव मेघरेखाम् ॥ २६ ॥
सीतामपश्यन्मनुजेश्वरस्य रामस्य पत्नीं वदतां वरस्य ॥
बभूव दुःखाभिहतश्चिरस्य प्लवङ्गमो मन्द इवाचिरस्य ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चमः सर्गः ॥ ५ ॥

षष्ठः सर्गः ॥ ६ ॥

हनुमता पुनर्लङ्काभरणायमानाद्भुततररावणभवनमेत्य तत्समीपस्थप्रहस्तादिनानानामकराक्षसगृहेषु सीतान्वेषणपूर्वकं रावणगृहप्रवेशनं ॥ १ ॥

स निकामं विमानेषु विषण्णः कामरूपधृक् ॥ विचचार पुनर्लङ्कां लाघवेन समन्वितः ॥ १ ॥
आससादाथ लक्ष्मीवान्राक्षसेन्द्रनिवेशनम् ॥ प्राकारेणार्कवर्णेन भास्वरेणाभिसंवृतम् ॥ २ ॥

वस्थानकाले वरार्होत्तम, निष्ककण्ठीं वरार्हः उत्तमश्चनिष्कः कण्ठे यस्याः त उरःकण्ठसंबन्धी भूषणविशेषो निष्कः । अभिरक्तकण्ठीं स्निग्धकण्ठीम् ॥ २५ ॥ अव्यक्तरेखां अव्यक्तस्वरूपां चन्द्ररेखां चन्द्रकलामिव स्थितां । अत्यन्तकृशत्वे कान्तिहीनत्वे च दृष्टान्तोयं । पांसुप्रदिग्धां पांसुकलुषितां हेमरेखां कनकशलाकामिव स्थितां । स्वतःशुद्धस्वभावस्य आगन्तुकमालिन्ये दृष्टान्तोयं । क्षतप्ररूढां क्षतेन प्ररूढां औषधादिना समाहितां । अन्तःशल्यदोषवतीं बहिस्समाहितां । बाणरेखां बाणक्षतिमिव स्थितां । अन्तर्वेदनातिशये दृष्टान्तोयं । वायुप्रभग्नामिव मेघलेखां पुनरसमाधेयशैथिल्ये दृष्टान्तोयं ॥ २६ ॥ चिरस्यापश्यन् चिरकालं निरीक्ष्याप्यपश्यन् । अचिरस्य अचिरेण सपदीत्यर्थः । मन्दो मुग्ध इव दुःखाभिहतो बभूव । " मुग्धो मन्दो विवर्णश्च " इति हलायुधः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चमः सर्गः ॥ ५ ॥

स निकाममित्यादि ॥ विमानेषु विषण्णः विमानेषु सीतामदृष्ट्वा विषण्ण इत्यर्थः । लाघवेनवेगेन

निविष्टः उदरेयस्यास्तांमदनमातरं ॥ २४ ॥ स० उष्णार्दितां रामविरहतप्तां । अनुसृतंअस्रंअश्रुयस्य सचासौकण्ठश्चतेनसहवर्ततइतितथातां । सानुसृतास्रकण्ठीमित्यादिस्थानत्रयेपिडीबार्षः । यद्वा 'स्राङ्गाच्च' इतिसूत्रस्थचशब्दसूचिता'ङ्गगात्रकण्ठेभ्यइतिवक्तव्यं' इतिवृत्तिकृदुक्तेर्ङीष् । नचभाष्यानुक्तेरप्रामाणिकाइतिप्रामाणिकाः 'अप्रामाणिकाएव' इतिभट्टोजिनागोजिभट्टोक्तेःकथमितिशङ्क्यं । अनुवृत्त्यैवङीपिसिद्धेचशब्दस्यवैयर्थ्यादेवमादिरूपाणांदुरुपपादनत्वावर्णनाच्च 'अप्रतिषिद्धमनुमतं' इत्युक्तेर्महाभाष्यकारस्यमतमितिसूचितत्वात्कवेर्महत्त्वाच्च । अश्रुकण्ठामितिवापाठइतिनागोजिभट्टोक्तिरनुप्रासभङ्गभीरुभिरनादरणीया ॥ अभिरक्तकण्ठींसुस्वरां । नीलकण्ठीं मयूरीं ॥ २५ ॥ इतिपञ्चमःसर्गः ॥ ५ ॥

स० विमानेषुसप्तभौमाष्टभौमादिप्रासादेषु।विचचार विचारयामास॥ रामानु०सःलङ्कायामन्विष्टायामपिवैदेह्याअदर्शनेनविषण्णः। विचचारपुनर्लङ्कामितिसम्यक् । कपिर्लङ्कामितिपाठेपिवैदेह्याअन्वेषणेनविषण्णस्यहनुमतोऽन्वेषणकर्तृत्वाभिधानात्पुनरन्वेषणंकृतवानित्ययमर्थोलभ्यते॥ १॥ रामानु० आससादाथलक्ष्मीवान्राक्षसेन्द्रनिवेशनंइतिरावणभवनंप्रविष्टस्यहनुमतः पुनरपिरावणभवनप्राप्त्यभिधानान्मध्येलङ्कान्वेषणाभिधानाच्चपूर्वंरावणभवनंप्रविष्टोहनुमांस्तदानींजाग्रद्बहुरक्षस्संकीर्णतयासीतान्वेषणावसरोऽयंनभवतीतिम-

[पा०] १ ग. मभिराम. २ ख. ग. झ. ञ. ट. प्रवृत्तामिव. ३ क. ङ.—झ. ट. चन्द्रलेखां. ४ ङ. झ. ट. वर्णरेखां. ५ ग. घ. ङ. ट. प्रभग्नामिव. ञ. प्रभुग्नामिव. क. प्रणुन्नामिव. ६ ग. ङ. झ. ट. दुःखोपहतः ७ क. ग.—ट. विचरन्काम. ८ क. ग.—ट. कपिर्लङ्कां. ९ क. ङ. झ. ञ. ट. आससादच. घ. आससादस.

रक्षितं [1]राक्षसैर्घोरैः सिंहैरिव महद्वनम् ॥ समीक्षमाणो भवनं चकाशे कपिकुञ्जरः ॥ ३ ॥
रूप्यकोपहितैश्चित्रैस्तोरणैर्[2]हेमभूषितैः ॥ विचित्राभिश्च कक्ष्याभिर्द्वारैश्च रुचिरैर्[3]वृतम् ॥ ४ ॥
गजास्थितैर्[4]महामात्रैः शूरैश्च विगतश्रमैः ॥ उपस्थितमसंहार्यैर्[5]हयैः स्यन्दनयायिभिः ॥ ५ ॥
सिंहव्याघ्रतनुत्राणैर्दान्तकाञ्चनराजतैः ॥ घोषवद्भिर्विचित्रैश्च सदा विचरितं रथैः ॥ ६ ॥
बहुरत्नसमाकीर्णं [7]पराध्यासनभाजनम् ॥ महारथसमावासं महारथमहास्वनम् ॥ ७ ॥
दृश्यैश्च परमोदारैस्तैस्तैश्च मृगपक्षिभिः ॥ विविधैर्बहुसाहस्रैः [9]परिपूर्णं समन्ततः ॥ ८ ॥
विनीतैरन्तपालैश्च रक्षोभिश्च सुरक्षितम् ॥ मुख्याभिश्च वरस्त्रीभिः परिपूर्णं समन्ततः ॥ ९ ॥
मुदितप्रमदारत्नं राक्षसेन्द्रनिवेशनम् ॥ वरा[11]भरणसंह्रादैः समुद्रस्वननिस्वनम् ॥ १० ॥
तद्राजगुणसंपन्नं [12]मुख्यैश्चागुरुचन्दनैः ॥ महा[13]जनैः समाकीर्णं सिंहैरिव महद्वनम् ॥ ११ ॥
भेरीमृदङ्गाभिरुतं शङ्खघोषनिनादितम् ॥ नित्यार्चितं [15]पर्वहुतं पूजितं राक्षसैः सदा ॥ १२ ॥

॥ १—२ ॥ चकाशे जहर्षेत्यर्थः ॥ ३ ॥ रूप्यकोपहितैः रजतनिर्मितैः । कक्ष्याभिः प्रकोष्ठैः ॥ ४ ॥ असंहार्यैः अवध्यैः । स्यन्दनयायिभिः स्यन्दनवाहकैः ॥ ५ ॥ सिंहव्याघ्रतनुत्राणैः सिंहव्याघ्रचर्मपरिवृतैरित्यर्थः ॥ ६ ॥ महारथसमावासं महारथानां रक्षसामाकरं । महारथमहास्वनं महतां रथानां महान् स्वनः यस्मिन् ॥ ७—८ ॥ अन्तपालैः बाह्यरक्षिभिः ॥ ९ ॥ राक्षसेन्द्रनिवेशनं राक्षसेन्द्राः राक्षसश्रेष्ठाः निविशन्ते समीपे निवसन्त्यस्मिन्निति राक्षसेन्द्रनिवेशनमित्यर्थः । अन्यथा वक्ष्यमाणवेश्मा.देन पुनरुक्तिःस्यात् । संह्रादः शब्दः । समुद्रस्वनवन्निस्वनतीति समुद्रस्वननिस्वनम् । पचाद्यच् ॥ १० ॥ तत् प्रसिद्धं राजगुणसंपन्नं राजोपच[illegible]दिभिः संपन्नं । अगुरुचन्दनैरित्यत्रापि संप[illegible]ति संबध्यते ॥ ११ ॥ पर्वसु हुतं होमो

ल्लाततोनिष्क्रम्यपुनर्लङ्कांविचित्यराक्षसेन्द्रनिवेशनमाससादेत्यवगम्यते ॥ २ ॥ **ती०** चकाशे विस्मयादुल्ललासेत्यर्थः । चचारकपिकुञ्जरइतिपाठः । **रामानु०** भवनमितस्ततोनिरीक्षमाणस्सन्नर्कवर्णभवनप्राकारतेजस्संबन्धात्सप्रकाशोऽभूदित्यर्थः ॥ **स०** चकाशे भयाभावादितिभावः॥ ३॥ **ति०**चकाशे चन्द्रसाहित्याद्यक्तान्वेषणक्रियोबभूवेत्यर्थः॥ **स०**रूप्यस्यायत्कंउदकंतेनउपहितैःलिखितैः।रूप्यशब्देनाहतसुवर्णंग्राह्यं । 'रूप्यंस्यादाहतेखर्णे' इतिविश्वः । कक्ष्याभिः प्रकोष्ठापरपर्यायरक्षकनिवासस्थानैः ॥४॥ **स०** महामात्रैः अंबष्ठैः । असंहार्यैःउपसंहर्तुमशक्यवेगैरितिहयविशेषणंवा ॥ **रामानु०** महामात्रैःप्रधानैः । 'महामात्राःप्रधानानि' इत्यमरः ॥ ५ ॥ **रामानु०** महारथसमावापमितिपाठेपिमहारथानांरथिकविशेषाणांआवापं आवासभूतमित्यर्थः ॥ **ति०** महतांरथानामावापःस्थानंसमन्ताद्यस्मिंस्तत् ॥ **स०** एकोदशसहस्राणियोधयेद्यस्तुधन्विनाम् । अस्त्रशस्त्र(शस्त्रशास्त्र)प्रवीणश्चसमहारथउच्यते ' इत्युक्तलक्षणानांयस्समावापः उपवेशनवेदिका सयस्मिन् । ' आवापःपरिक्षेपालवालयोः ' इतिविश्वः । महारथानांउक्तलक्षणानामपिशत्रूणां महत् असनं गतिनिवृत्तिर्यस्मिन् । ' असनंयात्रानिवृत्तिः ' इतिविश्वः ॥ ७ ॥ **रामानु०** दृश्यैः दर्शनीयैः । परमोदारैः अतिमहद्भिः । ' उदारोदात्तमहतोः ' इत्यमरः ॥ ८ ॥ **रामानु०** राक्षसेन्द्रनिवेशनं राक्षसेन्द्राणांनिवेशनानियस्मिंस्तत् ॥ **स०** वराभरणनिर्ह्रादैःकरणैःसमुद्रस्वननिस्वनं तद्धनिसदृशध्वनिमत् ॥ १० ॥ **रामानु०** राजगुणाः छत्रचामरादयःतैः संपन्नं समृद्धं ॥ ११ ॥ **ति०** पर्वसुसुतःसोमोयस्मिन्यज्ञार्थेतत्पर्वसुतं । राक्षसैःसदापूजितं स्वपूजनीयदेवताकं ॥ **रामानु०** नित्यार्चितं । गन्धपुष्पादिभिर्नित्यमार्चितं । पर्वसु हुतंहोमोयस्मिंस्तत्पर्वहुतं । रावणस्याहिताग्नित्वात्तद्गृहेदर्शपूर्णमासादिहोमसद्भावः । अस्याहिताग्निलंयुद्धकाण्डेप्रसिद्धं । पूजितंराक्षसैस्सदा स्वामिगृहत्वाद्राक्षसैस्सदानमस्कृतं । ' पूजानमस्यापचितिः ' इत्यमरः ।

[**पा०**] १ ग. घ. ङ. च. ज. ट. राक्षसैर्भीमैः. २ घ.—ट. तोरणैर्हेमभूषणैः. क. तोरणैस्सुविभूषितैः. ३ ङ. ञ. रुचिरावृतं. ४ च. छ. ञ. गजस्थितैः. ५ ग. च. ज. शूरैश्चापगतश्रमैः. ६ ख. ग. घ. हयस्यन्दन. ७ ङ. ञ. ज. ट. भूषितं. ८ ख. घ. ङ. ञ. ज. ट. समावापं. ९ क.—च. ज.—ट. महासनं. १० क. परिकीर्णं. ११ ख. महाभरण. क. ग. च. छ. ज. महाभरणनिर्ह्रादैः. १२ क.—ङ. ञ. ज. ट. मुख्यैश्चवरचन्दनैः. १३ क. ग.—ट. महाजनसमाकीर्णं. १४ क. ख. ग. च.— ट. विनादितं. १५ घ. ङ. ञ. ट. पर्वसुतं.

समुद्रमिव गम्भीरं समुद्रमिव निस्स्वनम् ॥ महात्मनो महद्वेश्म महारत्नपरिच्छदम् ॥
महारत्नसमाकीर्णं ददर्श स महाकपिः ॥ १३ ॥
विराजमानं वपुषा गजाश्वरथसंकुलम् ॥ लङ्काभरणमित्येव सोमन्यत महाकपिः ॥ १४ ॥
चचार हनुमांस्तत्र रावणस्य समीपतः ॥ १५ ॥
गृहाद्गृहं राक्षसानामुद्यानानि च वानरः ॥ वीक्षमाणो ह्यसंत्रस्तः प्रासादांश्च चचार सः ॥ १६ ॥
अवप्लुत्य महावेगः प्रहस्तस्य निवेशनम् ॥ ततोऽन्यत्पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान् ॥ १७ ॥
अथ मेघप्रतीकाशं कुम्भकर्णनिवेशनम् ॥ विभीषणस्य च तदा पुप्लुवे स महाकपिः ॥ १८ ॥
महोदरस्य च गृहं विरूपाक्षस्य चैव हि ॥ विद्युज्जिह्वस्य भवनं विद्युन्मालेस्तथैव च ॥
वज्रदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः ॥ १९ ॥
शुकस्य च महोतजाः सारणस्य च धीमतः ॥ तथा चेन्द्रजितो वेश्म जगाम हरियूथपः ॥ २० ॥
जम्बुमालेः सुमालेश्च जगाम हरिसत्तमः ॥ रश्मिकेतोश्च भवनं सूर्यशत्रोस्तथैव च ॥ २१ ॥
वज्रकायस्य च तथा पुप्लुवे स महाकपिः ॥ धूम्राक्षस्य च संपातेर्भवनं मारुतात्मजः ॥ २२ ॥
विद्युद्रूपस्य भीमस्य घनस्य विघनस्य च ॥ २३ ॥
शुकनासस्य वक्रस्य शठस्य विकटस्य च ॥ ब्रह्मकर्णस्य दंष्ट्रस्य रोमशस्य च रक्षसः ॥ २४ ॥
युद्धोन्मत्तस्य मत्तस्य ध्वजग्रीवस्य नादिनः ॥ विद्युज्जिह्वेन्द्रजिह्वानां तथा हस्तिमुखस्य च ॥ २५ ॥
करालस्य पिशाचस्य शोणिताक्षस्य चैव हि ॥ क्रममाणः क्रमेणैव हनुमान्मारुतात्मजः ॥ २६ ॥
तेषु तेषु महार्हेषु भवनेषु महायशाः ॥ मृद्धिमतामृद्धिं ददर्श स महाकपिः ॥ २७ ॥
सर्वेषां समतिक्रम्य भवनानि समन्ततः ॥ आससादाथ लक्ष्मीवान्राक्षसेन्द्रनिवेशनम् ॥ २८ ॥
रावणस्योपशायिन्यो ददर्श हरिसत्तमः ॥ विचरन्हरिशार्दूलो राक्षसीर्विकृतेक्षणाः ॥
शूलमुद्गरहस्ताश्च शक्तितोमरधारिणीः ॥ २९ ॥

यस्मिंस्तत् पर्वहुतम् ॥ १२ ॥ समुद्रमिव निस्स्वनं निश्शब्दं । रावणभीत्या जनकोलाहलरहितमित्यर्थः । समुद्रस्वनमिति तु बाह्यकक्ष्यापेक्षया ॥ १३—१४ ॥ रावणस्य रावणगृहस्य ॥ १५—२४ ॥ विद्युज्जिह्वेन्द्रजिह्वानामिति बहुवचनं तन्नाम्नां बहूनां सत्त्वात् ॥ २५—२८ ॥ उपशायिन्यः पर्यायशायिनीः ।

नित्यार्चितंसर्वसुखमूर्जितमितिवापाठः । पर्वयुतमितिपाठेपर्वशब्देनोत्सवउच्यते ॥ १२ ॥ **रामानु०** समुद्रमिवनितरांस्वनतीति निस्वनं । पचाद्यच् ॥ **ति०** परिच्छदः अलङ्कारः ॥ १३ ॥ **स०** लङ्कायाआभरणरूपमिदमित्यमन्यत ॥ १४ ॥ **रामानु०** राक्षसानां रावणभ्रातृकुमारामात्यादीनांगृहाद्गृहं । उद्यानानिचचारेतियोजना ॥ १६ ॥ **ति०** विद्युज्जिह्वेन्द्रजिह्वानामितिबहुवचनमार्षं । तयोरित्यर्थः ॥ २५ ॥ **स०** उपशायिन्यः शयनस्थानंपर्यायेणरक्षयित्र्योयास्ताइत्यर्थः । ' उपशायोविशायश्चपर्यायशय-

[पा०] १ क. घ. समुद्रस्वननिस्स्वनं. झ. समुद्रसमनिस्स्वनं. २ च. छ. ज. महावेश्म. ३ ख. महाजनसमाकीर्णं. ४ ङ. झ. ञ. ट. चसर्वशः. क. घ. वनानिच. ५ क. अवप्लुतो. ६ क. घ.—ट. तथा. ७ घ.—ट. तथा. ८ झ. बहुदंष्ट्रस्य. ९ क. ग.—ट. महावेगः. १० ग. पुप्लुवे. ११ घ. सूर्यकेतोः. १२ भवनं. १३ क. धूम्राक्षस्यैवसदनंसंपातेः. ख. घ. धूम्राक्षस्यापि. ग. ङ. छ. झ. ञ. ट. धूम्राक्षस्याथ. १४ ज. यूपनेत्रस्य. १५ क. प्रघसस्यघनस्यच. च. छ. ज. प्रघस्यप्रघसस्यच. १६ छ. शुभनाभस्य. क.—च. ज.—ट. शुकनाभस्य. १७ ङ. च. छ. झ. ट. चक्रस्य. ञ. शक्रस्य. ख. ग. वज्रस्य. १८ ङ. च. झ. ट. कपटस्यच. क. घ. विशठस्यच. १९ ख. ग. ङ. च. छ. झ. ट. हस्तकर्णस्य. घ. हस्तदंष्ट्रस्यकण्ठस्य. क. हस्तकर्णस्यवीरस्य. २० घ. भवनं. २१ ङ. च. ज.—ट. सादिनः. २२ ङ. झ. ट. विद्युज्जिह्वद्विजिह्वानां. २३ च. —ट. विशालस्य. २४ च.—ट. ध्रुवमानः. २५ क. हनुमान्कपिः. २६ क. आससादच. २७ क. घ. विकृताननाः. २८ ग. ङ.— ट. धारिणः.

ददर्श विविधान्गुल्मांस्तस्य रक्षःपतेर्गृहे ॥ राक्षसांश्च महाकायान्नानाप्रहरणोद्यतान् ॥ ३० ॥
रक्ताञ्श्वेतान्सितांश्चैव हरींश्चापि महाजवान् ॥ कुलीनान्रूपसंपन्नान्गजान्परगजारुजान् ॥ ३१ ॥
निष्ठितान्गजशिक्षायामैरावतसमान्युधि ॥ निहन्तॄन्परसैन्यानां गृहे तस्मिन्ददर्श सः ॥ ३२ ॥
क्षरतश्च यथा मेघान्स्रवतश्च यथा गिरीन् ॥ मेघस्तनितनिर्घोषान्दुर्धर्षान्समरे परैः ॥ ३३ ॥
सहस्रं वाहिनीस्तत्र जाम्बूनदपरिष्कृताः ॥ हेमजालपरिच्छन्नास्तरुणादित्यसन्निभाः ॥
ददर्श राक्षसेन्द्रस्य रावणस्य निवेशने ॥ ३४ ॥
शिबिका विविधाकाराः स कपिर्मारुतात्मजः ॥ लतागृहाणि चित्राणि चित्रशालागृहाणि च ॥ ३५ ॥
क्रीडागृहाणि चान्यानि दारुपर्वतकानपि ॥ कामस्य गृहकं रम्यं दिवागृहकमेव च ॥
ददर्श राक्षसेन्द्रस्य रावणस्य निवेशने ॥ ३६ ॥
स मन्दरगिरिप्रख्यं मयूरस्थानसंकुलम् ॥ ध्वजयष्टिभिराकीर्णं ददर्श भवनोत्तमम् ॥ ३७ ॥
अनेकरत्नसंकीर्णं निधिजालं समन्ततः ॥ धीरनिष्ठितकर्मान्तं गृहं भूतपतेरिव ॥ ३८ ॥
अर्चिर्भिश्चापि रत्नानां तेजसा रावणस्य च ॥ विरराजाथ तद्वेश्म रश्मिवानिव रश्मिभिः ॥ ३९ ॥
जाम्बूनदमयान्येव शयनान्यासनानि च ॥ भाजनानि च मुख्यानि ददर्श हरियूथपः ॥ ४० ॥
मध्वासवकृतक्लेदं मणिभाजनसंकुलम् ॥ मनोरममसंबाधं कुबेरभवनं यथा ॥ ४१ ॥
नूपुराणां च घोषेण काञ्चीनां निनदेन च ॥ मृदङ्गतलघोषैश्च घोषवद्भिर्विनादितम् ॥ ४२ ॥

रावणे शयाने जाग्रतीरित्यर्थः ॥ २९—३० ॥ सितान् बद्धान् । " षिञ् बन्धने " इत्यस्मात् क्तः । हरीन् अश्वान् । परगजानारुजन्ति पीडयन्तीति परगजारुजान् ॥ ३१—३२ ॥ क्षरतश्चेति श्लोकः पूर्वोक्तगजविशेषकः । क्षरतः किंचिद्वर्षतः । स्रवन्मदत्वे दृष्टान्तः । स्रवतः निर्झरिणः ॥ ३३ ॥ वाहिनीः सेनाः । पदातीनित्यर्थः । जाम्बूनदं जम्बूनदीप्रभवं स्वर्णं । हेम केवलस्वर्णं । उभयविधस्वर्णमयाभरणयुक्ता इत्यर्थः ॥ ३४ ॥ शिबिका इत्यादि ॥ दारुपर्वतकान् क्रीडापर्वतकान् । कामस्य गृहकं रतिगृहं । दिवागृहकं दिवाविनोदस्थानं । रावणस्य निवेशन इति पाठः ॥ ३५—३६ ॥ स इत्यादि ॥ मयूरस्थानं क्रीडामयूरविश्रमस्थानं । कपोतानामिव मयूराणामपि स्थानानि शिलाभिः कल्प्यन्त इति प्रसिद्धं । धीरनिष्ठितकर्मान्तं धीरैः कृतकल्पकर्मकं । भूतपतेः प्रमथाधिपस्य ॥ ३७—३८ ॥ रश्मिवान् सूर्यः ॥ ३९—४० ॥ मध्वासवकृतक्लेदं मध्वासवैः मधुविकारमद्यैः । कृतक्लेदं कृतसेकं ॥ ४१ ॥ घोषवद्भिः नादवद्भिः । नादश्च दीर्घशब्दस्य विराम-

नार्थकौ ' इत्यमरः ॥ २९ ॥ **रामानु०** गुल्मान् सेनाः । ' गुल्मास्तुक्स्तंबसेनाश्च ' इत्यमरः ॥ ३० ॥ **वि०** सहस्रंवाजिनः अनेकानश्वान् ॥ ३४ ॥ **वि०** हेमजालैरविच्छिन्नाः सर्वतोभूषिताइतिशिबिकाविशेषणं ॥ ३५ ॥ **ति०** दारुनिर्मिताःक्रीडापर्वताः दारुपर्वतकानि । क्लीबत्वमार्ष ॥ ३६ ॥ **शि०** भूतपतेःब्रह्मणः ॥ **ति०** निधिजालंनिधिजालवदित्यर्थः । धीरनिष्ठितकर्माङ्गं धीरैः निर्भयस्थिरचित्तैःनिष्ठितंनिर्वर्तितंकर्मणः निधिरक्षादिकर्मणःअङ्गंमहिषादिबलिरूपंयस्मिन् । कश्चित्तुकर्मान्तमितिपठित्वा । धीरैः निष्ठितस्यअनुष्ठितस्यकर्मणःतपोरूपस्यअन्तंफलरूपं इत्यर्थमाह । भूतपतेःमहेश्वरस्ययक्षेश्वरस्यवा ॥ ३८ ॥ इतिषष्ठःसर्गः ॥ ६ ॥

[पा०] १ ग. हनुमान्गुल्मान्राक्षसानांपतेर्गृहे. २ ङ. प्रहरणोदितान्. ३ क. ग.—ट. न्सितांश्चापि. ४ ग. हरीनश्वान्. घ. हारितांश्च. ५ ङ. झ. ट. शिक्षितान्. ६ ज. न्संगरे. ७ क. ग. च. छ. ज. ञ. वाजिनस्तत्रजांबूनदपरिष्कृतान्. ८ घ. ङ. झ. ञ. हेमजालैरविच्छिन्नाः. ट. हेमजालैःपरिच्छिन्नाः. ९ ग. च. छ. ज. स्तरुणादित्यवर्चसः. १० क. ग. घ. चन्द्रशाला. ११ ङ.—ट. पर्वतकानिच. क. ग. घ. पर्वतकान्यपि. १२ ख. ङ. झ. कामस्यचगृहं. १३ च. छ. ज. दिव्यं. १४ क. ग. ङ. —ज. ञ. ट. मन्दरतलप्रख्यं. झ. मन्दरसमप्रख्यं. १५ क.—ट. अनन्तरत्ननिचयं. १६ ग. जालनिरन्तरं. ख. जालसमावृतं. १७ ङ. झ. ञ. ट. कर्माङ्गं. १८ ङ.—ट. विरराजच. १९ क.—ट. शुभ्राणि. २० क. ग. मनोहरं. २१ च. छ. ज. नादेन. ङ. झ. ञ. ट. निस्वनेनच. २२ ग. तालघोषैश्च. ङ. च. छ. झ. ञ. ट. तलनिर्घोषैः. २३ क. निनादितं.

प्रासादसंघातयुतं स्त्रीरत्नशतसंकुलम् ॥ सुव्यूढकक्ष्यं हनुमान्प्रविवेश महागृहम् ॥ ४३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षष्ठः सर्गः ॥ ६ ॥

सप्तमः सर्गः ॥ ७ ॥

ग्रन्थकृतारावणभवनतद्गतपुष्पकविमानयोर्वर्णनं ॥ १ ॥

स वेश्मजालं बलवान्ददर्श व्यासक्तवैडूर्यसुवर्णजालम् ॥
यथा महत्प्रावृषि मेघजालं विद्युत्पिनद्धं सविहङ्गजालम् ॥ १ ॥
निवेशनानां विविधाश्च शालाः प्रधानशङ्खायुधचापशालाः ॥
मनोहराश्चापि पुनर्विशाला ददर्श वेश्मादिषु चन्द्रशालाः ॥ २ ॥
गृहाणि नानावसुराजितानि देवासुरैश्चापि सुपूजितानि ॥
सर्वैश्च दोषैः परिवर्जितानि कपिर्ददर्श स्वबलार्जितानि ॥ ३ ॥
तानि प्रयत्नाभिसमाहितानि मयेन साक्षादिव निर्मितानि ॥
महीतले सर्वगुणे स्थितानि ददर्श लङ्काधिपतेर्गृहाणि ॥ ४ ॥
ततो ददर्शोच्छ्रितमेघरूपं मनोहरं काञ्चनचारुरूपम् ॥
रक्षोधिपस्यात्मबलानुरूपं गृहोत्तमं ह्यप्रतिरूपरूपम् ॥ ५ ॥

समयसंभवो ध्वनिः ॥ ४२ ॥ व्यूढकक्ष्यं विशालप्रकोष्ठं ॥ ४३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षष्ठः सर्गः ॥ ६ ॥

स वेश्मजालमित्यादि ॥ व्यासक्तवैडूर्यसुवर्णजालं वैडूर्यघटितसुवर्णमयजालकरन्ध्रं ॥ १ ॥ निवेशनानां शालाः । गृहान्तःशालाः । प्रधानैर्मुख्यैः शङ्खायुधचापैः शालन्ते प्रकाशन्त इति प्रधानशङ्खायुधचापशालाः । पचाद्यच् । वेश्मादिषु हर्म्यप्रासादादिषु । चन्द्रशालाः शिरोगृहाणि ॥ २ ॥ नानावसुराजितानि नानारत्नराजितानि ॥ ३ ॥ प्रयत्नाभिसमाहितानि प्रयत्नेन यथायोगं स्थापितानि । मयेनेति विश्वकर्मा लक्ष्यते । महीतले निर्मितानि । इवशब्देन मयस्य निर्मातृत्वव्याजमात्रं । रावणप्रयत्नेनैव निर्मितानीत्यर्थः । यद्वा अन्यानि गृहाणि विश्वकर्मनिर्मितानि । इमानि तु मयं व्याजीकृत्य स्वयमुपायप्रदर्शनमुखेन निर्मितानीति पूर्वगृहेभ्यो विशेष उच्यते ॥ ४ ॥ तदन्तर्वर्तिपुष्पकविमानं दर्शयति—तत इति ॥ अप्रतिरूपरूपं अप्रतिमसौन्दर्यं । प्रकीर्णं दैवाच्युतं । रजसा पुष्परजसा ।

रामानु० नानाविधानिकर्माणियासांताःनानाविधकर्माणःशालाश्चनानाविधकर्मशालाः । कक्ष्याश्चनानाविधकर्मशालाइत्ययं पाठः । निवेशनानांविविधाश्चशालाइतिपाठेप्रधानभवनानांसंबन्धिनीःविविधाःशालाइत्यर्थः । प्रधानशङ्खायुधचापशालाः प्रधानैः मुख्यैःशङ्खैरायुधैश्चापैश्चशालन्तइतिप्रधानशङ्खायुधचापशालाःताः । पचाद्यच् । वेश्मान्यद्रयइववेश्माद्रयस्तेषु । वेश्मादिष्वितिपाठे आदिशब्देनप्रासादादयउच्यन्ते । चन्द्रशालाःशिरोगृहाणि । ' चन्द्रशालाशिरोगृहं ' इत्यमरः ॥ **ति०** चन्द्रशालाः चन्द्रकान्तमणिबद्धशालावा ॥ २ ॥ **ति०** वसु धनं । स्वबलेत्यत्रस्वशब्दोरावणवाची । कुबेराद्रावणेनलङ्कायाआच्छिद्यगृहीतत्वात् । यद्वा स्वशब्दोहनुमद्वाची । स्वबलेनार्जितानिलब्धप्रवेशानि ॥ ३ ॥ **ति०** विश्वकर्मकृतान्यपिमाययाविचित्ररचनादक्षेणमयेननिर्मितानीव ॥ **स०** प्रयत्नाभिसमाहितानि प्रयत्नेन विश्वकर्मणइतिशेषः ॥ ४ ॥ **रामानु०** वैश्रवर्णनिर्जित्यगृहीतंपुष्पकंवर्ण्यतेततइत्यादिना । ततः गृहदर्शनानन्तरं । आत्मबलानुरूपं आत्मनोप्रतिबलस्यसदृशं । गृहोत्तममितिपुष्पकमुच्यते । पुष्पकस्यापिगृहलक्षणसद्भावात् । एतच्चपुष्पाह्वयमित्यनेनव्यक्तीभविष्यति । रजसा पुष्परजसा ॥ तटिद्भिरिवस्थितैर्नारीप्रवेकैःअंभोदद्दीप्यमानमिव स्थितमितिसंबन्धः । वाह्यमानं उह्यमानं । आर्षःस्वार्थेणिच् । अतएवसंप्रसारणाभावः । यद्वाहंसप्रवेकैर्वाह्यमानं स्वामिनेतिशेषः ॥ यथेति । युक्तीकृतमेघचित्रं समूहीकृतनानावर्णमेघचित्रमित्यर्थः ॥ **ति०** नानावर्णैरयुक्तोपितयुक्तःकृतो युक्तीकृतः । सचासौचा-

[**पा०**] १ घ. प्रासादशतसंबाधं. २ क. गृहोत्तमं. ३ ग. च. छ. प्रयत्नेनसमाहितानि. ४ घ. ददर्शाद्भुतमेघ. ५ घ. गुणानुरूपं-

महीतले [1]स्वर्गमिव प्रकीर्णं श्रिया ज्वलन्तं बहुरत्नकीर्णम् ॥
नानातरूणां कुसुमावकीर्णं गिरेरिवाग्रं रजसावकीर्णम् ॥ ६ ॥
नारीप्रवेकैरिव [2]दीप्यमानं तडिद्भिरम्भोदवदर्च्यमानम् [3]॥
हंसप्रवेकैरिव वाह्यमानं श्रिया युतं खे [4]सुकृतां विमानम् ॥ ७ ॥
यथा नगाग्रं [5]बहुधातुचित्रं यथा नभश्च ग्रहचन्द्रचित्रम् ॥
ददर्श [6]युक्तीकृतमेघचित्रं विमानरत्नं बहुरत्नचित्रम् ॥ ८ ॥
मही कृता पर्वतराजिपूर्णा शैलाः कृता [7]वृक्षवितानपूर्णाः ॥
वृक्षाः कृताः पुष्पवितानपूर्णाः पुष्पं कृतं [8]केसरपत्रपूर्णम् ॥ ९ ॥
कृतानि वेश्मानि च पाण्डुराणि तथा [9]सुपुष्पाण्यपि पुष्कराणि ॥
पुनश्च पद्मानि सकेसराणि [10]धन्यानि चित्राणि तथा वनानि ॥ १० ॥
पुष्पाह्वयं नाम विराजमानं रत्नप्रभाभिश्च [11]विवर्धमानम् ॥
वेश्मोत्तमानामपि चोत्तमानं महाकपिस्तत्र महाविमानम् ॥ ११ ॥
कृताश्च वैडूर्यमया विहङ्गा रूप्यप्रवालैश्च तथा विहङ्गा ॥
चित्राश्च नानावसुभिर्भुजङ्गा जात्यानुरूपास्तुरगाः शुभाङ्गाः ॥ १२ ॥
प्रवालजाम्बूनदपुष्पपक्षाः [12]सलीलमावर्जितजिह्मपक्षाः ॥
कामस्य साक्षादिव भान्ति पक्षाः कृता विहङ्गाः सुमुखाः सुपक्षाः ॥ १३ ॥
[13]नियुज्यमानास्तु गजाः सुहस्ताः सकेसराश्चोत्पलपत्रहस्ताः ॥
बभूव देवी च कृता सुहस्ता लक्ष्मीस्तथा पद्मिनि पद्महस्ता ॥ १४ ॥

नारीप्रवेकैः नारीश्रेष्ठैः।"प्रवेकानुत्तमोत्तमा" इत्यमरः। इवशब्दो वाक्यालंकारे । अर्च्यमानं सर्वैरिति शेषः। हंसप्रवेकैर्वाह्यमानं सुकृतां पुण्यकृतां विमानमिव स्थितमित्यन्वयः। युक्तीकृतमेघचित्रं पुञ्जीकृतमेघचित्रं चित्रमेघसङ्घातसदृशमित्यर्थः । विमानरत्नं पुष्पकं ॥५—८॥महीति॥ यत्रेति शेषः। यत्र विमाने। पर्वतराजिपूर्णामही कृता चित्ररूपेण लिखिता । एवमुत्तरत्रापि बोध्यं । अत्र पूर्वपूर्वं प्रत्युत्तरोत्तरस्य विशेषवत्त्वादधिकालङ्कारः ॥ ९ ॥ कृतानीति ॥ अत्रापि यत्रेत्यध्याहार्यं । पुष्कराणि पुष्करिण्यः ॥ १० ॥ पुष्पाह्वयं पुष्पकं । उत्तमानं अधिकमानं । सर्वत्र ददर्शेत्यन्वयः ॥ ११ ॥ यत्रेति शेषः । नानावसुभिः नानारत्नैः । जात्यानुरूपाः जात्या सदृशाः । स्पष्टजातिस्वभावा इत्यर्थः ॥ १२ ॥ प्रवालजाम्बूनदकृतानि पुष्पाणि पक्षेषु येषां ते प्रवालजाम्बूनदपुष्पपक्षाः । सलीलमावर्जितजिह्मपक्षाः सलीलमालम्बिवक्रपक्षाः । कामस्य पक्षा इव कामस्य सहाया इव ॥ १३ ॥ नियुज्यमानाः स्वयमेवात्मानं नियोजयन्तः । कर्मकर्तरि यक् । यत्र विमाने । पद्मिनि पद्माकरे । स्वयमेवोत्पलपत्राभिषेककर्मणि प्रवर्तमानाः । सुहस्ताः

रुमेघश्चतद्वद्विचित्रं ॥ ५—८ ॥ ति० यत्रपुष्पके मही अनेकजनानामाधारस्थानं पर्वतराज्यापूर्णं । पर्वतादयश्चात्रमणिस्वर्णादिनिर्मिताः । नत्विदंचित्ररूपमितिभ्रमितव्यं । अनन्तवानरसेनायानिर्बाधंतत्रावस्थानस्यवक्ष्यमाणत्वात् । किंचस्वामीच्छानुसारेण संकोचविकासौतस्यवक्ष्यतिस्वेच्छयाहनुमद्देहवत् । वितानंसमूहः । एकावल्यत्रालङ्कारः ॥ ९ ॥ **रामानु०** महीत्यादि । यत्रेति शेषः। ददर्शेत्यनुषज्यते । महीकृतेस्यारभ्यपद्मिनिपद्महस्तेत्यन्तमेकंवाक्यं । यत्रमह्यादयोलक्ष्म्यन्ताःपदार्थाःकृताःतत्पुष्पाह्वयंनाम

[पा०] १ च. छ. ज. स्वर्गमिवावतीर्णं. २ घ. प्रवेकैरभि. ३ ङ. झ. ञ. ट. रंभोधरमर्च्यमानं. ४ ग. ङ. छ.—ञ. सुकृतं. ५ क. बहुधाविचित्रं. ६ ङ—झ. ञ. ट. युक्तीकृतचारुमेघचित्रंविमानंबहु. ७ ग. वृक्षसमूहपूर्णाः. ८ ग. केसरजालपूर्णं. घ. केसररत्नपूर्णं. ९ क.—ट. सुपुष्पाअपिपुष्करिण्यः. १० ङ. झ. ञ. ट. वनानिचित्राणिसरोवराणि. च. छ. ज. वनानिचारूणितथापराणि. ग. वनानिचित्राणितथापराणि.. ११ ङ. झ. ञ. ट. विघूर्णमानं. १२ घ. जांबुनदजातपक्षाः. १३ क. ख. ग. ङ.—ट. नियुज्यमानाश्च.

इतीव तद्गृहमभिगम्य शोभनं सविस्मयो नगमिव चारुशोभनम् ॥
पुनश्च तत्परमसुगन्धि सुन्दरं हिमात्यये नगमिव चारुकन्दरम् ॥ १५ ॥
ततः स तां कपिरभिपत्य पूजितां चरन्पुरीं दशमुखबाहुपालिताम् ॥
अदृश्य तां जनकसुतां सुपूजितां सुदुःखितः पतिगुणवेगनिर्जिताम् ॥ १६ ॥
ततस्तदा बहुविधभावितात्मनः कृतात्मनो जनकसुतां सुवर्त्मनः ॥
अपश्यतोऽभवदतिदुःखितं मनः सुचक्षुषः प्रविचरतो महात्मनः ॥ १७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तमः सर्गः ॥ ७ ॥

शोभनशुण्डादण्डाः । सकेसराः कृ जलावगाहत्वेनाङ्गलग्नकिञ्जल्काः । उत्पलपत्रहस्ताः उत्पलपत्रवर्षिणः । गजाश्च कृताः तदभिषिच्यमाना पद्महस्ता अतएव सुहस्ता लक्ष्मीश्च कृता बभूवेत्यर्थः ॥ १४ ॥ इवशब्दो वाक्यालंकारे । तद्गृहं तस्य रावणस्य गृहं । सविस्मयः अभूदिति शेषः । नगं पर्वतमिव स्थितं । शोभनं शोभमानं । चारुशोभनं चारुमङ्गलं । इतीवेत्येकनिपातो वा प्रकारार्थः । इतीव तद्गृहं अभिगम्य अभिगत्य । अद्भुतदर्शनात्पुनश्चाभिगम्य सविस्मयोभूदिति योजना । रुचिरावृत्तमिदं । "चतुर्ग्रहैरिह रुचिरा जभस्जगाः" इति लक्षणात् ॥१५॥ अदृश्य अदृष्ट्वा । ऋषिनिपातनान्नञ्पूर्वेपि ल्यप् । सुदुःखितः अभूदिति शेषः । पतिगुणवेगनिर्जितां भर्तृगुणजवेन वशीकृतां ॥ १६ ॥ बहुविधभावितात्मनः बहुविधं यथा भवति तथा चिन्तितात्मनः । कृतात्मनः निशितबुद्धेः । सुवर्त्मनः सदाचारसंपन्नस्य । सुचक्षुषः दूरसूक्ष्मादिदर्शनेषु अप्रतिहतनयनतेजसः । महात्मनः महाधैर्यस्य ॥ १७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तमः सर्गः ॥ ७ ॥

महाविमानंददर्शेतिसंबन्धः । महीकृता महीनिर्मिता । एवमुत्तरत्रापिकृतशब्दार्थः । वेश्मोत्तमानामितिपञ्चम्यर्थेषष्ठी । वेश्मोत्तमेभ्योप्युच्चमानं । यद्वापूर्वंगृहोत्तमंह्यप्रतिरूपरूपमितिपुष्पकस्यगृहोत्तमत्वप्रतिपादनेनसजातीयत्वान्निर्धारणेषष्ठी । तेषांमध्येउच्चमानं उन्नतमितियावत् । अपिचेतिनिपातसमुदायोविशेषणान्तरसमुच्चयपरः । जात्यानुरूपाः आरट्टजत्लवनायुजत्वादिविशिष्टाश्वाकारसदृशाः । प्रवालजांबूनदमयानिपुष्पाणिपक्षेषुयेषांतेतथोक्ताः । सलीलमावर्जितजिह्मपक्षाः सलीलमानमितवक्रपक्षाः । कामस्यसाक्षात्पक्षाइव मदनस्यसाक्षात्सहायाइव कामोद्दीपकाइतियावत् । नियुज्यमानाःस्वयमेवव्याप्रियमाणाः । कर्मकर्तरियक् । सकेसराः पद्माकरविहारिगजाकारनिर्माणात्सकेसरत्वं । पद्मिनि पद्माकरे ॥ १४ ॥ स० हिमात्ययेवसन्ते । हिमशब्देनतद्युक्तमासचतुष्टयग्रहणात् ॥ १५ ॥ स० दृश्यस्याभावोदृश्यता । नविद्यतेदृश्यतायस्यास्सातथा । तामुद्दिश्यदुःखितोऽभूदितिवा । पतिगुणवेगनिर्जितां पत्युःरामस्ययोगुणवेगःगुणप्रवाहःतेननिर्जितां । पत्यारामेणकर्त्रा गुणवेगेन ज्याकर्षणवेगेन धनुर्भङ्गद्वारानिर्जितांनितरां प्राप्तां ॥ १६ ॥ रामानु० बहुविधभावितात्मनः बहुविधभावितमनसः । बहुविधचिन्तान्वितस्येतियावत् । कृतात्मनःकृतप्रयत्नस्य । 'आत्मादेहेधृतौयत्नेस्वभावपरमात्मनोः' इतिवैजयन्ती । सुवर्त्मनःशोभननीतिमार्गवर्तिनइत्यर्थः । सुचक्षुषःसकृदालोकनेनद्रष्टव्यंसर्वंकरतलामलकवत्साक्षात्कर्तुक्षमस्य ॥ ति० बहुविधभावितात्मनः नानाप्रकारेणसर्वंजगत्पूजितस्वभावस्य । स्वभाववाच्यात्मशब्दः । कृतात्मनःशिक्षितान्तःकरणस्य । सचक्षुषः श्रुतिस्मृतिन्यायरूपचक्षुस्सहितस्य ॥ स० बहुविधभावितात्मनः बहुप्रकारंध्यातरामरूपस्वामिकस्य ॥ १७ ॥ इतिसप्तमःसर्गः ॥ ७ ॥

[पा०] १ ग. मुपगम्य. २ ङ. झ. ञ. ट. चारुकन्दरं. ३ ग. ततस्तां. ४ च. छ. ज. सूर्जितां. ५ क. थ.—ज. ट. बाहुनिर्जितां. ६ घ.—ट. सुदुःखितां. ७ ख. ङ. झ. ञ. ट. सचक्षुषः.

अष्टमः सर्गः ॥ ८ ॥

ग्रन्थकृताविस्तारेणपुनः पुष्पकविमानवर्णनं ॥ १ ॥

स तस्य मध्ये भवनस्य संस्थितं महद्विमानं मणिवज्रचित्रितम् ॥
प्रतप्तजाम्बूनददजालकृत्रिमं ददर्श वीरः पवनात्मजः कपिः ॥ १ ॥
तदप्रमेयाप्रतिकारकृत्रिमं कृतं स्वयं साध्विति विश्वकर्मणा ॥
दिवं गतं वायुपथप्रतिष्ठितं व्यराजतादित्यपथस्य लक्ष्मवत् ॥ २ ॥
न तत्र किंचिन्न कृतं प्रयत्नतो न तत्र किंचिन्न महार्हरत्नवत् ॥
न ते विशेषा नियताः सुरेष्वपि न तत्र किंचिन्न महाविशेषवत् ॥ ३ ॥
तपःसमाधानपराक्रमार्जितं मनःसमाधानविचारचारिणम् ॥
अनेकसंस्थानविशेषनिर्मितं ततस्ततस्तुल्यविशेषदर्शनम् ॥ ४ ॥
मनस्समाधाय तु शीघ्रगामिनं दुरावरं मारुततुल्यगामिनम् ॥
महात्मनां पुण्यकृतां महर्द्धिनां यशस्विनामभ्यमुदामिवालयम् ॥ ५ ॥

पूर्वोक्तविमानवर्णनं विस्तृणीते—स तस्येत्यादि ॥ प्रतप्तजाम्बूनदजालकृत्रिमं निष्टप्तस्वर्णविशेषकृतकृत्रिमपक्ष्यादिकं ॥ १ ॥ अप्रतिमेयाप्रतिकारकृत्रिमं अपरिच्छेद्याप्रतिक्रियकृत्रिमं । तत्र हेतुमाह—कृतमिति ॥ स्वयं निर्मात्रा विश्वकर्मणा इदं साधु सुन्दरमिति श्लाघापूर्वं कृतं। सर्वत्राप्रतिहतसंचारं चैतदित्याह—दिवं गतं आकाशगतं । वायुपथप्रतिष्ठितं वायुमार्गभूतान्तरिक्षस्थितं । मध्ये भवनस्य संस्थितमिति पूर्वमुक्तत्वात् भूतलप्रत्यासन्नान्तरिक्षस्थितमित्यर्थः । आदित्यपथस्य लक्ष्मवत् । लक्ष्म लक्षणं व्यावर्तकं व्यराजत प्रचकाश इत्यर्थः ॥ २ ॥ ते विशेषाः तद्विमानस्थितविशेषाः । सुरेष्वपि सुरालयेष्वपि ॥ ३ ॥ तपस्समाधानेत्यादि पञ्चश्लोकी कुलकं ॥ सर्वत्र ददर्शेति संबन्धः । तपस्समाधानपराक्रमार्जितं तपस्समाधानेन तपोनुष्ठानेन पराक्रमेण च अर्जितं । मनस्समाधानविचारचारिणं समाधानमभिसंधानं । कर्मणि चैतत् । विचारो विविधा गतिः । मनोभिसंहितविविधगतिचारिणं । अनेकसंस्थानविशेषनिर्मितं अनेकैस्संस्थानविशेषैः विमानगोपुरादिसन्निवेशैः निर्मितं । ततस्ततस्तुल्यविशेषदर्शनं तत्र तत्र तुल्यं विशेषदर्शनं यस्मिन् ॥४॥मनस्समाधाय मन एकाग्रीकृत्य। स्वयं मनस्वीति यावत् । दुरावरं दुर्वारं महर्द्धिनां महर्द्धीनां । "अपि माषं मषं कुर्याच्छन्दोभङ्गं न कारयेत्" इत्युक्तरीत्या वृत्तभङ्गभिया ह्रस्वोच्चारणं । अभ्यमुदां इन्द्रादीनां

ति० मणिरत्नैः मणिश्रेष्ठैःचित्रितं । प्रतप्तजांबूनदजालानां तन्मयगवाक्षाणांकृत्रिमंकृतिःयस्मिंस्तत् ॥ १ ॥ ति० अप्रमेयप्रतिकारकृत्रिमं अप्रमेयैः अपरिच्छेद्यसौन्दर्यादिभिः प्रतिकारैःप्रतिमादिभिःकृत्रिमंनिर्वृत्तचित्रशोभं । पाठान्तरंत्वसांप्रदायिकमिति कतकः ॥ २ ॥ ती० तुल्यविशेषदर्शनं तुल्यानांरमणीयत्वेनसदृशानांविशेषाणांदर्शनंयस्मिंस्तत् । सर्वतोरमणीयमित्यर्थः ॥ स० मनस्समाधानविचारचारिणं । अन्तरुपविष्टानांमनस्समाधानंयथाभवतितथा विचारवत् पक्षिसंचारवत्चरतीतितथातं ॥ शि० तपस्समाधानाभ्यांकृच्छ्रचान्द्रायणादिदेवविशेषध्यानाभ्यांजातेनपराक्रमेणआर्जितं रावणेनप्राप्तं ॥ ४ ॥ ति० मनस्समाधाय स्वामिनोनुरुध्य तु शीघ्रगामित्वादिधर्मकं । दुरासदंपापिभिरितिशेषः । दुरावरमितिपाठे शत्रुभिर्दुर्निवारमित्यर्थः । महर्द्धिनां दीर्घाभावश्छान्दसः । एवंतुल्यगामिनमित्यत्रपुंस्त्वं । विमानशब्दोधैर्चादिर्वा । अभ्यमुदांमहासुखानांपुण्यकृतामेवआलयंआस्पदं ।

[पा०] १ क. ग. घ. ङ. झ. ञ. ट. संस्थितो. २ क. घ.—ट. मणिरत्नचित्रितं. ३ क. जालसन्ततं. ४ ङ. झ. ज. ट. धीमान्पवनात्मजः. ५ ग. ङ. झ. ञ. ट. तदप्रमेयप्रतिकार. ६ ङ. झ. ञ. ट. गतेवायुपथे. ७ ङ. झ. ट. लक्ष्मतत्. ८ ङ. ञ. महार्घरत्नवत्. ९ क. विशेषचारिणं. ङ. झ. ञ. ट. विशेषनिर्मितं. १० ङ. झ.—ञ. ट. दुरासदं. ११ च.—छ. महर्षिणामुदारमभ्यंमरुतामिवालयं घ. मनस्विनां. ज. महर्षिणां.

विशेषमालम्ब्य विशेषसंस्थितं विचित्रकूटं बहुकूटमण्डितम् ॥
मनोभिरामं शरदिन्दुनिर्मलं विचित्रकूटं शिखरं गिरेर्यथा ॥ ६ ॥
वहन्ति [1]यं कुण्डलशोभिताननाः महाशनाः व्योमचराः निशाचराः ॥
विवृत्तविध्वस्तविशाललोचनाः महाजवाः भूतगणाः सहस्रशः ॥ ७ ॥
[2]वसन्तपुष्पोत्करचारुदर्शनं वसन्तमासादपि [3]कान्तदर्शनम् ॥
सः [4]पुष्पकं तत्र विमानमुत्तमं ददर्श तद्वानरवीरसत्तमः ॥ ८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः ॥ ९ ॥

सीतान्वेषणाय रावणगृहस्थात्यद्भुतपुष्पकविमानमारूढवताहनुमता तत्रप्रसुप्तनानावस्थापन्ननानाजातीयनारीनिकरावलोकनं ॥ १ ॥

तस्यालयवरिष्ठस्य मध्ये विपु[5]लमायतम् ॥ ददर्श [6]भवनश्रेष्ठं हनुमान्मारुतात्मजः ॥ १ ॥
अर्धयोजनविस्तीर्णमायतं योज[7]नं हि तत् ॥ भवनं राक्षसेन्द्रस्य बहुप्रासादसंकुलम् ॥ २ ॥
मार्गमाणस्तु वैदेहीं सीतामा[8]तलोचनाम् ॥ सर्वतः परिचक्राम हनुमानरिसूदनः ॥ ३ ॥

॥ ५ ॥ विशेषमालम्ब्य विशेषसंस्थितं विशेषं गृहीत्वा विशेषेण संस्थितं । सविशेषविशेषणसंस्थितमिति यावत् । सविशेषसंस्थानविशेषविशिष्टमित्यर्थः । कूटानां विचित्रत्वबहुत्वे विशेषणद्वयेन दर्शयति—विचित्रेत्यादिना । विचित्रकूटं शिखरं गिरेर्यथा । कूटं अवान्तरशृङ्गं । शिखरं महाशृङ्गमिति प्रयोगादवधार्यते ॥ ६ ॥ यं यत् । आर्षो व्यत्ययः । महाशनाः । महाकाया इत्यर्थः । व्योमचाराः व्योमचरसदृशसंस्थानाः । विवृत्तविध्वस्तविशाललोचनाः विवृत्तानि वर्तुलानि विध्वस्तानि भुग्नानि विशालानि लोचनानि येषां ते तथा । महाजवाः महाजवा इव स्थिताः । भूतगणाः गोपुरवाहका इव प्रतिमारूपेण स्थिताः । अन्यथा रावणान्तःपुरे पुरुषसञ्चारायोगात् कामगस्य विमानस्य वहनासंभवाच्च । यद्वा शिबिकावाहका इव भूतगणा अधोभागे वहन्ति । तद्वारेणैव कामगत्वमपि । चेतनप्रेरणं विना अचेतनसंचारस्यात्यन्तमनुचितत्वाच्च ॥ ७ ॥ उत्करः समूहः ॥ ८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टमः सर्गः ॥ ८ ॥

तस्येत्यादि ॥ आलयवरिष्ठस्य पुष्पकस्य ॥ १ ॥ तद्भवनं कियत्प्रमाणमित्यत्राह—अर्धयोजनेति ॥ २ ॥ सर्वतः पुष्पकादन्यत्र सर्वत्र । पुष्पकारोहणस्य पश्चाद्व-

इवशब्दएवार्थे । अत्रतस्याचेतनत्वेपितदभिमानिदेवतायाश्चित्तज्ञत्वादितिबोध्यं ॥ ५ ॥ **रामानु०** वहन्तीत्यनेनश्लोकेनविमानस्यराक्षसवाह्यत्वंप्रतीयते । कामगस्यदिव्यस्यतन्नोपपद्यते । एतद्विरोधपरिहारार्थंवहतेर्धातोःरक्षणार्थत्वस्वीकारोपिनोपपद्यते । अन्तःपुरमध्येविमानरक्षणार्थंराक्षसावस्थानायोगात् । अतोत्रसमाधानंविद्वद्भिश्चिन्त्यं ॥ **ती०** वहन्ति वहन्तीव इवशब्दोत्राध्याहार्यः । तथाचविमानेनिर्मिताःनिशाचराकाराःप्रतिमाःवहन्तीवेत्यर्थः । अन्यथाकामगमस्यान्तःपुरेविद्यमानस्यराक्षसवहनरक्षणयोरयोगात् ॥ **स०** विवृत्तविध्वस्तविशाललोचनाः वि विरुद्धं स्वामिविरुद्धं वृत्तं चरित्रं विध्वस्तं येषां ते तथा । तेचतेविशाललोचनाश्चेतितथा ॥ ७ ॥ इत्यष्टमःसर्गः ॥ ८ ॥

रामानु० 'तस्यालयवरिष्ठस्य' 'सतस्यमध्येभवनस्यसंस्थितं' इतिपुष्पकाधारत्वेनप्रकृतस्यगृहश्रेष्ठस्य । भवनश्रेष्ठं पुष्पकाख्यं ॥ १ ॥ **रामानु०** सर्वतःपरिचक्राम रावणभवनपर्यन्तवर्तितद्भ्रातृकुमारामात्यादिभवनेषुपरितश्चचारेत्यर्थः । उत्तरश्लोके-

[पा०] १ च. झ. ञ. यत्कुण्डल. २ च. छ. ज. प्रतप्तचामीकरचारु. क. वसन्तपुष्पोद्गम. ३ ङ. झ. ञ. ट. चारुदर्शनं. ४ च. छ. ज. सुपुष्पकं. ५ च. छ. ज. ञ. विपुलमास्थितं. ङ. झ. ट. विमलमायतं. ६ च. ज. भवनं. ७ क. ग. ङ.—ट. योजनंमहत्.

[1]उत्तमं [2]राक्षसावासं हनुमानवलोकयन् ॥ आससादाथ लक्ष्मीवान्राक्षसेन्द्रनिवेशनम् ॥ ४ ॥
चतुर्विषाणैर्द्विरदैस्त्रिविषाणैस्तथैव च ॥ परिक्षिप्तमसंबाधं रक्ष्यमाणमुदायुधैः ॥ ५ ॥
राक्षसीभिश्च पत्नीभी रावणस्य निवेशनम् ॥ आहृताभिश्च विक्रम्य राजकन्याभिरावृतम् ॥ ६ ॥
तन्नक्रमकराकीर्णं तिमिभिर्झिलझषाकुलम् ॥ वायुवेगसमाधूतं पन्नगैरिव सागरम् ॥ ७ ॥
यौ हि वैश्रवणे लक्ष्मीर्या चेन्द्रे हरिवाहने ॥ सा रावणगृहे सर्वा नित्यमेवानपायिनी ॥ ८ ॥
या च राज्ञः कुबेरस्य यमस्य वरुणस्य च ॥ तादृशी तद्विशिष्टा वा ऋद्धी रक्षोगृहेष्विह ॥ ९ ॥
तस्य हर्म्यस्य मध्यस्थं वेश्म चान्यत्सुनिर्मितम् ॥ बहुनिर्यूहसंकीर्णं ददर्श पवनात्मजः ॥ १० ॥
ब्रह्मणोर्थे कृतं दिव्यं दिवि यद्विश्वकर्मणा ॥ विमानं पुष्पकं नाम सर्वरत्नविभूषितम् ॥
परेण तपसा लेभे यत्कुबेरः पितामहात् ॥ ११ ॥
कुबेरमोजसा जित्वा लेभे तद्राक्षसेश्वरः ॥ १२ ॥
ईहामृगसमायुक्तैः कार्तस्वरहिरण्मयैः ॥ सुकृतैराचितं स्तम्भैः प्रदीप्तमिव च श्रिया ॥ १३ ॥

क्ष्यमाणत्वात् ॥ ३ ॥ राक्षसेन्द्रनिवेशनं पुष्पकमध्यस्थालयादन्यन्मूलस्थानं । राक्षसीभिरित्यादिश्लोकद्वये आससादेति संबध्यते । रावणस्य निवेशनमिति पुनरुपादानमपूर्वविशेषणविवक्षया । नक्रः कुम्भीरः । तिमिङ्गिलः महामत्स्यः । झषः केवलमत्स्यः ॥४—९॥ तस्य हर्म्यस्येत्यादि ॥ पूर्वमुक्तार्थस्यापि पुनरुपन्यासः पुष्पकस्य मध्ये रावणस्य निवासभवनमन्यदस्तीत्यस्यार्थस्य स्पष्टीभावार्थम् । निर्यूहः मत्तवारणः ॥ १० ॥ ब्रह्मणोर्थे कृतं यत्कुबेरस्तपसा लेभे तद्वेश्म ददर्शेति पूर्वेण संबन्धः ॥ ११ ॥ कुबेरमित्यादि ॥ ईहामृगसमायुक्तैः वृकप्रतिकृतियुक्तैः कार्तस्वरहिरण्मयैः कार्तस्वरं सुवर्णं । हिरण्यं रजतं । " कृताकृतं हेम रूप्यं हिरण्यमभिधीयते " इति रजतस्यापि हिरण्यत्वाभिधानात् । जालवातायनैः जालानि तिर्यगूर्ध्वविन्यस्तफलकघटितानि । वातायनानि केवलानि रन्ध्राणि । अर्थवैशद्यार्थमेकार्थे शब्दद्वयप्रयोगो वा । महानीलाः सिंहलद्वीपोद्भवनीलरत्नानि । महाधनैः महामूल्यैः । निस्तुलाभिः सुवृत्ताभिः । तुलेन निर्मितेनेति शेषः । आदित्यतरुणोपमं तरुणादित्योपमं । एतदन्ते लेभे तद्राक्षसेश्वर इति संबध्यते । अन्यथा कूटागारै-

रावणगृहप्राप्तेरभिधानात् ॥ ३ ॥ **ती०** रावणस्यनिवेशनं निवेश्यन्तेपरिगृह्यन्तेपत्न्योत्रेतिनिवेशनं । रावणस्थानमित्यर्थः ॥ ६ ॥ **रामानु०** हनुमताप्राप्तरावणभवनस्यराक्षसभवनानांचसर्वोत्तरतांदर्शयितुंतत्समृद्धिमनुसंधत्ते—याहिवैश्रवणइत्यादिश्लोकद्वयेन । वैश्रवणेन्द्रयोर्ग्रहणमितरदिक्पालानामप्युपलक्षणं । 'रावणस्यगृहेसर्वा नित्यमेवानपायिनी' इत्यभिधानात् सर्वदिक्पालानामैश्वर्यमेकस्मिन्रावणभवनेसर्वदावर्ततइत्यवगम्यते ॥ **स०** हरिवाहने ' त्वङ्केशवालरोमाणिसुवर्णाभानियस्यतु । हरिःसवर्णतोश्वस्तुपीतकौशेयसप्रभ'इतिशालिहोत्रोक्तलक्षणोपेतोयोश्वःसहरिरित्युच्यते । सवाहनंयस्यतस्मिन् । यद्वाहरिवाहनेसूर्ये । ' हरिवाहनइत्युक्तिः शचीपतिविषयतोः ' इतिविश्वः । अनपायिनी अविश्लेषा ॥ ८ ॥ **रामानु०** तद्विशिष्टा ततोप्यधिका । रक्षोगृहेषुरावणभ्रातृपुत्रामात्यादिराक्षसगृहेषु । अत्रऋद्धेःसर्वशब्देनाविशेषितत्वात्कुबेरादेकैकदिक्पालैश्वर्यंरक्षसांगृहेषुप्रत्येकंवर्ततइत्यर्थः ॥ ९ ॥ **ति०** वेश्म सस्त्रीकशयनगृहमितिकतकः । वेश्म पुष्पकाख्यमितितीर्थः । अत्रतीर्थव्याख्याज्यायसी ॥ १० ॥ **रामानु०** कुबेरमित्यारभ्यसर्वत्तस्समलङ्कृतमित्यन्तमेकंवाक्यं । अतोवक्ष्यमाणेनकूटागारशब्देननपौनरुक्त्यं । ईहामृगसमायुक्तैः कृत्रिमवृकयुक्तैः । कार्तस्वरहिरण्मयैः सुवर्णरजतमयैः । ' कृताकृतंहेमरूप्यंहिरण्यमभिधीयते ' इतिरजतस्यापिहिरण्यत्वाभिधानात् । ज्वलनार्कप्रतीकाशमित्यारभ्य आरुरोहमहाकपिरित्यन्तमेकंवाक्यं । जालवातायनैर्युक्तं कुड्योपरिभागेऽलङ्कारार्थंस्वस्तिकसर्वतोभद्राद्याकारेणयन्त्रवत्तयाकृतंजालं । वायुसंचारार्थंकृतोगवाक्षोवातायनं । इन्द्रनीलमहानीलेति । " क्षीरमध्येक्षिपेन्नीलंक्षीरंचेन्नीलतांव्रजेत् । इन्द्रनीलमितिख्यातमितिचागस्त्यभाषितम् ' इतिरत्नशास्त्रोक्तलक्षणमिन्द्रनीलं । ' सिंहलाकारसंभूतामहानीलाइतिस्मृताः ' इत्युक्ता महानीलाइतितयोर्भेदः । विद्रुमेणमहाधनैर्मणिभिःनिस्तुलाभिर्मुक्ताभिश्चकरणैःविचित्रेणतलेनाभिविराजितमितिसंबन्धः । आदि-

[**पा०**] १ च. छ. ज. राक्षसेन्द्रस्यचावासमवलोकयन्. २ ग. तिमिमीनसमाकुलं. ३ ङ. ञ. समाधूतैः. ४ क. याच. ५ ङ.—ट. रम्यानिर्त्यं. क. लक्ष्मीर्निर्त्यं. ६ ग. लक्ष्मीरक्षोगृहेष्विह. ट. लक्ष्मीरक्षोगृहेष्वपि. ७ ङ. ञ. ट. संयुक्तं. ८ ङ. च. छ. ज. विधिवद्विश्व. ९ घ. श्रेष्ठंरत्न. १० क. वरेण. ११ क. ख. स्वरविभूषितैः. १२ ट. सुकृतंराजतस्तंभैः. क. ग. घ. च. ज. सुकृतैराजतस्तंभैः.

मेरुमन्दरसंकाशैरुल्लिखद्भिरिवाम्बरम् ॥ कूटागारैः शुभाकारैः सर्वतः समलंकृतम् ॥ १४ ॥
ज्वलनार्कप्रतीकाशं सुकृतं विश्वकर्मणा ॥ हेमसोपानसंयुक्तं चारुप्रवरवेदिकम् ॥ १५ ॥
जालवातायनैर्युक्तं काञ्चनैः स्फाटिकैरपि ॥ इन्द्रनीलमहानीलमणिप्रवरवेदिकम् ॥ १६ ॥
विद्रुमेण विचित्रेण मणिभिश्च महाधनैः ॥ निस्तुलाभिश्च मुक्ताभिस्तलेनाभिविराजितम् ॥ १७ ॥
चन्दनेन च रक्तेन तपनीयनिभेन च ॥ सुपुण्यगन्धिना युक्तमादित्यतरुणोपमम् ॥ १८ ॥
कूटागारैर्वराकारैर्विविधैः समलंकृतम् ॥ विमानं पुष्पकं दिव्यमारुरोह महाकपिः ॥ १९ ॥
तत्रस्थः स तदा गन्धं पानभक्ष्यान्नसंभवम् ॥ दिव्यं संमूर्च्छितं जिघ्रद्धूपवन्तमिवानिलम् ॥ २० ॥
स गन्धस्तं महासत्त्वं बन्धुर्बन्धुमिवोत्तमम् ॥ इत एहीत्युवाचेव तत्र यत्र स रावणः ॥ २१ ॥
ततस्तां प्रास्थितः शालां ददर्श महतीं शुभाम् ॥ रावणस्य मनःकान्तां कान्तामिव वरस्त्रियम् ॥२२॥
मणिसोपानविकृतां हेमजालविभूषिताम् ॥ स्फाटिकैरावृततलां दन्तान्तरितरूपिकाम् ॥ २३ ॥
मुक्ताभिश्च प्रवालैश्च रूप्यचामीकरैरपि ॥ विभूषितां मणिस्तम्भैः सुबहुस्तम्भभूषिताम् ॥२४॥
समैर्ऋजुभिरत्युच्चैः समन्तात्सुविभूषितैः ॥ स्तम्भैः पक्षैरिवात्युच्चैर्दिवं संप्रस्थितामिव ॥ २५ ॥
महत्या कुथयाऽऽस्तीर्णां पृथिवीलक्षणाङ्कया ॥ पृथिवीमिव विस्तीर्णां सराष्ट्रगृहमालिनीम् ॥ २६ ॥
नादितां मत्तविहगैर्दिवगन्धाधिवासिताम् ॥ परार्ध्यास्तरणोपेतां रक्षोधिपनिषेविताम् ॥ २७ ॥
धूम्रामगरुधूपेन विमलां हंसपाण्डुराम् ॥ चित्रां पुष्पोपहारेण कल्माषीमिव सुप्रभाम् ॥ २८ ॥
मनःसंह्लादजननीं वर्णस्यापि प्रसाधिनीम् ॥ तां शोकनाशिनीं दिव्यां श्रियः संजननीमिव ॥२९॥
इन्द्रियाणीन्द्रियार्थैस्तु पञ्च पञ्चभिरुत्तमैः ॥ तर्पयामास मातेव तदा रावणपालिता ॥ ३० ॥

रित्यनेन पुनरुक्तिः स्यात् ॥ १२—१९ ॥ जिघ्रत् अजिघ्रत् ॥ २०—२१ ॥ दन्तान्तरितरूपिकां दन्तैः व्यवहितरूपिकां । अन्तरान्तराकृतदन्तफलकामिति यावत् । सुबहुस्तम्भभूषितां अवान्तरबहुस्तम्भभूषितां । सुबहुस्तम्भभूषितैरिति पाठे सुबहुस्तम्भैः स्तम्भदार्ढ्यकारिपट्टैरलंकृतामित्यर्थः । अत्युच्चैः अत्यन्तोन्नतैः । दिवं आकाशं । कुथया आस्तरणेन । पृथिवीलक्षणाङ्कया सरित्समुद्रगिरिवनादिभिः पृथिवीलक्षणैरङ्कितया । कल्माषीं शबलवर्णां वसिष्ठधेनुमिव । सर्वकामप्रदत्वेन कल्माषीसादृश्यं । वर्णस्यापि प्रसाधिनीं वर्णोत्कर्षकरीमित्यर्थः । तां शोकनाशिनीमिति । ततस्तामिति वर्तमाने पुनस्तच्छब्द उपसंहारार्थः । तां प्रति प्रस्थितः ददर्शेति वासंबन्धः ॥ २२—२९ ॥ इन्द्रियाणीति ॥ हनुमत इति शेषः ॥ ३० ॥

त्यतरुणोपमं तरुणादित्योपमं । उपसर्जनस्यपरनिपातआर्षः ॥१२—१९॥ **ति०** यत्तु पुष्पकस्यैव साशाला । ततइत्यस्य तदनन्तरमित्यर्थइति तच्चिन्त्यं । प्रस्थितइतिपदाद्वारस्यात् अर्धयोजनविस्तीर्णमित्यादिना मूलालयप्रदर्शनोपक्रमाच्च । मूलालयंदृष्ट्वा तद्गृहिस्थंपुष्पकमन्विष्य तत्स्थएव रावणशयनगृहं तद्गृहवर्त्यनुमाय पुष्पकादवरुह्य तंप्रतिस्थितस्तांददर्शेत्येवन्याय्यमितिकतकः । यत्त्वित्यादिनोक्तव्याख्यैवयुक्तेति ममभाति । ' अवतीर्यविमानाच्चहनुमान्मारुतात्मजः' इत्यग्रे उपसंहारात् ॥ २२ ॥ **ती०** सुबहुस्तंभभूषितामित्यत्रबहुत्वविधानायस्तंभानुवादान्नपौनरुक्त्यं ॥ **स०** बहूनांशत्रूणांस्तंभःजडीभावःतेनविभूषितां यदाशयाप्रवृत्ताश-

---

[पा०] १ ङ. ञ. ज. ट. शुभागारैः. २ ङ. ञ. युक्तंच. ३ ज. वर्तुलाभिश्च. ४ क. ग. घ. युक्ततरुणादित्यसंनिभं. ५ च. छ. ज. कूटागारैर्महागारैःसर्वतः. ६ ङ. ञ. ज. ट. सर्वतो. क. घ. सततं. ७ घ. ततःसंप्रस्थितः. ८ ङ.—ट. शिवां. ९ ख. सुकृतां. १० ग.—ट. विराजितां. क. समावृतां. ११ ङ.—ट. मुक्तावज्रप्रवालैश्च. १२ क. सुगन्धैःसुविभूषितां. च. बहुस्तंभविभूषितां. घ. सुबहुस्तंभशोभितां. १३ घ. च. छ. ज. ञ. कुथयाकीर्णां. १४ ञ. ट. सराष्ट्रगृहशालिनीं. ग. सुराष्ट्रग्राममालिनीं. १५ च. छ. ज. रक्षोधिपतिसेवितां. १६ ङ. ञ. ज. ट. पत्रपुष्पोपहारेण. १७ ङ. ञ. ज. ट. मनसोमोदजननीं. १८ च. छ. ज. सेविता.

स्वर्गोयं देवलोकोऽयमिन्द्रस्येयं पुरी भवेत् ॥ सिद्धिर्वेयं परा हि स्यादित्यमन्यत मारुतिः ॥ ३१ ॥
प्रध्यायत इवापश्यत्प्रदीपांस्तत्र काञ्चनान् ॥ धूर्तानिव महाधूर्तैर्दैवनेन पराजितान् ॥ ३२ ॥
दीपानां च प्रकाशेन तेजसा रावणस्य च ॥ अर्चिर्भिर्भूषणानां च प्रदीप्तेत्यभ्यमन्यत ॥ ३३ ॥
ततोपश्यत्कुथासीनं नानावर्णाम्बरस्रजम् ॥ सहस्रं वरनारीणां नानावेषविभूषितम् ॥ ३४ ॥
परिवृत्तेऽर्धरात्रे तु पाननिद्रावशं गतम् ॥ क्रीडित्वोपरतं रात्रौ सुष्वाप बलवत्तदा ॥ ३५ ॥
तत्प्रसुप्तं विरुरुचे निःशब्दान्तरभूषणम् ॥ निःशब्दहंसभ्रमरं यथा पद्मवनं महत् ॥ ३६ ॥
तासां संवृतदन्तानि मीलिताक्षाणि मारुतिः ॥ अपश्यत्पद्मगन्धीनि वदनानि सुयोषिताम् ॥३७॥
प्रबुद्धानीव पद्मानि तासां भूत्वा क्षपाक्षये ॥ पुनः संवृतपत्राणि रात्राविव बभुस्तदा ॥ ३८ ॥
इमानि मुखपद्मानि नियतं मत्तषट्पदाः ॥ अम्बुजानीव फुल्लानि प्रार्थयन्ति पुनःपुनः ॥ ३९ ॥
इति चामन्यत श्रीमानुपपत्त्या महाकपिः ॥ मेने हि गुणतस्तानि समानि सलिलोद्भवैः ॥ ४० ॥
सा तस्य शुशुभे शाला ताभिः स्त्रीभिर्विराजिता ॥ शारदीव प्रसन्ना द्यौस्ताराभिरभिशोभिता ॥४१॥
स च ताभिः परिवृतः शुशुभे राक्षसाधिपः ॥ यथा ह्युडुपतिः श्रीमांस्ताराभिरभिसंवृतः ॥ ४२ ॥
याश्यवन्तेम्बरात्ताराः पुण्यशेषसमावृताः ॥ इमास्ताः संहृताः कृत्स्ना इति मेने हरिस्तदा ॥ ४३ ॥
ताराणामिव सुव्यक्तं महतीनां शुभार्चिषाम् ॥ प्रभावर्णप्रसादाश्च विरेजुस्तत्र योषिताम् ॥ ४४ ॥

स्वर्गोयमिति ॥ सामान्यतः स्वर्गोयं । तत्रापि देवलोकः त्रयस्त्रिंशद्देवानां लोकः । तत्रापीन्द्रस्य पुरी अमरावती । परा सिद्धिः ब्रह्मणः स्थानमित्युत्तरोत्तरोत्कर्षः ॥ ३१ ॥ प्रध्यायत इव निश्चलतया प्रकृष्टध्यानयुक्तानिव । धूर्तान् अक्षधूर्तान् । देवनेन द्यूतेन ॥ ३२ ॥ प्रदीप्ता शाला दग्धेति अभ्यमन्यत ॥ ३३ ॥ कुथासीनं कुथशयितं । नानावर्णाम्बरस्रजमिति । हलन्तस्य स्रक्छब्दस्य भागुरिमतेन टावन्तत्वादजन्तत्वोपपत्तिः ॥ ३४—३५ ॥ निःशब्दान्तरभूषणं निःशब्दविशेषाणि भूषणानि यस्य ॥ " अथान्तरं रन्ध्रेप्यपरव्यवधानयोः । अवकाशावसरयोरवसानविनार्थयोः । विशेषमध्यतादर्थ्येषु " इति दर्पणः ॥ अतिनिद्रापरवशत्वेन निश्चलाङ्गतया निःशब्दभूषणमित्यर्थः ॥ ३६—३७ ॥ अत्र वदनानीत्यनुषज्यते । तासां वदनानि क्षपाक्षये दिवसे पद्मानीव प्रबुद्धानि भूत्वा रात्रौ पुनः संवृतपत्राणि सङ्कुचितपत्राणि पद्मानीव बभुः ॥ ३८ ॥ प्रार्थयन्ति प्रार्थयेरन् । मधुरसलुब्धतया अत्र पुनःपुनः पतेयुरित्यर्थः । व्यत्ययेन परस्मैपदं । अनुदात्तत्वेनात्मनेपदत्वात् । नियतं नूनं । उपपत्त्या युक्त्या । उपपत्तिमेवाह—मेन इति । तानि मुखानि । गुणतः सौरभादिगुणैः । सलिलोद्भवैः पद्मैः ॥ ३९—४३ ॥ प्रभा कान्तिः ।

त्रवोजडीभवन्तीत्यर्थः । " स्तंभौस्थूणाजडीभावौ " इत्यमरः ॥ २४ ॥ ती० प्रध्यायतइतिपाठेऽप्यटितिप्रकाशसंभारात्प्रत्यागच्छतइवस्थितान् । काञ्चनान् काञ्चनस्तंभगतानित्यर्थः ॥ ३२ ॥ ति० प्रदीप्ता अग्निज्वालाज्वालिता । अनेनाग्निमोऽग्निदाहस्सूचितः ॥ ३३ ॥ ति० निद्रितत्वात्संवृतानि संवृतपक्ष्माणि । तादृशानिचतानि दान्तानि ग्लानानि । मीलिताक्षीणि अतिसंवृतपक्ष्माणि । स्वर्गदेवलोकादेरिवसंवृतमीलितयोरपिभेदोबोध्यः । यद्वासंवृतदान्तानीत्यस्यैवव्याख्यानंनिमीलिताक्षीणीति । यद्वा संवृतत्वमोष्ठयोः

[पा०] १ ङ. झ. ञ. ट. देवलोकोयमिन्द्रस्यापि. ग. देवलोकोयंगान्धर्वीयं. २ च. छ. ज. गान्धर्वीयंपरासिद्धिरित्यमन्यत. क. गान्धर्वीयंपुरीवास्यादित्यमन्यत. ग. इन्द्रस्येयंपुरीवास्यादित्यमन्यत. ३ च. नानाभरणभूषितं. छ. ज. वराभरणभूषितं. ४ क. नानारत्नविभूषितं. ५ ङ. झ. ञ. ट. प्रसुप्तं. ६ ङ. च. झ. ञ. ट. भूषितं. ७ ङ. झ. दान्तानि. ८ ङ. च. छ. झ. ट. मीलिताक्षीणि. ९ क. ञ. क्षपाक्षये. १० घ.—छ. झ. ञ. ट. इतिवामन्यत. ११ क. संहृताः. १२ घ. सर्वाइति.

[1]व्यावृत्तगुरुपीनस्रक्प्रकीर्णवरभूषणाः ॥ पानव्यायामकालेषु निर्द्रापहृतचेतसः ॥ ४५ ॥
व्यावृत्ततिलकाः काश्चित्काश्चिदुद्भ्रान्तनूपुराः ॥ पार्श्वे गलितहाराश्च काश्चित्परमयोषितः ॥ ४६ ॥
[3]मुक्ताहारावृताश्चान्याः [4]काश्चिद्विस्रस्तवाससः ॥ [5]व्याविद्धरशनादामाः किशोर्य इव वाहिताः ॥४७॥
[6]सुकुण्डलधराश्चान्या विच्छिन्नमृदितस्रजः ॥ गजेन्द्रमृदिताः फुल्ला लता इव महावने ॥ ४८ ॥
चन्द्रांशुकिरणाभाश्च हाराः कासांचिदुत्कटाः ॥ हंसा इव बभुः सुप्ताः स्तनमध्येषु योषिताम् ॥ ४९ ॥
अपरासां च वैडूर्याः कादम्बा इव पक्षिणः ॥ हेमसूत्राणि चान्यासां चक्रवाका इवाभवन् ॥ ५० ॥
हंसकारण्डवाकीर्णाश्चक्रवाकोपशोभिताः ॥ आपगा इव ता रेजुर्जघनैः पुलिनैरिव ॥ ५१ ॥
[10]किङ्किणीजालसंकोशास्ता [11]हैमविपुलाम्बुजाः ॥ भावग्राहा यशस्तीराः सुप्ता नद्य इवाबभुः ॥५२॥
[12][13]दुष्वङ्गेषु कासांचित्कुचाग्रेषु च संस्थिताः ॥ बभूवुर्भूषणानीव शुभा भूषणराजयः ॥ ५३ ॥
अंशुकान्ताश्च कासांचिन्मुखमारुतकम्पिताः ॥ उपर्युपरि वक्त्राणां व्याधूयन्ते पुनःपुनः ॥ ५४ ॥
ताः पताका इवोद्भूताः पत्नीनां रुचिरप्रभाः ॥ नानावर्णसुवर्णानां वक्त्रमूलेषु रेजिरे ॥ ५५ ॥

वर्णः रूपं । प्रसादः प्रसन्नता ॥ ४४ ॥ पानव्यायामकालेषु पानानन्तरं भाविरतिव्यापारसमयेषु । व्यावृत्तगुरुपीनस्रक्प्रकीर्णवरभूषणाः विपर्यस्तगुरुपीनस्रजः प्रकीर्णवरभूषणाश्च सत्यः निद्रापहृतचेतसः विरेजुः ॥ ४५ ॥ व्यावृत्ततिलकाः उन्मृष्टतिलकाः । उद्भ्रान्तनूपुराः स्वस्थानानवस्थितनूपुराः ॥ ४६ ॥ मुक्ताहारावृताः मुक्ताहारैरावृताः । छिन्नमुक्ताहारा इत्यर्थः । व्याविद्धरशनादामाः छिन्नकाञ्चीगुणाः । किशोर्यः प्रथमवयस्काबडबाः । वाहिताः मार्गश्रमनिवृत्त्यर्थं भूमौ प्रवेष्टनं कारिताः । सर्वत्र रेजुरित्यन्वयः ॥ ४७—४८ ॥ चन्द्रांशुकिरणाभाः अंशुः सूर्यः । "अथांशुः स्यान्मयूखे सवितर्यपि" इति दर्पणः । चन्द्रसूर्ययोः किरणानामाभेवाभा येषां ते तथा । उत्कटाः स्थूलाः ॥४९—५१॥ अथासां नदीसमाधिं दर्शयति—किङ्किणीति ॥ किङ्किणीजालसंकोशाः किङ्किणीजालान्येव संकोशा मुकुलानि यासां ताः । एतत्स्थाने सत्कोशा इति पाठान्तरदर्शनात्संकोशशब्दो मुकुलवाचीत्यवगम्यते । भावाः शृङ्गारचेष्टाः त एव ग्राहाः नक्रा यासां ताः । सुप्तिदशायामपि वासनावशाद्भावाभिव्यञ्जकसंस्थानवत्त्वाद्भावग्राहा इत्युक्तं । यशस्तीराः यशश्शब्देन यशोहेतुभूता पर्यन्तप्रसृतप्रभोच्यते । सैव तीरं यासां ताः॥५२॥ संस्थिताः लग्नाः भूषणराजयः । भ्रमराणीव भ्रमरा इव । व्यत्यय आर्षः । कामुका इव । बभूवुः । "भ्रमरः कामुके भृङ्गे" इति दर्पणः । केचित्तु भूषणानीति पाठं कल्पयित्वा भूषणराजयः भूषणविमर्दकृतरेखाः । विस्रस्तभूषणानामपि कासांचिद्भूषणानीव बभूवुरित्यर्थ इत्याहुः ॥ ५३ ॥ मुखमारुतकम्पिताः अंशुकान्ताः सूक्ष्मवस्त्रदशाः । उपर्युपरि वक्त्राणां वक्त्राण्युपर्युपरि । "धिगुपर्यादिषु त्रिषु । द्वितीयाम्रेडितान्तेषु" इति द्वितीयाभाव आर्षः । व्याधूयन्त इति श्यन्नार्षः । धूनातेः क्र्यादित्वात् ॥५४॥ ता इति विधेयत्वात्स्त्रीलिङ्गता । नानावर्णसुवर्णानां नानाविधशोभनवर्णानां ॥ ५५ ॥

स० पद्मगन्धीनि ' उपमानाच्च ' इतीत्वं ॥ ३७ ॥ ति० व्यावृत्ताःकचाःपीनस्रजश्चयासांताश्च ॥ ४५ ॥ ति० अकुण्डलधराः कुण्डलधरणरहिताः गलितकुण्डलाइतियावत् ॥ विच्छिन्नाःआमृदिताश्चस्रजोयासांताः ॥ ४८ ॥ ति० अंशवःप्रभाः किरणास्तदाधाराः । अंशवःसूक्ष्मरश्मयः । किरणाःस्थूलरश्मयइत्यन्ये । शि० सुप्ताहंसाइवबभुः ॥ ४९ ॥ ति० किङ्किणीजालसंकाशाःतद्वन्मुकुलितनयनाः तत्स्थानेचनद्यांमुकुलितकुमुदानि । हेमविपुलांबुजत्वेनवक्त्रनिगरणं । उपमानेतुननिगरणं । किङ्किणीजालसंबाधा इतिपाठेकिङ्किणीजालसंबाधत्वमुभयत्रापिस्पष्टमेव । शब्दवत्त्वसाधर्म्यात्किङ्किणीशब्देनलहरीणामप्युक्तेः । भावाविलासाएवस्वाभाविकसुरतभावोवाग्राह्योयासांताः । यशःअतिगुणवत्त्वकृतयशएवतीरंयासांताः । यशश्शब्देनलक्षणयाकान्तिरित्यन्ये । सुप्तानार्यो

[पा०] १ ङ. च. ञ. ट. व्यावृत्तकुचपीन. झ. व्यावृत्तकचपीन. २ ङ.—ट. निद्रोपहृत. ३ ख. घ. ङ. झ. ञ. ट. मुक्ताहारवृताः. ४ क. ख. ग. ङ.—ट. काश्चित्प्रस्रस्त. घ. काश्चित्प्रहृत. ५ क. ग. व्यावृत्तरशना. ६ ङ. झ. ञ. ट. अकुण्डलधराः. ७ ङ.—ज. ञ. ट. विच्छिन्नामृदित. ८ ङ. झ. ञ. दुद्गताः. ९ ङ. झ. ञ. ट. कारण्डवोपेताः. १० च. छ. ज. जालसंबाधाः. ग. ङ. झ. ञ. ट. जालसंकाशाः. ११ क. वक्त्रकनकांबुजाः. १२ क. मृदुष्वंशेषु. १३ ङ. राशयः.

ववल्गुश्चात्र कासांचित्कुण्डलानि शुभार्चिषाम् ॥ मुखमारुतसंसर्गान्मन्दं मन्दं सुयोषिताम् ॥५६॥
शर्करासवगन्धैश्च प्रकृत्या सुरभिः सुखः ॥ तासां वदननिःश्वासः सिषेवे रावणं तदा ॥ ५७ ॥
रावणाननशङ्काश्च काश्चिद्रावणयोषितः ॥ मुखानि स्म सपत्नीनामुपाजिघ्रन्पुनः पुनः ॥ ५८ ॥
अत्यर्थं सक्तमनसो रावणे ता वरस्त्रियः ॥ अस्वतन्त्राः सपत्नीनां प्रियमेवाचरंस्तदा ॥ ५९ ॥
बाहूनुपनिधायान्याः पारिहार्यविभूषितान् ॥ अंशुकानि च रम्याणि प्रमदास्तत्र शिश्यिरे ॥ ६० ॥
अन्या वक्षसि चान्यस्यास्तस्याः काश्चित्पुनर्भुजम् ॥ अपरा त्वङ्कमन्यस्यास्तस्याश्चाप्यपरा भुजौ ॥६१॥
ऊरुपार्श्वकटीपृष्ठमन्योन्यस्य समाश्रिताः ॥ परस्परनिविष्टाङ्ग्यो मदस्नेहवशानुगाः ॥ ६२ ॥
[अन्योन्यस्याङ्गसंस्पर्शात्प्रीयमाणाः सुमध्यमाः ॥ एकीकृतभुजाः सर्वाः सुषुपुस्तत्र योषितः ॥६३॥]
अन्योन्यभुजसूत्रेण स्त्रीमाला ग्रथिता हि सा ॥ मालेव ग्रथिता सूत्रे शुशुभे मत्तषट्पदा ॥ ६४ ॥
लतानां माधवे मासि फुल्लानां वायुसेवनात् ॥ अन्योन्यमालाग्रथितं संसक्तकुसुमोच्चयम् ॥ ६५ ॥
व्यतिवेष्टितसुस्कन्धमन्योन्यभ्रमराकुलम् ॥ आसीद्वनमिवोद्भूतं स्त्रीवनं रावणस्य तत् ॥ ६६ ॥
उचितेष्वपि सुव्यक्तं न तासां योषितां तदा ॥ विवेकः शक्य आधातुं भूषणाङ्गाम्बरस्रजाम् ॥ ६७ ॥
रावणे सुखसंविष्टे ताः स्त्रियो विविधप्रभाः ॥ ज्वलन्तः काञ्चना दीपाः प्रेक्षन्तानिमिषा इव ॥६८॥
राजर्षिपितृदैत्यानां गन्धर्वाणां च योषितः ॥ राक्षसानां च याः कन्यास्तस्य कामवशं गताः ॥६९॥

ववल्गुरिति ॥ उपधानपरिसरे घनमणिखचिततया लम्बमानानि कुण्डलानि मन्दं मन्दं चेलुरित्यर्थः ॥५६—५८॥ रावणे अत्यर्थं सक्तमनसः । अस्वतन्त्राः पाननिद्रापरवशाः ताः सपत्नीभिराघ्रातमुखाः । वरस्त्रियः तदा मुखाघ्राणसमये सपत्नीनां प्रियमेवाचरन् रावणोऽजिघ्रदिति बुद्ध्या स्वयमप्यजिघ्रन्नित्यर्थः । अथवा कथं सपत्न्योपि सह स्वपन्तीत्याशङ्क्याह—अत्यर्थमिति ॥ ५९ ॥ पारिहार्यो वलयः । अंशुकानि च उपनिधायेत्यनुषज्यते ॥ ६० ॥ अन्या वक्षसि चान्यस्या इत्यादिश्लोकद्वये शिश्यिर इत्येतद्वचनविपरिणामेन यथायोगं संबध्यते उपनिधायेति च ॥ ६१—६३ ॥ मालेव पुष्पमालेव । मत्तषट्पदस्थानीयाः केशाः ॥ ६४ ॥ लतानामित्यादिश्लोकद्वयमेकान्वयं ॥ तद्रावणस्य स्त्रीवनं लतानां वनमिवासीदिति संबन्धः। विशेषणान्युभयत्र योज्यानि। वायुसेवनाद्धेतोः अन्योन्यमालाग्रथितं अन्योन्यमालारूपेण ग्रथितं सुखमुखमारुतसेवनादन्योन्यमालाग्रथितमिति स्त्रीपक्षे । संसक्तकुसुमोच्चयं । अन्योन्यसंसक्तनीवीकं संसक्तकुसुमसमूहं चेत्यर्थः । व्यतिवेष्टितसुस्कन्धं अन्योन्यपरिवेष्टितांसं अन्योन्यपरिवेष्टितप्रकाण्डं च । अन्योन्यं भ्रमरैश्चिकुरैराकुलं भ्रमरैः भृङ्गैराकुलं च । " भ्रमरश्चिकुरे भृङ्गे " इति विश्वः ॥ ६५—६६॥ उचितेषु स्थानेषु स्थितानामपि भूषणाङ्गाम्बरस्रजां साधारण्यादेकतामापन्नानामिति भावः । विवेकः सुव्यक्तमाधातुं न शक्यः । अन्योन्यसंग्रथितत्वेन सुप्तत्वात् । इमा अस्या भूषणाङ्गाम्बरस्रजः इमा अपरस्या इति विवेकः कर्तुं न शक्य इत्यर्थः ॥ ६७ ॥ सुखसंविष्टे सुखसुप्ते । काञ्चनाः काञ्चनदीपस्तम्भस्था दीपाः अनिमिषास्सन्तः प्रैक्षन्तेव । अनेन रावणस्य जाग्रद्दशायां दीपैरपि ताः स्त्रियो निश्चलं द्रष्टुमशक्या इति गम्यते ॥ ६८ ॥ अथ सीतयैकया अकाम्यत्वं वक्तुं सर्वस्त्रीकाम्यत्वमाह—

नद्यइवबभुः ॥ ५२ ॥ ति० शर्करासवः आसवविशेषः । तद्योगात्तद्गन्धः । प्रकृत्याचसुरभिः । यद्वाप्रकृत्याअसुरभिरपि वायुरिति शेषः । तासांवदननिश्श्वासःतद्युक्तः । अर्शआद्यजन्तं । अतएवशर्करासवगन्धःरावणंसिषेवे ॥ ५७ ॥ ति० राजर्षयोविप्रदैत्याश्च ।

[पा०] १ ग. श्चारु. क. स्तत्र. २ च. छ. ज. मारुतसंक्षोभात्. ग. घ. मारुतसंसर्गैर्मन्दं. क. ङ. झ. ञ. ट. मारुतसंकंपैर्मन्दं. ३ झ. ञ. ट. मन्दंच. क. च. छ. ज. मन्दंस्म. ४ क. घ.—ट. गन्धस्स. ग. गन्धाढ्यः. ५ ग. च.—झ. ट. मुखानिच. ६ क. अंशुकानीव. ७ ग. ङ.—ट. कुचौ. ८ अयंश्लोकः क.—ट. पाठेषुदृश्यते. ९ ङ.—ट. प्रतिवेष्टित. १० ङ. च. छ. ज. सुखसंसुप्ते. ११ ख. ङ. झ. ट. प्रेक्षन्तोऽनिमिषाइव. क. च. छ. ज. ञ. प्रेक्षन्तेऽनिमिषाइव. १२ ङ. झ. ट. राजर्षिविप्र. १३ क.—ट. रक्षसांचाभवन्कन्याः. १४ क. स्तथा.

युद्धकामेन ताः सर्वा रावणेन हृताः स्त्रियः ॥ समदा मदनेनैव मोहिताः काश्चिदागताः ॥ ७० ॥
न तत्र काश्चित्प्रमदाः प्रसह्य वीर्योपपन्नेन गुणेन लब्धाः ॥
न चान्यकामापि न चान्यपूर्वा विना वरार्हां जनकात्मजां ताम् ॥ ७१ ॥
न चाकुलीना न च हीनरूपा नादक्षिणा नानुपचारयुक्ता ॥
भार्याऽभवत्तस्य न हीनसत्त्वा न चापि कान्तस्य न कामनीया ॥ ७२ ॥
बभूव बुद्धिस्तु हरीश्वरस्य यदीदृशी राघवधर्मपत्नी ॥
इमा यथा राक्षसराजभार्याः सुजातमस्येति हि साधुबुद्धेः ॥ ७३ ॥

राजर्षीत्यादिना श्लोकत्रयेण ॥ तस्य कामवशं गताः तं प्रति यः कामः तस्य वशंगताः। तं कामयित्वा स्वयमेवागतास्ताः न तु तेन कामयित्वा हृता इत्यर्थः ॥ ६९ ॥ हृताश्च काश्चन श्रूयन्ते तत्र कथमित्यत्राह —युद्धेति ॥ तासु हृतासु तासां संबन्धिभिस्सह युद्धं भविष्यतीति युद्धं कामयित्वानेन हृताः नतु ताः कामयित्वा हृताः ॥ ७० ॥ अमुमेवार्थं विवृणोति— न तत्रेति ॥ तत्र तासु काश्चिदपि प्रमदाः प्रसह्य वीर्येण न लब्धाः। किंतु स्वसंवादेनैवेत्यर्थः। वीर्योपपन्नेन रावणेन न लब्धाः अपि तु गुणेन लब्धाः। अन्यकामा च काचित्तत्र नास्ति। अन्यपूर्वा च न। अन्यत्रासक्ता च न काचिदित्यर्थः ॥ ७१—७२ ॥ राघवधर्मपत्नी ईदृशी यदि स्वयंवरात्पूर्वमेवास्य धर्मपत्नी चेत्। अस्य सुजातं सुकृतं। इयमसाध्वी बुद्धिः कापेयत्वप्रमादकृता न तु स्वयं तस्य बुद्धिरिति द्योतयितुं साधुबुद्धेरित्युक्तं। एवं प्रमादोपस्थितबुद्ध्या पश्चात्तापोभूदित्याह—पुनश्चेति। यद्वा इमाःराक्षसराजभार्याःयथा स्वभर्त्रा विशिष्टास्सकलभोगयुक्ताश्च तथा राघवधर्मपत्नी ईदृशी यदि स्वभर्त्रा सहिता भोगयुक्ता च यदि तदाऽस्य रावणस्य सुजातं शोभनं जन्मेति साधुबुद्धेः परसमृद्धिपरस्य हरीश्वरस्य स्वयमाधिपत्यार्हस्य बुद्धिर्बभूव। अयं रावणः राघवधर्मपत्नीं यदि प्रत्यर्पयेत्तदास्य

अस्यब्रह्मराक्षसत्वादस्तिविप्रकन्याविवाहेऽधिकारः । कामवशंगतास्सत्यस्तस्ययोषितोऽभवन् । अनेनतासामप्यनुरागःसूचितः ॥ ६९ ॥ **तनि०** रावणःस्त्रीभिःसहयथासंततसंश्लेषेणतिष्ठति । एवंरामःसीतयासंश्लेषेणतिष्ठतिचेद्रावणस्यैश्वर्यमविच्छिन्नंस्यात् । साधुबुद्धेः शत्रूणामपिहितमन्वेषयतः ॥ **स०** साधुबुद्धेःदेवावतारादिषुसम्यग्बुद्धिमतःहरीश्वरस्यहनुमतःइतिवक्ष्यमाणाबुद्धिर्बभूव । तदेवव्यनक्ति—यदीति । इमाःपुरतस्सुप्ताःराक्षसराजभार्याःलङ्कायांयथावर्तन्ते तथाराघवधर्मपत्नीसीतापि यदीदृशी एतत्पुरगताचेत्तर्ह्यस्यअत्रसुप्तस्यरावणस्य सुजातंराक्षसत्वनिर्गमेनशोभनजन्म शिशुपालत्वावस्थायांभगवदङ्गप्रवेशकारणंजन्म हि प्रसिद्धं भवतीत्यर्थः । युद्धेरामेणहतस्सन्शिशुपालत्वंप्राप्यजयोभवत्वीतिभावः। विस्तरस्तुतीर्थव्याख्यानेद्रष्टव्यः॥ **ती०** यद्वा राघवधर्मपत्नी यथा रावणेनबलादानीताइमाराक्षसराजभार्याः तथायदि सुग्रीवेणबलाद्धृतायदि तदा हरीश्वरस्यसुग्रीवस्य सुजातंहीतिसाधुबुद्धेः सन्मन्त्रिबुद्धेः अस्यहनुमतः ईदृशीबुद्धिर्बभूवेत्यन्वयः । यद्वा इमाराक्षसराजभार्यायथारावणेनाहृताइत्यर्थः । राघवधर्मपत्नी ईदृशीयदि अनेनाहृतायदि तदा अस्य रावणस्य सुजातंकिं सम्यग्भविष्यतिकिं । नभविष्यत्येवेति हरीश्वरस्यबुद्धिर्बभूव । " मम दयिततरा हृतावनान्तात्प्रजनिचरेण तदा विमथ्य सा । कथय मम रिपुं तमद्य वै प्लवगपते यमसादनं नयामि " इति रामवाक्याद्रावणस्यन सम्यग्भविष्यतीत्यर्थः । यद्वा इमाराक्षसराजभार्यायथामयादृष्टाइतिशेषः । राघवधर्मपत्नी ईदृशीयदि मयादृष्टायदीत्यर्थः । तदा अस्यमम सुजातंजन्मसफलमितिहरीश्वरस्यबुद्धिर्बभूव । "यश्चमासान्निवृत्तोमे दृष्टास्नीतेतिवक्ष्यति । मत्तुल्यविभवोभोगैः सुखंसविहरिष्यति । ततःप्रियतरोनास्ति ममप्राणाद्विशेषतः " इतिसुग्रीववचनात् प्रभोःसुग्रीवस्य प्रियसंवादकत्वेन ममजन्म सफलमितिभावः । यद्वा इमाराक्षसराजभार्याः यथामयादृष्टाः राघवधर्मपत्नी ईदृशीयदि दृष्टायदि अस्यसीतायाअदर्शनहेतुना सुग्रीवरामादिभयात्प्रायोपवेशनायोद्युक्ताङ्गदादिवानरसमानस्येत्यर्थः । सुजातमितिबुद्धिर्बभूव । "अप्रवृत्तौचसीतायाः पापमेवकरिष्यति । तस्मात्क्षममिहाद्यैव प्रायोपविशनंहिनः । त्यक्त्वापुत्रांश्चदारांश्च धनानिचगृहाणिच " इतिसीताऽदर्शनव्यथिताङ्गदादीनां पुनर्जीवितलाभात्सुजातमितिभावः । यद्वा इमाराक्षसराजभार्या यथाजीवन्तीत्यर्थः । राघवधर्मपत्नी ईदृशी जीवतियदि तदा अस्य रामस्य सुजातमितिबुद्धिर्बभूव । " ज्ञायतांसौम्यवैदेही यदिजीवतिवानवा । नह्यहंजीवितुंशक्तस्तामृतेजनकात्मजां " इतिसीताजीवितसंशयव्यथितस्यरामस्य सीताजीवितनिश्चयेसति स्वजीवितलाभात्सुजातमितिभावः । यद्वा हेराक्षसराज इमाःस्त्रियो यथाभार्याः एवं राघवधर्मपत्नी ईदृशीयदि अस्यतव सर्वसंपत्समृद्धियुक्तपुत्रपौत्रादिसहितस्यास्यतवेत्यर्थः । सुजातंहिकिंसम्यग्भविष्यतीति रावणस्याहि-

[पा०] १ क. ग. दक्षनाः. २ ग. घ. च.—ट. जनकात्मजांतु. ३ ङ. झ. ट. महाराक्षसराज.

पुनश्च सोचिन्तयदार्तरूपो ध्रुवं विशिष्टा गुणतो हि सीता ॥
अथायमस्यां कृतवान्महात्मा लङ्केश्वरः कष्टमनार्यकर्म ॥ ७४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे नवमः सर्गः ॥ ९ ॥

शोभनं जन्म स्यादिति बुद्धिर्जातेत्यर्थः ॥ ७३ ॥ किंच चिन्तान्तरमाह—पुनश्चेति ॥ अथ सः हनुमान् सीता गुणतः पातिव्रत्यादिगुणतः ध्रुवं विशिष्टा हि । अस्यां एतद्विषये । महात्मा महाकुलप्रसूतोपि अयं लङ्केश्वरः । अनार्यकर्म अपहरणरूपं कर्म कृतवान् । कष्टमिति । आर्तरूपः अत्यन्तमार्तः । " प्रशंसायां रूपप् " पुनश्चाचिन्तयत् । वैदेह्याः दृढव्रतत्वात्पातिव्रत्यभङ्गो न भवेदेव । अपि तु मिथ्यापवादमेवोत्पादितवानिति भृशं दुःखितस्सन् चिन्तितवानित्यर्थः । यद्वा बभूवेत्यादि । राक्षसराजपत्नीवत्सीता स्वभर्त्रा संगता चेत्सीतापहरणं न कृतवांश्चेत्तदास्य सुजातमित्युक्तं । तत्र निरतिशयसौन्दर्यादिशालिन्या मैथिल्याः रक्षस्स्त्रीसाम्यं चिन्तयता मया हीनोपमा कृतेति पश्चात्तापयुक्तस्सन् अचिन्तयत् । हि यस्मात्सीता गुणतः विशिष्टा अतः आर्तस्वरूपस्सन्नचिन्तयत् । मया हीनोपमैव कृतेत्यचिन्तयत् । अथ अथापि अस्यां सीतायां । अनार्यकर्म धर्षणरूपं कर्म । कृतवान् । कष्टं सर्वमिदं लङ्केश्वर्यं भ्रष्टं भविष्यतीत्यचिन्तयच्चेत्यर्थः । यद्वा राघवधर्मपत्नी यथा रावणेन बलादानीता तथा राक्षसराजभार्याः बलात्सुग्रीवेण बन्दीकृताश्चेदस्य हरीश्वरस्य सुग्रीवस्य सुजातं हीति साधुबुद्धेः सन्मन्त्रिबुद्धेः अस्य हनुमतः बुद्धिर्बभूवेत्यर्थः । यद्वा । इमा राक्षसराजभार्याः यथा रावणेनुरक्ताः ईदृशी राघवधर्मपत्नी यदि एवमनुरक्ता चेत् अस्य सुजातमिति साधुबुद्धेरपि बुद्धिर्बभूव ऐश्वर्यातिशयदर्शनविस्मयादिति भावः । अतएव वक्ष्यति—अहो वीर्यमित्यादिना । एवंहठादुक्त्वानुशयितवानित्याह—पुनश्चेति ॥ हि यस्मात्सीता गुणतः पातिव्रत्येन विशिष्टा सर्वोत्कृष्टा अतः आर्तरूपः किं मया व्याहृतमित्यनुतप्तः सन् । अस्यामनार्यकर्म कृतवानित्यचिन्तयत् ॥ ७४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने नवमः सर्गः ॥ ९ ॥

तमुपदेष्टव्यमितिबुद्धिर्बभूव । " तद्ववान्दृष्टधर्मार्थस्तपःकृतपरिग्रहः । परदारान्महाप्राज्ञनोपरोद्धुंलमर्हसि " इतिहितोपदेशस्यवक्ष्यमाणत्वात् । यद्वा एतासांमध्ये सीतानास्तीतिनिश्चिनोति—बभूवेति । इमाराक्षसराजभार्याः यथा यादृग्रूपवत्यइत्यर्थः । यदि किमित्यर्थे । राघवधर्मपत्नी ईदृशी किं ईदृग्रूपवतीकिं । किंतुत्रिलोकसुन्दरीत्यर्थः । अतएवात्र नास्तीतिशेषः । इत्यस्यहरीश्वरस्यसुजातं निश्चितंयथातथाबुद्धिर्बभूव ॥ **ति०** अथ सीताप्येतत्क्रियन्तर्गता नवेति विकल्प्याद्ये रावणस्यभद्रमेवेति बुद्धिर्हनुमतोजातेत्याह—बभूवेति । साधुबुद्धेर्हरीश्वरस्य इतिबुद्धिर्बभूव । इमामहाराक्षसराजभार्याःयथातद्भुक्ताः राघवधर्मपत्न्यपि ईदृशी एतदन्तर्गता एतद्भुक्ताचयदिस्यात् तदाऽस्य रावणस्यसुजातंभद्रमेवभवति । रावणभुक्तेति मयानिवेदितेसति सीतायांमृतायामिव राघवस्योपेक्षणाद्रावणवधयत्नाप्रसक्तेरितिभावः ॥ **शि०** इमाराक्षसराजभार्या यथा स्वपतिस्मरणादिषुनिरताः । ईदृशी तथारामस्मरणादिनिरता यदि राघवधर्मपत्नी । तत्स्मरणादीनांविघ्नोनकृतःस्यादित्यर्थः । तदा अस्य रावणस्यसुजातं कल्याणमेवेत्यर्थः । इतिसाधुबुद्धेर्हरीश्वरस्यबुद्धिः निश्चयोबभूव ॥ ७३ ॥ **ति०** यदीत्यनेन सूचितमस्यपक्षस्यात्यन्तासंभावितत्वमाह—पुनश्चेति । पक्षान्तरंचसोचिन्तयत् विचारेणनिश्चितवानित्यर्थः । चिन्ताप्रकारः हिप्रसिद्धमेतत् । यत्सीतादेवीगुणतःपातिव्रत्यादिगुणैर्विशिष्टा । अथ यतइत्यर्थे । यतोमहात्मामहाबलोलङ्केश्वरः । निरवधिकैश्वर्यवैशिष्ट्यमनेनसूचितं । ईदृशःअस्यांजानक्यांअनार्यकर्म अपहरणरूपंकर्म । आर्तरूपः परिगृहीतमायारूपःसन्कष्टं सक्लेशंयथाभवतितथाकृतवान् । ययेषाऐश्वर्यादौसरागास्यात्तदास्वरसतएवनयनंस्यात्नचतदस्ति । अस्माभिस्तद्विक्रोशनादेवरावणेनक्लेशपूर्वंनयनस्यचानुभवादित्याशयः । आर्तरूपइतिपाठे आर्तंसंजातपीडंरूपंयस्येत्यर्थे हनुमद्विशेषणं । आन्तरपीडासूचकरूपइत्यर्थः ॥ **स०** समहात्माहनूमान् पुनश्चैवमचिन्तयत् । हियस्मात् गुणतः पातिव्रत्यादिगुणैः सीता विशिष्टाश्रेष्ठा । अथ तस्मात् अस्यांसीतायांतद्विषये । अयं रावणः अनार्यकर्म अपहरणादिजुगुप्सितंकर्म कृतवान् । अतोमृत्वा आर्तरूपस्सन् ध्रुवंकदाप्यनिवर्त्यतयाशाश्वतंकष्टं पञ्चकष्टाख्यंतमः यातीतिशेषः । रावणदेहे जीवद्वयसमावेशात्सञ्जीवस्यपूर्वंश्लोकेगतिरुक्ता द्वितीयस्यत्वत्रेतिविवेकः ॥ ७४ ॥ इतिनवमस्सर्गः ॥ ९ ॥

[पा०] १ दात्तरूपो.

दशाग्र· सर्गः ॥ १० ॥

हनुमता पुष्पकविमाने नानालङ्कारोपशोभितशयनोत्तमशायिनो नानाभरणादिविभूषितवपुषोरावणस्यावलोकनं ॥ १ ॥ तथातत्पादमूलेवीणावेणुमृदङ्गादिनानावाद्यैस्सहसंसुप्तनानावस्थापन्ननारीनिकरनिरीक्षणं ॥ २ ॥ तथा तासांमध्येऽद्भुतशयनशायिमन्दोदरींदृष्टवतातेन तदद्भुतरूपेणतस्यांसीतात्वबुद्ध्या हर्षेण पुच्छचुंबनादिकापेयचेष्ताविष्करणं ॥ ३ ॥

तत्र दिव्योपमं मुख्यं स्फाटिकं रत्नभूषितम् ॥ अवेक्षमाणो हनुमान्ददर्श शयनासनम् ॥ १ ॥
दान्तकाञ्चनचित्राङ्गैर्वैडूर्यैश्च वरासनैः ॥ महार्हास्तरणोपेतैरुपपन्नं महाधनैः ॥ २ ॥
तस्य चैकतमे देशे सौम्यमालाविभूषितम् ॥ ददर्श पाण्डुरच्छत्रं ताराधिपतिसन्निभम् ॥ ३ ॥
जातरूपपरिक्षिप्तं चित्रभानुसमप्रभम् ॥ अशोकमालाविततं ददर्श परमासनम् ॥ ४ ॥
वालव्यजनहस्ताभिर्वीज्यमानं समन्ततः ॥ गन्धैश्च विविधैर्जुष्टं वरधूपेन धूपितम् ॥ ५ ॥
परमास्तरणास्तीर्णमाविकाजिनसंवृतम् ॥ दामभिर्वरमाल्यानां समन्तादुपशोभितम् ॥ ६ ॥
तप्तजाम्बूनदनिभं प्रदीप्तोत्तमकुण्डलम् ॥ लोहिताक्षं महाबाहुं महारजतवाससम् ॥ ७ ॥
लोहितेनानुलिप्ताङ्गं चन्दनेन सुगन्धिना ॥ सन्ध्यारक्तमिवाकाशे तोयदं सतडिद्गुणम् ॥ ८ ॥
वृतमाभरणैर्दिव्यैः सुरूपं कामरूपिणम् ॥ सवृक्षवनगुल्माढ्यं प्रसुप्तमिव मन्दरम् ॥ ९ ॥
क्रीडित्वोपरतं रात्रौ वराभरणभूषितम् ॥ प्रियं राक्षसकन्यानां राक्षसानां सुखावहम् ॥ १० ॥
पीत्वाऽप्युपरतं चापि ददर्श स महाकपिः ॥ भास्वरे शयने वीरं प्रसुप्तं राक्षसाधिपम् ॥ ११ ॥
निश्श्वसन्तं यथा नागं रावणं वानरर्षभः ॥ आसाद्य परमोद्विग्नः सोपासर्पत्सुभीतवत् ॥ १२ ॥

शयनासनं शयनस्यासनं खट्वामित्यर्थः । दान्तानि दन्तविकारभूतानि । काञ्चनानि काञ्चनमयानि च । अतएव चित्राणि नानावर्णानि अङ्गानि येषां तैः प्रान्ते दन्तमयैः ततः परं काञ्चनमयैः । सर्वत्र वैडूर्यनिर्मितैरित्यर्थः । महाधनैः महामूल्यैः वरासनैः शयनावरोहणकाले विश्रमाय स्थापितैः । उपपन्नं आवृतं ॥ १—२ ॥ एकतमे देशे शिरोभाग इत्यर्थः ॥ ३ ॥ उक्तमेवपर्यङ्कं पुनर्वर्णयन्नाह—जातरूपेत्यादिना ॥ चित्रभानोः सूर्यस्य ॥ ४—५ ॥ आविकाजिनं ऊर्णायुचर्म तेनपर्यङ्कस्योपरि फलका संधीयते । वरमाल्यानां अशोकातिरिक्तपुष्पाणां ॥ ६ ॥ महारजतवाससं हेमचित्रितवाससं । महारजतं हेम । महारजनवाससमिति पाठे कुसुम्भरागरञ्जितवस्त्रमित्यर्थः ॥ ७—८ ॥ सवृक्षवनगुल्माढ्यं सवृक्षैर्वनैः गुल्मैश्चाढ्यं प्रसुप्तं निश्चलमित्यर्थः ॥ ९—१२ ॥

रामानु० शयनासनं आस्यतेऽस्मिन्नित्यासनं । शयनासनंपर्यङ्काधारधिष्ण्यमितियावत् ॥ **ती०** शयनासनं शयनंचतदासनंच शयनासनंपर्यङ्कं । उभयोपकारादुभयव्यपदेशः । यद्वा आस्यतेअस्मिन्नित्यासनं । शयनस्यासनं शयनासनं । शयनगृहमित्यर्थः ॥ १ ॥ **ति०** वरासनैः स्त्रीशयनपल्यङ्कैः ॥ २ ॥ **रामानु०** तत्रैवप्रदेशे परमासनंचददर्शेत्याह—जातरूपपरिक्षिप्तमित्यादिनाश्लोकत्रयेण । परमासनंपर्यङ्कं ॥ **ति०** यद्वायत्सन्निधानेशोकाभावस्तादृशमालायुतं ॥ ४ ॥ **ति०** ननुसंभोगगृहेतत्रापि निद्राणस्यकर्थंवालव्यजनवीजनं कर्थंचहनुमतस्ताभिरदर्शनमितिचेन्न । यन्त्रनिर्मितस्त्रीप्रतिमादिभिस्तत्रापितत्संभवात् ॥ ५ ॥ **ति०** रावणस्यतटित्स्थानीयंसौवर्णंवासः ॥ ८ ॥ **ति०** सवृक्षवनगुल्माढ्यं पुष्पसहितवृक्षवनगुल्माढ्यंमन्दरमिवस्थितं । बाहवोस्यवृक्षाः । नासादयोगुल्माः ॥ **स०** सुरूपिणंसुन्दरं । कथमस्येत्यतउक्तंकामरूपिणमिति ॥ ९ ॥ **ति०** परमोद्विग्नःअयंपापी देवींहृतवानित्येतत्समीपेऽवस्थानमनुचितमितिमत्वाखिन्नचित्तःअपासर्पत् । सुभीतवत्सुभीतोयथाभयहेतोःपिशाचादेःसंमुखे स्थातुमशक्तोपसर्पतितद्वत् ॥ **स०** परमाःमहाबलाअपिउद्विग्नाःयेनसतथा । अतोभीतवदित्युपपन्नं ॥ **शि०** परमोद्विग्नःभविष्य-

[पा०] १ ग. च. छ. ज. रम्यं. २ क.—घ. च. छ. ज. महासंस्तरणोपेतैः. ३ तस्यचैकतमेदेशे. जातरूपपरिक्षिप्तं. इतिश्लोकयोःपौर्वापर्यं क. ग. घ. पाठेषुदृश्यते. ४ झ. ञ. दिव्यमालोपशोभितं. ट. दिव्यमाल्योपशोभितं. च. छ. ज. सोभ्यमाल्य. ५ ग. राभरणैर्मुख्यैः.

अथारोहणमासाद्य वेदिकान्तरमाश्रितः ॥ सुप्तं राक्षसशार्दूलं प्रेक्षते स्म महाकपिः ॥ १३ ॥
शुशुभे राक्षसेन्द्रस्य स्वपतः शयनोत्तमम् ॥ गन्धहस्तिनि संविष्टे यथा प्रस्रवणं महत् ॥ १४ ॥
काञ्चनाङ्गदनद्धौ च ददर्श स महात्मनः ॥ विक्षिप्तौ राक्षसेन्द्रस्य भुजाविन्द्रध्वजोपमौ ॥ १५ ॥
ऐरावतविषाणाग्रैरापीडनकृतव्रणौ ॥ वज्रोल्लिखितपीनांसौ विष्णुचक्रपरिक्षतौ ॥ १६ ॥
पीनौ समसुजातांसौ सङ्गतौ बलसंयुतौ ॥ सुलक्षणनखाङ्गुष्ठौ स्वङ्गुलीतललक्षितौ ॥ १७ ॥
संहतौ परिघाकारौ वृत्तौ करिकरोपमौ ॥ विक्षिप्तौ शयने शुभ्रे पञ्चशीर्षाविवोरगौ ॥ १८ ॥
शशक्षतजकल्पेन सुशीतेन सुगन्धिना ॥ चन्दनेन परार्घ्येन स्वनुलिप्तौ स्वलंकृतौ ॥ १९ ॥
उत्तमस्त्रीविमृदितौ गन्धोत्तमनिषेवितौ ॥ यक्षपन्नगगन्धर्वदेवदानवराविणौ ॥ २० ॥
ददर्श स कपिस्तस्य बाहू शयनसंस्थितौ ॥ मन्दरस्यान्तरे सुप्तौ महाही रूषिताविव ॥ २१ ॥
ताभ्यां स परिपूर्णाभ्यां भुजाभ्यां राक्षसेश्वरः ॥ शुशुभेऽचलसंकाशः शृङ्गाभ्यामिव मन्दरः ॥२२॥
चूतपुन्नागसुरभिर्वकुलोत्तमसंयुतः ॥ मृष्टान्नरससंयुक्तः पानगन्धपुरस्सरः ॥ २३ ॥
तस्य राक्षससिंहस्य निश्चक्राम महामुखात् ॥ शयानस्य विनिश्श्वासः पूरयन्निव तद्गृहम् ॥ २४ ॥
मुक्तामणिविचित्रेण काञ्चनेन विराजितम् ॥ मुकुटेनापवृत्तेन कुण्डलोज्ज्वलितानानम् ॥ २५ ॥
रक्तचन्दनदिग्धेन तथा हारेण शोभिना ॥ पीनायतविशालेन वक्षसाभिविराजितम् ॥ २६ ॥

अथ अपसर्पणानन्तरं । आरोहणं सोपानं । आसाद्य अधिरुह्य । वेदिकान्तरं सोपानपर्वमध्यं ॥१३॥ यस्यगन्धेनान्ये हस्तिनोभीता भवन्ति स गन्धहस्ती । प्रस्रवणं निर्झरं ॥१४॥ निक्षिप्तौ प्रसारितौ ॥१५॥ विष्णुचक्रपरिक्षतौ । विष्णुः उपेन्द्रः ॥ १६ ॥ सङ्गतौ देहानुरूपौ ॥१७॥ संहतौ दृढसंधिबन्धौ । विक्षिप्तौ शयने निहितौ । पञ्चाङ्गुलिमत्तया पञ्चशीर्षावित्युक्तं । एतदन्तस्य ददर्शेत्यनेनान्वयः । अत्र द्विभुजत्वैकमुखत्वोक्तिः स्त्रीणां कामनीयत्वाय ॥ १८—१९ ॥ यक्षादीन् रावयितुं शीलमनयोरस्तीति तथा ॥ २० ॥ ददर्शेति पुनरभिधानं विशेषणान्तरविवक्षया ॥ २१ ॥ परिपूर्णाभ्यां दीर्घवृत्ताभ्यामित्यर्थः ॥ २२ ॥ निश्वासस्य चूतादिसुरभित्वं तदधिवासितरसावल्यादिमधुसेवनात् । मृष्टान्नरससंयुक्तः षड्रसपदार्थगन्धयुक्तः । पानगन्धपुरस्सरः पीयत इति पानं मधु तद्गन्धयुक्तः ॥ २३—२४॥ अपवृत्तेन स्थानात्किंचिच्चलितेन ॥२५—२६॥

देतदैश्वर्यध्वंसहेतुकोद्वेगविशिष्टःसन्नपासर्पत् । एतेनहनुमतोदयालुत्वातिशयःसूचितः ॥ १२ ॥ **रामानु०** आरोहणमासाद्यवेदिकान्तरमाश्रितः सोपानमार्गेणान्यवेदिकामारूढइत्यर्थः ॥ १३ ॥ **स०** गन्धहस्तिनिसंविष्टं गन्धहस्तिनामत्तगजेननितरांसंविष्टंअध्यारूढं प्रस्रवणंगिरिमिवस्थितं ॥ १४ ॥ कृतव्रणौ कृतव्रणकिणौ । वज्रचक्रयोरप्यसाध्यमृत्युरितिभावः ॥ **स०** विष्णुचक्रपरिक्षतौ विष्णोरुपेन्द्रस्ययच्चक्रंसैन्यंदेवगणस्तेनपरिक्षतौ विविधायुधजालेनपरिक्षतौ । तेनसुदर्शनस्यामोघत्वमक्षुण्णं । ' चक्रंसैन्यरथाङ्गयोः ' इतिविश्वः । भगवच्चक्रादन्यदिदंवा ॥ १६ ॥ **शि०** रुषितौ क्रुद्धौ ॥ **ति०** ददर्श अत्यादरेणददर्श । नातःपुनरुक्तिः । महाही महासर्पौ ॥ अत्रद्विभुजत्वकथनायुद्धादिकालएवविंशतिभुजत्वंदशशीर्षत्वंचेतिबोध्यं ॥ २१ ॥ **ती०** भुजाभ्यामितिद्विभुजत्वं महामुखादितिवक्ष्यमाणमेकमुखत्वंचरावणस्यकामरूपत्वात्संगच्छते ॥ २२ ॥ **ति०** बकुलोत्तमसंयुतः उत्तमबकुलगन्धयुतः । अयंपुरुषविशेषश्चासधर्मइतिकतकः । पानंमधु । राक्षसत्वादेववामाचारेणपूजाकरणान्मधुपानं ॥ २३ ॥ **ति०** विराजतामुकुटेन । उपलक्षितमितिशेषः । शोभिनाहारेण शोभनहारवता वक्षसा उपलक्षितमितिशेषः ॥ २५—२६ ॥

[**पा०**] १ च. वेदिकांपरमांश्रितः. २ ङ. झ. ञ. ट. क्षीवं. ३ ख. च. छ. ज. राक्षसराजानं. ४ ङ. झ. ञ. ट. शयनंशुभं. ५ ङ. झ. ञ. ट. हस्तिनिसंविष्टं. ६ च. छ. ज. सुमहात्मनः. क. घ. समहाकपिः. ७ क. ग. घ. रापीडित. च. छ. ज. रुत्पीडन. ८ क. ग. घ. संहतौ. ९ ग. सलक्षण. १० क. ङ.—ट. स्वङ्गुलीयकलक्षितौ. ११ ङ. झ. ट. संवृतौ. १२ घ. संहतौपरिघाकारौ उत्तमस्त्रीविमर्दितौ । समौचविपुलौशुद्धौ गन्धोत्तमनिषेवितौ. १३ ग. विभूषितौ. १४ ग. च. छ. ज. स्तत्र. १५ ट. रुषिताविव. १६ ङ. झ. ट. पूर्णाभ्यामुभाभ्यां. १७ ङ—ट. राक्षसराजस्य. १८ क. पूरयामास. १९ क. ख. घ. ङ. झ. ञ. ट. विराजता. २० ङ. झ. ञ. ट. विराजता.

पाण्डरेणापविद्धेन क्षौमेण क्षतजेक्षणम् ॥ महार्हेण सुसंवीतं पीतेनोत्तमवाससा ॥ २७ ॥
मापराशिप्रतीकाशं निःश्वसन्तं भुजङ्गवत् ॥ गाङ्गे महति तोयान्ते प्रसुप्तमिव कुञ्जरम् ॥ २८ ॥
चतुर्भिः काञ्चनैर्दीपैर्दीप्यमानचतुर्दिशम् ॥ प्रकाशीकृतसर्वाङ्गं मेघं विद्युद्गणैरिव ॥ २९ ॥
पादमूलगताश्चापि ददर्श सुमहात्मनः ॥ पत्नीः स प्रियभार्यस्य तस्य रक्षःपतेर्गृहे ॥ ३० ॥
शशिप्रकाशवदनाश्चारुकुण्डलभूषिताः ॥ अम्लानमाल्याभरणा ददर्श हरियूथपः ॥ ३१ ॥
नृत्तवादित्रकुशला राक्षसेन्द्रभुजाङ्कगाः ॥ वराभरणधारिण्यो निषण्णा ददृशे हरिः ॥ ३२ ॥
वज्रवैडूर्यगर्भाणि श्रवणान्तेषु योषिताम् ॥ ददर्श तापनीयानि कुण्डलान्यङ्गदानि च ॥ ३३ ॥
तासां चन्द्रोपमैर्वक्त्रैः शुभैर्ललितकुण्डलैः ॥ विरराज विमानं तन्नभस्तारागणैरिव ॥ ३४ ॥
मदव्यायामखिन्नास्ता राक्षसेन्द्रस्य योषितः ॥ तेषु तेष्ववकाशेषु प्रसुप्तास्तनुमध्यमाः ॥ ३५ ॥
अङ्गहारैस्तथैवान्या कोमलैर्नृत्तशालिनी ॥ विन्यस्तशुभसर्वाङ्गी प्रसुप्ता वरवर्णिनी ॥ ३६ ॥
काचिद्वीणां परिष्वज्य प्रसुप्ता संप्रकाशते ॥ महानदीप्रकीर्णेव नलिनी पोतमाश्रिता ॥ ३७ ॥
अन्या कक्षगतेनैव मडुकेनासितेक्षणा ॥ प्रसुप्ता भामिनी भाति बालपुत्रेव वत्सला ॥ ३८ ॥
पटहं चारुसर्वाङ्गी पीड्य शेते शुभस्तनी ॥ चिरस्य रमणं लब्ध्वा परिष्वज्येव भामिनी ॥ ३९ ॥
काचिद्वंशं परिष्वज्य सुप्ता कमललोचना ॥ रहः प्रियतमं गृह्य सकामेव च कामिनी ॥ ४० ॥
विपञ्चीं परिगृह्यान्या नियता नृत्तशालिनी ॥ निद्रावशमनुप्राप्ता सहकान्तेव भामिनी ॥ ४१ ॥
अन्या कनकसंकाशैर्मृदुपीनैर्मनोरमैः ॥ मृदङ्गं परिपीड्याङ्गैः प्रसुप्ता मत्तलोचना ॥ ४२ ॥
भुजपार्श्वान्तरस्थेन कक्षगेन कृशोदरी ॥ पणवेन सहानिन्द्या सुप्ता मदकृतश्रमा ॥ ४३ ॥
डिण्डिमं परिगृह्यान्या तथैवासक्तडिण्डिमा ॥ प्रसुप्ता तरुणं वत्समुपगूह्येव भामिनी ॥ ४४ ॥

अपविद्धेन पर्यस्तेन । क्षौमेण उत्तरीयरूपेण ॥ २७—२८ ॥ विद्युद्गणैरिव विद्युत्समूहैरिव । रावणं तस्य पत्नीश्च ददर्शेत्यन्वयः ॥ २९ ॥ रक्षःपतेर्गृह इति परशेषः ॥ ३०—३१ ॥ राक्षसेन्द्रस्य भुजं अङ्कं गच्छन्तीति राक्षसेन्द्रभुजाङ्कगाः । उत्सङ्गोपवेशनालिङ्गनाभ्यां लालिता इत्यर्थः । वराभरणधारिण्यइति द्वितीयार्थे प्रथमा । निषण्णाः शयानाः । ददृशे इत्यात्मनेपदमार्षं ॥३२॥ श्रवणान्तेष्वङ्गददर्शनं बाहूनुपधाय शयनात् ॥ ३३—३५ ॥ अङ्गहारः नृत्तविशेषादङ्गविक्षेपविशेषः । तथोक्तं भरतशास्त्रे "अङ्गानां योग्यदेशेषु हरणेन यथोचितम् । अङ्गनिर्वर्तनीयत्वादङ्गहारस्तथोच्यते" इत्यादि । कोमलैः सुकुमारैः । नृत्तशालिनी सुषुप्त्यवस्थायामपि वासनाबलेन नृत्तसन्निवेशविशिष्टा स्थितेत्युच्यते ॥ ३६ ॥ महानदीप्रकीर्णा महानदीप्रसृता । नलिनी समूलनालदलं पद्मजालकं । पोतं यानपात्रं । वीणां परिष्वज्य प्रसुप्ता काचित् नद्यां प्लवमाना यदृच्छया पोतसंयुक्ता नलिनीव प्रकाशत इत्यर्थः ॥ ३७ ॥ मडुकेन वाद्यविशेषेण ॥ ३८—३९ ॥ वंशं वेणुं ॥ ४० ॥ विपञ्ची सप्ततन्त्री । षट्तन्त्री वीणा ॥ ४१—४२ ॥ पणवेन मर्दलेन ॥ ४३ ॥ यथा पूर्वा तथैवासक्तडिण्डिमान्या तं डिण्डिमं परिगृह्य परिष्वज्य । प्रसुप्ता । कथमिव । तरुणं वत्समुपगूह्येव । डिण्डिमः पणवभेदः । यद्वा अन्या भामिनी डिण्डिमं परिगृह्यावलम्ब्य

ति० विमानं मञ्चकविशेषः । पुष्पकमित्यन्ये । विराजत व्यराजत ॥ ३४ ॥ ति० मदव्यायामेन रतिजेन ॥ ३५ ॥ ती० विन्यस्तशुभसर्वाङ्गी विशेषेणन्यस्तंशुभंयेषुधात्रा तादृशानिसर्वाण्यङ्गानियस्यास्सा ॥ शि० विन्यस्तानि विधिनानिर्मितानि सं-

[पा०] १ ङ. झ. ञ. ट. दीप्यमानं. २ ग. घ. च. छ. ज. विद्युल्लतैरिव. ३ ङ. झ. ञ. ट. विराजत. ४ घ. निषण्णाः. ५ ग. घ. स्तथाचान्याः. ६ क. ग.—ट. कामिनी. ७ ख. ङ. झ. ञ. ट. काचिद्वीणां. ८ ङ. झ. ञ. ट. वरंप्रियतमं. ९ क. लब्ध्वा. १० ग. ङ. ञ. ट. सकामेवहि. ११ क. घ. कामिनी. १२ घ. कनकवर्णाङ्गीमृदु. क. कनकवर्णाभैर्मृदु. १३ घ. शुभोदरी. १४ ग. च. छ. ज. सहैवान्या. १५ क. ख. मुपगूह्यैव.

काचिदाडम्बरं नारी भुजसंभोगपीडितम् ॥ कृत्वा कमलपत्राक्षी प्रसुप्ता मदमोहिता ॥ ४५ ॥
कलशीमपविध्यान्या प्रसुप्ता भाति भामिनी ॥ वसन्ते पुष्पशबला मालेव परिमार्जिता ॥ ४६ ॥
पाणिभ्यां च कुचौ काचित्सुवर्णकलशोपमौ ॥ उपगूह्याबला सुप्ता निद्राबलपराजिता ॥ ४७ ॥
अन्या कमलपत्राक्षी पूर्णेन्दुसदृशानना ॥ अन्यामालिङ्ग्य सुश्रोणीं प्रसुप्ता मदविह्वला ॥ ४८ ॥
आतोद्यानि विचित्राणि परिष्वज्य वरस्त्रियः ॥ निपीड्य च कुचैः सुप्ताः कामिन्यः कामुकानिव ॥४९॥
तासामेकान्तविन्यस्ते शयानां शयने शुभे ॥ ददर्श रूपसंपन्नामपरां स कपिः स्त्रियम् ॥ ५० ॥
मुक्तामणिसमायुक्तैर्भूषणैः सुविभूषिताम् ॥ विभूषयन्तीमिव तत्स्वश्रिया भवनोत्तमम् ॥ ५१ ॥
गौरीं कनकवर्णाङ्गीमिष्टामन्तःपुरेश्वरीम् ॥ कपिर्मन्दोदरीं तत्र शयानां चारुरूपिणीम् ॥ ५२ ॥
स तां दृष्ट्वा महाबाहुर्भूषितां मारुतात्मजः ॥ तर्कयामास सीतेति रूपयौवनसंपदा ॥ ५३ ॥
हर्षेण महता युक्तो ननन्द हरियूथपः ॥ [दृष्ट्वा सीतेति हृष्टोऽभूद्दीनश्चारित्रदर्शनात्] ॥ ५४ ॥
आस्फोटयामास चुचुम्ब पुच्छं ननन्द चिक्रीड जगौ जगाम ॥
स्तम्भानरोहन्निपपात भूमौ निदर्शयन्स्वां प्रकृतिं कपीनाम् ॥ ५५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे दशमः सर्गः ॥ १० ॥

एकादशः सर्गः ॥ ११ ॥

युक्तिपर्यालोचनयामन्दोदर्यांसीतात्वबुद्धिविधूननपूर्वकं पानभूमिंगतवताहनुमता परितोरावणं प्रसुप्तानां नानावस्थायुक्तनानास्त्रीणामवलोकनेनसह नानाविधपानपात्राद्यवलोकनं ॥ १ ॥ तथा परदारदर्शनेन स्वस्य दुरिताशङ्कनपूर्वकंपुनः स्वस्य वशीकृतमनस्कत्वादिहेतुभिस्तत्पराकरणं ॥ २ ॥ तथापानभूमौ सीतायाअदर्शने ततोन्यत्र तदन्वेषणोपक्रमः ॥ ३ ॥

अवधूय च तां बुद्धिं बभूवावस्थितस्तदा ॥ जगाम चापरां चिन्तां सीतां प्रति महाकपिः ॥ १ ॥

तथैव आसक्तडिण्डिमा आलिङ्गितान्यडिण्डिमा तरुणं रमणमुपगूह्य वत्सं पुत्रं परिगृह्यैव प्रसुप्ता । यद्वा डिण्डिमं परिगृह्य वादनार्थं परिगृह्य । तथैव वादनकाल एव आसक्तडिण्डिमा अन्या तरुणं वत्समुपगूह्येव प्रसुप्ता ॥ ४४ ॥ आडम्बरं तूर्यभेदं । भुजसंभोगपीडितं भुजपरिणाहपीडितं भुजपरिश्लेषपीडितं वा ॥४५॥ अपविध्य पर्यस्य । अनेन सलिलसंबन्धः सूच्यते । परिमार्जिता सलिललवसंमार्जिता । अपविद्धकलशनिर्गलितगन्धोदकसिक्ता काचित् । वसन्ते म्लानिपरिहाराय सलिललवसमुक्षिता मालेव बभावित्यर्थः । पुष्पशबलेत्यनेन कलशस्थजलस्य कुङ्कुमादिरससिक्तत्वमुच्यते । सर्वाभरणभूषितत्वं वा । इयं च रावणस्य करकधारिणीति गम्यते ॥ ४६—४८ ॥ आतोद्यानि । "ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् । चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकं" इत्यमरः ॥ ४९—५१ ॥ किमिव गौरीमित्यत्राह—कनकवर्णाङ्गीमिति । इष्टां रावणस्येति शेषः ॥ ५२—५३ ॥ हर्षेणेत्यर्थं ॥ हर्षेण युक्तः ननन्द उत्तरोत्तरमानन्दमवापेत्यर्थः ॥ ५४ ॥ तदेवोपपादयति—आस्फोटयामासेति ॥ चिक्रीड ननर्तेति यावत् । स्वां प्रकृतिं स्वासाधारणं चापल्यं ॥ ५५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने दशमः सर्गः ॥ १० ॥

तां बुद्धिं मन्दोदर्यां सीताबुद्धिं । अवस्थितो बभूव

स्थापितानिवाशुभाज्ञानियस्यास्सा ॥ ३६ ॥ **ती०** जगौ हर्षान्मन्दगानंकृतवानित्यर्थः ॥ ५५ ॥ इतिदशमः सर्गः ॥ १० ॥

[**पा०**] १ ङ. ञ. ञ. ट. मथतां. २ क. ख. ग. ङ.—ट. चस्वश्रिया. ३ ख. ग. ङ.—ञ. ट. कनकवर्णाभां. ४ ग. ञ. तांदृष्ट्वास. ५ ग. हर्षेणचसमायुक्तो. ६ क. ननाद. ७ इदमर्धं ङ.—ज. ञ. ट. पाठेषुदृश्यते. ८ क. च. छ. ज. निदर्शयानः.

न रामेण वियुक्ता सा स्वप्तुमर्हति भामिनी ॥ न भोक्तुं नाप्यलंकर्तुं न पानमुपसेवितुम् ॥
नान्यं नरमुपस्थातुं सुराणामपि चेश्वरम् ॥ २ ॥
न हि रामसमः कश्चिद्विद्यते त्रिदशेष्वपि ॥ अन्येयमिति निश्चित्य पानभूमौ चचार सः ॥ ३ ॥
क्रीडितेनापराः क्लान्ता गीतेन च तथा पराः ॥ नृत्तेन चापराः क्लान्ताः पानविप्रहतास्तथा ॥ ४ ॥
मुरवेषु मृदङ्गेषु पीठिकासु च संस्थिताः ॥ तथास्तरणमुख्येषु संविष्टाश्चापराः स्त्रियः ॥ ५ ॥
अङ्गनानां सहस्रेण भूषितेन विभूषणैः ॥ रूपसँल्लापशीलेन युक्तगीतार्थभाषिणा ॥ ६ ॥
देशकालाभियुक्तेन युक्तवाक्याभिधायिना ॥ रताभिरतसंसुप्तं ददर्श हरियूथपः ॥ ७ ॥
तासां मध्ये महाबाहुः शुशुभे राक्षसेश्वरः ॥ गोष्ठे महति मुख्यानां गवां मध्ये यथा वृषः ॥ ८ ॥
स राक्षसेन्द्रः शुशुभे ताभिः परिवृतः स्वयम् ॥ करेणुभिर्यथाऽरण्ये परिकीर्णो महाद्विपः ॥ ९ ॥
सर्वकामैरुपेतां च पानभूमिं महात्मनः ॥ ददर्श हरिशार्दूलस्तस्य रक्षःपतेर्गृहे ॥ १० ॥
मृगाणां महिषाणां च वराहाणां च भागशः ॥ तत्र न्यस्तानि मांसानि पानभूमौ ददर्श सः ॥ ११ ॥
रौक्मेषु च विशालेषु भाजनेष्वर्धभक्षितान् ॥ ददर्श हरिशार्दूलो मयूरान्कुकुटांस्तथा ॥ १२ ॥
वराहवार्ध्राणसकान्दधिसौवर्चलायुतान् ॥ शल्यान्मृगमयूरांश्च हनुमानन्ववैक्षत ॥ १३ ॥

स्वस्थचित्तो बभूव ॥ १—२ ॥ त्रिदशेष्वपीत्यनन्तरं अन्येयमित्यर्धं ॥ पानभूमौ ततोन्यत्रेत्यर्थः ॥ ३ ॥ क्रीडितेनेत्याद्यपराः स्त्रिय इत्यन्तमेकं वाक्यं । ददर्शेत्यनुषज्यते । क्रीडितेन क्रीडया । भावे निष्ठा । विप्रहताः क्लान्ता इत्यर्थः॥४॥ संस्थिताः उपधानीकृत्य शयिताः । संविष्टाः सुप्ताः॥५॥ तत्र सीताया अदर्शनात्पुनरपि रावणस्थानमागत्य ददर्शेत्याह—अङ्गनानामिति ॥ रूपसँल्लापशीलेन स्वसौन्दर्यवर्णनशीलेन । रावणविषयरूपप्रशंसाशीलेन वा। युक्तगीतार्थभाषिणा युक्तं उपपन्नं गीतार्थं भाषितुं शीलमस्येति युक्तगीतार्थभाषी तेन । देशकालाभियुक्तेन देशकालाभिज्ञेनेत्यर्थः। अङ्गनानां सहस्रेण रताभिरतसंसुप्तमित्यन्वयः । रतशब्देन बाह्यसुरतमुच्यते । अभिरतशब्देन करणबन्धादिकमुच्यते । रताभिरतश्चासौ संसुप्तश्च तं तथा । स्नातानुलिप्तादिवत्समासः । क्रीडाखेदेन सुप्तमित्यर्थः । रावणमिति शेषः ॥ ६—८ ॥ परिकीर्णः परिवृतः ॥ ९ ॥ पानभूमेः पुनर्दर्शनोक्तिस्तत्रत्यपदार्थकथनाय ॥ १० ॥ भागशः पिण्डशः ॥ ११ ॥ मयूरादिशब्दाः मयूरादिविकारमांसपराः ॥ १२ ॥ वार्ध्राणसाः छागविशेषाः । "त्रिपिबंत्विन्द्रियक्षीणं

रामानु० अत्रपुनरपिपानभूमौ स्त्रीणांरावणस्यचदर्शनाभिधानात्क्षणमन्यत्रान्विष्य विशेषेणमार्गितुं पुनःपानभूम्यादिकं दृष्टवानित्यवगम्यते ॥ ४ ॥ **ती०** युक्तगीतार्थभाषिणा युक्तं उपपन्नंयथातथा गीतस्य भरतशास्त्रस्यार्थभाषितुंशीलमस्येतितथा तेन । भरतशास्त्रार्थव्याख्यानचतुरेणेत्यर्थः ॥ ६ ॥ **रामानु०** मयूरान्कुकुटानितिस्वरूपेणनिर्देशात्तत्तदाकारविशिष्टतयातेपक्वा इत्यवगम्यते ॥ १२ ॥ **ती०** वार्ध्राणसःपक्षिविशेषः । ' कृष्णग्रीवोरक्तशिराःश्वेतपक्षोविहङ्गमः । सवैवार्ध्राणसःपक्षी ' इति

[पा०] १ क. रामादुपस्थातुं. २ क. ग. नराणामपि. ३ ज. पानभूमिंददर्शसः. ङ.—ञ. ट. भूयस्तत्रचचारसः । पानभूमौहरिश्रेष्ठःसीतासंदर्शनोत्सुकःइत्यर्धमधिकंचदृश्यते. ४ ग. ङ. ज.—ट. मुरजेषु. ५ ञ. चेलिकासु. ६ ख. च. छ. ज. तदास्तरण. ग. कुथास्तरण. ७ देशकालाभियुक्तेनेत्यर्धानन्तरं क. ग. ङ.—ट. पाठेषु रताधिकेनसंयुक्तां ददर्शहरियूथपः । अन्यत्रापिवरस्त्रीणांरूपसँल्लापशायिनाम् । सहस्रंयुवतीनांतुप्रसुप्तंसददर्शह । देशकालाभियुक्तंतु युक्तवाक्याभिधायितत् । इतिचत्रार्धानिअधिकानिदृश्यन्ते. एषांतिलकव्याख्यानंचदृश्यते. तथाहि । देशकालाभियुक्तेन तद्विषयपरिज्ञानकुशलेन । युक्तवाक्यस्यदेशकालोचितवाक्यस्याभिधानशीलेन । एतत्सर्वं निद्रोद्भमवशादेवबोध्यं । रताधिकेन उक्तप्रकीडावता संयुक्तांपानभूमिं ददर्श । अन्यत्रापीत्यादिश्लोकद्वयंनव्याःप्रमादान्नपठन्ति । अन्यत्रापि पानभूमिभिन्नेरावणशयनगृहे । बहिस्थांपानभूमिं दृष्ट्वा पुनरभ्यन्तरे शयनस्थानआगत्यान्वेषणं । रूपविषयोयःसँल्लापो वर्णनं तत्पूर्वं शयानानां युवतीनांवरस्त्रीणां सहस्रमुच्यमानगुणंददर्श । तत् पूर्वदृष्टं. ८ क. ङ. ञ. ट. रताविरतसंयुक्तं. ९ ज. तथा. १० ञ. ट. भोजनेष्वप्यभक्षितान्. ङ. भोजनेष्वथभक्षितान्. ११ ङ. ञ. ज. ट. वराहवार्ध्राणसकान. ज. वराहयूथान्दयितान्. क. ग. वराहगृध्रान्सुकृतान्. १२ च. छ. ज. शल्यकान्मृगमायूरान्.

[1]ककरान्विविधान्सिद्धांश्चकोरानर्धभक्षितान् ॥ महिषानेक[2]शल्यांश्च [3]च्छागांश्च कृतनिष्ठितान् ॥
लेह्यानुच्चावचान्पेयान्भोज्यानि विविधानि च ॥ १४ ॥
तथाम्ललवणोत्तंसैर्विविधै रागषाडवैः ॥ हारनूपुरकेयूरैरपविद्धैर्महाधनैः ॥ १५ ॥
पानभाजनविक्षिप्तैः फलैश्च विविधैरपि ॥ कृतपुष्पोपहारा भूरधिकं पुष्यति श्रियम् ॥ १६ ॥
[4]तत्रतत्र च विन्यस्तैः [5]सुश्लिष्टैः शयनासनैः ॥ पानभूमिर्विना वह्निं प्रदीप्तेवोपलक्ष्यते ॥ १७ ॥
बहुप्रकारैर्विविधैर्वरसंस्कारसंस्कृतैः ॥ मांसैः कुशलसंयुक्तैः पानभूमिगतैः पृथक् ॥ १८ ॥
दिव्याः प्रसन्ना विविधाः सुराः [6]कृतसुरा अपि ॥ शर्करासवमाध्वीकपुष्पासवफलासवाः ॥ १९ ॥
[7]वासचूर्णैश्च विविधैर्दृष्टास्तैस्तैः पृथक्पृथक् ॥ सन्तता शुशुभे भूमिर्माल्यैश्च बहुसंस्थितैः ॥ २० ॥
हिरण्मयैश्च [8]विविधैर्भाजनैः स्फाटिकैरपि ॥ जाम्बूनदमयैश्चान्यैः करकैरभिसंवृता ॥ २१ ॥

यूषस्याग्रचरं तथा । रक्तवर्णं च राजेन्द्र च्छागं वार्ध्राणसं विदुः " इति स्मृतेः ॥ पक्षिविशेषइत्यन्ये । खड्गमृगइत्यपरे । " वार्ध्राणसः खड्गमृगः " इतिहलायुधः । दधिसौवर्चलायुतान् दधिसौवर्चलाभ्यांसंस्कृतानित्यर्थः । सौवर्चलं रुचकाख्योलवणविशेषः । " सौवर्चलेक्षरुचके " इत्यमरः । शल्यान् श्वाविधः । " श्वावित्तुशल्यः " इत्यमरः । मृगमयूरादीनां पुनःकथनं प्रदेशभेदात् ॥ १३ ॥ ककरान् पक्षिविशेषान् । " कृकणककरौ समौ " इत्यमरः । सिद्धान् पक्कान् । एकशल्यान् मत्स्यविशेषान् । कृतनिष्ठितान् पर्याप्तपक्कान् । "युगपर्याप्तयोः कृतं" इत्यमरः॥१४॥ आम्ललवणोत्तंसैः आम्लप्रधानैः लवणप्रधानैश्च । रागषाडवैः रागयुक्तैः षाडवैः । रागः श्वेतसर्षपः । "रागस्सिद्धार्थकोज्ञेयः " इतिसूदशास्त्रं । षाडवाः षड्रससंयोगकृताभक्ष्यविशेषाः । प्रदीपे त्वन्यथोक्तं " सिताम्ध्वादिमधुरो द्राक्षादाडिमजो रसः । विरलश्चेत्कृतो रागस्सान्द्रश्चेत्षाडवः स्मृतः " इति ॥ १५—१७ ॥ कुशलसंयुक्तैः समर्थसूदसंयोजितैः ।एवंभूतैः मांसैः सह दृष्ट्वा इति वक्ष्यमाणेनान्वयः ॥ १८ ॥ दिव्याः अमृतमथनोद्भूतवारुणीजातीयाः । प्रसन्नाः निष्कल्मषाः । कृतसुराः कृत्रिमसुराः । कृत्रिमसुरा एवाह—शर्करेति । शर्करासवाः शर्करया कृताः । माध्वीकाः मधुना कृताः । पुष्पासवाः पुष्पमकरन्दकृताः । फलासवाः फलरसकृताः । तथोक्तमर्णवे —" पानकं द्राक्षमाधूकं खार्जूरं तालमैक्षवम् । मधूत्थं शीधुमाध्वीकं मैरेयं नारिकेलजं " इति ॥ १९ ॥ वासचूर्णैः अधिवासचूर्णैः सह दृष्टाः हनुमतेतिशेषः । बहुप्रकारैर्मांसैः सह सुराः वासचूर्णैः सह हनुमता तत्र पानभूमौ दृष्टा इति संबन्धः । तैस्तैरित्याद्युत्तरशेषः । तैस्तैर्मांसविशेषैस्सुराविशेषैर्वासचूर्णैश्च पृथक्पृथक् संततेति संबन्धः । बहुसंस्थितैः बहुसंस्थानैः ॥ २० ॥ हिरण्मयैरिति अत्रापि संततेति पूर्वेणान्वयः । हिरण्मयैः रजतमयैः । " कृताकृतं हेमरूप्यं हिरण्यमभिधीयते " इति वचनात् । तैस्तैः पृथक्पृथक् संतता बहुसंस्थितैर्माल्यैर्हिरण्मयैः स्फाटिकैरपि

विष्णुधर्मोक्तेः । छागविशेषोवा ' त्रिपिबंत्रिन्द्रियक्षीणंश्वेतंवृद्धमजापतिं । वार्ध्राणसंचतंप्राहुर्याज्ञिकाःश्राद्धकर्मणि ' इतिस्मरणात् ॥ त्रिपिबं पानकालेमुखपर्यन्तंकर्णयोर्लंबमानत्वात् त्रिभिः मुखेनकर्णाभ्यांचपिबतीतित्रिपिबं । खड्गमृगोवा । ' वार्ध्राणसःखड्गमृग' इतिहलायुधः ॥ १३ ॥ **ती०** कृसरानितिपाठेतिलादिमिश्रितौदनान् ॥ १४ ॥ **स०** संयुक्तैःसम्यग्रचितैः । दातृतयाक्षेमसंयुक्तैरितिवा । ' पर्याप्तिक्षेमपुण्येषुकुशलंशिक्षितेत्रिषु ' इत्यमरः ॥ दिव्याःमनोहराः । प्रसन्नाःदर्शनमात्रेपिपासाजनिकाः । सुराः स्वतएवसमुद्राद्युत्पन्नाः । कृतसुराःमादकरसैर्नूतनतयाकृताः ॥ **ती०** माद्वीकाइतिपाठे द्राक्षाफलविकारा । ' मृ-

[**पा०**] १ ङ. झ. ट. कृकलान्विविधाञ्छागान्शशकानर्ध. च. छ. ज. ककरान्विविधाञ्छागान्. २ छ. ज. ञ. मेषांश्चानेक. ३ ङ. झ. ट. छेदाश्च. ४ ङ. झ. ञ. ट. भोज्यान्युच्चावचानिच. ५ च. छ. ज. विमलैर्विविधैरपि. ६ ङ. ज.—ट. रधिकां. ७ क. ख. ततस्तत्र. ८ ग. संश्लिष्टैः. झ. ञ. सुश्लिष्टशयनासनैः. ९ च. छ. ज. कृतसुरास्तथा. १० क. घ.—ट. माध्वीकाः. ११ क. वासचूर्णाश्चविविधाः. १२ ङ. झ. ञ. ट. कलशैर्भाजनैः. च. छ. ज. सुकृतैःकरकैः. क—घ. करकैर्भाजनैः.

राजतेषु च कुम्भेषु जाम्बूनदमयेषु च ॥ पानश्रेष्ठं तदा भूरि कपिस्तत्र ददर्श सः ॥ २२ ॥
सोपश्यच्छातकुम्भानि शीधोर्मणिमयानि च ॥ राजतानि च पूर्णानि भाजनानि महाकपिः ॥२३॥
कुचिदर्धावशेषाणि क्वचित्पीतानि सर्वशः ॥ क्वचिन्नैव प्रपीतानि पानानि स ददर्श ह ॥ २४ ॥
क्वचिद्भक्ष्यांश्च विविधान्क्वचित्पानानि भागशः ॥ क्वचिद्दत्तावशेषाणि पश्यन्वै विचचार ह ॥ २५ ॥
क्वचित्प्रभिन्नैः करकैः क्वचिदालोलितैर्घटैः ॥ क्वचित्संपृक्तमाल्यानि जलानि च फलानि च ॥२६ ॥
शयनान्यत्र नारीणां शुभ्राणि बहुधा पुनः ॥ परस्परं समाश्लिष्य कांश्चित्सुप्ता वराङ्गनाः ॥ २७ ॥
कांचिच्च वस्त्रमन्यस्याः स्रंपन्त्याः परिधाय च ॥ आहृत्य चाबलाः सुप्ता निद्राबलपराजिताः ॥ २८ ॥
तासामुच्छ्वासवातेन वस्त्रं माल्यं च गात्रजम् ॥ नात्यर्थं स्पन्दते चित्रं प्राप्य मन्दमिवानिलम् ॥२९॥
चन्दनस्य च शीतस्य शीधोर्मधुरसस्य च ॥ विविधस्य च माल्यस्य धूपस्य विविधस्य च ॥
बहुधा मारुतस्तत्र गन्धं विविधमुद्वहन् ॥ ३० ॥
रसानां चन्दनानां च धूपानां चैव मूर्छितः ॥ प्रववौ सुरभिर्गन्धो विमाने पुष्पके तदा ॥ ३१ ॥
श्यामा वदातास्तत्रान्याः काश्चित्कृष्णा वराङ्गनाः ॥ काश्चित्काञ्चनवर्णाङ्ग्यः प्रमदा राक्षसालये ॥३२॥
तासां निद्रावशत्वाच्च मदनेन विमूर्च्छितम् ॥ पद्मिनीनां प्रसुप्तानां रूपमासीद्यथैव हि ॥ ३३ ॥
एवं सर्वमशेषेण रावणान्तःपुरं कपिः ॥ ददर्श सुमहातेजा न ददर्श च जानकीम् ॥ ३४ ॥
निरीक्षमाणश्च तदा ताः स्त्रियः स महाकपिः ॥ जगाम महतीं चिन्तां धर्मसाध्वसशङ्कितः ॥३५॥

भाजनैस्संतता जाम्बूनदमयैरन्यैः करकैश्चाभिसंवृता भूमिः शुशुभ इति संबन्धः ॥ २१—२२ ॥ शीधोः मद्यस्य ॥ २३ ॥ पानानि पानपात्राणि ॥ २४ ॥ क्वचिद्भक्ष्यानित्यादिनिद्राबलपराजिता इत्यन्तमेकं वाक्यं ॥ क्वचित्प्रभिन्नैरित्यादिषु सहयोगे तृतीया हेतौतृतीया वा । प्रभिन्नत्वादालोलितत्वाच्च संपृक्तमाल्यानि माल्यमिश्राणीत्यर्थः । परस्परमित्यादि पश्यन्वै विचचारेति पूर्वेणान्वयः ॥ २५—२८ ॥ गात्रजं गात्रस्थं । मन्दमनिलं प्राप्येव अत्यर्थं न स्पन्दत इत्यन्वयः ॥ २९ ॥ चन्दनस्येत्यादि उद्वहन् प्रववाविति पकृष्यते ॥ ३० ॥ रसादीनां सुरभिर्गन्धः विमाने मूर्च्छितः व्याप्तः सन् प्रववौ चचार ॥ ३१ ॥ वदाताः अवदाताः । भागुरिमतेनाल्लोपः । शुभ्रा इत्यर्थः ॥ ३२ ॥ चकारोप्यर्थकः । निद्रापरवशानामपि तासां रूपं प्रसुप्तानां पद्मिनीनां रूपमिव रम्यमासीदित्यर्थः ॥ ३३—३४ ॥ धर्मसाध्वसशङ्कितः धर्मलोपभया-

द्वीकागोस्तनीद्राक्षा ' इत्यमरः ॥ **शि०** दिव्याःवृक्षकोटरादिद्वारावरुणादिप्रेषिताःसुराः ॥ १९ ॥ **ति०** शून्यानि पतिशून्यानि । अतएवपरस्परंसमाश्लिष्येति ॥ २७ ॥ **ति०** अपहृत्य बलाद्गृहीत्वा । उपगुह्य प्रावृत्य । उपगम्य तच्छयनस्थानंप्राप्य । तांच पश्यन्विचचारेतिसंबन्धः ॥ २८ ॥ **रामानु०** चन्दनस्य अनुलेपनचन्दनस्य । धूपस्य गृहाधिवासार्थधूपस्य । स्नानानांचन्दनानां स्नानार्हचन्दनानां । धूपानां केशाधिवासधूपानां । मारुतःएतेषांविविधंगन्धमुद्वहन्प्रववौ । अतएवसुरभिः घ्राणतर्पणः गन्धः । विमानेपुष्पके । मूर्च्छितःव्याप्तइतिसंबन्धः ॥३१॥ **ति०** ततोनिरीक्षणानन्तरं । ' नेक्षेतनग्नांपरस्त्रियं ' इतिशास्त्रस्मरणादिति शेषः । तदेवाह—धर्मेति । धर्मलोपनिमित्तंयत्साध्वसंभयंतेनशङ्कितःभीतइत्यर्थः ॥ ३५ ॥

[**पा०**] १ क. ङ. झ. ञ. ट. पानश्रेष्ठांतथाभूमिं. २ ञ. तानितानिच. ३ ख. क्वचिदल्पावशेषाणि. ४ ङ. झ. ञ. ट. स्पीतान्यशेषतः. ५ ङ. झ. ट. त्पानंविभागतः. ञ. त्पानंविभागशः. च. छ. ज. त्पानानिसर्वशः. ६ ख. ङ.—ट. क्वचिदर्धावशेषाणि. ७ क.—ट. शून्यानि. ८ क. सुप्ताःपुनःपुनः. ९ ङ. च. छ. झ. ञ. ट. काचिच्चवस्त्रमन्यस्याअपहृत्योपगुह्यच । उपगम्याबलासुप्तानिद्रावलपराजिता. १० ग. घ. अपहृत्योपगूह्यतां. ११ ग. ज. उपगम्याबलाः. १२ क. ग. ङ. झ. ञ. ट. पुष्पस्य. १३ क. ङ.—ट. मारुतस्तस्य. १४ ट. रसानांचधनानांच. क. ख. ग. ङ.—ञ. स्नानानांचन्दनानांच. ग. पानानां चन्दनानांच. १५ क. स्तास्तत्र. १६ क. मासीत्तदद्भुतं. १७ ख. ङ. झ. ञ. ट. समहातेजाः. ग. चमहातेजाः. च. ज. सुमहावीरः. १८ क. ख. ङ. झ. ञ. ट. शङ्कां.

परदारावरोधस्य प्रसुप्तस्य निरीक्षणम् ॥ इदं खलु ममात्यर्थं धर्मलोपं करिष्यति ॥ ३६ ॥
न हि मे परदाराणां दृष्टिर्विषयवर्तिनी ॥ अयं चात्र मया दृष्टः परदारपरिग्रहः ॥ ३७ ॥
तस्य प्रादुरभूच्चिन्ता पुनरन्या मनस्विनः ॥ निश्चितैकान्तचित्तस्य कार्यनिश्चयदर्शिनी ॥ ३८ ॥
कामं दृष्टा मया सर्वा विश्वस्ता रावणस्त्रियः ॥ न हि मे मनसः किंचिद्वैकृत्यमुपपद्यते ॥ ३९ ॥
मनो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्तने ॥ शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम् ॥ ४० ॥
नान्यत्र हि मया शक्या वैदेही परिमार्गितुम् ॥ स्त्रियो हि स्त्रीषु दृश्यन्ते सदा संपरिमार्गणे ॥४१॥
यस्य सत्त्वस्य या योनिस्तस्यां तत्परिमार्ग्यते ॥ न शक्या प्रमदा नष्टा मृगीषु परिमार्गितुम् ॥ ४२ ॥
तदिदं मार्गितं तावच्छुद्धेन मनसा मया ॥ रावणान्तःपुरं सर्वं दृश्यते न च जानकी ॥ ४३ ॥
देवगन्धर्वकन्याश्च नागकन्याश्च वीर्यवान् ॥ अवेक्षमाणो हनुमान्नैवापश्यत जानकीम् ॥ ४४ ॥
तामपश्यन्कपिस्तत्र पश्यंश्चान्या वरस्त्रियः ॥ अपक्रम्य तदा वीरः प्रध्यातुमुपचक्रमे ॥ ४५ ॥
स भूयस्तु परं श्रीमान्मारुतिर्यत्नमास्थितः ॥ आपानभूमिमुत्सृज्य तद्विचेतुं प्रचक्रमे ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकादशः सर्गः ॥ ११ ॥

च्छङ्कितः ॥ ३५ ॥ परदारावरोधस्य परदाररूपान्तःपुरस्य ॥ ३६ ॥ मे दृष्टिः कदाचिदपि परदाराणां विषयवर्तिनी नहि । परदारसंबन्धिविषयपरा नहीत्यर्थः । तथाप्ययं परदारपरिग्रहः दृष्टः इदमसङ्गतमित्यर्थः ॥ ३७ ॥ निश्चितैकान्तचित्तस्य नियतैकरूपचित्तस्य ॥ ३८ ॥ वैकृत्यं विकारः । उपपद्यते उत्पद्यते ॥ ३९ ॥ शुभाशुभास्ववस्थासु शुभकरणाशुभकरणेषु विषये । इन्द्रियाणां प्रवर्तने मन एव हेतुः सुव्यवस्थितं न तदभिलाषि जातमित्यर्थः ॥ ४० ॥ ननु परदारदर्शनमपि परिहरणीयं तत्किमर्थं कृतं तत्राह—नान्यत्रेति ॥ अन्यत्र स्त्रीव्यतिरिक्ते । संपरिमार्गणे कर्तव्ये स्त्रीष्वेव हि स्त्रियो दृश्यन्ते ॥ ४१ ॥ योनिः जातिः । सजातीयइत्यर्थः ॥ ४२—४३ ॥ अपश्यत अपश्यत् ॥ ४४—४५ ॥ तत् रावणान्तःपुरं ॥ ४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकादशः सर्गः ॥ ११ ॥

ति० धर्मलोपंदर्शयति—परदारेति । परदारावरोधस्य । दारशब्दःस्त्रीसामान्यवाची । अवरोधशब्दःस्वधर्मयुक्तकुलस्त्रीवाची । प्रसुप्तस्य । अनेननग्नप्रायत्वंसूचितं । तत्समयेवसनानांविपर्यासात् । किंचपरदाराएवपरिग्रहो भार्यायस्यसःअतिपापीरावणश्चदृष्टः । तादृशदर्शनमपिधर्मलोपकारीतिभावः ॥ ३७ ॥ ति० अथपुनर्विचारेणतदलोपबुद्धिरप्युत्पन्नेत्याह—तस्येति । अन्याचिन्ता पूर्वचिन्ताविरोधिनी । निश्चितेप्रमाणप्रतिपन्ने । एकान्तेसिद्धान्तेतद्विषयज्ञानेचित्तं । अतएवसाचिन्ताकार्यनिश्चयदर्शिनी कर्तव्याकर्तव्यनिर्णयसमर्था ॥ ८ ॥ इत्येकादशः सर्गः ॥ ११ ॥

[पा०] १ क. ग. घ. च. ज.—ट. ननु. २ घ. मूलं. ३ च. छ. स्त्रियाःसंपरिमार्गणे. ४ ख. ङ.—ट. शक्यं. ५ ग. ननु. च. छ. ज. नात्र. ख. नापि. ६ क. नैवपश्यति. ७ ख. ग. ङ.—ट. प्रस्थातुं. ८ ङ. छ.—ट. भूयस्सर्वतःश्रीमान्. च. भूयस्तांपुरींश्रीमान्. घ. ज. भूयस्तत्परःश्रीमान्. ९ च. छ. ज. पानभूमिंसमुत्सृज्यविचेतुंचप्रचक्रमे. १० क. ग. घ. ङ. झ. ञ. ट. तांविचेतुं.

द्वादशः सर्गः ॥ १२ ॥

पुनरपिहनुमता रावणगृहे लतागृहचित्रगृहादिनानास्थानेष्वन्वेषणेपि सीतायाअदर्शनेन तस्यारावणेनप्रमापणादिसंभावनया स्वयत्नस्यवैफल्यशङ्कया अकृतकार्यतयासुग्रीवाद्यवलोकनस्यातिजुगुप्सितत्वशङ्कयाच निर्वेदाधिगमः ॥ १ ॥ तथा निर्वेदस्यानर्थसाधनत्वाध्यवसायेन अनिर्वेदस्यश्रेयस्साधनत्वनिर्धारणेनच पुनरप्यन्वेषणेसमुद्यमः ॥२॥ तथा चतुरङ्गुलदेशमात्रानवशेषीकरणेनपुनरन्वेषणेपि सीतायाअदर्शनेनविषादाधिगमः ॥ ३ ॥

स तस्य मध्ये भवनस्य मारुतिर्लतागृहाञ्चित्रगृहान्निशागृहान् ॥
जगाम सीतां प्रति दर्शनोत्सुको न चैव तां पश्यति चारुदर्शनाम् ॥ १ ॥
स चिन्तयामास ततो महाकपिः प्रियामपश्यन्रघुनन्दनस्य ताम् ॥
ध्रुवं हि सीता म्रियते यथा न मे विचिन्वतो दर्शनमेति मैथिली ॥ २ ॥
सा राक्षसानां प्रवरेण जानकी स्वशीलसंरक्षणतत्परा सती ॥
अनेन नूनं प्रतिदुष्टकर्मणा हता भवेदार्यपथे परे स्थिता ॥ ३ ॥
विरूपरूपा विकृता विवर्चसो महानना दीर्घविरूपदर्शनाः ॥
समीक्ष्य सा राक्षसराजयोषितो भयाद्विनष्टा जनकेश्वरात्मजा ॥ ४ ॥
सीतामदृष्ट्वा ह्यनवाप्य पौरुषं विहृत्य कालं सह वानरैश्चिरम् ॥
न मेस्ति सुग्रीवसमीपगा गतिः सुतीक्ष्णदण्डो बलवांश्च वानरः ॥ ५ ॥
दृष्टमन्तःपुरं सर्वं दृष्टा रावणयोषितः ॥ न सीता दृश्यते साध्वी वृथा जातो मम श्रमः ॥ ६ ॥
किंनु मां वानराः सर्वे गतं वक्ष्यन्ति संगताः ॥ गत्वा तत्र त्वया वीर किं कृतं तद्वदस्व नः ॥
अदृष्ट्वा किं प्रवक्ष्यामि तामहं जनकात्मजाम् ॥ ७ ॥
ध्रुवं प्रायमुपैष्यन्ति कालस्य व्यतिवर्तने ॥ ८ ॥

निशागृहान् रात्रिनिवासयोग्यगृहान् । "गृहाः पुंसि च भूम्न्येव" इति पुँल्लिङ्गत्वं । पश्यति अपश्यत् ॥ १ ॥ यथा यस्मात्कारणात् । विचिन्वतो मे मैथिली दर्शनं नैति तस्मात् म्रियते ममार । यद्वा अथवा नेति वाक्यं पठनीयं । तदा अपश्यन्निति हेतुगर्भं । अदर्शनान्मृता वा अथवा दर्शनं नैति । कुत्रचिद्गहने प्रदेशे स्थितावेत्यर्थः ॥२॥ प्रतिदुष्टकर्मणा अतिदुष्टकर्मणा । वीप्सायां प्रतिः । "प्रतिप्रतिनिधौ वीप्सालक्षणादौ" इत्यमरः । परे उत्कृष्टे । आर्यपथे सन्मार्गे ॥ ३ ॥ विरूपाणि न्यूनाधिकानि रूपाणि शरीरावयवाः यासां ताः । विकृताः विकृतवेषाः । विवर्चसोनिस्तेजस्काः। महाननाः अतिविशालमुखाः । दीर्घाणि विरूपाणि दर्शनानि चक्षूंषि यासां ताः । राक्षसराजयोषितः रावणस्याज्ञाकारिणीःस्त्रियः ॥४॥ पौरुषं शत्रुविषयपराक्रमं । चिरं कालं विहृत्य अतिक्रम्येत्यर्थः । एवंभूतस्य मे सुग्रीवसमीपगा तत्समीपगामिनी । गतिः मार्गः । नास्ति । सुग्रीवसमीपगतिः ममायोग्येत्यर्थः । तत्र हेतुमाह—सुतीक्ष्णेति । यत इति—शेषः ॥ ५—६ ॥ किंन्विति सामान्येन निर्वेदोक्तिः । विशेषतश्चाह—गत्वेति । इत्युक्त इति शेषः । वदस्व न इत्युक्तः किं प्रवक्ष्यामि । यद्वा किन्त्विति पाठः । पूर्ववदर्धत्रयमेकं वाक्यं । किन्त्विति पूर्वस्माद्विशेषोक्तिः । मां वानराः वदस्व न इति वक्ष्यन्ति तदा अदृष्ट्वा किं प्रवक्ष्यामीति योजना ॥ ७ ॥ तार्हि अत्रैव कालविलम्बः क्रियतां तत्राह—ध्रुवमिति ॥ कालस्य व्यतिवर्तने अस्मदागमनकालेऽ-

ति० नम्रियतेनजीवतिस्म । ध्रुवंनुसीताम्रियतेइतिक्वचित्पाठः । तत्रहेतुःयथेति । यतइत्यर्थः ॥ २ ॥

[पा०] १ ङ.—ट. संस्थितोलता. घ. संश्रितोलता. २ क. ग. घ. च. छ. ज. ध्रुवंतु. ङ. ञ. ञ. ट. ध्रुवंनसीता म्रियते. ३ क. ग.—च. ज.—ट. बाला. ४ च. छ. प्रतिष्ठिता. ५ घ. समाजसंगतिः. ६ ङ. ञ. ट. सुपासिष्ये. ख. सुपेष्यामि.

किं[1] वा वक्ष्यति वृद्धश्च जाम्बवानङ्गदश्च सः ॥ गतं पारं समुद्रस्य वानराश्च समागताः ॥ ९ ॥
अनिर्वेदः श्रियो मूलमनिर्वेदः परं सुखम् ॥ अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तकः ॥ १० ॥
करोति सफलं जन्तोः कर्म यच्चत्करोति[2] सः ॥ तस्मादनिर्वेदकृतं यत्नं चेष्टेऽहमुत्तमम्[3] ॥ ११ ॥
भूयस्तावद्विचेष्यामि देशान्रावणपालितान्[4] ॥ भूयस्तत्र विचेष्यामि न यत्र विचयः कृतः ॥
आपानशाला[5] विचितास्तथा पुष्पगृहाणि च ॥ १२ ॥
चित्रशालाश्च विचिता भूयः क्रीडागृहाणि च ॥ निष्कुटान्तररथ्याश्च विमानानि च सर्वशः ॥ १३ ॥
इति संचिन्त्य भूयोपि विचेतुमुपचक्रमे ॥ भूमीगृहांश्चैत्यगृहान्गृहातिगृँहकानपि[6] ॥ १४ ॥
उत्पतन्निपतंश्चापि तिष्ठन्गच्छन्पुनः पुनः ॥ अपावृण्वंश्च द्वाराणि कपाटान्यवघाटयन्[7] ॥ १५ ॥
प्रविशन्निष्पतंश्चापि प्रपतन्नुत्पतन्नपि[8] ॥ सर्वमप्यवकाशं स विचचार महाकपिः ॥ १६ ॥
चतुरङ्गुलमात्रोपि नावकाशः स विद्यते ॥ रावणान्तःपुरे तस्मिन्यं कपिर्न जगाम सः ॥ १७ ॥
प्राकारान्तररथ्याश्च[9] वेदिकाश्चैत्यसंश्रयाः ॥ दीर्घिकाः[10] पुष्करिण्यश्च सर्वे तेनावलोकितम् ॥ १८ ॥
राक्षसो विविधाकारा विरूपा विकृतास्तथा ॥ दृष्टा हनुमता तत्र न तु सा[11] जनकात्मजा ॥ १९ ॥
रूपेणाप्रतिमा लोके वरा[12] विद्याधरस्त्रियः ॥ दृष्टा हनुमता तत्र न तु राघवनन्दिनी ॥ २० ॥
नागकन्या[13] वरारोहा पूर्णचन्द्रनिभाननाः ॥ दृष्टा हनुमता तत्र न तु सीता[14] सुमध्यमा ॥ २१ ॥
प्रमथ्य राक्षसेन्द्रेण नागकन्या[15] बलाद्धृताः ॥ दृष्टा हनुमता तत्र न सा जनकनन्दिनी ॥ २२ ॥

तीते । प्रायमुपैष्यन्ति । जाम्बवत्प्रभृतयइतिशेषः ॥ ८ ॥ सामान्येन निर्वेदं प्रतिवक्ति—किं वेति ॥ समुद्रलङ्घनरूपं महत्कर्म कृतवन्तं मां ते किं वक्ष्यन्ति । किमपि वक्ष्यन्ति । यद्वा मद्वृत्तान्तं प्रशंसन् जाम्बवान् तदुत्साहकोऽङ्गदस्तदुपशृण्वन्तोन्ये च मां किं वा जुगुप्सितं वक्ष्यन्ति । " किं पृच्छायां जुगुप्सने " इत्यमरः ॥ ९ ॥ चिरं निर्वेदे कार्यहानिः स्यादिति मत्वा अनिर्वेदमवलम्बते—अनिर्वेद इति ॥ १० ॥ अनिर्वेद उत्साहः तत्कृतं तत्प्रयुक्तं । यत्नं चेष्टे । करोमीत्यर्थः । यत्करोति जन्तुरिति सिद्धम् । जन्तोस्सबन्धि तत्सर्वं कर्म सः अनिर्वेद एव । सफलं करोतीत्यन्वयः ॥ ११ ॥ आपानेति । एता विचिताः अथापि पुनर्विचेष्यामीत्यनुषज्यते ॥ १२ ॥ निष्कुटाः गृहारामाः । अन्तररथ्याः अवान्तरवीथ्यः ॥ १३ ॥ भूमीगृहान् भूमीबिलगृहान् । चैत्यगृहान् चतुष्पथमण्डपान् । गृहातिगृहकान् गृहानतीत्य दूरे स्वैरविहारार्थं निर्मितान्गृहान् ॥ १४ ॥ उत्पतन्निपतन् पूर्वमुच्चस्थानान्यधिरुह्य ततोवरोहन् । अवघाटयन् पाटयन् ॥ १५ ॥ निष्पतन् निर्गच्छन् । प्रपतन्नुत्पतन् बिलगृहादीनि नीचस्थानानि प्रथममधिरुह्य ततःसमुद्गच्छन् ॥१६—१७॥ प्राकारान्तररथ्याः प्राकारमध्यवर्तिवीथ्यः । वेदिकाश्चैत्यसंश्रयाः चैत्यवृक्षमूलपीठिकाबन्धाः ॥ १८—२१ ॥ प्रमथ्य प्रसह्य । बलाद्धृता नागकन्या इत्यभिधानादत्र बन्दीकृतानां ग्रहणं । पूर्व-

---

ती० चैत्यगृहान् बुद्धायतनानि । गृहातिगृहकानपि गृहानतीत्यानतिदूरेस्वैरविहारार्थंनिर्मितगृहान् ॥ ति० गृहातिगृहकाःगृहोपरिगृहाइतिकतकः । स० भूमीगृहान् भूविवरस्थगृहान् । चैत्यगृहान् देवायतनानि । अपावृण्वन् अपगतावरणानिकुर्वन् ॥१४॥ चैत्यःचतुष्पथवृत्तिवृक्षः ॥ १८ ॥ स० राघवंनन्दयतीतिराघवनन्दिनीसीता ॥ २० ॥

[पा०] १ क. ग. किंमां. २ क. घ. ङ. झ. ट. यच्चकरोति. ख. यच्चकरोतिच. ३ क. ङ. दनिर्वेदकरं. ४ ख.—ट. अदृष्टांश्चविचेष्यामि. ५ क. घ.—ट. पाठेष्विदमर्धंदृश्यते. ६ क. विविधास्तथा. ७ ख. गृहकानिच. ८ क. ख. ग. ङ. ञ. न्पुनःक्वचित्. ९ च. छ. ज. अपावृतानि. १० क. ग.—ट. न्यवघट्टयन्. ११ ङ.—झ. ट. त्पतन्निव. १२ क. सर्वानप्यवकाशांश्च. १३ ङ.—झ. ट. वीथ्यश्च. १४ क. ग. संश्रिताः. १५ क.—ट. श्वभ्राश्च. १६ क. ग. सीतासुमध्यमा. १७ झ. ञ. ट. पराः. १८ घ. राजकन्याः. १९ ङ.—ट. साजनकात्मजा. २० ग. देवकन्याः. ख. राजकन्याः. २१ च. छ. बलात्कृताः.

सोपश्यंस्तां महाबाहुः पश्यंश्चान्या वरस्त्रियः ॥ विषसाद मुहुर्धीमान्हनुमान्मारुतात्मजः ॥ २३ ॥
उद्योगं वानरेन्द्राणां प्लवनं सागरस्य च ॥ व्यर्थं वीक्ष्यानिलसुतश्चिन्तां पुनरुपागमत् ॥ २४ ॥
अवतीर्य विमानाच्च हनुमान्मारुतात्मजः ॥ चिन्तामुपजगामाथ शोकोपहतचेतनः ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्वादशः सर्गः ॥ १२ ॥

त्रयोदशः सर्गः ॥ १३ ॥

पुष्पकविमानात्प्राकारंपरिक्रान्तवताहनुमता प्रायस्सर्वत्रान्वेषणेपिसीतायाअदर्शने तत्रानेकहेतूत्प्रेक्षणपूर्वकं रामेतत्वनिवेदनानिवेदनपक्षयोर्महानर्थोत्प्रेक्षणं ॥ १ ॥ तथा सीतानवलोकनशोकेन स्वप्राणविमोक्षणरावणमारणाद्यनेकविकल्पान्परिकल्पयतातेनदैवादशोकवनिकावलोकनं ॥२ ॥ तथा स्वेनतस्याअनन्वेषितत्वनिर्धारणेन तत्रान्वेषणनिर्धारणपूर्वकं रामादीन्प्रति सकलसुरनिकरान्प्रतिच सप्रणामंस्वान्वेषणस्यसाफल्यसिद्धिप्रार्थनं ॥ ३ ॥

विमानात्तु सुसंक्रम्य प्राकारं हरियूथपः ॥ हनुमान्वेगवानासीद्यथा विद्युद्घनान्तरे ॥ १ ॥
संपरिक्रम्य हनुमान्रावणस्य निवेशनात् ॥ अदृष्ट्वा जानकीं सीतामब्रवीद्वचनं कपिः ॥ २ ॥
भूयिष्ठं लोलिता लङ्का रामस्य चरता प्रियम् ॥ न हि पश्यामि वैदेहीं सीतां सर्वाङ्गशोभनाम् ॥ ३ ॥
पल्वलानि तटाकानि सरांसि सरितस्तथा ॥ नद्योनूपवनान्ताश्च दुर्गाश्च धरणीधराः ॥
लोलिता वसुधा सर्वा न तु पश्यामि जानकीम् ॥ ४ ॥
इह संपातिना सीता रावणस्य निवेशने ॥ आख्याता गृध्रराजेन न च पश्यामि तामहम् ॥ ५ ॥
किंनु सीताऽथ वैदेही मैथिली जनकात्मजा ॥ उपतिष्ठेत विवशा रावणं दुष्टचारिणम् ॥ ६ ॥
क्षिप्रमुत्पततो मन्ये सीतामादाय रक्षसः ॥ बिभ्यतो रामबाणानामन्तरा पतिता भवेत् ॥ ७ ॥

श्लोके ऊढानां नागकन्यानामित्यपुनरुक्तिः ॥ २२–२५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वादशः सर्गः ॥ १२ ॥

विमानादित्यादि । इदानीं विमानादवतरणोत्तया मध्ये विमानमधिरूढ इत्यवगम्यते । वेगवत्त्वे दृष्टान्तमाह—विद्युदिति ॥ १ ॥ संपरिक्रम्य प्राकारमिति शेषः । अब्रवीत् स्वयमितिशेषः ॥२॥ लोलिता बहुशोन्विष्टेत्यर्थः॥३॥ सरितः क्षुद्रनद्यः। अनूपवनान्ताः जलप्रायवनप्रदेशाः ॥ ४—५ ॥ सीता अयोनिजा । वैदेही जन्मभूमिप्रयुक्तातिशयवती । मैथिली आचारप्रधानकुलोत्कर्षवती । अथशब्दस्समुच्चये । एवंभूता जनकात्मजा दुष्टचारिणं रावणं विवशा कामपरवशा सती उपतिष्ठेत किंनु । नेत्यर्थः ॥६॥ अथास्या अदर्शने हेतूनुत्प्रेक्षते—क्षिप्रमित्यादिना ॥ रामबाणानां

ति० अवतीर्य विमानएवैतत्सर्वदर्शनमितितत्वं ॥ २५ ॥ इतिद्वादशः सर्गः ॥ १२ ॥

रामानु० जनकात्मजेत्यनेन ' कर्मणैवहिसंसिद्धिमास्थिताजनकादयः ' इतिप्रसिद्धजनकसंबन्धकृतवैशिष्ट्यं । एवंगुणविशिष्टादेवीदुष्टचारिणंरावणंउपतिष्ठेतकिंनु मित्रत्वेनप्राप्नुयात्किंनु । नप्राप्नुयादेवेत्यर्थः । " उपाद्देवपूजासंगतिकरणमित्रकरणपथिष्विति वक्तव्यं ' इत्यात्मनेपदं ॥ ६ ॥ तर्ह्यदर्शनंकुतः तत्रहेतूनुत्प्रेक्षते । क्षिप्रमिति । एतेपक्षाः दुःखातिशयात्संपातिवचनविस्मरणमूलकाः । बिभ्यतःकराद्भ्रष्टेतिशेषः । रामबाणानां । आघातादितिशेषः । शेषेषष्ठीवा । **स०** यद्यपिसंपातिनालङ्कायांसीतास्तीत्यभिधानादेवमाशुत्प्रेक्षानशक्यातु । तथापिसंपात्युक्तरीत्याऽन्वेषणेपियतोनदृश्यतेअतस्तद्वचनमेवविचारणीयमितिमतिमतो-

[पा०] १ ख. घ. ङ. झ. ञ. ट. विषसादमहाबाहुः. ग. विषादमगमद्वीरो. क. च. छ. ज. विषादमगमद्धीमान् २ ङ.—ट. पुनरुपागतः. ३ क. विमानाग्राद्धनुमान्. ४ ख. सर्वाङ्गसुन्दरीं. ५ क.—ङ. झ. ञ. ट. नच. ६ ङ. झ. ट सादृश्यतेतुकिं. ७ ङ.—झ. ट. रावणेनहृतावलात्.

अथवा ह्रियमाणायाः पथि सिद्धनिषेविते ॥ मन्ये पतितमार्याया हृदयं प्रेक्ष्य सागरम् ॥ ८ ॥
रावणस्योरुवेगेन भुजाभ्यां [1]पीडितेन च ॥ तया मन्ये विशालाक्ष्या त्यक्तं जीवितमार्यया ॥ ९ ॥
उपर्युपरि वा नूनं सागरं क्रमतस्तथा ॥ विवेष्टमाना पतिता समुद्रे जनकात्मजा ॥ १० ॥
अहो क्षुद्रेण [2]वाऽनेन रक्षन्ती शीलमात्मनः ॥ अबन्धुर्भक्षिता सीता रावणेन तपस्विनी ॥ ११ ॥
अथवा राक्षसेन्द्रस्य पत्नीभिरसितेक्षणा ॥ अदुष्टा दुष्टभावाभि[3]र्भक्षिता सा भविष्यति ॥ १२ ॥
संपूर्णचन्द्रप्रतिमं पद्मपत्रनिभेक्षणम् ॥ रामस्य ध्यायती वक्त्रं पञ्चत्वं कृपणा गता ॥ १३ ॥
हा राम लक्ष्मणेत्येवं हायोध्ये चेति मैथि[4]ली ॥ विलप्य बहु वैदेही न्यस्तदेहा भविष्यति ॥ १४ ॥
अथवा निहिता मन्ये रावणस्य निवेशने ॥ [5]नूनं लालप्यते सीता पञ्जरस्थेव शारिका ॥ १५ ॥
जनकस्य सुता सीता रामपत्नी सुमध्यमा ॥ कथमुत्पलपत्राक्षी रावणस्य वशं व्रजेत् ॥ १६ ॥
विनष्टा वा प्रणष्टा वा मृता वा जनकात्मजा ॥ रामस्य प्रियभार्यस्य न निवेदयितुं क्षमम् ॥ १७ ॥
निवेद्यमाने दोषः स्यादोषः स्यादनिवेदने ॥ कथं नु खलु कर्तव्यं विषमं प्रतिभाति मे ॥ १८ ॥
अस्मिन्नेवं गते कार्ये प्राप्तकालं क्षमं च किम् ॥ भवेदिति [6]मतं भूयो हनुमान्[7]प्रविचारयत् ॥ १९ ॥
यदि सीतामदृष्ट्वाहं वानरेन्द्रपुरीमितः ॥ गमिष्यामि ततः को मे पुरुषार्थो भविष्यति ॥ २० ॥
ममेदं लङ्घनं व्यर्थं सागरस्य भविष्यति ॥ [8]प्रवेशश्चैव [9]लङ्काया राक्षसानां च दर्शनम् ॥ २१ ॥

रामबाणेभ्यः ॥ ७ ॥ सागरं प्रेक्ष्य भीतं हृदयं सागरे पतितमिति मन्ये । हृदयस्य भयस्थानत्वेन तन्मूलतया तच्छरीरं लक्ष्यते ॥ ८ ॥ पीडितेन पीडनेन ॥ ९ ॥ उपर्युपरि सागरं सागरस्य सन्निहितोपरिप्रदेशे । " उपर्यध्यधसस्सामीप्ये " इति द्विर्वचनं । " धिगुपर्यादिषु त्रिषु " इति द्वितीया ॥ १० ॥ अहो इति खेदे ॥ ११ ॥ दुष्टभावाभिः सापत्न्यप्रयुक्तक्रोधाभिः ॥ १२—१३ ॥ न्यस्तदेहा त्यक्तदेहा । भविष्यति भवेदित्यर्थः ॥१४॥ निहिता भूगृहादौ गूढं स्थापिता । लालप्यते मुहुर्मुहुः प्रलपति ॥ १५ ॥ एवं निरुध्यमानापि सीता रावणस्य वशं न व्रजेदित्याह—जनकस्येति ॥ कथं व्रजेत् । न व्रजेदेवेत्यर्थः ॥ १६ ॥ ननु किं चिन्तया गत्वा यथावृत्तं निवेद्यतामित्याशङ्क्य तदनुचितमित्याह—विनष्टेति ॥ विनष्टा भूगृहादौ स्थापनेनादर्शनं गता । " णश अदर्शने " इति धातोर्निष्ठा । प्रणष्टा समुद्रपतनादिना त्यक्तजीविता । " उपसर्गादसमासेपि णोपदेशस्य " इति णत्वं । मृता रामविरहदुःखासहिष्णुतया स्वयं मृता ॥ १७ ॥ निवेद्यमाने वक्ष्यमाणो दोषः स्यात् । दोषः स्यादनिवेदने । यथावृत्तानिवेदने स्वामिवञ्चनदोषः स्यात् । विषमं परस्परविरुद्धं ॥ १८ ॥ हनुमान् अस्मिन्कार्ये एवंगते एवं विषमत्वं प्राप्ते सति । किंप्राप्तकालं कालोचितं । क्षमं समर्थं च भवेदिति मतं पक्षं । भूयः प्रविचारयत् ॥ १९—२० ॥ पुरुषार्थाभाव-

हनुमतःसायुक्तेतिज्ञेयं ॥ ७ ॥ **ति०** रामपरोक्षंतथाभयायोगात्पक्षान्तरं—अथवेति । हृदयंपतितं मनउत्क्रान्तं । मनउत्क्रमणस्यैव मरणत्वात् ॥ ८ ॥ **स०** अबन्धुःअसंनिहितबन्धुः ॥ ११ ॥ **स०** रिपुभिर्योधयितुंशक्योयोध्यः । सनभवतीत्ययोध्यः । तस्य संबुद्धिः । हायोध्येत्युपपन्नं ॥१४॥ **ति०** नन्वनेनविचारेणालं यथानुभूतंनिवेद्यतां तत्राह—विनष्टेति । अस्यक्वचिद्वर्ततइतिशेषः । ' णशअदर्शने ' इतिधात्वनुसाराददृष्टासतीक्वचिदस्तीतिवक्तुं अशक्यं अक्षमं । सर्वतोन्विष्टत्वात् प्रणष्टा प्रगतंनष्टंअदर्शनंयस्यास्सा दृष्टेत्यर्थः । एतदपिनवक्तुंक्षमं । स्वयमदृष्टत्वात् ॥ एवंमृतेत्यपिवक्तुंनशक्यं । तत्साधकदृढतरप्रमाणाभावात् । तस्माद्रामस्याग्रेकिमपिवक्तुंनशक्यं । दृश्यदेशेमाययाऽदर्शनंविनाशः । अदृश्यदेशेऽवस्थापनंप्रणाशइतितुतीर्थः ॥ १७ ॥ **ति०** प्राप्तकालं

[**पा०**] १ क. ख. ङ. पीडनेनच. २ ग. पापेन. ३ क. झ. ट. भक्षितावा. ४ ङ. ञ. ट. भामिनी. ५ ज. रहोवानिहिता. ६ ङ. झ. ट. भृशं. ७ ङ. झ. ट. लालप्यतेबाला. क. घ. च. छ. ञ. लालप्यतेमन्दं. ग. विलपतेमन्दं. ८ क. ग. ङ.—ट. कुलेजाता. ९ च. छ. ज. सुधार्मिका. १० ग. ङ.—ट. मतिं. ११ ग. ङ. ज. झ. ञ. न्प्रविचारयन्. घ. न्विचचारह. क. न्प्रव्यचारयत्. १२ च. छ. ज. प्रवेशश्चापि. १३ क. ञ. लङ्कायां.

किं[1] मां वक्ष्यति सुग्रीवो हरयो वा[2] समागताः ॥ किष्किन्धां समनुप्राप्तं[3] तौ वा दशरथात्मजौ ॥२२॥
गत्वा तु यदि काकुत्स्थं वक्ष्यामि परमप्रियम्[4] ॥ न दृष्टेति मया सीता ततस्त्यक्ष्यति जीवितम् ॥ २३ ॥
परुषं दारुणं क्रूरं[5] तीक्ष्णमिन्द्रियतापनम्[6] ॥ सीतानिमित्तं दुर्वाक्यं श्रुत्वा स नभविष्यति ॥ २४ ॥
तं तु कृच्छ्रगतं दृष्ट्वा पञ्चत्वगतमानसम्[7] ॥ भृशानुरक्तो मेधावी नभविष्यति लक्ष्मणः ॥ २५ ॥
विनष्टौ भ्रातरौ श्रुत्वा भरतोपि मरिष्यति[8] ॥ भरतं च मृतं दृष्ट्वा शत्रुघ्नो नभविष्यति ॥ २६ ॥
पुत्रान्मृतान्समीक्ष्याथ नभविष्यन्ति मातरः ॥ कौसल्या च सुमित्रा च कैकेयी च न संशयः ॥ २७ ॥
कृतज्ञः सत्यसन्धश्च सुग्रीवः प्लवगाधिपः ॥ रामं तथागतं दृष्ट्वा ततस्त्यक्ष्यति जीवितम् ॥ २८ ॥
दुर्मना व्यथिता दीना निरानन्दा तपस्विनी ॥ पीडिता भर्तृशोकेन रुमा त्यक्ष्यति जीवितम् ॥२९॥
वालिजेन तु दुःखेन पीडिता शोककर्शिता[9] ॥ पञ्चत्वं[10] च गते राज्ञि ताराऽपि नभविष्यति ॥ ३० ॥
मातापित्रोर्विनाशेन सुग्रीवव्यसनेन च[11] ॥ कुमारोप्यङ्गदः कस्माद्धारयिष्यति जीवितम् ॥ ३१ ॥
भर्तृजेन तु दुःखेन ह्यभिभूता[12] वनौकसः[13] ॥ शिरांस्यभिहनिष्यन्ति तलैर्मुष्टिभिरेव च ॥ ३२ ॥
सान्त्वेनानुप्रदानेन मानेन च यशस्विना ॥ लालिताः कपिराजेन[14] प्राणांस्त्यक्ष्यन्ति वानराः ॥३३॥
न वनेषु न शैलेषु न[15] निरोधेषु वा पुनः ॥ क्रीडामनुभविष्यन्ति समेत्य कपिकुञ्जराः ॥ ३४ ॥
सपुत्रदाराः सामात्या भर्तृव्यसनपीडिताः[16] ॥ शैलाग्रेभ्यः पतिष्यन्ति समेत्य[17] विषमेषु च ॥ ३५ ॥
विषमुद्बन्धनं वाऽपि प्रवेशं ज्वलनस्य वा ॥ उपवासमथो शस्त्रं प्रचरिष्यन्ति वानराः ॥ ३६ ॥
घोरमारोदनं मन्ये गते मयि भविष्यति ॥ इक्ष्वाकुकुलनाशश्च नाशश्चैव वनौकसाम् ॥ ३७ ॥
सोहं नैव गमिष्यामि किष्किन्धां नगरीमितः ॥ न[18] च शक्ष्याम्यहं द्रष्टुं सुग्रीवं मैथिलीं विना ॥३८॥
मय्यगच्छति चेहस्थे धर्मात्मानौ महारथौ[19] ॥ आशया तौ धरिष्येते वानराश्च मनस्विनः[20] ॥ ३९ ॥
हस्तादानो मुखादानो नियतो वृक्षमूलिकः[21] ॥ वानप्रस्थो भविष्यामि ह्यदृष्ट्वा[22] जनकात्मजाम् ॥ ४० ॥
सागरानूपजे देशे बहुमूलफलोदके ॥ चितां[23] कृत्वा प्रवेक्ष्यामि समिद्धमरणीसुतम् ॥ ४१ ॥

माह—ममेदमिति ॥ २१—२२ ॥ निवेद्यमाने दोषः स्यादित्येतदुपपादयति—गत्वेत्यादिना ॥ अप्रियमिति च्छेदः ॥ २३ ॥ परुषं श्रवणकटुकं । दारुणं भयंकरं । क्रूरं उग्रं । तीक्ष्णं असह्यम् । इन्द्रियतापनं इन्द्रियक्षोभकं । सीतानिमित्तं सीताविषयं ॥ २४ ॥ पञ्चत्वगतमानसं मरणे कृतनिश्चयं ॥ २५—३२ ॥ मानेन प्रत्युत्थानादिना ॥ ३३ ॥ निरोधेषु गृहादिसंवृतप्रदेशेषु ॥ ३४—३५ ॥ प्रचरिष्यन्ति करिष्यन्तीत्यर्थः । शस्त्रं शस्त्रपतनं ॥ ३६ ॥ आरोदनं आसमन्ताद्रोदनं ॥ ३७—३९ ॥ हस्तादानः हस्तपतितभोजी । मुखादानः मुखपतितभोजी । वृक्षमूलिकः वृक्षमूलवासी ॥ ४० ॥ बहुमूलफलोदक इति स्वरू-

---

कालोचितं किंक्षमं किंवक्तुंयुक्तंभवेदिति भूयोमर्तिं तद्विषयंपक्षंविचारयन्नभूदितिशेषः ॥ १९ ॥ स० सत्यसंधः प्रागितिशेषः । यद्वा मनसासीतांसंबोध्यवदति—सतीति । असंधः अनिष्पन्नस्वप्रतिज्ञः । अथवा अनुवादेन सीतायाअनानयनेप्राणांस्त्यक्ष्यामीतिवादऊह्यः । ततश्च सत्यसन्धइति यथावस्थितमन्वेति ॥ २८ ॥ स० हस्तादानः हस्तेयत्पतितंदैवात् तस्यादा-

[पा०] १ क.—ट. किंवा. २ ङ. झ. ञ. ट. वापिसंगताः. क. च. छ. ज. वामहाबलाः. ३ ङ. झ. ञ. ट. किष्किन्धामनुसंप्राप्तं. ४ क. ग. घ. च. छ. ज. समनुप्राप्तौ. ५ ङ. झ. ञ. ट. परुषंवचः. ६ ङ.—ट. तीक्ष्णंक्रूरमिन्द्रिय. ७ क. घ. शत्रुघ्नोपिमरिष्यति. ८ क. च. छ. ज. वालिनोमृतिंदुःखेन. ९ क. ग. दुःखकर्शिता. १० ङ. झ. ञ. ट. पञ्चत्वमागताराज्ञी. क. च. छ. ज. पञ्चत्वंगताराज्ञी. ११ ङ. झ. ञ., ट. प्यङ्गदस्तस्माद्विजहिष्यतिजीवितं. च. छ. ज. प्यङ्गदोबालस्तस्मात्सनभविष्यति. १२ घ. शोकेन. १३ ख.—ङ. झ. ञ. ट. अभिभूताः. १४ ङ.—ट. कपिनाथेन. १५ च. छ. ज. निरोधेषुचवानराः. १६ क. च. छ. ज. कर्शिताः. १७ ङ.—झ. समेषु. १८ क.—ट. नहि. १९ ग. महाबलौ. २० ङ. झ. ट. तरस्विनः. २१ ख. ग. ङ.—ट. अदृष्ट्वा. २२ ङ. झ. ञ. ट. चितिं. २३ घ. प्रदीप्तं.

उपविष्टस्य वा सम्यग्लिङ्गिनीं[1] साधयिष्यतः ॥ शरीरं भक्षयिष्यन्ति वायसाः श्वापदानि च ॥ ४२ ॥
इदं[2] महर्षिभिर्दृष्टं निर्याणमिति मे मतिः ॥ सम्यगापः प्रवेक्ष्यामि न चेत्पश्यामि जानकीम् ॥ ४३ ॥
सुजातमूला सुभगा कीर्तिमाला यशस्विनी ॥ प्रभग्ना चिररात्रीयं[3] मम सीतामपश्यतः ॥ ४४ ॥
तापसो वा भविष्यामि नियतो वृक्षमूलिकः ॥ नेतः[4] प्रतिगमिष्यामि तामदृष्ट्वाऽसितेक्षणाम्[5] ॥ ४५ ॥
यदीतः[6] प्रतिगच्छामि सीतामनधिगम्य ताम् ॥ अङ्गदः सह[7] तैः सर्वैर्वानरैर्नभविष्यति ॥ ४६ ॥
विनाशे बहवो दोषा जीवन्भद्राणि पश्यति ॥ तस्मात्प्राणान्धरिष्यामि ध्रुवो[8] जीवितसंगमः ॥ ४७ ॥
एवं बहुविधं दुःखं मनसा धारयन्मुहुः[9] ॥ नाध्यगच्छत्तदा पारं शोकस्य कपिकुञ्जरः ॥ ४८ ॥
[ततो[10] विक्रममासाद्य धैर्यवान्कपिकुञ्जरः ॥] रावणं वा वधिष्यामि दशग्रीवं महाबलम्[11] ॥
कामम[12]स्तु हृता सीता प्रत्याचीर्णं भविष्यति ॥ ४९ ॥
अथ[13] वैनं समुत्क्षिप्य उपर्युपरि सागरम् ॥ रामायोपहरिष्यामि पशुं पशुपतेरिव ॥ ५० ॥

पकथनं । अरणीसुतं अरण्युत्पन्नं ॥ ४१ ॥ उपविष्टस्य प्रायोपविष्टस्य । लिङ्गिनीं लिङ्गं संन्यासः अनशनं तद्वती लिङ्गिनी तां । साधयिष्यतः । लिङ्गिनमिति क्वचित्पाठः । तत्र लिङ्गं शरीरं तद्वान् लिङ्गी आत्मा तं साधयिष्यतः । शरीरादात्मानं मोचयिष्यत इत्यर्थः । श्वापदानि श्वापदाः व्याघ्रादयः ॥ ४२ ॥ न चैवमात्मत्यागे दोष इत्याह—इदमिति । निर्याणं मारणं । आपः अपः ॥ ४३ ॥ सुजातमूला । आदौ लङ्काधिदेवताजयेन शोभनप्रारम्भा । सुभगा चन्द्रोदयेन रम्या । कीर्तिमाला मम कीर्तिमयमाला । यशस्विनी हनुमतो लङ्काप्रवेशरात्रिरिति लोके विख्याता । चिररात्री जागरणेन दीर्घभूता रात्रिः । प्रभग्ना समाप्ता । एवं कल्याणीयं रात्रिः सीतामपश्यतो मे व्यर्थैव जातेत्यर्थः । "कृदिकारादक्तिन" इति दीर्घः ॥ ४४ ॥ आत्मत्यागापेक्षया तापसभाव एव ज्यायानित्याह—तापस इति ॥ वाशब्दोऽवधारणे । "वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये" इतिविश्वः ॥ ४५ ॥ मा भूत्सुग्रीवसमीपगमनं अङ्गदादिभिस्संयुज्यतामित्याशङ्क्याह—यदीत इति ॥ ४६ ॥ बहवो दोषाः पूर्वोक्तास्सर्वविनाशादयः । संगमः श्रेयस्संगमः ॥ ४७—४८ ॥ प्रत्याचीर्णं प्रत्याचरितं प्रतिकृतमिति यावत् ॥ ४९ ॥ पशुं पशुपतेरिवेति पशुपतेः अग्नेः ।

नंयस्यसः ॥ ४० ॥ **ति०** लिङ्गिनीमितिपाठे प्राणलिङ्गिनींचितिंचैतन्यमित्यर्थः ॥ **स०** लिङ्गिनंसाधयिष्यतः केवललिङ्गदेहविशिष्टमात्मानंकुर्वतः स्थूलदेहंत्यजतइतियावत् ॥ ४२ ॥ **ति०** सीतामपश्यतोमम यशस्विनी यशस्संपादिका । मृतस्यख्यातिर्यशः । सुजातमूला सुजातकारणवती । कीर्तिरूपामाला । जीवतःसा कीर्तिः । चिररात्रायेत्यव्ययं । चिरायेत्यर्थः । चिरायभग्ना आत्यन्तिकलयंगतेत्यर्थः ॥ **ती०** सुभगा सीतान्वेषणसौकर्यापादकचन्द्रिकयामनोहरा । कीर्तिमाला कीर्तनंकीर्तिः सीतान्वेषणसहकारिणीति सर्वत्रक्रियमाणाकीर्तिरेव मालायस्यास्सा । यशस्विनी हनुमल्लङ्काप्रवेशरात्रिरिति ख्यातिमती । चिररात्रिः चिरकालविशिष्टारात्रिः । दीर्घरात्रिरितियावत् । अनेन रामकार्यसहायेच्छया रात्रिरपिवर्धितवतीत्यवगम्यते ॥ **शि०** चिररात्राय बहुकालंसीतामपश्यतोमम सुजातमूला सुजातं रामसुग्रीवसंबन्धहेतुकवार्ताहरत्वेननिष्पन्नं मूलंयस्यास्सा । सुभगा शोभनैश्वर्यदात्री । यशस्विनी मुद्रिकादानोपलक्षितरामप्रीतिपात्रत्वहेतुकातियशोविशिष्टाकीर्तिमाला प्रभग्ना । अतः तापसः विचारपरः भविष्यामि । तांसीतामदृष्ट्वा इतोनप्रतिगमिष्यामि ॥ श्लोकद्वयमेकान्वयि ॥ **स०** सुजातमूला सद्वंशप्रभवा सुभगा सुन्दरी यशस्विनी या सीता तांचिररात्राय बहुकालमपश्यतोममकीर्तिमालाप्रभग्ना ॥ ४४ ॥ **ति०** एवमगमनेनिश्चिते मरणजीवितयोःकिंश्रेयस्तत्राह—विनाशइति । दोषाबहवःप्रागुक्ताः । चिरंमदगमने सीताविनाशनिश्चयेन रामादयोनस्युरेव । आत्मघातादयश्च । जीवंस्तु ममात्मा भद्रंकंप्राप्नोति वक्ष्यमाणनानाविधोपायाश्रयणेन । तस्मात्प्राणान्धरिष्यामि । यतोमयिजीवतिसति संगमः रामादीनांध्रुवः संभावितइत्यर्थः । काव्यलिङ्गमत्रालङ्कारः ॥ तीर्थस्तु अत्रजीवितसंगमइतिपाठंकल्पयामास । **स०** जीवितसंगमः

[पा०] १ ख. छ.—ञ. सम्यग्लिङ्गिनं. २ क. ग.—ट. इदमप्यृषिभिर्दृष्टं. ३ झ. ञ. ट. चिररात्राय. ४ क. च. छ. ज. नतुप्रति. ५ च. छ. ज. ञ. मदृष्ट्वायतेक्षणां. ६ क. ग. ङ.—ञ. यदितुप्रति. घ. यदिप्रतिगमिष्यामि. ७ ग. ङ. झ. ञ. ट. सहितस्सर्वैः. क. घ. च. छ. ज. सहितैः. ८ ङ. झ. ञ. ट. जीवन्प्राप्नोतिभद्रकं. ९ ग. घ. च. छ. ज. त्प्राणान्हिरक्ष्यामो. १० ख. झ. ञ. ट. ध्रुवोजीवति. क. ध्रुवंजीवति. ठ. श्रेयोजीवितसंगमः. ११ ङ. झ. ट. धारयन्बहु. १२ इदमर्धं ङ.—ट. पाठेषुदृश्यते. १३ क. घ. च. छ. ज. ञ. रामपत्नीहतायेनप्रत्याचीर्णं. १४ ख. घ. ञ. अथचैनं.

इति चिन्तां[1] समापन्नः सीतामनधिगम्य ताम् ॥ ध्यानशोकपरीतात्मा चिन्तयामास वानरः ॥ ५१ ॥
यावत्सीतां[2] हि पश्यामि रामपत्नीं यशस्विनीम् ॥ तावदेतां पुरीं लङ्कां विचिनोमि पुनःपुनः ॥५२॥
संपातिवचनाच्चापि रामं यद्यानयाम्यहम् ॥ अपश्यन्नाघवो भार्यां निर्दहेत्सर्ववानरान् ॥ ५३ ॥
इहैव नियताहारो वत्स्यामि नियतेन्द्रियः ॥ न मत्कृते विनश्येयुः सर्वे ते नरवानराः ॥ ५४ ॥
अशोकवनिका[3] चेयं दृश्यते या महाद्रुमा ॥ इमां[4]मधिगमिष्यामि न हीयं विचिता मया ॥ ५५ ॥
वसुरुद्रांस्तथाऽऽदित्यानश्विनौ मरुतोपि[5] च ॥ नमस्कृत्वा गमिष्यामि रक्षसां शोकवर्धनः ॥ ५६ ॥
जित्वा तु राक्षसान्सर्वानिक्ष्वाकुकुलनन्दिनीम्[6] ॥ संप्रदास्यामि रामाय यथा सिद्धिं[7] तपस्विने ॥५७॥
स मुहूर्तमिव ध्यात्वा चिन्ताव्यथितेन्द्रियः[8] ॥ उदतिष्ठन्महातेजा हनूमान्मारुतात्मजः[9] ॥ ५८ ॥

नमोस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै ॥
नमोस्तु रुद्रेन्द्रयमानिलेभ्यो नमोस्तु[10] चन्द्रार्कमरुद्गणेभ्यः ॥ ५९ ॥

स[11] तेभ्यस्तु नमस्कृत्य[12] सुग्रीवाय च मारुतिः ॥ दिशः सर्वाः समालोक्य[13] सोशोकवनिकां प्रति ॥६०॥
स गत्वा मनसा पूर्वमशोकवनिकां शुभाम् ॥ उत्तरं चिन्तयामास वानरो मारुतात्मजः ॥ ६१ ॥
ध्रुवं तु रक्षोबहुला भविष्यति वनाकुला ॥ अशोकवनिका चिन्त्या[14] सर्वसंस्कारसंस्कृता ॥ ६२ ॥
रक्षिणश्चात्र विहिता नूनं रक्षन्ति पादपान् ॥ भगवानपि सर्वात्मा[15] नातिक्षोभं प्रवाति[16] वै ॥ ६३ ॥

पशुं अजमिव । " इमं पशुं पशुपते ते अद्य बध्नाम्यग्ने " इति श्रुतेः । अनेन सुप्रापत्वमुक्तं ॥ ५० ॥ प्रथमं चिन्ता विचारः । ततो ध्यानं ज्ञातव्यविषयनिरंतरप्रत्ययः । ततश्चिन्तेति दुरन्तचिन्तोच्यते ॥५१॥ चिन्ताप्रकारमाह—यावदिति ॥ ५२ ॥ यदि पूर्वमेव संपातिवचनप्रामाण्येन रामोत्रानीयेत तदा महान्प्रमादः स्यादित्याह—संपातीति ॥ ५३—५६ ॥ सिद्धिं तपःफलं ॥ ५७—५८ ॥ " सर्वान्देवान्नमस्यन्ति रामस्यार्थे यशस्विनः " इत्युक्तरीत्या अभिमतलाभत्वरया सर्वान्नमस्करोति—नमोस्त्विति॥५९॥ स तेभ्यस्त्वित्यादिश्लोकद्वयमेकान्वयं ॥ नमस्कृत्यालोकनरूपक्रियाभेदात्तच्छब्दद्वयं । नमस्कृत्य अशोकवनिकां प्रति उद्दिश्य सर्वा दिशस्समालोक्य अशोकवनिकां परिच्छेत्तुं तस्यास्सर्वा दिशो दृष्ट्वा तां स मनसा गत्वा उत्तरं चिन्तयामासेति योजना । अशोकशब्दः संक्षेपेव्याख्यातः ॥ ६०—६१ ॥ रक्षोबहुला रक्षकराक्षसबहुला । वनाकुला जलावृता द्रुमषण्डमण्डिता वा । सर्वसंस्कारैः कर्षणतृणनिरसनादिभिः संस्कृता कृतातिशयाधाना । अशोकवनिका ध्रुवं चिन्त्या भविष्यति । अवश्यमन्वेषणीया भवेदित्यर्थः ॥ ६२ ॥ अत्र अशोकवनिकायां । विहिताः नियुक्ताः । सर्वात्मा सर्वमाप्नोतीति सर्वात्मा वायुः । सोपि नातिक्षोभं प्रवाति । अतिकम्पनपूर्वकं नात्र संचरतीत्यर्थः ॥६३॥

जीवितेनसंगमः श्रेयः श्रेयस्साधनं ॥ ४७ ॥ **ति०** चिन्तया विग्रथितानि संबद्धानि व्याकुलानि इन्द्रियाणियस्यसः ॥ ५८ ॥ **ती०** सुग्रीवायचेत्यत्र नमश्चक्रइति करोतेर्विपरिणामः । अशोकवनिकांगतः मनसेतिशेषः ॥ अशोकवनिकांप्रतीतिपाठे समालोकयदित्यालोकयतेर्विपरिणामः । अन्यथा तच्छब्दोतिरिच्यते ॥ **ति०** स्वामित्वात्सूर्यांशत्वाच्च सुग्रीवनतिः ॥ **ति०** अत्र

[पा०] १ क. ग. ङ. च. झ. ञ. ट. चिन्तासमापन्नः. २ क. ख. ङ. झ. ञ. ट. त्सीतांन. ग. च. छ. ज. त्सीतांतु. ३ क.—ट. चापिमहतीयंमहाद्रुमा. ४ ख. इमाममि. ५ क. ग.—ट. वसून्रुद्रान्. ६ क. ञ. मरुतोपिवा. ७ क. ग.—ट. राक्षसान्देवीमिक्ष्वाकु. ८ घ.—ट. सिद्धीमिव. क. खसिद्धिमिवयोगिने. ९ क. ग. चिन्तयाग्रथिते. ख. ङ.—ट. चिन्ताविग्रथिते. १० क. ग. ङ.—ट. न्महाबाहुः. ११ ग. घ. नमश्च. १२ ङ. झ. ञ. ट. चन्द्राग्नि. १३ ग. इतितेभ्योऽञ्जलिंकृत्वा. क. इतितेभ्यो. ञ. सतुतेभ्यो. १४ क. ख. ङ.—झ. ट. नमस्कृत्वा. १५ च. छ. ज. ञ. सोशोकवनिकांगतः. ख. घ. ङ. झ. ट. सोशोकवनिकांप्रति. १६ ङ.—ट. पुण्या. १७ ङ.—ट. विश्वात्मा. १८ घ. ञ. ट. प्रवात्यसौ. ख. झ. प्रवायति.

संक्षिप्तोऽयं मयाऽऽत्मा च रामार्थे रावणस्य च ॥ [1]सिद्धिं मे संविधास्यन्ति देवाः सर्षिगणास्त्विह ॥६४॥
ब्रह्मा स्वयंभूर्भगवान्[2]देवाश्चैव दिशन्तु मे ॥ सिद्धिमग्निश्च वायुश्च पुरुहूतश्च वज्रभृत् ॥ ६५ ॥
वरुणः पाशहस्तश्च सोमादित्यौ तथैव च ॥ अश्विनौ च महात्मानौ मरुतः [3]शर्व एव च ॥ ६६ ॥
सिद्धिं सर्वाणि भूतानि भूतानां चैव यः प्रभुः ॥ [4]दास्यन्ति मम [5]ये चान्ये ह्यदृष्टाः पथिगोचराः ॥ ६७ ॥
तदुन्नसं [6]पाण्डुरदन्तमव्रणं शुचिस्मितं पद्मपलाशलोचनम् ॥
द्रक्ष्ये तदार्यावदनं कदान्वहं प्रसन्नताराधिपतुल्यदर्शनम् ॥ ६८ ॥
क्षुद्रेण [7]पापेन [8]नृशंसकर्मणा सुदारुणालङ्कृतवेषधारिणा ॥
बलाभिभूता ह्यबला तपस्विनी कथं नु मे दृष्टिपथेऽद्य सा भवेत् ॥ ६९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

चतुर्दशः सर्गः ॥ १४ ॥

अशोकवनिकाप्राकारावस्थानेन वनरामणीयकावलोकनपूर्वकं वनंप्रविष्टेन शाखाचालनात्पुष्पादिशातनेन वृक्षाद्वृक्षान्तरोत्प्लवनेन सर्वतः सीतांचिन्वताहनुमता मध्येवनं काञ्चनवेदिकामण्डलमध्यवर्तिन्याः काञ्चनवृक्षपरिवृतायाः कस्याश्चित्काञ्चनमयशिंशुपाया दर्शनं ॥ १ ॥ तद्देशे रमणीयतरनदीप्रति सन्ध्योपास्त्याद्यर्थं सीतायाआगमनसंभावनेन तद्दिदृक्षया शिंशुपारोहणेन पर्णनिबिडविटपाग्रे निलीयावस्थानं ॥ २ ॥

स मुहूर्तमिव ध्यात्वा मनसा चाधिगम्य ताम् ॥ [9]अवप्लुतो महातेजाः प्राकारं तस्य वेश्मनः ॥ १ ॥
स तु संहृष्टसर्वाङ्गः प्राकारस्थो महाकपिः ॥ पुष्पिताग्रान्वसन्तादौ ददर्श विविधान्द्रुमान् ॥ २ ॥

एवंभूतप्रदेशे भवतः कथं गमनमित्याशङ्क्याह—संक्षिप्त इति ॥ मया अयमात्मा देहः । रामार्थे रामप्रयोजनसिद्ध्यर्थं । रावणस्य चार्थे रावणादृश्यत्वार्थं च । संक्षिप्तः अल्पीकृतः । एवं मया कार्यानुकूलो यत्नः कृतः कार्यसिद्धिं तु देवा विधास्यन्तीत्याह—सिद्धिमिति । संविधास्यन्ति ददत्वित्यर्थः ॥६४—६५॥ शर्वः रुद्रः ॥ ६६ ॥ उक्तमर्थं पुनः संग्रहेणाह—सिद्धिं सर्वाणि भूतानीति ॥ भूतानां प्रभुः उक्तब्रह्मरुद्राद्यधिपतिः । परिशेषाद्विष्णुरित्यवगम्यते । पन्थानो गोचरः येषां ते पथिगोचराः मार्गवर्तिनः ॥ ६७ ॥ तत् तस्मात्कारणात् । उन्नता नासिका यस्य तदुन्नसं । "उपसर्गाच्च" इति समासान्तोचूप्रत्ययः नसादेशश्च । अव्रणं अनवद्यं । तत् अभिज्ञातव्यत्वेन रामेण निवेदितं ॥ ६८ ॥ सुदारुणालंकृतवेषधारिणा सुदारुणत्वेऽप्यापातप्रसन्नवेषधारिणा ॥ ६९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रयोदशः सर्गः ॥ १३ ॥

इवशब्दो वाक्यालंकारे । प्राकारं अशोकवनिकाप्राकारं । तस्य वेश्मनः रावणस्य गृहात् । अवप्लुतः प्राप्तः ॥ १ ॥ संहृष्टसर्वाङ्गः पुलकितसर्वाङ्गः ।

ध्रुवंरक्षोबहुलेत्युत्प्रेक्षया चन्द्रास्तःसूचितः । अन्यथा तत्प्रकाशेन निश्चयएवस्यात् ॥ ६२ ॥ **शि०** रामार्थेरावणस्यवनिकायां अयंममात्मादेहःसंक्षिप्तः प्रवेशितः । मेसिद्धिंतु सर्षिगणादेवादिशंतु । किंच संक्षिप्तशब्दस्यलघूकृतइत्यर्थः । रावणस्य समासघटकीभूतार्थेन्वयः । सविशेषणानामित्यस्यतु नविषयः । अर्थस्यविशेष्यत्वात् । रावणसंबद्धार्थशब्दस्यविनाशपरत्वं । वनिकानिरीक्षणार्थमित्यध्याहारोवा ॥ **ति०** रावणस्य अर्थेइत्यनुकर्षः । रावणकर्तृकदर्शनपरिहारायेत्यर्थः ॥ ६४ ॥ **ति०** भूतानांप्रभुः प्रजापतिः । दास्यन्ति । तेषामप्यस्यार्थस्येष्टत्वादितिभावः । पूर्वप्रार्थना इदानींतु तन्निश्चयः ॥ ६७ ॥ इतित्रयोदशः सर्गः ॥१३॥

स० मुहूर्तमिवध्यात्वा मुहूर्तंध्यात्वेव ॥ १ ॥ **शि०** वसन्तादौचैत्रे । किंच वसन्तआदीयते नित्यंप्रतीयते यस्यांतस्यांभूमौ ॥

[**पा०**] १ ङ. झ. ट. सिद्धिंदिशन्तुमेसर्वे. क. कार्यसिद्धिंप्रयच्छन्ति. २ ङ. झ. ञ. ट. न्देवाश्चैवतपस्विनः. क. च. छ. ज. न्वेदाश्चैव. ३ क. सोमसूर्यौ. ख. इन्द्रादित्यौ. ४ झ. ञ. सर्वएवच. ५ क. ग. च. छ. ज. दास्यन्तिसिद्धिं. ६ ग. च. छ. ज. येचान्येभूताश्च. घ. ङ. झ. ञ. येचान्येप्यदृष्टाः. ७ क. च. छ. ज. समुन्नसं. ८ ङ. झ. ञ. तुल्यवर्चसं. ९ ङ.—ट हीनेन. १० नृशंसमूर्तिना. ११ क. अवप्लुत्य.

सालानशोकान्भव्यांश्च चम्पकांश्च सुपुष्पितान् ॥ उद्दालकान्नागवृक्षांश्चूतान्कपिमुखानपि ॥ ३ ॥
अथाम्रवणसंछन्नां लताशतसमावृताम् ॥ ज्यामुक्त इव नाराचः पुप्लुवे वृक्षवाटिकाम् ॥ ४ ॥
स प्रविश्य विचित्रां तां विहंगैरभिनादिताम् ॥ राजतैः काञ्चनैश्चैव पादपैः सर्वतो वृताम् ॥ ५ ॥
विहगैर्मृगसङ्घैश्च विचित्रां चित्रकाननाम् ॥ उदितादित्यसंकाशां ददर्श हनुमान्कपिः ॥ ६ ॥
वृतां नानाविधैर्वृक्षैः पुष्पोपगफलोपगैः ॥ कोकिलैर्भृङ्गराजैश्च मत्तैर्नित्यनिषेविताम् ॥ ७ ॥
प्रहृष्टमनुजे काले मृगपक्षिसमाकुले ॥ मत्तबर्हिणसंघुष्टां नानाद्विजगणायुताम् ॥ ८ ॥
मार्गमाणो वरारोहां राजपुत्रीमनिन्दिताम् ॥ सुखप्रसुप्तान्विहगान्बोधयामास वानरः ॥ ९ ॥
उत्पतद्भिर्द्विजगणैः पक्षैः सालाः समाहताः ॥ अनेकवर्णा विविधा मुमुचुः पुष्पवृष्टयः ॥ १० ॥
पुष्पावकीर्णः शुशुभे हनुमान्मारुतात्मजः ॥ अशोकवनिकामध्ये यथा पुष्पमयो गिरिः ॥ ११ ॥
दिशः सर्वाः प्रधावन्तं वृक्षषण्डगतं कपिम् ॥ दृष्ट्वा सर्वाणि भूतानि वसन्त इति मेनिरे ॥ १२ ॥
वृक्षेभ्यः पतितैः पुष्पैरवकीर्णा पृथग्विधैः ॥ रराज वसुधा तत्र प्रमदेव विभूषिता ॥ १३ ॥
तरस्विना ते तरवस्तरसाऽभिप्रकम्पिताः ॥ कुसुमानि विचित्राणि ससृजुः कपिना तदा ॥ १४ ॥
निर्धूतपत्रशिखराः शीर्णपुष्पफलद्रुमाः ॥ निक्षिप्तवस्त्राभरणा धूर्ता इव पराजिताः ॥ १५ ॥
हनूमता वेगवता कम्पितास्ते नगोत्तमाः ॥ पुष्पपर्णफलान्याशु मुमुचुः पुष्पशालिनः ॥ १६ ॥
विहङ्गसङ्घैर्हीनास्ते स्कन्धमात्राश्रया द्रुमाः ॥ बभूवुरगमाः सर्वे मारुतेनेव निर्धुताः ॥ १७ ॥
निर्धूतकेशी युवतिर्यथा मृदितवर्णका ॥ निष्पीतशुभदन्तोष्ठी नखैर्दन्तैश्च विक्षता ॥ १८ ॥

वसन्तादौ " पौर्णमास्या मासान् संपाद्य " इति पक्षमनुसृत्य फाल्गुनपौर्णमासीप्रपूर्वदिनत्वेन वसन्तादावित्युक्तं ॥ २ ॥ सालान् सर्जकान् । भव्यान् शुभानित्यशोकविशेषणं । यद्वा भवं रुद्रमर्हन्तीति भव्यान् रुद्रप्रियपुष्पान् वृक्षविशेषान् । उद्दालकान् बहुवारकान् । नागवृक्षान् नागकेसरवृक्षान् । कपिमुखान् मर्कटकान् ॥ ३—४ ॥ काञ्चनैः काञ्चनमयैरिव स्थितैः ॥ ५ ॥ चित्रकाननां चित्रावान्तरवनां । चम्पकवनं चूतवनमित्येवंविधवनवतीं ॥ ६ ॥ पुष्पाण्युपगच्छन्तीति पुष्पोपगाः पुष्पसंपन्नाः तैः । फलोपगैः फलसंपन्नैः ॥ ७ ॥ प्रहृष्टमनुजे काले वसन्ते । वसन्तस्य प्रचुरमन्मथत्वात्प्रहृष्टमनुजत्वं ॥ ८—९ ॥ सालाः वृक्षाः । " अनोकहः कुटस्सालः " इत्यमरः । पुष्पवृष्टयः पुष्पवृष्टीः ॥ १०—१४ ॥ धूर्ताः अक्षधूर्ताः ॥ १५—१६ ॥ स्कन्धमात्राश्रयाः पुष्पादीनामनाश्रयाइत्यर्थः । अतएव अगमाः अगम्याः असेव्या इत्यर्थः । निर्धुताः कम्पिताः ॥ १७ ॥ मृदितवर्णका मृष्टाङ्गरागा । "अङ्गरा-

ति० वसन्तादौ वसन्तादिसर्वर्तुषु संनिहितैःपुष्पैःपुष्पिताम्रान् ॥ २ ॥ ति० कपिमुखान् कपिमुखाकारफलवतः । चूतविशेषणमेतत् ॥ ३ ॥ राजतैः रजतादिसंस्कृतैस्तद्वर्णैर्वा ॥ ५ ॥ ति० उदितादित्यसंकाशां पुष्पैरितिशेषः ॥ ६ ॥ ति० काले सर्वस्मिन् । मृगादीन्मदेनाकुलयति तां ॥ ७ ॥ ति० सर्वाभिधावन्तमिति संधिरार्षः । वसन्तइतिमेनिरइति अन्यस्येहवनेऽशक्यप्रवेशत्वाद्वसन्तएव वृक्षसंचारोचितंकपिरूपमास्थाय चरतीतिमेनिरइत्यर्थः । एतेन द्रष्टृणांतस्मिन्विमतिनिवृत्तिरीश्वरानुग्रहादिति सूचितं ॥ स० वसन्तइतिमेनिरे सर्ववृक्षपत्रादिशातनात् ' वसन्तेसर्वसस्यानां जायतेपत्रशातनं ' इतिवचनात् पुष्पावकीर्णइत्युक्तिस्वारस्यात् ॥ १२ ॥ ति० निपीतः शुभदन्तयुक्तओष्ठोयस्यास्सा । स० निष्पीताः अत्यन्तमन्तर्गमिताः आच्छादिताइति

[पा०] १ ख. झ. ञ. ट. तथाम्रवणसंपन्नाँल्लताशतसमन्वितान्. ङ. च. छ. ज. तथाम्रवणसंछन्नाँल्लतागृहसमावृतान्. २ ङ. च. ञ. ट. विहङ्गैः. ३ ङ. झ. ञ. ट. हनुमान्बली. ४ ङ. झ. प्रहृष्टमनुजां. ५ घ. बहुपक्षि. ख. मृगद्विजमदाकुलां. ६ ञ. समाकुलां, क. मदाकुले. ङ. झ. ट. मदाकुलां. ७ ङ. झ. ट. पक्षैर्वातैः. ८ ञ. समावृताः. ९ च. छ. ज. ञ. सर्वादिशोऽभि. धावन्तं. ख. ग. सर्वादिशोविधावन्तं. घ. ङ. झ. ट. दिशः सर्वाभिधावन्तं. १० ग. सुभूषिता. ११ ङ. झ. ट. स्तरसाबहुकंपिताः. घ. स्तरसाहिप्रकंपिताः. १२ क. च. छ. ज. कपिनोद्धताः. १३ ग. जीर्णपत्रफल. ञ. शीर्णपत्र. १४ ङ. झ. ट. पुष्पपत्र. १५ ग. घ. ङ. झ. ञ. ट. विधूत. १६ ङ. झ. ञ. ट. निपीत.

तथा लाङ्गूलहस्तैश्च चरणाभ्यां च मर्दिता ॥ वैभूवाशोकवनिका प्रभग्नवरपादपा ॥ १९ ॥
महालतानां दामानि व्यधमत्तरसा कपिः ॥ यथा प्रावृषि विन्ध्यस्य मेघजालानि मारुतः ॥ २० ॥
स तत्र मणिभूमीश्च राजतीश्च मनोरमाः ॥ तथा काञ्चनभूमीश्च ददर्श विचरन्कपिः ॥ २१ ॥
वापीश्च विविधाकाराः पूर्णाः परमवारिणा ॥ महार्हैर्मणिसोपानैरुपपन्नास्ततस्ततः ॥ २२ ॥
मुक्ताप्रवालसिकताः स्फाटिकान्तरकुट्टिमाः ॥ काञ्चनैस्तरुभिश्चित्रैस्तीरजैरुपशोभिताः ॥ २३ ॥
फुल्लपद्मोत्पलवनाश्चक्रवाकोपकूजिताः ॥ नत्यूहरुतसंघुष्टा हंससारसनादिताः ॥ २४ ॥
दीर्घाभिर्द्रुमयुक्ताभिः सरिद्भिश्च समन्ततः ॥ अमृतोपमतोयाभिः शिवाभिरुपसंस्कृताः ॥ २५ ॥
लताशतैरवततास्सन्तानकसमावृताः ॥ नानागुल्मावृतघनाः करवीरकृतान्तराः ॥ २६ ॥
ततोऽम्बुधरसंकाशं प्रवृद्धशिखरं गिरिम् ॥ विचित्रकूटं कूटैश्च सर्वतः परिवारितम् ॥ २७ ॥
शिलागृहैरवततं नानावृक्षैः समावृतम् ॥ ददर्श हरिशार्दूलो रम्यं जगति पर्वतम् ॥ २८ ॥
ददर्श च नगात्तस्मान्नदीं निपतितां कपिः ॥ अङ्कादिव समुत्पत्य प्रियस्य पतितां प्रियाम् ॥ २९ ॥
जले निपतिताग्रैश्च पादपैरुपशोभिताम् ॥ वार्यमाणामिव क्रुद्धां प्रमदां प्रियबन्धुभिः ॥ ३० ॥
पुनरावृत्ततोयां च ददर्श स महाकपिः ॥ प्रसन्नामिव कान्तस्य कान्तां पुनरुपस्थिताम् ॥ ३१ ॥
तस्यादूरात्स पद्मिन्यो नानाद्विजगणायुताः ॥ ददर्श हरिशार्दूलो हनुमान्मारुतात्मजः ॥ ३२ ॥
कृत्रिमां दीर्घिकां चापि पूर्णां शीतेन वारिणा ॥ मणिप्रवरसोपानां मुक्तासिकतशोभिताम् ॥ ३३ ॥
विविधैर्मृगसङ्घैश्च विचित्रां चित्रकाननाम् ॥ प्रासादैः सुमहद्भिश्च निर्मितैर्विश्वकर्मणा ॥ ३४ ॥
काननैः कृत्रिमैश्चापि सर्वतः समलङ्कृताम् ॥ ३५ ॥
ये केचित्पादपास्तत्र पुष्पोपगफलोपगाः ॥ सच्छत्राः सवितर्दीकाः सर्वे सौवर्णवेदिकाः ॥ ३६ ॥

गस्समालम्भो वर्णकश्च विलेपनं " इत्युक्तेः । निष्पीतशुभदन्तोष्ठी निष्पीततयाशुभदन्ततुल्योष्ठी ॥ १८—१९ ॥ लतानां दामानि प्रतानानि ॥ २०—२३ ॥ नत्यूहाः दात्यूहाः ॥ २४—२५ ॥ संतानकाः कल्पवृक्षास्तैस्समावृताः । घनाः निबिडाः । नानागुल्मावृताश्च ताः घनाश्चेति समासः । करवीरकृतान्तराः करवीरैः कृतविशेषाः ॥ २६—२७ ॥ जगति लोके । रम्यं एतत्सदृशं रम्यं किंचिन्नास्तीत्यर्थः । पर्वतं ददर्शेत्यन्वयः ॥ २८ ॥ अथ नद्याः कुपितया निर्गतया सखीसान्त्वनेन पुनरागतया साम्यं दर्शयति —ददर्श चेति ॥ २९—३० ॥ पुनरावृत्ततोयां वृक्षाग्रप्रतिहत्या पुनःपर्वताभिमुखतोयप्रवाहां । उपमाने उपमेये चान्वयाय ददर्शेति पदद्वयं ॥ ३१ ॥ तस्य पर्वतस्य । पद्मिन्यः पद्मिनीः ॥ ३२ ॥ कृत्रिमां क्रियया निर्वृत्तां निर्मितामित्यर्थः ॥ ३३—३५ ॥ सच्छत्राः सवितानाइत्यर्थः । सवितर्दिकाः सवेदिकाः । सौवर्णवेदिकाः वितर्दिकारोहणार्थं सुवर्णमयसोपान-

---

यावत् । शुभदन्ता याभ्यांतौ ओष्ठौयस्यास्सा ॥ १८ ॥ **रामानु०** जगतिपर्वतं । जगतीशब्दस्यहस्वभावआर्षः । जगती भूमिः मृदितियावत् । तत्प्राधान्याज्जगतिपर्वतमित्युक्तं । यद्वा जगतिपर्वतइतिसंज्ञा ॥ **ति०** जगति लोकेरम्यं सुन्दरवस्तुभ्योपि परमसुन्दरं । तीर्थस्तु—जगतीपर्वतमित्यर्थः । मृत्पर्वतइतियावदितिव्याचक्षाण उपेक्ष्यएव । **शि०** पर्वतं पर्वभिः अनेकग्रन्थिभिः

[**पा०**] १ च.—ञ. हस्तैस्तु. २ ङ. झ. ञ. ट. तयैवाशोक. ३ ख. ङ. च. झ. ञ. ट. वनपादपा. ४ ङ. झ. ञ. ट. प्रावृषिवेगेन. च. छ. ज. प्रावृष्प्रवृद्धानि. ५ ख. ग. ङ. ञ. ट. विचरन्ददृशेकपिः. ६ ग. घ. ङ. झ. ञ. ट. बुद्धपद्मोत्पल. ७ ङ.—ट. श्रक्रवाकोपशोभिताः. ८ ख. छ. ज. शुभाभिः. ९ क. रुपसंवृताः. घ. रभिसंस्कृताः. १० क.—घ. च. छ. ज. संतानकसमावृताः. ११ क. ग.—ट. वनाः. १२ ङ. झ. ञ. ट. वृक्षसमावृतं. १३ क. रजतपर्वतं. १४ घ. तोयांतां. १५ क. अदूरात्तत्र. १६ क. च. छ. ज. गणावृताः. १७ ङ.—ज. वापि. १८ ख. ञ. निर्मितांविश्व.

[1]लताप्रतानैर्बहुभिः पर्णैश्च बहुभिर्वृताम् ॥ काञ्चनीं शिंशुपामेकां ददर्श [3]हनुमान्कपिः ॥
वृतां [3]हेममयीभिस्तु वेदिकाभिः समन्ततः ॥ ३७ ॥
सोपश्यद्भूमिभागांश्च [5]गर्तप्रस्रवणानि च ॥ सुवर्णवृक्षानपरान्ददर्श शिखिसन्निभान् ॥ ३८ ॥
तेषां द्रुमाणां प्रभया मेरोरिव दिवाकरः ॥ अमन्यत तदा वीरः काञ्चनोस्मीति वानरः ॥ ३९ ॥
तां काञ्चनैस्तरुगणैर्मारुतेन च वीजिताम् ॥ किङ्किणीशतनिर्घोषां दृष्ट्वा विस्मयमागमत् ॥ ४० ॥
स पुष्पिताग्रां [9]रुचिरां तरुणाङ्कुरपल्लवाम् ॥ तामारुह्य [11]महाबाहुः शिंशुपां पर्णसंवृताम् ॥ ४१ ॥
इतो द्रक्ष्यामि वैदेहीं रामदर्शनलालसाम् ॥ इतश्चेतश्च दुःखार्तां [12]संपतन्तीं यदृच्छया ॥ ४२ ॥
अशोकवनिका चेयं दृढं रम्या दुरात्मनः ॥ [13]चम्पकैश्चन्दनैश्चापि बकुलैश्च विभूषिता ॥ ४३ ॥
इयं च नलिनी रम्या द्विजसङ्घनिषेविता ॥ इमां सा [15]राममहिषी नूनमेष्यति जानकी ॥ ४४ ॥
सा रामा [15]राममहिषी राघवस्य प्रिया [16]सती ॥ वनसंचारकुशला [17]नूनमेष्यति जानकी ॥ ४५ ॥
अथवा मृगशावाक्षी वनस्यास्य विचक्षणा ॥ वनमेष्यति [18]सार्येह रामचिन्तानुकर्शिता ॥ ४६ ॥
रामशोकाभिसंतप्ता सा देवी वामलोचना ॥ [20]वनवासे रता नित्यमेष्यते वनचारिणी ॥ ४७ ॥
वनेचराणां सततं नूनं स्पृहयते [21]पुरा ॥ रामस्य दयिता [22]भार्या जनकस्य सुता सती ॥ ४८ ॥
संध्याकालमनाः श्यामा [23]ध्रुवमेष्यति [24]जानकी ॥ नदीं चेमां [25]शिवजलां सन्ध्यार्थे वरवर्णिनी ॥४९॥
तस्याश्चाप्यनुरूपेयमशोकवनिका शुभा ॥ शुभा या पार्थिवेन्द्रस्य पत्नी रामस्य संमता ॥ ५० ॥
यदि जीवति सा देवी ताराधिपनिभानना ॥ आगमिष्यति साऽवश्यमिमां [26]शिवजलां नदीम् ॥५१॥

वेदिकायुक्ताः ॥ ३६—३९ ॥ काञ्चनैस्तरुगणैः उपलक्षितां तां शिंशुपां । किङ्किणीशतनिर्घोषां किङ्किण्यः क्षुद्रघण्टिकाः तासां निर्घोषो यस्याः । यद्वा किङ्किणीभिः शतमनन्ताः निर्घोषा यस्याः सा तां ॥ ४० ॥ स पुष्पिताग्रामित्याद्यासर्गसमाप्त्येकं वाक्यं ॥ ४१ ॥ इतो द्रक्ष्यामि इमामारुह्य द्रक्ष्यामि । ल्यब्लोपे पञ्चमी ॥ ४२ ॥ दुरात्मनः रावणस्य ॥ ४३—४५ ॥ अथवेति पक्षान्तरे । विचक्षणा तापापनोदनचतुरा । अस्य वनस्य अशोकवनस्य । इह वनं नलिनीपरिसरवर्तिवनं । रामचिन्तानुकर्शिता सती एष्यति । रामविश्लेषजनिततापापनोदनार्थमेतद्वनप्रदेशमागमिष्यतीत्यर्थः । सा आर्येतिपदच्छेदः ॥ ४६ ॥ एष्यते एष्यति ॥ ४७ ॥ वनेचराणां स्पृहयते वनेचरेभ्यस्स्पृहयते ॥ ४८ ॥ संध्याकाले मनः यस्यास्सा संध्याकालमनाः संध्योपासनतत्परेत्यर्थः । संध्यार्थे एष्यति प्रतिदिनमितिशेषः ॥ ४९—५१ ॥

तन्यतेवर्ध्यते सतं ॥ २८ ॥ शि० मेरोरिव द्रुमाणांप्रभयोपलक्षितोमहाकपिः अहंकाञ्चनोस्मीत्यमन्यत ॥ ३९ ॥ ति० सन्ध्यादिनरात्र्योःसन्धिरूपानुष्ठानकालोयस्यकर्मणस्तत्रमनोयस्यास्सातथा । सन्ध्यार्थे सन्ध्याकालक्रियमाणस्नानाद्यर्थे । पूर्ववदेवात्राप्युक्तस्यैवार्थस्यावृत्तिः । रात्रिशेषे हनुमतोस्यवचसःप्रवृत्तेः सन्ध्याशब्देनात्रप्रातःकालोविवक्षितः । तत्रकर्तव्यस्नानादौचास्त्रेवस्त्रीणामप्यधिकारइति कथंस्त्रीणांसन्ध्यावन्दनमितिपरास्तंवेदितव्यं । किंच सम्यग्भगवज्ज्ञानस्यैव सन्ध्यापदार्थत्वेनास्त्येव तत्रस्त्रियाअधिकारः । गायत्रीमन्त्रेण तदर्थस्मरणपूर्वकध्यानेतु द्विजस्यैवाधिकारइत्यन्यत् ॥ ४९ ॥ इतिचतुर्दशः सर्गः ॥ १४ ॥

[पा०] १ घ. च. छ. ज. लताविताने:. २ क. ङ.—ट. समहाकपिः. ३ च. हेममयीभिश्च. ४ ङ. झ. ञ. ट. नगप्रस्रवणानिच. ५ घ. गिरिसंनिभान्. ६ क. घ. ङ. ट. महाकपिः. ७ ङ. झ. ट. सर्वतः. ८ ग. ङ. झ. ञ. ट. तान्काञ्चनान्वृक्षगणान्मारुतेनप्रकंपितान् । किङ्किणीशतनिर्घोषान्दृष्ट्वा. ९ क. च. छ. ज. मागतः. १० क. च. छ. ज. हनुमांस्तरुणाङ्कुर. ११ क. ग.—ट. महावेगः. १२ झ. ञ. संतपन्तीं. १३ ग. ङ.—ट. चन्दनैश्चंपकैश्चापि. १४ क. ख. ग. ङ. च. छ. झ. ञ. ट. राजमहिषी. १५ ङ.—ट. राजमहिषी. १६ ख.—ङ. ञ. ट. सदा. १७ घ.—ट. ध्रुवं. १८ ङ. झ. ञ. ट. साद्येह. घ. साध्वीह. १९ ङ.—ट. सुकर्शिता. २० ख.—ट. वनवासरता. २१ क. सदा. २२ ङ. झ. ञ. चार्या. २३ क. नूनं. २४ ग. मैथिली. २५ ख. घ.—ट. शुभजलां. क. शीतजलां. २६ ख. ग. ङ.—ट, शीतजलां.

एवं तु मत्वा हनुमान्महात्मा प्रतीक्षमाणो मनुजेन्द्रपत्नीम् ॥
अवेक्षमाणश्च ददर्श सर्वं सुपुष्पिते पर्णघने निलीनः ॥ ५२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

पञ्चदशः सर्गः ॥ १५ ॥

शिंशुपाविटपाग्रावस्थानेनैव सर्वतश्चक्षुषीचालयताहनुमताऽत्यद्भुताकारचैत्यप्रासादगताया ग्रन्थकृदुपवर्णितगुणावस्थोपलक्षितायाःसीतायाअवलोकनं ॥ १ ॥ अथबहुहेतुभिस्तस्याःसीतात्वनिर्धारणं ॥ २ ॥

सं वीक्षमाणस्तत्रस्थो मार्गमाणश्च मैथिलीम् ॥ अवेक्षमाणश्च महीं सर्वां तामन्ववैक्षत ॥ १ ॥
सन्तानकलताभिश्च पादपैरुपशोभिताम् ॥ दिव्यगन्धरसोपेतां सर्वतः समलङ्कृताम् ॥ २ ॥
तां स नन्दनसंकाशां मृगपक्षिभिरावृताम् ॥ हर्म्यप्रासादसंबाधां कोकिलाकुलनिस्वनाम् ॥ ३ ॥
काञ्चनोत्पलपद्माभिर्वापीभिरुपशोभिताम् ॥ बह्वासनकुथोपेतां बहुभूमिगृहायुताम् ॥ ४ ॥
सर्वर्तुकुसुमै रम्यां फलवद्भिश्च पादपैः ॥ पुष्पितानामशोकानां श्रिया सूर्योदयप्रभाम् ॥ ५ ॥
प्रदीप्तामिव तत्रस्थो मारुतिः समुदैक्षत ॥ निष्पत्रशाखां विहगैः क्रियमाणामिवासकृत् ॥ ६ ॥
विनिष्पतद्भिः शतशश्चित्रैः पुष्पावतंसकैः ॥ आमूलपुष्पनिचितैरशोकैः शोकनाशनैः ॥ ७ ॥
पुष्पभारातिभारैश्च स्पृशद्भिरिव मेदिनीम् ॥ कर्णिकारैः कुसुमितैः किंशुकैश्च सुपुष्पितैः ॥ ८ ॥
स देशः प्रभया तेषां प्रदीप्त इव सर्वतः ॥ पुन्नागाः सप्तपर्णाश्च चम्पकोद्दालकास्तथा ॥
विवृद्धमूला बहवः शोभन्ते स्म सुपुष्पिताः ॥ ९ ॥
शातकुम्भनिभाः केचित्केचिदग्निशिखोपमाः ॥ नीलाञ्जननिभाः केचित्तत्राशोकाः सहस्रशः ॥१०॥
नन्दनं त्रिविधोद्यानं चित्रं चैत्ररथं यथा ॥ अतिवृत्तमिवाचिन्त्यं दिव्यं रम्यं श्रिया वृतम् ॥ ११ ॥

पर्णघने पर्णसमूहे । महात्मा स हनुमान् । पुष्पिताग्र्यादिविशिष्टां तामारुह्य इतो द्रक्ष्यामीत्यारभ्य आगमिष्यति सावश्यमिमां शिवजलां नदीमित्यन्तेन यः प्रकार उक्तः एवमुक्तप्रकारेणमत्वा । मनुजेन्द्रपत्नीं प्रतीक्षमाणः अवेक्षमाणः मार्गमाणः । सुपुष्पिते पर्णघने निलीनश्च सन् सर्वं ददर्शेत्यन्वयः ॥ ५२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुर्दशः सर्गः ॥ १४ ॥

सः तत्रस्थः शिंशुपास्थः। मैथिलीं मार्गमाणः मैथिलीमार्गणाद्धेतोः। "लक्षणहेत्वोः क्रियायाः" इति शानच्। वीक्षमाणः विविधं चक्षुर्विक्षिपन्। महीं चावेक्षमाणः सर्वां तां अशोकवनिकां अन्ववैक्षतेत्यन्वयः ॥ १—३ ॥ बह्वासनैः कुथैः आस्तरणैश्चोपेतां । भूमिगृहाणि बिलगृहाणि ॥ ४ ॥ सर्वर्तुकुसुमैः पादपैः रम्यामित्यन्वयः । सूर्योदयप्रभां उद्यत्सूर्यप्रभां ॥ ५ ॥ विहगैः निष्पत्रशाखां क्रियमाणामिव स्थितां । युगपत्पातिपक्षिपक्षविहतपत्रतया पत्ररहितशाखामिव स्थितामित्यर्थः ॥ ६ ॥ पुष्पावतंसकैः चञ्चुपुटलग्नपुष्पालंकृतैरित्यर्थः । आमूलेति आमूलं पुष्पैर्निचितैः व्याप्तैः । पुन्नागादौ तथा दृष्टं ॥ ७ ॥ पुष्पभारः पुष्पसमूहः स एवातिभारो येषां तैः । अशोकैरित्यादावुपलक्षणे तृतीया । अशोकादिभिरुपलक्षितां समुदैक्षतेति पूर्वेणान्वयः ॥ ८—१० ॥ पुनरशोकवनं विविधोपमानदर्शनेन वर्णयति—नन्दनमित्यादिना श्लोकच-

---

[पा०] १ झ. ञ. ट. गत्वा. २ ग. पुत्रीं. ३ घ. समीक्षमाणस्सर्वत्र. क. वीक्षमाणस्तुतत्रस्थो. ४ ग. ङ.—ट. रम्यैः. ५ ङ. झ. ञ. ट. समूलंपुष्परचितैः. क. ग. च. छ. ज. समूलंपुष्पविचितैः. ख. आमूलपुष्पोपचितैः. ६ ङ. झ. ट. शिखप्रभाः. ७ ख. ङ. झ. ञ. ट. विबुधोद्यानं. ८ ख. अभिवृद्धमिवा. ९ क. ग. ङ. झ. ञ. ट. श्रियायुतं.

द्वितीयमिव चाकाशं पुष्पज्योतिर्गणायुतम् ॥ पुष्परत्नशतैश्चित्रं पञ्चमं सागरं यथा ॥ १२ ॥
सर्वर्तुपुष्पैर्निचितं पादपैर्मधुगन्धिभिः ॥ नानानिनादैरुद्यानं रम्यं मृगगणैर्द्विजैः ॥ १३ ॥
अनेकगन्धप्रवहं पुण्यगन्धं मनोरमम् ॥ शैलेन्द्रमिव गन्धाढ्यं द्वितीयं गन्धमादनम् ॥ १४ ॥
अशोकवनिकायां तु तस्यां वानरपुङ्गवः ॥ स ददर्शाविदूरस्थं चैत्यप्रासादमुच्छ्रितम् ॥ १५ ॥
मध्ये स्तम्भसहस्रेण स्थितं कैलासपाण्डुरम् ॥ प्रवालकृतसोपानं तप्तकाञ्चनवेदिकम् ॥ १६ ॥
मुष्णन्तमिव चक्षूंषि द्योतमानमिव श्रिया ॥ विमलं प्रांशुभावत्वादुल्लिखन्तमिवाम्बरम् ॥ १७ ॥
ततो मलिनसंवीतां राक्षसीभिः समावृताम् ॥ उपवासकृशां दीनां निःश्वसन्तीं पुनः पुनः ॥
ददर्श शुक्लपक्षादौ चन्द्ररेखामिवामलाम् ॥ १८ ॥
मन्दं प्रख्यायमानेन रूपेण रुचिरप्रभाम् ॥ पिनद्धां धूमजालेन शिखामिव विभावसोः ॥ १९ ॥
पीतेनैकेन संवीतां क्लिष्टेनोत्तमवाससा ॥ सपङ्कामनलंकारां विपद्मामिव पद्मिनीम् ॥ २० ॥
व्रीडितां दुःखसंतप्तां परिम्लानां तपस्विनीम् ॥ ग्रहेणाङ्गारकेणेव पीडितामिव रोहिणीम् ॥ २१ ॥
अश्रुपूर्णमुखीं दीनां कृशामनशनेन च ॥ शोकध्यानपरां दीनां नित्यं दुःखपरायणाम् ॥ २२ ॥
प्रियं जनमपश्यन्तीं पश्यन्तीं राक्षसीगणम् ॥ स्वगणेन मृगीं हीनां श्वगणाभिवृतामिव ॥ २३ ॥
नीलनागाभया वेण्या जघनं गतयैकया ॥ नीलया नीरदापाये वनराज्या महीमिव ॥ २४ ॥

तुष्टयेन ॥ उद्यानं अशोकवनं । अत्र ददर्शेत्यपकृष्यते । नन्दनं इन्द्रक्रीडावनं । विविधोद्यानं विविधवृक्षषण्डं । चैत्ररथं कुबेरक्रीडावनं । नन्दनमतिवृत्तमिव अतिक्रम्य स्थितमिव । चैत्ररथं यथा चैत्ररथमिव चित्रमित्यन्वयः ॥ ११ ॥ आकाशसाम्ये साधारणधर्ममाह—पुष्पेति । एवं सागरौपम्ये पुष्परत्नेति ॥१२—१४ ॥ चैत्यप्रासादं चैत्यं बुद्धमन्दिरं तदाकारं प्रासादं ॥१५—१६॥ प्रांशुभावत्वात् दीर्घत्वभावत्वात् ॥१७॥ मलिनसंवीतां मलिनवस्त्रेणावृतां मलिनैरङ्गैः संवीतां वा । शुक्लपक्षादावित्यनेन वर्धिष्णुत्वं द्योतितं ॥ १८ ॥ मन्दं प्रख्यायमानेन इदं तदिति कथंचित्प्रत्यभिज्ञायमानेन रूपेणोपलक्षितां । पिनद्धामिति मलिनसंवीतत्वे उपमा । पिनद्धां बद्धां ॥ १९ ॥ उत्तरीयराहित्यं द्योतयितुमेकेनेत्युक्तिः । सपङ्कां भूमेराविर्भवन्तीमिव स्थितां । अनलंकारां पङ्कं निवर्त्य अलंकुर्वतोसन्निधानादलंकाररहितां । रामागमनेप्ययमाश्रयो नोत्सादयितुमर्हतीत्येवं मन्यमानां । विपद्मामिवपद्मिनीं पद्मरहितां सरसीमिव स्थितां ॥ २० ॥ ग्रहेण क्रूरग्रहेण । द्वितीय इवशब्दो वाक्यालंकारे ॥२१॥ कृशां दीनामिति पुनःपुनरुक्तिः कार्श्यदैन्ययोरतिशयप्रदर्शनाय । अत्र उपवासकृशां कृशामनशनेनेत्युक्त्या पूर्वकाण्डान्ते इन्द्रदत्तपायसाशनवृत्तान्तः कल्पित इति तत्रैवोक्तं ॥ २२—२३ ॥ नीलनागाभया कृष्णसर्पतुल्यया । नीरदापाये शरदि

स० एकेनसंवीतां उत्तरीयवस्त्रस्यसुग्रीवसंनिधौप्रक्षिप्तत्वात् ॥ २० ॥ शि० अङ्गारकेणग्रहेणपीडितांरोहिणीमिवपीडितां ॥ ति० अङ्गारकेणेव तत्तुल्येनग्रहेणकेतुना पीडितांरोहिणीमिव ॥ २१ ॥ शोकध्यानपरां शोकेन रामविरहजन्येन ध्यानपरां रामध्यानसक्तां ॥ २२ ॥ स० एकया अत्रिगुणितया ॥ ति० जघनं पृष्ठभागं गतया प्राप्तया । एकया हरणदिनकृतैकसंस्कारवत्या यद्वा पुरोभागीयवेणीद्वयराहित्येन पृष्ठलंबया एकयावेण्या । नीलनागाभया नीलसर्पतुल्यया वेण्या उपलक्षितां । अनेन तत्सर्शे-

[पा०] १ क. तद्वितीयमिवाकाशं. २ क. ङ.—ट. गणद्विजैः. ३ क. घ.—ट. मनोहरं. ४ ख. घ. ङ. झ. ञ. ट. मूर्जितं. ग. च. छ. ज. मुत्तमं. ५ ङ. झ. ञ. ट. निर्मलं. ६ ग. चन्द्रलेखामिवावृतां. ७ क.—ट. मन्दप्रख्याय. ८ च. छ. ज. पद्मिनीमिवश्रियं. ९ ङ.—ट. पीडितां. १० ङ. झ. ञ. ट. परिक्षीणां. ग. परिक्लिन्नां. घ. व्यसनानामकोविदां. ११ ग. घ. ङ. ट. नित्यदुःख. १२ क. ग. जनं. १३ ङ. झ. ञ. ट. श्वगणेनावृतामिव. ग. श्वगणेनसमावृतां. १४ ग. प्रतिलंबया.

सुखार्हां दुःखसंतप्तां व्यसनानामकोविदाम् ॥ तां समीक्ष्य विशालाक्षीमधिकं मलिनां कृशाम् ॥
तर्कयामास सीतेति कारणैरुपपादिभिः ॥ २५ ॥
ह्रियमाणा तदा तेन रक्षसा कामरूपिणा ॥ यथारूपा हि दृष्टा वै तथारूपेयमङ्गना ॥ २६ ॥
पूर्णचन्द्राननां सुभ्रूं चारुवृत्तपयोधराम् ॥ कुर्वन्तीं प्रभया देवीं सर्वा वितिमिरा दिशः ॥ २७ ॥
तां नीलकेशीं बिम्बोष्ठीं सुमध्यां सुप्रतिष्ठिताम् ॥ सीतां पद्मपलाशाक्षीं मन्मथस्य रतिं यथा ॥२८॥
इष्टां सर्वस्य जगतः पूर्णचन्द्रप्रभामिव ॥ भूमौ सुतनुमासीनां नियतामिव तापसीम् ॥ २९ ॥
निःश्वासबहुलां भीरुं भुजगेन्द्रवधूमिव ॥ शोकजालेन महता विततेन न राजतीम् ॥ ३० ॥
संसक्तां धूमजालेन शिखामिव विभावसोः ॥ तां स्मृतीमिव संदिग्धामृद्धिं निपतितामिव ॥ ३१ ॥
विहतामिव च श्रद्धामाशां प्रतिहतामिव ॥ सोपसर्गां यथा सिद्धिं बुद्धिं सकलुषामिव ॥
अभूतेनापवादेन कीर्तिं निपतितामिव ॥ ३२ ॥
रामोपरोधव्यथितां रक्षोहरणकर्शिताम् ॥ अबलां मृगशाबाक्षीं वीक्षमाणां ततस्ततः ॥ ३३ ॥
बाष्पाम्बुपरिपूर्णेन कृष्णवक्त्राक्षिपक्ष्मणा ॥ वदनेनाप्रसन्नेन निःश्वसन्तीं पुनः पुनः ॥ ३४ ॥
मलपङ्कधरां दीनां मण्डनार्हाममण्डिताम् ॥ प्रभां नक्षत्रराजस्य कालमेघैरिवावृताम् ॥ ३५ ॥
तस्य संदिदिहे बुद्धिर्मुहुः सीतां निरीक्ष्य तु ॥ आम्नायानामयोगेन विद्यां प्रशिथिलामिव ॥३६॥
दुःखेन बुबुधे सीतां हनुमाननलङ्कृताम् ॥ संस्कारेण यथा हीनां वाचमर्थान्तरं गताम् ॥ ३७ ॥

॥ २४ ॥ उपपादिभिः उपपादनशीलैः । मन्दप्रख्यायमानेनेत्यारभ्य सीतां समीक्ष्य उपपादिभिः कारणैस्सीतेति तर्कयामासेत्यन्वयः ॥ २५ ॥ एवं लिङ्गैः सीतेति विचार्य प्रत्यभिज्ञयापि तथा तर्कयामासेत्याह —ह्रियमाणेति ॥ इति तर्कयामासेति शेषः ॥ २६ ॥ पूर्णचन्द्राननामित्यारभ्य विद्यां प्रशिथिलामिवेत्यन्तमेकं वाक्यं । सुभ्रूं सुभ्रुवं । उवङभाव आर्षः । कुर्वन्तीमिति दश मासान् स्नानेन विना मलिनापि प्रभया दिशः वितिमिराः कुर्वन्तीमिति प्रभातिशयोक्तिः ॥ २७ ॥ सुप्रतिष्ठितां सुप्रतिष्ठितपादतलां ॥ २८—२९ ॥ नराजतीं नराजन्तीं ॥ ३० ॥ तां प्रसिद्धां । स्मृतिं मन्वाद्युक्तिं । संदिग्धां संदिग्धार्थां । ऋद्धिं संपदं । निपतितां क्षीणां ॥ ३१ ॥ विहतां अविश्वासबहुलां । प्रतिहतां अलब्धकार्यां । सोपसर्गां सविघ्नां । सकलुषां सकालुष्यां । भावप्रधानो निर्देशः । अभूतेन असत्येन ॥ ३२ ॥ रामोपरोधव्यथितां रामप्राप्तिनिरोधेन व्यथितां ॥ ३३—३५ ॥ पुनः सीताशब्दोऽव्यवहितानुस्मरणार्थः । आम्नायानां वेदानां । अयोगेन असंबन्धेन । प्रशिथिलां अप्राप्तप्रतिष्ठां । विद्यां वेदबाह्यविद्यां । यद्वा आम्नायानां अभ्यासानामभावेन प्रशिथिलां अस्थिरपदां विद्यामिव सीतां निरीक्ष्य तस्य हनुमतो बुद्धिः संदिदिहे इत्यन्वयः । कार्श्यमालिन्यादिना तिरोहितरूपत्वादिति भावः ॥ ३६ ॥ संस्कारः शब्दव्युत्पत्तिः तेन हीनां अतएव विवक्षितादर्थान्तरंगतां विपरीतार्थामित्यर्थः । संस्कारहीनतया प्रतिपिपादयिषितार्थवक्तुमशक्तुव-

ऽन्यस्यमरणमेवेतिसूचितं ॥ शि० जघनं पृष्ठान्तदेशंगतया । एकया केशविन्यासाभावेनजटीभूतया ॥ २४ ॥ स० व्यसनानामकोविदां कदाप्यदृष्टव्यसनां ॥ २५ ॥ ति० नीलकण्ठीं सौभाग्यसूचकेन्द्रनीलमणिमयकण्ठस्थभूषणप्रभया तद्वर्णकण्ठां । सुप्रतिष्ठितां सुप्रतिष्ठितसर्वावयवसंस्थानां ॥ २८ ॥ ती० चन्द्रप्रभामिवेति सर्वानन्दकरत्वमुक्तं । भुजगेन्द्रवधूमिवेति दुष्प्रधर्षत्वं । शिखामिवविभावसोरिति पातिव्रत्यं ॥ २९ ॥ स० रामोपरोधव्यथितां रामाभिः राक्षसस्त्रीभिः यउपरोधः इतस्ततोगमनप्रतिबन्धस्तेनव्यथितां ॥ ३३ ॥ ति० दुःखबोध्यत्वेहेतुः अनलङ्कृतामिति । संस्कारेणेति स्नानानुलेपनादिरङ्गसंस्कारः । वाचो व्याकरणज्ञानादिजःसंस्कारः । देव्या अर्थान्तरगतत्वं देशान्तरगतत्वं । वाचस्तु विवक्षितार्थादन्यार्थबोधकत्वं । वाचोऽर्थो यथा-

[पा०] १ ङ. झ. ञ. ट. विलोक्य. २ ग. च. ज. ह्रियमाणातुसा. ३ घ. क्रूररूपिणा. ४ ञ. सादृष्टा. ङ. झ. ट. दृष्टासा. ५ ग. तेजसास्वेन. ६ झ. ट. नीलकण्ठीं. ७ ङ. झ. ट. रक्षोगणनिपीडितां. ८ घ. वीक्षमाणामितस्ततः. ९ घ. नीलमेघैः. १० ङ. झ. ञ. ट. बुद्धिस्तथा. ११ ग. निरीक्ष्यतां. ङ.—ट. निरीक्ष्यच.

तां समीक्ष्य विशालाक्षीं राजपुत्रीमनिन्दिताम् ॥ तर्कयामास सीतेति कारणैरुपपादिभिः ॥ ३८ ॥
वैदेह्या यानि चाङ्गेषु तदा रामोऽन्वकीर्तयत् ॥ तान्याभरणजालानि शाखाशोभीन्यलक्षयत् ॥३९॥
सुकृतौ कर्णवेष्टौ च श्वदंष्ट्रौ च सुसंस्थितौ ॥ मणिविद्रुमचित्राणि हस्तेष्वाभरणानि च ॥
श्यामानि चिरयुक्तत्वात्तथा संस्थानवन्ति च ॥ ४० ॥
तान्येवैतानि मन्येऽहं यानि रामोऽन्वकीर्तयत् ॥ ४१ ॥
तत्र यान्यवहीनानि तान्यहं नोपलक्षये ॥ यान्यस्या नावहीनानि तानीमानि न संशयः ॥ ४२ ॥
पीतं कनकपट्टाभं स्रस्तं तद्वसनं शुभम् ॥ उत्तरीयं नगासक्तं तदा दृष्टं प्लवङ्गमैः ॥ ४३ ॥
भूषणानि च मुख्यानि दृष्टानि धरणीतले ॥ अनयैवापविद्धानि स्वनवन्ति महान्ति च ॥ ४४ ॥
इदं चिरगृहीतत्वाद्वसनं क्लिष्टवत्तरम् ॥ तथाऽपि नूनं तद्वर्णं तथा श्रीमद्यथेतरत् ॥ ४५ ॥
इयं कनकवर्णाङ्गी रामस्य महिषी प्रिया ॥ प्रनष्टाऽपि सती यॉऽस्य मनसो न प्रणश्यति ॥ ४६ ॥
इयं सा यत्कृते रामश्चतुर्भिः परितप्यते ॥ कारुण्येनानृशंस्येन शोकेन मदनेन च ॥ ४७ ॥

न्तीमविवक्षितमर्थं बोधयन्तीं वाचमिव। सम्यग्व्युत्पत्त्यभावादर्थान्तरंगतां व्युत्पत्त्यनन्तरं स्वार्थं प्रतिपादयन्तीमिव स्थितामित्यर्थः ॥ ३७—३८ ॥ शाखायां शोभन्त इति शाखाशोभीनि भर्तृविरहकाले भूषणधारणस्यानुचितत्वात् स्वाङ्गेभ्य उन्मुच्य शाखायां न्यस्तानीत्यर्थः ॥ ३९ ॥ कर्णवेष्टौ कुण्डले। "कर्णिका तालपत्रं स्यात्कुण्डलं कर्णवेष्टनं" इति सज्जनः। श्वदंष्ट्रः त्रिकर्णकाख्यः पुष्पाकारःकर्णपार्श्वभूषणविशेषः। "त्रिकर्णकः श्वदंष्ट्रश्च" इत्यभिधानरत्नमाला। हस्तेषु हस्तावयवेषु। श्यामानि विरहतापौष्ण्यवशाच्छ्यामीभूतानि। तथा चिरयुक्तत्वात् चिरधृतत्वात्। संस्थानवन्ति हस्तेषु तत्तदाभरणसंस्थानानि दृश्यन्त इत्यर्थः ॥ ४० ॥ तान्येवेत्यर्धमेकं वाक्यं ॥ ४१ ॥ तत्र ऋश्यमूके। यान्यवहीनानि पतितानि तान्यहं नोपलक्षये। अत्रेति शेषः। अस्याः सीतायाः सकाशाद्यानि नावहीनानि न पतितानि। तानीमानि तत्तुल्यत्वात् ॥ ४२ ॥ प्लवङ्गमैः सुग्रीवादिप्लवङ्गमैः। यदुत्तरीयं दृष्टं यानि भूषणानि दृष्टानि तानि सर्वाण्यनयैव अपविद्धानि पातितानि। नगासक्तमित्यनेन पतनदशायामुत्तरीयाग्रं वृक्षे किंचित्सक्तमिति द्योत्यते ॥ ४३—४४ ॥ इतरत् उत्सृष्टं। तदुत्तरीयं यथा यादृशवर्णयुक्तं यथा श्रीमत् इदं इदानीं धार्यमाणं। तद्वर्णं तथा श्रीमत् नूनमिति योजना ॥ ४५ ॥ या रामस्य प्रिया सती महिषीति कृत्वा प्रनष्टापि अस्य रामस्य मनसः सकाशात् न प्रणश्यति सदा मनसा दृष्टा भवतीत्यर्थः। सा कनकवर्णाङ्गी इयं मया परिदृश्यमानेत्यर्थः ॥ ४६ ॥ रामः कारुण्यादिभिश्चतुर्भिः यत्कृते परितप्यते सेयं। कारुण्यादीनां परितापहेतुत्वं विभज्य दर्शयति—स्त्रीति ॥ आपत्काले स्त्रियो रक्षणीयाः तन्न कृतमिति कारुण्यात्परितप्यते। आनृशंस्यमक्रूरत्वं। आश्रितसंरक्षणैकस्वभावत्वमिति यावत्। तस्मात् आश्रिता न रक्षितेति परितप्यते। "अर्धो वा एष आत्मनो यत्पत्नी" इत्युक्तरीत्या आत्मार्धभूता पत्नी नष्टेति

व्याकरणाद्यभ्यासदुःखेनव्युत्पत्तिंसंपाद्यबुध्यते तद्वत्सीतांकष्टेनबुबुधे ॥ ३७ ॥ स० उपपादिभिः अनुमापकैः ॥ ३८ ॥ ति० इदानीं सीतालोपपादकमाह—वैदेह्याइति। तदा स्वप्रस्थानसमये। गात्रशोभीनीतिपाठः कतकसंमतः। येष्वङ्गेषुयान्याभरणजालान्यकीर्तयत् तान्याभरणजालानि तत्तद्गात्रशोभीन्यलक्षयदिति प्रत्यभिज्ञाप्रामाण्यंसिद्धं ॥ तीर्थस्तु—शाखाशोभीनीति पाठंप्रकल्प्य रामविश्लेषसमये भूषणधारणस्यानुचितत्वाद्वैदेह्याभूषणानिस्वाङ्गेभ्यउन्मुच्यशाखायांन्यस्तानीतिगम्यतइतिव्याचख्यौ। तत्तूत्तरश्लोकयोर्हस्तेष्विति तथा श्यामानिचिरयुक्तत्वादिति पदस्वरसविरुद्धं। किंचैवं तदङ्गेरामोक्ताभरणाभावादसीतात्वमेवस्यात् ॥ ३९ ॥ ति० अथकस्मिन्गात्रेकिमाभरणंदृश्यतेतत्राह—सुकृताविति। सुसंस्थितौ कर्णरूपाङ्गेसुप्रतिष्ठितौ उपलक्षयेइतिशेषः। यानिरामेणोक्तानि तथैवसुस्थितान्युपलक्षये ॥ ४० ॥ ति० चिरयुक्तत्वात्चिरकालमसंस्कृतदेहस्थितत्वेनश्यामान्यपि तथासंस्था-

[पा०] १ क. ङ. झ. ञ. ट. रुपपादयन्. २ घ. ङ. झ. ट. गात्रशोभीनि. क. च. छ. ज. शाखाशोभीनिलक्षये. ३ क. च. छ. ज. सुसंस्कृतौकर्णवेष्टौ. ४ क. च. छ. ज. ञ. श्वदंष्ट्रौचापिसंस्थितौ. ५ क. ग. च. ज. अनयैवप्रमुक्तानि. ६ झ. तथाप्यनूनं. ग. च. छ. ज. ञ. तथाह्यनूनं. ७ ग. घ. ङ. झ. ट. यस्य. ८ ङ. झ. ञ. ट. श्चतुर्भिरिहतप्यते.

स्त्री प्रनष्टेति कारुण्यादाश्रितेत्यानृशंस्यतः ॥ पत्नी नष्टेति शोकेन प्रियेति मदनेन च ॥ ४८ ॥
अस्या देव्या यथा रूपमङ्गप्रत्यङ्गसौष्ठवम् ॥ रामस्य च यथा रूपं तस्येयमसितेक्षणा ॥ ४९ ॥
अस्या देव्या मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितम् ॥ तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति ॥५०॥
दुष्करं कृतवान्रामो हीनो यदनया [1]प्रभुः ॥ धारयत्यात्मनो देहं न शोकेनावसीदति ॥ ५१ ॥
दुष्करं कुरुते रामो य इमां मत्तकाशिनीम् ॥ [2]सीतां विना महाबाहुर्मुहूर्तमपि जीवति ॥ ५२ ॥
एवं सीतां [3]तदा दृष्ट्वा हृष्टः पवनसंभवः ॥ जगाम मनसा रामं प्रशशंस च तं प्रभुम् ॥ ५३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

शोकेन परितप्यते । प्रिया नष्टेति मदनेन परितप्यत इति योजना ॥ ४७—४८ ॥ अथानयोरन्योन्याभिरूप्यानुगुण्यमाह—अस्या इति ॥ अस्याः सीतायाः । रूपं शरीरं अङ्गप्रत्यङ्गसौष्ठवं च यथा यथाविधं । तथाविधमेव रामस्यापि रूपं अङ्गप्रत्यङ्गसौष्ठवं च । तथा रामस्य रूपमङ्गप्रत्यङ्गसौष्ठवं च यथा यथाविधं । तथाविधमेवास्यारूपमङ्गप्रत्यङ्गसौष्ठवं च । अतः इयमसितेक्षणा तस्य योग्येति शेषः ॥ ४९ ॥ तथानयोरन्योन्यस्यानुरागमाह—अस्या इति ॥ अस्या देव्या मनस्तस्मिन्रामे प्रतिष्ठितं । तेन हेतुना इयं मुहूर्तमपि जीवति । तस्य च मनोऽस्यां प्रतिष्ठितं तेन कारणेन स मुहूर्तमपि जीवति । तयोरन्योन्यंमनोनिवेशनाभावे मुहूर्तजीवनमपि न घटत इति भावः ॥५०॥ माल्यवति शैले रामस्य सीताविरहक्लेशातिशयं निशाम्य हन्त वसिष्ठशिष्यः कस्याश्चित्स्त्रियाः कृते कथमेवमभूदिति विनिन्द्य परिहसितवान् स्वयं विरक्ततया । संप्रत्यस्या वैलक्षण्यातिशयदर्शनेन विशेषज्ञतया एतद्विरहे रामस्य देहधारणं सर्वात्मना अशक्यमित्याह—दुष्करमिति ॥ दुष्करं कृतवान्रामः । इमां वियुज्य समाधानपरो रामः प्रकाममशक्यं कृत्यमकरोत् । हीनो यदनया प्रभुः । अनया विना देहं धृत्वावस्थित इति यत्तदत्यन्तमशक्यं । प्रभुः गजाश्वादिकं शिक्षयितुं राज्यं पालयितुं च जानाति । न प्रणयधारायां प्रथमांशमपि भुक्तवान् । धारयत्यात्मनो देहं । किमिदं याचितकं शरीरं धारयति स्वस्यैव हि देहोयं देहं भोगायतनं हीदं न दुःखायतनं " दिह उपचये" इत्यस्माद्धातोः "इगुपधे"त्यादिना कः । तेनायमर्थो लभ्यते । सीताशरीरस्य परतन्त्रतया तत्त्यक्तुमयुक्तं नतु स्वाधीनशरीरस्य धारणं युक्तमितिभावः । विशेषज्ञेनापि कथमिदं त्यक्तुं शक्यं तत्राह—न शोकेनावसीदति ॥ ५१ ॥ उक्तमर्थं किंचिद्विशेषान्तरेण दर्शयति—दुष्करंकुरुतइति ॥ ५२ ॥ एवं दृष्ट्वा मलिनसंवीतत्वोपवासकृशत्वशोकध्यानपरायणत्वादिपतिव्रताधर्मयुक्तां सीतां दृष्ट्वा । हृष्टःसन् मनसा रामं जगाम सस्मार । तं प्रभुं बुद्धिस्थं रामं । प्रशशंस च । पुनः प्राग्युपयुक्तपतिव्रतोक्तधर्मनिष्ठत्वदर्शनात् भाग्योत्तरो रामइत्यस्तौषीत् । यद्वा एतादृशसौन्दर्यवतीं सीतांदृष्ट्वा एतद्विरहितस्यमहाञ्शोकः प्राप्तः अतः युक्तमेवकृतवान्राम इत्यस्तौषीत् ॥ ५३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चदशः सर्गः ॥ १५ ॥

नवन्ति रामोक्तसंनिवेशवन्ति ॥ ४१ ॥ स० अङ्गप्रत्यङ्गसौष्ठवं अङ्गानिहस्ताद्यवयवाः । प्रत्यङ्गानिअङ्गुल्यादीनि । तेषांसौष्ठवं सामीचीन्यं ॥ ४९ ॥ स० मुहूर्तशब्दएतावत्कालोपलक्षकः ॥ अन्यथानजीवेदित्याशयः ॥ ५२ ॥ इतिपञ्चदशः सर्गः ॥ १५ ॥

[पा०] १ ब. विभुः. २ ग. घ. विनासीतां. ३ ट. तथा.

कामये त्वां विशालाक्षि बहुमन्यस्व मां प्रिये ॥ सर्वाङ्गगुणसंपन्ने सर्वलोकमनोहरे ॥ ३ ॥
नेह केचिन्मनुष्या वा राक्षसाः कामरूपिणः ॥ व्यपसर्पतु ते सीते भयं मत्तः समुत्थितम् ॥ ४ ॥
स्वधर्मो रक्षसां भीरु सर्वथैव न संशयः ॥ गमनं वा परस्त्रीणां हरणं संप्रमथ्य वा ॥ ५ ॥
एवं चैतदकामां तु न त्वां स्प्रक्ष्यामि मैथिलि ॥ कामं कामः शरीरे मे यथाकामं प्रवर्तताम् ॥६॥
देवि नेह भयं कार्यं मयि विश्वसिहि प्रिये ॥ प्रणयस्व च तत्त्वेन मैवं भूः शोकलालसा ॥ ७ ॥
एकवेणी धराशय्या ध्यानं मलिनमम्बरम् ॥ अस्थानेऽप्युपवासश्च नैतान्यौपयिकानि ते ॥ ८ ॥
विचित्राणि च माल्यानि चन्दनान्यगुरूणि च ॥ विविधानि च वासांसि दिव्यान्याभरणानि च ॥९॥
महार्हाणि च पानानि शयनान्यासनानि च ॥ गीतं नृत्तं च वाद्यं च लभ मां प्राप्य मैथिलि॥१०॥
स्त्रीरत्नमसि मैवं भूः कुरु गात्रेषु भूषणम् ॥ मां प्राप्य हि कथं नु स्यास्त्वमनर्हा सुविग्रहे ॥ ११ ॥
इदं ते चारु संजातं यौवनं व्यतिवर्तते ॥ यदतीतं पुनर्नैति स्रोतः शीघ्रमपामिव ॥ १२ ॥
त्वां कृत्वोपरतो मन्ये रूपकर्ता स विश्वसृक् ॥ न हि रूपोपमा त्वन्या तवास्ति शुभदर्शने ॥१३॥

र्शनं अदृश्यत्वं ॥ २ ॥ मां दृष्ट्वा भीतिर्न कर्तव्येत्याह —कामय इति ॥ ३ ॥ अन्ये च भयहेतवोत्र न सन्तीत्याह—नेहेति ॥ ४ ॥ परदारेच्छा दोष इत्याशङ्क्याह—स्वधर्म इति ॥ संप्रमथ्य बलात्कृत्य ॥५॥ कामं अत्यन्तं । यथाकामं यथेच्छं ॥ ६ ॥ प्रणयस्व स्नेहंकुरु ॥ ७ ॥ एकवेणी असीमन्ततवेणी । धराशय्या भूशयनं । औपयिकानि युक्तानि । " युक्तमौपयिकं " इत्यमरः ॥ ८—१० ॥ मां प्राप्य हीति । हिः पादपूरणे अप्यर्थो वा । हे सुविग्रहे मां प्राप्यापि कथमनर्हा स्याः ॥ ११—१२ ॥ उपरतः निवृत्तः । अत्रेतिकरणं द्रष्टव्यं । उत्तरोत्तरं सातिशयं रूपं सिसृक्षुर्विधाता त्वां सृष्ट्वा इतः परं सातिशयं रूपं स्रष्टुं न शक्यत इति धिया सृष्टेरुपरत इति मन्य

मिच्छसि तत्किंसितिशेषः ॥ २ ॥ ती० वस्तुतस्तु त्वांकामये ईश्वरीत्वेनेतिशेषः । अतोमांबहुमन्यस्व ॥ ३ ॥ ती० नेहेति । मनुष्याराक्षसावा । त्वद्भयकर्तारइतिशेषः । वस्तुतस्तु सर्वेश्वर्यास्तवनकुत्रापिभयशङ्केतिभावः । ति० किमिदानींमदतिरिक्तपुरुषान्तरजंतवभयं उतममस्पर्धेधर्महानिजं । नाद्यइत्याह—नेहेति । मत्तः मदागमनात्समुत्थितं पुरुषान्तरागमनसंभावनयाजातं भयं व्यपसर्पतु । अन्येषामभावात् ॥४॥ ति० नान्त्यइत्याह—स्वधर्मइति । तंस्वधर्ममाह—गमनंवेति । आनुकूल्यंसंपादयेतिशेषः । संप्रमथ्य बलात्कृत्य । एवंस्वधर्मत्वान्ममनाधर्मः । बलात्कारेचास्ततत्रत्वात्क्रियाअपिनदोषइतिभावः ॥ ५ ॥ ती० यद्यपिपरदाराभिमर्शःस्वधर्मः तथापि नाहंत्वाम मागमयमानांस्प्रक्ष्यामीत्याह—**स्वधर्मइत्यादिश्लोकद्वयेन** । कामं अत्यर्थं । यथाकामं यथेच्छं । मेशरीरेकामः । तवेतिशेषः । मयितवेच्छाप्रवर्ततामितिभावः । स्वधर्मइत्यादिश्लोकद्वयस्यवास्तवार्थस्तु—कामुकस्त्वं नविश्वसनीयइत्यतआह—स्वधर्मइत्यादि । यद्यपिरक्षसांपरदाराहरणादि स्वधर्मःस्वभावः । मेशरीरेकामं अत्यर्थं । यथाकामं यथेच्छं कामःप्रवर्ततांनाम मन्मथविकारोस्तुनाम । तथाप्येतत्सर्वंममेष्टदेवतायांत्वयिनघटतइतिशेषः । अतएव अकामां मयि भृत्यत्वकामनारहितां । यद्वा अकामां विष्णुकामांत्वां । नस्प्रक्ष्यामि त्वदाज्ञांविना पूजांकर्तुमपिबिभेमीतिशेषः ॥ ति० एवंच एवमपि । बलात्कारपक्षे तवममचदोषाभावेपितस्वपक्षस्यरसाभाससंपादकत्वात् । अतएवमकामां अनेनप्रकारेणमयिकामरहितांत्वां मद्भिन्नेच्छावतींच । नच नतु । स्प्रक्ष्यामि । एवंचैतदकामांत्वामितिपाठे एतत् रक्षोधर्मत्वं । एवंच एवमेव मदुक्तरीतिकमेव । तथाप्युक्तप्रकारेण त्वामकामां नस्प्रक्ष्यामीत्यर्थः । नन्वेवंसतिदुस्सहाकामपीडातवस्यात्तत्राह—**काममिति** । कामः मन्मथः । यथाकामं यथेच्छं । कामं तद्विषयेच्छां । प्रवर्ततां प्रवर्तयत्वित्यर्थः ॥ ६ ॥ ती० वस्तुतस्तु विचित्राणीत्यादिश्लोकद्वयमेकंवाक्यं । मांप्राप्य भृत्यत्वेनेतिशेषः । माल्यादीनिलभ प्राप्नुहीतिसंबन्धः ॥ ९—१० ॥ ती० वस्तुतस्तु त्वत्पूजाक्षमंमदीयमायुर्व्यर्थंगच्छतीतिखिद्यति—**इदंतइति** । ते तवभृत्यस्य । ममेतिशेषः । यौवनं दार्ढ्यावस्था । यत् यतः । भृत्यक्षममायुः व्यर्थंगच्छति ।

[पा०] १ ख. ङ. च. ज.—ट. सर्वदैव. २ च. ज. ञ. चैवमकामां. ङ. झ. ट. चैवमकामांत्वां. घ. त्वेतदकामां. ३ ङ. झ. ट. नच. ४ ङ. अधश्शय्या. ५ क. ख. घ. यानानिशयनानिच. ६ क.—ट. स्त्रीरत्नमसि. ७ घ.—ट. कथंवा. क. कथंस्यास्त्वमनाहारा. ८ ङ.—ट. स्रोतस्विनामिव. ९ ख. ङ. झ. ट. विश्वकृत्. १० क. ङ.—ट. त्वन्या.

त्वां समासाद्य वैदेहि रूपयौवनशालिनीम् ॥ [1]कः पुमानतिवर्तेत साक्षादपि पितामहः ॥ १४ ॥
यद्यत्पश्यामि ते गात्रं शीतांशुसदृशानने ॥ तस्मिंस्तस्मिन्पृथुश्रोणि चक्षुर्मम निबध्यते ॥ १५ ॥
भव मैथिलि [3]भार्या मे मोहं[4]मेनं विसर्जय ॥ बह्वीनामुत्तमस्त्रीणामाहृतानामितस्ततः ॥
सर्वासामेव भद्रं ते ममाग्रमहिषी भव ॥ १६ ॥
लोकेभ्यो यानि रत्नानि संप्रमथ्याहृतानि वै ॥ [6]तानि मे भीरु सर्वाणि राज्यं चैतदहं च ते ॥१७॥
विजित्य पृथिवीं सर्वां नानानगरमालिनीम् ॥ जनकाय प्रदास्यामि तव हेतोर्विलासिनि ॥ १८ ॥
नेहं पश्यामि लोकेऽन्यं यो मे प्रतिबलो भवेत् ॥ पश्य मे सुमहद्वीर्यमप्रतिद्वन्द्वमाहवे ॥ १९ ॥
असकृत्संयुगे भग्ना मया विमृदितध्वजाः ॥ अशक्ताः प्रत्यनीकेषु स्थातुं मम सुरासुराः ॥ २० ॥
इच्छया क्रियतामद्य प्रतिकर्म तवोत्तमम् ॥ २१ ॥
[9]संप्रभाण्यवसज्यन्तां तवाङ्गे [11]भूषणानि च ॥ साधु पश्यामि ते रूपं संयुक्तं [12]प्रतिकर्मणा ॥ २२ ॥
प्रतिकर्माभिसंयुक्ता दाक्षिण्येन वरानने ॥ भुङ्क्ष्व भोगान्यथाकामं पिब भीरु रमस्व च ॥ २३ ॥
यथेष्टं च प्रयच्छ त्वं पृथिवीं वा धनानि च ॥ [13]ललस्व मयि विस्रब्धा धृष्टमाज्ञापयस्व च ॥
[14]मत्प्रसादाल्ललन्त्याश्च [15]ललन्तां बान्धवास्तव ॥ २४ ॥
ऋद्धिं ममानुपश्य त्वं श्रियं भद्रे [16]यशश्च मे ॥ किं करिष्यसि रामेण सुभगे चीर[17]वाससा ॥ २५ ॥
निक्षिप्तविजयो रामो गतश्रीर्वनगोचरः ॥ व्रती स्थण्डिलशायी च शङ्के जीवति वा न वा ॥ २६ ॥

इत्यर्थः ॥ १३ ॥ कः अतिवर्तेत न कोपीत्यर्थः ॥ १४ —१९ ॥ विमृदितध्वजाः भग्नध्वजाः । प्रत्यनीकेषु शत्रुषु मध्ये ॥ २० ॥ प्रतिकर्म अलंकारः । " प्रतिकर्म प्रसाधनं " इत्यमरः ॥ २१ ॥ अवसज्यन्तां अर्प्यन्तां । प्रतिकर्मणा संयुक्तं पश्यामि पश्येयं ॥ २२ ॥ दाक्षिण्येन सरलत्वेन । भुङ्क्ष्व अनुभव । "दक्षिणे सरलोदारौ" इत्यमरः ॥२३॥ ललस्व प्रीतिं कुरु । " लल ईप्सायाम् " इति धातुः ॥ २४ ॥ एवमात्मानं प्रशस्य रामं निन्दति—किं करिष्यसीत्यादिना ॥२५॥ निक्षिप्तविजयः त्यक्तविजय इत्यर्थः ।

अतोमम तवपूजार्थमनुज्ञांदेहीतिशेषः ॥ १२ ॥ **ति०** कोनातिवर्तेत क्षुभ्येतेत्यर्थः । कःपुमानतिवर्तेतेतिपाठे कामवशतामतिक्रम्य कोवर्तेतेत्यर्थः ॥ **ती०** वस्तुतस्तु मदाराधनेतवबुद्धिःकथंस्यादतआह—त्वामिति । त्वां लक्ष्मीं । " सीतालक्ष्मीर्भवान्विष्णुः " इतिवक्ष्यमाणत्वात् । समासाद्य साक्षात्पितामहोपिनातिवर्तेत अनाराधितुंनशक्नुयात् । पुमांस्तुकोवाऽतिवर्तेतेत्यर्थः ॥ १४ ॥ **ती०** यद्यदिति । गात्रं अवयवविशेषं । तस्मिंस्तस्मिन्नवयवविशेषेचक्षुर्निबध्यते । इष्टदेवतायास्तवदर्शनस्यमुक्तिसाधकत्वादिति भावः ॥ १५ ॥ **ती०** वस्तुतस्तु मैथिलि भार्या भयाकान्ता आर्याश्रेष्ठाभव । एनंमोहं मयिशत्रुत्वशङ्कां । विसर्जय । मेमम उत्तमस्त्रीणांममयाअग्रमहिषीमन्दोदरी तस्याश्चममचभव ईश्वरोतिशेषः । **शि०** हे भवमैथिलि भवति भावयति नितरां स्वपतिं चिन्तयति सैवमैथिली । तत्संबोधनं । अग्रस्यसर्वोत्कृष्टस्यरावणस्यमहिषीत्वं ममबह्वीनामुत्तमस्त्रीणां भार्या सेव्याभव । अतएव तं वियमानं मेमोहं वैचित्यं । विसर्जय त्याजय ॥१६॥ **ती०** लोकेभ्यइत्यस्यवास्तवार्थस्तु इष्टदेवतायैदेव्यै रावणस्त्वात्मात्मीयसमर्पणं करोति—**लोकेभ्यइतिश्लोकद्वयेन** । अहमित्यनेनात्मसमर्पणं । रत्नानीत्यादिनाऽऽत्मीयसमर्पणमिति ज्ञेयं ॥ १७ ॥ **ति०** इच्छयेति । वस्तुतस्तु मां लक्ष्मींसंपदमित्यर्थः ॥२१॥ **ती०** वस्तुतस्तु मत्प्रसादात् मयिप्रसादोऽनुग्रहः । तस्मात् । तवललन्त्याः रमन्त्याः सत्याः बान्धवाश्चरमन्तामितिसंबन्धः ॥ २४ ॥ **रामानु०** ऋद्धिं संपदं । श्रियं भां ॥ २५ ॥ **ती०** ऋद्धिमित्यादीनांवास्तवार्थस्तु—सरामाऽहंतेअखिलसंपत्समृद्धिंददामि । गांरामेणसहसंयोजयेत्याशङ्क्यनाहंसंपदाद्यर्थी किंतुमोक्षकामी । अतो यावन्मोक्षंत्वत्पादाब्जंनत्यजामीत्यभिप्रायेणाह—**ऋद्धिममेत्यादिश्लोकचतुष्टयेन** । हेसुभगे ममऋद्ध्यादिकंपश्य । निक्षिप्तविजयः स्वतस्सिद्धविजयइत्यर्थः । वनगोचरः वनंजलंगोचरंनिवासस्थानंयस्यसः । नारायणइत्यर्थः । अतएवगतश्रीः गताप्राप्ता

[पा०] १ ङ. झ. ट. कःपुनर्नातिवर्तेत. घ. च. छ. ञ. कःपुमान्नातिवर्तेत. २ ख. शीतांशुसमदर्शने. ३ क. मेभार्या. ४ च. ज. झ. ट. मेतं. ५ ख. झ. ञ. ट. संप्रमथ्याहृतानिमे. क. ङ.—ज. संप्रमथ्यहृतानिमे. ६ ख. घ. ङ. झ. ट. तानिते. ७ झ. ट. चैवददामिते. ८ च. छ. ज. ञ. नैव. ९ क. ङ. च. ज. ट. इच्छमां. १० ङ. छ. झ. ञ. ट. सुप्रभाण्यव. च. छ. सुप्रभाण्यपि. ११ ङ.—ट. भूषणानिहि. १२ ङ.—ट. सुयुक्तं. १३ घ. रमस्व. १४ क. घ. मत्प्रभावात्. १५ ङ, ज, झ. ञ. ललतांबान्धवस्तव. १६ ङ.—ट. यशस्विनि. १७ ङ. झ. ट. चीरवासिना.

न हि वैदेहि रामस्त्वां द्रष्टुं वाऽप्युपलप्स्यते ॥ पुरोबलाकैरसितैर्मेघैर्ज्योत्स्नामिवावृताम् ॥ २७ ॥
न चापि मम हस्तात्त्वां प्राप्तुमर्हति राघवः ॥ हिरण्यकशिपुः कीर्तिमिन्द्रहस्तगतामिव ॥ २८ ॥
चारुस्मिते चारुदति चारुनेत्रे विलासिनि ॥ मनो हरसि मे भीरु सुपर्णः पन्नगं यथा ॥ २९ ॥
क्लिष्टकौशेयवसनां तन्वीमप्यनलङ्कृताम् ॥ त्वां दृष्ट्वा स्वेषु दारेषु रतिं नोपलभाम्यहम् ॥ ३० ॥
अन्तःपुरनिवासिन्यः स्त्रियः सर्वगुणान्विताः ॥ यावत्यो मम सर्वासामैश्वर्यं कुरु जानकि ॥ ३१ ॥
मम ह्यसितकेशान्ते त्रैलोक्यप्रवराः स्त्रियः ॥ तास्त्वां परिचरिष्यन्ति श्रियमप्सरसो यथा ॥ ३२ ॥
यानि वैश्रवणे सुभ्रु रत्नानि च धनानि च ॥ तानि लोकांश्च सुश्रोणि मां च भुङ्क्ष्व यथासुखम् ॥३३॥
न रामस्तपसा देवि न बलेन न विक्रमैः ॥ न धनेन मया तुल्यस्तेजसा यशसाऽपि वा ॥ ३४ ॥

पिब विहर रमस्व भुङ्क्ष्व भोगान्धननिचयं प्रदिशामि मेदिनीं च ॥
मयि लल ललने यथासुखं त्वं त्वयि च समेत्य ललन्तु बान्धवास्ते ॥ ३५ ॥
कुसुमिततरुजालसंततानि भ्रमरयुतानि सरिद्वतीरजानि ॥
कनकविमलहारभूषिताङ्गी विहर मया सह भीरु काननानि ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे विंशः सर्गः ॥ २० ॥

स्थण्डिलशायी भूतलशायी ॥२६॥ वाशब्दोऽवधारणे । द्रष्टुमपि नोपलप्स्यत एवेत्यर्थः । दर्शनमात्रफलमपि दर्शनं नप्राप्स्यसीत्यर्थः । पुरोऽग्रे बलाका येषां ते पुरोबलाकाः तैः । अनेन मेघानामतिविपुलतोच्यते । महामेघेष्वेव बलाकासंचारवर्णनात् ॥ २७ ॥ हिरण्यकशिपुः कीर्तिमिन्द्रहस्तगतामिवेति वैधर्म्यदृष्टान्तः । अत्र कीर्तिशब्देन भार्या लक्ष्यते । हिरण्यकशिपुरिन्द्रहस्तगतां भार्यां पुनः प्राप्तवानित्येतच्छ्रीभागवते प्रसिद्धम् । " व्यलुम्पन्नाजशिबिरममरा राज्यकाङ्क्षिणः । इन्द्रस्तु राजमहिषीं मातरं मम चाग्रहीत् " इत्यादिप्रह्लादवचनात् ॥ २८—३० ॥ ऐश्वर्यं अन्तःपुरैश्वर्यं । स्वामिनीत्वं कुरु प्राप्नुहीत्यर्थः ॥ ३१—३२ ॥ भुङ्क्ष्व स्वाधीनं कुरु ॥ ३३—३४ ॥ पिब मद्यमिति शेषः । विहर संचर । विहारशब्दस्य संचारेऽपि प्रयोगात् ॥ ३५—३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने विंशः सर्गः ॥ २० ॥

श्रीर्लक्ष्मीर्येन । अतएव प्रतिभक्तसंरक्षणव्रतशीलः । अतएव पितृवाक्यपरिपालनायस्थण्डिलशायीयोरामः । अचीरवाससेति च्छेदः । पीतांबरधारिणेत्यर्थः । एतादृशेनतेनरामेणसहवात्वं इदानींविद्यमानैश्वर्यापेक्षयानकिमपिकरिष्यसीति शङ्के मन्ये । अतोजीवतिमयिसतीतिशेषः । रामस्त्वांद्रष्टुमपिनोपलप्स्यते । नचममहस्तात्त्वांराघवःप्राप्तुमर्हति । मद्वधानन्तरंरामस्त्वांद्रष्टुमप्युपलप्स्यतेप्राप्तुमप्यर्हतीतिभावः ॥ ति० उपलभ्यते व्यत्ययेनश्यन्प्रत्ययः । समर्थोभवतीत्यर्थः । उपलप्स्यतइतिपाठे समर्थोभविष्यतीत्यर्थः ॥ २५—२७ ॥ ती० हिरण्यकशिपुरिति । पुराकिलहिरण्यकशिपोर्भार्यांह्लानारदमुखेनप्रार्थितस्तस्मैपुनःप्रादादिति भागवतेकथाऽस्ति । तथाच भार्याहरणमेवकीर्तिहरणमितिभावः ॥ स० हिरण्यकशिपुः इन्द्रहस्तगतां इन्द्राधीनांकीर्तिं । इन्द्रः स्वरिपुहिरण्यकशिपोर्भार्यामपहृतवानितिकीर्तियथानप्राप्तुमर्हति तथेत्यर्थः । इन्द्रनीतांकयाधूंहिरण्यकशिपुःपुनरपीन्द्रंनिर्जित्यानीतवानित्यप्रसिद्धेः । नारदएवतांतस्मैदत्तवानितिभावः ॥ २८ ॥ शि० अनलङ्कृतांत्वां त्वदुःखमित्यर्थः । दृष्ट्वा स्वेषुदारेषु । रतिं प्रीतिं । नोपलभामि । अतिदुःखितंमनःकापिनप्रवर्ततइत्यर्थः । एतेन रावणस्यदयालुत्वंसूचितं ॥ स० अनलङ्कृतामपित्वांदृष्ट्वा स्वभार्यासुरतिं नोपलभामि नोपलभे । अलङ्कृतांपुनर्दृष्ट्वातत्ररतिंनोपलभइतिकिंवक्तव्यमित्यर्थः । एतेनसौन्दर्यातिशयोद्योत्यते ॥ ती० क्लिष्टकौशेयेत्यस्यवास्तवार्थस्तु त्वांममेव्देवतांदृष्ट्वा स्वेषुधनेषुदारेषुचरतिंनोपलभामि । इष्टदेवतायास्तवदर्शनमात्रेणानन्दपूर्णोऽहंसर्वतोनिवृत्तोस्मीतिभावः ॥ ३० ॥ ती० नरामइत्यस्यवास्तवार्थस्तु—रामः तपआदिनामयातुल्योनभवति । किंतुनिरवधिकषड्गुणैश्वर्यसंपन्नोभगवाञ्श्रीरामोमत्तोप्यधिकएवेतिभावः ॥३४॥ ती० मयि ललल रमस्व । वस्तुतस्तु मयिभृत्येसति ललं ॥३५॥ ती० मयासह । वस्तुतस्तु सह एकदैव । मया संवर्धितानीतिशेषः । काननानिविहर ॥ ३६ ॥ इतिविंशः सर्गः ॥ २० ॥

[पा०] १ च. द्रष्टुमप्युपलप्स्यते. ङ. ञ. ञ. ट. द्रष्टुंवाप्युपलभ्यते. क. ख. द्रष्टुंवाप्युपपद्यते. २ क. सर्वगुणोत्तराः, ३ ङ. ञ. ट. प्रवरस्त्रियः. ४ ङ. ञ, ट, मया. ५ क. रूपेण, ङ. ञ. ट, बलेनच. ६ क. ख. यशसापिच.

एकविंशः सर्गः ॥ २१ ॥

सीतयारावणंप्रति मध्येतृणप्रक्षेपेण साम्नाहितोपदेशपूर्वकं रामगुणानुवर्णनेनतस्मैस्वप्रत्यर्पणेन तेनसहमैत्रीविरोधसंपादनयोः क्रमेणशुभाशुभफलहेतुत्वोक्तिः ॥ १ ॥

तस्य तद्वचनं श्रुत्वा सीता रौद्रस्य रक्षसः ॥ आर्ता दीनस्वरा दीनं प्रत्युवाच शनैर्वचः ॥ १ ॥
दुःखार्ता रुदती सीता वेपमाना तपस्विनी ॥ चिन्तयन्ती वरारोहा पतिमेव पतिव्रता ॥
तृणमन्तरतः कृत्वा प्रत्युवाच शुचिस्मिता ॥ २ ॥
निवर्तय मनो मत्तः स्वजने क्रियतां मनः ॥ न मां प्रार्थयितुं युक्तं सुसिद्धिमिव पापकृत् ॥ ३ ॥
अकार्यं न मया कार्यमेकपत्न्या विगर्हितम् ॥ कुलं संप्राप्तया पुण्यं कुले महति जातया ॥ ४ ॥
एवमुक्त्वा तु वैदेही रावणं तं यशस्विनी ॥ राक्षसं पृष्ठतः कृत्वा भूयो वचनमब्रवीत् ॥ ५ ॥
नाहमौपयिकी भार्या परभार्या सती तव ॥ साधुधर्ममवेक्षस्व साधु साधुव्रतं चर ॥ ६ ॥
यथा तव तथाऽन्येषां दारा रक्ष्या निशाचर ॥ आत्मानमुपमां कृत्वा स्वेषु दारेषु रम्यताम् ॥ ७ ॥
अतुष्टं स्वेषु दारेषु चपलं चलितेन्द्रियम् ॥ नयन्ति निकृतिप्रज्ञं परदाराः पराभवम् ॥ ८ ॥
इह सन्तो न वा सन्ति सतो वा नानुवर्तसे ॥ तथाहि विपरीता ते बुद्धिराचारवर्जिता ॥ ९ ॥

तस्येत्यादि ॥ १ ॥ तृणमिति रावणस्य साक्षात्संभाषणानर्हत्वात्तृणव्यवधानकरणम् । प्रत्युवाचेति पुनरभिधानं वचनप्रकारविशेषकथनार्थं । दुःखार्तायाअपि शुचिस्मितत्वाभिधानं वस्तुस्वभावेन सस्मितवत्प्रतीयमानत्वात् ॥२—३॥एकः पतिर्यस्यास्सा एकपत्नी तया। "नित्यं सपत्न्यादिषु" इति ङीप्॥४॥ पृष्ठतः कृत्वा अनादृत्येर्थः ॥ ५ ॥ सती अहं तव औपयिकी युक्ता भार्या न किन्तु परिहार्या । साधूनां सतां धर्मं साधुधर्मं । साधूनांव्रतं साधुव्रतं। साधु सम्यक् । चर ॥६॥ आत्मानमुपमां कृत्वा यथा तव दारा रक्ष्यास्तथान्येषां दारा रक्ष्याः। तस्मात् स्वेषु दारेषु रम्यतां॥७॥ अतुष्टं अतृप्तं निकृतिप्रज्ञं निकृतौ शाठ्ये प्रज्ञा यस्य तं । पराभवं आयुरैश्वर्यादिक्षयरूपं ॥८॥ इह अतिविशालेपि दुर्जनसंकुले देशे। सन्तः त्वामनर्थान्निवारयन्तः। न सन्ति वा नसन्ति किं सन्त्येव । श्रीविभीषणप्रभृतीनां संभवान्न सन्तीति कथं वक्तुं शक्यं । सतो वा नानुवर्तसे । "तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः"

तनि० तृणमन्तरतःकृत्वेति । परपुरुषमुखंनिरीक्ष्यवार्तानकर्तव्येतिमर्यादयावा तृणवदलक्षीकृत्यवा अस्मद्वक्ष्यमाणवचनंतृणसमानमित्यंनलक्षीकरोतीतिबुद्ध्यावा " सश्लाघ्यःसगुणीधन्यःसकुलीनःसबुद्धिमान् । सशूरःसचविक्रान्तोयंत्वंदेविनिरीक्षसे" इत्युक्तकटाक्षपाताद्दोमाभूदितिवा स्वामिनातृणमादायकाकासुरनिरासवदनेनतृणेनैतन्निरासःकार्यइतिवा अचेतनंचेतनंकृत्वासंबोधनेनवाक्यंवदामीतिबुद्ध्यावा आसन्नस्यास्यव्यवधानेनभाव्यमितिबुद्ध्यावा पशुसमानस्यतवेदमेवभोग्यमितिबुद्ध्यावा रामविरोधेन भवान्सानुबन्धोनशिष्यतीतिनिवेदनायवा तृणंमध्येस्थापयित्वा ॥ स० प्रत्युवाचेतिपूर्वंप्रतिज्ञातं । तत्रेत्थंकारमाह—तृणमन्तरतःकृत्वाप्रत्युवाचेति । अतोनपुनर्वचनं ॥ २ ॥ ति० कुद्धोक्त्यामनःपदादेःपौनरुक्त्यंनदोषभाक् । वर्णनीयमयीभावाच्चकवेरपि तादृशंनदोषाय ॥ स० युक्तः योग्यः । सिद्धिं मोक्षं ॥ ३ ॥ स० एकपत्न्या एकःपतिर्यस्यास्सा रामकृतयज्ञफलभोक्त्री । पतिव्रतेतियावत् । तया । विगर्हितं विनिन्दितं । तर्हि कदापिगर्हितंत्वयानानुष्ठितंकिमित्यतस्तथैवेत्याह—मयेति । मयायदकारि तत्सर्वं अं मत्पतिंविष्णुमुद्दिश्यैवाकारीतिविगर्हितंतनकार्यमितिभावः ॥ ४ ॥ ति० पृष्ठतःकृत्वा परावृत्यस्थित्वा ॥ ५ ॥ ती० वस्तुतस्तु अहंतव त्वया भार्या भर्तव्यान किंतुपरभार्या परेणरामेणभार्या भर्तव्या ॥ स० औपयिकी उपभोगयोग्यान । तत्रहेतुः परभार्येति । तत्रापिनस्वैरिणीत्युदीरयति—सतीति । साधूनांसतांधर्मं धर्मशास्त्रायाशंसितं । अवेक्षस्व । साधुव्रतं साधोः साध्व्याःपतिव्रतायाममव्रतं परित्यजनंचर । " वोतोगुणवचनात् " इति साधुस्साधुः ॥ ६ ॥ स० दाराः रक्ष्याः शीलतःसंरक्ष-

[पा०] १ क. घ. ङ. छ.—ट. ततःशनैः. २ क. चिन्तयित्वा. ३ च. ज. क्रियतांहितत्. क. ख. घ. झ. प्रीयतांमनः. ४ क. घ. ङ. च. ज.—ट. युक्तस्त्वंसिद्धिमिव. ५ क. अनार्यं. ६ घ. तपस्विनी. ७ घ. ङ. च. ज.—ट. रावणं. ८ घ. ङ. च. ज.—ट. रक्ष्यादाराः. ९ ङ. झ. ट. चपलेन्द्रियं. १० ख. झ. ञ. ट. यथाहि.

विकृताः पिङ्गलाः काली: क्रोधनाः कलहप्रियाः ॥ कालायसमहाशूलकूटमुद्गरधारिणीः ॥ ९ ॥
वराहमृगशार्दूलमहिषाजशिवामुखीः ॥ गजोष्ट्रहयपादीश्च निखातशिरसोपराः ॥ १० ॥
एकहस्तैकपादाश्च खरकर्ण्यः श्वकर्णिकाः ॥ गोकर्णीर्हस्तिकर्णीश्च हरिकर्णीस्तथापराः ॥ ११ ॥
अनासा अतिनासाश्च तिर्यङ्नासा विनासिकाः ॥ गजसन्निभनासाश्च ललाटोच्छ्वासनासिकाः ॥१२॥
हस्तिपादा महापादा गोपादाः पादचूडिकाः ॥ अतिमात्रशिरोग्रीवा अतिमात्रकुचोदरीः ॥ १३ ॥
अतिमात्रास्यनेत्राश्च दीर्घजिह्वानखास्तथा ॥ अजामुखीर्हस्तिमुखीर्गोमुखीः सूकरीमुखीः ॥ १४ ॥
हयोष्ट्रखरवक्त्राश्च राक्षसीर्घोरदर्शनाः ॥ शूलमुद्गरहस्ताश्च क्रोधनाः कलहप्रियाः ॥ १५ ॥
कराला धूम्रकेशीश्च राक्षसीर्विकृताननाः ॥ पिबन्तीः सततं पानं सदा मांससुराप्रियाः ॥ १६ ॥
मांसशोणितदिग्धाङ्गीर्मांसशोणितभोजनाः ॥ ता ददर्श कपिश्रेष्ठो रोमहर्षणदर्शनाः ॥
स्कन्धवन्तमुपासीनाः परिवार्य वनस्पतिम् ॥ १७ ॥
तस्याधस्ताच्च तां देवीं राजपुत्रीमनिन्दिताम् ॥ लक्षयामास लक्ष्मीवान्हनुमाञ्जनकात्मजाम् ॥१८॥
निष्प्रभां शोकसंतप्तां मलसंकुलमूर्धजाम् ॥ क्षीणपुण्यां च्युतां भूमौ तारां निपतितामिव ॥ १९ ॥
चारित्रव्यपदेशाढ्यां भर्तृदर्शनदुर्गताम् ॥ भूषणैरुत्तमैर्हीनां भर्तृवात्सल्यभूषणाम् ॥ २० ॥
राक्षसाधिपसंरुद्धां बन्धुभिश्च विनाकृताम् ॥ विधूतां सिंहसंरुद्धां बद्धां गजवधूमिव ॥ २१ ॥
चन्द्ररेखां पयोदान्ते शारदाभ्रैरिवावृताम् ॥ क्लिष्टरूपामसंस्पर्शादयुक्तामिव वल्लकीम् ॥ २२ ॥
सीतां भर्तृवशे युक्तामयुक्तां राक्षसीवशे ॥ अशोकवनिकामध्ये शोकसागरमाप्लुताम् ॥ २३ ॥
ताभिः परिवृतां तत्र सग्रहामिव रोहिणीम् ॥ ददर्श हनुमान्देवीं लतां कुसुमितामिव ॥ २४ ॥
सा मलेन च दिग्धाङ्गी वपुषा चाप्यलंकृता ॥ मृणाली पङ्कदिग्धेव विभाति न विभाति च ॥२५॥

भुग्नवक्त्रां निम्नवक्त्रां । विकृताननां नासिकौष्ठविरहितानना मित्यर्थः । एतदन्तस्य पूर्वेण ददर्शेत्यनेनान्वयः ॥ ८ ॥ विकृता इत्यादेरुत्तरेण ददर्शेत्यनेनान्वयः । एता एकाक्ष्यादिराक्षसीभ्योन्याः । विकृताः विकृतवेषाः ॥ ९ ॥ निखातशिरसः गात्रान्तरवर्तिशिरसः ॥ १० ॥ हरिकर्णीः कपिकर्णीः ॥ ११—१२ ॥ पादे चूडिका यासां ताः पादचूडिकाः । " शिखा चूडा केशपाशी" इत्यमरः ॥ १३—१५ ॥ राक्षसीर्विकृताननाः इत्यत्र पुनः राक्षसीपदमविस्मरणार्थं ॥ १६—१७ ॥ लक्ष्मीवान् सीतादर्शनजनितशोभायुक्तः ॥ १८ ॥ च्युतां स्थानाच्चलितां ॥ १९ ॥ चारित्रव्यपदेशाढ्यां पतिव्रताधर्माचरणख्यातिसंपन्नां । भर्तृदर्शनेन दुर्गतां दरिद्रां । भर्तृदर्शनरहितामित्यर्थः । भर्तृवात्सल्यभूषणां वात्सल्यपदमत्र स्नेहमात्रवाचि ॥ २०—२१ ॥ पयोदान्ते वर्षान्ते । चन्द्ररेखायाः स्पष्टास्पष्टत्वद्योतनायेदं विशेषणं । असंस्पर्शात् उद्वर्तनादिसंस्काररहित्यात् । अयुक्तां अनारोपितत्रीं । वल्लकीं वीणां ॥ २२ ॥ सीतामित्यादिपरशेषः ॥ राक्षसीवशे अयुक्तां अनवस्थितां । तद्वचनान्यशृण्वन्तीमित्यर्थः ॥ २३ ॥ लतां कुसुमितामिव तथादर्श-

ति० पयोदान्ते वर्षान्ते । अनेन दुःखस्यात्यल्पावशिष्टत्वंसूच्यते ॥ २२ ॥ ती० लतामकुसुमामिव आभरणपरिहारादितिभावः ॥ २४ ॥

[पा०] १ क. महाप्रास. २ ग.—ट. शिवामुखाः. ३ घ. ङ. झ. ञ. ट. हयपादाश्च. च. छ. ज. शिववक्त्राश्च. क. ग. हयवक्त्राश्च. ४ ग. घ. खरकर्णाश्चकर्णिकाः. ५ छ. ज. गोकर्णाहस्तिकर्णाश्चहरिकर्णास्तथा. ६ ङ. झ. ट. अतिनासाश्चकाश्चित्तिर्यक्स्रवासाअनासिकाः. ७ ग. कृशोदरीः. ट. कुचोदराः. ८ ङ. छ. झ. ञ. ट. जिह्वाननास्तथा. ९ झ. ञ. ट. करालधूम्रकेशिन्यो. १० झ. ञ. ट. सुरामांससदाप्रियाः. ११ क. वैदेहीं. १२ क. दर्शयामास. १३ घ. ञ. हनूमान्मारुतात्मजः. १४ क. ख. घ.—ट. भूषितां. १५ ङ. झ. ञ. ट. सतांभर्तृहिते. च. छ. ज. सतांपतिहिते. ग. सदाभर्तृहिते. १६ क. ग. घ. ङ. झ. रक्षसांवशे. १७ ङ. झ. ञ. ट. हनुमांस्तत्र. १८ ङ. ट. लतामकुसुमामिव. १९ क. ग. ङ. झ. ट. विभातिचनभातिच.

मलिनेन तु वस्त्रेण परिक्लिष्टेन भामिनीम् ॥ संवृतां मृगशाबाक्षीं ददर्श हनुमान्कपिः ॥ २६ ॥
तां देवीं दीनवदनामदीनां भर्तृतेजसा ॥ रक्षितां स्वेन शीलेन सीतामसितलोचनाम् ॥ २७ ॥
तां दृष्ट्वा हनुमान्सीतां मृगशाबनिभेक्षणाम् ॥ मृगकन्यामिव त्रस्तां वीक्षमाणां समन्ततः ॥ २८ ॥
दहन्तीमिव निःश्वासैर्वृक्षान्पल्लवधारिणः ॥ संघातमिव शोकानां दुःखस्योर्मिमिवोत्थिताम् ॥२९॥
तां क्षमां सुविभक्ताङ्गीं विनाभरणशोभिनीम् ॥ प्रहर्षमतुलं लेभे मारुतिः प्रेक्ष्य मैथिलीम् ॥ ३० ॥
हर्षजानि च सोश्रूणि तां दृष्ट्वा मदिरेक्षणाम् ॥ मुमोच हनुमांस्तत्र नमश्चक्रे च राघवम् ॥ ३१ ॥
नमस्कृत्वा स रामाय लक्ष्मणाय च वीर्यवान् ॥ सीतादर्शनसंहृष्टो हनुमान्संवृतोऽभवत् ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तदशः सर्गः ॥ १७ ॥

अष्टादशः सर्गः ॥ १८ ॥

शिंशुपाविटपाग्रगेनहनुमता अपररात्रेप्रबुध्यमदनपरवशतयाप्रमदाशतेनसह सीतासमीपमागच्छतोरावणस्यावलोकनम् ॥ १ ॥ ततः सीतासमीपमागतस्यरावणस्यचेष्टादेःस्फुटावगमाय उच्चशाखाग्रादवरोहणेनाधश्शाखाग्रेनिगूढमवस्थानम् ॥२॥

तथा विप्रेक्षमाणस्य वनं पुष्पितपादपम् ॥ विचिन्वतश्च वैदेहीं किंचिच्छेषा निशाऽभवत् ॥ १ ॥
षडङ्गवेदविदुषां क्रतुप्रवरयाजिनाम् ॥ शुश्राव ब्रह्मघोषांश्च विरात्रे ब्रह्मरक्षसाम् ॥ २ ॥
अथ मङ्गलवादित्रैः शब्दैः श्रोत्रमनोहरैः ॥ प्रबुध्यत महाबाहुर्दशग्रीवो महाबलः ॥ ३ ॥
विबुध्य तु यथाकालं राक्षसेन्द्रः प्रतापवान् ॥ स्रस्तमाल्याम्बरधरो वैदेहीमन्वचिन्तयत् ॥ ४ ॥
भृशं नियुक्तस्तस्यां च मदनेन मदोत्कटः ॥ न स तं राक्षसः कामं शशाकात्मनि गूहितुम् ॥ ५ ॥

नीयामित्यर्थः ॥ २४—२५ ॥ मलिनेनेत्यादिश्लोकद्वयमेकं वाक्यं ॥ २६—२७ ॥ तामित्यादिश्लोकत्रयमेकं वाक्यं ॥ २८—२९ ॥ क्षमां क्षमामिव स्थितां । निगीर्याध्यवसानादभेदोक्तिः । तां दृष्ट्वा तां प्रेक्ष्येत्यनयोर्विशेषणविशेष्यभेदान्न पौनरुक्त्यं । दूरप्रयुक्तस्यानुस्मरणार्थं वा पुनरुक्तिः ॥ ३० ॥ राघवं नमश्चक्रे । उपपदविभक्त्यपेक्षया कारकविभक्तेर्बलीयस्त्वान्नमस्करोति देवानित्यादाविव द्वितीया ॥ ३१ ॥ संवृतः राक्षस्यदर्शनाय शिंशुपापर्णैर्गूढोऽभूत् ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तदशः सर्गः ॥ १७ ॥

विप्रेक्षमाणस्य विचिन्वतश्च विप्रेक्षमाणे विचिन्वति च तस्मिन्नित्यर्थः । " यस्य च भावेन भावलक्षणं " इत्यर्थे षष्ठी ॥ १ ॥ विरात्रे अपररात्रे " अहस्सर्वैकदेशसंख्यातपुण्याच्च रात्रेः " इत्यत्र चकारादव्ययादुत्तरस्य रात्रिशब्दस्य समासान्तोच् प्रत्ययः । ब्रह्मरक्षसां ब्राह्मणत्वविशिष्टरक्षसां । ब्रह्मघोषान् वेदघोषान् ॥ २—४ ॥ नियुक्तः प्रेरितः

ति० क्षामां कृशां ॥ ३० ॥ **तो०** अत्रतांतामितितच्छब्दावृत्त्यातत्तदवस्थाभेदस्यवर्णितत्वादपौनरुक्त्यं ॥ ३१ ॥ इति सप्तदशः सर्गः ॥ १७ ॥

तो० वस्तुतस्तुमदनेसत्यपिमदोत्कटोन । अतएवतस्यांसीतायांनियुक्तः नितरांयुक्तः विनीतइत्यर्थः । अतएवराक्षसः तंकामं आत्मनिगूहितुंनशशाकेतिकाकुः ॥ **ति०** भृशंनियुक्तः गाढाभिनिवेशितचित्तः । कामं कामवेगं । ईदृशेषुतीर्थस्यान्यथायोजनं भ्रान्त्यैव । रक्षसस्तमोगुणाविष्टस्यभगवन्मायामोहितस्याकृत्येष्वेवप्रवृत्तेः । तथाक्रियमाणंभगवद्ध्यानमपिपापभोगोत्तरंजन्मान्तरेउत्तमफलायेतिबोध्यं । अतएवऋक्षाश्वमेधनाम्नोराज्ञोदानस्तावकऋङ्मन्त्रः " नयुष्मेवाजबन्धवनिनित्सुश्वनमर्त्यः । अवद्यमधिदीधरत् "

[पा०] १ ङ. महीनां. २ ग. नागकन्यामिव. ३ ग. ततस्ततः. ४ घ. ङ. झ. ञ. ट. तांक्षामां. क. च. छ. ज. तांसमां. ग. सीतांसमविभक्ताङ्गीं. ५ क. च. छ. ज. तथाश्रूणि. ६ क. घ. च. ज.—ट. नमस्कृत्वाच. ७ ङ. ज. झ. ट. ब्रह्मघोषान्स. ८ घ. ङ. च. झ. ञ. ट. प्राबोध्यत. ९ ग. विबुध्यच. १० ङ. झ. ञ. ट. महाभागो. ११ ङ. झ. ट. नतु.

स सर्वाभरणैर्युक्तो बिभ्रच्छ्रियमनुत्तमाम् ॥ तां नगैर्बहुभिर्जुष्टां सर्वपुष्पफलोपगैः ॥ ६ ॥
वृतां पुष्करिणीभिश्च नानापुष्पोपशोभिताम् ॥ सदामदैश्च विहगैर्विचित्रां परमाद्भुताम् ॥ ७ ॥
ईहामृगैश्च विविधैर्जुष्टां दृष्टिमनोहरैः ॥ वीथीः संप्रेक्षमाणश्च मणिकाञ्चनतोरणाः ॥ ८ ॥
नानामृगगणाकीर्णां फलैः प्रपतितैर्वृताम् ॥ अशोकवनिकामेव प्राविशत्संततद्रुमाम् ॥ ९ ॥
अङ्गनाशतमात्रं तु तं व्रजन्तमनुव्रजत् ॥ महेन्द्रमिव पौलस्त्यं देवगन्धर्वयोषितः ॥ १० ॥
दीपिकाः काञ्चनीः काश्चिज्जगृहुस्तत्र योषितः ॥ वालव्यजनहस्ताश्च तालवृन्तानि चापराः ॥११॥
काञ्चनैरपि भृङ्गारैर्जहुः सलिलमग्रतः ॥ मण्डलाग्रान्बृसीं चैव गृह्यान्याः पृष्ठतो ययुः ॥ १२ ॥
काचिद्रत्नमयीं स्थालीं पूर्णां पानस्य भामिनी ॥ दक्षिणा दक्षिणेनैव तदा जग्राह पाणिना ॥ १३ ॥
राजहंसप्रतीकाशं छत्रं पूर्णशशिप्रभम् ॥ सौवर्णदण्डमपरा गृहीत्वा पृष्ठतो ययौ ॥ १४ ॥
निद्रामदपरीताक्ष्यो रावणस्योत्तमाः स्त्रियः ॥ अनुजग्मुः पतिं वीरं घनं विद्युल्लता इव ॥ १५ ॥
व्याविद्धहारकेयूराः समामृदितवर्णकाः ॥ समागलितकेशान्ताः सस्वेदवदनास्तथा ॥ १६ ॥
घूर्णन्त्यो मदशेषेण निद्रया च शुभाननाः ॥ स्वेदक्लिष्टाङ्गकुसुमाः सुमाल्याकुलमूर्धजाः ॥ १७ ॥
प्रयान्तं नैर्ऋतपतिं नार्यो मदिरलोचनाः ॥ बहुमानाच्च कामाच्च प्रियं भार्यास्तमन्वयुः ॥ १८ ॥
स च कामपराधीनः पतिस्तासां महाबलः ॥ सीतासक्तमना मन्दो मदाञ्चितगतिर्बभौ ॥ १९ ॥
ततः काञ्चीनिनादं च नूपुराणां च निस्स्वनम् ॥ शुश्राव परमस्त्रीणां स कपिर्मारुतात्मजः ॥२०॥

॥ ५—७ ॥ वीथीः उद्यानवीथीः ॥ ८—९ ॥ महेन्द्रं देवगन्धर्वयोषितइव व्रजन्तं तं । अङ्गनाशतमात्रं अनुव्रजत् अन्वव्रजत् ॥ १० ॥ तालवृन्तानि व्यजनानि ॥ ११ ॥ भृङ्गारैः कनकालुकाभिः । "भृङ्गारः कनकालुका" इत्यमरः । मण्डलाग्रान् असिविशेषान् । "मण्डलाग्रो नतार्थकः" इति वैजयन्ती । बृसीं आस्तरणं । गृह्य गृहीत्वा ॥ १२ ॥ पानस्य पूर्णा पीयत इति पानं मधु तस्य पूर्णा तेन पूर्णा । "पूरणगुण—" इत्यादिना सुहितार्थयोगे षष्ठीसमासनिषेधज्ञापकादत्र षष्ठी । स्थालीं पात्रीं ॥ १३—१५ ॥ व्याविद्धाः व्यत्यस्ततया न्यस्ताः । समामृदितवर्णकाः संमृष्टानुलेपनाः । "अङ्गरागः समालम्भो वर्णकश्च विलेपनं" इति निघण्टुः ॥१६—१८ ॥ मदेनाञ्चिता गतिर्यस्य स मदाञ्चितगतिः

इति । तस्यार्थः—वाजमित्यन्ननाम । अन्नदानेनयेसर्वेषांबन्धवःतेषांसंबोधनं । हेवाजबन्धवः युष्मेयुष्माखधि । सप्तम्यर्थानुवाद्यधिः । निनित्सुश्चन निन्दनेच्छाशीलोपिमर्त्योऽवद्यं नदीधरत् नधारयति । भगवदनुसन्धानेनैवनिष्पापत्वादिति । एवंचभगवतो निन्दावरुद्धभावेनध्यानमपिनरकभोगोत्तरंजन्मान्तरेउत्तमफलाय । अतएवास्यमरणोत्तरंचतुर्थचतुर्युग्यांचेदिराजकुलेजन्म । चतुर्विंशतिचतुर्युग्यांरामावतारइतिहरिवंशोक्तेः । तावत्पर्यन्तंचैतत्पापफलभोगइत्यर्थोयातमितिबोध्यं ॥ **शि०** मदनेन मादकसुरापानादिना मदोत्कटः उत्कटदैन्यविशिष्टोपिराक्षसः । यतस्तस्यांसीतायां । भृशं अत्यन्तं । नियुक्तः संस्थापितचित्तः । अतः तं सीतागोपनविषयकं कामं इच्छां । आत्मनि मनसि । गूहितुं नियमितुं । नशशाक ॥ **स०** मदनेन तस्यांसीतायांनियुक्तः प्रेरितः पूर्वमेव । मदोत्कटः व्यक्तमदः । तं मदनं । गूहितुं निग्रहीतुं ॥ ५ ॥ **ति०** अङ्गनाः । शतमात्रमित्यवधारणेइतिकतकः । देवादियोषितोमहेन्द्रमिव पौलस्त्यं अनुव्रजन् । अडभावआर्षः ॥ **स०** अङ्गनाशतमेवाङ्गनाशतमात्रं देवगन्धर्वयोषितोमहेन्द्रमिवपौलस्त्यं अनुव्रजदभूत् ॥ १० ॥ **ती०** भृङ्गाराः धत्तूरकुसुमसदृशजलपात्राणि ॥ **ति०** मण्डलाग्रावृत्तपर्यन्ताः बृसीः आसनविशेषान् । तपस्विनामिमेतृणादिना । अस्यतुस्वर्णेनेतिविशेषः ॥ **स०** बृसीः ऋषिपुत्रत्वाद्रावणस्यऋष्यासनवत्त्वं ॥ १२ ॥

[**पा०**] १ ग. ङ.—ट. नगैर्विविधैः. २ ग. ङ. ट. मत्तैश्च. ३ क. ङ. झ. ञ. ट. परमाद्भुतैः. ४ क. ग. घ. च.—ट. विविधैर्वृतां. ५ ख. ङ. झ. ञ. ट. तोरणां. ६ ख. झ. ञ. ट. अङ्गनाःशतमात्रंतु. ७ ख. झ. ञ. ट. मनुव्रजन्. ८ घ. काञ्चनीश्चापिजगृहुः. ९ ङ. झ. ञ. ट. काञ्चनैश्चैव. १० ग. ङ.—ट. मण्डलाग्रावृसीश्चैव. क. घ. मण्डलाग्रानसींश्चैव. ११ घ. वहन्त्यःपृष्ठतो. १२ क.—ङ. छ. झ. ञ. ट. पात्रीं. १३ ङ. झ. ञ. ट. भ्राजतीं. १४ क. परिजग्राह. १५ च. छ. ज. वदनांबुजाः. १६ ख. घ.—ञ. समाल्याकुल. १७ च.—ट. प्रियभार्याः.

तं चाप्रतिमकर्माणमचिन्त्यबलपौरुषम् ॥ द्वारदेशमनुप्राप्तं ददर्श हनुमान्कपिः ॥ २१ ॥
दीपिकाभिरनेकाभिः समन्तादवभासितम् ॥ गन्धतैलावसिक्ताभिर्धियमाणाभिरग्रतः ॥ २२ ॥
कामदर्पमदैर्युक्तं जिह्मताम्रायतेक्षणम् ॥ समक्षमिव कन्दर्पमपविद्धशरासनम् ॥ २३ ॥
मथितामृतफेनाभमरजो वस्त्रमुत्तमम् ॥ सलीलमनुकर्षन्तं विमुक्तं सक्तमङ्गदे ॥ २४ ॥
तं पत्रविटपे लीनः पत्रपुष्पघनावृतः ॥ समीपमिव संक्रान्तं निध्यातुमुपचक्रमे ॥ २५ ॥
अवेक्षमाणस्तु ततो ददर्श कपिकुञ्जरः ॥ रूपयौवनसंपन्ना रावणस्य वरस्त्रियः ॥ २६ ॥
ताभिः परिवृतो राजा सुरूपाभिर्महायशाः ॥ तन्मृगद्विजसंघुष्टं प्रविष्टः प्रमदावनम् ॥ २७ ॥
क्षीबो विचित्राभरणः शङ्ककर्णो महाबलः ॥ तेन विश्रवसः पुत्रः स दृष्टो राक्षसाधिपः ॥ २८ ॥
वृतः परमनारीभिस्ताराभिरिव चन्द्रमाः ॥ तं ददर्श महातेजास्तेजोवन्तं महाकपिः ॥ २९ ॥
रावणोऽयं महाबाहुरिति संचिन्त्य वानरः ॥ [सोऽयमेव पुरा शेते पुरमध्ये गृहोत्तमे ॥]
अवप्लुतो महातेजा हनुमान्मारुतात्मजः ॥ ३० ॥
स तथाप्युग्रतेजाः सन्निधूतस्तस्य तेजसा ॥ पत्रगुह्यान्तरे सक्तो हनुमान्संवृतोऽभवत् ॥ ३१ ॥
सं तामसितकेशान्तां सुश्रोणीं संहतस्तनीम् ॥ दिदृक्षुररसितापाङ्गामुपावर्तत रावणः ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टादशः सर्गः ॥ १८ ॥

॥१९—२०॥ द्वारदेशं अशोकवनद्वारदेशं ॥ २१ ॥ गन्धतैलं गन्धवासिततैलं ॥ २२ ॥ समक्षं प्रत्यक्षं । अपविद्धशरासनं अधृतशरासनं ॥ २३ ॥ मथितामृतफेनाभं मथितं तक्रं अमृतं धारोष्णं तयोर्यत्फेनं तदाभं । "निरम्बु वोलं मथितं धारोष्णं त्वमृतंपयः" इत्युभयत्र वैजयन्ती । विमुक्तं स्वस्थानात्प्रचलितं । अङ्गदे सक्तं वस्त्रं सलीलं यथा भवति तथा अनुकर्षन्तमित्यन्वयः ॥ २४ ॥ पत्रविटपे पत्रवति विटपे । लीनः छन्नः । पत्रपुष्पघनावृतः पत्रपुष्पसमूहावृतः । इवशब्दोवाक्यालंकारे । यद्वा दूरे समागतमपि तेजसा समीपे संक्रान्तमिव स्थितं । तं निध्यातुं द्रष्टुमुपचक्रमे । "निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणं" इत्यमरः ॥ २५—२६ ॥ प्रमदावनं अन्तःपुरोद्यानं ॥ २७ ॥ क्षीबः मत्तः । शङ्ककर्णः गर्वेण स्तब्धकर्ण इत्यर्थः ॥ २८—२९ ॥ अवप्लुतः अवरूढः । रावणचेष्टास्सर्वा द्रष्टुं पूर्वस्थानादधःशाखां समाश्रित इत्यर्थः ॥ ३० ॥ सः हनुमान् । तथा पूर्वोक्तरीत्या । उग्रतेजास्सन्नपि । तस्य रावणस्य । तेजसा निर्धूतः सन् । पत्रगुह्यान्तरे पत्रगूढप्रदेशे । संवृतोऽभवत् गूढोऽभवत् ॥ ३१—३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टादशः सर्गः ॥ १८ ॥

ति० अपविद्धशरासनं त्यक्तेक्ष्वाकुचापं । कन्दर्पमिवस्थितं ॥२३॥ **ति०** अमृतंपयः । मथितपयःफेनवच्छुक्लाआभायस्यतत् । सपुष्पं पुष्पमालासहितं । विमुक्तं विशिष्टमुक्तावन्तं । सपुष्पमवकर्षन्तमित्येवपाठः । तीर्थस्तु एतद्योजनाशक्त्यासलीलमवकर्षन्तमितिपाठंकल्पयति ॥ २४ ॥ **स०** क्षीबः मत्तः । शङ्ककर्णः तन्नामकोयोऽनपालस्तेनदृष्टः ॥ २८ ॥ **स०** सोयंरावणः पुरमध्ये प्रासादमध्ये । "गृहोपरिगृहंपुरं" इतिविश्वः । शेतेपुरा अशेत ॥ ३० ॥ **ति०** यद्यपिससमुद्रलङ्घनकर्ता समारुतात्मजः उग्रतेजाः । तथापि तस्यरावणस्यतेजसानिर्धूतः तस्यपुरोऽवस्थातुमशक्नुवन् पत्रे पत्रबहुले । अतएव गुह्यान्तरे शाखान्तरे । सक्तः स्थितः । तत्राप्यल्पशरीरतयासंवृतः गुप्तोऽभवत् । सर्वमायातिरस्कारकमायावतस्तस्यदृष्ट्वाग्रेमाययाऽल्पशरीरादिमत्त्वेनस्थातुमशक्यत्वादेवंकरणं ॥ ३१ ॥ इत्यष्टादशः सर्गः ॥ १८ ॥

[**पा०**] १ ङ. झ. ञ. ट. सपुष्पमवकर्षन्त. घ. च. छ. ज. सपुष्पमनु. २ ङ. च. ज.—ट. पुष्पशतावृतः. घ. पुष्पवनावृतः. ३ क. ख. घ.—ट. मुपसंक्रान्तं. ४ घ. प्रध्यातुं. ङ. झ. ट. विज्ञातुं. ५ ङ.—ट. तदा. ६ इदमर्धं क. ङ.—ट. पाठेषुदृश्यते. ७ क. ख. ङ. ज. झ. ट. सनिर्धूतः. ८ ङ. झ. ञ. ट. पत्रेगुह्यान्तरे. ९ ङ.—ट. मतिमान्. १० क. च. ज. सीतां. ११ ङ.—ट. रसितापाङ्गां.

एकोनविंशः सर्गः ॥ १९ ॥

ग्रन्थकृतानानावस्त्वौपम्येन बहुधोपवर्णितांसीतांप्रति रावणेनप्रलोभनोपक्रमः ॥ १ ॥

तस्मिन्नेव ततः काले राजपुत्री त्वनिन्दिता ॥ रूपयौवनसंपन्नं भूषणोत्तमभूषितम् ॥ १ ॥
ततो दृष्ट्वैव वैदेही रावणं राक्षसाधिपम् ॥ प्रावेपत वरारोहा प्रवाते कदली यथा ॥ २ ॥
ऊर्च्छाद्योदरमूरुभ्यां बाहुभ्यां च पयोधरौ ॥ उपविष्टा विशालाक्षी रुदन्ती वरवर्णिनी ॥ ३ ॥
दशग्रीवस्तु वैदेहीं रक्षितां राक्षसीगणैः ॥ ददर्श सीतां दुःखार्तां नावं सन्नामिवार्णवे ॥ ४ ॥
असंवृतायामासीनां धरण्यां शंसितव्रताम् ॥ छिन्नां प्रपतितां भूमौ शाखामिव वनस्पतेः ॥ ५ ॥
मलमण्डनचित्राङ्गीं मण्डनार्हाममण्डिताम् ॥ मृणाली पङ्कदिग्धेव विभाति न विभाति च ॥ ६ ॥
समीपं राजसिंहस्य रामस्य विदितात्मनः ॥ संकल्पहयसंयुक्तैर्यान्तीमिव मनोरथैः ॥ ७ ॥
शुष्यन्तीं रुदतीमेकां ध्यानशोकपरायणाम् ॥ दुःखस्यान्तमपश्यन्तीं रामां राममनुव्रताम् ॥ ८ ॥
वेष्टमानां तथाऽऽविष्टां पन्नगेन्द्रवधूमिव ॥ धूप्यमानां ग्रहेणेव रोहिणीं धूमकेतुना ॥ ९ ॥
वृत्तशीलकुले जातामाचारवति धार्मिके ॥ पुनःसंस्कारमापन्नां जातामिव च दुष्कुले ॥ १० ॥
अभूतेनापवादेन कीर्तिं निपतितामिव ॥ आम्नायानामयोगेन विद्यां प्रशिथिलामिव ॥ ११ ॥
सन्नामिव महाकीर्तिं श्रद्धामिव विमानिताम् ॥ पूजामिव परिक्षीणामाशां प्रतिहतामिव ॥ १२ ॥
आयतीमिव विध्वस्तामाज्ञां प्रतिहतामिव ॥ दीप्तामिव दिशं काले पूजामपहृतामिव ॥ १३ ॥

तस्मिन्नित्यादिश्लोकद्वयमेकान्वयं ॥ ततः रावणागमनानन्तरं । तस्मिन्नेव काले तदागमनानन्तरकाल एव । भूषणोत्तमभूषितं रूपयौवनसंपन्नं रावणं ततो दृष्ट्वैव तत्र दूरदेश एव दृष्ट्वा प्रावेपतेतिसंबन्धः ॥ १–५ ॥ मलमण्डनचित्राङ्गीं मलरूपमण्डनेन चित्राङ्गीं । मलावृतामप्याश्चर्यावहदेहामित्यर्थः । मृणाली पङ्कदिग्धेवेत्यत्र येत्यध्याहार्यं ॥ ६—८ ॥ आविष्टां मणिमन्त्राद्यभिभूतां । धूप्यमानां संतप्यमानां । धूमः केतुरिव धूमकेतुः केतुना ग्रहेणेत्यर्थः । यद्वा ग्रहेण ग्राहकेण आच्छादकेनेति धूमकेतुर्विशिष्यते ॥ ९ ॥ वृत्तं दृढं शीलं स्वभावो यस्य तत् तच्च तत् कुलं च तस्मिन् । आचारवति समयाचारवति । धार्मिके यज्ञादिधर्मप्रधाने एवंभूते कुले जातां । संस्कारमापन्नां विवाहरूपसंस्कारमापन्नां । अतः संस्कारद्वारा दुष्कुले पुनर्जातामिव स्थितां । कुमाराणामुपनयनमिव कुमारीणां विवाहो द्वितीयं जन्म । " वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृतः " इति स्मृतेः ॥ १०—११ ॥ सन्नां क्षीणां । श्रद्धामिव विमानितां अवमानितामित्यर्थः । अवमाने हि कृते अवमन्तरि श्रद्धा मन्दीभवति । पूजामिव परिक्षीणां स्वल्पपूजाद्रव्यामित्यर्थः । प्रतिहतां निष्फलां ॥ १२ ॥ आयतीं धनलाभं । विध्वस्तां मन्दीभूतां । प्रतिहतां अननुष्ठितां । दीप्तां दाहयुक्तां । काले उत्पातकाले । पूजामपहृतामिव । अत्र पूजाशब्देन पूजाद्रव्यमुच्यते

ति० मलेनमण्डनस्थानेषुदिग्धाङ्गीं रूषिताङ्गीं । चित्राङ्गीमितिपठित्वा मलरूपेणमण्डनेन चित्राङ्गीं कर्बुरामित्यर्थतीर्थआह । संन्यासिलादुचितैवतस्यमलेपिमण्डनत्वबुद्धिः । ईदृशींयांददर्श सा दिग्धामृणालीवविभातिनविभातिच ॥ स्वरूपशोभयाअतिमलावराच्चविभाति नविभातिचेत्यर्थः ॥ ६ ॥ ति० वृत्तमाचारः । शीलं सत्स्वभावः । तद्युते विहितकर्मानुष्ठानवतिचकुलेजातां । तादृशएवकुले पुनःसंस्कारं पाणिग्रहणसंस्कारमापन्नामपि दुष्कुलेजातां उत्पन्नां तत्रैवप्राप्तसंस्कारामिवचमलिनांस्थितां ॥ स० धार्मिके एतादृशेपितृकुलेजाता । सैवदुष्कुले वृत्तादिरहितेविवाहाख्यसंस्कारेणपुनर्जाताचेत्सायथावर्तेत तथाविद्यमानां ॥ १० ॥

[पा०] १ घ. ह्यनिन्दिता. २ क. ख. घ. ङ. छ.—ट. ऊरुभ्यामुदरंछाद्य. ३ क. घ.—ट. दीनां. ४ ख. ङ. झ. ञ. ट. मण्डनदिग्धाङ्गीं. ५ क. ख. विभातिचनभातिच. ६ क. शोकध्यानपरायणां. ७ क. ख. घ.—ज. ञ. ट. वेष्टमानामथा. ८ झ. ट. वृत्तशीलेकुले. ९ ख. विनाशितां. १० क. ख. ङ. ज. झ. ट. प्रज्ञामिव. ११ ङ.—ञ. पूजामपहृतामिव. क. पूजांप्रतिहतामिव.

पद्मिनीमिव विध्वस्तां हतशूरां चमूमिव ॥ प्रभामिव तमोध्वस्तामुपक्षीणामिवापगाम् ॥ १४ ॥
वेदीमिव परामृष्टां शान्तामग्निशिखामिव ॥ पौर्णमासीमिव निशां राहुग्रस्तेन्दुमण्डलाम् ॥ १५ ॥
उत्कृष्टपर्णकमलां वित्रासितविहङ्गमाम् ॥ हस्तिहस्तपरामृष्टामाकुलां पद्मिनीमिव ॥ १६ ॥
पतिशोकातुरां शुष्कां नदीं विस्रावितामिव ॥ परया मृजया हीनां कृष्णपक्षनिशामिव ॥ १७ ॥
सुकुमारीं सुजाताङ्गीं रत्नगर्भगृहोचिताम् ॥ तप्यमानामिवोष्णेन मृणालीमचिरोद्धृताम् ॥ १८ ॥
गृहीतामालितां स्तम्भे यूथपेन विनाकृताम् ॥ निःश्वसन्तीं सुदुःखार्तां गजराजवधूमिव ॥ १९ ॥
एकया दीर्घया वेण्या शोभमानामयत्नतः ॥ नीलया नीरदापाये वनराज्या महीमिव ॥ २० ॥
उपवासेन शोकेन ध्यानेन च भयेन च ॥ परिक्षीणां कृशां दीनामल्पाहारां तपोधनाम् ॥ २१ ॥
आयाचमानां दुःखार्तां प्राञ्जलिं देवतामिव ॥ भावेन रघुमुख्यस्य दशग्रीवपराभवम् ॥ २२ ॥
समीक्षमाणां रुदतीमनिन्दितां सुपक्ष्मताम्रायतशुक्ललोचनाम् ॥
अनुव्रतां राममतीव मैथिलीं प्रलोभयामास वधाय रावणः ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

विंशः सर्गः ॥ २० ॥

रावणेन सीतांप्रति प्रलोभनाय चाटुवचनोपन्यासपूर्वकंस्वाङ्गीकरणप्रार्थना ॥ १ ॥

सं तां पतिव्रतां दीनां निरानन्दां तपस्विनीम् ॥ साकारैर्मधुरैर्वाक्यैर्न्यदर्शयत रावणः ॥ १ ॥
भीं दृष्ट्वा नागनासोरु गूहमाना स्तनोदरम् ॥ अदर्शनमिवात्मानं भयान्नेतुं त्वमिच्छसि ॥ २ ॥

॥ १३ ॥ विध्वस्तां हिमादिहतां । तमोध्वस्तां तमःसंवृतां । उपक्षीणां स्वल्पजलामित्यर्थः ॥ १४ ॥ परामृष्टां शूद्रादिभिरितिशेषः ॥ १५ ॥ उत्कृष्टपर्णकमलां उद्धृतपत्रकमलां ॥ १६ ॥ विस्रावितां रोधोभङ्गादिना अन्यनिर्गमितजलामित्यर्थः । मृजया उद्वर्तनाद्यङ्गशोधनेन ॥ १७ ॥ सुजाताङ्गीं सुन्दराङ्गीं ॥ १८ ॥ आलितां बद्धां ॥ १९—२० ॥ अल्पाहारां तोयमात्राहारामित्यर्थः । यद्वा अल्पाहारां मितभोजिनीमित्युत्तमस्त्रीलक्षणमुच्यते ॥ २१ ॥ रघुमुख्यस्य कर्तुः दशग्रीवपराभवं भावेन मनसा । आयाचमानां प्रार्थयन्तीमिव स्थितां ॥ २२ ॥ समीक्षमाणां रक्षकं समीक्षमाणां । सुपक्ष्मेति । अन्ते ताम्रं मध्ये शुक्लमस्या लोचनमित्युच्यते ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनविंशः सर्गः ॥ १९ ॥

साकारैः सेङ्गितैः । " आकाराविङ्गिताकृती " इत्यमरः । न्यदर्शयत स्वाभिप्रायमिति शेषः । सीतायै स्वाभि ायं प्रकाशितवानित्यर्थः ॥ १ ॥ अद-

ति० परामृष्टां वेदवेदिरहितपतितैराक्रान्तां ॥ १५ ॥ ति० गृहीतां धृतां । पश्चात्स्तंभे लाडितां बद्धां ॥१९॥ ति० अल्पाहारां जलमात्राहारां । अन्नातयाऽन्नस्यग्रहीतुमशक्यत्वात् । देवराज्ञः पायसलाभेनतदनपेक्षणाच्च ॥ स० शोकेन रामविश्लेषजेन । ध्यानेन पत्युः । भयेन रावणजन्येन । अल्पाहारां पत्युच्छिष्टंविनान्यस्यस्वीकारायोग्यत्वाच्छरीरयात्रार्थं नीरस्याशितानशितलोक्तेस्तद्ग्रहणस्यादोषत्वात् । पत्युर्नारायणावतारत्वेनतत्रततसांनिध्यविशेषात्तद्ग्रहोयुक्तः । उपेन्द्रावतारत्वादामस्य इन्द्रस्यतदप्रजत्वात्तदुत्तपायसाशनंगौरवतःस्वान्नत्वाच्चभोजनंयुक्तमितिमन्तव्यं ॥ शि० अल्पः अतिसूक्ष्मः वायुरित्यर्थः । आहारोयस्यास्तां ॥ २१ ॥ वधाय स्ववधार्थमेव । नतुतेनकिंचित्प्रयोजनमितिभावः ॥ २३ ॥ इत्येकोनविंशः सर्गः ॥ १९ ॥

ति० परिवृतां राक्षसीभिरितिशेषः ॥ १ ॥ ती० वस्तुतस्तु पुत्रसमभृत्यदर्शनविषयेभयादिकंनोचितमितिभावः । ति० नेतु-

[पा०] १ ङ. झ. ट. तमोग्रस्तेन्दु. २ क. ध. च.—ट. माकुलामिवपद्मिनीं. ३ क. घ. शोकाकुलां. ४ ख. ङ. झ. ट. गृहीतांलाडितां. क. गृहीतांबलिनास्तंभे. ५.क. सीतां, ६ ङ. झ. ञ. ट. परिवृतां.

कामये त्वां विशालाक्षि बहुमन्यस्व मां प्रिये ॥ सर्वाङ्गगुणसंपन्ने सर्वलोकमनोहरे ॥ ३ ॥
नेह केचिन्मनुष्या वा राक्षसाः कामरूपिणः ॥ व्यपसर्पतु ते सीते भयं मत्तः समुत्थितम् ॥ ४ ॥
स्वधर्मो रक्षसां भीरु सर्वथैव न संशयः ॥ गमनं वा परस्त्रीणां हरणं संप्रमथ्य वा ॥ ५ ॥
एवं चैतदकामां तु नं त्वां स्प्रक्ष्यामि मैथिलि ॥ कामं कामः शरीरे मे यथाकामं प्रवर्तताम् ॥६॥
देवि नेह भयं कार्यं मयि विश्वसिहि प्रिये ॥ प्रणयस्व च तत्त्वेन मैवं भूः शोकलालसा ॥ ७ ॥
एकवेणी धराशय्या ध्यानं मलिनमम्बरम् ॥ अस्थानेऽप्युपवासश्च नैतान्यौपयिकानि ते ॥ ८ ॥
विचित्राणि च माल्यानि चन्दनान्यगुरूणि च ॥ विविधानि च वासांसि दिव्यान्याभरणानि च ॥९॥
महार्हाणि च पानानि शयनान्यासनानि च ॥ गीतं नृत्तं च वाद्यं च लभ मां प्राप्य मैथिलि॥१०॥
स्त्रीरत्नमपि मैवं भूः कुरु गात्रेषु भूषणम् ॥ मां प्राप्य हि कथं नु स्यास्त्वमनर्हा सुविग्रहे ॥ ११ ॥
इदं ते चारु संजातं यौवनं व्यतिवर्तते ॥ यदतीतं पुनर्नैति स्रोतः शीघ्रमपामिव ॥ १२ ॥
त्वां कृत्वोपरतो मन्ये रूपकर्ता स विश्वसृक् ॥ न हि रूपोपमा त्वन्या तवास्ति शुभदर्शने ॥१३॥

र्शनं अदृश्यत्वं ॥ २ ॥ मां दृष्ट्वा भीतिर्न कर्तव्येत्याह —कामय इति ॥ ३ ॥ अन्ये च भयहेतवोत्र न सन्तीत्याह—नेहेति ॥ ४ ॥ परदारेच्छा दोष इत्याशङ्क्याह—स्वधर्म इति ॥ संप्रमथ्य बलात्कृत्य ॥५॥ कामं अत्यन्तं । यथाकामं यथेच्छं ॥ ६ ॥ प्रणयस्व स्नेहंकुरु ॥ ७ ॥ एकवेणी असीमन्ततवेणी । धराशय्या भूशयनं । औपयिकानि युक्तानि । " युक्तमौपयिकं " इत्यमरः ॥ ८—१० ॥ मां प्राप्य हीति । हिः पादपूरणे अप्यर्थो वा । हे सुविग्रहे मां प्राप्यापि कथमनर्हा स्याः ॥ ११—१२ ॥ उपरतः निवृत्तः । अत्रेतिकरणं द्रष्टव्यं । उत्तरोत्तरं सातिशयं रूपं सिसृक्षुर्विधाता त्वां सृष्ट्वा इतः परं सातिशयं रूपं स्रष्टुं न शक्यत इति धिया सृष्टेरुपरत इति मन्य

मिच्छसि तत्किमितिशेषः ॥ २ ॥ **ती०** वस्तुतस्तु त्वांकामये ईश्वरीत्वेनेतिशेषः । अतोमांबहुमन्यस्व ॥ ३ ॥ **ती०** नेहेति । मनुष्याराक्षसावा । त्वद्भयकर्तारइतिशेषः । वस्तुतस्तु सर्वेश्वर्यास्तवनकुत्रापिभयशङ्केतिभावः । **ति०** किमिदानींमदतिरिक्तपुरुषान्तरजंतवभयं उतममस्पर्शेधर्महानिजं । नाद्यइत्याह—**नेहेति** । मत्तः मदागमनात्समुत्थितं पुरुषान्तरागमनसंभावनयाजातं भयं व्यपसर्पतु । अन्येषामभावात् ॥४॥ **ति०** नान्त्यइत्याह—स्वधर्मइति । तंस्वधर्ममाह—गमनंवेति । आनुकूल्यंसंपाद्येतिशेषः । संप्रमथ्य बलात्कृत्य । एवंस्वधर्मत्व.ममनाधर्मः । बलात्कारेचास्वतन्त्रत्वात्स्त्रियाअपिनदोषइतिभावः ॥ ५ ॥ **ती०** यद्यपिपरदाराभिमर्शःस्वधर्मः तथापि नाहंत्वाम मयमानांस्प्रक्ष्यामीत्याह—**स्वधर्मइत्यादिश्लोकद्वयेन** । कामं अत्यर्थं । यथाकामं यथेच्छं । मेशरीरेकामः । तवेतिशेषः । मयितवेच्छाप्रवर्ततामितिभावः । स्वधर्मइत्यादिश्लोकद्वयस्यवास्तवार्थस्तु—कामुकस्त्वं नविश्वसनीयइत्यतआह—स्वधर्मइत्यादि । यद्यपिरक्षसांपरदाराहरणादि स्वधर्मःस्वभावः । मेशरीरेकामं अत्यर्थं । यथाकामं यथेच्छं कामःप्रवर्ततांनाम मन्मथविकारोस्तुनाम । तथाप्येतत्सर्वंममेष्टदेवतायांत्वयिनघटतइतिशेषः । अतएव अकामां मयि भृत्यत्वकामनारहितां । यद्वा अकामां विष्णुकामांत्वां । नस्प्रक्ष्यामि त्वदाज्ञांविना पूजांकर्तुमपिबिभेमीतिशेषः ॥ **ति०** एवंच एवमपि । बलात्कारपक्षे तवममचदोषाभावेपितस्यपक्षस्यरसाभाससंपादकत्वात् । अतएवमकामां अनेनप्रकारेणमयिकामरहितांत्वां मद्भिन्नेच्छावतींच । नच नतु । स्प्रक्ष्यामि । एवंचैतदकामांत्वामितिपाठे एतत् रक्षोधर्मत्वं । एवंच एवमेव मदुक्तरीतिकमेव । तथाप्युक्तप्रकारेण त्वामकामां नस्प्रक्ष्यामीत्यर्थः । नन्वेवंसतिदुस्सहाकामपीडातवस्यात्तत्राह—**काममिति** । कामः मन्मथः । यथाकामं यथेच्छं । कामं तद्विषयेच्छां । प्रवर्ततां प्रवर्तयत्वित्यर्थः ॥ ६ ॥ **ती०** वस्तुतस्तु विचित्राणीत्यादिश्लोकद्वयमेकंवाक्यं । मांप्राप्य भृत्यत्वेनेतिशेषः । माल्यादीनिलभ प्राप्नुहीतिसंबन्धः ॥ ९—१० ॥ **ती०** वस्तुतस्तु त्वत्पूजाक्षमंमदीयमायुर्व्यर्थंगच्छतीतिखियति—**इदंतइति** । ते तवभृत्यस्य । ममेतिशेषः । यौवनं दार्ढ्यावस्था । यत् यतः । भृत्यस्यममायुः व्यर्थंगच्छति ।

[पा०] १ ख. ङ. च. ज.—ट. सर्वदैव. २ च. ज. ञ. चैवमकामां. ङ. झ. ट. चैवमकामांत्वां. घ. त्वेतदकामां. ३ ङ. झ. ट. नच. ४ ङ. अधश्शय्या. ५ क. ख. घ. यानानिशयनानिच. ६ क.—ट. स्त्रीरत्नमसि. ७ घ.—ट. कथंवा. क. कथंस्यास्त्वमनाहारा. ८ ङ.—ट. स्रोतस्विनामिव. ९ ख. ङ. झ. ट. विश्वकृत्. १० क. ङ.—ट. त्वन्या.

त्वां समासाद्य वैदेहि रूपयौवनशालिनीम् ॥ कः[1] पुमानतिवर्तेत साक्षादपि पितामहः ॥ १४ ॥
यद्यत्पश्यामि ते गात्रं शीतांशुसदृशानने[2] ॥ तस्मिंस्तस्मिन्पृथुश्रोणि चक्षुर्मम निबध्यते ॥ १५ ॥
भव मैथिलि भार्या मे मोहमेनं[3] विसर्जय[4] ॥ बह्वीनामुत्तमस्त्रीणामाहृतानामितस्ततः ॥
सर्वासामेव भद्रं ते ममाग्रमहिषी भव ॥ १६ ॥
लोकेभ्यो यानि रत्नानि संप्रमथ्याहृतानि वै[5] ॥ तानि[6] मे भीरु सर्वाणि राज्यं चैतदहं च ते ॥१७॥
विजित्य पृथिवीं सर्वां नानानगरमालिनीम् ॥ जनकाय प्रदास्यामि तव हेतोर्विलासिनि ॥ १८ ॥
नेह[7] पश्यामि लोकेऽन्यं यो मे प्रतिबलो भवेत् ॥ पश्य मे सुमहद्वीर्यमप्रतिद्वन्द्वमाहवे ॥ १९ ॥
असकृत्संयुगे भग्ना मया विमृदितध्वजाः ॥ अशक्ताः प्रत्यनीकेषु स्थातुं मम सुरासुराः ॥ २० ॥
इच्छया क्रियतामद्य प्रतिकर्म[8] तवोत्तमम् ॥ २१ ॥
संप्रभाण्यवसज्यन्तां[9] तवाङ्गे भूषणानि[10] च ॥ साधु पश्यामि ते रूपं संयुक्तं[11] प्रतिकर्मणा ॥ २२ ॥
प्रतिकर्माभिसंयुक्ता दाक्षिण्येन[12] वरानने ॥ भुङ्क्ष्व भोगान्यथाकामं पिब भीरु रमस्व च ॥ २३ ॥
यथेष्टं च प्रयच्छ त्वं पृथिवीं वा धनानि च ॥ ललस्व[13] मयि विस्रब्धा धृष्टमाज्ञापयस्व च ॥
मत्प्रसादाल्ललन्त्याश्च[14] ललन्तां[15] बान्धवास्तव[16] ॥ २४ ॥
ऋद्धिं ममानुपश्य त्वं श्रियं भद्रे यशश्च[17] मे ॥ किं करिष्यसि रामेण सुभगे चीरवाससा[18] ॥ २५ ॥
निक्षिप्तविजयो रामो गतश्रीर्वनगोचरः ॥ व्रती स्थण्डिलशायी च शङ्के जीवति वा न वा ॥ २६ ॥

इत्यर्थः ॥ १३ ॥ कः अतिवर्तेत न कोपीत्यर्थः ॥ १४—१९ ॥ विमृदितध्वजाः भग्नध्वजाः । प्रत्यनीकेषु शत्रुषु मध्ये ॥ २० ॥ प्रतिकर्म अलंकारः । "प्रतिकर्म प्रसाधनं" इत्यमरः ॥ २१ ॥ अवसज्यन्तां अर्प्यन्तां । प्रतिकर्मणा संयुक्तं पश्यामि पश्येयं ॥ २२ ॥ दाक्षिण्येन सरलत्वेन । भुङ्क्ष्व अनुभव । "दक्षिणे सरलोदारौ" इत्यमरः ॥२३॥ ललस्व प्रीतिं कुरु । "ल ईप्सायाम्" इति धातुः ॥ २४ ॥ एवमात्मानं प्रशस्य रामं निन्दति—किं करिष्यसीत्यादिना ॥२५॥ निक्षिप्तविजयः त्यक्तविजय इत्यर्थः ।

अतोमम तवपूजार्थमनुज्ञांदेहीतिशेषः ॥ १२ ॥ **ति०** कोनातिवर्तेत क्षुभ्येतेत्यर्थः । कःपुमानतिवर्तेतेतिपाठे कामवशतामतिक्रम्य कोवर्तेतेत्यर्थः ॥ **ती०** वस्तुतस्तु मदाराधनेतवबुद्धिःकथंस्यादतआह—त्वामिति । त्वां लक्ष्मीं । "सीतालक्ष्मीर्भवान्विष्णुः" इतिवक्ष्यमाणत्वात् । समासाद्य साक्षात्पितामहोपिनातिवर्तेत अनाराधितुंनशक्नुयात् । पुमांस्तुकोवाऽतिवर्तेतेत्यर्थः ॥ १४ ॥ **ती०** यद्यदिति । गात्रं अवयवविशेषं । तस्मिंस्तस्मिन्नवयवविशेषेचक्षुर्निबध्यते । इष्टदेवतायास्तवदर्शनस्यमुक्तिसाधकत्वादिति भावः ॥ १५ ॥ **ती०** वस्तुतस्तु मैथिलि भार्या भयाक्रान्ता आर्याश्रेष्ठाभव । एनंमोहं मयिशत्रुत्वशङ्कां । विसर्जय । मेमम उत्तमस्त्रीणांममयाअग्रमहिषीमन्दोदरी तस्याश्चममचभव ईश्वरोतिशेषः । **शि०** हे भवमैथिलि भवति भावयति नितरां स्वपतिं चिन्तयति सैवमैथिली । तत्संबोधनं । अग्रस्यसर्वोत्कृष्टस्यराज्ञोमहिषीत्वं ममबह्वीनामुत्तमस्त्रीणां भार्या सेव्याभव । अतएव तं वियमानं मेमोहं वैचित्यं । विसर्जय त्याजय ॥१६॥ **ती०** लोकेभ्यइत्यस्यवास्तवार्थस्तु इष्टदेवतायैदेव्यै रावणस्त्वात्मात्मीयसमर्पणं करोति—**लोकेभ्यइतिश्लोकद्वयेन** । अहमित्यनेनात्मसमर्पणं । रत्नानीत्यादिनाऽऽत्मीयसमर्पणमिति ज्ञेयं ॥ १७ ॥ **ति०** इच्छयेति । वस्तुतस्तु मां लक्ष्मींसंपदमित्यर्थः ॥२१॥ **ती०** वस्तुतस्तु मत्प्रसादात् मयिप्रसादोऽनुग्रहः । तस्मात् । तवललन्त्याः रमन्त्याः सत्याः बान्धवाश्चरमन्तामितिसंबन्धः ॥ २४ ॥ **रामानु०** ऋद्धिं संपदं । श्रियं भां ॥ २५ ॥ **ती०** ऋद्धिमित्यादीनांवास्तवार्थस्तु—सरामाऽहंतेअखिलसंपत्समृद्धिंददामि । गांरामेणसहसंयोजयेत्याशङ्क्यनाहंसंपदाद्यर्थी किंतुमोक्षकामी । अतो यावन्मोक्षंत्वत्पादाब्जंनत्यजामीत्यभिप्रायेणाह—**ऋद्धिममेत्यादिश्लोकचतुष्टयेन** । हेसुभगे ममऋद्ध्यादिकंपश्य । निक्षिप्तविजयः स्वतस्सिद्धविजयइत्यर्थः । वनगोचरः वनंजलंगोचरंनिवासस्थानंयस्यसः । नारायणइत्यर्थः । अतएवगतश्रीः गताप्राप्ता

[पा०] १ ङ. झ. ट. कःपुनर्नातिवर्तेत. घ. च. छ. ञ. कःपुमान्नातिवर्तेत. २ ख. शीतांशुसमदर्शने. ३ क. मेभार्या. ४ च. ज. झ. ट. मेतं. ५ ख. झ. ञ. ट. संप्रमथ्याहृतानिमे. क. ङ.—ज. संप्रमथ्यहृतानिमे. ६ ख. घ. ङ. झ. ट. तानिते. ७ झ. ट. चैवददामिते. ८ च. छ. ज. ञ. नैव. ९ क. ङ. च. ज. ट. इच्छमां. १० ङ. छ. झ. ञ. ट. सुप्रभाण्यव. च. छ. सुप्रभाण्यपि. ११ ङ.—ट. भूषणानिहि. १२ ङ.—ट. सुयुक्तं. १३ घ. रमस्व. १४ क. घ. मत्प्रभावात्. १५ ङ. ज. झ. ञ. ललतांबान्धवस्तव. १६ ङ.—ट. यशस्विनि. १७ ङ. झ. ट. चीरवासिना.

न हि वैदेहि रामस्त्वां द्रष्टुं वाऽप्युपलप्स्यते ॥ पुरोबलाकैरसितैर्मेघैर्ज्योत्स्नामिवावृताम् ॥ २७ ॥
न चापि मम हस्तात्त्वां प्राप्तुमर्हति राघवः ॥ हिरण्यकशिपुः कीर्तिमिन्द्रहस्तगतामिव ॥ २८ ॥
चारुस्मिते चारुदति चारुनेत्रे विलासिनि ॥ मनो हरसि मे भीरु सुपर्णः पन्नगं यथा ॥ २९ ॥
क्लिष्टकौशेयवसनां तन्वीमप्यनलङ्कृताम् ॥ त्वां दृष्ट्वा स्वेषु दारेषु रतिं नोपलभाम्यहम् ॥ ३० ॥
अन्तःपुरनिवासिन्यः स्त्रियः सर्वगुणान्विताः ॥ यावत्यो मम सर्वासामैश्वर्यं कुरु जानकि ॥ ३१ ॥
मम ह्यसितकेशान्ते त्रैलोक्यप्रवराः स्त्रियः ॥ तास्त्वां परिचरिष्यन्ति श्रियमप्सरसो यथा ॥ ३२ ॥
यानि वैश्रवणे सुभ्रु रत्नानि च धनानि च ॥ तानि लोकांश्च सुश्रोणि मां च भुङ्क्ष्व यथासुखम् ॥३३॥
न रामस्तपसा देवि न बलेन न विक्रमैः ॥ न धनेन मया तुल्यस्तेजसा यशसाऽपि वा ॥ ३४ ॥

पिब विहर रमस्व भुङ्क्ष्व भोगान्धननिचयं प्रदिशामि मेदिनीं च ॥
मयि लल ललने यथासुखं त्वं त्वयि च समेत्य लल्लन्तु बान्धवास्ते ॥ ३५ ॥
कुसुमिततरुजालसंततानि भ्रमरयुतानि समुद्रतीरजानि ॥
कनकविमलहारभूषिताङ्गी विहर मया सह भीरु काननानि ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे विंशः सर्गः ॥ २० ॥

स्थण्डिलशायी भूतलशायी ॥२६॥ वाशब्दोऽवधारणे । द्रष्टुमपि नोपलप्स्यत एवेत्यर्थः । दर्शनमात्रफलमपि दर्शनं नप्राप्स्यसीत्यर्थः । पुरोऽग्रे बलाका येषां ते पुरोबलाकाः तैः । अनेन मेघानामतिविपुलतोच्यते । महामेघेष्वेव बलाकासंचारवर्णनात् ॥ २७ ॥ हिरण्यकशिपुः कीर्तिमिन्द्रहस्तगतामिवेति वैधर्म्यदृष्टान्तः । अत्र कीर्तिशब्देन भार्या लक्ष्यते । हिरण्यकशिपुरिन्द्रहस्तगतां भार्यां पुनः प्राप्तवानित्येतच्छ्रीभागवते प्रसिद्धम् । " व्यलुम्पन्राजशिबिरममरा राज्यकाङ्क्षिणः । इन्द्रस्तु राजमहिषीं मातरं मम चाग्रहीत् " इत्यादिप्रह्लादवचनात् ॥ २८—३० ॥ ऐश्वर्यं अन्तःपुरैश्वर्यं । स्वामिनीत्वं कुरु प्राप्नुहीत्यर्थः ॥ ३१—३२ ॥ भुङ्क्ष्व स्वाधीनं कुरु ॥ ३३—३४ ॥ पिब मद्यमिति शेषः । विहर संचर । विहारशब्दस्य संचारेऽपि प्रयोगात् ॥ ३५—३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने विंशः सर्गः ॥ २० ॥

श्रीलक्ष्मीयेन । अतएव प्रतिभक्तसंरक्षणव्रतशीलः । अतएव पितृवाक्यपरिपालनायस्थण्डिलशायीयोरामः । अचीरवाससेति च्छेदः । पीतांबरधारिणेत्यर्थः । एतादृशेनतेनरामेणसहवात्वं इदानींविद्यमानंस्वार्थापेक्षयानकिमपिकरिष्यसीति शङ्के मन्ये । अतोजीवतिमयिसतीतिशेषः । रामस्त्वांद्रष्टुमपिनोपलप्स्यते । नचममहस्तात्त्वांराघवःप्राप्तुमर्हति । मद्बधानन्तरंरामस्त्वांद्रष्टुमप्युपलप्स्यतेप्राप्तुमप्यर्हतीतिभावः ॥ ति० उपलभ्यते व्यत्ययेनश्यन्प्रत्ययः । समर्थोभवतीत्यर्थः । उपलप्स्यतइतिपाठे समर्थोभविष्यतीत्यर्थः ॥ २५—२७ ॥ ती० हिरण्यकशिपुरिति । पुराकिलहिरण्यकशिपोर्भार्यांहृत्वानारदमुखेनप्रार्थितस्तस्मैपुनःप्रादादिति भागवतेकथाऽस्ति । तथाच भार्याहरणमेवकीर्तिहरणमितिभावः ॥ स० हिरण्यकशिपुः इन्द्रहस्तगतां इन्द्राधीनांकीर्तिं । इन्द्रः स्वरिपुहिरण्यकशिपोर्भार्यामपहृतवानितिकीर्तियथानप्राप्तुमर्हति तथेत्यर्थः । इन्द्रनीतांकयाधूंहिरण्यकशिपुःपुनरपीन्द्रंनिर्जित्यानीतवानित्यप्रसिद्धेः । नारदएवतांतस्मैदत्तवानितिभावः ॥ २८ ॥ शि० अनलङ्कृतांत्वां लक्ष्यःखमित्यर्थः । दृष्ट्वा स्वेषुदारेषु । रतिं प्रीतिं । नोपलभामि । अतिदुःखितंमनःक्वापिनप्रवर्ततइत्यर्थः । एतेन रावणस्यदयालुत्वंसूचितं ॥ स० अनलङ्कृतामपित्वांदृष्ट्वा स्वभार्यासुरतिं नोपलभामि नोपलभे । अलङ्कृतांपुनर्दृष्ट्वातत्ररतिंनोपलभइतिकिंवक्तव्यमित्यर्थः । एतेनसौन्दर्यातिशयोद्योत्यते ॥ ती० क्लिष्टकौशेयेत्यस्यवास्तवार्थस्तु त्वांमम देवतांदृष्ट्वा स्वेषुधनेषुदारेषुचरतिंनोपलभामि । इष्टदेवतायास्तवदर्शनमात्रेणानन्दपूर्णोऽहंसर्वतोनिवृत्तोस्मीतिभावः ॥ ३० ॥ ती० नरामइत्यस्यवास्तवार्थस्तु—रामः तपआदिनामयातुल्योनभवति । किंतुनिरवधिकषड्गुणैश्वर्यसंपन्नोभगवाञ्श्रीरामोमत्तोप्यधिकएवेतिभावः ॥३४॥ ती० मयि लल रमस्व । वस्तुतस्तु मयिश्लेषति लल ॥३५॥ ती० मयासह । वस्तुतस्तु सह एकदैव । मया संवर्धितानीतिशेषः । काननानिविहर ॥ ३६ ॥ इतिविंशः सर्गः ॥ २० ॥

[पा०] १ च. द्रष्टुमप्युपलप्स्यते. ङ. झ. ञ. ट. द्रष्टुंवाप्युपलभ्यते. क. ख. द्रष्टुंवाप्युपपद्यते. २ क. सर्वगुणोत्तराः. ३ ङ. झ. ट. प्रवरस्त्रियः. ४ ङ. झ. ट. मया. ५ क. रूपेण, ङ. झ. ट. बलेनच. ६ क. ख. यशसापिच.

एकविंशः सर्गः ॥ २१ ॥

सीतयारावणंप्रति मध्येतृणप्रक्षेपेण साक्षाहितोपदेशपूर्वकं रामगुणानुवर्णनेनतस्मैस्वप्रत्यर्पणेन तेनसहमैत्रीविरोधसंपादनयोः क्रमेणशुभाशुभफलहेतुत्वोक्तिः ॥ १ ॥

तस्य तद्वचनं श्रुत्वा सीता रौद्रस्य रक्षसः ॥ आर्ता दीनस्वरा दीनं प्रत्युवाच शनैर्वचः ॥ १ ॥
दुःखार्ता रुदती सीता वेपमाना तपस्विनी ॥ चिन्तयन्ती वरारोहा पतिमेव पतिव्रता ॥
तृणमन्तरतः कृत्वा प्रत्युवाच शुचिस्मिता ॥ २ ॥
निवर्तय मनो मत्तः स्वजने क्रियतां मनः ॥ न मां प्रार्थयितुं युक्तं सुसिद्धिमिव पापकृत् ॥ ३ ॥
अकार्यं न मया कार्यमेकपत्न्या विगर्हितम् ॥ कुलं संप्राप्तया पुण्यं कुले महति जातया ॥ ४ ॥
एवमुक्त्वा तु वैदेही रावणं तं यशस्विनी ॥ राक्षसं पृष्ठतः कृत्वा भूयो वचनमब्रवीत् ॥ ५ ॥
नाहमौपयिकी भार्या परभार्या सती तव ॥ साधुधर्ममवेक्षस्व साधु साधुव्रतं चर ॥ ६ ॥
यथा तव तथाऽन्येषां दारा रक्ष्या निशाचर ॥ आत्मानमुपमां कृत्वा स्वेषु दारेषु रम्यताम् ॥ ७ ॥
अतुष्टं स्वेषु दारेषु चपलं चलितेन्द्रियम् ॥ नयन्ति निकृतिप्रज्ञं परदाराः पराभवम् ॥ ८ ॥
इह सन्तो न वा सन्ति सतो वा नानुवर्तसे ॥ तथाहि विपरीता ते बुद्धिराचारवर्जिता ॥ ९ ॥

तस्येत्यादि ॥ १ ॥ तृणमिति रावणस्य साक्षात्संभाषणानर्हत्वात्तृणव्यवधानकरणम् । प्रत्युवाचेति पुनरभिधानं वचनप्रकारविशेषकथनार्थं । दुःखार्तायाअपि शुचिस्मितत्वाभिधानं वस्तुस्वभावेन सस्मितवत्प्रतीयमानत्वात् ॥२—३॥एकः पतिर्यस्यास्सा एकपत्नी तया। "नित्यं सपत्न्यादिषु" इति ङीप्॥४॥ पृष्ठतः कृत्वा अनादृत्येर्थः ॥ ५ ॥ सती अहं तव औपयिकी युक्ता भार्या न किन्तु परिहार्या । साधूनां सतां धर्मं साधुधर्मं । साधूनांव्रतं साधुव्रतं। साधु सम्यक् । चर ॥६॥ आत्मानमुपमां कृत्वा यथा तव दारा रक्ष्यास्तथान्येषां दारा रक्ष्याः। तस्मात् स्वेषु दारेषु रम्यतां॥७॥ अतुष्टं अतृप्तं निकृतिप्रज्ञं निकृतौ शाठ्ये प्रज्ञा यस्य तं । पराभवं आयुरैश्वर्यादिक्षयरूपं ॥८॥ इह अतिविशालेपि दुर्जनसंकुले देशे। सन्तः त्वामनर्थान्निवारयन्तः। न सन्ति वा नसन्ति किं सन्त्येव । श्रीविभीषणप्रभृतीनां संभवान्न सन्तीति कथं वक्तुं शक्यं । सतो वा नानुवर्तसे । "तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः"

ति० तृणमन्तरतःकृत्वेति । परपुरुषमुखंनिरीक्ष्यवार्तानकर्तव्येतिमर्यादयावा तृणवदलक्षीकृत्यवा अस्मद्वक्ष्यमाणवचनंतृणसमानमित्यर्थंनलक्षीकरोतीतिबुद्ध्यावा " सश्लाघ्यःसगुणीधन्यःसकुलीनःसबुद्धिमान् । सशूरःसचविक्रान्तोयंत्वंदेविनिरीक्षसे" इत्युक्तकटाक्षपाताद्दोमाभूदितिवा स्वामिनातृणमादायकाकासुरनिरासवदनेनतृणेनैतन्निरासःकार्यइतिवा अचेतनंचेतनंकृत्वासंबोधनेनवाक्यंवदामीतिबुद्ध्यावा आसन्नस्यास्यव्यवधानेनभाव्यमितिबुद्ध्यावा पशुसमानस्यतवेदमेवभोग्यमितिबुद्ध्यावा रामविरोधेन भवान्सानुबन्धोनशिष्यतीतिनिवेदनायवा तृणमध्येस्थापयित्वा ॥ **स०** प्रत्युवाचेतिपूर्वंप्रतिज्ञातं । तत्रेत्थंकारमाह—तृणमन्तरतःकृत्वाप्रत्युवाचेति । अतोनपुनर्वचनं ॥ २ ॥ **ति०** कुद्वोक्त्यामनःपदादेःपौनरुक्त्यंनदोषभाक् । वर्णनीयमयीभावाच्चकवेरपि तादृशंनदोषाय ॥ **स०** युक्तः योग्यः । सिद्धिं मोक्षं ॥ ३ ॥ **स०** एकपत्न्या एकःपतिर्यस्यास्सा रामकृतयज्ञफलभोक्त्री । पतिव्रतेतियावत् । तया । विगर्हितं विनिन्दितं । तर्हि कदापिगर्हितंत्वयानानुष्ठितंकिमित्यतस्तथैवेत्याह—**मयेति** । मयायदकारि तत्सर्वं अं मत्पतिंविष्णुमुद्दिश्यैवाकारीतिविगर्हितंनकार्यमितिभावः ॥ ४ ॥ **ति०** पृष्ठतःकृत्वा परावृत्यस्थित्वा ॥ ५ ॥ **ती०** वस्तुतस्तु अहंतव त्वया भार्या भर्तव्यान किंतुपरभार्या परेणरामेणभार्या भर्तव्या ॥ **स०** औपयिकी उपभोगयोग्यान । तत्रहेतुः **परभार्येति** । तत्रापिनस्वैरिणीत्युदीरयति—**सतीति** । साधूनांसतांधर्मं धर्मशास्त्राद्याशंसितं । अवेक्षस्व । साधुव्रतं साधोः साध्व्याःपतिव्रतायाममव्रतं परित्यजनंचर । " वोतोगुणवचनात् " इति साधुस्साधुः ॥ ६ ॥ **स०** दाराः रक्ष्याः शीलतःसंरक्ष-

[**पा०**] १ क. घ. ङ. छ.—ट. ततःशनैः. २ क. चिन्तयित्वा. ३ च. ज. क्रियतांहितत्. क. ख. घ. झ. प्रीयतांमनः. ४ क. घ. ङ. च. ज.—ट. युक्तस्त्वंसिद्धिमिव. ५ क. अनार्यं. ६ घ. तपस्विनी. ७ घ. ङ. च. ज.—ट. रावणं. ८ घ. ङ. च. ज.—ट. रक्ष्यादाराः. ९ ङ. झ. ट. चपलेन्द्रियं. १० ख. झ. ञ. ट. यथाहि.

वचो मिथ्याप्रणीतात्मा पथ्यमुक्तं विचक्षणैः ॥ राक्षसानामभावाय त्वं वा न प्रतिपद्यसे ॥ १० ॥
अकृतात्मानमासाद्य राजानमनये रतम् ॥ समृद्धानि विनश्यन्ति राष्ट्राणि नगराणि च ॥ ११ ॥
तेक्ष्वं त्वं समासाद्य लङ्का रक्षोघसंकुला ॥ अपराधात्तवैकस्य नचिराद्विनशिष्यति ॥ १२ ॥
स्वकृतैर्हन्यमानस्य रावणादीर्घदर्शिनः ॥ अभिनन्दन्ति भूतानि विनाशे पापकर्मणः ॥ १३ ॥
एवं त्वां पापकर्माणं वक्ष्यन्ति निकृता जनाः ॥ दिष्ट्यैतद्व्यसनं प्राप्तो रौद्र इत्येव हर्षिताः ॥ १४ ॥
शक्या लोभयितुं नाहमैश्वर्येण धनेन वा ॥ अनन्या राघवेणाहं भास्करेण प्रभा यथा ॥ १५ ॥
उपधाय भुजं तस्य लोकनाथस्य सत्कृतम् ॥ कथं नामोपधास्यामि भुजमन्यस्य कस्यचित् ॥ १६ ॥
अहमौपयिकी भार्या तस्यैव वसुधापतेः ॥ व्रतस्नातस्य धीरस्य विद्येव विदितात्मनः ॥ १७ ॥

इत्युक्तरीत्या प्रणिपातमन्तरेण न ते उपदिशन्ति । त्वं च तत्पादेषु कदाचिदपि न प्रणतवानसि । कथमिदं भवती जानातीत्याशङ्क्याह—तथाहीति । तथाहि विपरीता ते बुद्धिः तव बुद्धिवैपरीत्यमेव तव शिष्टाननुवर्तनं सूचयतीत्यर्थः । परबुद्धेरप्रत्यक्षत्वात् कथं मदीया बुद्धिस्त्वया ज्ञायत इत्यत्राह—आचारवर्जितेति । आचारवर्जिता तव दुरनुष्ठानमेव तव बुद्धिं द्योतयतीति भावः ॥ ९ ॥ वच इति पूर्वश्लोके रावणस्याभाव उपन्यस्तः । अनेन राक्षसाभावपक्ष उपन्यस्यते । मिथ्याप्रणीतात्मा मिथ्यास्निग्धात्मा । स्नेहीति भावयन्निवेति यावत् । त्वं विचक्षणैस्साधुभिरुक्तं पथ्यं हितं वचः राक्षसानामभावाय न प्रतिपद्यसे नाङ्गीकरोषि वा । राक्षसेषु स्नेहं भावयन् तद्विनाशमेव हृदि कृत्वा साधु वचनं न शृणोषीत्यर्थः ॥ १०—१२ ॥ रावणादीर्घदर्शिन इत्यत्र रावणेति संबुद्धिः ॥ १३ ॥ निकृताः त्वया वञ्चिताः ॥ १४ ॥ शक्येति । अनेन रावणोक्तप्रलोभनानामुत्तरमुच्यते । ऐश्वर्येण अन्तःपुरस्त्रीणामीश्वरत्वेन । धनेन आभरणादिना वा । लोभयितुं वञ्चयितुं । अहं न शक्या । अत्र हेतुमाह—अनन्येति । अहं नित्यानपायिनी । राघवेण रघुकुलावतीर्णेन विष्णुना । अनन्या अविभक्ता । यत्र यत्र कुले विष्णुरवतरति तत्र तत्रावतीर्णा लक्ष्मीरित्यर्थः । तृतीयया तत्परतन्त्रा चास्मीति द्योत्यते । न केवलं तस्य परतन्त्राहं प्रत्युत तस्याप्यतिशयावहेति दृष्टान्तेन द्योतयति—भास्करेणेति । प्रभा हि भास्करस्याप्यतिशयमावहति तथैव हि मारीचो भवन्तं प्रति निवेदितवान् । "अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा" इति । किं तद्धितवचनमपि मोहेन विस्मृतोसीति तत्त्वमाह ॥ १५ ॥ लोकनाथस्य सर्वैर्ब्रह्मादिदेवगणैः स्वस्वपदप्राप्तये नाथ्यमानस्य याच्यमानस्य । "नाथृ याच्ञायाम्" इति धातुः । तस्य रामस्य । सत्कृतं भुजं दक्षिणं भुजमित्यर्थः । उपधाय उपधानीकृत्य । तेन तत्परिष्वक्तत्वं गम्यते । एवं श्लाघिताहं अन्यस्य ततो भोगं याचमानस्य कस्यचिदनामधेयस्य क्षुद्रस्य त्वादृशः । भुजं असत्कृतं कथं नामोपधास्यामि । नकथंचिदपीत्यर्थः ॥ १६ ॥ अहं तु शीलवयोवृत्ता तस्यैव तुल्यशीलवयोवृत्तस्य वसुधापतेः औपयिकी उचिता भार्या । "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति भूमिनाथस्याहं लक्ष्मीदेव्युचितेति हृदयम् । कथमिव । व्रतस्नातस्य वेदव्रतैः स्नातस्य । धीरस्य धीमतः ब्राह्मणस्य । विदितात्मनः आत्मज्ञानवतः । विद्येव योगाभ्यासरूपविद्येव ।

णीयाः। आत्मानं स्वं। उपमां निदर्शनं । स्वदारधर्षणंदुर्मर्षणममयथा तथाऽन्येषामित्यत्र ॥७॥ स०भुजमित्यनेन मत्परिरंभणकामनयातवभुजानांछेदः " येभैष्म्याःपरिरंभणंचकमिरेतेषांभुजांश्चिच्छिदुः" इत्यादुक्तेःभावीतिद्योतयति ॥१६॥ ति० औपयिकी योग्या । व्रतस्नातस्य ब्रह्मचर्यव्रतपूर्वंकंकृतसमावर्तनस्य । यथाशास्त्रंमत्पाणिग्रहणंकृतवतः । विदितात्मनः ज्ञातस्वतत्वस्यज्ञातपुरुषार्थसाधनस्यचतस्यैवार्हयोग्या । विप्रस्य विद्येव ब्रह्मविद्येव । ब्रह्मविद्यायथा ब्राह्मणस्यैवासाधारणंस्वंन्यायप्राप्तं तद्वत् । संन्यासेतस्यैवाधिकाराद्ब्रह्मविद्यायांब्राह्मणस्यैवाधिकारइतिभावः । अन्येतु विप्रपदंत्रैवर्णिकपरं । त्रैवर्णिकस्यैवब्रह्मविद्यायामधिकारः । अतएव धीरस्येतिक्वचित्पाठइत्याहुः ॥ स० विदितात्मनः अवगतभगवत्तत्वस्य । व्रतस्नातस्य ब्रह्मचर्यादिव्रतसंकल्पपूर्वंस्नातस्य । अभिषिक्तस्यविप्रस्य विद्येव उपनिषदादिविद्येव । विप्रस्येत्यनेनोत्तरवर्णद्वयापेक्षयापृथग्जातेरेवमुख्याधिकारः यथाऽहंतथामुख्यातस्यौपयि.

[पा०] १ क. घ. विविधानिच. २ ख. ङ. झ. ट. तथैव. ३ ङ. झ. ट. यथाप्रभा. ४ ख. लोककान्तस्य. ५ ङ. झ. ट. तस्यैवचधरापतेः. ६ ख. च. छ. ञ. विप्रस्य. घ. वीरस्य. ङ. झ. ट. विद्येवविप्रस्य.

साधु रावण रामेण मां समानय दुःखिताम् ॥ वने वाशितया सार्धं करेण्वेव गजाधिपम् ॥ १८ ॥
मित्रमौपयिकं कर्तुं रामः स्थानं परीप्सता ॥ वधं चानिच्छता घोरं त्वयाऽसौ पुरुषर्षभः ॥
विदितः[1] स हि धर्मज्ञः शरणागतवत्सलः ॥ १९ ॥
तेन मैत्री भवतु ते यदि जीवितुमिच्छसि ॥ प्रसादयस्व त्वं चैनं शरणागतवत्सलम् ॥ २० ॥
मां चास्मै प्रयतो भूत्वा निर्यातयितुमर्हसि[2] ॥ २१ ॥
एवं हि ते भवेत्स्वस्ति संप्रदाय रघूत्तमे ॥ अन्यथा त्वं हि कुर्वाणो[3] वधं प्राप्स्यसि रावण ॥ २२ ॥
वज्रमुत्सृष्टं वर्जयेद्वज्रमुत्सृष्टं वर्जयेदन्तकश्चिरम्[4] ॥ त्वद्विधं तु न संक्रुद्धो लोकनाथः स राघवः ॥ २३ ॥
रामस्य धनुषः शब्दं श्रोष्यसि त्वं महास्वनम् ॥ शतक्रतुविसृष्टस्य निर्घोषमशनेरिव ॥ २४ ॥

द्येव ॥ १७ ॥ पथिचोरं पानीययाचकवद्रावणमर्थयते—साध्विति ॥ साधु रावण मद्वियोगेन त्वत्कौर्यमधिकंजातमितिभावः । एवमुत्कटक्रौर्यं प्रति याचनात् स्वस्यातिशयोव्यज्यते । रामेण सर्वाङ्गसुन्दरेण मां तस्यानन्यार्हां तद्वियोगे जीवितं धारयितुमशक्तां। नच सीतेत्यादि । समानय संगमय । तत्र हेतुः—दुःखितामिति । करेण्वा गजवध्वा । वाशितया यौवनं गतया । "वाशितायुवतिःप्रोक्ता कलभःकरिपोतकः" इतिवचनात् । यद्वा वासितयेतिपाठः । वने वासितया बद्धया । अत्र विभक्तिव्यत्यासःकार्यः । वने वासितां करेणुं गजाधिपेनेति । वस्तुतस्तु यथान्यास एवान्वेति । रामेणसंगमनंनाम रामाह्वानं । नहि पुनरपि रामस्थानं तेन नेतुमीष्टे किंत्वत्र राममाहूय समर्पणमेव । अतएव करेण्वा गजाधिपमित्युक्तं ॥ १८ ॥ एवं रावणे जननीत्वप्रतिपत्तिं विहाय कानिचिदसंगतानि जल्पति देवी खिन्ना सती कोयमस्य स्वभावः कथमस्य कोप्युपदेष्टा सेत्स्यतीति इह सन्तो न वासन्तीत्यादिना विचिन्त्य दयावती स्वयमेवोपदिशति मातृत्वप्रयुक्तवात्सल्येन—मित्रमिति ॥ रामं शरणं गच्छेत्युक्ते तन्न रावणस्सहेत दुर्मानितया आलसद्बुद्ध्यनुसारेणमित्रमित्याह । किंच शरणागतं स्वस्याधीनं मन्यते देवी देवश्च । अतएव रामो वक्ष्यति । "मित्रभावेन संप्राप्तं न त्यजेयं कथंचन" इति । इमं च तथाह । मित्रमिति । रामः मित्रं कर्तुं युक्तमित्यर्थः । मित्रशब्दापेक्षया औपयिकमिति नपुंसकनिर्देशः । स्थानंपरीप्सता मार्गचोरस्यापि भूमौ पदानि स्थापयित्वा चौर्यं कर्तव्यं । तवापि यदि स्थानमभीप्सितं तर्हि तमेव भजेत्यर्थः । शरणागतिदैन्यादपि मरणमेववरमितियदिमन्यसे तदानीं तज्जनंकर्तव्यमित्याह—वधं चानिच्छता घोरं तव सम्यङ्मरणं न दास्यति । त्वां संस्थाप्य त्वत्समक्षं त्वत्सन्तानजान् हिंसित्वा ततस्ते चित्रवधं करिष्यति तं यदि नेच्छसि तदा प्रत्तव्य इत्यर्थः । त्वया तत्प्रतीकारावलोकनेन त्वयाऽवश्यं तच्छरणागतिः कर्तव्या । एवं स रक्षक इत्यत्र किं प्रमाणं तत्राह—असौ निरन्तरप्रत्ययेनास्या रामः प्रत्यक्ष इवभासते । रावणस्यापि मायामृगानुसरणसमये तदाकारदर्शनजभयेन "वृक्षे वृक्षे च पश्यामि" इत्युक्तरीत्या पुरःस्थित इव भासते । पुरुषर्षभः मत्कृतापराधेन कथं मामङ्गीकरिष्यतीत्येवं त्वया नचिन्तनीयं । आनुकूल्यलेशे सति सर्वमपराधं विस्मरिष्यति पुरुषधौरेयत्वात् । मित्रकरणप्रकारमाह –प्रसादयस्वेति । त्वं चेत्यनेनाहमपि प्रसादयिष्यामीति सिद्धम् । प्रयतो भूत्वा मनःकालुष्यंत्यक्त्वेत्यर्थः । निर्यातयितुं प्रत्यर्पयितुं ॥ १९—२१ ॥ संप्रदाय स्थितायेति शेषः ॥ २२ ॥ उत्सृष्टं इन्द्रमुक्तं वज्रं अन्तकश्च त्वद्विधं वर्जयेत् । राघवस्त्वद्विधं न वर्जयेदिति संबन्धः ॥ २३ ॥ महास्वनं महानादं । नादो नाम स्वरावयवविशेषः

कीर्तिसूचयति ॥ १७ ॥ **ति०** करेण्वासाकंगजाधिपमिव । उपमानोपमेयवाक्ययोर्वैषम्यंतुकुद्धविरहिण्युक्तित्वान्नदोषावहं । **स०** यद्यपिनीधातुर्द्विकर्मकइतिरामंमांसमानयेतिवक्तव्यं । तथापि रामेणेतितृतीयया सहयोगःसार्वकालिकः त्वयासंमेलनंतु लोकदृष्ट्येतिसूचयितुं । गजाधिपेनकरिणीमिवेतिदार्ष्टान्तिकानुगुण्यार्थंवक्तव्यं । तथापीत्थमुक्त्यातद्दांपत्यमकृत्रिमितिद्योतयति ॥ १८ ॥

[**पा०**] १ च. छ. ज. ञ. विदितस्तवधर्मात्मा. ङ. ञ. ट. विदितःसर्वधर्मज्ञः. क. विदितस्सहिधर्मात्मा. २ क. ख. ग. निर्यापयितुं. ३ ङ. ञ. ट. कुर्वाणःपरांप्राप्स्यतिचापदं. ४ क. ग. ङ.—ट. नतु.

इह शीघ्रं सुपर्वाणो ज्वलितास्या इवोरगाः ॥ इषवो निपतिष्यन्ति रामलक्ष्मणलक्षणाः ॥ २५ ॥
रक्षांसि परिनिघ्नन्तः पुर्यामस्यां समन्ततः ॥ असंपातं करिष्यन्ति पतन्तः कङ्कवाससः ॥ २६ ॥
राक्षसेन्द्रमहासर्पान्स रामगरुडो महान् ॥ उद्धरिष्यति वेगेन वैनतेय इवोरगान् ॥ २७ ॥
अपनेष्यति मां भर्ता त्वत्तः शीघ्रमरिन्दमः ॥ असुरेभ्यः श्रियं दीप्तां विष्णुस्त्रिभिरिव क्रमैः ॥२८॥
जनस्थाने हतस्थाने निहते रक्षसां बले ॥ अशक्तेन त्वया रक्षः कृतमेतदसाधु वै ॥ २९ ॥
आश्रमं तु तयोः शून्यं प्रविश्य नरसिंहयोः ॥ गोचरं गतयोर्भ्रात्रोरपनीता त्वयाऽधम ॥ ३० ॥
न हि गन्धमुपाघ्राय रामलक्ष्मणयोस्त्वया ॥ शक्यं संदर्शने स्थातुं शुना शार्दूलयोरिव ॥ ३१ ॥
तस्य ते विग्रहे ताभ्यां युगग्रहणमस्थिरम् ॥ वृत्रस्येवेन्द्रबाहुभ्यां बाहोरेकस्य निग्रहः ॥ ३२ ॥
क्षिप्रं तव स नाथो मे रामः सौमित्रिणा सह ॥ तोयमल्पमिवादित्यः प्राणानादास्यते शरैः ॥३३॥
गिरिं कुबेरस्य गतोपधाय वा सभां गतो वा वरुणस्य राज्ञः ॥
असंशयं दाशरथेर्न मोक्ष्यसे महाद्रुमः कालहतोशनेरिव ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकविंशः सर्गः ॥ २१ ॥

॥ २४ ॥ रामलक्ष्मणलक्षणाः रामलक्ष्मणनामाङ्काः ॥ २५ ॥ असंपातं अनवकाशं ॥ २६ ॥ राक्षसेन्द्रमहासर्पानिति रूपकोक्तमेवोपमयाप्याह—वैनतेय इति ॥ २७ ॥ न चापि मम हस्तात्त्वां प्रामुमर्हतीत्युक्तस्योत्तरमाह—अपनेष्यतीति ॥ २८ ॥ एतद्वं विना चौर्येणापहरणं ॥ २९ ॥ गोचरं गतयोः ाह्यदेशं गतयोः ॥ ३०—३१ ॥ तस्य ते असमर्थतया चोरवृत्तेस्तव । ताभ्यां रामलक्ष्मणाभ्यां । विग्रहे सति युद्धे सति । युगग्रहणं संयुगे जयग्रहणं । अस्थिरं असंभावितं । यद्वा युगग्रहणं युद्धारम्भः अस्थिरं अध्रुवं किंतु ताभ्यां प्रसह्य वधस्ते सिद्ध इति दृष्टान्तेनाह—वृत्रस्येवेति । वृत्रस्य एकस्य बाहोर्द्वाभ्यामिन्द्रस्य बाहुभ्यां सह विग्रहे सति निग्रह इव जय इव । वृत्रस्यैकेन बाहुना इन्द्रस्य द्वयोर्बाह्वोरिव एकेन त्वया तयोर्द्वयोर्जयो न शक्य इत्यर्थः ॥ ३२ ॥ सः नाथ इति पदच्छेदः ॥ ३३ ॥ अपधाय अपक्रम्य । कुबेरस्य गिरिं कैलासं । "कैलासःस्थानमलका" इत्यमरः ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकविंशः सर्गः ॥ २१ ॥

ति० उद्धरणशैघ्र्येउपमा—**वैनतेयइति**। **स०** राक्षसेन्द्रमहासर्पान् रामलक्षणोगरुडउद्धरिष्यति । तत्रदृष्टान्तः । वैनतेयः विनतायामुत्पन्नःगरुडातिरिक्तःकश्चित्पक्षी उरगान् दुर्बलसर्पानिव ॥ २७ ॥ **ती०** कुबेरस्यगिरिं गन्धमादनं । अपधाय अतिक्रम्य । पुरीमितिपाठे कुबेरस्यपुरीमित्येतदुपरितनलोकानामुपलक्षणं । वरुणस्यसभामित्यनेनाधस्तनलोकानामुपलक्षणं । तत्वदृष्ट्याऽपरुषवचनंतंरावणमुद्दिश्यसीतयोक्तानांपरुषवाक्यानामयमाशयः । रावणेनदेवींप्रतितत्वदृष्ट्यासौम्यरूपाण्येववाक्यान्युक्तानियद्यपि तथापि बाह्यदृष्ट्यापरुषवाक्यवत्प्रतीयमानत्वेनदेव्यपितत्वदृष्टिसंगोप्य बाह्यदृष्टिमनुसृत्य परुषवाक्यैरेवतस्योत्तरमाहेति ॥ कालहतस्त्वंअशनेस्संबन्धान्महाद्रुमइवदाशरथेस्संबन्धात्विमोक्षसेप्राणानितिशेषः । विमोक्ष्यसइतिपाङ्क्तःपाठइतिकतकः ॥ ३४ ॥ इत्येकविंशः सर्गः ॥ २१ ॥

[पा०] १ क. ङ.—ट. लक्षिताः. २ ङ. ज. झ. ट. निहनिष्यन्तः. ३ ङ. झ. ट. नसंशयः. ४ घ. सुदूरं. ५ ग. स्तयोः. ६ क.—ट. गतोथवालयं. ७ ङ. झ. ट. दाशरथेर्विमोक्षसे.

द्वाविंशः सर्गः ॥ २२ ॥

सीतयागर्हितेनरावणेन तांप्रति सकोपाटोपंस्वसंकेतितकालस्यमासद्वयात्मकशेषावसाने मारणोक्तिः ॥ १ ॥ ततोरावणस्त्रीभिर्वक्रनेत्रादिसंज्ञयासमाश्वासितयासीतया पुनर्बहुधारावणगर्हणम् ॥ २ ॥ ततोघोरतरविकृतनानाकृतीनामेकाक्ष्यादिराक्षसीनां तर्जनसान्त्वनादिनासीतावशीकरणनियोजनपूर्वकं पुनस्सरोषंसीतातर्जनोद्यतस्यरावणस्य धान्यमालिनीनामकतत्पत्न्या सपरिष्वङ्गंसान्त्वनपूर्वकमन्यतोपसरणम् ॥ ३ ॥ ततोरावणेन स्त्रीजनैस्सहनिजगृहप्रवेशनम् ॥ ४ ॥

सीताया वचनं श्रुत्वा परुषं राक्षसाधिपः ॥ प्रत्युवाच ततः सीतां विप्रियं प्रियदर्शनाम् ॥ १ ॥
यथायथा सान्त्वयिता वश्यः स्त्रीणां तथातथा ॥ यथायथा प्रियं वक्ता परिभूतस्तथातथा ॥ २ ॥
संनियच्छति मे क्रोधं त्वयि कामः समुत्थितः ॥ द्रवतोऽमार्गमासाद्य हयानिव सुसारथिः ॥ ३ ॥
वामः कामो मनुष्याणां यस्मिन्किल निबध्यते ॥ जने तस्मिंस्त्वनुक्रोशः स्नेहश्च किल जायते ॥४॥
एतस्मात्कारणान्न त्वां घातयामि वरानने ॥ वधार्हामवमानार्हां मिथ्याप्रव्रजिते रताम् ॥ ५ ॥
परुषाणीह वाक्यानि यानियानि ब्रवीषि माम् ॥ तेषुतेषु वधो युक्तस्तव मैथिलि दारुणः ॥ ६ ॥
एवमुक्ता तु वैदेही रावणो राक्षसाधिपः ॥ क्रोधसंरम्भसंयुक्तः सीतामुत्तरमब्रवीत् ॥ ७ ॥
द्वौ मासौ रक्षितव्यौ मे योवधिस्ते मया कृतः ॥ ततः शयनमारोह मम त्वं वरवर्णिनि ॥ ८ ॥
ऊर्ध्वं द्वाभ्यां तु मासाभ्यां भर्तारं मामनिच्छतीम् ॥ मम त्वां प्रातराशार्थमारभन्ते महानसे ॥९॥
तां तर्ज्यमानां संप्रेक्ष्य राक्षसेन्द्रेण जानकीम् ॥ देवगन्धर्वकन्यास्ता विषेदुर्विकृतेक्षणाः ॥ १० ॥

सीताया इत्यादि ॥ १ ॥ सान्त्वयिता अनुनेता ॥ २ ॥ संनियच्छति निरुणद्धि । द्रवतः धावतः । अमार्गमितिच्छेदः ॥ ३ ॥ वामः प्रतिकूलः । मनुष्याणां प्राणिनां । अनुक्रोशः कृपा । परिभवादिप्रदानेन मनुष्याणां प्रतिकूलः कामः यस्मिञ्जने निबध्यते तस्मिंस्त्वनुक्रोशः स्नेहश्च जायते किल ॥ ४ ॥ मिथ्याप्रव्रजिते कपटेन वन्यवृत्तिभाजि । रामे रतां सक्तां ॥ ५—६ ॥ क्रोधसंरम्भसंयुक्तः क्रोधप्रणयाभ्यां संयुक्तः ॥ ७ ॥ ते मया योऽवधिः कृतः "मासान्द्वादशभामिनि" इत्यारण्यकाण्डोक्तोद्वादशमासात्मकोऽवधिः कल्पितः । अत्र द्वौ मासाववशिष्टौ । तौ द्वौ मासौ । मे मया । रक्षितव्यौ प्रतीक्षणीयौ । ततः तस्मात्कारणात् । मम शयनमारोहेत्यन्वयः ॥८॥ प्रातराशार्थं मासद्वयान्तर्गतरात्रिसमाप्त्यनन्तरं हिंसायां कालविलम्बंविना प्रातःकालिकाशनार्थमित्यर्थः । आरभन्ते आलभन्ते । रलयोरभेदः । "आलम्भस्स्पर्शहिंसयोः" इत्यमरः । महानसे पाकशालायां

ती० सीतायाइत्यस्यवास्तवार्थस्तु राक्षसाधिपः सीतायाःपरुषं अतएवविप्रियंवचनंश्रुत्वा प्रत्युवाचेतिसंबन्धः ॥१॥ **ती०** वस्तुतस्तु इष्टदेवतायांसमुत्थितः कामः इच्छा समुत्पन्नाभक्तिरित्यर्थः । मेक्रोधं राक्षसजातेर्ममसर्वदाविद्यमाननंनैजंक्रोधं । क्रोधशब्देनकामक्रोधादिषड्वर्गउच्यते । तंनियच्छतीतिसंबन्धः ॥ ३ ॥ **ती०** एतस्मादित्यादिश्लोकद्वयस्यवास्तवार्थस्तु ननुमद्वधोद्युक्तः स्त्रीघातकश्चत्वंनसंभाष्यइत्यत्राह—एतस्मादिति । एतस्मात्कारणात् त्वद्भर्तृकारणात् । प्रव्रजिते मत्स्वामिनिरामेइतिशेषः । रतांत्वां ममेष्टदेवतांत्वां । नघातयाम्येव । वधार्हामवमानार्हामपित्रियंघातयामीतिमिथ्येतिसंबन्धः ॥ ५–६ ॥ **स०** उत्तरं उत्तरत्रक्रियमाणं । यद्वा सीतामुत्तरं सीतायाः मुत् संतोषातिशयोयस्माद्वचनात् मासद्वयावधिप्रदात्तत् । "व्यवधानेनयद्दुःखंतद्दुःखंनैवचिन्तयेत्" इत्युक्तेरितिभावः ॥ ७ ॥ **स०** द्वौमासौरक्षितव्यौ । "वर्ततेदशमोमासोद्वौतुशेषौप्लवङ्गम" इतिसीतावचनाद्दशममासस्यतदावर्तमानत्वेपिमासत्वेनावशिष्टौतुद्वावेव । उर्वरितदिनानांतुमासत्वाभावादनुक्तिः । सीतासंगौत्सुक्येनाल्पदिनानामगणनेतिवा ॥ ८ ॥ **ती०** एवमुक्त्वेत्यादिश्लोकत्रयस्यवास्तवार्थस्तु क्रोधसंरंभसंयुक्तइत्यनेन राक्षसस्वभावोवर्णितः । पतिवियोगदुःखितांनिद्राहाररहितांप्रत्याह—**द्वौमासावित्यादिश्लोकद्वयेन** । हे मे लक्ष्मीस्सीते मयायोऽवधिःकृतः "मासान्द्वादशभामिनि । प्रतीक्षस्व" इतियःसमयःप्रार्थितः तन्मध्यतःपरंरक्षितव्यौ प्रतीक्षणीयौ द्वौमासावेव द्वाभ्यांमासाभ्यामूर्ध्वंन । ततः तदनन्तरं

[**पा०**] १ ङ.—ट. राक्षसेश्वरः. २ ङ. ञ. ट. प्रव्रजने. क. प्रव्राजने. ३ क.—ट. द्वाभ्यामूर्ध्वंतु. ४ ञ. ट. प्रातराशार्थंसूदाश्छेत्स्यन्तिखण्डशः. ५ ङ. ञ. ट. भर्त्स्यमानां.

ओष्ठप्रकारैरपरा वक्त्रनेत्रैस्तथाऽपराः ॥ सीतामाश्वासयामासुस्तर्जितां तेन रक्षसा ॥ ११ ॥
ताभिराश्वासिता सीता रावणं राक्षसाधिपम् ॥ उवाचात्महितं वाक्यं वृत्तशौण्डीर्यगर्वितम् ॥१२॥
नूनं न ते जनः कश्चिदस्ति निःश्रेयसे स्थितः ॥ निवारयति यो न त्वां कर्मणोऽस्माद्विगर्हितात् ॥१३॥
मां हि धर्मात्मनः पत्नीं शचीमिव शचीपतेः ॥ त्वदन्यस्त्रिषु लोकेषु प्रार्थयेन्मनसाऽपि कः ॥१४॥
राक्षसाधम रामस्य भार्यामिततेजसः ॥ उक्तवानसि यच्छापं क गतस्तस्य मोक्ष्यसे ॥ १५ ॥
यथा दृप्तश्च मातङ्गः शशश्च सहितो वने ॥ तथा द्विरदवद्रामस्त्वं नीच शशवत्स्मृतः ॥ १६ ॥
स त्वमिक्ष्वाकुनाथं वै क्षिपन्निह न लज्जसे ॥ चक्षुषोर्विषयं तस्य न तावदुपगच्छसि ॥ १७ ॥
इमे ते नयने क्रूरे विरूपे कृष्णपिङ्गले ॥ क्षितौ न पतिते कस्मान्मामनार्य निरीक्षतः ॥ १८ ॥
तस्य धर्मात्मनः पत्नीं स्नुषां दशरथस्य च ॥ कथं व्याहरतो मां ते न जिह्वा व्यवशीर्यते ॥ १९ ॥
असंदेशात्तु रामस्य तपसश्चानुपालनात् ॥ न त्वां कुर्मि दशग्रीव भस्म भस्मार्ह तेजसा ॥ २० ॥
नापहर्तुमहं शक्या तस्य रामस्य धीमतः ॥ विधिस्तव वधार्थाय विहितो नात्र संशयः ॥ २१ ॥
शूरेण धनदभ्रात्रा बलैः समुदितेन च ॥ अपोह्य रामं कस्माद्धि दारचौर्यं त्वया कृतम् ॥ २२ ॥
सीताया वचनं श्रुत्वा रावणो राक्षसाधिपः ॥ विवृत्य नयने क्रूरे जानकीमन्ववैक्षत ॥ २३ ॥
नीलजीमूतसंकाशो महाभुजशिरोधरः ॥ सिंहसत्त्वगतिः श्रीमान्दीप्तजिह्वाग्रलोचनः ॥ २४ ॥

॥ ९—१० ॥ ओष्ठप्रकारैः रुरुदिषतामोष्ठेषु भङ्गस्फुरणादयो ये विकारास्ते ओष्ठप्रकाराः ओष्ठभङ्गादिरूपसंज्ञादिभिरित्यर्थः । एवं वक्त्रनेत्रैः वक्त्रनेत्रसंज्ञादिभिरित्यर्थः ॥ ११ ॥ वृत्तशौण्डीर्यगर्वितं वृत्तं पातिव्रत्यं तस्य शौण्डीर्यं बलं तेन गर्वितमिति क्रियाविशेषणं ॥ १२ ॥ ते निःश्रेयसे स्थितः कश्चिज्जनः नास्ति । यः अस्माद्विगर्हितात्कर्मणस्त्वां निवारयति स चापि नास्ति । नूनमिति योजना । तवेष्टप्रापकः अनिष्टनिवारकश्च नास्तीत्यर्थः ॥ १३—१४ ॥ तस्य मोक्ष्यसे तस्मान्मोक्ष्यसे ॥ १५ ॥ यथा मातङ्गः शशश्च । सहितः युयुत्सादिना संगतः । तथान्योन्यसंगतो रामस्त्वं च । अत्र रावणः स्वस्य मातङ्गसाम्यमुक्तमिति भ्राम्येदिति परिहरति—तथेति । तत्र गज इव रामः । शश इव त्वं ॥ १६ ॥ इक्ष्वाकुनाथं क्षिपन् मायामृगव्याजेन दूरं निस्सारयन् । इह स्वजनेषु न तावदुपगच्छसि । यद्युपगच्छसि तदा तत्प्रभावं वेत्स्यसीत्यर्थः ॥ १७—१९ ॥ रामस्य भर्तुः । असंदेशात् अपकारिषु शपेथा इति संदेशाभावात् । तपसः पातिव्रत्यरूपस्य । कुर्मि करोमि । उक्त्वविकरणप्रत्ययलोपावार्षौ । भस्मार्ह भस्मीकरणार्हं । तेजसा पातिव्रत्यप्रभावेन ॥ २० ॥ तस्य रामस्य तस्मात् रामात् । विधिः चौर्येणापहरणं । विहितः दैवेनेति शेषः ॥ २१ ॥ बलैस्समुदितेन बलेन सर्वश्रेष्ठेनेत्यर्थः । अपोह्य रामं मृगच्छद्मनापवाह्य ॥ २२ ॥ विवृत्य विवर्त्य ॥ २३ ॥ सिंहस्येव बलगमने यस्यासौ सिंहसत्त्वगतिः । जिह्वाग्रं लोचने च दीप्तानि यस्य सोयं दीप्तजिह्वाग्रलोचनः । कोपेन चलं अग्रं यस्य तत् चलाग्रंचतत् मुकुटंच तेन प्रांशुः दीर्घः । चित्रमाल्यवत्त्वेपि रक्तमाल्यवत्त्वं तत्प्राचुर्यादुक्तं । तप्ताङ्गदविभूषणः तप्तशब्देन तेजिष्ठत्वमुक्तं । मेचकेन

ते तव भर्तारं अनिच्छतीमामनङ्गीकुर्वाणां ममामदीयराज्यलक्ष्मींचप्राप्स्यसीतिशेषः । लांप्रार्थयइतिशेषः । ममहानसेप्रातराशार्थं आलभन्तेपशून् तान्भक्षयेतिशेषः । शयनमारोह शयनंकुर्वित्यर्थः ॥ १० ॥ ति० ओष्ठप्रकारैः वराकोऽयंकिंकरिष्यति नभेतव्यमित्येवौष्ठाग्रोत्क्षेपणैः ॥ ११ ॥ ति० यत्पापं ममशयनमारोहेत्यादिरूपं । क्रुतोमोक्ष्यसे तत्साध्यसमूलनाशस्यलयापरि-

[पा०] १ क. घ.—ट. नेत्रैर्वक्त्रैस्तथा. २ ङ. झ. ट. कश्चिदस्मिन्निश्रेयसिस्थितः. ३ क.—ट. यत्पापं. ४ क. ख. ङ. झ. ञ. सहितौ. ५ ङ. झ. ट. चक्षुषोविषये. ६ ङ. झ. ट. यावत्. ७ ङ. च. झ. ट. विकृते. ८ च. यन्मामनाथांनिरीक्षते. ९ ङ. झ. नजिह्वापापशीर्यति. क. ग. च. छ. ज. जिह्वापापनशीर्यते. ञ. ट. जिह्वापापनशीर्यति. १० ख. त्वया. ११ ङ. च. ज.—ट. कस्माच्चिद्दारचौर्यं. १२ क. परुषं. १३ ग. च. छ. ज. ञ. सिंहसंहननः. ख. सिंहसत्वगतोवीरोदीप्त. १४ क. ग. घ. ङ. झ. ञ. ट. जिह्वाग्रलोचनः.

चलाग्रमुकुटप्रांशुश्चित्रमाल्यानुलेपनः ॥ रक्तमाल्याम्बरधरस्तप्ताङ्गदविभूषणः ॥ २५ ॥
श्रोणीसूत्रेण महता मेचकेन सुसंवृतः ॥ अमृतोत्पादनद्धेन भुजगेनेव मन्दरः ॥ २६ ॥
ताभ्यां स परिपूर्णाभ्यां भुजाभ्यां राक्षसेश्वरः ॥ शुशुभेऽचलसंकाशः शृङ्गाभ्यामिव मन्दरः ॥ २७ ॥
तरुणादित्यवर्णाभ्यां कुण्डलाभ्यां विभूषितः ॥ रक्तपल्लवपुष्पाभ्यामशोकाभ्यामिवाचलः ॥ २८ ॥
स कल्पवृक्षप्रतिमो वसन्त इव मूर्तिमान् ॥ श्मशानचैत्यप्रतिमो भूषितोपि भयङ्करः ॥ २९ ॥
अवेक्षमाणो वैदेहीं कोपसंरक्तलोचनः ॥ उवाच रावणः सीतां भुजङ्ग इव निःश्वसन् ॥ ३० ॥
अनयेनाभिसंपन्नमर्थहीनमनुव्रते ॥ नाशयाम्यहमद्य त्वां सूर्यः संध्यामिवौजसा ॥ ३१ ॥
इत्युक्त्वा मैथिलीं राजा रावणः शत्रुरावणः ॥ संदिदेश ततः सर्वा राक्षसीर्घोरदर्शनाः ॥ ३२ ॥
एकाक्षीमेककर्णां च कर्णप्रावरणां तथा ॥ गोकर्णीं हस्तिकर्णीं च लम्बकर्णीमकर्णिकाम् ॥ ३३ ॥
हस्तिपाद्यश्वपाद्यौ च गोपादीं पादचूलिकाम् ॥ एकाक्षीमेकपादीं च पृथुपादीमपादिकाम् ॥ ३४ ॥
अतिमात्रशिरोग्रीवामतिमात्रकुचोदरीम् ॥ अतिमात्रास्यनेत्रां च दीर्घजिह्वामजिह्विकाम् ॥ ३५ ॥
अनासिकां सिंहमुखीं गोमुखीं सूकरीमुखीम् ॥ यथा मद्वशगा सीता क्षिप्रं भवति जानकी ॥
तथा कुरुत राक्षस्यः सर्वाः क्षिप्रं समेत्य च ॥ ३६ ॥
प्रतिलोमानुलोमैश्च सामदानादिभेदनैः ॥ आवर्जयत वैदेहीं दण्डस्योद्यमनेन च ॥ ३७ ॥
इति प्रतिसमादिश्य राक्षसेन्द्रः पुनः पुनः ॥ काममन्युपरीतात्मा जानकीं पर्यतर्जयत् ॥ ३८ ॥
उपगम्य ततः क्षिप्रं राक्षसी धान्यमालिनी ॥ परिष्वज्य दशग्रीवमिदं वचनमब्रवीत् ॥ ३९ ॥
मया क्रीड महाराज सीतया किं तवानया ॥ विवर्णया कृपणया मानुष्या राक्षसेश्वर ॥ ४० ॥
नूनमस्या महाराज न दिव्यान्भोगसत्तमान् ॥ विदधात्यमरश्रेष्ठस्तव बाहुबलार्जितान् ॥ ४१ ॥

नीलेन । अमृतोत्पादनद्धेन अमृतोत्पादनार्थं नद्धेन । ताभ्यां प्रसिद्धाभ्याम् ॥ २४—२७ ॥ तरुणेत्यादि ॥ अलंकृतत्वे कल्पकसाम्यं । भयंकरत्वेपुनश्चैत्यसाम्यं । चैत्यं श्मशानवृक्षः । श्मशानमण्डपो वा । सीताया अत्यन्तभयंकरत्वज्ञापनाय रावणवर्णनं कृतं ॥ २८—३१ ॥ इत्युक्त्वेत्यादि ॥ प्रधानाप्रधानभूते द्वे एकाक्ष्यौ । अतो न पुनरुक्तिः । अथवा अक्षं इन्द्रियं । एकाक्षी एकैकेन्द्रियां । श्रोत्रनासादावेकमात्रवतीत्यर्थः ॥ ३२—३६ ॥ प्रतिलोमानुलोमैः प्रतिकूलानुकूलाचरणैः । सामदानादिभेदनैः सामदानमुख्यैर्भेदैः । प्रथमप्रयुक्तसामदानैरित्यर्थः । आवर्जयत वशीकुरुत ॥ ३७—३८ ॥ धान्यमालिनी रावणस्य कनिष्ठपत्नी । इदं मन्दोदर्या अप्युपलक्षणं । उत्तरत्र वानरान्प्रति हनुमद्वचने तथा वक्ष्यमाणत्वात् ॥ ३९—४० ॥ अस्याः सीतायाः । अमरश्रेष्ठो ब्रह्मा । दिव्यान् भोगान्न विदधाति । अस्या दिव्यभोगे

हारोशक्यइत्यर्थः ॥ १५ ॥ ति० ताभ्यां प्रसिद्धपराक्रमाभ्यां । भुजद्वयमेवसर्वदा । युद्धादौस्वेच्छयादशभुजत्वमितिद्विवचनं ॥ वामदक्षेषुभुजत्वजात्यैकवचनमित्यन्ये ॥ २७ ॥ स० अनयेन स्त्रीवधतन्नासिकाछेदाद्यन्यायेन । अभिसंपन्नं युक्तं । अर्थहीनं निर्भाग्यं । एतादृशंराममनुव्रतेसीतेत्वां नाशयामि । सन्ध्यां सन्ध्याकालिकंतमः ॥ ३१ ॥ स० पुनरेकाक्षीमित्युपादानं व्यक्तिभेदाभिप्रायेण । अथवा पूर्वमेकाक्षीमितिमैथिलीविशेषणं । एकस्मिन्नामेअक्षिणीयस्यासा तामित्यर्थः । एकमक्षियस्यास्तेत्येकत्र । अपरत्रच एकस्मिन्भागेअक्षिणीयस्यास्सापि निर्नासिकाव्यवधानमक्षिद्वयमेकस्मिन्प्रदेशेवर्ततइतिनैकाक्षीमितिपुनरुक्तं ॥ ३४ ॥ ति० प्रतिगर्जत प्रत्यगर्जत् ॥ ३८ ॥ उपगम्य समीपमागम्य । ततः अतिसंतर्जनंत्रासीतायांदययेतिशेषः ॥ स० परिष्वज्य सीताताडनवारणार्थमालिङ्ग्य ॥ ३९ ॥ शि० अमरश्रेष्ठइति । अस्याराज्यभोगोब्रह्मणानलिखितइत्यर्थः । आदराद्बहुवचनं ॥

[पा०] १ च. ज. विराजितः. २ क. ङ.—ट. अमृतोत्पादनेनद्धो. ३ क.—च. ज.—ट. भुजङ्गेनेव. ४ क. च. छ. ज. ञ. द्वाभ्यां. घ. सताभ्यांपरिपीनाभ्यां. ५ ख. फुल्लपल्लव. ६ ङ. झ. संददर्श. ७ क. घ. ङ. च. ज.—ट. जिह्वानखामपि. ८ ङ. झ. ट. समेत्यवा. ९ क. ग.—ज. आवर्तयत. १० ङ. झ. ञ. ट, प्रतिगर्जत. ११ क.—ट. देवाभोगसत्तमान् । विदधत्यमरश्रेष्ठाः.

अकामां कामयानस्य शरीरमुपतप्यते ॥ इच्छन्तीं कामयानस्य प्रीतिर्भवति शोभना ॥ ४२ ॥
एवमुक्तस्तु राक्षस्या समुत्क्षिप्तस्ततो बली ॥ प्रहसन्मेघसंकाशो राक्षसः स न्यवर्तत ॥ ४३ ॥
प्रस्थितः स दशग्रीवः कम्पयन्निव मेदिनीम् ॥ ज्वलद्भास्करवर्णाभं प्रविवेश निवेशनम् ॥ ४४ ॥
देवगन्धर्वकन्याश्च नागकन्याश्च सर्वतः ॥ परिवार्य दशग्रीवं विविशुस्तद्गृहोत्तमम् ॥ ४५ ॥
स मैथिलीं धर्मपरामवस्थितां प्रवेपमानां परिभर्त्स्य रावणः ॥
विहाय सीतां मदनेन मोहितः स्वमेव वेश्म प्रविवेश भास्वरम् ॥ ४६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

त्रयोविंशः सर्गः ॥ २३ ॥

रावणचोदनया एकजटादिभीराक्षसीभिः पृथक्पृथक् सीतांप्रति रावणप्रशंसनपूर्वकंतद्भार्याभावस्वीकरणचोदना ॥ १ ॥

इत्युक्त्वा मैथिलीं राजा रावणः शत्रुरावणः ॥ संदिश्य च ततः सर्वा राक्षसीर्निर्जगाम ह ॥ १ ॥
निष्क्रान्ते राक्षसेन्द्रे तु पुनरन्तःपुरं गते ॥ राक्षस्यो भीमरूपास्ताः सीतां समभिदुद्रुवुः ॥ २ ॥
ततः सीतामुपागम्य राक्षस्यः क्रोधमूर्च्छिताः ॥ परं पौरुषया वाचा वैदेहीमिदमब्रुवन् ॥ ३ ॥
पौलस्त्यस्य वरिष्ठस्य रावणस्य महात्मनः ॥ दशग्रीवस्य भार्यात्वं सीते न बहु मन्यसे ॥ ४ ॥
ततस्त्वेकजटा नाम राक्षसी वाक्यमब्रवीत् ॥ आमृश्य क्रोधताम्राक्षी सीतां करतलोदरीम् ॥ ५ ॥
प्रजापतीनां पण्णां तु चतुर्थो यः प्रजापतिः ॥ मानसो ब्रह्मणः पुत्रः पुलस्त्य इति विश्रुतः ॥ ६ ॥
पुलस्त्यस्य तु तेजस्वी महर्षिर्मानसः सुतः ॥ नाम्ना स विश्रवा नाम प्रजापतिसमप्रभः ॥ ७ ॥
तस्य पुत्रो विशालाक्षि रावणः शत्रुरावणः ॥ तस्य त्वं राक्षसेन्द्रस्य भार्या भवितुमर्हसि ॥
मयोक्तं चारुसर्वाङ्गि वाक्यं किं नानुमन्यसे ॥ ८ ॥
ततो हरिजटा नाम राक्षसी वाक्यमब्रवीत् ॥ विवर्त्य नयने कोपान्मार्जारसदृशेक्षणा ॥ ९ ॥
येन देवास्त्रयस्त्रिंशद्देवराजश्च निर्जिताः ॥ तस्य त्वं राक्षसेन्द्रस्य भार्या भवितुमर्हसि ॥ १० ॥
ततस्तु प्रघसा नाम राक्षसी क्रोधमूर्च्छिता ॥ भर्त्सयन्ती तदा घोरमिदं वचनमब्रवीत् ॥ ११ ॥

भाग्यं नास्तीत्यर्थः ॥ ४१—४५ ॥ सर्गार्थं संग्रहेण दर्शयति—स इति ॥ ४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

प्रजापतीनामिति । " मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः " इति षट् प्रजापतयः । तेषां चतुर्थः

ति० अमरश्रेष्ठाइन्द्रादयः । दैवहतेयमदृष्टहीनेत्यर्थः ॥ ४१ ॥ ति० समुत्क्षिप्तः अन्यतोपसारितः । प्रहसन् धान्यमालिन्योचितव्यवहारदर्शनेनावशप्राप्तस्त्रीप्रहारापकीर्तिपरिहारेणचप्रसन्नइत्यर्थः ॥ स० समुत्क्षिप्तः बलात्परिवर्तितः । अतएवप्रहसन् ॥ ४३ ॥ ति० प्रविविशुः प्रविविशुः ॥ ४५ ॥ इतिद्वाविंशःसर्गः ॥ २२ ॥

ति० शत्रून्रावयति हाहाशब्दंकारयति सशत्रुरावणः ॥ १ ॥ ति० नबहुमन्यसे मोहादितिशेषः ॥ ४ ॥ ति० तस्यपुत्रइत्यनेन कुलीनत्वंसूचितं ॥ ८ ॥ स० अष्टौवसवः । एकादशरुद्राः । द्वादशादित्याः । द्वावश्विनौ । आहत्यत्रयस्त्रिंशद्देवाः । द्वादशा-

[पा०] १ क. ङ. झ. ट. भास्करसंकाशं. २ ङ.—ज. ञ. कन्याश्चताःस्त्रियः. ग. ङ. झ. ट. कन्याश्चतास्तत्रः. क. कन्याश्चशोभनाः. ख. कन्याश्चसर्वशः. ३ क. ग. च. छ. ज. ञ. ट. विविशुस्तागृहोत्तमं. ङ. झ. प्रविशुस्तागृहोत्तमं. ४ च. प्रतिपद्यवीर्यवान्. क. ज. ञ. प्रविवेशवीर्यवान्. ङ. झ. ट. प्रविवेशरावणः. ५ क. परुषंपरुषावाचो. ६ च. छ. ज. ञ. पाठेषु ततोहरिजटेत्यर्धस्यस्थाने. ततोहरिजटानाम राक्षसीक्रोधमूर्छिता । भर्त्समानातदाघोरमिदंवचनमब्रवीत् इत्यर्धद्वयंदृश्यते.

वीर्योत्सिक्तस्य शूरस्य संग्रामेष्वनिवर्तिनः ॥ बलिनो वीर्ययुक्तस्य भार्यात्वं किं न लप्स्यसे ॥ १२ ॥
प्रियां बहुमतां भार्यां त्यक्त्वा राजा महाबलः ॥ सर्वासां च महाभागां त्वामुपैष्यति रावणः ॥१३॥
समृद्धं स्त्रीसहस्रेण नानारत्नोपशोभितम् ॥ अन्तःपुरं समुत्सृज्य त्वामुपैष्यति रावणः ॥ १४ ॥
अन्या तु विकटा नाम राक्षसी वाक्यमब्रवीत् ॥ १५ ॥
असकृद्देवता युद्धे नागगन्धर्वदानवाः ॥ निर्जिताः समरे येन स ते पार्श्वमुपागतः ॥ १६ ॥
तस्य सर्वसमृद्धस्य रावणस्य महात्मनः ॥ किमद्य राक्षसेन्द्रस्य भार्यात्वं नेच्छसेऽधमे ॥ १७ ॥
ततस्तु दुर्मुखी नाम राक्षसी वाक्यमब्रवीत् ॥ १८ ॥
यस्य सूर्यो न तपति भीतो यस्य च मारुतः ॥ न वाति सायतापाङ्गे किं त्वं तस्य न तिष्ठसि ॥ १९ ॥
पुष्पवृष्टिं च तरवो मुमुचुर्यस्य वै भयात् ॥ शैलाश्च सुभ्रूः पानीयं जलदाश्च यदेच्छति ॥ २० ॥
तस्य नैर्ऋतराजस्य राजराजस्य भामिनि ॥ किं त्वं न कुरुषे बुद्धिं भार्यार्थे रावणस्य हि ॥ २१ ॥
साधु ते तत्त्वतो देवि कथितं साधु भामिनि ॥ गृहाण सुस्मिते वाक्यमन्यथा न भविष्यसि ॥२२॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

चतुर्विंशः सर्गः ॥ २४ ॥

रावणचोदनया राक्षसीभिस्तर्जितयासीतया ताःप्रति भर्तुरन्यस्यापरिग्रहविषये शच्यरुन्धतीप्रभृतिपतिव्रतानांदृष्टान्तीकरणपूर्वकं स्वस्यमारणेपिरामान्यपुरुषापरिग्रहविषये दृढप्रतिज्ञानम् ॥ १ ॥ ततःशिंशुपास्थेहनुमति गूढंतूष्णींशृण्वति नानाराक्षसीभिर्नानापरुषभाषणैर्नानाविधायुधोद्यमनेनच भीषणपूर्वकंसंतर्जने सीतयादुःखाद्रोदनम् ॥ २ ॥

ततः सीतामुपागम्य राक्षस्यो विकृताननाः ॥ परुषं परुषा नार्य ऊचुस्तां वाक्यमप्रियम् ॥ १ ॥
किं त्वमन्तःपुरे सीते सर्वभूतमनोहरे ॥ महार्हशयनोपेते न वासमनुमन्यसे ॥ २ ॥
मानुषी मानुषस्यैव भार्यात्वं बहु मन्यसे ॥ प्रत्याहर मनो रामान्न त्वं जातु भविष्यसि ॥ ३ ॥

पुलस्त्यः ॥ ६—१२ ॥ सर्वासां मध्ये प्रियां बहुमतां । महाभागां च भार्यां मन्दोदरीं त्यक्त्वा त्वामुपैष्यति ॥ १३—१७ ॥ यस्य यस्मात् । तस्य न तिष्ठसि तस्मै न तिष्ठसे । प्रकाशनार्थेप्यार्षत्वात्परस्मैपदं षष्ठी च ॥ १९ ॥ शैलाश्च जलदाश्च पानीयं रावणः यदेच्छति तदा मुञ्चन्तीति विपरिणम्यते॥२०—१२॥ साधु ते कथितं साधु गृहाणेति साधुशब्दद्वयस्य निर्वाहः ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥

न त्वं जातु भविष्यसितस्येति शेषः ॥ ३—

दित्यमध्यप्रविष्टस्यविष्णोःस्वरूपस्यराक्षसीभिरज्ञानादेवमुक्तं ॥ १० ॥ स० वीर्योत्सिक्तस्य वीर्योन्मत्तस्यसकाशादपिवीर्ययुक्तस्य । नलिप्ससे नेच्छसि ॥ १२ ॥ स० यस्यसकाशाद्भीतः तस्य वशेइतिशेषः ॥ १८ ॥ स० मुमुचुः मुमुचुः । आर्षोविसर्गलोपः ॥ १९ ॥ ति० भार्यार्थे भार्यालनिमित्तं ॥ २० ॥ स० अधुते रावणेनानिराकृते सत्कृतेइतियावत् । सात्वंगृहाणेतिवा ॥२१॥ इतित्रयोविंशःसर्गः ॥ २३ ॥

स० परुषमपिसरुषापित्रापुत्रंप्रत्युदीरितं शठ तर्हिनपठेत्येवमादिवाक्यमन्ततोगत्वाप्रायःप्रियपर्यवसायिदृष्टमित्यतोप्रियमित्युक्तं ॥ १ ॥ ति० प्रत्याहर निवर्तय । एवं लदभीष्टंरामसंगमरूपंवस्तु । जातु कदाचिदपि । अतःपरंनभविष्यति । अत्ररामागमन-

[पा०] १ झ. ठ. लिप्ससे. २ ग. रत्नेनशोभितं. ३ घ. झ. ट. तदुत्सृज्य. ४ झ. ट. असकृद्भीमवीर्येण. ५ झ. ट. किमर्थं. ६ ङ. झ. ट. यस्यस. ७ क. झ. ञ. ट. तिष्ठसे. ८ च. वृष्टीश्च. ९ झ. ञ. ट. शैलाःसुस्रुवुः पानीयं. ठ. शैलाः सुस्रुवुपानीयं. १० क. च. छ. निश्चितं. ११ क. ग.—ट. सीतांसमस्तास्ताः. १२ ङ. झ. ञ. ट. परुषानर्हा. १३ ख. ङ. झ. ञ. ट. ऊचुस्तद्वाक्यं. ग. घ. च. छ. ज. ऊचुस्तावाक्यं. १४ झ. मनोरमे. १५ घ. वासंबहुमन्यसे. १६ झ. ट. रामान्नैवंजातु.

त्रैलोक्यवसुभोक्तारं रावणं राक्षसेश्वरम् ॥ भर्तारमुपसंगम्य विहरस्व यथासुखम् ॥ ४ ॥
मानुषी मानुषं तं तु राममिच्छसि शोभने ॥ राज्याद्भ्रष्टमसिद्धार्थं विक्लवं त्वमनिन्दिते ॥ ५ ॥
राक्षसीनां वचः श्रुत्वा सीता पद्मनिभेक्षणा ॥ नेत्राभ्यामश्रुपूर्णाभ्यामिदं वचनमब्रवीत् ॥ ६ ॥
यदिदं लोकविद्विष्टमुदाहरथ संगताः ॥ नैतन्मनसि वाक्यं मे किल्बिषं प्रतिभाति वः ॥ ७ ॥
न मानुषी राक्षसस्य भार्या भवितुमर्हति ॥ कामं खादत मां सर्वा न करिष्यामि वो वचः ॥ ८ ॥
दीनो वा राज्यहीनो वा यो मे भर्ता स मे गुरुः ॥ तं नित्यमनुरक्तास्मि यथा सूर्यं सुवर्चला ॥ ९ ॥
यथा शची महाभागा शक्रं समुपतिष्ठति ॥ अरुन्धती वसिष्ठं च रोहिणी शशिनं यथा ॥ १० ॥
लोपामुद्रा यथाऽगस्त्यं सुकन्या च्यवनं यथा ॥ सावित्री सत्यवन्तं च कपिलं श्रीमती यथा ॥११॥
सौदासं मदयन्तीव केशिनी सगरं यथा ॥ नैषधं दमयन्तीव भैमी पतिमनुव्रता ॥
तथाऽहमिक्ष्वाकुवरं रामं पतिमनुव्रता ॥ १२ ॥
सीताया वचनं श्रुत्वा राक्षस्यः क्रोधमूर्च्छिताः ॥ भर्त्सयन्ति स्म परुषैर्वाक्यै रावणचोदिताः ॥१३॥
अवलीनः स निर्वाक्यो हनुमाञ्छिंशुपाद्रुमे ॥ सीतां संतर्जयन्तीस्ता राक्षसीरशृणोत्कपिः ॥ १४ ॥
तामभिक्रम्य संक्रुद्धा वेपमानां समन्ततः ॥ भृशं संलिलिहुर्दीप्तान्प्रलम्बान्दशनच्छदान् ॥ १५ ॥
ऊचुश्च परमक्रुद्धाः प्रगृह्याशु परश्वधान् ॥ नेयमर्हति भर्तारं रावणं राक्षसाधिपम् ॥ १६ ॥
संभर्त्स्यमाना भीमाभी राक्षसीभिर्वरानना ॥ सा बाष्पमुपमार्जन्ती शिंशुपां तामुपागमत् ॥ १७ ॥
ततस्तां शिंशुपां सीता राक्षसीभिः समावृता ॥ अभिगम्य विशालाक्षी तस्थौ शोकपरिप्लुता ॥१८॥
तां कृशां दीनवदनां मलिनाम्बरधारिणीम् ॥ भर्त्सयांचक्रिरे सीतां राक्षस्यस्तां समन्ततः ॥ १९ ॥
ततस्तां विनता नाम राक्षसी भीमदर्शना ॥ अब्रवीत्कुपिताकारा कराला निर्णतोदरी ॥ २० ॥
सीते पर्याप्तमेतावद्धर्तुः स्नेहो निदर्शितः ॥ सर्वत्रातिकृतं भद्रे व्यसनायोपकल्पते ॥ २१ ॥
परितुष्टास्मि भद्रं ते मानुषस्ते कृतो विधिः ॥ ममापि तु वचः पथ्यं ब्रुवन्त्याः कुरु मैथिलि ॥२२॥

४ ॥ मानुषीति हेतुगर्भं । मानुषी त्वं मानुषं तमिच्छसि ॥ ५—६ ॥ किल्बिषं पापावहं ॥ ७—८ ॥ सुवर्चलेत्यादि बहुदृष्टान्तप्रदर्शनं स्वस्य पातिव्रत्यदार्ढ्यद्योतनाय ॥ ९—१३ ॥ अवलीनः छन्नः । राक्षसीरशृणोत् राक्षसीवाक्यान्यशृणोदित्यर्थः ॥ १४—१५ ॥ नेयमर्हतीत्यत्रेतिकरणं बोध्यं । अस्य ऊचुरित्यनेनसंबन्धः ॥ १६ ॥ संभर्त्स्यमानेति । सा भर्त्स्यमानेतिपाठे भर्त्सनोपगमनरूपक्रियाभेदात्तच्छब्दद्वयं । तां हनुमदधिष्ठितां शिंशुपां ॥ १७—१९ ॥ निर्णतोदरी उन्नतोदरी ॥ २० ॥ अतिकृतं अतिमात्रकृतं ॥ २१ ॥ मानुषो विधिः कृतः । मनुष्यजात्युचितपातिव्रत्यप्रकटनं कृतं एतावत्कालमित्यर्थः

स्यतएवातत्रगमनस्यप्रसक्त्यभावादितिभावः ॥ यद्वा अतःपरंजातुकदाचिदप्येवंभावश्चेत् भवती नभविष्यति मारयामइत्यर्थः ॥३॥ ति० नेत्राभ्यां उपलक्षितेतिशेषः ॥ ६ ॥ स० एतत् युष्मद्वाक्यं मेकिल्बिषंप्रति पापसाधनपरपुरुषसंसर्गप्रति मनउत्पादनंप्रति नप्रतितिष्ठति ॥ ७ ॥ ति० सुवर्चला सूर्यपत्नी । सूर्याभिमुखपुष्पवतीकाचिदोषधिरित्यन्यः ॥ ९ ॥ स० दुस्समयगमनायानेकनिदर्शनान्याह—यथेति ॥ १० ॥ स० भैमीदमयन्तीतिसामानाधिकरण्यं ॥१२॥ स० साभर्त्स्यमानेतिपदमेकं । सांहिंसामुद्दिश्यभर्त्स्यमाना साभर्त्स्यमाना । "सातुहिंसायां" इतिविश्वः । यासेत्यन्वयः । उपेत्यनेनातिसामीप्यंसूचयति ॥१७॥ स० विधिः

[पा०] १ क. ख. त्रैलोक्यमनु. २ क. ङ. च. ज.—ट. प्रतितिष्ठति. ३ क. ख. घ. च. छ. ज. ञ. समनुतिष्ठति. ४ क. ख. घ. च. छ. ज. ञ. तामतिक्रम्य. ५ क. ख. घ. च.—ट. संरब्धाः. ६ क. ख. च. ज. प्रलंबदशन. ७ क. च. छ. ज. ञ. ऊचुःपरमसंक्रुद्धाः. ८ क. ख. ग. ङ. छ.—ट. साभर्त्स्यमाना. घ. साभर्त्स्यमानावैदेही. ९ क. ङ. झ. ट. वैराङ्गना. १० क. खबाष्पमवमार्जन्ती. घ. ङ. झ. ञ. ट. साबाष्पमपमार्जन्ती. ११ क. ङ.-ट. वासिनीं. १२ घ. ङ. झ. ट. भीमाः. १३ क. घ. झ. ट. राक्षस्यस्ताः. १४ ङ. झ. ट. ततस्तु. १५ ख. च. ञ. कराली. १६ ङ.—ञ. ञ. ट. स्नेहःप्रदर्शितः.

रावणं भज भर्तारं भर्तारं सर्वरक्षसाम् ॥ विक्रान्तं रूपवन्तं च सुरेशमिव वासवम् ॥ २३ ॥
दरिणं त्यागशीलं च सर्वस्य प्रियदर्शनम् ॥ २४ ॥
मानुषं कृपणं रामं त्यक्त्वा रावणमाश्रय ॥ दिव्याङ्गरागा वैदेहि दिव्याभरणभूषिता ॥ २५ ॥
अद्य प्रभृति सर्वेषां लोकानामीश्वरी भव ॥ अग्नेः स्वाहा यथा देवी शची वेन्द्रस्य शोभने ॥ २६ ॥
किं ते रामेण वैदेहि कृपणेन गतायुषा ॥ एतदुक्तं च मे वाक्यं यदि त्वं न करिष्यसि ॥
अस्मिन्मुहूर्ते सर्वास्त्वां भक्षयिष्यामहे वयम् ॥ २७ ॥
अन्या तु विकटा नाम लम्बमानपयोधरा ॥ अब्रवीत्कुपिता सीतां मुष्टिमुद्यम्य गर्जती ॥ २८ ॥
बहून्यप्रियरूपाणि वचनानि सुदुर्मते ॥ अनुक्रोशान्मृदुत्वाच्च सोढानि तव मैथिलि ॥ २९ ॥
न च नः कुरुषे वाक्यं हितं कालपुरस्सरम् ॥ ३० ॥
आनीतासि समुद्रस्य पारमन्यैर्दुरासदम् ॥ रावणान्तःपुरं घोरं प्रविष्टा चासि मैथिलि ॥ ३१ ॥
रावणस्य गृहे रुद्धामस्माभिस्तु सुरक्षिताम् ॥ न त्वां शक्तः परित्रातुमपि साक्षात्पुरन्दरः ॥ ३२ ॥
कुरुष्व हितवादिन्या वचनं मम मैथिलि ॥ अलमश्रुप्रपातेन त्यज शोकमनर्थकम् ॥ ३३ ॥
भज प्रीतिं प्रहर्षं च त्यजैतां नित्यदैन्यताम् ॥ सीते राक्षसराजेन सह क्रीड यथासुखम् ॥ ३४ ॥
जानासि हि यथा भीरु स्त्रीणां यौवनमध्रुवम् ॥ यावन्न ते व्यतिक्रामेत्तावत्सुखमवाप्नुहि ॥ ३५ ॥
उद्यानानि च रम्याणि पर्वतोपवनानि च ॥ सह राक्षसराजेन चर त्वं मदिरेक्षणे ॥ ३६ ॥
स्त्रीसहस्राणि ते सप्त वशे स्थास्यन्ति सुन्दरि ॥ रावणं भज भर्तारं भर्तारं सर्वरक्षसाम् ॥ ३७ ॥
उत्पाट्य वा ते हृदयं भक्षयिष्यामि मैथिलि ॥ यदि मे व्याहृतं वाक्यं न यथावत्करिष्यसि ॥३८॥
ततश्चण्डोदरी नाम राक्षसी क्रोधमूर्च्छिता ॥ भ्रामयन्ती महच्छूलमिदं वचनमब्रवीत् ॥ ३९ ॥
इमां हरिणलोलाक्षीं त्रासोत्कम्पिपयोधराम् ॥ रावणेन हृतां दृष्ट्वा दौर्हृदो मे महानभूत् ॥ ४० ॥
यकृत्प्लीहमथोत्पीडं हृदयं च सबन्धनम् ॥ अत्राण्यपि तथा शीर्षं खादेयमिति मे मतिः ॥ ४१ ॥

॥ २२—२८ ॥ सोढानि रावणेनेति शेषः ॥ २९ ॥ कालपुरस्सरं कालानुरूपं ॥ ३०—३३ ॥ प्रीतिं रावणविषयप्रीतिं । प्रहर्षं कालकृतमनोविकासं ॥ ३४—३७ ॥ उत्पाट्य वा उत्पाट्यैव ॥ ३८ —३९ ॥ दौर्हृदः इच्छा ॥ ४० ॥ कुक्षिदक्षिणभागस्थः कालखण्डाख्यो मांसपिण्डो यकृत् । " स्नायुस्त्रियां कालखण्डयकृती तु समे इमे " इत्यमरः । प्लीहा तु गुल्माख्यो वामभागस्थो मांसपिण्डविशेषः ।

करणं । मानुषः मनुष्यजात्युचितः । तेनेतिशेषः । अमानुषः देवादिगोचरोवा । अमानुषः राक्षससंबन्धी अविधिः अननुष्ठानं । कृतः । तेनतुष्टास्मि सहसाहस्तगतयानभाव्यमितित्वयेत्यर्थकृतमितितुष्टास्मीत्यर्थोवा । " सभाराजाऽमनुष्यपूर्वा " इतिसूत्रवृत्तावमनुष्यशब्दोरक्षःपिशाचादीनाहेत्युक्तेः ॥ २२ ॥ स० आपतन्तं शत्रूणामुपरीतिशेषः ॥ २३ ॥ स० गतायुषा अस्मदाहाररूपत्वाद्गतायुष्टमितिभावः ॥ सर्वास्त्वांभक्षयिष्यामहइत्युक्त्वानैकापित्वत्पक्षपातिनीवर्ततइतिद्योतयति ॥ २७ ॥ ति० तर्जती तर्जयन्ती ॥ २८ ॥ स० दैन्यं स्वार्थेघञ् । दैन्यतां दीनतां ॥ रामानु० प्रीतिं स्नेहं । प्रहर्षं आनन्दं । नित्यदैन्यतां

[पा०] १ ङ. झ. ट. विक्रान्तमापतन्तं. २ क. ख. घ.—ट. प्रियवादिनं. ३ ङ.—ट. लोकानांसर्वेषामीश्वरी. ४ ङ. झ. ञ. ट. तर्जती. ५ ख. घ. झ. ट. बहून्यप्रतिरूपाणि. ६ च. छ. ज. ञ. प्रोक्तानि. ७ क. ख. घ.—ट. कालपुरस्कृतं. ८ ङ. झ. ञ. ट. पुरेघोरे. ९ क. ख. ङ. झ. ञ. ट. रुद्धाअस्माभिस्त्वभिरक्षिता. १० घ.—ट. मश्रुनिपातेन. ११ झ. त्यजन्ती. ङ. छ. ज. ट. त्यजतां. १२ ख. निजदैन्यतां. १३ ङ. झ. ट. परिक्रीड. १४ झ. ट. जानीमहेयथा. १५ ङ. झ. ञ. ट. देविवशे. १६ क. ङ. च. ज.—ट. क्रूरदर्शना. १७ ङ. झ. ट. हरिणशावाक्षीं. १८ क. ख. घ.—झ. ट. त्रासोत्कंप. १९ ख. ङ. झ. ट. महानयं. २० ङ. च. ज.—ट. यकृत्प्लीहंमहत्क्रोडं. क. यकृत्प्लीहमथोत्क्रुत्य. २१ च. छ. ज. स्नायुबन्धनं. २२ झ. ट. गात्राण्यपि. २३ ङ.—ज. ञ. खादयामीति.

ततस्तु प्रघसा नाम राक्षसी वाक्यमब्रवीत् ॥ कण्ठमस्या नृशंसायाः पीडयाम किमास्यते ॥ ४२ ॥
निवेद्यतां ततो राज्ञे मानुषी सा मृतेति ह ॥ नात्र कश्चन संदेहः खादतेति स वक्ष्यति ॥ ४३ ॥
ततस्त्वजामुखी नाम राक्षसी वाक्यमब्रवीत् ॥ विशस्येमां ततः सर्वाः समान्कुरुत पीलुकान् ॥४४॥
विभजाम ततः सर्वा विवादो मे न रोचते ॥ पेयमानीयतां क्षिप्रं लेह्यमुच्चावचं बहु ॥ ४५ ॥
ततः शूर्पणखा नाम राक्षसी वाक्यमब्रवीत् ॥ अजामुख्या यदुक्तं हि तदेव मम रोचते ॥ ४६ ॥
सुरा चानीयतां क्षिप्रं सर्वशोकविनाशिनी ॥ मानुषं मांसमास्वाद्य नृत्यामोथ निकुम्भिलाम् ॥ ४७ ॥
एवं संभर्त्स्यमाना सा सीता सुरसुतोपमा ॥ राक्षसीभिः सुघोराभिर्धैर्यमुत्सृज्य रोदिति ॥ ४८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

पञ्चविंशः सर्गः ॥ २५ ॥

राक्षसीगणसंतर्जनमसहमानयासीतयाऽशोकशाखालंबनेन रामलक्ष्मणादीन्प्रत्याक्रोशनपूर्वकमश्रुधाराविसर्जनेन बहुपरिदेवनम् ॥ १ ॥

अथ तासां वदन्तीनां परुषं दारुणं बहु ॥ राक्षसीनामसौम्यानां रुरोद जनकात्मजा ॥ १ ॥
वमुक्ता तु वैदेही राक्षसीभिर्मनस्विनी ॥ उवाच परमत्रस्ता बाष्पगद्गदया गिरा ॥ २ ॥
मानुषी राक्षसस्य भार्या भवितुमर्हति ॥ कामं खादत मां सर्वा न करिष्यामि वो वचः ॥ ३ ॥
सा राक्षसीमध्यगता सीता सुरसुतोपमा ॥ न शर्म लेभे दुःखार्ता रावणेन च तर्जिता ॥ ४ ॥
वेपते स्माधिकं सीता विशन्तीवाङ्गमात्मनः ॥ वने यूथपरिभ्रष्टा मृगी कोकैरिवार्दिता ॥ ५ ॥
सा त्वशोकस्य विपुलां शाखामालम्ब्य पुष्पिताम् ॥ चिन्तयामास शोकेन भर्तारं भग्नमानसा ॥६॥

नकारान्तस्य ह्रीहन्शब्दस्य अकारान्तत्वमार्षं । " अस्रं पुरीतद्बुल्मस्तु ह्रीहा पुंसि " इत्यमरः । उत्पीडं तस्योपरि स्थितं मांसं । हृदयं पद्मकोशप्रतीकाशं मांसं । बन्धनं तस्य धारणमधोमांसं । उत्क्रोडमिति पाठे उत्क्रोडोहृदयस्थानं । अस्रं पुरीतत् ॥ ४१—४३ ॥ पीलुकान् मांसखण्डान् ॥ ४४ ॥ पेयं लेह्यं चास्या उपदंशलेनोच्यते ॥ ४५—४६ ॥ निकुम्भिला नाम लङ्कायाः पश्चिमद्वारप्रदेशवासिनी भद्रकाली ॥४७॥ रोदिति अरुदत् ॥४८॥इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्यानेचतुर्विंशःसर्गः ॥२४॥

तासां वदन्तीनां तासु वदन्तीषु ॥ १ ॥ मनस्विनी पातिव्रत्ये दृढमनाः ॥ २ ॥ खादत भक्षयत ॥ ३ ॥ शर्म सुखं ॥ ४ ॥ कोकैः ईहामृगैः । " कोकस्त्वीहामृगो वृकः " इत्यमरः ॥ ५ ॥ अशोकस्य हनुमद्-

---

निर्लज्जदैन्यमस्यास्तानिर्लज्जदैन्या तस्याभावोनिर्लज्जदैन्यतातां ॥ २४ ॥ **ति०** प्रघसावाक्यं **विशस्येमामिति** । मध्ये-कण्ठमस्या इत्यादिततस्त्वजामुखीत्यन्तंश्लोकद्वयंप्रक्षिप्तमितिकतकः ॥ ४४ ॥ **ति०** शूर्पणखेयमन्या ॥ ४६ ॥ इतिचतुर्विंशःसर्गः ॥ २४ ॥

स० परुषं बहिःक्रूरं । दारुणं अन्तः ॥ १ ॥ **ति०** शर्मनलेभेइव । शोकार्तैव ॥ **ती०** सीताविलापस्यवास्तवार्थस्तु श्रीरामवियोगेन घोरराक्षसपुरावस्थानेन विरूपराक्षसीसमागमेनच विविधप्रलापादिकमितिज्ञेयं । अस्मिन्काण्डेयत्रयत्रसीताप्रलापस्तत्रतत्रैवमेवोहनीयः ॥ ४ ॥ **स०** आत्मनः स्वस्य अङ्गं विशन्तीमहाङ्गेष्ववान्तराङ्गानिनिवेशयन्तीव ॥ **ति०** आत्मनोऽङ्गंविशन्तीव भीत्यातिसंकुचितशरीराकमठवदभूदित्यर्थः ॥ ५ ॥ **शि०** अशोकस्य अशोकसदृशशिंशुपायाः । अशोकशब्दआचारक्विबन्तप्रकृ-

[**पा०**] १ एतदार्धचतुष्टयं झ. पाठेनदृश्यते. २ ङ. च. झ. ञ. ट. सर्वान्समान्. ३ ङ. झ. ञ. ट. पिण्डकान्. ४ ङ. झ. ञ. ट. माल्यंचविविधंबहु. क. माल्यानिविविधानिच. ५ ङ.—ट. यदुक्तंवै. ६ ङ. च. ज.—ट. मासाद्य. ७ ङ. च. ज.—ट. निर्भर्त्स्यमाना. ८ राक्षसीभिर्विरूपाभिः. ९ क. ङ. झ. ट. अथ. १० ख. ङ.—ट. शोकार्ता. ११ झ. रावणेनेव. १२ क. सिंहैरिवा. १३ क. दुःखार्तांभर्तारं. १४ क. गतमानसा. घ. ज. सक्तमानसा.

सा स्रापयन्ती विपुलौ स्तनौ नेत्रजलस्रवैः ॥ चिन्तयन्ती न शोकस्य तदाऽन्तमधिगच्छति ॥ ७ ॥
सा वेपमाना पतिता प्रवाते कदली यथा ॥ राक्षसीनां भयत्रस्ता विवर्णवदनाऽभवत् ॥ ८ ॥
तस्याः सा दीर्घविपुला वेपन्त्या सीतया तदा ॥ ददृशे कम्पिनी वेणी व्यालीव परिसर्पती ॥ ९ ॥
सा निःश्वसन्ती दुःखार्ता शोकोपहतचेतना ॥ आर्ता व्यसृजदश्रूणि मैथिली विललाप ह ॥ १० ॥
हा रामेति च दुःखार्ता हा पुनर्लक्ष्मणेति च ॥ हा श्वश्रु मम कौसल्ये हा सुमित्रेति भामिनी ॥ ११ ॥
लोकप्रवादः सत्योऽयं पण्डितैः समुदाहृतः ॥ अकाले दुर्लभो मृत्युः स्त्रिया वा पुरुषस्य वा ॥१२॥
यत्राहमेवं क्रूराभी राक्षसीभिरिहार्दिता ॥ जीवामि हीना रामेण मुहूर्तमपि दुःखिता ॥ १३ ॥
एषाऽल्पपुण्या कृपणा विनशिष्याम्यनाथवत् ॥ समुद्रमध्ये नौः पूर्णा वायुवेगैरिवाहता ॥ १४ ॥
भर्तारं तमपश्यन्ती राक्षसीवशमागता ॥ सीदामि खलु शोकेन कूलं तोयहतं यथा ॥ १५ ॥
तं पद्मदलपत्राक्षं सिंहविक्रान्तगामिनम् ॥ धन्याः पश्यन्ति मे नाथं कृतज्ञं प्रियवादिनम् ॥ १६ ॥
सर्वथा तेन हीनाया रामेण विदितात्मना ॥ तीक्ष्णं विषमिवास्वाद्य दुर्लभं मम जीवितम् ॥ १७ ॥
कीदृशं तु मया पापं पुरा जन्मान्तरे कृतम् ॥ येनेदं प्राप्यते दुःखं मया घोरं सुदारुणम् ॥ १८ ॥
जीवितं त्यक्तुमिच्छामि शोकेन महता वृता ॥ राक्षसीभिश्च रक्ष्यन्त्या रामो नासाद्यते मया ॥ १९ ॥
धिगस्तु खलु मानुष्यं धिगस्तु परवश्यताम् ॥ न शक्यं यत्परित्यक्तुमात्मच्छन्देन जीवितम् ॥२०॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

धिष्ठितशिंशुपासन्निहितस्य ॥ ६ ॥ अन्तं अवधिं । अधिगच्छति अध्यगच्छत् ॥ ७ ॥ राक्षसीनां राक्षसीभ्यः ॥ ८ ॥ सीतयेति व्यत्ययेन षष्ठ्यर्थे तृतीया । परिसर्पती परिसर्पन्ती । नुमभावआर्षः ॥ ९ ॥ दुःखार्ता राक्षसीवचनश्रवणजदुःखार्ता । आर्ता रामविरहार्ता ॥ १० ॥ सुमित्रेत्यत्र संबुद्धावाप एकारादेशाभाव आर्षः ॥ ११ ॥ लोकप्रवाद इत्यादिश्लोकद्वयमेकं वाक्यं ॥ अकाले अप्राप्तकाले । दुर्लभ इत्यत्र इतिकरणं बोध्यं । यत्र यतः ॥ १२—१३ ॥ पूर्णा पदार्थैरिति शेषः ॥ १४—१५ ॥ मम धनं सर्वेषां स्वं भविष्यतीत्याह—तमिति ॥ तं " बहवो नृप कल्याणगुणाः पुत्रस्य सन्तिते " इति प्रसिद्धं । आत्मगुणानुक्त्वा विग्रहगुणानाह—पद्मदलपत्राक्षं दलतीति दलं विकसितपद्माक्षमित्यर्थः । यद्वा दलतीति दलं गर्भपत्रं । विस्पष्टार्थमेकार्थे शब्दद्वयं वा । सिंहविक्रान्तगामिनं विक्रान्तं विक्रमः गमनं तद्वत् गच्छतीति तथा ॥ १६—१७ ॥ पुरा जन्मान्तरे पूर्वजन्मनि । घोरं सुदारुणं अत्यन्तघोरमित्यर्थः ॥ १८ ॥ रक्ष्यन्त्या रक्ष्यमाणया ॥ १९ ॥ परवश्यतां भर्तृपरतन्त्रतां । परस्वभूतं शरीरं न स्वेच्छया त्यक्तुं शक्यमित्यर्थः । आत्मच्छन्देन मदिच्छया ॥ २० ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

तिककर्तृक्रिबन्तः । इवार्थस्तुशब्दोवा ॥ ती० हनुमदधिष्ठितशिंशुपामूलंप्राप्तायास्सीतायाअशोकशाखालंबनाभिधानादशोकशाखाःशिंशुपाशाखाश्चपरस्परंसंमिलितावर्तन्तइत्यवगम्यते ॥ ६ ॥ स० भयत्रस्ता भयैः घोरैरायुधादिभिः । त्रस्ता भीता । "भयं प्रतिभयेघोरे " इतिविश्वः ॥ ८ ॥ स० अनाथवत् अनाथेव । आर्षःपुंवद्भावः ॥ १४ ॥ इतिपञ्चविंशःसर्गः ॥ २५ ॥

[पा०] १ क. विषण्णवदना. २ ङ. झ. ट. दीर्घबहुला. ३ ङ. झ. ट. कंपिता. ४ झ. शोकार्तोपोपहतचेतना. ५ क. घ. ङ. झ. ट. विललापच. ६ क. घ.—छ. झ. ञ. ट. यत्राहमाभिः. ७ ङ. झ. ञ. ट. जीवनं. ८ ङ.—ट. महापापं मयादेहान्तरे. ९ ङ. ज.—ट. घोरंमहादुःखं. ङ. ट. घोरंमहद्दुःखं.

षड्विंशः सर्गः ॥ २६ ॥

राक्षसीसंतर्जनमसहमानयासीतया ताःप्रति स्वस्यचित्राहिंसयामारणेपि रावणानङ्गीकरणेदृढप्रतिज्ञानपूर्वकं स्वानयनाय रामानागमने बहुकारणविकल्पनेनबहुधाविलापः ॥ १ ॥

प्रसक्ताश्रुमुखी[1]त्येवं ब्रुवन्ती जनकात्मजा ॥ [2]अधोमुखमुखी बाला विलप्तुमुपचक्रमे ॥ १ ॥
उन्मत्तेव प्रमत्तेव भ्रान्तचित्तेव शोचती ॥ उपावृत्ता किशोरीव विवेष्टन्ती महीतले ॥ २ ॥
राघवस्य प्रमत्तस्य रक्षसा कामरूपिणा ॥ रावणेन प्रमथ्याहमानीता क्रोशती बलात् ॥ ३ ॥
राक्षसीवशमापन्ना भर्त्स्यमाना [3]सुदारुणम् ॥ चिन्तयन्ती सुदुःखार्ता नाँ[4]हं जीवितुमुत्सहे ॥ ४ ॥
न हि मे [5]जीवितैर्थो नैवार्थैर्न च भूषणैः ॥ वसन्त्या राक्षसीमध्ये विना रामं [6]महारथम् ॥ ५ ॥
अश्मसारमिदं नूनमथवाऽप्यजरामरम् ॥ हृदयं मम येनेदं न [7]दुःखेनावशीर्यते ॥ ६ ॥
धिङ्मामनार्यामसतीं याऽहं तेन विना कृता ॥ मुहूर्तमपि [8]रक्षामि जीवितं [9]पापजीविता ॥ ७ ॥
का च मे जीविते श्रद्धा सुखे वा तं प्रियं विना ॥ भर्तारं सागरान्ताया वसुधायाः प्रियंवदम् ॥८॥
भिद्यतां भक्ष्यतां वाऽपि शरीरं विसृजाम्यहम् ॥ न चाप्यहं चिरं दुःखं सहेयं प्रियवर्जिता ॥ ९ ॥
चरणेनापि सव्येन न स्पृशेयं निशाचरम् ॥ रावणं किं पुनरहं कामयेयं [10]विगर्हितम् ॥ १० ॥
[11]प्रत्याख्यातं न जानाति नात्मानं नात्मनः कुलम् ॥ यो नृशंसस्वभावेन मां प्रार्थयितुमिच्छति ॥११॥
छिन्ना [12]भिन्ना विभक्ता वा दीप्ते[13]वाग्नौ प्रदीपिता ॥ रावणं नोपतिष्ठेयं किं प्रलापेन वश्चिरम् ॥१२॥
ख्यातः प्राज्ञः कृतज्ञश्च सानुक्रोशश्च राघवः ॥ [14]सद्वृत्तो निरनुक्रोशः शङ्के मद्भाग्यसंक्षयात् ॥ १३ ॥

उन्मत्ता चित्तविभ्रमवती । " उन्मादश्चित्तविभ्रमः " इत्युक्तेः । प्रमत्ता अनवधाना । " प्रमादोनवधानता " इत्यमरः । भ्रान्तचित्ता अनवस्थितचित्ता । उपावृत्ता श्रमापनोदनार्थं वेष्टिता । किशोरीव बडवेव ॥ २ ॥ प्रमत्तस्य अनवहितस्य ॥ ३–४ ॥ मे जीवितैर्जीवनैः कोप्यर्थो नास्ति । केवलजीवितस्यानपेक्षितत्वेप्यर्थसहितत्वेन तदपेक्षा स्यात् नेत्याह—नैवार्थैर्न च भूषणैः भूषणैरर्थैश्च सहितैर्जीवनैर्मे नार्थः । कुत इत्यत्राह—वसन्त्या इति । राक्षसीमध्यवासाद्रामविरहाच्च सर्वोपकरणसहितमपि जीवितं नापेक्षितमित्यर्थः ॥ ५—१० ॥ प्रत्याख्यातं प्रत्याख्यानं । भावे निष्ठा । आत्मानं स्वस्वरूपं ॥११॥ छिन्ना द्विखण्डतया कृता । भिन्ना दलिता । विभक्ता अवयवशः कृता । दीप्तेव अग्नौ प्रदीपिता वा ॥ १२ ॥ एवं पातिव्रत्यदार्ढ्यमुक्त्वा रामस्यानागमने कारणानि बहुधा शङ्कते—ख्यात इत्यादिना ॥ प्राज्ञः दोषवत्यपि गुणदर्शी । " न तेऽम्बा मध्यमा माता गर्हितव्या कथंचन" इत्युक्तं । कृतज्ञः "कथंचिदुपकारेण कृतेनैकेन तुष्यति" इत्युक्तरीत्या स्वाश्रितैः कृतं किंचित्कारं सर्वदा मनसि कुर्वन्नित्यर्थः । सानुक्रोशः किंचित्कारकरणे "भृशं भवति दुःखितः" इत्युक्तरीत्या तेषां व्यसने सति अतिदुःखितः राघवः । जनित्वार्जितानां गुणान्तराणामुपसंग्रहणमिदं । सद्वृत्तः परसमृद्ध्येकप्रयोजनः । ख्यातः एवं शत्रुगोष्ठ्यामपि प्रसिद्धः । निरनुक्रोशः शङ्के अस्यामप्यवस्थायां सुखप्रदानाभावान्नृशंसमाशङ्के । मद्भाग्यसंक्षयात् । मद्भाग्यविपर्य-

---

ति० असतीं असतीवत्परगृहस्थां । जीवामि जीवितंरक्षामीत्यर्थः । पाकंपचतीतिवत्प्रयोगः ॥ ७ ॥

[पा०] १ ख. ङ.—ञ. त्येवं. २ ङ.—ट. अधोगतमुखी. ३ ङ. च. ज.—ट. चदारुणं. ४ क. नहि. ५ क. घ.—ट. जीवितेनार्थो. ६ क. ख. घ. महाबलं. ७ ङ. च. ज. झ. ट. नदुःखेनविशीर्यते. क. दुःखेननविशीर्यते. ८ झ. ट. जीवामि. ९ ङ. झ. ट. पापजीविका. १० ङ. झ. ट. निशाचरं. ११ क. ङ. झ. ञ. ट. प्रत्याख्यानं. १२ ङ. झ. ट. भिन्नाप्रभिन्ना. १३ ङ. झ. दीप्तावाग्नौ. १४ क. च. ज. ञ. सुवृत्तो.

राक्षसानां [1]सहस्राणि जनस्थाने चतुर्दश ॥ [2]येनैकेन निरस्तानि स मां किं नाभिपद्यते ॥ १४ ॥
निरुद्धा रावणेनाहमल्पवीर्येण रक्षसा ॥ समर्थः खलु मे भर्ता रावणं हन्तुमाहवे ॥ १५ ॥
विराधो दण्डकारण्ये येन राक्षसपुङ्गवः ॥ रणे रामेण निहतः स [3]मां किं नाभिपद्यते ॥ १६ ॥
कामं मध्ये समुद्रस्य लङ्केयं दुष्प्रधर्षणा ॥ न तु राघवबाणानां [4]गतिरोधीह विद्यते ॥ १७ ॥
किंनु तत्कारणं येन रामो दृढपराक्रमः ॥ रक्षसापहृतां भार्यामिष्टां [5]नाभ्यवपद्यते ॥ १८ ॥
इहस्थां मां न जानीते शङ्के लक्ष्मणपूर्वजः ॥ जानन्नपि हि तेजस्वी [6]धर्षणं मर्षयिष्यति ॥ १९ ॥
हृतेति योधि[7]गत्वा मां राघवाय निवेदयेत् ॥ गृध्रराजोपि स रणे रावणेन निपातितः ॥ २० ॥
कृतं कर्म महत्तेन मां [8]तथाऽभ्यवपद्यता ॥ तिष्ठता रा[9]वणद्वन्द्वे वृद्धेनापि जटायुषा ॥ २१ ॥
यदि मामिह जानीयाद्वर्तमानां [10]सं राघवः ॥ अद्य बाणैरभिक्रुद्धः कुर्याल्लोकमराक्षसम् ॥ २२ ॥
[11]विधमेच्च पुरीं लङ्कां शोषयेच्च महोदधिम् ॥ रावणस्य च नीचस्य कीर्तिं नाम च नाशयेत् ॥ २३ ॥
ततो निहतनाथानां राक्षसीनां गृहे गृहे ॥ यथाहमेवं रुदती तथा भूयो न संशयः ॥ २४ ॥
अन्विष्य रक्षसां लङ्कां कुर्याद्रामः सलक्ष्मणः ॥ न हि ताभ्यां रिपुर्दृष्टो मुहूर्तमपि जीवति ॥ २५ ॥
चिताधूमाकुलपथा गृध्रम[12]ण्डलसंकुला ॥ [13]अचिरेण तु लङ्केयं श्मशानसदृशी भवेत् ॥ २६ ॥
अचिरेणैव कालेन प्राप्स्याम्येवं [14]मनोरथम् ॥ दुष्प्रस्थानोयमा[15]ख्याति सर्वेषां वो [16]विपर्ययम् ॥ २७ ॥
[17]यादृशानीह दृश्यन्ते लङ्कायामशुभानि वै ॥ [18]अचिरेण तु कालेन भविष्यति हतप्रभा ॥ २८ ॥
नूनं लङ्का हते पापे रावणे [19]रा[20]क्षसाधमे ॥ [21]शोषं यास्यति दुर्धर्षा प्रमदा विधवा यथा ॥ २९ ॥

येणैवं वैपरीत्यं जातं ॥ १३ ॥ एकमात्रसहायः स किं करिष्यतीत्यत्राह—राक्षसानामिति ॥ जनस्थाने रक्षसां चतुर्दश सहस्राणि एकेन येन रामेण निरस्तानि घातितानि सः नाभिपद्यते न रक्षति ॥ १४ ॥ प्रबलो रावणः कथं निरस्य इत्यत्राह—निरुद्धेति ॥ १५ ॥ सामर्थ्यं निदर्शयति—विराध इति ॥ १६ ॥ अस्तु-रामःसमर्थः तथापि समुद्रमध्यस्थालङ्कादुष्प्रधर्षेत्याशङ्क्याह—काममिति ॥ गतिरोधि गतिप्रतिबन्धकं । किंचिदिति शेषः ॥ १७ ॥ एतत्फलितमाह—किंन्विति ॥१८॥ लक्ष्मणपूर्वज इत्यनेन निरनुक्रोशत्वादिप्रसक्त्यभावस्सूच्यते । मर्षयिष्यतीत्यत्र काकुरनुसंधेया ॥१९॥ इहास्तीत्यज्ञाने हेतुमाह—हृतेति ॥२०॥ प्रसङ्गादाह—कृतमिति ॥ अभ्यवपद्यता रक्षता । रावणद्वन्द्वे रावणद्वन्द्वयुद्धे ॥ २१—२३ ॥ अहं यथा एवं रुदती रुदन्त्यस्मि । तथा निहतनाथानां राक्षसीनां गृहे गृहे भूयः भूरि । रुदन्त्यो भविष्यन्तीत्यर्थः ॥ २४ ॥ रक्षसां लङ्कामन्विष्य कुर्यात् । रिपुनाशनमिति शेषः ॥ २५—२६ ॥ दुष्प्रस्थानः दुर्मार्गः दुराचार इति यावत् ॥ २७ ॥ अशुभानि अशुभसूचकानि । हतप्रभेत्यत्र लङ्केत्यनुकर्षः । लङ्का अचिरेण कालेन हतप्रभा भविष्यतीत्यत्र यादृशानि सूचकानि स्युः इह लङ्कायां तादृशान्यशुभानिदृश्यन्त इत्यन्वयः ॥ २८ ॥ दुर्धर्षेति लङ्काविशेषणं ॥ २९ ॥

शि० सरामः मां नाभ्यवपद्यते किमर्थमितिशेषः ॥ १६ ॥ ति० रावणवधेतिष्ठता रावणवधार्थंयतता ॥ २१ ॥ स० दुष्प्रस्थानः दुस्साध्यप्रस्थानः । अनिवर्त्यइतियावत् ॥ २७ ॥ ति० शोषं ऐश्वर्यादेरितिशेषः ॥ २९ ॥

[पा०] १ क. घ.—ट. जनस्थानेसहस्राणि. २ च. झ. ट. एकेनैव. ३ क. ख. च. ज. ट. मांनाभ्यवपद्यते. ४ झ. ट. गतिरोधोभविष्यति. च. ज. ञ. गतिरोधोत्रदृश्यते. ५ ङ. झ. मिष्टांयोनाभिपद्यते. ख. च. छ. ट. मिष्टांनाभ्युपपद्यते. ६ क. घ.—छ. झ. ञ. ट. धर्षणां. ७ ङ. झ. ट. मांयोधिगत्य. क. च. छ. ज. ञ. योभिगत्वामां. ८ च. ज. झ. ट. तदा. ९ क. ङ. झ. ट. रावणवधे. १० ङ. ज. झ. ट. हिराघवः. ११ ङ. झ. ट. निर्दहेच्च. १२ ङ.—ट. मण्डलमण्डिता. १३ ख. ङ. झ. ट. अचिरेणैवकालेन. १४ ङ. झ. ट. म्येनं. १५ ङ. झ. ट. माभाति. १६ ङ. झ. ट. विपर्ययः. १७ ग. ङ. च. ज. झ. ट. यादृशानितु. १८ क. ख. घ. ङ. च. ज.—ट. अचिरेणैव. १९ क. घ.—ट. राक्षसाधिपे. २० ङ. झ. ञ. ट. शोषमेष्यति.

पुण्योत्सवसंमुत्था[1] च नष्टभर्त्री[2] सराक्षसी ॥ भविष्यति पुरी लङ्का नष्टभर्त्री यथाऽङ्गना ॥ ३० ॥
नूनं राक्षसकन्यानां रुदन्तीनां[3] गृहे गृहे ॥ श्रोष्यामि नचिरादेव दुःखार्तानामिह ध्वनिम् ॥ ३१ ॥
सान्धकारा हतद्योता हतराक्षसपुङ्गवा ॥ भविष्यति पुरी लङ्का निर्दग्धा रामसायकैः ॥ ३२ ॥
यदि नाम[4] स शूरो मां रामो रक्तान्तलोचनः[5] ॥ जानीयाद्वर्तमानां[6] हि रावणस्य निवेशने ॥ ३३ ॥
अनेन तु नृशंसेन रावणेनाधमेन मे ॥ समयो यस्तु निर्दिष्टस्तस्य कालोऽयमागतः ॥ ३४ ॥
[सँ च मे विहितो मृत्युरस्मिन्दुष्टेन[7] वर्तते ॥] अकार्यं ये न जानन्ति नैर्ऋताः[8] पापकारिणः ॥
अधर्मात्तु महोत्पातो भविष्यति हि साम्प्रतम् ॥ ३५ ॥
नैते धर्मं विजानन्ति राक्षसाः पिशिताशनाः ॥ ध्रुवं मां प्रातराशार्थे राक्षसः[9] कल्पयिष्यति ॥३६॥
साऽहं कथं करिष्यामि[10] तं विना प्रियदर्शनम् ॥ रामं रक्तान्तनयनमपश्यन्ती सुदुःखिता ॥ ३७ ॥
यदि कश्चित्प्रदाता मे विषस्याद्य[11] भवेदिह ॥ क्षिप्रं वैवस्वतं देवं पश्येयं पतिना विना ॥ ३८ ॥
नाजानाज्जीवतीं रामः स मां लक्ष्मणपूर्वजः[12] ॥ जानन्तौ तौ न कुर्यातां नोर्व्यां हि मम मार्गणम्[13] ३९
नूनं ममैव शोकेन स वीरो लक्ष्मणाग्रजः ॥ देवलोकमितो यातस्त्यक्त्वा देहं महीतले ॥ ४० ॥
धन्या देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ मम पश्यन्ति ये नाथं[14] रामं राजीवलोचनम् ॥ ४१ ॥
अथवा न हि तस्यार्थो धर्मकामस्य धीमतः ॥ मया रामस्य राजर्षेर्भार्यया परमात्मनः ॥ ४२ ॥
दृश्यमाने भवेत्प्रीतिः सौहृदं नास्त्यपश्यतः[15] ॥ नाशयन्ति कृतघ्नास्तु न रामो नाशयिष्यति ॥४३॥

पुण्योत्सवेभ्यस्समुत्था निकृत्तपुण्योत्सवेत्यर्थः । सराक्षसी राक्षसीजनमात्रयुक्तेत्यर्थः । इयं लङ्कापुरी । नष्टभर्त्री सराक्षसी अर्थात् हतराक्षसा । नष्टभर्त्री अङ्गना यथा अङ्गनेव पुण्योत्सवसमुत्था भविष्यतीत्यन्वयः ॥३०—३२॥ स रामः रावणस्य निवेशने मां वर्तमानां जानीयाद्यदि तदा लङ्का निर्दग्धा भविष्यतीति पूर्वेण संबन्धः ॥ ३३ ॥ समयः द्वादशमासात्मकः संकेतः । तस्य कालः आगतः सन्निहितः । मासद्वयमात्रपरिशेषादिति भावः ॥ ३४ ॥ पापकारिणः ये नैर्ऋताः अधर्मोद्धेतोः अकार्यं च जानन्ति । तैर्महोत्पातस्संभविष्यति ॥ ३५ ॥ एतदेव विवृणोति—नैत इति ॥ ३६—३७ ॥ पतिनेति नाभाव आर्षः ॥ ३८ ॥ जीवतीं जीवन्तीं । न न कुर्यातां कुर्यातामेव । तदाह वामनः—" संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ " इति ॥ ३९—४१ ॥ धर्मकामस्य तस्य कामानपेक्षिण इत्यर्थः । मया भार्यया कोर्थः । परमात्मनः उत्कृष्टस्वभावस्य ॥ ४२ ॥ सौहृदं नास्त्यपश्यतः अदृश्यमाने प्रीतिर्न भवति । तस्माददृश्यायां मयि रामस्य किं प्रीतिर्नासीदित्यर्थः । एवमाशङ्कितं प्रतिषेधति—नाशयन्तीति । कृतघ्नाः प्रथममुत्पन्नां प्रीतिं नाशयन्ति । न तु रामो नाशयिष्यति । मयिप्रीतिमितिशेषः

ति० पुण्योत्सवसमृद्धाच । अद्येतिशेषः ॥३०॥ ति० अस्मिन्काले दुष्टेन रावणेन । सकालोमेमृत्युर्विहितः । वर्ततइत्यर्थः । ननुततःपरमपिस्त्रीत्वात्त्वांनहिंस्युस्तत्राह—अकार्यमिति ॥ ३५ ॥ ति० ननुत्वज्जीवनाभावनिश्चयप्रमाणोपलंभंविनाकथंरामेणदेहस्त्यक्तइत्यतःपक्षान्तरमाह—अथवेति । धर्मकामस्यहिभार्ययाऽर्थः अर्थतुनतथा । तदेवाह—धीमतः आत्मानात्मविवेकवतः । अतएवपरमात्मनः परमात्मब्रह्मात्मनास्थितस्यजीवन्मुक्तस्यतस्यमयानार्थः । अनेनवैराग्यादप्रवृत्तिरितिसूचितं ॥ ४२ ॥ ती० यद्वा सौहृदं स्नेहं । अपश्यतःपुंसः । दृश्यमानेपि सुहृदीतिशेषः । प्रीतिर्नभवेत् किमुतादृश्यमाने ॥ स० सौहृदमिति । " हृद्भगसिन्धवन्ते " इत्यादिनोभयपदवृद्ध्यभावआर्षः ॥ अवृत्तच्छित्तेस्तथैवपठितुंसुशकंवा ॥ ४३ ॥

[पा०] १ क. घ. च. झ. ञ. ट. समृद्धाच. २ क. ख. घ. ङ. च. ज.—ट. सराक्षसा. ३ घ. च. झ. ट. रुदतीनां. ४ क. च. छ. ज. ञ. रामःसशूरोमामिह. ५ घ. राजीवलोचनः. ६ ङ.—ज. वर्तमानांमां. झ. वर्तमानांयां. ७ इदमर्धं ङ. झ. ट. पाठेषुदृश्यते. ८ क. ग. घ. च. छ. ज. पापचारिणः. ९ झ. राशार्थं. १० क. ग. छ. चरिष्यामि. ११ च. छ. ज. विषमद्य. १२ घ. ङ. झ. ट. भरतपूर्वजः. १३ ङ.—ट. परिमार्गणं. १४ ग. ङ. च. ज.—ट. वीरं. १५ ङ. झ. ट. नास्त्यदृश्यतः.

किंनु[1] मे न गुणाः केचित्किंवा भाग्यक्षयो[2] मम ॥ याऽहं सीदामि रामेण हीना मुख्येन भामिनी ॥४४॥
श्रेयो[3] मे जीवितान्मर्तुं विहीनाया महात्मनः[4] ॥ रामादक्लिष्टचारित्राच्छूराच्छत्रुनिबर्हणात् ॥ ४५ ॥
अथवा न्यस्तशस्त्रौ तौ वने मूलफलाशिनौ ॥ भ्रातरौ हि नरश्रेष्ठौ संवृत्तौ[5] वनगोचरौ ॥ ४६ ॥
अथवा राक्षसेन्द्रेण रावणेन दुरात्मना ॥ छद्मना सादितौ[6] शूरौ भ्रातरौ रामलक्ष्मणौ ॥ ४७ ॥
साऽहमेवं[7] गते काले मर्तुमिच्छामि सर्वथा ॥ न च मे विहितो मृत्युरस्मिन्दुःखेऽपि वर्तति ॥४८॥
धन्याः खलु महात्मानो[8] मुनयस्त्यक्तकिल्बिषाः[9] ॥ जितात्मानो[10] महाभागा[11] येषां न स्तः प्रियाप्रिये ४९
प्रियान्न संभवेद्दुःखमप्रियादधिकं भयम्[12] ॥ ताभ्यां हि [13]ये वियुज्यन्ते नमस्तेषां महात्मनाम् ॥५०॥
साऽहं त्यक्ता [14]प्रियेणेह रामेण विदितात्मना[15] ॥ प्राणांस्त्यक्ष्यामि पापस्य रावणस्य गता वशम् ॥५१॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षड्विंशः सर्गः ॥ २६ ॥

सप्तविंशः सर्गः ॥ २७ ॥

सीतांसंतर्जयन्तीराक्षसीःप्रति स्वापात्प्रबुद्धयात्रिजटाख्ययाराक्षस्या स्वेनसीताराघवयोः स्वबन्धोरावणस्यच क्रमेणाभ्युदयानभ्युदयसूचकाद्भुतस्वप्नदर्शननिवेदनेन सभर्त्सनंसीतातर्जनप्रतिषेधनपूर्वकं दूरेतासामपसारणम् ॥ १ ॥ तथा तासां प्रार्थनया ताःप्रति स्वस्यस्वामिकार्यदर्शनप्रकारनिरूपणपूर्वकं सीतायाविजयाशंसकशुभशकुनप्रदर्शनम् ॥ २ ॥

इत्युक्ताः सीतया घोरा[16] राक्षस्यः क्रोधमूर्च्छिताः ॥ [17]काश्चिज्जगमुस्तदाख्यातुं रावणस्य [18]तरस्विनः ॥१॥
ततः सीतामुपागम्य राक्षसो घोरदर्शनाः ॥ पुनः परुषमेकार्थमनर्थार्थमथाब्रुवन् ॥ २ ॥

॥ ४३ ॥ नगुणाः दुष्कृतानि ॥ ४४ ॥ मर्तुमिति भावार्थे तुमुन् । मरणमित्यर्थः । महात्मनः रामाद्विहीनायाः महात्मना रामेण हीनायाः । तृतीयार्थे पञ्चमी ॥४५॥ न्यस्तशस्त्रौ संवृत्तौ किमिति संबन्धः ॥ ४६ ॥ सादितौ हतौ ॥ ४७ ॥ वर्ततिवर्तमाने ॥ ४८ ॥ महात्मानः महाधैर्याः । त्यक्तकिल्बिषाः त्यक्तपापाः । जितात्मानः जितान्तःकरणाः । महाभागाः महाभाग्याः ॥ ४९ ॥ प्रियान्न संभवेद्दुःखं किंतु सुखमेव भवेदित्यर्थः । प्रियात् अनुकूलवस्तुनः । अप्रियात् प्रतिकूलवस्तुनः । अधिकं भयं अधिकं दुःखं । ताभ्यां । प्रियाप्रियाभ्यां । नमस्तेषां त एव सर्वोत्तमा इत्यर्थः ॥ ५० ॥ साहं तद्विलक्षणाहं । केवलप्रियपरेत्यर्थः । प्रियेण त्यक्ता अप्रियं प्राप्ता । प्राणांस्त्यक्ष्यामीत्यर्थः ॥ ५१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षड्विंशः सर्गः ॥ २६ ॥

तत् मरणाध्यवसायं ॥ १ ॥ एकार्थं पूर्वोक्तवचनैरेकाभिधेयं । अनर्थार्थं अनर्थफलकं । एकाक्ष्यादयः पूर्वोक्तार्थमेव परुषवचनं पुनरब्रुवन्नित्यर्थः ॥ २ ॥

ति० मयितदुपेक्षाहेतवःकेचनअगुणाः दोषाःस्युः । अयमपिपक्षोनयुक्तः । स्वापरिज्ञातस्वापचाराभावात् । तस्मात्प्राग्भवीयदुष्कर्मजोभाग्यक्षयएवहेतुरित्याह—किंवेति ॥४४॥ ति० भाग्यक्षयनिश्चयस्यकर्तुमशक्यत्वात्पक्षान्तरं—अथवेति ॥ ४६ ॥ ति० इदमप्यसंभावितं । रक्षोभिःकृतवैरेणक्षत्रियेणतत्त्यागायोगात् । अतःपक्षान्तरं—अथवेति॥४७॥ इतिषड्विंशःसर्गः॥२६॥

स० तत् सीताव्यवसितंमरणं ॥ १ ॥ स० एकार्थं रावणसंगमरूपैकाभिधेययुक्तं । अनर्थः राक्षसविनाशरूपः अर्थः प्रयो-

[पा०] १ ङ. ञ. ट. किंवामय्यगुणाः. २ क. ग.—ट. क्षयोहिमे. क. ग. घ. ङ. ञ. ट. याहिसीतावरार्हेणहीनारामेणभामिनी. ३ क. श्रेयोहि. ४ ख. घ. च. ज. ञ. महात्मना. ५ क. ग.—ट. चरन्तौ. ६ ख. ग. ङ.—ट. घातितौ. ७ क. घ. वीरौ. ८ ङ.—ट. मेवंविधे. ९ ङ. ञ. ट. दुःखेऽतिवर्तति. १० क. ग. ट. मुनयःसत्यसंमताः. ११ घ. महात्मानो. १२ ङ.—ट. भवेत्. १३ ञ. तेवियुज्यन्ते. १४ ङ. ञ. ट. प्रियेणैव. १५ ग. ङ. ञ. ट. घोरं. १६ घ. स्थिताःकाश्चिद्गताःकाश्चिद्रावणायनिवेदितुं. १७ ङ. ञ. ञ. ट. दुरात्मनः.

[1]अद्येदानीं तवानार्ये सीते पापविनिश्चये ॥ राक्षस्यो [2]भक्षयिष्यन्ति मांसमेतद्यथासुखम् ॥ ३ ॥
सीतां ताभिरनार्याभिर्दृष्ट्वा संतर्जितां तदा ॥ राक्षसी त्रिजटा [3]वृद्धा शयाना वाक्यमब्रवीत् ॥ ४ ॥
आत्मानं खादतानार्या न सीतां भक्षयिष्यथ ॥ जनकस्य सुतामिष्टां स्नुषां दशरथस्य च ॥ ५ ॥
स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः ॥ राक्षसानामभावाय भर्तुरस्या [4]भवाय च ॥ ६ ॥
एवमुक्तास्त्रिजटया राक्षस्यः क्रोधमूर्च्छिताः ॥ सर्वा एवाब्रुवन्भीतास्त्रिजटां तामिदं वचः ॥
कथयस्व त्वया दृष्टः स्वप्नोऽस्याः कीदृशो निशि ॥ ७ ॥
तासां श्रुत्वा तु वचनं राक्षसीनां [5]मुखाच्च्युतम् ॥ उवाच वचनं काले त्रिजटा स्वप्नसंश्रितम् ॥ ८ ॥
गजदन्तमयीं दिव्यां शिबिकामन्तरिक्षगाम् ॥ युक्तां [6]हंससहस्रेण स्वयमास्थाय राघवः ॥
[7]शुक्लमाल्याम्बरधरो लक्ष्मणेन [8]सहागतः ॥ ९ ॥
स्वप्ने चाद्य मया दृष्टा सीता शुक्लाम्बरावृता ॥ सागरेण परिक्षिप्तं [9]श्वेतं पर्वतमास्थिता ॥
रामेण संगता सीता भास्करेण [10]प्रभा यथा ॥ १० ॥
राघवश्च [11]मया दृष्टश्चतुर्दन्तं महागजम् ॥ आरूढः शैलसंकाशं [12]चचार सहलक्ष्मणः ॥ ११ ॥
[13]ततस्तौ नरशार्दूलौ दीप्यमानौ स्वतेजसा ॥ शुक्लमाल्याम्बरधरौ जानकीं पर्युपस्थितौ ॥ १२ ॥
ततस्तस्य नगस्याग्रे ह्याकाशस्थस्य दन्तिनः ॥ भर्त्रा परिगृहीतस्य जानकी स्कन्धमाश्रिता ॥ १३ ॥
भर्तुरङ्कात्समुत्पत्य ततः कमललोचना ॥ चन्द्रसूर्यौ मया दृष्टा [14]पाणिना परिमार्जती ॥ १४ ॥
ततस्ताभ्यां कुमाराभ्यामास्थितः स गजोत्तमः ॥ सीतया च विशालाक्ष्या लङ्काया उपरि स्थितः ॥१५
पाण्डुरर्षभयुक्तेन रथेनाष्टयुजा स्वयम् ॥ [[15]शुक्लमाल्यांबरधरो लक्ष्मणेन सहागतः ॥
ततोन्यत्र मया दृष्टो रामः सत्यपराक्रमः] ॥ १६ ॥
इहोपयातः काकुत्स्थः सीतया सह भार्यया ॥ १७ ॥

अद्य अस्मिन्दिने। इदानीं अस्मिन्क्षणे। भक्षयिष्यन्तीत्यब्रुवन्निति पूर्वेण संबन्धः ॥ ३ ॥ त्रिजटा विभीषणपुत्री। शयानेत्यनेन स्वप्नवृत्तान्तकथनत्वरोच्यते ॥ ४—६ ॥ निशीत्यनन्तरमितिकरणं द्रष्टव्यं ॥ ७ ॥ काले उषःकाले यस्स्वप्नः तत्संश्रितं ॥ ८ ॥ आगतः लङ्कामिति शेषः ॥९—१०॥ महागजमारूढ इति शिबिकात इति शेषः। तथोक्तं स्वप्नाध्याये—"आरोहणं गोवृषकुञ्जराणां प्रासादशैलाग्रवनस्पतीनाम्। विष्ठानुलेपो रुदितं मृतं च स्वप्नेष्वनन्यागमनं च धन्यं" इति ॥११॥ चचार सीतां प्रतीति शेषः ॥१२॥ ततस्तस्य नगस्याग्र इति ॥ अत्र द्वादशसहस्रश्लोकागताः त्रयोदशसहस्रादिमोयं श्लोकः। गायत्र्याख्योदशमक्षरमत्र बोध्यम् ॥ १३ ॥ चन्द्रसूर्यौ पाणिना परिमार्जतीति। अत्र स्वप्नाध्यायवचनं। "आदित्यमण्डलं वातु चन्द्रमण्डलमेव वा। स्वप्ने गृह्णाति हस्ताभ्यां राज्यं संप्राप्नुयान्महत् इति ॥ १४—१७ ॥

जनं यस्यतादृशं। परुषं परुषवाक्यमब्रुवन् ॥ २ ॥ **स०** अद्येत्युक्तौ श्वःप्रातःपर्यन्तमितिभ्रमोमाहिभूदितीदानीमित्युक्तं ॥ ३ ॥ **ति०** प्रबुद्धेत्यनेन तावत्पर्यन्तंसुप्तवतीतिगम्यते ॥४॥ **ती०** कालेप्रातःकाले। स्वप्नसंश्रितं प्रातःकालदृष्टस्वप्नदृष्टार्थविषयकं। अनेन स्वप्नस्यशीघ्रफलदत्वंसूचितं ॥७॥ **ती०** एतेन लङ्कायामेवरामस्यसीतादर्शनंसूचितं ॥९॥ **शि०** सीता स्वर्गगङ्गासदृशी। सीता वैदेही। सार्धश्लोकएकान्वयी। एकःसीताशब्दः आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः। "सीता लाङ्गलपद्धतिवैदेहीस्वर्गगङ्गासु" इतिमेदिनी ॥ १० ॥ **ति०** शुक्लमाल्यांबरधरोरामोलक्ष्मणेनसहेहागतइत्यन्वयः। अन्यत्र स्वप्नान्तरे ॥ १६ ॥

[**पा०**] १ घ. ह्यन्तेदानीं. २ छ. ज. ञ. भक्षयिष्यामो. ३ ङ. ञ. ट. वृद्धाप्रबुद्धा. ४ क. ग. घ. जयायच. ५ क. ग. ङ.—ट. मुखोद्गतं. ६ ग. घ. ङ. छ. ञ. ञ. ट. वाजिसहस्रेण. ७ क. च. छ. ञ. शुक्लांबरधरोवीरो. ८ क. ख. ङ. च. ज.—ट. समागतः. ९ ङ. च. छ. ञ. ञ. ट. श्वेतपर्वतं. १० ट. यथाप्रभा. ११ ङ. ञ. ञ. ट. पुनर्दृष्टः. १२ ग. ङ. ञ. ञ. ट. चकास. च. छ. ज. जगाम. १३ ङ. ञ. ट. ततस्तुसूर्यसंकाशौ. क. च. छ. ज. ततस्तु. १४ ङ—ट. पाणिभ्यां. १५ इदमर्धद्वयं क. ग.—ट. पाठेषुदृश्यते.

लक्ष्मणेन सह भ्रात्रा सीतया सह वीर्यवान् ॥ आरुह्य पुष्पकं दिव्यं विमानं सूर्यसन्निभम् ॥
उत्तरां दिशमालोक्य जगाम पुरुषोत्तमः ॥ १८ ॥
एवं स्वप्ने मया दृष्टो रामो विष्णुपराक्रमः ॥ लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया ॥ १९ ॥
[साण्डं त्रिभुवनं सर्वं सर्वतः सचराचरम् ॥ सर्वं ग्रस्तं मया दृष्टं रामेणाक्लिष्टकर्मणा ॥ २० ॥
क्षीरोदधिजले मध्ये श्वेतः शैलः समुच्छ्रितः ॥ तस्य मूर्ध्नि ततः श्वेतश्चतुर्दन्तो महागजः ॥
तस्य पृष्ठे स्थितः श्रीमान्रामो राजीवलोचनः ॥ २१ ॥
ततः सीता समुत्पत्य भर्तुरङ्काश्रिता तदा ॥ बाहुभ्यां संपरिष्वज्य संपूर्णं चन्द्रमण्डलम् ॥ २२ ॥
ततोऽन्यत्र मया दृष्टो रामो राजीवलोचनः ॥ आसीनः प्राङ्मुखः श्रीमानासने परमाद्भुते ॥ २३ ॥
अभिषिक्तस्तु काकुत्स्थः सर्वदेवैर्नमस्कृतः ॥ सब्रह्मर्षिगणैः सर्वैः सर्वतीर्थजलेन च ॥ २४ ॥
शुक्लमाल्यांबरधरा शुक्लमाल्यानुलेपना ॥ साधु सा तत्र सुश्रोणी रराज जनकात्मजा ॥ २५ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ ब्रह्माणमग्रतः कृत्वा रामं तत्र ववन्दिरे ॥ २६ ॥
पुनरेव मया दृष्टो रामो रमयतांवरः ॥ विष्णुरेव स्वयं भूत्वा तस्मिन्नास्ते वरासने ॥ २७ ॥
परं ब्रह्म परं तत्वं परं ज्ञानं परं तपः ॥ परं बीजं परं क्षेत्रं परं कारणकारणम् ॥ २८ ॥
शङ्खचक्रगदः श्रीमान्पुण्डरीकायतेक्षणः ॥ श्रीवत्सवक्षा नित्यश्रीरजेयः शाश्वतो ध्रुवः ॥ २९ ॥
एवंभूतो महातेजा रामः कमललोचनः ॥ सर्वलोकेश्वरः श्रीमान्ससर्ज रघुनन्दनः ॥ ३० ॥

ततोमरेन्द्राः पितरो मुनीन्द्रा गन्धर्वविद्याध्वरपन्नगेन्द्राः ॥
कृताभिषेकं परिवार्य रामं प्रतुष्टुवुः प्राञ्जलयः प्रहृष्टाः ॥ ३१ ॥
ततस्तु सर्वाप्सरसः प्रहृष्टा नृत्यन्ति गायन्ति समेत्य तत्र ॥
वाद्यं प्रकुर्वन्ति समेत्य शङ्खा वंशाश्च वीणा मुरजाश्च भेर्यः ॥ ३२ ॥]

न हि रामो महातेजाः शक्यो जेतुं सुरासुरैः ॥ राक्षसैर्वाऽपि चान्यैर्वा स्वर्गः पापजनैरिव ॥ ३३ ॥

अयमिह स्वप्नक्रमः । शिबिकास्थितो रामो दृष्टः । श्वेतपर्वतस्था सीता च । ततः शिबिकाया गजमारुह्य लक्ष्मणेन सह पर्वतमभ्येत्य ततस्सीतां गजस्कन्धेधिरोप्य लङ्काया उपरि स्थित्वा ताभ्यां सहाष्टर्षभयुक्तेन रथेनेहागत्य स्वं देशं प्रति ताभ्यां पुष्पकमधिरुह्यागत इति अन्ये श्लोकाः प्रक्षिप्ताः । तेन ते न व्याख्याता इत्याहुः । लक्ष्मणेन सह भ्रात्रेति ॥ एतत्पादस्यानन्तरं, सीतया सह वीर्यवान् ॥ आरुह्य पुष्पकं दिव्यं विमानं सूर्यसन्निभम् । उत्तरां दिशमालोक्य जगाम पुरुषोत्तमः ॥ एवं स्वप्ने मया दृष्टो रामो विष्णुपराक्रमः । लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया ॥ इति पाठक्रमः । विमाने पुष्पके स्थितः । साण्डं त्रिभुवनमित्यारभ्य रामः सत्यपराक्रम इत्यन्तो ग्रन्थः प्रक्षिप्तः प्रकृतासंगतश्च । विष्णुरेव स्वयंभूत्वेति प्रक्षिप्तवचनस्य विष्णुपराक्रम इत्यनेन विरोधात्

ति० अत्रमध्ये ' साण्डंत्रिभुवनं ' इत्यादयोबहवःश्लोकाः रामानुजसंप्रदायपुस्तकेषुदृश्यन्ते । तेप्रक्षिप्ताइतिकतकादयोऽन्येच ॥ १९ ॥ स० विष्णुःउपेन्द्ररूपीसन् ॥ २७ ॥ स० तत्स्वरूपंनिरूपयति—परंब्रह्मेति । कीदृशंब्रह्म परंतत्वं अत्यन्तानारोपितरूपं । परंज्ञानं उत्तमज्ञानस्वरूपं । परंतपः फलरूपं । परंबीजं अतिशयेननिमित्तकारणं । परंक्षेत्रं मुख्याश्रयः । कारणकारणं प्रकृतिकालादिरूपकारणानामपिकारणं ॥ २८ ॥ नित्यश्रीः अनपायलक्ष्मीवान् । अत्रसाण्डंभुवनमित्याद्येतदन्तंश्लोकजातंप्रक्षिप्तमितिकतकप्रभृतयः । अस्माभिस्तुगङ्गाजलमिश्ररथ्योदकवदुपादेयतयाव्याख्यातं ॥ २९ ॥

[पा०] १ ङ. ञ. ट. मालोच्यप्रस्थितः. २ घ. च. छ. ज. ञ. वीर्यवान्. ३ साण्डंत्रिभुवनमित्यारभ्यवीणामुरजाश्चभेर्यइत्यन्ताःश्लोकाः च. छ. ज. ञ. पाठेषुदृश्यन्ते. ४ च. छ. नतु. ५ क. च. छ. रक्षसांवापिलोकेन. ग. रक्षसांवापिलोकैर्वा·

रावणश्च मया दृष्टः क्षितौ[1] तैलसमुक्षितः ॥ रक्तवासाः पिबन्मत्तः करवीरकृतस्रजः ॥ ३४ ॥
विमानात्पुष्पकाद्य रावणः पतितो[2] भुवि ॥ कृष्यमाणः स्त्रिया[3] दृष्टो मुण्डः कृष्णाम्बरः[4] पुनः ॥३५॥
रथेन खरयुक्तेन रक्तमाल्यानुलेपनः[5] ॥ पिबंस्तैलं हसन्नृत्यन्भ्रान्तचित्ताकुलेन्द्रियः[6] ॥
गर्दभेन ययौ शीघ्रं दक्षिणां दिशमाश्रितः[7] ॥ ३६ ॥
पुनरेव मया दृष्टो रावणो राक्षसेश्वरः ॥ पतितोऽवाक्शिरा भूमौ गर्दभाद्भयमोहितः[8] ॥ ३७ ॥
सहसोत्थाय संभ्रान्तो भयार्तो मदविह्वलः[9] ॥ उन्मत्त[5] इव दिग्वासा दुर्वाक्यं प्रलपन्बहु ॥ ३८ ॥
दुर्गन्धं दुःसहं घोरं तिमिरं नरकोपमम् ॥ मलपङ्कं प्रविश्याशु मग्नस्तत्र स रावणः ॥
[प्रस्थितो दक्षिणामाशां[10] प्रविष्टः कर्दमह्रदम्] ॥ ३९ ॥
कण्ठे बद्ध्वा दशग्रीवं प्रमदा रक्तवासिनी ॥ काली कर्दमलिप्ताङ्गी दिशं याम्यां प्रकर्षति ॥ ४० ॥
एवं तत्र मया दृष्टः कुम्भकर्णो निशाचरः[11] ॥ रावणस्य सुताः सर्वे दृष्टास्तैलसमुक्षिताः[12] ॥ ४१ ॥
वराहेण दशग्रीवः शिंशुमारेण चेन्द्रजित् ॥ उष्ट्रेण कुम्भकर्णश्च प्रयातो[13] दक्षिणां दिशम् ॥ ४२ ॥
एकस्तत्र मया दृष्टः श्वेतच्छत्रो विभीषणः ॥ शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः ॥
शङ्खदुन्दुभिनिर्घोषैर्नृत्तगीतैरलङ्कृतः ॥ ४३ ॥
आरुह्य शैलसंकाशं[14] मेघस्तनितनिस्स्वनम् ॥ चतुर्दन्तं गजं दिव्यमास्ते तत्र विभीषणः ॥
चतुर्भिः सचिवैः सार्धं वैहायसमुपस्थितः[15] ॥ ४४ ॥
समाजश्च मया[16] दृष्टो गीतवादित्रनिःस्वनः ॥ पिबतां रक्तमाल्यानां राक्षसां[17] रक्तवाससाम् ॥ ४५ ॥
लङ्का चेयं पुरी रम्या सवाजिरथकुञ्जरा ॥ सागरे पतिता दृष्टा भग्नगोपुरतोरणा ॥ ४६ ॥
लङ्का दृष्टा मया स्वप्ने रावणेनाभिरक्षिता ॥ दग्धा रामस्य दूतेन वानरेण तरस्विना ॥ ४७ ॥
पीत्वा तैलं प्रनृत्ताश्च[18] प्रहसन्त्यो महास्वनाः ॥ लङ्कायां भस्मरूक्षायां[19] प्रविष्टा राक्षसस्त्रियः ॥ ४८ ॥
कुम्भकर्णादयश्चेमे सर्वे राक्षसपुङ्गवाः ॥ रक्तं निवसनं गृह्य प्रविष्टा गोमयह्रदे[20] ॥ ४९ ॥
अपगच्छत नश्यध्वं[21] सीतामाप[22] स राघवः ॥ घातयेत्परमामर्षी सर्वैः[23] सार्धं हि राक्षसैः ॥
[रावणं राघवो घोरे भार्याहर्तारमाहवे] ॥ ५० ॥

॥ १८—३३ ॥ पिबन्निति । तैलसमुक्षित इत्यनेन तैलमित्युपस्थाप्यते । करवीरकृतस्रज इत्याकारान्तत्वमार्षं । हलन्ताद्वा इत्यापो विधानात् स्रक्छब्दस्याबन्तत्वेन वा निर्वाहः ॥ ३४—४२ ॥ एवं रावणविनाशसूचकमुक्त्वा विभीषणस्य राज्यप्राप्तिसूचकमाह —एकस्तत्र मया दृष्टः श्वेतच्छत्र इत्यादिना ॥ ४३ ॥ वैहायसं विमानं ॥ ४४—४९ ॥ अपगच्छत अपसरत । नश्यध्वं अदर्शनं प्राप्नुत । आत्मनेपद-

स० करवीरकृतस्रजइतिरावणविशेषणं । करवीरैः रक्तकरवीरपुष्पैः कृतास्रजामालायस्यसतथा । " टापंचैव " इत्यायुक्तेः । विमानविशेषणत्वेतु पृथक्साक्षादपशकुनत्वाप्रतीत्यस्वारस्यं । नचनागोजिभट्टेन टापंचैवेत्यादेःशब्देन्दुशेखरेऽनङ्गीकृतत्वेनकथमेतदितिवाच्यं । बहुप्रयोगविप्लवापत्तेःसाहसमात्रंतदित्यवधेयं । रक्तमाल्यानुलेपनइत्युत्तरग्रन्थानुगुण्याच्च ॥ ३४ ॥ स० स्त्रियासह मुण्डस्तया कृष्यमाणइत्यन्वयः । सुवासिनीकर्षणस्यहर्षहेतुत्वात् । अतउभयत्रतथाविधतायुक्ता । अपशकुनान्तरलाभाच्च । अथवा स्त्रियानीलवासोदन्तादिमत्या ॥ ३५ ॥

[पा०] १ ङ. झ. ञ. ट. मुण्डस्तैल. २ ङ. झ. ट. पतितःक्षितौ. ३ झ. ट. मुण्डोदृष्टः. ४ क. च. छ. ज. ञ. कृष्णांबरावृतः. ५ ङ. च. ज.—ट. माश्रितः. ६ ङ. झ. ट. उन्मत्तरूपो. ७ इदमर्धं क. ङ.—ट. पाठेषुदृश्यते. ८ ङ. झ. ट. महाबलः. ९ क. ग.—ट. मुण्डास्तैल. १० क. घ. च. छ. ञ. ट. प्रयातादक्षिणां. ११ घ. ङ. च. ज. ञ. मेघसंकाशं. १२ क. राघवंसमुपस्थितः. १३ झ. ञ. ट. महान्नृत्तो. १४ घ. नर्दतां. १५ क. ङ. छ.—ट. प्रमत्ताश्च. ग. घ. प्रनृत्यन्ति. १६ घ. भस्मदिग्धायां. १७ क. ग.—ट. सर्वाराक्षसयोषितः. १८ क. घ. ङ. झ. ट. गोमयहृदं. १९ क. घ.—ट. पश्यध्वं. २० ङ. झ. ट. सीतामाप्नोति. ग. सीतांसंप्राप्य. २१ झ. ट. युष्मान्सार्धं. २२ इदमर्धं क. पाठेदृश्यते.

प्रियां बहुमतां भार्यां वनवासमनुव्रताम् ॥ भर्त्सितां तर्जितां वाऽपि नानुमंस्यति राघवः ॥ ५१ ॥
तदलं क्रूरवाक्यैर्वः सान्त्वमेवाभिधीयताम् ॥ अभियाचाम वैदेहीमेतद्धि मम रोचते ॥ ५२ ॥
यस्यामेवंविधः स्वप्नो दुःखितायां प्रदृश्यते ॥ सा दुःखैर्विविधैर्मुक्ता प्रियं प्राप्नोत्यनुत्तमम् ॥ ५३ ॥
भर्त्सितामपि याचध्वं राक्षस्यः किं विवक्षया ॥ राघवाद्धि भयं घोरं राक्षसानामुपस्थितम् ॥ ५४ ॥
प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा ॥ अलमेषा परित्रातुं राक्षसो महतो भयात् ॥ ५५ ॥
अपि चास्या विशालाक्ष्या न किंचिदुपलक्षये ॥ विरूपमपि चाङ्गेषु सुसूक्ष्ममपि लक्षणम् ॥ ५६ ॥
छायावैगुण्यमात्रं तु शङ्के दुःखमुपस्थितम् ॥ अदुःखार्हामिमां देवीं वैहायसमुपस्थिताम् ॥ ५७ ॥
अर्थसिद्धिं तु वैदेह्याः पश्याम्यहमुपस्थिताम् ॥ राक्षसेन्द्रविनाशं च विजयं राघवस्य च ॥ ५८ ॥
निमित्तभूतमेतत्तु श्रोतुमस्या महत्प्रियम् ॥ दृश्यते च स्फुरच्चक्षुः पद्मपत्रमिवायतम् ॥ ५९ ॥
ईषच्च हर्षितो वास्या दक्षिणाया ह्यदक्षिणः ॥ अकस्मादेव वैदेह्या बाहुरेकः प्रकम्पते ॥ ६० ॥
करेणुहस्तप्रतिमः सव्यश्चोरुरनुत्तमः ॥ वेपमानः सूचयति राघवं पुरतः स्थितम् ॥ ६१ ॥
पक्षी च शाखानिलयः प्रहृष्टः पुनःपुनश्चोत्तमसान्त्ववादी ॥
सुस्वागतां वाचमुदीरयानः पुनःपुनश्चोदयतीव हृष्टः ॥ ६२ ॥

मार्षं । सीतामाप सीतामचिरेणाप्स्यतीत्यर्थः । सर्वैः राक्षसैस्सार्धं घातयेत् । व इति सिद्धं । अपगच्छत नश्यध्वमित्युक्तेः । रावणमित्यध्याहारो वा ॥ ५० ॥ नानुमंस्यति न सहिष्यत इत्यर्थः ॥ ५१ ॥ अभियाचाम अभयमिति शेषः ॥ ५२—५३ ॥ किं विवक्षया अस्माभिस्तदा भर्त्सिता कथं प्रसन्ना भविष्यतीति वक्तुमिच्छया किं । शङ्का न कर्तव्येत्यर्थः ॥ ५४ ॥ कुत इत्यत आह—प्रणिपातप्रसन्ना हीति ॥ ५५ ॥ स्वप्रदर्शनकथनेन सीतायाः शोभनं भावीत्यभिधाय शरीरलक्षणप्रदर्शनेनापि शुभं भावीत्याह—अपिचेति ॥ लक्षणं दुःखप्राप्तिहेतुभूतं रेखोपरेखादिकं ॥ ५६ ॥ तर्हि कुतस्तादृशदुःखानुभव इत्यत्राह—छायेति ॥ छायावैगुण्यमात्रं उपलक्षय इत्यनुषज्यते । वैहायसं विमानं । उपस्थितां प्राप्तां । दिव्यभोगार्हामिति यावत् । अन्वयस्तु छायावैगुण्यमात्रं तूपलक्षये अतः अदुःखार्हां दिव्यभोगार्हामिमां दुःखं उपस्थितमिति शङ्क इति । अत्र छायावैगुण्यं नाम कान्तिवैकल्यं । " छायात्वनातपेकान्तौ " इत्यमरः । यद्वा छायात्राऽनातपः तद्वैगुण्यं तस्य विषमत्वं । सर्वलक्षणलक्षिताया अपि छायावैगुण्यमेतावद्दुःखकरमासीदिति भावः ॥ ५७—५८ ॥ इदानीं रामवार्ताश्रवणसूचकमाह—निमित्तभूतमिति ॥ चक्षुरिति अदक्षिणमित्येतदत्राप्यनुषज्यते । हृषितो वा हृष्ट इव पुलकित इव । पद्मपत्रमित्यनेन रोगादिदृष्टहेत्वन्तरराहित्यमुक्तं । अकस्मात् दृष्टहेत्वन्तरं विना ॥ ५९—६१ ॥ एवं देहनिमित्तमुक्त्वा शाकुनमप्याह—पक्षीति ॥ पक्षी पिङ्गलिका । शाखानिलयः प्रहृष्टः । पुनःपुनश्चोत्तमसान्त्ववादी भूयोभूयो मधुरवादी । उत्तरोत्तरमुत्तमसान्त्वस्वरवादी वा । सुस्वागतां शोभनबन्ध्वागमनमिति यावत् । " बन्धुस्वस्वजनास्समाः " इत्यमरः । वाचं स्वरमुदीरयानः चोदयतीव रामागमनं कथयतीव । यद्वा पूर्वोक्तराघव एव कर्म । राघवमुपपादयतीवेत्यर्थः । आचार्यास्तु पक्षावस्य स्त इति पक्षी गरुत्मान् । भूम्नि प्रशंसायां च मत्वर्थीयः । तदुक्तम् —"भूमनिन्दाप्रशंसासु नित्ययोगेतिशायने । संसर्गेस्तिविवक्षायां भवन्ति मतुवादयः " इति ॥ तथाच पक्षौ विस्तार्य प्रदक्षिणं सञ्चरन् । शाखानिलयः कुसुमितपल्लवितशाखायां दृढतरं स्थितः ।

ति० किंविवक्षया कुत्सितभर्त्सनादिवचनेच्छया । अलमितिशेषः । तत्रहेतुः राघवादिति ॥ ५४ ॥ ति० सुस्वागतां शोभनस्वस्वागतंप्राप्तिर्यस्यां तादृशींवाचं । चोदयतीव शोभनप्राप्तिंसूचयतीव ॥ ६२ ॥ इतिसप्तविंशःसर्गः ॥ २७ ॥

[पा०] १ ङ. झ. ट. वाक्यैश्च. २ क. ग. च. ज.—ट. यस्याह्येवंविधः. घ. यस्यास्त्वेवंविधः. ३ क. ग. च. झ. ञ. ट. दुःखितायाः. ४ क.—ट. दुःखैर्बहुभिः. ५ घ. च. छ. ज. हृषितोबाहुः. ६ ङ. झ. ट. वेपन्कथयतीवास्याः. ७ क. ख. ग. ङ.—ट. शाखानिलयंप्रविष्टः.

आर्द्रतरतरुभाग एव शाखात्वव्यपदेशः । प्रदक्षिणभ्रमणं आर्द्रशाखावरोहणं दृढतरावस्थानं च शुभशंसीत्यर्थः । प्रहृष्टः तत्र फलभोजनादिना सन्तुष्टः । पुनःपुनश्चोत्तमसान्त्ववादी उत्तरोत्तरं सान्त्ववचनं कुर्वन्निव स्थितः । मा शुचः सद्यः समागमिष्यति ते भर्ता नायमवसरश्शोकस्य-इत्येवं सान्त्वयन्निव स्थितः । तदुपरि सुस्वागतां वाचमुदीरयानः । एतावन्मात्रं न भवति तस्य संतापातिरेक इति कथयन्निव स्थितः । विरहक्लिष्टायास्सुस्वागतवचनं हि नाम प्रतियोगिनः संतापातिशयकथनमेव । उक्तं हि—" तपति तनुगात्रि मदनस्त्वामनिशं मां पुनर्दहत्येव । ग्लपयति यथा शशाङ्कं न तथाहि कुमुद्वितीं दिवसः "इति ॥ पुनः पुनश्चोदयतीव प्रियागमने निश्चिते मज्जनालंकरणादिकं किमर्थं न करोषीत्येवं सीतां चोदयतीवेत्युत्प्रेक्षा । हृष्टः नायिकागमनकालिकहर्षः स्वस्यैवेत्येतद्वैलक्षण्यं हृषिततनूरुहैस्सूचयन्निव स्थितः । इदंहि रामायणमुत्तमं काव्यं । तथाहि–काव्यं तावत्त्रिविधं उत्तमं मध्यममधमं चेति।यत्र वाच्यातिशायिव्यङ्ग्यं तदुत्तमं। सएव ध्वनिरित्युच्यते । यत्र वाच्यानतिशायिव्यङ्ग्यं तन्मध्यमं काव्यं । तदेव गुणीभूतव्यङ्ग्यमित्युच्यते । यत्र व्यङ्ग्यमेव नास्ति तदधमं । तदेव चित्रमित्युच्यते । व्यङ्ग्यं च पदगतं वाक्यगतं प्रबन्धगतं चेति त्रिविधं भवति । एतत्काण्डरूपप्रबन्धेन अनादिभगवत्संबन्धवतश्चेतनस्योज्जीवने प्रवृत्तस्याचार्यस्य प्रवृत्तिरभिव्यज्यते । उक्तश्चायमर्थस्ततो रावणनीताया इति श्लोके । अत्र लङ्कापदेन शरीरं द्योतितं । एकाक्षीप्रभृतय इन्द्रियाणि । रावणकुम्भकर्णावहंकारममकारौ । इन्द्रजित्प्रभृतयः कामक्रोधलोभमोहमदमात्सर्यदम्भादयः।तादृशलङ्कानिरुद्धसीतासदृशश्चेतनः। तस्य भगवज्ज्ञानोपदेष्टाचार्यतुल्यो मारुतिः । तादृशाचार्यलक्षणमनेन श्लोकेन सूच्यते । पक्षी । पक्षिशब्देन गमनसाधनत्वात् ज्ञानकर्मणी उच्येते । तदुक्तं —"उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः। तथैव ज्ञानकर्मभ्यां नियता परमा गतिः " इति । ज्ञानकर्मणोरङ्गाङ्गिभावेनात्र समुच्चयो विवक्षितः । " ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन " इति श्रुतेः । अनेनाचार्यशब्दनिर्वचनमुक्तं । " आचिनोति हि शास्त्रार्थानाचारे स्थापयत्यपि । स्वयमाचरते यस्मात्तस्मादाचार्य उच्यते " इति ॥ शाखाशब्देन वेदशाखा उच्यन्ते । निलयशब्देन तदेकपरत्वं । त्यागे प्रत्यवायश्रवणात् । तदुक्तं शिक्षायां—" अधीतमपि योवेदं विमुञ्चति नराधमः । भ्रूणहा स तु विज्ञेयो वियोनिमभिगच्छति " इति ॥ किंच निलय इत्यनेन तदर्थविषयकश्रवणमननदिध्यासनरूपतदनुष्ठानान्युच्यन्ते । अनेनाचार्यलक्षणमुक्तं । तथाहुः—" आचार्यो वेदसंपन्नो विष्णुभक्तो विमत्सरः। मन्त्रज्ञो मन्त्रभक्तश्च सदा मन्त्राश्रयश्शुचिः॥ गुरुभक्तिसमायुक्तः पुराणज्ञो विशेषतः । एवंलक्षणसंपन्नो गुरुरित्यभिधीयते " इति ॥ प्रहृष्टः सदा संतुष्टहृदयः । अनेन सर्वदा सेवनीयत्वमुक्तं । तथोक्तं —"आह्लादशीतनेत्राम्बुः पुलकीकृतगात्रवान् । सदा परगुणाविष्टो द्रष्टव्यस्सर्वदेहिभिः " इति ॥ पुनःपुनश्चोत्तमसान्त्ववादी । उत्तमः " उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः " इत्युक्तः परमात्मा । तद्विषयं सान्त्वं शिष्येभ्यो वदतीत्युत्तमसान्त्ववादी । "त्वं मेहं मे कुतस्तत्तदपि कुत इदं वेदमूलप्रमाणादेतच्चानादिसिद्धादनुभवविभवात्तर्हि साक्रोश एव । काक्रोशः कस्य गीतादिषु मम विदितः कोत्र साक्षी सुधीस्याद्धन्त त्वत्पक्षपाती स इति नृकलहे मृग्यमध्यस्थवक्त्वं " इत्युक्तरीत्या भगवति मनुष्याणां कलहे । " यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः । तेन चेदविवादस्ते मा गङ्गां मा कुरून्गमः " इति सान्त्ववादशील इत्यर्थः । पुनः पुनरित्यनेन कर्षकः कदाचिन्न फलितमित्येतावता यथा कृषिं न परित्यजति पुनःपुनस्तत्रैव प्रवर्तते । तथाचार्योपि कदाचित्त्ववचनाश्रवणेपि न निवर्तते इत्युक्तं । अनेनाचार्यस्य भगवतोप्यतिशय उक्तः । स हि पार्थाय गीतामुपदिश्य पुनरात्मेधिके तेन पूर्वोक्तमर्थं विस्मृत्य पुनः पृष्टेनाहं वक्ष्यामीत्युक्तवान् " नूनमश्रद्दधानोसि दुर्मेधाश्चासि पाण्डव " इत्यादिना । किंच सुस्वागतां वाचमुदीरयानः । सुष्ठु संप्रदायाविच्छेदो यथा तथाचार्यपरंपरया स्वस्मै आगतां वाचं अष्टाक्षरादिमन्त्रराजरूपां निर्हेतुक्यैव दयया समुदीरयन् । 'आचार्याणामसावसाविला भगवत्त' इति गुरुपरम्पराया अनुसन्धेयत्वमनेन सूचितम् । पुनःपुनश्चोदयतीव । उक्तार्थस्यानुष्ठानाय चोदनां दर्शयति । अन्यथा ह्युपदेशोप्यनर्थक एव स्यात् । अत एवाहुर्निगमान्ताचार्याः— स्खालित्ये शासितारमिति । हृष्टः । एतेन शिष्यशि-

[ततस्सा ह्रीमती बाला भर्तुर्विजयहर्षिता ॥ अवोचद्यदि तत्तथ्यं भवेयं शरणं हि वः] ॥ ६३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

अष्टाविंशः सर्गः ॥ २८ ॥

सीतयारावणराक्षसीगणकृतसंतर्जनाद्यसहिष्णुतयाबहुधाविलापपूर्वकं वेण्युद्बन्धनादसुविमोक्षणनिश्चयेनशिंशुपाशाखावलंबने तदङ्गेष्वनुभूतपूर्वशुभशकुनप्रादुर्भावः ॥ १ ॥

सा राक्षसेन्द्रस्य वचो निशम्य तद्रावणस्याप्रियमप्रियार्ता ।
सीता वितत्रास यथा वनान्ते सिंहाभिपन्ना गजराजकन्या ॥ १ ॥
सा राक्षसीमध्यगता च भीरुर्वाग्भिर्भृशं रावणतर्जिता च ॥
कान्तारमध्ये विजने विसृष्टा बालेव कन्या विललाप सीता ॥ २ ॥
सत्यं बतेदं प्रवदन्ति लोके नाकालमृत्युर्भवतीति सन्तः ॥
यत्राहमेवं परिभर्त्स्यमाना जीवामि किंचित्क्षणमप्यपुण्या ॥ ३ ॥
सुखाद्विहीनं बहुदुःखपूर्णमिदं तु नूनं हृदयं स्थिरं मे ॥
विशीर्यते यन्न सहस्रधाऽद्य वज्राहतं शृङ्गमिवाचलस्य ॥ ४ ॥
नैवास्ति दोषं मम नूनमत्र वध्याहमस्याप्रियदर्शनस्य ॥
भावं न चास्याहमनुप्रदातुमलं द्विजो मन्त्रमिवाद्विजाय ॥ ५ ॥
नूनं ममाङ्गान्यचिरादनार्यः शस्त्रैः शितैश्छेत्स्यति राक्षसेन्द्रः ॥
तस्मिन्ननागच्छति लोकनाथे गर्भस्थजन्तोरिव शल्यकृन्तः ॥ ६ ॥

क्षणं स्वप्रयोजनमाचार्यस्येत्युक्तम् ॥ ६२–६३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तविंशः सर्गः ॥ २७ ॥

यत्र येन । किंचिज्जीवामि कुत्सितं जीवामि ॥ ३—४ ॥ नन्वात्महनने महान्दोषः स्यादित्याशङ्क्याह—नैवेति ॥ दोषं दोषः । आर्षं नपुंसकं । अत्र आत्महनने कथमदोष इत्याशङ्क्य रावणकृतान्मरणादात्मनैव मरणं श्रेय इत्याह—वध्येति । अप्रियदर्शनस्य अस्य रावणस्य । दुर्मरणत्वाविशेषेपि दुष्टराक्षसेन मरणमतिकष्टमितिभावः । तर्हि तदनुप्रवेशेनात्मा रक्ष्यतां " सर्वत आत्मानं गोपायेत् " इति श्रुतेरित्याशङ्क्याह—भावमिति । अस्य अस्मिन्रावणे । भावं हृदयं अनुप्रदातुं नालं न शक्ता । रामस्वत्वाधस्य न ह्यन्यस्य स्वमन्योन्यस्मै दातुमर्हतीति भावः । अनर्हश्चायं भावोन्यप्रदानस्येत्यमुमर्थं दृष्टान्तमुखेनाह—द्विज इति । मन्त्रं वेदं । अद्विजाय शूद्राय ॥ ५ ॥ अनागच्छति मासद्वयादर्वागिति शेषः । गर्भस्थजन्तोः निरुद्धनिर्गमस्य गर्भस्थजन्तोः । शल्यकृन्तः

स० तद्वचः प्रातराशायकुरुतेत्यादिरूपंवचः । अप्रियार्ता उत्तरत्रकिंभविष्यतीतिभाव्यप्रियेणार्ता ॥ १ ॥ स० विसृष्टा मात्रादिभिर्नैर्घृण्यादिनाशकुन्तलादिवत्त्यक्ता ॥ २ ॥ स० यत्र अस्यां दुर्दशायां । अपुण्या शीघ्रमरणप्रापकपुण्यरहिता ॥ ३ ॥ ति० नन्वात्मघातेऽतिदोषात्सोयुक्तइत्याशङ्क्य सत्यंविचित्रवधाद्भिमेमीत्याह—तस्मिन्निति । तस्मिन्रामे अनागच्छतिसति ममाङ्गानि जीवन्त्याएवछेत्स्यन्ति । निरुद्धायाविशसनेदृष्टान्तः गर्भेति । शल्यं शस्त्रं तेनकृणत्तीतिशल्यकृन्तः आंबष्ठवैद्यः । आर्षत्वात्साधु । सयथागर्भस्थजन्तुंव्याधिरूपंजीवन्तंकृणत्ति तद्वत् ॥ एतच्छ्लोकद्वयंकतकेनेत्थंव्याख्यातं—अन्यायप्राप्तवधेपिममदोषोनेत्याह—नैवेति । यद्यप्यस्याहंवध्याभवामि । ममदोषोन । एवंभावाप्रदानेनपातिव्रत्यरक्षणात्सर्वदोषनिस्तारइत्यर्थः । किंचमरणप्राप्तिःपाक्षि-

[पा०] १ अयंश्लोकः. ङ—ट. पाठेषुदृश्यते. २ क. झ. सिंहाविपन्ना. ३ क. ङ. झ. यस्मात्क्षणं. ४ क. घ.—ट. विदीर्यते. ५ क. ग. ङ.—ट. नूनंममदोषं. ६ ङ. झ. ञ. ट. शरैःशितैः.

दुःखं बतेदं मम दुःखिताया मासौ चिरायाधिगमिष्यतो द्वौ ॥
बद्धस्य वध्यस्य तथा निशान्ते राजापराधादिव तस्करस्य ॥ ७ ॥
हा राम हा लक्ष्मण हा सुमित्रे हा राममातः सह मे जनन्या ॥
एषा विपद्याम्यहमल्पभाग्या महार्णवे नौरिव मूढवाता ॥ ८ ॥
तरस्विनौ धारयता मृगस्य सत्त्वेन रूपं मनुजेन्द्रपुत्रौ ॥
नूनं विशस्तौ मम कारणात्तौ सिंहर्षभौ द्वाविव वैद्युतेन ॥ ९ ॥
नूनं स कालो मृगरूपधारी मामल्पभाग्यां लुलुभे तदानीम् ॥
यत्रार्यपुत्रं विससर्ज मूढा रामानुजं लक्ष्मणपूर्वजं च ॥ १० ॥
हा राम सत्यव्रत दीर्घबाहो हा पूर्णचन्द्रप्रतिमानवक्त्र ॥
हा जीवलोकस्य हितः प्रियश्च वध्यां न मां वेत्सि हि राक्षसानाम् ॥ ११ ॥
अनन्यदेवत्वमियं क्षमा च भूमौ च शय्या नियमश्च धर्मे ॥
पतिव्रतात्वं विफलं ममेदं कृतं कृतघ्नेष्विव मानुषाणाम् ॥ १२ ॥

नापितः ॥ ६ ॥ चिरायदुःखिताया मम द्वौ मासौ वधस्यावधिभूतौ अधिगमिष्यतः । इदं दुःखं बत । कस्य दुःखमिव । राजापराधात् बद्धस्य तथा निशान्ते वध्यस्य तस्करस्येव दुःखं । यथेति पाठे इवशब्दो वाक्यालंकारे ॥ ७ ॥ मूढो वात्यारूपो वातो यस्यास्सा मूढवाता । वात्याहतेत्यर्थः । "मूढस्तन्द्रितवात्ययोः" इतिविश्वः ॥८॥ मृगस्य रूपं धारयता सत्त्वेन जन्तुना । मम कारणात् मन्निमित्तं । विशस्तौ हिंसितौ । द्वौ सिंहर्षभाविव द्वौ सिंहाविव द्वौ वृषभाविवेत्यर्थः । वैद्युतेन अशनिना ॥९॥ लुलुभे प्रलोभयामास । यत्र यस्मिन्काले । विससर्जेति सृजेर्लिट्युत्तमपुरुषैकवचनं । रामानुजं लक्ष्मणपूर्वजं च । परस्परस्य सदृशावित्युक्तपरस्परसादृश्यात् । बाल्यात्प्रभृति सुस्निग्धतया च परस्परनिरूपकभूतौ ॥ १०—११ ॥ अनन्यदेवत्वं आश्रयणीया देवतान्यास्ति या रक्षिष्यतीति बुद्धिर्मे नास्ति । " नारायणमुपागमत् " इत्यत्राप्याप्राधान्येन सह पठ्येति ह्युक्तं । नारायणमाराधयतो रामस्यपरिचारिकास्मीत्यर्थः । इयं क्षमा च । रावणपरुषाक्षराणि राक्षसीनां तर्जनभर्त्सनादीनि राममधुरालापश्रवणकुतूहलेन ह्यहं क्षान्तवती । भूमौ च शय्या । तवाङ्के समुपाविशमित्येवंविधभोगःकदाचिदपि किं सेत्स्यतीत्याशया हि मया भूमौ शयनं क्रियते । नियमश्च धर्मे । रक्षकत्वधर्मोपि तस्मिन्नेवेति मनीषया हि मया स्थितं । " न त्वां कुर्मि दशग्रीव भस्म भस्मार्ह तेजसा " इत्युक्तिरपि तं दृष्ट्वैव । पतिव्रतात्वं एतद्व्रतं ममेत्युक्तं व्रतं विना मम किञ्चिद्व्रतं नास्तीत्यर्थः । पत्युर्व्रतमेव व्रतं यस्यास्सा पतिव्रता तस्या भावः पतिव्रतात्वं । विफलं ममेदं अमोघमपि मोघमासीत् । कस्येवेति चेत्तत्राह—कृतं कृतघ्नेष्विव मानुषाणां । " आत्मानं मानुषं मन्ये " इत्युक्तरीत्या मानुषत्वं रामस्याप्यस्ति । अतस्तदितरमानुषाणां मध्ये कृतघ्नेषु कृतं कार्यमिव । अस्य किं मूलमिति चेत्

कीत्याह—**तस्मिन्निति** । अनागच्छत्येववधप्रसक्तिर्नान्यथेतिभावः । अनागमनपक्षेप्राप्तविशसनेदृष्टान्तः **गर्भस्येति** ॥ ६ ॥ **ति०** चिरायभर्तृवियोगदुःखितायामेइदंविशसनदुःखमपिबतागमिष्यति । यतोद्वौमासौविशसनावधिभूतौकतिपयदिनावधिकावप्यभिगमिष्यतः शीघ्रंगमिष्यतःकिल । तत्रवधप्राप्तौदृष्टान्तः बद्धस्येति । तस्करस्यवधइवेतिशेषः । **स०** दुःखितायामम । द्वौमासौ यद्यपि चिरायबहुव्यवधानरूपौ । तथापि ममदुर्दैववशात्तावभिगमिष्यतः शीघ्रमागमिष्यतः ॥ ७ ॥ **स०** मूढाऽहंविससर्जेत्यन्वयः । प्रलापकालल्लिङ्संभवति 'सुप्तोऽहंकिलविललाप' 'बहुजगदपुरस्तात्तस्यमत्ताकिलाऽहं' इत्यादिवत् **ति०** अहंविससर्ज अपरोक्षेपिचित्तविक्षेपादिनापारोक्ष्यमारोप्यलिट् ॥ १० ॥ **ति०** हारामेत्यादौ हेराममांहा अहंशोचेइत्यर्थः । हाजीवममप्राणरूप । हितो हितकरः प्रियश्चेत्यस्य त्वमितिशेषः ॥ ११ ॥ **ति०** धर्मोरक्षतीतिसर्वाविवादसिद्धमपिमांप्रतिनिष्फलमित्याह—अनन्यदेवत्वमिति । पत्येकदेवत्वमित्यर्थः । इयंक्षमा शापेनसंहारशक्तावप्येवंपीडासहनरूपा । पत्यतिरिक्तेकामासक्तिराहित्यं पतिव्रतात्वं । कृतं

[पा०] १ क.—घ. च.—ट. यथा. २ ङ. ञ. ट. जनन्याः. ३ च. छ. मन्दवाता. ४ ङ. ञ. ञ. ट. यत्रार्यपुत्रौ.

मोघो हि धर्मश्चरितो मयाऽयं तथैकपत्नीत्वमिदं निरर्थम् ॥
या त्वां न पश्यामि कृशा विवर्णा हीना त्वया संगमने निराशा ॥ १३ ॥
पितुर्निदेशं नियमेन कृत्वा वनान्निवृत्तश्चरितव्रतश्च ॥
स्त्रीभिस्तु मन्ये विपुलेक्षणाभिस्त्वं रंस्यसे वीतभयः कृतार्थः ॥ १४ ॥
अहं तु राम त्वयि जातकामा चिरं विनाशाय निबद्धभावा ॥
मोघं चरित्वाऽथ तपो व्रतं च त्यक्ष्यामि धिग्जीवितमल्पभाग्या ॥ १५ ॥
सा जीवितं क्षिप्रमहं त्यजेयं विषेण शस्त्रेण शितेन वाऽपि ॥
विषस्य दाता न हि मेऽस्ति कश्चिच्छस्त्रस्य वा वेश्मनि राक्षसस्य ॥ १६ ॥
इतीव देवी बहुधा विलप्य सर्वात्मना राममनुस्मरन्ती ॥
प्रवेपमाना परिशुष्कवक्त्रा नगोत्तमं पुष्पितमाससाद ॥ १७ ॥
शोकाभितप्ता बहुधा विचिन्त्य सीताऽथ वेणुं युद्ग्रथनं गृहीत्वा ॥
उद्बध्य वेण्युद्ग्रथनेन शीघ्रमहं गमिष्यामि यमस्य मूलम् ॥ १८ ॥
उपस्थिता सा मृदुसर्वगात्रा शाखां गृहीत्वाऽथ नगस्य तस्य ॥ १९ ॥
तस्यास्तु रामं प्रविचिन्तयन्त्या रामानुजं स्वं च कुलं शुभाक्ष्याः ॥
शोकानिमित्तानि तथा बहूनि धैर्यार्जितानि प्रवराणि लोके ॥
प्रादुर्निमित्तानि तदा बभूवुः पुराऽपि सिद्धान्युपलक्षितानि ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥

ममेदं तस्मिन्न काचिन्न्यूनता । ममैव दुष्कृतमत्र हेतुः ॥ १२—१३ ॥ पितुर्निदेशं आज्ञां नियमेन अविच्छेदेन कृत्वा चरितव्रतः चरितवन्यवृत्तिव्रतः वनान्निवृत्तश्च सन् । स्त्रीभिस्तु मत्तोपि विलक्षणाभिः स्त्रीभिः त्वं रंस्यसे । वीतभयः गतवनवासभयः । कृतार्थः निष्पन्नसर्वपुरुषार्थः। मद्विनाशेन पुनर्वह्वीरूढ्वा रंस्यस इति भावः ॥ १४ ॥ त्वयि जातकामा अतएव त्वयि निबद्धभावा निबद्धहृदया । विनाशाय त्वयि निबद्धभावेति दुःखातिरेकोक्तिः। तपः अनशनं । व्रतं नियमं । अल्पभाग्या जन्मान्तरसुकृतरहिता । इदानीमनुष्ठितानां तपोव्रतादीनां जन्मान्तरफलदत्वेन मोघत्वोक्तिः । अतएवाल्पभाग्येत्युक्तं ॥ १५ ॥ वेश्मनि राक्षसस्य । एवं सम्यङ्मरणकारी क्रूरस्यास्य गृहे कथं लभ्येतेति भावः ॥ १६ ॥ वेणुद्ग्रथनं वेणीबन्धनं । यमस्य मूलं यमस्य समीपं । अत्रेतिकरणं बोध्यं । इति विचिन्त्य नगोत्तमं शिंशुपामाससाद । शिंशुपां तामुपागमदिति पूर्वमुक्तं । तस्य सामीप्येन गमनमद्योच्यते । पुष्पितं शुभसूचनं । यद्वा पुष्पितमाससाद अग्निप्रवेशं कुर्वन्तीवेत्यर्थः ॥ १७—१८ ॥ उपस्थितेत्यर्धमेकं वाक्यं ॥ नगस्य शाखां गृहीत्वा उपस्थिता ॥ १९ ॥ स्वं च कुलं विचिन्तयन्त्या इत्यनेन दुर्मरणाद्भीतत्वं व्यज्यते । शोकानिमित्तानि शुभसूचकानीत्यर्थः । धैर्यार्जितानि आर्जितधैर्याणि । धैर्यकराणीत्यर्थः । लोके प्रवराणि लोके प्रसिद्धानीत्यर्थः । प्रवरं हि प्रसिद्धं भवति । प्रादुर्बभूवुरित्यन्वयः । पुरापि सिद्धान्युपलक्षितानि पूर्वमपि फलव्याप्तत्वेन दृष्टानि । तान्युत्तरसर्गे विवरिष्यति ॥ २० ॥ इति श्रीगोविन्दराजविरचिते

उपकृतं ॥ १२ ॥ **ति०** वेश्मनिराक्षससेत्येतदनन्तरंइतीवदेवीत्यादिरेकःश्लोकःप्रक्षिप्तः ॥ १६ ॥ **वि०** शोकाभितप्तेत्यादिसार्धश्लोकमेकंवाक्यं । शोकाभितप्तासीताबहुधाविचिन्त्यवेणुद्ग्रथनंगृहीत्वा वेणुद्ग्रथनेनउद्बध्य उद्बंधनंकृत्वायमस्यमूलंसमीपंगमिष्यामीतिनगस्यशाखांगृहीत्वाउपस्थिताअवस्थितेतिसंबन्धः ॥१८॥ **ति०** विशोकानि विशोककराणि ॥ २० ॥ अष्टाविंशःसर्गः ॥ २८ ॥

[**पा०**] १ क. ग.—ट. मोघंहि. २ ग. घ. ङ. झ. ट. निरर्थकं. ३ क. ङ.—ट. स्संरस्यसे. ४ ङ. झ. ट. मल्पभाग्यां. ५ ङ. झ. ट. संजीवितं. ६ क. ख. ग. सीता. ७ झ. ट. वेणीग्रथनं. ८ क. ख. ग. ङ.—ट. सर्वगात्री. ९ ङ. झ. ञ. ट. परिचिन्तयित्वा. १० ङ. झ. तस्याविशोकानितदा. क. ग. शोकापनोदानितदा.

एकोनत्रिंशः सर्गः ॥ २९ ॥

ग्रन्थकृता विशिष्यसीतायाःशुभशकुनप्रतिपादनम् ॥ १ ॥ सीतया शुभशकुनानांपुरोपलब्धफलकशकुनसाजात्याच्छुभफलावश्यंभावनिर्धारणेन हर्षाधिगमः ॥ २ ॥

तथागतां तां व्यथितामनिन्दितां व्यपेतहर्षां परिदीनमानसाम् ॥
शुभां निमित्तानि शुभानि भेजिरे नरं श्रिया जुष्टमिवोपजीविनः ॥ १ ॥
तस्याः शुभं वाममरालपक्ष्मराजीवृतं कृष्णविशालशुक्लम् ॥
प्रास्पन्दतैकं नयनं सुकेश्या मीनाहतं पद्ममिवाभिताम्रम् ॥ २ ॥
भुजश्च चार्वञ्चितपीनवृत्तः परार्ध्यकालागरुचन्दनार्हः ॥
अनुत्तमेनाध्युषितः प्रियेण चिरेण वामः समवेपताशु ॥ ३ ॥
गजेन्द्रहस्तप्रतिमश्च पीनस्तयोर्द्वयोः संहतयोः सुजातः ॥
प्रस्पन्दमानः पुनरूरुरस्या रामं पुरस्तात्स्थितमाचचक्षे ॥ ४ ॥
शुभं पुनर्हेमसमानवर्णमीषद्रजोध्वस्तमिवामलाक्ष्याः ॥
वासस्थितायाः शिखराग्रदन्त्याः किंचित्परिस्रंसत चारुगात्र्याः ॥ ५ ॥

श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टाविंशः सर्गः ॥ २८ ॥

तथागतां रहस्यं च प्रकाशं चेत्युक्तरीत्या सर्वं यथावत्साक्षात्कृतवतो मुनेरपि तथाशब्दप्रयोगादित्थमिति परिच्छिद्य वक्तुमशक्यदुःखां । तां धर्मिस्वरूपातिरिक्तयत्किंचिदतिशयरहितां । व्यथितां । "आशंसायां भूतवच्च" इति निष्ठा । तथाच पूर्वोक्तं सर्वं धर्मिस्वरूपमात्रं । इतःपरमेव व्यसनानि भविष्यन्तीति मन्यमानां । "समा द्वादश तत्राहं राघवस्य निवेशने । भुञ्जाना मानुषान्भोगान्सर्वकामसमृद्धिनी" इत्युक्तं भोगजातं सर्वमकिंचित्करमासीत् । दुःखमेव निरूपकमासीत् । अनिन्दितां रामविरहे यथा स्थातव्यं तथा स्थितां । एवमनवस्थाने निन्दितैव भवति । व्यपेतहर्षां हर्षः पूर्वमस्यां वसित्वा गत इति न ज्ञातामित्यर्थः । व्यपाभ्यामुपसर्गाभ्यां तथा प्रतीयते । परिदीनमानसां हर्षे समागतेष्याश्रयरहितां । परीत्यनेनतथाऽवगम्यते । शुभां गुणाधिकविषयविरहकृतविकृतित्वेन तद्दशाया एव नीराजना कर्तव्येत्येवंस्थितां । निमित्तानि शुभानि भेजिरे । निमित्तानि तद्विषये शुभानि सूचयित्वा स्वसत्तां लेभिरे । नरं श्रिया जुष्टमिवोपजीविनः । आर्थिनो हि लक्ष्मीकटाक्षवद्विषये किंचित्कृत्य स्वप्रयोजनं लभन्ते । इमानि तु साक्षाल्लक्ष्मीविषये किंचित्कृत्य निमित्तस्वामित्वं लेभिर इत्यर्थः ॥ १ ॥ शुभनिमित्तान्येवाह—तस्या इत्यादिना ॥ अरालं वक्रं । कृष्णविशालशुक्लं मध्ये कनीनिकायां कृष्णं सर्वतो विशालं शुभ्रं च । अभिताम्रं अभितस्ताम्रं । प्रान्तरक्तमित्यर्थः । "प्रान्तरक्ते च नेत्रे" इति पद्मिनीलक्षणात् ॥ २—३ ॥ तयोः सुलक्षणवत्तया प्रसिद्धयोः ऊरुः वाम इत्यनुषज्यते । सुजातः सुन्दरः ॥ ४ ॥ शिखराग्रदन्त्याः वृत्ताग्रदन्तयुक्तायाः । "शिखरं निस्तुलं वृत्तं" इत्युत्पलमाला । शिखरं दाडिमफलबीजमित्यन्ये नैघण्टुकाः । यद्वा शिखराकाराग्रदन्तायाः "अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च" इति दन्तस्य दत्रादेशः । वासः वस्त्रं । परिस्रंसत पर्यस्रंसत । अडभाव आर्षः । ऊरुकम्पा-

स० उपसेविनः योगविभागादादन्तादिनिः । उपसेवितुंशीलमेषामित्यर्थे "सुप्यजातौ" इतिणिनिः ॥ १ ॥ स० संहतयोः मांसलत्वेनश्लिष्टयोः । तयोरूर्वोर्मध्ये ऊरुःप्रस्पन्दमानः रामंपुरस्थितमाचचक्षे । शकुनप्रस्तावाद्वामइत्यनुक्तावप्येकवचनेनैकइति प्रतीयते । सचमानान्तरेणवामएवेत्यवसेयं ॥ ४ ॥ ति० शिखरं दाडिमबीजं तदग्रतुल्यदन्त्याः । "शिखरंशैलवृक्षाग्रेकक्षाग्र-

[पा०] १ घ. पुरापिसिद्धानि. २ ङ. झ. ट. जुष्टमिवोपसेविनः. ३ ङ. झ. ट. राज्यावृतं. ४ ग. शुभाङ्ग्याः. ५ ङ.—ट. वृत्तपीनः. ६ च. छ. ज. ञ. संगतयोः. झ. संहतयोस्तु. ७ ङ. झ. मिवातुलाक्ष्याः. ८ क. परिस्पन्दत.

एतैर्निमित्तैरपरैश्च सुभ्रूः संबोधिता प्रागपि साधु सिद्धैः ॥
वातातपक्लान्तमिव प्रनष्टं वर्षेण बीजं प्रतिसंजहर्ष ॥ ६ ॥
तस्याः पुनर्बिम्बफलाधरोष्ठं स्वक्षिभ्रु केशान्तमरालपक्ष्म ॥
वक्त्रं बभासे सितशुक्लदंष्ट्रं राहोर्मुखाच्चन्द्र इव प्रमुक्तः ॥ ७ ॥
सा वीतशोका व्यपनीततन्द्री शान्तज्वरा हर्षविवृद्धसत्त्वा ॥
अशोभतार्या वदनेन शुक्ले शीतांशुना रात्रिरिवोदितेन ॥ ८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

त्रिंशः सर्गः ॥ ३० ॥

शिंशुपाग्रावस्थानेनैवनिखिलसीतावृत्तान्तमवगतवताहनुमता सीतायाआश्वासनानाश्वासनपक्षयोर्गुणदोषविमर्शनपूर्वकं समुचितसमयेसमाश्वासननिर्धारणम् ॥ १ ॥

हनुमानपि विश्रान्तः सर्वं शुश्राव तत्त्वतः ॥ सीतायास्त्रिजटायाश्च राक्षसीनां च तर्जनम् ॥ १ ॥
अवेक्षमाणस्तां देवीं देवतामिव नन्दने ॥ ततो बहुविधां चिन्तां चिन्तयामास वानरः ॥ २ ॥
यां कपीनां सहस्राणि सुबहून्ययुतानि च ॥ दिक्षु सर्वासु मार्गन्ते सेयमासादिता मया ॥ ३ ॥
चारेण तु सुयुक्तेन शत्रोः शक्तिमवेक्षता ॥ गूढेन चरता तावदवेक्षितमिदं मया ॥ ४ ॥

दिति भावः । स्थितायाः तिष्ठन्त्या इति वस्त्रसंसनानुगुणावस्थोक्तिः । यद्वा वासस्संसनं कान्तागमनसूचकमिति भावः । शिखरदन्तत्वे सामुद्रिकम्—"स्निग्धास्समानुरूपास्सुपङ्क्तयः शिखरिणः श्लक्ष्णाः । दन्ता भवन्ति यासां तासां पादे जगत्सर्वं " इति ॥ "यासां शिखरिणो दन्ता दीर्घं जीवन्ति ताः स्त्रियः " इति च ॥ ५ ॥ अपरैः पूर्वोक्तशकुनैः । संबोधिता सद्यः कान्तागमवार्ता भविष्यतीति बोधिता । वातातपक्लान्तं सम्यग्वातातपसंशोषितं । प्रनष्टं भूमावदर्शनं गतं । यद्वा प्रनष्टं प्रकर्षेण कृशीभूतं । बीजं वर्षेणेव प्रतिसंजहर्ष । बीजस्य प्रहर्षो नाम अङ्कुरादिभावेन स्थूलीभूय बहिर्निर्गमः ॥ ६ ॥ स्वक्षिभ्रु शोभनाक्षिभ्रूयुक्तं । केशाः अन्ते यस्य तत् केशान्तं । उपरिभागप्रकीर्णालकमित्यर्थः । सितशुक्लदंष्ट्रं अत्यन्तशुक्लदन्तं । एकार्थे शब्दद्वयप्रयोगोतिशयज्ञापनाय । यथा मुग्धमनोज्ञ इति । नीरन्ध्रत्वेन संसक्तशुक्लदंष्ट्रमिति वार्थः । " षिञ् बन्धने " इत्यस्माद्धातोर्निष्ठा ॥ ७ ॥ व्यपनीततन्द्री निरस्तजाड्या । हर्षविवृद्धसत्वा हर्षविकसितचित्ता । शुक्ले शुक्लपक्षे ॥ ८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनत्रिंशस्सर्गः ॥ २९ ॥

विक्रान्तः पराक्रमशाली । सीतायास्त्रिजटायाश्च सर्वं सर्ववृत्तान्तं । तर्जनं तर्जनवचनं ॥ १ ॥ चिन्तां चिन्तयामास चिन्तां चकार ॥ २ ॥ यामिति सर्ववानराभिलषितोर्थो मयैकेन लब्ध इति विस्मितवान् ॥ ३ ॥ इदं वक्ष्यमाणं । तावत् कात्स्न्र्येन

गृहकोटिषु । पक्वेदाडिमबीजेच " इतिविश्वः ॥ ५ ॥ ति० सितशुक्लदंष्ट्रं स्फटिकादिसितपदार्थवच्छुक्लादंष्ट्रायत्रतत् । ती० सितशुक्लदंष्ट्रं पङ्क्तिबद्धधवलदन्तमित्यर्थः ॥ ७ ॥ इत्येकोनत्रिंशःसर्गः ॥ २९ ॥

ती० विश्रान्तः विगतव्यापारः ॥ स० सीतायागर्जितं विलापरूपं । त्रिजटायास्स्वप्नकथनरूपं । राक्षसीनांसीतातर्जनरूपमितिविवेकः ॥ १ ॥ स० चिन्तां चिन्तनीयं । चिन्तयामास । देवीं तां चिन्तां तदीयचिन्तांचावेक्षमाणश्चिन्तयामासेत्यन्वयोवा

[पा०] १ ङ—ट. संचोदिता. २ क. ङ.—ट. फलोपमोष्ठं. ३ क. शुक्लदन्तं. ४ ङ.—ट. तन्द्रा. ५ क. ख. ग. ङ. झ. ञ. ट. विबुद्धसत्त्वा. ६ क. घ. ङ. झ. ञ. ट. विक्रान्तः. ७ ङ. झ. राक्षसानां. ८ च. छ. ञ. ट. तर्जितं. ङ. झ. गर्जितं.

राक्षसानां विशेषश्च पुरी चेयमवेक्षिता ॥ राक्षसाधिपतेरस्य प्रभावो रावणस्य च ॥ ५ ॥
युक्तं तस्याप्रमेयस्य सर्वसत्त्वदयावतः ॥ समाश्वासयितुं भार्यां पतिदर्शनकाङ्क्षिणीम् ॥ ६ ॥
अहमाश्वासयाम्येनां पूर्णचन्द्रनिभाननाम् ॥ अदृष्टदुःखां दुःखार्तां दुःखस्यान्तमगच्छतीम् ॥ ७ ॥
यद्यप्यहमिमां देवीं शोकोपहतचेतनाम् ॥ अनाश्वास्य गमिष्यामि दोषवद्गमनं भवेत् ॥ ८ ॥
गते हि मयि तत्रेयं राजपुत्री यशस्विनी ॥ परित्राणमविन्दन्ती जानकी जीवितं त्यजेत् ॥ ९ ॥
मया च स महाबाहुः पूर्णचन्द्रनिभाननः ॥ समाश्वासयितुं न्याय्यः सीतादर्शनलालसः ॥ १० ॥
निशाचरीणां प्रत्यक्षमनर्हं चापि भाषणम् ॥ कथं नु खलु कर्तव्यमिदं कृच्छ्रगतो ह्यहम् ॥ ११ ॥
अनेन रात्रिशेषेण यदि नाश्वास्यते मया ॥ सर्वथा नास्ति संदेहः परित्यक्ष्यति जीवितम् ॥ १२ ॥
रामश्च यदि पृच्छेन्मां किं मां सीताऽब्रवीद्वचः ॥ किमहं तं प्रतिब्रूयामसंभाष्य सुमध्यमाम् ॥ १३ ॥
सीतासंदेशरहितं मामितस्त्वरया गतम् ॥ निर्दहेदपि काकुत्स्थः क्रुद्धस्तीव्रेण चक्षुषा ॥ १४ ॥
यदि चोद्योजयिष्यामि भर्तारं रामकारणात् ॥ व्यर्थमागमनं तस्य ससैन्यस्य भविष्यति ॥ १५ ॥
अन्तरं त्वहमासाद्य राक्षसीनामिहं स्थितः ॥ शनैराश्वासयिष्यामि सन्तापबहुलामिमाम् ॥ १६ ॥
अहं ह्येवंतितनुश्चैव वानरश्च विशेषतः ॥ वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम् ॥ १७ ॥
यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ॥ रावणं मन्यमाना मां सीता भीता भविष्यति ॥
वानरस्य विशेषेण कथं स्यादभिभाषणम् ॥ १८ ॥
अवश्यमेव वक्तव्यं मानुषं वाक्यमर्थवत् ॥ मया सान्त्वयितुं शक्या नान्यथेयमनिन्दिता ॥ १९ ॥

॥ ४—५ ॥ समाश्वासयितुं युक्तं न्याय्यं ॥ ६ ॥ आश्वासयामि " वर्तमानसामीप्ये वर्तमानवद्वा " इति लट् ॥ ७—८ ॥ दोषवत्त्वमुपपादयति—गते हीति ॥ ९ ॥ समाश्वासयितुं न्याय्यः सीतासंदेशकथनेनेति शेषः ॥ १०—१२ ॥ सीताब्रवीद्वच इत्यत्रेतिकरणं द्रष्टव्यं ॥ १३—१४ ॥ भर्तारं सुग्रीवं । व्यर्थं अनाश्वास्य गमने तदागमनपर्यन्तं देव्याः प्राणानवस्थानादिति भावः ॥१५॥ राक्षसीनां अन्तरं अवकाशं विच्छेदं वा राक्षस्यसन्निधानसमयमित्यर्थः ॥ १६ ॥ अतितनुः अतिसूक्ष्मतनुः । संस्कृतां प्रयोगसौष्ठवलक्षणसंस्कारयुक्तां ॥ १७ ॥ गीर्वाणभाषया व्यवहारे दोषमाह—यदीति ॥ १८ ॥ अथमानु-

॥२॥ ति० राक्षसानांविश... तारतम्यमैश्वर्यादिकृतं ॥५॥ ति० अप्रमेयस्य अपरिच्छेद्यस्वरूपस्यापरिच्छेद्यगुणस्यच ॥ स० सर्वसत्त्वदयावतइति । सर्वेअहिंसाविषयेसत्त्ववान् बलवांश्चासौदयावांश्चतस्य । सर्वबलवान्सर्वदयावांस्तस्येतिवा सर्वप्राणिषुदयावांस्तस्येतिवा । समाश्वासयितुं मयायुक्तमितिशेषः ॥६॥ स० आश्वासयामीतिवर्तमानसामीप्यालृडर्थेलट् । अथवा क्रियाप्रबन्धेलडित्युक्तेर्धात्वर्थमात्रेलडवन्योग्येऽर्थेलृडर्थेभविष्यतीतिलटउपपत्तेः । अन्तं पारं । नाधिगच्छन्ती । यद्वा दुःखस्य कर्मणिषष्ठी । दुःखं नाद्यप्यन्तंबध्नन्तं क्षणेक्षणेदुःखंनूतनयन्तमितियावत् । तंरावणं प्रकारंवा । अधिगच्छतीं प्राप्नुवन्तीं । रामाश्वासनपरतयाशेषेणचार्थापयतस्तीर्थस्योत्तरश्लोकइव इतरेषांतदुत्तरश्लोकःसाधकइत्युभयव्याकरणे समूले इतिज्ञेयं ॥ ७ ॥ स० यद्यपिरावणमरणेनदेवताप्रयोजनंभविष्यतीति नसर्वात्मनावैयर्थ्यं । तथापि सीतावाप्तिरूपैहिकफलालाभाद्वैयर्थ्यमेवेतिभावः ॥१५॥ ति० मानुषीं मनुष्यशरीरसाध्यां । संस्कृतां व्याकरणसंस्कारवतीं ॥ स० वाचंचोदाहर्तव्यांविकल्प्यैकांनिश्चिनोति—अहंहीति । मानुषींसंस्कृतांवा वाचं । संस्कृतायाविकल्पकोटौप्रथमतोनिर्देशस्यमुख्यत्वेनन्याय्यत्वेपि मानुष्याएवभाषायाःसीतयासहभाष्यत्वेननिर्धार्यमाणत्वात् तस्याएवादौनिवेशोयुक्तइतिनानौचिती ॥ १७ ॥ स० सीताभीतेति । रावणस्यविश्रवस्सुतत्वेनगीर्वाणवाणीतस्तद्भ्रमःसंभा-

[पा०] १ ङ. झ. ट. चेयंनिरीक्षिता. २ ङ. झ. ट. यथा. ३ झ. दुःखस्यनाद्यन्तमधिगच्छतीं. ४ ङ. झ. ट. यदिह्यहंसतीमेनां. क. घ. च. छ. ज. ञ. यदिह्यहमिमामेवं. ५ ङ.—ट. मपश्यन्ती. क. ग. मजानन्ती. ६ ङ. झ. ट. यथाच. ७ क. ग. घ. च. छ. ज. ञ. मक्षमंचापि. ङ. झ. ट. मक्षमंचाभिभाषितं. ८ ङ. झ. ट. क्रोधतीव्रेण च. छ. ज. ञ. कुपितस्तीक्ष्णचक्षुषा. ९ ङ. झ. ञ. ट. योद्योजयिष्यामि. १० क. ग. घ. सुग्रीवं. ११ झ. ट. मवस्थितः १२ ङ. झ. ट. राश्वासयाम्यथ. १३ क. ख. ग. ङ.—ट. ह्यतितनुः. १४ ञ. ट. प्रवक्ष्यामि.

सेयमालोक्य मे रूपं जानकी भाषितं तथा ॥ रक्षोभिस्त्रासिता पूर्वं भूयस्त्रासं गमिष्यति ॥ २० ॥
ततो जातपरित्रासा शब्दं कुर्यान्मनस्विनी ॥ जानमाना विशालाक्षी रावणं कामरूपिणम् ॥ २१ ॥
सीतया च कृते शब्दे सहसा राक्षसीगणः ॥ नानाप्रहरणो घोरः समेयादन्तकोपमः ॥ २२ ॥
ततो मां संपरिक्षिप्य सर्वतो विकृताननाः ॥ वधे च ग्रहणे चैव कुर्युर्यत्नं यथाबलम् ॥ २३ ॥
गृह्य शाखाः प्रशाखाश्च स्कन्धांश्चोत्तमशाखिनाम् ॥ दृष्ट्वा विपरिधावन्तं भवेयुर्भयशङ्किताः ॥२४॥
मम रूपं च संप्रेक्ष्य वने विचरतो महत् ॥ राक्षस्यो भयवित्रस्ता भवेयुर्विकृताननाः ॥ २५ ॥
ततः कुर्युः समाह्वानं राक्षस्यो रक्षसामपि ॥ राक्षसेन्द्रनियुक्तानां राक्षसेन्द्रनिवेशने ॥ २६ ॥
ते शूलशक्तिनिस्त्रिंशविविधायुधपाणयः ॥ आपतेयुर्विमर्देऽस्मिन्वेगेनोद्विग्नकारिणः ॥ २७ ॥
संरुद्धैस्तैः सुपरितो विधमन्राक्षसां बलम् ॥ शक्नुयां न तु संप्राप्तुं परं पारं महोदधेः ॥ २८ ॥
मां वा गृह्णीयुरायुल्य बहवः शीघ्रकारिणः ॥ स्वादियं चागृहीतार्था मम च ग्रहणं भवेत् ॥ २९ ॥
हिंसाभिरुचयो हिंस्युरिमां वा जनकात्मजाम् ॥ विपन्नं स्यात्ततः कार्यं रामसुग्रीवयोरिदम् ॥ ३० ॥
उद्देशे नष्टमार्गेऽस्मिन्राक्षसैः परिवारिते ॥ सागरेण परिक्षिप्ते गुप्ते वसति जानकी ॥ ३१ ॥
विशस्ते वा गृहीते वा रक्षोभिर्मयि संयुगे ॥ नान्यं पश्यामि रामस्य साहाय्यं कार्यसाधने ॥ ३२ ॥
विमृशंश्च न पश्यामि यो हते मयि वानरः ॥ शतयोजनविस्तीर्णं लङ्घयेत महोदधिम् ॥ ३३ ॥
कामं हन्तुं समर्थोऽस्मि सहस्राण्यपि रक्षसाम् ॥ न तु शक्ष्यामि संप्राप्तुं परं पारं महोदधेः ॥ ३४ ॥
असत्यानि च युद्धानि संशयो मे न रोचते ॥ कश्च निस्संशयं कार्यं कुर्यात्प्राज्ञः ससंशयम् ॥३५॥
प्राणत्यागश्च वैदेह्या भवेदनभिभाषणे ॥ एष दोषो महान्हि स्यान्मम सीताभिभाषणे ॥ ३६ ॥

षभाषया व्यवहर्तव्यत्वं निश्चिनोति—अवश्यमिति ॥ अत्र वाक्यस्य मानुषत्वं कोसलदेशवर्तिमनुष्यसंबन्धित्वं विवक्षितं । तादृग्वाक्यस्यैव देवीपरिचितत्वात् ॥ १९ ॥ एवं मानुषभाषया व्यवहर्तव्यत्वं निश्चित्य संप्रति तयापि भाषयानेन वानररूपेण पुरः स्थित्वाभिभाषणे दोषोस्तीति विचारयति—सेयमिति ॥ २० ॥ जानमाना जानाना । सुमागम आर्षः ॥ २१—२३ ॥ प्रशाखाः उपशाखाः । विपरिधावन्तं मामिति शेषः ॥ २४—२६ ॥ उद्विग्नकारिणः उद्वेगकारिणः ॥ २७ ॥ तैः परितः संरुद्धः । अतएव रक्षसां बलं विधमन् प्रहरन् । अहं महोदधेः परं पारं प्राप्तुं न शक्नुयामित्यन्वयः ॥ २८ ॥ अगृहीतार्था अविदितरामसंदेशार्था ॥ २९—३० ॥ उद्देशे प्रदेशे । नष्टमार्गे अदृष्टमार्गे । उक्तविशेषणे उद्देशे वसतीत्यन्वयः ॥ ३१ ॥ सहाय एव साहाय्यः तं । कार्यसाधने सीतादर्शननिवेदनलक्षणकार्यसाधने ॥ ३२ ॥ यो लङ्घयेत तं न पश्यामीत्यन्वयः ॥ ३३—३४ ॥ असत्यानि अनिश्चितजयापजयानि । क्रेशस्तु भूयानिति भावः । ततो नैतन्मम मतमित्याह—संशय इति । संशयः संशयितार्थः । स च सङ्ग्रामः अथापि तथाकरणे स एव कार्यहन्ता बुद्धिहीनो निन्दाभाजनं चेत्याशयेनाह—कश्चेति । प्राज्ञः कः ससंशयं कार्यं निःसंशयं निर्विचारं कुर्यात् ॥ ३५ ॥ अनभिभाषणे रामसंदेशानिवेदने । एष दोषः पूर्वोक्तसीतासंत्रासा-

वितइति तेन भीतिभवनंयुक्तमितिभावः ॥१८॥ ति० नतुशक्ष्यामि युद्धश्रान्त्येतिभावः ॥ शि० नशक्ष्यामि सीतामरणशङ्कयाक्षीणशक्तिर्भविष्यामीतितात्पर्यं ॥३४॥ ति० किंचयुद्धेजयोपिसंदिग्धइत्याह—असत्यानीति ॥ स० असत्यानि अनिश्चितजयकानि ।

[पा०] १ ङ. झ. ट. त्रासमुपैष्यति. २ क. शङ्कमाना. ङ.—ट. जानानामां. ३ ङ. झ. ट. महाबलाः. ४ ख. ङ. झ. ञ. ट. तंमांशाखाः. ५ ङ.—ट. दृष्ट्वाच. क. दृष्ट्वामां. ६ ङ. झ. ट. भवेयुःपरिशङ्किताः. क. भवेयुर्भयशङ्किनः. घ. भवेच्छङ्कितविह्वलः. ७ ङ.—ट. विकृतस्वराः. ८ ङ.—ट. शूलशर. क. ग. घ. शूलाशनि. ९ झ. ञ. ट. वेंगेनोद्विग्नकारणात्. १० क.—ङ. संक्रुद्धस्तैस्तु. ११ क. ब.—ट. त्राक्षसं. १२ ङ.—ट. रावृत्य. १३ ख. घ. सहायं. १४ ङ. च. ज.—ट. शक्ष्याम्यहंप्राप्तुं.

भूताश्चार्था विनश्यन्ति देशकालविरोधिताः ॥ विक्लबं दूतमासाद्य तमः सूर्योदये यथा ॥ ३७ ॥
अर्थानर्थान्तरे बुद्धिर्निश्चिताऽपि न शोभते ॥ [यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने ॥]
घातयन्ति हि कार्याणि दूताः पण्डितमानिनः ॥ ३८ ॥
न विनश्येत्कथं कार्यं वैक्लव्यं न कथं भवेत् ॥ लङ्घनं च समुद्रस्य कथं नु न वृथा भवेत् ॥ ३९ ॥
कथं नु खलु वाक्यं मे शृणुयान्नोद्विजेत वा ॥ इति संचिन्त्य हनुमांश्चकार मतिमान्मतिम् ॥४०॥
राममक्लिष्टकर्माणं स्वबन्धुमनुकीर्तयन् ॥ नैनामुद्वेजयिष्यामि तद्बन्धुगतमानसाम् ॥ ४१ ॥
इक्ष्वाकूणां वरिष्ठस्य रामस्य विदितात्मनः ॥ शुभानि धर्मयुक्तानि वचनानि समर्पयन् ॥ ४२ ॥
श्रावयिष्यामि सर्वाणि मधुरां प्रब्रुवन्गिरम् ॥ श्रद्धास्यति यथा हीयं तथा सर्वं समादधे ॥ ४३ ॥
इति स बहुविधं महानुभावो जगतिपतेः प्रमदामवेक्षमाणः ॥
मधुरमवितथं जगाद वाक्यं द्रुमविटपान्तरमास्थितो हनूमान् ॥ ४४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिंशस्सर्गः ॥ ३० ॥

एकत्रिंशः सर्गः ॥ ३१ ॥

शिंशुपास्थेनहनुमता मानुषभाषाश्रयणेन रामजननप्रभृतिस्वीयसीतादर्शनावधिसकलवृत्तान्तप्रतिपादनम् ॥ १ ॥ तच्छ्रवणेनहर्षविस्मयापन्नयासीतया सर्वतश्चक्षुश्चालनेनशिंशुपाशाखायां हनुमतोऽवलोकनम् ॥ २ ॥

एवं बहुविधां चिन्तां चिन्तयित्वा महाकपिः ॥ संश्रवे मधुरं वाक्यं वैदेह्या व्याजहार ह ॥ १ ॥

क्रोशतन्निमित्तराक्षसागमनादिः । सीताभिभाषणे वानररूपेण पुरःस्थित्वाभिभाषणे ॥ ३६ ॥ भूताश्चार्थाः निष्पन्नार्थाः । विक्लबं अविवेकिनं । दूतमासाद्य देशकालविरोधिताः सन्तः सूर्योदये तमो यथा विनश्यति तथा विनश्यन्तीति संबन्धः ॥३७॥ अत्र विक्लबं दूतमासाद्येत्यनुषज्यते । अर्थानर्थान्तरे कार्याकार्यविषये । निश्चितापि स्वामिना सचिवैः सह निश्चितापि । बुद्धिः विक्लबं दूतमासाद्य न शोभते । अकिंचित्कराभिभवतीत्यर्थः । एतदेवोपपादयति—घातयन्तीति ॥ ३८ ॥ प्रागुक्ता दूतदोषास्त्वस्मिन्यथा न स्युस्तथा कर्तव्यमित्याह—न विनश्येदिति ॥ कार्यं स्वामिकार्यं कथं केन प्रकारेण । न विनश्येत् । वैक्लव्यं बुद्धिहीनता । मम कथं न भवेत् । समुद्रलङ्घनं कथं न वृथा भवेत् । तथा कर्तव्यमिति शेषः ॥ ३९ ॥ कथमिति अथ सीतेत्यध्याहार्यं । हनुमान् मे वाक्यं सीता कथं केन प्रकारेण । शृणुयात्कथं नोद्विजेतेति विचार्य मतिमान् प्रशस्तमतिः । मतिं तत्कालोचितकर्तव्यविषयां । चकार निष्पादयामास ॥ ४० ॥ स्वबन्धुं राममनुकीर्तयन् " लक्षणहेत्वोः—"इति हेत्वर्थे शतृप्रत्ययः । नैनामुद्वेजयिष्यामि एनां मद्रूपप्रदर्शनमन्तरेण रामस्य कीर्तनेनैवानुद्विग्नांकरिष्यामीत्यर्थः । तद्बन्धुगतमानसां स चासौ बन्धुश्च तद्बन्धुः रामः तद्गतमानसां ॥ ४१—४३ ॥ जगतिपतेरिति दीर्घाभाव आर्षः । जगादेति वक्ष्यमाणसर्गार्थसंग्रहः ॥ ४४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रिंशः सर्गः ॥३०॥

चिन्तां चिन्तयित्वा चिन्तां कृत्वा । कर्तव्यमर्थं

यद्वा राक्षसानांमायिकत्वान्मायामयानि ॥ ३५ ॥ शि० भूताः सिद्धप्रायाः ॥ ३७ ॥ स० सुबन्धुं कदाप्यवियोगिबान्धवं । तद्बन्धुः सः तद्रूपीबन्धुः । रामः तद्गतचेतनां तस्यरामस्यबन्धुरासःकोवाऽऽगच्छेदितितद्गतमानसांवा ॥ ४१ ॥ स० जगतिपतेः भूपतेः । " ङ्यापोःसंज्ञाछन्दसोः " इतिसंज्ञात्वात् "जाहविसूर्यकन्ययोः " इत्यादिवद्ह्रस्वः । अजगतिपतेरितिवाछेदः । अजस्य चतुर्मुखस्य गतिः उदरतोनिस्सरणं सद्गतिर्वाययासा अजगतिः रमा तस्याःपतिस्तस्येतिवा ॥ ४४ ॥ इतित्रिंशःसर्गः ॥ ३० ॥

स० चिन्तांचिन्तयित्वेतिपूर्ववत् । संश्रवे संश्रूयतेशब्दोयत्रससंश्रवः अन्यानाकलनेनसीताऽऽकलनंयस्मिन् । समीपप्रदेशे

[पा०] १ ग. ञ. भूतार्थाहिविपद्यन्ते. ङ—ञ. ट. भूताश्चार्थाविरुद्ध्यन्ति. २ इदमर्धं ख. पाठेदृश्यते. ३ क. ख. घ. च. छ. ज. ञ. विनश्येदिदंकार्यं. ४ ख. ङ.—ट. कथंमम. ५ क. मतिमुत्तमां. ६ ङ. ञ. ट. सुबन्धुमनु. ७ ङ. ञ. ट. गतचेतनां. ८ ङ. ञ. ञ. ट, यथासीतातथा. ९ ङ. ञ. ट. महामतिः.

राजा दशरथो नाम रथकुञ्जरवाजिमान् ॥ पुण्यशीलो महाकीर्तिर्ऋजुरासीन्महायशाः ॥ २ ॥
राजर्षीणां गुणश्रेष्ठस्तपसा चर्षिभिः समः ॥ चक्रवर्तिकुले जातः पुरन्दरसमो बले ॥ ३ ॥
अहिंसारतिरक्षुद्रो घृणी सत्यपराक्रमः ॥ मुख्यश्चेक्ष्वाकुवंशस्य लक्ष्मीवांल्लक्ष्मिवर्धनः ॥ ४ ॥
पार्थिवव्यञ्जनैर्युक्तः पृथुश्रीः पार्थिवर्षभः ॥ पृथिव्यां चतुरन्तायां विश्रुतः सुखदः सुखी ॥ ५ ॥
तस्य पुत्रः प्रियो ज्येष्ठस्ताराधिपनिभाननः ॥ रामो नाम विशेषज्ञः श्रेष्ठः सर्वधनुष्मताम् ॥ ६ ॥
रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ॥ रक्षिता जीवलोकस्य धर्मस्य च परन्तपः ॥ ७ ॥
तस्य सत्याभिसंधस्य वृद्धस्य वचनात्पितुः ॥ सभार्यः सह च भ्रात्रा वीरः प्रव्राजितो वनम् ॥ ८ ॥
तेन तत्र महारण्ये मृगयां परिधावता ॥ राक्षसा निहताः शूरा बहवः कामरूपिणः ॥ ९ ॥
जनस्थानवधं श्रुत्वा हतौ च खरदूषणौ ॥ ततस्त्वमर्षापहृता जानकी रावणेन तु ॥
वञ्चयित्वा वने रामं मृगरूपेण मायया ॥ १० ॥
स मार्गमाणस्तां देवीं रामः सीतामनिन्दिताम् ॥ आससाद वने मित्रं सुग्रीवं नाम वानरम् ॥ ११ ॥
ततः स वालिनं हत्वा रामः पुरपुरञ्जयः ॥ प्रायच्छत्कपिराज्यं तत्सुग्रीवाय महाबलः ॥ १२ ॥
सुग्रीवेणापि संदिष्टा हरयः कामरूपिणः ॥ दिक्षु सर्वासु तां देवीं विचिन्वन्ति सहस्रशः ॥ १३ ॥
अहं संपातिवचनाच्छतयोजनमायतम् ॥ अस्या हेतोर्विशालाक्ष्याः सागरं वेगवान्प्लुतः ॥ १४ ॥
यथारूपां यथावर्णां यथालक्ष्मीं च निश्चिताम् ॥ अश्रौषं राघवस्याहं सेयमासादिता मया ॥ १५ ॥
विरामैवमुक्त्वासौ वाचं वानरपुङ्गवः ॥ जानकी चापि तच्छ्रुत्वा विस्मयं परमं गता ॥ १६ ॥
ततः सा वक्रकेशान्ता सुकेशी केशसंवृतम् ॥ उन्नम्य वदनं भीरुः शिंशुपावृक्षमैक्षत ॥ १७ ॥

निश्चित्येत्यर्थः । संश्रवे सम्यक् श्रूयतेस्मिन्निति संश्रवः । समीपं समीपे व्याजहार । यद्वा पाठ्ये गेये च मधुरमिति संश्रवे श्रवणे मधुरं ज्ञानप्रसरणद्वारा इन्द्रियेभ्यो निस्सृत्य विषयान्गृहीत्वा तदनन्तरं हि रसो जायते लोके अत्र न तथा यत्र शब्दसंसर्गो जायते तत्र रसो जायत इत्यतिशयोक्तिः । मधुरं ज्ञानमपि तद्द्वारा रसजनकं वाक्यं पूर्वापरनिरूपणं विना स्वयं रसजनकं वैदेह्याः वैदेहीनिमित्तं । कुलानुरोधेन देहेनिस्स्पृहायाः देहमपि दत्त्वा रसावहत्वमुच्यते ॥ १ ॥ वितरणविक्रमादिजनितत्वेन कीर्तियशसोर्भेदोवगन्तव्यः ॥ २—४ ॥ पार्थिवव्यञ्जनैः राजलक्षणैः ॥ ५—७ ॥ तस्य पितुर्वचनाद्वनं प्रव्राजितः गतः । स्वार्थे णिच् ॥ ८ ॥ मृगयां परिधावता मृगयामुद्दिश्य परिधावता । अनेन लीलया खरादिवधः सूच्यते ॥ ९ ॥ जनस्थानवधं जनस्थानरक्षोवधं । अमर्षेणापहृता अमर्षापहृता । मृगरूपेण मृगसौन्दर्येण प्रशस्तमृगेण वा । " प्रशंसायां रूपप् " ॥ १०—१४ ॥ यथारूपां यादृशशरीरां । यथावर्णां यादृशरूपाम् । यथालक्ष्मीं यादृशकान्तिं । राघवस्य राघवात् ॥ १५—१६ ॥ सुकेशी नीलसूक्ष्मकेशी ।

॥ १ ॥ ति० मायया मृगरूपेण मारीचेनकरणेन । रामंवञ्चयित्वेत्यर्थः ॥ १० ॥ ति० तस्याहेतोः तदन्वेषणहेतोः ॥ १४ ॥ ति० केशसंवृतं असंस्कारतःप्रकीर्णत्वात् ॥ १७ ॥

[पा०] १ ङ—ट. महाकीर्तिरिक्ष्वाकूणांमहायशाः. क. ग. महाकीर्तिःप्रादुरासीन्महायशाः. २ क. गुणैःश्रेष्ठः. ३ क. व्यञ्जनोपेतः. ४ क. ग. ङ.—ट. वृत्तस्य. ५ ख. स्वजनस्याभि. क. ङ.—ज. ञ. ट. स्वजनस्यापि. ६ ङ.—ट. निहतौ. ७ घ. सत्यपराक्रमः. ८ ङ. च. झ. ञ. ट. आयच्छत्कपिराज्यंतुसुग्रीवाय. ९ ङ.—झ. ट. महात्मने. १० ङ. झ. ट. विचिन्वन्तः. ११ क. ततस्ततः. १२ घ.—ट. तस्माहेतोः. १३ ङ.—ट. समुद्रं. १४ ङ. झ. ट. यथालक्ष्मवतींचतां. च. ज. ञ. यथालक्ष्मींविनिश्चितां. क. यथालक्ष्मींचतामपि. १५ क. घ. ङ. झ. ट. मुक्त्वास. ग. च. छ. ज. ञ. मुक्त्वातु. १६ ङ. ज.—ट. शिंशुपामन्ववैक्षत.

निशम्य सीता वचनं कपेश्च दिशश्च सर्वाः प्रदिशश्च वीक्ष्य ॥
स्वयं प्रहर्षं परमं जगाम सर्वात्मना राममनुस्मरन्ती ॥ १८ ॥
सा तिर्यगूर्ध्वं च तथाप्यधस्तान्निरीक्षमाणा तमचिन्त्यबुद्धिम् ॥
ददर्श पिङ्गाधिपतेरमात्यं वातात्मजं सूर्यमिवोदयस्थम् ॥ १९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकत्रिंशस्सर्गः ॥ ३१ ॥

द्वात्रिंशः सर्गः ॥ ३२ ॥

सीतया शिंशुपायांदृष्टस्यहनूमतःस्वामित्वबुद्ध्या स्वप्नेवानरदर्शनस्यानर्थहेतुतया दैवंप्रति रामादिकुशलप्रार्थना ॥ १ ॥ पुनःकारणाभावात्स्वप्नाद्यभावनिर्धारणेन ब्रह्मादीन्प्रति हनुमदुक्तस्ययाथार्थ्यसिद्ध्यर्थप्रार्थना ॥ २ ॥

ततः शाखान्तरे लीनं दृष्ट्वा चलितमानसा ॥ वेष्टितार्जुनवस्त्रं तं विद्युत्संघातपिङ्गलम् ॥ १ ॥
सा ददर्श कपिं तत्र प्रश्रितं प्रियवादिनम् ॥ फुल्लाशोकोत्करामासं तप्तचामीकरेक्षणम् ॥ २ ॥
[सांऽथ दृष्ट्वा हरिश्रेष्ठं विनीतवदवस्थितम् ॥] मैथिली चिन्तयामास विस्मयं परमं गता ॥ ३ ॥
अहो भीममिदं रूपं वानरस्य दुरासदम् ॥ दुर्निरीक्ष्यमिति ज्ञात्वा पुनरेव मुमोह सा ॥ ४ ॥
विललाप भृशं सीता करुणं भयमोहिता ॥ रामरामेति दुःखार्ता लक्ष्मणेति च भामिनी ॥ ५ ॥
रुरोद बहुधा सीता मन्दं मन्दस्वरा सती ॥ ६ ॥

वक्रिण्णः पूर्वमुक्तत्वात् ॥ १७—१८ ॥ पार्श्वे आकाशं भूमिं चावेक्षमाणा । अधस्तादित्यनेन यथा भूमिं भित्त्वा कश्चिन्नरः रामनामानि कीर्तयेत्तथान्यत्रापीत्यपिना संभावनोच्यते । शिंशुपावृक्षस्याधस्तात्तिर्यगूर्ध्वमिति वा । तमचिन्त्यबुद्धिं ददर्श । तद्वपुरवलोकनात्पूर्वं तस्यहृदयमेवं परिच्छिनत्ति स्म । इह लङ्कायां प्रविश्यावरोधारामम्मध्यप्रवेशेनायं निपुणतरमतिरिति निश्चितवतीत्यर्थः । पिङ्गाधिपतेरमात्यं स्वरविशेषेणायं वानरः । तत्रापि न स्वतन्त्रः । किन्तु स्वसजातीयस्य राज्ञः कस्यचिदमात्योयं । तद्राज्यकार्यमेतद्वस्तगतमिति निश्चितवती । वातात्मजं रामप्राणहेतुभूतमत्प्राणनहेतुत्वेन सर्वप्राणिप्राणनहेतुत्वेन वायुपुत्रोयमित्यवगतवती । सूर्यमिवोदयस्थं रामदिवाकरस्योदयसूचकमुदयगिरिस्थमरुणमिव स्थितं । सूरः सूर्यः । "सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः" इत्यमरः। "सूरसूतोरुणोनूरुः" इत्युक्तेस्सूरस्य संबन्धी सूर्यः । दिगादित्वाद्यत् । भवतापि संबन्धः विशेष एव । यद्वा सूर्यशब्देन तत्संबन्ध्यरुणो लक्ष्यते । " सूर्योरुणे च सूर्ये च " इति निघण्टुरस्तीत्याहुः । औचित्यादत्र सूर्योरुणः ॥ १९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकत्रिंशः सर्गः ॥३१॥

ततः शाखान्तरे लीनमित्यादिश्लोकद्वयमेकान्वयं ॥ दृष्ट्वा पूर्वं सामान्यतो दृष्ट्वा भयाच्चलितमानसा सती विशेषतो ददर्श । वेष्टितार्जुनवस्त्रं वेष्टितधवलवस्त्रं । तं पूर्वोक्तं ॥ १—५ ॥ रुरोदेत्यर्धं ॥ मन्दं राक्षस्यः श्रुत्वा किमिदमिति विचारयिष्यन्तीति भयेनेति भावः

स० पिङ्गाधिपतेः पिङ्गाक्षस्वामिनः ॥ १९ ॥ इत्येकत्रिंशःसर्गः ॥ ३१ ॥

ति० लीनंदृष्ट्वा स्फुरन्तंदृष्ट्वा । चलितमानसा दृष्टरूपोऽयमपिमायामृगोवेतिचलितचित्ता ॥ स० विद्युतांसंघातः समूहः । सदृवपिङ्गलस्तं ॥ १ ॥ स० विनीतवत् स्वार्थवतिः । विनीताःसन्त्यस्येतिविनीतवान् । सचासाववस्थितश्च तंवा । अथवा विनीतं विनीतिः तद्वांश्चासाववस्थितश्चतं । यद्वा विनीतं विशिष्टनीतंवदतीतिसविनीतवदः विनीतवाग्मी । सचासौ वस्थितश्चतं ॥ ३ ॥ ति० वानरस्य निर्धारणेषष्ठी । जातावेकवचनं । वानराणांमध्ये इदंसत्वं जीवः । भीमं प्राकृतप्राणिभयावहं । अतएवतैर्दुरासदं

[पा०] १ ख. निरीक्षमाणातथाप्यधस्तात्तमचिन्त्य. २ क. ग. ङ.—ट. पाठेष्विदमर्धंदृश्यते. ३ ङ.—ट. सत्वं. ४ झ. ट. मिदंमला. ५ क. ङ. च. छ. झ. ञ. ट. सहसासीता.

सा तं दृष्ट्वा हरिश्रेष्ठं विनीतवदुपस्थितम् ॥ मैथिली चिन्तयामास स्वप्नोऽयमिति भामिनी ॥ ७ ॥
सा वीक्षमाणा पृथुभुग्नवक्त्रं शाखामृगेन्द्रस्य यथोक्तकारम् ॥
ददर्श पिङ्गाधिपतेरमात्यं वातात्मजं बुद्धिमतां वरिष्ठम् ॥ ८ ॥
सा तं समीक्ष्यैव भृशं विसंज्ञा गतासुकल्पेव बभूव सीता ॥
चिरेण संज्ञां प्रतिलभ्य भूयो विचिन्तयामास विशालनेत्रा ॥ ९ ॥
स्वप्ने मयाऽयं विकृतोऽद्य दृष्टः शाखामृगः शास्त्रगणैर्निषिद्धः ॥
स्वस्त्यस्तु रामाय सलक्ष्मणाय तथा पितुर्मे जनकस्य राज्ञः ॥ १० ॥
स्वप्नोपि नायं न हि मेस्ति निद्रा शोकेन दुःखेन च पीडितायाः ॥
सुखं हि मे नास्ति यतोस्मि हीना तेनेन्दुपूर्णप्रतिमाननेन ॥ ११ ॥
रामेति रामेति सदैव बुद्ध्या विचिन्त्य वाचा ब्रुवती तमेव ॥
तस्यानुरूपां च कथां तमर्थमेवं प्रपश्यामि तथा शृणोमि ॥ १२ ॥
अहं हि तस्याद्य मनोभवेन संपीडिता तद्गतसर्वभावा ॥
विचिन्तयन्ती सततं तमेव तथैव पश्यामि तथा शृणोमि ॥ १३ ॥
मनोरथः स्यादिति चिन्तयामि तथाऽपि बुद्ध्या च वितर्कयामि ॥
किं कारणं तस्य हि नास्ति रूपं सुव्यक्तरूपश्च वदत्ययं माम् ॥ १४ ॥

॥ ६—७ ॥ वीक्षमाणा विचारयन्ती । ददर्श पुनरनुकूलोयं स्यादिति ददर्शेत्यर्थः । भुग्नवक्त्रं वक्त्रमुखं । यथोक्तकारं आज्ञाकरं ॥ ८ ॥ विसंज्ञा मूर्च्छिता । गतासुकल्पा मृतप्राया । इवशब्दो वाक्यालङ्कारे । चिरेण संज्ञां प्रतिलभ्य कालेनैव प्रबोधकेन प्रबुद्धवतीत्यर्थः । विकृतवानरवेषदर्शनेन मूर्च्छिता पुनः कालेन प्रबुद्धेत्यर्थः ॥ ९ ॥ स्वप्ने स्वप्नस्थाने । स्वप्ने वानरदर्शनं बन्धुविनाशकरमिति भावः ॥ १० ॥ एवं दर्शनस्य स्वप्नत्वं संभाव्य पुनर्याथार्थ्यमाह—स्वप्नोपीति ॥ स्वप्नाभावे हेतुमाह—नहि मेस्ति निद्रेति । निद्राभावे हेतुः—शोकेनेत्यादिः । एवं प्रतिबन्धकेन निद्राभावमुक्त्वा सुखरूपहेत्वभावाच्च न निद्रेत्याह—सुखंहीति । इन्दुपूर्णप्रतिमाननेन पूर्णेन्दुप्रतिमाननेन ॥ ११ ॥ सदैव बुद्ध्या विचिन्त्य तमेव राममेव । वाचा ब्रुवती । तस्यानुरूपां विचिन्तितस्याभिवदनस्यानुरूपां । कथां तथा शृणोमि । तमर्थं कथार्थमेवं प्रपश्यामि । एवं उक्तप्रकारेण जानामीत्यन्वयः । तदर्थामिति पाठे अयमर्थः । तस्यानुरूपां रामकीर्तनस्यानुरूपां । तदर्थां स रामोर्थोभिधेयो यस्याः तां ॥ १२ ॥ उक्तमर्थं विवृणोति—अहं हीति ॥ १३ ॥ प्रथमं इदं रामनामकथयितृदर्शनं मनोरथः अभिलाषमात्रमिति चिन्तयामि । तथापि तथा चिन्तायां सत्यामपि । बुद्ध्या वितर्कयामि मनोरथो न भवतीति विचारयामि । किं कारणमिति चेत् तस्य मनोरथस्य रूपं नास्ति । अयं वानरस्तु सुव्यक्तरूपश्च मां वदति च । तस्मान्मनोरथो न भवेदेवेत्यर्थः

दुर्निरीक्ष्यंचेतिमत्वा पुनरपिमायैवेयमितिभयान्मुमोह ॥ ४ ॥ ति० यथोक्तकारं कामाज्ञाकरं । यद्वा यथोक्तवेष्टितार्जुनवस्त्राद्याकारं । छान्दसोहस्वः ॥ स० यथोक्तकारं वेष्टितार्जुनवस्त्राकारंवा । उपसर्गाणांचधातुलीनार्थबोधकत्वेनाङ्गिकलोपिकारशब्दएवाकारवाची ॥ ८ ॥ शि० तं हनूमन्तं । समीक्ष्य रावणत्वेनवितर्क्य । गतासुकल्पा विपन्नाचेष्टारहितावभूव । चिरेणकिंचिद्विलंबतः संज्ञांप्रतिलभ्यचिन्तयामास ॥ ९ ॥ ति० दृश्यमानोऽयंस्वप्नोमयाविकृतएवदृष्टः । कुतस्त्राह—शाखामृगइत्यादि । एवंदु-

[पा०] १ ङ. झ. ट. हरिवरं. २ च. छ. झ. ञ. ट. दुपागतं. ३ ग. घ. च.—ट. पिङ्गप्रवरंमहार्हं. क. कीशप्रवरंमहार्हं. ४ ङ. ट. विपन्ना. ५ क. ग. च.—ट. चैवं. ख. चित्तेसाचिन्तयामास. ६ क. ख. ग. ङ.—ट. स्वप्नो. ७ ख. स्वप्नेनचायं. ८ ग.—छ. झ. ञ. ट. यतोविहीना. ९ ख. विचिन्त्यबुद्ध्यासदैव. १० ङ. झ. ट. तस्यानुरूपंचकथांतदर्थां. ११ ख. तदर्थंतमेवपश्यामि.

नमोस्तु वाचस्पतये सवज्रिणे स्वयंभुवे चैव हुताशनाय च ॥
अनेन चोक्तं यदिदं ममाग्रतो वनौकसा तच्च तथाऽस्तु नान्यथा ॥ १५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

जानतापिहनुमता तन्मुखाच्छ्रवणेच्छया सीतांप्रति सुरस्त्रीत्वादिनाविकल्पैःप्रश्नपूर्वकमनेकहेतुभिःसीतात्वनिर्धारणोक्तिः ॥ १ ॥ सीतयाहनुमन्तंप्रति रावणकर्तृकस्वापहरणान्तनिखिलवृत्तान्तकथनपूर्वकं रावणसंकेतितस्वजीवनकालेमासद्वयस्यावशिष्टत्वोक्त्या तदनन्तरंस्वेनैव स्वजीवितत्यागप्रतिज्ञानम् ॥ २ ॥

सोवतीर्य द्रुमात्तस्माद्विद्रुमप्रतिमाननः ॥ विनीतवेषः कृपणः प्रणिपत्योपसृत्य च ॥ १ ॥
तामब्रवीन्महातेजा हनूमान्मारुतात्मजः ॥ शिरस्यञ्जलिमाधाय सीतां मधुरया गिरा ॥ २ ॥
कां नु पद्मपलाशाक्षि क्लिष्टकौशेयवासिनि ॥ द्रुमस्य शाखामालम्ब्य तिष्ठसि त्वमनिन्दिते ॥ ३ ॥
किमर्थं तव नेत्राभ्यां वारि स्रवति शोकजम् ॥ पुण्डरीकपलाशाभ्यां विप्रकीर्णमिवोदकम् ॥ ४ ॥
सुराणामसुराणां वा नागगन्धर्वरक्षसाम् ॥ यक्षाणां किन्नराणां वा का त्वं भवसि शोभने ॥ ५ ॥
का त्वं भवसि रुद्राणां मरुतां वा वरानने ॥ वसूनां वा वरारोहे देवता प्रतिभासि मे ॥ ६ ॥
किंनु चन्द्रमसा हीना पतिता विबुधालयात् ॥ रोहिणी ज्योतिषां श्रेष्ठा श्रेष्ठसर्वगुणान्विता ॥ ७ ॥
का त्वं भवसि कल्याणि त्वमनिन्दितलोचने ॥ ८ ॥
कोपाद्वा यदि वा मोहाद्भर्तारमसितेक्षणे ॥ वसिष्ठं कोपयित्वा त्वं नासि कल्याण्यरुन्धती ॥ ९ ॥
को नु पुत्रः पिता भ्राता भर्ता वा ते सुमध्यमे ॥ अस्माल्लोकादमुं लोकं गतं त्वमनुशोचसि ॥ १० ॥

॥ १४ ॥ अनेनोक्तं सत्यमस्त्विति देवताः प्रार्थयते—नम इति ॥ हुताशनाय च अग्नये च ॥ १५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वात्रिंशः सर्गः ॥ ३२ ॥

सः राक्षसीषु सुप्तासु लब्धावसर इत्यर्थः । कृपणः सीतादौस्थ्यदर्शनेन दीनः । जानन्नपि वैदेह्यैव वाचयितुमब्रवीत् ॥ १—३ ॥ तव नेत्राभ्यां आनन्दाश्रुयोगार्हाभ्यां । किमर्थं कस्य कुलच्छेदाय । यद्वा किमर्थं किं चेतसि कृत्वा । पुण्डरीकेत्यादि हन्तैतत्सौन्दर्यं प्रणयिना रामेण दृष्टमासीदिति भावः ॥ ४ ॥ सुराणामित्यादिषु निर्धारणे षष्ठी । का त्वं कस्य संबन्धिनीत्यर्थः ॥ ५—७ ॥ हे कल्याणि त्वं का । अनिन्दितलोचने त्वं का भवसीति योजना ॥ ८ ॥ वसिष्ठं कोपयित्वेत्यत्रापि पतिता विबुधालयादित्यनुषज्यते । नासीत्यत्र काकुरनुसंधेया ॥ ९ ॥ अमुं लोकं गतं । यमिति शेषः । परलोकं गतं यं पुत्रं पितरं भ्रातरं भर्तारं वानुशोचसि स क इत्यर्थः । गता त्वमित्यपि पाठः । तस्मात् स्वर्गादमुं मनुष्यलोकं गता या

स्वप्नंमत्वा स्वस्तिप्रार्थयते । जनकस्य तद्वंश्यस्य ॥ १० ॥ ति० एवंहनुमद्वचसोऽवास्तवत्वंनिर्णायानाप्तप्रणीतत्वेनमिथ्यार्थकत्वस्यापिसंभवात्तद्व्यावृत्तयेदेवान्प्रणमति—नमोस्त्विति । वाचस्पतिरत्रेनवाचस्सत्यत्वसंपादनयोग्यता । वज्रिणोपि बृहस्पतितःसत्यवाग्रूपशब्दपारायणग्रन्थरूपमन्त्रलाभात्तदुपासकत्वेनवाचःसत्यत्वसंपादनयोग्यता । स्वयंभुवे सत्यादिरूपब्रह्मणे । वागधिष्ठातृदेवतात्वाच्चाग्नयेनतिः ॥ १५ ॥ इतिद्वात्रिंशःसर्गः ॥ ३२ ॥

ती० कृपणः दीनः । सीतादैन्यात्स्वयंकृपणइत्यर्थः । अत्रराक्षसीनांनिद्राजाड्यात्त्रिजटास्वप्नश्रवणजन्यभयानन्तरमात्मत्राणायसीतैकशरणत्वेनोपेक्षणाच्चदैवानुग्रहाच्चसीताहनुमतोरयमप्रत्यूहःसंल्लापइत्यनुसन्धेयं ॥ अस्यार्थस्याष्टपञ्चाशत्सर्गेअङ्गदाग्रेहनुमतैव " ततस्ताःसहिताःसर्वाः " इत्यादिनावक्ष्यमाणत्वादिति ॥ ति० अत्यूर्ध्वशाखातःसीतासंमुखशाखायामवतीर्य । द्रुम-

[पा०] १ ग. पद्मपत्रविशालाक्षि. घ. कालंपद्म. ज. कासिपद्म. २ क. ख. ङ.—ट. मसुराणांच. ३ ङ. ञ. ट. गुणाधिका.

रोदनादतिनिःश्वासाद्धूमिसंस्पर्शनादपि ॥ न त्वां देवीमहं मन्ये राज्ञः संज्ञावधारणात् ॥ ११ ॥
व्यञ्जनानि च ते यानि लक्षणानि च लक्षये ॥ महिषी भूमिपालस्य राजकन्याऽसि मे मता ॥१२॥
रावणेन जनस्थानाद्वैलादपहृता यदि ॥ सीता त्वमसि भद्रं ते तन्ममाचक्ष्व पृच्छतः ॥ १३ ॥
यथा हि तव वै दैन्यं रूपं चाप्यतिमानुषम् ॥ तपसा चान्वितो वेषस्त्वं राममहिषी ध्रुवम् ॥१४॥
सा तस्य वचनं श्रुत्वा रामकीर्तनहर्षिता ॥ उवाच वाक्यं वैदेही हनुमन्तं द्रुमाश्रितम् ॥ १५ ॥
पृथिव्यां राजसिंहानां मुख्यस्य विदितात्मनः ॥ स्नुषा दशरथस्याहं शत्रुसैन्यप्रतापिनः ॥ १६ ॥
दुहिता जनकस्याहं वैदेहस्य महात्मनः ॥ सीता च नाम नाम्नाऽहं भार्या रामस्य धीमतः ॥ १७ ॥
समा द्वादश तत्राहं राघवस्य निवेशने ॥ भुञ्जाना मानुषान्भोगान्सर्वकामसमृद्धिनी ॥ १८ ॥
तत्र त्रयोदशे वर्षे राज्येनेक्ष्वाकुनन्दनम् ॥ अभिषेचयितुं राजा सोपाध्यायः प्रचक्रमे ॥ १९ ॥
तस्मिन्संभ्रियमाणे तु राघवस्याभिषेचने ॥ कैकेयी नाम भर्तारं देवी वचनमब्रवीत् ॥ २० ॥
न पिबेयं न खादेयं प्रत्यहं मम भोजनम् ॥ एष मे जीवितस्यान्तो रामो यद्यभिषिच्यते ॥ २१ ॥
यत्तदुक्तं त्वया वाक्यं प्रीत्या नृपतिसत्तम ॥ तच्चेन्न वितथं कार्यं वनं गच्छतु राघवः ॥ २२ ॥

त्वमनुशोचसि । तस्यास्ते को वा पुत्रादिरिति योजना ॥ १० ॥ देवीं देवस्त्रियं । संज्ञावधारणात् संज्ञायते अनयेति संज्ञा लक्षणं । राजलक्षणनिश्चयादित्यर्थः ॥११॥ व्यञ्जनानि स्तनजघनादीनि । "व्यञ्जनं तेमने चिह्ने श्मश्रुण्यवयवेपि च" इति विश्वः । लक्षणानि शुभावर्तरेखादिसामुद्रिकलक्षणानि ॥ १२—१३ ॥ यथा यादृशं ॥ १४ ॥ द्रुमाश्रितं द्रुममूलाश्रितं । सोवतीर्येति द्रुमावतरणस्य पूर्वमुक्तत्वात् । यद्वा पूर्वमग्रादवतरणमुक्तमिति ज्ञेयं ॥ १५ ॥ शत्रुसैन्यप्रतापिनः शत्रुषु जीवत्सु न मे श्वशुरो जीवितवान् । स चेदिदानीं वर्तेत कथमहमेतादृशीमवस्थां प्राप्नुयामिति भावः ॥ १६ ॥ सीता च नामेत्यत्र नामशब्दः प्रसिद्धौ ॥ १७ ॥ अहं एतादृशावस्था अहं । तत्र मम श्वशुरगृहे । द्वादश समाः द्वादश संवत्सरान् । अत्यन्तसंयोगे द्वितीया । तेनाविच्छिन्नैकरूपभोगभोक्तृत्वमुच्यते । मानुषानित्यनेन नाम्नो मानुषत्वं स्वाभाविकमिति सूच्यते । भोगान् भुञ्जाना अनुभवन्ती । काम्यन्त इति कामाः भोगोपकरणानि स्रक्चन्दनादीनि । तेषां समृद्धं समृद्धिः । भावे निष्ठा । तदस्यास्तीति सर्वकामसमृद्धिनी । " अत इनिठनौ " इति इनिप्रत्ययः । अभवमिति शेषः ॥ १८—१९ ॥ संभ्रियमाणे संभारान् संपादयति सति राघवस्याभिषेचने रामाभिषेकनिमित्तं । देवी महिषी ॥ २० ॥ भुज्यत इति भोजनं खाद्यं पेयं च । रामो यद्यभिषिच्यते तदा मम संबन्धियत् भोजनं तन्न पिबेयं न खादेयं । एषः अयमभिषेकः । जीवितस्यान्तश्च ॥ २१ ॥ तत्पूर्वोक्तं यद्वरदानरूपं वाक्यं तन्न वितथं

शब्दस्तदवयवपरः । अतएवाग्रेद्रुमाश्रितइतिवक्ष्यति ॥ १ ॥ ति० रोदनादिति । अश्रुसंबन्धोभूस्पर्शोदेवानांनास्तीतिश्रुतं । तद्वत्त्वात्त्वांनमन्ये । किंचराज्ञोरामस्यसंज्ञावधारणात् नामग्रहणात् ॥ ११ ॥ ती० व्यञ्जनानि संस्थानविशेषविशिष्टतयोत्तमस्त्रीत्वव्यञ्जकानिस्तनजघनादीनि ॥ १२ ॥ अनुक्तेपित्वत्स्वरूपनिश्चयोममास्तीतिप्रौढ्याह—यथाहीति ॥ १४ ॥ स० द्रुमाश्रितं द्रुमशब्देन तच्छायाग्राह्या । अथवा यःपूर्वंद्रुममाश्रितस्तंप्रत्युवाचेति ॥ १५ ॥ स० अमानुषान् देवभोगसमान् ॥ १८ ॥ स० सोपाध्यायः सपुरोहितः ॥ १९ ॥ स० अभिषेचनं अभिषेकसाधनं तस्मिन् ॥ २० ॥ स० अहं प्रत्यहं निरन्तरं । ममभोजनंभोज्यंयद्वर्ततेतन्नपिबेयं नखादेयं । कुतएतदित्यतआह—एषइति । एषइतिबुद्ध्याविवेकेनाभिषेकेऽन्वेति । अथवा एषमेजीवितस्यान्तः एतच्चममभोजनं पालनं । तत्किमित्युक्ते यदिरामोऽभिषिच्यते तर्ह्येषः अभिषेकः मेजीवितस्यान्तः । यदिनाभिषिच्यते तर्हि एतत् ममभोजनं पालनमिति । यदि नाभिषिच्यत इतिपदानामावृत्त्याऽन्वयः । " भुजपालनाभ्यवहारयोः " इति

[पा०] १ ख. व्यञ्जनानीह. क. ग. घ. च. छ. झ. ञ. ट. व्यञ्जनानिहि. २ क. ङ. च. ज.—ट. द्वुलात्प्रमथिता. ३ क. रामसत्कथयाश्रितं. ४ घ. राजसिंहस्य. ५ ङ. झ. ट. प्रणाशिनः. क. ख. घ. प्रमाथिनः. ६ ङ. झ. ट. सीतेतिनाम्नाचोक्ताहं. ७ ङ.—ट. ततस्त्रयोदशे. ८ क. रामं. ९ ङ. झ. ट. भर्तारमिदं.

स राजा सत्यवाग्देव्या क्रूरदानमनुस्मरन् ॥ मुमोह वचनं श्रुत्वा कैकेय्याः क्रूरमप्रियम् ॥ २३ ॥
ततस्तु स्थविरो राजा सत्ये धर्मे व्यवस्थितः ॥ ज्येष्ठं यशस्विनं पुत्रं रुदन्राज्यमयाचत ॥ २४ ॥
स पितुर्वचनं श्रीमानभिषेकात्परं प्रियम् ॥ मनसा पूर्वमासाद्य वाचा प्रतिगृहीतवान् ॥ २५ ॥
दद्यान्न प्रतिगृह्णीयान्न ब्रूयात्किंचिदप्रियम् ॥ अपि जीवितहेतोर्वा रामः सत्यपराक्रमः ॥ २६ ॥
स विहायोत्तरीयाणि महार्हाणि महायशाः ॥ विसृज्य मनसा राज्यं जनन्यै मां समादिशत् ॥२७॥
साऽहं तस्याग्रतस्तूर्णं प्रस्थिता वनचारिणी ॥ न हि मे तेन हीनाया वासः स्वर्गेऽपि रोचते ॥ २८ ॥
प्रागेव तु महाभागः सौमित्रिर्मित्रनन्दनः ॥ पूर्वजस्यानुयात्रार्थे द्रुमचीरैरलङ्कृतः ॥ २९ ॥
ते वयं भर्तुरादेशं बहुमान्य दृढव्रताः ॥ प्रविष्टाः स्म पुराऽदृष्टं वनं गम्भीरदर्शनम् ॥ ३० ॥
वसतो दण्डकारण्ये तस्याहममितौजसः ॥ रक्षसाऽपहृता भार्या रावणेन दुरात्मना ॥ ३१ ॥

द्वौ मासौ तेन मे कालो जीवितानुग्रहः कृतः ॥
ऊर्ध्वं द्वाभ्यां तु मासाभ्यां ततस्त्यक्ष्यामि जीवितम् ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

कार्यं चेत्तदा रामो वनं गच्छतु ॥ २२ ॥ देव्यास्संबन्धि स्वकृतं वरदानं स्मृत्वा कैकेय्याः वचनं श्रुत्वा मुमोह ॥ २३—२४ ॥ अभिषेकात्परं प्रियं पितुर्वचनं विवासयाचनारूपं पूर्वं मनसा आसाद्य अङ्गीकृत्य । अथ वाचा प्रतिगृहीतवान् । मनःपूर्वकमङ्गीकृतवानित्यर्थः ॥ २५—२६ ॥ उत्तरीयाणि वासांसि । जनन्यै कौसल्यायै । मां समादिशत् तन्निकटे त्वया स्थातव्यमित्युक्तवानित्यर्थः ॥ २७ ॥ अग्रतः प्रस्थाने हेतुमाह—न हीति ॥ २८ ॥ प्रागेव यद्यपि रामानन्तरमेव लक्ष्मणेन द्रुमचीरादिस्वीकारः तथापि तस्य त्वरातिशयव्यञ्जनाय तथोक्तिः । महाभागः अहं सर्वं करिष्यामीति प्रतिज्ञानुसारेण सर्वविधकैङ्कर्यकरणोचिताभिषेकविघ्नहेतुभाग्यसंपन्नः । सौमित्रिः सृष्टस्त्वं वनवासायेत्युक्तवत्याः गर्भे संजातः । मित्रनन्दनः स लक्ष्मणः सर्वविधकैङ्कर्यकर्तेत्यनुकूलैरभिनन्दनीयः पूर्वजस्येत्यादि । रामकैङ्कर्यानुरूपत्वेन द्रुमचीरादीनामलंकरणत्वमित्यर्थः ॥ २९ ॥ पुरादृष्टं पूर्वमदृष्टं । अत्र गम्भीरशब्देन दुष्प्रवेशत्वं । दर्शनशब्देन स्वरूपमप्युच्यते ॥ ३०—३१ ॥ द्वौ मासौ द्विमासरूपः कालः । मे जीवितानुग्रहः जीवितानुग्राहकः जीवितधारणानुकूलःकृतः । त्यक्ष्यामि स्वयमेवेति भावः ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

धातुव्याख्यानात् ॥ २१ ॥ स० अभिषेकात्परं प्रियं रावणादिदुष्टनिग्रहशिष्टपरिपालनरूपावतारफलकारणत्वात् ॥ २५ ॥ ति० सीतारामंस्तौति—दद्यादिति ॥ २६ ॥ स० उत्तरीयाणि । उपलक्षणमेतत् । परिधानवस्त्राण्यपीत्यर्थः ॥ २७ ॥ स० भर्तुः दशरथस्य । पुरा अयोध्यानिर्गमात्प्राक् । अदृष्टं ॥ ३० ॥ स० द्वौमासौ तत्परिमितःकालः । जीवितानुग्रहः जीवनार्थमनुग्रहरूपः । ततः रावणात् ॥ ३२ ॥ इतित्रयस्त्रिंशःसर्गः ॥ ३३ ॥

[पा०] १ ख. झ. ट. ततस्तं. २ क. ग. ङ. च. छ. झ. ट. सत्यधर्मे. ख. घ. सत्यधर्मव्यवस्थि... ३ क. ग. ङ.—ट. गृह्णीयात्सत्यंब्रूयान्नचानृतं. ४ क.—ट. हेतोर्हि. ५ च.—ट. कुशचीरैः. ६ घ. दुरार्षं.

चतुस्त्रिंशः सर्गः ॥ ३४ ॥

हनुमता स्वप्रश्नस्यसमुचितोत्तरदानेन सीतायाःस्वस्मिन्नाश्वाससंभावनया तांप्रति स्वस्यरामदूतत्वनिवेदनपूर्वकं क्रमेण रामलक्ष्मणकर्तृककुशलप्रश्नाभिवादननिवेदनम् ॥ १ ॥ हनुमता समीपोपसर्पणेनाभिवादने सीतयातस्मिन्नावणत्वबुद्ध्या गर्हणम् ॥ २ ॥ हनुमता पुनःसीतांप्रति रामगुणानुवर्णनादिपूर्वकं स्वस्यसुग्रीवसचिवत्वहनुमन्नामकत्वाद्युक्त्या स्वस्मिन्नावणत्वशङ्कात्यागेनस्ववचनस्यश्रद्धेयत्वप्रार्थना ॥ ३ ॥

तस्यास्तद्वचनं श्रुत्वा हनुमान्हरियूथपः ॥ दुःखादुःखाभिभूतायाः सान्त्वमुत्तरमब्रवीत् ॥ १ ॥
अहं रामस्य संदेशादेवि दूतस्तवागतः ॥ वैदेहि कुशली रामस्त्वां च कौशलमब्रवीत् ॥ २ ॥
यो ब्राह्ममस्त्रं वेदांश्च वेद वेदविदां वरः ॥ स त्वां दाशरथी रामो देवि कौशलमब्रवीत् ॥ ३ ॥
लक्ष्मणश्च महातेजा भर्तुस्तेऽनुचरः प्रियः ॥ कृतवाञ्छोकसंतप्तः शिरसा तेऽभिवादनम् ॥ ४ ॥
सा तयोः कुशलं देवी निशम्य नरसिंहयोः ॥ प्रीतिसंहृष्टसर्वाङ्गी हनुमन्तमथाब्रवीत् ॥ ५ ॥
कल्याणी बत गाथेयं लौकिकी प्रतिभाति मा ॥ एति जीवन्तमानन्दो नरं वर्षशतादपि ॥ ६ ॥
तया समागते तस्मिन्प्रीतिरुत्पादिताऽद्भुता ॥ परस्परेण चालापं विश्वस्तौ तौ प्रचक्रतुः ॥ ७ ॥
तस्यास्तद्वचनं श्रुत्वा हनुमान्हरियूथपः ॥ सीतायाः शोकदीनायाः समीपमुपचक्रमे ॥ ८ ॥
यथा यथा समीपं स हनुमानुपसर्पति ॥ तथा तथा रावणं सा तं सीता परिशङ्कते ॥ ९ ॥

दुःखात् दुःखाभिभूतायाः उत्तरोत्तरं दुःखं प्राप्तायाः ॥१॥तव दूतः त्वां प्रति प्रेषितो दूतः॥२॥वेद वेत्ति। वेदविदां वेदार्थज्ञानवतां ॥३—४॥ प्रीतिसंहृष्टसर्वाङ्गी प्रीत्यापुलकितसर्वाङ्गी ॥५॥ दुःखबाहुल्येपि रामदर्शनप्रत्याशया कृच्छ्रेणजीवन्त्याः देव्याः जीवनफलस्य लब्धत्वात्तत्संवादिनीं गाथां स्तौति—कल्याणीति ॥ कल्याणी सत्यार्था । मा प्रतिभाति मां प्रतिभाति । वर्षशतादपीत्यन्ते इतिकरणं बोध्यम् ॥ ६ ॥ तया सीतया । तस्मिन् हनुमति विषये । अद्भुता प्रीतिरुत्पादिता । परस्परेणेत्यादिकं वक्ष्यमाणस्य सर्गस्य संग्रहः ॥ ७ ॥ उपचक्रमे गन्तुमिति शेषः । प्रापेतिवार्थः ॥ ८ ॥ रावणं परिशङ्कते रामकुशलकथनेन

ति० दुःखादुःखाभिभूतायाइत्यलुगार्षः । दुःखपरंपराखिन्नायाइत्यर्थः ॥ स० यद्वा दुःखेनातन्तीतिदुःखार्त्तास्तेषामिवयदुःखं तेनाभिभूतायाः । यद्वा दुःखात् सान्त्वमुत्तरमब्रवीदित्यन्वयः । दुश्चखंचतयोःसमाहारः द्वन्द्वैकवद्भावोवा उत्तरपदलोपिसमासान्तंवा । तस्मात् सीताएवंक्लिश्यतीतिदुःखात् खागमनप्रयोजनंजातमितिखात् सुखात् । " दुर्दुःखमितिसंप्रोक्तंखंसुखंचोच्यतेबुधैः " इतिवचनाद्दुःखशब्दउभयवाची ॥ १ ॥ ती० तवागतः समीपमितिशेषः ॥ स० रामस्यसन्देशादागतइतितवदूतः ॥ २ ॥ ती० ब्राह्ममस्त्रंयोवेद । अनेनसर्वास्त्रपारगत्वमुक्तं । तदस्त्रदेवतायाब्रह्मणःसर्वजगत्समष्टित्ववत्तदस्त्रस्यापिसर्वास्त्रसमष्टित्वात् वेदांश्चेत्यनेन सर्वकर्ममार्गपरत्वं । वेदविदांवरइत्यनेन ज्ञानमार्गपरत्वमुक्तं ॥ स० योब्राह्ममस्त्रं वेदांश्च वेदेत्यन्वयः । यद्वा वेदवेदेतिद्विरभिधानेन उभयोरपिमुख्यतामभिप्रैति । यद्वा वेदान् व्याख्येयानृगादीन् । वेदवेदान् भारतादीन्व्याख्यानरूपान्विदन्ति तेतथा । तेषु वरइति । " इतिहासपुराणःपञ्चमोवेदानांवेदः " इत्युक्तेः ॥ ३ ॥ स० प्रीतिसंहृष्टसर्वाङ्गी अन्तःसंभृतस्तोषइतिसूचकरोमाञ्चितसर्वावयवा ॥ ५ ॥ स० जीवन्तंनरं आनन्दःवर्षशतादेतीतिलौकिकी लोकसिद्धागाथा या सेयं मा मांप्रति कल्याणी कल्याणसूचिका प्रतिभाति । बत हर्षः विस्मयोवा । " जीवन्नरोभद्रशतानिपश्यति " इत्युक्तेः । अस्यस्वविषयेसीतयोदाहृतत्वाज्जीवन्तीं स्त्रियमितिवक्तव्यं । तथापि नरंजीवन्तमित्युक्तिः सर्वांअपियोषितःपुरुषेपरतन्त्राः । तत्राप्यहं सदातन्मात्रायत्तमङ्गलेतिसूचयितुमिति मन्तव्यं ॥ ६ ॥ ति० तस्मिन् तस्मिन्काले रामलक्ष्मणकुशलवचश्श्रवणकाले । तयोः रामलक्ष्मणयोःसमागमकालइव । सीतायास्तेनवचसा अद्भुता अचिन्त्यस्वरूपाप्रीतिरुत्पादिता । किंच तयोः सीताहनुमतोः । तस्मिन्समागमेपरस्परस्यअद्भुता प्रीतिरुत्पादिता । देवीदृष्टेतिहनुमतःप्रीतिः । रामदूतोदृष्टइतिदेव्याःप्रीतिः । अतस्तौविश्वस्तौभूत्वा परस्परेणालापंचक्रतुः ॥ ७ ॥ ति० तद्व-

[पा०] १ ङ. ञ. ट. रामस्सलां. २ ङ. ञ. ट. प्रतिसंहृष्ट. ३ क. ख. ग. प्रतिभातिमे. ४ ग. ङ.—ञ. तयोःसमागमे. ५ ङ. ञ. ट. शोकतप्तायाः. ६ घ. हनूमान्ससमीपमुप. क. समीपंतां.

अहो धिग्दुष्कृतमिदं कथितं हि यदस्य मे ॥ रूपान्तरमुपागम्य स एवायं हि रावणः ॥ १० ॥
तामशोकस्य शाखां सा विमुक्त्वा शोककर्शिता ॥ तस्यामेवानवद्याङ्गी धरण्यां समुपाविशत् ॥११॥
हनुमानपि दुःखार्तां तां दृष्ट्वा भयमोहिताम् ॥ अवन्दत महाबाहुस्ततस्तां जनकात्मजाम् ॥
सा चैनं भयवित्रस्ता भूयो नैवाभ्युदैक्षत ॥ १२ ॥
तं दृष्ट्वा वन्दमानं तु सीता शशिनिभानना ॥ अब्रवीद्दीर्घमुच्छ्वस्य वानरं मधुरस्वरा ॥ १३ ॥
मायां प्रविष्टो मायावी यदि त्वं रावणः स्वयम् ॥ उत्पादयसि मे भूयः संतापं तन्न शोभनम् ॥ १४ ॥
स्वं परित्यज्य रूपं यः परिव्राजकरूपधृत् ॥ जनस्थाने मया दृष्टस्त्वं स एवासि रावणः ॥ १५ ॥
उपवासकृशां दीनां कामरूप निशाचर ॥ संतापयसि मां भूयः संतप्तां तन्न शोभनम् ॥ १६ ॥
अथवा नैतदेवं हि यन्मया परिशङ्कितम् ॥ मनसो हि मम प्रीतिरुत्पन्ना तव दर्शनात् ॥ १७ ॥
यदि रामस्य दूतस्त्वमागतो भद्रमस्तु ते ॥ पृच्छामि त्वां हरिश्रेष्ठ प्रियं रामकथां हि मे ॥
गुणान्रामस्य कथय प्रियस्य मम वानर ॥ १८ ॥
चित्तं हरसि मे सौम्य नदीकूलं यथा रयः ॥ १९ ॥
अहो स्वप्नस्य सुखता याऽहमेवं चिराहृता ॥ प्रेषितं नाम पश्यामि राघवेण वनौकसम् ॥ २० ॥
स्वप्नेऽपि यद्यहं वीरं राघवं सहलक्ष्मणम् ॥ पश्येयं नावसीदेयं स्वप्नोपि मम मत्सरी ॥ २१ ॥
नाहं स्वप्नमिमं मन्ये स्वप्ने दृष्ट्वा हि वानरम् ॥ न शक्योऽभ्युदयः प्राप्तुं प्राप्तश्चाभ्युदयो मम ॥ २२ ॥
किंनु स्याच्चित्तमोहोऽयं भवेद्वातगतिस्त्वियम् ॥ उन्मादजो विकारो वा स्यादियं मृगतृष्णिका ॥२३॥

संजातरावणमायास्मरणा पुनः शङ्कितवतीत्यर्थः ॥९॥ मे मया । अस्य पुरतः यत्कथितं तत् दुष्कृतं अनुचितं कृतं । इदं अनालोच्य कथनं । धिक् । अहो इति खेदे । खेदहेतुमाह—रूपान्तरमिति । वर्तत इति शेषः ॥ १० ॥ यद्यपि पूर्वं शिंशुपाशाखावलम्बनमुक्तं तथापि शिंशुपाशाखा अशोकसंवलितेति क्वचिच्छिंशुपेत्युच्यते क्वचिदशोक इति । अतो न कश्चिद्दोषः ॥ ११ ॥ भयवित्रस्ता भयहेतुना वित्रस्ता ॥ १२—१३ ॥ मायावी स्वतएव मायावान् । " अस्मायामेधास्रजो विनिः " इति विनिप्रत्ययः । इदानीं मायां प्रविष्टः आश्रितः । स्वयं रावणस्सन् मम सन्तापमुत्पादयसीति यदि उत्पादयसीति यत् तत्सन्तापोत्पादनं ते न शोभनं । तवाप्यभीष्टविरहसन्तापो भविष्यतीत्यर्थः ॥ १४—१६ ॥ हनुमन्तं रावणमाशङ्क्य तज्जनितमनःप्रसादमालोच्य तां शङ्कां निराचष्टे—अथवेति ॥ मया यत् परिशङ्कितं एतन्नैवं हि नैवमेव । कुत इत्यत आह—मनस इति ॥ १७—१९ ॥ इह रामदूतागमनमत्यन्तासंभावितमिति मत्वा पुनर्बहुधा शङ्कते—अहो इत्यादिना ॥ २० ॥ स्वप्नेऽपि यद्यहं वीरं । राक्षसीमध्यवासकृतं दुःखं स्वप्नदृष्टोपि निवर्तयितुं क्षम इति वीर्यातिशयोक्तिः । राघवं सहलक्ष्मणं । विश्लेषदशायामुभयोर्दर्शनात् स्वप्नदर्शनेप्युभयोर्दर्शनं भवेत् । यद्वा तदानीमुभयोर्विश्लेषात्तौ किं परस्परं संयुक्तौ न वेति शङ्कते—पश्येयं नावसीदेयं । एवमुभयोस्स्वप्ने दर्शनेपि महद्दुःखं निवर्तेत । कथंचिज्जीवितं धारयेयं । स्वप्नोपि मम मत्सरी । मद्दशां विज्ञाय राम इव स्वप्नोपि मयि मात्सर्यं करोति ॥ २१—२२ ॥ एवं यथार्थस्वप्नपक्षौ निरस्य पुनश्चतुरो विभ्रमपक्षानुत्प्रेक्षते—किंनु स्यादिति ॥ चित्तमोहः रामक्षेमवार्ताश्रवणकुतूहलकन्दलितनिरन्तरचिन्तनं कल्याणीत्यादिसीतावचनं ॥ ८ ॥ ति० चित्तमोहः निरन्तररामध्यानजनितस्तत्प्रेषितदूतदर्शनसंभाषणादिविषयोभ्रमः । वातगतिः भूतावेशादिजनितोभ्रमः । उन्मादोविरहिणांपित्तोद्रेकरूपावस्थाविशेषजोभ्रमः । मृगतृष्णिका तद्वत्प्रत्यक्षोभ्रमः ॥ स० चित्तमोहः सर्वदारामध्यानात्तद्वृत्तेनसहसंभाषणादिरूपोमनोविकारः । वातगतिः पिशाचव्यापारः । ऊषरभूमौजलवत्प्रतीतंमृग-

[पा०] १ ङ. ज. झ. ट. धिग्धिक्कृतमिदं. २ ङ. झ. ट. शाखांतु. घ. साशाखां. ३ ख. ग. दुःखार्तांस्तां. ४ च.—ट. भयसंत्रस्ता. ५ क. ङ. छ.—ट. नैनमुदैक्षत. ६ ग. ङ—ट. रूपवान्. ७ ङ. झ. ट. एवहि. ८ ख. घ. ङ. झ. ट. संतापंतन्नशोभनं. ९ घ. ब्रूहिरामकथांहिमे. १० ख. जातश्चा. क. ग. घ. प्रियश्चा.

अथवा नायमुन्मादो मोहोप्युन्मादलक्षणः ॥ संबुध्ये चाहमात्मानमिमं चापि वनौकसम् ॥ २४ ॥
इत्येवं बहुधा सीता संप्रधार्य बलाबलम् ॥ रक्षसां कामरूपत्वान्मेने तं राक्षसाधिपम् ॥ २५ ॥
एतां बुद्धिं तदा कृत्वा सीता सा तनुमध्यमा ॥ न प्रतिव्याजहाराथ वानरं जनकात्मजा ॥ २६ ॥
सीतायाश्चिन्तितं बुद्ध्वा हनुमान्मारुतात्मजः ॥ श्रोत्रानुकूलैर्वचनैस्तदा तां संप्रहर्षयत् ॥ २७ ॥
आदित्य इव तेजस्वी लोककान्तः शशी यथा ॥ राजा सर्वस्य लोकस्य देवो वैश्रवणो यथा ॥२८॥
विक्रमेणोपपन्नश्च यथा विष्णुर्महायशाः ॥ सत्यवादी मधुरवाग्देवो वाचस्पतिर्यथा ॥ २९ ॥
रूपवान्सुभगः श्रीमान्कन्दर्प इव मूर्तिमान् ॥ स्थानक्रोधः प्रहर्ता च श्रेष्ठो लोके महारथः ॥३०॥
बाहुच्छायामवष्टब्धो यस्य लोको महात्मनः ॥ ३१ ॥
अपकृष्याश्रमपदान्मृगरूपेण राघवम् ॥ शून्ये येनापनीतासि तस्य द्रक्ष्यसि यत्फलम् ॥ ३२ ॥
नचिराद्रावणं संख्ये यो वधिष्यति वीर्यवान् ॥ रोषप्रमुक्तैरिषुभिर्ज्वलद्भिरिव पावकैः ॥ ३३ ॥
तेनाहं प्रेषितो दूतस्त्वत्सकाशमिहागतः ॥ त्वद्वियोगेन दुःखार्तः स त्वां कौशलमब्रवीत् ॥ ३४ ॥
लक्ष्मणश्च महातेजाः सुमित्रानन्दवर्धनः ॥ अभिवाद्य महाबाहुः स त्वां कौशलमब्रवीत् ॥ ३५ ॥
रामस्य च सखा देवि सुग्रीवो नाम वानरः ॥ राजा वानरमुख्यानां स त्वां कौशलमब्रवीत् ॥३६॥
नित्यं स्मरति रामस्त्वां ससुग्रीवः सलक्ष्मणः ॥ दिष्ट्या जीवसि वैदेहि राक्षसीवशमागता ॥ ३७ ॥

न्तासंततिपरिणतिविशेषरूपः कोपि मनसो विभ्रम इत्यर्थः। असत्यश्चित्तसंकल्पो वा। वातगतिः उपवासादिप्रयुक्तधातुक्षोभजो वातविकाररूपो भ्रमः। तदध्यारोपो वा यथा त्वरूपस्य वायोः पांसुपुञ्जरूपविशेषोध्यारोपः। उन्मादजो विकारो वा। उन्मादो नाम विरहिणां कश्चिदवस्थाविशेषः। तज्जो विकारो भ्रमः। मृगतृष्णिका अन्यस्यान्यरूपेणावभासः। चित्तमोहोन्मादावप्रकृतिस्थप्रतिभासविशेषौ। वातगतिमृगतृष्णिके तु प्रकृतिस्थस्य ॥ २३ ॥ अनन्तरोक्तचतुष्टयं निराकरोति—अथवेत्यादिना ॥ अथवा अयं वानरतद्भाषणादिप्रतिभासः। उन्मादो न। मोहोप्युन्मादलक्षणः उन्मादस्य लक्षणमिव लक्षणं यस्य स तथोक्तः। अतः उन्मादनिराकरणेनैव सोपि निराकृत इत्यर्थः। अनयोर्निराकरणमितरपक्षद्वयनिराकरणस्योपलक्षणं कृत इत्यत आह—संबुध्य इति। अहं आत्मानमिमं वनौकसं चापि संबुध्ये सम्यग्जानामि ॥ २४ ॥ बलाबलं मोहत्वादीनामबलत्वं रावणत्वस्य बलवत्त्वं च ॥ २५—२६ ॥ संप्रहर्षयत् संप्राहर्षयत् ॥ २७ ॥ राजेति। कुबेरस्य सर्वलोकराजत्वमुक्तं। "राजाधिराजाय प्रसह्यसाहिने नमो वयं वैश्रवणाय कुर्महे" इति ॥ २८ ॥ सत्यमधुरवाक्त्वं बृहस्पतेर्वाचस्पतित्वादेव॥२९॥रूपवान् सौन्दर्यवान्। सुभगः रमणीयः। श्रीमान् कान्तिमान्। स्थाने क्रोधस्थाने क्रोधः यस्यासौ स्थानक्रोधः। प्रहर्ता क्रोधविषयेप्रहर्ता। आदित्य इवेत्यादिनोक्तैर्विशेषणैर्विशिष्टो राम इतियोज्यं ॥ ३० ॥ लोकः महात्मनो यस्य बाहुच्छायां अवष्टब्धः आश्रितः। तं मृगरूपेण प्रशस्तमृगेण हेतुना। आश्रमपदादपकृष्य शून्ये येनापनीतासि तस्य रावणस्य

तृष्णा। तद्वदयमपिकिंभ्रमविशेषइत्यर्थः ॥ २३ ॥ स० उन्मादस्यलक्षणमिवलक्षणंयस्यपिशाचस्यसतथा एतेन। नपुनरुक्तिर्नवातगतेरसंग्रहश्च। मोहोनेति उन्मादलक्षणोपिनेतित्रावृत्तिः। संबुध्ये परीक्षयाजानामि ॥ २४ ॥ **ती०** बलाबलं बलं रक्षसां कामरूपधारणंबलं। अबलं रामदूतस्यापिवानरस्यात्रागमनासामर्थ्यंअबलंसंप्रधार्येत्यर्थः ॥ २५ ॥ **ति०** निश्चितं रावणबलनिश्चयं। श्रोत्रानुकूलैर्वचनैः रामगुणकथनरूपैः। विश्वासार्थं 'गुणान्रामस्यकथय' इतिसीतोक्तेरितिभावः। संप्रहर्षयन् वक्ष्यमाणंवचःकथयामासेतिशेषः ॥ २७ ॥ **ति०** स्थानक्रोधे उचितक्रोधविषये। क्रोधौचित्येप्रहर्तेतियावत् ॥ **स०** स्थानक्रोधी उचितस्थलेकोपी। प्रहर्ता वैरिहन्ता। स्थानक्रोधप्रहर्तेतिपाठे कोपयोग्यस्थानेशिक्षाकर्तेत्यर्थः ॥ ३० ॥ इतिचतुस्त्रिंशःसर्गः ॥ ३४ ॥

[पा०] १ ग. ङ.—ट. सीतायानिश्चितं. २ ग. समहर्षयत् क. झ. ट. संप्रहर्षयन्. ३ झ. स्थानकोधे. ठ. स्थानकोधी. ४ ङ. झ. ट. तत्फलं. ५ .—ट. अचिरात्. ६ क. ख. ग. सोपि. ७ ङ.—ट. तेरामः.

नचिराद्द्रक्ष्यसे रामं लक्ष्मणं च [1]महाबलम् ॥ मध्ये वानरकोटीनां [2]सुग्रीवं चामितौजसम् ॥ ३८ ॥
अहं सुग्रीवसचिवो हनुमान्नाम वानरः ॥ प्रविष्टो नगरीं लङ्कां लङ्घयित्वा महोदधिम् ॥ ३९ ॥
कृत्वा मूर्ध्नि पदन्यासं रावणस्य दुरात्मनः ॥ त्वां द्रष्टुमुपयातोऽहं समाश्रित्य पराक्रमम् ॥ ४० ॥
नाहमस्मि तथा [3]देवि यथा मामवगच्छसि ॥ विशङ्का त्यज्यतामेषा श्रद्धत्स्व वदतो मम ॥ ४१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

पञ्चत्रिंशः सर्गः ॥ ३५ ॥

सीतया रामसुग्रीवसख्यप्रकारंरामलक्ष्मणलक्षणंचपृष्टेनहनुमता तदङ्गलक्षणनिरूपणेनसह सविस्तरंरामसुग्रीवसख्यप्रभृतिस्वीयसीतादर्शनान्तवृत्तवृत्तान्तकथनपूर्वकं प्रभञ्जनादञ्जनायांस्वजननादिप्रतिपादनम् ॥ १ ॥

तां तु रामकथां श्रुत्वा वैदेही वानरर्षभात् ॥ उवाच वचनं सान्त्वमिदं मधुरया गिरा ॥ १ ॥
क्व ते रामेण संसर्गः कथं जानासि लक्ष्मणम् ॥ वानराणां नराणां च कथमासीत्समागमः ॥ २ ॥
यानि रामस्य लिङ्गानि लक्ष्मणस्य च वानर ॥ तानि [4]भूयः समाचक्ष्व न मां शोकः समाविशेत् ॥३॥
कीदृशं तस्य संस्थानं रूपं [5]रामस्य कीदृशम् ॥ कथमूरू कथं बाहू लक्ष्मणस्य च शंस मे ॥ ४ ॥
एवमुक्तस्तु वैदेह्या हनुमान्मारुतात्मजः ॥ ततो रामं यथातत्त्वमाख्यातुमुपचक्रमे ॥ ५ ॥
जानन्ती [6]बत दिष्ट्या मां वैदेहि परिपृच्छसि ॥ भर्तुः कमलपत्राक्षि संस्थानं लक्ष्मणस्य च ॥ ६ ॥
यानि रामस्य चिह्नानि लक्ष्मणस्य च यानि वै ॥ लक्षितानि विशालाक्षि वदतः शृणु तानि मे ॥७॥
रामः कमलपत्राक्षः [7]सर्वसत्त्वमनोहरः ॥ रूपदाक्षिण्यसंपन्नः प्रसूतो जनकात्मजे ॥ ८ ॥
तेजसाऽऽदित्यसंकाशः क्षमया पृथिवीसमः ॥ बृहस्पतिसमो बुद्ध्या यशसा वासवोपमः ॥ ९ ॥

यत्फलं मरणरूपं तत् द्रक्ष्यसीति योजना । यद्वा बाहुच्छायामवष्टब्धो यस्य लोको महात्मनः असावादित्य इव तेजस्वीत्येवं योजना ॥ ३१—४० ॥ वञ्चनार्थं परिगृहीतवेष इति मां यथावगच्छसि तथा नास्मीत्यर्थः ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुस्त्रिंशः सर्गः ॥ ३४ ॥

लिङ्गानि चिह्नानि ॥ ३ ॥ संस्थानं अवयवसंनिवेशः । रूपं आकारः वर्णः कान्तिर्वा ॥४—५॥ बतेत्यामन्त्रणे । जानन्ती त्वं दिष्ट्या मां परिपृच्छसीति संबन्धः ॥ ६ ॥ लक्षितानि त्वया दृष्टानि । मे मत्तः ॥ ७ ॥ रामः सर्वाङ्गसुन्दरः । कमलपत्राक्षः कान्तिप्रवाहे आवर्त इव अत्यन्तमाकर्षकनयनशोभः । तादृशनयनसौन्दर्यसीमाभूमिमाह—सर्वसत्त्वमनोहरः । तिर्यग्जातितया विटपाद्विटपं प्लवतो ममापि चित्तापहारकः अविशेषज्ञस्यापि मनोहर इत्यर्थः । रूपदाक्षिण्यसंपन्नः रूपमित्येतद्विग्रहगुणानामुपलक्षणं दाक्षिण्यमित्यात्मगुणानामुपलक्षणं देहगुणैरात्मगुणैश्चान्यून इत्यर्थः । संपन्नः प्रसूतः । इदं सर्वं नागन्तुकं किंतु औत्पत्तिकमित्यर्थः । अत्युत्कटं वदसि किमेवंविधोपरोप्यस्ति न वेत्यपेक्षायामाह—जनकात्मजे इति । भवती च तादृशीत्यर्थः ॥ ८ ॥ संग्रहेणोक्तान्गुणान्विवृणोति

तनि० गुरुकुलवासायोग्यानांवानराणांवसिष्ठशिष्याणांचईदृशसमागमःकथंजातः । शास्त्रवश्यानामेवगुरुकुलवासयोग्यत्वात् । रमयतीतिरमन्तेयोगिनइतिचरामः । रामत्वमेवाह—**कमलपत्राक्षइति** । सर्वसत्वमनोहरइति । तत्रवानरजातीयमचित्तापकर्षणमेवप्रमाणमितिध्वन्यते । तर्ह्येवंविधःपुमान्वियतेकिमितिचेन्नेत्याह—जनकात्मजइति । "तुल्यशील" इत्यादिना

[पा०] १ क. ग. घ. च. छ. झ. ञ. ट. महारथं. २ ग. च. छ. ज. ञ. सुग्रीवममितौजसं. ३ च. मातर्यथा. ४ घ. सौम्यमिदं. ५ क. ख. घ. ङ. झ. ट. चिह्नानि. ६ ग. घ. ङ.—ज. भूयस्त्वमाचक्ष्व. ७ ङ.—ट. तस्यच. ८ ख. यदिदिष्ट्या. ९ ङ.—ट. पूर्णचन्द्रनिभाननः. ख. ग. घ. सर्वभूतमनोहरः. क. सर्वभूतहितेरतः.

रक्षिता जीवलोकस्य स्वजनस्याभिरक्षिता ॥ रक्षिता स्वस्य वृत्तस्य धर्मस्य च परन्तपः ॥ १० ॥
रामो भामिनि लोकस्य चातुर्वर्ण्यस्य रक्षिता ॥ मर्यादानां च लोकस्य कर्ता कारयिता च सः ॥११॥
अर्चिष्मानर्चितोत्यर्थं ब्रह्मचर्यव्रते स्थितः ॥ साधूनामुपकारज्ञः प्रचारज्ञश्च कर्मणाम् ॥ १२ ॥
राजविद्याविनीतश्च ब्राह्मणानामुपासिता ॥ श्रुतवाञ्शीलसंपन्नो विनीतश्च परन्तपः ॥ १३ ॥
यजुर्वेदविनीतश्च वेदविद्भिः सुपूजितः ॥ धनुर्वेदे च वेदेषु वेदाङ्गेषु च निष्ठितः ॥ १४ ॥
विपुलांसो महाबाहुः कम्बुग्रीवः शुभाननः ॥ गूढजत्रुः सुताम्राक्षो रामो देवि जनैश्श्रुतः ॥ १५ ॥
दुन्दुभिस्वननिर्घोषः स्निग्धवर्णः प्रतापवान् ॥ समः समविभक्ताङ्गो वर्णं श्यामं समाश्रितः ॥१६॥
त्रिस्थिरस्निग्धप्रलम्बश्च त्रिसमस्निग्धु चोन्नतः ॥ त्रिताम्रस्निग्धु च स्निग्धो गम्भीरस्निग्धु नित्यशः ॥१७॥
त्रिवलीमांस्त्रियवनतश्चतुर्व्यङ्गस्त्रिशीर्षवान् ॥ चतुष्कलश्चतुर्लेखश्चतुष्किष्कुश्चतुस्समः ॥ १८ ॥

—तेजसेत्यादिना ॥ ९—११ ॥ ब्रह्मचर्यव्रते स्थितः गृहस्थस्यास्य ब्रह्मचर्यं नाम ऋतोरन्यत्र स्त्रीसङ्गमत्यागः । तदाह मनुः—"षोडशर्तुनिशाः स्त्रीणां तस्मिन्युग्मासु संविशेत् । ब्रह्मचार्येव पर्वाद्याश्चतस्रश्च विवर्जयेत् " ॥ प्रचारज्ञः प्रयोगज्ञः । ऐहिकामुष्मिकानां कर्मणां । प्रचारं गतिं हेतुफलभावव्यवस्थां तत्त्वतो जानातीत्यर्थ इत्यप्याहुः ॥ १२ ॥ राजविद्याविनीतश्च चतस्रो राजविद्याः । "आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती । एता विद्याश्चतस्रस्तु लोकसंस्थितिहेतवः" इत्युक्ताः । तासु विनीतः शिक्षितः । श्रुतवान् अवधृतवान् । शीलसंपन्नः सदाचारसंपन्नः । पूर्वं यज्ञादिकर्मानुष्ठातृत्वमुक्तमिति नपुनरुक्तिः ॥ १३ ॥ वेदेषु यजुर्व्यतिरिक्तवेदेषु । अनेन स्वस्य यजुर्वेदत्वं सूचितं ॥ १४ ॥ एवमात्मगुणानभिधाय विग्रहगुणानाशास्ते—विपुलांस इत्यादिना ॥ गूढजत्रुः अस्पष्टभुजसन्ध्यस्थिः ॥ १५ ॥ समः अन्यूनातिरिक्तदेहप्रमाणः ॥ १६ ॥ त्रिस्थिर इति त्रिषु स्थानेषु स्थिरः । तथोक्तं सामुद्रिके—" उरश्च मणिबन्धश्च मुष्टिश्च नृपतेः स्थिराः " इति । त्रिप्रलम्बः त्रिषु प्रलम्बः । " दीर्घभ्रूबाहुमुष्कस्तु चिरजीवी धनी नरः " इति वचनात् । अन्यत्र तु । " त्रयश्च यस्य विद्यन्ते प्रलम्बा मेढ्बाहवः " इति । त्रिसमः त्रिषु समः । " केशाग्रं.वृषणं जानु समा यस्य स भूपतिः " इति वचनात् । त्रिषु चोन्नतः । तदाहवराहमिहिरः—" उन्नतकुक्षिः क्षितिपः परिमण्डलोन्नतनाभयः क्षितिपाः । हृदयं न वेपनं पृथु समोन्नतं मांसलं च नृपतीनां " इति ॥ त्रिताम्रः त्रिषु ताम्रः । " स्निग्धाङ्गुलीरुचिरताम्रनखौ सुपार्ष्णी पादौ करावपि सुरक्तनखाल्परेखौ " इति वचनात् । " नेत्रान्तनखपाण्यङ्घ्रितलैस्ताम्रैस्निग्धिस्सुखी " इति च । त्रिषु स्निग्धः । " स्निग्धा भवन्ति वै येषां पादरेखाः शिरोरुहाः । तथा लिङ्गमणिस्तेषां महाभाग्यं विनिर्दिशेत् " इति सामुद्रिकवचनात् । त्रिषु गम्भीरः । अत्र वररुचिः—" स्वरः सत्त्वं च नाभिश्च गम्भीरः शस्यते बुधैः " इति । ब्राह्मे तु—" स्वरे गतौ च नाभौ च गम्भीरस्निग्धु शस्यते " इति । नित्यश इति सर्वत्र विशेषणीयं । तेन रोगाद्युपाधिकृतरागादिनिवृत्तिः ॥ १७ ॥ त्रिवलीमान् उदरे वलित्रयवान् । कण्ठवलित्रयवान्वा । अत्र गर्गः—" स्थिरा त्रिरेखा सुभगोपपन्ना स्निग्धा सुमांसोपचिता सुवृत्ता । न

भवत्येवप्रसिद्धा नपुमान्कश्चिदितिभावः ॥ **ती०** प्रसूतइत्यनेन गुणानामुत्पत्तिविशिष्टत्वमवगम्यते ॥ ८ ॥ **ति०** लोकस्य सर्वस्यकर्ता हर्ताभर्ताचेतिशेषः । अनेनसृष्टिस्थितिसंहारकर्तृत्वरूपंब्रह्मलक्षणंरामस्योक्तंगूढं । एवंज्ञानंतत्क्षणंभगवतैवस्वमायातिरस्करिणीनिरासादितिबोध्यं । लोकस्यमर्यादानां वर्णाश्रममर्यादानांकर्ता । भगवदवतारत्वात् । कारयिता कालात्मना अवतीर्णरूपेणचातुर्वर्ण्यरक्षिताच ॥ **स०** चातुर्वर्ण्यस्य स्वार्थेष्यञ् ॥ ११ ॥ **ति०** अर्चिष्मान् आदित्यरूपःसन्नर्चितः । त्रैवर्णिकैरितिशेषः । ब्रह्मचर्यव्रते गृहस्थोचितपर्वादिवर्जनपूर्वकमृतुगमनलक्षणेस्थितः । वस्तुतस्तु गार्हस्थ्येप्यस्खलितरेताः । मनस्संकल्पेनैवदेव्यारतिप्रीतेःसंतानस्यचसंपादनमितिभावः ॥ **स०** यद्वा स्वरतत्राद्रोगार्थमनपेक्षितस्त्रीसङ्गादिरितिब्रह्मचर्यव्रतंवा ॥ १२ ॥ **स०** विशिष्ययजु-

[पा०] १ क. घ.—ट. स्वजनस्यचरक्षिता. २ क. धर्मस्यवृत्तस्यच. ३ ख. लोकेऽस्मिंश्चातुर्वर्ण्यस्य. ४ ख. घ. नर्चितो नित्यं. ५ ङ.—ट. राजनीत्यांविनीतश्च. ६ ङ. ज. झ. ट. मुपासकः. ७ क. च. छ. ज. ञ. ट. ज्ञानवाञ्शीलसंपन्नः. ८ क. ज. वेदविद्भिश्च. ९ ङ.—ट. रामोनाम. ख. देविरामो. १० घ. ङ. झ. ट. समश्चसुविभक्ताङ्गः.

चतुर्दशसमद्वन्द्वश्चतुर्दंष्ट्रश्चतुर्गतिः ॥ महोष्ठहनुनासश्च पञ्चस्निग्धोष्ठवंशवान् ॥ १९ ॥
दशपद्मो दशबृहत्त्रिभिर्व्याप्तो द्विशुक्लवान् ॥ षडुन्नतो नवतनुस्त्रिभिर्व्याप्नोति राघवः ॥ २० ॥

चातिदीर्घा चतुरङ्गुला च ग्रीवा सुदीर्घा भवतीह धन्या " इति ॥ त्र्यवनतः त्रीण्यवनतानि निम्नानि यस्यासौ त्र्यवनतः । तानि स्तनचूचुकपादरेखाः । अत्र मिहिरः—" पीनोपचितैर्निम्नैः क्षितिपतयश्चूचुकैः स्तनैः सुखिनः । स्निग्धा निम्ना रेखा धनिनां तद्व्यत्ययेन निस्वानां" इति ॥ चत्वारि व्यङ्गानि ह्रस्वानि यस्यासौ चतुर्व्यङ्गः । अत्र वररुचिः—"ग्रीवा प्रजननं पृष्ठं ह्रस्वं जङ्घा च पूज्यते " इति । यद्वा चत्वारो व्यङ्गाः विकलाः यस्य सः चतुर्व्यङ्गः । ते च सिराविकलः पादः रोमान्तरविकलो रोमकूपः दैर्घ्यविकलो मेढ्रः मांसविकलो बस्तिः । अत्र नारदः—" पादैः प्रस्वेदरहितैः सिराहीनश्च पार्थिवः । एकरोमा भवेद्राजा द्विरोमा पण्डितो भवेत् ॥ त्रिरोमा चतूरोमा च भवेद्भाग्यविवर्जितः । समपादोपविष्टस्य गुल्फं स्पृशति मेहनम् ॥ यस्येश्वरं तं जानीयात्सुखिनं चैव मानवम् । निर्मांसः संहतो बस्तिर्येषां तेसुखभागिनः " इति । त्रिशीर्षवान् त्रिभिर्लक्षणैर्युक्तं शीर्षं तदस्यास्तीति त्रिशीर्षवान् । तानि लक्षणान्यावर्ताः । " आवर्तत्रयरुचिरं यस्य शिरः स क्षितिभृतांनेता " इति कथनात् । यद्वा त्रिप्रकारं समवृत्तंछत्राकारं विशालं च शीर्षमस्यास्तीति त्रिशीर्षवान् । अत्र नारदः—" समवृत्तशिराश्चैव छत्राकारशिरास्तथा । एकछत्रां महीं भुङ्क्ते दीर्घमायुश्च विन्दति " ॥ चतस्रः कलाः वेदाः यस्य चतुष्कलः । अत्र शरीरलक्षणप्रकरणे कलाशब्दस्तत्सूचकरेखापरः । अत्र नन्दी—" मूलेङ्गुष्ठस्य वेदानां चतस्रस्तिस्र एव वा । एका द्वे वा यथायोगं रेखा ज्ञेया द्विजन्मनां " इति ॥ चतुर्लेखः ललाटे पादयोः पाण्योश्चतस्रो लेखा रेखा यस्य स चतुर्लेखः । "ललाटे यस्य दृश्यन्ते चतुस्त्रिंश्चैकरेखिकाः । शतद्वयं शतं षष्टिस्तस्यायुर्विंशतिस्तथा" इति काश्यायनः । "यस्य पादतले वज्रध्वजशङ्खाङ्कुशोपमाः । रेखास्सम्यक्प्रकाशन्ते मनुजेन्द्रं तमादिशेत्" इति नारदः । "पाणौ चतस्रो रेखाश्च यस्य तिष्ठन्त्यभङ्गुराः " इतिब्रह्मा । चत्वारः किष्कवः यस्य स चतुष्किष्कुः । चतुर्विंशत्यङ्गुलात्मको हस्तः किष्कुः । षण्णवत्यङ्गुलोत्सेध इत्यर्थः । " षण्णवत्यङ्गुलोत्सेधो यः पुमान्स दिवौकसः " इतिब्राह्मपुराणवचनम् । चतुस्समः चत्वारः समा यस्य स चतुस्समः । ते च बाहुजानूरुगण्डाः । तदुक्तं ब्रह्माण्डे—" बाहुजानूरुगण्डाश्च चत्वार्यथ समानि च " इति ॥ १८ ॥ चतुर्दशसमद्वन्द्वः चतुर्दशसंख्यानि समानि द्वन्द्वानि यस्य सः । तथात्र सामुद्रिकं । " भ्रुवौ नासापुटे नेत्रे कर्णावोष्ठौ च चूचुके । कूर्परौ मणिबन्धौ च जानुनी वृषणौ कटी ॥ करौ पादौ स्फिजौ यस्य समौ ज्ञेयः स भूपतिः " इति । चत्वारो दंष्ट्राकारा दन्ता यस्य स चतुर्दंष्ट्रः । तदाह मिहिरः—" स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः समाश्च शुभाः " इति । चतुर्गतिः चतुर्णां सिंहशार्दूलगजवृषभाणां गतिरिव गतिर्यस्य सः । " गजसिंहगती वीरौ शार्दूलवृषभोपमौ " इति बालकाण्डोक्तेः । महोष्ठहनुनासश्च ओष्ठस्य महत्त्वं बन्धुजीवबिम्बफलारुणमांसलत्वं हनोस्तु परिपूर्णमांसलत्वं नासिकाया दीर्घतुङ्गत्वं । तथाच संहिता । "बन्धुजीवकुसुमोपमोधरो मांसलो रुचिरबिम्बरूपधृत् । पूर्णमांसलहनुस्तु भूमिपस्तुङ्गतुण्डरुचिराकृतिस्तथा " इति ॥ तुण्डशब्देन नासिकोच्यते । पञ्चस्निग्धः पञ्च स्निग्धाः अवयवाः यस्य सः । ते च वाक्यवक्त्रनखलोमत्वचः केशनेत्रदन्तत्वक्पादतलानि वा । अत्र वररुचिः—" चक्षुस्स्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम् । त्वचःस्नेहेन शयनं पादस्नेहेन वाहनं " इति ॥ " स्निग्धनीलमृदुकुञ्चितास्तथा मूर्धजाः सुखकराः समं शिरः " इति मिहिरः । पूर्वं त्रिषु स्निग्ध इत्युक्तेः अत्र पञ्चस्निग्ध इतीदं मतभेदमाश्रित्योक्तं । अष्टवंशवान् अष्टौ वंशाः आयतावयवा यस्य सः आयताष्टावयव इत्यर्थः । अत्र सामुद्रिकं । " पृष्ठवंशः शरीरं च हस्तपादाङ्गुली करौ । नासिका चक्षुषी कर्णौ प्रजनो यस्य चायताः " इति ॥ प्रजनस्यायतत्वमार्जवं ॥ १९ ॥ दशपद्मः दशपद्माकारावयवाः यस्य सः दशपद्मः । " मुखने-

---

वेंदग्रहणेन रामोयाजुषइतिसूचयति ॥ १४ ॥ **तीo** द्विशुक्लवान् द्वौशुक्लौ शुद्धौ मातृपितृवंशौयस्यसः । तदुक्तं " द्वौशुक्लौतुशुभौ शुद्धौवंशौमातुःपितुस्तथा " इति । ननुत्रिसमस्निग्धेषुचोन्नतः । 'त्रिषुस्निग्धस्त्रिभिर्व्याप्तः' इत्युक्तंप्राक् । इहतुचतुस्समःषडुन्नतःपञ्च

सत्यधर्मपरः श्रीमान्संग्रहानुग्रहे रतः ॥ देशकालविभागज्ञः सर्वलोकप्रियंवदः ॥ २१ ॥
भ्राता च तस्य द्वैमात्रः सौमित्रिरपराजितः ॥ अनुरागेण रूपेण गुणैश्चैव तथाविधः ॥
[स सुवर्णच्छविः श्रीमान्रामः श्यामो महायशाः] ॥ २२ ॥
तावुभौ नरशार्दूलौ त्वद्दर्शनसमुत्सुकौ ॥ विचिन्वन्तौ महीं कृत्स्नामस्माभिरभिसंगतौ ॥ २३ ॥
त्वामेव मार्गमाणौ तौ विचरन्तौ वसुन्धराम् ॥ ददर्शतुर्मृगपतिं पूर्वजेनावरोपितम् ॥ २४ ॥
ऋश्यमूकस्य पृष्ठे तु बहुपादपसंकुले ॥ भ्रातुर्भयार्तमासीनं सुग्रीवं प्रियदर्शनम् ॥ २५ ॥
वयं तु हरिराजं तं सुग्रीवं सत्यसङ्गरम् ॥ परिचर्यामहे राज्यात्पूर्वजेनावरोपितम् ॥ २६ ॥
ततस्तौ चीरवसनौ धनुःप्रवरपाणिनौ ॥ ऋश्यमूकस्य शैलस्य रम्यं देशमुपागतौ ॥ २७ ॥
स तौ दृष्ट्वा नरव्याघ्रौ धन्विनौ वानरर्षभः ॥ अवप्लुतो गिरेस्तस्य शिखरं भयमोहितः ॥ २८ ॥
ततः स शिखरे तस्मिन्वानरेन्द्रो व्यवस्थितः ॥ तयोः समीपं मामेव प्रेषयामास सत्वरम् ॥ २९ ॥
तावहं पुरुषव्याघ्रौ सुग्रीववचनात्प्रभू ॥ रूपलक्षणसंपन्नौ कृताञ्जलिरुपस्थितः ॥ ३० ॥

स्निग्धः त्रिभिर्व्याप्नोतीत्युच्यते । सत्यं मतभेदमाश्रित्योक्तत्वान्नदोषः । अन्येषामप्येवंविधानांसकलशास्त्रोक्तमहापुरुषलक्षणानामेक सकलगुणारामोरामएवलक्ष्यमितिसूचनाय ॥ ति० नवतनुः नवसुसूक्ष्मः । तानिच—" सूक्ष्माण्यङ्गुलिपर्वाणिकेशरोमनखत्वचः । शेफश्चयेषांसूक्ष्माणितेनरादीर्घजीविनः " इतिप्रोक्तंषट्कं । मृदुश्मश्रुत्वंसूक्ष्मदृष्टित्वंसूक्ष्मबुद्धित्वंचेतिनवसूक्ष्मत्वं । दृष्टेःसौक्ष्म्यं रत्नपरीक्षान्तसूक्ष्मदर्शनचातुर्यं । बुद्धेःसूक्ष्मत्वं तत्त्वसाक्षात्कारसमर्थत्वं । त्रिभिर्व्याप्नोति धर्मार्थकामैःकालंयथोचितंव्याप्नोति । त्रिवर्गसेवीत्यर्थः ॥ २० ॥ ति० संग्रहानुग्रहे संग्रहः धनबलादीनां । अनुग्रहः ताभ्यांप्रजारक्षणं । तदुभयनिष्ठः ॥ २१ ॥ रामानु० द्वैमात्रः द्वयोर्मात्रोरपत्यंपुमान्द्वैमात्रः । " मातुरुत्संख्यासंभद्रपूर्वायाः " इत्यण्प्रत्ययः । उकाराभावआर्षः । सुमित्रापत्यस्यलक्ष्मणस्यद्वैमातुरत्वंजन्मप्रभृतिरामवत्कौसल्ययासंवर्धितत्वात् । ति० द्वैमात्रः राममात्रपेक्षयाद्वितीयामाता । तस्याअपत्यमित्यर्थः । भिन्नोदरभ्रातेत्यर्थः । वैमात्रइतिपाठान्तरं ॥ २२ ॥ रामानु० परिचर्य परिचर्याकृत्वा । आस्महे तिष्ठामइत्यर्थः ॥ ति० परिचर्यामहे । तङ्ङ्यनावार्षौ ॥ परिचरामइत्यर्थः ॥ स० परिचर्यामहे सुग्रीवमुद्दिश्ययापरिचर्यासेवातद्प्रेमहेउत्सवेइत्यर्थः । स्थिताइतिशेषः । द्वितीयाषष्ठ्यर्थवा ॥ २६ ॥ स० धनुःप्रवरपाणिनौ पणोव्यवहारएवपाणः । धनुःप्रवराभ्यांपाणोऽनयोरस्तीतितथा । धनुःप्रवरपाणिनां नौ नायकावित्यर्थइतिवा । " नेतानश्वसमाख्यातः " इतिनानार्थपदमञ्जर्यां । नान्तोवायंशब्दः ॥ २७ ॥

[पा०] १ ङ. ज.—ट. सत्यधर्मरतः. २ ङ. ञ. ट. रमितप्रभः. ३ च. छ. ञ. अनुकारेण. ४ ख. गुणैरपि. ङ. ञ. ट. गुणैश्चापि. ५ इदमर्धं ङ. ञ. ट. पाठेषुदृश्यते. ६ ग. उभौतौ. ७ घ.—ट. मस्माभिःसहसंगतौ. ८ ञ. ट. मूलेतु ९ ख. घ. प्रियवादिनं. १० ङ. ञ. ट. वयंच. ११ क.—ट. परिचर्यामहे. १२ ग. घ. प्रवरधारिणौ. १३ क. ग.—ट. अभिप्लुतो.

तौ परिज्ञाततत्त्वार्थौ मया प्रीतिसमन्वितौ ॥ पृष्ठमारोप्य तं देशं प्रापितौ पुरुषर्षभौ ॥ ३१ ॥
निवेदितौ च तत्त्वेन सुग्रीवाय महात्मने ॥ तयोरन्योन्यसंलापाद्दृढं प्रीतिरजायत ॥ ३२ ॥
ततस्तौ प्रीतिसंपन्नौ हरीश्वरनरेश्वरौ ॥ परस्परकृताश्वासौ कथया पूर्ववृत्तया ॥ ३३ ॥
ततः स सान्त्वयामास सुग्रीवं लक्ष्मणाग्रजः ॥ स्त्रीहेतोर्वालिना भ्रात्रा निरस्तमुरुतेजसा ॥ ३४ ॥
ततस्त्वन्नाशजं शोकं रामस्याक्लिष्टकर्मणः ॥ लक्ष्मणो वानरेन्द्राय सुग्रीवाय न्यवेदयत् ॥ ३५ ॥
स तं श्रुत्वा वानरेन्द्रस्तु लक्ष्मणेनेरितं वचः ॥ तदासीन्निष्प्रभोत्यर्थं ग्रहग्रस्त इवांशुमान् ॥ ३६ ॥
ततस्त्वद्भात्रशोभीनि रक्षसा ह्रियमाणया ॥ यान्याभरणजालानि पातितानि महीतले ॥ ३७ ॥
तानि सर्वाणि रामाय आनीय हरियूथपाः ॥ संहृष्टा दर्शयामासुर्गतिं तु न विदुस्तव ॥ ३८ ॥
तानि रामाय दत्तानि मयैवोपहृतानि च ॥ स्रवन्त्यवकीर्णानि तस्मिन्विगतचेतसि ॥ ३९ ॥
तान्यङ्के दर्शनीयानि कृत्वा बहुविधं तव ॥ तेन देवप्रकाशेन देवेन परिदेवितम् ॥ ४० ॥
पश्यतस्तानि रुदतस्ताम्यतश्च पुनः पुनः ॥ प्रादीपयन्दाशरथेस्तानि शोकहुताशनम् ॥ ४१ ॥
शयितं च चिरं तेन दुःखार्तेन महात्मना ॥ मयाऽपि विविधैर्वाक्यैः कृच्छ्रादुत्थापितः पुनः ॥४२॥
तानि दृष्ट्वा महाबाहुर्दर्शयित्वा मुहुर्मुहुः ॥ राघवः सहसौमित्रिः सुग्रीवे संन्यवेदयत् ॥ ४३ ॥
स तवादर्शनादार्ये राघवः परितप्यते ॥ महता ज्वलता नित्यमग्निनेवाग्निपर्वतः ॥ ४४ ॥
त्वत्कृते तमनिद्रा च शोकश्चिन्ता च राघवम् ॥ तापयन्ति महात्मानमभ्यगारमिवाग्नयः ॥ ४५ ॥
तवादर्शनशोकेन राघवः प्रविचाल्यते ॥ महता भूमिकम्पेन महानिव शिलोच्चयः ॥ ४६ ॥
काननानि सुरम्याणि नदीः प्रस्रवणानि च ॥ चरन्न रतिमाप्नोति त्वामपश्यन्नृपात्मजे ॥ ४७ ॥
स त्वां मनुजशार्दूलः क्षिप्रं प्राप्स्यति राघवः ॥ समित्रबान्धवं हत्वा रावणं जनकात्मजे ॥ ४८ ॥
सहितौ रामसुग्रीवावुभावकुरुतां तदा ॥ समयं वालिनं हन्तुं तव चान्वेषणं तथा ॥ ४९ ॥
ततस्ताभ्यां कुमाराभ्यां वीराभ्यां स हरीश्वरः ॥ किष्किन्धां समुपागम्य वाली युद्धे निपातितः ॥५०॥
ततो निहत्य तरसा रामो वालिनमाहवे ॥ सर्वर्क्षहरिसङ्घानां सुग्रीवमकरोत्पतिम् ॥ ५१ ॥
रामसुग्रीवयोरैक्यं देव्येवं समजायत ॥ हनुमन्तं च मां विद्धि तयोर्दूतमिहागतम् ॥ ५२ ॥

नान्तत्वमार्षं ॥ २७—३५ ॥ अत्यर्थं निष्प्रभ इति आत्मवद्रामस्यापि दुःखहेतुश्रवणादिति भावः। यद्वा रामापेक्षया अत्यन्तनिष्प्रभः। रामः सीताविरहेण निष्प्रभोभूत् सुग्रीवस्तु तयोस्साहित्यादर्शनाद्रामक्लेशदर्शनाच्चात्यर्थं निष्प्रभोभूत् ॥ ३६—३७ ॥ आनीय हरियूथपा इति पूर्वं सुग्रीवेणानयनमुक्तं तद्धरियूथपद्वारेत्यत्रोच्यते। गतिं रावणस्थानं ॥ ३८ ॥ दत्तानि सुग्रीवेणेति शेषः। मयैवोपहृतानि पूर्वं पतनकाल इतिशेषः। इदानीं हरियूथपैरानीतत्वोक्तेः। स्रवन्ति आकाशात्पतनकाले ॥ ३९—४१ ॥ शयितं मूर्च्छितं ॥ ४२ ॥ सुग्रीवे संन्यवेदयत् सुग्रीवहस्ते न्यस्तवानित्यर्थः ॥ ४३ ॥ अग्निपर्वतो नाम मेरुशिखरवर्ती कश्चिद्गिरिः। उक्तंच भारते। "अत्र माल्यवतः शृङ्गे दृश्यते हव्यवाट् सदा। नाम्ना संवर्तको नाम कालाग्निर्भरतर्षभ" इति ॥४४–५१॥ ननु वानराणां नराणां च कथमासीत्समागम इति

स० त्वन्नाशजं त्वदनुपलंभजं। "नाशो निधनानुपलंभयोः" इतिविश्वः ॥ ३५ ॥ स० ताभ्यां रामलक्ष्मणाभ्यां। छत्रिन्यायेनेयमुक्तिः ॥ हरीश्वरः वाली ॥ ५० ॥ स० ऐक्यं मत्त्वैक्यं ॥ ५२ ॥

[पा०] १ क. ग.—ट. संभाषात्. २ ख. घ. ङ. झ. ट. तत्रतौ. ३ क. ग.—ट. कीर्तिसंपन्नौ. ४ ङ. ज. झ. निरस्तपुरु. ५ क. ग घ. त्वन्नाशजनितं. ६ क. ग.—ज. तच्छ्रुत्वा. ७ क.—घ. च.—ट. महार्हाणिदर्शयित्वा. ८ क. ग.—झ. संन्यवेशयत्. ९ क. घ. ङ. झ. ञ. ट. परिचाल्यते. ज. प्रतिचाल्यते. १० ख. हत्वा. ११ ङ. च. छ. झ. ञ. ट. प्रति. १२ क.—घ. च. छ. ज. ञ. युधि. १३ ङ.—ट. मुपागतं.

स्वराज्यं प्राप्य सुग्रीवः समानीय हरीश्वरान् ॥ त्वदर्थं प्रेषयामास दिशो दश महाबलान् ॥५३॥
आदिष्टा वानरेन्द्रेण सुग्रीवेण महौजसा ॥ अद्रिराजप्रतीकाशाः सर्वतः प्रस्थिता महीम् ॥ ५४ ॥
ततस्ते मार्गमाणा वै सुग्रीववचनातुराः ॥ चरन्ति वसुधां कृत्स्नां वयमन्ये च वानराः ॥ ५५ ॥
अङ्गदो नाम लक्ष्मीवान्वालिसूनुर्महाबलः ॥ प्रस्थितः कपिशार्दूलस्त्रिभागबलसंवृतः ॥ ५६ ॥
तेषां नो विप्रनष्टानां विन्ध्ये पर्वतसत्तमे ॥ भृशं शोकपरीतानामहोरात्रगणा गताः ॥ ५७ ॥
ते वयं कार्यनैराश्यात्कालस्यातिक्रमेण च ॥ भयाच्च कपिराजस्य प्राणांस्त्यक्तुं व्यवस्थिताः ॥५८॥
विचित्य वनदुर्गाणि गिरिप्रस्रवणानि च ॥ अनासाद्य पदं देव्याः प्राणांस्त्यक्तुं समुद्यताः ॥५९॥
दृष्ट्वा प्रायोपविष्टांश्च सर्वान्वानरपुङ्गवान् ॥ भृशं शोकार्णवे मग्नः पर्यदेवयदङ्गदः ॥ ६० ॥
तव नाशं च वैदेहि वालिनश्च वधं तथा ॥ प्रायोपवेशमस्माकं मरणं च जटायुषः ॥ ६१ ॥
तेषां नः स्वामिसंदेशान्निराशानां मुमूर्षताम् ॥ कार्यहेतोरिवायातः शकुनिर्वीर्यवान्महान् ॥ ६२ ॥
गृध्रराजस्य सोदर्यः संपातिर्नाम गृध्रराट् ॥ श्रुत्वा भ्रातृवधं कोपादिदं वचनमब्रवीत् ॥ ६३ ॥
यवीयान्केन मे भ्राता हतः क्व च निपातितः ॥ एतदाख्यातुमिच्छामि भवद्भिर्वानरोत्तमाः ॥६४॥
अङ्गदोकथयत्तस्य जनस्थाने महद्वधम् ॥ रक्षसा भीमरूपेण त्वामुद्दिश्य यथातथम् ॥ ६५ ॥
जटायुषो वधं श्रुत्वा दुःखितः सोरुणात्मजः ॥ त्वां शशंस वरारोहे वसन्तीं रावणालये ॥ ६६ ॥
तस्य तद्वचनं श्रुत्वा संपातेः प्रीतिवर्धनम् ॥ अङ्गदप्रमुखास्तूर्णं ततः संप्रस्थिता वयम् ॥ ६७ ॥
विन्ध्यादुत्थाय संप्राप्ताः सागरस्यान्तमुत्तरम् ॥ त्वद्दर्शनकृतोत्साहा हृष्टास्तुष्टाः प्लवङ्गमाः ॥ ६८ ॥
अङ्गदप्रमुखाः सर्वे वेलोपान्तमुपस्थिताः ॥ चिन्तां जग्मुः पुनर्भीतास्त्वदर्शनसमुत्सुकाः ॥ ६९ ॥

वामदक्षिणहस्तवैषम्यमप्यविजानानां शाखायाश्शाखामाप्लुत्य जीवतां तिरश्चां वसिष्ठशिष्यतया निरतिशयाचारसंपन्नयोश्चक्रवर्तिपुत्रयोश्च कथं समागमो जात इति पृष्टं तस्य किमुत्तरमुक्तमित्यत्राह—रामसुग्रीवयोरिति ॥ रामसुग्रीवयोरैक्यमेवं समजायत । एवमिति प्रत्यक्षनिर्देशः । स्वानुजे विद्यमानेपि यथाहं सुग्रीवदूतोन्तःपुरकार्यसमाधानायागतः । तथा तयोरैक्यं मैत्री जातेत्यर्थः । यद्वा एवं समजायत अहमप्येवं दृष्टवान् । न योग्यतामवगच्छामीत्यर्थः ॥५२—५४॥ सुग्रीववचनातुराः सुग्रीवाज्ञाभीताः । सुग्रीववचनानुगा इति च पाठः ॥ ५५ ॥ त्रिभागबलसंवृतः तृतीयांशेन बलेन सैन्येन संवृत इत्यर्थः । वृत्तिविषये पूरणार्थत्वं संख्याशब्दस्येष्यते ॥ ५६ ॥ विप्रनष्टानां बिले अदर्शनं गतानां ॥५७॥ कालस्य सुग्रीवकल्पितमासस्य । कपिराजस्य सुग्रीवात् ॥ ५८—५९ ॥ दृष्ट्वेत्यादिश्लोकद्वयमेकं वाक्यं ॥ परिदेवनकर्माह—तवेति ॥ ६०—६१ ॥ स्वामिसंदेशात् मासादूर्ध्वमनागतानां भयमित्येवंरूपात् । तेषां कार्यहेतोः ॥ ६२—६७॥ हृष्टाः उत्साहवन्तः । तुष्टाः आनन्दवन्तः ॥ ६८ ॥ वेलोपान्तं वेला सिन्धुपूरः तस्यो-

---

ति० त्रिभागबलसंवृतः सेनायास्त्रिष्वंशेषुएकांशसेनावृतइत्यर्थः ॥ ५६ ॥ ति० कार्यहेतोः कार्यसिद्ध्यर्थमिवायातः । दैवादितिशेषः । स० कार्यहेतोः अस्मद्रक्षणाख्यकार्येण । इहायातः अस्मत्समीपंप्राप्तः ॥ ६२ ॥ ति० आख्यातुमित्यसमानकर्तृकेपितुमुन्नार्षः ॥ स० आख्यातुं आख्यापयितुं । तेनसमानकर्तृकत्वोपपत्तिः ॥ ६४ ॥ स० महद्वधं महतोजटायुषोवधः महद्वधः तं । परोपकारेप्राणत्यागान्महत्त्वं ॥६५॥ स० वरारोहाभ्यांसहिता सवरारोहा । तस्यास्संबुद्धिः । अतोनसइत्यस्याधिक्यं ॥६६॥

[पा०] १ झ. ठ. स्वंराज्यं. २ ङ. झ. ञ. ट. स्वानानीयमहाकपीन्. ३ क. ग. च. छ. ज. ञ. हरयश्चमहौजसः. ख. घ. सुग्रीवेणवनौकसः. ङ. झ. ट. सुग्रीवेणमहौजसः. ४ ङ. झ. ट. त्यक्तुमुपस्थिताः. ५ क. ख. घ. च.—ट. त्यक्तुंव्यवस्थिताः. ६ क.—ट. तथावधं. ७ क. ख. च. छ. ज. ञ. ट. रिहायातः. ८ ग. सचविनाशितः. ९ झ. ञ. ट. यथार्थतः. १० झ. ट. ठ. त्वामाहसवरारोहे. ११ क.—च. ज. ञ. प्रमुखास्सर्वे. १२ झ. ट. प्रस्थापितावयं. १३ घ.—ट. मुपागताः. १४ ग. जग्मुर्महात्मानः. ख. ङ. छ. झ. ट. जग्मुःपुनर्भीमां.

तथाऽहं हरिसैन्यस्य सागरं प्रेक्ष्य सीदतः ॥ व्यवधूय भयं तीव्रं योजनानां शतं प्लुतः ॥ ७० ॥
लङ्का चापि मया रात्रौ प्रविष्टा राक्षसाकुला ॥ रावणश्च मया दृष्टस्त्वं च शोकपरिप्लुता ॥ ७१ ॥
एतत्ते सर्वमाख्यातं यथावृत्तमनिन्दिते ॥ अभिभाषस्व मां देवि दूतो दाशरथेरहम् ॥ ७२ ॥
तं मां रामकृतोद्योगं त्वन्निमित्तमिहागतम् ॥ सुग्रीवसचिवं देवि बुध्यस्व पवनात्मजम् ॥ ७३ ॥
कुशली तव काकुत्स्थः सर्वशस्त्रभृतां वरः ॥ गुरोराराधने युक्तो लक्ष्मणश्च सुलक्षणः ॥ ७४ ॥
तस्य वीर्यवतो देवि भर्तुस्तव हिते रतः ॥ अहमेकस्तु संप्राप्तः सुग्रीववचनादिह ॥ ७५ ॥
मयेयमसहायेन चरता कामरूपिणा ॥ दक्षिणा दिगनुक्रान्ता त्वन्मार्गविचयैषिणा ॥ ७६ ॥
दिष्ट्याऽहं हरिसैन्यानां त्वन्नाशमनुशोचताम् ॥ अपनेष्यामि संतापं तवाभिगमशंसनात् ॥ ७७ ॥
दिष्ट्या हि मम न व्यर्थं देवि सागरलङ्घनम् ॥ प्राप्स्याम्यहमिदं दिष्ट्या त्वद्दर्शनकृतं यशः ॥ ७८ ॥
राघवश्च महावीर्यः क्षिप्रं त्वामभिपत्स्यते ॥ समित्रबान्धवं हत्वा रावणं राक्षसाधिपम् ॥ ७९ ॥
माल्यवान्नाम वैदेहि गिरीणामुत्तमो गिरिः ॥ ततो गच्छति गोकर्णं पर्वतं केसरी हरिः ॥ ८० ॥
स च देवर्षिभिर्दिष्टः पिता मम महाकपिः ॥ तीर्थे नदीपतेः पुण्ये शंबसादनमुद्धरत् ॥ ८१ ॥
तस्याहं हरिणः क्षेत्रे जातो वातेन मैथिलि ॥ हनुमानिति विख्यातो लोके स्वेनैव कर्मणा ॥ ८२ ॥
विश्वासार्थं तु वैदेहि भर्तुरुक्ता मया गुणाः ॥ अचिराद्राघवो देवि त्वामितो नयिताऽनघे ॥ ८३ ॥
एवं विश्वासिता सीता हेतुभिः शोककर्शिता ॥ उपपन्नैरभिज्ञानैर्दूतं तमवगच्छति ॥ ८४ ॥
अतुलं च गता हर्षं प्रहर्षेण च जानकी ॥ नेत्राभ्यां वक्त्रपक्ष्मभ्यां मुमोचानन्दजं जलम् ॥ ८५ ॥
चारु तद्वदनं तस्यास्ताम्रशुक्लायतेक्षणम् ॥ अशोभत विशालाक्ष्या राहुमुक्त इवोडुराट् ॥ ८६ ॥
हनुमन्तं कपिं व्यक्तं मन्यते नान्यथेति सा ॥ अथोवाच हनूमांस्तामुत्तरं प्रियदर्शनाम् ॥ ८७ ॥
एतत्ते सर्वमाख्यातं समाश्वसिहि मैथिलि ॥ किं करोमि कथं वा ते रोचते प्रतियाम्यहम् ॥ ८८ ॥

पान्तं । "वेलाम्बुधेस्तीरवृक्ष्योः कालमर्यादयोरपि" इति दर्पः ॥ ६९—७२ ॥ रामकृतोद्योगं रामकृतोत्साहं ॥ ७३ ॥ गुरोः ज्येष्ठस्य । आराधने शुश्रूषणे । रतः लक्ष्मणश्च कुशली ॥ ७४—७५ ॥ विचयैषिणा अन्वेषणेच्छुना ॥ ७६ ॥ तवाभिगमशंसनात् त्वत्समीपप्राप्तिकथनात् ॥ ७७—७९ ॥ बुध्यस्व पवनात्मजमिति पवनात्मजत्वमुक्तं तत्कथं वानरस्येत्यपेक्षायामाह—माल्यवानिति ॥ गच्छति अगच्छत् ॥ ८० ॥ सः गोकर्णं गतः । देवर्षिभिः तत्रत्यैः । दिष्टः नियुक्तः । शंबसादनं तीर्थोपद्रवकारिणमसुरं शंबसादनाख्यं । उद्धरत् उदहरत् । देवर्षिप्रार्थनया अवधीदित्यर्थः ॥ ८१ ॥ हरिणः हरेः केसरिणः । क्षेत्रे पत्न्यां अञ्जनायां । जातः पितुर्देशान्तरगमनकाले जातः । अनेनान्यक्षेत्रे कथमन्येनोत्पादनमिति शङ्का परास्कृता ॥ ८२ ॥ नयिता नेता ॥ ८३ ॥ अवगच्छति अवा-

ति० कामरूपिणा । अनेनरावणान्तःपुराद्यन्वेषणसामर्थ्यं सूचितं ॥ ७६ ॥ ति० सर्वमुत्तरं सर्वप्रत्युत्तरमाख्यातमित्यन्वयः ॥ किंकरोमीति । वर्तमानसामीप्येलटौ । प्रतियामि प्रतियास्ये रामसमीपं । किंकरोमि किंकरिष्ये । कथंवारोचते चिकीर्षितमितिशेषः ॥ ८८ ॥

[पा०] १ क. ङ. झ. ट. अथाहं. २ क. च. ज. ञ. हरिसैन्यानां. ३ क. च. छ. ज. ञ. सीदतां. ४ ग. व्यवधूयचसर्वान्. ५ ग. च. छ. ट. शोकनिपीडिता. ६ ङ.—ट. लक्ष्मणःशुभलक्षणः. ७ ङ. झ. तवाधिगमशासनात्. ८ ङ. च. ज. झ. ट. नममव्यर्थं. ९ घ. सागरस्यचलङ्घनं. ङ.—ट. सागरस्येहलङ्घनं. १० ङ. झ. ट. देवि. ११ ङ. झ. सपुत्रबान्धवं. १२ ख. छ. ज. कौरवोनाम. क. कुञ्जरोनाम. १३ ग. देवर्षिनिर्दिष्टः. १४ क.—च. ज. झ. ट. मुद्धरन्. १५ ङ. झ. ट. यस्याहं. १६ ङ. झ. ट. अचिरात्त्वामितोदेविराघवोनयिताध्रुवं. १७ ग. ङ. ञ. ट. तमधिगच्छतिः १८ ग. पयः. १९ च. छ. ज. ञ. सातस्यवचनंश्रुत्वाताम्रशुक्लायतेक्षणा. अशोभतविशालाक्षी. क. चारुतच्चाननंदेव्याःपुण्डरीकायतेक्षणं.

हतेऽसुरे संयति शंबसादने कपिप्रवीरेण महर्षिचोदनात् ॥
ततोस्मि वायुप्रभवो हि मैथिलि प्रभावतस्तत्प्रतिमश्च वानरः ॥ ८९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

षट्त्रिंशः सर्गः ॥ ३६ ॥

हनुमता स्वस्मिन्नाश्वासदार्ढ्याय सीतायैश्रीरामाङ्गुलीयकदानम् ॥ १ ॥ तल्लाभहृष्टयासीतया हनुमच्छ्लाघनपूर्वकंराम-लक्ष्मणकुशलादिप्रश्नः ॥ २ ॥ हनुमता सीतांप्रत्येतावत्पर्यन्तंरामस्यानागमनात्स्वस्मिन्नप्रीतिशङ्काजातकोपापनोदनाय रामानागमनस्य सीतावस्थानस्थानापरिज्ञानहेतुकत्वाभिधानम् ॥ ३ ॥ तयातस्यां रामस्यतद्विषयकप्रीत्यतिशयनिश्चयजन-नाय सशपथंरामशोकावस्थानप्रतिपादनपूर्वकं तत्प्राप्तयेरामप्रयत्नातिशयाभिधानेन तत्समाश्वासनम् ॥ ४ ॥

भूय एव महातेजा हनुमान्मारुतात्मजः ॥ अब्रवीत्प्रश्रितं वाक्यं सीताप्रत्ययकारणात् ॥ १ ॥
वानरोऽहं महाभागे दूतो रामस्य धीमतः ॥ रामनामाङ्कितं चेदं पश्य देव्यङ्गुलीयकम् ॥ २ ॥
प्रत्ययार्थं तवानीतं तेन दत्तं महात्मना ॥ समाश्वसिहि भद्रं ते क्षीणदुःखफला ह्यसि ॥
[इत्युक्त्वा प्रददौ तस्यै सीतायै वानरोत्तमः] ॥ ३ ॥
गृहीत्वा प्रेक्षमाणा सा भर्तुः करविभूषणम् ॥ भर्तारमिव संप्राप्ता जानकी मुदिताऽभवत् ॥ ४ ॥
चारु तद्वदनं तस्यास्ताम्रशुक्लायतेक्षणम् ॥ अशोभत विशालाक्ष्या राहुमुक्त इवोडुराट् ॥ ५ ॥
ततः सा ह्रीमती बाला भर्तृसंदेशहर्षिता ॥ परितुष्टा प्रियं कृत्वा प्रशशंस महाकपिम् ॥ ६ ॥

गच्छत् ॥ ८४—८८ ॥ देवीनियुक्तार्थकरणे स्वस्य शक्तिरस्तीति द्योतयितुं स्वमाहात्म्यमाह—हत इति ॥ ततः असुरवधोपकारात् ॥ ८९ ॥ इति श्रीगोविन्द-राजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलका-ख्याने सुन्दरकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥ ३५ ॥

इत्थं संदेशकथनादिना देवीं विश्वास्याभिज्ञानाङ्गु-लीयकदानेन दृढं विश्वासयति—वानरोहमित्यादिना ॥ २—३ ॥ गृहीत्वा देशान्तरादागतं बन्धुं दृष्ट्वेव स्वयं गृहीतवती । प्रेक्षमाणा वर्तमानार्थेन शानचा दत्तदृष्टिं न विचालितवतीत्युच्यते सा पूर्वं रावणत्वेन शङ्कितवती । भर्तुःकरविभूषणं पाणिग्रहणकाले हस्तस्पृष्टमाभरणं । करविभूषणमित्यनेन भोगातिश-यात् प्रणयकोपे प्रवृत्ते परस्परमालोकनभाषणादिविर-हदशायां काङ्क्षिते भाषणे मानातिशयेन मौने कृते रामोङ्गुलीयकं भूमौ च्यावयति स्म । तदा व्याजेन च्युतमङ्गुलीयकमिति सीतयाभिहिते प्रणयकोपशैथि-ल्यात् परस्परसंश्लेषो भूयोप्यभूत् । एवं घटकभूतं करविभूषणं भर्तारमिव संप्राप्ता अङ्गुलीयकदर्शनात्तस्य कान्तस्य करं स्मृतवती । तत्स्मृत्या बाहुं तत्स्मरणेन तद्विग्रहं । एवं भावनाप्रकर्षेण तं पुरस्थितमिव मत्वा तमालिङ्गितवती । जननीबुद्ध्या मुनिस्संप्राप्ते-वेत्याह । जननीकृतभोगस्यावर्ण्यत्वात् । जानकी शोकहर्षाभ्यां क्ष्वेडुमनर्हे कुले जाता । मुदिताऽभवत् इयमिदानीं मुदिता उदर्के किं भविष्यतीति न जान इत्याहर्षिः ॥ ४—५ ॥ प्रियं कृत्वा संमानं कृत्वा

ति० नहिरावणआत्मानंकथमपिकपिपुत्रइतिब्रूयादितिकपित्वनिश्चयायपुनःस्वजन्मानुवादः । ततः शंबसादनासुरवधप्रीतमहर्षेः प्रसादतइत्यर्थः । स० ततः मत्पितुस्तद्धननार्थंगमनानन्तरं । वायुप्रभवोस्मि तदवकाशे वायुनाजातोस्मि ॥ ८९ ॥ इति पञ्चत्रिंशःसर्गः ॥ ३५ ॥

ति० असि शीघ्रमेवभविष्यसि ॥ स० दुःखं तमआदिस्थं फलंयेषांते दुःखफलाः राक्षसाः । क्षीणाःदुःखफलायस्यानिमित्तेन सातथा । दुःखरूपंयत्फलं तत्क्षीणंयस्यांसावा । एष्यन्निश्चयेनेदंवचनं ॥ ३ ॥ ति० ह्रीमती अङ्गुलीयसांनिध्येभर्तृसांनिध्यादिवकिं-चिल्लज्जावती । स० ह्रीमती पत्न्यौयद्रत्न्यौन्नत्यंकपिरपिममापश्यदितिलज्जावती । प्रियंकृत्वा रावणादिविकल्पंविधूयप्रेमास्पदमेवकृत्वा

[पा०] १ क. पाठेइदमर्धदृश्यते. २ घ. ङ. झ. ञ. ट. बभूवहर्षोदग्रं. च. ख. बभूवहर्षितोदग्रं. ३ छ. राहुमुक्तेन्दुमण्डलं. ४ क. छ. झ. श्रीमती. ५ क.—ट. भर्तुस्संदेश. ६ क. श्रुत्वा. ७ क. ग. च. ज. ञ. प्राशंसत.

विक्रान्तस्त्वं समर्थस्त्वं प्राज्ञस्त्वं वानरोत्तम ॥ येनेदं राक्षसपदं त्वयैकेन प्रधर्षितम् ॥ ७ ॥
शतयोजनविस्तीर्णः सागरो मकरालयः ॥ विक्रमश्लाघनीयेन क्रमता गोष्पदीकृतः ॥ ८ ॥
न हि त्वां प्राकृतं मन्ये वानरं वानरर्षभ ॥ यस्य ते नास्ति संत्रासो रावणान्नापि संभ्रमः ॥ ९ ॥
अर्हसे च कपिश्रेष्ठ मया समभिभाषितुम् ॥ यदि प्रेषितस्तेन रामेण विदितात्मना ॥ १० ॥
प्रेषयिष्यति दुर्धर्षो रामो न ह्यपरीक्षितम् ॥ पराक्रममविज्ञाय मत्सकाशं विशेषतः ॥ ११ ॥
दिष्ट्या च कुशली रामो धर्मात्मा सत्यसङ्गरः ॥ लक्ष्मणश्च महातेजाः सुमित्रानन्दवर्धनः ॥१२॥
कुशली यदि काकुत्स्थः किंनु सागरमेखलाम् ॥ महीं दहति कोपेन युगान्ताग्निरिवोत्थितः ॥१३॥
अथवा शक्तिमन्तौ तौ सुराणामपि निग्रहे ॥ ममैव तु न दुःखानामस्ति मन्ये विपर्ययः ॥ १४ ॥
कच्चिन्न व्यथितो रामः कच्चिन्न परितप्यते ॥ उत्तराणि च कार्याणि कुरुते पुरुषोत्तमः ॥ १५ ॥
कच्चिन्न दीनः संभ्रान्तः कार्येषु च न मुह्यति ॥ कच्चित्पुरुषकार्याणि कुरुते नृपतेः सुतः ॥ १६ ॥
द्विविधं त्रिविधोपायमुपायमपि सेवते ॥ विजिगीषुः सुहृत्कच्चिन्मित्रेषु च परन्तपः ॥ १७ ॥

॥ ६ ॥ विक्रान्तइत्यादिपदत्रयेण तत्प्रत्यक्षमेण ज्ञानशक्तिबलान्युच्यन्ते। इदं राक्षसपदमिति प्रज्ञोक्ता। त्वयैकेनेति सामर्थ्यं। प्रधर्षितमिति विक्रमः ॥ ७—८ ॥ प्राकृतं क्षुद्रं। संभ्रमः व्यग्रता ॥ ९ ॥ यद्यपीतिनिपातसमुदायो यस्मादित्यर्थे। अव्ययानामनेकार्थत्वात् ॥ १०—१२ ॥ अथ प्रणयरोषेण दूतसन्निधौ रामं गर्हते—कुशलीति ॥ काकुत्स्थः परपरिभवासहकुलेजातः। अनेन परपरिभव एव परिहरणीयः न स्वीय इति नियमोस्ति किं। किंनु सागरमेखलां महीं दहति। अत्र काकुत्स्थः दहति किंनु न दहतीत्यर्थः। सागरमेखलामिति विशेषणेन द्रवद्रव्यस्यैकेन कठिनद्रव्यस्यचैकेन बाणेन भवितव्यं किं। सागरं सलिलमेव तैलं कृत्वा महीं दग्धुं समर्थो न क्रिमित्यर्थः। यद्वा स्वपत्नीं वा सुरक्षितपरिधानाङ्करोतीति भावः। अनादिकृतमर्यादा मही कथं दग्धुं शक्येत्यत्राह—युगान्तेति। महीमर्यादा तन्नयनरागपर्यन्तैवेति भावः। किं न सागरमेखलामित्यपि पाठः। काकुत्स्थः कुशली यदि तदा महीं किं न दहति। शक्तश्चेद्दहत्येव। न दहति अतो न शक्त इत्यर्थः ॥ १३ ॥ पक्षान्तरमाह—अथवेति ॥ १४ ॥ न व्यथितः न कृशः। उत्तराणि कार्याणि मत्प्राप्तिसाधकानि कच्चित्कुरुते ॥ १५ ॥ न दीनः कच्चित्संभ्रान्तः सन् कार्येषु न मुह्यति कच्चिदित्यन्वयः। पुरुषकार्याणि पुरुषेण कर्तव्यानि ॥ १६ ॥ तान्येवाह—द्विविधमिति ॥ परन्तपो रामः मित्रेषु विषये सुहृत्सन् द्विविधं सामदानरूपमुपायमपि। सेवते कच्चित्। चकारेणामित्रास्समुच्चीयन्ते। अमित्रेषु विषये

मलावा ॥ ६ ॥ **ति०** विक्रान्तः शूरः। समर्थः देशकालोचितकृत्यचतुरः। प्राज्ञः धर्मार्थविषयकसर्वशास्त्रार्थतत्त्वज्ञः। पदं स्थानं ॥ ७ ॥ **ति०** संत्रासः समुद्रादितिशेषः। **स०** प्राकृतं साधारणं। यतः मेइतिशेषः। यतः मेसंभ्रमः भयं। तस्माद्रावणादपिनसंत्रासः ॥ ९ ॥ **ति०** यदि यस्मात् ॥ **ती०** यद्यपीत्यवधारणे। मयासमभिभाषितुंअर्हसेयद्यपि अर्हस्येवेत्यर्थः। कुतः विदितात्मनारामेणप्रेषितइतिसंबन्धः ॥ यद्वा अप्यवधारणे। यदि यस्मात्। विदितात्मनारामेणप्रेषितः। तस्मान्मयासमभिभाषितुं अर्हस्यवेतिसंबन्धः ॥ १० ॥ **शि०** कोपेन रावणापराधज्ञानजनितक्रोधेन। महीं लङ्काभूमिं। किंनुदहति ॥ १३ ॥ **ति०** ननुकेवलंमहीमेवेतिकिमुच्यतेइत्याशयेनपक्षान्तरं—**अथवेति**। तथाशक्तिमन्तौयदि तर्हिकिमितितूष्णींतिष्ठतःतत्राह—ममैवेति। दुःखानां दुःखहेतुपापानां। विपर्ययः नाशः। नाद्यापिसंवृत्तइत्यर्थः ॥ १४ ॥ **ति०** ममदुःखक्षयः ईषत्करः अपितु तस्यसुखावस्थानमेवमुख्यमित्याशयेनाह—**कच्चिदिति**। उत्तराणिकार्याणि मद्विमोचनफलानि ॥१५॥ **ति०** द्विविधं सौम्यासौम्यरूपप्रकारद्वयवत् ॥ त्रिविधोपायं धर्मार्थकामलक्षणत्रिविधपुरुषार्थानांप्राप्त्युपायभूतमुपायं सामाद्युपायमपिसेवतेकच्चित्। तथा मित्रेषुच विजिगीषुसुहृत्कच्चित्। विजिगीषुसुहृदिति बहुव्रीहिस्तत्पुरुषश्चेतिकतकः। सुहृत्परंतपोरामोविजिगीषुःसन् त्रिविधोपायं सामदानभेदरूपमुपायंदण्डोपायंच। मित्रेषुच चादमित्रेषुच द्विविधंयथाभवतितथा सेवतेकच्चित्। मित्रेषुसामदाने अमित्रेषुभेददण्डौचेत्येवंविभज्यप्रयुङ्क्तेकच्चिदित्यर्थइतितीर्थः ॥ **स०** त्रिविधोपायं धर्मार्थकामसाधनरूपं। तज्ज्ञानरूपासाधारणकारणकस्यमोक्षस्यसाधारण-

[**पा०**] १ क. ग. ङ.—ट. रावणादपि. २ क. ङ. झ. ट. यद्यसि. च. छ. ज. ञ. यदसि. ३ क. ग. च. ज. झ. ञ. दिष्ट्यास. ४ क. धर्मवत्सलः. ख. ग. ञ. सत्यवत्सलः. ५ क.—ट. व्यथते. ६ झ. विजिगीषुसुहृत्कच्चित्. ७ झ. परंतप.

कच्चिन्मित्राणि लभते मित्रैश्चाप्यभिगम्यते ॥ कच्चित्कल्याणमित्रश्च मित्रैश्चापि पुरस्कृतः ॥ १८ ॥
कच्चिदाशास्ति देवानां प्रसादं पार्थिवात्मजः ॥ कच्चित्पुरुषकारं च दैवं च प्रतिपद्यते ॥ १९ ॥
कच्चिन्न विगतस्नेहः प्रसादान्मयि राघवः ॥ कच्चिन्मां व्यसनादस्मान्मोक्षयिष्यति वानर ॥ २० ॥
सुखानामुचितो नित्यमसुखानामनूचितः ॥ दुःखमुत्तरमासाद्य कच्चिद्रामो न सीदति ॥ २१ ॥
कौसल्यायास्तथा कच्चित्सुमित्रायास्तथैव च ॥ अभीक्ष्णं श्रूयते कच्चित्कुशलं भरतस्य च ॥ २२ ॥
मन्निमित्तेन मानार्हः कच्चिच्छोकेन राघवः ॥ कच्चिन्नान्यमना रामः कच्चिन्मां तारयिष्यति ॥२३॥
कच्चिदक्षौहिणीं भीमां भरतो भ्रातृवत्सलः ॥ ध्वजिनीं मन्त्रिभिर्गुप्तां प्रेषयिष्यति मत्कृते ॥ २४ ॥
वानराधिपतिः श्रीमान्सुग्रीवः कच्चिदेष्यति ॥ मत्कृते हरिभिर्वीरैर्वृतो दन्तनखायुधैः ॥ २५ ॥
कच्चिच्च लक्ष्मणः शूरः सुमित्रानन्दवर्धनः ॥ अस्त्रविच्छरजालेन राक्षसान्विधमिष्यति ॥ २६ ॥
रौद्रेण कच्चिदस्त्रेण ज्वलता निहतं रणे ॥ द्रक्ष्याम्यल्पेन कालेन रावणं ससुहृज्जनम् ॥ २७ ॥

कच्चिन्न तद्वेमसमानवर्णं तस्याननं पद्मसमानगन्धि ॥
मया विना शुष्यति शोकदीनं जलक्षये पद्ममिवातपेन ॥ २८ ॥
धर्मोपदेशात्त्यजतश्च राज्यं मां चाप्यरण्यं नयतः पदातिम् ॥
नासीद्व्यथा यस्य न भीर्न शोकः कच्चिच्च धैर्यं हृदये करोति ॥ २९ ॥
न चास्य माता न पिता च नान्यः स्नेहाद्विशिष्टोस्ति मया समो वा ॥
तावच्चहं दूत जिजीविषेयं यावत्प्रवृत्तिं शृणुयां प्रियस्य ॥ ३० ॥

विजिगीषुस्सन् त्रिविधोपायं दानभेददण्डान् । सेवते प्रयुङ्क्ते कच्चित् । सुहृत्सु कदाचिदपि भेददण्डौ न कार्यौ । शत्रुषु नसामेति भावः । योजनान्तरे विजिगीषुसुहृत्पदयोः प्रयोजनं मृग्यं ॥ १७ ॥ अभिगम्यते लभ्यते । मित्रस्य कंचिदुपकारं कृत्वा स्वयमुपकारं मित्रादपेक्षते कच्चिदित्यर्थः । कल्याणमित्रः पुरस्कृतमित्र इत्यर्थः ॥ १८ ॥ आशास्ति आशास्ते । पुरुषकारं स्वबलं । एकैकस्यानर्थहेतुत्वादिति भावः ॥ १९—२० ॥ अनूचित इति दीर्घ आर्षः । उत्तरं उत्कृष्टं ॥ २१—२२ ॥ मन्निमित्तेन मया हेतुना । अन्यमनाः कार्यान्तरासक्तः ॥ २३ ॥ ध्वजिनीं सेनां ॥ २४—२७ ॥ हेमशब्देन तद्वर्ण उच्यते । अभेदेन हेमवत्स्पृहणीयमित्यर्थः । मया विनेति जलक्षयस्थानं । शोकदीनमित्यातपस्थानं ॥ २८ ॥ धर्मोपदेशात् धर्मोद्देशार्थं । धर्ममुद्दिश्येत्यर्थः । यद्वा धर्मव्याजाद्धेतोः । राज्यत्यागाद्यथा नासीत् । अरण्यसञ्चाराद्धीर्नासीत् । मत्पादसञ्चाराच्छोको नासीत् । सः तादृशधैर्ययुक्तो रामो मद्विश्लेषेपि हृदये धैर्यं करोति कच्चित् ॥ २९ ॥ धैर्याकरणे हेतुमाह—न चास्येति ॥ प्रवृत्तिं मदानयनवार्तां । प्रणयरोषपक्षे किमेष पितृवचनपरिपालनाय वनं प्राप्तः न । किन्तु ममैव हिंसायै इति भावः । रामस्यैव दोषः न ममेति सीतयोक्ते वयमेव किं सम्यक् स्थितवन्तः रामविश्लेषानन्तरक्षणे न तनुस्त्यक्ता हीत्येवं हनुमदाशयं ज्ञात्वाह—नचास्येति ॥ रामस्य मात्रादयः अन्योबन्धुश्च स्नेहाद्विशिष्टा न भवन्ति । लोके कस्यचिन्माता पिता भ्रातेत्येवं स्नेहो विसृत्वरो भवति । नचैवं रामस्य मात्रादिषु संभावितः । सर्वोपि मय्येकमार्गः कृतः । यावत्प्रि-

---

साधनसाध्यकोटौनिवेशोनसमञ्जसइतित्रयाणांग्रहणं ॥ सुहृदितिमित्रपक्षे । इतरत्रविजिगीषुरिति ॥ १७ ॥ **स०** लभते स्वयं प्राप्नोति । कल्याणमित्रः कल्याणंगूढद्वेषरहितंमित्रंयस्यसतथा । मित्रैः स्वोपद्रवपरिहाराय चापीति धानुष्कचूडामणिरितिपुरस्कृतः ॥ १८ ॥ **रामानु०** अनुचितएवानौचितः । 'प्रज्ञादिभ्यश्च' इतिस्वार्थेऽण्प्रत्ययः । उत्तरं उत्कृष्टं ॥ **स०** अनूचितः अनुचितः । यद्वा अनुहीनं उचितं उचितलं । भावप्रधानोनिर्देशः । यस्येति । 'अनुहीने' इतिविश्वः ॥ २१ ॥ **स०** कुशलं क्षेमवार्ता । कैकेय्याभरतसांनिध्यादप्रश्नः ॥ २२ ॥ **स०** अन्यमनाःक्वयन्तरविवाहासक्तचित्तः ॥ २३ ॥ **स०** प्रवृत्तिं पुनर्वार्तां ॥ ३० ॥

[पा०] १ क.—ट. विवासान्मयि. २ ग. ङ.—ट. राघवः. ३ च. छ. मनौचितः. ४ क. ख. ग. ङ.—ट. रामेण. ५ ङ. झ. ट. त्यजतस्स्वराज्यं. ६ छ. झ. ञ. ट. पदातेः. ७ क. ग. ङ. च. छ. झ. ञ. ट. नचान्यः. ८ तावज्जहं.

इतीव देवी वचनं महार्थं तं वानरेन्द्रं मधुरार्थमुक्त्वा ॥
श्रोतुं पुनस्तस्य वचोभिरामं रामार्थयुक्तं विरराम रामा ॥ ३१ ॥
सीताया वचनं श्रुत्वा मारुतिर्भीमविक्रमः ॥ शिरस्यञ्जलिमाधाय वाक्यमुत्तरमब्रवीत् ॥ ३२ ॥
न त्वामिहस्थां जानीते रामः कमललोचने ॥ तेन त्वां नानयत्याशु शचीमिव पुरन्दरः ॥ ३३ ॥
श्रुत्वैव तु वचो मह्यं क्षिप्रमेष्यति राघवः ॥ चमूं प्रकर्षन्महतीं हर्यृक्षगणसंकुलाम् ॥ ३४ ॥
विष्टम्भयित्वा बाणौघैरक्षोभ्यं वरुणालयम् ॥ करिष्यति पुरीं लङ्कां काकुत्स्थः शान्तराक्षसाम् ॥३५॥
तत्र यद्यन्तरा मृत्युर्यदि देवाः सहासुराः ॥ स्थास्यन्ति पथि रामस्य स तानपि वधिष्यति ॥ ३६ ॥
तवादर्शनजेनार्ये शोकेन समभिप्लुतः ॥ न शर्म लभते रामः सिंहार्दित इव द्विपः ॥ ३७ ॥
मलयेन च विन्ध्येन मेरुणा मन्दरेण च ॥ दर्दुरेण च ते देवि शपे मूलफलेन च ॥ ३८ ॥
यथा सुनयनं वल्गु बिम्बोष्ठं चारुकुण्डलम् ॥ मुखं द्रक्ष्यसि रामस्य पूर्णचन्द्रमिवोदितम् ॥ ३९ ॥
क्षिप्रं द्रक्ष्यसि वैदेहि रामं प्रस्रवणे गिरौ ॥ शतक्रतुमिवासीनं नाकपृष्ठस्य मूर्धनि ॥ ४० ॥

यस्य प्रवृत्तिं शृणुयां शृणोमि । तावज्जिजीविषेयं जीवेयं । इच्छाया इष्यमाणप्रधानत्वादिष्यमाणं जीवनमिहाभिधीयते । रामः " न मांसं राघवो भुङ्क्ते " इत्युक्तरीत्या भोजनं, " अनिद्रः सततं रामः " इति निद्रां च हित्वा समुद्रं बद्ध्वा समागच्छन् तापार्ते प्रपां गते तस्यां भिन्नपानीयपात्रायां सत्यामिव मयि नष्टायां न जीवेत् । अतस्तदागमनपर्यन्तं मया जीवितव्यं परतन्त्रशरीरत्वात् । तदागमनानन्तरमपि यदि जीविष्यामि तदेत्थं वदेदिति भावः । एतावत्पर्यन्तं वानरेति संबोध्य संप्रति दूतेत्याह—रामविषयप्रणयरोषस्य दूतपर्यन्तं व्यापनात् । तेन प्रहितः खलु भवानपीति भावः । प्रणयरोषाभावपक्षेपि—न चास्येति ॥ अस्य माता चास्मिन्स्नेहात् मत्तः न विशिष्टा मया न समा च । यथाहमस्मिन् स्निग्धा तथानान्यइत्यर्थः । एतदेवोत्तरार्धेन समर्थयति—तावदिति ॥ ३० ॥ इतीव पूर्वं कतिपयानर्थान्विविच्योक्तवान् । संप्रति प्रणयधारासूक्ष्ममृषीणामपदं हि तत इतीवेत्याह—देवी । वल्लभाया व्यवहारो बहिष्ठानां न प्रतिभाति हि । वचनं महार्थं न केवलं बहिष्ठानां देशिकानामस्माकमपीत्यर्थः । महार्थमित्युक्तेः । तं वानरेन्द्रं । सुग्रीवस्य शेषत्वेभिषिक्तत्वेपि पारतन्त्र्ये हनुमानभिषिक्त इत्यर्थः । मधुरार्थं माधुर्येण मध्ये हनुमान्न वक्तुमारभतेति भावः । उक्त्वा स तदीयाश्च तयाभिवर्धन्ते तथोक्त्वा । श्रोतुं पुनस्तस्य वचोभिरामं स्ववचनानुरूपोत्तरं श्रोतुं । रामार्थयुक्तं रामप्रयोजनयुक्तं रामरूपाभिधेययुक्तं वा । विरराम स्वयं चिरभाषणात्स्वामिन्यां भाषमाणायां मध्ये भृत्येनोक्त्ययोगाच्च तूष्णींभूतस्यावकाशप्रदानमकरोत् । रामा पारंपर्यं विना साक्षाद्वचःसौन्दर्यदर्शनं रामेण न लब्धं हीति मुनिः खिद्यति ॥ ३१—३२ ॥ रामः न जीवेयं क्षणमपि विना तामसितेक्षणामित्यध्यवसायी। कथं नागच्छेत् । कमललोचने त्वन्नयनसौन्दर्यं दर्पणतलेपि किंन दृष्टवती भवती । एतत्सौन्दर्यवतीं कथं त्वां विना स तिष्ठेत् । तेन अनेन हेतुना । आशु त्वां नानयति । शचीं पुरन्दर इव । अनुद्वादहस्तगतां शचीमिन्द्रः कंचित्कालमविज्ञाय ज्ञानानन्तरं यथा आनीतवान् तथेति भावः ॥ ३३ ॥ मह्यं मम । व्यत्ययेन षष्ठ्यर्थे चतुर्थी ॥ ३४ ॥ समुद्रं कथमतिक्रमिष्यतीत्यत्राह—विष्टम्भयित्वेति ॥ विष्टम्भयित्वा स्तब्धं कृत्वेत्यर्थः ॥ ३५ ॥ स्थास्यन्ति प्रतिबन्धकतयेति शेषः ॥ ३६—३७ ॥ गिरीणां स्वजीवनस्थानत्वात्तैः शपति—मलयेनेति ॥ दर्दुरो नाम मलयपरिसरवर्ती चन्दनप्रभवः कश्चित्पर्वतः ॥ ३८ ॥ यथेति तथा शप इति पूर्वेणान्वयः ॥ ३९ ॥ नाकपृष्ठो नाम

ती० नागराजस्य ऐरावतस्य । नाकपृष्ठस्येतिपाठे स्वर्गोपरीत्यर्थः ॥ ति० प्रस्रवणेगिरौविद्यमानमपि । इहद्रक्ष्यसीत्यर्थः । नागपृष्ठस्यमूर्धनि ऐरावतोपरिस्थितमिन्द्रमिवमत्पृष्ठगंरामंद्रक्ष्यसीत्यर्थः । शि० नागाः गजाः पृष्ठे पार्श्वेइत्यर्थः । यस्यतस्य ॥ ४० ॥

[पा०] १ क. हनूमान्वाक्यमब्रवीत्. २ क. त्वामिहस्थांनजानीते. ३ ग. ङ.—ट. कमललोचनः. ४ ङ. ञ. ट. परिपूरितः. ५ ग.—ट. मन्दरेणचतेदेविशपेमूलफलेनच । मलयेनचविन्ध्येनमेरुणादर्दुरेणच. ६ ख. च. छ. नागराजस्य. ञ. ञ. ट. नागपृष्ठस्य.

न मांसं राघवो भुङ्क्ते न चापि मधु सेवते ॥ वन्यं सुविहितं नित्यं भक्तमश्नाति पञ्चमम् ॥ ४१ ॥
नैव दंशान्न मशकान्न कीटान्न सरीसृपान् ॥ राघवोपनयेद्भात्रात्त्वद्गतेनान्तरात्मना ॥ ४२ ॥
नित्यं ध्यानपरो रामो नित्यं शोकपरायणः ॥ नान्यच्चिन्तयते किंचित्स तु कामवशं गतः ॥४३॥
अनिद्रः सततं रामः सुप्तोपि च नरोत्तमः ॥ सीतेति मधुरां वाणीं व्याहरन्प्रतिबुध्यते ॥ ४४ ॥
दृष्ट्वा फलं वा पुष्पं वा यद्वाऽन्यत्सुमनोहरम् ॥ बहुशो हा प्रियेत्येवं शंसंस्त्वामभिभाषते ॥ ४५ ॥
स देवि नित्यं परितप्यमानस्त्वामेव सीतेत्यभिभाषमाणः ॥
दृढव्रतो राजसुतो महात्मा तवैव लाभाय कृतप्रयत्नः ॥ ४६ ॥
सा रामसंकीर्तनवीतशोका रामस्य शोकेन समानशोका ॥
शरन्मुखे साम्बुदशेषचन्द्रा निशेव वैदेहसुता बभूव ॥ ४७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

इन्द्रस्यासाधारणस्वर्गस्थानविशेषः ॥ ४० ॥ न मांसमिति "दृङ्मनःसङ्गसङ्कल्पजागराः कृशताऽरतिः । ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश" इति दशावस्थास्वरतिरनेनोच्यते । मांसाद्यभोजनं अरत्या ततः पूर्वं तद्भोजनोक्तेः । वन्यं वने भवं कन्दमूलादिकं । सुविहितं वानप्रस्थयोग्यत्वेन विहितं । भक्तं अन्नं । पञ्चमं प्रातःसङ्गवमध्याह्नापराह्णसायंरूपेषु कालेषु पञ्चमकालिकं शरीरधारणमात्रोपयुक्तं भुङ्क्ते इत्यर्थः ॥ ४१ ॥ अथ मनःसङ्गावस्थामाह—नैवेति ॥ दंशास्तु वनमक्षिकाः तान् । मशकांश्चेत्यनेन दंशमशकापरिज्ञानमुक्तं । कीटसरीसृपोक्त्या उपरिशरीरं चरतामनिवृत्तिरुच्यते । तत्र हेतुः त्वद्गतेनान्तरात्मना । परकायप्रविष्टस्य कथं त्यक्तशरीरविकृतिज्ञानं । तत्र स्थितः खलु तत्रत्यपीडां ज्ञास्यतीति भावः ॥ ४२—४३ ॥ तथास्य जागरावस्थामाह—अनिद्र इति ॥ अनिद्रः सततं रामः निद्रया सर्वदा कालक्षेपार्होपि संततमनिद्रोभूत् । सुप्तोपिचेत्यनेन परगतार्थानुसंधानाभाव उच्यते । नरोत्तमः अभिमतविश्लेषे तथावस्थानमेव हि पुरुषोत्तमत्वस्य लक्षणमिति भावः । सीतेति अप्राकृतसौन्दर्याद्यनुसंधानेन वासनावशाद्विलपति । मधुरां वाणीं । वासनावशाद्विलपत्यपिशब्दस्वभावाद्रसनाजलस्यन्दिनी भवतीत्यर्थः । प्रतिबुध्यते क्लेशहीनदशाविगमात्पुनरपि बाधकोद्दीपनसंदर्शनेन बाधार्हः स्थित इत्यर्थः ॥ ४४—४६ ॥ रामसद्भावातिशङ्क्या कश्चिच्छोकः सीतायाः रामविरहेण कश्चिच्छोकः । तत्राद्यो हनुमदुक्त्या निवृत्तः द्वितीयस्तु वर्तत इत्याह—रामस्य शोकेन समानशोका तद्विरहकृतत्वेन तत्तुल्यशोका । अधिकशोकस्तु निवृत्त इति भावः । यद्वा रामसंकीर्तनेन वीतशोकापि नैवं दंशान्न मशकानित्यादिश्रवणेन रामतुल्यशोका प्रकाशाप्रकाशशरन्मुखनिशेवाभूदित्यर्थः ॥ ४७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्त्रिंशः सर्गः ॥ ३६ ॥

ती० भक्तं अन्नं पञ्चमं पञ्चानामन्नानांपूरणं । वानप्रस्थाहिमूलफलादिकंपञ्चधाकृत्वादेवपित्रतिथिभूतेभ्यस्तद्भागान्दत्वा पञ्चमं स्वयंभुञ्जते । यद्वा षोडशारण्यवासिनइत्युक्तवानप्रस्थभोज्यस्यपञ्चमांशंभुङ्क्ते । अनेनरामस्याल्पाहारतोक्ता ॥ ति० पञ्चमं कालं प्राप्येतिशेषः । यद्वा प्रातस्सायंसायंप्रातरितिकालचतुष्टयंलक्ष्यं पञ्चमेप्रातःकालइत्यर्थः । दिनद्वयमतीत्यभुङ्क्तइत्यर्थः । शि० मांसं सुग्रीवसंसर्गेणवनेपि प्राप्तराज्यभोगं । नभुङ्क्ते नकरोति । वन्यं फलादिरूपंअन्नं पञ्चमं पूर्वभोज्यापेक्षयापञ्चमं ॥ ४१ ॥ ति० स्त्रीमनोहरं स्त्रीसंनिधानेमनोहरं । स्त्रीणांमनोहरंवा । श्वसन् दीर्घोच्छ्वासंत्यजन् ॥ ४५ ॥ ती० नमांसंराघवोभुङ्क्तेइत्युक्तशोकेनहेतुना समानशोका ॥ ति० नमांसंराघवोभुङ्क्तेइत्युक्तेनरामशोकेन समानशोका । शरत् लुप्तषष्ठीकं । शरदोनिशेव प्रकाशाप्रकाशयुक्तशरन्निशेवहर्षशोकवतीबभूव ॥ ४७ ॥ इतिषट्त्रिंशःसर्गः ॥ ३६ ॥

[पा०] १ ङ. ज. झ. ट. नचैव. २ ख. देवंसतु. ३ क. रात्रौ. ४ क. ग. घ. ङ. ज. झ. ट. यच्चान्यत्स्त्रीमनोहरं. च. छ. ञ. यद्वान्यत्स्त्रीमनोहरं. ५ क. शोचंस्त्वां. ट. स्मरंस्त्वां. ६ ग. ङ. झ. ट. धृतव्रतो. ७ ङ. झ. शरन्मुखेनांबुद. च. छ. ञ. शरन्मुखेसाम्बुदचन्द्रशे ा.

सप्तत्रिंशः सर्गः ॥ ३७ ॥

स्ववियोगहेतुकरामशोकातिरेकश्रवणखिन्नयासीतया सत्वरंरामसमानयनंचोदितेनहनुमता सीताशोकासहनेनतांप्रति तस्याःस्वपृष्ठारोपणेनरामसमीपप्रापणोक्तिः ॥ १ ॥ सीतया हनुमतोऽणुरूपतयास्वप्रापणासंभावनाशङ्कयोपहासे हनुमता तस्याःप्रत्ययजननाय मेरुतुल्यपरिमाणकपृथुतरशरीरपरिग्रहणम् ॥ २ ॥ सीतयातंप्रति बहुहेतूपन्यासेनतेनसहगमनस्यानौचित्यप्रतिपादनपूर्वकं सत्वरंरामस्यैवसमानयनचोदना ॥ ३ ॥

सीता तद्वचनं श्रुत्वा पूर्णचन्द्रनिभानना ॥ हनूमन्तमुवाचेदं धर्मार्थसहितं वचः ॥ १ ॥
अमृतं विषसंसृष्टं त्वया वानर भाषितम् ॥ यच्च नान्यमना रामो यच्च शोकपरायणः ॥ २ ॥
ऐश्वर्ये वा सुविस्तीर्णे व्यसने वा सुदारुणे ॥ रज्ज्वेव पुरुषं बद्ध्वा कृतान्तः परिकर्षति ॥ ३ ॥
विधिर्नूनमसंहार्यः प्राणिनां प्लवगोत्तम ॥ सौमित्रिं मां च रामं च व्यसनैः पश्य मोहितान् ॥ ४ ॥
शोकस्यास्य कदा पारं राघवोऽधिगमिष्यति ॥ प्लवमानः परिश्रान्तो हतनौः सागरे यथा ॥ ५ ॥
राक्षसानां वधं कृत्वा सूदयित्वा च रावणम् ॥ लङ्कामुन्मूलितां कृत्वा कदा द्रक्ष्यति मां पतिः ॥ ६ ॥
स वाच्यः संत्वरस्वेति यावदेव न पूर्यते ॥ अयं संवत्सरः कालस्तावद्धि मम जीवितम् ॥ ७ ॥
वर्तते दशमो मासो द्वौ तु शेषौ प्लवङ्गम ॥ रावणेन नृशंसेन समयो यः कृतो मम ॥ ८ ॥
विभीषणेन च भ्रात्रा मम निर्यातनं प्रति ॥ अनुनीतः प्रयत्नेन न च तत्कुरुते मतिम् ॥ ९ ॥
मम प्रतिप्रदानं हि रावणस्य न रोचते ॥ रावणं मार्गते सङ्घे मृत्युः कालवशं गतम् ॥ १० ॥
ज्येष्ठा कन्याऽनला नाम विभीषणसुता कपे ॥ तया ममेदमाख्यातं मात्रा प्रहितया स्वयम् ॥ ११ ॥
[अविन्ध्यो नाम मेधावी विद्वान्राक्षसपुङ्गवः । द्युतिमाञ्शीलवान्वृद्धो रावणस्य सुसंमतः ॥
रामक्षयमनुप्राप्तं रक्षसां प्रत्यचोदयत् ॥ न च तस्य स दुष्टात्मा शृणोति वचनं हितम् ॥ १३ ॥]
असंशयं हरिश्रेष्ठ क्षिप्रं मां प्राप्स्यते पतिः ॥ अन्तरात्मा हि मे शुद्धस्तस्मिंश्च बहवो गुणाः ॥ १४ ॥
उत्साहः पौरुषं सत्त्वमानृशंस्यं कृतज्ञता ॥ विक्रमश्च प्रभावश्च सन्ति वानर राघवे ॥ १५ ॥
चतुर्दश सहस्राणि राक्षसानां जघान यः ॥ जनस्थाने विना भ्रात्रा शत्रुः कस्तस्य नोद्विजेत् ॥ १६ ॥
न स शक्यस्तुलयितुं व्यसनैः पुरुषर्षभः ॥ अहं तस्य प्रभावज्ञा शक्रस्येव पुलोमजा ॥ १७ ॥
शरजालांशुमाञ्छूरः कपे रामदिवाकरः ॥ शत्रुरक्षोमयं तोयमुपशोषं नयिष्यति ॥ १८ ॥

यच्च नान्यमना इत्यमृतत्वे हेतुः । यच्छोकपरायण इति विषसंसृष्टत्वे ॥ २ ॥ रामवियोगो न स्वबुद्धिकृत इत्याह—ऐश्वर्य इति ॥ कृतान्तः दैवं ॥ ३ ॥ विधिः दैवं । असंहार्यः अनिवार्यः ॥ ४—७ ॥ दशमोमासः दशममासान्तः ॥ ८ ॥ निर्यातनं प्रत्यर्पणं ॥ ९—१४ ॥ लोकोत्तरेषु कार्येषु स्थेयान् प्रयत्न उत्साहः । पौरुषं तादृक्कार्यकरणं । सत्त्वं बलं । आनृशंस्यं अक्रूरत्वं । कृतज्ञता उपकारज्ञत्वं । विक्रमः शौर्यं । प्रभावः शक्तिः ॥ १५—१६ ॥ तुलयितुं चालयितुं ॥ १७—

शि० ऐश्वर्येव्यसनेवाविद्यमानंपुरुषं रज्ज्वाबद्ध्वेवकृतान्तःकालःपरिकर्षति । एतेन रावणविध्वंसोऽवश्यंभवितेतिसूचितं ॥ ३ ॥ ति० कन्या अजातपुरुषसंबन्धा । एतत् विभीषणानुनयनं । इदमेवाग्रे रामश्रुतंविभीषणस्यनिश्शङ्कपरिग्रहाभिषेकयोर्बीजं ॥ ११ ॥ ति०व्यसनैः व्यसनदातृभीराक्षसैः । तुलयितुं उपमितुं । तस्यतत्वंचममप्रत्यक्षमेवेत्याह—अहंतस्येति । तद्रूपत्वादितिगूढं ॥ १७ ॥

[पा०] १ क. ग. ङ. च. छ. झ. ञ. ट. सासीतावचनं. घ. सीताचवचनं. २ ङ. च. छ. झ. ञ. ट. विषसंपृक्तं. ख. घ. विषसंस्पृष्टं. ३ च. छ. ज. शोकस्यच. ४ ङ. झ. ट. कथं. ५ ङ. च. छ. झ. ञ. ट. परिक्रान्तो. ६ क—घ. क्षयं. ७ ङ. झ. ट. मुन्मथितां. ८ घ. मनः. ९ ङ. झ. ञ. कन्याकला. १० झ. ममैतदाख्यातं. ११ च. छ. ट. मात्राऽभिहितया १२ इदंश्लोकद्वयं ङ—ट. पाठेषुदृश्यते. १३ क.—घ. झ. ट. आशंसेयं. १४ ग. ङ. च. छ. झ. ञ. ट. तस्यानुभावज्ञा.

इति संजल्पमानां तां रामार्थे शोककर्शिताम् ॥ अश्रुसंपूर्णनयनामुवाच वचनं कपिः ॥ १९ ॥
कृत्वैव[2] तु वचो मह्यं क्षिप्रमेष्यति राघवः ॥ चमूं प्रकर्षन्महतीं हर्यृक्षगणसंकुलाम् ॥ २० ॥
अथवा मोचयिष्यामि त्वामद्यैव वरानने[3] ॥ अस्माद्दुःखादुपारोह मम पृष्ठमनिन्दिते ॥ २१ ॥
त्वां तु पृष्ठगतां कृत्वा संतरिष्यामि सागरम् ॥ शक्तिरस्ति हि मे वोढुं लङ्कामपि सरावणाम्[4] ॥२२॥
अहं प्रस्रवणस्थाय राघवायाद्य मैथिलि ॥ प्रापयिष्यामि शक्राय हव्यं[5] हुतमिवानलः ॥ २३ ॥
द्रक्ष्यस्यद्यैव वैदेहि राघवं सहलक्ष्मणम् ॥ व्यवसायसमायुक्तं विष्णुं दैत्यवधे यथा ॥ २४ ॥
त्वद्दर्शनकृतोत्साहमाश्रमस्थं महाबलम् ॥ पुरन्दरमिवासीनं नाकराजस्य[6] मूर्धनि ॥ २५ ॥
पृष्ठमारोह मे देवि मा विकाङ्क्षस्व शोभने ॥ योगमन्विच्छ रामेण शशाङ्केनेव रोहिणी[7] ॥ २६ ॥
कथयन्तीव[8] चन्द्रेण सूर्येण च महार्चिषा ॥ मत्पृष्ठमधिरुह्य[9] त्वं तेराकाशमहार्णवौ[10] ॥ २७ ॥
न हि मे संप्रयातस्य त्वामितो नयतोऽन्तरे ॥ अनुगन्तुं गतिं शक्ताः सर्वे लङ्कानिवासिनः ॥ २८ ॥
यथैवाहमिह प्राप्तस्तथैवाहमसंशयः[11] ॥ यास्यामि पश्य वैदेहि त्वामुद्यम्य विहायसम्[12] ॥ २९ ॥
मैथिली तु हरिश्रेष्ठाच्छ्रुत्वा वचनमद्भुतम् ॥ हर्षविस्मितसर्वाङ्गी[13] हनुमन्तमथाब्रवीत् ॥ ३० ॥
हनुमन्दूरमध्वानं कथं मां[14] वोढुमिच्छसि ॥ तदेव खलु ते मन्ये कपित्वं हरियूथप ॥ ३१ ॥
कथं वाऽल्पशरीरस्त्वं मामितो नेतुमिच्छसि ॥ सकाशं मानवेन्द्रस्य भर्तुर्मे प्लवगर्षभ ॥ ३२ ॥
सीतायाः[15] वचनं श्रुत्वा हनुमान्मारुतात्मजः ॥ चिन्तयामास लक्ष्मीवान्नवं परिभवं कृतम् ॥ ३३ ॥
न मे जानाति सत्त्वं वा प्रभावं वासितेक्षणा ॥ तस्मात्पश्यतु वैदेही यद्रूपं मम कामतः[16] ॥ ३४ ॥
इति संचिन्त्य हनुमांस्तदा प्लवगसत्तमः ॥ दर्शयामास वैदेह्याः स्वरूपमरिमर्दनः ॥ ३५ ॥
स तस्मात्पादपाद्धीमानाप्लुत्य प्लवगर्षभः ॥ ततो वर्धितुमारेभे सीताप्रत्ययकारणात् ॥ ३६ ॥
मेरुमन्दरसंकाशो बभौ दीप्तानलप्रभः ॥ अग्रतो व्यवतस्थे च सीताया वानरोत्तमः ॥ ३७ ॥

---

२४ ॥ नाकराजस्य मूर्धनि । नाकपृष्ठसंज्ञस्य मूर्धनि । नगराजस्येति पाठे मेरोरित्यर्थः ॥ २५ ॥ मा विकाङ्क्षस्व मोपेक्षिष्ठाः ॥ २६ ॥ चन्द्रेण कथयन्तीव चन्द्रेण भाषमाणेव तरेत्यन्वयः ॥२७—२९॥ हर्षविस्मितसर्वाङ्गी हर्षेण पुलकितसर्वाङ्गी ॥ ३० —३३ ॥ न मे जानाति सत्त्वं वा प्रभावं वासितेक्षणा । तस्मात्पश्यतु वैदेही यद्रूपं मम कामतः ॥ इति पाठः । अन्यथा पाठे वक्ष्यमाणेन विरोधः स्यात् ॥ ३४ ॥ स्वरूपं स्वस्य शरीरं ॥ ३५ ॥ एतदेवाह— स तस्मादिति ॥ अयं श्लोको वर्धनार्थं वृक्षादवरोहणं दर्शयति स्म । अनेन सोवतीर्य द्रुमादिति पूर्वं द्रुमाग्रात्सीतासमीपस्थशाखायामवतरणमुक्तं । अत्र भूमाविति बोध्यं ॥ ३६ ॥ अग्रतोऽव्यवतस्थे । संभाषणाय

ति० नगराजस्य श्रेष्ठस्यप्रस्रवणगिरेरित्यर्थः ॥२५॥ ति० कथयन्तीव संगतव्योरामइतिवचनंकथयन्तीव । शशिनारोहिणीवसंगमिष्यसीत्यन्वयः । एतद्वचनसमकालमेवरामसमीपंप्रापयिष्यामीत्यर्थः । यथातद्वचने नप्रयासः एवमनायासेनत्वांनयामीत्यर्थोवा । स० त्वत्पृष्ठारोहणेकिंफलमित्यतआह—कथयन्तीति । त्वंमत्पृष्ठारोहिणीति रोहिणी अतिसुखात्मकत्वाच्छशीरामः । यद्वा शशीरामः'नक्षत्राणामहंशशी'इतिश्रीभगवदुक्तेः । कथयन्तीवसंगमिष्यसि । रामेणसंगतव्यमित्यालापनसमयएवसंगमिष्यसि । अनेनातित्वराद्योत्यते ॥ २७ ॥ ती० पादपात् पादपमूलात् । आप्लुत्य शरीरवर्धनवेगकृतशाखाभङ्गध्वनिनाराक्षस्योज्ञास्यन्तीतिमत्वा

[पा०] १ ग.—ट. संपूर्णवदनां. २ ङ. झ. ट. श्रुत्वैवच. क. घ. च. छ. ज. ञ. श्रुत्वैवतु. ३ ङ. च. छ. झ. ञ. ट. सराक्षसात्. क. ख. हिराक्षसात्. घ. ज. सरावणात्. ४ घ. हुतंहव्यं. ५ क. क्षिप्रंद्रक्ष्यसि. ६ ख. ग. ङ. च. छ. झ. ञ. ट. नगराजस्य. ७ क. ग. घ. च. छ. ज. ञ. ट. पौलोमीवमहेन्द्रेणसूर्येणेवसुवर्चला. ङ. झ. कथयन्तीवशशिनासंगमिष्यसिरोहिणी. ८ ङ.—ट. मधिरोहत्वं. ९ ग. घ. ङ. झ. ट. तराकाशंमहार्णवं. १० ग. ङ.—ट. मसंशयं. ११ ख. घ. विहायसा. १२ घ. सासीतास्मितपूर्वंहि. १३ ङ. झ. ट. मानेतुं. १४ घ. ङ. झ. ट. सीतायास्तुवचः. १५ क. काङ्क्षतः.

हरिः पर्वतसंकाशस्ताम्रवक्त्रो महाबलः ॥ वज्रदंष्ट्रनखो भीमो वैदेहीमिदमब्रवीत् ॥ ३८ ॥
सपर्वतवनोद्देशां साट्टप्राकारतोरणाम् ॥ लङ्कामिमां सनाथां वा नयितुं शक्तिरस्ति मे ॥ ३९ ॥
तदवस्थाप्यतां बुद्धिरलं देवि विकाङ्क्षया ॥ विशोकं कुरु वैदेहि राघवं सहलक्ष्मणम् ॥ ४० ॥
तं दृष्ट्वा भीमसंकाशमुवाच जनकात्मजा ॥ पद्मपत्रविशालाक्षी मारुतस्यौरसं सुतम् ॥ ४१ ॥
तव सत्त्वं बलं चैव विजानामि महाकपे ॥ वायोरिव गतिं चापि तेजश्चाग्नेरिवाद्भुतम् ॥ ४२ ॥
प्राकृतोऽन्यः कथं चेमां भूमिमागन्तुमर्हति ॥ उदधेरप्रमेयस्य पारं वानरपुङ्गव ॥ ४३ ॥
जानामि गमने शक्तिं नयने चापि ते मम ॥ अवश्यं संप्रधार्यांशु कार्यसिद्धिर्महात्मनः ॥ ४४ ॥
अयुक्तं तु कपिश्रेष्ठ मम गन्तुं त्वयाऽनघ ॥ वायुवेगसवेगस्य वेगो मां मोहयेत्तव ॥ ४५ ॥
अहमाकाशमापन्ना ह्युपर्युपरि सागरम् ॥ प्रपतेयं हि ते पृष्ठाद्भयाद्वेगेन गच्छतः ॥ ४६ ॥
पतिता सागरे चाहं तिमिनक्रझषाकुले ॥ भवेयमाशु विवशा यादसामन्नमुत्तमम् ॥ ४७ ॥
न च शक्ष्ये त्वया सार्धं गन्तुं शत्रुविनाशन ॥ कलत्रवति संदेहस्त्वय्यपि स्यादसंशयः ॥ ४८ ॥
ह्रियमाणां तु मां दृष्ट्वा राक्षसा भीमविक्रमाः ॥ अनुगच्छेयुरादिष्टा रावणेन दुरात्मना ॥ ४९ ॥
तैस्त्वं परिवृतः शूरैः शूलमुद्गरपाणिभिः ॥ भवेस्त्वं संशयं प्राप्तो मया वीर कलत्रवान् ॥ ५० ॥
सायुधा बहवो व्योम्नि राक्षसास्त्वं निरायुधः ॥ कथं शक्ष्यसि संयातुं मां चैव परिरक्षितुम् ॥५१॥
युध्यमानस्य रक्षोभिस्तव तैः क्रूरकर्मभिः ॥ प्रपतेयं हि ते पृष्ठाद्भयार्ता कपिसत्तम ॥ ५२ ॥
अथ रक्षांसि भीमानि महान्ति बलवन्ति च ॥ कथंचित्सांपराये त्वां जयेयुः कपिसत्तम ॥ ५३ ॥
अथवा युध्यमानस्य पतेयं विमुखस्य ते ॥ पतितां च गृहीत्वा मां नयेयुः पापराक्षसाः ॥ ५४ ॥
मां वा हरेयुस्त्वद्वस्ताद्विशसेयुरथापि वा ॥ अव्यवस्थौ हि दृश्येते युद्धे जयपराजयौ ॥ ५५ ॥
अहं वाऽपि विपद्येयं रक्षोभिरभितर्जिता ॥ त्वत्प्रयत्नो हरिश्रेष्ठ भवेन्निष्फल एव तु ॥ ५५ ॥
कामं त्वमसि पर्याप्तो निहन्तुं सर्वराक्षसान् ॥ राघवस्य यशो हीयेत्त्वया शस्तैस्तु राक्षसैः ॥ ५७ ॥
अथवाऽऽदाय रक्षांसि न्यसेयुः संवृते हि माम् ॥ यत्र ते नाभिजानीयुर्हरयो नापि राघवौ ॥
आरम्भस्तु मदर्थोऽयं ततस्तव निरर्थकः ॥ ५८ ॥

वृक्षमूलगतो बभूवेत्यर्थः ॥ ३७—३९ ॥ अवस्थाप्यतां निश्चलीक्रियतां। विकाङ्क्षया उपेक्षया ॥ ४०–४३ ॥ संप्रधार्या विचारणीया ॥ ४४ ॥ स्वप्रापणे प्रधानं दोषं हृदि कृत्वा आपाततो दोषमाह—अयुक्तमिति ॥ ४५ ॥ उपर्युपरि सागरमिति। " उपर्यध्यधसस्सामीप्ये " इति द्विवचनं। 'धिगुपर्यादिषु'इति द्वितीया ॥ ४६ ॥ यादसां जलजन्तूनां ॥ ४७ ॥ कलत्रवति रक्ष्यवति त्वयि संदेहः स्यात्। मयि रक्ष्यायां त्वयि विपत्संदेहः स्यादित्यर्थः ॥ ४८ ॥ एतदेव प्रपञ्चयति—ह्रियमाणामित्यादिना ॥ ४९ ॥ त्वं तैः परिवृतो भवेः। कलत्रवान् रक्ष्यवान्। त्वं संशयं प्राप्तश्च भवेरिति योजना ॥ ५० ॥ संयातुं सम्यग्योद्धुं ॥ ५१ ॥ पूर्वश्लोकोक्तं समर्थयति—युध्यमानस्येत्यादिना ॥ ५२ ॥ सांपराये युद्धे ॥ ५३ ॥ विमुखस्य युद्धपरवशस्येत्यर्थः ॥ ५४—५७ ॥ संवृते गूढ-

---

ऽन्यत्रापहृतवानित्यर्थः ॥ ३६ ॥ ति० कलत्रवति स्त्रियासहगन्तरि। संदेहः राक्षसानामितिशेषः। स० कलत्रवति मद्रूपकल-

[पा०] १ क.—ट. दृष्टाचलसंकाशं. २ ङ.—झ. ट. गतिश्चापि. ३ ङ. झ. सिद्धिरिवात्मनः. क. च. छ. ज. सिद्धिरिहात्मनः. ४ ग. ङ.—ट. मयागन्तुं. ५ ग. ङ.—ट. त्वयासह. ६ क. ग. ङ.—ट. मासक्ता. ७ ङ.—ट. द्रुवोवेगेन. ८ च. छ. ज. नाहंशक्ष्ये. ९ क. संयोद्धुं. १० क. ग. ङ. च. छ. झ. ञ. ट. रक्षोभिस्तततस्तैः. घ. रक्षोभिस्समस्तैः. ११ ग. च. छ. नयेयुः. १२ क. ख. ग. ङ.—ट. राघवः. १३ क. प्रयत्नस्तुमदर्थाय.

त्वया हि सह रामस्य महानागमने गुणः ॥ ५९ ॥
मयि जीवितमायत्तं राघवस्य महात्मनः ॥ भ्रातॄणां च महाबाहो तव राजकुलस्य च ॥ ६० ॥
तौ निराशौ मदर्थं तु शोकसंतापकर्शितौ ॥ सह सर्वर्क्षहरिभिस्त्यक्ष्यतः प्राणसंग्रहम् ॥ ६१ ॥
भर्तृभक्तिं पुरस्कृत्य रामादन्यस्य वानर ॥ नं स्पृशामि शरीरं तु पुंसो वानरपुङ्गव ॥ ६२ ॥
यदहं गात्रसंस्पर्शं रावणस्य बलाद्गता ॥ अनीशा किं करिष्यामि विनाथा विवशा सती ॥ ६३ ॥
यदि रामो दशग्रीवमिह हत्वा सबान्धवम् ॥ मामितो गृह्य गच्छेत तत्तस्य सदृशं भवेत् ॥ ६४ ॥
श्रुता हि दृष्टाश्च मया पराक्रमा महात्मनस्तस्य रणावमर्दिनः ॥
न देवगन्धर्वभुजङ्गराक्षसा भवन्ति रामेण समा हि संयुगे ॥ ६५ ॥
समीक्ष्य तं संयति चित्रकार्मुकं महाबलं वासवतुल्यविक्रमम् ॥
सलक्ष्मणं को विषहेत राघवं हुताशनं दीप्तमिवानिलेरितम् ॥ ६६ ॥
सलक्ष्मणं राघवमाजिमर्दनं दिशागजं मत्तमिव व्यवस्थितम् ॥
सहेत को वानरमुख्य संयुगे युगान्तसूर्यप्रतिमं शरार्चिषम् ॥ ६७ ॥
स मे हरिश्रेष्ठ सलक्ष्मणं पतिं सयूथपं क्षिप्रमिहोपपादय ॥
चिराय रामं प्रति शोककर्शितां कुरुष्व मां वानरमुख्य हर्षिताम् ॥ ६८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

प्रदेशे ॥५८—५९॥ तवराजकुलस्य सुग्रीवराजकुलस्य ॥६०—६२॥ अनीशा स्वयं किंचित्कर्तुमसमर्था । विनाथा विगतस्वामिका । विवशा विचेष्टा ॥ ६३—६४ ॥ प्रथमहिशब्दो गुणप्रसिद्धौ । द्वितीयो निस्समत्वप्रसिद्धौ ॥ ६५—६७ ॥ हर्षितां हर्षमासादितां । उत्तरोत्तरहर्षवतीमित्यर्थः । अनया भक्तिकया उपायान्तरं स्वरूपविरुद्धं भगवत्प्राप्तौ स एवोपाय इति दर्शितः ॥ ६८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तत्रिंशस्सर्गः ॥ ३७ ॥

त्रवतिरामे । त्वयि त्वद्विषये । असंशयंयथातथा संदेहः परपुरुषेणसहैकाऽऽयातेतिसंदेहः ॥ ४८ ॥ **ती०** ननुरावणाङ्गसंस्पर्शः कथंस्यादित्यतआह—भर्तुरिति । यस्मात्कारणात्भर्तुर्भक्तिंपुरस्कृत्य भर्तुर्भक्त्यालक्ष्मणःप्रस्थापितः । तस्माद्रावणस्यगात्रसंस्पर्शबलाद्गतेतिसंबन्धः । हासीतेलक्ष्मणेतिमारीचवाक्यंश्रुत्वा रामानर्थशङ्कयाभर्तृभक्त्यालक्ष्मणप्रस्थापनात्प्राप्तोऽयमनर्थोकामकृतइतिभावः । अनीशा स्वयंकिंचित्कर्तुमशक्नुवती । विवशा विचेष्टा । विनाथा विगतस्वामिका असंनिहितनाथेत्यर्थः ॥ ६२—६३ ॥ **ति०** तत्तस्यसदृशं स्वमहिम्नासगर्णशत्रुंहत्वामन्नयनं । सगणरावणवधार्थमेवावतारात् तस्यचमद्गमनेऽसंभवात् । एवंचस्वकार्यानिष्पत्त्यागतायामपिकुज्ञेदितिगूढं ॥ ६४ ॥ **ति०** तादृशबलंचतस्यमयासुविदितमित्याह—श्रुताश्चेति । विश्वामित्रयज्ञादौकृताः वालिवधादयश्चश्रुताः । अन्येदृष्टाः ॥ **स०** रणावमर्दिनः रणेवैर्यवमर्दी । रणेअवन्तिरक्षयन्तिआगच्छन्तिस्वानितिवा रणावाः । तान्मर्दीतिवा ॥ ६५ ॥ **स०** वासवतुल्यविक्रमं वासवोपितुल्यविक्रमः योग्यतानुसारिपराक्रमोयेनसतथा । इतरोर्थःस्फुटः ॥ ६६ ॥ **स०** सयूथपं ससुग्रीवं । कपिश्रेष्ठ वानरवीरेति प्रलापकालत्वाद्विरुक्तिः । यद्वा रामंप्रतिशोककर्शितां नरवीरेणरामेणहर्षितां कुरुष्वेत्यर्थः ॥ ६८ ॥ इतिसप्तत्रिंशःसर्गः ॥ ३७ ॥

[**पा०**] १ ङ.—ट. राघवस्यामितौजसः. २ क.—घ. ज.—ट. भर्तुर्भक्तिं. ३ ङ. झ. ट. नाहंस्प्रष्टुंस्वतोगात्रमिच्छेयं वानरोत्तम. च. छ. ज. ञ. मयांपुनःपुमानन्योनयुक्तःस्प्रष्टुमात्मना. ४ ग.—ट. गतावलात्. ५ क. ख. घ.—ट. सराक्षसं. ६ ङ. झ. ट. प्रियं. ७ क.—ज. ट. वानरवीर.

अष्टत्रिंशः सर्गः ॥ ३८ ॥

हनुमता रामप्रत्यायनायाभिज्ञानंयाचितयासीतया तंप्रति काकासुरवृत्तान्तस्याभिज्ञानत्वेननिवेदनचोदना ॥ १ ॥ तथा हनुमन्तंप्रति रामलक्ष्मणयोःक्रमेणाभिवादनकुशलप्रश्ननिवेदनचोदनपूर्वकं मासद्वयस्यसंकेतसमयावशिष्टत्वेष्येकमासपर्यन्तमेव स्वेनप्राणधारणप्रतिज्ञानेनसहाभिज्ञानान्तरत्वेनतस्मिन्स्वचूडामणिदानम् ॥ २ ॥

ततः स कपिशार्दूलस्तेन वाक्येन हर्षितः ॥ सीतामुवाच तच्छ्रुत्वा वाक्यं वाक्यविशारदः ॥ १ ॥
युक्तरूपं त्वया देवि भाषितं शुभदर्शने ॥ सदृशं स्त्रीस्वभावस्य साध्वीनां विनयस्य च ॥ २ ॥
स्त्रीत्वं न तु समर्थं हि सागरं व्यतिवर्तितुम् ॥ मामधिष्ठाय विस्तीर्णं शतयोजनमायतम् ॥ ३ ॥
द्वितीयं कारणं यच्च ब्रवीषि विनयान्विते ॥ रामादन्यस्य नार्हामि संस्पर्शमिति जानकि ॥ ४ ॥
एतत्ते देवि सदृशं पत्न्यास्तस्य महात्मनः ॥ का ह्यन्या त्वामृते देवि ब्रूयाद्वचनमीदृशम् ॥ ५ ॥
श्रोष्यते चैव काकुत्स्थः सर्वं निरवशेषतः ॥ चेष्टितं यत्त्वया देवि भाषितं मम चाग्रतः ॥ ६ ॥
कारणैर्बहुभिर्देवि रामप्रियचिकीर्षया ॥ स्नेहप्रस्कन्नमनसा मयैतत्समुदीरितम् ॥ ७ ॥
लङ्घाया दुष्प्रवेशत्वाद्दुस्तरत्वान्महोदधेः ॥ सामर्थ्यादात्मनश्चैव मयैतत्समुदीरितम् ॥ ८ ॥
इच्छामि त्वां समानेतुमद्यैव रघुबन्धुना ॥ गुरुस्नेहेन भक्त्या च नान्यथैतदुदाहृतम् ॥ ९ ॥
यदि नोत्सहसे यातुं मया सार्धमनिन्दिते ॥ अभिज्ञानं प्रयच्छ त्वं जानीयाद्राघवो हि तत् ॥१०॥
एवमुक्ता हनुमता सीता सुरसुतोपमा ॥ उवाच वचनं मन्दं बाष्पप्रग्रथिताक्षरम् ॥ ११ ॥
इदं श्रेष्ठमभिज्ञानं ब्रूयास्त्वं तु मम प्रियम् ॥ शैलस्य चित्रकूटस्य पादे पूर्वोत्तरे पुरा ॥ १२ ॥

तच्छ्रुत्वा तेन वाक्येन हर्षितः वाक्यमुवाच ॥१॥ युक्तरूपं युक्ततरमित्यर्थः । प्रशंसायां रूपप् । प्राशस्त्यंचात्र प्रकृत्यर्थवैशिष्ट्यं । स्त्रीस्वभावस्य भीरुत्वादेः । साध्वीनां पतिव्रतानां । विनयस्य वृत्तस्य ॥ २ ॥ विस्तीर्णं मामधिष्ठाय शतयोजनमायतं सागरं व्यतिवर्तितुं तर्तुं । स्त्रीत्वं न समर्थं हि । स्त्री न समर्थेत्यर्थः । यद्वा सागरस्य शतयोजनं आयतं विस्तीर्णं च मामधिष्ठायापि स्त्रीत्वं व्यतिवर्तितुं अपगन्तुं । न समर्थं हि । सागरस्य शतयोजनं यावत्तावदायतं तथा विस्तीर्णं च मामधितिष्ठन्त्या अपि तव स्त्रीत्वं भीरुत्वं नापगच्छतीत्यर्थः ॥ ३—५ ॥ त्वया चेष्टितं उद्बन्धनादिकं । भाषितं रावणं तृणीकृत्य फणितं । मम प्रत्युत्तरत्वेन कथितं च ॥ ६ ॥ बहुभिः कारणैः बहुभिरुपायैः । स्नेहप्रस्कन्नमनसा स्नेहशिथिलमनसा ॥ ७ ॥ लङ्घायाइति दुष्प्रवेशलङ्घाप्रवेशे दुस्तरसागरतरणे च मम शक्तिरस्तीति ज्ञापयितुमेवमुक्तमित्यर्थः ॥ ८ ॥ रघुबन्धुना रघुवंश्येन । " सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनास्समाः " इत्यमरः। रघुवंश्यानां बन्धुना तत्कीर्तिसंपादकेनेत्यथः । समानेतुं संगमयितुं । इच्छामि ऐच्छं ॥ ९—१० ॥ बाष्पप्रग्रथिताक्षरं बाष्पेण विघ्निताक्षरं । एकान्तवृत्तान्तस्मरणाद्बाष्पः ॥ ११ ॥ इदमित्यादिश्लोकद्वयमेकान्वयं ॥ चित्रकूटस्य पादे चित्रकूटप्रत्यन्तपर्वते । मन्दाकिन्या अदूरे सिद्धैराश्रिते प्राज्यमूलफलोदके

ती० यद्वा स्त्रीलमित्यत्र स्त्रीइतिच्छेदः । समर्थमितिलिङ्गव्यत्ययआर्षः । स्त्रीभूता त्वं सागरंव्यतिवर्तितुंनसमर्थासीत्यर्थः । स्त्रीणांभीरुस्वभावत्वात्तत्तुभूषणमेवेतिभावः । सागरस्यनिवर्तितुमितिपाठे सागरस्ययादृक्छतयोजनंतावदायतंविस्तीर्णमपिमामधिष्ठायनिवर्तयितुं उपगन्तुं स्त्री त्वं नसमर्थं नसमर्थेतियोजना ॥ ३ ॥ **ति०** ईदृशंवचनं त्वयासहनयास्यामीत्येतद्वचनंत्वद्भिन्नाईदृश्यामापदिईदृशंवचनंकाब्रूयात् ॥ ५ ॥ **ति०** चेष्टितं व्यापारः विलापादिरूपः । कारणैर्बहुभिरुपपन्नंयत्त्वयाममाग्रतोभाषितं तत् रामाग्रेउच्यमानगुणकेनमयाईरितं । काकुत्स्थोनिरवशेषतःश्रोष्यतइत्यन्वयइतिकतकः ॥ ६—७ ॥ **स०** श्रेष्ठं झटितिरामस्यसंदेहनिवर्तकत्वात् ॥ १२ ॥

[**पा०**] १ ङ.—ट. तोषितः. २ घ. स्त्रीस्वभावानां. ३ ङ. झ. ट. स्त्रीत्वान्नत्वंसमर्थासि. ४ क.—ट. संसर्गमिति. ५ ङ.—ट. भाषितंचममाग्रतः. ६ ङ. झ. ट. रघुनन्दिना. ७ च. छ. ज. ञ. सार्कं. ८ क. ग. घ. च. छ. तदा. ङ. ज.—ट. पदे.

तापसाश्रमवासिन्याः प्राज्यमूलफलोदके ॥ तस्मिन्सिद्धाश्रमे देशे मन्दाकिन्या ह्यदूरतः ॥ १३ ॥
तस्योपवनषण्डेषु नानापुष्पसुगन्धिषु ॥ विहृत्य सलिलक्लिन्ना तवाङ्के समुपाविशम् ॥ १४ ॥
ततो मांससमायुक्तो वायसः पर्यतुण्डयत् ॥ तमहं लोष्टमुद्यम्य वारयामि स्म वायसम् ॥ १५ ॥
दारयन्स च मां काकस्तत्रैव परिलीयते ॥ न चाप्युपारमन्मांसाद्भक्षार्थी बलिभोजनः ॥ १६ ॥
उत्कर्षन्त्यां च रशनां क्रुद्धायां मयि पक्षिणि ॥ स्रंसमाने च वसने ततो दृष्टा त्वया ह्यहम् ॥ १७ ॥
त्वयापहसिता चाहं क्रुद्धा संलज्जिता तदा ॥ भक्षगृध्नेन काकेन दारिता त्वामुपागता ॥ १८ ॥
आसीनस्य च ते श्रान्ता पुनरुत्सङ्गमाविशम् ॥ क्रुध्यन्ती च प्रहृष्टेन त्वयाऽहं परिसान्त्विता ॥ १९ ॥
बाष्पपूर्णमुखी मन्दं चक्षुषी परिमार्जती ॥ लक्षिताहं त्वया नाथ वायसेन प्रकोपिता ॥ २० ॥
परिश्रमात्प्रसुप्ता च राघवाङ्केऽप्यहं चिरम् ॥ पर्यायेण प्रसुप्तश्च ममाङ्के भरताग्रजः ॥
स तत्र पुनरेवाथ वायसः समुपागमत् ॥ २१ ॥
ततः सुप्तप्रबुद्धां मां रामस्याङ्कात्समुत्थिताम् ॥ वायसः सहसाऽऽगम्य विददार स्तनान्तरे ॥ २२ ॥
पुनः पुनरथोत्पत्य विददार स मां भृशम् ॥ ततः समुक्षितो रामो मुक्तैः शोणितबिन्दुभिः ॥ २३ ॥
वायसेन ततस्तेन बलवत्क्लिश्यमानया ॥ स मया बोधितः श्रीमान्सुखसुप्तः परन्तपः ॥ २४ ॥

तस्मिन्देशे तापसाश्रमवासिन्याः तापसाश्रमे वसन्त्या मम इदं वक्ष्यमाणं श्रेष्ठमभिज्ञानं प्रियंप्रति त्वं ब्रूया इति योजना ॥ १२—१३ ॥ रामाय सीतया वक्तव्यं वचनं हनुमन्तं प्रत्युच्यते--तस्येत्यादि ॥ १४ ॥ मांससमायुक्तः मांसप्रतिलुब्धः । "आयुक्तकुशलाभ्यां च—" इत्यत्र आयुक्तशब्दस्य तात्पर्यपरतया व्याख्यानात् । लोष्टं मृत्पिण्डं । पर्यतुण्डयत् पर्यखण्डयत् । स्तनान्तर इति शेषः । " तुडि तोडने " इत्ययं धातुश्चौरादिकः ॥ १५ ॥ परिलीयते अन्तर्हितो भवति स्म । बलिभोजनः काकः ॥ १६ ॥ उत्कर्षन्त्यां च रशनां काकोत्सारणार्थमिति शेषः ॥१७॥ भक्षगृध्नेन भक्षलोलुपेन । दारिता विदारिता । त्वामुपागता पुनरुत्सङ्गमाविशमित्येताभ्यां काकोत्सारणार्थमङ्कादुत्थानमनुधावनं च कृतं देव्येत्यवगम्यते ॥१८—१९॥ बाष्पेति रामाङ्के केवलं स्थितास्मि । तदा काको मां किंचिददारयत् । तं दृष्ट्वा तत्पलायनार्थं स्वयमायासं कुर्वन्तीं तदशक्त्या रुदन्तीं मां रामः परिहासपूर्वकं सान्त्वितवानित्यर्थः । अनेन स्वरक्षणे स्वयं प्रवृत्तश्चेदीश्वर उपेक्षते स्वयमप्रवृत्तौ स रक्षतीति द्योतितम ॥२०—२३॥ सः निखिललोकविदितनिरतिशयसौन्दर्यप्रसिद्धः । मया बोधितः । मयैवाहंहता स्वापकालिकश्रीविशेषाननुभवात् । लोके कश्चित्संचारदशायां सुन्दरइव भाति शयने दुर्लक्षणादिभिर्दोषादृश्यन्ते न तथायं । श्रीमान् स्वापकालिकश्रीरुच्यते । सुख-

ती० तवाङ्केसमुपाविशमिति । ननुहनुमन्तमुद्दिश्याभिज्ञानंवक्तुमुपक्रान्तादेवीरामंसंबोध्यकिमर्थंकथयतीतिचेत् सत्यं । मद्यमभिज्ञानंवक्तुमुपक्रान्तात्तामेवाभिमुखीकृत्यएवमुत्तरंप्रादादितिहनुमतारामायवाचयितुमितिनदोषः ॥ १४ ॥ ति० सः त्वदनुभवसिद्धः । समायुक्तः विकाराभियुक्तःसन् पर्यतुण्डयत् । स्तनान्तरइतिशेषः । यद्वा मांससमायुक्तः मांसेच्छायुक्तइत्यर्थः ॥ १५ ॥ ति० तत्रैवपरिलीयते वार्यमाणोपिनदेशान्तरंगच्छतिस्म । नचमांसात् मांसविदारणात् । भक्षार्थी उपारमत् । यद्ययंवस्तुतोनमांसार्थीत्युच्यते तदेत्थंयोज्यं । सवायसः मांसात् भक्षार्थीव । इवाध्याहारः । ल्यब्लोपेपञ्चमी । मांसमुपगृह्यभक्षार्थीव । यद्वा मांसभोजनेभक्षार्थीवपुनःपुनर्विलेखनान्नविरराम ॥ १६ ॥ ति० त्वयिस्वपति मयिजाग्रत्यामित्यर्थः । सुप्तप्रबुद्धां राघवाङ्केसुप्त्वाततःप्रबुद्धां । अतएव राघवाङ्कादुत्थितां । वायसःपुनरागम्यस्तनान्तरे विरराद व्यलिखत् ॥ २२ ॥

[पा०] १ क. ङ. झ. ट. सिद्धाश्रिते. २ ङ. झ. ट. मन्दाकिन्याविदूरतः. क. च. छ. ज. मन्दाकिन्यास्त्वदूरतः. ३ झ. खण्डेषु. ४ क. ग. ङ. झ. सलिलेक्लिन्नोममाङ्केसमुपाविशः. ५ ख. ङ. च. ज.—ट. पक्षिणे. ६ ङ. झ. ञ. ट. स्रंसमाने. ७ क. ग.—ट. त्वयाविहसिता. ८ ङ. ज. झ. ट. ततःश्रान्ताऽहमुत्सङ्गमासीनस्यतवाविशं. ९ ङ. झ. परिश्रान्ताचसुप्ताहं. १० क. ग. ङ.—ट. राघवाङ्केऽस्म्यहं. ११ ग. च. छ. ञ. समुपागम्य. १२ क. विररादस्तनौभृशं. झ. विररादस्तनान्तरे. १३ क. च. छ. मयाप्रबोधितः.

स मां दृष्ट्वा महाबाहुर्वितुन्नां स्तनयोस्तदा ॥ आशीविष इव क्रुद्धः श्वसन्वाक्यमभाषत ॥ २५ ॥
केन ते नागनासोरु विक्षतं वै स्तनान्तरम् ॥ कः क्रीडति सरोषेण पञ्चवक्त्रेण भोगिना ॥ २६ ॥
वीक्षमाणस्ततस्तं वै वायसं समुदैक्षत ॥ नखैः सरुधिरैस्तीक्ष्णैर्मामेवाभिमुखं स्थितम् ॥ २७ ॥
पुत्रः किल स शक्रस्य वायसः पततां वरः ॥ धरान्तरगतः शीघ्रं पवनस्य गतौ समः ॥ २८ ॥
ततस्तस्मिन्महाबाहुः कोपसंवर्तितेक्षणः ॥ वायसे कृतवान्क्रूरां मतिं मतिमतां वरः ॥ २९ ॥
स दर्भं संस्तराद्गृह्य ब्रह्मणास्त्रेण योजयत् ॥ स दीप्त इव कालाग्निर्ज्वालाभिमुखो द्विजम् ॥ ३० ॥
स तं प्रदीप्तं चिक्षेप दर्भं तं वायसं प्रति ॥ ततस्तं वायसं दर्भः सोम्बरेऽनुजगाम ह ॥ ३१ ॥
अनुसृप्तस्तदा काको जगाम विविधां गतिम् ॥ लोकैकाम इमं लोकं सर्वं वै विचचार ह ॥ ३२ ॥
स पित्रा च परित्यक्तः सुरैश्च समहर्षिभिः ॥ त्रीँल्लोकान्संपरिक्रम्य तमेव शरणं गतः ॥ ३३ ॥

सुप्तः तत्त्वानुगुणैव हि सुप्तिरपि । परन्तपः शयनमेव सकलशत्रुनिवर्तनक्षममित्यर्थः । सुप्तः श्रीमान् । लोके स्थानगमनशयनादिदशायां रूपवानिवलक्ष्यतेकश्चित् । संशयने प्रकाशितप्रच्छन्नदोषतयाजुगुप्सितोभवति । अयंतु शयनावस्थायामेवनीराजनाकर्तव्या दृष्टिदोषपरिहारायेत्येवंस्थितः ॥ २४ ॥ वितुन्नां दारितां ॥ २५ ॥ पञ्चवक्त्रेण व्यात्तमुखेन । " पचि विस्तारे " इत्यस्मात्पचाद्यच् । कार्यातिशयद्योतनार्थं वा पञ्चसङ्ख्याकवक्त्रत्वोक्तिः । नागनासोरु नागहस्तोरु । कुपितपञ्चवक्त्रक्रीडासमं तवस्तनविदारणमितिभावः ॥ २६—२७ ॥ ननु वायसमात्रे किमर्थमस्त्रं मुक्तमित्याशङ्क्याह—पुत्रः किलेति ॥ इदं रक्षणानन्तरं तेनैवोक्तमिति ज्ञेयं । किलेति प्रसिद्धौ । इन्द्रपुत्रत्वेन प्रसिद्धो जयन्त एव वायसरूपेणागत इत्याहुः । वायसरूपोन्यः पुत्र इत्यप्याहुः ॥ २८—२९ ॥ संस्तरात् आस्तरणात् । गृह्य गृहीत्वा । अस्त्रेण अस्त्रमन्त्रेण । योजयत् अयोजयत् । अभिमन्त्रितवानित्यर्थः । द्विजं काकं ॥ ३०—३१ ॥ अनुसृप्तः अनुसृतः । विविधां गतिं विविधं स्थानं । लोककामः लोकयितृकामः । रक्षकापेक्षीत्यर्थः ॥ ३२ ॥ भगवद्व्यतिरिक्ता बान्धवाभासा न रक्षका इत्याह—स पित्रेति । सः पुरुषकारभूतायामपि कृतापराधः । सः आर्द्रापराधः । पित्रा च परित्यक्तः अस्त्रक्षतिभीततया प्रथमं पितरं रक्षकं गतः तेन त्रैलोक्याधिपतिना च त्यक्तः । "इन्द्रो महेन्द्रस्सुरनायकोवा" इति तस्यासमर्थत्वोक्तेः । परित्यक्तः त्यागोपि नापाततः बुद्धिपूर्वं त्यक्तः । " त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थं कुलं त्यजेत्" इति न्यायात् । यद्वापरित्यक्तः भार्यापुत्रादिभिस्सह त्यक्तः । चकारेण माता समुच्चीयते । न केवलं हितपरेण पित्रा प्रियपरयामात्रा च परित्यक्तः । " सीता नारी जनस्यास्य योगक्षेमं विधास्यति " इति स्वरक्षकभूतायामपि सापराधत्वादिति भावः । पित्रपेक्षया मातुर्वात्सल्यातिशयात्तामेव प्रथमं गच्छति स्म ततः पितरं । पित्रा त्यागवचनान्मात्रा त्यागः सिद्ध एवेति चकारेण सूचितम् । पितृभ्यां त्यागेपि बान्धवा न त्यज्यन्ति । किं पितरौ सर्वथा त्यक्ष्यत इति तैरपि त्यक्त इत्याह—सुरैश्च । " कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे " इति रामनयने रक्ते तेपि बिभ्यति हि । एवं पूर्वसजातीयैस्त्यक्तत्वेपि परिगृहीतपक्षिरूपसजातीयैः किं त्यक्त इत्यपेक्षायां तथेत्याह—चकारेण । " पक्षिणोपि प्रयाचन्ते सर्वभूतानुकम्पिनं " इति पक्षिणामपि शरण्यत्वात् । स्वनायकगरुडस्वामित्वाच्च पक्षिभिरपि परित्यक्तः । स महर्षिभिः । पित्रादिबन्धूनामरक्षकत्वेपि आनृशंस्यप्रधाना महर्षयो रक्षिष्यन्तीति गतः । तैरपि प्रकामं दूरदर्शिभिः परित्यक्तः ।

ति० तदा स्तनयोर्वितुन्नांमांदृष्ट्वाक्रुद्धः । अनेन पूर्वपर्यायेकेवलंरामःकाकचेष्टाबुद्ध्यापरिहासमेवकृतवानितिसूचितं ॥ २५ ॥ ति० शक्रपुत्रः जयन्तः । सतुवायसः । वायसरूपधारीत्यर्थः । धरान्तरंगतः भूमिविलंप्राप्तः । शीघ्रगतौ पवनसमः । धरान्तरचारित्वंतु पवनादस्यविशेषः । नहिवायुस्तत्संचारीतिकतकः । ननुसावधानजनशरीरस्यकाककर्तृकविदारणंलोकेनदृष्टमिति कोऽयमीदृशःकाकइतिहनुमतःशङ्कांदूरीकुर्वतीआह—**पुत्रइति** । शक्रस्यपुत्रः । एतेन रामपराक्रमपरीक्षार्थंशक्रप्रेरणयैवायमागत

[पा०] १ क.—ट. समवैक्षत. २ झ. दर्भसंस्तरात्. ३ ग. ङ. झ. ट. ब्रह्मणोस्त्रेण. ४ क. ङ.—ट. त्राणकामः. ५ ङ. झ, ट. सर्वैश्च. ६ ङ. झ. ट. परमर्षिभिः

स तं निपतितं भूमौ शरण्यः शरणागतम् ॥ वधार्हमपि काकुत्स्थः कृपया पर्यपालयत् ॥ ३४ ॥
न शर्म लब्ध्वा लोकेषु तमेव शरणं गतः ॥ ३५ ॥
परिद्यूनं विषण्णं च स तमायान्तमब्रवीत् ॥ मोघं कर्तुं न शक्यं तु ब्राह्ममस्त्रं तदुच्यताम् ॥ ३६ ॥
हिनस्तु दक्षिणाक्षि त्वच्छर इत्यथ सोब्रवीत् ॥ ततस्तस्याक्षि काकस्य हिनस्ति स्म स दक्षिणम् ॥
दत्त्वा स दक्षिणं नेत्रं प्राणेभ्यः परिरक्षितः ॥ ३७ ॥
स रामाय नमस्कृत्वा राज्ञे दशरथाय च ॥ विसृष्टस्तेन वीरेण प्रतिपेदे स्वमालयम् ॥ ३८ ॥
मत्कृते काकमात्रे तु ब्रह्मास्त्रं समुदीरितम् ॥ कस्माद्यो मां हरत्त्वत्तः क्षमसे तं महीपते ॥ ३९ ॥
सं कुरुष्व महोत्साहः कृपां मयि नरर्षभ ॥ त्वया नाथवती नाथ ह्यनाथा इव दृश्यते ॥ ४० ॥

आनृशंस्यविषयव्यवस्थास्तीति तैस्त्यक्त इत्यर्थः । एतदङ्गीकारे वयमपि संसर्गदोषेण नश्येम । अस्मिन्त्यागेऽनन्यगतिकत्वाद्राम एनं स्वीकरिष्यतीति तैस्त्यक्तः महर्षिभिः " यो विष्णुं सततं द्वेष्टि तं विद्यादन्त्यरेतसं " इति विष्णुद्वेषेण चण्डालत्वात् । " चण्डालः पक्षिणां काकः " इत्युक्तेश्च । चण्डालो नाम्नद्वाटमागच्छेदिति त्यक्तः । एवं रक्षकान्तरादर्शनात् " नष्टगजो घटमप्यन्वेषते " इति न्यायेन स्वैरविवृतद्वारान्सर्वान्गृहान्गत इत्याह—त्रींल्लोकान्संपरिक्रम्य परिक्रम्य एतदेव नवकृत्वो गतः । संपरिक्रम्य गृहस्थैरविज्ञाततया कवाटमूलेषु लीनश्चेत्यर्थः । अपि कदाचित्कृपैषामुत्पद्येतेति मत्वा पुनःपुनर्गत इत्यर्थः । अमुं निष्कास्य कवाटबन्धनं सर्वैः कृतमित्यर्थः । ततः किं कृतमित्यत्राह—तमेव शरणं गतः । रक्षकत्वेन प्राप्तापेक्षया हिंसकत्वेन स्थितस्य मुखमेव शीतलमित्यवस्थितः । अतस्तमेव शरणं गतः । " यदिवारावणस्स्वयं " इत्येवं स्थितो हि रामः तमेव सर्वलोकशरण्यमेव । तमेव दोषो यद्यपि न त्यजेयमिति स्थितं । शरणं गतः निवासं गतः । न तूपायतया गतः । " निवासवृक्षः साधूनां " इत्युक्तेः ॥ ३३ ॥ स तमिति ॥ सः रक्षणैकस्वभावः । तं प्रातिकूल्यैकनिरतं भूमौ निपतितं देवजातितया भूमिमस्पृशन्तमपि भूमौ पतितं । भूमौ दुष्पुत्रं पितरि शिक्षमाणे स यथा मातुः पादयोः पतति तथापतत् । शरण्यः सर्वावस्थास्वपि शरणवरणार्हः । शरणागतं अनन्यगतिकतया स्वमुपागतं । वधार्हमपि रामसिद्धान्तेनापि वधार्हं । काकुत्स्थः कृपया पर्यपालयत कुलोचितस्वभावेन रक्षितवान् । कृपया अस्मदाद्यारब्धं कार्यं प्रबलकर्मणा न समाप्यते । तथा तेनारब्धमपि कृपया न पूर्यत इति भावः ॥ ३४—३५ ॥ परिद्यूनं परितप्तं । तदुच्यतामित्यनन्तरं । " हिनस्तु दक्षिणाक्षि त्वच्छर इत्यथ सोब्रवीत् " इत्यर्धमनुसन्धेयम् ॥ ३६—३७ ॥ दशरथाय स्वलोकस्थतया पूर्वमेव मित्रभूताय ॥ ३८ ॥ समुदीरितं प्रमुक्तं । हरत् अहरत् ॥ ३९ ॥ सः परदुःखं दृष्ट्वा न सहामहे इत्युक्तवान् । त्वं महोत्साहः एतदनुष्ठानपर्यन्तं कुर्वन मयि अत्यन्तदुःखितायां कृपां परदुःखासहिष्णुत्वं । प्रकाशयितुमर्हसि । नरोत्तम एवंनकरोषिचेत्तव नरोत्तमत्वस्यहानिरेवस्यात् । तस्मादेतद्वचनमनुष्ठानपर्यन्तंकृत्वा मां जीवयित्वा तवनरोत्तमत्वं परिपालयेतिभावः । अनाथाइव अनाथेव । आर्षो गुणाभावः । आनृशंस्यं परो धर्मः । नावारोपणानन्तरं वेतनाभ्य-

इतिध्वनितं । वायसः तदन्तर्गतः ॥ २८ ॥ ति० दर्भसंस्तरात् । एकमितिशेषः ॥ ३० ॥ स० ब्राह्ममस्त्रं दर्भान्तर्गर्भितं । तदुच्यतां एतेनवध्यमुच्यतां भार्गववदितिभावः । रामानु० तदुच्यतामितिप्रश्नानन्तरं हिनस्तिस्मसदक्षिणमितिवचनादस्त्रलक्ष्यत्वेनदक्षिणाक्षिप्रदानपरंप्रतिवचनंकाकेनकृतमित्यवगम्यते ॥ ३६ ॥ ति० सः दक्षिणाक्षि अस्यसंहार्यभवत्वित्युक्तः । परिरक्षितः परिरक्षितवान् । आत्मानमितिशेषः । स० प्राणेभ्यः प्राणार्थं दत्वास्थितः । परिरक्षितः रामेणेतिशेषः ॥ ३७ ॥ ती० एवंहनुमतेरामैकसंवेद्यमभिज्ञानमभिधायदुःखावेशाद्राममेवबुद्धिस्थंसंबोध्यसोपालंभंप्रार्थयते—मत्कृतइत्यादिनासार्धचतुष्टयेन । ति० कस्मात्क्षमसेइत्यवान्तरवाक्यान्तेइत्युक्तवतीतिबुद्धीतिवाक्यशेषोद्रष्टव्यइतिकतकः ॥ ३९ ॥ शि० अनाथा-

[पा०] १ क. ग. ङ.—ट. विवर्णंच. २ झ. ट. पतमानंतमब्रवीत्. ३ घ. च.—ञ. मोघमस्त्रं. ४ घ. च.—ञ. ब्राह्मंकर्तुं. ५ ख. काकमात्रेतद्ब्रह्मास्त्रं. झ. ट. काकमात्रेऽपि. ६ ङ. झ. ञ. माऽहरत्त्वत्तः. ७ क. त्वंकुरुष्व. ८ ग. ङ. झ. ञ. ट. महोत्साहां. ९ ख. घ. च. अनाथेवहि.

आनृशंस्यं परो धर्मस्त्वत्त एव मया श्रुतः ॥ ४१ ॥
जानामि त्वां महावीर्यं महोत्साहं महाबलम् ॥ अपारपारक्षोभ्यं गाम्भीर्यात्सागरोपमम् ॥
भर्तारं संसमुद्राया धरण्या वासवोपमम् ॥ ४२ ॥
एवमस्त्रविदां श्रेष्ठः सत्यवान्बलवानपि ॥ किमर्थमस्त्रं रक्षस्सु न योजयति राघवः ॥ ४३ ॥
न नागा नापि गन्धर्वा नासुरा न मरुद्गणाः ॥ रामस्य समरे वेगं शक्ताः प्रतिसमाधितुम् ॥४४॥
तस्य वीर्यवतः कश्चिद्यद्यस्ति मयि संभ्रमः ॥ किमर्थं न शरैस्तीक्ष्णैः क्षयं नयति राक्षसान् ॥ ४५ ॥
भ्रातुरादेशमादाय लक्ष्मणो वा परन्तपः ॥ कस्य हेतोर्न मां वीरः परित्राति महाबलः ॥ ४६ ॥
यदि तौ पुरुषव्याघ्रौ वाय्वग्निसमतेजसौ ॥ सुराणामपि दुर्धर्षौ किमर्थं मामुपेक्षतः ॥ ४७ ॥
ममैव दुष्कृतं किंचिन्महदस्ति न संशयः ॥ समर्थावपि तौ यन्मां नावेक्षेते परन्तपौ ॥ ४८ ॥
वैदेह्या वचनं श्रुत्वा करुणं साश्रु भाषितम् ॥ अथाब्रवीन्महातेजा हनुमान्मारुतात्मजः ॥ ४९ ॥
त्वच्छोकविमुखो रामो देवि सत्येन मे शपे ॥ रामे दुःखाभिपन्ने च लक्ष्मणः परितप्यते ॥ ५० ॥

र्थनवत्संश्लेषदशायां तवात्यन्ताभिमतोधर्मःक इति मयापृष्टे परदुःखं चेत्तदसहिष्णुत्वमेव परमो धर्म इति ममाभिमतं तथैवमत्स्वभाव इतित्वयारहस्योद्भेदनंकृतं । त्वत्तएव नतु दूतमुखेन मया श्रुतः । इदं श्रवणमात्रपर्यवसायिजातं नत्वनुष्ठानपर्यवसायीतिरामंपृच्छेतिभावः । एवं पृच्छन्त्याःसीतायाःप्रत्युत्तरं दिशतोरामस्यच कोभिप्राय इतिचेदुच्यते । एतस्य संश्लेपस्यविच्छेदोभवतिचेत् किंकरिष्यामीति कातरतया पृष्टवती । सोपि मद्विरहक्लेशेन काम्यन्तीं त्वां न कदाचिदपि पश्येयमित्युक्तवान् । अयमर्थोप्यरण्यकाण्डे अप्यहं जीवितं जह्यामिति श्लोकप्रघट्टिकादौ दर्शितः ॥ ४०—४१ ॥ अपारपारं दुरधिगमपारं असीममित्यर्थः । दुरधिगमगुणसीममित्यर्थो वा ॥ ४२—४३ ॥ प्रतिसमाधितुं प्रतिबद्धुं ॥ ४४ ॥ संभ्रमः भावबृत्तिः ॥ ४५—४६ ॥ उपेक्षतः उपेक्षेते । यदि तौ संगताविति शेषः ॥ ४७ ॥ समर्थौ विरोधिवर्गमुन्मूल्य मद्रक्षणानुगुणशक्तिमन्तौ । परन्तपौ इतःपूर्वंप्रतिपक्षनिर्दहनंकुर्वन्तौ । एवंभूतावपि तौ मां प्राणपर्यन्तं रक्षणप्रवृत्त्यर्हदशां प्राप्तां मां नावेक्षेते इति यत् न कटाक्षयतइतियत् अस्यनिमित्तं तयोर्वा मयि वा किंचिद्भवितुमर्हति । तत्र तद्विषये तादृशनिमित्तप्रसक्तिर्नास्ति सामर्थ्यपरन्तपत्वादिदर्शनात् । परिशेषान्ममैव पापं अस्य निमित्तं भवितुमर्हति । यद्वा ममैव " द्विषन्तः पापकृत्यां " इत्युक्तरीत्या अन्यतो नागतमित्यर्थः । किंचित् नहि वयं सर्वज्ञाः अस्माभिरज्ञातं किंचिद्भवितुमर्हति । महत् प्रारब्धफलतयाऽनुभवं विना दुष्परिहरं । अस्ति न संशयः । कार्ये सति कारणे किमस्ति संदेहः । यद्वा किंचिदनिर्वचनीयं । महद्दुष्कृतमस्तीत्यनेन " किं त्वामन्यत वैदेहः " इत्यादिनोक्तो भगवदपचारः । उक्तंहि " कीदृशं तु मया पापं पुरा देहान्तरे कृतं " इति । देहान्तरे बालशरीरे ॥ ४८ ॥ साश्रु यथा तथा भाषितं उक्तं ॥ ४९ ॥ त्वच्छोकविमुखः त्वच्छोकेन विमुखः विषयान्तरपराङ्मुखः ।

इवदृश्यते ममतनुरितिशेषः ॥ ४० ॥ शि० ननुतवरक्षणेममनकिंचित्प्रयोजनमित्यतआह—आनृशंस्यमिति । आनृशंस्यं निर्हेतुककृपा परोधर्मः इतित्वत्तएवमयाश्रुतं । एतेन प्रयोजनाभावेपिस्वकृपयापालयेतिसूचितं ॥ ४१ ॥ रामानु० अपारपारं " पार कर्मसमाप्तौ " इतिधातोर्निष्पन्नत्वादत्रपारशब्देनकर्मसमाप्तिरुच्यते । अपाराः पाराः कर्मसमाप्तयोयस्यसतथोक्तः । निरवधिकापदानइत्यर्थः ॥ ४२ ॥ ति० प्रतिसमीहितुं प्रतिभटतयास्थित्वानिरोद्धुमित्यर्थः । प्रतिसमाधितुमितिपाठान्तरं । तत्रार्थेत्वंशरणं ॥ ४४ ॥ ति० ममसंभ्रमइतिपाठे ममप्राप्तयेसंभ्रमइत्यर्थः ॥ ४५ ॥

[पा०] १ ङ. झ. ट. श्रुतं. २ घ. सागरान्तायाः. ३ ङ. झ. ट. बलवान्सत्ववानपि. ख. ग. घ. च. छ. ज. ञ. सत्ववान्. ४ ट. मोचयसि. ५ ङ. झ. ट. प्रतिसमीहितुं. ६ ङ. च. ज. झ. ट. वाग्विन्द्र. ७ ग. मन्येमहदस्ति. ८ क. यन्मामुपेक्षेतां. ग. यन्मांनावेक्षेतां. ९ ख. तदाऽब्रवीत्. १० क. ख. घ. ङ. च. ज.—ट. सत्येनते. ११ क. ङ. झ. ञ. ट. दुःखाभिपन्नेतु. ग. घ. दुःखाभिभूतेच.

कथंचिद्भवती दृष्टा न कालः परिशोचितुम् ॥ इमं मुहूर्तं दुःखानां द्रक्ष्यस्यन्तमनिन्दिते ॥ ५१ ॥
तावुभौ पुरुषव्याघ्रौ राजपुत्रौ महाबलौ ॥ त्वद्दर्शनकृतोत्साहौ लङ्कां भस्मीकरिष्यतः ॥ ५२ ॥
हत्वा च समरे क्रूरं रावणं सहबान्धवम् ॥ राघवस्त्वां विशालाक्षि नेष्यति स्वां पुरीं प्रति ॥ ५३ ॥
ब्रूहि यद्राघवो वाच्यो लक्ष्मणश्च महाबलः ॥ सुग्रीवो वाऽपि तेजस्वी हरयोऽपि समागताः ॥ ५४ ॥
इत्युक्तवति तस्मिंश्च सीता सुरसुतोपमा ॥ उवाच शोकसंतप्ता हनुमन्तं प्लवङ्गमम् ॥ ५५ ॥
कौसल्या लोकभर्तारं सुषुवे यं मनस्विनी ॥ तं ममार्थे सुखं पृच्छ शिरसा चाभिवादय ॥ ५६ ॥
स्रजश्च सर्वरत्नानि प्रिया याश्च वराङ्गनाः ॥ ऐश्वर्यं च विशालायां पृथिव्यामपि दुर्लभम् ॥ ५७ ॥
पितरं मातरं चैव संमान्याभिप्रसाद्य च ॥ अनुप्रव्रजितो रामं सुमित्रा येन सुप्रजाः ॥ ५८ ॥
आनुकूल्येन धर्मात्मा त्यक्त्वा सुखमनुत्तमम् ॥ अनुगच्छति काकुत्स्थं भ्रातरं पालयन्वने ॥ ५९ ॥
सिंहस्कन्धो महाबाहुर्मनस्वी प्रियदर्शनः ॥ पितृवद्वर्तते रामे मातृवन्मां समाचरन् ॥ ६० ॥
ह्रियमाणां तदा वीरो न तु मां वेद लक्ष्मणः ॥ वृद्धोपसेवी लक्ष्मीवाञ्शक्तो न बहु भाषिता ॥ ६१ ॥

प्रत्युत त्वय्येव दत्तचित्त इत्यर्थः ॥ ५० ॥ इमं मुहूर्तं अस्मिन्मुहूर्ते । सप्तम्यर्थे द्वितीया ॥ ५१—५५ ॥ मनस्विनी लोकभर्तारं सुषुवे । लोके स्त्रियः इहलोकपरलोकयोः स्वरक्षणार्थं पुत्रान् सुवते नैवं मेऽश्वशूः । मनस्विनी विपुलमनस्का । सर्वलोकरक्षकः पुत्रो मे भवेदिति व्रतमनुष्ठाय लोकोपकाराय पुत्रं सूतवती । एवंभूतः कौसल्यासंकल्पः कथं मोघस्स्यात् । अहमत्र लोके न किमन्तर्भूता । तं ममार्थे सुखं पृच्छ । अस्मद्रक्षणं न मया प्रार्थ्यं तच्चिन्ता तस्यैव । अस्मत्त्वरातु विलम्बासहिष्णुतया । तस्मात्तत्सत्ता चेन्मद्रक्षणस्य न कापि हानिः । अतस्तत्सत्तैवास्माभिराशास्यते । तेन तस्य सुखमस्ति किमितिमया पृष्टमिति वद । एवंच लोकवदस्माभिश्च तस्मात्किंचिदपेक्षितंचेत् लोकैर्यत्कार्यं तत्कार्यं मयापि कार्यमित्याह—शिरसा चाभिवादय । अहं तं शिरसा प्रणतवत्यस्मीति तमभिवादय । प्रणिपातंकुर्वित्यर्थः । कथं नायिका नायकं शिरसा प्रणमेदितिचेत् आचारप्रधानजनककुलनन्दिन्यैवमनुष्ठितमिति किमत्र प्रमाणं प्रष्टव्यं । प्रणयरोषेणैवमाहेति चेन्न । हनुमद्वचनेन तस्य शान्तत्वात् । ननु ममार्थे मत्कार्यसिद्ध्यर्थं तं प्रणमेत्यर्थः किंनस्यादिति चेत्, ममार्थ इत्यस्योभयत्रान्वयात् । पूर्वमत्र मया पृष्टमिति पृच्छेत्यर्थस्यावश्यकत्वादत्रापि मया प्रणतमिति प्रणमेत्यस्य स्वरसत्वात् ॥ ५६ ॥ स्रजश्चेति ॥ सन्तीति शेषः । स्रगादयः सन्ति पृथिव्यां दुर्लभमैश्वर्यमप्यस्ति । तथा पितरं मातरं चैव संमान्य सुमित्रा येन सुप्रजाः सः राममनु प्रव्रजितः ॥ ५७—५८ ॥ आनुकूल्येन भक्त्येत्यर्थः ॥ ५९ ॥ समा-

शि० यस्मात्कथंचिद्भवतीदृष्टा मयेतिशेषः । अतः इमंमुहूर्तं आरभ्येतिशेषः । दुःखानामन्तंद्रक्ष्यसि । किंच दुःखानामन्तं विध्वंसकं इमं आगामिनंमुहूर्तंद्रक्ष्यसि अतःपरिशोचितुंकालः समयोन ॥ ५१ ॥ तनि० लोकेस्त्रियःस्वजीवनदशायांपोषकंपरत्रोत्तारकंचपुत्रमभिलषन्ति । कौसल्यातु विपुलमनस्कतयासर्वेलोकरक्षकंपुत्रंप्रार्थ्यव्रताचरणेनलब्धवती तत्प्रार्थनाविकलाकिं । अहं लोकशब्दान्तर्भूतानभवामिकिं । जलसमीपस्थितसस्यस्यशुष्कतावत्सर्वावस्थास्वप्यनुसृतायाममरक्षणेतत्प्रार्थनासंकुचिताकिं । तंममार्थेसुखंपृच्छ । ममरक्षणंनप्रार्थनीयं तस्यमनसितिष्ठत्येव । किंतु त्वयातस्यसुखजनकेनभाव्यं । तस्यावस्थाने अस्मद्रक्षणं भविष्यतीतितदेवाशास्यते । शिरसाचाभिवादय । अग्निसाक्षिकंगृहीतपाणिनाचरक्षणंकार्यं तत्रक्रियते । इतरसाधारण्येनवारक्षणं क्रियतां । तैर्यत्क्रियते तन्मयाप्यभिवादनंक्रियतेइत्यस्मदर्थमभिवादनंकुरु ॥ ति० ममार्थे मत्प्रतिनिधित्वेनेत्यर्थः ॥ ५६ ॥ ति० लक्ष्मणःपूर्वंमारीचवधायगतेरामेतत्पृष्ठगमनायसम्यक्कृतपारुष्यइतिज्ञात्वातस्यविमोचनप्रवृत्त्युपेक्षामाभूदितिविशिष्यकुशलप्रश्नं ब्रूहीत्याह—स्रजश्चेति । दुर्लभमित्यत्र त्यक्त्वेत्यनुकर्षः ॥ ५७ ॥

[पा०] १ ङ. झ. ट. दुःखानामन्तंद्रक्ष्यसिशोभने. २ ङ. झ. ट. लोकान्भस्मी. ३ क.—ट. स्वांपुरींप्रतिनेष्यति. ४ घ. इत्युक्तासाहनुमता. ५ ख.—ट. सीतापुनरथाब्रवीत्. ६ इदमर्धं ख.—ट. पाठेषुनदृश्यते. ७ क. ग. च. छ. विसृज्य. ८ घ. संमान्याभिप्रणम्यच. ग. परित्यज्यप्रसाद्यच. ९ क. घ. च. छ. ज. ञ. भाषितुं.

राजपुत्रः प्रियः श्रेष्ठः सदृशः श्वशुरस्य मे ॥ मम प्रियतरो नित्यं भ्राता रामस्य लक्ष्मणः ॥ ६२ ॥
नियुक्तो धुरि यस्यां तु तामुद्वहति वीर्यवान् ॥ यं दृष्ट्वा राघवो नैव वृत्तमार्यमनुस्मरेत् ॥ ६३ ॥
स ममार्थाय कुशलं वक्तव्यो वचनान्मम ॥ मृदुर्नित्यं शुचिर्दक्षः प्रियो रामस्य लक्ष्मणः ॥ ६४ ॥
यथा हि वानरश्रेष्ठ दुःखक्षयकरो भवेत् ॥ त्वमस्मिन्कार्यनिर्योगे प्रमाणं हरिसत्तम ॥ ६५ ॥
राघवस्त्वत्समारम्भान्मयि यत्नपरो भवेत् ॥ इदं ब्रूयाश्च मे नाथं शूरं रामं पुनः पुनः ॥ ६६ ॥
जीवितं धारयिष्यामि मासं दशरथात्मज ॥ ऊर्ध्वं मासान्न जीवेयं सत्येनाहं ब्रवीमि ते ॥ ६७ ॥
रावणेनोपरुद्धां मां निकृत्या पापकर्मणा ॥ त्रातुमर्हसि वीर त्वं पातालादिव कौशिकीम् ॥ ६८ ॥
ततो वस्त्रगतं मुक्त्वा दिव्यं चूडामणिं शुभम् ॥ प्रदेयो राघवायेति सीता हनुमते ददौ ॥ ६९ ॥
प्रतिगृह्य ततो वीरो मणिरत्नमनुत्तमम् ॥ अङ्गुल्या योजयामास नह्यस्य प्राभवद्भुजः ॥ ७० ॥
मणिरत्नं कपिवरः प्रतिगृह्याभिवाद्य च ॥ सीतां प्रदक्षिणं कृत्वा प्रणतः पार्श्वतः स्थितः ॥ ७१ ॥
हर्षेण महता युक्तः सीतादर्शनजेन सः ॥ हृदयेन गतो रामं शरीरेण तु विष्ठितः ॥ ७२ ॥

चरन् परिचरन् ॥ ६०—६२ ॥ यस्यां धुरि यस्मिन्कार्यनिर्वाहइत्यर्थः । आर्यं श्वशुरं दशरथं नानुस्मरेत् । पितृवत्सम्यग्रक्षकत्वादिति भावः ॥ ६३—६४ ॥ रामः यथा दुःखक्षयकरो भवेत्तथा वक्तव्यमित्यर्थः । कार्यनिर्योगे कार्यसंघटने । प्रमाणं व्यवस्थापकः ॥ ६५ ॥ त्वत्समारम्भात् त्वदुत्साहात् ॥ ६६ ॥ ऊर्ध्वं मासात् । रावणकृतमासद्वयावधिं न सहिष्य इति भावः ॥ ६७ ॥ निकृत्या वञ्चनेन । पातालादिव कौशिकीं । अत्रेतिकरणं द्रष्टव्यं । इदं च ब्रूया इति पूर्वेणान्वयः । कौशिकः इन्द्रः तत्संबन्धिनी श्रीः कौशिकी तामिव । एवं ब्रह्मपुराणे श्रूयते । पुरा वृत्रवधे ब्रह्महत्याभिभूतं निश्श्रीकमिन्द्रं भगवान्नारायणो देवैस्सह वैष्णवेनाश्वमेधेन निष्कल्मषं कृत्वा त्रैलोक्यराज्येऽभिषिच्य पुरातनीं पौरंदरीं श्रियमुपाह्वयत् । ततोऽशरीरवाक्याद्गवाक्षतीर्थवर्तिनीं तामुपश्रुत्य स देवदेवो देवाश्च तत्र जग्मुः । ततस्तान् दृष्ट्वा सा श्रीः पातालं प्रविवेश । तत्र प्रवेष्टुमशक्नुवन्तो देवाः पुनरप्यशरीरं वाक्यं युष्मासु सर्वलक्षणसंपन्नस्तां प्रतिनेतुमर्हतीत्युपश्रुत्य तमेव पुरुषोत्तमं प्रार्थयामासुः । स तत्र प्रविश्य पातालात्तां समुद्धृत्य तैस्सह शक्राय प्रादादिति ॥ महाभारते तु उतथ्यस्य भार्यां यमुनायां स्नान्तीं वरुणो हृत्वा पातालमनयत् । तामुतथ्यो नारदेन याचित्वा तामलब्ध्वा कुपितः पातालह्रदशोषेण तामवापेति श्रूयते । सा कौशिकीति केचित्कथयन्ति ॥ ६८—६९ ॥ मणिरत्नं मणिश्रेष्ठं । अङ्गुल्या योजयामास । चूडामणेरधिष्ठानस्य पृष्ठे या केशसरणिः तत्राङ्गुलिं प्रावेशयदित्यर्थः । एवं तनीयसी किमङ्गुलिरित्यत्राह—नहीति । अस्य हनुमतः भुजः न प्राभवत् न स्थूलोभवत् । न तदानीं स महाकायः भुजश्च न स्थूलः तेनाङ्गुलिस्तनीयसीत्यर्थः । एतेन देव्यैप्रदर्शितं महद्रूपंविहाय पुरप्रवेशकालिकं सूक्ष्मरूपमङ्गीकृतवानित्यवगम्यते ॥ ७० ॥ प्रणतः नम्रगात्रः ॥ ७१—७२ ॥

ति० रावणदत्तावध्यवशिष्टंकिंचिदधिकंमासद्वयमपिनसहिष्यइतिभावः । तत्समाप्तौत्वदनागमनेऽनार्योऽनार्यमेवाचरेत् । अतोऽर्वागेवमरणंज्यायइतिशीघ्रमागमनायैवमुक्तिरितिबोध्यं । निकृत्या राक्षसीकर्तृकनिग्रहेण । उपरुद्धां पातालादिवकौशिकीं पातालमग्नांभुवंभगवानिवत्रातुमर्हसि । गायत्र्याःसांख्यायनगोत्रखवद्भूःकौशिकीतिकतकः ॥ ६८ ॥ ति० ननुतदासूक्ष्मरूपत्वात्तत्रभुजासञ्जनमेवोचितमतआह—नहीति । अस्यभुजःसूक्ष्मोपि नप्राभवत् । तद्रन्ध्रे नप्राविशदित्यर्थः । निषेधस्यप्रसक्तिमूलकत्वात् प्रसक्तेश्चसूक्ष्मरूपएवसंभवात् । पूर्वंदेव्यैप्रदर्शितंमहद्रूपंविहाय सूक्ष्मरूपेणैवस्थितइतिगम्यतइतितीर्थः । कतकस्तु—अङ्गुल्यायोजयामाससूक्ष्मवासोबद्धं अङ्गुल्यांदृढंबबन्धेत्यर्थः । अस्यबन्धनेभुजोनप्राभवत् व्यक्तयासवौनुभवप्रसङ्गाद्रोपणीयत्वाच्चभुजोनोचितोऽभूदित्यर्थइत्याह ॥ ७० ॥

[पा०] १ क. ग.—ट. मत्तः. २ ङ. झ. ट. मनुस्मरत्. ३ ङ. झ. ट. निर्वाहे. ४ क. मासमात्रंनृपात्मज. ५ क. मासाद्ध्वंन. ६ क. ज. अङ्गुल्यां. ७ ङ. झ. ट. रामंलक्ष्मणंचसलक्षणं.

मणिवरमुपगृह्य तं महार्हं जनकनृपात्मजया धृतं प्रभावात् ॥
गिरिरिव पवनावधूतमुक्तः सुखितमनाः प्रतिसंक्रमं प्रपेदे ॥ ७३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टत्रिंशः सर्गः ॥ ३८ ॥

एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

सीतया चूडामणिग्रहणेनप्रयाणोन्मुखंहनुमन्तंप्रति रामलक्ष्मणादिषुस्वकुशलप्रश्ननिवेदनचोदनपूर्वकं सत्वरंस्वानयनाय रामप्रोत्साहनचोदना ॥ १ ॥ हनुमता रामलक्ष्मणयोः सुग्रीवादीनांच दुस्तरसागरतरणेशङ्कमानांसीतांप्रति वानरप्रभाववर्णनेन कैमुत्येनतेषांतरणसमर्थनपूर्वकं राघवयोः स्वपृष्ठारोपणेनसागरतारणप्रतिज्ञानादिना समाश्वासनम् ॥ २ ॥

मणिं दत्त्वा ततः सीता हनुमन्तमथाब्रवीत् ॥ अभिज्ञानमभिज्ञातमेतद्रामस्य तत्त्वतः ॥ १ ॥
मणिं तु दृष्ट्वा रामो वै त्रयाणां संस्मरिष्यति ॥ वीरो जनन्या मम च राज्ञो दशरथस्य च ॥ २ ॥
स भूयस्त्वं समुत्साहे चोदितो हरिसत्तम ॥ अस्मिन्कार्यसमारम्भे प्रचिन्तय यदुत्तरम् ॥ ३ ॥
त्वमस्मिन्कार्यनिर्योगे प्रमाणं हरिसत्तम ॥ हनुमन्यत्नमास्थाय दुःखक्षयकरो भव ॥
तस्य चिन्तयतो यत्नो दुःखक्षयकरो भवेत् ॥ ४ ॥
स तथेति प्रतिज्ञाय मारुतिर्भीमविक्रमः ॥ शिरसाऽऽवन्द्य वैदेहीं गमनायोपचक्रमे ॥ ५ ॥
ज्ञात्वा संप्रस्थितं देवी वानरं मारुतात्मजम् ॥ बाष्पगद्गदया वाचा मैथिली वाक्यमब्रवीत् ॥ ६ ॥
कुशलं हनुमन्ब्रूयाः सहितौ रामलक्ष्मणौ ॥ ७ ॥
सुग्रीवं च सहामात्यं वृद्धान्सर्वांश्च वानरान् ॥ ब्रूयास्त्वं वानरश्रेष्ठ कुशलं धर्मसंहितम् ॥ ८ ॥
यथा स च महाबाहुर्मां तारयति राघवः ॥ अस्माद्दुःखाम्बुसंरोधात्त्वं समाधातुमर्हसि ॥ ९ ॥

पवनावधूतमुक्तः महावातकम्पितः तेन रहितश्चेत्यर्थः । प्रतिसंक्रमं प्रतिप्रयाणं । प्रपेदे प्राप्तुमुद्युक्तः ॥ ७३ ॥ इति गोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टत्रिंशः सर्गः ॥ ३८ ॥

अभिज्ञातं सम्यग्ज्ञातं ॥ १ ॥ त्रयाणामिति "अधीगर्थदयेशां कर्मणि" इति षष्ठी । विवाहकाले शिरोमणिदातृत्वात्पित्रोर्ग्रहीतृत्वाच्च मम स्मरणमिति भावः । पाणिग्रहणोत्सवे मम श्वशुराभ्यां प्रथमं शिरोभूषणतया एष दत्तः । अतः त्रीनस्मान् युगपत्स्मरिष्यतीत्यर्थ इत्याह कश्चित् । तदनुचितं "मणिरत्नमिदं दत्तं वैदेह्याः श्वशुरेण मे । वधूकाले तथा बद्धमधिकं मूर्ध्नि शोभते" इत्युपरि वक्ष्यमाणत्वाद्विवाहकाले रामजनन्या अनागमनाच्च ॥ २—३ ॥ कार्यनिर्योगे कार्यसंघटने । प्रमाणं व्यवस्थापकः । चिन्तयतस्तस्य । तवेति शेषः ॥ ४ ॥ आवन्द्येति पदच्छेदः ॥ ५—६ ॥ धर्मसंहितं धर्मसहितं धर्मपुरस्सरं कुशलंब्रूया इत्यर्थः ॥ ८ ॥ दुःखाम्बुसंरोधात् अम्बूनि संरुध्यन्ते अनेनेत्यम्बुसंरोधः जलधिः ।

स० प्रभावात् सर्वदासमीपवर्तिनोपिपदार्थस्येतरादृश्यत्वप्रापकसामर्थ्यविशेषात् ॥ ति० प्रभावात् सामर्थ्यविशेषात् । राक्षसीभिर्यथानज्ञायते तथाधृतं । गिरिवरपवनावधूतमुक्तः पर्वतश्रेष्ठोर्ध्वभागीयपवनकंपितः पश्चात्तेनकंपेनमुक्तः । सहवसुखितमनाः । अयमपि पूर्वंसीतायाअदर्शनेनदुःखवशात्कंपितः । ततस्तद्दर्शनेनततःकंपान्मुक्तः । अतःसुखितमनाः । प्रतिसंक्रमं लङ्कादुर्गप्राकारंप्राप्तुं प्रपेदे यत्नमारभतेत्यर्थः ॥ ७३ ॥ इत्यष्टत्रिंशःसर्गः ॥ ३८ ॥

ती० त्रयाणांसंस्मरिष्यतीति । पाणिग्रहणकालिममजननी इमंमणिंदशरथसंनिधौ जनकहस्तादादायशिरोभूषणतयामह्यंदत्तवती । अतोममजननीं दशरथं जनकं मांच स्मरिष्यतीत्यर्थः ॥ २ ॥ स० वानरात्मजं केसरिपुत्रं वानरंच । ब्रह्मजातलेपिजांबवानिव कश्यपा-

[पा०] १ ग. ङ.—ट. गिरिवरपवना. २ च. ज.—ट. मणिंदृष्ट्वातु. ख. ग. मणिंतुरामोवैदृष्ट्वा. ३ क. तस्मिन्. ४ ङ. झ. ट. समुत्साहे. ५ ङ. ज.—ट. चिन्तययोयत्नः. ६ ठ. वानरात्मजं. ७ ङ. झ, ट. हनूमन्कुशलंब्रूयाः. ८ क. ख. ग. ङ. झ. ञ. ट. यथाचस.

जीवन्तीं मां यथा रामः संभावयति कीर्तिमान् ॥ तत्तथा हनुमन्वाच्यं वाचा धर्ममवाप्नुहि ॥ १० ॥
नित्यमुत्साहयुक्ताश्च वाचः श्रुत्वा त्वयेरिताः ॥ वर्धिष्यते दाशरथेः पौरुषं मदवाप्तये ॥ ११ ॥
मत्संदेशयुता वाचस्त्वत्तः श्रुत्वैव राघवः ॥ पराक्रमविधिं वीरो विधिवत्संविधास्यति ॥ १२ ॥
सीताया वचनं श्रुत्वा हनुमान्मारुतात्मजः ॥ शिरस्यञ्जलिमाधाय वाक्यमुत्तरमब्रवीत् ॥ १३ ॥
क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्रवरैर्वृतः ॥ यस्ते युधि विजित्यारीञ्शोकं व्यपनयिष्यति ॥ १४ ॥
न हि पश्यामि मर्त्येषु नासुरेषु सुरेषु वा ॥ यस्तस्य क्षिपतो बाणान्स्थातुमुत्सहतेऽग्रतः ॥ १५ ॥
अप्यर्कमपि पर्जन्यमपि वैवस्वतं यमम् ॥ स हि सोढुं रणे शक्तस्तव हेतोर्विशेषतः ॥ १६ ॥
स हि सागरपर्यन्तां महीं शासितुमीहते ॥ त्वन्निमित्तो हि रामस्य जयो जनकनन्दिनि ॥ १७ ॥
तस्य तद्वचनं श्रुत्वा सम्यक्सत्यं सुभाषितम् ॥ जानकी बहुमेनेऽथ वचनं चेदमब्रवीत् ॥ १८ ॥
ततस्तं प्रस्थितं सीता वीक्षमाणा पुनःपुनः ॥ भर्तृस्नेहान्वितं वाक्यं सौहार्दादनुमानयत् ॥ १९ ॥
यदि वा मन्यसे वीर वसैकाहमरिन्दम ॥ कस्मिंश्चित्संवृते देशे विश्रान्तः श्वो गमिष्यसि ॥ २० ॥
मम चेदल्पभाग्यायाः सान्निध्यात्तव वानर ॥ अस्य शोकस्य महतो मुहूर्तं मोक्षणं भवेत् ॥ २१ ॥
गते हि हरिशार्दूल पुनरागमनाय तु ॥ प्राणानामपि संदेहो मम स्यान्नात्र संशयः ॥ २२ ॥
तवादर्शनजः शोको भूयो मां परितापयेत् ॥ दुःखाद्दुःखपरामृष्टां दीपयन्निव वानर ॥ २३ ॥
अयं च वीर संदेहस्तिष्ठतीव ममाग्रतः ॥ सुमहांस्त्वत्सहायेषु हर्यृक्षेषु हरीश्वर ॥ २४ ॥
कथं नु खलु दुष्पारं तरिष्यन्ति महोदधिम् ॥ तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ॥ २५ ॥
त्रयाणामेव भूतानां सागरस्यास्य लङ्घने ॥ शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ॥ २६ ॥

समाधातुं राममनुकूलयितुं ॥ ९ ॥ जीवन्तीं संभावयति जीवन्तीं करोतीत्यर्थः । तत्तथा अव्ययमेतत् । वचनस्य प्रयोजनमाह—वाचेति । वाचाधर्मं वाचिकधर्मं ॥ १० ॥ तमेवधर्ममुपपादयति द्वाभ्यां—नित्यमित्यादि ॥ ११—१५ ॥ पर्जन्यं इन्द्रं । "पर्जन्यौ रसदेवेन्द्रौ" इत्यमरः ॥ १६ ॥ जयः भविष्यतीति शेषः ॥ १७ ॥ सम्यक् सोपपत्तिकं । सत्यं परमार्थं । सुभाषितं श्रुतिमधुरं ॥ १८ ॥ वचनं चेदमब्रवीदित्युक्तं विवृणोति—ततस्तमिति ॥ भर्तृस्नेहान्वितं आत्मनि यो भर्तुः स्नेहस्तेनान्वितं । स्वविषयभर्तृस्नेहप्रकाशकमिति यावत् । अनुमानयत् अन्वमानयत् । वक्ष्यमाणोक्तिरूपं संमानवचनमब्रवीदित्यर्थः ॥ १९—२२ ॥ दुःखाद्दुःखपरामृष्टां पूर्वदुःखादधिकेन दुःखेन स्पृष्टां । दीपयन्निव वर्धयन्निवेत्यर्थः ॥ २३ ॥ अयं वक्ष्यमाणः । तिष्ठतीव मूर्तीभूतइत्यर्थः

त्मजत्वेपिसर्पादिवद्वानेतिसूचयितुंपदद्वयं । यद्वा नरेष्वात्माधैर्यंयस्यनरात्मा दशरथः । तस्माज्जायतइतिसतथा । तंरामं प्रतिगन्तुमुपचक्रमेवेत्यन्वयः ॥ ६ ॥ ति० वमतः बाणान्विसृजतइत्यर्थः ॥ १५ ॥ ति० महींसाधितुमर्हति जेतुमुयुङ्क्तइत्यर्थः ॥ १७ ॥ स० अल्पभाग्यायाममतवसांनिध्यादस्यमहतःशोकस्यमोक्षणं त्यागः ॥ २१ ॥ स० पुनरागमनायसंदेहेसति मम प्राणानांसंदेहः स्यादित्यर्थः ॥ २२ ॥ ती० दुःखंदुःखपरामृष्टामितिपाठे दुःखंमां दीपयन् ज्वलयन्निवपरितापयेदितिसंबन्धः ॥ २३ ॥ ति० त्वत्सहायेष्विति । साक्षात्साधकस्यतवसहायभूतेषु मिलितेषुहर्यृक्षेषुहरीश्वरः सुग्रीवः । कथमुदधिंतरिष्यति । सैन्यानिकथंतरिष्यन्ति । तौवाकथंतरिष्यतइत्यर्थः ॥ २४—२५ ॥

[पा०] १ क. राघवः. २ क. ख. ग. ङ. च. ज. झ. ट. तत्त्वया. ३ ङ. झ. ट. युक्तस्य. ४ क. ख. ग. ङ.—ट. मयेरिताः. ५ क. झ. ञ. ट. पराक्रमेमतिं. ङ. पराक्रमेगतिं. ६ ख. ङ. झ. ट. सीतायास्तद्वचः. ७ क. ख. च. छ. ज. ञ. नासुरेष्वमरेषुवा. ग. घ. नामरेष्वसुरेषुच. ८ ङ. झ. ट. वमतो. ९ ख. ग. सतु. १० ग. शासितुमर्हति. ङ. झ. ट. साधितुमर्हति. ११ क. ग. घ. छ. भर्तुःस्नेहान्वितं. १२ ङ. झ. ट. चैवाल्पभाग्यायाः. च. छ. ज. ञ. वाल्पभाग्यायाः. १३ ङ. झ. ट. ततोहि. ख. ततस्तु. १४ ग. पुनश्चागमनायतु. १५ झ. हरीश्वरः. १६ क. ख. ग. छ. झ. ञ. तरिष्यति. १७ क. दशरथात्मजौ. १८ ङ.—ट. सागरस्नेह.

तदस्मिन्[1]कार्यनिर्योगे वीरैवं दुरितक्रमे ॥ किं पश्यसि समाधानं त्वं हि कार्यविदां वरः ॥ २७ ॥
काममस्य त्वमेवैकः कार्यस्य परिसाधने ॥ पर्याप्तः परवीरघ्न यशस्यस्ते फलोदयः ॥ २८ ॥
बलैः [3]समग्रैर्यदि मां रावणं जित्य संयुगे ॥ विजयी [4]स्वपुरीं [5]यायात्तत्तु मे स्याद्यशस्करम् ॥ २९ ॥
[6]शरैस्तु संकुलां कृत्वा लङ्कां परबलार्दनः ॥ मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥ ३० ॥
तद्यथा तस्य विक्रान्तमनु[7]रूपं महात्मनः ॥ भवेदाहवशूरस्य तथा त्वमुपपादय ॥ ३१ ॥
तदर्थोपहितं वाक्यं [8]सहितं हेतुसंहितम् ॥ निशम्य हनुमाञ्शेषं वाक्यमुत्तरमब्रवीत् ॥ ३२ ॥
देवि हर्यृक्षसैन्यानामीश्वरः प्लवतां वरः ॥ सुग्रीवः सत्त्वसंपन्नस्तवार्थे कृतनिश्चयः ॥ ३३ ॥
स वानरसहस्राणां कोटीभिरभिसंवृतः ॥ क्षिप्रमेष्यति वैदेहि राक्षसानां निबर्हणः ॥ ३४ ॥
तस्य विक्रमसंपन्नास्सत्त्ववन्तो महाबलाः ॥ मनःसंकल्पसंपाता निदेशे हरयः स्थिताः ॥ ३५ ॥
येषां नोपरि नाधस्तान्न तिर्यक्सज्जते गतिः ॥ न च कर्मसु सीदन्ति महत्स्वमिततेजसः ॥ ३६ ॥
असकृत्तैर्महोत्साहैः ससागरधराधरा ॥ प्रदक्षिणीकृता भूमिर्वायुमार्गानुसारिभिः ॥ ३७ ॥
मद्विशिष्टाश्च तुल्याश्च सन्ति तत्र वनौकसः ॥ मत्तः प्रत्यवरः कश्चिन्नास्ति सुग्रीवसन्निधौ ॥ ३८ ॥
अहं तावदिह प्राप्तः किं पुनस्ते महाबलाः ॥ न हि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे जनाः ॥ ३९ ॥
तदलं परितापेन देवि शोको व्यपैतु ते ॥ एकोत्पातेन ते लङ्कामेष्यन्ति हरियूथपाः ॥ ४० ॥
मम पृष्ठगतौ तौ च चन्द्रसूर्याविवोदितौ ॥ त्वत्सकाशं महासत्त्वौ नृसिंहावागमिष्यतः ॥ ४१ ॥
तौ हि वीरौ नरवरौ सहितौ रामलक्ष्मणौ ॥ आगम्य नगरीं लङ्कां सायकैर्विधमिष्यतः ॥ ४२ ॥
सगणं रावणं हत्वा राघवो रघुनन्दनः ॥ त्वामादाय वरारोहे [9]स्वपुरं प्रतियास्यति ॥ ४३ ॥
तदाश्वसिहि भद्रं ते भव त्वं कालकाङ्क्षिणी ॥ नचिराद्द्रक्ष्यसे रामं प्रज्वलन्तमिवानलम् ॥ ४४ ॥
निहते [10]राक्षसेन्द्रेऽस्मिन्सपुत्रामात्यबान्धवे ॥ त्वं समेष्यसि रामेण शशाङ्केनेव रोहिणी ॥ ४५ ॥
[11]क्षिप्रं त्वं देवि शोकस्य पारं [12]यास्यसि मैथिलि ॥ रावणं चैव रामेण [13]निहतं द्रक्ष्यसेऽचिरात् ॥ ४६ ॥

॥ २४—२६ ॥ समाधानं परिहारं ॥ २७ ॥ अहमेव साधयिष्यामीत्याशङ्क्याह—काममिति ॥ हे परवीरघ्न त्वं अस्य कार्यस्य सर्वराक्षसवधपूर्वकमत्प्रापणरूपस्य । परिसाधने कामं पर्याप्तः शक्तः । एवं चेत्फलोदयः शक्तिसमृद्धिः । ते यशस्यः तव यशस्करः । नतु ममेति भावः ॥ २८ ॥ तर्हि तव किं यशस्यमित्याकाङ्क्षायामाह—बलैरिति ॥ जित्य जित्वा । मां गृहीत्वेति शेषः । यायात् राम इतिच शेषः ॥ २९ ॥ एतन्नकेवलंमम रामस्यापीत्याह—शरैरिति ॥ ३० ॥ तस्य अनुरूपं विक्रान्तं यथा भवेत्तथा उपपादय कुरु ॥ ३१ ॥ अर्थोपहितं अर्थयुक्तं । सहितं परस्परसंगतं । हेतुसंहितं युक्तियुक्तं । शेषं पूर्वमनुक्तं । उत्तरं वाक्यमब्रवीत् ॥ ३२–३४ ॥ मनःसंकल्पसंपाताः मनोव्यापारतुल्यगमनाः ॥ ३५ ॥ न सज्जते न विलंबेत ॥ ३६—३७ ॥ प्रत्यवरः हीनः । पूर्वं चतुर्णामेवात्र गतिरिति विचारप्रकारमात्रमुक्तं । अत्र तु परमार्थः । यद्यपि बले हनुमानधिकः तथापि वेगे सुग्रीवसन्निहिता नीलादयः सर्वे तुल्या एवेति नानृतोक्तिः ॥ ३८—३९ ॥ एकोत्पातेन एकयत्नेन ॥ ४०–४१ ॥ विधमिष्यतः दहिष्यतः ॥ ४२—४३ ॥ कालकाङ्क्षिणी भव दिवसगणनायां तत्परा भवेत्यर्थः । नचिरात् अचिरात् ॥ ४४—४६ ॥ पुनरब्रवीदिति । दार्ढ्याय

नतुभवत्वेवंहरीणामागमनं । राघवयोःकथंतत्राह—**ममेति** । महासंघौ महासमुदाययुक्तौ ॥ ४१ ॥ इत्येकोनचत्वारिंशःसर्गः ॥ ३९ ॥

[पा०] १ ख. घ. त्वमस्मिन्. क. एतस्मिन्. २ ङ. झ. ञ. ट. समग्रैर्युधि. ३ घ. ङ. झ. ट. स्वपुरं. क. स्वांपुरीं. ग. स्वंपुरं. ४ ग. ङ. झ. ट. तत्तस्यसदृशंभवेत्. ५ क. ख. ग. ङ. झ. ट. बलैस्तु. ६ ङ.—ट. प्रश्रितं. ७ ख. हनुमाञ्श्रेष्ठं. ८ क. संपन्नाः. ९ ङ. छ.—ञ. स्वपुरीं. घ. च. ट. स्वांपुरीं. ख. स्वंपुरं. १० क.—ट. राक्षसेन्द्रेचसपुत्रा. ११ च. छ. ज. ञ. क्षिप्रमेष्यसिशोकस्यपरंपारंचमैथिलि. १२ ङ. झ. ट. द्रक्ष्यसिमैथिलि. १३ ङ. झ. ट. द्रक्ष्यसेनिहतंबलात्. ख. विहतं.

एवमाश्वास्य वैदेहीं हनुमान्मारुतात्मजः ॥ गमनाय मतिं कृत्वा [1]वैदेहीं पुनरब्रवीत् ॥ ४७ ॥
तमरिघ्नं कृतात्मानं क्षिप्रं द्रक्ष्यसि राघवम् ॥ लक्ष्मणं च धनुष्पाणिं लङ्काद्वारमुपस्थितम् ॥
[[3]सुग्रीवसहितं शूरं वानरैः परिवारितम्] ॥ ४८ ॥
नखदंष्ट्रायुधान्वीरान्सिंहशार्दूलविक्रमान् ॥ वानरान्वारणेन्द्राभान्क्षिप्रं द्रक्ष्यसि संगतान् ॥ ४९ ॥
शैलाम्बुदनिकाशानां लङ्कामलयसानुषु ॥ नर्दतां कपिमुख्यानामार्ये यूथान्यनेकशः ॥ ५० ॥
स तु मर्मणि घोरेण ताडितो मन्मथेषुणा ॥ न शर्म लभते रामः सिंहार्दित इव द्विपः ॥ ५१ ॥
मा[6] रुदो देवि शोकेन मा भूत्ते मनसोप्रियम् ॥ [7]शचीव पत्या [8]शक्रेण भर्त्रा नाथवती ह्यसि ॥५२॥
रामाद्विशिष्टः कोन्योस्ति कश्चित्सौमित्रिणा समः ॥ अग्निमारुतकल्पौ तौ भ्रातरौ [9]तेव संश्रयौ ॥ ५३ ॥
नासिंश्चिरं वत्स्यसि देवि देशे रक्षोगणैरध्युषितेतिरौद्रे ॥
न ते चिरादागमनं प्रियस्य क्षमस्व मत्सङ्गमकालमात्रम् ॥ ५४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनचत्वारिंशस्सर्गः ॥ ३९ ॥

चत्वारिंशः सर्गः ॥ ४० ॥

सीतयाहनुमन्तंप्रति श्रीरामे तेनस्वस्यमनश्शिलयातिलकरचनायाः प्रत्यभिज्ञानत्वेननिवेदनचोदनम् ॥ १ ॥ तथा स्वचरणप्रणामपूर्वकंप्रयाणोद्यतंहनुमन्तंप्रति श्रीरामे स्वीयदुरवस्थानिवेदनचोदनपूर्वकमाशीर्वचनेन गमनाभ्यनुज्ञानम् ॥ २ ॥

श्रुत्वा तु वचनं तस्य वायुसूनोर्महात्मनः ॥ उवाचात्महितं वाक्यं सीता सुरसुतोपमा ॥ १ ॥
त्वां दृष्ट्वा प्रियवक्तारं संप्रहृष्यामि वानर ॥ अर्धसंजातसस्येव वृष्टिं प्राप्य वसुन्धरा ॥ २ ॥
यथा तं पुरुषव्याघ्रं गात्रैः शोकाभिकर्शितैः[12] ॥ संस्पृशेयं [13]सकामाऽहं तथा कुरु दयां मयि ॥ ३ ॥
अभिज्ञानं च रामस्य दद्या हरिगणोत्तम[14] ॥ क्षिप्तामिषीकां काकस्य कोपादेकाक्षिशातनीम् ॥ ४ ॥
मनश्शिलायास्तिलको गण्डपार्श्वे निवेशितः ॥ त्वया प्रनष्टे तिलके [15]तत्किल स्मर्तुमर्हसि ॥ ५ ॥

पुनरुक्तिः ॥ ४७—४९ ॥ शैलाम्बुदेति द्रक्ष्यसीति शेषः ॥५०-५१॥ मा रुदः रोदनं मा कुरु ॥५२—५३॥ मत्सङ्गमकालमात्रं मम रामेण सङ्गमकालमात्रं ॥ ५४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

श्रुत्वेत्यादि ॥ १ ॥ अर्धसंजातसस्या अर्धोत्पन्नसस्या ॥ २—३ ॥ काकस्यैकाक्षिशातनीं क्षिप्तां इषीकां इषीकतृणरूपमभिज्ञानं पूर्वोक्तं दद्याः । अन्यच्च वक्ष्यामीति भावः । तदेवाह—मन इति ॥ तिलके पूर्वतिलके प्रनष्टे सति । गण्डपार्श्वे गण्डस्थले गण्डशैलपार्श्वे वा । मनश्शिलायास्तिलकः मनश्शिलाकृततिलकः । तत् मनश्शिलातिलकनिर्माणं । स्मर्तुमर्हसि । इदमप्यभिज्ञानं दद्या इति योजना ॥ ४—

ति० अर्धसंजातानिअर्धवयःप्राप्तानि । ततःपरंजलाभावादासन्नशोषाणिसस्यानियस्यास्सा । यथादैवात्संपन्नवृष्ट्यासंपन्नसस्या भवति तथाऽहमपि प्राप्तजीवितनाशा मृतोपमा त्वद्दर्शनाद्धृतजीविततिभावः ॥ २ ॥ ति० स्मर्तुमर्हसीति मयोक्तमितिब्रूहीतिशेषः

[पा०] १ क. ख. च. छ. ज. ञ. मैथिलीं. २ ङ. झ. ट. मुपागतं. ३ इदमर्धं ग. पाठेदृश्यते. ४ क. च. छ. ज. न्वानरेन्द्रेणक्षिप्रं. ५ च. छ. ज. ञ. मुख्यानामचिराच्छ्रोष्यसिध्वानिं. ख. घ. मुख्यानांनचिराच्छ्रोष्यसिस्वनं. ग. मुख्यानांमध्ये यूथा. ६ ङ. छ. झ. ट. रुदमादेविशोकेन. क. ज. ञ. अलंतेदेविशोकेन. ७ ङ. झ. ट. मनसोभयं. ८ क. घ. ङ. च. ज.—ट. शचीवभर्त्रा. ९ च. ज. ञ. शक्रेणपत्या. ङ. झ. ट. शक्रेणसङ्गमेष्यसिशोभने. १० क. च. छ. ज. ञ. रणसंश्रयौ. ११ ग. च. छ. ज. ञ. रध्युषितेहि. १२ घ. पीडितैः. १३ च. छ. ज. समासक्ता. १४ ख. घ. दत्तं. १५ झ. तंकिल.

स वीर्यवान्कथं सीतां हृतां समनुमन्यसे ॥ वसन्तीं रक्षसां मध्ये महेन्द्रवरुणोपमः ॥ ६ ॥
एष चूडामणिर्दिव्यो मया सुपरिरक्षितः ॥ एतं दृष्ट्वा प्रहृष्यामि व्यसने त्वामिवानघ ॥ ७ ॥
एष निर्यातितः श्रीमान्मया ते वारिसंभवः ॥ अतः परं न शक्ष्यामि जीवितुं शोकलालसा ॥ ८ ॥
असह्यानि च दुःखानि वाचश्च हृदयच्छिदः ॥ राक्षसीनां सुघोराणां त्वत्कृते मर्षयाम्यहम् ॥ ९ ॥
धारयिष्यामि मासं तु जीवितं शत्रुसूदन ॥ मासादूर्ध्वं न जीविष्ये त्वया हीना नृपात्मज ॥ १० ॥
घोरो राक्षसराजोयं दृष्टिश्च न सुखा मयि ॥ त्वां च श्रुत्वा विषज्जन्तं न जीवेयमहं क्षणम् ॥ ११ ॥
वैदेह्या वचनं श्रुत्वा करुणं साश्रु भाषितम् ॥ तथाऽब्रवीन्महातेजा हनुमान्मारुतात्मजः ॥ १२ ॥
त्वच्छोकविमुखो रामो देवि सत्येन ते शपे ॥ रामे दुःखाभिभूते तु लक्ष्मणः परितप्यते ॥ १३ ॥
कथंचिद्धृती दृष्ट्वा न कालः परिशोचितुम् ॥ इमं मुहूर्तं दुःखानामन्तं द्रक्ष्यसि भामिनि ॥ १४ ॥
तावुभौ पुरुषव्याघ्रौ राजपुत्रावरिन्दमौ ॥ त्वद्दर्शनकृतोत्साहौ लङ्कां भस्मीकरिष्यतः ॥ १५ ॥
हत्वा तु समरे क्रूरं रावणं सहबान्धवम् ॥ राघवौ त्वां विशालाक्षि स्वां पुरीं प्रापयिष्यतः ॥ १६ ॥
यत्तु रामो विजानीयादभिज्ञानमनिन्दिते ॥ प्रीतिसंजननं तस्य भूयस्त्वं दातुमर्हसि ॥ १७ ॥
साब्रवीद्दत्तमेवेति मयाभिज्ञानमुत्तमम् ॥ एतदेव हि रामस्य दृष्ट्वा मत्केशभूषणम् ॥
श्रद्धेयं हनुमन्वाक्यं तव वीर भविष्यति ॥ १८ ॥
स तं मणिवरं गृह्य श्रीमान्प्लवगसत्तमः ॥ प्रणम्य शिरसा देवीं गमनायोपचक्रमे ॥ १९ ॥
तमुत्पातकृतोत्साहमवेक्ष्य हरिपुङ्गवम् ॥ वर्धमानं महावेगमुवाच जनकात्मजा ॥
अश्रुपूर्णमुखी दीना बाष्पगद्गदया गिरा ॥ २० ॥
हनुमन्सिंहसंकाशौ भ्रातरौ रामलक्ष्मणौ ॥ सुग्रीवं च सहामात्यं सर्वान्ब्रूया ह्यनामयम् ॥ २१ ॥
यथा च स महाबाहुर्मां तारयति राघवः ॥ अस्माद्दुःखांबुसंरोधात्त्वं समाधातुमर्हसि ॥ २२ ॥
इमं च तीव्रं मम शोकवेगं रक्षोभिरेभिः परिभर्त्सनं च ॥
ब्रूयास्तु रामस्य गतः समीपं शिवश्च तेऽध्वाऽस्तु हरिप्रवीर ॥ २३ ॥

६ ॥ प्रहृष्यामीति । अस्य चूडामणेस्त्वया बहुशो लालितत्वेन त्वत्स्मारकत्वादितिभावः ॥ ७ ॥ वारिसंभवः । रत्नं हि रत्नाकरे उत्पद्यते । अतःपरं मासात्परं ॥ ८—१० ॥ विषज्जन्तं विलम्बमानं ॥ ११—१३ ॥ इमं मुहूर्तं अस्मिन्मुहूर्ते ॥ १४—२२ ॥ शिवः अव्याहत इत्यर्थः ॥ २३ ॥

॥ ५ ॥ ति० दिव्यएषचूडामणिः एतावत्कालंसुपरिरक्षितः । एतंव्यसनेत्वामिवदृष्ट्वाप्रहृष्यामि । एतत्संनिधानेरक्षोऽभिभवासंभवादितिभावः ॥ ७ ॥ ती० त्वत्कृते त्वत्प्राप्त्याशया ॥ ९ ॥ स० मासादूर्ध्वमित्युक्तिस्तुकालेधिकेसत्यपितीव्रागमनाभिप्रायेणवा दिनेषुसत्स्वप्यात्मघाताभिप्रायेणवेतिज्ञातव्यं ॥ १० ॥ ति० यतोऽयंघोरस्तस्यदृष्टिश्च । चाद्बुद्धिः नसुखा अवधिकालादूर्ध्वकृतविनाशनिश्चया । अतस्तत्पूर्वमेवमरणौचित्यादवधिकालस्याधिकक्लेपिमासादूर्ध्वमेवनजीविष्यामि । किंचत्वां विषज्जन्तं विलम्बंकुर्वन्तं । यदिश्रृणुयां तदा तथाश्रुत्वामासादर्वागेवक्षणमपिनजीवेयमित्युक्तमितिब्रूहीतिशेषः ॥ स० विषज्जन्तं असक्तमिवविद्यमानं ॥ ११ ॥ ति० त्वच्छोकविमुखः त्वत्स्थित्यपरिज्ञानजशोकेनत्वदुद्धारप्रवृत्तिविमुखः । नतुज्ञात्वेति सत्येनतेशपे ॥ १३ ॥ ति० त्वंसमाधातुमित्यस्य तथेत्यादिः । समाधानं संविधानं । अथापिसमहाबाहुरितिपाठे यथेत्यपिपूरणीयमेव । यद्यपिश्रुतवृत्तान्तःस्वयमेवयतिष्य-

[पा०] १ क. ख. घ. च.—ट. वरुणोपम. २ क. ङ. ट. संपरि. ३ ङ. झ. ट. राक्षसैस्सहसंवासं. ४ घ. विपन्नंतु. ५ ङ. झ. ट. मपिक्षणं. ६ क. ख. ग. ङ.—ट. अथाब्रवीत्. घ. ततोऽब्रवीत्. ७ क. ग.—च. ज. झ. ट. शोकाभिभूते. ८ क. ग. ङ.—ट. दृष्टाकथंचिद्धृती. ९ ङ. झ. ट. परिदेवितुं. १० घ.—ट. वनिन्दितौ. ११ घ. छित्त्वातु. १२ क. ग. घ. च. छ. ज. ञ. घोरं. ङ. झ. ट. रक्षो. १३ क. ङ.—ट. बान्धवैः. १४ क. ग. च. छ. ज. ञ. राघवस्त्वां. १५ ङ. झ. ट. प्रतिनेष्यतः. क. च. छ. ज. ञ. प्रतिनेष्यति. ग. प्रापयिष्यति. १६ ङ. झ. ट. यत्नेनभूषणं. १७ क. ग, च. ज, ञ, बाष्पसंदिग्धया. १८ क. ग. ञ. शोकंममतीव्रवेगं. १९ घ. शिवश्चपन्थास्तु.

स राजपुत्र्या प्रतिवेदितार्थः कपिः कृतार्थः परिहृष्टचेताः ॥
अल्पावशेषं प्रसमीक्ष्य कार्यं दिशं ह्युदीचीं मनसा जगाम ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

एकचत्वारिंशः सर्गः ॥ ४१ ॥

हनुमता रावणेनसह साक्षात्संभाषणादिनातदीयबलाध्यवसायादिपरिज्ञानस्यावश्यकत्वनिर्धारणपूर्वकंवनभङ्गनस्य तद्दर्शनोपायत्वनिर्धारणेनाशोकवनभङ्गनम् ॥ १ ॥

स च वाग्मिः प्रशस्ताभिर्गमिष्यन्पूजितस्तया ॥ तस्मादेशादपक्रम्य चिन्तयामास वानरः ॥ १ ॥
अल्पशेषमिदं कार्यं दृष्टेयमसितेक्षणा ॥ त्रीनुपायानतिक्रम्य चतुर्थ इह लक्ष्यते ॥ २ ॥
न साम रक्षस्सु गुणाय कल्पते न दानमर्थोपचितेषु युज्यते ॥
न भेदसाध्या बलदर्पिता जनाः पराक्रमस्त्वेव ममेह रोचते ॥ ३ ॥
न चास्य कार्यस्य पराक्रमादृते विनिश्चयः कश्चिदिहोपपद्यते ॥
हतप्रवीरा हि रणे हि राक्षसाः कथंचिदीयुर्यदिहाद्य मार्दवम् ॥ ४ ॥
कार्ये कर्मणि निर्दिष्टे यो बहून्यपि साधयेत् ॥ पूर्वकार्याविरोधेन स कार्यं कर्तुमर्हति ॥ ५ ॥
न ह्येकः साधको हेतुः स्वल्पस्यापीह कर्मणः ॥ यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने ॥ ६ ॥

अल्पावशेषं अल्पावशिष्टं । प्रसमीक्ष्य विचार्य॥२४॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चत्वारिंशः सर्गः ॥ ४० ॥

" अभिगम्य तु वैदेहीं निलयं रावणस्यच " इत्युक्तकार्यद्वये सीतादर्शनरूपं कार्यं जातं । इदं कार्यं रावणनिलयपरिज्ञानरूपं । अल्पशेषं अल्पावशिष्टं । सान्तःपुरलङ्कायाः सम्यक्परिज्ञातत्वेपि राक्षसबलाबलरावणहृदयाद्यपरिज्ञानात्कार्यस्याल्पशेषत्वोक्तिः । इह राक्षसबलाबलरावणहृदयपरिज्ञानरूपकार्ये । त्रीनुपायानतिक्रम्य सामदानभेदानतिक्रम्य । चतुर्थो लक्ष्यते साधनतया दण्ड एवदृश्यतइत्यर्थः ॥ २ ॥ उपपत्तिपूर्वकमेतदेव विवृणोति—न सामेति ॥ " अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः । पराजयश्च संग्रामे तस्माद्युद्धं विसर्जयेत् " इति युद्धस्याव्यवस्थितफलकत्वेपि " सर्वं बलवतः पथ्यं " इति न्यायेन सर्वातिशायिबलपराक्रमस्य मम पराजयप्रसङ्ग एव नास्तीत्यभिप्रायेणाह—पराक्रम इति । मम तु इह रक्षोविषये पराक्रम एव रोचत इति संबन्धः ॥ ३—४ ॥ " अभिगम्य तु वैदेही निलयं रावणस्य च " इत्यनुज्ञातस्यातिरिक्तकार्यकरणे दोषमाशङ्क्य परिहरति—कार्य इति ॥ कार्ये विहिते कर्तव्ये । बहूनि कार्याणि ॥ ५ ॥ अल्पस्यापि कर्मणः एको

ति तथापि त्वमपियथामांशीघ्रंतारयसि तथासंविधानंकुर्वित्यर्थः ॥२२॥ **ति०** तत्कार्यं लङ्कागमनप्रयोजनं । अल्पशेषं । देवीदर्शनरूपस्यमहतःप्रधानकृत्यस्यनिष्पन्नत्वात्परबलार्दनरूपस्यानुषङ्गिकत्वादल्पशेषत्वमित्याशयः ॥२५॥ इतिचत्वारिंशःसर्गः ॥४०॥

ति० अस्यकार्यस्य परबलाशयपरिज्ञानरूपस्य । सर्वातिशायिपराक्रमवतोममपराजयएवनास्तीत्याशयेनाह—पराक्रमादृते इति । विनिश्चयः निश्चितोपायः । स्वबलप्रकाशनेप्रयोजनान्तरमप्यस्तीत्याह—हतेति । अथ हताःप्रवीराः श्रेष्ठायेषांतेराक्षसाः यत् यस्मात् इह भाविनिरणे । मार्दवं एकेनैवैवंपराक्रमःकृतः तादृग्भिरनेकैःकथमस्माकंजयाशेतिरणप्रवृत्तिराहित्यंप्राप्नुयुः । अतः पराक्रमात्परबलस्यमनोभङ्गरूपंकार्यंसिध्यतीत्याशयः । **शि०** इह अस्मिन्समये । राक्षसाःकथंचित् केनाप्युपायेनयदिहतप्रवीराः तर्हिमार्दवं किंचिन्नश्रुतं । ईयुः । एतेन नश्रीभूययदिसीतांरामायसमर्पयेत् तर्हिराक्षसकुलविध्वंसो नभवेदितिसूचितं । तेनहनुमतो दयालुत्वंव्यक्तं ॥४॥ **ति०** उक्तमेवविवृणोति—**नहीति**।यस्तु स्वल्पस्यापिकर्मणोतिशयितयत्नेनसिद्धिहेतुर्भवति असावेकोमुख्यः

[पा०] १ घ. ट. प्रतिपादितार्थः. २ क.—ट. तदल्पशेषं. ३ च. स्तदा. ४ क. ग. घ. च. छ. ज. वर्तते. ५ ख. ग. ङ. झ. ट. स्त्वेष. ६ ङ. च. छ. झ. ञ. ट. निर्वृत्ते. क. संवृत्ते.

इहैव तावत्कृतनिश्चयो ह्यहं यदि व्रजेयं प्लवगेश्वरालयम् ॥
परात्मसंमर्दविशेषतत्त्ववित्ततः कृतं स्यान्मम भर्तृशासनम् ॥ ७ ॥
कथं नु खल्वद्य भवेत्सुखागतं प्रसह्य युद्धं मम राक्षसैः सह ॥
तथैव खल्वात्मबलं च सारवत्समानयेन्मां च रणे दशाननः ॥ ८ ॥
ततः समासाद्य रणे दशाननं समन्त्रिवर्गं सबलप्रयायिनम् ॥
हृदि स्थितं तस्य मतं बलं च वै सुखेन मत्वाऽहमितः पुनर्व्रजे ॥ ९ ॥
इदमस्य नृशंसस्य नन्दनोपममुत्तमम् ॥ वनं नेत्रमनःकान्तं नानाद्रुमलतायुतम् ॥ १० ॥
इदं विध्वंसयिष्यामि शुष्कं वनमिवानलः ॥ अस्मिन्भग्ने ततः कोपं करिष्यति दशाननः ॥ ११ ॥
ततो महत्साश्वमहारथद्विपं बलं समादेक्ष्यति राक्षसाधिपः ॥
त्रिशूलकालायसपट्टसायुधं ततो महद्युद्धमिदं भविष्यति ॥ १२ ॥
अहं तु तैः संयति चण्डविक्रमैः समेत्य रक्षोभिरसह्यविक्रमः ॥
निहत्य तद्रावणचोदितं बलं सुखं गमिष्यामि कपीश्वरालयम् ॥ १३ ॥
ततो मारुतवत्क्रुद्धो मारुतिर्भीमविक्रमः ॥ ऊरुवेगेन महता द्रुमान्क्षिप्रमथारभत् ॥ १४ ॥
ततस्तु हनुमान्वीरो बभञ्ज प्रमदावनम् ॥ मत्तद्विजसमाघुष्टं नानाद्रुमलतायुतम् ॥ १५ ॥

हेतुस्साधकोन किमुत महतः कर्मण इति भावः । बहुधा बहुभिर्हेतुभिः ॥ ६ ॥ पूर्वोक्तसमर्थनायाह— इहैवेति ॥ अहमिहैव परात्मसंमर्दविशेषतत्त्ववित् परात्मनोर्युद्धतारतम्यतत्त्ववित् । कृतनिश्चयः कृतबलाबलनिश्चयः सन् यदि प्लवगेश्वरालयं व्रजेयं ततः भर्तृशासनं सीतादर्शनरावणनिलयसम्यक्परिज्ञानविषयं शासनं । तावत्साकल्येन कृतं स्यात् । अन्यथा राक्षसबलावलं कीदृशमितिभर्त्रापृष्टे निरुत्तरः स्यामिति भावः ॥ ७ ॥ युद्धं कथं सुखागतं सुखेन प्राप्तं भवेत्तथा कर्तव्यमित्यर्थः । युद्धस्य फलमाह— तथैवेत्यादिना सार्धश्लोकेन ॥ तथैव खलु युद्धकरणे खलु । स दशाननः । रणे आत्मबलं स्वपक्षबलं मां च । सारवत् मानयेत्परिच्छिन्द्यात् ॥ ८ ॥ बलप्रयायिना सेनान्या सह वर्तत इति सबलप्रयायी तं । तस्य हृदिस्थितं मतं सीताविषयाध्यवसायं बलं च मत्वा । सुखेन इतः अस्मात्स्थानात् । पुनः व्रजे व्रजिष्यामि ॥ ९ ॥ नेत्रमनःकान्तं वर्तत इति शेषः ॥ १०— १२ ॥ समादेक्ष्यति नियोजयिष्यति । इदं अव्यवहितोत्तरकालिकं ॥ १२ ॥ कपीश्वरालयमित्यनन्तरमितिकरणं द्रष्टव्यं । इति चिन्तयामासेत्यन्वयः ॥१३॥ ततः तेन चिन्तितेन हेतुना ॥ १४ ॥ प्रमदावनं अन्तःपुरवनं । "प्रमदावनमन्तःपुरोचितं" इत्यमरः

साधकोहेतुर्नभवति । अपितु योद्ध्यर्थं प्रयोजनं । अल्पेनयत्नेन बहुधाकर्तुंवेद सएवार्थसाधने समर्थः ॥ ६ ॥ **ति०** एवंनिश्चितार्थो युद्धप्रवृत्तिप्रकारंचिन्तयति—**कथंन्विति** । अद्यखलु ममेहागतं आगमनं । सुखागतं सुखफलकमागमनंकथंभवेत् । तथा राक्षसैः सहप्रसह्यस्वयमेवबलात्कृत्ययुद्धंच कथंममभवेत् । तथा तथैवकरणेसति । सारवत् ऊर्जितंस्वबलंमांच सदशाननः कथंमानयेत् श्लाघयेत् । यद्वा तथैवयुद्धकरणेखलु दशाननः आत्मबलंमांचसारवत्संमानयेत् सम्यक्परिच्छिन्द्यादित्यर्थेनयुद्धफलमुक्तं ॥ ८ ॥ **ति०** ततोमद्बलवशादेवमारणेसमासाद्यवर्तमानं सबलं सयायिनं ससारथिं । अन्तर्भावितण्यर्थाद्यातेर्णिनौ यापयितायायी सारथिः । तेनसहितंरावणंज्ञात्वा हृदिस्थितंतस्यमतं अभीष्टंबलंच । सुखेन अक्लेशतोमत्वा ज्ञात्वा । पुनरितोव्रजे व्रजिष्ये । सबलप्रयायिनमित्याधुनिककल्पितःपाठः ॥ ९ ॥ **शि०** इदंवनं अस्य रावणस्य । मनःकान्तं मनःप्रियं । अस्तीतिशेषः ॥ १० ॥ **शि०** इदंवनं शुष्कंवनमनलइवविध्वंसयिष्यामि । यदितु एतच्छ्लोकघटकस्य इदमित्यस्य स्वप्रवेशिनोजनस्योद्दीपनद्वारा इंकामंददातीतितथाइत्यर्थः तदापूर्वस्मापीहैवान्वयः । एवंच पूर्वत्रास्तेरध्याहारस्य न प्रयोजनं ॥ ११ ॥

[पा०] १ ग. घ. सुखावहं. २ ङ. च. झ. ट. सबलंसयायिनं. घ. सबलंसबान्धवं. ३ क. ङ.—ट. समानेष्यति. ४ ङ. झ. ञ. ट. रभङ्गविक्रमः. घ. रसह्यविक्रमैः. ५ ग. ङ. झ. ढ. ततस्तद्धनुमान्.

तद्वनं मथितैर्वृक्षैर्भिन्नैश्च सलिलाशयैः ॥ चूर्णितैः पर्वताग्रैश्च बभूवाप्रियदर्शनम् ॥ १६ ॥
नानाशकुन्तविरुतैः प्रभिन्नैः सलिलाशयैः ॥ ताम्रैः किसलयैः क्रान्तैः क्रान्तद्रुमलतायुतम् ॥
न बभौ तद्वनं तत्र दावानलहतं यथा ॥ १७ ॥
व्याकुलावरणा रेजुर्विह्वला इव ता लताः ॥ १८ ॥
लतागृहैश्चित्रगृहैश्च नाशितैर्महोरगैर्व्यालमृगैश्च निर्धुतैः ॥
शिलागृहैरुन्मथितैस्तथा गृहैः प्रनष्टरूपं तदभून्महद्वनम् ॥ १९ ॥
सा विह्वलाऽशोकलताप्रताना वनस्थली शोकलताप्रताना ॥
जाता दशास्यप्रमदावनस्य कपेर्बलाद्धि प्रमदावनस्य ॥ २० ॥
सं तस्य कृत्वाऽर्थपतेर्महाकपिर्महद्व्यलीकं मनसो महात्मनः ॥
युयुत्सुरेको बहुभिर्महाबलैः श्रिया ज्वलंस्तोरणमाश्रितः कपिः ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

द्विचत्वारिंशः सर्गः ॥ ४२ ॥

हनुमताऽवभञ्जने संभ्रान्तपक्षिकुलकोलाहलैर्वृक्षभङ्गरवैश्च प्रबुद्धाभीराक्षसीभिःसीतांप्रति हनुमत्स्वरूपादिप्रश्नः ॥ १ ॥ सीतया कैतवेनस्वस्यतदपरिज्ञानोक्तौ राक्षसीभीरावणायतन्निवेदनम् ॥ २ ॥ रावणचोदितैरशीतिसंख्याकैःकिङ्करनामकै राक्षसैस्तोरणस्थंहनुमन्तंप्रति युद्धायाभियानम् ॥ ३ ॥ हनुमता रामादिजयोद्घोषणेनसह स्वनामनिर्देशेनस्वस्यरामदूतत्वोद्घोषणपूर्वकं सकलकिङ्करराक्षससंहरणम् ॥ ४ ॥

ततः पक्षिनिनादेन वृक्षभङ्गस्वनेन च ॥ बभूवुस्त्रासंभ्रान्ताः सर्वे लङ्कानिवासिनः ॥ १ ॥

॥ १५ ॥ पर्वताग्रैः क्रीडापर्वताग्रैः ॥ १६—१७ ॥ व्याकुलावरणाः आवरणादुपन्नाव्याकुलाः । विह्वलाः स्त्रिय इव ॥ १८ ॥ व्यालमृगैः श्वापदादिहिंस्रमृगैः । निर्धुतैः पीडितैः । गृहैः केवलगृहैः ॥ १९ ॥ शोच्यत इति शोकः । प्रतानं विततिः । अशोकं अशोच्यं लताप्रतानं यस्यास्सा अशोकलताप्रताना । दशास्यप्रमदावनस्य भोगवर्धनेन रावणवनितारक्षकस्य । प्रमदावनस्य अन्तःपुरोद्यानस्य । सा वनस्थली तृणगुल्मलतादिविशिष्टप्रदेशः । कपेर्बलाद्धि विह्वला लुलिता शोकलताप्रताना च जाता । यद्वा शोकलताश्शोकरताः । रलयोरभेदः । अप्रतानाः अप्सु प्रतानाः कमलकह्लारादयोऽस्यां सा शोकलताप्रताना । म्लानजलजेति यावत् । दशास्यप्रमदावनस्य रावणप्रमदावनस्य । "ङ्यापोस्संज्ञाच्छन्दसोर्बहुलम्" इति बहुलवचनाद्भस्वाभावः । दशास्यप्रमदावनस्य वनस्थलीत्यत्र शिलापुत्रकस्य शरीरमितिवदुपचारात्षष्ठी । प्रमदावनस्य सीतारूपप्रमदापालकस्य । वनस्थली कपेर्बलाद्विह्वला शोकलताप्रताना च जाता । अशोकलतेत्युपलक्षणं ॥ २० ॥ अर्थपतेः राज्ञो रावणस्य । मनसः व्यलीकं अप्रियं पीडनं वा । "अलीकं त्वप्रियाकार्यवैलक्ष्यानृतपीडने" इति निघण्टुः।युयुत्सुः योद्धुमिच्छुः । तोरणं उद्यानबहिर्द्वारं । "तोरणोस्त्री बहिर्द्वारं" इत्यमरः ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकचत्वारिंशः सर्गः ॥ ४१ ॥

उतशब्दो वार्थे । "उताप्यर्थविकल्पयोः"

ति० पर्वताग्रैः उपलक्षितमितिशेषः ॥ १६ ॥ शि० विह्वलाः अशोकलताप्रतानाः विस्तृताशोकलताःयस्यांसा वनस्थली । प्रमदस्य उत्कृष्टमदस्य अवनेरक्षणंयस्मिंस्तस्य । निर्लमदविशिष्टस्येत्यर्थः । दशास्यप्रमदावनस्य रावणस्त्रीसमूहस्य । कपेर्बलात् शोकरूपलताप्रतानःलताविस्तारोयस्यांसा जाता ॥ २० ॥ इत्येकचत्वारिंशःसर्गः ॥ ४१ ॥

[पा०] १ ख. घ. बभूवाद्भुतदर्शनं. ङ. च. ट. बहुधाप्रियदर्शनं. झ. बहुधाप्रियदर्शनैः. २ ङ. झ. ट. लतायुतैः. ३ ङ.—ट. सादितैर्व्यालैर्मृगैरार्तरवैश्चपक्षिभिः. ४ क. व्याघ्रमृगैश्च. ५ ङ. झ. ट. ततस्सकृत्वाजगतीपतेर्महान्कपिः. ६ ग. बहुभिर्निशाचरैः. ७ क. ग.—च. झ. ञ. ट. माश्रितः.

विद्रुताश्च भयत्रस्ता विनेदुर्मृगपक्षिणः ॥ रक्षसां च निमित्तानि क्रूराणि प्रतिपेदिरे ॥ २ ॥
ततो गतायां निद्रायां राक्षस्यो विकृताननाः ॥ तद्वनं ददृशुर्भग्नं तं च वीरं महाकपिम् ॥ ३ ॥
स ता दृष्ट्वा महाबाहुर्महासत्त्वो महाबलः ॥ चकार सुमहद्रूपं राक्षसीनां भयावहम् ॥ ४ ॥
ततस्तं गिरिसंकाशमतिकायं महाबलम् ॥ राक्षस्यो वानरं दृष्ट्वा पप्रच्छुर्जनकात्मजाम् ॥ ५ ॥
कोयं कस्य कुतो वाऽयं किंनिमित्तमिहागतः ॥ कथं त्वया सहानेन संवादः कृत इत्युत ॥ ६ ॥
आचक्ष्व नो विशालाक्षि मा भूत्ते सुभगे भयम् ॥ संवादमसितापाङ्गे त्वया किं कृतवानयम् ॥७॥
अथाब्रवीत्तदा साध्वी सीता सर्वाङ्गसुन्दरी ॥ रक्षसां भीमरूपाणां विज्ञाने मम का गतिः ॥ ८ ॥
यूयमेवाभिजानीत योऽयं यद्वा करिष्यति ॥ अहिरेव ह्यहेः पादान्विजानाति न संशयः ॥ ९ ॥
अहमप्यस्य भीताऽस्मि नैनं जानामि कोन्वयम् ॥ वेद्मि राक्षसमेवैनं कामरूपिणमागतम् ॥१०॥
वैदेह्या वचनं श्रुत्वा राक्षस्यो विद्रुता दिशः ॥ स्थिताः काश्चिद्गताः काश्चिद्रावणाय निवेदितुम् ॥११॥
रावणस्य समीपे तु राक्षस्यो विकृताननाः ॥ विरूपं वानरं भीममाख्यातुमुपचक्रमुः ॥ १२ ॥
अशोकवनिकामध्ये राजन्भीमवपुः कपिः ॥ सीतया कृतसंवादस्तिष्ठत्यमितविक्रमः ॥ १३ ॥
न च तं जानकी सीता हरिं हरिणलोचना ॥ अस्माभिर्बहुधा पृष्टा निवेदयितुमिच्छति ॥ १४ ॥
वासवस्य भवेद्दूतो दूतो वैश्रवणस्य वा ॥ प्रेषितो वाऽपि रामेण सीतान्वेषणकाङ्क्षया ॥ १५ ॥
तेन त्वद्भुतरूपेण यत्तत्तव मनोहरम् ॥ नानामृगगणाकीर्णं प्रमृष्टं प्रमदावनम् ॥ १६ ॥
न तत्र कश्चिदुद्देशो यस्तेन न विनाशितः ॥ यत्र सा जानकी सीता न स तेन न विनाशितः ॥१७॥
जानकीरक्षणार्थं वा श्रमाद्वा नोपलभ्यते ॥ अथवा कः श्रमस्तस्य सैव तेनाभिरक्षिता ॥ १८ ॥
चारुपल्लवपुष्पाढ्यं यं सीता स्वयमाश्रिता ॥ प्रवृद्धः शिंशुपावृक्षः स च तेनाभिरक्षितः ॥ १९ ॥
तस्योग्ररूपस्योग्र त्वं दण्डमाज्ञातुमर्हसि ॥ सीता संभाषिता येन तद्वनं च विनाशितम् ॥ २० ॥

इत्यमरः । संवादो वा कथं कृत इति पप्रच्छुरिति पूर्वेण संबन्धः । कः किंनामकः । कस्य कस्य संबन्धी पुरुषः । कुतः कस्मादेशादागतः । किंनिमित्तं किं प्रयोजनमुद्दिश्य । संवादं किं कृतवान् किमुद्दिश्य कृतवान् । सर्वस्यापि पप्रच्छुरितिपूर्वेणान्वयः ॥६–८॥ अयं यः यादृशः । यद्वा कार्यं करिष्यति तद्यूयमेवाभिजानीतेति संबन्धः ॥ ९ ॥ नैनं जानामीति । "विवाहकाले रतिसंप्रयोगे प्राणात्यये सर्वधनापहारे । मित्रस्य चार्थेष्यनृतं वदेयुः पञ्चानृतान्याहुरपातकानि" इति स्मरणादसत्योक्तिः ॥ १० ॥ दिशः दिक्षु । वनस्यपार्श्वेष्वित्यर्थः । विद्रुताः विलीनाः । निवेदितुं निवेदयितुं ॥११—१५॥ प्रमृष्टं भग्नमित्यर्थः ॥१६—१९॥ हे उग्र त्वं आज्ञातुं आज्ञापयितुं ॥२०

ति० पप्रच्छुः तस्यानिर्निद्रतयाऽवस्थानंमलेतिभावः ॥ ५ ॥ ति० त्वयाऽनेनकथंसंवादःकृतइतिचपप्रच्छुः । यद्यपितानिद्रिताः । वनभङ्गध्वनिनाजागरिताइतिसंवादज्ञानस्यैवाभावात्कथंप्रश्नोनिरवसरः । तथापि निद्रामध्येकिञ्जिज्जागरेणेषत्संवादश्रवणेपि देवमायया पुनर्निद्रेतितत्प्रश्नोपपत्तिरित्याहुः । सीतायास्तदृर्शनेपिनिर्भयप्रसन्नमुखतयाऽवस्थानादर्शनादयंकश्चिदेतत्परिचितएतद्वृत्तान्तज्ञानार्थमेवप्रायेणागतइतिसंभाव्यानयासंवादकरणंचसंभाव्य तत्प्रश्ननिर्वाहइतिकतकः ॥ ६ ॥ ति० कागतिः कउपायः ॥८॥ ति० ननिवेदयितुमिच्छति । प्रायेणेयंतंजानातीतिसामाशयः ॥ १४ ॥ ति० उद्देशः प्रदेशः ॥ १७ ॥

[पा०] १ क. विद्राविताश्वसंत्रस्ताः. २ ङ. झ. ट. निषेदुः. ३ घ. ददृशुर्भिन्नं. ४ च. भीमं. ५ च. ज. ञ. महामतिं. ६ च. छ. ज. ञ. त्वयानेनपुनः. ७ क.—ट. सर्वाङ्गशोभना. ८ क.—ट. कामरूपाणां. ९ ङ. झ. ट. कागतिर्मम. १० घ. ङ. झ. ट. यूयमेवास्यजानीत. क. ग. यूयमेवात्र. च. छ. ज. ञ. यूयमेवहि. ११ ङ. झ. ट. अहमप्यति. १२ ङ. झ. ट. नैवजानामिकोह्यहं. १३ क. ख. दृढं. ङ. झ. ट. द्रुतं. ग. भयात्. १४ ङ. झ. ट. भीमंरावणायन्यवेदिषुः. क. भीमंव्याख्यातुमुप. १५ ङ. झ. ट. तेनैवाद्भुत. १६ क. ञ. वीर्येण. १७ ङ. झ. ट. देवी, १८ क. ङ. ज—ट. लक्ष्यते. १९ क. घ. ङ. झ. ट. पत्राढ्यं. च. छ. ज. ञ. शोभाढ्यं. २० ङ. छः झ. ञ. रूपस्योग्रं. २१ ग. ङ.—ट. वनंतेन.

मनःपरिगृहीतां तां तव रक्षोगणेश्वर ॥ कः सीतामभिभाषेत यो न स्यात्त्यक्तजीवितः ॥ २१ ॥
राक्षसीनां वचः श्रुत्वा रावणो राक्षसेश्वरः ॥ हुताग्निरिव जज्वाल कोपसंवर्तितेक्षणः ॥ २२ ॥
तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन्नास्रबिन्दवः ॥ दीप्ताभ्यामिव दीपाभ्यां सार्चिषः स्नेहबिन्दवः ॥२३॥
आत्मनः सदृशाञ्छूरान्किंकरान्नाम राक्षसान् ॥ व्यादिदेश महातेजा निग्रहार्थं हनूमतः ॥ २४ ॥
तेषामशीतिसाहस्रं किंकराणां तरस्विनाम् ॥ २५ ॥
निर्ययुर्भवनात्तस्मात्कूटमुद्गरपाणयः ॥ महोदरा महादंष्ट्रा घोररूपा महाबलाः ॥
युद्धाभिमनसः सर्वे हनुमद्ग्रहणोन्मुखाः ॥ २६ ॥
ते कपीन्द्रं समासाद्य तोरणस्थमवस्थितम् ॥ अभिपेतुर्महावेगाः पतङ्गा इव पावकम् ॥ २७ ॥
ते गदाभिर्विचित्राभिः परिघैः काञ्चनाङ्गदैः ॥ आजघ्नुर्वानरश्रेष्ठं शरैश्चादित्यसन्निभैः ॥ २८ ॥
मुद्गरैः पट्टिशैः शूलैः प्रासतोमरशक्तिभिः ॥ परिवार्य हनूमन्तं सहसा तस्थुरग्रतः ॥ २९ ॥
हनुमानपि तेजस्वी श्रीमान्पर्वतसन्निभः ॥ क्षितावाविध्य लाङ्गूलं ननाद च महास्वनम् ॥ ३० ॥
स भूत्वा सुमहाकायो हनुमान्मारुतात्मजः ॥ धृष्टमास्फोटयामास लङ्कां शब्देन पूरयन् ॥ ३१ ॥
तस्यास्फोटितशब्देन महता सानुनादिना ॥ पेतुर्विहङ्गा गगनाद्दुश्चैश्चेदमघोषयत् ॥ ३२ ॥
जयत्यतिबलो रामो लक्ष्मणश्च महाबलः ॥ राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ ३३ ॥
दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः ॥ हनुमाञ्शत्रुसैन्यानां निहन्ता मारुतात्मजः ॥ ३४ ॥
न रावणसहस्रं मे युद्धे प्रतिबलं भवेत् ॥ शिलाभिस्तु प्रहरतः पादपैश्च सहस्रशः ॥ ३५ ॥
अर्दयित्वा पुरीं लङ्कामभिवाद्य च मैथिलीम् ॥ समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम् ॥३६॥
तस्य सन्नादशब्देन तेऽभवन्भयशङ्किताः ॥ ददृशुश्च हनूमन्तं संध्यामेघमिवोन्नतम् ॥ ३७ ॥

—२१॥ संवर्तितेक्षणः परिवर्तितेक्षणः ॥२२—२३॥ नाम प्रसिद्धौ । किंकर इति प्रसिद्धानित्यर्थः ॥ २४ ॥ किंकराणां संख्यां निर्दिशति—तेषामिति ॥ २५ ॥ सर्व इति विशेष्यं । कूटो नाम अयस्कारकूटसदृश आयुधविशेषः । मुद्गरः द्रुघणः ॥ २६ ॥ अवस्थितं युद्धाय सन्नद्धमित्यर्थः ॥ २७ ॥ परिघैः परिघपातनैः । काञ्चनाङ्गदैः काञ्चनपटैः ॥ २८ ॥ पट्टिशो नाम लोहदण्डः तीक्ष्णधारः क्षुरोपमआयुधविशेषः । अत्रेत्थंभूतलक्षणे तृतीया । प्रासः कुन्तः । तोमरः आयुधविशेषः ॥ २९ ॥ श्रीमानिति तात्कालिकहर्षकृतकान्तिरुच्यते ॥ ३० ॥ धृष्टमिति क्रियाविशेषणं ॥ ३१ ॥ सानुनादिना सप्रतिध्वनिना । यद्वा अनुनादिनः पर्वतगुहादयः तत्सहितेन । यद्वा सानुषु प्रतिध्वनिंकुर्वता । उच्चैश्चेदमघोषयदिति । स हनुमान इदं वक्ष्यमाणं वचनमुच्चैरघोषयत् ॥ ३२ ॥ घोषणवचनमाह—जयतीत्यादि ॥ अभिपालितः वालिवधेन ॥३३॥अक्लिष्टकर्मण इत्यनेन स्वदास्यं न कर्मकृतं किंतु स्वरूपप्रयुक्तमित्युच्यते॥३४॥ प्रतिबलं समानबलं । प्रहरतः राक्षसानितिशेषः । प्रहारमात्रेणवा हनुमद्विशेषणं ॥ ३५ ॥ मिषतां पश्यतां । अनादरे षष्ठी ॥ ३६ ॥ संध्यामेघमिवेति रक्तवर्णत्वात् ॥ ३७ ॥

ती० सीतयासहसंभाषणस्यापराधत्वंसाधयन्ति—**मनःपरिगृहीतामिति** । राजपरिग्रहसंभाषणंपुंसोपराधइतिभावः । **ति०** त्यक्तजीवितः त्यक्तजीविताशः ॥ २१ ॥ **स०** आत्मनःसदृशान् स्वदूतत्वयोग्यान् ॥ २४ ॥ तेषांसंख्या अशीतिसाहस्रमित्यन्वयः । **शि०** तेषामिति । किङ्कराणांमध्येअशीतिसाहस्रंकिङ्करास्तस्माद्भवनान्निर्ययुः ॥ २५ ॥ **ति०** क्षितावाविध्यलाङ्गूलमिति स्वभावोक्तिरलङ्कारः ॥ ३० ॥

[पा०] १ घ. ङ. झ. ट. सदृशान्वीरान्. २ क.—ङ. झ. ञ. ट. कपिंतं. ३ ख. ग. ङ. झ. ट. शरैरादित्य. च. छ. ज. ञ. शरैरशनि. ४ क. ख. ग. ङ. च. ज.—ट. तोमरपाणयः. ५ ङ. झ. ट. पुच्छमास्फोट. ६ क. ख. च. छ. ज. ञ. दुश्चैर्घोषमघोषयत्. ७ क. राघवेणानु. ८ ट. ददृशुस्ते.

स्वामिसंदेशनिःशङ्कास्ततस्ते राक्षसाः कपिम् ॥ चित्रैः प्रहरणैर्भीमैरभिपेतुस्ततस्ततः ॥ ३८ ॥
स तैः परिवृतः शूरैः सर्वतः स महाबलः ॥ आससादायसं भीमं परिघं तोरणाश्रितम् ॥
स तं परिघमादाय जघान रजनीचरान् ॥ ३९ ॥
स पन्नगमिवादाय स्फुरन्तं विनतासुतः ॥ विचचाराम्बरे वीरः परिगृह्य च मारुतिः ॥
[सूदयामास वज्रेण दैत्यानिव सहस्रदृक्] ॥ ४० ॥
स हत्वा राक्षसान्वीरान्किङ्करान्मारुतात्मजः ॥ युद्धकाङ्क्षी पुनर्वीरस्तोरणं समुपाश्रितः ॥ ४१ ॥
ततस्तस्माद्भयान्मुक्ताः कतिचित्तत्र राक्षसाः ॥ निहतान्किङ्करान्सर्वान्रावणाय न्यवेदयन् ॥ ४२ ॥

स राक्षसानां निहतं महद्बलं निशम्य राजा परिवृत्तलोचनः ॥
समादिदेशाप्रतिमं पराक्रमे प्रहस्तपुत्रं समरे सुदुर्जयम् ॥ ४३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

किङ्करहननानन्तरं तोरणाच्चैत्यप्रासादमाप्लुतेनहनुमता तत्प्रासादभञ्जनम् ॥ १ ॥ तद्रक्षिभीराक्षसैर्युद्धाय तदभियानम् ॥ २ ॥ हनुमता प्रासादस्तंभोत्पाटनेनतद्भ्रामणे तदुद्गताग्निना प्रासाददहनम् ॥ ३ ॥ हनुमता प्रासादरक्षकराक्षसहनन-पूर्वकमन्तरिक्षस्थित्या सवानरबलेनसुग्रीवेण लङ्काभङ्गस्यभविष्यत्त्वोद्घोषणम् ॥ ४ ॥

ततः स किंकरान्हत्वा हनुमान्स्थानमास्थितः ॥ १ ॥
वनं भग्नं मया चैत्यप्रासादो न विनाशितः ॥ तस्मात्प्रासादमप्येव भीमं विध्वंसयाम्यहम् ॥ २ ॥
इति संचिन्त्य मनसा हनुमान्दर्शयन्बलम् ॥ चैत्यप्रासादमाप्लुत्य मेरुशृङ्गमिवोन्नतम् ॥
आरुरोह हरिश्रेष्ठो हनुमान्मारुतात्मजः ॥ ३ ॥
आरुह्य गिरिसंकाशं प्रासादं हरियूथपः ॥ बभौ स सुमहातेजाः प्रतिसूर्य इवोदितः ॥ ४ ॥

ततस्तत इति । अनेनास्य समीपं सहसा गन्तुमशक्ता इत्यवगम्यते ॥३८-३९॥ सपन्नगमिति सपरिघत्वमात्रे दृष्टान्तः । परिगृह्य परिघमिति शेषः । स्फुरन्तं पन्नगमादाय विनतासुतइव स वीरो मारुतिः परिघं परिगृह्याम्बरे विचचारेति संबन्धः ॥४०-४१॥ तस्माद्भयान्मुक्ताः दूरस्था इत्यर्थः ॥४२-४३॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्विचत्वारिंशः सर्गः ॥ ४२ ॥

ध्वंसनफलमाह—दर्शयन् बलमिति । बलदर्शनार्थमित्यर्थः । ध्वंसनप्रकारमाह—चैत्येति ॥ चैत्यं देवायतनं तद्रूपः प्रासादः चैत्यप्रासादः तं । आप्लुत्य तोरणाल्लङ्घयित्वा । हरिश्रेष्ठो हनुमान्मारुतात्मज इत्यस्योत्तरश्लोकेनान्वयः ॥ ३ ॥ हरियूथपत्वेऽप्यहरिर्भविष्यतीति तद्व्यावृत्त्यर्थं हरिश्रेष्ठ इत्युक्तं । प्रतिसूर्यः द्वितीयसूर्यइत्यर्थः । अनेनसूर्योदयस्सूचितः

ति० स्वामिनोरामस्यसंदेशेननामग्रहणेन कस्यायंभटइतिसंदेहरहिताः । किंच स्वामिसंदेशेनरावणाज्ञयाऽतिघोरेणाप्यनेनयोद्धव्यमेवेतिनिश्चयात्पक्षान्तरशङ्कारहिताः । प्रहरणैः आयुधैः । अभिपेतुः प्राहरन्नित्यर्थः ॥ ३८ द्विचत्वारिंशःसर्गः ॥ ४२ ॥

ति० ध्यानं विचारः ॥ १ ॥ ति० चैत्यप्रासादः रक्षःकुलदेवताप्रासादः । एवं प्रमदावनवत् ॥ २ ॥

[पा०] १ इदमर्धं ङ. झ. ञ. ट. पाठेषुदृश्यते. २ ख. घ.—च. झ. ञ. ट. न्वीरःकिंकरान्. ३ ङ. च. छ. झ. ञ. ट. युद्धाकाङ्क्षी. ४ ङ. च. झ. ट. महावीरः. ५ क. ङ. झ. ट. समवस्थितः. ङ. च. छ. ज. ञ. समुपस्थितः. ६ ग. ङ.—ट. महाबलं. ७ क. ख. ग. ङ. च. छ. झ. ञ. ट. हनुमान्ध्यानं. ज. हनुमान्द्वारं. ८ ग. ङ. झ. ट. मप्येवमिमं क. ग. घ. च. छ. मप्येवमिमं. ९ घ. इवोत्थितः.

संप्रधृष्य च दुर्धर्षं चैत्यप्रासादमुत्तमम् ॥ हनुमान्प्रज्वलँल्लक्ष्म्या पारियात्रोपमोऽभवत् ॥ ५ ॥
स भूत्वा सुमहाकायः प्रभावान्मारुतात्मजः ॥ धृष्टमास्फोटयामास लङ्कां शब्देन पूरयन् ॥ ६ ॥
तस्यास्फोटितशब्देन महता श्रोत्रघातिना ॥ पेतुर्विहङ्गमास्तत्र चैत्यपालाश्च मोहिताः ॥ ७ ॥
अस्त्रविज्जयतां रामो लक्ष्मणश्च महाबलः ॥ राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ ८ ॥
दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः ॥ हनुमाञ्शत्रुसैन्यानां निहन्ता मारुतात्मजः ॥ ९ ॥
न रावणसहस्रं मे युद्धे प्रतिबलं भवेत् ॥ शिलाभिस्तु प्रहरतः पादपैश्च सहस्रशः ॥ १० ॥
अर्दयित्वा पुरीं लङ्कामभिवाद्य च मैथिलीम् ॥ समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम् ॥११॥
एवमुक्त्वा विमानस्थश्चैत्यस्थान्हरियूथपः ॥ ननाद भीमनिर्ह्रादो रक्षसां जनयन्भयम् ॥ १२ ॥
तेन शब्देन महता चैत्यपालाः शतं ययुः ॥ गृहीत्वा विविधानस्त्रान्प्रासान्खड्गान्परश्वधान् ॥
विसृजन्तो महाकाया मारुतिं पर्यवारयन् ॥ १३ ॥
ते गदाभिर्विचित्राभिः परिघैः काञ्चनाङ्गदैः ॥ आजघ्नुर्वानरश्रेष्ठं बाणैश्चादित्यसन्निभैः ॥ १४ ॥
आवर्त इव गङ्गायास्तोयस्य विपुलो महान् ॥ परिक्षिप्य हरिश्रेष्ठं स बभौ रक्षसां गणः ॥ १५ ॥
ततो वातात्मजः क्रुद्धो भीमरूपं समास्थितः ॥ १६ ॥
प्रासादस्य महान्तस्य स्तम्भं हेमपरिष्कृतम् ॥ उत्पाटयित्वा वेगेन हनुमान्पवनात्मजः ॥
ततस्तं भ्रामयामास शतधारं महाबलः ॥ १७ ॥
तत्र चाग्निः समभवत्प्रासादश्चाप्यदह्यत ॥ १८ ॥
दह्यमानं ततो दृष्ट्वा प्रासादं हरियूथपः ॥ स राक्षसशतं हत्वा वज्रेणेन्द्र इवासुरान् ॥
अन्तरिक्षे स्थितः श्रीमानिदं वचनमब्रवीत् ॥ १९ ॥
मादृशानां सहस्राणि विसृष्टानि महात्मनाम् ॥ बलिनां वानरेन्द्राणां सुग्रीववशवर्तिनाम् ॥ २० ॥
अटन्ति वसुधां कृत्स्नां वयमन्ये च वानराः ॥ २१ ॥
दशनागबलाः केचित्केचिद्दशगुणोत्तराः ॥ केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः ॥ २२ ॥
सन्ति चौघबलाः केचित्केचिद्वायुबलोपमाः ॥ अप्रमेयबलाश्चान्ये तत्रासन्हरियूथपाः ॥ २३ ॥
ईदृग्विधैस्तु हरिभिर्वृतो दन्तनखायुधैः ॥ शतैः शतसहस्रैश्च कोटीभिरयुतैरपि ॥
आगमिष्यति सुग्रीवः सर्वेषां वो निषूदनः ॥ २४ ॥

॥ ४ ॥ संप्रधृष्य आक्रम्य। पारियात्रोनाम कुलपर्वतः ॥ ५—११ ॥ चैत्यस्थान् चैत्यपालान् ॥ १२—१६ ॥ पवनात्मजः भ्रामयामासेत्यन्वयः। शतधारं धारा कोटिः। वज्रवत्स्थितमित्यर्थः। यद्वा शतधा अरमिति च्छेदः। अरं शीघ्रं ॥ १७ ॥ अग्निः समभवत्। भ्रामितस्तम्भैः स्तम्भान्तरसंघट्टनादिति भावः ॥ १८—१९ ॥ राक्षसानामुत्साहभङ्गं कारयितुमाह—मादृशानामित्यादि ॥ २०—२२ ॥ ओघबलाः

स० शतं बहवः ॥ १३ ॥ ति० परिक्षिप्येत्यंशे तोयस्यावर्तइवेतिदृष्टान्तः ॥ १५ ॥ रामानु० महान्तस्य महाग्रस्य। अत्युन्नतशिखरस्येत्यर्थः। महार्हस्येतिवापाठः ॥ १७ ॥ स० अग्निःप्रासादस्तंभान्तरसंघर्षाद्वा वायुसूनुकरपरिभ्रमणरूपमथनतो वाग्निःसमभवदितिभावः। समदह्यत समग्रग्रामदाहस्यभाविनइयंनान्दीतिभावः ॥ १८ ॥ ती० ओघबलाः ओघसंख्यासंख्यातगजबलाः ॥ २३ ॥

[पा०] १ ङ. ञ. ट. धर्षयित्वा. २ ग. ङ.—ट. महाकायश्चैत्यस्थोहरिपुङ्गवः. ३ ङ. ञ. ट. नादेन. ४ क. पालाश्चते. ५ च. ज. ञ. समाश्रितः. ६ ग. घ. ङ. ञ. ट. केचित्सन्तिवायुबलोपमाः. क. केचिच्छतगुणोत्तराः. वैनतेयबलाःकेचित्केचिद्वायुबलोपमाः. ७ क. ङ. च. ज.—ट. बलाःकेचित्त्रासन्. ८ ग. घ. कोटिभिर्बहुभिर्वृतः. ङ. ञ. ञ. ट. कोटिभिश्चायुतैरपि.

नेयमस्ति पुरी लङ्का न यूयं न च रावणः ॥ यस्मादिक्ष्वाकुनाथेन बद्धं वैरं महात्मना ॥ २५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

हनुमता रावणचोदनयासमागतवतःप्रहस्तात्मजस्यजंबुमालिनोवधः ॥ १ ॥

संदिष्टो राक्षसेन्द्रेण प्रहस्तस्य सुतो बली ॥ जम्बुमाली महादंष्ट्रो निर्जगाम धनुर्धरः ॥ १ ॥
रक्तमाल्याम्बरधरः स्रग्वी रुचिरकुण्डलः ॥ महान्विवृत्तनयनश्चण्डः समरदुर्जयः ॥ २ ॥
[दग्धैत्रिकूटप्रतिमो महाजलदसंनिभः ॥ महाभुजशिरस्स्कन्धो महादंष्ट्रो महाननः ॥ ३ ॥
महाजवो महोत्साहो महासत्वोरुविक्रमः ॥ आजगामातिवेगेने वज्राशनिसमस्वनः ॥ ४ ॥]
धनुः शक्रधनुःप्रख्यं महद्रुचिरसायकम् ॥ विस्फारयानो वेगेन वज्राशनिसमस्वनम् ॥ ५ ॥
तस्य विस्फारघोषेण धनुषो महता दिशः ॥ प्रदिशश्च नभश्चैव सहसा समपूर्यत ॥ ६ ॥
[उद्गच्छन्निव चादित्यः प्रभाभिरिव लोहितः ॥ लोहिताङ्गेन महता कवचेनाभिसंवृतः ॥
तिष्ठतिष्ठेति सहसा हनूमन्तमथाब्रवीत् ॥ ७ ॥]
रथेन खरयुक्तेन तमागतमुदीक्ष्य सः ॥ हनुमान्वेगसंपन्नो जहर्ष च ननाद च ॥ ८ ॥
तं तोरणविटङ्कस्थं हनुमन्तं महाकपिम् ॥ जम्बुमाली महाबाहुर्विव्याध निशितैः शरैः ॥ ९ ॥
अर्धचन्द्रेण वदने शिरस्येकेन कर्णिना ॥ बाह्वोर्विव्याध नाराचैर्दशभिस्तं कपीश्वरम् ॥ १० ॥
तस्य तच्छुशुभे ताम्रं शरेणाभिहतं मुखम् ॥ शरदीवाम्बुजं फुल्लं विद्धं भास्कररश्मिना ॥ ११ ॥
तत्तस्य रक्तं रक्तेन रञ्जितं शुशुभे मुखम् ॥ यथाऽऽकाशे महापद्मं सिक्तं चन्दनबिन्दुभिः ॥ १२ ॥

ओघाख्यसंख्याकवलाः ॥ २३—२५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

विवृत्तनयनः मण्डलीकृतनयनः ॥ २—४ ॥ रुचिरसायकं रुचिरसायकार्हं । विस्फारयानः विस्फारयमाणः । ज्याकर्षणं कुर्वन्नित्यर्थः । वज्राशनिसमस्वनमिति विस्फारणक्रियाविशेषणं ॥ ५ ॥ नभस्समपूर्यत दिशः प्रदिशश्च समपूर्यन्तेति विपरिणामेनानुषङ्गः ॥ ६—८ ॥ तोरणविटङ्कं तोरणस्य कपोतपालिका । " कपोतपालिकायां तु विटङ्कं पुन्नपुंसकं " इत्यमरः । स्तम्भोपरि तिर्यङ्निहितदार्वित्यर्थः ॥ ९ ॥ एकेनेत्येतदर्धचन्द्रस्यापि विशेषणं । अर्धचन्द्राकाराग्रशरेणेत्यर्थः । कर्णिना कर्णवच्छरेण ॥ १० ॥ अम्बुजं रक्तपद्मं । भास्कररश्मिना विद्धं अतएव फुल्लमित्यर्थः ॥ ११ ॥ रक्तं स्वतएव रक्तं । रक्तेन शोणितेन । महापद्मं रक्तोत्पलं । चन्दनबिन्दुभिः

शि० नास्ति नङ्क्ष्यतीत्यर्थः ॥ २५ ॥ इतित्रिचत्वारिंशःसर्गः ॥ ४३ ॥

स० स्रग्वी सुवर्णमालः । " प्रहस्तपुत्रस्त्विहजंबुमालीप्राभञ्जनिंप्राप्यसुवर्णमाली " इति संग्रहरामायणोक्तेः ॥ २ ॥ ति० समपूर्यत । दिगादिसमुदायापेक्षमेकवचनं ॥ स० नभः आकाशं । दिशःप्रदिशश्चयदात्मिकास्तत्समपूर्यत । " साक्षिसिद्धमेव गगनंतद्भागाएवदिशोनद्रव्यान्तरं " इतिसुधोक्तेः ॥ ६ ॥ ति० कर्णी अङ्कुशाकाराग्रशरविशेषः ॥ १० ॥

[पा०] १ क. ङ.—ट. यस्यलिक्ष्वाकुवीरेण. २ इदंश्लोकद्वयं क. पाठेदृश्यते. ३ इदमर्धत्रयं क. ग. पाठयोर्दृश्यते. ४ ङ. ञ. ट. महातेजाविव्याध. ५ घ. र्दशभिस्तुस्तनान्तरे. ६ ङ. ञ. ण. ट. काञ्चनबिन्दुभिः.

चुकोप बाणाभिहतो राक्षसस्य महाकपिः ॥ १३ ॥
ततः पार्श्वेतिविपुलां ददर्श महतीं शिलाम् ॥ तरसा तां समुत्पाट्य चिक्षेप बलवद्बली ॥
तां शरैर्दशभिः क्रुद्धस्ताडयामास राक्षसः ॥ १४ ॥
विपन्नं कर्म तद्दृष्ट्वा हनुमांश्चण्डविक्रमः ॥ सालं विपुलमुत्पाट्य भ्रामयामास वीर्यवान् ॥ १५ ॥
भ्रामयन्तं कपिं दृष्ट्वा सालवृक्षं महाबलम् ॥ चिक्षेप सुबहून्बाणाञ्जम्बुमाली महाबलः॥ १६ ॥
सालं चतुर्भिश्चिच्छेद वानरं पञ्चभिर्भुजे ॥ उरस्येकेन बाणेन दशभिस्तु स्तनान्तरे ॥ १७ ॥
स शरैः पूरिततनुः क्रोधेन महता वृतः ॥ तमेव परिघं गृह्य भ्रामयामास वेगितः ॥ १८ ॥
अतिवेगोतिवेगेन भ्रामयित्वा बलोत्कटः ॥ परिघं पातयामास जम्बुमालेर्महोरसि ॥ १९ ॥
तस्य चैव शिरो नास्ति न बाहू न च जानुनी ॥ न धनुर्न रथो नाश्वास्तत्राद्दृश्यन्त नेषवः ॥२०॥
स हतस्तरसा तेन जम्बुमाली महाबलः ॥ पपात निहतो भूमौ चूर्णिताङ्गविभूषणः ॥ २१ ॥
जम्बुमालिं च निहतं किंकरांश्च महाबलान् ॥ चुक्रोध रावणः श्रुत्वा कोपसंरक्तलोचनः ॥ २२ ॥

स रोषसंवर्तिततामलोचनः प्रहस्तपुत्रे निहते महाबले ॥
अमात्यपुत्रानतिवीर्यविक्रमान्समादिदेशाशु निशाचरेश्वरः ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

हनुमता रावणप्रेषितमन्त्रिपुत्रसप्तकहननम् ॥ १ ॥

ततस्ते राक्षसेन्द्रेण चोदिता मन्त्रिणः सुताः ॥ निर्ययुर्भवनात्तस्मात्सप्त सप्तार्चिवर्चसः ॥ १ ॥
महाबलपरीवारा धनुष्मन्तो महाबलाः ॥ कृतास्त्रास्त्रविदां श्रेष्ठाः परस्परजयैषिणः ॥ २ ॥

रक्तचन्दनबिन्दुभिः ॥ १२ ॥ चुक्रोपेत्यर्धं ॥ राक्षसस्य राक्षसविषये ॥ १३—१६ ॥ पञ्चभिर्भुज इत्यादौ विव्याधेत्यध्याहारः ॥ १७—१९ ॥ नाश्वा इति अश्वशब्देनात्र खरा उच्यन्ते । रथेन खरयुक्तेनेति पूर्वमुक्तत्वात् ॥ २०—२३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

भवनात्तस्मात् रावणभवनात् । सप्तार्चिवर्चसइत्यत्र सप्तार्चीति इकारान्तत्वमार्षं ॥ १ ॥ कृतास्त्राः शिक्षि-

ति० काञ्चनबिन्दुभिःरक्ताशोकपुष्परसबिन्दुभिः । सिक्तंमहापद्मं महत्तरंरक्तपद्ममिवेत्यभूतोपमेयं ॥ " अशोकःकाञ्चनाह्वयः " स० काञ्चनबिन्दुभिः सुवर्णरसबिन्दुभिः । अभूतोपमेयं ॥ १२ ॥ स० राक्षसस्यबाणाभिहतः । एकदेशान्वयः ससंबन्धिकत्वाद्युक्तः । यद्वा बाणाभिहतोराक्षसस्यचुकोपेत्यन्वयः । हनुमत्कोपसहनासुशकत्वाद्यप्रतीत्यप्रवृत्तेःषष्ठी । साचशैषिकीतिकर्मणि ॥१३॥ ति० ताडयामास विभेद ॥१४॥ ति० विपन्नं व्यर्थीकृतं ॥१५॥ स० जंबुमालेः रूढः इकारान्तोनकारान्तश्चेतिजंबुमालेरिति साधु ॥ १९ ॥ स० नाश्वाः अश्वभिन्नाः अश्वसदृशावाखराः । ते नादृश्यन्त । नञर्थस्यनशब्दस्यतद्भिन्नतत्सदृशार्थकता स्वपरसाधारण्येनदृष्टा । अथवा विभाषानुवृत्तेर्नलोपाभावान्नाश्वाइतिसंभवति । तेनखरयुक्तयानत्वमुक्तमुपपन्नं ॥२०॥ स० चूर्णिताङ्गः चूर्णीकृतशाखः चूर्णीकृतावयवोराक्षसोपि ॥२१॥ स० क्रोधसंरक्तलोचनः पूर्वंकिङ्करनाशात् । पुनर्जंबुमालिनंनिहतंश्रुत्वा पूर्वापेक्षयाबहुकोपंकृतवानित्यर्थः ॥२२॥ स० वीर्यं वैरिपराक्रमः । तदतिक्रम्यपराक्रमोयेषांतान् ॥२३॥ इतिचतुश्चत्वारिंशःसर्गः ॥४४॥

स० सप्तार्चीः प्रतिमारूपाः कालीकरालीइत्याद्याः अस्यसन्तीतिसप्तार्ची वह्निः । तद्वद्वर्चोयेषांतेतथा । यद्वा इकारान्तोर्चिश्शब्दोर्चिशब्दपर्यायः । सप्तअर्चयोर्चींषि शिखायस्यसोग्निः । " अर्चिर्मयूरशिखयोः " इतिविश्वः । " इकारान्तोप्यस्ति " ' अग्नेर्भ्राजन्तेअर्चयः ' इतीतिभानुदीक्षितलेखात् ॥ १ ॥ स० परस्परजयैषिणः परस्परमुत्कर्षापेक्षाः ॥ २ ॥

[पा०] १ ग. झ. जववद्बली. २ क. ग. शिरस्येकेन. ३ ख. मारुतिः. क. ङ. झ. ञ. ट. वेगितः. ४ क. ग. ङ.—ट. महारथः. ५ ग. निपपातहतो. ६ ङ.—ट. चूर्णिताङ्गइवद्रुमः. ७ ख. महारथान्. क. महाजवान्. ८ झ. ठ. क्रोधसंरक्त.

हेमजालपरिक्षिप्तैर्ध्वजवद्भिः पताकिभिः ॥ तोयदस्वननिर्घोषैर्वाजियुक्तैर्महारथैः ॥ ३ ॥
तप्तकाञ्चनचित्राणि चापान्यमितविक्रमाः ॥ विस्फारयन्तः संहृष्टास्तडिद्वन्त इवाम्बुदाः ॥ ४ ॥
जनन्यस्तु ततस्तेषां विदित्वा किंकरान्हतान् ॥ बभूवुः शोकसंभ्रान्ताः सबान्धवसुहृज्जनाः ॥ ५ ॥
ते परस्परसंघर्षात्तप्तकाञ्चनभूषणाः ॥ अभिपेतुर्हनूमन्तं तोरणस्थमवस्थितम् ॥ ६ ॥
सृजन्तो बाणवृष्टिं ते रथगर्जितनिःस्वनाः ॥ वृष्टिमन्त इवाम्भोदा विचेरुर्नैर्ऋताम्बुदाः ॥ ७ ॥
अवकीर्णस्ततस्ताभिर्हनुमाञ्शरवृष्टिभिः ॥ अभवत्संवृताकारः शैलराडिव वृष्टिभिः ॥ ८ ॥
स शरान्मोघयामास तेषामाशुचरः कपिः ॥ रथवेगं च वीराणां विचरन्विमलेऽम्बरे ॥ ९ ॥
स तैः क्रीडन्धनुष्मद्भिर्व्योम्नि वीरः प्रकाशते ॥ धनुष्मद्भिर्यथा मेघैर्मारुतः प्रभुरम्बरे ॥ १० ॥
स कृत्वा निनदं घोरं त्रासयंस्तां महाचमूम् ॥ चकार हनुमान्वेगं तेषु रक्षस्सु वीर्यवान् ॥ ११ ॥
तलेनाभ्यहनत्कांश्चित्पादैः कांश्चित्परन्तपः ॥ मुष्टिनाभ्यहनत्कांश्चिन्नखैः कांश्चिद्व्यदारयत् ॥ १२ ॥
प्रममाथोरसा कांश्चिदूरुभ्यामपरान्कपिः ॥ केचित्तस्य निनादेन तत्रैव पतिता भुवि ॥ १३ ॥
ततस्तेष्ववसन्नेषु भूमौ निपतितेषु च ॥ तत्सैन्यमगमत्सर्वं दिशो दश भयार्दितम् ॥ १४ ॥
विनेदुर्विस्वरं नागा निपेतुर्भुवि वाजिनः ॥ भग्ननीडध्वजच्छत्रैर्भूश्च कीर्णाऽभवद्रथैः ॥ १५ ॥
स्रवता रुधिरेणाथ स्रवन्त्यो दर्शिताः पथि ॥ विविधैश्च स्वरैर्लङ्का ननाद विकृतं तदा ॥ १६ ॥

स तान्प्रवृद्धान्विनिहत्य राक्षसान्महाबलश्चण्डपराक्रमः कपिः ॥
युयुत्सुरन्यैः पुनरेव राक्षसैस्तमेव वीरोभिजगाम तोरणम् ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

तास्राः ॥ आर्षः सन्धिः । कृतास्त्राणामस्त्रविदां च श्रेष्ठा इति वा । ज्ञानशिक्षे उभे अप्येषां स्त इति भावः । परस्परजयैषिणः प्रत्येकं हनुमज्जयैषिण इत्यर्थः ॥ २ ॥ हेमजालपरिक्षिप्तैः सुवर्णजालविनिर्मितैः । स्वासाधारणचिह्नयुक्तं ध्वजं । केवलचित्रवस्त्रालंकृता पताका । तोयदस्वननिर्घोषैः तोयदस्वनतुल्यनिर्घोषवद्भिः ॥३—८॥ स शरान् मोघयामास । यथा शराः स्वस्मिन्न पतन्ति तथा चकारेत्यर्थः । रथवेगं च मोघयामासेत्यन्वयः । यथा रथवेगास्त्वप्रहाराय न भवन्ति तथासमचरदित्यर्थः ॥ ९—१० ॥ वेगं संहारोद्योगं ॥ ११ ॥ पादैः कांश्चिदिति बहुवचनं वानराणां द्विपात्सु चतुष्पात्सु च ग्रहणात् ॥ १२—१४ ॥ नीडं ध्वजावयवविशेषः ॥ १५ ॥ स्रवन्त्यः नद्यः । विकृतं यथा तथा ननाद प्रतिध्वानवती बभूव ॥ १६—१७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चचत्वारिंशः सर्गः ॥४५॥

स० एकजिह्वाः ध्वजाः । द्विजिह्वाः पताकाः ॥ ३ ॥ शि० सिंहावलोकनन्यायेननिहतकिङ्करगृहवृत्तान्तमाह—**जनन्यइति** ॥ ५ ॥ ति० तोरणस्थमवस्थितं तत्रस्थितं निश्चलमित्यर्थः ॥ ६ ॥ स० राक्षसानांशरवर्षेणकार्ष्ण्येनचमेघसमता । पूर्वमखण्डतः शरसारगमनादेकवचनंवृष्टिमिति प्रत्येकंपृथक्पृथगञ्चनाद्वृष्टिभिरितिबहुवचनंचसंभवतः ॥ ७ ॥ ति० संवृताकारः अदृश्यइति यावत् ॥ ८ ॥ ति० नीडं रथस्थंरथ्यधिष्ठानस्थानं ॥ १५ ॥ इतिपञ्चचत्वारिंशःसर्गः ॥ ४५ ॥

[पा०] १ ग. धनुष्यमित. २ ख. घ.—ट. जनन्यस्तास्ततस्तेषां. ३ ङ. ज. झ. ट. परस्परसंघर्षास्तप्त. ४ ङ. झ. ट. प्रावृट्कालइवांभोदाः. ५ क.—ट. रथवेगांश्च. ६ ङ. झ. ट. तलेनाभिहनत्. ७ ग. घ. पद्भ्यांकांश्चित्. ८ ग. ङ. छ.—ट. मुष्टिभिश्चाहनत्. ९ ङ. झ. ट. मपरानपि. १० क. ग. र्विस्वराः. ११ क. ख. ङ.—ट. स्तुदेव.

षट्चत्वारिंशः सर्गः ॥ ४६ ॥

हनुमता रावणप्रहितसेनापतिपञ्चकस्य पञ्चताप्रापणम् ॥ १ ॥

हतान्मन्त्रिसुतान्बुद्ध्वा वानरेण महात्मना ॥ रावणः संवृताकारश्चकार मतिमुत्तमाम् ॥ १ ॥
स विरूपाक्षयूपाक्षौ दुर्धरं चैव राक्षसम् ॥ प्रघसं भासकर्णं च पञ्च सेनाग्रनायकान् ॥ २ ॥
संदिदेश दशग्रीवो वीरान्नयविशारदान् ॥ हनुमद्ग्रहणव्यग्रान्वायुवेगसमान्युधि ॥ ३ ॥
यात सेनाग्रगाः सर्वे महाबलपरिग्रहाः ॥ सवाजिरथमातङ्गाः स कपिः शास्यतामिति ॥ ४ ॥
यत्तैश्च खलु भाव्यं स्यात्तमासाद्य वनालयम् ॥ कर्म चापि समाधेयं देशकालविरोधिनम् ॥ ५ ॥
[वानरोयमिति ज्ञात्वा न हि शुध्यति मे मनः ॥ नैवाहं तं कपिं मन्ये यथेयं प्रस्तुता कथा ॥६॥]
न ह्यहं तं कपिं मन्ये कर्मणा प्रतितर्कयन् ॥ सर्वथा तन्महद्भूतं महाबलपरिग्रहम् ॥
भवेदिन्द्रेण वा सृष्टमसदर्थं तपोबलात् ॥ ७ ॥
सनागयक्षगन्धर्वा देवासुरमहर्षयः ॥ युष्माभिः सहितैः सर्वैर्मया सह विनिर्जिताः ॥ ८ ॥
तैरवश्यं विधातव्यं व्यलीकं किंचिदेव नः ॥ तदेव नात्र संदेहः प्रसह्य परिगृह्यताम् ॥ ९ ॥
नावमान्यो भवद्भिश्च हरिर्धीरपराक्रमः ॥ दृष्टा हि हरयः पूर्वं मया विपुलविक्रमाः ॥ १० ॥
वाली च सहसुग्रीवो जाम्बवांश्च महाबलः ॥ नीलः सेनापतिश्चैव ये चान्ये द्विविदादयः ॥ ११ ॥
नैवं तेषां गतिर्भीमा न तेजो न पराक्रमः ॥ न मतिर्न बलोत्साहौ न रूपपरिकल्पनम् ॥ १२ ॥
महत्सत्त्वमिदं ज्ञेयं कपिरूपं व्यवस्थितम् ॥ प्रयत्नं महदास्थाय क्रियतामस्य निग्रहः ॥ १३ ॥
कामं लोकास्त्रयः सेन्द्राः ससुरासुरमानवाः ॥ भवतामग्रतः स्थातुं न पर्याप्ता रणाजिरे ॥ १४ ॥
तथापि तु नयज्ञेन जयमाकाङ्क्षता रणे ॥ आत्मा रक्ष्यः प्रयत्नेन युद्धसिद्धिर्हि चञ्चला ॥ १५ ॥
ते स्वामिवचनं सर्वे प्रतिगृह्य महौजसः ॥ समुत्पेतुर्महावेगा हुताशसमतेजसः ॥ १६ ॥

संवृताकारः अन्तर्मनाः । मतिं चिन्तां ॥ १-३ ॥ इति वक्ष्यमाणप्रकारेण ॥ ४ ॥ तमेवाह—यत्तैरित्यादिना ॥ यत्तैः यतमानैः । अप्रमत्तैरिति यावत् । यतेः कर्तरि क्तः । समाधेयं परिहर्तव्यं । देशकालविरोधिनं देशकालविरोधीत्यर्थः ॥ ५—६ ॥ महद्भूतं मन्य इत्यनुषज्यते । इन्द्रेण वा अन्यैर्वेति शेषः । वाशब्दस्य विकल्पार्थस्य प्रयोगात् ॥ ७—८ ॥ व्यलीकं अप्रियं ॥ ९ ॥ नावमान्यो भवद्भिश्च हरिर्धीरपराक्रम इति ॥ अत्र त्रयोदशसहस्रश्लोका गताः । अयं चतुर्दशसहस्रस्यादिः । धीति गायत्र्याश्चतुर्दशाक्षरं ॥ १०—११ ॥ गतिः वेगः । रूपपरिकल्पनं यथेष्टरूपग्रहणं ॥ १२ ॥ महदिति ॥ इत्थं महत्सत्त्वं किमपि कपिरूपं सत् व्यवस्थितमिति ज्ञेयमित्यर्थः

ती० संवृताकारः गूढाकारः । अन्तस्संजातशङ्कइत्यर्थः । उत्तमांमतिं धैर्यं ॥ १ ॥ **ती०** किंचात्रदेशकालाविरुद्धंकर्मकार्यमित्याह—**कर्मचेति** । देशकालविरोधिनंदेशकालविरोधीत्यर्थः । आर्षोलिङ्गविभक्तिव्यत्ययः । कर्म समाधेयं परिहर्तव्यं । देशकालाविरोधितमितिपाठे समाधेयं कर्तव्यं । अत्रहेतुमाह—नहीति ॥ ५ ॥ **ती०** असदर्थं अस्मन्निग्रहार्थं ॥ **स०** असदर्थं अस्माकमर्थंनिवृत्तिमुद्दिश्य ॥ ७ ॥ **स०** वालीति । जांबवानपिकपिमध्येबहुस्थलेगणितइतिनानुपपत्तिः ॥ ११ ॥ **ती०** नैवंतेषामित्यादौसर्वत्रईदृक्छब्दोऽध्याहर्तव्यः । तथाचेत्थंयोजना तेषां वाल्यादिनां । हनुमतोभीमागतिस्तेजआदिकंचयथा तथा ईदृङ्नास्तीतिसंबन्धः । रूपपरिकल्पनंयथेप्सितरूपपरिग्रहणं ॥ १२ ॥ **ति०** प्रयत्नमित्यार्षक्लिबत्वं ॥ १३ ॥ **ति०** कामं यद्यपीत्यर्थः

[**पा०**] १ ङ. ञ. ट. दुर्धर्षं. २ क.—ट. हनुमद्ग्रहणे. ३ क.—ट. कालाविरोधितं. ४ अयंश्लोकः ङ. ञ. पाठेषुदृश्यते. ५ ख. ग. ङ. च. छ. ञ. ट. गन्धर्वदेवासुर. ६ क. युधि. ७ ख. नावमान्यश्चयुष्माभिः.

[1]रथैर्मत्तैश्च मातङ्गैर्वाजिभिश्च महाजवैः ॥ शस्त्रैश्च विविधैस्तीक्ष्णैः सर्वैश्चोपचिता बलैः ॥ १७ ॥
ततस्तं ददृशुर्वीरा दीप्यमानं महाकपिम् ॥ रश्मिमन्तमिवोद्यन्तं स्वतेजोरश्मिमालिनम् ॥ १८ ॥
तोरणस्थं महोत्साहं महासत्त्वं महाबलम् ॥ महामतिं महावेगं महाकायं महाबलम् ॥ १९ ॥
तं समीक्ष्यैव ते सर्वे दिक्षु सर्वास्ववस्थिताः ॥ तैस्तैः प्रहरणैर्भीमैरभिपेतु[3]स्ततस्ततः ॥ २० ॥
तस्य पञ्चायसास्तीक्ष्णाः शिताः पीतमुखाः शराः ॥ शिरस्युत्पलपत्राभा दुर्धरेण निपातिताः ॥२१॥
स तैः पञ्चभिराविद्धः शरैः शिरसि वानरः ॥ उत्पपात नदन्व्योम्नि दिशो दश विनादयन् ॥ २२ ॥
ततस्तु दुर्धरो वीरः सरथः सज्यकार्मुकः ॥ किरञ्शरशँतैस्तीक्ष्णैरभिपेदे महाबलः ॥ २३ ॥
स कपिर्वारयामास तं व्योम्नि शरवर्षिणम् ॥ वृष्टिमन्तं पयोदान्ते पयोदमिव मारुतः ॥ २४ ॥
[4]अर्द्यमानस्ततस्तेन दुर्धरेणानिलात्मजः ॥ चकार [5]कदनं भूयो व्यवर्धत च वेगवान् ॥ २५ ॥
स दूरं सहसोत्पत्य दुर्धरस्य रथे हरिः ॥ निपपात महावेगो विद्युद्राशिर्गिरावि[6]व ॥ २६ ॥
ततः स मथिताष्टाश्वं रथं भग्नाक्षकूबरम् ॥ विहाय न्यपतद्भूमौ दुर्धरस्त्यक्तजीवितः ॥ २७ ॥
तं विरूपाक्षयूपाक्षौ दृष्ट्वा निपतितं भुवि ॥ [7]संजातरोषौ दुर्धर्षावुत्पेततुररिन्दमौ ॥ २८ ॥
स ताभ्यां सहसोत्पत्य विष्ठितो विमलेऽम्बरे ॥ मुद्गराभ्यां महाबाहुर्वक्षस्यभिहतः कपिः ॥ २९ ॥
तयोर्वेगवतोर्वेगं विनिहत्य महाबलः ॥ निपपात पुनर्भूमौ [8]सुपर्णसमविक्रमः ॥ ३० ॥
स सालवृक्षमासाद्य तमुत्पाट्य च वानरः ॥ तावुभौ राक्षसौ वीरौ जघान पवनात्मजः ॥ ३१ ॥
ततस्तांस्त्रीन्हताञ्ज्ञात्वा वानरेण तरस्विना ॥ [9][10]अभिपेदे महावेगः प्रसह्य प्रघसो [11]हरिम् ॥ ३२ ॥
भासकर्णश्च संक्रुद्धः शूलमादाय वीर्यवान् ॥ एकतः कपिशार्दूलं यशस्वि[12]नमवस्थितम् ॥ ३३ ॥
पट्टिशेन शिताग्रेण प्रघसः प्रत्ययोधयत् ॥ भासकर्णश्च शूलेन राक्षसः कपिसत्तमम् ॥ ३४ ॥
स ताभ्यां विक्षतैर्गात्रैरसृग्दिग्धतनूरुहः ॥ अभवद्वानरः क्रुद्धो बालसूर्यसमप्रभः ॥ ३५ ॥
समुत्पाट्य गिरेः शृङ्गं समृगव्यालपादपम् ॥ जघान हनुमान्वीरो राक्षसौ कपिकुञ्जरः ॥
[[13]गिरिशृँङ्गविनिष्पिष्टौ तिलशस्तौ बभूवतुः] ॥ ३६ ॥

॥ १३—१७ ॥ स्वतेजोरश्मिमालिनं स्वतेजसा सूर्यं । रश्मिमन्तमिवेत्यत्र उपमा । अत्र रूपकमिति भिदा ॥ १८ ॥ उत्साहः लोकोत्तरकार्येषु स्थेयान्प्रयत्नः । महासत्त्वं महाध्यवसायं । " द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु" इत्यमरः । द्वितीयबलशब्दश्शक्तिवचनः । " बलं रूपेस्थनि स्थौल्ये शक्तिरेतश्चमूषु च"इति वैजयन्ती ॥१९—२०॥ तीक्ष्णाः क्रूराः । शिताः निशिताः । पीतमुखाः समीचीनायसनिर्मितत्वेन पीतरेखाग्राः । उत्पलपत्राभाः उत्पलपत्राणि यथा निपात्यन्ते तथा निपातिता इत्यर्थः॥२१—२३॥ वारयामास स्ववेगेन प्रापयामासेत्यर्थः ॥२४॥ कदनं युद्धं ॥ २५ ॥ विद्युद्राशिः अशनिः ॥ २६ ॥ कूबरः युगन्धरः ॥२७—२९॥ वेगं विनिहत्य परिहृत्य

॥ १४ ॥ स० रश्मिमन्तं रश्मिवंतं । यवादिरयं ॥ स्वतेजोरश्मिमालिनं सु अत्यन्तंअतेजसोरश्मिमालिनोयेन भवन्तिसतथा ॥१८॥ ति० दिक्षुसर्वास्ववस्थिताःद्राक्तत्समीपमागन्तुंचकिताइतिभावः ॥ २० ॥ ती० पीतमुखाः शत्रुशोणितरञ्जिताइत्यर्थः । उत्पलपत्राभाः तद्वर्णाः ॥ ती० पीतमुखाः फलभागेस्वर्णरूषिताः । उत्पलपत्राभाएव नतुतत्पीडार्हाइत्यर्थः ॥ स० पीतमुखाः पायितपानीयमुखाः ॥ २१ ॥ ति० ताभ्यां कर्तृभ्यां । मुद्गराभ्यां करणाभ्यांहतः ॥ २९ ॥ इतिषट्चत्वारिंशःसर्गः ॥ ४६ ॥

[पा०] १ छ. ज. रथैश्चमत्तनागैश्च. ङ. च. झ. ञ. ट. रथैर्मत्तैश्चनागैश्च. २ क. ङ.—ञ. निशितैः. ३ क. पेतुस्सहस्रशः. ४ क. ग. ङ. झ. ट. शतैर्नैकैः. ५ घ. हन्यमानस्ततः. ६ क. घ. ङ. च. झ. ञ. ट. निनर्द. ७ क. ख. ततस्तं. ८ ङ.—ट. तौजातरोषौ. ९ क. ङ.—ट. निहत्यसमबाहुलः. १० ङ.—ट. सुपर्णइववेगितः. ११ ङ. च. छ. झ. ट. अभिगम्य. १२ ङ.—ञ. बली. १३ ग. ङ.—ट. मवस्थितौ. १४ इदमर्धं ङ.—ट. पाठेषुदृश्यते.

ततस्तेष्ववसन्नेषु सेनापतिषु पञ्चसु ॥ बलं तदवशेषं च नाशयामास वानरः ॥ ३७ ॥
अश्वैरश्वान्गजैर्नागान्योधैर्योधान्रथै रथान् ॥ स कपिर्नाशयामास सहस्राक्ष इवासुरान् ॥ ३८ ॥
हतैर्नागैश्च तुरगैर्भग्नाक्षैश्च महारथैः ॥ हतैश्च राक्षसैर्भूमी रुद्धमार्गा समन्ततः ॥ ३९ ॥
ततः कपिस्तान्ध्वजिनीपतीन्रणे निहत्य वीरान्सबलान्सवाहनान् ॥
समीक्ष्य वीरः परिगृह्य तोरणं कृतक्षणः काल इव प्रजाक्षये ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

हनुमता रावणसुतस्याक्षकुमारस्यक्षपणम् ॥ १ ॥

सेनापतीन्पञ्च स तु प्रमापितान्हनूमता सानुचरान्सवाहनान् ॥
समीक्ष्य राजा समरोद्धतोन्मुखं कुमारमक्षं प्रसमैक्षताग्रतः ॥ १ ॥
स तस्य दृष्ट्यर्पणसंप्रचोदितः प्रतापवान्काञ्चनचित्रकार्मुकः ॥
समुत्पपाताथ सदस्युदीरितो द्विजातिमुख्यैर्हविषेव पावकः ॥ २ ॥
ततो महद्बालदिवाकरप्रभं प्रतप्तजाम्बूनदजालसंततम् ॥
रथं समास्थाय ययौ स वीर्यवान्महाहरिं तं प्रति नैर्ऋतर्षभः ॥ ३ ॥
ततस्तपःसंग्रहसञ्चयार्जितं प्रतप्तजाम्बूनदजालशोभितम् ॥
पताकिनं रत्नविभूषितध्वजं मनोजवाष्टाश्ववरैः सुयोजितम् ॥ ४ ॥
सुरासुराधृष्यमसङ्गचारिणं रविप्रभं व्योमचरं समाहितम् ॥
सतूणमष्टासिनिबद्धबन्धुरं यथाक्रमावेशितशक्तितोमरम् ॥ ५ ॥

॥३०—३९॥ ध्वजिनीपतीन् सेनापतीन् । कृतक्षणः दत्तावसरः । अभूदिति शेषः ॥ ४० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्चत्वारिंशः सर्गः ॥ ४६ ॥

समीक्ष्य विज्ञाय ॥ १ ॥ द्विजातिमुख्यैः हविषा उदीरितः अभिवर्धितः पावक इवेत्यन्वयः ॥ २–३ ॥ ततो महदित्यनेनोक्तं विस्तरेणाह—ततस्तपस्संग्रहेत्यादिना ॥ तपस्संग्रहसञ्चयार्जितं तपोनुष्ठानसमूहसंपादितं ॥ ४ ॥ समाहितं सज्जीकृतं । अष्टासिनिबद्धबन्धुरं अष्टासिभिर्निबद्धं अतएव बन्धुरं सुन्दरं । " बन्धुरं सुन्दरे नम्रे " इति विश्वः । यद्वा अष्टासिभिर्निबद्धं बन्धुरं यस्य स तथा । बन्धुरं फलकासंघाट इत्याहुः । अन्ये घण्टा इत्यप्याहुः । तदानीं अष्टासिश्चासौ निबद्धबन्धुरश्चेति समासः । यथाक्रमावेशितशक्तितोमरं पङ्क्तितया स्थापितशक्तितोमरं

ति० प्रमापितान् मारितान् । समरोद्धतोन्मुखं समरोद्धतश्चासौसमरायोन्मुखश्चतं । आक्षं समक्षमवस्थितं । अक्षाख्यंकुमारं निशाम्य दृष्ट्वा । प्रसमैक्षत दृष्ट्यायुद्धार्थमाज्ञापयामासेत्यर्थः ॥ स० समरोद्धतोन्मुखं समरोद्धताः वैरिणः तदुन्मुखः तदभिमुखः तं । आक्षं अक्षाणां नेत्राणामिन्द्रियाणामयं विषयआक्षः तं । नेत्रविषयमितियावत् ॥ १ ॥ ति० सदसि यज्ञशालायां ॥ २ ॥ ति० महान्सइत्यन्वयः ॥ ३ ॥ ति० अष्टसुदिक्षु असिभिःसहनिबद्धाबन्धुरारथफलकायस्मिंस्तं ॥ शि० असङ्गचारिणं निरालंब-

[पा०] १ घ. हयैर्नागैश्चमत्तैश्च. २ ङ.—ट. तथैववीरः. क.—घ. तदेववीरः. ३ ङ.—ट. निशम्य. ४ झ. प्रसमैक्षताक्षं. ५ क. समुत्पपाताशु. ६ ग. ङ.—ट. महान्बाल. ७ ङ.—ट. जालचित्रितं. ८ ङ—ट. तडित्प्रभं.

विराजमानं प्रतिपूर्णवस्तुना सहेमदाम्ना शशिसूर्यवर्चसा ॥
दिवाकराभं रथमास्थितस्ततः स निर्जगामामरतुल्यविक्रमः ॥ ६ ॥
स पूरयन्खं च महीं च साचलां तुरङ्गमातङ्गमहारथस्वनैः ॥
बलैः समेतैः स हि तोरणस्थितं समर्थमासीनमुपागमत्कपिम् ॥ ७ ॥
स तं समासाद्य हरिं हरीक्षणो युगान्तकालाग्निमिव प्रजाक्षये ॥
अवस्थितं विस्मितजातसंभ्रमः समैक्षताक्षो बहुमानचक्षुषा ॥ ८ ॥
स तस्य वेगं च कपेर्महात्मनः पराक्रमं चारिषु पार्थिवात्मजः ॥
विधारयन्स्वं च बलं महाबलो हिमक्षये सूर्य इवाभिवर्धते ॥ ९ ॥
स जातमन्युः प्रसमीक्ष्य विक्रमं स्थिरं स्थितः संयति दुर्निवारणम् ॥
समाहितात्मा हनुमन्तमाहवे प्रचोदयामास शरैस्त्रिभिः शितैः ॥ १० ॥
ततः कपिं तं प्रसमीक्ष्य गर्वितं जितश्रमं शत्रुपराजयोर्जितम् ॥
अवैक्षताक्षः समुदीर्णमानसः स बाणपाणिः प्रगृहीतकार्मुकः ॥ ११ ॥
स हेमनिष्काङ्गदचारुकुण्डलः समाससादाशुपराक्रमः कपिम् ॥
तयोर्बभूवाप्रतिमः समागमः सुरासुराणामपि संभ्रमप्रदः ॥ १२ ॥
ररास भूमिर्न ततापे भानुमान्ववौ न वायुः प्रचचाल चाचलः ॥
कपेः कुमारस्य च वीक्ष्य संयुगं ननाद च द्यौरुदधिश्च चुक्षुभे ॥ १३ ॥
ततः स वीरः सुमुखान्पतत्रिणः सुवर्णपुङ्खान्सविषानिवोरगान् ॥
समाधिसंयोगविमोक्षतत्त्ववित्छरानथ त्रीन्कपिमूर्ध्न्यपातयत् ॥ १४ ॥
स तैः शरैर्मूर्ध्नि समं निपातितैः क्षरन्नसृग्दिग्धविवृत्तलोचनः ॥
नवोदितादित्यनिभः शरांशुमान्व्यराजतादित्य इवांशुमालिकः ॥ १५ ॥

॥ ५ ॥ प्रतिपूर्णवस्तुना समग्रोपकरणेन । शरधनुः-कवचादीन्युपकरणानि । प्रतिपूर्णमस्तिनेति पाठे अस्तिना धनेनेत्यर्थः । हेमदाम्ना हेममयाश्वादिबन्धन-रज्जुना । शशिसूर्यवर्चसा । दामसु किञ्चित्सितवर्णे किञ्चित्सूर्यवत्पीतवर्णमित्यर्थः । प्रतिपूर्णवस्तुना शशिसूर्यवर्चसा हेमदाम्ना च विराजमानमित्यन्वयः । यद्वा क्वचिच्छशिवर्चसा क्वचित्सूर्यवर्चसा च विराज-मानमित्यन्वयः । वितानादिषु शशिवर्चसा हेममयर-थाङ्गेषु सूर्यवर्चसा । दिवाकराभमित्याकाशचारित्वे दृष्टान्तः । अतो न रविप्रभमित्यनेन पुनरुक्तिः । तच्छब्दद्वयं च पूर्वानुस्मरणार्थं ॥ ६ ॥ सः अक्षः । हिः प्रसिद्धौ ॥ ७ ॥ हरीक्षणः सिंहप्रेक्षणः । प्रजा-क्षये अवस्थितं प्राणिनाशे प्रवृत्तं । विस्मितश्चासौ जातसंभ्रमश्च विस्मितजातसंभ्रमः ॥ ८ ॥ विधारयन् निर्धारयन् । विचारयन्निति च पाठः ॥ ९—१२ ॥ न ततापे भानुमान् । सूर्योदयः पूर्वं सूचितः सः न तापेत्युच्यते ॥ १३ ॥ समाधिसंयोगविमोक्षतत्त्व-वित् समाधिः लक्ष्यवेदनं संयोगः शरसंधानं विमोक्षः तद्विसर्गः तेषां तत्त्ववित् यथार्थवित् ॥१४॥ रक्तसिक्तत्वे दृष्टान्तो नवोदितेति । शरार्चितत्वे

गमनशीलं । अतएव व्योमचरं । समाहितं सम्यक्संस्थापितं ॥ ५ ॥ ति० विस्मितंचतंजातसंभ्रमंच । बालोऽयंमांयोद्धुमिच्छती-तिविस्मयः । रावणपुत्रत्वाच्च तत्रजातादरत्वं ॥ ८ ॥ ति० निष्कं उरोभूषणं । आशुपराक्रमः तीक्ष्णपौरुषइतियावत् । समागमः युद्धं । संभ्रमप्रदः भयप्रदः ॥ १२ ॥ ती० अक्षयुद्धसमयेसूर्योदयाभावादेशान्तरस्थोपिसूर्यः एतज्ज्ञात्वानतातापेतिभावः ॥ ति० भूमिः भूमिस्थप्राणिजातं । ररास । वीर्यप्रवृत्तसंयुगंवीक्ष्येतिशेषः ॥१३॥ ति० अताडयत् अपातयत् ॥१४॥ ति० असृग्दिग्धश्चा-

[पा०] १ क. ख. परिपूर्णवस्तुना. २ क. ङ.—ट. जातसंभ्रमं. ३ ङ. च. झ. ञ. ट. रावणात्मजः. ४ क. ख. ङ.—ट. विचारयन्. ५ ग. बलोत्कटो. ६ ख. ङ.—ट. युगक्षये. ७ ग.—ट. पराजयोचितं. क. पराजयोद्यतं. ८ दाशुनिशाचरः. ९ ङ. झ. ञ. ट. मूर्ध्नताडयत्. १० झ. निपातैः. ११ झ. विवृत्तनेत्रः.

ततः स पिङ्गाधिपमन्त्रिसत्तमः समीक्ष्य तं राजवरात्मजं रणे ॥
उदग्रचित्रायुधचित्रकार्मुकं जहर्ष चापूर्यत चाहवोन्मुखः ॥ १६ ॥
स मन्दराग्रस्थ इवांशुमालिको विवृद्धकोपो बलवीर्यसंयुतः ॥
कुमारमक्षं सबलं सवाहनं ददाह नेत्राग्निमरीचिभिस्तदा ॥ १७ ॥
ततः स बाणासनचित्रकार्मुकः शरप्रवर्षो युधि राक्षसांबुदः ॥
शरान्मुमोचाशु हरीश्वराचले बलाहको वृष्टिमिवाचलोत्तमे ॥ १८ ॥
ततः कपिस्तं रणचण्डविक्रमं विवृद्धतेजोबलवीर्यसंयुतम् ॥
कुमारमक्षं प्रसमीक्ष्य संयुगे ननाद हर्षाद्घनतुल्यविक्रमः ॥ १९ ॥
स बालभावाद्युधि वीर्यदर्पितः प्रवृद्धमन्युः क्षतजोपमेक्षणः ॥
समाससादाप्रतिमं कपिं रणे गजो महाकूपमिवावृतं तृणैः ॥ २० ॥
स तेन बाणैः प्रसभं निपातितैश्चकार नादं घननादनिस्स्वनः ॥
समुत्पपाताशु नभः स मारुतिर्भुजोरुविक्षेपणघोरदर्शनः ॥ २१ ॥
समुत्पतन्तं समभिद्रवद्बली स राक्षसानां प्रवरः प्रतापवान् ॥
रथी रथिश्रेष्ठतमः किरञ्शरैः पयोधरः शैलमिवाश्मवृष्टिभिः ॥ २२ ॥
स ताञ्शरांस्तस्य हरिर्विमोक्षयंश्चचार वीरः पथि वायुसेविते ॥
शरान्तरे मारुतवद्विनिष्पतन्मनोजवः संयति चण्डविक्रमः ॥ २३ ॥
तमाक्तबाणासनमाहवोन्मुखं खमास्तृणन्तं विशिखैः शरोत्तमैः ॥
अवैक्षताक्षं बहुमानचक्षुषा जगाम चिन्तां च स मारुतात्मजः ॥ २४ ॥
ततः शरैर्भिन्नभुजान्तरः कपिः कुमारवीरेण महात्मना नदन् ॥
महाभुजः कर्मविशेषतत्त्वविद्विचिन्तयामास रणे पराक्रमम् ॥ २५ ॥
अबालवद्बालदिवाकरप्रभः करोत्ययं कर्म महन्महाबलः ॥
न चास्य सर्वाहवकर्मशोभिनः प्रमापणे मे मतिरत्र जायते ॥ २६ ॥

दृष्टान्तः आदित्यइवांशुमालिक इति ॥ १५ ॥ आपूर्यत व्यवर्धत ॥ १६ ॥ मन्दराग्रस्थः मन्दरो नाम भूमध्यपर्वतः । तदग्रे मध्याह्ने वर्तत इत्यौ-ड्योक्तिः ॥ १७ ॥ बाणासनचित्रकार्मुकः बाणाः अस्यन्ते क्षिप्यन्तेनेनेति बाणासनः बाणविमोक्षक-चित्रकार्मुक इत्यर्थः ॥ १८—२२ ॥ विमोक्षयन् शरीरे असंयोजयन् । लाघवातिशयेनेति भावः ॥ २३ ॥ आस्तृणन्तं आच्छादयन्तं । विशिखैः विविधशिखैः । चिन्तां जगाम कथमेतादृशमेनं वधिष्यामीत्येवं ॥ २४ ॥ इदमेवोपपादयति ततश्शरै-

सौविवृत्तनेत्रश्च । विवृत्तलोचनइतिपाठे अवसरोचितचक्षुरित्यर्थः । नवोदितादित्यसंनिभः रक्तवर्णइत्यर्थः । शरांशुमान् स्वमस्तक-स्थशररूपांशुमान् । अंशुमालाभृत्सूर्यइव व्यराजत ॥ १५ ॥ रामानु० मन्दराग्रस्थः मन्दरोनामसालग्रामपर्वतोत्तरभागेभारः तखण्डमध्येवर्तमानःकश्चनपर्वतः । तदग्रस्थः । अनेनोत्तरायणेमध्याह्नगतत्वमुक्तंभवति ॥ १७ ॥ रामानु० बाणासनचित्रका-मुर्कः बाणानामसनं बाणान्क्षिपत् चित्रंचकार्मुकंयस्यसतथोक्तः । बाणासनचक्रकार्मुकइतिपाठे बाणान्क्षिपत् चक्राकारंकार्मुकं यस्यसः ॥ ति० बाणासनमेवशक्रकार्मुकंयस्यसः ॥ १८ ॥ ति० चिन्ताप्रकारः अबालवदिति० । सर्वाहवकर्मशालिन-

[पा०] १ ङ.—ट. संवृतः. २ क. मरीचिभिःकपिः. ३ ख.—ट. शक्रकार्मुकः. ४ ख. ज.—ट. प्रवृद्ध. ५ क.—ट. सायकं. ६ क.—ट. तुल्यनिस्स्वनः. ७ ङ. छ. झ. ट. समुत्सहेनाशुनभस्समारुजन्. ८ ख. घ. स्तस्यविमोचयन्कपिश्चचार. ९ ख. ङ.—ट. भीमविक्रमः क. घ. चेन्द्रविक्रमः. १० ङ.—ट. विविधैः. ११ क. ख. घ. शरोत्करैः. १२ क. ख. ग. ङ.—ट. कुमारवर्येण. १३ ङ.—ट. कर्मशालिनः.

अयं महात्मा च महांश्च वीर्यतः समाहितश्चातिसहश्च संयुगे ॥
असंशयं कर्मगुणोदयादयं सनागयक्षैर्मुनिभिश्च पूजितः ॥ २७ ॥
पराक्रमोत्साहविवृद्धमानसः समीक्षते मां प्रमुखागतः स्थितः ॥
पराक्रमो ह्यस्य मनांसि कम्पयेत्सुरासुराणामपि शीघ्रगामिनः ॥ २८ ॥
न खल्वयं नाभिभवेदुपेक्षितः पराक्रमो ह्यस्य रणे विवर्धते ॥
प्रमापणं त्वेव ममास्य रोचते न वर्धमानोऽग्निरुपेक्षितुं क्षमः ॥ २९ ॥
इति प्रवेगं तु परस्य तर्कयन्स्वकर्मयोगं च विधाय वीर्यवान् ॥
चकार वेगं तु महाबलस्तदा मतिं च चक्रेऽस्य वधे महाकपिः ॥ ३० ॥
स तस्य तानष्टहयान्महाजवान्समाहितान्भारसहान्विवर्तने ॥
जघान वीरः पथि वायुसेविते तलप्रहारैः पवनात्मजः कपिः ॥ ३१ ॥
ततस्तलेनाभिहतो महारथः स तस्य पिङ्गाधिकमन्त्रिनिर्जितः ॥
प्रभग्ननीडः परिमुक्तकूबरः पपात भूमौ हतवाजिरम्बरात् ॥ ३२ ॥
स तं परित्यज्य महारथो रथं सकार्मुकः खड्गधरः खमुत्पतन् ॥
तपोभियोगाद्दपिरुग्रवीर्यवान्विहाय देहं मरुतामिवालयम् ॥ ३३ ॥
ततः कपिस्तं विचरन्तमम्बरे पतत्रिराजानिलसिद्धसेविते ॥
समेत्य तं मारुततुल्यविक्रमः क्रमेण जग्राह स पादयोर्दृढम् ॥ ३४ ॥
स तं समाविध्य सहस्रशः कपिर्महोरगं गृह्य इवाण्डजेश्वरः ॥
मुमोच वेगात्पितृतुल्यविक्रमो महीतले संयति वानरोत्तमः ॥ ३५ ॥
स भग्नबाहूरुकटीशिरोधरः क्षरन्नसृङ्मर्मथितास्थिलोचनः ॥
सभग्नसंधिः प्रविकीर्णबन्धनो हतः क्षितौ वायुसुतेन राक्षसः ॥
महाकपिर्भूमितले निपीड्य तं चकार रक्षोधिपतेर्महद्भयम् ॥ ३६ ॥
महर्षिभिश्चक्रचरैर्महाव्रतैः समेत्य भूतैश्च सयक्षपन्नगैः ॥
सुरैश्च सेन्द्रैर्मृगजातविस्मयैर्हते कुमारे स कपिर्निरीक्षतः ॥ ३७ ॥

रित्यादिना ॥ २५—२६ ॥ अतिसहः अतिसोढा । कर्मगुणोदयात् युद्धकर्मोत्कर्षाभिवृद्धेः ॥२७—२९॥ परस्य शत्रोः । प्रवेगंतर्कयन् आलोचयन् । स्वकर्मयोगं विधाय युद्धक्रमं च सङ्कल्प्य । पूर्वमश्वान् हत्वा ततो रथं भङ्क्ष्यामीति निश्चित्येत्यर्थः ॥ ३० ॥ विवर्तने सव्यापसव्यभ्रमणेपि । भारसहान् रथभारसहान् ॥ ३१ ॥ तलेनाभिहतः अतएव पिङ्गाधिपमन्त्रिनिर्जितः हनुमता निर्जित इत्यर्थः । प्रभग्ननीडः प्रभग्नरथाङ्गः । कूबरः युगन्धरः । वाजिरिति इकारान्तत्वमार्षं ॥ ३२ ॥ मरुतामालयमुत्पतन् ऋषिरिव अभवदितिशेषः ॥ ३३—३४ ॥ गृह्य इवेत्यत्र गुणाभावआर्षः ॥ ३५ ॥ प्रविकीर्णबन्धनः प्रविकीर्णकक्ष्यादिबन्धनः । प्रभिन्नसंधिरितिसंधिबन्धभङ्गस्योक्तत्वात् ॥ ३६ ॥ चक्रचरैः ज्योतिश्चक्रचरैः । नभश्चक्र-

सर्वप्रकाराहवकर्मशालिनः । अत्र अस्मिन्काले । अस्यप्रमापणेमेमतिर्नजायते । प्रमापणेमारुतिरत्रजायतेइतिपाठे अयंजनइतिवत्स्वैवहनुमतोमारुतिरितिनिर्देशः ॥ २६ ॥ ति० स्वकर्मयोगं स्वस्यकर्मणियोगं ज्ञानबलविशेषावस्थानलक्षणमुपायं ॥ ३० ॥ शि० विवर्तने अनेकविधमण्डलगमने । समाहितान् प्राप्तशिक्षानित्यर्थः ॥ ३१ ॥ इतिसप्तचत्वारिंशःसर्गः ॥ ४७ ॥

[पा०] १ ग. ङ. झ. ञ. ट. प्रमुखोग्रतः. २ ख.—ट. शीघ्रकारिणः. ३ ङ.—झ. ट. प्रमापणंह्यस्यममाद्य. ४ ख. छ. झ. घ. ङ. झ. ट. वधेतदानीं. क. च. छ. ज. वधेदुरात्मनः. ५ ङ. छ. ज. झ. ट. तानष्टवरान्महाहयान्. ६ ख. ङ. च. ट. सभग्ननीडः. ७ ङ.—ट. संभिन्नसन्धिः क. ग. प्रभिन्नसन्धिः. ८ ङ. झ. ट. चक्रचरैःसमागतैः. घ. चक्रचरैर्महाबलैः.

निहत्य तं वज्रिसुतोपमप्रभं कुमारमक्षं क्षतजोपमेक्षणम् ॥
तमेव वीरोऽभिजगाम तोरणं कृतक्षणः काल इव प्रजाक्षये ॥ ३८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

इन्द्रजिता हितोपदेशपूर्वकरावणप्रेरणया रणायहनुमन्तंप्रत्यभियानम् ॥ १ ॥ हनुमता लाघवातिशयेनेन्द्रजिद्बाणादीनांमोघीकरणे इन्द्रजिताब्रह्मास्त्रेण तद्बन्धनम् ॥ २ ॥ अस्त्रमोचनशक्तस्यापि रावणदर्शनादिप्रयोजनायास्त्रमनुवर्तमानस्यहनुमतोराक्षसैरावणसमीपप्रापणम् ॥ ३ ॥

ततः स रक्षोधिपतिर्महात्मा हनूमताऽक्षे निहते कुमारे ॥
मनः समाधाय तदेन्द्रकल्पं समादिदेशेन्द्रजितं सरोषम् ॥ १ ॥
त्वमस्त्रविच्छस्त्रविदां वरिष्ठः सुरासुराणामपि शोकदाता ॥
सुरेषु सेन्द्रेषु च दृष्टकर्मा पितामहाराधनसंचितास्त्रः ॥ २ ॥
तवास्त्रबलमासाद्य नासुरा न मरुद्गणाः ॥ न शेकुः समरे स्थातुं सुरेश्वरसमाश्रिताः ॥ ३ ॥
न कश्चित्त्रिषु लोकेषु संयुगे नगतश्रमः ॥ भुजवीर्याभिगुप्तश्च तपसा चाभिरक्षितः ॥
देशकालविभागज्ञस्त्वमेव मतिसत्तमः ॥ ४ ॥
न तेऽस्त्यशक्यं समरेषु कर्मणा न तेऽस्त्यकार्यं मतिपूर्वमञ्जसे ॥
न सोस्ति कश्चित्त्रिषु संग्रहेषु वै न वेद यस्तेऽस्त्रबलं बलं च ते ॥ ५ ॥
ममानुरूपं तपसो बलं च ते पराक्रमश्चास्त्रबलं च संयुगे ॥
न त्वां समासाद्य रणावमर्दे मनः श्रमं गच्छति निश्चितार्थम् ॥ ६ ॥

चरैर्वा ॥ ३७—३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

मनः समाधाय धैर्यं कृत्वेत्यर्थः ॥ १ ॥ अस्त्रवित् ब्रह्मास्त्रवित् । संचितास्त्रः संचितास्त्रविशेषः ॥ २ ॥ तव अस्त्रबलमासाद्य असुराः न नश्यन्तीत्यर्थः ॥ ३ ॥ त्रिषु लोकेषु तव संयुगे नगतश्रमः अप्राप्तश्रमः कश्चिन्न । " सुप्सुपा " इति समासः । सर्वेप्राप्तश्रमाइत्यर्थः । हरिहयादयोपि श्रमंप्राप्नुवन्तीत्यर्थः । मतिसत्तमः मतिश्रेष्ठइत्यर्थः ॥ ४ ॥ समरेषु कर्मणा पुरुषकारेण । ते अशक्यं नास्तीत्यर्थः । तथा मतिपूर्वमञ्जसे विवेकपूर्वविचारे । अकार्यं अज्ञातकार्यं । ज्ञातुमशक्यं कार्यं नास्तीत्यर्थः । संग्रहेषु संगृह्यन्ते भोग्यतया स्वीक्रियन्ते भोक्तृभिरिति संग्रहाः लोकाः । तेषु त्रिष्वपि यस्तवास्त्रबलं शारीरं बलं च न वेद स नास्ति । सर्वलोकप्रख्यातशस्त्रास्त्रबलसंपन्नस्त्वमित्यर्थः ॥ ५ ॥ रणावमर्दे रणसंकटे । निश्चितार्थं निश्चितजयरूपार्थं । त्वां आसाद्य विचिन्त्य । मे मनः श्रमं न

स० समाधाय पुत्रशोकोपहतंमनःपुनःकार्यगौरवाद्धैर्येणैकाग्र्यंविधाय । इन्द्रकल्पं इन्द्रोपमंकपिंप्रति इन्द्रजितंसमादिदेश । अनेनानायासेनहनुमज्जयेसमर्थइतिभ्रमेणसमादिदेशेतिभावःसूचितोभवति । इन्द्रकल्पं इन्द्रसमसमरेकल्पो दक्षइतीन्द्रजितोविशेषणंवा । एतत्पक्षेकल्पशब्दः । प्राक्पक्षेप्रत्ययइतिविवेकः ॥ ति० मनःसमाधाय पुत्रनाशखिन्नमपिचेतोधीरतयाऽप्रकाशितभयंप्रतिष्ठाप्य ॥ १ ॥ स० सुरेश्वरंसमाश्रिताःकेप्यन्ये नशेकुरित्यन्वयः ॥ ३ ॥

[पा०] १ ङ. ञ. ञ. ट. सुतोपमंरणे. २ क. ख. ग. ङ.—ट. तदेव. ३ ख. झ. ञ. ट. सदेवकल्पं. ४ क. ङ. ट. सरोषः. ५ क. ख. घ. ङ. ज.—ट. रछस्त्रभृतां. ६ ङ. च. छ. झ. ञ. ट. त्वदस्त्र. ७ ङ. झ. ट. ससुरास्समरुद्गणाः. ८ ङ.—ट. देशकालप्रधानश्च.

निहताः किंकराः सर्वे जम्बुमाली च राक्षसः ॥ अमात्यपुत्रा वीराश्च पञ्च सेनाग्रयायिनः ॥ ७ ॥
बलानि सुसमृद्धानि साश्वनागरथानि च ॥ सहोदरस्ते दयितः कुमारोक्षश्च सूदितः ॥ ८ ॥
न हि तेष्वेव मे सारो यस्त्वय्यरिनिषूदन ॥ ९ ॥
इदं हि दृष्ट्वा मतिमन्महद्बलं कपेः प्रभावं च पराक्रमं च ॥
त्वमात्मनश्चापि समीक्ष्य सारं कुरुष्व वेगं स्वबलानुरूपम् ॥ १० ॥
बलावमर्दस्त्वयि सन्निकृष्टे यथागते शाम्यति शान्तशत्रौ ॥
तथा समीक्ष्यात्मबलं परं च समारभस्वास्त्रविदां वरिष्ठ ॥ ११ ॥
न वीर सेनागणशोच्यवन्ति न वज्रमादाय विशालसारम् ॥
न मारुतस्यास्य गतेः प्रमाणं न चाग्निकल्पः करणेन हन्तुम् ॥ १२ ॥

गच्छति विषादंनगच्छतीत्यर्थः ॥ ६—८ ॥ त्वयि मे यस्सारः उत्कर्षप्रत्ययः । सः तेषु नास्त्येवहीति योजना ॥ ९ ॥ इदं किङ्कराध्यक्षकुमारान्तमारकं मतिमत् प्रशस्तमतियुक्तं । बलं शारीरं । प्रभावं अन्तःशक्तिं । पराक्रमं पौरुषं ॥ १० ॥ शान्तशत्रौ शमितशत्रौ । शत्रुशमनस्वभाव इति यावत् । " वा दान्तशान्त—" इत्यादिना निपातनाण्णिलोप इडभावश्च । त्वयि संनिकृष्टे कपेरासन्ने सति । यथा बलावमर्दः सेनाक्षयः । शाम्यति । तथा आत्मबलं परं परबलं च समीक्ष्य समारभस्व । बलनाशात्पूर्वमेव शत्रुशान्तिं कुर्वित्यर्थः ॥ ११ ॥ हे वीर गणशोचि गणानां शोचयितरि । शोचतेर्ण्यन्तात्किप् । एकदाऽनेकप्रहर्तरीत्यर्थः । एवंभूते हनुमति निमित्ते सेनाः नावन्ति न रक्षन्ति । युगपदनेकविनाशके सेना अप्रयोजिकेत्यर्थः । अतः सेनाभिः सह मा गच्छेत्यर्थः । उपायान्तरं प्रतिषेधति—न वज्रमिति । अलसारं हनुमद्विषये जीर्णसारं । वज्रं वज्राख्यमायुधविशेषं । आदाय न विश । तत्समीपमिति शेषः । तत्र हेतुमाह—न मारुतस्येति । अस्य गतिप्रमाणं मारुतस्य नास्ति । मारुतादप्यतिशयितगतिप्रमाण इत्यर्थः । अतस्तरसा यया कयापि दिशा समागम्य प्रहर्तरि न वज्रं किञ्चित्करमिति भावः । यदि समीपमागमिष्यति तदा मुष्टयादिभिरेव निहन्यत इत्याशङ्क्याह—न चेति । अग्निकल्पो हनुमान् करणेन मुष्टया-

---

शि० ननुतर्हिममापिवधःस्यादित्यतआह—नेति । मे ममसंबन्धीयस्सारोबलं त्वय्यस्ति सः तेषुनिहतेषुनैव । एतेनातिप्रबलत्वात्तववधोनभविष्यतीतिध्वनितं ॥ ति० यद्वा मेसारः सर्वजगज्जयसामर्थ्यं स त्वय्येव त्वत्साहाय्यनिमित्तएव । नतुतेषु नतुतत्साहाय्यनिमित्तकइत्यर्थः ॥ स० सारोबलं यस्त्वयि । स तेषुपूर्वविनाशितेषुनेतिमे मह्यंरोचतइतिवा भातीतिवा क्रमाच्चतुर्थीषष्ठीवाऽऽश्रयणीयेतिशेषोध्येयः ॥ ९ ॥ स० बलावमर्दैः अस्मदीयैस्सह त्वयिसंनिकृष्टे हनुमत्समीपंप्राप्तेसति । शान्तशत्रुः नाशिताक्षादिः शाम्यति शान्तोभवति मृतोभवतीतियावत् । तथा आत्मबलं परबलंचसमीक्ष्यारभस्व ॥ ११ ॥ स० हनुमद्बलाकर्णनदीप्तहृदयःसेनादिसत्त्वभ्रमतोनसाहसंकुर्वितिसुतंप्रति शंसति—नेति । हेवीर आरब्धान्तगामिन् । गणशः सङ्घीभूताःसेनाः न नोपयुक्ताः । तत्रहेतुश्चयन्तीति । स्वामिनंगमयित्वा पलायन्ते । उत्वमार्षं । विशालसारंवज्रमादायापिनप्रयोजनं । मारुतस्य हनुमतः । गतेः प्रमाणं इयत्ता । न नास्ति । करणेन सेनादिरूपेण । अग्निकल्पोऽयं नच नशक्यइतिशेषः । यद्वा नवीर नविद्यतेवीरोयस्मादन्यइतिनवीरः तत्संबुद्धिः । सेनाः गणशः अ च्यवन्ति नच्यवन्ति स्वस्थलाद्रणाङ्गणंप्रतिनोपसर्पन्ति । " अमानोनाःप्रतिषेधे " इत्यनुशिष्टं अ इत्यव्ययं । ततश्च अ च्यवन्तीतिपदद्वयं । अथवा नसेनाइत्यनेनाक्षेपोज्ञायते । अतःसमासोपपत्तिः । विशालसारंवज्रं तन्नामकायुधमादायापिन नगच्छतस्तवकृत्यं । अतद्गोचरइति भावः । यद्वा हेनवीरगणश स्वसंघसुखद सेनाउच्यवन्ति परिसर्पन्ति । नचच्यवन्ति उच्यवन्तीत्यत्र एकचकारद्विचकारपदयोरुच्चरणवैलक्षण्यावश्यंभावात्कथमेवंपदमितिवाच्यं । " असिद्धवदत्राभात् " इतिसूत्रमहाभाष्ये " नव्यञ्जनपरस्यैकस्यवानेकस्यवोच्चारणेश्रवणंप्रतिविशेषोस्ति" इत्युक्तेः । इदंप्रकारस्तुभाष्यदीपिकायुक्तिवाल्यायामस्मत्कृतायांविस्तरतउदञ्चितस्ततोनुसंधेयः । कुतःसेनाप्रयोजनंनास्तीत्यतआह—नेति । विशालसारंवज्रमादायन नायाति । एकवचनेनएकंवज्रमादायनायाति किंतु बहुवज्रा-

[पा०] १ ग. ज. ञ. सेनाग्रनायकाः. ङ. झ. ट. सेनाग्रगामिनः. २ ग. मेमनसस्सारो. ३ ङ—ट. निरीक्ष्य. ४ ङ. च, छ. झ. ञ. बलावमर्दैः. ५ ङ. च. छ. झ. ञ. शान्तशत्रुः. ६ क. ग. ङ.—ञ. मारुतस्यास्तिगतिप्रमाणं.

तमेवमर्थं प्रसमीक्ष्य सम्यक्स्वकर्मसाम्याद्धि समाहितात्मा ॥
स्मरंश्च दिव्यं धनुषोस्त्रवीर्यं व्रजाक्षतं कर्म समारभस्व ॥ १३ ॥
न खल्वियं मतिः श्रेष्ठा यत्त्वां संप्रेषयाम्यहम् ॥
इयं च राजधर्माणां क्षत्रस्य च मतिर्मता ॥ १४ ॥
नानाशस्त्रैश्च संग्रामे वैशारद्यमरिन्दम ॥ अवश्यमेव बोद्धव्यं काम्यश्च विजयो रणे ॥ १५ ॥
ततः पितुस्तद्वचनं निशम्य प्रदक्षिणं दक्षसुतप्रभावः ॥
चकार भर्तारमदीनसत्त्वो रणाय वीरः प्रतिपन्नबुद्धिः ॥ १६ ॥

दिना । हन्तुं न शक्यः । अग्नितुल्ये मुष्टयादिप्रहारा-प्रवृत्तेरितिभावः ॥ १२ ॥ तर्हि कथं कर्तव्यं तत्राह —तमिति ॥ तं पूर्वोक्तमर्थं एवं । सम्यक् । प्रसमीक्ष्य विचार्य । स्वकर्मसाम्यात् स्वकार्यसिद्ध्यर्थं । फलस्यापि हेतुत्वात्पञ्चमी । साम्यं समत्वं । अन्यूनातिरिक्तत्वं । समाहितात्मा एकाग्रचित्तः । दिव्यं धनुस्संबन्धि अस्त्रवीर्यं अस्त्रबलं । स्मरन् व्रज । अस्त्रबलं विना स निगृहीतुमशक्यः । तेन तन्मन्त्रं स्मरन्नेव गच्छेतिभावः ॥ १३ ॥ अहं त्वां संप्रेषयामीति यत् इयं मतिः न श्रेष्ठा खलु । नोचितेत्यर्थः । इयं मतिः त्वत्प्रेषणविषया मतिः । राजधर्माणां राजनीतिस्वरूपधर्माणां । क्षत्रस्य तदनुष्ठातुः क्षत्रियस्य च मता उचिता । यद्यपि बालस्य प्रेषणमनुचितं तथापि स्वीयेषु सत्सु प्रधानगमनं नीतिशास्त्रविरुद्धमिति त्वां प्रेषयामीति भावः ॥ १४ ॥ नानाशस्त्रैः वैशारद्यं प्रहरणसामर्थ्यं । अवश्यं बोद्धव्यं स्मर्तव्यमित्यर्थः । रणे विजयश्च काम्यः प्रार्थनीयः । जयार्थं सर्वाण्यस्त्राणि स्मर्तव्यानीत्यर्थः ॥ १५ ॥ दक्षसुतप्रभावः दक्षसुता

नादायायातो वासवापेक्षयाथमतिशयितबलइत्यवलेपोनकार्यइतिभावः । यथोक्तंसंग्रहे—" नन्वेकवज्रोरिपुमेतिवज्रीदशास्यघोरानखनामवज्राः " इति । योमारुतः अग्निकल्पः अग्निसदृशः । आवम्येनन । " अग्निर्वैदेवानामवमः " इतिश्रुतेः । अतः-करणेन कस्य आत्मनः । रणेन युद्धेन अस्मज्जातियुद्धेन । मायामयेनेतियावत् । यद्वा कशब्दःकुत्सितवाची । कपटेत्यकापट्यंकुत्सितपटवत्त्वंचविवक्ष्यतइतिश्लेषकविसंप्रदायात् । केनकुत्सितेनरणेनहन्तुंन नहन्तुंयोग्यइत्यर्थः । केनापिकरणेनहन्तुंनशक्यइति । अलसारं पर्याप्तबलं । वज्रमिव वज्रंदृढंहनुमन्तं । आदायविश लङ्कामितिशेषः । हेअलस न्यायमार्गेणयुद्धंकर्तुमसमर्थ । अरं अलं अत्यन्तं । रलयोरभेदात् । वर्जनात् वैरिवर्जनाद्वज्रोहरिः तद्वान् । अर्शआद्यच् । तंहनुमन्तमादायेतिपूर्ववत् । यत्तुनागोजिभट्टेनतत्रावतेस्त्रायतिसमानार्थत्वेनपञ्चमीप्राप्तौसप्तमीत्वार्षी । अलतेर्धातोःपर्याप्त्यर्थत्वेनपर्याप्तसारमितिव्याख्यातुंयोग्यं । कुण्ठेत्यर्थस्यततोऽलाभादितितीर्थोपरिसाहसंकृतं तत्तु प्रथमपक्षेतदुक्त्यैव द्वितीयपक्षे कुण्ठधारमित्युक्त्यैवनयुक्तं । तथाहि । शब्देन्दुशेखरे " ततश्चसंबन्धसामान्येषष्ठ्यैवसमासः । भीत्रार्थानामिति हेतुलप्रकारकबोधेतृतीयाबाधनार्थंविभक्तिप्रकरणे नकृतं । कारकलप्रयुक्तकार्यानापत्तेरितिभावः । किंचहेतुलाविवक्षायांसंबन्धित्वेनविवक्षायाषष्ठीसूत्रारंभेपिबोध्या । अभ्युच्चयेनाहेत्यादि" । क्तितिचेत्यादाविवगणशोचीतिनिमित्तसप्तम्युपपत्तेः । मारुतस्येति । किंचिद्भूतमित्युक्तिस्तु तद्बलासहिष्णुतयेतिज्ञेयं ॥ १२ ॥ ति० स्वकर्मसाम्यात् स्वेनैवकर्मणःप्रकृतकार्यस्यसाम्यात्सिद्धेःसंपादनीयत्वात्त्वं समाहितात्मा समाहितचित्तोभूत्वा अस्यविषये दिव्यं धनुषोवीर्यं दिव्यास्त्रमोक्षसामर्थ्यंस्मरन् निश्चिन्वन्व्रज गच्छ ॥ स० एवं एवंविधं तंहनुमन्तं अर्थं त्वत्प्रयोजनंचप्रसमीक्ष्य स्वकर्मसाम्यात् स्वव्यापारानुगुण्यात् । समाहितात्मा अस्यहनुमतः अस्यधनुषोवीर्यंचस्मरन् व्रज । तेकर्म व्यापारः अक्षतं फलपर्यवसायियथास्यात्तथासमारभस्व ॥ १३ ॥ स० मतिश्रेष्ठ बुद्ध्यावरिष्ठ । यदित्यव्ययंतृतीयार्थे । ययामत्या त्वांप्रेषयिष्यामिइयंमतिर्नेत्यर्थः । अथवासंप्रेषयिष्यामीतियत् इयंप्रेरणा न नोचितेत्यर्थः । इयंप्रेरणविषयामतिः राज्ञांधर्माः राजधर्माःएषांसन्तीतिराजधर्माः तेषामस्माकं । क्षत्रियस्यचमता उचिता नान्येषामितिभावः । अतोनानिच्छसक्तिः । एतेन स्वस्यक्षत्रियत्वाभावेपिक्षत्रधर्मानुष्ठानात्पुत्रप्रेषणंयुक्तमितिसूचयति ॥ १४ ॥ अथराज्ञःक्षत्रियस्यचकृत्यमाह—नानेति । नानाशास्त्रेषु धर्मार्थनीत्यादिशास्त्रेषु संग्रामेच वैशारद्यं संपाद्यमितिशेषः । यस्यरणेविजयःकाम्योभवति तेनोक्तं नानाशास्त्रंअवश्यंबोद्धव्यमेवेत्यर्थः । यद्वा परस्यनानाशास्त्रेषुयद्वैशारद्यमस्ति तद्योद्भावश्यमेवबोद्धव्यं । बुद्ध्वापिरणेस्वस्यविजयःप्रार्थ्यएव । अहंजेष्याम्येवेतिबुद्ध्यायुद्धमारभ्यमेव । नतुतादृशशत्रोरपिनिवर्तितव्यमित्यर्थः । केचित्तु नानाशस्त्रैरितियोद्धव्यमितिचपठित्वा नानाशस्त्रकरणकसंग्रामेवैशारद्यंसामर्थ्यंतवास्ति अतस्त्वयाऽवश्ययोद्धव्यमेव रणेजयश्चप्रार्थनीयएवेतिव्याचक्षते ॥ १५ ॥ स० दक्षःसुतोऽस्यांप्रचेतसांब्रह्मणइतिवा तत्प्रभावः तत्स-

[पा०] १ ख. सामर्थ्यसमीहितात्मा. २ ख. घ. ङ. च. ज.—ट. धनुषोस्यवीर्यं. ३ झ.—ठ. मतिश्रेष्ठ. ४ ङ. झ. ञ. ट. नानाशास्त्रेषु. ५ ख. च. छ. योद्धव्यं. ६ ङ. झ. ट. मतिस्त्वरेण.

ततस्तैः स्वगणैरिष्टैरिन्द्रजित्प्रतिकूजितः ॥ युद्धोद्धतः कृतोत्साहः संग्रामं प्रत्यपद्यत ॥ १७ ॥
श्रीमान्पद्मपलाशाक्षो राक्षसाधिपतेः सुतः ॥ निर्जगाम महातेजाः समुद्र इव पर्वसु ॥ १८ ॥
स पक्षिराजोपमतुल्यवेगैर्व्यालैश्चतुर्भिः सिततीक्ष्णदंष्ट्रैः ॥
रथं समायुक्तमसह्यवेगं समारुरोहेन्द्रजिदिन्द्रकल्पः ॥ १९ ॥
स रथी धन्विनां श्रेष्ठः शस्त्रज्ञोस्त्रविदां वरः ॥ रथेनाभिययौ क्षिप्रं हनूमान्यत्र सोभवत् ॥ २० ॥
स तस्य रथनिर्घोषं ज्यास्वनं कार्मुकस्य च ॥ निशम्य हरिवीरोसौ संप्रहृष्टतरोऽभवत् ॥ २१ ॥
सुमहच्चापमादाय शितशल्यांश्च सायकान् ॥ हनुमन्तमभिप्रेत्य जगाम रणपण्डितः ॥ २२ ॥
तस्मिंस्ततः संयति जातहर्षे रणाय निर्गच्छति बाणपाणौ ॥
दिशश्च सर्वाः कलुषा बभूवुर्मृगाश्च रौद्रा बहुधा विनेदुः ॥ २३ ॥
समागतास्तत्र तु नागयक्षा महर्षयश्चक्रचराश्च सिद्धाः ॥
नभः समावृत्य च पक्षिसङ्घा विनेदुरुच्चैः परमप्रहृष्टाः ॥ २४ ॥
आयान्तं सरथं दृष्ट्वा तूर्णमिन्द्रजितं कपिः ॥ विननाद महानादं व्यवर्धत च वेगवान् ॥ २५ ॥
इन्द्रजित्तु रथं दिव्यमास्थितश्चित्रकार्मुकः ॥ धनुर्विस्फारयामास तडिदूर्जितनिस्स्वनम् ॥ २६ ॥
ततः समेतावतितीक्ष्णवेगौ महाबलौ तौ रणनिर्विशङ्कौ ॥
कपिश्च रक्षोधिपतेश्च पुत्रः सुरासुरेन्द्राविव बद्धवैरौ ॥ २७ ॥
स तस्य वीरस्य महारथस्य धनुष्मतः संयति संमतस्य ॥
शरप्रवेगं व्यहनत्प्रवृद्धश्चचार मार्गे पितुरप्रमेये ॥ २८ ॥
ततः शरानाययतीक्ष्णशल्यान्सुपत्रिणः काञ्चनचित्रपुङ्खान् ॥
मुमोच वीरः परवीरहन्ता सुसन्नतान्वज्रनिपातवेगान् ॥ २९ ॥
ततस्तु तत्स्यन्दननिस्स्वनं च मृदङ्गभेरीपटहस्वनं च ॥
विकृष्यमाणस्य च कार्मुकस्य निशम्य घोषं पुनरुत्पपात ॥ ३० ॥

देवाः । तथोक्तं विष्णुपुराणे— "मनसा त्वेव भूतानि पूर्वं दक्षोसृजत्तथा । देवानृषीन्सगन्धर्वानुरगान्पक्षिणस्तथा" इति ॥ १६ ॥ युद्धोद्धतः कृतोत्साह इति पाठः ॥ १७–१८ ॥ पक्षिराजोपमतुल्यवेगैः पक्षिराजोपमैः अन्योन्यतुल्यवेगैश्च । व्यालैः हिंस्रपशुभिः । सिंहैरिति यावत् । सिंहाश्च रक्षसां वाहनानि भवन्ति । "सर्पहिंस्रपशू व्यालौ" इत्यमरः ॥ १९—२० ॥ ज्यास्वनमित्यत्र ज्या इति लुप्तषष्ठीविभक्तिकं पृथक्पदं । कार्मुकस्येत्यत्र स्वनमिति वा अध्याहारः ॥ २१—२२ ॥ संयति युद्धे । जातहर्षे जातोत्साहे ॥ २३ ॥ चक्रचराः सञ्चारिणः ॥ २४—२५ ॥ तडिदूर्जितनिस्स्वनं । अत्र तडिच्छब्देन तत्सङ्घातोशनिरुच्यते । विद्युत्सङ्घातनिस्स्वनमिति पूर्वमुक्तत्वात् । अशनिवद्दृढनिस्स्वनमित्यर्थः ॥ २६ ॥ सुरासुरेन्द्राविव समेतावित्यन्वयः ॥ २७ ॥ शरप्रवेगं व्यहनत् चचार चेत्यन्वयः ॥ २८—३० ॥

मानपराक्रमः । दक्षसुतानांनारदेननाशितत्वादेवमेवार्थोबोध्यः ॥ १६ ॥ स० इन्द्रकल्पः इन्द्रादपिसमर्थः ॥ १९ ॥ ति० तटिदूर्जितनिस्स्वनं तटिन्निभमूर्जितस्वनंच ॥ २६ ॥ रामानु० सुपत्रिणः पत्रिणः प्रशस्तपत्राः । शोभनाश्चतेपक्षिणश्चेतिविग्रहः

[पा०] १ ङ. झ. ट. विशालाक्षो. २ घ. ङ. झ. ट. पर्वणि. ३ क. ख. पक्षिराजानिलतुल्य. ४ ङ. झ. ट. सतुतीक्ष्ण. ५ ङ. च. झ. ट. मसह्यवेगः. ६ क. विशारदः. ७ ङ. झ. ट. इन्द्रजिच्चापमादाय. ८ ग. च. छ. ज. ञ. ट. मभिप्रेक्ष्य. ९ क. विविधाः. १० क. घ. स्तत्रस. ११ ङ. झ. ट. ननादच. घ. ननादसुमहावेगं. १२ ङ. झ. ट. माश्रितः. १३ ग. ङ. झ. ट. रप्रमेयः. १४ ग. ज. ञ. तीक्ष्णवेगान्. १५ क.—च. ज.—ट. सुसंततान्. १६ ङ.—ट. वज्रसमानवेगान्. १७ क. ख. घ. च. छ. ज. ञ. सतस्य. १८ क. सशङ्खभेरी.

शराणामन्तरेष्वाशु व्यवर्तत महाकपिः ॥ हरिस्तस्याभिलक्ष्यस्य मोघयँल्लक्ष्यसंग्रहम् ॥ ३१ ॥
शराणामग्रतस्तस्य पुनः समभिवर्तत ॥ प्रसार्य हस्तौ हनुमानुत्पपातानिलात्मजः ॥ ३२ ॥
तावुभौ वेगसंपन्नौ रणकर्मविशारदौ ॥ सर्वभूतमनोग्राहि चक्रतुर्युद्धमुत्तमम् ॥ ३३ ॥
हनूमतो वेद न राक्षसोन्तरं न मारुतिस्तस्य महात्मनोन्तरम् ॥
परस्परं निर्विषहौ बभूवतुः समेत्य तौ देवसमानविक्रमौ ॥ ३४ ॥
ततस्तु लक्ष्ये स विहन्यमाने शरेष्वमोघेषु च संपतत्सु ॥
जगाम चिन्तां महतीं महात्मा समाधिसंयोगसमाहितात्मा ॥ ३५ ॥
ततो मतिं राक्षसराजसूनुश्चकार तस्मिन्हरिवीरमुख्ये ॥
अवध्यतां तस्य कपेः समीक्ष्य कथं निगच्छेदिति निग्रहार्थम् ॥ ३६ ॥
ततः पैतामहं वीरः सोस्त्रमस्त्रविदां वरः ॥ संदधे सुमहातेजास्तं हरिप्रवरं प्रति ॥ ३७ ॥
अवध्योऽयमिति ज्ञात्वा तमस्त्रेणास्त्रतत्त्ववित् ॥ निजग्राह महाबाहुर्मारुतात्मजमिन्द्रजित् ॥ ३८ ॥
तेन बद्धस्ततोस्त्रेण राक्षसेन स वानरः ॥ अभवन्निर्विचेष्टश्च पपात च महीतले ॥ ३९ ॥
ततोथ बुद्ध्वा स तदस्त्रबन्धं प्रभोः प्रभावाद्विगतात्मवेगः ॥
पितामहानुग्रहमात्मनश्च विचिन्तयामास हरिप्रवीरः ॥ ४० ॥
ततः स्वयम्भुवैर्मन्त्रैर्ब्रह्मास्त्रमभिमन्त्रितम् ॥ हनूमांश्चिन्तयामास वरदानं पितामहात् ॥ ४१ ॥
नँ मेऽस्य बन्धस्य च शक्तिरस्ति विमोक्षणे लोकगुरोः प्रभावात् ॥
ईत्येव मत्वा विहितोस्त्रबन्धो मयाऽऽत्मयोनेरनुवर्तितव्यः ॥ ४२ ॥
स वीर्यमस्त्रस्य कपिर्विचार्य पितामहानुग्रहमात्मनश्च ॥
विमोक्षशक्तिं परिचिन्तयित्वा पितामहाज्ञामनुवर्तते स्म ॥ ४३ ॥
अस्त्रेणापि हि बद्धस्य भयं मम न जायते ॥ पितामहमहेन्द्राभ्यां रक्षितस्यानिलेन च ॥ ४४ ॥

अभिलक्ष्यस्य लक्ष्यवेधने प्रसिद्धस्य । लक्ष्यसंग्रहं लक्ष्यसंग्रहणं लक्ष्यविषयदृष्टिमिति यावत् । मोघयन् वितथयन् ॥३१॥ समभिवर्तत समभ्यवर्तत उत्पपात चेत्यन्वयः ॥ ३२ ॥ मनोग्राहि मनआकर्षकं ॥ ३३ ॥ अन्तरं छिद्रं ॥ ३४ ॥ अमोघेषु शरेषु संपतत्स्वपि लक्ष्ये लक्ष्यभूते हनुमति । विहन्यमाने स्वयं तेभ्यो विमुच्यमाने सति । हन्तेर्गत्यर्थात्कर्मकर्तरि लटश्शानजादेशः । समाधिसंयोगसमाहितात्मा सम्यगाधीयत इति समाधिः लक्ष्यं तस्मिन् संयोगे शरसंधाने समाहितात्मा अप्रमत्तचित्तः । स महात्मा इन्द्रजित् । महतीं चिन्तां जगाम ॥ ३५ ॥ अवध्यतां तस्य कपेस्समीक्ष्य निग्रहार्थं कथं निगच्छेत् नीचतां गच्छेदिति मतिं चकार ॥ ३६—३७ ॥ निजग्राह बबन्ध ॥ ३८—४० ॥ ब्रह्मास्त्रमभिमन्त्रितं । विज्ञायेति शेषः ॥ ४१ ॥ लोकगुरोः प्रभावात् अस्य बन्धस्य मोक्षणे मे शक्तिर्नास्तीत्येवं मत्वा एवं विहितः इन्द्रजिता अनेन प्रकारेण कृतः । आत्मयोनेरस्त्रबन्धः मया अनुवर्तितव्य इत्यन्वयः ॥ ४२ ॥ पितामहानुग्रहं विमोक्षहेतुभूतमनुग्रहं ॥ ४३ ॥ स्वस्यादित्यग्रासानन्तरं पितामहमहेन्द्राभ्यामनिलेन च रक्षितत्वान्न

॥ २९ ॥ शि० शरेषुसंपतत्सुसत्सु अतएव लक्ष्ये हनुमति । विहन्यमाने ताड्यमानेसत्येव ननुप्राणैर्विमुक्तेसतीत्यर्थः । महात्मा अतिप्रयत्नवान् । समाधिसंयोगेनअतिविचारकालप्राप्त्यासमाहितःएकाग्रीकृतः आत्मामनोयेनसः । हन्तेस्ताडनार्थकत्वंतु " मालाहतइवद्विपः " इत्यादौप्रसिद्धं । तुशब्दएवार्थे ॥ ३५ ॥ स० पितामहमहेन्द्राभ्यांरक्षितस्यममभयंनजायते । अत्रयद्यपि

[पा०] १ क. घ. ज. मन्तरेष्वेव. २ छ.—ञ. व्यावर्तत. ३ घ. ङ. छ. झ. ञ. ट. मोक्षयन्. ४ घ. मनोग्राहं. ५ क. ग. घ. मद्भुतं. ६ ख. विशारदः. ७ क.—घ. नमेस्त्रबन्धस्य. ख. घ. नमेस्त्रबद्धस्य. ८ ख. घ. ङ. च. ज.—ट. इत्येवमेवं. ३ ग. घ. ज. ममात्मयोनेः.

ग्रहणे चापि रक्षोभिर्महान्मे गुणदर्शनः ॥ राक्षसेन्द्रेण संवादस्तस्माद्धन्तु मां परे ॥ ४५ ॥
स निश्चितार्थः परवीरहन्ता समीक्ष्यकारी विनिवृत्तचेष्टः ॥
परैः प्रसह्याभिगतैर्निगृह्य नेनाद तैस्तैः परिभर्त्स्यमानः ॥ ४६ ॥
ततस्तं राक्षसा दृष्ट्वा निर्विचेष्टमरिन्दमम् ॥ बबन्धुः शणवल्कैश्च द्रुमचीरैश्च संहतैः ॥ ४७ ॥
स रोचयामास परैश्च बन्धं प्रसह्य वीरैरभिनिग्रहं च ॥
कौतूहलान्मां यदि राक्षसेन्द्रो द्रष्टुं व्यवस्येदिति निश्चितार्थः ॥ ४८ ॥
स बद्धस्तेन वल्केन विमुक्तोस्त्रेण वीर्यवान् ॥ अस्त्रबन्धः स चान्यं हि न बन्धमनुवर्तते ॥ ४९ ॥
अथेन्द्रजित्तु द्रुमचीरबद्धं विचार्य वीरः कपिसत्तमं तम् ॥
विमुक्तमस्त्रेण जगाम चिन्तां नान्येन बद्धो ह्यनुवर्ततेऽस्त्रम् ॥ ५० ॥
अहो महत्कर्म कृतं निरर्थकं न राक्षसैर्मन्त्रगतिर्विमृष्टा ॥
पुनश्च नास्त्रे विहतेऽस्त्रमन्यत्प्रवर्तते संशयिताः स्म सर्वे ॥ ५१ ॥
अस्त्रेण हनुमान्मुक्तो नात्मानमवबुध्यत ॥ कृष्यमाणस्तु रक्षोभिस्तैश्च बन्धैर्निपीडितः ॥ ५२ ॥
हन्यमानस्ततः क्रूरै राक्षसैः काष्ठमुष्टिभिः ॥ समीपं राक्षसेन्द्रस्य प्राकृष्यत स वानरः ॥ ५३ ॥
अथेन्द्रजित्तं प्रसमीक्ष्य मुक्तमस्त्रेण बद्धं द्रुमचीरसूत्रैः ॥
व्यदर्शयत्तत्र महाबलं तं हरिप्रवीरं सगणाय राज्ञे ॥ ५४ ॥
तं मत्तमिव मातङ्गं बद्धं कपिवरोत्तमम् ॥ राक्षसा राक्षसेन्द्राय रावणाय न्यवेदयन् ॥ ५५ ॥
कोऽयं कस्य कुतो वाऽत्र किं कार्यं को व्यपाश्रयः ॥ इति राक्षसवीराणां तत्र संजज्ञिरे कथाः ॥५६॥

मे भयमित्यर्थः ॥ ४४ ॥ गुणदर्शनः गुणपर्यवसायी । संवादः ॥ ४५—४६ ॥ शणवल्कैः शणत्वग्भिः । संहतैः सज्जीकृतैः । द्रुमचीरैः वल्कलैः ॥ ४७ ॥ राक्षसेन्द्रः कौतूहलात् मां द्रष्टुं व्यवस्येदिति निश्चितार्थस्सन् बन्धनादिकं रोचयामासेति संबन्धः ॥ ४८—४९ ॥ अन्येनशणवल्कलादिना । बद्धः अस्त्रं नानुवर्तते । नास्त्रेण बद्ध इव वर्ततइत्यर्थः ॥ ५० ॥ मन्त्रगतिः ब्रह्मास्त्रमन्त्रपद्धतिः । न विमृष्टा नपर्यालोचितेत्यर्थः । बन्धान्तरेण सहानवस्थानरूपं ब्रह्मास्त्रस्वभावमनालोच्य शणबन्धादिकं राक्षसैः कृतमिति भावः । अस्त्रेविहते ब्रह्मास्त्रे प्रतिहते । अन्यदस्त्रं नप्रवर्तते न प्रभवतीत्यर्थः । तदेव ब्रह्मास्त्रं प्रयुज्यतामित्याशङ्क्याह—पुनश्चेति । पुनर्नप्रवर्तते प्रयुक्तं ब्रह्मास्त्रं पुनर्न प्रभवतीत्यर्थः । सर्व इत्यनन्तरमितिकरणं बोध्यं । इति चिन्तां । जगामेति पूर्वेण संबन्धः ॥५१॥ नावबुध्यत नावधृतवान् ॥ ५२—

इन्द्रजितोभयं इन्द्ररक्षितस्यापिभवेत् । तथापि " इन्द्रोवृत्रंहत्वामहानास " इत्युक्त्यावृत्रहननलब्धमहत्त्वगुणविशिष्टेनेन्द्रेणरक्षितस्यवरदानेनलोकदृष्ट्यासंरक्षितस्यभयंनेत्युक्तिर्युक्तितिबोध्यं । आभ्यांसमुच्चिताभ्यामित्यर्थकरणे नचाशङ्कानचोत्तरं ॥ ४४ ॥ ति० इममर्थमिन्द्रजिदपिज्ञातवानित्याह—अथेति । अस्त्रेणविमुक्तं विचार्य ज्ञात्वा । अन्येनबद्धोपिहनुमानस्त्रमनुवर्तते अस्त्रेणबद्धइव वर्ततइत्यपिविचार्य चिन्तामाजगामेतिसंबन्धः । नान्येनबन्धोह्यनुवर्ततेऽस्त्रमितिपाठे चिन्तास्वरूपमिदं । राक्षसैःस्वकृतबन्धनवशात्खेदंजगामेत्यर्थः ॥५०॥ ति० चिन्तामाह—अहोइति । पाठान्तरेचिन्तान्तरमिदं । मयाकृतंमहत्कर्म निरर्थंकृतंराक्षसैः । यतस्तैर्मन्त्रगतिर्नविमृष्टा नविचारिता । अन्यबन्धेमन्त्रबन्धोनश्यतीतिनज्ञातमित्यर्थः । पुनरस्त्रंतदेवप्रयोज्यंतत्राह । अस्त्रेब्राह्मेविहते पुनरन्यदस्त्रं तदस्त्रप्रयोगान्तरं । नप्रवर्तते । अतःसर्ववयंसंशयिताः संशयितजयाएव । मुक्तोऽयंसर्वानपिहन्यादितिभावः ॥ ५१ ॥ ति० अवबुध्यतेरन्तर्भावितण्यर्थतयानावबोधयतिस्म अस्त्रमोक्षेनप्रकाशयतिस्मेत्यर्थः ॥ ५२ ॥ ती० अत्र रावणपुरे ।

[पा०] १ ग. ङ. च. झ. ञ. ट. महन्मेगुणदर्शनं. २ ग. निशाचरैस्तैः. ३ ङ. च. झ. ञ. ट. ततस्ते. ४ क.—घ. च. ज. ञ. बन्धनं. ५ ङ. झ. ञ. ट. रभिगर्हणंच. ६ ङ. च. छ. झ. ट. अथेन्द्रजित्तं. ७ ख. घ. ङ. झ. ट. चिन्तामन्येन. ८ ङ.—झ. ट. निरर्थं. ९ घ. ङ. झ. ट. मवबुध्यते. १० ङ. झ. ट. कालमुष्टिभिः. ११ ग. च. छ. ज. ञ. द्रुमचीरवल्कैः. १२ क.—ट. वापि. १३ ङ. ट. कोभ्युपाश्रयः. १४ ङ. झ. ट. दृष्ट्वासंजज्ञिरे.

हन्यतां दह्यतां वाऽपि भक्ष्यतामिति चापरे ॥ राक्षसास्तत्र संक्रुद्धाः परस्परमथाब्रुवन् ॥ ५७ ॥
अतीत्य मार्गं सहसा महात्मा स तत्र रक्षोधिपपादमूले ॥
ददर्श राज्ञः परिचारवृद्धान्गृहं महारत्नविभूषितं च ॥ ५८ ॥
स ददर्श महातेजा रावणः कपिसत्तमम् ॥ रक्षोभिर्विकृताकारैः कृष्यमाणमितस्ततः ॥ ५९ ॥
राक्षसाधिपतिं चापि ददर्श कपिसत्तमः ॥ तेजोबलसमायुक्तं तपन्तमिव भास्करम् ॥ ६० ॥
स रोषसंवर्तिताम्रदृष्टिर्दशाननस्तं कपिमन्ववेक्ष्य ॥
अथोपविष्टान्कुलशीलवृद्धान्समादिशत्तं प्रति मन्त्रिमुख्यान् ॥ ६१ ॥
यथाक्रमं तैः स कपिर्विपृष्टः कार्यार्थमर्थस्य च मूलमादौ ॥
निवेदयामास हरीश्वरस्य दूतः सकाशादहमागतोस्मि ॥ ६२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

एकोनपञ्चाशः सर्गः ॥ ४९ ॥

हनुमता रावणसमृद्धिनिरीक्षणेनाश्चर्यपरवशतया तस्यबलवदधर्माभावे सशङ्कसुरलोकशासनोत्प्रेक्षणम् ॥ १ ॥

ततः स कर्मणा तस्य विस्मितो भीमविक्रमः ॥ हनुमान्नोषताम्राक्षो रक्षोधिपमवैक्षत ॥ १ ॥
भ्राजमानं महार्हेण काञ्चनेन विराजता ॥ मुक्ताजालावृतेनाथ मुकुटेन महाद्युतिम् ॥ २ ॥
वज्रसंयोगसंयुक्तैर्महार्हमणिविग्रहैः ॥ हैमैराभरणैश्चित्रैर्भनसेव प्रकल्पितैः ॥ ३ ॥
महार्हक्षौमसंवीतं रक्तचन्दनरूषितम् ॥ स्वनुलिप्तं विचित्राभिर्विविधाभिश्च भक्तिभिः ॥ ४ ॥
विवृत्तैर्दर्शनीयैश्च रक्ताक्षैर्भीमदर्शनैः ॥ दीप्ततीक्ष्णमहादंष्ट्रैः प्रलंबदशनच्छदैः ॥ ५ ॥
शिरोभिर्दशभिर्वीरं भ्राजमानं महौजसम् ॥ नानाव्यालसमाकीर्णैः शिखरैरिव मन्दरम् ॥ ६ ॥

---

५७ ॥ परिचारवृद्धान् अमात्यवृद्धान् ॥ ५८—६१ ॥ कार्यार्थं कर्तव्यार्थं । अर्थस्य कर्तव्यार्थस्य । मूलं निमित्तं प्रेषयितारमित्यर्थः । अनयोर्विपृष्ट इत्यनेन संबन्धः । श्लोकान्त इतिकरणंबोध्यं । वक्ष्यमाणसंग्रहोयं ॥ ६२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

कर्मणा तस्य विस्मितः युद्धार्थं रावणेनागन्तव्यमिति मया यत्नः कृतः स तु नीतिज्ञ आसनस्थ एव इन्द्रजिन्मुखेन मां निबध्यानीतवानित्यानयनकर्मणा जातविस्मय इत्यर्थः ॥ १—२ ॥ वज्रसंयोगसंयुक्तैः वज्रकीलनेन संबद्धैः । अत्र भ्राजमानमित्यनुषज्यते ॥ ३ ॥ भक्तिभिः पङ्क्तिभिः । इत्थंभूतलक्षणे तृतीया । यथा पङ्क्तयो भवन्ति तथानुलिप्तं इत्यर्थः ॥ ४—६ ॥

कोव्यपाश्रयः कोवाश्रयः ॥ ५६ ॥ ति० मन्त्रीन् मन्त्रिणइत्यर्थः ॥ स० मन्त्रएषामस्तीतिमत्वर्थे तद्धिताइतिबहुवचनज्ञापितेकारप्रत्ययेसति मुख्यमन्त्रीन् ॥ ६१ ॥ ति० कार्यं कर्तव्यं । अर्थः तत्प्रयोजनंच । समाहारद्वन्द्वः । अर्थस्यमूलं उक्तप्रयोजनप्रवर्तकं । उत्तराशयस्तु दूत्यंकृत्यं प्रेरकःसुग्रीवइति ॥ ६२ ॥ इत्यष्टचत्वारिंशःसर्गः ॥ ४८ ॥

कतक० तस्य इन्द्रजितः । यत्तुरावणस्येति तन्न । तेन हनूमतिकस्यापिकर्मणोकृतत्वात् ॥ स० तस्य रावणस्य । कर्मणा स्वयंमहाराजइतिसाक्षादसंभाष्य मन्त्रिमुखेनवाचयामासेत्येवंरूपकर्मणेत्यर्थः ॥ १ ॥ ति० भक्तिभिः शैवत्रिपुण्ड्रवद्रचनाविशेषैः ॥ ४ ॥ ति० विचित्रं आश्चर्यभूतैः । दशनच्छदैः प्रलंबं लंबदशनच्छदं तं ॥ ५ ॥ स० शिरोभिर्दशभिरित्यनेन हनुमद्भीषणा-

[पा०] १ च. छ. ज. ञ. ज्वलन्तमिव. २ ङ.—ट. मुख्यमन्त्रीन्. ३ ङ. ञ. ट. कपिश्चपृष्टः. ४ ख. ङ. भूषितं. ५ ङ. ञ. ट. विचित्रंदर्शनीयैश्च. ६ ङ. ञ. ट. महादंष्ट्रंप्रलंबं.

नीलाञ्जनचयप्रख्यं हारेणोरसि राजता ॥ पूर्णचन्द्राभवक्त्रेण सबलाकमिवाम्बुदम् ॥ ७ ॥
बाहुभिर्बद्धकेयूरैश्चन्दनोत्तमरूषितैः ॥ भ्राजमानाङ्गदैः पीनैः पञ्चशीर्षैरिवोरगैः ॥ ८ ॥
महति स्फाटिके चित्रे रत्नसंयोगसंस्कृते ॥ उत्तमास्तरणास्तीर्णे सूपविष्टं वरासने ॥ ९ ॥
अलंकृताभिरत्यर्थं प्रमदाभिः समन्ततः ॥ वालव्यजनहस्ताभिरारात्समुपसेवितम् ॥ १० ॥
दुर्धरेण प्रहस्तेन महापार्श्वेन रक्षसा ॥ मन्त्रिभिर्मन्त्रतत्त्वज्ञैर्निकुम्भेन च मन्त्रिणा ॥ ११ ॥
सुखोपविष्टं रक्षोभिश्चतुर्भिर्बलदर्पितैः ॥ कृत्स्नं परिवृतं लोकं चतुर्भिरिव सागरैः ॥ १२ ॥
सचिवैर्मन्त्रतत्त्वज्ञैरन्यैश्च शुभबुद्धिभिः ॥ अन्वास्यमानं रक्षोभिः सुरैरिव सुरेश्वरम् ॥ १३ ॥
अपश्यद्राक्षसपतिं हनुमानतितेजसम् ॥ विष्ठितं मेरुशिखरे सतोयमिव तोयदम् ॥ १४ ॥
स तैः संपीड्यमानोपि रक्षोभिर्भीमविक्रमैः ॥ विस्मयं परमं गत्वा रक्षोधिपमवैक्षत ॥ १५ ॥
भ्राजमानं ततो दृष्ट्वा हनुमान्राक्षसेश्वरम् ॥ मनसा चिन्तयामास तेजसा तस्य मोहितः ॥ १६ ॥
अहो रूपमहो धैर्यमहो सत्त्वमहो द्युतिः ॥ अहो राक्षसराजस्य सर्वलक्षणयुक्तता ॥ १७ ॥
यद्यधर्मो न बलवान्स्यादयं राक्षसेश्वरः ॥ स्यादयं सुरलोकस्य सशक्रस्यापि रक्षिता ॥ १८ ॥
अस्य क्रूरैर्नृशंसैश्च कर्मभिर्लोककुत्सितैः ॥ तेन नैनं बिभ्यति खल्वस्माल्लोकाः सामरदानवाः ॥ १९ ॥
अयं ह्युत्सहते क्रुद्धः कर्तुमेकार्णवं जगत् ॥ इति चिन्तां बहुविधामकरोन्मतिमान्हरिः ॥
दृष्ट्वा राक्षसराजस्य प्रभावममितौजसः ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

पञ्चाशः सर्गः ॥ ५० ॥

प्रहस्तेन रावणप्रेरणयाहनुमन्तंप्रति तत्स्वरूपप्रश्नेनसह वनभञ्जनराक्षसहननप्रयोजनप्रश्नः ॥ १ ॥ हनुमता प्रहस्तस्याऽलक्ष्यीकरणेनरावणंप्रत्येव वनभञ्जनाक्षादिराक्षसक्षपणयोः क्रमेणतद्दर्शनात्मरक्षणार्थत्वोक्तिः ॥ २ ॥ तथातंप्रति रामदूतत्वादिनिजतत्त्वनिवेदनेनसह स्वस्यब्रह्मवरात्तदस्त्रावश्यत्वनिवेदनपूर्वकं तद्दर्शनार्थमस्यानुवर्तनोक्तिः ॥ ३ ॥

तमुद्वीक्ष्य महाबाहुः पिङ्गाक्षं पुरतः स्थितम् ॥ कोपेन महताऽऽविष्टो रावणो लोकरावणः ॥ १ ॥

पूर्णचन्द्राभवक्त्रेण पूर्णचन्द्रतुल्यनायकरत्नेन । वक्त्रं नायकरत्नं अभितोलम्बमुक्तामणिमण्डलं ॥ ७ ॥ केयूरं भुजोपरिधार्यमाणमाभरणं अङ्गदं बाहुमध्यस्थाभरणं ॥ ८—१० ॥ मन्त्रिभिः प्रशस्तमन्त्रैः । अतस्सचिवैरित्यपुनरुक्तिः ॥ ११—१७ ॥ अयं रावणकृतः अधर्मः बलवान्नस्याद्यदि । तदायं राक्षसेश्वरः सशक्रस्य सुरलोकस्यापि रक्षिता स्यात् ॥ १८ ॥ तेन कर्मभिः कृतेन पूर्वोक्तेनाधर्मेण हेतुना ॥१९–२०॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनपञ्चाशः सर्गः ॥ ४९ ॥

बाणः महाबलिसुतः । अनेन तेनापि किञ्चित्

थैर्युद्धकालइव रूपविशेषग्रहणमितिसूचयति ॥ ६ ॥ **ती०** मन्त्री बुद्धिसहायः ॥ ११ ॥ सचिवः कार्यसहायः ॥ १३ ॥ **ति०** सर्वैसंपत्तिमतोप्यधर्मवतोमहान्दोषइत्याह—यदीति । बलवान् एवंविधसमृद्धावप्युन्मूलनक्षमोऽधर्मोयद्यस्मिन्नस्यात्तदाऽयंराक्षसेश्वरः शक्रस्यसुरलोकस्यापि विष्णुवद्रक्षितास्यात् । यद्वा अधर्मइत्यर्शआद्यजन्तं । अयंबलवान्राक्षसेश्वरः यद्यधर्मवान्नस्यात् तदा शक्रस्येत्यादिप्राग्वत् ॥ १८ ॥ **ती०** क्रूरैः भीषणैः । नृशंसैः परद्रोहाचरणशीलैः । तेन पूर्वोक्तेनाधर्मेणच । **ति०** केनबिभ्यतीतिपाठे के न इतिपदच्छेदः ॥ १९ ॥ इत्येकोनपञ्चाशःसर्गः ॥ ४९ ॥

[पा०] १ ख. ङ. च. ज.—ट. सबलार्कमिवा. २ ख. घ. ङ. भूषितैः. ३ ङ.—ञ. ट. मानाङ्गदैर्भामैः. ४ ङ.—ट. चित्रिते. ५ घ.—ट. उपोपविष्टं. ६ ङ. ञ. ट. दर्पितं. ७ ङ.—ट. शुभदर्शिभिः. ख. ग. बहुबुद्धिभिः. क. हितबुद्धिभिः. ८ ङ. ञ. ट. आश्वास्यमानं. ९ ग. घ. नमितौजसं. १० ङ. ञ. ट. सर्वेबिभ्यति. ११ क. बहुविधांचकारमतिमान्. १२ क. च. छ. ज. समुद्वीक्ष्य. १३ क.—ट. रोषेण.

शङ्काहतात्मा दध्यौ स कपीन्द्रं तेजसा वृतम् ॥ किमेष भगवान्नन्दी भवेत्साक्षादिहागतः ॥ २ ॥
येन शप्तोऽसि कैलासे मया संचालिते पुरा ॥ सोयं वानरमूर्तिः स्यात्किंस्विद्बाणोपि वाऽसुरः ॥३॥
स राजा रोषताम्राक्षः प्रहस्तं मन्त्रिसत्तमम् ॥ कालयुक्तमुवाचेदं वचो विपुलमर्थवत् ॥ ४ ॥
दुरात्मा पृच्छ्यतामेष कुतः किं वाऽस्य कारणम् ॥ वनभङ्गे च कोस्यार्थो राक्षसीनां च तर्जने ॥५॥
मत्पुरीमप्रधृष्यां वाऽऽगमने किं प्रयोजनम् ॥ आयोधने वा किं कार्यं पृच्छ्यतामेष दुर्मतिः ॥६॥
रावणस्य वचः श्रुत्वा प्रहस्तो वाक्यमब्रवीत् ॥ समाश्वसिहि भद्रं ते न भीः कार्या त्वया कपे ॥७॥
यदि तावत्त्वमिन्द्रेण प्रेषितो रावणालयम् ॥ तत्त्वमाख्याहि मा भूत्ते भयं वानर मोक्ष्यसे ॥ ८ ॥
यदि वैश्रवणस्य त्वं यमस्य वरुणस्य च ॥ चाररूपमिदं कृत्वा प्रविष्टो नः पुरीमिमाम् ॥
विष्णुना प्रेषितो वाऽपि दूतो विजयकाङ्क्षिणा ॥ ९ ॥
न हि ते वानरं तेजो रूपमात्रं तु वानरम् ॥ तत्त्वतः कथयस्वाद्य ततो वानर मोक्ष्यसे ॥ १० ॥
अनृतं वदतश्चापि दुर्लभं तव जीवितम् ॥ अथवा यन्निमित्तं ते प्रवेशो रावणालये ॥ ११ ॥
एवमुक्तो हरिश्रेष्ठस्तदा रक्षोगणेश्वरम् ॥ अब्रवीन्नास्मि शक्रस्य यमस्य वरुणस्य वा ॥ १२ ॥
धनदेन न मे सख्यं विष्णुना नास्मि चोदितः ॥ जातिरेव मम त्वेषा वानरोऽहमिहागतः ॥ १३ ॥
दर्शने राक्षसेन्द्रस्य दुर्लभे तदिदं मया ॥ वनं राक्षसराजस्य दर्शनार्थे विनाशितम् ॥ १४ ॥
ततस्ते राक्षसाः प्राप्ता बलिनो युद्धकाङ्क्षिणः ॥ रक्षणार्थं तु देहस्य प्रतियुद्धा मया रणे ॥ १५ ॥
अस्त्रपाशैर्न शक्योऽहं बद्धुं देवासुरैरपि ॥ पितामहादेव वरो ममाप्येषोभ्युपागतः ॥ १६ ॥
राजानं द्रष्टुकामेन मयाऽस्त्रमनुवर्तितम् ॥ विमुक्तो ह्यहमस्त्रेण राक्षसैस्त्वभिपीडितः ॥ १७ ॥

शप्तमिति गम्यते । अत्रेतिकरणं द्रष्टव्यं ॥ ३—४ ॥ दुरात्मा पृच्छ्यतामिति । अस्य विवरणं कुत इत्यादि । कुतः कस्माद्देशादागतः । किं वास्य कारणं । अस्य कः प्रेरकः ॥ ५ ॥ मत्पुरीं प्रतीति शेषः । आयोधने युद्धे । किं कार्यं किं प्रयोजनं ॥ ६—७ ॥ यदि वैश्रवणस्येत्यादेः दूतो विजयकाङ्क्षिणेत्यन्तस्य तत्त्वमाख्याहीति पूर्वेण संबन्धः ॥ ८—९ ॥ यन्निमित्तं कृत्वा ते प्रवेशः तन्निमित्तं कथयस्वेति पूर्वेण संबन्धः ॥ १०—११ ॥ रक्षोगणेश्वरमित्यनेन प्रष्टारं प्रहस्तं पृष्टतः कृतवानिति गम्यते ॥ १२ ॥ एषा वानरता ॥ १३ ॥ राक्षसेन्द्रस्य तवेति शेषः ॥ १४ ॥ प्रतियुद्धाः प्रतिप्रहृताः ॥ १५ ॥ ममापीति तवेवेत्यर्थः ॥ १६ ॥ तर्हि कथं बद्धोसीत्याशङ्क्याह—राजानमिति । पीडितः बद्धस्सन् । अस्त्रेण विमुक्तः ।

ति० नन्दी वानरमुखएवप्रमथगणाधिपः । स० यद्यपिमारुतिरितिइन्द्रजितंप्रतिरावणेनोक्त्वान्नेयंशङ्कासंभवति । तथापि नन्दिबाणाभ्यांस्वस्यपराभूतत्वाद्भयेनतच्छङ्कायुक्तेतिज्ञेयं ॥२॥ ती० शप्तः मन्मुखसदृशमुखैस्तवनाशोभविष्यतीतिशप्तः ॥ ३ ॥ स० दुर्मतिः दुरित्यव्ययंदुःखवाचि । एवमस्मदीयदुःखेमतिर्यस्यसतथा ॥६॥ स० भद्रंतइत्युक्तिरुत्तरत्ररक्षःक्षयोनकार्यइतिसुमुखीकरणार्थं ॥ ७ ॥ ति० चाररूपं चाराणांप्रच्छन्नवेषत्वाच्छद्मकृतवानररूपं ॥ ९ ॥ ति० वानरमितीदमर्थेऽणन्तं ॥ १० ॥ ति० एषा वानराकृतिः । ममजातिरेव जन्मकृतैव । अतोवानरएवाहमिहागतः । राक्षसेन्द्रस्य तव दर्शनेदर्शननिमित्तं । इहागतइत्यर्थः । तदिदंतवदर्शनंदुर्लभं प्रकारान्तरेणाशक्यलाभंइतिज्ञात्वातवदर्शनार्थंवनंविनाशितं ॥ १३—१४ ॥ ति० इदानींयुद्धप्रयोजनमाह—रक्षणार्थमिति । प्रतियुद्धाः मयाप्रतिभटतयास्थित्वाकृतयुद्धाः । स० प्रति स्वयुद्धंप्रति युद्धं मयाकृतंयेषांतेतथा । १५ ॥ ति० नन्वेवं भाविबन्धायपर्यालोच्यकथंयुद्धंकृतंतत्राह—अस्त्रैरिति । अस्त्रैः ब्रह्मास्त्रान्तैः । पाशैः यमपाशान्तैः । वंचेतरपाशकथापिदरापास्तेत्युक्तं । देवासुरैः मिलितैरपीत्यर्थः ॥ १६ ॥ ती० ननुतवास्त्रबन्धाभावेकिमितिब्रह्मास्त्रेणबद्धोराक्षसैःपीड्यसइत्यतआह—राजानमिति । अस्त्रमुक्तोपि कार्यवशाद्बुद्धिपूर्वकमेवाहमेभिःपीड्ये । एतन्ममाकिञ्चित्करमितिभावः

[पा०] १ ङ. झ. ञ. ट. प्रहसिते. २ ङ. झ. ञ. ट. राक्षसानांच. ३ च. ज. ञ. कपिरूपमिदं. ४ क. ख. ङ. झ. ट. यन्निमित्तस्ते. ५ घ. ङ. झ. ट. देषवरोममापिहिसमागतः. ६ ङ. झ. ट. विमुक्तोप्यहमस्त्रेण. च. छ. ज. ञ. विमुक्तोस्म्यहमेस्त्रण. ७ घ. राक्षसैरति. ङ. झ. ट. राक्षसैस्त्वभिवेदितः. क. ख. ग. छ. ज. राक्षसैस्त्वतिपीडितः.

केनचिद्राजकार्येण संप्राप्तोसि तवान्तिकम् ॥ दूतोऽहमिति विज्ञेयो राघवस्यामितौजसः ॥ १८ ॥
श्रूयतां चापि वचनं मम पथ्यमिदं प्रभो ॥ १९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

एकपञ्चाशः सर्गः ॥ ५१ ॥

हनुमता रावणंप्रति रामवनागमनप्रभृतिस्वीयसीतादर्शनावधिसकलवृत्तान्तनिवेदनम् ॥ १ ॥ तथा राममहिमानुवर्णनपूर्वकं तस्यैसीतायाःप्रत्यर्पणानर्पणयोर्निजजीवितलाभतदभावकारणत्वोत्कीर्तनम् ॥ २ ॥

तं समीक्ष्य महासत्त्वं सत्त्ववान्हरिसत्तमः ॥ वाक्यमर्थवदव्यग्रस्तमुवाच दशाननम् ॥ १ ॥
अहं सुग्रीवसंदेशादिह प्राप्तस्तवालयम् ॥ राक्षसेन्द्र हरीशस्त्वां भ्राता कुशलमब्रवीत् ॥ २ ॥
भ्रातुः शृणु समादेशं सुग्रीवस्य महात्मनः ॥ धर्मार्थोपहितं वाक्यमिह चामुत्र च क्षमम् ॥ ३ ॥
राजा दशरथो नाम रथकुञ्जरवाजिमान् ॥ पितेव बन्धुर्लोकस्य सुरेश्वरसमद्युतिः ॥ ४ ॥
ज्येष्ठस्तस्य महाबाहुः पुत्रः प्रियकरः प्रभुः ॥ पितुर्निदेशान्निष्क्रान्तः प्रविष्टो दण्डकावनम् ॥ ५ ॥
लक्ष्मणेन सह भ्रात्रा सीतया चापि भार्यया ॥ रामो नाम महातेजा धर्म्यं पन्थानमाश्रितः ॥ ६ ॥
तस्य भार्या वने नष्टा सीता पतिमनुव्रता ॥ वैदेहस्य सुता राज्ञो जनकस्य महात्मनः ॥ ७ ॥

हिशब्दोवधारणे । ब्रह्मास्त्रस्य साधनान्तरासहत्वादिति भावः ॥ १७ ॥ अस्तु सर्वमेतन्मद्दर्शनार्थं मद्दर्शनं वा किमर्थं तत्राह—केनचिदिति ॥ १८—१९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

समीक्षणोक्तिक्रियाभेदात्तच्छब्दद्वयं ॥ १ ॥ अहमिति ॥ अहं रामदूत एव संदेशस्तु सुग्रीवस्येति भावः । सुग्रीवसंदेशात् सुग्रीवसंदेशाद्धेतोः । संदेशप्रापणार्थमित्यर्थः । "संदेशवाग्वाचिकं स्यात्" इत्यमरः । इह लङ्कायां । भ्राता भ्रातृवद्धितकरः । अब्रवीत् अप्राक्षीत् । यद्यपि सुग्रीवेण न संदिष्टं तथापि दूतोक्तं सर्वं स्वाम्युक्तमेवेत्याशयेनोक्तं ॥ २ ॥ समादेशं संदेशरूपमिति वाक्यविशेषणं । इह अस्मिल्लोके । अमुत्र परलोके । क्षमं अभ्युदयसाधनं ॥ ३—५ ॥ धर्म्यं धर्मादनपेतं । " धर्मपथ्यर्थन्यायादनपेते "

॥ १७ ॥ स० अमितौजसइत्यनेन अन्यथाराघवोघातयेदेवेतिसूचयति । ति० रामकार्येणेतिपाङ्क्तःपाठः । रामस्यतवचकःसंबन्धस्तत्राह—दूतइति ॥ १८ ॥ ति० ननुरामदूतेनापिसीतान्वेषणमेवकार्यं एवंप्रयासेनमद्दर्शनेकिंफलंतत्राह—श्रूयतामिति । वचनं सन्देशवचनं । पथ्यं तवक्षेमकरं । मद्दर्शने नपुण्यावाप्तिर्मम । किंतुतुभ्यंहितंवक्तव्यमितीयानायासइतिभावः ॥ १९ ॥ इतिपञ्चाशःसर्गः ॥ ५० ॥

ति० सुग्रीवसंदेशकथनव्याजेनसामदण्डान्यतरविषयत्वनिश्चयायन्यायानुसारीनवेतिजिज्ञासति—तमित्यादि ॥ स० अव्यग्रः निर्भीः ॥ १ ॥ ति० भ्रातेतिस्नेहप्रकाशिकालोकोक्तिः । स० हेराक्षसेभ राक्षसश्रेष्ठ । वालिरावणयोर्भ्रातृसौहार्दात्तत्प्रकाशिकामृदूक्तिर्भ्रातेति । हरीशः कुशलमब्रवीत् त्वत्कुशलमुद्दिश्य पृच्छेतिमामब्रवीत् । राक्षसेभहरीशः नष्टोषितेनोक्तंचेत्तवहननमनायासेनकृत्वासीतांनेष्यतीत्यान्तरङ्गिकोऽर्थः राक्षसेभस्य हरीशः महासिंहइत्येकपदतायांज्ञेयः । तथाभ्रातेत्यनेन त्वद्राज्यग्रहणेपियोग्यतातस्यास्तीतिसूचयति ॥ २ ॥ स० कपिभ्योऽवृतवरत्वबलेनवा रामरूपबलिष्ठाश्रयणेनवा समादेशमित्युक्तिः । रामानु० रावणहृदयपरिज्ञानार्थं तत्कालोदितप्रतिभयासुग्रीवसंदेशंकल्पयित्वावदति—भ्रातुरिति । समादेशं संदेशं । सुग्रीवसंदेशस्यरामप्रयोजनपरत्वात्संदेशोपयोगितयारामसुग्रीवयोःसख्यादिकं राजादशरथइत्यारभ्य भ्रमताचमयादृष्टागृहेतेजनकात्म-

[पा०] १ ङ.—ट. द्रामकार्येण. २ ङ. झ. ट. आगतोस्मि. ३ घ. राघवस्यमहात्मनः. ४ ङ. झ. ट. श्रूयतामेववचनं. ५ ख. घ. त्वान्तिकं. ङ. झ. ट. त्वान्तिके. क. त्वदन्तिकं. ६ झ. ञ. ट. राक्षसेश. ठ. राक्षसेभ. ७ ङ. झ. ट. धर्मार्थसहितं. ८ झ. ट. प्रियतरः. ९ ङ. झ. ट. सह. घ. चैव. १० ङ. झ. ट. जनस्थानेभ्रष्टासीतेतिविश्रुता.

स मार्गमाणस्तां देवीं राजपुत्रः सहानुजः ॥ ऋश्यमूकमनुप्राप्तः सुग्रीवेण समागतः ॥ ८ ॥
तस्य तेन प्रतिज्ञातं सीतायाः परिमार्गणम् ॥ सुग्रीवस्यापि रामेण हरिराज्यं निवेदितम् ॥ ९ ॥
ततस्तेन मृधे हत्वा राजपुत्रेण वालिनम् ॥ सुग्रीवः स्थापितो राज्ये हर्यृक्षाणां गणेश्वरः ॥ १० ॥
त्वया विज्ञातपूर्वश्च वाली वानरपुङ्गवः ॥ रामेण निहतः सङ्ख्ये शरेणैकेन वानरः ॥ ११ ॥
स सीतामार्गणे व्यग्रः सुग्रीवः सत्यसङ्गरः ॥ हरीन्संप्रेषयामास दिशः सर्वा हरीश्वरः ॥ १२ ॥
तां हरीणां सहस्राणि शतानि नियुतानि च ॥ दिक्षु सर्वासु मार्गन्ते ह्यधश्चोपरि चाम्बरे ॥ १३ ॥
वैनतेयसमाः केचित्केचित्तत्रानिलोपमाः ॥ असङ्गगतयः शीघ्रा हरिवीरा महाबलाः ॥ १४ ॥
अहं तु हनुमान्नाम मारुतस्यौरसः सुतः ॥ सीतायास्तु कृते तूर्णं शतयोजनमायतम् ॥ १५ ॥
समुद्रं लङ्घयित्वैव तां दिदृक्षुरिहागतः ॥ भ्रमता च मया दृष्टा गृहे ते जनकात्मजा ॥ १६ ॥
तद्भवान्दृष्टधर्मार्थस्तपःकृतपरिग्रहः ॥ परदारान्महाप्राज्ञ नोपरोद्धुं त्वमर्हसि ॥ १७ ॥
न हि धर्मविरुद्धेषु बह्वपायेषु कर्मसु ॥ मूलघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥ १८ ॥
कश्च लक्ष्मणमुक्तानां रामकोपानुवर्तिनाम् ॥ शराणामग्रतः स्थातुं शक्तो देवासुरेष्वपि ॥ १९ ॥
न चापि त्रिषु लोकेषु राजन्विद्येत कश्चन ॥ राघवस्य व्यलीकं यः कृत्वा सुखमवाप्नुयात् ॥ २० ॥
तत्त्रिकालहितं वाक्यं धर्म्यमर्थानुबन्धि च ॥ मन्यस्व नरदेवाय जानकी प्रतिदीयताम् ॥ २१ ॥
दृष्ट्वा हीयं मया देवी लब्धं यदिह दुर्लभम् ॥ उत्तरं कर्म यच्छेषं निमित्तं तत्र राघवः ॥ २२ ॥

इति यत्प्रत्ययः ॥ ६—७ ॥ सुग्रीवेण मयेतिशेषः । यद्वा लोके वक्तारः स्वात्मानमन्यमिव निर्दिशन्त्यौद्धत्यातिशयात् । यद्वा अत्रानुवादात् पूर्वंसुग्रीवेणैवं वक्तव्यमिति पठितं तथैव हनुमान्पठतीति समादेशप्राधान्यादन्यवाक्यमपि तथोच्यत इति केचित्प्राहुः । यद्वा सुग्रीवसंदेशस्य रामप्रयोजनपरत्वात्संदेशोपयोगितया रामसुग्रीवयोस्सख्यादिकं दर्शयति—राजा दशरथ इत्यादिना ॥ ८—११ ॥ सत्यसङ्गरः सत्यप्रतिज्ञः । " कर्बुरे च प्रतिज्ञाजिसंविदापत्सु सङ्गरः " इत्यमरः ॥ १२ ॥ अधश्चोपरि चाम्बरे पाताले भूमौ आकाशे चेत्यर्थः ॥ १३ ॥ असङ्गगतय इति शीघ्रत्वे हेतुः ॥ १४ ॥ औरसस्सुतः क्षेत्रजत्वव्यावृत्तये औरसपदं । सीतायास्तु कृते सीतालाभाय । तां दिदृक्षुरिति योज्यं ॥ १५—१६ ॥ एवं सुग्रीवसंबन्धं प्रतिपाद्य सुग्रीवसंदेशं वदति—तद्भवानित्यादिना ॥ दृष्टधर्मार्थः शास्त्रेण विदितधर्मार्थस्वरूपइत्यर्थः । तपःकृतपरिग्रहः तपसि विषये कृतस्वीकारः । यद्वा तपसा स्वयं कृतपरिग्रहः । स्वारसिकतपस्कइति यावत् । हेतुगर्भे विशेषणे ॥ १७ ॥ धर्मविरुद्धेषु धर्मशास्त्रविरुद्धेषु । धर्मविरुद्धत्वेपि यत्सौख्यावहं तत्कार्यमित्यत्राह—बह्वपायेष्वित्ति । बहुहानिकरेष्वित्यर्थः । अपायाः कथंचित्परिह्रियन्त इत्याशङ्क्याह—मूलघातिष्विति । स्वविनाशकरेष्वित्यर्थः । कर्मसु परदारापहारेषु । न सज्जन्ते नोद्युक्ता भवन्ति ॥ १८ ॥ रामकोपानुवर्तिनां रामकोपानुसारेण निर्गतानामित्यर्थः ॥ १९ ॥ व्यलीकं अप्रियं । " व्यलीकं त्वप्रियेऽनृते " इत्यमरः ॥ २० ॥ तत् तस्मात् अधर्मावहत्वाद्रामापराधस्य परिहर्तव्यत्वाच्च । त्रिकालहितं भूतभविष्यद्वर्तमानकालहितं । दारुणाधर्मस्य स्वपूर्वपुरुषविनाशकत्वेन तत्परिहारस्य भूतकालहितत्वं मन्यस्व । मत्वा प्रतिदीयतामिति योज्यं ॥ २१ ॥ जानकीहरणे किं मानं तत्राह—दृष्ट्वा हीति ॥ यत्सीतादर्शनं दुर्लभं इतरवानरालभ्यं । तल्लब्धं । तर्हि सा नीयतामित्यत्राह—उत्तरमिति । सीतादर्शनोत्तरं यच्छेषं कर्म

जेष्यन्तेनप्रतिपादयन्तद्भवानित्यादिनाकृत्वासुखमवाप्नुयादित्यन्तेनसुग्रीवसंदेशंवदति ॥ ३ ॥ ति० तांमार्गमाणःसरामः ऋश्यमूकं प्राप्तः सुग्रीवेणसंगतश्च । अनेनैवज्ञायते नेदंसुग्रीवसंदेशवाक्यं । तदाहिमयाचैवसुसंगतइतिवदेत् ॥ ८ ॥ ती० त्वयाविज्ञातपूर्वश्चवालीतिममोक्तिः सतेननिहतइतिरामोत्कर्षश्चप्रतिपादितइतिज्ञेयं ॥ ११ ॥ असङ्गगतयः आलंबरहितगतिविशिष्टाः ।

[पा०] १ क. ङ.—ट. सतेन. २ ङ. झ. ट. मर्थानुयायिच. क.—घ. मर्थानुपातिच.

लक्षितेयं मया सीता तथा शोकपरायणा ॥ गृह्य यां नाभिजानासि पश्यास्यामिव पन्नगीम् ॥ २३ ॥
नेयं जरयितुं शक्या सासुरैरमरैरपि ॥ विषसंसृष्टमत्यर्थं भुक्तमन्नमिवौजसा ॥ २४ ॥
तपस्संतापलब्धस्ते योऽयं धर्मपरिग्रहः ॥ न स नाशयितुं न्याय्यमात्मप्राणपरिग्रहः ॥ २५ ॥
अवध्यतां तपोभिर्यां भवान्समनुपश्यति ॥ आत्मनः सासुरैर्देवैर्हेतुस्तत्राप्ययं महान् ॥ २६ ॥
सुग्रीवो न हि देवोऽयं नासुरो न च राक्षसः ॥ न दानवो न गन्धर्वो न यक्षो न च पन्नगः ॥२७॥
[मानुषो राघवो राजन्सुग्रीवश्च हरीश्वरः ॥] तस्मात्प्राणपरित्राणं कथं राजन्करिष्यसि ॥ २८ ॥
न तु धर्मोपसंहारमधर्मफलसंहितम् ॥ तदेव फलमन्वेति धर्मश्चाधर्मनाशनः ॥ २९ ॥

सीतानयनं तत्र राघवो निमित्तं । आज्ञप्तस्यैव मया कर्तव्यत्वादितिभावः ॥ २२ ॥ दृष्ट्यापिमद्वशंवदया सीतया रामः किंकरिष्यतीत्याशङ्क्याह—लक्षितेयमिति ॥ तथेति वाचामगोचरत्वोक्तिः । नेयं तव वश्या प्रत्युत पन्नगीव तव प्राणहारिणीतिभावः ॥ २३ ॥ ओजसा अमरपक्षे प्रतापेन । अन्नपक्षे जाठराग्निना ॥ २४ ॥ तपःकृच्छ्रलब्धमिष्टं महज्जीवनं वृथामानाशयेत्याह—तप इति ॥ तपस्संतापः तपश्चर्या । ओदनपाकं पचतीतिवन्निर्देशः । तेन लब्धः । परिगृह्यत इति परिग्रहः फलं धर्मपरिग्रहः धर्मफलं । तादृशो योयमात्मप्राणपरिग्रहः आत्मनः प्राणानां च परिग्रहः स्वीकारः । जीवनमिति यावत् । स नाशयितुं न न्याय्यं न युक्तं । अव्ययमेतत् । तपःक्लेशलब्धं तद्व्यतिरिक्तधर्मफलभूतं च यज्जीवनमायुः तन्न विनाशयेत्यर्थः । चकाराभावादित्थमेव योजना ॥ २५ ॥ सर्वावध्यस्नेह मे कोयमायुर्विनाशक इत्याशङ्क्य परिहरति—अवध्यतामिति ॥ तपोभिरार्जितां सासुरैर्देवैर्यां आत्मनोऽवध्यतां भवान् समनुपश्यति । तत्रापि अवध्यतायां सत्यामपि । अयं वक्ष्यमाणः । हेतुः भवद्वधहेतुरस्ति । महान् अपरिहार्यः ॥ २६ ॥ तमेव हेतुमाह—सुग्रीव इति ॥ न च राक्षस इति पाठस्सम्यक् । न च मानुष इति पाठे प्रतिषेधप्रसक्तिरपि नास्तीत्युच्यते । " तृणभूता हि मे सर्वे प्राणिनो मानुषादयः " इत्युत्तरश्रीरामायणे मनुष्यादिभिरवध्यत्वस्याप्रार्थितत्वात् । नच तिर्यञ्च इति न प्रसज्य च प्रतिषिध्यतइतिभावः ॥ २७ ॥ तस्मात् सुग्रीवात् ॥ २८ ॥ ननु किमनेनोपदेशेन कृतानि मया पापानि तैश्चावश्यंफलप्रदैर्भवितव्यमित्याशङ्क्याह—न त्विति॥

आकाशगामिनइत्यर्थः ॥ १४ ॥ स० पश्चास्यामित्यनेन आस्यस्थानीयानि रामोलक्ष्मणोराजाऽहंचेतिचत्वारिस्वयंसीतेत्येकंचेति पञ्चआस्यानियस्यास्सा तां । विस्तृतमुखींवा ॥ २३ ॥ शि० जरयितुं गोपयितुमित्यर्थः ॥ २४ ॥ स० तपस्संतापेनलब्धोयोधर्मपरिग्रहः धर्मसंचयः । यद्वा धर्मंचार्थंचेतिधर्मसाधनीभूतःपरिग्रहोमन्दोदरी । सुभार्यायाःपुण्यलभ्यत्वात् । नाशयितुं पूर्वत्रः विफलीकर्तुं परत्रविधवीकर्तुं। आत्मप्राणपरिग्रहः बहुकालवर्तिप्राणपरिग्रहणवान् । अन्यथा स्वप्राणपरिग्रहः प्राणवियोजकइत्यर्थः ॥ २५ ॥ शि० अयंसुग्रीवोराघवश्चदेवादिर्न । किंतु सुग्रीवोहरीश्वरः राघवश्चमानुषः । एतेनाभ्यांतवाभयदानंनास्तीतिसूचितं ॥ २७ ॥ ती० ननुमहतापूर्वसंचितेनैवधर्मेणममत्राणंभविष्यतीत्याशंक्यरोगराज्यादिवद्धर्माधर्मफलयोःसंभूयानुभवसिद्धेरात्मत्राणसिद्धिः । उताधर्मवाधेनधर्मफलानुभवश्चेतिद्वैधाविकल्प्याद्यस्यासंभवमाह—नत्विति । धर्मोपसंहारं धर्मस्यफलविनाश्यत्वात् धर्म उपसंहियतइतिधर्मोपसंहारं धर्मफलंसुखंतत् अधर्मफलसंहितंनभवति । अधर्मेणसहभोग्यंनभवतीत्यर्थः । तीव्रतपःपरदारापहरणभवदीयधर्माधर्मफलयोर्वेध्यत्वावध्यत्वयोःजीवनतदभावयोःसहावस्थानविरोधात् । रोगराज्यादिवत्संभूयानुभवोनसंभवतीतिभावः । द्वितीयंदूषयति—तदेवेति । तत् धर्मफलमेवान्वेति धर्मफलंधर्मफलेनसहतिष्ठतीतियावत्। धर्मोनाधर्मनाशनः अधर्मबाधेनधर्मफलानुभवोनघटतइतिभावः । यद्वा ननुयेभ्योऽवध्यत्वंनप्रार्थितं तेभ्योपिपूर्वोपार्जितोमहासुकृतसंचयएवरक्षिष्यतीत्याशङ्क्यएवंचेत्तुल्यन्यायतयात्वत्कृतःअधर्मनिचयोपित्वांनाशयिष्यतीत्याह—नत्विति । धर्मोपसंहारंधर्मस्यफलविनाश्यत्वात्धर्मउपसंह्रियतेअनेनेति धर्मोपसंहारंधर्मफलंसुखं । तत् अधर्मसंहितं विरुद्धकारणकलादुःखसंहितंनभवतीत्यर्थः । किंतु तदेवफलमन्वेति सुखमेवफलत्वेनानुवर्तते । तुश्चार्थे । तेनाधर्मफलमपि धर्मफलसहितंनभवति अधर्मफलत्वेनानुवर्ततइतिलभ्यते । नत्वधर्मधर्मो नाशयिष्यतीत्याशङ्क्याह—धर्मश्चेति । अत्रनञनुवर्तते। धर्मः अधर्मनाशनोनभवति । पूर्वकृतोधर्मः इदानींकृताधर्मनाशनोनभवतीत्यर्थः । चकारादेवमधर्मोपि धर्मनाशनोनभवतीतिलभ्यते । धर्माधर्मावनुभवैकविनाश्याविति भावः ॥ ति० ननुतपोबलान्मे-

[पा०] १ ङ. झ. ट. गृहे. २ क. ग. घ. ङ. झ. ट. सोयं. ३ च. छ. ज. ञ. तपोवीर्याद्भवान्. ४ ङ. झ. ट. नयक्षो. ५ क.—घ. मानुषः. ६ क.—घ. नराक्षसो. ङ. झ. ट. पाठेष्विदमर्धनदृश्यते. ७ ङ.—ट. पाठेष्विदमर्धंदृश्यते. ८ घ. च. संयुतं.

प्राप्तं धर्मफलं तावद्भवता नात्र संशयः ॥ फलमस्याप्यधर्मस्य क्षिप्रमेव प्रपत्स्यसे ॥ ३० ॥
जनस्थानवधं बुद्ध्वा [1]बुद्ध्वा वालिवधं तथा ॥ रामसुग्रीवसख्यं च बुध्यस्व हितमात्मनः ॥ ३१ ॥
कामं खल्वहमप्येकः सवाजिरथकुञ्जराम् ॥ लङ्कां नाशयितुं शक्तस्त[2]स्यैष तु न निश्चयः ॥ ३२ ॥
रामेण हि प्रतिज्ञातं हर्यृक्षगणसन्निधौ ॥ उत्सादनममित्राणां सीता यैस्तु प्रधर्षिता ॥ ३३ ॥
अपकुर्वन्हि रामस्य साक्षादपि पुरन्दरः ॥ न सुखं प्राप्नुयादन्यः किं पुनस्त्वद्विधो जनः ॥ ३४ ॥
यां सीतेत्यभिजानासि येयं तिष्ठति ते [3]वशे ॥ कालरात्रीति तां विद्धि सर्वलङ्काविनाशिनीम् ॥३५॥
तदलं कालपाशेन सीताविग्रहरूपिणा ॥ स्वयं स्कन्धावसक्तेन [4]क्षेममात्मनि चिन्त्यताम् ॥ ३६ ॥
सीतायास्तेजसा दग्धां रामकोपप्रपीडिताम् ॥ दह्यमानामिमां पश्य पुरीं साट्टप्रतोलिकाम् ॥३७॥
स्वानि मित्राणि मन्त्रींश्च ज्ञातीन्भ्रातॄन्सुतान्हितान् ॥ भोगान्दारांश्च लङ्कां च मा विनाशमुपानय ॥३८॥

तुशब्द उक्तशङ्काव्यावर्तकः। धर्मः उपसंह्रियतेनेनेति धर्मोपसंहारं धर्मफलं। फलेन धर्मस्योपसंह्रियमाणत्वात्। क्लीबत्वमार्षं। तत् अधर्मफलसंहितं न भवति। कुत इत्यत्राह—तदेव फलमन्वेतीति। धर्मफलमेवानुवर्तते। नन्वधर्मे च विद्यमानेकथंतत्फलाननुवृत्तिस्तत्राह—धर्मश्चाधर्मनाशनइति। च उक्तशङ्कानिवृत्त्यर्थः। विरोधिनि धर्मे जाग्रति कथमधर्मवार्तापीत्यर्थः। "धर्मेण पापमपनुदति" इति श्रुतेः। यद्वा व्यत्ययो वा किं न स्यात्तत्राह—धर्मश्चेति। चोवधारणे। धर्म एवाधर्मनाशनः तथा श्रुतेः। न त्वधर्मः प्रमाणाभावादितिभावः। ननु यदिधर्मोधर्मनाशनः तार्हि प्राथमिक एवधर्मः आधुनिकानधर्मान्निवर्तयेदित्याशङ्क्याह—प्राप्तमिति ॥ तावच्छब्दः कात्स्न्यर्थवाची। कृत्स्नं धर्मफलं फलमस्येति। तथाच क्षिप्रं धर्ममाचर अन्यथा सद्यस्ते विनाशो भविष्यतीति भावः। अत्र कर्तव्यत्वेन विधीयमानो धर्मस्सीताप्रदानपूर्वकरामविषयशरणागतिरेव। शूरस्याशौर्यप्रवृत्त्या धर्मफलं सर्वं क्षीणमिति हनुमतावगतमिति मन्तव्यम् ॥ २९—३० ॥ मा भूद्धर्मापेक्षा कार्योपस्थितिरवेक्ष्यतामित्याह—जनस्थानेति ॥ रामसुग्रीवसख्यं चेति परोक्षनिर्देशस्य गतिःपूर्वमुक्ता ॥ ३१ ॥ कामं अत्यन्तं। अहं सुग्रीवः। तन्नाशनं। तस्य रामस्य। निश्चयः निश्चयविषयः ॥ ३२ ॥ कथमित्यत्राह—रामेणेति ॥ हर्यृक्षगणसन्निधौ वृद्धसभायांप्रतिज्ञातमनतिक्रमणीयमितिभावः ॥३२–३४॥ कालरात्रीति काचिच्छक्तिरिति वदन्ति। "समी च कालरात्रिश्च भैरवी गणनायिका" इत्यमरशेषः ॥ ३५ ॥ कालपाशेन यमपाशेन। अतस्सीतां रामाय देहीति हृदयं ॥ ३६ ॥ अट्टः अट्टालः। प्रतोलिका वीथिका ॥ ३७ ॥ मन्त्रीन् मन्त्रिणः। इकारान्तत्व-

---

सर्वतोजयोभविष्यतीत्यतआह—नलिति। यःपुमान् अधर्मफलसंहितबलवत्तयाफलोन्मुखाधर्मसंबद्धस्तंपुरुषं धर्मोपसंहारमपि धर्मोपसंमर्हवन्तमपि। नत्वन्वेति धर्मफलमितिशेषः। किंतु तदेवफलं फलोन्मुखाधर्ममेवान्वेति। ननुधर्मफलादधर्मनाशोभविष्यतीत्यत्राह—धर्मश्चेति। उत्कटोऽधर्मोत्तरभावीधर्मोऽधर्मस्यनाशनः। चादुत्कटाधर्मोधर्मनाशकः। एवंचास्याधर्मस्यस्वकृतसफलधर्मापेक्षयोत्कटत्वादुत्तरकालत्वाच्चायमेवत्वयाप्राक्संचितस्यसकलधर्मस्यनाशकइतिभावः ॥ **स०** अधर्मफलसंयुतः उत्कटोत्तरभावी योऽधर्मः परदारधर्षणादिरूपःतत्फलं आसन्ननाशादिकंतेनसंयुतःपुमान् धर्मोपसंहारं धर्मस्योपसंहारस्तिरोधानंयेनकार्यरूपेण। कार्यनिष्पत्त्यनन्तरंकारणनिवृत्तेःसर्वत्रदृष्टत्वात्। तादृशंतदेवफलं धर्मफलंनत्वन्वेति रक्षकत्वेननप्राप्नोति। उपसंहरति—**धर्मइति**। अतोधर्मः अधर्मनाशनोनभवतीत्यर्थः। तवतुसीताधर्षणरूपादत्युत्कटोत्तरकालभाविकर्मफलस्यनाशोनकेनापीतिनात्मरक्षायांस्वयमक्षमइतिभावः ॥ २९ ॥ **ती०** ननुमहतःपुण्यफलानुभवस्यसमाप्त्यनन्तरंअधर्मफलानुभवोभविष्यतीत्यत्राह—प्राप्तमिति। धर्मफलं तावत्साकल्येन। प्राप्तं भुक्तं। अस्याधर्मस्य सीताहरणरूपस्य ॥ ३० ॥ **ती०** एषः हनुमत्कर्तृकलङ्काविनशस्तु। तस्य रामस्य। ननिश्चयः नसंमतइत्यर्थः ॥ **ति०** नन्वेवंकटुवादिनस्तवकोरक्षकइतिचेत्तत्राह—काममिति। यथेष्टमित्यर्थः। तर्हि कुतस्तन्नाशंनकरोषीत्यत्राह—तस्य। यस्याहंदूतस्तस्यरामस्य एषः मत्कर्तृकलङ्कानाशविषयोनिश्चयोन। स्वाम्याज्ञांविना तदा

[पा०] १ ङ. च. ज.—ट. वालिनश्चवधं. २ च. स्तस्यैवतुविनिश्चयः. ग. स्तस्यैवतुनसंशयः. ३ क. ङ.—ट. हे. ४ ख. ग. ङ. च. झ. ट. क्षेमं. ५ ग. ङ. च. ज. झ. ट. प्रदीपितां.

सत्यं राक्षसराजेन्द्र शृणुष्व वचनं मम ॥ रामदासस्य दूतस्य वानरस्य विशेषतः ॥ ३९ ॥
सर्वाँल्लोकान्समुसंहृत्य सभूतान्सचराचरान् ॥ पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः ॥ ४० ॥
देवासुरनरेन्द्रेषु यक्षरक्षोगणेषु च ॥ विद्याधरेषु सर्वेषु गन्धर्वेषूरगेषु च ॥
सिद्धेषु किन्नरेन्द्रेषु पतत्रिषु च सर्वतः ॥ ४१ ॥
सर्वभूतेषु सर्वत्र सर्वकालेषु नास्ति सः ॥ यो रामं प्रतियुध्येत विष्णुतुल्यपराक्रमम् ॥ ४२ ॥
सर्वलोकेश्वरस्यैवं कृत्वा विप्रियमुत्तमम् ॥ रामस्य राजसिंहस्य दुर्लभं तव जीवितम् ॥ ४३ ॥

देवाश्च दैत्याश्च निशाचरेन्द्र गन्धर्वविद्याधरनागयक्षाः ॥
रामस्य लोकत्रयनायकस्य स्थातुं न शक्ताः समरेषु सर्वे ॥ ४४ ॥
ब्रह्मा स्वयंभूश्चतुराननो वा रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वा ॥
इन्द्रो महेन्द्रः सुरनायको वा त्रातुं न शक्ता युधि रामवध्यम् ॥ ४५ ॥

मार्षं ॥ ३८ ॥ रामदासस्येत्यनेन रामसामर्थ्यपरिज्ञानमुक्तं । दूतस्येत्यनेन हितोपदेशाधिकारः । वानरस्येति माध्यस्थ्यं ॥ ३९ ॥ लोकान् भूरादीन् । सभूतान् पृथिव्यप्तेजोवाय्वाकाशरूपपञ्चमहाभूतयुक्तान् । सचराचरान् चतुर्मुखद्वारा सृष्टजङ्गमयुक्तान् । संहृत्य प्रलयावसाने रुद्रद्वारा स्वयं च संहृत्य । पुनः कल्पादौ तथैव " धाता यथापूर्वमकल्पयत् " इति श्रुत्युक्तरीत्या स्रष्टुं समर्थः । तत्र प्रमाणमाह—महायशा इति । " न तस्येशे कश्चन तस्य नाम महद्यशः" इति हि श्रुतिः । श्रुतिस्मृतिषु तथाप्रसिद्धइत्यर्थः ॥ ४०—४४ ॥ मा भूवन् शक्तास्सामान्यदेवाः ईश्वराश्शक्ताः स्युरित्याशङ्क्याह—ब्रह्मेति ॥ अत्र विशेषणान्तरोपादानं तेषां सामर्थ्यविशेषद्योतनार्थं पतत्प्रकर्षत्वपरिहाराय व्युत्क्रमेण योजनीयं । इन्द्रः परमैश्वर्यवान् । " इदि परमैश्वर्ये " इत्यस्माद्धातोः " ऋज्रेन्द्राग्र—" इत्यादिना निपातनात्साधुत्वं । त्रैलोक्याधिपतिरपि त्रातुं न शक्त इत्यर्थः । तस्य त्रैलोक्याधिपतित्वेपि परनिरसनसामर्थ्याभावादशक्ततेत्यत्राह—महेन्द्रइति । वृत्रहननप्रसिद्धसामर्थ्योपि न शक्तः । "योवृत्रमवधीदिति तन्महेन्द्रस्य महेन्द्रत्वं" इति श्रौतनिर्वचनं । स्वयं चतुरोपि सहायसंपत्त्यभावान्न शक्त इत्यत्राह—सुरनायकइति । सकलत्रयत्रयस्त्रिंशत्कोटिसुरगणसहायोपि न शक्त इत्यर्थः । मा भूत्क्षुद्र इन्द्रश्शक्तः सर्वसंहारकोरुद्रस्तु शक्तस्स्यात्तत्राह—रुद्र इति । संहारकाले प्रजाः रोदयतीति रुद्रः । " रोदेर्णिलुक् च " इति रप्रत्ययः । कालवि-

---

नुष्ठानमशक्यमितिभावः । स० तस्यैवतुविनिश्चयइतिपाठे तदाज्ञायांसत्यामित्यर्थः ॥३२॥ ति० विशेषतः निष्कृष्योच्यमानंवचनमित्यर्थः । रामदासस्येत्यादिविशेषणत्रयेण राममहिमवेत्तृत्वं स्वस्यपरोक्तवाक्यानुवादपूर्वंहितोपदेशाधिकारः नररक्षोतिरिक्तजात्यन्तरत्वेनापक्षपाततोन्यायवक्तृत्वंचसूचितं ॥ ३९ ॥ ती० रुतंशब्दंवेदात्मानंब्रह्मणेकल्पादौरातीतिवा रुद्रः । यद्वा रुता नादेन सकलंजगदिदंद्रावयति रजयतीति नादात्मकत्वाद्रुद्रः । यद्वा रुता नादेनप्रणवरूपेणवेदरूपेणवा दापयति इष्टमर्थंगमयतीतिवा रुद्रः । यद्वा रुतंसंसारदुःखहेतुंवाद्रावयतीतिरुद्रः। तदुक्तं"मद्दुःखंदुःखहेतुंवातद्रावयतियःप्रभुः । रुद्रइत्युच्यतेतस्माच्छिवंपरमकारणं" इति । एवंव्युत्पत्तियुक्तरुद्रत्वशत्रुभस्मीकरणसमर्थकालकालोचनयुक्तत्वत्रिपुरान्तकत्वादिधर्मविशिष्टोमहेश्वरोवा । ति० ब्रह्मास्वयंभूरित्यनेन हिरण्यगर्भःसर्वादिरुक्तः । चतुराननः ततः प्राप्तसृष्टृत्वाधिकारः । त्रिनेत्रस्त्रिपुरान्तकोरुद्रोवेत्यनेन संहाराधिकारी । सुरनायकोमहेन्द्रः महैश्वर्यवानिन्द्रः । उपेन्द्रोविष्णुः पालनाधिकारी । एवंत्रिमूर्तिभिरपि रक्षानसिध्यति । रामस्यैवत्रिमूर्तित्वात् । स० ब्रह्मेत्यादिपादत्रयेपित्रिवारमुक्तिर्दार्ढ्याय भट्टिकाव्ये " जहिहिजहीहिजहाहिरामभार्यां " इतिवत् । यद्वा ब्रह्मा बृहस्पतिः । " ब्रह्मापितन्नजानाति " इतिगीताभाष्यप्रमेयदीपिकायांब्रह्मावृहस्पतिरितिव्याख्यानात् । अस्वयंभूः स्वयंभूभिन्नः । स्वयंभूसदृशोवायुः । चतुराननोविरिञ्चः । वाशब्दःसर्वत्रान्वेति । रुद्रः क्रूरोयमः । त्रिनेत्रोरुद्रः । त्रिपुरान्तेनरुद्रेणकंशिरोयस्यदक्षस्यविनायकस्यवा । इन्द्रः शचीपतिः । अमहेन्द्रः वृत्रहेतरः तत्सदृशः कामः । सुरनायकः सुरसेनानायकःषण्मुखः ॥ ४५ ॥ इत्येकपञ्चाशःसर्गः ॥ ५१ ॥

[पा०] १ क. घ.—ट. नागेषुगन्धर्वेषुमृगेषुच. २ घ. सिद्धेषुचमृगेन्द्रेषु. क. नागेन्द्रेषुचसर्वेषुकिन्नरेषुपतत्रिषु. ३ क. ख. ग. सर्वलोकेषु. ४ क. ग.—ट. लोकेश्वरस्येह. ५ क. ग. ङ.—ट. विप्रियमीदृशं.

स सौष्ठवोपेतमदीनवादिनः कपेर्निशम्याप्रतिमोऽप्रियं वचः ॥
दशाननः कोपविवृत्तलोचनः समादिशत्तस्य वधं महाकपेः ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

द्विपञ्चाशः सर्गः ॥ ५२ ॥

हनुमत्परुषभाषणश्रवणरुष्टेनरावणेन तस्यवधाज्ञापनेविभीषणेनदूतवधस्यशास्त्रनिन्दितत्वोक्त्यातत्प्रतिषेधनम् ॥ १ ॥

तस्य तद्वचनं श्रुत्वा वानरस्य महात्मनः ॥ आज्ञापयद्वधं तस्य रावणः क्रोधमूर्च्छितः ॥ १ ॥
वधे तस्य समाज्ञप्ते रावणेन दुरात्मना ॥ निवेदि[1]तवतो दौ[2]त्यं नानुमेने विभीषणः ॥ २ ॥
[3]तं रक्षोधिपतिं क्रुद्धं तच्च कार्यमुपस्थितम् ॥ विदित्वा चिन्तयामास [4]कार्यं कार्यविधौ स्थितः ॥३॥
निश्चितार्थस्ततः साम्नाऽऽपूज्य शत्रुजिदग्रजम् ॥ उवाच हितमत्यर्थं वाक्यं वाक्यविशारदः ॥ ४ ॥

शेषे संहारकोपीदानीमप्राप्तकालत्वादशक्त इत्यत्राह—त्रिनेत्र इति । निटिलनयनदहनज्वालाविलोपितमदनोपीत्यर्थः । काकतालीयत्वशङ्काव्युदासायाह—त्रिपुरान्तकइति । प्रबलतरमहासुरसंहारकोपीत्यर्थः । मा भूत्तस्य शक्तिः " ब्रह्मणः पुत्राय ज्येष्ठाय श्रेष्ठाय " इत्युक्तरीत्या रुद्रस्यापि पिता ब्रह्मा शक्तस्स्यात् तत्राह—ब्रह्मेति । बृंहतीति ब्रह्मा । " बृहेरम् नलोपश्च " इति मनिन् अमागमो नकारलोपश्च । रुद्रपिता स्वयं कर्मवश्यःकथं शक्नुयात्तत्राह—स्वयंभूरिति । कर्मवश्यत्वेपीतरसाधारण्येनानुत्पन्नः स्वयंभूः । स्वयंभूत्वेपि सहायसंपत्त्यभावात्कथंत्रायेतेत्यत्राह—चतुराननइति । युगपदेवसर्ववेदोच्चारणसंपादितातिशयोपि नशक्तः । प्रत्येकमशक्तत्वेपि किं संभूयागताश्शक्नवन्ति तत्राह—न शक्ता इति । बहुवचनेनायमर्थो लभ्यते । वधमर्हतीति वध्यः । दण्डादित्वाद्यः । रामस्य वध्यो रामवध्यः । तं त्रातुं न शक्ताः । स्थानविन्निग्रहस्य चेत्युचितवधार्हस्य त्राताकः । युधि युद्धे । न शक्ताः किन्तुशरणं गत्वा त्रातुं शक्ता इत्यर्थः अत्र " हिरण्यगर्भस्समवर्तताग्रे । न सन्नचासीच्छिव एव केवलः । इन्द्रो मायाभिः पुरुरूप ईयते " इति परदेवतात्वेन प्रसक्तात्रिकादधिकत्वमुक्तं । रामइत्यनेन वेदान्तोदितानां सद्ब्रह्मादिसामान्यशब्दानां हिरण्यगर्भशिवेन्द्रादिविशेषशब्दानां च व्यक्तिविशेषपरत्वं व्यञ्जितं । त्रातृत्वेन प्रसक्तप्रधानदेवतानिराकरणप्रकरणे विष्णोरनुपादानात्पारिशेष्याद्राम एव विष्णुरिति प्रतिपादितं । अस्माच्छ्लोकात्परं स सौष्ठवेति श्लोकः । तस्य तद्वचनमिति श्लोकस्तु उत्तरसर्गादिः । अत्र स प्रमादाल्लिखितः ॥ ४५—४६ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥

तस्य तद्वचनं श्रुत्वेति श्लोकस्सर्गस्य प्रथमः ॥ १ ॥ दौत्यं दूतकर्म । ब्राह्मणादेराकृतिगणत्वात् ष्यञ् । तन्निवेदितवतः उक्तवतः । नानुमेने वधमित्यनुवर्तनीयं । निवेदितमतौ दूत्यमिति पाठान्तरं । मन्यत इति मतिः कार्यं । निवेदितमतौ निवेदितकार्यांशे यथार्थवादित्वेनावध्ये हनुमति दूत्यं दूतसंबन्धितया रावणादिष्टं वधं । " दूतवणिग्भ्यां चेति वक्तव्यं " इति भावकर्मणोर्विहितो यप्रत्ययः अर्थानुगुण्यात्संबन्धमात्रे गमयितव्यः ॥ २ ॥ तच्च कार्यं दूतवधरूपकार्यं । कार्यं अनन्तरानुष्ठेयं । कार्यविधौ कार्यकरणे । स्थितः निश्चितार्थः । साध्वसाधुविवेकनिश्चितकार्य इत्यर्थः ॥ ३ ॥ आपूज्येति च्छेदः ॥ ४ ॥

तीo निवेदितमतौ मन्यतइतिमतिःकार्यं । निवेदितस्वागमनकार्येहनुमति । अनेनास्ययथादिष्टानुवादित्वेनापराधित्वादवध्य-

[पाo] १ च. छ. निवेदितमतौ. २ ख. ग. दौत्ये. ३ क. घ. सरक्षोधिपतिं. ४ क. कार्याकार्यविधौ.

क्षमस्व रोषं त्यज राक्षसेन्द्र प्रसीद मद्वाक्यमिदं शृणुष्व ॥
वधं न कुर्वन्ति परावरज्ञा दूतस्य सन्तो वसुधाधिपेन्द्राः ॥ ५ ॥
राजधर्मविरुद्धं च लोकवृत्तेश्च गर्हितम् ॥ तव चासदृशं वीर कपेरस्य प्रमापणम् ॥ ६ ॥
धर्मज्ञश्च कृतज्ञश्च राजधर्मविशारदः ॥ परावरज्ञो भूतानां त्वमेव परमार्थवित् ॥ ७ ॥
गृह्यन्ते यदि रोषेण त्वादृशोपि विपश्चितः ॥ ततः शास्त्रविपश्चित्त्वं श्रम एव हि केवलम् ॥ ८ ॥
तस्मात्प्रसीद शत्रुघ्न राक्षसेन्द्र दुरासद ॥ युक्तायुक्तं विनिश्चित्य दूतदण्डो विधीयताम् ॥ ९ ॥
विभीषणवचः श्रुत्वा रावणो राक्षसेश्वरः ॥ रोषेण महताऽऽविष्टो वाक्यमुत्तरमब्रवीत् ॥ १० ॥
न पापानां वधे पापं विद्यते शत्रुसूदन ॥ तस्मादेनं वधिष्यामि वानरं पापचारिणम् ॥ ११ ॥
अधर्ममूलं बहुदोषयुक्तमनार्यजुष्टं वचनं निशम्य ॥
उवाच वाक्यं परमार्थतत्त्वं विभीषणो बुद्धिमतांवरिष्ठः ॥ १२ ॥
प्रसीद लङ्केश्वर राक्षसेन्द्र धर्मार्थयुक्तं वचनं शृणुष्व ॥
दूता न वध्याः समयेषु राजन्सर्वेषु सर्वत्र वदन्ति सन्तः ॥ १३ ॥
असंशयं शत्रुरयं प्रवृद्धः कृतं ह्यनेनाप्रियमप्रमेयम् ॥
न दूतवध्यां प्रवदन्ति सन्तो दूतस्य दृष्टा बहवो हि दण्डाः ॥ १४ ॥
वैरूप्यमङ्गेषु कशाभिघातो मौढ्यं तथा लक्षणसन्निपातः ॥
एतान्हि दूते प्रवदन्ति दण्डान्वधस्तु दूतस्य न नः श्रुतोपि ॥ १५ ॥
कथं च धर्मार्थविनीतबुद्धिः परावरप्रत्ययनिश्चितार्थः ॥
भवद्विधः कोपवशे हि तिष्ठेत्कोपं नियच्छन्ति हि सत्त्ववन्तः ॥ १६ ॥
न धर्मवादे न च लोकवृत्ते न शास्त्रबुद्धिग्रहणेषु चापि ॥
विद्येत कश्चित्तव वीर तुल्यस्त्वं ह्युत्तमः सर्वसुरासुराणाम् ॥ १७ ॥

परावरज्ञाः त्याज्योपादेयविवेकयुक्ताः ॥ ५ ॥ प्रमापणं मारणं ॥ ६ ॥ भूतानामिति निर्धारणे षष्ठी । भूतानां मध्ये ॥ ७ ॥ शास्त्रविपश्चित्त्वं विविधं पश्यतीति विपश्चित् तस्य भावः विपश्चित्त्वं शास्त्रविषये विविधज्ञानोपेतत्वमितियावत् ॥ ८ ॥ दूतदण्डः दूतयोग्यदण्डः ॥ ९—१२ ॥ सर्वेषु सर्वत्र सर्वदेशेषु सर्वजातिष्वित्यर्थः ॥ १३ ॥ न केवलं दूतोयं अक्षादिवधेन शत्रुश्च तथाच हन्तव्य इत्याशङ्क्याह—असंशयमिति ॥ दूतवध्यां दूतवधं । स्त्रियां भावे क्यप् । हन्तेर्वधादेश आर्षः ॥१४॥ लक्षणसन्निपातः दूतयोग्याङ्कनसंबन्धः । नः अस्माभिः ॥१५॥ धर्मार्थविनीतबुद्धिः धर्मार्थयोरिशिक्षितबुद्धिः । परावरप्रत्ययनिश्चितार्थः उत्कृष्टापकृष्टपरिज्ञाननिश्चितार्थः । अस्मिन्विषये इदं कार्यं परं इदमवरमिति विवेकनिश्चितकार्यइत्यर्थः । नियच्छन्ति निगृह्णन्ति । सत्त्ववन्तः व्यवसायवन्तः ॥ १६ ॥ धर्मवादे धर्मशास्त्रे । लोकवृत्ते

लमुक्तं ॥ २ ॥ शि० तस्मात् मदुक्तहेतोः । प्रसीद प्रसादंकुरु ॥ ९ ॥ ति० मौण्डयं मुण्डनं । लक्षणसंनिपातः दूतयोग्याङ्कनसंबन्धइतितीर्थः । वैरूप्यादीनामेकैकंवा । तथालक्षणानांसंनिपातः सर्वानुष्ठानंवेत्यर्थइत्यन्ये । नोस्माकंश्रुतोपिनास्ति । दर्शनंतु। दूरापास्तमितिभावः ॥ शि० अङ्गेषुवैरूप्यं नासिकाच्छेदादिनाविरूपकरणं । कशाभिघातः कशयातोत्रेण अभिघातः ताडनं मौण्डयं भ्रुकुट्यादिमुण्डनं । लक्षणसंनिपातः ताम्रखण्डदाहादिनाललाटादौचिह्नकरणं । एतान्दण्डान्दूतेप्रवदन्ति ॥ स० मौढ्य-

[पा०] १ क. ङ. च, झ. ञ. ट. मेवाक्यं. २ ङ. झ. ट. विचक्षणाः. ३ च. ज.—ट. कोपेन. ४ झ. ट. तस्मादिमं. ५ क. छ.—ट. पापकारिणं. ६ क. ग. घ. च. छ. झ. ञ. ट. बहुदोषयुक्तं. ७ ग. घ. ङ. झ. ट. धर्मार्थतत्वं. ८ झ. ञ. ट. मौण्डयं. ९ ङ. झ. ट. श्रुतोस्ति. १० ग. प्रत्ययदर्शितार्थः. ११ क. घ. ङ. झ. ट. नगच्छन्ति. १२ क. घ. च. छ. ज. धर्मवादेषुच.

[पराक्रमोत्साहमनस्विनां च सुरासुराणामपि दुर्जयेन ॥
त्वयाऽप्रमेयेन सुरेन्द्रसंघा जिताश्च युद्धेष्वसकृन्नरेन्द्राः ॥ १८ ॥
इत्थंविधस्यामरदैत्यशत्रोः शूरस्य वीरस्य तवाजितस्य ॥
कुर्वन्ति वीरा मनसाऽप्यलीकं प्राणैर्विमुक्ता न तु भोः पुरा ते ॥ १९ ॥]
न चाप्यस्य कपेर्घाते कंचित्पश्याम्यहं गुणम् ॥ तेष्वयं पात्यतां दण्डो यैरयं प्रेषितः कपिः ॥२०॥
साधुर्वा यदि वाऽसाधुः परैरेष समर्पितः ॥ ब्रुवन्परार्थं परवान्न दूतो वधमर्हति ॥ २१ ॥
अपि चास्मिन्हते राजन्नान्यं पश्यामि खेचरम् ॥ इह यः पुनरागच्छेत्परं पारं महोदधेः ॥ २२ ॥
तस्मान्नास्य वधे यत्नः कार्यः परपुरञ्जय ॥ भवान्सेन्द्रेषु देवेषु यत्नमास्थातुमर्हति ॥ २३ ॥
अस्मिन्विनष्टे न हि दूतमन्यं पश्यामि यस्तौ नरराजपुत्रौ ॥
युद्धाय युद्धप्रिय दुर्विनीतावुद्योजयेद्दीर्घपथावरुद्धौ ॥ २४ ॥
[अस्मिन्हते वानरयूथमुख्ये सर्वापवादं प्रवदन्ति सन्तः ॥
न हि प्रपश्यामि गुणं यशो वा लोकापवादो भवति प्रसिद्धः ॥ २५ ॥
मूढैः प्रगल्भैरपि दुर्विनीतैर्यैर्वानरोऽयं पुरुषैर्विसृष्टः ॥
तेषां वधार्थं कुरु वीर यत्नं शीघ्रं विनाशाय निशाचरेन्द्र ॥ २६ ॥
कुरुष्व तावत्परमप्रयत्नं धर्मं समास्थाय सुरेन्द्रशत्रो ॥
देवेषु सर्वेषु सवासवेषु दैत्येषु सर्वेषु सदानवेषु ॥ २७ ॥
कृत्वा प्रयत्नं सुदृढं सुशीघ्रं मद्वाक्यमेवं मनसा प्रगृह्य ॥
तौ राजपुत्रौ विनिगृह्य वीरौ जयं परं प्राप्स्यसि राक्षसेन्द्र ॥ २८ ॥
पराक्रमोत्साहमनस्विनां च सुरासुराणामपि दुर्जयेन ॥
त्वया मनोनन्दन नैर्ऋतानां युद्धायतिर्नाशयितुं न युक्ता ॥ २९ ॥

लौकिकाचारे। शास्त्रबुद्धिग्रहणेषु शास्त्रशब्देन शास्त्रार्थ उच्यते । शास्त्रार्थज्ञानतद्धारणेष्वित्यर्थः ॥ १७–१९ ॥ न केवलं दूतस्य वधे शास्त्रविरोधः गुणमपि न कंचित्पश्यामि अतः एतत्प्रेषकेष्वेव वधरूपो दण्डः पात्यतामित्याह—न चेत्यादि ॥ २० ॥ साधुर्वेति । समर्पितः प्रेषितः ॥ २१ ॥ अस्मिन्हतेसति वृत्तान्तनिवेदकाभावाद्रामलक्ष्मणयोरिहागमनाभावेन तव शत्रुक्षयो न स्यात् । विमुक्तेस्मिन् एतन्निवेदितवृत्तान्तयोस्तयोरिहागमनादयत्नेन तव शत्रुनाशो भवेदित्यभिप्रेत्याह—अपि चेत्यादिना ॥ इह परं पारं इह विद्यमानं महोदधेः परं पारं इदं दक्षिणकूलमित्यर्थः ॥ २२—२३ ॥ दीर्घपथावरुद्धौ दूरमार्गेण निरुद्धगमनाविति अर्थः । एतच्छ्लोकानन्तरं पराक्रमोत्साहमनस्विनांचेति श्लोकः । ततो हिताश्चेति श्लोकः । अथ तदेकदेशेनेति श्लोकः । अथ निशाचराणामिति सर्गान्तश्लोकः । अयमेव पाठक्रमः समीचीनः । अन्ये

मितिपाठे धुत्तूरादिभोजनेनमुग्धताप्रापणं ॥ १५ ॥ ति० युद्धप्रियेतिसंबोधनेन रणपराक्रमविजयकीर्ती तवेष्टेकिल । तेऽभेअप्येतद्विनाशे नश्यतइत्याशयः । रावणस्यरजःप्रकृतित्वात्तत्प्रकृत्यनुसारेणयुद्धादिव्यापारेणप्रलोभनं । तत्प्रीत्यर्थमेवदुर्विनीतावित्याद्युक्तिः ॥ २४ ॥ ति० हेनैर्ऋतानांमनोनन्दन सुरासुराणामपिदुर्जयेनत्वया पराक्रमेयउत्साहस्तत्र प्रशस्तमनोवतांनैर्ऋतानांमनः युद्धायप्रवृत्तं निर्नाशयितुंनयुक्तं । नैर्ऋतानामित्यत्रमनइत्यत्रचतत्रं । यद्वा तादृशानांनैर्ऋतानांमनोनन्दन तादृशेनत्वया युद्धायतिः युद्धागमः । नाशयितुंनयुक्तमित्यर्थः ॥ शि० हेनन्दन राक्षसाभिरामदातः । युद्धाय समुत्सुकमितिशेषः । नैर्ऋतानांमनः निर्ना-

[पा०] १ इदंश्लोकद्वयं क. ट. पाठयोर्दृश्यते. २ क. च. ज. किंचित्. ३ घ. अस्मिन्हतेमहाराजनान्यं. ४ क. ख. घ.—ज. भूतमन्यं. ५ इमेचत्वारःश्लोकाः ग. पाठेदृश्यन्ते. ६ ग. शूरेणवीरेणनिशाचरेन्द्रसुरासुराणामपि. ७ ग. ङ. ट. युद्धायनिर्नाशयितुंनयुक्तं.

हिताश्च शूराश्च समाहिताश्च कुलेषु जाताश्च महागुणेषु ॥
मनस्विनः शस्त्रभृतां वरिष्ठाः कोट्यग्रतस्ते सुभृताश्च योधाः ॥ ३० ॥
तदेकदेशेन बलस्य तावत्केचित्तवादेशकृतोभियान्तु ॥
तौ राजपुत्रौ विनिगृह्य मूढौ परेषु ते भावयितुं प्रभावम् ॥ ३१ ॥
निशाचराणामधिपोनुजस्य विभीषणस्योत्तमवाक्यमिष्टम् ॥
जग्राह बुद्ध्या सुरलोकशत्रुर्महाबलो राक्षसराजमुख्यः ॥ ३२ ॥
[किं वा परं ब्रह्म परं त्वसह्यं सर्वस्य बीजं जगतोस्य विष्णोः ॥
यद्देवदेवस्य परं च तेजस्तदेव तेजः कपिरेष वीरः ॥ ३३ ॥
वधाय मे वैष्णवतेज एव निस्संशयोऽयं कपिरूपधारी ॥
इत्येवमेतद्बहुधा विचिन्त्य रक्षोधिपः क्रोधवशं जगाम ॥ ३४ ॥
क्रोधं च जातं हृदये निरुध्य विभीषणोक्तं वचनं सुपूज्य ॥
उवाच रक्षोधिपतिर्महात्मा विभीषणं शस्त्रभृतांवरिष्ठम् ॥ ३५ ॥]
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

त्रिपञ्चाशः सर्गः ॥ ५३ ॥

रावणाज्ञया राक्षसगणैर्हनुमद्वालस्य पटवेष्टनतैलसेचनपूर्वकमग्निज्वालया संदीपनेनसवाद्यघोषंलङ्कासंचारणम् ॥ १ ॥ राक्षसीभिस्तद्वृत्तान्तं निवेदितयासीतया सशपथमग्निप्रति हनुमददाहप्रार्थनम् ॥ २ ॥ [हनुमद्वालसंदीपनश्रवणखिन्नां सीतांप्रति विभीषणभार्ययासरमया हनुमत्कृतलङ्कादहननिवेदनेन समाश्वासनम् ॥ ३ ॥] हनुमता पुरद्वारारोहणेन पृथुतरनिजशरीरकृशीकरणाद्वालबन्धविश्लथनपूर्वकं पुनःशतीरपृथूकरणम् ॥ ४ ॥ तथा तत्रत्यपरिघेण तद्रक्षिणांरक्षसांक्षपणम् ॥ ५ ॥

तस्य तद्वचनं श्रुत्वा दशग्रीवो महाबलः ॥ देशकालहितं वाक्यं भ्रातुरुत्तरमब्रवीत् ॥ १ ॥
सम्यगुक्तं हि भवता दूतवध्या विगर्हिता ॥ अवश्यं तु वधादन्यः क्रियतामस्य निग्रहः ॥ २ ॥
कपीनां किल लाङ्गूलमिष्टं भवति भूषणम् ॥ तदस्य दीप्यतां शीघ्रं तेन दग्धेन गच्छतु ॥ ३ ॥
ततः पश्यन्त्विमं दीनमङ्गवैरूप्यकर्शितम् ॥ समित्रज्ञातयः सर्वे बान्धवाः ससुहृज्जनाः ॥ ४ ॥

प्यत्र सर्गे श्लोकाः कल्पिता दृश्यन्ते ॥ २४—३० ॥ तत् तस्मात्कारणात् । एकदेशेनेति सहयोगे तृतीया । बलस्य सैन्यस्य ॥ ३१—३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

देशकालहितं देशकालोचितमिति विभीषणवचनविशेषणं ॥ १ ॥ दूतवध्या दूतवधः ॥ २—३ ॥ समित्रेति । मित्राणि आप्ताः । समसुखदुःखा वा । सहाया वा । ज्ञातयः भ्रात्रादयः । बान्धवाः संबन्धिनः । सुहृज्जनाः स्निग्धजनाः ॥ ४ ॥

शयितुंत्वयानयुक्तं ॥ २९ ॥ **ती०** समाहिताः दानमानाभ्यांवशीकृताइत्यर्थः । सुभृताः सद्वृत्याः । योधाश्च वर्तन्तेखल्विति-शेषः ॥ ३० ॥ इतिद्विपञ्चाशः सर्गः ॥ ५२ ॥

[**पा०**] १ झ. ञ. कोपप्रशस्ताःसुभृताश्च. घ. कोट्यायुतास्तेसुहृदश्च. २ झ. ञ. ट. कृतोद्ययान्तु. क. ग. च. कृतोपयान्तु. ३ झ. ञ. ट. राजपुत्रावुपगृह्य. ४ घ. युद्धे. ५ घ. शत्रुर्दशाननो. ६ इदंश्लोकत्रयं ग. पाठेदृश्यते. ७ ङ. सतस्यवचनं. ८ ख.—ट. महात्मनः. ९ ग. घ. च. ज. ञ. दण्डेन. १० झ. ट. पश्यन्त्वमुं. ११ ङ. झ. ट. सुमित्रज्ञातयः. ख समित्राज्ञातयः. च. ज. मित्राणिज्ञातयः. घ. खमित्रज्ञातयः.

आज्ञापयद्राक्षसेन्द्रः पुरं सर्वं सचत्वरम् ॥ लाङ्गूलेन प्रदीप्तेन रक्षोभिः परिणीयताम् ॥ ५ ॥
तस्य तद्वचनं श्रुत्वा राक्षसाः कोपकर्शिताः ॥ वेष्टयन्ति स्म लाङ्गूलं जीर्णैः कार्पासकैः पटैः ॥ ६ ॥
संवेष्ट्यमाने लाङ्गूले व्यवर्धत महाकपिः ॥ शुष्कमिन्धनमासाद्य वनेष्विव हुताशनः ॥
तैलेन परिषिच्याथ तेऽग्निं तत्राभ्यपातयन् ॥ ७ ॥
लाङ्गूलेन प्रदीप्तेन राक्षसांस्तानपातयत् ॥ रोषामर्षपरीतात्मा बालसूर्यसमाननः ॥ ८ ॥
लाङ्गूलं संप्रदीप्तं तु दृष्ट्वा तस्य हनूमतः ॥ सहस्त्रीबालवृद्धाश्च जग्मुः प्रीता निशाचराः ॥ ९ ॥
स भूयः संगतैः क्रूरै राक्षसैर्हरिसत्तमः ॥ निबद्धः कृतवान्वीरस्तत्कालसदृशीं मतिम् ॥ १० ॥
कामं खलु न मे शक्ता निबद्धस्यापि राक्षसाः ॥ छित्त्वा पाशान्समुत्पत्य हन्यामहमिमान्पुनः ॥ ११ ॥
यदि भर्तृहितार्थाय चरन्तं भर्तृशासनात् ॥ बध्नन्त्येते दुरात्मानो न तु मे निष्कृतिः कृता ॥ १२ ॥
सर्वेषामेव पर्याप्तो राक्षसानामहं युधि ॥ किंतु रामस्य प्रीत्यर्थं विषहिष्येऽहमीदृशम् ॥ १३ ॥
लङ्का चारयितव्या वै पुनरेव भवेदिति ॥ रात्रौ न हि सुदृष्टा मे दुर्गकर्मविधानतः ॥ १४ ॥
अवश्यमेव द्रष्टव्या मया लङ्का निशाक्षये ॥ १५ ॥
कामं बद्धस्य मे भूयः पुच्छस्योद्दीपनेन च ॥ पीडां कुर्वन्तु रक्षांसि न मेऽस्ति मनसः श्रमः ॥ १६ ॥

प्रदीप्तेन लाङ्गूलेन युक्तो हनुमान् सचत्वरं सर्वं पुरं परिणीयतां परितो नीयतां । इत्याज्ञापयदित्यन्वयः ॥ ५—७ ॥ अपातयत् लाङ्गूलभ्रामणेन अद्रावयदित्यर्थः ॥ ८—१० ॥ न मे शक्ताः न मे पर्याप्ता इत्यर्थः । मम निग्रहे नसमर्थाइतियावत् ॥ ११ ॥ भर्तृहितार्थाय रामहितार्थाय । चरन्तं प्रवर्तमानं । मामितिशेषः । भर्तृशासनात् रावणशासनात् । यदि बध्नन्ति । तावता मे निष्कृतिः प्रतिक्रिया । नकृता । इदं बन्धनमकिञ्चित्करमिति भावः ॥ १२ ॥ रामस्यप्रीत्यर्थमिदंविषहिष्ये । रावणादिवधस्य स्वेनैवकर्तव्यत्वेनरामाभिमतत्वाद्राक्षसानामहमीदृशं बन्धनाकर्षणादिरूपंपरिभवंसहिष्यइतिभावः । रामस्यप्रीत्यर्थमित्यत्र च्छन्दोभङ्गआर्षः ॥ १३ ॥ लङ्का रात्रौ दुर्गकर्मविधानतः दुर्गकर्मविधानाद्धेतोः । नहिसुदृष्टा नैवसुदृष्टा । यद्वा दुर्गकर्मविधानतः नगरगुप्तिविशेषज्ञानपूर्वकमित्यर्थः । नदृष्टेतिहेतोर्मया लङ्का पुनश्चारयितव्याभवेत् । विचरित्वा द्रष्टव्या भवेदित्यर्थः । अयं च प्रातःकालः नतूषःकालः । प्रातःकालेपि तथाव्यवहारोपपत्तेः ॥ १४—१५ ॥ मनसः श्रमइ-

ति० आरण्यकायथाशुष्कमिन्धनमासाद्यहुताशनमुत्पादयन्ति तथा जीर्णपटवेष्टितलाङ्गूलंतैलेपरिषिच्य तत्रतेग्निमुपपादयन् उदपादयन्निल्यर्थइतिकतकः । हुताशनइतिपाठे वृद्धौदृष्टान्तोऽयं । उपपादयन्निल्यस्यसमयोजयन्निल्यर्थइत्यन्ये ॥ ७ ॥ तान् बध्वानेतॄन् ॥ ८ ॥ ति० यदितांवधरूपांचिकीर्षुस्तदासर्वान्हनिष्याम्येवेत्याह—**सर्वेषामिति** । यदिपर्याप्तस्तर्हिकियतांशत्रवधस्तत्राह—रामस्येति ॥ १३ ॥ ति० निशाक्षयइत्यनेन सीतासंभाषणार्थिकतिपयदिनवासोगम्यते । तथाहि— फाल्गुनेरावणेनसीतापहारः । आश्विनशुक्लसमाप्तौहनुमत्प्रेरणयापक्षावधिदानेनवानरान्प्रतिदूतप्रेषणं । ततःकार्तिकशुक्लप्रतिपद्यन्वेषणार्थंवानरप्रस्थानं । मार्गशुक्लदशम्यांसंपातिदर्शनं । तदासुग्रीवदत्तमासावधेर्गतत्वस्यवानरैरुक्तिः । अग्रएकादश्यांहनुमतोलङ्कागमनं । तद्रात्रित्रिशेषेसीतादर्शनं । ततोद्वादश्यांदिनेस्थिलारात्रौसीतायाःसम्यग्दर्शनं । तद्रात्रित्रिशेषेतत्रारावणागमनं । तत्ररावणेन " मासान्द्वादशभामिनि " इतिस्वदत्तावधौमासद्वयावशेषवचनेकतिपयदिनाधिक्यंतुमासलाभवच्छिन्नत्वेनाल्पान्तरत्वान्नविवक्षितं । ततस्त्रयोदश्यांप्रातःसीतयासहकथालापः । तद्दिनएवाशोकवनिकाभङ्गादि । चतुर्दश्यामक्षान्तवधोलङ्कादाहश्चपूर्णिमायांवा । पूर्ववासन्तिकवृक्षाणांपुष्पितलोक्तिस्तु तद्वर्षेक्षयमासेनोपपादिता उत्पातेनच । लक्ष्मणस्यसुग्रीवनिकटेप्रेषणसमयेरामेणमासचतुष्टयरूपकृतावधेरपगमोक्तिस्तु

[पा०] १ क. ख. ग. ङ.—ट. कोपकर्कशाः. घ. क्रोधमूर्च्छिताः. २ क. ख. ग. ङ. ज्ञ. ट. वेष्टन्ततस्यलाङ्गूलं. ३ क. ङ. ज्ञ. ट. तत्रोपपादयन्. घ. तत्रावपातयन्. ख. तत्राप्यपातयन्. च. ज. तत्रप्रदीपयन्. ४ ख. सतुरोषपरीतात्मा. क. रोषामर्षपरीताक्षः. ५ ख. दृष्ट्वासर्वं. क. च. छ. ज. ञ. दृष्ट्वातस्यमहात्मनः. ६ क. छ.—ट. प्रीतिं. ७ क. संगतैर्वीरैः. ८ क. ख. घ. च. छ. ज. ञ. भर्तृहितार्थाय. ९ ङ. ज्ञ. ट. निबध्नन्ते. १० क. रामस्यकार्यार्थं. क. रामप्रियार्थंतु. ११ क. ख. ङ—ट. चारयितव्यामे. १२ क. ङ. ज्ञ. कुर्वन्ति.

ततस्ते संवृताकारं सत्त्ववन्तं महाकपिम् ॥ परिगृह्य ययुर्हृष्टा राक्षसाः कपिकुञ्जरम् ॥ १७ ॥
शङ्खभेरीनिनादैस्तं घोषयन्तः स्वकर्मभिः ॥ राक्षसाः क्रूरकर्माणश्चारयन्ति स्म तां पुरीम् ॥ १८ ॥
अन्वीयमानो रक्षोभिर्ययौ सुखमरिन्दमः ॥ हनुमांश्चारयामास राक्षसानां महापुरीम् ॥ १९ ॥
अथापश्यद्विमानानि विचित्राणि महाकपिः ॥ संवृतान्भूमिभागांश्च सुविभक्तांश्च चत्वरान् ॥२०॥
वीथीश्च गृहसंबाधाः कपिः शृङ्गाटकानि च ॥ तथा रथ्योपरथ्याश्च तथैव गृहकान्तरान् ॥
गृहांश्च मेघसंकाशान्ददर्श पवनात्मजः ॥ २१ ॥
चत्वरेषु चतुष्केषु राजमार्गे तथैव च ॥ घोषयन्ति कपिं सर्वे चारीक इति राक्षसाः ॥ २२ ॥
स्त्रीबालवृद्धा निर्जग्मुस्तत्र तत्र कुतूहलात् ॥ तं प्रदीपितलाङ्गूलं हनुमन्तं दिदृक्षवः ॥ २३ ॥
दीप्यमाने ततस्तस्य लाङ्गूलाग्रे हनूमतः ॥ राक्षस्यस्ता विरूपाक्ष्यः शंसुर्देव्यास्तदप्रियम् ॥ २४ ॥
यस्त्वया कृतसंवादः सीते ताम्रमुखः कपिः ॥ लाङ्गूलेन प्रदीप्तेन स एष परिणीयते ॥ २५ ॥
श्रुत्वा तद्वचनं क्रूरमात्मापहरणोपमम् ॥ वैदेही शोकसंतप्ता हुताशनमुपागमत् ॥ २६ ॥
मङ्गलाभिमुखी तस्य सा तदाऽऽसीन्महाकपेः ॥ उपतस्थे विशालाक्षी प्रयता हव्यवाहनम् ॥ २७ ॥
यद्यस्ति पतिशुश्रूषा यद्यस्ति चरितं तपः ॥ यदि चास्त्येकपत्नीत्वं शीतो भव हनूमतः ॥ २८ ॥
यदि किंचिदनुक्रोशस्तस्य मय्यस्ति धीमतः ॥ यदि वा भाग्यशेषो मे शीतो भव हनूमतः ॥२९॥
यदि मां वृत्तसंपन्नां तत्समागमलालसाम् ॥ स विजानाति धर्मात्मा शीतो भव हनूमतः ॥ ३० ॥
यदि मां तारयेदार्यः सुग्रीवः सत्यसङ्गरः ॥ अस्माद्दुःखाम्बुसंरोधाच्छीतो भव हनूमतः ॥ ३१ ॥
ततस्तीक्ष्णार्चिरव्यग्रः प्रदक्षिणशिखोनलः ॥ जज्वाल मृगशावाक्ष्याः शंसन्निव शिवं कपेः ॥ ३२ ॥

त्यनन्तरमितिकरणं बोध्यं ॥ १६ ॥ संवृताकारं गूढस्वभावं । महाकपिमिति बुद्ध्या महत्त्वं । कपिकुञ्जरमिति सजातीयश्रैष्ठ्यं ॥ १७ ॥ स्वकर्मभिः आस्फोटनसिंहनादैरित्यर्थः । तां पुरीं घोषयन्तः । अत्यन्तसंयोगे द्वितीया । चारयन्ति स्म तमिति शेषः ॥ १८ ॥ चारयामास शोधयामास ॥ १९ ॥ चत्वरान् गृहबहिरङ्गणानि ॥ २०॥ शृङ्गाटकानि चतुष्पथानि । रथ्याः महावीथीः । उपरथ्याः अवान्तरवीथीः । गृहकान्तरान् गृहकाणि क्षुद्रगृहाणि अन्तराणि प्रच्छन्नद्वाराणि । अन्तर्द्वाराणीत्यर्थः । " तोरणोऽस्त्री बहिर्द्वारं प्रच्छन्नद्वारमन्तरं " इति वैजयन्ती । अक्लीबत्वमार्षं ॥ २१ ॥ चत्वरेषु चतसृणां रथ्यानां संभेदेषु । चतुष्केषु चतुस्तम्भमण्डपेषु । चार एव चारीकः । स्वार्थे कप्रत्ययः । आर्षो दीर्घः ॥ २२—२३ ॥ शंसुः शशंसुः । आर्षो द्विर्वचनाभावः ॥ २४ ॥ परिणीयते परितो नीयते ॥२५॥ उपागमत् उपासितवती ॥ २६ ॥ तस्य हनुमतः । मङ्गलाभिमुखी अदाहपरा । प्रयता शुद्धिमती । " पवित्रः प्रयतः पूतः " इत्यमरः ॥ २७ ॥ पतिशुश्रूषादिपदं तत्फलपरं । शीतो भव तेनेति शेषः । एकपत्नीत्वं पातिव्रत्यं ॥ २८ ॥ किंचिदनुक्रोश इति समस्तंपदं । तस्य रामस्य । भाग्यशेषः । इदानीं निरन्तरदुःखानुभवात् भाग्यप्रसक्तिरेवनास्तीतिमन्यमानाया इदं वचनं ॥ २९ ॥ मम पातिव्रत्यं यदि हनुमान् जानाति तदा शीतो भवेत्याह—यदि मामिति ॥ ३० ॥ यदि मां तारयेदिति । मत्तारणे इदमेव ज्ञापकमिति भावः ॥ ३१ ॥ ततः सीतोपगमात् । कपेरनलः कपिवालाग्निः । मृगशावाक्ष्याः सीतायाः । शुभं शंसन्निव प्रदक्षिणशिखो जज्वालेत्यन्वयः ॥३२॥

प्रागुपपादितरहस्योतिदिक् । पुच्छस्योद्दीपनेनचेत्यस्योत्तरश्लोकेनान्वयः ॥ १५ ॥ ति० स्वकर्मभिः राजद्रोहिणोदुष्टस्यैवंदण्डइत्येवमादिभिः । घोषवन्तः । पूर्ववृत्तान्तस्यसर्वान्प्रतिप्रकटंप्रतिपादनंघोषणं ॥ १८ ॥ ति० एकपत्नीत्वं पातिव्रत्यं । शीतोभव हुता-

[पा०] १ क. ङ.—ट. रथ्याश्च. २ क. घ. पुरींसर्वे. ३ ङ. झ. ट. चारइत्येव. ४ क. घ. मुपासिता. ५ क. ग. घ. च. छ. कश्चिदनुक्रोशः, ६ क. ग. घ. च. छ. ज. अस्माद्दुःखान्महाबाहुश्शीतो.

हनुमज्जनकश्चापि पुच्छानलयुतोऽनिलः ॥ ववौ स्वास्थ्यकरो देव्याः प्रालेयानिलशीतलः ॥ ३३ ॥
[तां तदा परमोद्विग्नां सीतां शोकाभिकर्शिताम् ॥ हनूमति गृहीते तु रक्षोभिर्भीमविक्रमैः ॥
उवाच सरमा वाक्यं तामाश्वासयितुं तदा ॥ ३४ ॥
मा शुचो देवि वैदेहि हनूमन्तं महाकपिम् ॥ ३५ ॥
हत्वा तु रक्षिणः सर्वान्राक्षसांस्तत एव सः ॥ पुरीं लङ्कां दहति स साक्षादिव हुताशनः ॥
भवनाद्भवनं गच्छन्नसावत्यन्तवीर्यवान् ॥ ३६ ॥
प्रासादवरसंस्थाश्च गवाक्षस्थाश्च योषितः ॥ वह्निप्रदीप्तनयनास्तथा क्रन्दन्ति दुःखिताः ॥ ३७ ॥
एता वरविशालाक्ष्यो वह्निज्वालासमावृताः ॥ अपश्यन्त्यः क्वचित्स्थातुं सर्वतोऽग्निसमावृताः ॥
वह्नावभ्युत्पतन्त्याशु कर्तव्यं नैव जज्ञिरे ॥ ३८ ॥
अभिधावन्ति सहसा क्रोशन्त्यः सह बालकैः ॥ अवकुण्ठानि कृत्वा स्म वासोभिर्विष्ठितास्तदा ॥३९॥
स्तंभै राजतसौवर्णैः प्रवालमणिचारुभिः ॥ दृश्यन्तेऽग्निसमासक्ता वह्नौ वह्निरिवोद्यताः ॥
प्रासादमाला बहुधा अग्निदग्धाः पतन्ति हि ॥ ४० ॥
अर्चिषेव हिरण्यानां प्रभाभिः कृष्णवर्त्मनः ॥ दीप्यमाना इवाभाति लङ्केयं कालपर्यये ॥ ४१ ॥
क्वचिद्दग्धाः प्रदेशास्तु क्वचिद्दग्धा विनाशिताः ॥ बहुभौमा विभान्ति स्म गृहाणां भूमयः शुभाः ॥४२॥
कान्ताभिः सह वित्रस्ता दृश्यन्ते राक्षसास्तदा ॥ हाहेत्युच्चैर्वदन्ति स्म त्रातारं नाभिजज्ञिरे ॥ ४३ ॥
संप्रदीप्तां पुरीं लङ्कां हनुमद्वीर्यधर्षिताम् ॥ अन्तःपुराणि सर्वाणि दृष्ट्वा दुद्रुविरे तदा ॥ ४४ ॥
क्वचिन्कुङ्कुमवर्णाभाः क्वचित्किंशुकसंनिभाः ॥ क्वचिन्मलिनसंकाशाः शिखा वह्नेश्चकाशिरे ॥ ४५ ॥
धूमेन संवृताः केचिद्गृहोद्देशाः सुशोभनाः ॥ वर्षाकाले तु संप्राप्ते घनैरिव नभस्स्थलम् ॥ ४६ ॥
देवि व्यपैतु ते त्रासो हनूमन्तं प्रति प्रिये ॥ दग्ध्वैव लङ्कां सुमहान्व्योम्नि वीरः प्रकाशते ॥
दीप्तैर्घनांबुसंरोधैर्मुक्तचन्द्रइवामलः ॥ ४७ ॥
एतच्छ्रुत्वाऽभवत्प्रीता सीता शशिनिभानना ॥ निर्वृतिं परमां प्राप्ता बाला स्वस्थाऽभवत्तदा ॥४८॥]
दह्यमाने च लाङ्गूले चिन्तयामास वानरः ॥ प्रदीप्तोऽग्निरयं कस्मान्न मां दहति सर्वतः ॥ ४९ ॥
दृश्यते च महाज्वालः करोति न च मे रुजम् ॥ शिशिरस्येव संपातो लाङ्गूलाग्रे प्रतिष्ठितः ॥५०॥
अथवा तदिदं व्यक्तं यदृष्टं प्लवता मया ॥ रामप्रभावादाश्चर्यं पर्वतः सरितां पतौ ॥ ५१ ॥
यदि तावत्समुद्रस्य मैनाकस्य च धीमतः ॥ रामार्थं संभ्रमस्तादृक्किमग्निर्न करिष्यति ॥ ५२ ॥

अनिलश्च पुच्छानलयुतोपि प्रालेयानिलशीतलः हिममारुतवच्छीतलस्सन् । देव्याः सीतायाः । स्वास्थ्यकरः सुखकरः । ववौ । अस्मात्परं दह्यमाने च लाङ्गूल इति श्लोकः । अनयोः श्लोकयोर्मध्ये केचन श्लोकाः कतिपयकोशेषु दृश्यन्ते । बहुकोशेष्वदर्शनादर्थाधिक्याभावाच्च ते अनादरणीयाः ॥ ३३—४९ ॥ रुजं पीडां । शिशिरस्येव संपातः शिशिरस्य चन्द्रनोशीरादेः संपातः संघट्ट इव स्थितः । अत्यन्तशीतल इत्यर्थः । एतेन हेतुविशेषं न पश्यामीत्युक्तं ॥ ५० ॥ हेतुविशेषान्निश्चिनोति—अथवेत्यादिना ॥ प्लवता मया सरितां पतौ । आर्षं धिसंज्ञाकार्यं । समुद्रमध्ये । पर्वतः पर्वतरूपं यदाश्चर्यं अद्भुतरूपं वस्तु दृष्टं । तद्वदिदमग्नेः शैत्यं रामप्रभावात्संजातं व्यक्तं निश्चितं ॥ ५१ ॥ एतदेवोपपादयति—यदीति ॥ संभ्रमः

शनेतिशेषः । अस्याःसीताछायात्वेपिस्वस्मिन्सदभेदबुद्धिसत्त्वान्नैतदुत्तरसंगतिः ॥ २८ ॥ **रामानु०** हनुमज्जनकइति । अस्मात्परतोदह्यमानेचलाङ्गूलेइतिश्लोकः । अनयोःश्लोकयोर्मध्येसरमावाक्यभूताःकेचनश्लोकाःकतिपयकोशेषुदृश्यन्ते । बहुकोशेष्वदर्शनादर्थौचित्याभावाच्चतेअनादरणीयाः ॥ ३३ ॥ **ति०** ननुसमुद्रप्रेरणेनमैनाकोत्थानंयुज्यते अग्नेस्तुस्वभावविपरीतंकुतस्तत्राह-

[पा०] १ तांतदापरमोद्विग्नामित्यारभ्य बालास्वस्थाऽभवत्तदेत्यन्ताःश्लोकाः घ. पाठेदृश्यन्ते.

सीतायाश्चानृशंस्येन तेजसा राघवस्य च ॥ पितुश्च मम सख्येन न मां दहति पावकः ॥ ५३ ॥
भूयः स चिन्तयामास मुहूर्तं कपिकुञ्जरः ॥ [कथमग्निर्मया सेह बन्धनं राक्षसाधमैः ॥
प्रतिक्रियाऽस्य युक्ता स्यात्सति मय्यं पराक्रमे ॥ ५४ ॥
ततश्छित्त्वा च तान्पाशान्वेगवान्वै महाकपिः ॥] उत्पपाताथ वेगेन ननाद च महाकपिः ॥ ५५ ॥
पुरद्वारं ततः श्रीमाञ्शैलशृङ्गमिवोन्नतम् ॥ विभक्तरक्षःसंबाधमाससादानिलात्मजः ॥ ५६ ॥
स भूत्वा शैलसंकाशः क्षणेन पुनरात्मवान् ॥ ह्रस्वतां परमां प्राप्तो बन्धनान्यवशातयत् ॥ ५७ ॥
विमुक्तश्चाभवच्छ्रीमान्पुनः पर्वतसन्निभः ॥ वीक्षमाणश्च ददृशे परिघं तोरणाश्रितम् ॥ ५८ ॥
स तं गृह्य महाबाहुः कालायसपरिष्कृतम् ॥ रक्षिणस्तान्पुनः सर्वान्सूदयामास मारुतिः ॥ ५९ ॥
स तान्निहत्वा रणचण्डविक्रमः समीक्षमाणः पुनरेव लङ्काम् ॥
प्रदीप्तलाङ्गूलकृतार्चिमाली प्रकाशतादित्य इवार्चिमाली ॥ ६० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

हनुमता लङ्कादहनस्यकार्यशेषत्वनिर्धारणेन स्ववालानलेनविभीषणभवनर्जे समग्रलङ्कादहनम् ॥ १ ॥ देवगन्धर्वादिभिर्लङ्कादहकदर्शनेन सविस्मयंहर्षाधिगमः ॥ २ ॥

वीक्षमाणस्ततो लङ्कां कपिः कृतमनोरथः ॥ वर्धमानसमुत्साहः कार्यशेषमचिन्तयत् ॥ १ ॥
किं नु खल्ववशिष्टं मे कर्तव्यमिह साम्प्रतम् ॥ यदेषां रक्षसां भूयः संतापजननं भवेत् ॥ २ ॥
वनं तावत्प्रमथितं प्रकृष्टा राक्षसा हताः ॥ बलैकदेशः क्षपितः शेषं दुर्गविनाशनम् ॥ ३ ॥
दुर्गे विनाशिते कर्म भवेत्सुखपरिश्रमम् ॥ अल्पयत्नेन कार्येऽस्मिन्मम स्यात्सफलः श्रमः ॥ ४ ॥

त्वरा । किमग्निर्न करिष्यति संभ्रममिति शेषः । रामार्थं मैनाकस्य संभ्रमो यदि स्यादग्नेस्तादृशस्संभ्रमः कुतो न भविष्यतीत्यर्थः ॥ ५२ ॥ आनृशंस्येन दयया ॥ ५३ ॥ स चिन्तयामास अनन्तरकर्तव्यमितिशेषः ॥ ५४ ॥ चिन्नितमेवाह—उत्पपातेति ॥ ५५ ॥ विभक्तरक्षस्संबाधं निवृत्तरक्षस्संचारं ॥ ५६ ॥ अवशातयत् अवाशातयत अच्यावयदित्यर्थः ॥ ५७—५९ ॥ निहत्य निहत्य । ल्यबभावआर्षः । लाङ्गूलकृतार्चिमाली लाङ्गूले कृतज्वालामालः । अर्चिमाली तेजःपुञ्जवानादित्य इव । प्रकाशत प्राकाशत । अनित्यत्वादडभावः । अर्चीतीकारान्तत्वमार्षं ॥ ६० ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

कृतमनोरथः पर्याप्तमनोरथः ॥ १—२ ॥ बलैकदेशः सेनैकदेशः । क्षपितः नाशितः । दुर्गविनाशनं पुरविनाशनं । शेषं अवशिष्टं ॥ ३ ॥ कर्मपूर्वोक्तं वनभङ्गादिकं । समुद्रलङ्घनं दृत्यं वा । सुखपरिश्रमं सफलायासं । शक्यमेतदित्याह—अल्पयत्नेनेति । अस्मिन्कार्ये

यदीति ॥ तावदितिवाक्यालङ्कारे । रामार्थं रामोपकारार्थं । तादृक्संभ्रमोयदि आदरपूर्वंकंत्वरायदि । तदा रामेणनित्यमुपासितोऽग्निः रामोपकारार्थं कथमपिशैत्यंकिंनकरिष्यतीत्यर्थः ॥ ५२ ॥ **ति०** प्रतिक्रिया लङ्कादहनरूपा । मय्यं मम ॥ ५४ ॥ **शि०** उत्पपात ननादच । क्रियाभेदात्कपिरितिनपौनरुक्त्यं ॥ ५५ ॥ **स०** विभक्तरक्षस्संबाधं नानाधिकारनियुक्तराक्षसनिबिडं ॥ ५६ ॥ **स०** रक्षिणः तोरणरक्षिणः ॥ ५९ ॥ इतित्रिपञ्चाशःसर्गः ॥ ५३ ॥

स० कर्म समुद्रतरणादिरूपं । सुखपरिश्रमं सुखयतीतिसतथा श्रमोयस्यतत् । अल्पयत्नेन पावकसंपादनाद्यायासरहितयत्नेन । मम स्वामिनइतिशेषः । श्रमः मत्प्रेषणरूपः । सफलः कीर्तिरूपफलसहितइत्यर्थः ॥ **ति०** अस्मिन् सीतान्वेषणप्रवृत्तिरूपे । कार्ये-

[**पा०**] १ क. ख. ग. ङ. छ. ज. ञ. ट. संचिन्तयामास. २ इदमर्धत्रयं, ङ.—ट. पाठेषुदृश्यते.

यो ह्ययं मम लाङ्गूले दीप्यते हव्यवाहनः ॥ अस्य संतर्पणं न्याय्यं कर्तुमेभिर्गृहोत्तमैः ॥ ५ ॥
ततः प्रदीप्तलाङ्गूलः सविद्युदिव तोयदः ॥ भवनाग्रेषु लङ्काया विचचार महाकपिः ॥ ६ ॥
गृहाद्गृहं राक्षसानामुद्यानानि च वानरः ॥ वीक्षमाणो ह्यसंत्रस्तः प्रासादांश्च चचार सः ॥ ७ ॥
अवप्लुत्य महावेगः प्रहस्तस्य निवेशनम् ॥ अग्निं तत्र स निक्षिप्य श्वसनेन समो बली ॥ ८ ॥
ततोऽन्यत्पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान् ॥ मुमोच हनुमानग्निं कालानलशिखोपमम् ॥ ९ ॥
वज्रदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः ॥ शुकस्य च महातेजाः सारणस्य च धीमतः ॥
तथा चेन्द्रजितो वेश्म ददाह हरियूथपः ॥ १० ॥
जम्बुमालेः सुमालेश्च ददाह भवनं ततः ॥ ११ ॥
रश्मिकेतोश्च भवनं सूर्यशत्रोस्तथैव च ॥ ह्रस्वकर्णस्य दंष्ट्रस्य रोमशस्य च रक्षसः ॥ १२ ॥
युद्धोन्मत्तस्य मत्तस्य ध्वजग्रीवस्य रक्षसः ॥ विद्युज्जिह्वस्य घोरस्य तथा हस्तिमुखस्य च ॥ १३ ॥
करालस्य पिशाचस्य शोणिताक्षस्य चैव हि ॥ कुम्भकर्णस्य भवनं मकराक्षस्य चैव हि ॥ १४ ॥
यज्ञशत्रोश्च भवनं ब्रह्मशत्रोस्तथैव च ॥ नरान्तकस्य कुम्भस्य निकुम्भस्य दुरात्मनः ॥ १५ ॥
वर्जयित्वा महातेजा विभीषणगृहं प्रति ॥ क्रममाणः क्रमेणैव ददाह हरिपुङ्गवः ॥ १६ ॥
तेषुतेषु महार्हेषु भवनेषु महायशाः ॥ गृहेष्वृद्धिमतामृद्धिं ददाह स महाकपिः ॥ १७ ॥
सर्वेषां समतिक्रम्य राक्षसेन्द्रस्य वीर्यवान् ॥ आससादाथ लक्ष्मीवान्रावणस्य निवेशनम् ॥ १८ ॥
ततस्तस्मिन्गृहे मुख्ये नानारत्नविभूषिते ॥ मेरुमन्दरसंकाशे सर्वमङ्गलशोभिते ॥ १९ ॥
प्रदीप्तमग्निमुत्सृज्य लाङ्गूलाग्रे प्रतिष्ठितम् ॥ ननाद हनुमान्वीरो युगान्तजलदो यथा ॥ २० ॥
श्वसनेन च संयोगादतिवेगो महाबलः ॥ कालाग्निरिव जज्वाल प्रावर्धत हुताशनः ॥ २१ ॥
प्रदीप्तमग्निं पवनस्तेषु वेश्मस्वचारयत् ॥ अभूच्छ्वसनसंयोगादतिवेगो हुताशनः ॥ २२ ॥
तानि काञ्चनजालानि मुक्तामणिमयानि च ॥ भवनान्यवशीर्यन्त रत्नवन्ति महान्ति च ॥ २३ ॥
तानि भग्नविमानानि निपेतुर्वसुधातले ॥ भवनानीव सिद्धानामंबरात्पुण्यसंक्षये ॥ २४ ॥

कृते सतीति शेषः ॥ ४ ॥ केनोपायेनेदं सुकरमित्याशङ्क्य तमाह—योहीति ॥ यः अग्निः । अतिशीतलतया मम महोपकारं कृतवान् अस्य संतर्पणं न्याय्यमित्यर्थः ॥ ५ ॥ अत्र बन्धविस्रंसनाय पूर्वं तनुसंकोचे कृतेपि कार्यार्थमग्निवर्तिः स्थापितेति बोध्यं । सविद्युदिव तोयद इति सर्वतआवृत्यसञ्चारे दृष्टान्तः ॥ ६–९ ॥ वज्रदंष्ट्रस्येत्यादि सार्धश्लोकः ॥ १० ॥ जम्बुमालेरित्यर्धं ॥ ११ ॥ रश्मिकेतोरित्यादिपञ्चश्लोकी ॥ १२—१५ ॥ प्रतिवर्जयित्वेति संबन्धः ॥ १६ ॥ भवनेष्विति गृहविशेषणं समृद्धिमत्परं । ऋद्धिं मणिमुक्ताप्रवालादिकां ॥ १७—१८ ॥ सर्वमङ्गलशोभिते सर्वमङ्गलद्रव्ययुक्ते ॥ १९—२० ॥ श्वसनेनेति । पूर्वं रावणादिभीतावश्यनिलौ इदानीं राक्षसक्षयं देवबलोदयं च प्रत्यासन्नं विदित्वा निश्शङ्कावभूतामिति

योमयाकृतःश्रमः सत्वल्पेनयत्नेन स्वल्पयत्नेनसाध्येनकरिष्यमाणलङ्कादाहेन सफलोभविष्यति ॥ ४ ॥ ति० तोयदः सन्ध्यातोयदः । हनुमतोरक्तवर्णत्वात् ॥ ६ ॥ ति० प्रहस्तस्यप्रधानमन्त्रित्वादादौतद्गृहेग्निप्रक्षेपः । प्रथमंतत्संभावनस्यौचित्यात् ॥ ८ ॥ स० कालानलशिखोपमं हनुमल्लाङ्गूलसंसर्गमाहात्म्येनजलाद्यशाम्यज्ज्वालत्वेनैतदुपमता ॥ ९ ॥ स० प्रतिगृहंक्रमेणक्रममाणइत्यन्वयः । विभीषणगृहंवर्जयित्वा । अनेनविभीषणसाधुत्वमिवअन्योन्यसंलग्नतायामपिसद्मनांदाहतदभावयोर्हनुमदिच्छानुसारिप्रवृत्तिरग्नेश्चद्यो-

[पा०] १ क. ग. घ. सर्वशः. २ ङ. झ. ट. तत्रविनिक्षिप्य. क.—घ. च. छ. तत्रैव. ३ ग. ङ.—ट. विशालस्य. ४ क. ग. ङ.—ट. महात्मनः. ५ ग. महाबाहुः. ६ घ. राक्षसानांच. ७ ङ—झ. ट. नानामङ्गल. ८ क. संदीप्तःप्रावर्धत.

संजज्ञे तुमुलः शब्दो राक्षसानां प्रधावताम् ॥ स्वगृहस्य परित्राणे भग्नोत्साहगतश्रियाम् ॥
नूनमेषोऽग्निरायातः कपिरूपेण हा इति ॥ २५ ॥
क्रन्दन्त्यः सहसा पेतुस्तनन्धयधराः स्त्रियः ॥ काश्चिदग्निपरीतेभ्यो हर्म्येभ्यो मुक्तमूर्धजाः ॥ २६ ॥
पतन्त्यो रेजिरेऽभ्रेभ्यः सौदामिन्य इवाम्बरात् ॥ २७ ॥
वज्रविद्रुमवैदूर्यमुक्ताराजतसंहितान् ॥ विचित्रान्भवनान्धातून्स्यन्दमानान्ददर्श सः ॥ २८ ॥
नाग्निस्तृप्यति काष्ठानां तृणानां हरियूथपः ॥ नाग्नेर्नापि विशस्तानां राक्षसानां वसुन्धरा ॥ २९ ॥
क्वचित्किंशुकसंकाशाः क्वचिच्छालमलिसन्निभाः ॥ क्वचित्कुङ्कुमसंकाशाः शिखा वह्नेश्चकाशिरे ॥ ३० ॥
हनूमता वेगवता वानरेण महात्मना ॥ लङ्कापुरं प्रदग्धं तद्रुद्रेण त्रिपुरं यथा ॥ ३१ ॥

ततस्तु लङ्कापुरपर्वताग्रे समुत्थितो भीमपराक्रमोऽग्निः ॥
प्रसार्य चूडावलयं प्रदीप्तो हनूमता वेगवता विसृष्टः ॥ ३२ ॥
युगान्तकालानलतुल्यवेगः समारुतोऽग्निर्ववृधे दिविस्पृक् ॥
विधूमरश्मिर्भवनेषु सक्तो रक्षःशरीराज्यसमर्पितार्चिः ॥ ३३ ॥

भावः ॥ २१—२४ ॥ स्वगृहस्य परित्राणे भग्नोत्साहगतश्रियामिति पाठः । स्वगृहस्य परित्राणे भग्नोत्साहोर्जितश्रियामिति पाठे उत्साहश्च ऊर्जितश्रीश्च उत्साहोर्जितश्रियौ भग्ने उत्साहोर्जितश्रियौ येषामिति विग्रहः । स्वगृहस्य परित्राणे भग्नोत्साहानां श्रीमतां राक्षसानामिति वार्थः । हा इति " निपात एकाजनाङ् " इति प्रकृतिभावः ॥ २५ ॥ काश्चित् स्त्रियः हर्म्येभ्यः पेतुरिति संबन्धः । सुकेशवंश्यानां जननमात्रे रुद्रेण मातृतुल्यत्ववरप्रदानेपि तदितरेषु तदभावात् स्तनन्धयधरत्वं । अन्यजातीयाश्च राक्षसास्तत्र सन्त्येव ॥ २६ ॥ अम्बरात् पतन्त्यः अभ्रेभ्यो मेघेभ्यः पतन्त्यः सौदामिन्यः तडित इव रेजिरे ॥ २७ ॥ भवनानिति पुंल्लिङ्गत्वमार्षं । धातून् सुवर्णादीन् । " धातुस्तु गैरिके स्वर्णे " इति दर्पः । स्यन्दमानान् स्यन्दतः । अग्नितप्तत्वेन द्रवीभूतस्वर्णादीनित्यर्थः ॥ २८ ॥ काष्ठानां तृणानां चेति संबन्धसामान्ये षष्ठी । काष्ठैस्तृणैश्चेत्यर्थः । " पूरणगुण— " इत्यादिना षष्ठी वा । अग्निः काष्ठैस्तृणैश्च न तृप्यति । हरियूथपः अग्नेः न तृप्यति अग्निना न तृप्यति । अग्निप्रक्षेपणेन न तृप्यतीत्यर्थः । एवं वसुन्धराविशस्तानां राक्षसानां विशस्तैः राक्षसैः । न तृप्यतीति योज्यं । अनेन राक्षसशवाकीर्णा भूरभूदित्यर्थः ॥ २९ ॥ शिखाः ज्वालाः ॥ ३० ॥ ननु एतावत्पर्यन्तमल्पबलतयास्थितस्य हनुमतः कथमेतादृशी शक्तिरित्यत्राह—रुद्रेण त्रिपुरं यथेति । " विष्णुरात्मा भगवतो भवस्यामिततेजसः । तस्माद्वनुर्ज्यासंस्पर्शं स विषेहे महेश्वरः " इत्युक्तरीत्या विष्णवाप्यायिततेजसा रुद्रेण त्रिपुरं यथा दग्धं तथानेनेति भावः ॥ ३१ ॥ लङ्कापुरपर्वताग्रे लङ्कापुराधारत्रिकूटशिखरे । तद्वर्तित्वात्तस्यास्तथानिर्देशः । पर्वताग्रस्थलङ्कापुर इति परनिपातो वा । चूडावलयं ज्वालाजालमित्यर्थः । तत् प्रसार्य । विस्तार्य । प्रदीप्तः विसृष्टः । गृहेष्विति शेषः ॥ ३२ ॥ दिविस्पृक् अभ्रंलिहः " हनुभ्यां ङेरलुग्वक्तव्यः " इति सप्तम्या अलुक् । रक्षश्शरीराज्यसमर्पितार्चिः

लते ॥ १६ ॥ रामानु० नाग्निरिति । " तृणानांचयथातथा । हनुमान्राक्षसेन्द्राणांवधेकिंचिन्नतृप्यति । नहनूमद्विशस्तानांराक्षसानांवसुन्धरा " इतिपाठः ॥ स० यथाग्निर्नतृप्यति तथा हनुमान्राक्षसानांवह्निनावधेसतिकिंचिन्नतृप्यति स्वल्पंवानतृप्यति यद्वा एवंबहुवधेसत्यपिकिंचिदिदमितिनतृप्यति ॥ शि० यथाकाष्ठादीनां दाहेहेतिशेषः । अग्निःकिञ्चिन्नतृप्यति । तथा राक्षसेन्द्राणांवधेहनुमान्नतृप्यति । सकलराक्षसवधमिच्छतीत्यर्थः । तेनसीतादुःखदर्शनासहिष्णुत्वंव्यञ्जितं । हनूमद्विशस्तानांराक्षसानां धारणे इतिशेषः । वसुन्धराचनतृप्यति । निहतसर्वराक्षसधारणमाकाङ्क्षतीत्यर्थः । सेनपतिवियोगजनितस्वसुतादुःखहेतुकदुःखाक्रान्तत्वं

[पा०] १ ङ. च. ज.—ट, स्वेस्वेगृहपरित्राणे. २ क. च. झ. ञ. ट. भग्नोत्साहोज्झितश्रियां. ३ क. घ. ङ. झ. ट. परीताङ्गो. ४ घ. संनिभान्. ५ च.—ट. तृणानांचयथातथा. एतदनन्तरं क.—घ. च. झ. ट. पाठेषु हनूमान्राक्षसेन्द्राणां वधेकिंचिन्नतृप्यति. इत्यर्धमधिकंदृश्यते. ६ च.—ट, नहनूमद्विशस्तानां. ७ छ. झ. ट, वेगवतोपसृष्टः. ८ ङ.—ट. तुल्यरूपः. ९ घ. गंगनेषु.

[सं तामत्यर्थतो वह्निर्लङ्कां राक्षससंकुलाम् ॥ ज्वालामालापरिक्षेपैरदहन्मारुतात्मजः ॥ ३४ ॥
तेन शब्देन वित्रस्ता धर्षितास्तेन चाग्निना ॥ अभिपेतुस्तदा घोरा हनूमन्तं निशाचराः ॥ ३५ ॥
तं प्रदीप्तैश्च शूलाग्रैः प्रासैः खड्गैः परश्वधैः ॥ हनूमन्तं महावेगैरक्षिपन्नैर्ऋतर्षभाः ॥ ३६ ॥
ते राक्षसा भीमबला नानाप्रहरणान्विताः ॥ निहत्य च स तांस्तत्र दिवमेवोत्पपात ह ॥ ३७ ॥
स च विक्रम्य सहसा संक्रामंश्च गृहाद्गृहम् ॥ लङ्कामादीपयामास वायुपुत्रः प्रतापवान् ॥ ३८ ॥
स लाङ्गूलोपसक्ताग्निर्मुक्तो मृत्युगृहादिव ॥ लङ्कां पर्यदहत्कृत्स्नां खे ग्रहः संपतन्निव ॥ ३९ ॥
तोरणेषु गवाक्षेषु रम्येषु शिखरेषु च ॥ तिष्ठन्ति स्म प्रपश्यन्ति राक्षसाः प्लवगोत्तमम् ॥ ४० ॥

हुताशनज्वालसमावृता सा हतप्रवीरा हतसर्वशोभना ॥
हनूमतः क्रोधबलाभिभूता बभूव कालोपहतेव लङ्का ॥ ४१ ॥
ससंभ्रमत्रस्तविशस्तराक्षसां समुज्वलज्ज्वालहुताशनाङ्किताम् ॥
ददर्श लङ्कां हनुमान्महामनाः स्वयंभुवः कोपहतामिवावनिम् ॥ ४२ ॥
गृहाग्र्यशृङ्गाग्रतले विचित्रे प्रतिष्ठितो वानरराजसिंहः ॥
प्रदीप्तलाङ्गूलकृतार्चिमाली व्यराजतादित्य इवार्चिमाली ॥ ४३ ॥]
आदित्यकोटीसदृशः सुतेजा लङ्कां समाप्तां परिवार्य तिष्ठन् ॥
शब्दैरनेकैरशनिप्ररूढैर्भिन्दन्निवाण्डं प्रबभौ महाग्निः ॥ ४४ ॥
तत्राम्बरादग्निरतिप्रवृद्धो रूक्षप्रभः किंशुकपुष्पचूडः ॥
निर्वाणधूमाकुलराजयश्च नीलोत्पलाभाः प्रचकाशिरेऽभ्राः ॥ ४५ ॥
वज्री महेन्द्रस्त्रिदशेश्वरो वा साक्षाद्यमो वा वरुणानिलो वा ॥
रुद्रोऽग्निरर्को धनदश्च सोमो न वानरोयं स्वयमेव कालः ॥ ४६ ॥
किं ब्रह्मणः सर्वपितामहस्य सर्वस्य धातुश्चतुराननस्य ॥
इहागतो वानररूपधारी रक्षोपसंहारकरः प्रकोपः ॥ ४७ ॥

रक्षश्शरीराण्येवाज्यानि तैस्समर्पितार्चिः उत्थापितज्वालः ॥ ३३—४३ ॥ समाप्तां निःशेषां । अशनिप्ररूढैः अशनिवन्निष्ठुरैः । अण्डं ब्रह्माण्डं ॥ ४४ ॥ अम्बरात् अम्बरपर्यन्तं । किंशुकपुष्पचूडः तत्तुल्यशिखः । निर्वाणधूमाकुलराजयः पूर्वपूर्वदग्धभवनाग्निनिर्वाणसमयोत्थितधूमैर्व्याप्तपङ्क्तयः । अतएव नीलोत्पलाभाः निर्वाणधूमानां नीलवर्णत्वादितिभावः । अभ्राः मेघाः । पुँल्लिङ्गत्वमार्षं ॥४५॥ अथ रक्षोवचनं—वज्रीत्यादि ॥ महेन्द्रः । वज्रीत्यादिविशेषणं सामर्थ्यविशेषद्योतनार्थं । उत्तरत्राप्येवमेवगतिः । यमकालयोर्मूर्तिभेदान्नपुनरुक्तिः । रक्षोपसंहारकरइत्यत्र आर्षस्सलोपः । प्रकोपः प्रकोपकृतमूर्तिविशेषः ॥४६॥ किं वैष्णवमिति । अत्राद्यो वाशब्दोवधारणे । "वा स्याद्धिकल्पोपमयोरेवार्थे चसमुच्चये " इतिविश्वः । द्वितीयो वितर्के । अनन्तं त्रिविधपरिच्छेदरहितं । अव्यक्तं चक्षुराद्यगोचरं । अचिन्त्यं केवलमनसोप्यविषयं ।

तस्यास्सूचितं ॥ २९ ॥ **ती०** सतामिति । वह्निः ज्वालामालापरिक्षेपैः ज्वालासमूहानांप्रसारणैः । लङ्कामत्यर्थमदहदितिसंबन्धः ॥३४॥ **ती०** सः हनुमान् ॥३७॥ **ती०** सचेति । संक्रामन् गच्छन् ॥ ३८ ॥ **ती०** सइति । लाङ्गूलोपसक्ताग्निः लाङ्गूलोत्थितोग्निः । मृत्युगृहान्मुक्तइवतथाऽतिभीकरइत्यर्थः ॥ ३९ ॥ **ती०** हुताशनेति । कालोपहतेव प्रलयकालोपहतेव ॥ ४१ ॥ **शि०** गृहाग्र्यशृङ्गाग्रतले गृहाग्र्याणां गृहश्रेष्ठानां शृङ्गाग्र्यतले परप्रासादभूमौ । प्रतिष्ठितः अर्चिमालीआदित्यइव प्रदीप्तलाङ्गूलकृतार्चिमालीवानरराजसिंहः व्यराजत । अतएव निर्देशादर्चिशब्दोप्यस्तीतिप्रतीयते ॥ ४३ ॥

[पा०] १ सतामत्यर्थतोवह्निरित्यादयः व्यराजतादित्यइवार्चिमालीत्यन्ताःश्लोकाः च. छ. ज. पाठेदृश्यन्ते. २ क. घ. ङ, झ. ञ. ट. समस्तां. ३ ख. घ. रशनिप्रकाशैः. ४ ङ—ट. लोकस्यधातुः.

किं वैष्णवं वा कपिरूपमेत्य रक्षोविनाशाय परं सुतेजः ॥
अनन्तमव्यक्तमचिन्त्यमेकं स्वमायया सांप्रतमागतं वा ॥ ४८ ॥
इत्येवमूचुर्बहवो विशिष्टा रक्षोगणास्तत्र समेत्य सर्वे ॥
सप्राणिसङ्घां सगृहां सवृक्षां दग्धां पुरीं तां सहसा समीक्ष्य ॥ ४९ ॥
ततस्तु लङ्का सहसा प्रदग्धा सराक्षसा साश्वरथा सनागा ॥
सपक्षिसङ्घा समृगा सवृक्षा रुरोद दीना तुमुलं सशब्दम् ॥ ५० ॥
हा तात हा पुत्रक कान्त मित्र हा जीवितं भोगयुतं सुपुष्पम् ॥
रक्षोभिरेवं बहुधा ब्रुवद्भिः शब्दः कृतो घोरतरः सुभीमः ॥ ५१ ॥
हुताशनज्वालसमावृता सा हतप्रवीरा परिवृत्तयोधा ॥
हनूमतः क्रोधबलाभिभूता बभूव शापोपहतेव लङ्का ॥ ५२ ॥
स संभ्रमत्रस्तविषण्णराक्षसां समुज्ज्वलज्ज्वालहुताशनाङ्किताम् ॥
ददर्श लङ्कां हनुमान्महामनाः स्वयंभुकोपोपहतामिवावनिम् ॥ ५३ ॥
भङ्क्त्वा वनं पादपरत्नसंकुलं हत्वा तु रक्षांसि महान्ति संयुगे ॥
दग्ध्वा पुरीं तां गृहरत्नमालिनीं तस्थौ हनूमान्पवनात्मजः कपिः ॥ ५४ ॥
त्रिकूटशृङ्गाग्रतले विचित्रे प्रतिष्ठितो वानरराजसिंहः ॥
प्रदीप्तलाङ्गूलकृतार्चिमाली व्यराजतादित्य इवांशुमाली ॥ ५५ ॥
स राक्षसांस्तान्सुबहूंश्च हत्वा वनं च भङ्क्त्वा बहुपादपं तत् ॥
विसृज्य रक्षोभवनेषु चाग्निं जगाम रामं मनसा महात्मा ॥ ५६ ॥
ततो महात्मा हनुमान्मनस्वी निशाचराणां क्षतकृत्कृतार्थः ॥
रामस्य नाथस्य जगत्त्रयाणां श्रीपादमूलं मनसा जगाम ॥ ५७ ॥
ततस्तु तं वानरवीरमुख्यं महाबलं मारुततुल्यवेगम् ॥
महामतिं वायुसुतं वरिष्ठं प्रतुष्टुवुर्देवगणाश्च सर्वे ॥ ५८ ॥
भङ्क्त्वा वनं महातेजा हत्वा रक्षांसि संयुगे ॥ दग्ध्वा लङ्कापुरीं रम्यां रराज स महाकपिः ॥ ५९ ॥

एकं अद्वितीयं । यद्वैष्णवं सुतेजः पूज्यं धाम तदेव स्वमायया स्वासाधारणयाश्चर्यशक्त्या । कपिरूपमेत्य सांप्रतमागतं वा इतियोजना । वैष्णवमिति स्वार्थे अण् । विष्णुशरीरान्तर्वर्तीतिवार्थः ॥ ४७ ॥ विशिष्टाः ज्ञानाधिकाः ॥ ४८—५० ॥ युगपदेव शोके दूराह्वाने च हाशब्दो वर्तते । हा जीवितमित्यत्र संबुद्ध्यलोप आर्षः । हतमितिशेषइत्यन्ये । "अभितःपरितस्समयानिकषाहाप्रतियोगे" इति द्वितीया वा । दरिद्रैरशोच्यत्वाद्विशिनष्टि—भोगयुतं सुपुण्यमिति । सुखाढ्यं सुकृतैकफलं चेत्यर्थः । घोरतरः तीव्रतरः । अतएव सुभीमः भयङ्करः ॥ ५१ ॥ परिवृत्तयोधा परिवृत्तभटा ॥ ५२ ॥ हनुमान्महामना इतिपाठः । हनुमान्महासेति पाठे विषमवृत्तं वा । स्वयंभुकोपोपहतां प्रलये भगवता दग्धामित्यर्थः ॥ ५३ ॥ रत्नशब्दः श्रेष्ठवाची । तस्थौ संकल्पितकार्यस्य परिसमाप्तत्वादुपरतोद्योगो भूदित्यर्थः ॥ ५४—५५ ॥ जगाम रामं मनसेति । कृतकृत्यत्वाद्रामं गन्तुमियेषेत्यर्थः ॥ ५६—५७ ॥ वरिष्ठमिति । बलवतामिति शेषः

रामानु० रराजसमहाकपिरित्यतःपरमुत्तरसर्गादिभूतो " लङ्कांसमस्तांसंदीप्य " इत्यर्धश्लोकःकेषुचित्कोशेषुप्रमादाल्लिखितः ॥ ५९ ॥ इतिचतुःपञ्चाशः सर्गः ॥ ५४ ॥

[पा०] १ ख. सुभृशंसुशब्दं. २ ङ. ञ. जीवितेशाङ्गहतं. ३ ख. द्रवद्भिः. ४ ङ. ञ. रोषोपहतां. ५ ग. महाद्रि. ६ अर्धश्लोकः क. घ. पाठयोर्दृश्यते.

तत्र देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ दृष्ट्वा लङ्कां प्रदग्धां तां विस्मयं परमं गताः ॥ ६० ॥
तं दृष्ट्वा वानरश्रेष्ठं हनुमन्तं महाकपिम् ॥ कालाग्निरिति सञ्चिन्त्य सर्वभूतानि तत्रसुः ॥ ६१ ॥
देवाश्च सर्वे मुनिपुङ्गवाश्च गन्धर्वविद्याधरनागयक्षाः ॥
भूतानि सर्वाणि महान्ति तत्र जग्मुः परां प्रीतिमतुल्यरूपाम् ॥ ६२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुःपञ्चाशः सर्गः ॥ ५४ ॥

पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

लङ्कायानिःशेषभस्मीभावावलोकनेन सीतायाअपिदाहसंभावनयाऽऽत्मधिक्कारपूर्वकंसशोकंबहुधाचिन्तयताहनुमतासिद्धचारणभाषणश्रवणादिना तस्यादाहाभावनिर्धारणेन हर्षाधिगमः ॥ १ ॥

लङ्कां समस्तां संदीप्य लाङ्गूलाग्निं महाबलः ॥ निर्वापयामास तदा समुद्रे हरिसत्तमः ॥ १ ॥
संदीप्यमानां विध्वस्तां त्रस्तरक्षोगणां पुरीम् ॥ अवेक्ष्य हनुमाँल्लङ्कां चिन्तयामास वानरः ॥ २ ॥
तस्याभूत्सुमहांस्त्रासः कुत्सा चात्मन्यजायत ॥ लङ्कां प्रदहता कर्म किंस्वित्कृतमिदं मया ॥ ३ ॥
धन्यास्ते पुरुषश्रेष्ठा ये बुद्ध्या कोपमुत्थितम् ॥ निरुन्धन्ति महात्मानो दीप्तमग्निमिवाम्भसा ॥ ४ ॥
क्रुद्धः पापं न कुर्यात्कः क्रुद्धो हन्याद्गुरूनपि ॥ क्रुद्धः परुषया वाचा नरः साधूनधिक्षिपेत् ॥ ५ ॥
वाच्यावाच्यं प्रकुपितो न विजानाति कर्हिचित् ॥ नाकार्यमस्ति क्रुद्धस्य नावाच्यं विद्यते क्वचित् ॥६॥
यः समुत्पतितं क्रोधं क्षमयैव निरस्यति ॥ यथोरगस्त्वचं जीर्णां स वै पुरुष उच्यते ॥ ७ ॥
धिगस्तु मां सुदुर्बुद्धिं निर्लज्जं पापकृत्तमम् ॥ अचिन्तयित्वा तां सीतामग्निदं स्वामिघातकम् ॥ ८ ॥
यदि दग्धा त्वियं लङ्का नूनमार्यापि जानकी ॥ दग्धा तेन मया भर्तुर्हितं कार्यमजानता ॥ ९ ॥
यदर्थमयमारम्भस्तत्कार्यमवसादितम् ॥ मया हि दहता लङ्कां न सीता परिरक्षिता ॥ १० ॥
ईषत्कार्यमिदं कार्यं कृतमासीन्न संशयः ॥ तस्य क्रोधाभिभूतेन मया मूलक्षयः कृतः ॥ ११ ॥
विनष्टा जानकी नूनं न ह्यदग्धः प्रदृश्यते ॥ लङ्कायां कश्चिदुद्देशः सर्वा भस्मीकृता पुरी ॥ १२ ॥

॥ ५८—६१ ॥ परामित्यस्य विवरणं—अतुल्यरूपामिति । अस्मिन्सर्गे एकपञ्चाशच्छ्लोकाः । ततो महालेति श्लोकः स राक्षसानिति श्लोकोक्तार्थकतया बहुकोशेष्वदर्शनाच्च प्रक्षिप्तः । बहुकोशेष्वेतत्सर्गसमाप्तिविपर्ययः उत्तरसर्गारम्भविपर्ययश्च दृश्यते ॥६२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुःपञ्चाशः सर्गः ॥ ५४ ॥

लाङ्गूलाग्निं समुद्रे निर्वापयामासेत्यन्वयः ॥१—२॥ कुत्सा निन्दा ॥ ३—८ ॥ जानक्यपि यदि दग्धेत्यन्वयः ॥ ९—१० ॥ इदं कार्यं अन्वेषणपूर्वकरावणनिलयपरिज्ञानसीतादर्शनतन्निवेदनरूपं महत्कार्यं । ईषत्कार्यं ईषदवशिष्टकार्यं । असमग्रप्रायमेवकृतमासीत् । रामनिवेदनमात्रावशेषं कृतमासीदित्यर्थः । किंत्विदानीं क्रोधाभिभूतेन क्रोधान्धेन । मया तस्य कार्यस्य । मूलक्षयःकृतः न संशयः । विफलीकृतमित्यर्थः ॥ ११ ॥ सीतानाशे तत्तथैव सएव तु कुत

ति० उक्तकुत्सितकार्यमूलंकोपएवेतिनिश्चित्यतद्रहितान्स्तौति—धन्याइति । दुःखातिशयादेवमहात्मपदपौनरुक्त्यंनदोषाय ॥४॥ ति० क्रुद्धःपापंनकुर्याद्यइतिपाठे क्रुद्धोयःकश्चित्पापंकुर्यान्न । नचिकाकुः । अपितुकुर्यादेव । अकरणमशक्यमेवेत्यर्थः । तदेवदर्शयति—क्रुद्धोहन्यादिति ॥५॥ शि० सीतामचिन्तयित्वा विस्मृत्य अन्यत्रानीतेत्यर्थः । अग्निदं अग्नयेददाति अग्निददातिव-

[पा०] १ ङ. ञ. ञ. ट. कामं. २ ङ. छ.—ञ. धन्याःखलुमहात्मानो. ३ च. ञ. ञ. ट. लङ्कात्रियंसर्वा.

यदि तद्विहतं कार्यं मम प्रज्ञाविपर्ययात् ॥ इहैव प्राणसंन्यासो ममापि ह्यद्य रोचते ॥ १३ ॥
किमग्नौ निपताम्यद्य आहोस्विद्वडवामुखे ॥ शरीरमाहो सत्त्वानां दद्मि सागरवासिनाम् ॥ १४ ॥
कथं हि जीवता शक्यो मया द्रष्टुं हरीश्वरः ॥ तौ वा पुरुषशार्दूलौ कार्यसर्वस्वघातिना ॥ १५ ॥
मया खलु तदेवेदं रोषदोषात्प्रदर्शितम् ॥ प्रथितं त्रिषु लोकेषु कपित्वमनवस्थितम् ॥ १६ ॥
धिगस्तु राजसंभावमनीशमनवस्थितम् ॥ ईश्वरेणापि यद्रागान्मया सीता न रक्षिता ॥ १७ ॥
विनष्टायां तु सीतायां तावुभौ विनशिष्यतः ॥ तयोर्विनाशे सुग्रीवः सबन्धुर्विनशिष्यति ॥ १८॥
एतदेव वचः श्रुत्वा भरतो भ्रातृवत्सलः ॥ धर्मात्मा सहशत्रुघ्नः कथं शक्ष्यति जीवितुम् ॥ १९ ॥
इक्ष्वाकुवंशे धर्मिष्ठे गते नाशमसंशयम् ॥ भविष्यन्ति प्रजाः सर्वाः शोकसंतापपीडिताः ॥ २० ॥
तदहं भाग्यरहितो लुप्तधर्मार्थसंग्रहः ॥ रोषदोषपरीतात्मा व्यक्तं लोकविनाशनः ॥ २१ ॥
इति चिन्तयतस्तस्य निमित्तान्युपपेदिरे ॥ पूर्वमप्युपलब्धानि साक्षात्पुनरचिन्तयत् ॥ २२ ॥
अथवा चारुसर्वाङ्गी रक्षिता स्वेन तेजसा ॥ न वशिष्यति कल्याणी नाग्निरग्नौ प्रवर्तते ॥ २३ ॥
नहि धर्मात्मनस्तस्य भार्यामिततेजसः ॥ स्वचारित्राभिगुप्तां तां स्प्रष्टुमर्हति पावकः ॥ २४ ॥
नूनं रामप्रभावेन वैदेह्याः सुकृतेन च ॥ यन्मां दहनकर्माऽयं नादहद्धव्यवाहनः ॥ २५ ॥
त्रयाणां भरतादीनां भ्रातृणां देवता च या ॥ रामस्य च मनःकान्ता सा कथं विनशिष्यति ॥२६॥
यद्वा दहनकर्माऽयं सर्वत्र प्रभुरव्ययः ॥ न मे दहति लाङ्गूलं कथमार्यां प्रधक्ष्यति ॥ २७ ॥
पुनश्चाचिन्तयत्तत्र हनुमान्विस्मितस्तदा ॥ हिरण्यनाभस्य गिरेर्जलमध्ये प्रदर्शनम् ॥ २८ ॥
तपसा सत्यवाक्येन अनन्यत्वाच्च भर्तरि ॥ अपि सा निर्दहेदग्निं न तामग्निः प्रधक्ष्यति ॥ २९ ॥
स तथा चिन्तयंस्तत्र देव्या धर्मपरिग्रहम् ॥ शुश्राव हनुमान्वाक्यं चारणानां महात्मनाम् ॥ ३० ॥
अहो खलु कृतं कर्म दुष्करं हि हनूमता ॥ अग्निं विसृजताऽभीक्ष्णं भीमं राक्षसवेश्मनि ॥ ३१ ॥

इत्यत्राह—विनष्टेति ॥ १२ ॥ विहतं यदि सीतानाशाद्विनष्टं यदि । प्राणसंन्यासः प्राणत्यागः ॥ १३—१५ ॥ कपित्वं कापेयं । अनवस्थितं चापलात्मकमित्यर्थः ॥ १६ ॥ राजसंभावं रजोगुणनिबन्धनचेष्टाविशेषं । अनीशं नियामकरहितं । स्वतन्त्रमिति यावत् । अनवस्थितं कुर्वत्स्वभावं । ईश्वरेणापि रक्षणसमर्थेनापि । रागात् मात्सर्यात् । "रागोनुरागे मात्सर्ये रक्तवर्णे कुसुम्भके" इतियादवः । यद्वा रागात् रजोगुणात् । आग्रहादिति यावत् ॥१७—२१॥ निमित्तान्युपपेदिरे शुभशंसिनिमित्तानि प्रादुर्बभूवुरित्यर्थः ॥ २२ ॥ एवं लोकदृष्ट्याऽनर्थमाशङ्क्य तत्त्वदृष्ट्या समाधत्ते—अथवेत्यादिना ॥ नाग्निरग्नौ प्रवर्तते । अग्निरग्निं न दहतीत्यर्थः ॥ २३—२४ ॥ दहनकर्मा भस्मीकरणस्वभावः । यत्प्रभावादयं मां

स्तुमात्रेक्षिपतिवासतं ॥ ८ ॥ ति० वडवामुखेअग्नावित्यन्वयः । दद्मि ददामि ॥ स० अग्नौ मन्निहितलङ्काग्नौ । वडवामुखे समुद्रान्तर्गतेवाऽग्नौ । वडवामुखेऽग्नावित्यन्वयेनिरर्थकताऽऽहोस्वितः । यदिप्राचीनप्राणन्यासेन समुच्चयायतदित्युच्यतेतर्हिकिमित्यस्यपूर्वार्धेविकल्पसूचकत्वेनाहोस्विदित्यस्योत्तरार्धेऽन्वयस्यवक्तव्यतयाआहोइत्यस्यवैयर्थ्यस्यदुर्वारत्वापत्तेः ॥ १३ ॥ स० तदेव कपित्वं सीतयापूर्वोक्तं । अनवस्थितं अव्यवस्थितं ॥ १६ ॥ स० त्रयाणांभरतादीनां । भरतस्यराज्येऽधिकृतत्वात्प्रथमतउक्तिः । तज्ज्यैष्ठ्यपक्षे नानुपपत्तिः । देवता तद्वत्पूज्या ॥ २६ ॥ ती० देवीप्रभावात्सिन्धौमद्विश्रान्तिनिमित्तगिरिदर्शनहेतुनापिदेवीमग्निर्नदहतीत्याह—पुनश्चेति ॥ तत्र तस्मिन्समये । विस्मितोहनुमान् जलमध्ये सागरान्तर्देशे । हिरण्यनाभस्यगिरेःप्रदर्शनं पुनरचिन्तयत् । एतेन पर्वतादीनामपिसर्वेषांरामाज्ञावशवर्तित्वंसूचितं । तेन सीतायानाग्नेर्भीतिरितिसूचितं ॥ २८ ॥ स० सहनुमान् । धारकत्वाद्गोर्भगवान्रामः । तत्परिग्रहं भार्यां । चिन्तयन् देव्याविषयेचारणानां शुश्राव । वचइतिशेषः । धर्मपरिग्रहं रक्षकधर्मसंपत्तिंवा ॥ ३० ॥

[पा०] १ झ. ञ. शरीरमिह. २ ग. च. छ. झ. ञ. ट. मसंशयः. ३ ङ. झ. ञ. ट. असौविनिर्दहेत्. ग. अथसा. ४ झ. ञ. ट. हनुमांस्तत्र.

प्रपलायितरक्षस्त्रीबालवृद्धसमाकुला ॥ जनकोलाहलाध्माता क्रन्दन्तीवाद्रिकन्दरे ॥ ३२ ॥
दग्धेयं नगरी सर्वा साट्टप्राकारतोरणा ॥ जानकी न च दग्धेति विस्मयोऽद्भुत एव नः ॥ ३३ ॥
इति शुश्राव हनुमान्वाचं तामृतोपमाम् ॥ बभूव चास्य मनसो हर्षस्तत्कालसंभवः ॥ ३४ ॥
स निमित्तैश्च दृष्टार्थैः कारणैश्च महागुणैः ॥ ऋषिवाक्यैश्च हनुमानभवत्प्रीतमानसः ॥ ३५ ॥
ततः कपिः प्राप्तमनोरथार्थस्तामक्षतां राजसुतां विदित्वा ॥
प्रत्यक्षतस्तां पुनरेव दृष्ट्वा प्रतिप्रयाणाय मतिं चकार ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

षट्पञ्चाशः सर्गः ॥ ५६ ॥

हनुमता शिंशुपामूलमेत्य सीतांप्रत्यभिवादनसमाश्वासनसमापृच्छनपूर्वकं सागरोत्तरतीरगमनायारिष्टगिरिसमारोहणम् ॥ १ ॥ तथा स्वचरणनिपीडनात्तद्गिरिवरस्य रसातलप्रवेशनेनततस्समुत्पतनम् ॥ २ ॥

ततस्तु शिंशुपामूले जानकीं पर्यवस्थिताम् ॥ अभिवाद्याब्रवीद्दिष्ट्या पश्यामि त्वामिहाक्षताम् ॥ १ ॥
ततस्तं प्रस्थितं सीता वीक्षमाणा पुनः पुनः ॥ भर्तृस्नेहान्वितं वाक्यं हनुमन्तमभाषत ॥ २ ॥
[यदि त्वं मन्यसे तात वसैकाहमिहानघ ॥ क्वचित्सुसंवृते देशे विश्रान्तः श्वो गमिष्यसि ॥ ३ ॥
मम चैवाल्पभाग्यायाः सांनिध्यात्तव वानर ॥ शोकस्यास्यापमेयस्य मुहूर्तं स्यादपि क्षयः ॥ ४ ॥
गते हि हरिशार्दूल पुनः संप्राप्तये त्वयि ॥ प्राणेष्वपि न विश्वासो मम वानरपुङ्गव ॥ ५ ॥
अदर्शनं च ते वीर भूयो मां दारयिष्यति ॥ दुःखाद्दुःखतरं प्राप्तां दुर्मनश्शोककर्शिताम् ॥ ६ ॥
अयं च वीर संदेहस्तिष्ठतीव ममाग्रतः ॥ सुमहत्सु सहायेषु हर्यृक्षेषु महाबलः ॥ ७ ॥
कथं नु खलु दुष्पारं संतरिष्यन्ति सागरम् ॥ तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ॥ ८ ॥
त्रयाणामेव भूतानां सागरस्यातिलङ्घने ॥ शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ॥ ९ ॥
तदत्र कार्यनिर्बन्धे समुत्पन्ने दुरासदे ॥ किं पश्यसि समाधानं त्वं हि कार्यविशारदः] ॥ १० ॥
काममस्य त्वमेवैकः कार्यस्य परिसाधने ॥ पर्याप्तः परवीरघ्न यशस्स्ते बलोदयः ॥ ११ ॥

नादहत् स तामेव कथं दहतीत्यर्थः ॥ २५—३२ ॥ विस्मयोद्भुत एव न इति। अयं विस्मयः अद्भुत एव। अद्भुतमाश्चर्यं। कल्याणं चेत्युणादिवृत्तिः। यद्वा विस्मयः आश्चर्यं अद्भुतः अभूतपूर्वइत्यर्थः। अद्भुतः अद्भुतरसः। तस्य स्थायीभावोविस्मयः। तथाच अद्भुत एव अद्भुतरसतां प्राप्त एव। महानयं विस्मयः। न विस्मयमात्र इत्यर्थः ॥ ३३—३४ ॥ निमित्तैः दक्षिणाक्षिस्पन्दादिभिः। दृष्टार्थैः दृष्टफलसंवादैः। कारणैः सीतापातिव्रत्यरामप्रभावादिभिः। ऋषिवाक्यैः चारणवाक्यैः ॥ ३५ ॥ पूर्वं चारणवाक्यैर्विदित्वा पुनः प्रत्यक्षं दृष्ट्वा ततः प्रतिप्रयाणाय मतिं चकार। प्रतियास्यामीति संकल्पितवानित्यर्थः ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

प्रस्थितं प्रस्थानोद्युक्तं ॥ २—१० ॥ वनभङ्गाक्षवधादिना हनुमतश्शक्तिं विज्ञाय असौ रामाय निवेद्य स्वयमेव सकलराक्षससंहारपूर्वकं मम नेता मा भूदित्यभिप्रायेणाह—काममिति ॥ अस्य

स० प्राप्तमनोरथार्थः प्राप्तसीतादर्शनरूपमनोरथफलः ॥ ३६ ॥ इतिपञ्चपञ्चाशःसर्गः ॥ ५५ ॥

[पा०] १ ग. ङ. झ. ञ. ट. लङ्घा. २ घ. विस्मयोदात्तभाषिणां. ३ अयंश्लोकः ङ. च. छ. झ. ञ. ट. पाठेषुदृश्यते. ४ झ. स्नेहान्विता. ५ यदित्वंमन्यसेइत्यादयः त्वंहिकार्यविशारदइत्यन्ताःश्लोकाः छ. झ. ञ. ट. पाठेषुदृश्यन्ते.

शरैः सुसंकुलां कृत्वा लङ्कां परबलार्दनः ॥ मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥ १२ ॥
तद्यथा तस्य विक्रान्तमनुरूपं महात्मनः ॥ भवत्याहवशूरस्य तथा त्वमुपपादय ॥ १३ ॥
तदर्थोपहितं वाक्यं प्रश्रितं हेतुसंहितम् ॥ निशम्य हनुमांस्तस्या वाक्यमुत्तरमब्रवीत् ॥ १४ ॥
[[3]देवि हर्यृक्षसैन्यानामीश्वरः प्लवतांवरः ॥ सुग्रीवः सत्वसंपन्नस्तवार्थे कृतनिश्चयः ॥ १५ ॥
स वानरसहस्राणां कोटीभिरभिसंवृतः ॥ क्षिप्रमेष्यति वैदेहि सुग्रीवः प्लवगाधिपः ॥ १६ ॥
तौ च वीरौ नरवरौ सहितौ रामलक्ष्मणौ ॥ आगम्य नगरीं लङ्कां सायकैर्विधमिष्यतः ॥ १७ ॥
सगणं राक्षसं हत्वा नचिराद्रघुनन्दनः ॥ त्वामादाय वरारोहे स्वां पुरीं प्रतियास्यति ॥ १८ ॥
समाश्वसिहि भद्रं ते भव त्वं कालकाङ्क्षिणी ॥ क्षिप्रं द्रक्ष्यसि रामेण निहतं रावणं रणे ॥ १९ ॥
निहते राक्षसेन्द्रे च सपुत्रामात्यबान्धवे ॥ त्वं समेष्यसि रामेण शशाङ्केनेव रोहिणी] ॥ २० ॥
क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्रवरैर्वृतः ॥ यस्ते युधि [5]विजित्यारीञ्शोकं व्यपनयिष्यति ॥ २१ ॥
एवमाश्वास्य वैदेहीं हनुमान्मारुतात्मजः ॥ गमनाय मतिं कृत्वा वैदेहीमभ्यवादयत् ॥ २२ ॥
[[6]राक्षसान्प्रवरान्हत्वा नाम विश्राव्य चात्मनः ॥ समाश्वास्य च वैदेहीं दर्शयित्वा परं बलम् ॥२३॥
नगरीमाकुलां कृत्वा वञ्चयित्वा च रावणम् ॥ दर्शयित्वा बलं घोरं वैदेहीमभिवाद्य च ॥
प्रतिगन्तुं मनश्चक्रे पुनर्मध्येन सागरम् ॥ २४ ॥]
ततः स कपिशार्दूलः स्वामिसंदर्शनोत्सुकः ॥ आरुरोह गिरिश्रेष्ठमरिष्टमरिमर्दनः ॥ २५ ॥
तुङ्गपद्मकजुष्टाभिर्नीलाभिर्वनराजिभिः ॥ सोत्तरीयमिवाम्भोदैः शृङ्गान्तरविलम्बिभिः ॥ २६ ॥
बोध्यमानमिव प्रीत्या दिवाकरकरैः [7]शुभैः ॥ उन्मिषन्तमिवोद्भूतैर्लोचनैरिव धातुभिः ॥ २७ ॥
तोयौघनिस्स्वनैर्मन्द्रैः प्राधीतमिव [8]पर्वतम् ॥ प्रगीतमिव विस्पष्टैर्नानाप्रस्रवणस्वनैः ॥ २८ ॥
देवदारुभिरुत्युच्चैरूर्ध्वबाहुमिव स्थितम् ॥ प्रपातजलनिर्घोषैः [9]प्राकृष्टमिव सर्वतः ॥ २९ ॥

कार्यस्य सर्वराक्षसवधपूर्वकमत्प्रापणरूपकार्यस्य । बलोदयः सत्त्वप्रकर्षः । सैन्योत्थापनं वा । ते यशस्यः यशस्करः । नतु रामस्येति भावः ॥ ११ ॥ तर्हि रामस्य किं यशस्करमित्यत्राह—शौरैरिति । तत् स्वपराक्रमेण मन्नयनं । तस्य काकुत्स्थस्य । सदृशं । एतदेव ममाभिलषितं । अन्यथा मे कथं वीरपत्नीत्वमिति भावः ॥ १२ ॥ तच्च त्वदायत्तमेवेत्याह—तद्यथेति ॥ विक्रान्तं विक्रमणं ॥ १३–२४ ॥ अरिष्टं अरिष्टाख्यं ॥ २५ ॥ अथैनं गिरिं चतुर्दशधोत्प्रेक्षते—तुङ्गेत्यादिना ॥ पद्मकाः पद्मवर्णवृक्षाः । परिधानालेख्यस्थानीयतया विशेषणमिति बोध्यं । सपरिधानमिव स्थितमितिशेषः । उत्तरार्धे सोत्तरीयत्वोत्प्रेक्षणात् ॥ २६ ॥ शुभैः तरुणैः । करैः अंशुभिः हस्तैश्च । बोध्यमानमिव स्थितं । तत्र ज्ञापकमाह—उद्भूतैरिति । उद्भूतैः उद्गतैः । लोचनैरिव स्थितैः धातुभिः उन्मिषन्तं पश्यन्तमिव स्थितं ॥ २७ ॥ तोयौघनिःस्वनैः गिरिनदीघोषैः । मन्द्रैः गंभीरैः । प्राधीतमिव प्राध्येतुं प्रवृत्तमिव । आदिकर्मणि कर्तरि क्तः । अधीयानमिवेत्यर्थः । प्रस्रवणस्वनैः पर्वतमूलाद्वहिः प्रवहन्ति जलानि प्रस्रवणानि तेषां स्वनैः । प्रगीतमिव गातुं प्रवृत्तमिव गायन्तमिवेत्यर्थः । आदिकर्मणि कर्तरि क्तः ॥ २८ ॥ ऊर्ध्वबाहुमिवेति तपोविशेष उच्यते । प्रपातजलनिर्घोषैः प्रपाताः भृगवः । " प्रपातस्त्वतटो भृगुः " इत्यमरः । तेषां जलानि

ति० प्रपातजलनिर्घोषैः प्रपातेभ्यः भृगुदेशेभ्यः पतज्जलशब्दैः । प्राकृष्टमिव आरब्धाकोशमिव । सर्वत्रादिकर्मणिकर्तरिक्तः

[पा०] १ क. ग. तत्त्वमेवोपपादय. २ झ. ञ. ट. हनुमान्वीरो. ३ देविहर्यृक्षसैन्यानामित्यादयः शशाङ्केनेवरोहिणीत्यन्ताःश्लोकाः झ. ञ. ट. पाठेषुदृश्यन्ते. ४ च.—ठ. प्रवरैर्युतः. ५ ख. ग. घ. झ. ट. विनिर्जित्यशोकं. ६ राक्षसान्प्रवरानित्यार्धपञ्चकं झ. ञ. ट. पाठेषु दृश्यते. ७ ख. ग. घ. सुखैः. ८ क.—घ. च.—ट. सर्वतः. ९ क. ग. च. छ. झ, ञ, ट. विस्पष्टनाना. १० ग. घ. च. झ. ञ. ट. रुद्भूतैः. ११ घ. प्रघुष्टमिव.

वेपमानमिव श्यामैः कम्पमानैः शरद्धनैः ॥ वेणुभिर्मारुतोद्धूतैः कूजन्तमिव कीचकैः ॥ ३० ॥
निश्श्वसन्तमिवामर्षाद्घोरैराशीविषोत्तमैः ॥ नीहारकृतगम्भीरैर्ध्यायन्तमिव गह्वरैः ॥ ३१ ॥
मेघपादनिभैः पादैः प्रक्रान्तमिव सर्वतः ॥ जृम्भमाणमिवाकाशे शिखरैरभ्रमालिभिः ॥ ३२ ॥
कूटैश्च बहुधाकीर्णैः शोभितं बहुकन्दरैः ॥ सालतालाश्वकर्णैश्च वंशैश्च बहुभिर्वृतम् ॥ ३३ ॥
लतावितानैर्विततैः पुष्पवद्भिरलंकृतम् ॥ नानामृगगणाकीर्णं धातुनिष्यन्दभूषितम् ॥ ३४ ॥
बहुप्रस्रवणोपेतं शिलासंचयसंकटम् ॥ महर्षियक्षगन्धर्वकिन्नरोरगसेवितम् ॥ ३५ ॥
लतापादपसंघातं सिंहाध्युषितकन्दरम् ॥ व्याघ्रसङ्घसमाकीर्णं स्वादुमूलफलद्रुमम् ॥ ३६ ॥
तमारुरोह हनुमान्पर्वतं पवनात्मजः ॥ रामदर्शनशीघ्रेण प्रहर्षेणाभिचोदितः ॥ ३७ ॥
तेन पादतलाक्रान्ता रम्येषु गिरिसानुषु ॥ सघोषाः समशीर्यन्त शिलाश्चूर्णीकृतास्ततः ॥ ३८ ॥
स तमारुह्य शैलेन्द्रं व्यवर्धत महाकपिः ॥ दक्षिणादुत्तरं पारं प्रार्थयँल्लवणाम्भसः ॥ ३९ ॥
अधिरुह्य ततो वीरः पर्वतं पवनात्मजः ॥ ददर्श सागरं भीमं मीनोरगनिषेवितम् ॥ ४० ॥
स मारुत इवाकाशं मारुतस्यात्मसंभवः ॥ प्रपेदे हरिशार्दूलो दक्षिणादुत्तरां दिशम् ॥ ४१ ॥
स तदा पीडितस्तेन कपिना पर्वतोत्तमः ॥ ररास सह तैर्भूतैः प्रविशन्वसुधातलम् ॥
कम्पमानैश्च शिखरैः पतद्भिरपि च द्रुमैः ॥ ४२ ॥
तस्योरुवेगोन्मथिताः पादपाः पुष्पशालिनः ॥ निपेतुर्भूतले रुग्णाः शक्रायुधहता इव ॥ ४३ ॥
कन्दरान्तरसंस्थानां पीडितानां महौजसाम् ॥ सिंहानां निनदो भीमो नभो भिन्दन्स शुश्रुवे ॥ ४४ ॥

तेभ्यः पतन्तो निर्झरा इत्यर्थः । तेषां निर्घोषैः । प्राक्रुष्टमिव आक्रोशन्तमिव । पूर्ववत् क्तः ॥ २९ ॥ शरदि ये घना भवन्ति ते शरद्घनाः । शरत्कालपुष्पिणस्सप्तच्छदादयः तैः शुभ्रीभूतैः । जरया कम्पमानमिव स्थितमित्यर्थः । शरद्घनैरितिपाठे बहुवार्षिकवृक्षैरित्यर्थः । शरवणैरिति वार्थः । तकारान्तोप्यस्ति । शरवणे जातस्य कृपाचार्यस्य शारद्वत इति नामदर्शनात् । कीचकैः कीचकाख्यैर्वेणुभिः । तदाहामरः—" वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः " इति ॥ ३० ॥ आशीविषोत्तमैः निश्श्वसन्तमिव सर्पश्रेष्ठनिश्श्वासैर्निश्श्वसन्तमिव । अमर्षात् हनुमति क्रोधादित्यर्थः । नीहारकृतगम्भीरैः नीहारपूर्णैः गम्भीरैश्च । गह्वरैः गुहाभिः ध्याननिरुद्धेन्द्रियस्थानीयैः । ध्यायन्तमिव स्थितं । निरुद्धेन्द्रियद्वारा ध्यानारूढमिवस्थितमित्यर्थः ॥ ३१ ॥ मेघपादनिभैः मेघावरोहनिभैः । पादैः प्रत्यन्तपर्वतैः । प्रक्रान्तमिव गन्तुमुद्युक्तमिव । पूर्ववत् क्तः । जृम्भमाणमिव गात्रभङ्गं कुर्वाणमिव । अभ्रमालिभिः मेघमालावद्भिः ॥ ३२ ॥ बहुधाकीर्णैः हनुमत्पादस्पर्शेन शिथिलैरित्यर्थः ॥ ३३ ॥ धातुनिष्यन्दः धातुस्रावः ॥ ३४—३५ ॥ लतापादपानां संघातो यस्मिन्निति व्यधिकरणबहुव्रीहिः ॥ ३६ ॥ रामदर्शनशीघ्रेण रामदर्शनत्वरावता ॥ ३७ ॥ चूर्णीकृतास्समशीर्यन्त । यथा चूर्णीकृता भवन्ति तथा समशीर्यन्तेत्यर्थः ॥ ३८ ॥ दक्षिणात् दक्षिणपारात् । प्रार्थयन् गन्तुमिति शेषः ॥ ३९—४० ॥ स हरिशार्दूल इति संबन्धः । पितृतुल्यवेगवत्त्वं सूचयति—मारुतस्येति ॥ ४१ ॥ तैर्भूतैः तत्रत्यजन्तुभिः ॥ ४२ ॥ रुग्णाः शीर्णा इति यावत् । शक्रायुधहताः वज्रहताः ॥ ४३ ॥ नभो भिन्दन् भिन्दन्निव । महत्तायां तात्पर्यं ॥ ४४ ॥

इत्याहुः ॥ २९ ॥ शरद्घनैः सप्तपर्णादिशारदवृक्षसंघैः ॥ ३० ॥ ति० धातुनिष्यन्दैः धातुनिर्गमैर्भूषितं ॥ ३४ ॥ शिलासंचयेन शिलासमूहेन संकटं नीरन्ध्रं ॥ ३५ ॥

[पा०] १ घ. मेघजालनिभैः. २ झ. सालतालैश्चकर्णैश्च. ३ झ. ट. गणैःकीर्णं. ४ क. घ. च. ज.—ट. संबाधं. ५ च.—ट. सिंहाधिष्ठित. ६ च. छ. झ. ञ. ट. व्याघ्रादिभिस्समाकीर्णं. ७ ग. फलोदकं. ८ च.—ट. भीमोरग. ९ छ.—ट. विविधैर्भूतैः, ख. विहृतैः. १० क. घ. झ. ट. प्राविशद्वसुधातलं. ११ च.—ट. भग्नाः. १२ घ. च. झ. ञ. ट. कन्दरोदर.

व्यक्तव्याविद्धुमरागा व्याकुलीकृतभूषणाः ॥ विद्याधर्यः समुत्पेतुः सहसा धरणीधरात् ॥ ४५ ॥
अतिप्रमाणा बलिनो दीप्तजिह्वा महाविषाः ॥ निपीडितशिरोग्रीवा व्यवेष्टन्त महाहयः ॥ ४६ ॥
किन्नरोरगगन्धर्वयक्षविद्याधरास्तदा ॥ पीडितं तं नगवरं त्यक्त्वा गगनमास्थिताः ॥ ४७ ॥
स च भूमिधरः श्रीमान्बलिना तेन पीडितः ॥ सवृक्षशिखरोद्ग्रः प्रविवेश रसातलम् ॥ ४८ ॥
दशयोजनविस्तारस्त्रिंशद्योजनमुच्छ्रितः ॥ धरण्यां समतां यातः स बभूव धराधरः ॥ ४९ ॥
स लिलङ्घयिषुर्वीर्यं रावणं लक्ष्मणाग्रजम् ॥ कल्लोलास्फालवेलान्तमुत्पपात नभो हरिः ॥ ५० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अङ्गदादिभिरुत्प्लवनेन गन्तव्यमार्गनिवेदनपूर्वकमागच्छतो हनुमतो महेन्द्राचलावलोकनेन वानरान् प्रहर्षयति—प्लवगाधिपवाक्यानि ॥ १ ॥ जांबवता तद्वचनेन सत्त्वसमुचितवानरगणान्प्रति हर्षोद्दीपनहेतुना हनुमतः कृतकार्यत्वोक्तिः ॥ २ ॥ ततोमहेन्द्रशिखरमारुह्य हनुमता जांबवदादिवृद्धानिवादपूर्वकं सर्वान्प्रति संप्रहर्षेण सीतादर्शननिवेदनं ॥ ३ ॥ अङ्गदेन हनुमत्पराक्रमपूर्वकं विशेषेण सीतादर्शनवृत्तान्तानुभूत्या सर्वैः सह महेन्द्राचलविशालशिलातलेषूपवेशनम् ॥ ४ ॥

[आहुल्य च महाविगः पक्षवानिव पर्वतः ॥] सचन्द्रकुमुदं रम्यं सार्कवारण्डवं शुभम् ॥
तिष्यश्रवणकादम्बमभ्रशैवालशाद्वलम् ॥ १ ॥
पुनर्वसुमहाङ्गारं लोहिताङ्गमहाग्रहम् ॥ ऐरावतमहाद्वीपं स्वातीहंसविलोलितम् ॥ २ ॥
वातसंघातजातोर्मि चन्द्रांशुशिशिराम्बुमत् ॥ भुजङ्गयक्षगन्धर्वप्रबुद्धकमलोत्पलम् ॥ ३ ॥
हनुमान्मारुतगतिर्महानौरिव सागरम् ॥ अपारमपरिश्रान्तः प्लुप्लुवे गगनार्णवम् ॥ ४ ॥
असंगान इवाकाशं तारापथमिवोल्लिखन् ॥ हरन्निव सनक्षत्रं गगनं सार्कमण्डलम् ॥ ५ ॥

सक्तानि व्याविद्धानि च वसनानि यासां ताः व्यक्तव्याविद्धवसनाः ॥ ४५ ॥ निपीडितशिरोग्रीवाः शिथिलपतितशिलातलैरिति शेषः ॥ ४६—४७ ॥ सवृक्षशिखरोद्ग्रः सवृक्षैः शिखरैः उद्ग्रः श्रेष्ठः ॥ ४८—४९ ॥ कल्लोलास्फालवेलान्तं तरङ्गैरास्फालयमानतीरोपान्तं ॥ ५० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्पञ्चाशः सर्गः ॥ ५६ ॥

उत्पपात नभो हरिरित्युक्तं तल्लक्षणं रूपकेण चतुर्भिर्वर्णयति—सचन्द्रेत्यादिना ॥ कारण्डवः जलकुक्कुटः । कादम्बः कलहंसः "कादम्बः कलहंसस्यात्" इत्यमरः । अभ्रशैवालशाद्वलं मेघस्य शैवालत्वेन पर्यन्तस्थशाद्वलत्वेन च रूपणं ॥ १ ॥ लोहिताङ्गः अङ्गारकः स एव महाग्रहः महाग्राहः यस्य तं । ऐरावतस्याभ्रगातङ्गत्वेना भ्रगामित्वात्तत्र संभवः । विलोलितं अवगाढं ॥ २ ॥ वातसङ्घातजातोर्मय एव चन्द्रांशवः तैः शीतलजलवत् भुजङ्गादीनांकमलोत्पलत्वेनरूपणं तत्तद्वर्णभेदेन ॥ ३ ॥ अत्र गगनस्यार्णवत्वेन चन्द्रादीनां तदवयवकुमुदादित्वेन च रूपणात्सावयवरूपकं । तस्य नौरिवेत्युपमया तिलतण्डुलवत्संसृष्टिः ॥ ४ ॥ अथ तदेवोत्प्रेक्षया वर्णयति—

ति० व्यवेष्टन्त कुण्डलीकृतशरीरा अजायन्त । व्यवेष्टन्तेतिपाठे पीडयाऽलुठन्नित्यर्थः ॥ ४६ ॥ ति० कल्लोलैरास्फाल्यते रुद्यते तादृशवेलान्तःतीरप्रान्तोयस्यतं सागरंलिलङ्घयिषुः नभउत्पपातेतिसंबन्धः ॥ ५० ॥ इतिषट्पञ्चाशःसर्गः ॥ ५६ ॥

स० गगनार्णवमित्यत्रार्णवशब्दः । "असादीयंगुणार्णवं" इत्यनुव्याख्याने [illegible] । तदेवदर्शयन्नतामाश्रित्यानन्तरंपनाथाचेअर्णवमितित्रिभिःसाधुरित्युक्तेः । गगनार्णवःप्रसिद्धार्णवइव । नप्लवन्तं [illegible] अमयेददाति [illegible] अमिंददातिवत्प्लवनं ॥ ४ ॥

[पा०] १ घ. व्यावेष्टन्तमहोरगाः. च. छ. ज. ट. व्यचेष्टन्तमहोरगाः. [illegible]. ज. ट. लङ्घयिषुर्वी.. गिरेः. ४ इदमर्धं ट.—ट. पाठेपुदृश्यते. ५ श. ट. शिलारितं. ज. [illegible]

मारुतस्यात्मजः श्रीमान्कपिर्व्योमचरो महान् ॥ [अपारमपरिश्रान्तश्चाम्बुधिं समगाहत ॥]
हनुमान्मेघजालानि विकर्षन्निव गच्छति ॥ ६ ॥
पाण्डरारुणवर्णानि नीलमाञ्जिष्ठकानि च ॥ हरितारुणवर्णानि महाभ्राणि चकाशिरे ॥ ७ ॥
प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः ॥ अच्छन्नश्च प्रकाशश्च चन्द्रमा इव लक्ष्यते ॥ ८ ॥
विविधाभ्रघनापन्नगोचरो धवलाम्बरः ॥ दृश्यादृश्यतनुर्वीरस्तदा चन्द्रायतेम्बरे ॥ ९ ॥
तार्क्ष्यायमाणो गगने वैभ्राजे वायुनन्दनः ॥ दारयन्मेघवृन्दानि निष्पतंश्च पुनः पुनः ॥ १० ॥
नदन्नादेन महता मेघस्वनमहास्वनः ॥ प्रवरान्राक्षसान्हत्वा नाम विश्राव्य चात्मनः ॥ ११ ॥
आकुलां नगरीं कृत्वा व्यथयित्वा च रावणम् ॥ अर्दयित्वा बलं घोरं वैदेहीमभिवाद्य च ॥
आजगाम महातेजाः पुनर्मध्येन सागरम् ॥ १२ ॥
पर्वतेन्द्रं सुराष्ट्रं च समुपस्पृश्य वीर्यवान् ॥ ज्यामुक्त इव नाराचो महावेगोऽभ्युपागतः ॥ १३ ॥
स किंचिदनुसंप्राप्तः समालोक्य महागिरिम् ॥ महेन्द्रं मेघसंकाशं ननाद हरिपुङ्गवः ॥ १४ ॥
स पूरयामास कपिर्दिशो दश समन्ततः ॥ नदन्नादेन महता मेघस्वनमहास्वनः ॥ १५ ॥
स तं देशमनुप्राप्तः सुहृद्दर्शनलालसः ॥ ननाद हरिशार्दूलो लाङ्गूलं चाप्यकम्पयत् ॥ १६ ॥
तस्य नानद्यमानस्य सुपर्णचरिते पथि ॥ फलतीवास्य घोषेण गगनं साकमण्डलम् ॥ १७ ॥
ये तु तत्रोत्तरे तीरे समुद्रस्य महाबलाः ॥ पूर्वं संविष्ठिताः शूरा वायुपुत्रदिदृक्षवः ॥ १८ ॥
महतो वायुपुत्रस्य तोयदस्येव गर्जितम् ॥ शुश्रुवुस्ते तदा घोषमूरुवेगं हनूमतः ॥ १९ ॥
ते दीनमनसः सर्वे शुश्रुवुः काननौकसः ॥ वानरेन्द्रस्य निर्घोषं पर्जन्यनिनदोपमम् ॥ २० ॥
निशम्य नदतो नादं वानरास्ते समन्ततः ॥ बभूवुरुत्सुकाः सर्वे सुहृद्दर्शनकाङ्क्षिणः ॥ २१ ॥
जाम्बवान्सहरिश्रेष्ठः प्रीतिसंहृष्टमानसः ॥ उपामन्त्र्य हरीन्सर्वानिदं वचनमब्रवीत् ॥ २२ ॥
सर्वथा कृतकार्योसौ हनूमान्नात्र संशयः ॥ नह्यस्याकृतकार्यस्य नाद एवंविधो भवेत् ॥ २३ ॥
तस्य बाहूरुवेगं च निनादं च महात्मनः ॥ निशम्य हरयो हृष्टाः समुत्पेतुस्ततस्ततः ॥ २४ ॥

अस्मगान इवेत्यादिना ॥ ५—६ ॥ व्यक्ताव्यक्तवाचिलेन अरुणशब्दयोः कथंचिदपौनरुक्त्यमुन्नेयं । यद्वा "अरुणःकृष्णलोहितः" इत्यमरशेषः । महाभ्राणिचकाशिरे हनुमत्संपर्कादित्यर्थः । अन्यथा वाजपेयशरद्वर्णनवदभ्रवर्णनस्यासंगतत्वापातः । हनुमतस्तेजस्वीत्यनेन मेघानांनानावर्णत्वापत्तिः सूर्येन्दुसंपर्कवत् ॥ ७—८ ॥ विविधेष्वभ्रघनेषु मेघसंघातेषु । आपन्नगोचरः प्राप्तविषयः । लब्धमार्ग इति यावत् । धवलाम्बरः शुक्लवासाः । दृश्यादृश्यतनुः मेघान्तःप्रवेशनिष्क्रमणाभ्यामितिभावः । चन्द्रायते चन्द्रइवाचरति । तार्क्ष्यइवाचरन् तार्क्ष्यायमाणः । उभयत्र "उपमानादाचारे" "कर्तुः क्यङ् सलोपश्च" इति क्यङ् ॥ ९—१२ ॥ सुनाभं मैनाकं ॥ १३ ॥ किंचिदनुसंप्राप्तः मैनाकात्परं कंचित्प्रदेशं प्राप्तः ॥ १४—१५ ॥ लालसः साभिलाषः । तं देशं सुहृदावाससमीपप्रदेशं ॥ १६ ॥ नानद्यमानस्य पुनःपुनर्भृशं नदत इत्यर्थः । फलतीव दलतीव ॥ १७—१८ ॥ वातनुन्नस्य वातसंघट्टितस्य । घोषं ऊरुवेगमिति ऊरुवेगजन्यं घोषमित्यर्थः ॥ १९ ॥ ते दीनमनस इति । अनिष्टश्रवणशङ्कयेति भावः ॥ २०—२३ ॥ निशम्य ज्ञात्वेत्यर्थः । यद्वा दृष्ट्वेत्यध्याहार्यं । अन्यथा बाहूरुवेगपदानन्वयात् ॥ २४ ॥

रामानु० [पा०] १ ख. सुनाभंसुशब्दं. २ ग. च. निष्कामंश्च. ३ झ. ट. पाठयोर्दृश्यते. ४ झ. घ. ट. सर्वतो. ५ झ. ट. अर्दयित्वा ॥ ५९ ॥ इतिचतुःपञ्चाशत्तमं सर्गं कृत्वा. ६ च.—ट. वेगोऽभ्युपागमत्. ७ च.—ट. सकिंचिदारात्संप्राप्तः. ख. ग. शीघ्रंतदनुसंप्राप्तः. ६ अयंश्लोकः क. घ. पाठयोर्दृश्यते. —घ. दीनवदनाः. १५ ङ. च. छ. झ. ञ. समुत्पेतुर्ययुस्ततः. क. ख. घ.

ते नगाग्रान्नगाग्राणि शिखराच्छिखराणि च ॥ प्रहृष्टाः समपद्यन्त हनूमन्तं दिदृक्षवः ॥ २५ ॥
ते प्रीताः पादपाग्रेषु गृह्य शाखाः सुविष्ठिताः ॥ वासांसीव प्रशाखाश्च समाविध्यन्त वानराः ॥ २६ ॥
गिरिगह्वरसंलीनो यथा गर्जति मारुतः ॥ एवं जगर्ज बलवान्हनूमान्मारुतात्मजः ॥ २७ ॥
तमभ्रघनसंकाशमापतन्तं महाकपिम् ॥ दृष्ट्वा ते वानराः सर्वे तस्थुः प्राञ्जलयस्तदा ॥ २८ ॥
ततस्तु वेगवांस्तस्य गिरेर्गिरिनिभः कपिः ॥ निपपात महेन्द्रस्य शिखरे पादपाकुले ॥ २९ ॥
हर्षेणापूर्यमाणोसौ रम्ये पर्वतनिर्झरे ॥ छिन्नपक्ष इवाकाशात्पपात धरणीधरः ॥ ३० ॥
ततस्ते प्रीतमनसः सर्वे वानरपुङ्गवाः ॥ हनुमन्तं महात्मानं परिवार्योपतस्थिरे ॥ ३१ ॥
परिवार्य च ते सर्वे परां प्रीतिमुपागताः ॥ प्रहृष्टवदनाः सर्वे तमरोगमुपागतम् ॥ ३२ ॥
उपायनानि चादाय मूलानि च फलानि च ॥ प्रत्यर्चयन्हरिश्रेष्ठं हरयो मारुतात्मजम् ॥ ३३ ॥
[विनेदुर्मुदिताः केचित्केचित्किलिकिलास्तथा ॥ हृष्टाः पादपशाखाश्च आनिन्युर्वानरर्षभाः] ॥३४॥
हनुमांस्तु गुरून्वृद्धाञ्जाम्बवत्प्रमुखांस्तदा ॥ कुमारमङ्गदं चैव सोवन्दत महाकपिः ॥ ३५ ॥
स ताभ्यां पूजितः पूज्यः कपिभिश्च प्रसादितः ॥ दृष्ट्वा सीतेति विक्रान्तः संक्षेपेण न्यवेदयत् ॥ ३६ ॥
निषसाद च हस्तेन गृहीत्वा वालिनः सुतम् ॥ रमणीये वनोद्देशे महेन्द्रस्य गिरेस्तदा ॥
हनुमानब्रवीद्धृष्टस्तदा तान्वानरर्षभान् ॥ ३७ ॥
अशोकवनिकासंस्था दृष्टा सा जनकात्मजा ॥ रक्ष्यमाणा सुघोराभी राक्षसीभिरनिन्दिता ॥ ३८ ॥
एकवेणीधरा बाला रामदर्शनलालसा ॥ उपवासपरिश्रान्ता जटिला मलिना कृशा ॥ ३९ ॥
ततो दृष्टेति वचनं महार्थममृतोपमम् ॥ निशम्य मारुतेः सर्वे मुदिता वानरा भवन् ॥ ४० ॥

समुत्पेतुरित्युक्तं विवृणोति—ते नगाग्रादिति ॥ नगाग्रात् वृक्षाग्रात् समपद्यन्त संघीभूताः ॥ २५ ॥ प्रीता इति हेतुगर्भं विशेषणं । यथा मनुष्याः दूरस्थस्वकीयानयनाय वासांसि धून्वन्ति तथा वानराश्चान्योन्याह्वानाय पुष्पितशाखाः गृहीत्वा प्रशाखाः प्राग्रशाखाः । समाविध्यन्त पर्यभ्रामयन् ॥ २६—२७ ॥ अभ्रघनसंकाशं अभ्रसमूहतुल्यं ॥ २८ ॥ निपपात निर्भरमाक्रान्तवान् ॥ २९ ॥ पपातेति अच्छिन्नपक्षस्य पातासंभवाच्छिन्नपक्षइत्युक्तं ॥ ३० —३१ ॥ प्रहृष्टवदनाः प्रसन्नमुखाः । आसन्निति शेषः । अरोगं कुशलिनमित्यर्थः ॥ ३२ ॥ उपायनानि उपहारान् ॥ ३३—३४ ॥ कुमारमङ्गदं चेति । स्वामित्वादिति भावः ॥ ३५—३९ ॥ भवन् अभवन् ।

ति० अभ्रं मेघः । तदुपरियोमेघस्तत्संकाशं । अत्युन्नतमेघसमूहसदृशमित्यर्थमन्ये । स्वजीवनदातृत्वेन स्वपूज्यत्वात्प्राञ्जलयः ॥ २८ ॥ ति० ततोगिरेः अरिष्टाख्याद्गिरेः । सुतःकपिः तस्यमहेन्द्रस्यगिरेःशिखरेनिपपात । अनेनाविश्रममागमनंध्वनितं ॥ २९ ॥ ति० पर्वतनिर्झरे निर्झरप्रवर्तकेशिखरेइत्यर्थमेके । श्रमनिवृत्तये जलएवपतितइत्यन्ये ॥ स० छिन्नपक्षः धरणीधरः पर्वतइवपपात । अनेन मान्द्याभावःसूच्यते । छिदितिभावेसंपदादिक्विबन्तः । छित् छिदा न यस्यौछिन्नौ । नशब्दोनिषेधार्थकः । तस्यछिच्छब्दानन्तरत्वं जनइत्यादिवद्बोध्यं । ततश्च अच्छिन्नौपक्षौयस्यसः । एवंचेत् हर्षापूर्यमाणता विवक्षितस्थलाभोविजयेनागमनंचेतिबहुश्रुतलाभोभवतीतिबोध्यं ॥ ३० ॥ स० परां पूर्वप्रीतितोप्युत्कृष्टां । संतोषातिशयेनसर्वैरितिद्विरुक्तिः । सर्वे रुद्रे । लुप्तोपमेयं । तेदूताः त्रिपुरंहत्वाआयातेरुद्रेइतिवा । " सर्वोह्येषरुद्रः " इतिश्रुतेः । " सर्वःशर्वःकालजरःशिवः " इतिनामनिधानात् ॥ ३२ ॥ ति० शाखानयनं हनूमतआसनार्थं ॥ ३४ ॥ स० ताभ्यां जांबवदङ्गदाभ्यां । यद्यपिजांबवत्प्रमुखान्गुरून्वृद्धानित्युक्त्या तैरितिसुभाषं । तथापि कार्यनिविष्टताद्वयोरेवातिशयेनेताभ्यामित्युपपद्यते । देवीदृष्टेतिपौर्वापर्येदेवी-

[पा०] १ ङ. च. झ. ञ. ट. शाखामवस्थिताः. क. ख. घ. शाखास्सुपुष्पिताः. २ घ. ङ. झ. ञ. ट. वासांसिचप्रकाशानि. क. वासांसिचमहार्हाणिदुधुवुर्वानरर्षभाः. च. छ. ज. वासांसिचमहाप्रीत्या. ३ ङ. झ. ट. वेगवान्वीरो. ४ ङ. झ. ट. तमागतमुपागमन्. ५ ख. प्रत्यपयन्हरिश्रेष्ठं. ६ अर्धश्लोकः ङ. झ. ट. पाठेषुदृश्यते. ७ ग. घ. च.—ट. देवीति. ८ क. संग्रहेण. ९ ङ. झ. ट. नम्रवीत्पृष्टः. घ. नम्रवीद्धृष्टस्समेतान्वानरर्षभान्. १० ख. दीना. ११ क. ग. मारुतेर्वाक्यं

क्ष्वेलन्त्यन्ये नदन्त्यन्ये गर्जन्त्यन्ये महाबलाः ॥ चक्रुः किलिकिलामन्ये प्रतिगर्जन्ति चापरे ॥४१॥
केचिदुच्छ्रितलाङ्गूलाः प्रहृष्टाः कपिकुञ्जराः ॥ अञ्चितायतदीर्घाणि लाङ्गूलानि प्रविव्यधुः ॥ ४२ ॥
अपरे च हनूमन्तं वानरा वारणोपमम् ॥ आप्लुत्य गिरिशृङ्गेभ्यः संस्पृशन्ति स्म हर्षिताः ॥ ४३ ॥
उक्तवाक्यं हनूमन्तमङ्गदस्तमथाब्रवीत् ॥ सर्वेषां हरिवीराणां मध्ये वचनमुत्तमम् ॥ ४४ ॥
सत्त्वे वीर्ये न ते कश्चित्समो वानर विद्यते ॥ यदवप्लुत्य विस्तीर्णं सागरं पुनरागतः ॥ ४५ ॥
[जीवितस्य प्रदाता नस्त्वमेको वानरोत्तम ॥ त्वत्प्रसादात्समेष्यामस्सिद्धार्था राघवेण ह] ॥ ४६ ॥
अहो स्वामिनि ते भक्तिरहो वीर्यमहो धृतिः ॥ दिष्ट्या दृष्टा त्वया देवी रामपत्नी यशस्विनी ॥
दिष्ट्या त्यक्ष्यति काकुत्स्थः शोकं सीतावियोगजम् ॥ ४७ ॥
ततोऽङ्गदं हनूमन्तं जाम्बवन्तं च वानराः ॥ परिवार्य प्रमुदिता भेजिरे विपुलाः शिलाः ॥ ४८ ॥
[उपविष्टा गिरेस्तस्य शिलासु विपुलासु च ॥] श्रोतुकामाः समुद्रस्य लङ्घनं वानरोत्तमाः ॥ ४९ ॥
दर्शनं चापि लङ्कायाः सीताया रावणस्य च ॥ तस्थुः प्राञ्जलयः सर्वे हनुमद्वदनोन्मुखाः ॥ ५० ॥
तस्थौ तत्राङ्गदः श्रीमान्वानरैर्बहुभिर्वृतः ॥ उपास्यमानो विबुधैर्दिवि देवपतिर्यथा ॥ ५१ ॥

हनूमता कीर्तिमता यशस्विना तथाङ्गदेनाङ्गदबद्धबाहुना ॥
मुदा तदाध्यासितमुन्नतं महन्महीधराग्रं ज्वलितं श्रियाऽभवत् ॥ ५२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अष्टपञ्चाशः सर्गः ॥ ५८ ॥

महेन्द्रगिरौ सर्ववानरमध्ये जांबवत्पृष्टेन हनुमता वानरान्प्रति लङ्कागमनकाले मैनाकावलोकनादिस्वपुनरागमनान्तसकलवृत्तान्तनिवेदनम् ॥ १ ॥

ततस्तस्य गिरेः शृङ्गे महेन्द्रस्य महाबलाः ॥ हनुमत्प्रमुखाः प्रीतिं हरयो जग्मुरुत्तमाम् ॥ १ ॥

अनित्यत्वादडभावः ॥ ४० ॥ क्ष्वेलन्ति सिंहनादं कुर्वन्ति । नदन्ति अव्यक्तशब्दं कुर्वन्ति । गर्जन्ति वृषभनादं कुर्वन्ति । किलिकिलां स्वजात्युचितकिलिकिलाशब्दं ॥ ४१ ॥ अञ्चितायतदीर्घाणि अत्र दीर्घपदसन्निधानादायतपदं स्थूलपरं । प्रविव्यधुः लाङ्गूलान्युद्धृत्य भूमावताडयन्नित्यर्थः ॥ ४२ ॥ संस्पृशन्ति आलिङ्गन्तीत्यर्थः ॥ ४३—४४ ॥ अवप्लुत्यविस्तीर्णमित्यङ्गदेतरव्यावृत्तिः । पुनरागत इत्यङ्गदव्यावृत्तिः ॥ ४५—५१ ॥ कीर्तिमतेति हनुमद्विशेषणं । यशस्विनेत्यङ्गदविशेषणं । भृत्यकीर्त्या स्वामिनः कीर्तेः । अन्यथा पौनरुक्त्यात् । यद्वा बुद्धिमत्त्वजन्या कीर्तिः । शौर्यजन्यं यशः ॥ ५२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तपञ्चाशःसर्गः ॥ ५७ ॥

कार्यवृत्तान्तं कार्यविषयवृत्तान्तं सीतादर्शनविषय-

विलोकितानवेतिशङ्कास्यात् सा माहिभूदितिदृष्टेपिपूर्वमुक्तिरितिज्ञेयं ॥ ३६ ॥ ति० आयताञ्चितदीर्घाणि आयामोविस्तारः । स्थौल्यमित्यन्ये ॥ ४२ ॥ इतिसप्तपञ्चाशःसर्गः ॥ ५७ ॥

[पा०] १ ङ. ञ्ज्वेलन्त्यन्ये. २ च. ज. महास्वनाः. ३ च. छ. ज. वानराः. ४ ङ.—ट. आयताञ्चित. ५ ङ. ञ. ट. श्रीमन्तंवानरोत्तमं. च. छ. ज. वानराःप्रशंसिरे. ६ क. ग.—ट. वाचमनुत्तमां. ७ अयंश्लोकः ङ.—ट. पाठेषुदृश्यते. ८ इदमर्धं ङ.—ट. पाठेषुदृश्यते. ९ ख. हनूमद्वचनोन्मुखाः.

[1]प्रीतिमत्सूपविष्टेषु वानरेषु महात्मसु ॥ तं ततः [2]प्रीतिसंहृष्टः [3]प्रीतिमन्तं महाकपिम् ॥
जाम्बवान्कार्यवृत्तान्तमपृच्छदनिलात्मजम् ॥ २ ॥
कथं दृष्टा त्वया देवी कथं वा तत्र वर्तते ॥ तस्यां वा स कथंवृत्तः क्रूरकर्मा दशाननः ॥ ३ ॥
तत्त्वतः सर्वमेतन्नः प्रब्रूहि त्वं महाकपे ॥ [[4]संमार्गिता कथं देवी किंच सा प्रत्यभाषत ॥]
श्रुतार्थाश्चिन्तयिष्यामो भूयः कार्यविनिश्चयम् ॥ ४ ॥
यश्चार्थस्तत्र वक्तव्यो गतैरस्माभिरात्मवान् ॥ रक्षितव्यं च यत्तत्र तद्भवान्व्याकरोतु नः ॥ ५ ॥
स नियुक्तस्ततस्तेन संप्रहृष्टतनूरुहः ॥ प्रणम्य शिरसा देव्यै सीतायै प्रत्यभाषत ॥ ६ ॥
प्रत्यक्षमेव भवतां महेन्द्राग्रात्स्वमाप्लुतः ॥ उदधेर्दक्षिणं पारं काङ्क्षमाणः समाहितः ॥ ७ ॥
गच्छतश्च हि मे घोरं विघ्नरूपमिवाभवत् ॥ काञ्चनं शिखरं दिव्यं पश्यामि सुमनोहरम् ॥ ८ ॥
स्थितं पन्थानमावृत्य मेने विघ्नं च तं नगम् ॥ ९ ॥
उपसंगम्य तं दिव्यं काञ्चनं नगसत्तमम् ॥ कृता मे मनसा बुद्धिर्भेत्तव्योयं मयेति च ॥ १० ॥
प्रहृतं च मया तस्य लाङ्गूलेन महागिरेः ॥ शिखरं सूर्यसंकाशं व्यशीर्यत सहस्रधा ॥ ११ ॥
व्यवसायं च तं बुद्ध्वा स होवाच महागिरिः ॥ पुत्रेति मधुरां वाणीं मनः प्रह्लादयन्निव ॥ १२ ॥
पितृव्यं चापि मां विद्धि सखायं मातरिश्वनः ॥ मैनाक इति विख्यातं निवसन्तं महोदधौ ॥१३॥
पक्षवन्तः पुरा पुत्र बभूवुः पर्वतोत्तमाः ॥ छन्दतः पृथिवीं चेरुर्बाधमानाः समन्ततः ॥ १४ ॥
श्रुत्वा नगानां चरितं महेन्द्रः पाकशासनः ॥ चिच्छेद भगवान्पक्षान्वज्रेणैषां सहस्रशः ॥ १५ ॥
अहं तु [5]मोक्षितस्तस्मात्तव पित्रा महात्मना ॥ मारुतेन तदा वत्स [6]प्रक्षिप्तोस्मि महार्णवे ॥ १६ ॥
रामस्य च मया साह्ये वर्तितव्यमरिन्दम ॥ रामो धर्मभृतां श्रेष्ठो महेन्द्रसमविक्रमः ॥ १७ ॥
एतच्छ्रुत्वा वचस्तस्य मैनाकस्य महात्मनः ॥ कार्यमावेद्य तु गिरेरुद्यतं च मनो मम ॥ १८ ॥
तेन चाहमनुज्ञातो मैनाकेन महात्मना ॥ स चाप्यन्तर्हितः शैलो मानुषेण वपुष्मता ॥
शरीरेण महाशैलः शैलेन च महोदधौ ॥ १९ ॥

वृत्तान्तं ॥ २ ॥ कथं केन प्रकारेण । कथंवृत्तः कीदृग्व्यापारः ॥ ३ ॥ तत्त्वकथनस्य प्रयोजनमाह—श्रुतार्था इत्यादि ॥ ४ ॥ तत्र रामसन्निधौ । योऽर्थो वक्तव्यः वक्तुमर्हः । यच्च रक्षितव्यं गोप्तव्यं तत् । आत्मवान् बुद्धिमान् । भवान्व्याकरोतु ॥ ५—६ ॥ प्रत्यक्षमेवेति इदं न वक्तव्यमेवेति भावः । आप्लुतः आप्लुतोस्मि । पारं गन्तुमिति शेषः । समाहितः एकाग्रः । इत्येतद्भवतां प्रत्यक्षमेवेति संबन्धः ॥ ७ ॥ विघ्नरूपमिव । वस्तुतो न तथेतिभावः । पश्यामीत्यादौ व्यत्ययेन लट् । शिखरं विघ्नरूपमिवाभवत् तत् पश्यामीति योजना ॥ ८ ॥ मेने इति लिट्युत्तमपुरुषैकवचनं । परोक्षत्वाद्यभावेपि च्छान्दसं । अमनिषीत्यर्थः ॥ ९ ॥ गमनदशायामुरसा पातयामासेति सूचितं विवृणोति—भेत्तव्योयमित्यादिना ॥१०—१२॥ पितृव्यं चेति । पितृव्यत्वे हेतुमाह—सखायमिति । पितृसखत्वात् पितृव्यत्वव्यपदेश इत्यर्थः ॥ १३ ॥ छन्दतः यथेच्छं ॥ १४—१५ ॥ मोक्षणप्रकारमाह—प्रक्षिप्तोस्मि महार्णव इति ॥१६॥ साह्ये साहाय्ये । साहाय्यकरणे हेतुमाह—रामो धर्मभृतां श्रेष्ठ इति ॥१७॥ उद्यतं उद्युक्तं ॥ १८ ॥ अनुज्ञातः

ति० सशैलोमानुषेणवपुष्मता प्रशस्तेनशरीरेण । महाशैलोन्तर्हितः । शैलेनशिलारूपेणचमहोदधावन्तर्हितइत्यन्वयः ॥ स० शैलः मैनाकः । मानुषेणशरीरेणान्तर्हितोभूत् । ततश्चमहाशैलः वपुष्मतामानुषदेहान्तर्धानाधिकरणेन । शैलेन पर्वतरूपदेहेन

[पा०] १ इदमर्धं क.—ट. पाठेषुदृश्यते. २ ङ. छ. ज. झ. ट. प्रतिसंहृष्टः. ३ ङ. च. ज.—ट. प्रीतियुक्तं. ४ इदमर्धं ङ.—ट. पाठेषुदृश्यते. ५ ख. ङ. च.—ट. नमस्यञ्छिरसा. ६ ङ. झ. ट. [illegible]. ७ ङ.—ट. मोचितस्तस्मात्. ८ क. झ. ट. प्रक्षिप्तोवरुणालये. घ. प्रक्षिप्तोस्मिमहोदधौ. ९ क. ख. ग. ङ.—ट. [illegible]स्य. १० ङ. झ. ट. रुद्धतंवै.

उत्तमं जवमास्थाय [1]शेषं पन्थानमास्थितः ॥ ततोऽहं सुचिरं कालं वेगेनाभ्यगमं पथि ॥ २० ॥
ततः पश्याम्यहं देवीं सुरसां नागमातरम् ॥ समुद्रमध्ये सा देवी [2]वचनं मामभाषत ॥ २१ ॥
मम भक्षः प्रदिष्टस्त्वममरैर्हरिसत्तम ॥ [3]अतस्त्वां भक्षयिष्यामि विहितस्[4]त्वं चिरस्य मे ॥ २२ ॥
एवमुक्तः सुरसया प्राञ्जलिः प्रणतः स्थितः ॥ विवर्[5]णवदनो भूत्वा वाक्यं चेदमुदीरयन् ॥ २३ ॥
रामो दाशरथिः श्रीमान्प्रविष्टो दण्डकावनम् ॥ लक्ष्मणेन सह भ्रात्रा सीत[6]या च परन्तपः ॥ २४ ॥
तस्य सीता हृता भार्या रावणेन दुरात्मना ॥ तस्याः सकाशं दूतोऽहं गमिष्ये रामशासनात् ॥
कर्तुमर्हसि रामस्य साहाय्यं विषये सती ॥ २५ ॥
अथवा मैथिलीं दृष्ट्वा रामं चाक्लिष्टकारिणम् ॥ आगमिष्यामि ते वक्त्रं सत्यं प्रतिशृणोमि ते ॥ २६ ॥
एवमुक्ता मया सा तु सुरसा कामरूपिणी ॥ अब्रवीन्नातिवर्तेत कश्चिदेष वरो मम ॥ २७ ॥
एवमुक्तः सुरसया दशयोजनमायतः ॥ [7]तत[8]ोऽर्धगुणविस्तारो बभूवाहं क्षणेन तु ॥ २८ ॥
[9]मत्प्रमाणानुरूपं च व्यादितं तु मुखं तया ॥ तदृष्ट्वा व्यादितं चास्यं ह्रस्वं ह्यकरवं [10]वपुः ॥ २९ ॥
तस्मिन्मुहूर्ते च पुनर्बभूवाङ्गुष्ठ[11]मात्रकः ॥ अभिपत्याशु तद्वक्त्रं निर्गतोऽहं ततः क्षणात् ॥ ३० ॥
अब्रवीत्सुरसा देवी स्वेन रूपेण मां पुनः ॥ [12]अर्थसिद्ध्यै हरिश्रेष्ठ गच्छ सौम्य यथासुखम् ॥ ३१ ॥
समानय च वैदेहीं राघवेण महात्मना ॥ सुखी भव महाबाहो प्रीताऽस्मि तव वानर ॥ ३२ ॥
ततोऽहं साधु साध्वीति सर्वभूतैः प्रशंसितः ॥ ततोन्तरिक्षं विपुलं प्लुतोऽहं गरुडो यथा ॥ ३३ ॥
छाया मे निगृहीता च न च पश्यामि किंचन ॥ ३४ ॥
सोहं विगतवेगस्तु दिशो दश विलोकयन् ॥ न किंचित्तत्र पश्यामि येन मेऽर्थ[13]हृता गतिः ॥ ३५ ॥
ततो मे बुद्धिरुत्पन्ना किं नाम गगने मम ॥ ईदृशो विघ्न उत्पन्नो रूपं यत्र न दृश्यते ॥ ३६ ॥
अधोभागे न मे दृष्टिः शो[14]चता पातिता [15]मया ॥ ततोऽद्राक्षमहं भीमां राक्षसीं सलिलेशयाम् ॥ ३७ ॥
ग्रहस्य च महानादमुक्तोऽहं भीमया तया ॥ अवस्थितमसंभ्रान्तमिदं वाक्यमशोभनम् ॥ ३८ ॥
क्वासि गन्ता महाकाय क्षुधिताया ममेप्सितः ॥ भक्षः प्रीणय मे देहं चिरमाहारवर्जितम् ॥ ३९ ॥

अस्मीति शेषः । वपुष्मता पुष्कलवपुषा । मानुषेणशरीरेणान्तर्हितः । शैलेन तु शरीरेण महोदधौ सागरोपरि स्थित इति शेषः । "स वै दत्तवरः शैलोबभूवावस्थितस्तथा" इति प्रथमसर्गोक्तेः । प्रतिप्रयाणे च—"पर्वतेन्द्रं सुनाभं च समुपस्पृश्य वीर्यवान्" इत्युक्तं । "हिरण्यनाभं शैलेन्द्रं काञ्चनं पश्य मैथिलि" इति रामेण चोक्तं ॥ १९—२४ ॥ विषये सती स्वराज्ये वसन्ती ॥ २५–२७ ॥ अर्धगुणविस्तारः । अत्रार्धशब्दः एकदेशवाची । किंचिदधिकविस्तारोभवमित्यर्थः । एवमेवार्थः । प्रथमसर्गोक्तशतयोजनविस्तारस्तु विरुद्धः तद्ग्रन्थःकल्पितश्चेत्युक्तं ॥ २८ ॥ व्यादितं व्यात्तं ॥ २९ ॥ ह्रस्वत्वं विशेषयति—अङ्गुष्ठमात्रक इति ॥ ३०–३१ ॥ समानय संयोजय ॥ ३२ ॥ साधु साध्वीति दीर्घश्छान्दसः ॥ ३३–३६ ॥ सलिलेशयां सलिले स्थितां ॥ ३७ ॥ अवस्थितं दृढभूतं । असंभ्रान्तं अव्यग्रं ॥ ३८–३९ ॥

महोदधावन्तर्हितोऽभूत् ॥ १९ ॥ **ती०** ततोर्धगुणविस्तारः ततोदशयोजनात्अर्धस्यपञ्चयोजनस्यगुणः आवृत्तिः तद्विस्तारोदशयोजनविस्तारः । प्रथमसर्गेदशयोजनविस्तारोक्त्यानुगुण्येनैवंव्याख्यातं ॥ २८ ॥ **शि०** साध्वीतिदीर्घआर्षइतिभट्टाः । विस्मयार्थंकार-

[पा०] १ ङ. च. ज.—ट. शेषमध्वानं. २ ङ. झ. ट. वचनंचेदमब्रवीत्. ३ ग. ङ.—ट. ततस्त्वां. ४ ङ. झ. ट. स्त्वंहिमेसुरैः. ५ ग. घ. च. छ. ज. ञ. विषण्णवदनो. ६ ख. सीतयाचापिभार्यया. ७ ग. घ. च. छ. ज. ञ. ततोद्विगुण. ८ ङ.—ट. मत्प्रमाणाधिकंचैव. ९ ख. च.—ट. पुनः. १० ङ.—ट. संमितः. ११ घ. अथसाव्याहरच्छ्रेष्ठा. १२ ङ. च. ज.—ट. मेविहता. १३ ङ. झ. ञ. ट. शोचतः. १४ च, छ, ज. तदा.

बाढमित्येव तां वाणीं प्रत्यगृह्णामहं ततः ॥ आस्यप्रमाणादधिकं तस्याः कायमपूरयम् ॥ ४० ॥
तस्याश्चास्यं महद्भीमं वर्धते मम भक्षणे ॥ न च मां साधु बुबुधे मम वा निकृतं कृतम् ॥ ४१ ॥
ततोऽहं विपुलं रूपं संक्षिप्य निमिषान्तरात् ॥ तस्या हृदयमादाय प्रपतामि नभःस्थलम् ॥ ४२ ॥
सा विसृष्टभुजा भीमा पपात लवणाम्भसि ॥ मया पर्वतसंकाशा निकृत्तहृदया सती ॥ ४३ ॥
शृणोमि खेगतानां च सिद्धानां चारणैः सह ॥ राक्षसी सिंहिका भीमा क्षिप्रं हनुमता हता ॥४४॥
तां हत्वा पुनरेवाहं कृत्यमात्ययिकं स्मरन् ॥ गत्वा चाहं महाध्वानं पश्यामि नगमण्डितम् ॥४५॥
दक्षिणं तीरमुदधेर्लङ्का यत्र च सा पुरी ॥ अस्तं दिनकरे याते रक्षसां निलयं पुरम् ॥
प्रविष्टोऽहमविज्ञातो रक्षोभिर्भीमविक्रमैः ॥ ४६ ॥
तत्र प्रविशतश्चापि कल्पान्तघनसन्निभा ॥ अट्टहासं विमुञ्चन्ती नारी काऽप्युत्थिता पुरः ॥ ४७ ॥
जिघांसन्तीं ततस्तां तु ज्वलदग्निशिरोरुहाम् ॥ सव्यमुष्टिप्रहारेण पराजित्य सुभैरवाम् ॥
प्रदोषकाले प्रविशं भीतयाऽहं तयोदितः ॥ ४८ ॥
अहं लङ्कापुरी वीरैं निर्जिता विक्रमेण ते ॥ यस्मात्तस्माद्विजेतासि सर्वरक्षांस्यशेषतः ॥ ४९ ॥
तत्राहं सर्वरात्रं तु विचिन्वञ्जनकात्मजाम् ॥ रावणान्तःपुरगतो न चापश्यं सुमध्यमाम् ॥ ५० ॥
ततः सीतामपश्यंस्तु रावणस्य निवेशने ॥ शोकसागरमासाद्य न पारमुपलक्षये ॥ ५१ ॥
शोचता च मया दृष्टं प्राकारेण समावृतम् ॥ काञ्चनेन विकृष्टेन गृहोपवनमुत्तमम् ॥ ५२ ॥
स प्राकारमवप्लुत्य पश्यामि बहुपादपम् ॥ ५३ ॥
अशोकवनिकामध्ये शिंशुपापादपो महान् ॥ तमारुह्य च पश्यामि काञ्चनं कदलीवनम् ॥ ५४ ॥
अदूरे शिंशुपावृक्षात्पश्यामि वरवर्णिनीम् ॥ श्यामां कमलपत्राक्षीमुपवासकृशाननाम् ॥ ५५ ॥
तदेकवाससंवीतां रजोध्वस्तशिरोरुहाम् ॥ शोकसन्तापदीनाङ्गीं सीतां भर्तृहिते स्थिताम् ॥ ५६ ॥

तस्याः आस्यप्रमाणादधिकं यथा तथा कायं आत्मदेहं। अपूरयं अवर्धयं । मयि वृद्धे साप्यवर्धिष्टेत्यर्थः । अयं कामरूपीति मां । साधु सम्यक् । न बुबुधे न ज्ञातवती । मम कृतं निकृतं मया कृतां निकृतिं वा नबुबुधे ॥ ४०–४१ ॥ निकृतिमेव दर्शयति— ततोहमिति ॥ ४२ ॥ विसृष्टभुजा विसृष्टसन्धिकभुजा ॥ ४३ ॥ हतेत्यनन्तरमितिकरणंबोध्यं ॥४४॥ कृत्यमात्ययिकं स्मरन् प्राणान्तिकं तत्कर्म विचिन्तयन्नित्यर्थः ॥ ४७ ॥ भीतया तया नार्या । अशेषत इत्यनन्तरमितिकरणं द्रष्टव्यं ॥ ४८–४९ ॥ सर्वरात्रं सर्वां रात्रिं । " अहः सर्व—" इत्यादिना समासान्तोच् । अत्यन्तसंयोगे द्वितीया । तत्र लङ्कायां । विचिन्वन् अनन्तरं रावणान्तःपुरमपि गतःसन् सुमध्यमां नापश्यं ॥ ५०—५१ ॥ विकृष्टेन विप्रकृष्टेन । अतिदीर्घेणेति यावत् ॥ ५२ ॥ बहुपादपं अनेकपादपप्रमाणमिति प्राकारविशेषणं ॥ ५३ ॥ शिंशुपापादपः अस्तीतिशेषः ॥ ५४ ॥ शिंशुपावृक्षात् शिंशुपावृक्षस्य । श्यामां यौवनमध्यस्थां । तदेकवाससंवीतां येन वाससा हृता तेनैकवाससा संवीतां । यद्वा तेन तत्कालदृष्टेन पूर्वदृष्टेन एकेन वाससा संवीतां । वेषान्तरनिस्पृहामित्यर्थः । मानसिकत्वकायिकत्व-

---

प्रश्लेषेतुनार्षकल्पना ॥ स० साध्वी अहंप्रीतास्मीत्यन्वयोवा ॥३३॥ ती०तद्विकृतंकिमित्यतआह—ततोहमिति । हृदयमादाय हृदयंनिकृत्य ।प्रपतामि प्रापतं॥४२॥ति० आत्ययिकं जातकालविलंबं॥स० महद्ध्वानं महताकालेन गम्यमध्वानं ॥४५॥ति०सर्वरात्रं

[पा०] १ ख. वर्धितश्चास्मि सुमहांस्तस्याः. २ घ. ममापिविकृतं. क. मयाचविकृतं. ३ ङ. झ. ट. खगतानांचवाचः सौम्यामहात्मनां. ४ क. ख. घ. च.—ट. गत्वाचमहद्ध्वानं. ५ ङ. झ. ट. निलयंपुरीं. घ. प्राविशंपुरं. ६ ङ. च. ज. झ. घनसप्रभा. ७ ख. भीमा. ८ ग. तत्राहमर्धरात्रेतु. क. तत्राहमर्धरात्रंतु. ९ ग. ङ.—ट. प्राकारेणाभिसंवृतं. १० घ. च. विचित्रेण. ११ क.—ट. अदूराच्छिंशुपा,

राक्षसीभिर्विरूपाभिः क्रूराभिरभिसंवृताम् ॥ मांसशोणितभक्षाभिर्व्याघ्रीभिर्हरिणीमिव ॥ ५७ ॥
सा मया राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः ॥ एकवेणीधरा दीना भर्तृचिन्तापरायणा ॥ ५८ ॥
भूमिशय्या विवर्णाङ्गी पद्मिनीव हिमागमे ॥ रावणाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया ॥
कथंचिन्मृगशावाक्षी तूर्णमासादिता मया ॥ ५९ ॥
तां दृष्ट्वा तादृशीं नारीं रामपत्नीं यशस्विनीम् ॥ तत्रैव शिंशुपावृक्षे पश्यन्नहमवस्थितः ॥ ६० ॥
ततो हलहलाशब्दं काञ्चीनूपुरमिश्रितम् ॥ शृणोम्यधिकगम्भीरं रावणस्य निवेशने ॥ ६१ ॥
ततोऽहं परमोद्विग्नः स्वं रूपं प्रतिसंहरन् ॥ अहं तु शिंशुपावृक्षे पक्षीव गहने स्थितः ॥ ६२ ॥
ततो रावणदाराश्च रावणश्च महाबलः ॥ तं देशं समनुप्राप्ता यत्र सीताऽभवत्स्थिता ॥ ६३ ॥
तां दृष्ट्वाऽथ वरारोहा सीता राक्षोमहाबलम् ॥ संकुच्योरू स्तनौ पीनौ बाहुभ्यां परिरभ्य च ॥ ६४ ॥
वित्रस्तां परमोद्विग्नां वीक्षमाणां ततस्ततः ॥ त्राणं किंचिदपश्यन्तीं वेपमानां तपस्विनीम् ॥ ६५ ॥
तामुवाच दशग्रीवः सीतां परमदुःखिताम् ॥ अवाक्छिराः प्रपतितो बहुमन्यस्व मामिति ॥ ६६ ॥
यदि चेच्चं तु दर्पान्मां नाभिनन्दसि गर्विते ॥ द्वौ मासावन्तरं सीते पास्यामि रुधिरं तव ॥६७॥
एतच्छ्रुत्वा वचस्तस्य रावणस्य दुरात्मनः ॥ उवाच परमक्रुद्धा सीता वचनमुत्तमम् ॥ ६८ ॥
राक्षसाधम रामस्य भार्यामिततेजसः ॥ इक्ष्वाकुकुलनाथस्य स्नुषां दशरथस्य च ॥
अवाच्यं वदतो जिह्वा कथं न पतिता तव ॥ ६९ ॥
किंचिद्वीर्यं तवानार्य यो मां भर्तुरसंनिधौ ॥ अपहृत्यागतः पाप तेनादृष्टो महात्मना ॥ ७० ॥
न त्वं रामस्य सदृशो दास्येऽप्यस्य न युज्यसे ॥ यज्ञीयः सत्यवादी च रणश्लाघी च राघवः ॥७१॥
जानक्या परुषं वाक्यमेवमुक्तो दशाननः ॥ जज्वाल सहसा कोपाच्चितास्थ इव पावकः ॥ ७२ ॥
विवर्त्य नयने क्रूरे मुष्टिमुद्यम्य दक्षिणम् ॥ मैथिलीं हन्तुमारब्धः स्त्रीभिर्हा हा कृतं तदा ॥ ७३ ॥
स्त्रीणां मध्यात्समुत्पत्य तस्य भार्या दुरात्मनः ॥ वरा मण्डोदरीनाम तया स प्रतिषेधितः ॥ ७४ ॥

भेदेन शोकसंतापयोर्भेदः ॥ ५५—५७ ॥ सामयेति आमयः खेदः तेन सह वर्तत इति सामया । मर्तव्ये मरणे । " कृत्यल्युटो बहुलं " इति साधुः ॥ ५८—५९ ॥ पश्यन् परामृशन् ॥ ६०—६१ ॥ गहने पर्णगूढप्रदेशे । पर्णघने निलीन इत्यधस्तादप्युक्तेः ॥ ६२—६४ ॥ परमोद्विग्नां अतीवोद्भ्रान्तहृदयां । ततस्ततः वीक्षमाणां नानादिक्षु वीक्षमाणां । त्राणमित्यनुषज्यते ॥ ६५ ॥ अवाक्छिराः अवनतमूर्धा । प्रपतितः भूमाविति शेषः ॥ ६६ ॥ द्वौ मासौ अन्तरमवधिः । ततः पास्यामीति योज्यं ॥ ६७—६९ ॥ किंचिद्वीर्यं कुत इत्यत्राह—यो मामिति । भर्तुरसंनिधौ तेन भर्त्रा अदृष्टःसन् यो मामपहृत्यागतः तस्य तव किंचिद्वीर्यमिति योज्यं ॥ ७०—७१ ॥ घोरत्वसिद्धये चितास्थइत्युक्तं ॥ ७२ ॥ आरब्धः रावण इति शेषः । हा हा कृतं हा हेत्येतत्कृतं ॥ ७३ ॥ समुत्पत्य रावणसमीपं गतेति शेषः । मण्डोदरी मण्डनभूतोदरी । " मडि भूषायाम् " इत्यस्माद्धातोः पचाद्यच् । मन्दोदरी

सर्वारात्रौ । अल्पशेषायांरात्रावशोकवनिकायादर्शनादेवमुक्तिः ॥ ५० ॥ रामानु० परिरभ्य वितत्रासेतिशेषः ॥ ६४ ॥ ति० सादृश्यसंभावनापिदूरापास्तेत्याह—दास्येपीति। स० अस्यदास्ये दासत्वे । नयुज्यसे युक्तोनभवसि । अपिना मूलरूपेपि द्वार्बहिरवस्थानमेवनान्तर्दास्येयोग्यइतिसूचयति ॥ ७१ ॥ ति० चितास्थपावकत्वेनास्पृश्यतासूचिता ॥ ७२ ॥ ति० यद्वा

[पा०] १ क. ङ.—ट. हरिणींयथा. २ क.—घ. च. छ. ज. ञ. रामपत्नीमनिन्दितां. ३ ग. च. छ. ज. ञ. सहसोद्विग्नः. ४ ग. च.—ट. स्वरूपंप्रत्यसंहरं. ५ ख. देशमभिसंप्राप्ता. ६ क. ख. घ. ङ. च. ज.—ट. तंदृष्ट्वाथ. ७ क. ख. घ. ङ. च. ज.—ट. रक्षोगणेश्वरं. ८ क. ङ. ञ. ञ. ट. वीक्षमाणामितस्ततः. ९ ख. मनस्विनीं. १० ङ. ञ. ट. द्विमासानन्तरं. ११ ङ. ञ. ञ. ट. इक्ष्वाकुवंश. १२ घ.—ट. अजेयःसत्यवाञ्छूरो. ग. धार्मिकःसत्यवादीच.

उक्तश्च मधुरां वाणीं तया स मदनार्दितः ॥ सीतया तव किं कार्यं महेन्द्रसमविक्रम ॥
[[1]मया सह रमस्वाद्य मद्विशिष्टा न जानकी] ॥ ७५ ॥
देवगन्धर्वकन्याभिर्यक्षकन्याभिरेव च ॥ सार्धं प्रभो [2]रमस्वेह सीतया किं करिष्यसि ॥ ७६ ॥
ततस्ताभिः समेताभिर्नारीभिः स महाबलः ॥ [3]प्रसाद्य सहसा नीतो भवनं स्वं निशाचरः ॥७७॥
याते तस्मिन्दशग्रीवे राक्षस्यो विकृताननाः ॥ सीतां निर्भर्त्सयामासुर्वाक्यैः क्रूरैः सुदारुणैः ॥७८॥
तृणवद्धारितं तासां गणयामास जानकी ॥ गर्जितं च तदा तासां सीतां प्राप्य निरर्थकम् ॥७९॥
वृथागर्जितनिश्चेष्टा [4]राक्षस्यः पिशिताशनाः ॥ रावणाय शशंसुस्ताः सीता[5]ध्यवसितं महत् ॥ ८० ॥
ततस्ताः सहिताः सर्वा विहताशा निरुद्यमाः ॥ [6]परिक्षिप्य समन्तात्तां निद्रावशमुपागताः ॥ ८१ ॥
तासु चैव प्रसुप्तासु सीता भर्तृहिते रता ॥ विलप्य करुणं दीना [7]प्रशुशोच सुदुःखिता ॥ ८२ ॥
तासां मध्यात्समुत्थाय त्रिजटा वाक्यमब्रवीत् ॥ ८३ ॥
आत्मानं [8]खादत क्षिप्रं न सीतां [9]विनशिष्यति ॥ [10]जनकस्यात्मजा साध्वी स्नुषा दशरथस्य च ॥८४॥
स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः ॥ [11]राक्षसां च [12]विनाशाय भर्तुरस्या जयाय च ॥ ८५ ॥
[13]अलमस्मात्परित्रातुं राघवाद्राक्षसीगणम् ॥ अभियाचाम वैदेहीमेतद्धि मम रोचते ॥ ८६ ॥
[14]यस्या ह्येवंविधः स्वप्नो दुःखितायाः प्रदृश्यते ॥ सा दुःखैर्विविधैर्मुक्ता [15]सुखमाप्नोत्यनुत्तमम् ॥८७॥
प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा ॥ [[16]अलमेषा परित्रातुं राक्षस्यो महतो भयात्] ॥ ८८॥
ततः सा ह्रीमती बाला भर्तुर्विजयहर्षिता ॥ अवोचद्यदि तत्तथ्यं भवेयं शरणं हि वः ॥ ८९ ॥
तां चाहं तादृशीं दृष्ट्वा सीताया दारुणां दशाम् ॥ चिन्तयामास वि[17]क्रान्तो न च मे निर्वृतं मनः ॥९०॥

वा । दडयोरभेदः । दम्भो दाडिममित्यादिवत् । यद्वा मन्दत्वं चाल्पत्वं । " मूढाल्पापटुनिर्भाग्या मन्दा " इत्यमरः । सूक्ष्मोदरीत्यर्थः । मन्दा स्थूलपिपीलिकेत्याचक्षते । तस्या इव कृशमस्या उदरमित्यर्थः । ननु पूर्वं धान्यमालिन्या प्रतिषिद्ध इत्युक्तं । संप्रति मण्डोदर्येत्युच्यते । विप्रतिषिद्धमिदं । मैवं । उभाभ्यामपि प्रतिषिद्धत्वेनान्यतरोक्तावविरोधात् । मण्डोदर्यादिनामपरिज्ञानं च हनुमतस्तदीयव्यवहारात् ॥ ७४—७६ ॥ ताभिः देवकन्याभिः । अनेन मण्डोदर्यादिवदन्यासामपि निवारयितृत्वमुक्तं ॥ ७७ ॥ क्रूरैः क्रूरशब्दैः । सुदारुणैः अर्थतोपि क्रूरैः ॥ ७८ ॥ तृणवत् गणयामासेत्यन्वयः ॥७९॥ वृथागर्जितनिश्चेष्टाः वृथागर्जितेन निर्व्यापाराः ॥ ८० ॥ ततस्ताइति । तूष्णीं रक्षतेति रावणोक्ता इति शेषः । परिक्षिप्य परिवार्य ॥ ८१ ॥ सुदुःखिता प्रशुशोच । उत्तरोत्तरं दुःखितवतीत्यर्थः ॥ ८२—८५ ॥ अलं शक्ता । " अलं भूषणपर्याप्तिशक्तिवारणवाचकं " इत्यमरः । परित्रातुं एषेति शेषः ॥ ८६—८७ ॥ अपराधिजनप्राणत्राणे हेतुमाह—प्रणिपातेति ॥ ८८ ॥ ततः त्रिजटावाक्यानन्तरं । भर्तुर्विजयहर्षिता त्रिजटाकथितस्वप्नसूचितरामविजयहर्षिता । तत् त्रिजटास्वप्नवाक्यं । शरणं हि व इत्यत्रेतिकरणं द्रष्टव्यं ॥८९॥ नच

मन्दोदर्याएवनामान्तरंधान्यमालिनीत्युक्तं ॥ ७४ ॥ स० राक्षसीगणं राघवात्परित्रातुं अलं समर्था । प्रसादितासीतेति शेषः । तस्मादभियाचाम प्रार्थयाम ॥ ८६ ॥ शि० ननुस्वप्नस्यमिथ्यात्वात्किंतद्दर्शनेनसीताभर्तृविजयादीस्यतआह—यदीति । दुःखितायाएवंविधःस्वप्नोयदिदृश्यते तर्हि सादुःखिता दुःखैर्विमुक्तासतीसुखमाप्नोति । एतेन स्वप्नस्यमिथ्यात्वेपितद्दर्शनजनितफल·

[पा०] १ इदमर्धं ङ. च. ज.—ट. पाठेषुदृश्यते. २ क. ङ. झ. ट. रमस्वेति. ३ ङ. झ. ट. उत्थाप्य. ४ ङ. झ. ट. तथा. ५ घ. ट. राक्षस्योविकृताननाः. ६ क.—घ. ङ. झ. ट. सीताव्यवसितं. ७ ङ. च. ज.—ट. परिक्ष्विश्य. ८ ग. प्ररुरोद. घ. प्रचुक्रोश. ९ क. ख. खादतानार्यानसीतांभक्षयिष्यत. १० ङ. झ. ट. सीतामसितेक्षणां. ११ ङ. झ. ट. जनकस्यात्मजांसाध्वींस्नुषांदशरथस्यच. १२ क. राक्षसानांविनाशायराघवस्यजयायच. घ. राक्षसानामभावाय. १३ क. अलमेषापरित्रातुं. १४ ग. ङ.—ट. यदिह्येवंविधः. १५ घ. सुखंप्राप्नोत्यनुत्तमं. १६ इदमर्धं ङ.—ट. पाठेषुदृश्यते. १७ ङ. झ. ट. विश्रान्तो.

संभाषणार्थं च मया जानक्याश्चिन्तितो विधिः॥ इक्ष्वाकूणां हि वंशस्तु ततो मम पुरस्कृतः॥ ९१॥
श्रुत्वा तु गदितां वाचं राजर्षिगणपूजिताम्॥ प्रत्यभाषत मां देवी बाष्पैः पिहितलोचना॥ ९२॥
कस्त्वं केन कथं चेह प्राप्तो वानरपुङ्गव॥ का च रामेण ते प्रीतिस्तन्मे शंसितुमर्हसि॥ ९३॥
तस्यास्तद्वचनं श्रुत्वा ह्यहमप्यब्रवं वचः॥ ९४॥
देवि रामस्य भर्तुस्ते सहायो भीमविक्रमः॥ सुग्रीवो नाम विक्रान्तो वानरेन्द्रो महाबलः॥ ९५॥
तस्य मां विद्धि भृत्यं त्वं हनुमन्तमिहागतम्॥ भर्त्राहं प्रेषितस्तुभ्यं रामेणाक्लिष्टकर्मणा॥ ९६॥
इदं च पुरुषव्याघ्रः श्रीमान्दाशरथिः स्वयम्॥ अङ्गुलीयमभिज्ञानमदात्तुभ्यं यशस्विनि॥ ९७॥
तदिच्छामि त्वयाऽऽज्ञप्तं देवि किं करवाण्यहम्॥ रामलक्ष्मणयोः पार्श्वं नयामि त्वां किमुत्तरं॥९८॥
एतच्छ्रुत्वा विदित्वा च सीता जनकनन्दिनी॥ आह रावणमुत्साद्य राघवो मां नयत्विति॥९९॥
प्रणम्य शिरसा देवीमहमार्यामनिन्दिताम्॥ राघवस्य मनोह्लादमभिज्ञानमयाचिषम्॥ १००॥
अथ मामब्रवीत्सीता गृह्यतामयमुत्तमः॥ मणिर्वैन महाबाहू रामस्त्वां बहुमन्यते॥ १०१॥
इत्युक्त्वा तु वरारोहा मणिप्रवरमद्भुतम्॥ प्रायच्छत्परमोद्विग्ना वाचा मां संदिदेश ह॥ १०२॥
ततस्तस्यै प्रणम्याहं राजपुत्र्यै समाहितः॥ प्रदक्षिणं परिक्राममिहाभ्युद्गतमानसः॥ १०३॥
उत्तरं पुनरेवेदं निश्चित्य मनसा तया॥ [ज्ञात्वा संप्रस्थितं सीता मामुवाच तपस्विनी॥]
हनुमन्मम वृत्तान्तं वक्तुमर्हसि राघवे॥ १०४॥
यथा श्रुत्वैव नचिरात्तावुभौ रामलक्ष्मणौ॥ सुग्रीवसहितौ वीरावुपेयातां तथा कुरु॥ १०५॥
यद्यन्यथा भवेदेतद्द्वौ मासौ जीवितं मम॥ न मां द्रक्ष्यति काकुत्स्थो म्रिये साऽहमनाथवत्॥ १०६॥
तच्छ्रुत्वा करुणं वाक्यं क्रोधो मामभ्यवर्तत॥ उत्तरं च मया दृष्टं कार्यशेषमनन्तरम्॥ १०७॥
ततोऽवर्धत मे कायस्तदा पर्वतसन्निभः॥ युद्धकाङ्क्षी वनं तच्च विनाशयितुमारभे॥ १०८॥
तद्भग्नं वनषण्डं तु भ्रान्तत्रस्तमृगद्विजम्॥ प्रतिबुद्धा निरीक्षन्ते राक्षस्यो विकृताननाः॥ १०९॥
मां च दृष्ट्वा वने तस्मिन्समागम्य ततस्ततः॥ ताः समभ्यागताः क्षिप्रं रावणायाचचक्षिरे॥ ११०॥

मे निर्वृतं किन्तुदुःखितमित्यर्थः॥ ९०॥ विधिः उपायः॥ ९१—१०१॥ वाचा मां संदिदेशेति। स्वरामैकवेद्यं प्रागुक्तं काकासुरवृत्तान्तं तिलकनिर्माणादिकं च संदिष्टवतीत्यर्थः॥ १०२॥ परिक्रामं पर्यक्रामं। इहाभ्युद्गतमानसः इहाभ्युद्गते इहाभ्यागमने मानसं यस्य स तथा॥१०३—१०५॥ एतत् उपयानं। यद्यन्यथा भवेत् यदि नोपेयातामित्यर्थः। तदा द्वौ मासौ मम जीवितं। ततः परं जीवामीत्यर्थः। न मां द्रक्ष्यसि मासद्वयाभ्यन्तरे मां न द्रक्ष्यति चेत् तदा म्रिय इति योज्यं। मासशब्दोत्र पक्षपरः। "पक्षा वै मासाः" इति श्रुतेः॥ १०६॥ उत्तरं अनन्तरं। अनन्तरं अनन्तरकर्तव्यं उत्तरकार्यमित्यर्थः॥१०७—

स्यसत्यलंध्वनितं। मतान्तरेस्वप्नस्यापिसत्यत्वमित्यन्यदेतत्॥ ८७॥ स० सर्वैः पुरस्कृतः प्रधानीकृतः। इक्ष्वाकोर्यत्कुलंसंततिरूपंगृहं तस्यवंशः गृहाधारस्थूणावेणुस्थानीयोरामः मम मया स्तुतः॥ ९१॥ स० अभिज्ञानं स्मृतिजनकं॥ ९७॥ रामानु० त्वया आज्ञप्तमिच्छामि त्वत्कर्तृकमाज्ञापनमिच्छामीत्यर्थः। किंशब्दःक्षेपे। रामलक्ष्मणयोःपार्श्वंत्वांनयामि। उत्तरंकिं एवमेवंवदं-

[पा०] १ ग.—ट. इक्ष्वाकुकुलवंशस्तुतो. २ च. छ. ज. ञ. क्रच. ३ ख. ङ.—ट. अहमपि. ४ ङ.—ट. संग्रहितस्तुभ्यं. घ. संप्रेषितस्तुभ्यं. ५ छ. झ. ञ. ट. मुत्पाट्य. ६ क.—ट. मुत्तमं. ७ क. ग. घ. च. छ. ज. परिक्रम्यइहा. क. परिक्रम्यइहाभ्यागत. ८ ङ. छ. झ. ञ. ट. उत्तरंपुनरेवाह. ख. उक्तोहंपुनरेवेदं. ९ क. ग.—ट. तदा. १० इदमर्धं क. पाठेदृश्यते. ११ ग. ङ. च. छ. झ. ञ. ट. यदन्यथा. १२ च. छ. ज. ञ. मनुत्तमं. १३ क. ख. ततोहंवातवेगेनतदा. १४ ङ. झ. युद्धाकाङ्क्षी. १५ घ. ङ. झ. ट. तस्य. १६ क. भग्नपादपषण्डंतु. १७ घ. वनद्विजं. १८ ङ. च. झ. ञ. ट. प्रतिबुध्य. १९ घ. न्समागत्य. २० क. गत्वातास्त्वरिताः.

राजन्वनमिदं दुर्गं तव भग्नं दुरात्मना ॥ वानरेण ह्यविज्ञाय तव वीर्यं महाबल ॥ १११ ॥
दुर्बुद्धेस्तस्य राजेन्द्र तव विप्रियकारिणः ॥ वधमाज्ञापय क्षिप्रं यथाऽसौ विलयं व्रजेत् ॥ ११२ ॥
तच्छ्रुत्वा राक्षसेन्द्रेण विसृष्टा भृशदुर्जयाः ॥ राक्षसाः किंकरा नाम रावणस्य मनोनुगाः ॥ ११३ ॥
तेषामशीतिसाहस्रं शूलमुद्गरपाणिनाम् ॥ मया तस्मिन्वनोद्देशे परिघेण निषूदितम् ॥ ११४ ॥
तेषां तु हतशेषा ये ते गत्वा लघुविक्रमाः ॥ निहतं च महत्सैन्यं रावणायाचचक्षिरे ॥ ११५ ॥
ततो मे बुद्धिरुत्पन्ना चैत्यप्रासादमाक्रमम् ॥ तत्रस्थान्राक्षसान्हत्वा शतं स्तम्भेन वै पुनः ॥
ललामभूतो लङ्कायाः स वै विध्वंसितो मया ॥ ११६ ॥
ततः प्रहस्तस्य सुतं जम्बुमालिनमादिशत् ॥ राक्षसैर्बहुभिः सार्धं घोररूपैर्महायानकैः ॥ ११७ ॥
तमहं बलसंपन्नं राक्षसं रणकोविदम् ॥ परिघेणातिघोरेण सूदयामि सहानुगम् ॥ ११८ ॥
तच्छ्रुत्वा राक्षसेन्द्रस्तु मन्त्रिपुत्रान्महाबलान् ॥ पदातिबलसंपन्नान्प्रेषयामास रावणः ॥ ११९ ॥
परिघेणैव तान्सर्वान्नयामि यमसादनम् ॥ १२० ॥
मन्त्रिपुत्रान्हताञ्छ्रुत्वा समरे लघुविक्रमान् ॥ पञ्च सेनाग्रगाञ्छूरान्प्रेषयामास रावणः ॥ १२१ ॥
तानहं सहसैन्यान्वै सर्वानेवाभ्यसूदयम् ॥ १२२ ॥
ततः पुनर्दशग्रीवः पुत्रमक्षं महाबलम् ॥ बहुभी राक्षसैः सार्धं प्रेषयामास रावणः ॥ १२३ ॥
तं तु मन्दोदरीपुत्रं कुमारं रणपण्डितम् ॥ सहसा खं समुत्क्रान्तं पादयोश्च गृहीतवान् ॥
चर्मासिनं शतगुणं भ्रामयित्वा व्यपेषयम् ॥ १२४ ॥
तमक्षमागतं भग्नं निशम्य स दशाननः ॥ ततः इन्द्रजितं नाम द्वितीयं रावणः सुतम् ॥
व्यादिदेश सुसंक्रुद्धो बलिनं युद्धदुर्मदम् ॥ १२५ ॥
तच्चाप्यहं बलं सर्वं तं च राक्षसपुङ्गवम् ॥ नष्टौजसं रणे कृत्वा परं हर्षमुपागमम् ॥ १२६ ॥
महतापि महाबाहुः प्रत्ययेन महाबलः ॥ प्रेषितो रावणेनैव सह वीरैर्मदोत्कटैः ॥ १२७ ॥
सोविषह्यं हि मां बुद्ध्वा स्वबलं चावमर्दितम् ॥ ब्राह्मेनास्त्रेण स तु मां प्राबध्नाच्चातिवेगितः ॥ १२८ ॥
रज्जुभिश्चाभि बध्नन्ति ततो मां तत्र राक्षसाः ॥ रावणस्य समीपं च गृहीत्वा मामुपानयन् ॥ १२९ ॥
दृष्ट्वा संभाषितश्चाहं रावणेन दुरात्मना ॥ पृष्टश्च लङ्कागमनं राक्षसानां च तं वधम् ॥ १३० ॥
तत्सर्वं च मया तत्र सीतार्थमिति जल्पितम् ॥ १३१ ॥

११५ ॥ ततो मे बुद्धिरुत्पन्ना वक्ष्यमाणकार्यविषयेत्यर्थः । तादृशं बुद्धिकार्यमाह—चैत्येत्यादिना। चैत्यप्रासादं नगरमध्यस्थप्रासादं । ललामभूतः अलंकारभूतः ॥ ११६—११८ ॥ पदातिबलसंपन्नान् पदातिप्रभृत्याज्ञापनरूपमुत्तरंकिमित्यर्थः ॥ ति० उत्तरं समुद्रोत्तरकूलस्थं ॥ ९८ ॥ ति० तस्यदुर्बुद्धितेतिबहुव्रीहेस्तल् । नपुनर्व्रजेत् स्वदेशमितिशेषः ॥ ११२ ॥ रामानु० शूलमुद्गरपाणिनामित्यत्र दीर्घाभावआर्षः ॥ ११४ ॥ ति० चैत्यप्रासादं विनाशयितुमितिशेषः ॥ ११६ ॥ रामानु० चर्मासिनमित्यत्र इनन्तत्वमार्षं ॥ १२४ ॥ रामानु० द्वितीयं प्रेषितपुत्रापेक्षयाद्वितीयं ॥ १२५ ॥

[पा०] १ ङ. झ. ट. त्तस्यदुर्बुद्धितारांजस्तव. ग. तस्यदुर्बुद्धिनोराजंस्तव. २ ङ. झ. ट. नपुनर्व्रजेत्. ३ ङ. झ. ट. बहुदुर्जयाः. ४ ङ.—ट. हतशिष्टाये. ५ क. ग. ङ.—ट. मयासैन्यं. ६ ग. ङ.—ट. सुसमं. ७ ग. ङ.—झ. ट. लङ्काया मयाविध्वंसितोरुषा. ८ ग. भैयावहैः. ङ. दुरासदैः. ९ क. सबलंसाश्वं. १० क. ग. ङ.—ट. संयुगे. ११ ङ.—ट. समुद्यन्तं. १२ ङ. झ. ञ. तमासीनं. १३ ङ.—ट. ततश्चेन्द्रजितं. १४ क. रावणेनैषमहावीर्योमदोत्कटः. १५ ङ.—ट. मंदोद्धतैः. १६ क. ग.—ट. स्वसैन्यंच. १७ ग. रज्जुभिश्चबबन्धुस्ते. १८ ङ. छ. झ. ञ. ट. मामुपागमन्. १९ ग. घ. संभाषितस्तेन. २० क.—घ. तद्वधं. २१ क. ग. ङ.—ट. रणेतत्र. २२ ङ.—ट. सीतार्थमुप. घ. सीतार्थमभि.

[1]अस्याहं दर्शनाकाङ्क्षी प्राप्तस्त्वद्भवनं विभो ॥ मारुतस्यौरसः पुत्रो वानरो हनुमानहम् ॥ १३२ ॥
रामदूतं च मां विद्धि सुग्रीवसचिवं कपिम् ॥ सोहं [2]दौत्येन रामस्य [3]त्वत्सकाशमिहागतः ॥ १३३ ॥
[[4]शृणु चापि समादेशं यदहं ब्रवीमि ते ॥ राक्षसेश हरीशस्त्वां वाक्यमाह समाहितम् ॥१३४॥]
सुग्रीवश्च [5]महातेजाः स त्वां कुशलमब्रवीत् ॥ धर्मार्थकामसहितं हितं पथ्यमुवाच च ॥ १३५ ॥
वसतो ऋश्यमूके मे पर्वते विपुलद्रुमे ॥ राघवो रणविक्रान्तो मित्रत्वं समुपागतः ॥ १३६ ॥
तेन मे कथितं [6]राज्ञा भार्या मे रक्षसा हृता ॥ तत्र साहाय्यमस्माकं कार्यं सर्वात्मना त्वया ॥१३७॥
मया च कथितं तस्मै [7]वालिनश्च वधं प्रति ॥ तत्र साहाय्यहेतोर्मे समयं कर्तुमर्हसि ॥ १३८ ॥
वालिना हृतराज्येन सुग्रीवेण [8]महाप्रभुः ॥ [9]चक्रेग्निसाक्षिकं सख्यं राघवः सहलक्ष्मणः ॥ १३९ ॥
तेन [10]वालिनमुत्पाट्य शरेणैकेन संयुगे ॥ वानराणां महाराजः [11]कृतः स प्लवतां प्रभुः ॥ १४० ॥
[12]तस्य साहाय्यमस्माभिः कार्यं सर्वात्मना त्विह ॥ तेन प्रस्थापितस्तुभ्यं समीपमिह धर्मतः ॥१४१॥
क्षिप्रमानीयतां सीता दीयतां [13]राघवाय च ॥ यावन्न हरयो वीरा विधमन्ति [14]बलं तव ॥ १४२ ॥
वानराणां [15]प्रभावो हि न केन विदितः पुरा ॥ देवतानां सकाशं च ये गच्छन्ति निमन्त्रिताः ॥१४३॥
इति वानरराजस्त्वामाहेत्यभिहितो मया ॥ मामैक्षत [16]ततः क्रुद्धश्चक्षुषा प्रदहन्निव ॥ १४४ ॥
तेन वध्योऽहमाज्ञप्तो रक्षसा रौद्र[17]कर्मणा ॥ मत्प्रभावमविज्ञाय रावणेन दुरात्मना ॥ १४५ ॥
ततो विभीषणो नाम तस्य भ्राता [18]महामतिः ॥ तेन [19]राक्षसराजोसौ याचितो मम कारणात् ॥१४६॥
नैवं राक्षसशार्दूल त्यज्यतामेष निश्चयः ॥ राजशास्त्रव्यपेतो हि मार्गः [20]संसेव्यते त्वया ॥ १४७॥
दूतवध्या न दृष्टा हि राजशास्त्रेषु राक्षस ॥ दूतेन वेदितव्यं च [21]यथार्थं हितवादिना ॥ १४८ ॥
सुमहत्यपराधेपि दूतस्यातुलविक्रम ॥ विरूपकरणं दृष्टं न वधोस्तीति शास्त्रतः ॥ १४९ ॥
विभीषणेनैवमुक्तो रावणः संदिदेश तान् ॥ राक्षसानेतदेवास्य लाङ्गूलं दह्यतामिति ॥ १५० ॥
ततस्तस्य वचः श्रुत्वा मम पुच्छं समन्ततः ॥ वेष्टितं शणवल्कैश्च [22]जीर्णैः कार्पासकैः पटैः ॥१५१॥

तिसैन्यसंपन्नान् ॥ ११९—१३१ ॥ अस्याः सीतायाः । विसंधिरार्षः ॥ १३२—१३४ ॥ धर्मार्थकामसहितमिति तत्र धर्मसाहित्यात् हितं परत्र उपकारकं । अर्थसाहित्यात्पथ्यं । इहोपकारकं चेत्यर्थः ॥ १३५—१३८ ॥ सुग्रीवश्चेत्यादिना सुग्रीवोक्तं कियदनूद्य संप्रति शेषं स्वयं वक्ता सन्नाह—वालिनेति ॥ १३९—१४३ ॥ इदं वचस्सुग्रीवोक्तमेव मयोक्तमित्याह—इतीति ॥ १४४–१४६ ॥ नैवमिति । कर्तव्यमिति शेषः । राजशास्त्रं राजधर्मशास्त्रं ॥१४७॥ वेदितव्यं वक्तव्यमित्यर्थः ॥१४८—

रामानु० अहंप्राप्तः अहंहनुमान् इत्यहंशब्दस्यनिर्वाहः ॥ १३२ ॥ **स०** समोऽहितेनशत्रुणेतिसमाहितः । पूर्ववालिमुखतःसख्येपिइदानींरामसाहाय्येनशत्रुंत्रासमित्यर्थः ॥ १३४ ॥ **रामानु०** सुग्रीवेण मयेतिशेषः ॥ १३९ ॥ **रामानु०** वानराणांमहाराजःकृतः । अहमितिशेषः ॥ १४० ॥ **रामानु०** तेन साहाय्यस्यास्माभिःकर्तव्यत्वेन । प्रस्थापितः दूतइतिशेषः ॥ **शि०** तेन मया ॥ १४१ ॥ **रामानु०** विधमन्ति । " यावत्पुरानिपातयोर्लट् " इतिलृडर्थेलट् ॥ १४२ ॥ **रामानु०** येहिनिमन्त्रिताः युद्धसाहाय्यार्थमाहूताः । देवतानांसकाशंगच्छन्ति तेषांवानराणांप्रभावः पुराकेननविदितः । त्वयाविज्ञातएवेतिभावः ॥ **स०** निमन्त्रिताः आज्ञप्ताः । अनेनराजाज्ञाभावादेवनैतावत्कालपर्यन्तमत्रागताइतिध्वन्यते ॥ **ति०** वानराणामिति। राघवाणामितिपाठे

[पा०] १ ङ. झ. ट. तस्यास्तु. घ. अस्याःसंदर्शनाकाङ्क्षी. २ क. घ.—ट. दौत्येन. ३ क. ख. घ. त्वत्समीपमुपागतः. ४ अर्धश्लोकः ङ.—ट. पाठेपुदृश्यते. ५ ङ.—ट. महाभागसत्वांकौशलं. ६ क.—ट. राजन्भार्या. ७ ङ.—झ. ट. सहप्रभुः. घ. समंप्रभुः. ८ ग कृत्वाग्निसाक्षिकं. ९ क. तेनवालीविनिहतोराघवेणमहाजिरे। राज्यंचसुमहत्प्राप्तंसुग्रीवेणमहात्मना. १० ख. ग. घ. मुत्साद्य. ङ. च. ज.—ट. माहत्म्य. ११ क. घ. तत्र. १२ ग.—ट. राघवस्यच. १३ ङ. झ. ट. प्रभावोर्यं. १४ ख. ग. ङ.—ट. ततोरुष्टश्चक्षुषा. घ. रुषाविष्टश्चक्षुषा. १५ घ. क्रूरकर्मणा. १६ घ. महाद्युतिः. १७ ग. ङ. छ. झ. ञ. ट. राक्षसराजश्च. १८ ङ. झ. ञ. ट. संलक्ष्यते. १९ ग. ङ. झ. ट. यथाभिहितवादिना. २० ग.—ञ. पटैःकार्पासकैस्तथा.

राक्षसाः सिद्धसन्नाहास्ततस्ते चण्डविक्रमाः ॥ [1]तदाऽदह्यन्त मे पुच्छं निघ्नन्तः काष्ठमुष्टिभिः ॥१५२॥
बद्धस्य बहुभिः पाशैर्यत्रितस्य च राक्षसैः ॥ [[2]न मे पीडा भवेत्काचिदिदृक्षोर्नगरीं दिवा] ॥१५३॥
ततस्ते राक्षसाः शूरा बद्धं मामग्निसंवृतम् ॥ अघोषयन्राजमार्गे नगरद्वारमा[3]गताः ॥ १५४ ॥
ततोऽहं सुमहद्रूपं संक्षिप्य पुनरात्मनः ॥ विमोचयित्वा तं बन्धं प्रकृतिस्थः स्थितः पुनः ॥१५५॥
आयसं परिघं गृह्य तानि रक्षांस्यसूदयन् ॥ ततस्तन्नगरद्वारं वेगेनाप्लुतवा[4]हनम् ॥ १५६ ॥
पुच्छेन च प्रदीप्तेन तां पुरीं साट्टगोपुराम् ॥ दहाम्यहमसंभ्रान्तो युगान्ताग्निरिव प्रजाः ॥ १५७ ॥
[[5]ततो मे ह्यभवत्त्रासो लङ्कां दग्धां समीक्ष्य तु ॥] विनष्टा जानकी व्यक्तं न ह्यदग्धः प्रदृश्यते ॥
लङ्कायां कश्चिदुद्देशः सर्वा भस्मीकृता पुरी ॥ १५८ ॥
दहता च मया लङ्कां [6]दग्धा सीता न संशयः ॥ [7]रामस्य हि महत्कार्यं मयेदं वि[8]तथीकृतम् ॥ १५९ ॥
इति शोकसमाविष्टश्चिन्तामहमुपागतः ॥ १६० ॥
अथाहं वाचमश्रौषं चारणानां शुभाक्षराम् ॥ जानकी न च दग्धेति वि[9][10]स्मयोदन्तभाषिताम् ॥ १६१ ॥
ततो मे बुद्धिरुत्पन्ना श्रुत्वा तामद्भुतां गिरम् ॥ अदग्धा जानकीत्येवं निमित्तै[11]श्चोप[12]लक्षिता ॥ १६२ ॥
दीप्यमाने तु लाङ्गूले न मां दहति पावकः ॥ हृदयं च प्रहृष्टं मे वाताः सुरभिगन्धिनः ॥ १६३ ॥
तैर्निमित्तैश्च दृष्टार्थैः कारणैश्च महागुणैः ॥ ऋषिवाक्यैश्च सि[13]द्धार्थैरभवं हृष्टमानसः ॥ १६४ ॥
पुनर्दृष्ट्वा च वैदेहीं विसृष्टश्च तया पुनः ॥ १६५ ॥
ततः पर्वतमासाद्य तत्रारिष्टमहं पुनः ॥ प्रतिप्लवनमारेभे युष्मद्दर्शनकाङ्क्षया ॥ १६६ ॥
ततः [14]पवनचन्द्रार्कसिद्धगन्धर्वसेवितम् ॥ पन्थानमहमाक्रम्य भवतो दृ[15]ष्टवानिह ॥ १६७ ॥
राघवस्य प्रभावेन भवतां चैव तेजसा ॥ सुग्रीवस्य च कार्यार्थं मया सर्वमनुष्ठितम् ॥ १६८ ॥

---

१५२ ॥ यत्रितस्य आवृतस्य ॥ १५३ ॥ नगरद्वारमागतास्सन्तः राजमार्गे अघोषयन्निति योजना ॥ १५४—१५६ ॥ अट्टं बलभिः ॥ १५७—१६० ॥ विस्मयोदन्तभाषितां भाषितविस्मयोदन्तां । उक्ताद्भुतवार्तामित्यर्थः । विस्मयवृत्तान्तव्यवहृतामिति वा ॥ १६१ ॥ निमित्तैश्चोपलक्षिता शकुनादिभिश्च सीता न दग्धेति ज्ञातेत्यर्थः ॥ १६२ ॥ हृदयं प्रहृष्टं । आसीदितिशेषः । सुरभिगन्धिनः आसन्नितिशेषः ॥ १६३ ॥ दृष्टार्थैः दृष्टफलैः । निमित्तैः शकुनैः । कारणैः नेत्रस्फुरणादिभिः । महागुणैः फलव्याप्तैः । सिद्धार्थैः अबाधितार्थैः । तत्र हेतुत्वेन ऋषिपदोपादानं ॥ १६४ ॥ पुनरित्यर्धमेकं वाक्यं । विसृष्टः प्रेषितोस्मि ॥ १६५ ॥ तत्र लङ्कासमीपे । सामीप्ये सप्तमी । तत्र वर्तमानं अरिष्टं पर्वतं ॥ १६६ ॥ भवतो दृष्टवानिह । भवतः युष्मान् । इह समुद्रतीरे ॥ १६७ ॥ भवतां चैव तेजसा भवदनुग्रहेणेत्यर्थः । सुग्रीवस्य च कार्यार्थं स्वामिकार्यस्यावश्यकर्तव्यत्वादिति भावः । कार्यार्थं कार्यवस्तु । क्लीबत्वमार्षं । अस्यानुवादवाक्यविस्तरस्य प्रयोजनं

मनुष्योसमर्थइतिनमन्तव्यमितिभावः ॥ १४३ ॥ ति० उपलक्षितं तददहनमितिशेषः । निमित्तैः शुभसूचकैः ॥ १६२ ॥ स० गन्धएषामस्तीतिगन्धिनः । सुरभयश्चतेगन्धिनश्चेतिविग्रहः । सुरभिलंगन्धेसप्तघटिकाभोजनमित्यत्रेवार्थादन्वेति ॥ १६३ ॥ इत्यष्टपञ्चाशःसर्गः ॥ ५८ ॥

[पा०] १ क. ग. ङ. ञ. ट. तदाऽदीप्यन्त. २ इदमर्धं ङ.—ट. पाठेषुदृश्यते. ३ घ. माश्रिताः. ४ इदमर्धं क. ख. पाठयोर्दृश्यते. ५ क. ख. नसीतापरिरक्षिता. ६ च. छ. ज. ञ. रामस्येदंमयाकार्यंभूयोवा. ७ ङ. ञ. ट. विफलीकृतं. ८ ङ. ञ. ट. ततोहं. ९ घ. गगनेऽश्रौषं. १० क. ग. घ. विस्मयोदात्तभाषिणां. ११ ङ. ञ. ट. श्चोपलक्षितं. १२ ङ. ञ. ट. दृष्टार्थैरभवं. १३ ङ. ञ. ट. श्वसन. १४ च. छ. ज. दृष्टवानहं.

एतत्सर्वं मया तत्र यथावदुपपादितम् ॥ अत्र यन्न कृतं शेषं तत्सर्वं क्रियतामिति ॥ १६९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टपञ्चाशः सर्गः ॥ ५८ ॥

एकोनषष्टितमः सर्गः ॥ ५९ ॥

हनुमता वानरान्प्रति सीतादुरवस्थानिवेदनपूर्वकं तदसहिष्णुतया जांबवदादिपराक्रमप्रशंसनेन तत्साहाय्यात्कैमुत्येन स्वस्य रावणादिहननसामर्थ्यनिवेदनपूर्वकं सीतापुरस्करणेन रामदर्शनस्यौचित्योक्तिः ॥ १ ॥

एतदाख्याय तत्सर्वं हनुमान्मारुतात्मजः ॥ भूयः समुपचक्राम वचनं वक्तुमुत्तरम् ॥ १ ॥
सफलो राघवोद्योगः सुग्रीवस्य च संभ्रमः ॥ शीलमासाद्य सीताया मम च प्रवणं मनः ॥
[आर्यायाः सदृशं शीलं सीतायाः प्लवगर्षभाः] ॥ २ ॥
तपसा धारयेल्लोकान्क्रुद्धो वा निर्दहेदपि ॥ सर्वथाऽतिप्रवृद्धोसौ रावणो राक्षसाधिपः ॥
तस्य तां स्पृशतो गात्रं तपसा न विनाशितम् ॥ ३ ॥
न तदग्निशिखा कुर्यात्संस्पृष्टा पाणिना सती ॥ जनकस्यात्मजा कुर्याद्यत्क्रोधकलुषीकृता ॥ ४ ॥

वानराणां श्रवणकुतूहलातिशयप्रकाशनं ॥१६८-१६९
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टपञ्चाशः सर्गः ॥ ५८ ॥

तदेतदाख्याय उत्तरं वचनं वक्तुमुपचक्रामेत्यन्वयः ॥ १ ॥ अथ संप्रत्येव रावणं जित्वा सीतया सहैवास्माभिः प्रतियातव्यमिति हृदि निधायाह—सफल इति । संभ्रमः त्वरा । उत्साह इतियावत् । कुतस्साफल्यमित्याशङ्क्य सीतापातिव्रत्योपलम्भादित्याह—शीलमिति । शीलं वृत्तं । पातिव्रत्यमिति यावत् । अहं तु प्रागेव तदेकशरण इत्याह—मम चेति । प्रवणं प्रह्वं तत्परमिति यावत् । सीताचारित्रस्य न किंचिदसाध्यमस्तीति भावः ॥ २ ॥ तर्हि तं दुरात्मानं रावणं स्पृशन्तमेव किमिति नादहदित्याशङ्क्य तस्यापि तपःसंपत्तिसद्भावादित्याह—तपसेत्यादिना ॥ यद्वा रावणतपःकथनद्वारा सीतायाः पातिव्रत्यातिशयमाह—तपसेत्यादिना ॥ तपसा अतिप्रवृद्ध इत्यन्वयः । कोपप्रसादाभ्यां सर्वलोकनिग्रहानुग्रहसमर्थोसौ रावणस्सर्वथा महातपस्संपन्नः । अतएव सीतास्पर्शेप्यविनाशित इत्यर्थः ॥ ३ ॥ तर्हि सीताशीलं दुर्बलमस्माकं किमुपकरिष्यतीत्याशङ्क्य नेत्याह—न तदिति ॥ सीताशीलमेव बलीयस्त्वादुपकरिष्यतीत्यर्थः । क्रोधकलुषीकृतेतिवचनाद्भर्तृमुखेन वैरनिर्यातनं वीरपत्नीधर्मः । अन्यथा महालाघवं भर्तुरित्यद्यापि पारतन्त्र्यपालनाय तादृक्क्रोधाकरणाद्रावणो जीवतीति गम्यते । एतदेवोक्तं प्राक्—" असंदेशात्तु रामस्य तपसश्चानुपालनात् । न त्वां कुर्मि दशग्रीव भस्म भस्मार्ह

स० उत्तरं उत्तमं ॥ १ ॥ ति० संभ्रमः आदरः । उत्साह इत्यर्थः । ममनः प्रीणितं तुष्टं । प्रवणमितिपाठेपि प्रवणं संतोषप्रवणमित्यर्थः ॥ स० राघवोद्योगः सीतावृत्तान्तज्ञानोत्साहः । सुग्रीवस्यसंगमः सुग्रीवेणसहसख्यंच । सीतायाःशीलं पातिव्रत्यादिसद्वृत्तं । आसाद्य प्राप्य । दृष्ट्वासफलइतिज्ञातः । एतादृश्याःस्त्रियाअन्यस्याःक्वाप्यभावेनास्याविषयेबहुलायासोपियत्नःकर्तव्य एवेतिभावः । ति० सदृशं पतिव्रतानामरुन्धत्यादीनांसदृशमित्यर्थः । स० आर्यायाः पार्वत्याः । सदृशंशीलंसीतायाः । अथवा आर्यायाः सीतायाः । शीलं सीतायाएवसदृशमित्यनन्वयालङ्कारः ॥ २ ॥ ति० तर्हिरावणंकिमितिनादहदित्यतआह—सर्वथेति । अतिप्रकृष्टः महातपस्संपन्नइत्यर्थः ॥ स० सर्वथा सर्वप्रकारेण । तपोबलादिनातिप्रकृष्टः अभिवृद्धः । कथमेवंज्ञायतइत्यतआह—यस्येति । सर्वथा रावणतपोबलेनसीतायाःकोपातिशयानुदयात्तस्यजीवनमितिफलितार्थः ॥ ३ ॥ ति० नैतावतासीताशीलंदुर्बलमित्याशङ्क्यमित्याह—नेति । यत्कुद्धासीताकुर्यात् तत् स्पृष्टाऽग्निशिखापिनकुर्यात् । इयंतुभर्तुःपराक्रमकीर्तये नाद्यापिकुध्यतीति

[पा०] १ ग. ङ. झ. ट. तत्र. च. छ. ज. ञ. अतोयत्कर्मशेषंनः. क. मयायन्नकृतंकर्मतत्सर्वंकर्तुमर्हथ. २ ठ. संगमः. ३ ङ. झ. ट. प्रीणितं. ४ ङ.—ट. पाठेष्विदमर्धंदृश्यते. ५ ङ. च. झ. ट. न्कुद्धावा. ६ ङ. झ. ट. प्रकृष्टोसौ. ७ क. ग. घ. ङ. झ. ट. यस्य. च. छ. ज. ञ. यस्यसंस्पृशतो.

जाम्बवत्प्रमुखान्सर्वाननुज्ञाप्य महाहरीन् ॥ अस्मिन्नेवंगते कार्ये भवतां च निवेदिते ॥
न्याय्यं स्म सह वैदेह्या द्रष्टुं तौ पार्थिवात्मजौ ॥ ५ ॥
अहमेकोपि पर्याप्तः सराक्षसगणां पुरीम् ॥ तां लङ्कां तरसा हन्तुं रावणं च महाबलम् ॥ ६ ॥
किं पुनः सहितो वीरैर्बलवद्भिः कृतात्मभिः ॥ कृतास्त्रैः प्लवगैः शूरैर्भवद्भिर्विजयैषिभिः ॥ ७ ॥
अहं तु रावणं युद्धे ससैन्यं सपुरस्सरम् ॥ सहपुत्रं वधिष्यामि सहोदरयुतं युधि ॥ ८ ॥
ब्राह्ममैन्द्रं च रौद्रं च वायव्यं वारुणं तथा ॥ यदि शक्रजितोस्त्राणि दुर्निरीक्षाणि संयुगे ॥ ९ ॥
तान्यहं विधमिष्यामि निहनिष्यामि राक्षसान् ॥ भवतामभ्यनुज्ञातो विक्रमो मे रुणद्धि तम् ॥१०॥
मयाऽतुला विसृष्टा हि शैलवृष्टिर्निरन्तरा ॥ देवानपि रणे हन्यात्किं पुनस्तान्निशाचरान् ॥
[भवतामनुज्ञातो विक्रमो मे रुणद्धि माम्] ॥ ११ ॥
सागरोप्यतियाद्वेलां मन्दरः प्रचलेदपि ॥ न जाम्बवन्तं समरे कम्पयेदरिवाहिनी ॥ १२ ॥
सर्वराक्षससङ्घानां राक्षसा ये च पूर्वकाः ॥ अलमेको विनाशाय वीरो वालिसुतः कपिः ॥ १३ ॥
पनसस्योरुवेगेन नीलस्य च महात्मनः ॥ मन्दरोप्यवशीर्येत किं पुनर्युधि राक्षसाः ॥ १४ ॥
सदेवासुरयक्षेषु गन्धर्वोरगपक्षिषु ॥ मैन्दस्य प्रतियोद्धारं शंसत द्विविदस्य वा ॥ १५ ॥
अश्विपुत्रौ महाभागावेतौ प्लवगसत्तमौ ॥ एतयोः प्रतियोद्धारं न पश्यामि रणाजिरे ॥ १६ ॥
पितामहवरोत्सेकात्परमं दर्पमास्थितौ ॥ अमृतप्राशिनावेतौ सर्ववानरसत्तमौ ॥ १७ ॥
अश्विनोर्माननार्थं हि सर्वलोकपितामहः ॥ सर्वावध्यत्वमतुलमनयोर्दत्तवान्पुरा ॥ १८ ॥
वरोत्सेकेन मुक्तौ च प्रमथ्य महतीं चमूम् ॥ सुराणाममृतं वीरौ पीतवन्तौ प्लवङ्गमौ ॥ १९ ॥
एतावेव हि संक्रुद्धौ सवाजिरथकुञ्जराम् ॥ लङ्कां नाशयितुं शक्तौ सर्वे तिष्ठन्तु वानराः ॥ २० ॥
मयैव निहता लङ्का दग्धा भस्मीकृता पुनः ॥ राजमार्गेषु सर्वत्र नाम विश्रावितं मया ॥ २१ ॥
जयत्यतिबलो रामो लक्ष्मणश्च महाबलः ॥ राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ २२ ॥
अहं कोसलराजस्य दासः पवनसंभवः ॥ हनुमानिति सर्वत्र नाम विश्रावितं मया ॥ २३ ॥
अशोकवनिकामध्ये रावणस्य दुरात्मनः ॥ अधस्ताच्छिंशुपावृक्षे साध्वी करुणमास्थिता ॥ २४ ॥
राक्षसीभिः परिवृता शोकसंतापकर्शिता ॥ मेघलेखापरिवृता चन्द्रलेखेव निष्प्रभा ॥ २५ ॥
अचिन्तयन्ती वैदेही रावणं बलदर्पितम् ॥ पतिव्रता च सुश्रोणी अवष्टब्धा च जानकी ॥ २६ ॥

तेजसा " इति ॥ ४ ॥ एवं स्थिते युष्मदनुमत्या भृत्यविजयोपि स्वामिन एवेति कृत्वा सीतारामपदावलम्बादहमेव रावणं निर्जित्य सीतापुरस्कारेणैव राघवौ द्रक्ष्यामीत्याह—जाम्बवदिति ॥ ५ ॥ न चाशक्तिशङ्का कार्येति बहुधा प्रपञ्चयन्नाह—अहमित्यादिना ॥ ६—९ ॥ अभ्यनुज्ञातः अभ्यनुज्ञानात् । पञ्चम्यास्तसिः । मे विक्रमः तं रावणं रुणद्धि हन्तीत्यर्थः ॥ १०—११ ॥ अतियात् आर्ष ह्रस्वत्वं ॥ १२ ॥ पूर्वकाः तेषामितिशेषः ॥ १३—२० ॥ दग्धत्वेप्यङ्गारावस्था भवति सापि नास्तीत्याह—भस्मीकृतेति ॥ २१ ॥ नामविश्रावणमेवाह—जयतीति ॥ जयति सर्वोत्कर्षेण वर्तते । तदुक्तं हरिणा—" जयिर्जयाभिभवयोराद्येर्थेसावकर्मकः । उत्कर्षप्राप्तिराद्यार्थो द्वितीयेर्थे सकर्मकः " इति ॥ २२—२३ ॥ अथ सीतादुर्दशाविमर्शेपि संप्रत्यसौ समानेतव्येत्याशयेन तद्दशां दर्शयति—अशोकेत्यादिना ॥ २४—२६ ॥

भावः । अकुद्धायाअपिस्पर्शमात्रेणप्राप्तोनाशस्तु रावणतपसानिवारितइतिज्ञेयं ॥ ४ ॥ ति० कृतास्त्रैः देवांशत्वादस्त्रप्रयोगसमर्थैः ॥ ७ ॥ स० युद्धेरावणं युद्धेलोकरावणं ॥ ८ ॥

[पा०] १ क. ग. ङ. च. झ. ञ. ट. शक्तैः. २ ङ. झ. ट. पाठेष्विदमर्धदृश्यते. ३ क. तेषांवालिसुतः. ४ झ. ट. प्लवगस्योरुवेगेन. ५ ग. ङ. झ. ट. महावेगौ. च. छ. ज. ञ. महावीर्यौयौतौ. ६ क. मत्तौच. ग. मत्तौतौ. ७ ङ.—ट. पुरी.

अनुरक्ता हि वैदेही रामं सर्वात्मना शुभा ॥ अनन्यचित्ता रामे च पौलोमीव पुरन्दरे ॥ २७ ॥
तदेकवाससंवीता रजोध्वस्ता तथैव च ॥ शोकसंतापदीनाङ्गी सीता भर्तृहिते रता ॥ २८ ॥
सा मया राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः ॥ राक्षसीभिर्विरूपाभिर्दृष्टा हि प्रमदावने ॥ २९ ॥
एकवेणीधरा दीना भर्तृचिन्तापरायणा ॥ अधःशय्या विवर्णाङ्गी पद्मिनीव हिमागमे ॥ ३० ॥
रावणाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया ॥ कथंचिन्मृगशावाक्षी विश्वासमुपपादिता ॥ ३१ ॥
ततः संभाषिता चैव सर्वमर्थं च दर्शिता ॥ रामसुग्रीवसख्यं च श्रुत्वा प्रीतिमुपागता ॥ ३२ ॥
नियतः समुदाचारो भक्तिर्भर्तरि चोत्तमा ॥ यन्न हन्ति दशग्रीवं स महात्मा कृतागसम् ॥
निमित्तमात्रं रामस्तु वधे तस्य भविष्यति ॥ ३३ ॥
सा प्रकृत्यैव तन्वङ्गी तद्वियोगाच्च कर्शिता ॥ प्रतिपत्पाठशीलस्य विद्येव तनुतां गता ॥ ३४ ॥
एवमास्ते महाभागा सीता शोकपरायणा ॥ यदत्र प्रतिकर्तव्यं तत्सर्वमुपपद्यताम् ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनषष्टितमस्सर्गः ॥ ५९ ॥

षष्टितमः सर्गः ॥ ६० ॥

अङ्गदेनापि स्वस्वीयपराक्रमप्रशंसनेन रावणादिरक्षःक्षपणपूर्वकं सीतासमानयनस्य कर्तव्यत्वोक्तौ जांबवता सयुक्तयुपन्यासं तत्प्रतिषेधनं ॥ १ ॥

तस्य तद्वचनं श्रुत्वा वालिसूनुरभाषत ॥ १ ॥
[अहमेकोपि पर्याप्तः सराक्षसगणां पुरीम् ॥ तां लङ्कां तरसा हन्तुं रावणं च महाबलम् ॥ २ ॥

पौलोमीव पुरन्दर इति । नहुषनिर्बन्ध इतिभावः ॥ २७—२८ ॥ प्रमदावने अशोकवनिकायां ॥ २९—३०॥ विनिवृत्तार्था त्यक्तप्रयोजना । रावणप्रलोभनवाक्यैरवशीकृतेत्यर्थः ॥ ३१ ॥ सर्वमर्थं रामोद्योगादिकं । दर्शिता बोधिता ॥ ३२ ॥ नियत इति ॥ समुदाचारः चारित्रमिति यावत् । नन्वेवंमाहात्म्या सीता स्वयमेव रावणं किमिति न हन्तीत्याशङ्क्याह —यन्न हन्तीति ॥ दशग्रीवं न हन्तीतियत् तत्र कारणं स दशाननः महात्मा महानुभावः । शापनिबन्धनदुर्मरणाभावादिति भावः । अतस्तस्य वधे रामस्तु राम एव निमित्तमात्रं भविष्यति । तथा तस्योत्कर्षात् । सीता तु निमित्तकारणमिति शेषः । भर्त्रैव वैरनिर्यातनं वीरपत्नीधर्मः अन्यथा भर्तुर्महल्लाघवमिति मनीषया नस्वयं हन्ति नत्वसामर्थ्यादिति भावः॥ ३३—३४॥ फलितमुपसंहरति—एवमिति॥ उपपद्यतां अनुष्ठीयतां ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनषष्टितमः सर्गः ॥ ५९ ॥

तस्येत्यादि ॥ १—३ ॥ वानरा इति संबोधनं

ति० रामेण रामप्रीत्या ॥ २७ ॥ शि० प्रमदानामवनंअतिरक्षायस्मिन् । पुरुषागम्येत्यर्थः ॥ २९ ॥ स० दशग्रीवं नहन्तियस्मात्स महात्मा । अनेन सीता रामकीर्त्यैरावणवधमुदास्ते इत्युक्तंभवति ॥ ३३ ॥ इत्येकोनषष्टितमःसर्गः ॥ ५९ ॥

[पा०] १ झ. रामे. २ झ. अनन्यचिन्तारामेण. ३ ग. ङ. च. ज.—ट. हिमोदये. ४ ङ. झ. ट. प्रकाशिता. ग. चदर्शितं. च. ज. ञ. प्रदर्शिता. ५ ग. प्रमुदिताभृशं. ६ ङ. च. ज.—ट. मुपकल्पयतां. ७ ग. ततस्तद्वचनंश्रुत्वा. एतदर्धानन्तरं झ. पाठे. अश्विपुत्रौमहावेगौबलवन्तौबलवङ्गमौ । पितामहवरोत्सेकात्परमंदर्पमास्थितौ । अश्विनोर्माननार्थंहिसर्वंलोकपितामहः । सर्वावध्यत्वमतुलमनयोर्दत्तवान्पुरा । वरोत्सेकेनमत्तौचप्रमथ्यमहतींचमूम् । सुराणाममृतंवीरौपीतवन्तौमहाबलौ । एतावेवहिसंक्रुद्धौसवाजिरथकुञ्जराम् । लङ्कांनाशयितुंशक्तौसर्वेतिष्ठन्तुवानराः । इतिचत्वारःश्लोकाअधिकादृश्यन्ते । एतएवश्लोकाःअस्मदीयपुस्तकेएकोनषष्टितमेऽध्यायेहनुमद्वाक्ये षोडशश्लोकानन्तरंदृश्यमानत्वात् अत्रनास्माभिर्मुद्रिताः. ८ एतदर्धपञ्चकं झ. पाठेदृश्यते.

किंपुनः सहितैर्वीरैर्बलवद्भिः कृतात्मभिः ॥ कृतास्त्रैः प्लवगैः शक्तैर्भवद्भिर्विजयैषिभिः ॥
वायुसूनोर्बलेनैव दग्धा लङ्केति नः श्रुतम् ॥ ३ ॥]
अयुक्तं तु विना देवीं दृष्टवद्भिश्च वानराः ॥ समीपं गन्तुमस्माभी राघवस्य महात्मनः ॥ ४ ॥
दृष्टा देवी न चानीता इति तत्र निवेदनम् ॥ अयुक्तमिव पश्यामि भवद्भिः ख्यातविक्रमैः ॥ ५ ॥
न हि नः प्लवने कश्चिन्नापि कश्चित्पराक्रमे ॥ तुल्यः सामरदैत्येषु लोकेषु हरिसत्तमाः ॥ ६ ॥
[जित्वा लङ्कां सरक्षौघां हत्वा तं रावणं रणे ॥ सीतामादाय गच्छामः सिद्धार्था हृष्टमानसाः ॥७ ॥]
तेष्वेवं हतवीरेषु राक्षसेषु हनूमता ॥ किमन्यदत्र कर्तव्यं गृहीत्वा याम जानकीम् ॥ ८ ॥
[रामलक्ष्मणयोर्मध्ये न्यस्याम जनकात्मजाम् ॥ किं व्यलीकैस्तु तान्सर्वान्वानरान्वानरर्षभान् ॥९॥]
वयमेव हि गत्वा तान्हत्वा राक्षसपुङ्गवान् ॥ राघवं द्रष्टुमर्हामः सुग्रीवं सहलक्ष्मणम् ॥ १० ॥]
तमेवं कृतसंकल्पं जाम्बवान्हरिसत्तमः ॥ उवाच परमप्रीतो वाक्यमर्थवदर्थवित् ॥ ११ ॥
[नैषा बुद्धिर्महाबुद्धे यद्ब्रवीषि महाकपे ॥ विचेतुं वयमाज्ञप्ता दक्षिणां दिशमुत्तमाम् ॥ १२ ॥
नानेतुं कपिराजेन नैव रामेण धीमता ॥ कथंचिन्निर्जितां सीतामस्माभिर्नाभिरोचयेत् ॥ १३ ॥
राघवो नृपशार्दूलः कुलं व्यपदिशन्स्वकम् ॥ प्रतिज्ञाय स्वयं राजा सीताविजयमग्रतः ॥
सर्वेषां कपिमुख्यानां कथं मिथ्या करिष्यति ॥ १४ ॥
विफलं कर्म च कृतं भवेत्तुष्टिर्न तस्य च ॥ वृथा च दर्शितं वीर्यं भवेद्वानरपुङ्गवाः ॥ १५ ॥
तस्माद्गच्छाम वै सर्वे यत्र रामः सलक्ष्मणः ॥ सुग्रीवश्च महातेजाः कार्यस्यास्य निवेदने ॥ १६ ॥]
न तावदेषा मतिरक्षमा नो यथा भवान्पश्यति राजपुत्र ॥
यथा तु रामस्य मतिर्निविष्टा तथा भवान्पश्यतु कार्यसिद्धिम् ॥ १७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षष्टितमः सर्गः ॥ ६० ॥

एकषष्टितमः सर्गः ॥ ६१ ॥

महेन्द्रपर्वतात्किष्किन्धागमनाय गगनमुत्पतितैरङ्गदादिभिः मध्येमार्गं दधिमुखरक्षितेसुग्रीवस्यप्रियतमेमधुवनेऽवतरणम् ॥ १ ॥ सर्ववानरैरङ्गदानुज्ञया यथेच्छं मधुफलोपभोगे वृक्षक्षोभमधुफलविध्वंसनरुष्टेनदधिमुखेन बलात्प्रतिषेधने तैर्नखदशनादिभिस्तत्परिपीडनं ॥ २ ॥

ततो जाम्बवतो वाक्यमगृह्णन्त वनौकसः ॥ अङ्गदप्रमुखा वीरा हनूमांश्च महाकपिः ॥ १ ॥
प्रीतिमन्तस्ततः सर्वे वायुपुत्रपुरस्सराः ॥ महेन्द्राद्रिं परित्यज्य पुप्लुवुः प्लवगर्षभाः ॥ २ ॥

॥ ४–१६ ॥ अथ जाम्बवानङ्गदवाक्यं बहु मन्यमानस्सुहृद्भावेन प्रतिषेधति—नतावदिति ॥ अक्षमा अयुक्ता न किन्तु युक्तैवेत्यर्थः । यद्यपिसम्यगुक्तं समर्थैश्चापि रामाज्ञानुसारेण कर्तव्यं न स्वातन्त्र्येणेत्यर्थः ॥ १७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

सभाज्यमानं संपूज्यमानं । वहन्त इव दृष्टिभिरिति । प्रीतिपूर्वकानिमिषदर्शनादृष्टिष्वारोप्य नयन्त

ति० अगृह्णन्त युक्तियुक्तत्वेनामन्यन्त ॥ १ ॥ स० प्रीतिमन्तः हर्षयुक्ताः । नागमनकालइवचिन्तायुक्ताइत्यर्थः । पुप्लुवुः

[पा०] १ झ. निवेदितुं. २ झ. ख्यातपौरुषैः. ३ झ. वःप्लवने. ४ अयंश्लोकः झ. पाठेदृश्यते. ५ झ. हतशेषेषु. ६ इदंश्लोकद्वयं झ. पाठेदृश्यते. ७ एतेश्लोकाः झ. पाठेदृश्यन्ते. ८ ङ.—ट. महेन्द्राम्रात्समुत्पत्य.

मेरुमन्दरसंकाशा मत्ता इव महागजाः ॥ छादयन्त इवाकाशं महाकाया महाबलाः ॥ ३ ॥
सभाज्यमानं भूतैस्तमात्मवन्तं महाबलम् ॥ हनुमन्तं महावेगं वहन्त इव दृष्टिभिः ॥ ४ ॥
राघवे चार्थनिर्वृत्तिं कर्तुं च परमं यशः ॥ समाधाय समृद्धार्थाः कर्मसिद्धिभिरुन्नताः ॥ ५ ॥
प्रियाख्यानोन्मुखाः सर्वे सर्वे युद्धाभिनन्दिनः ॥ सर्वे रामप्रतीकारे निश्चितार्था मनस्विनः ॥ ६ ॥
प्लवमानाः खमाप्लुत्य ततस्ते काननौकसः ॥ नन्दनोपममासेदुर्वनं द्रुमलतायुतम् ॥ ७ ॥
यत्तन्मधुवनं नाम सुग्रीवस्याभिरक्षितम् ॥ अधृष्यं सर्वभूतानां सर्वभूतमनोहरम् ॥ ८ ॥
यद्रक्षति महावीर्यः सदा दधिमुखः कपिः ॥ मातुलः कपिमुख्यस्य सुग्रीवस्य महात्मनः ॥ ९ ॥
ते तद्वनमुपागम्य बभूवुः परमोत्कटाः ॥ वानरा वानरेन्द्रस्य मनःकान्ततमं महत् ॥ १० ॥
ततस्ते वानरा हृष्टा दृष्ट्वा मधुवनं महत् ॥ कुमारमभ्ययाचन्त मधूनि मधुपिङ्गलाः ॥ ११ ॥
ततः कुमारस्तान्वृद्धाञ्जाम्बवत्प्रमुखान्कपीन् ॥ अनुमान्य ददौ तेषां निसर्गं मधुभक्षणे ॥ १२ ॥
[ते निसृष्टाः कुमारेण धीमता वालिसूनुना ॥ हरयः समपद्यन्त द्रुमान्मधुकराकुलान् ॥ १३ ॥
भक्षयन्त सुगन्धीनि मूलानि च फलानि च ॥ जग्मुः प्रहर्षं ते सर्वे बभूवुश्च मदोत्कटाः ॥ १४ ॥]
ततश्चानुमताः सर्वे संप्रहृष्टा वनौकसः ॥ मुदिताः प्रेरिताश्चापि प्रनृत्यन्तोऽभवंस्ततः ॥ १५ ॥

गायन्ति केचित्प्रणमन्ति केचिन्नृत्यन्ति केचित्प्रहसन्ति केचित् ॥
पतन्ति केचिद्विचरन्ति केचित्प्लवन्ति केचित्प्रलपन्ति केचित् ॥ १६ ॥
परस्परं केचिदुपाश्रयन्ते परस्परं केचिदुपाक्रमन्ते ॥
परस्परं केचिदुपब्रुवन्ते परस्परं केचिदुपारमन्ते ॥ १७ ॥
द्रुमाद्द्रुमं केचिदभिद्रवन्ते क्षितौ नगाग्रान्निपतन्ति केचित् ॥
महीतलात्केचिदुदीर्णवेगा महाद्रुमाग्राण्यभिसंपतन्ति ॥
[धावन्ति केचित्सुपतन्ति केचिन्महाबला वानरयूथमुख्याः] ॥ १८ ॥
गायन्तमन्यः प्रहसन्नुपैति हसन्तमन्यः प्ररुदन्नुपैति ॥
रुदन्तमन्यः प्रणुदन्नुपैति नुदन्तमन्यः प्रणदन्नुपैति ॥ १९ ॥

इवेत्युत्प्रेक्षा ॥ ४ ॥ अर्थनिर्वृत्तिं अर्थसिद्धिं । समाधाय निश्चित्य संकल्प्य वा । समृद्धार्थाः सिद्धकार्याः । कर्मसिद्धिभिः कार्यसिद्धिभिः । उन्नताः इतरेभ्य उत्कृष्टाः ॥ ५ ॥ रामप्रतीकारे रामप्रत्युपकारे । पुप्लुवुरिति पूर्वेणसंबन्धः ॥६—९॥ परमोत्कटाः परमोत्सुकाः ॥१०॥ मधुपिङ्गलाः मधुवत्पिङ्गलवर्णाः वानराः ॥ ११ ॥ अनुमान्य अनुमतिं कारयित्वा । निसर्गं विसर्जनं । अनुमतिमिति यावत् ॥ १२—१४ ॥ पूर्वमेव सीतादर्शनात्प्रहृष्टाः ततः मधुवनभङ्गे अङ्गदेनानुमतास्सन्तस्ततो मुदिताः तत्प्रेरिताः प्रनृत्यन्तोऽभवन् ॥ १५ ॥ मधुवनभङ्गाभ्यनुज्ञानकृतं वानरहर्षविकारमेव वर्णयति सर्गशेषेण—गायन्ति केचित्प्रणमन्ति केचिन्नृत्यन्ति केचित्प्रहसन्ति केचित् । पतन्ति केचिद्विचरन्ति केचित्प्लवन्ति केचित्प्रलपन्ति केचित् । इति पाठः । प्रणमन्ति अवाक्छिरसः पतन्ति । पतन्ति ऊर्ध्वपादाः पृष्ठेन पतन्ति ॥१६—१९॥

वनंप्रतीतिशेषः ॥ २ ॥ ति० रामप्रतीकारे रामकर्तव्येरावणप्रतीकारे । निश्चितार्थाः अभूवन्निति शेषः ॥ ६ ॥ ति० हर्षमुदो बाह्यान्तरत्वकृतोभेदः ॥ १५ ॥ ति० तत्रबाह्यमानन्दसूचकमाह—गायन्तीति ॥ १६ ॥ स० परुषाणि क्रूराणि । उवाच ।

[पा०] १ क. घ. प्रियाख्यानपराः. २ ख. ग. घ. खमुत्पत्य. क. समुत्पत्य. ३ ग.—ट. द्रुमशतायुतं. ४ ख. ग. ङ. झ. ट. महावीरः. ५ ज. सोयं. ६ ङ. झ. ञ. ट. मनःकान्तंमहावनं. ग. च. छ. ज. मनःकान्तंमहद्वनम्. घ. मनःकान्ततरंमहत्. ७ ख. प्लवतांमधुभक्षणे. ८ इदंश्लोकद्वयं ङ.—ट. पाठेषुदृश्यते. ९ च.—ट. सुसंहृष्टाः. १० ग. मुदिताश्चतत केचित्प्रनृत्यन्तितथापरे. क. घ.—छ. झ. ञ. ट. मुदिताश्चततस्तेचप्रनृत्यन्तिततस्ततः. ११ इदमर्धं क. पाठेदृश्यते.

समाकुलं तत्कपिसैन्यमासीन्मधुप्रपानोत्कटसत्त्वचेष्टम् ॥
न चात्र कश्चिन्न बभूव मत्तो न चात्र कश्चिन्न बभूव तृप्तः ॥ २० ॥
ततो वनं तत्परिभक्ष्यमाणं द्रुमांश्च विध्वंसितपत्रपुष्पान् ॥
समीक्ष्य कोपाद्दधिवक्त्रनामा निवारयामास कपिः कपींस्तान् ॥ २१ ॥
स तैः प्रवृद्धैः परिभर्त्स्यमानो वनस्य गोप्ता हरिवीरवृद्धः ॥
चकार भूयो मतिमुग्रतेजा वनस्य रक्षां प्रति वानरेभ्यः ॥ २२ ॥
उवाच कांश्चित्परुषाणि धृष्टमसक्तमन्यांश्च तलैर्जघान ॥
समेत्य कैश्चित्कलहं चकार तथैव साम्नोपजगाम कांश्चित् ॥ २३ ॥
स तैर्मदात्संपरिवार्य वाक्यैर्बलाच्च तेन प्रतिवार्यमाणैः ॥
प्रधर्षितस्त्यक्तभयैः समेत्य प्रकृष्यते चाप्यनवेक्ष्य दोषम् ॥ २४ ॥
नखैस्तुदन्तो दशनैर्दशन्तस्तलैश्च पादैश्च समापयन्तः ॥
मदात्कपिं तं कपयः समग्रा महावनं निर्विषयं च चक्रुः ॥ २५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

द्विषष्टितमः सर्गः ॥ ६२ ॥

हनुमतादधिमुखप्रतिपिद्धवानरान्प्रति प्रतिषेधकप्रतिषेधनप्रतिज्ञानपूर्वकं निश्शङ्कमधुपाननियोगे पुनर्वानरैः सवनक्षोभं यथारुचि मधुपानादिषुप्रवर्तनम् ॥ १ ॥ वानरैर्मधुपानजमदपरवशतयोन्मत्तवत्कृत्तादिनानाचेष्टाविष्करणम् ॥ २ ॥ वानरैस्ताडनादिनापीडितैर्वनपालैर्दधिमुखे तन्निवेदने तेनतैस्सह वानरान्प्रत्यायोधनम् ॥ ३ ॥ अङ्गदेन दधिमुखस्य सताडनंभूमौ निष्पेषणं ॥ ४ ॥ दधिमुखेन वनपालैःसह सुग्रीवे मधुवनधर्षणादिनिवेदनाय किष्किन्धामेत्य रामादिसंनिधौ सुग्रीवचरणयोःप्रणामः ॥ ५ ॥

तानुवाच हरिश्रेष्ठो हनुमान्वानरर्षभः ॥ अव्यग्रमनसो यूयं मधु सेवत वानराः ॥
अहमावारयिष्यामि युष्माकं परिपन्थिनः ॥ १ ॥
श्रुत्वा हनुमतो वाक्यं हरीणां प्रवरोऽङ्गदः ॥ प्रत्युवाच प्रसन्नात्मा पिबन्तु हरयो मधु ॥ २ ॥
अवश्यं कृतकार्यस्य वाक्यं हनुमतो मया ॥ अकार्यमपि कर्तव्यं किमङ्ग पुनरीदृशम् ॥ ३ ॥
अङ्गदस्य मुखाच्छ्रुत्वा वचनं वानरर्षभाः ॥ साधु साध्विति संहृष्टा वानराः प्रत्यपूजयन् ॥ ४ ॥

मधुप्रपानोत्कटसत्त्वचेष्टं मत्तचित्तचेष्टं ॥२०—२४॥ निर्विषयं निर्गतमधुमूलादिभोग्यवस्तुकं । चक्रुरित्यर्थः ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकषष्टितमः सर्गः ॥ ६१ ॥

तान् दधिमुखकलहव्याकुलितान् । अन्ये तु तानुवाचेत्यादिना पूर्वसर्गोक्तं संक्षेपेणानूद्य उपरि गच्छतीत्याचक्षते । अपरे तु सर्गमुखे केचिच्छ्लोकाः पतिता इत्याहुः ॥ १—२ ॥ अङ्गेति संबोधने निपातः ॥ ३ ॥ अङ्गदस्य स्वामिनः मुखाद्वचनं

ततोप्यधमान्कांश्चित् तलैः करचरणतलैः । स्वसमैः कलहंचकार । स्वतःप्रबलानङ्गदादीन् साम्नाजगाम ॥ २३ ॥ ति० समापयन्तः मृतकल्पंकुर्वन्तः ॥ २५ ॥ इत्येकषष्टितमःसर्गः ॥ ६१ ॥

[पा०] १ क. घ. तैःपरिभक्ष्यमाणं. २ झ. ट. परुषाण्यभीतं. ३ घ. झ. ञ. ट. मैदादप्रतिवार्यवेगैः. क. च. छ. ज. मैदाच्चाप्रतिवार्यवेगैः. ४ झ. ट. तेकपयः. ५ झ. ट. समन्तान्महावनं. क. ग. घ. समग्राबलाद्वनं. ख. समग्रामधोर्वनं.

पूजयित्वाऽङ्गदं सर्वे वानरा वानरर्षभम् ॥ जग्मुर्मधुवनं यत्र नदीवेगा इव द्रुतम् ॥ ५ ॥
ते प्रविष्टा मधुवनं पालानाक्रम्य वीर्यतः ॥ अतिसर्गाच्च पटवो दृष्ट्वा श्रुत्वा च मैथिलीम् ॥
पपुः सर्वे मधु तदा रसवत्फलमाददुः ॥ ६ ॥
उत्पत्य च ततः सर्वे वनपालान्समागतान् ॥ ताडयन्ति स्म शतशः सक्तान्मधुवने तदा ॥ ७ ॥
मधूनि द्रोणमात्राणि बाहुभिः परिगृह्य ते ॥ पिबन्ति सहिताः सर्वे निघ्नन्ति स्म तथा परे ॥ ८ ॥
केचित्पीत्वाऽपविध्यन्ति मधूनि मधुपिङ्गलाः ॥ मधूच्छिष्टेन केचिच्च जघ्नुरन्योन्यमुत्कटाः ॥ ९ ॥
अपरे वृक्षमूले तु शाखां गृह्य व्यवस्थिताः ॥ अत्यर्थं च मदग्लानाः पर्णान्यास्तीर्य शेरते ॥ १० ॥
उन्मत्तभूताः प्लवगा मधुमत्ताश्च हृष्टवत् ॥ क्षिपन्ति च तदाऽन्योन्यं स्खलन्ति च तथापरे ॥ ११ ॥
केचित्क्ष्वेलां प्रकुर्वन्ति केचित्कूजन्ति हृष्टवत् ॥ हरयो मधुना मत्ताः केचित्सुप्ता महीतले ॥ १२ ॥
कृत्वा केचिद्धसन्त्यन्ये केचित्कुर्वन्ति चेतरत् ॥ कृत्वा केचिद्रदन्त्यन्ये केचिद्बुध्यन्ति चेतरत् ॥ १३ ॥
येऽप्यत्र मधुपालाः स्युः प्रेष्या दधिमुखस्य तु ॥ तेपि तैर्वानरैर्भीमैः प्रतिषिद्धा दिशो गताः ॥ १४ ॥
जानुभिस्तु प्रकृष्टाश्च देवमार्गं प्रदर्शिताः ॥ अब्रुवन्परमोद्विग्ना गत्वा दधिमुखं वचः ॥ १५ ॥
हनूमता दत्तवरैर्हतं मधुवनं बलात् ॥ वयं च जानुभिः कृष्टा देवमार्गं च दर्शिताः ॥ १६ ॥
ततो दधिमुखः क्रुद्धो वनपस्तत्र वानरः ॥ हतं मधुवनं श्रुत्वा सान्त्वयामास तान्हरीन् ॥ १७ ॥

हनुमदुक्तं श्रुत्वा ॥ ४ ॥ जग्मुर्मधुवनमिति प्रदेशभेदविवक्षया । यद्वा दधिमुखनिवारणेन भीतानां हनुमदङ्गदाभ्यां पुनरनुज्ञापनेन पुनर्जग्मुरित्यर्थः ॥ ५ ॥ वीर्यतः बलात् । अतिसर्गात् अङ्गदाभ्यनुज्ञानात् । दृष्ट्वा श्रुत्वा च मैथिलीं दर्शनश्रवणाभ्यां च हेतुना । वनपालानाक्रम्य आक्षिप्य ॥ ६ ॥ सक्तान् वनपालने रतान् ॥ ७ ॥ मधूनि मधुपटलानि । द्रोणमात्राणि द्रोणप्रमाणानि आढकप्रमाणानि । घ्नन्तिस्म पीतावशिष्टानि मधुपटलानि भिन्दन्तिस्म ॥ ८ ॥ अपविध्यन्ति अवक्षिपन्ति । मधूच्छिष्टेन सिक्थकेन । " मधूच्छिष्टं तु सिक्थकं" इत्यमरः । उत्कटाः मत्ताः ॥ ९-१० ॥ हृष्टवत् हर्षयुक्तमिति क्रियाविशेषणं । हृष्टार्हमितिवार्थः । क्षिपन्ति उत्क्षिप्य पातयन्ति । स्खलन्ति पादेन नुदन्तीत्यर्थः ॥ ११ ॥ क्ष्वेलां सिंहनादं । " क्ष्वेला तु सिंहनादः स्यात् " इत्यमरः । कूजन्ति पक्षिवच्छब्दायन्ते ॥ १२ ॥ अन्ये अवाच्यं किंचिद्ग्राम्यं कर्म कृत्वा हसन्ति । इतरत्तद्विलक्षणं ग्राम्यं कर्म केचित्कुर्वन्ति । केचिदन्यद्ग्राम्यं कर्म कृत्वा अस्माभिरिदं कृतमिति वदन्ति उच्चारयन्ति । केचिदितरद्बुध्यन्ति एवं करिष्यामीति संकल्पयन्तीत्यर्थः ॥ १३—१४ ॥ जानुभिःप्रकृष्टाः । जानून्यवलम्ब्य कृष्टा इत्यर्थः । देवमार्गं अपानद्वारं । देवशब्दो वायुवाची । उपनिषदि वायुलोके देवलोकशब्दप्रयोगात् । दर्शिताः दर्शनं कारिताः । दृशेरुपसंख्यानादणि कर्तुः कर्मत्वं । " ण्यन्तात्कर्तुश्च कर्मणः " इति तस्यैवाभिधेयत्वं च ॥ १५—१७ ॥

ति० अतिसर्गात् अङ्गदानुज्ञानात्मधु पपुः रसवत्फलंचाददुः भक्षणार्थमितिशेषः ॥ ६ ॥ स० मधूनिपीत्वा अपविध्यन्ति तत्करण्डमितिशेषः ॥ ९ ॥ स० इतरत् अप्रदर्शनीयावयवप्रदर्शनादि ॥ १३ ॥ ति० जानुभिःप्रघृष्टाः जानुषुगृहीत्वाआकृष्टाः । देवमार्गेदर्शिताः पादौगृहीत्वोर्ध्वंप्रक्षिप्ताइत्यर्थः । कर्णावञ्जलिभिर्धृत्वोर्ध्वीकृताइतिवार्थ इत्यन्ये ॥ स० जानुभिश्चप्रघृष्टाः पश्चात्ताडिताःसन्तोदेवमार्गसुरवर्त्मदर्शिताः पश्चाज्जानुसंताडनेमुखोर्ध्वीभवनेनाकाशावलोकनस्यजायमानत्वादेवमुक्तिः । पायुद्वारंवा । कपीनांहेलनसमयेयुदप्रदर्शनस्यभागवतदशमोत्तरार्धेबलरामद्विविदप्रस्तावेअन्यत्रापिबहुशोदृष्टत्वात् ॥ १५ ॥

[पा०] १ ख. ग. ङ. झ. नदीवेगइवद्रुमं. २ ङ. झ. ट. शक्तितः. ३ ज. अतिगर्वाच्च. ग. तेनिसर्गाच्च. घ. निसर्गाच्चापि. ख. निसर्गाच्चापिहरयो. ४ ग. ङ. झ. ट. तेताडयन्तःशतशः. ५ पिबन्तिसहिताइत्यर्धस्यस्थाने क.—ट. पाठेषु. पिबन्तिकपयःकेचित्संघशस्तत्रहृष्टवत् । घ्नन्तिस्मसहिताःसर्वेभक्षयन्तितथापरे । इत्येकःश्लोकोदृश्यते. ६ ग. घ. ङ. ज.—ट. मूलेषु. ७ ङ. च. ज.—ट. शाखागृह्य. ८ ङ. झ. ञ. ट. उन्मत्तवेगाः. ९ ख. हसन्तिच. १० झ. ञ. ट. धृष्टाःकेचित्. ११ ग. ङ. झ. ट. जानुभिश्चप्रघृष्टाश्च. १२ क. ग.—च. ज.—ट. देवमार्गंचदर्शिताः. १३ ङ. झ. ट. जानुभिर्घृष्टाः.

इहागच्छत गच्छामो वानरान्बलदर्पितान् ॥ बलेन वारयिष्यामो मधु भक्षयतो वयम् ॥ १८ ॥
श्रुत्वा दधिमुखस्येदं वचनं वानरर्षभाः ॥ पुनर्वीरा मधुवनं तेनैव सहसा ययुः ॥ १९ ॥
मध्ये चैषां दधिमुखः प्रगृह्य तरसा तरुम् ॥ समभ्यधावद्वेगेन ते च सर्वे प्लवङ्गमाः ॥ २० ॥
ते शिलाः पादपांश्चापि पर्वतांश्चापि वानराः ॥ गृहीत्वाभ्यगमन्क्रुद्धा यत्र ते कपिकुञ्जराः ॥ २१ ॥
ते स्वामिवचनं वीरा हृदयेष्ववसज्य तत् ॥ त्वरया ह्यभ्यधावन्त सालतालशिलायुधाः ॥ २२ ॥
वृक्षस्थांश्च तलस्थांश्च वानरान्बलदर्पितान् ॥ अभ्यक्रामंस्ततो वीराः पालास्तत्र सहस्रशः ॥ २३ ॥
[बलान्निवारयन्तश्च आसेदुर्हरयो हरीन् ॥ संदष्टोष्ठपुटक्रुद्धा भर्त्सयन्तो मुहुर्मुहुः ॥ २४ ॥]
अथ दृष्ट्वा दधिमुखं क्रुद्धं वानरपुङ्गवाः ॥ अभ्यधावन्त वेगेन हनुमत्प्रमुखास्तदा ॥ २५ ॥
तं सवृक्षं महाबाहुमापतन्तं महाबलम् ॥ आर्यकं प्राहरत्तत्र बाहुभ्यां कुपितोङ्गदः ॥ २६ ॥
मदान्धश्च न वेदैनमार्यकोयं ममेति सः ॥ अथैनं निष्पिपेषाशु वेगवद्वसुधातले ॥ २७ ॥
स भग्नबाहूरुभुजो विह्वलः शोणितोक्षितः ॥ मुमोह सहसा वीरो मुहूर्तं कपिकुञ्जरः ॥ २८ ॥
स समाश्वस्य सहसा संक्रुद्धो राजमातुलः ॥ वानरान्वारयामास दण्डेन मधुमोहितान् ॥ २९ ॥
स कथंचिद्विमुक्तस्तैर्वानरैर्वानरर्षभः ॥ उवाचैकान्तमाश्रित्य भृत्यान्स्वान्समुपागतान् ॥ ३० ॥
एते तिष्ठन्तु गच्छामो भर्ता नो यत्र वानरः ॥ सुग्रीवो विपुलग्रीवः सह रामेण तिष्ठति ॥ ३१ ॥
सर्वं चैवाङ्गदे दोषं श्रावयिष्यामि पार्थिवे ॥ अमर्षी वचनं श्रुत्वा घातयिष्यति वानरान् ॥ ३२ ॥
इष्टं मधुवनं ह्येतत्सुग्रीवस्य महात्मनः ॥ पितृपैतामहं दिव्यं देवैरपि दुरासदम् ॥ ३३ ॥
स वानरानिमान्सर्वान्मधुलुब्धान्गतायुषः ॥ घातयिष्यति दण्डेन सुग्रीवः ससुहृज्जनान् ॥ ३४ ॥
वध्या ह्येते दुरात्मानो नृपाज्ञापरिभाविनः ॥ अमर्षप्रभवो रोषः सफलो नो भविष्यति ॥ ३५ ॥
एवमुक्त्वा दधिमुखो वनपालान्महाबलः ॥ जगाम सहसोत्पत्य वनपालैः समन्वितः ॥ ३६ ॥
निमेषान्तरमात्रेण स हि प्राप्तो वनालयः ॥ सहस्रांशुसुतो धीमान्सुग्रीवो यत्र वानरः ॥ ३७ ॥
रामं च लक्ष्मणं चैव दृष्ट्वा सुग्रीवमेव च ॥ समप्रतिष्ठां जगतीमाकाशान्निपपात ह ॥ ३८ ॥
संनिपत्य महावीर्यैः सर्वैस्तैः परिवारितः ॥ हरिर्दधिमुखः पालैः पालानां परमेश्वरः ॥ ३९ ॥

गच्छाम इति तैः साहित्येन बहुवचनं । आत्मनि बहुवचनं वा ॥ १८—३३ ॥ गतायुष इत्यधिक्षेपवचनं ॥३४॥ अमर्षप्रभवः अक्षमाजन्यः । रोषस्य तज्जन्यत्वं च यो यस्मै न सहते तस्मै क्रुध्यतीति प्रसिद्धं ॥३५—३६ ॥ निमेषान्तरमात्रेण निमेषावकाशमात्रेण । वनालयः वानरः ॥ ३७ ॥ समप्रतिष्ठां समतलां ।

ति० एतागच्छतअग्रेइतिशेषः । गच्छामः । वयमप्यागच्छामइत्यर्थः ॥ १८ ॥ ति० आर्यकः सुग्रीवमातुलत्वात्पूज्यः ॥ २६ ॥

[पा०] १ ङ. झ. ट. एतागच्छत. २ ङ. ज.—ट. वानरानतिदर्पितान्. ३ ङ. झ. ट. प्रभुज्ञानान्मधूत्तमं. ४ ङ. च. झ. ञ. ट. सहिताः. ५ छ. ञ. सुमहातरुं. ६ ङ. झ. ट. पाषाणानपि. ७ अयंश्लोकः ङ. झ. ट. पाठेषुदृश्यते. ८ ख. ग. च. ज. संक्रुद्धाहनु. ९ ख. ग. च. ज. स्ततः. १० ङ. झ. ट. सवृक्षंतं. ११ ङ. झ. ट. वेगवन्तंविजग्राहबाहुभ्यां. १२ ङ. झ. ट. मदान्धोनकृपांचक्रेआर्यकोयं. १३ ङ. झ. ट. वेगेनवसुधातले. १४ ङ. झ. ट. सभग्नबाहूरुमुखो. ग. भग्नबाहुश्चविमुखो. ख. च. ज. ञ. सभग्नबाहुर्विमुखो. १५ ङ. झ. ट. प्रमुमोहमहावीरो. च. ज. मुमोहसमहावीर्यो. १६ ङ. झ. ट. मागत्य. ख. ज. ञ. मागम्य. १७ ग. झ. एतागच्छत. क. इहागच्छत. १८ घ. ङ. च. ज.—ट. परिपन्थिनः. १९ ख. सहसोपेत्य. २० ख. ग. सुतःश्रीमान्. २१ झ. ञ. संनिपत्य. २२ ख. ङ. झ. ट. महावीरः.

स दीनवदनो भूत्वा कृत्वा शिरसि चाञ्जलिम् ॥ सुग्रीवस्य शुभौ मूर्ध्ना चरणौ प्रत्यपीडयत् ॥४०॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

त्रिषष्टितमः सर्गः ॥ ६३ ॥

दधिमुखे सुग्रीवे मधुवनवृत्तान्तंनिवेदयति लक्ष्मणेन सुग्रीवंप्रति दधिमुखवचनार्थप्रश्नः ॥ १ ॥ सुग्रीवेणलक्ष्मणंप्रति तन्निवेदनपूर्वकं मधुवनधर्षणहेतुनासीतादर्शननिर्धारणोक्तिः ॥ २ ॥ तथा दधिमुखसमाश्वासनपूर्वकंतंप्रत्यङ्गदादीनांशीघ्रप्रेषणचोदना ॥ ३ ॥

ततो मूर्ध्ना निपतितं वानरं वानरर्षभः ॥ दृष्ट्वोद्विग्नहृदयो वाक्यमेतदुवाच ह ॥ १ ॥
उत्तिष्ठोत्तिष्ठ कस्मात्त्वं पादयोः पतितो मम ॥ अभयं ते भवेद्वीर सर्वमेवाभिधीयताम् ॥ २ ॥
[किं संभ्रमाद्धितं कृत्स्नं ब्रूहि यद्वक्तुमर्हसि ॥ कच्चिन्मधुवने स्वस्ति श्रोतुमिच्छामि वानर ॥ ३ ॥]
स तु विश्वासितस्तेन सुग्रीवेण महात्मना ॥ उत्थाय सुमहाप्राज्ञो वाक्यं दधिमुखोऽब्रवीत् ॥ ४ ॥
नैवर्क्षरजसा राजन्न त्वया नापि वालिना ॥ वनं निसृष्टपूर्वं हि भक्षितं तच्च वानरैः ॥ ५ ॥
[न्यवारयमहं सर्वान्सहैभिर्वनचारिभिः ॥ अचिन्तयित्वा मां हृष्टा भक्षयन्ति पिबन्ति च ॥ ६ ॥]
एभिः प्रधर्षिताश्चैव वानरा वनरक्षिभिः ॥ मधून्यचिन्तयित्वेमान्भक्षयन्ति पिबन्ति च ॥ ७ ॥
शिष्टमत्रापविध्यन्ति भक्षयन्ति तथा परे ॥ निवार्यमाणास्ते सर्वे भ्रुवौ वै दर्शयन्ति हि ॥ ८ ॥
इमे हि संरब्धतरास्तथा तैः संप्रधर्षिताः ॥ वारयन्तो वनात्तस्मात्क्रुद्धैर्वानरयूथपैः ॥ ९ ॥
ततस्तैर्बहुभिर्वीरैर्वानरैर्वानरर्षभ ॥ संरक्तनयनैः क्रोधाद्वयं प्रविचालिताः ॥ १० ॥

जगतीं भूमिं ॥ ३८—४० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्विषष्टितमः सर्गः ॥ ६२ ॥

उद्विग्नहृदयः भीतहृदयः । मातुलस्यापि पादपतनं स्वामित्वानुसारेण ॥ १—४ ॥ न निसृष्टपूर्वं यथेच्छभोगाय न दत्तपूर्वं । वानरैः अङ्गदप्रमुखैः । अन्यथा सुग्रीववाक्ये अङ्गदानुवादविरोधात् । भक्षितमिति वनैकदेशमधुपटलविषयं ॥ ५—६ ॥ अचिन्तयित्वा अगणयित्वा । मधूनीति फलानामुपलक्षणं । भक्षयन्ति पिबन्ति चेत्युक्तेः । यद्वा मधून्येव भक्षयन्ति भक्षवत्कुर्वन्तीत्यर्थः ॥ ७ ॥ शिष्टं अवशिष्टं मधुपटलं । अत्र मधुवने । अपविध्यन्ति ध्वंसयन्ति । भक्षयन्ति मधुपटलमित्यर्थः ॥ ८ ॥ हिशब्दः पादपू-

---

ति० तौ सर्ववानरपूज्यौ चरणावित्यन्वयः ॥ ४० ॥ इतिद्विषष्टितमःसर्गः ॥ ६२ ॥

स० अभयंप्रदास्यामि प्रमादादपराधेप्रसक्तेपीतिशेषः ॥ २ ॥ स० संभ्रमात्किं किंप्रयोजनं । यद्वक्तुमर्हसितद्ब्रूहि । कस्मात्संभ्रमः किंसंभ्रमस्तस्मात् । इदं पादयोःपतनं । यतस्त्वंअर्हसि योग्योसि । अर्ह्यतइत्यर्हः सइवाचरतीतिण्युत्पत्त्या पूज्योसीत्यर्थइतिवा ॥ ३ ॥ शि० समहाप्राज्ञः महाप्राज्ञासहितः । प्राज्ञाशब्दःस्वार्थिकाणन्तः । ङीबभावस्त्वजादित्वात् ॥ ४ ॥ ति० एभिः हनुमदाद्यैः प्रधर्षणायामारब्धायां वनपालकैर्वारितं । ममापि । अपिनाइतरान्पालकानचिन्तयन् अचिन्तयन्तः

[पा०] १ ख. ङ. झ. ट. सुग्रीवस्याशुतौ. २ ग. ङ. झ. ट. प्रदास्यामि. ३ ख.—ङ. ज. झ. ञ. सत्यमेवा. ४ अयंश्लोकः ङ. च. ज.—ट. पाठेषुदृश्यते. ५ ङ. झ. ट. ससमाश्वासितः. ६ घ. सहसाप्राज्ञो. क. ख. ङ. च. ज. झ. ट. समहाप्राज्ञो. ७ ख. ङ. च. ज. झ. ट. निसृष्टपूर्वंतेनाशितंतत्तु. क. निसृष्टपूर्वंहिमथितंतत्तु. ८ अयंश्लोकः घ. ङ. च. ज.—ट. पाठेषुदृश्यते. ९ झ. प्रधर्षणायांचवारितंवनपालकैः. ङ. च. ज. ञ. ट. प्रधृष्यमाणाश्चवारिताः. १० ङ. झ. मामप्यचिन्तयन्देवभक्षयन्तिवनौकसः. ट. मामप्यचिन्तयित्वाते. च. मधून्यचिन्तयित्वाते. ११ च. ज.—ट. भ्रुकुटिंदर्शयन्तिहि. १२ छ. ज. ञ. संरब्धनयनैःक्रूरैरस्मदीयाःप्रधर्षिताः. १३ झ. ट. संप्रधर्षिताः.

पाणिभिर्निहताः केचित्केचिज्जानुभिराहताः ॥ प्रकृष्टाश्च यथाकामं देवमार्गं च दर्शिताः ॥ ११ ॥
एवमेते हताः शूरास्त्वयि तिष्ठति भर्तरि ॥ कृत्स्नं मधुवनं चैव प्रकामं तैः प्रभक्ष्यते ॥ १२ ॥
एवं विज्ञाप्यमानं तं सुग्रीवं वानरर्षभम् ॥ अपृच्छत्तं महाप्राज्ञो लक्ष्मणः परवीरहा ॥ १३ ॥
किमयं वानरो राजन्वनपः प्रत्युपस्थितः ॥ कं चार्थमभिनिर्दिश्य दुःखितो वाक्यमब्रवीत् ॥ १४ ॥
एवमुक्तस्तु सुग्रीवो लक्ष्मणेन महात्मना ॥ लक्ष्मणं प्रत्युवाचेदं वाक्यं वाक्यविशारदः ॥ १५ ॥
आर्य लक्ष्मण संप्राह वीरो दधिमुखः कपिः ॥ अङ्गदप्रमुखैर्वीरैर्भक्षितं मधु वानरैः ॥
विचित्य दक्षिणामाशामागतैर्हरिपुङ्गवैः ॥ १६ ॥
नैषामकृतकृत्यानामीदृशः स्यादुपक्रमः ॥ आगतैश्च प्रमथितं यथा मधुवनं हि तैः ॥
धर्षितं च वनं कृत्स्नमुपयुक्तं च वानरैः ॥ १७ ॥
वनं यदाऽभिपन्नास्ते साधितं कर्म वानरैः ॥ १८ ॥
[वारयन्तो भृशं प्राप्ताः पाला जानुभिराहताः ॥ तथा न गणितश्चायं कपिर्दधिमुखो बली ॥
पतिर्मम वनस्यायमस्माभिः स्थापितः स्वयम् ॥ १९ ॥]
दृष्टा देवी न संदेहो न चान्येन हनूमता ॥ न ह्यन्यः साधने हेतुः कर्मणोस्य हनूमतः ॥ २० ॥
कार्यसिद्धिर्मतिश्चैव तस्मिन्वानरपुङ्गवे ॥ व्यवसायश्च वीर्यं च श्रुतं चापि प्रतिष्ठितम् ॥ २१ ॥
जाम्बवान्यत्र नेता स्यादङ्गदश्च महाबलः ॥ हनूमांश्चाप्यधिष्ठाता न तस्य गतिरन्यथा ॥ २२ ॥
अङ्गदप्रमुखैर्वीरैर्हतं मधुवनं किल ॥ वारयन्तश्च सहितास्तथा जानुभिराहताः ॥ २३ ॥
एतदर्थमयं प्राप्तो वक्तुं मधुरवागिह ॥ नाम्ना दधिमुखो नाम हरिः प्रख्यातविक्रमः ॥ २४ ॥
दृष्टा सीता महाबाहो सौमित्रे पश्य तत्त्वतः ॥ अभिगम्य तथा सर्वे पिबन्ति मधु वानराः ॥२५॥
न चाप्यदृष्ट्वा वैदेहीं विश्रुताः पुरुषर्षभ ॥ वनं दत्तवरं दिव्यं धर्षयेयुर्वनौकसः ॥ २६ ॥
ततः प्रहृष्टो धर्मात्मा लक्ष्मणः सहराघवः ॥ श्रुत्वा कर्णसुखां वाणीं सुग्रीववदनाच्युताम् ॥
प्राहृष्यत भृशं रामो लक्ष्मणश्च महाबलः ॥ २७ ॥

रणे । संप्रधर्षणचिह्नस्य दृश्यमानत्वाभिप्रायेण प्रसिद्धिपरो वा ॥ ९—१५ ॥ अङ्गदप्रमुखैरिति । अत्र विशिष्यानुवादाद्दधिमुखवाक्ये वानरपुङ्गवैरित्यत्रापि विशेषपरत्वं बोध्यं ॥ १६ ॥ वनं प्रमथितं भग्नं । धर्षितं आक्रान्तं । मधु च भक्षितं । यथा येन कारणेन । एषामकृतकृत्यानामीदृश उपक्रमो न स्यादिति मन्य इति योजना ॥ १७ ॥ कृतकृत्यत्वं विशेषयति—वनमित्यादिना ॥ १८—२५ ॥ वनमिति । मधुवनधर्षणमेव सीतादर्शने लिङ्गमिति भावः । दत्तवरं दिव्यमित्यनेन ऋक्षरजसे ब्रह्मणा दत्तमित्यवग-

---

॥ ७ ॥ शि० देवमार्गदर्शिताः प्रक्षेपेणप्रापिताः ॥ ११ ॥ ती० सहैववसतोलक्ष्मणस्यकंचनार्थमभिनिर्दिश्यदुःखितोवाक्यमब्रवीदितिप्रश्नकरणाद्दधिमुखेनवनभङ्गादिकंस्वजात्युचितभाषयोक्तमित्यवगन्तव्यं । उपांशूक्तमितिवाद्रष्टव्यं ॥ १३ ॥ ति० यत् यतः । वनमभिपन्नाः नाशयितुंप्रवृत्ताः ॥ १८ ॥ स० स्ववेदनावेदनवागपि रामकार्यसूचकत्वान्मधुरवाक् ॥ २४ ॥ इतित्रिषष्टितमःसर्गः ॥ ६३ ॥

[पा०] १ क. वनपोराजन्वानरः. २ ङ. झ. ट. मकृतकार्याणां. ३ ङ. झ. ट. स्याद्यतिक्रमः. ४ च. ज. आत्मेच्छातः प्रहृष्टैश्चहृतंमधुवनं. ५ झ. यदभिपन्नाः. ६ ङ. झ. ट. तद्भुवं. ७ इदमर्धत्रयं ख. ग. ङ. च. छ. झ. ञ. ट. पाठेषुदृश्यते. ८ ङ. झ. ट. कार्यसिद्धिर्हनुमति. ख. ग. घ. हनूमतःकार्यसिद्धिर्मतिश्चहरिपुङ्गवे. क. यदतःकार्यसंसिद्धिः. ९ क. च. छ. ज. ञ. वीर्यंचसूर्ये तेजइवध्रुवं. १० क. स्याद्युवराजस्तथाङ्गदः. ११ ङ.—ट. नंतत्र. क. ग. नह्यस्य. १२ ख. घ. च. छ. ज. वारितास्सहिताःपालास्तथा. ञ. पातिताःसहिताःपालास्तथा. क. वानरास्तुहताःपालास्तथा. ङ. झ. ट. पातितावनपालास्तेतथा. १३ क. ङ.—ट. यथा. १४ घ. विश्रान्ताः. क. विश्रुताःप्लवगर्षभाः. १५ घ. एतन्मधुवनंदिव्यं. १६ क. ख. घ. ङ. च. ज.—ट. महायशाः.

श्रुत्वा दधिमुखस्येदं सुग्रीवस्तु प्रहृष्य च ॥ वनपालं पुनर्वाक्यं सुग्रीवः प्रत्यभाषत ॥ २८ ॥
प्रीतोस्मि सोहं यद्दुक्तं वनं तैः कृतकर्मभिः ॥ मर्षितं मर्षणीयं च चेष्टितं कृतकर्मणाम् ॥ २९ ॥
[गच्छ शीघ्रं मधुवनं संरक्षस्व त्वमेव हि ॥ शीघ्रं प्रेषय सर्वांस्तान्हनुमत्प्रमुखान्कपीन् ॥ ३० ॥]
इच्छामि शीघ्रं हनुमत्प्रधानाञ्शाखामृगांस्तान्मृगराजदर्पान् ॥
द्रष्टुं कृतार्थान्सह राघवाभ्यां श्रोतुं च सीताधिगमे प्रयत्नम् ॥ ३१ ॥
प्रीतिस्फीताक्षौ संप्रहृष्टौ कुमारौ दृष्ट्वा सिद्धार्थौ वानराणां च राजा ॥
अङ्गैः संहृष्टैः कर्मसिद्धिं विदित्वा बाह्वोरासन्नां सोतिमात्रं ननन्द ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

चतुःषष्टितमः सर्गः ॥ ६४ ॥

दधिमुखेन सुग्रीवसमीपात्पुनर्मधुवनमेत्य अङ्गदक्षमापणपूर्वकं तंप्रति शीघ्रागमनविषयकसुग्रीवचोदनानिवेदनम् ॥ १ ॥ हनुमताऽङ्गदादिभिःसह सुग्रीवसमीपमेत्य श्रीरामंप्रति सप्रणामंसीताकुशलनिवेदनं ॥ २ ॥

सुग्रीवेणैवमुक्तस्तु हृष्टो दधिमुखः कपिः ॥ राघवं लक्ष्मणं चैव सुग्रीवं चाभ्यवादयत् ॥ १ ॥
स प्रणम्य च सुग्रीवं राघवौ च महाबलौ ॥ वानरैः सहितैः शूरैर्दिवमेवोत्पपात ह ॥ २ ॥
स यथैवागतः पूर्वं तथैव त्वरितं गतः ॥ निपत्य गगनाद्भूमौ तद्वनं प्रविवेश ह ॥ ३ ॥
स प्रविष्टो मधुवनं ददर्श हरियूथपान् ॥ विमदानुत्थितान्सर्वान्मेहमानान्मधूदकम् ॥ ४ ॥
स तानुपागमद्वीरो बद्ध्वा करपुटाञ्जलिम् ॥ उवाच वचनं श्लक्ष्णमिदं हृष्टवदङ्गदम् ॥ ५ ॥

म्यते ॥ २६—२७ ॥ द्वितीयसुग्रीवशब्दस्य शोभनग्रीव इत्यवयवार्थो विवक्षितः । क्रियाभेदेनापुनरुक्तिर्वा ॥ २८—३० ॥ हनुमत्प्रधानान् हनुमत्प्रमुखान् । कृतार्थान् कृतकृत्यान् । प्रयत्नं प्रयासं । तेभ्यः श्रोतुमिच्छामीत्यन्वयः ॥ ३१ ॥ अथ प्रत्युपकारार्थं सुग्रीवः स्वोद्योगसाफल्यदर्शनात् भृशं ननन्देत्याह—प्रीतिस्फीताक्षाविति । प्रीत्या संतोषेण । संप्रहृष्टौ रोमस्विति शेषः । हृषितरोमाणावित्यर्थः । " हृषेर्लोमसु " इति विकल्पादिडभावः । एवं अङ्गैः संहृष्टैरित्यत्रापि द्रष्टव्यं । कर्मसिद्धिं बाह्वोरासन्नां हस्तप्राप्तां । विदित्वा । निश्चित्येत्यर्थः । जागतं वैश्वदेवीवृत्तं । " पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ यौ " इति लक्षणात् ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रिषष्टितमस्सर्गः ॥ ६३ ॥

सहितैः स्नेहातिरेकेणान्योन्यं युक्तैः । वानरैः सहितैरिति पाठः ॥ १—३ ॥ विमदानित्यत्र हेतुमाह—मेहमानानिति । मेहमानान् मेहयतः । मूत्रयत इत्यर्थः । एतेन मूत्रणान्मधूनि जीर्णानीति गम्यते । अतएव विमदत्वं । मधूनि च उदकानि च । मधूदकमिति द्वन्द्वैकवद्भावः । उदकानि चात्र अनुपानत्वेन पीतानि । तदाह बाहटः—" अनुपानं हिमं वारि यवगोधूमयोर्हितं । दधि मद्ये बिसे क्षौद्रे कोष्णं पिष्टमयेषु च " इति ॥ ४ ॥ करपुटाञ्जलिं करतलयोरञ्जलिं । सम्यक्संयुक्तकरतलाञ्जलिमि-

ति० मधुपरिणामभूतमुदकं मधूदकं ॥ ४ ॥

[पा०] १ ङ. ञ. ट. धर्षितंमर्षणीयंच. ग. च. छ. ज. ञ. अमर्षणीयमेतेषां. ख. मर्षणीयंचमेतेषां. २ अयंश्लोकः ङ. ञ. ट. पाठेषुदृश्यते. ३ ख. ङ. ञ. प्रष्टुं. ४ क. प्रवृत्तिं. ५ क. ङ.—ठ. प्रहृष्टैःकार्यसिद्धिं. ६ ग. ङ. ञ. ट. रासन्नामतिमात्रं. ७ ङ.—ट. सहितः. ८ ख. ङ.—ट. नुद्धतान्.

सौम्य रोषो न कर्तव्यो [1]यदेभिरभिवारितः ॥ अज्ञानाद्रक्षिभिः क्रोधाद्भवन्तः प्रतिषेधिताः ॥
[[2]श्रान्तो दूरादनुप्राप्तो भक्षयस्व स्वकं मधु ॥ ६ ॥]
युवराजस्त्वमीशश्च वनस्यास्य महाबल ॥ मौर्ख्यात्पूर्वं कृतो दोष[3]स्तं भवान्क्षन्तुमर्हति ॥ ७ ॥
[[4]यथैव हि पिता तेऽभूत्पूर्वं हरिगणेश्वरः ॥ तथा त्वमपि सुग्रीवो नान्यस्तु हरिसत्तम ॥ ८ ॥]
आख्यातं हि मया गत्वा पितृव्यस्य तवानघ ॥ इहोपयातं सर्वेषामेतेषां वनचारिणाम् ॥ ९ ॥
[5]स त्वदागमनं श्रुत्वा सहैभिर्हरियूथपैः ॥ [6]प्रहृष्टो न तु रुष्टोसौ वनं श्रुत्वा प्रधर्षितम् ॥ १० ॥
[7]प्रहृष्टो मां पितृव्यस्ते सुग्रीवो वानरेश्वरः ॥ शीघ्रं प्रेषय सर्वांस्तानिति होवाच पार्थिवः ॥ ११ ॥
श्रुत्वा दधिमुख[8]स्येदं वचनं श्लक्ष्णमङ्गदः ॥ अब्रवीत्तान्हरिश्रेष्ठो वाक्यं वाक्यविशारदः ॥ १२ ॥
शङ्के श्रुतोऽयं वृत्तान्तो रामेण हरियूथपाः ॥ [[9]अयं च हर्षादाख्याति तेन जानामि हेतुना ॥]
तत्क्षणं नेह नः स्थातुं कृतेऽकार्ये परन्तपाः ॥ १३ ॥
पीत्वा मधु यथाकामं [10]विश्रान्ता वनचारिणः ॥ किं शेषं गमनं तत्र सुग्रीवो [11]यत्र मे गुरुः ॥ १४ ॥
सर्वे यथा मां वक्ष्यन्ति समेत्य हरियूथपाः ॥ तथाऽस्मि कर्ता कर्तव्ये भवद्भिः परवानहम् ॥ १५ ॥
नाज्ञापयितुमीशोऽहं युवराजोसि यद्यपि ॥ अयुक्तं कृतकर्माणो यूयं धर्षयितुं [12]मया ॥ १६ ॥
[13]श्रुवतश्चाङ्गदस्यैवं श्रुत्वा वचनमव्ययम् ॥ प्रहृष्टमनसो वाक्यमिदमूचुर्वनौकसः ॥ १७ ॥
एवं वक्ष्यति को राजन्प्रभुः सन्वानरर्षभ ॥ ऐश्वर्यमदमत्तो हि सर्वोऽहमिति मन्यते ॥ १८ ॥
तव चेदं सुसदृशं वाक्यं नान्यस्य कस्य चित् ॥ सन्नतिर्हि तवाख्याति भविष्यच्छुभयोग्यताम् ॥१९॥

त्यर्थः ॥ ५ ॥ एभिः वानरैः । अभिवारितः अभिवारितोऽसीति यत् अत्रार्थे रोषो न कर्तव्यः । भवन्त इति पूजायां बहुवचनं । नच हनुमदादिकमादाय बहुवचनं उत्तरश्लोकेपि युवराजस्त्वमित्युक्तेः । अज्ञानात्क्रोधात् । अज्ञानप्रयुक्तक्रोधादित्यर्थः । अभिवारितमिति पाठे लिङ्व्यत्यय आर्षः । केचित्तु अज्ञानात् क्रोधाच्च भवन्तः प्रतिषेधिता इत्येतत् परिवारितं परिवारणं प्रति । रोषो न कर्तव्य इति योजयन्ति ॥ ६ ॥ क्रोधाद्वारणे कृते कुतो रोषो न कर्तव्यस्यादित्याशङ्क्य क्रोधस्याज्ञानकृतत्वादित्याह—युवराज इति ॥ दोषः निवारणरूपापराधः ॥ ७—८ ॥ उपयातं आगमनं ॥ ९—१२ ॥ अयं वृत्तान्तः अस्मदागमनवृत्तान्तः ॥१३॥ किं शेषं न किंचिदपि शिष्टमित्यर्थः । किन्तु मे गुरुः सुग्रीवो यत्र वर्तते तत्र गमनमेवशेषमित्यर्थः । "किंशेषं गमनं तच्च सुग्रीवो यत्र मे गुरुः" इति पाठे अस्माकं गमनं किंशेषं किंचिच्छेषं । तच्च गमनशेषं च सुग्रीवो यत्र तत्र गमनमिति संबन्धः ॥ १४ ॥ विनयपूर्वकं सर्वसंमेलनं समर्थयते—सर्व इति ॥ तथास्मि कर्ता आह्वानं करिष्यामीत्यर्थः । कर्तव्ये कार्ये भवद्भिः अहं परवान् । भवद्भिर्यथा नियुक्तं तथा करिष्यामि । गन्तव्यमित्युक्ते गमिष्यामः स्थातव्यमित्युक्ते स्थास्याम इत्यर्थः ॥१५॥ युवराजत्वाद्भवानेव कर्तव्याकर्तव्यनियन्तेत्यत आह—नाज्ञापयितुमिति ॥ ईशः स्वतन्त्रः । कृतकर्माणः कृतोपकाराः । यूयं मया धर्षयितुं अनादर्तुं परतन्त्रीकर्तुमिति यावत् । अयुक्तं अयुक्ता इत्यर्थः । आर्षमव्ययमेतत् । शक्यमितिवत्सामान्योपक्रमान्नपुंसकैकत्वनिर्देश इत्यप्याहुः ॥१६—१७॥ अहमिति मन्यते गर्विष्ठो भवतीति यावत् ॥ १८ ॥ सन्नतिः

ति० तत्. तस्मात् । अकार्ये वनविध्वंसनरूपे । कृतेसति इहस्थातुं । नोस्माकं नक्षमं नयुक्तं ॥ १३ ॥

[पा०] १ ङ. झ. ट. यदेभिःपरिवारणं. ख. यदेभिर्नविचारितं. क. यदेभिरविचारितं. २ इदमर्धं ङ.—ट. पाठेषु दृश्यते. ३ ङ. झ. ट. रोषस्तद्भवान्. क. ख. घ. च. छ. ज. दोषस्तद्भवान्. ४ अयंश्लोकः ङ.—ट. पाठेषुदृश्यते. ५ क. ख. घ.—ट. यानं. ६ क. राजालामागतं. ङ. झ. ट. भवदागमनंश्रुत्वासहैभिर्वनचारिभिः. ७ क. संप्रहृष्टोनरुष्टस्तु. ८ क. मांचाब्रवीत्पितृव्यस्ते. ९ क. ख. ङ. झ. ट. स्यैतद्वचनं. १० इदमर्धं ख. ङ.—ट. पाठेषुदृश्यते. ११ ङ. झ. ट. विक्रान्ताः. १२ ङ. झ. ट. यत्रवानरः. १३ ङ. झ. ट. वलात्. च. छ. ज. रुषा. १४ ङ.—ट. मुत्तमं.

सर्वे वयमपि प्राप्तास्तत्र गन्तुं कृतक्षणाः ॥ स यत्र हरिवीराणां सुग्रीवः पतिरव्ययः ॥ २० ॥
त्वया ह्यनुक्तैर्हरिभिर्नैव शक्यं पदात्पदम् ॥ क्वचिद्गन्तुं हरिश्रेष्ठ ब्रूमः सत्यमिदं तु ते ॥ २१ ॥
एवं तु वदतां तेषामङ्गदः प्रत्यभाषत ॥ बाढं गच्छाम इत्युक्त्वा खमुत्पेतुर्महाबलाः ॥ २२ ॥
उत्पतन्तमनूत्पेतुः सर्वे ते हरियूथपाः ॥ कृत्वाऽऽकाशं निराकाशं यन्त्रोत्क्षिप्ता इवाचलाः ॥ २३ ॥
[अङ्गदं पुरतः कृत्वा हनूमन्तं च वानरम् ॥] तेऽम्बरं सहसोत्पत्य वेगवन्तः प्लवङ्गमाः ॥
विनदन्तो महानादं घना वातेरिता यथा ॥ २४ ॥
अङ्गदे समनुप्राप्ते सुग्रीवो वानराधिपः ॥ उवाच शोकोपहतं रामं कमललोचनम् ॥ २५ ॥
समाश्वसिहि भद्रं ते दृष्टा देवी न संशयः ॥ नागन्तुमिह शक्यं तैरृतीते समये हि नः ॥
[अङ्गदस्य प्रहर्षाच्च जानामि शुभदर्शन ॥ २६ ॥]
न मत्सकाशमागच्छेत्कृत्ये हि विनिपातिते ॥ युवराजो महाबाहुः प्लवतां प्रवरोऽङ्गदः ॥ २७ ॥
यद्यप्यकृतकृत्यानामीदृशः स्यादुपक्रमः ॥ भवेत्स दीनवदनो भ्रान्तविप्लुतमानसः ॥ २८ ॥
पितृपैतामहं चैतत्पूर्वकैरभिरक्षितम् ॥ न मे मधुवनं हन्याद्दृष्टः प्लवगेश्वरः ॥ २९ ॥
कौसल्या सुप्रजा राम समाश्वसिहि सुव्रत ॥ दृष्टा देवी न संदेहो न चान्येन हनूमता ॥ ३० ॥
न ह्यन्यः कर्मणो हेतुः साधनेस्य हनूमतः ॥ हनूमति हि सिद्धिश्च मतिश्च मतिसत्तम ॥
व्यवसायश्च वीर्यं च सूर्ये तेज इव ध्रुवम् ॥ ३१ ॥
जाम्बवान्यत्र नेता स्यादङ्गदश्च बलेश्वरः ॥ हनुमांश्चाप्यधिष्ठाता न तस्य गतिरन्यथा ॥ ३२ ॥

विनयः ॥ १९ ॥ कृतक्षणाः कृतावसराः । अवसरप्रतीक्षा इति यावत् ॥ २०—२१ ॥ बाढमित्यङ्गीकारे । इतिशब्दः काकाक्षिन्यायेन पूर्वापरयोरन्वेति । एवं तेषां वदतां तेषु वदत्सु । अङ्गदः बाढमिति प्रत्यभाषत । गच्छाम इत्युक्त्वापि उत्पपात ॥ २२ ॥ निराकाशं निरवकाशम् ॥ २३ ॥ तेम्बरमिति अत्र जग्मुरित्यध्याहार्यं ॥ २४—२६ ॥ विनिपातिते विनिहते ॥ २७ ॥ अकृतकृत्यानां अकृतकार्याणां । ईदृशः मधुवनभङ्गरूपः । उपक्रमः उद्योगः । यदि स्यात्तदाङ्गदो दीनवदनत्वादिविशिष्टो भवेत् ॥ २८ ॥ पिता चासौ पितामहश्च । पित्रा ब्रह्मणा ऋक्षरजसे दत्तं पितृपैतामहं । प्लवगेश्वरः अङ्गदः ॥ २९ ॥ हे राम कौसल्या सुप्रजाः सुप्रजावती । " नित्यमसिच् प्रजामेधयोः " इत्यसिच्प्रत्ययः । एवं देव्यवस्थानज्ञानेन भवतस्सत्तालाभादिदानीं कौसल्या सुप्रजावती अभूदिति शेषः ॥ ३०—३१ ॥ यत्र कार्ये ।

ती० ननुमधुवनधर्षणमात्रेणकथंकार्यसिद्धिः कापेयादिनापिसंभवादित्याशङ्क्यसत्यमन्येषांतादृशत्वेपि अङ्गदस्यनैतादृशइत्याशयेनाह—यद्यपीत्यादिश्लोकद्वयेन । अकृतकृत्यानामन्येषांवानराणां ईदृशउपक्रमः मधुवनभङ्गहर्षव्यापारोयद्यपिस्यात् । तथापि तत्राङ्गदस्तु दीनवदनो भ्रान्तविप्लुतमानसश्चभवेत् । कुतः पितृपैतामहं पितृपितामहपरंपरागतं । मेमधुवनं जनकात्मजामदृष्टानहन्यात् ॥ २८–२९ ॥ ती० हेराम कौसल्यासुप्रजाः । सीतायाःस्थितिपरिज्ञानेनभवतःसत्तालाभात् इदानींकौसल्यासुपुत्रवत्यभूदितिभावः ॥ ३० ॥ ति० अस्यकर्मणःसाधने तद्विधोहेतुरपरोनभवेत् नास्ति । इहहनूमति एतत्कार्यसाधिकासिद्धिः ब्रह्मवरजन्यामतिश्चास्ति । हि यतः । व्यवसायः उद्यमः ॥ ३१ ॥ ति० नेता प्रधानः । अधिष्ठाता कार्यकरणोद्योगवान् ॥ ३२ ॥

[पा०] १ ङ. झ. ट. साधुगच्छाम. २ च. छ. उत्पपातमहीतलात्. ख. घ. खमुत्पेतुर्महीतलात्. ३ ङ. ज.—ट. यन्त्रोत्क्षिप्ताइवोपलाः, क. ख. ग. छ. यन्त्रोत्क्षिप्ताइवानलाः. ४ इदमर्धं ङ. झ. ट. पाठेषुदृश्यते. ५ च. छ. ज. ञ. तेऽङ्गदं पुरतःकृत्वा. ६ ङ.—ट. शोकसंतप्तं. ७ ङ.—ट. रतीतसमयैरिह. ८ इदमर्धं ङ.—ट. पाठेषुदृश्यते. ९ क. ङ. झ. ट. भवेत्तुदीनवदनो. ख. ग. घ. भवेयुर्दीनवदनाभ्रान्तविप्लुतमानसाः. १० छ. ज. भ्रान्तविप्लुत. ११ ङ. झ. दद्यद्राजनकात्मजां. १२ क. घ.—ट. नह्यस्यकर्मणोहेतुस्साधनेतद्विधोभवेत्. ग. नह्यस्यसाधकोहेतुस्साधनेतद्विधोभवेत्. १३ क. च. छ. ज. ञ. हनूमतिमतिश्चैवकर्मसिद्धिश्चसत्तम. १४ क. रघुसत्तम. १५ क. ख. ग. ङ. छ.—ट. शौर्यंचश्रुतंचापिप्रतिष्ठितं. १६ ख.—ठ. हरीश्वरः. १७ ङ. च. छ. झ. ञ. ट. तत्र.

मा भूश्चिन्तासमायुक्तः संप्रत्यमितविक्रम ॥ ३३ ॥
[यदा हि दर्पितोदग्राः संगताः काननौकसः ॥ नैषामकृतकार्याणामीदृशः स्यादुपक्रमः ॥
वनभङ्गेन जानामि मधूनां भक्षणेन च ॥ ३४ ॥]
ततः किलकिलाशब्दं शुश्रावासन्नमम्बरे ॥ हनुमत्कर्मदृप्तानां नर्दतां काननौकसाम् ॥
किष्किन्धामुपयातानां सिद्धिं कथयतामिव ॥ ३५ ॥
ततः श्रुत्वा निनादं तं कपीनां कपिसत्तमः ॥ आयताश्चितलाङ्गूलः सोभवद्धृष्टमानसः ॥ ३६ ॥
आजग्मुस्तेऽपि हरयो रामदर्शनकाङ्क्षिणः ॥ अङ्गदं पुरतः कृत्वा हनूमन्तं च वानरम् ॥ ३७ ॥
तेऽङ्गदप्रमुखा वीराः प्रहृष्टाश्च मुदान्विताः ॥ निपेतुर्हरिराजस्य समीपे राघवस्य च ॥ ३८ ॥
हनुमांश्च महाबाहुः प्रणम्य शिरसा ततः ॥ नियतामक्षतां देवीं राघवाय न्यवेदयत् ॥ ३९ ॥
[दृष्टा देवीति हनुमद्वदनादमृतोपमम् ॥ आकर्ण्य वचनं रामो हर्षमाप सलक्ष्मणः ॥ ४० ॥]
निश्चितार्थस्ततस्तस्मिन्सुग्रीवः पवनात्मजे ॥ लक्ष्मणः प्रीतिमान्प्रीतं बहुमानादवैक्षत ॥ ४१ ॥
प्रीत्या च रममाणोथ राघवः परवीरहा ॥ बहुमानेन महता हनुमन्तमवैक्षत ॥ ४२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

पञ्चषष्टितमः सर्गः ॥ ६५ ॥

रामेण सीतावृत्तान्तंदृष्टेनहनुमता तंप्रति शिंशुपामूले राक्षसीमध्यस्थित्यादितद्वृत्तान्तकथनपूर्वकं तदुक्ताभिज्ञाननिवेदनेन सह तत्सन्देशकथनम् ॥ १ ॥

ततः प्रस्रवणं शैलं ते गत्वा चित्रकाननम् ॥ प्रणम्य शिरसा रामं लक्ष्मणं च महाबलम् ॥ १ ॥
युवराजं पुरस्कृत्य सुग्रीवमभिवाद्य च ॥ प्रवृत्तिमथ सीतायाः प्रवक्तुमुपचक्रमुः ॥ २ ॥
रावणान्तःपुरे रोधं राक्षसीभिश्च तर्जनम् ॥ रामे समनुरागं च यश्चायं समयः कृतः ॥
एतदाख्यान्ति ते सर्वे हरयो रामसन्निधौ ॥ ३ ॥

नतो मन्त्री । बलेश्वरः सेनापतिः । अधिष्ठाता संरक्षक इत्यर्थः । तस्य कार्यस्य । गतिः सिद्धिः । अन्यथा विपरीता । न भवेत् । संप्रति चिन्तासंयुक्तो मा भूः ॥ ३२—३४ ॥ सिद्धिं कथयतामिव । उत्साहेनेति शेषः ॥ ३५ ॥ आयताश्चितलाङ्गूलः आयतः दीर्घीकृतः अञ्चितः माल्यवच्छृङ्गे समास्थापितः ॥ ३६—३७ ॥ प्रहृष्टाः सञ्जातपुलकाः ॥३८॥ नियतामिति । अक्षतत्वेप्यनियतत्वे वैयर्थ्यं नियतत्वेपि क्षतत्वे च तथा । ततः आवश्यकमुभयं संग्रहेण दर्शयति ॥ अस्मिन्सर्गे सार्धैकोनचत्वारिंशच्छ्लोकाः ॥ ३९–४२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुष्षष्टितमः सर्गः ॥ ६४ ॥

प्रवृत्तिं वार्तां ॥ २ ॥ रोधं निरोधं । यश्चायं समयः कृतः । मासद्वयादूर्ध्वं हनिष्यामीति यः

ति० नियतां पातिव्रत्यसंपन्नां । अक्षतां शरीरेणकुशलिनीं ॥ ३९ ॥ शि० परमया लक्ष्म्यापि परयासीतयेत्यर्थः ॥ उपेतो मनसासंयुक्तः । राघवश्च महता प्रशंसनीयेन । बहुमानेनावैक्षत ॥ ४२ ॥ इतिचतुष्षष्टितमःसर्गः ॥ ६४ ॥

ति० रामसंनिधौ स्थिताइतिशेषः ॥ ३ ॥

[पा०] १ इदमर्धत्रयं ङ.—ट. पाठेषुदृश्यते. २ घ.—ट. नदतां. ३ ङ. झ. ट. मदान्विताः. ४ अयंश्लोकः ङ.—ट. पाठेषुदृश्यते. ५ क. घ.—ट. निश्चितार्थंततस्तस्मिन्सुग्रीवंपवनात्मजे । लक्ष्मणःप्रीतिमान्प्रीतो. ६ झ. ञ. ट. परमोपेतो. ७ ख. ङ. झ. मुपचक्रमे. ८ क. राक्षसीनांच. ९ ङ. झ. ट. यथाच. १० ङ. च. झ. एतदाख्यायते.

वैदेहीमक्षतां श्रुत्वा रामस्तूत्तरमब्रवीत् ॥ क्व सीता वर्तते देवी कथं च मयि वर्तते ॥
एतन्मे सर्वमाख्यात वैदेहीं प्रति वानराः ॥ ४ ॥
रामस्य गदितं श्रुत्वा हरयो रामसन्निधौ ॥ चोदयन्ति हनूमन्तं सीतावृत्तान्तकोविदम् ॥ ५ ॥
श्रुत्वा तु वचनं तेषां हनुमान्मारुतात्मजः ॥ प्रणम्य शिरसा देव्यै सीतायै तां दिशं प्रति ॥
उवाच वाक्यं वाक्यज्ञः सीताया दर्शनं यथा ॥ ६ ॥
[[1]तं मणिं काञ्चनं दिव्यं दीप्यमानं स्वतेजसा ॥ दत्त्वा रामाय हनुमांस्ततः प्राञ्जलिरब्रवीत् ॥७॥]
समुद्रं लङ्घयित्वाऽहं शतयोजनमायतम् ॥ अगच्छं जानकीं सीतां मार्गमाणो दिदृक्षया ॥ ८ ॥
तत्र लङ्केति नगरी रावणस्य दुरात्मनः ॥ दक्षिणस्य समुद्रस्य तीरे वसति दक्षिणे ॥ ९ ॥
तत्र दृष्टा मया सीता रावणान्तःपुरे सती ॥ संन्यस्य त्वयि जीवन्ती रामा राम मनोरथम् ॥ १० ॥
दृष्टा मे राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः ॥ राक्षसीभिर्विरूपाभी रक्षिता प्रमदावने ॥ ११ ॥
दुःख[2]मासाद्यते देवी [3]तथाऽदुःखोचिता सती ॥ १२ ॥
रावणान्तःपुरे रुद्धा राक्षसीभिः सुरक्षिता ॥ एकवेणीधरा दीना त्वं[4]यि चिन्तापरायणा ॥ १३ ॥
अधःशय्या विवर्णाङ्गी पद्मिनीव हिमागमे ॥ रावणाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया ॥
देवी कथंचित्काकुत्स्थ त्वन्मना मार्गिता मया ॥ १४ ॥
इक्ष्वाकुवंशविख्यातिं शनैः [5]कीर्तयताऽनघ ॥ [6]सा मया नरशार्दूल विश्वास[7]मुपपादिता ॥ १५ ॥
ततः संभाषिता देवी सर्वमर्थं च दर्शिता ॥ [8]रामसुग्रीवसख्यं च श्रुत्वा प्रीतिमुपागता ॥ १६ ॥
नियतः समुदाचारो भक्तिश्चास्यास्तथा त्वयि ॥ १७ ॥
एवं मया महाभागा दृष्टा जनकनन्दिनी ॥ उग्रेण तपसा युक्ता त्वद्भक्त्या पुरुषर्षभ ॥ १८ ॥
अभिज्ञानं च मे दत्तं यथा वृत्तं तवान्तिके ॥ चित्रकूटे महाप्राज्ञ वायसं प्रति राघव ॥ १९ ॥
विज्ञाप्यश्च नरव्याघ्रो रामो वायुसुत त्वया ॥ [9]अखिलेनेह यदृष्टमिति मामाह जानकी ॥ २० ॥

संकेतो रावणेन कृत इत्यर्थः । मासशब्दःपक्षपर इत्युक्तं प्राक् । तमिति शेषः ॥ ३—५ ॥ प्रणामश्च सीतायाः स्मरणकृत इति बोध्यं । सीताया दर्शनं यथेति । येन प्रकारेण सीतादर्शनं जातं तेन प्रकारेणोवाचेत्यन्वयः ॥ ६—७ ॥ दिदृक्षया ननु श्रोतुमिच्छया । मार्गमाण इत्यर्थः ॥ ८ ॥ तत्र लङ्कने कृते सति ॥ ९ ॥ हे राम रामा सीता । त्वयि मनोरथं स्वाभिलाषं । संन्यस्य जीवन्ती । त्वदभिलाषेण धृतजीवितेत्यर्थः ॥ १०—११ ॥ दुःखमित्यर्धं । आसाद्यते आसीदति । आर्षो यत् ॥१२॥ एकवेणीधरा त्रिधा विभागं विना बद्धः केशपाशः एकवेणीत्युच्यते ॥ १३ ॥ अधःशय्या स्थण्डिलशायिनी । मर्तव्ये मरणे कृतनिश्चया ॥ १४—१५ ॥ सर्वमर्थं च दर्शिता सुग्रीवसख्यप्रभृतिसर्वमर्थं च बोधिता ॥१६॥ समुदाचारः परपुरुषाचिन्तकत्वादिः । त्वयि भक्तिश्च । वर्तत इति शेषः ॥ १७ ॥ तपसा अनशनेन ॥१८॥ अभिज्ञानं चिह्नभूतं वाक्यं । तवान्तिके पूर्वं यथा येन प्रकारेण जातं तथा दत्तमित्यर्थः । तदेव दर्शयति—चित्रकूट इति । सदस्यवक्तव्यत्वात्सूचनोक्तिः ॥ १९ ॥ अखिलेनेति । रावणागमनादिकमित्यर्थः ॥

शि० सीताक्ववर्तते । मयिकथं केनभावेनवर्तते । वैदेहीं प्रति वैदेहीसंबन्धि । एतत्सर्वं यूयमाख्यात केनभावेनेत्युक्त्या भूतंखकर्तृकरावणवधाभावजनितसीतामर्षविषयकसंभावनासूचिता ॥ ४ ॥ ति० तीरे दक्षिणसमुद्रसंबन्धिद्वीपसंनद्धतीरे ॥ ९ ॥

[पा०] १ अर्धश्लोकः ङ.—ट. पाठेषुदृश्यते. २ क. ख. ङ. ज.—ट. मापद्यते. ३ ङ. झ. ञ. ट. त्वयावीरसुखोचिता. क. ख. घ. तवादुःखोचितासती. च. त्वयाऽदुःखोचिता. ४ क. त्वच्चित्तात्वत्परायणा. ५ ख. च. छ. ज. ञ. कीर्तयतामया. ६ ख. साचमेराजशार्दूल. ७ ङ. झ. शनैर्विश्वासितातदा. ८ ख. रामसुग्रीवयोःसख्यं. ९ ङ. झ. स्सदा. १० ङ. झ. ट. विज्ञाप्यःपुनरप्येपरामो. ११ ङ. च. झ. अखिलेनयथादृष्टमिति.

अयं चास्मै प्रदातव्यो यत्नात्सुपरिरक्षितः ॥ ब्रुवता वचनान्येवं सुग्रीवस्योपशृण्वतः ॥ २१ ॥
एष चूडामणिः श्रीमान्मया सुपरिरक्षितः ॥ मनःशिलायास्तिलको गण्डपार्श्वे निवेशितः ॥ २२ ॥
त्वया प्रनष्टे तिलके तं किल स्मर्तुमर्हसि ॥ एष निर्यातितः श्रीमान्मया ते वारिसंभवः ॥ २३ ॥
एतं दृष्ट्वा प्रमोदिष्ये व्यसने त्वामिवानघ ॥ जीवितं धारयिष्यामि मासं दशरथात्मज ॥
ऊर्ध्वं मासान्न जीवेयं रक्षसां वशमागता ॥ २४ ॥
इति मामब्रवीत्सीता कृशाङ्गी धर्मचारिणी ॥ रावणान्तःपुरे रुद्धा मृगीवोत्फुल्ललोचना ॥ २५ ॥
एतदेव मयाख्यातं सर्वं राघव यद्यथा ॥ सर्वथा सागरजले संतारः प्रविधीयताम् ॥ २६ ॥
तौ जाताश्वासौ राजपुत्रौ विदित्वा तच्चाभिज्ञानं राघवाय प्रदाय ॥
देव्या चाख्यातं सर्वमेवानुपूर्व्याद्वाचा संपूर्णं वायुपुत्रः शशंस ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ॥ ६६ ॥

रामेण सीताप्रेषितचूडामणेर्वीक्षणनिक्षेपेणसकरुणंबहुधाविलापपूर्वकं हनुमन्तंप्रति पुनः सीतावचननिवेदनचोदना ॥१॥

एवमुक्तो हनुमता रामो दशरथात्मजः ॥ तं मणिं हृदये कृत्वा प्ररुरोद सलक्ष्मणः ॥ १ ॥
तं तु दृष्ट्वा मणिश्रेष्ठं राघवः शोककर्शितः ॥ नेत्राभ्यामश्रुपूर्णाभ्यां सुग्रीवमिदमब्रवीत् ॥ २ ॥
यथैव धेनुः स्रवति स्नेहाद्वत्सस्य वत्सला ॥ तथा ममापि हृदयं मणिरत्नस्य दर्शनात् ॥ ३ ॥
मणिरत्नमिदं दत्तं वैदेह्याः श्वशुरेण मे ॥ वधूकाले यथा बद्धमधिकं मूर्ध्नि शोभते ॥ ४ ॥

॥ २० ॥ सुग्रीवस्योपशृण्वतः सुग्रीवे समीपे शृण्वति सति । एवं एष चूडामणिरित्यारभ्य रक्षसां वशमागतेत्यन्तवक्ष्यमाणप्रकारेण । वचनानि रामं प्रति मयोक्तवचनानि । ब्रुवता त्वया । अयं मणिरित्यर्थः । प्रदातव्यः ॥ २१—२४ ॥ मृगीवोत्फुल्ललोचना । त्रासातिशयादिति भावः ॥ २५ ॥ सन्तीर्यतेनेनेति संतारः सेतुः ॥ २६ ॥ ताविति । पूर्ववद्वैश्वदेवीवृत्तम् । समुद्रतरणे सुरसानिरसनादिकं अक्षवधलङ्कादहनादिकं सजातीयेभ्यः पूर्वमुक्तमपि प्रभुसंनिधावात्मश्लाघायां पर्यवस्येदिति नोक्तमिति ध्येयम् । *स्ववृत्तान्तं सर्वमाख्यातवानिति सामान्येनवक्तुंयुक्तत्वेप्यङ्गदसन्निधौ प्रपञ्चनं गोप्यविशेषगोपनार्थं । अत्र त्वप्रपञ्चनं अकथनीयाकथनार्थं चेति ज्ञेयं ॥२७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चषष्टितमःसर्गः ॥६५॥

यथा वत्सला वत्से स्नेहवती धेनुः । वत्सस्य स्नेहात् वत्सविषयकस्नेहात् । स्रवत्येव द्रवत्येव । तथा मणिरत्नस्य मणिश्रेष्ठस्य । दर्शनान्मम हृदयं द्रवति ॥१—३॥ मणेरागतिमाह—मणिरत्नमिति ॥ मे श्वशुरेण जनकेन । वधूकाले वधूप्रतिग्रहकाले । विवाहकाल इत्यर्थः । यथा शोभते तथा बद्धमित्यन्वयः ॥४॥

शि० एवंवचनानिउपशृण्वतःसुग्रीवस्यसमीपेब्रुवतात्वया यत्नात् स्वत्प्रयत्नंविज्ञाय । सुपरिरक्षितः स्वदेहइतिशेषः । अयंवृत्तान्तसमूहः त्वयाप्रदातव्यःवक्तव्यइत्यर्थः ॥ २१ ॥ स० स्मरस्व स्मर । स्व स्वतन्त्रेतिरामसंबोधनंवा ॥ २२ ॥ ति० मासात् वियमानाद्दशमासादूर्ध्वमित्यर्थः ॥२४॥ ति० संतारः सन्तारोपायः । प्रविधीयतां प्रविचार्यतां ॥२६॥ इतिपञ्चषष्टितमःसर्गः ॥६५॥

ति० वत्सस्नेहत्वात्रापिदर्शनादितिसंबध्यते । तथास्नेहात्स्रवतीत्यनुकर्षः ॥ ३ ॥ ति० वधूकाले वधूत्वसंपादकेकाले । सीतामातृहस्ताद्गृहीत्वादशरथहस्तेदत्तं । तच्चतस्मिन्काले यथाधिकंशोभते तथामूर्ध्निबद्धमित्यर्थः ॥ स० वधूकरणकालेवैदेह्यामूर्ध्निबद्धंयथाअधिकंअशोभत तथाइदानीमपिशोभते । कालतस्तत्प्रकाशतिरोधानंनास्तीतिमहत्त्वंरत्नस्यध्वन्यते ॥ ४ ॥

[पा०] १ घ. च. छ. ज. ञ. ट. इदंचास्मैप्रदातव्यमेतत्सुपरिरक्षितं. २ घ. च. छ. ज. ञ. मयातेपरिरक्षितः. ३ क. ख. घ.—ट. स्तिलकंतत्स्मरस्वेतिचाब्रवीत्. ४ क. घ. ङ. झ. ञ. ट. एतं दृष्ट्वा. ५ क. घ. एतदेवं. ६ च.—ट. रुरोदसहलक्ष्मणः. ७ ख. मणिवरं. ८ घ. च.—ट. मणिश्रेष्ठस्य.

[1]अयं हि जलसंभूतो मणिः [2]सज्जनपूजितः ॥ यज्ञे परमतुष्टेन [3]दत्तः शक्रेण धीमता ॥ ५ ॥
इमं दृष्ट्वा मणिश्रेष्ठं [4]यथा तातस्य दर्शनम् ॥ अद्यास्म्यवगतः सौम्य वैदेहस्य तथा विभोः ॥ ६ ॥
अयं हि शोभते तस्याः प्रियाया मूर्ध्नि मे मणिः ॥ अस्याद्य दर्शनेनाहं प्राप्तां तामिव चिन्तये ॥ ७ ॥
किमाह सीता वैदेही ब्रूहि सौम्य पुनःपुनः ॥ पिपासुमिव तोयेन [5]सिञ्चन्ती वाक्यवारिणा ॥ ८॥
इतस्तु किं दुःखतरं [6]यदिमं वारिसंभवम् ॥ मणिं पश्यामि सौमित्रे वैदेह्यामागतं विना ॥ ९ ॥
चिरं जीवति वैदेही यदि मासं धरिष्यति ॥ क्षणं सौम्य न जीवेयं विना तामसितेक्षणाम् ॥१०॥
नय मामपि तं देशं यत्र दृष्टा मम प्रिया ॥ न तिष्ठेयं क्षणमपि प्रवृत्तिमुपलभ्य च ॥ ११ ॥
कथं सा मम सुश्रोणी भीरुभीरुः सती [7]सदा ॥ भयावहानां घोराणां मध्ये तिष्ठति रक्षसाम् ॥१२॥
शारदस्तिमिरोन्मुक्तो नूनं चन्द्र इवाम्बुदैः ॥ [8]आवृतं वदनं तस्या न विराजति [9]राक्षसैः ॥ १३ ॥
किमाह सीता हनुमंस्तत्त्वतः [10]कथयाद्य मे ॥ एतेन खलु जीविष्ये भेषजेनातुरो यथा ॥ १४ ॥
मधुरा मधुरालापा किमाह मम भामिनी ॥ मद्विहीना वरारोहा हनुमन्कथयस्व मे ॥
[[11]दुःखाद्दुःखतरं प्राप्य कथं जीवति जानकी]॥ १५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

सप्तषष्टितमः सर्गः ॥ ६७ ॥

हनुमता रामचोदनया काकासुरवृत्तान्तादिप्रतिपादकसीतावचनानां विस्तरेणानुवादः ॥१॥ तथा तांप्रति स्वेनार्थरूपाभिज्ञानयाचने तयाचूडामणिरूपार्थाभिज्ञानदाननिवेदनपूर्वकं रामादिषु कुशलप्रश्ननिवेदनचोदनादिरूपतद्वचनानुवादः ॥ २ ॥

[12]एवमुक्तस्तु हनुमान्राघवेण महात्मना ॥ सीताया भाषितं सर्वं न्यवेदयत राघवे ॥ १ ॥

जनकेनापि कुतस्तल्लब्धं तत्राह—अयं हीति ॥ ५ ॥ "मणिं तु दृष्ट्वा रामो वै त्रयाणां संस्मरिष्यति" इति सीतयोक्तप्रकारेण स्मरति—इममिति । इमं दृष्ट्वा तातस्य दशरथस्य । वैदेहस्य जनकस्य । दर्शनमद्यावगतः प्राप्तोस्मि । तदा ताभ्यां तस्या मूर्ध्नि बद्धत्वादिति भावः । इह वैदेहग्रहणं सीताजनन्या अप्युपलक्षणं । सीतावाक्ये "वीरो जनन्या मम च" इत्युक्तेः । तत्र त्रयाणां संस्मरिष्यतीति त्रयग्रहणं बहुमात्रोपलक्षणं । इह वैदेहस्यापि स्मरणोक्तेः ॥ ६—८ ॥ आगतं मणिमित्यन्वयः ॥ ९—११ ॥ भीरुभीरुः अत्यन्तभीरुः ॥ १२–१३ ॥ तत्त्वतः संकोचेन न किंचिद्गोपनीयमिति भावः ॥१४॥ मधुरा सुन्दरी । मधुरालापा । येन तद्वचनानुवादेपि भवद्वचनं मधुरं भवतीत्यर्थः ॥ १५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥

पूर्वं संकुचितं विस्तृणीते—सुखेत्यादिना ॥

ति० परासुं मूर्च्छितमां ॥ ८ ॥ ति० यदिमासंधरिष्यति जीविष्यति । तदा चिरंजीवति जीविष्यतीत्यर्थः । तांविना यथाऽहंनजीवेयं तथामांविना सापिनजीविष्यतीत्यर्थः ॥ स० यदिवैदेहीचिरंजीवति तर्हि मासंधरिष्यति । यदिमासंधरिष्यति तर्ह्येव चिरंजीवतीतितज्जीवनंमज्जीवनव्याप्तं । व्यतिरेकेणाप्याह—क्षणमिति । तामसितेक्षणांविना क्षणमहंनजीवेयंयथा तथा इयंसीतापिमांविना नजीवा नविद्यतेजीवोयस्याःसेतियोजना । यद्वा वैदेहीयदिमासंधरिष्यतिप्राणान् तर्हि चिरंजीवति । वार्ताज्ञानानन्तरंमयातुतथाजीवितुमशक्यमित्याह—क्षणमिति ॥ १० ॥ स० प्रवृत्तिं वार्तां । निराहारत्वादिप्रवृत्तिंवा ॥ ११ ॥ इतिषट्षष्टितमःसर्गः ॥ ६६ ॥

[पा०] १ च. छ. ज. इदंहिजलसंभूतंमणिप्रवरमुत्तमं. २ ख. घ. झ. प्रवरपूजितः. ३ च. छ. ज. दत्तं. ४ क. ख. च. छ. झ. ञ. तथा. ५ ख. झ. ञ. ट. परासुमिव. ६ छ. स्रवन्ती. ७ झ. ञ. यमिमं. ८ ख. झ. वीर. ९ च.—झ. तदा. १० छ. झ. ञ. आवृतो. ११ झ. सांप्रतं. १२ क. छ. ज. झ. ट. कथयस्वमे. १३ इदमर्धं झ. ट. पाठयोर्नदृश्यते. १४ ख. राघवेणैवमुक्तस्तुहनूमान्मारुतात्मजः । वाक्यमुत्तरमव्यग्रस्तमुवाचप्रहृष्टधीः.

इदमुक्तवती देवी जानकी पुरुषर्षभ ॥ पूर्ववृत्तमभिज्ञानं चित्रकूटे यथातथम् ॥ २ ॥
सुखसुप्ता त्वया सार्धं जानकी पूर्वमुत्थिता ॥ वायसः सहसोत्पत्य विरराद स्तनान्तरे ॥ ३ ॥
पर्यायेण च सुप्तस्त्वं देव्यङ्के भरताग्रज ॥ पुनश्च किल पक्षी स देव्या जनयति व्यथाम् ॥ ४ ॥
पुनःपुनरुपागम्य विरराद भृशं किल ॥ ततस्त्वं बोधितस्तस्याः शोणितेन समुक्षितः ॥ ५ ॥
वायसेन च तेनैव सततं बाध्यमानया ॥ बोधितः किल देव्या त्वं सुखसुप्तः परन्तप ॥ ६ ॥
तां तु दृष्ट्वा महाबाहो दारितां च स्तनान्तरे ॥ आशीविष इव क्रुद्धो निःश्वसन्नभ्यभाषथाः ॥ ७ ॥
नखाग्रैः केन ते भीरु दारितं तु स्तनान्तरम् ॥ कः क्रीडति सरोषेण पञ्चवक्त्रेण भोगिना ॥ ८ ॥
निरीक्षमाणः सहसा वायसं समवैक्षथाः ॥ नखैः सरुधिरैस्तीक्ष्णैस्तामेवाभिमुखं स्थितम् ॥ ९ ॥
सुतः किल स शक्रस्य वायसः पततां वरः ॥ धरान्तरचरः शीघ्रं पवनस्य गतौ समः ॥ १० ॥
ततस्तस्मिन्महाबाहो कोपसंवर्तितेक्षणः ॥ वायसे त्वं कृथाः क्रूरां मतिं मतिमतां वर ॥ ११ ॥
सं दर्भं संस्तराद्गृह्य ब्रह्मास्त्रेण ह्ययोजयः ॥ स दीप्त इव कालाग्निर्जज्वालाभिमुखः खगम् ॥ १२ ॥
क्षिप्तवांस्त्वं प्रदीप्तं हि दर्भं तं वायसं प्रति ॥ ततस्तु वायसं दीप्तः स दर्भोऽनुजगाम ह ॥ १३ ॥
स पित्रा च परित्यक्तः सुरैश्च समहर्षिभिः ॥ त्रीँल्लोकान्संपरिक्रम्य त्रातारं नाधिगच्छति ॥ १४ ॥
पुनरेवागतस्त्रस्तस्त्वत्सकाशमरिन्दम ॥ स तं निपतितं भूमौ शरण्यः शरणागतम् ॥
वधार्हमपि काकुत्स्थ कृपया पर्यपालयः ॥ १५ ॥
मोघमस्त्रं न शक्यं तु कर्तुमित्येव राघव ॥ भवांस्तस्याक्षि काकस्य हिनस्ति स्म स दक्षिणम् ॥ १६ ॥
राम त्वां स नमस्कृत्य राज्ञे दशरथाय च ॥ विसृष्टस्तु तदा काकः प्रतिपेदे स्वमालयम् ॥ १७ ॥

उभावपि पर्यायेण सुप्ताविति त्वया सार्धमित्युक्तं ॥ ३—६ ॥ दारितां विदारितां ॥ ७—१८ ॥

शि० पक्षी वायसः । देव्याः व्यथां स्पर्शादिनाऽस्वास्थ्यं । पुनःपुनर्जनयति । पुनःपुनर्जनयतीत्यनेन अयंरावणवधयोग्योस्विनवेतिपरीक्षार्थमागतइतिव्यक्तं ॥ ४ ॥ **शि०** विददार विदारणानुकूलव्यापारंचकार । ततोनन्तरंशोणितेन रुधिरबिन्दुना । समुक्षितइवलं तस्याः तथा । बोधितः । शोणितोक्षितसादृश्यंचात्यरुणबिन्दुविशिष्टसीतापटविशेषाच्छादितत्वेन । समुक्षितशब्दः आचारक्विबन्तप्रकृतिककर्तृक्विन्तः । प्रातिभासिकंव्याख्यानंतुहेयमेव । अप्राकृताङ्गस्यरुधिरस्रावहेतुभूतविदारितत्वस्यासंभवात् । अतएव " योवेत्तिभौतिकंदेहंरामस्यपरमात्मनः । ससर्वेस्माद्बहिष्कार्यःश्रौतस्मार्तविधानतः " इत्यादिसंगच्छते । प्रमाणेरामस्येत्युपलक्षणंसीतायाः ॥ ५ ॥ **ति०** रादितं दारितमित्यर्थः ॥ **स०** पञ्चवक्त्रेण अङ्गुलिरूपपञ्चमुखेनहस्तेन । कःपुमान् । सरोषेणभोगिना तद्रूपयात्वयाक्रीडति । पञ्चवक्त्रेण विस्तृतमुखेनेतिवा ॥ ८ ॥ **स०** निरीक्षमाणः समन्तात्पश्यन् । नखैः पादनखैः ॥ ९ ॥ **स०** चिक्षेप चिक्षेपिथ । " त्वंदेव शक्त्यांगुणकर्मयोनौरेतस्त्वजायांकविरादधेऽजः " इत्यादाविवयुष्मच्छब्दप्रयोगेपि प्रथमपुरुषःसंभवति । " त्वमग्नेप्रथमोमातरिश्वन " इतिऋग्भाष्यटीकायामेतद्भागवतवाक्योदाहरणेनतथैवोक्तेः ॥ १३ ॥ **स०** भीतैः त्वत्तः । नाधिगच्छति नप्राप्तवान् ॥ १४ ॥ **स०** तत्र त्रायकशून्यकाले । धरण्यां क्षितौ अनाथतयानिपतितं । भूमौ " भूमिःक्षितौस्थानमात्रे " इत्यनुशासनात्स्थानमात्रंग्रहणार्थः । समभ्यर्थश्चोद्देश्यत्वं । स्वाश्रयार्थमितिभावः । शरणागतं शरणायस्वरक्षणायआगतं त्वामितिशेषः । **शि०** सीताङ्गस्पर्शमात्रेणतत्कल्याणप्रकटनमपहायकोपप्रकटनद्वाराकिमर्थंकृतमितितुनभ्रमितव्यं । प्रार्थनयैवपरमकल्याणंक्रियतइतिस्वाभाविकपरमात्मरीतेः । तथाहि "करुणावानपिव्यक्तंशक्तःस्वाम्यपिदेहिनां । अप्रार्थितोनगोपायेदितितत्प्रार्थनामतिः " इतिपुराणं ॥ १५ ॥ **स०** हिनस्तिस्म अहिनः ॥ १६ ॥

[**पा०**] १ झ. ट. विददारस्तनान्तरं. २ क. ख. च. छ. ज. प्रसुप्तस्त्वं. ३ क.—ट. ततःपुनः. ४ ग. झ. ञ. ट. विददार. ५ ख. घ. तद्व्रणंच. ६ झ. ट. ततोवाक्यंत्वमूचिवान्. ७ घ. छ.—झ. रादितंवैस्तनान्तरे. ख. दारितासिस्तनान्तरे. ८ क. च. छ. ज. समुदैक्षत. झ. ट. समुदैक्षथाः. ख. ग. समवैक्षथ. ९ ख. च. ज.—ट. सदर्भसंस्तराद्गृह्य. १० ज.—ट. न्ययोजयः. ११ ग. च.—ट. सत्वंप्रदीप्तंचिक्षेप. १२ क. च. ज. ञ. दर्भोंभिजगामतं. १३ ज. झ. ट. भीतैश्चसंपरित्यक्तः. १४ क. ख. ग. च.—ट. सुरैस्सर्वैश्चवायसः. १५ क. ख. ग. च. छ. ज. ञ. पुनरेवागतस्त्रत्वत्समीपं. १६ च.—ज. ञ. ततस्तंपतितं. क. ङ. घ. सत्वंनिपतितं. झ. ठ. त्वंतंनिपतितंभूमौधरण्यां. १७ क.—घ. च. ज.—ट. ततस्तस्याक्षि. १८ घ. रामतुभ्यं. क. च. छ. ज. ततोरामंनमस्कृत्य. झ. ञ. ट. वायसस्त्वांनमस्कृत्य. १९ क. ख. ग. च.—ट. राज्ञोदशरथस्यच.

एवमस्त्रविदांश्रेष्ठः सत्त्ववाञ्छीलवानपि ॥ किमर्थमस्त्रं रक्षस्सु न योजयति राघवः ॥ १८ ॥
न नागा नापि गन्धर्वा नासुरा न मरुद्गणाः ॥ न च सर्वे रणे शक्ता रामं प्रतिसमासितुम् ॥१९॥
तस्य वीर्यवतः कश्चिद्यद्यस्ति मयि संभ्रमः ॥ क्षिप्रं सुनिशितैर्बाणैर्हन्यतां युधि रावणः ॥ २० ॥
भ्रातुरादेशमाज्ञाय लक्ष्मणो वा परन्तपः ॥ स किमर्थं नरवरो न मां रक्षति राघवः ॥ २१ ॥
शक्तौ तौ पुरुषव्याघ्रौ वाय्वग्निसमतेजसौ ॥ सुराणामपि दुर्धर्षौ किमर्थं मामुपेक्षतः ॥ २२ ॥
ममैव दुष्कृतं किंचिन्महदस्ति न संशयः ॥ समर्थौ सहितौ यन्मां नावेक्षेते परंतपौ ॥ २३ ॥
वैदेह्या वचनं श्रुत्वा करुणं साधु भाषितम् ॥ पुनरप्यहमार्यां तामिदं वचनमब्रवम् ॥ २४ ॥
त्वच्छोकविमुखो रामो देवि सत्येन ते शपे ॥ रामे दुःखाभिभूते तु लक्ष्मणः परितप्यते ॥ २५ ॥
कथंचिद्भवती दृष्टा न कालः परिशोचितुम् ॥ इमं मुहूर्तं दुःखानामन्तं द्रक्ष्यसि भामिनि ॥२६॥
तावुभौ नरशार्दूलौ राजपुत्रावनिन्दितौ ॥ त्वद्दर्शनकृतोत्साहौ लङ्कां भस्मीकरिष्यतः ॥ २७ ॥
हत्वा च समरे रौद्रं रावणं सहबान्धवम् ॥ राघवस्त्वां वरारोहे स्वां पुरीं नयते ध्रुवम् ॥ २८ ॥
यत्तु रामो विजानीयादभिज्ञानमनिन्दिते ॥ प्रीतिसंजननं तस्य प्रदातुं त्वमिहार्हसि ॥ २९ ॥
साऽभिवीक्ष्य दिशः सर्वा वेण्युद्ग्रथनमुत्तमम् ॥ मुक्त्वा वस्त्राद्दौ मह्यं मणिमेतं महाबल ॥ ३० ॥
प्रतिगृह्य मणिं दिव्यं तव हेतो रघूद्वह ॥ शिरसा तां प्रणम्यार्यामहमागमने त्वरे ॥ ३१ ॥
गमने च कृतोत्साहमवेक्ष्य वरवर्णिनी ॥ विवर्धमानं च हि मामुवाच जनकात्मजा ॥ ३२ ॥
अश्रुपूर्णमुखी दीना बाष्पसंदिग्धभाषिणी ॥ ममोत्पतनसंभ्रान्ता शोकवेगसमाहता ॥ ३३ ॥
[मामुवाच ततः सीता सभाग्योसि महाकपे ॥ यद्द्रक्ष्यसि महाबाहुं रामं कमललोचनम् ॥
लक्ष्मणं च महाबाहुं देवरं मे यशस्विनम् ॥ ३४ ॥
सीतयाऽप्येवमुक्तोऽहमब्रवं मैथिलीं तथा ॥ पृष्ठमारोह मे देवि क्षिप्रं जनकनन्दिनि ॥ ३५ ॥
यावत्ते दर्शयाम्यद्य ससुग्रीवं सलक्ष्मणम् ॥ राघवं च महाभागे भर्तारमसितेक्षणे ॥ ३६ ॥
साऽब्रवीन्मां ततो देवी नैष धर्मो महाकपे ॥ यत्ते पृष्टं सिपेवेऽहं स्ववशा हरिपुङ्गव ॥ ३७ ॥
पुरा च यदहं वीर स्पृष्टा गात्रेषु रक्षसा ॥ तत्राहं किं करिष्यामि कालेनोपनिपीडिता ॥ ३८ ॥
गच्छ त्वं कपिशार्दूल यत्र तौ नृपतेः सुतौ ॥ इत्येवं सा समाभाष्य भूयः संदेष्टुमास्थिता] ॥३९॥

प्रतिसमासितुं प्रतिमुखं स्थातुं ॥ १९—२४ ॥ त्वच्छोकविमुखः त्वच्छोकेन कार्यान्तरविमुखः ॥ २५—२७ ॥ नयते नेष्यते । वर्तमानसामीप्ये वर्तमानवत्प्रयोगः ॥ २८—२९ ॥ साभिवीक्ष्य दिश इति । दिगवलोकनं राक्षस्यो दृष्ट्वा रावणाय वक्ष्यन्तीति भयेन । वेण्यामुद्ग्रथ्यत इति वेण्युद्ग्रथनं । वेणीधार्यमित्यर्थः । मुक्त्वा वस्त्रादिति वस्त्राञ्चलेन ग्रथितं मणिं मुक्त्वा ततः ददावित्यर्थः ॥ ३०—

ति० अतःपरेपरिशोचितुं नकालःतवयोग्यइतिशेषः । चिरंलङ्कायामासितुंनकालोयोग्यइतिपाठान्तरेऽर्थः ॥ ति० इदंमुहूर्तं अस्मित्रेवमुहूर्तेइत्यर्थः ॥ २६ ॥ इतिसप्तषष्टितमः सर्गः ॥ ६७ ॥

[पा०] १ क. च. छ. ज. ञ. सत्त्ववान्बलवानपि. २ क. ग. घ. च.—ट. योजयसि. ३ झ. ट. नदानवानगन्धर्वाः. ४ ख. घ. झ. ञ. ट. तवरामरणेशक्तास्तथाप्रतिसमासितुं. ५ ख. ग. च.—ट. तववीर्यवतः. ६ झ. ट. सुनियतैः. ७ ग. घ. मादाय. ८ घ. समर्थावपितौ. ९ झ. ट. यन्मांनरक्षेते. क. च. छ. ज. यन्मामुपेक्षेते. १० च.—ट. साधुभाषितं. ११ ख. घ. कालश्चिरमासितुं. १२ क. च.—ट. इदंमुहूर्तं. १३ च. छ. ज. ञ. पुत्रौमहाबलौ. झ. ट. पुत्रौपरंतपौ. १४ ग. विशालाक्षिस्वांपुरींप्रतिनेष्यति. ख. महाभागे. १५ झ. ट. स्वपुरीं. १६ क. ग. च.—ट. तत्त्वमर्हसि. १७ च. छ. ज. ञ. सासभीक्ष्य. १८ छ. झ. ट. दोर्भ्यांतव. क. ख. ग. च. ज. ञ. देव्यास्तव. १९ ग. घ. च. छ. झ. ञ. ट. संप्रणम्यैनां. २० झ. ट. बाष्पगद्गद. २१ मामुवाचेत्यादयः भूयःसंदेष्टुमास्थितेत्यन्ताःश्लोकाः झ. ञ. ट. पाठेषुदृश्यन्ते.

हनुमन्निसहसंकाशावुभौ तौ रामलक्ष्मणौ ॥ सुग्रीवं च सहामात्यं सर्वान्ब्रूया ह्यनामयम् ॥ ४० ॥
यथा च स महाबाहुर्मां तारयति राघवः ॥ असाद्दुःखाम्बुसंरोधात्त्वं समाधातुमर्हसि ॥ ४१ ॥
इमं च तीव्रं मम शोकवेगं रक्षोभिरेभिः परिभर्त्सनं च ॥
ब्रूयास्तु रामस्य गतः समीपं शिवश्च तेऽध्वास्तु हरिप्रवीर ॥ ४२ ॥
एतत्तवार्या नृपराजसिंह सीता वचः प्राह विषादपूर्वम् ॥
एतच्च बुद्ध्वा गदितं मया त्वं श्रद्धत्स्व सीतां कुशलां समग्राम् ॥ ४३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

अष्टषष्टितमः सर्गः ॥ ६८ ॥

हनुमता श्रीरामंप्रतिराघवयोर्वानराणांच दुस्तरसागरतरणेसीताशङ्कायां तन्निवर्तकस्ववचनाद्यनुवादपूर्वकं स्वकृतसीता-समाश्वासननिवेदनेनसह सीताकुशलनिवेदनम् ॥ १ ॥

अथाहमुत्तरं देव्या पुनरुक्तः ससंभ्रमः ॥ तव स्नेहान्नरव्याघ्र सौहार्दादनुमान्य वै ॥ १ ॥
एवं बहुविधं वाच्यो रामो दाशरथिस्त्वया ॥ यथा मामभ्युपाच्छीघ्रं हत्वा रावणमाहवे ॥ २ ॥
यदि वा मन्यसे वीर वसैकाहमरिन्दम ॥ कस्मिंश्चित्संवृते देशे विश्रान्तः श्वो गमिष्यसि ॥ ३ ॥
मम चाप्यल्पभाग्यायाः सान्निध्यात्तव वीर्यवन् ॥ अस्य शोकविपाकस्य मुहूर्तं स्याद्विमोक्षणम् ॥४॥
गते हि त्वयि विक्रान्ते पुनरागमनाय वै ॥ प्राणानामपि संदेहो मम स्यान्नात्र संशयः ॥ ५ ॥
तवादर्शनजः शोको भूयो मां परितापयेत् ॥ दुःखाद्दुःखपराभूतां दुर्गतां दुःखभागिनीम् ॥ ६ ॥
अयं च वीर संदेहस्तिष्ठतीव ममाग्रतः ॥ सुमहांस्त्वत्सहायेषु हर्यृक्षेषु हरीश्वर ॥ ७ ॥
कथं नु खलु दुष्पारं तरिष्यन्ति महोदधिम् ॥ तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ॥ ८ ॥
त्रयाणामेव भूतानां सागरस्यास्य लङ्घने ॥ शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ॥ ९ ॥
तदस्मिन्कार्यनिर्योगे वीरैवं दुरतिक्रमे ॥ किं पश्यसि समाधानं ब्रूहि कार्यविदां वर ॥ १० ॥
काममस्य त्वमेवैकः कार्यस्य परिसाधने ॥ पर्याप्तः परवीरघ्न यशस्यस्ते बलोदयः ॥ ११ ॥
बलैः समग्रैर्यदि मां हत्वा रावणमाहवे ॥ विजयी स्वां पुरीं रामो नयेत्तत्स्याद्यशस्करम् ॥ १२ ॥

४३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायण-भूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तषष्टितमः सर्गः ॥ ६७ ॥

हे नरव्याघ्र तव स्नेहात् । मयीति शेषः । सौहार्दात् सुहृद्भावात् । आप्तत्वादिति यावत् । अनुमान्य संमान्य । उत्तरं ततः परं । उत्तरं कार्यं वा । पुनर्देव्याहमुक्त इत्यन्वयः । ससंभ्रमः गमनत्वरान्वित इत्यर्थः ॥ १—३ ॥ शोकविपाकस्य शोकवृद्धेरित्यर्थः ॥ ४—९ ॥ कार्यनिर्योगे कार्यगतौ । दुरतिक्रमे

[पा०] १ झ. ञ. ट. संरोधात्तत्त्वमाख्यातुमर्हसि. क. च. ज. संरोधात्तत्समाधातुमर्हसि. २ ग. घ. झ. ञ. ट. इदंच. ३ झ. ञ. ट. नृपसंयतासा. ४ झ. ञ. ट. गदितोयथात्वं. क. च. छ. ज. गदितंप्रियायाः. ५ घ. झ. ट. ससंभ्रमं. ६ च. छ. ज. ञ. मांप्राप्नुयात्. ७ झ. ञ. ट. वानर. ८ झ. ट. तवादर्शनजंचापिभयंमां. ग. तवादर्शनतश्चापिशोकोमां. घ. तवादर्श-नजश्चापिशोकोमां. ९ ग. दुःखाद्दुःखाभिभूतांमांदुःखितां. ख. च. छ. दुःखाद्दुःखाभिभूतांचदुःखितां. घ. दुःखाद्दुःखतरंयातांदुः-खितांदुःखसागरे. १० ग. हर्यृक्षप्रवरेषुच. क. ख. च. छ. ज. ञ. हर्यृक्षेषुनसंशयः. झ. हर्यृक्षेषुअसंशयः. ११ झ. ञ. ट. सागरस्नेह. १२ घ. च. झ. ञ. ट. वायोर्वातवचानघ. १३ क. ग. त्वंहि. १४ झ. ट. वाक्यविदां. १५ झ. ट. स्वपुरीं. १६ च. छ. ज. नयेन्मांतद्यशस्करं.

यथाऽहं तस्य वीरस्य वनादुपधिना हृता ॥ रक्षसा तद्भयादेव तथा नार्हति राघवः ॥ १३ ॥
बलैस्तु संकुलां कृत्वा लङ्कां परबलार्दनः ॥ मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥ १४ ॥
तद्यथा तस्य विक्रान्तमनुरूपं महात्मनः ॥ भवत्याहवशूरस्य तथा त्वमुपपादय ॥ १५ ॥
तदर्थोपहितं वाक्यं प्रश्रितं हेतुसंहितम् ॥ निशम्याहं ततः शेषं वाक्यमुत्तरमब्रवम् ॥ १६ ॥
देवि हर्यृक्षसैन्यानामीश्वरः प्लवतांवरः ॥ सुग्रीवः सत्त्वसंपन्नस्तवार्थे कृतनिश्चयः ॥ १७ ॥
तस्य विक्रमसंपन्नाः सत्त्ववन्तो महाबलाः ॥ मनःसंकल्पसंपाता निदेशे हरयः स्थिताः ॥ १८ ॥
येषां नोपरि नाधस्तान्न तिर्यक्सज्जते गतिः ॥ न च कर्मसु सीदन्ति महत्स्वमिततेजसः ॥ १९ ॥
असकृत्तैर्महाभागैर्वानरैर्बलदर्पितैः ॥ प्रदक्षिणीकृता भूमिर्वायुमार्गानुसारिभिः ॥ २० ॥
मद्विशिष्टाश्च तुल्याश्च सन्ति तत्र वनौकसः ॥ मत्तः प्रत्यवरः कश्चिन्नास्ति सुग्रीवसन्निधौ ॥२१॥
अहं तावदिह प्राप्तः किं पुनस्ते महाबलाः ॥ न हि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे जनाः ॥२२॥
तदलं परितापेन देवि मन्युर्व्यपैतु ते ॥ एकोत्पातेन वै लङ्कामेष्यन्ति हरियूथपाः ॥ २३ ॥
मम पृष्ठगतौ तौ च चन्द्रसूर्याविवोदितौ ॥ त्वत्सकाशं महाभागे नृसिंहावागमिष्यतः ॥ २४ ॥
अरिघ्नं सिंहसंकाशं क्षिप्रं द्रक्ष्यसि राघवम् ॥ लक्ष्मणं च धनुष्पाणिं लङ्काद्वारमुपस्थितम् ॥ २५ ॥
नखदंष्ट्रायुधान्वीरान्सिंहशार्दूलविक्रमान् ॥ वानरान्वारणेन्द्राभान्क्षिप्रं द्रक्ष्यसि सङ्गतान् ॥ २६ ॥
शैलाम्बुदनिकाशानां लङ्कामलयसानुषु ॥ नर्दतां कपिमुख्यानामचिराच्छ्रोष्यसि स्वनम् ॥ २७ ॥
निवृत्तवनवासं च त्वया सार्धमरिन्दमम् ॥ अभिषिक्तमयोध्यायां क्षिप्रं द्रक्ष्यसि राघवम् ॥ २८ ॥

ततो मया वाग्भिरदीनभाषिणा शिवाभिरिष्टाभिरभिप्रसादिता ॥
जगाम शान्तिं मम मैथिलात्मजा तवापि शोकेन तदाऽभिपीडिता ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशत्सहस्रिकायां संहितायां सुन्दरकाण्डे अष्टषष्टितमः सर्गः ॥ ६८ ॥

॥ सुन्दरकाण्डः समाप्तः ॥

दुर्निर्वहे ॥ १०—२२ ॥ मन्युः दैन्यं । " मन्युर्दैन्ये क्रतौ क्रुधि " इत्यमरः ॥ २३—२८ ॥ तव शोकेनापि नैव दंशानित्यादिमदुक्त्या श्रुतेन । तदा मम पुरस्तादभिपीडिता । अदीनभाषिणा मया । शिवाभिः इष्टाभिः वाग्भिः । अभिप्रसादिता शान्तिं दुःखनिवृत्तिं जगाम ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टषष्टितमः सर्गः ॥ ६८ ॥

इत्थं कौशिकवंशमौक्तिकमणिर्गोविन्दराजाभिधो वात्स्यश्रीशठकोपदेशिकपदद्वन्द्वैकसेवारतः ॥ पूर्वाचार्यकृता विलोक्य विविधा व्याख्या मुहुर्जानकीकान्तस्याप्रतिमाज्ञयैव तिलकं सौन्दर्यकाण्डेऽधात् ॥ १ ॥

[पा०] १ च. छ. ज. ञ. शैरसु. २ ग. च. छ. झ. ञ. तत्त्वमेवोपपादय. ३ झ. ट. स्त्वदर्थे. ४ ख. झ. ट. सदृशाः. ५ ख. च. छ. ज. ञ. मैंहाभागैःससागरधराधरा. ६ घ. ङ. झ. ट. बलसंयुतैः. ७ घ. चन्द्रसूर्याविवांबरे. ८ च. छ. ज. ञ. त्वत्समीपं. ९ ङ.—ट. धनुष्मन्तं. १० घ.—ट. मुपागतं. ११ झ. ट.उवाह. १२ ख. वियोगशोकेनतथा.

इदं किष्किन्धाकाण्डं कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम्। शकाब्दाः १८३४ सन १९१३.

श्रीः

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यासमलंकृतम् ।

युद्धकाण्डम् ६

श्रीरामचन्द्राय नमः ॥

प्रथमः सर्गः ॥ १ ॥

हनुमन्मुखादवगतसीतावृत्तान्तेनश्रीरामेण हनुमन्तंप्रतिप्रशंसनपूर्वकं तत्कृतसीतान्वेषणाद्युपकारप्रत्युपकारतयासर्वस्वदानप्रतिनिधिभूतस्वात्मप्रदानरूपपरिष्वङ्गकरणम् ॥१॥ तथा सुग्रीवसंनिधौहनुमन्तंप्रति सागरस्यदुस्तरतयासीतान्वेषणादिप्रयासस्यनिष्फलत्वोक्त्या सागरतरणोपायानधिगमेनपरिचिन्तनम् ॥ २ ॥

श्रुत्वा हनुमतो वाक्यं यथावद्[1]भिभाषितम् ॥ रामः प्रीतिसमायुक्तो वाक्यमुत्तरमब्रवीत् ॥ १ ॥
कृतं हनुमता कार्यं सुमहद्भुवि [2]दुर्लभम् ॥ मनसाऽपि यदन्येन न शक्यं धरणीतले ॥ २ ॥
न हि तं परिपश्यामि यस्तरेत [3]महार्णवम् ॥ अन्यत्र गरुडाद्वायोरन्यत्र च हनूमतः ॥ ३ ॥

श्रीरामचन्द्राय नमः ॥ आचार्यं शठकोपदेशिकवरं प्राचार्यपारंपरीमप्यानम्य सनारदं कुशलवाचार्यं मुनीनां वरम् । पूर्वाचार्यकृता विलोक्य बहुधा व्याख्याः सतां प्रीतये कुर्वे संप्रति युद्धकाण्डविवृतिं श्रीमत्किरीटाभिधाम् ॥ उक्तं पुरुषकारभूताया लक्ष्म्याः कृत्यं सुन्दरकाण्डे । अथोपायकृत्यं वक्तुं षष्ठः काण्ड आरभ्यते । तत्र स्वामिना कृतकार्ये भृत्ये एवं वर्तितव्यमित्यमुमर्थमुपदेष्टुं सुग्रीवादीनामुत्साहं वर्धयन् समाहृतसीतावृत्तान्तं हनुमन्तं रामः सत्करोति प्रथमे सर्गे—श्रुत्वेति । अत्र गायत्र्यक्षरं मकारः । यथावत् यथावस्थितप्रकारेण । अभिभाषितं उक्तं । उत्तरं प्रियश्रवणोत्तरकालार्हं ॥ १ ॥ अथ " प्रत्यक्षे गुरवः स्तुत्याः परोक्षे मित्रबान्धवाः । कर्मान्ते दासभृत्याश्च न कदाचन पुत्रकाः " इति वचनात्कर्मान्ते दासं स्तौति—कृतमित्यादिना । अत्र महदित्यनेन सागरतरणमुच्यते । सुमहदित्यनेन लङ्काप्रवेशः । दुर्लभमित्यनेन लङ्काधर्षणं । मनसापि न शक्यमित्यनेन पुनर्निर्गमः । प्रथमं सागर एव न तर्तुं शक्यः । तीर्त्वापि तं लङ्कां न प्रवेष्टुं । प्रविश्यापि न धर्षयितुं । धर्षयित्वापि न ततो निर्गन्तुमिति भावः ॥ २ ॥ महत्त्वमुपपादयति—न हीति ॥ गरुडवायूमिलित्वा तरेतां । अयं त्वेक एवातरदित्यर्थः ॥ ३ ॥

श्रीरामाय नमः ॥ स० मारुतेरीरितंश्रुत्वाराघवःश्लाघापूर्वकमन्यत्तस्मैदातुमचक्षाणःस्वात्मानमेवददावित्याह—श्रुत्वेत्यादिना ॥ रामःहनुमतोयथावत्सम्यगभिभाषितं वचनं । अवाक्यं निश्शब्दंयथाभवतितथाश्रुत्वा उत्तरं प्रत्युत्तररूपं तत्कालोचिततयोत्तमं वाक्यमब्रवीत् ॥ १ ॥ स० सुमहतांमहात्मनांदेवानां या भूः स्वर्गादिरूपंस्थानं । तस्यामपिदुर्लभं असाध्यं । यत्कार्यं सीतासंदर्शनरूपं । तत् धरणीतलेहनुमताकृतं । अन्येन हनुमतोभिन्नेन । नशक्यं कर्तुमितिशेषः ॥ २ ॥ तरेत तरेत् । अन्यत्र अन्यं

[पा०] १ क.—घ. ज. दनुभाषितं. २ ख. घ. दुष्करं. ३ ङ. झ. ट. महोदधिं.

देवदानवयक्षाणां गन्धर्वोरगरक्षसाम् ॥ अप्रधृष्यां पुरीं लङ्कां रावणेन सुरक्षिताम् ॥ ४ ॥
[[1]यो वीर्यबलसंपन्नो द्विषद्भिरनिवारितः] ॥ प्रविष्टः सत्वमाश्रित्य [2]श्वसन्को नाम निष्क्रमेत् ॥ ५ ।
को विशेत्सुदुराधर्षां राक्षसैश्च सुरक्षिताम् ॥ यो वीर्यबलसंपन्नो न समः स्याद्धनूमतः ॥ ६ ॥
भृत्यकार्यं हनुमता सुग्रीवस्य कृतं महत् ॥ [3]स्वयं विधाय स्वबलं सदृशं विक्रमस्य च ॥ ७ ॥
यो हि भृत्यो नियुक्तः सन्भर्त्रा कर्मणि दुष्करे ॥ कुर्यात्तदनुरागेण तमाहुः पुरुषोत्तमम् ॥ ८ ॥
नियुक्तो यः परं कार्यं न कुर्यान्नृपतेः प्रियम् ॥ भृत्यो युक्तः समर्थश्च तमाहुर्मध्यमं नरम् ॥ ९ ॥
नियुक्तो नृपतेः कार्यं न कुर्याद्यः समाहितः ॥ भृत्यो युक्तः समर्थश्च तमाहुः पुरुषाधमम् ॥ १० ।
तन्नियोगे नियुक्तेन कृतं कृत्यं हनूमता ॥ न चात्मा लघुतां नीतः सुग्रीवश्चापि तोषितः ॥ ११ ।
अहं च रघुवंशश्च लक्ष्मणश्च महाबलः ॥ वैदेह्या दर्शनेनाद्य धर्मतः परिरक्षिताः ॥ १२ ॥

सुमहत् मनसापि न शक्यमित्येतद्दूयमप्युपपादयति —देवदानवेत्यादिना सार्धश्लोकेन ॥ सत्त्वं बलं । आश्रित्य श्वसन् जीवन् । निष्क्रमेत् निष्क्रामेत् । लङ्कां प्रविश्य स्वबलेन पुनर्निर्गच्छन् हनुमतोऽन्यःकोपि नास्तीत्यर्थः ॥ ४—५ ॥ दुर्लभत्वमुपपादयति—को विशेदिति ॥ ६ ॥ न केवलं स्वामिनियुक्तकार्यकरणेन भृत्यकार्यं निर्व्यूढमनेन किन्त्वनियुक्तप्रकृतकार्यानुकूलकार्यान्तरकरणेनापि महत्कार्यं संसाधितमित्याह—भृत्येति ॥ विक्रमः अतिशक्तिः । " विक्रमस्त्वतिशक्तिता " इत्यमरः । विक्रमस्य सदृशं स्वबलं अशोकवनिकाभङ्गादिकं पौरुषं । स्वयं आत्मना स्वामिनियोगं विना । विधाय सुग्रीवस्य भृत्यकार्यं भृत्येन कर्तव्यं । महत् अधिकं कृतमित्यर्थः ॥ ७ ॥ हनुमत उत्तमभृत्यत्वं दर्शयितुमुत्तममध्यमाधमभृत्यानां क्रमेण लक्षणमाह—यो हीत्यादिना ॥ यो भृत्यः भर्त्रा स्वामिना । दुष्करे कर्मणि नियुक्तः तत् कृत्वा । अनुरागेण स्वामिभक्त्यतिशयेन । तदपेक्षितमनियुक्तमपि कार्यं कुर्यात् । तं पुरुषोत्तमं उत्तमभृत्यं । आहुः ॥ ८ ॥ भर्त्रा नियुक्तः यो भृत्यः युक्तः उत्साहयुक्तः समर्थश्च । नृपतेः स्वामिनः । प्रियं परं कार्यं स्वामिनिर्दिष्टादधिकं कार्यं । न कुर्यात् । तं मध्यमं नरं मध्यमभृत्यं । आहुः । " भृत्यस्तु यः परं कार्यं न कुर्यान्नृपतेः प्रियम् । भृत्योऽभृत्यस्समर्थोपि तमाहुर्मध्यमं नरं " इति पाठान्तरं । तत्र त्वयमर्थः यस्तु भृत्यस्समर्थोपि परं कार्यं नकुर्यात् उक्तमात्रमेव कुर्यात्स भृत्योऽभृत्यः उक्तानुष्ठानात् भृत्यः अधिकाकरणादभृत्यः । ततस्तं मध्यममाहुरिति ॥ ९ ॥ समाहितः कार्यान्तराव्यग्रः । युक्तः समर्थश्च यो भृत्यो नियुक्तोपि नृपतेः कार्यं नृपतेः उक्तमात्रमपि कार्यं सम्यङ्न कुर्यात् तं पुरुषाधमं अधमभृत्यं । आहुः ॥ १० ॥ उक्तेषु त्रिविधभृत्येषूत्तमभृत्योयमित्याह—तदिति ॥ तत् उत्तमभृत्यलक्षणलक्षितत्वात् । नियुज्यतेस्मिन्निति नियोगः कार्यं तस्मिन्नियुक्तेन उत्तमभृत्येन कृत्यं कर्तव्यं कार्यं हनुमता कृतं । किंचात्मा स्वयं लघुतां न नीतः । राक्षसैरपराजितत्वात् सुग्रीवश्चापि तोषितः उक्तकार्यातिरिक्तकार्यकरणात् ॥ ११ ॥ न केवलं सुग्रीवतोषणं धर्मपरिरक्षणं चास्माकमासीदित्याह—अहमिति ॥ धर्मतः धर्मे सप्तम्यर्थे तसिः । धर्मतः परिरक्षिताः धर्मे स्थापिताः धर्मेस्थापनं चात्राधर्मान्मोचनं । यदि हनुमता सीता न दृश्येत तदाहं तावदात्मानं जह्यां । ततो लक्ष्मणादयश्च । तत आत्महानिरूपोऽधर्मस्सर्वेषां स्यादिति भावः । यद्वा वैदेहीदर्शनरूपेण धर्मेण उपकारेण सर्वे वयं परिरक्षिताः निरपवादाः कृताः स्मेति भाव

॥ ३ ॥ **स०** देवदानवयक्षाणामितिकर्तरिषष्ठी ॥ ४ ॥ **ती०** योवीर्यबलसंपन्नोपि हनुमतःसमोनस्यात् सकोवालङ्कांविशेदित्यन्वयः ॥ **स०** नकेवलंप्रविष्टस्यनिष्क्रमणंदुर्घटं प्रवेशोपिनशक्यइत्याह—कइति । यश्चवीर्यबलेनसंपन्नइतिप्रसिद्धोभवेत् सोपिहनुमतोनसमः । योहनूमान् नोस्माकं । वीर्यबलसंपद्रूपस्तस्यहनूमतइतिवा ॥ ६ ॥ **रामानु०** कुर्यात्तदनुरागेणेतिपाठः । धातूनामनेकार्थत्वादत्रानुरागशब्दोनुबन्धवचनः । तदनुबन्धेन प्रकृतकार्यानुबन्धेन । अनियुक्तमपिकार्यं यःकुर्यादित्यर्थः । "भृत्यस्तुयःपरंकार्यंकुर्यात्" इत्यधिककार्याकर्तुर्मध्यमभृत्यत्वाभिधानादेवंव्याख्यातं । तदनसूयुर्यइतिपाठेयच्छब्दोतिरिच्यते ॥८॥ **ति०** धर्मत

[**पा०**] १ इदमर्धं च. छ. पाठयोर्दृश्यते. २ क. ग.—ट. जीवन्कोनाम. ३ च. छ. एवं. ४ ख. तदनुसारेण.

इदं तु मम दीनस्य मनो भूयः प्रकर्षति ॥ यदिहास्य प्रियाख्यातुर्न कुर्मि सदृशं प्रियम् ॥ १३ ॥
एष सर्वस्वभूतस्तु परिष्वङ्गो हनूमतः ॥ मया कालमिमं प्राप्य दत्तस्तस्य महात्मनः ॥ १४ ॥
इत्युक्त्वा प्रीतिहृष्टाङ्गो रामस्तं परिषस्वजे ॥ हनूमन्तं महात्मानं कृतकार्यमुपागतम् ॥ १५ ॥
ध्यात्वा पुनरुवाचेदं वचनं रघुनन्दनः ॥ हरीणामीश्वरस्यैव सुग्रीवस्योपशृण्वतः ॥ १६ ॥
सर्वथा सुकृतं तावत्सीतायाः परिमार्गणम् ॥ सागरं तु समासाद्य पुनर्नष्टं मनो मम ॥ १७ ॥
कथं नाम समुद्रस्य दुष्पारस्य महांभसः ॥ हरयो दक्षिणं पारं गमिष्यन्ति समाहिताः ॥ १८ ॥

॥ १२ ॥ एवं निरतिशयानन्दकरं वचनं कथयतो हनुमतः तत्सदृशप्रत्युपकारालाभात् खिद्यते—इदं त्विति ॥ प्रकर्षति व्याकुलयति संतापयति वा । कुर्मि करोमि ॥ १३ ॥ स च संतापस्सर्वस्वदानरूपेण प्रत्युपकारेण विना न शाम्यति । तस्य सर्वस्वदानस्य मया क्रियमाणः परिष्वङ्गएव प्रतिनिधिर्भवत्वित्याह—एष इति । तुशब्दोवधारणे । इमं प्रत्युपकारार्हं कालं प्राप्य मया दत्तोयं परिष्वङ्ग एव सर्वस्वभूतोस्तु । सर्वस्वदानसदृशोस्त्विति संबन्धः । एषः स्वानुभवसिद्धः । इच्छागृहीताभिमतोरुदेहत्वेन स्वस्य निरवधिकभोग्यतया स्थितः । लोके स्वस्य रत्नं हि स्वामिमताय दिशतिसर्वस्वभूतः । एतद्व्यतिरिक्तप्रदाने इदं न दत्तमिति न्यूनता स्यात् । एतत्प्रदाने तु सर्वं दत्तं । एतद्विग्रहस्य सर्वाश्रयत्वात् परिष्वङ्गो हनूमतः । अमृताशिनो हि तृणकबलादिकं न देयं । स्नेहो मे परमो राजन्नित्येतद्विग्रहे प्रेमवतः स एव दातव्यः । मया कालमिमं प्राप्य दत्तः । अयं किञ्चिदपि मत्तोनपेक्षमाणो वर्तते । कदा मयाऽस्मै किंचिद्दत्तं स्यादिति सोत्कण्ठेन मया स्थितं । संप्रत्यप्रतिषेधसमयलाभाद्दत्तवानस्मि । तस्य महात्मनः महास्वभावस्य । महोदारस्येत्यर्थः । देहद्वयमुपकृतवतः किमेकदेहप्रदानमुचितमितिभावः । वेणुद्रुथनसमये सीतां संरक्ष्यदत्त्वा अवगाह्यार्णवं स्वप्स्य इति दशायां रामदेहं च सीतासंदेशवचनेनाजीवयद्धि । एवं देहद्वयंदत्तवतः किमेकदेहदानमुचितमितिभावः ॥१४॥ प्रीतिहृष्टाङ्गः प्रीत्या पुलकितगात्रः । महात्मानमित्यादिविशेषणानि परिष्वङ्गहेतवः ॥ १५ ॥ एवं हनुमन्तं स्तुत्वा सागरस्य दुस्तरत्वं विचार्य विषण्णस्सन् प्रयासकृतं सीतान्वेषणं निरर्थकमितिमन्वान आह—ध्यात्वेति ॥ एवकारो भिन्नक्रमः । ध्यात्वा दुस्तरं सागरं सर्ववानरवाहिनीसहितोहं कथं संतरिष्यामीति संचिन्त्य । सुग्रीवस्योपशृण्वतः सुग्रीवे उपशृण्वत्येव । व्यत्ययेन सप्तम्यर्थे षष्ठी ॥ १६ ॥ सर्वथा सर्वप्रकारेण समुद्रतरणान्तःपुरप्रवेशादिना । सुकृतंतावत् सुष्ठु कृतमेव । परिमार्गणं अन्वेषणं । किंतु सागरं समासाद्य सागरस्य दुस्तरत्वमालोच्य । पुनर्नष्टं मनो मम । सीतावृत्तान्तश्रवणेन हृष्टमपि मे मनः पुनर्नष्टं प्रकृतं विषादं पुनः प्राप्तमित्यर्थः ॥ १७ ॥ विषादमेव प्रकटयति—कथमिति ॥ दुष्पारस्य दुष्प्रापतीरस्य । " पार—तीर कर्मसमाप्तौ " इत्यस्माद्धातोः खच्

धर्मप्राप्येत्यर्थः । एतेन स्वाम्याज्ञापालनेनभृत्यस्यधर्मोपिसूचितः ॥ १२ ॥ **ति०** सर्वस्वभूतः भगवद्देहस्यशुद्धानन्दरूपत्वात्स्वालिङ्गनस्यसर्वस्वभूतत्वंबोध्यं । आनन्दएवहिभगवतःसर्वस्वं । " आनन्दएवहिमाययारामादिदेहत्वेनभासते " इतिगीताभाष्यविष्णुसहस्रनामभाष्ययोर्भगवत्पादैःस्पष्टमेवोक्तं । ब्रह्माण्डपुराणादिषुचैवंपरिष्वङ्गद्वाराब्रह्मानन्दार्पणमेवहनुमतेकृतमितिबोधितं । तस्यहनूमतः उत्तमभृत्यस्यहनूमतः ॥ **स०** एतत्कालोचितमिदमित्यालोच्यदत्तवान्वानरेन्द्रायराघवेन्द्रइत्याह—एषइत्यादिना । सर्वस्वभूतः सहभोगहेतुत्वात्कृतोपकारसमप्रफलरूपः । एषः परिष्वङ्गः अङ्गालिङ्गनरूपः । इमंकालं एतादृशंसमयं । प्राप्य । महात्मनः तस्यहनुमतोदत्तः । मयारमयामहात्मनोममचसर्वस्वभूतः एषोपि इमं अकालं सायुज्यसूचकस्यतस्येदानीमयोग्यत्वात्तत्कालभिन्नंकालंप्राप्यापि मयादत्तइतिवा । तुशब्दस्तुरमामाहृतयोर्विशेषद्योतकः । अनेनकृपापारवश्यंद्योत्यते ॥ **शि०** इमं दानयोग्यंकालंप्राप्यसर्वस्वभूतः ममसर्वधनलंप्राप्तः । एषपरिष्वङ्गः ममालिङ्गनं । महात्मनोहनूमतोदत्तोस्तु । एतेनपरिष्वङ्गातिरिक्तंहनुमदुपयोगिवस्त्वन्तरंनास्तीतिसूचितं । तेन रामपरिष्वङ्गप्राप्तेःपरमपुरुषार्थत्वंसूचितं ॥ १४ ॥ **ति०** समागताः मिलिताः ॥ १८ ॥

[पा०] १ च. छ. ज. दत्तश्चास्तु. क. ख. घ. दत्तश्चास्य. २ ङ. ञ. ट. कृतवाक्यं. ३ ख.—ट. रघुसत्तमः. ४ च. कथंचास्य. ५ ङ. च. छ. ञ. ट. समागताः.

यद्यप्येष तु वृत्तान्तो वैदेह्या गदितो मम ॥ समुद्रपारगमने हरीणां किमिवोत्तरम् ॥ १९ ॥
इत्युक्त्वा शोकसंभ्रान्तो रामः शत्रुनिबर्हणः ॥ हनुमन्तं महाबाहुस्ततो ध्यानमुपागमत् ॥ २० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे प्रथमः सर्गः ॥ १ ॥

द्वितीयः सर्गः ॥ २ ॥

सुग्रीवेणरामंप्रति समाश्वासनपूर्वकंमध्येसमुद्रं सेतुबन्धनिर्धारणपूर्वकंतदुपायचिन्तनप्रार्थना ॥ १ ॥ तथातंप्रति वानर-पराक्रमादिप्रशंसनपूर्वकं शुभशकुननिवेदनेनशत्रुजयनिर्धारणोक्तिः ॥ २ ॥

तं तु शोकपरिद्यूनं रामं दशरथात्मजम् ॥ उवाच वचनं श्रीमान्सुग्रीवः शोकनाशनम् ॥ १ ॥
किं त्वं संतप्यसे वीर यथाऽन्यः प्राकृतस्तथा ॥ मैवं भूस्त्यज संतापं कृतघ्न इव सौहृदम् ॥ २ ॥
संतापस्य च ते स्थानं न हि पश्यामि राघव ॥ प्रवृत्तावुपलब्धायां ज्ञाते च निलये रिपोः ॥ ३ ॥
मतिमाञ्छास्त्रवित्प्राज्ञः पण्डितश्चासि राघव ॥ त्यजेमां पापिकां बुद्धिं कृतात्मेवार्थदूषणीम् ॥ ४ ॥

प्रत्ययः । महाम्भसः अगाधजलस्य । समाहिताः संगताः ॥ १८ ॥ सर्वेथेति श्लोकोक्तं विवृणोति—यदीति ॥ वैदेह्या वृत्तान्तः गदितो यद्यपि गदित एव । हरीणां समुद्रपारगमने उत्तरं किं उत्तरकालोचितं साधकं किं । न किमपीत्यर्थः । इवशब्दो वाक्यालंकारे ॥ १९ ॥ ध्यानमुपागमत् सागरतरणोपायचिन्तामकरोदित्यर्थः । शत्रुनिबर्हणमहाबाहुपदाभ्यां सागरशोषणादिकमेवोपायमचिन्तयदिति द्योत्यते । २० । इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने प्रथमः सर्गः ॥ १ ॥

एवं शोकसंभ्रान्तं राममवलोक्य समदुःखतया तच्छोकमसहमानः सुग्रीवः " आपद्युन्मार्गगमने कार्यकालात्ययेषु च । अपृष्टोपि हितान्वेषी ब्रूयात्कल्याणभाषितं" इति नीतिशास्त्रमनुस्मरन् शोकनिवारकंवचनमुवाचेत्याह—तंत्विति ॥ तुशब्दः पूर्वस्माद्वैलक्षण्यपरः । तंतुशोकपरिद्यूनं रामःप्रीतिसमायुक्तइति प्रीतियुक्तत्वदशायामेव शोकपरिद्यूनं शोकपरितप्तं । दशरथात्मजं महाराजपुत्रत्वेनशोकलेशानर्हं । रामं । श्रीमान् " शुचिता त्यागिता शौर्यं समानसुखदुःखता । अनुरागश्च दाक्षिण्यं सत्यता च सुहृद्गुणाः" इति कामन्दकोक्तरीत्या मित्रगुणसंपन्न इत्यर्थः । शोकनाशनं रामहृदयान्तर्गतशोकनिवर्तनक्षमं । वचनमुवाच ॥ १ ॥ प्राकृतः क्षुद्रः । मैवं भूः प्राकृत इव मा भूः ॥ २ ॥ निमित्ताभावमुपपादयति—संतापस्यचेति ॥ चोवधारणे । संतापस्य स्थानमेव निमित्तमेव । नपश्यामि । एतावत्पर्यन्तं सीतानुपलम्भनरूपं निमित्तमासीत् इदानीं तु नास्तीत्यर्थः । स्थानं अवकाशः । " अवकाशे स्थितौ स्थानं " इत्यमरः । प्रवृत्तौ सीतावृत्तान्ते । " वार्ता प्रवृत्तिर्वृत्तान्तः " इत्यमरः ॥ ३ ॥ त्वद्दुणपर्यालोचनायामपि न शोकावकाश इत्याह—मतिमानित्यादिना ॥ मतिमान् आगामिगोचरज्ञानवान् । शास्त्रवित् नीतिशास्त्रज्ञः । प्रज्ञास्यास्तीति प्राज्ञः । " प्रज्ञादिभ्यश्च " इत्यण्प्रत्ययः । ऊहापोहज्ञ इत्यर्थः । पण्डा निर्णयात्मकं ज्ञानं सास्य संजातेति पण्डितः । परिच्छेत्तेत्यर्थः । पापिकां पापयुक्तां । अनुत्साहकारिणीमितियावत् । इमां बुद्धिं त्यज । कृतात्मा योगी । अर्थदूषणीं मोक्षरूपपुरुषार्थनिवर्तिकां बुद्धिमिव

शि० अशोकसंभ्रान्तः वास्तवशोकसंभ्रान्तिरहितः । रामः हनूमन्तमित्युक्त्वा ध्यानं सीताप्राप्त्युपायविषयकचिन्तां । उपागमत् प्राप्नोत् ॥ २० ॥ इतिप्रथमःसर्गः ॥ १ ॥

ती० अर्थदूषणीं अपवर्गदूषणीं । बुद्धिमिव विषयेषूपादेयत्वबुद्धिमिव । यद्वा अर्थदूषणीं प्रयोजनहानिकरीं । पापिकां अशुभात्मिकां कलुषितांबुद्धिंत्यजेत्यर्थः ॥ ति० पण्डितः विचारपूर्वंसिद्धान्तप्रतिष्ठापनसमर्थः ॥ स० प्राज्ञः प्रकृष्टा कार्यकारित्वात् ।

[पा०] १ ङ. ञ. ट. त्वयातप्यसे, २ ख. नाथ. ३ ङ. ञ. ट. प्राकृतां.

समुद्रं लङ्घयित्वा तु महानक्रसमाकुलम् ॥ लङ्कामारोहयिष्यामो हनिष्यामश्च [1]ते रिपुम् ॥ ५ ॥
निरुत्साहस्य दीनस्य शोकपर्याकुलात्मनः ॥ सर्वार्था व्यवसीदन्ति व्यसनं चाधिगच्छति ॥ ६ ॥
इमे शूराः समर्थाश्च [2]सर्वे नो हरियूथपाः ॥ त्वत्प्रियार्थं कृतोत्साहाः प्रवेष्टुमपि पावकम् ॥ ७ ॥
एषां हर्षेण जानामि तर्कश्चास्मिन्दृढो मम ॥ ८ ॥
विक्रमेण समानेष्ये सीतां हत्वा यथा रिपुम् ॥ रावणं पापकर्माणं तथा त्वं कर्तुमर्हसि ॥ ९ ॥
[3]सेतुरत्र यथा बध्येद्यथा पश्येम तां पुरीम् ॥ तस्य राक्षसराजस्य तथा त्वं कुरु राघव ॥ १० ॥
दृष्ट्वा तां तु पुरीं लङ्कां त्रिकूटशिखरे स्थिताम् ॥ हतं च रावणं युद्धे दर्शनादु[4]पधारय ॥ ११ ॥
अबद्ध्वा सागरे सेतुं घोरे तु वरुणालये ॥ लङ्का नै[5] र्मर्दितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ १२ ॥
सेतुर्बद्धः समुद्रे च यावल्लङ्कासमीपतः ॥ सर्वं तीर्णं च [6]वै सैन्यं जितमित्युपधारय ॥ १३ ॥
[7]ईमे हि समरे शूरा हरयः कामरूपिणः ॥ शक्ता लङ्कां समानेतुं समुत्पाट्य सराक्षसाम् ॥ १४ ॥
तदलं विक्लबा बुद्धी राजन्[8]सर्वार्थनाशिनी ॥ पुरुषस्य हि लोकेस्मिञ्शोकः शौर्यापकर्षणः ॥ १५ ॥

॥ ४ ॥ नापि सागरदुस्तरत्वं संतापनिमित्तमित्याह —समुद्रमिति ॥ न क्रमन्त इति नक्राः गजग्राहिमत्स्याः । महानक्रसमाकीर्णमपि समुद्रं लङ्घयित्वा लङ्कामारोहयिष्यामः । सेनामिति शेषः । ते रिपुं रावणं । हनिष्यामश्च । समुद्रलङ्घनलङ्कारोहणशत्रुवधार्थं न संतापः कार्य इत्यर्थः ॥ ५ ॥ एवं कारणाभावाच्छोकस्य नावकाश इत्युक्तं । सत्यपि कारणे स त्याज्य इत्याह—निरुत्साहस्येति ॥ शोकपर्याकुलात्मनः शोकव्याकुलमनसः । अतएव निरुत्साहस्य । सर्वार्थाः सर्वप्रयोजनानि । व्यवसीदन्ति नश्यन्ति । सः शोकं व्यसनं चाप्नोति । शोकादनुत्साहः । अनुत्साहादैन्यं । दैन्यादर्थनाशः । अर्थनाशाच्चापत्प्राप्यत इत्यर्थः । तस्माच्छोकस्त्याज्य इति भावः ॥ ६ ॥ नापि सहायानुपपत्तिश्शोकनिमित्तमित्याह—इम इति ॥ शूराः पराक्रमशालिनः । समर्थाः उपायकुशलाः । नः अस्माकं संबन्धिनः । सर्वे इमे हरियूथपाः त्वत्प्रियार्थं पावकमपि प्रवेष्टुं कृतोत्साहाः । किमुतान्यत्कर्तुमिति भावः ॥ ७ ॥ कुत एषामुत्साहस्त्वयावगत इत्याह—एषामिति अर्धमेकं वाक्यं ॥ एषां यूथपानां । हर्षेण मुखप्रसादानुमानेन जानामि । एषां उत्साहमितिशेषः । अस्मिन् उत्साहे । मम दृढः अप्रशिथिलः । तर्कश्चास्ति ॥ ८ ॥ फलितमाह—विक्रमेणेति ॥ पापकर्माणं सीताहरणरूपपापकर्मयुक्तं । ते रिपुं रावणं हत्वा सीतां विक्रमेण यथा समानेष्ये तथा त्वमुत्साहं कर्तुमर्हसि ॥ ९ ॥ तथा त्वं कर्तुमर्हसीत्युक्तं विशिनष्टि—सेतुरिति ॥ अत्र समुद्रे । सेतुर्यथा बध्येत यथा तां पुरीं पश्येम तथा त्वं कुरु । तथोपायं चिन्तयेत्यर्थः ॥ १० ॥ दर्शनमात्रेण किं सेत्स्यति तत्राह—दृष्ट्वेति ॥ तां पुरीं दृष्ट्वा दर्शनादेव हेतोः रावणं हतमवधारय ॥ ११ ॥ सेतुर्बध्य इति कोयं निर्बन्ध इत्याशङ्क्या(वश्यकत्व)न्यथा अशक्यत्वमन्वयव्यतिरेकाभ्यामाह—अबद्ध्वेत्यादिश्लोकद्वयेन ॥ अबद्ध्वा सागर इत्यादि स्पष्टं । लङ्कासमीपतः लङ्कासमीपे । यावत् यावत्काले । सेतुर्बद्धो भवति तावत्काले । सर्वं सैन्यं तीर्णं जितं चेत्युपधारय । कर्तरि निष्ठा ॥ १२—१३ ॥ तरणमात्रेण जयित्वे हेतुमाह—इमे हीति ॥१४॥ उपसंहरति—तदिति ॥ तत् उक्तरीत्या शोकनिमित्तासंभवात् । विक्लबा शोक-

आज्ञा यस्यसतथा । पण्डितः आगमज्ञानोवा ॥४॥ **रामानु०** शोकाक्रान्तस्यतवदर्शनेनममाप्युत्तरकर्तव्यंनस्फुरति । तस्माच्छोकं परित्यज । यथाममोत्साहोभवेत्तथायत्नंकुर्वितिभावः ॥ **स०** यथारिपुंहत्वासीतां विक्रमेण पराक्रमेण । वेर्गरुडस्यक्रमइवक्रमस्तने समानेष्ये । तथेत्युत्साहंकर्तुमर्हसि । यथाऽहंसमानेष्ये तथात्वमुत्साहंममप्रोत्साहनंकर्तुमर्हसीतिवा ॥ ९ ॥ **ती०** तीर्णंजितमिति कर्तरिनिष्ठा । अत्रावधारणचकाराभ्यांराक्षससैन्यकृतविघ्नबाहुल्येसत्यपिअप्रतिहतंतरिष्यतिजेष्यतिचेत्युक्तंभवति ॥ १३ ॥ **ति०** तत्

[पा०] १ क. ग. रावणं. २ ङ. झ. ट. सर्वतो. ख. छ. ज. सर्वेते. ३ घ. सेतुमत्रयथाबद्धा. ४ ङ. च. छ. झ. ट. दवधारय. ५ क. च. ञ. नासादितुं. ६ ङ. झ. ट. मेसैन्यं. ७ ख. ग. छ. धार्यतां. ८ झ. ट. तथाहिसमरेवीराः. ९ झ. ञ. तदलंविक्लबांबुद्धिं ञान्सर्वार्थनाशनीं. १० ख. ग. च. छ. ज. न्सर्वविनाशिनी.

यत्तु कार्यं मनुष्येण शौण्डीर्यमवलंबता ॥ [तदलंकरणायैव कर्तुर्भवति सत्वरम् ॥]
अस्मिन्काले महाप्राज्ञ सत्त्वमातिष्ठ तेजसा ॥ १६ ॥
शूराणां हि मनुष्याणां त्वद्विधानां महात्मनाम् ॥ विनष्टे वा प्रनष्टे वा शोकः सर्वार्थनाशनः ॥१७॥
त्वं तु बुद्धिमतां श्रेष्ठः सर्वशास्त्रार्थकोविदः ॥ मद्विधैः सचिवैः सार्धमरिं जेतुमिहार्हसि ॥ १८ ॥
न हि पश्याम्यहं कंचिन्त्रिषु लोकेषु राघव ॥ गृहीतधनुषो यस्ते तिष्ठेदभिमुखो रणे ॥ १९ ॥
वानरेषु समासक्तं न ते कार्यं विपत्स्यते ॥ अचिराद्रक्ष्यसे सीतां तीर्त्वा सागरमक्षयम् ॥ २० ॥
तदलं शोकमालम्ब्य क्रोधमालम्ब भूपते ॥ निश्चेष्टाः क्षत्रिया मन्दाः सर्वे चण्डस्य बिभ्यति ॥२१॥
लङ्घनार्थं च घोरस्य समुद्रस्य नदीपतेः ॥ सहास्माभिरिहोपेतः सूक्ष्मबुद्धिर्विचारय ॥ २२ ॥
[लङ्घिते तत्र तैः सैन्यैर्जितमित्येव निश्चिनु ॥] सर्वं तीर्णं च मे सैन्यं जितमित्युपधारय ॥२३॥
इमे हि हरयः शूराः समरे कामरूपिणः ॥ तानरीन्विधमिष्यन्ति शिलापादपवृष्टिभिः ॥ २४ ॥
कथंचित्संतरिष्यामस्ते वयं वरुणालयम् ॥ हतमित्येव तं मन्ये युद्धे संमितिनन्दन ॥ २५ ॥

परवशा । अतएव सर्वार्थनाशिनी बुद्धिः अलं मा भूत् । " अलं भूषणपर्याप्तिशक्तिवारणवाचकं " इत्यमरः । तत्र हेतुमाह—पुरुषस्येति । शौर्यापकर्षणः शौर्यनाशनः ॥ १५ ॥ न केवलं शोकत्यागः स्वत्वावलम्बनं च कार्यमित्याह—यत्त्विति ॥ शौण्डीर्यं शौर्यं । "शौण्डी गर्वे " इति धातोरौणादिके ईरन्प्रत्यये शौण्डीरश्शूरः अस्य भावश्शौण्डीर्यं तत् । अवलम्बता अवलम्बमानेन । शौर्यप्रधानेनेत्यर्थः । मनुष्येण पुरुषेण । यत्कार्यं संपाद्यं तत्सत्त्वं धैर्यं बलं वा । तेजसा पराक्रमेण सह अस्मिन्काले आतिष्ठ अवलम्बस्व ॥ १६ ॥ ननु नायं शोकस्सागरतरणादिनिमित्तकः किंतु सीतानवलोकनादिनिमित्त इत्यत्राह—शूराणामिति ॥ विनष्टे अन्तर्हिते । "णश अदर्शने " इति धातोर्निष्ठा ॥ १७ ॥ पुनश्च रामं प्रोत्साहयति—त्वमिति ॥ इह इदानीं ॥ १८ ॥ न हि तिष्ठेत् स्थातुं नशक्नुयात् ॥ १९ ॥ वानरेषु समासक्तं वानरमूलमित्यर्थः । न विपत्स्यते न विनङ्क्ष्यति ॥२०॥ उपसंहरति—तदिति ॥ आलम्ब्यालं । नालम्बस्वेत्यर्थः । " अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा " इति क्त्वाप्रत्ययः । क्रोधस्यालम्ब्यत्वे हेतुमाह—निश्चेष्टा इति । निश्चेष्टाः निरुद्योगाः । क्षत्रियाः मन्दाः मन्दभाग्याः । चण्डस्य चण्डात् । " चण्डस्त्वत्यन्तकोपनः " इत्यमरः ॥ २१ ॥ एवं सेतुबन्धेन सर्वार्थसिद्धेः शोको न कार्य इत्युक्त्वा सेतुबन्धोपायो विचार्यतामित्याह—लङ्घनार्थमिति ॥ लङ्घनार्थं लङ्घनहेतुं । " अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने । व्यवहारे धनुश्शास्त्रे वस्तुहेतुनिवृत्तिषु " इति वैजयन्ती ॥ २२ ॥ सेतुबन्धोपाये निर्णीते ततः परं सुकरमित्याह—सर्वमिति ॥ २३ ॥ उक्तेर्थे पूर्वोक्तं हेतुमनुवदति—इमे हीति ॥ विधमिष्यन्ति धक्ष्यन्ति ॥ २४ ॥ मा भूत्सेतुबन्धः प्रकारान्तरेणापि समुद्रं तीर्त्वा शत्रून् हनिष्यामीत्याह—कथंचिदिति ॥ कथंचित् केनाप्युपायेन । नन्दतीति नन्दनः । नन्द्यादित्वात् ल्युः । समित्यां युद्धे नन्दन युद्धोत्सुकेतियातस्मात् विक्लवां सर्वार्थनाशिनीं बुद्धिमवलंब्यालं । हि यतः शौर्यापकर्षणः तन्नाशकः ॥ १५ ॥ ति० मन्दाः शत्रुविषयक्रोधहीनाः ॥ २१ ॥ ती० सर्वमित्यर्धमेकंवाक्यं । अत्रयावत्तावच्छब्दावध्याहार्यौ । जितमितिभावेनिष्ठा । मेसैन्यंयावत्तीर्णतावत्तेनजितमित्युपधारय । लङ्घितेतस्यतैस्तैन्यमितिक्वचित्पाठः । तस्यार्थः । समुद्रेलङ्घितेतैर्वानरैस्तस्यरावणस्यसैन्यंजितमित्युपधारयेत्यर्थः ॥ २३ ॥ इतिद्वितीयःसर्गः ॥ २ ॥

[पा०] १ झ. शौटीर्यमवलंब्यतां. २ इदमर्धं ङ. झ. ट. पाठेषुदृश्यते. ३ ङ. झ. ट. तत्त्वं. ४ ङ. च. छ. जेतुंत्वमर्हसि. झ. ट. जेतुंसमर्हसि. ५ ख. च. छ. ञ. आनयिष्यामितेसीतां. ६ इदमर्धं क. ङ. च. छ. झ. ञ. ट. पाठेषुदृश्यते. ७ ख. ग. झ. ञवधार्यतां. च. छ. त्युपधार्यतां. ८ घ. शूराविक्रान्ताः. ९ ङ. झ. ट. कथंचित्परिपश्यामिलङ्घितं. क.—घ. कथंचित्परिपश्यामस्तंवयं. १० ङ. झ. ट. शत्रुनिबर्हण.

किमुक्त्वा बहुधा चापि सर्वथा विजयी भवान् ॥ निमित्तानि च पश्यामि मनो मे संप्रहृष्यति ॥२६॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्वितीयः सर्गः ॥ २ ॥

तृतीयः सर्गः ॥ ३ ॥

श्रीरामेणहनुमन्तंप्रति स्वस्यसेतुबन्धाद्यन्यतमोपायेनवानराणांसागरतारणसामर्थ्योक्तिपूर्वकं लङ्कायादुर्गादिभिःपरिरक्षण-प्रकारप्रश्नः ॥१॥ हनुमता तंप्रति विस्तरेणतत्प्रकारनिवेदनेनसहस्वकृतसंक्रमादिविध्वंसननिवेदनपूर्वकं स्वस्याङ्गदादिकतिपय-वीरसाहित्येन बाहुप्लवनेनैव लङ्कागमनपूर्वकं सर्वराक्षसविध्वंसनशक्तिनिवेदनेन तदर्थमाज्ञाप्रार्थनम् ॥ २ ॥

सुग्रीवस्य वचः श्रुत्वा हेतुमत्परमार्थवित् ॥ प्रतिजग्राह काकुत्स्थो हनुमन्तमथाब्रवीत् ॥ १ ॥
तपसा सेतुबन्धेन सागरोच्छोषणेन वा ॥ सर्वथा सुसमर्थोऽसि सागरस्यास्य लङ्घने ॥ २ ॥
कति दुर्गाणि दुर्गाया लङ्कायाः ब्रूहि तानि मे ॥ ज्ञातुमिच्छामि तत्सर्वं दर्शनादिव वानर ॥ ३ ॥
बलस्य परिमाणं च द्वारदुर्गक्रियामपि ॥ गुप्तिकर्म च लङ्कायाः रक्षसां सदनानि च ॥ ४ ॥
यथासुखं यथावच्च लङ्कायामसि दृष्टवान् ॥ सर्वमाचक्ष्व तत्त्वेन सर्वथा कुशलो ह्यसि ॥ ५ ॥
श्रुत्वा रामस्य वचनं हनूमान्मारुतात्मजः ॥ [प्रणम्य शिरसा रामं प्राञ्जलिः सुसमाहितः ॥]
वाक्यं वाक्यविदांश्रेष्ठो रामं पुनरथाब्रवीत् ॥ ६ ॥
श्रूयतां सर्वमाख्यास्ये दुर्गकर्म विधानतः ॥ गुप्ता पुरी यथा लङ्का रक्षिता च यथा बलैः ॥ ७ ॥

वत् ॥ २५ ॥ निमित्तानुसारेणापि भवतो जयसिद्धिरित्याह—किमुक्त्वेति ॥ सर्वथा सेतुं बद्ध्वा अबद्ध्वा वा । निमित्तानि नेत्रस्फुरणादीनि । मनो मे संप्रहृष्यतीति मनःसंप्रहर्षश्च कार्यसिद्धिनिमित्तमिति भावः ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्वितीयः सर्गः ॥ २ ॥

एवं मानुषभावनानुसारेण समुद्रस्य दुस्तरत्वेन शोकापन्नोपि सुहृदुपदेशेन प्रतिष्ठापितधैर्यो रामः नीतिशास्त्रानुसारेण संहार्यशत्रुदुर्गस्वरूपशोधनाय पृच्छति—सुग्रीवस्येत्यादिना ॥ सारग्राहित्वमाह—परमार्थविदिति । हेतुमत् युक्तियुक्तं । वचः श्रुत्वा प्रतिजग्राह ॥ १ ॥ तपसा तपःप्रभावेन । तरसेति पाठे तरसा वेगेन । लङ्घने तरणे ॥ २ ॥ एवमुपायचिन्तनेन समुद्रस्य दुस्तरत्वमविगणय्य दुर्गस्वरूपं पृच्छति—कतीति ॥ दुर्गायाः दुष्प्रापायाः । लङ्कायाः कति दुर्गाणि कति दुर्गप्राकारः । सन्तीत्यर्थः । जलगिरिस्थलात्मकानि दुर्गाणि । तत् दुर्गविशेषवत्त्वं । मे ब्रूहि । पूर्वमेवोक्तमित्यत्राह—ज्ञातुमिति । तत्पूर्वं श्रुतं सर्वं । दर्शनादिव प्रत्यक्षत इव । विशदं ज्ञातुमिच्छामि । बलस्य सेनायाः । परिमाणं इयत्तां । द्वारदुर्गक्रियां द्वारेषु दुर्गक्रियां कीलखननजलौघप्लवनकरणादिभिः दुर्गमत्वकरणं । गुप्तिकर्म प्राकारपरिघादिनिर्माणं । सदनानि गृहाणि । ज्ञातुमिच्छामीति पूर्वेणान्वयः ॥ ३–४ ॥ यथासुखं निश्शङ्कं । यथावत् तत्त्वेन । लङ्कायां पूर्वोक्तं सर्वं दृष्टवानसि । तत्त्वेन दृष्टप्रकारेणैव । आचक्ष्व व्यक्तं वद । सर्वथा द्रष्टुं वक्तुं च ॥ ५ ॥ अथाब्रवीत् कात्स्न्र्येनाब्रवीत् । "मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथोऽथ" इत्यमरः ॥ ६ ॥ दुर्गकर्मविधानतः दुर्गकर्म प्राकारपरिखाखननादि । तद्विधानतः तन्निर्माणेन गुप्तेति संबन्धः । राक्षसाः स्निग्धाः स्वामिनि भक्ताः तेजसासंपादितामितिशेषः । विभागं तत्र तत्र

स० परमार्थः अवतारमुख्यार्थः रावणमारणादिः तद्वत् । तद्घटकमितियावत् ॥ १ ॥ ति० तपसा तपःकार्यसंकल्पसिद्ध्या । अतएवसकलस्वपुरवर्तिप्राणिनांब्रह्मलोकनयनंवक्ष्यमाणंसंगच्छते । सेतुबन्धेन गङ्गायांगाङ्गेयेनशरैरिव । सागरोच्छोषणेन दिव्या-

[पा०] १ ख. संप्रसीदति. २ ख. इतितस्यवचः. च. छ. तस्यतद्वचनं. ३ ङ. झ. ट. लङ्कायास्तद्रक्षीष्वमे. क. ख. ग. च. छ. ज. ञ. लङ्कायास्तद्रक्षीहिमे. ४ च. छ. ञ. श्रोतुमिच्छामि. ५ ग. ङ. च. ज. लङ्कायां. ६ इदमर्धं क. ख. पाठयोर्दृश्यते.

राक्षसाश्च यथा स्निग्धा रावणस्य च तेजसा ॥ परां समृद्धिं लङ्कायाः सागरस्य च भीमताम् ॥
विभागं च बलौघस्य निर्देशं वाहनस्य च ॥ ८ ॥
एवमुक्त्वा कपिश्रेष्ठः कथयामास तत्त्वतः ॥ ९ ॥
हृष्टप्रमुदिता लङ्का मत्तद्विपसमाकुला ॥ महती रथसंपूर्णा रक्षोगणसमाकुला ॥
वाजिभिश्च सुसंपूर्णा सा पुरी दुर्गमा परैः ॥ १० ॥
दृढबद्धकवाटानि महापरिघवन्ति च ॥ द्वाराणि विपुलान्यस्याश्चत्वारि सुमहान्ति च ॥ ११ ॥
तत्रेषूपलयत्राणि बलवन्ति महान्ति च ॥ आगतं परसैन्यं तु तत्र तैः प्रतिहन्यते ॥ १२ ॥
द्वारेषु संस्कृता भीमाः कालायसमयाः शिताः ॥ शतशो रचिता वीरैः शतघ्नो रक्षसां गणैः ॥१३॥
सौवर्णश्च महांस्तस्याः प्राकारो दुष्प्रधर्षणः ॥ मणिविद्रुमवैडूर्यमुक्ताविरचितान्तरः ॥ १४ ॥
सर्वतश्च महाभीमाः शीततोयवहाः शुभाः ॥ अगाधा ग्राहवत्यश्च परिखा मीनसेविताः ॥ १५ ॥
द्वारेषु तासां चत्वारः संक्रमाः परमायताः ॥ यन्त्रैरुपेता बहुभिर्महद्भिर्गृहपङ्क्तिभिः ॥ १६ ॥
त्रायन्ते संक्रमास्तत्र परसैन्यागमे सति ॥ यन्त्रैस्तैरवकीर्यन्ते परिखासु समन्ततः ॥ १७ ॥

विभज्य स्थापनं । बलौघस्य चतुरङ्गबलसमूहस्य । निर्दिश्यते इयत्तया परिच्छिद्यतेऽनेनेति निर्देशः संख्या तं ॥ ७–८ ॥ एवमित्यर्धं ॥ एवमुक्त्वा उक्तरीत्या वक्ष्यमाणं संग्रहेण प्रतिज्ञाय ॥ ९ ॥ हृष्टप्रमुदिता अत्यन्तहृष्टजना ॥ १० ॥ दृढेति आयसकीलादिभिर्दृढघटितकवाटानि । महापरिघवन्ति महार्गलवन्ति । “ अर्गले काचके वंशे योगे प्राकारगोपुरे । अस्त्रे घटे मुद्गरे च परिघः परिपठ्यते ” इतिनिघण्टुः । सुमहान्ति उन्नतानि ॥ ११ ॥ तत्र तेषु द्वारेषु । इषूपलयत्राणि शरशिलाक्षेपकयत्राणि । बलवन्ति दृढानि महान्ति विपुलानि सन्तीति शेषः । तैः यन्त्रैः । तत्र द्वारेषु । प्रतिहन्यते प्रतिबध्यते ॥ १२ ॥ संस्कृताः सज्जीकृताः । शिताः तीक्ष्णाः । कालायसमयाः अयस्सारमयाः । ङीबभाव आर्षः । “ अनोश्मायस्सरसां जातिसंज्ञयोः ” इति समासान्तः । शतं घ्नन्तीति शतघ्नयः मुद्गरविशेषाः । “ अमनुष्यकर्तृके च ” इति ठक् । शतशः बहुशः । रचिताः स्थापिताः ॥ १३ ॥ तस्याः प्राकारो दुष्प्रधर्षणः दुरारोह इत्यर्थः । मणयः पद्मरागाः ॥ १४ ॥ सर्वतः प्राकारमभितः परिखाः सन्तीति शेषः । शीततोयत्वेन दुष्प्रवेशत्वमुक्तं ॥ १५ ॥ द्वारेषु द्वारसमीपप्रदेशेषु । सामीप्ये सप्तमी । तासां परिखानां संबन्धिनः । परिखोपरिक्ष्मा इत्यर्थः । संक्रमाः दारुफलकनिर्मितसंचारमार्गाः । “ संक्रमः क्रमणे सम्यग्द्वारसंचारयन्त्रके ” इति विश्वः । परमायताः अतिविपुलाः । यन्त्रैः संक्रमावकीर्यकैः । महद्भिरिति यन्त्रविशेषणं । गृहपङ्क्तिभिः रक्षिजनावासस्थानपङ्क्तिभिः । उपेताः सन्तीतिशेषः ॥१६॥ संक्रमाणामुपयोगमाह—त्रायन्त इति ॥ तत्र द्वारप्रदेशेषु । परसैन्यागमेसति संक्रमाः त्रायन्ते पुरीमिति शेषः । कथमित्यत्राह—यन्त्रैरिति । यन्त्रैः संक्रमफलकविक्षेपयन्त्रैः । परिखासु परिखोपरि । समन्ततः अवकीर्यन्ते क्षिप्यन्ते । सर्वथा परिखाजलोपरि फलका निक्षिप्यन्ते । शत्रुसैन्यागमेतु ता उत्क्षिप्यन्ते । तेन दुर्गपरिखाजलेन प्राकारसमीपगमनं न शक्यत इति श्लोकतात्पर्यं ॥ १७ ॥

स्त्रबलतइतिशेषः ॥ सर्वथा सर्वप्रकारस्यलङ्घनोपायस्यविद्यमानत्वादित्याशयः ॥ २ ॥ स० स्निग्धाः रावणेपरस्परंचस्नेहवन्तः । तथाश्रृणु । स्निग्धाइत्यनेन भेदनोपायासाध्यत्वंसूचयति ॥ ८ ॥ ती० शतघ्नोनाम सकृत्प्रयोगाच्छतमारिकाःचतुर्वितस्तिप्रमाणा मुद्गरविशेषाः ॥ “ शतघ्नीचचतुर्हस्तागदितालोहकण्टकी ” इतिवैजयन्ती ॥ १३ ॥ स० परसैन्यागमेसति । अनेनगमनमेवदुर्घटमितिसूचयति ॥ १७ ॥

[पा०] १ ङ. झ. ट. तत्त्ववित्. २ ङ. च. छ. झ. ञ. ट. गणनिषेविता. ३ ख. ग. ङ. ज.—ट. प्रतिसैन्यंतैस्तत्रप्रतिनिवार्यते. क. घ. च. छ. परसैन्यंतैस्तत्रप्रतिनिवार्यते. ४ ट. सौवर्णस्तुमहान्. झ. सौवर्णस्तुमहान्. घ. ससौवर्णमयस्तस्याः. ५ ङ. च. छ. झ. ञ. ट. शीततोयामहाशुभाः. ६ घ. मीनसंकुलाः.

एकस्त्वकम्प्यो बलवान्संक्रमः सुमहादृढः ॥ काञ्चनैर्बहुभिः स्तम्भैर्वेदिकाभिश्च शोभितः ॥ १८ ॥
स्वयं प्रकृतिसंपन्नो युयुत्सू राम रावणः ॥ उत्थितश्चाप्रमत्तश्च बलानामनुदर्शने ॥ १९ ॥
लङ्का पुनर्निरालम्बा देवदुर्गा भयावहा ॥ नादेयं पार्वतं वान्यं कृत्रिमं च चतुर्विधम् ॥ २० ॥
स्थिता पारे समुद्रस्य दूरपारस्य राघव ॥ नौपथोपि च नास्त्यत्र निरादेशश्च सर्वतः ॥ २१ ॥
शैलाग्रे रचिता दुर्गा सा पूर्देवपुरोपमा ॥ वाजिवारणसंपूर्णा लङ्का परमदुर्जया ॥ २२ ॥
परिखाश्च शतघ्नयश्च यन्त्राणि विविधानि च ॥ शोभयन्ति पुरीं लङ्कां रावणस्य दुरात्मनः ॥ २३ ॥
अयुतं रक्षसामत्र पूर्वद्वारं समाश्रितम् ॥ शूलहस्ता दुराधर्षाः सर्वे खड्गाग्रयोधिनः ॥ २४ ॥
नियुतं रक्षसामत्र दक्षिणद्वारमाश्रितम् ॥ चतुरङ्गेण सैन्येन योधास्तत्राप्यनुत्तमाः ॥ २५ ॥
प्रयुतं रक्षसामत्र पश्चिमद्वारमाश्रितम् ॥ चर्मखड्गधराः सर्वे तथा सर्वास्त्रकोविदाः ॥ २६ ॥
न्यर्बुदं रक्षसामत्र उत्तरद्वारमाश्रितम् ॥ रथिनश्चाश्ववाहाश्च कुलपुत्राः सुपूजिताः ॥ २७ ॥
शतशोथ सहस्राणि मध्यमं स्कन्धमाश्रिताः ॥ यातुधाना दुराधर्षाः सैाग्रकोटिश्च रक्षसाम् ॥२८॥

तेषु संक्रमेषु। एकः उत्तरद्वारस्थः। बलवान् स्थौल्यवान्। सुमहादृढः अत्यन्तवृद्धसंघटनः । अतएवाकम्प्यः । स्तम्भैः संक्रमाधारार्थं परिखासु स्थापितैः स्तम्भैः । वेदिकाभिः रक्षिजनाधारार्थाभिर्वितर्दिकाभिः ॥१८॥ प्रकृतिसंपन्नः द्यूतादिव्यसनरूपविचाररहितः । अप्रमत्तः सावधानः । बलानां सैन्यानां । अनुदर्शने प्रतिदिनमवलोकननिमित्तं । उत्थितः जागरूकः । स्वयं युयुत्सुः सर्वदा युद्धोद्यतः । तिष्ठतीतिशेषः ॥ १९ ॥ लङ्का पुनः लङ्का तु । निरालम्बा टङ्कच्छेदमसृणीकृतत्रिकूटशिखरस्थितत्वादारोहणालम्बनरहिता । देवदुर्गा देवैरपि दुष्प्रापा । लङ्का नादेयादिरूपेण चतुर्विधदुर्गं च चतुर्विधदुर्गप्राकारवतीत्यर्थः । नादेयं नद्यां भवं । जलदुर्गमित्यर्थः । पार्वतं पर्वतस्थं । वनानां समूहो वन्या तत्संबन्धि वान्यं । कृत्रिमं क्रियया निर्वृत्तं । प्राकारपरिखादिमत् स्थलमित्यक्षरार्थः ॥ २० ॥ दूरे पारं यस्य सः दूरपारः तस्य । विशालस्येत्यर्थः । पारे दक्षिणतीरे स्थिता । अत्र समुद्रे । नौपथः नौसंचारश्च नास्ति । अतएव सर्वतः निरादेशश्च । आदेशो वार्तासंचारः तद्रहितः अयं देश इत्यर्थः ॥ २१ ॥ वनगिरिदुर्गवत्त्वमाह—शैलाग्र इति ॥२२॥ कृत्रिमदुर्गवत्त्वमाह—परिखा इति ॥ २३ ॥ विभागं च बलौघस्येति रामप्रश्नस्योत्तरमाह—अयुतमिति ॥ अत्र लङ्कायां । सर्वे पूर्वद्वारस्थाः । अयुतं दशसहस्रं । अग्रे सेनाग्रे युध्यन्त इत्यग्रयोधिनः । खड्गैरग्रयोधिनः सर्वे अयुतसंख्याकाः सर्वेपितथाविधा इत्यर्थः ॥ २४ ॥ अत्र लङ्कायां । चतुरङ्गेण सैन्येन सह रक्षसां नियुतं दक्षिणद्वारमाश्रितं । तत्र चतुरङ्गबलेषु । योधाः पदातयः । अनुत्तमाः अत्यन्तशूराः । भवन्तीत्यर्थः ॥ २५ ॥ सर्वे पश्चिमद्वारवासिनः । सर्वास्त्रकोविदाः समस्तास्त्रज्ञाः ॥ २६ ॥ अश्ववाहाश्चेति चकारेण गजवाहास्समुच्चीयन्ते । कुलपुत्राः सत्कुलप्रसूताः । विश्वसनीया इति यावत्। सुपूजिताः रावणेन बहुमताः । किंकरा इति शेषः ॥ २७ ॥ अथेति कात्स्न्र्ये । शतशः सहस्राणि अनेकसहस्राणि । दुराधर्षाः यातुधानाः राक्षसाः । मध्यमं स्कन्धं नगरमध्यमस्थानं । आश्रिताः ।

शि० बलवान् बहुसेनाविशिष्टः । सुमहादृढः शैथिल्यसंसर्गरहितइत्यर्थः । अतएवाकंप्यः परैःकंपयितुमशक्यः । काञ्चनैः स्तंभैर्वेदिकाभिश्चशोभितः एकःसंक्रमोस्तीतिशेषः । एतेन तेनैवरावणोनिर्गच्छतिप्रविशतिचेतिसूचितं ॥ १८ ॥ शि० प्रकृतिं स्वभावं । आपन्नः मद्यपानादावपिस्वभावपरिणामरहितइत्यर्थः ॥ १९ ॥ स० निरालंबा अंबरलंबिनीतिनिरालंबैव निरालंबा नितरां दृढाइतियावत् । आलंबः पर्वतशिखरादिरूपआश्रयोयस्यास्सा । देवदुर्गा देवानामपिदुस्साधगमना । निरालंबादेव प्रतीयमानाश्रयाभावादेव दुर्गेतिवा । दुर्गा दुष्टांगतिमापन्नोदुःखंप्राप्तोवातस्याभयावहेतिवा ॥ २० ॥ स० निरुद्देशः वृथाभूमिः । निरादेशइतिपाठे आज्ञांविनागम्यप्रदेशः । नास्तीत्युभयत्रान्वेति ॥ २१ ॥

[पा०] १ झ. ञ. ट. प्रकृतिमापन्नो. २ क. ख. च. छ. ज. ञ. लङ्कापुरीनिरा. ३ क. ग.—ट. नौपथश्चापि. ४ ङ. झ. ट. निरुद्देशश्च. ५ घ. शतकोटिश्च.

ते मया संक्रमा भग्नाः परिखाश्चावपूरिताः ॥ दग्धा च नगरी लङ्का प्राकाराश्चावसादिताः ॥ २९ ॥
बलैकदेशः क्षपितो राक्षसानां महात्मनाम् ॥ ३० ॥
येन केन च मार्गेण तराम वरुणालयम् ॥ हतेति नगरी लङ्का वानरैरवधार्यताम् ॥ ३१ ॥
अङ्गदो द्विविदो मैन्दो जाम्बवान्पनसो नलः ॥ नीलः सेनापतिश्चैव बलशेषेण किं तव ॥ ३२ ॥
प्लवमाना हि गत्वा तां रावणस्य महापुरीम् ॥ सपर्वतवनां भित्त्वा सखातां सप्रतोरणाम् ॥
सप्राकारां सभवनामानयिष्यन्ति राघव ॥ ३३ ॥
एवमाज्ञापय क्षिप्रं बलानां सर्वसंग्रहम् ॥ मुहूर्तेन तु युक्तेन प्रस्थानमभिरोचय ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः ॥ ४ ॥

सुग्रीवेणरामचोदनयातदुक्तप्रकारेणवानरसैन्यानांसुमुहूर्तेलङ्कांप्रतिप्रस्थानायाज्ञापनम् ॥ १ ॥ सुग्रीवादिभिर्हनुमदङ्गदारूढाभ्यांरामलक्ष्मणाभ्यांसहरामोक्तप्रकारेणसर्वतःसेनारक्षणपूर्वकंलङ्कांप्रतिप्रस्थानम् ॥ २ ॥ प्रयाणसमयेलक्ष्मणेनरामंप्रति स्वपरजयापजयसूचकशुभाशुभशकुनप्रदर्शनपूर्वकंसमाश्वासनम् ॥ ३ ॥ रामेणसुग्रीवादिभिःसह क्रमेणमलयाद्यतिक्रमेण महेन्द्रगिरिमेत्यतच्छिखरारोहणेनसागरावलोकनम् ॥ ४ ॥ हनुमदंसादवतीर्यसमुद्रवेलावनमुपगतेनरामेणसुग्रीवंप्रतिसेनासंनिवेशननियोजनपूर्वकंसागरतरणोपायनिर्धारणायमन्त्रचोदना ॥ ५ ॥

श्रुत्वा हनुमतो वाक्यं यथावदनुपूर्वशः ॥ ततोऽब्रवीन्महातेजा रामः सत्यपराक्रमः ॥ १ ॥
यां निवेदयसे लङ्कां पुरीं भीमस्य रक्षसः ॥ क्षिप्रमेनां मथिष्यामि सत्यमेतद्ब्रवीमि ते ॥ २ ॥

सर्वसंख्यामाह—साग्रेति । रक्षसां साग्रकोटिः पूर्णकोटिः । अत्र लङ्कायां अस्तीति शेषः ॥ २८ ॥ एवं दुर्गप्राकारवर्णनेन लघूनां भीतिर्मा भूदिति स्वकृतं दर्शयति—ते मयेति ॥ परिखा इत्यादावपि तच्छब्दोनुसंधेयः ॥२९॥ बलैकदेश इत्यर्धमेकान्वयं ॥ बलैकदेशः सेनाचतुर्थांश इत्यर्थः । महात्मनां महाकायानां ॥ ३० ॥ तपसा सेतुबन्धेनेत्येवं रामोक्तमेव सम्यगित्याह–येनेति ॥ मार्गेण उपायेन । तराम तरिष्यामः । व्यत्ययेन लोट् । वरुणालयं समुद्रं ॥ ३१॥ पक्षान्तरमाह–अङ्गद इत्यादिसार्धश्लोकद्वयेन ॥ अङ्गदादयः प्लवमानाः समुद्रं लङ्घितवन्तः । सखातां सपरिखां । सप्रतोरणां सबहिर्द्वारां आनयिष्यन्ति । बलशेषेण किं । उक्ताङ्गदादिव्यतिरिक्तबलशेषेण किं प्रयोजनमिति योजना ॥ ३२—३३ ॥ सर्वसंग्रहं । संगृह्यत इति संग्रहः बलानां मध्ये सर्वसारभूतं बलं अङ्गदादिकं आज्ञापय । एवं प्लवमाना इत्याद्युक्तरीत्या आज्ञापयेत्यर्थः । युक्तेन यात्रायोग्येन ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने तृतीयः सर्गः ॥ ३ ॥

एवं लङ्काया दुर्गकर्मबलपरिमाणादौ हनुमता कथिते रामः कियन्मात्रमिदमिति न्यक्कृत्य तदानीमेव दण्डयात्रामाज्ञापयति—श्रुत्वेति ॥ महातेजाः महाबलः । सत्यपराक्रमः अमोघविक्रमः । आभ्यां निर्भयत्वे हेतुरुक्तः । अब्रवीत् सुग्रीवमिति शेषः ॥ १ ॥ निवेदयसे हनुमन्मुखेन निवेदयसि । मथिष्यामि

ति० परिखाश्चावपूरिताः शिलेष्टकादिभिरितिशेषः ॥ चेनबलैकदेशक्षयोपिकृतइत्यर्थः ॥ २९ ॥ ति० एवमिति । एवं प्रधानैरेवकार्यसाधनमिष्टंचेत्क्षिप्रमिदानीमेवानयतेत्याज्ञापय । यदि बलानांसर्वसंग्रहं बलसंमेलनमुद्दिश्य बलानामपिपारनयनमिष्टं तदा युक्तेन यात्रोचितेनमुहूर्तेनप्रस्थानं स्वयात्रामभिरोचय ॥ ३४ ॥ इतितृतीयःसर्गः ॥ ३ ॥

स० "किंतस्यशत्रुहननेकपयःसहायाः" इत्याद्युक्तप्रकारेणस्वमतमावेदयति—**यदिति** । यदित्यव्ययं यामित्यर्थे । यांलङ्काम-

[पा०] १ क. घ. दुरात्मनां. २ ख. लङ्कांवैसप्र. ङ. झ. ट. सखातांचसतोरणां. क. सपताकांसतोरणां. ज. सखातां सप्रतोलिकां. ३ घ. ज. मैथिलीं. ४ क. ख. दनुभाषितं. ५ ङ. झ. ट. यन्निवेदयसे. ६ ङ. झ. ट. ठ. वधिष्यामि.

अस्मिन्मुहूर्ते सुग्रीव प्रयाणमभिरोचये ॥ युक्तो मुहूर्तो विजयः प्राप्तो मध्यं दिवाकरः ॥ ३ ॥
अस्मिन्मुहूर्ते विजये प्राप्ते मध्यं दिवाकरे ॥ सीतां हृत्वा तु मे जातु क्वाऽसौ यास्यति यास्यतः ॥४॥
सीता श्रुत्वाऽभियानं मे आशामेष्यति जीविते ॥ जीवितान्तेऽमृतं स्पृष्ट्वा पीत्वा विषमिवातुरः ॥५॥
उत्तराफल्गुनी ह्यद्य श्वस्तु हस्तेन योक्ष्यते ॥ अभिप्रयाम सुग्रीव सर्वानीकसमावृताः ॥ ६ ॥
[मुहूर्तेन च युक्तेन प्रस्थानमभिरोचय ॥] निमित्तानि च धन्यानि यानि प्रादुर्भवन्ति च ॥
निहत्य रावणं सीतामानयिष्यामि जानकीम् ॥ ७ ॥
उपरिष्टाद्धि नयनं स्फुरमाणमिदं मम ॥ विजयं समनुप्राप्तं शंसतीव मनोरथम् ॥ ८ ॥

शरैर्ध्वंसयिष्यामि ॥ २ ॥ कुत इत्यत्राह—युक्त इति । युक्तः यात्रार्हः । तत्र हेतुः । विजयः विजयावहः । विजयावहत्वे हेतुमाह—दिवाकरः । मध्यं दिने मध्यं प्राप्तः । अभिजिन्मुहूर्त इत्यर्थः । तदुक्तं विद्यामाधवीये—" आर्द्रोरगमित्रमखावसुजलविश्वाभिजिद्विरिञ्चेन्द्राः । ऐन्द्राग्निमूलवरुणार्यमभगतारा दिवा मुहूर्ताः स्युः " इति ॥ नन्वभिजिन्मुहूर्ता दक्षिणयात्रासु निषिद्धाः । यथा ज्यौतिष्करत्नाकरे—" भुक्तौ दक्षिणयात्रायां प्रतिष्ठायां द्विजन्मनि । आधाने च ध्वजारोहे मृत्युदः स्यात्सदाभिजित् " इति ॥ उच्यते । लङ्का हि दक्षिणपूर्वस्यां किष्किन्धायाः । अतो नेयं दक्षिणयात्रेति नोक्तदोषः ॥ ३ ॥ मुहूर्तविशेषे प्रयाणस्य फलं दर्शयति—अस्मिन्निति ॥ दिवाकरे मध्यं प्राप्ते विजयाख्ये अस्मिन्मुहूर्ते यास्यतो मे यास्यति मयि । असौ रावणः । सीतां हृत्वा जातु कदाचित् क्व यास्यति । यत्र कुत्रापि यान्तं तं हनिष्यामीत्यर्थः । सीतां हृत्वा तु मे यात्विति पाठे यातु राक्षसः । " नैर्ऋतो यातुरक्षसी " इत्यमरः । यद्वा यातु गच्छतु । क्व यास्यतीत्यन्वयः ॥ ४ ॥ अद्यैव सागरतरणोपायचिन्तां विना निर्गमस्य फलमाह—सीतेति ॥ मे अभियानं प्रस्थानं । सीता श्रुत्वा जीविते आशामेष्यति । श्रवणं च त्रिजटादिभ्य इति ज्ञेयं । निर्गमं विना केवलं विचाराकुलेष्वस्मासु जीविते सा निराशा स्यादिति भावः । कथमिव । विषं पीत्वा आतुरः पीडितः । पुरुषः जीवितान्ते प्राणात्यये प्राप्ते । अमृतं स्पृष्ट्वेव ॥ ५ ॥ तर्हि कदाऽस्माभिः प्रस्थाप्यं तत्राह—उत्तरेति ॥ अद्य दिने उत्तराफल्गुनीनक्षत्रं वर्तते । श्वः उत्तरदिने । हस्तेन योक्ष्यते । चन्द्र इति शेषः । हस्तो रामस्य निधनतारा । उत्तराफल्गुनी तु साधनतारा । अतोऽद्यैव सर्वानीकसमावृताः सन्तः अभिप्रयाम गच्छेम । अत्रोत्तराफल्गुनीत्यनेन स दिवसः फाल्गुनपौर्णमासीत्यवगम्यते । इदमुत्तरत्र प्रतिपादयिष्यते ॥ ६ ॥ यानि निमित्तानि धन्यानि तानि प्रादुर्भवन्ति । अतो रावणं निहत्य सीतामानयिष्यामि । जानकीमिति विशेषणेन जनकप्रीत्यर्थं चावश्यं सा आनेतव्येति व्यज्यते ॥ ७ ॥ उपरिष्टात् उपरि । स्फुरमाणमिदं मम नयनं । मनोरथं मनोरथविषयभूतं जयं । समनुप्राप्तं सम्यक्समीपे प्राप्तं । शंसतीव । स्पष्टं बोधयतीत्यर्थः । तथोक्तं ज्योतिश्शास्त्रे—" नेत्रस्याधस्स्फुरणमसकृत्सङ्गरे भङ्गहेतुर्नेत्रोपान्ते

तिवुर्गमांनिवेदयसे कथयसि । तामेतांक्षिप्रमेववधिष्यामि । प्रकृत्यन्तरस्येदंरूपं । वधिष्यामीत्यनेन लङ्कानाशेऽन्यनैरपेक्ष्यंसूचयति ॥ तेतुभ्यमितिहनुमन्तंप्रत्युक्तिः ॥ २ ॥ **ति०** सुग्रीवप्रयाणमितिषष्ठीतत्पुरुषः ॥ **स०** राजत्वात्सुग्रीवंकटाक्षीकृत्याह—अस्मिन्निति । अस्मिन् अभिजिन्नामकेमुहूर्ते प्रयाणमितोस्मन्निर्गममभिरोचये । अभिरोचयेतिपाठे अनुमोदस्वेत्यर्थः । सुग्रीवप्रयाणमित्यैकपद्येनहनुमदाभिमुख्येनवचनमित्यङ्गीकारे " अभिप्रयामसुग्रीवसर्वानीकसमावृताः " इत्यग्रिमग्रन्थानानुगुण्यंस्फुटं ॥ मध्यं नभोमध्यं । दिवाकरोयतःप्राप्तः तस्मात् विजये विजयप्रदेमुहूर्ते । युक्तः निर्गमइतिशेषः । युक्तोमुहूर्तोविजयइतिप्रथमान्तपाठःस्फुटार्थः ॥ ३ ॥ **ति०** आतुरः जीवितान्ते जीवितनाशप्राप्तौ । अमृतं अमृतत्वसाधनंदिव्यौषधं । स्पृष्ट्वा द्रवरूपममृतंपीत्वाच यथाजीविताशामेति तद्वत् ॥ ५ ॥ **ति०** ममतारावलमस्तीत्याह—उत्तरेति । पुनर्वसुजातस्यहस्तोवधतारा। उत्तराचसीतायाजन्मतारा । बद्धजन्मतारायांतन्मोचनार्थयात्रायामवश्यंतन्मुक्तिरितिभावः । अद्यामान्तमानेनमार्गशीर्षकृष्णाष्ट-

[पा०] १ क. च.—ट. मभिरोचय. २ ङ. ट. प्राप्तोमध्यंदिवाकरः. ३ ङ. झ. ट. हृत्वातुतद्यातु. ४ ख.—ङ. झ. ञ. ट. जीवितः. ग. च. छ. वेगितः. ५ ङ. झ. पीत्वाऽमृतं. ६ इदमर्धं ख. च. छ. पाठेषुदृश्यते. ७ ङ. झ. ट. पश्यामि. क. ख. सौम्यानि. ८ क. ख. छ. ञ. प्रादुर्भवन्तिमे. ९ ख. च. छ. ञ. संख्येह्यानयिष्यामि.

ततो वानरराजेन लक्ष्मणेन च पूजितः ॥ उवाच रामो धर्मात्मा पुनरप्यर्थकोविदः ॥ ९ ॥
अग्रे यातु बलस्यास्य नीलो मार्गमवेक्षितुम् ॥ वृतः शतसहस्रेण वानराणां तरस्विनाम् ॥ १० ॥
फलमूलवता नील शीतकाननवारिणा ॥ पथा मधुमता चाशु सेनां सेनापते नय ॥ ११ ॥
दूषयेयुर्दुरात्मानः पथि मूलफलोदकम् ॥ राक्षसाः परिरक्षेथास्तेभ्यस्त्वं नित्यमुद्यतः ॥ १२ ॥
निम्नेषु वनदुर्गेषु वनेषु च वनौकसः ॥ अभिप्लुत्याभिपश्येयुः परेषां निहितं बलम् ॥ १३ ॥
यच्च फल्गु बलं किंचित्तदत्रैवोपयुज्यताम् ॥ एतद्धि कृत्यं घोरं नो विक्रमेण प्रयुध्यताम् ॥ १४ ॥
सागरौघनिभं भीममग्रानीकं महाबलाः ॥ कपिसिंहाः प्रकर्षन्तु शतशोथ सहस्रशः ॥ १५ ॥
गजश्च गिरिसंकाशो गवयश्च महाबलः ॥ गवाक्षश्चाग्रतो यान्तु गवां दृप्ता इवर्षभाः ॥ १६ ॥
यातु वानरवाहिन्या वानरः प्लवतां वरः ॥ पालयन्दक्षिणं पार्श्वमृषभो वानरर्षभः ॥ १७ ॥
गन्धहस्तीव दुर्धर्षस्तरस्वी गन्धमादनः ॥ यातु वानरवाहिन्याः सव्यं पार्श्वमधिष्ठितः ॥ १८ ॥
यास्यामि बलमध्येऽहं बलौघमभिहर्षयन् ॥ अधिरुह्य हनूमन्तमैरावतमिवेश्वरः ॥ १९ ॥
अङ्गदेनैष संयातु लक्ष्मणश्चान्तकोपमः ॥ सार्वभौमेन भूतेशो द्रविणाधिपतिर्यथा ॥ २० ॥

हरति नयनं नेत्रमूले च मृत्युः । नेत्रस्योर्ध्वं हरति सकलं मानसं दुःखजातं वामे चैवं फलमविकलं दक्षिणे वैपरीत्यं " इति ॥ एवं वचने विद्यमाने दक्षिणनयनमिति व्याख्यानं चिन्त्यं ॥ ८ ॥ पूजितः युक्तमिति श्लाघितः । अर्थकोविदः नीतिशास्त्रनिपुणः ॥ ९ ॥ नीतिशास्त्रमनुस्मरन् सेनासंविधानं दर्शयति—अग्र इति ॥ १० ॥ मार्गमवेक्षितुं यात्विति सुग्रीवं प्रत्युक्तमात्रेण सन्निहितं नीलं प्रत्याह—फलेति ॥ ११ ॥ मार्गशोधनप्रकारमाह— दूषयेयुरिति । विषादिनेति शेषः । परिरक्षेथा इत्यात्मनेपदमार्षं । उद्यतः सावधान इत्यर्थः ॥ १२ ॥ शोधनान्तरमाह —निम्नेष्विति ॥ निम्नेषु गर्तप्रदेशेषु वनदुर्गेषु वनैःजलैः दुर्गेषु दुर्गमप्रदेशेषु । " जीवनं भुवनं वनं " इत्यमरः । वनेषु काननेषु च । निहितं रन्ध्रे प्रहारार्थं स्थापितं । बलं परसैन्यं । वनौकसः वानराः । अभिप्लुत्य अभित उत्प्लुत्य । पश्येयुः ॥ १३ ॥ शोधनान्तरमाह—यदिति ॥ यत्किंचिद्बलं फल्गु असारं । तत् अत्रैव किष्किन्धायामेव । उपयुज्यतां स्थाप्यतां । किंचिदित्यनेन तादृशं बलमत्र दुर्लभमिति सूचितं । अत्र युक्तिवक्ति—एतदिति । एतत् घोरं कृत्यं विक्रमेण प्रयुध्यतां । आर्षः शतृप्रत्ययः । विक्रमेण शक्त्या । ये युध्यन्ते तेषामेव नान्येषामित्यर्थः । विक्रमेणोपयुज्यतामिति पाठे विक्रमेणोपयुज्यमानानां । विक्रमयुक्तानामित्यर्थः । क्रियापदत्वे संप्रधारणायां लोड्वेदितव्यः ॥ १४ ॥ अथ " यतश्च बलमाशङ्की ततो विस्तारयेद्बलं " इत्युक्तरीत्या बहवो बलिनोग्रे सेनां कर्षन्तित्याह—सागरेति ॥ सागरौघनिभं सागरस्य प्रवाहो यदि भवेत्तत्तुल्यमित्यर्थः । शतशोथ सहस्रशः । शतशः सहस्रशश्च संघीभूयेत्यर्थः ॥ १५ ॥ " अथ सेनाबलाध्यक्षौ सर्वदिक्षु निवेशयेत् " इत्युक्तरीत्या निवेशयति—गज इति ॥ गवामग्रे दृप्ताः वृषभा इवेति संबन्धः ॥ १६ ॥ दक्षिणं पश्चिमपार्श्वमित्यर्थः । " यतश्च भयमाशङ्कि तां प्राचीं परिकल्पयेत् " इति कामन्दकोक्तेः । प्लवतां वानराणां ॥ १७ ॥ गन्धहस्ती मत्तगजः । तरस्वी बलवान् । सव्यं प्राचीभागं । अधिष्ठितः अधिष्ठाता । कर्तरि क्तः ॥ १८ ॥ मध्यगमनप्रयोजनमाह—अभिहर्षयन्निति । "प्रहर्षयेद्बलं व्यूह्य " इत्युक्तेः । ईश्वरः इन्द्रः । तथैवौचित्यात् । गवां पतिमिवेश्वर इति वा पाठः ॥ १९ ॥ अङ्गदेन संयातु अङ्गदमारुह्य संयात्वित्यर्थः । सार्वभौ-

म्यांकृष्णसप्तम्यांवा । मार्गशीर्षपूर्णिमोत्तरंतदन्यतरस्मिन्नुत्तराऽलाभात् । अभिप्रयामेतिप्रश्नेलोट् ॥ ६ ॥ **ति०** यच्चफल्गु निस्सारंबलं बालवृद्धादिलक्षणंयुद्धानर्हंतदत्रैवोपपद्यतांतिष्ठतु । हियस्मात्एतन्नःकृत्यं युद्धरूपं घोरं । अतोविक्रमेणविक्रमोपपन्नबलेन प्रयुज्यतां । यात्रेतिशेषः ॥ १४ ॥ **ती०** यस्यमदगन्धादितरेहस्तिनोद्रवन्ति सगन्धहस्ती ॥ १८ ॥

[पा०] १ ङ. ट. झ. ट. सुपूजितः. २ घ. उवाचवचनरामो. ३ ङ. झ. ट. पथिरक्षेथाः. ४ क. ख. ग. ङ. छ. झ. ञ. ट. प्रयुज्यतां. ५ झ. ट. पतिः.

जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः ॥ ऋक्षराजो महासत्त्वः कुक्षिं रक्षन्तु ते त्रयः ॥ २१ ॥
[पैशार्धमिव लोकस्य प्रचेतास्तेजसा वृतः ॥ जघनं कपिसेनायाः कपिराजोऽभिरक्षतु] ॥ २२ ॥
राघवस्य वचः श्रुत्वा सुग्रीवो वाहिनीपतिः ॥ व्यादिदेश महावीर्यान्वानरान्वानरर्षभः ॥ २३ ॥
ते वानरगणाः सर्वे समुत्पत्य युयुत्सवः ॥ गुहाभ्यः शिखरेभ्यश्च आशु पुप्लुविरे तदा ॥ २४ ॥
ततो वानरराजेन लक्ष्मणेन च पूजितः ॥ जगाम रामो धर्मात्मा ससैन्यो दक्षिणां दिशम् ॥ २५ ॥
शतैः शतसहस्रैश्च कोटीभिरयुतैरपि ॥ वारणाभैश्च हरिभिर्ययौ परिवृतस्तदा ॥
तं यान्तमनुयाति स्म महती हरिवाहिनी ॥ २६ ॥
दृप्ताः प्रमुदिताः सर्वे सुग्रीवेणाभिपालिताः ॥ आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवंगमाः ॥
क्ष्वेलन्तो निनदन्तस्ते जग्मुर्वै दक्षिणां दिशम् ॥ २७ ॥
भक्षयन्तः सुगन्धीनि मधूनि च फलानि च ॥ उद्वहन्तो महावृक्षान्मञ्जरीपुञ्जधारिणः ॥ २८ ॥
अन्योन्यं सहसा दृप्ता निर्वहन्ति क्षिपन्ति च ॥ पततश्चाक्षिपन्त्यन्ये पातयन्त्यपरे परान् ॥ २९ ॥
रावणो नो निहन्तव्यः सर्वे च रजनीचराः ॥ इति गर्जन्ति हरयो राघवस्य समीपतः ॥ ३० ॥
पुरस्तादृषभो वीरो नीलः कुमुद एव च ॥ पन्थानं शोधयन्ति स्म वानरैर्बहुभिः सह ॥ ३१ ॥
मध्ये तु राजा सुग्रीवो रामो लक्ष्मण एव च ॥ बहुभिर्बलिभिर्भीमैर्वृताः शत्रुनिबर्हणाः ॥ ३२ ॥
हरिः शतबलिर्वीरः कोटीभिर्दशभिर्वृतः ॥ सर्वामेको ह्यवष्टभ्य ररक्ष हरिवाहिनीम् ॥ ३३ ॥
कोटीशतपरीवारः केसरी पनसो गजः ॥ अर्कश्चातिबलः पार्श्वमेकं तस्याभिरक्षति ॥ ३४ ॥

मेन उत्तरदिग्गजेन । भूतेशः यक्षेशः । द्रविणाधिपतिः धनाधिपतिः । अत्र त्वं च शिविकामारुह्य आवाभ्यामागच्छेति सिद्धम् ॥ २० ॥ ऋक्षराजः जाम्बवद्भ्राता । कुक्षिं पश्चाद्भागं । जाम्बवान् सुषेणः वेगदर्शी चेति त्रयः महासत्त्वः ऋक्षराजश्च कुक्षिं रक्षन्त्वित्यन्वयः ॥ २१—२२ ॥ व्यादिदेश रामोक्तं सर्वं कुरुतेत्याज्ञापयामास ॥ २३ ॥ पुप्लुविरे प्लुतगतिं चक्रिरे ॥ २४ ॥ पूजितः पुरस्कृत इत्यर्थः । धर्मात्मा नीतिरूपधर्मज्ञ इत्यर्थः ॥ २५ ॥ ययौ राम इतिशेषः । हरिवाहिनी पूर्वोक्तबलवानरभिन्ना ॥ २६ ॥ गच्छन्नामवस्थाविशेषान् दर्शयति—दृप्ता इत्यादिना ॥ दृप्ताः गर्विताः । आप्लवन्तः मण्डलाकारं भ्रमन्त इत्यर्थः । गर्जन्तः मेघध्वनिं कुर्वन्तः । घनगर्जितमिति प्रसिद्धिः । क्ष्वेलन्तः सिंहनादं कुर्वन्तः । " क्ष्वेला तु सिंहनादः स्यात् " इत्यमरः । निनदन्तः अव्यक्तं शब्दायमानाः । " णद अव्यक्ते शब्दे " इति धातुः । भक्षयन्तः पिबन्तः । उद्वहन्तः विलासार्थं हस्ते धारयन्तः ॥ २७—२८ ॥ सहसा । तरसा । निर्वहन्ति उद्वहन्ति । क्षिपन्ति पातयन्ति । अन्ये पतन्तः सन्तः । परान् पातयितॄन् । आक्षिपन्ति । प्रतीकारकरणासामर्थ्येन परिभाषणं कुर्वन्तीत्यर्थः । अपरे शक्ताः । परान् पातयितॄन् । पातयन्ति ॥ २९ ॥ नः अस्माभिरित्यर्थः ॥ ३० ॥ अत्र पूर्वं रामेण मार्गरक्षणाय ये नीलादयो नियुक्ताः ततोन्ये कुमुदादयस्तु रामभक्त्युत्साहेन स्वयमेव प्रवृत्ता इति ज्ञेयं । ऋषभोदक्षिणपार्श्वरक्षणाय नियुक्तो भक्त्या पराक्रमातिशयेन च अत्रापि रक्षणं कृतवानिति ज्ञेयं ॥ ३१ ॥ मध्ये त्विति । जग्मुरिति शेषः ॥ ३२ ॥ अवष्टभ्य अधिष्ठाय ॥ ३३ ॥ गजस्याग्रभागनियुक्तस्यापि पार्श्वरक्षणं भक्त्यतिशयात् । अत्र कार्यकरणा-

ति० अयमृषभोदक्षिणपार्श्वविनियुक्तादन्योनीलसहकारी ॥ ३१ ॥ ति० सर्वावाहिनीमवष्टभ्यैकोररक्ष । समन्ततोभ्रमन्सरक्षतिस्मेत्यर्थः ॥ ३३ ॥ ति० केसरिणां नृसिंहोद्भवतस्यबलस्यदक्षिणंवामंचैकैकंपार्श्वमभिरक्षतइत्यर्थइतिकतकः । एषगजः

[पा०] १ ङ.—ट. महाबाहु . २ अयंश्लोकः क. ख. च. छ. पाठेषुदृश्यते. ३ ग. ङ. च. छ. झ. ञ. ट. महावीर्यो वानरान्. ४ ङ. च. छ. ञ. ट. महौजसः. ५ क.—ट. हृष्टाः. ६ क. ख. च. छ. ज. सुषेणपरिपालिताः. ७ ङ. च. झ. ञ. ट. निनदन्तश्च. क.—घ. ज. विनदन्तस्ते. ८ क.—ट. पतन्तश्चोत्पतन्त्यन्ये. ९ घ. ङ. ट. पातयन्तःपरे. १० ङ. ज. झ. ट. अर्कश्चबहुभिःपार्श्वे. ग. ऋक्षश्चातिबलः.

सुषेणो जाम्बवांश्चैव [1]ऋक्षैश्च बहुभिर्वृतौ ॥ सुग्रीवं पुरतः कृत्वा जघनं संररक्षतुः ॥ ३५ ॥
तेषां सेनापतिर्वीरो नीलो वानरपुङ्गवः ॥ [2]संपतन्पततां श्रेष्ठस्तद्बलं पर्यपालयत् ॥ ३६ ॥
[3]दरीमुखः प्रजङ्घश्च रम्भोऽथ [4]रभसः कपिः ॥ सर्वतश्च ययुर्वीरास्त्वरयन्तः प्लवङ्गमान् ॥ ३७ ॥
एवं ते हरिशार्दूला [5]गच्छन्तो बलदर्पिताः ॥ [6]अपश्यंस्ते गिरिश्रेष्ठं सह्यं द्रुमलतायुतम् ॥
सरांसि च सुफुल्लानि तटाकानि [7]वनानि च ॥ ३८ ॥
रामस्य शासनं ज्ञात्वा भीमकोपस्य भीतवत् ॥ वर्जयन्नगराभ्याशांस्तथा जनपदानपि ॥ ३९ ॥
सागरौघनिभं भीमं तद्वानरबलं महत् ॥ [9]उत्ससर्प महाघोषं भीमघोष इवार्णवः ॥ ४० ॥
तस्य दाशरथेः पार्श्वे शूरास्ते कपिकुञ्जराः ॥ तूर्णमापुप्लुवुः सर्वे सदश्वा इव चोदिताः ॥ ४१ ॥
कपिभ्यामूह्यमानौ तौ शुशुभाते नरोत्तमौ ॥ महद्भ्यामिव संस्पृष्टौ ग्रहाभ्यां चन्द्रभास्करौ ॥ ४२ ॥
ततो वानरराजेन लक्ष्मणेन च पूजितः ॥ जगाम रामो धर्मात्मा ससैन्यो दक्षिणां दिशम् ॥४३॥
तमङ्गदगतो रामं लक्ष्मणः शुभया गिरा ॥ [10]उवाच परिपूर्णार्थः [11]स्मृतिमान्प्रतिभानवान् ॥४४॥
हृतामवाप्य वैदेहीं क्षिप्रं हत्वा च रावणम् ॥ समृद्धार्थः समृद्धार्थामयोध्यां प्रति यास्यसि ॥ ४५ ॥
महान्ति च निमित्तानि दिवि भूमौ च राघव ॥ शुभानि तव पश्यामि सर्वाण्येवार्थसिद्धये ॥ ४६ ॥

त्केसर्यादयश्च पूर्वं नियुक्ता एवेत्याहुः । अत्र पूर्वनियुक्तानां गन्धमादनादीनामप्युपलक्षणं । एकं पार्श्वं सव्यं पार्श्वं । अभिरक्षतीत्यस्य प्रत्येकमभिसंबन्धः । व्यत्ययेनलट् ॥ ३४ ॥ ऋक्षैरावृतत्वं जाम्बवत एव । तत्संबन्धात् सुषेणस्यापि । जघनं पश्चाद्भागम् ॥३५॥ संपतन् । मार्गशोधनाय पुरो गच्छन्नपि पर्यपालयत् । सेनापतित्वात्सर्वतो ररक्षेत्यर्थः ॥ ३६—३७ ॥ अपश्यन् दूरादिति शेषः । सुफुल्लानि सुफुल्लपद्मकह्लाराणि ॥ ३८ ॥ भीतवत् भीतं । कर्तरि क्तप्रत्ययः । वर्जयत् दूरतः परिहरत् । उत्ससर्प जगामेति संबन्धः । सागरौघनिभमिति विपुलतायां साम्यं । भीमघोष इवार्णव इति घोषे ॥ ३९—४० ॥ दाशरथेः पार्श्व इति । तन्मुखोल्लासायेति भावः ॥ ४१ ॥ हनुमदङ्गदाभ्यामूह्यमानौ रामलक्ष्मणौ । महाग्रहाभ्यां शुक्रबृहस्पतिभ्यां । संस्पृष्टौ संयुक्तौ । चन्द्रसूर्याविव शुशुभाते । अत्र उपमाने चतुर्ग्रहसंयोगस्य बहुजनविनाशहेतुत्वात् हनुमदङ्गदाभ्यां रामलक्ष्मणयोगस्य महासेनाविनाशकत्वं गम्यत इत्यलंकारेण वस्तुध्वनिः । संस्पृष्टपदेन हनुमदङ्गदयोर्लाघवातिशयकथनात् पदगतवस्तुना वस्तुध्वनिः ॥ ४२ ॥ पुनः सुदूरगमनसूचनायाह—तत इति ॥ ४३ ॥ परिपूर्णार्थः परिपूर्णमनोरथः । स्मृतिमान् निमित्तशास्त्रार्थस्मरणवान् । प्रतिभानवान् तात्कालिकबुद्धिमान् ॥ ४४ ॥ वक्ष्यमाणनिमित्तश्रवणे श्रद्धामुत्पादयितुं प्रथमं तत्फलं दर्शयति—हृतामिति ॥ रावणं हत्वा वैदेहीमवाप्यसीतिक्रमः ॥ ४५ ॥ कुतोयं निश्चय इत्यत्राह—महान्तीति ॥ महान्ति दुर्लभानि । दिवि भूमौ च यानि शुभानि निमित्तानि सर्वाणि तवार्थसिद्धये पश्यामि । अर्थसिद्धिकराणि पश्यामीत्यर्थः ॥ ४६ ॥

पूर्वभागनियुक्तादन्यइतितीर्थः ॥ ३४ ॥ ति० महद्भ्यां ग्रहाभ्यां । संस्पृष्टौ अर्धभागेस्पृष्टौचन्द्रभास्करविव । महद्भ्यामर्धसंस्पृष्टाविति पाठान्तरं । स० ग्रहाभ्यां शुक्रबृहस्पतिभ्यां । " कविकाव्ययुतज्योत्स्नाकान्तवत्सव्यरोचत " इत्युक्तेः । लक्ष्मणपक्षेचन्द्रोनिदर्शनं । रामपक्षेभास्करः । ततश्चकविकाव्याभ्यांसकान्तिश्चन्द्रइव वाहनसाहित्येनसकान्तिर्लक्ष्मणः । सूर्यप्रकाशाभिभूतप्रकाशस्तयोरिवरामप्रकाशाभिभवोवाहनरुचोरितिनिदर्शनविवेकोद्रष्टव्यः ॥ ४२ ॥

[पा०] १ क. ख. घ. ऋक्षैर्बहुभिरावृतः. २ ङ. झ. ट. संयतश्चरतां. क. च छ. समन्तात्पततां. ३ घ. ङ. झ. ट. वलीमुखः. ४ घ. ङ. झ. ट. जंभोथ. ५ ख. शरभः. ६ क. ख. ग. ङ.—ट. गच्छन्ति. ७ घ. मददर्पिताः. ८ ङ. झ. ट. अपश्यन्त. ९ ङ. झ. ट. गिरिशतायुतं. क. ख. ग. च. छ. ञ. द्रुमशतायुतं. घ. द्रुमशतावृतं. १० क. ग. ङ. झ. ट. वराणिच. ख. घ. च. छ. ञ. महान्तिच. ज. सरांसिच. ११ क. ख. ग. च.—झ. ट. निस्ससर्प. १२ क. च. उवाच चमहाप्राज्ञः. १३ ग. वचनंप्रतिभानवान्.

अनुवाति शुभो वायुः सेनां मृदुहितः सुखः ॥ पूर्णवल्गुस्वराश्चेमे प्रवदन्ति मृगद्विजाः ॥ ४७ ॥
प्रसन्नाश्च दिशः सर्वा विमलश्च दिवाकरः ॥ उशनाश्च प्रसन्नार्चिरनु त्वां भार्गवो गतः ॥ ४८ ॥
ब्रह्मराशिर्विशुद्धश्च शुद्धाश्च परमर्षयः ॥ अर्चिष्मन्तः प्रकाशन्ते ध्रुवं सर्वे प्रदक्षिणम् ॥ ४९ ॥

सुखःसुखकरः । शीत इत्यर्थः । मृदुहितः मृदुः मार्दवयुक्तः । हितः अनुकूल इत्यर्थः । शुभः भाविशुभसूचकः वायुः सेनां अनुवाति अनुसृत्य वाति । पूर्णवल्गुस्वराः अन्यूनापरुषस्वराःसन्तः प्रवदन्ति ॥ ४७ ॥ भौमनिमित्तान्युक्त्वा दिव्यनिमित्तान्याह—त्वामनुगतः । तवानुकूलदिशि स्थित इत्यर्थः । यद्वा अनुगतः पश्चाद्भागं गतः । पुरः शुक्रस्य यात्रासु प्रतिषेधादिति भावः । तथोक्तं ज्यौतिषे—" प्रतिशुक्रं प्रतिबुधं प्रतिभौमं गतो नृपः । अपि शक्रेण सदृशो हतसैन्यो निवर्तते " इति ॥ उशनाश्च प्रसन्नार्चिरनु त्वां भार्गवो गत इत्यनेनावतारकाले जातकफलसूचनवद्रामस्यानुकूलं गोचारफलं दर्शयति विपरीतफलं राक्षसानां च । तथाहि किष्किन्धातः आग्नेयदिग्वर्तिनीं लङ्कां प्रति गच्छतो रामस्यानुकूलः शुक्र इत्युच्यते । सूर्यस्थराशेः पुरोराशिस्थो हि भवति शुक्रः । सूर्यश्च तदानीं मीनस्थः । उत्तराफल्गुनी ह्यद्येति प्रयाणदिनकथनात् । फाल्गुनपौर्णमास्यां हि रामस्य दण्डयात्रेति पूर्वमुक्तं । तदाच शुक्रो मेषस्थः । अतो रामस्य कर्कटराशेर्मेषो हि दशमोनुकूलः । पूर्वोक्तदिग्वर्तिनीं लङ्कां प्रति गच्छतो रामस्य पश्चात्स्थितत्वाच्च शुक्रोऽनुकूल एव । शुक्रानुकूल्योक्तिर्बृहस्पत्याद्यानुकूल्योपलक्षणं । सह्यवतारकाले कर्कटकस्थः । तदपेक्षयाष्टत्रिंशद्वर्षयुद्धयात्राकालः । तथाच त्रिरावृत्त्या षट्त्रिंशद्वर्षेषु गतेषु रामस्याष्टत्रिंशद्वर्षे युद्धारम्भे गुरोः सिंहस्थितिः सिद्धा । गुरुद्वितीयता रामस्यानुकूला । शनिश्चावतारकाले तुलावर्गोत्तमस्थः । द्वितीयावृत्तौ तुलावृश्चिकयोः पञ्चवर्षेण गतयोः सार्धवर्षद्वयेनातीतेन धनुरतीत्य तदानीं मकरस्थितियोग्योपि कथंचिद्धनुर्वर्गोत्तमस्थ एव शनिः । राहुस्तु अवतारकाले सिंहस्थः । ततोष्टत्रिंशद्वर्षेस्मिन्कटकस्थितियोग्योप्यतिचारादिभिर्मिथुनस्थः । तत्सप्तमे धनुषि केतुः । उक्तं चात्रापि—" मूलो मूलवता स्पृष्टो धूप्यते धूमकेतुना " इति । धूमाकारः केतुर्धूमकेतुः । तथाच धनुषि शनिकेतू रामस्य षष्ठस्थावनुकूलौ । अङ्गारकस्तु रामरावणयुद्धप्रसङ्गे, " आक्रम्याङ्गारकस्तस्थौ विशाखे अपि चाम्बरं " इत्युक्त्या विशाखाचतुर्थपादे वृश्चिकराशौ तिष्ठति । रामस्य पञ्चमाङ्गारकत्वफलमिदं । यदेतद्ब्रह्मास्त्रबन्धरुधिरमोहादि, बुधस्य प्रतिमासं रोहिणीस्थत्वयोगेपि रामरावणयुद्धप्रसङ्गे, " प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियाम् । समाक्रम्य बुधस्तस्थौ प्रजानामशुभावहः " इत्युक्तं प्रजानामशुभावहत्वमतिचारवशादेव । स च रामस्य दशमस्थोऽनुकूलः । चन्द्रश्च उत्तराफल्गुनीस्थत्वात्कन्यास्थः । अतस्तृतीयचन्द्रो रामस्यानुकूलः । सूर्यो नवमस्थो रामस्यानुकूलः । राहुस्तु मिथुनस्थत्वाद्द्वादशस्थ इति किंचिद्बाधकः । राक्षसानामिदं सर्वं विपरीतं । तथाहि—राक्षसानां हि नक्षत्रं मूलं । तथाच धनू राशिः । तदपेक्षया पञ्चमस्थः शुक्रः प्रतिकूलः । जन्मराशिस्थौ शनिकेतू च प्रतिकूलौ । राहुस्तु सप्तमस्थः किंचिदनुकूलः । द्वादशस्थाङ्गारकश्च प्रतिकूलः । गुरुस्तु नवमस्थोनुकूलः । चतुर्थस्थः सूर्यः पञ्चमस्थो बुधश्च नानुकूलौ । दशमस्थश्चन्द्रः किंचिदनुकूलः । एवं प्रायेण ग्रहगोचारफलं राक्षसानां विपरीतमेवेति ॥ ४८ ॥ ब्रह्मराशिः अधीतसर्ववेद इत्यर्थः । विशुद्धः पापग्रहासंयुक्तः । इदं द्वयमपि भार्गवविशेषणं । परमर्षयः सप्तर्षयः । दक्षिणां दिशं प्रति गताः । प्रदक्षिणं तिष्ठद्ध्रुवप्रभृतित्वात्साधुः । आवर्तमाना इति शेषः

ती० मृदुहितसुखपदैःक्रमेणमान्द्यशैत्यसौरभ्याण्युच्यन्ते ॥ ४७ ॥ ती० ब्रह्मराशिरित्यस्यपादस्यपूर्वशेषंविहायान्योर्थउच्यते । ब्रह्मराशिरित्यत्रब्रह्मराशिशब्देन " तत्रासतेमहात्मानऋषयोयेऽग्निहोत्रिणः । भूतारंभकृतंब्रह्मशंसन्तोऽत्रित्विगुद्यताः । प्रारभन्ते लोककामास्तेषांपन्थाःसदक्षिणः " इतिश्रीविष्णुपुराणोक्तेःपितृयाणमार्गस्थालोकाभिवृद्धिकामामहर्षयउच्यन्ते । तेषांराशिः संघः । विशुद्धः प्रसन्नः । परमर्षयः सप्तर्षयः । ध्रुवं औत्तानपादिं प्रदक्षिणंयथातथा आवर्तमानाइतिशेषः । प्रकाशन्तइतिसंबन्धः । सप्तर्षिसंनिवेशप्रकारस्तु—" पूर्वभागेतुभगवान्मरीचिरुपरिस्थितः । वसिष्ठश्चसभार्योस्मात्पुरस्तादङ्गिरामुनिः । ततोत्रि-

[पा०] १ क. च. ञ. खराश्वामी.

त्रिशङ्कुर्विमलो भाति राजर्षिः सपुरोहितः ॥ पितामहवरोस्माकमिक्ष्वाकूणां महात्मनाम् ॥ ५० ॥
विमले च प्रकाशेते विशाखे निरुपद्रवे ॥ नक्षत्रवरमस्माकमिक्ष्वाकूणां महात्मनाम् ॥ ५१ ॥
नैर्ऋतं नैर्ऋतानां च नक्षत्रमभिपीड्यते ॥ मूलो मूलवता स्पृष्टो धूप्यते धूमकेतुना ॥ ५२ ॥
सर्वं चैतद्विनाशाय राक्षसानामुपस्थितम् ॥ काले कालगृहीतानां नक्षत्रं ग्रहपीडितम् ॥ ५३ ॥
प्रसन्नाः सुरसाश्चापो वनानि फलवन्ति च ॥ ग्रैवान्त्यभ्यधिकं गन्धान्यथर्तुकुसुमा द्रुमाः ॥ ५४ ॥
व्यूढानि कपिसैन्यानि प्रकाशन्तेऽधिकं प्रभो ॥ देवानामिव सैन्यानि सङ्ग्रामे तारकामये ॥ ५५ ॥
एवमार्य समीक्ष्यैतान्प्रीतो भवितुमर्हसि ॥ इति भ्रातरमाश्वास्य हृष्टः सौमित्रिरब्रवीत् ॥ ५६ ॥
अथावृत्य महीं कृत्स्नां जगाम महती चमूः ॥ ऋक्षवानरशार्दूलैर्नखदंष्ट्रायुधैर्वृता ॥ ५७ ॥
कराग्रैश्चरणाग्रैश्च वानरैरुत्थितं रजः ॥ भीममन्तर्दधे लोकं निवार्य सवितुः प्रभाम् ॥ ५८ ॥
सपर्वतवनाकाशां दक्षिणां हरिवाहिनी ॥ छादयन्ती ययौ भीमा द्यामिवाम्बुदसंततिः ॥ ५९ ॥

॥ ४९ ॥ पुरोहितः विश्वामित्रः । " सृजन्दक्षिणमार्गस्थान्सप्तर्षीनपरान्पुनः " इति बालकाण्डोक्तरीत्या विश्वामित्रसृष्टसप्तर्ष्यन्तर्गतवसिष्ठो वा । पितामहवरः पितामहेषु कूटस्थेषु श्रेष्ठः । इक्ष्वाकूणां प्रधानकूटस्थ इत्यर्थः ॥ ५० ॥ निरुपद्रवे क्रूरग्रहानाक्रान्ते । विशाखे इति द्विवचनं नक्षत्रद्वयात्मकत्वात् । विशाख्यं नक्षत्रवरमित्यर्थः । विशाखाया इक्ष्वाकुनक्षत्रत्वंज्यौतिषदर्पणे दर्शितं—" अश्विन्यां यदि केतुः " इत्यारभ्य "इक्ष्वाकुकुलनाथस्तु ह्यन्यतो यदि भवेद्विशाखास्थस्तु " इति ॥ ५१ ॥ स्वानुकूल्यमुक्त्वा परप्रातिकूल्यमाह—नैर्ऋतमिति ॥ नैर्ऋतं नैर्ऋतदैवतं । नैर्ऋतानां राक्षसानाम् । किं तन्नैर्ऋतं तस्य पीडा केनेत्याकाङ्क्षायामाह—मूल इति । मूलवता अन्तिकवता । " मूलं वशीकृतौ स्वीये शीर्षे तारान्तिकादिषु " इति वैजयन्ती । तेन धूमकेतुना स्पृष्टो मूलः मूलनक्षत्रं । धूप्यते संताप्यते । " धूप संतापे " इति धातुः ॥ ५२ ॥ ततः किमित्यत्राह—सर्वमिति ॥ एतन्नक्षत्रपीडनमेव राक्षसानां विनाशाय सर्वं अशुभसूचकनिमित्तजातं । समुपस्थितमित्यर्थः । तदेवोपपादयति—काल इति । कालगृहीतानां मृत्युगृहीतानां नक्षत्रं । काले अन्तकाले । ग्रहपीडितं भवति ॥५३॥ पुनरपि विजयसूचकान्याह—प्रसन्ना इत्यादिना ॥ द्रुमाः यथर्तुकुसुमाः ऋतुमनतिक्रम्य जातानि कुसुमानि येषां ते तथोक्ताः । अकालकुसुमोत्पत्तिर्ह्युत्पातः । स इदानीं नास्तीत्यर्थः । तथोक्तं वराहमिहिरेण—" शीतोष्णानां विपर्यासः फलपुष्पमकालजम् । अशोष्याणां विशोषश्च फलं षाण्मासिकं भवेत् " इति ॥ ५४ ॥ व्यूढानि कृतव्यूहानि । तारकस्य तारकासुरस्य आमयो वधो यस्मिन् सः तारकामयः तस्मिन् । यद्वा तारकायाः बृहस्पतिपत्न्याः आमयो मनोव्याधिः यस्मिन् । तादृशसंग्रामसंज्ञेयं । तथोक्तं श्रीविष्णुपुराणे—एवंच तयोरतीवोग्रः संग्रामस्तारकानिमित्तस्तारकामयो नामाभवदिति ॥ ५५ ॥ आश्वास्याब्रवीत् आश्वासनपूर्वकमब्रवीत् । अनेन प्रथमसर्गान्तोक्तः श्लोकोनुवृत्त इति ज्ञायते ॥ ५६ ॥ पुनरपि सेनायाः दूरगमनमाह—अथेति ॥ ऋक्षवानरशार्दूलैः ऋक्षशार्दूलैः वानरशार्दूलैश्च । शार्दूलशब्दः श्रेष्ठवाची ॥ ५७ ॥ अन्तर्दधे आच्छादयामास ॥ ५८ ॥ हरिवाहिनी दक्षिणां महीं अम्बुदसंततिर्द्यामिव छादयन्ती ययाविति संबन्धः ॥ ५९ ॥

स्तस्य वासन्नःपुलस्त्यःपुलहःक्रतुः " इति ॥ ४९ ॥ ति० सपुरोहितः भगवद्विश्वामित्रसृष्टस्वर्गसमीपवर्तिसप्तर्षिमण्डलमध्यवर्तिवसिष्ठसहितइत्यर्थः ॥ ईदृशस्त्रिशङ्करस्माकंपितामहोस्माकंपुरोभाति । तस्यदक्षिणदिक्स्थत्वात् । पितामहःपुरोस्माकमितिपाङ्क्तः पाठः इतिकतकः ॥ ५० ॥ स० मूलवता सीताहरणजन्यपापरूपकारणवता ॥ ५२ ॥ ति० गन्धाः अजन्तः । गन्धवन्तो वायवोऽधिकानप्रवान्ति मन्दंवान्तीत्यर्थः ॥ ५४ ॥

[पा०] १ च. छ. नक्षत्रमपि. क. ङ. झ. ञ. ट. नक्षत्रमति. २ ङ. झ. ट. प्रवान्तिनाधिकागन्धाः. ३ ङ. च. छ. झ. ट. हरिवाहिनी. ४ क. ख. च. छ. ञ. वानरगोपुच्छैः. ५ ङ. च. छ. झ. ट. दंष्ट्रायुधैरपि. ६ क. ख. महासेना. ग. ययौभूमिं. च. छ. ञ. महींभीमां.

[1]उत्तरन्त्यां च सेनायां संततं बहुयोजनम् ॥ नदीस्रोतांसि सर्वाणि सस्यन्दुर्विपरीतवत् ॥ ६० ॥
सरांसि विमलाम्भांसि द्रुमाकीर्णांश्च पर्वतान् ॥ समान्भूमिप्रदेशांश्च वनानि फलवन्ति च ॥
मध्येन च समन्ताच्च तिर्यक्चाधश्च साऽविशत् ॥ ६१ ॥
समावृत्य महीं कृत्स्नां जगाम महती चमूः ॥ ६२ ॥
ते [3]हृष्टमनसः सर्वे जग्मुर्मारुतरंहसः ॥ हरयो राघवस्यार्थे समारोपितविक्रमाः ॥ ६३ ॥
[4]हर्षवीर्यबलोद्रेकान्दर्शयन्तः परस्परम् ॥ यौवनोत्सेकजान्दर्पान्विविधांश्चक्रुरध्वनि ॥ ६४ ॥
तत्र केचिद्द्रुतं जग्मुरुत्पेतुश्च तथाऽपरे ॥ केचित्किलकिलां चक्रुर्वानरा [5]वनगोचराः ॥ ६५ ॥
प्रास्फोटयंश्च पुच्छानि सन्निजघ्नुः पदान्यपि ॥ [6]भुजान्विक्षिप्य [7]शैलांश्च द्रुमानन्ये बभञ्जिरे ॥ ६६ ॥
आरोहन्तश्च शृङ्गाणि गिरीणां गिरिगोचराः ॥ महानादान्विमुञ्चन्ति [8]क्ष्वेलामन्ये प्रचक्रिरे ॥ ६७ ॥
ऊरुवेगैश्च ममृदुर्लताजालान्यनेकशः ॥ जृम्भमाणाश्च विक्रान्ता विचिक्रीडुः शिलाद्रुमैः ॥ ६८ ॥
[9]शतैः शतसहस्रैश्च कोटीभिश्च सहस्रशः ॥ वानराणां तु घोराणां [10]श्रीमत्परिवृता मही ॥ ६९ ॥
सा स्म याति दिवारात्रं [11]महती हरिवाहिनी ॥ [12]हृष्टा प्रमुदिता सेना सुग्रीवेणाभि[13]रक्षिता ॥ ७० ॥
वानरास्त्वरितं यान्ति सर्वे युद्धाभिनन्दिनः ॥ [14]प्रमोक्षयिषवः सीतां मुहूर्तं [15]कापि नासत ॥ ७१ ॥

संततं निरन्तरं यथा भवति तथा उत्तरन्त्यां । विपरीतवत् वैपरीत्यवत् । भावप्रधानो निर्देशः । बहुयोजनं च यथा भवति तथा सस्यन्दुः ॥ ६० ॥ सरांसीत्यादिसार्धश्लोक एकान्वयः ॥ यथायोग्यं च संबन्धः । सरांसि शीतलसलिलतया मध्येनाविशत् । पर्वतान् द्रुमाकीर्णतया तिर्यगाविशत् । समान् भूमिप्रदेशान् समन्तादाविशत् । वनानि फलवत्तया अध आविशत् ॥ ६१ ॥ समावृत्येत्यर्धं ॥ ६२ ॥ मारुतरंहसः वायुवेगाः । समारोपितविक्रमाः अभिवृद्धविक्रमा इत्यर्थः । उद्रेकशब्दोतिशयवाची । दर्पान् दर्पजव्यापारान् ॥ ६३—६४ ॥ तान्विवृणोति—तत्रेत्यादिना ॥ किलकिलेति वानरशब्दानुकरणं ॥ ६५ ॥ प्रास्फोटयन् भूमावन स्फालयन् । सन्निजघ्नुः । भूमाविति शेषः । भुजान् विक्षिप्य प्रसार्य । द्रुमान् शैलांश्च बभञ्जिरे ॥ ६६ ॥ गिरिगोचराः गिरिचराः । क्ष्वेलां सिंहनादं ॥ ६७ ॥ ममृदुः मर्दनं चक्रुः ॥ ६८ ॥ श्रीमद्यथा भवति तथा परिवृता आसीदिति संबन्धः ॥ ६९ ॥ सेना इनेन स्वामिना सहिता ॥ ७० ॥ प्रमोक्षयिषवः मोचयितुमिच्छवः । सनि द्विर्वचनाभाव आर्षः । " मोक्ष निरसने " इत्यस्माद्धातोः सन्

ति० सर्वाणिनदीस्रोतांसि विपरीतवत् वैपरीत्येन । सस्यन्दुः । यथाऽग्रेषुधावत्सुचन्द्रोधावतीव तद्वत्सेनागतिर्नदीप्रवाहेषुभ्रान्त्याभातिस्मेत्यर्थइतिकतकः । वस्तुतोनदीषुवानराणांप्रवाह्याभिमुखंतरणेतैराहतानिजलानिविपरीतवहनानीत्यर्थः ॥ ६० ॥ ति० साविशत् अयंद्वितीयोवासइतिप्रतीयते ॥ ६१ ॥ स० समारोपितविक्रमाः स्वदपेक्षयाममबलमधिकमितिपरस्परमारोपितपराक्रमाः । उत्साहविशेषवन्तइतियावत् ॥ ६३ ॥ ति० श्रीमत् लुप्ततृतीयान्तं । श्रीमद्भिरित्यर्थः ॥ अयंतृतीयोवासः । स० श्रीमत्परिवृता श्रीमद्भिः सुघोराणांवानराणांमध्ये श्रीमद्भिःपरिवृता । श्रीमत्परिवृता श्रियंराक्षससंपदंमभ्रन्तीतिश्रीमथः । तैः परिवृतेति सुघोराणांवानराणांमहीजातेतिवा ॥ ६९ ॥ ति० दिवारात्रं मध्यरात्रएवयाममात्रंवासइत्याशयः ॥ स० दिवारात्रं अहोरात्रं । याममात्रवासइत्याशयः । उत्तरत्रदिवेतिशेषइतिचनागोजिभट्टः । अखण्डाहोरात्रमित्यर्थःस्वरसः । " मुहूर्तंकापिनावसन् " इत्युत्तरग्रन्थस्वारस्यात् । शेषंविनान्वयसंभवाच्च ॥ ७० ॥ ति० प्रमोक्षयिषवः मोक्षशब्दात्तत्करोतीतिणौसनि आर्षेअभ्यासलोपेऽप्रत्ययेचरूपं । प्रमोचयितुमिच्छावन्तइत्यर्थः ॥ नावसन् दिवेतिशेषः ॥ ७१ ॥

[पा०] १ ग. ङ. झ. उत्तरन्त्याश्चसेनायाः. २ ङ. च. झ. ञ. ट. हृष्टवदनाः. ३ झ. हर्षवीर्यबलोद्रेकान्. ४ क. ख. ग. वारणोपमाः. ५ क. ख. भुजैरुत्क्षिप्य. ६ ख. शैलेन्द्रान्. ७ ङ. झ. ट. नादान्प्रमुञ्चन्ति. ख. नादान्विमुञ्चन्तः. च. ञ. नादान्प्रमुञ्चन्तः. ८ ङ. झ. ट. ततःशत. ९ क. ख. ग. ङ. च. झ. ञ. ट. सुघोराणां. १० क. ख. ज. ञ. यूथैःपरिवृता. ११ ख. ग. ङ. झ. ट. प्रहृष्टमुदिताःसर्वेसुग्रीवेणाभिपालिताः. १२ क. घ. च. छ. पालिता. १३ क.—ट. स्त्वरिताः. १४ क. ख. ग. च. छ. ज. ञ. मुमोक्षयिषवः. १५ ङ. झ. ट. नावसन्. ख. नासते.

ततः पादपसंबाधं [1]नानामृगसमायुतम् ॥ [2]सह्यपर्वतमासेदुर्मलयं च महीधरम् ॥ ७२ ॥
काननानि विचित्राणि नदीप्रस्रवणानि च ॥ [3]पश्यन्नतियया रामः सह्यस्य मलयस्य च ॥ ७३ ॥
[4]बकुलांस्तिलकांश्चूतानशोकान्सिन्धुवारकान् ॥ करवीरांश्च तिमिशान्भञ्जन्ति स्म प्लवङ्गमाः ॥ ७४ ॥
[5]अङ्कोलांश्च करञ्जांश्च प्लक्षन्[6]यग्रोधतिन्दुकान् ॥ [7]जम्बूकामलकान्नीपान्भञ्जन्ति स्म प्लवङ्गमाः ॥ ७५ ॥
प्रस्तरेषु च रम्येषु विविधाः काननद्रुमाः ॥ [8]वायुवेगप्रचलिताः पुष्पैरवकिरन्ति तान् ॥ ७६ ॥
मारुतः सुखसंस्पर्शो वाति चन्दनशीतलः ॥ षट्पदैरनुकूजद्भिर्वनेषु मधुगन्धिषु ॥ ७७ ॥
अधिकं शैलराजस्तु [9]धातुभिः सुविभूषितः ॥ ७८ ॥
धातुभ्यः प्रसृतो रेणुर्वायुवेगै[10]र्विघट्टितः ॥ सुमहद्वानरानीकं छादयामास सर्वतः ॥ ७९ ॥
गिरिप्रस्थेषु रम्येषु सर्वतः संप्रपुष्पिताः ॥ केतक्यः सिन्धुवाराश्च वासन्त्यश्च मनोरमाः ॥ ८० ॥
माधव्यो गन्धपूर्णाश्च [12]कुन्दगुल्माश्च पुष्पिताः ॥ चिरिबिल्वा मधूकाश्च बकुलाः प्रियकास्तथा ॥ ८१ ॥
[13]स्फूर्जकास्तिलकाश्चैव नागवृक्षाश्च पुष्पिताः ॥ चूताः [14]पाटलयश्चैव कोविदाराश्च पुष्पिताः ॥ ८२ ॥
मुचुलिन्दार्जुनाश्चैव शिंशुपाः कुटजास्तथा ॥ धवाः शाल्मलयश्चैव रक्ताः कुरवकास्तथा ॥ ८३ ॥
हिन्तालास्तिमिशाश्चैव चूर्णका नीपकास्तथा ॥ नीलाशोकाश्च [15]वरणा अङ्कोलाः पद्मकास्तथा ॥
[16]प्लवमानैः प्लवङ्गैस्तु सर्वे पर्याकुलीकृताः ॥ ८४ ॥

॥ ७१ ॥ ततः दिवारात्रान्ते ॥ ७२ ॥ सह्यस्य मलयस्य च काननानीत्यन्वयः । सह्यमलयौ नाम मार्गवर्तिनौ कौचित्पर्वतौ ॥७३॥ बकुलान् केशरवृक्षान् । तिलकान् क्षुरकवृक्षान् । चूताः प्रसिद्धाः अशोकाश्च । सिन्धुवारकान् निर्गुण्डीवृक्षान् । करवीराः प्रसिद्धाः । तिमिशान् नेमिवृक्षान् ॥ ७४ ॥ अङ्कोलान् निकोचकवृक्षान् । करञ्जान् नक्तमालवृक्षान् । प्लक्षान् जटीवृक्षान् । न्यग्रोधान् वटान् । तिन्दुकान् स्फूर्जकवृक्षान् । जम्बूकामलकाः प्रसिद्धाः । नीपाः कदम्बाः ॥ ७५ ॥ प्रस्तरेषु शिलासु । स्थिता इति शेषः । वायुवेगः वानरसेनावेगजवायुवेगः ॥ ७६—७७ ॥ वानराणां धातुरेणुरूषितत्वं वक्तुं पर्वतस्य धातुमत्तामाह— अधिकमिति ॥ अर्धमेकं वाक्यं । शैलराजः सह्यः ॥ ७८ ॥ विघट्टितः उत्थापितः ॥ ७९ ॥ गिरिप्रस्थेत्यादिसार्धपञ्चश्लोक्येकान्वया ॥ पुष्पिता इत्येतत्सर्वविशेषणं । अतस्तस्य बहुशः प्रयोगः । वसन्ते पुष्प्यन्तीति वासन्त्यः । इदं माधवीविशेषणं । " कालात्साधुपुष्प्यत्पच्यमानेषु " इत्यण् । गन्धैः पूर्णाः गन्धपूर्णाः । कुन्दाः । चिरिबिल्वाः नक्तमालाः । मधूकाः गुडपुष्पाः । वञ्जुलाः वानीराः । प्रियकाः बन्धूकाः ॥ ८०—८१ ॥ स्फूर्जकाः तिन्दुकवृक्षाः । नागवृक्षाः नागकेसराः । पाटलयः पाटलाः । कोविदाराः चमरकाः ॥ ८२ ॥ मुचुलिन्दाः खर्जूरविशेषाः । अर्जुनाः ककुभाः । शिंशुपाः पिच्छिलाः । कुटजाः जयवृक्षाः । धवाः धुन्धुरवृक्षाः । शाल्मलयः मोचाः । " पिच्छिला पूरणी मोचा चिरायुः शाल्मलिर्द्वयोः " इत्यमरः ॥ ८३ ॥ हिन्तालाः तालविशेषाः । चूर्णकाः आमलकविशेषाः । नीपकाः कदम्बाः । वरणाः वारुणाः । पद्मकाः सुगन्धिपुष्पा वृक्षविशेषाः । एवंभूतावृक्षाः प्लवमानैः प्लवंगैः पर्याकुलीकृता इत्यन्वयः ॥ ८४ ॥

ति० प्रीयमाणैः उक्तपुष्पदर्शनेनेतिशेषः ॥ ८४ ॥

[पा०] १ ख. ग. ज. झ. ट. नानावनसमायुतं. ङ. नानावनसमन्वितं. २ ख. ग. ङ. झ. ट. सह्यपर्वतमासाद्यवानरास्तं समारुहान्. ३ ङ. च. झ. ट. पश्यन्नपि. क. छ. ञ. पश्यन्नमि. ४ क. ख. ग. ङ. ज. झ. ट. चंपकांस्तिल. ५ ङ. झ. ट. अशोकांश्च. ६ झ. ट. न्यग्रोधपादपान्. ७ क.—छ. ञ. जंबुकामलकान्नागान्. ट. जंबुकामलपुन्नागान्. ८ क. ख. च. ऊरुवेगैः. ९ घ. च. ज. गां. १० ग. झ. धातुभिस्तु. ११ झ. ट. वेगेनघट्टितः. १२ क. ख. च. छ. ञ. स्फूर्जाःकुन्दाश्च. १३ ख. ङ. झ. ञ. ट. रंजकास्तिलकाः. १४ झ. ञ. ट. पाटलिकाश्चैव. १५ ख. ङ. झ. ट. सरलाअङ्कोलाः. १६ ङ. झ. ट. प्रीयमाणैः.

वाप्यस्तस्मिन्गिरौ शीताः पल्वलानि तथैव च ॥ चक्रवाकानुचरिताः कारण्डवनिषेविताः ॥
प्लवैः क्रौञ्चैश्च संकीर्णा वराहमृगसेविताः ॥ ८५ ॥
ऋक्षैस्तरक्षुभिः सिंहैः शार्दूलैश्च भयावहैः ॥ व्यालैश्च बहुभिर्भीमैः सेव्यमानाः समन्ततः ॥ ८६ ॥
पद्मैः सौगन्धिकैः फुल्लैः कुमुदैश्चोत्पलैस्तथा ॥ वारिजैर्विविधैः पुष्पै रम्यास्तत्र जलाशयाः ॥८७ ॥
तस्य सानुषु कूजन्ति नानाद्विजगणास्तथा ॥ ८८ ॥
स्नात्वा पीत्वोदकान्यत्र जले क्रीडन्ति वानराः ॥ अन्योन्यं प्लावयन्ति स्म शैलमारुह्य वानराः ॥८९॥
फलान्यमृतगन्धीनि मूलानि कुसुमानि च ॥ बुभुजुर्वानरास्तत्र पादपानां मदोत्कटाः ॥ ९० ॥
द्रोणमात्रप्रमाणानि लम्बमानानि वानराः ॥ ययुः पिबन्तो हृष्टास्ते मधूनि मधुपिङ्गलाः ॥ ९१ ॥
पादपानवभञ्जन्तो विकर्षन्तस्तथा लताः ॥ विधमन्तो गिरिवरान्प्रययुः प्लवगर्षभाः ॥ ९२ ॥
वृक्षेभ्योऽन्ये तु कपयो नर्दन्तो मधुदर्पिताः ॥ अन्ये वृक्षान्प्रपद्यन्ते प्रपतन्त्यपि चापरे ॥ ९३ ॥
बभूव वसुधा तैस्तु संपूर्णा हरियूथपैः ॥ यथा कमलकेदारैः पक्वैरिव वसुन्धरा ॥ ९४ ॥
महेन्द्रमथ संप्राप्य रामो राजीवलोचनः ॥ अध्यारोहन्महाबाहुः शिखरं द्रुमभूषितम् ॥ ९५ ॥
ततः शिखरमारुह्य रामो दशरथात्मजः ॥ कूर्ममीनसमाकीर्णमपश्यत्सलिलाकरम् ॥ ९६ ॥
ते सह्यं समतिक्रम्य मलयं च महागिरिम् ॥ आसेदुरानुपूर्व्येण समुद्रं भीमनिस्स्वनम् ॥ ९७ ॥
अवरुह्य जगामाशु वेलावनमनुत्तमम् ॥ रामो रमयतां श्रेष्ठः सुग्रीवः सलक्ष्मणः ॥ ९८ ॥
अथ धौतोपलतलां तोयौघैः सहसोत्थितैः ॥ वेलामासाद्य विपुलां रामो वचनमब्रवीत् ॥ ९९ ॥

वाप्य इत्यादि जलाशया इत्यन्तमेकं वाक्यं ॥ जलाशयाः जलपूर्णा इति वापीविशेषणं । अत्रापि पर्याकुलीकृता इत्यनुषज्यते । कारण्डवाः जलकुक्कुटाः । प्लवैः जलकाकैः । क्रौञ्चैः प्रसिद्धैः । तीरवनमृगानाह —वराहेत्यादिना । तरक्षुभिः मृगादनैः । व्यालैः दुष्टगजैः । सौगन्धिकैः कह्लारैः । वारिजैरिति । एवमिति शेषः ॥ ८५—८७ ॥ तस्य सानुष्वित्यर्धमेकं वाक्यं ॥ कूजन्ति चुक्कूजुः । तत्सैन्यदर्शनादिति भावः ॥ ८८ ॥ अत्र जले वापीजले । प्लावयन्ति सिञ्चन्ति ॥ ८९ ॥ शैलमारुह्येत्युत्तरशेषः । अमृतगन्धीनि अमृतस्वादूनि । मदोत्कटाः मदमत्ताः ॥९०॥ द्रोणमात्रप्रमाणानि द्रोणं शिवद्वयं तत्प्रमाणमधुपूर्णानि । मधूनि मधुपटलानि । मधुपिङ्गलाः मधुवत्पिङ्गलवर्णाः ॥ ९१ ॥ विधमन्तः दहन्तः । " ध्मा शब्दाग्निसंयोगयोः " इति धातुः ॥ ९२ ॥ अन्ये वृक्षेभ्यः वृक्षेभ्योन्यत्र । अत्रापि ययुरित्यनुषज्यते ॥ ९३ ॥ इवशब्दो वाक्यालंकारे । अन्ये तु । तत्र तदानीं पक्वैः कलमकेदारैः पक्वशालिक्षेत्रैः । संपूर्णा वसुन्धरेव यथा भवेत् तथा तैर्हरिपुङ्गवैः संपूर्णा वसुधा बभूवेति योजयन्ति । अपरेतु कलमकेदारैर्यथा कलमकेदारसदृशैः हरिपुङ्गवैः संपूर्णा वसुधा वसुन्धरेव कलमकेदारभूरिव बभूवेत्याहुः । उपमानद्वित्वं व्यञ्जयितुमुपमावाचकद्वयं प्रयुञ्जते कवयः । यथा " उद्धृत्य मेघैस्तत एव तोयमर्थं मुनीन्द्रैरिव संप्रणीताः । आलोकयामास हरिः पतन्तीर्नदीः स्मृतीर्वेदमिवाम्बुराशिं " इति ॥ ९४ ॥ अथ सह्यमलयातिक्रमणानन्तरं । राजीवलोचन इति समुद्रदर्शनाय महेन्द्रशिखरारोहणकुतूहलित्वमुक्तं ॥ ९५—९७ ॥ वेलावनस्योन्नतत्वादवरुह्येत्युक्तं । रमयतां श्रेष्ठ इत्यनेन समुद्रसंभ्रमप्रदर्शनेन लक्ष्मणादिरञ्जकत्वं व्यञ्जितं

ति० तत्रानुक्तमपिवासत्रयमन्यद्वोध्यं । आग्निवेश्योक्तेः । तेसर्वेवानराः आनुपूर्व्येण सेनासंनिवेशक्रमेण ॥ ९७ ॥

[पा०] १ झ. ट. रम्याः. २ क. ख. पीतोदकास्तत्र. ३ क. ख. घ. ङ. च. ज.—ट. बभञ्जुर्वानराः. ४ झ. ट. पिबन्तःखस्थास्ते. ५ ग. ज. झ. ट. नदन्तो. ६ ख. ट. प्रपिबन्त्यपि. ७ च. झ. ट. आरुरोहमहाबाहुः. ८ क. ख. ग. च. ज. ञ. सलिलाशयं. झ. ट. सलिलाकुलं.

एते वयमनुप्राप्ताः सुग्रीव वरुणालयम् ॥ इहेदानीं विचिन्ता सा या नः पूर्वं समुत्थिता ॥ १०० ॥
अतः परमतीरोऽयं सागरः सरितां पतिः ॥ न चायमनुपायेन शक्यस्तरितुमर्णवः ॥ १०१ ॥
तदिहैव निवेशोस्तु मन्त्रः प्रस्तूयतामिति ॥ यथेदं वानरबलं परं पारमवाप्नुयात् ॥ १०२ ॥
इतीव स महाबाहुः सीताहरणकर्शितः ॥ रामः सागरमासाद्य वासमाज्ञापयत्तदा ॥ १०३ ॥
सर्वाः सेना निवेश्यन्तां वेलायां हरिपुङ्गव ॥ संप्राप्तो मन्त्रकालो नः सागरस्यास्य लङ्घने ॥ १०४ ॥
स्वांस्वां सेनां समुत्सृज्य मा च कश्चित्कुतो व्रजेत् ॥ गच्छन्तु वानराः शूरा ज्ञेयं छन्नं बलं च नः ॥१०५॥
रामस्य वचनं श्रुत्वा सुग्रीवः सहलक्ष्मणः ॥ सेनां न्यवेशयत्तीरे सागरस्य द्रुमायुते ॥ १०६ ॥
विरराज समीपस्थं सागरस्य च तद्बलम् ॥ मधुपाण्डुजलः श्रीमान्द्वितीय इव सागरः ॥ १०७ ॥
वेलावनमुपागम्य ततस्ते हरिपुङ्गवाः ॥ विनिविष्टाः परं पारं काङ्क्षमाणा महोदधेः ॥ १०८ ॥
तेषां निविशमानानां सैन्यसन्नाहनिस्स्वनः ॥ अन्तर्धाय महानादमर्णवस्य प्रशुश्रुवे ॥ १०९ ॥
सा वानराणां ध्वजिनी सुग्रीवेणाभिपालिता ॥ त्रिधा निविष्टा महती रामस्यार्थपराऽभवत् ॥११०॥
सा महार्णवमासाद्य हृष्टा वानरवाहिनी ॥ वायुवेगसमाधूतं पश्यमाना महार्णवम् ॥ १११ ॥
दूरपारमसंबाधं रक्षोगणनिषेवितम् ॥ पश्यन्तो वरुणावासं निषेदुर्हरियूथपाः ॥ ११२ ॥
चण्डनक्रग्रहं घोरं क्षपादौ दिवसक्षये ॥ हसन्तमिव फेनौघैर्नृत्यन्तमिव चोर्मिभिः ॥ ११३ ॥
चन्द्रोदयसमुद्भूतं प्रतिचन्द्रसमाकुलम् ॥ चण्डानिलमहाग्राहैः कीर्णं तिमितिमिङ्गिलैः ॥ ११४ ॥

॥ ९८—९९ ॥ चिन्ता समुद्रतरणोपायचिन्ता ॥ १०० ॥ अतीरः अविद्यमानतीरः । जलप्राय इतियावत् । अनुपायेन उपायं विनेत्यर्थः । प्रसज्यप्रतिषेधे नञ्समासः ॥ १०१ ॥ मन्त्रः कार्यविचारः । प्रस्तूयतां आरभ्यतां । इति वक्ष्यमाणप्रकारेण ॥ १०२ ॥ इतिवेत्यनेन सेनानिवेशनियोगे सागरतरणोपायविचारः अहृदयो हेतुः । वस्तुतस्तु सीताहरणक्लेश एव हेतुरिति व्यज्यते ॥ १०३—१०४ ॥ कुतः कुतश्चिद्धेतोः । शूराः वानराः गच्छन्तु सर्वतः सञ्चरन्तु । किमर्थमित्यत्राह—ज्ञेयमिति । नः अस्माकं । भयं भयनिमित्तं । छन्नं ज्ञेयं तत्र तत्र निलीनैः शत्रुभिः प्रायशः प्रहारसंभवादिति भावः ॥ १०५ ॥ द्रुमायुते द्रुमैर्युक्ते । मिश्रणार्थाद्यौतेर्निष्ठा ॥ १०६ ॥ सागरस्य समीपस्थं तद्बलं मधुपाण्डुजलः मधुवत्पिङ्गलजलः । द्वितीयः सागर इव विरराजेत्युत्प्रेक्षा ॥ १०७—१०८ ॥ अन्तर्धाय स्थित इति शेषः ॥ १०९ ॥ त्रेधा त्रिप्रकारैः वलयत्रयाकारेणेति यावत् । वानरगोपुच्छभल्लूकभेदेन त्रेधेति वा ॥ ११० ॥ पश्यमाना पश्यन्ती सती । हृष्टा अभूदिति शेषः ॥ १११ ॥ दूरं पारं यस्य दूरपारं विशालमित्यर्थः । असंबाधं संबाधरहितं । अक्षोभ्यमित्यर्थः । रक्षोगणनिषेवितं समुद्रे रक्षांसि वसन्तीति प्रसिद्धिः ॥ ११२ ॥ चण्डनक्रैः करणैः ग्रहः ग्रहणं यस्य स तथोक्तः तं । " सूर्यादौ ग्रहणे युद्धे पूतनादावनुग्रहे । उपरागे च निर्बन्धे स्वर्भानौ च ग्रहः स्मृतः " इति निघण्टुः ॥ दिवसक्षये क्षपादौ सन्ध्यायामित्यर्थः । घोरं वर्धमानत्वाद्भयङ्करं ॥११३॥ समुद्भूतं उल्लसितं । प्रतिवीचि प्रतिबिम्बितचन्द्रत्वात् प्रतिचन्द्रैः समाकुलं । चण्डानिलमहाग्राहैः चण्डानिलसदृशवेगमहाग्राहैरित्यर्थः । तिमयः शतयोजनायता महामत्स्याः । तानपि भक्षयितुं क्षमास्तिमिङ्गिलाः । तिमीन्निगिरतीति व्युत्पत्तेः । " गृ निग-

ती० वासमाज्ञापयदित्यस्यैवनिवेशोस्त्वित्युक्तनिवेशनप्रकारविशेषविधानार्थत्वान्नपुनरुक्तिः ॥ १०३ ॥ ती० वानराणांध्वजिनी ऋक्षगोलाङ्गूलानामपिवानरावान्तरजातीयत्वात्सर्वेषामपिवानरत्वोक्तिः ॥ ११० ॥ स० क्षपादौ क्षपायाआदिर्मुख्यः अधिपतिरितियावत् । तस्मिंश्चन्द्रमसिसति ॥ ११३ ॥

[पा०] १ ग—च. झ. ञ. ट. सागरस्येह. २ ग. नचकश्चित्कुतश्चन. क. ख. नचकश्चिदितो. ३ क.—ङ. ज. झ. ञ. भयंचनः. ४ ङ. ज. झ. ट. निविष्टाश्च. क. ख. निविष्टाःपरमंपारं. च. निविष्टास्ते. ५ झ. ट. चण्डनक्रग्राहघोरं. घ. क्षपनक्रमहं. ६ ख. घ.—ज. समाधूतं.

दीप्तभोगैरिवाकीर्णं भुजङ्गैर्वरुणालयम् ॥ अवगाढं महासत्त्वैर्नानाशैलसमाकुलम् ॥
सुदुर्गं दुर्गमार्गं तमगाधमसुरालयम् ॥ ११५ ॥
मकरैर्नागभोगैश्च विगाढा वातलोलिताः ॥ उत्पेतुश्च निपेतुश्च प्रवृद्धा जलराशयः ॥ ११६ ॥
अग्निचूर्णमिवाविद्धं भास्वराम्बु महोरगम् ॥ सुरारिविषयं घोरं पातालविषमं सदा ॥ ११७ ॥
सागरं चाम्बरप्रख्यमम्बरं सागरोपमम् ॥ सागरं चाम्बरं चेति निर्विशेषमदृश्यत ॥ ११८ ॥
संपृक्तं नभसाऽप्यम्भः संपृक्तं च नभोम्भसा ॥ तादृरूपे स्म दृश्येते तारारत्नसमाकुले ॥ ११९ ॥
समुत्पतितमेघस्य वीचिमालाकुलस्य च ॥ विशेषो न द्वयोरासीत्सागरस्याम्बरस्य च ॥ १२० ॥
अन्योन्यमाहताः सक्ताः सस्वनुर्भीमनिस्स्वनाः ॥ ऊर्मयः सिन्धुराजस्य महाभेर्य इवाहवे ॥१२१॥
रत्नौघजलसन्नादं विषक्तमिव वायुना ॥ उत्पतन्तमिव क्रुद्धं यादोगणसमाकुलम् ॥ १२२ ॥
ददृशुस्ते महोत्साहा वाताहतजलाशयम् ॥ अनिलोद्धूतमाकाशे प्रवल्गन्तमिवोर्मिभिः ॥ १२३ ॥

रणे " इति धातुः । ग्रोचि इति लत्वं । तदुक्तं पुराणे —" अस्ति मत्स्यस्तिमिर्नाम शतयोजनमायतः । तिमिङ्गिलगिलोप्यस्ति तद्गिलोप्यस्ति सागरे " इति ॥ ११४ ॥ दीप्तभोगैः शिरोरत्नकान्त्या प्रकाशितफणैरिव स्थितैः । महासत्त्वैः जलगजशिंशुमारादिभिः । सुदुर्गं यादोभिः । दुर्गमार्गं दुर्गमं । नौपथसञ्चारायोग्यमित्यर्थः । योगरूढिभ्यां वरुणावासवरुणालयपदद्वयनिर्वाहः ॥ ११५ ॥ तदानीं सागरमुत्प्रेक्षते—मकरैरिति ॥ नागभोगैः सर्पकायैः । विगाढाः प्रविष्टाः । वातलोलिताः वायुचलिताः । अतएव प्रवृद्धाः जलराशयः तरङ्गाः । उत्पेतुश्च निपेतुश्च । उत्पत्य निपेतुरिति भावः ॥ ११६ ॥ अथ सागराम्बरयोः सर्वथा साम्यं वर्णयति—अग्निचूर्णमित्यादिना ॥ रात्रौ सागरस्य सलिलशीकराः अग्निचूर्णा इव दृश्यन्त इति प्रसिद्धिः । अतो भास्वराण्यम्बूनि शीकररूपाणि यस्य तथोक्तं । अतएवाविद्धं आकीर्णं । अग्निचूर्णमिव सागरे दृश्यते । अम्बरं च कीर्णैर्नक्षत्रैस्तथा दृश्यते । भास्वराम्बु विमलतुहिनं च । महान्त उरगा यस्मिन् तन्महोरगं । इदमप्युभयत्रापि समानं । आकाशे गन्धर्वादीनामिव नागानामपि सञ्चारसम्भवात् । राह्वादिरूपोरगसंभवाद्वा । सुरारयः असुरा राक्षसाश्च तेषां विषयं आवासभूतं । इदमप्युभयत्र तुल्यं । पातालविषमं पातालवत् गम्भीरं । इदमप्युभयत्र तुल्यं । घोरं भयङ्करं । इदमप्युभयत्र तुल्यं । एवमुक्तविशेषणविशिष्टं सागरं सागरः । अम्बरप्रख्यं अम्बराभं । उक्तविशेषणविशिष्टमम्बरं च सागरोपममदृश्यतेत्याकृष्य योजना । न केवलं साम्यं सर्वथा साम्यं चेत्याह—सागरमिति ॥ क्लीबत्वमार्षं ॥ ११७—११८ ॥ प्रकारान्तरेणापि उक्तं साम्यं दर्शयति—संपृक्तमिति ॥ संपृक्तं संसृष्टं । तुल्यवर्णमितियावत् । हिशब्दो हेतौ । तादृरूपे अन्योन्यतुल्यरूपे । तारारत्नसमाकुले सागराम्बरे दृश्येते स्म ॥ ११९ ॥ समुत्पतितेति । मेघवीचिमालयोर्बिम्बप्रतिबिम्बभावेनोपमानत्वं ॥ १२०॥ प्रथमं सक्ताः अथ आहता इत्यन्वयः ॥१२१॥ रत्नौघेत्यादिश्लोकद्वयं ॥ रत्नौघजलयोः सन्नादो यस्मिन् । अनेन वेगवद्वायुजनितक्षोभातिशयादन्तर्गतरत्नानामुद्गमनमवगम्यते । वायुना विषक्तमिव वायुना एकीभूतमिव । यादोगणसमाकुलं यादांसि जलजन्तवः तेषां गणेन समाकुलं । वाताहतजलाशयं जलाशयः समुद्रः वाताहतश्चासौ जलाशयश्चेति कर्मधारयः तं ऊर्मिभिः आकाशे वल्गन्तमिव स्थितं । एतन्निरूपणार्थमेव अनिलोद्धतमिति पुनरुक्तिः ॥१२२

स० तारारत्नसमाकुले एकंनभस्तारासमाकुलं । अपरं रत्नसमाकुलमितिते । तारारत्नैः नक्षत्रश्रेष्ठैः तथा तारारत्नैः मुक्ताश्रेष्ठैरितिनागोजिभट्टः । तत्पक्षे " तारःशुद्धमौक्तिके " इतिविश्वोक्तेःस्त्रीलिङ्गस्ताराशब्दस्तद्वाचीमृग्यः । तारेषुमुक्तासुआरत्नैः अतिश्रेष्ठैरितितद्विनेयैःक्लिष्टकल्पनयासमाधेयं ॥ १२० ॥ इतिचतुर्थःसर्गः ॥ ४ ॥

[पा०] १ ख. भुजगैर्भुजगालयं. २ ङ. झ. ट. प्रहृष्टाः. ३ ख. ग. ङ. च. ज.—ट. विषयं. ४ ख. ग. ङ. च. ज.—ट. अन्योन्यैराहताः. ५ ख. सस्वरंभीमविक्रमाः. ६ ङ. छ. झ. ट. इवांबरे. ७ क. ख. ग. ङ.—ट. महात्मानो. ८ ङ. झ. ट. प्रलपन्तमिवो.

ततो विस्मयमापन्ना ददृशुर्हरयस्तदा ॥ भ्रान्तोर्मिजलसन्नादं प्रलोलमिव सागरम् ॥ १२४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्थः सर्गः ॥ ४ ॥

पञ्चमः सर्गः ॥ ५ ॥

समुद्रवेलावलोकनाद्युद्दीपकसमुद्दीपितविरहशोकेनरामेण लक्ष्मणंप्रति सीतामुद्दिश्यसपरिशोचनंबहुधाविलापः ॥ १ ॥ तथा लक्ष्मणसमाश्वासितेनतेन सायंसन्ध्योपासनम् ॥ २ ॥

सा तु नीलेन विधिवत्स्वारक्षा सुसमाहिता ॥ सागरस्योत्तरे तीरे साधु सेना निवेशिता ॥ १ ॥
मैन्दश्च द्विविदश्चोभौ तत्र वानरपुङ्गवौ ॥ विचेरतुश्च तां सेनां रक्षार्थं सर्वतो दिशम् ॥ २ ॥
निविष्टायां तु सेनायां तीरे नदनदीपतेः ॥ पार्श्वस्थं लक्ष्मणं दृष्ट्वा रामो वचनमब्रवीत् ॥ ३ ॥
शोकश्च किल कालेन गच्छता ह्यपगच्छति ॥ मम चापश्यतः कान्तामहन्यहनि वर्धते ॥ ४ ॥
न मे दुःखं प्रिया दूरे न मे दुःखं हृतेति वा ॥ एतदेवानुशोचामि वयोस्या ह्यतिवर्तते ॥ ५ ॥
वाहि वात यतः कान्ता तां स्पृष्ट्वा मामपि स्पृश ॥ त्वयि मे गात्रसंस्पर्शश्चन्द्रे दृष्टिसमागमः ॥६॥

—१२३॥ ततइति विशेषाभिधानार्थत्वान्न पुनरुक्तिः । भ्रान्तोर्मिजलसन्नादमिति । घूर्णिततरङ्गजलसन्नादो यस्मिन् तं प्रलोलमिव उद्भ्रान्तमिव ॥ १२४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्थः सर्गः ॥ ४ ॥

एवं कृतज्ञत्वमित्रानुरोधित्वपरीक्ष्यकारित्वमहोत्साहत्वादयःशरण्यत्वौपयिका रामगुणा दर्शिताः । अथ रामस्य कारुण्यरूपं प्रधानगुणं दर्शयितुं सर्गान्तरमारभते—सा त्विति ॥स्वारक्षा आसमन्ताद्रक्षन्तीत्यारक्षाः शोभनाः आरक्षाः यस्याः सातथोक्ता । विधिवत् नीतिशास्त्रोक्तरीत्या । सुसमाहिता निराकुला । निवेशिता ॥ १ ॥ दिशमिति जात्येकवचनं । दिश इत्यर्थः । " उभसर्वतसोः—" इत्यादिना द्वितीया । सर्वत इति सप्तम्यर्थे तसिः । दिशां सर्वेषु प्रदेशेष्वित्यर्थः ॥ २—३ ॥ समुद्रवेलावनाद्युद्दीपकदर्शनादुद्भूतं विरहशोकं सोढुमशक्नुवन् सौमित्रिं प्रत्याह—शोकश्चेत्यादिना ॥ प्रथमश्चकारोऽवधारणे । द्वितीयस्त्वर्थः । शोकः इष्टवस्त्वन्तरवियोगजनितः शोकः । गच्छता कालेन अपगच्छति । किलेत्यैतिह्ये । गच्छत्येवेति प्रसिद्धमिति लौकिका वदन्ति । कान्तामपश्यतो मम तु शोकः । अहन्यहनि वर्धते । लौकिकशोकविलक्षणोमम शोक इतिभावः ॥ ४ ॥ ननु शत्रुहृताया दूरे स्थितायास्तस्याः प्रत्याहरणसमर्थस्य तव किं शोकेनेत्याशङ्क्य न तद्विषयोयं शोकः किंतूपभोगयोग्यस्य प्रियावयसो वैफल्यानुस्मरणादित्याह—न म इति ॥ प्रिया दूरे स्थितेति मे न दुःखं । सुग्रीवेण प्रस्थानेन तस्य निवर्त्यत्वात् । प्रबलरक्षसा हृतेति मे दुःखं नास्ति । तस्य तच्छिरःकृन्तनापनोद्यत्वात् । एतदेवानुशोचामि । इदमेकमेव शोकनिमित्तं । वयोस्या ह्यतिवर्तते गतं यौवनं न प्रत्याहर्तुं शक्यमितिभावः । अत्र यौवनमतिवर्तत इति नार्थः । नित्ययौवनत्वात्तस्याः । किंतु वयोतिवर्तते । व्यर्थतयैवयातीतिभावः । मानुषभावानुसारेण चेदं वचनं ॥ ५ ॥ प्रियास्पृष्टद्रव्यस्पर्शस्य विनोदहेतुत्वात्तत्संपादनार्थं वायुं प्रार्थयते—वाहीति ॥ हे वात मेकान्ता यतः यत्र वसति तत्र वाहि गच्छ । तत्रगत्वाकिंकरणीयमित्यत्राह—तामिति । न चैतदन्यतः सेत्स्यतीति सदृष्टान्तं दर्शयति—दृष्टिसमागमः चन्द्रे यथा चन्द्राधीनः । तथा मे तद्गात्रसंस्पर्शोपि । त्वयि त्वदधीनः । तथा तदवलोकितं चन्द्रं पश्यन्

स० सासेनात्रित्यन्वयः । असाधुषा असाधूनां सा हिंसाययेति । तदर्थस्तुरिपुनाशिका ॥ १ ॥ ति० नन्वचिरात्प्रत्याहरिष्यामःकिंशोकेनेत्यत्रतत्रैवविघ्नशङ्क्यादुःखमित्याह—नमेइति । प्रियादूरेस्थितेतिमेदुःखंनास्ति । स्त्रीधर्मदिवसवत् । तथाहृतेत्यपि नदुःखं । प्रबलदुष्कर्मवशंप्राप्तत्वात् । अपिचस्यावयः प्राणावस्थितिकालः । अतिवर्तते । मासद्वयमात्रंजीवनमित्युक्तेः । तत्रापि

[पा०] १ ह्म. ञ. ट. जाल. २ क. ख. प्रालोलमिव. ३ ग. च. विधिनास्वारक्षा. ख. विधिवत्सुरक्षा.

तन्मे दहति गात्राणि विषं पीतमिवाशये ॥ हा नाथेति प्रिया सा मां ह्रियमाणा यदब्रवीत् ॥७॥
तद्वियोगेन्धनवता तच्चिन्ताविपुलार्चिषा ॥ रात्रिंदिवं शरीरं मे दह्यते मदनाग्निना ॥ ८ ॥
अवगाह्यार्णवं स्वप्स्ये सौमित्रे भवता विना ॥ कथंचित्प्रज्वलन्कामः स मा सुप्तं जले दहेत् ॥ ९ ॥
बह्वेतत्कामयानस्य शक्यमेतेन जीवितुम् ॥ यदहं सा च वामोरूरेकां धरणिमाश्रितौ ॥ १० ॥
केदारस्येव केदारः सोदकस्य निरूदकः ॥ उपस्नेहेन जीवामि जीवन्तीं यच्छृणोमि ताम् ॥ ११ ॥
कदा नु खलु सुश्रोणीं शतपत्रायतेक्षणाम् ॥ विजित्य शत्रून्द्रक्ष्यामि सीतां स्फीतामिव श्रियम्॥१२॥
कदा नु चारुबिम्बोष्ठीं तस्याः पद्ममिवाननम् ॥ ईषदुन्नम्य पास्यामि रसायनमिवातुरः ॥ १३ ॥
तस्यास्तु संहतौ पीनौ स्तनौ तालफलोपमौ ॥ कदा नु खलु सोत्कम्पौ श्लेष्यन्त्या मां भजिष्यतः १४

तत्प्रणालिकया तां दृष्टवानस्मि । तद्वत् तदङ्गस्पृष्टं त्वां स्पृशन् तामेव स्पृष्टवान्भवेयमित्यर्थः ॥ ६ ॥ न केवलं वयोतिवर्तनस्मरणमेव व्यथाहेतुः किंतु कारणान्तरमप्यस्तीत्याह—तदिति ॥ तद्वचनं मे आशये हृदये । स्थितं सत् । सदा स्मर्यमाणंसदित्यर्थः । पीतं विषमिव गात्राणि प्रत्यवयवं । दहति । किं तद्वचनं तत्राह—हा नाथेति । सा सर्वान्भोगान्परित्यज्य मया सहागता । ह्रियमाणा सती रावणेन हरणसमये "न त्वां कुर्मि दशग्रीव भस्म भस्मार्ह तेजसा" इत्युक्तरीत्या पातिव्रत्याग्निना भस्मीकर्तुं समर्थापि "तत्तस्य सदृशं भवेत्" इत्युक्तरीत्या हा नाथेति मन्नाथत्वमेव पुरस्कृत्य मां यदब्रवीत् तन्मे गात्राणि दहति । एतेन रामशोकः सीताविषयकारुण्यमित्यवगम्यते । परदुःखदुःखित्वं हि कारुण्यं ॥ ७ ॥ अथ संतापो जलप्रवेशं विना न शाम्यतीति वक्तुं तस्याग्नित्वं सावयवं रूपयति—तद्वियोगेति ॥ मदनाग्निवर्धकत्वेन वियोगस्येन्धनरूपत्वं । संततत्वेन चिन्ताया ज्वालात्वरूपणं । रात्रिंदिवमिति । "अचतुर—" इत्यादिना सूत्रेण साधुत्वं । शीतलाशीतलकालाविशेषेण दह्यत इत्यर्थः ॥ ८ ॥ सौमित्रे कान्तास्मारकेण भवता विना अर्णवमवगाह्य स्वप्स्ये । अनेन लक्ष्मणस्य शेषावतारत्वमुक्तं । अर्णवशयनं हि शेषिणैव किं प्रयोजनमित्यत्राह—कथंचिदिति । इदानीं प्रज्वलन् स कामः जले सुप्तं मां कथंचिद्दहेत् कृच्छ्राद्दहेत् मन्दीभवेदित्यर्थः ॥ ९ ॥ एवं दुःसहदुःखाक्रान्तस्यापि मम जीवनधारणशक्तिस्तया सह एकधरण्याश्रयणात्तज्जीवनप्रवृत्त्युपलम्भाच्च जायत इत्याह—बह्वित्यादिना श्लोकद्वयेन ॥ अहं सा वामोरूश्च एकां धरणिमाश्रितावेति यत् एतद्बहु भूरि जीवनसाधनं । अतः एतेन कामयानस्य विरहिणो मम जीवितुं शक्यं । एकशय्याश्रयणन्यायेन कामिनोरेकधरण्याश्रयणमपि जीवनसाधनं भवतीत्यभिप्रायः ॥ जीवन्तीं तां शृणोमीति यत् तेन । निरूदकः निरुदकः । केदारः वप्रं । सोदकस्य केदारस्य उपस्नेहेन उपक्लेदेनेव जीवामि ॥ १०—१२ ॥ रसायनं शरीरसिद्धिकरमौषधविशेषं । आतुरः रोगी । "आतुरोभ्यमितोभ्यान्तः" इत्यमरः ॥ १३ ॥ संहतौ श्लिष्टौ ॥१४—

बहुदिवसात्यया ॥ शि० एतदेवानुशोचामि । एतेनप्रबलेनैतदुःखेनपूर्वदुःखंतिरोहितमितिसूचितं ॥ ५ ॥ शि० त्वयि सीतास्पर्शविशिष्टे । मेगात्रसंस्पर्शः चन्द्रेदृष्टिसमागमः चक्षुस्संयोगः । यथाचन्द्रेदृष्टिसमागमस्तापशामकः तथा सीतास्पर्शवतित्वयि ममस्पर्शोपितापशामकइत्यर्थः ॥ ती० यद्वा यतोयत्र कान्तावर्तते तत्र वाहि संचर । त्वात्मानंस्पृशन्तंवायुंप्रत्येवमुक्तं । मद्गात्रसंस्पर्शस्तस्याःसिध्येदितिभावः ॥ ६ ॥ ती० "कथंचित्प्रज्वलन्कामःसमासुप्तेजनेदहेत्" इतिपाठे जने सुप्तेसति कथंचित्प्रज्वलन्कामः । समादहेत् । सः कामः । तंजनं नबाधेतेत्यर्थः । तस्माद्भवताविना त्वांविहाय । अर्णवमवगाह्यस्वप्स्ये इतिसंबन्धः ॥ ति० सौमित्रे भवताविनाऽहमेकएकार्णवमवगाह्यस्वप्स्ये । एवंसतिप्रज्वलन्कामः जलेसुप्तंनदहेत् । जलस्याग्निविरोधित्वात् । मनोमूलकामस्यसुप्तौ मनउपरमेणोपरमाच्चेतिभावः । भवताविनेत्युक्तिरेकाकित्वेननिद्राप्राप्त्यै ॥ शि० भवताविनेत्युक्त्या जाग्रदेवलंतिष्ठेतिसूचितं । तेनत्वद्विश्लेषनिकटेनागच्छलितिहेतुःसूचितः । तेनसीतातिरिक्तविषये तदानींदिदृक्षाभावः सूचितः । स० भवताविना तवशीतबाधाभवेदित्यर्थः ॥ ९ ॥

[पा०] १ झ. ट. एवंचप्रज्वलन्. २ ङ. च. झ. ट. नमांसुप्तं. ३ ङ. झ. ट. सुचारु. ४ ग. च. छ. झ. ट. तौतस्याः सहितौ. क. ख. ज. तौतस्याःसंहितौ. ५ क—ट. हसन्त्या.

सा नूनमसितापाङ्गी रक्षोमध्यगता सती ॥ मन्नाथा नाथहीनेव त्रातारं नाधिगच्छति ॥ १५ ॥
कथं जनकराजस्य दुहिता सा मम प्रिया ॥ राक्षसीमध्यगा शेते क्षुषा दशरथस्य च ॥ १६ ॥
कदाऽविक्षोभ्यरक्षांसि सा विधूयोत्पतिष्यति ॥ विधूय जलदान्नीलाञ्शशिरेखा शरत्स्विव ॥ १७ ॥
स्वभावतनुका नूनं शोकेनानशनेन च ॥ भूयस्तनुतरा सीता देशकालविपर्ययात् ॥ १८ ॥
कदा नु राक्षसेन्द्रस्य निधायोरसि सायकान् ॥ सीतां प्रत्याहरिष्यामि शोकमुत्सृज्य मानसम् ॥ १९ ॥
कदा नु खलु मां साध्वी सीता सुरसुतोपमा ॥ सोत्कण्ठा कण्ठमालम्ब्य मोक्ष्यत्यानन्दजं पयः ॥ २० ॥
कदा शोकमिमं घोरं मैथिली विप्रयोगजम् ॥ सहसा विप्रमोक्ष्यामि वासः शुक्लेतरं यथा ॥ २१ ॥
एवं विलपतस्तस्य तत्र रामस्य धीमतः ॥ दिनक्षयान्मन्दरुचिर्भास्करोस्तमुपागमत् ॥ २२ ॥
आश्वासितो लक्ष्मणेन रामः संध्यामुपासत ॥ स्मरन्कमलपत्राक्षीं सीतां शोकाकुलीकृतः ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चमः सर्गः ॥ ५ ॥

षष्ठः सर्गः ॥ ६ ॥

रावणेन मन्त्रिणः प्रति हनुमत्कृतलङ्कादहनादिदुष्करकर्मानुवादपूर्वकं सैन्यैस्सहरामागमनसंभावनया तत्प्रतीकाराय मन्त्रिनियोजनम् ॥ १ ॥

लङ्कायां तु कृतं कर्म घोरं दृष्ट्वा भयावहम् ॥ राक्षसेन्द्रो हनुमता शक्रेणेव महात्मना ॥
अब्रवीद्राक्षसान्सर्वान्ह्रिया किंचिदवाङ्मुखः ॥ १ ॥
धर्षिता च प्रविष्टा च लङ्का दुष्प्रसहा पुरी ॥ तेन वानरमात्रेण दृष्टा सीता च जानकी ॥ २ ॥
प्रासादो धर्षितश्चैत्यः प्रवरा राक्षसा हताः ॥ आविला च पुरी लङ्का सर्वा हनुमता कृता ॥ ३ ॥

१६ ॥ अविक्षोभ्यरक्षांसीत्येकं पदं । अविक्षोभ्याणि दुराधर्षाणि रक्षांसि ॥ १७ ॥ देशकालविपर्ययात् देशकालयोर्व्यत्यासात् । सुखावहयोर्देशकालयोरपगमात्तद्विरुद्धयोरुपगमाच्चेत्यर्थः ॥ १८ ॥ सीतां प्रत्याहरिष्यामि शोकमुत्सृज्य मानसमिति । सीतां प्रत्याहृत्य कदा नु शोकमुत्सक्ष्यामीत्यर्थः । आस्यं व्यादाय स्वपितीतिवत्साधुः ॥ १९—२० ॥ शुक्लेतरं मलिनं ॥ २१—२२ ॥ उपासत उपास्त । भ्रातुरपि लक्ष्मणस्य पुरतो रघुनाथस्यैवंविधवचनप्रयोगस्तस्य सर्वविधसेवकत्वात् । अतो नानौचित्यं ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चमः सर्गः ॥ ५ ॥

एवं रामवृत्तान्तमुक्त्वा हनुमन्निर्गमकालानन्तरकालिकं रावणवृत्तान्तं वक्तुमुपक्रमते—लङ्कायामिति ॥ घोरं दुर्दर्शम् । शक्रेणेव शक्रतुल्येन । " इवेन सह नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम् " इति विभक्तेरलोपः ॥ १ ॥ वानरमात्रेण वानरजातीयेन । वानरेष्वल्पेनेति यावत् ॥ २ ॥ चैत्यः प्रासादः नगरप्रधानभूतः प्रासादः ।

स० दिनक्षयात् अहःक्षयात् । मन्दवपुः मन्दरश्मिः ॥ २२ ॥ रामानु० उपासत उपास्त । वचनव्यत्ययआर्षः । उपागमदिति वापाठः ॥ ती० स्मरन्निति हेतौशतृप्रत्ययः । सीतास्मरणाद्धेतोः शोकाकुलीकृतः ॥ २३ ॥ इतिपञ्चमःसर्गः ॥ ५ ॥

स० महात्मनाशक्रेणेवेत्यनेन हनुमत्कृतकर्मणः " इन्द्रोवृत्रंहत्वामहानास " इत्युक्तरीत्यामहेन्द्रकृतिसाध्यत्वेपिरावणसुतजितेन्द्रप्रयत्नाविषयत्वंसूचयति ॥ १ ॥ ति० वानरमात्रेण एकेननिरायुधेनचेत्यर्थः ॥ २ ॥ शि० चैत्यः देवविशेषाविष्टःप्रासादः ॥ ३ ॥

[पा०] १ क. ग. ङ. च. ज.—ट. ममचप्रिया. ख. परमप्रिया. २ ङ. झ. ट. अविक्षोभ्यानिरक्षांसि. ३ ङ. ज. झ. ट. लेखा. क. ख. च. छ. ञ. लेखेवशारदी. ४ ङ. झ. ट. मेसाध्वी. ख. सासाध्वी. ५ क.—च. झ. ञ. ट. न्मन्दवपुः. ६ क. ग. ङ. च. झ. ञ. ट. मुपागतः. ७ क. ख. ग. मुपाविशत्. ८ ख. सर्वं. ९ ख. च. छ. आकुलाच.

किं करिष्यामि भद्रं वः किं वा युक्तमनन्तरम् ॥ उच्यतां नः समर्थं यत्कृतं च सुकृतं भवेत् ॥४॥
मन्त्रमूलं हि विजयं प्राहुरार्या मनस्विनः ॥ तस्माद्वै रोचये मन्त्रं रामं प्रति महाबलाः ॥ ५ ॥
त्रिविधाः पुरुषा लोके उत्तमाधममध्यमाः ॥ तेषां तु समवेतानां गुणदोषौ वदाम्यहम् ॥ ६ ॥
मन्त्रिभिर्हितसंयुक्तैः समर्थैर्मन्त्रनिर्णये ॥ मित्रैर्वापि समानार्थैर्बान्धवैरपि वा हितैः ॥ ७ ॥
सहितो मन्त्रयित्वा यः कर्मारम्भान्प्रवर्तयेत् ॥ दैवे च कुरुते यत्नं तमाहुः पुरुषोत्तमम् ॥ ८ ॥
एकोर्थं विमृशेदेको धर्मे प्रकुरुते मनः ॥ एकः कार्याणि कुरुते तमाहुर्मध्यमं नरम् ॥ ९ ॥
गुणदोषावनिश्चित्य त्यक्त्वा धर्मव्यपाश्रयम् ॥ करिष्यामीति यः कार्यमुपेक्षेत्स नराधमः ॥ १० ॥
यथेमे पुरुषा नित्यमुत्तमाधममध्यमाः ॥ एवं मन्त्रा हि विज्ञेया उत्तमाधममध्यमाः ॥ ११ ॥
ऐकमत्यमुपागम्य शास्त्रदृष्टेन चक्षुषा ॥ मन्त्रिणो यत्र निरतास्तमाहुर्मन्त्रमुत्तमम् ॥ १२ ॥
बह्व्योपि मतयो भूत्वा मन्त्रिणामर्थनिर्णये ॥ पुनर्यत्रैकतां प्राप्ताः स मन्त्रो मध्यमः स्मृतः ॥ १३ ॥
अन्योन्यं मतिमास्थाय यत्र संप्रतिभाष्यते ॥ न चैकमत्ये श्रेयोस्ति मन्त्रः सोधम उच्यते ॥ १४ ॥
तस्मात्सुमन्त्रितं साधु भवन्तो मतिमत्तमाः ॥ कार्यं संप्रतिपद्यन्तामेतत्कृत्यं मतं मम ॥ १५ ॥
वानराणां हि वीराणां सहस्रैः परिवारितः ॥ रामोऽभ्येति पुरीं लङ्कामस्माकमुपरोधकः ॥ १६ ॥

आविला दाहेन आकुला ॥ ३ ॥ अनन्तरं किं वा युक्तं यन्नः समर्थं हितं । " समर्थस्त्रिषु शक्तिस्थे संबन्धार्थे हितेपि च " इत्यमरः । यत्कृतं अनुष्ठितं । सुकृतं स्वनुष्ठितं । भवेत् फलवद्भवेत् । तादृशं किं उच्यतां करिष्यामि । वो भद्रमस्त्वित्यन्वयः ॥ ४ ॥ बलवतस्तव किं मन्त्रेणेत्याशङ्क्य सर्वेषामपि विजयस्य मन्त्रमूलत्वान्मयापि मन्त्रः करणीय इत्याह—मन्त्रमूलमिति ॥ ५ ॥ मन्त्रस्य करणीयत्वेपि स्वयमेव संमन्त्र्यतां किं बहुभिरित्याशङ्क्य बहुभिः सह मन्त्रयितुरेवोत्तमत्वं वक्तुं प्रतिज्ञापूर्वकं क्रमेण मन्त्रयितृभेदानाह—त्रिविधा इत्यादिना ॥ समवेतानां संकीर्णस्वरूपाणां । लक्षणज्ञानं विना विवेक्तुमशक्यानामित्यर्थः । गुणदोषौ उत्तमलक्षणं गुणं अधमलक्षणं दोषं । मध्यमलक्षणं मिश्रणं ॥ ६ ॥ हितसंयुक्तैः हितपरैः । समानार्थैः समानसुखदुःखैः । कर्मारम्भान् आरम्भणीयकर्माणि । दैवे दैवसमाश्रयणे । कुरुते ॥ ७—८ ॥ धर्मे पूर्वोक्तदैवसमाश्रयणे । मनः मनःपूर्वं यत्नं ॥९॥ गुणदोषौ हिताहिते । अनिश्चित्य दैवव्यपाश्रयं त्यक्त्वा करिष्यामीत्युपक्रम्ययः कार्यमुपेक्षेत् उपेक्षेत न समाप्नुयात् ॥ १०—११ ॥ उक्तत्रैविध्यं मन्त्रेप्यतिदिशति—ऐकमत्यमिति ॥ ऐकमत्यं एकां मतिं उपागम्य । शास्त्रदृष्टेन स्वभ्यस्तशास्त्रेण । राजदन्तादित्वात्परनिपातः । तद्रूपेण चक्षुषा उपलक्षिताःमन्त्रिणः यत्र मन्त्रे निरताः तं उत्तममन्त्रमाहुः ॥ १२ ॥ यत्र मन्त्रे । मन्त्रिणां मतयः बह्व्यः बहुधा भूत्वापि । अर्थनिर्णये अर्थनिर्णयरूपफलविषये । एकतां प्राप्ता भवन्ति स मन्त्रो मध्यमः स्मृतः । नीतिज्ञैरितिशेषः ॥ १३ ॥ यत्र मन्त्रे । मन्त्रिभिः अन्योन्यं मतिं स्वां स्वां बुद्धिं । आस्थाय प्रधानीकृत्य । संप्रतिभाष्यते व्यवह्रियते । अनेनोत्तममन्त्रव्यावृत्तिरुक्ता । मध्यममन्त्रव्यावृत्त्यर्थमाह—न चेति । ऐकमत्ये तेषां मन्त्रिणां श्रेयश्च प्रीतिश्च नास्ति स मन्त्रोधम उच्यते ॥ १४ ॥ सुमन्त्रितं सुनिश्चितं । साधु समीचीनं । कार्यं संप्रतिपद्यन्तां ऐकमत्येन जानन्तु । एतत् ऐकमत्येन सुनिश्चितं कार्यं । मम कृत्यं अतिशयेन कर्तव्यं ॥ १५ ॥ गतं तु गतमेव किं मन्त्र-

[पा०] १ ङ. च. छ. झ. ञ. ट. प्रवदन्तिमनस्विनः. २ क.—घ. च. छ. ज. गुणंदोषं. ३ ङ. झ. मन्त्रस्त्रिभिर्हि संयुक्तः. ४ क. च. ञ. ट. बान्धवैर्वासमाहितैः. ५ ख. ङ.—ट. दैवव्यपाश्रयं. ६ क. ख. ङ. च. झ. ञ. ट. मन्त्रोपिविज्ञेयउत्तमाधममध्यमः. ७ ङ. झ. ट. बह्वीरपिमतीर्गत्वामन्त्रिणामर्थनिर्णयः । पुनर्यत्रैकतांप्राप्तः. ८ ख. च. छ. मन्त्रिणो मन्त्रनिर्णये. ९ क. ख. ग. च. छ. ञ. मन्त्रिसत्तमाः. ङ. ज. झ. ट. मतिसत्तमाः. १० कार्यसंप्रतिपद्यतामित्यर्धस्यस्थाने क. च. छ. पाठेषु. इतीमंमन्त्रयन्राजाकार्यंतत्प्रतिपद्यते । तस्मात्संमन्त्र्यतांसर्वैरेतत्कृत्यंमतंमम ॥ इतिश्लोकोदृश्यते. ११ च. छ. सवानराणां. १२ ङ. झ. ट. धीराणां.

तरिष्यति च सुव्यक्तं राघवः सागरं सुखम् ॥ तरसा युक्तरूपेण सानुजः सबलानुगः ॥
समुद्रमुच्छोषयति वीर्येणान्यत्करोति वा ॥ १७ ॥
[खरो येन हतः संख्ये तस्य वीर्येण लक्ष्यते ॥ १८ ॥]
अस्मिन्नेवंगते कार्ये विरुद्धे वानरैः सह ॥ हितं पुरे च सैन्ये च सर्वं संमन्त्र्यतां मम ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षष्ठः सर्गः ॥ ६ ॥

सप्तमः सर्गः ॥ ७ ॥

राक्षसैरावणंप्रति कुबेरविजयादितदपादानप्रशंसनपूर्वकं रामस्यततोप्यल्पबलत्वोक्त्या कैमुत्येनतत्पराजयस्यसुकरत्वोक्तिः ॥ १ ॥ तथेन्द्रजिदपादानप्रशंसनपूर्वकं रामविजयायतन्नियोजनोक्त्या समाश्वासनम् ॥ २ ॥

इत्युक्ता राक्षसेन्द्रेण राक्षसास्ते महाबलाः ॥ ऊचुः प्राञ्जलयः सर्वे रावणं राक्षसेश्वरम् ॥
द्विषत्पक्षमविज्ञाय नीतिबाह्यास्त्वबुद्धयः ॥ १ ॥
राजन्परिघशक्त्यृष्टिशूलपट्टिशसंकुलम् ॥ सुमहन्नो बलं कस्माद्विषादं भजते भवान् ॥ २ ॥
त्वया भोगवतीं गत्वा निर्जिताः पन्नगा युधि ॥ कैलासशिखरावासी यक्षैर्बहुभिरावृतः ॥
सुमहत्कदनं कृत्वा वश्यस्ते धनदः कृतः ॥ ३ ॥
स महेश्वरसख्येन श्लाघमानस्त्वया विभो ॥ निर्जितः समरे रोषाल्लोकपालो महाबलः ॥ ४ ॥

करणे इतःकिं नद्विछन्नमित्यत आह—वानराणामिति॥ अभ्येति अभ्येष्यति । " वर्तमानसामीप्ये वर्तमानवद्वा " इति वर्तमाननिर्देशः । उपरोधकः उपरोद्धुं । क्रियार्थायां क्रियायां ण्वुल् ॥१६॥ सागरे विद्यमाने कथमस्मानुपरोत्स्यति तत्राह—तरिष्यतीति सार्धश्लोकः ॥ उच्छोषयति उच्छोषयिष्यति । अन्यत्सेतुबन्धादिकं वा । करोति करिष्यति ॥ १७—१८ ॥ अस्मिन् लङ्कानिरोधनरूपे कार्ये । एवंगते उक्तरीत्या प्रवृत्ते । वानरैः सह विरुद्धे विरोधे च प्राप्ते । भावे निष्ठा । पुरादिषु हितं यत्तत्सर्वं संमन्त्र्यतामित्यर्थः ॥ १९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षष्ठः सर्गः ॥ ६ ॥

एवं रावणवचनमाकर्ण्य अविदितरघुनाथप्रभावा मदोद्धता राक्षसास्तद्बलवर्णनपूर्वकं रावणं प्रशंसन्ति—इत्युक्ता इत्यादिना । सार्धश्लोक एकान्वयः । द्विषत्पक्षं द्विषद्बलं । " पक्षो मासार्धके पार्श्वे गृहे सूर्यविरोधयोः । केशादेः परितो वृन्दे बले सखिसहाययोः " इति विश्वः ॥ १ ॥ परिघः परितो हननक्षमो गदाविशेषः । " परिघः परिघातनः " इत्यमरः । शक्तिः दीर्घयष्टिः । ऋष्टिः असिः । " खड्गे तु निस्त्रिंशचन्द्रहासासिऋष्टयः " इत्यमरः । शूलं प्रसिद्धं । पट्टिशः खड्गविशेषः । तैः संकुलं व्याप्तं । बलमस्ति समग्रबले एवं विद्यमाने कस्माद्धेतोः भवान् विषादं भजत इति योजना । अत्र सुमहन्नो बलमित्यत्र बलं नास्तीति प्रामादिका भाव्यनर्थसूचिकाखिलोक्तिः ॥ २ ॥ तिष्ठतु सैन्यं त्वमेक एव समस्तशत्रुविद्रावणक्षम इत्याशयेनाह—त्वयेत्यादिना ॥ सार्धश्लोक एकान्वयः । भोगवतीं सर्पराजनगरीं । कदनं

ति० प्रथमान्तपाठे सगरस्यगोत्रापत्यंसागरइति रामविशेषणं ॥ तदा सागरमितिद्वितीयान्तमन्यत्पदमध्याहार्यं ॥ १७ ॥ इतिषष्ठःसर्गः ॥ ६ ॥

ति० तत्रादौदुर्मन्त्रिणांदुर्मन्त्रमाह—**इत्युक्ताइति** । यतोनीतिबाह्याः अतएवाबुद्धयः तेराक्षसाः द्विषत्पक्षस्यरामसुग्रीवादेर्बलमविज्ञाय ज्ञात्वापिमोहाद्विगणय्यवा प्राञ्जलयस्सन्तोरावणमूचुः॥ १॥**ति०** तदेवप्रपञ्च्यते—**सइति** । सः धनदः । महेश्वरसख्येन हेतुना स्वयंश्लाघमानोपि लोकपालोपि त्वयासमरेरोषान्निर्जितः ॥ **स०** श्लाघमानः अहंत्र्यंबकसखः मत्सदृशोऽन्योनास्तीत्यात्मा-

[पा०] १ इदमर्धं घ. पाठेदृश्यते. २ क. ग. ङ. च. तस्मिन्नेवंगते. झ. ट. तस्मिन्नेवंविधे. ३ घ. निरुद्धे. ४ क. ग. संमन्त्र्यतामिति. ५ घ. अविज्ञायात्मनःपक्षं. ६ ङ. झ. कुन्तलं.

[1]विनिहत्य च यक्षौघान्विक्षोभ्य च विगृह्य च ॥ त्वया कैलासशिखराद्विमानमिदमाहृतम् ॥ ५ ॥
मयेन दानवेन्द्रेण त्वद्भयात्सख्यमिच्छता ॥ दुहिता तव भार्यार्थे दत्ता राक्षसपुङ्गव ॥ ६ ॥
दानवेन्द्रो मधुर्नाम वीर्योत्सिक्तो दुरासदः ॥ विगृह्य वशमानीतः कुम्भीनस्याः सुखावहः ॥ ७ ॥
निर्जितास्ते महाबाहो नागा गत्वा रसातलम् ॥ वासुकिस्तक्षकः शङ्खो जटी च वशमाहृताः ॥ ८ ॥
अक्षया बलवन्तश्च शूरा लब्धवराः पुनः ॥ त्वया संवत्सरं युद्ध्वा समरे दानवा विभो ॥ ९ ॥
स्वबलं समुपाश्रित्य नीता वशमरिन्दम ॥ मायाश्चाधिगतास्तत्र बहवो रक्षसाधिप ॥ १० ॥
[निर्जिताः समरे रोषाल्लोकपाला महाबलाः ॥ देवलोकमितो गत्वा शक्रश्चापि विनिर्जितः ॥] ॥ ११ ॥
शूराश्च बलवन्तश्च वरुणस्य सुता रणे ॥ निर्जितास्ते महाबाहो चतुर्विधबलानुगाः ॥ १२ ॥
मृत्युदण्डमहाग्राहं शाल्मलिद्रुममण्डितम् ॥ कालपाशमहावीचिं यमकिङ्करपन्नगम् ॥ १३ ॥
[महाज्वरेण दुर्धर्षं यमलोकमहार्णवम् ॥] अवगाह्य त्वया राजन्यमस्य बलसागरम् ॥
जयश्च विपुलः प्राप्तो मृत्युश्च प्रतिषेधितः ॥ १४ ॥
सुयुद्धेन च ते सर्वे लोकास्तत्र विलोलिताः ॥ १५ ॥
क्षत्रियैर्बहुभिर्वीरैः शक्रतुल्यपराक्रमैः ॥ आसीद्वसुमती पूर्णा महद्भिरिव पादपैः ॥ १६ ॥
तेषां वीर्यगुणोत्साहैर्न समो राघवो रणे ॥ प्रसह्य ते त्वया राजन्हताः परमदुर्जयाः ॥ १७ ॥
तिष्ठ वा किं महाराज श्रमेण तव वानरान् ॥ अयमेको महाबाहुरिन्द्रजित्क्षपयिष्यति ॥ १८ ॥
अनेन हि महाराज माहेश्वरमनुत्तमम् ॥ इष्ट्वा यज्ञं वरो लब्धो लोके परमदुर्लभः ॥ १९ ॥
शक्तितोमरमीनं च विनिकीर्णान्त्रशैवलम् ॥ गजकच्छपसंबाधमश्वमण्डूकसंकुलम् ॥ २० ॥

युद्धं ॥ ३—४ ॥ विमानं पुष्पकं ॥ ५ ॥ दुहिता मन्दोदरी । यद्यपि मयेनाभिजात्यभ्रमाद्दत्तेत्युत्तरे वक्ष्यति तथाप्यत्र प्रशंसायां भयाद्दत्तेत्युक्तं ॥ ६ ॥ दानवेन्द्रः मधुः । कुम्भीनसी रावणभगिनी । सुखमावहतीति सुखावहः भर्ता ॥ ७ ॥ जटी सर्पविशेषस्य नाम । त्वया भोगवतीमित्यत्र तक्षकादिभिन्नकर्कोटकादिजयोक्तिरिति न पौनरुक्त्यं ॥ ८ ॥ अक्षया इत्यादिश्लोकद्वयमेकान्वयं ॥ लब्धवराः ब्रह्मणेति शेषः । अक्षयाः चूर्णीकरणेपि पुनरुत्पत्तिमत्त्वेन क्षयरहिता इत्यर्थः । दानवाः कालकेयाः । तत्र कालकेयसकाशात् । बहवः बह्वयः । " वोतो गुणवचनात् " इति पक्षे ङीषभावः ॥ ९—११ ॥ चतुर्विधबलानुगाः रथगजतुरगपदातिभेदेन चतुर्विधानि बलानि पृष्ठगानि येषां ते तथा ॥ १२ ॥ मृत्युदण्डेत्यादिश्लोकद्वयमेकान्वयं ॥ मृत्युदण्डः यमदण्डः स एव महाग्राहः महानक्रः यस्मिन् । शाल्मलयः कण्टकशाल्मलिवृक्षाकारायुधविशेषाः त एव द्रुमाः तैर्मण्डितं । मृत्युः यमः । प्रतिषेधितः युद्धादपक्रामितः ॥ १३—१४ ॥ सुयुद्धेनेत्यर्धं ॥ सुयुद्धेन स्वल्पयुद्धेनेत्यर्थः । विलोलिताः द्राविताः ॥ १५ ॥ क्षत्रियैः अनरण्यप्रभृतिभिः ॥ १६ ॥ न समो राघव इति । तेभ्योपि निहीनबलः सुखेन निग्राह्य इति भावः ॥ १७—१८ ॥ माहेश्वरं महेश्वरप्रीतिकरं ॥ १९ ॥ शक्तितोमरेत्यादिश्लोकत्रयमेकान्वयं ॥ २०—

नंश्लाघमानः ॥ ४ ॥ ति० नजयमात्रं अपितुसर्वंखापहारोपीत्याह—**विनिपात्येति** । इदंविमानं पुष्पकं ॥ ५ ॥ ति० शाल्मलिद्रुमैः यातनावृक्षैः मण्डितं । सागरोपिद्वीपेषुवृक्षमण्डितोभवति ॥ १३ ॥ ति० एवंदिव्यंजयमुक्त्वाभौमंजयमाहुः—**क्षत्रियैरिति** ॥ १६ ॥

[पा०] १ क. ख. ग. ङ. च. ज—ट. विनिपात्यच. २ क. ख. ग. ङ. ज. झ. ट. महाबाहोवीर्यो. ३ घ. महाबलः. ४ घ. युध्वाविभोरत्नाकरेतदा. ५ च. छ. झ. ट. बह्वयोवैराक्षसाधिप. ६ अयंश्लोकःप्राचीनकोशेषुनदृश्यते. ७ क. ग. महाभागाश्चतुर्विध. ख. च. ञ. महाराज. ङ. झ. ट. महाभाग. ८ इदमर्धं ङ—ट. पाठेषुदृश्यते. ९ क. ख. घ.—ट. सुतोषिताः. १० क. ग. गुणोत्सेकैः. ११ ङ. च. छ. झ. ञ. ट. समरदुर्जयाः. १२ क. ख. ङ.—ट. महाराजइन्द्रजित्.

रुद्रादित्यमहाग्राहं मरुद्वसुमहोरगम् ॥ रथाश्वगजतोयौघं पदातिपुलिनं महत् ॥ २१ ॥
अनेन हि समासाद्य देवानां बलसागरम् ॥ गृहीतो दैवतपतिर्लङ्कां चापि प्रवेशितः ॥ २२ ॥
पितामहनियोगाच्च मुक्तः शम्बरवृत्रहा ॥ गतस्त्रिविष्टपं राजन्सर्वदेवनमस्कृतः ॥ २३ ॥
तमेव त्वं महाराज विसृजेन्द्रजितं सुतम् ॥ यावद्वानरसेनां तां सरामां नयति क्षयम् ॥ २४ ॥
राजन्नापदयुक्तेयमागता प्राकृताज्ञनात् ॥ हृदि नैव त्वया कार्या त्वं वधिष्यसि राघवम् ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तमः सर्गः ॥ ७ ॥

अष्टमः सर्गः ॥ ८ ॥

प्रहस्तादिभीरावणंप्रत्यात्मश्लाघनपूर्वकं रामादिवधप्रतिज्ञानेन समाश्वासनम् ॥ १ ॥

ततो नीलाम्बुदनिभः प्रहस्तो नाम राक्षसः ॥ अब्रवीत्प्राञ्जलिर्वाक्यं शूरः सेनापतिस्तदा ॥ १ ॥
देवदानवगन्धर्वाः पिशाचपतगोरगाः ॥ न त्वां धर्षयितुं शक्ताः किं पुनर्वानरा रणे ॥ २ ॥
सर्वे प्रमत्ता विश्वस्ता वञ्चिताः स्म हनूमता ॥ न हि मे जीवतो गच्छेज्जीवन्स वनगोचरः ॥ ३ ॥
सर्वां सागरपर्यन्तां सशैलवनकाननाम् ॥ करोम्यवानरां भूमिमाज्ञापयतु मा भवान् ॥ ४ ॥
रक्षां चैव विधास्यामि वानराद्रजनीचर ॥ नागमिष्यति ते दुःखं किंचिदात्मापराधजम् ॥ ५ ॥
अब्रवीत्तु सुसंक्रुद्धो दुर्मुखो नाम राक्षसः ॥ इदं न क्षमणीयं हि सर्वेषां नः प्रधर्षणम् ॥ ६ ॥
अयं परिभवो भूयः पुरस्यान्तःपुरस्य च ॥ श्रीमतो राक्षसेन्द्रस्य वानरेण प्रधर्षणम् ॥ ७ ॥
अस्मिन्मुहूर्ते हत्वैको निवर्तिष्यामि वानरान् ॥ प्रविष्टान्सागरं भीममम्बरं वा रसातलम् ॥ ८ ॥

॥ २१ ॥ दैवतपतिः इन्द्रः ॥ २२—२३ ॥ विसृज प्रेषय । यावन्नयति नेष्यति ॥ २४ ॥ अयुक्ता असंभाविता । प्राकृतात् क्षुद्रात् हनुमतः ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तमः सर्गः ॥ ७ ॥

एवं मन्त्रिभिः सहसंमन्त्र्य भूयोभिहिते सकलसचिवप्रधानः प्रहस्तः स्वाभिमतमर्थं राज्ञे निवेदयति—तत इति ॥ १—२ ॥ हनुमतः पौरुषं प्रत्यक्षतो दृष्ट्वा कथमेवमुच्यत इत्यत्राह—सर्व इति ॥ विश्वस्ताः परिभवितुमस्मान् कोपि न शक्त इति विश्वस्ताः विस्रब्धाः । प्रासादिकशत्रुपरिभवो न न्यूनतामापादयतीतिभावः ॥ ३—४ ॥ आत्मापराधः सीताहरणरूपो व्यतिक्रमः ॥ ५ ॥ हि यस्माद्वानरेण कृतमिदं कर्म सर्वेषां नः प्रधर्षणरूपं । भूयः तदुपरि पुरस्यान्तःपुरस्य च परिभवरूपं । अथच राक्षसेन्द्रस्य प्रधर्षणरूपं । अतो न क्षमणीयमित्यर्थः ॥ ६—७ ॥ ततः किं करिष्यसीत्यत आह—अस्मिन्निति ॥ ८—९ ॥

स० दैवतपतिः इन्द्रः । लङ्कायां तत्रापिकारागृहइतिशेषः । सागरमित्यर्धर्चादिः । अतोमहदितिपूर्वश्लोकस्थविशेषणंयुक्तं । " दीप्तानलार्कद्युतिमप्रमेयं " इत्यत्रप्रमेयदीपिकायामप्रमेयत्वस्यद्युताविवमहदित्यस्यबहुव्रीहिघटकपुलिनपदार्थेवान्वयः । अतो नपुंसकत्वोपपत्तिः । महान्तमितिलिङ्गविपर्यासोवा । दैवतशब्दग्रहणेनतेषांनपुंसकत्वंध्वन्यते ॥ २२ ॥ ति० पितामहस्य चतुर्मुखस्यरुद्रस्य । यदिज्यातोलब्धवरः तन्नियोगात् तदाज्ञया । सर्वस्यजगतःप्रजापतिःपिता । भगवांश्चतुर्मुखरुद्रःपितामहः । भगवान्हिरण्यगर्भःप्रपितामहः । अतएवादित्यरुद्रवसुप्रधानाःसर्वश्राद्धदेवताःसर्वयज्ञदेवताः । ससुरासुरसर्वप्रजोपास्यस्यसर्वस्वभूताश्चेतिकतकः । शंबरंवृत्रंहन्ति सः ॥ स० सर्वदेवनमस्कृतइत्युपहासः ॥ २३ ॥ इतिसप्तमःसर्गः ॥ ७ ॥

रामानु० जीवतइत्यनादरेषष्ठी ॥ ३ ॥ रामानु० करोमि अचिरादेवकरिष्यामि । " वर्तमानसामीप्येवर्तमानवद्वा " इतिभविष्यदर्थेलट् ॥ स० करोमीत्यनेनलट्प्रयोगेण विलंबासहत्वंसूचयति ॥ ४ ॥ स० शौर्यमदेनरजनीचरेत्युक्तिः ॥ ५ ॥ ति० भूयः पुनः । पुरस्य अन्तःपुरस्यचार्यपरिभवोदाहरूपोनक्षमणीयइत्यनुषङ्गः । वानरेन्द्रप्रधर्षणं तज्जंराक्षसेन्द्रस्यदुःखं । अह-

[पा०] १ ग. घ. च. छ. ज. ञ. लंङ्कायांच. २ ङ. छ. झ. ञ. ट. नीलांबुदप्रख्यः. ३ झ ट. पुनर्मानवौ. ४ घ. वीरांश्चरजनीचरान्. ५ ङ. झ. ट. वानरेन्द्रप्रधर्षणं. ६ ङ. झ. ट. गत्वैको.

ततोऽब्रवीत्सुसंक्रुद्धो वज्रदंष्ट्रो महाबलः ॥ प्रगृह्य परिघं घोरं मांसशोणितरूषितम् ॥ ९ ॥
किं वो हनुमता कार्यं कृपणेन तपस्विना ॥ रामे तिष्ठति दुर्धर्षे ससुग्रीवे सलक्ष्मणे ॥ १० ॥
अद्य रामं ससुग्रीवं परिघेण सलक्ष्मणम् ॥ आगमिष्यामि हत्वैको विक्षोभ्य हरिवाहिनीम् ॥ ११ ॥
इदं ममापरं वाक्यं शृणु राजन्यदीच्छसि ॥ उपायकुशलो ह्येव जयेच्छत्रूनतन्द्रितः ॥ १२ ॥
कामरूपधराः शूराः सुभीमा भीमदर्शनाः ॥ राक्षसा वा सहस्राणि राक्षसाधिप निश्चिताः ॥ १३ ॥
काकुत्स्थमुपसंगम्य बिभ्रतो मानुषं वपुः ॥ सर्वे ह्यसंभ्रमा भूत्वा ब्रुवन्तु रघुसत्तमम् ॥ १४ ॥
प्रेषिता भरतेन स्म भ्रात्रा तव यवीयसा ॥ [तवागमनमुद्दिश्य कृत्यमात्ययिकं त्विति ॥]
स हि सेनां समुत्थाप्य क्षिप्रमेवोपयास्यति ॥ १५ ॥
ततो वयमितस्तूर्णं शूलशक्तिगदाधराः ॥ चापबाणासिहस्ताश्च त्वरितास्तत्र याम ह ॥ १६ ॥
आकाशे गणशः स्थित्वा हत्वा तां हरिवाहिनीम् ॥ अश्मशस्त्रमहावृष्ट्या प्रापयाम यमक्षयम् ॥ १७ ॥
एवं चेदुपसर्पेतामनयं रामलक्ष्मणौ ॥ अवश्यमपनीतेन जहतामेव जीवितम् ॥ १८ ॥
कौम्भकर्णिस्ततो वीरो निकुम्भो नाम वीर्यवान् ॥ अब्रवीत्परमक्रुद्धो रावणं लोकरावणम् ॥ १९ ॥
सर्वे भवन्तस्तिष्ठन्तु महाराजेन सङ्गताः ॥ अहमेको हनिष्यामि राघवं सहलक्ष्मणम् ॥
सुग्रीवं च हनूमन्तं सर्वानेव च वानरान् ॥ २० ॥
ततो वज्रहनुर्नाम राक्षसः पर्वतोपमः ॥ क्रुद्धः परिलिहन्वक्त्रं जिह्वया वाक्यमब्रवीत् ॥ २१ ॥
स्वैरं कुर्वन्तु कार्याणि भवन्तो विगतज्वराः ॥ एकोऽहं भक्षयिष्यामि तान्सर्वान्हरियूथपान् ॥ २२ ॥
स्वैःस्थाः क्रीडन्तु निश्चिन्ताः पिबन्तो मधुवारुणीम् ॥ २३ ॥

कृपणेन गूढसंचारप्रकटितभयेन । तपस्विना शोच्येन ॥ १०—११ ॥ तद्वाक्यं किमित्याकाङ्क्षायामुपायप्रतिपादकं वाक्यं वक्तुमादावुपायं प्रशंसति—उपायेति ॥ १२ ॥ विवक्षितमुपायमेवाह—कामरूपेत्यादिना ॥ निश्चिताः निश्चितवन्तः । राक्षसा वा सहस्राणीति । सहस्रशब्दस्य संख्येयपरत्वेपि शब्दस्वाभाव्यान्नपुंसकत्वं । किमिति ब्रूयुस्तत्राह—प्रेषिता इति ॥ अस्यान्ते इतिकरणं द्रष्टव्यं ॥ १३—१५ ॥ ते वयं तत्र समीपे याम । यामेति लोटि रूपं ॥ १६—१७ ॥ एवं कृते किं स्यादित्यत्राह—एवं चेदिति ॥ रामलक्ष्मणौ अनयं अस्मत्कृतकैतवापरिज्ञानेन विश्वासं यद्युपसर्पेतां ततस्तेन अपनीतेन अपनयेन । जीवितं जहतामेव । जह्यातामेवेत्यर्थः ॥ १८—१९ ॥ सर्व इत्यादि सार्धश्लोकमेकं वाक्यं ॥ २० ॥ तत इत्यादिसार्धश्लोकत्रयमेकान्वयं ॥ २१—२२ ॥ मधुवारुणीं मधुरूपां वारुणीं । रणकुञ्जरं रणाप्रधृष्यं । स्वःस्था इत्यमङ्गलोक्तिः

मेकएवगत्वाभीत्यासागरादीनपिप्रविष्टान्वानरान्हत्वा निवर्तयिष्यामि प्रधर्षणदुःखंनिवर्तयिष्यामि ॥ ७—८ ॥ रामानु० निवर्तिष्यामि निवर्तिष्ये ॥ ८ ॥ रामानु० तपस्विना तपस्व्याहारभूतफलाशिनेत्यर्थः ॥ ती० कृपणेन दीनेन । प्रकाशसंचारेभयाद्रात्रौकृतकार्येणवा । तपस्विना शोच्येन । हनुमताकिं । अलक्ष्यस्यतस्यहननेन नप्रयोजनमितिभावः । कृपणादिशब्दानांपारुष्यमात्रेतात्पर्यं । नत्वर्थे । मातृगाम्यादिगालिदानवत् । तर्हिकोहन्तव्यस्तत्राह—रामेतिष्ठति अहतेतिष्ठतिसतिकिमनेनहतेनेत्यर्थः ॥ १० ॥ ती० अथरामस्यवास्तवार्थस्तु लक्ष्मणंरामंविनेतिशेषः । सुग्रीवंहत्वा आगमिष्यामीतिसंबन्धः ॥ ११ ॥ ती० विवृतं स्पष्टं । वपुः धृत्वेतिशेषः ॥ १४ ॥ ति० सूक्तां ओष्ठप्रान्तं ॥ २१ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. दूषितं. २ ङ—ट. किंनो. ३ ङ. झ. ट. सुग्रीवेपि. ४ क. ज. रक्षसांवै. घ. च. छ. झ. ञ. ट. राक्षसानां. ५ झ. ञ. ट. विवृतं. ६ च. छ. ञ. ट. भरतेनैव. ७ इदमर्धप्राचीनकोशेषुनदृश्यते. ८ छ. ञ. ट. यामते. ९ क. ङ. छ—ट. सुग्रीवंसहनूमन्तंसर्वांश्चैवात्र. १० ङ. झ. ट. परिलिहन्सूक्तां. ११ क. ङ. झ. ट. तांसर्वांहरिवाहिनीं. १२ स्वस्थाःक्रीडन्त्वित्यर्धात्पूर्वं क. छ. पाठयोः ततोमहोदरःक्रुद्धोरावणंवाक्यमब्रवीत् इत्यर्धमधिकंदृश्यते. १३ क.—घ. छ.—ट. पिबन्तु. १४ ङ. झ. ट. मधुवारुणं.

अहमेको वधिष्यामि सुग्रीवं सहलक्ष्मणम् ॥ अङ्गदं च हनूमन्तं रामं च रणकुञ्जरम् ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः ॥ ९ ॥

विभीषणेनरावणंप्रति रामवधप्रतिज्ञानेनसायुधग्रहणंसरभससमुत्थितनिकुंभादिनिवारणपूर्वकं रामपराक्रमप्रशंसनेन तस्मिन्दण्डस्यदुष्करत्वोक्त्या वैपरीत्येऽनर्थप्राप्तिकथनपूर्वकं रामायसीताप्रत्यर्पणचोदना ॥ १ ॥ ततःसायंरावणेन विभीषणादिसर्वजनविसर्जनपूर्वकंस्वगृहंप्रतिगमनम् ॥ २ ॥

ततो निकुम्भो रभसः सूर्यशत्रुर्महाबलः ॥ सुप्तघ्नो यज्ञहा रक्षो महापार्श्वो महोदरः ॥ १ ॥
अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः ॥ इन्द्रजिच्च महातेजा बलवान्रावणात्मजः ॥ २ ॥
प्रहस्तोथ विरूपाक्षो वज्रदंष्ट्रो महाबलः ॥ धूम्राक्षश्चातिकायश्च दुर्मुखश्चैव राक्षसः ॥ ३ ॥
परिघान्पट्टिशान्प्रासाञ्शक्तिशूलपरश्वधान् ॥ चापानि च सबाणानि खड्गांश्च विपुलाञ्शितान् ॥ ४ ॥
प्रगृह्य परमक्रुद्धाः समुत्पत्य च राक्षसाः ॥ अब्रुवन्रावणं सर्वे प्रदीप्ता इव तेजसा ॥ ५ ॥
अद्य रामं वधिष्यामः सुग्रीवं च सलक्ष्मणम् ॥ कृपणं च हनूमन्तं लङ्का येन प्रधर्षिता ॥ ६ ॥
तान्गृहीतायुधान्सर्वान्वारयित्वा विभीषणः ॥ अब्रवीत्प्राञ्जलिर्वाक्यं पुनः प्रत्युपवेश्य तान् ॥ ७ ॥
अप्युपायैस्त्रिभिस्तात योर्थः प्राप्तुं न शक्यते ॥ तस्य विक्रमकालांस्तान्युक्तानाहुर्मनीषिणः ॥ ८ ॥
प्रमत्तेष्वभियुक्तेषु दैवेन प्रहृतेषु च ॥ विक्रमास्तात सिध्यन्ति परीक्ष्य विधिना कृताः ॥ ९ ॥

॥ २३–२४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टमः सर्गः ॥ ८ ॥

अथ निकुम्भमतमेवानुसरन्तः सर्वेपि प्रधाना अहमहमिकया समुत्थाय शत्रुवधोद्युक्ताः । तमुद्योगं नीतिशास्त्रज्ञो विभीषणः प्रतिषिद्धवानित्याह । तत इत्यादि श्लोकषट्कमेकं वाक्यं ॥ आदौ निकुम्भोपादानं निकुम्भमतानुसरणसूचनार्थं ॥ १–४ ॥ समुत्पत्य आसनेभ्यः समुत्थाय ॥ ५ ॥ प्रधर्षितेत्यनन्तरमितिकरणं द्रष्टव्यं ॥ ६ ॥ क्रियाभेदात्तानित्यस्य न पुनरुक्तिः ॥ ७ ॥ प्रहस्तादीनां प्रधानानां संनिहितत्वाद्रावणिं वा रावणं वा प्रत्युक्तिः । मध्ये क्वचित्सचिवान्प्रति वोक्तिः । विक्रमस्य नायमवसर इति दर्शयितुं सामान्येन विक्रमकालानाह—अप्युपायैरिति ॥ तातेत्यभिमुखीकरणाय संबोधनं । त्रिभिः सामदानभेदरूपैः । उपायैरपि योर्थः लब्धुं न शक्यते तस्य सिद्धये । तान् नीतिशास्त्रप्रसिद्धान् । विक्रमकालान् युक्तानाहुः । तदुक्तं कामन्दकेन—" सामादीनामुपायानां त्रयाणां विफले नये । विनयेन्नयसंपन्नो दण्डं दण्ड्येषु दण्डभृत् " इति ॥ तथाच नायं दण्डस्य काल इत्युक्तं ॥ ८ ॥ न केवलं दण्डस्याकालिकत्वं दण्ड्यत्वं च ते शत्रोर्नास्तीत्यभिप्रायेणाह—प्रमत्तेष्विति ॥ प्रमत्तेषु अनवधानेषु । विषयासक्तेष्वित्यर्थः । अभियुक्तेषु ज्ञानिषु । विरक्तेष्विति यावत् । यद्वा सामन्तैराक्रान्तेषु । दैवेन भाग्येन । प्रहृतेषु क्षीयमाणसंपत्स्वित्य-

ति० कतकरीत्यात्रसर्गाविच्छेदः ॥ २४ ॥ इत्यष्टमः सर्गः ॥ ८ ॥

ति० कौंभकर्णिरेवायंनिकुंभः परैःसहितस्तंपुनराह ॥ शि० निकुंभादिनामत्वेनबहूनांसत्त्वान्नपौनरुक्त्यं ॥ १ ॥ ति० विपुलांबुभान् निर्मलजलकान्तीन् ॥ स० विपुलांबुभान् घनजलप्रकाशान् ॥ ४ ॥ स० अभियुक्तेषु आप्रहवत्सु । प्रमत्तेष्वभियुक्तेष्वितिपदमेकंवा । प्रमत्तानां परप्रतिभटानां इषुभिरभियुक्तेषु । दैवेनप्रहृतेषु अदृष्टशून्येषु । सिध्यन्ति फलोपलंभकाभवन्ति ॥ ९ ॥

[पा०] १ क.—ट. साङ्गदंच. २ ङ. झ. ट. सर्वांश्चैवात्रवानरान्. घ रामंचखरसूदनं. ३ ङ.—ट. यज्ञकोपश्च. ४ घ—छ. झ. ञ. ट. महापार्श्वमहोदरौ. ५ ख. ङ. च. झ. ञ. ट. धूम्राक्षोथनिकुंभश्च. ६ क. ख. ग. विपुलाञ्शुभान्, ङ. झ. ञ. ट. विपुलांबुभान्, ७ ठ. प्रहृतेषु.

अप्रमत्तं कथं तं तु विजिगीषुं बले स्थितम् ॥ जितरोषं दुराधर्षं प्रधर्षयितुमिच्छथ ॥ १० ॥
समुद्रं लङ्घयित्वा तु घोरं नदनदीपतिम् ॥ कृतं हनुमता कर्म दुष्करं तर्कयेत वा ॥ ११ ॥
बलान्यपरिमेयानि वीर्याणि च निशाचराः ॥ परेषां सहसाऽवज्ञा न कर्तव्या कथंचन ॥ १२ ॥
किं च राक्षसराजस्य रामेणापकृतं पुरा ॥ आजहार जनस्थानाद्यस्य भार्यां यशस्विनः ॥ १३ ॥
खरो यद्यतिवृत्तस्तु रामेण निहतो रणे ॥ अवश्यं प्राणिनां प्राणा रक्षितव्या यथाबलम् ॥ १४ ॥
अयशस्यमनायुष्यं परदाराभिमर्शनम् ॥ अर्थक्षयकरं घोरं पापस्य च पुनर्भवम् ॥ १५ ॥
एतन्निमित्तं वैदेही भयं नः सुमहद्भवेत् ॥ आहृता सा परित्याज्या कलहार्थे कृतेन किम् ॥ १६ ॥
न नः क्षमं वीर्यवता तेन धर्मानुवर्तिना ॥ वैरं निरर्थकं कर्तुं दीयतामस्य मैथिली ॥ १७ ॥
यावन्न सगजां साश्वां बहुरत्नसमाकुलाम् ॥ पुरीं दारयते बाणैर्दीयतामस्य मैथिली ॥ १८ ॥
यावत्सुघोरा महती दुर्धर्षा हरिवाहिनी ॥ नावस्कन्दति नो लङ्कां तावत्सीता प्रदीयताम् ॥ १९ ॥

र्थः । चकाराद्बालवृद्धादिषु । विधिना नीतिशास्त्रोक्तरीत्या । परीक्ष्य मन्त्रिभिर्विचार्य । कृताःविक्रमाः विग्रहाः सिध्यन्ति । नान्यत्रेत्यर्थः । यथाह कामन्दकः— "बालो वृद्धो दीर्घरोगी तथा ज्ञातिबहिष्कृतः । भीरुको भीरुकजनो लुब्धो लुब्धजनस्तथा ॥ विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिमान् । अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः ॥ दैवोपहतकश्चैव दैवचिन्तक एव च । दुर्भिक्षव्यसनोपेतो बलव्यसनसंयुतः ॥ अदेशस्थो बहुरिपुर्युक्तोऽकालेन यश्च सः । सत्यधर्मव्यपेतश्च विंशतिः पुरुषा अमी ॥ एतैः सन्धिं न कुर्वीत विगृह्णीयात्तु केवलं " इति ॥ ९ ॥ रामस्तु न तादृश इत्याह—अप्रमत्तमिति ॥ अप्रमत्तं सावधानं । तुशब्दोऽवधारणे । बले स्थितं स्थिरबलमित्यर्थः । जितरोषं अकाले रोषरहितमित्यर्थः । इच्छथेति । पूर्वं रावणंप्रतिवचनं । अत्र सर्वान्प्रतीति बहुवचनं ॥ १० ॥ राम इदानीं दैवानुपहत इत्यत्र उदाहरणमाह—समुद्रमिति ॥ ११ ॥ परेषां रामादीनां ॥ १२ ॥ अनपराधिनि निष्कारणवैरकरणमप्यपरमनुचितमित्याह—किं चेत्यादि ॥ खरवध एव प्रथमापराध इत्याशङ्क्याह—खर इति ॥ दुर्वृत्ततया स्ववधप्रवृत्तखरवधे रामस्य नापकारगन्धोपीति भावः । निहतो यदि तत्र को दोष इति शेषः । दोषाभावमाह—अवश्यमिति ॥ १३—१४ ॥ प्रथमं रामेणापकृतत्वेप्यनेकदोषमूलं सीतापहरणं न कार्यमित्याह—अयशस्यमिति ॥ पुनर्भवं जन्मान्तरं । मूर्त्यन्तरमितियावत् ॥ १५ ॥ एवं सामान्यतः परदाराभिमर्शनस्यानर्थहेतुत्वमुक्त्वा प्रकृते तद्दर्शयति—एतदिति ॥ एतस्मान्निमित्तादित्यर्थः । " निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम् " इति पञ्चम्यर्थे प्रथमा । अयशस्त्वादिहेतोर्वैदेह्याः सकाशात्सुमहद्भयं भवेत् । तर्हि किमिदानीं कर्तव्यं तत्राह—आहृतेति ॥ उत्तमं वस्तु कथं त्यक्तव्यं तत्राह—कलहार्थे कृतेन किमिति । कलहार्थे विषये कृतेन कर्मणा किमित्यर्थः । " अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने । व्यवहारे धने शास्त्रवस्तुहेतुनिवृत्तिषु " इति वैजयन्ती ॥ १६ ॥ बहुदोषप्रदर्शनपूर्वकं सीताप्रदानस्यावश्यकर्तव्यतामाह—न नः क्षममित्यादिना ॥ १७ ॥ यावद्दारयते दारयिष्यति । " यावत्पुरानिपातयोर्लट् " इतिभविष्यदर्थे लट् । राम इति शेषः ॥ १८ ॥ यावत् यदा । तावत्

जितरोषमित्यनेन पापाभावादैवोपहतत्वाभावउक्तः । इतरविशेषणत्रयेणान्योपरुद्धत्वाभावः । राक्षसाभिमुख्येनेच्छतेत्युक्तिः । अतएवोपरिनिशाचराइतिसंबोधनं ॥ ति० प्रकृतोविक्रमानर्हएवकालइत्याह—अप्रमत्तमिति । विजिगीषुं अनेनशश्वन्तरागहित्यं । बले दैवबले स्थितं । जितरोषमित्यनेन मौर्ख्यराहित्यं । दुराधर्षत्वेन दिव्यास्त्रसंपदुक्ता ॥ १० ॥ ती० यस्मात्तस्मादित्यध्याहार्यं । यस्मादवश्यंप्राणिनांप्राणारक्षितव्याः तस्मादितिव्यक्तं । स्वयमेवरामंहन्तुंप्रवृत्तःखरस्तुनिहतोयदि । एतेन पुराराक्षसराजस्यकिमपकृतं नापकृतमित्यर्थः ॥ १४ ॥ ती० पुनस्तदुपरिपापस्यच भवं उत्पत्तिस्थानं ॥ १५ ॥ ति० एतन्निमित्तं एतस्मा-

[पा०] १ क. ङ. च. छ. ञ. ट. गतिंहनुमतोलोकेकोविद्यात्तर्कयेतवा. २ ङ. ञ. सरामेणहतो. ३ क. ख. च. छ. ज. ञ. वैदेह्याभयं. ४ क. च. छ. ञ. पुनस्त्याज्या. ५ ङ. ञ. ट. नतुक्षमं. ६ घ. रामोदीयतां.

विनश्येद्धि पुरी लङ्का शूराः सर्वे च राक्षसाः ॥ रामस्य दयिता पत्नी स्वयं न यदि दीयते ॥ २० ॥
प्रसादये त्वां बन्धुत्वात्कुरुष्व वचनं मम ॥ हितं पथ्यमहं ब्रूमि दीयतामस्य मैथिली ॥ २१ ॥
पुरा शरत्सूर्यमरीचिसन्निभान्नवाग्रपुङ्खान्सुदृढान्नृपात्मजः ॥
सृजत्यमोघान्विशिखान्वधाय ते प्रदीयतां दाशरथाय मैथिली ॥ २२ ॥
त्यजस्व कोपं सुखधर्मनाशनं भजस्व धर्मं रतिकीर्तिवर्धनम् ॥
प्रसीद जीवेम सपुत्रबान्धवाः प्रदीयतां दाशरथाय मैथिली ॥ २३ ॥
विभीषणवचः श्रुत्वा रावणो राक्षसेश्वरः ॥ विसर्जयित्वा तान्सर्वान्प्रविवेश स्वकं गृहम् ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे नवमः सर्गः ॥ ९ ॥

दशमः सर्गः ॥ १० ॥

विभीषणेन रावणगृहमेत्यतंप्रति सीतानयनकालप्रभृतिलङ्कायामनर्थसूचकदुर्निमित्तप्रादुर्भावनिवेदनपूर्वकं तत्प्रायश्चित्तत्वेन रामायसीताप्रत्यर्पणचोदना ॥ १ ॥ रावणेन विभीषणंप्रति रामस्यालक्ष्यत्वोक्त्या तद्वचनानादरणेनगृहंप्रति तद्विसर्जनम् ॥ २ ॥

ततः प्रत्युषसि प्राप्ते प्राप्तधर्मार्थनिश्चयः ॥ राक्षसाधिपतेर्वेश्म भीमकर्मा विभीषणः ॥ १ ॥
शैलाग्रचयसंकाशं शैलशृङ्गमिवोन्नतम् ॥ सुविभक्तमहाकक्ष्यं महाजनपरिग्रहम् ॥ २ ॥

तदा । नावस्कन्दति न रुणद्धि ॥ १९ ॥ शूरा इति । विनश्येयुरिति व्यत्ययेन योजनीयं । स्वयं न यदि दीयत इति पाठः ॥ २० ॥ ब्रूमि ब्रवीमि । अस्य अस्मै ॥ २१ ॥ अग्रं शल्यं पुङ्खं शरमूलं नवे अग्रपुङ्खे यषां ते । अतएव सुदृढान् पुरा सृजति स्रक्ष्यति । दृशरथस्यायं दाशरथः । " तस्येदम् " इति संबन्धार्थे अण् । संबन्धश्चात्र पुत्रत्वं । दाशरथाय दाशरथये ॥ २२ ॥ रतिः सुखं ॥ २३ ॥ विभीषणेति । सर्वे प्रातरालोचयिष्याम इति विभीषणप्रमुखान् विसृज्येत्यर्थः ॥ २४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने नवमः सर्गः ॥ ९ ॥

अथ हितपरो विभीषणः सत्त्वोत्तरकाले रावणस्योपदेष्टुं तद्गृहं गत इत्याह—तत इत्यादि ॥ प्रविवेश महाद्युतिरित्यन्तमेकं वाक्यं । ततः प्रत्युषसीत्यनेन लङ्कादाहानन्तरमेकमहो गतमित्यवगम्यते । प्राप्तधर्मार्थनिश्चयः सीताप्रदानमेवास्माकं धर्मोर्थश्चेति कृतनिश्चयः । भीमकर्मा । परमार्थतो रावणस्य हितत्वेप्यनभिमतार्थविज्ञापनरूपसाहसकरणात् भीमकर्मेत्युक्तिः । राक्षसाधिपतेः अग्रजस्य । आलयं निवासभूतं । वेश्म प्रविवेशेति संबन्धः । शैलाग्रचयसंकाशं गिरिशिखरचयसदृशं । अनेकशृङ्गयुक्तत्वादितिभावः । शैलशृङ्गमिवोन्नतमित्यौन्नत्ये दृष्टान्तः । सुविभक्तमहाकक्ष्यं सुष्ठु विभक्तमहाप्रकोष्ठं । " कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने " इत्यमरः । महा-

रकारणात् ॥ १६ ॥ शि० यदिस्वयंरामस्यपत्नीनदीयते तर्हि लङ्काविनश्येत् । अतोदीयतां ॥ २० ॥ इतिनवमःसर्गः ॥ ९ ॥

ती० " राक्षसाधिपतेर्वेश्मप्रविवेशविभीषणः " इतिपाठेतु उत्तरषट्कस्यैतत्प्रपञ्चार्थत्वात् " अग्रजस्यालयंवीरःप्रविवेशमहाद्युतिः " इत्यनेनापौनरुक्त्यं । " राक्षसाधिपतेर्वेश्मभीमकर्माविभीषणः " इतिपाठे राक्षसाधिपतेरग्रजस्यालयं निवासभूतं वेश्मेत्यन्वयः । अस्मिन्पाठेतु वेश्मालययोरपौनरुक्त्यं । " आकेशग्रहणान्मित्रमहितेभ्योनिवारयेत् " इतिन्यायेनसर्वात्मनाहितमेववक्तव्यमित्यभिप्रेत्यरावणानभिमतहितोपदेशप्रवृत्तत्वाद्भीमकर्मेत्युक्तिः ॥ स० भीमकर्मा वैरिणां । भीमंरावणंप्रति कर्म

[पा०] १ ङ. ज.—ट. दीयतांपत्नी. २ क. ख. ग. ङ. झ. ट. तथ्यंत्वहं. च. छ. ज. ञ. तथ्यमहं. घ. तथ्यंत्वहंब्रूयां- ३ ख. ङ. च. छ. ञ. ट. शरान्सूर्य. ४ ज. पुङ्खान्विशिखान्. ख. पुङ्खान्सुशितान्. ५ ख. ङ. च. छ. ञ ट. त्यमोघान्नि. शितान्. ६ झ. ट. त्यजाशुकोपं. ७ घ. गृहंशुभं. ८ ख. घ. प्रविवेश.

मतिमद्भिर्महामात्रैरनुरक्तैरधिष्ठितम् ॥ राक्षसैश्चाप्तपर्याप्तैः सर्वतः परिरक्षितम् ॥ ३ ॥
मत्तमातङ्गनिश्वासैर्व्याकुलीकृतमारुतम् ॥ शङ्खघोषमहाघोषं तूर्यनादानुनादितम् ॥ ४ ॥
प्रमदाजनसंबाधं प्रजल्पितमहापथम् ॥ तप्तकाञ्चननिर्यूहं भूषणोत्तमभूषितम् ॥ ५ ॥
गन्धर्वाणामिवावासमालयं मरुतामिव ॥ रत्नसञ्चयसंबाधं भवनं भोगिनामिव ॥ ६ ॥
तं महाभ्रमिवादित्यस्तेजोविस्तृतरश्मिवान् ॥ अग्रजस्यालयं वीरः प्रविवेश महाद्युतिः ॥ ७ ॥
पुण्यान्पुण्याहघोषांश्च वेदविद्भिरुदाहृतान् ॥ शुश्राव सुमहातेजा भ्रातुर्विजयसंश्रितान् ॥ ८ ॥
पूजितान्दधिपात्रैश्च सर्पिर्भिः सुमनोक्षतैः ॥ मन्त्रवेदविदो विप्रान्ददर्श सुमहाबलः ॥ ९ ॥
स पूज्यमानो रक्षोभिर्दीप्यमानः स्वतेजसा ॥ आसनस्थं महाबाहुर्ववन्दे धनदानुजम् ॥ १० ॥
स राजदृष्टिसंपन्नमासनं हेमभूषितम् ॥ जगाम समुदाचारं प्रयुज्याचारकोविदः ॥ ११ ॥
स रावणं महात्मानं विजने मन्त्रिसन्निधौ ॥ उवाच हितमत्यर्थं वचनं हेतुनिश्चितम् ॥ १२ ॥
प्रसाद्य भ्रातरं ज्येष्ठं सान्त्वेनोपस्थितक्रमः ॥ देशकालार्थसंवादी दृष्टलोकपरावरः ॥ १३ ॥

जनैः विद्वद्भिः परिगृह्यत इति महाजनपरिग्रहं । तदधिष्ठितमित्यर्थः । महामात्रैः प्रधानैः । " महामात्राः प्रधानाः स्युः" इत्यमरः । आप्तपर्याप्तैः कार्यकरणदक्षैरिति महामात्रविशेषणं । व्याकुलीकृतमारुतं चक्रवातीकृतवायुं । शङ्खघोषमहाघोषं शङ्खघोषेण महान् घोषो यस्य तथोक्तं । तूर्यनादानुनादितं तूर्यनादेन सञ्जातप्रतिध्वनिं । प्रजल्पितमहापथं सञ्जातमहाकलकलमहामार्गं । तप्तकाञ्चननिर्यूहं द्रुतकनकमयमत्तवारणं । "निर्यूहो मत्तवारणः" इत्यमरः । भूषणोत्तमैः तोरणवितानप्रभृतिभिर्भूषितं । गन्धर्वाणामिवावासं । तौर्यत्रिकमुखरितत्वादितिभावः । मरुतां देवानां । आलयमिव । निरवधिकैश्वर्यसंपन्नत्वादितिभावः। रत्नसंचयैः संबाधं संपूर्णम् । अतएव भोगिनां सर्पाणां । भवनमिव स्थितं । तेजोविस्तृतरश्मिवान् तेजः शरीरकान्तिस्तदेव विस्तृतरश्मिरस्यास्तीति तथा । महाद्युतिः महाप्रभः । अभ्रमिवेत्युपमया तद्भवनं विभीषणस्य तेजोपहारकमितिव्यज्यते । एवं गृहोत्कर्षवर्णनं रावणस्यानीत्या सर्वमेकपदे नष्टमिति ज्ञापनाय ॥ १—७ ॥ पुण्यान् पुण्यकरान् । पुण्याहघोषान् पुण्याहमन्त्रघोषान् । विजयसंश्रितान् विजयफलकानित्यर्थः । उदाहृतान् उच्चारितान् ॥ ८ ॥ दधिपात्रैः दधियुक्तपात्रैः । मन्त्रवेदविदः मन्त्रब्राह्मणविदः । मन्त्राः कर्मसु विनियुक्ता इषेत्वेत्यादयः । कर्मचोदना ब्राह्मणानि ॥ ९ ॥ पूज्यमानः श्लाघ्यमानः ॥ १० ॥ दृष्टिसंपन्नं दृष्ट्या निवेदितमित्यर्थः । समुदाचारं जयशब्दप्रयोगादिसमुदाचारं । जगाम आरुरोह ॥ ११ ॥ विजने मन्त्रिव्यतिरिक्तजनरहिते । हेतुनिश्चितं हेतुभिर्युक्तिभिर्निश्चितं ॥ १२ ॥ प्रसाद्य स्तुतिवचनेन प्रसन्नं कृत्वा । सान्त्वेनोवाचेत्यन्वयः । उपस्थितक्रमः ज्ञातवचनक्रमः । देशकालार्थसंवादी देशकालप्रयोजनानुसारी । दृष्टलोकपरावरः लोके ये परावरे उत्कृष्टापकृष्टे ते दृष्टे ज्ञाते येन तथोक्तः । रामस्य धार्मिकत्वं रावणस्याधार्मिकत्वं च जानातीत्यर्थः

हितबोधनरूपंयस्येतिवा ॥ १ ॥ स० मत्तमातङ्गनिश्वासैरित्यनेन गजानांबाहुल्येनतच्छ्वासप्रादुर्भावेणतिरोगच्छतिवायुरितिभावः ॥ १४ ॥ ती० निर्यूहो द्वारं " निर्यूहःशिखरेद्वारे " इतिविश्वः । ति० प्रजल्पितमहापथं । आदिकर्मणिक्तः । प्रातःकालत्वारब्धजल्पमहामार्गं ॥५॥ ती० गन्धर्वाणामिवालयं तौर्यत्रिकमुखरितत्वात् । आलयंमरुतामिवऐश्वर्यातिशयात् । भवनंभोगिनामिव परैःप्रवेष्टुमशक्यत्वात् । आलयापेक्षयातमित्युक्तिः ॥ ६ ॥ ती० तेजोविस्तृतरश्मिवान् तेजः स्वशरीरस्थं तेनविस्तृताः विसृता विश्रुतावा रश्मयोयस्य । अनेनपाठत्रयंसूचितं । ति० तेजोविस्तृतरश्मिवान् तेजोभिर्विस्तृतारश्मयोयेषांसन्ति । तादृशमणिमानित्यर्थः । स० तेजोविस्तृतरश्मिमान् तेजः विस्तृतंयेषुतेरश्मयोऽस्यसन्तीतितथा । रश्मिमान् रश्मिवान् ॥ ७ ॥

[पा०] १ घ. मैहामात्यैः. २ ङ. ञ. ट. राक्षसैराप्त. घ. राक्षसैश्चापि. ३ क—ङ. ञ. ट. तूर्यसंबाधनादितं. ज. तूर्यसंघानुनादितं. च. छ. ञ. तूर्यसन्नाद. ४ क. संजल्पित. ५ क. बहुरत्नसमाकीर्णं. ६ क. पूजितान्घृतपात्रैश्चसुगन्धैः. च. छ. पूजितांस्तिलपात्रैश्च. ७ क. घ. संपूज्यमानः. ८ ङ. ञ. ट. दीप्यमानं. ९ ख. आस्थानस्थं. १० क. महाबाहुंववन्दे.

यदाप्रभृति वैदेही [1]संप्राप्तेमां पुरीं तव ॥ तदाप्रभृति दृश्यन्ते निमित्तान्यशुभानि नः ॥ १४ ॥
सस्फुलिङ्गः सधूमार्चिः सधूमकलुषोदयः ॥ मन्त्रै[2]संधुक्षितोप्यग्निर्न सम्यगभिवर्धते ॥ १५ ॥
अग्निष्ठेष्वग्निशालासु तथा ब्रह्मस्थलीषु च ॥ [3]सरीसृपाणि दृश्यन्ते हव्येषु च पिपीलिकाः ॥ १६ ॥
गवां पयांसि स्कन्नानि विमदा वीर[4]कुञ्जराः ॥ दीनमश्वाः प्रहेषन्ते [5]न च ग्रासाभिनन्दिनः ॥ १७ ॥
खरोष्ट्राश्वतरा राजन्भिन्नरोमाः स्रवन्ति नः ॥ न स्वभावेऽवतिष्ठन्ते विधानैरपि चिन्तिताः ॥ १८ ॥
वायसाः सङ्घशः क्रूरा व्याहरन्ति समन्ततः ॥ समवेताश्च दृश्यन्ते विमानाग्रेषु सङ्घशः ॥ १९ ॥
गृध्राश्च परिलीयन्ते पुरीमुपरि पिण्डि[6]ताः ॥ उपपन्नाश्च सन्ध्ये द्वे व्याहरन्त्यशिवं शिवाः ॥ २० ॥
क्रव्यादानां मृगाणां च पु[7]रुरद्वारेषु [8]सङ्घशः ॥ श्रूयन्ते वि[9]पुला घोषाः सं[10]विस्फूर्जथुनिःस्वनाः ॥ २१ ॥
तदेवं [11]प्रस्तुते कार्ये प्रायश्चित्तमिदं क्षमम् ॥ रो[12]चते यदि वैदेही राघवाय प्रदीयताम् ॥ २२ ॥
इदं च यदि वा मोहाल्लोभाद्वा व्याहृतं मया ॥ तत्रापि च महाराज न [13]दोषं कर्तुमर्हसि ॥ २३ ॥

॥ १३ ॥ प्रथमं रावणसंवादाय दुर्निमित्तानि दर्शयति—यदेति ॥ यदाप्रभृति यत्कालमारभ्य । क्रियाविशेषणमिदं । एवं तदाप्रभृतीत्यपि । अशुभानि निमित्तानि अशुभसूचकनिमित्तानि ॥ १४ ॥ सस्फुलिङ्गः अग्निकणसहितः । सधूमार्चिः धूमाकुलज्वालासहितः । सधूमकलुषोदयः धूमेन कलुषः उदयः आविर्भावो धूमकलुषोदयः तेन सहितः सधूमकलुषोदयः । शान्तः शान्तो ज्वलन्नित्यर्थः । मन्त्रसन्धुक्षितः मन्त्रवद्भिर्हविर्भिर्योजितः ॥ १५ ॥ अग्नयस्तिष्ठन्त्यत्रेत्यग्निष्ठाः महानसाः तेषु । अग्निशालासु अग्निहोत्रशालासु । ब्रह्मस्थलीषु वेदाध्ययनस्थानेषु । सरीसृपाणि सर्पाः । लिङ्गव्यत्यय आर्षः । हविष्येषु देवताभ्यो देयेषु आज्यपुरोडाशादिषु ॥ १६ ॥ स्कन्नानि शुष्काणि " स्कन्दिर्गतिशोषणयोः " इति धातोर्निष्ठा । " रदाभ्यां निष्ठातो नः पूर्वस्य च दः " इति नत्वं । वीरकुञ्जराः मत्तगजाः । प्रहेषन्ते हेषारवं कुर्वन्ति । हेषा अश्वशब्दः ॥ १७ ॥ अश्वतराः महाखराः । भिन्नरोमाः स्वस्थानात् भिन्नरोमाणः गलितरोमाणः ऊर्ध्वरोमाणो वा । अकारान्तत्वमार्षं । स्रवन्ति अश्रूणि मुञ्चन्ति । विधानैः चिकित्साभिः । चिन्तिताः अनुसंहिताः । चिकित्सिता अपीत्यर्थः । स्वभावे प्रकृतौ । नावतिष्ठन्ते प्रकृतिस्था न भवन्तीत्यर्थः ॥ १८ ॥ संघशो व्याहरन्ति संघशः समवेता इति च संबन्धः ॥ १९ ॥ पुरीमुपरि उपर्युपरिगृहेष्वित्यर्थः । पिण्डिताः मण्डलीभूताः सन्तः । परिलीयन्ते श्लिष्यन्ति । सन्ध्ये द्वे, अत्यन्तसंयोगे द्वितीया । शिवाः जम्बुकाः । उपपन्नाः नगरसमीपं प्राप्ताः ॥ २० ॥ क्रव्यादानां मांसभक्षकाणां । मृगाणां श्वादीनामित्यर्थः । सविस्फूर्जथुनिःस्वनाः विस्फूर्जथुः अशनिघोषः तद्रूपस्वनसहिताः ॥ २१ ॥ एवमुपस्थितदुर्निमित्तजातस्य प्रायश्चित्तं सीताप्रदानमेवेत्याह—तदेवमिति ॥ तत् दुर्निमित्तदर्शनात् । तत्सूच्ये कार्ये पराजये । एवं लङ्कादहनादिरूपेण प्रस्तुते प्रसक्ते सति । क्षमं अशुभनिवारणसमर्थं । इदं प्रायश्चित्तम् । इदंशब्दार्थमाह—वैदेहीति ॥ २२ ॥ एवमनभिमतभाषणेन राजा कुप्यतीति समाधत्ते—इदमिति ॥ मोहात् कार्यतत्त्वापरिज्ञानात् । लोभात् जीवनलोभाद्वापि । यदि व्याहृतं । तत्रापि तथापि । मयि

ति० अग्निर्मथनादिनोत्पत्तिकाले सधूमकलुषोदयः धूमकलुषोयउदयस्तत्सहितः । उत्पत्त्यनन्तरंप्रणयनकालेसस्फुलिङ्गःसधूमार्चिः । स० मन्त्रसंधहुतः विहितमन्त्रसमूहहुतोप्यग्निः सधूमार्चिः सस्फुलिङ्गः सधूमकलुषोदयः । मन्त्रसङ्कहुतइत्यनेन कर्त्रादिवैगुण्यनिमित्तोनाग्नेरयंभावः । किंतु नोऽनर्थसूचकइतिसूचयति ॥ १५ ॥ ति० नवग्रासाभिनन्दिनः । अनेनकृतभोजनाअपिबुभुक्षिताइति सूच्यते ॥ १७ ॥ स० वायसाःसमन्ततोव्याहरन्ति । तेचसाधारणाःकेचनेत्याह—क्रूराःसङ्घशइति । नकेवलंव्याहरन्ति । किंतु संघशः विमानाग्रेषुसमवेताश्चदृश्यन्ते । रामरामास्पर्शमात्रमाहात्म्येनास्मन्नेत्रशातनंजातं लंचजागृहीतिसूचयितुमदानेचभा-

[पा०] १ क.—घ. च.—ट. संप्राप्तेह. २ ङ. ञ. ट. मन्त्रसंधहुतो. ३ छ. सरीसृपाश्च. ४ ङ. छ. झ. ञ. ट. वरकुञ्जराः. ५ झ. नवग्रासाभि. ६ ङ. ज. झ. ञ. पीडिताः. घ. विष्ठिताः. ७ ग. ङ. ज. झ. पुरीद्वारेषु. ८ क. घ. छ. ञ. सर्वशः. ९ क. घ. तुमुलाघोषाः. १० क. ख. ग. ङ. झ. ट. सविस्फूर्जित. घ. तत्रस्फूर्जित. ११ गं. निश्चिते. १२ क. ख. ञ. रोचतेवीर. ग. ङ. झ. ट. रोचयेवीर. १३ क. दोषंगन्तुं.

अयं च दोषः सर्वस्य जनस्यास्योपलक्ष्यते ॥ रक्षसां राक्षसीनां च पुरस्यान्तःपुरस्य च ॥ २४ ॥
श्रावणे चास्य मन्त्रस्य निवृत्ताः सर्वमन्त्रिणः ॥ अवश्यं च मया वाच्यं यदृष्टमपि वा श्रुतम् ॥ २५ ॥
संप्रधार्य यथान्यायं तद्भवान्कर्तुमर्हति ॥ २६ ॥
इति स मन्त्रिणां मध्ये भ्राता भ्रातरमूचिवान् ॥ रावणं राक्षसश्रेष्ठं पथ्यमेतद्विभीषणः ॥ २७ ॥
हितं महार्थं मृदु हेतुसंहितं व्यतीतकालायतिसंप्रतिक्षमम् ॥
निशम्य तद्वाक्यमुपस्थितज्वरः प्रसङ्गवानुत्तरमेतदब्रवीत् ॥ २८ ॥
भयं न पश्यामि कुतश्चिदप्यहं न राघवः प्राप्स्यति जातु मैथिलीम् ॥
सुरैः सहेन्द्रैरपि सङ्गतः कथं ममाग्रतः स्थास्यति लक्ष्मणाग्रजः ॥ २९ ॥
इतीदमुक्त्वा सुरसैन्यनाशनो महाबलः संयति चण्डविक्रमः ॥
दशाननो भ्रातरमाप्तवादिनं विसर्जयामास तदा विभीषणम् ॥ ३० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे दशमः सर्गः ॥ १० ॥

एकादशः सर्गः ॥ ११ ॥

रावणेन मन्त्रकरणायसभाप्रवेशः ॥ १ ॥ रावणाज्ञयादूताहूतैराक्षसैर्नानायानैरावणसभाप्रवेशः ॥ २ ॥ रथारोहणेनसभागतेनविभीषणेन रावणप्रणामपूर्वकं तन्नियोगेनपरमासने समुपवेशनम् ॥ ३ ॥

स बभूव कृशो राजा मैथिलीकाममोहितः ॥ असंमानाच्च सुहृदां पापः पापेन कर्मणा ॥ १ ॥

दोषं अपराधं । कर्तुं नार्हसि ॥ २३ ॥ अयं दोषः पूर्वोक्तदुर्निमित्तसूचितोऽनर्थः । सर्वस्योपलक्ष्यते । संबन्धसामान्ये षष्ठी । सर्वेणापि लक्ष्यत इत्यर्थः ॥ २४ ॥ ग्रहस्तादिषु विद्यमानेषु भवतैव किमुच्यते तत्राह—श्रावणे चेति ॥ तेषां त्वच्चित्तमात्रानुसारित्वादितिभावः । श्रावणे त्वां प्रति विज्ञापने च । त्वं पुनः कथं वक्तुं प्रगल्भसे तत्राह—अवश्यमिति ॥ भ्रातृत्वादिति भावः ॥ २५ ॥ संप्रधार्येत्यर्धं ॥ यथान्यायं यथायोग्यं । संप्रधार्य मनस्येव निश्चित्य । तत् संप्रधारितं कार्यं ॥ २६ ॥ इत्येतदूचिवानित्यन्वयः । ऊचिवान् उक्तवान् । "क्वसुश्च" इति लिटः क्वसादेशः ॥ २७ ॥ महार्थं प्रयोजनव्याप्तं । मृदु सान्त्वपूर्वं । हेतुसंहितं युक्तियुक्तं । व्यतीतकालायतिसंप्रतिक्षमं व्यतीतकालः भूतकालः । आयतिः भविष्यत्कालः । संप्रति वर्तमानकालः । तत्र क्षमं । अकीर्तिनाशकत्वेन सीतापहरणप्रायश्चित्तत्वेनवाप्यतीतकालक्षमं । सुखवर्धकत्वेन वर्तमानकालक्षमं । धर्मावहत्वेनायतिक्षमं । उपस्थितज्वरः प्राप्तक्रोध इत्यर्थः । प्रसङ्गवान् परिगृहीतार्थेभिनिवेशवान् ॥ २८ ॥ भयं भयजनकं पुरुषं । रामो युद्धेन सीतां प्राप्स्यतीति पूर्वं विभीषणोक्तस्य परिहारमाह—सुरैरिति । कथं तिष्ठति स्थास्यति । स्थातुमेव न शक्तः कुतो योत्स्यति कुतस्तरां सीतां प्राप्स्यतीति भावः ॥ २९ ॥ राघवं तृणीकृत्य कथमेवमाहेत्याशङ्क्य तन्निदानं दर्शयति—इतीति ॥ नाशनः हिंसकः । चण्डविक्रमः उग्रविक्रमः । आप्तवादिनं युक्तवादिनं ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने दशमः सर्गः ॥ १० ॥

अथ परेद्युर्विभीषणाद्युपदेशेतिचिन्ताव्याकुलस्य

व्यनर्थसूचयितुंचैवमितिभावः ॥ १९ ॥ शि० ननुत्वदुक्तमसंमतंअस्यारंभेसर्वेषांनिवृत्तत्वात् सज्जनहिंसावत् । इदमयुक्तंसर्वासंमतत्वाद्विषभक्षणवदित्यतआह—प्रापणइति । अस्यमन्त्रस्य प्रापणे बोधने । सर्वेमन्त्रिणोनिवृत्ताः त्वद्भयादपगताः । एतेन निवृत्तानामपिमदुक्तंसंमतमेवेतिसूचितं । तेनोहितानुमानयोर्बाधस्वरूपासिद्ध्यादिप्रस्तत्वंध्वनितं । ननुत्वासंमतंबुद्ध्वैवगताःनतुमद्भयादित्यतआह—यत्दृष्टंस्वतोज्ञातं अथवाश्रुतं अन्यतोज्ञातं । तन्मयावाच्यं भवत्संनिधौनिवेदनीयं ॥ २५ ॥ इतिदशमःसर्गः ॥ १० ॥

[पा०] १ ख. घ. ङ. झ. ट. प्रापणे. २ ङ. च. झ. ञ. ट. इत्येवमुक्त्वा.

[[1]अतीव कामसंपन्नो वैदेहीमनुचिन्तयन् ॥] अतीतसमये काले तस्मिन्वै युधि रावणः ॥
अमात्यैश्च सुहृद्भिश्च [2]मन्त्रकालममन्यत ॥ २ ॥
स हेमजालविततं मणिविद्रुमभूषितम् ॥ उपगम्य विनीताश्वमारुरोह महारथम् ॥ ३ ॥
तमास्थाय रथश्रेष्ठं महामेघसमस्वनम् ॥ प्रययौ राक्षसश्रेष्ठो दशग्रीवः सभां प्रति ॥ ४ ॥
असिचर्मधरा योधाः सर्वायुधधरास्तथा ॥ राक्षसा राक्षसेन्द्रस्य पुरतः संप्रतस्थिरे ॥ ५ ॥
नानाविकृतवेषाश्च नानाभूषणभूषिताः ॥ पार्श्वतः पृष्ठतश्चैनं परिवार्य ययुस्ततः ॥ ६ ॥
रथैश्चातिरथाः शीघ्रं मत्तैश्च वरवारणैः ॥ अनूत्पेतुर्दशग्रीवमाक्रीडद्भिश्च वाजिभिः ॥ ७ ॥
गदापरिघहस्ताश्च शक्तितोमरपाणयः ॥ परश्वधधराश्चान्ये तथाऽन्ये शूलपाणयः ॥ ८ ॥
ततस्तूर्यसहस्राणां संजज्ञे निस्वनो महान् ॥ तुमुलः शङ्खशब्दश्च सभां गच्छति रावणे ॥ ९ ॥
स नेमिघोषेण [3]महान्सहसाऽभिविनादयन् ॥ राजमार्गं श्रिया जुष्टं प्रतिपेदे महारथः ॥ १० ॥
विमलं [4]चातपत्राणं प्रगृहीतमशोभत ॥ पाण्डरं राक्षसेन्द्रस्य पूर्णस्ताराधिपो यथा ॥ ११ ॥
[5]हेममञ्जरिगर्भे च शुद्धस्फटिकविग्रहे ॥ चामरव्यजने [6]चास्य रेजतुः सव्यदक्षिणे ॥ १२ ॥
ते कृताञ्जलयः सर्वे रथस्थं पृथिवीस्थिताः ॥ राक्षसा राक्षसश्रेष्ठं शिरोभिस्तं ववन्दिरे ॥ १३ ॥
राक्षसैः स्तूयमानः [7]सञ्जयाशीर्भिररिन्दमः ॥ आससाद महातेजाः सभां [8]सुविहितां [9]शुभाम् ॥ १४ ॥

रावणस्य निर्णयहेतुमन्त्रकरणाय सभाप्राप्तिं दर्शयति —स बभूवेत्यादि ॥ पापः पापी । " गुणवचनेभ्यो मतुपो लुगिष्टः " इति मतुपो लुक् । असंमानात् अनादरात् । सुहृदां विभीषणादीनां । कर्तरि षष्ठी । विभीषणोक्ते तूष्णींस्थितत्वेन प्रहस्तादीनामप्यनादरः सिद्ध एव । पापेन कुत्सितेन सीतापहरणरूपेण कर्मणा । हेतौ तृतीया । मैथिलीकाममोहितइति हेतुगर्भविशेषणं । तथाच मैथिलीविषयकाममोहात् सुहृदनादरात् पापहेतुसीताहरणाच्च कृशः । चिन्ताकुलो बभूवेत्यर्थः ॥ १ ॥ तस्मिन्काले मन्त्रयोग्यकाले । अतीतसमये अतीतावसरे सति । युधि च सत्यां युद्धे च प्राप्ते सति । अमात्यैश्च सुहृद्भिश्च मन्त्रस्य प्राप्तकालममन्यत । मुनिहृदयं तु कालेऽतीतसमये रावणायुःकालेऽतीते सति । युधि अमात्यादिभिः सहात्मानं । प्राप्तकालं प्राप्तमृत्युं । अमन्यतेति । वैप्रसिद्धौ ॥ २ ॥ हेमजालविततं स्वर्णमयगवाक्षव्याप्तं । स्वर्णसमूहनिर्मितमिति वा । विनीताश्वं शिक्षिताश्वयुक्तं । उपगम्य प्रदक्षिणीकृत्य ॥ ३ ॥ सभां मन्त्रशालां ॥ ४ ॥ चर्म खेटः ॥ ५ ॥ ततः रावणालयात् । नानाविकृतवेषाः नानाविधतया विशिष्य कृतालंकाराः । राक्षसा इति शेषः ॥ ६ ॥ आक्रीडद्भिः धारामण्डलगमनादिकं कुर्वद्भिः ॥ ७ ॥ अत्र प्रतिपदमन्य इत्यनुषञ्जनीयं । अनूत्पेतुरिति च ॥८॥ ततः स्वालयात् ॥ ९ ॥ नेमिः रथचक्रधारा ॥ १० ॥ विमलमिति । भासा विमलमित्यर्थः ॥ ११ ॥ हेममञ्जरिगर्भे हेमसूत्रगर्भे । इकारान्तत्वमार्षं । शुद्धस्फटिकविग्रहे शुद्धस्फटिकसदृशाकारे । चामरव्यजने चामररूपव्यजने । सव्यदक्षिणे सव्यदक्षिणयोः । " सर्वो द्वन्द्वो विभाषयैकवद्भवति " इत्येकवद्भावः ॥ १२-१३ ॥ सुविहितां सुष्ठुनिर्मितां ॥ १४ ॥

स० अतीतसमये अतीतोभवतिसमयःद्वादशमासात्मकःसीताप्राप्तौसंकेतरूपोयस्मिंस्तस्मिन्काले । अनुचिन्तयन् तत्प्राप्तिमितिशेषः । युधि युद्धविषये । अमात्यादिभिःसहप्राप्तकालंयोग्यमालोचनमित्यमन्यत । युधि युद्धे । अतीतसमये विभीषणोक्तदिशाप्रतिबद्धेसतिकाले । तत्कालेमन्त्रणं प्राप्तकालं योग्यमित्यमन्यतेतिवा । ती० वास्तवार्थेसबभूवेत्यादिश्लोकद्वयमेकंवाक्यं । अतीव कामसंपन्नः अतएवपापेनकर्मणा अथापिमैथिलीमनुचिन्तयन् । स्वेष्टदेवतात्वेनेतिशेषः । अतएव मैथिलीकाममोहितः मैथिलीभूत्योभविष्यामीतिचसंबन्धः ॥ भयमोहितः सुहृदामसंमानाच्चकृशोबभूव । मन्त्रकालंचामन्यतेतियोजना ॥ २ ॥ स० विनीताश्वं

[पा०] १ इदमर्धं क. ङ.—ट. पाठेषुदृश्यते. २ ग. ङ. ज.—ट. प्राप्तकालं. ३ घ. महान्दिशोदशविलोकयन्. ४ ङ—ट. निनादयन्. ५ ख. ङ. झ. ट. चातपत्रंच. ६ घ. हेमरत्नविचित्रेच. ७ क. ख. ग. ङ. च. झ. ञ. ट. तस्य. ८ घ. स्तूयमानोसौजया. ९ क. ख. च. ज. ञ. विरचितां. १० ङ. छ. झ. ट. तदा.

सुवर्णरजतस्थूणां[1] विशुद्धस्फटिकान्तराम् ॥ विराजमानो वपुषा रुक्मपट्टोत्तरच्छदाम् ॥ १५ ॥
तां पिशाचशतैः षड्भिरभिगुप्तां[2] सदा शुभाम् ॥ प्रविवेश महातेजाः सुकृतां विश्वकर्मणा ॥ १६ ॥
तस्यां[3] तु वैडूर्यमयं प्रियकाजिनसंवृतम् ॥ महत्सोपाश्रयं[4] भेजे रावणः परमासनम् ॥ १७ ॥
ततः शशासेश्वरव[5]त्ताँल्लघुपराक्रमान् ॥ समानयत मे क्षिप्रमिहैतान्राक्षसानिति ॥ १८ ॥
कृत्यमस्ति महज्जातं[6] समर्थ्यमिह नो महत् ॥ १९ ॥
राक्षसास्तद्वचः श्रुत्वा लङ्कायां परिचक्रमुः[7] ॥ अनुगेहमवस्थाय विहारशयनेषु च ॥
उद्यानेषु च रक्षांसि चोदयन्तो ह्यभीतवत् ॥ २० ॥
ते रथान्तु[8]चिरानेके दृप्तानेके पृथग्घयान् ॥ नागानन्येऽधिरुरुहुर्जग्मुश्चैके पदातयः ॥ २१ ॥
सा पुरी परमाकीर्णा रथकुञ्जरवाजिभिः ॥ संपतद्भिर्विरुरुचे गरुत्मद्भिरिवाम्बरम् ॥ २२ ॥
ते वाहनान्यवस्थाप्य यानानि विविधानि च ॥ सभां पद्भिः प्रविविशुः सिंहा गिरिगुहामिव ॥ २३ ॥
राज्ञः पादौ गृहीत्वा तु राज्ञा ते प्रतिपूजिताः ॥ पीठेष्वन्ये वृसीष्वन्ये भूमौ केचिदुपाविशन् ॥ २४ ॥
ते समेत्य सभायां वै राक्षसा राजशासनात् ॥ यथार्हमुपतस्थुस्ते रावणं राक्षसाधिपम् ॥ २५ ॥
मन्त्रिणश्च यथा[9] मुख्या निश्चयार्थेषु पण्डिताः ॥ अमात्याश्च गुणोपेताः सर्वज्ञा बुद्धिदर्शनाः ॥
समेयु[10]स्तत्र शतशः शूराश्च बहवस्तदा ॥ २६ ॥

सुवर्णेत्यादिश्लोकद्वयमेकान्वयं ॥ विशुद्धस्फटिकान्तरां निर्मलस्फटिकनिर्मितमध्यप्रदेशां । रुक्मपट्टोत्तरच्छदां कनकमयपट्टवस्त्रास्तरणां ॥ १५—१६ ॥ वैडूर्यमयं वैडूर्यप्रचुरं । प्रियकाजिनसंवृतं प्रियकमृगस्याजिनेन संवृतं । "प्रियको लोमभिर्युक्तो मृदूच्चमसृणैर्घनैः" इति वैजयन्ती । सोपाश्रयं सावष्टम्भं । सोपधानमिति यावत् ॥ १७ ॥ ईश्वरवत् राजार्हं । इह सभायां । एतान् एतन्नगरस्थान् । इति शशासेत्यन्वयः । तमेव प्रकारमाह—कृत्यमित्यर्धेन ॥ महद्यथा तथा समर्थ्यं यत्नेन निर्वाह्यं । जातं प्राप्तं । महत्कृत्यमस्तीति शशास । महद्भ्यो रामादिभ्यो जातमिति वा । महदित्यनेन तदानीं चारमुखेन रामादेः समुद्रतीरगमनं रावणो ज्ञातवानितिगम्यते ॥ १८—१९ ॥ राक्षसा इत्यादि सार्धश्लोकः । विहरमाणानीति शेषः । विहारो विहारस्थलं । विहारादिषु आस्थाय विहरमाणानि रक्षांसि । अभीतवत् अभीताः । चोदयन्तः चोदनार्थं लङ्कायामनुगेहं परिचक्रमुरित्यन्वयः ॥ २०—२१ ॥ गरुत्मद्भिः पक्षिभिः ॥ २२ ॥ वाहनानि शिबिकादीनि । यानानि अश्वादीनि । अवस्थाप्य बहिर्निक्षिप्य ॥ २३ ॥ अन्ये पुरोहितादयः । पीठेषु सुवर्णादिकृतासनेषु । अन्ये श्रोत्रियाः । वृसीषु दर्भमयासनेषु । केचित्पुत्रादयः । भूमौ सामान्यास्तरणमात्रयुक्तायां भूमौ ॥ २४ ॥ क्रियाभेदात्तच्छब्दद्वयं । उपतस्थुः समीपे तस्थुः । यथार्हं यथाक्रमम् ॥ २५ ॥ मन्त्रिणश्चेत्यादिसपादश्लोकः ॥ यथा यथाक्रमं । यथामुख्या इत्येकंपदं वा । मुख्याननतिक्रम्य

विनीताअश्वायस्थं ॥ ३ ॥ **रामानु०** ईश्वरवत् ईशानवत् । **स०** लघुपराक्रमान् शीघ्रपराक्रमान् । यद्वा परानुद्दिश्य आसम्यक् क्रमःपादविक्षेपःपराक्रमः । लघुःपराक्रमोयेषांतान् । जङ्गालानित्यर्थः ॥ १८ ॥ **रामानु०** कृत्यमिति । एकोमहच्छब्दः क्रियाविशेषणं । इहमहज्जातंकृत्यमस्ति । तत् महत् भूरियथातथा समर्थ्यं समर्थनीयं । कर्मणिघञ् । समर्थ्यमिहनोभवेदितिवा पाठः । पूर्वश्लोकान्तरस्थमितिकरणमत्रद्रष्टव्यं । इतिशशांसेतिसंबन्धः ॥ १९ ॥ **रामानु०** रथान्तचराः रथमध्यस्थिताः । जग्मुरित्यर्थः । ह्यानित्यत्राप्यधिरुरुहुरितिसंबध्यते । जग्मुरेकेपदातयः केचित्पदातयस्सन्तोजग्मुरितिसंबन्धः ॥ २१ ॥ **ति०** वृसी वृत्तासनं ॥ २४ ॥ **ति०** निश्चितार्थेषु । भावेनिष्ठा । आहिताग्न्यादिः । अर्थनिश्चयेष्वित्यर्थः । अमात्याः उपमन्त्रिणः

[**पा०**] १ घ. ङ. झ. ट. रजतास्तीर्णां. च. छ. ञ. रजताकीर्णां. २ ङ. झ. ञ. ट. सदाप्रभां. ३ ङ. झ. ञ. ट. तस्यास्स. क. ग. छ. तस्यांस. ख. तस्यांवैडूर्यरचितं. ४ झ. ट. महज्जानेकर्तव्यमितिशत्रुभिः. ५ क. ग. छ. ज. भवेत्. ६ ज. राक्षसावचनंश्रुत्वा. ७ ङ. झ. ट. रथान्तचराएकेदृप्तानेकेदृढान्हयान्. ८ क. ग. ङ.—ट. नागानेके. ९ घ. महामुख्याः १० घ. समेतास्तत्र.

सभायां हेमवर्णायां सर्वार्थस्य सुखाय वै ॥ रम्यायां राक्षसेन्द्रस्य समेयुस्तत्र सङ्घशः ॥
[राक्षसा राक्षसश्रेष्ठं परिवार्योपतस्थिरे] ॥ २७ ॥

ततो महात्मा विपुलं सुयुग्यं वरं रथं हेमविचित्रिताङ्गम् ॥
शुभं समास्थाय ययौ यशस्वी विभीषणः संसदमग्रजस्य ॥ २८ ॥
स पूर्वजायावरजः शशंस नामाथ पश्चाच्चरणौ ववन्दे ॥
शुकः प्रहस्तश्च तथैव तेभ्यो ददौ यथार्हं पृथगासनानि ॥ २९ ॥
सुवर्णनानामणिभूषणानां सुवाससां संसदि राक्षसानाम् ॥
तेषां परार्ध्यागरुचन्दनानां स्रजश्च गन्धाश्च ववुः समन्तात् ॥ ३० ॥
न चुक्रुशुर्नानृतमाह कश्चित्सभासदो नैव जजल्पुरुच्चैः ॥
संसिद्धार्थाः सर्व एवोग्रवीर्या भर्तुः सर्वे ददृशुश्चाननं ते ॥ ३१ ॥
स रावणः शस्त्रभृतां मनस्विनां महाबलानां समितौ मनस्वी ॥
तस्यां सभायां प्रभया चकाशे मध्ये वसूनामिव वज्रहस्तः ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकादशः सर्गः ॥ ११ ॥

द्वादशः सर्गः ॥ १२ ॥

कुंभकर्णादिषुसभामागतेषु रावणेनप्रहस्तंप्रति विशेषतोनगररक्षाचोदना ॥ १ ॥ तथा स्वकृतसीतानयनाद्यनुवादेनसह रामस्यसेनाभिःसहसागरतीरागमननिवेदनपूर्वकं तद्बधोचितमन्त्रकरणचोदना ॥ २ ॥ कुंभकर्णेन सक्रोधंरावणंप्रति सुहृद्भिः सहमन्त्रपूर्वकंसीताहरणस्यकर्तव्यत्वोक्त्या तद्विपरीत्यस्यानौचित्योक्तिपूर्वकं दर्पोद्रामवधप्रतिज्ञानेनसमाश्वासनम् ॥ ३ ॥

स तां परिषदं कृत्स्नां समीक्ष्य समितिंजयः ॥ प्रचोदयामास तदा प्रहस्तं वाहिनीपतिम् ॥ १ ॥

स्थिताः । अनव्ययत्वमार्षं । निश्चयार्थेषु अर्थनिश्चयेषु । अमात्याः कर्मणि सहायाः । मन्त्रिणः बुद्धिसहायाः । यद्वा अमा सह तिष्ठन्तीत्यमात्याः । "अव्ययात्त्यप्" । आप्ता इत्यर्थः । बुद्धिदर्शनाः । बुद्धिचक्षुषः शूरा इत्युत्तरशेषः । अन्यथा क्रियापदपौनरुक्त्यं ॥ २६ ॥ सुखाय क्षेमाय । क्षेमं विचारयितुं । " क्रियार्थोपपदस्य " इत्यादिना चतुर्थी ॥ २७ ॥ युग्याः अश्वाः । युगं वहन्तीति " तद्वहति रथयुगप्रासङ्गम् " इति यत् ॥ २८ ॥ नाम शशंस । अभिवादनमकरोदित्यर्थः । शुकः प्रहस्तश्चेति । ववन्दाते इत्यर्थः ॥२९॥ स्रजश्च गन्धाः स्रजां गन्धाः ॥ ३० ॥ न चुक्रुशुः न घोषं चक्रुः । न जजल्पुः नाक्रमोक्तीश्चक्रुः । सभासदः सभागताः । संसिद्धेत्यर्धे वृत्तभेदश्चिन्त्यः ॥३१॥ समितौ सङ्घे " सङ्घे सभायां समितिः " इत्यमरः । सभायां आस्थानमण्डपे ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकादशः सर्गः ॥ ११ ॥

अथ सर्वमेलनानन्तरं नगररक्षाविधानपूर्वकं स्वाभिमतानुसारेण रावणो मन्त्रमर्थयते—स तामित्यादि ॥ समितौ युद्धे जयतीति समितिंजयः । "संज्ञायां भृतृवृजि—" इत्यादिना खचि मुमागमः । तां पूर्वो-

---

॥ २६ ॥ ति० नामग्रहणपूर्वकंनमस्कारःकार्यइतिसदाचारः । व्यग्रचित्ततयाराज्ञःस्वागमनज्ञापनायवा ॥ स० ददौ रावणः । दृष्ट्वासूचयामासेतिभावः ॥ २९ ॥ स० संसिद्धार्थाः पूर्णमनोरथाः । भेदनोपायाविषयाइतिभावः ॥ ३१ ॥ स० प्रभया देहकान्त्या ॥ ३२ ॥ इत्येकादशःसर्गः ॥ ११ ॥

[पा०] १ इदमर्धं प्राचीनकोशेषुनदृश्यते. २ च. छ. ञ. वराहैर्जांबूनदचित्रितांगं. क. वराहैर्मेकंसुविचित्रितांगं. ३ क. घ. च. छ. ञ. रथं. ४ क. ङ. च. छ. झ. ञ. ट. स्रजांच. ५ ङ. झ. ट. प्रबोधयामास.

सेनापते यथा ते स्युः कृतविद्याश्चतुर्विधाः ॥ [1]योधानधिकरक्षायां तथा व्यादेष्टुमर्हसि ॥ २ ॥
स प्रहस्तः प्रणीतात्मा चिकीर्षन्राजशासनम् ॥ [2]विनिक्षिपद्बलं सर्वं बहिरन्तश्च मन्दिरे ॥ ३ ॥
ततो विनिक्षिप्य बलं [3]पृथङ्नगरगुप्तये ॥ प्रहस्तः प्रमुखे राज्ञो निषसाद जगाद च ॥ ४ ॥
[4]निहितं बहिरन्तश्च बलं बलवतस्तव ॥ कुरुष्वाविमनाः क्षिप्रं यदभिप्रेतमस्तु ते ॥ ५ ॥
[5]प्रहस्तस्य वचः श्रुत्वा राजा राज्यहिते रतः ॥ सुखेप्सुः सुहृदां मध्ये व्याजहार स रावणः ॥ ६ ॥
प्रियाप्रिये सुखं दुःखं लाभालाभौ हिताहिते ॥ धर्मकामार्थकृच्छ्रेषु यूयमर्हथ वेदितुम् ॥ ७ ॥
सर्वकृत्यानि युष्माभिः समारब्धानि सर्वदा ॥ मन्त्रकर्मनियुक्तानि न जातु विफलानि मे ॥ ८ ॥
स सोमग्रहनक्षत्रैर्मरुद्भिरिव वासवः ॥ भवद्भिरहमत्यर्थं वृतः श्रियमवाप्नुयाम् ॥ ९ ॥
अहं तु खलु सर्वान्वः समर्थयितुमुद्यतः ॥ कुम्भकर्णस्य तु स्वप्नान्नेममर्थमचोदयम् ॥ १० ॥
अयं हि सुप्तः षण्मासान्कुम्भकर्णो महाबलः ॥ सर्वशस्त्रभृतां मुख्यः स इदानीं समुत्थितः ॥११॥
इयं च दण्डकारण्याद्रामस्य महिषी प्रिया ॥ रक्षोभिश्चरितादेशादानीता जनकात्मजा ॥ १२ ॥
सा मे न शय्यामारोढुमिच्छत्यलसगामिनी ॥ त्रिषु लोकेषु चान्या मे न सीतासदृशी मता ॥१३॥
तनुमध्या पृथुश्रोणी शारदेन्दुनिभानना ॥ हेमबिम्बनिभा सौम्या मायेव मयनिर्मिता ॥ १४ ॥

क्तां । कृतविद्याः अभ्यस्तधनुर्विद्याः । चतुर्विधाः रथिकहस्तिपकसादिपदातिरूपेण चतुर्विधाः । अधिकरक्षायां पूर्वापेक्षया सावधानरक्षायां । यथा स्युः यथा जागरूकाः स्युः । तथा व्यादेष्टुमर्हसि । अत्र इतिकरणं बोध्यं ॥ २ ॥ सः सर्वेषु विद्यमानेष्वपि रावणविस्रम्भपात्रभूतः । प्रणीतात्मा निश्चितबुद्धिः । मन्दिरे रावणगृहे । विनिक्षिपत् विन्यक्षिपत् व्यधात् ॥ ३ ॥ प्रमुखे अग्रे ॥ ४ ॥ अविमनः स्वस्थहृदयः यदभिप्रेतं तत्कुरुष्व । तत् अभीष्टं ते अस्तु सिध्यतु ॥ ५ ॥ सुखेप्सुः कामपुरुषार्थेच्छुः । न विजयेच्छुः ॥ ६ ॥ मन्त्रणीयं वक्तुमनास्तेषामाभिमुख्यं संपादयितुं प्रथमं तान् प्रशंसति—प्रियाप्रिये इति ॥ धर्मकामार्थकृच्छ्रेषु धर्मकामार्थसङ्कटेषु विषये । धर्मादिष्विदानीं को वा सेव्य इति संदेहे तदनुष्ठानफलभूते । प्रियाप्रिये सुखदुःखसाधने वस्तुनी । सुखं दुःखं लाभालाभौ । लाभ इष्टप्राप्तिः अलाभः तन्नाशः तौ च । हिताहिते । हितं उत्तरकालफलवत् । अहितं तदितरत् ते च । वेदितुमर्हथ । प्रियाप्रियादिफलस्वरूपनिर्धारणाय धर्मादिसंदेहं निराकर्तुं समर्था इत्यर्थः ॥ ७ ॥ कथमर्हाम इत्यपेक्षायांतत्कार्यमुखेन दर्शयति—सर्वेति ॥ ८ ॥ इदानीमपि तथैवास्त्वित्याह—स सोमेति ॥ ग्रहाः सोमभिन्नाः सूर्यादयः । मरुद्भिः सोमादिभिन्नैर्देवैः ॥ ९ ॥ पूर्वोक्तस्यैवार्थस्य पुनरपि वक्ष्यमाणत्वात्तत्र पुनः कथने हेतुं दर्शयति—अहमिति ॥ तुरवधारणे । सर्वान् वः समर्थयितुं ज्ञापयितुं । उद्यतएव पूर्वमेवोद्यतः । किंतु कुम्भकर्णस्य स्वप्नाद्धेतोः इममर्थं नाचोदयं तस्य नावेदयं । अतः कथ्यत इत्यर्थः ॥ १० ॥ कुम्भकर्णस्य स्वप्नादित्युक्तमेव स्पष्टयति—अयमिति ॥ षण्मासानित्यत्यन्तसंयोगे द्वितीया । इदानीं समुत्थितः । अतः पूर्वं नावेदयमित्यर्थः ॥ ११ ॥ उत्तरत्र सीताप्रत्यर्पणं विना रामजयो विचार्यतामिति वक्तुकामस्तस्या दुस्त्यजत्वं दर्शयितुं तामेव स्तौति—इयमित्यादिना ॥ रक्षोभिश्चरितादेशात् जनस्थानादित्यर्थः । सा मयाऽनीतेत्युक्तिरजानन्तं कुम्भकर्णं प्रति ॥ १२ ॥ अलसगामिनी मन्दगामिनी । त्यज तामनिच्छन्तीं परिगृह्णेतरामित्यत्राह—त्रिष्विति ॥ १३ ॥ असदृशत्वमुपपादयति—तनुमध्येत्यादिना ॥ हेमबिम्बनिभा स्वर्णप्रतिमातुल्या ।

स० मन्दिरे गृहरूपनगरे । यद्वा मन्दिररक्षणानन्तरंपुररक्षणमितिपूर्वमन्दिरइत्युक्तिः । एतेनागच्छद्वयवैपुल्यंद्योत्यते ॥ ३ ॥ ति० राजहितैषिणः प्रहस्तस्येत्यन्वयः ॥ ६ ॥ स० षण्मासान् । विशेषणसमासः । षडितिभिन्नंवापदं । " कालाध्वनोः—"

[पा०] १ ङ.—ट. योधानगररक्षायां. क. योधान्नगररक्षार्थं. ख. योधान्नगररक्षार्थे. २ ग. ङ. छ.—ट. विनिक्षिप्यबलं. ३ ङ. झ. ट. सर्वंनगर. ४ क. विहितंचमयासर्वंबलवन्बलतस्तव. ५ क. ख. च—ट. मरुतो. ६ ज. प्रहस्तवचनं. ७ क. ङ—ट. राज्यहितैषिणः. ८ क. ग. ङ—ञ. सुखेदुःखेलाभालाभे. ९ ख. ग. ङ. ज—ट. श्चरितोद्देशात्. १० ङ. झ. ञ. ट. तथा.

सुलोहिततलौ श्लक्ष्णौ चरणौ सुप्रतिष्ठितौ ॥ दृष्ट्वा ताम्रनखौ तस्या दीप्यते मे शरीरजः ॥ १५ ॥
हुताग्नेरर्चिसंकाशामेनां सौरीमिव प्रभाम् ॥[दृष्ट्वा सीतां विशालाक्षीं कामस्य वशमेयिवान्] ॥१६॥
उन्नसं वदनं वल्गु विपुलं चारु लोचनम् ॥ पश्यंस्तदाऽवशस्तस्याः कामस्य वशमेयिवान् ॥ १७॥
क्रोधहर्षसमानेन दुर्वर्णकरणेन च ॥ शोकसंतापनित्येन कामेन कलुषीकृतः ॥ १८ ॥
सा तु संवत्सरं कालं मामयाचत भामिनी ॥ प्रतीक्षमाणा भर्तारं राममायतलोचना ॥ १९ ॥
तन्मया चारुनेत्रायाः प्रतिज्ञातं वचः शुभम् ॥ श्रान्तोऽहं सततं कामाद्यातो हय इवाध्वनि ॥ २० ॥
कथं सागरमक्षोभ्यमुत्तरन्ति वनौकसः ॥ बहुसत्त्वझषाकीर्णं तौ वा दशरथात्मजौ ॥ २१ ॥
अथवा कपिनैकेन कृतं नः कदनं महत् ॥ दुर्ज्ञेयाः कार्यगतयो ब्रूत यस्य यथामतिः ॥ २२ ॥
मानुषान्मे भयं नास्ति तथाऽपि तु विमृश्यताम् ॥ तदा देवासुरे युद्धे युष्माभिः सहितोऽजयम् ॥

सौम्या रम्या मायेव प्रतिक्षणमपूर्ववदाश्चर्यावहवस्तुवत् स्थिता ॥ १४ ॥ क्रमेणारोक्ष्यतीत्याशङ्क्य मन्मथो विलम्बं नसहत इत्याह—सुलोहिततेति ॥ सुप्रतिष्ठितौ समतलौ दृष्ट्वा । स्थितस्येति शेषः । शरीरजः कामः ॥ १५ ॥ सोपि निगृह्यतामित्याशङ्क्याह—हुतेत्यादि ॥ अर्धमेकं वाक्यं । अर्चिश्शब्दस्य इकारान्तत्वमार्षं । सौरीमिवप्रभामित्यस्य दृष्ट्वेत्यादिशेषपूरणेन संबन्धः ॥ १६ ॥ उन्नसं उन्नतनासिकं । "उपसर्गाच्च" इति नसादेशः । अवशः विवशः तदधीनः कथं निगृह्णीयामिति भावः । वल्गु सुन्दरं ॥ १७ ॥ कामवश्यत्वमेव विवृणोति—क्रोधेति ॥ क्रोधहर्षयोः समानेन क्रोधे हर्षे चैकरूपेण । दुर्वर्णकरणेन वैवर्ण्यकारिणा । शोकसंतापनित्येन शोके मनोव्यथायां संतापे शरीरपीडायां च नित्येन अनपायेन कामेन । कलुषीकृतः व्याकुलचित्तोस्मि ॥ १८ ॥ यद्येवं सा प्रसह्यापि शय्यामारोप्यतां तत्राह—सा त्विति ॥ संवत्सरं कालं संवत्सररूपं कालं । संवत्सराभ्यन्तरे रामो यदि नागतः तदा तथा करिष्यामीत्ययाचतेत्यर्थः । इदं चारोप्योक्तं । वस्तुतो रावणेनैव तथा प्रतिज्ञानादिति भावः ॥ १९ ॥ चारुनेत्राया इति प्रतिश्रवणहेतुः । नयनसौन्दर्यपारवश्येन तद्वचनमङ्गीकृतवानस्मीतिभावः । अध्वनि दीर्घमार्गे ॥ २० ॥ कथमेनामुपलप्स्यसे तामुपनेतुमुपागते सपरिकरेदाशरथावित्यत आह—कथमिति ॥ उत्तरन्ति उत्तरिष्यन्ति । सत्त्वानि झषव्यतिरिक्तजन्तवः ॥ २१ ॥ तर्हि किमिदानीं विचार्यं तत्राह—अथवेति ॥ यस्य यथा मतिः तथा ब्रूतेत्यर्थः ॥ २२ ॥ विभीषणमतव्यावृत्त्यर्थं स्वमतमाह—मानुषादिति ॥ सपादश्लो-

इतिद्वितीया ॥ ११ ॥ **शि०** ननुतर्हिकिमर्थंसंरोध्यतइत्यतआह—हुतेति । सौरीप्रभामिव एनांसीतां लब्ध्वेतिशेषः । तस्याःसीतायावदनंपश्यन् अवशःस्वतन्त्रोपियोरामः कामस्य तत्प्राप्तिविषयकोत्कटेच्छायाः । वशमेयिवान् सरामःक्रोधंकोपंहर्षयतिवर्धयति तेनसीतानिरोधेन समानंजीवनंयस्यतेन । दुर्वर्णस्य रामशरीरवैवर्ण्यस्य करणंयस्मिंस्तेन । शोकसंतापयोःनित्यंनियमेनस्थितिर्येनतेनकामेन कलुषीकृतः व्याप्तः । एतेन रामदुःखप्राप्तयेएवसीतानिरोधइतिध्वनितं । सार्धश्लोकद्वयमेकान्वयि ॥ **ति०** अवशोस्वाधीनएव तस्यावदनंपश्यन्नेयिवान् प्राप्तवान् । यत्किंचिद्विषयनिमित्तककोधहर्षकालयोरपिसमानेन तावप्यभिभूयान्तःप्रवृत्तेन । दुर्वर्णकरणेन कान्तिनाशकेन । तदप्राप्तिजयोःशोकसंतापयोः नित्येन नित्यप्रवर्तकेन ॥ १६—१८ ॥ ननुस्वनगरेस्थितायांतस्यांकिमित्येवंदुःखभोगोतआह—सात्विति । सातु संवत्सरंकालं तत्समाप्तिपर्यन्तं । रामंप्रतीक्षमाणा ममास्पर्शमयाचत । मयापि तथास्वीकृतिप्रतिज्ञातं । बलात्कारेशापान्मरणभियास्वेनैवकृतंसमयंतयाचितत्वेनब्रूतइत्यत्रवस्तुतत्वं । नहिसीतैवंयाचितुमर्हतीति । अतएव पूर्वं "सामेनशय्यामारोढुमिच्छत्यलसगामिनी" इतिसामान्येनैवोक्तं ॥ **शि०** ननुभर्तारंविनासाकथंजीवतीत्यतआह—सेति । भर्तारंप्रतीक्षमाणासा सीता संवत्सरं वर्षपर्यन्तं । कालं स्वजीवनसमयं मामयाचत अवदत् । **ती०** तर्ह्योदितआरभ्यप्रतिकूलयासीतयाकिंप्रयोजनंसात्यज्यतामित्याशंक्य "सामेनशय्यामारोढुमिच्छत्यलसगामिनी" इत्यवशादागतसत्यवचनसूचितंतदनुरागाभावंसंगोप्यस्वकृतस्यावधेस्तत्प्रार्थनापूर्वकत्वमारोप्याह—सात्वित्यादि । कालं अवधित्वेनायाचत ॥ १९ ॥ **स०** कामात् स्वप्रतिज्ञापरिपालननिमितसीतास्पर्शाभावजनितात् अहंश्रान्तः सततमध्वनियातो हयइव । रंभापुञ्जकस्थलीशापनिमित्तमरणभयात्तदस्पर्शइतिगूढोभिप्रायः ॥ २० ॥ **ति०** अतःकार्यगतयोदुर्ज्ञेयाः । तस्माद्यस्ययथामति यद्भाति तद्ब्रूत ॥ २२ ॥

[**पा०**] १ इदमर्धं क.—ट. पाठेषुनदृश्यते. २ क. ख. ग. ङ. झ. ञ. ट. स्तदवशः. घ. स्तद्वदनंतस्याः. ३ क. ङ—ट. मक्षोभ्यंतरिष्यन्ति. ४ झ. ञ. यथामति. ५ ङ. झ. ट. मानुषान्नो. ६ क. तथादेवासुरांश्चापियुष्माभिः.

ते मे भवन्तश्च तथा सुग्रीवप्रमुखान्हरीन् ॥ २३ ॥
परे पारे समुद्रस्य पुरस्कृत्य नृपात्मजौ ॥ सीतायाः पदवीं प्राप्तौ संप्राप्तौ वरुणालयम् ॥ २४ ॥
अदेया च यथा सीता वध्यौ दशरथात्मजौ ॥ भवद्भिर्मन्त्र्यतां मन्त्रः सुनीतं चाभिधीयताम् ॥२५॥
न हि शक्तिं प्रपश्यामि जगत्यन्यस्य कस्यचित् ॥ सागरं वानरैस्तीर्त्वा निश्चयेन जयो मम ॥ २६ ॥
तस्य कामपरीतस्य निशम्य परिदेवितम् ॥ कुम्भकर्णः प्रचुक्रोध वचनं चेदमब्रवीत् ॥ २७ ॥
[संप्रधार्यैव तत्कार्यं करणीयं त्वया विभो ॥ संप्रधार्य सहामात्यैः पूर्वमेव यथातथम्] ॥ २८ ॥
यदा तु रामस्य सलक्ष्मणस्य प्रसह्य सीता खलु सा इहाहृता ॥
सकृत्समीक्ष्यैव सुनिश्चितं तदा भजेत चित्तं यमुनेव यामुनम् ॥ २९ ॥
सर्वमेतन्महाराज कृतमप्रतिमं तव ॥ विधीयेत सहास्माभिरादावेवास्य कर्मणः ॥ ३० ॥
न्यायेन राजकार्याणि यः करोति दशानन ॥ न स संतप्यते पश्चान्निश्चितार्थमतिर्नृपः ॥ ३१ ॥
अनुपायेन कर्माणि विपरीतानि यानि च ॥ क्रियमाणानि दुष्यन्ति हवींष्यप्रयतेष्विव ॥ ३२ ॥
यः पश्चात्पूर्वकार्याणि कर्माण्यभिचिकीर्षति ॥ पूर्वं चापरकार्याणि न स वेद नयानयौ ॥ ३३ ॥

कमेकं वाक्यं । मानुषात् भयाभावे हेतुमाह—तदेति । अजयमिति च्छेदः । लङुत्तमैकवचनं । इन्द्रं जितवतो मे मनुष्यः कियानितिभावः । ते मे भवन्तश्च तथा । ते देवासुरे युद्धे जेतारो भवन्तः । तथा सहायभूताः । वर्तन्त इत्यर्थः । सुग्रीवप्रमुखान्हरीनित्युत्तरशेषः ॥ २३ ॥ प्राप्तौ ज्ञातवन्तौ । वरुणालयं समुद्रं संप्राप्तौ । प्राप्तुतां नाम का नः क्षतिरितिभावः ॥ २४ ॥ विमृश्यतामित्युक्तं विमर्शप्रकारं दर्शयति—अदेयेति ॥ मन्त्रो मन्त्र्यतां मन्त्रः क्रियतामित्यर्थः । सुनीतं सुनिश्चितं ॥ २५ ॥ मा भूद्रामस्य समुद्रतरणे तव जये वा शक्तिः तत्सहायस्यान्यस्य कस्यचित्स्यात्तत्राह—नहीति ॥ वानरैः सह सागरं तीर्त्वा । आगन्तुमिति शेषः । रामादन्यस्य शक्तिं न पश्यामि । अतो मम निश्चयेन जय इत्यन्वयः ॥२६॥ कामपरीतस्य कामेन विपरीतस्य । कामातुरतया विपरीतबुद्धेरित्यर्थः । परिदेवितं परिदेवनं । तद्वदसंगतभाषणमित्यर्थः ॥२७—२८॥ "मन्त्रिभिर्हितसंयुक्तैः समर्थैर्मन्त्रनिर्णये । सहितो मन्त्रयित्वा यः कर्मारम्भान्प्रवर्तयेत् " इत्युक्तोत्तममन्त्रयितृभावे " एकोर्थं विमृशन्नेको धर्मे प्रकुरुते मनः । एकः कार्याणि कुरुते तमाहुर्मध्यमं नरं" इत्युक्तमध्यममन्त्रयितृभावेपि नावस्थितोसीत्याह—यदेति ॥ यदा सकृत्समीक्ष्यैव स्वयमेव विचार्य । रामस्य सीता इहाहृता तदैव चित्तं कर्तृ यमुना यामुनं पर्वतमिव सुनिश्चितं सुनिश्चयम् भजेत खलु । स एवास्माभिः सह विचारकालः । इदानीं विचारणं गते जले सेतुबन्धनमिति भावः॥२९॥ तदा कृते किं स्यादित्यत्राह—सर्वमिति ॥ कृतमिति कर्मणि निष्ठा । एतत्कृतं सर्वं मन्त्रकर्म । अस्य कर्मणः सीताहरणरूपस्य । आदावेव यदि विधीयेत तदा अप्रतिमं समञ्जसं स्यादित्यर्थः ॥ ३० ॥ आदौ विचार्य कृतस्य साफल्यप्रदर्शनपुरःसरमविचार्यकृतस्य फलवैपरीत्यं दर्शयति श्लोकद्वयेन—न्यायेनेति ॥ न्यायेन विचारणेन ॥ ३१ ॥ अनुपायेन क्रियमाणानि कर्माणि विपरीतानि विपर्यस्तानि यानि तानि च दुष्यन्ति दोषवन्ति च भवन्ति । न केवलं निष्फलानि प्रत्युतानर्थकराण्यपिभवन्तीत्यर्थः । अप्रयतेषु अशुचिषु अपात्रेषु । दीयमानानीति शेषः ॥ ३२ ॥ अकालकृतं मन्त्रकरणमनुचितमित्याह—य इति ॥ पूर्वकार्याणि पूर्वं कर्तव्यानि मन्त्रकर्माणि । अपरकार्याणि उत्तरकालकर्तव्यकर्मारम्भान् । पूर्वं मन्त्रवि-

ती० नहिशक्तिमित्यस्यवास्त्वर्थस्तु । अन्यस्यशक्तिंनपश्यामि । रामंविनेतिशेषः । एवंनिश्चयेसतिममजयोनेत्यन्वयः ॥ २६ ॥
ति० यदा सलक्ष्मणस्यरामस्यसीतासकृत्समीक्ष्यैव तात्कालिकापातविचारंकृत्वैवप्रसह्यहृता । तदैव तेचित्तं यमुना यामुनंह्रदमिव सुनिश्चितंभजेत निश्चयभजनार्हं । यथायमुनापृथिव्यामवतारसमयएव स्वह्रदंपूरयति कालान्तरेतुसमुद्रंगतत्वात्तज्जलस्यतत्पूरणासंभवः । एवमस्माभिःसहविचारस्यसएवकालः । इदानींत्वनर्थनिश्चयोजातएवेतिविचारोनिष्फलइतिक्रोधजाव्यङ्ग्योक्तिः ॥ २९ ॥

[पा०] १ घ. स्तर्तुं. २ अयंश्लोकः. घ. पाठेदृश्यते. ३ घ. पश्चात्सुखीहिभवतिप्रभो.

चपलस्य तु कृत्येषु प्रसमीक्ष्याधिकं बलम् ॥ क्षिप्रमन्ये प्रपद्यन्ते क्रौञ्चस्य खमिव द्विजाः ॥ ३४ ॥
त्वयेदं महदारब्धं कार्यमप्रतिचिन्तितम् ॥ दिष्ट्या त्वां नावधीद्रामो विषमिश्रमिवामिषम् ॥ ३५ ॥
तस्मात्त्वया समारब्धं कर्म ह्यप्रतिमं परैः ॥ अहं समीकरिष्यामि हत्वा शत्रूंस्तवानघ ॥ ३६ ॥
अहमुत्सादयिष्यामि शत्रूंस्तव विशांपते ॥ यदि शक्रविवस्वन्तौ यदि पावकमारुतौ ॥
तावहं योधयिष्यामि कुबेरवरुणावपि ॥ ३७ ॥
गिरिमात्रशरीरस्य महापरिघयोधिनः ॥ नर्दतस्तीक्ष्णदंष्ट्रस्य बिभियाद्वै पुरन्दरः ॥ ३८ ॥
पुनर्मां स द्वितीयेन शरेण निहनिष्यति ॥ ततोऽहं तस्य पास्यामि रुधिरं काममाश्वस ॥ ३९ ॥
वधेन वै दाशरथेः सुखावहं जयं तवाहर्तुमहं यतिष्ये ॥
हत्वा च रामं सह लक्ष्मणेन खादामि सर्वान्हरियूथमुख्यान् ॥ ४० ॥
रमस्व कामं पिब चाम्यवारुणीं कुरुष्व कार्याणि हितानि विज्वरः ॥
मया तु रामे गमिते यमक्षयं चिराय सीता वशगा भविष्यति ॥ ४१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्वादशः सर्गः ॥ १२ ॥

चारात्पूर्वं ॥ ३३ ॥ इदानीमसमीक्ष्यकारिणो बलमपि निरर्थकमित्याह—चपलस्येति ॥ यद्वा प्राप्तामप्यनीतिं बलेन समीकरिष्यामीत्यत्राह—चपलस्येति ॥ कृत्येषु क्षिप्रं चपलस्य असमीक्ष्यकारिणः । बलमधिकमाभिमुख्येन जेतुमशक्यम् । समीक्ष्य विचार्य । अन्ये शत्रवः । खं रन्ध्रम् प्रपद्यन्ते । असमीक्ष्यकरणरूपावसरं लब्ध्वा अभिभवन्तीत्यर्थः । द्विजाः हंसाः । अलङ्घ्यस्यक्रौञ्चस्य क्रौञ्चाख्यपर्वतस्य । लङ्घनाय खं रन्ध्रंयथाप्रपद्यन्ते तद्वदित्यर्थः । क्रौञ्चस्यौन्नत्येनालङ्घ्यत्वात् । सुब्रह्मण्यशक्तिविदारणकृतरन्ध्रेण हंसास्तमतिक्रम्य गच्छन्तीति प्रसिद्धिः ॥ ३४ ॥ सापायं च त्वत्कृतं कर्मेत्याह—त्वयेति ॥ महत् दुष्करं । सापायमित्यर्थः । अप्रतिचिन्तितं अनालोचितं । इदं सीताहरणरूपंकार्यं । सापायत्वमेवाह—दिष्ट्येति ॥ ३५ ॥ सर्वमेतन्महाराजेत्युपक्रम्योक्तमुपसंहरति—तस्मादिति ॥ तर्हि का गतिरित्यपेक्षायां मयि जीवति कस्ते भार इत्याह—अहमिति । अनघेति । त्वं तु निर्व्यसनोभवेत्यर्थः । समीकरिष्यामि नीत्यनीती तुल्ये करिष्यामीत्यर्थः ॥ ३६ ॥ तदेवाह—अहमिति सार्धश्लोकः ॥ विशांपते प्रजानां पते । अतिमानुषवैभवौ तौ कथं जय्यौ तत्राह—यदीति । तौ दशरथात्मजौ । शक्रविवस्वन्तौ यदि स्यातां तथापीत्यर्थः ॥ ३७ ॥ स्वस्य योधनसामर्थ्यविशेषं दर्शयति—गिरीति ॥ गिरिमात्रशरीरस्य गिरिप्रमाणदेहस्य । "प्रमाणे द्वयसचूदघ्नञ्मात्रचः" इति मात्रच्प्रत्ययः । पञ्चम्यर्थे षष्ठी ॥ ३८ ॥ शरवर्षिणो रामस्य पुरतः कथं स्थातुं शक्तस्तत्राह—पुनरिति ॥ सः रामः । पुनर्मां प्रथममेकेन शरेण निहत्य पुनरपि द्वितीयेन शरेण मां हनिष्यति । ततः तावदेवेत्यर्थः । अत्राश्लीलमपि ध्वन्यते । मां द्वितीयेन शरेणावश्यंनिहनिष्यति । तस्य रामस्य । ततः तस्माद्धननात् । कर्तरिषष्ठी । रुधिरं स्वरुधिरं । पास्यामि । कामं अत्यर्थं । आश्वस निश्चसेति ॥ ३९ ॥ आत्मानमरक्षन्परघातीवीरो न श्लाघ्य इति न्यायेन परवत्स्वस्यापि वधे न कोप्यतिशय इत्यत्राह—वधेनेति ॥ अत्राप्यर्थान्तरं । वधेन स्वविनाशेन । दाशरथेः सुखावहं जयं तव सकाशादाहर्तुं यतिष्ये । रामं हत्वा रामं गत्वा । " हन हिंसागत्योः " इति धातुः । खादामि किं जीवामि किमिति काकुरनुसन्धेया ॥ ४० ॥ रमस्वेति । अत्राप्यर्थान्तरं । मया रामे विषये अक्षयं यथा भवति तथा गमिता प्रापिता सीता रामस्य वशगा भविष्यति । रमस्वेत्यादौ काकुः ॥ ४१ ॥ इति श्रीगो-

तीo पुनरित्यादिश्लोकत्रयस्यवास्तवार्थस्तु । रणमूर्धनिस्खकर्तव्यंविज्ञापयति । पुनरितिशेषः । सः रामः । मामेकेनशरेणप्रहृत्य पुनर्द्वितीयेनशरेणनिहनिष्यति । ततः ततःप्रागेव तस्य रामस्यसंबन्धिवानराणामितिशेषः । रुधिरंपास्यामिकाममाश्वस ॥ ३९ ॥ तीo मयारामेविषये यमक्षयंगमितेसति सीता अवशं अस्य विष्णुरूपरामस्यवशमागमिष्यतीतिसंबन्धः ॥४१॥ इतिद्वादशःसर्गः ॥१२॥

[पाo] १ ङ. ञ. ट. छिद्रमन्ये. २ छ. ञ. मुत्पाटयिष्यामि. ३ क. च. छ. ञ. शितशूलधरस्यच.

त्रयोदशः सर्गः ॥ १३ ॥

महापार्श्वेन कुंभकर्णवचनाकर्णनकुपितरावणप्रहर्षणाय सदृष्टान्तोपन्यासं बलात्कारेणसीतोपभोगचोदना ॥ १ ॥ रावणेन सम्भावंतंप्रति स्वकृतपुञ्जकस्थलीहठोपभोगलब्धब्रह्मशापस्यहठोपभोगप्रतिबन्धकत्वनिवेदनपूर्वकं रामजयेकुंभकर्णादियोजनसूचकतद्वचनोत्तरतयास्वपराक्रमवर्णनपूर्वकमितरनैरपेक्ष्येण स्वस्यरामादिपराजयसामर्थ्योक्तिः ॥ २ ॥

रावणं क्रुद्धमाज्ञाय महापार्श्वो महाबलः ॥ मुहूर्तमनुसंचिन्त्य प्राञ्जलिर्वाक्यमब्रवीत् ॥ १ ॥
यः खल्वपि वनं प्राप्य मृगव्यालसमाकुलम् ॥ न पिबेन्मधु संप्राप्तं स नरो बालिशो भवेत् ॥ २ ॥
ईश्वरस्येश्वरः कोस्ति तव शत्रुनिबर्हण ॥ रमस्व सह वैदेह्या शत्रूनाक्रम्य मूर्धसु ॥ ३ ॥
बलात्कुक्कुटवृत्तेन वर्तस्व सुमहाबल ॥ आक्रम्याक्रम्य सीतां वै तथा भुङ्क्ष्व रमस्व च ॥ ४ ॥
लब्धकामस्य ते पश्चादागमिष्यति यद्भयम् ॥ प्राप्तमप्राप्तकालं वा सर्वं प्रतिसहिष्यसि ॥ ५ ॥

विन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्वादशः सर्गः ॥ १२ ॥

अथ रावणस्य दुर्मन्त्रिमतानुसारित्वमाह—रावणमित्यादि ॥ क्रुद्धं कुम्भकर्णोक्तनयापरिज्ञानवचनेनेत्यर्थः । मुहूर्तमनुसंचिन्त्य रावणक्रोधनिवारणोपायं विचार्येत्यर्थः ॥ १ ॥ खलुर्वाक्यालंकारे । दुष्करं सीताहरणं श्रमेण कृत्वा तत्संभोगमकुर्वाणस्त्वं क्षौद्राकाङ्क्षयाऽतिगहनं वनं प्रविश्य तदपिवञ्चनइवमूढोसीतिभावः ॥ २ ॥ शत्रुषु विद्यमानेष्वधर्मावहमिदंकथं कुर्यामित्यत्राह—ईश्वरस्येति ॥ सर्वनियन्तुस्तव को वा नियन्तास्ति । अतो धर्मान्न भेतव्यमितिभावः । शत्रून् मूर्धस्वाक्रम्य तांस्तृणीकृत्येत्यर्थः । अर्थान्तरं तु रामस्येश्वरः कोस्ति । स निग्रहीतुं न शक्य इत्यर्थः । शत्रून् रामं । पूजायां बहुवचनं । दशस्वपि मूर्धस्वाक्रम्य शिरसाप्रणम्येत्यर्थः । वैदेह्या सह रमस्व वैदेह्यां यथा स्वभर्ता रमते तथा त्वमपि स्वदारेषु रमस्व । वैदेह्या सह रामं प्रणम्येति वा योजना ॥ ३ ॥ किं करोमि सा हि न मामभिलषतीत्यत्राह—बलादिति ॥ कुक्कुटवृत्तेन कुक्कुटवृत्त्या । भावे क्तः । कुक्कुटो वञ्चनामार्गेण स्वदयितामाक्रमते । तथा त्वमपीत्यर्थः । कुक्कुटानां कामुककुक्कुटसङ्गे कोपो जातिधर्मः । तथा सीतामनुभव । यथा कुक्कुटाःसुखिनः तद्वदित्यर्थः । यथाह वात्स्यायनः—" कुक्कुटाक्रम्य भोगस्तु कौक्कुटः सोपि सौख्यदः " इति । भुङ्क्ष्व भोगं भज । रमस्व निर्विचारो भवेत्यर्थः । मुनिहृदयं तु कुक्कुटवृत्तेनान्यत्र वर्तस्व सीतां तु बलात् भुङ्क्ष्व रक्ष । " भुज परिपालनाभ्यवहारयोः " इति धातुः । आत्मनेपदमार्षं ॥ ४ ॥ एतन्निमित्तमागामि भयमनिवार्य कथमेवं क्रियतामित्यत्राह—लब्धेति ॥ एवं लब्धकामस्य ते पश्चात् कामलाभानन्तरं । यत् भयमागमिष्यति । प्राप्तं तदानी-

---

स० मुहूर्तमनुसंचिन्त्य अप्रियोक्तौममविप्रियं तत्प्रियोक्तौसर्वैप्रियहानिः । कथंकर्तव्यमितिध्यात्वा ॥ १ ॥ स० प्रथमतः सीतानयनंनकर्तव्यं । कृतंचेत्सीतानुभवोभवतोनयोग्यइतिप्रोत्साहयति—**यद्इति** ॥२॥ स० "सार्किनरम्यासचकिंनरन्तागरीयसीकेवलमीश्वरेच्छा " इत्यादिवदीश्वरेच्छानुसारिताचेतरस्य नतवेत्याह—ईश्वरस्येति ॥ ३ ॥ शि० ननुमांप्रत्यतिकुपितायाः सीतायाःकथंप्रसादोभविष्यतीत्यतआह—बलादिति । कुक्कुटानांतच्छब्दानांवृत्तंवर्तनंयस्मिंस्तेन । उषःकालेइत्यर्थः । बलात् हठात् । आक्रम्याक्रम्य तच्चरणौगृहीत्वागृहीत्वा। सीतांप्रवर्तस्व स्वापराधक्षमापणेनियोजयस्व । अतएतांलङ्कासंपत्तिं भुङ्क्ष्व रमस्वच ॥ती० अनङ्गीकारेकथमनुभवइत्यत्राह—बलादिति । रमस्वसहवैदेह्येत्यादिसार्धश्लोकस्यवास्तवार्थस्तु—कुक्कुटवृत्तेनेत्यत्र कुक्कुटवृत्ते न इतिच्छेदः। हेमहाबल रावण वैदेह्याकिं । अतआक्रम्याक्रम्यवा प्रकारान्तरेणवा तांवैदेहीं नभुङ्क्ष्व नरमस्वच । कुक्कटवृत्ते कुक्कुटव्यापारे । चापल्येइतियावत् । नवर्तस्व किंतु बलाच्छत्रून्मूर्धस्वाक्रम्यरमस्वेतिसंबन्धः ॥ ४ ॥ शि० ननुसीतासमर्पणेपिरामप्रसादेसंशयएवेत्यतआह—लब्धेति । पश्चात् सीताप्राप्त्यनन्तरकाले लब्धःकामः इच्छाविषयीभूतस्वदारप्राप्तिः येनतस्य रामस्य रामात् । भयंतुभ्यंकिं किमर्थं । आगमिष्यति प्राप्स्यति नप्राप्स्यतीत्यर्थः । अतः अप्राप्तकालं अप्राप्तःनिवृत्तइत्यर्थः । कालःकोप.

[पा०] १ क. ख. ग. ङ.—ट. व्यालनिषेवितं. २ ग.—छ. झ. ञ. ट. संप्राप्य. ३ घ. त्कुक्कटवद्वृत्तिवर्तयस्वमहाबल- ४ ङ. झ. ट. प्रवर्तस्वमहाबल. ५ क. ख. आक्रम्यसीतांवैदेहींलंभुङ्क्ष्वचरमस्वच. ६ ङ. छ. ज. झ. ट. तांभुंक्ष्वचरमस्वच. ७ क. ख. ङ.—ट. किंभयं. ८ ङ. झ. प्रतिविधास्यसे.

कुम्भकर्णः सहास्माभिरिन्द्रजिच्च महाबलः ॥ प्रतिषेधयितुं शक्तौ सवज्रमपि वज्रिणम् ॥ ६ ॥
उपप्रदानं सान्त्वं वा भेदं वा कुशलैः कृतम् ॥ समतिक्रम्य दण्डेन सिद्धिमर्थेषु रोचय ॥ ७ ॥
इह प्राप्तान्वयं सर्वाञ्शत्रूंस्तव महाबल ॥ वशे शस्त्रप्रतापेन करिष्यामो न संशयः ॥ ८ ॥
एवमुक्तस्तदा राजा महापार्श्वेन रावणः ॥ तस्य संपूजयन्वाक्यमिदं वचनमब्रवीत् ॥ ९ ॥
महापार्श्व निबोध त्वं रहस्यं किंचिदात्मनः ॥ चिरवृत्तं तदाख्यास्ये यदवाप्तं मया पुरा ॥ १० ॥
पितामहस्य भवनं गच्छन्तीं पुञ्जिकस्थलाम् ॥ चञ्चूर्यमाणामद्राक्षमाकाशेऽग्निशिखामिव ॥ ११ ॥

मागतं । अप्राप्तकालं प्राप्तकालमित्यस्य " प्राप्तापन्ने च द्वितीयया " इति समासः । तथा न भवतीत्यप्राप्तकालं । आगामीतियावत् । प्रतिसहिष्यसि अभिभविष्यसीत्यर्थः ॥ ५ ॥ तिष्ठतु भवान् त्वद्भ्रातृपुत्रावेव प्रतिपक्षप्रतिषेधे शक्तावित्याह—कुम्भकर्ण इति ॥ ६ ॥ विभीषणमतं खण्डयति—उपप्रदानमिति ॥ अकुशलैः युद्धासमर्थैः । कृतं दानादिकं । अतिक्रम्य त्यक्त्वा । दण्डेन बलात्कारेण । अर्थेषु प्रयोजनेषु । सिद्धिं रोचय ॥ ७ ॥ रामादयो यत्र वर्तन्ते तत्र गत्वा योद्धव्यमित्युक्तं निकुम्भादिमतं दूषयन्नाह—इहेति ॥ इह लङ्कापरिसरे । शस्त्रप्रतापेन शस्त्रबलेन । वशे करिष्यामः । निग्रहिष्याम इत्यर्थः ॥ ८ ॥ संपूजयन् स्वचित्तानुगुणमुक्तमिति श्लाघयन्नित्यर्थः ॥ ९ ॥ महापार्श्वेति संबोधनं ॥ प्रमुदितोऽस्मीति शेषः । चिरवृत्तं रहस्यं किंचित् । अस्तीति शेषः । यत्पुरा मयावाप्तं तदाख्यास्य इति योजना ॥ १० ॥ गच्छन्तीं । पितामहवन्दनायेति शेषः । पुञ्जिकस्थला नाम काचिदप्सराः । चञ्चूर्यमाणां भीत्या निलीय गच्छन्तीं । " लुपसदचर— " इत्यादिना भावगर्हायां यङ् । संचरणात्मकस्य भावस्य गर्हा निलयनं । " चरफलोश्च " इति नुक् । " उत्परस्यातः " इत्युकारः । अग्निशिखामिवेति तेजोविशेषोक्तिः । यद्वा द्रावकत्वोक्तिः । अत एवोक्तं—" अङ्गारसदृशी नारी घृतकुम्भसमः पुमान् " इति । संचार्यमाणामिति

समयोयस्यतं । प्राप्तरामं सर्वं स्वापराधजातं प्रतिसहिष्यसि साहयिष्यसि ॥ ५ ॥ शि० ननुप्रसादनेपियदितत्कोपशान्तिर्नभवेत् तदा किंकर्तव्यमित्यतआह—कुंभकर्णइत्यादिभिः । कुंभकर्णइन्द्रजिच्च सवज्रं वज्रसहितं वज्रिणं वज्रस्वामिनमिन्द्रमपि । प्रतिषेधयितुंशक्तौ । एतेन तवापराधसत्त्वेकुंभकार्णदीनांबलमकिञ्चित्करंभविष्यतीतिध्वनितं ॥ ६ ॥ शि० तवशत्रून् बलं तत्सैन्यंच शस्त्रप्रपातेन करिष्यामः हनिष्यामः ॥ ८ ॥ स० ननूत्तरकाण्डेरंभानिमित्तंनलकूबरशापःपरदाराणांबलात्सङ्गेश्रूयते । यथोक्तं—" एतस्मिन्नन्तरेतत्रदिव्याभरणभूषिता । सर्वाप्सरोवररंभापूर्णचन्द्रनिभानना " इत्यारभ्य—" नलकूबरमासाद्य—" इत्याद्युक्त्वा " उत्ससर्जतदाशापंराक्षसेन्द्रायदारुणं । अकामातेनयस्मात्त्वंबलाद्धर्षिप्रधर्षिता । तस्मात्सयुवतीमन्यांनाकामामुपयास्यति " इत्यादि । तथाभारतेवनपर्वणिरामोपाख्यानेसीतांप्रतित्रिजटावाक्यं—" नलकूबरशापेनरक्षितात्मसिनन्दिनि । शापोह्येषपुरापापोवधूंरंभांपरामृशन् "इति। तथाचकथमत्रपुञ्जकस्थलीनिमित्तंब्रह्मशापोत्कीर्तनं। नचपूर्वंरंभानिमित्तशापः अनन्तरंपुञ्जकस्थलीकृतःशापइत्येकस्यैवशापद्वयाङ्गीकारेबाधकाभावइतिवाच्यं । तथात्वे नलकूबरशापेनतदनन्तरभाविपुञ्जकस्थलीधर्षणकालेतच्छिरस्स्फोटापत्तेः । ब्रह्मशापानन्तरंरंभासंभोगेतुसुतरां । तस्यदुर्निवारत्वात् । तस्मात्कथमत्रेतिचेदुच्यते । कल्पेकल्पेअवान्तरवैचित्र्यस्यबहुलमुपलंभात्कल्पान्तरवृत्तांब्रह्मशापकथांसमाधौसमीक्ष्यकविरवादीदिति । अथवा नलकूबरशापस्यपतिव्रताधर्षणविषयत्वेन स्वैरिणीविषयत्वाभावेननपुञ्जकस्थलीसंगात्तच्छिरसःसहस्रधाभेदः । यथोक्तत्रैवोत्तररामायणे—" तेननिस्सीमतांप्रीतिमापुःसर्वाः पतिव्रताः । " इति । अन्यथापतिव्रताइतिनस्यात् स्याच्चस्त्रियइति । यद्वा रंभानिमित्तशापस्यकामनारहितस्त्रीबलात्कारविषयत्वं । पुञ्जकस्थल्याअन्तःकामोवर्ततइतिज्ञायते । अतोनतन्मरणमभूत् । यथोक्तंतत्रैव—" नाकामामुपयास्यसि " इति । अत्रचञ्चूर्यमाणां रावणलज्जयास्वाङ्गेनिलीयमानामिवेति । प्रसह्येत्युक्तिस्तु स्त्रीस्वभावेनलज्जयाऽनङ्गीकारप्रदर्शनादितिज्ञेयं । यत्तुनागोजिभट्टेन क्वचिदेवमेवकुबेरपुत्रनलकूबरशापोपिरंभानिबन्धनःश्रूयते । तत्रोपपत्तिश्चिन्त्या । अस्यप्रथमत्वेतस्यांबलात्कारासंभवात् । तस्यप्रथमत्वे अस्यांबलात्कारासंभवादितिकेचित् । नलकूबरशापस्यतपोबलेनाकिंचित्करत्वादयमेवशापोब्रह्मास्त्रवदप्रतिक्रियःपाश्चात्यइत्यन्येइत्युक्तं । तत्रनलकूबरशापेनेत्युक्तभारतवचनेतस्यैवपुरस्करणं । " तस्मिन्नुदाहृतेशापेज्वलितानिसमप्रभे । देवदुन्दुभयोनेदुः पुष्पवृष्टिश्चखाच्युता । पितामहमुखाश्चैवसर्वेदेवाःप्रहर्षिताः । ज्ञात्वालोकगतिंसर्वे " इत्यत्रैवोत्तरकाण्डेब्रह्मादत्तमल्याशापस्यदुष्परिहारतेव " श्रुत्वातुसदशग्रीवस्तंशापंरोमहर्षणं । नारीषुमिथुनीभावंनाकामास्वभ्यरोचयत् " इत्यनेनशापेनैवाकामकामिनीसंभोग-

[पा०] १ ङ. ज. झ. ट. रोचये. २ ट. बलंशस्त्र. ३ ख. ङ. झ.ट. प्रवदतोरहस्यं.

सा प्रसह्य मया भुक्ता कृता विवसना ततः ॥ स्वयंभूभवनं प्राप्ता लोलिता नलिनी यथा ॥ १२ ॥
तस्य तच्च तदा मन्ये ज्ञातमासीन्महात्मनः ॥ अथ संकुपितो [1]देवो मामिदं वाक्यमब्रवीत् ॥ १३ ॥
अद्यप्रभृति यामन्यां बलान्नारीं गमिष्यसि ॥ तदा ते शतधा मूर्धा फलिष्यति न संशयः ॥ १४ ॥
इत्यहं तस्य शापस्य भीतः प्रसभमेव ताम् ॥ [3]नारोपये बलात्सीतां [4]वैदेहीं शयने शुभे ॥ १५ ॥
सागरस्येव मे वेगो मारुतस्येव मे गतिः ॥ नैतद्दाशरथिर्वेद ह्यासादयति तेन माम् ॥ १६ ॥
[5]अस्तु सिंहमिवासीनं सुप्तं गिरिगुहाशये ॥ क्रुद्धं मृत्युमिवासीनं [6]प्रबोधयितुमिच्छति ॥ १७ ॥
न मत्तो [7]निशितान्बाणान्द्विजिह्वानिव पन्नगान् ॥ रामः पश्यति संग्रामे तेन मामभिगच्छति ॥ १८ ॥
क्षिप्रं वज्रोपमैर्बाणैः शतधा कार्मुकच्युतैः ॥ राममादीपयिष्यामि उल्काभिरिव कुञ्जरम् ॥ १९ ॥
तच्चास्य बलमादास्ये बलेन महता वृतः ॥ [8]उदयन्सविता काले नक्षत्राणामिव प्रभाम् ॥ २० ॥
न वासवेनापि सहस्रचक्षुषा युधाऽस्मि शक्यो वरुणेन वा पुनः ॥

पाठे परिचारिकादर्शितमार्गामित्यर्थः ॥ ११ ॥ विवसना कृता सा मया भुक्तेत्यन्वयः ॥ १२ ॥ तत् धर्षणं । मन्य इत्यनेन शापमात्रं मया श्रुतं । धर्षणश्रवणं तु मया ऊहितमिति गम्यते ॥ १३ ॥ अद्यप्रभृति एतत्क्षणमारभ्य । क्रियाविशेषणमेतत् । तदा गमनकाले एव फलिष्यति विशीर्णो भविष्यति । इति एवंप्रकारस्य शापस्य शापादित्यर्थः । प्रसभं नारोप इत्यन्वयोन बलादित्यनेन पौनरुक्त्यात् । किंतु प्रसभं शापस्येत्यन्वयः । वैदेहीमित्यनेन महाकुलप्रसूततया तच्छापादपि भीतोऽस्मीत्यवगम्यते ॥ १४—१५ ॥ एवं न युक्ता बलात्कर्तुं सीतेत्युक्त्वा अस्माभिः सह कुम्भकर्णेन्द्रजितौ योत्स्यत इति महापार्श्ववचनस्यासहायशूरे मयि विद्यमाने किमन्येनेति परिहारमाह—सागरस्येति ॥ एतत् वेगगतिमत्त्वं । आसादयति सेनामिति शेषः । स्वार्थण्यन्तो वा । तेन अवेदनेन ॥ १६ ॥ स्वप्रभावावेदनेनाहितमाह—यस्त्विति ॥ सुप्तं सिंहमिवासीनं सिंहमिव स्थितमित्यर्थः । मृत्युमित्यत्रापि सुप्तमित्यनुषज्यते । अन्यथा प्रबोधयितुमिच्छतीत्यनेनानन्वयः । क्रुद्धं क्रोधार्हं । यथा सुप्तं सिंहं मृत्युं वा प्रबोधयितुमिच्छन् पुरुषोऽनभिज्ञ एव । तद्वत् तूष्णीं स्थितं मां प्रकोपयन्नामोपीति भावः ॥ १७ ॥ रामो मत्पराक्रमं न वेत्त्येव तत्तिष्ठतु मद्बाणवेगं वा जानाति नैवेत्याह—नेति ॥ लेलिहानतादृशां द्योतयितुं द्विजिह्वानित्युक्तं ॥ १८ ॥ आदीपयिष्यामि सन्तापयिष्यामि । उल्काभिः निर्गतज्वालकाष्ठैः । कुञ्जरपलायनार्थमुल्काः प्रदर्शयन्तीति प्रसिद्धिः ॥ १९ ॥ एवं रामं पलाययित्वा तस्य सेनां हनिष्यामीत्याह—तच्चेति ॥ आदास्ये खण्डयिष्ये । " दो अवखण्डने " इति धातुः ॥ २० ॥ देवानामप्यजय्योस्मि कथं मनुष्यादीनां जय्यो भविष्यामीत्याशयेनाह—न वासवेनेति ॥ सहस्रचक्षुषेति तस्याभिमानातिशयोक्तिः । युधा

विरुचिताचकथंसंगच्छतइतिविचार्यं । अतएवतेनकेचिदन्येचेत्युक्तमितिमन्तव्यं ॥ ११ ॥ **शि०** अभुक्ता एकादश्याद्युपवासयुक्ता सा पुञ्जकस्थली मया विवसना दूरगमनदर्शनजनितकोपादुत्तरीयरहिताकृता ॥ १२ ॥ **ति०** तच्च ममचरितं । महात्मनस्तस्य मन्ये निश्चितं । ज्ञातमासीत् । मन्यइतितिङन्तप्रतिरूपकमव्ययं । " मन्येशङ्केध्रुवंप्रायोनिश्चयार्थाअमीमताः " इतिकतकः ॥ १३ ॥ **रामानु०** अथेत्यादि । " तदातेशतधामूर्धाफलिष्यतिनसंशयः " इत्यनेनरावणविषयेरंभानिबन्धननलकूबरशापेविद्यमानेपितस्यप्राकृतदेवत्वात्तत्पुत्रत्वाच्चतच्छापमनादृत्यपुञ्जिकस्थलायामपिप्रवृत्तंरावणंपश्चात्पितामहःशप्तवान् । अतएव रावणोप्यनुच्छन्ननीयंपितामहवाक्यमेवोक्त्वानित्यवगम्यते । शापस्यभीतः शापाद्भीतः ॥ १४—१५ ॥ **शि०** अन्यांनारीं तत्समीपं । बलात् हठात् । यदिगमिष्यसि । इतीति । इतिहेतोः तस्यशापस्य शापाद्भीतः हठप्रार्थनायामियमपिशापंदास्यतीतिभयंप्राप्तोहं शुभेशयने तद्योग्यपर्यङ्केबलान्नारोपये भूमावेवसातिष्ठतीत्यर्थः । नन्वेवंचेद्रामायसमर्पयेत्यतआह—सागरस्येति । एतेन रामायदानेमेदौर्बल्यप्रख्यातिर्भविष्यतीत्यतोनदास्यामीतिसूचितं ॥ १६ ॥ इतित्रयोदशःसर्गः ॥ १३ ॥

[पा०] १ ङ. झ. ट. वेधाः. २ ङ.—ट. नारोहये. ३ ख. ग. ङ.—ट. कोहि. ४ क. ख. ङ. ट. संबोधयितुं. ५ क.—ल. निर्गतान्. ६ ङ. झ. ट. उदितः.

मया त्विदं बाहुबलेन निर्जिता पुरी पुरा वैश्रवणेन पालिता ॥ २१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रयोदशस्सर्गः ॥ १३ ॥

चतुर्दशः सर्गः ॥ १४ ॥

विभीषणेन रावणंप्रति कुंभकर्णादीनांयुधिरामाग्रेऽवस्थानस्यापिदुश्शकत्वोक्तिपूर्वकं रामायसीताप्रत्यर्पणचोदना ॥ १ ॥

निशाचरेन्द्रस्य निशम्य वाक्यं स कुम्भकर्णस्य च गर्जितानि ॥
विभीषणो राक्षसराजमुख्यमुवाच वाक्यं हितमर्थयुक्तम् ॥ १ ॥
वृतो हि बाह्वन्तरभोगराशिश्चिन्ताविषः सुस्मिततीक्ष्णदंष्ट्रः ॥
पञ्चाङ्गुलीपञ्चशिरोतिकायः सीतामहाहिस्तव केन राजन् ॥ २ ॥
यावन्न लङ्कां समभिद्रवन्ति वलीमुखाः पर्वतकूटमात्राः ॥
दंष्ट्रायुधाश्चैव नखायुधाश्च प्रदीयतां दाशरथाय मैथिली ॥ ३ ॥
यावन्न गृह्णन्ति शिरांसि बाणा रामेरिता राक्षसपुङ्गवानाम् ॥
वज्रोपमा वायुसमानवेगाः प्रदीयतां दाशरथाय मैथिली ॥ ४ ॥
भित्त्वा न तावत्प्रविशन्ति कायं प्राणान्तिकास्तेऽशनितुल्यवेगाः ॥
शिताः शरा राघवविप्रमुक्ताः प्रहस्त तेनैव विकत्थसे त्वम् ॥ ५ ॥

युद्धेन न शक्योस्मि । जेतुमिति शेषः । उत्तरार्धेन कुबेरेणापि न जेतुं शक्य इति सिद्धं । अत्र वंशस्थवृत्तं ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रयोदशः सर्गः ॥ १३ ॥

एवं दुर्मन्त्रिभिः प्रभुचित्तानुसारेण कथिते तदसहमानो विभीषणः परमार्थं हितमुपदिशति–निशेति ॥ स कुम्भकर्णस्येत्यत्र स इति च्छेदः । गर्जितानि निरर्थकवचनानि । अर्थयुक्तं कर्तव्यार्थबोधयुक्तं ॥ १ ॥ अदेया न यथा सीतेति रावणवचनं प्रति वक्तुं सीतामहित्वेन रूपयति—वृत इति ॥ बाह्वन्तरं वक्षः तदेव भोगराशिः फणापरिणाहो यस्य स तथा । यद्वा बाह्वन्तरे वक्षसि भोगराशिः सौख्यसंपत् सैव बाह्वन्तरभोगराशिः तिर्यक्प्रसारितयोर्बाह्वोर्यदन्तरं तत्प्रमाणो भोगराशिः शरीरपरिणाहो यस्येत्यावृत्त्या रूपकनिर्वाहः । चिन्तैव विषं विरोधिप्राणहरत्वात् । तत् यस्य सः चिन्ताविषः । सुस्मितं स्वाभाविकमन्दस्मितं । तदेव शुभ्रत्वेन कामुकहृदयहारित्वेन च तीक्ष्णा दंष्ट्रा यस्य सः सुस्मिततीक्ष्णदंष्ट्रः । चिन्तावशेन वदनोपधानीकृतपाणेः पञ्चाङ्गुल्य एव पञ्चशिरोरूपातिकायो यस्य सः पञ्चाङ्गुलीपञ्चशिरोतिकायः । सीतामहाहिः स्पर्शमात्रेण मारकाहिः । तव त्वया । केन हेतुना वृतः । सर्वथा त्यक्तव्य एवेति भावः । राजन्निति सान्त्वोक्तिः ॥ २ ॥ न केवलं तवैवानर्थहेतुः सीता किंतु तावकीनस्य सर्वस्येत्याह–यावदिति ॥ " यावत्पुरानिपातयोर्लट् " । इति लट् । तावदिति शेषः ॥ ३—४ ॥ तावच्छब्दो वाक्यालंकारे । प्राणान्ते भवाः प्राणान्तिकाः प्राणहारिण इत्यर्थः । साक्षाद्राजानं प्रत्युक्तेरयुक्तत्वात्प्रहस्तं प्रति प्राणहरत्वोक्तिः । विकत्थसे आत्मानं श्लाघसे । "कत्थ श्लाघायां " इति धातुः ॥ ५ ॥

स० अर्थयुक्तं सदभिप्रायगर्भं ॥ १ ॥ ति० सुस्मितं अनुचितकृत्यदर्शनादिजंस्मितं । केनवृतः बद्धः । कण्ठेइतिशेषः । स० सुस्मितं रामवार्ताज्ञानानन्तरंवृत्तं । पञ्चाङ्गुलीरूपपञ्चशिरोविशिष्टश्चासौ अतिकायश्चेतिसतथा । "निचकर्तशिरान्द्रौणिः" इत्यादिप्रयोगादकारान्तोपिशिरशब्दोवर्ततइतिपक्षेपञ्चशिरइत्यन्तंभित्त्रंसदहिविशेषणं ॥ २ ॥ रामानु० यावन्नगृह्णन्तिशिरांसिबाणाइत्यतःपरंकेषुचित्कोशेषुदृश्यमानः भित्त्वानतावत्प्रविशन्तिकायमितिश्लोकः प्रहस्तोद्देशेनप्रवृत्तस्यतीक्ष्णानतायत्तवेत्यस्यानन्तरंद्रष्टव्यः ।

न कुम्भकर्णेन्द्रजितौ न राजा तथा महापार्श्वमहोदरौ वा ॥
निकुम्भकुम्भौ च तथातिकायः स्थातुं न शक्ता युधि राघवस्य ॥ ६ ॥
जीवंस्तु रामस्य न मोक्ष्यसे त्वं गुप्तः सवित्राऽप्यथवा मरुद्भिः ॥
न वासवस्याङ्कगतो न मृत्योर्नभो न पातालमनुप्रविष्टः ॥ ७ ॥
निशम्य वाक्यं तु विभीषणस्य ततः प्रहस्तो वचनं बभाषे ॥
न नो भयं विद्म न दैवतेभ्यो न दानवेभ्यो ह्यथवा कुतश्चित् ॥ ८ ॥
न यक्षगन्धर्वमहोरगेभ्यो भयं न संख्ये पतगोत्तमेभ्यः ॥
कथं नु रामाद्भविता भयं नो नरेन्द्रपुत्रात्समरे कदाचित् ॥ ९ ॥
प्रहस्तवाक्यं त्वहितं निशम्य विभीषणो राजहितानुकाङ्क्षी ॥
ततो महात्मा वचनं बभाषे धर्मार्थकामेषु निविष्टबुद्धिः ॥ १० ॥
प्रहस्त राजा च महोदरश्च त्वं कुम्भकर्णश्च यथाऽर्थजातम् ॥
ब्रवीथ रामं प्रति तन्न शक्यं यथा गतिः स्वर्गमधर्मबुद्धेः ॥ ११ ॥
वधस्तु रामस्य मया त्वया वा प्रहस्त सर्वैरपि राक्षसैर्वा ॥
कथं भवेदर्थविशारदस्य महार्णवं तर्तुमिवाप्लवस्य ॥ १२ ॥
धर्मप्रधानस्य महारथस्य इक्ष्वाकुवंशप्रभवस्य राज्ञः ॥
प्रहस्त देवाश्च तथाविधस्य कृत्येषु शक्तस्य भवन्ति मूढाः ॥ १३ ॥

तर्हि कुम्भकर्णादयो रामं वारयिष्यन्तीत्यत्राह—न कुम्भकर्णेति ॥ इदमपि प्रहस्तं प्रति वचनं ॥ ६ ॥ राज्ञः असामर्थ्यं विशिष्य दर्शयति—जीवन्निति ॥ रामस्य रामात्। विभक्तिव्यत्ययः। जीवन्न विमोक्ष्यसे प्राणपर्यन्तं न त्वां रामो विमोक्ष्यतीति भावः। अङ्कगतोपि पुत्रभावेनाङ्कस्थितोपीत्यर्थः। मृत्योरित्यत्रापि अङ्कगत इत्यनुषज्यते । नभः पातालं वाऽनुप्रविष्टः न मोक्ष्यस इति योजना ॥ ७ ॥ अस्माकं कुतश्चित् भयं न विद्म । विसर्गलोपश्छान्दसः । एवं सामान्येनोक्त्वा विशिष्य दर्शयति—न दैवतेभ्य इत्यादिना । भयं न विद्म इति सर्वत्रान्वेति ॥ ८ ॥ पतगोत्तमेभ्यः गरुडेभ्यः । नरेन्द्रपुत्रात् मानुषबालादित्यर्थः । कथं नो भवितेत्यपि ध्वन्यते ॥ ९ ॥ महात्मा महाबुद्धिः । धर्मार्थकामेषु । स्वामिन इति शेषः ॥ १० ॥ महोदरोक्तत्वेन पूर्वमनुक्तमप्यनेनावगम्यते पूर्वमुक्तमिति । अर्थजातं यथा ब्रवीथ तथा रामं प्रति तत्कार्यजातं न शक्यं । कर्तुमिति शेषः । अधर्मबुद्धेः स्वर्गं प्रति गतिर्यथा न शक्या तथैवेत्यर्थः ॥ ११ ॥ अशक्यत्वमेव विशदयति—वधस्त्विति ॥ अर्थविशारदस्य कार्यदक्षस्य । रामस्य वधः । अप्लवस्य नौरहितस्य । महार्णवं तर्तुं तरितुं । शक्तिरिति शेषः। शक्तिरिव कथं भवेत् न कथंचिदपि संभवतीत्यर्थः । एतेन वध्यौ दशरथात्मजाविति युक्तस्योत्तरमुक्तं ॥ १२ ॥ उक्तमर्थं कैमुतिकन्यायेन द्रढयति—धर्मेति ॥ धर्मप्रधानस्य । "अप्यहं जीवितं जह्यां" इत्युक्तरीत्या धर्मविरोधे तृणीकृतसकलेतरपुरुषार्थस्य महारथस्य रणे आत्मानं सारथिं च रक्षन् शत्रुसंहारक्षमो महारथः तस्य। "आत्मानं सारथिं चाश्वान्रक्षन्युध्येत यो नरः । स महारथसंज्ञः स्यादित्याहुर्नीतिकोविदाः" इत्युक्तेः ॥ इक्ष्वाकुवंशप्रभवस्य जन्मसिद्धनिरतिशयपराक्रमस्य। राज्ञः सकलप्रकृतिमण्डलरञ्जकस्य । तथाविधस्य विराधकबन्धवालिप्रभृतिव-

अन्यथाप्रकरणविरोधःस्यात् ॥ ५ ॥ स० युधि तदाबद्धननावसरे । राघवस्य पुरतइतिशेषः । राघवकर्तृकयुधीतिवा ॥ ६ ॥ स० तर्तुं तरितुं । धात्वन्तरस्यवैतद्रूपं । आगमशासनस्यानित्यत्वाद्वा " आर्धधातुकस्य—" इतिनेट् । तेनतर्तुमितिसाधु ॥१२॥

[पा०] १ क. ङ. ज. झ. ञ. राजंस्तथा. २ क. ख. ग. ङ. झ. ञ. समर्थायुधि. ३ क.—ङ. ज. ञ. कदाचित्, ४ क. ख. ग. ङ. ज. झ. ञ. महार्थे. ५ ख. ङ. ज. झ. ब्रवीत. घ. प्रब्रूत. ६ ङ. झ. पुरोस्यदेवाश्च.

तीक्ष्णा नता यत्तव कङ्कपत्रा दुरासदा राघवविप्रमुक्ताः ॥
भित्त्वा शरीरं प्रविशन्ति बाणाः प्रहस्त तेनैव विकत्थसे त्वम् ॥ १४ ॥
न रावणो नातिबलस्त्रिशीर्षो न कुम्भकर्णोस्य सुतो निकुम्भः ॥
न चेन्द्रजिद्दाशरथिं प्रसोढुं त्वं वा रणे शक्रसमं समर्थाः ॥ १५ ॥
देवान्तको वाऽपि नरान्तको वा तथाऽतिकायोतिरथो महात्मा ॥
अकम्पनश्चाद्रिसमानसारः स्थातुं न शक्ता युधि राघवस्य ॥ १६ ॥
अयं हि राजा व्यसनाभिभूतो मित्रैरमित्रप्रतिमैर्भवद्भिः ॥
अन्वास्यते राक्षसनाशनार्थे तीक्ष्णः प्रकृत्या ह्यसमीक्ष्यकारी ॥ १७ ॥
अनन्तभोगेन सहस्रमूर्ध्ना नागेन भीमेन महाबलेन ॥
बलात्परिक्षिप्तमिमं भवन्तो राजानमुत्क्षिप्य विमोचयन्तु ॥ १८ ॥
यावद्भि केशग्रहणात्सुहृद्भिः समेत्य सर्वैः परिपूर्णकामैः ॥
निगृह्य राजा परिरक्षितव्यो भूतैर्यथा भीमबलैर्गृहीतः ॥ १९ ॥
संहारिणा राघवसागरेण प्रच्छाद्यमानस्तरसा भवद्भिः ॥

धविदितवैभवस्य । शक्तस्य कार्यदक्षस्य । रामस्य कृत्येषु रणव्यापारेषु विषये । देवाश्च मूढा भवन्ति । अविदिततदीयव्यापारा भवन्तीत्यर्थः । किं पुनर्भवादृशा इति भावः ॥ १३ ॥ तीक्ष्णाः तीक्ष्णाग्राः । झटितिभेदनक्षमा इत्यर्थः । नताः नतपर्वाणः ऋजव इत्यर्थः । सपदि भित्त्वा निर्गन्तुं क्षमा इतिभावः । कङ्कपत्राः कङ्कानां पत्राण्येव पत्राणि येषां ते तथोक्ताः । कङ्कपक्षनिबद्धत्वेन महावेगा इत्यर्थः । अतएव दुरासदाः ॥ १४ ॥ न रावण इति । रावणादयः सर्वेपि न समर्था इति योज्यं ॥ १५ ॥ अतिरथः अतिशयितरथः । महात्मा महाशरीरः । अद्रिसमानसारः गिरितुल्यबलः । " सारो बले स्थिरांशे च " इत्यमरः । देवान्तकादयो रावणपुत्राश्च राघवस्य युधि स्थातुं न शक्ताः ॥ १६ ॥ अमित्रप्रतिमैः कार्यतो रिपुतुल्यैः । नाम्ना मित्रैः भवद्भिः त्वत्प्रमुखैः । व्यसनाभिभूतः सप्तव्यसनैराक्रान्तः । प्रकृत्या तीक्ष्णः उग्रः । असमीक्ष्यकारी अविमृश्यकारी । अयं राजा राक्षसनाशनार्थं अन्वास्यते अनुस्थियते । अस्य राजत्वासमीक्ष्यकारित्वव्यसनाभिभूतत्वान्यपुरस्कृत्य तीक्ष्णत्वमेव पुरस्कुर्वन्तो भवन्तोभिभवन्ति । सर्वराक्षसविनाशं न जानन्तीति भावः । सप्तव्यसनस्वरूपमुक्तं कामन्दकेन—" वाग्दण्डयोस्तु पारुष्यमर्थदूषणमेव च । पानं स्त्री मृगया द्यूतं व्यसनं सप्तधा प्रभोः " इति ॥ १७ ॥ एवं प्रहस्तप्रमुखान्मन्त्रिमुख्यान्निर्भर्त्स्य संप्रति कर्तव्यमुपदिशति—अनन्तेति ॥ अनन्तभोगेन अपरिच्छिन्नकायेन । सहस्रमूर्ध्ना अतएव भीमेन । न केवलं भीमत्वमात्रं महाबलेन नागेन । शेषेणेत्यर्थः । परिक्षिप्तं परिवेष्टितं । रामद्वेषो महासर्पवेष्टनतुल्य इति भावः ॥ १८ ॥ ननु समयोतीतः किं कुर्म इत्यत्राह—यावदिति ॥ परिपूर्णकामैः । अवाप्तसर्वाभीष्टैरित्यर्थः । राजतो लब्धकामैः राजकार्येऽवश्यं यतितव्यमिति भावः । सर्वैः सुहृद्भिः समेत्य ऐकमत्यं प्राप्येति यावत् । राजा भीमबलैः भूतैः गृहीतः पुरुष इव निगृह्य बलात्कृत्य । यावत्केशग्रहणात् शत्रुभिः केशग्रहणपर्यन्तं । परिरक्षितव्यः । आकेशग्रहणान्मित्रमकृत्येभ्यो निवर्तयेदिति प्रसिद्धिं दर्शयति हिशब्दः । यद्वा आकेशग्रहणान्निगृह्य परिरक्षितव्यः । अकार्यप्रवृत्तोऽयं राजा केशेष्वाकृष्यापि निवारणीय इत्यर्थः ॥ १९ ॥ संहारिणा विनाशकेन । राघवसागरेण लक्ष्मणसमुद्रेण । प्रच्छाद्यमानः । ततः काकुत्स्थपातालमुखे रामबडबा-

ति० यावत्तेकार्यमित्त्वाबाणाःपुनस्तदिषुधिनप्रविशन्ति तेनैवहेतुनातावत्हेप्रहस्त त्वंविकत्थसेवृथात्मश्लाघांकरोषि । रावणस्यपुरस्तादितिशेषः ॥ १४ ॥ ति० सुवारिणा सुचरित्ररूपवारिमता । राघवसागरेण ॥ शि० सुवारिणा वियोगजनितदुःखरूपजलवता ॥ २० ॥ इतिचतुर्दशःसर्गः ॥ १४ ॥

[पा०] १ क. ग. ङ. ञ. ञ. सुवारिणा.

युक्तस्त्वयं तारयितुं समेत्य काकुत्स्थपातालमुखे पतन्सः ॥ २० ॥
इदं पुरस्तास्य सराक्षसस्य राज्ञश्च पथ्यं समुदीरयन्त्याः ॥
सम्यग्घि वाक्यं स्वमतं ब्रवीमि नरेन्द्रपुत्राय ददाम पत्नीम् ॥ २१ ॥
परस्य वीर्यं स्वबलं च बुद्ध्वा स्थानं क्षयं चैव तथैव वृद्धिम् ॥
तथा स्वपक्षेष्यनुमृश्य बुद्ध्या वदेत्क्षमं स्वामिहितं च मन्त्री ॥ २२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

पञ्चदशः सर्गः ॥ १५ ॥

इन्द्रजिता विभीषणभाषणाधिक्षेपेणस्वात्मश्लाघनपूर्वकं कैमुत्येनरामपराजयस्य सुशकत्वोक्तिः ॥१॥ विभीषणेन तद्गर्हणपूर्वकं रामायसोपायनंसीताप्रत्यर्पणेन तत्प्रसादसंपादनचोदना ॥ २ ॥

बृहस्पतेस्तुल्यमतेर्वचस्तन्निशम्य यत्नेन विभीषणस्य ॥
ततो महात्मा वचनं बभाषे तत्रेन्द्रजिन्नैर्ऋतयोधमुख्यः ॥ १ ॥
किं नाम ते तात कनिष्ठवाक्यमनर्थकं चैव सुभीतवच्च ॥
अस्मिन्कुले योपि भवेन्न जातः सोपीदृशं नैव वदेन्न कुर्यात् ॥ २ ॥

ग्निमुखे । " पातालं बडबाग्नौ च " इति नानार्थरत्नमाला । पतन् सोयं राजा तरसा आरम्भकाल एव । तारयितुं भवद्भिर्हस्तप्रदानेनोत्तारयितुं युक्तः अर्हः । अत्र प्रच्छाद्यमानः पतन्निति प्रयोगौ वर्तमानसामीप्यात् । लक्ष्मणः प्रथमं ग्रहीष्यति ततो रामः अतो न जीवितुं शक्यं । अतः प्रथममेव राजा निवर्तनीय इतिभावः । सुवारिणेति पाठान्तरं । तत्र सागरपक्षे सुजलेनेत्यर्थः । राघवपक्षे वारः स्यन्दनः । शोभनो वारः सुवारः सोस्यास्तीति सुवारी तेन । " सूर्यादिदिवसे वृन्दे कुन्दवृक्षे परिक्रमे । मद्यपात्रे स्यन्दने च वारो वरुणसेनयोः " इति निघण्टुः ॥ २० ॥ मा दिशतु रामाय राजा वैदेहीं वयमेव बलाद्धि ददामः यदि हितमाकाङ्क्षितमित्याह—इदमिति ॥ स्वमतं स्वस्य सिद्धान्तभूतं । इदंशब्दार्थमाह—नरेन्द्रेति ॥ २१ ॥ वयमपि सम्यगेव ब्रूमः शत्रुर्हन्तव्य इति तत्राह—परस्येति ॥ मन्त्री परस्य शत्रोः । वीर्यं स्वबलं स्वराजबलं च बुद्ध्वा स्वराजपरराजयोर्बलं परीक्ष्येत्यर्थः । तथैव बलाबलपरीक्षावत् । परस्य स्थानं संपदां साम्यं क्षयं वृद्धिं च बुद्ध्वा । तथा परस्येव स्वपक्षेपि बुद्ध्या सूक्ष्मदृष्टया । स्थानक्षयवृद्धीः अनुमृश्य आलोच्य । क्षमं युक्तं । स्वामिहितं च वदेत् । परस्य क्षये स्ववृद्धौ यानं परस्यवृद्धौ स्वस्य क्षये संधिं परस्य स्वस्य च साम्ये आसनंच स्वामिने कथयेदित्यर्थः । अत्र प्रकृते परस्य वृद्धेः रावणस्य नगरदहनतनयनाशादिना क्षयस्य दर्शनाच्च सीताप्रदानेन सन्धिरेव साधुरिति मन्त्रिभिर्भवत्स्वामिने निवेदनीयमितिभावः ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्दशः सर्गः ॥ १४ ॥

अथेन्द्रजितो दुर्बुद्धिमुपन्यस्य दूषयति—बृहस्पतेरिति ॥ ततो विभीषणवचनानन्तरं । तत्र राक्षसेषु । यत्नेन निशम्य । असह्यतयेति भावः ॥ १ ॥ हे तात ते कनिष्ठवाक्यं । अनर्थकं प्रयोजनशून्यं । अनुष्ठातुरभावादिति भावः। सुभीतवत् सुभीतिमत् । किंनाम कीदृशं जुगुप्सितमित्यर्थः । नामशब्दः कुत्सनद्योतकः " नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने " इतिवैजयन्ती । तदेवोपपादयति—अस्मिन्निति । आद्योऽपिशब्दः प्रश्ने । अपि ननु । अस्मिन् कुले पौलस्त्यवंशे । यो जातो न भवेत् । अन्यस्मिन् कुले

स० नचकुर्यात्चिन्तामितिवा बलाद्गृहीतस्तुदानमितिवाशेषः ॥ २ ॥

[पा०] १ ङ. ञ. ञ. ददातुमैथिलीं. २ ङ. ञ. यूथमुख्यः.

सत्त्वेन वीर्येण पराक्रमेण शौर्येण धैर्येण च तेजसा च ॥
एकः कुलेस्मिन्पुरुषो विमुक्तो विभीषणस्तात कनिष्ठ एषः ॥ ३ ॥
किं नाम तौ राक्षस राजपुत्रावस्माकमेकेन हि राक्षसेन ॥
सुप्राकृतेनापि मतौ निहन्तुं शक्यौ कुतो भीषयसे स्म भीरो ॥ ४ ॥
त्रिलोकनाथो ननु देवराजः शक्रो मया भूमितले निविष्टः ॥
भयार्दिताश्चापि दिशः प्रपन्नाः सर्वे तथा देवगणाः समग्राः ॥ ५ ॥
ऐरावतो विस्वरमुन्नदन्स निपातितो भूमितले मया तु ॥
विकृष्य दन्तौ तु मया प्रसह्य वित्रासिता देवगणाः समग्राः ॥ ६ ॥
सोहं सुराणामपि दर्पहन्ता दैत्योत्तमानामपि शोकदाता ॥
कथं नरेन्द्रात्मजयोर्न शक्तो मनुष्ययोः प्राकृतयोः सुवीर्यः ॥ ७ ॥
अथेन्द्रकल्पस्य दुरासदस्य महौजसस्तद्वचनं निशम्य ॥
ततो महार्थं वचनं बभाषे विभीषणः शस्त्रभृतां वरिष्ठः ॥ ८ ॥
न तात मन्त्रे तव निश्चयोस्ति बालस्त्वमद्याप्यविपक्वबुद्धिः ॥
तस्मात्त्वया ह्यात्मविनाशनाय वचोर्थहीनं बहु विप्रलप्तम् ॥ ९ ॥

यो जातः सोपि ईदृशं न वदेत् । न कुर्यात् ईदृग्वचनार्थं नानुतिष्ठेत् । ईदृग्वचनं वक्तृश्रोत्रोरुभयोरपि निन्दनीयं । यद्वा हे तात कनिष्ठ । ते वाक्यं किं नाम । जुगुप्सितमित्यर्थः । जुगुप्सितत्वमेवाह—अस्मिन्निति । न कुर्यात् नचिन्तयेत् । अत्र करोतिश्चिन्ताक्रियायां वर्तते मुख्यस्य करणार्थस्यासंभवात् सर्वधात्वर्थेषु करोत्यर्थस्य संभवाच्च ॥ २ ॥ एतद्वाक्यमेतत्स्वभावस्य सदृशमित्याह—सत्त्वेनेति ॥ सत्त्वेन बलेन । वीर्येण प्रभावेन । " वीर्यं बले प्रभावे च " इत्यमरः । पराक्रमेण उद्योगेन । "शौर्योद्योगौ पराक्रमौ" इत्यमरः । शौर्येण साहसिकत्वेन । धैर्येण स्थैर्येण । तेजसा गर्वेण । पराभिभवासहनेनेतियावत् ॥ ३ ॥ एवं रावणं प्रत्युक्त्वा विभीषणं निर्भर्त्सयति—किंनामेत्यादिना ॥ राक्षसेति हीनसंबोधनमाग्रहकृतं । तौ राजपुत्रौ किं नाम न किंचिदपि । अतिदुर्बलावित्यर्थः । कुत इत्यत्राह—अस्माकमेकेनेति । अस्माकं मध्ये सुप्राकृतेन अतिक्षुद्रेणापि । एकेन राक्षसेन एतौ निहन्तुं शक्यौ हि । अतः भीरो कुतोस्मान् भीषयसे स्वयंभीतोऽस्मान् भीषयसे । नास्माकंकिंचिद्भयमितिभावः ॥ ४ ॥ भयाभावे पूर्ववृत्तं संवादयति—त्रिलोकेति ॥ नन्वित्यामन्त्रणे । त्रिलोकनाथ इत्यैश्वर्यमुक्तं । देवराजइति सैन्यसामग्री दर्शिता । मया हेतुना । भूमितले निविष्टः स्थितः । निवेशितइत्यर्थइत्यन्ये ॥ ५ ॥ उन्नदन् उद्घुष्यन् । विकृष्य उत्पाट्य । ताभ्यां सर्वे देवगणाः वित्रासिताः हेतुभेदेन देवानां भयान्तरमत्रोक्तमिति न पुनरुक्तिः ॥ ६ ॥ स्ववृत्तप्रदर्शनफलमाह—सोहमिति ॥ मनुष्ययोरिति देवासुरव्यावृत्तिः । प्राकृतयोरिति इन्द्रव्यावृत्तिः । नरेन्द्रात्मजयोरिति बाल्योक्तिः । कथं न शक्तोस्मि अतः कुतो भीषयसे इति पूर्वेणान्वयः ॥ ७ ॥ इन्द्रकल्पस्येत्यादिविशेषणत्रयेण पूर्वोक्तस्य यथार्थत्वमुक्तं । शस्त्रभृतां वरिष्ठ इत्यनेनाभीरुत्वमुक्तं । महार्थमित्यनेन वक्ष्यमाणार्थस्येन्द्रजिता दुर्ज्ञेयत्वमुक्तं ॥ ८ ॥ न तातेति अनेन निकृष्टवयस्त्वमुक्तं । बालत्वेपि कस्यचित्सुमतिः संभवति सापि

स० कुतइतिद्वितीयान्ताकुशब्दात्ततिः । कुं लङ्काभूमिं । एतौ प्राप्तौ तौमानुषराजपुत्रौनिहन्तुंशक्यौ । किंनाम भीषयसेस्मकुतो भीषयसे । एतौकिंनाम किंपदार्थौ । अलक्ष्यतयैवमुक्तिः ॥ ४ ॥ ति० भूमितलेनिविष्टः स्वर्गात्प्रच्याव्यभूमौबन्दीकृत्यस्थापितः ॥ स० त्रिलोकनाथइति । विशेषणसमासोऽयं । लोकानांनाथोलोकनाथः । त्रयाणांलोकनाथस्त्रिलोकनाथः । सप्तघटिकाभोजनमितिवद्वा । भयार्पिताः भयमर्पितंयेषुते भयार्पिताइतिवा । सर्वाङ्गीणभयाइतिवा । दिशःप्रपन्नाः । यदेदृशीदशास्त्रिदशेश्वरस्त्रिदशानां काकथारघुनाथपोतयोरितिभावः ॥ ५ ॥ स० माययेन्द्रजयेपि वास्तवतत्सामर्थ्याभावादिन्द्रकल्पस्येत्युक्तिः ॥ ८ ॥

[पा०] १ ङ. ञ. मानुषराजपुत्रौ. २ ञ.—ट. भयार्पिताः. ३ ङ. ञ. ट. निस्वनं. ४ ग. ङ. ञ. शोककर्ता.

पुत्रप्रवादेन तु रावणस्य त्वमिन्द्रजिन्मित्रमुखोसि शत्रुः ॥
यस्येदृशं राघवतो विनाशं निशम्य मोहादनुमन्यसे त्वम् ॥ १० ॥
त्वमेव वध्यश्च सुदुर्मतिश्च स चापि वध्यो य इहानयत्त्वाम् ॥
बालं दृढं साहसिकं च योऽद्य प्रावेशयन्मन्त्रकृतां समीपम् ॥ ११ ॥
मूढः प्रगल्भोऽविनयोपपन्नस्तीक्ष्णस्वभावोऽल्पमतिर्दुरात्मा ॥
मूर्खस्त्वमत्यन्तसुदुर्मतिश्च त्वमिन्द्रजिद्बालतया ब्रवीषि ॥ १२ ॥
को ब्रह्मदण्डप्रतिमप्रकाशानर्चिष्मतः कालनिकाशरूपान् ॥
सहेत बाणान्यमदण्डकल्पान्समक्षमुक्तान्युधि राघवेण ॥ १३ ॥
धनानि रत्नानि विभूषणानि वासांसि दिव्यानि मणींश्च चित्रान् ॥
सीतां च रामाय निवेद्य देवीं वसेम राजन्निह वीतशोकाः ॥ १४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

नास्तीत्याह—अद्यापीति । अविपक्वबुद्धिः अपरिणतबुद्धिः । निश्चयाभावं दर्शयति—तस्मादिति । विप्रलपं विप्रलपितं ॥ ९ ॥ न केवलं स्वाज्ञानस्य स्वविनाश एव फलं किंतु पितृविनाशोपीत्याह—पुत्रेति ॥ हे इन्द्रजित् त्वं पुत्रप्रवादेन पुत्रप्रसिद्ध्या । इत्थंभावे तृतीया । मित्रस्य मुखमिव मुखं यस्य सः तथोक्तः । मित्रवद्भासमान इत्यर्थः । शत्रुरसि । शत्रुत्वमेवोपपादयति—यस्येति । त्वं यस्य रावणस्य ईदृशं पुत्रमित्रविनाशपर्यन्तं । राघवतो रामात् । विनाशं निशम्य मन्मुखाच्छ्रुत्वा । मोहादनुमन्यसे तस्य रावणस्य त्वं शत्रुरसीत्यर्थः । मोहादित्यनेन मित्रमुखत्वमुपपादितं । अनुमन्यस इत्यनेन शत्रुत्वं ॥ १० ॥ एवमनुमोदनस्य दण्डमाह—त्वमेवेति ॥ त्वमेव वध्यः दण्ड्यः किमित्यर्थः । किंतु यस्त्वां इह सभायां । आनयत् प्रावेशयच्च । स एव वध्यः ॥ ११ ॥ सुदुर्मतिश्चेति चशब्ददर्शितान् दोषानाह—मूढः इति ॥ मूढः कृत्याकृत्यविवेकशून्यः । प्रगल्भः धृष्टः । पण्डितंमन्य इति यावत् । अविनयोपपन्नः अशिक्षित इत्यर्थः । तीक्ष्णस्वभावः क्रूरप्रकृतिः । दुरात्मा दुष्टान्तःकरणः । मूर्खः अविमृश्यकारी । अत्यन्तसुदुर्मतिः । प्रहस्तो दुर्मतिः महापार्श्वादिः सुदुर्मतिः त्वमत्यन्तसुदुर्मतिरित्यर्थः । त्वमेवंभूतोसि अतस्त्वं बालतया ब्रवीषि इति संबन्धः ॥ १२ ॥ दुर्मतित्वे हेतुमाह—क इति ॥ ब्रह्मदण्डप्रतिमप्रकाशान् ब्रह्मदण्डसदृशप्रभान् । ब्रह्मदण्डो नाम युगान्तसमुत्थितोग्निवर्णो धूमकेतुरित्येके । ब्रह्मशाप इत्यन्ये । अर्चिष्मतः ज्वालावतः । "अर्चिर्हेतिः शिखा स्त्रियां" इत्यमरः । कालनिकाशरूपान् अन्तकसदृशरूपान् । समक्षमुक्तान् समीपे मुक्तान् ॥ १३ ॥ कृतस्याकृत्यस्य प्रायश्चित्तं राजानं प्रत्याह—धनानीति ॥ रत्नानि श्रेष्ठवस्तूनि । "रत्नं स्वजातिश्रेष्ठेपि" इत्यमरः । धनानि द्रव्याणि ॥ १४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चदशः सर्गः ॥ १५ ॥

स० ब्रह्मदण्डप्रतिमः ब्राह्मणशापसदृशःप्रकाशस्तेजोयेषांते तान् । कालः कालाभिमानीयमभृत्यः । नितरांकाशतइतिनिकाशोऽग्निः । तद्वद्रूपंयेषांतान् । समीक्ष्य लक्षीकृत्य ॥ १३ ॥ स० रत्नानिधनानि श्रेष्ठधनानि । " रत्नंश्रेष्ठमणावपि " इतिविश्वः मणीन् हीरादीन् ॥ १४ ॥ इतिपञ्चदशःसर्गः ॥ १५ ॥

[पा०] १ ज. मन्यार्थसुदुर्मतिश्च. २ ख.—ङ. ञ. सुभूषणानि.

षोडशः सर्गः ॥ १६ ॥

रावणेनविभीषणंप्रतिसगर्हणंभ्रातृत्वाभावेवधार्हत्वोक्तिः ॥ १ ॥ विभीषणेनतदसहिष्णुतयागदापाणिनासतासचिवचतुष्टयेनसहगगनोत्पतनेनरावणंप्रतिशोचनपूर्वंकंरामसमीपगमनम् ॥ २ ॥

सुनिविष्टं हितं वाक्यमुक्तवन्तं विभीषणम् ॥ अब्रवीत्परुषं वाक्यं रावणः कालचोदितः ॥ १ ॥
वसेत्सह सपत्नेन क्रुद्धेनाशीविषेण वा ॥ न तु मित्रप्रवादेन संवसेच्छत्रुसेविना ॥ २ ॥
जानामि शीलं ज्ञातीनां सर्वलोकेषु राक्षस ॥ हृष्यन्ति व्यसनेष्वेते ज्ञातीनां ज्ञातयः सदा ॥ ३
प्रधानं साधनं वैद्यं धर्मशीलं च राक्षस ॥ ज्ञातयो ह्यवमन्यन्ते शूरं परिभवन्ति च ॥ ४ ॥
नित्यमन्योन्यसंहृष्टा व्यसनेष्वाततायिनः ॥ प्रच्छन्नहृदया घोरा ज्ञातयस्तु भयावहाः ॥ ५ ॥
श्रूयन्ते हस्तिभिर्गीताः श्लोकाः पद्मवने क्वचित् ॥ पाशहस्तान्नरान्दृष्ट्वा शृणु तान्गदतो मम ॥ ६ ॥

इत्थं हितमुक्तवन्तं विभीषणं प्रति रावणस्य परुषभाषणं षोडशे—सुनिविष्टमिति ॥ सुसन्निवेशं अर्थानुसंधानविरहेपि श्रवणमात्रेणात्यन्तप्रीतिजनकं । तेनार्थस्याननुकूलत्वेपि श्रवणस्यापरित्याज्यत्वमुक्तं । सुनिविष्टं उक्तवन्तमिति क्रियाविशेषणं वा । तेन मनस्यलग्नं चेदनादरणीयं वा स्यात् । मनसि सम्यग्लग्नं यथा भवति तथा उक्तवन्तं । हितं न केवलं श्रवणप्रियं । अतिदुर्दशानिस्तरणोपायतया पथ्यं । श्रवणकटुत्वेपि पथ्यत्वपर्यालोचनया अपरित्याज्यं । वाक्यं यावद्वक्तव्यार्थपूर्णं । उक्तवन्तं । "नासंवत्सरवासिने ब्रूयात्" इत्युक्तरीत्या गुरूपसदनयुक्तस्य पादयोः पतितस्य वक्तव्यस्य दुरवस्थां दृष्ट्वोक्तवन्तं विभीषणं । अन्येन चेदुक्तं परित्याज्यं । साक्षादनुजतया प्रत्यासन्नेनोक्तं कथं त्याज्यं । परुषं वाक्यमब्रवीत् । श्रवणसमनन्तरं स्थितोस्मि गतसंदेह इति वा वक्तव्यं । त्वया महोपकारः कृत इति स्तोत्रं वा कर्तव्यं । सदृशप्रत्युपकाराभावेनानुतापो वा कर्तव्यः । तद्विहाय शत्रून्प्रति वक्तव्यमुक्तवान् । अब्रवीदित्यनेन यथा सुनिविष्टमुक्तं तथा मनसि सुलग्नं यथा भवति तथा व्यक्तमुक्तवान् । एवमुक्तवन्तं प्रत्यपि परुषोक्तौ हेतुद्वयमाह—रावण इत्यादि । रावयति रोदयतीति रावणः परहिंसायां जगद्विदितः । रौतीति रवणः स एव रावणः । स्वार्थेणप्रत्ययः । अस्थाने पदं दत्त्वा स्वयमप्याक्रन्दन्नित्यर्थः । कालचोदितः । भ्राता रामं शरणं गच्छेत्युक्तवान् कालस्तन्न कर्तव्यमिति स्वयं द्विधा भज्येयमिति । अतः स्वप्रकृत्यनुगुणं कालमनुसृतवानितिभावः ॥ १ ॥ परुषमेवाह—वसेदिति ॥ सपत्नेन बाह्यशत्रुणा । मित्रप्रवादेन मित्रवदवभासमानेनेत्यर्थः । शत्रुसेविना शत्रुपक्षपातिना । सहजशत्रुणेत्यर्थः । शत्रुसर्पसहवासादपि सहजशत्रुसहवासः सुदूरं परिहर्तव्य इति भावः । अतस्त्वया अस्मान्नगरात् सद्यो गन्तव्यमितिद्योत्यते ॥ २ ॥ अत्र शत्रुसेवित्वे हेतूंस्त्रिभिर्दर्शयति—जानामीत्यादिभिः । सर्वलोकेषु सर्वजनेषु मध्ये । शीलं स्वभावं । शीलमेवाह—हृष्यन्तीति । अस्मद्व्यसनेन लब्धहर्षस्त्वमेवं गर्जसीति भावः ॥ ३ ॥ ज्ञातयः । प्रधानं स्वजातिश्रेष्ठं । साधनं कार्यसाधकं । वैद्यं विद्वांसं । प्राधान्यादिष्वेकैकगुणयोगेपि ज्ञातयोवमन्यन्ते । न बहु मन्यन्ते अवसरे परिभवन्ति चेत्यर्थः ॥ ४ ॥ एवं ज्ञातीनां ज्ञातिषु व्यसने हर्षः उत्कर्षेऽसूया चेति शीलद्वयमुक्तं । अथ भयावहत्वरूपं शीलान्तरमाह—नित्यमिति ॥ प्रतिच्छन्नहृदयाः गूढाभिप्रायाः । अतएव नित्यमन्योन्यसंहृष्टाः बहिःस्नेहवन्त इवस्थिताः । घोराः क्रूरकर्माणः । अतएव व्यसनेषु सत्सु आततायिनः द्रोहकारिणः । अतस्त्वमस्मासु व्यसने प्रहर्तुमिच्छसीतिभावः ॥ ५ ॥ उक्तं ज्ञातीनां भयावहत्वं हस्ति-

ती० सुनिविष्टं सुष्ठुविनीतिनिष्ठमितियावत् ॥ १ ॥ ति० सपत्नेनापिसहवसेत् । नतुमित्रप्रवादेन मित्रपदव्यवहार्येण । शत्रुसेविना शत्रुपक्षपातिना । वसेत् । सपत्नेचित्तस्यद्वेषकोव्यैवप्रतिष्ठा । मित्रप्रवादेतु द्वेष्यत्वेनस्निग्धत्वेनचेतिपरमदुःखमितितत्सहवासनिषेधः । शत्रुसेविनेत्यनेनास्यभगवद्भक्तत्वंसूचितं ॥ २ ॥ ति० ज्ञातयः ज्ञातिरूपाः । आततायिनः "अग्निदोगरदश्चैव

[पा०] १ ङ. ज.—ट. साधकं. घ. सुकृतं. २ ङ. ञ. ञ. ट. ज्ञातयोप्यव. ३ ङ. ञ. पुरा. ४ ङ. छ. ञ. ञ. ट. शृणुष्वगदतो.

नाग्निर्नान्यानि शस्त्राणि न नः पाशा भयावहाः॥ घोराः स्वार्थप्रयुक्तास्तु ज्ञातयो नो भयावहाः॥७॥
उपायमेते वक्ष्यन्ति ग्रहणे नात्र संशयः ॥ कृत्स्नाद्भयाज्ज्ञातिभयं सुकष्टं विदितं च नः ॥ ८ ॥
विद्यते गोषु संपन्नं विद्यते ब्राह्मणे दमः ॥ विद्यते स्त्रीषु चापल्यं विद्यते ज्ञातितो भयम् ॥ ९ ॥
ततो नेष्टमिदं सौम्य यदहं लोकसत्कृतः ॥ ऐश्वर्यमभिजातश्च ज्ञातीनां मूर्ध्न्यवस्थितः ॥ १० ॥
यथा पुष्करपर्णेषु पतितास्तोयविन्दवः ॥ न श्लेषमुपगच्छन्ति तथाऽनार्येषु संगतम् ॥ ११ ॥
यथा मधुकरस्तर्षाद्रसं विन्दन्न विंदते ॥ तथा त्वमपि तत्रैव तथाऽनार्येषु सौहृदम् ॥ १२ ॥
[यथा मधुकरस्तर्षात्काशपुष्पं पिबन्नपि ॥ रसमत्र न विन्देत तथाऽनार्येषु सौहृदम्] ॥ १३ ॥
यथा पूर्वं गजः स्नात्वा गृह्य हस्तेन वै रजः ॥ दूषयत्यात्मनो देहं तथाऽनार्येषु सौहृदम् ॥ १४ ॥
यथा शरदि मेघानां सिञ्चतामपि गर्जताम् ॥ न भवत्यम्बुसंक्लेदस्तथाऽनार्येषु सौहृदम् ॥ १५ ॥

गीतेन संवादयति—श्रूयन्त इत्यादिना ॥ कचित्पद्मवने । पाशहस्तान् पाशाः गजग्रहणरज्जवः ते हस्तेषु येषां ते तथोक्तान् । स्वबन्धनोद्युक्तानिति यावत् । नरान् ज्ञातिगजगोप्तॄन् गजग्राहिपुरुषान् दृष्ट्वा हस्तिभिः गीताः पठिताः । श्लोकाः श्रूयन्ते । वक्तृपरम्परया तान् श्लोकान् । गदतः वदतः । मम मत्तः । शृणु ॥ ६ ॥ तानेव त्रीञ्श्लोकानुपादत्ते—नाग्निरित्यादिना ॥ नः अस्माकं । अग्निः आश्रयाशोपि न भयावहः । अन्यानि लोकविलक्षणानि अग्नितोपि क्षणान्नाशकराणि । शस्त्राणि आयुधानि च । न भयावहानि । पाशाः मरणादप्यतिदुस्सहपारवश्यक्लेशकराश्च न भयावहाः । किंतु घोराः निर्दयाः । स्वार्थप्रयुक्ताः स्वप्रयोजनपराः । ज्ञातयः भयावहाः । अग्न्यादिभ्योप्यधिकं ज्ञातिभ्यो भयमित्यर्थः ॥ ७ ॥ उक्तं ज्ञातिभयातिरेकं सयुक्तिकमुपपादयति—उपायमिति ॥ अस्माकं ग्रहणे एते ज्ञातिरूपा हस्तिनः । उपायं वक्ष्यन्ति । अत्रोपायकथने संशयो नास्ति । अतः कृत्स्नादग्न्यादिभयात् ज्ञातिभयं सुकष्टं । प्रकृष्टं भयमित्यर्थः । इदमस्माभिः विदितं ज्ञातं च ॥ ८ ॥ स्निग्धेषु ज्ञातिषु कुतो भयसंभावनेत्याशङ्क्याह—विद्यत इति ॥ गोसंपत्त्याद्युपादानं दृष्टान्तार्थं । गोषु संपन्नं संपत्तिः । तद्धेतुत्वमित्यर्थः । विद्यते अस्ति । "विद सत्तायां" इति धातुः । दमः इन्द्रियनिग्रहः । चापल्यं चञ्चलत्वं । ज्ञातितः ज्ञातिषु । भयं भयकरत्वं ॥ ९ ॥ प्रधानं साधनमिति श्लोकोक्तं निदर्शयति—तत इति ॥ अहं लोकसत्कृतः ऐश्वर्यं अभिजातः प्राप्तः । रिपूणां मूर्ध्न्यवस्थितश्चेतियत् इदं ततः ज्ञातीनामसहिष्णुत्वात् तव नेष्टं ॥ १० ॥ चिरं सह वसति विभीषणे कथमकार्यमाशङ्कस इत्यपेक्षायामनार्यस्य चिरसंवासोऽप्रयोजक इत्याह—यथेति ॥ पुष्करपर्णेषु पद्मपत्रेषु पतितास्तोयबिन्दवः यथा श्लेषं ऐक्यं । नोपगच्छन्ति तथा अनार्येषु दुष्टेषु विषये । संगतं संबन्धः । श्लेषं स्नेहबन्धं । नोपयातीत्यर्थः ॥ ११ ॥ त्वदुपजीविनस्त्वयि कथं स्नेहबन्धाभाव इत्यत्राह—यथेति ॥ यथा मधुकरः तर्षात् अभिलाषात् । रसं मकरन्दं । विन्दन् पिबन् । तत्र रसाधारे पुष्पे । न विद्यते न तिष्ठति । रसप्रदानोपकारंजानन् तत्र न स्निह्यतीत्यर्थः । त्वमपि तथा मधुकरइव । अनार्येषु दुर्जनेषु । सौहृदं तथा हि । उपजीव्यविषये न जायतइत्यर्थान्तरन्यासः ॥ १२—१३ ॥ तथापि कृतस्नेहः कुतोपलप्यते तत्राह—यथेति ॥ अनार्येषु सौहृदं गजस्नानवत्तैरेव दुष्यत इत्यर्थः ॥ १४ ॥ दृष्टोपि स्नेहो न फलपर्यव-

---

शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैवषडेतेआततायिनः " ॥ ५ ॥ **रामानु०** सौम्येत्याक्षेपोक्तिः ॥ १० ॥ **ति०** काशपुष्पंपिबतोपिरसालाभः तथाऽनार्येषुसौहृदंकुर्वतःफलालाभइतिभावः ॥ १३ ॥ **ति०** यथागर्जतांसिञ्चतामपिमेघानांसंबन्धे पृथिव्याअंबुसंक्लेदः अंबुव्याप्तता । नभवति तथा अनार्येषुसौहृदं निष्फलमितिभावः । यद्वा वर्षासुगर्जतांसिञ्चतामपिमेघानांशरदिनांबुसंक्लेदः तथाऽनार्येषुसौहृदं अल्पकालस्थायीत्यर्थः ॥ **ती०** शरदिसिञ्चतां जललवान्मुञ्चतांमेघानांयथार्द्रीभावोनभवति । मेघाइवानार्याः

[**पा०**] १ क.—ङ. छ.—ञ. रिपूणांमूर्धनिस्थितः. २ ङ. झ. ट. मभिगच्छन्ति. ३ क.—ङ. छ.—ञ. सौहृदं. ४ ङ. छ. झ. तिष्ठति. घ. ज. सज्जते. ५ अयंश्लोकः क. ग. ङ. छ. झ. ञ. ट. पाठेषुदृश्यते. ६ ख. शारदमेघानां.

अन्यस्त्वेवंविधं ब्रूयाद्वाक्यमेतन्निशाचर ॥ अस्मिन्मुहूर्ते नभवेत्त्वां तु धिक्कुलपांसनम् ॥ १६ ॥
इत्युक्तः परुषं वाक्यं न्यायवादी विभीषणः ॥ उत्पपात गदापाणिश्चतुर्भिः सह राक्षसैः ॥ १७ ॥
अब्रवीच्च तदा वाक्यं जातक्रोधो विभीषणः ॥ अन्तरिक्षगतः श्रीमान्भ्रातरं राक्षसाधिपम् ॥ १८ ॥
स त्वं भ्राताऽसि मे राजन्ब्रूहि मां यद्यदिच्छसि ॥ १९ ॥
ज्येष्ठो मान्यः पितृसमो न च धर्मपथे स्थितः ॥ इदं तु परुषं वाक्यं न क्षमाम्यनृतं तव ॥ २० ॥
सुनीतं हितकामेन वाक्यमुक्तं दशानन ॥ न गृह्णन्त्यकृतात्मानः कालस्य वशमागताः ॥ २१ ॥
सुलभाः पुरुषा राजन्सततं प्रियवादिनः ॥ अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ २२ ॥
बद्धं कालस्य पाशेन सर्वभूतापहारिणा ॥ न नश्यन्तमुपेक्षेयं प्रदीप्तं शरणं यथा ॥ २३ ॥
दीप्तपावकसंकाशैः शितैः काञ्चनभूषणैः ॥ न त्वामिच्छाम्यहं द्रष्टुं रामेण निहतं शरैः ॥ २४ ॥
शूराश्च बलवन्तश्च कृतास्त्राश्च रणाजिरे ॥ कालाभिपन्नाः सीदन्ति यथा वालुकसेतवः ॥ २५ ॥
तन्मर्षयतु यच्चोक्तं गुरुत्वाद्धितमिच्छता ॥ आत्मानं सर्वथा रक्ष पुरीं चेमां सराक्षसाम् ॥ २६ ॥

सायीत्याह—यथेति ॥ शरदि सिञ्चतां वर्षतां । मेघानां संबन्धी अम्बुसंक्लेदः अम्बुसेचनं । यथा न भवति तथानार्येषु सौहृदं । शरन्मेघवर्षणवदनार्येषु सौहृदमनुपकारकमित्यर्थः ॥ १५ ॥ एवं सामान्येन विनिन्द्य साक्षादपि निन्दति—अन्य इति ॥ अन्यः अनुजादन्यः । एवंविधं अतिपरुषं । एतत् पूर्वोक्तं । वाक्यं ब्रूयात् वदेच्चेत् । अस्मिन्मुहूर्तेस्मिन्क्षणएव । नभवेत् विनश्येत् । नाशयेयमितियावत् । त्वां तु भ्रात्राभासं । धिक् त्यक्ष्यामीत्यर्थः । कुलपांसनं राक्षसकुलावद्यकरं ॥ १६ ॥ न्यायवाद्यपि इति पूर्वोक्तरीत्या । परुषमुक्तस्सन् उत्पपात संतप्तसिकतामयभूमिस्थितइव उद्गतः ॥ १७ ॥ एवमाकाशे उत्पतन्नपि पुनस्तस्मिन्ननुतापेनापिनामसमुद्भवेत्समीची मतिरिति हितोपदेशे प्रावर्ततेत्याह—अब्रवीदिति ॥ अन्तरिक्षगतः श्रीमान् । "परित्यक्ता मया लङ्का मित्राणि च धनानि च" इति समुत्थितस्य का नाम श्रीः । उच्यते । प्रतिकूलनिवृत्तिपूर्वकानुकूलरामविषयाभिमुख्यश्रीसमेत इत्यर्थः ॥ १८ ॥ स त्वमित्यर्धमेकं वाक्यं ॥ स त्वं परुषवादी त्वं । भ्रातासि प्रतिवक्तुमनर्होसि । अतो यद्यदिच्छसि तद्वद ॥१९॥ तर्हि किमर्थमुद्वतोसि प्रतिवचनाभावात् क्षमापि क्रियतां तत्राह—ज्येष्ठ इति ॥ ज्येष्ठस्त्वं पितृसमः मान्यः । किंतु धर्मपथे न स्थितोसि । अतस्त्वदुक्तमनृतं परुषं न क्षमामि न क्षमे ॥ २० ॥ स्ववाक्याश्रवणे निमित्तं सामान्यतो दर्शयति—सुनीतमिति ॥ २१ ॥ प्रियवादिन इत्युपलक्षणं प्रियश्रोतारश्च ॥ २२ ॥ तर्ह्यश्रोतारं प्रति किमर्थं वदसि तत्राह—बद्धमिति ॥ सर्वभूतापहारिणा निर्दयेनेत्यर्थः । नोपेक्षेयं नोपेक्षेय । शरणं गृहं ॥ २३—२४ ॥ शौर्यबलास्त्रशालिनो मे कुतो विपदाशङ्केत्यत्राह—शूरा इति ॥ कालाभिपन्नाः मृत्युगृहीताः । सीदन्ति शीर्यन्ति । वालुकाः सिकताः ॥ २५ ॥ मर्षयतु । भवानितिशेषः ॥ २६ ॥

आपाततउपकुर्वन्तइवप्रतीयमानाअपिवस्तुतोनोपकुर्वन्तीत्यर्थः ॥ १५ ॥ **ति०** परुषंवाक्यं पूर्वोक्तं । लङ्कावस्थानेप्येतैस्सहनाशस्य दुर्वारत्वात्ज्येष्ठोप्यसौ "उत्पथंप्रतिपन्नस्यकार्याकार्यमजानतः । गुरोरप्यवलिप्तस्यपरित्यागोविधीयते" इतिशास्त्रबलात्सर्वथापरित्याज्यएवेत्यालोच्यतत्सभांहित्वाखमुत्पपातचतुर्भिर्मन्त्रिभिः ॥ १७ ॥ **रामानु०** अत्रश्रीशब्देनसोपाधिकप्रतिकूलसंबन्धपरित्यागंपूर्वकनिरुपाधिकस्वामिसंबन्धावलंबनरूपाश्रीरुच्यते ॥ १८ ॥ **ति०** अथसभासदांज्येष्ठत्वागेनाधमोयमितिशङ्कानिवृत्त्यर्थमाह—सलंभ्रातेइत्यादि । ज्येष्ठत्वादिगुणकोपिनधर्मपथेस्थितः परदारापहरणादिरूपानेकाधर्मशालित्वात् । "पतितैःसहसंव्यवहारोनविद्यते" इतिस्मृतेः । "पतितमाचार्यज्ञातिंवाद्रष्टुंनगच्छेत् । नचास्मादुपयुञ्जीत । यदृच्छासंनिपातेउपसंगृह्यतूष्णींव्रजेत्" इतिस्मृतेश्चाग्रजस्यापितेइदंपरुषंवाक्यंनक्षमामि । अतःपरमिहस्थित्वेतिशेषः ॥ १९—२० ॥ **ति०** यदुक्तमप्रियमिवहितं तद्भवान्मर्षयतु क्षमतां । मयाविनासुखीभवेतिव्यङ्ग्योक्तिः ॥ २६ ॥

[**पा०**] १ घ. ङ. छ. झ. ञ. ट. योनस्त्वेवं. क. योन्यश्चैवं. २ ख. ङ. झ. ट. पांसन. ३ ङ. छ. झ. ञ. क्षमाम्यग्रजस्यते. क. क्षमाम्यग्रतस्तव. ४ ङ. झ. मुपेक्षेयां. ५ क. ख. सैकतमंभसि.

स्वस्ति तेऽस्तु गमिष्यामि सुखी भव मया विना ॥ २७ ॥
[नूनं न ते रावण कश्चिदस्ति रक्षोनिकायेषु सुहृत्सखा वा ॥
हितोपदेशस्य स मन्त्रवक्ता यो वारयेत्त्वां स्वयमेव पापात् ॥ २८ ॥]
निवार्यमाणस्य मया हितैषिणा न रोचते ते वचनं निशाचर ॥
परीतकाला हि गतायुषो नरा हितं न गृह्णन्ति सुहृद्धिरीरितम् ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षोडशः सर्गः ॥ १६ ॥

सप्तदशः सर्गः ॥ १७ ॥

मन्त्रिचतुष्टयेनसहगगनेऽभ्यागच्छन्तंगदापाणिंविभीषणंदृष्टवतासुग्रीवेण हनुमदादीन्प्रति तत्प्रदर्शनपूर्वकं तदागमनस्यरा-
मादिहननेच्छामूलकत्वोक्तिः ॥१॥ सागरोत्तरतीरमागतवताविभीषणेन सुग्रीवादीन्प्रति स्ववृत्तान्तनिवेदनेनसहस्वागमननिदा
ननिवेदनपूर्वकं श्रीरामेतन्निवेदनप्रार्थना ॥ २ ॥ सुग्रीवेणरामंप्रति तन्निवेदनपूर्वकंविभीषणेदोषनिर्धारणेन तस्यवधार्हत्वो-
क्तिः ॥ ३ ॥ रामेणविभीषणस्वीकरणे स्वस्वाभिप्रायनिवेदनंचोदितैरङ्गदादिभिर्विभीषणेदोषसंभावनया परीक्षामन्तराग्रहण-
निषेधे हनुमताऽङ्गदादिपक्षप्रतिक्षेपपूर्वकं तस्यनिर्दोषत्वनिर्धारणेनग्राह्यत्वोक्तिः ॥ ४ ॥

इत्युक्त्वा परुषं वाक्यं रावणं रावणानुजः ॥ आजगाम मुहूर्तेन यत्र रामः सलक्ष्मणः ॥ १ ॥

स्वस्तीत्यर्धं ॥ २७—२९ ॥ इति श्रीगोविन्दराज-विरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्ध-काण्डव्याख्याने षोडशः सर्गः ॥ १६ ॥

एवमष्टभिः सर्गैः—" आनुकूल्यस्य संकल्पः प्रा-तिकूल्यस्य वर्जनम् । रक्षिष्यतीति विश्वासो गोप्तृत्व-वरणं तथा ॥ आत्मनिक्षेपकार्पण्ये षड्विधा शरणाग-तिः " इत्युक्तेषु शरणागत्यङ्गेषु प्रपित्सोर्विभीषणस्या-नुकूल्यसंकल्पप्रातिकूल्यवर्जने दर्शिते । पुनः पुनरुप-देशादिना महाविश्वासो दर्शितः । अथ कार्पण्यप्रद-र्शनपूर्वकं शरणागतिस्वरूपं दर्शयितुमुपक्रमते—इत्यु-क्त्वेत्यादिना ॥ तत्र रावणेन तिरस्कारे सत्यस्य देश एवास्माभिस्त्याज्यः । परमधार्मिकश्रीरामाश्रयस्तु कर्त-व्य इति धार्मिकस्य विभीषणस्य धर्मे मतिरासीदित्यृ-षिः प्रस्तौति—इतीति ॥ इत्युक्त्वा " प्रदीयतां दाशरथाय मैथिली " इति कर्तव्यसौकर्यं " यावन्न गृह्णन्ति शिरांसि बाणाः " इत्यकरणे प्रत्यवायं चो-क्त्वा । परुषं स्त्रीकजनसुखावहस्य मलयमारुतस्य विरहिणि दुःखकरत्ववद्विभीषणोदितं हितं । आश्रय-दोषेण परुषं । वाक्यं हितपरिपूर्णं । उक्त्वा हितज्ञो भ्राता भ्रातरमापन्नं परित्यजेत्यपयशो यावता शक्यं परिमार्ष्टुं तावत्पर्यन्तमुक्त्वा । परुषत्वे हेतुः रावणमिति । प्रबलदुर्बलविचारमन्तरेण सर्वरावकस्य शत्रुबलोपवर्णने परुषं भवत्येव । रावणानुजः रावणा-नुजत्वेपि सत्वोत्तरतया कथनीयं हितमुक्तवानित्यृषिः स्तौति । हितकथने ज्येष्ठभावोप्यप्रयोजकः । अत एवोक्तं मनुना—"पितृनध्यापयामास शिशुराङ्गिरसः कविः । पुत्रका इति होवाच ज्ञानेन परिगृह्य तान् ॥ अज्ञं हि बालमित्याहुः पितेत्येव च मन्त्रदं " इति । आजगाम रावणगोष्ठ्यां स्वस्य संबन्धाभावेन राम-गोष्ठ्याः स्वगृहत्वेनाजगामेत्युक्तं नतुजगामेति । मुहूर्तेन " वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः । न शौरिचिन्ताविमुखजनसंवासवैशसं " इति न्याये-नाङ्गारनिकरपरिक्षिप्तेवर्त्मनिपदन्यासवत् रावणस-दनावस्थित्यनर्हत्वं विगलितबन्धनरज्जोर्वत्सस्य मातु-रूधःस्पर्शमन्तरेण मध्यदेशादर्शनवदतिवेगागमनं चो-क्तं । यत्रराम: । रामापेक्षया तद्देशसंबन्धस्य प्राप्य-त्वमुक्तं । " सुभगश्चित्रकूटोसौ गिरिराजोपमो गि-रिः । यस्मिन्वसति काकुत्स्थः कुबेर इव नन्दने " इतिवत् रामस्य लक्ष्मणो व्यावर्तकइति सलक्ष्मण

रामानु० परीतकालाः परीतः प्रत्यासन्नः कालोमृत्युर्येषांतेतथोक्ताः । **ती०** यद्वा परीतः परिवृतः कालः मृत्युरिवअहिः तेनग तान्यायूंषियेषांतेतथोक्ताः ॥ २९ ॥ इतिषोडशःसर्गः ॥ १६ ॥

[**पा०**] १ ङ. ञ. ट. परान्तकालेहि. ज. परेतकल्पाहि.

इत्युक्तं । यद्वा पुरुषकारसान्निध्यमनेनोच्यते । अनेन श्लोकेन भगवद्विमुखानां देशस्य त्याज्यत्वं तत्संबन्धिदेशस्य परमप्राप्यत्वं चोक्तं । यद्वा " सा काशीति न चाकशीति " इत्याद्युक्तरीत्या भगवद्देशस्यापि भागवताभिमानाभावे परित्याज्यत्वाल्लक्ष्मणसान्निध्यमुक्तं । ननु विश्रवःपितामहवरप्रदानविभवविदितनिखिलधर्मवृन्देन " विभीषणस्तु धर्मात्मा न तु राक्षसचेष्टितः " इति तत्र तत्र धार्मिकतया प्रशंसितेन विभीषणेन " ज्येष्ठो भ्राता पितृसमः " इति पितृवदनुवर्तनीयो ज्येष्ठभ्राता बाल्यात्प्रभृति परिपोषकश्च सन्नावणः सपदि सन्निहिते शत्रौ क्षुद्रबुद्धिनेव दूरं कथं परित्यक्तः । त्यजतु नाम कथंचित् । अथापि न युक्तमभिगन्तुं तस्य प्रहर्तारं । अभिगच्छतु नाम नोचितमस्यस्थानमभिलषितुं । अभिलषतु नाम नौपयिकमस्यवधोपायंनिर्देष्टुं । अत्र केचित् । रावणस्य निरवधिकदोषदूषितत्वात् "गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथं प्रतिपन्नस्य परित्यागो विधीयते" इति स्मरणाद्विभीषणेन त्यक्तो रावण इत्याहुः । त्रय्यन्तगुरवस्तु–' पितामहवरप्रसादेन लब्धविज्ञानत्वाद्रामं सर्ववेदान्तवेद्यं सर्वलोकेश्वरभूतं सर्वलोकशरण्यं मुक्तप्राप्यं नारायणाख्यं परं ब्रह्म लोकानुजिघृक्षयावतीर्णमिति निर्विचिकित्समवगच्छति । यथा मन्दोदरीप्रभृतयः । एवं तत्त्वज्ञानसंपन्नस्य विशेषसामान्यधर्मप्राबल्यदौर्बल्यविवेकेन सामान्यधर्मपरित्यागो विशेषधर्मपरिग्रहश्चोपपद्यते । ज्येष्ठभ्रात्रनुवर्तनंहि त्रैवर्गिकफलसाधनतयाज्येष्ठानुवर्तनद्वारा परमात्माराधने पर्यवसानस्य वक्तव्यत्वात् मोक्षपर्यवसानेपि परमात्मोपासनाङ्गत्वाच्च सामान्यधर्मः । रामानुवर्तनं तु साक्षात्परमात्मसमाराधनत्वात् यज्ञादिधर्मसाध्यत्वेन प्रधानत्वाच्च विशेषधर्मः । उभयोश्चाप्यविरोधे सत्युभयमप्यनुवर्तनीयं । विरोधेतुसामान्यधर्मं परित्यज्य विशेषधर्मोनुवर्तनीयः । अतो विभीषणोपि इयन्तं कालं कृतं रावणानुवर्तनमपरित्यज्यैव मम रामानुवर्तनमपि किं सिद्ध्येदित्याशया तस्मै हितं पुनःपुनरुपदिदेश । एवमपि तस्यासुरप्रकृतितयाऽनपनोद्यं रामवैरमितिनिश्चित्यातःपरं एतदनुवर्तने स्वात्मविनाशकं रामविषयकं वैरं मय्यपि स्यादिति भीतःसन् " वरं हुतवहज्वाला " इत्यादिन्यायेनात्यन्तदुःसहां तत्संगतिं तत्याज । विशेषधर्मं रामानुवर्तनं चाङ्गीचकारेत्यतोयं परो धर्म एवेति कृतघ्नशङ्का दूरोत्सारिता । नाप्ययं राज्यकाङ्क्षया रामंशरणमुपजगाम तदपेक्षाया अदर्शनात् । तथाहि शरणागतिसमये " त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः " इत्यन्यविषयवैराग्यस्य तेन कण्ठरवेणोक्तत्वात् । पश्चाद्रामाय विज्ञापने क्रियमाणे " परित्यक्ता मया लङ्का मित्राणि च धनानि च । भवद्गतं मे राज्यं च जीवितं च सुखानि च " इति सर्वविधपुरुषार्थत्वेन त्वामेवाहमुपेयिवानितिकथनाच्च । " अहं हत्वा दशग्रीवं सप्रहस्तं सबान्धवं । राजानं त्वां करिष्यामि सत्यमेतद्ब्रवीमि ते " इत्यनाकाङ्क्षितराजत्वकरणोक्तिः कूलंकषरामप्रीतिसागरपरीवाहरूपानुषङ्गिकभोगप्रदानपरा । यथाहुः—" आयुरारोग्यमर्थांश्च भोगांश्चैवानुषङ्गिकान् । ददाति ध्यायतां नित्यमपवर्गप्रदो हरिः " इति ॥ अतो यदुक्तं हनुमता " राज्यं प्रार्थयमानस्तु बुद्धिपूर्वमिहागतः " इति । यच्च रामेणोक्तं " राज्यकाङ्क्षी विभीषणः " इति तत्सर्वं रामभक्त्याविलाशयस्य सुग्रीवस्य व्यामोहप्रशमनाय नीतिशास्त्रोक्तराजवृत्तान्तप्रदर्शनमात्रपरमिति मन्तव्यम् । हनुमद्रामवाक्यस्य विभीषणवाक्यस्य चान्योन्यविरोधप्रसङ्गे " अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीयः " इतिन्यायेन विभीषणवाक्यस्य प्राबल्यात् । अतएव " राजानं त्वां करिष्यामि " इति ब्रुवतो रामस्य प्रतिवचनमनुक्त्वा परिचरणमात्रमेव विभीषणः प्रार्थयामास " राक्षसानां वधे साह्यं लङ्कायाश्च प्रधर्षणे । करिष्यामि यथाप्राणं प्रवेक्ष्यामि च वाहिनीम् " इति । तस्यानुमत्यभावेपि बलाद्राज्यस्वीकार उत्तरकाण्ड उक्तः—" यावत्प्रजा धरिष्यन्ति तावत्त्वं वै विभीषण । राक्षसेन्द्र महावीर्य लङ्कास्थस्त्वं धरिष्यसि ॥ शाश्वतस्त्वं सखित्वेन कार्यं ते मम शासनम् । प्रजाः संरक्ष धर्मेण नोत्तरं वक्तुमर्हसि " इति । इत्थमनन्यप्रयोजनत्वादेवास्मै रामः कुलधनं श्रीरङ्गनाथं ददौ । धर्मसंस्थापनार्थमेवावतीर्णस्य रामस्य नियोगेनावशिष्टां राक्षसजातिं सन्मार्गे प्रवर्तयितुं तस्य राज्याङ्गीकरणं । इदमप्याज्ञानुविधायित्वात् कैङ्कर्यकोटावन्तर्भूतमिति विभीषणतात्पर्यं । अतो यथावद्विदितधर्मो लक्ष्मणोपि " अहं तावन्महाराजे पितृत्वं नोपलक्षये । भ्राता भर्ता च बन्धुश्च पिता च मम राघवः " इति सोपाधिकपितरं दशरथं परित्यज्य निरुपाधिकसकलविधबन्धुं

तं मेरुशिखराकारं दीप्तामिव शतह्रदाम् ॥ गगनस्थं महीस्थास्ते ददृशुर्वानराधिपाः ॥ २ ॥
[स हि मेघाचलप्रख्यो महेन्द्रसमविक्रमः ॥ सर्वायुधधरो वीरो दिव्याभरणभूषितः ॥ ३ ॥
ये चाप्यनुचरास्तस्य चत्वारो भीमविक्रमाः ॥ तेऽपि सर्वायुधोपेता भूषणैश्चापि भूषिताः] ॥ ४ ॥
तमात्मपञ्चमं दृष्ट्वा सुग्रीवो वानराधिपः ॥ वानरैः सह दुर्धर्षश्चिन्तयामास बुद्धिमान् ॥ ५ ॥
चिन्तयित्वा मुहूर्तं तु वानरांस्तानुवाच ह ॥ हनुमत्प्रमुखान्सर्वानिदं वचनमुत्तमम् ॥ ६ ॥

राममेव "अग्रतस्ते गमिष्यामि पन्थानमकुतोभयम्। अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते" इति रामपरिचरणमेव फलं प्रार्थयामास। "स भ्रातुश्चरणौ गाढं निपीड्य रघुनन्दनः" इति राघवं शरणमुपागतश्च । तथा विभीषणोपि सोपाधिकबन्धुं भ्रातरं परित्यज्य कैङ्कर्यापेक्षयैव सर्वविधसहजबन्धुं रामं शरणं गत इति बोध्यम् । अतएव रामप्राप्त्यपेक्षया रावणपरित्यागवेलायामन्तरिक्षगतः श्रीमानिति प्रशंसितः । स तु नागवरः श्रीमान् लक्ष्मणो लक्ष्मसंपन्न इतिवत्। तस्मान्नाधर्मशङ्का विभीषणे । ननु यद्येवं तर्हि "ययोर्वीर्यमुपाश्रित्य प्रतिष्ठा काङ्क्षिता मया । तावुभौ मम नाशाय प्रसुप्तौ पुरुषर्षभौ ॥ जीवन्नपि विपन्नोस्मि नष्टराज्यमनोरथः । प्राप्तप्रतिज्ञश्च रिपुः सकामो रावणःकृतः" इति नागपाशबन्धनसमये स्वस्य राज्यनाशकृतनिर्वेदः कथमुपपद्यत इति चेन्न । तत्रापि प्रतिष्ठाशब्दस्य रामकैङ्कर्यपरत्वात् । नष्टराज्यमनोरथ इत्यत्रापि राज्यशब्दो "भवद्गतं मे राज्यं च" इत्युक्तकैङ्कर्यसाम्राज्यपरः । एतेन "राज्यं प्राप्स्यसि धर्मज्ञ लङ्कायां नात्र संशयः" इति सुग्रीववचनं तु तदाशयाज्ञानकृतमिति न कश्चिद्दोष' इति प्राहुः । अतएव चतुरशीतौ वक्ष्यति विभीषणः—"यदाज्ञप्तं महाबाहो त्वया गुल्मनिवेशनम् । तत्तथाऽनुष्ठितं वीर त्वद्वाक्यसमनन्तरम्" इति ॥ १ ॥ रावणसमीपादुत्पतनसमय एव सुग्रीवादयो विभीषणमपश्यन्नित्याह—तमिति ॥ तं दवाग्निर्निर्गत्य शीतलह्रदे पतितुमिवागच्छन्तं मेरुशिखराकारं उन्नत पीवरत्वरत्नबहुलत्वादिभिर्मेरुशिखरतुल्यं । किंच प्रतिपक्षत्यागलाभेन स्थिरतया स्थितत्वं प्रकाशमानत्वं पारतन्त्र्यज्ञापकत्वं । तेन रामस्य शृङ्गलाभः रावणस्य शृङ्गभङ्गश्चोच्यते । दीप्तामिव शतह्रदां । तेजिष्ठत्वगगनसंचाराभ्यां विद्युद्दृष्टान्तः । रामभक्तावानरा नास्मान्प्रवेशयिष्यन्तीतिकम्पः, अप्रवेशे जीवनं न सिध्यतीति त्वरा चेत्येतद्भयं तेन गम्यते । गगनस्थमिति दूरत एव ददृशुरिति भावः ॥ २-४ ॥ अथ सुग्रीवो लङ्कापुरीदेशादागमनमायुधसन्नाहं च दृष्ट्वा प्रहर्तुमेवागच्छतीति विचार्य तमर्थं वानरैः सह चिन्तयामासेत्याह—तमिति ॥ तं अत्यन्ताभिनिवेशेन शीघ्रमागतं । आत्मपञ्चमं आत्मना पञ्चत्वसङ्ख्यापूरकमित्यर्थः । अनलशरभसंपातिप्रघसनामभिश्चतुर्भी राक्षसैर्युक्तमिति यावत् । अनलादिगतसङ्ख्यापूरण एव विभीषणस्य प्राधान्यमुक्तं । रामविषयप्रेमास्पदत्वं तु समानं । सुग्रीवः गगनस्थदर्शनार्थं शीघ्रं शिर उन्नम्य दर्शनेन तात्कालिकग्रीवासौन्दर्यमृषिःस्तौति । वानराधिपः । शीघ्रमुत्थाय दर्शनं वानरसेनायाअपि स्वस्यैव रक्षकत्वेन रामविषयप्रीतेश्च राघवार्थे पराक्रान्ता इत्युक्तेभ्यो वानरेभ्योपि स्वस्यैव निरवधिकप्रीतिमत्ताज्ञापकत्वेन च । दुर्धर्षः शरणागतस्यापि पश्चादाकृष्टपादत्वापादकत्वेन अनभिभवनीयः स्थितः । बुद्धिमान्वानरैः सह चिन्तयामास । स्वयं समर्थत्वेपि तानप्यनुसृत्य चिन्तनं कार्यगौरवात् । चारो वा शत्रुर्वेति चिन्तयामास । आगमनमुखविकासादिना निर्दुष्टत्वनिश्चयेपि रामविषयप्रेमपारवश्येन चिन्तितवानितिबुद्धेः प्राशस्त्यं ॥५॥ विभीषणे सपरिकरे सविधस्थे मन्त्रविलम्बो न युक्त

तनि० गगनस्थं रावणगोष्ठीतोनिर्गमनसमयएवददृशुः । महीस्थाः भूमौपरितोरक्षणनियुक्ताः । आकाशस्थमपिदद्दशुरितिजागरूकत्वातिरेकः । यद्वा महीस्थाः तत्रतत्रवृक्षादिषुस्थितास्सर्वे तदात्वएवगगनस्थंदृष्ट्वारामंपर्यवारयन् । वानराधिपाः । अत्यन्तंसावधानतयाविद्यमानत्वाद्वानरानपिकृपिःस्तौति—**वानराधिपाइति** । ददृशुः एकोदृष्टाऽन्यस्सैनदर्शितवान् । किंतुयुगपदेवसर्वेददृशुः । अनेननकेवलंप्रतिकूलसमूहान्निर्गमनमेवविभीषणस्यप्रयोजनं किंत्वनुकूलकटाक्षविषयत्वंलब्धमित्युक्तं ॥ २ ॥ **तनि०** मुहूर्तं

[पा०] १ क. ख. च. छ. प्रदीप्तमिवतेजसा. घ. दीप्यमानमिवश्रिया. २ इदंश्लोकद्वयं क. ख. घ. च.—ट. पाठेषु दृश्यते. ३ क. च. छ. झ. ञ. ट. वज्रायुधसमप्रभः. घ. महेन्द्राचलविक्रमः. ४ क. ख. घ. च. छ. ञ. ट. वरायुधधरो. ५ ख. च. छ. ञ. ट. भूषणोत्तमभूषिताः. ६ ख. च. छ. वचनमब्रवीत्.

एष सर्वायुधोपेतश्चतुर्भिः सह राक्षसैः ॥ राक्षसोभ्येति पश्यध्वमस्मान्हन्तुं न संशयः ॥ ७ ॥
सुग्रीवस्य वचः श्रुत्वा सर्वे ते वानरोत्तमाः ॥ सालानुद्यम्य शैलांश्च इदं वचनमब्रुवन् ॥ ८ ॥
शीघ्रं व्यादिश नो राजन्वधायैषां दुरात्मनाम् ॥ निपतन्तु हताश्चैते धरण्यामल्पतेजसः ॥ ९ ॥
तेषां संभाषमाणानामन्योन्यं स विभीषणः ॥ उत्तरं तीरमासाद्य खस्थ एव व्यतिष्ठत ॥ १० ॥
उवाच च महाप्राज्ञः स्वरेण महता महान् ॥ सुग्रीवं तांश्च संप्रेक्ष्य सर्वान्वानरयूथपान् ॥ ११ ॥

इति झटिति मनसा निश्चित्य सचिवादीन्प्रति निर्णीतमाह—चिन्तयित्वेति ॥ चिन्ताया निर्णयान्तत्वादत्र चिन्तयित्वेतिनिर्णयवाची । नायं चारो नापि दूतः अपितु बाधक एवेति निश्चित्य ॥ ६ ॥ स्वनिर्णीतार्थमाह—एष इति ॥ एषः बाधकतैकान्तक्रौर्यसंपन्नः । सर्वायुधोपेतः । मनःस्थितक्रौर्यानुकूलहिंसापरिकरसंपूर्णः । अनुकूलस्य प्रतिकूलतानिश्चयवत् रामविषयप्रेमान्धतया एकायुधस्य बहुत्वनिश्चयः । एकायुधग्रहणचातुर्यदर्शनेन सर्वायुधग्रहणेष्वपि नैपुण्यं ज्ञायत इति वा तथोक्तं । स्वामिपीडने ब्रह्मास्त्रसदृशशरणागतिरेतस्य हस्ते विद्यत इतिवा । उत्पपात गदापाणिरित्यत्र सर्वायुधोपलक्षणमित्यन्ये । राक्षसः सर्पजातिरितिवत् क्रौर्यातिशयोक्तिः । पश्यध्वं पश्यत । अस्मान्हन्तुं । अस्मासु कस्यचिद्धनने हि शेषं जीविष्यति मूलभूतरामहनने सर्वविनाश इति बहुवचनार्थः ॥७॥ वानराश्च सुग्रीववाक्यानुसारेणोद्योगं चक्रुरित्याह—सुग्रीवस्येत्यादिश्लोकद्वयेन ॥ अल्पतेजस इति । अस्मद्बलस्य गजकबलप्राया इत्यर्थः ॥८—९॥ तेषामिति । अनादरे चेयं षष्ठी । वदन्तु नामैते वानरा यत्किंचित् । सर्वज्ञः परमकारुणिकः सर्वलोकशरण्यो रामो मामवश्यं रक्षिष्यत्येवेति महाविश्वासेन तेषामन्योन्यभाषणमनादृत्य प्रहरणोद्यतानामपि तेषामाभिमुख्येनाजगाम । आगत्यापि निर्विशङ्कः सन् सर्वेषामात्मानं प्रकाशयन्नाकाशे एव स्थितवानित्यर्थः । अत्र खस्थो व्यतिष्ठतेति द्विःप्रयोगो निर्भयत्वेन निष्कम्पावस्थानसूचनार्थः ॥ १० ॥ अथ पुरुषकारलेशमनपेक्ष्य सर्वानपि प्रतिबन्धिनो निवार्य मां रक्षिष्यतीति महाविश्वासशाल्यपि विभीषणः सहसा रामं शरणं नोपजगाम । किंतु दूरत एवस्थितः प्रातिकूल्यप्रवृत्तानेव सुग्रीवादीन्पुरुषकारभूतान्कृत्वोवाचेत्याह—उवाचचेति ॥ उवाच च चकारेण स्वीकारे स्वागमनमेव पर्याप्तं वचनमप्युक्तवान् । पश्यामभिगमाच्चेत्यागमनमपि भारायेति मन्यमानस्य तदुपरि वाक्यं क्षते क्षारवत् । महाप्राज्ञ इत्यनेनान्तरङ्गपुरुषकारेणैव कृपालुरपि राजा शरणमुपगन्तव्य इतिपरिज्ञानं वानराणां मत्प्रतिकूलसंरम्भोपि नमद्वेषकृतः किंतु रामभक्तिप्रकर्षकारितः । अतोगुणएवायमिति जानन्यदि रामपरिचारका एते नाङ्गीकुर्युः किं रामाङ्गीकारेण। अतो रामाङ्गीकारादप्येतदन्तर्भाव एव ममपुरुषार्थ इति ज्ञानं च विवक्षितं । स्वरेण महतेति । पुरुषकारभूतानां सर्वेषां सर्वलोकशरण्यस्य च स्वार्तरवश्रवणाय महास्वरप्रयोगः । रामविषये चैवंविधार्तरवोच्चारणं भाग्याधिकस्यैवेति विव-

अल्पकालेन रावणः उत्तरकूलेअनावृतेस्थितंरामंशीघ्रहत्वा आगन्तव्यमितिप्रेषितवान् मन्त्रेणविलंबेकृतेअयमतिशेतइतिझटितिनिश्चितवान् । तुशब्दोनिश्चयानन्तरंपूर्वावस्थापेक्षयावैलक्षण्यंद्योतयति । तानुवाच प्रेमपरवशानुवाचह । स्वामिपरिकरसमवायप्रकारआश्चर्यकरइतिऋषिरभिनन्दतिहेति । हनुमत्प्रमुखान् गौरवकालेजांबवत्प्रमुखानितिवक्तव्यं । मन्त्रविचारकालेतु बुद्धिमत्त्वप्राधान्याद्धनुमत्प्रमुखानित्युक्तिः । सर्वान् रामविषयप्रेमातिशयःसर्वेषामविशेषइतिसर्वानित्युक्तिः । इदंवचनं । अर्थमन्तरेणापिवचनसंनिवेशस्यश्रुतिप्रियत्वमभिनन्दतिऋषिः । उत्तमं सर्वोत्तमं ॥ ६ ॥ **तनि०** सुग्रीवस्य साहसकृत्यनिर्वाहकस्य । वचःश्रुत्वा अनुमतिंलब्ध्वा । सालानुद्यम्यशैलांश्च शैलवृक्षतारतम्यानादरेणसहसाहस्तमुलभान्स्वीकृत्य । आदरातिशयेनप्रत्येकमुभयपरिकरत्वमुक्तं । रामकैंकर्यानुकूलवृत्तेर्लक्ष्मणस्ययुगपच्छत्रचामरग्रहणवत् राक्षसहननंहिरामकैङ्कर्यं । इदंवचनं स्वशेषत्वसिद्धयेसुग्रीवानुमतिमप्यनवेक्ष्यतेषांवधनिश्चयोपपादकंवचनमब्रुवन् । गुणप्रधानभावमौचित्यंवाऽनपेक्ष्यसर्वेऽब्रुवन् । अस्खलत्प्राणामनुमतिर्विलंबे स्खलंत्रप्रहारेचपारतन्त्र्यहानिःस्यात् । सायथानभवतितथाशीघ्रमाज्ञापय । नः वधोद्युक्तानस्मान् । वधोद्युक्तायूयं किंममानुमत्येत्यत्राह—राजन्निति । राजाज्ञाखल्वनुवर्तनीयेतिभावः । वधायगृहीत्वाबद्धाश्चेदत्रस्थित्वाकथंचिदनर्थंकुर्युः । अतोवधायैवानुमतिर्देया । एषांदुरात्मनामाकारेणैवदौरात्म्यंदृश्यतेखलु । निपतन्तुहताः सर्वेहताःपतन्तु यथापुनराकाशंनोत्पतन्ति तथाभूमावेवनिपातयिष्यामइतिभावः । युद्धेजयाजयौपाक्षिकावित्यतआह—अल्पतेजसः । अल्पबलाः । अस्मद्बलस्यगजकबलप्रायाइतिभावः

[पा०] १ ख. ग. घ. निपतन्तिहतायावत्. २ झ. ट. मल्पचेतनाः. ३ क. ख. घ. च.—ट. खस्थएवविभीषणः.

रावणो नाम दुर्वृत्तो राक्षसो राक्षसेश्वरः ॥ तस्याहमनुजो भ्राता विभीषण इति श्रुतः ॥ १२ ॥
तेन सीता जनस्थानाद्धृता हत्वा जटायुषम् ॥ रुद्धा च विवशा दीना राक्षसीभिः सुरक्षिता ॥१३॥
तमहं हेतुभिर्वाक्यैर्विविधैश्च न्यदर्शयम् ॥ साधु निर्यात्यतां सीता रामायेति पुनः पुनः ॥ १४ ॥
स च न प्रतिजग्राह रावणः कालचोदितः ॥ उच्यमानं हितं वाक्यं विपरीत इवौषधम् ॥ १५ ॥
सोऽहं परुषितस्तेन दासवच्चावमानितः ॥ त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः ॥ १६ ॥
सर्वलोकशरण्याय राघवाय महात्मने ॥ निवेदयत मां क्षिप्रं विभीषणमुपस्थितम् ॥ १७ ॥

क्षया महानित्युक्तिः । यथोक्तं लक्ष्मीतन्त्रे—"आकिञ्चन्यैकशरणाः केचिद्भाग्याधिकाः पुनः । मामेव शरणं प्राप्य मामेवान्ते समश्नुते" इति ॥ ११ ॥ अत्र प्रथमं स्वदोषान्पुरस्करोति—रावण इति ॥ "रावणंलोकरावणं" इति न्यायेन रावयतीति व्युत्पत्तिसंभवान्नामैव क्रूरमित्यर्थः । न केवलं नामैव क्रूरं व्यापारोपि नृशंस इत्याह—दुर्वृत्त इति । जातिरपि तथाविधेत्याह—राक्षसइति । केवलं स्वयमेवक्रूरः क्रूरानेकपरिकरसमवेतश्चेत्याह—राक्षसेश्वर इति । रावणस्यैवंविधत्वे तव किमायातमित्यत्राह—तस्याहमिति । यद्यहमग्रजः स्यां तर्हितदाज्ञानुवर्तित्वेन धनदवत्तद्दोषैर्न लिप्येयं । अनुजत्वेन तन्मनीषिताः सर्वे दोषास्तदाज्ञया मया कृता इतिभावः ॥ १२ ॥ राघवस्य तु प्रियापहारनिरोधादिभिः समाश्रितहननाच्च विशेषतस्तेनापकृतमित्याह—तेनेति ॥१३॥ अस्त्वेवं ततः किमित्यत्राह—तमिति ॥ हेतुभिर्वाक्यैः हेतुप्रतिपादकैर्वाक्यैः । न्यदर्शयं अबोधयं । बोधितमेवार्थमाह—साध्विति । निर्यात्यतां प्रत्यर्प्यतां ॥ १४ ॥ विपरीतः मुमूर्षुः ॥ १५ ॥ एवमीश्वरस्य निर्हेतुककरुणाकृतेन रावणावमानेन प्रयोजनान्तरवैमुख्यं जातं । ततश्च परमपुरुषार्थभूतरामप्राप्त्यर्थं राममेव शरणमुपगतोस्मीत्याह—सोहमिति ॥ अत्र पुत्रान्दारानिति, "परित्यक्ता मया लङ्का मित्राणि च धनानि च" इति वक्ष्यमाणानां लङ्काराज्यादीनामुपलक्षणं । अत्र फलान्तरानिर्देशाद्राक्षसानां वधे साध्यमित्यादिवचनस्य स्वेनैव वक्ष्यमाणत्वाच्च रामपरिचरणस्यैव फलत्वपक्षो युक्तः ॥ १६ ॥ एवं शरण्यस्य विज्ञाप्यमर्थमुक्त्वा तद्विज्ञापनाय पुरुषकारभूतान्प्रार्थयते—सर्वलोकशर-

॥ ८—९ ॥ **ती०** राक्षसेश्वरइत्यनेन भृत्यसंबन्धप्रयुक्तदोषवत्त्वमुच्यते । तस्याहमनुजोभ्रातेत्यनेन स्वस्यरावणसंबन्धनिबन्धनदोषवत्त्वमुक्तंभवति । अनेन " उपायेनैवसिध्यन्तिह्यपायाविविधास्तथा " इतिगर्वहानिस्तद्दैन्यंकार्पण्यमुच्यतइत्युक्तगर्वहानिलक्षणंकार्पण्यरूपमङ्गंप्रदर्शितं ॥ १२ ॥ **तनि०** पूर्वोक्तदोषाःप्रायश्चित्तनिवर्त्याः । नक्षमामीत्युक्तभागवतापचारोप्यस्तीत्याह—तेनेति । तेन उक्तसकलदोषवता । हृता " अनन्याराघवेणाहं " " जलान्मत्स्याविवोद्धृतौ " इत्याद्युक्तरीत्यारामविश्लेषानर्हा । हृता सीतागर्भवासादिक्लेशाभावेनपरमपदादजहत्स्वभावतयाऽत्यन्तसौकुमार्या । जनस्थानात् पुष्पापचयादिभोगानामेकान्तस्थानतया अयोध्यातउत्कृष्टत्वेनसंमतात् । जटायुषंहत्वा । " ममप्राणाहि " इत्युक्तरीत्याऽत्यन्ताभिमतंजटायुषमवधीत् । यदिसीतयासह जटायुषमपिकारागारेनिवेशितवान् तदामोचनंस्यात् । तथानकृतं । स्वस्यसपरिवारस्यविनाशार्थमेवंकृतवान् । रुद्धाच प्रमादाद्धरणेपिपश्चात्तापेनपुनर्नेत्युक्ता । किंतूच्छ्वासनिश्वासासंचारस्थलेरुद्धा । विवशा न्यस्तपाणिपादाचलनेनरामविश्लेषदुःखेन आश्वासकान्तराभावेनचस्वबलहानिंप्रकाशयन्तीस्थिता । रामभोगपरंपरयाहृष्टामेतादृशावस्थांकृतवान् । राक्षसीभिःसुरक्षिता विकृतभयङ्करवेषवचोभिःएकाक्ष्येककर्णीप्रभृतिभिः आश्वासकनवव्याकरणपण्डितस्यापियथानप्रवेशस्तथारक्षिता ॥ १३ ॥ **तनि०** सीताहरणसमकालमेवागमनंममोचितं । तथाऽकृत्वातस्यहितंवक्तुंविलंबितोऽहमेवपापीयानित्याह—अहमिति । तं उक्तद्रोहयुक्तं । अहं पापिष्ठंज्ञात्वापि हितवक्ता । विविधैः सामादिभिर्वाक्यैःपूर्णार्थैः । हेतुभिः खरवधादिभिर्लिङ्गैः । अबोधयं सुप्तमिवप्रबोधयं । बोधितमर्थमाह—साधुनिर्यात्यतांसीतेति । निर्यातनं प्रतिदानं । साधु अनुतापाकिञ्चन्यादिप्रदर्शनेन । सीतारामाय तदीयएववस्तुनिस्मैदत्तेपिस्वकीयंदत्तमितिमन्वानाय । पुनःपुनः तस्येच्छाभावेपिमद्वचःकुर्याद्वेतिप्रत्याशयाप्रलपितं ॥ **ती०** निर्यात्यतां प्रत्यर्प्यतां। अनेन " चराचराणिभूतानिसर्वाणिभगवद्वपुः । ततस्तदानुकूल्यमेकर्तव्यमितिनिश्चयः " इत्युक्तमानुकूल्यसंकल्परूपमङ्गंप्रदर्शितं ॥ १४ ॥ **ती०** दासवच्चावमानितः अनेनईश्वरस्यनिर्हेतुककरुणापरिपाकभूतेनैवरावणावमानेनप्रयोजनान्तरवैमुख्यंजातं । ततश्च परमपुरुषार्थरूपरामप्राप्त्यर्थंराममेवशरणमुपगतोस्मीत्याह—त्यक्त्वेति । त्यक्त्वापुत्रांश्चदारांश्चेत्यनेन प्रातिकूल्यवर्जनरूपमङ्गंप्रदर्शितं । राघवंशरणंगतइत्यनेनात्मनिक्षेपरूपमङ्गंप्रदर्शितं ॥ १६ ॥ **ती०** सर्वलोकशरण्याय अधिकारिभेदमन्तरेणसुरनरवानरतिर्य-

[**पा०**] १ ख. वाक्यैर्बहुभिर्वा.

एतत्तु वचनं श्रुत्वा सुग्रीवो लघुविक्रमः ॥ लक्ष्मणस्याग्रतो रामं संरब्धमिदमब्रवीत् ॥ १८ ॥
रावणस्यानुजो भ्राता विभीषण इति श्रुतः ॥ चतुर्भिः सह रक्षोभिर्भवन्तं शरणं गतः ॥ १९ ॥
मन्त्रे व्यूहे नये चारे युक्तो भवितुमर्हसि ॥ वानराणां च भद्रं ते परेषां च परंतप ॥ २० ॥
अन्तर्धानगता ह्येते राक्षसाः कामरूपिणः ॥ शूराश्च निकृतिज्ञाश्च तेषु जातु न विश्वसेत् ॥ २१ ॥
प्रणिधी राक्षसेन्द्रस्य रावणस्य भवेदयम् ॥ अनुप्रविश्य सोस्मासु भेदं कुर्यान्न संशयः ॥ २२ ॥

ण्यायेति ॥ शरणे रक्षणे साधुः शरण्यः । "तत्र साधुः" इति यत्प्रत्ययः । शरणं भवितुमर्हः शरण्य इतिनिरुक्तिः । अनालोचितकुलविद्यावृत्तादिविशेषाशेषलोकशरण्यायेत्यर्थः । अतः संचितविविधापराधस्य रावणस्यापि युष्माकमिवात्रांशोस्ति किमुत तत्संबन्धिनः । परंतु रूच्यभावादेव स स्वांशं न लब्धवान् । मम त्वाभिमुख्येनागतस्य दुरपनोदोंशलाभ इतिभावः । अत्र शरण्याङ्गभूतं सुलभत्वपरत्वरूपं गुणद्वयं प्राधान्येन दर्शयति—राघवाय महात्मन इति । सुलभत्वेप्यनिष्टानां लोष्टानां उत्कर्षेप्यसुलभानां मेरुप्रभृतीनां चानुपादेयत्वादुभयमप्यपेक्षितं । "यत्तदनिर्देश्यं" इत्यादिवेदान्तगोचरस्य परब्रह्मणःसकलमनुजतिर्यक्त्वयनसाक्षात्कारक्षममनुजावतारात् कोयमन्या सौलभ्यकाष्ठेतिभावः । महात्मने । एवमवतारेप्यजहत्स्वभावतया निखिलहेयप्रत्यनीकत्वे सति ज्ञानशक्त्याद्यनन्तकल्याणगुणैकतानाय निवेदयत । अत्र प्रत्यक्षस्य स्वागमनस्य निवेदने प्रयोजनाभावात् स्वापराधपरिपूर्तिः इहामुत्रफलभोगविरागः शरणागतिलक्षणनिरपायोपायपरिग्रहः रामकैङ्कर्याभिलाषः तत्परिचारकान्तर्भावश्चेत्येतेऽर्था विज्ञापनीया इत्यर्थः । क्षिप्रमित्यनेन यावच्छरण्यः स्वयमेव परिग्रहिष्यति ततः पूर्वमेव विज्ञापनेन युष्माभिः सुहृत्कार्यमाचरणीयमितिभावः । विभीषणं । रावणवन्नाहं प्रतिकूलः किंतु विभीषणस्तु धर्मालेत्यनुकूल एव । उपस्थितं अतिहीनस्याप्युपगमनमेव हि रामाङ्गीकारे बीजमितिभावः ॥ १७ ॥ अथ सुग्रीवो रामप्रेमातिशयजनिताद्यामोहात् । "अतिस्नेहः पापशङ्की" इति न्यायेन तस्य सर्वशक्तित्वमपि विस्मृत्य शरणागतवत्सलो रामः शरणागतिशब्दश्रवणमात्रेण गूढहृदयमेनं परिगृह्णीयात् । ततः क्रूरहृदयोयं रामे किमिव पापमाचरेदित्यस्थानभयशङ्काव्याकुलितः शीघ्रं रामसमीपं गत्वा स्वसमानहृदयं लक्ष्मणमपि सहायीकृत्य विभीषणो निग्राह्य इति विज्ञापयामासेत्याह—एतदिति ॥ तुशब्देन पूर्वोक्त विशेष उच्यते । लघुविक्रमः शीघ्रगमनः । संरब्धं प्रेमभरात्त्वरितोदिताक्षरं ॥ १८–१९ ॥ मन्त्रः कार्याकार्यविचारः । व्यूहः सेनास्कन्दनिवेशः । नयः विचार्य निश्चितानामुपायानां स्वस्वविषयेप्रयोगः । चारः गूढप्रेषणं । वानराणां परेषां राक्षसानां च मन्त्रादिषु विषये युक्तः अवहितः । भवितुमर्हसि । वानराणां मन्त्रादीन्प्रयोजय । शत्रूणां मन्त्रादींस्तु सम्यग्जानीहि । एवं सति तव भद्रं भविष्यतीत्यर्थः ॥ २० ॥ अस्त्वेवं ततः किमित्याशङ्क्य प्रकृतं विज्ञापयति—अन्तर्धानेति ॥ अन्तर्धानगताः अदृश्यचारिणः । निकृतिज्ञाः कपटोपायवेदिनः ॥ २१ ॥ विश्वासे वा

कस्थावरान्तानांसर्वेषांसमाश्रयणीयाय । राघवाय "अन्येपिसन्त्येवनृपाःपृथिव्यांमांधातुरेतेतनयाःप्रसूताः । किंत्वर्थिनामर्थितदानदीक्षाकृतव्रतश्लाघ्यमिदंकुलंतत्" इत्यादिवचनैःप्रसिद्धवैभवेरघुवंशेऽवतीर्णाय । अनेनार्थिनांप्रार्थनावैफल्यंनास्तीतिद्योतितं । महात्मने परमात्मने । मां राममेवसर्वविधबन्धुत्वेनाश्रितं । क्षिप्रं । क्षिप्रमित्यनेन शीतलसुरभिसलिलंपद्माकरंदृष्टवतस्तृषितस्येव विलंबासहत्वंद्योत्यते । निवेदयत विज्ञापयत । "वाचाधर्ममवाप्नुहि" इतिन्यायेनाक्लेशेनभवतांमहानुपकारःसेत्स्यतीतिभावः । सर्वलोकशरण्यायेत्यनेनश्लोकेन "अप्रार्थितोनगोपायेदितितत्प्रार्थनामतिः । गोपायिताभवत्येवंगोमृत्ववरणंस्मृतं" इत्युक्तंगोमृत्ववरणरूपमङ्गंप्रदर्शितं । उपस्थितं समीपंप्राप्यस्थितं । अनेन "रक्षिष्यत्यनुकूलान्नइत्येवंसुदृढामतिः । सविश्वासोभवेच्चात्रसर्वंदुष्कृतिनाशनः" इत्युक्तंविश्वासरूपमङ्गंप्रदर्शितं । ननुइक्ष्वाकुवंशस्यराज्ञोरामभद्रस्यसर्वलोकशरण्यत्वंपरत्वंचविभीषणेनकथमुक्तमितिचेदुच्यते । "परमापद्गतस्यापिधर्मेममममतिर्भवेत् । ययामेजायतेबुद्धिर्येषुयेष्वाश्रमेषुच । सासाभवतुधर्मिष्ठातंतंधर्मंचपालयेत्" इतिप्रार्थितेनब्रह्मणा "धर्मिष्ठत्वंतथावत्सतथाचैतद्भविष्यति" इतिदत्तवरत्वेनरामंसकलजगद्रक्षणार्थमिक्ष्वाकुवंशेऽवतीर्णंपरमधर्म-

[पा०] १ क. संरब्धतरं. संरब्धमिदमब्रवीदित्यनन्तरं. प्रविष्टःशत्रुसैन्यंहीतिश्लोकः ग. ङ. च. ज. झ. ट. पाठेषुदृश्यते. अयंश्लोकःअस्मिन्नेवसर्गेराक्षसोजिह्मयावुध्येतिश्लोकानन्तरंविद्यतइतिनात्रमुद्रितः. २ अयंश्लोकः ग. ङ. च. ज. झ. ट. पाठेषु. प्रकृत्याराक्षसेन्द्रस्येतिश्लोकानन्तरंदृश्यते. ३ ङ. झ. तेषां.

अथवा स्वयमेवैष च्छिद्रमासाद्य बुद्धिमान् ॥ अनुप्रविश्य विश्वस्ते कदाचित्प्रहरेदपि ॥ २३ ॥
मित्राटवीबलं चैव मौलं भृत्यबलं तथा ॥ सर्वमेतद्बलं ग्राह्यं वर्जयित्वा द्विषद्बलम् ॥ २४ ॥
प्रकृत्या राक्षसेन्द्रस्य भ्राताऽमित्रस्य ते प्रभो ॥ आगतश्च रिपोः पक्षात्कथमस्मिन्हि विश्वसेत् ॥२५॥
रावणेन प्रणिहितं तमवेहि विभीषणम् ॥ तस्याहं निग्रहं मन्ये क्षमं क्षमवतां वर ॥ २६ ॥
राक्षसो जिह्मया बुद्ध्या संदिष्टोऽयमुपागतः ॥ प्रहर्तुं मायया च्छन्नो विश्वस्ते त्वयि राघव ॥२७॥
प्रविष्टः शत्रुसैन्यं हि प्राज्ञः शत्रुरतर्कितः ॥ निहन्यादन्तरं लब्ध्वा उलूक इव वायसान् ॥ २८ ॥
वध्यतामेष दण्डेन तीव्रेण सचिवैः सह ॥ रावणस्य नृशंसस्य भ्राता ह्येष विभीषणः ॥ २९ ॥
एवमुक्त्वा तु तं रामं संरब्धो वाहिनीपतिः ॥ वाक्यज्ञो वाक्यकुशलं ततो मौनमुपागमत् ॥ ३० ॥
सुग्रीवस्य तु तद्वाक्यं श्रुत्वा रामो महायशाः ॥ समीपस्थानुवाचेदं हनुमत्प्रमुखान्हरीन् ॥ ३१ ॥

किमयंकरिष्यतीत्याशङ्क्य भेदं दण्डं वा करिष्यतीत्याह —प्रणिधिरिति ॥ प्रणिधिः चारः । " यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः । चारश्च गूढपुरुषः " इत्यमरः । भेदं मित्रभेदं ॥ २२ ॥ अपिः संभावनायां ॥ २३ ॥ शत्रुसकाशादागतस्यास्य परिग्रहे शत्रोर्बलक्षयः अस्माकं बलवृद्धिश्च स्यादित्याशङ्क्य द्विषद्बलव्यतिरिक्तमेव बलं ग्राह्यमित्याह—मित्रेति ॥ मित्रबलं मित्रसंबन्धिबलं । अटवीबलं आटविकजनरूपं बलं । मौलं परंपरागतं सैन्यं । भृत्यबलं तादात्विकभृतिप्रदानोपजीवि बलं ॥ २४ ॥ न केवलं द्विषद्बलत्वमात्रं अन्येष्वपरिग्राह्यताहेतवः सन्तीत्याह—प्रकृत्येति ॥ प्रकृत्या जात्येत्यर्थः ॥ २५ ॥ नन्वयं शरणागतः कथं परित्याज्य इत्याशङ्क्य शरणागतिलक्षणमायोपायेन विश्वासमुत्पाद्य त्वयि प्रहर्तुं प्रवृत्तत्वान्नास्यापरिग्राह्यत्वमात्रं किंतु सहायैः सह वध्यत्वमित्याह—रावणेनेत्यादिश्लोकद्वयमेकं वाक्यं । प्रणिहितं प्रणिधिकर्मणा नियुक्तं । अस्य शरणागतिर्विप्रलम्भकृतेति भावः । क्षमवतां युक्तव्यापारवतां । क्षमं हितं । " क्षमं शक्ते हिते त्रिषु " इत्यमरः ॥ २६ ॥ प्रणिधिरप्येष नः किं करष्यतीत्यत्राह—राक्षस इति ॥ संदिष्टः रावणेनेति शेषः । प्रहर्तुं संदिष्ट इति संबन्धः ॥ २७ ॥ यदा शाठ्यं दृश्यते तदाऽसौ हन्यतां तत्राह—प्रविष्ट इति ॥ प्राज्ञ इति हेतुगर्भं विशेषणं । प्राज्ञत्वादतर्कितः अस्मज्जिघांसयाऽयमागत इति तैरविचारितः । अतएव तेषां सैन्यं प्रविष्टः सन् । कदाचित् अन्तरं छिद्रं लब्ध्वा हन्यादित्यर्थः । प्रविष्टोप्येकाकी कथं बहून्हनिष्यतीत्याशङ्क्य छिद्रसहितस्य युज्यत इति दृष्टान्तमुखेन प्रकटयति—उलूक इति ॥ २८ ॥ तर्हि किं कर्तव्यं तत्राह—वध्यतामिति ॥ वध्यतां केवलनिरसने कृते मारीचवदनर्थकारी स्यादिति भावः । तीव्रेण दण्डेन । वालिवदेकेन बाणेन न हन्तव्यः । किंतु शिरसि वर्तिं कृत्वा दीपारोपण कार्यं । सचिवैः सह प्रथमं तेषां शिरांसि छित्त्वा विभीषणहस्ते दत्त्वा ततोयं वध्यतां । तत्र हेतुमाह—रावणस्येत्यादि ॥ २९ ॥ एवं सुग्रीवो विभीषणविषयवक्तव्यमुक्त्वा अतः परमनेन यत्किंचिदुक्तं चेदुत्तरं वक्ष्याम इति तूष्णींस्थित इत्याह—एवमुक्त्वेति ॥ ३० ॥ अथ शरणागतवत्सलो रामः सुग्रीवस्य संरम्भप्रतिक्षेपाय यत्किंचिद्व्याजमपेक्षमाणो विभीषणस्य विश्वासातिरेकेण किंचिद्विलम्बेपि भावं निवेदयतेति वदतस्तस्य तदन्तर्भावापेक्षां च सम्यगालोच्य प्रतिक्षेपकमुखेनैव तदानयनं कर्तुकामो हनुमदादीनुवाचेत्याह—सुग्रीव-

रूपंपरमपुरुषंनारायणंज्ञात्वातथोक्तवानितिसर्वंसमञ्जसम् ॥ १७ ॥ **ति०** मित्रेणाटविकेन आरण्यकेन प्रेषितंबलंमित्राटविबलं । मौलं आप्तबन्धुप्रहितंबलं । " मूलंवशीकृतौस्त्रीये " इतिकोशः ॥ २४ ॥ **स०** तस्यबलिष्टस्यकथंनिग्रहइत्यतआह—**क्षमवतांवरेति** । क्षमाःशक्ताएषांसन्तीति क्षमवन्तः तेषुवर । एतेन त्वत्सेनानायकैरस्माभिरपितन्निग्रहःसुसाध्यः किमुवयेतिसूचयति । " क्षमंयुक्तेक्षमान्विते । वाच्यवच्छक्तहितयोःक्षमाभूमितितिक्षयोः " इतिविश्वः । एतेन तितिक्षार्थंक्षमशब्दमङ्गीकृत्य हखलः स्यार्षत्वंवर्णनंपरास्तं । सतिगत्यन्तरेतस्मायुक्तत्वात्क्षमाकथनस्यकथाऽसंगतत्वाच्च ॥ २६ ॥ **शि०** संरब्धः ईषत्कोपविशिष्ट-

[**पा०**] १ च. छ. ज. वीर्यवान्. २ क. ख. ग. च. छ. मित्राटपिबलं. झ. मित्राटविबलं. ३ ङ. झ. ञ. मौलभृत्यबलं. ४ क. घ.—ट. राक्षसोह्येष. ५ क. पार्श्वात्कथं. ङ. च. झ. साक्षात्कथं. ६ ङ. च. झ. ञ. ट. मिहागतः. क.—घ. मुपस्थितः. ७ क. ख. ग. ङ.—ट. लयिचानघ. घ. लयिमानद. ८ क.—घ. च. ज. ञ. प्राप्तः.

यदुक्तं कपिराजेन रावणावरजं प्रति ॥ वाक्यं हेतुमदर्थ्यं च भवद्भिरपि तच्छ्रुतम् ॥ ३२ ॥
सुहृदा ह्यर्थकृच्छ्रेषु युक्तं बुद्धिमता सता ॥ समर्थेनापि संदेष्टुं शाश्वतीं भूतिमिच्छता ॥ ३३ ॥
इत्येवं परिपृष्टास्ते स्वं स्वं मतमतन्द्रिताः ॥ सोपचारं तदा राममूचुर्हितचिकीर्षवः ॥ ३४ ॥
अज्ञातं नास्ति ते किंचित्रिषु लोकेषु राघव ॥ आत्मानं सूचयज्ञानन्पृच्छस्यस्मान्सुहृत्तया ॥ ३५ ॥
त्वं हि सत्यव्रतः शूरो धार्मिको दृढविक्रमः ॥ परीक्ष्यकारी स्मृतिमान्निसृष्टात्मा सुहृत्सु च ॥३६॥
तस्मादेकैकशस्तावद्ब्रुवन्तु सचिवास्तव ॥ हेततो मतिसंपन्नाः समर्थाश्च पुनः पुनः ॥ ३७ ॥
इत्युक्ते राघवायाथ मतिमानङ्गदोऽग्रतः ॥ विभीषणपरीक्षार्थमुवाच वचनं हरिः ॥ ३८ ॥
शत्रोः सकाशात्संप्राप्तः सर्वथा शङ्क्य एव हि ॥ विश्वासयोग्यः सहसा न कर्तव्यो विभीषणः ॥३९॥
छादयित्वाऽऽत्मभावं हि चरन्ति शठबुद्धयः ॥ प्रहरन्ति च रन्ध्रेषु सोनर्थः सुमहान्भवेत् ॥ ४० ॥
अर्थानर्थौ विनिश्चित्य व्यवसायं भजेत ह ॥ गुणतः संग्रहं कुर्याद्दोषतस्तु विवर्जयेत् ॥ ४१ ॥

स्येति ॥ ३१ ॥ रामः सुग्रीववचनोपलालनपूर्वकमन्यानपि सचिवान् स्वं स्वं मतं पृच्छति—यदुक्तमित्यादिश्लोकद्वयेन ॥ हेतुमत् युक्तियुक्तं । अर्थ्यं अर्थः प्रयोजनं तस्मादनपेतं ॥ ३२ ॥ न ह्येकेन सुहृदोपदिष्टे सत्यन्यैस्तूष्णीं स्थातव्यं । अपि तु बुद्धिमता समर्थेन । शाश्वतीं भूतिमिच्छता श्रेयस्कामेन । सुहृदा सुहृदन्तरेणापि । अर्थकृच्छ्रेषु कार्यसङ्कटेषु । उपदेष्टुं युक्तमेव । अतो यूयमपि वदतेत्यर्थः ॥ ३३—३४ ॥ सोपचारप्रशंसावाक्यमेवाह—अज्ञातमिति ॥ अत्र सर्वज्ञ इत्युक्ते प्रायिकत्वशङ्का स्यादिति तन्निवृत्त्यर्थं व्यतिरेकोक्तिः । त्रिषु लोकेषु कृतकमकृतकं कृताकृतकमित्युक्तेषु । आत्मानं सुहृत्तया सूचयन्नस्मान् पृच्छसीत्यन्वयः । अयं वानराणां सुहृदितीमां कीर्तिं लोके ख्यापयितुं तवायं प्रश्न इत्यर्थः । पूजयन्निति पाठे तु अस्मान् प्रत्येकं मानयन्नस्मान् पृच्छसीत्यर्थः । प्रत्येकं माननाभिप्रायेणैवात्मानमित्येकवचनप्रयोगः । यद्वा आत्मानं आत्मस्वभावं । जानन् राजनीतिमिति यावत् । पूजयन् पालयन् । यद्वा । सुहृत्तया शोभनहृदयतया हेतुना । आत्मानं स्वं । पूजयन् । कार्यविचारेषु अस्मदपेक्षया स्वयमेव शोभनहृदय इति स्वप्रभावमभिव्यञ्जयितुमितिभावः । अस्मन्मतानि पूर्वपक्षीकृत्य स्वमतमेवसिद्धान्तयितुमितिभावः ॥ ३५ ॥ स्वपूजनार्थमस्मान्पृच्छसीत्यत्र हेतुमाह—त्वमिति ॥ सत्यव्रतः शरणागतरक्षणव्रतस्य सापराधरावणादिष्वपि विफलीकर्तुमशक्यत्वात् । परीक्ष्यकारी सर्वज्ञः सन्नपि सम्यग्धेतुभिर्विमृश्याचरणशीलः । सुहृत्सु निसृष्टात्मा सुहृत्परतन्त्रीकृतात्मस्वरूपः । पूर्वश्लोके सुहृत्त्वमात्रमुक्तं । अत्र तु सुहृत्परतन्त्रत्वमितिभेदः ॥ ३६ ॥ तस्मात् भवत उक्तगुणत्वात् । तावत् क्रमेण । हेततः युक्तिभिः । ब्रुवन्तु ॥ ३७ ॥ सुग्रीवानन्तरमङ्गदस्य युवराजतयाप्रधानत्वात् प्रथममङ्गदोजगादेत्याह—इत्युक्तइति ॥ विभीषणपरीक्षार्थं तदुपायप्रतिपादकमितिशेषः ॥ ३८ ॥ असौ शरणागतोपि शत्रोः सकाशात्प्राप्तत्वादनुकूलो नेति शङ्क्य एव । अतः सहसा परीक्षामन्तरेण विश्वासयोग्यो न कर्तव्यः किंतु परीक्ष्य प्रवेष्टव्य इति सुग्रीववचनाद्विशेषः ॥ ३९ ॥ विश्वासकरणे अनिष्टमाह—छादयित्वेति ॥ शठबुद्धयः कुटिलबुद्धयः । आत्मभावं स्वाभिप्रायं । छादयित्वा स्वाभिप्रायसूचकेङ्गितादिकमपि स्वगयित्वेत्यर्थः । चरन्ति यावद्रन्ध्रलाभं स्वैरसंचारं कुर्वन्ति । रन्ध्रेषु अनवधानेषु सत्सु । प्रहरन्ति हिंसन्ति ॥ ४० ॥ त्यागोपादानोपयुक्तं परीक्षाप्रकारमाह—अर्थानर्थाविति ॥ अर्थानर्थौ गुणदोषौ । विनिश्चित्य कस्मिंश्चित्कर्मणि नियोगेन निश्चित्य । व्यवसायं त्यागसंग्रहोचिताध्यवसायं । भजेत । तत्र गुणतः गुणनिश्चयेन । संग्रहं अङ्गीकारं कुर्यात् ।

॥ ३० ॥ ति० तर्क्यएव शङ्क्यएव । विश्वासनीयः विश्वासप्रयुक्तव्यवहारार्हः । सहसानकर्तव्यः । अपितु शनैरित्यर्थः ॥ ३९ ॥

[पा०] १ ङ. ञ. सुहृदामर्थ. क. सुहृदाह्यति. च. छ. ज. सुहृदांह्यर्थ. २ ङ. ञ. ट. समर्थेनोप. ३ च. ञ. सोपचार. मिदंवाक्यं. ४ ङ. ञ. ब. ट. मूचुःप्रिय. ५ क.—ट. पूजयन्नाम. ६ ख. घ. ङ. च. ञ. ब. ट. पुनस्तथा. ७ क. महत्. ८ क. ख. घ.—ट. तर्क्यएव. ग. त्याज्यएव. ९ च. ञ. ब. ट. विश्वासनीयः. १० क. सोनर्थस्तत्कृतोभवेत. ११ क. घ. च. ब. ट. भजेदिह. १२ क. ख. घ.—ट. विसर्जयेत्.

यदि दोषो महांस्तस्मिंस्त्यज्यतामविशङ्कितम् ॥ [1]गुणान्वाऽपि बहून्ज्ञात्वा संग्रहः क्रियतां नृप ॥४२॥
शरभस्त्वथ निश्चित्य [2]साध्यं वचनमब्रवीत् ॥ क्षिप्रमस्मिन्नरव्याघ्र चारः प्रतिविधीयताम् ॥ ४३ ॥
प्रणिधाय हि चारेण यथावत्सूक्ष्मबुद्धिना ॥ परीक्ष्य च ततः कार्यो यथान्याय्यं परिग्रहः ॥ ४४ ॥
जाम्बवांस्त्वथ संप्रेक्ष्य शास्त्रबुद्ध्या विचक्षणः ॥ वाक्यं विज्ञापयामास गुणवद्दोषवर्जितम् ॥ ४५ ॥
बद्धवैराच्च पापाच्च राक्षसेन्द्राद्विभीषणः ॥ अदेशकाले संप्राप्तः सर्वथा शङ्क्यतामयम् ॥ ४६ ॥
ततो मैन्दस्तु संप्रेक्ष्य नयापनयकोविदः ॥ वाक्यं वचनसंपन्नो बभाषे हेतुमत्तरम् ॥ ४७ ॥
[3]वचनं नाम तस्यैष रावणस्य विभीषणः ॥ पृच्छ्यतां मधुरेणायं शनैर्नरवरेश्वर ॥ ४८ ॥
भावमस्य तु विज्ञाय ततस्त्वं करिष्यसि ॥ यदि दुष्टो न दुष्टो वा बुद्धिपूर्वं नरर्षभ ॥ ४९ ॥
अथ संस्कारसंपन्नो हनूमान्सचिवोत्तमः ॥ उवाच वचनं श्लक्ष्णमर्थवन्मधुरं लघु ॥ ५० ॥
न भवन्तं मतिश्रेष्ठं समर्थं वदतां वरम् ॥ अतिशाययितुं शक्तो बृहस्पतिरपि ब्रुवन् ॥ ५१ ॥
न वादान्नापि सङ्घर्षान्नाधिक्यान्न च कामतः ॥ वक्ष्यामि वचनं राजन्यथार्थं रामगौरवात् ॥ ५२ ॥

दोषतः दोषनिश्चयेन तु विसर्जयेत् ॥ ४१ ॥ ननु सर्वात्मना गुणी दोषी वा दुर्लभः अतः कथं संग्रहत्यागव्यवस्थितिरित्यत्राह—यदीति ॥ तस्मिन विभीषणे । महान्दोषो यदि स्यात् तदा असौ अविशङ्कितं अविशङ्कं त्यज्यतां । बहून्गुणान् ज्ञात्वा संग्रहः क्रियतां वा । स्वल्पदोषवत्त्वेपि बहुगुणो ग्राह्यः । स्वल्पगुणवत्त्वेपि बहुदोषस्त्याज्य इति भावः ॥ ४२ ॥ विनियोगं विना गुणदोषपरिज्ञानं न संभवति सहसा विनियोगे च मन्त्रहानिः स्यादिति पूर्वास्वरसाच्छरभ आह—शरभस्त्विति ॥ तुशब्दः पूर्वस्माद्वैलक्षण्यपरः । साध्यं साध्यार्थकं । अनेनाङ्गदपक्षस्यासाध्यार्थत्वं द्योतितं । अस्मिन् विभीषणविषये । प्रतिविधीयतां प्रेष्यतां ॥ ४३ ॥ प्रणिधाय चारंप्रेषयित्वा । सूक्ष्मबुद्धिनाचारेण यथावन्नीतिशास्त्रोक्तरीत्या परीक्ष्य ततो यथान्याय्यं न्यायादनपेतं न्याय्यं । निर्णीतार्थमनतिक्रम्य । परिग्रहः विभीषणपरिग्रहः । कार्यः ॥४४॥ नियोगेन चारेण वा नायं परीक्ष्यः अविस्रम्भहेतूनां बहूनां संभवादिति जाम्बवान्पक्षान्तरमुपक्षिपति—जाम्बवानिति ॥ गुणवत् युक्तिमत् । दोषवर्जितं अनपायमितिपूर्वोक्तमतद्वयव्यावृत्तिः ॥ ४५ ॥ बद्धवैरात् दृढवैरात् । पापात् पापकर्मणः । अदेशे दूरतयासांप्रतिकभयाभावेन आगमनप्रयोजनरहिते । अकाले स्वामिपरित्यागानर्हकाले ॥ ४६ ॥ सर्वथा शङ्क्यत्वेपि सुकरोपायेन गुणदोषपरीक्षया अकरणे सुखोपनतमित्रहानिः स्यादिति मैन्दो मतान्तरमाह—तत इति ॥ हेतुमत्तरं अतिशयेन हेतुयुक्तं ॥ ४७ ॥ मधुरेण वचसा रावणस्य वचनमयं विभीषणः शनैः पृच्छ्यतामिति संबन्धः । पृच्छ्यतामित्यत्र अज्ञातपुरुषमुखेनेति शेषः । उत्तरत्र तथैव हनुमताऽनुवादात् ॥ ४८ ॥ भावमिति । एवंविधपरीक्षणेनास्य तत्त्वतो भावं विज्ञाय यदि दुष्टः तदा तदनुरूपं अदुष्टश्चेत्तदनुरूपं च बुद्धिपूर्वं परीक्षापूर्वकं करिष्यसीत्यर्थः ॥४९॥ एवं सुग्रीवेणेदानीं वध्यत्वं प्रतिपादितं । अङ्गदादिभिस्तु गुणदोषपरीक्षापूर्वकं परिग्रहपरित्यागौ सिद्धान्तितौ । अथ सचिवोत्तमो हनुमान् सुग्रीवमतं राजमतत्वादत्यन्ताविचारमूलत्वाच्चोपेक्ष्य अङ्गदादिमतमेकैकानुवादपूर्वकं दूषयित्वा इदानीमेव दोषाभावस्य निर्णेतुं शक्यत्वात् सहसैव परिग्राह्य इति सिद्धान्तयति सर्गशेषेण—अथेति ॥ संस्कारसंपन्नः शास्त्राभ्यासदृढतरसंस्कारयुक्तः । लघु अविस्तृतं ॥ ५० ॥ भवत उपदेशार्थं न मम प्रवृत्तिः भवतः सर्वप्रकारोत्कृष्टत्वात् केनाप्याकारेणातिशयितस्य कस्यचिदभावादित्याह—न भवन्तमिति ॥ ५१ ॥ वादात् तर्ककौशलात् । संघर्षात् सचिवेषु स्पर्धावशात् । आधिक्यात् अहं

ति० अदेशकाले स्वामिसंदेशंविहायरिपुदेशआगमनेनानुचितदेशप्राप्तत्वं । स्वामिनःसंकटकाले तत्प्रहाणानौचित्यादनुचितकालप्राप्तः । अतः शङ्क्यतां । सर्वथाशङ्काविषयत्वेनत्यागार्हएवायमितिभावः । ती० अदेशे शत्रुसमीपदेशे । अकाले रात्रौ । यद्वा अकाले स्वामिपरित्यागानर्हकाले ॥ ४६ ॥

[पा०] १ च. छ. ज. सुगुणान्दुर्गुणान्. २ ग. वीरोवचनं. क. ख. ङ. झ. ट. सार्थवचनं. ३ ङ. झ. ट. अनुजोनामतस्यैष.

अर्थानर्थनिमित्तं हि यदुक्तं सचिवैस्तव ॥ तत्र दोषं प्रपश्यामि क्रिया न ह्युपपद्यते ॥ ५३ ॥
ऋते नियोगात्सामर्थ्यमवबोद्धुं न शक्यते ॥ सहसा विनियोगो हि दोषवान्प्रतिभाति मा ॥५४॥
चारप्रणिहितं युक्तं यदुक्तं सचिवैस्तव ॥ अर्थस्यासंभवात्तत्र कारणं नोपपद्यते ॥ ५५ ॥
अदेशकाले संप्राप्त इत्ययं यद्विभीषणः ॥ विवक्षा तत्र मेऽस्तीयं तां निबोध यथामति ॥
स एष देशः कालश्च भवतीति यथातथा ॥ ५६ ॥
पुरुषात्पुरुषं प्राप्य तथा दोषगुणावपि ॥ दौरात्म्यं रावणे दृष्ट्वा विक्रमं च तथा त्वयि ॥
युक्तमागमनं तस्य सदृशं तस्य बुद्धितः ॥ ५७ ॥
अज्ञातरूपैः पुरुषैः स राजन्पृच्छ्यतामिति ॥ यदुक्तमत्र मे प्रेक्षा काचिदस्ति समीक्षिता ॥ ५८ ॥
पृच्छ्यमानो विशङ्केत सहसा बुद्धिमान्वचः ॥ तत्र मिश्रं प्रदुष्येत मिथ्या पृष्टं सुखागतम् ॥ ५९ ॥

मतिमान् वाग्मीचेत्याधिक्याभिमानात् । कामतः स्वैरभाषणेच्छातः । विभीषणपक्षपाताद्वा । तर्हि किमर्थं प्रवृत्तिस्तत्राह—गौरवादिति । मयि त्वत्कृतात्संमानात् ॥ ५२ ॥ पूर्वोक्तेषु चतुर्षु मतेषु प्रथममङ्गदमतं दूषयति—अर्थानर्थेति ॥ अर्थानर्थयोर्निमित्तं निर्णयोपायः । सचिवैः अङ्गदेन तादात्विकसंरम्भपरिहाराय नामानुक्तिर्बहुवचनं च । यदुक्तं तत्र दोषं प्रपश्यामि । कुतः क्रिया एवंप्रकारेण क्रिया । नोपपद्यतेहि ॥५३॥ अनुपपत्तिमेव दर्शयति—ऋत इति ॥ नियोगात् राजकार्येषु नियोगात् । ऋते विना । "अन्यारादितरर्ते—" इत्यादिना पञ्चमी । सामर्थ्यं साधुत्वं । सहसा विनियोगः गुणदोषपरीक्षामन्तरेण कुत्रचिन्महति राजकार्ये विनियोजनं । मा मां प्रति । दोषवान् भाति । तथाच सत्यां गुणदोषपरीक्षायां नियोगः । नियोगे सति गुणदोषपरीक्षणमित्यन्योन्याश्रयः । अतोनुपपन्नमङ्गदमतमितिभावः ॥ ५४ ॥ अथ शरभमतं प्रयोजनाभावेन खण्डयति—चारेति ॥ अत्रेतिशब्दोध्याहर्तव्यः । चारप्रणिहितं चारप्रणिधानं । युक्तमिति तव सचिवैर्यदुक्तं शरभेण यदुक्तमित्यर्थः । तत्र तस्मिन्मते । अर्थस्य चारप्रयोजनस्य । दूरतिरोहितदर्शनादेरसंभवात् चारप्रणिधानलक्षणं । कारणं उपायः । न युज्यत इत्यर्थः । अत्यासन्ने स्वचक्षुर्विषये सम्यक्परिदृश्यमाने व्यवधानरहिते नभस्थलावस्थायिनि चास्मिन् पररन्ध्रादितत्त्वदर्शनलक्षणचारप्रयोजनाभावादयमुपायो न युज्यत इतिभावः । चारणं नोपपद्यत इतिपाठेतु चारयितव्यस्यान्तःपुरसमाजतीर्थादिरूपस्य विषयस्याभावाच्चारसंचारणं न घटतइत्यर्थः ॥ ५५ ॥ अदेशकाले संप्राप्त इत्यस्य जाम्बवन्मतस्यासारत्वात्तन्निराकरणेन सर्वं निराकृतप्रायमिति तत्स्वरूपासिद्ध्या दूषयति—अदेशेति सार्धश्लोकएकान्वयः । अयं विभीषणः । अदेशकाले संप्राप्तइति यत् । तत्र तद्विषये । यथातथा याथातथ्येन । स एष देशः कालश्च भवतीति मे यथामति इयं विवक्षास्ति तां निबोधेत्यन्वयः ॥५६॥ विवक्षितमेव सोपपत्तिकं विशदयति—पुरुषादित्यादिसार्धश्लोकेन ॥ पुरुषात् अधमपुरुषाद्रावणात् । पुरुषं उत्तमपुरुषं भवन्तं । प्राप्य मनसा विमृश्य । तथा दोषगुणावपि युवयोर्विमृश्य । तथा । रावणे दौरात्म्यं राक्षसकुलविनाशहेतुभूतसीतापहरणतत्प्रत्यर्पणानपेक्षित्वादिकं । त्वयि विक्रमं खरदूषणप्रमुखराक्षसवधादिकं वालिवधपूर्वकसुग्रीवराज्यप्रदानं अतिदुस्तरसमुद्रतरणोद्योगं च । दृष्ट्वा । तस्य बुद्धितः बुद्धेः सदृशं तस्य आगमनं युक्तमिति संबन्धः । यदा प्रतिकूले दोषदर्शनमनुकूले गुणज्ञानं च स एव देशः कालश्चभवति । इदं तथ्यमिति भावः ॥ ५७ ॥ मैन्दमतं प्रतिक्षिपतिश्लोकत्रयेण—अज्ञातेति ॥ अज्ञातरूपैः अपरिचितस्वरूपस्वभावैः । समीक्षिता सम्यक्परीक्षिता । प्रेक्षा युक्तिरूपा बुद्धिः ॥ ५८ ॥ क्वचिद्गुणवत्यपि मित्रे दोषदृष्टिहेतुत्वेनानैकान्तोयं गुणदोषनिर्णयोपाय इत्याह—पृच्छ्यमान इति ॥ बुद्धिमानपि पुमान् अपरिचितैः पृच्छ्यमानः सन् अविश्वासादेवैते पृच्छन्ति कस्मिन्वचस्युक्ते को वानर्थः समापद्यत इति प्रतिवचनरूपंवच-

---

[पा०] १ क. सचिवैस्सह. २ क. ङ. छ. झ. ट. भातिमे. ३ ङ. झ. ट. एषदेशश्चकालश्च. ४ ख. घ. दोषगुणावुभौ. ५ घ. च. छ. युक्तमागतमस्यापिविमृशान्तस्यबुद्धितः. ६ ङ. झ. ट. ह्यत्र. ञ. चात्र. ७ ग. च. बुद्धिमान्नरः.

अशक्यः सहसा राजन्भावो वेत्तुं परस्य वै ॥ अन्तःस्वभावैर्गीतैस्तैर्नैपुण्यं पश्यता भृशम् ॥ ६० ॥
न त्वस्य ब्रुवतो जातु लक्ष्यते दुष्टभावता ॥ प्रसन्नं वदनं चापि तस्मान्मे नास्ति संशयः ॥ ६१ ॥
अशङ्कितमतिः स्वस्थो न शठः परिसर्पति ॥ न चास्य दुष्टा वाक्यापि तस्मान्नास्तीह संशयः ॥ ६२ ॥
आकारश्छाद्यमानोपि न शक्यो विनिगूहितुम् ॥ बलाद्धि विवृणोत्येव भावमन्तर्गतं नृणाम् ॥ ६३ ॥
देशकालोपपन्नं च कार्यं कार्यविदां वर ॥ स्वफलं कुरुते क्षिप्रं प्रयोगेणाभिसंहितम् ॥ ६४ ॥
उद्योगं तव संप्रेक्ष्य मिथ्यावृत्तं च रावणम् ॥ वालिनश्च वधं श्रुत्वा सुग्रीवं चाभिषेचितम् ॥
राज्यं प्रार्थयमानश्च बुद्धिपूर्वमिहागतः ॥ ६५ ॥
एतावत्तु पुरस्कृत्य युज्यते तत्र संग्रहः ॥ यथाशक्ति मयोक्तं तु राक्षसस्यार्जवं प्रति ॥
त्वं प्रमाणं तु शेषस्य श्रुत्वा बुद्धिमतां वर ॥ ६६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तदशः सर्गः ॥ १७ ॥

उद्दिश्य । सहसा विविधां शङ्कां प्राप्नुयात् । तथासति सुखागतं स्वस्मिन्दोषराहित्येन विश्वासोपगतमपि मित्रं मिथ्या पृष्टं सत् तेन प्रश्नेन हेतुना । प्रदुष्येत । दुष्टं भवेदित्यर्थः ॥ ५९ ॥ क्वचिन्निष्प्रयोजनश्चायमुपाय इत्याह—अशक्य इति ॥ भृशं अत्यर्थं । स्वस्मिन्नैपुण्यं पश्यतापि मिथ्या प्रष्ट्रा अन्तःस्वभावैः अन्तर्हितस्वाभिप्रायैः । परस्य गीतैः भाषितैः । पराभिप्रायः सहसा ज्ञातुमशक्य इत्यर्थः । छद्मना प्रष्टुर्गूढमभिप्रायं ज्ञात्वा । "अहृदयवाचामहृदया एव प्रतिवाचो भवन्ति" इति न्यायेन परेणापि स्वाभिप्रायानाविष्करणादितिभावः ॥ ६० ॥ एवं पूर्वोक्तेषु पक्षेषु दोषानुद्भाव्य संप्रत्यालना परीक्ष्य कक्षीकृतं पक्षमुपक्षिपति—न त्वित्यादिना ॥ ब्रुवतः बहुव्याहरतोस्य ॥ ६१ ॥ एवमस्येङ्गिताकाराभ्यामदुष्टत्वमुक्त्वा चेष्टाभाषणाभ्यां च तद्दर्शयति—अशङ्कितेति ॥ शठः गूढविप्रियकारी ॥ ६२ ॥ ननु परमवञ्चकःपुरुषो भावं निगूहयति कथंतेनविश्वासइत्यत्राह—आकारइति ॥ आकारः मुखविकारः ॥ ६३ ॥ एवं दोषाभावमुक्त्वा गुणमुचितज्ञत्वरूपंदर्शयितुं नीतिमर्यादां दर्शयति—देशेति ॥ देशकालोपपन्नं देशकालाभ्यां युक्तं । प्रयोगेण उचितपुरुषप्रयोगेण । अभिसंहितं युक्तं । उचितेषु देशकालपुरुषेषु प्रयुक्तमित्यर्थः । कार्यं क्रिया । स्वफलं स्वोचितफलं । क्षिप्रं अप्रतिबन्धं । कुरुते कर्तरीति शेषः ॥ ६४ ॥ एतेनाप्येवमेवकार्यं प्रयुक्तमित्याशयेनाह—उद्योगमितिसार्धश्लोक एकान्वयः ॥ ६५ ॥ फलितमाह—एतावदिति सार्धश्लोकेन ॥ स्ववचनं निगमयति—यथाशक्तीति । यथाशक्ति बुद्धिशक्तिमनतिक्रम्य । आर्जवं निर्दोषत्वं । मद्वाक्यं श्रुत्वा यत्कर्तव्यमकर्तव्यं वा तस्य सर्वस्य त्वं तु त्वमेव । प्रमाणं प्रमातेत्यर्थः ॥ ६६ ॥ इति श्रीगोविन्द-

---

ति० किंचतस्यशत्रुत्वेतदभिप्रायश्चारैरपिदुर्ज्ञेयइत्याह—अशक्यमिति । परस्यशत्रोर्भावश्चारेण सहसा द्राक् । प्रश्नमात्रेणवेत्तुं ज्ञातुं । अशक्यएव । अज्ञातेनपृष्टउत्तरस्यैवादानात् । शत्रुप्रहितत्वेनज्ञातेप्रत्युतदण्डस्यापिप्रसङ्गात् ॥ नन्वेवंजगतिचारप्रेषणनैष्फल्यप्रसङ्गइतिचेन्न । बहुकालंतत्रस्थितौतद्वचनैस्तद्व्यवहारैस्तत्प्रसङ्गेहर्षामर्षादिभिश्चतस्यशत्रुमित्रत्वज्ञानायतत्प्रेषणसंभवात् । यदेव मतःअन्तरेणेति । "अन्तरेणस्वरैर्भिन्नैर्नैपुण्यंपश्यतांभृशं" इतिप्राचीनःपाठः ॥ अन्तरेण व्यवहारमध्ये । भिन्नैस्स्वरैः विलक्षणस्वरैः कण्ठध्वनिभिः नैपुण्यं । सदसदन्यतरत्वनिश्चयं । पश्यतां कुरुतां । भवानितिशेषः । तत्रबाष्पकण्ठत्वेभीत्यापूर्वापरासंगतकथनेचासन् अन्यथासन्नितिनिश्चीयतामित्याशयः ॥ ६० ॥ **ति०** ननुत्वयैवप्रथमंपरीक्ष्यतामितिचेन्मयापरीक्षितएवेत्याह—नत्वस्येति । दुष्टभावता वचनचेष्टादिभिर्दुष्टान्तःकरणता । नलक्ष्यते । प्रसन्नवदनताचदृश्यते ॥ ६१ ॥ **स०** प्रयोगेण प्रकृष्टयोगेनोपायेनदैवरूपेणाभिसंहितं संबद्धं । यद्वा प्रयोगोनुष्ठानं । स्वात्मानमेवसफलंकुरुतइतिवा । क्षिप्रंप्रयोगेणाभिसंहितं अदीर्घसमीक्षयाकृतंकर्तारं सफलं सविशरणं । नष्टमितियावत् । देशकालोपपन्नंचकार्यंसफलंकुरुते विभीषणकार्यंचदेशकालोपपन्नमितिसफलमेवेतिभावः ॥ ६४ ॥ **स०** तवोद्योगं रावणमारणविषयं । मिथ्यावृत्तं असदाचारं । वालिनः रावणादपिबलिनः ।

[**पा०**] १ ङ. झ. ट. अन्तरेणस्वरैर्भिन्नैर्नैपुण्यंपश्यतां. २ क. प्रसन्नमदनश्चापि. ३ ख. ग. ङ. झ. ञ. ट. दुष्टवागस्ति. ४ झ.—ठ. सफलं. ५ क.—ङ. झ. ञ. ट. वालिनंचहतं. ६ घ. ङ. छ. झ. ट, विद्यतेतस्य. ७ ग. च. ञ. तस्य. क. ख. ज. त्वस्य.

अष्टादशः सर्गः ॥ १८ ॥

रामेणसुग्रीवंप्रति विभीषणस्यमित्रभावेनप्राप्तत्वरूपहेतुना त्यागानर्हत्वोक्तौ सुग्रीवेणतंप्रतिसप्रणामंतस्मिन्दोषोज्ञापनेन तन्निग्रहप्रार्थना ॥ १ ॥ रामेणतंप्रति विभीषणस्यनिर्दोषत्वसमर्थनपूर्वकं शरणागतरक्षणस्यावश्यंकर्तव्यत्वे कपोतोपाख्यान-स्यदृष्टान्तीकरणेनसह कण्डुमुनिवचनस्यप्रमाणीकरणेन शत्रुत्वेपिशरणागतरक्षणस्यस्वव्रतत्वोक्त्या तस्माअभयप्रदानोक्तिपूर्वकं तदानयनचोदना ॥ २ ॥

अथ रामः प्रसन्नात्मा श्रुत्वा वायुसुतस्य ह ॥ प्रत्यभाषत दुर्धर्षः श्रुतवानात्मनि स्थितम् ॥ १ ॥
ममापि तु विवक्षाऽस्ति काचित्प्रति विभीषणम् ॥ श्रोतुमिच्छामि तत्सर्वं भवद्भिः श्रेयसि स्थितैः ॥२॥
मित्रभावेन संप्राप्तं न त्यजेयं कथंचन ॥ दोषो यद्यपि तस्य स्यात्सतामेतदगर्हितम् ॥ ३ ॥

राजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तदशः सर्गः ॥ १७ ॥

एवं सुग्रीवादिभिः स्वस्वमते प्रतिपादिते स्वाभिमतमपि रामो वक्तुं प्रारभते—अथेति ॥ वायुसुतस्य वचनमिति शेषः । प्रसन्नात्मा सुग्रीवादिवाक्यैः कलुषीकृते मनसि सति हनुमद्वाक्येन प्रसन्नमनाः । दुर्धर्षः पूर्वपक्षैरक्षोभ्यः । तत्रहेतुमाह—श्रुतवानिति । वसिष्ठादिभ्यः श्रुतकपोतकण्डूपाख्यानादिमान् । आत्मनिस्थितं चित्तावस्थितं ॥ १ ॥ सर्वमतप्रतिक्षेपरूपेण स्ववाक्येन किमेते व्याकुलितमनसो भवेयुरिति शङ्कया रामःसचिवानुपच्छन्दयति—ममापीति ॥ तुशब्दः पक्षान्तरवद्धनुमत्पक्षमपि व्यावर्तयति । ममापि विभीषणंप्रति काचिद्युष्मत्पक्षैः सह परिगणनायोग्या विवक्षा अस्ति । अतः तत्सर्वं मद्विवक्षितं वा तु साध्यरूपं सर्वमर्थजातं । श्रेयसि स्थितैः अस्मच्छ्रेयोनिरतैः । भवद्भिः युष्माभिः । श्रोतुमिच्छामि । भवद्भिः श्रुत्वा परीक्षणं कार्यमितिममेच्छास्तीत्यर्थः ॥ २ ॥ एवं सचिवाननुगुणीकृत्य स्वस्वभावकथनव्याजेन स्वविवक्षितुं सहेतुकं दर्शयति—मित्रभावेनेति ॥ मतान्तरेषु सदोषत्वान्न परिग्राह्य इति हेतुसाध्ये अपि दुष्टे । मारुतिमतेतु परिग्राह्यत्वरूपे साध्येसमीचीनेपि निर्दोषत्वादिति हेतुरसमीचीनः । किंतु शरणागतोहमितिवाक्यप्रयोक्तृत्वमेव तत्र मुख्यहेतुरित्यभिप्रायेण मित्रभावेनेति हेतुनिर्देशः । मित्रभावेन वास्तवमित्रत्वाभावेपि मित्रत्वाभिनयमात्रेणापीत्यर्थः । मित्रभावः शरणागतत्वं । राघवं शरणं गतः शरण्यं शरणं गत इति पूर्वोत्तरत्र च तस्यैव कथनात् । अन्यत्रापि—"विदितः स हि धर्मज्ञः शरणागतवत्सलः" इति शरणागतिशब्देनोपक्रम्य "तेन मैत्री भवतु ते यदि जीवितुमिच्छसि" इति मैत्रीशब्देन परिसमापनात् । यद्वा । मित्रशब्दः स्वाभिप्रायेण शरणागते गौरवारोपाद्युज्यते । न त्यजेयं त्यक्तुं न शक्नोमि । सर्वशक्तेरपि मम शरणागतशब्दश्राविणःपरित्यागे शक्तिसंभावनामपिन पश्यामीत्यर्थः । कथंचन दृष्टादृष्टानर्थशतानुबन्धित्वे तत्परिग्रहस्य सुहृदामनभिमतत्वे मत्प्राणपरित्यागे प्रस्तुतेपीत्यर्थः । दोषो यद्यपि तस्य स्यात् । यद्यपि सुग्रीवादिभिरुक्ता दोषा नास्मिन्सन्ति । सन्तु वाततोपि भूयांसः । अथाप्यशक्यमहं कथं करोमीत्यर्थः । स्याच्छब्दः दुष्टोपि शरणागतशब्दप्रयोक्ता मया परिगृहीत इति मम महद्यशो भवेदित्येवमर्थे । अदुष्टपरिग्रहे गुणो मन्दः । दुष्टपरिग्रहे तु मम शरणागतरक्षणधर्म उत्तेजितोभवतीतिभावः । करुणयादुष्टपरिग्रहे शिष्टगर्हास्यादित्यत्राह—सतामेतदिति । एतद्दुष्टस्यापि शरणागतस्यसंग्रहणं । सतां शिष्टानां । अगर्हितं गर्हितादन्यत् । पूजितमित्यर्थः । पूजितत्वं च कपोतोपाख्यानादिभिः प्रपञ्चयिष्यते । एवंच शास्त्रेषु दोषाणां परित्यागहेतुत्वोक्तिः शरणागतव्यतिरिक्तविषयेति विषयव्यवस्थाऽभिप्रेता । अतएव

निष्कंपप्रवृत्तावयंहेतुः । राज्यं रावणसाम्राज्यं । ज्येष्ठमारणकनिष्ठाभिषेचनयोःसुग्रीवनिदर्शनेननिश्चितरावणमारणस्वस्थापनार्थमयमायातइतिनाचातुरीतस्येतिभावः ॥ ६५ ॥ इतिसप्तदशःसर्गः ॥ १७ ॥

स० अयंहनुमदुक्तप्रकारेणनिर्दोषएवयद्यपि । यदितस्यदोषः त्यागहेतुःस्यात् तर्हि तस्यैवदोषःवधरूपःस्यात् नास्माकंकश्चन ।

[पा०] १ ङ. ञ. ट. ममापिच. २ ग. घ. मेतद्विगर्हितं.

दोषाधिक्येनवधार्हस्यापि शरणागतस्यरक्षणमेवकार्यमितिश्रुतिराह—तस्मादपिवध्यं प्रपन्नं न प्रतिप्रयच्छन्तीति । आचार्ययोजना । मित्रस्य स्नेहिनो भावो मित्रत्वं । तेन आशालेशमात्रेण । अद्वेषमात्रेणाभिमुख्यमात्रंवाऽस्मदङ्गीकारे प्रयोजकं न तु पूर्णभक्तिरिति भावः । तथोक्तं—"त्वामामनन्ति कवयः करुणामृताब्धे ज्ञानक्रियाभजनलभ्यमलभ्यमन्यैः । एतेषु केन वरदोत्तरकोसलस्थाः पूर्वं सदूर्वमभजन्त हि जन्तवस्त्वां" इति ॥ यद्वा मित्रभावेन मित्रक्रियया । "भावो लीलास्वभावयोः । जन्त्वभिप्रायचेष्टासु भूतौ विद्वत्पदार्थयोः । क्रियायामात्मनि" इति नानार्थरत्नमाला । मित्रभावनयेतियावत् । अहृदयशरणोक्तयेत्यर्थः । तदप्युक्तं—" शरणवरणवागियं योदिता न भवति वत सापि धीपूर्विका " इति । शरणागतभावेनेति वक्तव्ये मित्रभावेनेत्युक्तिः स्वाश्रयणाय कतिचित्पदानि कुर्वत्यपि स्वसदृशबुद्धिकारिणोभगवतोभिप्रायेण । देव्यापि शरणागतिमभिदधत्या "तेन मैत्री भवतु ते यदि जीवितुमिच्छसि" इत्युक्तं । यद्वा मित्रभावेन मित्रत्वेन हेतुना । "सुहृदं सर्वभूतानां" इत्युक्तरीत्या अस्मदीयसहजसौहार्दपुरस्कृत्येत्यर्थः । यद्वा मित्रभावेन आनुकूल्यसंकल्पादिपूर्वकमित्यर्थः । यद्वा मितात्रायतइति मित्रं । ईश्वरोपकारं परिच्छिद्य तत्सदृशोपकारप्रवृत्तस्य भावेनेत्यर्थः । यद्वा विश्वसनीयस्थलं मित्रं । "तन्मित्रं यत्र विश्वासः" इत्युक्तत्वात् । विश्वासिनो भावेनेत्यर्थः । संप्राप्तं "तस्याशालेशमात्रेण ह्रीरेषाहिममातुला" इत्युक्तरीत्या मम तन्निवासगमने प्राप्तेपि स्वयमेव प्राप्तं कथं त्यजेयं । संप्राप्तं सम्यक्प्राप्तं । पादुके द्वारि विन्यस्य देववन्दनकारिन्यायेनान्यत्रचित्तप्राप्तिमन्तरेण "परित्यक्तम मया लङ्का मित्राणि च धनानि च" इति विरोधिनिवृत्तिपूर्वकं प्राप्तमित्यर्थः । यद्वा संप्राप्तं माता पिता भ्राता निवासः शरणं सुहृद्गतिर्नारायण इति न्यायेन मयि त्यक्तसकलविधबन्धुभावमाचरन्तं । यद्वा मदन्तरङ्गानुचरपुरस्कारेण प्राप्तं । यद्वा संप्राप्तं लङ्कायां स्थित्वा राघवं शरणं गतोस्मीत्युक्तंचेत् अतन्द्रितचमूपतीत्याद्युक्तन्यायेन मम तत्र गन्तव्यतायामपि तस्यागमनेन पङ्गोरुपरि गङ्गानिपतनवदस्मत्प्रयोजनमेवकृतं । संप्राप्तं प्राप्तिरेवास्माकमपेक्षिता । न तु स्तुत्यर्चनध्यानप्रणामादिः । समित्यनेन मानसवाचिककायिकरूपपूर्णप्रपदनमुच्यते । न त्यजेयं त्यक्तुं न शक्नोमि । सर्वशक्तेरपि मम शरणागतशब्दश्राविणः परित्यागे शक्तिसंभावनामपि न पश्यामीत्यर्थः । संप्राप्तं न त्यजेयं, " शरणागतस्यमालिनीयं वृषशैलेशकृषीवलं धिनोति " इत्युक्तरीत्या रक्षापेक्षां प्रतीक्षमाणोहं कथं संप्राप्तं त्यजेयं । न त्यजेयं तत्संबन्धेन रावणविषयाकारापेक्षी कथं तमेव त्यजेयं । अतएवहि घण्टाकर्णपक्षपातेन तदनुजस्यापि मुक्तिं ददौ । अतएव च मालाकारविषयपक्षपातेन । " युष्मत्सन्ततिजातानां दीर्घमायुर्भविष्यति " इत्युक्तवान् । न त्यजेयं । आगमनमात्रेण श्लाघनीये त्यागसंभावना कुतः । संभावनायां लिङ् । त्यागसंभावनायां खलु साधनोद्योगः । तस्य त्यागे स्वसत्ताचेत् साधनोद्योगः स्यात् । सैव न निर्वहति कथमुद्योगः तत्स्वीकाराभावे स्वसत्ता न सिद्ध्यति चेत् तत्स्वीकारेऽस्मत्सत्ता न सिद्ध्यतीत्यस्मत्त्यागः स्यात् स कथमुपपद्यत इति चेत्तत्राह—कथंचन । " अप्यहं जीवितं जह्यां " इत्युक्तरीत्या नवप्रसववात्सल्येन वत्सला गौः पूर्ववत्सानिव युष्मानपि त्यक्ष्यामि न त्वाश्रितं । यद्वा कथंचन सर्वदेशसर्वकालसर्वावस्थास्वपीत्यर्थः । यद्वा कथंचन शरणागतस्य गुणाभावेपि दोषप्राचुर्येपि तत्परिग्रहस्य सर्वानभिमतत्वेपि दृष्टादृष्टानिष्टशतानुबन्धित्वेपि मत्प्राणपरित्यागे प्रस्तुतेपीत्यर्थः । किंच दोषो यद्यपि तस्य स्यात् । अस्मदभिप्रायेण दोषो नास्त्येव अस्थानभयशङ्कितो भवतोभिप्रायेण तस्य दोषोस्ति चेत्स्यात् । अङ्गीकारेऽव्ययमिदं । दोषभोग्यत्वरूपवात्सल्यैकस्वभावस्य मे आश्रितदोषो ह्युपादेयइतिभावः । सुकुमारस्य राजकुमारस्य सुगन्धिमूलमृल्लेशवदस्य दोषभोग्यत्वं । यद्वा दोषो यद्यपि स्यात् । तस्य शरणागतस्य नदोषः । " यथैषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते " इत्युक्तरीत्या दोषो न श्लिष्येदित्याशयः । यद्वा दोषो यद्यपि स्यात् । स तस्य हि शरणागतिरूपनिरतिशयगुणशालिनो दोषो न त्याज्यकोटिमाटीकते । सुगन्धिमूलमृल्लेशवत् । यद्वा दोषो यद्यपि तस्य दोषोस्ति चेत्तत्संबन्धी खलु दोषः । स तस्मादपि श्लाघ्यः स्यात् । प्रार्थनायां लिङ् । अस्माभिः प्रार्थितःखलु । गुणवात्रक्षितश्चेत् गुणवत्तापत्तिकरः । दोषवात्रक्षितश्चेदतिशयोस्माकमिति भावः ।

सुग्रीवस्त्वथ तद्वाक्यमाभाष्य च विमृश्य च ॥ ततः शुभतरं वाक्यमुवाच हरिपुङ्गवः ॥ ४ ॥
सुदुष्टो वाऽप्यदुष्टो वा किमेष रजनीचरः ॥ ५ ॥
ईदृशं व्यसनं प्राप्तं भ्रातरं यः परित्यजेत् ॥ को नाम स भवेत्तस्य यमेष न परित्यजेत् ॥ ६ ॥
वानराधिपतेर्वाक्यं श्रुत्वा सर्वानुदीक्ष्य च ॥ ईषदुत्स्मयमानस्तु लक्ष्मणं पुण्यलक्षणम् ॥
इति होवाच काकुत्स्थो वाक्यं सत्यपराक्रमः ॥ ७ ॥
अनधीत्य च शास्त्राणि वृद्धाननुपसेव्य च ॥ न शक्यमीदृशं वक्तुं यदुवाच हरीश्वरः ॥ ८ ॥
अस्ति सूक्ष्मतरं किंचिद्यदत्र प्रतिभाति मे ॥ प्रत्यक्षं लौकिकं वाऽपि विद्यते सर्वराजसु ॥ ९ ॥

यद्वा दोषो यद्यपि अस्मद्बधापेक्षया तस्य स्यात् तस्यापेक्षितफलसिद्धिः स्यात् । कपोतोपाख्यानानुगुणेयं योजनेति श्रीवत्साङ्कमिश्रा आहुः । कथं तर्ह्येतन्महामन्त्रिणो निन्दन्तीत्यत्राह—सतामेतदगर्हितं । एतत् आश्रितदोषाङ्गीकरणं । सतां अगर्हितं अनिन्दितं । अस्मत्पक्षपातिनामस्थानभयशङ्किनां निन्दितत्वेपि परमार्थदर्शिनां कपोतादीनांच न निन्दितमिति भावः । यद्वा एवं दुष्टापरित्यागे प्रत्यवायपरिहारो वा पुरुषार्थसिद्धिर्वा पापक्षयो वेति चेन्नैतदित्याह—सतामिति । सद्रोष्टीष्वस्मद्गर्हापरिहारएव फलं स्वमारणोद्योगवतामपि रक्षकाः कपोतादयः तेषामगर्हितं । यद्वा दुष्टजनपरिग्रहस्य शिष्टगर्हितत्वाच्छास्त्रनिन्दितत्वाच्चायुक्तमित्याशङ्क्य सत्यमेतदुष्टजनत्याज्यत्ववचनं सामान्यविषयं । तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्तीत्येवमादिशरणागतापरित्यागविषयविशेषशास्त्रस्य सद्भावात् । दुष्टस्यापि शरणागतस्य संरक्षणे शिष्टगर्हणा नास्ति प्रत्युत श्रेय एवेत्याह—सतामेतदगर्हितमिति । एतत् दुष्टशरणागतपरिग्रहणं । सतां सामान्यविशेषशास्त्रविदां । अगर्हितं गर्हितादन्यत् । पूजनीयमित्यर्थः । सर्वशक्तेः काचिदशक्तिः । सर्वज्ञस्य किंचिदज्ञानं च मित्रभावेनेति श्लोकेन दर्शितमिति गोविन्दयतिनः प्रत्यवदन् ॥ ३ ॥ अथ सुग्रीवो रामप्रकृतिमाकर्ण्य अतिसाहसमेतदित्यन्तं भीतभीतः प्राह—सुग्रीव इति ॥ आभाष्य अनूद्य । शुभतरं नीतिशास्त्ररहस्यमूलत्वात्स्वामिविषयप्रेमातिशयनिबन्धनत्वाच्च शुभतरं । वाक्यमुवाच । अत्र लक्ष्मणमित्युक्त्वादुपसंहारे सहलक्ष्मण इत्युक्तत्वाच्चोभयोरपि वचनमुभावपिप्रति प्रतिवचनं च बोध्यम् ॥ ४ ॥ सुदुष्ट इत्यर्धमेकं वाक्यं ॥ अस्माभिः पूर्वमुक्तैश्छिद्रान्वेषित्वादिदोषैर्युक्तो भवतु वा मा वा कृतघ्नः स एष रजनीचरः । किं किमर्थं । परित्याज्यएवेत्यर्थः ॥ ५ ॥ कृतघ्नतामेवाह—ईदृशमिति ॥ यं बन्धुं । एष व्यसने प्राप्ते न परित्यजेत्स कस्तस्य भवेत् नकोपीत्यर्थः । भ्रातरं परित्यजन् सर्वानपि परित्यजेदेवेति भावः । ईदृशं व्यसनं । लङ्कादहनपुत्रवधादिकमारभ्य समुद्रतीरनिवेशपर्यन्तं व्यसनमित्यर्थः ॥ ६ ॥ अथ सूक्ष्मधर्मानभिज्ञस्य सुग्रीवस्य नीतिमर्यादयैवोत्तरं वक्तुमारभते—वानराधिपतेरिति सार्धश्लोकः ॥ ईषदुत्स्मयमानः धर्मरहस्यमिदं मम परमशक्तिं शरणागतसंरक्षणव्रतं च सम्यगपरिज्ञाय यत्किंचिद्वदत्ययमिति मन्दस्मयंकुर्वन् ॥ ७ ॥ प्रथमं तद्वचनमुपलालयति—अनधीत्येति ॥ ८ ॥ सूक्ष्मतरं किंचित् अर्थस्वरूपमितिशेषः । तदेवार्थस्वरूपं विशिनष्टि—प्रत्यक्षमिति । प्रत्यक्षं दृष्टं । लौकिकं लोकसिद्धं । यत्सर्वेष्वपि राजसु विद्यते मे प्रतिभाति च तत्सूक्ष्मतरं किंचिद्धर्मस्वरूपमस्तीतिसंबन्धः ॥ ९ ॥

यद्यपितस्यदोषःस्यात् तथापि नत्यजेयमितिवा ॥ ३ ॥ **रामानु०** दुष्टत्वादुष्टत्वयोर्मध्येयमितिवदन्तंरामंप्रत्युभयथापित्याज्यइतिसोपपत्तिकमाह—सुदुष्टइत्यादिना । सुदुष्टोवाप्यदुष्टोवा एषरजनीचरः । किं किमर्थं । अनेनसाध्यंप्रयोजनंकिमपिनास्तीत्यर्थः ॥ ५ ॥ **ती०** यद्वा योविभीषणः ईदृशंव्यसनंप्राप्तंभ्रातरंपरित्यजेत् त्यक्तवान् । सएषः यं कमित्यर्थः । सएषविभीषणः कंनपरित्यजेत् । तस्यकोनामभवेत् । एवंविधमेनंकोवापरिगृह्णीयादित्यर्थः । **ति०** तस्मात्यकोनामसभवेत् । यमेष संकटेनपरित्यजेत् । तस्मादस्मानपिसंकटेत्यक्ष्यत्येव । विश्वासघातिकृतघ्नत्वादित्यर्थः ॥ ६ ॥ **ति०** सर्वानुदीक्ष्यसुग्रीवस्योत्तरकक्ष्याचालनसामर्थ्यंसर्वेहरीननुभाव्य तथालक्ष्मणमुदीक्ष्येषदुत्स्मयमानोवालत्वेनमदृत्तापरिज्ञानात्तवाप्येतदेवसंमतमितीषद्धासंकुर्वन्नि-

[**पा०**] १ ग. ङ. झ. ट. उदीक्ष्यतु. २ ग. ङ. झ. ट. यथाचप्रतिभातिमा. ३ क. ङ. झ. ञ. ट. चापि. ४ ङ. झ. ट. वर्तते.

अमित्रास्तत्कुलीनाश्च प्रातिदेश्याश्च कीर्तिताः ॥ व्यसनेषु प्रहर्तारस्तस्मादयमिहागतः ॥ १० ॥
अपापास्तत्कुलीनाश्च मानयन्ति स्वकान्हितान् ॥ एष प्रायो नरेन्द्राणां शङ्कनीयस्तु शोभनः ॥ ११ ॥
यस्तु दोषस्त्वया प्रोक्तो ह्यादानेऽरिबलस्य च ॥ तत्र ते कीर्तयिष्यामि यथाशास्त्रमिदं शृणु ॥
न वयं तत्कुलीनाश्च राज्यकाङ्क्षी च राक्षसः ॥ १२ ॥
पण्डिता हि भविष्यन्ति तस्माद्ग्राह्यो विभीषणः ॥ १३ ॥
अव्यग्राश्च प्रहृष्टाश्च न भविष्यन्ति संगताः ॥ प्रणादश्च महानेष ततोस्य भयमागतम् ॥
इति भेदं गमिष्यन्ति तस्माद्ग्राह्यो विभीषणः ॥ १४ ॥

तदेवार्थस्वरूपमाह—अमित्रा इति ॥ तत्कुलीनाः ज्ञातयः । प्रातिदेश्याः समनन्तरदेशाधिपाश्च । व्यसनेषु समुपस्थितेषु प्रहर्तारः अमित्राः शत्रवः कीर्तिताः । तस्माद्व्यसनप्रहर्तृज्ञातित्वात् ॥१०॥ व्यसनिनं रावणं परित्यज्यागमने कारणान्तरमस्तीत्याह—अपापा इति ॥ अपापास्तत्कुलीना नरेन्द्राः । हितान् हितपरान् । स्वकान् ज्ञातीन् मानयन्त्येव । तेषामपि नरेन्द्राणां शोभनो गुणवानेष ज्ञातिः प्रायः शङ्कनीयः । लोके पापभूयिष्ठतया शोभनोपि प्रायेण शङ्कनीयः । पापिनस्तु नरेन्द्रस्य तादृशो ज्ञातिः शङ्कनीय इति किमु वक्तव्यम् । अतोयं रावणेन शङ्कितस्तेन सह विरुध्यैवागत इत्यर्थः ॥ ११ ॥ एवं रावणपरित्यागे हेतुमुक्त्वा स्वापरित्यागे हेतुं वक्तुं प्रतिजानीते—यस्त्विति ॥ अरिबलस्य विभीषणस्य । दोषः को नाम स भवेत्तस्येत्यादिनोक्तः । तत्र विषये । यथाशास्त्रं नीतिशास्त्रमनतिक्रम्य । इदमुत्तरं—न वयमिति । न वयं तत्कुलीनाः राक्षसराज्यानर्हाः । अस्माकं तद्राज्ये आकाङ्क्षाभावात् । मम रावणस्येव तस्मिन्नरित्वशङ्काप्रसक्तिर्नास्ति । अतो नास्मांस्त्यक्ष्यतीति भावः । किंच राक्षसो विभीषणस्तु राज्यकाङ्क्षी अस्मन्मुखेन रावणं घातयति । अतः स्वकार्यविघातभयादपिनास्माकमपकारं करोतीत्यर्थः ॥ १२ ॥ ननु मूर्खा राक्षसाः कथमेवं विमृश्यकारिण इत्याशङ्क्य नायं नियम इत्याह—पण्डिता इति ॥ अर्धमेकं वाक्यं । राक्षसा अपीत्यर्थः ॥ १३ ॥ पुनरप्यस्य रावणेन विरुध्यागमनमेव प्रतिपादयन् परिग्राह्यत्वं निगमयति—अव्यग्रा इति सार्धश्लोकेन ॥ ते ज्ञातयः अव्यग्राः प्रहृष्टाश्च सन्तः कदाचिदप्यन्योन्यसंगताः न भविष्यन्ति न भवन्तीति । अनेनैव हेतुना ज्ञातयोवसरे भेदं गमिष्यन्ति गच्छन्ति । अस्य च भीतस्यैव महान् प्रणादः श्रूयते । अतो बलीयसो रावणात् अस्य भयमागतं तेन च भयेनात्मत्राणार्थमागत इति

तिह्येवाच ॥ ७ ॥ **ति०** तदर्थरूपंप्रतिपादयितुंतदुपयुक्तांलोकस्थितिमाह—**अमित्राइति** । राज्ञांअमित्राः शत्रवः । द्विधाकीर्तिताः । तत्कुलीनाज्ञातयः प्रातिदेश्याः आसन्नदेशवासिनश्चेति । तेद्विविधाअपि स्वावरोधिज्ञातेःस्वविरोधिनः आसन्नदेशवर्तिनश्च । व्यसनेषु आध्यात्मिकादित्रिप्रकारकष्टेषु । तस्यप्रहर्तारोभवन्तीतिप्रसिद्धं । अस्तुकिंततइत्यत्राह—तस्मादिति । नानाप्रकारस्वपीडाप्रवृत्तज्ञातिभयात्स्वत्राणार्थंमिहागतः । यद्वा तस्मात् व्यसनप्रहर्तृज्ञातित्वात् । व्यसनिनंरावणंप्रहर्तुमयंविभीषणइहागतइत्यर्थः ॥ **शि०** तत्कुलीनाः स्वकुलप्रसूताः । प्रातिदेश्याः तत्समीपदेशवासिनश्च । अमित्राः समयविशेषेशत्रवःकीर्तिताः । अतएव व्यसनेषु दुःखसमयेषु । प्रहर्तारोभवन्ति । तस्मात् ज्ञातिरूपरिपुभयात् अयमिहागतः । एतेनभ्रातृनिष्ठप्रीतिविषयत्वेयद्ययमिहागच्छेत् तदास्मिन्कृतघ्नत्वादिदोषसंभावनासंभवेत् । अयंतुपापाचरणशीलः स्वबन्धुनास्वविपरीताचरणवत्तयाऽयंनिस्सारित इतिनदोषवानितिसूचितं ॥ १० ॥ **ती०** प्रवादश्चमहानेषइतिपाठेतु ज्ञातिभ्योभयागमनेअपवादश्च " घोराःस्वार्थप्रयुक्ताश्चज्ञातयोनोभयावहाः " इतिहस्तिगीतादिरूपोलोकप्रवादोस्तीत्यर्थः ॥ **ति०** उक्तहेत्वनुवादपूर्वंग्राह्यत्वमुपसंहरति—अव्यग्राइतिसार्धेन । तेज्ञातयः अव्यग्राः अनाकुलाः । निश्चयवन्तइतियावत् । प्रहृष्टाः अन्योन्यंसंतुष्टाश्च । सौभ्रात्रात्संगताः परस्परंमिलिताभविष्यन्तीतिसर्वलोकप्रसिद्धं । तेभ्योन्येतूक्तविपरीताइतिप्रागुक्तरीत्यापापमूलराज्यलोभादिनाभेदंगमिष्यन्ति । ततोऽनन्तरं अस्य ज्ञातिवर्गस्य । एषः लोकप्रसिद्धः । प्रणादः युद्धरूपकोलाहलः । भवति । अन्योन्यस्यान्योन्यतोभयंचागतंभवतीतिलोकस्थितिर्यतः तस्मादयमेतावत्कालमनपगतसौभ्रात्रोपिकेनचिन्निमित्तेनाद्यप्राप्तवैरःशरणमागतोग्राह्यएवेतिकतकव्याख्या । तीर्थंतु नैषततोस्येतिपठित्वा अस्य भीतस्येव एषमहान्प्रणादःश्रूयते । अतस्ततोबलवतोरावणादस्यविभीषणस्यभयमागतमित्यात्मत्राणार्थंमागतःपरिग्राह्यएवेत्यर्थः ।

[**पा०**] १ क. ग. घ. प्रतुष्टास्तेन. ङ. झ. ट. प्रहृष्टाश्चते.

न सर्वे भ्रातरस्तात भवन्ति भरतोपमाः ॥ मद्विधा वा पितुः पुत्राः सुहृदो वा भवद्विधाः ॥ १५ ॥
एवमुक्तस्तु रामेण सुग्रीवः सहलक्ष्मणः ॥ उत्थायेदं महाप्राज्ञः प्रणतो वाक्यमब्रवीत् ॥ १६ ॥
रावणेन प्रणिहितं तमवेमि विभीषणम् ॥ तस्माहं निग्रहं मन्ये क्षमं क्षमवतां वर ॥ १७ ॥
राक्षसो जिह्मया बुद्ध्या संदिष्टोऽयमिहागतः ॥ ग्रहर्तुं त्वयि विश्वस्ते प्रच्छन्नो मयि वाऽनघ ॥१८॥
लक्ष्मणे वा महाबाहो स वध्यः सचिवैः सह ॥ रावणस्य नृशंसस्य भ्राता ह्येष विभीषणः ॥ १९ ॥
एवमुक्त्वा रघुश्रेष्ठं सुग्रीवो वाहिनीपतिः ॥ वाक्यज्ञो वाक्यकुशलं ततो मौनमुपागमत् ॥ २० ॥
सुग्रीवस्य तु तद्वाक्यं रामः श्रुत्वा विमृश्य च ॥ ततः शुभतरं वाक्यमुवाच हरिपुङ्गवम् ॥ २१ ॥

परिग्राह्योयमित्यर्थः ॥ १४ ॥ ननु दुष्टोपि ज्येष्ठोनुवर्तनीय एवेत्याशङ्क्य यद्यप्ययं धर्मः तथापि न सर्वत्र संभवतीत्याह—न सर्व इति ॥ " मद्विधा वा पितुः पुत्राः " इति भूतार्थकथनत्वान्नात्मप्रशंसादोषः । यथा " कृपावानविकत्थनः " इत्युक्तलक्षणेन धीरोदात्तेन दुष्यन्तेन " सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः " इत्युक्तं । यथा च हनुमता " पन्नगाशनमाकाशे पतन्तं पक्षिसेविते । वैनतेयमहं शक्तः परिगन्तुं सहस्रधा" इति ॥ दण्डिना च काव्यादर्शे प्रथमपरिच्छेदे । " स्वगुणाविष्क्रियादोषो नात्र भूतार्थशंसिनः । अपि त्वनियमो दृष्टस्तथा त्वन्यैरुदीरणात् " इति ॥ यद्वा पूर्वश्लोकार्थस्य भरतेति प्रसङ्गं परिहरति—सर्व इति । तातेति सान्त्वोक्तिः । सर्वे भ्रातरः भरतोपमा न भवन्ति । कैकेयीवरप्राप्तं पित्रा दत्तमपि राज्यं परित्यज्य वनं गतं मामनुसृत्य तवैव राज्यं त्वमेव गृहाण । अहं त्वदास्यं करिष्यामीति वदन्भरतादन्यः कश्चिदस्ति किमिति भावः । एवंविधप्रसक्त्यभावाल्लक्ष्मणस्यानुपादानं । अत्र दृष्टान्तमाह—मद्विधा इत्यादिना । मद्विरहमात्रेण लोकान्तरं गतः पिता । तत्तुल्यपितृमानस्मत्सदृशः कश्चिदस्ति किमित्यर्थः। यद्वा मद्विधाः पितुः पुत्राः सन्तुवा मा वा भरतसमा भ्रातरस्त्वत्समाः सुहृदश्च न सन्तीत्यर्थः । सुहृदो वा भवद्विधाः । वर्षरात्रसमये स्थितेन मयाऽत्यन्तकुपितेन लक्ष्मणेन चात्यन्तं परुषमुक्तेपि अस्मासु प्रेमातिशयमेव प्रकटयन् त्वत्समः कोवास्तीति भावः। यद्वा मद्विधा वा पितुः पुत्रा न भवन्ति । निरतिशयपितृवात्सल्यभूतोस्मत्तुल्यो नास्तीत्यर्थः ॥१५॥ अथ सुग्रीवो नीतिमुखेन विभीषणस्य त्याज्यतां प्रतिपादयितुमशक्तः परिग्रहे चाविदितभावोयं रामे कमनर्थमुत्पादयिष्यतीति प्रेमवशेन व्याकुलो विभीषणशरणागतेरेकस्याः सलक्ष्मणेन स्वेन क्रियमाणं शरणागतिद्वयं प्रबलमभिमन्यमानः शरणागतिपूर्वकं विभीषणनिग्रहं प्रार्थयते—एवमित्यादिचतुःश्लोकैः ॥ १६—१७ ॥ राक्षस इत्यादि ॥ अत्र मयि लक्ष्मण इति स्वस्य लक्ष्मणस्य चानर्थकथनं स्वव्यसनादपि स्वाश्रितव्यसनं रामस्यात्यन्तारुन्तुदमिति तत्प्रदर्शनेन विभीषणापरिग्रहसमर्थनार्थं ॥ १८—१९ ॥ मौनमुपागमत् । प्रणयरोषादितिभावः ॥ २० ॥ अथ रामः स्वस्य सर्वशक्तित्वप्रदर्शनेन सुग्रीवस्यातिशङ्कां-

इतरत्तुप्राग्वदेवव्याख्येयमित्याह ॥ १४ ॥ **ति०** ननुभरतादिष्वेतद्दोषादर्शनाद्भ्रातृणामीदृशभेदासंभवोतआह—नसर्वइति । राज्यादीच्छयाप्राप्तसौभ्रात्रत्यागस्याभावोभरतादन्येपरमदुष्करः । तेनपितृदत्तराज्यत्यागात् । लक्ष्मणादेस्तुतदप्रसक्त्यानतदुक्तिः । मद्विधावापुत्राः सुखलिप्सयापितृवाक्यलङ्घनरहिताः । सुहृदोवाभवद्विधाः । त्यक्त्वापिसर्वसौख्यंसर्वाकारेणसर्वबलेनसर्वयत्नेनच मित्रकार्यसाधकःसुहृत्परमदुर्लभइतिभावः । अत्रभूतार्थकथनरूपत्वान्नात्मप्रशंसादोषोभगवतः । " स्वगुणाविष्क्रियादोषोनास्तिभूतार्थशंसने " इतिदण्ड्युक्तेः ॥ **स०** भ्रातृषुसौभ्रात्रंदुर्मिलमितिनवक्तुंयुक्तं । भरतेभक्तिभरितता त्वयि त्वदनुभूतैववर्ततइत्यतः क्वाचित्कएवैवंभावोभ्रात्रादिष्वित्याह—नेति । सर्वेभ्रातरोभरतोपमानभवन्ति । स लोकविलक्षणइतिभावः । लक्ष्मणस्यच स्वसमखेदमोदत्वेनसहैवावस्थानाद्राज्यप्राप्तेरहन्ताहेतोरभावेनचानुक्तिर्नतुसौहार्दावमर्देनेतिहृदयं । भ्रातृप्रस्तावे पितापुत्राचारोक्तिः प्रसङ्गसङ्गत्या । सर्वेभ्रातरोभरतोपमानेत्यनेन मारिततारारमणस्यममौत्कीर्तनंमन्यमानस्तंसुमुखीकर्तुंसुहृदइत्याद्युक्तिश्चेतिज्ञेयं ॥१५॥ **स०** विश्वस्तेत्वयिवा तथा विश्वस्तेमयिवा । त्वयिविश्वस्तेमयिवा मयिविश्वस्तेत्वयिवा । एतेन मन्त्राशस्तवेवतवनाशोममसंतापकरइतिस्वाम्यर्थस्वार्थचायंनसंग्राह्यइतिभावः ॥ १८ ॥ **स०** लक्ष्मणेवाप्रहर्तुमागतः । त्वयिराजत्वान्मयिधूर्वोदृत्वात्प्रहरणंन दुस्सहं । लक्ष्मणप्रहरणंतुतवेवममापिदुस्सहमितिभावः । सचिवैः चतुर्भिः ॥ १९ ॥ **ति०** मौनमुपागमत् त्रिवाचोक्तं । अतोधिकंप्रभौनवक्तुंयुक्तमित्याशयेनेतिशेषः ॥ २० ॥ **ती०** सुग्रीवस्यवाक्यंश्रुत्वा तद्विमृश्य । अस्यायमर्थः प्रथमतःकृतविभीषण-

[पा०] १ ख.—ट. निशाचरं. २ ङ. झ. ट. विश्वस्तेमयि. ३ ङ. झ. ञ. ट. ससुग्रीवस्य.

सुदुष्टो वाऽप्यदुष्टो वा किमेष रजनीचरः ॥ सूक्ष्ममप्यहितं कर्तुं ममाशक्तः कथंचन ॥ २२ ॥
पिशाचान्दानवान्यक्षान्पृथिव्यां चैव राक्षसान् ॥ अङ्गुल्यग्रेण तान्हन्यामिच्छन्हरिगणेश्वर ॥ २३ ॥
श्रूयते हि कपोतेन शत्रुः शरणमागतः ॥ अर्चितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः ॥ २४ ॥
स हि तं प्रतिजग्राह भार्याहर्तारमागतम् ॥ कपोतो वानरश्रेष्ठ किं पुनर्मद्विधो जनः ॥ २५ ॥

निवार्य शरणागतरक्षणरूपस्य स्वव्रतस्य । धर्मशास्त्रसिद्धत्वात्तस्यापरित्याज्यतां प्रतिपादयति—सुग्रीवस्य त्वित्यादिना ॥ विमृश्य मयि प्रेमातिशयेनैवमुक्तमिति विचार्य ॥ २१ ॥ सुग्रीवस्य भयं निवर्तयति—सुदुष्ट इति ॥ स एष रजनीचरः सुदुष्टो वा अदुष्टो वा भवतु किं करिष्यति । तदेव विवृणोति—सूक्ष्ममिति । सूक्ष्ममपीत्यनेन साक्षान्मयि मदाश्रितेषु मत्संबन्धिसंबन्धिष्वपि न शक्त इति भावः ॥ २२ ॥ कथं न शक्त इत्याकाङ्क्षायां स्वशक्तिं दर्शयति–पिशाचानिति ॥ पृथिव्यां विद्यमानानितिशेषः । त्वं तावत्सकलैः स्वबलैः सह तिष्ठ अहमेक एव पर्याप्तइत्यभिप्रायेणाह—हरिगणेश्वरेति । अङ्गुल्यग्रेण शस्त्रास्त्रादिप्रसङ्गशून्येनअङ्गुल्यन्तरनिरपेक्षेण एकस्यामप्यङ्गुल्यामंशान्तरव्यापारवर्जितेन । तत्रापि हस्तपादादिविशेषविवक्षाशून्येन अग्रमात्रेण । हन्यां हन्तुंशक्तः । नकेवलं लङ्कामात्रनिवासिनो राक्षसान् किन्तु स्थानान्तरनिवासिनोपीतिविवक्षया पृथिव्यांचैवेति निर्देशः । न केवलमेकजातीयानामेव लक्ष्यत्वं किन्तु सर्वेषामपीत्यभिप्रायेणाह—तानिति । तर्हि लङ्कामात्रनिवासिनो राक्षासान्किमिति न हंसीत्यत्राह—इच्छन्निति । इच्छाभावादेव तद्वधाभावः । न त्वशक्त्येतिभावः ॥ २३ ॥ एवमस्मादपकारशङ्का नास्तीत्युक्त्वा भवतुवाऽयमपकारी तस्मादेवापकारान्मम प्राणा गच्छन्तु वा । अथापि नायंनिग्राह्यः नापिपरित्याज्यः । किन्त्ववश्यं रक्ष्यएवेति कपोतोपाख्यानेन प्रतिपादयति—श्रूयतेहीति ॥ हीतिप्रसिद्धेयमाख्यायिकेत्यर्थः । कपोतेन धर्माधिकारशून्येन तिर्यङ्मात्रेण । एतेनाप्यनुष्ठितत्वे किमु वक्तव्यमस्माकं । कपोतेन एकेनासहायेन कृतं किमुत ससहायैरस्माभिः । शत्रुः कपोतस्य मृगयुः स्वयं भार्यापहारी वैरी । विभीषणस्त्वस्माकं नतथा । तथाप्यरक्षणे किमस्मत्पौरुषेण । शरणमागतः कपोताध्युषितद्रुमस्थलं यदृच्छयाप्राप्तः । " सोञ्जलिं शिरसा बद्ध्वा वाक्यमाह वनस्पतिम् । शरणं हि गतोस्म्यद्य देवतामिहवासिनीं " इति ॥ स्वावासवनस्पतिदेवतां प्रत्युक्तवान् नतुकपोतं । विभीषणस्तु राघवं शरणं गत इति अस्मत्कूटस्थरघुराक्षससंवादोक्तशरणागतराक्षसरक्षणं पुरस्कृत्य मांप्राप्तः । यद्वा शरणं । " शाखिनः पक्षिणां गृहं " इत्युक्तरीत्या वनस्पतिरूपं गृहं प्राप्तः । न तु शरणागतिं चक्रे । " शरणं गृहरक्षित्रोः " इत्यमरः । अर्चितश्च लुब्धकत्वात्सहजशत्रुत्वात् भार्यापहर्तृत्वाच्चापन्नोप्यसावित्युपेक्षणस्य तद्वधोपायान्वेषणस्य च कर्तव्यत्वे प्राप्तेप्यतिथिदेवत्वेनमत्वा शीतनिवारणायाग्निमानीय पूजितः । वयंतु " वध्यतामेष तीव्रेण दण्डेन सचिवैः सह " इत्यनुबन्धिपर्यन्तं सम्यगर्चयामः । यथान्यायं । यावत्क्षुन्निवृत्ति सन्मित्रागम इव समप्रादरेणान्तर्विषादलेशं विना आदृतः । यद्वा प्रियवचनादिभिः वञ्चनांविनेत्यर्थः । स्वैश्च मांसैर्निमन्त्रितः । बहिः कतिचिदाहारानानीय स्वकीयद्रव्यान्तराणि कतिपयानि शरीरैकदेशान्वा दत्त्वा नोपचचार । किन्त्वज्ञैरात्मत्वेनाभिमन्यमानैः प्राज्ञैरप्याद्यं धर्मसाधनमित्यादरणीयैः शरीरमांसैः शरभङ्ग इव । " इदमेकं महत्तपः " इति मत्वा वह्नावह्नाय पतति स्म । निमन्त्रितः भोजनार्थंनियोजितः ॥ २४ ॥ उक्तमे-

शरणागत्यपेक्षयापश्चात्कृतसुग्रीवलक्ष्मणशरणागतेर्दौर्बल्यंच "तस्मादपिवध्यंप्रपन्नंनप्रतिप्रयच्छन्ति" इतिश्रुत्यर्थानुसारिशरणागतरक्षणरूपस्वधर्मचपर्यालोच्येत्यर्थः ॥ २१ ॥ ति० ममसूक्ष्ममप्यहितंकर्तुंकथंचन कथमपिशक्तःकिं नकथमपिशक्तइत्यर्थः ॥ २२ ॥ यद्येवमस्मदादिसंग्रहोव्यर्थस्तत्राह—इच्छन्निति । स्वस्यनिरतिशयमहिमानंतालिकंब्रह्मभावंप्रकटीकर्तुमिच्छन्यदिस्यां तदा तथैव कुर्यां । संप्रतितुदेवभावोपेतनिजविलासैरशेषैरवध्यत्वमस्यमयैवदत्तमितितत्परिपालनायस्वदिव्यभावंस्वशक्त्यैवान्तर्धाय मानुषमर्यादायांस्थित्यातद्भावप्रकटनायैवसीताविरहयोगप्रयुक्तरोदनवद्भवादृशसहायमेलनं । वस्तुतोनस्वातिरिक्तसहायान्तरापेक्षामम । मनुष्याणांसंसारमर्यादाज्ञापनंतद्व्यवहारफलमितिभावः ॥ २३ ॥ स० सहि सोपि । अनेनापकृतोपीत्यर्थः । प्रतिजग्राह प्रतिहतभार्यावचनश्रवणानन्तरमपिप्रीतिपूर्वंकंजग्राहेतिसूचयन्ती । सहितं हितेनसहितंयथाभवतितथेतिवा । तिर्यक्समाधानंतिर्यङ्निदर्शने-

[पा०] १ ङ. च. झ. ट. सदुष्टो. २ क. ङ. च. झ. ञ. ट. ममशक्तः. ३ ख. स्वैर्मांसैरभितर्पितः.

ऋषेः कण्वस्य पुत्रेण कण्डुना परमर्षिणा ॥ शृणु गाथां पुरा गीतां धर्मिष्ठां सत्यवादिनीम् ॥ २६ ॥

वार्थं दृढीकुर्वन् स्वस्य कैमुत्यमाह—स हि तमिति ॥ सः कपोतः । वयमिव धर्मानुष्ठानयोग्यजातौ शरण्यवंशे वा नोत्पन्नः । तं जात्या स्वभावेन च क्षुद्रसमाचारं पक्षिणां कालसंमित इत्यखिलपक्षिजातिविरोधिनं । तस्य कपोतस्यान्तिकंप्रति यदृच्छयाभ्येत्य पतितं उपायान्तरशून्यं विपरीतानुष्ठानैकनिरतं अनुतापलेशेन वा अनुकूलवादप्रसङ्गेन वाऽनन्वितं प्रतिजग्राह । स्वात्मत्यागेनाङ्गीकृत्यावति स्म । पूर्वश्लोके शत्रुरिति सामान्येनोक्तमर्थं तद्वृत्तिप्रदर्शनेन विशिनष्टि—भार्याहर्तारमिति । एवमेव रावण आगतश्चेदस्माभिः कार्य इत्यभिप्रायः । आगतं अस्याङ्गीकाराय कृतमुपायानुष्ठानं कपोतावासद्रुमस्थलं प्रत्यागमनमात्रमेव । तद्विना वनस्पतिदेवतां प्रत्युक्तं शरणशब्दं कपोतोनाशृणोत् । अत्र स हीत्यनेनैव कपोतानुवादे लब्धेपि पुनः कपोतग्रहणं श्येनकपोतोपाख्यानइव नायं परिगृहीतकपोतशरीरो देवो मुनिर्वा । किन्तु प्राकृतः कपोत इति ज्ञापनार्थं । अयं कपोतः प्राक्तनधर्मविशेषैर्गजेन्द्रादिवत्तिर्यक्त्वेप्येवंधर्मानुष्ठानयोग्यो बभूव। कपोत इत्यनेन तिर्यक्त्वं शास्त्रानधिकारित्वं बुद्धिमान्द्यं च सूचितं । वानरश्रेष्ठ पुनरप्येकस्तिर्यक् शत्रुं किरातं ररक्षेत्येनां कथां शृणु। वानरः कश्चिद्व्याघ्रीतं स्वावासद्रुममागतं किरातं ररक्ष । तदानीं वृक्षमूलस्थो व्याघ्रस्तस्मिन्वानरे सुप्ते निषादं समीक्ष्य त्वां रक्षामि वानरं पातयेत्युवाच । ततः पापैकनिरतः किरातः स्वरक्षणकारिणं वानरं पातयामास । अनन्तरं वानरं पतितं गृहीत्वा व्याघ्रः त्वां जह्यां स्वोपकारिद्रोहिणं निषादं जहीति मनुष्यमांसलुब्धत्वादुवाच । ततो धर्मवित्स वानरः प्राणात्ययदशात्वादहृदयं तत्त्यागमङ्गीकृत्य व्याघ्रमुक्तस्तरुमारुह्य स्वस्यापकर्तारं किरातं पश्चादपि गत्यन्तराभावान्निजवासद्रुमस्थितिहेतुना शरणागत इत्यरक्षत् । भवान्वा- नराधिपत्ये स्थितः सन् स्वजातिधर्म इति शरणागतरक्षणं किंनावलम्बते । किं पुनर्मद्विधो जनः । कपोतचरितं पश्यतां मादृशां किं वक्तव्यं । मद्विधः शरणागतरक्षणाय समुच्छ्रितध्वजे रघुवंशे जातः । " षष्टिर्वर्षसहस्राणि लोकस्य चरता हितम् । पाण्डुरस्यातपत्रस्य छायायां जरितं मया " इत्युक्तरीत्या लोकरक्षणदीक्षितस्य दशरथस्य पुत्रः । वसिष्ठविश्वामित्रादिशिष्यः महायोगिना जनकेन कृतसंबन्धः " रामो विग्रहवान्धर्मः " इति प्रसिद्धः । " मर्यादानां च लोकस्य कर्ता कारयिता च सः " इति सर्वलोकानुकृतधर्मानुष्ठानः अहं संप्रति शरणागतहिंसां कुर्यां चेल्लोकः कीदृग्विधः स्यात् । मद्विधः मम वृत्तं पश्चाद्वक्ष्यते । सामान्येन धर्मसेतुर्नृपाणामिति मादृशानां संमतत्वेन स्थितः । मद्विधः मादृशः शरणागतत्यागं न करोति । अवध्यवधोन्मुखानां रावणादीनां खल्वीदृशं कार्यं रोचते । जनः शरणागतत्यागकृत्कीदृशोत्पत्तिमान्स्यात् ॥ २५ ॥ ननु शास्त्रानधिकारिणस्तिरश्चोनुष्ठानमनुपादेयं न च चोदनामन्तरेण प्रकृतिमात्रेण धर्मत्वं सिध्यतीत्याशङ्क्य कण्डुमुनिगाथया विधानं दर्शयति—ऋषेरिति ॥ कण्वस्य पुत्रेणेत्यनेन महाकुलप्रसूतत्वं परमर्षिणेति यथार्थदर्शित्वं सत्यवादिनेति यथादृष्टार्थवादित्वं चोच्यते। तेन परमाप्तत्वं दर्शितं। वेदवचनादिसिद्धं। पुरा गीतां। कण्डुकल्पितेयमिति न मन्तव्यं । ऋच एव सामत्वात्पुरा विद्यमानामेवेदानीं गीयमानां गीतां एतत्कृतत्वेपि सामध्वनिवत्समस्तपापापनोदनक्षमां । धर्मिष्ठां वेदोक्तधर्मोपमेयस्मृत्युक्तप्रतिपादिकां। अनेन परमप्रयोजनत्वमुक्तं । सत्यवादिनीमितिपाठे अबाधितार्थप्रतिपादिनीं गाथां । अनेकार्थोचितसुलभाभ्यसनीयत्वाय संकुचितशब्दां शृणु । इतः पूर्वमेतद्राधानाकर्णनेन खलु त्वमेवमाविलात्मासि एना-

---

नशीघ्रंभवतीतिवा भार्यापहर्तृभ्रातृग्रहणेभार्यापहर्तृसत्कारकर्तृनिदर्शनमुचितमितिवादौकपोतेतिहासोबोधितोरामेणेतिज्ञेयं । "मुनिरुवाच । धर्मनिश्चयसंयुक्तांकामार्थसहितांकथां । शृणुष्वावहितोराजन्गदतोमेमहाभुज " इत्यारभ्य पञ्चाध्याय्या शान्तिपर्वण्यापद्धर्मोक्ताकपोतव्याधकथात्रानुसन्धेया ॥ २५ ॥ **स०** पिपीलिकालिपिवद्याद्दच्छिकलाभतच्चेष्टाधर्मेप्रमाणीस्यादित्यतोमहर्षिगीतां गाथांकथयति—ऋषेरिति । रामोक्तेस्तिर्यगतिर्यगादिविषयत्वादेवमादिनिदर्शनंयुक्तमितिभावः । "नहिपितुः पाण्डित्येनपुत्रःपण्डितोभवति " इतिन्यायेनातत्सदृशपुत्रगीतेत्यतस्तंविशिनष्टि—**परमर्षिणेति** । पितुःऋषित्वं एतस्यपरमर्षित्वमितितद्गीताकथा-

[पा०] १ ङ. ञ. गाथापुरागीताधर्मिष्ठासत्यवादिना.

बद्धाञ्जलिपुटं दीनं याचन्तं शरणागतम् ॥ न हन्यादानृशंस्यार्थमपि शत्रुं परंतप ॥ २७ ॥
आर्तो वा यदि वा दृप्तः परेषां शरणागतः ॥ अरिः प्राणान्परित्यज्य रक्षितव्यः कृतात्मना ॥२८॥
स चेद्भयाद्वा मोहाद्वा कामाद्वाऽपि न रक्षति ॥ स्वया शक्त्या यथासत्त्वं तत्पापं लोकगर्हितम् ॥२९॥
विनष्टः पश्यतस्तस्यारक्षिणः शरणागतः ॥ आदाय सुकृतं तस्य सर्वं गच्छेदरक्षितः ॥ ३० ॥

मवहितमनाः शृणु ॥ २६ ॥ अथ कण्डुगाथायां चतुःश्लोक्यामाद्यश्लोकेन पूर्णप्रपत्त्यसिद्धावपि गत्यन्तरशून्यतयाऽऽत्मनिक्षेपाभिप्रायव्यञ्जकशरणागतिशकलतुल्याञ्जलिबन्धादिमात्रविधानमपि हानिं नन्येत् तत्करणमनुग्रहावहमित्याह—बद्धाञ्जलिपुटमिति ॥ अनुकूलबुद्धिवाग्वृत्त्यभावेऽप्यञ्जलिमात्रमेवालं। "अञ्जलिः परमा मुद्रा क्षिप्रं देवप्रसादिनी" इति स्वतन्त्रस्याप्याशु दयाजननी मुद्रा खल्वियं । दीनं एवमञ्जलिबन्धमात्रं विनापि कार्पण्यद्योतनावस्थानमेवालं । याचन्तं अञ्जल्याद्यभावेपि कार्पण्यद्योतनेप्यहृदयप्रार्थनैवालं । शरणागतं । अञ्जलिबन्धादित्रयेप्यविद्यमाने रक्षकनिवासस्थलाभिगमनमेवालं । पूर्वं स्वरक्षाभरनिक्षेपरूपशरणागतिशकलान्युक्त्वा शरणागतमिति पूर्णप्रपत्तिरुक्तेतिवा स्यात् । अपि शत्रुं साक्षाच्छत्रुमपि । न हन्यात् । अयं शास्त्रार्थ ऐहिकाभ्युदयार्थो वा परलोकार्थो वा प्रत्यवायपरिहारार्थो वेत्युक्ते सति तेभ्यः प्राक्प्रयोजनान्तरमाह—आनृशंस्यार्थमिति । अघातुकत्वसिद्ध्यर्थमित्यर्थः । नृशंसोयमिति लोकापवादपरिहारार्थमितियावत् । यद्वा आनृशंस्यं सकलधर्मसारभूतो दयागुणः तद्रक्षणार्थवा । यथोक्तं सीतया—" आनृशंस्यं परो धर्मस्त्वत्त एव मया श्रुतः " इति । परंतपेति कण्डुरपि कंचिद्राजानं प्रत्युक्तवानितिगम्यते । परंतप । शरणागते किं पौरुषप्रकटनेन प्रत्यर्थिषु खलु तत्कर्तव्यमितिभावः ॥२७॥ पूर्वं न हन्यादिति स्वेन क्रियमाणं हननमात्रं प्रतिषिद्धं । अत्र स्वेतरक्रियमाणशरणागतपीडायामपि शरणागते आर्तत्वदृप्तत्वविभागानालोचनेन प्राणान्हित्वा तद्रक्षणं कार्यमित्याह—आर्तो वेति ॥ आर्तः स्वाभिमतसंभवे विलम्बाक्षमतीव्रसंवेगवान्वा । शरणागमनवेलायामपि स्वापराधनिमित्तभयादिमान्वेत्यर्थः । दृप्तस्तु विलम्बाविलम्बावनादृत्य फलसिद्धिमात्रसक्तः । अस्यां वेलायां विनयस्वापराधभयशून्यो वा । मुमुक्षुपक्षे संसारजुगुप्सानुसंधानेन सद्य एव देहनिवृत्तिकाम आर्तः । दृप्तः शरीरावसाने मुक्तिकामः । यद्वा आकिंचन्यानन्यगतित्वपुरस्सरं प्रपन्न आर्तः । स्तोभहेलनादिरूपेण शरणागतोस्मीति ब्रुवन् दृप्तः । परेषां शरणागतः स्वव्यतिरिक्तशरणागतः । यद्वा परेषामिति निर्धारणे षष्ठी । परेषां मध्ये शरणागतोरिः वैरे हृदि विद्यमानेपि शरणागतिशब्दमात्रमभिदधानः पुरुषः कृतात्मना निश्चितमनस्केन । धर्मशास्त्रविश्वासशालिनेत्यर्थः । प्राणान्परित्यज्य रक्षितव्यः । अस्थिरान्प्राणान्परित्यज्य स्थिरं शरणागतरक्षणं कर्तव्यं । कृतात्मनेति विशेषणेन विदुषोतिक्रमे दण्डभूयस्त्वमुक्तं । शरणागतरक्षणशास्त्रस्य निरवकाशत्वात् । सर्वथैवात्मानं गोपायेदिति शास्त्रस्य सावकाशत्वात्तद्व्यतिरिक्तविषयेप्यवस्थाप्यमितिभावः ॥ २८ ॥ एवं शरणागतरक्षणधर्मे चोदनामभिधाय तदरक्षणे प्रत्यवायमाह—सचेदिति ॥ भयात् तद्रक्षणे तच्छत्रुसकाशात् तस्माद्वा । किरातन्यायेन स्वस्यापि भयमुत्प्रेक्ष्य ततोहेतोः । मोहात् शास्त्रार्थापरिज्ञानात् । कामात् स्वच्छन्दवृत्तिस्वाभाव्यात् तच्छत्रुसकाशात्किंचिल्लाभापेक्षणाद्वा । स्वयाशक्त्या स्वकीयेन केनचित्सामर्थ्यप्रकारेण । स्वसहायसंपादनस्वकीयद्रव्यदानादिना शरीरत्यागपर्यन्तेनोपायकलापेनेत्यर्थः । यथासत्त्वं सत्त्वमनतिक्रम्य । शक्तौ सत्यामपि येन केनचिच्छलेन शक्तिवञ्चनामकृत्वा । तत् अरक्षणं । पापप्रत्यवायहेतुः । अनेन निरयहेतुत्वमुक्तं । न केवलं परलोकबाधकं । इह लोकेपि सर्वजनगर्हितमित्याह—लोकगर्हितमिति ॥ २९ ॥ न केवलमैहिकानर्थहेतुत्वमात्रं पूर्वसंचितसकलसुकृत-

ऽऽदर्तव्येत्यनेनसूचयति ॥ २६ ॥ शि० शत्रुमपि आनृशंस्यार्थं अतिक्रूरत्वनिवृत्त्यर्थमपिनहन्यात् । "मशकार्थोधूमः" इत्यादिवार्थशब्दस्यनिवृत्त्यर्थकत्वंप्रसिद्धं । अतएवास्यार्थस्यप्रतिषेधोवक्तव्यइतिवार्तिकेअर्थशब्दस्यतथात्वंकैयटादिभिर्व्याख्यातं ॥ किंच आनृशंस्यार्थं खस्मिन्क्रूरतासंसर्गाभावार्थमित्यर्थः ॥ २७ ॥ ति० यःशरणागतोऽरक्षितोविनष्टःस्यात् सपश्यतस्तस्यरक्षिणः रक्षा-

[पा०] १ ङ. झ. ट. शरणंगतः. २ ग. च. तस्यरक्षितुः. क. ङ. छ. झ. ञ. तस्यरक्षिणः.

एवं दोषो महानत्र प्रपन्नानामरक्षणे ॥ ३१ ॥
अस्वर्ग्यं चायशस्यं च बलवीर्यविनाशनम् ॥ करिष्यामि यथार्थं तु कण्डोर्वचनमुत्तमम् ॥
धर्मिष्ठं च यशस्यं च स्वर्ग्यं स्यात्तु फलोदये ॥ ३२ ॥
सकृदेव प्रपन्नाय तवास्मीति च याचते ॥ अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥ ३३ ॥

विनाशकमपीत्याह—विनष्ट इति ॥ यः कश्चिद्यं कंचिच्छरणमागतः । तमरक्षिणस्तस्य पश्यतः रक्षकत्वेन वृते समर्थे च तस्मिन्पश्यति । तेनारक्षणेनैव स्वशत्रुसकाशाद्विनष्टश्चेत् तस्य अरक्षकस्यसंबन्धि अनादिकालसंचितं सर्वं सुकृतमादाय गच्छति । अस्यारक्षकस्य समार्जितसकलसुकृतक्षयोभवतीत्यर्थः ॥ ३० ॥ कण्डुवचनचतुःश्लोकीतात्पर्यं संग्रहेणाह—एवं दोषो महानत्र प्रपन्नानामरक्षण इत्यर्धेन ॥ ३१ ॥ विस्तरेणाह—अस्वर्ग्यमित्यादिना ॥ अस्वर्ग्यं स्वर्गविरुद्धं । नरकहेतुभूतमित्यर्थः । अयशस्यं अकीर्तिकरं । बलवीर्यविनाशनं । ययोः शारीरबलवीर्ययोः सतोरेव शरणागतो न रक्षितः तयोर्विनाशकमित्यर्थः । अत्र अरक्षणमिति विशेष्यमनुषज्यते । एवं शरणागतरक्षणे कण्डुवचनं प्रमाणयित्वा धर्मसंस्थापनप्रवृत्तस्य ममैतदवश्यंपालनीयमित्याह—करिष्यामीति ॥ उत्तमं लोकादृतं । न केवलमकरणे प्रत्यवायबाहुल्यं करणे दृष्टादृष्टाभ्युदया बहवः सन्तीत्यपि कण्डुवचनतात्पर्यमिति रामः स्वयमाह—धर्मिष्ठमिति ॥ पापनिवर्तकधर्मोपेतत्वं विवक्षितं । फलहेतुर्धर्मोपेतत्वस्य स्वर्ग्यमित्यनेनैव सिद्धत्वात् । फलोदये फलप्रदानकालेसमुपस्थिते । स्वर्ग्यं । स्वर्गहेतुरित्यर्थः । अत्र प्रतिपाद्यगतं धर्मिष्ठत्वादिकं प्रतिपादकवचने समुपचर्यते ॥ ३२ ॥ एवं " श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः । सम्यक्संकल्पजः कामोधर्ममूलमिदं स्मृतं " इति याज्ञवल्क्योक्तधर्मप्रमाणेषु श्रूयत इत्यनेन, तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्तीत्यादिना श्रुतिः । कण्डुगाथामुखेन स्मृतिः । कपोतादिना शिष्टाचारः । प्रतिपक्षनिरसनपूर्वकबलवदुपपादनेन स्वप्रियत्वं चेत्येवं चतुर्षु प्रमाणेषु प्रपन्नरक्षणरूपपरमधर्मविषयेषु दर्शितेषु संप्रति तत्र प्रमाणं पञ्चमं दर्शयति—सकृदेवेति ॥ सकृदेव एकवारमेव । उपायान्तरेष्वावृत्तिः शास्त्रार्थः प्रपत्तौ त्वनावृत्तिः " सकृदेव हि शास्त्रार्थः कृतोयं तारयेन्नरं " इत्युक्तेः । प्रपन्नाय गत्यर्था ज्ञानार्था इति न्यायेनात्र मानसप्रपत्तिरुच्यते । तवास्मीति तु वाचिकी । उभयोरन्यतरेण युक्तायापीत्यर्थः । यद्वा प्रपन्नायेत्युपायः कथ्यते । तवास्मीति च याचत इति तच्छेषवृत्तिलक्षणफलविशेषप्रार्थना । एवंभूतायाधिकारिणे । सर्वभूतेभ्य इति " भीत्रार्थानां भयहेतुः " इत्यपादानत्वं । भयहेतुतया शङ्कितेभ्यः सर्वभूतेभ्यः । अभयं भयाभावं । ददामि । अभयमेव मोक्षो नाम । " अथ सोभयं गतो भवति आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति" इति ब्रह्मविद्याफलत्वेन श्रवणात् । एतत् तवास्मीति फलविशेषयाच्ञेति पक्षस्यानुकूलं । पक्षान्तरे त्रैवर्गिकफलानामप्येतदुपलक्षणं । स्वस्य सकलफलप्रदत्वात् । एतद्व्रतं मम व्रतवदिदं कस्यांचिदपिदशायां परित्यागायोग्यमित्यर्थः । अत्र सर्वभूतेभ्य इत्यपि चतुर्थी । प्रपन्नसंबन्धिभ्योपि सर्वभूतेभ्योभयं

र्थंवृतस्य समक्षमेवतस्यरक्षिणःसर्वंसुकृतमादायगच्छेत् ॥ स० तस्यस्वरक्षणसमर्थस्याप्यरक्षितुःसुकृतं । उपलक्षणमेतत् । स्वापांतस्मैदत्वेत्यपिग्राह्यं ॥ ३० ॥ ति० एतदन्ताःकण्डुगाथाः । अथरामवाक्यं—एवमिति ॥ ३१ ॥ ति० अस्वर्ग्यं स्वर्गप्रतिबन्धकं ॥ स० अस्वर्ग्यं अस्वर्गप्रापकं ॥ ३२ ॥ ति० अत्रवर्तमानप्रयोगेणनित्यसत्सहजधर्मत्वमभयदानस्योक्तं । तदेवाह—एतन्ममव्रतमिति । नित्यपरिगृहीतःनित्यनिजप्रतिष्ठितोस्मद्धर्मइत्यर्थः । अत्रतात्कालिकमात्यन्तिकंचेत्युभयविधमप्यभयदानंप्रतिज्ञायते । तत्रात्यन्तिकंसंसारभयोपरतिरूपं । द्वितीयंतुरावणादितउत्थितमृत्युभयनिवृत्तिरूपं । इदंचोरारिग्रहनिमित्तकाभयदानस्याप्युपलक्षणं । नन्वेवंसर्वेश्वरस्यापितवनिमित्ताभयदातृत्वेवैषम्यनैर्घृण्यादिदोषप्रसङ्गस्तत्राह—सकृदिति । अनेनोभयविधाभयदानस्यसाधनमुपदिश्यते । सकृदेकयैववृत्त्याप्रपन्नाय । पदिर्गत्यर्थः । प्रकृष्टप्रतिपत्तिमते । प्रतिपत्तौप्रकर्षश्चनिरन्तरत्वं । साच तत्त्वमस्यादिवाक्यजन्याभगवतःस्वात्मत्वेनप्रतिपत्तिः । अयंच " ज्ञानीत्वात्मैवमेमतः " इतिगीतोक्तः । अयमेवात्यन्तिकाभयदानपात्रं । द्वितीयाभयदानसाधनमाह " तवास्मीतिचयाचते " इति । औपाधिकभेदमवलंब्यतवाहंशेषकस्त्वंमेस्वामी अहंशिष्यस्त्वंगुरुः अहंरक्ष्यस्त्वंरक्षकइत्येवमुपासनांकुर्वेतः " द्वितीयाद्धिभयंभवति " इतिन्यायेनावश्यंप्राप्तभयस्यसर्वभूतेभ्योयथाभयं नभवतितथायतामीतिमेव्रतमित्यर्थः । अतथाभूतेभ्यस्तुनयच्छामीतिननैर्घृण्यादिदोषप्रसङ्गइतिभावः । स० सकृत् एकवारं प्र-

आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया ॥ विभीषणो वा सुग्रीव यदि वा रावणः स्वयम् ॥ ३४ ॥
रामस्य तु वचः श्रुत्वा सुग्रीवः प्लवगेश्वरः ॥ प्रत्यभाषत काकुत्स्थं सौहार्देन[1] प्रचोदितः ॥ ३५ ॥
किमत्र चित्रं धर्मज्ञ लोकनाथ[2] सुखावह ॥ यत्त्वमार्यं प्रभाषेथाः सत्त्ववान्सत्पथे स्थितः ॥ ३६ ॥
मम चाप्यन्तरात्माऽयं शुद्धं वेत्ति विभीषणम् ॥ अनुमानाच्च भावाच्च सर्वतः सुपरीक्षितः ॥ ३७ ॥

ददामि । " पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदं " इत्युक्तेः ॥३३॥ एवमुक्ते सत्यसंभवदुत्तरं प्रशान्तप्रेमान्ध्यंतया प्रसन्नमुखं विभीषणाभिमुखं सुग्रीवमालोक्य तमेव तदानयने नियुङ्क्ते—आनयैनमिति ॥ निवेदयतेति सपरिवारान्युष्मान् । पुरुषकारतया वृतवन्तमेनं यूयमेवानयत । तथा सत्येतावत्पर्यन्तमस्वीकारकृतदुःखमस्य निवर्तेत । हरिश्रेष्ठ तस्य दुःखनिवृत्तये त्वमेव गत्वानयसि चेन्मयि स्नेहवद्भ्यो हरिभ्यः श्रेष्ठं भवन्तमतिक्रम्य किमहं स्वीकरोमि । दत्तमस्याभयं मया । अस्य स्वबन्धुत्यागपूर्वकं स्वनिकर्षकीर्तनपुरःसरं चागतस्य मया मित्रभावेनैवालमिति मन्यमानेन अभयं दत्तं । शरणशब्दश्रवणकाल एवेति शेषः । कथमानयेयमित्याकुलितं समाधत्ते—विभीषणो वेत्यादिना । विभीषणो वा । " विभीषणस्तु धर्मात्मा " इति विभीषणस्वीकारो धर्मवत्स्वीकारतया नोत्कर्षाय । रावणस्य नृशंसस्येति रावणस्वीकारएवोत्कर्षःस्यादिति । विभीषणस्वीकारे तत्परिकराश्चत्वार एवरक्षिताःस्युः । रावणस्वीकारेतु लङ्कास्थाः सर्वेपि रक्षिताःस्युरितिमहाँल्लाभः । सुग्रीव । अस्माकमागतोतिशयो युष्माकं तुल्यः खलु । "एकं दुःखं सुखं च नौ " इत्युक्तेः । यदि वा रावणः स्वयं यत्संबन्धेन विभीषणेप्यतिशङ्का स एवास्तु स्वयं । सीतामपुरस्कृत्य स्वयमागतो रावणो वास्तु । यद्वा स्वयं अयं यदि विभीषणो न भवति किंतु कामरूपी रावण एव विभीषणभूमिकां परिगृह्य यद्यागतः तथाप्यस्याभयं मया दत्तं । त्वमपि रावणोयं न तु विभीषण इति विज्ञापनायापि पुनर्नागच्छेः । किंत्वानयैवेत्यर्थः ॥ ३४ ॥ अथ सुग्रीवः कचिदप्यसंभावितं रामस्य शरणागते स्वस्मिंश्च सौहार्दातिशयमालोच्य विस्मयपरवश आह—रामस्येति ॥ सौहार्देन प्रचोदितः । सर्वानपि दोषाननालोच्य विपरीतप्रवृत्तान् पूर्वसुहृदो नानाप्रकारैरनुनीय यदि वा रावणः स्वयमिति वदतो रामचन्द्रस्य कोयं सौहार्दातिशय इति विस्मयेन प्रेरित इत्यर्थः ॥ ३५ ॥ एवं विस्मयातिशयाद्वक्तुमुपक्रान्तो रामस्य स्वाभाविकानवकल्याणगुणौघानालोच्य सहजधर्मत्वादेतद्रामे नाश्चर्यकरमित्याह—किमिति ॥ धर्मज्ञ । धर्मसूक्ष्मतत्त्वज्ञस्य तव धर्मानुष्ठानं किमाश्चर्यं । लोकनाथ । भृत्यवर्गसंरक्षणं स्वामिनः किं चित्रं । सुखावह । स्वयमवाप्तसमस्तकामत्वेन परप्रयोजनैकपरायणस्य सर्वसुखकारिणस्तव शरणागतेषु समाश्रितेष्वस्मासु सुखकारित्वे कोवा विस्मयः । आर्यं समीचीनं । सत्त्ववान् प्रशस्ताध्यवसायवान् । " द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु " इत्यमरः । दृढव्रतस्य व्रतपरिपालनंकिमद्भुतं । यद्वा सत्त्वं बलं सर्वशक्तेस्तव समाश्रितभयनिवारणं किमाश्चर्यं । सत्पथे स्थितः । धर्मसंस्थापनार्थमेवावतीर्णस्य शरणागतरक्षणरूपविशेषधर्मानुष्ठानं नाश्चर्यमित्यर्थः । प्रपन्नसंरक्षणे धर्मज्ञत्वादिष्वन्यतम एव गुणः पर्याप्तः । किमुत सर्वेपि समुदिता इतिभावः ॥ ३६ ॥ किमस्मत्प्रशंसनेन त्वन्मनःप्रवृत्तौ खलु विभीषणो ग्राह्यः स्यात्तत्राह—ममेति ॥ मम । " वध्यतामेष तीव्रेण दण्डेन " इत्युक्तवतोपि । न केवलमस्मिन्नर्थे मदन्तःकरणप्रवृत्तिरेकमेव प्रमाणं । प्रमाणान्तराण्यपि सन्तीत्याह—अनुमानादिति । अनुमानात् त्वया हनुमता चोक्तयुक्तिकदम्बात् । भावात् भावबोधकान्मुखप्रसादादिलिङ्गात् । सर्वतः सर्वत्र । अन्तर्बहिश्चेत्यर्थः । यद्वा अनुमानात् हृदयप्रकाशकमुखविकासादिलिङ्गात् । भावात् आर्तध्वनिप्रकाशितमृदुस्वभावात् । चशब्देन वध्यतामपीत्युक्तावस्थायां न त्यजेयमिति कालेप्येकरूपत्वं समुच्चीयते । सुपरीक्षितः संशयविपर्ययराहित्येन परीक्षितः । अन्तरात्मा अन्तःकरणं । चापीति

त्राय शरणंगताय । तेननतत्रपरीक्षापेक्षेतिसूचयति ॥ ३३ ॥ **ति०** लोकनाथानांराज्ञांशिखामणे ॥ ३६ ॥

[**पा०**] १ झ. सौहार्देनाभिपूरितः. २ ङ. च. झ. ट. नाथशिखामणे.

तस्मात्क्षिप्रं सहास्माभिस्तुल्यो भवतु राघव ॥ विभीषणो महाप्राज्ञः सखित्वं चाभ्युपैतु नः ॥ ३८॥
ततस्तु सुग्रीववचो निशम्य तद्धरीश्वरेणाभिहितं नरेश्वरः ॥
विभीषणेनाशु जगाम संगमं पतत्रिराजेन यथा पुरंदरः ॥ ३९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टादशः सर्गः ॥ १८ ॥

एकोनविंशः सर्गः ॥ १९ ॥

विभीषणेन मन्त्रिभिःसहगगनादवतीर्य श्रीरामचरणप्रणामपूर्वकं तंप्रति स्ववृत्तान्तनिवेदनेनसहस्वशरणागतिनिवेदनम् ॥ १ ॥ विभीषणेन रामचोदनयातंप्रतिरावणकुंभकर्णादिपराक्रमनिवेदनपूर्वकं यथाशक्तियुद्धसाहाय्यकरणप्रतिज्ञानम् ॥ २ ॥ रामेण विभीषणपरिष्वङ्गपूर्वकंतस्य लक्ष्मणकरेणलङ्काराज्येऽभिषेचनम् ॥ ३ ॥ हनुमत्सुग्रीवाभ्यांसागरतरणोपायंपृष्टेनविभीषणेन तौप्रति रामेणसमुद्रंप्रतिशरणागतिकरणोक्तिः ॥ ४ ॥ रामेण लक्ष्मणसुग्रीवाद्यनुमत्यासमुद्रोपासनाय तत्तीरेसमास्तृतकुशोपरिशयनम् ॥ ५ ॥

राघवेणाभये दत्ते सन्नतो रावणानुजः ॥ विभीषणो महाप्राज्ञो भूमिं समवलोकयन् ॥
खात्पपातावनीं हृष्टो भक्तैरनुचरैः सह ॥ १ ॥

रामान्तःकरणसमुच्चयार्थः ॥ ३७ ॥ पूर्वमानयैनमिति नियुक्तमनुतिष्ठति—तस्मादिति ॥ क्षिप्रं पूर्वमज्ञानवशान्मया पापमाचरितं । तत्त्वविचारे त्वयं क्षणमात्रं विलम्बानर्ह इतिभावः । तुल्यो भवतु । निवेदयत मामिति पुरुषकारकरणायाभ्यर्थितानां नृशंसानामस्माकं पुरुषकारत्वं संपादयितुमेव तवायं प्रयासश्च सिद्धः । इतःपरमस्माभिः पुरुषकारव्यापारः क्रियत इत्यर्थः । एवं विभीषणस्य पुरुषार्थमर्थयित्वा तत्सख्यरूपं स्वेषां पुरुषार्थमर्थयते—विभीषण इति । महाप्राज्ञः फलसाधनोपयोगिज्ञानवान् । न केवलं ममैव सर्वेषामिदं फलं समानमिति दर्शयितुं नः सखित्वमित्युक्तं ॥ ३८ ॥ एवं सुहृत्तरसुग्रीवाभ्यनुज्ञानानन्तरं शरण्यस्य शरणागतसंगमविशेषं दर्शयति—तत इति ॥ सुग्रीववचो निशम्य ततो हरीश्वरेणाभिहितं विभीषणेन संगमं जगामेत्यन्वयः । अभिहितं हे विभीषण राघवस्त्वाभयं दत्तवान् राघवमुपयाहीत्येवं सुग्रीवोक्तं । नरेश्वरः संगमं जगामेति संगमोपि कर्तुरीप्सिततमत्वकथनेन रामस्यायं लाभ इति गम्यते । न त्यजेयं कथंचनेत्यादिभिः सुग्रीवादिवाक्यरूपविरोधिनिरसनपूर्वकं श्रीविभीषणस्वीकारं प्रतिश्रुत्य कथंचित्सुग्रीवादिवाक्यजनितं विलम्बमविषह्य त्वरया रक्षितुं स्वयमेव तेन संगत इत्याह—विभीषणेनाशु जगाम संगममिति । आशु त्वरितं । आश्रितसंश्लेषे स्वयं त्वरातिशयवानितिभावः । पुरंदरो यथा पतत्रिराजेन संगमं स्वलाभममन्यत तथाऽयमपीति दृष्टान्ताभिप्रायः । यद्वा सुग्रीवस्य बुद्धिः पुनर्विपरीता चेत्कार्यहानिरिति शीघ्रं जगाम ॥ ३९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टादशः सर्गः ॥ १८ ॥

एवं शरणस्य शरणागतसंगमरूपफलमुक्त्वा शरणागतस्य शरण्यसेवाख्यपुरुषार्थलाभमाह—राघवेणेत्यादि सार्धश्लोक एकान्वयः ॥ अभये स्वापेक्षिते सर्वभूताभये दत्ते । सन्नतः । "गुणैर्दास्यमुपागतः" इति न्यायेन पूर्वश्रुतेभ्योप्यधिकानां रामकल्याणगुणानां साक्षात्कारेण सम्यक्प्रह्वीभूताङ्गः । महाप्राज्ञः । निरुपायोपायपरिग्रहेण परमपुरुषार्थलाभाद्वेदशास्त्राभ्या-

स० तुल्यः दास्येनेतिशेषः । यद्वा भ्रातृहननमुखेनराज्यप्राप्त्यासमोभवतु । "आत्मनिगुरावेकेषां" इत्यादेर्बहुवचनं ॥३८॥ स० हरीश्वरेणहनुमताभिहितंविभीषणेनसंगमंसख्यंजगाम मनसेतिशेषः । पतत्रिराजेन गरुडेन । पुरंदरोयथाअमृतहरणकाले सख्यंजगामतद्वत् ॥ ३९ ॥ इत्यष्टादशःसर्गः ॥ १८ ॥

स० सन्नतः प्रवणः । सत्स्वभावत्वात्सत्सुनतइतिवा । भूमिंसमवलोकयत् । अवतरणायेतिभावः ॥ १ ॥ स० हृष्टः महा-

[पा०] १ ङ. ञ. समवलोकयत्.

स तु रामस्य धर्मात्मा निपपात विभीषणः ॥ पादयोः शरणान्वेषी चतुर्भिः सह राक्षसैः ॥ २ ॥
अब्रवीच्च तदा रामं वाक्यं तत्र विभीषणः ॥ धर्मयुक्तं च युक्तं च सांप्रतं संप्रहर्षणम् ॥ ३ ॥
अनुजो रावणस्याहं तेन चाप्यवमानितः ॥ भवन्तं सर्वभूतानां शरण्यं शरणागतः ॥ ४ ॥
परित्यक्ता मया लङ्का मित्राणि च धनानि वै ॥ भवद्गतं मे राज्यं च जीवितं च सुखानि च ॥५॥

सातिशयजनितप्रज्ञातिशयस्य फलमिदानींनिर्वृत्तमिति भावः । भूमिं समवलोकयन् । अन्तरङ्गसचिवसमूहसंमर्दनिरवकाशेपि रामपुरोदेशे सचिवैरेव सयूथ्यतामापन्नस्य विभीषणस्य स्वपरिषन्मध्ये दत्तं भूतलावकाशं सम्यक्पश्यन् । खादवनीं पपातेति प्राथमिकोदूरप्रणाम उच्यते । प्रणामाद्ययोग्यस्थानमाकाशं परित्यज्य पाणिपादशिरःप्रभृतिभिरष्टाङ्गैर्भूमिं प्राप्तवानित्यर्थः । नन्वपेक्षितमभयं दत्तमेव पुनः किमर्थं प्रणनामेत्यत्राह—हृष्ट इति । रामस्य स्वरूपरूपगुणानुभवजनितहर्षविवशीकृतशरीर एव प्रणतः । ननु किमपि प्रयोजनमुद्दिश्येत्यर्थः । भक्तैरनुचरैः सहेति । " राघवं शरणं गतः । निवेदयत मां"इति विभीषणस्यैकस्यैवोपायानुष्ठानश्रवणेपि तदनुबन्धिनां तद्भक्तिवशादेव रामपरिचरणं समानमित्युच्यते । उक्तं हि " पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदं" इति ॥ १ ॥ पूर्वं वाचिका प्रपत्तिः कृता संप्रति कायिकशरणागतिं प्रयुङ्क्ते—स त्विति ॥ स तु पूर्वस्माद्विलक्षणः । संशयविपर्ययनिवृत्त्या अनुकूलत्वनिर्णयविषय इत्यर्थः । धर्मात्मा सर्वावस्थास्वप्यप्रच्युतशरणागतिधर्मनिष्ठावान् । "वध्यतामिति । शङ्क्यतामिति । न त्यजेयमिति । आनयैनमिति अस्माभिस्तुल्यो भवत्वि"ति चोक्तासु सर्वावस्थास्वप्यविचारेणैकरूपचित्त इत्यर्थः । अनेन विभीषणस्य महाविश्वास उक्तः । शरणान्वेषी कृतशरणवरणः । विभीषणः रामस्य स्वस्मिन्पक्षपातातिशयद्योतकाभिरामाकारस्य पादयोः स्तनन्धयस्य मातृस्तनवत् श्रीपादावेव स्वस्य भोग्यभूताविति पपात । अन्यैरागत्य प्रशिथिलानवयवान् सम्यग्योजयित्वा यथोत्थाप्येत तथा पपात । चतुर्भिः सह राक्षसैः । करचरणाद्यवयववत्तत्परतन्त्रैरित्यर्थः । तत्रानुकूल्यसंकल्पप्रातिकूल्यवर्जनवत्त्वमुक्तं । धर्मात्मेति महाविश्वासः शरणान्वेषीति गोप्तृत्ववरणं पपातेत्यात्मनिक्षेप इति साङ्गशरणागतिः कृता भवति ॥ २ ॥ एवं कायिकी शरणागतिरुक्ता । अथ वाचिकीं दर्शयति—अब्रवीदिति ॥ तदा पादपतनसमये । तत्र सुग्रीवादीनां सर्वेषामेकमत्यवति सदसि । रामं पूर्वं सुग्रीवादिपुरुषकारभूतान् प्रति संप्रति शरण्यमेव धर्मयुक्तं शरणागत्यङ्गानुकूलसङ्कल्पादिधर्मयुक्तं । युक्तं समर्थकारुणिकशरण्यविषयतया योग्यं । सांप्रतं संप्रहर्षणं । पूर्वं राघवं शरणं गत इत्युक्तिदशायां सुग्रीवादीनां श्रुतिकटुकं जातं । इदानीं सर्वसंप्रहर्षणं ॥ ३ ॥ अनुज इति पूर्वं निवेदयतेत्यत्र पुरुषकारभूतान्प्रत्युक्तं । इदानीं साक्षाच्छरण्यं प्रतीति नपुनरुक्तिः । पूर्वार्धेन स्वदोषख्यापनादाकिंचन्यमुक्तं । सर्वभूतानां शरण्यं रावणस्यापि शरणं भवामीति कृतसङ्कल्पं । भवन्तंज्ञानशक्त्यादिपरिपूर्णं ॥ ४ ॥ अनन्तरं प्राप्यान्तरनिरसनपूर्वकं त्वमेव प्राप्यइत्याह—परित्यक्तेति ॥ लङ्का

लाभोजातइतिप्रीतमनाः रामस्यपादयोः । अनेन नकेवलमयमंबरचरऐहिकफलावलंबी । किंतुमोक्षज्ञानानन्दाद्यर्थीचेतिसूचयति । यथोक्तंवृहदारण्यकोपनिषद्भाष्ययोः । " सुवरितिप्रतिष्ठे द्वेएतेप्रतिष्ठे द्वेएतेअक्षरे । " " खिल्यानन्दःसमुद्दिष्टो वरिति ज्ञानमुच्यते । मोक्षदानेन तद्दानात्सुवरस्य पदद्वयम् । दक्षिणश्चेति सव्यश्च " इति । अथ अवतरणानन्तरं । चतुर्भिःसचिवैःसह सहितः । यः निपपाता नितरांपान्ति जगदिति निपाः ब्रह्माद्याः । तान्पातिस्वभावेन नफलाशयेति निपपाता । तंरामंप्रति विभीषणोऽब्रवीदिति श्लोकद्वयस्यैकान्वयः । अथवा स्वयंपादयोर्निपपात । स्वामित्वात्स्वस्यप्रथमतःप्रणामः अथ अनन्तरं । सविभीषणः चतुर्भिःसचिवैःसहनिपपात । अथवा स्वात्पपातेतिपूर्वं । अनन्तरं रामस्यसमीपतइतिशेषः । अथ तदनन्तरंचतुर्भीराक्षसैःसहरामस्यपादयोर्निपपात । एतंविशेषं तुशब्दउद्बोधयति ॥ अथ विभीषणस्यरामपादनिपतनानन्तरं । सरावणः चतुर्भीराक्षसैः कुंभकर्णमहापार्श्वेन्द्रजित्प्रहस्तैःसहनिपपातेतिमध्ये एष्यन्नयेनकविवचनंवा । चतुर्भिरभिहितैःसहेतरराक्षसैर्वारामप्रणिपातस्तन्निपातहेतुरितिभावः ॥ १—२ ॥ **स०** भवन्तं सर्वभूतानांशरण्यं । अनेनाप्रजस्यमहाद्रोहेणसहवासायोग्यता स्वस्यश्रीरामे भगवदवतारतामतिंचसूचयति ॥ ४ ॥ **स०** मित्राणि पूर्वंमित्रवदनुकृतानि । परित्यक्तानीतिलिङ्गवचनव्यत्यासेनवा यस्यांमित्राणि

[पा०] १ ङ. ञ. ठ. पादयोर्निपपाताथ. २ ख.ग.ङ.च.ज.—ट. चास्म्यवमानितः. ३ ङ. ञ. ट. भवद्गतंहिमेराज्यं.

स तु रामस्य धर्मात्मा निपपात विभीषणः ॥ पादयोः शरणान्वेषी चतुर्भिः सह राक्षसैः ॥ २ ॥
अब्रवीच्च तदा रामं वाक्यं तत्र विभीषणः ॥ धर्मयुक्तं च युक्तं च सांप्रतं संप्रहर्षणम् ॥ ३ ॥
अनुजो रावणस्याहं तेन चाप्यवमानितः ॥ भवन्तं सर्वभूतानां शरण्यं शरणागतः ॥ ४ ॥
परित्यक्ता मया लङ्का मित्राणि च धनानि वै ॥ भवद्गतं मे राज्यं च जीवितं च सुखानि च ॥५॥

सातिशयजनितप्रज्ञातिशयस्य फलमिदानींनिर्वृत्तमिति भावः । भूमिं समवलोकयन् । अन्तरङ्गसचिवसमूहसंमर्दनिरवकाशेपि रामपुरोदेशे सचिवैरेव सयूथ्यतामापन्नस्य विभीषणस्य स्वपरिषन्मध्ये दत्तं भूतलावकाशं सम्यक्पश्यन् । खादवनीं पपातेति प्राथमिकोदूरप्रणाम उच्यते । प्रणामाद्ययोग्यस्थानमाकाशं परित्यज्य पाणिपादशिरःप्रभृतिभिरष्टाङ्गैर्भूमिं प्राप्तवानित्यर्थः । नन्वपेक्षितमभयं दत्तमेव पुनः किमर्थं प्रणनामेत्यत्राह—हृष्ट इति । रामस्य स्वरूपरूपगुणानुभवजनितहर्षविवशीकृतशरीर एव प्रणतः । नतु किमपि प्रयोजनमुद्दिश्येत्यर्थः । भक्तैरनुचरैः सहेति । " राघवं शरणं गतः । निवेदयत मां"इति विभीषणस्यैकस्यैवोपायानुष्ठानश्रवणेपि तदनुबन्धिनां तद्भक्तिवशादेव रामपरिचरणं समानमित्युच्यते । उक्तं हि " पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदं" इति ॥ १ ॥ पूर्वं वाचिका प्रपत्तिः कृता संप्रति कायिकशरणागतिं प्रयुङ्क्ते—स त्विति ॥ स तु पूर्वस्माद्विलक्षणः । संशयविपर्ययनिवृत्त्या अनुकूलत्वनिर्णयविषय इत्यर्थः । धर्मात्मा सर्वावस्थास्वप्यप्रच्युतशरणागतिधर्मनिष्ठावान् । "वध्यतामिति । शङ्क्यतामिति । न त्यजेयमिति । आनयैनमिति अस्माभिस्तुल्यो भवत्वि"ति चोक्तासु सर्वावस्थास्वप्यविचारेणैकरूपचित्त इत्यर्थः । अनेन विभीषणस्य महाविश्वास उक्तः । शरणान्वेषी कृतशरणवरणः । विभीषणः रामस्य स्वस्मिन्पक्षपातातिशयद्योतकाभिरामाकारस्य पादयोः स्तनन्धयस्य मातृस्तनवत् श्रीपादावेव स्वस्य भोग्यभूताविति पपात । अन्यैरागत्य प्रशिथिलानवयवान् सम्यग्योजयित्वा यथोत्थाप्येत तथा पपात । चतुर्भिः सह राक्षसैः । करचरणाद्यवयववत्तत्परतन्त्रैरित्यर्थः । तत्रानुकूल्यसंकल्पप्रातिकूल्यवर्जनवत्त्वमुक्तं । धर्मात्मेति महाविश्वासः शरणान्वेषीति गोप्तृत्ववरणं पपातेत्यात्मनिक्षेप इति साङ्गशरणागतिः कृता भवति ॥ २ ॥ एवं कायिकी शरणागतिरुक्ता । अथ वाचिकीं दर्शयति—अब्रवीदिति ॥ तदा पादपतनसमये । तत्र सुग्रीवादीनां सर्वेषामैकमत्यवति सदसि । रामं पूर्वं सुग्रीवादिपुरुषकारभूतान् प्रति संप्रति शरण्यमेव धर्मयुक्तं शरणागत्यङ्गानुकूलसङ्कल्पादिधर्मयुक्तं । युक्तं समर्थकारुणिकशरण्यविषयतया योग्यं । सांप्रतं संप्रहर्षणं । पूर्वं राघवं शरणं गत इत्युक्तिदशायां सुग्रीवादीनां श्रुतिकटुकं जातं । इदानीं सर्वसंप्रहर्षणं ॥ ३ ॥ अनुज इति पूर्वं निवेदयतेत्यत्र पुरुषकारभूतान्प्रत्युक्तं । इदानीं साक्षाच्छरण्यं प्रतीति नपुनरुक्तिः । पूर्वार्धेन स्वदोषख्यापनादाकिंचन्यमुक्तं । सर्वभूतानां शरण्यं रावणस्यापि शरणं भवामीति कृतसङ्कल्पं । भवन्तंज्ञानशक्त्यादिपरिपूर्णं ॥ ४ ॥ अनन्तरं प्राप्यान्तरनिरसनपूर्वकं त्वमेव प्राप्यइत्याह—परित्यक्तेति ॥ लङ्का

लाभोजातइतिप्रीतमनाः रामस्यपादयोः । अनेन नकेवलमयमंबरचरऐहिकफलावलंबी । किंतुमोक्षज्ञानानन्दाद्यर्थीचेतिसूचयति । यथोक्तंबृहदारण्यकोपनिषद्भाष्ययोः । " सुवरितिप्रतिष्ठे द्वेएतेप्रतिष्ठे द्वेएतेअक्षरे । " " स्खित्यानन्दःसमुद्दिष्टो वरिति ज्ञानमुच्यते । मोक्षदानेन तद्दानात्सुवरस्य पदद्वयम् । दक्षिणश्चेति सव्यश्च " इति । अथ अवतरणानन्तरं । चतुर्भिःसचिवैःसह सहितः । यः निपपाता नितरांपान्ति जगदिति निपाः ब्रह्माद्याः । तान्पातिस्वभावेन नफलाशयेति निपपाता । तंरामंप्रति विभीषणोऽब्रवीदिति श्लोकद्वयस्यैकान्वयः । अथवा स्वयंपादयोर्निपपात । स्वामिन्स्वस्यप्रथमतःप्रणामः अथ अनन्तरं । सविभीषणः चतुर्भिःसचिवैःसहनिपपात । अथवा खात्पपातेतिपूर्वं । अनन्तरं रामस्यसमीपतइतिशेषः । अथ तदनन्तरंचतुर्भीराक्षसैःसहरामस्यपादयोर्निपपात । एतंविशेषं तुशब्दउद्बोधयति ॥ अथ विभीषणस्यरामपादनिपतनानन्तरं । सरावणः चतुर्भीराक्षसैः कुंभकर्णमहापार्श्वेन्द्रजित्प्रहस्तैःसहनिपपातेतिमध्ये एष्यन्नयेनकविवचनंवा । चतुर्भिरभिहितैःसहेतररक्षसैर्वारामप्रणिपातस्तन्निपातहेतुरितिभावः ॥ १—२ ॥ स० भवन्तं सर्वभूतानांशरण्यं । अनेनाप्रजस्यमहाद्वेहेणसहवासायोग्यता स्वस्यश्रीरामे भगवदवतारतामतिंचसूचयति ॥ ४ ॥ स० मित्राणि पूर्वंमित्रवदनुकृतानि । परित्यक्तानीतिलिङ्गवचनव्यत्यासेनवा यस्यांमित्राणि

[पा०] १ ङ. ञ. ठ. पादयोर्निपपाताथ. २ ख.ग.ङ.च.ज.—ट. चास्म्यवमानितः. ३ ङ. ञ. ट. भवद्गतंहिमेराज्यं.

तस्य तद्वचनं श्रुत्वा रामो वचनमब्रवीत् ॥ वचसा सान्त्वयित्वैनं लोचनाभ्यां पिबन्निव ॥ ६ ॥
आख्याहि मम तत्त्वेन राक्षसानां बलाबलम् ॥ ७ ॥
एवमुक्तं तदा रक्षो रामेणाक्लिष्टकर्मणा ॥ रावणस्य बलं सर्वमाख्यातुमुपचक्रमे ॥ ८ ॥
अवध्यः सर्वभूतानां गन्धर्वासुररक्षसाम् ॥ राजपुत्र दशग्रीवो वरदानात्स्वयंभुवः ॥ ९ ॥
रावणानन्तरो भ्राता मम ज्येष्ठश्च वीर्यवान् ॥ कुम्भकर्णो महातेजाः शक्रप्रतिबलो युधि ॥ १० ॥
राम सेनापतिस्तस्य प्रहस्तो यदि वा श्रुतः ॥ कैलासे येन संग्रामे माणिभद्रः पराजितः ॥ ११ ॥
बद्धगोधाङ्गुलित्राणस्त्ववध्यकवचो युधि ॥ धनुरादाय यस्तिष्ठन्नदृश्यो भवतीन्द्रजित् ॥ १२ ॥
संग्रामसमयव्यूहे तर्पयित्वा हुताशनम् ॥ अन्तर्धानगतः शत्रूनिन्द्रजिद्धन्ति राघव ॥ १३ ॥
महोदरमहापार्श्वौ राक्षसश्राप्यकम्पनः ॥ अनीकस्थास्तु तस्यैते लोकपालसमा युधि ॥ १४ ॥
दशकोटिसहस्राणि रक्षसां कामरूपिणाम् ॥ मांसशोणितभक्षाणां लङ्कापुरनिवासिनाम् ॥ १५ ॥
स तैस्तु सहितो राजा लोकपालानयोधयत् ॥ १६ ॥
सह दैवैस्तु ते भग्ना रावणेन महात्मना ॥ १७ ॥

वासस्थानं । मित्राणि सुहृदः । धनानि तद्द्वारा समागतानि सोपाधिकानि वस्तूनि प्राप्यान्तराणि त्यक्तानीत्यर्थः । भवद्व्रतं त्वदधीनं । राज्यमिति सर्वपरिग्रहोपलक्षणं । जीवितमिति धारकपोषकभोग्योपलक्षणं । सुखानि ऐहिकामुष्मिकरूपाणि । इदं सर्वं भवद्व्रतं भवत्कैङ्कर्यान्तर्गतं भवत्कैङ्कर्यविना अन्यन्नाहमभ्यर्थयामीत्यर्थः ॥ ५ ॥ तस्य सर्वपरिग्रहत्यागपूर्वकं रामेन्यस्तभरस्य । तद्वचनं रामकैङ्कर्यमेव सकलभोग्यजातमिति वाक्यं । सान्त्वयित्वा शरणं गत इत्युक्तिसमय एव स्वीकार्योसि एतावत्पर्यन्तं विलम्बः क्षन्तव्य इति सान्त्ववचनान्युक्त्वा । लोचनाभ्यां पिबन्निव सान्त्ववचनेन तस्य हृदयमार्द्रं कृत्वा अत्यादरेण विलोकयन्नित्यर्थः ॥ ६ ॥ एवं विभीषणेन कायिककैङ्कर्ये प्रार्थिते कायिककैङ्कर्यं पश्चाद्भविष्यतीति संप्रति वाचिककैङ्कर्यं कुर्विति दर्शयति—आख्याहीति ॥ अत्र भवदीयानामित्यनुक्त्वा राक्षसानामित्युक्तेरयं राक्षसजातिर्न भवति किन्त्विक्ष्वाकुवंश्य इति रामो मेने इतिगम्यते । भ्रमरकीटन्यायेन सद्यः स्वसाम्यप्रदंहि भगवदाश्रयणवैभवं ॥ ७—८ ॥ सर्वभूतानामित्येतत् गन्धर्वादिव्यतिरिक्तपरं । राजपुत्रेति संबुद्ध्या मानुषवध्यत्वं द्योतयति ॥ ९ ॥ प्रतिबल समानबलः ॥ १० ॥ कैलासे वर्तमान इति शेषः माणिभद्रः कुबेरसेनापतिः यदिवा श्रुत इति । हनुमत इति शेषः ॥ ११ ॥ बद्धेति । अङ्गुलीत्राणायत इत्यङ्गुलित्राणं अङ्गुलिकवचं । "गोधा तलं ज्याघातवारणे" इत्यमरः । अनेन निरन्तरशरसन्धायीति गम्यते । अवध्यकवचः अभेद्यकवचः । युधि अदृश्यो भवतीत्यन्वयः । हनुमद्ग्राहकत्वेन प्रसिद्धत्वात्तस्य रावणपुत्रत्वानुक्तिः ॥ ११ ॥ कुतोस्यादृश्यत्वशक्तिः अदृश्यश्च किं करोतीत्याह—संग्रामेति ॥ संग्रामसमयकृतव्यूहे । तर्पयित्वा होमैःप्रीणयित्वा ॥ १३ ॥ महोदर इत्यादि श्लोकद्वयं ॥ अनीकस्थाः सेनापतयः एते महोदरादयः दशकोटिसहस्राणि सन्तीति शेषः ॥ १४—१५ ॥ स तैरित्यर्धं ॥ १६ ॥ न केवलं योधनं पराजिताश्च ते लोकपाला इत्याह—सह दैवैरित्यर्धमेकं वाक्यं ॥ दैवैः लोकपालभिन्नैः । तं

धनानिच सालङ्कारपरित्यक्तेतिवाऽन्वयः । मेराज्यं । जीवितं जीवनं । सुखानि ऐहलौकिकानि । पारलौकिकानिच । भवद्व्रतानि पूर्वस्मात्परित्यक्तामयालङ्क्ष्यावृत्तं सद्भवद्व्रतेतिविपरिणतेनान्वेति । परित्यक्तः आमयोरोगरूपी प्राकारायङ्गभङ्गकारित्वाद्रावणः यस्य सालङ्का । भवद्व्रता । एतेन एकांमूलनगरींस्थापयित्वावा स्वस्मास्थितिरामेणगृहीत्वाराज्यप्रदानंनाभिप्रेतं विभीषणेनरामवदान्यत्वेनेतिभावः ॥ ५ ॥ ति० दशकोटिसहस्राणि । इदंच प्रधानराक्षसविवक्षया ॥ १५ ॥

[पा०] १ ङ. ञ. ट. गन्धर्वोरगपक्षिणां. २ ञ. ञ. यदिते. ३ ङ. ञ. ट. समरे. ४ ख. घ.—ट. संग्रामेसुमहद्व्यूहे ५ ङ. ञ. ट. श्रीमानिन्द्र. ६ ङ. ञ. अनीकपास्तु. ग. अतिकायास्तु. ७ क. घ.—ट. दुरात्मना.

विभीषणवचः श्रुत्वा रामो दृढपराक्रमः ॥ अन्वीक्ष्य मनसा सर्वमिदं वचनमब्रवीत् ॥ १८ ॥
यानि कर्मापदानानि रावणस्य विभीषण ॥ आख्यातानि च तत्त्वेन ह्यवगच्छामि तान्यहम् ॥ १९ ॥
अहं हत्वा दशग्रीवं सप्रहस्तं सबान्धवम् ॥ राजानं त्वां करिष्यामि सत्यमेतद्ब्रवीमि ते ॥ २० ॥
रसातलं वा प्रविशेत्पातालं वाऽपि रावणः ॥ पितामहसकाशं वा न मे जीवन्विमोक्ष्यते ॥ २१ ॥
अहत्वा रावणं संख्ये सपुत्रबलबान्धवम् ॥ अयोध्यां न प्रवेक्ष्यामि त्रिभिस्तैर्भ्रातृभिः शपे ॥ २२ ॥
श्रुत्वा तु वचनं तस्य रामस्याक्लिष्टकर्मणः ॥ शिरसाऽऽवन्द्य धर्मात्मा वक्तुमेवोपचक्रमे ॥ २३ ॥
राक्षसानां वधे साह्यं लङ्कायाश्च प्रधर्षणम् ॥ करिष्यामि यथाप्राणं प्रवेक्ष्यामि च वाहिनीम् ॥ २४ ॥
इति ब्रुवाणं रामस्तु परिष्वज्य विभीषणम् ॥ अब्रवील्लक्ष्मणं प्रीतः समुद्राज्जलमानय ॥ २५ ॥
तेन चेमं महाप्राज्ञमभिषिञ्च विभीषणम् ॥ राजानं रक्षसां क्षिप्रं प्रसन्ने मयि मानद ॥ २६ ॥
एवमुक्तस्तु सौमित्रिरभ्यषिञ्चद्विभीषणम् ॥ मध्ये वानरमुख्यानां राजानं राजशासनात् ॥ २७ ॥
तं प्रसादं तु रामस्य दृष्ट्वा सद्यः प्लवङ्गमाः ॥ प्रचुक्रुशुर्महात्मानं साधुसाध्विति चाब्रुवन् ॥ २८ ॥
अब्रवीच्च हनूमांश्च सुग्रीवश्च विभीषणम् ॥ २९ ॥

लोकपालाः । महात्मना महाधैर्येण ॥ १७ ॥ अन्वीक्ष्य आलोच्य । सर्वं कर्तव्याकर्तव्यं ॥ १८ ॥ कर्मापदानानि । "अपदानं कर्मवृत्तं" इत्यमरः । करिकलभ इत्यत्रेव कर्मशब्दप्रयोगः । शौर्यकृतव्यापारा इत्यर्थः । अवगच्छामि अवधारयामीत्यर्थः ॥ १९ ॥ आलोचितमर्थमाह—अहमित्यादिना ॥ २० ॥ रसातलं भूविवरं । पातालं अधोलोकं । पितामहसकाशं स्ववरप्रदसमीपं । उपरितनलोकावधिभूतं सत्यलोकं वा । मे मत्तः ॥ २१ ॥ उक्तमर्थं व्यतिरेकमुखेन द्रढयन् सत्यमेतद्ब्रवीमि त इत्युक्तं विवृणोति—अहत्वेति ॥ सङ्ख्ये युद्धे । तैः प्रसिद्धैः । भ्रातृभिरिति हेतुविक्षया तृतीया ॥ २२ ॥ स्वानभिमतराज्यप्रदानप्रतिज्ञानात् वन्दनपूर्वकं स्वाभिमतं कैङ्कर्यमेव प्रयोजनान्तरनिवृत्तयेर्थयते—श्रुत्वेत्यादिना ॥ आवन्द्येति च्छेदः ॥ २३ ॥ साह्यं साहाय्यं । सहशब्दः सहायवाची । यथाप्राणं यथाबलं ॥ २४ ॥ एवं कैङ्कर्यव्यतिरिक्तफलमनाकाङ्क्षमाणं विभीषणं परिष्वङ्गेन वशीकृत्यानुषङ्गिकमपि फलं मत्प्रदत्तमङ्गीकर्तव्यमित्यभिप्रायेण लक्ष्मणमादिशति—इतीति ॥ २५ ॥ तेन समुद्रजलेन । महाप्राज्ञं कैङ्कर्यपर्यन्तस्वशेषत्वस्वरूपज्ञं । मयि प्रसन्ने सतीत्यनेन अभिषेको विभीषणेनानाकाङ्क्षित इति गम्यते । मानद बहुमानप्रद । मत्प्रसादे सति फलप्रदस्त्वमिति भावः ॥ २६ ॥ मध्ये वानरमुख्यानामित्यनेन महत्समाजे कृतमलङ्घनीयमिति द्योत्यते । राजशासनादित्यनेनालङ्घनीयं राजशासनमिति विभीषणोनुमेन इति भाव्यते ॥ २७ ॥ प्रचुक्रुशुः हर्षनादं चक्रुः । महात्मानं रामं । अब्रुवन् प्राशंसन्नित्यर्थः ॥ २८ ॥ अथ समयान्तरे कुत्रचिदेकान्ते प्रदेशे हनुमत्सुग्रीवौ स्थलज्ञं विभीषणं वानरसेनातरणोपायमपृच्छतामित्याह—अब्रवीच्चेति ॥

ति० कर्मापदानानि युधिकर्मनिर्वर्तितशौर्याणि । तान्यहमवगच्छाम्येव । ननुतानिमयिप्रभविष्यन्तीतिभावः ॥ स० कर्मापदानानि अपदानानि अतिवृत्तानि अमर्यादयाकृतानि । कर्माणिचतान्यपदानानिच तानि । यद्वा कर्मणि युद्धादिरूपेअपदानानिअतिवृत्तानिवैरिकर्मखण्डकानीतिवा । " अपदानमतीवृत्तकर्मखण्डनयोर्मतं " इतिविश्वः ॥ १९ ॥ स० रामप्रतिज्ञांश्रुत्वाविभीषणोपिप्रतिश्रृणोतीत्याह—वक्तुमेवेति । एवकारेण सर्वस्वामिनोरामस्यसाहाय्यकरणवचनमुपहास्यं । तथापि लौकिकरीत्यनुपालनार्थमिदमितिसूचयति ॥ २३ ॥ स० राजानं लङ्कायाः । राजशासनात् रामाज्ञायाः । रावणावरजस्यस्वावरजेनाभिषेचनंयुक्तमितिवा इदानींरावणमारणदीक्षाबन्धाद्व्यापारान्तरस्याकरणीयतयावा साक्षात्पितामहएवाभिषेकयोग्योनान्यइतिवालक्ष्मणेनाभिषेचनमितिमन्तव्यं ॥ राजशासनात् राजारावणः तच्छासनं शिक्षांतृणीकृत्येतिवा । ल्यब्लोपनिमित्तापञ्चमी ॥ २७ ॥

[पा०] १ क. ख. ग. ङ.—ट. विभीषणस्यतुवचस्तच्छ्रुत्वारघुसत्तमः. २ ङ. च. छ. झ. ञ. ट. सहात्मजं. ग. सहानुजं. ३ ङ. झ. मेतच्छ्रूणोतुमे. ४ क. ख. घ.—ट. जनबान्धवं. ५ ङ. च. झ. ञ. ट. वक्तुमेवप्रचक्रमे. ६ क. ग.—ट. प्रधर्षणे. ७ क. ग. घ. च. छ. ज. रामशासनात्.

कथं सागरमक्षोभ्यं तराम वरुणालयम् ॥ सैन्यैः परिवृताः सर्वे वानराणां महौजसाम् ॥ ३० ॥
उपायं नाधिगच्छामो यथा नदनदीपतिम् ॥ तराम तरसा सर्वे ससैन्या वरुणालयम् ॥
एवमुक्तस्तु धर्मज्ञः प्रत्युवाच विभीषणः ॥ ३१ ॥
समुद्रं राघवो राजा शरणं गन्तुमर्हति ॥ ३२ ॥
खानितः सगरेणायमप्रमेयो महोदधिः ॥ कर्तुमर्हति रामस्य ज्ञात्वा कार्यं महामतिः ॥ ३३ ॥
एवं विभीषणेनोक्तो राक्षसेन विपश्चिता ॥ आजगामाथ सुग्रीवो यत्र रामः सलक्ष्मणः ॥ ३४ ॥
ततश्चाख्यातुमारेभे विभीषणवचः शुभम् ॥ सुग्रीवो विपुलग्रीवः सागरस्योपवेशनम् ॥ ३५ ॥
प्रकृत्या धर्मशीलस्य राघवस्याप्यरोचत ॥ ३६ ॥
स लक्ष्मणं महातेजाः सुग्रीवं च हरीश्वरम् ॥ सत्क्रियार्थं क्रियादक्षः स्मितपूर्वमुवाच ह ॥ ३७ ॥
विभीषणस्य मन्त्रोऽयं मम लक्ष्मण रोचते ॥ ब्रूहि त्वं सहसुग्रीवस्तवापि यदि रोचते ॥ ३८ ॥
सुग्रीवः पण्डितो नित्यं भवान्मन्त्रविचक्षणः ॥ उभाभ्यां संप्रधार्यार्थं रोचते यत्तदुच्यताम् ॥ ३९ ॥
एवमुक्तौ तु तौ वीरावुभौ सुग्रीवलक्ष्मणौ ॥ समुदाचारसंयुक्तमिदं वचनमूचतुः ॥ ४० ॥
किमर्थं नौ नरव्याघ्र न रोचिष्यति राघव ॥ विभीषणेन यच्चोक्तमस्मिन्काले सुखावहम् ॥ ४१ ॥
अबद्ध्वा सागरे सेतुं घोरेऽस्मिन्वरुणालये ॥ लङ्का नासादितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ ४२ ॥

इदमर्धमेकं वाक्यं ॥ २९ ॥ दुस्तरत्वे हेतुः अक्षोभ्यमिति तत्रापि हेतुर्वरुणालयमिति ॥ ३० ॥ बुद्धिमन्तो भवन्त एव विचारयन्तीत्यत्राह—उपायं नाधिगच्छाम इति ॥ सर्वे । वयमेतिशेषः ॥ ३१ ॥ समुद्रमित्यर्धं ॥ लक्ष्मणव्यावृत्तये राजेत्युक्तिः ॥ ३२ ॥ शरणवरणं व्याजीकृत्य समुद्रः प्रत्यासक्त्यतिशयात्सद्य उपायं दिशेदित्यभिप्रायेणाह—खानितइति ॥ खानितः स्वपुत्रैरिति शेषः । न केवलमुत्पत्तिमात्रं तन्मूलं किं त्वतिशयोपि तदधीन इत्याह—अप्रमेयो महोदधिरिति । सगरेण रामकूटस्थेन । महामतिः उपकारज्ञ इत्यर्थः ॥ ३३ ॥ राक्षसेनेति स्थलज्ञतोक्ता । विपश्चितेति तात्कालिकबुद्धिमत्ता । आजगामेत्यनेन कालान्तरे देशान्तरे सुग्रीवादिप्रश्न इति गम्यते ॥ ३४ ॥ विपुलग्रीव इत्यनेन कुतूहलित्वमुक्तं । आरेभइत्यनेन आरम्भमात्र एव सूक्ष्मज्ञतया रामेण सहसा सुग्रीवविवक्षितं ज्ञातमित्युच्यते । उपवेशनं उपासनं ॥ ३५ ॥ प्रकृत्येत्यर्धमेकं वाक्यं ॥ अरोचत तदुपवेशनमित्यनुषङ्गः ॥ ३६ ॥ महातेजाः तात्कालिकहर्षप्रकाशकदेहकान्तिमान् । अन्यान्विहाय सुग्रीवं प्रति वचने हेतुःहरीश्वरमिति । सत्क्रियार्थं विभीषणमन्त्रबहुमानार्थं । क्रियादक्षः स्वयं कार्यकरणसमर्थोपि ॥ ३७—३८ ॥ पण्डितः मन्त्रसमर्थः । उभाभ्यामिति चतुर्थी । अर्थं प्रयोजनं संप्रधार्य निश्चित्य । यत्कार्यमुभाभ्यां रोचते तदुच्यतामितिसंबन्धः ॥ ३९ ॥ समुदाचारः अञ्जलिबन्धाद्युपचारः तत्संयुक्तमिति क्रियाविशेषणं ॥४०॥ अस्मिन्काले उपायमन्तरा दर्शनकाले । सुखावहं अयत्नेन कार्यसाधकं । नौआवयोः ॥ ४१ ॥ रामशरणागतेः फलं सेतुबन्धनमित्याशयेनाह—अबद्ध्वेति ॥ घोरे तिमितिमिङ्गिलादिसत्त्वाधिष्ठितत्वेन दुस्तरे । सेन्द्रैरिति । किं पुनरस्माभिरिति भावः ॥ ४२ ॥

ति० ससैन्यावरुणालयंयथातराम तथाकैरुपायैर्नदनदीपतिमभिगच्छाम । मार्गप्राप्तये तद्वदेतिशेषः ॥ ३१ ॥ ति० एवं विभीषणोक्तंश्रुत्वा यत्ररामोवर्तते तंदेशंसलक्ष्मणःसुग्रीवआजगामेतिसंबन्धः ॥ ३४ ॥

[पा० १ ख. ग. ङ. झ. ट. उपायैरभिगच्छामः. च. छ. ञ. उपायैरधि. २ ङ. च. झ. ञ. धर्मात्मा. ३ ग. ङ.—ट. ज्ञातेःकार्यं. ४ ख. ग. ङ. च. छ. झ. ञ. ट. विभीषणेनोक्तं. ज. विभीषणेनोक्ते. ५ ङ. झ. रामस्यास्याप्यरोचत. ६ ख. ग. ङ. च. झ. ञ. ट. यत्तूक्तं.

विभीषणस्य शूरस्य यथार्थं क्रियतां वचः ॥ अलं कालात्ययं कृत्वा समुद्रोऽयं नियुज्यताम् ॥
यथा सैन्येन गच्छामः पुरीं रावणपालिताम् ॥ ४३ ॥
एवमुक्तः कुशास्तीर्णे तीरे नदनदीपतेः ॥ संविवेश तदा रामो वेद्यामिव हुताशनः ॥ ४४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

विंशः सर्गः ॥ २० ॥

रावणचोदनयासागरोत्तरतीरमेत्य रामादिवृत्तान्तावगमनपूर्वकं लङ्कांपुनरागतेनशार्दूलनाम्नाचारेणरावणे रामवृत्तान्तनिवेदनम् ॥ १ ॥ रावणप्रेषितेनपक्षिरूपधारिणाशुकनाम्नाराक्षसदूतेनान्तरिक्षस्थेनैवसता सुग्रीवे रावणसंदेशनिवेदनम् ॥ २ ॥ गगनमुद्गतैर्वानरैर्भूयापणपूर्वकंपीडितेनशुकेन स्वप्रार्थितरामनियोगात्तैर्विमोक्षणे पुनरन्तरिक्षमेत्यसुग्रीवंप्रति संदेशप्रार्थनम् ॥ ३ ॥ शुकंप्रतिसुग्रीवेणरावणे रामापराधात्पुत्रमित्रादिभिस्सहमारणप्रतिज्ञानरूपप्रतिसंदेशनिवेदनचोदना ॥ ४ ॥ अङ्गदेन शुकेदूतत्वनिषेधेनचारत्वसमर्थने वानरैःपुनर्ग्रहणेनबन्धनपूर्वकं तत्पीडनम् ॥५॥ शुकप्रार्थितेनरामेण तेभ्यस्तन्निवारणम् ॥६॥

ततो निविष्टां ध्वजिनीं सुग्रीवेणाभिपालिताम् ॥ ददर्श राक्षसोऽभ्येत्य शार्दूलो नाम वीर्यवान् ॥१॥
चारो राक्षसराजस्य रावणस्य दुरात्मनः ॥ तां दृष्ट्वा सर्वतो व्यग्रं प्रतिगम्य स राक्षसः ॥
प्रविश्य लङ्कां वेगेन रावणं वाक्यमब्रवीत् ॥ २ ॥
एष वानरऋक्षौघो लङ्कां समभिवर्तते ॥ अगाधश्चाप्रमेयश्च द्वितीय इव सागरः ॥ ३ ॥
पुत्रौ दशरथस्येमौ भ्रातरौ रामलक्ष्मणौ ॥ उत्तमायुधसंपन्नौ सीतायाः पदमागतौ ॥ ४ ॥
एतौ सागरमासाद्य सन्निविष्टौ महाद्युती ॥ ५ ॥
बलमाकाशमावृत्य सर्वतो दशयोजनम् ॥ तत्त्वभूतं महाराज क्षिप्रं वेदितुमर्हसि ॥
तव दूता महाराज क्षिप्रमर्हन्त्यवेक्षितुम् ॥ ६ ॥
उपप्रदानं सान्त्वं वा भेदो वात्र प्रयुज्यताम् ॥ ७ ॥

शूरस्य मन्त्रशूरस्य । यथार्थं परमाप्तोक्तत्वादिति भावः । नियुज्यतां प्रार्थ्यतां । यथेति । तथा नियुज्यतामिति पूर्वेणान्वयः ॥ ४३ ॥ संविवेश संवेशनमकरोत् । वेद्यामिव हुताशन इत्यनेन ज्वलिष्यमाणत्वं व्यज्यते ॥ ४४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनविंशःसर्गः ॥ १९ ॥

अथ विभीषणनिर्गमनानन्तरं लङ्कावृत्तान्तं प्रस्तौति —तत इत्यादिना ॥ निविष्टां समुद्रतीरस्थां । ध्वजिनीं सेनां । वीर्यवानिति दर्शनसामर्थ्योक्तिः ॥ १ ॥ चार इत्यादि सार्धश्लोकः ॥ दुरात्मनः दुर्बुद्धेः । अकाले चारप्रेषितुरित्यर्थः ॥ २ ॥ अगाधः सेनापक्षे दुष्प्रवेश इत्यर्थः । अप्रमेयः अपरिच्छेद्यः ॥ ३ ॥ पदं स्थानं प्रति । आगतौ ॥ ४ ॥ एतावित्यर्धमेकं ॥ ५ ॥ बलमिति ॥ पूर्वं सेनासन्निवेशमात्रमुक्तं । अत्र तद्विस्तार उच्यते । आकाशं अवकाशं । सर्वतः चतुःपार्श्वेषु । दशयोजनपरिमितमवकाशमावृत्य स्थितं तत्त्वभूतमिति मया सामान्यतो ज्ञातं यथार्थभूतं यथा भवति तथाज्ञातुमर्हसीत्यर्थः ॥ ६ ॥ उपप्रदान-

---

ति० सागराय सागरप्रार्थनार्थं । नियुज्यतां । स्वात्मेतिशेषः ॥ ४३ ॥ इत्येकोनविंशःसर्गः ॥ १९ ॥

स० सीतायाःपदं त्राणमुद्दिश्य अत्रवर्ततइतिचिह्नंज्ञात्वावा शब्दंहनुमद्बोधितंश्रुत्वावा । " पदंव्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु " इत्यमरः ॥ ४ ॥ स० उपप्रदानं सीतायारामसमीपंगत्वादानं । सान्त्वं सीतादानंविनाऽमूल्यरत्नादिदानेनसमाधानं ।

[पा०] १ ङ. झ. सागराय. २ ङ. च. झ. सर्वतोऽभ्यग्रां. ३ क. ग. ङ.—ट. आविश्य. ४ क. ट. राजानमिदमब्रवीत्. ५ ग. ङ. झ. ट. एषवैवानरक्षौघो. ६ ङ. झ. ट. उत्तमौरूपसंपन्नौ. ७ ख.—च. झ. ञ. ट. बलंचाकाश. ८ क. च. छ. ज. तत्त्वमेतन्महाराज. घ. तथाभूतं. ९ घ. ङ. च. झ. ञ. ट. महंन्तिवेदितुं.

शार्दूलस्य वचः श्रुत्वा रावणो राक्षसेश्वरः ॥ उवाच सहसा व्यग्रः संप्रधार्यार्थमात्मनः ॥
शुकं नाम तदा रक्षो वाक्यमर्थविदां वरम् ॥ ८ ॥
सुग्रीवं ब्रूहि गत्वा त्वं राजानं वचनान्मम ॥ यथासंदेशमक्लीबं श्लक्ष्णया परया गिरा ॥ ९ ॥
त्वं वै महाराज कुलप्रसूतो महाबलश्चर्क्षरजस्सुतश्च ॥
न कश्चिदर्थस्तव नास्त्यनर्थस्तथा हि मे भ्रातृसमो हरीश ॥ १० ॥
अहं यद्यहरं भार्यां राजपुत्रस्य धीमतः ॥ किं तत्र तव सुग्रीव किष्किन्धां प्रतिगम्यताम् ॥ ११
न हीयं हरिभिर्लङ्का शक्या प्राप्तुं कथंचन ॥ देवैरपि सगन्धर्वैः किं पुनर्नरवानरैः ॥ १२ ॥
स तथा राक्षसेन्द्रेण संदिष्टो रजनीचरः ॥ शुको विहङ्गमो भूत्वा तूर्णमाप्लुत्य चाम्बरम् ॥ १३ ॥
स गत्वा दूरमध्वानमुपर्युपरिसागरम् ॥ संस्थितो ह्यम्बरे वाक्यं सुग्रीवमिदमब्रवीत् ॥
सर्वमुक्तं यथादिष्टं रावणेन दुरात्मना ॥ १४ ॥
तं प्रापयन्तं वचनं तूर्णमाप्लुत्य वानराः ॥ प्रापद्यन्त दिवं क्षिप्रं लोप्तुं हन्तुं च मुष्टिभिः ॥ १५ ॥
स तैः प्लवङ्गैः प्रसभं निगृहीतो निशाचरः ॥ गगनाद्भूतले चाशु परिगृह्य निपातितः ॥ १६ ॥
वानरैः पीड्यमानस्तु शुको वचनमब्रवीत् ॥ न दूतान्घ्नन्ति काकुत्स्थ वार्यन्तां साधु वानराः ॥ १७
यस्तु हित्वा मतं भर्तुः स्वमतं संप्रभाषते ॥ अनुक्तवादी दूतः सन्स दूतो वधमर्हति ॥ १८ ॥

मित्यर्धमेकं वाक्यं ॥ दण्डस्य त्ववकाश एव नास्तीति भावः । अत्र रामविषये ॥ ७ ॥ शार्दूलस्येत्यर्धत्रयमेकान्वयं ॥ अर्थः कर्तव्यार्थः ॥ ८ ॥ भेदप्रयोगमुपदर्शयति—सुग्रीवमिति ॥ मम वचनाद्ब्रूहि मयोक्तमिति ब्रूहि । अक्लीबं सधाष्टर्यमित्यर्थः । श्लक्ष्णयापारुष्यरहितया । परया श्राव्यया ॥ ९ ॥ वचनमेवाह—त्वमिति ॥ वचनगाम्भीर्यव्यञ्जनाय गुरुवृत्तारम्भः । हे महाराज त्वं कुलप्रसूतः । सूर्यपुत्रत्वादिति भावः । तेन निष्कारणवैरं त्वया कर्तुमनुचितमिति व्यज्यते । महाबलः अल्पबलं राममवलम्बितुं नार्हसीत्यर्थः । ऋक्षरजस्सुतः ब्रह्मपौत्रत्वेन मम बन्धुभूतोसीत्यर्थः । तव रामावलम्बने कश्चिदर्थो नास्ति । अनवलम्बने अनर्थश्च नास्ति । अफलं वैरं तव नोचितमिति भावः । वालिसंबन्धेन भ्रातृसमत्वान्मयैव प्रणयं कुर्वित्यभिप्रायेणाह—तथा हीति ॥ १० ॥ सीतापहरणमेव त्वत्कृतो महाननर्थ इत्याह—अहमिति ॥ राजपुत्रस्य तवेति पदाभ्यनरवानरयोः कः संबन्ध इत्युक्तं । धीमत इसुग्रीवविशेषणं । तत्र हरणविषये । किं का हानिरित्यर्थः ॥ ११ ॥ आरब्धस्यान्तगमनमिति न्याये प्रक्रान्तं कार्यं कथं त्यज्यतामित्यत्राह—नहीति उक्तमर्थं कैमुतिकन्यायेन द्रढयति—देवैरिति अत्र नरग्रहणात् पूर्वार्धे हरिपदं नरोपलक्षकं बोध्यं त्वमेवामुमर्थमालोचयेतिभावः । इयं लङ्का प्राप्तुं शक्येत्युत्तरार्धेनुषज्यते ॥ १२ ॥ अम्बरमाप्लुआजगामेति शेषः ॥ १३ ॥ उपर्युपरिसागरं सारस्याव्यवहितोपरि प्रदेशे " उपर्यध्यधसः सामीप्ये इति द्विर्वचनं।आम्रेडितान्तत्वात् "उभसर्वतसोः" इति द्वितीया ॥१४॥ प्रापयन्तं श्रावयन्तं । प्रापद्यन्त पर्यवारयन् ॥ १५ ॥ निगृहीतः बद्धः ॥ १६—१७ दूतोप्ययुक्तकारी वध्य एवेत्याशङ्क्य नाहं तथा अ

भेदः मित्रभेदः । चतुर्थोपायभूतोदण्डस्तु रामसेनावलोकनानन्तरं अयमशक्यइति शार्दूलेननोपन्यस्तः ॥ ७ ॥ स० त्वंमेभ्रातसमः वालिरावणयोःसख्यान्मदनुजसमइत्युक्तिः ॥ एवंदैवान्निस्सृतयावाण्या वालिनइवरावणस्यवधोपि रामाद्भविष्यतीतिसूच्य ॥ १० ॥ स० सगन्धर्वैः हरिभिः बहुवचनमाद्यर्थे । इन्द्रादिभिः नारायणादिभिर्वा । देवैः । "हरिर्वातार्कचन्द्रेन्द्रोपेन्द्र"—इत्य दिविश्वः ॥ १२ ॥ ती० लोप्तुं पक्षावितिशेषः ॥ १५ ॥ स० अवतारितः रामाज्ञांविनाहनने भूपकोपास्पदतास्यादिति मन्त्र

[पा०] १ ङ. झ. ट. शुकंसाधु. २ क. ङ. च. झ. ट. गत्वाशु. ३ ङ. च. छ. झ. ट. कश्चनार्थः. ४ घ. राक्षस ५ क. ग. यथोद्दिष्टं. ६ ग. ङ. झ. प्रापयन्ततदा. क. च. छ. प्रारभन्ततदा. ७ क. ग. छ. ट. परिगृह्यावतारितः. ङ. च. झ. प्रतिगृह्यावतारितः. ८ ङ. झ. ट. संप्रधारयेत.

शुकस्य वचनं श्रुत्वा रामस्तु परिदेवितम् ॥ उवाच मा वधिष्टेति हतः शाखामृगर्षभान् ॥ १९ ॥
स च पत्रलघुर्भूत्वा हरिभिर्दर्शिते भये ॥ अन्तरिक्षस्थितो भूत्वा पुनर्वचनमब्रवीत् ॥ २० ॥
सुग्रीव सत्त्वसंपन्न महाबलपराक्रम ॥ किं मया खलु वक्तव्यो रावणो लोकरावणः ॥ २१ ॥

स एवमुक्तः प्लवगाधिपस्तदा प्लवङ्गमानामृषभो महाबलः ॥
उवाच वाक्यं रजनीचरस्य चारं शुकं तूर्णमदीनसत्त्वः ॥ २२ ॥
न मेऽसि मित्रं न तथाऽनुकम्प्यो न चोपकर्ताऽसि न मे प्रियोसि ॥
अरिश्च रामस्य सहानुबन्धः स मेसि वालीव वधार्हो वध्यः ॥ २३ ॥
निहन्म्यहं त्वां ससुतं सबन्धुं सज्ञातिवर्गं रजनीचरेश ॥
लङ्कां च सर्वां महता बलेन क्षिप्रं करिष्यामि समेत्य भस्म ॥ २४ ॥
न मोक्ष्यसे रावण राघवस्य सुरैः सहेन्द्रैरपि मूढ गुप्तः ॥
अन्तर्हितः सूर्यपथं गतो वा तथैव पातालमनुप्रविष्टः ॥
[गिरीशपादांबुजसंगतो वा हतोसि रामेण सहानुजस्त्वम् ॥] २५ ॥

क्तकारीत्याशयेनाह—यस्त्विति ॥ १८ ॥ परिदेवितं परिदेवनरूपं वचनं । मा वधिष्टेति प्रत्येकोक्त्यभिप्रायेणैकवचनं । वधिष्टेतीत्यत्र आर्षः सन्धिः ॥ १९ ॥ पत्रलघुः लघुपत्रः । वानरैः प्रायेण लूनपक्ष इत्यर्थः । भये दर्शिते दर्शितेपि ॥ २० ॥ स्ववाक्यश्रवणाय सुग्रीवं प्रशंसति—सुग्रीवेति॥लोकरावण इत्येनेन प्रतिवचनानादाने मां हनिष्यतीति भावः ॥ २१ ॥ स एवमिति। लोके कश्चिदधिपतिरपि तज्जातीयो न भवति। तद्व्यावर्तनाय प्लवङ्गमानामृषभ इत्युक्तं । महाबलः तृणीकृतरावणइत्यर्थः । अदीनसत्त्वः अदीनमनस्कः । अत्र वंशस्थोपेन्द्रवज्रेन्द्रवज्रायोगादुपजातिवृत्तभेदः ॥ २२ ॥ भ्रातृसमोसीत्यस्योत्तरमाह—न मेसीति ॥ मे मित्रं नासीत्यर्थः । अनुकम्प्यः दयनीयश्च नासि । मे उपकर्ता च नासि । मे प्रियोपि नासि । अतः कथं भ्रातृसमोसीति भावः । प्रत्युत मित्रशत्रुत्वाच्छत्रुरेवासीत्याह—अरिश्चेति । ननु नोपकर्तृत्वादिना मित्रं किन्तु सख्युर्वालिनो भ्रातृत्वादित्यत आह—स मेसीति । नः अरिभूतस्त्वमपि वालीव मे वध्योसि । अरिमित्रस्याप्यरित्वादिति भावः । इदमेव मनसि कृत्वोक्तं वधार्हेति । अनेन अहं यद्यहरं भार्यामित्येतदुत्तरं ॥ २३ ॥ न हीयं हरिभिर्लङ्केत्यस्योत्तरमाह—निहन्मीति ॥ ज्ञातिवर्गः कुम्भकर्णादिः । विभीषणस्तु न ज्ञातिरिति भावः । सुतादयः किमर्थं हन्तव्या इत्यपेक्षायां राजापराधादित्याह—रजनीचरेशेति । बलेन सेनया ॥ २४ ॥ मयि लङ्कास्थे खल्वेवं करिष्यसि । स्थलान्तरं गमिष्यामीति शङ्कायामाह—न मोक्ष्यस इति ॥ राघवस्य राघवात् । पञ्चम्यर्थे षष्ठी । मूढेति संबुद्धिः । सूर्यपथं सूर्यद्वारं । गतः सन्

भुवमवतारितः ॥ १६ ॥ **ती०** पक्षलघुः पक्षैर्लघुः लूनपक्षइतियावत् ॥ **स०** पक्षलघुः कपिभिर्लुप्तात्पपक्षः पूर्वंभूत्वा अनन्तरं रामाज्ञयाहरिभिरभयेदर्शिते दत्तेसति पक्षैः छिन्नप्ररूढैः लघुः शीघ्रगामीभूत्वेत्यर्थोवा । यत्तु लूनपक्षत्वे अन्तरिक्षगमनासंभवः । रामाज्ञाननुष्ठानप्रसङ्गश्चेति कैश्चिदभिहितं तत्तु शुकरूपस्यमायिकत्वेन पक्षच्छेदेपि मायया पुनःप्ररोहणस्यसंभवादन्तरिक्षगमनसंभवेन रामाज्ञातः पूर्वमेव कतिपयतल्लोपनेन तदाज्ञाभङ्गस्याप्यभावेनचायुक्तमितिज्ञेयम् ॥ २० ॥ **स०** प्लवगाधिपः एवमुक्तोऽभूत् । एवमुक्तः प्लवङ्गमानामृषभःसुग्रीवः। रजनीचरस्य रावणस्य। चारं दूतं । दीनंशुकंप्रत्युवाच । प्लवगान् आधितः मनोव्यथातःपातीतिवा तथा । प्लवङ्गेषुमानः चित्तोन्नतिर्यस्यसः प्लवङ्गमानः । सचासौनविद्यते मृषा मिथ्यावचनं येषांते अमृषाः तेषांभइवभः इन्द्रइतियावत् । " भःस्यान्मयूखेशकेच " इति " मानश्चित्तोन्नतौ " इतिचविश्वः ॥ अदीनसत्त्वः अदीनान्तःकरणः ॥ २२ ॥ **ति०** त्वां मन्मित्ररामारिं । सर्वैःसमेत्येत्यन्वयः ॥ २४ ॥ **शि०** अतः अन्तर्हितत्वादिकंप्राप्तोपिसहानुजस्त्वं रामेणहतः ।

[**पा०**] १ च. छ. ठ. पक्षलघुः. २ ख.—ट. अन्तरिक्षेस्थितो. ज. अन्तरिक्षेस्थिरो. क. अन्तरिक्षगतो. ३ च. ञ. शुकोवचनं. क. भूयोवचनं. ४ ङ. च. झ. ट. शुद्धमदीन. ५ ग. ङ. झ. ट. ततोसि. घ. त्वमेव. ६ ङ. झ. ञ. सर्वैः करिष्यामि. ७ ज. भग्नां. ८ ङ.—ट. सर्वैः. ९ इदमर्धं ङ. झ. ञ. ट. पाठेषुदृश्यते.

तस्य ते त्रिषु लोकेषु न पिशाचं न राक्षसम् ॥ त्रातारमनुपश्यामि न गन्धर्वं न चासुरम् ॥ २६ ॥
अवधीर्यज्जरावृद्धमक्षमं किं जटायुषम् ॥ २७ ॥
किं नु ते रामसान्निध्ये सकाशे लक्ष्मणस्य वा ॥ हृता सीता विशालाक्षी यां त्वं गृह्य न बुध्यसे ॥२८॥
महाबलं महात्मानं दुर्धर्षममरैरपि ॥ न बुध्यसे रघुश्रेष्ठं यस्ते प्राणान्हरिष्यति ॥ २९ ॥
ततोऽब्रवीद्वालिसुतस्त्वङ्गदो हरिसत्तमः ॥ नायं दूतो महाराज चारिकः प्रतिभाति मे ॥ ३० ॥
तुलितं हि बलं सर्वमनेनात्रैव तिष्ठता ॥ गृह्यतां मा गमल्लङ्कामेतद्धि मम रोचते ॥ ३१ ॥
ततो राज्ञा समादिष्टाः समुत्प्लुत्य वलीमुखाः ॥ जगृहुश्च बबन्धुश्च विलपन्तमनाथवत् ॥ ३२ ॥
शुकस्तु वानरैश्चण्डैस्तत्र तैः संप्रपीडितः ॥ व्याक्रोशत महात्मानं रामं दशरथात्मजम् ॥
लुप्येते मे बलात्पक्षौ भिद्येते च तथाऽक्षिणी ॥ ३३ ॥
यां च रात्रिं मरिष्यामि जाये रात्रिं च यामहम् ॥ एतस्मिन्नन्तरे काले यन्मया ह्यशुभं कृतम् ॥
सर्वं तदुपपद्येथा जह्यां चेद्यदि जीवितम् ॥ ३४ ॥
नाघातयत्तदा रामः श्रुत्वा तत्परिदेवनम् ॥ वानरानब्रवीद्रामो मुच्यतां दूत आगतः ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे विंशः सर्गः ॥ २० ॥

अन्तर्हितोपि न मोक्ष्यसे ॥ २५ ॥ त्रिदशेश्वरेपि त्रातुमनीश्वरे का वार्ता क्षुद्राणामित्याह—तस्येति ॥ तस्य रामशरविद्धस्य ॥ २६ ॥ यदि रामसहाये स्थितोसि तर्हि ते जटायुषोवस्था स्यादित्यत्राह—अवधीरिति अर्धमेकं वाक्यं । जरया वृद्धं अत एवाक्षमं असमर्थं । जटायुषमवधीरिति यत्तत्र ते किं वीर्यमिति शेषः । नाहं तादृश इति भावः ॥ २७ ॥ भार्याहरणकाले किमप्यकुर्वन्रामः किमिदानीं करिष्यतीत्यत्राह—किंन्विति ॥ ते त्वया । सन्निधिरेव सान्निध्यं । विशालाक्षीत्यनेन सीताहरणं रामस्यात्यन्तासह्यमित्युच्यते । गृह्य गृहीत्वा । न बुध्यसे भाव्यनर्थमिति शेषः ॥ २८ ॥ न बुध्यस इत्युक्तं विवृणोति—महाबलमिति ॥ महात्मानं महाबुद्धिं ॥ २९ ॥ हरिसत्तमः इङ्गितप्रेक्षणादिज्ञ इति यावत् । चारिकः चारः । स्वार्थे ठक् । दूतो हि न वध्यः चारस्तु वध्य एवेति भावः ॥ ३० ॥ तुलितं तुलया मितं । परिच्छिद्य ज्ञातमिति यावत् । ॥ ३१ ॥ राज्ञा सुग्रीवेण ॥ ३२ ॥ शुकस्त्वित्यादि सार्धश्लोक एकान्वयः ॥ चण्डैः अत्यन्तकोपनैः । पितृसंबन्धकीर्तने दया भवेदिति दशरथात्मजमित्युक्तं । पक्षौ पूर्वलुप्तशेषौ ॥ ३३ ॥ यामित्यादिसार्धश्लोक एकान्वयः ॥ रात्रिशब्दोऽहोरात्रवचनः । यां च रात्रिं यस्मिंश्च दिवसे । मरिष्यामि । यस्मिंश्च जाये अजाये "अनित्यमागमशासनं" इत्यडभावः । जातोस्मि । एतस्मिन्नन्तरे जननमरणयोर्मध्यकाले मया यदशुभं कृतं तत्सर्वं निरपराधस्य मे घातयिता त्वं उपपद्येथाः प्राप्नुहि । चेदिति प्रसिद्ध्यर्थमव्ययं ॥ ३४ ॥ नाघातयत् वधाय्यवर्तयत् । मुच्यतां बन्धनान्मुच्यतां । निर्यापणं तु दक्षिणकूले ॥ ३५ ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने विंशः सर्गः॥२०॥

निहतप्रायोसि ॥ सार्धश्लोकएकान्वयी ॥ २५ ॥ **ति०** पिशाचादीनामेकैकंसमुदितंचत्रातारंनपश्यामि । अतएवनञ्पञ्चकंचरितार्थं ॥ २६ ॥ **रामानु०** चारश्चरणं । तदस्यास्तीतिचारीकः । " अतइनिठनौ " इतिठन् ॥ ३० ॥ तुलितं इयत्तयापरिच्छिन्नं ॥ ३१ ॥ इतिविंशःसर्गः ॥ २० ॥

[**पा०**] १ क. ग. ङ. छ.—ट. त्रातारंनानुपश्यामि. च. त्रातारंनाधिगच्छामि. २ ङ.—ट. अवधीस्त्वंजरावृद्धंगृध्रराजं जटायुषं. क.—घ. अवधीस्त्वंजरावृद्धंगृध्रराजमपक्षकं. ३ ङ. च. झ. ञ. ट. दुराधर्षंसुरैरपि. ४ ङ. झ. ञ. ट. महाप्राज्ञचारकः. ५ ङ. च. झ. ञ. ट. मनेनतवतिष्ठता. ६ ङ. च. झ. ञ. ट. व्याचुक्रोश.

एकविंशः सर्गः ॥ २१ ॥

रामेण समुद्रप्रसादनायतत्तीरेसमास्तृतदर्भेषु निजभुजोपधानेननियमाच्छयनम् ॥१॥ रामे दिवसत्रयमनवारतंकुशशयनेशयानेपि समुद्रेस्वशरीरमदर्शयति कोपाद्रामेण लक्ष्मणकराद्धनुरानयनेनकतिपयशरप्रक्षेपेण जलधिजलविक्षोभपूर्वकंजलधिजिघांसया शरान्तरसन्धानायधनुराकर्षणे लक्ष्मणेन सप्रतिषेधनंधनुरालंबनम् ॥ २ ॥

ततः सागरवेलायां दर्भानास्तीर्य राघवः ॥ अञ्जलिं प्राङ्मुखः कृत्वा प्रतिशिश्ये महोदधेः ॥
बाहुं भुजगभोगाभमुपधायारिसूदनः ॥ १ ॥
जातरूपमयैश्चैव भूषणैर्भूषितं पुरा ॥ २ ॥
वरकाञ्चनकेयूरमुक्ताप्रवरभूषणैः ॥ भुजैः परमनारीणामभिमृष्टमनेकधा ॥ ३ ॥
चन्दनागरुभिश्चैव पुरस्तादधिवासितम् ॥ बालसूर्यप्रतीकाशैश्चन्दनैरुपशोभितम् ॥ ४ ॥

एवं प्रासङ्गिकं परिसमाप्य एकान्तरितपूर्वसर्गान्तोदितकथाशेषमुपक्षिपति—तत इत्यादि सार्धश्लोक एकान्वयः ॥ ततः शुकमोक्षणानन्तरं । सागरवेलायां शर्कराप्रचुरायां । दर्भान् शिताग्रकुशान् । आस्तीर्य । राघवः सर्वशरण्यकुलप्रसूतः । महोदधेः अञ्जलिं कृत्वा । भुजगभोगाभं अहिकायवदतिमृदुलं बाहुं । उपधाय उपधानीकृत्य । प्राङ्मुखः सन् प्रतिशिश्ये । प्रतीत्यनेन तदानीं सागराभिमुखमपरः सागर इव स्थित इत्यवगम्यते । अरिसूदन इत्यनेन तादृशदशायामपि शत्रूणामधृष्यतया स्थित इत्युच्यते । अत्र विशेषणमहिम्ना अतिसुकुमारस्य कथमतिकठिनावनितलशयनं अखिलरक्षकस्य कथमन्यतो रक्षापेक्षेति वाल्मीकेः खेदो द्योत्यते ॥ १ ॥ अमुमेवार्थं प्रपञ्चयति—सार्धसप्तश्लोकैः । जातरूपमयैरित्यादि ॥ जातरूपमयैः चकाराद्रत्नमयैः । एवकारोऽयोगव्यवच्छेदार्थः । पुरा अयोध्यावासकाले । अवतारात्पूर्वं वा ॥ २ ॥ वरकाञ्चनेति परमनारीभुजविशेषणं । भुजैः हस्तैः । तदेकदेशलक्षणा । परमनारीणां सैरन्ध्रिकाणां । अनेकधा स्नानालङ्करणादिषु चन्दनागरुकुङ्कुमप्रभृतिभिः बहुप्रकारेण । अभिमृष्टं संमृष्टं ॥ ३ ॥ अधिवासितं सञ्जातगन्धं । बालसूर्येति विशेषणात् द्वितीयचन्दनशब्दो रक्तचन्दनपरः । तच्च कुङ्कुम । " कुङ्कुमं घुसृणं प्रोक्तं लोहितं रक्तचन्दनं " इतिहलायुधः । आदौ चन्दनागरुभ्यां चर्चितं अथ कुङ्कुमैरिति बोध्यं । कश्चिदाह । परमनारीणामित्यनेन सीताव्यतिरिक्ताश्च भार्याः सन्तीति तन्न । नहि बालकाण्डे कुत्रचिद्रामस्य दारान्तरोद्वाहः प्रतिपाद्यते । प्रत्युत " रामस्तु सीतया सार्धं विजहार बहूनृतून् । मनस्वी तद्गतस्तस्या नित्यं हृदि समर्पितः " इति सीतया सह निरन्तरभोग एवोच्यते । अतएव सीताप्याह " समा द्वादश तत्राहं राघवस्य निवेशने । भुञ्जाना मानुषान्भोगान्सर्वकामसमृद्धिनी " इत्यत्यन्तसंयोगे द्वितीयया निरन्तरभोगं । तत्कुतोस्य दारान्तरावकाशः । ननु रामस्य दयिता भार्येति विशेषणाद्रोहिणी यथेति ताराणामन्यतमया रोहिण्या दृष्टान्तीकरणाच्च भार्यान्तरं तस्य व्यज्यत इति चेन्न । दयितो भ्रातुरितिवदनुगमनानर्हत्वाय तथा विशेषितत्वात् किं भरतो रामस्य न दयितः । " तामेवेक्ष्वाकुनाथस्य भरतस्य कथां कुरु । न सर्वे भ्रातरस्तात भवन्ति भरतोपमाः " इत्यादिविरोधात् । रामवाल-

स० सागरवेलायां समुद्रतीरे । महोदधेःअञ्जलिंकृत्वा बद्ध्वा । प्राङ्मुखःसन्प्रातांशिश्ये । शयनप्रातांनधिकृतवान् ॥ प्रतिना निर्दोषस्यरामस्यस्वाभाविकीनिद्रानवक्तुंशक्येतितत्प्रतिनिधिभूतंचक्षुर्निमीलनमात्रमितिसूचयति ॥ १ ॥ स० परमनारीणां कौसल्यादीनां । परमाश्चते अरयोनभवन्तीतिनारयोब्रह्माद्याभक्ताः तेषां । अथवा खदत्तपारम्योवरुणस्तस्यनार्योगङ्गाद्याः तासांबाहुभिस्तरङ्गैः । स्वेष्ववतारेषु रमायाअप्यवतारबाहुविश्येन नारीणामितिबहुवचनबोधितबहुविधता संभवतीति नैककामिनीव्रततोपहतिरितिज्ञेयं ॥ शि० परमनारीणां समवेतजनकराजवेश्मस्थाङ्गनानां । भुजैः अनेकधा बहुवारं । पुरस्तात् विवाहसमये । अभिमृष्टं श्रमापनयनहेतुकनिपीडनादौस्पृष्टं । किंच नारीभुजयोःपूज्यत्वाद्बहुवचनमिति नारीशब्देनसीतैवग्राह्या । किंच अनारीणां नारीसंसर्गरहितानांनैष्ठिकानांहनुमदादीनामित्यर्थः । भुजैरभिमृष्टं । सख्यभावनयास्पृष्टं । अतएवपरमं तेषांतृप्तिकारकं । किंच यत् अरीणांभुजैर्नाभिमृष्टं तत् परं अत्युत्कृष्टं अपालकं अज्ञातअनधातुप्रकृतिकक्विबन्तप्रकृतिकामन्तंसामान्येनपुंसकं । दीर्घाभ-

[पा०] १ ङ. च. छ. झ. ञ. ट. मणिकाञ्चन. २ ङ. झ. ट. दभिसेवितं. ३ ङ. छ.—ट. प्रकाशैश्च.

शयने चोत्तमाङ्गेन सीतायाः शोभितं पुरा ॥ तक्षकस्येव संभोगं गङ्गाजलनिषेवितम् ॥ ५ ॥
संयुगे युगसंकाशं शत्रूणां शोकवर्धनम् ॥ सुहृदानन्दनं[1] दीर्घं सागरान्तव्यपाश्रयम् ॥ ६ ॥
अस्यता च पुनः सव्यं ज्याघातविगतत्वचम् ॥ दक्षिणो दक्षिणं बाहुं महापरिघसन्निभम् ॥ ७ ॥

भ्यातिशयेन सौकुमार्यातिशयेन च राजगृह एवावस्थाय दिव्यसुखानुभवयोग्यावपि सीतालक्ष्मणौ रामनुगताविति हि तत्र मुनिहृदयं । रोहिणी चेयमन्या प्रसिद्धाया नित्यानुगमनासंभवात् । ननु च "हृष्टाः खलु भविष्यन्ति रामस्य परमाः स्त्रियः । अप्रहृष्टा भविष्यन्ति स्नुषास्ते भरतक्षये" इति स्नुषासाहचर्याद्रामस्य स्त्रियः पत्न्यो बह्वयः सन्तीति गम्यते । सुन्दरकाण्डेपि "स्त्रीभिस्तु मन्ये विपुलेक्षणाभिस्त्वं रंस्यसे वीतभयः कृतार्थः" इति सीतया चोच्यते । अत्रापि भुजैः परमनारीणामभिमृष्टमनेकधेत्युक्तं । तस्माद्बह्वयः पत्न्यो रामस्य सन्तीत्यवगम्यते । मैवं । रामस्य परमाः स्त्रिय इति रामसंबन्धिन्यः कौसल्यासीतातद्दासीप्रभृतय उच्यन्ते । पूजायां बहुवचनेन सीतैवोच्यते । ते स्नुषा इतिवत् । न हि भरतस्यानेकाः स्त्रियः सन्तीत्यत्र प्रमाणमस्ति । त्वं रंस्यस इत्यत्रापि लौकिकरीतिमनुसृत्य सीतोक्तवती । परमनारीणामित्यत्रापि अलंकर्त्रीणामित्यर्थ उक्तः । यद्वा अभिमृष्टं अभिमर्शनार्हं । आशंसायां क्तः । परमनार्यः श्रीभूमिनीलाः । आत्मानं मानुषं राम एव हि मन्यते ऋषिस्तु रामस्य विष्णुत्वं व्यक्तीकरोत्येव । जज्ञे विष्णुः सनातन इत्याह । ननु राजसूयाश्वमेधाद्यनुष्ठानान्यथानुपपत्त्या रामस्यानेकपत्न्यः कल्प्यन्ते । कामं कल्प्यन्तां न ता इह संबध्यन्ते । तासां केवलं धर्मार्थं वृत्तानां परिग्रष्टुं रन्तुं चायोग्यत्वात् । वस्तुतो न ताः कल्प्याः सीतयैव प्रतिमया यज्ञे पत्नीकार्यनिर्वाहस्योत्तरकाण्डे दर्शितत्वात् । न च पत्नीप्रतिनिधिभावो न भट्टाचार्येण कथ्यत इति वाच्यं । "न हि वचनविरोधे न्यायः प्रभवति" इति न्यायात् । वचनं च हेमाद्रिस्मृतिनिबन्धने दर्शितं "यदि दुष्टभार्यो दूरभार्यो वा स्यात्तदा दर्भपुञ्जीलं तत्स्थाने निधायाग्निमाधाय कुर्यात्" इति । धर्मसंस्थापनार्थं प्रवृत्तस्य रामस्याचारादपरं किं नाम मानमपेक्षणीयं । वस्तुत आचार एव प्रथमं प्रमाणं श्रुत्या पूर्वाचारं प्रदर्श्यैव कर्मविधानात् । आपस्तम्बोप्यतएव धर्मज्ञसमयः प्रमाणं वेदाश्चेत्याचारमेव प्रथमं प्रमाणमाह । अतएव स्मरन्ति च स्मर्तारः "श्रुतिर्विभिन्ना स्मृतयो विभिन्ना न चानृषेर्दर्शनमस्ति किंचित् । धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः" इति ॥ तस्मात् "चातुर्वर्ण्यं च लोकेस्मिन्स्वे स्वे धर्मे नियोक्ष्यति" इत्युक्तरामाचार एव समीचीनं प्रमाणं तद्विरुद्धाश्च न्याया न प्रभवन्ति । यद्यपि राजसूयाश्वमेधानां महिषीवद्वावातापरिवृत्तिभ्यामपि भवितव्यं । तथापि तल्लोपे तत्कार्याननुष्ठानमेव । तस्य कर्मवैकल्याहेतुत्वात् । यथा पङ्ग्वन्धादेर्यज्ञे विष्णुक्रमाज्यावेक्षणादिलोपेन न यज्ञलोपः । तत्तन्मन्त्रोच्चारणस्यैव कार्यत्वात् । तस्मात्केवलन्यायसञ्चारेणापन्यायमार्गो नानुसरणीयः । किंतु सर्वाचारप्रवर्तकसर्वकर्मधुरन्धरभगवदवताररामचन्द्राचार एव विवेकिभिरनुवर्तनीयइति सर्वमवदातं ॥ ४ ॥ शयने हंसतूलिकामये तल्पे । गङ्गानिषेवितं गङ्गाजले वर्तमानं । तक्षकस्य संभोगं कायमिव स्थितं । सीताया उत्तमाङ्गेन शोभितं चेति योजना ॥ ५ ॥ संयुगे युद्धे । युगसंकाशं गोपुरार्गलवत्प्रतिभटनिवारकं अतएव शत्रूणां शोकवर्धनं । सागरोन्ते यस्यासौ सागरान्तः भूमण्डलं । तस्य व्यपाश्रयं आलम्बनभूतं ॥ ६ ॥ सव्यं अप्रदक्षिणं यथाभवति तथा अस्यता इषून् क्षिपता । स्वेनैव हेतुना ज्याघातेन करणेन विगतत्वचं ज्याकिणाङ्कितमित्यर्थः । महापरिघसन्निभं । उत्तमपरिघाख्यायुधवत् दृढं । गोसहस्रप्रदातारं करणे कर्तृत्वोपचारः । महद्भुजं भुजोत्तमं तथैव प्रायशः पाठः । आत्वाभाव आर्षः । एवंभूत

वस्तु संज्ञापूर्वकविधेरनित्यत्वात् । पुरस्तात् पूर्वचन्दनादिभिरभिसेवितं ॥ ३—४ ॥ स० अत्रबाहुंभुजगभोगाभमित्युपक्रम्यगोसहस्रप्रदातारमित्येतच्छ्लोकपर्यन्तंप्रतिश्लोकंविशेष्येणबाह्वादिशब्देनभवितव्यमितिदर्शयितुं बाहुंभुजगभोगाभं दक्षिणंबाहुं भुजोत्तम

[पा०] १ घ. ङ. च. झ. ञ. ट. सुहृदांनन्दनं.

गोसहस्रप्रदातारमुपधाय महद्भुजम् ॥ अद्य मे मरणं वाऽथ तरणं सागरस्य वा ॥ ८ ॥
इति रामो मतिं कृत्वा महाबाहुर्महोदधिम् ॥ अधिशिश्ये स विधिवत्प्रयतो नियतो मुनिः ॥ ९ ॥
तस्य रामस्य सुप्तस्य कुशास्तीर्णे महीतले ॥ नियमादप्रमत्तस्य निशास्तिस्रोतिचक्रमुः ॥ १० ॥
स त्रिरात्रोषितस्तत्र नयज्ञो धर्मवत्सलः ॥ उपासत तदा रामः सागरं सरितां पतिम् ॥ ११ ॥
न च दर्शयते मन्दस्तदा रामस्य सागरः ॥ प्रयतेनापि रामेण यथार्हमभिपूजितः ॥ १२ ॥
समुद्रस्य ततः क्रुद्धो रामो रक्तान्तलोचनः ॥ समीपस्थमुवाचेदं लक्ष्मणं शुभलक्षणम् ॥ १३ ॥
अवलेपः समुद्रस्य न दर्शयति यत्स्वयम् ॥ १४ ॥
प्रशमश्च क्षमा चैव आर्जवं प्रियवादिता ॥ असामर्थ्यं फलन्त्येते निर्गुणेषु सतां गुणाः ॥ १५ ॥
आत्मप्रशंसिनं दुष्टं धृष्टं विपरिधावकम् ॥ सर्वत्रोत्सृष्टदण्डं च लोकः सत्कुरुते नरम् ॥ १६ ॥
न साम्ना शक्यते कीर्तिर्न साम्ना शक्यते यशः ॥ प्राप्तुं लक्ष्मण लोकेऽस्मिञ्जयो वा रणमूर्धनि ॥१७॥
अद्य मद्बाणनिर्भिन्नैर्मकरैर्मकरालयम् ॥ निरुद्धतोऽयं सौमित्रे प्लवद्भिः पश्य सर्वतः ॥ १८ ॥
महाभोगानि मत्स्यानां करिणां च करानिह ॥ भोगिनां पश्य नागानां मया छिन्नानि लक्ष्मण ॥१९॥

दक्षिणं बाहुमुपधाय दक्षिणः दाक्षिण्यवान् ॥७–८॥ महाबाहुः सर्वाभयप्रदः । रामः अद्य मे तरणं वा सागरस्य मरणं वा भवत्विति मतिं कृत्वा । विधिवत् शास्त्रोक्तरीत्या । प्रयतः कायिकनियमयुक्तः । नियतः वाचिकनियमवान् । मुनिः मानसनियमोपेतश्चसन् । महोदधिमुद्दिश्याधिशिश्ये इति योजना॥९॥ सुप्तस्य शयानस्य । नियमादप्रमत्तस्य अतएवाप्रच्युतनियमस्येत्यर्थः । तिस्रो निशाः त्रीण्यहानि ॥ १० ॥ तिसृष्वपि रात्रिषूपासनमविच्छिन्नमित्याह–स इति ॥ त्रिरात्रोषितः त्रिरात्रं शयानः । तत्र समुद्रतीरे । सर्वशक्तेःकुत एवं निर्बन्ध इत्याशङ्क्य धर्मप्रवर्तनार्थमित्याशयेनाह—नयज्ञो धर्मवत्सल इति । शरणागतधर्मे प्रीतिमान् । सरितां पतिं स्वगोष्ठ्यां कान्तापुरुषकारमुखेन समाश्रयणदर्शनात्स्वयमपि तथैवाचरदिति भावः ॥ ११ ॥ नच दर्शयते आत्मानमिति शेषः । मन्दः अज्ञः । ननु रामेण सम्यक्कृता शरणागतिः कुतो नफलिता । उच्यते । अनधिकारिणा कृतत्वात् ब्राह्मणकृतराजसूयवत् । न च शरणागतावधिकारी रामः । अकिंचनो हि तत्राधिकारी ॥ १२ ॥ समुद्रस्य समुद्रविषये । संबन्धसामान्ये षष्ठी । रक्तान्ते लोचने यस्य सः रक्तान्तलोचनः । अनेन मन्दकोपत्वमुक्तं । शुभलक्षणं स्वस्य हृदयकोपमवगम्य कृतमन्दहासं ॥ १३ ॥ स्वयं न दर्शयतीति यत् अयं समुद्रस्यावलेप इत्यन्वयः ॥ १४ ॥ प्रशमः अक्रोधता । क्षमा अपराधसहिष्णुता । आर्जवं परचित्तानुसारित्वं । अकौटिल्यं वा । प्रियभाषिता प्रियवादित्वमित्येते गुणाः निर्गुणेषु असामर्थ्यं फलन्ति । असमर्थत्वबुद्धिं जनयन्तीत्यर्थः ॥१५॥ कं पुनः समर्थं निर्गुणो मन्यते तत्राह—आत्मेति ॥ आत्मप्रशंसिनं आत्मस्तुतिपरं । दुष्टं वञ्चकं । धृष्टं निर्दयमित्यर्थः । विपरिधावकं सर्वपलायनकरं । सर्वत्र सगुणेषु निर्गुणेषु च । उत्सृष्टदण्डं क्षिप्तदण्डं । लोकः अज्ञो जनः ॥ १६ ॥ बलकृता प्रथा यशः । पराक्रमकृता कीर्तिः । जयो वेत्यत्रापि न साम्ना प्राप्तुं शक्यत इत्यनुषञ्जनीयं ॥ १७ ॥ मद्बाणनिर्भिन्नैः अतएव जलोपरि प्लवद्भिः मकरैः । निरुद्धतोयं व्याप्ततोयं ॥ १८ ॥ भोगिनां महाकायानां । भूम्नि मतुप् । " भोगः सुखे रूयादिभृतावहेश्च फणकाययोः " इत्यमरः । नागानां सर्पाणां । महाभोगानि महाशरीराणि । क्लीबत्वमार्षं । करिणां मत्स्यानां

मितित्रिवारमुक्तिः ॥ ७ ॥ ति० अत्रत्रिदिनमुपासनयाप्रसन्नस्यसागरस्यप्रसादेनमेससैन्यस्यतरणंवापिस्यात् । ततःपरमुपेक्षणे सागरस्यमत्तोमरणमेवस्यादितिधृतिंकृत्वा निश्चिन्वेतियोजना ॥ ९ ॥ ति० अभिजग्मतुः अभिजग्मुः ॥ १० ॥

[पा०] १ च. छ. ज. ञ. भुजोत्तमं. २ ग. घ. ङ. झ. ट. धृतिं. ३ क. ग. घ. ङ. ञ.—ट. शिश्येच. ४ ङ. झ. ट. प्रयतोत्रस्थितो. ५ ङ. झ. स्तिस्रोभिजग्मतुः. ६ ङ. च. झ. ञ. ट. दर्शयतेरूपंमन्दो. च. दर्शयतेत्मानंतदा. छ. दर्शयतेरूपंतदा. ७ क. ङ. च. छ. झ. ञ. ट. असामर्थ्यफलाह्येते. ८ ङ. च. छ. झ. ञ. निर्भग्नैः.

सशङ्खशुक्तिकाजालं समीनमकरं शरैः ॥ अद्य युद्धेन महता समुद्रं परिशोषये ॥ २० ॥
क्षमया हि समायुक्तं मामयं मकरालयः ॥ असमर्थं विजानाति धिक् क्षमामीदृशे जने ॥ २१ ॥
न दर्शयति साम्ना मे सागरो रूपमात्मनः ॥ २२ ॥
चापमानय सौमित्रे शरांश्चाशीविषोपमान् ॥ सागरं शोषयिष्यामि पन्द्यां यान्तु प्लवङ्गमाः ॥२३॥
अद्याक्षोभ्यमपि क्रुद्धः क्षोभयिष्यामि सागरम् ॥ २४ ॥
वेलासु कृतमर्यादं सहसोर्मिसमाकुलम् ॥ निर्मर्यादं करिष्यामि सायकैर्वरुणालयम् ॥ २५ ॥
महार्णवं क्षोभयिष्ये महादानवसंकुलम् ॥ २६ ॥
एवमुक्त्वा धनुष्पाणिः क्रोधविस्फारितेक्षणः ॥ बभूव रामो दुर्धर्षो युगान्ताग्निरिव ज्वलन् ॥२७॥
संपीड्य च धनुर्घोरं कम्पयित्वा शरैर्जगत् ॥ मुमोच विशिखानुग्रान्वज्रानिव शतक्रतुः ॥ २८ ॥

गजाकारमत्स्यानां । छिन्नानीति लिङ्गव्यत्ययेनानुषङ्गः । करान् शुण्डादण्डान् । "मत्स्यविशेषो मकरः करिमकरो भवति तद्विशेषश्च" इति हलायुधः ॥ १९—२० ॥ क्षमैकसाराणां भवतामीदृशी फणितिरनुचितेत्याशङ्क्याह—क्षमयेति ॥ सागरशोषणेप्रवृत्तोप्येतावत्पर्यन्तं क्षमया गृहीतचरणोस्मि । "सुप्तप्रमत्तकुपितानां भावज्ञानं दृष्टं" इति न्यायेन स्वरूपं प्रकटयंति—मामिति । मां इतरनैरपेक्ष्येण स्थितं । असमर्थं विजानाति कार्यकरणाक्षमं मन्यते । विजानाति मकरालयः । अयोध्याधिपतिः कोसलाधिपतिरिवस्वमात्मानं मन्यते । कतिपयमीनग्रहणगर्त इति न जानाति । धिक् क्षमां इतःपरं क्षमां नाङ्गीकुर्मः । विनियोगकाले हि क्षमा स्वीकार्या । अद्य क्रोध एवाङ्गीकर्तव्यः । इक्ष्वाकूणां कदाचिदपि क्षमा किं त्याज्येत्यत्राह—ईदृशे जन इति ॥ ईदृशे जने प्राप्तरक्षस्सहवासदोषे ॥ २१ ॥ न दर्शयतीत्यर्धमेकं वाक्यं ॥ २२ ॥ अपि कदाचिदात्मानं दर्शयेदिति करुणया समुद्रं वाचा निर्भर्त्स्य कर्मणापि निर्भर्त्सयितुमुपक्रमते—चापमानयेति ॥ एव विलम्ब्य करणं क्रमेण निर्भर्त्स्य कार्यं कारयितुं । अन्यथा सद्य एव शोषयेत् । चापमानय निर्गुणं वशीकर्तुं सगुणमानयेत्याशयः । चापमानय अस्यानम्रत्वं निवर्तयितुं नम्रं चापमानय । समुद्रस्य शेषशय्यात्वेन तस्मिन्किंचित्सौहार्दवता लक्ष्मणेन क्षणं विलम्बः कृतः । अत आह—सौमित्र इति । सुमित्रावचनमेव कर्तव्यं ज्येष्ठवचनं तु न कर्तव्यमिति नियमोस्ति । यद्वा सौमित्रे रामे प्रमादं माकार्षीरिति मात्रोपदिष्टं मा विस्मार्षीः । अथ चापमात्रमानीतं तदाह—शरांश्चेति । लीलाप्रयोगार्हेषु केषुचिदानीतेष्वाह—आशीविषोपमानिति । दृष्टिविषाः सर्पा आशीविषा इत्युच्यन्ते । किमर्थं शरानयनमिति विलम्ब्य सौमित्रिणा पृष्ट आह—सागरमिति । एकेनैव दग्धुं सामर्थ्येपि शरानित्युक्तिस्तत्संबन्धेन सप्तसागरानपि शोषयितुमिच्छया । कोपातिशयेन स्वबलमज्ञात्वा वा तादृशोक्तिः । शोषयिष्यामीति वदतः किं शरेणेति न शङ्कनीयं । छिन्नं भिन्नं शरैर्दग्धमिति रामशराणां दाहकत्वसंभवात् । अन्तरेणापि चतुर्थभूतजगन्निर्वाहं करिष्यामीति भावः । सागरं । यद्ययं ज्ञातिविरोधमाचरति तर्हि वयमपि ज्ञातिकृत्यं कुर्म इतिभावः । सागरं शोषयिष्यामि अनेकसहस्रखातमेक एव हरिष्यामि । किं तत इत्यत्राह—पद्भ्यामिति । एकैकस्य पदद्वयं गमनसाधनमिति द्विवचनं । वानराणां हि द्वावेव पादौ द्वौ हस्तौ ग्रहणभक्षणादीनां ताभ्यामेव दर्शनात् । अनेन कृतस्य कार्यविच्छेदस्यानुरूपममुं वानरपादाभ्यामेव दर्शयिष्यामीतिभावः ॥ २३ ॥ पक्षान्तरमाह—अद्येति ॥ अर्धमेकं वाक्यं ॥ २४ ॥ पुनः पक्षान्तरमेवाह—वेलास्विति ॥ वेलासु चतुर्षु तीरेषु । कृतमर्यादं कृतव्यवस्थं । कदाचिदपि वेलामनतिवर्तमानमित्यर्थः । निर्मर्यादं करिष्यामि अव्यवस्थं करिष्यामि । भूतले प्लावयिष्यामीत्यर्थः ॥ २५ ॥ समुद्रेण चिरपरिपोषिता दानवादय एतं रक्षिष्यन्तीत्यत्राह—महार्णवमिति ॥ दानवैः सह क्षोभयिष्यामीत्यर्थः ॥२६॥ विस्फारितेक्षणः विवार्ततनयनः ॥ २७ ॥ संपीड्य दृढमुष्टिना मध्यमवलम्ब्य । कम्पयित्वा भयकम्पितं

[पा०] १ ङ. ञ. तथा.

ते ज्वलन्तो महावेगास्तेजसा सायकोत्तमाः ॥ प्रविशन्ति समुद्रस्य सलिलं त्रस्तपन्नगम् ॥ २९ ॥
तोयवेगः समुद्रस्य सनक्रमकरो महान् ॥ संबभूव महाघोरः समारुतरवस्तदा ॥ ३० ॥
महोर्मिमालाविततः शङ्खशुक्तिसमावृतः ॥ सधूमपरिवृत्तोर्मिः सहसाऽऽसीन्महोदधिः ॥ ३१ ॥
व्यथिताः पन्नगाश्चासन्दीप्तास्या दीप्तलोचनाः ॥ दानवाश्च महावीर्याः पातालतलवासिनः ॥ ३२ ॥
ऊर्मयः सिन्धुराजस्य सनक्रमकरास्तदा ॥ विन्ध्यमन्दरसंकाशाः समुत्पेतुः सहस्रशः ॥ ३३ ॥
आघूर्णिततरङ्गौघः संभ्रान्तोरगराक्षसः ॥ उद्वर्तितमहाग्राहः संवृत्तः सलिलाशयः ॥ ३४ ॥

ततस्तु तं राघवमुग्रवेगं प्रकर्षमाणं धनुरप्रमेयम् ॥
सौमित्रिरुत्पत्य समुच्छ्वसन्तं मामेति चोक्त्वा धनुरालालम्बे ॥ ३५ ॥
[एतद्विनापि ह्युदधेस्तवाद्य संपत्स्यते वीरतमस्य कार्यम् ॥
भवद्विधाः क्रोधवशं न यान्ति दीर्घं भवान्पश्यतु साधुवृत्तम् ॥ ३६ ॥
अन्तर्हितैश्चापि तथाऽन्तरिक्षे ब्रह्मर्षिभिश्चैव सुरर्षिभिश्च ॥
शब्दः कृतः कष्टमिति ब्रुवद्भिर्मामेति चोक्त्वा महता स्वरेण ॥ ३७ ॥]

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकविंशः सर्गः ॥ २१ ॥

कृत्वा । जगत् जगत्स्थजन्तून् । वज्रानित्यभूतोपमा ॥ २८ ॥ तेजसा ज्वलन्त इत्यन्वयः । प्रविशन्ति प्राविशन् । त्रस्तपन्नगमिति क्रियाविशेषणं ॥ २९ ॥ तोयवेगः तरङ्गविततिः । मारुतरवः वातजन्यरवः । समारुतरवः वातसंघट्टनजन्यरवसहित इत्यर्थः ॥ ३० ॥ तीरे महोर्मिमालाविततः । अन्तस्तरङ्गजालाकृष्टशङ्ख-शुक्तिसमावृतः । सज्वालशरप्रवेशेन सधूमः । मध्ये शराग्निशोषणेन परिवृत्तोर्मिश्चासीदित्यन्वयः ॥ ३१ ॥ व्यथिता इति । आपातालं शराः प्रविष्टा इति भावः ॥ ३२ ॥ तात्कालिकतरङ्गौन्नत्यं वर्णयति—ऊर्मय इति ॥ ३३ ॥ उक्तानुवादेन विशेषान्तरमाह—आघूर्णीतेति ॥ आघूर्णीतसंभ्रान्तोद्वर्तितपदान्येकार्थानि ॥ ३४ ॥ ततस्त्विति । तुशब्देन पूर्वसंधानाद्वैषम्यमुक्तं । अप्रमेयं अपरिच्छेद्यवैभवं । प्रकर्षमाणं । अमोघशरसन्धानायेति भावः । समुच्छ्वसन्तं कोपेनेति शेषः । तं राघवं । उत्पत्य झटित्यागत्य । मामेत्युक्त्वा एतादृशं धनुराकर्षणं मा कुर्वित्युक्त्वा । भयातिशयाद्वीप्सा । अनिवर्तमाने तस्मिन् धनुरालालम्बे ॥ ३५—३७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकविंशः सर्गः ॥ २१ ॥

शि० उदधेः एतत् विनाशनंविनापि । वीरतमस्यतव कार्यं सन्तरणं । संपत्स्यते सेत्स्यति । ननु प्राप्तक्रोधस्यकथंनिष्फलत्वमित्यतआह—भवद्विधाः भवत्सदृशाः । क्रोधवशंनयान्ति । अतः दीर्घं सार्वकालिकं । साधुवृत्तं क्रोधादिरहिततयास्वस्थितिं । भवान्पश्यतु संस्मरतु ॥ ३६ ॥ शि० निवारणेस्वस्यातच्चयंनिवारयन्नाह—**अन्तरिति** । अन्तरिक्षे अन्तर्हितैः तिरोहिततयासंस्थितैः । महतास्वरेण कष्टमितिब्रुवद्भिर्ब्रह्मर्षिप्रभृतिः मामा एवंमाभूदित्यर्थः । इत्युक्त्वा शब्दःकृतः । किंच एको माशब्दः अस्मच्छब्दप्रकृतिकद्वितीयान्तः । एतेन तद्बोधनायैवमयानिवार्यसइतिसूचितं । तेन लक्ष्मणस्यापिकिंचिद्रयंव्यक्तम् ॥ ३७ ॥ इत्येकविंशः सर्गः ॥ २१ ॥

[पा०] १ क. घ. ज. दृप्तपन्नगं. २ ङ. च. छ. झ. समीनमकरो. ३ ङ. झ. महोर्मिजालचलितः. ४ क. ग. घ. ङ. झ. शङ्खजालसमावृतः. ५ क. घ. च. ञ. समन्ततः. ६ ङ. च. झ. ञ. सघोषोवरुणालयः. ७ ङ. च. झ. ञ. ट. विनिश्वसन्तं. ८ इदंश्लोकद्वयं ङ. च. झ. ट. पाठेषुदृश्यते

द्वाविंशः सर्गः ॥ २२ ॥

रामेण सप्रतिज्ञानंसागरशोषणायब्रह्मास्त्राभिमन्त्रितशरसन्धानपूर्वकंधनुराकर्षणे घोरतरोत्पातप्रादुर्भावेभीतेनसागरेण गङ्गादिभिःसह नानाभूषणभूषितनिजरूपप्रकटनपूर्वकंसमुद्रमध्यादुद्गमनेनश्रीराममेत्य साञ्जलिबन्धंक्षमापणम् ॥ १ ॥ रामेण धनुस्संहितनिजशरस्यामोघत्वोक्त्यालक्ष्यप्रदर्शनंचोदितेनसागरेण स्वान्तर्वर्तिमरुकान्तारवासिपापतराभीरेषुशरमोक्षणचोदने शराग्निनातद्वधपूर्वकंतत्प्रदेशस्यमरुत्वदोषनिरसनम् ॥ २ ॥ सागरेणरामंप्रति कपिकुलमध्यवर्तिनलगुणप्रशंसनपूर्वकं तत्करेणसेतुरचनाचोदनेनपुनरन्तर्धानम् ॥ ३ ॥ नलेनरामचोदनया कपिगणाहृतनानागिरितरुभिरद्भुतसेतुरचना ॥ ४ ॥ हनुमदङ्गदांससमारूढाभ्यांराघवाभ्यां सुग्रीवादिभिस्सहसेतुमार्गेण परपारमेत्यतत्रसेनासंनिवेशनम् ॥ ५ ॥

अथोवाच रघुश्रेष्ठः सागरं दारुणं वचः ॥ [1]अद्य त्वां शोषयिष्यामि सपातालं महार्णव ॥ १ ॥
शरनिर्[2]दग्धतोयस्य परिशुष्कस्य सागर ॥ मया शो[3]षितसत्त्वस्य पांसुरुत्पद्यते महान् ॥ २ ॥
मत्कार्मुकविसृष्टेन शरवर्षेण सागर ॥ [4]पारं तेऽद्य गमिष्यन्ति पद्भिरेव प्लवङ्गमाः ॥ ३ ॥
विचिन्वन्नाभिजानासि पौरुषं वाऽपि विक्रमम् ॥ दानवालय संतापं मत्तो [5]नाधिगमिष्यसि ॥ ४ ॥
ब्राह्मेणास्त्रेण संयोज्य ब्रह्मदण्डनिभं शरम् ॥ संयोज्य धनुषि श्रेष्ठे विचकर्ष महाबलः ॥ ५ ॥
तस्मिन्विकृष्टे सहसा राघवेण शरासने ॥ रोदसी संपफालेव पर्वताश्च चकम्पिरे ॥ ६ ॥

प्रथमं वानरसेनातरणाय सागरं शरणं गत्वा तस्मिन्ननागते चापमानयेति वाचा भीषयित्वा तथाप्यनाविष्कृतनिजरूपं तं शरैः प्रक्षोभ्य तावताप्यनागतस्य तस्य भीतिमुत्पादयितुं ब्रह्मास्त्रसन्धानायोपक्रमत इत्याह—अथेत्यादिना ॥ सपातालं पातालपर्यन्तमित्यर्थः ॥ १ ॥ शरनिर्दग्धतोयस्य निर्जलस्येत्यर्थः । परिशुष्कस्य भूम्यन्तर्गतजलशून्यस्य । शोषितसत्त्वस्य दग्धसत्त्वस्येत्यर्थः । ते महान् पांसुः अतिसूक्ष्मो रेणुः । उत्पद्यते । वर्तमानसामीप्ये वर्तमानप्रयोगः । महावर्षेपि पुनर्यथा जललवोपि न तिष्ठति तथा करिष्यामीतिभावः ॥ २ ॥ ननु सकलजलशोषणेन पातालमात्रपरिशोषात्तत्र गमनासंभवादाकाशेन गन्तव्यं ततो वरमिदानीं तथागमनं किं कोपेनेत्यत्राह—मत्कार्मुकेति ॥ शरवर्षेण शरजालेन सेतुस्थानीयेन । सेतुबन्धादिक्लेशो मे न भवतीतिभावः ॥ ३ ॥ पौरुषं बलं । विक्रमं पराक्रमं च । विचिन्वन् विशेषेण पर्यालोचयितुं । नाभिजानासि । "लक्षणहेत्वोः—" इति शतृप्रत्ययः । इदमज्ञानं सहवासकृतमित्याशयेन दानवालयेति संबोधनं । मत्तो भाविनं संतापं च नाधिगमिष्यसि न ज्ञास्यसि । मत्पराक्रममजानन् मत्तो भाविब्रह्मास्त्रपीडामपि न ज्ञास्यस्येवेतिभावः ॥ ४ ॥ ब्रह्मदण्डः ब्रह्मशापः । तद्वद्मोघमित्यर्थः । यद्वा ब्रह्मदण्डः केतुविशेषः । तथोक्तं नारदसंहितायां—"पितामहात्सजःक्रूरस्त्रिवर्णः शिखरान्वितः । ब्रह्मदण्डाह्वयः केतुः सर्वभूतविनाशनः" इति ॥ ब्राह्मेणास्त्रेण ब्रह्मास्त्रमन्त्रेण । संयोज्य अभिमन्त्र्य । तद्धनुर्विचकर्ष ॥ ५ ॥ अथास्त्रसन्धानस्य मरुकान्तारवर्तिनां युगपद्विनाशहेतुत्वात्तत्काले तदुचितंमहोत्पातान् दर्शयति—तस्मिन्नित्यादिना ॥ शरसन्धानकालिकं लोकस्यभयं दर्शयतीत्यप्याहुः । रोदसी द्यावापृथिव्यौ । संपफालेव भिन्ने इव । एकवचनमार्षं । "द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च

तो० विक्रमं जलोपरिशरसेतुबन्धनजलस्तंभनतच्छोषणादिशक्तिरूपं । विचिन्वन् विशेषेणपर्यालोचयन् । नाभिजानासि । पौरुषं शास्त्रवश्यत्वसौजन्यनिबन्धनंशरणवरणरूपंपुरुषकृत्यं । नाभिजानासि मत्तोभाविनंसन्तापंनावगमिष्यसि नज्ञास्यसि । सर्वशक्तेरपि धर्मशीलतयाशरणागतस्यमे फलप्रदानाभावे महाननर्थोभविष्यतीत्यमुमर्थंनजानासीत्यर्थः ॥ ४ ॥ स० रोदसी द्यावापृथिव्यौ । संपफाल विशीर्णं । एकवचनमार्षमितिनागोजिभट्टादयः । वस्तुतस्तु "रोदश्चरोदसीचापि दिविभूम्नोपृथक्पृथक् । सहप्रयोगेप्यनयोरोदःस्यादपिरोदसी" इतिविश्वोक्तेःरोदसी तन्नन्यायेनद्यौःपृथिवीच । पकाल विशीर्णेत्यर्थः । रोदसीत्यव्ययमप्यस्तीतिभानुदी-

[पा०] १ ङ. छ. झ. ट. अद्याहं. २ च. छ. निर्दग्धसत्वस्य. ३ ङ. झ. ञ. ट. निहतसत्वस्य. च. छ. शोषिततोयस्य. ४ ङ. झ. ट. परंतीरं. ५ क.—ट. नापिविक्रमं. ६ क.—घ. ङ. झ. ट. नामगमिष्यसि. च. छ. ञ. नावगमिष्यसि.

तमश्च लोकमावव्रे दिशश्च न चकाशिरे ॥ परिचुक्षुभिरे चाशु सरांसि सरितस्तथा ॥ ७ ॥
तिर्यक्च सह नक्षत्रैः संगतौ चन्द्रभास्करौ ॥ भास्करांशुभिरादीप्तं तमसा च समावृतम् ॥ ८ ॥
प्रचकाशे तदाकाशमुल्काशतविदीपितम् ॥ अन्तरिक्षाच्च निर्घाता निर्जग्मुरतुलस्वनाः ॥ ९ ॥
पुस्फुरुश्च घना दिव्या दिवि मारुतपङ्क्तयः ॥ १० ॥
बभञ्ज च तदा वृक्षाञ्जलदानुद्वहन्नपि ॥ अरुजंश्चैव शैलाग्राञ्शिखराणि प्रभञ्जनः ॥ ११ ॥
दिविस्पृशो महामेघाः संगताः समहास्वनाः ॥ मुमुचुर्वैद्युतानग्नींस्ते महाशनयस्तदा ॥ १२ ॥
यानि भूतानि दृश्यानि चुक्रुशुश्चाशनेः समम् ॥ अदृश्यानि च भूतानि मुमुचुर्भैरवस्वनम् ॥ १३ ॥
शिश्यिरे चापि भूतानि संत्रस्तान्युद्विजन्ति च ॥ संप्रविव्यथिरे चापि न च पस्पन्दिरे भयात् ॥१४॥
सह भूतैः सतोयोर्मिः सनागः सहराक्षसः ॥ सहसाऽभूत्ततो वेगाद्भीमवेगो महोदधिः ॥ १५ ॥
योजनं व्यतिचक्राम वेलामन्यत्र संप्लवात् ॥ तं तदा समतिक्रान्तं नातिचक्राम राघवः ॥
समुद्धतमभित्रघ्नो रामो नदनदीपतिम् ॥ १६ ॥

रोदसी " इत्यमरः ॥ ६—७ ॥ तिर्यक्केति श्लोकद्वयमेकान्वयं ॥ चन्द्रभास्करौ नक्षत्रैः सह तिर्यग्वक्रं यथा भवति तथा सङ्गतौ तिर्यग्जग्मतुः । भयादिति भावः । आदीप्तं ईषद्दीप्तं । मन्दरश्मित्वात्तमसावृतत्वाच्च सूर्यस्येतिभावः । समावृतं सम्यगावृतं । उल्काशतविदीपितं । उल्कालक्षणमुक्तं वराहमिहिरेण " उल्का शिरसि विशाला निपतन्ती वर्धते च तनुपुच्छा " इति । निर्घातलक्षणं तेनैवोक्तं—" पवनः पवनाभिहतो गगनादवनौ यदा समापतति । भवति तथा निर्घातः स च पापो दीर्घखगविरुतः " इति ॥ ८—९ ॥ पुस्फुरुः चेरुः । मारुतपङ्क्तयः आवहोद्वहादिवातस्कन्धाः । दिव्याः श्लाघ्याः ॥ १० ॥ उद्वहन् ऊर्ध्वनयन् । शैलाग्रान् पर्वताग्रप्रदेशान् । शिखराणि खण्डपर्वतान् । अरुजन् अपीडयत् । बहुवचनमार्षं ॥ ११ ॥ ते वैद्युताग्नयः । तदा महाशनयोभवन् । अशनिस्वरूपं मिहिरेणोक्तं—" अशनिः स्वनेन महता युक्ता नृगजाश्वतरुपशुमुखेषु । निपतति विदारयन्ती धरातलं चक्रसंस्थाना " इति ॥ १२ ॥ यानीत्यादि श्लोकद्वयमेकं वाक्यं ॥ यानि भूतानि दृश्यानि मनुष्यादीनि । अदृश्यानि पिशाचादीनि । तानि सर्वाणि भूतानि संत्रस्तानि । अतएवोद्विजन्ति कम्पमानानि सन्ति । अशनेः समं अशनिस्वरसमं यथा तथा चुक्रुशुः तथा । भैरवस्वनं मुमुचुः । ततः शिश्यिरे सुप्तानि । सुप्तवद्भूमौ पतितानीत्यर्थः । तत्रापि संप्रविव्यथिरे चिन्तया दुःखितानि । भयान्न पस्पन्दिरे न चलितानि ॥ १३—१४ ॥ अथ समुद्रराजस्योत्थानं सूचयति—सहभूतैरित्यादिना ॥ ततो वेगात् पूर्वसर्गान्तोक्ताद्रामवेगात् । सहसा शरसन्धानसमय एव । भीमवेगोऽभूत् भीमप्रवाहवेगोऽभूत् । केवलशरमोक्षकृतात्क्षोभात् ब्रह्मास्त्रमोक्षारम्भे महान्क्षोभोऽभूदित्यर्थः ॥ १५ ॥ वेगफलं दर्शयति—योजनमित्यादिना ॥ सार्धश्लोक एकान्वयः । संप्लवात् वारिपूरेण । वेलामन्यत्र वेलां विनेत्यर्थः । अथवा संप्लवादन्यत्र प्रलयं विना । वेलां योजनं योजन-

क्षितः ॥ ६ ॥ ति० नक्षत्रैःसहतिर्यक्संगतौ यथाप्राप्तपूर्वापरमार्गप्रतिरोधादक्षिणोत्तरमार्गगामिनावभूतामित्यर्थः । भास्करांशुभिरादीप्तमपितमसासंवृतं । आकाशमासीदितिशेषः । अनेनविरुद्धयोस्तेजस्तिमिरयोःसामानाधिकरण्यरूपोत्पातःसूचितः ॥ ७ ॥ वि० प्रास्फुटन् प्रचेलुः । बभञ्जचेति मारुतपङ्क्तिरितिशेषः । उद्वहन् मारुतसमूहइतिशेषः । अग्रेप्येषएवकर्ता । शैलाग्रान् पर्वतप्रदेशान् । आरुजन् अपीडयन् । बहुवचनमार्षं । शिखराणि खण्डपर्वतान् बभञ्जचेत्यन्वयः ॥ १०—११ ॥ स० तथाशब्द उपमायां । तंतथा चोरमिवस्थितं । चोरंस्वगृहेस्थापयितायथाचोरसदृशोभवति । तथा स्वदारचोरस्यरावणस्यस्वगर्भेस्थापनात्समुद्रश्चोरसदृशस्तं । द्वितीयेन तमित्यनेन समुद्रपरामर्शः । " तकारःकीर्तितश्चोरे " इतिविश्वः । एतेननपौनरुक्त्यं । समतिक्रान्तं अतिक्रान्तवेलं । अतएवोद्धतं उत्कृष्टमपितंनदनदीपतिं । रामः नातिचक्राम नावधीत् । भीषणार्थमेवास्त्रसंयोजननवस्तुतः । सत्य-

[पा०] १ ख. ग. घ. छ. झ. ट. प्रतिचुक्षुभिरे. २ च. छ. ज. ञ. प्रास्फुटंश्चपुनर्दिव्याः. ङ. झ. ट. वपुःप्रकर्षेणवर्तुर्दिव्यमारुतपङ्क्तयः. ३ क. घ. विमानवरपङ्क्तयः. ४ ङ. च. छ. झ. ञ. ट. नुद्वहन्मुहुः. क. नुद्ववाहच. ख. नुद्वहन्तिच. ५ झ. ञ. ट. बभञ्जच. ६ ग.—छ. झ. ञ. ट. दिविचस्र. ७ ङ. च. छ. झ. ञ. ट. तथा. ८ क. ग. च. झ. तमुद्धतं.

ततो मध्यात्समुद्रस्य सागरः स्वयमुत्थितः ॥ उदयन्हि महाशैलान्मेरोरिव दिवाकरः ॥ १७ ॥
पन्नगैः सह दीप्तास्यैः समुद्रः प्रत्यदृश्यत ॥ स्निग्धवैडूर्यसंकाशो जाम्बूनदविभूषितः ॥ १८ ॥
रक्तमाल्याम्बरधरः पद्मपत्रनिभेक्षणः ॥ सर्वपुष्पमयीं दिव्यां शिरसा धारयन्स्रजम् ॥ १९ ॥
जातरूपमयैश्चैव तपनीयविभूषितैः ॥ आत्मजानां च रत्नानां भूषितो भूषणोत्तमैः ॥ २० ॥
धातुभिर्मण्डितः शैलो विविधैर्हिमवानिव ॥ एकावलीमध्यगतं तरलं पाण्डरप्रभम् ॥ २१ ॥
विपुलेनोरसा बिभ्रत्कौस्तुभस्य सहोदरम् ॥ आघूर्णिततरङ्गौघः कालिकानिलसंकुलः ॥ २२ ॥
[देवतानां सुरूपाणां नानारूपाभिरीश्वरः ॥ गङ्गासिन्धुप्रधानाभिरापगाभिः समावृतः ॥ २३ ॥]
उद्वर्तितमहाग्राहः संभ्रान्तोरगराक्षसः ॥ सागरः समुपक्रम्य पूर्वमामन्त्र्य वीर्यवान् ॥
अब्रवीत्प्राञ्जलिर्वाक्यं राघवं शरपाणिनम् ॥ २४ ॥
पृथिवी वायुराकाशमापो ज्योतिश्च राघव ॥ स्वभावे सौम्य तिष्ठन्ति शाश्वतं मार्गमाश्रिताः ॥२५॥

पर्यन्तं । व्यतिचक्राम अतिक्रान्तवान् । योजनमन्तर्जीर्णोऽभूदित्यप्याहुः । तं समतिक्रान्तं पलायमानं नातिचक्राम । पलायमानं प्रति शस्त्रप्रयोगरूपातिक्रमं न चकार ॥ १६ ॥ समुद्रस्य मध्यात् उन्नतात् । स्वयं सागरः समुद्राभिमानिदेवता । दिवाकर इव बभावितिशेषः ॥ १७ ॥ जाम्बूनदं जम्बूनदीप्रभवं स्वर्णं ॥ १८ ॥ रक्तमाल्यं रक्तवैकक्ष्यमाला ॥ १९ ॥ जातरूपमयैः आकरजसुवर्णप्रचुरैः । तपनीयविभूषितैः रत्नकीलनार्हद्रुतकनकविभूषितैः । रत्नानां संबन्धिभिर्भूषणोत्तमैः ॥ २० ॥ एकावली मुक्तावली । तरलं नायकरत्नं ॥ २१ ॥ आघूर्णितः चलितः । कालिका मेघपङ्क्तिः । " मेघजालेपि कालिका " इत्यमरः । तयाऽनिलेन च संकुलः क्षुभितः । मेघानिलौ समुद्रस्य सहचराविति प्रसिद्धिः ॥ २२–२३ ॥ उद्वर्तितेत्यादि सार्धश्लोक एकान्वयः ॥ उद्वर्तितः उद्भ्रामितः । समुपक्रम्य समुपागम्य । स्वसौजन्यं पुरस्कर्तुं पूर्वं आमन्त्र्य आहूय । प्रकृष्टो मूर्ध्नि कृतोञ्जलिः यस्यासौ प्राञ्जलिः । शरपाणिनमिति नकारान्तत्वमार्षं । स्वविरोधिनो मरुवासिनो रामेण घातयितुं स्वयं रावणभीतत्वेन तत्संहारक्षममस्य पराक्रमं परीक्षितुं च समुद्र एतावत्पर्यन्तं विलम्बितवानिति बोध्यम् ॥ २४ ॥ किं विभोस्तव मया कर्तव्यं किं गाधत्वं उत जलस्तम्भनं आहोस्वित्सेतुबन्धनानुकूल्यमित्याशङ्क्य न तावदाद्यः पक्ष इत्याह श्लोकद्व-

---

संकल्पलात् । नातिचक्राम स्वधैर्यान्नचचालेतिवा । अत्रपक्षेदृष्टेतिशेषः ॥ १६ ॥ स० सागरः वरुणः । मेरोरिवविद्यमानात उदयाद्रेर्महाशैलात् शृङ्गात् दिवाकरइव । मेरोःधनुषोभयादुत्थितइतिवा । " मेरुर्भूधरधन्वनोः " इतिविश्वः ॥ १७ ॥ स० सर्वपुष्पमयीं यावत्पुष्पयुक्तां । शिरसिधारयन्नित्यनेन रामसत्कारार्थमितिज्ञायते । ऐकैकस्यदेवस्यएकैकंपुष्पंयुक्तंअयुक्तंचैकंश्रीनारायणरूपिणोरामस्य । समस्तकुसुमयुक्तायुक्तामाला । यथोक्तंभागवतेनवमे । रुक्मिणीशविजयेचप्रमाणान्तरोक्तार्थसंग्राहके । "सिन्धुः शिरस्यर्हणंप्रतिगृह्यरूपीति " " यावैचंपकसंपदाऽब्जवसतेर्दूर्वाश्रियास्वात्मनःकेतक्याविभवेनकृत्तिवसनस्यांभोजकान्त्याविधोः । सन्नीलोत्पलशोभयादिनमणेःश्रीमत्तुलस्याऽमताहेरंबस्य हरेःपरंसमुचितासामालिकाशोभते " इति । यद्वा वरुणाभरणप्रस्तावात्तत्स्रग्वा ॥ १९ ॥ स० समुपक्रम्य पादाभ्यामागत्य । पूर्वमामन्त्र्य अहं भोरामांभोनिधिर्देवंवन्देत्वामितिसंबोध्य । शरपाणिनं बाणपाणिं । पणोग्लहः । सएवपाणःप्रज्ञादिः । शरैःपाणः रिपुप्राणरूपःसोस्यास्तीतिसतथावा तं । नचभारतेवनपर्वणि " सागरस्तुततःस्वप्नेदर्शयामासराघवं" इतिस्वप्नेरामस्यसागरआत्मानंदर्शयामासेत्युक्त्या अत्रचसमुत्थितः प्राञ्जलिरितिवचःपूर्वं अत्रच— " सागरःसमुपक्रम्यपूर्वमामन्त्र्यवीर्यवान् । अब्रवीत्प्राञ्जलिर्वाक्यं " इतिवाक्यंविरुद्धमितिवाच्यं । भागवतेनवमे " सिन्धुःशिरस्यर्हणंप्रतिगृह्यरूपीपादारविन्दमुपगम्यबभाषएतत् " इत्युक्तेः प्रत्यक्षतएवजाग्रद्दशायामेवदर्शनं । भागवतस्योत्तरत्वेनैतदनुरोधेनप्रतिशिश्यइतिपूर्वोदीरितेस्वप्नेऽपेक्षतेसतिनदनदीभर्तारावंस्वंदर्शयामासेतिभारतश्लोकार्थोपपत्तेः । अत्रैवयादोगणैर्वृतइत्युक्तिस्वारस्याच्च । स्वप्नेचेदेकमात्रदर्शनेनभाविकार्यसिद्धेस्तत्संवृततयागमनमनुपयुक्तं । प्रत्यक्षतस्तत्सहनयनंत्वद्रोषोष्मणायादसांदशेद-

[पा०] १ ङ. च. छ. झ. ञ. ट. उदयाद्रिमहाशैलात्. २ क. संकाशस्तप्तकाञ्चनकुण्डलः. ङ. च. छ. झ. ञ. ट. संकाशोजांबूनदविभूषणः. ३ क. ख. चं. छ. पाटलप्रभं. ४ अयंश्लोकः क. ख. ग. च. छ. पाठेषुदृश्यते. ५ क. ख. सरूपाभिः.- ६ च. छ. प्रधानाभिस्त्रोयधाराभिरंबुराट्. ग. प्रधानाभिर्नानारूपाभिरंबुराट्. घ. प्रधानाभिर्नानारूपाभिरावृतः.

तत्स्वभावो ममाप्येष [1]यदगाधोऽहमप्लवः ॥ विकारस्तु भवेद्राघ एतत्ते प्रवदाम्यहम् ॥ २६ ॥
न कामान्न च लोभाद्वा न भयात्पार्थिवात्मज ॥ [2]ग्राहनक्राकुलजलं स्तम्भयेयं कथंचन ॥ २७ ॥
[3]विधास्ये राम येनापि विषहिष्ये ह्यहं तथा ॥ ग्राहा न प्रहरिष्यन्ति यावत्सेना तरिष्यति ॥
हरीणां तरणे राम करिष्यामि यथा स्थलम् ॥ २८ ॥
[4]तमब्रवीत्तदा [5]राम उद्यतो हि नदीपते ॥ अमोघोऽयं महाबाणः कस्मिन्देशे निपात्यताम् ॥ २९ ॥
रामस्य वचनं श्रुत्वा तं च दृष्ट्वा महाशरम् ॥ महोदधिर्महातेजा राघवं वाक्यमब्रवीत् ॥ ३० ॥
उत्तरेणावकाशोस्ति [6]कश्चित्पुण्यतमो मम ॥ द्रुमकुल्य इति ख्यातो लोके ख्यातो यथा भवान् ॥३१॥
उग्रदर्शनकर्माणो बहवस्तत्र दस्यवः ॥ आभीरप्रमुखाः पापाः पिबन्ति सलिलं मम ॥ ३२ ॥

येन—पृथिवीति ॥ सौम्य प्रसन्न । अनेनाञ्जलिकरणानन्तरमेव रामः प्रसन्न इति गम्यते । पृथिव्यादयः पञ्चपदार्थाः । शाश्वतं नित्यं । मार्गं मर्यादां । आश्रिताः सन्तः स्वभावे काठिन्यतिर्यग्गमनावकाशप्रदानागाधत्वोर्ध्वज्वलनादिस्वस्वभावे तिष्ठन्ति । स्वस्वभावं नातिक्रामन्तीत्यर्थः ॥ २५ ॥ एषु कस्ते स्वभाव इत्यत आह—तदिति ॥ तत् तस्मात् । सर्वेषां पृथिव्यादीनां स्वस्वभावानतिलङ्घित्वात् । अहं अगाधः अप्लवः अलङ्घ्यश्चेति यत् एषः ममापि स्वभावः । तस्मादेवमेव मया स्थातव्यं । गाधःप्लवविषयोहमिति यत् एषः मम विकारः अन्यथाभावः । तथा मया न स्थातुं युक्तं । एतत् उक्तस्वरूपं ते प्रवदामि प्रावदं । प्रददामीति पाठेप्ययमेवार्थः । धातूनामनेकार्थत्वात् ॥ २६ ॥ द्वितीयपक्षोप्यनुपपन्न इत्याह—न कामादिति ॥ कामात् अर्थेच्छया । लोभात् लब्धवस्तुत्यागासहिष्णुतया । भयात् दण्डभयात् । पार्थिवात्मजेत्यनेन सर्वमर्यादास्थापकोसीति द्योतयति । न स्तम्भयेयं पीडाकरत्वादिति भावः ॥ २७ ॥ तृतीयं तु पक्षं कक्षीकरोमीत्याह—विधास्य इत्यादिसार्धश्लोकेन ॥ येन यथाहं विषहिष्ये शक्ष्यामि । तथा विधास्ये । किं तच्छक्यमित्यपेक्षायामाह—ग्राहेत्यादि ॥ यावत्सेना तरिष्यति तावत् ग्राहा न प्रहरिष्यन्ति । जलेपि हि केचिद्गमिष्यन्ति । हरीणां तरणे विषये । यथा स्थलं भवति यथा सेतुमार्गो भवति । तथा करिष्यामि । सेतुबन्धद्रव्यापकर्षणादिविघ्नं न करिष्यामीत्यर्थः ॥ २८ ॥ उद्यतः कृतसंधानः ॥ २९ ॥ महातेजाः स्वाभिमतलाभेन जनितकान्तिः ॥ ३० ॥ उत्तरेण समीपवर्तिन्युत्तरभागे । "एनबन्यतरस्यामदूरेऽपञ्चम्याः" इत्येनप् । ममावकाशः मध्यप्रदेशइत्यर्थः । पुण्यतमः चारुतमः । "पुण्यं तु चार्वपि" इत्यमरः । द्रुमेषु कुल्या यस्यासौ द्रुमकुल्यः । "कुल्याल्पा कृत्रिमा सरित्" इत्यमरः ॥ ३१ ॥ उग्रे दर्शनकर्मणी येषां ते उग्रदर्शनकर्माणः । दस्यवः शत्रवः । "दस्युशात्रवशत्रवः" इत्यमरः । दस्यवः चोरा वा । आभीराः

शीतिप्रदर्शनेन देवदयोदयहेतुरितिसहनयनंयुक्तं ॥ २४ ॥ **ती०** हेपार्थिवात्मजेत्यनेन दशरथेऽवतीर्णेश्वरेत्युक्तंभवति । ईश्वरत्वादेव भयात् लद्भयात् रागात् त्वयिभक्त्याच वानररूपान्तरङ्गभक्तसहितत्वात्पादारविन्दरजोवहनभाग्यमयालब्धमितिभक्त्याजलंस्तंभयेयमित्यर्थः ॥ २७ ॥ **स०** हेवरुणालय वरुणश्चासावालयोयादसामितिसतथा । तस्यसंबुद्धिः । हेवरुण । अलय मत्तोनाशरहित । अतएवामोघोबाणः कस्मिन्देशेनिपात्यतामितिप्रश्नःसंभवति । महाबाणः ब्रह्मास्त्राभिमन्त्रितः इतिशेषः । एतेन पूर्वंविसृष्टानांकेवलबाणत्वाद्वा समुद्रशोषणेच्छयानत्यक्तइत्यतोवा नतत्संहारइतिबोध्यं ॥ २९ ॥ **स०** उत्तरेण तृतीयासप्तम्यर्थे । एनबन्तमव्ययंवा । ऊर्ध्वत्वेनोपलक्षितोऽवकाशोस्तीति । पुरतोविलोकने ऊर्ध्वंकिञ्चित्प्रवाहादूर्ध्वंअवकाशोस्तीतिसंबन्धः । नामाह—द्रुमकुल्यइतीति । पुण्यतमइतिलोकेख्यातोयथाभवान् तथाऽयंदेशोपिपुण्यतरइतिख्यातः । यथा भवानेतत्स्थलमङ्गलीकरणेन लोके ख्यातः दस्यून्निरस्यस्वच्छंकृतवान्सुकृतवान्रामइतिख्यातोभवेत् पुण्यतरश्चभवेत्तथोत्तरेणावकाशोस्तीतिवा ॥ ३१ ॥ **ती०** उग्रदर्श-

[पा०] १ घ. यदगाधोमहाप्लवः. २ ङ. झ. ट. रागान्नक्राकुल. घ. नगनक्राकुल. ञ. एतन्नक्राकुल. ३ क. ख. ङ.—ट. विधास्येयेनगन्तासि. ४ ज. प्रसन्नस्तुतदारामश्चाब्रवीत्तंनदीपतिं. ५ ङ. च. छ. झ. ञ. ट. रामःशृणुमेवरुणालय. ६ ङ. च. छ. झ. कश्चित्पुण्यतरो. क. कश्चित्ख्यातोमरुर्मम.

तैस्तु संस्पर्शनं प्राप्तैर्न सहे पापकर्मभिः ॥ अमोघः क्रियतां राम तत्र तेषु शरोत्तमः ॥ ३३ ॥
तस्य तद्वचनं श्रुत्वा सागरस्य स राघवः ॥ मुमोच तं शरं दीप्तं वीरः सागरदर्शनात् ॥ ३४ ॥
तेन तं मरुकान्तारं पृथिव्यां खलु विश्रुतम् ॥ निपातितः शरो यत्र दीप्ताशनिसमप्रभः ॥ ३५ ।
ननाद च तदा तत्र वसुधा शल्यपीडिता ॥ तस्माद्व्रणमुखात्तोयमुत्पपात रसातलात् ॥ ३६ ॥
स बभूव तदा कूपो व्रण इत्यभिविश्रुतः ॥ सततं चोत्थितं तोयं समुद्रस्येव दृश्यते ॥
अवदारणशब्दश्च दारुणः समपद्यत ॥ ३७ ॥
तस्मात्तद्बाणपातेन त्वपः कुक्षिष्वशोषयत् ॥ ३८ ॥
विख्यातं त्रिषु लोकेषु मरुकान्तारमेव तत् ॥ शोषयित्वा ततः कुक्षिं रामो दशरथात्मजः ॥
वरं तस्मै ददौ विद्वान्मरवेऽमरविक्रमः ॥ ३९ ॥
पशव्यश्चाल्परोगश्च फलमूलरसायुतः ॥ बहुस्नेहो बहुक्षीरसुगन्धिर्विविधौषधः ॥ ४० ॥
एवमेतैर्गुणैर्युक्तो बहुभिः सततं मरुः ॥ रामस्य वरदानाच्च शिवः पन्था बभूव ह ॥ ४१ ॥
तस्मिन्दग्धे तदा कुक्षौ समुद्रः सरितां पतिः ॥ राघवं सर्वशास्त्रज्ञमिदं वचनमब्रवीत् ॥ ४२ ॥
अयं सौम्य नलो नाम तनुजो विश्वकर्मणः ॥ पित्रा दत्तवरः श्रीमान्प्रतिमो विश्वकर्मणा ॥ ४३ ।

महाशूद्राः ॥ ३२ ॥ तत्र द्रुमकुल्ये । तेषु आभीरप्रमुखेषु ॥ ३३ ॥ सागरदर्शनात् सागरमतेन । यद्वा अङ्गुल्या निर्दिश्य सागरेण प्रदर्शनात् ॥ ३४ ॥ तेन शरमोक्षणेन ॥ ३५ ॥ ननाद जलनिर्गमेनेति भावः । व्रणमुखात् व्रणमुखद्वारेण ॥ ३६ ॥ सः व्रणमुखं । व्रणकूप इत्यभिविश्रुतो बभूव । सततमिति । तस्येति शेषः । अवदारणशब्दः बाणस्येति शेषः ॥ ३७ ॥ तस्मादित्यर्धं ॥ तद्बाणपातेन तस्य बाणस्य पातेन । कुक्षिषु अवटेषु । स्थिता अपः पूर्वं पापस्पृष्टानि जलानि । तस्मात् द्रुमकुल्यात् । अशोषयत् न्यवारयदित्यर्थः ॥ ३८ ॥ पूर्वं रामबाणपातेन पृथिव्यां विश्रुतत्वमुक्तं संप्रति विरोधिनिरसनात् त्रिषु लोकेषु विख्यातत्वमाह—विख्यातमिति ॥ मरुकान्तारमेव मरुकान्तारनामैव । विख्यातं प्रसिद्धमभूदित्यर्थः कुक्षिं समुद्रमध्यप्रदेशं । मरुकान्तारं शोषयित्वा दग्ध्वा कथं मनुष्यत्वं भावयतो वरदानमित्यत्राह—अमर विक्रम इति । "सत्येन लोकाञ्जयति" इति न्यायेन वशीकृतसर्वलोकइत्यर्थः ॥ ३९ ॥ वरं सिद्धिमुखेन दर्शयति श्लोकद्वयेन—पशव्य इत्यादि ॥ पशव्य पशुभ्यो हितः पशूपभोग्यबालतृणादिसमृद्ध इत्यर्थः अल्परोगः आरम्भ एव विनष्टरोगः । रसः मधु आयुतः समन्ताद्युक्तः । स्नेहः घृतं । औषधं ओषधि समूहः । एवमेतैः एवंप्रकारैः । गुणैः भोग्यैः । युक्त संयुतः । शिवः पन्थाः शोभनप्रदेश इत्यर्थः ॥ ४०-४२ ॥ एवं सेतुनिर्माणानुकूलं स्थास्यामीत्युक्तवान संप्रति वरदानसन्तुष्टो वाक्सहायमाचरति—अय

नकर्माणः उप्रे दर्शनकर्मणी येषांतेतथा ॥ ३२ ॥ स० व्रणमुखात् बाणकृतच्छिद्रादित्यर्थः ॥ ३६ ॥ स० अमरविक्रमः देववि क्रमः अप्रतिहतपराक्रमोवा ॥ ३९ ॥ स० अल्परोगः तुच्छीकृतरोगः ॥ ४० ॥ ति० पित्रादत्तवरः सर्ववस्तुनिर्माणसामर्थ्ये दत्तवरः । विश्वकर्मणस्तव प्रीतिमान् त्वद्विषयप्रीतिमान् । तेनत्वन्नामस्मरणंपूर्वकरोत्वित्यर्थः । संसारसागरेगाधतासंपादकस्यत्वन्ना

[पा०] १ ङ. तैर्नाहंस्पर्शनंपापंसहेयं. ख. ग. ञ. ट. तैर्नसंस्पर्शनंपापंसहेयं. क. घ. तैर्नसंस्पर्शनंरामसहेयं. झ. तैर्न तत्स्पर्शनंपापंसहेयं. ज. तैस्तुसंस्पर्शनंपापंसदाक्लेशकरंमहत्. २ ग. ङ. च. छ. झ. ञ. ट. रामअयंतत्रशरोत्तमः. ज. रामशि तस्तत्रशरोत्तमः. क. राममरौतत्रशरोत्तमः. ३ ङ. झ. महात्मनः. ४ ख. ग. ङ. ज. झ. ट. परंसागर. ५ ख.—ट. तन्मरु ६ झ. ट. किल. ७ ख. निपपातशरो. ८ ङ. च. छ. झ. ञ. ट. वज्राशनि. ९ ङ. च. छ. झ. ञ. ट. इत्येवविश्रुतः. १० ख अवदारणजःशब्दो. ११ ज. तस्मिन्बाणस्यपातेन. १२ क. झ. ट. अपःकुक्षिषु. ग. घ. अपःकुक्षिमशोषयत्. १३ क ग.—ट. शोषयित्वातुतंकुक्षिं. ख. सशोषयित्वातंकुक्षिं. १४ क. घ. च. छ. ञ. पश्चान्मरवे. १५ क. ख. ज. श्चाप्यरोगश्च १६ च. झ. ञ. ट. विविधौषधिः. १७ ग. ङ.—ट. एवमेतैश्चसंयुक्तो. १८ ङ. च. छ. झ. ञ. ट. संयुतो. १९ क. ङ. च छ. झ. ञ. ट. तनयो. २० ग. च. छ. झं. ञ. ट. प्रीतिमान्विश्वकर्मणः. क. घ. धृतिमान्विश्वकर्मणः.

एष सेतुं महोत्साहः करोतु मयि वानरः ॥ तमहं धारयिष्यामि तथा ह्येष यथा पिता ॥ ४४ ॥
एवमुक्त्वोदधिर्नष्टः समुत्थाय नलस्तदा ॥ अब्रवीद्वानरश्रेष्ठो वाक्यं रामं महाबलः ॥ ४५ ॥
अहं सेतुं करिष्यामि विस्तीर्णे वरुणालये ॥ पितुः सामर्थ्यमास्थाय तत्त्वमाह महोदधिः ॥ ४६ ॥
दण्ड एव वरो लोके पुरुषस्येति मे मतिः ॥ धिक्क्षमामकृतज्ञेषु सान्त्वं दानमथापि वा ॥ ४७ ॥
अयं हि सागरो भीमः सेतुकर्मदिदृक्षया ॥ ददौ दण्डभयाद्गाधं राघवाय महोदधिः ॥ ४८ ॥
मम मातुर्वरो दत्तो मन्दरे विश्वकर्मणा ॥ [मया तु सदृशः पुत्रस्तव देवि भविष्यति ॥]
औरसस्तस्य पुत्रोऽहं सदृशो विश्वकर्मणा ॥ ४९ ॥
स्मारितोस्म्यहमेतेन तत्त्वमाह महोदधिः ॥ न चाप्यहमनुक्तो वै ब्रूयामात्मनो गुणान् ॥ ५० ॥
समर्थश्चाप्यहं सेतुं कर्तुं वै वरुणालये ॥ काममद्यैव बध्नन्तु सेतुं वानरपुङ्गवाः ॥ ५१ ॥
ततोतिसृष्टा रामेण सर्वतो हरियूथपाः ॥ अभिपेतुर्महारण्यं हृष्टाः शतसहस्रशः ॥ ५२ ॥
ते नगान्नगसंकाशाः शाखामृगगणर्षभाः ॥ बभञ्जुर्वानरास्तत्र प्रचकर्षुश्च सागरम् ॥ ५३ ॥
ते सालैश्चाश्वकर्णैश्च धवैर्वंशैश्च वानराः ॥ कुटजैरर्जुनैस्तालैस्तिलकैस्तिमिशैरपि ॥ ५४ ॥

मिति ॥ दत्तवरः मत्तुल्यः पुत्रस्ते भविष्यतीति मात्रे दत्तवरः ॥ ४३ ॥ तं सेतुं । तथा ह्येष यथा पितेति । पिता यथा यादृशशक्तिमान् तादृशोयमित्यर्थः ॥४४॥ उदधिः नष्टः अन्तर्हितः ॥ ४५ ॥ पितुः सामर्थ्यं पित्रा दत्तं सामर्थ्यं ॥ ४६ ॥ अथ वानरान्प्रत्याह—दण्ड इत्यादि श्लोकद्वयेन ॥ अतो राघवायेति परोक्षनिर्देशः । हिमवान्मन्दरो मेरुरित्यादिवत् । मध्ये कविवाक्यं वा । दण्ड एव परःसमीचीनोपायः । क्षमां सान्त्वं साम दानं वा धिक् । क्षमादयो नोपाया इत्यर्थः ॥ ४७ ॥ उक्तेर्थे हेतुमाह—अयं हीति ॥ हि यस्मात्सागरः सगरखानितः । प्रत्युपकारानभिज्ञ इत्यर्थः । दण्डभयात् सेतुकर्मदिदृक्षया गाधं ददावित्यन्वयः । सेतुकर्मदिदृक्षा च दण्डभयादेवास्य जातेत्यर्थः ॥ ४८ ॥ पूर्वोक्तस्वपितृतुल्यसामर्थ्यलाभस्य हेतुं दर्शयति—ममेति ॥ मया सदृशः पुत्रस्तव भविष्यतीत्येवंरूपो वरः । अयं चार्थः "औरसस्तस्य पुत्रोहं सदृशो विश्वकर्मण" इत्यनुवादात्सिद्धः ॥४९॥ तर्ह्येतावत्पर्यन्तं किमर्थं नोक्तवानसीत्यत्राह—स्मारित इति ॥ एतेन समुद्रेण । अनुक्तौ निमित्तान्तरमप्याह—नचेति । अनुक्तः अन्येनानुक्तः । स्वेनैवोक्तौ महाकर्मारम्भे विश्वासो न भवेदिति भावः ॥ ५० ॥ न केवलमुक्तिमात्रं समर्थश्चापीत्याह—समर्थश्चेति ॥ बध्नन्तु बन्धनाय शिलादिकमानयन्त्वित्यर्थः ॥५१॥ अतिसृष्टाः नियुक्ताः ॥ ५२ ॥ नगान् वृक्षान् । नगसंकाशाः गिरिसंकाशाः । वानराधिपतित्वेपि मनुष्यत्वं संभवति निषादस्थपत्यधिकरणपूर्वपक्षन्यायादत आह—वानरा इति । तत्र तदानीं । प्रचकर्षुः आनयन्ति स्म ॥ ५३ ॥ सेतुबन्धनसाह्यकृतां वृक्षाणां कृतार्थतां

श्रीमद्गाधतासंपादनमीषत्करमितिभावः ॥ स० विश्वकर्मणः तन्नामदेवतक्षाध्यक्षस्य । विश्वकर्मणः विश्वंचतत्कर्मच । तस्मात् प्रीतिमान् पितुरितिविपरिणतंसदावर्तते । पितुः यथाकर्मसुकौशलंवर्तते तथासर्वकर्मसुकुशलत्वात्तत्प्रीतिपात्रमितिभावः ॥ ४३ ॥ स० धारयिष्यामि विना धरासंपर्कमुपर्येवधारयिष्यामि । यथोक्तंवनपर्वणि—" नलेनसृज्यमानास्तेगण्डशैलाःसपर्वताः । तेरुर्वारांनिधौतस्मिंस्तूलंसूक्ष्ममयंयथा " इति ॥ ४४ ॥ स० अयंसागरः सगरपुत्रखानितः रामज्ञातिर्महोदधिः । दिदृक्षया स्वदिदृक्षया कृतोयोदण्डस्तद्भयात् गाधं श्लाघ्यंसेतुकर्मोद्दिश्यददौ मार्गमितिशेषः । " गाधःश्लाघ्येपिलिप्सायां " इतिविश्वः । " गायन्तिदिग्विजयिनोयमुपेत्यभूपाः " इत्यादेः ॥ ननु हनुमतियद्दूतआगतेसमुद्रोमैनाकं " अङ्गमाननीयोहिमादृशैः " इत्याद्युक्त्वा सेवार्थंप्रबोधयामासयस्स स्वयंरामउपयाते नोपयातइत्यत्यद्भुतमितिचेत्सत्यं । स्वमध्यवर्तिदुर्वृत्तिमद्रामेतरामारणदितिसुतवधोनक्रोधोदयेनविनाभवतीतिविलंबमवललंबेइतिशीघ्रंनायातोयादोभिःसहेतितात्पर्यमवधेयं ॥४८॥ स० उत्पेततुः उत्पेतुः । उत्पेतुश्चेतिक-

[पा०] १ ज. मुक्त्वोदधिर्यातः. २ क. च.—ट. महाबलं. ३ झ. ट. मकरालये. ४ ग.—ट. मासाद्य. ५ घ. सेतुबन्ध. ६ च. छ. राघवस्य. ७ इदमर्धं क. ख. ङ.—ट. पाठेषुदृश्यते. ८ क. ख. स्मारितोद्याहं. ९ ङ. झ. ट. तस्मादद्यैव. १० ङ.—ट. ततोविसृष्टा. ११ ङ. छ. झ. ञ. ट. उत्पेततुर्महा. च. उत्पेतुस्ते. १२ ख. ङ.—ट. बभञ्जुःपादपांस्तत्र. १३ क. चिक्षिपुश्चहि. घ. चिक्षिपुःसागरंप्रति.

विल्वैश्च सप्तपर्णैश्च कर्णिकारैश्च पुष्पितैः ॥ चूतैश्चाशोकवृक्षैश्च सागरं समपूरयन् ॥ ५५ ॥
समूलांश्च विमूलांश्च पादपान्हरिसत्तमाः ॥ इन्द्रकेतूनिवोद्यम्य प्रजह्रुर्हरयस्तरून् ॥ ५६ ॥
तालान्दाडिमगुल्मांश्च नारिकेलान्विभीतकान् ॥ बकुलान्खदिरान्निम्बान्समाजहुः समन्ततः ॥५७
हस्तिमात्रान्महाकायाः पाषाणांश्च महाबलाः ॥ पर्वतांश्च समुत्पाट्य यन्त्रैः परिवहन्ति च ॥ ५८
प्रक्षिप्यमाणैरचलैः सहसा जलमुद्धतम् ॥ समुत्पतितमाकाशमुपासर्पत्ततस्ततः ॥ ५९ ॥
समुद्रं क्षोभयामासुर्वानराश्च समन्ततः ॥ [आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः ॥]
सूत्राण्यन्ये प्रगृह्णन्ति व्यायतं शतयोजनम् ॥ ६० ॥
नलश्चक्रे महासेतुं मध्ये नदनदीपतेः ॥ स तथा क्रियते सेतुर्वानरैर्घोरकर्मभिः ॥ ६१ ॥
दण्डानन्ये प्रगृह्णन्ति विचिन्वन्ति तथा परे ॥ ६२ ॥
वानराः शतशस्तत्र रामस्याज्ञापुरस्सराः ॥ मेघाभैः पर्वताग्रैश्च तृणैः काष्ठैर्बबन्धिरे ॥ ६३ ॥
पुष्पिताग्रैश्च तरुभिः सेतुं बध्नन्ति वानराः ॥ ६४ ॥
पाषाणांश्च गिरिप्रख्यान्गिरीणां शिखराणि च ॥ दृश्यन्ते परिधावन्तो गृह्य वारणसन्निभाः ॥६५
शिलानां क्षिप्यमाणानां शैलानां च निपात्यताम् ॥ बभूव तुमुलः शब्दस्तदा तस्मिन्महोदधौ ॥६६
[सहेलं हनुमाञ्शैलं यंयं विपुलमाक्षिपत् ॥ तंतं करेण वामेन सलीलं जगृहे नलः ॥ ६७ ॥]

व्यञ्जयितुं तान् परिगणयति—श्लोकद्वयेन ते सालैरित्यादिना ॥ ५४—५५ ॥ अथैषामानयनशैघ्र्यमाह—समूलानिति ॥ हरयस्तरूनित्युत्तरशेषः ॥ ५६ ॥ वृक्षेषून्मूलितेषु गुल्मादीनाजह्रुरित्याह—तालानिति ॥ तालान् क्षुद्रतालान् । खदिरान् अरिमेदकान् ॥ ५७ ॥ भूरुहेषु लुप्तेषु पाषाणपर्वतादीनाजह्रुरित्याह—हस्तीति ॥ हस्तिमात्रान् गजप्रमाणान् । " प्रमाणे द्वयसच्दघ्नञ्मात्रचः " इति मात्रच्प्रत्ययः । यन्त्रैः शकटादिभिः ॥ ५८ ॥ उद्धतं उत्पतितं । आसीत् । समुत्पतितं सत् आकाशं ततस्ततः तत्र तत्र । उपासर्पत् प्रससार ॥ ५९ ॥ सूत्राणि शतयोजनं व्यायतं आकृष्टं यथा भवा तथा । प्रगृह्णन्ति प्रागृह्णन् । आर्जवार्थं व्यत्यये लकारः ॥ ६० ॥ घोरकर्मभिः युगपदनेकपर्वतान यनकर्मभिः । तथा नलक्रियानुसारेण ॥ ६१ दण्डान् सूत्रबद्धदण्डान् । वानरत्वराकरणदण्डान्वा विचिन्वन्ति विशेषेण चयनं कुर्वन्ति । नलबद्धसे तोरुपरि शिलाश्चितवन्त इत्यर्थः ॥ ६२ ॥ बबन्धि सेतुप्रदेशानिति शेषः ॥ ६३ ॥ पुष्पिताग्रैरिति मार्दवार्थमुपरि बबन्धुरित्यर्थः ॥ ६४ ॥ अथ वानराण पर्वतानयनं वर्णयति—पाषाणांश्चेति ॥ गृह्य गृहीत ॥ ६५ ॥ निपात्यतां आर्षं परस्मैपदं । तुमुलः संकुल

चित्पाठः ॥५२॥ **स०** यन्त्रैः अनायासाहरणकरणैश्चकादिभिः । समर्थैःकौशलप्रदर्शनार्थं असमर्थैःशरीररक्षणार्थंयन्त्रादिकरणमितिवेकः ॥५८॥ **ती०** शतयोजनंव्यायतंसूत्राणिप्रगृह्णन्ति शतयोजनपर्यन्तव्यायामस्यन्यूनातिरिक्तत्वपरिहारार्थंसूत्राण्यगृह्णन्नित्यर्थः **स०** शतयोजनमायतंदीर्घंसेतुंकर्तुं ॥ ६० ॥ **शि०** नलोमहासेतुंचक्रे । ससेतुःवानरैरितरैरपिक्रियते । एतेनपाषाणादिसङ्घट्टनंनलयत्तं । सामग्रीसंपादनमितरायत्तमितिसूचितं ॥ ६१ ॥ **स०** दण्डान् मानार्थं । विचिन्वन्ति छिद्रादिकंयथानस्यात्तथामार्गयन्ति **ति०** विचिन्वन्ति आहरणीयवृक्षादिकं ॥ **ती०** दण्डान् प्रत्येकंबन्धनीयसेतुविभागंमानदण्डान्गृह्णन्ति । विचिन्वन्ति समविभागंपरीक्षन्ते । यद्वा सेतुबन्धनार्थं पर्वताद्यानेतॄन्वानरांस्त्वरयितुं दण्डान् दीर्घयष्टीः । प्रगृह्णन्ति । विचिन्वन्ति श्रमात्तत्रतच्छायासुविलीनान्वानरानन्वेषयन्ति ॥ ६२ ॥ **स०** आज्ञैवपुरस्सरीयेषांते तैः । आज्ञायाःपुरस्सराः अहमहमिकयातैर्वा

[**पा०**] १ ख. घ.—ञ. ट. बिल्वकैः. २ ङ. ञ. ट. करीरान्बकुलान्निंबान्. घ. खादिरान्पाटलान्निंबान्. ३ ङ.—ट समुत्सर्पत्चाकाशमवासर्पत्ततःपुनः. ४ घ. च. छ. ञ. ञ. निंपतन्तःसमन्ततः. ५ इदमर्धं क. पाठेदृश्यते. ६ ख. ग. ङ्यायतं. ७ ङ. च. छ. ञ. ञ. तदा. ८ क. ख. ङ.—ट. वानरैः. ९ क.—ट. पुरस्सरैः. १० क.—ट. पर्वताभैश्च. ११ घ. ङ. ञ. दानवसंनिभाः. १२ क. ख. ग. ङ.—ट. तत्रपात्यतां. १३ अयंश्लोकः ख. च. छ. ञ. पाठेषुदृश्यते.

कृतानि प्रथमेनाह्ना योजनानि चतुर्दश ॥ प्रहृष्टैर्गजसंकाशैस्त्वरमाणैः प्लवङ्गमैः ॥ ६८ ॥
द्वितीयेन तथा चाह्ना योजनानि तु विंशतिः ॥ कृतानि प्लवगैस्तूर्णं भीमकायैर्महाबलैः ॥ ६९ ॥
अह्ना तृतीयेन तथा योजनानि कृतानि तु ॥ त्वरमाणैर्महाकायैरेकविंशतिरेव च ॥ ७० ॥
चतुर्थेन तथा चाह्ना द्वाविंशतिरथापि च ॥ योजनानि महावेगैः कृतानि त्वरितैस्तु तैः ॥ ७१ ॥
पञ्चमेन तथा चाह्ना प्लवगैः क्षिप्रकारिभिः ॥ योजनानि त्रयोविंशत्सुवेलमधिकृत्य वै ॥
[प्रहृष्टैर्गिरिसंकाशैस्त्वरमाणैः प्लवङ्गमैः ॥ ७२ ॥]
स वानरवरः श्रीमान्विश्वकर्मात्मजो बली ॥ बबन्ध सागरे सेतुं यथा चास्य पिता तथा ॥ ७३ ॥
स नलेन कृतः सेतुः सागरे मकरालये ॥ शुशुभे सुभगः श्रीमान्स्वातीपथ इवाम्बरे ॥ ७४ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ आगम्य गगने तस्थुर्द्रष्टुकामास्तदद्भुतम् ॥ ७५ ॥
दशयोजनविस्तीर्णं शतयोजनमायतम् ॥ ददृशुर्देवगन्धर्वा नलसेतुं सुदुष्करम् ॥ ७६ ॥
आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः ॥ ७७ ॥
तदचिन्त्यमसह्यं च अद्भुतं रोमहर्षणम् ॥ ददृशुः सर्वभूतानि सागरे सेतुबन्धनम् ॥ ७८ ॥

॥ ६६—६७ ॥ कृतानीति । चतुर्दशयोजनपरिमितः सेतुर्बद्ध इत्यर्थः । एवमुत्तरेष्वपि योज्यं ॥ ६८ ॥ द्वितीयेनेति । प्रतिदिनं योजनाधिक्यमुत्साहातिरेकात् ॥ ६९—७१ ॥ त्रयोविंशत् त्रयोविंशतिः । आर्षो व्यत्ययः । अधिकृत्य अवधिं कृत्वा ॥ ७२ ॥ अस्य पिता यथा यादृशशक्तिविशिष्टः । तथा तादृशशक्तिविशिष्ट इत्यर्थः ॥ ७३ ॥ सुभगः शोभनमाहात्म्यवान् । स्वातीपथः छायापथः । स्वातीवीथिर्वा । सा चाकाशे सूर्यादीनां मध्यमार्गे मध्यमावीथिः । तदुक्तं वायुपुराणे—" सूर्यादीनां त्रयो मार्गा दक्षिणोत्तरमध्यमाः " इति प्रक्रम्य " तथा द्वे चापि फल्गुन्या मघा चैवार्षभी मता । हस्तश्चित्रा तथा स्वाती मध्यवीथ्यभिविश्रुता ॥ ज्येष्ठा विशाखानूराधा वीथीराजगवी मता । एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते " इति ॥७४—७५॥ नलसंबन्धी सेतुर्नलसेतुः तं ॥ ७६ ॥ निर्विघ्नसेतुबन्धेन जातं वानरहर्षं दर्शयति—आप्लवन्त इति ॥ अर्धमेकं वाक्यं । आप्लवन्तः आभिमुख्येन प्लवन्तः दूरं प्लवन्तः । आसन्निति शेषः ॥ ७७ ॥ अचिन्त्यं इतःपूर्वं मनसापि चिन्तयितुमनर्हं । असह्यं कस्यापि यत्नाविषयं । अद्भुतं आश्चर्यं-

शि०शतशोवानरैः तृणादिभिः बबन्धिरे सेतुप्रदेशाइतिशेषः ॥६३॥ ति० सुवेलं सामीप्येसुशब्दस्याव्ययीभावः। वेलासमीपं परपारसमीपमधिकृत्येत्यर्थः ॥ स० सुवेलं सुशोभनाप्राप्यावान्तरवेलायस्मिन्कर्मणितद्यथाभवतितथा । अधिकृत्येतिकेचित् । वस्तुतस्तु सुवेलंतन्नामकंपर्वतं । यद्वक्ष्यति " तेसुवेलस्यशैलस्य " इति ॥ ननुवनपर्वणि " दशयोजनविस्तारंत्रिंशद्योजनमायतं । बबन्धुर्वानराः सेतुंप्रथमेदिवसेतदा । सन्ध्यामर्वाग्द्वितीयेतुत्रिंशद्योजनविस्तरः । एवंत्रिभिर्दिनैर्वीरैःसेतुर्नवतियोजनं । चतुर्थेतुदिनेसार्धेयामेतेचवलीमुखाः । दृष्टालङ्केतिरामायशशंसुः " इतिचतुर्थेदिनेदशयोजनानील्याहत्यशतयोजनोभवतिसेतुर्दशयोजनविस्तारश्चेतिदिनचतुष्टयेसेतुसमाप्त्युक्तेः । तथापद्मपुराणेपुष्करखण्डेत्रिंशेऽध्याये " एषसेतुर्मयाबद्धःसमुद्रेवरुणालये । त्रिभिर्दिनैःसमाप्तिमेनीतोवानरसत्तमैः । " इतित्रिभिर्दिनैःसेतुसमाप्त्युक्तेश्च भारतेचतुर्दिन्युक्तिश्चकथं । कथंचात्रपञ्चदिन्युक्तिरितिचेन्न । हिरण्याक्षवधस्यभागवतेतृतीयस्कन्धेकर्णमूलताडनेन तथापुनस्तत्रैवदंष्ट्रयेतिकथनंयथाकल्पभेदेनेतिव्यवस्था श्रीतात्पर्येणकृता कृताच वामाङ्गुष्ठनखनिर्भिन्नेतिभागवतस्यदक्षिणाङ्गुष्ठनखनिर्भिन्नेतिपुराणान्तरस्यचवाराहादिकल्पभेदेनेति तथा भारतरामायणयोरपिविरोधसमाधिरवधेयः । अवधेयश्चपद्मपुराणाविरोधः । तथाचोक्तंस्कान्दे—उमासंहिताद्वादशाध्याये " कदाचिद्धनुषासेतुःकदाचिद्विशिखेनच । दार्वादिनाकदाचिच्चकल्पेकल्पेव्यवस्थितिः" इति । एवंदिनेष्वपिकल्पभेदेनसमाधानंज्ञेयं । अथवापञ्चषासुपुस्तकसंपुटीषुनैतेश्लोकाःसन्ति सन्तिचकचिदेवेत्येतेप्रक्षिप्ताइतिज्ञेयं ॥ ७४ ॥

[पा०] १ च.—झ. ट. तथैवाह्ना. २ ङ. च. छ. झ. ट. योजनानितुसागरे. ३ ङ. च. झ. ञ. ट. त्वरितैस्ततः. ग. प्लवगैस्तुतैः. ४ इदमर्धं ग. पाठेदृश्यते. ५ ददृशुरित्यर्धस्यस्थानेख. पाठे. ददृशुर्देवगन्धर्वाःसिद्धाश्चपरमर्षयः । विस्मिताश्चतदाहृष्टा नलसेतुंसुदुष्करं इत्येकःश्लोकोदृश्यते. ६ घ. दुष्करं.

तानि कोटिसहस्राणि वानराणां महौजसाम् ॥ बध्नन्तः सागरे सेतुं जग्मुः पारं महोदधेः ॥ ७९ ॥
विशालः सुकृतः श्रीमान्सुभूमिः सुसमाहितः ॥ अशोभत महासेतुः सीमन्त इव सागरे ॥ ८० ॥
ततः पारे समुद्रस्य गदापाणिर्विभीषणः ॥ परेषामभिघातार्थमतिष्ठत्सचिवैः सह ॥ ८१ ॥
सुग्रीवस्तु ततः प्राह रामं सत्यपराक्रमम् ॥ हनुमन्तं त्वमारोह अङ्गदं चापि लक्ष्मणः ॥ ८२ ॥
अयं हि विपुलो वीर सागरो मकरालयः ॥ वैहायसौ युवामेतौ वानरौ तारयिष्यतः ॥ ८३ ॥
अग्रतस्तस्य सैन्यस्य श्रीमान्रामः सलक्ष्मणः ॥ जगाम धन्वी धर्मात्मा सुग्रीवेण समन्वितः ॥ ८४ ॥
अन्ये मध्येन गच्छन्ति पार्श्वतोन्ये प्लवङ्गमाः ॥ सलिले प्रपतन्त्यन्ये मार्गमन्ये न लेभिरे ॥ ८५ ॥
केचिद्वैहायसगताः सुपर्णा इव पुप्लुवुः ॥ ८६ ॥
घोषेण महता तस्य सिन्धोर्घोषं समुच्छ्रितम् ॥ भीममन्तर्दधे भीमा तरन्ती हरिवाहिनी ॥ ८७ ॥
वानराणां हि सा तीर्णा वाहिनी नलसेतुना ॥ तीरे निविविशे राज्ञो बहुमूलफलोदके ॥ ८८ ॥

तदद्भुतं राघवकर्म दुष्करं समीक्ष्य देवाः सह सिद्धचारणैः ॥
उपेत्य रामं सहसा महर्षिभिः समभ्यषिञ्चन्सुशुभैर्जलैः पृथक् ॥ ८९ ॥
जय स्वशत्रून्नरदेव मेदिनीं ससागरां पालय शाश्वतीः समाः ॥
इतीव रामं नरदेवसत्कृतं शुभैर्वचोभिर्विविधैरपूजयन् ॥ ९० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

करं । रोमहर्षणं पुलकावहं ॥ ७८ ॥ सेतुं बध्नन्तः सेतुबन्धनसहकारिणः ॥ ७९ ॥ सुकृतः दृढतया कृतः सुकृतकरो वा । श्रीमान् ऋजुत्वेन कान्तिमान् । सुभूमिः निम्नोन्नतत्वरहितः । सुसमाहितः निर्विवरः ॥ ८० ॥ पारे दक्षिणतीरे ॥ ८१ ॥ लक्ष्मण इत्यत्र आरोहस्विति पुरुषविपरिणामः कर्तव्यः ॥ ८२ ॥ आरोहणहेतुमाह—अयमिति ॥ विपुलः शतयोजनसंपन्त्वां गमने बहुकालविलम्बो भविष्यतीति भावः । वैहायसौ अपादचारिणौ । इति सुग्रीवः प्राहेति पूर्वेणान्वयः ॥ ८३—८४ ॥ न लेभिरे मार्गालाभात्तीर एव कंचित्कालं स्थिता इत्यर्थः ॥ ८५ ॥ केचिदित्यर्धमेकं वाक्यं ॥ वैहायसं विहायःसंबन्धि गतं गमनं येषां ते तथोक्ताः । सुपर्णाः गरुडाः ॥ ८६ ॥ अन्तर्दधे तिरश्चकार ॥ ८७ ॥ वानराणां राज्ञो वाहिनीत्यन्वयः । राज्ञेति पाठे राज्ञा सुग्रीवेण सहेत्यर्थः । तीरे दक्षिणतीरे ॥ ८८ ॥ इत्थमकुण्ठदशकण्ठकण्ठाटवीत्रुटननिदर्शनभूतं सेतुनिर्माणनैपुण्यमालोक्य समुपजातमानन्दसन्दोहमा रावणनिबर्हणादनुद्घाटनीयमप्यन्तर्नियन्तुमशक्नुवन्तस्तादृशहर्षप्रकर्षबलात्कारेण देवा यथोचितं राममपूजयन्नित्याह—तदित्यादिना श्लोकद्वयेन ॥ दुष्करं रामादन्यैर्मनसापि कर्तुमशक्यं पृथक्प्रत्येकं समभ्यषिञ्चन् ॥ ८९ ॥ जयेति च्छेदः । स्वशत्रून् आश्रितशत्रूणामेवास्य शत्रुत्वादिति भावः । नरदेवसत्कृतं नरैश्च देवैश्च सत्कृतं । अपूजयन् अस्तुवन् । स्तुतिर्हि वाचिका पूजा ॥ ९० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

रामानु० सुग्रीवेणसमन्वितोजगामेत्यनेन सुग्रीवस्यापिविहायसागमनंद्योत्यते ॥ ८४ ॥ ति० नरदेवाः ब्राह्मणाः ॥ ९० ॥ इतिद्वाविंशः सर्गः ॥ २२ ॥

[पा०] १ घ. ज. झ. ट. सलिलं. २ क.—घ. च.—ट. महताघोषंसागरस्य. ३ घ. हन्त. ४ घ. सिन्धोर्बहुमूल. क. ग. ङ.—ट. राज्ञाबहुमूल.

त्रयोविंशः सर्गः ॥ २३ ॥

तीर्णार्णवेनरामेण लक्ष्मणंप्रति घोरतरसमरसूचकोत्पातप्रदर्शनपूर्वकमुत्साहेन सेनयाविभीषणसुग्रीवादिभिस्सहलङ्कांप्रति प्रस्थानम् ॥ १ ॥

निमित्तानि निमित्तज्ञो दृष्ट्वा लक्ष्मणपूर्वजः ॥ सौमित्रं संपरिष्वज्य इदं वचनमब्रवीत् ॥ १ ॥
परिगृह्योदकं शीतं वनानि फलवन्ति च ॥ बलौघं संविभज्येमं व्यूह्य तिष्ठेम लक्ष्मण ॥ २ ॥
लोकक्षयकरं भीमं भयं पश्याम्युपस्थितम् ॥ निर्बर्हणं प्रवीराणामृक्षवानररक्षसाम् ॥ ३ ॥
वाताश्च कलुषा वान्ति कम्पते च वसुन्धरा ॥ पर्वताग्राणि वेपन्ते पतन्ति च महीरुहाः ॥ ४ ॥
मेघाः क्रव्यादसंकाशाः परुषाः पुरुषस्वनाः ॥ क्रूराः क्रूरं प्रवर्षन्ति मिश्रं शोणितबिन्दुभिः ॥ ५ ॥
रक्तचन्दनसंकाशा सन्ध्या परमदारुणा ॥ ज्वलतः प्रपतत्येतदादित्यादग्निमण्डलम् ॥ ६ ॥
दीना दीनस्वराः क्रूराः सर्वतो मृगपक्षिणः ॥ प्रत्यादित्यं विनर्दन्ति जनयन्तो महद्भयम् ॥ ७ ॥
रजन्यामप्रकाशस्तु संतापयति चन्द्रमाः ॥ ८ ॥
कृष्णरक्तांशुपर्यन्तो लोकक्षय इवोदितः ॥ ह्रस्वो रूक्षोऽप्रशस्तश्च परिवेषः सुलोहितः ॥ ९ ॥

एवं रामो नलसेतुना तीर्णमहार्णवो महासमरसूचकान्महोत्पातान्दृष्ट्वा चिरप्रार्थिताभीष्टसिद्धिर्भविष्यतीति सन्तुष्टो दृष्टानि निमित्तानि निमित्तज्ञाय लक्ष्मणाय दर्शयति—निमित्तानीति ॥ निमित्तज्ञत्वे लक्ष्मणादप्याधिक्यं दर्शयितुं लक्ष्मणपूर्वज इत्युक्तं । संपरिष्वङ्गश्चिरप्रार्थितसमरस्यासन्नत्वात् । निमित्तापेक्षणस्यावश्यकत्वमुक्तं कामन्दके—" निमित्तान्येव शंसन्ति शुभाशुभफलोदयम् । तस्मादेतानि शास्त्रज्ञो राजा समुपलक्षयेत् " इति ॥ १ ॥ शीतमुदकं शीतोदकवत्प्रदेशं । वनानि जलसमीपस्थानि । परिगृह्य वासार्थं स्वीकृत्य । व्यूह्य गरुडरूपेण सन्निवेश्य । तथा व्यक्तीभविष्यति ॥ २ ॥ लोकक्षयकरं । क्षुद्रजनक्षयकरं । विशिष्य प्रवीराणां निबर्हणं विनाशकं । भयमिति युद्धमुच्यते ॥ ३ ॥ भयदर्शने लिङ्गान्याह—वाता इत्यादि ॥ महीरुहाः पतन्ति अकस्मादितिभावः । अत्रात्यन्तानिष्टकरो भूकम्पः संध्याकालिक इति ज्ञेयं । तथोक्तं वसिष्ठेन—" यामत्रयाच्च भूकम्पो द्विजातीनामरिष्टदः । अरिष्टदः क्षितीशानां संध्ययोरुभयोरपि " इति ॥ ४ ॥ क्रव्यादसंकाशाः वृकवर्णाः श्येनादिसंस्थाना इति वा । परुषाः दुर्दर्शाः । रूक्षा इति यावत् । परुषस्वनाः श्रुतिकटुस्वनाः । अतएव क्रूराः भयंकराः । मिश्रं उदकमिति शेषः । क्रूरमिति क्रियाविशेषणं । अत्र मिहिरः—" दिव्युल्कापतनं चैव दिवा नक्षत्रदर्शनम् । दिवाऽशनिस्तथा काष्ठतृणरक्तप्रवर्षणं " ॥ ५ ॥ रक्तचन्दनं कुङ्कुमं । रक्तचन्दनतुल्यमेघवतीत्यर्थः । परमदारुणा भवतीति शेषः । अग्निमण्डलं अग्निपिण्डः ॥ ६ ॥ दीनाः दीनाकृतयः । जनयन्तः सूचयन्तः ॥ ७ ॥ रजन्यामिति अर्धमेकं वाक्यं । अप्रकाशः निष्प्रभः । संतापयति । शीतस्य संतापकरणं ह्युत्पात इति भावः ॥ ८ ॥ कृष्णा रक्ताश्चांशवः पर्यन्ते यस्य सः तथोक्तः । सर्वान्ते कृष्णमण्डलः तदनन्तरं रक्तमण्डल इत्यर्थः । सुलोहितः मध्ये अत्यन्तरक्तवर्णः । लोकक्षये प्रलये उदितः परिवेष इव स्थितः । रूक्षः क्रूरः । अप्रशस्तः अप्रसिद्धः । इतः पूर्वमदृष्ट इत्यर्थः । परिवेषः दृश्यत इति शेषः । अत्र वर्णत्रयकथनेन मण्डलत्रयकथनात्सायंकालिकत्वाच्च परिवेषस्य नृपक्षयकरत्वं सूच्यते । तथाहकाश्यपः—" द्विमण्डलश्चमूपन्नो नृपन्नो यस्त्रिमण्डलः " इति । " दिनकरपरिवेषः पूर्वयामे तु पीडा दिनकरपरिवेषो वृष्टियुद्धं द्वितीये । दिनकरपरिवेषं क्षेममाहुस्तृतीये

स० भयं तत्साधनं । निबर्हणं नाशश्च । योग्यतयाभयं ऋक्षवानराणां । रक्षसांचनिबर्हणमित्यन्वेतव्यं । अन्यथा सर्वज्ञस्य रामस्यैनिमित्तोपन्यासोनिर्मरणवानरऋक्षविषयेमोघःस्यात् । अथवा " तारापिता तान्निरुजश्चकार " इतितद्ग्रन्थमादनानिलोज्जीविताःब्रह्मवराच्चजीविताश्चेत्येतत्पूर्वतनींमूर्तिंविवक्षित्वा प्रबर्हणवचनमर्हतिऋक्षवानरपक्षेपि ॥ ३ ॥ स० परुषस्वराः प्रखरस्वराः ।

[पा०] १ ङ. ञ. प्रबर्हणं. २ ठ. परुषस्वराः.

आदित्ये विमले नीलं लक्ष्म लक्ष्मण दृश्यते ॥ १० ॥
रजसा महता चापि नक्षत्राणि हतानि च ॥ युगान्तमिव लोकानां पश्य शंसन्ति लक्ष्मण ॥११॥
काकाः श्येनास्तथा गृध्रा नीचैः परिपतन्ति च ॥ शिवाश्चाप्यशिवान्नादान्नदन्ति सुमहाभयान् ॥ १२ ॥
शैलैः शूलैश्च खड्गैश्च विसृष्टैः कपिराक्षसैः ॥ भविष्यत्यावृता भूमिर्मांसशोणितकर्दमा ॥ १३ ॥
क्षिप्रमद्यैव दुर्धर्षां पुरीं रावणपालिताम् ॥ अभियाम जवेनैव सर्वतो हरिभिर्वृताः ॥ १४ ॥
इत्येवमुक्त्वा धर्मात्मा धन्वी संग्रामहर्षणः ॥ प्रतस्थे पुरतो रामो लङ्कामभिमुखो विभुः ॥ १५ ॥
सविभीषणसुग्रीवास्ततस्ते वानरर्षभाः ॥ प्रतस्थिरे विनर्दन्तो निश्चिता द्विषतां वधे ॥ १६ ॥
राघवस्य प्रियार्थं तु धृतानां वीर्यशालिनाम् ॥ हरीणां कर्मचेष्टाभिस्तुतोष रघुनन्दनः ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

दिनकरपरिवेषः सर्वनाशश्चतुर्थे " इति ॥ ९ ॥ नीलं लक्ष्म छिद्ररूपं । तदाह वराहः—" अपर्वणि तथा राहुग्रहणं चन्द्रसूर्ययोः । चन्द्रार्कमण्डलच्छिद्रं दृष्ट्वा जनपदक्षयः " इति ॥ यद्वा नीलं लक्ष्म चन्द्र इव कलङ्को दृश्यते । एतदेवौत्पातिकं नैत्यमधिकृत्य यदादित्यस्य रोहितं रूपमित्यारभ्य यत् कृष्णं तदन्नस्येत्युच्यते ॥ १० ॥ रजसा मालिन्येन । युगान्तं प्रलयं ॥ ११ ॥ नीचैः दुर्बलैः । अधिकबलानां दुर्बलैः परिभवोऽप्युत्पात इति । शिवाः गोमायवः । " स्त्रियां शिवा भूरिमायगोमायुः " इत्यमरः । नादान् नदन्ति नादान्कुर्वन्तीत्यर्थः ॥ १२ ॥ उक्तोत्पातफलमाह—शैलैरिति ॥ मांसशोणितकर्दमा मांसशोणितरूपकर्दमवती ॥ १३ ॥ क्षिप्रं सत्वरं । जवेन वेगेन ॥ १४ ॥ पुरतः प्रतस्थ इति उत्साहातिशयोक्तिः । विभुः समर्थः ॥ १५ ॥ निश्चिताः निश्चयवन्तः । अत्र प्रस्थानं शीतोदकफलवद्वनपरिग्रहार्थं परिगृह्योदकमित्यादिना प्रथमं तस्य कर्तव्यतया अभिहितत्वात् ॥ १६ ॥ धृतानां धैर्यवतां । कर्मचेष्टाभिः युद्धकर्मादिविषयचेष्टाभिः लाङ्गूलोत्थापनादिभिः । तुतोषेत्यनेन इदं दुर्गप्रदेशं दृष्ट्वा वानरा निरुत्साहा भवेयुरिति पूर्वं राममनसि स्थितमित्यवगम्यते ॥ १७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥

अतएवपरुषाः श्रोत्रोल्बणाः। क्रूराः मनउद्वेजकाः ॥५॥ **शि०** क्षिप्रमभियाम। एतेन स्वविजयसूचकसुशकुनोपिरामेणावलोकितइति व्यञ्जितं ॥ १४ ॥ **ति०** रामः जनरमणः रामइत्यन्वयः ॥ **स०** अरामः पुत्रत्वेनतत्सदृशःतद्भिन्नोलक्ष्मणः । पुरतोरामः । अपुरतः तत्पश्चाल्लक्ष्मणः ॥ सरैः मुक्ताहारादिभिर्नविद्यतेमाशोभाइदानींयस्येतिवा सरामः इदानींदृरितभार्यत्वेनारामः सर्वाभिरामोपिरिपूर्णाममनोहरइतिवा अरामः । धर्मात्मेतिक्वचित्पाठोव्याख्यातृसाहसासहः ॥१५॥ **ति०** धृतानां निश्चितबुद्धीनां ॥१६॥ **स०** राघवस्य स्वस्यप्रियार्थं भार्यार्थं । यत्कर्म अन्वेषणरूपं तदनुरूपाभिश्चेष्टाभिः । रघुनन्दनोरामस्तुतोष । राघवशब्देन मुखतोगृहीतस्यपुनारघुनन्दनपदेनग्रहणं " अनुग्रहार्थसकृषेरवापसलक्ष्मणोस्त्रमुनितोहिकेवलं " इत्यादिवत्संभवति । राघवस्य लक्ष्मणस्य । प्रियार्थं प्रीत्यावहप्रयोजनमुद्दिश्य । यत्कर्म तदनुरूपचेष्टाभिः रघुनन्दनोरामः । राघवस्य रामस्य । रघुनन्दनोलक्ष्मणइतिवा ॥ **ति०** कर्मचेष्टाभिः कर्मणा धैर्येणपरंप्रतिप्रस्थानलक्षणेन । चेष्टाभिः कायव्यापारैश्च तुतोषेत्यन्वयः ॥ १७ ॥ इतित्रयोविंशः सर्गः ॥ २३ ॥

[पा०] १ क. ख. च. छ. नक्षत्राण्यावृतानिच. २ च.—झ. ट. विमुक्तैः. ३ क. च. छ. अभियामो. ४ च. छ. झ. ञ. ट. सर्वैर्हरिभिरावृताः. ५ झ. ञ. ट. ठ. धन्वीसरामःसंग्रामधर्षणः. ६ ङ.—ञ. सुग्रीवास्सवेंते. ७ ङ. झ. ञ. ट. धृतानांद्विषतां. ८ क. ख. रावणस्यवधार्थंतुगच्छतांवीर्यशालिनां. ९ ङ. झ. ञ. ट. सुतरांवीर्य.

- DONATED BY -
Lt. PADMASHREE
Prof. V. VENKATACHALAM
VARANASI

चतुर्विंशः सर्गः ॥ २४ ॥

लङ्कासमीपंगतैरन्तर्गतराक्षससेनाक्रोशमसहमानैर्वानरैरुच्चैरुद्घोषणम् ॥ १ ॥ रामेणलक्ष्मणंप्रति लङ्कावर्णनम् ॥ २ ॥ तथा सुरक्षितंसेनासंनिवेशनपूर्वकं वानरेभ्योबन्धाच्छुकराक्षसमोक्षणम् ॥ ३ ॥ शुकेन रावणमेत्यतंप्रति वानरकृतस्वबन्धादिनिवेदनपूर्वकं रामपराक्रमप्रशंसनेन तस्मैसीताप्रत्यर्पणस्य रणस्यवा करणचोदना ॥ ४ ॥ तेन शुकंप्रत्यात्मश्लाघनपूर्वकं रामेणस्वस्याजय्यत्वादिप्रलपनम् ॥ ५ ॥

सा वीरसमिती राज्ञा विरराज व्यवस्थिता ॥ शशिना शुभनक्षत्रा पौर्णमासीव शारदी ॥ १ ॥
प्रचचाल च वेगेन त्रस्ता चैव वसुन्धरा ॥ पीड्यमाना बलौघेन तेन सागरवर्चसा ॥ २ ॥
ततः शुश्रुवुराक्रुष्टं लङ्कायां काननौकसः ॥ भेरीमृदङ्गसंघुष्टं तुमुलं रोमहर्षणम् ॥ ३ ॥
बभूवुस्तेन घोषेण संहृष्टा हरियूथपाः ॥ अमृष्यमाणास्तं घोषं विनेदुर्घोषवत्तरम् ॥ ४ ॥
[1]राक्षसास्तु प्लवङ्गानां [2]शुश्रुवुश्चापि गर्जितम् ॥ नर्दतामिव दृप्तानां मेघानामम्बरे स्वनम् ॥ ५ ॥
दृष्ट्वा दाशरथिर्लङ्कां चित्रध्वजपताकिनीम् ॥ जगाम मनसा सीतां दूयमानेन चेतसा ॥ ६ ॥
अत्र सा मृगशावाक्षी रावणेनोपरुध्यते ॥ अभिभूता ग्रहेणेव लोहिताङ्गेन रोहिणी ॥ ७ ॥
दीर्घमुष्णं च निश्वस्य समुद्वीक्ष्य च लक्ष्मणम् ॥ उवाच वचनं वीरस्तत्कालहितमात्मनः ॥ ८ ॥
आलिखन्तीमिवाकाशमुत्थितां पश्य लक्ष्मण ॥ मनसेव कृतां लङ्कां नगाग्रे विश्वकर्मणा ॥ ९ ॥

अथ रावणस्य वानरसेनागमनश्रवणं—सेत्यादि ॥ राज्ञा रामेण । व्यवस्थिता शीतोदकादिकं परिगृह्य स्थिता । वीरसमितिः वीरसङ्घः । " सङ्घे सभायां समितिः " इत्यमरः । शशिना व्यवस्थिता कृतमर्यादा ॥ १ ॥ सागरवर्चसा सागरवदपरिच्छिन्नेनेत्यर्थः ॥ २ ॥ ततः सेनानिवेशानन्तरं । निष्कोलाहले सतीत्यर्थः । आक्रुष्टं सेनाक्रोशं । भावे क्तः । भेरीमृदङ्गसंघुष्टमिति समुच्चयः ॥ ३ ॥ घोषवत्तरं राक्षसघोषादधिकघोषवत् । क्रियाविशेषणं ॥ ४ ॥ दृप्तानां पूर्णानां । आकाशस्यैव शब्दाश्रयत्वादम्बर इत्युक्तं । यद्वा " प्लवगसैन्यमुलूकजिताजितं " इतिवदम्बरशब्दस्तत्पर्यायं नभश्शब्दं लक्षयित्वा श्रावणमासमाह ॥ ५ ॥ चिह्नयुक्तो ध्वजः । केवलचेला पताकेति भिदा । चेतसा उपलक्षितः मनसा जगाम । सस्मारेत्यर्थः ॥ ६ ॥ स्मरणप्रकारमाह—अत्रेति ॥ एतच्छ्लोकान्ते प्रकारवचनमितिकरणं द्रष्टव्यं । सा साकेते सकलभोगार्हा । मृगशावाक्षी । मृगानुसरणसमये यद्धरिणदर्शनकुतूहलेन मृगशिशुवत्तरलतरं विलोचनयुगलं तदेवाद्यापि मनसि परिवर्तते । तदाह । यद्वा मृगशावे मारीचमये अक्षिणी यस्या इति विग्रहः ॥ ७ ॥ अद्य युद्धयात्रासमये कान्तास्मरणव्यसनमनुचितमिति तन्नियमितवानिति सूचयति दीर्घमुष्णं च निश्वस्येत्यनेन । तत्कालहितं युद्धयात्रासमये हितं । शोकविस्मारकनगरशोभावर्णनरूपं वचनं । यद्वा अङ्गदः सह नीलेनेत्यादि वाक्यं तत्कालहितं । तत्साहचर्यादाढ्यं नगरमितिवत् आलिखन्तीमित्यादिकं सर्वं वाक्यजातं तत्कालहितमित्युक्तं ॥ ८ ॥ आलिखन्तीं स्पृशन्तीं । उत्थितां उन्नतां । नगाग्रे

शि० सागरवर्चसा सागरस्यसगरवंशोद्भवस्यरामस्यवर्चस्तेजोयस्मिन् । किंचसागरात् सागरतरणात् लब्धंवर्चोयेनतेन । वेगेनोपलक्षितेनबलौघेन । त्रस्तत्वादिविशिष्टावसुंधरा प्रचचाल ॥ स० सागरस्यवर्चोयेनसः । तेनबलौघेन सेनासङ्घेन । वसुंधरा वेगेनपीड्यमानात्रस्तेवप्रचचाल ॥ २ ॥ स० दूयमानेनेति मनःपदेनचेतःपदेनाप्यन्वेति । ततश्च दूयमानेनचेतसासहितांसीतां दूयमानेनमनसाजगामेत्यन्वयःकृतोज्ञेयः । "वृद्धोयूना—" इत्यादिवत्सहेतिलाभः । दूयमानेनमनसाविशिष्टां । वैशिष्ट्यंतृतीयार्थ इतिवा ॥ ६ ॥ ति० आत्मनस्तत्कालहितं लङ्कादर्शनकालेआत्मनःप्रीतिकरं । दिव्यपुरीदर्शनजसंतोषद्योतकमितियावत् ॥ ८ ॥

[पा०] १ क. ख. ग. ङ. च. झ. ट. राक्षसास्तत्प्लवंगानां. २ ख. ग. ङ. झ. ञ. ट. शुश्रुवुस्तेपि.

विमानैर्बहुभिर्लङ्का संकीर्णा भुवि राजते ॥ विष्णोः पदमिवाकाशं छादितं पाण्डुरैर्घनैः ॥ १० ॥
पुष्पितैः शोभिता लङ्का वनैश्चैत्ररथोपमैः ॥ नानापतङ्गसंघुष्टैः फलपुष्पोपगैः शुभैः ॥ ११ ॥
पश्य मत्तविहंगानि प्रलीनभ्रमराणि च ॥ कोकिलाकुलषण्डानि दोधवीति शिवोऽनिलः ॥ १२ ॥
इति दाशरथी रामो लक्ष्मणं समभाषत ॥ १३ ॥
बलं च तद्वै विभजञ्शास्त्रदृष्टेन कर्मणा ॥ शशास कपिसेनाया बलमादाय वीर्यवान् ॥ १४ ॥
अङ्गदः सह नीलेन तिष्ठेदुरसि दुर्जयः ॥ १५ ॥
तिष्ठेद्वानरवाहिन्या वानरौघसमावृतः ॥ आश्रित्य दक्षिणं पार्श्वमृषभो वानरर्षभः ॥ १६ ॥
गन्धहस्तीव दुर्धर्षस्तरस्वी गन्धमादनः ॥ तिष्ठेद्वानरवाहिन्याः सव्यं पार्श्वं समाश्रितः ॥ १७ ॥
मूर्ध्नि स्थास्याम्यहं युक्तो लक्ष्मणेन समन्वितः ॥ १८ ॥
जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः ॥ ऋक्षमुख्या महात्मानः कुक्षिं रक्षन्तु ते त्रयः ॥ १९ ॥
जघनं कपिसेनायाः कपिराजोऽभिरक्षतु ॥ पश्चार्धमिव लोकस्य प्रचेतास्तेजसा वृतः ॥ २० ॥
सुविभक्तमहाव्यूहा महावानररक्षिता ॥ अनीकिनी सा विबभौ यथा द्यौः साभ्रसंप्लवा ॥ २१ ॥
प्रगृह्य गिरिशृङ्गाणि महतश्च महीरुहान् ॥ आसेदुर्वानरा लङ्कां विमर्दयिषवो रणे ॥ २२ ॥

त्रिकूटशिखरे ॥ ९ ॥ विष्णोः आदित्यस्य । पदं स्थानं । आकाशमध्यमिति भावः । विमानं अनेकतलप्रासादः ॥ १० ॥ फलभूतानि पुष्पाणि यासां ताः फलपुष्पाः मल्लिकादयः ताभिरुपगम्यन्त इति तथा । अतो न पुष्पितैरित्यनेन पौनरुक्त्यं । सङ्घुष्टं सङ्घोषः । भावे क्तः । नानाविधानि पतङ्गसङ्घुष्टानि येषां तैः ॥११॥ मत्तविहंगानि । विहंगशब्दोत्र कोकिलपरः । अनेन सदा फलवत्त्वमुक्तं । प्रलीनभ्रमराणि मधुपानपरवशतया निष्पन्दभ्रमराणि । अनेन सदा पुष्पवत्त्वमुक्तं । कोकिलाकुलं षण्डं पुष्पसमूहो येषां तानि कोकिलाकुलषण्डानि । अनेन सदा पल्लवितत्वमुक्तं । कोकिलानां पल्लवप्रियत्वात् । वनानीत्यनुषञ्जनीयं । दोधवीति पुनः पुनः कम्पयति । " धूञ् कम्पने " इत्यस्माद्यङ्लुक् ॥ १२ ॥ इतीत्यर्धमेकं वाक्यं ॥१३॥ शास्त्रदृष्टेन नीतिशास्त्रज्ञानेन । कर्मणा प्रयोगेण । बलं सेनां । विभजन् व्यूहयन् । व्यूहहेतोः शशास । कपिसेनाया इत्याद्युत्तरशेषः॥१४॥ शासनप्रकारमाह—कपिसेनाया इत्यादि ॥ अङ्गदो नीलेन सह स्वबलमादाय कपिसेनायाः उरसि उरःस्थाने । तिष्ठेदित्यन्वयः ॥ १५ ॥ वानरौघसमावृतः कपिसमूहसहितः ॥ १६ ॥ गन्धहस्ती मत्तगजः ॥ १७ ॥ मूर्ध्नीत्यर्धमेकं वाक्यं ॥ युक्तः सावधानः ॥ १८ ॥ वानरइति वेगदर्शिविशेषणं । ऋक्षमुख्यपदं वानराणामप्युपलक्षणं । महात्मानः महाबुद्धयः । कुक्षिं कुक्षिस्थानं ॥ १९ ॥ जघनं चरमभागं पुच्छमिति यावत् । कपिराजः सुग्रीवः । पश्चार्धमिति । " अपरस्यार्धे पश्चभावो वक्तव्यः " इत्यपरशब्दस्य पश्चादेशः । अर्धशब्दोंशवाची । पश्चिमां दिशमित्यर्थः ॥ २० ॥ सुविभक्तमहाव्यूहा सुष्ठु कृतगरुडव्यूहा । उत्तरत्र शार्दूलवचने " गारुडं व्यूहमाश्रित्य " इति वक्ष्यमाणत्वात् । साभ्रसंप्लवा समेघसंचारा ॥ २१ ॥ आसेदुः आसादितुमुद्युक्ताः । विमर्दयिषवः मर्दयि-

---

रामानु० विष्णोःपदं विष्णुपादभूतं ॥ **ति०** विष्णोः व्यापनशीलस्यवायुमयस्यब्रह्मणः । पदं प्रचारस्थानमाकाशमिव ॥ **स०** आकाशं पूर्वप्रकाशमानं । विष्णोः पदं आकाशं । पाण्डुभिर्घनैर्मेघैः छादितमिव ॥ १० ॥ **स०** पुष्पितैःशोभिता एकत्र । नानापतगसंघुष्टफलपुष्पोपगैर्वनैरपत्र ॥ ११ ॥ **ति०** विभजत् व्यभजत् ॥ १४ ॥ **ति०** नीलेनसहउरसि उच्यमानपुरुषव्यूहस्योरसि ॥ १५ ॥ **ति०** जांबवदादयस्त्रयोपिऋक्षाः ॥ १९ ॥ **ति०** जघनं पश्चार्धं । लोकस्य भूलोकस्य । पश्चार्धं पश्चिमदिशं । तेजसा

[पा०] १ ङ. झ. ञ. ट. संकीर्णारचितापुरा. क.—घ. च. छ. संकीर्णाहिविराजते. २ ङ. झ. ट. नानापतगसंघुष्ट. फलपुष्पोपगैः. ३ क. वनान्युपवनानिच. ४ ख. ङ. च. छ. झ. ट. तत्रविभजच्छास्त्र. घ. तद्विभक्तंवैशास्त्र. ५ क. ख. ङ.—ट. कपिसेनांतांबलादादाय. ६ क.—छ. झ. ञ. ट. आश्रितो. ज. आस्थितो. ७ ङ.—ट. मृषभोनामवानरः. ८ क. ख. घ. च. छ. ज. ञ. पार्श्वमधिष्ठितः. ङ. झ. ट. पक्षमधिष्ठितः. ९ क. ग. ङ.—ट. यत्तो.

शिखरैर्विकिरामैनां लङ्कां मुष्टिभिरेव वा ॥ इति स्म दधिरे सर्वे मनांसि हरिसत्तमाः ॥ २३ ॥
ततो रामो महातेजाः सुग्रीवमिदमब्रवीत् ॥ सुविभक्तानि सैन्यानि शुक एष विमुच्यताम् ॥ २४ ॥
रामस्य वचनं श्रुत्वा वानरेन्द्रो महाबलः ॥ मोचयामास तं दूतं शुकं रामस्य शासनात् ॥ २५ ॥
मोचितो रामवाक्येन वानरैश्चाभिपीडितः ॥ शुकः परमसंत्रस्तो रक्षोधिपमुपागमत् ॥ २६ ॥
रावणः प्रहसन्नेव शुकं वाक्यमभाषत ॥ किमिमौ ते सितौ पक्षौ लूनपक्षश्च दृश्यसे ॥
कच्चिन्नानेकचित्तानां तेषां त्वं वशमागतः ॥ २७ ॥
ततः स भयसंविग्नस्तथा राज्ञाऽभिचोदितः ॥ वचनं प्रत्युवाचेदं राक्षसाधिपमुत्तमम् ॥ २८ ॥
सागरस्योत्तरे तीरे सुवेलस्ते वचनं तथा ॥ यथासंदेशमक्लिष्टं सान्त्वयं श्लक्ष्णया गिरा ॥ २९ ॥
क्रुद्धैस्तैरहमुत्प्लुत्य दृष्टमात्रैः प्लवङ्गमैः ॥ गृहीतोस्म्यपि चारब्धो हन्तुं लोप्तुं च मुष्टिभिः ॥ ३० ॥
नैवं संभाषितुं शक्याः संप्रश्नोत्र न लभ्यते ॥ प्रकृत्या कोपनास्तीक्ष्णा वानरा राक्षसाधिप ॥३१॥
स च हन्ता विराधस्य कबन्धस्य खरस्य च ॥ सुग्रीवसहितो रामः सीतायाः पदमागतः ॥ ३२ ॥
स कृत्वा सागरे सेतुं तीर्त्वा च लवणोदधिम् ॥ एष रक्षांसि निर्धूय धन्वी तिष्ठति राघवः ॥ ३३ ॥
ऋक्षवानरसङ्घानामनीकानि सहस्रशः ॥ गिरिमेघनिकाशानां छादयन्ति वसुंधराम् ॥ ३४ ॥
राक्षसानां बलौघस्य वानरेन्द्रबलस्य च ॥ नैतयोर्विद्यते सन्धिर्देवदानवयोरिव ॥ ३५ ॥
पुरा प्राकारमायान्ति क्षिप्रमेकतरं कुरु ॥ सीतां वाऽस्मै प्रयच्छाशु सुयुद्धं वा प्रदीयताम् ॥ ३६ ॥

तुमिच्छवः । सनि द्वित्वाभाव आर्षः ॥ २२ ॥ शिखरैः साधनैः । विकिराम चूर्णयाम । मनांसि दधिरे निश्चयं चक्रुरित्यर्थः ॥ २३—२६ ॥ सितौ बद्धौ । " षिञ् बन्धने " इत्यस्माद्धातोर्निष्ठा । तत्र हेतुमाह—लूनपक्षश्च दृश्यस इति । चो हेत्वर्थः । यस्माल्लूनपक्षो दृश्यसे तस्मात् सिताविति संबन्धः । अनेकचित्तानां चञ्चलचित्तानामित्यर्थः । अनेन पुनः पुनर्बन्धविसर्जने ध्वन्येते । तेषां वानराणां वशमागतो न कच्चिदित्यन्वयः ॥ २७ ॥ संविग्नः संभ्रान्तः । तथापि चोदितः मत्संदेशस्य किमुत्तरं सुग्रीवेण दत्तं वदेति चोदित इत्यर्थः ॥ २८ ॥ सान्त्वयं असान्त्वयं । सुग्रीवमितिशेषः ॥ २९ ॥ लोप्तुं विनाशयितुं ॥ ३० ॥ अत्र वानरेषु । विषये सप्तमी । तीक्ष्णाः क्रूराः । उक्तेरेवावकाशो नास्ति । प्रत्युक्तेः का कथेति भावः । रावणप्रसादार्थं मध्ये राक्षसाधिपेतिसंबुद्धिः । त्वत्तोप्येतेऽतिशयिता इति ज्ञापनार्थं वा ॥ ३१ ॥ वक्ष्यमाणयोः सीताप्रदानयुद्धयोर्मध्ये सीताप्रदानस्य साधिष्ठत्वं दर्शयितुं रामपराक्रमं वर्णयति—स चेति ॥ तदव्याहतपराक्रमस्य भूयः संदर्शनादस्मानवश्यं हनिष्यत्येवेति भावः ॥ ३२ ॥ निर्धूय तृणीकृत्य । एष इत्यतिसन्निहितत्वमुच्यते ॥ ३३ ॥ सङ्घानामनीकानीत्यनेन सङ्घारब्धत्वोक्त्या महानीकत्वं सूचितं ॥ ३४ ॥ इदानीं तव वचनावकाशाभावेपि पुनः प्रकारान्तरेण गच्छेत्याशङ्क्याह—राक्षसानामिति ॥ संधिः योगमात्रं ॥ ३५ ॥ संप्रति कर्तव्यमुपदिशति—पुरेति ॥ पुरा आयान्ति आयास्यन्ति । " यावत्पुरानिपातयोर्लट् " इति भविष्यदर्थे लट् । एकतर-

धृतः प्रचेताइव ॥ २० ॥ स० विमुच्यतां बन्धनात् । पूर्वंविमुच्यतामित्युक्तिस्ताडनादिवमोचनविषयिणी । इयंतुलङ्कांप्रतिगन्तुं मुच्यतामित्येतत्परेतिमुक्त्युक्तिर्विवेकः ॥ २४ ॥ स० निपीडितः प्राक् । परमसंत्रस्तः पुरस्सरकपयस्ताडयेयुरितिवा इयदालस्यं कृतइतिरावणः क्रुद्धोहनिष्येदितिवातथा । अतएव पुनर्मोचयालूनपक्षलमुच्यमानंयुज्यते ॥ इतः परं रामाज्ञानन्तरं असत्रस्तः कपिप्रीडनभयरहितः ॥२६॥ ति० प्रहसन्नेव लूनपक्षलादिविकृताकारंदृष्ट्वाप्रहासः । स० कपिपीडाईदृशी अहोहतिहासः ॥२७॥ ति० सागरस्योत्तरेतीरेस्थिला श्लक्ष्णयागिरा वानरान्सान्त्वयन् अक्लिष्टंतेवचनं यथासंदेशंतथाऽब्रुवं ॥ २९ ॥ ति० विराधादि-

[पा०] १ घ. शुकमत्रविसर्जय. २ ङ. च. छ. झ. ञ. ट. रामस्यतुवचः. ३ ख.—ट. वानरैश्चनिपीडितः. ४ क. ख. ग. ङ.—ट. वाक्यमुवाचह. ५ ङ. च. छ. झ. ट. स्तेनराज्ञा. ६ घ. रावणंराक्षसाधिपं. ७ झ. तीरेऽब्रवंते. ८ झ. सान्त्वयन्. ९ ङ. झ. ञ. ट. दृष्टमात्रः. १० ङ. झ. नते. ११ ङ. झ. ट. युद्धंवापिप्रदीयतां.

शुकस्य वचनं श्रुत्वा रावणो वाक्यमब्रवीत् ॥ रोषसंरक्तनयनो निर्दहन्निव चक्षुषा ॥ ३७ ॥
यदि मां प्रति युद्ध्येरन्देवगन्धर्वदानवाः ॥ नैव सीतां प्रयच्छामि सर्वलोकभयादपि ॥ ३८ ॥
कदा नामाभिधावन्ति राघवं मामकाः शराः ॥ वसन्ते पुष्पितं मत्ता भ्रमरा इव पादपम् ॥ ३९ ॥
कदा तूणीशयैर्दीप्तैर्गणशः कार्मुकच्युतैः ॥ शरैरादीपयाम्येनमुल्काभिरिव कुञ्जरम् ॥ ४० ॥
तच्चास्य बलमादास्ये बलेन महता वृतः ॥ ज्योतिषामिव सर्वेषां प्रभामुद्यन्दिवाकरः ॥ ४१ ॥
सागरस्येव मे वेगो मारुतस्येव मे गतिः ॥ न हि दाशरथिर्वेद तेन मां योद्धुमिच्छति ॥ ४२ ॥
न मे तूणीशयान्बाणान्सविषानिव पन्नगान् ॥ रामः पश्यति संग्रामे तेन मां योद्धुमिच्छति ॥४३॥
न जानाति पुरा वीर्यं मम युद्धे स राघवः ॥ ४४ ॥
मम चापमयीं वीणां शरकोणैः प्रवादिताम् ॥ ज्याशब्दतुमुलां घोरामार्तभीतमहास्वनाम् ॥ ४५ ॥
नाराचतलसन्नादां तां ममाहितवाहिनीम् ॥ अवगाह्य महारङ्गं वादयिष्याम्यहं रणे ॥ ४६ ॥

न वासवेनापि सहस्रचक्षुषा यथाऽस्मि शक्यो वरुणेन वा स्वयम् ॥
यमेन वा धर्षयितुं शराग्निना महाहवे वैश्रवणेन वा पुनः ॥ ४७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

मित्युक्तंविशदयति—सीतामिति ॥ ३६—३७ ॥ सर्वलोकभयात् सर्वलोकेभ्यो भयात् ॥ ३८ ॥ स्वमनोरथं दर्शयति—कदेत्यादिना ॥ ३९ ॥ तूणीशयैः चिरात्समराभावेन केवलतूणीरस्थैः । गणशः सङ्घशः । उल्काभिः निर्गतज्वालाकाष्ठैः । ताभिः कुञ्जरमभिद्रावयन्तीति प्रसिद्धिः ॥ ४० ॥ तत् बलं "स च हन्ता विराधस्य" इत्यादिना भवदुक्तबलं । आदास्ये तिरस्करोमीत्यर्थः ॥ ४१—४३ ॥ न जानातीत्यर्धं ॥ पुरा न जानाति इतःपरं ज्ञास्यतीत्यर्थः ॥ ४४ ॥ अथ रूपकव्याजेन युद्धस्यात्मनो विनोदनकरत्वमाह—ममेत्यादिना ॥ ममाहितवाहिनीमेव महारङ्गं विपुलनृत्तशालां । अवगाह्य प्रविश्य । शरैरेव कोणैः वीणावादनदण्डैः । प्रवादितां शब्दितां । ज्याशब्द एव तुमुलः तुमुलस्वनो यस्यास्तां । आर्तभीतमहास्वनां आर्तभीतशब्देन तत्स्वनो लक्ष्यते । एवं नाराचतलशब्देनापि तत्स्वनः । आर्तभीतानां स्वन एव महास्वनो यस्यास्तां । नाराचतलस्वन एव सन्नादो यस्यास्तां । घोरां अन्यैर्वादयितुमशक्यां । मम चापमयीं वीणामिति व्यस्तरूपकं । रणे रणस्थजने । शृण्वतीति शेषः । वीणाया मन्द्रमध्यतारभेदेन स्वरत्रयसंभवादत्रापि स्वरत्रयमुक्तं ॥ ४५—४६ ॥ न वासवेनेति सहस्रचक्षुष्ट्वं गर्वहेतुत्वेनोक्तं । दिग्विजये वरुणपुत्रैरेव युद्धकरणात् स्वयमित्युक्तं । वासवादिभिः शराग्निना यथा धर्षयितुं न शक्योस्मीति योजना ॥ ४७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्विंशः सर्गः ॥ २४ ॥

हन्तेत्यनेन तवापिहन्तेतिसूचितं पदं स्थानं । अन्विष्यागतः ॥ ३२ ॥ **स०** चक्षुषेत्येकवचनेन अल्पबलेशुकेकोपेनसमग्रचक्षुषां विनियोगे भवेद्रक्षीभूतःसइतितजीवनेच्छारावणस्याधुनास्तीतिद्योत्यते ॥ ३७ ॥ **स०** सर्वलोकः सर्वज्ञः हरोवाहरिर्वाहिरण्यगर्भोवा । तस्माद्भयादपि नैवप्रदास्यामीत्यन्वयः । सर्वलोकभयात् पुत्रादिलोकनाशभयादपीतिवा ॥ ३८ ॥ **रामानु०** सागरस्य जगदाप्लवनोद्यतस्य ॥ ४२ ॥ इतिचतुर्विंशःसर्गः ॥ २४ ॥

[पा०] १ क. ख. ग. ङ. च. झ. ञ. प्रदास्यामि. २ ङ. झ. ट. नदीमहित. ३ घ. नवैश्रवेणापिमृधेस्वयंभुवा. ४ क. च. छ. ज. वास्वयं.

पञ्चविंशः सर्गः ॥ २५ ॥

विभीषणेन रावणप्रेरणया रामसेनागणनाद्यर्थंप्रहितयोः कपिरूपधारणेनकपिसेनाप्रविष्टयोः शुकसारणनाम्नो राक्षसयोर्ग्रहणेन रामेप्रत्यर्पणम् ॥ १ ॥ स्वप्रार्थनया रावणे संदेशनिवेदनचोदनपूर्वकं राममोचिताभ्यांशुकसारणाभ्यां रावणमेत्य तंप्रति विभीषणकृतस्वग्रहणादिनिवेदनम् ॥ २ ॥ तथा वानरसेनाया अपरिच्छेद्यत्वनिवेदनपूर्वकं रामप्रभाववर्णनेनसीताप्रदानपूर्वकं तेनसन्धिविधानम् ॥ ३ ॥

सबले सागरं तीर्णे रामे दशरथात्मजे ॥ अमात्यौ रावणः श्रीमानब्रवीच्छुकसारणौ ॥ १ ॥
समग्रं सागरं तीर्णं दुस्तरं वानरं बलम् ॥ अभूतपूर्वं रामेण सागरे सेतुबन्धनम् ॥ २ ॥
सागरे सेतुबन्धं तु न श्रद्दध्यां कथंचन ॥ अवश्यं चापि संख्येयं तन्मया वानरं बलम् ॥ ३ ॥
भवन्तौ वानरं सैन्यं प्रविश्यानुपलक्षितौ ॥ परिमाणं च वीर्यं च ये च मुख्याः प्लवङ्गमाः ॥ ४ ॥
मन्त्रिणो ये च रामस्य सुग्रीवस्य च संमताः ॥ ये पूर्वमभिवर्तन्ते ये च शूराः प्लवङ्गमाः ॥ ५ ॥
स च सेतुर्यथा बद्धः सागरे सलिलार्णवे ॥ निवेशं यद्यथा तेषां वानराणां महात्मनाम् ॥ ६ ॥
रामस्य व्यवसायं च वीर्यं प्रहरणानि च ॥ लक्ष्मणस्य च वीर्यं च तत्त्वतो ज्ञातुमर्हथः ॥ ७ ॥
कश्च सेनापतिस्तेषां वानराणां महौजसाम् ॥ एतज्ज्ञात्वा यथातत्त्वं शीघ्रमागन्तुमर्हथः ॥ ८ ॥
इति प्रतिसमादिष्टौ राक्षसौ शुकसारणौ ॥ हरिरूपधरौ वीरौ प्रविष्टौ वानरं बलम् ॥ ९ ॥
ततस्तद्वानरं सैन्यमचिन्त्यं रोमहर्षणम् ॥ संख्यातुं नाध्यगच्छेतां तदा तौ शुकसारणौ ॥ १० ॥

अथ शुकसारणप्रेषणं पञ्चविंशे—सबल इत्यादि ॥ दशरथात्मजइति मनुष्यत्वोक्तिः । श्रीमानिति मदातिशयोक्तिः । शुकः पूर्वस्मादन्यः । सारणसाहित्यात् ॥ १ ॥ समग्रं विशालं । दुस्तरं तरितुमशक्यं । सागरं कर्म । वानरं वानरसंबन्धि बलं कर्तृ । तीर्णं अतरत् । कर्तरि क्तः । सेतुबन्धनं रामेण कृतमिति शेषः ॥ २ ॥ सेतुबन्धनं रामेण कृतं । कथंचन आप्तपुरुषोदितत्वेपि । अपिच तथापि । संख्येयं ज्ञातव्यं ॥ ३ ॥ भवन्तावित्यादि चतुःश्लोक्येकान्वया ॥ तस्माद्भवन्तौ अनुपलक्षितौ परैरविज्ञातौ सन्तौ । वानरं सैन्यं प्रविश्य । परिमाणं वानराणामियत्तां । तेषां वीर्यं बलपरिच्छेदं । ये प्लवङ्गमाःमुख्याः प्रधानभूताः तान् । ये रामस्य सुग्रीवस्य च संमता मन्त्रिणः । ये नासीरभटाः पूर्वमभिवर्तन्ते । ये च प्लवङ्गमाः वस्तुतः शूराः तान्सर्वान् । सागरे सगरखानिते । सलिलार्णवे लवणजलसमुद्रे । स सेतुः वानरतरणार्थसेतुश्च । यथा येन प्रकारेण बद्धः तं प्रकारं । तेषां निवेशं निवासं । उत्पत्तिस्थानं वा । क्लीबत्वमार्षं । यद्यथा यादृशप्रकारः । रामस्य व्यवसायं कर्तव्यविषयनिश्चयं । वीर्यं बलं । प्रहरणानि आयुधानि । लक्ष्मणस्य व्यवसायं बलं च । तत्त्वतः पारमार्थ्येन । ज्ञातुमर्हथ इत्यन्वयः ॥ ४—९ ॥ नाध्य-

ति० अमात्यत्वेनविशेषणादयंशुकोऽन्यः । पूर्वप्रेषितशुकोक्तवृत्तान्तज्ञानपूर्वकंप्रेषणाच्चेतिकतकादयः ॥ स० चारात्प्राचीनादयमन्योऽमात्यत्वेनोक्तेः । अथवाऽयंसएव । परिचितसैन्यकलात् । अमात्यस्यात्याप्तत्वेन प्रथमप्रतिपत्त्यर्थंप्रेषणस्यौचित्यात् । अतएव पक्षीभूयप्रतिपक्षिसेनाप्रवेशोपिसंभवति । नचचारः इत्युक्त्याऽयमन्यइतिवाच्यं । चतुर्दशश्लोके "राक्षसेन्द्रस्यमन्त्रिणौ । लङ्कायाः समनुप्राप्तौचारौ" इत्युक्तेर्मन्त्रिणोपिचारतासंभवात् । छत्रिन्यायेनवाऽमात्यत्वोक्तिरिति भवतुचारएवायं । "अवश्यंचापिसंख्येयं" इत्युत्तरत्रसेनासंख्यारूपादिविशेषविवित्सानुज्ञानात्सामान्यतस्तज्ज्ञानिनासहान्यप्रेषणस्यन्याय्यत्वात् ॥ १ ॥ ति० सागरे सेतुबन्धनंनश्रद्दध्यां । समुद्रस्यविराड्वदरत्वेनजीवत्रातैरशक्यबन्धनत्वाज्जीवविशेषत्वाच्चरामस्येत्याशयः । रामोपिविराडेवनान्यइति बुद्धिस्तु रजस्तमःप्रधानत्वान्नतस्येतिदिक् ॥ ३ ॥ स० सागरे सगरपुत्रखातत्वात्तत्संबन्धिनि । अर्णवशब्दोरूढः समुद्रइत्येतन्मात्रार्थकः । सलिलार्णवे जलसमुद्रेइत्यर्थः । "सल गतौ" इलजन्तः । तथाचसलिलानि गच्छन्ति अर्णांसिसन्त्यत्रेतिसवा ।

[पा०] १ ख. ङ. च. छ. झ. ञ. ट. सेतुबन्धंतं. २ ज. कदाचन. ३ ङ. ज. झ. ट. संगताः. ४ ख. च. छ. मुख्याः. ५ ङ. झ. ट. निवेशंचयथा. घ. प्रवेशश्चयथा. ज. निवेशश्चयथा. ६ ग. ङ. च. छ. झ. ञ. ट. वीरस्य. ७ ङ. झ. महात्मनां. ८ ङ. झ. तच्चज्ञात्वा.

[1]संस्थितं पर्वताग्रेषु निर्दरेषु गुहासु च ॥ समुद्रस्य च तीरेषु वनेषूपवनेषु च ॥ ११ ॥
तरमाणं च तीर्णं च तर्तुकामं च सर्वशः ॥ निविष्टं निविशचैव भीमनादं महाबलम् ॥
तद्बलार्णवमक्षोभ्यं ददृशाते निशाचरौ ॥ १२ ॥
तौ ददर्श महातेजाः प्रेच्छन्नौ च विभीषणः ॥ आचचक्षेऽथ रामाय गृहीत्वा शुकसारणौ ॥ १३ ॥
[3]तस्येमौ राक्षसेन्द्रस्य मन्त्रिणौ शुकसारणौ ॥ लङ्कायाः समनुप्राप्तौ चारौ परपुरंजय ॥ १४ ॥
तौ दृष्ट्वा व्यथितौ रामं निराशौ जीविते तदा ॥ कृताञ्जलिपुटौ भीतौ वचनं चेदमूचतुः ॥ १५ ॥
आवामिहागतौ सौम्य रावणप्रहितावुभौ ॥ परिज्ञातुं बलं कृत्स्नं तवेदं रघुनन्दन ॥ १६ ॥
तयोस्तद्वचनं श्रुत्वा रामो दशरथात्मजः ॥ अब्रवीत्प्रहसन्वाक्यं सर्वभूतहिते रतः ॥ १७ ॥
यदि दृष्टं बलं कृत्स्नं वयं वा सुपरीक्षिताः ॥ यथोक्तं वा कृतं कार्यं छन्दतः प्रतिगम्यताम् ॥१८॥
अथ किंचिददृष्टं वा भूयस्तद्द्रष्टुमर्हथः ॥ विभीषणो वा कात्स्न्र्येन भूयः संदर्शयिष्यति ॥ १९ ॥
न चेदं ग्रहणं प्राप्य भेतव्यं जीवितं प्रति ॥ न्यस्तशस्त्रौ गृहीतौ वा न दूतौ वधमर्हथः ॥ २० ॥
पृच्छमानौ विमुञ्चैतौ चारौ रात्रिंचरावुभौ ॥ शत्रुपक्षस्य सततं विभीषण विकर्षणौ ॥ २१ ॥
प्रविश्य नगरीं लङ्कां भवद्भ्यां धनदानुजः ॥ वक्तव्यो रक्षसां राजा यथोक्तं वचनं मम ॥ २२ ॥
यद्बलं च समाश्रित्य सीतां मे हृतवानसि ॥ तद्दर्शय यथाकामं ससैन्यः सहबान्धवः ॥ २३ ॥
श्वः काल्ये नगरीं लङ्कां सप्राकारां सतोरणाम् ॥ राक्षसं च बलं पश्य शरैर्विध्वंसितं मया ॥२४॥
क्रोधं भीममहं मोक्ष्ये ससैन्ये त्वयि रावण ॥ श्वः काल्ये वज्रवान्वज्रं दानवेष्विव वासवः ॥२५॥

गच्छेतां नाज्ञासिष्टां ॥ १० ॥ अज्ञानहेतुमाह सार्धश्लोकद्वयेन—संस्थितमिति ॥ निर्दरेषु दलितपर्वतप्रदेशेषु। उपवनेषु आरामेषु। "आरामः स्यादुपवनं" इत्यमरः ॥ ११—१२ ॥ अथ विभीषणः ददर्श आचचक्षे चेत्यन्वयः ॥ १३ ॥ लङ्काया इति पञ्चमी। परपुरं जयतीति परपुरंजयः। " संज्ञायां भृतृवृजिधारिसहितपिदमः " इति खच् ॥ १४—१६ ॥ दशरथात्मजः महापुरुषप्रसूतत्वेन सहजकारुण्यः। प्रहसन् रावणबुद्धिमान्द्यस्मरणात् प्रहासः। सर्वभूतहिते रतः रिपूणामपि वत्सलः ॥ १७ ॥ यथोक्तं रावणेन यथोक्तं। छन्दतः यथेच्छातः ॥ १८ ॥ अथेति पक्षान्तरे। भूयः अतिशयेन ॥ १९ ॥ दूतौ युवामितिशेषः ॥ २० ॥ विभीषणं प्रत्याह—पृच्छमानाविति ॥ सततं पृच्छमानत्वदशायामपि शत्रुपक्षस्य विकर्षणौ बाधकाविति यावत् ॥ २१ ॥ पुनर्दूतौ प्रत्याह—प्रविश्येति ॥ २२ ॥ यथाकामं यथेच्छं। शरणं वाऽऽगच्छेति भावः ॥ २३ ॥ श्वः काल्ये परेद्युः प्रातःकाले ॥ २४ ॥ क्रोधं मोक्ष्ये क्रोधकार्यं

तस्मिन् ॥ ६ ॥ स० बलार्णवं अर्णवशब्दस्यनपुंसकतातुपूर्वव्युत्पादितानुसंधेया ॥ १२ ॥ ति० प्रहसन् सेतुबन्धनेनजनस्थाने निरपेक्षंखरादिवधेनचनमद्बलज्ञानंवृत्तमितिप्रहासः ॥ १७ ॥ ति० वयमितिरामेणनिर्देशः सुग्रीवादिसहितस्यस्वस्य । सुसमाहिताः ज्ञातबलाः ॥ स० सुसमीक्षिताः अतिसम्यगवलोकिताः। वयंवासुसमाहिताइतिपाठे सुसमाहिताः स्वस्थचित्ताः प्रतिभटभीतिरहिताइतियावत्। दृष्टमितिविपरिणतंसदृष्टाइत्यन्वेति। " अस्मदोद्वयोश्च " इतिवयमितिसंभवति। ननुनसंभवतिसविशेषणत्वादितिचेन्न। " नचविदितवेद्याअपिवयं " " शैवावयंनखलुतत्रविचारणीयंपञ्चाक्षरीजपपरानितरां " इत्यादिवद्विधेयविशेषणत्वाददोषः। असुसमाहिताः रावणंसगणंतृणीकृत्यानवधानेनैवस्थिताइतिवा। प्रतिगम्यतां स्वस्मिंसंनिधिं ॥ १८ ॥ ति० न्यस्तशस्त्रत्वादेकैकमप्यवधेहेतुःकिमुसमुदितमितिभावः ॥ २० ॥ ती० सततंपृच्छमानौ अभयंपृच्छन्तौ ॥ २१ ॥

[पा०] १ ङ.—ट. तस्थितं. २ ख. ग.—ट. प्रतिच्छन्नौ. ३ ङ. ट. तस्यैतौ. ४ ङ. झ. सर्वतदिदं. ५ क. ग. ङ. झ. ट. सर्वं. ६ क. ग. च. छ. ञ. ट. ठ. वयंवासुसमीक्षिताः. ङ. झ. वयंवासुसमाहिताः. घ. वयंसाधुसमीक्षिताः. ७ ङ. झ. ट. पुनः. ८ च. छ. ञ. नचात्मग्रहणं. क. ख. नचात्र. ९ ङ. झ. ञ. ट. प्रच्छन्नौच. १० च. छ. ञ. वचनान्मम. ११ ख. राक्षसंस्वबलं. ग. राक्षसंस्वजनं. क. घ. ङ. झ. ट. रक्षसांचबलं. च. छ. रक्षसांस्वबलं. १२ क.—घ. च. ज. ञ. घोरंरोषमहं. १३ ग. बलंधारयरावण.

इति प्रतिसमादिष्टौ राक्षसौ शुकसारणौ ॥ जयेति प्रतिनन्द्यैतौ राघवं धर्मवत्सलम् ॥
आगम्य नगरीं लङ्कामब्रूतां राक्षसाधिपम् ॥ २६ ॥
विभीषणगृहीतौ तु वधार्हौ राक्षसेश्वर ॥ दृष्ट्वा धर्मात्मना मुक्तौ रामेणामिततेजसा ॥ २७ ॥
एकस्थानगता यत्र चत्वारः पुरुषर्षभाः ॥ लोकपालोपमाः शूराः कृतास्त्रा दृढविक्रमाः ॥ २८ ॥
रामो दाशरथिः श्रीमाँल्लक्ष्मणश्च विभीषणः ॥ सुग्रीवश्च महातेजा महेन्द्रसमविक्रमः ॥ २९ ॥
एते शक्ताः पुरीं लङ्कां सप्राकारां सतोरणाम् ॥ उत्पाट्य संक्रामयितुं सर्वे तिष्ठन्तु वानराः ॥ ३० ॥
यादृशं तस्य रामस्य रूपं प्रहरणानि च ॥ वधिष्यति पुरीं लङ्कामेकस्तिष्ठन्तु ते त्रयः ॥ ३१ ॥
रामलक्ष्मणगुप्ता सा सुग्रीवेण च वाहिनी ॥ बभूव दुर्धर्षतरा सेन्द्रैरपि सुरासुरैः ॥ ३२ ॥
[युक्तः सेतुस्तथा बद्धो दशयोजनविस्तृतः ॥ शतयोजनमायामस्तीर्णा सेना च सागरम् ॥ ३३ ॥
निविष्टो दक्षिणे तीरे रामः स च नदीपतेः ॥ तीर्णस्य तरमाणस्य बलस्यान्तो न विद्यते ॥ ३४ ॥]
प्रहृष्टरूपा ध्वजिनी वनौकसां महात्मनां संप्रति योद्धुमिच्छताम् ॥
अलं विरोधेन शमो विधीयतां प्रदीयतां दाशरथाय मैथिली ॥ ३५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

करिष्य इत्यर्थः । वज्रवान् अभ्यस्तवज्र इत्यर्थः ॥ २५ ॥ इतीत्यादि सार्धश्लोक एकान्वयः ॥ प्रतिनन्द्य अभिष्टुत्य ॥ २६ ॥ मुक्तौ आवामिति शेषः । धर्मात्मना दूतवधमनिच्छतेत्यर्थः । अमिततेजसेत्यनेन अस्मत्त्यागे भीतिहेतुता न शङ्क्येत्यर्थः ॥ २७ ॥ एकस्थानेत्यादि श्लोकत्रयमेकान्वयं ॥ यत्र एकस्थानं ऐकमत्यं । एकप्रदेशं वा गताः एते शक्ताः । पुरीं लङ्कामित्याद्यन्वयः । कृतास्त्राः शिक्षितास्त्राः । छत्रिणो गच्छन्तीतिवदयं निर्देशः । सुग्रीवस्याकृतास्त्रत्वात् । उत्पाट्य उद्धृत्य । संक्रामयितुं अन्यत्र क्षेप्तुं । सर्वे एतच्चतुष्टयमिन्नाः ॥ २८—३० ॥ यादृशमिति । प्रहरणादिकं यादृशं तदवलोकने राम एको वधिष्यतीति मन्यावहे इत्यर्थः ॥ ३१ ॥ नन्वसहायशूरोपि रामः सेनाहननादनुत्साहः स्यात् तत्क्रियतामित्यत्राह—रामलक्ष्मणेति ॥ सुग्रीवेण च अङ्गदादिना च सहिता सा अपरिच्छिन्ना । हरिवाहिनी चपलकपिसेना । रामलक्ष्मणगुप्ता रामेण रामस्य दक्षिणो बाहुरिति रामदक्षिणबाहुभूतेन लक्ष्मणेन च गुप्ता सती । सुग्रीवस्य रक्ष्यकोटावेवान्वयः न तु रक्षककोटौ । तन्मन्त्रिणा हनुमतैव—" जयत्यतिबलो रामो लक्ष्मणश्च महाबलः । राजा जयति सुग्रीवो राघवेणाभिपालितः " इत्युक्तेः । दुर्धर्षतरा बभूव । तरसा मनसापि धर्षयितुमशक्येत्यवगम्यते । न केवलं मनुष्यादिभिः किन्तु सुरैरपि । न केवलं सुरैरेव किन्तु सुरासुरैः विरोधं विहाय कृतसौहार्दैरपि । न केवलमनायकैस्तैः किन्तु सेन्द्रैरपि । स्वस्वातन्त्र्यं विहाय नायकाज्ञानुवर्तिभिरित्यर्थः ॥ ३२—३४ ॥ महात्मनां दृढमनस्कानां । संप्रति सद्य एव । योद्धुमिच्छतां । प्रहृष्टरूपा हर्षद्योतकाकारयुक्ता । भवतीति शेषः । अतस्तद्विरोधेनालं । शमः क्रोधनिवृत्तिः । विधीयतां क्रियतां । मैथिली प्रदीयतां च ॥ ३५ ॥ इति श्रीगो-

---

विभीषणगृहीतावित्यनेन तत्त्यागस्तवमहतेऽनर्थायेतिसूचितं ॥ स० ननु "वधंनकुर्वन्तिपरावरज्ञादूतस्य" इत्यारभ्य "युक्तायुक्तं विनिश्चित्यदूतदण्डोविधीयताम् । विभीषणवचःश्रुत्वा" इत्यन्तेनग्रन्थेनविभीषणकृतदूतघातप्रतिषेधबोधनावगतेःअत्रपुनः "विभीषणगृहीतौतुवधार्हौ" इत्युक्तिःकथमितिचेत्सत्यं । शङ्केरंस्तत्त्यागेकपयोमयीतितथाऽऽत्मानंदर्शयामासेतियुक्ततोक्तेर्ज्ञेया । मरिष्यन्नयनस्यपरिश्रमन्नरएवयमदूतइतिनीतेरभावादारभव्याऽतथाकार्यपितथेतिवा ॥ २७ ॥ स० तेत्रयइति । रावणज्ञातपराक्रमत्वाद्धनुमदनुक्तिः ॥ ३१ ॥ रामानु० प्रहृष्टरूपा अत्यन्तंप्रहृष्टा । प्रशंसायांरूपप् ॥ ३५ ॥ इतिपञ्चविंशःसर्गः ॥ २५ ॥

[पा०] १ क. ङ. च. छ. झ. ट. प्रतिनन्द्यैनं. ख. चप्रणम्यैनं. २ ङ. झ. वधार्थ. ३ ङ. झ. ञ. लोकपालसमाः. ४ ङ. झ. ट. तद्धि. ५ क.—ट. सर्वैरपि. ६ इदंश्लोकद्वयं औत्तराहपाठएवदृश्यते. ७ क. ख. ग. ङ. च. छ. झ. ञ. ट. प्रहृष्टयोधा. ८ ख. महात्मनासंप्रतियोद्धुमिच्छता.

षड्विंशः सर्गः ॥ २६ ॥

वानरबलावलोकनाय शुकसारणाभ्यांसहोच्चप्रासादमारूढंरावणंप्रति सारणेन पृथक्पृथङ्नामनिर्देशेनतत्तद्बलपराक्रमवर्णनपूर्वकं नीलाङ्गदादिप्रधानयूथनाथप्रदर्शनम् ॥ १ ॥

तद्वचः पथ्यमक्लीबं सारणेनाभिभाषितम् ॥ निशम्य रावणो राजा प्रत्यभाषत सारणम् ॥ १ ॥
यदि मामभियुञ्जीरन्देवगन्धर्वदानवाः ॥ नैव सीतां प्रदास्यामि सर्वलोकभयादपि ॥ २ ॥
त्वं तु सौम्य परित्रस्तो हरिभिर्निर्जितो भृशम् ॥ प्रतिप्रदानमद्यैव सीतायाः साधु मन्यसे ॥
को हि नाम सपत्नो मां समरे जेतुमर्हति ॥ ३ ॥
इत्युक्त्वा परुषं वाक्यं रावणो राक्षसाधिपः ॥ आरुरोह ततः श्रीमान्प्रासादं हिमपाण्डरम् ॥
बहुतालसमुत्सेधं रावणोथ दिदृक्षया ॥ ४ ॥
ताभ्यां चराभ्यां सहितो रावणः क्रोधमूर्च्छितः ॥ पश्यमानः समुद्रं च पर्वतांश्च वनानि च ॥
ददर्श पृथिवीदेशं सुसंपूर्णं प्लवङ्गमैः ॥ ५ ॥
तदपारमसङ्ख्येयं वानराणां महद्बलम् ॥ आलोक्य रावणो राजा परिपप्रच्छ सारणम् ॥ ६ ॥
एषां वानरमुख्यानां के शूराः के महाबलाः ॥ के पूर्वमभिवर्तन्ते महोत्साहाः समन्ततः ॥ ७ ॥
केषां शृणोति सुग्रीवः के वा यूथपयूथपाः ॥ सारणाचक्ष्व तत्त्वेन के प्रधानाः प्लवङ्गमाः ॥ ८ ॥
सारणो राक्षसेन्द्रस्य वचनं परिपृच्छतः ॥ आचचक्षेऽथ मुख्यज्ञो मुख्यांस्तांस्तु वनौकसः ॥ ९ ॥
एष गोभिमुखो लङ्कां नर्दंस्तिष्ठति वानरः ॥ यूथपानां सहस्राणां शतेन परिवारितः ॥ १० ॥
यस्य घोषेण महता सप्राकारा सतोरणा ॥ लङ्का प्रत्रेपते सर्वा सशैलवनकानना ॥ ११ ॥

विन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

अथ रावणाय सारणेन वानरयूथपतीनां वीर्यादिकथनपूर्वकं तत्प्रदर्शनं षड्विंशे—तदिति ॥ अक्लीबं अकातरं । प्रत्यभाषत अनिन्ददित्यर्थः ॥ १ ॥ अभियुञ्जीरन् युद्ध्येरन् । सर्वलोकभयात् सर्वलोकेभ्यो भयात् ॥ २ ॥ त्वमित्यादिसार्धश्लोकः ॥ सपत्नः शत्रुः ॥ ३ ॥ इत्युक्त्वेत्यादिसार्धश्लोकः ॥ ततः तस्मात्पूर्वस्थानात् । बहुतालसमुत्सेधं अनेकतालवृक्षतुल्यौन्नत्यं । यद्वा विततार्ङुष्ठमध्यमामितस्तालः । तदाह सज्जनः—" प्रादेशतालगोकर्णवितस्त्यश्च यथाक्रमम् । भवन्ति विततार्ङुष्ठप्रदेशिन्यादिभिः सह " इति ॥ अत्र द्वितीयो रावणशब्दो रावयतीति व्युत्पत्त्या क्रियानिमित्तकः । दिदृक्षया वानरबलदिदृक्षया ॥ ४ ॥ चराभ्यां चाराभ्यां । क्रोधमूर्च्छितः क्रोधेन व्याप्तः । पृथिवीदेशं त्रिकूटाधःप्रदेशं ॥ ५ ॥ अपारं उत्तरावधिरहितं ॥ ६ ॥ एषामिति । इयं निर्धारणेषष्ठी ॥ ७ ॥ केषामिति । वचनमिति शेषः । प्रधानाः सेनापतयः ॥ ८ ॥ वचनं निशम्येति शेषः ॥ ९ ॥ त्रिभिर्नीलं वर्णयति—एष इत्यादि ॥ य एष इत्यन्वयः ।

शि० हरिभिर्भृशंपीडितः अतएवपरित्रस्तस्त्वंसीतायाःप्रतिप्रदानं साधुमन्यसे । एतेन रामबलवर्णनंभीतिहेतुकमितिसूचितं ॥ ३ ॥ ति० सहस्रेणशतेन लक्षेणेत्यर्थः ॥ १० ॥

[पा०] १ ङ. झ. ट. सत्यमक्लीबं. २ क. ख. ग. ङ. च. छ. झ. पर्यभाषत. ३ क. ख. ग. ङ. च. छ. झ. ञ. ट. सीतामहंदद्याः. ४ क. ङ. च. छ. झ. ञ. ट. हरिभिःपीडितो. ग. हरिभिर्निहतो. ख. हरिभिस्तर्जितो. ५ ङ. झ. समुद्रंतं. ६ ङ. च. झ. ञ. ट. मसह्यंच. घ. मसंबाधं. ७ ङ. झ. महाबलं. ८ घ.—छ. झ. ञ. ट. केवानरामुख्याःके. ९ ख. ग. ङ. छ. झ. ट. मेसर्वांकिंप्रभावाःप्लवङ्गमाः. क. घ. च. ञ. मेसर्वे. १० ङ. च. छ. झ. ञ. ट. आवभाषेथ. ११ क. ख. ग. ङ. च. झ. ञ. ट. मुख्यांस्तत्र. घ. मुख्यांस्तत्रप्लवङ्गमान्. १२ क. ख. ङ. च. छ. झ. ञ. ट. सहस्रेणशतेन. १३ ङ. झ. ट. प्रतिहता.

सर्वशाखामृगेन्द्रस्य सुग्रीवस्य महात्मनः ॥ बलाग्रे तिष्ठते वीरो नीलो [1]नामैष यूथपः ॥ १२ ॥
बाहू प्रगृह्य यः पद्भ्यां महीं गच्छति वीर्यवान् ॥ लङ्कामभिमुखः क्रोधादभीक्ष्णं च विजृम्भते ॥१३॥
गिरिशृङ्गप्रतीकाशः पद्मकिञ्जल्कसन्निभः ॥ स्फोटयत्यं[2]भिसंरब्धो लाङ्गूलं च पुनः पुनः ॥
यस्य लाङ्गूलशब्देन [3]स्तनन्ति प्रदिशो दश ॥ १४ ॥
एष वानरराजेन सुग्रीवेणाभिषेचितः ॥ [4]यौवराज्येऽङ्गदो नाम त्वामाह्वयति संयुगे ॥ १५ ॥
वालिनः सदृशः पुत्रः [5]सुग्रीवस्य सदा प्रियः ॥ राघवार्थे पराक्रान्तः शक्रार्थे वरुणो यथा ॥ १६ ॥
एतस्य सा मतिः सर्वा यदृष्टा जनकात्मजा ॥ हनूमता वेगवता राघवस्य हितैषिणा ॥ १७ ॥
बहू[6]नि वानरेन्द्राणामेष यूथानि वीर्यवान् ॥ परिगृह्याभियाति त्वां [7]स्वेनानीकेन दुर्जयः ॥ १८ ॥
अनु वालिसुतस्यापि बलेन महता वृतः ॥ वीरस्तिष्ठति संग्रामे सेतुहेतुरयं नलः ॥ १९ ॥
ये तु विष्टभ्य गात्राणि क्ष्वेलयन्ति नदन्ति च ॥ [8]उत्थाय च विजृम्भन्ते [9]क्रोधेन हरिपुङ्गवाः ॥२०॥
एते दुष्प्रसहा [10]घोराश्चण्डाश्चण्डपराक्रमाः ॥ अष्टौ शतसहस्राणि दशकोटिशतानि च ॥ २१ ॥
य एनमनुगच्छन्ति वीरा[11]श्चन्दनवासिनः ॥ एषैवाशंसते लङ्कां [12]स्वेनानीकेन मर्दितुम् ॥ २२ ॥
श्वेतो रजतसंकाशश्चपलो भीमविक्रमः ॥ बुद्धिमान्[13]वानरो वीरस्त्रिषु लोकेषु विश्रुतः ॥ २३ ॥
तूर्णं सुग्रीवमागम्य पुनर्गच्छति [14]सत्वरः ॥ विभजन्वानरीं सेनामनीकानि प्रहर्षयन् ॥ २४ ॥

तिष्ठते तिष्ठति ॥ १०—१२ ॥ अथाङ्गदं वर्णयति—बाहू इत्यादिना स्वेनानीकेन दुर्जय इत्यन्तेन ॥ बाहू प्रगृह्य उत्क्षिप्य । अभि उद्दिश्य मुखं यस्यासावभिमुखः । विजृम्भते जृम्भणं करोति ॥ १३ ॥ पद्मकिञ्जल्कसन्निभः पद्मकेसरवत्पीतवर्ण इत्यर्थः । स्फोटयति भूमौ ताडयति । अभिसंरब्धः कुपितः । प्रस्वनन्तीत्यन्वयः ॥ १४ ॥ अभिषेचितः अभिषिक्तः । आह्वयति आह्वयते । स्पर्धाविषयेऽप्यात्मनेपदाभाव आर्षः ॥ १५ ॥ पराक्रान्तः पराक्रमितुमुद्यतः ॥१६॥ एतस्येति ॥ हनूमता सीता दृष्टेति यत्सा मतिः एतस्य अङ्गदस्य । एतद्बुद्धिमूलं हनुमतः सीतादर्शनमितिभावः । अङ्गदपुरस्कारेण हनुमतः समागमात् ॥१७॥ स्वेनानीकेनेति दुर्जयत्वकारणोक्तिः । अतो न पुनरुक्तिः ॥ १८ ॥ अनु वालीति । एतस्योत्तरार्धं वीरस्तिष्ठति संग्राम इति । वालिसुतस्य अनु पश्चात् । सेतुहेतुः सेतुकर्ता । संग्रामे संग्रामनिमित्तं ॥ १९ ॥ नलपरिवारानाह—ये त्वित्यादिना मर्दितुमित्यन्तेन ॥ श्लोकत्रयमेकान्वयं । विष्टभ्य उन्नम्य । क्ष्वेलयन्ति सिंहनादं कुर्वन्ति । नदन्ति गर्जन्ति । उत्थाय आसनादिति शेषः । विजृम्भन्ते कोपेन गात्रविनामं कुर्वन्ति । य एवंविधा वानराः ये च चन्दनवासिनः चन्दनवनवासिनः । एते एनं नलमनुगच्छन्तीति संबन्धः । चन्दनवानरा इति पाठे मध्यमपदलोपिसमासः । चन्दनवासिनो वानरा इति । एषैवेति सन्धिरार्षः । आशंसते प्रार्थयते ॥२०—२२॥ अथ द्वाभ्यां श्वेताख्यं वानरं वर्णयति—श्वेत इत्यादि ॥ अन्वर्थनामेत्याह—रजतेति । चपलः युद्धचपलः । अनीकानि पुनर्गच्छतीत्यन्वयः । विभजन् निबिडां सेनां भित्त्वा गच्छन्नित्यर्थः । अत्र चपल इत्यनेन अद्यैव लङ्कां ध्वंसयामीति निवेदनार्थं गत्वा तेन सान्त्वितः

स० चन्दनवासिनः तन्नामकगिरिविशेषवासिनः । अथवा चन्दनभूयिष्ठत्वान्मलयः । तत्रवासिनोवा । एषैव एषएव । संधिरार्षः । एषा याप्रसिद्धालदावासभूता तांलङ्कां मर्दितुमितिवा ॥२२॥ शि० श्वेतंवर्णयति—**श्वेतइति** । वानरीसेनांविभजन्सन् योवानरः सुग्रीवमागम्यतूर्णंपुनर्गच्छति । सवानरः त्रिषुलोकेषुविश्रुतः । श्वेतः तदभिधः । यत्तच्छब्दाध्याहारस्तु अन्यतरवानरशब्दसार्थक्याय । यदितु वानं रचनाविशेषं राति बोधयतीत्यर्थः इतिव्युत्पाद्यते तदानाध्याहृतिः । अर्धचतुष्टयमेकान्वयं ॥ २३-२४ ॥

[पा०] १ घ. नाममहाबलः. २ ग. ङ. च. छ. झ. ञ. ट. त्यतिसंरब्धो. ३ ख. घ. च छ. ज. ट. स्वन-तीवदिशोदश. ४ ग. ङ. झ. ट. युवराजोऽङ्गदो. ५ घ. सुग्रीवस्यचसंमतः. ६ ख. बहूनां. ७ ङ. झ. ट. मर्दितुं. ८ च. ञ. आस्थाय. ९ ख. क्रोधेनमहतावृताः. १० क. ख.घोरावानराश्चण्डविक्रमाः. ११ ग. ज. चण्डाश्चन्दन. ख. धीराश्चन्दन. १२ क. ग. घ. ङ. झ. ट. न्वानरःशूरः. ख. च. छ. ज. न्वानरश्रेष्ठः. ज. न्वानरवरः. १३ ख. ग. ङ. च. झ. ञ. ट. वानरः.

यः पुरा गोमतीतीरे रम्यं पर्येति पर्वतम् ॥ नाम्ना संकोचनो[1] नाम नानानगयुतो गिरिः ॥ २५ ॥
तत्र राज्यं प्रशास्त्येष कुमुदो नाम यूथपः ॥ योसौ शतसहस्राणां[2] सहस्रं परिकर्षति ॥ २६ ॥
यस्य वाला बहुव्यामा दीर्घा लाङ्गूलमाश्रिताः ॥ ताम्राः पीताः सिताः श्वेताः प्रकीर्णा घोरकर्मणः[3] ॥ २७ ॥
अदीनो रोषणश्चण्डः संग्राममभिकाङ्क्षति ॥ एषोप्याशंसते[4] लङ्कां स्वेनानीकेन मर्दितुम् ॥ २८ ॥
यस्त्वेष सिंहसंकाशः कपिलो दीर्घलोचनः[5] ॥ निभृतः प्रेक्षते लङ्कां दिधक्षन्निव चक्षुषा ॥ २९ ॥
विन्ध्यं कृष्णगिरिं सह्यं पर्वतं च सुदर्शनम् ॥ राजन्सततमध्यास्ते रम्भो नामैष यूथपः[6] ॥ ३० ॥
शतं शतसहस्राणां त्रिंशच्च हरिपुङ्गवाः ॥ यमेते[7] वानराः शूराश्चण्डाश्चण्डपराक्रमाः ॥
परिवार्यानुगच्छन्ति लङ्कां मर्दितुमोजसा ॥ ३१ ॥
यस्तु कर्णौ विवृणुते जृम्भते च पुनःपुनः ॥ न च संविजते मृत्योर्न च युद्धाद्विधावति ॥ ३२ ॥
प्रकंपते च रोषेण तिर्यक्पुनरीक्षते ॥ पर्श्यल्लाङ्गूलमपि च क्ष्वेलते[8] च महाबलः ॥ ३३ ॥
महाजवो[9] वीतभयो रम्यं साल्वेयपर्वतम् ॥ राजन्सततमध्यास्ते शरभो नाम यूथपः ॥ ३४ ॥
एतस्य बलिनः सर्वे विहारा नाम यूथपाः ॥ राजञ्शतसहस्राणि चत्वारिंशत्तथैव च ॥ ३५ ॥
यस्तु मेघ इवाकाशं महानावृत्य तिष्ठति ॥ मध्ये वानरवीराणां सुराणामिव वासवः ॥ ३६ ॥
भेरीणामिव सन्नादो यस्यैष श्रूयते महान् ॥ घोषः शाखामृगेन्द्राणां संग्राममभिकाङ्क्षताम् ॥ ३७ ॥
एष पर्वतमध्यास्ते पारियात्रमनुत्तमम् ॥ युद्धे दुष्प्रसहो नित्यं पनसो नाम यूथपः ॥ ३८ ॥
एनं शतसहस्राणां शतार्धं पर्युपासते ॥ यूथपा यूथपश्रेष्ठं येषां यूथानि भागशः ॥ ३९ ॥
यस्तु भीमां प्रवल्गन्तीं चमूं तिष्ठति शोभयन् ॥ स्थितां[10] तीरे समुद्रस्य द्वितीय इव सागरः ॥ ४० ॥
एष दर्दर[11]संकाशो विनतो नाम यूथपः ॥ पिबंश्चरति पर्णासां[12] नदीनामुत्तमां नदीम् ॥ ४१ ॥

पुनर्गच्छतीत्यवगम्यते ॥ २३—२४ ॥ चतुर्भिः कुमुदं वर्णयति—यः पुरेत्यादि ॥ पुरेत्यनेनाद्य सुग्रीवसमीप एव वसतीति गम्यते । पर्येति परितः संचरति । नाम्ना संकोचनो नाम यः प्रसिद्धः तं पर्वतमित्यन्वयः ॥ २५ ॥ तत्र गोमतीतीरे । परिकर्षति आनयति ॥ २६ ॥ घोरकर्मणो यस्य लाङ्गूलमाश्रिताः वालाः रोमाणि । दैर्घ्यस्यावधिमाह—बहुव्यामा इति । " व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरं " इत्यमरः ॥ २७ ॥ अदीन इत्यत्र य इत्युपस्कार्यं ॥ २८ ॥ अथ सार्धैस्त्रिभी रम्भं वर्णयति—यस्त्वेष इत्यादि ॥ २९—३१ ॥ अथ शरभं वर्णयति—यस्तु कर्णावित्यादि ॥ संविजते बिभेति ॥ ३२—३५ ॥ अथ पनसं वर्णयति—यस्तु मेघ इत्यादिना ॥ ३६—३८ ॥ एनं पनसं । येषां यूथपानां यूथानि च भागशः स्वस्वांशासङ्करेण । एनं पर्युपासत इति संबन्धः ॥ ३९ ॥ विनतं वर्णयति—यस्त्वित्यादि ॥ प्रवल्गन्तीं उत्साहेन प्लवमानां । समुद्रस्य पारे स्थितां । अतएव द्वितीयः सागर इव स्थितामिति शेषः । विनतविशेषणं वा । दर्दरो नाम गङ्गासमीपस्थः पर्वतः । पर्णासां पर्णासाख्यां नदीं ।

[पा०] १ ङ. च. झ. ञ. ट. संरोचनो. २ ङ. झ. ट. शतसहस्राणिसहर्षं. ज. शतसहस्रंचवानरान्परि ३ ङ. च. झ. ञ. ट. घोरदर्शनाः. ४ ङ.—ट. वानरश्चण्डः. ५ क.—ट. एषैवाशंसते. ६ क.—ट. दीर्घकेसरः. ७ ग. ङ. झ. ट. संरंभो नामयूथपः. ८ ङ. झ. ट. यंयान्तंवानराघोराः. ९ ङ. च. झ. ट. नंचसेनांप्रधावति. क. ख. ग. ज. नंचयूथाद्विधावति. १० झ. ञ. ट. पश्यलाङ्गूलविक्षेपंक्ष्वेडत्येष. ङ. च. पश्यलाङ्गूलविक्षेपैःक्ष्वेडत्येष. ११ घ. च. ज. महाबलो. ङ. झ. ट. महौजसावीत. १२ ख. घ. च. ञ. स्थितस्तीरे. १३ ग. पर्वतसंकाशो. घ. मन्दरसंकाशो. १४ ङ. झ. ट. योवेणां. ग. वेणांयो.

षष्टिः शतसहस्राणि [1]बलमस्य प्लवङ्गमाः ॥ ४२ ॥
त्वामाह्वयति युद्धाय [2]क्रोधनो नाम यूथपः ॥ विक्रान्ता बलवन्तश्च [3]यथा यूथानि भागशः ॥ ४३ ॥
यस्तु गैरिकवर्णाभं वपुः पुष्यति वानरः ॥ अवमत्य सदा सर्वान्वानरान्बलदर्पितान् ॥ ४४ ॥
गवयो नाम तेजस्वी त्वां क्रोधादभिवर्तते ॥ एनं शतसहस्राणि सप्ततिः पर्युपासते ॥
[5]एषैवाशंसते लङ्कां सेनानीकेन मर्दितुम् ॥ ४५ ॥
एते दुष्प्रसहा घोरा बलिनः कामरूपिणः ॥ यूथपा यूथपश्रेष्ठा एषां यूथानि भागशः ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षड्विंशः सर्गः ॥ २६ ॥

सप्तविंशः सर्गः ॥ २७ ॥

रावणप्रतिसारणेनपृथक्पृथङ्नामनिर्देशेनतत्तत्पराक्रमादिप्रशंसनपूर्वकमृक्षवानरादियूथाध्यक्षप्रदर्शनम् ॥ १ ॥

तांस्तु [6]तेहं प्रवक्ष्यामि प्रेक्षमाणस्य यूथपान् ॥ राघवार्थे पराक्रान्ता ये न रक्षन्ति जीवितम् ॥ १ ॥
स्निग्धा यस्य बहुव्यामा [7]बाला लाङ्गूलमाश्रिताः ॥ ताम्राः पीताः सिताः श्वेताः प्रकीर्णा घोरकर्मणः ॥ २ ॥
प्रगृहीताः प्रकाशन्ते सूर्यस्येव मरीचयः ॥ पृथिव्यां चानुकृष्यन्ते [9]हरो नामैष [10]यूथपः ॥ ३ ॥

॥४०—४१॥ विनतसेनासङ्ख्यामाह—षष्टिरिति ॥ षष्टिः शतसहस्राणि प्लवङ्गमाः अस्य विनतस्य बलं सेनेत्यर्थः ॥ ४२ ॥ एकेन क्रोधनमाह—त्वामिति ॥ उत्तरार्धे अस्येत्यध्याहार्यं । यथायूथानि यथायूथं । अमभावश्छान्दसः । भागशः भागत्वेन स्थिता वानराः विक्रान्ता बलवन्तश्चेति योजना ॥ ४३ ॥ शेषेण गवयं वर्णयति—यस्त्वित्यादिना ॥ गैरिकं रक्तवर्णधातुविशेषः । " धातुर्मनश्शिलाद्यद्रेर्गैरिकं तु विशेषतः " इत्यमरः । तद्वर्ण इवाभा यस्येति विग्रहः । गैरिकवर्ण इवाभातीति गैरिकवर्णाभमिति वा । पुष्यति युद्धहर्षादभिवर्धयतीत्यर्थः ॥ ४४—४५ ॥ उपसंहरति—एत इति ॥ यूथपाः अङ्गदादयः । यूथपश्रेष्ठाः सुग्रीवादयः । एषां यूथपानां यूथानि भागशः पृथक् । विद्यन्त इति शेषः ॥ ४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षड्विंशः सर्गः ॥२६॥

पुनरुक्तेभ्योप्युत्कृष्टान्प्रधानयूथपतीन्वक्तुं प्रतिजानीते—तांस्त्वित्यादि ॥ ये राघवार्थे पराक्रान्ताः सन्तः जीवितं न रक्षन्ति तान् यूथपान् ते तुभ्यं प्रवक्ष्यामीत्यन्वयः ॥ १ ॥ द्वाभ्यां हरं वर्णयति—बाला इति ॥ बालाः रोमाणि । बहुव्यामाः बहुव्यामप्रमाणाः । व्यामो नाम प्रसारितबाहुद्वयप्रमाणं । प्रगृहीताः उत्क्षिप्ताः । प्रकीर्णाः विरलाः । सूर्यस्य मरीचय इव मेघेषु शक्रचापादिरूपेण प्रसृता रश्मय इव । प्रकाशन्ते । कदाचित् पृथिव्यामनुकृष्यन्ते । एष यूथपो

कतक० अत्रसर्गच्छेदोपाङ्गः । वृत्तभेदाभावादेकप्रकरणत्वाच्च ॥४६॥ इतिषड्विंशःसर्गः ॥ २६ ॥
ति० स्निग्धाइत्यादिहरवर्णनमितिकतकः । तारस्येत्यन्ये ॥ २ ॥

[**पा०**] १ ख. ग. च. वानरास्तेमहाबलाः. घ. यूथपास्तुप्लवङ्गमाः. २ ङ. ज. झ. क्रथनोनाम. ३ ग. एषांयूथानि. घ० यस्ययूथानि क. च. छ. ज. यथायूथविभागशः. ४ क. ख. ङ. च. झ. ञ. ट. न्बलदर्पितः. ५ ख. दनुवर्तते. ६ ज. एषलाशङ्कते. ७ ङ. च. छ. झ. ञ. ट. वीरायेषांसङ्ख्यानविद्यते. ८ क. ङ. झ. ञ. ट. श्रेष्ठास्तेषां. ९ ङ. छ. झ. ञ. ट. तेसंप्रवक्ष्यामि. १० ङ. झ. ट. दीर्घलाङ्गूलमाश्रिताः. ११ क. च. ञ. तारोनाम. १२ ङ. झ. ट. वानरः.

यं पृष्ठतोऽनुगच्छन्ति शतशोथ सहस्रशः ॥ द्रुमानुद्यम्य सहसा लङ्कारोहणतत्पराः ॥
यूथपा हरिराजस्य किङ्कराः समुपस्थिताः ॥ ४ ॥
[1]एष कोटिसहस्रेण वानराणां महौजसाम् ॥ आकाङ्क्षते त्वां संग्रामे जेतुं परपुरंजय ॥ ५ ॥
नीलानिव महामेघांस्तिष्ठतो यांस्तु पश्यसि ॥ असिताञ्जनसंकाशान्युद्धे सत्यपराक्रमान् ॥
असंख्येयाननिर्देश्यान्परं पारमिवोदधेः ॥ ६ ॥
पर्वतेषु च ये केचिद्विषमेषु[2] नदीषु च ॥ एते त्वामभिवर्तन्ते राजन्नृक्षाः सुदारुणाः ॥ ७ ॥
एषां मध्ये स्थितो [3]राजन्भीमाक्षो भीमदर्शनः ॥ पर्जन्य इव जीमूतैः समन्तात्परिवारितः ॥ ८ ॥
ऋक्षवन्तं गिरिश्रेष्ठमध्यास्ते नर्मदां पिबन् ॥ सर्वर्क्षाणामधिपतिर्धूम्रो नामैष यूथपः ॥ ९ ॥
यवीयानस्य तु [4]भ्राता पश्यैनं पर्वतोपमम् ॥ भ्रात्रा समानो रूपेण विशिष्टस्तु [5]पराक्रमैः ॥ १० ॥
स एष जाम्बवान्नाम महायूथपयूथपः ॥ [6]प्रक्रान्तो गुरुवर्ती[7] च संप्रहारेष्वमर्षणः ॥ ११ ॥
एतेन साह्यं सुमहत्कृतं शक्रस्य धीमता ॥ दैवासुरे जाम्बवता लब्धाश्च बहवो वराः ॥ १२ ॥
आरुह्य पर्वताग्रेभ्यो महाभ्रविपुलाः शिलाः ॥ मुञ्चन्ति [8]विपुलाकारा न मृत्योरुद्विजन्ति च ॥ १३ ॥
राक्षसानां च सदृशाः पिशाचानां च लोमशाः ॥ एतस्य सैन्या बहवो विचरन्त्यग्नितेजसः ॥ १४ ॥
यं त्वेनमभिसंरब्धं प्लवमानमिव स्थितम् ॥ प्रेक्षन्ते वानराः सर्वे स्थिता यूथपयूथपम् ॥ १५ ॥
एष राजन्सहस्राक्षं पर्युपास्ते हरीश्वरः ॥ बलेन [9]बलसंपन्नो [10]दंभो नामैष यूथपः ॥ १६ ॥
[11]यः स्थितं योजने शैलं गच्छन्पार्श्वेन सेवते ॥ ऊर्ध्वं तथैव कायेन गतः प्राप्नोति योजनम् ॥ १७ ॥

हरो नाम ॥ २—३ ॥ यमित्यादि सार्धश्लोक एकान्वयः ॥ यं हरं। हरस्य हरिराजकिङ्करत्वेन तदीया अपि यूथपा हरिराजकिंकरा एवेति न विरोधः ॥ ४—५ ॥ ऋक्षसेना वर्णयति—नीलानित्यादि ॥ अनिर्देश्यान् प्रत्येकं निर्देष्टुमशक्यान्। परं पारमिवोदधेः समुद्रस्यापरं तीरमिव स्थितमित्यर्थः ॥ ६ ॥ विषमेषु निम्नोन्नतप्रदेशेषु ॥ ७ ॥ पर्जन्यः वर्षदेवता ॥ ८—९ ॥ यवीयान् कनिष्ठः। अयमिति शेषः। विशिष्टः अधिकः ॥ १० ॥ गुरुवर्ती गुरुशुश्रूषकः ॥ ११ ॥ दैवासुरे देवासुरयुद्धे ॥ १२ ॥ जाम्बवतः सैनिकान्वर्णयति द्वाभ्यां—आरुह्येत्यादि ॥ पर्वताग्राणीत्यर्थात्सिद्धं। मुञ्चन्ति च्यावयन्ति। नोद्विजन्ति न बिभ्यति। राक्षसानां पिशाचानां च सदृशा इत्यन्वयः ॥ १३—१४ ॥ द्वाभ्यां दम्भं वर्णयति—यं त्विति ॥ अभिसंरब्धं कुपितं। प्लवमानमिव सदा प्लवमानमिव स्थितं प्रेक्षन्ते। आश्चर्येणेति शेषः। बलेन पर्युपास्ते बलेन प्रीणयतीत्यर्थः ॥ १५—१६ ॥ त्रिभिः सन्नादनं वर्णयति—यः स्थितमिति ॥ यो गच्छन् योजने योजनदूरे। स्थितं शैलं पार्श्वेन गच्छति। अस्य गमनकाले एकपदप्रक्षेपदशायां एकयोजनपरिमितः पर्वतः पार्श्वस्थो भवति। योजनायतशरीर इत्यर्थः। कायेनोर्ध्वं गतः सन् योजनं प्राप्नोति। योजनोन्नतकायइत्यर्थः। अतएव चतुष्पादेषु यस्मात् परमं परं रूपं शरीरं। न विद्यते।

शि० जीमूतैः कृष्णमेघैः। समन्तात्परिवारितः पर्जन्यः इन्द्रइव यःस्थितः ॥ ८ ॥ स० अस्य धूम्रस्य। यवीयान् कनिष्ठः। रूपेण ऋक्षाकारेण। विशिष्टः उत्तमः। एतेन जांबवतइव धूम्रस्यापिब्रह्मजातत्वंज्ञायते। बालकाण्डेअंशावतरणप्रस्तावेगुणज्येष्ठत्वाज्जांबवतएवोक्तिः। सौहार्दाद्भ्रातेवेवा ॥ १० ॥ रामानु० संप्रहारेषु युद्धेषु। "संप्रहाराभिसंपातकलिसंस्फोटसंयुगाः" इत्यमरः ॥ ति० गुरुवर्ती सद्गुरूपासकः। अनेन सर्वसिद्धिमत्त्वमुक्तं। स० गुरुवर्ती ज्येष्ठानुवर्ती। अमर्षणः परपराभवासहिष्णुः ॥ ११ ॥

[पा०] १ अयंश्लोकःप्राचीनकोशेषुनदृश्यते. औत्तराहपाठएवदृश्यते. २ ङ. झ. ट. द्विषयेषु. ३ घ. ङ. झ. ट. राजाभीमाक्षो. ४ ख. च. छ. ज. ञ. बलीपश्यैनं. ५ ख. ङ. च. छ. झ. ञ. ट. पराक्रमे. ६ क.—ट. प्रशान्तो. ७ ख. च. छ. विपुलान्नादान्न. घ. विविधाकारान. ८ ङ. झ. ट. न्यूमितौजसः. ९ क. च. यूथपयूथपाः. १० ङ. झ. बलसंयुक्तो. ११ ज. ऋषभोनामयूथपः. घ. ङ. झ. ञ. रंभोनामैष. १२ घ. संस्थितं.

यस्मान्न परमं रूपं चतुष्पादेषु विद्यते ॥ श्रुतः सन्नादनो नाम वानराणां पितामहः ॥ १८ ॥
येन युद्धं पुरा दत्तं रणे शक्रस्य धीमता ॥ पराजयश्च न प्राप्तः सोऽयं यूथपयूथपः ॥ १९ ॥
यस्य विक्रममाणस्य शक्रस्येव पराक्रमः ॥ एष गन्धर्वकन्यायामुत्पन्नः कृष्णवर्त्मनः ॥ २० ॥
तदा दैवासुरे युद्धे साह्यार्थं त्रिदिवौकसाम् ॥ २१ ॥
यस्य वैश्रवणो राजा जम्बूमुपनिषेवते ॥ यो राजा पर्वतेन्द्राणां बहुकिन्नरसेविनाम् ॥ २२ ॥
विहारसुखदो नित्यं भ्रातुस्ते राक्षसाधिप ॥ तत्रैष वसति श्रीमान्बलवान्वानरर्षभः ॥ २३ ॥
युद्धेष्वकत्थनो नित्यं क्रथनो नाम यूथपः ॥ वृतः कोटिसहस्रेण हरीणां समुपस्थितः ॥
एषैवाशंसते लङ्कां सेनानीकेन मर्दितुम् ॥ २४ ॥
यो गङ्गामनु पर्येति त्रासयन्हस्तियूथपान् ॥ हस्तिनां वानराणां च पूर्ववैरमनुस्मरन् ॥ २५ ॥
एष यूथपतिर्नेता गच्छन्गिरिगुहाशयः ॥ गजान्योधयते वन्यान्गिरींश्चैव महीरुहान् ॥ २६ ॥
हरीणां वाहिनीमुख्यो नदीं हैमवतीमनु ॥ उशीरबीजमाश्रित्य पर्वतं मन्दरोपमम् ॥
रमते वानरश्रेष्ठो दिवि शक्र इव स्वयम् ॥ २७ ॥
एनं शतसहस्राणां सहस्रमनुवर्तते ॥ वीर्यविक्रमदृप्तानां नर्दतां बलशालिनाम् ॥ २८ ॥
स एष नेता चैतेषां वानराणां महात्मनाम् ॥ २९ ॥
स एष दुर्धरो राजन्प्रमाथी नाम यूथपः ॥ वातेनेवोद्धतं मेघं यमेनमनुपश्यसि ॥ ३० ॥

शक्रस्य रणे शक्रस्यासुरैः सह युद्धे । येनासुरेभ्यो युद्धं दत्तं तदा पराजयश्चासुरेभ्यो न प्राप्तः सोयं सन्नादन इति श्रुतो नाम ॥ १७—१९ ॥ कस्यायं पुत्र इत्यत्राह—यस्येति ॥ विक्रममाणस्य पराक्रमं कुर्वतः । यस्य पराक्रमः शक्रस्येव । तत्पराक्रमसदृशपराक्रम इत्यर्थः ॥ २० ॥ किमर्थमुत्पादित इत्यत्राह—तदेत्यर्धं ॥ तदा प्रसिद्धे ॥ २१ ॥ क्रथनं वर्णयति सार्धैस्त्रिभिः—यस्येत्यादिना । यस्य गिरेः वैश्रवणः कुबेरो राजा । योगिरिः जम्बूं जम्बूवृक्षं । उपनिषेवते । जम्बूयुक्त इत्यर्थः । यः ते भ्रातुः कुबेरस्य विहारसुखदः । तत्र पर्वते । युद्धेष्वकत्थनः क्रथनो नामैषः यूथपो वसतीति संबन्धः ॥ २२—२४ ॥ यो गङ्गामित्यादि सार्धश्लोकसप्तकं प्रमाथिविषयं । हस्तिनां वानराणां च अन्योन्यं पूर्ववैरमनुस्मरन् यः गङ्गामनु गङ्गासमीपे । "कर्मप्रवचनीययुक्ते द्वितीया" इति द्वितीया । हस्तियूथपान् त्रासयन् पर्येति परितश्चरति । अत्रेयं पौराणिकी कथा—पुरा किल शम्बसादनो नामासुरो गजरूपेण मुनीन् बाधमानस्तैर्मुनिभिश्चोदितेन केसरिणा हनुमत्पित्रा हतः । तत्संतुष्टैर्मुनिभिर्महापराक्रमो हनूमान् पुत्रस्ते भविष्यतीति केसरिणे वरो दत्तः । ततःप्रभृति हस्तिनां वानराणां च परस्परं वैरमभूदिति ॥ २५ ॥ गच्छन्नेव गमनकाल एव । रिपूणां नाशयिता । गिरिगुहायां शेते वर्तत इति गिरिगुहाशयः । गजानिति । गजैर्वृक्षान् वृक्षैर्गजांश्च हन्तीत्यर्थः ॥ २६ ॥ हैमवतीमनु गङ्गासमीपे । स्थितं उशीरबीजाख्यं पर्वतमाश्रित्य रमत इतियोजना । हरिवाहिनीमुख्यत्वेपि भिन्नजातीयत्वभ्रमव्युदासार्थं वानरश्रेष्ठ इत्युक्तं ॥ २७ ॥ वीरस्य भावो वीर्यं । उत्साह इत्यर्थः । विक्रमः परान्प्रत्यभिभवः । बलशालिनां वानराणामित्यर्थसिद्धं । शतसहस्राणां सहस्रं सहस्रलक्षमित्यर्थः ॥ २८ ॥ नेता नायकः ॥ २९ ॥ प्रमाथिनं वर्णयति—स एष इति ॥ दुर्धरः दुर्धर्षः । प्रमाथी नाम प्रमाथिनामकः । वातेनोद्धतं मेघमिव यमेनमनुप-

रामानु० यस्यविक्रममाणस्येत्यारभ्यस्वेनानीकेनमर्दितुमित्यन्तंकथनाख्यवानरविषयं ॥ २० ॥

[पा०] १ ङ. झ. ट. यस्मात्तुपरमंरूपंचतुष्पात्सुनविद्यते. छ. ञ. यस्मान्नभैरवं. २ घ. ङ. ज. झ. ट. तदा. ३ ङ. झ. ट. रमते. ४ घ. ङ. च. झ. ट. न्गजयूथपान्. ५ ङ. झ. ट. गजान्योधयते. ज. गर्जन्योधयते. ६ ख. ङ. च. छ. झ. ट. वन्यानारुजंश्च. ग. घ. वन्यानुरूंश्चैव. ७ क.—ट. मभिवर्तते. ८ क. घ. ङ. च. झ. ट. बाहुशालिनां. ९ घ. एषदुर्मर्षणोराजन्.

अनीकमपि संरब्धं वानराणां तरस्विनाम् ॥ उद्धूतमरुणाभासं पवनेन समन्ततः ॥
विवर्तमानं बहुधा पश्यैतद्बहुलं रजः ॥ ३१ ॥
एतेऽसितमुखा घोरा गोलाङ्गूला महाबलाः ॥ शतं शतसहस्राणि दृष्ट्वा वै सेतुबन्धनम् ॥ ३२ ॥
गोलाङ्गूलं महावेगं गवाक्षं नाम यूथपम् ॥ परिवार्याभिवर्तन्ते लङ्कां मर्दितुमोजसा ॥ ३३ ॥
भ्रमराचरिता यत्र सर्वकामफलद्रुमाः ॥ यं सूर्यस्तुल्यवर्णाभमनु पर्येति पर्वतम् ॥ ३४ ॥
यस्य भासा सदा भान्ति तद्वर्णा मृगपक्षिणः ॥ यस्य प्रस्थं महात्मानो न त्यजन्ति महर्षयः ॥३५॥
सर्वकामफला वृक्षाः सदा फलसमन्विताः ॥ मधूनि च महार्हाणि यस्मिन्पर्वतसत्तमे ॥ ३६ ॥
तत्रैष रमते राजन्रम्ये काञ्चनपर्वते ॥ मुख्यो वानरमुख्यानां केसरी नाम यूथपः ॥ ३७ ॥
षष्टिर्गिरिसहस्राणां रम्याः काञ्चनपर्वताः ॥ तेषां मध्ये गिरिवरस्त्वमिवानघ रक्षसाम् ॥ ३८ ॥
तत्रैते कपिलाः श्वेतास्ताम्रास्या मधुपिङ्गलाः ॥ निवसन्त्युत्तमगिरौ तीक्ष्णदंष्ट्रा नखायुधाः ॥३९॥
सिंहा इव चतुर्दंष्ट्रा व्याघ्रा इव दुरासदाः ॥ सर्वे वैश्वानरसमा ज्वलिताशीविषोपमाः ॥ ४० ॥
सुदीर्घाञ्चितलाङ्गूला मत्तमातङ्गसन्निभाः ॥ महापर्वतसंकाशा महाजीमूतनिस्वनाः ॥ ४१ ॥

ष्यसि एष भ्रमाधीति संबन्धः ॥ ३० ॥ यत्र अनीके । समन्ततः पवनेनोद्धूतं अरुणाभासं अरुणकान्तिबहुलमेतद्रजः । बहुधा विवर्तमानं भवति । संरब्धं तत् तरस्विनां वानराणामनीकमपि पश्यसि । तदप्यस्य भ्रमाथिनइत्यर्थः ॥ ३१ ॥ गवाक्षमाह श्लोकद्वयेन—एत इति ॥ असितमुखाः गोलाङ्गूलाः सेतुबन्धनं दृष्ट्वा उत्साहेन शतं शतसहस्राणि च सन्तः गवाक्षं नाम स्वयूथपतिं परिवार्य लङ्कां ओजसा स्वतेजसा । मर्दितुमभिवर्तन्ते । अत्र यूथपत्यपेक्षया यूथानां बलोत्साहाधिक्यं व्यज्यते ॥ ३२—३३ ॥ अथ चतुर्भिः केसरिणं वर्णयति—भ्रमरेति ॥ यत्र पर्वते । सर्वकामफलाः सर्वैः काम्यन्त इति सर्वकामाः सर्वाभीष्टार्थाः तान् फलन्तीति सर्वकामफलाः ते च ते द्रुमाश्च सर्वकामफलद्रुमाः । भ्रमरैः आचरिताःव्याप्ताः भवन्ति । अनेन वृक्षाणां सर्वापेक्षितप्रदत्वं सदा पुष्पितत्वं चोक्तं । यं पर्वतं सूर्यः तुल्यवर्णाभं तुल्यप्रकारकान्तिकं यथा तथा । अनु समीपे । पर्येति संचरति । दृश्यते हि सूर्यस्तत्सन्निधाने काञ्चनवर्णः । यस्मिन्पर्वतसत्तमे सर्वकामफलाः सर्वैः काम्यमानफलाः । अनेन स्वादुफलत्वमुक्तं । सदा फलसमन्विताः सर्वकालं फलयुक्ता इत्यर्थः । काञ्चनपर्वते मेरौ ॥ ३४—३७ ॥ अथ शतबलिवानरसेनाश्लाघनपूर्वकं वर्णयति—षष्टिरित्यारभ्य हरिरित्यन्तेन ॥ गिरिसहस्राणां षष्टिरस्ति । ते रम्याः काञ्चनपर्वता भवन्ति । गिरिवरः मेरुः । अस्ति ह्यस्तगिरेः पूर्वताश्चापरो मेरुः ॥ ३८—३९ ॥ वैश्वानरसमाः । वैश्वानरः अग्निः तद्वदुग्रा इत्यर्थः । ज्वलिताशीविषाः कुपितसर्पाः । आशिषि दंष्ट्रायां विषं येषां ते आशीविषाः । "आशीरुरगदंष्ट्रायां प्रियवाक्याभिलाषयोः" इत्यमरः । पृषोदरादित्वात् सलोपः । तद्वत्कोपना इत्यर्थः ॥४०॥ अञ्चितलाङ्गूलाः उदञ्चितलाङ्गूलाः । मत्तेत्यादिना महाकायत्वमुक्तं । पर्वतसंकाशाइत्यनेन

स० गवाक्षक्षमतामाह—एतइति । गोलाङ्गूलाः असितमुखाइतिपृथग्विद्यमानत्वात्सामान्यतःकपयः । अन्यतरस्ययौगिकत्वेनविशेषणत्वंवा । खेषांलङ्काप्राप्तिसाधनंसेतुबन्धनंदृष्ट्वाहृष्टास्सन्तोगोलाङ्गूलंस्वजातिगवाक्षं परिवार्य लङ्कांमर्दितुमभिवर्तन्ते ॥३२—३३ ॥ ती० यंकाञ्चनपर्वतं । यस्यकाञ्चनपर्वतस्य । यस्मिन् काञ्चनपर्वते । अस्माद्दिसमीपवर्तिनि सावर्णिनिवासमेरौ ॥ ३४ ॥

[पा०] १ क. घ.—छ. झ. ञ. ट. बहुशो. २ ख. येनैतत्. ३ ङ. झ. ट. महाराज. ४ झ. सर्वकालफल. ५ च. छ. सूर्यःशतवर्णाभं. ६ ङ. झ. ट. सर्वे. ७ ख. च. छ. ञ. पुष्पसमन्विताः. ८ ख. घ. ङ. च. झ. ट. गिरिसहस्राणि. ९ झ. ट. निवसन्त्यन्तिमगिरौ. घ. च. छ. ञ. निवसन्त्युत्तरगिरौ. १० ग. ङ. च. छ. झ. ञ. ट. ज्वलदाशीविषोपमाः.

वृत्तपिङ्गलरक्ताक्षा भीमभीमगतिस्वराः ॥ मर्दयन्तीव ते सर्वे तस्थुर्लङ्कां समीक्ष्य ते ॥ ४२ ॥
एष चैषामधिपतिर्मध्ये तिष्ठति वीर्यवान् ॥ जयार्थी नित्यमादित्यमुपतिष्ठति बुद्धिमान् ॥ ४३ ॥
नाम्ना पृथिव्यां विख्यातो राजञ्शतबलीति यः ॥ एषैवाशंसते लङ्कां स्वेनानीकेन मर्दितुम् ॥४४॥
विक्रान्तो बलवाञ्शूरः पौरुषे स्वे व्यवस्थितः ॥ रामप्रियार्थं प्राणानां दयां न कुरुते हरिः ॥४५॥
गजो गवाक्षो गवयो नलो नीलश्च वानरः ॥ एकैक एव यूथानां कोटीभिर्दशभिर्वृतः ॥ ४६ ॥
तथाऽन्ये वानरश्रेष्ठा विन्ध्यपर्वतवासिनः ॥ न शक्यन्ते बहुत्वात्तु संख्यातुं लघुविक्रमाः ॥ ४७ ॥
सर्वे महाराज महाप्रभावाः सर्वे महाशैलनिकाशकायाः ॥
सर्वे समर्थाः पृथिवीं क्षणेन कर्तुं प्रविध्वस्तविकीर्णशैलाम् ॥ ४८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

अष्टाविंशः सर्गः ॥ २८ ॥

शुकेनरावणंप्रति सारणानुक्तानांहनुमदादिवानरवीराणां रामलक्ष्मणादीनांच प्रभावादिप्रशंसनपूर्वकं पृथङ्नामनिर्देशेन प्रदर्शनम् ॥ १ ॥ तथा लक्षकोट्यादिसर्वसंख्यालक्षणकथनपूर्वकं वानरसेनासु तावत्संख्यापर्याप्तिनिवेदनम् ॥ २ ॥

सारणस्य वचः श्रुत्वा रावणं राक्षसाधिपम् ॥ बलमादिश्य तत्सर्वं शुको वाक्यमथाब्रवीत् ॥ १ ॥
स्थितान्पश्यसि यानेतान्मत्तानिव महाद्विपान् ॥ न्यग्रोधानिव गाङ्गेयान्सालान्हैमवतानिव ॥ २ ॥
एते दुष्प्रसहा राजन्बलिनः कामरूपिणः ॥ दैत्यदानवसंकाशा युद्धे देवपराक्रमाः ॥ ३ ॥
एषां कोटिसहस्राणि नव पञ्च च सप्त च ॥ तथा शङ्खसहस्राणि तथा बृन्दशतानि च ॥ ४ ॥

दार्ढ्यमुक्तं ॥ ४१ ॥ भीमभीमाः भीमप्रकाराः । प्रकारः सादृश्यं । भीमसदृशाः ईषद्भीमा इत्यर्थः । " प्रकारे गुणवचनस्य " इति द्विर्भावः । तादृशगमनस्वराः ते वानराः । ते तव । लङ्कां समीक्ष्य मर्दयन्तीव तस्थुः मर्दयन्तीव तिष्ठन्ति । आर्षो लिङ्गव्यत्ययः ॥ ४२ ॥ उपतिष्ठति उपतिष्ठते ॥ ४३ ॥ एषैवेति संधिरार्षः ॥ ४४ ॥ पौरुषे पराक्रमे । प्राणानां प्राणेषु ॥ ४५–४७ ॥ प्रविध्वस्तविकीर्णशैलां प्रविध्वस्ताः चूर्णिताः विकीर्णा विक्षिप्ताः शैलाः यस्याः सा तां तथा ॥ ४८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तविंशः सर्गः ॥ २७ ॥

एवं सारणेनोक्तं श्रुत्वाशुकस्तेन कात्स्न्र्येनानुक्तेः स्वयं तत्सर्वं दर्शयत्यष्टाविंशे सर्गे—सारणस्येति ॥ शुकः सारणस्य वचः श्रुत्वा तेन कात्स्न्र्येनानुक्तेः स्वयं तत्सर्वं बलं आदिश्य अङ्गुल्या निर्दिश्य । रावणं । अथ कात्स्न्र्येन । अब्रवीत् । " मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ " इत्यमरः । सचिनयोक्तिद्योतनाय राक्षसाधिपमित्युक्तं ॥ १ ॥ न्यग्रोधान् वटान् । गाङ्गेयान् गङ्गातटरुहान् । हैमवतान् हिमवत्पर्वतोद्भवान् ॥ २ ॥ दैत्यदानवसंकाशाः दैत्यदानवतुल्यबलाः ॥ ३ ॥ शङ्खबृन्दादिस्वरूपमुत्तरत्र स्वयमेव वक्ष्यति । बृन्दशतादिसंख्याः सन्तीति शेषः

ति० तेवानराः । ते तव । लङ्कांसमीक्ष्य मर्दयन्तीव मर्दयन्तइवतिष्ठन्ति ॥ शि० एके प्रधानाः । सर्वेयेनिवसन्ति तेसर्वे लङ्कांमर्दयन्तीव । अतएव समीक्ष्यतस्थुः । एतेनलिङ्गव्यत्ययआर्षः इत्युक्तिश्चिन्त्या ॥ ४२ ॥ इतिसप्तविंशःसर्गः ॥ २७ ॥

स० बलं रामबलं रामसेनां । तत्सर्वं स्वेनतेनापिज्ञातंसर्वमादिश्य । रामेणोक्तंवचश्चादिश्य विज्ञाप्य । स्थितस्यसारणस्यवचः श्रुत्वा स्थितंरावणंप्रति शुकोऽथवाक्यमब्रवीत् ॥ १ ॥ ति० गाङ्गेयान् गङ्गातटोत्पन्नान् । अनपत्येपिढगार्षः ॥ २ ॥ ति० एषां

[पा०] १ ङ. च. झ. ञ. ट. वृत्तपिङ्गलने त्राहिमहाभीमगतिस्वनाः. २ घ. भीमतरस्वनाः. ३ क. ग. ज. मिमर्दयिषवोलङ्कांसर्वेतिष्ठन्त्युदीक्ष्यते. ४ ङ. छ. झ. ञ. वीर्यवान्. ५ घ. पर्यवस्थितः. ६ क. ग. च. छ. ज. ञ. स्फीतान्. ७ ङ.—ट. शङ्खसहस्राणि.

एते सुग्रीवसचिवाः किष्किन्धानिलयाः सदा ॥ हरयो देवगन्धर्वैरुत्पन्नाः कामरूपिणः ॥ ५ ॥
यौ तौ पश्यसि तिष्ठन्तौ कुमारौ देवरूपिणौ ॥ मैन्दश्च द्विविदश्चोभौ ताभ्यां नास्ति समो युधि ॥६॥
ब्रह्मणा समनुज्ञातावमृतप्राशिनावुभौ ॥ आशंसेते युधा लङ्कामेतौ मर्दितुमोजसा ॥ ७ ॥
[यावेतावेतयोः पार्श्वे स्थितौ पर्वतसन्निभौ ॥ सुमुखोसुमुखश्चैव मृत्युपुत्रौ पितुःसमौ ॥
प्रेक्षन्तौ नगरीं लङ्कां कोटिभिर्दशभिर्वृतौ ॥ ८ ॥]
यं तु पश्यसि तिष्ठन्तं प्रभिन्नमिव कुञ्जरम् ॥ यो बलात्क्षोभयेत्क्रुद्धः समुद्रमपि वानरः ॥ ९ ॥
एषोभिगन्ता लङ्काया वैदेह्यास्तव च प्रभो ॥ एनं पश्य पुरा दृष्टं वानरं पुनरागतम् ॥ १० ॥
ज्येष्ठः केसरिणः पुत्रो वातात्मज इति श्रुतः ॥ हनुमानिति विख्यातो लङ्घितो येन सागरः ॥११॥
कामरूपी हरिश्रेष्ठो बलरूपसमन्वितः ॥ अनिवार्यगतिश्चैव यथा सततगः प्रभुः ॥ १२ ॥
उद्यन्तं भास्करं दृष्ट्वा बालः किल पिपासितः ॥ त्रियोजनसहस्रं तु अध्वानमवतीर्य हि ॥ १३ ॥
आदित्यमाहरिष्यामि न मे क्षुत्प्रतियास्यति ॥ इति संचिन्त्य मनसा पुरैष बलदर्पितः ॥ १४ ॥
अनाधृष्यतमं देवमपि देवर्षिदानवैः ॥ अनासाद्यैव पतितो भास्करोदयने गिरौ ॥ १५ ॥

॥ ४ ॥ सुग्रीवसचिवाः सुग्रीवसहायाः । " मन्त्री सहायः सचिवः " इत्यमरः । देवगन्धर्वैः देवेभ्योगन्धर्वेभ्यश्चेत्यर्थः । उत्पन्नाः कामरूपिणइति कामरूपित्वेनोत्पन्ना इत्यर्थः । पूर्वं कामरूपित्वमुक्तं तस्येदानीमौत्पत्तिकत्वमुच्यत इति न पुनरुक्तिः ॥ ५ ॥ कुमारौ युवानौ । देवेति रावणंप्रति संबुद्धिः । रूपिणौ प्रशस्तरूपौ । प्रशंसायां मत्वर्थीय इनिप्रत्ययः । यौ पश्यसि तौ मैन्दश्च द्विविदश्चेत्युच्येते इत्यर्थः ॥ ६ ॥ युधि ताभ्यां समो नास्तीत्यत्र हेतुं दर्शयति— ब्रह्मणेति ॥ समनुज्ञातौ सन्तौ अमृतप्राशिनावित्यर्थः ॥ ७—८ ॥ हनुमन्तं वर्णयति—यं त्वित्यादिना ॥ प्रभिन्नं मत्तं । " प्रभिन्नो गर्जितो मत्तः " इत्यमरः ॥ ९ ॥ अभिगन्तेति । वैदेहीपक्षे अभिगमनं अन्वेषणं । रावणपक्षे दर्शनं ॥ १० ॥ ज्येष्ठ इति । अत्र एष इत्यध्याहार्यं । केसरिणः पुत्रः तस्य क्षेत्रजः पुत्रः ॥ ११ ॥ बलरूपसमन्वितः प्रशस्तबलसमन्वितः । प्रशंसायां रूपप् प्रत्ययः । यथा सततगः । सततग इव । सततगः वायुः ॥ १२ ॥ बालः बाल्यावस्थः । किलेत्यैतिह्ये । पिपासितः स्तन्यापेक्षः । क्षुधित इति यावत् । त्रियोजनसहस्रं त्रियोजनसहस्रपरिमाणं । " द्विगोर्नित्यं " इति प्रमाणप्रत्ययस्य लुक् । हनुमत्पितुः केसरिणः कनकाचलवासित्वात्तस्य चात्युन्नतत्वादादित्यस्य तच्छिखरस्य च मध्यमाद्वा त्रिसहस्रयोजनपरिमित इत्युक्तं । अतएव अवतीर्येत्युक्तं नतूत्पत्येति । यद्वा आदित्यस्य भूमेरुपरि लक्षयोजनान्तरत्वात् त्रियोजनसहस्रमित्येतदनेकसहस्रोपलक्षणं ॥ १३ ॥ आहरिष्यामि भक्षयिष्यामि । " इति संचिन्त्य मनसा पुरैष बलदर्पितः " इत्यनन्तरं त्रियोजनसहस्रमित्यर्धं योज्यं ॥ १४ ॥ देवं सूर्यं । भास्कर उदयतेऽस्मिन्निति भास्करोदयनः तस्मिन्गिरौ । हनुः तालुप्रदेशः । अनासाद्येत्यत्र तत्तेजसेत्युपस्कार्यं । तेजसा तस्य निर्धूत इति किष्किकोटीतिसुग्रीवसचिवसंख्या । सर्वबलसंख्यांतुसर्गान्तेवक्ष्यति ॥ ४ ॥ **ति०** समनुज्ञाताइत्यत्र "लोपःशाकल्यस्य" इतिलोपः ॥ **स०** यथा सम्यक् । " निवृत्तिमार्गःकथितआदौभगवतायथा " इतिभागवतश्लोकमुदाहृत्य " यथायोग्याखिलज्ञता " इत्यनुव्याख्यासुधायां " यथेतिभिन्नंपदंसम्यग्वाचि " इत्युक्तेः ॥ ७ ॥ **स०** ज्येष्ठइत्यनेनान्येप्यवरजाःसन्तीतिज्ञायते ॥ वातात्मजः वातस्यवायोः आत्मजः औरसः ॥ ११ ॥ **स०** बुभुक्षितः भक्षणेच्छावानित्यर्थः । त्रियोजनसहस्रं । उपलक्षणमेतत् । अवतीर्य मातुरुत्सङ्गात् मे मम । क्षुत् नप्रतियास्यति भूमिस्थफलादिभिरिशेषः । तस्मादादित्यमाहरिष्यामीतिनिश्चित्यपुप्लुवे ॥१३—१४॥ **स०** अनासाद्यपतितः इन्द्रवज्रादितिशेषः ॥ १५ ॥

[**पा०**] १ ङ. ञ. ट. समानौ. २ ङ. ञ. ट. द्विविदश्चैव. च. छ. झ. द्विविदश्चेति. ३ ञ. समनुज्ञाताअमृत. ४ ङ.—ट. यथालङ्कां. ५ अयंश्लोकःप्राचीनकोशेषुनदृश्यतेऔत्तराहपाठएवदृश्यते. ६ ग.—ट. लङ्कायां. ७ ङ. छ. ञ. ट. कामरूपो. ८ च. ग. बलवीर्य. ९ ख. च. छ. बाल्येकिल. १० घ. ङ. ञ. ञ. बुभुक्षितः. ११ घ. मधिरुह्यच. १२ क. घ.—छ. ञ. ञ. ट. निश्चित्य. १३ ङ. ञ. पुप्लुवेबल. १४ ङ.—ट. देवर्षिराक्षसैः.

पतितस्य कपेरस्य हनुरेका शिलातले ॥ किंचिद्भिन्ना दृढहनोर्हनुमानेष तेन वै ॥ १६ ॥
सत्यमागमयोगेन ममैष विदितो हरिः ॥ नास्य शक्यं बलं रूपं प्रभावो वाऽपि भाषितुम् ॥ १७ ॥
एष आशंसते लङ्कामेको मर्दितुमोजसा ॥ [येन जाज्वल्यतेऽसौ वै धूमकेतुस्तवाद्य वै ॥
लङ्कायां निहितश्चापि कथं विस्मरसे कपिम् ॥ १८ ॥]
यश्चैषोनन्तरः शूरः श्यामः पद्मनिभेक्षणः ॥ इक्ष्वाकूणामतिरथो लोके विख्यातपौरुषः ॥ १९ ॥
यस्मिन्न चलते धर्मो यो धर्मं नातिवर्तते ॥ यो ब्राह्ममस्त्रं वेदांश्च वेद वेदविदां वरः ॥ २० ॥
यो भिन्द्याद्गगनं बाणैः पर्वतानपि दारयेत् ॥ यस्य मृत्योरिव क्रोधः शक्रस्येव पराक्रमः ॥ २१ ॥
यस्य भार्या जनस्थानात्सीता चापहृता त्वया ॥ स एष रामस्त्वां योद्धुं राजन्समभिवर्तते ॥ २२ ॥
यस्यैष दक्षिणे पार्श्वे शुद्धजाम्बूनदप्रभः ॥ विशालवक्षास्ताम्राक्षो नीलकुञ्चितमूर्धजः ॥ २३ ॥
एषोस्य लक्ष्मणो नाम भ्राता प्राणसमः प्रियः ॥ नये युद्धे च कुशलः सर्वशास्त्रविशारदः ॥ २४ ॥
अमर्षी दुर्जयो जेता विक्रान्तो बुद्धिमान्बली ॥ रामस्य दक्षिणो बाहुर्नित्यं प्राणो बहिश्चरः ॥ २५ ॥

न्धाकाण्डोक्तेः । यद्यप्युत्तरकाण्डे इन्द्रवज्रेण पतनमुक्तं । तथापि तदपि हेत्वन्तरमिति ज्ञेयं ॥ १५–१६ ॥ कथमियं कथा त्वया विदितेत्यत्राह—सत्यमिति ॥ आगमः आप्तवाक्यं तदेव योग उपायः तेन । यद्वा आप्तवाक्यश्रवणेन मम मया रूपं वपुः भाषितुं न शक्यं । कामरूपदर्शनादितिभावः ॥ १७—१८ ॥ अथ रामं वर्णयति—यश्चैष इत्यादिना ॥ अनन्तरः अन्तरं अवकाशः तद्रहितः । स्कन्धारूढत्वेन पूर्वोक्तहनुमतोत्यन्तसन्निहितइत्यर्थः । शूरः हनुमदारूढत्वेन प्रकटितशौर्यः । श्यामः कनकमयशिखरारूढकालाम्बुदकमनीयविग्रहः । पद्मनिभेक्षणः दिव्यविग्रहमहातटाकस्थविकसितकमललोभनीयविलोचनः । अनरण्यादिवदयं न मन्तव्यः । किंत्विक्ष्वाकूणां मध्ये अतिरथः अतिशयितरथः । अपराजितरथइत्यर्थः । अत्र न वयमेव प्रमाणं । लोके विख्यातपौरुषः खरवधादिना ख्यातं भवद्वैरिवालिवधेन विशेषेण ख्यातं पौरुषं यस्य तथोक्तः ॥ १९ ॥ न केवलं पौरुषं धर्मोप्यस्यैव स्वमित्याह—यस्मिन्निति ॥ यस्मिन्धर्मो न चलति जाबालिप्रभृतिभिराकुलितोप्यप्रकम्पितः यो धर्मं नातिवर्तते भरतसीतादिभिः कृतेपि प्रतिबन्धे पितृवचनमुनिप्रतिज्ञाधर्मं नातिवर्तते । खरयुद्धेऽपसर्पणं बाणपातावकाशलाभार्थं । छद्मना वालिवधस्त्वन्यथानुपपत्त्यावश्यमाश्रितविषयप्रतिज्ञाया निर्वोढव्यतया च । न केवलं पौरुषधर्मौ अस्त्रबलं चास्यैवेत्याह—य इति । ब्राह्ममस्त्रं ब्रह्मास्त्रमस्त्रं । वेदांश्च वेद जानाति । ब्रह्मास्त्रमन्त्रस्य वेदान्तर्गतत्वेपि प्राधान्यात्पृथगुक्तिः । वेदविदां वेदार्थविदां वरः उपदेष्टृभ्यो वसिष्ठादिभ्योप्युत्कृष्टः ॥ २० ॥ उक्तं पौरुषमेव प्रपञ्चयति—यो भिन्द्यादित्यादि ॥ गगनं गगनस्थविमानादि । आदिशब्देन पातालादिकमुच्यते ॥ २१ ॥ संप्रति कोपोद्भवे मूलमाह—यस्य भार्येति ॥ २२ ॥ अथ लक्ष्मणं वर्णयति—यस्यैष इत्यादिना ॥ दक्षिणे रामस्येति शेषः । शुद्धजाम्बूनदप्रभः स्वर्णवर्णः । ताम्राक्षः त्वद्विषयकोपेनेति भावः ॥ २३ ॥ सर्वेति । शास्त्रशब्दो नीतिशास्त्रव्यतिरिक्तपरः ॥ २४ ॥ प्राणो बहिश्चर इत्यनेन प्राणसंरक्षकत्वमुच्यते

स० वज्रशिलातलताडनाद्बहुनाभङ्गेनभाव्यं । तथापि किञ्चिद्भेतिहनोर्दृढिमेतिदृढहनोरित्युक्तं ॥ तेननिमित्तेन हनुमानिति गीयतइतिशेषः ॥ मतुबर्थश्चप्राशस्त्यं । तदेवदार्ढ्यमितिभावः ॥ १६ ॥ ति० धूमकेतुरग्निः । येनजाज्वल्यते प्रज्वलितःकृतः । लत्तेजोरुद्धोपि यत्पुच्छंप्राप्य प्रज्वलितः ॥ १८ ॥ ति० यस्य दर्शितस्यहनुमतोऽनन्तरः समीपवर्ती ॥ १९ ॥ ति० गगनं बाणैर्भिन्द्यात् सर्वदुष्करमपितस्यसुकरमितितात्पर्यं ॥ २१ ॥

[पा०] १ क. ग. ङ.—ट. वानु. २ ङ. झ. ट. मथितुं. ३ अयंश्लोकः क. ख. ङ.—ट. पाठेषुदृश्यते. ४ ङ. ज. झ. ट. यस्यैषो. ५ ख. ङ.—ट. विश्रुतपौरुषः. ६ ज. भिन्द्यान्मेदिनीं. ७ ङ. च. झ. ञ. ट. मेदिनींवापि. ८ घ. नीलजीमूतमूर्धजः. ९ ङ. छ.—ट. एषोहिलक्ष्मणोनामभ्रातुःप्रियहितेरतः. ख. सएष. १० ख. प्रभुः. क. सखा. ११ ङ. छ. झ. ट. शस्त्रभृतांवरः. १२ घ. विक्रान्तोबलवान्वशी. ङ. झ. ट. विक्रान्तश्चजयीबली. ख. च. छ. ज. विक्रान्तोबलसंयुतः.

न ह्येष राघवस्यार्थे जीवितं परिरक्षति ॥ एषैवाशंसते युद्धे निहन्तुं सर्वराक्षसान् ॥ २६ ॥
[1]यस्तु सव्यमसौ पक्षं रामस्याश्रित्य तिष्ठति ॥ रक्षोगणपरिक्षिप्तो राजा ह्येष विभीषणः ॥ २७ ॥
श्रीमता राजराजेन लङ्कायामभिषेचितः ॥ [2]त्वामेव प्रतिसंरब्धो युद्धायैषोभि[3]वर्तते ॥ २८ ॥
यं तु पश्यसि तिष्ठन्तं मध्ये गिरिमिवाचलम् ॥ सर्वशाखामृगेन्द्राणां भर्तार[4]मपराजितम् ॥ २९ ॥
तेजसा यशसा बुद्ध्या ज्ञानेनाभिजनेन च ॥ यः कपीनतिबभ्राज हिमवानिव पर्वतान् ॥ ३० ॥
किष्किन्धां यः समध्यास्ते गुहां सगहनद्रुमाम् ॥ दुर्गां पर्व[6]तदुर्गस्थां प्रधानैः सह यूथपैः ॥ ३१ ॥
यस्यैषा काञ्चनी माला शोभते शतपुष्करा ॥ कान्ता देवमनुष्याणां यस्यां लक्ष्मीः प्रतिष्ठिता ॥३२॥
एतां च मालां तारां च कपिराज्यं च शाश्वतम् ॥ सुग्रीवो वालिनं हत्वा रामेण प्रतिपादितः ॥३३॥
शतं शतसहस्राणां कोटिमाहुर्मनीषिणः ॥ शतं कोटिसहस्राणां शङ्ख[8] इत्यभिधीयते ॥ ३४ ॥
शतं शङ्खसहस्राणां महाशङ्ख[10] इति स्मृतः ॥ महाशङ्खसहस्राणां शतं बृन्द[11]मिति स्मृतम् ॥ ३५ ॥
शतं बृन्दसहस्राणां महाबृन्दमिति स्मृतम् ॥ महापद्मसहस्राणां शतं पद्म[12]मिति स्मृतम् ॥ ३६ ॥
शतं पद्मसहस्राणां महापद्ममिति स्मृतम् ॥ महापद्मसहस्राणां शतं खर्वमिहोच्यते ॥ ३७ ॥
शतं खर्वसहस्राणां महाखर्व[13]मिति स्मृतम् ॥ महाखर्वसहस्राणां समुद्रमभिधीयते ॥ ३८ ॥
शतं समुद्रसाहस्रमोघ इत्यभिधीयते ॥ शतमोघसहस्राणां महौघ इति विश्रुतः[14] ॥ ३९ ॥
एवं कोटिसहस्रेण शङ्खा[15]नां च शतेन च ॥ महाशङ्ख[16]सहस्रेण तथा बृन्दशतेन च ॥ ४० ॥

॥ २५—२६ ॥ पक्षं पार्श्वं । रक्षोगणेति । चतुर्णामेव रक्षसां गणतुल्यविक्रमत्वात्तथोक्तं । राजा त्वद्राज्यस्येतिशेषः । अत्र हीति गायत्र्याः षोडशाक्षरं ॥ २७ ॥ राजत्वं कुत इत्यत्राह—श्रीमतेति ॥ श्रीमता अवाप्तसमस्तकामत्वेनलङ्काराज्यानभिलाषिणेत्यर्थः । राजराजेन विभीषणादिराजत्वानिर्वाहे स्वस्य राजराजत्वं न निर्वहेदिति मन्वानेन । लङ्कायां निमित्ते । लङ्कायां राजेतिवान्वयः ॥ २८ ॥ अथ सुग्रीवं वर्णयति—मध्ये रामविभीषणयोर्मध्ये । अचलं निश्चलं ॥ २९ ॥ बुद्ध्या ऊहापोहरूपज्ञानेन । ज्ञानेन शास्त्रजन्यज्ञानेन । अभिजनेन कुलेन । अतिबभ्राज अतिशय्य बभ्राज ॥ ३० ॥ गहनं वनं । दुर्गां प्राकारादिना दुर्गमां । पर्वतदुर्गस्थां पर्वतरूपदुर्गे स्थितां ॥ ३१ ॥ शतपुष्करा शतपद्मा । कान्ता काम्यमाना । लक्ष्मीः वीरलक्ष्मीः । तद्धारणे कदाचिदपि पराजयो न भवतीति सदा वाली तां वहतिस्मेति प्रसिद्धिः । तद्धारणादेव हि रामस्तदनभिमुख एव वालिनं हतवान् ॥ ३२ ॥ प्रतिपादितः प्रापितः ॥ ३३ ॥ उक्तानुक्तसकलवानरसंख्यां वक्तुं प्रथमतः संख्यामेव दर्शयति—शतमित्यादिना ॥ शतपर्यन्तसंख्यायाः स्फुटत्वात्तदूर्ध्वसंख्या अत्र संकीर्त्यन्ते । शतसहस्राणां लक्षाणां शतं कोटिरित्याहुः ॥ ३४—॥ ३९ ॥ एवं कोटिसहस्रेणेत्याद्यवान्तरसंख्याभेद-

स० रक्षोगणपरिक्षिप्तः रक्षसांगणाःयस्यासौतथा । तेनत्वयापरिक्षिप्तः बहिर्निष्कासितः । रक्षोगणैर्वर्जितइतिवा । राजराजेन राजश्रेष्ठेन । लङ्कायांराजा सन्नभिषेचितइत्यन्वयः । एतेन तत्रतस्तेन त्वं तुच्छीकृतइत्यवेहीतिसूचयति ॥ ति० यस्य प्राग्वर्णितस्यरामस्यसव्यंपक्षमाश्रित्यतिष्ठतीत्यन्वयः ॥ शि० रक्षोगणैःपरिक्षिप्तः त्यक्तः । एषविभीषणः अतएव एषः लङ्काराज्यविषयकेच्छावान् असौविभीषणः त्वांप्रतियुद्धाय संरब्धोभिवर्तते ॥ २७—२८ ॥ स० प्रतिसंरब्धः प्रतिना मनःपूर्वकतांसौहार्दत्यागपूर्वकतांवासंरंभस्यद्योतयति ॥ २८ ॥ इत्यष्टाविंशःसर्गः ॥ २८ ॥

[पा०] १ ग. ङ. झ. ट. यस्य. २ ङ.—ट. त्वामसौ. ३ घ. तिष्ठते. ४ ङ.—ट. ममितौजसं. ५ ख. घ. ङ. ज. झ. ट. बलेनाभि. ६ ङ. झ. ट. दुर्गम्यां. ७ ख.—ङ. झ. ञ. ट. शङ्करित्यभिधीयते. ८ क.—ट. शङ्कसहस्राणां. ९ ख. ङ.—ट. महाशङ्क. १० क.—ट. महाशङ्क. ११ ख.—ट. वृन्दमिहोच्यते. १२ ङ. च. झ. ञ. ट. पद्ममिहोच्यते. १३ क. च. ञ. महाखर्वमिहोच्यते. १४ झ. ट. विश्रुतं. १५ ङ. च. झ. ञ. ट. शङ्खानांच. १६ क.—च. झ. ञ. ट. महाशङ्क.

महावृन्दसहस्रेण तथा पद्मशतेन च ॥ महापद्मसहस्रेण तथा खर्वशतेन च ॥ ४१ ॥
समुद्रेण शतेनैव महौघेन तथैव च ॥ एष कोटिमहौघेन समुद्रसदृशेन च ॥ ४२ ॥
विभीषणेन सचिवैः राक्षसैः परिवारितः ॥ सुग्रीवो वानरेन्द्रस्त्वां युद्धार्थमभिवर्तते ॥
महाबलवृतो नित्यं महाबलपराक्रमः ॥ ४३ ॥
इमां महाराज समीक्ष्य वाहिनीमुपस्थितां प्रज्वलितग्रहोपमाम् ॥
ततः प्रयत्नः परमो विधीयतां यथा जयः स्यान्न परैः पराजयः ॥ ४४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥

एकोनत्रिंशः सर्गः ॥ २९ ॥

शुकसारणकृतशत्रुपक्षप्रशंसनमसहमानेनरावणेन सभर्त्सनं तद्विसर्जनपूर्वकं यथावच्छयनासनादिरामाचरणावगमाय शार्दूलादिचारवरप्रेषणम् ॥ १ ॥ वेषान्तरधारणेनवानरसेनामध्यप्रविष्टैर्विभीषणदृष्टनिवेदितैर्वानरमुष्टिपिष्टैः कृपयारामविमोचितैः शार्दूलादिभिः पुनारावणसमीपगमनम् ॥ २ ॥

शुकेन तु समाख्यातांस्तान्दृष्ट्वा हरियूथपान् ॥ समीपस्थं च रामस्य भ्रातरं खं विभीषणम् ॥ १ ॥
लक्ष्मणं च महावीर्यं भुजं रामस्य दक्षिणम् ॥ सर्ववानरराजं च सुग्रीवं भीमविक्रमम् ॥ २ ॥
[गजं गवाक्षं गवयं मैन्दं द्विविदमेव च ॥ अङ्गदं चैव बलिनं वज्रहस्तात्मजात्मजम् ॥ ३ ॥
हनूमन्तं च विक्रान्तं जाम्बवन्तं च दुर्जयम् ॥ सुषेणं कुमुदं नीलं नलं च प्लवगर्षभम् ॥ ४ ॥]
किंचिदाविग्नहृदयो जातक्रोधश्च रावणः ॥ भर्त्सयामास तौ वीरौ कथान्ते शुकसारणौ ॥ ५ ॥
अधोमुखौ तौ प्रणतावब्रवीच्छुकसारणौ ॥ रोषगद्गदया वाचा संरब्धः परुषं वचः ॥ ६ ॥
न तावत्सदृशं नाम सचिवैरुपजीविभिः ॥ विप्रियं नृपतेर्वक्तुं निग्रहप्रग्रहे प्रभोः ॥ ७ ॥
रिपूणां प्रतिकूलानां युद्धार्थमभिवर्तताम् ॥ उभाभ्यां सदृशं नाम वक्तुमप्रस्तवे स्तवम् ॥ ८ ॥

कीर्तनंअवान्तरसेनापतिभेदात् ॥४०—४१॥ समुद्रसदृशेन सागरसदृशेन ॥४२॥ सचिवैः राक्षसैरुपलक्षितेन विभीषणेन परिवारितः सुग्रीवः त्वामभि त्वांप्रति । युद्धार्थं वर्तते ॥४३॥ ज्वलितग्रहोपमां क्रूरग्रहोपमां । यथा ते जयो न स्यात् प्रत्युत परैः पराजय एव स्यात् तथा यत्नः क्रियतामिति ध्वन्यते ॥ ४४ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टाविंशः सर्गः ॥ २८ ॥

अथ रावणेन चारप्रेषणादिप्रतिपाद्यत एकोनत्रिंशे—शुकेनेत्यादिश्लोकत्रयं ॥ सर्ववानरराजंचेत्यत्र चकारो हनुमदादिसमुच्चयार्थः । आविग्नहृदयः भीतहृदयः । तथापि जातक्रोधः परस्तवाकर्णनेन कुपित इत्यर्थः । कथान्ते वचनान्ते ॥ १—५ ॥ रोषगद्गदया कोपस्खलितया । संरब्धः कुपितः ॥६॥ तावत् प्रथमतः । निग्रहप्रग्रहे निग्रहानुग्रहयोः । प्रभोः शक्तस्य । नृपतेः विप्रियं वक्तुं न सदृशं नाम । नामेति नीतिशास्त्रप्रसिद्धिः ॥ ७ ॥ विप्रियपदोक्तं विशदयति—रिपूणामिति ॥ अभिवर्ततां अभिवर्तमानानां । अप्र-

---

ति० भर्त्सयामास स्वकीयभीताकारगोपनार्थोयंव्यापारः ॥५॥ स० रिपूणां शत्रूणां । ननु "रिपोरपिगुणावाच्याः" इत्याद्युक्तेस्तत्स्तुतिर्युक्तेत्यतोवक्ति—प्रतिकूलानामिति । विरुद्धाचरणवतामित्यर्थः । स्तुतिस्तु अप्रतिकूलशत्रुजातीयविषयेतिभावः । तत्प्राह—युद्धार्थमिति । अप्रस्तवे तद्विषयकप्रश्नाभावे । स्तवं गुणकीर्तनं । वक्तुंसदृशंनामसदृशंकिल काकुः । यद्वा उभाभ्यामेवाप्रस्तवे

[पा०] १ क. ख. च. छ. ट. एवंकोटि. २ ङ.—ट. वीरेणसचिवैःपरि. ३ ङ. झ. ट. मनुवर्तते. ४ ङ. च. छ. झ. ञ. ट. पराभवः. ५ ङ. झ. ञ. ट. समादिष्टान्दृष्ट्वा. ६ इदंश्लोकद्वयं क. ख. च. छ. ञ. पाठेषुदृश्यते. क, ख. च. छ. ञ. नीलं. सेनापतिंचैवनलंगवयमेवच. ७ ङ. घ. च. छ. ञ. जातामर्षश्च. ८ च. ञ. नृपतेःकर्तुं.

[1]आचार्या गुरवो वृद्धा वृथा वां पर्युपासिताः ॥ सारं यद्राजशास्त्राणामनुजीव्यं न गृह्यते ॥
गृहीतो वा न विज्ञातो भारो ज्ञानस्य वोह्यते[2] ॥ ९ ॥
ईदृशैः सचिवैर्युक्तो मूर्खैर्दिष्ट्या धराम्यहम् ॥ १० ॥
किंनु मृत्योर्भयं नास्ति वक्तुं मां परुषं वचः ॥ यस्य मे शासतो जिह्वा प्रयच्छति शुभाशुभम् ॥ ११ ॥
अप्येव दहनं स्पृष्ट्वा वने तिष्ठन्ति पादपाः ॥ [3]राजदोषपरामृष्टास्तिष्ठन्ते नापराधिनः ॥ १२ ॥
हन्यामहं त्विमौ पापौ शत्रुपक्षप्रशंसकौ ॥ यदि पूर्वोपकारैस्तु न क्रोधो मृदुतां व्रजेत् ॥ १३ ॥
अपध्वंसत गच्छध्वं सन्निकर्षादितो मम ॥ न हि वां हन्तुमिच्छामि स्वराम्युपकृतानि वाम् ॥ १४ ॥
हताविव कृतघ्नौ तौ मयि स्नेहपराङ्मुखौ ॥ १५ ॥
एवमुक्तौ तु सव्रीडौ तावुभौ शुकसारणौ ॥ रावणं जयशब्देन प्रतिनन्द्याभिनिस्सृतौ ॥ १६ ॥
[4]अब्रवीत्तु दशग्रीवः समीपस्थं महोदरम् ॥ उपस्थापय मे शीघ्रं चारान्नीतिविशारदान् ॥
महोदरस्तथोक्तस्तु शीघ्रमाज्ञापयच्चरान् ॥ १७ ॥

स्तवे अनवसरे । स्तवं वक्तुं सदृशं नाम सदृशं किमु । युद्धारम्भसमयो हि परस्तुत्यनर्ह इति भावः ॥ ८ ॥ यद्यस्मात् राजशास्त्राणां सारं प्रतिपाद्यसारभूतं । अनुजीव्यं अनुजीविकृत्यं । न गृह्यते न ज्ञायते । अतः वां युवाभ्यां गुरवः महान्तः । वृद्धाः ज्ञानवयश्शीलसंपन्नाः । आचार्याः नीतिशास्त्रोपदेष्टारः । वृथा पर्युपासिताः । तदुपासनफलादर्शनान्निरर्थकमाराधिताइत्यर्थः । ननु चिरोपासितगुरोरज्ञानं नसाम्प्रतं तत्राह—गृहीतो वेति । गृहीतोवार्थः । न विज्ञातः न विशेषेण ज्ञातः । विस्मृत इत्यर्थः । तर्हि कथं ज्ञातृत्वप्रवाद इत्यत्राह—भार इति । ज्ञानस्य भारः ऊह्यते वा । जातमपि ज्ञानं नानुष्ठानपर्यवसायीत्यर्थः । यद्वा ज्ञानस्य भार ऊह्यते । ज्ञानभारभरणाभिमान एव क्रियते न तु तत्कार्यमित्यर्थः ॥ ९ ॥ आवयोरज्ञत्वे कथमेतावत्पर्यन्तमस्मन्मत्यनुसारेण तव राज्यभरणं तत्राह—ईदृशैरिति ॥ ईदृशैः एवं नीतिशास्त्रलेशानभिज्ञैरित्यर्थः । धरामि राज्यमिति शेषः । "धृञ् धारणे" इति भौवादिको धातुः । धरामि जीवामीति वा ॥ १० ॥ मां परुषं वचो वक्तुं युवयोर्मृत्योःसकाशात् भयं नास्ति किंनु । वक्तुं उद्यतयोर्युवयोरिति शेष इत्यप्याहुः । परुषोक्तिमात्रे कुतो मृत्युरित्यत्राह—यस्येति । शासतो मे जिह्वैव शुभाशुभं प्रयच्छति । शासने प्रवृत्तस्य मे जिह्वाचलनमेव मृत्युं श्रेयो वा प्रयच्छतीत्यर्थः ॥ ११ ॥ राजदोषः राजकोपः । दहनस्पृष्टवनपादपस्थितिसंभवादप्यसंभाविता राजदोषस्पृष्टजनस्थितिरिति भावः । तिष्ठन्ते तिष्ठन्ति ॥ १२ ॥ स्वमनः प्रत्याह—हन्यामिति ॥ १३ ॥ अपध्वंसत स्थानात्प्रच्यवध्वं । परस्मैपदं बहुवचनं चार्षं । गच्छध्वं गच्छत । सन्निकर्षात् दृष्टिविषयात् ॥ १४ ॥ हतावित्यर्धं ॥ कृतघ्नत्वस्नेहपराङ्मुखत्वे एव तयोर्वधइति भावः ॥ १५ ॥ प्रतिनन्द्य प्रशस्य । अभिनिस्सृतौ निर्गतौ ॥ १६ ॥ चारा-

स्तवंवक्तुंसदृशंनाम नान्येषामितिवा । स्तवशब्दार्थीभूतगुणकीर्तनस्यनपुंसकताविवक्षया "अजानतामहिमानंतवेदं" "उदीचामातः स्थानेयकपूर्वायाः" "मातुरुत्संख्यासंभद्रपूर्वायाः" इत्यादिवच्चस्तवमित्युक्तिःसंभवतीतिमन्तव्यमितिकेचित् । वस्तुतस्तु "संबन्धमनुवर्तिष्यते" इतिभाष्याल्लिङ्गानामतन्त्रत्वाद्वा ॥ ८ ॥ **ती०** आचार्याः उपनयनपूर्वकंसाङ्गवेदाध्यापकाः । गुरवः पित्रादयः । वृद्धाज्ञानवयोवृद्धाः । **स०** गुरुर्निषेककृन्मुख्यः । तद्भ्रात्राद्याअमुख्याअपिगुरवइतिगुरवइत्युक्तिः ॥ वां युवाभ्यां । वृथापर्युपासिताः । तयोर्गुरुमुखतोऽभ्यसनं स्वसाक्षिसिद्धमित्येवमुक्तिः । वांयुवाभ्यांसारंन्यायः । अनुजीव्यं ग्राह्यं नगृह्यते नगृहीतं । 'न्यायेचनीरेचघनेचसारं'इतिविश्वः ॥ ९ ॥ **स०** अपध्वंसत गच्छध्वं इतिबहुवचनंतु एवमन्येचेत्परुषंवदिष्यन्ति तर्हि तेषामप्ययमेवदण्डइतिसूचनाय । उभयत्रपदव्यत्यासोरावणपदव्यत्यासाय ॥ १४ ॥ **ति०** प्रतिनन्द्याभिनिस्सृतौ अयमेवतयोःराक्षसत्वप्रापकशापस्यान्तइत्यन्यत्रस्पष्टं ॥ १६ ॥

[**पा०**] १ ग. ङ. झ. ट. आचार्यो. २ ङ. च. झ. ञ. ट. वाह्यते. ३ ङ. झ. ञ. ट. राजदण्डपरामृष्टाः. ४ क. ख. घ. च. छ. ज. ट. अब्रवीत्स. ५ क.—ङ. छ. झ. ञ. ट. चारानितिनिशाचरः.

ततश्चाराः संत्वरिताः प्राप्ताः पार्थिवशासनात् ॥ उपस्थिताः प्राञ्जलयो वर्धयित्वा जयाशिषा ॥१८॥
तानब्रवीत्ततो वाक्यं रावणो राक्षसाधिपः ॥ चारान्प्रत्यायिताञ्शूरान्भक्तान्विगतसाध्वसान् ॥१९॥
इतो गच्छत रामस्य व्यवसायं परीक्षथ ॥ मन्त्रिष्वभ्यन्तरा येऽस्य प्रीत्या तेन समागताः ॥ २० ॥
कथं स्वपिति जागर्ति किंमन्यच्च करिष्यति ॥ विज्ञाय निपुणं सर्वमागन्तव्यमशेषतः ॥ २१ ॥
चारेण विदितः शत्रुः पण्डितैर्वसुधाधिपैः ॥ युद्धे स्वल्पेन यत्नेन समासाद्य निरस्यते ॥ २२ ॥
चारास्तु ते तथेत्युक्त्वा प्रहृष्टा राक्षसेश्वरम् ॥ शार्दूलमग्रतः कृत्वा ततश्चक्रुः प्रदक्षिणम् ॥ २३ ॥
ततस्ते तं महात्मानं चारा राक्षससत्तमम् ॥ कृत्वा प्रदक्षिणं जग्मुर्यत्र रामः सलक्ष्मणः ॥ २४ ॥
ते सुवेलस्य शैलस्य समीपे रामलक्ष्मणौ ॥ प्रच्छन्ना ददृशुर्गत्वा ससुग्रीवविभीषणौ ॥ २५ ॥
प्रेक्षमाणाश्चमूं तां च बभूवुर्भयविक्लवाः ॥ ते तु धर्मात्मना दृष्टा राक्षसेन्द्रेण राक्षसाः ॥ २६ ॥
विभीषणेन तत्रस्था निगृहीता यदृच्छया ॥ शार्दूलो ग्राहितस्त्वेकः पापोऽयमिति राक्षसः ॥ २७ ॥
मोचितः सोपि रामेण वध्यमानः प्लवङ्गमैः ॥ आनृशंस्येन रामस्य मोचिता राक्षसाः परे ॥ २८ ॥
वानरैरर्दितास्ते तु विक्रान्तैर्लघुविक्रमैः ॥ पुनर्लङ्कामनुप्राप्ताः श्वसन्तो नष्टचेतसः ॥ २९ ॥

ततो दशग्रीवमुपस्थितास्तु ते चारा बहिर्नित्यचरा निशाचराः ॥
गिरेः सुवेलस्य समीपवासिनं न्यवेदयन्भीमबलं महाबलाः ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

नुपस्थापयेत्यब्रवीदित्यन्वयः ॥ १७—१८ ॥ प्रत्यय एव प्रत्यायः तं प्राप्ताः प्रत्यायिताः तान् । विश्वसनीयानित्यर्थः । विगतसाध्वसान् विगतशत्रुभयान् ॥ १९ ॥ व्यवसायं कर्तव्यनिश्चयं । परीक्षथ परीक्षध्वं । शिथिलव्यवसायश्चेदमुं भीषयाम इति भावः । अस्य रामस्य मन्त्रिषु ये अभ्यन्तराः । अन्तरङ्गभूता इत्यर्थः । तेन रामेण प्रीत्या सङ्गताः । मित्रभूता इत्यर्थः । तानपि परीक्षध्वं । तच्छैथिल्ये तान् भेत्स्याम इत्याशयः ॥ २० ॥ कथं स्वपिति किमेकः स्वपिति उत जाग्रद्भिरनेकैरावृतः स्वपिति । आद्ये सुप्ते युद्धं प्रवर्तयिष्याम इति हृदयं । कथंजागर्ति किं चिन्ताकुलः उतानाकुल इत्यर्थः । आद्ये व्याक्षिप्तं प्रहरिष्यामीत्याकूतं । किमन्यच्च करिष्यति । किं कंचित्कालंविलम्ब्य नगरमुपरोत्स्यति उत सद्य इति। आद्ये क्रमेण वञ्चयिष्यामीति तात्पर्यं । निपुणं प्रच्छन्नमिति यावत् । क्रियाविशेषणमिदं । सर्वं उक्तं स्वापादिकं । अशेषतः सर्वप्रकारेण विज्ञायागन्तव्यं । अशेषतः अशेषैश्चारैरिति वार्थः । अशेषत इत्युत्तरशेषो वा ॥२१॥ उक्तमाशयं विवृणोति—चारेणेति ॥ पण्डितैः निपुणैः । वसुधाधिपैः । चारेण चारद्वारेण । अशेषतो विदितः शत्रुः युद्धे स्वल्पेन यत्नेन समासाद्य निरस्यते ॥ २२ ॥ चाराः शार्दूलमग्रतः कृत्वा प्रधानीकृत्य । राक्षसेश्वरं रावणं । प्रदक्षिणं चक्रुः ॥ २३ ॥ कृत्वा प्रदक्षिणमित्यनुवादो मध्ये विलम्बाभावद्योतनार्थं ॥ २४ ॥ प्रच्छन्नाः वेषान्तरधारिणः ॥२५॥ भयविक्लवाः भयेन दीनाः । धर्मात्मना राक्षसेन्द्रेण विभीषणेनेत्यर्थः ॥२६॥ निगृहीताः तर्जिताइत्यर्थः । ग्राहितः ग्रहणं प्रापितः ॥ २७ ॥ मोचितः प्रहारादितिशेषः ॥ २८ ॥ अर्दिताः पीडिताः । विक्रान्तैरित्यत्र विक्रममात्रोक्तैर्लघुविक्रमैरित्यत्र जवमात्रं विक्रमस्य विशेष्यते ॥ २९ ॥ बहिर्नित्यचराः परराष्ट्रेषु वृत्तान्तज्ञानाय सदा संचारशीलाः । समी-

---

स० अस्य रामस्य । मन्त्रेषु आलोचनेषु अभ्यन्तराः अन्तरङ्गाः ये केइत्यर्थः । यच्छब्दः " यतश्चोदेतिसूर्यः " इतिवत्प्रश्नार्थः । समागताः साहाय्यार्थमिलिताः ॥ २० ॥ स० शार्दूलातिरिक्तारक्षसाविभीषणेनदृष्टाअपि यदृच्छया विभीषणाज्ञांविनैवगृहीताः शार्दूलस्तु अयमत्यन्तपापइतिकपिभिर्ग्राहितः ॥ २७ ॥ स० भीमबलं भीमंभयंकरं बलं शारीरंसैन्यंवा यस्यतंरामं ।

[पा०] १ ङ. झ. ञ. ट. न्धीरान्विगत. छ. ञ्शक्तान्विगत. २ ङ. झ. ट. परीक्षितुं. ३ झ. ञ. ट. ठ. मन्त्रेष्वभ्यन्तराः. ४ क. ङ. च. झ. ट. किमद्यच. ५ ङ.—ट. मोक्षितः. ६ ङ. झ. ट. रामेणमोक्षिताः.

त्रिंशः सर्गः ॥ ३० ॥

शार्दूलेनरावणंप्रति निजबलेगरुडव्यूहरचनयारामस्यसुवेलाचलसमीपेऽवस्थाननिवेदनपूर्वकंप्रविष्टमात्रस्यस्वस्यविभीषणेन निवेदनेवानरैर्बलाद्ग्रहणेनसर्वतःसंचारणपूर्वकं रामसमीपप्रापणादिनिवेदनम् ॥ १ ॥ तथारावणचोदनया सुग्रीवस्य जांबवदादियूथनाथानांचपृथक्पितृनामादिनिवेदनम् ॥ २ ॥

ततस्तमक्षोभ्यबलं लङ्काधिपतये चराः ॥ सुवेले राघवं शैले निविष्टं प्रत्यवेदयन् ॥ १ ॥
चाराणां रावणः श्रुत्वा प्राप्तं रामं महाबलम् ॥ जातोद्वेगोऽभवत्किंचिच्छार्दूलं वाक्यमब्रवीत् ॥२॥
अयथावच्च ते वर्णो दीनश्चासि निशाचर ॥ नासि कच्चिदमित्राणां क्रुद्धानां वशमागतः ॥ ३ ॥
इति तेनानुशिष्टस्तु वाचं मन्दमुदीरयत् ॥ तदा राक्षसशार्दूलं शार्दूलो भयविह्वलः ॥ ४ ॥
न ते चारयितुं शक्या राजन्वानरपुङ्गवाः ॥ ५ ॥
विक्रान्ता बलवन्तश्च राघवेण च रक्षिताः ॥ नापि संभाषितुं शक्याः संप्रश्नोत्र न लभ्यते ॥ ६ ॥
सर्वतो रक्ष्यते पन्था वानरैः पर्वतोपमैः ॥ प्रविष्टमात्रे ज्ञातोऽहं बले तस्मिन्नचारिते ॥ ७ ॥
बलाद्गृहीतो रक्षोभिर्बहुधाऽस्मि विचालितः ॥ जानुभिर्मुष्टिभिर्दन्तैस्तलैश्चाभिहतो भृशम् ॥ ८ ॥
परिणीतोस्मि हरिभिर्बलवद्भिरमर्षणैः ॥ परिणीय च सर्वत्र नीतोऽहं रामसंसदम् ॥ ९ ॥
रुधिरादिग्धसर्वाङ्गो विह्वलश्चलितेन्द्रियः ॥ हरिभिर्वध्यमानश्च याचमानः कृताञ्जलिः ॥ १० ॥
राघवेण परित्रातो जीवामीति यदृच्छया ॥ ११ ॥
एष शैलैः शिलाभिश्च पूरयित्वा महार्णवम् ॥ द्वारमाश्रित्य लङ्काया रामस्तिष्ठति सायुधः ॥ १२ ॥

पवासिनमिति पुंस्त्वमार्षं ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनत्रिंशः सर्गः ॥ २९ ॥

अथ शार्दूलादिचारवचनं त्रिंशे—तत इति ॥ सुवेले सुवेलसमीपे । सामीप्ये सप्तमी । सुवेलस्य समीप इति पूर्वमुक्तत्वात् ॥ १ ॥ चाराणां चारेभ्यः ॥ २ ॥ अयथेति । शत्रुगृहीतत्वेन तेषां स्वरूपं किं न ज्ञातमिति भावः ॥ ३ ॥ अनुशिष्टः पृष्टः । उदीरयत् अडभाव आर्षः ॥ ४ ॥ चारयितुं चारविषयीकर्तुं । न शक्याः चारसंचारविषया न भवन्तीत्यर्थः ॥ ५ ॥ संप्रश्नः परीक्षणं । अत्र वानरेषु ॥ ६ ॥ प्रविष्टमात्रे प्रविष्ट एव । अचारिते चाराविषयीकृते ॥ ७ ॥ रक्षोभिः विभीषणसचिवैः । विचालितः भुवि परिवर्तितः ॥ ८ ॥ परिणीतः परितो नीतः । सर्वतः परिणीय सर्वेषां निकटे चारोयमिति घोषणपूर्वकं परिणीयेत्यर्थः । रामसंसदं रामसभां । विह्वलः मूर्च्छितः । मूर्च्छानिवृत्तावपि चलितेन्द्रियः ॥ ९ ॥ याचमानः त्राणमिति शेषः । परित्रात इत्यनुवादात् ॥ १० ॥ राघवेणेत्यर्धं ॥ जीवामीति यदृच्छया । इदानीं जीवनं यादृच्छिकमित्यर्थः । यद्वा इतीति स्वशरीरप्रदर्शनं । अयथावच्च ते वर्णो दीनश्चासि निशाचरेति ह्युक्तं ॥ ११ ॥ द्वारमाश्रित्य तिष्ठतीति

न्यवेदयन् । वानरैरुपद्रुताअपिजीवन्तीतिमहाबलाइत्युक्तं ॥ ३० ॥ इत्येकोनत्रिंशः सर्गः ॥ २९ ॥

शि० शार्दूलंकिंचिदब्रवीच्च । किंचिदिति जातोद्वेगइत्यत्रान्वयिवा ॥ २ ॥ **स०** भयविह्वलः कपिभयविह्वलः शुकसारणवत्किमुक्तौ किंभविष्यतीति भयविह्वलोवा ॥ ४ ॥ **स०** संप्रश्नः पर्यनुयोगः ॥ ६ ॥ **स०** विचारिते विचारणे प्रक्रान्तेसतीति शेषः ॥ ७ ॥ **ति०** विचारितः बहुप्रकारगत्याचालितः ॥ **स०** रक्षोभिः विभीषणसंबन्धिभिः । रक्षोभिः सहागतैस्सहेतिवा ।

[**पा०**] १ घ. ज. ततस्तदक्षोभ्य. २ ख. ग. राघवेणसुरक्षिताः. घ. राघवेणाभिरक्षिताः. ३ क. ख. ङ. च. झ. ञ. तस्मिन्विचारिते. ज. तस्मिन्निवासिते. ग. तस्मिन्नवारिते. ४ झ. ञ. विचारितः. ५ च.—ट. रुधिरस्रावदीनाङ्गो. ६ ङ. झ. ट. मामेतिच. ७ ङ. झ. ञ. ट. शैलशिलाभिस्तु.

गरुडव्यूहमास्थाय सर्वतो हरिभिर्वृतः ॥ मां विसृज्य महातेजा लङ्कामेवाभिवर्तते ॥ १३ ॥
पुरा प्राकारमायाति क्षिप्रमेकतरं कुरु ॥ सीतां वाऽस्मै प्रयच्छाशु [1]युद्धं वा प्रदीयताम् ॥ १४ ॥
मनसा [3]तं तदा प्रेक्ष्य तच्छ्रुत्वा राक्षसाधिपः ॥ शार्दूलं सुमहद्वाक्यमथोवाच स रावणः ॥ १५ ॥
यदि मां प्रति [4]युध्येरन्देवगन्धर्वदानवाः ॥ नैव सीतां प्रदास्यामि सर्वलोकभयादपि ॥ १६ ॥
एवमुक्त्वा महातेजा रावणः पुनरब्रवीत् ॥ [5]चारिता भवता सेना केऽत्र शूराः प्लवङ्गमाः ॥ १७ ॥
कीदृशाः किंप्रभाः सौम्य वानरा ये दुरासदाः ॥ कस्य पुत्राश्च पौत्राश्च तत्त्वमाख्याहि [6]राक्षस ॥१८॥
तथाऽत्र प्रतिपत्स्यामि ज्ञात्वा तेषां बलाबलम् ॥ अवश्यं [7]बलसंख्यानं कर्तव्यं युद्धमिच्छताम् ॥ १९॥
तथैवमुक्तः शार्दूलो रावणेनोत्तमश्वरः ॥ इदं वचनमारेभे वक्तुं रावणसन्निधौ ॥ २० ॥
अथर्क्षरजसः पुत्रो युधि [8]राजा सुदुर्जयः ॥ गद्गदस्याथ पुत्रोऽत्र जाम्बवानिति विश्रुतः ॥ २१ ॥
गद्गदस्यैव पुत्रोऽन्यो गुरुपुत्रः शतक्रतोः ॥ कदनं यस्य पुत्रेण कृतमेकेन रक्षसाम् ॥ २२ ॥
सुषेणश्चापि धर्मात्मा पुत्रो धर्मस्य वीर्यवान् ॥ सौम्यः सोमात्मजश्चात्र राजन्दधिमुखः कपिः ॥२३॥

वर्तमानसामीप्ये वर्तमानवत्प्रयोगः ॥ १२—१३ ॥ पुराप्राकारमायाति आयास्यतीत्यर्थः । " यावत्पुरानिपातयोर्लट् " । एकतरं द्वयोरेकं । " एकाच प्राचां " इति तरप् । एकतरमित्युक्तं विवृणोति—सीतामिति ॥ १४ ॥ मनसा प्रेक्ष्य आलोच्य । तं शार्दूलमुवाचेत्यन्वयः ॥ १५ ॥ सीतास्मैप्रदीयतामित्यस्योत्तरमाह—यदीति ॥ युध्येरन् तथापि सीतां न प्रदास्यामि । सर्वलोकेभ्यो भयादपि न प्रदास्यामीतियोजना ॥ १६ ॥ एवं प्रथमपक्षस्यानुपपत्त्या द्वितीयपक्षंकरिष्यमाणः तत्र ज्ञातव्यविशेषं पृच्छति—एवमित्यादि श्लोकत्रयं ॥ भवता सेना चारिता चारविषयीकृता । सम्यग्दृष्टेत्यर्थः । अत्र सेनायां । के शूराः ॥ १७ ॥ ये दुरासदाः ते कीदृशाः कीदृशाकाराः । किंप्रभाः किंप्रभावाः । कस्य पुत्राः कस्य पौत्राश्च । तत्त्वं तेषां वानराणां भावं । आख्याहि ॥ १८ ॥ कथने किं प्रयोजनमित्यत्राह—तथेति ॥ तथा एवमाख्याते सति । तेषां बलाबलं ज्ञात्वा अत्र वानरेषु । प्रतिपत्स्यामि प्रतिपत्स्ये । कर्तव्यं ज्ञास्यामीत्यर्थः ॥ १९—२० ॥ अथेत्युत्तरवचनारम्भे ; द्वितीयोथशब्दः पादपूरणे । राजा सुग्रीवः । पाञ्चालीन्यायेन गद्गदेन पोषितत्वात्तत्पुत्रो जाम्बवान् । तस्य ब्रह्मणो जृम्भारम्भसंभूतत्वात् ॥ २१ ॥ अन्यः पुत्रः धूम्रः । जाम्बवान् धूम्रश्चेति गद्गदस्य द्वौ पुत्रावित्यर्थः । यस्य पुत्रेणैकेन महता रक्षसां अक्षादीनां कदनं हननं । कृतं । स केसरी शतक्रतोर्गुरुः बृहस्पतिः तस्य पुत्रः । सापेक्षत्वेपि गमकत्वात्समासः ॥ २२ ॥ धर्मस्य देवतायाः । ननु, " वरुणो जनयामास सुषेणं नाम वानरं " इति बालकाण्डोक्तं । सत्यमुक्तं । स एवात्र धर्मशब्देनोच्यते । शार्दूलो वा भयाकुलोन्यथा श्रुतवान् । अन्योयं सुषेण इत्यप्याहुः ।

वानरैरितिशेषः ॥ ८ ॥ स० गरुडव्यूहमास्थाय प्रस्थानसमयत्वात् । साक्षाद्गरुडारोहेज्ञातभगवत्त्वोरावणःप्रपन्नश्चेदवतारव्यापारानिष्पादनंस्यादिति व्यूहमिषेणतंविरचय्य तत्रस्थितइतिध्वनिः ॥ १३ ॥ स० सुव्रतेत्यनेन अनृतभाषणेप्रत्यवेयामितिपरिज्ञानमस्तीतिसूच्यते ॥ १८ ॥ स० गद्गदस्य द्वितीयजन्मनि । नचैवंवचनेकिंकल्पकमितिवाच्यं । देवानामुत्पत्तेर्नानाविधायाभारतभागवतादौप्रोक्तिरेवेत्यवेहि । अत्रापि "जांबवाञ्जृंभमाणस्यममवक्त्रादजायत" इत्येकत्रनिर्भ्रातृकस्यैकस्यब्रह्मजलजल्पनं अन्यत्रधूम्रानुजत्वेनगद्गदपुत्रत्वजल्पनंचकल्पयिष्यतोऽमुमर्थमितिज्ञेयं । " गद्गदोजांबवतःक्षेत्रद्वारापिता । यद्यपि " जांबवाञ्जृंभमाणस्यममवक्त्रादजायत " इतिभगवन्मुखादस्योत्पत्तिःश्रुता । तथापिजृंभणसमयेउद्गतायाभगवच्छक्तेर्गद्गदक्षेत्रमाविश्यतेनरूपेणपरिणामादोषः ' इतिनागोजिभट्टकल्पनमल्पीकरोतिशक्तिक्षेत्रापेक्षयेतिमन्तव्यं । हनुमतःकेसरिक्षेत्रजलवचनवत्काप्यवचनाच्च ॥ २१ ॥

[पा०] १ ङ. झ. ञ. ट. वापि. च. छ. चापि. २ ङ. छ. झ. ञ. ट. युद्धंवापि. ३ ङ. झ. ञ. ट. तत्तदा. ४ ग. ङ. झ. ट. युध्यन्तेदेव. ५ ख. ङ. छ.—ट. चरिता. ६ ङ. छ. झ. ट. सुव्रत. ७ ङ. झ. ट. खलुसंख्यानं. ८ ङ. छ. झ. ट. राजन्सु.

सुमुखो दुर्मुखश्चात्र वेगदर्शी च वानरः ॥ मृत्युर्वानररूपेण नूनं सृष्टः स्वयंभुवा ॥ २४ ॥
पुत्रो हुतवहस्याथ नीलः सेनापतिः स्वयम् ॥ अनिलस्य च पुत्रोत्र हनुमानिति विश्रुतः ॥ २५ ॥
नप्ता शक्रस्य दुर्धर्षो बलवानङ्गदो युवा ॥ मैन्दश्च द्विविदश्चोभौ बलिनावश्विसंभवौ ॥ २६ ॥
पुत्रा वैवस्वतस्यात्र पञ्च कालान्तकोपमाः ॥ गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ २७ ॥
दश वानर कोट्यश्च शूराणां युद्धकाङ्क्षिणाम् ॥ श्रीमतां देवपुत्राणां शेषं नाख्यातुमुत्सहे ॥ २८ ॥
पुत्रो दशरथस्यैष सिंहसंहननो युवा ॥ दूषणो निहतो येन खरश्च त्रिशिरास्तथा ॥ २९ ॥
नास्ति रामस्य सदृशो विक्रमे भुवि कश्चन ॥ विराधो निहतो येन कबन्धश्चान्तकोपमः ॥ ३० ॥
वक्तुं न शक्तो रामस्य नरः कश्चिद्गुणान्क्षितौ ॥ जनस्थानगता येन यावन्तो राक्षसा हताः ॥ ३१ ॥
लक्ष्मणश्चात्र धर्मात्मा मातङ्गानामिवर्षभः ॥ यस्य बाणपथं प्राप्य न जीवेदपि वासवः ॥ ३२ ॥
श्वेतो ज्योतिर्मुखश्चात्र भास्करस्यात्मसंभवौ ॥ वरुणस्य च पुत्रोऽन्यो हेमकूटः प्लवङ्गमः ॥ ३३ ॥
विश्वकर्मसुतो वीरो नलः प्लवगसत्तमः ॥ विक्रान्तो बलवानत्र वसुपुत्रः सुदुर्धरः ॥ ३४ ॥
राक्षसानां वरिष्ठश्च तव भ्राता विभीषणः ॥ परिगृह्य पुरीं लङ्कां राघवस्य हिते रतः ॥ ३५ ॥
इति सर्वं समाख्यातं तवेदं वानरं बलम् ॥ सुवेलेऽधिष्ठितं शैले शेषकार्ये भवान्गतिः ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिंशः सर्गः ॥ ३० ॥

एवमन्यत्रापि ज्ञेयं ॥ २३ ॥ मृत्युरेव स्वयंभुवा सुमुखादिवानररूपेण सृष्टः । सुमुखादयो मृत्युतुल्या इत्यर्थः । यद्वा सुमुखादयो मृत्युपुत्रा इत्यर्थः ॥ २४ ॥ अनिलस्य पुत्रः औरसः । एवं तत्र तत्र पितृद्वयनिर्देशो बीजित्वक्षेत्रित्वाभ्यामिति मन्तव्यं ॥ २५ ॥ नप्तेति । अत्र नप्तृशब्दोर्थसामर्थ्यात्पौत्रे वर्तते ॥ २६—२७ ॥ वानरकोट्य इत्यत्र वानरेत्यविभक्तिकनिर्देशः । " सुपां सुलुक्—" इत्यादिना षष्ठ्या लुक् । वानराणामित्यर्थः । शेषं जन्मस्थानादि । नोत्सहे न शक्नोमि ॥ २८ ॥ सिंहसंहननः रमणीयावयवसन्निवेशवान् । " वराङ्गरूपोपेतो यः सिंहसंहननो हि सः " इत्यमरः ॥ २९—३० ॥ ये जनस्थानगताः ते यावन्तः ते सर्वेपि हता इत्यर्थः । " यावत्तावच्च साकल्ये " इत्यमरः ॥ ३१ ॥ चशब्देन दशरथस्य पुत्र इत्याकृष्यते । मातङ्गानामिवर्षभः गजश्रेष्ठ इव स्थितः ॥ ३२—३३ ॥ सुदुर्धरः सुदुर्धरनामा ॥ ३४ ॥ लङ्कां रामात् परिगृह्य तस्य हिते रतो विभीषणस्तव भ्रातेत्यन्वयः ॥ ३५ ॥ गतिः प्रमाणं । अत्र वानरजन्मोक्ते प्रायशो बालकाण्डोक्तविरोधादेतत्सर्गं विनापि पूर्वोत्तरकथासंघट्टनाच्च सर्गोयं कल्पित इत्याहुः ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिंशस्सर्गः ॥ ३० ॥

ती० नन्वत्रसर्गेधर्मस्यपुत्रःसुषेणः वैवस्वतपुत्रौशरभगन्धमादनावित्युच्यते । बालकाण्डेतु " वरुणोजनयामाससुषेणंनामवानरम् । शरभंजनयामासपर्जन्यस्तुमहाबलम् । धनदस्यसुतःश्रीमान्वानरोगन्धमादनः " इतित्रयाणामन्यतउत्पत्तिरुक्ता । सत्यं । सुषेणादिसंज्ञावतामनेकेषामपिसत्त्वान्नविरोधः ॥ ३६ ॥ इतित्रिंशःसर्गः ॥ ३० ॥

[पा०] १ क. ख. घ.—छ. झ. ञ. ट. तावन्तो. २ घ. ङ. छ. झ. ट. वेगवानत्र.

एकत्रिंशः सर्गः ॥ ३१ ॥

रावणेनमन्त्रिमुखात्ससैन्यरामस्यसुवेलाचलागमनश्रवणान्मन्त्रिभिस्सहालोच्यकर्तव्यनिर्धारणेन तद्विसर्जनम् ॥ १ ॥ तथा स्वचोदनयाविद्युज्जिह्वेनमायानिर्मितरामशिरश्शरासनसदृशशिरश्शरासनप्रदर्शनेन सीताविमोहनम् ॥ २ ॥

ततस्तमक्षोभ्यबलं लङ्काधिपतये चराः ॥ सुवेले राघवं शैले निविष्टं प्रत्यवेदयन् ॥ १ ॥
चाराणां रावणः श्रुत्वा प्राप्तं रामं महाबलम् ॥ जातोद्वेगोऽभवत्किंचित्सचिवानिदमब्रवीत् ॥ २ ॥
मन्त्रिणः शीघ्रमायान्तु सर्वे वै सुसमाहिताः ॥ अयं नो मन्त्रकालो हि संप्राप्त इति राक्षसाः ॥ ३ ॥
तस्य तच्छासनं श्रुत्वा मन्त्रिणोऽभ्यागमन्द्रुतम् ॥ ततः स मन्त्रयामास सचिवैः राक्षसैः सह ॥ ४ ॥
मन्त्रयित्वा स दुर्धर्षः क्षमं यत्समनन्तरम् ॥ विसर्जयित्वा सचिवान्प्रविवेश स्वमालयम् ॥ ५ ॥
ततो राक्षसमाहूय विद्युज्जिह्वं महाबलम् ॥ मायाविदं महामायः प्राविशद्यत्र मैथिली ॥ ६ ॥
विद्युज्जिह्वं च मायाज्ञमब्रवीद्राक्षसाधिपः ॥ मोहयिष्यावहे सीतां मायया जनकात्मजाम् ॥ ७ ॥
शिरो मायामयं गृह्य राघवस्य निशाचर ॥ त्वं मां समुपतिष्ठस्व महच्च सशरं धनुः ॥ ८ ॥
एवमुक्तस्तथेत्याह विद्युज्जिह्वो निशाचरः ॥ [दर्शयामास तां मायां सुप्रयुक्तां स रावणे ॥]
तस्य तुष्टोऽभवद्राजा प्रददौ च विभूषणम् ॥ ९ ॥
अशोकवनिकायां तु सीतादर्शनलालसः ॥ नैर्ऋतानामधिपतिः संविवेश महाबलः ॥ १० ॥
ततो दीनामदैन्यार्हां ददर्श धनदानुजः ॥ अधोमुखीं शोकपरामुपविष्टां महीतले ॥ ११ ॥
भर्तारमेव ध्यायन्तीमशोकवनिकां गताम् ॥ उपास्यमानां घोराभी राक्षसीभिरितस्ततः ॥ १२ ॥
[राक्षसीभिर्वृतां सीतां पूर्णचन्द्रनिभाननाम् ॥ उत्पातमेघजालाभिश्चन्द्ररेखामिवावृताम् ॥ १३ ॥
भूषणैरुत्तमैः कैश्चिन्मङ्गलार्थमलंकृताम् ॥ चरन्तीं मारुतोद्धूतां क्षिप्तां पुष्पलतामिव ॥ १४ ॥
हर्षशोकान्तरे मग्नां विषादस्य विलक्षणाम् ॥ स्तिमितामिव गाम्भीर्यान्नदीं भागीरथीमिव ॥ १५ ॥]
उपसृत्य ततः सीतां प्रहर्षं नाम कीर्तयन् ॥ इदं च वचनं धृष्टमुवाच जनकात्मजाम् ॥ १६ ॥

अथ सीतामोहनमेकत्रिंशे । कथासंघटनाय पूर्वसर्गोक्तमनुवदति—तत इति ॥ स्पष्टः ॥ १ ॥ चाराणां चारेभ्यः । जातोद्वेगः जातसंभ्रमः । सचिवान् मन्त्रिणः समीपस्थान् ॥ २ ॥ हे राक्षसाः अयं नो मन्त्रकालः संप्राप्तः इति हेतोः मन्त्रिणः समायान्त्विति इदं वाक्यमब्रवीदिति पूर्वेण संबन्धः । यद्वा इदमब्रवीदित्यस्य वाक्यान्तस्थेनेतिशब्देन संबन्धः । राक्षसा इत्युत्तरशेषः । अथवा हे मन्त्रिणः भवन्तः आयान्तु समीपमिति सचिवानब्रवीत् । राक्षसा इति मन्त्रिविशेषणं । सचिवै राक्षसैरित्यनुवादात् । सुसमाहिताः नीतिकुशला इत्यर्थः ॥ ३—४ ॥ समनन्तरं रामस्य समीपागमनानन्तरं । यत् क्षमं कर्तुमुचितं तन्मन्त्रयित्वेति योजना ॥ ५—७ ॥ गृह्य गृहीत्वा ॥ ८ ॥ तस्य तस्मिन् ॥ ९ ॥ लालसः साभिलाषः ॥ १०—११ ॥ उपास्यमानां अनुव्रतां ॥ १२—१५ ॥ प्रहर्षं नाम कीर्तयन् प्रहर्षवार्तां कीर्तयन्निव । नामे-

रामानु० ततस्तमक्षोभ्यबलमित्यनुवादःपूर्वसर्गादौचकृतः । 'पूर्वमेवमयासृष्टोजांबवान्नृक्षपुङ्गवः । जृंभमाणस्यसहसाममवक्त्रादजायत " इतिजृंभमाणपितामहवक्त्रादुत्पन्नत्वेनप्रसिद्धस्यजांबवतःपूर्वसर्गेगद्गदपुत्रत्वेनाभिधानाद्विरोधःस्फुरति । पूर्वसर्गमन्तरेणापिकथासंगच्छते । तथापि स्थितस्यगतिश्चिन्तनीयेतिन्यायेन पूर्वसर्गोव्याख्यातः ॥ **शि०** शार्दूलवचनश्रवणानन्तरकालिकंरावणंप्रतिचारान्तराणांवचनमाह—**ततइति** । नृपतेः रावणस्य । चराः चाराः ॥ १ ॥ **ती०** प्रहर्षंनामकीर्तयन् हेसीतेइतिसंबोधयन् ॥ **स०** प्रहर्षं रामपराजयजं । नाम नाम्ना । अर्थतत्परमार्थं । प्रहर्षन् प्रहर्षयन् । नाम सीतायाः हेसीतेइति ।

[**पा०**] १ ख. ग. च. छ. ञ. ट. लङ्कायांनृपतेश्चराः. २ ग. रामबलंमहत्. ३ क. ग. ङ.—ट. मन्त्रयित्वातु. ४ इदमर्धं घ.—ट. पाठेषुदृश्यते. ५ ख. च. छ. ञ. प्रददौवरभूषणं. ६ घ. प्रविवेश. ७ ङ.—ट. मदीनार्हां. ८ क. ग.—ञ. राक्षसीभिरदूरतः. ९ इदंश्लोकत्रयं प्राचीनकोशेषुनदृश्यते । औत्तराहपाठएवदृश्यते.

सान्त्व्यमाना मया भद्रे यमुपाश्रित्य वल्गसे ॥ खरहन्ता स ते भर्ता राघवः समरे हतः ॥ १७ ॥
छिन्नं ते सर्वतो मूलं दर्पस्ते विहतो मया ॥ व्यसनेनात्मनः सीते मम भार्या भविष्यसि ॥ १८ ॥
विसृजैमां मतिं मूढे किं मृतेन करिष्यसि ॥ भवस्व भद्रे भार्याणां सर्वासामीश्वरी मम ॥ १९ ॥
अल्पपुण्ये विवृत्तार्थे मूढे पण्डितमानिनि ॥ शृणु भर्तृवधं सीते घोरं वृत्रवधं यथा ॥ २० ॥
समायातः समुद्रान्तं मां हन्तुं किल राघवः ॥ वानरेन्द्रप्रणीतेन महता बलेन वृतः ॥ २१ ॥
स निविष्टः समुद्रस्य पीड्य तीरमथोत्तरम् ॥ बलेन महता रामो व्रजत्यस्तं दिवाकरे ॥ २२ ॥
अथाध्वनि परिश्रान्तमर्धरात्रे स्थितं बलम् ॥ सुखसंसुप्तमासाद्य चारितं प्रथमं चरैः ॥ २३ ॥
तत्प्रहस्तप्रणीतेन बलेन महता मम ॥ बलमस्य हतं रात्रौ यत्र रामः सलक्ष्मणः ॥ २४ ॥
पट्टिशान्परिघांश्चैव चक्रान्दण्डान्खड्गान्महायसान् ॥ बाणजालानि शूलानि भास्वरान्कूटमुद्गरान् ॥२५॥
यष्टीश्च तोमराञ्शक्तीश्चक्राणि मुसलानि च ॥ उद्यम्योद्यम्य रक्षोभिर्वानरेषु निपातिताः ॥ २६ ॥
अथ सुप्तस्य रामस्य प्रहस्तेन प्रमाथिना ॥ असक्तं कृतहस्तेन शिरश्छिन्नं महासिना ॥ २७ ॥
विभीषणः समुत्पत्य निगृहीतो यदृच्छया ॥ दिशः प्रव्राजितः सर्वैर्लक्ष्मणः प्लवगैः सह ॥ २८ ॥

त्यपरमार्थे ॥ १६ ॥ वल्गसे जल्पसि। मां निष्ठुरमवद इत्यर्थः ॥ १७ ॥ मूलं आधारभूतं। सर्वतः कात्स्न्र्येन व्यसनेन निमित्तेन। प्रार्थनां विनेत्यर्थः ॥१८॥ मृतेन रामेण। भवस्वेत्यात्मनेपदमार्षं ॥१९॥ निवृत्तार्थे एतावत्पर्यन्तं निवृत्तपुरुषार्थे। पण्डितमानिनि। "क्यङ्मानिनोश्च" इति ह्रस्वत्वं ॥ २० ॥ समुद्रान्तं समुद्रतीरं। प्रणीतेन आनीतेन ॥ २१ ॥ स रामः समुद्रस्योत्तरं तीरं महता बलेन पीड्य पीडयित्वा। दिवाकरे अस्तं प्रयाति सति निविष्टः ॥२२॥ कात्स्न्र्येऽथशब्दः। अध्वनि परिश्रान्तं अतएव स्थितं। अर्धरात्रे सुखसंसुप्तं बलं प्रथममासाद्य चारैश्चारितमभूत् ॥ २३ ॥ यत्र बले। रामः सलक्ष्मणोवस्थितः। तदस्य बलं प्रहस्तप्रणीतेन महता बलेन हतं ॥ २४ ॥ पट्टिशानित्यादिश्लोकद्वयं ॥ पट्टिशान् असिविशेषान्। परिघान् अर्गलानि। चक्रान् क्षुद्रचक्राणि। महायसान् महायसनिर्मितान्। दण्डविशेषणमेतत्। कूटमुद्गरान् अयःकीलकीलितगदाः। यष्टीः केवलदण्डान्। तोमरान् स्थूलाग्रगदाः। प्रासान् क्षेपणीः। चक्राणि महाचक्राणि। पट्टिशादीनुद्यम्योद्यम्य वानरेषु निपातिताः। त इति शेषः ॥ २५—२६ ॥ प्रमथ्नाति प्रहरतीति प्रमाथिः तेन। कृतहस्तेन शिक्षितहस्तेन कर्त्रा। महासिना करणेन। असक्तं अविलम्बितंयथा भवति तथा। छिन्नमित्यन्वयः ॥ २७ ॥ विभीषणः समुत्पत्य गतोपि निगृहीत इत्यर्थः। प्रव्राजितः पलाय-

---

अहंरावणइतिस्वनामवा कीर्तयन् ॥ १६ ॥ शि० ननुतवोक्तस्यसत्यत्वे अहंतल्लोकमेवगमिष्यामीत्यतआह—व्यसनेनेति मूढे हेप्राप्तनिरोधे। आत्मनोव्यसनेन पतिवियोगदुःखेनोपलक्षितालं एनां तल्लोकगमनविषयां। मतिंविसृज। मृतेन लोकान्तरं गतेनपत्या लंकिंकरिष्यसि। तत्प्राप्तिर्नभविष्यतीत्यर्थः। अतोममभार्याः स्त्रियः। भविष्यसि प्राप्स्यसि। तासांसेव्यासतीतत्रैव निवत्स्यसीत्यर्थः ॥ तदेवभङ्ग्यन्तरेणाह—भवस्वेति। हेभद्रे। अल्पपुण्ये अल्पानांक्षुद्राणामपिपुण्यंपवित्रत्वंयया यन्नामस्मरणादिनाक्षुद्राअपिपूताभवन्तीत्यर्थः। तत्संबोधनं। ननिवृत्तोर्थोयस्याः। सर्वार्थसंपन्नेत्यर्थः। तत्संबोधनं। मूढे प्राप्तनिरोधे। पण्डितान्मन्यतेसत्करोतितच्छीला। तत्संबोधनं। ममभार्याणां ईश्वरी पूज्या त्वंभवस्व ॥ १८—२० ॥ स० चक्राणि अस्त्राणि। "चक्रंसेनारथाङ्गयोः। राष्ट्रास्त्रयोरपि" इतिविश्वः ॥ स० नपुंसकशेषे निपातितानीतिवस्तुतोवक्तव्यं। सर्वस्यैतस्यावास्तविकतांकविरवगमयांबभूवैवंनिर्देशेनेतिमन्तव्यम् ॥ निपातनस्यप्रधानकर्मत्वादुद्यमनस्यावान्तरकर्मत्वादेतत्कर्मकर्मीभूतपरिघादिपदोत्तरंप्रथमयाभवितव्यमितित्यदादिष्वनियमादित्येतइतिशेषः ॥ उक्तंचमनोरमायां "उक्तंचहरिणा। प्रधानेतरयोर्यत्रद्रव्यस्यक्रिययोः पृथक्। शक्तिर्गुणाश्रयातत्रप्रधानमनुरुध्यते। प्रधानविषयाशक्तिःप्रत्ययेनाभिधीयते। यदागुणेतदातद्वदनुक्तापिप्रतीयते" इतीति ॥ २६ ॥ स० कृतहस्तेन शिक्षितकरेण। असक्तं यथामहासिनाशिरश्छिन्नं ॥ यथानिद्राभङ्गोभवेद्भवेच्छिरश्छेदः तथा-

[पा०] १ ङ. झ. ट. यमाश्रित्यविमन्यसे. क. घ. यमुपाश्रित्यवर्तसे. २ ख. ङ. झ. ट. दर्पश्चनिहतो. क. ग. घ. च. छ. ज. ञ. दर्पस्तेनिहतो. ३ क. ग. ङ. झ. ट. विसृजैतां. ख. घ. च. छ. ञ. विसृजैनां. ४ झ. संनिविष्टः. ५ ङ. झ. ट. श्चक्रानृष्टीन्दण्डान्महायुधान्. ६ घ. ङ. झ.—ट. दिशं. ७ ङ. झ. सैन्यैर्लक्ष्मणः. ख. च. छ. ञ. सैन्यैर्लक्ष्मणश्चप्लवङ्गमैः.

सुग्रीवो ग्रीवया सीते भग्नया प्लवगाधिपः ॥ निरस्तहनुकः शेते हनुमान्राक्षसैर्हतः ॥ २९ ॥
जाम्बवानथ जानुभ्यामुत्पतन्निहतो युधि ॥ पट्टिशैर्बहुभिश्छिन्नो निकृत्तः पादपो यथा ॥ ३० ॥
मैन्दश्च द्विविदश्चोभौ निहतौ वानरर्षभौ ॥ निश्वसन्तौ रुदन्तौ च रुधिरेण परिप्लुतौ ॥
असिना व्यायतौ छिन्नौ मध्ये हरिनिषूदनौ ॥ ३१ ॥
अनुतिष्ठति मेदिन्यां पनसः पनसो यथा ॥ ३२ ॥
नाराचैर्बहुभिश्छिन्नः शेते दर्यां दरीमुखः ॥ कुमुदस्तु महातेजा निष्कूजः सायकैः कृतः ॥ ३३ ॥
अङ्गदो बहुभिश्छिन्नः शरैरासाद्य राक्षसैः ॥ पतितो रुधिरोद्गारी क्षितौ निपतिताङ्गदः ॥ ३४ ॥
हरयो मथिता नागै रथजातैस्तथाऽपरे ॥ शायिता मृदिताश्चाश्वैर्वायुवेगैरिवाम्बुदाः ॥ ३५ ॥
प्रहृताश्चापरे त्रस्ता हन्यमाना जघन्यतः ॥ अभिद्रुतास्तु रक्षोभिः सिंहैरिव महाद्विपाः ॥ ३६ ॥
सागरे पतिताः केचित्केचिद्गगनमाश्रिताः ॥ ऋक्षा वृक्षानुपारूढा वानरीं वृत्तिमाश्रिताः ॥ ३७ ॥
सागरस्य च तीरेषु शैलेषु जवनेषु च ॥ पिङ्गलास्ते विरूपाक्षैर्बहुभिर्बहवो हताः ॥ ३८ ॥
एवं तव हतो भर्ता ससैन्यो मम सेनया ॥ क्षतजार्द्रं रजोध्वस्तमिदं चास्याहृतं शिरः ॥ ३९ ॥
ततः परमदुर्धर्षो रावणो राक्षसाधिपः ॥ सीतायामुपशृण्वन्त्यां राक्षसीमिदमब्रवीत् ॥ ४० ॥
राक्षसं क्रूरकर्माणं विद्युज्जिह्वं त्वमानय ॥ येन तद्राघवशिरः संग्रामात्स्वयमाहृतम् ॥ ४१ ॥
विद्युज्जिह्वस्ततो गृह्य शिरस्तत्सशरासनम् ॥ प्रणामं शिरसा कृत्वा रावणस्याग्रतः स्थितः ॥ ४२ ॥
तमब्रवीत्ततो राजा रावणो राक्षसं स्थितम् ॥ विद्युज्जिह्वं महाजिह्वं समीपपरिवर्तिनम् ॥ ४३ ॥
अग्रतः कुरु सीतायाः शिघ्रं दाशरथेः शिरः ॥ अवस्थां पश्चिमां भर्तुः कृपणा साधु पश्यतु ॥४४॥
एवमुक्तं तु तद्रक्षः शिरस्तत्प्रियदर्शनम् ॥ उप निक्षिप्य सीतायाः क्षिप्रमन्तरधीयत ॥ ४५ ॥
रावणश्चापि चिक्षेप भास्वरं कार्मुकं महत् ॥ त्रिषु लोकेषु विख्यातं सीतामिदमुवाच च ॥ ४६ ॥

यितः ॥ २८ ॥ ग्रीवया उपलक्षित इति शेषः ॥२९॥ जानुभ्यां जानुनोः । निहतः । अथ पट्टिशैश्छिन्नः जाम्बवान् निकृत्तः पादपश्चाभूत् ॥ ३० ॥ व्यायतौ दीर्घशरीरौ । मध्ये कटिस्थाने ॥ ३१ ॥ अनुतिष्ठति शेते । पनसः पनसफलं । तथा खण्डित इत्यर्थः ॥ ३२ ॥ निष्कूजः निश्शब्दः ॥ ३३ ॥ राक्षसैरासाद्य शरैश्छिन्नः निपतिताङ्गदोङ्गदः क्षितौ पतितः ॥ ३४ ॥ शायिताः शयानाः । अपरे हरयः वायुवेगैरम्बुदा इव नागै रथजातैश्च मृदिताः ॥ ३५ ॥ त्रस्ताः अत एवाभिद्रुताः । जघन्यतः पृष्ठतः । हन्यमानाः अपरे हरयः सिंहैः द्विपा इव प्रहृताः ॥ ३६—॥ ३७ ॥ पिङ्गलाः वानराः । विरूपाक्षैः वानरैः ॥ ३८—३९ ॥ राक्षसीं समीपवर्तिनीं कांचित् ॥ ४०—४१ ॥ ततः राक्षसीं प्रत्याज्ञापनवचनश्रवणानन्तरमेव ॥ ४२—४३ ॥ पश्चिमामवस्थां । मरणमित्यर्थः ॥ ४४ ॥ उप समीपे । अन्तरधीयत अपागच्छत् ॥ ४५ ॥ चिक्षेप आचकर्ष । विद्युज्जिह्वहस्तादित्यर्थः । त्रिषु लोकेषु विख्यातं । वैष्णवत्वादि-

---

सक्तताहेतुर्हस्तइवासिरितिकृतत्वंमहत्त्वंचोभयोर्युज्यते ॥ **शि०** कृतहस्तेन हस्तेकृतेनमहासिना ॥ २७ ॥ **शि०** पनसः विदीर्णपक्वपनसफलमिव पनसोनुश्वसिति ॥ ३२ ॥ **शि०** अङ्गदः अङ्गदविशिष्टः । अङ्गदः शरैश्छिन्नः ॥ ३४ ॥ **शि०** वानरैः व्यतिमिश्रिताः विभक्ताः । ऋक्षाः वृक्षानुपारूढाः ॥ ३७ ॥ **ति०** अन्तरधीयत अपागच्छत् । स्त्रीगोछ्यांस्थातुमयुक्तत्वधियेति भावः ॥ **शि०** अन्तरधीयतेत्यनेन सीतादर्शनमात्रेणतस्यदयोत्पन्नेतिसूचितं ॥ **स०** अन्तरधीयत । अन्तर्धानंतु पतिव्रता-

[**पा०**] १ ख. ङ. झ. ट. परीवृतौ. ज. समुक्षितौ. २ ङ.—ट. अनुश्वसिति. ३ ख. निष्प्राणश्चमहामतिः. ४ क. ख. घ.—ट. निपतितोऽङ्गदः. ५ ग.—ट. नागैरथजालैः. ख. नागैःशरजालैः. च. नागैरस्त्रजालैः. ६ क.—ट. शयानामृदिताः. ७ क.—घ. च. छ. ज. प्रसृताश्चापरे. ङ. झ. प्रसृताश्चपरे. ८ ङ. झ. ट. वानरैर्व्यतिमिश्रिताः. ९ ङ. झ. ट. विरूपाक्षैराक्षसैर्बहवो. १० ग. ङ. झ. ट. विख्यातंरामस्यैतदितिब्रुवन्. ख. घ. विख्यातंरामस्येदमितिब्रुवन्.

इदं तत्तव रामस्य कार्मुकं ज्यासमायुतम् ॥ इह प्रहस्तेनानीतं हत्वा तं निशि मानुषम् ॥ ४७ ॥
स विद्युज्जिह्वेन सहैव तच्छिरो धनुश्च भूमौ [2]विनिकीर्य रावणः ॥
विदेहराजस्य सुतां यशस्विनीं ततोऽब्रवीत्तां भव मे वशानुगा ॥ ४८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

द्वात्रिंशः सर्गः ॥ ३२ ॥

सीतया मायानिर्मितशिरसिसादृश्याद्रामशिरस्त्वप्रत्यभिज्ञानेन शोकाद्बहुधाविलापः ॥ १ ॥ अत्रान्तरे प्रहस्तप्रहितदूताह्वानेन रावणापयाने मायाशिरसोऽन्तर्धानम् ॥ २ ॥ राक्षसैरावणप्रेरणया रणभेरीवादनेनसेनासंनाहनम् ॥ ३ ॥

सा सीता तच्छिरो दृष्ट्वा तच्च कार्मुकमुत्तमम् ॥ [3]सुग्रीवप्रतिसंसर्गमाख्यातं च हनूमता ॥ १ ॥
नयने मुखवर्णं च भर्तुस्तत्सदृशं मुखम् ॥ केशान्केशान्तदेशं च तं च चूडामणिं शुभम् ॥ २ ॥

तिभावः ॥ ४६—४७ ॥ विद्युज्जिह्वेत्यत्र तलोप आर्षः । सहैव युगपदेव । विनिकीर्य शिरोधनुश्च युगपत्सीतायाःपुरतः स्थापयित्वेत्यर्थः । विद्युज्जिह्वः शिरः प्रक्षिप्तवान् स्वयं धनुरिति ज्ञेयं । वशानुगेत्यनन्तरमितिकरणं द्रष्टव्यं ॥ ४८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकत्रिंशः सर्गः ॥ ३१ ॥

अथ सीताप्रलापो द्वात्रिंशे—सा सीतेत्यादिश्लोकत्रयमेकं वाक्यं ॥ हनुमता पूर्वं कथितं । सुग्रीवप्रतिसंसर्गं रामस्य सुग्रीवप्रतिसंबन्धं । रावणमुखाच्छ्रुत्वेतिशेषः । यद्वा दृष्ट्वा ज्ञात्वेत्यर्थः । ज्ञानं च सुग्रीवप्रतिसंबन्धस्य स्मरणं । अन्यत्र साक्षात्कारः ॥ १ ॥ नयने इति द्वितीया । भर्तुः सदृशं । भर्तुर्मुखसदृशमित्यर्थः । इदं नयनादावप्यन्वेति । केशान्तदेशं

शापभीत्या ॥ ४५ ॥ स० विद्युज्जिह्वेन । विद्युज्जिह्वस्यैवेदंनामान्तरंवा । "अपिमार्षमर्षंकुर्याच्छन्दोभङ्गंनकारयेत्" इतिवाद्युकारलाघवमवगन्तव्यं ॥ ती० "उपसृत्यततःसीतां" इत्यारभ्यसर्गसमाप्तिपर्यन्तस्यवास्तवार्थस्तु—रावणोदेवींस्पष्टंदेवतात्वेनज्ञात्वापिरामहस्ताद्वधेच्छुरपिरावणोरामेणसहवैरंसंपाद्यमृतइतीतरराक्षसवञ्चनायदेवीमोहनार्थमिवश्रीराममायाशिरआदिकंप्रदर्श्य रामवधशङ्कयामोहितांदेवींरहसिप्रियवचनैःसमाश्वासयति—उपसृत्यततःसीतामित्यारभ्यसर्गसमाप्तिपर्यन्तेन । उपसृत्य समीपंप्राप्य । प्रहर्षन् प्रहर्षयन् । दुष्टंवचनं इतरराक्षसदृष्ट्यादुष्टमित्यर्थः ॥ सान्त्व्यमानेति । रामस्यकापिहानिर्नास्तीतिमयासान्त्व्यमानापि यंराममाश्रितंउद्दिश्यवरलसे दुःखेनधावसीत्यर्थः । खरहन्तासतेभर्ता समरेहतोथकिं । नहतएवेत्यर्थः । अतोदुःखंमाप्रापुहीतिशेषः । ममदुःखेनतवकाहानिरित्याशङ्क्याह—छिन्नमिति । हेसीते आत्मनस्तवव्यसनेनहेतुनातेत्वयातेममत्वदीयभूत्यस्यममेत्यर्थः । दर्पमयालक्ष्म्यासहसर्वतः सर्वप्रकारेणनिहतः । मूलंचलक्ष्म्यागमननिमित्तमपिछिन्नं । अतः भार्या भर्तव्याभविष्यसि । रामेणैवेतिशेषः । अतोदुःखंमाप्रापुहीत्यर्थः । विसृज्येत्यादिसार्धश्लोकएकंवाक्यं । हेभद्रे हेअमूढे सर्वज्ञे । एतां मिथ्याकल्पितरामविपद्विषयिणीं । मतिं विसृज्य ममप्रभ्रार्यांचईश्वराभव । अल्पपुण्ये निवृत्तार्थे नष्टपुरुषार्थेपण्डितमानिनिमूढेमृते मृतकल्पे । एतादृशविशेषणविशिष्टेमयि कृपयेतिशेषः । किंत्यर्थे । एवंनकरिष्यसियदि दुःखंनत्यजसीत्यर्थः । तर्ह्यहंसद्योमरिष्यामीतिशेषः । नन्वेताराक्षस्यःकिमितिरामविपत्तिंकथयन्तीत्याशङ्क्य तदसहमानःकुपितआह—शृण्विति । भर्तृवधं भर्तृवधविषयवचनमित्यर्थः । लंशृणु । अहंत्वेतादृशमिथ्यावचनंश्रोतुंनसहइतिशेषः । रामवधविषयराक्षस्युक्तिरसंगतेतिदर्शयितुंराक्षस्युक्तिक्षयमनुवदति । " समायातःसमुद्रान्तंमांहन्तुंकिलराघवः " इत्यारभ्य " क्षतजार्द्रंरजोध्वस्तमिदंचास्याहृतंशिरः " इत्यन्तेन "मांत्रातुंकिलराघवइत्यत्रकिलशब्दो " वानरेन्द्रप्रणीतेनेत्यारभ्य " एवंतवहतोभर्तासैन्योममसेनया " इत्यन्तंसर्वत्रयोज्यः । तर्हिराक्षस्युक्तिः सर्वात्मनामिथ्याकिमित्याशङ्क्य नहि त्वन्मोहनार्थंराक्षसैर्मायेयारामशिरआदिकंकल्पितमित्याशयेनाह—क्षतजार्द्रमिति । देव्यास्तच्छिरोदिदृक्षायां तदानेतुंराक्षसस्याह्वाने राक्षसींनियोजयतिततःपरमदुर्धर्षइत्यादिना । अग्रतःकुर्वित । " अवस्थांपश्चिमांभर्तुः " इत्याद्युक्तिः इतरराक्षसवंचनायज्ञातव्या । सविद्युज्जिह्वेनेत्यस्यवास्तवार्थस्तु मेवशानुगेत्यत्रावशानुगेतिच्छेदः । हेमे लक्ष्मीः । अवशानुगा अस्य विष्णोःरामस्य वशमनुगच्छतीत्यवशानुगाभवेति ॥ ४८ ॥ इत्येकत्रिंशःसर्गः ॥ ३१ ॥

ति० हनुमताख्यातंसुग्रीवप्रतिसंसर्गं सुग्रीवरामसंबन्धं रावणकल्पितवानरवधस्योपपादकं । स्मृत्वेतिशेषः ॥ १ ॥

[पा०] १ ग. ज. ज्यासमन्वितं. ङ. च. छ. झ. ञ. ट. ज्यासमावृतं. २ घ. ङ. ज. विनिकीर्यमाणः. ३ ग. सुग्रीवप्रीतिसंसर्गं.

एतैः सर्वैरभिज्ञानैरभिज्ञाय सुदुःखिता ॥ विजगर्हेऽत्र कैकेयीं क्रोशन्ती कुररी यथा ॥ ३ ॥
सकामा भव कैकेयि हतोऽयं कुलनन्दनः ॥ कुलमुत्सादितं सर्वं त्वया कलहशीलया ॥ ४ ॥
आर्येण [1]किं ते कैकेयि कृतं रामेण विप्रियम् ॥ यन्[2]मया चीरवसनस्त्वया प्रस्थापितो वनम् ॥
[[3]इदानीं स हि धर्मात्मा राक्षसैश्च कथं हतः ॥ ५ ॥]
एवमुक्त्वा तु वैदेही वेपमाना तपस्विनी ॥ जगाम जगतीं बाला छिन्ना तु कदली यथा ॥ ६ ॥
सा मुहूर्तात्[4]समाश्वास्य प्रतिलभ्य च चेतनाम् ॥ तच्छिरः समुपाघ्राय विललापायतेक्षणा ॥ ७ ॥
हा हताऽस्मि महाबाहो वीरव्रतमनुव्रत ॥ इमां ते पश्चिमावस्थां गताऽस्मि [5]विधवा कृता ॥ ८ ॥
प्रथमं मरणं नार्या भर्तुर्वैगुण्यमुच्यते ॥ सुवृत्त साधुवृत्तायाः संवृत्तस्त्वं ममाग्रतः ॥ ९ ॥
[6]दुःखाद्दुःखं प्रपन्नाया मग्नायाः शोकसागरे ॥ यो हि मामुद्यतस्त्रातुं सोपि त्वं विनिपातितः ॥१०॥
सा श्वश्रूर्मम कौसल्या त्वया पुत्रेण राघव ॥ वत्सेनेव यथा धेनुर्विवत्सा वत्सला [7]कृता ॥ ११ ॥

ललाटं ॥ २ ॥ अभिज्ञानैः चिह्नैः । " प्रज्ञानं चाप्यभिज्ञानं" इत्यमरः । अभिज्ञाय तदेव शिर इति प्रत्यभिज्ञायेत्यर्थः । अत्र रामविषये ॥ ३ ॥ हे कैकेयि सकामा भव । संपूर्णकामाभवेत्यर्थः । कः काम इत्यत्राह—हत इति । कलहशीलया कलहस्वभावया । कलहप्रयोजनयेतियावत् । त्वया सर्वं कुलं रघुवंशः । उत्सादितं भवति । तथा कुलनन्दनोयं रामो हतः । प्रव्राजनव्याजेन रामहननमेव त्वया संकल्पितं तदिदानीं विपरीतफलं ते जातं । कुलतन्तुभूतरामहननेन तदेकपराः सर्वे भरतादयो हता एव । कलह एव ते प्रयोजनं फलितमितिभावः ॥ ४ ॥ हेत्वन्तराभावादिदमेव रामवनप्रव्राजने हेतुरित्याह—आर्येणेति ॥ आर्येण सर्वप्रियकारिणेत्यर्थः । यत् येन कारणेन । मया सह चीरवसनो रामः प्रस्थापितः तादृशं विप्रियं किं कृतं ॥ ५ ॥ तपस्विनी शोचनीया । जगतीं भूमिं । जगाम । मूर्च्छितेत्यर्थः । बाला मृदुबुद्धिरित्यर्थः ॥ ६ ॥ समाश्वास्य उच्छ्वासं प्राप्य । चेतनांज्ञानं । आयतेक्षणा अश्रुमिश्रत्वेन शिरोवलोकनार्थं विस्तृतविलोचनेत्यर्थः ॥ ७ ॥ वीरव्रतं शत्रुमहत्वा न निवर्तिष्य इति संकल्पं । अनुव्रत अनुप्राप्त । गतास्मि दृष्टवत्यस्मि । " गत्यर्था ज्ञानार्थाः " इति न्यायात् । अतो विधवा कृता ॥ ८ ॥ प्रथमं भर्तुर्मरणं भार्यादोषनिमित्तकं भवति तत्त्वत्र न पश्यामीत्याह—प्रथममिति ॥ प्रथमं भर्तुर्मरणं नार्या वैगुण्यं वैगुण्यहेतुकं । सुवृत्तस्त्वं साधुवृत्ताया ममाग्रतः संवृत्तः मृतः । कथमिदं संगच्छत इति भावः । अस्मिन्पक्षे न सुवृत्तपदस्वारस्यं । यद्वा भवन्मरणस्य महोष एव हेतुरित्याह—प्रथममिति ॥ विगुण एव वैगुण्यं । स्वार्थे ष्यञ् । प्रथमं भर्तृमरणं भार्यादोषनिमित्तकमिति सुप्रसिद्धं । अतो हे सुवृत्त साधुवृत्त । साधुवृत्तायाः सम्यग्जीवनवत्याः । ममाग्रतस्त्वं मृतोसि । मद्वैगुण्यहेतुकं त्वन्मरणमितिभावः । सुवृत्तेत्यनेन त्वद्वैगुण्यहेतुकं न भवतीति ज्ञापितं ॥ ९ ॥ स्वस्य वैगुण्यसद्भावे निदर्शनमाह—दुःखादिति ॥ दुःखाद्दुःखं अत्यन्तदुःखं । प्रपन्नायाः वनप्रस्थानं प्रथमं दुःखं तस्मादपिदुःखं रावणेनापहरणं तत् प्राप्तायाइत्यर्थः । संप्रति भर्तृमरणेन शोकसागरे निमग्नायाः । इयं च षष्ठी " यस्य च भावेन भावलक्षणम् " इत्यस्मिन्नर्थे । शोकसागरे मग्नायाः शोकसागरे मग्नायां मयि । दुःखाद्दुःखं प्रपन्नायाः प्रपन्नायां सत्यां । यो मां त्रातुमुद्यतः स त्वमपि विनिपातित इति संबन्धः ॥ १० ॥ न केवलं ममैवदुःखं

ती० प्रथमंभर्तृमरणं नार्यावैगुण्यं दुश्चरित्रहेतुकमुच्यते । तथासति साधुवृत्तायाममाग्रतःसंवृत्तःममापचारंविनैवकथंमृतोसीत्यर्थः ॥ **ति०** नार्याभर्तुर्मरणं प्रथमंवैगुण्यं मुख्योऽनर्थः । यत्तु भर्तुःप्रथममरणंनार्यावैगुण्यं दुश्चरित्रमूलमित्यर्थइति तन्न । एवंहिसर्वविधवानामसतीत्वापत्तेः ॥ ९ ॥ **रामानु०** वत्सेनेवत्वया धेनुर्यथा धेनुरिव सेति यथेवशब्दयोर्निर्वाहः ॥ ११ ॥

[**पा०**] १ क. ख. ग. ङ. ज.—ट. किंनुकैकेय्याः. २ ख. घ. यद्गृहाच्चीरवसनस्त्वयाप्रव्राजितो. ङ.—ञ. यन्मयाचीरवसनंदत्त्वाप्रव्राजितो. ३ इदमर्धं. क. ख. च. छ. पाठेषुदृश्यते. ४ क. ग. ङ. झ. ञ. समाश्वस्य. ५ घ. विधिनाकृता. ६ ङ. झ. ट. महद्दुःखं. ७ क. ग. ङ. झ. ट. वत्सलातेयथाधेनुः.

आदिष्टं दीर्घमायुस्ते यैरचिन्त्यपराक्रम ॥ अनृतं वचनं तेषामल्पायुरसि राघव ॥ १२ ॥
अथवा नश्यति प्रज्ञा प्राज्ञस्यापि सतस्तव ॥ पचत्येनं यथा कालो भूतानां प्रभवो ह्ययम् ॥ १३ ॥
अदृष्टं मृत्युमापन्नः कस्मात्त्वं नयशास्त्रवित् ॥ व्यसनानामुपायज्ञः कुशलो ह्यसि वर्जने ॥ १४ ॥
तथा त्वं संपरिष्वज्य रौद्रयाऽतिनृशंसया ॥ कालरात्र्या ममाच्छिद्य हृतः कमललोचन ॥ १५ ॥
उपशेषे महाबाहो मां विहाय तपस्विनीम् ॥ प्रियामिव समाश्लिष्य पृथिवीं पुरुषर्षभ ॥ १६ ॥
अर्चितं सततं यत्तद्गन्धमाल्यैर्मया तव ॥ इदं ते मत्प्रियं वीर धनुः काञ्चनभूषणम् ॥ १७ ॥
पित्रा दशरथेन त्वं श्वशुरेण ममानघ ॥ सर्वैश्च पितृभिः सार्धं नूनं स्वर्गे समागतः ॥ १८ ॥

मातुश्चेत्याह—सेति ॥ सा मम श्वश्रूः कौसल्या वत्सला धेनुर्यथा धेनुरिव । त्वया हतेन पुत्रेण वत्सेनेव विवत्सा कृता ॥ ११ ॥ यैः ब्राह्मणैः । दीर्घमायुरित्यादिष्टं उपदिष्टं । तेषां वचनमनृतमासीत् । अनृतत्वे हेतुमाह—अल्पायुरसीति । अचिन्त्यपराक्रमेत्यनेन ते पराक्रमं दृष्ट्वा तैरुक्तं नतु शास्त्रं दृष्ट्वेति गम्यते ॥ १२ ॥ अथवा तेषामनृतवादित्वं नास्त्येव किंतु तवैवभाग्यविपर्यासात्तेषामपिप्रज्ञानष्टेति पक्षान्तरमवलम्बते—अथवेति ॥ प्रभवत्यस्मादिति प्रभवः । भूतानां कारणभूतः । अयं कालः परमात्मा । यथा येन प्रकारेण । एनं पचनविषयभूतं । पचति पक्वकर्माणं करोति । तथा प्राज्ञस्य भविष्यदर्थवेदिनोपि । सतः सत्पुरुषस्य । प्रज्ञा । तव त्वयि विषये । नश्यति नष्टेत्यर्थः । यद्वा पूर्वमचिन्त्यपराक्रमेति तव कथं विपत्तिरित्यभिप्रायेण संबोधितं । तत्र पक्षान्तरमाह—अथवेति ॥ एनं रामं । येन प्रकारेण कालः पचति । तथास्य प्राज्ञस्यापि प्रज्ञा नश्यति । अतो विपत्तिरियमिति भावः ॥ १३ ॥ हि यस्माद्व्यसनानां वर्जने प्रतिरोधे । कुशलोसि । अतः अदृष्टं अचिन्तितं सौम्निकत्वेनादृष्टं वा मृत्युं । कस्मादापन्नः कथमापन्नोसीत्यर्थः ॥ १४ ॥ रौद्रया क्रूरया । कालरात्र्या यस्यां रात्रौ समुद्रतीरे निविष्टोसि तया रात्र्या । संपरिष्वज्य । मम मत्तः । आच्छिद्य अपहृत्य । तथा हृतोसीति संबन्धः । यद्वा मयेति पाठः । रौद्रया अतिनृशंसया । अत्यन्तनिर्दयया कालरात्र्या कर्त्र्या । मया करणभूतया । संपरिष्वज्य आच्छिद्य बलात्कृत्य । तथा हृत इति । कालरात्रिर्नाम सर्वभूतापहारिणी काचन शक्तिः । यद्वा मया कालरात्र्येति व्यस्तरूपकं । संपरिष्वज्य त्वमाच्छिद्य बलाद्धृतोसीति । घोरवैधव्यलक्षणयुक्तत्वेन क्रूराया मे परिष्वङ्ग एव तेऽन्तहेतुरासीदित्यर्थः । शिरश्छेदादेरश्लीलत्वेन तथेत्युक्तं । कमललोचनेति हेतुगर्भं । कमललोचनत्वात् त्वं कालरात्र्या हृतोसि । परिकरानुप्राणितरूपकालङ्कारः ॥ १५ ॥ तपस्विनीं शोचनीयां । प्रियां मत्तः प्रियां । पुरुषर्षभेत्यनेन दक्षिणस्य शठत्वमनुचितमिति द्योत्यते ॥ १६ ॥ मया सह । तव त्वया । यदर्चितं तत्ते धनुः इदं एतादृशं जातमित्यर्थः ॥ १७ ॥ सर्वैः पितृभिः सार्धं स्थितेन दशरथेन । समा-

स० प्राज्ञस्यापिसतस्तव बुद्धिमत्त्वेनसंप्रतिपन्नस्यापितवप्रज्ञा नश्यत्यथवा नष्टाकिमित्यर्थः । अव्ययानामनेकार्थत्वादथवेतिकिमर्थः । एतादृशस्यापिबुद्धिभ्रंशईशायत्तइत्याह—पचतीति ॥ हियतःभूतानांकालःप्रभवः उत्पादकः । भूतानांकालः संहारकश्च । ततएनं भूतसङ्घं । पचति पाचयति । तत्तत्कर्मानुरोधेनबुद्धिभ्रंशंवा सद्बुद्धिंवा दत्वातत्तत्फलंभोजयति । अथवा अथवेतिश्लोकः पूर्वोक्तपक्षएवपक्षान्तरमाश्रित्यप्रवृत्तः । प्राज्ञस्यापिसतःदैवज्ञसङ्गस्यतवविषये प्रज्ञा नश्यति नष्टा । अतस्तद्वचनानृतीभवनमुचितं । तन्नाशेनिमित्तमाह—पचतीति । एनंदैवज्ञं भूतानांप्रभवःकालः प्रभवोस्यास्तीत्यच् प्रभवत्यस्मिन्निति वा उत्पत्तिकालः । तथा यथावचनमनृतंभवेत्तथा पचति परिपाकंनयति । तस्यातिसूक्ष्मत्वादितिभावः । पूर्वंदैवज्ञैरितिबहुवचनं अत्रप्राज्ञस्येत्येकवचनंच वक्तारोबहुलाः प्रज्ञातुल्यदेकोच्छ्रायविषयेतिसंभवतः ॥ १३ ॥ स० प्रियामिव मदपेक्षया । पृथिवींनारीं तद्रूपांरमणीं । आलिङ्ग्येतिशेषः । यद्वा प्रियां तपस्विनीं नारींभार्यामामिव पृथिवीं पितृपितामहादिपालितामपिविहाय । इह रक्षोरक्षितक्षितौ शेषइत्यर्थः ॥ १६ ॥ स० सर्वैःपितृभिः पितामहादिभिःसार्धं । स्थितेन त्वदपेक्षयापूर्वंगतत्वात् । पित्रा श्वशुरेणदशरथेन

[पा०] १ ङ. झ. ट. उद्दिष्टं. २ ङ.—ट. दैवज्ञैरपिराघव. ३ ख. मयालं. ४ ग.—छ. झ. ञ. ट. मयाच्छिद्य. ५ क.—ट. कमललोचनः. ६ ख. च. छ. ञ्चशेषे. ङ. झ. ट. इहशेषे. ७ क.—घ. च. छ. ज. ञ. शुभांनारीं. ङ. झ. ट. यथानारीं. ८ क.—ङ. ज.—ट. यत्नाद्गन्ध. च. छ. पत्न्यागन्ध. ९ ङ. झ. ट. भूषितं.

दिवि नक्षत्रभूतस्त्वं महत्कर्मकृतां प्रियम् ॥ पुण्यं राजर्षिवंशं त्वमात्मनः समवेक्षसे ॥ १९ ॥
किं मां न प्रेक्षसे राजन्किं मां न प्रतिभाषसे ॥ बालां बाल्येन संप्राप्तां भार्यां मां सहचारिणीम् ॥२०॥
संश्रुतं गृह्णता पाणिं चरिष्यामीति यत्त्वया ॥ स्मर तन्मम काकुत्स्थ नय मामपि दुःखिताम् ॥२१॥
कस्मान्मामपहाय त्वं गतो गतिमतां वर ॥ अस्माल्लोकादमुं लोकं त्यक्त्वा मामपि दुःखिताम् ॥२२॥
कल्याणैरुचितं यत्तत्परिष्वक्तं मयैव तु ॥ क्रव्यादैस्तच्छरीरं ते नूनं विपरिकृष्यते ॥ २३ ॥
अग्निष्टोमादिभिर्यज्ञैरिष्टवानाप्तदक्षिणैः ॥ अग्निहोत्रेण संस्कारं केन त्वं तु न लप्स्यसे ॥ २४ ॥
प्रव्रज्यामुपपन्नानां त्रयाणामेकमागतम् ॥ परिप्रक्ष्यति कौसल्या लक्ष्मणं शोकलालसा ॥ २५ ॥

गत इति संबन्धः ॥१८॥ महत्कर्मकृतां महाकर्मकृतां। आत्वाभाव आर्षः । प्रियं कर्मफलत्वेन काङ्क्षणीयं । पुण्यं आत्मनो राजर्षिवंशं इक्ष्वाकुप्रमुखं । दिवि नक्षत्रभूतः विमानस्थः सन् समवेक्षसे पश्यसि ॥ १९ ॥ बालां बाल्येन संप्राप्तां । बाल्य एव त्वयोढामित्यर्थः । भार्यां सदा भर्तुं योग्यां । मां एतादृशावस्थामापन्नां सहचारिणीं । मां किं न प्रेक्षसे किं न प्रतिभाषस इति संबन्धः ॥ २० ॥ मम पाणिं गृह्णता त्वया चरिष्यामि सहचरिष्यामीति यत् संश्रुतं प्रतिज्ञातं । तत् स्मर । स्मृत्वा मामपि त्वत्समीपं नय ॥ २१ ॥ त्यक्त्वा त्वां विहाय । दुःखितां मामपि प्रेयसीमपि मां । अपहाय अस्माल्लोकात् अमुं लोकं परलोकं । कस्माद्धेतोः गतोसि ॥ २२ ॥ यदित्यर्थे यत्तदित्यपि प्रयुज्यते । कल्याणैः मङ्गलैः । शुभैश्चन्दनादिभिर्वा सुवर्णाभरणैर्वा । उचितं अभ्यस्तं। यत्तच्छरीरं मयैव परिष्वक्तं नान्यया । एतदद्य क्रव्यादैः श्येनादिभिः । विपरिकृष्यते । अत्र मयैवेत्यनेन रामस्य दारान्तरं नास्तीति गम्यते ॥ २३ ॥ वनवासनिवृत्त्यनन्तरं त्वं । आप्तदक्षिणैः पर्याप्तदक्षिणैः । अग्निष्टोमादिभिर्यज्ञैः । इष्टवान् कृतदेवपूजनो भूत्वा । अग्निहोत्रेण यज्ञीयवह्निना । संस्कारं केन हेतुना न लप्स्यसे । अत्र वनवासात्पूर्वमभ्याधानाद्यभावात्तन्निवृत्त्यनन्तरमाधानाग्निष्टोमादिकमनुष्ठाय पश्चात्क्रमप्राप्तायुरवसाने यज्ञीयाग्निभिः संस्कारं प्राप्तुं योग्यस्त्वं कथमेवं मध्ये मरणंप्राप्तोसीतिभावः । अनेन वनवासात्पूर्वं रामेण यज्ञादिकं नानुष्ठितमिति सूच्यते । अयमर्थोऽयोध्याकाण्डे सम्यक्प्रतिपादितः ॥ २४ ॥ प्रव्रज्यां प्रवासं । "व्रजयजोर्भावे क्यप्" इति क्यप् । उपपन्नानां प्राप्तानां । त्रयाणां रामादीनां मध्ये एकं लक्ष्मणमागतं । शोकलालसा शोकमन्दा । कौसल्या परिप्र-

स्वर्गेसमागतः मिलितः । "पितामहाद्याश्चपितरोनामकीर्तिताः" इत्यैतरेयभाष्योक्तेःपितामहादीनांपितृशब्दवाच्यतासंभवति ॥ अनघेत्यनेनपुण्यलभ्यस्वर्गगतियोग्यतांसूचयति ॥ १८ ॥ स० दिविनक्षत्रभूतस्त्वं महत्कर्मकृतं महतांकर्म महत्कर्म तत्कृतं महात्मनांपुण्यकर्मफलत्वेनप्राप्यं राजर्षिवंशं इक्ष्वाकुवंशं । किमुपेक्षसे । बहुकर्मकृत्वाऽस्माकमिक्ष्वाकुवंशसंभवःस्यादितिकाङ्क्षितं वंशं किमुपेक्षसे । उपेक्ष्यगतइतियावत् । दिविनक्षत्रभूतं प्रकाशमानमितियावत् । महत्कर्मकृतंपुण्यं राजर्षिवंशं पित्रादिकंयथा राम ईक्षसे पश्यसि । तत्रगतः । तथापुण्यं आत्मनोममराजर्षिवंशं जनकवंशं । किमुपेक्षसे मदनयनेनेतिवा ॥ यत्तु—नागोजिभट्टेन—दिविनक्षत्रभूतं त्रिशङ्कोस्तथालाच्छत्रिन्यायेनवंशस्यतथात्वं । महता पितृवचनपरिपालनरूपेणकर्मणा कृतं तथापुण्यमासाद्यात्मनःप्रियंपुण्यं राजर्षिवंशं उपेक्षसे त्यक्त्वागच्छसि । एतदन्याय्यमित्यर्थइतिव्याख्यातं । तत्तु—स्वर्गगमनौचितीसाधकमेवभवतीतिप्रकृतानुपयुक्तं । यन्महत्कर्मकृतं भुवितद्वंशस्थातिरिक्तक्षत्रभूतं क्षत्रजात्युत्पन्नसंबद्धं क्षत्रभूसंबद्धं नेतिकिंवक्तव्यं । दिव्यपितादृशं तत्राप्येतत्सदक्षःक्षत्रियोनास्ति तन्नक्षत्रभूतं क्षत्रभूयिष्ठंनेतिवा । दशरथादिभिरिन्द्रादिसाहितीकरणादितिभावः । एतादृशंपुण्यंराजर्षिवंशमुपेक्षसे । तेपियुष्मद्बलमाश्रिताइतिनातिशेते तत्रत्यइतिनन्याय्यंतत्रगमनमितिभावइतिवा ॥ १९ ॥ स०लामपहाय अगतिमतां अगतिरितिमतां गतिरहितेतिसंमतां । मां रमारूपिणीं मां । दुःखितां तद्वद्वियमानां । कस्मात्त्यक्त्वा गतइत्यन्वयः । दुःखातिशयाद्वा पुनरुक्तिः । "परिहासेप्रलापेचवागनर्थापिदृश्यते" अनर्था निरर्था । चरितार्थत्वेनानधिकार्येतिदीपिकाव्याख्यानात् ॥ २२ ॥ स० त्रयाणां त्वमहंलक्ष्मणश्चेत्येषांमध्ये । एकमागतंलक्ष्मणं जीवन्तं कौसल्यापरिप्रक्ष्यति

[पा०] १ क. ङ. झ. ट. नक्षत्रभूतंचमहत्कर्मकृतंतथा. २ क. ङ. झ. ट. समुपेक्षसे. ३ घ.—ट. वालेन. ४ ङ. झ. तन्नाम. ५ ज. कस्मान्ममविहाय. ६ ट. मामिव. क. मामिह. ७ ङ. झ. ट. रुचिरंगात्रंपरिष्वक्तं. च. छ. ज. रुचिरंयत्तत्. ८ ङ. च. झ. ट. परिप्रेक्षति.

स तस्याः परिपृच्छन्त्या वधं मित्रबलस्य ते ॥ तव चाख्यास्यते नूनं निशायां राक्षसैर्वधम् ॥ २६ ॥
सा त्वां सुप्तं हतं श्रुत्वा मां च रक्षोगृहं गताम् ॥ हृदयेनावदीर्णेन नभविष्यति राघव ॥ २७ ॥
मम हेतोरनार्यायाः ह्यनर्हः पार्थिवात्मजः ॥ रामः सागरमुत्तीर्य सत्त्ववान्गोष्पदे हतः ॥ २८ ॥
अहं दाशरथेनोढा मोहात्स्वकुलपांसनी ॥ आर्यपुत्रस्य रामस्य भार्या मृत्युरजायत ॥ २९ ॥
नूनमन्यां मया जातिं वारितं दानमुत्तमम् ॥ याऽहमद्येह शोचामि भार्या सर्वातिथेरपि ॥ ३० ॥
साधु पातय मां क्षिप्रं रामस्योपरि रावण ॥ समानय पतिं पत्न्या कुरु कल्याणमुत्तमम् ॥ ३१ ॥
शिरसा मे शिरश्चास्य कायं कायेन योजय ॥ रावणानुगमिष्यामि गतिं भर्तुर्महात्मनः ॥ ३२ ॥
[मुहूर्तमपि नेच्छामि जीवितुं पापजीविता ॥ श्रुतं मया वेदविदां ब्राह्मणानां पितुर्गृहे ॥
यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः ॥ ३३ ॥
क्षमा यस्मिन्दमस्त्यागः सत्यं धर्मः कृतज्ञता ॥ अहिंसा चैव भूतानां तमृते का गतिर्मम] ॥३४॥
इति सा दुःखसंतप्ता विललापायतेक्षणा ॥ भर्तुः शिरो धनुस्तत्र समीक्ष्य च पुनः पुनः ॥ ३५ ॥
एवं लालप्यमानायां सीतायां तत्र राक्षसः ॥ अभिचक्राम भर्तारमनीकस्थः कृताञ्जलिः ॥ ३६ ॥
विजयस्वार्यपुत्रेति सोभिवाद्य प्रसाद्य च ॥ न्यवेदयदनुप्राप्तं प्रहस्तं वाहिनीपतिम् ॥ ३७ ॥
अमात्यैः सहितैः सर्वैः प्रहस्तः समुपस्थितः ॥ तेन दर्शनकामेन वयं प्रस्थापिताः प्रभो ॥ ३८ ॥
नूनमस्ति महाराज राजभावात्क्षमान्वितम् ॥ किंचिदात्ययिकं कार्यं तेषां त्वं दर्शनं कुरु ॥ ३९ ॥

क्ष्यति ॥ २५ ॥ सः लक्ष्मणः । परिपृच्छन्त्यास्तस्याः ते मित्रबलस्य वधं तववधं चाख्यास्यते ॥ २६ ॥ सुप्तं हतं सुप्तत्वदशायां हतमित्यर्थः । अवदीर्णेन भिन्नेन । हृदयेनोपलक्षिता सा नभविष्यति न जीविष्यति ॥ २७ ॥ अनार्यायाः दुश्शीलायाः । मम हेतोः मन्निमित्तं । अनर्हः एतादृशसौप्तिकवधानर्हः । सागरमुत्तीर्य गोष्पदे हतः खरतरखरादीन्हत्वा क्षुद्रेण प्रहस्तेन हत इत्यर्थः ॥ २८ ॥ स्वकुलपांसनी स्वकुलदूषणी । अहं मोहात् अज्ञानात् । दाशरथेनोढास्मि । अतो रामस्य भार्यैव मृत्युरजायत ॥२९॥ मया अन्यां जातिं प्राप्य । यद्वा अन्यां जातिं अन्यस्मिञ्जन्मनि । उत्तमं दानं वारितं । कन्यादानं वारितमित्यर्थः । तत्र हेतुमाह—येति । सर्वे अतिथयो यस्य तस्य सर्वातिथेः । सर्वरक्षितुरित्यर्थः । सर्वातिथिपूजकस्येति वाऽर्थः । भार्यापि याहं इह जन्मनि अद्य भोगकाल एव शोचामि ॥ ३० ॥ समानय योजय । उत्तमं कल्याणं पतिसंयोगरूपं ॥ ३१—३४ ॥ शिरः धनुश्च । तत्र पुरोदेशे ॥ ३५ ॥ लालप्यमानायां प्रलपन्त्यां । भर्तारं रावणं । अनीकस्थः द्वाररक्षः । ननु लौकिकीषु काचिदिव सीता भर्तृशिरस्साक्षात्कारेपि चिरं रुदित्वा विलप्य कथं जीवितं धारयति स्म । उच्यते । अनयोर्दिव्यदम्पत्योः परस्परसत्त्वैव जीवितधारणे निमित्तं नतु ज्ञानाज्ञाने । अतो भर्तुर्जीवितवैकल्याभावात्सा जीवति स्म ॥ ३६ ॥ अनुप्राप्तं द्वारीति शेषः ॥ ३७ ॥ वयमितिभयेन बहुवचनं बहूनामन्तःपुरे समागमासंभवात् ॥ ३८ ॥ प्रहस्तेन प्रेषितोपि

प्रश्नंकरिष्यति । " दिशंप्रव्राजितःसर्वैर्लक्ष्मणःप्लवगैःसह " इतिलक्ष्मणस्यजीवत्वोक्तेरियमुक्तिर्युक्ता ॥ परिप्रेक्षति द्रक्ष्यतीत्यर्थइतिनागोजिभट्टः । तत्रपरस्मैपदितेक्षधातोर्निर्वाह्या । एवं "सतस्याःपरिपृच्छन्त्याः" इत्यनुक्तानुवादास्वारस्यंचपरिहार्यं ॥ २५ ॥ ति० आर्यपुत्रशब्दोयद्यपिस्त्रीभिर्भर्तरिप्रयुज्यतेप्रायेण । तथापि पूजामात्रेसामान्यतःप्रयोगोपिबोध्यः ॥ स० अर्यपुत्र स्वामिपुत्र । " स्यादर्यःस्वामिवैश्ययोः " इत्यमरः । अरयः अपुत्रायेनेतिवा । तेनआर्यपुत्रेति पतिंप्रतिभार्यासंबोधनस्यैवसर्वत्रसत्त्वेनकथमेव-

[पा०] १ ङ. ज. झ. ट. अनघः. २ क.—ट. वीर्यवान्. ३ क. ग. घ. ज. नूनंमन्येमयाजाते. ४ ख.—ट. मद्यैव. ५ ख.—ट. सर्वातिथेरिह. ६ ख. ङ.—ट. घातयमां. ७ इदंश्लोकद्वयंप्राचीनकोशेषुनदृश्यते. औत्तराहपाठएवदृश्यते. ८ ङ. च. छ. झ. ट. इतीवदुःख. ञ. इतिदुःखेनसंतप्ता. ९ ख. ग. घ. विललापाकुलेन्द्रिया. १० ग. ङ.—ट. धनुश्चैवददर्श जनकात्मजा. क. ख. घ. धनुस्तत्रसमीक्ष्यजनकात्मजा. ११ घ. ङ. झ. ञ. ट. सहितः. १२ ङ. झ. प्रहस्तस्त्वामुपस्थितः. १३.—ट. अहंप्रस्थापितःप्रभो. घ. स्वयंप्रस्थापितःप्रभो.

एतच्छ्रुत्वा दशग्रीवो राक्षसप्रतिवेदितम् ॥ अशोकवनिकां त्यक्त्वा मन्त्रिणां दर्शनं ययौ ॥ ४० ॥
सोऽथ सर्वं समर्थ्यैव मन्त्रिभिः कृत्यमात्मनः ॥ सभां प्रविश्य विदधे विदित्वा रामविक्रमम् ॥४१॥
अन्तर्धानं तु तच्छीर्षं तच्च कार्मुकमुत्तमम् ॥ जगाम रावणस्यैव निर्याणसमनन्तरम् ॥ ४२ ॥
राक्षसेन्द्रस्तु तैः सार्धं मन्त्रिभिर्भीमविक्रमैः ॥ समर्थयामास तदा रामकार्यविनिश्चयम् ॥ ४३ ॥
अविदूरस्थितान्सर्वान्बलाध्यक्षान्हितैषिणः ॥ अब्रवीत्कालसदृशो रावणो राक्षसाधिपः ॥ ४४ ॥
शीघ्रं भेरीनिनादेन स्फुटकोणाहतेन मे ॥ समानयध्वं सैन्यानि वक्तव्यं च न कारणम् ॥ ४५ ॥
ततस्तथेति प्रतिगृह्य तद्वचो बलाधिपास्ते महदात्मनो बलम् ॥
समानयंश्चैव समागमं च ते न्यवेदयन्भर्तरि युद्धकाङ्क्षिणि ॥ ४६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

मायाकल्पितशिरोदर्शनेनदूयमानांसीतांप्रति विभीषणभार्ययासरमया हेतूपन्यासेनसमाश्वासनम् ॥ १ ॥

सीतां तु मोहितां दृष्ट्वा सरमा नाम राक्षसी ॥ आससादाथ वैदेहीं प्रियां प्रणयिनीं सखीम् ॥ १ ॥
मोहितां राक्षसेन्द्रेण सीतां परमदुःखिताम् ॥ आश्वासयामास तदा सरमा मृदुभाषिणी ॥ २ ॥
सा हि तत्र कृता मित्रं सीतया रक्ष्यमाणया ॥ रक्षन्ती रावणादिष्टा सानुक्रोशा दृढव्रता ॥ ३ ॥

कथमनवसरे समागतोसीत्याशङ्क्याह—नूनमिति ॥ राजभावात् राजत्वाद्धेतोः । क्षमान्वितं तदानीमेव कर्तव्यत्वेपि तव राजभावात् क्षमया त्वदाज्ञाप्रतीक्षणेनान्वितं । आत्ययिकं आतिपातिकं किंचित्कार्यमस्ति नूनं । तत्तस्मात्तेषां प्रहस्तादीनां दर्शनं कुर्वित्यन्वयः ॥ ३९—४० ॥ सः रावणः । रामविक्रमं विदित्वा सभां प्रविश्य आत्मनः सर्वं कृत्यं मन्त्रिभिः सह समर्थ्य निश्चित्य । विदधे । प्रकृतकार्यमिति शेषः ॥ ४१ ॥ निर्याणं निर्गमनं ॥ ४२ ॥ समर्थ्येत्युक्तं विवृणोति—राक्षसेन्द्र इति ॥ रामकार्यविनिश्चयं रामविषये स्वकृत्यनिश्चयं ॥ ४३—४४ ॥ स्फुटकोणाहतेन उल्बणवादनदण्डाहतिजनितेन । कार्ये कारणोपचारः । वक्तव्यं च न कारणमिति । युद्धार्थं निर्यातेति पुरे प्रवदन्ति चेद्बलाध्यक्षाः तदानीं देव्याः सन्निधौ कथितं स्वकीयं रामसैन्यवधवृत्तान्तवाक्यमसत्यमिति तस्याः विदितं स्यादिति भावः ॥४५॥ आत्मनः आत्मनां । भर्तरि विषये ॥ ४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्वात्रिंशः सर्गः ॥३२॥

अथ सरमा सीतां समाश्वासयति त्रयस्त्रिंशे—सीतामिति ॥ मोहितां रामविषयविपरीतज्ञानवतीं । सरमा विभीषणभार्या । प्रणयिनीं स्नेहवतीं ॥ १—२ ॥ ननु राक्षस्यास्तस्याः कथं सख्यमाश्वासनं

मित्यशङ्कानवकाशः ॥ ३७ ॥ **ती०** स्फुटकोणाहतेन उल्बणवादनदण्डहतेन । नचवक्तव्यंकारणंदेव्याःपुरतः । स्वोक्तंरामहननविषयवाक्यमसत्यमितिसीताज्ञास्यतीतिशङ्क्या वक्तव्यंचनकारणमित्युक्तं । " सासीतातच्छिरोदृष्ट्वातच्चकार्मुकमुत्तमम् " इत्यारभ्य " इतिसादुःखसंतप्ताविललापायतेक्षणा " इत्यन्तानांसीताप्रलापवाक्यानांवास्तवार्थेऽयमाशयः । सीतापिरामशिरआदिकंमायाकल्पितमितिज्ञात्वापितत्सत्यमितिमत्वेवमिथ्याप्रलापादिनाराक्षसान्वञ्चयितुंबहुविधंप्रलपति ॥ ४५ ॥ द्वात्रिंशःसर्गः ॥ ३२ ॥

ति० सीतांत्विति । विभीषणपत्नीयंसरमा । सातुसीतायांभक्तिमती । साहिरावणेनज्ञातसात्विकभावाऽतिभर्त्सनेननाशमाशङ्क्य सीताश्वासनार्थंसंदिष्टेतिबोध्यं । प्रणयिनी स्नेहवती । सखीसरमेत्यन्वयः ॥ १ ॥ **रामानु०** साहीति । विभीषणभार्यायाःसर

[**पा०**] १ घ. सतुपूर्वंसमामन्त्र्य. २ ख. ग. घ. च. छ. ञ. संमन्त्रयामास. ३ ङ. झ. ञ. ट. स्फुटं. ४ ङ. च. छ झ. ञ. ट. तद्वचस्तदैवदूताःसहसामहद्बलं. ५ ख. ग. ङ. च. छ. झ. ट. समागतंच. ६ क. च. छ. ञ. आससादाशु. ७ च. छ. प्रियांप्रियकरीं. ज. प्राणप्रणयिनीं. ङ. झ. ञ. ट. प्रियांप्रणयिनीसखी. ८ ख. कमललोचनां. ९ ज. हिता.

सा ददर्श ततः सीतां सरमा नष्टचेतनाम् ॥ उपावृत्योत्थितां ध्वस्तां बडबामिव पांसुलाम् ॥ ४ ॥
तां समाश्वासयामास सखीस्नेहेन सुव्रता ॥ ५ ॥
समाश्वसिहि वैदेहि माभूत्ते मनसो व्यथा ॥ उक्ता यद्रावणेन त्वं प्रत्युक्तं च स्वयं त्वया ॥
सखीस्नेहेन तद्धीरु मया सर्वं प्रतिश्रुतम् ॥ ६ ॥
लीनया गगने शून्ये भयमुत्सृज्य रावणात् ॥ तव हेतोर्विशालाक्षि न हि मे जीवितं प्रियम् ॥ ७ ॥
स संभ्रान्तश्च निष्क्रान्तो यत्कृते राक्षसाधिपः ॥ तँच्च मे विदितं सर्वमभिनिष्क्रम्य मैथिलि ॥ ८ ॥
न शक्यं सौप्तिकं कर्तुं रामस्य विदितात्मनः ॥ वधश्च पुरुषव्याघ्रे तस्मिन्नैवोपपद्यते ॥ ९ ॥

वेत्यत्राह—सा हीति ॥ हि यस्माद्रावणादिष्टा रक्षन्ती सा आत्मना रक्ष्यमाणया मित्रं सखी कृता । अत इत्यर्थः । रक्षन्ती । तत्रतत्रावसरे सीताया योगक्षेमविधानं कुर्वतीत्यर्थः । रावणादिष्टा योगक्षेमे रावणेनादिष्टा । सानुक्रोशा सदया । अनेन सख्यकरणे हेतुरुक्तः । दृढव्रता दृढप्रतिज्ञा । अनेन सख्यस्याप्रच्युतिर्दर्शिता ॥ ३ ॥ आसादनानन्तरं तदवस्थादर्शनमाह—सेति ॥ नष्टचेतनां विपरीतज्ञानवतीं । उपावृत्य लुठित्वा । ध्वस्तां धूल्युपहतां । बडबां अश्वस्त्रियं । पांसुलां पांसुमतीं ॥ ४ ॥ तामिति पूर्वं करस्पर्शादिना समाश्वासनमुक्तं । इदानीं रावणवृत्तान्तप्रदर्शनेनेति ज्ञेयं ॥ ५ ॥ स्वयं साक्षात् । प्रत्युक्तं प्रलापरूपं । सखीस्नेहेन सखीविषयस्नेहेन । प्रतिश्रुतं । प्रतिरुपसर्गमात्रं ॥ ६ ॥ तदानीमसन्निहितया त्वया कथं श्रुतमित्यत्राह—लीनयेति ॥ लीनया छन्नया । गगने कुत्रचित्तरुरन्ध्रे । गहन इति पाठे आवृत इत्यर्थः । शून्ये निर्जने । कथं घोराद्रावणाद्भयं त्यक्तं तत्राह—तवेति । तव हेतोः त्वन्निमित्तं । मे जीवितमपि न प्रियं । तत्र हेतुर्विशालाक्षीति । तव नयनसौन्दर्यं पश्यन्त्या मे कथं त्वत्पीडा सोढव्येति भावः । ननुविभीषणभार्या कथं सीतारक्षणे रावणेन नियोगार्हा । नियोगे वा कथं तस्याः रावणभयाद्गूढावस्थानं । उच्यते । विभीषणावस्थानकाले सीतायोगक्षेमपरामर्शायान्तरङ्गभूता सरमा नियुक्ता । तन्निर्गमनादिदानीमन्तरङ्गवार्ताश्रवणे भीतासीदिति न विरोधः । नियोगश्च दासीमुखेन । अदर्शनं च स्नुषात्वादिति बोध्यं । अन्येयं सरमेत्येके ॥ ७ ॥ मे मया । यत्कृते यन्निमित्तं । अभिनिष्क्रम्य बहिर्निर्गम्य ॥ ८ ॥ मा भूदस्मदवगमः उपपत्तिश्च तत्र नास्तीत्याह—न शक्यमिति ॥ सौप्तिकं सुप्तौ मरणं । न केवलमशक्यत्वं रामस्य पुरुषधौरेय-

---

मायाः " रक्षन्तीरावणादिष्टा" इतिसीतारक्षणेरावणनियोगःप्रतीयते । उपरि "सखीस्नेहेनतद्धीरुमयासर्वंप्रतिश्रुतम् । लीनयागहने शून्येभयमुत्सृज्यरावणात्" इतिरावणभयाद्गूढावस्थानेनरावणोक्तवाक्यश्रवणंचप्रतीयते । विभीषणभार्यायारावणेननियोगोनुचितइवप्रतिभाति । रावणनियुक्तत्वेतद्भयाद्गूढावस्थानमनुपपन्नमितिप्रतीयते । अत्रपरिहारोविद्वद्भिश्चिन्तनीयः ॥ **ती०** ननुविभीषणभार्यायाःसरमायाःकथंसख्यमाश्वासनंवातत्राह—साहीति । हियस्माद्रावणादिष्टा सीतांरक्षन्तीसा आत्मनारक्ष्यमाणयासीतया मित्रं सखीकृता । " ज्येष्ठाकन्याऽनलानामविभीषणसुताकपे । तयामेदमाख्यातंमात्राप्रहितयास्वयं " इतिसुन्दरकाण्डेसीतयोक्तत्वादत्रापिसानुक्रोशेत्युक्तत्वाच्चविभीषणभार्यायाःसरमायाःसीतायाःसखीत्वंतत्समाश्वासनंचयुक्तमितिभावः ॥ ३ ॥ **स०** ननु विभीषणभार्यात्वेनत्वंतत्त्वतस्तेननविश्वसनीयेति कथंसंकथनंश्रुतंभवत्येत्यतआह—लीनयेति । शून्ये जनैः । गहने इतरापरिज्ञातस्थाने । रावणाद्भयमुत्सृज्य क्रूरोपिरावणोरमणरिपुरपियोषितःकिंकरोतीतिभीतिंत्यक्त्वा । निलायनंतुभावत्वाद्रावणस्यलज्जयेति भावः । रावणादिष्टेतिपूर्वोक्तस्वारस्यंचेत्थंचेद्भविष्यति ॥ **ति०** ननुविभीषणस्यविरुद्धकोटौगतत्वात्तत्पत्न्यात्वयारावणसंनिधौस्थित्वा कथंश्रुतंतत्राह—लीनयेति । गहने अशोकवनमध्ये । पूर्वंमस्यमायाकृतवृत्तान्तंश्रुतवत्या त्वद्रक्षणरूपकार्यार्थमागत्यलीनया गुप्तंस्थितया । रावणाद्भयमुत्सृज्यस्थितया सर्वंश्रुतं । नहिमेरावणाद्भयं तेनैवतवरक्षणेनियुक्तत्वात्तज्जातित्वाच्च । ततोऽन्यैवैषासरमेत्यन्ये ॥ ७ ॥ **स०** ससंघातः ससमूहः । निष्क्रान्तः प्रहस्ताहूतः । यत्कृते यदर्थं । तत्सर्वं अभिनिष्क्रम्य बहिर्गत्वा । मे मयाविदितं ॥८॥ **ति०** सौप्तिकं सुप्तिकालयुद्धं । तत्रहेतुः—विदितात्मनः । जितनिद्रालस्यादिदोषचित्तस्येत्यर्थः । पुरुषव्याघ्रे सर्वातिशायिशौर्यवति । अतएवतस्मिन्वधोनोपपद्यते ॥ **स०** अल्पनावश्यकत्वादनन्तरंवदिष्यामीत्यादौधववार्तांजीवातुंसीतायावदिष्यन्तीततोप्यादौमोहमपहन्तीत्याह—नशक्यमिति । सौप्तिकं स्वापसमयव्यापारः । तत्रनिमित्तमाह—**विजितेति** । विजितात्मनः जित-

[पा०] १ ङ. च. छ. झ. ञ. ट. सखीसीतां. ख. सखींसीतां. २ ख.—ट. पांसुषु. ३ ङ. झ. ट. सुव्रतां. ४ झ.—ठ. गहने. ५ ङ. झ. ट. मेरावणाद्भयं. ६ क. सुसंभ्रान्तश्च. ठ. ससंघातश्च. ७ ङ. झ. ट. तत्रमे. ८ झ. ठ. विजितात्मनः.

नं त्वेव वानरा हन्तुं शक्याः पादपयोधिनः ॥ सुरा देवर्षभेणेव रामेण हि सुरक्षिताः ॥ १० ॥
दीर्घवृत्तभुजः श्रीमान्महोरस्कः प्रतापवान् ॥ धन्वी संहननोपेतो धर्मात्मा भुवि विश्रुतः ॥ ११ ॥
विक्रान्तो रक्षिता नित्यमात्मनश्च परस्य च ॥ लक्ष्मणेन सह भ्रात्रा कुलीनो नयशास्त्रवित् ॥ १२ ॥
हन्ता परबलौघानामचिन्त्यबलपौरुषः ॥ न हतो राघवः श्रीमान्सीते शत्रुनिबर्हणः ॥ १३ ॥
अयुक्तबुद्धिकृत्येन सर्वभूतविरोधिना ॥ इयं प्रयुक्ता रौद्रेण माया मायाविदा त्वयि ॥ १४ ॥
शोकस्ते विगतः सर्वः कल्याणं त्वामुपस्थितम् ॥ ध्रुवं त्वां भजते लक्ष्मीः प्रियं प्रीतिकरं शृणु ॥१५॥
उत्तीर्य सागरं रामः सह वानरसेनया ॥ सन्निविष्टः समुद्रस्य तीरमासाद्य दक्षिणम् ॥ १६ ॥
दृष्टो मे परिपूर्णार्थः काकुत्स्थः सहलक्ष्मणः ॥ स हि तैः सागरान्तस्थैर्बलैस्तिष्ठति रक्षितः ॥ १७ ॥
अनेन प्रेषिता ये च राक्षसा लघुविक्रमाः ॥ राघवस्तीर्ण इत्येव प्रवृत्तिस्तैरिहाहृता ॥ १८ ॥
सं तां श्रुत्वा विशालाक्षि प्रवृत्तिं राक्षसाधिपः ॥ एष मन्त्रयते सर्वैः सचिवैः सह रावणः ॥ १९ ॥
इति ब्रुवाणा सरमा राक्षसी सीतया सह ॥ सर्वोद्योगेन सैन्यानां शब्दं शुश्राव भैरवम् ॥ २० ॥
दण्डनिर्घातवादिन्याः श्रुत्वा भेर्या महास्वनम् ॥ उवाच सरमा सीतामिदं मधुरभाषिणी ॥ २१ ॥
सन्नाहजननी ह्येषा भैरवा भीरु भेरिका ॥ भेरीनादं च गम्भीरं शृणु तोयदनिस्वनम् ॥ २२ ॥
कल्प्यन्ते मत्तमातङ्गा युज्यन्ते रथवाजिनः ॥ हृष्यन्ते तुरगारूढाः प्रासहस्ताः सहस्रशः ॥ २३ ॥

तया वधयोग्यतापि नास्तीत्याह—वधश्चेति ॥ ९ ॥ एवं वानरवधोप्यनुपपन्न इत्याह—न त्विति ॥ स्वबलाद्रामबलाच्च न वानरा हन्तुं शक्या इत्यर्थः ॥१०॥ न केवलं बलादिना सौभाग्यलक्षणादिभिरप्यतदर्हो राम इत्याह श्लोकत्रयेण—दीर्घेत्यादिना ॥ श्रीमान् कान्तिमान् । प्रतापवान् तेजिष्ठः । संहननोपेतः शोभनावयवसंस्थानः । लक्ष्मणेन सह रक्षितेत्यन्वयः ॥ ११—१२ ॥ श्रीमान् विजयश्रीमान् ॥ १३ ॥ कथं तर्हि शिरःप्रभृतिप्रापणं तत्राह—अयुक्तेति ॥ अयुक्तबुद्धिकृत्येन अनर्हबुद्धिव्यापारेण । मायाशिरोदर्शनबुद्धेस्तत्कृत्यस्य चात्मलाघवहेतुत्वादितिभावः ॥ १४ ॥ भजते भविष्यत्सामीप्ये लट्प्रयोगः । प्रियं प्रियवचनं ॥ १५ ॥ सन्निविष्टः स्थितः ॥ १६ ॥ सागरान्तस्थैः सागरतीरस्थैः ॥ १७ ॥ तीर्णः तीर्णवान् । प्रवृत्तिर्वार्ता ॥ १८ ॥ एष मन्त्रयत इति सान्निध्यद्योतनाय ॥ १९ ॥ सीतया सह शुश्रावेत्यन्वयः । सर्वोद्योगेन सर्वप्रयत्नेन । जनितमिति शेषः । शब्दं सिंहनादं ॥२०॥ दण्डनिर्घातवादिन्याः दण्डाहत्या शब्दायमानायाः ॥ २१ ॥ भेरिका ताड्यत इति शेषः । तोयदनिस्वनं तोयदनिस्वनतुल्यं ॥ २२ ॥ कल्प्यन्ते आकल्प्यन्ते । अलङ्क्रियन्त इत्यर्थः । युज्यन्ते रथवाजिनः । रथेषु वाजिनो युज्यन्त इत्यर्थः । रथेत्यविभक्तिकनिर्देशो वा । हृष्यन्ते हर्षव्यापारं कुर्वन्ति

मनस्कस्य । विदितात्मनइतिपाठे विदितः अयंफलिष्यतीतिज्ञातः आत्मा यत्नोयेनसतथेत्यर्थः । पुरुषव्याघ्रे जाग्रति वधश्च स्वप्नो वा जाग्रत्कालिकोवानोपपद्यते ॥ ९ ॥ स० देवर्षभेन नारायणेनसुराइव वानराःरामेण हि यतःसुरक्षिताः अतोनहन्तुंशक्याइत्यन्वयः ॥ १० ॥ स० प्रियं प्रियवचनं । तेलांभजते । सर्वेपिप्रियवक्तारोभविष्यन्तीतिभावः ॥ ते तवविषये । प्रियंममवचनंशृणु । त्वांध्रुवंभजते धवइतिशेषः । लक्ष्मीश्चभजते ॥ हेभवति तेप्रियवचनमितिनागोजिभट्टव्याख्यानंमूलकोशेषुपश्चषेषुभवतिपाठादर्शनात् । " श्रुवःशृच " इतिश्रादेशे शृणुशब्दोलघ्वादिरितिभवतीकारगौरवानापादकइतिचासमञ्जसम् ॥ १५ ॥ ति० दृष्टोमे मयादृष्टइत्यर्थः । स्वगृहवत्यूर्ध्वंगृहमारुह्येतिशेषः । खेचरीलाद्बहिर्निर्गत्येतिशेषोवा । सागरान्तस्थैः सागरतीरस्थैः । स्वमहिम्नारक्षितस्तिष्ठति ॥ स० परिपूर्णार्थः अलक्ष्यीकृतरक्षोध्यक्षत्वात् । सहितैः मिलितैः सक्षेमैर्वा । तिष्ठतियः सदृष्टः ॥ १७ ॥ स० यदर्थंरावणःप्रहस्ताहूतोगतः तन्मेविदितमित्युक्तं तदिदानीमावेदयति—अनेनेति । प्रवृत्तिः वार्ता ॥ १८ ॥

[पा०] १ घ. नहितेवानराः. २ क.—घ. च. छ. ञ. कुशलीनय. ३ ग. ङ.—ञ. मायाविना. ४ ङ. च. झ. ञ. ट. प्रियंतेभवतिशृणु. ५ ख. उत्तीर्यराघवःश्रीमान्सागरंसहसेनया. ६ ख. घोराराक्षसाः. ७ घ. बलविक्रमाः. ८ घ. एतांश्रुत्वा. ९ घ. भीमनादिनी.

तत्रतत्र च सन्नद्धाः संपतन्ति पदातयः ॥ आपूर्यन्ते राजमार्गाः सैन्यैरद्भुतदर्शनैः ॥
वेगवद्भिर्नदद्भिश्च तोयौघैरिव सागरः ॥ २४ ॥
शस्त्राणां च प्रसन्नानां चर्मणां वर्मणां तथा ॥ रथवाजिगजानां च भूषितानां च रक्षसाम् ॥ २५ ॥
[संभ्रमो रक्षसामेष हृषितानां तरस्विनाम् ॥] प्रभां विसृजतां पश्य नानावर्णां समुत्थिताम् ॥
वनं निर्दहतो घर्मे यथा रूपं विभावसोः ॥ २६ ॥
घण्टानां शृणु निर्घोषं रथानां शृणु निःस्वनम् ॥ हयानां हेषमाणानां शृणु तूर्यध्वनिं यथा ॥२७॥
उद्यतायुधहस्तानां राक्षसेन्द्रानुयायिनाम् ॥ संभ्रमो रक्षसामेष तुमुलो रोमहर्षणः ॥ २८ ॥
श्रीस्त्वां भजति शोकघ्नी रक्षसां भयमागतम् ॥ २९ ॥
रामः कमलपत्राक्षोऽदैत्यानामिव वासवः ॥ विनिर्जित्य जितक्रोधस्त्वामचिन्त्यपराक्रमः ॥
रावणं समरे हत्वा भर्ता त्वाधिगमिष्यति ॥ ३० ॥
विक्रमिष्यति रक्षस्सु भर्ता ते सहलक्ष्मणः ॥ यथा शत्रुषु शत्रुघ्नो विष्णुना सह वासवः ॥ ३१ ॥
आगतस्य हि रामस्य क्षिप्रमङ्कगतां सतीम् ॥ अहं द्रक्ष्यामि सिद्धार्थां त्वां शत्रौ विनिपातिते ॥३२॥
अश्रूण्यानन्दजानि त्वं वर्तयिष्यसि शोभने ॥ समागम्य परिष्वज्य तस्योरसि महोरसः ॥ ३३ ॥

॥ २३ ॥ तत्रतत्रेति सार्धश्लोकः ॥ संपतन्ति सङ्घीभवन्ति । सैन्यैः सेनासमवेतरथगजतुरगपदातिभिः । अद्भुतदर्शनैः अलंकारविशेषैरिति शेषः । वेगवद्भिर्नदद्भिश्चेति पाठः ॥ २४ ॥ शस्त्राणामित्यादिश्लोकद्वयं ॥ प्रसन्नानां निर्मलानां । चर्मणां फलकानां । भूषितानां अतएव प्रभां विसृजतां उत्पादयतां । उत्थितां ऊर्ध्वं प्रसृतां । रूपं तेजः । नानौषधीवनदाहेन नानावर्णत्वं सिद्धं । पश्येत्यत्रापि प्रभैव कर्म । यद्वा विसृज तामिति च्छेदः । तां प्रसिद्धां प्रभां पश्य । विसृज शोकमिति शेषः ॥२५–२६॥ घण्टानां गजघण्टानां । रथानां निस्स्वनं । नेमिसंघट्टनजं । हेषं आणानामिति च्छेदः । आङ्पूर्वात् " अण शब्दे " इत्यस्माद्धातोः पचाद्यच् । आणानां शब्दायमानानां । हेषं शब्दं । स्त्रीलिङ्गाभावः आर्षः । निस्वनमिति वा अनुवर्त्यते । तूर्यध्वनिंयथा तूर्यध्वनिमिव ॥ २७ ॥ संभ्रमः सन्नाहः । तुमुलः सान्द्रः । दृश्यत इति शेषः ॥२८॥ ध्रुवं त्वां भजते लक्ष्मीरित्युपक्रान्तमुपसंहरति—श्रीरिति ॥ शोकघ्नी श्रीः विजयलक्ष्मीः भजति । भविष्यत्सामीप्ये लट्प्रयोगः॥२९॥राम इत्यादिसार्धश्लोक एकान्वयः । कमलपत्राक्षः । "श्रीर्न त्यजति रक्ताक्षं" इति सामुद्रिकोक्तरीत्याऽवश्यं श्रीरुपतिष्ठति । तत्रापि श्रेष्ठे तत्रापि चक्षुषी इति नयनसौभाग्यलक्षणमन्यभिचारीति भावः । न केवलं सौभाग्यलक्षणेन श्रीः प्रभावादपीत्याह—अदैत्यानामिति।अदैत्यानां देवानां मध्ये। वासव इव स्थितः । सर्वश्रेष्ठ इत्यर्थः । अचिन्त्यपराक्रमः एकेन शरेण मरुकान्तारवासिसकलदस्युवारणादप्रमेयपराक्रमः । तर्हि तादृशः किमिदानीं विलम्बत इत्यत्राह—जितक्रोध इति । रावणस्याभिमुखमनागमनात् क्रोधावकाशमलभमानास्तिष्ठतीति भावः। दैत्यानामिति द्वितीयार्थे षष्ठी वा । दैत्यान् वासव इव रावणं समरे हत्वा विनिर्जित्य शत्रुगृहादपनीय । त्वामभिगमिष्यतीति योजना ॥ ३० ॥ विष्णुना उपेन्द्रेण ॥ ३१ ॥ एवं शंसन्त्यास्ते किं फलं तत्राह—आगतस्येति ॥ चिरप्रवासादागतस्य दयितादर्शने कोपि विकासो भवेत्स मया द्रष्टव्य इति भावः ॥ ३२ ॥ महोरस इत्यत्र समासान्तविधेरनित्यत्वात्

ति० " वनंनिर्दहतोधर्मे " इत्यादि " राक्षसेन्द्रानुयायिनां " इत्यन्तंश्लोकद्वयंप्रक्षिप्तमितिकतकः ॥ २६ ॥ रामानु० दैत्यानामित्यत्रापि समरशब्दोयोजनीयः ॥ ३० ॥

[पा०] १ क. ग. ङ. च. छ. झ. ञ. सहस्रशः. २ ज. चर्मिणांवर्मिणां. ३ च. छ. हृषितानांच. ङ. झ. ञ. ट. राक्षसेन्द्रानुयायिनां. ४ इदमर्धं ङ.—ट. पाठेषुदृश्यते. ५ घ. च. छ. प्रभामिव. ६ ङ. च. ट. नेमिनिस्स्वनं. ७ ङ. च. छ. झ. ट. तुमुलंरोमहर्षणं. ८ ख. वैदेहि. ९ ख. घ. ङ. च.—झ. ञ. ट. अवजित्य. १० क.—ट. स्तमचिन्त्य. ११ ख. हन्ता. १२ ङ. च. छ. ञ. अश्राण्यानन्द. १३ ख. ग. ङ.—ट. जानकि. १४ क.—ट. परिष्वक्ता.

अचिरान्मोक्ष्यते सीते देवि ते जघनं गताम् ॥ धृतामेतां बहून्मासान्वेणीं रामो महाबलः ॥ ३४ ॥
तस्य दृष्ट्वा मुखं देवि पूर्णचन्द्रमिवोदितम् ॥ मोक्ष्यसे शोकजं वारि निर्मोकमिव पन्नगी ॥ ३५ ॥
रावणं समरे हत्वा नचिरादेव मैथिलि ॥ त्वया समग्रः प्रियया सुखार्हो लप्स्यते सुखम् ॥ ३६ ॥
समागता त्वं वीर्येण मोदिष्यसि महात्मना ॥ सुवर्षेण समायुक्ता यथा सस्येन मेदिनी ॥ ३७ ॥
गिरिवरमभितोऽनुवर्तमानो हय इव मण्डलमाशु यः करोति ॥
तमिह शरणमभ्युपेहि देवं दिवसकरं प्रभवो ह्ययं प्रजानाम् ॥ ३८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

चतुस्त्रिंशः सर्गः ॥ ३४ ॥

सरमयासीतांप्रति रामे स्वेनसंदेशप्रापणप्रार्थने सीतयातस्यानौचित्यबुद्ध्या स्वविषयेरावणाध्यवसायावगतयेतत्प्रेषणं ॥ १ ॥ रावणाध्यवसायाधिगमेनपुनरागतयासरमया सीतांप्रति रावणमात्राऽविन्ध्यनाम्नामस्त्रिणाचतंप्रतिबहुधारामायसीताप्रत्यर्पणचोदनेपि तस्यतदनर्पणेदृढाध्यवसायनिवेदनम् ॥ २ ॥ तथा रामेण रावणहननपूर्वकमयोध्यांप्रतितदानयननिवेदने तत्रोपश्रुतितयावानरसेनासंनाहभेरीशङ्खरवप्रादुर्भावः ॥ ३ ॥

अथ तां जातसंतापां तेन वाक्येन मोहिताम् ॥ सरमा ह्लादयामास पृथिवीं द्यौरिवाम्भसा ॥ १ ॥
ततस्तस्या हितं सख्याश्चिकीर्षन्ती सखीवचः ॥ उवाच काले कालज्ञा स्मितपूर्वाभिभाषिणी ॥ २ ॥
उत्सहेयमहं गत्वा त्वद्वाक्यमसितेक्षणे ॥ निवेद्य कुशलं रामे प्रतिच्छन्ना निवर्तितुम् ॥ ३ ॥

कबभावः । समागम्य परिष्वज्य स्थितस्य तस्योरसि अश्रूणि वर्तयिष्यसीति योजना ॥ ३३ ॥ जघनं गतां नितम्बावलम्बिनीं । बहून्मासान् धृतां बहुमासैर्धृतां । अत्यन्तसंयोगेद्वितीया । रामवियोगात्प्रभृति बद्धामेतां वेणीं । मोक्ष्यते मोक्षयिष्यति । आर्षमात्मनेपदं ॥ ३४ ॥ निर्मोकं त्वचं । निर्मोकदृष्टान्तेन शोकाश्रुणो निःशेषनिवृत्तिरुच्यते । अश्रुमूलं शोकं त्यक्ष्यसीति भावः ॥ ३५ ॥ समग्रः संपूर्णमनोरथः ॥ ३६ ॥ सस्येन समायुक्ता मेदिनी सुवर्षेण यथा तथा महात्मना रामेण समायुक्ता त्वं वीर्येण तच्छौर्येण । मोदिष्यसि ॥ ३७ ॥ अथानिष्टनिवारणाय इष्टप्राप्तये च सूर्यनमस्कारं विदधाति—गिरिवरमिति ॥ यः देवः । गिरिवरं मेरुं । अभितः परितः । "अभितः परितः—" इत्यादिना द्वितीया । अनुवर्तमानः आनुकूल्येन चरन् । प्रादक्षिण्येन चरन्नित्यर्थः । हयोश्च इव मण्डलं मण्डलगतिं आशु त्रिंशन्मुहूर्तेनैव करोति । देवं द्योतमानं । दिवसकरं शरणं रक्षणं । अभ्युपेहि गच्छ । वरणीयत्वे हेतुमाह—प्रभव इति । अयं दिवसकरः । प्रजानां देवतिर्यङ्मनुष्यस्थावराणां । प्रभवः कारणं । हिः प्रसिद्धौ । वर्षादिद्वारा जगदाप्यायक इत्यर्थः । " अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" इत्युक्तेः ॥ न पुनरत्र जगत्कारणत्वोक्तिः । अश्वोपमानेन स्वातिरिक्तपुरुषप्रेर्यत्वाभिधानात् । " भीषास्माद्वातः पवते, भीषोदेति सूर्यः " इति श्रुतेः ॥ ३८ ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

अथ सरमया रावणाशयपरिज्ञानं चतुस्त्रिंशे—अथ तामित्यादि ॥ अथेति प्रथमश्लोकेन पूर्वसर्गोक्तानुवादः । तेन वाक्येन ह्लादयामासेत्यन्वयः । यद्वा तेन वाक्येन रावणवाक्येन ॥ १ ॥ सख्याः सीतायाः । सखी सरमा ॥ २ ॥ कुशलं कुशलप्रतिपादकं । त्वद्वा-

ति० कुलदैवतं शरणमभ्युपेहि । हि यतः । अयंप्रजानां सुखदुःखहान्योरितिशेषः । प्रभवः ॥३८॥ इतित्रयस्त्रिंशःसर्गः ॥३३॥

[पा०] १ ङ.—ट. धृतामेकां. क. धृतामेवं. २ ङ. च. छ. झ. ञ. ट. सभाजितालंरामेण. ३ क. ख. ङ. झ.—ट. मभितोविवर्तमानो. ४ क. ग. ङ.—ट. देवि. ५ क. घ. ङ. झ. ट. महींदग्धामिवांभसा.

न हि मे क्रममाणाया निरालम्बे विहायसि ॥ समर्थो गतिमन्वेतुं पवनो गरुडोपि वा ॥ ४ ॥
एवं ब्रुवाणां तां सीता सरमां पुनरब्रवीत् ॥ मधुरं श्लक्ष्णया वाचा पूर्वं शोकाभिपन्नया ॥ ५ ॥
समर्था गगनं गन्तुमपि वा त्वं रसातलम् ॥ अवगच्छाम्यकर्तव्यं कर्तव्यं ते मदन्तरे ॥ ६ ॥
मत्प्रियं यदि कर्तव्यं यदि बुद्धिः स्थिरा तव ॥ ज्ञातुमिच्छामि तं गत्वा किं करोतीति रावणः ॥७॥
स हि मायाबलः क्रूरो रावणः शत्रुरावणः ॥ मां मोहयति दुष्टात्मा पीतमात्रेव वारुणी ॥ ८ ॥
तर्जापयति मां नित्यं भर्त्सापयति चासकृत् ॥ राक्षसीभिः सुघोराभिर्या मां रक्षन्ति नित्यशः ॥९॥
उद्विग्ना शङ्किता चास्मि न स्वस्थं च मनो मम ॥ तद्भयाच्चाहमुद्विग्ना अशोकवनिकां गता ॥ १० ॥
यदि नाम कथा तस्य निश्चितं वाऽपि यद्भवेत् ॥ निवेदयेथाः सर्वं तत्परो मे स्यादनुग्रहः ॥ ११ ॥
सा त्वेवं ब्रुवतीं सीतां सरमा वल्गुभाषिणी ॥ उवाच वदनं तस्याः स्पृशन्ती बाष्पविक्लबम् ॥१२॥

क्यमित्यन्वयः । निवर्तितुमुत्सहेयं समर्थेत्यर्थः ॥ ३॥ बहुदूरं कथं गन्तुमर्हसीत्यत्राह—न हीति ॥ क्रममाणायाः गच्छन्त्याः ॥ ४ ॥ मधुरं मधुरार्थकं । श्लक्ष्णयेति वाङ्माधुर्योक्तिः । पूर्वं शोकाभिपन्नया संप्रति हृष्टयेत्यर्थः ॥ ५ ॥ संदेशमाहरिष्यामीति वदन्तीं सरमां प्रति न गन्तव्यमित्युक्ते सख्यहानिः, रामं प्रति प्रेषणं तत्तस्य सदृशं भवेदिति स्थितायाः सीताया न युक्तं अतो व्याजेन निपुणं परिहरति—समर्थेति ॥ मदन्तरे मद्विषये । अन्यैरकर्तव्यं कर्तुमशक्यं कार्यं त्वया कर्तव्यं कर्तुं शक्यमित्यवगच्छामि । यद्वा मद्विषये ते कर्तव्यं अवश्यकरणीयं जानामीत्यर्थः ॥ ६ ॥ रावणं गत्वा स किं करोतीति ज्ञातुमिच्छामि । त्वत्कर्तृकं रावणज्ञानमिच्छामीत्यर्थः ॥७॥ तस्य ज्ञानस्य किं प्रयोजनमित्यत्राह—स हीति ॥ पीतमात्रा सद्यः पीता । वारुणी मद्यं ॥ ८ ॥ तर्जापयति तर्जनंकारयति । भर्त्सापयति भर्त्सनं कारयति । आत्वपुगागमावार्षौ । या राक्षस्यो मां रक्षन्ति ताभिस्तर्जापयतीति संबन्धः । नासाग्रे अङ्गुलिन्यासनयनभ्रामणदन्तदर्शनप्रभृतिमुखचेष्टाभिर्भीजननं तर्जनं । हनिष्यति दहिष्यतीत्यादि वाचा भीजननं भर्त्सनं ॥ ९ ॥ कुत उद्विग्नेत्यत्राह—तद्भयाच्चेति । कुतः शङ्कितेत्यत्राह—अशोकवनिकां गतेति ॥ १० ॥ तस्य रावणस्य । यदि नाम कथा यदि वार्तास्ति । यच्च तस्य निश्चितं अध्यवसाय इति यावत् । तत्सर्वं निवेदयेथाः । ततश्च मे परोनुग्रहः उपकारः । कृतःस्यात् । याहिनामेतिपाठः सम्यक् ॥ ११ ॥ वल्गु सुन्दरं यथा तथा भाषितुं शीलमस्या अस्तीति वल्गुभाषिणी । बाष्पविक्लवं बाष्पव्याकुलं ।

ति० पूर्वशोकाभिपन्नया आश्वासनात्पूर्वजातेनशोकेनेषद्युक्तया ॥५॥ ति० अथसीताशूर्पणखायाइवास्याअपिरामसमीपगमनमनुचितमितिविचार्यतत्सामर्थ्यश्लाघापूर्वतामुचितकृत्येनियोजयति—**समर्थेति** । स० हेमदन्तरे मयिअन्तरंअन्तरात्मा मनः प्राणोवायस्याः सातत्संबुद्धिः ॥ ६ ॥ स० यच्चासकृत् आसः उपवेशनं तंकरोतीतिकृत् । सदामत्समीपवर्ति रक्षः । राक्षसीभिः मध्येमध्येस्वप्रेषिताभिः । भर्त्सापयति एतावत्कालेनापिसीतानमद्वशंप्रापितात्वच्छिक्षयावाअनुनयेनवेतिपरुषभाषणेनतर्जयति । तत्रापिसुघोराभीराक्षसीभिः साक्षान्मामपितर्जापयति भर्त्सयति । योमांरक्षति वनावनौस्थापयित्वारक्षति सरावणःकिंकरोति । यद्वा योमामसकृद्रक्षति तंजनंतर्जापयति । पूर्ववदुवैरितं । अवाचिकीभीषिकातर्जनं वाचिकीतुसाभर्त्सनमितिनागोजिभट्टः । तत्र तद्बुद्धिरेवशरणं । "भर्त्सतर्ज संतर्जने" इत्यमरव्याख्यानेभानुदीक्षितः । तर्हिदुर्जनतर्जनेनेवानशनेनपीडितायास्तवकिमाधारेणजीवधारणमित्यतोवाह—नित्यशइति । सदासुखोयस्त्वदुक्तः सरामएवमांरक्षतीतिवा । पुगागमस्तु " बहुलमेतन्निदर्शनं " अदन्तधातुनिदर्शनमित्यर्थः । बाहुलकादन्येपिबोध्याः । तद्यथा अपपर्णत् । विष्कदर्शनेइत्यादि इतिकौमुद्युक्तेःशाकटायनरीत्यासंभवति ॥ ९ ॥ स० याऽहंप्राक्नोद्विग्ना नशङ्किताच कस्माच्चिदपि । ममनः स्वस्थं । तादृश्यप्यहं तद्भयात् रावणकर्तृकभीतिहेतोः । अशोकवनिकांगता प्राप्ता । अतश्चोद्विग्नेत्यन्वयः । यद्वा त्वत्सान्त्वनतःपूर्वंतद्भयादशोकवनिकांगतोद्विग्ना । रामक्षेमश्रवणसमनन्तरंतु इतरत्पूर्ववत् । तथापि सकपटीतिपुनर्वार्ताश्रवणेच्छेतिभावः ॥ १० ॥ स० तस्य रावणस्य । कथा युद्धसंनाहकथा । मद्विषयनिग्रहानुग्रहकथावा । तस्यनिश्चितंवापियद्भवेत्तत्सर्वंनिवेदयेथाः ज्ञात्वा मामावेदयेथाः । तन्निवेदनंमेमदुपरिवरोनु-

[पा०] १ क. ङ.—ट. सरमामिदमब्रवीत्. २ झ. पूर्वशोक. ३ घ. गन्तुमसि. ४ ङ. झ. अवगच्छाद्य. ५ घ. मिच्छाम्यहं. ६ झ. ञ. ठ. योमांरक्षति. ७ ङ. ज.—ट. साप्येवं. ८ ङ. च. छ. झ. ञ. ट. मृदुभाषिणी.

एष ते यद्यभिप्रायस्तदा गच्छामि जानकि ॥ गृह्य शत्रोरभिप्रायमुपावृत्तां च पश्य माम् ॥ १३ ॥
एवमुक्त्वा ततो गत्वा समीपं तस्य रक्षसः ॥ शुश्राव कथितं तस्य रावणस्य समन्त्रिणः ॥ १४ ॥
सा श्रुत्वा निश्चयं तस्य निश्चयज्ञा दुरात्मनः ॥ पुनरेवागमत्क्षिप्रमशोकवनिकां तदा ॥ १५ ॥
सा प्रविष्टा पुनस्तत्र ददर्श जनकात्मजाम् ॥ प्रतीक्षमाणां स्वामेव भ्रष्टपद्मामिव श्रियम् ॥ १६ ॥
तां तु सीता पुनः प्राप्तां सरमां वेल्गुभाषिणीम् ॥ परिष्वज्य च सुस्निग्धं ददौ च स्वयमासनम् ॥१७॥
इहासीना सुखं सर्वमाख्याहि मम तत्त्वतः ॥ क्रूरस्य निश्चयं तस्य रावणस्य दुरात्मनः ॥ १८ ॥
एवमुक्ता तु सरमा सीतया वेपमानया ॥ कथितं सर्वमाचष्ट रावणस्य समन्त्रिणः ॥ १९ ॥
जनन्या राक्षसेन्द्रो वै त्वन्मोक्षार्थं बृहद्वचः ॥ अविद्धेन च वैदेहि मन्त्रिवृद्धेन बोधितः ॥ २० ॥
दीयतामभिसत्कृत्य मनुजेन्द्राय मैथिली ॥ निदर्शनं ते पर्याप्तं जनस्थाने यदद्भुतम् ॥ २१ ॥
लङ्घनं च समुद्रस्य दर्शनं च हनूमतः ॥ वधं च रक्षसां युद्धे कः कुर्यान्मानुषो भुवि ॥ २२ ॥
एवं स मन्त्रिवृद्धैश्चाविद्धेन बहु भाषितः ॥ न त्वामुत्सहते मोक्तुमर्थमर्थपरो यथा ॥ २३ ॥
नोत्सहत्यमृतो मोक्तुं युद्धे त्वामिति मैथिलि ॥ सामात्यस्य नृशंसस्य निश्चयो ह्येष वर्तते ॥ २४ ॥

वदनं स्पृशन्ती परिमृजन्ती ॥ १२ ॥ तदा गच्छामीतिपाठः । गृह्य ज्ञात्वा । उपावृत्तां च पुनरागतामेव । पश्य तत्र सन्देहो नास्तीत्यर्थः ॥ १३—१५ ॥ स्वामेव आत्मानमेव । सरमामित्यर्थः । आत्मवाचिनः स्वशब्दस्य आबन्तत्वमार्षं । भ्रष्टपद्मां पद्मासनहीनामित्यर्थः ॥ १६ ॥ सुस्निग्धं स्नेहयुक्तं यथा तथा ॥ १७ ॥ सुखमासीनेत्यन्वयः ॥ १८ ॥ वेपमानया किंवा भयं वक्ष्यतीति कम्पमानया ॥ १९ ॥ जनन्या कैकसीनाम्न्या । अविद्धेन अविद्धाख्येन मन्त्रिवृद्धेनच । राक्षसेन्द्रस्त्वन्मोक्षार्थं बृहद्वचनं बोधितः ॥ २० ॥ तदेव वचनं दर्शयति—दीयतामिति ॥ जनस्थाने यदद्भुतं खरवधादिकं कृतं तदेव पर्याप्तं प्रमाणान्तरनिरपेक्षं । निदर्शनं दृष्टान्तः । करिष्यमाणस्य रामपराक्रमस्येति शेषः ॥ २१ ॥ तिष्ठतु रामः तद्भृत्यो हनुमानेव सर्वान्राक्षसाञ्जेतुं समर्थ इत्याशयेन तत्पराक्रमं वर्णयति—लङ्घनमिति ॥ दर्शनं सीतादर्शनं । मानुषः मनुष्यसंबन्धी पुरुषः । कः कुर्यात् । " तस्येदं " इत्यण् । स्वदूतमुखेनानेककार्यकारी रामो देव एवेतिभावः ॥ २२ ॥ अविद्धेन तन्नाम्ना । मन्त्रिवृद्धैरिति पूजायां बहुवचनं । बह्विति क्रियाविशेषणं ॥ २३ ॥ हि यस्मात्सामात्यस्य एष निश्चयो वर्तते इति तस्मात् युद्धे अमृतः सन् त्वां मोक्तुं नोत्सहतीति । इतिहेतौ इति निश्चय इत्यन्वय इत्येके । इति मन्य इत्यपरे । इह मैथिलीति केषुचित्पाठः

ग्रहःस्यादितिशेषः ॥ ११ ॥ ति० उपावर्तामि परावृत्त्याऽऽगच्छामि ॥ १३ ॥ स० स्वामेव आत्मीयामागतिं । " आत्मीयायामिति । आत्मज्ञातिधनेषुतुस्त्रीत्वमेवनास्तीतिभावइति " मनोरमोक्तेरात्मवाचकत्वेस्वशब्दस्यस्त्रीलिङ्गत्वासंभवात् । स्वकायामित्यादिश्रीहर्षादिप्रयोगाणामात्मीयत्वसंज्ञात्वादिनानिर्वाहस्यतत्रैवोक्तेश्च । " अर्थान्तरेतुनस्त्री " इतिकौमुदीवाक्यंधृत्वाआत्मज्ञातिधनेष्वित्यर्थइतितत्त्वसुबोधिन्यभिधानाच्च । भ्रष्टपद्मां कमलंकन्दुकीकृत्यखेलनसमयेहस्तविच्युतलतादिलीननालीकां । श्रियं लक्ष्मीमिव ॥ १६ ॥ ति० वृहद्वचः सर्वथाहितत्वाद्वचसोबृहत्त्वं । तदुक्त्वा चोदितोबोधितः ॥ २० ॥ स० पूर्वंमन्त्रिवृद्धेनेत्येकवचनमुपलक्षकमपरमन्त्रिवृद्धानामितिज्ञापयितुमत्रमन्त्रिवृद्धैरितिबहुवचनं । तत्रैकवचनेन एकएवाविन्ध्यउपपादनप्रकारभेदादितिःपाशानित्यादिवद्बहुवचनमितिवा । तत्रमान्यत्वान्मातुःपुरस्करणं । तस्याआलोचनकार्यानियुक्तत्वेनात्रवृद्धमन्त्रिपुरस्करणमितिविवेकः ॥ २३ ॥ स० नोत्सहति । चुरादिरयमार्षीयःपरस्मैपदेवर्तते । " सएवायंनागःसहतिकलभेभ्यःपरिभवं " इत्यादिप्रयोगात् । सामात्यस्य अविन्ध्यादिव्यतिरिक्तमन्त्रिसहितस्य ॥ २४ ॥

[पा०] १ क.—ट. स्तस्माद्गच्छामि. २ ङ. झ. ट. मुपावर्तामिमैथिलि. ३ ग. कथितंतस्य. ४ ख. घ. च. छ. तामेव. ५ ङ. झ. ञ. ट. प्रियभाषिणीं. घ. प्रियवादिनीं. ६ ङ. झ. अतिस्निग्धेन. ७ ङ. झ. युधि. ८ ङ. च. छ. झ. ञ. ट. मन्त्रिवृद्धैश्चमात्राचबहुबोधितः.

तदेषा निश्चिता बुद्धिर्मृत्युलोभादुपस्थिता ॥ भयान्न शक्तस्त्वां मोक्तुमनिरस्तस्तु संयुगे ॥
राक्षसानां च सर्वेषामात्मनश्च वधेन हि ॥ २५ ॥
निहत्य रावणं संख्ये सर्वथा निशितैः शरैः ॥ प्रतिनेष्यति रामस्त्वामयोध्यामसितेक्षणे ॥ २६ ॥
एतस्मिन्नन्तरे शब्दो भेरीशङ्खसमाकुलः ॥ श्रुतो वानरसैन्यानां कम्पयन्धरणीतलम् ॥ २७ ॥
श्रुत्वा तु तद्वानरसैन्यशब्दं लङ्कागता राक्षसराजभृत्याः ॥
नष्टौजसो दैन्यपरीतचेष्टाः श्रेयो न पश्यन्ति नृपस्य दोषे ॥ २८ ॥
इत्यार्षे श्रीमद्रामायणभूषणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

पञ्चत्रिंशः सर्गः ॥ ३५ ॥

रामसेनारणभेरीशङ्खरवश्रवणखिन्नेनरावणेन सभायांमन्त्रिणःप्रति तदानीमपितेषामौदासीन्यस्यानौचित्योक्त्यागर्हणम् ॥ १ ॥ माल्यवतारावणंप्रति शास्त्रोदितनीतिप्रदर्शनपूर्वकं विपरसूचकापशकुननिवेदनेन रामेणसंधानविधानम् ॥ २ ॥

तेन शङ्खविमिश्रेण भेरीशब्देन राघवः ॥ उपयाति महाबाहू रामः परपुरंजयः ॥ १ ॥
तं निनादं निशम्याथ रावणो राक्षसेश्वरः ॥ मुहूर्तं ध्यानमास्थाय संचिवानभ्युदैक्षत ॥ २ ॥
अथ तान्सचिवांस्तत्र सर्वानाभाष्य रावणः ॥ सभां सन्नादयन्सर्वामित्युवाच महाबलः ॥
जगत्संतापनः क्रूरो गर्हयन्राक्षसेश्वरः ॥ ३ ॥

॥ २४ ॥ एतादृशाध्यवसायस्य किं निमित्तमित्यपेक्षायां मरणलोभ एवेत्याह—तदेषेत्यादिसार्धश्लोकः ॥ तत् तस्येत्यर्थः । राक्षसानामात्मनश्च वधेन अनिरस्तः अनिराकृतः । केवलभयात्त्वां मोक्तुं न शक्तः । नोत्सहत इत्यर्थः ॥ २५ ॥ कथं तर्हि मे निर्गमनमित्यत आह—निहत्येति ॥ एतत्सर्वं तव नेत्रसौभाग्यलक्षणादित्यभिप्रायेणाह—असितेक्षण इति ॥ २६ ॥ सरमोक्तस्योपश्रुतिनिमित्तं दर्शयन्नेव कथाशेषं दर्शयति—एतस्मिन्निति ॥ अत्र भेर्यादिशब्दो भेर्यादिशब्दपरः । वानरसैन्यानामपि भेर्यादिकमस्तीति किष्किन्धाकाण्डे दर्शितं ॥ २७ ॥ श्रुत्वेति ॥ श्रेयो न पश्यन्ति नृपस्य दोष इति । रावणस्य दोषे निमित्तभूते जीवनभूतमात्मनः श्रेयो न पश्यन्ति ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुस्त्रिंशः सर्गः ॥ ३४ ॥

अथ माल्यवदुपदेशः पञ्चत्रिंशे—तेनेति ॥ शङ्खविमिश्रेण शङ्खशब्दविमिश्रेण । उपयाति उपाययौ ॥ १ ॥ ध्यानमास्थाय किं मयेदानीं कर्तव्यमिति ध्यानं कृत्वेत्यर्थः ॥ २ ॥ आभाष्य संबोध्य । सभां आस्थानमण्डपं । उद्दीक्षणाशयमुद्घाटयति—गर्हयन्निति । गर्हयन्नुवाच गर्हात्मिकांवाचमुवाचेत्यर्थः

स० मृत्युलोभात् मृत्युदेव्याएषुविद्यमानाद्वार्ध्यात् ॥ २५ ॥ इतिचतुस्त्रिंशःसर्गः ॥ ३४ ॥

स० नादिना प्रतिध्वनिमता । नादिना नविद्यन्तेआदिनोराक्षसायेनतादृशेन । "आदिनोराक्षसाःप्रोक्ताः" इतिभागवतदशमस्कन्धतात्पर्यात् । परपुरं वैरिनगरं । महाबाहूरामउपयाति । जयश्च तमुपयाति । पुरमितिशेषोवा । एतत्पक्षे परपुरञ्जयइतिसमस्तं ॥ १ ॥ ति० अगर्हयन्नितिच्छेदः ॥ ३ ॥ स० अस्यरामस्य । सागरस्यतरणविक्रमं बलेनसहितंपौरुषंचेतियदुक्तवन्तः तच्छ्रुत-

[पा०] १ घ. ङ. ञ. तदेषांमुस्थिरा. क. ख. च. छ. ज. ञ. तदेषामुस्थिरा. २ ग. ट. दवस्थिता. ३ घ. ङ. ञ. ट. वैसर्वसैन्यानां. ४ ख.—ङ. ञ. ण. ट. तंवानरसैन्यनादं. ५ ङ. च. छ. ञ. ण. ट. हतौजसो. क. ख. घ. भ्रष्टौजसो. ६ घ. परीतचित्ताः. ७ ख. च. छ. ज. दोषैः. ग. ङ. ञ. ण. दोषात्. ८ ङ. ञ. ट. नादिना. ९ च. ण. सचिवानिदमब्रवीत्. १० क. ख. च. ण. गर्हयन्हितवादिनः.

तरणं [1]सागरस्यापि विक्रमं [2]बलसंचयम् ॥ यदुक्तवन्तो रामस्य भवन्तस्तन्मया श्रुतम् ॥ ४ ॥
भवतश्चाप्यहं वेद्मि युद्धे सत्यपराक्रमान् ॥ तूष्णीकानीक्षतोऽन्योन्यं विदित्वा रामविक्रमम् ॥ ५ ॥
ततस्तु सुमहाप्राज्ञो माल्यवान्नाम राक्षसः ॥ रावणस्य वचः श्रुत्वा [3]मातुः पैतामहोऽब्रवीत् ॥ ६ ॥
विद्यास्वभिविनीतो यो राजा राजन्नयानुगः ॥ स शास्ति चिरमैश्वर्यमरींश्च कुरुते वशे ॥ ७ ॥
संदधानो हि कालेन विगृह्णंश्चारिभिः सह ॥ [4]स्वपक्षवर्धनं कुर्वन्महदैश्वर्यमश्नुते ॥ ८ ॥
हीयमानेन कर्तव्यो राज्ञा संधिः समेन च ॥ न शत्रुमवमन्येत ज्यायान्कुर्वीत विग्रहम् ॥ ९ ॥
तन्मह्यं रोचते संधिः [5]सह रामेण रावण ॥ यदर्थमभियुक्ताः [6]स्म सीता तस्मै प्रदीयताम् ॥ १० ॥
यैस्य देवर्षयः सर्वे गन्धर्वाश्च जयैषिणः ॥ विरोधं मा गमस्तेन संधिस्ते तेन रोचताम् ॥ ११ ॥
असृजद्भगवान्पक्षौ द्वावेव हि पितामहः ॥ सुराणामसुराणां च धर्माधर्मौ तदाश्रयौ ॥ १२ ॥

॥ ३ ॥ गर्हाप्रकारमाह श्लोकद्वयेन—तरणमिति ॥ तूष्णीकान् तूष्णींशीलान् । " शीले को मलोपश्च " इति कप्रत्ययोमलोपश्च । " तूष्णींशीलस्तु तूष्णीकः" इत्यमरः । निरुत्साहानित्यर्थः ॥ ४—५ ॥ पितामहस्य पुत्रः पैतामहः पितृव्य इत्यर्थः । कैकसी सुमालिपुत्रीत्युत्तररामायणेभिधानान्माल्यवतस्तद्भ्रातृत्वाच्च पितामहशब्दस्य नियतसापेक्षत्वान्नासामर्थ्यदोषः । पितेत्यर्थइत्येके । वृद्धो मातामहोऽब्रवीदिति क्वचित्पाठः ॥ ६ ॥ नीतिमार्गपर्यालोचनायां बलवता रामेण संधिः करणीय इत्यभिप्रायेण प्रथमं नयस्य श्रेयोहेतुत्वं दर्शयति—विद्येति ॥ विद्यासु आन्वीक्षिकीत्रयीवार्तादण्डनीत्याख्यासु चतसृषु विद्यासु । अभिविनीतः अभितः शिक्षितः । अतएव नयानुगः नीतिशास्त्रानुसारी योराजा सः चिरं ऐश्वर्यं ईश्वरत्वं । शास्ति अधितिष्ठति । तमिममर्थं विशदमुक्तवान्कामन्दकः—" आन्वीक्षिकीं त्रयीं वार्तां दण्डनीतिं च पार्थिवः । तद्विद्धिस्तत्क्रियोपेतैश्चिन्तयेद्विनयान्वितः ॥ आन्वीक्षिक्यात्मविज्ञानं धर्माधर्मौ त्रयीस्थितौ । अर्थानर्थौ तु वार्तायां दण्डनीत्यां नयानयौ ॥ विद्याश्चतस्र एवैता योगक्षेमाय देहिनाम् । विद्याविनीतो नृपतिर्न कृच्छ्रेष्ववसीदति " इति ॥ ७ ॥ नयानुग इत्युक्तं तत्र नयस्वरूपमाह—संदधान इति ॥ कालेन स्वबलक्षयकालेन । संदधानः संधानं कुर्वन् । स्वबलवृद्धिकालेन विगृह्णन् । विग्रहं कुर्वन् । ऐश्वर्येच्छुना कालानुरूपं संधिविग्रहौ कार्यावित्यर्थः । एवं कुर्वतः फलमाह—स्वपक्षेति ॥ ८ ॥ संधेर्विग्रहस्य च कालं विविच्य दर्शयति—हीयमानेनेति ॥ हीयमानेन हीयमानबलेन । समेन समबलेन च राज्ञा स्वशत्रुणा सह संधिः कर्तव्यः । ज्यायान् अधिकबलस्तु । शत्रुं नावमन्येत नोपेक्षेत । किंतु तेन सह विग्रहं कुर्वीत । हीयमानः समः संधिं कुर्यात् । अधिको विग्रहं कुर्यादित्यर्थः ॥ ९ ॥ अस्त्वेवं प्रस्तुते किमुपन्यस्तं तत्राह—तदिति ॥ तत् तस्मात् । एवं नीतिशास्त्रस्थितेः हीयमानस्य तव बलवता रामेण संधिर्मह्यं रोचत इत्यर्थः । बलवता संधिर्दानेन विना न फलति । तच्च सीताप्रत्यर्पणादेव सेत्स्यतीत्याह—यदर्थमिति । यदर्थं अभियुक्ताः स्म विरुद्धाः स्म । सा सीता तस्मै रामाय प्रदीयतां ॥ १० ॥ कथं रामस्य बलवत्त्वं तत्राह—यस्येति ॥ देवाश्च ऋषयश्च देवर्षयः । ते तुभ्यं । रामस्य देवबलवत्त्वात् बलवत्त्वमित्यर्थः ॥ ११ ॥ देवादीनां रामजयकाङ्क्षित्वे को हेतुरित्याशङ्क्य देवादीनां धर्मपक्षपातित्वाद्धर्मस्य रामाश्रयत्वादित्यभिप्रेत्याह—असृजदित्यादिना ॥ भगवान् सर्वज्ञः पितामहः । हि यस्मात् । सुराणां असुराणां च । पक्षौ अवलम्बभूतौ । द्वावेव धर्माधर्मौ । असृजत् । अतः धर्माधर्मौ तदाश्रयौ सुरासुराश्रयौ । असुरशब्देनात्रासुरप्रकृतयो राक्षसादयश्च

मितिगर्हयन् । गर्हणंचोक्तस्याप्यनुक्तप्रायीकरणं ॥ ४ ॥ स० अद्य आरामविक्रमं रामविषयेवनेमयाकृतंभार्याहरणविक्रमं । विदित्वा ज्ञात्वापि । तूष्णीकान् तूष्णींस्थितान् निरुत्साहानितियावत् । अन्योन्यंईक्षतः ईक्षमाणान् । वेद्मि । इदंकिमितिशेषः । रामविक्रमं रामस्यविक्रमं लङ्काभूमिकापादविक्षेपं तन्मात्रमितियावत् । युद्धसुखमनवलोक्यैवंभावोनक्काप्यवलोकितइतिभावः ॥५॥

[पा०] १ ङ. च. झ. ट. सागरस्यास्य. २ ङ. च. छ. झ. ञ. ट. बलपौरुषं. ३ ग. ङ. झ. ट. इतिमातामहोऽब्रवीत्. ४ ङ. छ. झ. ञ. स्वपक्षेवर्धनं. ५ च. छ. ञ. सन्धिस्तवरामेण. ६ ङ. झ. ट. मभियुक्तोसि. ७ क.—ट. तस्य.

धर्मो हि श्रूयते पक्षो ह्यमराणां महात्मनाम् ॥ अधर्मो रक्षसां पक्षो ह्यसुराणां च रावण ॥ १३ ॥
धर्मो वै ग्रसतेऽधर्मं ततः कृतमभूद्युगम् ॥ अधर्मो ग्रसते धर्मं ततस्तिष्यः प्रवर्तते ॥ १४ ॥
तत्त्वया चरता लोकान्धर्मो विनिहतो महान् ॥ अधर्मः प्रगृहीतश्च तेनास्मद्बलिनः परे ॥ १५ ॥
स प्रमादाद्विवृद्धस्तेऽधर्मोभिग्रसते हि नः ॥ विवर्धयति पक्षं च सुराणां सुरभावनः ॥ १६ ॥
विषयेषु प्रसक्तेन यत्किंचित्कारिणा त्वया ॥ ऋषीणामग्निकल्पानामुद्वेगो जनितो महान् ॥ १७ ॥
तेषां प्रभावो दुर्धर्षः प्रदीप्त इव पावकः ॥ तपसा भावितात्मानो धर्मस्यानुग्रहे रताः ॥ १८ ॥

विवक्षिताः ॥ १२ ॥ अनयोः कतरः केषां पक्ष इत्यत्राह—धर्मो हीति ॥ महात्मनामिति हेतुगर्भविशेषणं । महास्वभावानामित्यर्थः । समीचीनप्रकृतीनामितियावत् । अमहात्मनामित्यसुरादिविशेषणं चार्थसिद्धं । तथाच धर्मस्य देवपक्षत्वाद्रामस्य तदाश्रयत्वादेवादयो रामपक्षपातिन इतिभावः ॥ १३ ॥ एवं देवादिपक्षपाताद्रामस्य बलीयस्त्वमुपपाद्य धर्मस्य प्राबल्यादपि तदाह—धर्म इति । अत्र यदेतिशेषः । धर्मः अधर्मं यदा ग्रसते अभिभवति । तदा कृतं युगं अभूत् भवति । पुरुषेषु प्रवर्तते । आर्षः कालव्यत्ययः । अधर्मो यदा धर्मं ग्रसते तदा तिष्यः कलिः । प्रवर्तते । " तिष्यः कलौ च पुष्ये च " इत्यमरः ॥ १४ ॥ ततः किमित्यपेक्षायां त्वय्यधर्मेण कलेः प्रवेशात्कृतापेक्षया कलेर्दुर्बलत्वादस्मदपेक्षया रामो बलवानित्याह—तदिति ॥ लोकान् चरता दिग्विजयार्थमिति शेषः । विनिहतः । परदारपरिग्रहार्थमिति शेषः । अस्मदिति पञ्चमीबहुवचनं । परे शत्रवो रामादयो धार्मिकाः । यद्वा कृतं युगमिति शब्दसमुदायेन शुभं लक्ष्यते । तिष्य इत्यनेनाशुभं । यदा धर्मः अधर्मं ग्रसते तदा शुभं भवति । यदा अधर्मो धर्मं ग्रसते तदा अशुभं भवतीत्यर्थः । एवं भवतु मया किं कृतमित्यत्राह—तदिति ॥ तत् धर्माधर्मयोरेवंरूपत्वात् । त्वया शुभहेतुर्धर्मो विनिहतः अशुभहेतुरधर्मश्च परिगृहीतः । तेन पराजयरूपाशुभहेत्वधर्मकृद्ध्योस्मत्जयरूपशुभहेतुधर्मपराः परे बलिन इत्यर्थः ॥ १५ ॥ अधर्मं स्वीकृत्य धर्मे निहते तेषां सुराणां बलवत्त्वं कथमित्याशङ्क्याधर्मस्याश्रयनाशकत्वादित्यभिप्रायेणाह—स इति ॥ सः अधर्मः । ते प्रमादात् अविमृश्यकरणात् । विवृद्धः । नः अस्मान् । ग्रसते नाशयति । सुरभावनः सुरानुकूलः सन् सुराणां पक्षं विवर्धयति ॥ १६ ॥ स्वकृतस्याधर्मस्य सुरपक्षवृद्धिहेतुत्वं कथमित्याशङ्क्य ऋषीणामुद्वेगजननद्वाराऽधर्मप्रवर्तकत्वादित्याह—विषयेष्विति ॥ विषयेषु प्रसक्तेन अतएव यत्किञ्चित्कारिणा देवर्षिप्रमुखानां कन्यापत्नीहरणादिकं कुर्वता । ऋषीणामुद्वेगः मनस्तापः । जनितः कृतः ॥ १७ ॥ अग्निकल्पत्वमुपपादयति—तेषामिति । उद्वेगात्किं कृतवन्तस्तत्राह—तपसेति ॥ भावितात्मानः पूता-

ति० राक्षसाः राजसाः असुरास्तामसाइतिभेदः ॥ १३ ॥ **रामानु०** ततस्तिष्यःप्रवर्ततइतिपाठः । अत्रयदेत्यध्याहार्यं । यदा कृतंयुगमभूत् " तपःशौचंदयासत्यं " इतिश्रीभागवतोक्तप्रकारेणधर्मपादचतुष्टयविशिष्टंकृतयुगंभवति । धर्मवृद्धिर्भवतीत्यर्थः । तदा धर्मः अधर्मंग्रसते । अनेनधर्मपक्षपातिनांवृद्धिरधर्मपक्षपातिनांहानिश्चसूचिता । यदातिष्यःप्रवर्तते अधर्मंगौरित्यादिनाश्रीभागवतोक्तसङ्गमदानृताद्यधर्मपादचतुष्टयविशिष्टंकलियुगंप्रवर्तते । अधर्मवृद्धिर्भवतीत्यर्थः । ततः तदा अधर्मः अभिवृद्धाधर्मः । धर्मं ग्रसते । अनेनाधर्मपक्षपातिनांवृद्धिर्धर्मपक्षपातिनांहानिश्चसूचिता ॥ **ति०** अथतयोःकालविशेषेणाभिभवानभिवौदर्शयति—**धर्मो वैइत्यादिना** । यदाकृतंयुगमभूत्तदा तस्मादेवकालाद्धेतोःप्रवृद्धोधर्मः अधर्मंग्रसते अभिभवति । वैप्रसिद्धं । यदातिष्यः कलिः । प्रवर्तते तदा ततएवहेतोः । अधर्मोधर्मंग्रसते । कलौपादेनधर्मस्थितेः । तथाहि । सर्वदासुखसाधनंधर्मएकरूपएव । अधर्मस्त्रिधा । धर्मान्यस्तद्विरोधीतदभावश्चेति । तत्राद्यः शाक्तादिधर्ममार्गेदृष्टोधर्माभासः । द्वितीयोहत्यादिलक्षणः । अन्त्यः स्वस्वविहितनित्यधर्मलोपात्मा । कृते त्रिविधाधर्माभावएव । त्रेतादौ क्रमादेकद्वित्रिभिरधर्मैःसंवलनंधर्मस्य । एवंच कलावधर्माभिभूतपादत्रयलादेकपादेनधर्मस्यवृत्तिरक्षता । एवंच धर्मतोदेवत्वमधर्मतोराक्षसत्वादीतिसूचितं । नन्वधर्मस्यरक्षोसुरधर्मत्वे रक्षोसुराणां धर्मफलैश्वर्यजयादिकथमितिचेच्छृणु । देवाः केवलधर्मपराः । रक्षोसुराः काम्यराजसतामसधर्ममात्रपराः । तादृशधर्ममनुतिष्ठतोपितानुक्तत्रिप्रकाराधर्मोनमुच्यत्येव । रजस्तमःप्रकृतित्वात् । अतोधर्मकरणेनसुखिनोपितेकाम्यत्वेनसान्ततयाधर्म-

[**पा०**] १ ङ. च. झ. ट. तदातिष्यः २ क. ख. घ. ङ. च. झ. ञ. ट. धर्मोपि. ३ क. ख. ग. ङ.—ट. त्प्रवृद्धस्ते. ४ ध. प्रतापो.

मुख्यैर्यज्ञैर्यजन्त्येते नित्यं तैस्तैर्द्विजातयः ॥ जुह्वत्यग्नींश्च विधिवद्वेदांश्चोच्चैरधीयते ॥ १९ ॥
अभिभूय च रक्षांसि ब्रह्मघोषानुदैरयन् ॥ दिशोपि विद्रुताः सर्वाः स्तनयित्नुरिवोष्णगे ॥ २० ॥
ऋषीणामग्निकल्पानामग्निहोत्रसमुत्थितः ॥ आदत्ते रक्षसां तेजो धूमो व्याप्य दिशो दश ॥ २१ ॥
तेषु तेषु च देशेषु पुण्येष्वेव दृढव्रतैः ॥ चर्यमाणं तपस्तीव्रं संतापयति राक्षसान् ॥ २२ ॥
देवदानवयक्षेभ्यो गृहीतश्च वरस्त्वया ॥ २३ ॥
मानुषा वानरा ऋक्षा गोलाङ्गूला महाबलाः ॥ बलवन्त इहागम्य गर्जन्ति दृढविक्रमाः ॥ २४ ॥
उत्पातान्विविधान्दृष्ट्वा घोरान्बहुविधांस्तथा ॥ विनाशमनुपश्यामि सर्वेषां रक्षसामहम् ॥ २५ ॥
खराभिस्तनिता घोरा मेघाः प्रतिभयंकराः ॥ शोणितेनाभिवर्षन्ति लङ्कामुष्णेन सर्वतः ॥ २६ ॥
रुदतां वाहनानां च प्रपतन्त्यस्रबिन्दवः ॥ ध्वजा ध्वस्ता विवर्णाश्च न प्रभान्ति यथा पुरा ॥२७॥
व्याला गोमायवो गृध्रा वाश्यन्ति च सुभैरवम् ॥ प्रविश्य लङ्कामनिशं समवायांश्च कुर्वते ॥ २८ ॥
कालिकाः पाण्डुरैर्दन्तैः प्रहसन्त्यग्रतः स्थिताः ॥ स्त्रियः स्वप्नेषु मुष्णन्त्यो गृहाणि प्रतिभाष्य च २९
गृहाणां बलिकर्माणि श्वानः पर्युपभुञ्जते ॥ खरा गोषु प्रजायन्ते मूषिका नकुलैः सह ॥ ३० ॥

श्वानः । धर्मस्यानुग्रहे संवर्धने । रताः ॥ १८ ॥ मुख्यैः श्रेष्ठैः । तैस्तैः अग्निष्टोममारभ्य विश्वसृजामयनपर्यन्तैः । अग्नीनुद्दिश्य जुह्वति होमं कुर्वन्ति । देवतोद्देशेन द्रव्यत्यागो यागः । त्यक्तस्याग्नौ प्रक्षेपो होम इत्यनयोर्भेदः ॥ १९ ॥ अभिभूय अगणयित्वा । ब्रह्मघोषान् उदैरयन् । उच्चारयन्ति स्म । वेदांश्चोच्चैरधीयत इत्यस्य विवरणमिदं । तपःप्रभृतिकर्मणः फलमाह—दिश इत्यादिना ॥ सर्वा दिशःप्रतिविद्रुताः । राक्षसा इतिशेषः । उष्णगे ग्रीष्मे । स्तनयित्नुरिव मेघ इव । जातावेकवचनं ॥ २०—२२ ॥ बलिनोपि देवाः ब्रह्मदत्तवरमहिम्ना न ग्रहर्तुं शक्नुयुरिति चेत्तत्राह—देवदानवेत्यादिना ॥ देवदानवयक्षेभ्य एवावध्यत्ववरो गृहीतः । न तु मानुषादिभ्य इति भावः ॥ २३ ॥ तर्हि किमायातमित्यत्राह—मानुषा इति ॥ द्वयोरपि बहुवचनं पूजायां । महाबला महासैन्याः । इह लङ्कायां ॥ २४ ॥ न केवलं परागमनेन किं त्वशुभनिमित्तदर्शनेनापि भयमुत्प्रेक्ष्यमित्याह—उत्पातानिति ॥ उत्पातान् विविधान् दिव्यान्तरिक्षभौमभेदभिन्नान् । बहुविधान् भौमादिषुप्रत्येकंविविधान् । अनुपश्यामि तर्कयामि ॥२५॥ खराभिस्तनिताः परुषगर्जिताः । घोराः विरूपाः । प्रतिभयंकराः । प्रतीत्युपसर्गमात्रं । भयंकरा इत्यर्थः ॥ २६ ॥ ध्वस्ताः धूसराः । अतएव विवर्णाः विगतवर्णाः ॥ २७ ॥ व्यालाः दुष्टाः । वाश्यन्ति वाशितं कुर्वन्ति । कुत्सितरुतं कुर्वन्तीत्यर्थः । समवायान् सङ्घान् ॥ २८ ॥ कालिकाः नीलवर्णाः स्त्रियः । पूतनाप्रमुखा इति यावत् । शक्तय इत्येके । पाण्डुरैर्दन्तैरुपलक्षिताः सत्यः । प्रतिभाष्य प्रतिकूलमाभाष्य । गृहाणि गृहस्थितवस्तूनि । मुष्णन्त्यः हसन्ति । एवं दृश्यन्त इत्यर्थः ॥ २९ ॥ बलिकर्माणि बलिकर्मसाधनानि हवींषि । नकुलैः सह । वर्तन्तइतिशेषः

फलान्तेऽधर्मफलभोगभाजइतिनदोषः ॥ १४ ॥ स० उष्णगे ग्रीष्मर्तुगतेसूर्येस्तनयित्नुर्बलाहकइवविप्रद्रुताःविप्रद्रुतानिरक्षांसि । पलायनएवपुरुषकारइतिपुंशक्तिप्रयुक्तःपुल्लिङ्गनिर्देशः । रक्षांसीतिप्रकृतत्वात् । राक्षसाइतिशेषोवा ॥२०॥ ति० धूमः उत्तिष्ठतीतिशेषः ॥ २१ ॥ स० कालिकाः ग्रामस्थाः महाकालीभद्रकालीत्यादयः । प्रतिभाष्य श्रोतृभयदायिभाषांकृत्वा । पाण्डुरैर्दन्तैः अग्रतःस्थिताःसत्यःप्रहसन्ति । दन्तानांपाण्डुरत्वोक्त्या उक्त्याचविरुद्धभाषणमोषणहसनादीनां निश्चितंमरणं । किञ्चिद्व्यवधानेनभविष्यतीतिसूचयति ॥ २९ ॥ स० श्वानः सारमेयाः । उपसेवते उपसेवन्ते नवायसाः । " पुनःश्वानोभविष्यति " " श्वानसूकरमार्जार—" इत्यादिप्रयोगादकारान्तोवाश्वानशब्दः ॥ श्वा नः अस्माकमिदमितिपर्युपसेवते । नः बलिकर्माणि श्वा उपसेवते

[पा०] १ ङ. ञ. यजन्तेतैस्तैर्यत्तेद्विजातयः. २ क. ख. ग. ङ.—ट. दिशोविप्रद्रुताः. ३ ङ. ञ. आवृत्य. ४ ङ.—ट. बहुविधान्बहून्. ५ ङ.—ट. रजोध्वस्ताः. ६ क. ङ. ञ. ञ. यथापुरं. ७ ङ. ञ. ट. लङ्कामारामे. ८ ङ.—ठ. पर्युपसेवते. ९ ख. ङ. च. छ. ञ. ट. नकुलेषुच.

मार्जारा द्वीपिभिः सार्धं सूकराः शुनकैः सह ॥ किन्नरा राक्षसैश्चापि समीयुर्मानुषैः सह ॥ ३१ ॥
पाण्डुरा रक्तपादाश्च विहङ्गाः कालचोदिताः ॥ राक्षसानां विनाशाय कपोता विचरन्ति च ॥ ३२ ॥
[1]वीचीकूचीति वाश्यन्त्यः शारिका वेश्मसु स्थिताः ॥ ३३ ॥
पतन्ति ग्रथिताश्चापि निर्जिताः कलै[2]हैषिणः ॥ पक्षिणश्च मृगाः सर्वे प्रत्यादित्यं रु[3]दन्ति च ॥ ३४ ॥
करालो विकटो मुण्डः परुषः कृष्णपिङ्गलः ॥ कालो गृहाणि सर्वेषां कालेकालेऽन्ववेक्षते ॥ ३५ ॥
[[4]अहं त्वेतत्प्रपश्यामि युध्यतां तु दिनेदिने ॥ क्रव्यादा भक्षयिष्यन्ति मांसानि गजवाजिनाम् ॥
सर्वं नष्टप्रभं मन्ये सैन्यं त्वद्गेहमाश्रितम् ॥ ३६ ॥]
एतान्यन्यानि दुष्टानि निमित्तान्युत्पतन्ति च ॥ ज्ञात्वा[5] प्रधार्य कार्याणि क्रियतामायतिक्षमम् ॥ ३७ ॥
[विष्णुं मन्यामहे रामं मानुषं रूपमास्थितम् ॥ न हि मानुषमात्रोसौ राघवो दृढविक्रमः ॥ ३८ ॥
येन बद्धः [6]समुद्रस्य स सेतुः परमाद्भुतः ॥ कुरुष्व नरराजेन [7]संधिं रामेण रावण ॥ ३९ ॥]
[[8]अद्य प्रतिनिविष्टेन हितमुक्तं निशाचर ॥ सीतार्थे ते महाप्राज्ञ महद्भयमुपस्थितम् ॥
तथेमान्यनिमित्तानि लक्षये राक्षसेश्वर ॥ ४० ॥]

इदं वचस्[9]तत्र निशम्य माल्यवान्[10]परीक्ष्य रक्षोधिपतेर्मनः पुनः ॥
अनुत्तमेषूत्तमपौरुषो बली बभूव तूष्णीं समवेक्ष्य रावणम् ॥ ४१ ॥

॥ ३० ॥ समीयुः संयन्ति । द्वीपिभिः व्याघ्रैः । मानुषैः । राक्षसा इति शेषः । मानुषाश्चात्रोत्पातजनिता एव ॥ ३१ ॥ कालचोदिताः दैवप्रेरिताः । विनाशाय विनाशसूचनायेत्यर्थः । " वाताय कपिला विद्युत्—" इत्यादिवत् । कपोताः कपोताख्या विहङ्गा इत्यन्वयः ॥ ३२ ॥ वेश्मसु मधुरसंलापार्थं पोषिताः शारिकाः । मधुरभाषणानि विहाय वीचीकूचीति क्रूरं वाश्यन्तीत्यर्थः ॥ ३३ ॥ पक्षिणः काकादयः । मृगाश्च पूर्वं निर्जिता अपि पुनः कलहैषिणः सन्तः । ग्रथिताः पुञ्जीभूताः । पतन्ति धावन्ति । प्रत्यादित्यं रुदन्ति चेत्यन्वयः ॥ ३४ ॥ करालः भयंकरः । विकटः विकटाङ्गः । विकल इति पाठे हीनाङ्ग इत्यर्थः । परुषः परुषवर्णः । कालः मृत्युः । कालेकाले सायं प्रातश्च । गृहाण्यन्ववेक्षते । अन्वीक्षमाण इव दृश्यत इत्यर्थः ॥ ३५—३६ ॥ एतानि ज्ञात्वा कर्माणि कर्तव्यानि । प्रधार्य निर्धार्य । यत् आयतिक्षमं उत्तरकालार्हं । तत्क्रियतां । कर्माणि च सीताप्रदानादीनि ॥ ३७—४० ॥ अनुत्तमेषु मन्त्रिश्रेष्ठेषु । उत्तमपौरुषो माल्यवान् । इदं वचः। तत्र सभायां । निशम्य श्रावयित्वा । अन्तर्भावितण्यर्थोयं । रावणं रावणाकारं । समवेक्ष्य इङ्गितादिदर्शनपुरःसरं दृष्ट्वा । रक्षोधिपतेर्मनः परीक्ष्य

इतिवा ॥ रामानु० बलिकर्माणि बलिद्रव्याणि ॥ ३० ॥ किंनराइत्यर्धकेषुचित्कोशेषुनदृश्यते । तस्मिन्विरोधोस्ति लङ्कायांमानुषाभावात् ॥ ३१ ॥ ति० चीचीकूकीतिशब्दानुकारः । स० शारिकाः शुकवध्वः ॥ ३३ ॥ कलहैषिभिः पक्ष्यन्तरैः । निर्जिताः ग्रथिताः । पतन्ति परस्परमाबध्यपतन्ति ॥ ३४ ॥ कतक० "विष्णुंमन्यामहेरामं" इत्यादि " संधिंरामेणरावण " इत्यन्तं श्लोकद्वयंप्रक्षिप्तमितिप्राचीनैर्नव्याख्यातं ॥ शि० मानुषंरूपमास्थितं रामंविष्णुं खप्रतापद्वारासर्वत्रपूर्णमन्यामहे । अतःअयंराघवःमानुषमात्रः अस्मज्ज्ञानविषयीभूतमनुष्यशरीरवान्न । प्राकृतविलक्षणःपरपुरुषइत्यर्थः ॥ ३८ ॥ स० सः चारैः कथितः । येनबद्धः तेनरामेणसंधिंकुरुष्व ॥ ३९ ॥ स० इदंवचः रावणंप्रतिनिगद्य तस्यरक्षोधिपतेर्मनःपुनःपुनःपरीक्ष्य अनिवर्तनंज्ञात्वा । रावणं समवेक्ष्य तूष्णींबभूवेत्यन्वयः। "अर्थनिबन्धनेयंसंज्ञा" इत्युक्तेः वचोरावणंनिगद्येतिद्विकर्मकता । अनुत्तमेषु असदृशेषुराक्षसेषु । यद्वा अनुत्तमेषु नीचेषुरक्षोधिपतेर्मनःपरीक्ष्यस्वयमुत्तमपौरुषइतितूष्णींबभूव ॥ ४१ ॥ इतिपञ्चत्रिंशःसर्गः ॥ ३५ ॥

[पा०] १ झ. चीचीकूचीति. २ ङ. च. झ. ञ. ट. कलहैषिभिः. घ. कलहप्रियाः. ३ क. ख. ग. ङ.—ट. रुदन्तिते. घ. रुवन्ति. ४ ङ. झ. विकलो. ५ इदमर्धत्रयं घ. पाठेदृश्यते. ६ क. ख. ग. ङ. च. छ. झ. ञ. ट. ज्ञालाऽवधार्य. ७ इदं श्लोकद्वयं ख. ङ. च. ञ. ट. पाठेषुदृश्यते. ८ क. घ.—छ. ञ. समुद्रेच. ९ घ. सन्धिमार्येण. १० इदमर्धत्रयं घ. पाठेदृष्यते. ११ ग. ङ. च. छ. झ. ञ. ट. खस्यनिगद्य. क. ख. स्तन्निगद्य. १२ घ. न्समीक्ष्यरक्षोधिपतेस्तदप्रियं.

[स तद्वचो माल्यवता प्रभाषितं दशाननो न प्रतिशुश्रुवे तदा ॥
भृशं जगर्ह च सुदुष्टमानसो मुमूर्षुरत्युच्चवचांस्युदीरयन् ॥ ४२ ॥]
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

षट्त्रिंशः सर्गः ॥ ३६ ॥

रावणेनात्मश्लाघनेनरामवधप्रतिज्ञानपूर्वकं सोपालंभंमाल्यवद्विसर्जनम् ॥ १ ॥ तथा मन्त्रिभिस्सहमन्त्रपूर्वकं प्राच्यादिदिक्षु पुररक्षणायसैन्यैःसहप्रहस्तादिप्रेषणेनान्तःपुरप्रवेशः ॥ २ ॥

तत्तु माल्यवतो वाक्यं हितमुक्तं[1] दशाननः ॥ न मर्षयति[2] दुष्टात्मा कालस्य वशमागतः[3] ॥ १ ॥
स बद्ध्वा भ्रुकुटिं वक्त्रे क्रोधस्य[4] वशमागतः ॥ अमर्षात्परिवृत्ताक्षो माल्यवन्तमथाब्रवीत्[5] ॥ २ ॥
हितबुद्ध्या यदहितं वचः परुषमुच्यते ॥ परपक्षं प्रविश्यैव नैतच्छ्रोत्रं[6] गतं मम ॥ ३ ॥
मानुषं कृपणं राममेकं शाखामृगाश्रयम् ॥ समर्थं मन्यसे केन त्यक्तं पित्रा वनालयम्[7] ॥ ४ ॥
रक्षसामीश्वरं मां च देवतानां भयंकरम् ॥ हीनं मां मन्यसे केन ह्यहीनं सर्वविक्रमैः[8] ॥ ५ ॥
वीरद्वेषेण वा शङ्के पक्षपातेन वा रिपोः ॥ त्वयाऽहं परुषाण्युक्तः परप्रोत्साहनेन[9] वा ॥ ६ ॥
प्रभवन्तं पदस्थं हि परुषं कोऽभिधास्यति[10] ॥ पण्डितः शास्त्रतत्त्वज्ञो विना प्रोत्साहनाद्रिपोः ॥ ७ ॥
आनीय च वनात्सीतां पद्महीनामिव श्रियम् ॥ किमर्थं प्रतिदास्यामि राघवस्य भयादहम् ॥ ८ ॥

अनिवर्त्यं ज्ञात्वा तूष्णीं बभूव । उपदेशाद्विररामेत्यर्थः ॥ ४१—४२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥ ३५ ॥

अथ लङ्कागुप्तिकरणं षटत्रिंशे—तत्त्विति ॥ हितमुक्तं हितं यथा भवति तथा उक्तं । न मर्षयति नामर्षयत् ॥ १ ॥ परिवृत्ताक्षः घूर्णिताक्षः ॥ २ ॥ परपक्षं प्रविश्यैव शत्रुषु स्नेहमनुसृत्यैव । हितबुद्ध्या हितमित्ययं ज्ञास्यतीति बुद्ध्या । अहितं परुषं च । यद्वच उक्तं । एतत् मम श्रोत्रं न गतमित्यन्वयः ॥ ३ ॥ भवतः परपक्षानुसारश्च न युक्त इत्याह—मानुषमिति ॥ मानुषं जात्या हीनबलं । कृपणं प्रकृत्या हीनं । एकं असहायं । शाखामृगाश्रयं क्षुद्रसहायं । पित्रा त्यक्तं निर्धनं । वनालयं राज्यहीनं । रामं केन कथंप्रकारेण । समर्थं प्रबलं । मन्यसे ॥ ४ ॥ स्वस्मिन् तद्वैपरीत्यमाह—रक्षसामिति ॥ हीनं दुर्बलं ॥ ५ ॥ एवं परप्राबल्यस्वदौर्बल्ययोरभावेपि परुषोक्तौ हेतुमाशङ्कते—वीरद्वेषेणेति ॥ वीरद्वेषेण सजातीयवीरद्वेषेण । रिपोः पक्षपातेन शत्रौ पक्षपातेन ॥ ६ ॥ परप्रोत्साहनेनेत्येतदुपपादयति—प्रभवन्तमिति ॥ प्रभवन्तं प्रभावयुक्तं । पदस्थं परिपक्वबुद्धिं । परप्रोत्साहनाभावे पण्डितस्य पदस्थविषयकपरुषवचनं नोपपद्यत इत्यर्थः ॥ ७ ॥ अस्तु त्वदुक्तं परमार्थः तथापि दुर्लभवस्तुविशेषः कथं त्याज्य इत्याह—आनीयेति ॥ किमर्थं

ती० वस्तुतस्तु—वनालयं वनंजलमुदधिः आलयः शयनस्थानंयस्यतं । वटपत्रशायिनं नारायणमित्यर्थः । अतएव पित्रा त्यक्तं जन्मादिरहितमित्यर्थः । ईश्वरस्यजन्माद्यभावादेवपित्राद्यभावः । अतएव एकं अद्वितीयं । अतएव शाखामृगाश्रयं शाखाभिर्वेदशाखाभिःमृग्यतइतिशाखामृगोवेदवेद्यः सर्वेश्वरः । सचासावाश्रयश्चेतितं । तथापि केनापिहेतुना मानुषं मनुष्यरूपेणावतीर्णं । अतएव कृपणं कृपालुं । रामंसमर्थंमन्यसेकिल । तद्युक्तमेव । केनहेतुना रक्षसामीश्वरं सर्वैपराक्रमैर्हीनं मां अहीनंमन्यसेइत्यर्थः ॥ ४-५ ॥ स० सर्वैविक्रमैः देवानांभयङ्करं तदहीनंचमांमन्यसे । रामविषयेतु मां हीनंकेनमन्यसइत्यन्वयः । तेन नासच्छब्दद्वयवैयर्थ्यं ॥५॥ ती० आनीयेति । रामहस्ताद्वधेच्छयैव वनात्सीतामानीयराघवस्यभयात्किमर्थंप्रतिदास्यामीत्यर्थः ।

[पा०] १ अयंश्लोकः घ. पाठेदृश्यते. २ घ. वशमेयिवान्. ३ घ. क्रोधेनकलुषीकृतः. ४ क. वचनंपुनरुच्यते. ५ क. ग. ङ. च. झ. ञ. ट. च्छ्रोत्रगतं. ६ झ. ममप्रोत्साहनेनवा. ७ ङ. झ. ञ. ट. कोऽभिभाषते. च. कोऽभिभाषितुं. ८ क. ङ. छ.—ञ. प्रोत्साहनेनवा.

वृतं वानरकोटीभिः ससुग्रीवं सलक्ष्मणम् ॥ पश्य कैश्चिदहोभिस्त्वं राघवं निहतं मया ॥ ९ ॥
द्वन्द्वे यस्य न तिष्ठन्ति दैवतान्यपि संयुगे ॥ स कस्माद्रावणो युद्धे भयमाहारयिष्यति ॥ १० ॥
द्विधा भज्येयमप्येवं न नमेयं तु कस्यचित् ॥ एष मे सहजो दोषः स्वभावो दुरतिक्रमः ॥ ११ ॥
यदि तावत्समुद्रे तु सेतुर्बद्धो यदृच्छया ॥ रामेण विस्मयः कोत्र येन ते भयमागतम् ॥ १२ ॥
स तु तीर्त्वार्णवं रामः सह वानरसेनया ॥ प्रतिजानामि ते सत्यं न जीवन्प्रतियास्यति ॥ १३ ॥
एवं ब्रुवाणं संरब्धं रुष्टं विज्ञाय रावणम् ॥ व्रीडितो माल्यवान्वाक्यं नोत्तरं प्रत्यपद्यत ॥ १४ ॥
जयाशिषा च राजानं वर्धयित्वा यथोचितम् ॥ माल्यवानभ्यनुज्ञातो जगाम स्वं निवेशनम् ॥१५॥
रावणस्तु सहामात्यो मन्त्रयित्वा विमृश्य च ॥ लङ्कायामतुलां गुप्तिं कारयामास राक्षसः ॥ १६ ॥
स व्यादिदेश पूर्वस्यां प्रहस्तं द्वारि राक्षसम् ॥ दक्षिणस्यां महावीर्यौ महापार्श्वमहोदरौ ॥ १७ ॥
पश्चिमायामथो द्वारि पुत्रमिन्द्रजितं तथा ॥ व्यादिदेश महामायं बहुभी राक्षसैर्वृतम् ॥ १८ ॥
उत्तरस्यां पुरद्वारि व्यादिश्य शुकसारणौ ॥ स्वयं चात्र भविष्यामि मन्त्रिणस्तानुवाच ह ॥ १९ ॥
राक्षसं तु विरूपाक्षं महावीर्यपराक्रमम् ॥ मध्यमेऽस्थापयद्गुल्मे बहुभिः सह राक्षसैः ॥ २० ॥
एवं विधानं लङ्कायाः कृत्वा राक्षसपुङ्गवः ॥ कृतकृत्यमिवात्मानं मन्यते कालचोदितः ॥ २१ ॥

विसर्जयामास ततः स मन्त्रिणो विधानमाज्ञाप्य पुरस्य पुष्कलम् ॥
जयाशिषा मन्त्रिगणेन पूजितो विवेश चान्तःपुरमृद्धिमन्महत् ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षट्त्रिंशस्सर्गः ॥ ३६ ॥

केन हेतुना । राघवस्य राघवात् ॥ ८-९ ॥ द्वन्द्वे द्वन्द्वयुद्धे । युद्धे रामयुद्धे ॥ १० ॥ अत्यन्तहितपरं वृद्धं मातामहं कथमेवं परुषमुक्तवानस्मीत्यनुतापेनाह—द्विधेति ॥ राम आगत्य भयं जनयिष्यतीति त्वयोक्तं । न केवलं भयमात्रं । द्विधा भज्येयं शिरश्छेदं प्राप्नुयां । एवमपि न नमेयं । कस्यचित् । न केवलं रामस्य ततोपि शतगुणबलवतोपि द्विधा भङ्गादपि कस्यचिन्नमनमत्यन्तदुःसहमित्यर्थः । तर्हि हीयमानेनसन्धिःकार्य इति नीतिशास्त्रविरोधः स्यात्तत्राह—एष मे सहजो दोष इति । यदि दोषत्वमनुमतं तर्हि स त्याज्य एवेत्याशङ्क्याह—स्वभाव इति । नहि तिक्तो निम्बो मधुरायत इति भावः ॥ ११ ॥ अथ सेतुबन्धेन विस्मयसे चेत् तदपिकाकतालीयं । अतोमाभूत्ते भयमित्याह—यदीति ॥ तावत्समुद्रे स्वल्पसमुद्र इत्यर्थः ॥ १२ ॥ अर्णवं तीर्त्वा स्थितो राम इत्यर्थः ॥ १३ ॥ संरब्धं अहंकारयुक्तं । व्रीडित इति । स्वोपदेशवैफल्यादितिभावः ॥ १४ ॥ यथोचितमिति । प्रत्युत्थानादिनेति भावः ॥ १५ ॥ मन्त्रयित्वा कर्तव्यं विचार्य । विमृश्य निश्चित्य ॥ १६ ॥ व्यादिदेश रक्षणायेति शेषः ॥ १७—१८ ॥ भविष्यामीत्यनन्तरमितिकरणं द्रष्टव्यं ॥ १९ ॥ मध्यमे गुल्म इति गुल्मो नाम नगरमध्यचैत्यस्थानं ॥ २० ॥ विधानं रक्षणसंविधानं ॥ २१ ॥ पुष्कलं समग्रं ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षट्त्रिंशः सर्गः ॥३६॥

स० पद्महीनामिति । केवलंपद्मेनैवएतस्यास्तस्याश्चभेदइतिभावः ॥ ८ ॥ स० द्वन्द्वे संयुगे । दैवतानीत्यनेन तेषांसामर्थ्यराहित्यंसूचयति । तत्रदार्ढ्यसूचनायपरोक्षनिर्देशः ॥ १० ॥ ती० वास्तवार्थस्तु—रामःवानरसेनयासहार्णवंतीर्त्वाजीवन्प्रतियास्यतीति तेसत्यंप्रतिजानामि । नसंदेहः । अथापि मेस्वभावोदुरतिक्रमइतिपूर्वेणसंबन्धः ॥ १३ ॥ इतिषट्त्रिंशःसर्गः ॥ ३६ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. लङ्कायास्तुतदागुप्तिं. २ क.—च. झ. ञ. ट. व्यादिदेशच. ३ ङ. च. छ. झ. ञ. ट. गमिष्यामि. ४ ख. घ.—छ. झ. ट. लङ्कायां. ५ क.—ट. सोन्तःपुरं.

सप्तत्रिंशः सर्गः ॥ ३७ ॥

सुग्रीवादिभिःसहमन्त्रयमाणंश्रीरामंप्रति विभीषणेन लङ्कामेत्यरावणवृत्तान्तावगमेनपुनरागतनिजामात्यनिवेदितरावणकृतलङ्कारक्षणसंविधानप्रकारनिवेदनम् ॥ १ ॥ रामेण लङ्कायाः प्रागादिद्वारत्रये क्रमेणयुद्धाय नीलाङ्गदहनुमन्नियोजनपूर्वकं स्वेनरावणाधिष्ठितोत्तरभागेलक्ष्मणेनसहावस्थाननिर्धारणेन सेनयासहलङ्काभियानम् ॥ २ ॥

नरवानरराजौ तौ स च वायुसुतः कपिः ॥ जाम्बवानृक्षराजश्च राक्षसश्च विभीषणः ॥ १ ॥
अङ्गदो वालिपुत्रश्च सौमित्रिः शरभः कपिः ॥ सुषेणः सहदायादो मैन्दो द्विविद एव च ॥ २ ॥
गजो गवाक्षः कुमुदो नलोथ पनसस्तथा ॥ अमित्रविषयं प्राप्ताः समवेताः समर्थयन् ॥ ३ ॥
इयं सा लक्ष्यते लङ्का पुरी रावणपालिता ॥ सासुरोरगगन्धर्वैरमरैरपि दुर्जया ॥ ४ ॥
कार्यसिद्धिं पुरस्कृत्य मन्त्रयध्वं विनिर्णये ॥ नित्यं सन्निहितो ह्यत्र रावणो राक्षसाधिपः ॥ ५ ॥
तथा तेषु ब्रुवाणेषु रावणावरजोऽब्रवीत् ॥ वाक्यमग्राम्यपदवत्पुष्कलार्थं विभीषणः ॥ ६ ॥
अनलः शरभश्चैव संपातिः प्रघसस्तथा ॥ गत्वा लङ्कां महामात्याः पुरीं पुनरिहागताः ॥ ७ ॥
भूत्वा शकुनयः सर्वे प्रविष्टाश्च रिपोर्बलम् ॥ विधानं विहितं यच्च तदृष्ट्वा समुपस्थिताः ॥ ८ ॥
संविधानं यदाहुस्ते रावणस्य दुरात्मनः ॥ राम तद्ब्रुवतः सर्वं यथा तत्त्वेन मे शृणु ॥ ९ ॥
पूर्वं प्रहस्तः सबलो द्वारमासाद्य तिष्ठति ॥ दक्षिणं च महावीर्यौ महापार्श्वमहोदरौ ॥ १० ॥
इन्द्रजित्पश्चिमद्वारं राक्षसैर्बहुभिर्वृतः ॥ पट्टिशासिधनुष्मद्भिः शूलमुद्गरपाणिभिः ॥
नानाप्रहरणैः शूरैरावृतो रावणात्मजः ॥ ११ ॥
राक्षसानां सहस्रैस्तु बहुभिः शस्त्रपाणिभिः ॥ युक्तः परमसंविग्नो राक्षसैर्बहुभिर्वृतः ॥
उत्तरं नगरद्वारं रावणः स्वयमास्थितः ॥ १२ ॥
विरूपाक्षस्तु महता शूलखड्गधनुष्मता ॥ बलेन राक्षसैः सार्धं मध्यमं गुल्ममास्थितः ॥ १३ ॥

अथ रामस्य सेनागुप्तिविधानं सप्तत्रिंशे—नरवानरेत्यादिश्लोकत्रयमेकान्वयं ॥ सहदायादः सबान्धवः । "दायादौ सुतबान्धवौ" इत्यमरः । इदं विशेषणं सर्वत्र यथार्हमन्वेति । अमित्रविषयं शत्रुदेशं । समर्थयन् अमन्त्रयन् ॥ १—३ ॥ अथविचारप्रकारमेवाह—इयमित्यादिना ॥ सा हनुमता पूर्वमुक्ता ॥४॥ कार्यसिद्धिं विजयसिद्धिं । पुरस्कृत्य प्रधानीकृत्य । विनिर्णये निमित्ते मन्त्रयध्वं । विजयसाधककार्यनिर्णयाय मन्त्रः प्रवर्त्यतामित्यर्थः ॥ ५ ॥ अग्राम्यपदवत् संस्कृतपदवत् सर्वेषां स्फुटप्रतिपत्तये स्वदेशभाषापदरहितमुक्तवानित्यर्थः ॥ ६ ॥ अनल इत्यादिश्लोकत्रयं । विधानं नगररक्षणसंविधानं । ते दुरात्मनो रावणस्य यत्संविधानमाहुः तद्यथातत्त्वेन याथार्थ्येन । ब्रुवतः मे मत्तः । शृणु ॥ ७—१० ॥ पट्टिशासिधनुष्मद्भिः शूलमुद्गरपाणिभिः । बहुभी राक्षसैः प्रधानराक्षसैर्वृतः । नानाप्रहरणैः शूरैरावृतः । रावणात्मजः इन्द्रजित्पश्चिमद्वारं आसाद्य तिष्ठतीत्यनुकृष्यते ॥ ११ ॥ असंविग्नः अकम्पितहृदयः । राक्षसैः प्रधानभूतैः ॥ १२ ॥ बलेन

ति० नरेति । रामसुग्रीवौ । टजभावश्चार्षः ॥ १ ॥ स० परमसंविग्नः परंयथाभवतितथा असंविग्नः विभीः । तिष्ठतीत्यन्वयः । शुकसारणावेदितमहाबलस्मरणादन्तःकरणेभीतइतिव्याख्या स्तुतिप्रस्तावाननुगुणा । यदिवक्तव्याभीतिस्तार्हि हनुमतैकलेन

[पा०] १ ङ. च. झ. ञ. ट. नरवानरराजानौसतु. २ घ. समवेतास्तमन्त्रयन्. ३ ङ. च. झ. ञ. ट. गन्धर्वैस्सर्वैरपि. ४ ख. ङ. च. छ. झ. ञ. अथ. ५ ज. अनलश्चानिलश्चैवहरस्संपातिरेवच. ६ ङ. झ. ट. पनसश्चैव. ७ ङ. झ. ट. संपातिः प्रमतिस्त्री. ख. च. छ. ञ. संपातिर्विहगस्तथा. घ. संपातिःपनसस्तथा. ८ घ. ङ. झ. ट. राक्षसैस्सहमन्त्रयित्. ९ ङ. झ. ट. माश्रितः.

एतानेवंविधान्गुल्माँल्लङ्कायां समुदीक्ष्य ते ॥ मामकाः सचिवाः सर्वे पुनः शीघ्रमिहागताः ॥१४॥
गजानां च सहस्रं च रथानामयुतं पुरे ॥ हयानामयुते द्वे च साग्रकोटिश्च रक्षसाम् ॥ १५ ॥
विक्रान्ता बलवन्तश्च संयुगेष्वाततायिनः ॥ इष्टा राक्षसराजस्य नित्यमेते निशाचराः ॥ १६ ॥
एकैकस्यात्र युद्धार्थे राक्षसस्य विशांपते ॥ परिवारः सहस्राणां सहस्रमुपतिष्ठते ॥ १७ ॥
एतां प्रवृत्तिं लङ्कायां मन्त्रिप्रोक्तां विभीषणः ॥ एवमुक्त्वा महाबाहू राक्षसांस्तानदर्शयत् ॥
लङ्कायां सचिवैः सर्वां रामाय प्रत्यवेदयत् ॥ १८ ॥
रामं कमलपत्राक्षमिदमुत्तरमब्रवीत् ॥ रावणावरजः श्रीमान्रामप्रियचिकीर्षया ॥ १९ ॥
कुबेरं तु यदा राम रावणः प्रत्ययुध्यत ॥ षष्टिः शतसहस्राणि तदा निर्यान्ति राक्षसाः ॥ २० ॥
पराक्रमेण वीर्येण तेजसा सत्त्वगौरवात् ॥ सदृशा येऽत्र दर्पेण रावणस्य दुरात्मनः ॥ २१ ॥
अत्र मन्युर्न कर्तव्यो रोषये त्वां न भीषये ॥ समर्थो ह्यसि वीर्येण सुराणामपि निग्रहे ॥ २२ ॥
तद्भवांश्चतुरङ्गेण बलेन महता वृतः ॥ व्यूह्येदं वानरानीकं निर्मथिष्यसि रावणम् ॥ २३ ॥
रावणावरजे वाक्यमेवं ब्रुवति राघवः ॥ शत्रूणां प्रतिघातार्थमिदं वचनमब्रवीत् ॥ २४ ॥

सेनया । राक्षसैः मुख्यैः ॥ १३ ॥ गुल्मान् सेनाः । " गुल्मो रुक्स्तंबसेनासु " इत्यमरः ॥ १४ ॥ गजानां गजयोधिनां । रथानां हयानामित्यत्राप्येवं द्रष्टव्यं । हयानां साग्रकोटिः द्वे अयुते चेत्यन्वयः । एते एतावन्तः । यद्वा गजानामित्यादिशब्दाः गजादिपराः । एवमुत्तरोत्तराधिकसङ्ख्योच्यते । हयानां द्वे अयुते । रक्षसां साग्रकोटिः पूर्णा कोटिः । एते रावणस्येष्टा अन्तरङ्गाः । स्वसेविन इत्यर्थः । आततायिनः क्रूरा इत्यर्थः ॥ १५—१६ ॥ अत्र राक्षसेषु । एकैकस्य राक्षसस्य । सहस्राणां सहस्रं दशलक्षसङ्ख्याविशिष्टः परिवारः । इदानीं । युद्धार्थे युद्धनिमित्तं । उपतिष्ठत इत्यन्वयः ॥ १७ ॥ एतामिति सार्धश्लोकः ॥ तान् मन्त्रिभूतान् । दर्शनानन्तरं सचिवैः प्रयोज्यकर्तृभिः । लङ्कायां सर्वां प्रवृत्तिमित्यनुषज्यते । रामाय प्रत्यवेदयत् । सचिवैरपि तं वृत्तान्तमावेदयदित्यर्थः ॥ १८ ॥ राममित्यादिश्लोकत्रयं ॥ उत्तरं अनन्तरवक्तव्यं ॥ १९ ॥ दिग्विजयकालिकबलादाधुनिकबलमधिकमिति कथयितुं पूर्वबलं परिगणयति—कुबेरमिति । निर्यान्ति निर्ययुः ॥ २० ॥ पराक्रमेण पराभिभवसामर्थ्येन । वीर्येण युद्धे स्वयमविकृतत्वेन । तेजसा प्रतापेन । सत्त्वगौरवात् धैर्यातिशयेनेत्यर्थः । दर्पेण च । रावणस्य अत्र ये सदृशास्तादृशा राक्षसा इति पूर्वेणान्वयः ॥ २१ ॥ स्वामिसन्निधौ शत्रुबलवर्णनमयुक्तमित्याशङ्क्य परिहरति—अत्रेति ॥ अत्र बलवर्णने सति । मन्युः क्रोधः । न कर्तव्यः । रोषये शत्रुनिरसनाय रोषमुत्पादये । न भीषये शत्रुबलवर्णनेन न भीतिमुत्पादये । रोषोत्पादनस्य फलमाह—समर्थोहीति ॥ २२ ॥ तत् राक्षसबलस्य व्यूढत्वात् । महता बलेन वृतो भवानपि । चतुरङ्गेण रावणसेनावच्चतुरवयवेन । व्यूह्य विभज्य । निर्मथिष्यसि । मध्यमपुरुषत्वमार्ष । चतुरङ्गकार्यकरत्वाच्चतुरङ्गत्वमित्यन्ये ॥ २३ ॥ प्रतिघातार्थं प्रतिक्रियार्थं ॥ २४ ॥

कृतस्यकर्मणोदृष्टत्वेनवक्तव्या । श्रवणापेक्षयास्वसाक्षिणःप्राबल्यात् ॥ १२ ॥ स० आततायिनः स्वयमेवसीतोपरोधापराधंकृत्वा शस्त्रपाणयइत्याततायिनः । यद्वा संयुगेयुद्धे इषवः आत्यन्ते सदासम्यक्क्षिप्यन्तेयेन तदिष्वातं धनुः । तेनतायन्तेपालयन्तिजनानिति संयुगेष्वाततायिनः । "तायृ सन्तानपालनयोः" इतिधातोः । यद्वा परदारापहर्तृसंबन्धिलाद्याततायिनः । "क्षेत्रदारापहर्ता च" इत्युक्तेः । निशाचराः यूथपाः ॥ १६ ॥ ति० सर्वलङ्कायायद्वृत्तं तत्प्रत्यवेदयत् ॥ १८ ॥ ति० यस्मात्तेन तत्तद्वारेषुसर्वा सेनाविभज्यस्थापिता । तत् तस्मात् । भवानपि इदंवानरानीकंतद्वदेवविभागेनव्यूह्य व्यूहितेनचतुरङ्गेणबलेनवृतंरावणं निर्मथि-

---

[पा०] १ ड. झ. ञ. ल्लङ्कायाः. २ ड. च. झ. ट. मामकामश्विनः. ३ च. ञ. ष्वपराजिताः. ४ ड. झ. मुपतिष्ठति. ५ ङ. ड. च. झ. ञ. ट. सर्वं. ६ झ. प्रतियुध्यति. ७ ड. झ. ट. सदृशास्यत्र. घ. सदृशास्तेतु. ग. सदृशास्तस्य. ८ ड. च. झ. ट. कोपये. ९ ख. ड. झ. ञ. ट. वृतं.

पूर्वद्वारे तु लङ्कायाः नीलो वानरपुङ्गवः ॥ प्रहस्तप्रतियोद्धा स्याद्वानरैर्बहुभिर्वृतः ॥ २५ ॥
अङ्गदो वालिपुत्रस्तु बलेन महता वृतः ॥ दक्षिणे बाधतां द्वारे महापार्श्वमहोदरौ ॥ २६ ॥
हनुमान्पश्चिमद्वारं निपीड्य पवनात्मजः ॥ प्रविशत्वप्रमेयात्मा बहुभिः कपिभिर्वृतः ॥ २७ ॥
दैत्यदानवसङ्घानामृषीणां च महात्मनाम् ॥ विप्रकारप्रियः क्षुद्रो वरदानबलान्वितः ॥ २८ ॥
परिक्रामति यः सर्वाँल्लोकान्संतापयन्प्रजाः ॥ तस्याहं राक्षसेन्द्रस्य स्वयमेव वधे धृतः ॥ २९ ॥
उत्तरं नगरद्वारमहं सौमित्रिणा सह ॥ निपीड्याभिप्रवेक्ष्यामि सबलो यत्र रावणः ॥ ३० ॥
वानरेन्द्रश्च बलवानृक्षराजश्च वीर्यवान् ॥ राक्षसेन्द्रानुजश्चैव गुल्मो भवतु मध्यमः ॥ ३१ ॥
न चैव मानुषं रूपं कार्यं हरिभिराहवे ॥ एषा भवतु संज्ञा नो युद्धेऽस्मिन्वानरे बले ॥ ३२ ॥
वानरा एव नश्चिह्नं स्वजनेऽस्मिन्भविष्यति ॥ ३३ ॥
वयं तु मानुषेणैव सप्त योत्स्यामहे परान् ॥ अहमेष सह भ्रात्रा लक्ष्मणेन महौजसा ॥
आत्मना पञ्चमश्चायं सखा मम विभीषणः ॥ ३४ ॥
स रामः कृत्यसिद्ध्यर्थमेवमुक्त्वा विभीषणम् ॥ सुवेलारोहणे बुद्धिश्चकार मतिमान्मतिम् ॥
रमणीयतरं दृष्ट्वा सुवेलस्य गिरेस्तटम् ॥ ३५ ॥

पूर्वद्वारेस्थित्वेति शेषः ॥ २५—२६ ॥ अप्रमेयात्मेति मायाविन इन्द्रजितोयमेवार्ह इति भावः ॥२७॥ स्वस्यचोत्तरद्वारनिरोधहेतुमाह—दैत्यदानवेत्यादिश्लोकत्रयं ॥ विप्रकारप्रियः प्रियविप्रकारः । "वा प्रियस्य" इति पूर्वनिपातः । विप्रकारः पीडा । क्षुद्रः क्षुद्रबुद्धिः । प्रजाः संतापयन् लोकान् परिक्रामतीत्यन्वयः । तस्याहमिति श्लोके यत्तच्छब्दाध्याहारेणाहंशब्दद्वयनिर्वाहः । योहं धृतः निश्चितः । सोहं प्रवेक्ष्यामीत्यन्वयः । स्वयमेव अद्वारेण । यद्वा तस्याहमित्यर्धान्तमेकं वाक्यं । उत्तरमित्यादि भिन्नं वाक्यं ॥ २८—३० ॥ गुल्मो भवतु मध्यमः । मध्यमसेना भवत्वित्यर्थः । बलवङ्ग्यां रावणेन्द्रजिङ्ग्यामधिष्ठितयोरुत्तरपश्चिमयोः मध्यमगुल्मो भवत्वित्यर्थः ॥ ३१ ॥ संज्ञा संकेतः । अस्य प्रयोजनमाह—वानरा इति ॥ नः अस्माकं । वानरा एवास्मिन् स्वजने चिह्नं भविष्यतीति । अस्माकं वानरत्वमेवात्मीयत्वज्ञापकंभविष्यतीत्यर्थः । यदि वानराअपि कामरूपधारणेन युद्ध्येयुः । राक्षसानामपि तादृशत्वादालपरविवेको न स्यात् । वानरत्वंतु जघन्यतया न ते भजिष्यन्तीति भावः । इदानीं मानुषरूपपरिग्रहप्रतिषेधसामर्थ्यादितःपूर्वं मानुषरूपं परिगृह्य स्थिता इति गम्यते ॥ ३२—३३ ॥ मानुषेण मनुष्यसंबन्धिना । रूपेणेति शेषः । विभीषणादीनामपि मानुषरूपसंस्थानसादृश्यादेवमुच्यते ॥ ३४ ॥ स राम इत्यादिसार्धश्लोक एकान्वयः ॥ कृत्यसिद्ध्यर्थं कार्यसिद्ध्यर्थं । सुवेलारोहणे विषये । बुद्धिः बुद्धिमान् । मतुब्लोप आर्षः । मतिं इच्छां । सुवेलारोहणे बुद्धिं चकार मतिमान्मतिमिति च पाठः । सुवेलारोहणबुद्धिमेव मतिं चकार । नान्यामित्यर्थः । आरोहणेच्छाहेतुमाह—रमणीयतरमिति । सौन्दर्यावलोकनमेव तदारोहणहेतुः । नतु लङ्काप्राप्तिः । अतएव लङ्कोपरोधायावरोहणं वक्ष्यति—ततस्त्विति ॥ पृथिवीं सुवेलकटकभूमिं । महात्मा महाबुद्धिः । प्रहृष्टरूपः अतिशयेन प्रहृष्टः । "प्रशंसायां रूपप्" । लङ्कां लङ्कैकदेशसुवेलं । महात्मा महाधृतिरिति द्विती-

ष्यसि ॥ २३ ॥ ति० प्रहस्तंप्रतियोद्धा प्रहस्तस्यसेनापतेःप्रतियोद्धा ॥ २५ ॥ स० स्वजने स्वजनत्वेनज्ञाने ॥ ३३ ॥ ति० सुवेलारोहणेबुद्धिंचकार । तस्यदुर्गत्वाद्रात्रौतत्रावस्थानस्यसुखत्वाच्च । मतिमान्मतिमितिपाठे मतिं अर्थनिर्धारणात्मिकांबुद्धिमित्यर्थः । ती० सुवेलारोहणे प्रवृत्ताबुद्धिर्यस्यसः सुवेलारोहणेबुद्धिः । अलुक्त्वमार्षं । मतिमान् आगामिगोचरबुद्धिमान् । मतिंचकार सुवेलारोहणेच्छांचकारेत्यर्थः । बुद्धिमितिद्वितीयान्तपाठेतु सुवेलारोहणे मतिं मननात्मिकांबुद्धिं निश्चयात्मिकांचकारेत्यर्थः । यद्वा बुद्धिं तात्कालिकरूपांमतिंचकार अर्थनिर्धारणरूपांचकारेत्यर्थः । अर्थनिर्धारणंमतिरितितज्ज्ञाः ॥ ३५ ॥

[पा०] १ च. छ. ज. लङ्कायां. २ घ. ङ. ज. झ. ट. प्रहस्तंप्रति. ३ घ. सह. ४ क. घ.—ट. गुल्मेभवतुमध्यमे. ५ क. ख. ग. ङ. झ. ट. वश्चिह्नं. ६ घ.—ट. अहमेव. ७ क. ग.—च. झ. ट. बुद्धिंचकार. ८ ङ. झ. ञ. ट. मतिमान्प्रभुः.

ततस्तु रामो महता बलेन प्रच्छाद्य सर्वां पृथिवीं महात्मा ॥
प्रहृष्टरूपोभिजगाम लङ्कां कृत्वा मतिं सोरिवधे महात्मा ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

अष्टत्रिंशः सर्गः ॥ ३८ ॥

सूर्येणास्ताचलारोहणे रामेण सुग्रीवादिभिः सह लङ्कावलोकनाय सुवेलाचलारोहणम् ॥ १ ॥

स तु कृत्वा सुवेलस्य मतिमारोहणं प्रति ॥ लक्ष्मणानुगतो रामः सुग्रीवमिदमब्रवीत् ॥ १ ॥
विभीषणं च धर्मज्ञमनुरक्तं निशाचरम् ॥ मन्त्रज्ञं च विधिज्ञं च श्लक्ष्णया परया गिरा ॥ २ ॥
सुवेलं साधुशैलेन्द्रमिमं धातुशतैश्चितम् ॥ अध्यारोहामहे सर्वे वत्स्यामोत्र निशामिमाम् ॥ ३ ॥
लङ्कां चालोकयिष्यामो निलयं तस्य रक्षसः ॥ येन मे मरणान्ताय हृता भार्या दुरात्मना ॥ ४ ॥
येन धर्मो न विज्ञातो नै तद्वृत्तं कुलं तथा ॥ राक्षस्या नीचया बुद्ध्या येन तद्गर्हितं कृतम् ॥ ५ ॥
तस्मिन्मे वर्तते रोषः कीर्तिते राक्षसाधमे ॥ यस्यापराधान्नीचस्य वधं द्रक्ष्यामि रक्षसाम् ॥ ६ ॥
एको हि कुरुते पापं कालपाशवशं गतः ॥ नीचेनात्मापचारेण कुलं तेन विनश्यति ॥ ७ ॥
एवं संमन्त्रयन्नेव सक्रोधो रावणं प्रति ॥ रामः सुवेलं वासाय चित्रसानुमुपारुहत् ॥ ८ ॥
पृष्ठतो लक्ष्मणश्चैनमन्वगच्छत्समाहितः ॥ सशरं चापमुद्यम्य सुमहद्विक्रमे रतः ॥
तमन्वरोहत्सुग्रीवः सामात्यः सविभीषणः ॥ ९ ॥

यमहालशब्दार्थः । अभिजगाम । आरोहणायेति भावः ॥ ३५—३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तत्रिंशः सर्गः ॥ ३७ ॥

अथ लङ्कादर्शनार्थं सुवेलारोहणमष्टत्रिंशे—स त्वित्यादिश्लोकद्वयमेकान्वयं ॥ धर्मज्ञत्वादि सुग्रीवस्यापि विशेषणं । सुवेलो नाम लङ्कासमतुङ्गताको गिरिविशेषः । विधिज्ञं कार्यज्ञं ॥ १—२ ॥ चितं व्याप्तं । अध्यारोहामहे आरोक्ष्यामः । अयंच समुद्रतरणदिवसवृत्तान्तः पूर्वं संग्रहेणोक्तः । अद्य सविशेषमुच्यते ॥ ३ ॥ लङ्कामित्यादिश्लोकद्वयमेकान्वयं ॥ लङ्कालोकने निमित्तमाह—निलयमिति । मे भार्येति संबन्धः । मरणान्ताय मरणरूपफलाय । तत् प्रसिद्धं । वृत्तं धर्मशास्त्रविहितस्वकुलाचारः । कुलं स्वकुलातिशयः । एतत्सर्वं भार्यापहरणनिवृत्तिहेतुः तन्नासीदित्यर्थः । तर्हि केन हेतुना कृतमित्यत्राह—राक्षस्येति । तत् भार्यापहरणं ॥ ४—५ ॥ एतादृशस्य निलयदर्शने किं फलं तत्राह—तस्मिन्निति ॥ वर्तते उत्पद्यते । तर्हि तन्मात्रवधे यत्नः क्रियतामित्यत्राह—यस्येति ॥ ६ ॥ अन्यस्य दोषेणान्यवधः किमर्थंक्रियत इत्यत्राह—एक इति ॥ एकः पापं कुरुते नीचेन तेन कर्त्रा आत्मापचारेण तद्दोषेण कारणेन कुलं तत्संबन्धिनः सर्वे विनश्यन्ति ॥ ७ ॥ संमन्त्रयन् वदन् । उपारुहत् उपारुक्षत् ॥ ८ ॥ पृष्ठत इत्यादि सार्धश्लोकः ॥ समा-

कतक० एतदग्रे ततस्तुरामइतिपद्यंपठन्ति । तत्रवक्ष्यमाणसंग्रहो नाप्युक्तानुवादो नाप्यत्रप्रकरणविच्छेदइतीमंश्लोकं वृथाप्रक्षिप्यात्रसर्गच्छेदंकुर्वन्तिभ्रान्ताः ॥ ३६ ॥ इतिसप्तत्रिंशःसर्गः ॥ ३७ ॥

स० मरणान्ताय मरणेन रक्षःकुलसहितोतो नाशःस्वस्य तस्मै ॥४॥ स० वृत्तं सदाचारः असद्वलिष्ठतावार्तावा । राक्षस्या राक्षससंबन्धिन्या । तत्रापिनीचया । विभीषणं सुसुखीकर्तुमियमुक्तिः ॥ ५ ॥

[पा०] १ घ. मन्त्रज्ञंचहनूमन्तं. २ ख.—च. झ. ञ. ट. नवृत्तंनकुलंतथा. ३ घ. च. छ. नात्मापराधेन. ४ ङ. झ. ञ. ट. सुवेलमासाद्य. ५ ग. व्रजन्तंलक्ष्मणः.

हनुमानङ्गदो नीलो मैन्दो द्विविद एव च ॥ गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ १० ॥
पनसः कुमुदश्चैव हरो रम्भश्च यूथपः ॥ जाम्बवांश्च सुषेणश्च ऋषभश्च महामतिः ॥ ११ ॥
दुर्मुखश्च महातेजास्तथा शतबलिः कपिः ॥ एते चान्ये च बहवो वानराः शीघ्रगामिनः ॥ १२ ॥
ते वायुवेगप्रवणास्तं गिरिं गिरिचारिणः ॥ अध्यारोहन्त शतशः सुवेलं यत्र राघवः ॥ १३ ॥
[ततः सुवेलमारुह्य रामस्तैस्सह वानरैः ॥ निषसाद गिरेस्तस्य शृङ्गे समतले शुभे ॥ १४ ॥
ततः कपिगणास्सर्वे समावृत्य द्वियोजनम् ॥ सुवेलमध्यारोहंस्ते प्लवन्तो दक्षिणामुखाः ॥ १५ ॥]
ते त्वदीर्घेण कालेन गिरिमारुह्य सर्वतः ॥ ददृशुः शिखरे तस्य विषक्तामिव खे पुरीम् ॥ १६ ॥
तां शुभां प्रवरद्वारां प्राकारपरिशोभिताम् ॥ लङ्कां राक्षससंपूर्णां ददृशुर्हरियूथपाः ॥ १७ ॥
प्राकारचयसंस्थैश्च तदा नीलैर्निशाचरैः ॥ ददृशुस्ते हरिश्रेष्ठाः प्राकारमपरं कृतम् ॥ १८ ॥
ते दृष्ट्वा वानराः सर्वे राक्षसान्युद्धकाङ्क्षिणः ॥ मुमुचुर्विविधान्नादांस्तत्र रामस्य पश्यतः ॥ १९ ॥
ततोस्तमगमत्सूर्यः संध्यया प्रतिरञ्जितः ॥ पूर्णचन्द्रप्रदीप्ता च क्षपा समभिवर्तते ॥ २० ॥

ततः स रामो हरिवाहिनीपतिर्विभीषणेन प्रतिनन्द्य सत्कृतः ॥
सलक्ष्मणो यूथपयूथसंवृतः सुवेलपृष्ठे न्यवसद्यथासुखम् ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टत्रिंशः सर्गः ॥ ३८ ॥

एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

रात्रौसुग्रीवादिभिःसहसुवेलेसुखोषितेनरामेण प्रातर्लङ्कावलोकनम् ॥ १ ॥

तां रात्रिमुषितास्तत्र सुवेले हरिपुङ्गवाः ॥ लङ्कायां ददृशुर्वीर वनान्युपवनानि च ॥ १ ॥

हितः सावधानः ॥ ९ ॥ सामात्य इत्युक्तं विवृणोति—हनुमानित्यादिचतुःश्लोकी ॥ हनुमानिति पृथगुक्त्या रामलक्ष्मणौ पङ्क्त्यामेवारूढाविति गम्यते । ते प्रसिद्धाः । एते चान्ये च । वायुवेगप्रवणाः वायुवेगेन गच्छन्तः । "प्लुङ् गतौ" इति धातोर्बहुलग्रहणात्कर्तरि ल्युट् । अतएव शीघ्रगामिनः सन्तः अध्यारोहन्त ॥ १०—१५ ॥ ते रामादयः । तस्य प्रसिद्धस्य त्रिकूटस्य । खे विषक्तां आकाशे लम्बमानामिव स्थितां । पुरीं लङ्कां । सर्वतो ददृशुः ॥ १६ ॥ वानराश्च ददृशुरित्याह—तामिति ॥ स्पष्टः ॥ १७ ॥ प्राकारस्य चयः वप्रं तत्र स्थितैः । "स्याच्चयो वप्रमस्त्रियां" इत्यमरः ॥१८—१९॥ प्रतिरञ्जितः रक्तवर्णीकृतः । पूर्णचन्द्रप्रदीप्तेति । अनेन पौर्णमास्यां सुवेलारोहणमित्युक्तं । प्रथमायां युद्धारम्भ इत्याहुः । यद्वा पूर्णचन्द्रतुल्यप्रदीपवतीति वाऽर्थः । संभवन्ति हि वानरसेनायामपि प्रकाशार्थमारोपिता दीपाः ॥ २० ॥ वाहिनीपतिः वानरसेनानिर्वाहकः ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टत्रिंशः सर्गः ॥३८॥

अथ लङ्कादर्शनमेकोनचत्वारिंशे—तामिति ॥ तां रात्रिमित्यत्यन्तसंयोगे द्वितीया । ददृशुः प्रातरिति

स० वायुवद्वेगप्रवणः वेगायतिर्येषांतेतथा । वायोरिववेगविस्तारवन्तइत्यर्थः । "प्रवणःक्रमनिम्नोर्व्यामायतौच" इतिविश्वः ॥१३॥ स० खे०आकाशेविषक्तां अंबरचुंबिनीमितियावत् ॥ १६ ॥ ति० प्रतिरञ्जितः प्रतिप्रापितरागः । पूर्णचन्द्रप्रदीप्तारात्रेत्यनेन पौषशुक्लचतुर्दश्यांपूर्णिमायांवा सुवेलारोहणमितिबोध्यं । "चतुर्दश्यांसुवेलाग्रेरामःसैन्यंन्यवेशयत्" इत्यभिवेश्योक्तेः । अत्रपूर्णचन्द्रलोक्तिःपूर्णकल्पत्वादिति ॥ २० ॥ इत्यष्टत्रिंशःसर्गः ॥ ३८ ॥

[पा०] १ ख. ग. घ. करंभश्चमहाद्युतिः. २ इदंश्लोकद्वयं क. घ. च. छ. पाठेषुदृश्यते. ३ घ. ङ. ञ. ट. प्राकारवर. ४ ङ. ञ. ट. तंदृष्ट्वा. ५ ङ. च. छ. ञ. ट. यूथसंयुतः.

समसौम्यानि रम्याणि विशालान्यायतानि च ॥ दृष्टिरम्याणि ते दृष्ट्वा बभूवुर्जातविस्मयाः ॥ २ ॥
चम्पकाशोकपुंनागसालतालसमाकुला ॥ तमालवनसंछन्ना नागमालासमावृता ॥ ३ ॥
हिन्तालैरर्जुनैर्नीपैः सप्तपर्णैश्च पुष्पितैः ॥ तिलकैः कर्णिकारैश्च पाटलैश्च समन्ततः ॥ ४ ॥
शुशुभे पुष्पिताग्रैश्च लतापरिगतैर्द्रुमैः ॥ लङ्का बहुविधैर्दिव्यैर्यथेन्द्रस्यामरावती ॥ ५ ॥
विचित्रकुसुमोपेतै रक्तकोमलपल्लवैः ॥ शाद्वलैश्च तथा नीलैश्चित्राभिर्वनराजिभिः ॥ ६ ॥
गन्धाढ्यान्यंभिरम्याणि पुष्पाणि च फलानि च ॥ धारयन्त्यगमास्तत्र भूषणानीव मानवाः ॥ ७ ॥
तच्चैत्ररथसंकाशं मनोज्ञं नन्दनोपमम् ॥ वनं सर्वर्तुकं रम्यं शुशुभे पट्पदायुतम् ॥ ८ ॥
नत्यूहकोयष्टिभकैर्नृत्यमानैश्च बर्हिभिः ॥ रुतं परभृतानां च शुश्रुवुर्वननिर्झरे ॥ ९ ॥
नित्यमत्तविहङ्गानि भ्रमराचरितानि च ॥ कोकिलाकुलषण्डानि विहगाभिरुतानि च ॥ १० ॥
भृङ्गराजाभिगीतानि भ्रमरैः सेवितानि च ॥ कोणालकविघुष्टानि सारसाभिरुतानि च ॥ ११ ॥
विविशुस्ते ततस्तानि वनान्युपवनानि च ॥ हृष्टाः प्रमुदिता वीरा हरयः कामरूपिणः ॥ १२ ॥
तेषां प्रविशतां तत्र वानराणां महौजसाम् ॥ पुष्पसंसर्गसुरभिर्ववौ घ्राणसुखोऽनिलः ॥ १३ ॥
अन्ये तु हरिवीराणां यूथान्निष्क्रम्य यूथपाः ॥ सुग्रीवेणाभ्यनुज्ञाता लङ्कां जग्मुः पताकिनीम् ॥१४॥
वित्रासयन्तो विहगांस्त्रासयन्तो मृगद्विपान् ॥ कम्पयन्तश्च तां लङ्कां नादैस्ते नदतां वराः ॥
कुर्वन्तस्ते महावेगा महीं चरणपीडिताम् ॥ १५ ॥

सिद्धं । वनानि अकृत्रिमाणि । उपवनानि कृत्रिमाणि ॥ १ ॥ समानि च तानि सौम्यानि च समसौम्यानि निम्नोन्नतत्वरहितानि स्निग्धानि चेत्यर्थः । अत एव रम्याणि रमणीयानि । विशालानि विपुलानि । आयतानि दीर्घाणि । दृष्टिरम्याणि नयनाकर्षणानि । वनान्युपवनानि चेत्याकृष्यान्वयः ॥ २ ॥ चम्पकेत्यादि श्लोकचतुष्टयमेकान्वयं ॥ नागमाला नागकेसरमाला । हिन्तालैरित्यादि । उपलक्षितेतिशेषः । दिव्यैः पारिजातादिभिः । अत्राप्युपलक्षितेतिशेषः । बिचित्रेत्यादि पदद्वयमपि दिव्यद्रुमविशेषणं । शाद्वलैरित्यादावप्युपलक्षणे तृतीया । लङ्काशब्दश्चात्र सुवेलपरः । उत्तरत्र वानरप्रवेशोक्तेः । शुशुभे शोभमाना दृश्यत इत्यन्वयः ॥ ३—६ ॥ तत्र वनेषु । धारयन्ति अधारयन् । अगमाः वृक्षाः ॥ ७ ॥ सर्वे ऋतवो यस्मिन् तत्सर्वर्तुकं । " शेषाद्विभाषा " इति कप्प्रत्ययः । षट्पदायुतं षट्पदैरासमन्ताद्युतं ॥ ८ ॥ वननिर्झरे नत्यूहैः कोयष्टिभकैः जलकुक्कुटविशेषैः । नृत्यमानैः नृत्यद्भिः । बर्हिणैश्च सहितानां परभृतानां रुतं शुश्रुवुरिति योजना ॥ ९ ॥ वनरामणीयकाकृष्टास्तत्रविविशुरित्याह—नित्येत्यादिना कामरूपिण इत्यन्तेन श्लोकत्रयेण ॥ विहङ्गाः वक्ष्यमाणकोकिलादिव्यतिरिक्ताः । षण्डाः वृक्षसमूहाः । विहङ्गभृङ्गसंचारस्य तन्नादस्य च वनशोभाहेतुत्वात्तत्संचारमुक्त्वा तन्नादमाह—विहगेत्यादिना । विहगानामभिरुतं येषु तानि विहगाभिरुतानि । एवमुत्तरत्रापि विग्रहः । कोणालकः खञ्जनः । सारसाभिरुतानीत्यनेन वनादीनां सरःसमीपवर्तित्वमुक्तं । हृष्टाः पुलकिताः । प्रमुदिताः सन्तुष्टाः । वीराः शत्रुवनप्रवेशेपि निर्भयाः । कामरूपिणः सूक्ष्मविपुलप्रवेशानुगुणस्थूलसूक्ष्मशरीरवन्तः ॥ १०—१३ ॥ अन्येत्वित्यादिसार्धश्लोकद्वयमेकान्वयं ॥ १४—१५ ॥

ति० समसौम्यानि आयामविस्ताराभ्यांसमानि समभूतलानिच । दुष्टमृगाद्युपद्रवराहित्येनसौम्यानि । अतएवक्रीडादौरम्याणीत्यर्थइतितीर्थः । समसाम्यानीतिपाठः । समप्रदेशे साम्यसंस्थानानि । रम्याणि मृगाद्युपद्रवराहित्यादितिकतकः ॥ २ ॥ ति० वननिर्झरे निर्झरयुतेवने । राजदन्तादिः ॥९॥ ति०प्राणसमत्वेनमन्दता ॥१३॥ ति० अन्येतु वनोपवनप्रवेष्टव्यतिरिक्ताः ।

[पा०] १ ङ. च. छ. झ. ञ. ट. बकुलसाल. २ ङ. ज. झ. ट. न्यतिरम्याणि. ३ क. ख. घ. ङ. च. झ. ञ. ट. बर्हिणैः. ४ ङ. झ. राजाधिगीतानि. ५ क. ख. च. छ. ञ. कुररैः. ङ. झ. ट. कुररखनितानिच. ६ च. ञ. ट. कोयष्टिकविघुष्टानि. क. छ. कोयष्टिकविपुष्टानि. ७ ङ. च. छ. झ. ञ. ट. प्राणसमोऽनिलः. ८ ङ. झ. ट. विहगान्ग्लापयन्तो.

रजश्च सहसैवोर्ध्वं जगाम चरणोत्थितम् ॥ १६ ॥
ऋक्षाः सिंहा वराहाश्च महिषा वारणा मृगाः ॥ तेन शब्देन वित्रस्ता जग्मुर्भीता दिशो दश ॥१७॥
शिखरं तत्त्रिकूटस्य प्रांशु चैकं दिविस्पृशम् ॥ समन्तात्पुष्पसंछन्नं महारजतसन्निभम् ॥ १८ ॥
शतयोजनविस्तीर्णं विमलं चारुदर्शनम् ॥ श्लक्ष्णं श्रीमन्महच्चैव दुष्प्रापं शकुनैरपि ॥
मनसाऽपि दुरारोहं किं पुनः कर्मणा जनैः ॥ १९ ॥
निविष्टा तत्र शिखरे लङ्का रावणपालिता ॥ शतयोजनविस्तीर्णा त्रिंशद्योजनमायता ॥ २० ॥
सा पुरी गोपुरैरुच्चैः पाण्डुराम्बुदसन्निभैः ॥ काञ्चनेन च सालेन राजतेन च शोभिता ॥ २१ ॥
प्रासादैश्च विमानैश्च लङ्का परमभूषिता ॥ घनैरिवातपापाये मध्यमं वैष्णवं पदम् ॥ २२ ॥
यस्यां स्तम्भसहस्रेण प्रासादः समलङ्कृतः ॥ कैलासशिखराकारो दृश्यते खमिवोल्लिखन् ॥ २३ ॥
चैत्यः स राक्षसेन्द्रस्य बभूव पुरभूषणम् ॥ बलेन रक्षसां नित्यं यः समग्रेण रक्ष्यते ॥ २४ ॥
मनोज्ञां काननवतीं पर्वतैरुपशोभिताम् ॥ नानाधातुविचित्रैश्च उद्यानैरुपशोभिताम् ॥ २५ ॥
नानाविहगसंघुष्टां नानामृगनिषेविताम् ॥ नानाकाननसंतानां नानाराक्षससेविताम् ॥ २६ ॥
तां समृद्धां समृद्धार्थो लक्ष्मीवाँल्लक्ष्मणाग्रजः ॥ रावणस्य पुरीं रामो ददर्श सह वानरैः ॥ २७ ॥

रजश्चेत्यर्धमेकं वाक्यं ॥ चरणोत्थितं वानरपादाहतिजनितं । रजः ऊर्ध्वं जगाम । उत्थितमित्यर्थः ॥१६॥ अत्र ऋक्षादयो लङ्कावनवासिनः । भीताः दर्शनादेव भीताः । तेन शब्देन वित्रस्ताः विशेषेण त्रस्ताः । दश दिशो जग्मुः । यथायथं जग्मुरित्यर्थः ॥ १७ ॥ एवं त्रिकूटस्य प्रथमशिखरं सुवेलाख्यमुक्त्वा मध्यमशिखरं वर्णयति—शिखरं तदित्यादिना ॥ सार्धश्लोकद्वयमेकान्वयं । तत् प्रसिद्धं । प्रांशु पार्श्ववर्तिशिखरद्वयापेक्षया उन्नतं । एकं अद्वितीयं । मध्यममित्यर्थः । स्पृशतीति स्पृशं । इगुपधलक्षणः कप्रत्ययः । समन्तात्पुष्पसंछन्नं अतएव महारजतसन्निभं पृथुरजतसन्निभं । यद्वा सुवर्णसन्निभमिति स्वरूपोक्तिः । चारुदर्शनं सुन्दरदर्शनं । एवंभूतं शिखरं अदृश्यतेत्यध्याहारः ॥ १८—१९ ॥ निविष्टेत्यादिश्लोकपञ्चकमेकान्वयं ॥ २० ॥ सालेन प्राकारेण ॥ २१ ॥ प्रासादैरिति । प्रासादादिलक्षणं प्रागेव लिखितं । आतपापाये वर्षारम्भसमये । मध्यमं वैष्णवं पदमिति । त्रिविक्रमावतारे त्रिभिः पदैः सर्वलोकक्रमणे मध्यमपदेनान्तरिक्षं क्रान्तमिति आकाशं मध्यमं वैष्णवं पदमिति उच्यते ॥ २२ ॥ उल्लिखन् व्याप्नुवन् नगरमध्यचतुष्पथं चैत्यं तत्र भवश्चैत्यः राक्षसेन्द्रस्य पुरभूषणमित्यन्वयः । यः समग्रेण रक्षसां शतेन नित्यं रक्ष्यते । यश्च राक्षसेन्द्रस्य पुरभूषणं बभूव । स्तम्भसहस्रेण समलंकृतः कैलासशिखराकारः खमुल्लिखन्निव स्थितः चैत्यः स प्रासादः यस्यां दृश्यते तादृशी रावणपालितत्वादिविशेषणविशिष्टा तत्र शिखरे निविष्टा लङ्का अदृश्यतेत्यध्याहारेणान्वयः ॥२३–२४॥ एवं वानराणामग्रगतानां लङ्कादर्शनमुक्त्वा रामस्यापि तद्दर्शनमाह—मनोज्ञामित्यादिश्लोकत्रयमेकान्वयं ॥ पर्वतैः क्रीडाशैलैः । नानाधातुविचित्रैरिति पर्वतविशेषणं । उद्यानैः कृत्रिमवनैः ॥ २५ ॥ नानाकाननेति पूर्वं काननवत्त्वमुक्तं अत्र तन्नानात्वमितिभिदा ॥ २६ ॥ समृद्धां उन्नतां । समृद्धार्थो समृद्धद्रव्यां । लक्ष्मीवान् नगरदर्शनजप्रीतिविकसितकान्तिः ॥२७॥

यूथान्निष्क्रम्यलङ्कांजग्मुः ॥ १४ ॥ ति० दशयोजनेति । इदंचलङ्कारूपमहादुर्गान्तर्वर्तिरावणवासस्थानभूतान्तर्दुर्गपरं । 'शतयोजनविस्तीर्णांत्रिंशद्योजनमायता' इत्यत्रैवान्यत्रस्थलेऽउक्तेः ॥ २० ॥ काञ्चनेन राजतेन । सालेन प्राकारेण ॥ २१ ॥ इत्येकोनचत्वारिंशः सर्गः ॥ ३९ ॥

[पा०] १ क. ख. ग. ङ.—ट. तस्य. २ क.—ट. दशयोजन. ३ गं. घ. च. छ. ज. तथाद्विगुणमायता. ङ. झ. ट. विंशद्योजनमायता. ४ क. ख. ग. ङ.—ट. शोभते. ५ क.—ट. शतेन. ६ ङ. झ. ञ. ट. काञ्चनवतीं. ७ ज. नानागृहसमाकीर्णां. ८ ख. ग. घ. च. छ. समृद्धार्थो.

तां महागृहसंबाधां दृष्ट्वा लक्ष्मणपूर्वजः ॥ [1]नगरीममरप्रख्यो विस्मयं प्राप वीर्यवान् ॥ २८ ॥
तां रत्नपूर्णां बहुसंविधानां प्रासादमालाभिरलङ्कृतां च ॥
पुरीं महायन्त्रकवाटमुख्यां ददर्श रामो महता बलेन ॥ २९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

चत्वारिंशः सर्गः ॥ ४० ॥

सुवेलाचलस्थित्यालङ्कामवलोकमानेरामे पार्श्वस्थेनसुग्रीवेण लङ्कागोपुरशृङ्गेराजोपचारै रामाभिमुखावस्थितरावणावलोकनम् ॥ १ ॥ तथाकोपादुत्प्लवेनरावणनिकटमेत्य तत्किरीटपातनपूर्वकं तेनसहचिरंनियुद्धकरणम् ॥ २ ॥ तथा श्रान्तेनतेन मायोपक्रमे लाघवात्पुनारामपार्श्वागमनम् ॥ ३ ॥

ततो रामः सुवेलाग्रं योजनद्वयमण्डलम् ॥ [2]आरुरोह ससुग्रीवो हरियूथपसंवृतः ॥ १ ॥
स्थित्वा मुहूर्तं तत्रैव दिशो दश विलोकयन् ॥ त्रिकूटशिखरे रम्ये निर्मितां विश्वकर्मणा ॥
ददर्श लङ्कां सुन्यस्तां रम्यकाननशोभिताम् ॥ २ ॥
[3]तस्यां गोपुरशृङ्गस्थं राक्षसेन्द्रं दुरासदम् ॥ ३ ॥
श्वेतचामरपर्यन्तं विजयच्छत्रशोभितम् ॥ रक्तचन्दनसंलिप्तं [4]रत्नाभरणभूषितम् ॥ ४ ॥
नीलजीमूतसंकाशं हेमसंछादिताम्बरम् ॥ ऐरावतविषाणाग्रैरुत्कृष्टकिणवक्षसम् ॥ ५ ॥
शशलोहितरागेण संवीतं रक्तवाससा ॥ सन्ध्यातपेन [5]संवीतं मेघराशिमिवाम्बरे ॥ ६ ॥
पश्यतां वानरेन्द्राणां राघवस्यापि पश्यतः ॥ दर्शनाद्राक्षसेन्द्रस्य सुग्रीवः सहसोत्थितः ॥ ७ ॥
क्रोधवेगेन संयुक्तः सत्त्वेन च बलेन च ॥ अचलाग्रादथोत्थाय पुप्लुवे गोपुरस्थले ॥ ८ ॥

अमरप्रख्यः देवसदृशः ॥ २८ ॥ पुनःसंग्रहेणाह—तामिति ॥ रत्नानि श्रेष्ठवस्तूनि । संविधानं रक्षणं ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

अथ सुग्रीवरावणयोर्द्वन्द्वयुद्धकथनं चत्वारिंशे । अत्र प्रथमश्लोकः पूर्वोक्तानुवादः—तत इति ॥ योजनद्वयमण्डलं योजनद्वयविस्तारमण्डलं ॥ १ ॥ सुन्यस्तां सुष्ठु निवेशितां ॥ २ ॥ तस्यामित्यादि सार्धश्लोकत्रयमेकान्वयं ॥ अत्र ददर्शेत्यनुषज्यते । श्वेते चामरे पर्यन्ते पार्श्वद्वये यस्य स श्वेतचामरपर्यन्तः । उभयतो वीज्यमानचामर इत्यर्थः । विजयच्छत्रं विजयसूचकछत्रं । रत्नाभरणं पद्मरागाभरणं । हेमसंछादिताम्बरं तत्र तत्र सुवर्णचित्राम्बरं । सुवर्णसूत्रिताम्बरमिति वार्थः । उत्कृष्टकिणवक्षसं उपपादितकिणवक्षसं । उत्कृष्टस्य उल्लिखितस्य किणः वक्षसि यस्य स तथेति वार्थः । शशलोहितरागेण शशरुधिरसमानरागेण । रक्तशब्दविवरणमिदं । रक्तवाससा उत्तरीयेण । संवीतं परिवीतं ॥ ३—६ ॥ " हतं च रावणं संख्ये दर्शनादवधारय " इति रामसन्निधौ पूर्वं प्रतिज्ञातमर्थं साधयितुमुत्थितः सुग्रीवइत्याह—पश्यतामित्यादिना ॥ पश्यतामित्यनादरे षष्ठी । अत्रानादरणमनुक्त्वा गमनं । सप्तम्यर्थेषष्ठीवा । दर्शनात् दर्शनमात्रात् । क्रोधवेगेन कथं मत्स्वामिनोग्रे स्वयं राजोपचारेण तिष्ठति दुरात्मेति कोपातिशयेनेत्यर्थः । सत्त्वेन मनोबलेन । बलेन कायबलेन । पुप्लुवे गोपुरमुद्दिश्येति शेषः ॥ गोपुरस्थले स्थित्येत्य-

---

स० रक्तवाससा स्नेहविषयेणवस्त्रेण ॥ ६ ॥

[पा०] १ ङ. ञ. ट. नगरीत्रिदिवप्रख्यां. २ ङ. ञ. ट. उपारोहत्ससुग्रीवोहरियूथैःसमन्वितः. ३ ङ. ञ. तस्य. ४ ग. ङ. च. ञ. ञ. ट. रक्ताभरणभूषितं. ५ क. ग. ङ.—ट. संछन्नं. ६ क. ख. ग. च. ञ. संतप्तः.

स्थित्वा मुहूर्तं संप्रेक्ष्य निर्भयेनान्तरात्मना ॥ तृणीकृत्य च तद्रक्षः सोब्रवीत्परुषं वचः ॥ ९ ॥
लोकनाथस्य रामस्य सखा दासोस्मि राक्षस ॥ न मया मोक्ष्यसेऽद्य त्वं पार्थिवेन्द्रस्य तेजसा ॥१०॥
इत्युक्त्वा सहसोत्पत्य पुप्लुवे तस्य चोपरि ॥ आकृष्य मुकुटं चित्रं पातयित्वाऽपतद्भुवि ॥ ११ ॥
समीक्ष्य तूर्णमायान्तमाबभाषे निशाचरः ॥ सुग्रीवस्त्वं परोक्षं मे हीनग्रीवो भविष्यसि ॥ १२ ॥
इत्युक्त्वोत्थाय तं क्षिप्रं बाहुभ्यामाक्षिपत्तले ॥ कन्तुवत्तं समुत्थाय बाहुभ्यामाक्षिपद्धरिः ॥ १३ ॥

परस्परं स्वेदविदिग्धगात्रौ परस्परं शोणितदिग्धदेहौ ॥
परस्परं श्लिष्टनिरुद्धचेष्टौ परस्परं शाल्मलिकिंशुकौ यथा ॥ १४ ॥
मुष्टिप्रहारैश्च तलप्रहारैररत्निघातैश्च कराग्रघातैः ॥
तौ चक्रतुर्युद्धमसह्यरूपं महाबलौ वानरराक्षसेन्द्रौ ॥ १५ ॥
कृत्वा नियुद्धं भृशमुग्रवेगौ कालं चिरं गोपुरवेदिमध्ये ॥
उत्क्षिप्य चाक्षिप्य विनम्य देहौ पादक्रमाद्गोपुरवेदिलग्नौ ॥
अन्योन्यमाविध्य विलग्नदेहौ तौ पेततुः सालनिखातमध्ये ॥ १६ ॥
उत्पेततुर्भूतलमस्पृशन्तौ स्थित्वा मुहूर्तं त्वभिनिश्वसन्तौ ॥
आलिङ्ग्य चावल्ग्य च बाहुयोक्त्रैः संयोजयामासतुराहवे तौ ॥ १७ ॥
संरम्भशिक्षाबलसंप्रयुक्तौ संचेरतुः संप्रति युद्धमार्गैः ॥
शार्दूलसिंहाविव जातदर्पौ गजेन्द्रपोताविव संप्रयुक्तौ ॥ १८ ॥

न्वयः । अन्तरात्मना मनसा ॥ ७—९ ॥ रामाभिप्रायेण सखा वस्तुतो दासोस्मीति भावः । मया मत्तः । औद्धत्यं परिहरति—पार्थिवेन्द्रस्य तेजसेति ॥ १०—११ ॥ आयान्तं सुग्रीवमितिशेषः । परोक्षं ममासन्निधाने । त्वं सुग्रीवः शोभनग्रीवः । प्रत्यक्षं तु हीनग्रीवो भविष्यसीत्यर्थः ॥ १२ ॥ तले गोपुरतले । आक्षिपत् अपातयत् । कन्तुवत्समुत्थाय कन्तुकवज्झटित्युत्पत्येत्यर्थः ॥ १३ ॥ परस्परमित्यादि श्लोकद्वयमेकान्वयं ॥ आरम्भे दृढपरीरम्भेण स्वेदसिक्तगात्रौ । ततः खरतरनखक्षतेन शोणितलिप्तशरीरौ । ततो दृढाश्लिष्टतया निरुद्धचेष्टौ निष्पन्दौ । ततः परस्परत्यागे कुसुमितशाल्मलीकिंशुकाविव स्थितौ । तौ वानरराक्षसेन्द्रौ । मुष्टिप्रहारैः । मुष्टीनां व्यथायां तलप्रहारैः । तत्पीडायां अरत्निघातैः निष्कनिष्ठमुष्टियुक्तप्रकोष्ठप्रहारैः । " अरत्निस्तु निष्कनिष्ठेन मुष्टिना " इत्यमरः । तद्बाधायां कराग्रघातैः । असह्यरूपं अत्यन्तासह्यं । प्रशंसायां रूपप्प्रत्ययः । युद्धं चक्रतुः ॥ १४—१५ ॥ कृत्वेत्यादिसार्धश्लोकएकान्वयः ॥ नियुद्धं मल्लयुद्धं बाहुयुद्धं वा । " नियुद्धं बाहुयुद्धं स्यात् " इत्यमरः । गोपुरवेदिमध्ये चिरं कालं नियुद्धं कृत्वा । तत उत्क्षिप्य परस्परमूर्ध्वं क्षिप्त्वा । आक्षिप्य आकृष्य । परस्परंदेहौ विनम्य विनाम्य । पादक्रमात् पादविन्यासविशेषात् । गोपुरवेदिलग्नौ पदात्पदं पश्चाच्चलित्वा पुनर्युद्धार्थमवसरप्रतीक्षतया गोपुरवेदिकायां निश्चलंस्थितावित्यर्थः । आविध्य बाहुभ्यां संवेष्ट्य । विलग्नदेहौ श्लिष्टदेहौ सन्तौ । सालनिखातयोः प्राकारपरिखयोर्मध्ये पेततुः ॥ १६ ॥ लाघवातिशयेन भूतलमस्पृष्ट्वैव उत्पेततुः । ततो मुहूर्तं तूष्णीं स्थित्वा श्रमवशादभिनिश्वसन्तौ पुनरालिङ्ग्य स्वयमेव स्वशरीरमालिङ्ग्य । आवल्ग्य आप्लुत्य । बाहुयोक्त्रैः बाहुपाशैः संयोजयामासतुः । देहाविति शेषः । निबिडं बबन्धतुरित्यर्थः ॥ १७ ॥ संरम्भेति । संरम्भः अभिनिवेशः । शिक्षा अभ्यासः । बलं शक्तिः । एतैः संप्रयुक्तौ संयुक्तौ सन्तौ संप्रति युद्धमार्गैः चातुर्येण परस्परग्रहणानुकूलक्रमैरित्यर्थः । संप्रति तदानीमित्यर्थ इत्येके । शार्दूलसिंहौ शार्दूलश्रेष्ठौ । संप्रयुक्तौ

[पा०] १ घ.—ट. पातयामासतद्भुवि. २ ङ. च. छ. झ. ञ. ट. किंशुकाविव. ३ क. ग. ङ.—ट. मापीड्य. ४ च. छ. ज. ट. चापीड्य. क. ग. घ. चाबध्य.

संहत्य चापीड्य च तावुरोभ्यां निपेततुर्वै युगपद्धरण्याम् ॥
उद्यम्य चान्योन्यमधिक्षिपन्तौ संचक्रमाते बहुयुद्धमार्गैः ॥ १९ ॥
व्यायामशिक्षाबलसंप्रयुक्तौ क्लमं न तौ जग्मतुराशु वीरौ ॥
बाहूत्तमैर्वारणवारणाभैर्निवारयन्तौ वरवारणाभौ ॥ २० ॥
चिरेण कालेन तु संप्रयुक्तौ संचेरतुर्मण्डलमार्गमाशु ॥ २१ ॥
तौ परस्परमासाद्य यत्तावन्योन्यसूदने ॥ मार्जाराविव भक्षार्थे वितस्थाते मुहुर्मुहुः ॥ २२ ॥
मण्डलानि विचित्राणि स्थानानि विविधानि च ॥ गोमूत्रिकाणि चित्राणि गतप्रत्यागतानि च ॥२३॥
तिरश्चीनगतान्येव तथा वक्रगतानि च ॥ परिमोक्षं प्रहाराणां वर्जनं परिधावनम् ॥ २४ ॥

सन्तौ गजेन्द्रपोतौ कलभौ। संहत्य संयोज्य। उरोभ्यामन्योन्यमापीड्य धरण्यां युगपन्निपेततुः। अथ उद्यम्य उद्धृत्य। अधिक्षिपन्तौ पातयन्तौ। एवं बहुयुद्धमार्गैः बहुयुद्धप्रकारैः। संचक्रमाते संचेरतुः ॥१८—१९॥ खुरल्यां श्रमजयाय कृतोभ्यासो व्यायामः तद्रूपा या शिक्षा तद्बलेन तदतिशयेन संप्रयुक्तौ संयुक्तौ। वार्यन्ते एभिरिति वारणाः आलानस्तम्भाः। वारणवारणाभैः बाहूत्तमैः अन्योन्यमाशु निवारयन्तावपि क्लमं श्रमं। न जग्मतुः ॥२०॥ चिरेणेत्यर्धं॥ चिरेणकालेन बहुकालेन। संप्रयुक्तौ युध्यमानौ तौ। मण्डलमार्गं चक्राकारमार्गं। चेरतुः चक्रतुरित्यर्थः। अयं च वक्ष्यमाणमार्गान्तराणामप्युपलक्षणं ॥ २१ ॥ तदेव प्रपञ्चयति—तावित्यादिना ॥ परस्परमासाद्य अन्योन्यसूदने अन्योन्यहिंसने। यत्तौ यत्नवन्तौ। भक्ष्यत इति भक्षः भक्ष्यद्रव्यं। तदर्थे तन्निमित्तं। मार्जाराविव वितस्थाते विशेषेण तस्थतुः। "समवप्रविभ्यःस्थः" इत्यात्मनेपदं। भक्षग्रहणदत्तावधानौ मार्जाराविव निश्चलं तस्थतुरित्यर्थः। मुहुर्मुहुरित्यनेन मध्येमध्ये मण्डलादिसंचारो व्यज्यते ॥२२॥ मण्डलानीत्यादि चतुःश्लोक्येकान्वया ॥ मण्डलानि परिभ्रमणविशेषान्। यथाहभरतः—"एकपादप्रचारो यः स चारीत्यभिधीयते। द्विपादक्रमणं यत्तु करणं नाम तद्भवेत् ॥ करणानां समायोगात्खण्डमित्यभिधीयते। खण्डैस्त्रिभिश्चतुर्भिर्वा संयुक्तं मण्डलं भवेत्" इति। विचित्राणि सव्यमपसव्यं सव्यापसव्यमर्धभ्रमणमित्यादिभेदाद्भिन्नानि। स्थानानि व्याघ्रसिंहादितुल्यावस्थानानिवैष्णवादिस्थानानि। पादयोः पूर्वापरतिर्यग्विक्षेपादिका विन्यासविशेषा इतियावत्। तदाहभरतः—"वैष्णवं समपादं च वैशाखं मण्डलं तथा। प्रत्यालीढमथालीढं स्थानान्येतानि षण्नृणां" इति पञ्चेति धनुर्वेदे। एषां लक्षणादिकथने ग्रन्थगौरवं स्यादिति तन्नाद्रियते। गोमूत्रिकाणि गोमूत्रसरणिसदृशानि गमनानि। गोमूत्रशब्दात्तदाकारगमनवाचकान्मत्वर्थे ठन्प्रत्ययः। गोमूत्रिकाणां चित्रत्वं गमनागमनादिभेदात्। गतप्रत्यागतानि उपसर्पणापसर्पणानि। एते उभयगतिप्रचारभेदाः। तिरश्चीनगतानि तिर्यग्गमनानि। वक्रगतानि सव्यापसव्यसंचरणानि। परिमोक्षं स्थानचालनेन प्रहाराणां मोघकरणं। वर्जनं प्रतिप्रयोगेण परिहरणं। परिधावनं एकस्य तिष्ठतः समन्तादन्यस्य गमनागमनं। अभिद्रवणं आभिमुख्येन शीघ्रं गमनं। आप्लावं अल्पाङ्गत्वानल्पाङ्गत्वादिभिर्विनम्य गमनं। ईषद्गमनं वा। मण्डूकवद्गमनमित्यर्थः। आस्थानं च सविग्रहं विग्रहसहितमास्थानं। विगृह्य केवलासनं प्रगृह्य निर्भयावस्थानमिति वार्थः। परावृत्तं पराङ्मुखगमनं। अपावृत्तं स्थित्वैव पश्चाच्चलनं। अवद्रुतं जिघृक्षया शरीरं संकुच्यावनम्य गमनं। अवप्लुतं प्रतियोधिनं पादेन प्रहर्तुमधोमुखेन प्लवनं। उपन्यस्तं प्रतियोधिबाहुग्रहणार्थं स्वबाहुप्रसारणं। अपन्यस्तं प्रतियोधिग्रहणवञ्चनार्थं स्वबाह्वोरपक्षेपणं। एवं खड्गविद्यामल्लशास्त्रादिषूपदिश्यते। तत्तन्निदर्शने नितान्तं ग्रन्थगौरवं स्यात्। अतस्तदुपेक्ष्यते ॥ २३—

ति० संवेदनं प्रेरणं ॥१९॥ स० वारयन्त्येभिःप्रतिगजानितिवारणानि कराः। वारणानांगजानां तानि तदाभैः। परवारणः मुत्तमातङ्गः ॥ २० ॥ इतिचत्वारिंशःसर्गः ॥ ४० ॥

[पा०] १ ङ.—ट. संहत्यसंवेद्य चतौकराभ्यांतौपेततुर्वैयुगपद्धरायां. २ ख. ङ. च. झ. ञ. ट. मार्गे. ३ झ. ञ. ठ. परवारणाभौ. ४ ग. ङ. च. छ. झ. ट. कालेनभृशंप्रयुद्धौ. क. घ. ज. ट. कालेनभृशंप्रयुक्तौ. ५ ङ. झ. ञ. ट. भक्षार्थेऽवतस्थाते.

अभिद्रवणमाप्लावमास्थानं च सविग्रहम् ॥ परावृत्तमपावृत्तमवद्रुतमवप्लुतम् ॥ २५ ॥
उपन्यस्तमपन्यस्तं युद्धमार्गविशारदौ ॥ तौ संचेरतुरन्योन्यं वानरेन्द्रश्च रावणः ॥ २६ ॥
एतस्मिन्नन्तरे रक्षो मायाबलमथात्मनः ॥ आरब्धुमुपसंपेदे ज्ञात्वा तं वानराधिपः ॥ २७ ॥
उत्पपात तदाकाशं जितकाशी जितक्रमः ॥ रावणः स्थित एवात्र हरिराजेन वञ्चितः ॥ २८ ॥
अथ हरिवरनाथः प्राप्य संग्रामकीर्तिं निशिचरपतिमाजौ योजयित्वा श्रमेण ॥
गगनमतिविशालं लङ्घयित्वाऽर्कसूनुर्हरिवरगणमध्ये रामपार्श्वं जगाम ॥ २९ ॥
इति स सवितृसूनुस्तत्र तत्कर्म कृत्वा पवनगतिरनीकं प्राविशत्संप्रहृष्टः ॥
रघुवरनृपसूनोर्वर्धयन्युद्धहर्षं तरुमृगगणमुख्यैः पूज्यमानो हरीन्द्रः ॥ ३० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

एकचत्वारिंशः सर्गः ॥ ४१ ॥

रामेण रावणैकरग्रहणविमोचनेनपुनरागतंसुग्रीवंप्रत्यालिङ्गनपूर्वकं पुनरपितादृशसाहसकरणप्रतिषेधनम् ॥ १ ॥ तथा लक्ष्मणंप्रति युद्धादिसूचकदुर्निमित्तप्रदर्शनपूर्वकं सुवेलादवतरणेनसुग्रीवेणसह रणायसेनासंनाहपूर्वकं लङ्कांप्रत्यभियानम् ॥ २ ॥ लङ्कांगतेनरामेण नीलाङ्गदहनुमतां क्रमेण प्रागादिद्वारनिरोधनचोदनपूर्वकं स्वयंलक्ष्मणेनसहरावणाधिष्ठितोत्तरद्वारनिरोधनम् ॥ ३ ॥ तथा राजनीत्यनुसारेणसंदेशनिवेदनाय रावणंप्रत्यङ्गदप्रेषणम् ॥ ४ ॥ अङ्गदेनरावणमेत्यरामसंदेशनिवेदने तन्नियोगेन राक्षसैरङ्गदग्रहणम् ॥५॥ तदुद्वहनेनैवगगनमुल्लङ्घनेनाङ्गदेन स्वाङ्गविधूननेनरक्षसामधःपातनपूर्वकं पादाभिघातात्प्रासादभञ्जनेन पुनारामपार्श्वागमनम् ॥ ६ ॥

अथ तस्मिन्निमित्तानि दृष्ट्वा लक्ष्मणपूर्वजः ॥ सुग्रीवं संपरिष्वज्य तदा वचनमब्रवीत् ॥ १ ॥

२६ ॥ एतस्मिन्नित्यादिश्लोकद्वयमेकान्वयं ॥ अन्तरे अवकाशे । मायाबलं परितोनेकरावणप्रदर्शनं । आरब्धुमुपसंपेदे कर्तुमुपचक्रमे । तं मायोपक्रमं । जितेन जयेन काशते प्रकाशत इति जितकाशी । रावणस्य मायाबलोपक्रम एव निर्मायं युध्यमानस्य सुग्रीवस्य जय इति ज्ञेय । जितक्रमः जितश्रमः । बलिना चिरं मल्लयुद्धकरणादिति भावः । अत्र प्रासादे स्थित एव रावणो वञ्चितः पुनरागमने प्रतारितः ॥ २७—२८ ॥ हरिवरनाथः क्षणेन रावणहरणार्हपरिकरनियन्ता । रामभक्तिरेव स्वयंगमनहेतुरिति भावः । प्राप्य संग्रामकीर्तिं । रामस्य युद्धादागतां कीर्तिं स्वयमाजहारेति भावः । निशिचरपतिं । तत्सदृशेष्वनेकेषु विद्यमानेष्वपि तांस्तृणीकृत्य तेनैव युद्धं कृतवानितिभावः । आजौ । रावणवन्न च्छद्मना युद्धकृत् किन्तु मर्यादयेति भावः । योजयित्वा श्रमेण इतः पूर्वं तदज्ञातेन श्रमेण योजयित्वा । योजनं हि पूर्वमसंभावितस्यैव रावणस्य श्रमफलं । आत्मनस्तु कीर्तिरितिभावः । गगनमतिविशालं लङ्घयित्वाऽर्कसूनुः स्वस्यादित्यपुत्रत्वज्ञापनायाकाशमयत्नेनालङ्घयत् । अर्कसूनुः अज्ञातगमनवेगः । हरिवरगणमध्ये विनयेन स्वातिशयमप्रकाशयन् वानरेष्वन्यतमइति स्थितः । रामपार्श्वं जगाम रावणशिरोऽनादायागतोहं कथमस्याग्रे तिष्ठेयमिति पार्श्वे स्थितः । निशिचरपतिं श्रमेण योजयित्वा जगामेत्यनेन रामस्य प्रतिज्ञाहानिर्मा प्रसांक्षीदिति रावणमहत्त्वैवागत इति सूचितम् । मायाप्रयोगारम्भे समागमनं स्वेनापि मायाप्रयोगे रामस्य कोपः स्यादित्याशयात् ॥ २९ ॥ रघुवरनृपसूनोः रामस्य । तरुमृगगणमुख्यैः वानरगणमुख्यैः ॥ ३० ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चत्वारिंशः सर्गः ॥ ४० ॥

अथ लङ्कावरोध एकचत्वारिंशे—अथेति ॥ तस्मिन्

[पा०] १ ङ. झ. ञ. मवस्थानंसविग्रहं. २ ङ. झ. ञ. विचेरतुः. ३ ख. घ.—छ. झ. ञ. प्राप्तसंग्रामकीर्तिः. च. प्राप्यकीर्तिंमहात्मा. ४ क.—ङ. झ. ट. हरिगणबलमध्ये, ५ ख. ङ. च. छ. झ. ट. रामोवचनं. क. घ. च. इदंवचनं.

असंमन्त्र्य मया सार्धं तदिदं साहसं कृतम् ॥ एवं साहसकर्माणि न कुर्वन्ति जनेश्वराः ॥ २ ॥
संशये स्थाप्य मां चेदं बलं च सविभीषणम् ॥ कष्टं कृतमिदं वीर साहसं साहसप्रिय ॥ ३ ॥
इदानीं मा कृथा वीर एवंविधमचिन्तितम् ॥ त्वयि किंचित्समापन्ने किं कार्यं सीतया मम ॥४॥
भरतेन महाबाहो लक्ष्मणेन यवीयसा ॥ शत्रुघ्नेन च शत्रुघ्न स्वशरीरेण वा पुनः ॥ ५ ॥
त्वयि चानागते पूर्वमिति मे निश्चिता मतिः ॥ जानतश्चापि ते वीर्यं महेन्द्रवरुणोपम ॥ ६ ॥
हत्वाऽहं रावणं युद्धे सपुत्रबलवाहनम् ॥ अभिषिच्य च लङ्कायां विभीषणमथापि च ॥
भरते राज्यमावेश्य त्यक्ष्ये देहं महाबल ॥ ७ ॥
तमेवंवादिनं रामं सुग्रीवः प्रत्यभाषत ॥ तव भार्यापहर्तारं दृष्ट्वा राघव रावणम् ॥
मर्षयामि कथं वीर जानन्पौरुषमात्मनः ॥ ८ ॥
इत्येवंवादिनं वीरमभिनन्द्य स राघवः ॥ लक्ष्मणं लक्ष्मिसंपन्नमिदं वचनमब्रवीत् ॥ ९ ॥
परिगृह्योदकं शीतं वनानि फलवन्ति च ॥ बलौघं संविभज्येमं व्यूह्य तिष्ठेमं लक्ष्मण ॥ १० ॥
लोकक्षयकरं भीमं भयं पश्याम्युपस्थितम् ॥ निबर्हणं प्रवीराणामृक्षवानररक्षसाम् ॥ ११ ॥

सुग्रीवे । निमित्तानि युद्धचिह्नानि । " निमित्तं हेतुलक्ष्मणोः " इत्यमरः ॥ १ ॥ जनेश्वराः राजानः । न कुर्वन्ति अस्मादृशपरिजने विद्यमाने न कुर्वन्तीत्यादरोक्तिः ॥ २ ॥ संशये संशयपदे । त्वत्साहसेऽस्मदादीनां जीवनं दुर्लभमिति भावः ॥ ३ ॥ इदानीमित्यादि श्लोकद्वयं ॥ इदानीं अद्यप्रभृति । अचिन्तितं अविचारितं । एवंविधं साहसं मा कृथाः । कुत इत्यत्राह—त्वयीति । त्वयि किञ्चित्समापन्ने । वानरेति संबोधनं । प्राप्ते मम सीतया किं कार्यं किं प्रयोजनं । अभिनववत्सवात्सल्येन पूर्ववत्समनभिलषन्त्या वत्सलाया गोरिव नित्यानपायिनीमपि सीतामनादृत्य तदानीमाश्रिते वानरमात्रेऽत्यभिनिवेशं कुर्वतो रामस्य वात्सल्यातिशय उच्यते । सीतया । " अर्धो वा एष आत्मनो यत्पत्नी " इत्यर्धशरीरभूतया न मे किञ्चित्कार्यं । भरतेन यवीयसेति कनिष्ठत्वमुच्यते । " भ्राता स्वा मूर्तिरात्मनः " इत्युक्तभरतादिनापि न मे किञ्चित्प्रयोजनं । स्वशरीरेण वा, " आत्मानं सर्वथा रक्षेद्दारैरपि धनैरपि " इत्युक्तशरीरेण वा किं क्रियते ॥ ४—५ ॥ एतदेव प्रपञ्चयति—त्वयीत्यादिना ॥ पूर्वं त्वय्यनागते सति । इति वक्ष्यमाणप्रकारेण मे मतिः निश्चितासीत् । जानतश्चापीति विशेषणेन अस्थाने भयशङ्कित्वोक्त्या वात्सल्यातिशय उक्तः । इतिशब्दार्थमाह—हत्वेति ॥ प्रतिज्ञानिर्वाहार्थमिति भावः । अभिषिच्येति । अन्यथा शरणागतिवैफल्यादिति भावः । भरत इति । अन्यथा कुलधर्मोच्छेदादिति भावः । महाबलेत्यनन्तरमितिकरणस्यान्वयः ॥ ६—७ ॥ तमेवमित्यादिसार्धश्लोकः ॥ पौरुषं त्वद्दास्यरूपं पुरुषधर्ममित्यर्थः । अतएवहि पूर्वं रावणान्तिके दासोस्मीत्युक्तवान् । जानन्नित्यनेन दासस्य कर्मैवेदं नतु साहसमित्युच्यते ॥ ८ ॥ अथ रामस्योत्साहविशेषं दर्शयति—इत्येवमिति ॥ लक्ष्मिसंपन्नमित्यत्र " इको ह्रस्वोऽङ्यो गालवस्य " इति ह्रस्वः । लक्ष्मीरत्र निमित्तदर्शनजः सन्तोषः ॥ ९ ॥ संविभज्य तत्तद्यूथपाधीनं कृत्वा । व्यूह्य गरुडादिरूपेण स्थापयित्वा ॥ १० ॥ लोकक्षयकरं लोकक्षयसूचकं । भीमं भयंकरं । भयं भयनि-

ति० त्वयिकिंचित्समापन्ने दैवात्तवापमानादिप्राप्तावित्यर्थः । "नाश्लीलंकीर्तयेत्" इत्युक्तेरेवंवादः । स० इदानीं इतःपरं । अचिन्तितं अनालोचितं । किंचिदितिसुकुमारोक्तिः । मरणमित्यर्थः । आपन्ने प्राप्ते । किंचिदित्यस्य तदर्थतानङ्गीकारेसीतयेत्याद्युत्तरग्रन्थास्वारस्यापत्तेः । "नाश्लीलंकीर्तयेत्" इत्युक्तेस्तथोक्तिः ॥ ४ ॥ ति० भगवन्कथमेवंमयितवप्राकृतइवशङ्कित्यत्राह—जानतश्चापीति । "अतिस्नेहः पापशङ्की" इतिन्यायादितिभावः ॥ ६ ॥

[पा०] १ क.—ट. साहसयुक्तानि. २ ङ. झ. ट. बलंचेमंविभीषणं. ३ ङ. झ. ट. मरिंदम. ४ ङ. झ. ट. मारोप्य. ५ घ. ङ. च. झ. ट. जानन्विक्रमं. ६ ख. ङ. झ. ञ. ट. तिष्ठाम.

वाताश्च परुषा वान्ति कम्पते च वसुन्धरा ॥ पर्वताग्राणि वेपन्ते पतन्ति धरणीरुहाः ॥ १२ ॥
मेघाः क्रव्यादसंकाशाः परुषाः परुषस्वनाः ॥ क्रूराः क्रूरं प्रवर्षन्ति मिश्रं शोणितबिन्दुभिः ॥१३॥
रक्तचन्दनसंकाशा सन्ध्या परमदारुणा ॥ ज्वलच्च निपतत्येतदादित्यादग्निमण्डलम् ॥ १४ ॥
आदित्यमभिवाश्यन्ति जनयन्तो महद्भयम् ॥ दीना दीनस्वरा घोरा अप्रशस्ता मृगद्विजाः ॥१५॥
रजन्यामप्रकाशश्च संतापयति चन्द्रमाः ॥ कृष्णरक्तांशुपर्यन्तो यथा लोकस्य संक्षये ॥
ह्रस्वो रूक्षोप्रशस्तश्च परिवेषः सुलोहितः ॥ १६ ॥
आदित्यमण्डले नीलं लक्ष्म लक्ष्मण दृश्यते ॥ दृश्यन्ते न यथावच्च नक्षत्राण्यभिवर्तते ॥
युगान्तमिव लोकस्य पश्य लक्ष्मण शंसति ॥ १७ ॥
काकाः श्येनास्तथा गृध्रा नीचैः परिपतन्ति च ॥ शिवाश्चाप्यशिवा वाचः प्रवदन्ति महास्वनाः॥१८॥
[शैलैः शूलैश्च खड्गैश्च विमुक्तैः कपिराक्षसैः ॥ भविष्यत्यावृता भूमिर्मांसशोणितकर्दमा ॥ १९ ॥]
क्षिप्रमद्य दुराधर्षां लङ्कां रावणपालिताम् ॥ अभियाम जवेनैव सर्वतो हरिभिर्वृताः ॥ २० ॥
इत्येवं संवदन्वीरो लक्ष्मणं लक्ष्मणाग्रजः ॥ तस्मादवातरच्छीघ्रं पर्वताग्रान्महाबलः ॥ २१ ॥
अवतीर्य च धर्मात्मा तस्माच्छैलात्स राघवः ॥ परैः परमदुर्धर्षं ददर्श बलमात्मनः ॥ २२ ॥
सन्नह्य तु स सुग्रीवः कपिराजबलं महत् ॥ कालज्ञो राघवः काले संयुगायाभ्यचोदयत् ॥ २३ ॥
ततः काले महाबाहुर्बलेन महता वृतः ॥ प्रस्थितः पुरतो धन्वी लङ्कामभिमुखः पुरीम् ॥ २४ ॥
तं विभीषणसुग्रीवौ हनुमाञ्जाम्बवान्नलः ॥ ऋक्षराजस्तथा नीलो लक्ष्मणश्चान्वयुस्तदा ॥ २५ ॥

मित्तं । न केवलं लोकस्य प्रवीराणां चेत्याह—निबर्हणमिति । विनाशसूचकमित्यर्थः ॥ ११ ॥ तदेव भयनिमित्तं प्रपञ्चयति—वाता इति ॥ पतन्ति अनिमित्तमिति शेषः ॥ १२ ॥ क्रव्यादसंकाशाः श्येनादिसदृशसंस्थानाः। परुषाः क्रूरवेषाः। क्रूराः लोकक्षयसूचकाः । मिश्रं जलमिति शेषः ॥ १३—१४ ॥ आदित्यमभि आदित्याभिमुखं । दीनाः दीनवेषाः । दीनस्वराः दैन्यसूचकस्वरवन्तः । अतएव घोराः भयंकराः । अप्रशस्ताः हीनाः शिवादयः ॥ १५ ॥ कृष्णरक्तान्तपर्यन्तः कृष्णान्तो रक्तपर्यन्तश्चेत्यर्थः । ह्रस्वः व्याममात्रः । रूक्षः भयंकरः । अप्रशस्तः अशुभकरः । सुलोहितः रक्तमध्यः । परिवेषः लोकस्य संक्षये यथा तथा । दृश्यत इति शेषः ॥ १६ ॥ आदित्येत्यादिसार्धश्लोकः ॥ लक्ष्म चन्द्रकलङ्क इवेत्यर्थः । तथैव छान्दोग्ये—"यदादित्यस्य कृष्णं रूपं" इत्यत्र उत्पातकाले तथा दृश्यत इति व्याख्यातं । नक्षत्राणि यथावत् यथाप्रकारेण न दृश्यन्ते । मलिनानि दृश्यन्त इत्यर्थः । उक्तं निमित्तजातं लोकस्य युगान्तं शंसतीवाभिवर्तत इतियोजना ॥ १७ ॥ नीचैः ह्रस्वं वेदिकास्थानं । परिपतन्ति प्राप्नुवन्ति । शिवा इति । अप्रशस्तमृगजात्युक्तावपि पुनरुक्तिरशुभाधिक्यात् ॥ १८—१९ ॥ अभियामेति वर्तमानकाले लोट् ॥ २०—२१ ॥ तस्मात् सुवेलात् । बलमित्यनेन सर्वं बलं न सुवेलमारुहदिति गम्यते ॥२२॥ राघवः ससुग्रीवः सन् । कपिराजबलं कपिश्रेष्ठानां बलं । सन्नह्य प्रोत्साह्य । काले युद्धकाले । संयुगाय युद्धाय । अभ्यचोदयत् ॥ २३ ॥ काले प्रातःकाले

स० अग्निमण्डलं अग्निसमूहः ॥ १४ ॥ स० ऋक्षराजो धूम्रः ॥ २५ ॥

[पा०] १ ङ. झ. ट. वाताहिपरुषं. ख. च. छ. ञ. वाताहिकलुषाः. २ क. घ. ङ. झ. ट. नदन्तिधरणीधराः. ख. च. पतन्तिचमहीरुहाः. ३ ङ. झ. प्रवर्षन्ते. ४ ख. ङ. झ. मप्रशस्तश्च. ५ च. छ. लोकक्षयइवोदितः. ६ ख. घ. ङ. च. झ. ञ. ट. प्यशुभाः. ७ अर्धश्लोकः क. ख. ङ. च. छ. झ. ञ. ट. पाठेषुदृश्यते. ८ ख.—ट. पुरीं. ९ च. ञ. प्रवदन्वीरो. १० ख.—छ. झ. ञ. ट. तौविभीषण.

ततः पश्चात्सुमहती पृतनर्क्षवनौकसाम् ॥ प्रच्छाद्य महतीं भूमिमनुयाति स्म राघवम् ॥ २६ ॥
शैलशृङ्गाणि शतशः प्रवृद्धांश्च महीरुहान् ॥ जगृहुः कुञ्जरप्रख्या वानराः परवारणाः ॥ २७ ॥
तौ तु दीर्घेण कालेन भ्रातरौ रामलक्ष्मणौ ॥ रावणस्य पुरीं लङ्कामासेदतुररिन्दमौ ॥ २८ ॥
पताकमालिनीं रम्यामुद्यानवनशोभिताम् ॥ चित्रवप्रां सुदुष्प्रापामुच्चैः प्राकारतोरणाम् ॥ २९ ॥
तां सुरैरपि दुर्धर्षां रामवाक्यप्रचोदिताः ॥ यथानिवेशं संपीड्य न्यविशन्त वनौकसः ॥ ३० ॥
लङ्कायास्तूत्तरद्वारं शैलशृङ्गमिवोन्नतम् ॥ रामः सहानुजो धन्वी जुगोप च रुरोध च ॥ ३१ ॥
लङ्कामुपनिविष्टश्च रामो दशरथात्मजः ॥ लक्ष्मणानुचरो वीरः पुरीं रावणपालिताम् ॥
उत्तरद्वारमासाद्य यत्र तिष्ठति रावणः ॥ ३२ ॥
नान्यो रामाद्धि तद्द्वारं समर्थः परिरक्षितुम् ॥ रावणाधिष्ठितं भीमं वरुणेनेव सागरम् ॥ ३३ ॥
सायुधैः राक्षसैर्भीमैरभिगुप्तं समन्ततः ॥ लघूनां त्रासजननं पातालमिव दानवैः ॥ ३४ ॥
विन्यस्तानि च योधानां बहूनि विविधानि च ॥ ददर्शायुधजालानि तत्रैव कवचानि च ॥ ३५ ॥
पूर्वं तु द्वारमासाद्य नीलो हरिचमूपतिः ॥ अतिष्ठत्सह मैन्देन द्विविदेन च वीर्यवान् ॥ ३६ ॥
अङ्गदो दक्षिणद्वारं जग्राह सुमहाबलः ॥ ऋषभेण गवाक्षेण गजेन गवयेन च ॥ ३७ ॥
हनुमान्पश्चिमद्वारं ररक्ष बलवान्कपिः ॥ प्रमाथिप्रघसाभ्यां च वीरैरन्यैश्च संगतः ॥ ३८ ॥
मध्यमे च स्वयं गुल्मे सुग्रीवः समतिष्ठत ॥ सह सर्वैर्हरिश्रेष्ठैः सुपर्णश्वसनोपमैः ॥ ३९ ॥
वानराणां तु षट्त्रिंशत्कोट्यः प्रख्यातयूथपाः ॥ निपीड्योपनिविष्टाश्च सुग्रीवो यत्र वानरः ॥४०॥
शासनेन तु रामस्य लक्ष्मणः सविभीषणः ॥ द्वारेद्वारे हरीणां तु कोटिंकोटिं न्यवेशयत् ॥ ४१ ॥
पश्चिमेन तु रामस्य सुग्रीवः सहजाम्बवान् ॥ अदूरान्मध्यमे गुल्मे तस्थौ बहुबलानुगः ॥ ४२ ॥
ते तु वानरशार्दूलाः शार्दूला इव दंष्ट्रिणः ॥ गृहीत्वा द्रुमशैलाग्रान्हृष्टा युद्धाय तस्थिरे ॥ ४३ ॥

॥ २४—२५ ॥ पृतना सेना ॥ २६ ॥ कुञ्जरप्रख्याः गजतुल्याः । परवारणाः शत्रुवारकाः ॥ २७—२८ ॥ पताकेत्यादिश्लोकद्वयं पताकमालिनीमित्यत्र "ङ्यापोः संज्ञाछन्दसोर्बहुलं" इति ह्रस्वः । उद्यानं कृत्रिमवनं । चित्रवप्रां चित्रचयां । यथानिवेशं यथास्थानं । रामवचोऽन्यूनं स्वं स्वं स्थानमनतिक्रम्येत्यर्थः । संपीड्य उपरुध्य ॥ २९—३० ॥ जुगोप परपरिभवादात्मीयं बलं ररक्षेत्यर्थः । रुरोधेत्यनेन " शिखरं तत्त्रिकूटस्य प्रांशु चैकं दिविस्पृशं " इत्युक्तत्रिकूटशिखरारोहणमर्थसिद्धं ॥ ३१ ॥ लङ्कामित्यादिसार्धश्लोक एकान्वयः ॥ लक्ष्मणानुचरो वीर इति पाठः । रावणो यत्र तिष्ठति तदुत्तरद्वारमासाद्य लङ्कामुपनिविष्ट इत्यन्वयः ॥ ३२ ॥ रामेणैव निरोद्धव्यत्वे हेतुमाह— नान्य इत्यादिश्लोकद्वयेन ॥ लघूनां अल्पसाराणां ॥ ३३—३४ ॥ विन्यस्तानि द्वारोपान्तवेदिकाविष्वितिशेषः ॥ ३५ ॥ मैन्देन द्विविदेन चेत्यादिना प्रतिद्वारमधिकयूथपतिगमनस्यात्रोक्तत्वात्पूर्वं रामेण ते नियुक्ता इति ज्ञेयं ॥ ३६—३८ ॥ मध्यम इति । दुर्जयरावणेन्द्रजिदधिष्ठितयोरुत्तरपश्चिमद्वारयोर्मध्ये तदुभयद्वारनिरोधकानां काकाक्षिन्यायेन साहाय्यं कर्तुं सुग्रीवः स्वयमतिष्ठदिति ज्ञेयम् । " पश्चिमेन तु रामस्य सुग्रीवः सहजाम्बवान् । अदूरान्मध्यमे गुल्मे तस्थौ बहुबलानुगः " इति वक्ष्यमाणत्वात् । सुपर्णो गरुडः ॥ ३९—४२ ॥ वानरशार्दूलाः वानरश्रेष्ठाः ।

स० उत्तरं द्वारं रावणास्थितं । जुगोप आत्मबलं । रुरोधच लङ्कां । जुगोप अन्तस्थितरावणाद्यन्तस्थितेनरूपेणजुगोप बहीरामरूपेणरुरोधचेतिवा । अन्तरेणरामप्रेरणांरावणःकिमपिकर्तुमक्षमइत्यनेन सूच्यते ॥ ३१ ॥ रामानु० लक्ष्मणानुचरो रामइतिपाठे रमयतीतिव्युत्पत्त्यारामविशेषणं ॥ ३२ ॥ स० तत् द्वारं । परिरक्षितुं रावणादयोयथानबहिरागच्छेयुस्तथा

[पा०] १ क.—ट. तौ त्वदीर्घेण. २ क. ग. घ. च.—ट. यथानिदेशं. ३ क. ख. ङ.—ट. तथैव. ४ [illegible] सुपेणस्सह.

सर्वे विकृतलाङ्गूलाः सर्वे दंष्ट्रानखायुधाः ॥ सर्वे विकृतचित्राङ्गाः सर्वे च विकृताननाः ॥ ४४ ॥
दशनागबलाः केचित्केचिद्दशगुणोत्तराः ॥ केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः ॥ ४५ ॥
सन्ति चौघबलाः केचित्केचिच्छतगुणोत्तराः ॥ अप्रमेयबलाश्चान्ये तत्रासन्हरियूथपाः ॥ ४६ ॥
अद्भुतश्च विचित्रश्च तेषामासीत्समागमः ॥ तत्र वानरसैन्यानां शलभानामिवोद्यमः ॥ ४७ ॥
परिपूर्णमिवाकाशं संछन्नेव च मेदिनी ॥ लङ्कामुपनिविष्टैश्च संपतद्भिश्च वानरैः ॥ ४८ ॥
शतं शतसहस्राणां पृथगृक्षवनौकसाम् ॥ लङ्काद्वाराण्युपाजग्मुरन्ये योद्धुं समन्ततः ॥ ४९ ॥
आवृतः स गिरिः सर्वैस्तैः समन्तात्प्लवङ्गमैः ॥ ५० ॥
अयुतानां सहस्रं च पुरीं तामभ्यवर्तत ॥ ५१ ॥
वानरैर्बलवद्भिश्च बभूव द्रुमपाणिभिः ॥ संवृता सर्वतो लङ्का दुष्प्रवेशापि वायुना ॥ ५२ ॥
राक्षसा विस्मयं जग्मुः सहसाऽभिनिपीडिताः ॥ वानरैर्मेघसंकाशैः शक्रतुल्यपराक्रमैः ॥ ५३ ॥
महाञ्शब्दोऽभवत्तत्र बलौघस्याभिवर्ततः ॥ सागरस्येव भिन्नस्य यथा स्यात्सलिलस्वनः ॥ ५४ ॥
तेन शब्देन महता सप्राकारा सतोरणा ॥ लङ्का प्रचलिता सर्वा सशैलवनकानना ॥ ५५ ॥
रामलक्ष्मणगुप्ता सा सुग्रीवेण च वाहिनी ॥ बभूव दुर्धर्षतरा सर्वैरपि सुरासुरैः ॥ ५६ ॥
राघवः सन्निवेश्यैव सैन्यं स्वं रक्षसां वधे ॥ संमन्त्र्य मन्त्रिभिः सार्धं निश्चित्य च पुनः पुनः ॥
आनन्तर्यमभिप्रेप्सुः क्रमयोगार्थतत्त्ववित् ॥ ५७ ॥

शैलाग्रानिति पुंस्त्वमार्षं ॥ ४३ ॥ विकृतलाङ्गूलाः ऊर्ध्वं प्रसारितपुच्छाः । विकृतचित्राङ्गा इत्यत्र विकृतत्वं कोपरक्तमुखनेत्रत्वं । अतएव चित्रं चित्रवर्णं अङ्गं येषां ते तथोक्ता इति विग्रहः । विकृताननाः राक्षसविडम्बनाय कुटिलितमुखाः ॥ ४४ ॥ दशगुणोत्तराः शतनागबला इत्यर्थः ॥ ४५ ॥ ओघबलाः ओघसङ्ख्याकनागबलाः । शतगुणोत्तराः ओघसङ्ख्याकनागबलेभ्यः शतगुणेन उत्तराः श्रेष्ठा इत्यर्थः । अप्रमेयबलाः अपरिच्छेद्यबलाः ॥ ४६ ॥ अद्भुतः आश्चर्यभूतः । विचित्रः वानरगोपुच्छभल्लूकजुष्टतया नानावर्णः । तत्र लङ्कायां तेषां वानरसैन्यानां । समागमः आगमनं । शलभानां शरभाणां अष्टापदमृगाणां । उद्यमः समागम इव आसीत् । तथा भयंकरोऽभूदित्यर्थः । यद्वा यथा शलभानां समागमो युगपद्भवति तथेति युगपत्पतने दृष्टान्तः ॥ ४७ ॥ परिपूर्णमिति अत्र इवशब्दद्वयमपि वाक्यालङ्कारे । उपनिविष्टैः पृथिवी पूर्णा । संपतद्भिः आगच्छद्भिस्तु । आकाशं पूर्णं । भूमाववकाशाभावादिति भावः ॥ ४८ ॥ शतसहस्राणां । ऋक्षवनौकसां शतं पूर्वनियुक्तेभ्योतिरिक्तं लङ्काद्वाराण्युपाजगाम । अन्ये वानराः समन्ततः युद्धार्थमुपाजग्मुरित्यन्वयः ॥४९॥ आवृत इत्यर्धमेकं वाक्यं ॥ स गिरिः त्रिकूटः ॥५०॥ अयुतानामित्यर्धं ॥ अयुतानां सहस्रं च तां पुरीमभ्यवर्ततेत्यनेन पूर्वोक्तस्य द्वारावरणस्यानन्तरं अयुतानां सहस्रं च पुरीं तां पर्यवारयदित्युच्यते ॥ ५१ ॥ दुष्प्रवेशा बभूवेत्यन्वयः ॥ ५२ ॥ अभिनिपीडिताः उपरुद्धाः । राक्षसाः । विस्मयं आश्चर्यं जग्मुः ॥५३॥ तत्र त्रिकूटशिखरे । भिन्नस्य भिन्नमर्यादस्य । सागरस्येव अभिवर्ततः अभिवर्तमानस्य बलौघस्य । सलिलस्वनो यथा स्यात् तथा महाञ्छब्दो बभूवेति योजना । अतो न यथाशब्दवैयर्थ्यं ॥ ५४ ॥ सशैलवनकाननेत्यत्र वनं उद्यानं ॥ ५५ ॥ सुग्रीवेणेति रक्ष्यसाहित्यमुच्यते ॥ ५६ ॥ राघव इत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ वधे विषये । आनन्तर्यं

तुमित्यर्थः ॥ ३३ ॥ स० नचराक्षसादीनामिवमायिकइत्याह—विचित्रइति । विगतमायइत्यर्थः । "चित्राखुपर्णीगोर्डुबासुभद्रादन्तिकासुच । मायायां" इतिभानुदीक्षितोदाहृताभिधानात् । विचित्रः अगगनगइतिवा । " लेख्यतिलकेषुविहायसि " इतिविश्वः ॥ ४७ ॥ ति० ऋक्षवनौकसांशतसहस्राणां । शतकोटिरित्यर्थः । "एवंचकोटिसंख्याःपृतनाः लङ्काद्वाराण्युपाजग्मुः । पृतनाःऋक्षेत्यत्रसंधिरार्षः ॥ ४९ ॥ स० रक्षसांवधे । एतेन लोकानुकूल्याएवराजनीत्यनुसरणं । नश्यतोतिरावणोतोमारणमेवनि-

[पा०] १ ख. ग. शैलानामिवसंगमः. ङ. च. छ. झ. ञ. ट. शलभानामिवोद्गमः. २ ङ. झ. ट. पृतनार्क्षवनौकसां.

विभीषणस्यानुमते राजधर्ममनुस्मरन् ॥ अङ्गदं वालितनयं समाहूयेदमब्रवीत् ॥ ५८ ॥
गत्वा सौम्य दशग्रीवं ब्रूहि मद्वचनात्कपे ॥ लङ्घयित्वा पुरीं लङ्कां भयं त्यक्त्वा गतव्यथः ॥५९॥
भ्रष्टश्रीक गतैश्वर्य मुमूर्षो नष्टचेतन ॥ ऋषीणां देवतानां च गन्धर्वाप्सरसां तथा ॥ ६० ॥
नागानामथ यक्षाणां राज्ञां च रजनीचर ॥ यच्च पापं कृतं मोहादवलिप्तेन राक्षस ॥
[तस्य पापस्य संप्राप्ता व्युष्टिरद्य दुरासदा ॥ ६१ ॥]
नूनमद्य गतो दर्पः स्वयंभूवरदानजः ॥ यस्य दण्डधरस्तेऽहं दाराहरणकर्शितः ॥
दण्डं धारयमाणस्तु लङ्काद्वारे व्यवस्थितः ॥ ६२ ॥
पदवीं देवतानां च महर्षीणां च राक्षस ॥ राजर्षीणां च सर्वेषां गमिष्यसि मया हतः ॥ ६३ ॥
बलेन येन वै सीतां मायया राक्षसाधम ॥ मामतिक्रामयित्वा त्वं हृतवांस्तन्निदर्शय ॥ ६४ ॥
अराक्षसमिदं लोकं कर्ताऽस्मि निशितैः शरैः ॥ न चेच्छरणमभ्येषि मामुपादाय मैथिलीम् ॥६५॥

अनन्तरकर्तव्यं । अभिप्रेप्सुः प्राप्तुमिच्छुः । संमन्त्र्य दूतः प्रेषणीय इति विचार्य । निश्चित्य अङ्गद एव प्रेषणीय इति निर्धार्य । क्रमयोगार्थतत्त्ववित् क्रमयुक्ता योगाः सामाद्युपायाः तेषामर्थः फलं तस्य तत्त्वं याथार्थ्यं वेत्तीति तथोक्तः । राजधर्ममनुस्मरन् युयुत्सया शत्रुपुरं प्रत्यागता राजानः युद्धार्थं दूतमुखेन प्रथममाह्वयन्तीत्येवं रूपं राजधर्ममनुस्मरन् । विभीषणस्यानुमते अनुमतौ सत्यां । अङ्गदं समाहूयेदमब्रवीदिति संबन्धः ॥ ५७—५८ ॥ हे सौम्य गतव्यथः गतश्रमः सन् । लङ्कां पुरीं तत्प्राकारं लङ्घयित्वा भयं त्यक्त्वा दशग्रीवं मद्वचनात् ब्रूहि मयोक्तमितिब्रूहीत्यर्थः । कपे इत्यनेन लङ्घनसामर्थ्यं द्योतयति ॥ ५९ ॥ भ्रष्टश्रीक भ्रष्टप्रायद्रविण । गतैश्वर्य गतप्रायनियन्तृत्व । संपदि भ्रष्टायामपि लोके नियन्तृत्वं संभवति । तदपिनास्तीत्यर्थः । तदुभयाभावेपि जीवनाशा संभवति सापिनास्तीत्याह—मुमूर्षो इति । तदानीमपि ज्ञानं संभवति तदपि नास्तीत्याह—नष्टचेतनेति ॥ ६० ॥ नागानां सर्पाणां । अवलिप्तेन गर्वितेन त्वया । ऋषिप्रमुखानां यत्पापं कृतं यो द्रोहः कृतः । तस्य कारणभूतः स्वयंभूवरदानजो दर्पो गतः गतप्राय इत्यन्वयः । तत्र हेतुमाह—यस्येति । दण्डधरः नियन्ता । अहं यस्य ते दण्डं धारयमाणः करिष्यमाण इत्यर्थः ॥ ६१—६२ ॥ एवंविधस्य नियमने तव किं भविष्यतीत्यत्राह—पदवीमिति ॥ पदवीं तेषुकृतं परिभवं तमपि गमिष्यसीत्यर्थः । यद्वा पदवीं लोकं । युद्धे स्थितः सन् तेषां लोकं गमिष्यसि । युद्धे स्थित्वा सर्वपापविशुद्धः सन् गतिं गमिष्यसि । ततस्तूर्णमागच्छेति भावः ॥ ६३ ॥ मायया मारीचमायया । मां अतिक्रामयित्वा अपवाह्य । त्यबभाव आर्षः । येन बलेन यद्बलमवलम्ब्य । सीतां हृतवानसि तद्बलं निदर्शयेत्यन्वयः ॥ ६४ ॥ मैथिलीमुपादाय समर्प्य मां शरणं नाभ्येषि चेदिमं लोकमराक्षसं कर्तास्मि । शरणागतौ तु सर्वं क्षमिष्य इति भावः । मैथिलीमुपादायेत्यनेन स्वर्णस्तेये स्वर्णप्रत्यर्पणमन्तरेण प्रायश्चित्तानधिकारवत्सीताप्रत्यर्पणाभावे शरणागतौ तु नाधिकार इत्युक्तं । रावणेन शरणागतौ कृतायां विभीषणाय कोसलराज्यं दास्यामीत्यभिप्रायः ॥६५॥

श्चितमितिसूचयति ॥ ५७ ॥ **ती०** राजधर्ममनुस्मरन्नितिपाठे राजदन्तादिलाद्धर्मशब्दस्यपूर्वनिपातः । **ति०** राजधर्ममनुस्मरन् सामादिरुपायसाध्येऽर्थेदण्डोनमोक्तव्यःप्रजानाशहेतुरित्येवंरूपंराजधर्ममनुचिन्तयन् । **स०** विभीषणस्यानुमतइति विभीषणस्याराज्याभिषेको जातइतिसन्धौ चनतदभिसन्धिसिद्धिरितितत्संमतीकरणमुचितमितिभावः । सर्वज्ञत्वंरामस्यविराजतइतिनदुश्चित्ततविभीषणस्येतिपरमार्थः ॥ ५८ ॥ **ती०** एवंविधस्यममनियमनेतवकिंभविष्यतीत्यत्राह—पदवीमिति । युद्धेस्थितः सन् दैवतादीनांपदवींपुण्यलोकंगमिष्यसीतिसंबन्धः । "राजभिर्धृतदण्डास्तुकृत्वापापानिमानवाः । निर्मलाःस्वर्गमायान्तिसन्तःसुकृतिनोयथा । राजत्वशासन्पापस्यतदवाप्नोतिकिल्बिषं" इतिवचनादुभयोरपिपापनिवृत्तिरूपंफलंभविष्यतीतिभावः ॥ ६३ ॥

[पा०] १ ङ. ञ. ञ. भ्रष्टश्रीकंगतैश्वर्यमुमूर्षुनष्टचेतनं. २ इदमर्धं क. ख. घ. च. छ. ञ. पाठेषुदृश्यते.

धर्मात्मा रक्षसां श्रेष्ठः संप्राप्तोयं विभीषणः ॥ लङ्कैश्वर्यं ध्रुवं श्रीमानयं प्राप्नोत्यकण्टकम् ॥ ६६ ॥
न हि राज्यमधर्मेण भोक्तुं क्षणमपि त्वया ॥ शक्यं मूर्खसहायेन पापेनाविदितात्मना ॥ ६७ ॥
युध्यस्व वा धृतिं कृत्वा शौर्यमालम्ब्य राक्षस ॥ मच्छरैस्त्वं रणे शान्तस्ततः पूतो भविष्यसि ॥६८॥
यद्वा विशसि लोकांस्त्रीन्पक्षिभूतो मनोजवः ॥ मम चक्षुष्पथं प्राप्य न जीवन्प्रतियास्यसि ॥ ६९ ॥
ब्रवीमि त्वां हितं वाक्यं क्रियतामौर्ध्वदैहिकम् ॥ सुदृष्टा क्रियतां लङ्का जीवितं ते मयि स्थितम् ॥७०॥
इत्युक्तः स तु तारेयो रामेणाक्लिष्टकर्मणा ॥ जगामाकाशमाविश्य मूर्तिमानिव हव्यवाट् ॥ ७१ ॥
सोर्तिपत्य मुहूर्तेन श्रीमान्रावणमन्दिरम् ॥ ददर्शासीनमव्यग्रं रावणं सचिवैः सह ॥ ७२ ॥
ततस्तस्याविदूरे स निपत्य हरिपुङ्गवः ॥ दीप्ताग्निसदृशस्तस्थावङ्गदः कनकाङ्गदः ॥ ७३ ॥
तद्रामवचनं सर्वमन्यूनाधिकमुत्तमम् ॥ सामात्यं श्रावयामास निवेद्यात्मानमात्मना ॥ ७४ ॥
दूतोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः ॥ वालिपुत्रोङ्गदो नाम यदि ते श्रोत्रमागतः ॥ ७५ ॥

शरणागत्यकरणे स्वकर्तव्यमाह—धर्मात्मेति ॥ यद्वा शरणागतौ प्राणत्राणं करिष्यामि न तु राज्यं दास्यामीत्यभिप्रायेणाह—धर्मात्मेति ॥ धर्मात्मा धर्मबुद्धिः । रक्षसां श्रेष्ठः राक्षसनायक इत्यर्थः । अयं विभीषणः । संप्राप्तः मां प्रपन्नः । तस्माल्लङ्कैश्वर्यमयं प्राप्नोति उत्तरक्षणे प्राप्स्यतीत्यर्थः । श्रीमान् तदनुगुणानुकूल्यवान् । एवं क्रियाभेदादयंशब्दद्वयोपपत्तिः ॥ ६६ ॥ एवं विभीषणस्य राज्ययोग्यतामुक्त्वा रावणस्य तदभावमाह—न हीति ॥ अधर्मेण धर्मरहितेन । अतएव पापेन पापिष्ठेन । अतएवाविदितात्मना अस्वाधीनमनस्केन । मूर्खसहायेन त्वया न शक्यमित्यन्वयः ॥ ६७ ॥ सीतामादाय शरणमागतोसि चेद्विभीषणाय राज्यं दत्त्वा त्वत्प्राणान् रक्षामि अन्यथा युध्यस्वेत्याह—युध्यस्वेति ॥ शान्तः मृतः । पूत इति । युद्धे अपरावृत्त्या मृतेः सर्वपापप्रायश्चित्तत्वादिति भावः ॥ ६८—६९ ॥ क्रियतामौर्ध्वदैहिकमिति अराक्षसकरणेन श्राद्धकर्त्रभावात्स्वयमेव जीवच्छ्राद्धं कुर्वित्यर्थः । सुदृष्टेति । म्रियमाणा हि चापलेन पुत्रकलत्रादिमुखदर्शनं कुर्वन्ति तद्वदिति भावः । मयि स्थितं मदायत्तं । अवश्यं त्वां नाशयामीत्यर्थः ॥ ७० ॥ मूर्तिमान् करचरणादिसंस्थानवान् । हव्यवाट् अग्निः ॥ ७१ ॥ अतिपत्य प्राप्य । अव्यग्रं ददर्शेत्यन्वयः । श्रीमानित्यनेन हर्षवत्त्वमुच्यते ॥ ७२—७३ ॥ उत्तमं पथ्यं । सामात्यं रावणमिति शेषः । आत्मना स्वयं । आत्मानं निवेद्य । आत्मनो वालिपुत्रत्वादिनिवेदनपूर्वकं रामवचनं कथयामासेत्यर्थः ॥ ७४ ॥ यदि ते श्रोत्रमा-

ति० शरणागतिं विनाजीवनंराज्यंचसुतरांदुर्लभमित्याह—धर्मात्मेत्यादि । इहागत्यमांशरणंप्राप्तोविभीषणइदंलङ्कैश्वर्यंअकण्टकंलब्धुंप्रकण्टकरहितं । ध्रुवंप्राप्नोति । तत्प्राप्तियोग्यतांधर्मात्मेत्यादिविशेषणैर्दर्शयति । धर्मात्मा धर्मप्रधानः । नित्यंधर्मचित्तश्च । इदमैश्वर्यस्यसाक्षान्निदानं । राक्षसश्रेष्ठेत्यनेन त्वदनन्तरंन्यायप्राप्तं तस्यराज्यमितिदर्शितं । श्रीमानित्यनेन तदैश्वर्यप्रापकाशेषलक्षणवत्त्वं । मांप्राप्येत्यनेन तत्प्रापकसमग्रसामग्रीसंपत्प्रदर्शिता ॥ ६६ ॥ स० मूर्खसहायेन अनेन । महान्तोनसन्तिवक्तारस्तवसमीपइतिसूच्यते । एतावत्कालपर्यन्तंराज्यभोजकादृष्टेन भुक्तंनक्तञ्चरराज्यं । इतःपरमधर्मशासकेमय्युपायातेतद्भोगयोगस्तवकथंस्यादितिभावः ॥ ६७ ॥ ति० शरणव्रजनेतुजीवितमेकांशेनराज्यंचतवापिदास्यामि । तदभावेतुदण्डाधिकारिणामयासर्वथावध्यस्त्वं । युद्धवधश्चपरमंहितंतवेतिपरमदयालुर्भगवांस्तदेवोपदिशति—युध्यस्वेति । मा मां धृतिंकृत्वा युध्यस्व । मच्छरैः पापशोधनाधिकृतस्य ममशरैः । रणेशान्तः समाप्तः । ततएवहेतोःशान्तः आजन्मकृतात्पापात्पूतोभविष्यसि दर्शननामस्मरणैःपापशोधनफलकएवायमवतारस्तत्रेनज्ञायते । तथाज्ञानाभावेपिमत्तोमरणेकिंचित्कालोत्तरमुत्तमक्षत्रियकुलेजन्मप्राप्तिरितिभावः ॥ ६८ ॥ स० और्ध्वदैहिकं मृत्यनन्तरंलोकान्तरेसुखप्रापकंदानादिकं । क्रियतां । अनुशतिकादित्वादुभयपदवृद्धिः । अनेन पुत्राअप्यसन्तइतिसर्वनाशेकर्ताकोपिनजीविष्यतीतिद्योत्यते । "प्रियैर्दत्तंप्रियंभवेत्" इतिदशरथोक्तेर्विभीषणेनकृतंसदपितवसंमतंनभवेदित्येवमुक्तिः ॥७०॥

[पा०] १ ख. ग. ङ. च. झ. ञ. ट. राक्षसश्रेष्ठः. २ ङ. झ. ट. लङ्कैश्वर्यमिदंश्रीमान्ध्रुवं. ३ क. च. छ. प्राप्नोत्यकण्टकं. ४ झ. माधृतिं. ५ ङ. झ. ट. शान्तोभविष्यसि. ६ क. ग.—ट. यद्याविशसि. ७ च. झ. ञ. ट. पक्षीभूतोनिशाचर. ङ. पक्षीभूत्वानिशाचर. ८ च. सोभिप्लुत्य. ९ क. ख. ग. ङ. झ. ट. स्तस्याविदूरेण.

आह त्वां राघवो रामः कौसल्यानन्दवर्धनः ॥ निष्पत्य प्रतियुध्यस्व नृशंस पुरुषो भव ॥ ७६ ॥
हन्तास्मि त्वां सहामात्यं सपुत्रज्ञातिबान्धवम् ॥ निरुद्विग्नास्त्वयो लोका भविष्यन्ति हते त्वयि ॥७७॥
देवदानवयक्षाणां गन्धर्वोरगरक्षसाम् ॥ शत्रुमद्योद्धरिष्यामि त्वामृषीणां च कण्टकम् ॥ ७८ ॥
विभीषणस्य चैश्वर्यं भविष्यति हते त्वयि ॥ न चेत्सत्कृत्य वैदेहीं प्रणिपत्य प्रदास्यसि ॥ ७९ ॥
इत्येवं परुषं वाक्यं ब्रुवाणे हरिपुङ्गवे ॥ अमर्षवशमापन्नो निशाचरगणेश्वरः ॥ ८० ॥
ततः स रोषताम्राक्षः शशास सचिवांस्तदा ॥ गृह्यतामेष दुर्मेधा वध्यतामिति चासकृत् ॥ ८१ ॥
रावणस्य वचः श्रुत्वा दीप्ताग्निसमतेजसः ॥ जगृहुस्तं ततो घोराश्चत्वारो रजनीचराः ॥ ८२ ॥
ग्राहयामास तारेयः स्वयमात्मानमात्मवान् ॥ बलं दर्शयितुं वीरो यातुधानगणे तदा ॥ ८३ ॥
स तान्बाहुद्वये सक्तानादाय पतगानिव ॥ प्रासादं शैलसंकाशमुत्पपाताङ्गदस्तदा ॥ ८४ ॥
तेऽन्तरिक्षाद्विनिर्धूतास्तस्य वेगेन राक्षसाः ॥ भूमौ निपतिताः सर्वे राक्षसेन्द्रस्य पश्यतः ॥ ८५ ॥
ततः प्रासादशिखरं शैलशृङ्गमिवोन्नतम् ॥ ददर्श राक्षसेन्द्रस्य वालिपुत्रः प्रतापवान् ॥ ८६ ॥
तत्पफाल पदाक्रान्तं दशग्रीवस्य पश्यतः ॥ पुरा हिमवतः शृङ्गं वज्रिणेव विदारितम् ॥ ८७ ॥
भङ्क्त्वा प्रासादशिखरं नाम विश्राव्य चात्मनः ॥ विनद्य सुमहानादमुत्पपात विहायसम् ॥८८॥
व्यथयन्राक्षसान्सर्वान्हर्षयंश्चापि वानरान् ॥ स वानराणां मध्ये तु रामपार्श्वमुपागतः ॥ ८९ ॥
रावणस्तु परं चक्रे क्रोधं प्रासादधर्षणात् ॥ विनाशं चात्मनः पश्यन्निश्वासपरमोऽभवत् ॥ ९० ॥
रामस्तु बहुभिर्हृष्टैर्निनदद्भिः प्लवङ्गमैः ॥ वृतो रिपुवधाकाङ्क्षी युद्धायैवाभ्यवर्तत ॥ ९१ ॥
सुषेणस्तु महावीर्यो गिरिकूटोपमो हरिः ॥ बहुभिः संवृतस्तत्र वानरैः कामरूपिभिः ॥ ९२ ॥
चतुर्द्वाराणि सर्वाणि सुग्रीववचनात्कपिः ॥ पर्यक्रामत दुर्धर्षो नक्षत्राणीव चन्द्रमाः ॥ ९३ ॥

गतः । मां श्रुतवानसि किमित्यर्थः ॥ ७५ ॥ राघव इत्यादिना छद्मना न योत्स्यत इत्युक्तं । कौसल्यानन्दवर्धन इत्यनेन बहुतपःप्रभावजनिततया धार्मिकत्वमुक्तं । निष्पत्य पुरान्निर्गत्य । पुरुषो भव शूरो भवेत्यर्थः । पुरुषाधमेति पाठे पुरोपरोधेष्यनिर्गमने नूनं पुरुषाधम एवासीति भावः ॥ ७६ ॥ हन्तेति अहमिति शेषः । निरुद्विग्नाः निर्भयाः ॥ ७७ ॥ उद्धरिष्यामि उन्मूलयिष्यामि । कण्टकं बाधकमित्यर्थः ॥ ७८—७९ ॥ आपन्नः प्राप्तः । बभूव ॥८०॥ दुर्मेधाः दुर्बुद्धिः । न दूतो वध्य इति शास्त्रानभिज्ञ इत्यर्थः । असकृच्छशासेत्यन्वयः । यद्वा दुर्मेधा इत्यङ्गदमेवाह ॥ ८१—८२ ॥ यातुधानगणे विषये स्वबलं दर्शयितुं । आत्मवान् धृतिमान् । स्वयं आत्मानं ग्राहयामास ग्रहीतुमनुमेने ॥ ८३—८६ ॥ पफाल व्यशीर्यत ॥ ८७ ॥ विश्राव्य विशेषेण श्रावयित्वा ॥ ८८—८९ ॥ प्रासादधर्षणात् प्रासादभञ्जनात् । पश्यन् तर्कयन् । निश्वासपरमः अधिकनिश्वासः ॥ ९० ॥ राम इति अङ्गदागमनं दृष्ट्वेति शेषः ॥ ९१ ॥ संवृतः बभूवेति शेषः । उत्तरश्लोकेनैकवाक्यत्वे हरिकपिशब्दयोःपौनरुक्त्यं स्यात् ॥ ९२ ॥ न्यूनताव्यावृ-

---

स० वनपर्वणिमार्कण्डेयोपाख्याने "इङ्गितज्ञास्ततोभर्तुश्चत्वारोरजनीचराः । चतुर्ष्वङ्गेषुजगृहुःशार्दूलमिवपक्षिणः" इत्युक्तेः 'गृह्यतांबध्यतामितिशशास' अङ्गचेष्टाभिःसूचयामास ॥ ८१ ॥ सत्य० राक्षसाः वचःश्रुत्वेवजगृहुः । चतुर्ष्वङ्गेषु स्कन्धभुजेषु पार्श्वद्वयवर्तिष्वितिसंभवत्यैककण्ठ्यं ॥ ८२ ॥ ति० युद्धायैवाभिवर्तत अभ्यवर्तत ॥ ९१ ॥

[पा०] १ क.—घ. च. ज. पुरुषाधम. २ ङ. झ. ट. रोषमापन्नः. ३ क. ख. ङ.—ट. गृह्यतामिति. ४ झ. ञ. ट. दीप्ताग्निमिवतेजसा. ५ क.—ङ. झ. ञ. ट. बाहुद्वयासक्तान्. ६ च. छ. ञ. हरिपुङ्गवः. ७ घ. शैलशृङ्गाभं. ८ ङ.—ट. तस्योत्पतनवेगेननिर्धूतास्तत्रराक्षसाः. ९ क.—ङ. मिवोच्छ्रितं. १० च. बभञ्ज. ङ. झ. ञ. ट. चकाम. ११ ङ. झ. ट. पफालचतदाक्रान्तं. ग. घ. तत्पफालतदाक्रान्तं. १२ ख.—ट. वज्रेणेव. १३ ख. ङ. झ. ट. विहायसा. १४ ङ. झ. ञ. ट. वाभिवर्तत. १५ ङ. झ. ट. सतुद्वाराणिसंयम्य.

तेषामक्षौहिणिशतं समवेक्ष्य व नौकसाम् ॥ लङ्कामुपनिविष्टानां सागरं चाभिवर्तताम् ॥ ९४ ॥
राक्षसा विस्मयं जग्मुस्त्रासं जग्मुस्तथा परे ॥ अपरे समरोद्धर्षाद्धर्षमेवं प्रपेदिरे ॥ ९५ ॥
कृत्स्नं हि कपिभिर्व्याप्तं प्राकारपरिखान्तरम् ॥ ददृशू राक्षसा दीनाः प्राकारं वानरीकृतम् ॥९६ ॥
हाहाकारं प्रकुर्वन्ति राक्षसा भयमोहिताः ॥ ९७ ॥

तस्मिन्महाभीषणके प्रवृत्ते कोलाहले राक्षसराजधान्याम् ॥
प्रगृह्य रक्षांसि महायुधानि युगान्तवाता इव संविचेरुः ॥ ९८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

द्विचत्वारिंशः सर्गः ॥ ४२ ॥

राक्षसैर्वानरसेनाकृतलङ्काद्वारनिरोधननिवेदितेनरावणेन प्रासादारोहणेन तत्सेनावलोकनम् ॥ १ ॥ उच्चप्रदेशारोहणेन लङ्कामवलोकयतारामेण सीतास्मरणेनशोचनपूर्वकं वानरान्प्रतियुद्धचोदना ॥ २ ॥ ततोरावणचोदितराक्षसानां वानराणांच युद्धारंभः ॥ ३ ॥

ततस्ते राक्षसास्तत्र गत्वा रावणमन्दिरम् ॥ न्यवेदयन्पुरीं रुद्धां रामेण सह वानरैः ॥ १ ॥
रुद्धां तु नगरीं श्रुत्वा जातक्रोधो निशाचरः ॥ विधानं द्विगुणं कृत्वा प्रासादं सोध्यरोहत ॥ २ ॥
स ददर्शावृतां लङ्कां सशैलवनकाननाम् ॥ असंख्येयैर्हरिगणैः सर्वतो युद्धकाङ्क्षिभिः ॥ ३ ॥
स दृष्ट्वा वानरैः सर्वां वसुधां कबलीकृताम् ॥ कथं क्षपयितव्याः स्युरिति चिन्तापरोऽभवत् ॥ ४ ॥
स चिन्तयित्वा सुचिरं धैर्यमालम्ब्य रावणः ॥ राघवं हरियूथांश्च ददर्शायतलोचनः ॥ ५ ॥
राघवः सह सैन्येन मुदितो नाम पुप्लुवे ॥ लङ्कां ददर्श गुप्तां वै सर्वतो राक्षसैर्वृताम् ॥ ६ ॥

त्यर्थं सर्वाणीत्युक्तं । कपिः सुषेणः । पर्यक्रामत परितश्चचार । नक्षत्राणि नक्षत्रनिरूपितराशीनित्यर्थः ॥ ९३ ॥ अक्षौहिणिशतमित्यत्र " ङ्यापोः संज्ञाछन्दसोर्बहुलं " इति ह्रस्वः । अनेकाक्षौहिणीमित्यर्थः । सागरंचाभिवर्ततां सागरसमीपे वर्तमानानामित्यर्थः । राक्षसाः धीरा इति शेषः । अपरे अधीरा इत्यर्थः । उद्धर्षात् गर्वात् ॥ ९४—९५ ॥ हरिभिर्व्याप्तं प्राकारपरिखान्तरं प्राकारपरिखयोरन्तरालं । वानरीकृतं वानरप्रचुरतया कृतं । अपरमिव प्राकारं ददृशुरित्यर्थः ॥ ९६ ॥ हाहेत्यर्थे ॥ ९७—९८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकचत्वारिंशः सर्गः ॥ ४१ ॥

अथ युद्धारम्भो द्विचत्वारिंशे—तत इति ॥ तत्र तस्मिन्काले ॥ १ ॥ विधानं रक्षणविधिं । द्विगुणं पूर्वस्मादधिकं ॥ २ ॥ स इति । सर्वत आवृतामित्यन्वयः ॥ ३ ॥ कबलीकृतां आच्छादितां । कपिलीकृतामितिपाठे वानरवर्णेन कपिलीकृतां । क्षपयितव्याः नाशयितव्याः । एत इति शेषः ॥ ४ ॥ आयतलोचन इत्यनेन विस्मयातिशय उच्यते ॥ ५ ॥ पुप्लुवे

ति० शतशब्दोनन्तवाची । सागरंचाभिवर्ततां सागरपर्यन्तमभिव्याप्यवर्तमानानामित्यर्थः ॥ ९४ ॥ शि० अपरेराक्षसास्त्रासंजग्मुः । अपरे अन्ये । समरेहर्षात् अन्यसमरहर्षस्मरणात् । हर्षमेवोपपेदिरे । श्लोकद्वयमेकान्वयि ॥ ९४—९५ ॥ इत्येकचत्वारिंशःसर्गः ॥ ४१ ॥

ति० मुदितःपुप्लुवे । नामशब्दोवाक्यालङ्कारे । प्राकारसमीपमितिशेषः । रामाधिरूढवानरप्लवनंरामेऽपचर्यते ॥ ६ ॥

[पा०] १ क. ख. ङ.—ट. मेवोपेपेदिरे. २ छ. वानरैःकृतं. ज. वानरैर्वृतं. ३ क.—ट. हाहाकारमकुर्वन्त. ४ ङ.—ट. भयमागताः. ५ ङ. च. झ. ट. सर्ववसुधां.

दृष्ट्वा दाशरथिर्लङ्कां चित्रध्वजपताकिनीम् ॥ जगाम सहसा सीतां दूयमानेन चेतसा ॥ ७ ॥
अत्र सा मृगशाबाक्षी मत्कृते जनकात्मजा ॥ पीड्यते शोकसन्तप्ता कृशा स्थण्डिलशायिनी ॥८॥
पीड्यमानां स धर्मात्मा वैदेहीमनुचिन्तयन् ॥ क्षिप्रमाज्ञापयामास वानरान्द्विषतां वधे ॥ ९ ॥
एवमुक्ते तु वचने रामेणाक्लिष्टकर्मणा ॥ संघर्षमाणाः प्लवगाः सिंहनादैरनादयन् ॥ १० ॥
शिखरैर्विकिरामैनां लङ्कां मुष्टिभिरेव वा ॥ इति स्म दधिरे सर्वे मनांसि हरियूथपाः ॥ ११ ॥
उद्यम्य गिरिशृङ्गाणि शिखराणि महान्ति च ॥ तरूंश्चोत्पाट्य विविधांस्तिष्ठन्ति हरियूथपाः ॥१२॥
प्रेक्षतो राक्षसेन्द्रस्य तान्यनीकानि भागशः ॥ राघवप्रियकामार्थं लङ्कामारुरुहुस्तदा ॥ १३ ॥
ते ताम्रवक्त्रा हेमाभा रामार्थे त्यक्तजीविताः ॥ लङ्कामेवाभ्यवर्तन्त साँलतालशिलायुधाः ॥ १४ ॥
ते द्रुमैः पर्वताग्रैश्च मुष्टिभिश्च प्लवङ्गमाः ॥ प्राकाराग्राण्यरण्यानि ममन्थुस्तोरणानि च ॥ १५ ॥
परिखाः पूरयन्ति स्म प्रसन्नसलिलायुताः ॥ पांसुभिः पर्वताग्रैश्च तृणैः काष्ठैश्च वानराः ॥ १६ ॥
ततः सहस्रयूथाश्च कोटियूथाश्च वानराः ॥ कोटीशतयुताश्चान्ये लङ्कामारुरुहुस्तदा ॥ १७॥
काञ्चनानि प्रमृद्नन्तस्तोरणानि प्लवङ्गमाः ॥ कैलासशिखराभाणि गोपुराणि प्रमथ्य च ॥ १८ ॥
आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः ॥ लङ्कां तामभिधावन्ति महावारणसन्निभाः ॥ १९ ॥
जयत्यतिबलो रामो लक्ष्मणश्च महाबलः ॥ राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ २० ॥
इत्येवं घोषयन्तश्च गर्जन्तश्च प्लवङ्गमाः ॥ अभ्यधावन्त लङ्कायाः प्राकारं कामरूपिणः ॥ २१ ॥

नाम पूर्वस्थानात् प्राकारसन्निकृष्टं प्रदेशं प्राप्त इत्यर्थः ॥ ६ ॥ दूयमानेनेति । सीतां स्मृत्वा दुःखितोभूदित्यर्थः ॥ ७ ॥ मृगशाबाक्षीत्यनेन शोकानर्हत्वमुच्यते । स्थण्डिलशायिनी भूतलशायिनी ॥ ८ ॥ पीड्यमानां राक्षसीभिरिति शेषः । धर्मात्मेत्यनेन दयालुत्वमुच्यते ॥ ९ ॥ वचने आज्ञापनरूपे । सङ्घर्षमाणाः स्पर्धमानाः । अनादयन् लङ्कामितिशेषः ॥ १० ॥ विकिराम चूर्णयाम । मनांसि दधिरे निश्चयं चक्रुरित्यर्थः ॥ ११ ॥ शिखराणि पर्वतखण्डान् । शिखरं शैलखण्डमिति संग्रहकारः । तिष्ठन्ति अतिष्ठन् ॥ १२ ॥ प्रेक्षतः प्रेक्षमाणमनादृत्य । तान्यनीकानि वानरानीकानि । भागशः स्वस्वनियुक्तप्रदेशे । लङ्कां लङ्काप्राकारं । राघवप्रियकामार्थं रामप्रीतिसिद्ध्यर्थमित्यर्थः ॥ १३ ॥ त्यक्तजीविताः "आशंसायां भूतवच्च" इति क्तः ॥ १४ ॥ अरण्यानि उद्यानानि । तोरणानि बहिर्द्वाराणि । ममन्थुः बभञ्जुरित्यर्थः ॥ १५–१६ ॥ कोटीशतयुताः कोटीशतयूथयुताः ॥ १७ ॥ काञ्चनानीत्यादिश्लोकद्वयं । काञ्चनानि काञ्चनकृतानि । प्रमृद्नन्तः चूर्णयन्तः । आप्लवन्तः प्लवन्तश्च गमनागमने कुर्वन्तः ॥ १८—२० ॥ घोषयन्तः घुष्यन्तः ।

तीo दूयमानेन संतप्यमानेन । चेतसा उपलक्षितः । मनसाजगाम सस्मारेत्यर्थः ॥ ७ ॥ **तिo** मत्कृते मन्निमित्तं । शोकसंतप्तापिपीड्यते मदर्थंरामस्यैवंमहाक्लेशोऽजायतेतिखिन्नाभवतीत्यर्थः ॥ ८ ॥ **तीo** राघवप्रियकामार्थं प्रियविषयःकामोमनोरथः तत्सिद्ध्यर्थं राघवस्यप्रियविषयमनोरथसिद्धयेइत्यर्थः ॥ १३ ॥ **सo** त्यक्तजीविताः तावत्पर्यन्तंधैर्ययुक्ताइत्यर्थः । **विo** त्यक्तजीविताः त्यक्तव्यजीविताः ॥१४॥ **तिo** परिखानितिपुंस्त्वमार्षं । **सo** पांशुभिः पांसुभिरितिपाठद्वयमेकार्थं । "तालव्याश्चैवदन्त्याश्चशंवशूकरपांशवः' इत्युक्तेः ॥ १६ ॥ **तिo** कैलासशिखराभाणि तद्वदुच्चावचानि गोपुराणि ॥ १८ ॥ **सo** कामरूपिणः वानराकारमध्यएवदीर्घाणुवैपुल्यादिस्वेच्छानुसारिरूपाः । अन्यथाप्राचीनसंकेतवैपरीत्यापत्तेः ॥ २१ ॥

[**पाo**] १ ख. ङ.—ट. मनसा. २ ङ. च. छ. झ. ट. निपीड्यमानां. ३ घ. ङ. झ. ट. माज्ञापयद्रामो. ४ ङ. च. झ. ट. वचसि. ५ ङ. च. झ. ञ. ट. रपूरयन्. ६ ङ. झ. ञ. ट. मैतां. ७ ङ. झ. ट. सालभूधरयोधिनः. ८ ग. ङ. च. ज.—ट. प्रासादाग्राण्यसंख्यानि. ९ ख. ङ. झ. ञ. ट. परिखान्पूरयन्तश्चप्रसन्नसलिलाशयान्. १० ङ च. झ. ञ. ट. कोटीयूथशताश्चान्ये. ११ क. छ. ज. प्रमृघ्नतः. १२ ङ.—ट. शिखराग्राणि.

वीरबाहुः सुबाहुश्च नलश्च [1]वनगोचरः ॥ निपीड्योपनिविष्टास्ते प्राकारं हरियूथपाः ॥
एतस्मिन्नन्तरे चक्रुः स्कन्धावारनिवेशनम् ॥ २२ ॥
पूर्वद्वारं तु कुमुदः कोटीभिर्दशभिर्वृतः ॥ आवृत्य बलवांस्तस्थौ हरिभिर्जितकाशिभिः ॥ २३ ॥
[2]साहाय्यार्थं तु तस्यैव निविष्टः प्रघसो हरिः ॥ पनसश्च महाबाहु[3]र्वानरैर्बहुभिर्वृतः ॥ २४ ॥
[4]दक्षिणं द्वारमागम्य वीरः शतबलिः कपिः ॥ आवृत्य बलवांस्तस्थौ विंशत्या कोटिभिर्वृतः ॥२५॥
सुषेणः पश्चिमद्वारं [5]गतस्तारापिता हरिः ॥ आवृत्य बलवांस्तस्थौ [6]षष्टिकोटिभिरावृतः ॥ २६ ॥
उत्तरं द्वार[7]मासाद्य रामः सौमित्रिणा सह ॥ आवृत्य बलवांस्तस्थौ सुग्रीवश्च हरीश्वरः ॥ २७ ॥
गोलाङ्गूलो महाकायो गवाक्षो भीमदर्शनः ॥ वृतः कोट्या महावीर्यस्तस्थौ रामस्य पार्श्वतः ॥२८॥
ऋक्षाणां भीमवेगानां धूम्रः शत्रुनिबर्हणः ॥ वृतः कोट्या महावीर्यस्तस्थौ रामस्य पार्श्वतः ॥ २९ ॥
सन्नद्धस्तु महावीर्यो गदापाणिर्विभीषणः ॥ वृतो यत्तैस्तु सचिवैस्तस्थौ तत्र महाबलः ॥ ३० ॥
गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ समन्तात्परिधावन्तो ररक्षुर्हरिवाहिनीम् ॥ ३१ ॥
ततः कोपपरीतात्मा रावणो राक्षसेश्वरः ॥ निर्याणं सर्वसैन्यानां द्रुतमाज्ञापयत्तदा ॥ ३२ ॥
एतच्छ्रुत्वा [8]ततो वाक्यं रावणस्य [9]मुखोद्गतम् ॥ सहसा भीमनिर्घोषमुद्घुष्टं रजनीचरैः ॥ ३३ ॥
ततः प्रचोदिता भेर्यश्चन्द्रपाण्डुरपुष्कराः ॥ हेमकोणाहता भीमा राक्षसानां समन्ततः ॥ ३४ ॥
विनेदुश्च महाघोषाः शङ्खाः शतसहस्रशः ॥ राक्षसानां सुघोराणां मुखमारुतपूरिताः ॥ ३५ ॥
ते बभुः [10]शुभनीलाङ्गाः सशङ्खा रजनीचराः ॥ विद्युन्मण्डलसन्नद्धाः सबलाका इवाम्बुदाः ॥ ३६ ॥

गर्जन्तः सिंहनादं कुर्वन्तः ॥२१॥ वीरबाहुरित्यादिसार्धश्लोक एकान्वयः ॥ एतस्मिन्नन्तरे प्रसिद्धाः वीरबाह्वादयः प्राकारं निपीड्योपनिविष्टाः सन्तः । स्कन्धावारस्य शिबिरस्य । निवेशनं निर्माणं । चक्रुः । युद्धेन्तरान्तरा विश्रमार्थं वासस्थानं स्कन्धावारः । यद्वा व्यूहीभावेन सेनास्थापनं स्कन्धावारः ॥ २२ ॥ निवेशनप्रकारमेवाह—पूर्वद्वारमित्यादिना ॥ कुमुदः पूर्वद्वारमावृत्य तस्थौ । ईशानकोणे स्थित्वा पूर्वद्वारमाक्रम्य स्थितवानित्यर्थः ॥ २३—२४ ॥ शतबलिः दक्षिणद्वारमावृत्य तस्थौ । आग्नेयकोणे स्थित्वा दक्षिणद्वारमाक्रम्य स्थितवानित्यर्थः ॥ २५ ॥ सुषेणः पश्चिमद्वारं गतः आवृत्य तस्थौ । नैर्ऋतकोणे स्थित्वा पश्चिमद्वारमाक्रम्य स्थितवानित्यर्थः ॥ २६ ॥ सुग्रीवश्चोत्तरं द्वारमावृत्य तस्थौ । " पश्चिमेन तु रामस्य सुग्रीवः सहजाम्बवान् । अदूरान्मध्यमे गुल्मे तस्थौ बहुबलानुगः " इत्युक्तप्रकारेण वायव्यकोणे स्थितस्य सुग्रीवस्य उत्तरद्वारनिरोधकत्वाभिधानादेतदनुसारेण कुमुदादीनां तत्तत्कोणावस्थितत्वेन तत्तद्वारनिरोधकत्वमिति व्याख्यातं ॥ २७—३० ॥ गजो गवाक्ष इति ॥ रामपार्श्वस्थात् गवाक्षादन्यो ज्ञेयः ॥३१॥ ततः वानरसेनासन्निवेशाद्धेतोः । तदा तस्मिन्सन्निवेशकाले ॥३२॥ भीमनिर्घोषं यथा भवतितथा उद्घुष्टं । उच्चैः सिंहनादःकृत इत्यर्थः ॥३३॥ प्रचोदिताः सेनाग्रे प्रेरिताः । चन्द्रपाण्डुरपुष्कराः चन्द्रशुभ्रमुखाः । संमार्जनसंस्कारविशेषेण तासां शुभ्रत्वं । " पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले " इत्यमरः । कोणो वाद्यताडनदण्डः । विनेदुरित्यनुकर्षः । अथवा प्रचोदिताः सस्वनुरित्यर्थः ॥ ३४—३५ ॥ शुभनीलाङ्गाः आभरणप्रभाभिः शोभमानानि नीलानि चाङ्गानि येषां ते । अतएव विद्युन्मण्डलसन्नद्धा इति नाधिकोपमा । विद्युन्मण्डलसन्नद्धा इत्युपमानविशेषणेनोपमेयेषु राक्षसेषु सभूषणत्वं गम्यत इत्यप्याहुः ॥३६॥

[पा०] १ ङ.—ट. पनसस्तथा. २ घ. च.—ट. सहायार्थंतु. ३ ख. ङ.—ट. वानरैरभिसंवृतः. ४ ख. ङ.—ट. दक्षिणद्वारमासाद्य. ५ ङ. झ. ञ. ट. गत्वातारापितावली. ६ च. झ. कोटिकोटिभिः. ७ ग. च. झ. ञ. ट. मागम्य. ८ ङ. झ. ञ. ट. भीमकोपानां. ९ ङ. छ. झ. ट. यत्र. १० ङ. च. झ. ट. तदा. ११ क.—घ. च. झ. ट. मुखेरितं. १२ ग. ङ.—ट. शुकनीलाङ्गाः. घ. शुकनीलाभाः.

निष्पतन्ति ततः सैन्या हृष्टा रावणचोदिताः ॥ समये[1] पूर्यमाणस्य वेगा इव महोदधेः ॥ ३७ ॥
ततो वानरसैन्येन मुक्तो नादः समन्ततः ॥ मलयैः[2] पूरितो येन ससानुप्रस्थकन्दरः ॥ ३८ ॥
शङ्खदुन्दुभिसंघुष्टः[3] सिंहनादस्तरस्विनाम् ॥ पृथिवीं चान्तरिक्षं च सागरं चैव नादयन् ॥ ३९ ॥
गजानां बृंहितैः[4] सार्धं हयानां हेषितैरपि ॥ रथानां नेमिघोषैश्च[5] रक्षसां वदनस्वनैः[6] ॥ ४० ॥
एतस्मिन्नन्तरे घोरः संग्रामः समवर्तत ॥ रक्षसां वानराणां च यथा देवासुरे पुरा ॥ ४१ ॥
ते गदाभिः प्रदीप्ताभिः शक्तिशूलपरश्वधैः ॥ निजघ्नुर्वानरान्घोराः कथयन्तः स्वविक्रमान् ॥४२॥
राजा[7] जयति सुग्रीव इति शब्दो महानभूत् ॥ ४३ ॥
राजञ्जयजयेत्युक्त्वा स्वस्वनामकथान्ततः ॥ तथा वृक्षैर्महाकायाः पर्वताग्रैश्च वानराः ॥
निजघ्नुस्तानि रक्षांसि नखैर्दन्तैश्च वेगिताः ॥ ४४ ॥
राक्षसास्त्वपरे भीमाः प्राकारस्था महीगतान् ॥ भिण्डिपालैश्च[11] खड्गैश्च शूलैश्चैव व्यदारयन् ॥४५॥
वानराश्चापि संक्रुद्धाः प्राकारस्थान्महीगताः ॥ राक्षसान्पातयामासुः समाप्लुत्य[12] प्लवङ्गमाः ॥ ४६ ॥
स संप्रहारस्तुमुलो मांसशोणितकर्दमः ॥ रक्षसां वानराणां च संबभूवाद्भुतोपमः ॥ ४७ ॥
[वनौकसां[13] तत्र भृशं निनादो लङ्कागतानां च निशाचराणाम् ॥
प्रक्ष्वेडितास्फोटितसिंहनादैर्द्वाभ्यां गताभ्यामिव सागराभ्याम् ॥ ४८ ॥]
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

सैन्याः सेनायां समवेता जनाः । " सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते " इत्यमरः । समये प्रलये । चन्द्रोदये वा । वेगाः पूराः ॥ ३७ ॥ मलयः त्रिकूटः । सः प्रसिद्धः । सानुप्रस्थकन्दरः अनुप्रस्थं प्रस्थे प्रस्थे स्थिताः याः कन्दरास्ताभिः सह वर्तत इति विग्रहः । यद्वा सानुः वप्रः प्रस्थः तटः कन्दरा गुहेत्यर्थः । सानुः महाप्रस्थः प्रस्थः क्षुद्रतटः कन्दरः दरी तैः सह वर्तत इति ससानुप्रस्थकन्दर इत्यप्याहुः ॥ ३८ ॥ शङ्खदुन्दुभीत्यादिश्लोकद्वयं ॥ शङ्खदुन्दुभिसंघुष्टः शङ्खदुन्दुभिसंघोषयुक्तः । तरस्विनां बलवतां । सिंहनादः गजबृंहितादिभिः सह पृथिव्यादिकं नादयन् अनादयत् ॥ ३९—४० ॥ देवासुरे यथा देवासुरविरोधे देवानामसुराणामिवेत्यर्थः । यद्वा षष्ठीबहुवचनस्य " सुपां सुलुक्—" इत्यादिना शेआदेशः ॥ ४१—४२ ॥ राजेत्यर्धं ॥ स्पष्टं ॥ ४३ ॥ राजन्नित्यादिसार्धश्लोकः ॥ स्वस्वनामकथान्तत इति । नामकथां चोक्त्वा ततो निजघ्नुरित्युत्तरत्रान्वयः । नामकथानां अन्ततः अन्ते इति वा योजना । वेगिताः सञ्जातवेगाः । वेपिता इति पाठे कोपेन कम्पमाना इत्यर्थः ॥ ४४ ॥ भिन्दिपालैः गदाभेदैः ॥ ४५ ॥ समाप्लुत्य प्राकाराग्रपर्यन्तमुत्पत्य । प्लवनं प्लुतगतिं गच्छन्तीति प्लवङ्गमाः । असंज्ञायामपि खशार्षः । अनेन प्लुतगतिमत्त्वमुक्तं । अतो न वानरशब्देन पुनरुक्तिः ॥४६॥ संप्रहारः युद्धं । तुमुलः परस्परसंकुलः । मांसशोणि-

---

ति० समये प्रलयकाले । पूर्यमाणस्य । महामेघैरितिशेषः । वेगास्तरङ्गाः ॥ ३७ ॥ ति० येनातिदूरवर्तीमलयोपिपूरितः स्यात्तादृशोनादोमुक्तः ॥ ३८ ॥ स० गजानांबृंहितैः बृंहितशब्दोत्रध्वनिमात्रपरः । एवमुत्तरत्रापि ॥ ४० ॥ स० 'राजाजयतिसुग्रीव'इतिकप्युक्तिः । 'राजञ्जयजय'इतिराक्षसोक्तिः ॥ ४३—४४ ॥ अत्र 'राक्षसास्त्वपरे' इत्यर्धंप्रक्षिप्तमितिकतकः ॥ ४५ ॥ स० सेनाप्रत्यवहारोत्रानुक्तोपि "ततःप्रत्यवहारोभूत्सैन्यानांराघवाज्ञया । ततोनिविशमानांस्तान्सैनिकान्रावणानुगाः । अभि-

[पा०] १ घ. शशिनापूर्ये. २ घ. च. ज. सुवेलः. ३ ङ. च. झ. ञ. ट. दुन्दुभिनिर्घोषः. ४ ख. ग. ङ. च. झ. ञ. ट. चाभ्यनादयत्. घ. चव्यनादयत्. ५ ङ. —ट. नेमिनिर्घोषैः. ६ ग. घ. च. झ. ञ. ट. पदनिस्स्वनैः. क. ख. ज. पादनिस्स्वनैः. ७ ख. च. छ. ञ. सघः. ८ क. ख. घ.—ट. समपद्यत. ९ च. झ. ञ. ट. वानरान्सर्वान्कथय. १० " राजाजयतिसुग्रीवः " " तथावृक्षैर्महाकायाः " इत्येतयोःश्लोकयोः झ. ञ. ट. ठ. पुस्तकेषुव्युत्क्रमोदृश्यते. ११ घ.—ट. वानरान्भिण्डिपालैश्चशूलैश्चैव. १२ झ. ट. खमाप्लुत्यबाहुभिः. १३ अर्धश्लोकः ज. पाठेदृश्यते.

त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

वानरराक्षसानांद्वन्द्वयुद्धम् ॥ १ ॥

युध्यतां तु ततस्तेषां वानराणां महात्मनाम् ॥ रक्षसां संबभूवाथ बलकोपः सुदारुणः ॥ १ ॥
ते हयैः काञ्चनापीडैर्ध्वजैश्चाग्निशिखोपमैः ॥ रथैश्चादित्यसंकाशैः कवचैश्च मनोरमैः ॥ २ ॥
निर्ययू राक्षसव्याघ्रा नादयन्तो दिशो दश ॥ राक्षसा भीमकर्माणो रावणस्य जयैषिणः ॥ ३ ॥
वानराणामपि चमूर्बृहती जयमिच्छताम् ॥ अभ्यधावत तां सेनां रक्षसां कामरूपिणाम् ॥ ४ ॥
एतस्मिन्नन्तरे तेषामन्योन्यमभिधावताम् ॥ रक्षसां वानराणां च द्वन्द्वयुद्धमवर्तत ॥ ५ ॥
अङ्गदेनेन्द्रजित्सार्धं वालिपुत्रेण राक्षसः ॥ अयुध्यत महातेजारुरुयम्बकेण यथाऽन्तकः ॥ ६ ॥
प्रजङ्घेन च संपातिर्नित्यं दुर्मर्षणो रणे ॥ जम्बुमालिनमारब्धो हनुमानपि वानरः ॥ ७ ॥
संगतः सुमहाँक्रोधो राक्षसो रावणानुजः ॥ समरे तीक्ष्णवेगेन मित्रघ्नेन विभीषणः ॥ ८ ॥
तपनेन गजः सार्धं राक्षसेन महाबलः ॥ निकुम्भेन महातेजा नीलोपि समयुध्यत ॥ ९ ॥
वानरेन्द्रस्तु सुग्रीवः प्रघसेन समागतः ॥ संगतः समरे श्रीमान्विरूपाक्षेण लक्ष्मणः ॥ १० ॥
अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः ॥ सुप्तघ्नो यज्ञकोपश्च रामेण सह संगताः ॥ ११ ॥
वज्रमुष्टिस्तु मैन्देन द्विविदेनाशनिप्रभः ॥ राक्षसाभ्यां सुघोराभ्यां कपिमुख्यौ समागतौ ॥ १२ ॥
वीरः प्रतपनो घोरो राक्षसो रणदुर्धरः ॥ समरे तीक्ष्णवेगेन नलेन समयुध्यत ॥ १३ ॥
धर्मस्य पुत्रो बलवान्सुषेण इति विश्रुतः ॥ स विद्युन्मालिना सार्धमयुध्यत महाकपिः ॥ १४ ॥
वानराश्चापरे भीमा राक्षसैरपरैः सह ॥ द्वन्द्वं समीयुर्बहुधा युद्धाय बहुभिः सह ॥ १५ ॥
तत्रासीत्सुमहद्युद्धं तुमुलं रोमहर्षणम् ॥ रक्षसां वानराणां च वीराणां जयमिच्छताम् ॥ १६ ॥

तान्येव कर्दमो यस्मिन् स मांसशोणितकर्दमः । अद्भुतोपमः दुर्लभोपम इति यावत् ॥ ४७—४८ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्विचत्वारिंशः सर्गः ॥ ४२ ॥

अथ द्वन्द्वयुद्धं वर्णयति त्रिचत्वारिंशे—युध्यतां त्यादि ॥ वानराणां युध्यतां वानरेषु युध्यमानेषु । बलकोपः सेनायाः कोपः । बलेत्यविभक्तिकनिर्देशः ॥ १ ॥ ते हयैरित्यादिश्लोकद्वयमेकान्वयं ॥ काञ्चनापीडैः स्वर्णमयशेखरैः । हयैरित्याद्युपलक्षणे तृतीया । राक्षसव्याघ्राः राक्षसश्रेष्ठाः । राक्षसश्रेष्ठत्वेपि जात्यन्तरत्वं संभवतीति राक्षसा इत्युक्तं ॥ २—६ ॥ दुर्मर्षणः दुःसहः । प्रजङ्घो राक्षसः । संपातिः विभीषणसचिवः । आरब्धः हन्तुमिति शेषः ॥ ७—१० ॥ अग्निकेतुरिति । सुप्तघ्नयज्ञकोपौ चेति वापाठः ॥ ११ ॥ राक्षसाभ्यां वज्रमुष्टयशनिप्रभाभ्यां कपिमुख्यौ मैन्दद्विविदौ । अनेन परस्परसंगतिरुक्ता ॥ १२ ॥ रणदुर्धरः रणे दुर्निग्रहः ॥ १३—१४ ॥ द्वन्द्वं द्वन्द्वत्वं । बहुधा युद्धाय शस्त्रास्त्रबाहुचरणप्रभृतिभिर्युद्धाय । बहुभिरितिराक्षसविशेषणाद्वानराश्चेत्यत्रापि बहव इति विशेषणं विज्ञेयं ॥ १५ ॥ तुमुलं

जग्मुर्गणाएकेपिशाचक्षुद्ररक्षसाम् । ततोभिपततांतेषामदृश्यानांदुरात्मनाम् । अन्तर्धानवधंतज्ज्ञश्चकारसविभीषणः ।" इतिभारतवनपर्वोक्तोनुसन्धेयः ॥ ४८ ॥ इतिद्विचत्वारिंशःसर्गः ॥ ४२ ॥

ति० बलरोषः परस्परबलदर्शनजोरोषः । एतावद्दिनयुद्धेपिबहवएवतिष्ठन्तीत्येवंरोषइतिभावः ॥ १ ॥ ति० निर्ययुरिति । अनेनवाल्मीकिनापिप्रत्यवहारोध्वनितः ॥ ३ ॥ ति० शत्रुघ्नेन तदाख्यरक्षसा । मित्रघ्नेनेतिक्वचित्पाठः ॥ ८ ॥

[पा०] १ ङ. झ. ट. बलरोषः. २ ङ. झ. ट. पीडैर्गजैश्चा. ३ ख. ङ.—ट. राक्षसावीराः. ४ च. अभ्यधावत्ततस्सेनां. ५ ङ.—ट. घोरकर्मणां. ६ घ. ङ. ज. झ. ट. संगतस्तु. ७ च. छ. ञ. क्रोधाद्राक्षसो. ८ ङ. झ. ट. शत्रुघ्नेन. ९ क. ख. ग. मित्रघ्नोयज्ञकेतुश्च. ङ. झ. ट. मित्रघ्नो. १० ख, ङ. छ. झ. ञ. ट. घोराः. ११ ङ.—ट. समीयुस्सहसायुद्धाच.

हरिराक्षसदेहेभ्यः प्रभूताः केशशाद्वलाः ॥ शरीरसंघाटवहाः प्रसस्रुः शोणितापगाः ॥ १७ ॥
आजघानेन्द्रजित्क्रुद्धो वज्रेणेव शतक्रतुः ॥ अङ्गदं गदया वीरं शत्रुसैन्यविदारणम् ॥ १८ ॥
तस्य काञ्चनचित्राङ्गं रथं साश्वं ससारथिम् ॥ जघान समरे श्रीमानङ्गदो वेगवान्कपिः ॥ १९ ॥
संपातिस्तु त्रिभिर्बाणैः प्रजङ्घेन समाहतः ॥ निजघानाश्वकर्णेन प्रजङ्घं रणमूर्धनि ॥ २० ॥
जम्बुमाली रथस्थस्तु रथशक्त्या महाबलः ॥ बिभेद समरे क्रुद्धो हनूमन्तं स्तनान्तरे ॥ २१ ॥
तस्य तं रथमास्थाय हनूमान्मारुतात्मजः ॥ प्रममाथ तलेनाशु सह तेनैव रक्षसा ॥ २२ ॥
नदन्प्रतपनो घोरो नलं सोप्यन्वधावत ॥ २३ ॥
नलः प्रतपनस्याशु पातयामास चक्षुषी ॥ भिन्नगात्रः शरैस्तीक्ष्णैः क्षिप्रहस्तेन रक्षसा ॥ २४ ॥
ग्रसन्तमिव सैन्यानि प्रघसं वानराधिपः ॥ सुग्रीवः सप्तपर्णेन निर्बिभेद जघान च ॥ २५ ॥
[प्रपीड्य शरवर्षेण राक्षसं भीमदर्शनम् ॥ निजघान विरूपाक्षं शरेणैकेन लक्ष्मणः ॥ २६ ॥]
अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः ॥ सुप्तघ्नो यज्ञकोपश्च रामं निर्बिभिदुः शरैः ॥ २७ ॥
तेषां चतुर्णां रामस्तु शिरांसि निशितैः शरैः ॥ क्रुद्धश्चतुर्भिश्चिच्छेद घोररग्निशिखोपमैः ॥ २८ ॥
वज्रमुष्टिस्तु मैन्देन मुष्टिना निहतो रणे ॥ पपात सरथः साश्वः पुराट्ट इव भूतले ॥ २९ ॥
निकुम्भस्तु रणे नीलं नीलाञ्जनचयप्रभम् ॥ निर्बिभेद शरैस्तीक्ष्णैः करैर्मेघमिवांशुमान् ॥ ३० ॥
पुनः शरशतेनाथ क्षिप्रहस्तो निशाचरः ॥ बिभेद समरे नीलं निकुम्भः प्रजहास च ॥ ३१ ॥
तस्यैव रथचक्रेण नीलो विष्णुरिवाहवे ॥ शिरश्चिच्छेद समरे निकुम्भस्य च सारथेः ॥ ३२ ॥
वज्राशनिसमस्पर्शो द्विविदोप्यशनिप्रभम् ॥ जघान गिरिशृङ्गेण मिषतां सर्वरक्षसाम् ॥ ३३ ॥
द्विविदं वानरेन्द्रं तु नगयोधिनमाहवे ॥ शरैरशनिसंकाशैः स विव्याधाशनिप्रभः ॥ ३४ ॥
स शरैरतिविद्धाङ्गो द्विविदः क्रोधमूर्च्छितः ॥ सालेन सरथं साश्वं निजघानाशनिप्रभम् ॥ ३५ ॥
विद्युन्माली रथस्थस्तु शरैः काञ्चनभूषणैः ॥ सुषेणं ताडयामास ननाद च मुहुर्मुहुः ॥ ३६ ॥
तं रथस्थमथो दृष्ट्वा सुषेणो वानरोत्तमः ॥ गिरिशृङ्गेण महता रथमाशु न्यपातयत् ॥ ३७ ॥
लाघवेन तु संयुक्तो विद्युन्माली निशाचरः ॥ अपक्रम्य रथात्तूर्णं गदापाणिः क्षितौ स्थितः ॥३८॥
ततः क्रोधसमाविष्टः सुषेणो हरिपुङ्गवः ॥ शिलां सुमहतीं गृह्य निशाचरमभिद्रवत् ॥ ३९ ॥
तमापतन्तं गदया विद्युन्माली निशाचरः ॥ वक्षस्यभिजघानाशु सुषेणं हरिसत्तमम् ॥ ४० ॥

व्याकुलं ॥ १६ ॥ केशशाद्वलाः केशैः शाद्वलवत्यः । संघाटः काष्ठसंचयः ॥ १७ ॥ आजघान ताडयामास ॥ १८—२० ॥ रथशक्त्या रथ एव सदा वर्तमानया शक्त्या ॥ २१ ॥ आस्थाय आरुह्य ॥ २२ ॥ नदन्नित्यर्धमेकं वाक्यं ॥२३॥ रक्षसा प्रतपनेन । भिन्नगात्र इत्यस्य पूर्वेणान्वयः ॥ २४ ॥ सप्तपर्णेन सप्तपर्णवृक्षेण ॥ २५—२७ ॥ अग्निशिखोपमैः अग्निज्वालोपमैः ॥ २८ ॥ पुराट्टः पुरवलभिः ॥ २९—३० ॥ क्षिप्रहस्तः क्षिप्रकारिहस्तः । निकुम्भः प्रजहास चेति पाठः सम्यक् ॥ ३१ ॥ शिरश्चिच्छेद सारथेरित्यनन्तरं वज्राशनिसमस्पर्श इति श्लोकः । ततो द्विविदं वानरेन्द्रं त्विति श्लोकः ॥ ३२—३७ ॥ अपक्रम्य अवप्लुत्य ॥ ३८ ॥ अभिद्रवत् अभ्यद्रवत् ॥ ३९–४० ॥

ति० अट्टः क्षौममितिकतकः । विमानमित्यन्ये । स० सुराट्टः देवदत्तोदैतेयविमानः ॥ २९ ॥ स० आहवेचक्रेणविष्णुरिव समरे निकुंभस्यसारथेः शिरश्चिच्छेदेत्यन्वयः ॥ ३२ ॥

[पा०] १ क. ग. ङ. च. झ. ञ. ट. प्रसृताः. २ ङ. झ. ट. गदयाश्रीमान्. ३ ङ. छ. झ. ञ. ट. निजघानजवेनच. ४ अयंश्लोकः ङ.—ट. पाठेषुदृश्यते. ५ ख. ग. ङ. ज. झ. मित्रघ्नो. ६ ङ. झ. ट. राममादीपयच्छरैः. ७ ङ. च. झ. ञ. समरेशरैः. ८ झ. ञ. सुराट्टइव. ९ ङ. छ. झ. रभिविद्धाङ्गो.

गदाप्रहारं तं घोरमचिन्त्य प्लवगोत्तमः ॥ तां शिलां पातयामास तस्योरसि महामृधे ॥ ४१ ॥
शिलाप्रहाराभिहतो विद्युन्माली निशाचरः ॥ निष्पिष्टहृदयो भूमौ गतासुर्निपपात ह ॥ ४२ ॥
एवं तैर्वानरैः शूरैः शूरास्ते रजनीचराः ॥ द्वन्द्वे विमृदितास्तत्र दैत्या इव दिवौकसैः ॥ ४३ ॥
भग्नैः खड्गैर्गदाभिश्च शक्तितोमरपट्टिशैः ॥ अपविद्धैश्च भिन्नैश्च रथैः सांग्रामिकैर्हयैः ॥ ४४ ॥
निर्हतैः कुञ्जरैर्मत्तैस्तथा वानरराक्षसैः ॥ चक्राक्षयुगदण्डैश्च भग्नैर्धरणिसंश्रितैः ॥
बभूवायोधनं घोरं गोमायुगणसंकुलम् ॥ ४५ ॥
कबन्धानि समुत्पेतुर्दिक्षु वानररक्षसाम् ॥ विमर्दे तुमुले तस्मिन्देवासुररणोपमे ॥ ४६ ॥
विदार्यमाणा हरिपुङ्गवैस्तदा निशाचराः शोणितदिग्धगात्राः ॥
पुनः सुयुद्धं तरसा समास्थिता दिवाकरस्यास्तमयाभिकाङ्क्षिणः ॥ ४७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

रात्रियुद्धं ॥ १ ॥ द्वन्द्वयुद्धे अङ्गदनिहतहयसारथिनेन्द्रजिता रथत्यागेनमायया ऽन्तरिक्षेऽन्तर्हितेनसता रामलक्ष्मणावयवेषु नागमयशरवर्षणम् ॥ २ ॥

युध्यतामेव तेषां तु तदा वानररक्षसाम् ॥ रविरस्तं गतो रात्रिः प्रवृत्ता प्राणहारिणी ॥ १ ॥
अन्योन्यं बद्धवैराणां घोराणां जयमिच्छताम् ॥ संप्रवृत्तं निशायुद्धं तदा वानररक्षसाम् ॥ २ ॥
राक्षसोसीति हरयो हरिश्चासीति राक्षसाः ॥ अन्योन्यं समरे जघ्नुस्तस्मिंस्तमसि दारुणे ॥ ३ ॥
जहि दारय चैहीति कथं विद्रवसीति च ॥ एवं सुतुमुलः शब्दस्तस्मिंस्तमसि शुश्रुवे ॥ ४ ॥

अचिन्त्य अचिन्तयित्वा ॥ ४१—४२ ॥ दिवौकसैरित्यकारान्तत्वमार्षं ॥ ४३ ॥ भग्नैरित्यादि सार्धश्लोकद्वयमेकान्वयं ॥ अपविद्धैरिति रथविशेषणं । भिन्नैरिति हयविशेषणं । सांग्रामिकैः संग्रामे साधुभिः । अक्षं चक्ररन्ध्रं । युगदण्डः अश्वबन्धनदण्डः ॥ ४४–४५ ॥ कबन्धानि शिरोहीनशरीराणि । विमर्दे युद्धे ॥ ४६ ॥ दिवाकरस्येति । रात्रौ राक्षसानां बलाधिक्यादितिभावः ॥ ४७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

अथ रात्रियुद्धप्रवृत्तिश्चतुश्चत्वारिंशे—युध्यतामेवेत्यादि ॥ युध्यतां युध्यमानेषु । प्राणहारिणी वानराणामिति शेषः ॥ १—२ ॥ हरिश्चासीति राक्षसा इति । दारुणतमस्कत्वेन रक्षसामपि मोहोभूदितिभावः

स० दिवौकसैः ओकएवौकसं । प्रज्ञाद्यण्स्वार्थे । दिवंऔकसंयेषांतेतैः ॥ ४३ ॥ शि० आयोधनं संग्रामभूमिः । गोमायुगणैः सेवितंबभूव ॥ ४५ ॥ इतित्रिचत्वारिंशःसर्गः ॥ ४३ ॥

स० प्राणहारिणी "पौषपौर्णमास्यांसुवेलारोहः । समग्रपौषातिक्रमणंसेनाविभागकरणं । प्रतिपदिमध्याह्नेयुद्धप्रारंभः । बहुदिनंयुद्धकरणं । तदुपरिनिशायुद्धमितिसांधकारतयापरस्परादर्शनात् "ततोजज्ञेमहायुद्धंसंकुलंकपिरक्षसाम् । मध्याह्नेप्रथमंयुद्धं प्रारब्धंप्रतिपद्यभूत्" इतिपाद्मोक्तेः । अत्रतत्लंवक्ष्यामः" इतिनागोजिभट्टः । पद्मपुराणेपञ्चषेषुपुस्तकेषुएतत्पद्यादर्शनेन "अत्रयुद्धं महद्वृत्तंचैत्रशुक्लचतुर्दशीम् । अष्टचत्वारिंशद्दिनंयत्रासौरावणोहतः" इत्यन्यथादर्शनेनच तच्चिन्त्यं । चैत्रशुक्लचतुर्दशीतःप्राक्सप्तचत्वारिंशद्दिनीप्राह्या । चतुर्दश्यासहाष्टचत्वारिंशद्दिनीभवति भवतिफाल्गुनकृष्णेरात्रियुद्धमित्यन्ये ॥ १ ॥ ति० हत इदंहन्तेर्लो-

[पा०] १ ङ. ञ. ञ. तांतूष्णीं. २ ग. ङ. च. ज्ञ. ञ. ट. भल्लैश्चान्यैर्गदा. ३ घ. च. तोमरसायकैः. ४ ग. कुञ्जरैर्मन्दरप्रख्यैस्तथा. ५ ङ. ज्ञ. ट. गणसेवितं. ६ ख. ङ.—ट. निहन्यमानाहरि. घ. निवार्यमाणाहरि. ७ क. घ. ङ. ज्ञ. ट. शोणितगन्धमूर्च्छिताः. ८ ङ. ज्ञ. ञ. ट. हतदारय. ९ ङ. च. छ. ज्ञ. ञ. ट. तस्मिन्सैन्येतु. क.—घ. ज. तस्मिन्सैन्येविशुश्रुवे.

कालाः काञ्चनसन्नाहास्तस्मिंस्तमसि राक्षसाः ॥ संप्रादृश्यन्त शैलेन्द्रा दीप्तौषधिवना इव ॥ ५ ॥
तस्मिंस्तमसि दुष्पारे राक्षसाः क्रोधमूर्च्छिताः ॥ परिपेतुर्महावेगा भक्षयन्तः प्लवङ्गमान् ॥ ६ ॥
ते हयान्काञ्चनापीडान्ध्वजांश्चाग्निशिखोपमान् ॥ आप्लुत्य दशनैस्तीक्ष्णैर्भीमकोपा व्यदारयन् ॥७॥
वानरा बलिनो युद्धेऽक्षोभयन्राक्षसीं चमूम् ॥ कुञ्जरान्कुञ्जरारोहान्पताकाध्वजिनो रथान् ॥
चकर्षुश्च ददंशुश्च दशनैः क्रोधमूर्च्छिताः ॥ ८ ॥
लक्ष्मणश्चापि रामश्च शरैराशीविषोपमैः ॥ दृश्यादृश्यानि रक्षांसि प्रवराणि निजघ्नतुः ॥ ९ ॥
तुरङ्गखुरविध्वस्तं रथनेमिसमुत्थितम् ॥ रुरोध कर्णनेत्राणि युध्यतां धरणीरजः ॥ १० ॥
वर्तमाने महाघोरे संग्रामे रोमहर्षणे ॥ रुधिरोदा महाघोरा नद्यस्तत्र प्रसुस्रुवुः ॥ ११ ॥
ततो भेरीमृदङ्गानां पणवानां च निस्वनः ॥ शङ्खवेणुस्वनोन्मिश्रः संबभूवाद्भुतोपमः ॥
[विमर्दे तुमुले तस्मिन्देवासुररणोपमे ॥ १२ ॥
हतानां स्तनमानानां राक्षसानां च निस्वनः ॥ शस्तानां वानराणां च संबभूवातिदारुणः ॥१३॥
हतैर्वानरवीरैश्च शक्तिशूलपरश्वधैः ॥ निहतैः पर्वताग्रैश्च राक्षसैः कामरूपिभिः ॥ १४ ॥
शस्त्रपुष्पोपहारा च तत्रासीद्युद्धमेदिनी ॥ दुर्ज्ञेया दुर्निवेशा च शोणितास्रावकर्दमा ॥ १५ ॥
सा बभूव निशा घोरा हरिराक्षसहारिणी ॥ कालरात्रीव भूतानां सर्वेषां दुरतिक्रमा ॥ १६ ॥
ततस्ते राक्षसास्तत्र तस्मिंस्तमसि दारुणे ॥ राममेवाभ्यवर्तन्त संसृष्टाः शरवृष्टिभिः ॥ १७ ॥
तेषामापततां शब्दः क्रुद्धानामभिगर्जताम् ॥ उद्वर्त इव सप्तानां समुद्राणां प्रशुश्रुवे ॥ १८ ॥
तेषां रामः शरैरष्टौ षट् जघान निशाचरान् ॥ निमेषान्तरमात्रेण शितैरग्निशिखोपमैः ॥ १९ ॥
यमशत्रुश्च दुर्धर्षो महापार्श्वमहोदरौ ॥ वज्रदंष्ट्रो महाकायस्तौ चोभौ शुकसारणौ ॥ २० ॥

॥ ३—४ ॥ कालाः नीलाः । काञ्चनसन्नाहाः काञ्चनकवचाः । दीप्तौषधिवनाः दीप्ततृणज्योतिर्वनाः ॥ ५ ॥ परिपेतुः संचेरुः ॥ ६ ॥ ते वानराः । काञ्चनापीडान् सुवर्णशेखरान् ॥ ७ ॥ वानरा इत्यादिसार्धश्लोकः ॥ युद्धेक्षोभयन्नित्यत्र अक्षोभयन्निति पदच्छेदः ॥ ८ ॥ दृश्यादृश्यानि ईषद्दृश्यानीत्यर्थः ॥ ९ ॥ विध्वस्तं चूर्णितं ॥ १० ॥ रुधिरोदाः । असंज्ञायामप्युदकशब्दस्योदादेश आर्षः ॥ ११—१२ ॥ स्तनमानानां स्तनतां । शस्तानां हिंसितानां ॥ १३ ॥ हतैरित्यादिश्लोकद्वयमेकान्वयं ॥ निहतैरिति राक्षसविशेषणं । पर्वताग्रैः वानरप्रेरितैः । उपलक्षणेतृतीया । शस्त्राण्येव पुष्पोपहाराः पुष्पबलयो यस्यां सा । तत्र तदा । दुर्ज्ञेया कृच्छ्रज्ञेया । प्रतियोधिनः दुर्निवेशा दुष्प्रवेशा ॥ १४—१५ ॥ कालरात्रिः भीमरथिरात्रिः । " रात्रिर्भीमरथिर्नाम सर्वप्राणिभयावहा " इत्युक्तेः । शक्तिर्वा । " सती च कालरात्रिश्च भैरवी गणनायिका " इत्युक्तेः ॥ १६ ॥ संसृष्टाः संमिलिताः ॥ १७ ॥ उद्वर्ते अभिवृद्धौ । प्रलये वा ॥ १८ ॥ तेषां राक्षसानां मध्ये । षट् निशाचरान् । अग्निशिखोपमैः शितैः शरैः जघान ॥ १९ ॥ के ते षडित्यपेक्षायामाह—यमेति ॥ दुर्धर्षः धर्षितुमशक्यः । यमशत्रुः । महोदरमहापार्श्वौ । महाकायः वज्रदंष्ट्रः । तौ उत्तर-

टिमध्यमपुरुषबहुवचनं । हननंकुरुतेत्यर्थः ॥ ४ ॥ ति० इमौशुकसारणौचारव्लेनप्रेषिताभ्यामन्यावेवेतिबहवः । ताविति पदस्वार-

[पा०] १ ङ. झ. ट. ध्वजानाशीविषोपमान्. ग. च. छ. ञ. न्यजांश्चशिखरोपमान्. २ क. ख. शरैरग्निशिखोपमैः. ३ क. घ. ङ. च झ. ञ. तथाघोरे. ख. तदारौद्रे. ४ ङ. झ. ट. शङ्खनेमिस्वनोन्मिश्रः. ख. ट. शङ्खनेमिस्वनैर्मिश्रः. क. च. छ. ञ. शङ्खवेणुस्वनैर्मिश्रः. ५ इदमर्धं क. ख. च. छ. ञ. पाठेषुदृश्यते. ६ ङ. झ. ट. हयानां. ७ ख. ङ.—ट. संबभूवात्र. क. ग. घ. संबभौतत्र. ८ क.—ट. वीनरमुख्यैश्च. ९ ख. ङ.—ट. पर्वताकारैः. १० छ. ज. पुष्पोपहारैश्च. घ. पुष्पोपहारासा. ११ घ. दुर्धर्षादुर्विभागाच. क. ख. ग. च. ज. दुर्ज्ञेयादुर्निवेशाच. १२ छ. शोणितोद्गारकर्दमा. घ. मांसशोणितकर्दमा. १३ घ. मेवाभ्यधावन्त. १४ झ. ट. संहृष्टाः. ख. संवृष्टाः. १५ क. ख. ग. ङ.—ट. समुद्राणामभूत्स्वनः. घ. समुद्राणामिवस्वनः. १६ ट. घोरैरग्नि. १७ ख. ङ.—ट. यज्ञशत्रुश्च.

ते तु रामेण बाणौघैः सर्वे मर्मसु ताडिताः ॥ युद्धादपसृतास्तत्र सावशेषायुषोऽभवन् ॥ २१ ॥
तत्र काञ्चनचित्राङ्गैः शरैरग्निशिखोपमैः ॥ दिशश्चकार विमलाः प्रदिशश्च महाबलः ॥
[रामनामाङ्कितैर्बाणैर्व्याप्तं तद्रणमण्डलम्] ॥ २२ ॥
ये त्वन्ये राक्षसा भीमा रामस्याभिमुखे स्थिताः ॥ तेऽपि नष्टाः समासाद्य पतङ्गा इव पावकम् ॥२३॥
सुवर्णपुङ्खैर्विशिखैः संपतद्भिः सहस्रशः ॥ बभूव रजनी चित्रा खद्योतैरिव शारदी ॥ २४ ॥
राक्षसानां च निनदैर्हरीणां चापि निस्वनैः ॥ सा बभूव निशा घोरा भूयो घोरतरा तदा ॥२५॥
तेन शब्देन महता प्रवृद्धेन समन्ततः ॥ त्रिकूटः कन्दराकीर्णः प्रव्याहरदिवाचलः ॥ २६ ॥
गोलाङ्गूला महाकायास्तमसा तुल्यवर्चसः ॥ संपरिष्वज्य बाहुभ्यां भक्षयन्रजनीचरान् ॥ २७ ॥
अङ्गदस्तु रणे शत्रुं निहन्तुं समुपस्थितः ॥ रावणिं निजघानाशु सारथिं च हयानपि ॥ २८ ॥
वर्तमाने तदा घोरे संग्रामे भृशदारुणे ॥ इन्द्रजित्तु रथं त्यक्त्वा हताश्वो हतसारथिः ॥
अङ्गदेन महाकायस्तत्रैवान्तरधीयत ॥ २९ ॥
तत्कर्म वालिपुत्रस्य सर्वे देवाः सहर्षिभिः ॥ तुष्टुवुः पूजनार्हस्य तौ चोभौ रामलक्ष्मणौ ॥ ३० ॥
प्रभावं सर्वभूतानि विदुरिन्द्रजितो युधि ॥ [अदृश्यः सर्वभूतानां योऽभवद्युधि दुर्जयः ॥]
तेन ते तं महात्मानं तुष्टा दृष्ट्वा प्रधर्षितम् ॥ ३१ ॥
ततः प्रहृष्टाः कपयः ससुग्रीवविभीषणाः ॥ साधुसाध्विति नेदुश्च दृष्ट्वा शत्रुं प्रधर्षितम् ॥ ३२ ॥
इन्द्रजित्तु तदा तेन निर्जितो भीमकर्मणा ॥ संयुगे वालिपुत्रेण क्रोधं चक्रे सुदारुणम् ॥ ३३ ॥
एतस्मिन्नन्तरे रामो वानरान्वाक्यमब्रवीत् ॥ ३४ ॥
सर्वे भवन्तस्तिष्ठन्तु कपिराजेन संगताः ॥ ३५ ॥
स ब्रह्मणा दत्तवरस्त्रैलोक्यं बाधते भृशम् ॥ भवतामर्थसिद्ध्यर्थं कालेन स समागतः ॥
अद्यैव क्षमितव्यं मे भवन्तो विगतज्वराः ॥ ३६ ॥

द्वाररक्षकत्वेन पूर्वोक्तौ । उभौ शुकसारणौ चेति षट् । अत्र महाकाय इति वज्रदंष्ट्रविशेषणं । अपसृताः पलायिताः । सावशेषायुषः आयुःशेषयुक्ता इति जीवने हेतुः ॥ २०—२१ ॥ महाबलः रामः ॥ २२ ॥ पावकं समासाद्येत्यन्वयः ॥ २३—२४ ॥ पूर्वमेव घोरा सा भूयः विशिष्य घोरतरा बभूव ॥ २५ ॥ प्रव्याहरदिव प्रतिव्याहरदिवेत्यर्थः ॥ २६ ॥ भक्षयन् अभक्षयन् ॥ २७ ॥ पूर्वप्रसक्तस्याङ्गदेन्द्रजितोर्द्वन्द्वयुद्धस्य शेषं वक्तुमुपक्रमते—अङ्गदस्त्वित्यादिना ॥ २८ ॥ तत्रैव तस्मिन्देश एव ॥ २९ ॥ पूजनार्हस्य स्तुत्यर्हस्य ॥ ३० ॥ ते तानि । लिङ्गव्यत्यय आर्षः । महात्मानं महाधैर्यं । तेन अङ्गदेन । प्रधर्षितं पराजितं । दृष्ट्वा तुष्टाः ॥ ३१—३३ ॥ एतस्मिन्नित्यर्धं ॥ ३४ ॥ सर्वे इत्यर्धं ॥ ३५—३६ ॥

स्वाचारत्वेनप्रेषितावेवैतौ । राज्ञाधिकृतावपिराजसंनिधिंपरित्यज्ययुद्धेमृतावित्यन्ये ॥ २० ॥ शि० गोलाङ्गूलाः रजनीचरान्संपरिष्वज्य परिष्वङ्गेननिहत्य । भक्षयन् अभक्षयन् श्वादिभिरखादयन् ॥ २७ ॥ ती० सः इन्द्रजित् । ब्रह्मणादत्तवरस्सन् त्रैलोक्यंबाधते । किंच कालेन कालबलेन । भवतामर्थसिद्ध्यर्थंसमागतः कालबलेनभवतोजेतुंसमागतइत्यर्थः । अद्यैवमेमयाक्षमितव्यं ब्रह्मणोमान्यत्वादितिभावः । भवन्तोविगतज्वरास्तिष्ठन्त्वितिपूर्वेणसंबन्धः । स० तत्रहेतुमाह—सइति । सः इन्द्रजिदित्यर्थः । भवतां भवत्संबन्धीयोऽर्थःस्वस्यजयः तत्सिद्ध्यर्थं । कालेन ब्रह्मवरोज्जृंभकेन समागतः । पृथक्क्रियान्वयान्नतच्छब्दद्वयवैयर्थ्यं ।

[पा०] १ झ. ट. सर्वमर्मसु. २ च. ञ. दपसृतास्त्रस्ताः. ३ ख. च. झ. ञ. ट. निमेषान्तरमात्रेणघोरैरग्निशिखोपमैः. ४ च. झ. ञ. ट. महारथः. ५ ग.—ट. वीराः. ६ ख. ङ. च. झ. ञ. ट. समंततः. ७ ङ. झ. ट. घोरतराऽभवत्. ८ ख. प्रचचालाचलेश्वरः. ९ क. ख. इ. च. छ. झ. ट. महामायः. १० इदमर्धंप्राचीनकोशेषुनदृश्यते. ११ ङ. च. झ. ञ. ट. पराजितं.

सोन्तर्धानगतः पापो रावणी रणकर्कशः ॥ [[1]ब्रह्मदत्तवरो वीरो रावणिः क्रोधमूर्च्छितः ॥]
अदृश्यो निशितान्बाणान्मुमोचाशनिवर्चसः [2]॥ ३७ ॥
स रामं लक्ष्मणं चैव घोरैर्नागमयैः शरैः ॥ बिभेद समरे क्रुद्धः सर्वगात्रेषु [3]राक्षसः ॥ ३८ ॥
मायया संवृतस्तत्र मोहयन्राघवौ युधि ॥ अदृश्यः सर्वभूतानां कूटयोधी निशाचरः ॥
बबन्ध शरबन्धेन भ्रातरौ रामलक्ष्मणौ ॥ ३९ ॥
तौ तेन पुरुषव्याघ्रौ क्रुद्धेनाशीविषैः शरैः ॥ [4]सहसा निहतौ वीरौ तदा प्रेक्षन्त वानराः ॥ ४० ॥
प्रकाशरूपस्तु यदा न शक्तस्तौ बाधितुं राक्षसराजपुत्रः ॥
मायां प्रयोक्तुं समुपाजगाम बबन्ध तौ राजसुतौ [5]महात्मा ॥ ४१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

रामेणान्तरिक्षेऽन्तर्हितेन्द्रजिदन्वेषणायाङ्गदादिवानरदशकनियोजनम् ॥ १ ॥ इन्द्रजिता वृक्षोत्क्षेपेणान्तरिक्षप्रविष्टानामङ्गदादीनामङ्गेषु शरवर्षणेनतन्निवारणम् ॥ २ ॥ तथा नागास्त्रेण रामलक्ष्मणयोर्बन्धनम् ॥ ३ ॥ अस्त्रबन्धेन भुविशयानौराघवौपरिवार्य हनुमदादिभिः शोकेनावस्थानम् ॥ ४ ॥

स तस्य गतिमन्विच्छन्राजपुत्रः प्रतापवान् ॥ दिदेशातिबलो रामो दश वानरयूथपान् ॥ १ ॥
द्वौ सुषेणस्य दायादौ नीलं च [6]प्लवगर्षभम् ॥ अङ्गदं वालिपुत्रं च शरभं च तरस्विनम् ॥ २ ॥
विनतं [7]जाम्बवन्तं च सानुप्रस्थं महाबलम् ॥ ऋषभं चर्षभस्कन्धमादिदेश परंतपः ॥ ३ ॥
ते संप्रहृष्टा हरयो भीमानुद्यम्य पादपान् ॥ आकाशं विविशुः सर्वे मार्गमाणा दिशो दश ॥ ४ ॥
तेषां वेगवतां वेगमिषुभिर्वेगवत्तरैः ॥ अस्त्रवित्परमास्त्रैस्तु वारयामास रावणिः [8]॥ ५ ॥

अन्तर्धानगतः अन्तर्धानविद्यां प्राप्तः ॥ ३७ ॥ सर्वगात्रेषु सर्वावयवेषु ॥ ३८ ॥ मायया संवृतः मायया युक्तः । अतएव अदृश्यः । कूटयोधी कपटयोधी । राघवौ रघुकुलोद्भवौ रामलक्ष्मणौ । शरबन्धेन शररूपबन्धकेन । बबन्ध । वेष्टनदंशनादिना नागमयत्वं । वेदनादिना शरमयत्वं ॥ ३९—४० ॥ मायाप्रयोगः किमर्थस्तत्राह—प्रकाशेति ॥ समुपाजगाम उपचक्रमे । बबन्ध च । महात्मा महाबुद्धिः ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

अथ नागपाशबन्धः पञ्चचत्वारिंशे—स तस्येत्यादि ॥ गम्यत इति गतिः स्थानं ॥ १ ॥ तानेव दश यूथपान्दर्शयति—द्वावित्यादिना ॥ दायादौ पुत्रौ । "दायादौ सुतबान्धवौ" इत्यमरः ॥ २-३ ॥ मार्गमाणाः मार्गितुमित्यर्थः ॥ ४ ॥ परमास्त्रैरिषुभिः

समागतेन समागमेनसहवर्ततइतिससमागतइतिवाक्यियसतिकाचिन्तास्माकमित्यतआह—अयेति । क्षमितव्यः ब्रह्मवरोमाननीयः । पित्रापुत्रएकदावालालनीयइतिभावः ॥ ३६ ॥ ति० शरबन्धेन शरपरिणतनागपाशबन्धेन । अयंशरबन्धोभाद्रकृष्णान्त्यदिनेष्वित्यग्रेनिरूपयिष्यामः ॥ ३९ ॥ ति० उक्तानुवादःप्रकाशेत्यादि । समुपाजगाम उपचक्रमे । भूभङ्गमात्रेणसर्वजगत्संहर्तुरपिभगवतोनागपाशबन्धनसहनंस्वकृतमर्यादारूपब्रह्मवरदानपालनार्थं । विरोधेनापिनित्यमात्मानंस्मरतोरावणस्यरावणेश्वरमभक्तयाकीर्तेर्लोकेषुवृद्ध्यर्थंचेतितत्वं ॥ ४१ ॥ इतिचतुश्चत्वारिंशःसर्गः ॥ ४४ ॥

[पा०] १ इदमर्धं क. ख. ङ. च. झ. ञ. ट. पाठेषुदृश्यते. २ ञ. ट. चाशनिसंनिभः. ३ ख. ङ. झ. ट. राघवौ. ४ ख. ङ. झ. ञ. ट. सहसाऽभिहतौ. ५ ख. च. झ. ञ. ट. दुरात्मा. ६ ङ.—ट. प्लवगाधिपं. ७ ख.—ङ. झ. ट. द्विविदंचहनूमन्तं. ८ क.—ट. परमास्त्रेण.

तं भीमवेगा हरयो नाराचैः क्षतविग्रहाः ॥ अन्धकारे न ददृशुर्मेघैः सूर्यमिवावृतम् ॥ ६ ॥
रामलक्ष्मणयोरेव सर्वदेहभिदः शरान् ॥ भृशमावेशयामास रावणिः समितिंजयः ॥ ७ ॥
निरन्तरशरीरौ तौ भ्रातरौ रामलक्ष्मणौ ॥ क्रुद्धेनेन्द्रजिता वीरौ पन्नगैः शरतां गतैः ॥ ८ ॥
तयोः क्षतजमार्गेण सुस्राव रुधिरं बहु ॥ तावुभौ च प्रकाशेते पुष्पिताविव किंशुकौ ॥ ९ ॥
ततः पर्यन्तरक्ताक्षो भिन्नाञ्जनचयोपमः ॥ रावणिर्भ्रातरौ वाक्यमन्तर्धानगतोऽब्रवीत् ॥ १० ॥
युध्यमानमनालक्ष्यं शक्रोपि त्रिदशेश्वरः ॥ द्रष्टुमासादितुं वाऽपि न शक्तः किं पुनर्युवाम् ॥११॥
आवृताविषुजालेन राघवौ कङ्कपत्रिणा ॥ एष रोषपरीतात्मा नयामि यमसादनम् ॥ १२ ॥
एवमुक्त्वा तु धर्मज्ञौ भ्रातरौ रामलक्ष्मणौ ॥ निर्बिभेद शितैर्बाणैः प्रजहर्ष ननाद च ॥ १३ ॥
भिन्नाञ्जनचयश्यामो विस्फार्य विपुलं धनुः ॥ भूयो भूयः शरान्घोरान्विससर्ज महामृधे ॥ १४ ॥
ततो मर्मसु मर्मज्ञो मज्जयन्निशिताञ्शरान् ॥ रामलक्ष्मणयोर्वीरो ननाद च मुहुर्मुहुः ॥ १५ ॥
बद्धौ तु शरबन्धेन तावुभौ रणमूर्धनि ॥ निमेषान्तरमात्रेण न शेकतुरुदीक्षितुम् ॥ १६ ॥
ततो विभिन्नसर्वाङ्गौ शरशल्याचितावुभौ ॥ ध्वजाविव महेन्द्रस्य रज्जुमुक्तौ प्रकम्पितौ ॥ १७ ॥
तौ संप्रचलितौ वीरौ मर्मभेदेन कर्शितौ ॥ निपेततुर्महेष्वासौ जगत्यां जगतीपती ॥ १८ ॥

परमास्त्ररूपैरिषुभिः ॥ ५—६ ॥ भृशं सर्वदेहभिदः शरान् रामलक्ष्मणयोरेवाधिकरणयोरावेशयामास ॥ ७ ॥ निरन्तरशरीरौ कृताविति शेषः । शरतां गतैः शरकार्यं भेदनादिकं कुर्वद्भिरित्यर्थः ॥ ८ ॥ क्षतेन जातो मार्गः क्षतजमार्गः । ननु, "न भूतसङ्घसंस्थानो देहोस्य परमात्मनः । न तस्य प्राकृता मूर्तिर्मांसमेदोस्थिसंभवा" इत्यादिभिः रामलक्ष्मणयोर्दिव्यविग्रहस्याप्राकृतत्वस्मरणात्कथं रुधिरोद्गमइति चेदत्राहुः । वस्तुतोऽनयो रुधिराभावेपि मनुष्यभावनानुरोधेन नट इव रुधिराणि दर्शयतः स्म । नन्वेवं निर्बन्धेन मनुष्यभावं भावयतः किं प्रयोजनं । शृणु । सर्वात्मना मनुष्यभावनाननुरोधे जन एवं मन्येत । नायं मर्त्यः किं तु देवः तेन तद्वदस्माकं न शक्यमनुष्ठातुं धर्मानिति । सर्वथामनुष्यभावनायांतुमहाजनानुष्ठानदर्शनेन स्वयमनुष्ठास्यतिलोक इतिरहस्यं । रावणस्य मनुष्यैकवध्यत्वेन तद्भावनेत्यप्याहुः । नागपाशबद्धतयावस्थानंतु धर्मनिरतानामपिकदाचिदापदुपतिष्ठति निवर्ततेचझटितीति लोकानां प्रदर्शनायेति । एवं मोहादिष्वपिद्रष्टव्यं ॥ ९ ॥ पर्यन्तरक्ताक्ष इत्यनेन ईषत्कोपवत्त्वं लक्ष्यते ॥ १० ॥ अनालक्ष्यं यथा भवति तथा युध्यमानं मां शक्रस्त्रिदशेश्वरोपि द्रष्टुं मायया बलान्तरेण आसादितुंवापि नशक्तः । किं पुनर्युवां मानुषावित्यर्थः ॥ ११ ॥ राघवाविति संबोधनं । अत्रापि युवामिति द्वितीयान्ततया विपरिणम्यानुषञ्जनीयम् । कङ्कपत्रिणा कङ्कपत्रवता । एष इत्यव्यवधानद्योतनाय ॥१२॥ धर्मज्ञाविति । शब्दवेधप्रयोगासहिष्णू इत्यर्थः ॥ १३ ॥ अञ्जनोपरिप्रदेशस्य धूसरत्वसंभवात् भिन्नेत्युक्तं ॥१४—१५॥ निमेषान्तरमात्रेण निमेषावकाशमात्रेण क्षणमात्रेणेत्यर्थः ॥ १६ ॥ शरशल्याचितौ शराग्रप्रोतौ कृतौ । रज्जुमुक्तौ मुक्तरज्जू । अतएव प्रकम्पितौ महेन्द्रस्य ध्वजाविव कृतौ । जगत्यां भूमौ । जगतीपती भूपती ॥ १७—१८ ॥

रामानु० पन्नगैःशरतांगतैः । शरकार्यभेदनं । पन्नगकायसंवेष्टनंचकुर्वद्भिरित्यर्थः ॥ ८ ॥ **शि०** क्षतजमार्गेण रुधिरविषयकविचारेण । रामलक्ष्मणशरीरेभीतिजनकरुधिरप्रदर्शनायेत्यर्थः । तयोः रामलक्ष्मणयोरुपरिबहुरुधिरंसुस्राव माययास्रावयामास । अन्तर्भावितण्यिजर्थःस्रवतिः ॥ ९ ॥ **ति०** प्रापितौ बन्धनमितिशेषः ॥ १२ ॥

[**पा०**] १ ख. च. ञ. वारितास्तु. २ ग. ङ—ट. तक्षविक्षताः. ३ क. ख. घं.—ट. तावुभौराम. ४ च. छ. ञ. अथराक्षसवीरोसौ. ख. अथराक्षसवर्योसौ. ५ झ. प्रापितविषु. घ. प्रावृताविषु. ख. आविद्धाविषु. ६ घ. ङ. शरैस्तीक्ष्णैः. ख. च. छ. ञ. शितैर्बाणैःप्रतोत्रैरिवकुञ्जरौ. ७ घ. विजयंधनुः. ८ घ. झ. ट. भूयएवशरान्. ९ घ. चमूमुखे. १० च. घोरं. ११ घ. शरजालाचितावुभौ. छ. शरशल्यान्वितौकृतौ. ग. ङ. च. झ. ञ. ट. शरशल्याचितौकृतौ.

तौ वीरशयने वीरौ शयानौ रुधिरोक्षितौ ॥ शरवेष्टितसर्वाङ्गावार्तौ परमपीडितौ ॥ १९ ॥
न ह्यविद्धं तयोर्गात्रे बभूवाङ्गुलमन्तरम् ॥ नानिर्भिन्नं न चास्तब्धमाकराग्रादजिह्मगैः ॥ २० ॥
तौ तु क्रूरेण निहतौ रक्षसा कामरूपिणा ॥ असृक्सुस्रुवतुस्तीव्रं जलं प्रस्रवणाविव ॥ २१ ॥
पपात प्रथमं रामो विद्धो मर्मसु मार्गणैः ॥ क्रोधादिन्द्रजिता येन पुरा शक्रो विनिर्जितः ॥ २२ ॥
रुक्मपुङ्खैः प्रसन्नाग्रैरधोगतिभिराशुगैः ॥ नाराचैरर्धनाराचैर्भल्लैरञ्जलिकैरपि ॥
विव्याध वत्सदन्तैश्च सिंहदंष्ट्रैः क्षुरैस्तथा ॥ २३ ॥
स वीरशयने शिश्ये विज्यमादाय कार्मुकम् ॥ भिन्नमुष्टिपरीणाहं त्रिणतं रत्नभूषितम् ॥ २४ ॥
बाणपातान्तरे रामं पतितं पुरुषर्षभम् ॥ स तत्र लक्ष्मणो दृष्ट्वा निराशो जीवितेऽभवत् ॥ २५ ॥
रामं कमलपत्राक्षं शरबन्धपरिक्षतम् ॥ शुशोच भ्रातरं दृष्ट्वा पतितं धरणीतले ॥ २६ ॥
हरयश्चापि तं दृष्ट्वा सन्तापं परमं गताः ॥ [शोकार्ताश्चुक्रुशुर्घोरमश्रुपूरितलोचनाः] ॥ २७ ॥

बद्धौ तु वीरौ पतितौ शयानौ तौ वानराः संपरिवार्य तस्थुः ॥
समागता वायुसुतप्रमुख्या विषादमार्ताः परमं च जग्मुः ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

वीराः शेरतेऽस्मिन्निति वीरशयनं रणभूमिः । शरतल्पं वा । शरवेष्टितसर्वाङ्गौ शरभूतसर्पवेष्टितसर्वाङ्गौ । आर्तौ मनःपीडावन्तौ । परमपीडितौ शारीरकपीडावन्तौ । अभूतामिति शेषः ॥१९॥ अङ्गुलं अङ्गुलिप्रमाणं । अथवा "अङ्गुलिरङ्गुलं" इति त्रिकाण्डीस्मरणात् । अङ्गुलिप्रमाणवाच्यङ्गुलशब्दोकारान्तोप्यस्ति । तयोर्गात्रमङ्गुलमात्रेप्यवकाशे अविद्धं नाभूदिति भावः । यद्वा तयोर्गात्रं आङ्गुलं अङ्गुलसंबन्ध्यप्यन्तरमवकाशः । आकराग्रात्कराग्रपर्यन्तं । अजिह्मगैः सर्परूपशरैः । अविद्धं न बभूव । अस्तब्धं अनिश्चलं च न बभूव । अनिर्भिन्नं च न बभूव ॥ २० ॥ तीव्रं अत्यन्तं । प्रस्रवणौ गिरिविशेषौ ॥ २१ ॥ इन्द्रजित्त्वं निर्वक्ति—येनेति ॥ २२ ॥ नागास्त्रप्रयोगानन्तरं केवलशरैरपि विव्याधेत्याह—रुक्मपुङ्खैरित्यादिना ॥ प्रसन्नाग्रैः उन्मृष्टाग्रैरित्यर्थः । प्रहर्तुराकाशस्थत्वेनाधोगतिभिः । आशुगैः वक्ष्यमाणविशेषभिन्नैः । नाराचैः ऋजुवृत्ताग्रैः । अर्धनाराचैः मध्ये भिन्ननाराचतुल्यैः । भल्लैः परश्वधाग्रैः । अञ्जलिकैः अञ्जलिसदृशाग्रैः । वत्सदन्तैः वत्सदन्तसदृशाग्रैः । सिंहदंष्ट्रैः सिंहदंष्ट्रासदृशाग्रैः । क्षुरैः क्षुरागैः । अत्रेन्द्रजिदित्यध्याहार्यं ॥ २३ ॥ भिन्नमुष्टिपरीणाहं शिथिलमुष्टिबन्धं । तृणतन्त्रिषु स्थानेषु पार्श्वयोर्मध्ये च नतं । रुक्मभूषितं रुक्मपट्टबन्धं । विज्यं शरसंधानप्रसङ्गाभावाद्विगतज्यं । कार्मुकं धनुः । आदाय अवलम्ब्य । वीरशयने रणभूमौ । शिश्ये ॥ २४ ॥ बाणपातान्तरे शरतल्पे ॥ २५ ॥ शरबन्धपरिक्षतं । बन्धः क्षतश्चेति द्वयमत्र शरकार्यमुच्यते ॥ २६—२७ ॥ बद्धाविति । आदौ नागपाशबद्धौ । अथ शयानौ तु तौ वीरौ संपरिवार्य वायुसुतादयो वानरास्तस्थुः । विषादं दुःखं । जग्मुश्चेत्यन्वयः ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे युद्धकाण्डव्याख्याने रत्नकिरीटाख्याने पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

ति० आकराग्रात् कराग्रमभिव्याप्य । अध्वस्तं अक्षोभितं । स० आङ्गुलं अङ्गुलिप्रमाणं ॥ २० ॥ ति० रजोगतिभिः वायुनाविस्तीर्यमाणरजोवन्तीरन्ध्रसंपतद्भिः ॥ २३ ॥ शि० जीविते लोकपालनेनिराशोऽभवत् ॥ २५ ॥ इतिपञ्चचत्वारिंशःसर्गः ॥ ४५ ॥

[पा०] १ क. ख. ग. च. छ. ज. ट. गात्रंबभूवाङ्गुलमात्रकं. घ. गात्रेबभूवान्तरमण्वपि. २ घ. क्रूरकर्मणा. ३ झ. रजोगतिभिः. ४ ङ. छ. झ. ट. माविध्य. ५ क. ख. घ.—ट. रुक्मभूषितं. ६ ख. ग. च. ज. शरण्यंरणतोषितं. ङ. झ. ट. शरण्यंरणतोषिणं. ७ इदमर्धं क. ङ.—ट. पाठेषुदृश्यते.

षट्चत्वारिंशः सर्गः ॥ ४६ ॥

ससुग्रीवेणविभीषणेन इन्द्रजिन्नागपाशनिबद्धमुग्धरामलक्ष्मणसमीपंप्रत्यागमनम् ॥ १ ॥ विभीषणेन राघवावस्थानावलोकनेनशोचतस्सुग्रीवस्य समाश्वासनपूर्वकं कार्यान्तराय गमनम् ॥ २ ॥ राक्षसप्रहर्षणपूर्वकं लङ्कांप्रविष्टेनेन्द्रजिता रावणंप्रतिसप्रणामं स्वेनरामलक्ष्मणमारणकथनम् ॥ ३ ॥

ततो द्यां पृथिवीं चैव वीक्षमाणा वनौकसः ॥ ददृशुः संततौ बाणैर्भ्रातरौ रामलक्ष्मणौ ॥ १ ॥
वृष्ट्वेवोपरते देवे कृतकर्मणि राक्षसे ॥ आजगामाथ तं देशं ससुग्रीवो विभीषणः ॥ २ ॥
नीलद्विविदमैन्दाश्च सुषेणकुमुदाङ्गदाः ॥ तूर्णं हनुमता सार्धमन्वशोचन्त राघवौ ॥ ३ ॥
अचेष्टौ मन्दनिश्वासौ शोणितौघपरिप्लुतौ ॥ शरजालाचितौ स्तब्धौ शयानौ शरतल्पयोः ॥ ४ ॥
निश्वसन्तौ यथा सर्पौ निश्चेष्टौ मन्दविक्रमौ ॥ रुधिरस्रावदिग्धाङ्गौ तापनीयाविव ध्वजौ ॥ ५ ॥
तौ वीरशयने वीरौ शयानौ मन्दचेष्टितौ ॥ यूथपैस्तैः परिवृतौ बाष्पव्याकुललोचनैः ॥ ६ ॥
राघवौ पतितौ दृष्ट्वा शरजालसमावृतौ ॥ बभूवुर्व्यथिताः सर्वे वानराः सविभीषणाः ॥ ७ ॥
अन्तरिक्षं निरीक्षन्तो दिशः सर्वाश्च वानराः ॥ न चैनं मायया च्छन्नं ददृशू रावणिं रणे ॥ ८ ॥
तं तु मायाप्रतिच्छन्नं माययैव विभीषणः ॥ वीक्षमाणो ददर्शाथ भ्रातुः पुत्रमवस्थितम् ॥ ९ ॥
तमप्रतिमकर्माणमप्रतिद्वन्द्वमाहवे ॥ ददर्शान्तर्हितं वीरं वरदानाद्विभीषणः ॥ १० ॥
तेजसा यशसा चैव विक्रमेण च संयुतम् ॥ ११ ॥
इन्द्रजित्त्वात्मनः कर्म तौ शयानौ समीक्ष्य च ॥ उवाच परमप्रीतो हर्षयन्सर्वनैर्ऋतान् ॥ १२ ॥
दूषणस्य च हन्तारौ खरस्य च महाबलौ ॥ सादितौ मामकैर्बाणैर्भ्रातरौ रामलक्ष्मणौ ॥ १३ ॥
नेमौ मोक्षयितुं शक्यावेतस्मादिषुबन्धनात् ॥ सर्वैरपि समागम्य सर्षिसङ्घैः सुरासुरैः ॥ १४ ॥
यत्कृते चिन्तयानस्य शोकार्तस्य पितुर्मम ॥ अस्पृष्ट्वा शयनं गात्रैस्त्रियामा याति शर्वरी ॥ १५ ॥
कृत्स्नेयं यत्कृते लङ्का नदी वर्षास्विवाकुला ॥ सोयं मूलहरोऽनर्थः सर्वेषां निर्हतो मया ॥ १६ ॥

अथ पूर्वसर्गोक्तमनुवदति—तत इत्यादि ॥ द्यां आकाशं । सन्ततौ व्याप्तौ ॥ १ ॥ वृष्ट्वा उपरते देव इव स्थिते राक्षसे । कृतकर्मणि कृतशरवर्षरूपकर्मणि सति । तं देशं रामस्थानं ॥ २ ॥ नीलेति नीलादयः सुग्रीवात्पूर्वमेवागताः ॥ ३ ॥ अचेष्टाविति आदिचतुःश्लोक्येकान्वयाः ॥ अचेष्टौ अतएव स्तब्धौ निश्चलौ । मध्ये मध्ये मन्दनिश्वासौ मध्ये मध्ये निश्चेष्टौ । कदाचित्सर्पाविव निश्वसन्तौ कदाचिन्मन्दचेष्टितौ च । अत्र पुनरुक्तयो दुःखातिरेकात् । यद्वा अचेष्टाविति श्लोकः पूर्वश्लोकेनान्वितः ॥ ४—८ ॥ मायायैवेति । अन्तर्हितस्तुदर्शनहेतुभूतया विद्ययेत्यर्थः ॥ ९ ॥ अप्रतिद्वन्द्वं निःसमं । वरदानादन्तर्हितमित्यन्वयः । तेजसेत्यर्धं पूर्वेणान्वेति ॥ १०—११ ॥ आत्मनः कर्म नागास्त्रबन्धरूपं । शयानौ तौ च वीक्ष्येत्यन्वयः ॥ १२ ॥ सादितौ पश्यतेति शेषः ॥ १३ ॥ समागम्य सङ्घीभूय ॥ १४ ॥ यत्कृते यन्निमित्तं गात्रैः शयनमस्पृष्ट्वा चिन्तयानस्यैव मम पितुः त्रियामा याति । यत्पौरुषभयान्मम पिता शर्वर्यामेकस्मिन्नपि यामे न निद्रातीत्यर्थः ॥ १५ ॥ लङ्का लङ्कास्थजनः । आकुला नदीपक्षे आविलेत्यर्थः । लङ्कापक्षे व्यग्रे-

स० दूषणस्यचहन्तारावित्याद्युक्तिश्छत्रिन्यायेन । रामस्यैवतद्धन्तृत्वात् ॥ १३ ॥ स० यत्कृते यस्यरामस्यनिमित्तं शोकार्तस्य । स्त्रिया मन्दोदर्या अमा सह शयनंशय्यां गात्रैरस्पृष्ट्वैवचिन्तयानस्यममपितुः शर्वरीयाति । शार्वरीत्यपिक्वचित्पाठः । 'प्रज्ञाद्यणिशार्वर्यपि "शार्वरीशर्वरीशर्या" इतिशब्दार्णवः' इत्यमरव्याख्यायांभानुदीक्षितः । 'अमासहार्थान्तिकयोः' इतिविश्वः

[पा०] १ च. ञ. झ. ट. नीलश्चद्विविदोमैन्दः. २ क. ग. ज. सुमुखाङ्गदाः. ३ ग. च.—ट. शोणितेनपरिप्लुतौ. ४ ङ. छ. झ. ञ. ट. शरतल्पगौ. ५ क. ग. च.—ट. दीनविक्रमौ. ६ ङ. छ. झ. ञ. ट. यूथपैस्त्वैः. ७ ङ. छ. झ. ञ. ट. समन्वितौ. च. समाचितौ. ८ ङ.—ट. ददर्शाग्रे. ९ क. ख. घ. छ. झ. ञ. ट. न्सर्वराक्षसान्. १० ख. ङ.—ट. शमितो.

रामस्य लक्ष्मणस्यापि सर्वेषां च वनौकसाम् ॥ विक्रमा निष्फलाः सर्वे यथा शरदि तोयदाः ॥१७॥
एवमुक्त्वा तु तान्सर्वान्राक्षसान्परिपार्श्वतः ॥ यूथपानपि तान्सर्वांस्ताडयामास रावणिः ॥ १८ ॥
नीलं नवभिराहत्य मैन्दं च द्विविदं तथा ॥ त्रिभिस्त्रिभिरमित्रघ्नस्ताप प्रवरेषुभिः ॥ १९ ॥
जाम्बवन्तं महेष्वासो विद्ध्वा बाणेन वक्षसि ॥ हनूमतो वेगवतो विससर्ज शरान्दश ॥ २० ॥
गवाक्षं शरभं चैव द्वौवप्यमिततेजसौ ॥ द्वाभ्यां द्वाभ्यां महावेगो विव्याध युधि रावणिः ॥ २१ ॥
गोलाङ्गूलेश्वरं चैव वालिपुत्रमथाङ्गदम् ॥ विव्याध बहुभिर्बाणैस्त्वरमाणोथ रावणिः ॥ २२ ॥
तान्वानरवरान्भित्त्वा शरैरग्निशिखोपमैः ॥ ननाद बलवांस्तत्र महासत्त्वः स रावणिः ॥ २३ ॥
तानर्दयित्वा बाणौघैस्त्रासयित्वा च वानरान् ॥ प्रजहास महाबाहुर्वचनं चेदमब्रवीत् ॥ २४ ॥
शरबन्धेन घोरेण मया बद्धौ चमूमुखे ॥ सहितौ भ्रातरावेतौ निशामयत राक्षसाः ॥ २५ ॥
एवमुक्तास्तु ते सर्वे राक्षसाः कूटयोधिनः ॥ परं विस्मयमाजग्मुः कर्मणा तेन हर्षिताः ॥ २६ ॥
विनेदुश्च महानादान्सर्वतो जलदोपमाः ॥ हतौ राम इति ज्ञात्वा रावणिं समपूजयन् ॥ २७ ॥
निष्पन्दौ तु तदा दृष्ट्वा तावुभौ रामलक्ष्मणौ ॥ वसुधायां निरुच्छ्वासौ हतावित्यन्वमन्यत ॥२८॥
हर्षेण तु समाविष्ट इन्द्रजित्समितिंजयः ॥ प्रविवेश पुरीं लङ्कां हर्षयन्सर्वराक्षसान् ॥ २९ ॥
रामलक्ष्मणयोर्दृष्ट्वा शरीरे सायकैश्चिते ॥ सर्वाणि चाङ्गोपाङ्गानि सुग्रीवं भयमाविशत् ॥ ३० ॥
तमुवाच परित्रस्तं वानरेन्द्रं विभीषणः ॥ सबाष्पवदनं दीनं शोकैर्व्याकुललोचनम् ॥ ३१ ॥
अलं त्रासेन सुग्रीव बाष्पवेगो निगृह्यताम् ॥ एवंप्रायाणि युद्धानि विजयो नास्ति नैष्ठिकः ॥३२॥
सशेषभाग्यताऽस्माकं यदि वीर भविष्यति ॥ मोहमेतौ प्रहास्येते महात्मानौ महाबलौ ॥ ३३ ॥
पर्यवस्थापयात्मानमनाथं मां च वानर ॥ सत्यधर्माभिरक्तानां नास्ति मृत्युकृतं भयम् ॥ ३४ ॥
एवमुक्त्वा ततस्तस्य जलक्लिन्नेन पाणिना ॥ सुग्रीवस्य शुभे नेत्रे प्रममार्ज विभीषणः ॥ ३५ ॥
ततः सलिलमादाय विद्यया परिजप्य च ॥ सुग्रीवनेत्रे धर्मात्मा स ममार्ज विभीषणः ॥ ३६ ॥

त्यर्थः । सर्वेषामस्माकं मूलहरः अनर्थः अनर्थकरो रामः ॥ १६ ॥ विक्रमाः सेतुबन्धनादयः ॥ १७ ॥ परिपार्श्वतः समीपतः ॥ १८—१९ ॥ हनूमतः हनूमदर्थमित्यर्थः । संबन्धसामान्ये षष्ठी ॥ २०–२१ ॥ गोलाङ्गूलेश्वरं गवाक्षं ॥ २२—२४ ॥ निशामयत पश्यत ॥ २५ ॥ कूटयोधिनः कपटयोधिनः ॥ २६–२९ ॥ शरीरे इति प्रत्येकापेक्षया द्विवचनं । अङ्गानि करादीनि । उपाङ्गानि अङ्गुल्यादीनि । अत्रापि शरैश्चितानीति योज्यं । दृष्ट्वा स्थित इति सुग्रीवो विशेषणीयः ॥३०—३१॥ एवंप्रायाणि एवंविधानि । " प्रायश्चानशने मृत्यौ तुल्यबाहुल्ययोरपि " इति विश्वः । नैष्ठिकः नियतः ॥ ३२ ॥ सशेषभाग्यतेति । अस्माकं भाग्यशेषं यद्यस्तीत्यर्थः ॥ ३३ ॥ पर्यवस्थापयात्मानं मनो निश्चलं कुरु । स्वात्मपर्यवस्थापनेन मां च पर्यवस्थापय । धैर्यं कारयेत्यर्थः । पर्यवस्थापने हेतुमाह—सत्येति । मृत्युकृतं अपमृत्युकृतं॥३४॥ जलक्लिन्नेन जलसिक्तेन ॥ ३५ ॥ एवममाङ्गल्यनिवृत्त्यर्थं श्रान्तिनिवृत्त्यर्थं वा नेत्रे प्रमृज्य राक्षसमाया-

॥ १५ ॥ स० अनाथमित्यनेन पलायितस्यतवराज्यमस्तिनतथाममेतिसूचयति ॥ २४ ॥ ति० ततः सामान्यतःप्रमार्जनानन्तरं विद्यया तिरस्करणीविद्यातिरस्कारकविद्यया परिजप्य । परिवीक्ष्येतिपाठेप्ययमेवार्थः । राक्षसमायापरिज्ञानेनधैर्यसंपादनंचैतत्प्रमार्जनस्यफलं । वस्तुतः ततस्सलिलमितिश्लोकोबहुपुस्तकेषुनास्तीतिप्रायेणप्रक्षिप्तोयं । तेनेन्द्रजितंददर्शेतितत्कार्यप्रकाशकोत्तरवाक्याभावात् ॥ ३६ ॥

[पा०] १ क. ग. झ. ञ. ट. लक्ष्मणस्यैव. २ ग.—च. झ. ञ. ट. तावप्यमितविक्रमौ. ३ ग. घ. च. ञ. भ्रातरौराम. ४ क. ख. घ. च. ट. न्सर्वनैर्कृतान्. ५ क.—ट. क्रोधव्याकुल. ६ च. छ. सशेषभाग्यमस्माकं. क. ङ. झ. ञ. ट. सभाग्यशेषतास्माकं. ७ घ. प्रहास्येतेभ्रातरौरामलक्ष्मणौ.

प्रमृज्य[1] वदनं तस्य कपिराजस्य धीमतः ॥ अब्रवीत्कालसंप्राप्तं[2] समसंभ्रममिदं वचः ॥ ३७ ॥
न कालः कपिराजेन्द्र वैक्लव्यमनुवर्तितुम्[3] ॥ अतिस्नेहोप्यकालेऽस्मिन्मरणायोपकल्पते[4] ॥ ३८ ॥
तस्मादुत्सृज्य वैक्लव्यं सर्वकार्यविनाशनम् ॥ हितं रामपुरोगाणां[5] सैन्यानामनुचिन्त्यताम्[6] ॥ ३९ ॥
अथवा रक्ष्यतां रामो यावत्संज्ञाविपर्ययः[7] ॥ लब्धसंज्ञौ हि काकुत्स्थौ भयं नो व्यपनेष्यतः ॥४०॥
नैतत्किंचन रामस्य न च रामो मुमूर्षति ॥ न ह्येनं हास्यते लक्ष्मीर्दुर्लभा या गतायुषाम्[8] ॥ ४१ ॥
तस्मादाश्वासयात्मानं बलं चाश्वासय स्वकम् ॥ यावत्कार्याणि सर्वाणि पुनः संस्थापयाम्यहम्[9] ॥४२॥
एते हि फुल्लनयनास्त्रासादागतसाध्वसाः ॥ कर्णे कर्णे प्रकथिता हरयो हरिसत्तम ॥ ४३ ॥
मां तु दृष्ट्वा प्रधावन्तमनीकं संप्रहर्षितुम्[10] ॥ त्यजन्तु हरयस्त्रासं भुक्तपूर्वामिव स्रजम् ॥ ४४ ॥
समाश्वास्य तु सुग्रीवं राक्षसेन्द्रो विभीषणः ॥ विद्रुतं वानरानीकं तत्समाश्वासयत्पुनः ॥ ४५ ॥
इन्द्रजित्तु महामायः सर्वसैन्यसमावृतः ॥ विवेश नगरीं लङ्कां पितरं चाभ्युपागमत् ॥ ४६ ॥
तत्र रावणमासीनमभिवाद्य[11] कृताञ्जलिः ॥ आचचक्षे प्रियं पित्रे निहतौ रामलक्ष्मणौ ॥ ४७ ॥
उत्पपात ततो हृष्टः पुत्रं च परिषस्वजे ॥ रावणो रक्षसां मध्ये श्रुत्वा शत्रू निपातितौ ॥
उपाघ्राय[12] स मूर्ध्नेनं पप्रच्छ प्रीतमानसः ॥ ४८ ॥

परिज्ञानेनाप्यस्य धैर्यसंपादनाभिप्रायेण विद्याभिमन्त्रितजलेनापि ममार्जेत्याह—तत इति ॥ विद्यया राक्षसमायादर्शनहेतुमन्त्रेण । परिजप्य अभिमन्त्र्य ॥ ३६ ॥ कालसंप्राप्तं तत्कालोचितं । असंभ्रमं अव्याकुलमिति क्रियाविशेषणं ॥ ३७ ॥ वैक्लव्यं अधैर्यं । किं करोमि अतिस्नेह एवं बाधत इत्यत्राह—अतिस्नेहोपीति ॥ ३८ ॥ एवं त्यक्तव्यमुक्त्वा कर्तव्यमुपदिशति—तस्मादिति ॥ वैक्लव्यमिति स्नेहस्याप्युपलक्षणं । रामपुरोगाणां रामप्रभृतीनां । रामशरण्यानामित्यर्थः ॥ ३९ ॥ संज्ञाविपर्ययः मूर्च्छा । यावदनुवर्तते तावद्रक्ष्यतामित्यर्थः ॥ ४० ॥ एवंभूतयोः कथं संज्ञाप्राप्तिस्तत्राह—नैतदिति ॥ एतत् शस्त्रबन्धनं । रामस्य न किंचन । इदमसत्प्रायं बाधकं न भवतीत्यर्थः । अतो न मुमूर्षति । मरिष्यतीति शङ्का न कर्तव्येत्यर्थः । " आशङ्कायामुपसंख्यानं " इति म्रियतेः सन् । एतच्च जीवनलिङ्गशरीरसौभाग्येन निश्चीयत इत्याह—नहीति । गतायुषां मृतानां । या लक्ष्मीः मुखकान्तिः । दुर्लभा । सा च एनं न हास्यते । न जहातीत्यर्थः । जीवनानुकूला लक्ष्मीर्दृश्यत इत्यर्थः ॥ ४१ ॥ यावत् यावत्पर्यन्तं । सर्वाणि कार्याणि कर्तव्यानि पुनः संस्थापयामि । तावत्पर्यन्तमाश्वासयेत्यन्वयः । केचित्तु यावत्कार्याणि यावन्ति कर्तव्यानि । तानि सर्वाणीत्याहुः ॥ ४२ ॥ पर्यवस्थापनं किमर्थमित्यत्राह—एते हीति ॥ आगतसाध्वसाः प्राप्तभयविकाराः । ते च विकाराः पुलकादयः । प्रकथिताः पलायनार्थं प्रवृत्तकथा इत्यर्थः । संप्रहर्षितुमित्यनन्तरं अर्हसीत्यध्याहार्यं । प्रधावन्तं इन्द्रजिद्भयेनेति भावः । इदमनीकविशेषणं । गच्छामीति वाध्याहार्यं । संप्रहर्षितुं भयान्निवर्तयितुमिति यावत् । तदेवाह—त्यजन्त्विति ॥ ४३—४४ ॥ समाश्वासयत् नाहमिन्द्रजित्किंतु विभीषण इति समाश्वासयदित्यर्थः ॥ ४५ ॥ कथासंघट्टनाय पूर्वोक्तमनुवदति—इन्द्रजित्त्विति ॥ ४६ ॥ रामलक्ष्मणावित्यनन्तरमितिकरणं ज्ञेयं ॥ ४७ ॥ उत्पपात आसनादिति शेषः ॥ ४८ ॥

स० बलं प्राणं । सर्वाणिसैन्यानीत्युत्तरत्रोक्तेः ॥ ४२ ॥ स० त्रासात् तवोत्पन्नाद्भयात् आगतसाध्वसाःसन्तः कर्णेकर्णे प्रकथिताः भवन्ति ॥ ४३ ॥ ति० अनीकप्रत्याश्वासनार्थमांधावन्तंदृष्ट्वातुसंप्रहर्षितंप्राप्तहर्षमनीकं तद्रूपाहरयोभुक्तपूर्वांस्रजमिवत्रासंत्यजन्तु ॥ ४४ ॥

[पा०] १ क. च. ज. ट. विमृज्य. २ क. ख. ग. ङ. झ. ञ. ट. संप्राप्तसमसंभ्रान्तं. घ. संप्राप्तंसमभ्यर्थं. ३ घ.—छ. झ. ञ. ट. मवलंबितुं. ४ च. छ. ज. स्नेहस्यकाले. ५ क.—घ. प्रपद्यते. ६ ङ.—ट. मनुचिन्तय. ७ ख. ङ. झ. ञ. ट. यावत्सैन्यानि. ८ घ. दृष्ट्वानुधावन्तं. ९ क. ख. संप्रधर्षितं. ङ. छ.—ट. संप्रहर्षितं. १० क.—ट. मासाद्यअभिवाद्य. ११ क. घ.—ट. उपाघ्रायचतंमूर्ध्नि.

पृच्छते च यथावृत्तं [1]पित्रे सर्वं न्यवेदयत् ॥ यथा तौ शरबन्धेन निश्चेष्टौ निष्प्रभौ कृतौ ॥ ४९ ॥
स हर्षवेगानुगतान्तरात्मा श्रुत्वा वचस्तस्य महारथस्य ॥
जहौ ज्वरं दाशरथेः [2]समुत्थितं प्रहृष्य वाचाऽभिननन्द पुत्रम् ॥ ५० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

रावणाज्ञया राक्षसीभिस्त्रिजटया सहसीतायाः पुष्पकारोपणपूर्वकं रणाङ्गणप्रापणेनरामलक्ष्मणदुरवस्थाप्रदर्शनम् ॥ १ ॥ राक्षसभटैरावणनियोगेन लङ्कायांरामलक्ष्मणनियोगोद्घोषणम् ॥ २ ॥

[3]प्रतिप्रविष्टे लङ्कां तु कृतार्थे रावणात्मजे ॥ राघवं [4]परिवार्यार्ता ररक्षुर्वानरर्षभाः ॥ १ ॥
हनुमानङ्गदो नीलः सुषेणः कुमुदो नलः ॥ गजो गवा[5]क्षो गवयः शरभो गन्धमादनः ॥
[6]जाम्बवानृषभः स्कन्धो [7]रम्भः शतबलिः पृथुः ॥ २ ॥
व्यूढानीकाश्च यत्ताश्च द्रुमानादाय सर्वतः ॥ वीक्षमाणा दिशः सर्वास्तिर्यगूर्ध्वं च वानराः ॥
तृणेष्वपि च चेष्टत्सु राक्षसा इति मेनिरे ॥ ३ ॥
रावणश्चापि संहृष्टो विसृज्येन्द्रजितं सुतम् ॥ आजुहाव ततः सीतारक्षिणी राक्षसीस्तदा ॥ ४ ॥
राक्षस्स्त्रिजटा चैव [8]शासनात्समुपस्थिताः ॥ ता उवाच ततो हृष्टो राक्षसी राक्षसाधिपः ॥ ५ ॥
हताविन्द्रजिताऽऽख्यात वैदेह्या रामलक्ष्मणौ ॥ [9]पुष्पकं च समारोप्य दर्शयध्वं [10]हतौ रणे ॥ ६ ॥
यदाश्रयादवष्टब्धा नेयं मामुपतिष्ठति ॥ सोस्या भर्ता सह भ्रात्रा [11]निरस्तो रणमूर्धनि ॥ ७ ॥
निर्विशङ्का निरुद्विग्ना निरपेक्षा च मैथिली ॥ मामुपस्थास्यते सीता सर्वाभरणभूषिता ॥ ८ ॥

यथावृत्तं वृत्तमनतिक्रम्य । इदमेव विवृणोति—यथा ताविति ॥ ४९ ॥ हर्षवेगः हर्षातिशयः तेनानुगतो व्याप्तः अन्तरात्मा मनो यस्य स तथोक्तः । दाशरथेः निमित्तात् । ज्वरं चिन्तासंतापं । अनया राज्ञ्या प्रतिपद्यतेत्यूचुः ॥ ५० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षट्चत्वारिंशःसर्गः ॥ ४६ ॥

अथ सीतायै वीरशयनस्थरामलक्ष्मणप्रदर्शनं सप्तचत्वारिंशे—प्रतिप्रविष्ट इत्यादि ॥ १ ॥ ये ररक्षुस्तानाह—हनुमानित्यादिना ॥ २ ॥ अन्यान्वानरानाह—व्यूढानीकाश्चेति ॥ व्यूढानीकाः कृतव्यूहसेनावन्तः । चेष्टत्सु चेष्टमानेषु ॥ ३—५ ॥ आख्यात कथयत ॥ ६ ॥ अवष्टब्धा गर्विता । निर्विशङ्का निर्विचारा । निरुद्विग्ना निःशोका । भावे निष्ठा । निरपेक्षा रामः

ती० वस्तुतस्तुसरावणः हर्षवेगानुगतान्तरात्मायः दाशरथेःसमुत्थितंज्वरंजहौ तस्यवचःश्रुत्वा तंपुत्रं इन्द्रजितं । प्रहृष्य वाचाभिनन्द्य पुत्रप्रीत्यैकेवलंतंवाङ्मात्रेणननन्द नतुपरमार्थतः । "कालज्ञोराघवःकालेसंयुगायाभ्यचोदयत्" इत्यारभ्य "इन्द्रजित्तुमहामायःसर्वसैन्यसमावृतः । विवेशनगरींलङ्कां" इत्यन्तेनवानररक्षसांप्रतिपत्प्रवृत्तंयुद्धमुक्तं ॥५०॥ इतिषट्चत्वारिंशःसर्गः ॥४६॥

ती० व्यूढानीकाः व्यूढानि गरुडादिव्यूहाकाराणि अनीकानियेषांते ॥ ३ ॥ **स०** राक्षस्यः इतराः । त्रिजटेति ताभ्यःपृथक्त्योक्तिः उत्तरत्रसामान्यतोराक्षसीरित्युक्तिश्च त्रिजटा सीतापक्षेवर्ततइतिरावणमनसिसंदेहंसूचयतः ॥ ५ ॥ **शि०** मैथिली सर्वाभरणभूषितासती मां लङ्कासंपत्तिं । उपस्थास्यते अत्रैवनिवत्स्यतीत्यर्थः ॥ ८ ॥

[**पा०**] १ घ. पुत्रस्तस्मै. २ ग. ङ.—ट. समुत्थंप्रहृष्टवाचा. ३ ङ.—ट. तस्मिन्प्रविष्टेलङ्कायां. घ. प्रतिप्रविष्टेलङ्कायां. ४ ङ.—ट. परिवार्याथ. ५ छ. झ. ञ. ट. गवाक्षःपनसःसानुप्रस्थोमहाहरिः. ६ घ. जांबवानृक्षराजश्चरंभः. ७ क. ख. ङ. च. झ. ञ. ट. सुन्दोरंभः. ८ क. घ.—ट. शासनात्तमुपस्थिताः. ९ ग. ङ. च. झ. ञ. ट. पुष्पकंतत्समारोप्य. १० घ. गतायुधि. ११ ङ. —ट. निहतो.

अद्य कालवशं प्राप्तं रणे रामं सलक्ष्मणम् ॥ अवेक्ष्य विनिवृत्ताशा चान्यां गतिमपश्यती ॥
निरपेक्षा विशालाक्षी मामुपस्थास्यते स्वयम् ॥ ९ ॥
तस्य तद्वचनं श्रुत्वा रावणस्य दुरात्मनः ॥ राक्षस्यस्तास्तथेत्युक्त्वा जग्मुर्वै यत्र पुष्पकम् ॥ १० ॥
ततः पुष्पकमादाय राक्षस्यो रावणाज्ञया ॥ अशोकवनिकास्थां तां मैथिलीं समुपानयन् ॥ ११ ॥
तामादाय तु राक्षस्यो भर्तृशोकपराजिताम् ॥ सीतामारोपयामासुर्विमानं पुष्पकं तदा ॥ १२ ॥
ततः पुष्पकमारोप्य सीतां त्रिजटया सह ॥ जग्मुर्दर्शयितुं तस्यै राक्षस्यो रामलक्ष्मणौ ॥ १३ ॥
रावणोकारयल्लङ्कां पताकाध्वजमालिनीम् ॥ प्राघोषयत हृष्टश्च लङ्कायां राक्षसेश्वरः ॥
राघवो लक्ष्मणश्चैव हतावेन्द्रजिता रणे ॥ १४ ॥
विमानेनापि सीता तु गत्वा त्रिजटया सह ॥ ददर्श वानराणां तु सर्वं सैन्यं निपातितम् ॥ १५ ॥
प्रहृष्टमनसश्चापि ददर्श पिशिताशनान् ॥ वानरांश्चापि दुःखार्तान्रामलक्ष्मणपार्श्वतः ॥ १६ ॥
ततः सीता ददर्शोभौ शयानौ शरतल्पयोः ॥ लक्ष्मणं चापि रामं च विसंज्ञौ शरपीडितौ ॥ १७ ॥
विध्वस्तकवचौ वीरौ विप्रविद्धशरासनौ ॥ सायकैश्छिन्नसर्वाङ्गौ शरस्तम्बमयौ क्षितौ ॥ १८ ॥
तौ दृष्ट्वा भ्रातरौ तत्र वीरौ सा पुरुषर्षभौ ॥ शयानौ पुण्डरीकाक्षौ कुमाराविव पावकी ॥ १९ ॥
शरतल्पगतौ वीरौ तथाभूतौ नरर्षभौ ॥ दुःखार्ता सुभृशं सीता सुचिरं विललाप ह ॥ २० ॥

समेष्यतीत्याशारहिता ॥ ७—८ ॥ अद्येत्यादिसार्धश्लोक एकान्वयः ॥ अन्यां गतिं चापश्यती । आगमशासनस्यानित्यत्वान्नुमभावः । अन्यां मत्तोन्यां । गम्यत इति गतिः प्राप्यं । विनिवृत्ताशा रामाद्विनिवृत्तभावा ॥ ९—१२ ॥ त्रिजटया सह सीतामारोप्य । उभयोरेव विमानारोहणमनुज्ञायेत्यर्थः । पुत्रीत्वान्निपुणतया च त्रिजटाया विमानारोहणानुज्ञा ॥ १३ ॥ इन्द्रजिता रण इत्यनन्तरमितिकरणं बोध्यं ॥ १४—१६ ॥ ततः सीतेत्यादिश्लोकद्वयं ॥ विप्रविद्धशरासनौ भ्रष्टचापौ । सायकैश्छिन्नसर्वाङ्गौ अतएव शरस्तम्बमयौ शरगुल्ममयौ । स्तम्बः समूह इत्येके । क्षितौ शरतल्पयोः शयानाविति संबन्धः ॥ १७—१८ ॥ तावित्यादिश्लोकद्वयं ॥ पावकी पावकपुत्रौ स्कन्दविशाखौ । अत्रोत्तरो वीरशब्दः कुमाराविवस्य

ती० अन्यांगतिंनापश्यती अन्यां मत्तोन्यां । गम्यतइतिगतिः प्राप्यं । रामरूपंप्रियंपश्यतीतियावत् । राममवेक्ष्यविनिवृत्ताशा सास्वयंमामुपस्थास्यतइतिसंबन्धः । 'ताउवाचततोहृष्टाराक्षसीः' इत्यारभ्य'अनपेक्षाविशालाक्षीमामुपस्थास्यतेस्वयं' इत्यन्तस्यवास्तवार्थस्तु वैदेह्यारामलक्ष्मणवृत्तान्तजिज्ञासायां तद्वृत्तान्तंतस्यैकथयतेतिरावणोराक्षसीर्नियोजयति—ताउवाचेत्यारभ्यअनपेक्षाविशालाक्षीत्यन्तेन । रणेरामलक्ष्मणौ इन्द्रजितासह । युद्धायेतिशेषः । हतौ आगतावित्यर्थः । हनहिंसागत्योरितिधातोरेवमर्थः । वैदेह्या आख्यात तस्यास्तद्दर्शनेच्छायांसत्यांपुष्पकंसमारोप्यहतौ आगतौ तौ दर्शयध्वंचेत्यर्थः । तस्यैपतिदर्शनेनकिं भविष्यतितत्राह—यदाश्रयादित्यादिश्लोकद्वयेन । हे अवष्टब्धाः गर्विताःराक्षस्यः । इयंयदाश्रयात् यस्यरामस्याश्रयाद्धेतोः । मां लक्ष्मीं मदीयामितिशेषः । नोपतिष्ठति नानुभवतीत्यर्थः । अस्माभतांरणमूर्धनिभ्रात्रासहनिहतः आगतःखलु । तंदृष्ट्वा इतःपरंनिर्विशङ्का निरुद्विग्ना एतावत्पर्यन्तंनिरपेक्षापिमैथिली सर्वाभरणभूषितासती मां मदीयांलक्ष्मींनिवेदितांलक्ष्मीमित्यर्थः । उपस्थास्यते अनुभविष्यतीत्यर्थः । ननुकथंतत्समागमंविनातस्यदर्शनमात्रेणसीतात्वदर्पितैश्वर्यमनुभविष्यतीत्यत्राह—अद्येत्यादिसार्धश्लोकेन । कालवशं कालोवशोयस्यतं लक्ष्मणंरणेप्राप्तंराममपेक्ष्य नान्यांगतिंपश्यती रामव्यतिरिक्तप्राप्यंनपश्यतीसती परमपतिव्रतेत्यर्थः । अतएवानपेक्षा अतएवविनिवृत्ताशा । एतादृश्यपि सर्ववाक्यंसावधारणमितिन्यायात् अद्यैवस्वयमेवमां मदर्पितांलक्ष्मीं उपस्थास्यतीत्यर्थः । स० उपस्थास्यते संगतंकरोति मित्रीकरिष्यतीतिवा तेनात्मनेपदोपपत्तिः ॥ ९ ॥ स० रामं लक्ष्मणमितिवक्तव्ये यल्लक्ष्मणंचैवरामंचेतिवचनंनागपाशेननतदीशस्यबन्धनंसुतरांतच्छाथिनइतिद्योतयितुं ॥ १७ ॥ ती० विप्रविद्धशरासनौ भ्रष्टधनुष्कौ । शरस्तंबमयौ शरस्तंबःशरसमूहः तन्मयौ ॥ १८ ॥ इतिसप्तचत्वारिंशःसर्गः ॥ ४७ ॥

[पा०] १ क. ग.—ट. अनपेक्षा. २ घ. तामानाय्यतु. ३ घ. परायणां. ग. परिप्लुतां. ४ ङ. झ. ञ. ट. रावणश्चारयामास. च. छ. रावणःकारयामास. ५ ख. प्रविध्वस्तशरासनौ. ६ च. झ. ञ. ट. करुणं.

भर्तारमनवद्याङ्गी लक्ष्मणं चासितेक्षणा ॥ प्रेक्ष्य पांसुषु वेष्टन्तौ रुरोद जनकात्मजा ॥ २१ ॥
सा बाष्पशोकाभिहता समीक्ष्य तौ भ्रातरौ देवसमप्रभावौ ॥
वितर्कयन्ती निधनं तयोः सा दुःखान्विता वाक्यमिदं जगाद ॥ २२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

रामलक्ष्मणयोर्निधननिर्धारणेन सकरुणं बहुधाविलपन्तीसीतांप्रति त्रिजटया हेतूपन्यासाद्राघवयोर्जीवनप्रत्यायनेन समाश्वासनम् ॥ १ ॥ राक्षसीभिस्त्रिजटयासहसीतायाः पुनरशोकवनप्रापणम् ॥ २ ॥

भर्तारं निहतं दृष्ट्वा लक्ष्मणं च महाबलम् ॥ विललाप भृशं सीता करुणं शोककर्शिता ॥ १ ॥
ऊचुर्लक्षणिनो ये मां पुत्रिण्यविधवेति च ॥ तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ २ ॥
यज्वनो महिषीं ये मामूचुः पत्नीं च सत्रिणः ॥ तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ ३ ॥
ऊचुः संश्रवणे ये मां द्विजाः कार्तान्तिकाः शुभाम् ॥ तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥४॥
वीरपार्थिवपत्नी त्वं ये धन्येति च मां विदुः ॥ तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ ५ ॥
इमानि खलु पद्मानि पादयोर्यैः किल स्त्रियः ॥ आधिराज्येऽभिषिच्यन्ते नरेन्द्रैः पतिभिः सह ॥ ६ ॥

विशेषणं ॥ १९—२१ ॥ सेति अत्र वीक्षणगदनरूपक्रियाभेदात्तच्छब्दद्वयं ॥२२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

अथ सीताप्रलापोष्टचत्वारिंशे—भर्तारमिति ॥ करुणं यथा तथा विललाप ॥ १ ॥ लक्षणिन इति । लक्षणशब्देनात्र लक्षणज्ञानं लक्ष्यते तदेषामस्तीति लक्षणिनः । षडुत्तरषष्टिलक्षणसामुद्रिकशास्त्रज्ञा इत्यर्थः । " षष्टिष्षडुत्तरा योषिदङ्गलक्षणमीरितं " इत्युक्तेः । अतएवाविधवा विधवालक्षणरहिता । " निर्लोम हृदयं यस्याः समनिम्नत्ववर्जितम् । ऐश्वर्यं चाप्यवैधव्यं प्रियप्रेम च सा लभेत् " इत्युक्तलक्षणेत्यर्थः । पुत्रिणी पुत्रलाभलक्षणवती । " दीर्घाङ्गुलिश्च या नारी दीर्घकेशी च या भवेत् । दीर्घमायुरवाप्नोति पुत्रैश्च सह वर्तते " इत्युक्तलक्षणवतीत्यर्थः । ज्ञानिनो लक्षणज्ञानवन्तः । अनृतवादिनः आसन्निति शेषः ॥ २ ॥ यज्वनः कृताश्वमेधादिकस्य । " यज्वा तु विधिनेष्टवान् " इत्यमरः । बहुयजमानकानि गवामयनप्रभृतीनि सत्राणि तत्कर्तासत्री तस्य महिषीं कृताभिषेकां । " कृताभिषेका महिषी " इत्यमरः । पत्नीं यज्ञसंयोगवतीं । " पत्युर्नो यज्ञसंयोगे " इति पतिशब्दस्य नकारान्तादेशः । ततो " ऋन्नेभ्यो ङीप् " इति ङीप् ॥ ३ ॥ संश्रवणे मम सम्यक् श्रवणे । मयि शृण्वन्त्यामित्यर्थः । यद्वा सम्यक्-श्रवणमस्मिन्निति संश्रवणः सन्निधिः । मत्सन्निधावित्यर्थः । मात्रादिसमीप इति शेषः । कृतान्तः कालः तद्विदः कार्तान्तिकाः । " स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि " इत्यमरः । शुभां नित्यमङ्गलां । " स्मितं प्रशस्तं सुदृशामनिमीलितलोचनम् । समवृत्तपुटा नासा लघुच्छिद्रा शुभावहा " इत्याद्युक्तलक्षणैरिति शेषः ॥ ४ ॥ त्वं वीरपार्थिवपत्नी धन्या चेति ये विदुः । विदित्वा ऊचुरित्यर्थः । तेऽप्यनृतवादिन इति पूर्वेणान्वयः ॥ ५ ॥ यैः पद्मैरुपलक्षिताः स्त्रियः

ती० भर्तारंनिहतमित्यादिसीताप्रलापवाक्यानांवास्तवार्थेऽयमाशयः । सर्वेश्वरीसर्वज्ञादेवीरामलक्ष्मणयोःकापिहानिर्नास्तीति ज्ञात्वापि राक्षसान्वञ्चयितुंबहुविधंप्रलपतीति । निहतं निहतमिवस्थितमित्यर्थः । 'तेद्यसर्वेहतेरामे' इत्यादिसर्वस्थलेषु रामेहते हतइवस्थितेइत्यर्थः ॥ १ ॥ ति० वीरपार्थिवपत्नीनां पूजनीयामितिशेषः । भर्तृपूजितां सुमङ्गलीं येप्राहुः ॥ ५ ॥

[पा०] १ ख. ग. ङ.—ट. देवसुतप्रभावौ. २ ख. ग. घ. महारथं. ३ घ. ङ. झ. ट. लक्षणिकाः. ४ ऊचुस्संश्रवणे. वीरपार्थिवपत्नी. इत्यनयोःश्लोकयोःपौर्वापर्यं झ. पाठेदृश्यते. ५ झ. ट. वीरपार्थिवपत्नीनांयेविदुर्भर्तृपूजितां. ६ क. ख. ज. पादयोर्यैःकुलस्त्रियः. ङ. च. छ. झ. ञ. ट. पादयोर्वैकुलस्त्रियः.

वैधव्यं यान्ति यैर्नार्यो लक्षणैर्भाग्यदुर्लभाः ॥ नात्मनस्तानि पश्यामि पश्यन्ती हतलक्षणा ॥ ७ ॥
सत्यनामानि पद्मानि स्त्रीणामुक्तानि लक्षणैः ॥ तान्यद्य निहते रामे वितथानि भवन्ति मे ॥ ८ ॥
केशाः सूक्ष्माः समा नीला भ्रुवौ चासंगते मम ॥ वृत्ते चारोमशे जङ्घे दन्ताश्चाविरला मम ॥ ९ ॥
शङ्खे नेत्रे करौ पादौ गुल्फावूरू च मे चितौ ॥ अनुवृत्तनखाः स्निग्धाः समाश्चाङ्गुलयो मम ॥ १० ॥
स्तनौ चाविरलौ पीनौ ममैमौ मग्नचूचुकौ ॥ मग्ना चोत्सङ्गिनी नाभिः पार्श्वोरस्काश्च मे चिताः ॥ ११ ॥
मम वर्णो मणिनिभो मृदून्यङ्गरुहाणि च ॥ प्रतिष्ठितां द्वादशभिर्मामूचुः शुभलक्षणाम् ॥ १२ ॥
समग्रयवमच्छिद्रं पाणिपादं च वर्णवत् ॥ मन्दस्मितेत्येव च मां कन्यालक्षणिनो द्विजाः ॥ १३ ॥
आधिराज्येऽभिषेको मे ब्राह्मणैः पतिना सह ॥ कृतान्तकुशलैरुक्तं तत्सर्वं वितथीकृतम् ॥ १४ ॥

आधिराज्येभिषिच्यन्ते किलेत्यैतिह्ये । तानीमानि पद्मानि रेखारूपाणि दृश्यन्त इति शेषः । खल्विति प्रसिद्धौ । स्पष्टं दृश्यन्त इत्यर्थः । कथमेषां निष्फलत्वमितिभावः ॥ ६ ॥ भाग्यदुर्लभाः दुर्लभभाग्या नार्यः । यैर्लक्षणैर्वैधव्यं यान्ति तानि लक्षणानि पश्यन्ती विमृशन्ती । नपश्यामि । कुत्रापिवैधव्यहेतुर्लक्षणं न पश्यामीत्यर्थः । किंतु केवलं हतलक्षणा निष्फललक्षणास्मीत्यर्थः । तादृशलक्षणानि च सामुद्रिकोक्तानि । " परस्परं समारूढाः पादाङ्गुल्यो भवन्ति चेत् । हत्वा बहूनपि पतीन्परप्रेष्या तथा भवेत् ॥ यस्याः कनिष्ठिका भूमिं नगच्छन्त्याः परिस्पृशेत् । पतिद्वयं निहन्त्याद्या द्वितीया च पतित्रयम् ॥ एकरोमा राजपत्नी द्विरोमातिसुखान्विता । त्रिरोमा रोमकूपेषु भवेद्वैधव्यदुःखभाक् " इत्यादिना ॥ ७ ॥ पदि पदे मा श्रीर्येषां तानि पद्मानीत्येवं सत्यनामानि । पदश्रीकराणीत्यर्थः । यद्वा पद्मावत्त्वात् पद्मशब्दवाच्यानि । रेखारूपाणि यानि पद्मानि । सत्यनामानि अन्वर्थनामानि । पद्माशब्दादर्शआद्यचि कृते रूपं । केचित्सत्यनामानि अमोघफलानीत्याहुः । लक्षणैः ध्वजादिलक्षणैः सह यानि सत्यनामानि पद्मान्युक्तानि तानि मे वितथानि निष्फलानि भवन्तीतियोजना ॥ ८ ॥ केशा इत्यादिचतुःश्लोक्येकान्वया ॥ अहं सूक्ष्मकेशत्वादिलक्षणलक्षितास्मि । अतो मां शुभलक्षणामूचुरित्यन्वयः । समाः न्यूनाधिक्यरहिताः । असंगते परस्परमसंयुक्ते । अरोमशे रोमरहिते । वृत्ते वर्तुले । अत्र स्कान्दं—" रोमहीने शुभे स्निग्धे यज्जङ्घे क्रमवर्तुले । सा राजपत्नी भवति विशिरे सुमनोहरा " इति ॥ शङ्खे नेत्रोपान्तभूतललाटपार्श्वे । चितौ उपचितौ । एतच्छङ्खे नेत्रे इत्यत्र लिङ्गव्यत्ययेन योजनीयं । अनुवृत्तनखाः वृत्तनखाः । अङ्गुलयः पादहस्ताङ्गुलयः । तदुक्तं स्कान्दे—" स्निग्धाः समुन्नतास्तत्र वृत्ताः पादनखाः शुभाः " इति । समाः हस्तपरिमाणसदृशाः । नातिदीर्घा नातिह्रस्वा इत्यर्थः । यद्वा एकहस्तवद्धस्तान्तरेपि तुल्यपरिमाणा इत्यर्थः । अन्यूनाधिकसंख्याका इति वार्थः । अविरलौ निरन्तरौ । मग्नचूचुकौ ईषन्मग्नाग्रौ । मग्ना गम्भीरा । उत्सङ्गिनी उन्नतपर्यन्तप्रदेशः । पार्श्वोरस्काः पार्श्वे च उरस्कं च । आर्षो लिङ्गव्यत्ययः । चिताः उचिताः । मणिनिभः मणिवत्स्निग्धवर्णः । प्रतिष्ठितां द्वादशभिः दशभिः पादाङ्गुलिभिः द्वाभ्यां पादतलाभ्यां च भूमौ सुप्रतिष्ठितां ॥ ९—१२ ॥ समग्रयवं संपूर्णयवाकाररेखं । अच्छिद्रं श्लिष्टाङ्गुल्यन्तरालं । वर्णवत् अरुणवर्णं । मामूचुरित्यनुषञ्जनीयं । मन्दस्मितेत्येवेत्येवकारः अयोगव्यवच्छेदार्थः । नित्यमन्दस्मितेत्यर्थः ॥ १३ ॥ कृतान्तकुशलैः ज्यौतिषिकसिद्धान्तनिपुणैः । अत्र इतिकरणं द्रष्टव्यं । अभिषेक इत्युक्तमित्यन्वयः ।

स० लक्षणैः लक्षयन्तिजनानितिततज्ज्ञैःकर्तृभिः । लक्षणैः करणैर्वा । उक्तानि प्रोक्तानि । द्वितीयेतज्ज्ञैरितिशेषः ॥ ७—८ ॥ **शि०** नार्यःयैर्लक्षणैर्वैधव्यंयान्ति तानिलक्षणानिपश्यन्तीअन्वेषयन्ती । तलक्षणा तलयोःपाणिपादतलयोः क्षणं उत्सवप्रदचिह्नं यस्याः सा अहं आत्मनोनैवपश्यामि । एतेन रामनिधनंनसंभवतीतिसूचितं । हएवार्थे ॥ ७ ॥ **ति०** पार्श्वेचउरस्कंच । स्वार्थेकः । तत्पार्श्वोरस्कं ॥ ११ ॥ **स०** वर्णवत् रूपवत् । "वर्णःस्तुतौरूपे" इतिविश्वः ॥ १३ ॥ **स०** पतिनापत्या । पतिरित्याख्यातः पतिरितिलाक्षणिकः । नप्रतिपदोक्तोतःपतिसूत्रायगृहीतइतिपतिनेति 'पतितेपतौ' 'कृष्णस्यसखिरर्जुनः' इत्यादिवत्संभवतीतिवाङ्नेयं

[पा०] १ घ. दुर्लभैः. २ ङ. झ. ट. चासंहतेमम. ३ ङ. झ. ट. मामकौ. ४ ङ. झ. ट. पार्श्वोरस्कंचमेचितं. ५ ङ. च. छ. झ. ञ. ट. कन्यालाक्षणिकाविदुः. ग. घ. कन्यालक्षणिनोविदुः.

शोधयित्वा जनस्थानं प्रवृत्तिमुपलभ्य च ॥ तीर्त्वा सागरमक्षोभ्यं भ्रातरौ गोष्पदे हतौ ॥ १५ ॥
ननु वारुणमाग्नेयमैन्द्रं वायव्यमेव च ॥ अस्त्रं ब्रह्मशिरश्चैव राघवौ प्रेत्यपद्यताम् ॥ १६ ॥
अदृश्यमानेन रणे मायया वासवोपमौ ॥ मम नाथावनाथाया निहतौ रामलक्ष्मणौ ॥ १७ ॥
न हि दृष्टिपथं प्राप्य राघवस्य रणे रिपुः ॥ जीवन्प्रति निवर्तेत यद्यपि स्यान्मनोजवः ॥ १८ ॥
न कालस्यातिभारोस्ति कृतान्तश्च सुदुर्जयः ॥ यत्र रामः सह भ्रात्रा शेते युधि निपातितः ॥१९॥
न शोचामि तथा रामं लक्ष्मणं च महाबलम् ॥ नात्मानं जननीं वाऽपि यथा श्वश्रूं तपस्विनीम्॥२०॥
साऽनुचिन्तयते नित्यं समाप्तव्रतमागतम् ॥ कदा द्रक्ष्यामि सीतां च लक्ष्मणं च सराघवम् ॥२१॥
परिदेवयमानां तां राक्षसी त्रिजटाऽब्रवीत् ॥ २२ ॥
मा विषादं कृथा देवि भर्ताऽयं तव जीवति ॥ २३ ॥
कारणानि च वक्ष्यामि महान्ति सदृशानि च ॥ यथेमौ जीवतो देवि भ्रातरौ रामलक्ष्मणौ ॥२४॥
न हि कोपपरीतानि हर्षपर्युत्सुकानि च ॥ भवन्ति युधि योधानां मुखानि निहते पतौ ॥ २५ ॥
इदं विमानं वैदेहि पुष्पकं नाम नामतः ॥ दिव्यं त्वां धारयेन्नैवं यद्येतौ गतजीवितौ ॥ २६ ॥
हतवीरप्रधाना हि हतोत्साहा निरुद्यमा ॥ सेना भ्रमति संख्येषु हतकर्णेव नौर्जले ॥ २७ ॥
इयं पुनरसंभ्रान्ता निरुद्विग्ना तरस्विनी ॥ सेना रक्षति काकुत्स्थौ मया प्रीत्या निवेदितौ ॥ २८ ॥

" चक्रवार्तिस्त्रियः पाणौ नन्द्यावर्तः प्रदक्षिणः " इत्याद्युक्तनन्द्यावर्तादिलक्षणैरिति भावः । सर्वं वितथीकृतमित्यतः परं यज्वनो महिषीं ये मामित्यधस्तनश्लोकः केषुचित्कोशेषु दृश्यते । स तु लेखकप्रमादकृतः ॥ १४ ॥ शोधयित्वा अन्विष्य । प्रवृत्तिं वृत्तान्तं । गोष्पदे इन्द्रजिन्मायामात्र इति भावः ॥ १५ ॥ ब्रह्मशिरः अस्त्रविशेषः । प्रत्यपद्यतां नन्वित्यन्वयः । परस्मैपदमार्षं । नन्विति प्रसिद्धौ । आमन्त्रणे वा । " प्रभावधारणानुज्ञानुनयामन्त्रणे ननु " इत्यमरः । प्रलापे निर्निमित्तमामन्त्रणं संभवति ॥ १६—१७ ॥ दृश्यमानत्वे नैवं हन्तुं शक्नुयादित्याह—न हीति ॥ १८ ॥ नेति । शुभाशुभप्रापकस्य कालस्यातिभारो नास्ति । अशक्यार्थोनास्तीत्यर्थः । कृतान्तः दैवं । यत्र यतः । रामः अतिबलपराक्रमशाल्यपीति भावः ॥ १९ ॥ जननीं मन्मातरम् ॥ २० ॥ उक्तार्थे हेतुमाह—सेति ॥ समाप्तव्रतं अथ आगतं सराघवं लक्ष्मणं सीतां च कदा द्रक्ष्यामीति अनुचिन्तयत इत्यन्वयः ॥ २१ ॥ परिदेवयमानां विलपन्तीं ॥२२॥ मा विषादमित्यर्धं ॥ २३ ॥ इमौ रामलक्ष्मणौ जीवत इति यथा ज्ञातुं शक्यते तथा । महान्ति स्फुटानि । सदृशानि पूर्वानुभूततुल्यानि । दृष्टसंवादानीति यावत् । कारणानि हेतून् । वक्ष्यामीत्यन्वयः ॥२४॥ तान्येव कारणानि व्यतिरेकमुखेनाह—न हीति ॥ हर्षेण पर्युत्सुकानि । प्रसन्नानीतियावत् ॥२५—२६॥ हतकर्णा हतकर्णधारा ॥ २७ ॥ निवेदितौ निवेदित-

॥ १४ ॥ **ति०** गोष्पदे अल्पावशिष्टसैन्ये । हताविति यर्थः । अनेन बहुदिनयुद्धोत्तरमल्पावशिष्टैसैन्येकतिपययूथपरूपेऽयंशरबन्धइतिलभ्यते ॥ १५ ॥ **स०** राघवौ रामलक्ष्मणौ प्रत्यपद्यत प्रत्यपद्येतां । विश्वामित्रादितिशेषः । राघवश्चराघवश्चेत्येतद्विग्रहवाक्यैकवचनापेक्षयापृथक्पृथगन्वयोवा । विश्वामित्रोवसिष्ठोवाराघवौप्रत्यपद्यत प्रत्यपादयत् आहयामासेतिवा । ननुना सर्वएतदादिविस्मृतंवामायाप्रबलेतिवाकल्पनांसूचयति ॥ १६ ॥ **स०** नाथौ एकोमुख्यतयारक्षकत्वेनामुख्यतयाचैकइतिनाथौ । छत्रिन्यायेनवा ॥ १७ ॥ **शि०** यत्र यदानिपातितोरामःशेते तदा कृतान्तःकालःसुदुर्जयः कैश्चिदपिजेतुंअशक्यः । अतएव कालस्यातिभार अतिभीतिर्नास्ति । रावणमेवाश्रित्यसर्वेनिर्भयाभविष्यन्तीतिसूचितं ॥ १९ ॥ **स०** जननीं जनकभार्यां । जनकोप्युपलक्ष्यते । वार्धकाद्गतपतित्वादेकपुत्रत्वात्तामेवशोचामीतिभावः ॥ २० ॥ **शि०** नामतःपुष्पकमिदंविमानं यदितौगतजीवितौ तर्हि त्वांनधारयेत् । विधवांनधारयतीत्यर्थः । एतेन धारणरूपंहेत्वन्तरंसूचितं ॥ २६ ॥ इत्यष्टचत्वारिंशःसर्गः ॥ ४८ ॥

[**पा०**] १ क.—घ. च. ञ. मुपलभ्यमे. २ झ. ञ. ट. प्रत्यपद्यत. ३ झ. सातु. ४ क. ग. ङ.—ट. धारयन्नेदं. ५ ङ.—ट. गतोत्साहा. ६ ख. ग. ङ.—ट. तपस्विनि.

सा त्वं भव सुविस्रब्धा अनुमानैः सुखोदयैः ॥ अहतौ पश्य काकुत्स्थौ स्नेहादेतब्रवीमि ते ॥२९॥
अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन ॥ चारित्रसुखशीलत्वात्प्रविष्टासि मनो मम ॥ ३० ॥
नेमौ शक्यौ रणे जेतुं सेन्द्रैरपि सुरासुरैः ॥ तादृशं दर्शनं दृष्ट्वा मया चैवेदितं तव ॥
इदं च सुमहच्चिह्नं शनैः पश्यस्व मैथिलि ॥ ३१ ॥
निःसंज्ञावप्युभावेतौ नैव लक्ष्मीर्विमुञ्चति ॥ प्रायेण गतसत्त्वानां पुरुषाणां गतायुषाम् ॥
दृश्यमानेषु वक्त्रेषु परं भवति वैकृतम् ॥ ३२॥
त्यज शोकं च मोहं च दुःखं च जनकात्मजे ॥ रामलक्ष्मणयोरर्थे नाद्य शक्यमजीवितुम् ॥ ३३ ॥
श्रुत्वा तु वचनं तस्याः सीता सुरसुतोपमा ॥ कृताञ्जलिरुवाचेदमेवमस्त्विति मैथिली ॥ ३४ ॥
विमानं पुष्पकं तत्तु सन्निवर्त्य मनोजवम् ॥ दीना त्रिजटया सीता लङ्कामेव प्रवेशिता ॥ ३५ ॥
ततस्त्रिजटया सार्धं पुष्पकादवरुह्य सा ॥ अशोकवनिकामेव राक्षसीभिः प्रवेशिता ॥ ३६ ॥
प्रविश्य सीता बहुवृक्षषण्डां तां राक्षसेन्द्रस्य विहारभूमिम् ॥
संप्रेक्ष्य संचिन्त्य च राजपुत्रौ परं विषादं समुपाजगाम ॥ ३७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

एकोनपञ्चाशः सर्गः ॥ ४९ ॥

नागपाशबद्धेनापिदिष्ट्याप्रबुद्धेनरामेण लक्ष्मणदुरवस्थावलोकनेनतस्य चरमावस्थाशङ्कया तंप्रतिशोचनपूर्वकंबहुधा विलापः ॥ १ ॥

घोरेण शरबन्धेन बद्धौ दशरथात्मजौ ॥ निश्वसन्तौ यथा नागौ शयानौ रुधिरोक्षितौ ॥ १ ॥
सर्वे ते वानरश्रेष्ठाः ससुग्रीवा महाबलाः ॥ परिवार्य महात्मानौ तस्थुः शोकपरिप्लुताः ॥ २ ॥

जीवितौ ॥२८॥ अनुमानैः चिह्नैः । सुखोदयैः सुखज्ञैरित्यर्थः । चारित्रसुखशीलत्वात् । चरित्रमेव चारित्रं पातिव्रत्यं तदेव सुखं प्रियं शीलं स्वभावः यस्याः सा तस्याः भावश्चारित्रसुखशीलत्वं तस्मात् । यद्वा चारित्रेणाह्लादकस्वभावत्वादित्यर्थः । प्रविष्टासि मनो मम । त्वयि मम स्नेहो वर्तत इत्यर्थः ॥ २९–३० ॥ तादृशं तादृग्विधं । जीवनव्यञ्जकमिति यावत् । दृश्यते ज्ञायतेनेनेति दर्शनं सैन्यमुखप्रसादादिकं । पूर्वदृष्टं स्वप्नमिति वार्थः । शनैः पश्यस्व सावधानेन पश्येत्यर्थः ॥ ३१ ॥ न विमुञ्चति न जहाति । गतायुषां अतएव गतसत्त्वानां गतप्राणानां । " द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु " इत्यमरः । वैकृतं विकृतिः ॥ ३२ ॥ रामलक्ष्मणयोरर्थे शोकं शोककृतं मुखविकारं । मोहं विपरीतबुद्धिं । दुःखं मनोव्यथां च त्यज । अजीवितुं न शक्यं जीवितुं शक्यमेवेत्यर्थः ॥ ३३ ॥ कृताञ्जलिरित्यनेन भगवद्विषयोपदेष्टा योपि कोप्यादरणीय इत्युक्तं । इदंशब्दविवरणं एवमस्त्विति ॥ ३४ ॥ विमानमिति । सन्निवर्तने प्रवेशने च त्रिजटैव कर्त्री ॥ ३५ ॥ राक्षसीभिरित्यनेन त्रिजटादर्शनायानीतेति गम्यते ॥ ३६ ॥ विहारभूमिं प्रमदावनं । संप्रेक्ष्य संचिन्त्य । प्रेक्षितप्रकारेण संचिन्त्येत्यर्थः । यद्वा भावनाप्रकर्षात्पुरःस्थितौ संप्रेक्ष्येत्यर्थः ॥ ३७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

अथ रामप्रबोधनमेकोनपञ्चाशे—घोरेणेत्यादिश्लोकद्वयमेकान्वयं ॥ नागौ यथा नागाविव निश्वस-

[पा०] १ क.—ट. वक्ष्यामिमैथिलि. २ ग. झ. ट. चोदीरितं. ३ ङ. झ. ट. इदंतुसुमहच्चित्रं. ४ ग. घ. पश्याद्यमैथिलि. ५ ङ. झ. ट. विसंज्ञौपतितावेतौनैवलक्ष्मीर्विमुञ्चति. ६ ख. ग. ङ. झ. ट. रुवाचेमामेवं. ७ ग. ज. शोकपरिप्लुतौ.

एतस्मिन्नन्तरे रामः प्रत्यबुध्यत वीर्यवान् ॥ स्थिरत्वात्सत्त्वयोगाच्च शरैः संदानितोपि सन् ॥ ३ ॥
ततो दृष्ट्वा सरुधिरं विषण्णं गाढमर्पितम् ॥ भ्रातरं दीनवदनं पर्यदेवयदातुरः ॥ ४ ॥
किंनु मे सीतया कार्यं किं कार्यं जीवितेन वा ॥ शयानं योऽद्य पश्यामि भ्रातरं युधि निर्जितम् ॥५॥
शक्त्या सीतासमा नारी मर्त्यलोके विचिन्वता ॥ न लक्ष्मणसमो भ्राता सचिवः सांपरायिकः ॥६॥
परित्यक्ष्याम्यहं प्राणं वानराणां तु पश्यताम् ॥ यदि पञ्चत्वमापन्नः सुमित्रानन्दवर्धनः ॥ ७ ॥
किंनु वक्ष्यामि कौसल्यां मातरं किंनु कैकयीम् ॥ कथमम्बां सुमित्रां च पुत्रदर्शनलालसाम् ॥८॥
विवत्सां वेपमानां च क्रोशन्तीं कुररीमिव ॥ कथमाश्वासयिष्यामि यदा यास्यामि तं विना ॥ ९ ॥
कथं वक्ष्यामि शत्रुघ्नं भरतं च यशस्विनम् ॥ १० ॥
मया सह वनं यातो विना तेन गतः पुनः ॥ उपालम्भं न शक्ष्यामि सोढुं बत सुमित्रया ॥ ११ ॥
इहैव देहं त्यक्ष्यामि न हि जीवितुमुत्सहे ॥ १२ ॥
धिङ्मां दुष्कृतकर्माणमनार्यं यत्कृते ह्यसौ ॥ लक्ष्मणः पतितः शेते शरतल्पे गतासुवत् ॥ १३ ॥
त्वं नित्यं स विषण्णं मामाश्वासयसि लक्ष्मण ॥ गतासुर्नाद्य शक्नोषि मामार्तमभिभाषितुम् ॥१४॥
येनाद्य निहता युद्धे राक्षसा विनिपातिताः ॥ तस्यामेव क्षितौ वीरः स शेते निहतः परैः ॥ १५ ॥
शयानः शरतल्पेऽस्मिन्स्वशोणितपरिप्लुतः ॥ शरजालैश्चितो भाति भास्करोस्तमिव व्रजन् ॥ १६ ॥
बाणाभिहतमर्मत्वान्न शक्नोत्यभिभाषितुम् ॥ रुजा चाब्रुवतोप्यस्य दृष्टिरागेण सूच्यते ॥ १७ ॥
यथैव मां वनं यान्तमनुयातो महाद्युतिः ॥ अहमप्यनुयास्यामि तथैवैनं यमक्षयम् ॥ १८ ॥
इष्टबन्धुजनो नित्यं मां च नित्यमनुव्रतः ॥ इमामद्य गतोऽवस्थां ममानार्यस्य दुर्नयैः ॥ १९ ॥

न्तावित्यन्वयः । शोकपरिप्लुताः शोकपूर्णाः ॥१–२॥ स्थिरत्वात् धीरत्वात् । सत्त्वयोगात् बलयोगात् । संदानितोपि बद्धोपि । " बद्धे संदानितं मूतं " इत्यमरः ॥ ३ ॥ अर्पितं शरैरिति शेषः ॥ ४ ॥ किं त्वित्यादिश्लोकद्वयं ॥ विचिन्वता मयेति शेषः । सचिवः सहायः । साम्परायिकः युद्धे साधुः । " युद्धायत्योः सम्परायः " इत्यमरः ॥ ५—६ ॥ पञ्चत्वं मृतिं ॥ ७ ॥ किं न्वित्यादिश्लोकद्वयमेकान्वयं ॥ अहं तं लक्ष्मणं विना अयोध्यां यदा यास्यामि तदा कौसल्यां कैकयीं च किं वक्ष्यामि । सुमित्रां कथमाश्वासयिष्यामि ॥ ८—९ ॥ कथमित्यर्धं ॥ यशस्विनमित्यनेन तद्यशो मया न लब्धमिति खिद्यति ॥ १० ॥ यो मया सह वनं यातः तेन विनाऽयोध्यां गतोहं सुमित्रया कृतमुपालम्भं उक्तप्रकारं सोढुं कथं शक्ष्यामि ॥ ११ ॥ इहैवेत्यर्धं ॥ १२ ॥ दुष्कृतकर्माणं । लक्ष्मणवनानयनमेव दुष्कृतं कर्म ॥१३॥ स त्वमित्यन्वयः ॥ १४—१५ ॥ शयान इति । अयमिति शेषः । अत्र शरतल्पस्थानीयोस्तगिरिः । शरस्थाने किरणाः । शोणितस्थाने रक्तवर्णत्वं ॥ १६ ॥ रुजा व्यथा । दृष्टिरागेण वीक्षणप्रेम्णा ॥ १७ ॥ तथैव तेन प्रकारेण । मात्रादिस्नेहमविचार्येत्यर्थः । यमक्षयमित्यत्रापि यान्तमित्यनुषज्यते ॥ १८—१९ ॥

स० प्रत्यबुध्यत । तत्रनिमित्तमाह । स्थिरत्वात् प्रलयादावप्येकस्यैवस्थैर्यात् । नित्यनित्यत्वादितियावत् । सत्त्वयोगात् बलोपायात् । संदानितोबद्धःसन् । एतेनासुरमोहनायरामःस्वेच्छयैवसंदानितइतिज्ञायते ॥ ३ ॥ **स०** कौसल्यां किंनुवक्ष्यामि एतेनकौसल्यायारामइवलक्ष्मणेपिप्रेमेतिसूच्यते ॥ ८ ॥ **स०** वेपन्तीं वेपमानां कुररीमिववेपमानामित्यन्वयः ॥ ९ ॥ **ति०** शरभूतः शरैर्व्याप्तशरीरत्वाच्छररूपंप्राप्तः । तत्तद्रन्ध्रनिस्सरद्रुधिरव्याप्तशराःकिरणस्थानीयाः ॥ १६ ॥

[**पा०**] १ क. पतितं. २ ख. च. छ. ञ. लक्ष्मणंभ्रातरंदीनं. क. घ. लक्ष्मणंभ्रातरंरामः. ३ क. ख. घ.—ट. कार्यलब्धया. ग. कार्यलङ्कया. ४ क.—ट. प्राणान्वा. ५ च. झ. ञ. ट. वेपन्तीं. ६ क. ख. ग. च.—ट. यदि. ७ ङ.—ट. मत्कृते. ८ ङ. झ. पातितः. ९ ङ.—ट. बहवोयुद्धेनिहताराक्षसाःक्षितौ । तस्यामेवायशूरस्त्वंशेषेविनिहतःशरैः. १० झ. सशोणितपरिप्लुतः. ११ ङ. च. झ. ञ. ट. शरभूतस्ततोभासि. १२ ङ.—ट. चाब्रुवतोयस्य.

सुरुष्टेनापि वीरेण लक्ष्मणेन न संस्मरे ॥ परुषं विप्रियं वाऽपि श्रावितं तु कदाचन ॥ २० ॥
विससर्जैकवेगेन पञ्चबाणशतानि यः ॥ इष्वस्त्रेष्वधिकस्तस्मात्कार्तवीर्याच्च लक्ष्मणः ॥ २१ ॥
अस्त्रैरस्त्राणि यो हन्याच्छक्रस्यापि महात्मनः ॥ सोऽयमुर्व्यां हतः शेते महार्हशयनोचितः ॥ २२ ॥
यन्मया न कृतो राजा राक्षसानां विभीषणः ॥ तच्च मिथ्या प्रलप्तं मां प्रधक्ष्यति न संशयः ॥ २३ ॥
अस्मिन्मुहूर्ते सुग्रीव प्रतियातुमितोऽर्हसि ॥ मत्वा हीनं मया राजन्रावणोऽभिद्रवेद्बली ॥ २४ ॥
अङ्गदं तु पुरस्कृत्य ससैन्यः ससुहृज्जनः ॥ सागरं तर सुग्रीव नीलेन च नलेन च ॥ २५ ॥
कृतं हनुमता कार्यं यदन्यैर्दुष्करं रणे ॥ ऋक्षराजेन तुष्यामि गोलाङ्गूलाधिपेन च ॥ २६ ॥
अङ्गदेन कृतं कर्म मैन्देन द्विविदेन च ॥ युद्धं केसरिणा संख्ये घोरं संपातिना कृतम् ॥ २७ ॥
गवयेन गवाक्षेण शरभेण गजेन च ॥ अन्यैश्च हरिभिर्युद्धं मदर्थे त्यक्तजीवितैः ॥
न चातिक्रमितुं शक्यं दैवं सुग्रीव मानुषैः ॥ २८ ॥
यत्तु शक्यं वयस्येन सुहृदा च परंतप ॥ कृतं सुग्रीव तत्सर्वं भवता धर्मभीरुणा ॥ २९ ॥
मित्रकार्यं कृतमिदं भवद्भिर्वानरर्षभाः ॥ अनुज्ञाता मया सर्वे यथेष्टं गन्तुमर्हथ ॥ ३० ॥
शुश्रुवुस्तस्य ते सर्वे वानराः परिदेवनम् ॥ वर्तयाञ्चक्रुरश्रूणि नेत्रैः कृष्णेतरेक्षणाः ॥ ३१ ॥
ततः सर्वाण्यनीकानि स्थापयित्वा विभीषणः ॥ आजगाम गदापाणिस्त्वरितो यत्र राघवः ॥ ३२ ॥
तं दृष्ट्वा त्वरितं यान्तं नीलाञ्जनचयोपमम् ॥ वानरा दुद्रुवुः सर्वे मन्यमानास्तु रावणिम् ॥ ३३ ॥
[निश्चेष्टौ विगतज्ञानौ रणरेणुसमुक्षितौ ॥ शयानौ शरतल्पस्थौ द्रष्टुमायाद्विभीषणः ॥ ३४ ॥
तं राक्षसेन्द्रात्मजशङ्कया ते निपातितौ राजसुतौ च दृष्ट्वा ॥
विभीषणं विव्यधिरे च दृष्ट्वा मेघा यथा वायुहताः प्लवङ्गमाः ॥ ३५ ॥]

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

विप्रियं अहितं । सुरुष्टेनापि लक्ष्मणेन श्रावितं विप्रियं परुषं वाक्यं न स्मरामीत्यर्थः ॥ २० ॥ यः कार्तवीर्यः सहस्रबाहुः एकेन वेगेन एकप्रयत्नेन । यावता कालेन पञ्चबाणशतानि विससर्ज प्रायुङ्क्त । द्विभुजोप्ययं लक्ष्मणः तावतैव कालेन तावतो बाणान् विसृजन् । इष्वस्त्रेषु विषये तस्मात्कार्तवीर्यादधिक इत्यर्थः ॥ २१ ॥ हन्यात् हन्तुं शक्तः । शकि लिङ् ॥ २२ ॥ यत् यस्मात् विभीषणो राक्षसानां राजा न कृतः । तस्मात् मिथ्याप्रलप्तं राजानं त्वां करिष्यामीति मिथ्या प्रलपितं मां प्रधक्ष्यति । दहतीत्यर्थः । आश्रुतकार्यनिर्वाहाभावेन मिथ्येत्युच्यते । आश्रुतं प्रतिज्ञातं ॥ २३ ॥ प्रतियातुं किष्किन्धामिति शेषः । हीनं त्वामिति शेषः ॥ २४–२५ ॥ कृतमित्यादिसार्धश्लोकत्रयं ॥ संपातिना वानरेण ॥ २६—२८ ॥ वयस्येन मित्रेण । सुहृदा च शोभनहृदयेन वा । चशब्दो वाशब्दार्थकः । धर्मभीरुणा धर्मो नश्यतीति भीरुणेत्यर्थः । अधर्मभीरुणेति वा पदच्छेदः ॥ २९—३० ॥ वर्तयांचक्रुः प्रवर्तयांचक्रुः । कृष्णेतरेक्षणाः रक्तेक्षणा इत्यर्थः ॥ ३१ ॥ तत इत्यादिश्लोकद्वयं ॥ ३२—३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनपञ्चाशस्सर्गः ॥ ४९ ॥

स० सुरुष्टेनापि येनकेनचित् । परुषं निष्ठुरं । अप्रियं । कदाचन उक्तमितिशेषः । नसंस्मरे नसंस्मरामीत्येवश्रावितं । अन्यथापरुषाप्रियश्रावणापेक्षयाऽन्तर्निगूढस्यरोषस्याल्पताप्रतीयेत । तच्चवैदिकलौकिकाननुकूलमित्येवमेवान्वयःसमञ्जसः ॥ २० ॥ इत्येकोनपञ्चाशःसर्गः ॥ ४९ ॥

[पा०] १ घ. कार्तवीर्यार्जुनादपि. २ ङ. छ. ट. सत्वहीनं. ञ. सतुहीनं. ३ ङ.—ट. त्रावणोभिभविष्यति. ४ ङ.—ट. परंमम. ५ क. ङ.—ट. येसर्वे. ६ क. ग.—ट. परिदेवितं. ७ ङ. झ. ञ. ट. वर्तयाञ्चक्रिरेश्रूणि. ८ ङ. झ. ट. त्वरितंयत्र. ९ घ. दुद्रुवुःशीघ्रं. १० इदंश्लोकद्वयं प्राचीनकोशेपुनर्दृश्यते.

पञ्चाशः सर्गः ॥ ५० ॥

सुग्रीवचोदितेनजांबवता रामसमीपमागच्छतिगदापाणौविभीषणे इन्द्रजिद्भ्रमेणविद्रवतांवानराणां तस्यविभीषणत्वभाषणेनसमाश्वासनपूर्वकं प्रतिनिवर्तनम् ॥ १ ॥ रामलक्ष्मणसमीपमेत्य सलिलेनतन्नयनपरिमार्जनपूर्वकंविलपतोविभीषणस्य सुग्रीवेणसमाश्वासनम् ॥ २ ॥ सुग्रीवेण स्वयंरावणवधप्रतिज्ञानपूर्वकं राघवयोः किष्किन्धाप्रापणंचोदितेनसुषेणेन तंप्रति संजीवकरण्यादिमहौषधिसमानयनाय क्षीरोदंप्रतिहनुमच्चोदनचोदना ॥ ३ ॥ अत्रान्तरेस्वयमेव सत्वरसमागतेन गरुडेन रामलक्ष्मणयोर्नागपाशविध्वंसनपूर्वकं परिष्वङ्गः ॥ ४ ॥ रामप्रश्नेननिजस्वरूपनिवेदनपूर्वकं सप्रदक्षिणंगतेगरुडे वानरैर्हर्षादुच्चैरुद्घोषणम् ॥ ५ ॥

अथोवाच महातेजा हरिराजो महाबलः ॥ किमियं व्यथिता सेना मूढवातेव नौर्जले ॥ १ ॥
सुग्रीवस्य वचः श्रुत्वा वालिपुत्रोऽङ्गदोऽब्रवीत् ॥ २ ॥
न त्वं पश्यसि रामं च लक्ष्मणं च महाबलम् ॥ शरजालाचितौ वीरावुभौ दशरथात्मजौ ॥
शरतल्पे महात्मानौ शयानौ रुधिरोक्षितौ ॥ ३ ॥
अथाब्रवीद्वानरेन्द्रः सुग्रीवः पुत्रमङ्गदम् ॥ नानिमित्तमिदं मन्ये भवितव्यं भयेन तु ॥ ४ ॥
विषण्णवदना ह्येते त्यक्तप्रहरणा दिशः ॥ प्रपलायन्ति हरयस्त्रासादुत्फुल्ललोचनाः ॥ ५ ॥
अन्योन्यस्य न लज्जन्ते न निरीक्षन्ति पृष्ठतः ॥ विप्रकर्षन्ति चान्योन्यं पतितं लङ्घयन्ति च ॥ ६ ॥
एतस्मिन्नन्तरे वीरो गदापाणिर्विभीषणः ॥ सुग्रीवं वर्धयामास राघवं च निरैक्षत ॥ ७ ॥
विभीषणं तं सुग्रीवो दृष्ट्वा वानरभीषणम् ॥ ऋक्षराजं समीपस्थं जाम्बवन्तमुवाच ह ॥ ८ ॥
विभीषणोऽयं संप्राप्तो यं दृष्ट्वा वानरर्षभाः ॥ विद्रवन्ति परित्रस्ता रावणात्मजशङ्कया ॥ ९ ॥
शीघ्रमेतान्सुसंत्रस्तान्बहुधा विप्रधावितान् ॥ पर्यवस्थापयाख्याहि विभीषणमुपस्थितम् ॥ १० ॥
सुग्रीवेणैवमुक्तस्तु जाम्बवानृक्षपार्थिवः ॥ वानरान्सान्त्वयामास संनिरुध्य प्रधावतः ॥ ११ ॥
ते निवृत्ताः पुनः सर्वे वानरास्त्यक्तसंभ्रमाः ॥ ऋक्षराजवचः श्रुत्वा तं च दृष्ट्वा विभीषणम् ॥ १२ ॥
विभीषणस्तु रामस्य दृष्ट्वा गात्रं शरैश्चितम् ॥ लक्ष्मणस्य च धर्मात्मा बभूव व्यथितेन्द्रियः ॥ १३ ॥
जलक्लिन्नेन हस्तेन तयोर्नेत्रे प्रमृज्य च ॥ शोकसंपीडितमना रुरोद विललाप च ॥ १४ ॥
इमौ तौ सत्त्वसंपन्नौ विक्रान्तौ प्रियसंयुगौ ॥ इमामवस्थां गमितौ राक्षसैः कूटयोधिभिः ॥ १५ ॥

अथ रामस्य नागपाशविमोचनं पञ्चाशे—अथोवाचेत्यादि ॥ तादात्विकसेनापलायननिमित्तमजानानः पृच्छति—किमिति । किं किमर्थं । उवाच वानरानिति शेषः । मूढः मूर्च्छितः । विरुद्धदिग्वाय्वन्तराभिहत इत्यर्थः । वात्याहतेति यावत् ॥ १ ॥ सुग्रीवस्येत्यर्धं ॥ २ ॥ रामव्यथां विना किमन्यन्निमित्तमित्युत्तरयति—न त्वमिति ॥ अत्र काकुः । त्वं न पश्यसि किमित्यर्थः । रामं लक्ष्मणं चेत्युभावित्यन्वयः ॥ ३ ॥ स्वयमुद्घाटयति—अथेत्यादिना ॥ इदं रघुसिंहयोः शरतल्पशयनं । अनिमित्तं न भवतीति मन्ये । अन्येन भयनिमित्तेन भवितव्यमित्यर्थः । तत्र हेतुमाह—विषण्णेत्यादिना ॥ त्यक्तप्रहरणाः त्यक्तशिलाद्यायुधाः । अन्योन्यस्य अन्योन्यं । विप्रकर्षन्ति द्रुतगमनार्थमाकर्षन्ति ॥ ४–९ ॥ विप्रधावि-

---

स० इदं कपिपलायनं अनिमित्तं अकारणकंनमन्ये । पलायनप्रयोजकेनभयेन त्वदुक्तेतरेणभवितव्यमित्यङ्गदमब्रवीत् ॥ ४ ॥ स० त्रासात् नूतनभीतेः ॥ ५ ॥ स० वानरभीषणं इन्द्रजिद्भ्रमजनकतया ॥ ८ ॥

[पा०] १ ख. प्रौढवातेव. २ ख. किंनुपश्यसि. ३ ख. ङ.—ट. पलायन्तेत्रहरयः. ४ छ. जल्पन्ति. ५ ङ. झ. ञ. ट. राघवंचजयाशिषा. ६ क. ख. घ.—ट. द्रवन्त्यागतसंत्रासारावणात्मजशङ्कया. ७ क. वानरान्वारयामासनिवर्त्यप्रतिधावतः. ८ ख. ङ.—ट. संनिवर्त्य. ९ ङ. वानरामुक्तसाध्वसाः. च. छ. झ. ञ. ट. वानरास्त्यक्तसाध्वसाः. १० घ.—ट. व्यथितस्तदा. ११ ङ.—ट. विमृज्यच.

भ्रातुः पुत्रेण मे तेन दुष्पुत्रेण दुरात्मना ॥ राक्षसा जिह्मया बुद्ध्या चालितावृजुविक्रमौ ॥ १६ ॥
शरैरिमावलं विद्धौ रुधिरेण समुक्षितौ ॥ वसुधायामिमौ सुप्तौ दृश्येते शल्यकाविव ॥ १७ ॥
ययोर्वीर्यमुपाश्रित्य प्रतिष्ठा काङ्क्षिता मया ॥ तावुभौ देहनाशाय प्रसुप्तौ पुरुषर्षभौ ॥ १८ ॥
जीवन्नद्य विपन्नोसि नष्टराज्यमनोरथः ॥ प्राप्तप्रतिज्ञश्च रिपुः सकामो रावणः कृतः ॥ १९ ॥
एवं विलपमानं तं परिष्वज्य विभीषणम् ॥ सुग्रीवः सत्त्वसंपन्नो हरिराजोऽब्रवीदिदम् ॥ २० ॥
राज्यं प्राप्स्यसि धर्मज्ञ लङ्कायां नात्र संशयः ॥ रावणः सह पुत्रेण स कामं नेह लप्स्यते ॥ २१ ॥
न रुजापीडितावेतावुभौ राघवलक्ष्मणौ ॥ त्यक्त्वा मोहं वधिष्येते सगणं रावणं रणे ॥ २२ ॥
तमेनं सान्त्वयित्वा तु समाश्वास्य च राक्षसम् ॥ सुषेणं श्वशुरं पार्श्वे सुग्रीवस्तमुवाच ह ॥ २३ ॥
सह शूरैर्हरिगणैर्लब्धसंज्ञावरिन्दमौ ॥ गच्छ त्वं भ्रातरौ गृह्य किष्किन्धां रामलक्ष्मणौ ॥ २४ ॥
अहं तु रावणं हत्वा सपुत्रं सहबान्धवम् ॥ मैथिलीमानयिष्यामि शक्रो नष्टामिव श्रियम् ॥ २५ ॥
श्रुत्वैतद्वानरेन्द्रस्य सुषेणो वाक्यमब्रवीत् ॥ दैवासुरं महद्युद्धमनुभूतं सुदारुणम् ॥ २६ ॥
तदा स्म दानवा देवांश्शरसंस्पर्शकोविदाः ॥ निजघ्नुः शस्त्रविदुषश्छादयन्तो मुहुर्मुहुः ॥ २७ ॥
तानार्तान्नष्टसंज्ञांश्च परासूंश्च बृहस्पतिः ॥ विद्याभिर्मन्त्रयुक्ताभिरोषधीभिश्चिकित्सति ॥ २८ ॥

तान् पलायमानान् ॥ १०—१५ ॥ दुष्पुत्रेण कपटयुद्धेन पितुरवध्यावहेन । चालितौ वञ्चितौ । ऋजुविक्रमौ अकपटविक्रमौ ॥ १६ ॥ सुप्तौ सुप्तसदृशौ । शल्यकौ कण्टकिवराहौ ॥ १७ ॥ ययोरित्यादिचतुःश्लोकी ॥ अत्र वक्तव्यं सर्वमभयप्रदाने दर्शितं ॥ १८—२१ ॥ न रुजापीडितौ इयं रुजा अनयोरात्यन्तिकहानिकरी न भवति । किंतु मोहमात्रकारिणीत्यर्थः ॥ २२—२५ ॥ अनुभूतं मया ज्ञातं । शरसंस्पर्शकोविदाः शरप्रयोगसमर्थाः । स्पर्शो दानमिति पर्यायः ॥ २६–२७ ॥ मन्त्रयुक्ताभिः मन्त्रप्रचुराभिः ।

स० भ्रातुः रावणस्य पुत्रेण । नोभयोः पितापुत्रयोरैवैताद्दूटयोधिलं किंतु परंपरैवेदशीत्याह—दुष्पुत्रेणेति । दुर्दुष्टःपुत्रो यस्यासौतथा ॥ १६ ॥ स० इमौ अलंविद्धौइमौसुप्तावित्यन्वयः पृथक्पृथगितिनान्यतरवैयर्थ्यं । यद्वा इःकामः तस्यापिमाशोभायाभ्यांतौ । एवमपिशोभागतानेतिभावः । छन्दिन्यायेनेमाविति वा कामात्कामपालस्योत्तमत्वात्तत्त्वाल्लक्ष्मणस्यवा इमाविति संभवति । 'इःकामदेवेलनव्ययम्' इतिविश्वः ॥ १७ ॥ स० देहनाशाय स्वदेहनाशाय । यद्वा मद्देहनाशाय । एतयोरियाननर्थो यदितर्हि ममराज्याशैकत्रतिष्ठतु रावणोपितुप्राक्तनकोपेन मारयेदितिद्योतयत्नेनेतिज्ञेयम् ॥ १८ ॥ स० प्रतिज्ञायतइतिप्रतिज्ञा प्रतिज्ञातोर्थःसीतापरित्यागाभावरूपः प्राप्तोयेनसतथा । सकामः मन्नाशेननिष्कण्टकराज्यप्राप्त्या । कृतः । अनयोरेवंस्थापेनेतिशेषः ॥ १९ ॥ स० विलपमानं विलपन्तं । पदव्यत्यासेनविलापफलकस्यविभीषणोत्प्रेक्षितस्यव्यत्यासंकविरवगमयामासेतिज्ञेयं ॥ २० ॥ स० गरुडाधिष्ठितौ गरुडेअधिष्ठितोगरुडवाहनोरामश्च । अधिष्ठानमधिष्ठितं गरुडस्येवाधिष्ठानंयस्येतिचान्यश्चेति गरुडाधिष्ठितौरामलक्ष्मणौ । मोहं नागपाशासादनजं । अयमेवपाठोन्याय्यः । गरुडागमनेननागपाशवियोगस्यात्रोत्तरत्रेवबहुपुराणेषुश्रवणात् । तानिचस्वावसरेवक्ष्यामः । 'नरुजापीडितावितिपठित्वा' इतितीर्थपाठस्यतदुत्प्रेक्षितत्वंसूचयन्नागोजिभट्टः स्वयंपाठं 'गरुडाधिष्ठितौ' इतिपठित्वा 'गरुडोपासकतयाविदितौ' इतिनिर्मूलमर्थवदंस्तादृशएवेतिसंतोष्टव्यं ॥ २२ ॥ स० उत्तरश्लोकद्वयमेकान्वयि । राक्षसं विभीषणं । सान्त्वयित्वा सुषेणंचसमाश्वास्यच गच्छेत्यब्रवीदितिसंबन्धः । एतेनान्यतरातिरेकशङ्कया-'सान्त्वयित्वेत्यस्यैवार्थकथनं समाश्वास्यत्विति' इतिवदतोनागोजिभट्टस्य बहुस्थलेषु द्वित्रादीनांश्लोकानामेकान्वयंब्रुवतोऽन्वयज्ञानदारिद्र्यंद्योत्यते । 'सान्त्वयित्वा गरुडानुग्रहसंभावनयेत्यर्थः । अनेनसुग्रीववाक्येनरामविषयेस्वस्यभगवदवतारत्वज्ञानंसूचितं' इतितद्वचनं 'गरुडोपासकतयाविदितौ' इति 'गरुडानुग्रहसंभावनया' इतिस्ववचनव्याहतमित्युपेक्ष्यं । तेनाभगवदवतारत्वहेतोरुपासकत्वस्यतदनुग्रहपात्रत्वस्यैवचप्रतीतेः ॥ २३—२४ ॥ शि० राक्षसंतंविभीषणमेवमाश्वास्य बोधयित्वा सान्त्वयित्वा तापं निरस्य सुषेणमुवाच ॥ २३ ॥ ति० यावल्लब्धसंज्ञौभविष्यतः तावदनयोरक्षार्थं एतौगृहीत्वाशूरैर्हरिगणैःसहकिष्किन्धांगच्छ ॥ २४ ॥ स० आगमनप्रयोजनस्यानिष्पत्तेःकथं कथय गन्तव्यमित्यतआह—अहंलिति । नष्टां बल्यादिभिरदर्शनंप्रापितां श्रियं

[पा०] १ ङ. च. झ. ञ. ट. भ्रातृपुत्रेणचैतेन. २ क. ख. च. छ. ट. चालितौप्राज्यविक्रमौ. ग. ङ. झ. वञ्चितावृजुविक्रमौ. ३ ङ.—ट. तावेमौ. ४ ट. सत्त्वमापन्नः. ५ ङ. च. झ. ञ. ट. नेह. ६ ङ. झ. ट. गरुडाधिष्ठितावेतौ. ७ क. ख. ग. च.—ट. तमेवं, ८ क. घ. विभीषणं. ९ घ.—ट. पुरातनं. १० ग. घ. ङ. झ. ञ. ट. संस्पर्शकोविदान्.

तान्यौषधान्यानयितुं क्षीरोदं यान्तु सागरम् ॥ जवेन वानराः शीघ्रं संपातिपनसादयः ॥
हरयस्तु विजानन्ति [1]पार्वतीस्ता महौषधीः ॥ २९ ॥
संजीवकरणीं दिव्यां विशल्यां देवनिर्मिताम् ॥ ३० ॥
चन्द्रश्च [2]नाम द्रोणश्च क्षीरोदे सागरोत्तमे ॥ अमृतं यत्र मथितं तत्र ते परमौषधी ॥
[3]ते तत्र निहिते देवैः [4]पर्वते परमौषधी ॥ ३१ ॥
अयं वायुसुतो राजन्हनुमांस्तत्र गच्छतु ॥ ३२ ॥
एतस्मिन्नन्तरे वायुर्मेघांश्चापि सविद्युतः ॥ [5]पर्यस्यन्सागरे तोयं कम्पयन्निव [6]मेदिनीम् ॥ ३३ ॥
महता पक्षवातेन सर्वद्वीपमहाद्रुमाः ॥ [7]निपेतुर्भिन्नविटपाः [8]समूला लवणाम्भसि ॥ ३४ ॥
अभवन्पन्नगास्त्रस्ता भोगिनस्तत्रवासिनः ॥ शीघ्रं सर्वाणि यादांसि जग्मुश्च लवणार्णवम् ॥ ३५ ॥
ततो मुहूर्ताद्गरुडं वैनतेयं महाबलम् ॥ वानरा ददृशुः सर्वे ज्वलन्तमिव पावकम् ॥ ३६ ॥
[9]तमागतमभिप्रेक्ष्य नागास्ते विप्रदुद्रुवुः ॥ [10]यैस्तौ सत्पुरुषौ बद्धौ शरभूतैर्महाबलौ ॥ ३७ ॥
ततः सुपर्णः काकुत्स्थौ दृष्ट्वा प्रत्यभिनन्दितः ॥ विममर्श च पाणिभ्यां मुखे चन्द्रसमप्रभे ॥ ३८ ॥
वैनतेयेन संस्पृष्टास्तयोः संरुरुहुर्व्रणाः ॥ सुवर्णे च तनू स्निग्धे तयोराशु बभूवतुः ॥ ३९ ॥
तेजो वीर्यं बलं चौज उत्साहश्च महागुणः ॥ प्रदर्शनं च बुद्धिश्च स्मृतिश्च [11]द्विर्गुणं तयोः ॥ ४० ॥

विद्याभिः मृतसंजीविनीप्रभृतिभिः । चिकित्सति अचिकित्सत् ॥ २८ ॥ तान्यौषधानीत्यादिसार्धश्लोकः ॥ २९ ॥ संजीवकरणीमित्यर्धमेकं वाक्यं ॥ अत्रानयितुं यान्त्वित्यनुषज्यते । पूर्वोक्तक्षीरोदमध्ये संजीवकरणीं विशल्यां चानयितुं यान्त्वित्यर्थः । तयोरेवात्रोपयोगादिति भावः ॥ ३० ॥ ते कुत्र विद्येते इत्यत्राह—चन्द्रश्चेत्यादिना ॥ सागरोत्तमे क्षीरोदे । यत्र प्रदेशे अमृतं मथितं तत्र चन्द्रद्रोणाख्यौ पर्वतौ स्तः तयोस्ते महौषधी स्त इत्यर्थः । तत्रावस्थाने हेतुमाह—ते तत्रेति । पर्वते पर्वतयोः । जात्येकवचनं ॥ ३१ ॥ अयमित्यर्धं ॥ औषध्यन्तरानयने पनसादयो गच्छन्तु । संजीवविशल्यानयने तु हनुमान् गच्छत्विति विज्ञेयं ॥ ३२ ॥ मेघान् सागरतोयं च पर्यस्यन् पर्वतान्कम्पयन्निव गरुडपक्षवायुरुदभूदिति शेषः । सर्वद्वीपमहाद्रुमाः । सर्वपदं द्रुमविशेषणं । द्वीपं च लङ्का । लवणाम्भसि लवणसमुद्रे ॥ ३३—३४ ॥ भोगिनः प्रशस्तकायाः । तत्रवासिनः लङ्काद्वीपवासिनः । यादांसि जलजन्तवश्च । लवणार्णवं लवणार्णवमध्यं । भयादन्तर्मग्ना इत्यर्थः ॥ ३५—३८ ॥ व्रणाः क्षतानि । संरुरुहुः संरूढाः । अज्ञातस्वरूपा बभूवुरित्यर्थः ॥ ३९ ॥ तेजः पराभिभवनसामर्थ्यं । पराधिक्षेपासहनं वा । वीर्यं पराक्रमः । बलं शारीरं । ओजः कान्तिः । उत्साहः लोकोत्तरकार्येषु स्थिरतरप्रयत्नः । प्रदर्शनं सूक्ष्मार्थपरिज्ञानं । बुद्धिः विवेकः । स्मृतिः अनुभूतार्थाविस्मरणं । एतत् सर्वं द्विगुणं वैनतेयसंस्पर्शवशात् पूर्वतोप्यधिकं जातमित्यर्थः । अत्र धीरिति गायत्र्याः सप्तदशाक्षरं ।

संपदमिव ॥ २५ ॥ **ति०** पार्वतीपर्वतप्रतिष्ठिते । ते ओषधी । विजानन्ति । पार्वती इतिद्विवचनमार्ष ॥ ३० ॥ **ति०** यद्यपिपनसादयोजानन्ति । तथापि शीघ्रमागमनार्थंवायुसुतोयातु ॥ ३२ ॥ **ति०** एतस्मिन्नन्तरे ओषध्यानयनवार्ताकाले । सागरे तोयंपर्यस्य अतिलहरीयोगिकृत्वा पर्वतान्कंपयन्पक्षवायुरभूत् । सविद्युतोमेघाश्चासन् ॥ ३३ ॥ **स०** चन्द्रसमप्रभेइत्यनेन लोकानुकरणार्थमेवपातः आयातःसेवार्थंगरुडइतिध्वन्यते । अन्यथा मुखविकारापत्तेः ॥ ३८ ॥ **ति०** प्रदर्शनं शब्दानुमानाभ्यांपरोक्षार्थनिश्चयः । बुद्धिरपरोक्षनिश्चयः । द्विगुणा वैनतेयस्पर्शात्पूर्वतोप्यधिका । अत्रान्यैर्देवैरवतीर्यभगवतोरामस्यमूलमूर्तेराज्ञयोपकारःसंपादितः । गरुडेनतु स्वरूपतएवेतिबोध्यं ॥ ४० ॥

[**पा०**] १ ङ. ञ. ट. पार्वतीतेमहौषधी. क. पर्वतस्थाः. २ क. ख. च. ञ. नाम्ना. ३ ग. घ. ङ. ञ. ट. तौतत्रविहितौदेवैःपर्वतौतौमहोदधौ. ४ च. छ. ज. पर्वतेतुमहौषधी. ५ ङ.—ट. पर्यस्य. ६ क. ग.—ट. पर्वतान्. ७ क. घ.—ट. निपेतुर्भग्न. ८ ङ. ञ. ट. सलिले. ९ ख. ग. समागतं. १० ङ.—ट. यैस्तुतौपुरुषौबद्धौ. ग. यौतौ. ११ ञ. ट. द्विगुणातयोः.

तावुत्थाप्य महावीर्यौ गरुडो वासवोपमौ ॥ उभौ तौ सस्वजे हृष्टो रामश्चैनमुवाच ह ॥ ४१ ॥
भवत्प्रसादाद्व्यसनं रावणिप्रभवं महत् ॥ आवामिह व्यतिक्रान्तौ पूर्ववद्बलिनौ कृतौ ॥ ४२ ॥
यथा तातं दशरथं यथाऽजं च पितामहम् ॥ तथा भवन्तमासाद्य हृदयं मे प्रसीदति ॥ ४३ ॥
को भवान्नूपसंपन्नो दिव्यस्रगनुलेपनः ॥ वसानो विरजे वस्त्रे दिव्याभरणभूषितः ॥ ४४ ॥
तमुवाच महातेजा वैनतेयो महाबलः ॥ पतत्रिराजः प्रीतात्मा हर्षपर्याकुलेक्षणः ॥ ४५ ॥
अहं सखा ते काकुत्स्थ प्रियः प्राणो बहिश्चरः ॥ गरुत्मानिह संप्राप्तो युवाभ्यां साह्यकारणात् ॥४६॥
असुरा वा महावीर्या दानवा वा महाबलाः ॥ सुराश्चापि सगन्धर्वाः पुरस्कृत्य शतक्रतुम् ॥ ४७ ॥
नेमं मोक्षयितुं शक्ताः शरबन्धं सुदारुणम् ॥ मायाबलादिन्द्रजिता निर्मितं क्रूरकर्मणा ॥ ४८ ॥
एते नागाः काद्रवेयास्तीक्ष्णदंष्ट्रा विषोल्बणाः ॥ रक्षोमायाप्रभावेण शरा भूत्वा त्वदाश्रिताः ॥४९॥
सभाग्यश्चासि धर्मज्ञ राम सत्यपराक्रम ॥ लक्ष्मणेन सह भ्रात्रा समरे रिपुघातिना ॥ ५० ॥
इमं श्रुत्वा तु वृत्तान्तं त्वरमाणोऽहमागतः ॥ सहसा युवयोः स्नेहात्सखित्वमनुपालयन् ॥ ५१ ॥
मोक्षितौ च महाघोरादस्मात्सायकबन्धनात् ॥ अप्रमादश्च कर्तव्यो युवाभ्यां नित्यमेव हि ॥ ५२ ॥

षोडशसहस्रश्लोका गताः ॥ ४० ॥ ताविति । क्रियाभेदात्तच्छब्दद्वयं ॥ ४१ ॥ व्यतिक्रान्तौ लङ्घितवन्तौ । गत्यर्थत्वात्कर्तरि क्तः ॥ ४२—४३ ॥ विरजे निर्मले ॥ ४४–४५ ॥ सखा वाहनत्वेन सहाय इति गूढोक्तिः । युवाभ्यां युवयोः । षष्ठ्यर्थे तृतीया । साह्यकारणात् साहाय्यार्थं ॥ ४६—४८ ॥ काद्रवेयाः कद्रपुत्राः । मायाबलात् आश्चर्यशक्तिरूपबलात् ॥ ४९—५० ॥ युवयोः । षष्ठ्यर्थे तृतीया । साह्यकारणात् सहायत्वेन ॥ ५१ ॥ अप्रमादश्चकर्तव्य इति ।

ति० यथातातंदशरथं स्वावतारोचितं कश्यपप्रजापत्यंशं । अजंचपितामहं चतुर्मुखब्रह्मांशं । मे हिरण्यगर्भात्मनस्तदंशस्य । स० यथादशरथंतातं पितामहं अजं आसाद्यमेहृदयंप्रसन्नंतथाभवन्तमासाद्य हृदयंप्रसीदति । प्राप्तस्वमूलरूपपितृपितामहनिदर्शनं मूलरूपेणागतगरुडानुरूपमितिबहिः । यथातातंतवपितरंकश्यपं तवपितामहंमरीचिं अजंचब्रह्माणंप्रपितामहं । आसाद्य प्राप्य आभवं सम्यङ्मङ्गलवन्तं अभवं संसाररहितं दशरथं दशसुदिक्षुरथःकायोयस्यसतं व्याप्तं । तं मे मामासाद्यतथाहृदयंप्रसीदति प्रसन्नमभूत् । सेवयाजन्मसाफल्यात् । यथातातंपितामहंचासाद्यस्थितंभवन्तमुद्दिश्यतेषांहृदयंप्रसन्नं तथाभवन्तमुद्दिश्यमेहृदयंप्रसीदतीतिवा हृदयमितिहृदयपदेनासूचयत्कविरितिज्ञेयं । 'रथःस्यात्स्यन्दनेकाये' इतिविश्वः । शि० यथादशरथं यथा अजंचासाद्यमे हृदयंप्रसीदति तथाभवन्तमासाद्यप्रसीदति । एतेनगरुडस्यवृद्धत्वंसूचितं ॥ ४३ ॥ ति० कोभवानिति । अयंप्रश्नोपिमनुष्यशरीरोचितव्यवहारएवतत्सत्यत्वप्रख्यापनार्थः । अत्ररामसमीपागमनपर्यन्तंपक्ष्याकारेणैवागत्यसंनिधिमात्रेणनागबन्धनंचनिरस्यराघवस्पर्शनाद्यर्थंपुरुषाकारेणव्यवहृतवानितिबोध्यम् । तदाह—**रूपसंपन्नइति** । दिव्यरूपसंपन्नइत्यर्थः । स० भवान्कइतिमनुष्यत्वस्थेन्न । सोप्यसुरमोहायेतिज्ञेयं । रूपसंपन्नः सुरूपः नःप्रसादादेवरूपसंपत् । भवान् नएव अस्मदीयएव । कइवकः वायुवद्वेगवान्वासूर्यइव प्रकाशमानोवेति कइति मानसिकोभिप्रायः । विरजे शुद्धे 'अर्थाःपादरजोपमाः' इत्युक्तेःरजश्शब्दपर्यायोऽयंरजशब्दः ॥ ४४ ॥ स० तं तेइतिपूर्वमुक्तवतोगरुडस्य सेवकस्यतइत्युक्तौजिह्वाजिह्वेतीतिसूचयतियुवयोरित्युक्त्या । एवंसति सतिचच्छत्रिन्यायावकाशे नप्रत्ययेवाद्वैनतेय इतिभावोपिकवेर्ज्ञातव्यः । सखित्वंत्रोत्तरत्रैव "विष्णुनाचतदाकाशेवैनतेयःसमेयिवान् । तस्यनारायणस्तुष्टस्तेनालौल्येनकर्मणा । तमुवाचाव्ययोदेववरदोस्मीतिखेचरम् । सवव्रेतवतिष्ठेयमुपरीत्यन्तरिक्षगः । उवाचचैनंभूयोपिनारायणमिदंवचः । अजरश्चामरश्चस्याममृतेनविनाप्यहम् । एवमस्त्वितितंविष्णुरुवाचविनतासुतम् । प्रतिगृह्यवरौतौतुगरुडोविष्णुमब्रवीत् । भगवतेपिवरंदद्मिवृणोतुभगवानपि । तंवव्रेवाहनंविष्णुर्गरुत्मन्तंमहाबलम् । ध्वजंचचक्रेभगवानुपरिस्थास्यसीतितम् । एवमस्त्विति तंदेवमुक्त्वानारायणंखगः । वव्राज" इतिभारतादिपर्वसौपर्णाख्यानेचोक्तमनुसंधेयम् । इदंसर्वंभक्तभक्तिपारवश्येनेतिमन्तव्यम् । ति० अहंसखेति । सखित्वात्सुग्रीवादिवद्देवसाह्यकरणार्थमागतइतिभावः ॥ ४६ ॥ स० श्रुत्वा देवचारमुखादितिशेषः ॥ ५१ ॥

[पा०] १ ङ. झ. ट. महातेजागरुडो. २ ङ. झ. ट. उपायेनव्यतिक्रान्तौशीघ्रंचबलिनौ. ३ क.—घ. च. छ. ञ. शीघ्रंचबलिनौ. ४ ङ. छ. झ. ञ. ट. युवयोः. ग. भवद्भ्यां. घ. तवसौभाग्यकारणात्. ५ ङ. झ. ट. वानरावा. ६ ङ. झ. ट. शरभूतास्त्वदाश्रयाः. ख. च. ञ. शरभूतास्त्वदाश्रिताः. ७ झ. विक्रान्तस्त्वरमाणो. ८ ङ. च. झ. ट. सहसैवावयोः.

प्रकृत्या राक्षसाः सर्वे संग्रामे कूटयोधिनः ॥ शूराणां शुद्धभावानां भवतामार्जवं बलम् ॥ ५३ ॥
तन्न विश्वसितव्यं वो राक्षसानां रणाजिरे ॥ एतेनैवोपमानेन नित्यं जिह्मा हि राक्षसाः ॥ ५४ ॥
एवमुक्त्वा ततो रामं सुपर्णः सुमहाबलः ॥ परिष्वज्य सुहृत्स्निग्धमाप्रष्टुमुपचक्रमे ॥ ५५ ॥
सखे राघव धर्मज्ञ रिपूणामपि वत्सल ॥ अभ्यनुज्ञातुमिच्छामि गमिष्यामि यथागतम् ॥ ५६ ॥
न च कौतूहलं कार्यं सखित्वं प्रति राघव ॥ कृतकर्मा रणे वीर सखित्वमनुवेत्स्यसि ॥ ५७ ॥
बालवृद्धावशेषां तु लङ्कां कृत्वा शरोर्मिभिः ॥ रावणं च रिपुं हत्वा सीतां समुपलप्स्यसे ॥ ५८ ॥
इत्येवमुक्त्वा वचनं सुपर्णः शीघ्रविक्रमः ॥ रामं च विरुजं कृत्वा मध्ये तेषां वनौकसाम् ॥ ५९ ॥
प्रदक्षिणं ततः कृत्वा परिष्वज्य च वीर्यवान् ॥ जगामाकाशमाविश्य सुपर्णः पवनो यथा ॥ ६० ॥
निरुजौ राघवौ दृष्ट्वा ततो वानरयूथपाः ॥ सिंहनादांस्तदा नेदुर्लाङ्गूलान्दुधुवुस्तदा ॥ ६१ ॥
ततो भेरीः समाजघ्नुर्मृदङ्गांश्चाप्यनादयन् ॥ दध्मुः शङ्खान्संप्रहृष्टाः क्ष्वेलन्त्यपि यथापुरम् ॥ ६२ ॥
आस्फोट्यास्फोट्य विक्रान्ता वानरा नगयोधिनः ॥ द्रुमानुत्पाट्य विविधांस्तस्थुः शतसहस्रशः ॥६३॥
विसृजन्तो महानादांस्त्रासयन्तो निशाचरान् ॥ लङ्काद्वाराण्युपाजग्मुर्योद्धुकामाः प्लवङ्गमाः ॥ ६४ ॥
ततस्तु भीमस्तुमुलो निनादो बभूव शाखामृगयूथपानाम् ॥

तत्तदस्त्रानुगुणप्रत्यस्त्रप्रयोगेषु सावधानाभ्यां भवितव्यमित्यर्थः ॥ ५२ ॥ प्रकृत्येत्यादिश्लोकद्वयं ॥ एतेनैवोपमानेनेति । अनेन दृष्टान्तेन राक्षसा जिह्मा ज्ञेया इत्यर्थः ॥ ५३—५५ ॥ रिपूणामपि वत्सलेत्यनेन इन्द्रजिद्वधोपायो ज्ञात इति द्योत्यते ॥ ५६ ॥ अहं सखा ते काकुत्स्थेत्यादिनोक्तं सखित्वं कथमिति रामाशयमाशङ्क्य रहस्यत्वादिदानीं तद्विषयप्रश्नो न कर्तव्यः रावणवधानन्तरं स्वयमेव ज्ञास्यसीत्याह—न चेति ॥ सखित्वं प्रति सखित्वप्रश्नं प्रतीत्यर्थः ॥ ५७ ॥ रामस्योत्साहवर्धनाय भाविनमर्थं कथयति—बालेत्यादिना ॥ शरोर्मिभिः शरपरंपराभिः ॥ ५८ ॥ शीघ्रविक्रमः शीघ्रगतिः । क्रियाभेदेन सुपर्णपदद्वयान्वयः ॥ ५९—६० ॥ सिंहनादं नेदुः सिंहनादं चक्रुरित्यर्थः । दुधुवुः अकम्पयन् ॥ ६१ ॥ यथापुरं यथापूर्वं । ननु " पिशाचान्दानवान्यक्षान्पृथिव्यां चैव राक्षसान् । अङ्गुल्यग्रेण तान्हन्यां " इत्युक्तनिरवधिकशक्तिसंपन्नः सर्वज्ञो रामः कथमज्ञ इवाशक्त इवेन्द्रजिता हतो लोहितांक्तो भूमौ स्थित इवाभावयत् । उच्यते । लोके समाचारप्रवर्तनायैवं स्थितः । इन्द्रजित्पराजयेन ह्ययमर्थोवगम्यते । शुचीनां शुद्धभावानामृजूनां प्राणसन्देहदायिविपद्यपि न विनाशः । विपरीतानां पापिष्ठानां तु करतलगतापि कार्यसिद्धिर्विगलति । अतः शुचित्वार्जवादिगुणयुक्तैः पुम्भिर्भवितव्यमिति सतां धर्मनिश्चयप्रतिपत्तिर्जायते । ननु रावणवधार्थं दैवतैरर्थितो हि विष्णू रामत्वेनावतीर्णः । सत्यं, दुष्कृद्विनाशवद्धर्मसंस्थापनमपि ह्यवतारप्रयोजनं । रावणवधमात्रस्य प्रयोजनत्वे ह्येतावान्प्रयासो व्यर्थः स्यात् । अतएवोक्तं—"चातुर्वर्ण्यं च लोकेस्मिन्स्वे स्वे धर्मे नियोक्ष्यति " इति । नच धर्मोपदेशमात्रेण तत्सिद्धिः । तादृशोपदेशस्य श्रुतिस्मृतिभिरेव कृतत्वात् । स्वाचारमुखेन धर्मप्रवचनाय हि मानुषभावना च कृता । अतः स्वाचारमुखेन धर्मप्रवर्तन-

स० रिपूणामपिवत्सलरिपवोपियदिशरणंगताः तर्हितेष्वपिवत्सल ॥ ५६ ॥ ति० प्रदक्षिणंकृत्वेत्यनेनदिव्यदेवतावतारोरामइतिसर्वान्प्राकृतकपीन्प्रत्यपिबोधितं ॥ ६० ॥ ति० निशीथेयथाघनानां नादस्तथावानराणां नादइत्यर्थः । अत्रस्थानेदिनद्वयं युद्धावहारइत्याभिवेद्यः ॥ ६५ ॥ इतिपञ्चाशःसर्गः ॥ ५० ॥

[पा०] १ ङ. छ. झ. ट. विश्वसनीयंवो. २ ङ. झ. ट. तदारामं. ३ ख. झ. ट. यथासुखं. ४ ङ. च. झ. ञ. ट. त्वमुपलप्स्यसे. ५ ख. ङ. छ. झ. ट. निरुजौ. ६ क. ङ. च. झ. ञ. ट. सिंहनादंतदानेदुर्लाङ्गूलंदुधुवुश्चते. ७ झ. ट. प्यवादयन्. ८ ख. ग. ङ.—ट. अपरेस्फोट्य. ९ ङ.—ट. जग्मुर्युद्धकामाः. १० ख. ङ. झ. ट. तेषांसुभीमस्तुमुलो.

क्षये निदाघस्य यथा घनानां नादः सुभीमो नदतां निशीथे ॥ ६५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

एकपञ्चाशः सर्गः ॥ ५१ ॥

वानराणांविषादसमये तदीयहर्षोद्घोषश्रवणविषण्णेनरावणेन राक्षसान्प्रति तद्धर्षकारणावगमचोदना ॥ १ ॥ राक्षसै रणाङ्गणमेत्यतदवगमेन रावणंप्रति राघवयोर्नागास्त्रविमोक्षणस्य तत्कारणत्वनिवेदनम् ॥ २ ॥ धूम्राक्षेण रावणचोदनया राक्षसैस्सहपश्चिमद्वारगमनम् ॥ ३ ॥

तेषां सुतुमुलं शब्दं वानराणां तरस्विनाम् ॥ नर्दतां राक्षसैः सार्धं तदा शुश्राव रावणः ॥ १ ॥
स्निग्धगम्भीरनिर्घोषं श्रुत्वा स निनदं भृशम् ॥ सचिवानां ततस्तेषां मध्ये वचनमब्रवीत् ॥ २ ॥
यथाऽसौ संप्रहृष्टानां वानराणां समुत्थितः ॥ बहूनां सुमहानादो मेघानामिव गर्जताम् ॥
व्यक्तं सुमहती प्रीतिरेतेषां नात्र संशयः ॥ ३ ॥
तथा हि विपुलैर्नादैश्चुक्षुभे वरुणालयः ॥ ४ ॥
तौ तु बद्धौ शरैस्तीक्ष्णैर्भ्रातरौ रामलक्ष्मणौ ॥ अयं च सुमहान्नादः शङ्कां जनयतीव मे ॥ ५ ॥
एतत्तु वचनं चोक्त्वा मन्त्रिणो राक्षसेश्वरः ॥ उवाच नैर्ऋतांस्तत्र समीपपरिवर्तिनः ॥ ६ ॥
ज्ञायतां तूर्णमेतेषां सर्वेषां वनचारिणाम् ॥ शोककाले समुत्पन्ने हर्षकारणमुत्थितम् ॥ ७ ॥
तथोक्तास्तेन संभ्रान्ताः प्राकारमधिरुह्य ते ॥ ददृशुः पालितां सेनां सुग्रीवेण महात्मना ॥ ८ ॥
तौ च मुक्तौ सुघोरेण शरबन्धेन राघवौ ॥ समुत्थितौ महावेगौ विषेदुः प्रेक्ष्य राक्षसाः ॥ ९ ॥
संत्रस्तहृदयाः सर्वे प्राकारादवरुह्य ते ॥ विपण्णवदना घोरा राक्षसेन्द्रमुपस्थिताः ॥ १० ॥
तदप्रियं दीनमुखा रावणस्य निशाचराः ॥ कृत्स्नं निवेदयामासुर्यथावद्वाक्यकोविदाः ॥ ११ ॥
यौ तावेन्द्रजिता युद्धे भ्रातरौ रामलक्ष्मणौ ॥ निबद्धौ शरबन्धेन निष्प्रकम्पभुजौ कृतौ ॥ १२ ॥
विमुक्तौ शरबन्धेन तौ दृश्येते रणाजिरे ॥ पाशानिव गजौ छित्त्वा गजेन्द्रसमविक्रमौ ॥ १३ ॥

मित्यादिप्रबन्धादावेवोक्तं ॥ ६२–६५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

अथ धूम्राक्षनिर्गम एकपञ्चाशे—तेषामित्यादि ॥ राक्षसैः सह शुश्रावेत्यन्वयः ॥ १ ॥ निर्घोषः ध्वनिः ॥ २ ॥ यथासावित्यादिसार्धश्लोक एकान्वयः ॥ यथा येन कारणेन । सुमहानादः समुत्थितः ततः एतेषां सुमहती प्रीतिः । अस्तीतिशेषः ॥ ३ ॥ तथा हीत्यर्धं ॥ तथा प्रसिद्धप्रकारः ॥ ४ ॥ तौ त्विति । तुशब्दश्चार्थः । तौ च बद्धौ नादश्च श्रूयते । स च प्रकृतविरुद्धो नादः । शङ्कां राजपुत्रयोः शरबन्धापगमशङ्कां । जनयतीव । इवशब्दः संभावनायां ॥५–६॥ उत्थितं हर्षकारणं ज्ञायतामित्यन्वयः॥७—९॥उपस्थिताःप्राप्ताः॥१०—११॥यौ तौ । यावित्यर्थः॥१२॥ पाशानिति । पाशान् छित्त्वा स्थितौ गजाविव भास-

---

ति० राक्षसैः विभीषणादिभिः ॥ १ ॥ स० स्निग्धगंभीरनिर्घोषं एतेनसीतापतिपतनकालिकदुःखशब्दोव्यावर्त्यते । निनदं निरस्तोनदोऽर्णवोयेनतं । तदपेक्षयागंभीरमितियावत् ॥ २ ॥ स० विपुलैर्नादैः लवणार्णवः चुक्षुभे फूत्कारेणोदककंपदर्शनाच्चलितोऽभूत् ॥ ४ ॥ ती० शङ्कांजनयतीव जनयत्येवेत्यर्थः ॥ ५ ॥ ति० प्राकारमधिरुह्येति । अनेनात्रावहारःसूचितः ॥ ८ ॥

[पा०] १ ङ. च. छ. झ. ट. महौजसां. २ ख. च. ङ. झ. ट. नर्दतां. ३ ङ. छ. झ. ट. वानराणामुपस्थितः. ४ ग. ङ. झ. ट. सुमहान्नादो. ५ ङ. झ. ट. लवणार्णवः. ६ ङ. झ. ट. एवंच. ७ ङ. च. झ. ज. ट. चवनौकसां ८ क. ख. ग. ङ. ज.—ट. महाभागौ.

तच्छ्रुत्वा वचनं तेषां राक्षसेन्द्रो महाबलः ॥ चिन्ताशोकसमाक्रान्तो विषण्णवदनोऽब्रवीत् ॥१४॥
घोरैर्दत्तवरैर्बद्धौ शरैराशीविषोपमैः ॥ अमोघैः सूर्यसंकाशैः प्रमथ्येन्द्रजिता युधि ॥ १५ ॥
तदस्त्रबन्धमासाद्य यदि मुक्तौ रिपू मम ॥ संशयस्थमिदं सर्वमनुपश्याम्यहं बलम् ॥ १६ ॥
निष्फलाः खलु संवृत्ताः शरा वासुकितेजसः ॥ आदत्तं यैः सुसंग्रामे रिपूणां मम जीवितम् ॥ १७ ॥
एवमुक्त्वा तु संक्रुद्धो निःश्वसन्नुरगो यथा ॥ अब्रवीद्राक्षसां मध्ये धूम्राक्षं नाम राक्षसम् ॥ १८ ॥
बलेन महता युक्तो रक्षसां भीमविक्रम ॥ त्वं वधायाभिनिर्याहि रामस्य सह वानरैः ॥ १९ ॥
एवमुक्तस्तु धूम्राक्षो राक्षसेन्द्रेण धीमता ॥ कृत्वा प्रणामं संहृष्टो निर्जगाम नृपालयात् ॥ २० ॥
अभिनिष्क्रम्य तद्द्वारं बलाध्यक्षमुवाच ह ॥ त्वरयस्व बलं तूर्णं किं चिरेण युयुत्सतः ॥ २१ ॥
धूम्राक्षवचनं श्रुत्वा बलाध्यक्षो बलानुगः ॥ बलमुद्योजयामास रावणस्याज्ञया द्रुतम् ॥ २२ ॥
ते बद्धघण्टा बलिनो घोररूपा निशाचराः ॥ विगर्जमानाः संहृष्टा धूम्राक्षं पर्यवारयन् ॥
विविधायुधहस्ताश्च शूलमुद्गरपाणयः ॥ २३ ॥
गदाभिः पट्टिशैर्दण्डैरायसैर्मुसलैर्भृशम् ॥ परिघैर्भिन्दिपालैश्च भल्लैः प्रासैः परश्वधैः ॥
निर्ययू राक्षसा दिग्भ्यो नर्दन्तो जलदा यथा ॥ २४ ॥
रथैः कवचिनस्त्वन्ये ध्वजैश्च समलङ्कृतैः ॥ सुवर्णजालविहितैः खरैश्च विविधाननैः ॥ २५ ॥
हयैः परमशीघ्रैश्च गजेन्द्रैश्च मदोत्कटैः ॥ निर्ययू राक्षसव्याघ्रा व्याघ्रा इव दुरासदाः ॥ २६ ॥
वृकसिंहमुखैर्युक्तं खरैः कनकभूषणैः ॥ आरुरोह रथं दिव्यं धूम्राक्षः खरनिःस्वनः ॥ २७ ॥
स निर्यातो महावीर्यो धूम्राक्षो राक्षसैर्वृतः ॥ प्रहसन्पश्चिमद्वारं हनूमान्यत्र यूथपः ॥
रथप्रवरमास्थाय खरयुक्तं खरस्वनम् ॥ २८ ॥
प्रयान्तं तु महाघोरं राक्षसं भीमविक्रमम् ॥ अन्तरिक्षगता घोराः शकुनाः प्रत्यवारयन् ॥ २९ ॥
रथशीर्षे महान्भीमो गृध्रश्च निपपात ह ॥ ध्वजाग्रे ग्रथिताश्चैव निपेतुः कुणपाशनाः ॥ ३० ॥

मानावित्यर्थः ॥ १३—१४ ॥ दत्तवरैः वरदत्तैः । प्रमथ्य बलात्कृत्य । बद्धौ अभूतामिति शेषः ॥ १५ ॥ संशयस्थं प्राणसंशयस्थं ॥ १६ ॥ आदत्तं आत्तं ॥ १७—१८ ॥ त्वं वधायाभिनिर्याहीत्यमङ्गलसूचकं वचः ॥ १९-२० ॥ द्वारमभिनिष्क्रम्य द्वारान्निष्क्रम्य । युयुत्सतः ममेतिशेषः । किं चिरेण किं विलम्बेन ॥ २१ ॥ रावणस्याज्ञया रावणाज्ञाकृतं धूम्राक्षवचनं श्रुत्वेत्यर्थः ॥ २२ ॥ बद्धघण्टाः शूरत्वज्ञापनाय कटि-बद्धघण्टा इत्यर्थः । ते पूर्वोक्तसेनास्थाः । विविधेति । आयुधानि शूलादिभिन्नानि । अस्यार्धस्य पूर्वेणान्वयः ॥ २३ ॥ गदाभिरित्यादि । गदा प्रसिद्धा । पट्टिशः दण्डविशेषः । परिघः भिन्दिपालः । भल्लः अयोमयः शरः । प्रासैः परश्वधैः । दिग्भ्यो जलदा इवेत्यन्वयः ॥ २४ ॥ अन्ये कवचिनः । ध्वजैः विविधाननैः खरैश्च समलङ्कृतै रथैर्निर्ययुः । अन्ये हयैः अन्ये गजैश्च निर्ययुरित्यन्वयः ॥ २५—२८ ॥ शकुनाः निमित्तसूचकाः पक्षिणः ॥२९॥ कुणपाशनाः गृध्राः ।

स० जीवितमादत्तं युद्धान्तरे ॥ १७ ॥ ती० बलेनेत्यस्यप्रकृतार्थःस्पष्टः । वस्तुतस्तुबलेनयुक्तस्सन् । रक्षसांच तवचेत्यध्याहार्य एकदैवरामस्यवानरैः रामसंबन्धिवानरैःवधायत्वमभिनिर्याहीतिसंबन्धः ॥ १९ ॥

[पा०] १ ङ. ञ. ट. चिन्तारोष. २ ख. ङ. च. ञ. ञ. विवर्णवदनोभवत्. ३ ङ. ञ. शराःपावकतेजसः. ४ ञ. राक्षसैर्भीमविक्रमः. ङ. राक्षसैर्भीमविक्रमैः. ५ ङ.—ट. परिक्रम्यततःशीघ्रंनिर्जगाम. ६ ङ. ञ. ट. भृशं. ७ ङ. र्लगुडैरपि. ८ ङ.—ट. घोरानर्दन्तो. ९ च. जालरचितैः. १० ङ.—ट. कनकभूषितैः. ११ ङ. ञ. ट. हसन्वैपश्चिमद्वाराद्धनूमान्यत्र-तिष्ठति. च. प्रययौपश्चिमद्वारात्. १२ क. ख. ग. ङ. छ. ञ. ञ. ट. भीमदर्शनं. १३ ङ.—ट. प्रत्यषेधयन्.

रुधिरार्द्रो महाञ्श्वेतः कबन्धः पतितो भुवि ॥ विस्वरं चोत्सृजन्नादं धूम्राक्षस्य समीपतः ॥ ३१ ॥
ववर्ष रुधिरं देवः संचचाल च मेदिनी ॥ प्रतिलोमं ववौ वायुर्निर्घातसमनिःस्वनः ॥ ३२ ॥
तिमिरौघावृतास्तत्र दिशश्च न चकाशिरे ॥ ३३ ॥
स तूत्पातांस्तदा दृष्ट्वा राक्षसानां भयावहान् ॥ प्रादुर्भूतान्सुघोरांश्च धूम्राक्षो व्यथितोऽभवत् ॥३४॥
मुमुहू राक्षसाः सर्वे धूम्राक्षस्य पुरःसराः ॥ ३५ ॥

ततः सुभीमो बहुभिर्निशाचरैर्वृतोभिनिष्क्रम्य रणोत्सुको बली ॥
ददर्श तां राघववाहुपालितां महौघकल्पां बहुवानरीं चमूम् ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

द्विपञ्चाशः सर्गः ॥ ५२ ॥

धूम्राक्षसेनाभिस्सह वानराणांमहायुद्धम् ॥ १ ॥ हनुमता गिरिशृङ्गेणधूम्राक्षहननम् ॥ २ ॥

धूम्राक्षं प्रेक्ष्य निर्यान्तं राक्षसं भीमविक्रमम् ॥ विनेदुर्वानराः सर्वे प्रहृष्टा युद्धकाङ्क्षिणः ॥ १ ॥
तेषां सुतुमुलं युद्धं संजज्ञे हरिरक्षसाम् ॥ अन्योन्यं पादपैर्घोरं निघ्नतां शूलमुद्गरैः ॥ २ ॥
घोरैश्च परिघैश्चित्रैस्त्रिशूलैश्चापि संहतैः ॥ राक्षसैर्वानरा घोरैर्विनिकृत्ताः समन्ततः ॥ ३ ॥
वानरै राक्षसाश्चापि द्रुमैर्भूमौ समीकृताः ॥ राक्षसाश्चापि संक्रुद्धा वानरान्निशितैः शरैः ॥
विव्यधुर्घोरसंकाशैः कङ्कपत्रैरजिह्मगैः ॥ ४ ॥
ते गदाभिश्च भीमाभिः पट्टिशैः कूटमुद्गरैः ॥ विदार्यमाणा रक्षोभिर्वानरास्ते महाबलाः ॥
अमर्षाज्जनितोद्वर्षाश्चक्रुः कर्माण्यभीतवत् ॥ ५ ॥
शरनिर्भिन्नगात्रास्ते शूलनिर्भिन्नदेहिनः ॥ जगृहुस्ते द्रुमांस्तत्र शिलाश्च हरियूथपाः ॥ ६ ॥
ते भीमवेगा हरयो नर्दमानास्ततस्ततः ॥ ममन्थू राक्षसान्भीमान्नामानि च बभाषिरे ॥ ७ ॥
तद्बभूवाद्भुतं घोरं युद्धं वानररक्षसाम् ॥ शिलाभिर्विविधाभिश्च बहुभिश्चैव पादपैः ॥ ८ ॥

ग्रथिताः मिलिताः ॥ ३० ॥ विस्वरमिति क्रियाविशेषणं ॥ ३१ ॥ देवः पर्जन्यः । प्रतिलोमं प्रतिकूलं ॥ ३२—३४ ॥ मुमुहुरित्यर्धं ॥ पुरःसराः अग्रगाः ॥३५॥ अभिनिष्क्रम्य पुरादिति शेषः । महौघकल्पां महानोघो अस्मिन्निति महौघः सागरः तत्कल्पां । बहुवानरीं जीवत्वार्षः । द्वितीयायां प्रातर्धूम्राक्षनिर्गमः ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥

अथ धूम्राक्षवधो द्विपञ्चाशे—धूम्राक्षमित्यादि ॥ १—२ ॥ संहतैः संगतैः । राक्षसविशेषणमेतत् ॥ ३ ॥ समीकृताः पातिताः । घोरसंकाशैः घोरकालाग्न्यादितुल्यैः । अजिह्मगैः अवक्रगैः । कङ्कपत्रैः कङ्कपत्राण्येव पत्राणि येषां ते कङ्कपत्राः तैः ॥४॥ जनितोद्वर्षाः जनितोत्साहाः ॥५॥ शूलनिर्भिन्नदेहिनः । कर्मधारयादिनिरार्षः ॥ ६ ॥ नामानि स्वनामानि

स० वानराणांसंहतिर्वानरी । " तस्यसमूहः " इत्यण् । बह्वीचसावानरीच बहुवानरी । तां तद्रूपांचमूं । " अनुदात्तादेः " इत्यञ्वाप्रत्ययः । तेन न—'वृद्धाच्छः' इत्यनेनछप्रत्ययः ॥ ३६ ॥ इत्येकपञ्चाशःसर्गः ॥ ५१ ॥

[पा०] १ ङ. झ. ट. न्नादान्धूम्राक्षस्यनिपातितः. २ ख. च. छ. समुद्रकल्पां. ३ क. ज. भुविवानरीं. ४ ग. संशितैः. ५ झ. भूमिसमीकृताः. ६ क. ग. च.—ट. राक्षसास्त्वभि. ७ ख. च. छ. ञ. नर्दमानास्समन्ततः. ८ ङ. छ. झ. ञ. ट. न्वीरान्नामानि. ९ ङ.—ञ. बहुशाखैश्च.

राक्षसा मथिताः केचिद्वानरैर्जितकाशिभिः ॥ [1]ववमू रुधिरं केचिन्मुखै रुधिरभोजनाः ॥ ९ ॥
पार्श्वेषु दारिताः केचित्केचिद्राशीकृता द्रुमैः ॥ शिलाभिश्चूर्णिताः केचित्केचिद्दन्तैर्विदारिताः ॥१०॥
ध्वजैर्विमथितैर्भग्नैः [2]खैरश्च विनिपातितैः ॥ [3]रथैर्विध्वंसितैश्चापि पतितै रजनीचरैः ॥ ११ ॥
गजेन्द्रैः पर्वताकारैः पर्वताग्रैर्वनौकसाम् ॥ मथितैर्वाजिभिः कीर्णं सारोहैर्वसुधातलम् ॥ १२ ॥
वानरैर्भीमविक्रान्तैराप्लुत्याप्लुत्य वेगितैः ॥ राक्षसाः करजैस्तीक्ष्णैर्मुखेषु विनिकर्तिताः ॥ १३ ॥
विवर्णवदना भूयो विप्रकीर्णशिरोरुहाः ॥ मूढाः शोणितगन्धेन निपेतुर्धरणीतले ॥ १४ ॥
अन्ये परमसंक्रुद्धा राक्षसा भीमनिःस्वनाः ॥ तलैरेवाभिधावन्ति वज्रस्पर्शसमैर्हरीन् ॥ १५ ॥
वानरैरापतन्तस्ते वेगिता वेगवत्तरैः ॥ मुष्टिभिश्चरणैर्दन्तैः पादपैश्चावपोथिताः ॥
वानरैर्हन्यमानास्ते राक्षसा विप्रदुद्रुवुः ॥ १६ ॥
सैन्यं तु विद्रुतं दृष्ट्वा धूम्राक्षो राक्षसर्षभः ॥ [4]क्रोधेन कदनं चक्रे वानराणां युयुत्सताम् ॥ १७ ॥
प्रासैः प्रमथिताः केचिद्वानराः शोणितस्रवाः ॥ मुद्गरैराहताः केचित्पतिता धरणीतले ॥ १८ ॥
परिघैर्मथिताः केचिद्भिन्दिपालैर्विदारिताः ॥ पट्टिशैराहताः केचिद्विह्वलन्तो गतासवः ॥ १९ ॥
केचिद्विनिहताः शूलै रुधिरार्द्रा वनौकसः ॥ केचिद्विद्राविता नष्टाः सबलै राक्षसैर्युधि ॥ २० ॥
विभिन्नहृदयाः केचिदेकपार्श्वेन दारिताः ॥ विदारितास्त्रिशूलैश्च केचिदान्त्रैर्विनिस्सृताः ॥ २१ ॥
तत्सुभीमं महायुद्धं हरिराक्षससंकुलम् ॥ प्रबभौ शब्दबहुलं शिलापादपसंकुलम् ॥ २२ ॥
धनुर्ज्यातन्त्रिमधुरं हिक्कातालसमन्वितम् ॥ मन्दस्तनितसंगीतं युद्धगान्धर्वमाबभौ ॥ २३ ॥
धूम्राक्षस्तु धनुष्पाणिर्वानरान्रणमूर्धनि ॥ हसन्विद्रावयामास दिशस्तु शरवृष्टिभिः ॥ २४ ॥
धूम्राक्षेणार्दितं सैन्यं व्यथितं दृश्य मारुतिः ॥ अभ्यवर्तत संक्रुद्धः प्रगृह्य विपुलां शिलाम् ॥२५॥
क्रोधाद्विगुणताम्राक्षः पितृतुल्यपराक्रमः ॥ शिलां तां पातयामास धूम्राक्षस्य रथं प्रति ॥ २६ ॥

॥७–११॥ वनौकसां पर्वताग्रैः वानरप्रेरितपर्वताग्रैः । तैर्मथितैः गजेन्द्रैः । सारोहैः साधिष्ठातृभिः । वसुधातलं कीर्णमभूत् ॥ १२ ॥ भीमविक्रान्तैः भीमविक्रमैः । वेगितैः संजातवेगैः । वानरैः कर्तृभिः । करजैः नखैः करणैः । आक्रम्याक्रम्य मुखेषु विनिकर्तिताः खण्डिताः । मूढाः मूर्च्छिताः ॥ १३–१४ ॥ तलैरेवाभिधावन्ति । हस्ततलान्येवायुधस्थाने कृत्वा अभ्यधावन्नित्यर्थः ॥ १५ ॥ अवपोथिताः हिंसिताः । "व्यथ हिंसायां" इति धातुः ॥१६॥ कदनं हिंसनं ॥१७॥ प्रासैरित्यादिचतुःश्लोकी॥ विह्वलन्तः विवशाः। गतासवः अभवन्निति शेषः । आन्त्रैर्विनिःसृताः विनिःसृतान्त्रा इत्यर्थः॥ १८—२२ ॥ तन्त्री वीणा । आर्षो ह्रस्वः । तया मधुरं रम्यं । हिक्का । विरम्य विरम्य कण्ठात्पवनोद्गमः । मन्दस्तनितं अशक्त्या मन्दभाषणं । तदेव संगीतं सम्यग्गानं यस्मिन् तत् तथोक्तं । युद्धगान्धर्वं युद्धसंगीतं । संगीतं नृत्तगीतवाद्यं ॥२३॥ दिशः दिशः प्रति ॥ २४ ॥ व्यथितं दुःखितं । दृश्य दृष्ट्वा । मारुतिः हनुमान् ॥ २५ ॥ पिता वायुः

ति० द्रुमैः राशीकृताः द्रुमप्रहारैर्हत्वाराशीकृताइत्यर्थः । स० द्रुमैःराशीकृताः हत्वाहत्वासंमार्जनकार्यविनियुक्तैर्द्रुमैः ॥ १० ॥
कतक० आन्त्राणि पुरीततः ॥ २१ ॥ स० धनुर्ज्या धनुर्गुणः सैवतन्त्रिः तन्त्री वीणा । संज्ञात्वात् 'ङ्याप्नोःसंज्ञा—'इति ह्रस्वः । हिक्का हेषा तद्रूपतालयुक्तमितिनागोजिभट्टः । हिक्का ऊर्ध्ववातप्रवर्तितशब्दविशेषः । 'सारिकाहिक्के'त्यमरव्याख्यायां 'हिक्कअव्यक्तेशब्दे' 'गुरोश्चे'त्यकारप्रत्ययः । ऊर्ध्ववातप्रयुक्तशब्दविशेषइत्युक्तेः । मन्दस्तनितगीतं मन्दाः गजविशेषाः । तत्स्तनितरूपगीतं । "मन्दःखरगजजातिप्रभेदयोः" इतिविश्वः॥ २३ ॥

[पा०] १ ङ. छ. झ. ञ. ट. प्रवेमूरुधिरं. ग. ववर्षूरुधिरं. २ ङ.—ट. खड्गैश्च. ३ क. ख. ङ.—ञ. विध्वंसिताः केचिद्व्यथितारजनीचराः. ४ च. छ. झ. ञ. विनिदारिताः. ५ ग. ङ.—ट. भीमविक्रमाः. ६ ङ. च. छ. झ. ट. रोषेण. क. कोपेन. ७ क. च. झ. ञ. हताभूमौ.

आपतन्तीं शिलां दृष्ट्वा गदामुद्यम्य संभ्रमात् ॥ रथादाप्लुत्य वेगेन वसुधायां व्यतिष्ठत ॥ २७ ॥
सा प्रमथ्य रथं तस्य निपपात शिला भुवि ॥ सचक्रकूबरं साश्वं सध्वजं सशरासनम् ॥ २८ ॥
स भङ्क्त्वा तु रथं तस्य हनुमान्मारुतात्मजः ॥ रक्षसां कदनं चक्रे सस्कन्धविटपैर्द्रुमैः ॥ २९ ॥
विभिन्नशिरसो भूत्वा राक्षसाः शोणितोक्षिताः ॥ द्रुमैः प्रव्यथिताश्चान्ये निपेतुर्धरणीतले ॥ ३० ॥
विद्राव्य राक्षसं सैन्यं हनुमान्मारुतात्मजः ॥ गिरेः शिखरमादाय धूम्राक्षमभिदुद्रुवे ॥ ३१ ॥
तमापतन्तं धूम्राक्षो गदामुद्यम्य वीर्यवान् ॥ विनर्दमानः सहसा हनुमन्तमभिद्रवत् ॥ ३२ ॥
ततः क्रुद्धस्तु वेगेन गदां तां बहुकण्टकाम् ॥ पातयामास धूम्राक्षो मस्तके तु हनूमतः ॥ ३३ ॥
ताडितः स तया तत्र गदया भीमरूपया ॥ ३४ ॥
स कपिर्मारुतबलस्तं प्रहारमचिन्तयन् ॥ धूम्राक्षस्य शिरोमध्ये गिरिशृङ्गमपातयत् ॥ ३५ ॥
स विह्वलितसर्वाङ्गो गिरिशृङ्गेण ताडितः ॥ पपात सहसा भूमौ विकीर्ण इव पर्वतः ॥ ३६ ॥
धूम्राक्षं निहतं दृष्ट्वा हतशेषा निशाचराः ॥ त्रस्ताः प्रविविशुर्लङ्कां वध्यमानाः प्लवङ्गमैः ॥ ३७ ॥
स तु पवनसुतो निहत्य शत्रुं क्षतजवहाः सरितश्च संनिकीर्य ॥
रिपुवधजनितश्रमो महात्मा मुदमगमत्कपिभिश्च पूज्यमानः ॥ ३८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

त्रिपञ्चाशः सर्गः ॥ ५३ ॥

रावणाज्ञया ससैन्येनवज्रदंष्ट्रेण रणायाङ्गदाधिष्ठितदक्षिणद्वारगमनम् ॥ १ ॥ अङ्गदवज्रदंष्ट्रयो राक्षसवानरसेनाभ्यां सैन्ययोः परस्परंच युद्धम् ॥ २ ॥

धूम्राक्षं निहतं श्रुत्वा रावणो राक्षसेश्वरः ॥ क्रोधेन महताऽऽविष्टो निश्वसन्नुरगो यथा ॥ १ ॥
दीर्घमुष्णं विनिश्वस्य क्रोधेन कलुषीकृतः ॥ अब्रवीद्राक्षसं शूरं वज्रदंष्ट्रं महाबलम् ॥ २ ॥
गच्छ त्वं वीर निर्याहि राक्षसैः परिवारितः ॥ जहि दाशरथिं रामं सुग्रीवं वानरैः सह ॥ ३ ॥

॥ २६—२७ ॥ कूबरः युगंधरः । " कूबरस्तु युगंधरः " इत्यमरः ॥ २८—३१ ॥ अभिद्रवत् अभ्यद्रवत् । आगमशासनस्यानित्यत्वादडभावः ॥ ३२ ॥ बहुकण्टकां बहुकीलां ॥ ३३ ॥ ताडितः आसीदिति शेषः ॥ ३४—३५ ॥ विह्वलितानि विवशीकृतानि ॥ ३६—३७ ॥ वहन्तीति वहाः क्षतजस्यवहाः क्षतजवहाः । सन्निकीर्य उत्सार्येत्यर्थः । द्वितीयायां धूम्राक्षवधः ॥ ३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

अथ वज्रदंष्ट्रयुद्धं त्रिपञ्चाशे—धूम्राक्षमित्यादि ॥ आविष्टः अभूदिति शेषः ॥ १—२ ॥ गच्छ त्वं वीर निर्याहीति ॥ इतो गच्छ पुरान्निर्याहीत्यर्थः ॥ ३ ॥

ति० धूम्रक्षवधोभाद्रशुक्लद्वितीयायामित्याहुः । स० रिपुवधजनितश्रमः वधश्च जनितश्रमश्च तौ । रिपूणांवधजनितश्रमौयेन सतथा । स्थितानांवधः । विद्रुतानांचश्रमइतिविवेकः ॥ ३८ ॥ द्विपञ्चाशःसर्गः ॥ ५२ ॥

ति० गच्छनिर्याहीत्याभ्यांसर्वथागन्तव्यमितिबोध्यते ॥ ३ ॥

[पा०] १ ङ. ञ. ट. सचक्रकूबरमुखंसध्वजं. २ ङ. च. झ. ञ. ट. तस्यक्रुद्धस्यरोषेण. ३ ङ. च. झ. ञ. ट. विस्फारित. ४ क. ख. ग. ङ.—ट. शत्रून्क्षतज. ५ घ. संनिपत्य. ६ क. ख. घ. ङ. च. झ. ञ. ट. कपिभिस्सुपूज्य. ७ क. ग. राक्षसेन्द्रोनिशाचरः. ८ ङ. च. झ. ञ. ट. क्रूरं.

तथेत्युक्त्वा द्रुततरं मायावी राक्षसेश्वरः ॥ निर्जगाम बलैः सार्धं बहुभिः परिवारितः ॥ ४ ॥
नागैरश्वैः खरैरुष्ट्रैः संयुक्तः सुसमाहितः ॥ पताकाध्वजचित्रैश्च रथैश्च समलङ्कृतः ॥ ५ ॥
ततो विचित्रकेयूरमुकुटैश्च विभूषितः ॥ तनुत्राणि च संरुध्य सधनुर्निर्ययौ द्रुतम् ॥ ६ ॥
पताकालङ्कृतं दीप्तं तप्तकाञ्चनभूषणम् ॥ रथं प्रदक्षिणं कृत्वा समारोहच्चमूपतिः ॥ ७ ॥
यष्टिभिस्तोमरैश्चित्रैः शूलैश्च मुसलैरपि ॥ भिन्दिपालैश्च पाशैश्च शक्तिभिः पट्टिशैरपि ॥ ८ ॥
खड्गैश्चक्रैर्गदाभिश्च निशितैश्च परश्वधैः ॥ पदातयश्च निर्यान्ति विविधाः शस्त्रपाणयः ॥
विचित्रवाससः सर्वे दीप्ता राक्षसपुङ्गवाः ॥ ९ ॥
गजा मदोत्कटाः शूराश्चलन्त इव पर्वताः ॥ ते युद्धकुशलै रूढास्तोमराङ्कुशपाणिभिः ॥ १० ॥
अन्ये लक्षणसंयुक्ताः शूरा रूढा महाबलाः ॥ [अश्वाः परिपतन्तिस्म राक्षसैश्च प्रचोदिताः ॥११॥]
तद्राक्षसबलं घोरं विप्रस्थितमशोभत ॥ प्रावृट्काले यथा मेघा नर्दमानाः सविद्युतः ॥ १२ ॥
निःसृता दक्षिणद्वारादङ्गदो यत्र यूथपः ॥ तेषां निष्क्रममाणानामशुभं समजायत ॥ १३ ॥
आकाशाद्विघनात्तीव्रा उल्काश्चाभ्यपतंस्तदा ॥ वमन्त्यः पावकज्वालाः शिवा घोरं ववाशिरे ॥१४॥
व्याहरन्ति मृगा घोरा रक्षसां निधनं तदा ॥ समापतन्तो योधास्तु प्रास्खलन्भयमोहिताः ॥ १५ ॥
एतानौत्पातिकान्दृष्ट्वा वज्रदंष्ट्रो महाबलः ॥ धैर्यमालम्ब्य तेजस्वी निर्जगाम रणोत्सुकः ॥ १६ ॥
तांस्तु निष्क्रमतो दृष्ट्वा वानरा जितकाशिनः ॥ प्रणेदुः सुमहानादान्पूरयंश्च दिशो दश ॥ १७ ॥
ततः प्रवृत्तं तुमुलं हरीणां राक्षसैः सह ॥ घोराणां भीमरूपाणामन्योन्यवधकाङ्क्षिणाम् ॥ १८ ॥
निष्पतन्तो महोत्साहा भिन्नदेहशिरोधराः ॥ रुधिरोक्षितसर्वाङ्गा न्यपतञ्जगतीतले ॥ १९ ॥
केचिदन्योन्यमासाद्य शूराः परिघपाणयः ॥ चिक्षिपुर्विविधं शस्त्रं समरेष्वनिवर्तिनः ॥ २० ॥
द्रुमाणां च शिलानां च शस्त्राणां चापि निस्स्वनः ॥ श्रूयते सुमहांस्तत्र घोरो हृदयभेदनः ॥२१॥
रथनेमिस्वनस्तत्र धनुषश्चापि निस्स्वनः ॥ शङ्खभेरीमृदङ्गानां बभूव तुमुलः स्वनः ॥ २२ ॥
केचिदस्त्राणि संसृज्य बाहुयुद्धमकुर्वत ॥ २३ ॥
तलैश्च चरणैश्चापि मुष्टिभिश्च द्रुमैरपि ॥ जानुभिश्च हताः केचिद्भिन्नदेहाश्च राक्षसाः ॥
शिलाभिश्चूर्णिताः केचिद्वानरैर्युद्धदुर्मदैः ॥ २४ ॥

बहुभिः बलाध्यक्षैरिति शेषः ॥४॥ रथैरित्यस्य संयुक्त इत्यनेनान्वयः । समलंकृतः चन्दनकुसुमादिभिरलङ्कृतः । तनुत्राणि कवचतलत्रकण्ठत्रशिरस्त्राणानि । संरुध्य संबध्य धृत्वेत्यर्थः ॥५—७॥ यष्टिभिरित्यादिसार्धश्लोकद्वयं ॥ ८—९ ॥ गजा इति । अत्र निर्यान्तीत्यनुषज्यते । गजानेव विशिनष्टि—ते युद्धेत्यादिना । तोमराङ्कुशपाणिभिः यन्तृभिः । रूढाः आरूढा इत्यर्थः ॥ १० ॥ अन्ये लक्षणसंयुक्ता इति ॥ अत्रापि गजा निर्यान्तीत्यनुषङ्गः ॥ ११—१३ ॥ विघनात् घनशून्यात् ॥ १४—१५ ॥ औत्पातिकान् अशुभसूचकान् ॥ १६ ॥ पूरयन् अपूरयंश्चेत्यर्थः । केचित्तु पूरयन् पूरयन्त इत्यर्थः, वचनव्यत्यय आर्ष इत्याहुः ॥ १७ ॥ तुमुलं रणसङ्कुलं । " तुमुलं रणसङ्कुले " इत्यमरः ॥ १८—२२ ॥ अस्त्राणि संसृज्य सर्वाण्यस्त्राणि प्रयुज्य । तदनन्तरमस्त्राभावात् बाहु-

[पा०] १ ङ.—ट. बहुभिःसमलंकृतः. २ क. ख. घ.—ट. चापैश्च. ३ क.—ट. कुशलारूढाः. ४ ख. लक्षणसंश्लिष्टाः. ५ क. ग. महाजवाः. ६ इदमर्धं च. पाटेदृश्यते. ७ ङ. झ. सर्वे. ८ च. छ. समन्ततः. ९ ग. झ. ञ. ट. त्तीव्रादुडुमुकान्यपतंस्तदा. १० च.—ट. घोरावाशिरे. ११ ख.—ट. प्रास्खलंस्तत्रदारुणं. १२ ङ. झ. ट. विद्रवतो. १३ ङ. झ. ट. विविधाञ्शस्त्रान्. १४ च. ञ. ट. स्तत्रसागरस्वचघोषवत्. ङ. झ. स्तत्रधनुषश्चापिघोषवत्. १५ ङ. झ. ट. संसृज्य. १६ ङ.—ट. द्भग्नदेहाश्च.

वज्रदंष्ट्रो भृशं बाणै रणे वित्रासयन्हरीन् ॥ चचार लोकसंहारे पाशहस्त इवान्तकः ॥ २५ ॥
बलवन्तोऽस्त्रविदुषो नानाप्रहरणा रणे ॥ जघ्नुर्वानरसैन्यानि राक्षसाः क्रोधमूर्च्छिताः ॥ २६ ॥
निघ्नतो राक्षसान्दृष्ट्वा सर्वान्वालिसुतो रणे ॥ क्रोधेन द्विगुणाविष्टः संवर्तक इवानलः ॥ २७ ॥
तान्राक्षसगणान्सर्वान्वृक्षमुद्यम्य वीर्यवान् ॥ अङ्गदः क्रोधताम्राक्षः सिंहः क्षुद्रमृगानिव ॥
चकार कदनं घोरं शक्रतुल्यपराक्रमः ॥ २८ ॥
अङ्गदाभिहतास्तत्र राक्षसा भीमविक्रमाः ॥ विभिन्नशिरसः पेतुर्विकृत्ता इव पादपाः ॥ २९ ॥
रथैरश्वैर्ध्वजैश्छत्रैः शरीरैर्हरिरक्षसाम् ॥ रुधिरेण च संछन्ना भूमिर्भयकरी तदा ॥ ३० ॥
हारकेयूरवस्त्रैश्च शस्त्रैश्च समलङ्कृता ॥ भूमिर्भाति रणे तत्र शारदीव यथा निशा ॥ ३१ ॥
अङ्गदस्य च वेगेन तद्राक्षसबलं महत् ॥ प्राकम्पत तदा तत्र पवनेनाम्बुदो यथा ॥ ३२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुःपञ्चाशः सर्गः ॥ ५४ ॥

अङ्गदेनवज्रदंष्ट्रवधः ॥ १ ॥

बलस्य च निघातेन अङ्गदस्य जयेन च ॥ राक्षसः क्रोधमाविष्टो वज्रदंष्ट्रो महाबलः ॥ १ ॥
स विस्फार्य धनुर्घोरं शक्राशनिसमस्वनम् ॥ वानराणामनीकानि प्राकिरच्छरवृष्टिभिः ॥ २ ॥
राक्षसाश्चापि मुख्यास्ते रथेषु समवस्थिताः ॥ नानाप्रहरणाः शूराः प्रायुध्यन्त तदा रणे ॥ ३ ॥
वानराणां तु शूरा ये सर्वे ते प्लवगर्षभाः ॥ आयुध्यन्त शिलाहस्ताः समवेताः समन्ततः ॥ ४ ॥
तत्रायुधसहस्राणि तस्मिन्नायोधने भृशम् ॥ राक्षसाः कपिमुख्येषु पातयांचक्रिरे तदा ॥ ५ ॥
वानराश्चापि रक्षस्सु गिरीन्वृक्षान्महाशिलाः ॥ प्रवीराः पातयामासुर्मत्तवारणसन्निभाः ॥ ६ ॥
शूराणां युध्यमानानां समरेष्वनिवर्तिनाम् ॥ तद्राक्षसगणानां च सुयुद्धं समवर्तत ॥ ७ ॥

युद्धमकुर्वतेत्यर्थः ॥ २३—२५ ॥ अस्त्रविदुषः अस्त्रविद्वांसः । प्रथमार्थे द्वितीया ॥ २६ ॥ निघ्नत इत्यादिश्लोकद्वयमेकान्वयं ॥ संवर्तके प्रलयकाले । तान्राक्षसगणानित्यत्र निजघानेति विपरिणामः ॥ २७—३० ॥ शारदीव यथा निशेत्यत्र इव शब्दयथाशब्दावेकार्थकौ अपिचेतिवत् । इवशब्दः पादपूरण इत्येके ॥ ३१—३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

अथ वज्रदंष्ट्रवधश्चतुःपञ्चाशे—बलस्य चेत्यादिश्लोकद्वयमेकान्वयं ॥ १—३ ॥ वानराणामिति । निर्धारणे षष्ठी ॥ ४ ॥ तत्र कपिमुख्येष्वित्यन्वयः । आयोधने युद्धे ॥ ५—६ ॥ तद्राक्षसगणानां चेति ।

ति० वज्रदंष्ट्रोऽथतंदृष्ट्वा स्वसेनाविनाशमित्यर्थः । स० लोकसंहारे लोकसंहारार्थं । "चर्मणिद्वीपिनंहन्ति" इतिवत् ॥ २५ ॥ स० द्विगुणंयथातथाआविष्टः द्विगुणाविष्टः । क्रोधेनद्विगुणाविष्टः द्विगुणक्रोधाविष्टइतिफलितोर्थः ॥ २७ ॥ ति० पवनेनांबुदो यथेत्युत्तरंसर्गच्छेदः । क्वचित्कोयुक्तोवृत्तभेदप्रकरणभेदाद्यभावादितिकतकः ॥ ३२ ॥ इतित्रिपञ्चाशःसर्गः ॥ ५३ ॥

स० वानराणांमध्येऽवगर्षभाः प्लवेनगच्छन्तिये तेतथा । तेषुश्रेष्ठाः । द्रुतगतिमच्छ्रेष्ठाइतियावत् ॥ ४ ॥

[पा०] १ ब. वज्रदंष्ट्रोमहावीरोरणे. ङ. झ. वज्रदंष्ट्रोथतंदृष्ट्वा. घ. च. छ. वज्रदंष्ट्रोमहावाणैः. २ ङ. च. झ. जघ्नेतान्राक्षसान्सर्वान्वृष्टोवायुसुतोरणे. ३ घ. सराक्षस. ४ ख. घ. मुत्पाद्य. ५ च. छ. ञ. वेगवान्. ६ क. ख. ग. ङ.—ट. पेतुर्निकृत्ताइव. ७ ङ. झ. ट. रुधिरौघेण. ८ च. संपन्ना. ९ ङ. झ. ट. छत्रैश्च. १० खबलस्यचघातेन. ज. खबलस्यनिघातेन. ११ च. झ. ञ. ट. बलेनच. १२ क. ङ.—ट. समप्रभं. १३ क. ग.—ट. रथैश्च. १४ छ. समुपास्थिताः.

[1]प्रभिन्नशिरसः केचिद्भिन्नैः पादैश्च बाहुभिः ॥ शस्त्रैरर्पितदेहास्तु रुधिरेण समुक्षिताः ॥ ८ ॥
[2]हरयो राक्षसाश्चैव [3]शेरते गां समाश्रिताः ॥ कङ्कगृध्रबलैराढ्या गोमायुगणसंकुलाः ॥ ९ ॥
कबन्धानि समुत्पेतुर्भीरूणां भीषणानि वै ॥ १० ॥
भुजपाणिशिरश्छिन्नाश्छिन्नकायाश्च भूतले ॥ वानरा राक्षसाश्चापि निपेतुस्तत्र वै रणे ॥ ११ ॥
ततो वानरसैन्येन हन्यमानं निशाचरम् ॥ प्राभज्यत बलं सर्वं वज्रदंष्ट्रस्य पश्यतः ॥ १२ ॥
राक्षसान्भयवित्रस्तान्हन्यमानान्प्लवङ्गमैः ॥ दृष्ट्वा स रोषताम्राक्षो वज्रदंष्ट्रः प्रतापवान् ॥ १३ ॥
प्रविवेश धनुष्पाणिस्त्रासयन्हरिवाहिनीम् ॥ शरैर्विदारयामास कङ्कपत्रैरजिह्मगैः ॥ १४ ॥
विभेद वानरांस्तत्र सप्ताष्टौ नव पञ्च च ॥ विव्याध परमक्रुद्धो वज्रदंष्ट्रः प्रतापवान् ॥ १५ ॥
त्रस्ताः सर्वे हरिगणाः शरैः [4]संकृत्तकन्धराः ॥ अङ्गदं संप्रधावन्ति प्रजापतिमिव प्रजाः ॥ १६ ॥
ततो हरिगणान्भग्नान्दृष्ट्वा वालिसुतस्तदा ॥ क्रोधेन वज्रदंष्ट्रं तमुदीक्षन्तमुदैक्षत ॥ १७ ॥
वज्रदंष्ट्रोऽङ्गदश्चोभौ संगतौ हरिराक्षसौ ॥ चेरतुः परमक्रुद्धौ हरिमत्तगजाविव ॥ १८ ॥
ततः शरसहस्रेण वालिपुत्रं महाबलः ॥ जघान मर्मदेशेषु मातङ्गमिव तोमरैः ॥ १९ ॥
रुधिरोक्षितसर्वाङ्गो वालिसूनुर्महाबलः ॥ चिक्षेप वज्रदंष्ट्राय वृक्षं भीमपराक्रमः ॥ २० ॥
दृष्ट्वा पतन्तं तं वृक्षमसंभ्रान्तश्च राक्षसः ॥ चिच्छेद [5]बहुधा सोपि निकृत्तः [6]पतितो भुवि ॥ २१ ॥
तं दृष्ट्वा वज्रदंष्ट्रस्य विक्रमं प्लवगर्षभः ॥ प्रगृह्य विपुलं शैलं चिक्षेप च ननाद च ॥ २२ ॥
समापतन्तं तं दृष्ट्वा रथादाप्लुत्य वीर्यवान् ॥ गदापाणिरसंभ्रान्तः पृथिव्यां समतिष्ठत ॥ २३ ॥
[7]साङ्गदेन [8]गदाऽऽक्षिप्ता गत्वा तु रणमूर्धनि ॥ स चक्रकूबरं साश्वं प्रममाथ रथं तदा ॥ २४ ॥
ततोऽन्यं गिरिमाक्षिप्य विपुलं द्रुमभूषितम् ॥ वज्रदंष्ट्रस्य शिरसि पातयामास सोङ्गदः ॥ २५ ॥
अभवच्छोणितोद्गारी वज्रदंष्ट्रः स मूर्च्छितः ॥ मुहूर्तमभवन्मूढो गदामालिङ्ग्य निःश्वसन् ॥ २६ ॥

ते च राक्षसगणाश्च तद्राक्षसगणाः तेषां । तच्छब्देन वानरा उच्यन्ते । युध्यमानानां सुयुद्धं समवर्ततेत्यनेन उत्तरोत्तरयुद्धाधिक्यमुच्यते ॥ ७ ॥ पादैश्च बाहुभिरित्युपलक्षणे तृतीया । अर्पितदेहाः आरोपितदेहाः । गां भूमिं । कङ्कः अवटः स च श्येनविशेषः । गृध्रः दूरदर्शी । बलः श्येनविशेषः काकश्च तैराढ्याः व्याप्ताः ॥ ८—९ ॥ कबन्धानीत्यर्धं ॥१०॥ पुनः केषांचित्पतनमाह—भुजेति ॥ भुजपाणिशिरस्सु छिन्नाः छिन्नकायाः छिन्नमध्यकायाः ॥ ११ ॥ निशाचरं निशाचरसंबन्धि । अण्वृद्ध्यभाव आर्षः । यद्वा निशायां चरतीति योगमात्रविवक्षा ॥ १२ ॥ भयवित्रस्तान भयहेतुभ्यो वित्रस्तान् ॥ १३—१४ ॥ सप्ताष्टौ नव पञ्च चेति एकैकप्रयोगेणेति शेषः ॥ १५—१६ ॥ हरिमत्तगजौ सिंहमत्तगजौ ॥ १८—२३ ॥ सा वज्रदंष्ट्रधृता गदा । आक्षिप्ता अपहृता सः अङ्गदक्षिप्तशैलः ॥ २४—२५ ॥ शोणितोद्गारी रक्तोद्गारी ।

स० बलाः काकाः । "बलोबलिनिवायसे" इतिविश्वः ॥ ९ ॥ **शि०** तत्प्रकारमाह—बिभेदेति । तत्र एकैकबाणप्रक्षेपंसप्ताद्यन्यतमान् एकोनविंशत्संख्याकान्बाबिभेद । अर्धं पृथक् ॥ १५ ॥ **रामानु०** उदीक्षन्तं उदीक्षमाणं ॥ १७ ॥ **कतक०** हरिमत्तगजाविव । हरिरिहशार्दूलः । सिंहेनगजस्ययुद्धासंभवात् । स्वप्नेपिसिंहदर्शनेनगजानांमरणात् । **स०** योयुध्येते पुनः पुनर्युद्धमकुरुतां । हरिः सिंहः । अभूतोपमेयं । हरिःसिंहशावः । मत्तइति गजस्यतेनसहयोधनेअङ्गविस्मृतिःसूच्यतइतिवा । यद्वा 'यद्गन्धमात्राद्धरयोगजेन्द्राः' इतिभागवतोक्तेःविलक्षणगजानांहरिभिर्युद्धंसंभावितमित्युक्तिःसंभवति । हरिःशार्दूलइतिव्याख्यायां कोशःशोध्यः ॥ १८ ॥ **स०** समतिष्ठत । "समवप्रविभ्यःस्थः" इत्यात्मनेपदता ॥ २३ ॥

[**पा०**] १ ङ. ञ. अभग्नशिरसः. २ ग. ङ. ञ. ट. सुघोराराक्षसाश्चैव. ३ ङ. ट. शरवेगंसमा. ४ क. ग. ङ.—ट. गृध्रबलाढ्याश्च. ५ घ.—ट. कुलसंकुलाः. ग. वृकसंकुलाः. ६ क.—ट. संकृत्तदेहिनः. ७ ञ. ट. श्वोभौयौयुध्येतेपरस्परं ८ ख.—ट. महाबलं. ९ क.—ट. शरैरग्निशिखोपमैः. १० ग. शतधा. ११ ङ. छ. ञ. ट. मथितःप्रापतद्भुवि. क. ख. ग. च. ज. ञ. मथितःपतितो. १२ ङ. ञ. ट. अङ्गदेन. १३ ख. च.—ट. शिलाक्षिप्ता.

स लब्धसंज्ञो गदया वालिपुत्रमवस्थितम् ॥ जघान परमक्रुद्धो वक्षोदेशे निशाचरः ॥ २७ ॥
गदां त्यक्त्वा ततस्तत्र मुष्टियुद्धमवर्तत ॥ अन्योन्यं जघ्नतुस्तत्र तावुभौ हरिराक्षसौ ॥ २८ ॥
रुधिरोद्गारिणौ तौ तु प्रहारैर्जनितश्रमौ ॥ बभूवतुः सुविक्रान्तावङ्गारकबुधाविव ॥ २९ ॥
ततः परमतेजस्वी अङ्गदः कपिकुञ्जरः ॥ उत्पाट्य वृक्षं स्थितवान्बहुपुष्पफलाञ्चितम् ॥ ३० ॥
जग्राह चार्षभं चर्म खड्गं च विपुलं शुभम् ॥ किङ्किणीजालसंछन्नं चर्मणा च परिष्कृतम् ॥
[वज्रदंष्ट्रोथ जग्राह सोङ्गदोप्यसिचर्मणी ॥ ३१ ॥]
विचित्रांश्चेरतुर्मार्गान्ऋषितौ कपिराक्षसौ ॥ जघ्नतुश्च तदाऽन्योन्यं निर्दयं जयकाङ्क्षिणौ ॥ ३२ ॥
व्रणैः सास्रैरशोभेतां पुष्पिताविव किंशुकौ ॥ युध्यमानौ परिश्रान्तौ जानुभ्यामवनीं गतौ ॥ ३३ ॥
निमेषान्तरमात्रेण अङ्गदः कपिकुञ्जरः ॥ उदतिष्ठत दीप्ताक्षो दण्डाहत इवोरगः ॥ ३४ ॥
निर्मलेन सुधौतेन खड्गेनास्य महच्छिरः ॥ जघान वज्रदंष्ट्रस्य वालिसूनुर्महाबलः ॥ ३५ ॥
रुधिरोक्षितगात्रस्य बभूव पतितं द्विधा ॥ सं रोषपरिवृत्ताक्षं शुभं खड्गहतं शिरः ॥ ३६ ॥
वज्रदंष्ट्रं हतं दृष्ट्वा राक्षसा भयमोहिताः ॥ त्रस्ताः प्रत्यपतँल्लङ्कां वध्यमानाः प्लवङ्गमैः ॥
विषण्णवदना दीना ह्रिया किंचिदवाङ्मुखाः ॥ ३७ ॥

निहत्य तं वज्रधरप्रभावः स वालिसूनुः करिसैन्यमध्ये ॥
जगाम हर्षं महितो महाबलः सहस्रनेत्रस्त्रिदशैरिवावृतः ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुःपञ्चाशः सर्गः ॥ ५४ ॥

गदां अन्यां । यद्वा, जघान परमक्रुद्धो वक्षोदेशे निशाचर इत्यस्यानन्तरं, साङ्गदेन गदाक्षिप्ता गत्वा तु रणमूर्धनीत्यर्धं योज्यं ॥ २६—२७ ॥ अवर्तत अवर्तयत् ॥ २८—२९ ॥ ततः परमतेजस्वीत्यादिश्लोकद्वयमेकान्वयं ॥ वृक्षोत्पाटनार्षभचर्मखण्डग्रहणादिकमङ्गदस्योच्यमानमितरस्याप्युपलक्षणं । विचित्रांश्चेरतुर्मार्गानिति वक्ष्यमाणयुद्धस्य उभयोरविशेषेण वर्णनात् । अङ्गदेन वृक्षे गृहीते राक्षसोपि वृक्षं जग्राह । अङ्गदेन खड्गादौगृहीतेराक्षसोपि खड्गादिकं जग्राहेति भावः । आर्षभं चर्म ऋषभचर्मणिनद्धं फलकं । चर्मणा खड्गकोशेन ॥ ३०—३१ ॥ मार्गान् पूर्वोक्तमण्डलादिमार्गान् । निर्दयं जघ्नतुरित्यन्वयः ॥ ३२ ॥ सास्रैः सरुधिरैः । "असृगस्रमश्रुणि शोणिते" इत्यमरः । अवनीं गतौ अभूतामिति शेषः ॥ ३३ ॥ निमेषान्तरमात्रेण निमेषावकाशमात्रेण ॥ ३४ ॥ सुधौतेन शाणोल्लिखितेन । अतएव निर्मलेन । अस्य वज्रदंष्ट्रस्येत्यन्वयः । केचित्तु स जग्राहार्षभं चर्मेति पठित्वा सः वज्रदंष्ट्रः खड्गं जग्राह अङ्गदो वृक्षं जग्राहेति व्याख्याय, खड्गेनास्य महच्छिर इत्यत्र वृक्षे प्रतिहतेङ्गदोपि चर्मासी जग्राहेति अनेनावगम्यत इत्यपि वर्णयन्ति ॥ ३५—३६ ॥ विषण्णवदनाः शुष्कवदनाः ॥ तृतीयायां वज्रदंष्ट्रवधः ॥ ३७—

स० अङ्गारकोमङ्गलः ॥२९॥ ति० पुष्पफलैः हस्तधृतवृक्षीयैस्तैर्युतआसीत् ॥३०॥ ति० व्रणैः समुत्थैः तत्समुत्थितैःरुधिरैरित्यर्थः ॥ ३३ ॥ ति० खड्गेन आच्छिद्यगृहीतेनवज्रदंष्ट्रीयेण । शि० सुधौतेन शाणसंस्कृतेन । अतएव निर्मलेन ॥ ३५ ॥ स० शुभं प्राक् ॥ ३६ ॥ स० ह्रिया जीवनाशयाप्रत्यावर्तनाज्जातया लज्जया ॥ ३७ ॥ ति० तत्तृतीयायांवज्रदंष्ट्रवधः ॥ ३८ ॥ इतिचतुःपञ्चाशःसर्गः ॥ ५४ ॥

[पा०] १ ग. ङ.—ट. मकुर्वत. २ झ. ञ. ट. प्लवगर्षभः. ३ ङ. झ. ञ. ट. स्थितवानासीत्पुष्पफलैर्युतः. ४ इदमर्धं क. ख. घ. च. छ. पाठेषु दृश्यते. ५ ट. विचित्रान्तुधिरान्मार्गांश्चेरतुः. ङ. झ. चित्रांश्चरुचिरान्मार्गांश्चेरतुः. ६ ङ. झ. ट. नर्दन्तौ. ७ ग. समृद्धैःशोभेते. च. छ. समभ्रैःशोभेतां. ङ. झ. ञ. ट. समुत्थैःशोभेतां. ८ ङ. झ. ट. तच्चतस्यपरीताक्षं. ९ च.—ट. त्रस्ताश्चभ्यद्रवँल्लङ्कां. क. ख. घ. त्रस्ताःप्रविविशुर्लङ्कां. १० ङ. च. झ. ञ. ट. वज्रधरप्रतापवान्.

पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

रावणप्रेरणयाऽकंपनेनरणायनिर्याणम् ॥ १ ॥ वानरराक्षससेनयोर्महायुद्धम् ॥ २ ॥

वज्रदंष्ट्रं हतं श्रुत्वा वालिपुत्रेण रावणः ॥ बलाध्यक्षमुवाचेदं कृताञ्जलिमवस्थितम् ॥ १ ॥
शीघ्रं निर्यान्तु दुर्धर्षा राक्षसा भीमविक्रमाः ॥ अकम्पनं पुरस्कृत्य सर्वशस्त्रप्रकोविदम् ॥ २ ॥
एष शास्ता च गोप्ता च नेता च युधि संमतः ॥ भूतिकामश्च मे नित्यं नित्यं च समरप्रियः ॥३॥
एष जेष्यति काकुत्स्थौ सुग्रीवं च महाबलम् ॥ वानरांश्चापरान्घोरान्हनिष्यति परंतपः ॥ ४ ॥
परिगृह्य स तामाज्ञां रावणस्य महाबलः ॥ बलं संत्वरयामास तदा लघुपराक्रमः ॥ ५ ॥
ततो नानाप्रहरणा भीमाक्षा भीमदर्शनाः ॥ निष्पेतू रक्षसां मुख्या बलाध्यक्षप्रचोदिताः ॥ ६ ॥
रथमास्थाय विपुलं तप्तकाञ्चनकुण्डलः ॥ मेघाभो मेघवर्णश्च मेघस्वनमहास्वनः ॥
राक्षसैः संवृतो भीमैस्तदा निर्याल्यकम्पनः ॥ ७ ॥
न हि कम्पयितुं शक्यः सुरैरपि महामृधे ॥ अकम्पनस्ततस्तेषामादित्य इव तेजसा ॥ ८ ॥
तस्य निर्धावमानस्य संरब्धस्य युयुत्सया ॥ अकस्मादैन्यमागच्छद्वयानां रथवाहिनाम् ॥ ९ ॥
व्यस्फुरन्नयनं चास्य सव्यं युद्धाभिनन्दिनः ॥ विवर्णो मुखवर्णश्च गद्गदश्चाभवत्स्वनः ॥ १० ॥
अभवत्सुदिने चापि दुर्दिनं रूक्षमारुतम् ॥ ऊचुः खगा मृगाः सर्वे वाचः क्रूरा भयावहाः ॥११॥
स सिंहोपचितस्कन्धः शार्दूलसमविक्रमः ॥ तानुत्पातानचिन्त्यैव निर्जगाम रणाजिरम् ॥ १२ ॥
तदा निर्गच्छतस्तस्य रक्षसः सह राक्षसैः ॥ बभूव सुमहान्नादः क्षोभयन्निव सागरम् ॥ १३ ॥
तेन शब्देन वित्रस्ता वानराणां महाचमूः ॥ द्रुमशैलप्रहरणा योद्धुं समवतिष्ठत ॥ १४ ॥
तेषां युद्धं महारौद्रं संजज्ञे हरिरक्षसाम् ॥ रामरावणयोरर्थे समभित्यक्तजीविनाम् ॥ १५ ॥

---

३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुःपञ्चाशःसर्गः ॥ ५४ ॥

अथाकम्पनयुद्धं पञ्चपञ्चाशे—वज्रदंष्ट्रमित्यादि ॥ बलाध्यक्षं प्रहस्तं ॥१—२॥ शास्ता परसैन्यनिग्राहकः। गोप्ता स्वबलरक्षकः । नेता नायकः । सेनापतिरित्यर्थः । संमतः प्रसिद्धः ॥ ३—४ ॥ परिगृह्येति बलचोदनेन स्वचोदनमर्थसिद्धं मत्वेत्यर्थः ॥ ५ ॥ निष्पेतुः पुरान्निर्ययुः ॥ ६ ॥ मेघाभः मेघवत् स्थूलः । मेघस्वनमहास्वनः । सप्तम्युपमानपूर्वपदस्येत्यादिना उत्तरपदलोपस्य वैकल्पिकत्वे प्रथमस्वनपदश्रवणं ॥ ७ ॥ प्रसङ्गादाह—न हीति ॥ हि यस्मात् महामृधे महायुद्धेपि । कम्पयितुं न शक्यते अतो हेतोरकम्पनः अकम्पनशब्दवाच्यः । तेषां रक्षसां मध्ये तेजसा आदित्य इव स्थित इत्यर्थः ॥ ८—९ ॥ विवर्णः विपरीतवर्णः ॥ १० ॥ दुर्दिनं मेघच्छन्नदिनं । " मेघच्छन्नेह्नि दुर्दिनं " इत्यमरः ॥ ११ ॥ सिंहोपचितस्कन्धः सिंहस्येवोन्नतस्कन्धवान् ॥ १२—१४ ॥ समभित्यक्तजीविनां तृणीकृतशरीराणामित्यर्थः

शि० प्रोत्साहनार्थमकंपनस्यगुणानाह—एषइति ॥ ३ ॥ स० मुखवर्णः मुखकान्तिः । विवर्णः विगतस्तुतिः निन्द्यइतियावत् । 'वर्णःस्तुतौ' इतिविश्वः ॥ १० ॥ स० क्रूरभयावहाः क्रूराणामपिभयावहाः ॥ ११ ॥ ति० समभित्यक्ताः देहिनः आत्मानोयैस्ते । आत्मरक्षानिरपेक्षाइतियावत् । स० समभित्यक्तदेहिनः देहिनःप्राणाः समभित्यक्ताः त्यक्तुंसिद्धीकृताः यैस्तेतथा

[पा०] १ ग. च. झ. ञ. ट. शस्त्रास्त्रकोविदं. २ ङ. झ. ञ. ट. नसंशयः. ३ ङ. झ. ट. संप्रेरयामास. ४ ख. च. ञ. काञ्चनमण्डितं. ङ. झ. ट. काञ्चनभूषणं. ५ ख. ग. घ. अकंपनस्ततश्श्रीमानादित्यइव. क. च. छ. ञ. अकंपनस्सनाम्नाभूदादित्यइव. ६ ग. प्रास्फुरन्नयनं. ख. ङ. छ. झ. विस्फुरन्नयनं. ७ घ. ङ. झ. ट. कालेदुर्दिनं. ८ ठ. क्रूरभयावहाः. ९ ङ. झ. त्यक्तदेहिनः. छ. ट. त्यक्तदेहिनां.

सर्वे ह्यतिबलाः शूराः सर्वे पर्वतसन्निभाः ॥ हरयो राक्षसाश्चैव परस्परजिघांसवः[1] ॥ १६ ॥
तेषां विनर्दतां[2] शब्दः संयुगेऽतितरस्विनाम् ॥ शुश्रुवे सुमहान्क्रोधादन्योन्यमभिगर्जताम्[3] ॥ १७ ॥
रजश्चारुणवर्णाभं सुभीममभवद्भृशम् ॥ उद्भूतं हरिरक्षोभिः संरुरोध दिशो दश ॥ १८ ॥
अन्योन्यं रजसा तेन कौशेयोद्भूतपाण्डुना[4] ॥ संवृतानि च भूतानि ददृशुर्न रणाजिरे ॥ १९ ॥
न ध्वजा न पताका वा चर्म[5] वा तुरगोपि वा ॥ आयुधं स्यन्दनं[6] वाऽपि ददृशे तेन रेणुना ॥२०॥
शब्दश्च सुमहांस्तेषां नर्दतामभिधावताम्[7] ॥ श्रूयते तुमुले युद्धे न रूपाणि चकाशिरे ॥ २१ ॥
हरीनेव सुसंक्रुद्धा हरयो जघ्नुराहवे ॥ राक्षसाश्चापि रक्षांसि निजघ्नुस्तिमिरे[8] तदा ॥ २२ ॥
परांश्चैव[9] विनिघ्नन्तः स्वांश्च वानरराक्षसाः ॥ रुधिरार्द्रां तदा चक्रुर्महीं पङ्कानुलेपनाम्[10] ॥ २३ ॥
ततस्तु रुधिरौघेण सिक्तं व्यपगतं[11] रजः ॥ शरीरशवसंकीर्णा[12] बभूव च वसुंधरा ॥ २४ ॥
द्रुमशक्तिशिलाप्रासैर्गदापरिघतोमरैः ॥ हरयो राक्षसाश्चैव जघ्नुरन्योन्यमोजसा ॥ २५ ॥
बाहुभिः परिघाकारैर्युध्यन्तः पर्वतोपमाः ॥ हरयो[13] भीमकर्माणो राक्षसाञ्जघ्नुराहवे ॥ २६ ॥
राक्षसास्त्वपि संक्रुद्धाः प्रासतोमरपाणयः ॥ कपीन्निजघ्निरे तत्र शस्त्रैः परमदारुणैः ॥ २७ ॥
अकम्पनः सुसंक्रुद्धो राक्षसानां चमूपतिः ॥ संहर्षयति तान्सर्वान्राक्षसान्भीमविक्रमान् ॥ २८ ॥
हरयस्त्वपि रक्षांसि महाद्रुममहाश्मभिः ॥ विदारयन्त्यभिक्रम्य[14] शस्त्राण्याच्छिद्य वीर्यतः ॥ २९ ॥
एतस्मिन्नन्तरे वीरा हरयः कुमुदो नलः ॥ मैन्दश्च द्विविदः[15] क्रुद्धाश्चक्रुर्वेगमनुत्तमम् ॥ ३० ॥
ते तु वृक्षैर्महावेगा[16] राक्षसानां चमूमुखे ॥ कदनं सुमहच्चक्रुर्लीलया हरियूथपाः[17] ॥

॥ १५ ॥ परस्परजिघांसवः आसन्निति शेषः ॥१६॥ विनर्दतां सिंहनादं कुर्वतां । अभिगर्जतां आभिमुख्येन गर्जनं कुर्वतां ॥ १७ ॥ अरुणवर्णेन रक्तिम्ना आभातीत्यरुणवर्णाभं ॥ १८ ॥ कौशेयोद्भूतपाण्डुना उद्भूतकौशेयपाण्डुना । आहिताग्न्यादित्वात् परनिपातः । रजसो रक्तत्वपाण्डुत्वे भूमेदादिति ज्ञेयं । संवृतानि छन्नानि । भूतानि वस्तूनि । न ददृशुः । वानरा राक्षसाश्चेति शेषः ॥ १९ ॥ उक्तं विवृणोति—न ध्वजा इति ॥ वर्मादिष्वपि नञनुवर्तनीयः ॥ २० ॥ परस्परादर्शनादिजन्यं शब्दान्तरमाह—शब्दश्चेति ॥ रूपाणि पदार्थान्तराणि ॥ २१ ॥ अदर्शनफलमाह—हरीनिति ॥ २२ ॥ प्रथमं रक्तार्द्रां अथच रणक्षोदेन पङ्किलामित्यर्थः । पङ्कानुलेपनां पङ्कानुलिप्तां । कर्मणि ल्युट् ॥ २३ ॥ शरीरशवसंकीर्णा शवभूतशरीरसंकीर्णा ॥ २४ ॥ द्रुमशैला वानरीयाः । शक्त्यादयो राक्षसीयाः ॥ २५ ॥ बाहुभिः परिघाकारैरित्यस्योत्तरार्धः, हरयो भीमकर्माणो राक्षसाञ्जघ्नुराहव इति ॥ २६ ॥ राक्षसास्त्वपीति ॥ शस्त्रैः उक्तप्रासादिभिः ॥ २७ ॥ संहर्षयति उत्साहयति ॥ २८ ॥ अभिक्रम्य अभिमुखीभूय । आच्छिद्य अपहृत्य ॥ २९—३० ॥ ते त्वित्यादिसार्ध-

॥ १५ ॥ **रामानु०** संहर्षयति समहर्षयत् । संभावयामासेत्यर्थः । तान् कपीन्निघ्नतः ॥ २८ ॥ **कतक०** नानाप्रहरणैर्भृशमित्यत्रसर्गविच्छेदःप्रमादात् ॥ ३१ ॥ इतिपञ्चपञ्चाशः सर्गः ॥ ५५ ॥

[पा०] १ घ. ङ. ञ. जिघांसया. २ ङ. ञ. ट. सुमहान्कोपात्. ३ ग. मभिधावतां. ४ क. ख. घ. ङ. ञ. ट. कौशेयोद्धत. ५ ङ. ञ. ञ. ट. ध्वजो. घ. च. ध्वजावा. ६ क. ख. च. छ. ञ. गजोवातुरगो. ङ. ञ. ट. चर्मवातुरगो. ७ ख. घ. ङ. छ. ञ. ञ. ट. स्यन्दनोपिवा. ८ ग. गर्जतां. ९ ख. ङ. च. ञ. ञ. ट. राक्षसाराक्षसांश्चापि. १० क. निजघ्नुरितरेतरं. ११ च. छ. ञ. तेपरांश्चैवनिघ्नन्तः. ख. घ. ङ. ञ. ट. तेपरांश्चविनिघ्नन्तः. १२ ख. ङ. ञ. ट. ह्यपगतं. १३ ग. शतसंकीर्णा. १४ ग. घ. हरीनेव सुसंकुद्धाहरयोजघ्नुराहवे. १५ ग. दारयन्त्यभिनिष्क्रम्य. १६ ख. ग. ङ. ञ. ञ. ट. परमक्रुद्धाः. १७ ङ. च. ञ. ञ. ट. महावीराः. १८ ञ. हरिपुङ्गवाः.

[1]ममन्थू राक्षसान्सर्वे वानरा गणशो भृशम् ॥ ३१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

षट्पञ्चाशः सर्गः ॥ ५६ ॥

हनुमताऽकंपनवधः ॥ १ ॥ तेनरामादिभिर्हनुमच्छ्लाघनम् ॥ २ ॥

तद्दृष्ट्वा सुमहत्कर्म कृतं वानरसत्तमैः ॥ क्रोधमाहारयामास युधि तीव्रमकम्पनः ॥ १ ॥
क्रोधमूर्च्छितरूपस्तु धून्वन्परमकार्मुकम् ॥ दृष्ट्वा तु कर्म शत्रूणां सारथिं वाक्यमब्रवीत् ॥ २ ॥
[2]तत्रैव तावच्चरितं रथं प्रापय सारथे ॥ [3]यत्रैते बहवो घ्नन्ति सुबहून्राक्षसान्रणे ॥ ३ ॥
[4]एतेऽत्र बलवन्तो हि भीम[5]कायाश्च वानराः ॥ द्रुमशैलप्रहरणास्तिष्ठन्ति प्रमुखे मम ॥ ४ ॥
एतान्निहन्तुमिच्छामि समरश्लाघिनो ह्यहम् ॥ [6]एतैः प्रमथितं सर्वं दृश्यते राक्षसं बलम् ॥ ५ ॥
ततः [7]प्रजवनाश्वेन रथेन रथिनांवरः ॥ हरीनभ्यहनत्क्रोधाच्छरजालैरकम्पनः ॥ ६ ॥
न स्थातुं वानराः शेकुः किं पुनर्योद्धुमाहवे ॥ अकम्पनशरैर्भग्नाः सर्व एव विदुद्रुवुः ॥ ७ ॥
तान्मृत्युवशमापन्नानकम्पनवशं गतान् ॥ समीक्ष्य हनुमाञ्ज्ञातीनुपतस्थे महाबलः ॥ ८ ॥
तं महाप्लवगं दृष्ट्वा सर्वे प्लवगयूथपाः ॥ समेत्य समरे वीराः संहृष्टाः पर्यवारयन् ॥ ९ ॥
[8]अवस्थितं हनूमन्तं [9]ते दृष्ट्वा हरियूथपाः ॥ बभूवुर्बलवन्तो हि [10]बलवन्तं समाश्रिताः ॥ १० ॥
अकम्पनस्तु शैलाभं हनूमन्त[11]मवस्थितम् ॥ महेन्द्र इव धाराभिः शरैरभिववर्ष ह ॥ ११ ॥
अचिन्तयित्वा बाणौघाञ्शरीरे [12]पतिताञ्शितान् ॥ अकम्पनवधार्थाय मनो दध्रे महाबलः ॥१२॥
स प्रसह्य महातेजा हनूमान्मारुतात्मजः ॥ अभिदुद्राव तद्रक्षः कम्पयन्निव मेदिनीम् ॥ १३ ॥
तस्याभिनर्दमानस्य दीप्यमानस्य तेजसा ॥ बभूव रूपं दुर्धर्षं दीप्तस्येव विभावसोः ॥ १४ ॥
[13]आत्मानमप्रहरणं ज्ञात्वा क्रोधसमन्वितः ॥ शैलमुत्पाटयामास वेगेन हरिपुङ्गवः ॥ १५ ॥
[14]तं गृहीत्वा महाशैलं पाणिनैकेन मारुतिः ॥ स विनद्य महानादं भ्रामयामास वीर्यवान् ॥ १६॥

श्लोकः ॥ लीलया अनायासेन ॥३१॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥५५॥

अथाकम्पनवधः षट्पञ्चाशे—तद्दृष्ट्वेत्यादि ॥ १–३ ॥ प्रमुखे अग्रे ॥ ४–५ ॥ प्रजवनाश्वेन वेगवद्भिरश्वैः ॥ ६–७ ॥ उपतस्थे अकम्पनसमीपमाजगाम ॥ ८–११ ॥ अकम्पनवधार्थाय अकम्पनवधरूपप्रयोजनाय ॥ १२–१३ ॥ तस्य हनुमतः ॥ १४ ॥ अप्रहरणं अनायुधं ॥ १५ ॥ महानादं विनद्य महानादं

ति० बलवन्तोवा वाशब्दोवैशब्दस्यार्थे ॥ ४ ॥ ति० एतान्निहन्तुमिच्छामि प्रथमतःस्वसेनारक्षणार्थं। ततःपरबलंहनिष्यामीतिशेषः। तदेवाह—**एतैरिति** ॥ ५ ॥

[पा०] १ ममन्थूराक्षसानित्यर्धस्यस्थाने क. ख. घ. च. छ. ज. पाठेषु अकंपनसमादिष्टाविविधायुधयोधिनः। ममन्थू राक्षसास्तत्रवानरान्गणशोभृशं इत्येकश्लोकः पाठभेदेनदृश्यते. २ ङ. झ. ट. न्सर्वेनानाप्रहरणैर्भृशं. ३ ग. ट. तथैवत्वरितंयोद्धुं. ४ च. झ. ञ. ट. एतेचबलिनोघ्नन्ति. क. घ. यत्रैतेहरयोघ्नन्ति. ५ ङ. झ. एतेचबलवन्तोवा. ६ ङ. छ. झ. ट. भीमकोपाश्च. ७ क. ख. ग. च. ञ. एतत्प्रमथितं. ८ ङ. च. झ. ञ. ट. प्रचलिताश्वेन. ९ क. ख. छ. नकंपनशरातुरान्. च. झ. ट. नकंपनशरानुगान्. १० क. ग. ङ. झ. ट. व्यवस्थितं. ११ घ. च. छ. तंदृष्ट्वा. १२ क. ख. घ.—छ. झ ट. बलवन्तमुपाश्रिताः. १३ क. ख. ग. च. मुपस्थितं. १४ ङ. झ. ट. पातितान्कपिः. १५ क. ङ.—ट. आत्मानंत्वप्रहरणं. ख. ग. घ. आत्मानंचाप्रहरणं. १६ ङ. छ. झ. ट. गृहीत्वासुमहाशैलं.

ततस्तमभिदुद्राव राक्षसेन्द्रमकम्पनम् ॥ [1]पुरा हि नमुचिं संख्ये वज्रेणेव पुरंदरः ॥ १७ ॥
अकम्पनस्तु तद्दृष्ट्वा गिरिशृङ्गं समुद्यतम् ॥ दूरादेव महाबाणैरर्धचन्द्रैर्व्यदारयत् ॥ १८ ॥
[2]तत्पर्वताग्रमाकाशे रक्षोबाणविदारितम् ॥ विशीर्णं पतितं दृष्ट्वा हनुमान्क्रोधमूर्च्छितः ॥ १९ ॥
सोश्वकर्णं [3]समासाद्य रोषदर्पान्वितो हरिः ॥ तूर्णमुत्पाटयामास महागिरिमिवोच्छ्रितम् ॥ २० ॥
तं गृहीत्वा महास्कन्धं सोश्वकर्णं महाद्युतिः ॥ [4]ग्रहस्य परया प्रीत्या भ्रामयामास संयुगे ॥ २१ ॥
प्रधावन्वेगवद्वेगेन प्रभञ्जंस्तरसा द्रुमान् ॥ हनुमान्परमक्रुद्धश्चरणैर्दारयत्क्षितिम् ॥ २२ ॥
गजांश्च सगजारोहान्सरथान्रथिनस्तथा ॥ जघान हनुमान्धीमान्राक्षसांश्च पदातिगान् ॥ २३ ॥
तमन्तकमिव क्रुद्धं [5]समरे प्राणहारिणम् ॥ हनुमन्तमभिप्रेक्ष्य राक्षसा विप्रदुद्रुवुः ॥ २४ ॥
तमापतन्तं संक्रुद्धं [6]राक्षसानां भयावहम् ॥ ददर्शाकम्पनो वीरश्चुक्रोध च ननाद च ॥ २५ ॥
स चतुर्दशभिर्बाणैः शितैर्देहविदारणैः ॥ निर्बिभेद हनूमन्तं महावीर्यमकम्पनः ॥ २६ ॥
स तैंदा प्रतिविद्धस्तु बहुभिः शरवृष्टिभिः ॥ हनुमान्ददृशे वीरः प्ररूढ इव सानुमान् ॥ २७ ॥
विरराज महाकायो महावीर्यो महामनाः ॥ पुष्पिताशोकसंकाशो विधूम इव पावकः ॥ २८ ॥
ततोऽन्यं वृक्षमुत्पाट्य कृत्वा वेगमनुत्तमम् ॥ शिरस्यभिजघानाशु राक्षसेन्द्रमकम्पनम् ॥ २९ ॥
स वृक्षेण हतस्तेन सक्रोधेन महात्मना ॥ राक्षसो वानरेन्द्रेण पपात च ममार च ॥ ३० ॥
तं दृष्ट्वा निहतं भूमौ राक्षसेन्द्रमकम्पनम् ॥ व्यथिता राक्षसाः सर्वे क्षितिकम्प इव द्रुमाः ॥ ३१ ॥
त्यक्तप्रहरणाः सर्वे राक्षसास्ते पराजिताः ॥ लङ्कामभिययुस्त्रस्ता वानरैस्तैरभिद्रुताः ॥ ३२ ॥
ते मुक्तकेशाः संभ्रान्ता भग्नमानाः पराजिताः ॥ [7]स्रवच्छ्लमजलैरङ्गैः श्वसन्तो विप्रदुद्रुवुः ॥ ३३ ॥
[8]अन्योन्यं प्रममन्थुस्ते विविशुर्नगरं भयात् ॥ पृष्ठतस्ते सुसंमूढाः प्रेक्षमाणा मुहुर्मुहुः ॥ ३४ ॥
तेषु लङ्कां प्रविष्टेषु राक्षसेषु महाबलाः ॥ समेत्य हरयः सर्वे हनुमन्तमपूजयन् ॥ ३५ ॥
सोपि [9]ग्रहृष्टस्तान्सर्वान्हरीन्प्रत्यभ्यपूजयत् ॥ हनुमान्सत्त्वसंपन्नो यथार्हमनुकूलतः ॥ ३६ ॥
विनेदुश्च यथाप्राणं हरयो जितकाशिनः ॥ चकर्षुश्च पुनस्तत्र सप्राणानपि राक्षसान् ॥ ३७ ॥

स वीरशोभामभजन्महाकपिः समेत्य रक्षांसि निहत्य मारुतिः ॥
महासुरं भीममभित्रनाशनं [10]यथैव [11]विष्णुर्बलिनं [12]चमूमुखे ॥ ३८ ॥

कृत्वेत्यर्थः ॥ १६ ॥ तत इति । तत्र सः शैलेनेत्यध्याहार्यं । सहनुमान् अकम्पनं पुरन्दरो नमुचिं यथा तथा शैलेन वज्रेणेवाभिदुद्राव ॥ १७—१८ ॥ क्रोधमूर्च्छितः अभूदितिशेषः ॥ १९—२१ ॥ चरणैः चरणन्यासैः । दारयत् अदारयत् ॥ २२ ॥ पदातितया गच्छन्तीति पदातिगाः तान् ॥ २३—२६ ॥ प्ररूढः प्ररूढवृक्षः ॥ २७—२९ ॥ वानरेन्द्रेण कर्त्रा । तेन वृक्षेणहत इत्यन्वयः ॥३० ॥ क्षितिकम्पे भूकम्पे ॥ ३१—३५ ॥ प्रत्यभ्यपूजयत् भवत्साहाय्येनैव मया जितमित्येवमिति भावः ॥ ३६—

स० प्रीत्या समयेनसमीचीनायुधमुपलब्धमितिहर्षेण ॥ २१ ॥ ति० प्ररूढःसानुमानिव बहुशराचितशरीरत्वात्प्ररूढबहुवृक्षो गिरिरिवजनैर्ददृशइत्यर्थः ॥ २७ ॥ ति० सोपियथार्हमनुकूलतोऽनुकूलदर्शनवचनालिङ्गनैः संप्रत्यपूजयत् ॥ ३६ ॥ इतिषट्पञ्चाशःसर्गः ॥ ५६ ॥

[पा०] १ क.—घ. च. छ. ट. यथाहिनमुचिं. २ क. ख. तंशिलोच्चयमाकाशे. ३ क. ख. ग. समादाय. ४ झ. प्रगृह्यपरया. ५ ङ. झ. ट. सद्रुमंप्राण. ६ ख. संप्रेक्ष्य. ७ ङ. झ. ट. तथाविप्रकीर्णस्तुनाराचैःशितशक्तिभिः. क. तथाप्रतिविद्धाङ्गोभूरिभिःशरवृष्टिभिः. ८ ङ. झ. ट. महाबलः. ९ क.—घ. झ. भयाच्छ्लमजलैरङ्गैःप्रस्रवद्भिर्विदुद्रुवुः. ङ. भयाच्चस्रजलैरङ्गैःप्रस्रवद्भिर्विदुद्रुवुः. १० झ. ञ. ट. अन्योन्यंतेप्रमथ्नन्तो. घ. अन्योन्यंप्रेमबद्धास्ते. ११ ङ.—झ. प्रवृद्धांस्तान्सर्वान्. १२ ङ. झ. ट. विष्णुर्यथैवोरुबलं. १३ च. छ. महाहवे.

अपूजयन्देवगणास्तदा कपिं स्वयं च रामोतिबलश्च लक्ष्मणः ॥
तथैव सुग्रीवमुखाः प्लवङ्गमा विभीषणश्चैव महाबलस्तथा ॥ ३९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षट्पञ्चाशस्सर्गः ॥ ५६ ॥

सप्तपञ्चाशः सर्गः ॥ ५७ ॥

रावणचोदनयाप्रहस्तेन नरान्तकादिसचिवचतुष्टयसाहित्येन पूर्वद्वाराद्रणायनिर्याणम् ॥ १ ॥

अकम्पनवधं श्रुत्वा क्रुद्धो वै राक्षसेश्वरः ॥ किंचिद्दीनमुखश्चापि सचिवांस्तानुदैक्षत ॥ १ ॥
स तु ध्यात्वा मुहूर्तं तु मन्त्रिभिः संविचार्य च ॥ ततस्तु रावणः पूर्वदिवसे राक्षसाधिपः ॥
पुरीं परियियौ लङ्कां सर्वान्गुल्मानवेक्षितुम् ॥ २ ॥
तां राक्षसगणैर्गुप्तां गुल्मैर्बहुभिरावृताम् ॥ ददर्श नगरीं लङ्कां पताकाध्वजमालिनीम् ॥ ३ ॥
रुद्धां तु नगरीं दृष्ट्वा रावणो राक्षसेश्वरः ॥ उवाचामर्षतः काले प्रहस्तं युद्धकोविदम् ॥ ४ ॥
पुरस्योपनिविष्टस्य सहसा पीडितस्य वा ॥ नान्यं युद्धात्प्रपश्यामि मोक्षं युद्धविशारद ॥ ५ ॥
अहं वा कुम्भकर्णो वा त्वं वा सेनापतिर्मम ॥ इन्द्रजिद्वा निकुम्भो वा वहेयुर्भारमीदृशम् ॥ ६ ॥
स त्वं बलमतः शीघ्रमादाय परिगृह्य च ॥ विजयायाभिनिर्याहि यत्र सर्वे वनौकसः ॥ ७ ॥
निर्याणादेव ते नूनं चपला हरिवाहिनी ॥ नर्दतां राक्षसेन्द्राणां श्रुत्वा नादं द्रविष्यति ॥ ८ ॥
चपला ह्यविनीताश्च चलचित्ताश्च वानराः ॥ न सहिष्यन्ति ते नादं सिंहनादमिव द्विपाः ॥ ९ ॥
विद्रुते च बले तस्मिन्रामः सौमित्रिणा सह ॥ अवशस्ते निरालम्बः प्रहस्त वशमेष्यति ॥ १० ॥
आपत्संशयिता श्रेयो न तु निस्संशयीकृता ॥ प्रतिलोमानुलोमं वा यद्वा नो मन्यसे हितम् ॥ ११ ॥

---

३९ ॥ चतुर्थ्यामकम्पनवधः ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षट्पञ्चाशः सर्गः ॥ ५६ ॥

अथ युद्धाय प्रहस्तनिर्याणं सप्तपञ्चाशे—अकम्पनवधमित्यादि ॥ १ ॥ स त्वित्यादिसार्धश्लोक एकान्वयः ॥ ततः स रावणः पुरीं परिययौ। पूर्वदिवसे दिवसस्य पूर्वभागे। पूर्वाह्ण इत्यर्थः। गुल्मान् सेनाव्यूहान् ॥ २–३ ॥ काले निदेशार्हसमये ॥ ४ ॥ उप समीपे निविष्टं परसेनानिवेशो यस्य तस्य उपरुद्धस्येत्यर्थः। अतएव वाशब्दश्चार्थे। पीडितस्य च मोक्षं मोक्षोपायं ॥ ५ ॥ वहेयुरिति शकि लिङ् ॥ ६ ॥ शीघ्रमादाय। परिगृह्य स्वाधीनं कृत्वा। यत्र वनौकसो वर्तन्ते तत्र इतो निर्याहीत्यन्वयः ॥ ७ ॥ चपला धैर्यरहिता ॥ ८–९ ॥ अवशः प्रभुत्वरहितः। "वशमिच्छाप्रभुत्वयोः" इति विश्वः। हे प्रहस्त। ते तव वशमेष्यतीत्यन्वयः ॥ १० ॥ ननु युद्धे सत्यात्महानेरपि संभवात्तदकरणमेव श्रेय इत्याशङ्क्य तथात्वे शत्रुकृ-

ति० उपनिविष्टस्य अतिसमीपनिविष्टशत्रुबलस्येत्यर्थः। अतएवसहसाबलात्कारेणपीडितस्य। अन्ययुद्धात् अन्यकर्तृकयुद्धाद्धेतोः। मोक्षं उपरोधमोक्षं। न प्रपश्यामि ॥ ५ ॥ ति० ननुयुद्धेमज्जीवनपिसंदेहात्कथंनिरालंबोवशमेष्यतीत्युच्यतेतत्राह—आपदिति। युद्धे आपत् मृतिः। संशयिता संदेहविषया। श्रेयः विजयस्तु। तवनसंशयितः नसंदेहविषयः। तवातिबलत्वाद्बहुशोदृष्टविजयत्वाच्च इन्द्रजिद्वच्छ्रेयःप्राप्तिरेवोत्कटकोटिका। किंच श्रेयोनसंदिग्धं। युद्धेजीवनेमरणेचश्रेयस्सत्त्वात्। जीवनेराज्यं। मृतावुत्तमलोकः। अतोत्रयुद्धेप्रवृत्तिरेवनिस्संशयीकृता। 'यत्रायुद्धेध्रुवोमृत्युर्युद्धेजीवितसंशयः। तमेवकालंयुद्धस्यप्रवदन्तिमनीषिणः" इत्यादिशास्त्रादितिभावः। ममलघ्वयुद्धमेवहितंप्रतिभाति। प्रकारान्तरमस्तिचेद्दृहीत्याह—प्रतिलोमेत्यादि। मनोनुकूलंवा

[पा०] १ ख. प्रतियियौ. २ ङ. च. छ. झ. ट. नगरींराजा. घ. महतींलङ्कां. ३ ग. ङ. झ. ट. उवाचात्महितंकाले. ४ झ. नान्ययुद्धात्. ५ च. हेतुं. ६ क. ख. घ. च. छ. ज. मादायरथमास्थितः. ७ ङ. झ. ज. ट. चलिता. घ. चलिष्यत्यरिवाहिनी. ८ क. ग.—छ. झ. ज. ट. नात्र. ९ ङ. झ. ट. यत्तनो.

रावणेनैवमुक्तस्तु प्रहस्तो वाहिनीपतिः ॥ राक्षसेन्द्रमुवाचेदमसुरेन्द्रमिवोशना ॥ १२ ॥
राजन्मन्त्रितपूर्वं नः कुशलैः सह मन्त्रिभिः ॥ विवादश्चापि नो वृत्तः समवेक्ष्य परस्परम् ॥ १३ ॥
प्रदानेन तु सीतायाः श्रेयो व्यवसितं मया ॥ अप्रदाने पुनर्युद्धं दृष्टमेतत्तथैव नः ॥ १४ ॥
सोहं दानैश्च मानैश्च सततं पूजितस्त्वया ॥ सान्त्वैश्च विविधैः काले किं न कुर्यां प्रियं तव ॥ १५ ॥
न हि मे जीवितं रक्ष्यं पुत्रदारधनानि वा ॥ त्वं पश्य मां जुहूषन्तं त्वदर्थे जीवितं युधि ॥ १६ ॥
एवमुक्त्वा तु भर्तारं रावणं वाहिनीपतिः ॥ उवाचेदं बलाध्यक्षान्प्रहस्तः पुरतः स्थितान् ॥ १७ ॥
समानयत मे शीघ्रं राक्षसानां महद्बलम् ॥ १८ ॥
मद्बाणशतवेगेन हतानां च रणाजिरे ॥ अद्य तृप्यन्तु मांसादाः पक्षिणः काननौकसाम् ॥ १९ ॥
इत्युक्तास्ते प्रहस्तेन बलाध्यक्षाः कृतत्वराः ॥ बलमुद्योजयामासुस्तस्मिन्राक्षसमन्दिरे ॥ २० ॥
सा बभूव मुहूर्तेन तिर्यग्मनाविधायुधैः ॥ लङ्का राक्षसवीरैस्तैर्गजैरिव समाकुला ॥ २१ ॥

ताया हानेर्निश्चितत्वात् युद्धकरणे तस्याः संदेहात् । " यत्रायुद्धे ध्रुवो मृत्युर्युद्धे जीवितसंशयः । तमेव कालं युद्धस्य प्रवदन्ति मनीषिणः " इत्युक्तरीत्या इदानीं युद्धमेव श्रेय इत्याह—आपदिति ॥ संशयिता वितर्किता । आपत् मृतिः । श्रेयः । युद्धे मृतिः श्रेयस्करीत्यर्थः । जयापजययोरव्यवस्थितत्वेन पाक्षिकजयस्यापि संभवादिति भावः । पक्षान्तरं प्रतिक्षिपति—नत्विति । निस्संशयीकृता निश्चिता । मृतिस्तु युद्धं विना शत्रुभिर्मरणं तु न श्रेयः एतन्मम मतं । त्वन्मतं तु किमित्याह—प्रतिलोमेति । प्रतिलोमं मदुक्तप्रकारविपरीतप्रकारं । अनुलोमं वा नोस्माकं यद्धितं मन्यसे तद्वदेति शेषः । वेति पक्षान्तरे । अहं तदेव श्रेयो मन्ये । त्वमन्यच्च यदि मन्यसे तद्वद । तदेवास्माकं हितमित्यर्थः ॥ ११—१२ ॥ मन्त्रसमये मया यथा निर्धारितं तत्तथा प्रवृत्तमित्याह—राजन्नित्यादिना ॥ कुशलैर्मन्त्रिभिः विभीषणादिभिः सह । नः अस्माभिः । इदं वक्ष्यमाणं मन्त्रितपूर्वं । तर्हि मन्त्रितत्वे तथा किमिति नानुष्ठितं तत्राह—विवाद इति । परस्परं समवेक्ष्य बहुमतितया आलोच्य । नः अस्माकं विवादश्चापि वृत्तः । येन विभीषणो निरगच्छदिति भावः ॥ १३ ॥ मन्त्रितमर्थमाह—प्रदानेन त्विति ॥ सीतायाः प्रदानेन तु श्रेयः । अप्रदाने तु युद्धमिति च मम व्यवसितमित्यर्थः । सर्वमरणं युद्धशब्देनोपचर्यते । यथैव व्यवसितं तथैव नः अस्माभिः । दृष्टं च ॥ १४ ॥ एवं स्वमतमुक्त्वा संप्रति त्वन्मतानुसारेण युद्धमेव करिष्यामीत्याह—सोहमित्यादिना ॥ दानैः भूषणादिप्रदानैः । मानैः त्वदधीनं जीवितमित्यादिप्रियभाषणैः । पूजितः उत्कर्षमापादितः । काले आपत्काले । किंन कुर्यां जीवितत्यागमपि कुर्यामित्यर्थः ॥ १५ ॥ उक्तमेव विशदयति—न हीति ॥ जुहूषन्तं होतुमिच्छन्तं । जुहोतेः सन्प्रत्ययः । अनेन जीवितस्य हविष्ट्वं युद्धस्याग्निरूपत्वं च गम्यते । तेन चात्महविःप्रदानस्य महाफलत्वं युद्धसङ्गतिमात्रेण स्वविनाशश्च द्योत्यते । गतानुगतिकास्तु जुहूषन्तं त्यक्तुमिच्छन्तमित्यर्थः । जुहोतेर्दानार्थत्वादित्याहुः ॥ १६—१८ ॥ हतानां काननौकसां तृप्यन्त्वित्यन्वयः । " पूरणगुण—" इत्यादिना समासप्रतिषेधेन सुहितार्थयोगे ज्ञापिता षष्ठी ॥१९—

भवतुप्रतिकूलंवा । यत्तुनोहितंमन्यसे तद्वदेतिशेषः । स० आपत् मृतिः परिभवभवंदुःखंवा । संशयिता । नचनिस्संशयीकृता भविष्यत्येवेति ननिश्चिता । तथापि तवशक्तितोमयुक्तितश्च श्रेयः जयः निश्चितं । 'श्रेयः अमृतेऐहिकं मृते पारत्रिक'मिति प्रकृतानुपयुक्तंव्याख्यानं । प्रोत्साहनसमयत्वात् । ती० अत्र मदुक्तार्थविषये प्रतिलोमानुलोमंवा प्रतिलोमंवा अनुलोमंवा । अनयोर्यद्धितंमन्यसे तद्वदेतिशेषः । यद्वा प्रतिलोमंप्रतिकूलमितियन्मन्यसे अनुलोमं अनुकूलमितियन्मन्यसे अन्यद्वा एतद्व्यतिरिक्तं । यद्वा इतरन्मन्यसे तद्वदेतिशेषः । प्रतिलोमेत्यविभक्तिकोनिर्देशः ॥ ११ ॥ ती० जिहीर्षन्तं त्यक्तुमिच्छन्तं ॥ १६ ॥

[पा०] १ ग. घ. च. छ. ज. जिहीर्षन्तं. २ च. छ. ञ. प्रमुखेस्थितान्. ३ क.—घ. च. छ. ज. मद्बाणाशनिवेगेन. ४ घ. ज. मांसेनपक्षिणः. ५ ख. घ. ङ. झ. ट. काननौकसः. ६ च.—ट. तस्यतद्वचनंश्रुत्वाबलाध्यक्षाः. ७ ङ. झ. ट. महाबलाः. ८ झ. ट. भीमैर्नानाविधा. ९ क. ख. स्तैरिंसहैरिव.

हुताशनं तर्पयतां ब्राह्मणांश्च नमस्यताम् ॥ आज्यगन्धप्रतिवहः सुरभिर्मारुतो ववौ ॥ २२ ॥
स्रजश्च विविधाकारा जगृहुस्त्वभिमन्त्रिताः ॥ संग्रामसज्जाः संहृष्टा धारयन्राक्षसास्तदा ॥ २३ ॥
सधनुष्काः कवचिनो वेगादाप्लुत्य राक्षसाः ॥ रावणं प्रेक्ष्य राजानं प्रहस्तं पर्यवारयन् ॥ २४ ॥
अथामन्त्र्य च राजानं भेरीमाहत्य भैरवाम् ॥ आरुरोह रथं दिव्यं प्रहस्तः सज्जकल्पितम् ॥ २५ ॥
हयैर्महाजवैर्युक्तं सम्यक्सूतसुसंयतम् ॥ महाजलदनिर्घोषं साक्षाच्चन्द्रार्कभास्वरम् ॥ २६ ॥
उरगध्वजदुर्धर्षं सुवरूथं स्वपस्करम् ॥ सुवर्णजालसंयुक्तं प्रहसन्तमिव श्रिया ॥ २७ ॥
ततस्तं रथमास्थाय रावणार्पितशासनः ॥ लङ्कायां निर्ययौ तूर्णं बलेन महताऽऽवृतः ॥ २८ ॥
ततो दुन्दुभिनिर्घोषः पर्जन्यनिनदोपमः ॥ वादित्राणां च निनदः पूरयन्निव सागरम् ॥
शुश्रुवे शङ्खशब्दश्च प्रयाते वाहिनीपतौ ॥ २९ ॥
निनदन्तः स्वरान्घोरान्राक्षसा जग्मुरग्रतः ॥ भीमरूपा महाकायाः प्रहस्तस्य पुरस्सराः ॥ ३० ॥
नरान्तकः कुम्भहनुर्महानादः समुन्नतः ॥ प्रहस्तसचिवा ह्येते निर्ययुः परिवार्य तम् ॥ ३१ ॥
व्यूढेनैव सुघोरेण पूर्वद्वारात्स निर्ययौ ॥ गजयूथनिकाशेन बलेन महता वृतः ॥ ३२ ॥
सागरप्रतिमौघेन वृतस्तेन बलेन सः ॥ प्रहस्तो निर्ययौ तूर्णं कालान्तकयमोपमः ॥ ३३ ॥
तस्य निर्याणघोषेण राक्षसानां च नर्दताम् ॥ लङ्कायां सर्वभूतानि विनेदुर्विकृतैः स्वरैः ॥ ३४ ॥
व्यभ्रमाकाशमाविश्य मांसशोणितभोजनाः ॥ मण्डलान्यपसव्यानि खगाश्चक्रू रथं प्रति ॥ ३५ ॥

---

२१ ॥ हुताशनं तर्पयतां अग्नौ बहुधा शान्तिहोमानाचरतां । ब्राह्मणांश्च नमस्यतां गन्धपुष्पादिभिरर्चयतां संबन्धी आज्यगन्धप्रतिवहः ब्राह्मणार्चनकुसुमादिना सुरभिर्मारुतो ववौ ॥ २२ ॥ संग्रामसज्जाः संग्रामायोद्युक्ताः । राक्षसाः अभिमन्त्रिताः विजयमन्त्रेणाभिमन्त्रिताः । स्रजः जगृहुः । धारयन् अधारयंश्च ॥ २३ ॥ रावणं प्रेक्ष्य स्वामितया प्रधानं रावणमभिवन्द्येत्यर्थः ॥ २४ ॥ अथेत्यादिश्लोकत्रयं ॥ सज्जकल्पितं सज्जमुद्युक्तं सर्वायुधादिसमवेतत्वेन कल्पितमित्यर्थः । सुसंयतं नियमितं । साक्षाच्चन्द्रार्कभास्वरं चन्द्रार्कतुल्यं भास्वरं च । " साक्षात्प्रत्यक्षतुल्ययोः " इत्यमरः । आह्लादकत्वेन चन्द्रसाम्यं । तेजसाऽर्कसाम्यं । सुवरूथं शोभनरथगुप्तिकं । " रथगुप्तिर्वरूथोना " इत्यमरः । स्वपस्करं शोभनरथाङ्गं । " अपस्करो रथाङ्गं " इति निपातनात् सुडागमः । जालं गवाक्षं । प्रहसन्तमिव श्रिया स्वकान्त्या सर्वकान्तिमद्वस्तु परिहसन्तमिव स्थितं ॥ २५—२७ ॥ ततः आरोहणानन्तरं ॥ २८ ॥ तत इत्यादिसार्धश्लोक एकान्वयः ॥ पर्जन्यः मेघविशेषः ॥ २९ ॥ पुरस्सराः अग्रगाः ॥ ३०—३१ ॥ व्यूढेन सन्नद्धकङ्कटेन । " व्यूढः सन्नद्धकङ्कटः " इत्यमरशेषे ॥ ३२ ॥ कालान्तकयमोपमः काले प्रलयकाले अन्तको विनाशको यो यमस्तदुपमः ॥३३॥ तस्य प्रहस्तस्य । निर्याणघोषेण निर्गमकालिकसिंहनादेन । राक्षसानां निर्याणघोषेण च प्रयोजनेन । सर्वभूतानि विकृतैः सर्वैरुपलक्षितानि सन्ति विनेदुरिति संबन्धः ॥ ३४ ॥ अपसव्यानि अप्रदक्षिणानि । व्यभ्रमित्यनेन मण्डलकरणस्याकालिकत्वमुक्तं । साभ्रकाले हि पक्षिणो मण्डलान्याचरन्ति । यद्वाऽत्र खगाः गरुडाः । अपसव्यं प्रदक्षिणं ।

स० धनुषासहिताः सधनुष्काः । उत्सृज्य वाजिनइतिशेषः । पादत्रादिकंवा । पुत्रदारादिकंप्रतियुद्धार्थंगच्छामइत्युक्तिंवा ॥२४॥ शि० सागरप्रतिमानां दुरवगाहत्वेनसागरसदृशानांराक्षसानां ओघःसमूहोयस्मिंस्तेनबलेनवृतः अतएव कालान्तकयमोपमः प्रहस्तोनिर्ययौ । तत्रकालोमहाप्रलयः । अन्तकोमरणसमयः । यमःसंयमिनीपतिरितिविवेकः ॥ ३३ ॥ ति० अपसव्यानिमण्डलानि अपगतासव्यभागेविभ्रान्तिर्येषुमण्डलेषुभ्रामणेषुतान्यपसव्यानि प्रदक्षिणानि । गृध्रादीनांप्रदक्षिणमपिदुर्निमित्तमितिकतकः ॥३५॥

[पा०] १ ङ. ञ. ट. वेगादुत्सृज्य. २ ग. सूतकल्पितं. ३ ज. क्सूतेनसंयुतं ख. ग. छ. क्सूतंससायकं. ४ घ. ५ क.—ट. मेदिनीं. ६ ङ. ञ. ट. क्रुद्धःकालान्तक. क. ग. घ. च. छ. ज. तूर्णंक्रुद्धःकालान्तकोपमः. ख. तूर्णंयोकोपमः.

वमन्त्यः[1] पावकज्वालाः शिवा घोरं[2] ववाशिरे ॥ अन्तरिक्षात्पपातोल्का वायुश्च परुषो ववौ ॥३६॥
अन्योन्यमभिसंरब्धा ग्रहाश्च न चकाशिरे ॥ ३७ ॥
मेघाश्च खरनिर्घोषा रथस्योपरि रक्षसः ॥ ववृषू रुधिरं चास्य सिषिचुश्च पुरस्सरान् ॥ ३८ ॥
केतुमूर्धनि गृध्रोस्य निलीनो दक्षिणामुखः ॥ तुदन्नुभयतः[3] पार्श्वं समग्रामहरत्प्रभाम्[4] ॥ ३९ ॥
सारथेर्बहुशश्चास्य संग्राममवगाहतः ॥ प्रतोदो न्यपतद्धस्तात्सूतस्य हयसादिनः ॥ ४० ॥
निर्याणश्रीश्च यास्यासीद्भास्वरा वसुदुर्लभा ॥ सा ननाश मुहूर्तेन समे च स्खलिता हयाः ॥ ४१ ॥
प्रहस्तं त्वभिनिर्यान्तं प्रख्यातबलपौरुषम् ॥ युधि नानाप्रहरणा कपिसेनाऽभ्यवर्तत ॥ ४२ ॥
अथ घोषः सुतुमुलो हरीणां समजायत ॥ वृक्षानारुजतां चैव गुर्वीरागृह्णतां शिलाः ॥ ४३ ॥
नदतां राक्षसानां च वानराणां च गर्जताम् ॥ उभे प्रमुदिते सैन्ये रक्षोगणवनौकसाम् ॥ ४४ ॥
वेगितानां समर्थानामन्योन्यवधकाङ्क्षिणाम् ॥ परस्परं चाह्वयतां निनादः श्रूयते महान् ॥ ४५ ॥
ततः प्रहस्तः कपिराजवाहिनीमभिप्रतस्थे विजयाय दुर्मतिः ॥
विवृद्धवेगां च विवेश तां चमूं यथा मुमूर्षुः शलभो विभावसुम् ॥ ४६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अष्टपञ्चाशः सर्गः ॥ ५८ ॥

विभीषणेनरामंप्रति तत्प्रश्नेनरणायाभ्यागच्छतः प्रहस्तस्य यथात्म्यनिवेदनम् ॥ १ ॥ द्विविददुर्मुखजांबवत्तारैः क्रमेण नरान्तकसमुन्नतमहानादकुंभहनुनाम्नां प्रहस्तसचिवानांचतुर्णां हननम् ॥ २ ॥ नीलेन महतायुद्धेन प्रहस्तवधः ॥ ३ ॥

ततः प्रहस्तं निर्यान्तं दृष्ट्वा भीमपराक्रमम्[5] ॥ उवाच सस्मितं रामो विभीषणमरिन्दमः[6] ॥ १ ॥

"अपसव्यंतु दक्षिणं" इत्यमरः। गरुडानां ह्यप्रदक्षिणं शोभनं । ग्रहाः चन्द्रसूर्यादयः । तत्काले ग्रहयुद्धमासीदित्यर्थः ॥ ३५—३८ ॥ तुदन्नुभयतः पार्श्वं । उभौ पक्षौ मुखेन कण्डूयमानः समग्रामहरत् प्रभां प्रहस्तस्येति शेषः । ध्वजाग्रारूढगृध्रदर्शनेन प्रहस्तमुखं विवर्णमासीदित्यर्थः ॥ ३९ ॥ सूतस्य सूतजातस्य । हयसादिनः हयप्रस्थापकस्य । प्रतोदः तोत्रं । यद्वा सूतस्य सूतकुलोत्पन्नस्य । अभ्यस्तप्रतोदधारणस्यापीत्यर्थः । हयसादिनः अश्वगतिशिक्षकस्य ॥ ४० ॥ वसुदुर्लभा अष्टवसुदुर्लभा । भास्वरा वसुदुर्लभेति पाठः । निर्याणश्रीः निर्गमकालिकश्रीः । निरुत्साहः प्रहस्तोभूदित्यर्थः । स्खलिताः चस्खलुः । कर्तरि क्तः ॥ ४१ ॥ नानाप्रहरणा शिलावृक्षादिनानाप्रहरणा ॥ ४२ ॥ आरुजतां उन्मूलयतां । आगृह्णतां आसमन्तात् गृह्णतां ॥ ४३ ॥ नदतामिति त्रिपादश्लोकः ॥ रक्षोगणवनौकसामित्युत्तरशेषः ॥ ४४—४५ ॥ कपिराजवाहिनीमभिप्रतस्थे तां चमूं विवेश च ॥४६॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अथ प्रहस्तवधोष्टपञ्चाशे—ततः प्रहस्तमित्यादि ॥

स० सूतस्यतद्वंश्यस्य । हयसादिनः हयानश्वान्सादयतिगमयतियथेष्टमितिसतथा । तादृशस्यापिसारथेः हस्तात् प्रतोदः तोत्रं । न्यपतत् पपात । र्थं अत्रमस्यास्तीतिमत्वर्थेइकारः । 'अत्रंथ'मितिहिश्रुतिः । सारेण अरसहितेनचक्रेण थिः सारथिः । तस्येतिवा । हयैरेवानुबन्धनिमित्तैःआदिभिःराक्षसैःसहितःसतथा । तस्यसूतस्यसारथेः । "आदिनोराक्षसाःप्रोक्ताः" इतिभागवततात्पर्यात् । सूतः सुष्ठुऊतः प्रतोदोयस्यतस्येतिवा । सुदुर्लभा उत्तरत्रानेवमागमनात् ॥ ४० ॥ स० रक्षोगणवनौकसामित्यनेन रक्षोगणस्यैकैकोवनौकाःप्रर्यासइतिध्वन्यते ॥ ४४ ॥ स० विजयायदुर्मतिः अपशकुनैरिवगतमृतैःखीयैर्दृष्टैःश्रुतैरपिविजयभ्रमोस्यास्तीतिदुर्मतिरितिमन्तव्यम् ॥ ४६ ॥ इतिसप्तपञ्चाशःसर्गः ॥ ५७ ॥

[पा०] १ च. झ. ञ. ट. वमन्तिपावक. २ क.—ट. घोरावववाशिरे. ३ घ. ज. झ. ट. नदन्नुभयतः. ४ ङ. झ. ट. समग्रांश्रियमाहरत्. ५ झ. ट. रणकृतोद्यमं. ६ क. ख. ज. मरिंदमं.

क एष सुमहाकायो बलेन महता वृतः ॥ [[1]आगच्छति महावेगः किंरूपबलपौरुषः ॥]
आचक्ष्व मे महाबाहो वीर्यवन्तं निशाचरम् ॥ २ ॥
राघवस्य वचः श्रुत्वा प्रत्युवाच विभीषणः ॥ ३ ॥
एष सेनापतिस्तस्य प्रहस्तो नाम राक्षसः ॥ लङ्कायां राक्षसेन्द्रस्य त्रिभागबलसंवृतः ॥
वीर्यवानस्त्रविच्छूरः [[2]]ख्यातश्च पराक्रमे ॥ ४ ॥
ततः प्रहस्तं निर्यान्तं भीमं भीमपराक्रमम् ॥ गर्जन्तं सुमहाकायं राक्षसैरभिसंवृतम् ॥ ५ ॥
ददर्श महती सेना वानराणां बलीयसाम् ॥ अतिसंजातरोषाणां प्रहस्तमभिगर्जताम् ॥ ६ ॥
खड्गशक्त्यृष्टिबाणाश्च शूलानि मुसलानि च ॥ गदाश्च परिघाः प्रासा विविधाश्च परश्वधाः ॥ ७ ॥
धनूंषि च विचित्राणि राक्षसानां जयैषिणाम् ॥ प्रगृहीतान्यशोभन्त वानरानभिधावताम् ॥ ८ ॥
जगृहुः पादपांश्चापि [[3]पुष्पितान्वानरर्षभाः ॥ शिलाश्च विपुला दीर्घा योद्धुकामाः प्लवङ्गमाः ॥ ९ ॥
तेषामन्योन्यमासाद्य संग्रामः सुमहानभूत् ॥ बहूनामश्मवृष्टिं च शरवृष्टिं च वर्षताम् ॥ १० ॥
बहवो राक्षसा युद्धे बहून्वानरयूथपान् ॥ वानरा राक्षसांश्चापि निजघ्नुर्बहवो बहून् ॥ ११ ॥
शूलैः प्रमथिताः केचित्केचिच्च परमायुधैः ॥ परिघैराहताः केचित्केचिच्छिन्नाः परश्वधैः ॥ १२ ॥
निरुच्छ्वासाः कृताः केचित्पतिता धरणीतले ॥ विभिन्नहृदयाः केचिदिषुसंधानसंदिताः ॥ १३ ॥
केचिद्द्विधा कृताः खड्गैः स्फुरन्तः पतिता भुवि ॥ वानरा राक्षसैः शूलैः पार्श्वतश्चावदारिताः ॥१४॥
वानरैश्चापि संक्रुद्धै राक्षसौघाः समन्ततः ॥ पादपैर्गिरिशृङ्गैश्च संपिष्टा वसुधातले ॥ १५ ॥
वज्रस्पर्शतलैर्हस्तैर्मुष्टिभिश्च हता भृशम् ॥ वेमुः[[4]] शोणितमास्येभ्यो विशीर्णदशनेक्षणाः[[5]] ॥ १६ ॥

सस्मितमिति । बलवच्छत्रुदर्शनहर्षेणेतिभावः । तदेव व्यञ्जयति—अरिन्दम इति ॥ १ ॥ क एष इति । ननु प्रहस्तः पूर्वद्वारान्निर्गतः, रामस्तु उत्तरद्वारि तिष्ठति स्म, कथमस्यानेकयोजनस्थसाक्षात्कारः । उच्यते । आप्तवचनेन प्रत्यक्षतुल्येन महाकायः कश्चन गच्छतीति विदित्वा एष इत्याह । आचक्ष्व तमिति शेषः ॥ २—३ ॥ एष इत्यादिसार्धश्लोक एकान्वयः ॥ तस्य रावणस्य । असह्यतया नामाग्रहणं । संवृतशब्दोऽन्तर्भावितण्यर्थः । रावणेन लङ्कायां स्वबलस्य तृतीयभागेन संवारित इत्यर्थः । लङ्कायां राक्षसेन्द्रस्य त्रिभागबलसंवृत इति पाठः । रावणस्य सैन्येषु भागत्रयमस्याधीनमिति भावः । वीर्यवान् बलवान् । "वीर्यं बले प्रभावे च" इत्यमरः । शूरः रणेष्वपरावृत्तः । पराक्रमे परपरिभवने । अत्रेतिकरणं बोध्यं ॥ ४ ॥ तत इत्यादिश्लोकद्वयं ॥ भीमं भयंकरवेषं ॥ ५—६ ॥ खड्गेत्यादिश्लोकद्वयं ॥ राक्षसानामिति तृतीयार्थे षष्ठी । राक्षसैरित्यर्थः ॥७—८॥ वानरश्रेष्ठत्वेप्यवानरत्ववारणाय प्लवङ्गमा इत्युक्तं । यद्वा प्लवङ्गमाः युद्धोत्साहेन प्लवगत्या गच्छन्तः । असंज्ञायां खशार्षः ॥ ९—११ ॥ परमायुधैः चक्रैः । "चक्रं तु परमायुधं" इति निघण्टुः ॥ १२ ॥ शूलपातादिकार्यं दर्शयति—निरुच्छ्वासा इत्यादि ॥ निरुच्छ्वासाः कृताः । इषुसन्धानसंदिताः इषव एव संधानानि बन्धनरज्जवः तैः संदिताः संस्यूताः । स्फुरन्तः लुठन्तः । अवदारिताः भिन्नाः ॥१३–१४॥ संपिष्टाः चूर्णिताः । वेमुः वमनं चक्रुः ॥ १५—

स० त्रिभागबलसंवृतः रावणबलमध्येतृतीयभागबलेनयुक्तः । त्रिशब्दस्यतृतीयवाचकत्वंतुत्रिदशेत्येतद्व्याख्यावसरेभानुदीक्षितेनोक्तं ॥ ४ ॥ ति० इषूणांसंधानं सम्यग्विसर्जनं तेनसादिताः खण्डिताः ॥ १३ ॥ ति० वमन् । अवमन् । वेमुरितिपाठान्तरं

[पा०] १ इदमर्धं ङ. ञ. ट. पाठेषुदृश्यते. २ ङ. ञ. ट. सुप्रख्यातपराक्रमः. ३ ङ. ञ. ट. पुष्पितांश्चगिरींस्तथा. ४ ङ. ञ. ट. संधानसादिताः. ख. च. छ. ज. संधानसंधिताः. ५ घ. ङ. ञ. ट. वमञ्शोणित. ६ ख. मांसानि. ७ ङ. ञ. ट. वदनेक्षणाः.

आर्तस्वनं च स्वनतां सिंहनादं च नर्दताम् ॥ बभूव तुमुलः शब्दो हरीणां रक्षसां युधि ॥ १७ ॥
वानरा राक्षसाः क्रुद्धा वीरमार्गमनुव्रताः ॥ विवृत्तनयनाः क्रूराश्चक्रुः कर्माण्यभीतवत् ॥ १८ ॥
नरान्तकः कुम्भहनुर्महानादः समुन्नतः ॥ एते प्रहस्तसचिवाः सर्वे जघ्नुर्वनौकसः ॥ १९ ॥
तेषामापततां शीघ्रं निघ्नतां चापि वानरान् ॥ द्विविदो गिरिशृङ्गेण जघानैकं नरान्तकम् ॥ २० ॥
दुर्मुखः पुनरुत्थाय कपिः स विपुलद्रुमम् ॥ राक्षसं क्षिप्रहस्तस्तु समुन्नतमपोथयत् ॥ २१ ॥
जाम्बवांस्तु सुसंक्रुद्धः प्रगृह्य महतीं शिलाम् ॥ पातयामास तेजस्वी महानादस्य वक्षसि ॥ २२ ॥
अथ कुम्भहनुस्तत्र तारेणासाद्य वीर्यवान् ॥ वृक्षेणाभिहतो मूर्ध्नि प्राणान्संत्याजयद्रणे ॥ २३ ॥
अमृष्यमाणस्तत्कर्म प्रहस्तो रथमास्थितः ॥ चकार कदनं घोरं धनुष्पाणिर्वनौकसाम् ॥ २४ ॥
आवर्त इव संजज्ञे उभयोः सेनयोस्तदा ॥ क्षुभितस्याप्रमेयस्य सागरस्येव निस्स्वनः ॥ २५ ॥
महता हि शरौघेण प्रहस्तो युद्धकोविदः ॥ अर्दयामास संक्रुद्धो वानरान्परमाहवे ॥ २६ ॥
वानराणां शरीरैश्च राक्षसानां च मेदिनी ॥ बभूव निचिता घोरा पतितैरिव पर्वतैः ॥ २७ ॥
सा मही रुधिरौघेण प्रच्छन्ना संप्रकाशते ॥ संछन्ना माधवे मासि पलाशैरिव पुष्पितैः ॥ २८ ॥
हतवीरौघवप्रां तु भग्नायुधमहाद्रुमाम् ॥ शोणितौघमहातोयां यमसागरगामिनीम् ॥ २९ ॥
यकृत्प्लीहमहापङ्कां विनिकीर्णान्त्रशैवलाम् ॥ भिन्नकायशिरोमीनामङ्गावयवशाद्वलाम् ॥ ३० ॥
गृध्रहंसगणाकीर्णां कङ्कसारससेविताम् ॥ मेदःफेनसमाकीर्णामार्तस्तनितनिस्स्वनाम् ॥
तां कापुरुषदुस्तारां युद्धभूमिमयीं नदीम् ॥ ३१ ॥

१६ ॥ स्वनतां नर्दतामित्यत्र कुर्वतामित्यर्थः । तुमुलः निबिडितः । रक्षसां वानराणां च ॥ १७ ॥ वीरमार्गं युद्धकौशलं । विवृत्तनयनाः भ्रान्तनेत्राः । कर्माणि युद्धकर्माणि । अभीतवत् भयरहितं यथा भवति तथा ॥ १८—१९ ॥ तेषामिति । इयं निर्धारणे षष्ठी । एकं मुख्यं ॥ २० ॥ उत्थाय उद्धत्य । समुन्नताख्यं राक्षसं अपोथयत् अमारयत् । "पुथ हिंसायां" इति धातुः ॥ २१—२२ ॥ तत्र प्रहस्तसचिवेषु । सन्त्याजयत् संतत्याज । स्वार्थिको णिच्प्रत्ययः ॥ २३—२४ ॥ आवर्ते संवर्ते । प्रलय इव स्थिते तस्मिन् युद्धे क्षुभितस्य सागरस्य निस्स्वन इव सेनाया निस्वनः संजज्ञे ॥ २५ ॥ तेषु प्रहस्तप्रकर्ष प्रतिपादयितुं पुनराह—महतेत्यादि ॥ २६ ॥ निचिता व्याप्ता ॥ २७—२८ ॥ अपरिच्छिन्नवानरवधो वृत्त इति द्योतयितुं युद्धभूमिं नदीत्वेन वर्णयति—हतेत्यादिना ॥ उभयसेनाग्रयोर्हतवीराणामोघः समूह एव वप्रं तटं यस्यास्तां । भग्नायुधान्येव महाद्रुमाः भग्नाः तीरमहाद्रुमा यस्यास्तां । शोणितौघा एव महातोयानि कलुषजलानि यस्यास्तां । यमसागरगामिनीं युद्धभूमौ यमो जीवग्रहणाय सन्निधत्त इति प्रसिद्धिः । तद्रूपसागरगामिनीम् । यकृत्प्लीहशब्दौ हृदयस्य दक्षिणवामभागस्थमांसविशेषपरौ । अन्त्राणां शैवलत्वनिरूपणं स्तम्बमयत्वात् । भिन्नकायशिरसोर्मीनत्वनिरूपणं स्फुरितवत्त्वात् । अङ्गावयवाः करचरणाद्यङ्गानामवयवाः । अङ्गुलय इत्यर्थः । त एव शाद्वलानि शाद्वलभूजन्यतृणानि यस्यास्तां । कङ्कः धवलवर्णः श्येनः । सारसो हंसविशेषः । मेदः रुधिरमण्डलं । आर्तानां स्तनितः शब्द इति यावत् । तदेव निम्नोन्नतपतनजनितस्वनो यस्यास्तां । यद्यपि रुधिरप्रवाहस्यापि स्वत एव घोषोस्ति तथापि रूपकत्वायैवमुक्तं । कापुरुषाः भीरवः तैः दुस्तारां । वृद्धिरार्षी । युद्धभूमिमयीमिति स्वार्थे मयट् । व्यस्तरूपकं । प्रावर्तयन्नित्यध्याहार्यं । यद्वा तेरुरिति वक्ष्यमाणमत्राप्यनुषज्यते । अत्र सावयवरूपकालंकारः ॥ २९—

॥ १६ ॥ स० वृक्षेणकरणेन प्राणान् संत्याजयत् तत्याज । पूर्वार्धेयुयुधइतिसतारइत्युत्तरार्धेऽध्याहार्यं । संत्याजयत् अत्याजयदिति वा ॥ २३ ॥ ति० तत्कर्म क्षणादेवसचिवचतुष्टयमारणकर्म ॥ २४ ॥

[पा०] १ क. ख. ग. च. छ. वृक्षेणमहतातस्य. ङ. झ. ञ. ट. वृक्षेणमहतासद्यः. २ ज. प्राणांस्तत्याजराक्षसः.

नदीमिव घनापाये हंससारससेविताम् ॥ राक्षसाः कपिमुख्याश्च तेरुस्तां दुस्तरां नदीम् ॥ ३२ ॥
यथा पद्मरजोध्वस्तां नलिनीं गजयूथपाः ॥ ३३ ॥
ततः सृजन्तं बाणौघान्प्रहस्तं स्यन्दने स्थितम् ॥ ददर्श तरसा नीलो विनिघ्नन्तं प्लवङ्गमान् ॥ ३४ ॥
उद्धूत इव वायुः खे महदभ्रबलं बलात् ॥ समीक्ष्याभिद्रुतं युद्धे प्रहस्तो वाहिनीपतिः ॥
रथेनादित्यवर्णेन नीलमेवाभिदुद्रुवे ॥ ३५ ॥
स धनुर्धन्विनां श्रेष्ठो विकृष्य परमाहवे ॥ नीलाय व्यसृजद्बाणान्प्रहस्तो वाहिनीपतिः ॥ ३६ ॥
ते प्राप्य विशिखा नीलं विनिर्भिद्य समाहिताः ॥ महीं जग्मुर्महावेगा रुषिता इव पन्नगाः ॥३७॥
नीलः शरैरभिहतो निशितैर्ज्वलनोपमैः ॥ स तं परमदुर्धर्षमापतन्तं महाकपिः ॥
प्रहस्तं ताडयामास वृक्षमुत्पाट्य वीर्यवान् ॥ ३८ ॥
स तेनाभिहतः क्रुद्धो नदन्राक्षसपुङ्गवः ॥ ववर्ष शरवर्षाणि प्लवङ्गानां चमूपतौ ॥ ३९ ॥
तस्य बाणगणान्घोरान्राक्षसस्य महाबलः ॥ अपारयन्वारयितुं प्रत्यगृह्णान्निमीलितः ॥ ४० ॥
यथैव गोवृषो वर्षं शारदं शीघ्रमागतम् ॥ एवमेव प्रहस्तस्य शरवर्षं दुरासदम् ॥
निमीलिताक्षः सहसा नीलः सेहे सुदारुणम् ॥ ४१ ॥
रोषितः शरवर्षेण सालेन महता महान् ॥ प्रजघान हयान्नीलः प्रहस्तस्य मनोजवान् ॥ ४२ ॥
ततः स चापमुद्यम्य प्रहस्तस्य महाबलः ॥ बभञ्ज तरसा नीलो ननाद च पुनः पुनः ॥ ४३ ॥
विधनुस्तु कृतस्तेन प्रहस्तो वाहिनीपतिः ॥ प्रगृह्य मुसलं घोरं स्यन्दनादवपुप्लुवे ॥ ४४ ॥
तावुभौ वाहिनीमुख्यौ जातवैरौ तरस्विनौ ॥ स्थितौ क्षतजदिग्धाङ्गौ प्रभिन्नाविव कुञ्जरौ ॥ ४५ ॥
उल्लिखन्तौ सुतीक्ष्णाभिर्दंष्ट्राभिरितरेतरम् ॥ सिंहशार्दूलसदृशौ सिंहशार्दूलचेष्टितौ ॥ ४६ ॥
विक्रान्तविजयौ वीरौ समरेष्वनिवर्तिनौ ॥ काङ्क्षमाणौ यशः प्राप्तुं वृत्रवासवयोः समौ ॥ ४७ ॥
आजघान तदा नीलं ललाटे मुसलेन सः ॥ प्रहस्तः परमायत्तस्तस्य सुस्राव शोणितम् ॥ ४८ ॥

३१ ॥ उपमानमुखेनापि तत्तरणं दर्शयति—नदीमिति ॥ घनापाये वर्षान्ते । तां पूर्वत्र रूपकेण दर्शितां । केचित्तु अत्रोत्तरश्लोकस्थनदीपदवैयर्थ्यभयेन युद्धभूमिमयीं नदीं प्रवर्तयित्वेत्यध्याहरन्ति ॥ ३२ ॥ उक्तानां रक्षोवानराणामुपमामाह—यथेति ॥ पद्मरजोभिः ध्वस्तां वर्णान्तरं प्राप्तां । नलिनीं सरसीं यथा गजयूथपास्तरन्ति । तीर्त्वा रक्ततनवो भवन्तीति यावत् । तथा अरुणशरीरा उत्तेरुरित्यर्थः ॥ ३३ ॥ स्यन्दने रथे । स्थितं । बाणौघान् सृजन्तं मुञ्चन्तं । तरसा वेगेन । प्लवङ्गमान् विनिघ्नन्तं प्रहस्तं ददर्श ॥ ३४ ॥ उद्धूत इत्यादिसार्धश्लोकमेकं वाक्यं ॥ खे स्वदेशभूते । उद्धूतः उत्लवणः । वायुः अभ्रबलं अभ्रजालमिव । युद्धे बलादभिद्रुतं आभिमुख्येनायान्तं नीलं समीक्ष्य रथेन नीलमेवाभिदुद्रुवे इति योजना ॥ ३५—३६ ॥ रुषिताः पन्नगा इव स्थिताः समाहिताः ऋजवः नीलं विनिर्भिद्य महीं जग्मुः विविशुरित्यर्थः ॥ ३७ ॥ नील इत्यादि सार्धश्लोकः ॥ ३८—॥ ३९ ॥ अपारयन् अशक्नुवन् ॥ ४० ॥ यथैवेत्यादिसार्धश्लोकः ॥ यथैवेत्यत्र एवकारोत्यन्तायोगव्यवच्छेदार्थकः । शारदमित्यनेन शरपातस्य क्षयित्वं व्यनक्ति ॥ ४१—४४ ॥ तावुभावित्यादिश्लोकत्रयमेकं वाक्यं ॥ प्रभिन्नौ मत्तौ । सिंहशार्दूलसदृशाविति बले साम्यं । विक्रान्तविजयौ सर्वत्र प्राप्तविजयौ । काङ्क्षमाणौ अभूतामिति शेषः ॥ ४५—४७ ॥ परमायत्तः

ति० अपारयन् वारयितुमशक्तस्सन् ॥ ४० ॥ ति० शारदंवर्षं गोवृषस्यशरत्कालेप्राबल्यंकालस्वभावात् । वर्षंस्यलन्यथा । ततएव तेननातिक्लेशकरस्तस्यशरवर्षइतिसूचितं ॥ ४१ ॥

[पा०] १ घ. प्राहिणोद्बाणान्. २ ग. ङ. च. झ. ट. नर्दन्राक्षस. ३ ङ. झ. ट. गणानेवराक्षसस्यदुरात्मनः. ४ क. ख. ग. च. छ. ञ. महात्मनः. घ. दुरात्मनः. ५ ङ. झ. ट. शरवर्षान्दुरासदान्. ६ ङ. झ. ट. ततोरोषपरीतात्माधनुस्तस्यदुरात्मनः.

ततः शोणितदिग्धाङ्गः प्रगृह्य सुमहातरुम् ॥ प्रहस्तस्योरसि क्रुद्धो विससर्ज महाकपिः ॥ ४९ ॥
तमचिन्त्य प्रहारं स प्रगृह्य मुसलं महत् ॥ अभिदुद्राव बलिनं बलान्नीलं प्लवङ्गमम् ॥ ५० ॥
तमुग्रवेगं संरब्धमापतन्तं महाकपिः ॥ ततः संप्रेक्ष्य जग्राह महावेगो महाशिलाम् ॥ ५१ ॥
तस्य युद्धाभिकामस्य मृधे मुसलयोधिनः ॥ प्रहस्तस्य शिलां नीलो मूर्ध्नि तूर्णमपातयत् ॥ ५२ ॥
सा तेन कपिमुख्येन विमुक्ता महती शिला ॥ बिभेद बहुधा घोरा प्रहस्तस्य शिरस्तदा ॥ ५३ ॥
स गतासुर्गतश्रीको गतसत्त्वो गतेन्द्रियः ॥ पपात सहसा भूमौ छिन्नमूल इव द्रुमः ॥ ५४ ॥
प्रभिन्नशिरसस्तस्य बहु सुस्राव शोणितम् ॥ शरीरादपि सुस्राव गिरेः प्रस्रवणं यथा ॥ ५५ ॥
हते प्रहस्ते नीलेन तदकम्प्यं महद्बलम् ॥ रक्षसामप्रहृष्टानां लङ्कामभिजगाम ह ॥ ५६ ॥
न शेकुः समरे स्थातुं निहते वाहिनीपतौ ॥ सेतुबन्धं समासाद्य विकीर्णं सलिलं यथा ॥ ५७ ॥
हते तस्मिंश्चमूमुख्ये राक्षसास्ते निरुद्यमाः ॥ रक्षःपतिगृहं गत्वा ध्यानमूकत्वमाश्रिताः ॥
प्राप्ताः शोकार्णवं तीव्रं निःसंज्ञा इव तेऽभवन् ॥ ५८ ॥

ततस्तु नीलो विजयी महाबलः प्रशस्यमानः स्वकृतेन कर्मणा ॥
समेत्य रामेण सलक्ष्मणेन च प्रहृष्टरूपस्तु बभूव यूथपः ॥ ५९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टपञ्चाशः सर्गः ॥ ५८ ॥

प्रक्षिप्तसर्गः ॥ १ ॥

प्रहस्तवधश्रवणविषण्णेनरावणेनस्वस्यैवरणायनियोगनिर्धारणम् ॥ १ ॥ तच्छ्रावणेनमन्दोदर्या सभामेत्यरावणंप्रतिश्रीरामप्रभावप्रशंसनपूर्वकं तेनसहसंधिकरणप्रार्थना ॥ २ ॥

[प्रहस्तस्य वधं श्रुत्वा रावणो भ्रान्तमानसः ॥ राक्षसानादिदेशाथ राक्षसेन्द्रो महाबलः ॥ १ ॥
कार्या शत्रुषु नावज्ञा यैरिन्द्रबलसूदनः ॥ सूदितः सैन्यपालो मे सानुयात्रः सकुञ्जरः ॥ २ ॥
सोहं रिपुविनाशाय विजयस्याभिवृद्धये ॥ स्वयमेवाभियास्यामि रणशीर्षमभित्वरन् ॥ ३ ॥
अद्य तद्वानरानीकं सरामं सहलक्ष्मणम् ॥ प्रधक्ष्याम्येव बाणौघैः शुष्केन्धनमिवानलः ॥ ४ ॥
अद्य संतर्पयिष्यामि पृथिवीं कपिशोणितैः ॥ रामं च लक्ष्मणं चैव प्रेषयिष्ये यमक्षयम् ॥ ५ ॥

परमोद्युक्तः ॥ ४८–४९ ॥ अचिन्त्य अचिन्तयित्वा ॥ ५०–५४ ॥ प्रभिन्नशिरसः प्रभिन्नाच्छिरसः । शरीरादपीति समुच्चयः । प्रस्रवणं निर्झरः ॥५५–५६॥ विकीर्णं भग्नं ॥ ५७ ॥ हत इत्यादि सार्धश्लोकः ॥ ध्यानमूकत्वं ध्यानेन वाग्व्यापारशून्यत्वं । तीव्रं घोरं । शोकार्णवं प्राप्ताः शोकार्णवे मग्ना इत्यर्थः ॥ ५८ ॥

स्वकृतेन कर्मणा रिपुवधेन प्रहृष्टरूपः अतिशयेन प्रहृष्टः । प्रशंसायां रूपप् । पञ्चम्यां प्रहस्तवधः ॥५९॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टपञ्चाशः सर्गः ॥ ५८ ॥

ति० ध्यानमूकत्वं ध्यानेनदेवताध्यानेनयेमूकाःमौनिनस्तेषांभावस्तत्त्वं । भयदुःखमोहैःकिमपिवक्तुंनाशक्नुवन्नित्यर्थः । तदेवाह— प्राप्ताइति । स० ध्यानमूकत्वं परावृत्यागमनेरावणशिक्षा । तत्रावस्थानेमरणमितिकिंकर्तव्यमितिचिन्तयामूकत्वंप्राप्ताः ॥ ५८ ॥ इत्यष्टपञ्चाशःसर्गः ॥ ५८ ॥

[पा०] १ क. ख. ग. च. बलीनीलं. २ ग. तूर्णनिपातयत्. ३ क.—च. ज. ट. विभिन्नशिरसः. ४ क. ख. ग. ङ.—ट. मागताः. ५ अत्राधिकत्वेनमुद्रितंसर्गद्वयं ज. पुस्तकएवदृश्यते.

एवमुक्त्वा महातेजा रावणो लोकरावणः ॥ आगच्छत्सहसा क्रुद्धः सर्वसैन्येन संवृतः ॥ ६ ॥
संग्राममभिकाङ्क्षन्तं रावणं श्रुत्य भामिनी ॥ तदोत्थाय ययौ देवी नाम्ना मन्दोदरीति सा ॥ ७ ॥
माल्यवन्तं करे धृत्वा यूपाक्षसहिता तु सा ॥ मन्त्रिभिर्मन्त्रतत्त्वज्ञैस्तथान्यैर्मन्त्रिसत्तमैः ॥ ८ ॥
राक्षसैरावृता सर्वैर्वेत्रजर्झरपाणिभिः ॥ योषिद्भिश्चैव वृद्धाभिस्तथा कन्याभिरावृता ॥ ९ ॥
आयुधव्यग्रहस्तैश्च राक्षसैश्च समन्ततः ॥ सभां तु प्रस्थिता देवी यत्रास्ते राक्षसाधिपः ॥ १० ॥
छत्रेण ध्रियमाणेन अतिकायपुरस्सरा ॥ चामरैर्वररामाभिर्वीज्यमाना स्वलङ्कृता ॥ ११ ॥
शतार्धमार्गं विपुलं ध्वजमालोपशोभितम् ॥ उत्सारणं प्रकुर्वद्भिर्वेत्रजर्झरपाणिभिः ॥ १२ ॥
प्रविवेश सभां दिव्यां प्रभया द्योतमानया ॥ द्रष्टुं वै रावणं सा तु मयस्य दुहिता तु सा ॥ १३ ॥
प्राप्तां देवीं तदा राजा प्रियां मन्दोदरीं तदा ॥ दृष्ट्वा स संभ्रमात्तूर्णं परिष्वज्य दशाननः ॥ १४ ॥
मन्त्रिणां तु ततस्तेषामासनान्यादिदेश ह ॥ सौवर्णसुविचित्राणि सोपधानानि सर्वशः ॥ १५ ॥
तेष्वासनोपविष्टेषु सुखासीनेषु मन्त्रिषु ॥ पर्यङ्के चोपविष्टा तु देवी मन्दोदरी सुखम् ॥ १६ ॥
अतिकायो महाबाहुः पितरं चाभिवाद्य तम् ॥ मातरं चाभिवाद्याथ तदाऽऽसनगतोऽभवत् ॥ १७ ॥
प्रहस्तवधसंतप्तो महाकायवधार्दितः ॥ लङ्कायाश्चाभिमर्देन कषायीकृतलोचनः ॥ १८ ॥
संग्राममभिकाङ्क्षन्स आकुलेनान्तरात्मना ॥ अब्रवीद्वचनं सोथ महागंभीरनिस्स्वनम् ॥ १९ ॥
किमागमनकार्यं ते देवि शीघ्रं तदुच्यताम् ॥ तूर्णं मम समीपं वै किमर्थं त्वमिहाऽऽगता ॥
मन्त्रिभिः सहिता चैव ब्रूहि सर्वं यथातथम् ॥ २० ॥
एवमुक्ते तु वचने देवी रावणमब्रवीत् ॥ विज्ञाप्यं शृणु राजेन्द्र याचे यत्त्वां कृताञ्जलिः ॥ २१ ॥
न हि रोषश्च कर्तव्यो वदन्त्या मम मानद ॥ शृणुष्वैकमना मह्यं वचनं वाक्यकोविद ॥ २२ ॥
श्रुता मे नगरी रुद्धा श्रुता मे राक्षसा हताः ॥ धूम्राक्षप्रमुखा वीराः प्रहस्तेन सहैव तु ॥ २३ ॥
भवन्तं युद्धकामं च गमने कृतनिश्चयम् ॥ इति संचिन्त्य राजेन्द्र ममागमनकारणम् ॥ २४ ॥
न युक्तं प्रमुखे स्थातुं युद्धे तस्य महात्मनः ॥ रामस्य च महेन्द्रेण यस्य भार्या त्वया हृता ॥
लक्ष्मणस्य च राजेन्द्र यस्य नास्ति समो युधि ॥ २५ ॥
न च मानुषमात्रोसौ रामो दशरथात्मजः ॥ एकेन येन वै पूर्वं बहवो राक्षसा हताः ॥
चतुर्दशसहस्राणि जनस्थाननिवासिनाम् ॥ २६ ॥
खरश्च निहतः सङ्ख्ये दूषणश्च महाबलः ॥ त्रिशिराश्च महाबाहुर्हतो राक्षसपुङ्गवः ॥ २७ ॥
कबन्धश्च महातेजा विराधो दण्डके तथा ॥ शरेणैकेन वाली च वानरेन्द्रो निपातितः ॥
शङ्के चैवं महाराज मारीचस्य वधादहम् ॥ २८ ॥
पितुश्च वचनाद्रामो दण्डकारण्यमाश्रितः ॥ ब्रह्मचर्यव्रते युक्तः सह भ्रात्रा वनेचरः ॥ २९ ॥
तस्य भार्या जनस्थानात्त्वयाऽऽनीताऽविजानता ॥ अकारणं कृतं तत्ते दोषाय समुपस्थितम् ॥३० ॥
पतिव्रतावरोधस्तु दोषमावहते सदा ॥ न मह्यं रोचते बुद्ध्या एतेषां मन्त्रिणां तथा ॥ ३१ ॥
रामभार्या सती सा तु रामाय प्रतिदीयताम् ॥ विभीषणेन चैवोक्तं पूर्वमेव महात्मना ॥ ३२ ॥
स गतस्तत्र वै राजन्नसत्कार्यं करिष्यति ॥ वस्त्राणि चैव रत्नानि प्रेषयाद्य रघूत्तमे ॥ ३३ ॥
सीतां चैव महाराज सुवर्णं वाहनानि च ॥ मणिमुक्ताप्रवालं च तथा रजतमेव च ॥ ३४ ॥
माल्यवान्गृह्य संयातु यूपाक्षश्च तथैवच ॥ अतिकायस्तथा चायं कार्याकार्यविशारदः ॥ ३५ ॥

विभीषणो गतः पूर्वमेभिस्तत्र गतैर्ध्रुवम् ॥ संधिं करिष्यति व्यक्तं राघवं प्रणिपत्य ह ॥
संमान्य मैथिलीं चासौ प्रदास्यति विभीषणः ॥ ३६ ॥
माल्यवांश्च महामायो राक्षसानां हिते रतः ॥ राघवं याच्य शिरसा संधिं कुर्वन्तु रावण ॥ ३७ ॥
सान्त्वं भेदं तथा दानं राज्ञामेतत्त्रयं शुभम् ॥ अशुभं तु स्म वै युद्धं तस्माद्युद्धं विसर्जयेत् ॥
त्रिभिर्नयैर्जितं मन्ये सहितं विक्रमेण तु ॥ ३८ ॥
स्वजनस्य वधं कृत्वा पुत्रभ्रातृवधं तथा ॥ संशयं चात्मनः कृत्वा किं जयेन करिष्यसि ॥ ३९ ॥
चञ्चला युद्धसिद्धिस्तु हन्यते तेजसापि वा ॥ तस्माद्युद्धं न रोचेत संधिं कुरु दशानन ॥ ४० ॥
प्रणिपत्य महाबाहो राघवं प्रतिनन्दनम् ॥ दीयतामद्य सा सीता संधिस्ते तेन रोचताम् ॥ ४१ ॥
सांप्रतं संशयो राजन्पुरस्य सह बान्धवैः ॥ आत्मनो राक्षसश्रेष्ठ वर्तते नात्र संशयः ॥ ४२ ॥
तस्माद्राजन्ब्रवीम्येवं पुरस्याथ कुलस्य च ॥ रक्षणीयस्त्वयात्मा च सर्वमात्मन्यधिष्ठितम् ॥ ४३ ॥
क्षमाशीलस्तथा रामः सत्यवादी च राघवः ॥ धर्मनित्यो महाराजः शरणागतवत्सलः ॥ ४४ ॥
कुरु तेनादितः[1] सन्धिं रामे दशरथात्मजे ॥ लक्ष्मणश्च महाबाहो नित्यं भ्रातृहिते रतः ॥ ४५ ॥
प्रहस्तेन कृतं किं नु युध्यता रक्षसा बले ॥ धूम्राक्षेण च राजेन्द्रे नित्यं समरगृद्धिना ॥ ४६ ॥
महाकायेन च तथा महामायेन रक्षसा ॥ अकंपनेन वीरेण युध्यता राक्षसेश्वर ॥ ४७ ॥
तथान्यैर्युध्यमानैश्च किं कृतं राक्षसे बले ॥ न हतो यूथपः कश्चिद्बलोद्देशोपि रावण ॥ ४८ ॥
तेषां वीर्याद्विभेतीन्द्रः कुबेरवरुणावपि ॥ यमो वैवस्वतो येषां तथाऽन्ये देवदानवाः ॥ ४९ ॥
येषां नास्ति समो वीर्ये ते हता वानरैर्युधि ॥ न चापि वानराः शक्या हन्तुं पादपयोधिनः ॥५०॥
रक्ष्यमाणास्तु रामेण सुग्रीवेण च पालिताः ॥ तत्र ते रोचतां सन्धिः सह रामेण रावण ॥ ५१ ॥
योग्यश्च राघवो मित्रं कार्तवीर्यार्जुनो यथा ॥ मा कृथा मोघमानित्वं मा कृथाः कुलसंक्षयम् ॥५२॥
मा कृथाः पुरनाशं तु मा कृथाः पुत्रसंक्षयम् ॥ हितं सर्वं ब्रवीम्येषां कुरुष्व वचनं मम ॥ ५३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे प्रक्षिप्तः सर्गः प्रथमः ॥ १ ॥

प्रक्षिप्तसर्गः ॥ २ ॥

रावणेनमन्दोदरींप्रति स्वपराक्रमप्रशंसनपूर्वकं रामादिवधप्रतिज्ञानेनसपरिष्वङ्गंतस्या अन्तःपुरंप्रतिप्रेषणम् ॥ १ ॥ तथा-भटान्प्रतियुद्धायरथादिसज्जीकरणचोदना ॥ २ ॥

तस्यास्तद्वचनं श्रुत्वा प्रियाया राक्षसेश्वरः ॥ उष्णं दीर्घं विनिश्श्वस्य निरीक्ष्य च सभासदः ॥
हस्ते मन्दोदरीं गृह्य वाक्यमेतदुवाच ह ॥ १ ॥
त्वया न युद्धकाङ्क्षिण्या वचो यद्धहु भाषितम् ॥ न तन्मनसि मे देवि प्रविवेशाप्रियं प्रिये ॥ २ ॥
देवाञ्जित्वा रणे पूर्वं ससुरासुरमानुषान् ॥ प्रणमे मानुषं रामं वानरान्यः समाश्रितः ॥ ३ ॥
प्रणम्य रामं काकुत्स्थं किं वक्ष्ये सर्वदेवताः ॥ कीदृशं वा भवेन्मह्यं जीवितं हततेजसः ॥ ४ ॥
हृत्वा तस्य पुरा भार्यां मानं कृत्वा सुदारुणम् ॥ राक्षसान्मारयित्वा तु लङ्कां संपीड्य सर्वतः ॥
राघवं प्रणमे कस्माद्धीनवीर्य इवापरः ॥ ५ ॥
राघवं प्रणिपत्याहं कथं जीवितुमुत्सहे ॥ एष मे सहजो भावो नित्यं मनसि वर्तते ॥ ६ ॥

---

१ तेन कारणेन । आदितः प्रथमं रामेसंधिंकुर्वित्यन्वयः ॥ ४५ ॥ प्रणमे कथमितिशेषः ॥ ३ ॥

अविभज्य तदा देवि न नमेयं तु कस्यचित् ॥ त्रैलोक्ये स पुमान्नास्ति यो मया न जितो रणे ॥७॥
देवतानां बलं हत्वा देवराजो मया जितः ॥ राघवं प्रणमे कस्मान्मूर्ध्नि स्थित्वा च देहिनाम् ॥८॥
मा कृथा हृदि संतापं शमयिष्ये शुचिस्मिते ॥ हनिष्ये राघवं चैव लक्ष्मणं वानरांश्च तान् ॥ ९ ॥
सुग्रीवं च हनिष्यामि हनूमन्तं च वानरम् ॥ न तु संधिं करिष्यामि राघवेण सहैव तु ॥ १० ॥
वैदेहीं नार्पयिष्यामि राघवस्य भयादहम् ॥ सांप्रतं न च संधिं तु करिष्यति स राघवः ॥ ११ ॥
सागरं सुमहद्धत्वा लङ्कामेत्य सकाननाम् ॥ राक्षसप्रवरान्हत्वा संधिं कुर्यात्कथं प्रिये ॥ १२ ॥
न त्वहं संधिमिच्छामि कदाचिदपि भामिनि ॥ गच्छ त्वं भव विस्रब्धा सर्वमेतत्सुखोदयम् ॥१३॥
मा कृथा हृदि संतापमहं यास्ये रणाजिरम् ॥ अद्य सर्वान्वधिष्यामि शत्रून्समरमूर्धनि ॥ १४ ॥
पुत्राश्च ते महावीर्या मेघनादपुरस्सराः ॥ न तेषां मुच्यते कश्चिदपि मृत्युर्वरानने ॥ १५ ॥
अन्तःपुराय गच्छ त्वं सुखिनी भव सस्नुषा ॥ एवमुक्त्वा परिष्वज्य[1] भार्यां प्रियमना इव ॥ १६ ॥
प्रविवेश तदा देवी स्वयं च भवनं शुभम् ॥ चिन्तयामास तं घोरं विग्रहं समुपस्थितम् ॥ १७ ॥
रावणस्तु तदा वाक्यं राक्षसानिदमब्रवीत् ॥ १८ ॥
कल्प्यतां मे रथः शीघ्रं क्षिप्रमानीयतां धनुः ॥ अद्य क्रोधं विमोक्ष्यामि गूढं सुहृदयेशयम् ॥ १९ ॥
[2]देवाहवे यथा पूर्वं रुद्रेण निहतोऽन्धकः ॥ चिरकालेप्सितं ह्येतद्युद्धं मे राघवेण ह ॥ २० ॥
अद्य तूणीशया बाणा विमुक्ता इव पन्नगाः ॥ रामं समभिधावन्तु विषाग्निप्रतिमाः शिताः ॥ २१ ॥
सुतेजसै रुक्मपुङ्खैर्जलधौतैर्हिरण्मयैः ॥ शरैरादीपयाम्येनमुल्काभिरिव कुञ्जरम् ॥ २२ ॥
वानरान्सुबहून्गृह्य राघवात्संप्रचोदितान् ॥ यमं नयामि विक्रान्तान्मम पार्श्वमुपागतान् ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे प्रक्षिप्तः सर्गो द्वितीयः ॥ २ ॥

एकोनषष्टितमः सर्गः ॥ ५९ ॥

प्रहस्तनिधनश्रवणविहस्तेनरावणेन स्वयमेव महत्यासेनयासह रणायनिर्यांणं ॥ १ ॥ विभीषणेनरामंप्रतिरावणानुयायिनांप्रधानरक्षसां तदीयचिह्नप्रदर्शनपूर्वकंतत्तन्नामनिर्देशः ॥ २ ॥ रावणेन स्वानुयायिनां नगररक्षणनियोजनेनविसर्जनपूर्वकं शरनिकरैः सुग्रीवादिविदारणं ॥ ३ ॥ रामेसमरोद्योगिनिसति लक्ष्मणेन प्रार्थनयातदनुज्ञासंपादनेन रावणाभियानं ॥ ४ ॥ अत्रान्तरे हनुमता रावणनिरोधनं ॥ ५ ॥ रावणकरतलाभिहतेनहनुमता स्वकरतलेन तदुरसिताडनं ॥ ६ ॥ तेन सश्लाघं मुष्टया हनुमत्ताडनं ॥ ७ ॥ तेन किञ्चिद्विह्वलेसतिहनुमति रावणेन नीलंप्रत्यभियानं ॥ ८ ॥ नीले रावणशिरश्शरासनादिषु लाघवेनचपलतरंसंचरमाणे रावणेचालब्धलक्ष्ये हसत्सुकपिषुरुष्टेनतेनाग्नेयास्त्रेण नीलनिपातनपूर्वकं लक्ष्मणाभिगमनं ॥ ९ ॥ लक्ष्मणेनचापच्छेदनपूर्वकंशरताडितेनरावणेनब्रह्मदत्तयाशक्त्यालक्ष्मणवक्षस्ताडनं ॥ १० ॥ रावणेपतितमूर्छितलक्ष्मणोद्धरणेप्रयतनेनाप्यशक्नुवतिलक्ष्मणशरीराकर्षणरुष्टेनहनुमतारावणोरसिमुष्टिघातनं ॥ ११ ॥ तेनसरुधिरोद्गारंमूर्छितेरावणेहनुमतालक्ष्मणस्य रामसमीपप्रापणं ॥ १२ ॥ लब्धसंज्ञेरावणेऽभ्यागच्छतिहनुमत्प्रार्थनयातमारूढेनरामेणतदभियानं ॥ १३ ॥ रामेणशरनिकरैः रावणस्यविरथीकरणपूर्वकंविह्वलताप्रापणेनतत्किरीटकूटच्छेदनं ॥ १४ ॥ रामेणरथादिसामग्रीसाहित्येनपुरागमनचोदनपूर्वकंगृहगमनायाभ्यनुज्ञातेनरावणेनलज्जयालङ्कागमनं ॥ १५ ॥

तस्मिन्हते राक्षससैन्यपाले प्लवङ्गमानामृषभेण युद्धे ॥
भीमायुधं सागरतुल्यवेगं विदुद्रुवे राक्षसराजसैन्यम् ॥ १ ॥

अथ रावणमुकुटभङ्ग एकोनषष्टितमे—तस्मिन्हत | इत्यादि ॥ १ ॥ पावकसूनुशस्तं पावकसूनुना नीलेन

टि० १ परिष्वज्य विससर्जेतिशेषः ॥ १६ ॥ २ तथारामोमयाद्यहन्यतइतिशेषः ॥ २० ॥

[पा०] १ ख. ग. च. ज. प्रदुद्रुवे.

गत्वाऽथ रक्षोधिपतेः शशंसुः सेनापतिं पावकसूनुशस्तम् ॥
तच्चापि तेषां वचनं निशम्य रक्षोधिपः क्रोधवशं जगाम ॥ २ ॥
[1]संख्ये प्रहस्तं निहतं निशम्य शोकार्दितः क्रोधपरीतचेताः ॥
उवाच तान्रक्षतयोधमुख्यानिन्द्रो यथा [2]चामरयोधमुख्यान् ॥ ३ ॥
नावज्ञा रिपवे कार्या यैरिन्द्रबलसूदनः ॥ सूदितः सैन्यपालो मे सानुयात्रः [3]सकुञ्जरः ॥ ४ ॥
सोहं रिपुविनाशाय विजयायाविचारयन् ॥ स्वयमेव गमिष्यामि रणशीर्षं तदद्भुतम् ॥ ५ ॥
अद्य तद्वानरानीकं रामं च सहलक्ष्मणम् ॥ निर्दहिष्यामि बाणौघैर्वनं दीप्तैरिवाग्निभिः ॥ ६ ॥
[[4]अद्य संतर्पयिष्यामि पृथिवीं कपिशोणितैः ॥ रामं च लक्ष्मणं चैव प्रेषयिष्ये यमक्षयम् ॥ ७ ॥]
स एवमुक्त्वा ज्वलनप्रकाशं रथं तुरङ्गोत्तमराजयुक्तम् ॥
प्रकाशमानं वपुषा ज्वलन्तं समारुरोहामरराजशत्रुः ॥ ८ ॥
स शङ्खभेरीपणवप्रणादैरास्फोटितक्ष्वेलितसिंहनादैः ॥
पुण्यैः स्तवैश्चाप्यभिपूज्यमानस्तदा ययौ राक्षसराजमुख्यः ॥ ९ ॥
स शैलजीमूतनिकाशरूपैर्मांसादनैः पावकदीप्तनेत्रैः ॥
बभौ वृतो राक्षसराजमुख्यो भूतैर्वृतो रुद्र [5]इवासुरेशः ॥ १० ॥
ततो नगर्याः सहसा महौजा निष्क्रम्य तद्वानरसैन्यमुग्रम् ॥
महार्णवाभ्रस्तनितं ददर्श समुद्यतं पादपशैलहस्तम् ॥ ११ ॥
तद्राक्षसानीकमतिप्रचण्डमालोक्य रामो भुजगेन्द्रबाहुः ॥
विभीषणं शस्त्रभृतां वरिष्ठमुवाच सेनानुगतः पृथुश्रीः ॥ १२ ॥

शस्तं हतं । तच्चापीत्यनेन रावणेन स्वप्नेपि न तच्चिन्तितमिति सूच्यते । यद्वा शत्रोरुपचये समाश्रयः कार्यइतिनीतिः । तथापि रावणः कालचोदिततया समाश्रयणं विहाय अस्थाने क्रोधवशं गत इत्यपिशब्देन सूच्यते ॥ २—३ ॥ रिपवे रामाय । नावज्ञा कार्या उपेक्षा न कर्तव्या । क्रियाग्रहणं कर्तव्यमिति चतुर्थी । यैश्च वानरैर्हेतुभिः । मम सैन्यपालः प्रहस्तः । सानुयात्रः सानुचरः । सकुञ्जरश्च सूदितः । तेभ्योपि नावज्ञाकार्येत्यर्थः । केचित्तु रिपवे रिपुभ्यः । अवज्ञा एते कपयः किं करिष्यन्तीत्येवंरूपा । न कार्या । कुत इत्यत्राह—यैरित्यादीत्याहुः ॥ ४ ॥ अद्भुतं दुर्बलैः प्रबलविनाशनादाश्चर्यं ॥ ५–७ ॥ तुरङ्गोत्तमराजैः तुरङ्गश्रेष्ठतमैः युक्तं । प्रकाशमानं अलङ्कारैर्भासमानं । वपुषा ज्वलन्तं स्वरूपत एव प्रकाशमानं ॥८॥ आस्फोटितक्ष्वेलितसिंहनादैः आस्फोटितं भुजास्फालनं । क्ष्वेलितशब्दःशब्दमात्रपरः । आस्फोटितजनितशब्दैः सिंहनादैश्चेत्यर्थः । पुण्यैः चारुभिः ॥९॥ स इति । काठिन्यसिद्धये शैलौपम्यं । संकोचविकासार्हत्वसिद्ध्यै मेघौपम्यं । रूपं शरीरं । रुद्रस्यासुरेश्वरत्वं तामसप्रकृतित्वात् । तदुक्तं मैत्रायणीयानामुपनिषदि—" यो ह वा अस्य तामसोंशः सोसौ रुद्रः " इति ॥ १० ॥ महार्णवाभ्रस्तनितं महार्णवाभ्रयोरिव स्तनितं घोषो यस्येति तथा ॥ ११ ॥ अतिप्रचण्डं अत्यन्तकोपनं । भुजगेन्द्रबाहुः युद्धौत्सुक्येन प्रवर्धमानबाहुरित्यर्थः । पृथुश्रीः युद्धहर्षेण संजातलक्ष्मीकः । सेनानुगतः स्वामिसंरक्षणाय सर्वतः समवेतसेनापरिवृतः । शस्त्रभृतां वरिष्ठं वीरभटतारतम्यज्ञमिति

स० अनु यात्रा रणाजिरगमनंयस्यतदनुयात्रं सैन्यं । तेनसहितः सानुयात्रः ॥ ४ ॥ ती० वस्तुतस्तु—सहलक्ष्मणंरामं विनेतिशेषः । बाणौघैः वानरानीकंनिर्दहिष्यामीतिसंबन्धः ॥ ६ ॥ शि० रावणोभूतैर्वृतः अमरेशोरुद्रइवबभौ ॥ १० ॥

[पा०] १ ज. सभ्रातरंनीलहतंनिशम्यशोकार्दितःक्रोशवशाभिभूतः. २ झ. निर्जरयूथमुख्यान्. ३ ङ. झ. ट. रिन्द्रबलसादनः. ४ क. सवाहनः. ५ अयंश्लोकः ज. पुस्तकेदृश्यते. ६ झ. ञ. ट. इवामरेशः.

असौ च जीमूतनिकाशरूपः कुम्भः पृथुव्यूढसुजातवक्षाः ॥
समाहितः पन्नगराजकेतुर्विस्फारयन्भाति धनुर्विधून्वन् ॥ २१ ॥
यश्चैष जाम्बूनदवज्रजुष्टं दीप्तं सधूमं परिघं प्रगृह्य ॥
आयाति रक्षोबलकेतुभूतस्त्वसौ निकुम्भोद्भुतघोरकर्मा ॥ २२ ॥
यश्चैष चापासिशरौघजुष्टं पताकिनं पावकदीप्तरूपम् ॥
रथं समास्थाय विभात्युदग्रो नरान्तकोसौ नगशृङ्गयोधी ॥ २३ ॥
यश्चैष नानाविधघोररूपैर्व्याघ्रोष्ट्रनागेन्द्रमृगाश्ववक्त्रैः ॥
भूतैर्वृतो भाति विवृत्तनेत्रैः सोसौ सुराणामपि दर्पहन्ता ॥ २४ ॥
यत्रैतदिन्दुप्रतिमं विभाति च्छत्रं सितं सूक्ष्मशलाकमग्र्यम् ॥
अत्रैष रक्षोधिपतिर्महात्मा भूतैर्वृतो रुद्र इवावभाति ॥ २५ ॥
असौ किरीटी चलकुण्डलास्यो नगेन्द्रविन्ध्योपममीमकायः ॥
महेन्द्रवैवस्वतदर्पहन्ता रक्षोधिपः सूर्य इवावभाति ॥ २६ ॥

प्रत्युवाच ततो रामो विभीषणमरिन्दमम् ॥ अहो दीप्तो महातेजा रावणो राक्षसेश्वरः ॥ २७ ॥
आदित्य इव दुष्प्रेक्षो रश्मिभिर्भाति रावणः ॥ सुव्यक्तं लक्षये ह्यस्य रूपं तेजःसमावृतम् ॥ २८ ॥
देवदानववीराणां वपुर्नैवंविधं भवेत् ॥ यादृशं राक्षसेन्द्रस्य वपुरेतत्प्रकाशते ॥ २९ ॥
सर्वे पर्वतसंकाशाः सर्वे पर्वतयोधिनः ॥ सर्वे दीप्तायुधधरा योधाश्चास्य महौजसः ॥ ३० ॥
भाति राक्षसराजोसौ प्रदीप्तैर्भीमविक्रमैः ॥ भूतैः परिवृतस्तीक्ष्णैर्देहवद्भिरिवान्तकः ॥ ३१ ॥
दिष्ट्याऽद्यमद्य पापात्मा मम दृष्टिपथं गतः ॥ अद्य क्रोधं विमोक्ष्यामि सीताहरणसंभवम् ॥ ३२ ॥
एवमुक्त्वा ततो रामो धनुरादाय वीर्यवान् ॥ लक्ष्मणानुचरस्तस्थौ समुद्यृत्य शरोत्तमम् ॥ ३३ ॥

त्रिशिरा इत्यपि पठन्ति ॥ २० ॥ पृथुव्यूढसुजातवक्षाः पृथु पीनं व्यूढं विशालं सुजातं सुन्दरं च वक्षो यस्य स तथोक्तः । समाहितः सन्नद्धः । धनुर्विस्फारयन् ज्यामवलम्ब्य कर्षन् । पुनर्लीलया विधून्वन् असौ कुम्भो भाति । अत्र यच्छब्दाप्रयोगः सन्निहितत्वादिति भाव्यं ॥ २१ ॥ जाम्बूनदवज्राभ्यामन्योन्यमिलिताभ्यां जुष्टं अतएव दीप्तं ज्वालायुक्तं । सधूमं सधूममिव स्थितं । अभेदनिर्देशः । सर्वथा सादृश्यप्रतिपत्तये । रक्षोबलकेतुभूतः रक्षोबलप्रधानभूतइत्यर्थः ॥ २२ ॥ उदग्रः उन्नतः । नगशृङ्गैः साधनैः युध्यत इति नगशृङ्गयोधी । प्रतियोद्भ्रभावात् भुजकण्डूनिवृत्त्यर्थं नगैः सह युध्यत इति वार्थः ॥ २३ ॥ अथ त्रिभिः रावणं दर्शयति—यश्चेति ॥ विवृत्तनेत्रैः घूर्णितनेत्रैः ॥ २४—२५ ॥ नगेन्द्रः हिमवान् ॥ २६ ॥ दीप्तः कान्तिमान् । महातेजाः महाप्रतापः ॥ २७ ॥ आदित्य इव रश्मिभिः दुष्प्रेक्षः प्रेक्षितुमशक्यः । अनयोरर्थयोर्भिन्नवाक्यत्वान्न पुनरुक्तिशङ्का ॥ २८ ॥ देवेत्यर्धद्वयमेकं वाक्यं ॥ २९–३० ॥ देहवद्भिः प्रशस्तदेहैः ॥ ३१ ॥ क्रोधं विमोक्ष्यामि क्रोधं कार्यकरं करिष्यामीत्यर्थः । मम

पूर्वहतादन्यइतिबोध्यं ॥ १५ ॥ स० इन्दुप्रतिमं चन्द्रसदृशं । चन्द्रसादृश्येकिञ्चित्कलङ्कितात्राश्वास्यात् तांपरिहर्तुसितमित्युक्तं ॥ २५ ॥ ति० नव्यक्तंलक्षयेइत्यत्रहेतुः तेजस्समावृतमिति । रूपं सूक्ष्मावयवसंस्थानं ॥ २८ ॥ स० इदमोशब्दश्चाहनीत्यर्थेतिभवति । एतद्दिनेदृष्टिपथंगतः । अद्यक्रोधंविमोक्ष्यामि त्यक्ष्यामि । दिनेपि "लृदृशेषे" इत्युक्तेः दृष्टिमार्गगमनकालतउत्तरसि-

---

[पा०] १ ङ. झ. ट. विस्फारयन्याति. २ ख. ग. घ. च. छ. ज. केतुभूतस्सोसौ. ङ. झ. ट. केतुभूतोयोसौनिकुंद्भुतवीरकर्मा. ३ ग. ङ. झ. ट. विवृत्तनेत्रैर्योसौ. ४ घ. च. छ. झ. ट. नव्यक्तंलक्षये. ५ ख. च. छ. दानवयक्षाणां. च. छ. ज. वपुर्नैतादृशं. ७ क. ख. ग. च. छ. ज. ञ. ट. लक्ष्मणानुगतः.

ततः स रक्षोधिपतिर्महात्मा रक्षांसि तान्याह महाबलानि ॥
द्वारेषु चर्यागृहगोपुरेषु सुनिर्वृतास्तिष्ठत निर्विशङ्काः ॥ ३४ ॥
इहागतं मां सहितं भवद्भिर्वनौकसश्छिद्रमिदं विदित्वा ॥
शून्यां पुरीं दुष्प्रसहां प्रमथ्य प्रधर्षयेयुः सहसा समेताः ॥ ३५ ॥
विसर्जयित्वा [1]सहितांस्ततस्तान्मतेषु रक्षस्सु यथानियोगम् ॥
व्यदारयद्वानरसागरौघं महाझषः पूर्णमिवार्णवौघम् ॥ ३६ ॥
तमापतन्तं सहसा समीक्ष्य दीप्तेषुचापं युधि राक्षसेन्द्रम् ॥
महत्समुत्पाट्य महीधराग्रं दुद्राव रक्षोधिपतिं हरीशः ॥ ३७ ॥
तच्छैलशृङ्गं बहुवृक्षसानुं प्रगृह्य चिक्षेप निशाचराय ॥
तमापतन्तं सहसा समीक्ष्य बिभेद बाणैस्तपनीयपुङ्खैः ॥ ३८ ॥
तस्मिन्प्रवृद्धोत्तमसानुवृक्षे शृङ्गे विकीर्णे पतिते पृथिव्याम् ॥
महाहिकल्पं शरमन्तकाभं समाददे राक्षसलोकनाथः ॥ ३९ ॥
स तं गृहीत्वाऽनिलतुल्यवेगं सविस्फुलिङ्गज्वलनप्रकाशम् ॥
बाणं महेन्द्राशनितुल्यवेगं चिक्षेप सुग्रीववधाय रुष्टः ॥ ४० ॥
स सायको रावणबाहुमुक्तः शक्राशनिप्रख्यवपुः शिताग्रः ॥
सुग्रीवमासाद्य बिभेद वेगाद्रुहेरिता क्रौञ्चमिवोग्रशक्तिः ॥ ४१ ॥
स सायकार्तो विपरीतचेताः क्रूजन्पृथिव्यां निपपात वीरः ॥
[2]तं प्रेक्ष्य भूमौ पतितं विसंज्ञं नेदुः प्रहृष्टा युधि यातुधानाः ॥ ४२ ॥
ततो गवाक्षो गवयः [3]सुदंष्ट्रस्तथर्षभो ज्योतिमुखो [4]नभश्च ॥
शैलान्समुद्यम्य विवृद्धकायाः प्रदुद्रुवुस्तं [5]प्रति राक्षसेन्द्रम् ॥ ४३ ॥

दृष्टिपथं गत इति पाठः ॥ ३२–३३ ॥ द्वारेषु अन्तर्द्वारेषु । चर्यायुक्ताः पुरद्वारेषु गोपुरपार्श्वयोः भटनिवासार्थं निर्मिता विशङ्कटा गृहाः चर्यागृहाः । सुनिर्वृताः अतिसुखिताः ॥ ३४ ॥ इहागतं मां विदित्वा इदं छिद्रं विदित्वेत्यन्वयः । प्रमथ्य ध्वंसित्वा । प्रधर्षयेयुः अभिभवेयुः ॥३५॥ सहितान् संमिलितान् । महाझषः महामत्स्यः ॥ ३६ ॥ दीप्ते इषुचापे यस्य स तथोक्तः । युधि संयुगनिमित्तं । सहसा आपतन्तं राक्षसेन्द्रं समीक्ष्य । महीधराग्रं पर्वतशृङ्गं । समुत्पाट्य हरीशः सुग्रीवः । रक्षोधिपतिं दुद्राव ॥ ३७ ॥ बहुवृक्षसानुं बहुतरुयुततटं । तपनीयं स्वर्णं ॥ ३८—३९ ॥ महेन्द्राशनिः वज्रं । औत्पातिकाशनिव्यावृत्तये महेन्द्रपदं । यद्वा महेन्द्रसंबन्धोक्तिः अभ्यासवता मुक्तत्वेनातिवेगद्योतनाय ॥ ४० ॥ शक्राशनिप्रख्यं शक्राशनितुल्यं वपुः यस्य । गुहः स्कन्दः ॥ ४१ ॥ विपरीतचेताः भ्रान्तचित्तः ॥ ४२ ॥ ज्योतिमुखः ज्योति-

---

न्कालेकोपत्यागः । सोपितन्मारणात्माज्ञेयः ॥ ३२ ॥ स० तच्छैलशृङ्गं सचासौशैलश्च तस्यशृङ्गंयस्मिंस्तथा । बहुवृक्षैरुपेतश्चासौसानुः स्तुः । "स्तुःप्रस्थःसानुरस्त्रियां" इत्यमरः । "शृङ्गार्घनिदाघोद्यमशल्यदृढाः" इति पुंनपुंसकाधिकारलिङ्गानुशासनाच्चप्रवृद्धोत्तमसानुवृक्षेशृङ्गे इतिद्वितीयव्याख्यानेसुलभं । प्रथमव्याख्यानेसंबन्धस्यद्विनिष्ठत्वात्सानोःशृङ्गसाहित्यवच्छृङ्गस्यतत्साहित्यमपि संभवतीतिपदंलभ्यं । 'शृङ्गशब्दोऽर्धचादिरितिपुंल्लिङ्गतोपपत्तिरितिनागोजिभट्टोक्तिस्तु एतदनिभालनमूलेति प्रपञ्चार्थतैतस्येतिवा ज्ञेयं ॥ ३८—३९ ॥ स० बाणं सुग्रीववधायेतिचिक्षेप ॥ ४० ॥

[पा०] १ ख. ङ. च. छ. झ. सचिवांस्ततः. २ ङ. झ. ट. विदीर्णे. ३ ङ. झ. ट. शक्राशनिस्पर्शवपुः प्रकाशं. ४ ङ. झ. तंवीक्ष्य. ५ ङ. झ. ट. सुषेण स्त्वथर्षभो. ६ क.—ट. नलश्च. ७ घ. युधिराक्षसेन्द्रं.

तेषां प्रहारान्स चकार मोघान्रक्षोधिपो बाणगणैः शिताग्रैः ॥
तान्वानरेन्द्रानपि बाणजालैर्बिभेद जाम्बूनदचित्रपुङ्खैः ॥ ४४ ॥
ते वानरेन्द्रास्त्रिदशारिबाणैर्भिन्ना निपेतुर्भुवि भीमकायाः ॥
ततस्तु तद्वानरसैन्यमुग्रं प्रच्छादयामास स बाणजालैः ॥ ४५ ॥
ते वध्यमानाः पतिताः प्रवीरा नानद्यमाना भयशल्यविद्धाः ॥
शाखामृगा रावणसायकार्ता जग्मुः शरण्यं शरणं स्म रामम् ॥ ४६ ॥
ततो महात्मा स धनुर्धनुष्मानादाय रामः सहसा जगाम ॥
तं लक्ष्मणः प्राञ्जलिरभ्युपेत्य उवाच वाक्यं परमार्थयुक्तम् ॥ ४७ ॥
काममार्य सुपर्याप्तो वधायास्य दुरात्मनः ॥ विधमिष्याम्यहं नीचमनुजानीहि मां प्रभो ॥ ४८ ॥
तमब्रवीन्महातेजा रामः सत्यपराक्रमः ॥ ४९ ॥
गच्छ यत्नपरश्चापि भव लक्ष्मण संयुगे ॥ रावणो हि महावीर्यो रणेऽद्भुतपराक्रमः ॥
त्रैलोक्येनापि संक्रुद्धो दुष्प्रसह्यो न संशयः ॥ ५० ॥

र्मुखः ॥ ४३—४५ ॥ ते प्रसिद्धा वानरेन्द्राः नतु क्षुद्राः । वध्यमानाः प्रथमं हिंस्यमानाः । ततः पतिताः रावणवेगेन भूमौ पतिताः । तदानीं रक्षकान्तरादर्शनान्नानद्यमानाः अतिशयेन नदन्तः । नदतेर्यङि "सन्यङोः" इत्यभ्यासदीर्घादिः । भयशल्यविद्धाः तादृशहेतुना भयरूपशल्येन विद्धाः । शाखामृगाः वनचारित्वेनैतादृशभयानभिज्ञाः । उक्तप्रकारेण सायकार्ताःसन्तः शरण्यं सर्वलोकशरणार्हं । रामं शरणं जग्मुः । एतेनार्तिरेव शरणागतिप्रयोजिका नतुदेशकालाधिकारिफलनियमा इत्युक्तं ॥ ४६ ॥ शरणागतकृत्यमुक्त्वा शरण्यकृत्यमाह—तत इति ॥ अत्र प्रपत्तेरार्तप्रपत्तिरूपतया तस्याः सद्यः फलद्योतनाय तत इत्युक्तं । प्रपत्त्युत्तरक्षण इत्यर्थः । महात्मा शरणागतितारतम्यज्ञः । धनुष्मान् प्रशस्तधनुष्कः । धनुर्युद्धसमर्थ इत्यर्थः । सहसेत्यनेन लक्ष्मणः स्वयं गमिष्यामीति तत्पूर्वमेवाश्रितत्राणत्वरया सधनुः सन् जगामेत्युक्तं । तथैव घट्टकुट्यां प्रभातमित्याह—तमिति । तं आर्तत्राणत्वरया व्रजन्तं । लक्ष्मणः रामकैङ्कर्यलक्ष्मीसंपन्नः । अनतिक्रमणाय नाथं निगलयति—प्राञ्जलिरिति । अभ्युपेत्य अभितः उपेत्य । अनेन लक्ष्मणागमनमजानन्निव नानापार्श्वेषु रामोनेकधा जगामेत्यवगम्यते । परमार्थयुक्तं न तूपचारयुक्तं । यद्वा परमार्थयुक्तं परमप्रयोजनयुक्तं । विषये कैङ्कर्यस्य शेषभूतं प्रति परमप्रयोजन ॥ ४७ ॥ हे आर्य, अस्य दुरात्मनः परदारापहरण विषयदुर्बुद्धेः । कामं प्रकामं । वधाय सुपर्याप्तः सुशक्तोसि । तथापि नीचं भवता योद्धुमनर्हं । अहं वधिष्यामि । महाबलेन भवता नीचोयं न योद्धुमर्ह इति भावः । यद्वा अस्य वधायाहं पर्याप्तोस्मीत्यर्थः । तर्हि स्वयमेव गम्यतामित्यत्राह—अनुजानीहीति । प्रभो शेषिन् । त्वं मां शेषभूतमनुजानीहि । भवदनुज्ञामन्तरेण मे कार्यकरणं स्वरूपहानिकरमितिभावः ॥४८॥ तं विनयेनोक्तवन्तं । महातेजाः तादात्विकहर्षप्रकर्षावेदकसुषमाविशेषशाली । सति कस्मिंश्चिद्विधेयेसति । अपराक्रमः निवृत्तपराक्रमः । अब्रवीत् ॥ ४९ ॥ नीचपदसूचितमनादरं वारयति—यत्नपर इति । युद्धे यत्नपरश्चापि भव यथा युद्धपरोसि एवं यत्नपरो भव । यत्नस्यावश्यकर्तव्यत्वे हेतुमाह—रावण इति । अद्भुतपराक्रमः एवमस्त्रमाददान इवापरं संधत्ते तत्संदधान इवापरं मोक्षयतीत्यर्थः । त्रिलोक्येव त्रैलोक्यं तेन । युगपद्युद्धप्रवृत्तेनेत्यर्थः । यत्नपरत्वंदर्शयति—तस्येति ॥ चक्षुषा तस्य रावणस्य । छिद्राणि अनवधानादीनि । यत्नान्मार्गस्व अन्वेषयस्व । स्वच्छिद्राणि लक्षय काकान्पश्येतिवत् स्वस्य छिद्राणि यथा न भवन्ति

टी० सधनुरित्यत्र सइतिच्छेदः ॥ ४७ ॥

[पा०] १ ङ. च. झ. ट. बाणशतैः. २ क. ख. ज. पतिताभ्यवीराः. घ. प्रथिताभ्यवीराः. ३ ग. शरशल्यविद्धाः. क. ख. घ. हयतुल्यवेगाः. ४ झ. ट. रामंपरमार्थ.

तस्य च्छिद्राणि मार्गस्व स्वच्छिद्राणि च लक्षय ॥ चक्षुषा धनुषा यत्नाद्रक्षात्मानं समाहितः ॥५१॥
राघवस्य वचः श्रुत्वा परिष्वज्याभिपूज्य च ॥ अभिवाद्य ततो रामं ययौ सौमित्रिराहवम् ॥ ५२ ॥
स रावणं वारणहस्तबाहुर्ददर्श दीप्तोद्यतभीमचापम् ॥
प्रच्छादयन्तं शरवृष्टिजालैस्तान्वानरान्भिन्नविकीर्णदेहान् ॥ ५३ ॥
तमालोक्य महातेजा हनुमान्मारुतात्मजः ॥ निवार्य शरजालानि प्रदुद्राव स रावणम् ॥ ५४ ॥
रथं तस्य समासाद्य भुजमुद्यम्य दक्षिणम् ॥ त्रासयन्रावणं धीमान्हनुमान्वाक्यमब्रवीत् ॥ ५५ ॥
देवदानवगन्धर्वैर्यक्षैश्च सह राक्षसैः ॥ अवध्यत्वं त्वया प्राप्तं वानरेभ्यस्तु ते भयम् ॥ ५६ ॥
एष मे दक्षिणो बाहुः पञ्चशाखः समुद्यतः ॥ विधमिष्यति ते देहाद्भूतात्मानं चिरोषितम् ॥ ५७ ॥
श्रुत्वा हनुमतो वाक्यं रावणो भीमविक्रमः ॥ संरक्तनयनः क्रोधादिदं वचनमब्रवीत् ॥ ५८ ॥
क्षिप्रं प्रहर निश्शङ्कं स्थिरां कीर्तिमवाप्नुहि ॥ ततस्त्वां ज्ञातविक्रान्तं नाशयिष्यामि वानर ॥ ५९ ॥
रावणस्य वचः श्रुत्वा वायुसूनुर्वचोऽब्रवीत् ॥ प्रहृतं हि मया पूर्वमक्षं स्मर सुतं तव ॥ ६० ॥
एवमुक्तो महातेजा रावणो राक्षसेश्वरः ॥ आजघानानिलसुतं तलेनोरसि वीर्यवान् ॥ ६१ ॥
स तलाभिहतस्तेन चचाल च मुहुर्मुहुः ॥ स्थित्वा मुहूर्तं तेजस्वी स्थैर्यं कृत्वा महामतिः ॥
आजघानाभिसंक्रुद्धस्तलेनैवामरद्विषम् ॥ ६२ ॥
ततस्तलेनाभिहतो वानरेण महात्मना ॥ दशग्रीवः समाधूतो यथा भूमिचलेऽचलः ॥ ६३ ॥
संग्रामे तं तथा दृष्ट्वा रावणं तलताडितम् ॥ ऋषयो वानराः सिद्धा नेदुर्देवाः सहासुरैः ॥ ६४ ॥
अथाश्वास्य महातेजा रावणो वाक्यमब्रवीत् ॥ साधु वानर वीर्येण श्लाघनीयोसि मे रिपुः ॥ ६५ ॥

तथा पश्येत्यर्थः । यद्वा लक्षय लक्षित्वा प्रच्छादयेत्यर्थः । एवं समाहितः सावधानः सन् । धनुषा आत्मानं रक्ष ॥ ५०—५१ ॥ अभिपूज्य प्रदक्षिणीकृत्येत्यर्थः ॥ ५२—५३ ॥ तमालोक्येति भूत्वे मयि विद्यमाने कथमसौ समासीदतीति जगामेत्यर्थः ॥ ५४—५५ ॥ भयं प्राप्तमिति शेषः ॥ ५६ ॥ पञ्चशाखः पञ्चाङ्गुलिकः । भूतात्मानं विधमिष्यति निष्क्रामयिष्यति । धातूनामनेकार्थत्वात् ॥५७—५८॥ स्थिरां कीर्तिमवाप्नुहीति सोपालम्भोक्तिः । हनुमान् रावणमुपसृत्य प्रहृतवानित्येतादृशीं कीर्तिमवाप्स्यसीत्यर्थः । ज्ञातविक्रान्तं ज्ञातविक्रमं । भावे क्तः ॥५९॥ रावणवचनं ज्ञात्वा तदुचितमुत्तरमाह—प्रहृतं हीति ॥ ६० ॥ एवमुक्तइति । मर्मोद्घाटनेन संजातरोष इत्यर्थः ॥ ६१ ॥ तलेनेति । रावणेन तलेन प्रहरणात् स्वयमपि तलेनैवप्राहरदितिभावः ॥ ६२ ॥ समाधूतः कम्पितः । अभूत् । भूमिचले भूकम्पेसति । अचलः

स० छिद्राणि मर्माणि मार्गस्व परीक्षस्व । स्वच्छिद्राणि गोपय रक्ष । चक्षुषातं लक्षय । स्वसमाहितः स्वैनैवसमाहितः । समसमरेवक्तानान्योस्तीतिभावः । एतावत्युक्तिःकुतइत्यतोवाह—स्वसमाहितः सु अत्यन्तं असमोविषमः अहितो वैरीयस्यसतथा त्वमित्यर्थः ॥ ५१ ॥ **स०** वानरेभ्यःकपिभ्यः । तेभ्योऽवृतत्वाद्वरस्येतिभावः । नरेभ्यइत्यपि कपिसाम्याद्वक्तव्यं । तथापि स्वस्यैवपुरःस्थितेः स्वजातेर्ग्रहणमित्यवगन्तव्यं । वानरेभ्यइत्यत्राऽऽवृत्त्यातत्रापिपदच्छेदेन वानरेभ्योवातेभ्यइवनरेभ्योपिभयमित्यन्वयकरणेनतदुक्तिर्ज्ञेयेति अस्मत्तः कपिभ्यइत्यनुक्त्वा उक्त्वाचवानरेभ्यइतिकविर्ध्वनयाञ्चक्रे ॥ ५६ ॥ **स०** यतो येन । मुत् संतोषः । सतेबाहुः अदक्षिणः ताडनाकुशलः असमर्थइतियावत् । एषमेपंचशाखोहस्तः तेदेहेचिरोषितंभूतात्मानंप्राणं विधमिष्यति बहिर्निस्सारयति । अभूतात्मानं मुख्यप्राणमितिवा ॥ ५७ ॥ **रामानु०** ज्ञातविक्रान्तमितिवचनं सोष्ठुण्ठनं । ज्ञात्वातदुचितमुत्तरमाह—**प्रहृतमिति** ॥ ६० ॥ **स०** देवाः राजानः सुरासुरैःसहनेदुः । "देवःसुरेवनेराज्ञि" इतिविश्वः ॥ ६४ ॥

[**पा०**] १ क.—ज. गोपय. २ ङ. झ. ट. धनुषात्मानंगोपायस्वसमाहितः. ३ क. ख. घ.—ट. संपरिष्वज्यपूज्यच. ४ क. ग. घ. ङ. झ. ट. अभिवाद्यचरामाय. ५ ङ. झ. ट. राहवे. ६ क. झ. वारणहस्तबाहुं. ७ ग. मुष्टिमुद्यम्य. ८ क.—घ. च. छ. ञ. देवदानवगन्धर्वायक्षाश्चसहराक्षसाः । अवश्यंभवताभग्नावानरेभ्यस्तुतेभयं. ९ घ. ङ. झ. ट. देहेभूतात्मानं. १० ङ. झ. ट. सुरासुरैः. क.—घ. सहासुराः.

रावणेनैवमुक्तस्तु मारुतिर्वाक्यमब्रवीत् ॥ धिगस्तु मम वीर्येण यस्त्वं जीवसि रावण ॥ ६६ ॥
सकृत्तु प्रहरेदानीं दुर्बुद्धे किं विकत्थसे ॥ ततस्त्वां मामिका मुष्टिर्नयिष्यति यमक्षयम् ॥ ६७ ॥
ततो मारुतिवाक्येन क्रोधस्तस्य तदाऽज्वलत् ॥ संरक्तनयनो यत्नान्मुष्टिमुद्यम्य दक्षिणम् ॥
पातयामास वेगेन वानरोरसि वीर्यवान् ॥ ६८ ॥
हनुमान्वक्षसि व्यूढे संचचाल हतः पुनः ॥ ६९ ॥
विह्वलं तु तदा दृष्ट्वा हनुमन्तं महाबलम् ॥ रथेनातिरथः शीघ्रं नीलं प्रति समभ्यगात् ॥ ७० ॥
राक्षसानामधिपतिर्दशग्रीवः प्रतापवान् ॥ पन्नगप्रतिमैर्भीमैः परमर्मातिभेदिभिः ॥
शरैरादीपयामास नीलं हरिचमूपतिम् ॥ ७१ ॥
स शरौघसमायस्तो नीलः कपिचमूपतिः ॥ करेणैकेन शैलाग्रं रक्षोधिपतयेऽसृजत् ॥ ७२ ॥
हनुमानपि तेजस्वी समाश्वस्तो महामनाः ॥ विप्रेक्षमाणो युद्धेप्सुः सरोषमिदमब्रवीत् ॥ ७३ ॥
नीलेन सह संयुक्तं रावणं राक्षसेश्वरम् ॥ अन्येन युध्यमानस्य न युक्तमभिधावनम् ॥ ७४ ॥
रावणोपि महातेजास्तच्छृङ्गं सप्तभिः शरैः ॥ आजघान सुतीक्ष्णाग्रैस्तद्विकीर्णं पपात ह ॥ ७५ ॥
तद्विकीर्णं गिरेः शृङ्गं दृष्ट्वा हरिचमूपतिः ॥ कालाग्निरिव जज्वाल क्रोधेन परवीरहा ॥ ७६ ॥
सोश्वकर्णान्धवान्सालांश्चूतांश्चापि सुपुष्पितान् ॥ अन्यांश्च विविधान्वृक्षान्नीलश्चिक्षेप संयुगे ॥७७॥
स तान्वृक्षान्समासाद्य प्रतिचिच्छेद रावणः ॥ अभ्यवर्षत्सुघोरेण शरवर्षेण पावकिम् ॥ ७८ ॥
अभिवृष्टः शरौघेण मेघेनेव महाचलः ॥ दृश्यं कृत्वा तदा रूपं ध्वजाग्रे निपपात ह ॥ ७९ ॥
पावकात्मजमालोक्य ध्वजाग्रे समुपस्थितम् ॥ जज्वाल रावणः क्रोधात्ततो नीलो ननाद च ॥८०॥
ध्वजाग्रे धनुषश्चाग्रे किरीटाग्रे च तं हरिम् ॥ लक्ष्मणोथ हनूमांश्च दृष्ट्वा रामश्च विस्मिताः ॥ ८१ ॥
रावणोपि महातेजाः कपिलाघवविस्मितः ॥ अस्त्रमाहारयामास दीप्तमाग्नेयमद्भुतम् ॥ ८२ ॥

गिरिर्यथा ॥ ६३—६५ ॥ वीर्येणेति द्वितीयाभाव आर्षः । यस्त्वं जीवसि । मया प्रहृतोपीति शेषः ॥ ६६ ॥ सकृत्तु प्रहर । शत्रुणा प्रहृते पुनरात्मनः प्रहारो विक्रमपरिपाटीमाटीकत इति हनुमतो हृदयं । इदानीमिति । पूर्वं मदनवधानाज्जीवसीतिभावः । दुर्बुद्धे प्रहारतारतम्यानभिज्ञ । किं किमर्थं । विकत्थसे श्लाघसे । " कत्थ श्लाघायां " इति धातुः । यमक्षयं यमनिलयं । " निलयापचयौक्षयौ " इत्यमरः ॥ ६७ ॥ ततः तेनेत्यर्थः । अन्यथा तदाशब्दोतिरिच्येत । अज्वलत् ववृध इत्यर्थः । वीर्यवान् बलवान् । " वीर्यं बले च " इत्यमरः ॥ ६८ ॥ हनुमानित्यर्धं ॥ व्यूढे विशाले ॥ ६९ ॥ विह्वलं मूर्च्छितं । महाबलं तदानीमपि परैरनभिभवनीयं ॥ ७० ॥ आदीपयामास आसमन्ताज्ज्वालयामास ॥ ७१ ॥ समायस्तः आयासवान् । एकेनेत्यनेन इतरेण शरवारणं गम्यते ॥ ७२ ॥ रावणं अब्रवीदिति संबन्धः । अभिधावनं । अन्येन युध्यमानं प्रत्यभिधावनमित्यर्थः । अत्रेतिकरणं द्रष्टव्यं ॥ ७३—७७ ॥ समासाद्य समीपंप्राप्य । पावकिं पावकपुत्रं ॥७८–७९॥ जज्वाल चुक्रोधेत्यर्थः ॥ ८०—८१ ॥ आहारयामास

रामानु० ध्वजाग्रइति । हनुमांश्चविस्मितः "नमारुतेरस्तिगतिप्रमाणं" इतिप्रसिद्धगतिलाघवोहनुमानपिसंजातविस्मयोऽभूदित्यर्थः ॥ ८१ ॥

[**पा०**] १ ङ. च. झ. ञ. ट. ममवीर्यस्य. ख. घ. ममवीर्यंतवस्त्वं. २ क. च. झ. ञ. मामकोमुष्टिः. ३ घ. रोषान्मुष्टिमावृत्य. झ. ट. यत्नान्मुष्टिमावृत्य. ख. च. छ. ञ. क्रोधान्मुष्टिमावृत्य. ४ घ. ताडितोवक्षसि. ५ क.—ट. विह्वलंतं. ६ ख. घ. समभ्ययात्. ७ ङ. झ. ट. परममर्माभिभेदनैः. ८ ख. शरौघैःसमाविद्धः. ९ ङ. झ. ट. तद्विशीर्णं. १० ङ. झ. ट. कर्णद्रुमान्सालान्. ११ क. ख. च. तदात्मानं. ङ. झ. ट. ततोरूपं.

ततस्ते चुक्रुशुर्हृष्टा लब्धलक्षाः प्लवङ्गमाः ॥ नीललाघवसंभ्रान्तं दृष्ट्वा रावणमाहवे ॥ ८३ ॥
वानराणां च नादेन संरब्धो रावणस्तदा ॥ संभ्रमाविष्टहृदयो न किंचित्प्रत्यपद्यत ॥ ८४ ॥
आग्नेयेनाथ संयुक्तं गृहीत्वा रावणः शरम् ॥ ध्वजशीर्षस्थितं नीलमुदैक्षत निशाचरः ॥
ततोऽब्रवीन्महातेजा रावणो राक्षसेश्वरः ॥ ८५ ॥
कपे लाघवयुक्तोसि मायया परयाऽनया ॥ जीवितं खलु रक्षस्व यदि शक्तोसि वानर ॥ ८६ ॥
तानितान्यात्मरूपाणि सृजसि त्वमनेकशः ॥ तथापि त्वां मया युक्तः सायकोस्त्रप्रयोजितः ॥
जीवितं परिरक्षन्तं जीविताद्भ्रंशयिष्यति ॥ ८७ ॥
एवमुक्त्वा महाबाहू रावणो राक्षसेश्वरः ॥ संधाय बाणमस्त्रेण चमूपतिमताडयत् ॥ ८८ ॥
सोस्त्रयुक्तेन बाणेन नीलो वक्षसि ताडितः ॥ निर्दह्यमानः सहसा निपपात महीतले ॥ ८९ ॥
पितृमाहात्म्यसंयोगादात्मनश्चापि तेजसा ॥ जानुभ्यामपतद्भूमौ न च प्राणैर्व्ययुज्यत ॥ ९० ॥
विसंज्ञं वानरं दृष्ट्वा दशग्रीवो रणोत्सुकः ॥ रथेनाम्बुदनादेन सौमित्रिमभिदुद्रुवे ॥ ९१ ॥
आसाद्य रणमध्ये तु वारयित्वा स्थितो ज्वलन् ॥ धनुर्विस्फारयामास कम्पयन्निव मेदिनीम् ॥९२॥

तमाह सौमित्रिरदीनसत्त्वो विस्फारयन्तं धनुरप्रमेयम् ॥
अभ्येहि मामेव निशाचरेन्द्र न वानरांस्त्वं प्रतियोद्धुमर्हः ॥ ९३ ॥
स तस्य वाक्यं प्रतिपूर्णघोषं ज्याशब्दमुग्रं च निशम्य राजा ॥
आसाद्य सौमित्रिमवस्थितं तं कोपान्वितो वाक्यमुवाच रक्षः ॥ ९४ ॥
दिष्ट्यासि मे राघव दृष्टिमार्गं प्राप्तोन्तगामी विपरीतबुद्धिः ॥
अस्मिन्क्षणे यास्यसि मृत्युदेशं संसाद्यमानो मम बाणजालैः ॥ ९५ ॥

आददे ॥ ८२ ॥ लब्धलक्षाः लब्धहर्षविषयाः । नीलमेव पश्यन्त इति वार्थः ॥ ८३ ॥ वानराणां चेति चशब्देन नीललाघवं समुच्चीयते । संभ्रमः व्यग्रता । प्रत्यपद्यत अजानात् । आग्नेयेन आग्नेयमस्त्रेण । संयुक्तं अभिमन्त्रितं ॥ ८४–८५ ॥ कपे चञ्चलप्रकृते इत्यर्थः । अतो न वानरपदेन पौनरुक्त्यं ॥ ८६ ॥ तानि तान्यात्मरूपाणि सृजसि त्वमनेकश इति । लाघवातिशयेन सृजसीव दृश्यस इत्यर्थः । ननु तानि तानीत्यनेन रावणो नीलं नानातनुपरिग्रहयुक्तं मन्यत इत्यवगम्यत इति चेन्न । कपे लाघवयुक्तोसीति पूर्वोक्तिविरोधात् । युक्तः प्रयुक्तः । अस्त्रप्रयोजितः अस्त्रमन्त्रेणाभिमन्त्रितः । जीवितं परिरक्षन्तं त्वां जीवितात् भ्रंशयिष्यतीत्यन्वयः ॥ ८७—८९ ॥ पितृमाहात्म्येति । पितृमाहात्म्यं अग्नेः पुत्रतया दयालुत्ववैभवं ॥ ९०—९१ ॥ सौमित्रिमासाद्य । वारयित्वा सुग्रीवादीन्वारयित्वा । रणमध्ये ज्वलन् स्थितः धनुर्विस्फारयामासेत्यन्वयः ॥ ९२—९३ ॥ रक्षः रक्षोरूपः । राजेत्यन्वयः ॥ ९४ ॥ अन्तगामी विनाशेच्छुः । अतएव विपरीतबुद्धिः त्वं दिष्ट्या यदृच्छया दृष्टिमार्गं प्राप्तोसि । संसाद्यमानः पीड्यमानः

रामानु० तानितान्यात्मरूपाणिसृजसित्वमनेकशइत्यभिधानात् ध्वजकिरीटादिषुनीलस्यवेगातिशयकृतमवस्थानंयुगपदनेकशरीरपरिग्रहकृतमितिरावणोभ्रान्तवानित्यवगम्यते ॥ ८७ ॥ **ति०** अवेहिपश्य ॥ ९३ ॥ **ती०** सतस्यवाक्यमित्यारभ्यकिंमोघविकत्थनेनेत्येतदन्तस्यप्रातीतिकार्थःस्पष्टः । वस्तुतस्तु लक्ष्मणस्यरावणेनकिमुत्तरंदत्तमतआह—सतस्येत्यादिश्लोकद्वयेन । रक्षः राजा । सतुलक्ष्मणस्यवाक्यंउग्रंज्याशब्दंचनिशम्यकोपान्वितोपिविपरीतबुद्धिरपिअन्तगाम्यपि । अवस्थितंतंसौमित्रिमासाद्य हेराघव मेपापिष्ठस्यापिमम दिष्ट्या भाग्यवशेन दृष्टिमार्गंप्राप्तोसीतिवाक्यमुवाचेतिसंबन्धः ॥ ९४ ॥ **शि०** अन्तगामी परलोकगमन शीलः । अतएवविपरीता अयोद्धव्येयोधनविषयाबुद्धिर्यस्यसः ॥ ९५ ॥

[पा०] १ क.—घ. च. छ. ञ. परयाऽनघ. ङ. झ. ट. परयासह. २ क. ख. ग. च.—ट. मुक्तः. ३ झ. मुक्तेन. ४ क. ख. च. छ. ञ. पतितंदृष्ट्वा. ५ क. ख. ङ.—ट. विस्फारयामासराक्षसेन्द्रःप्रतापवान्. ६ ख. ग. च. छ. ज. ञ. अन्वेहि. क. ङ. झ. ट. अवेहि. ७ क. ख. घ. च.—ञ. योद्धुमर्हसि.

तमाह सौमित्रिरविस्मयानो गर्जन्तमुद्वृत्तशिताग्रदंष्ट्रम् ॥
राजन्न गर्जन्ति महाप्रभावा विकत्थसे पापकृतां वरिष्ठ ॥ ९६ ॥
जानामि वीर्यं तव राक्षसेन्द्र बलं प्रतापं च पराक्रमं च ॥
अवस्थितोऽहं शरचापपाणिरागच्छ किं मोघविकत्थनेन ॥ ९७ ॥
स एवमुक्तः कुपितः ससर्ज रक्षोधिपः सप्त शरान्सुपुङ्खान् ॥
ताँल्लक्ष्मणः काञ्चनचित्रपुङ्खैश्चिच्छेद बाणैर्निशिताग्रधारैः ॥ ९८ ॥
तान्प्रेक्षमाणः सहसा निकृत्तान्निकृत्तभोगानिव पन्नगेन्द्रान् ॥
लङ्केश्वरः क्रोधवशं जगाम ससर्ज चान्यान्निशितान्पृषत्कान् ॥ ९९ ॥
स बाणवर्षं तु ववर्ष तीव्रं रामानुजः कार्मुकसंप्रयुक्तम् ॥
क्षुरार्धचन्द्रोत्तमकर्णिभल्लैः शरांश्च चिच्छेद न चुक्षुभे च ॥ १०० ॥
स बाणजालान्यथ तानि तानि मोघानि पश्यंस्त्रिदशारिराजः ॥
विसिष्मिये लक्ष्मणलाघवेन पुनश्च बाणान्निशितान्मुमोच ॥ १०१ ॥
स लक्ष्मणश्चाशु शराञ्शिताग्रान्महेन्द्रवज्राशनितुल्यवेगान् ॥
संधाय चापे ज्वलनप्रकाशान्ससर्ज रक्षोधिपतेर्वधाय ॥ १०२ ॥
स तान्प्रचिच्छेद हि राक्षसेन्द्रश्छित्त्वा च ताँल्लक्ष्मणमाजघान ॥
शरेण कालाग्निसमप्रभेण स्वयम्भुदत्तेन ललाटदेशे ॥ १०३ ॥
स लक्ष्मणो रावणसायकार्तश्चचाल चापं शिथिलं प्रगृह्य ॥
पुनश्च संज्ञां प्रतिलभ्य कृच्छ्राच्चिच्छेद चापं त्रिदशेन्द्रशत्रोः ॥ १०४ ॥
निकृत्तचापं त्रिभिराजघान बाणैस्तदा दाशरथिः शिताग्रैः ॥
स सायकार्तो विचचाल राजा कृच्छ्राच्च संज्ञां पुनराससाद ॥ १०५ ॥
स कृत्तचापः शरताडितश्च मेदार्द्रगात्रो रुधिरावसिक्तः ॥
जग्राह शक्तिं समुदग्रशक्तिः स्वयम्भुदत्तां युधि देवशत्रुः ॥ १०६ ॥

॥ ९५ ॥ अविस्मयानः तृणीकुर्वन्नित्यर्थः । उद्वृत्तसिताग्रदंष्ट्रं उन्नतधवलाग्रदंष्ट्रं । न गर्जन्ति नात्मश्लाघां कुर्वन्तीत्यर्थः । पापकृतां वरिष्ठेति हेतुगर्भितविशेषणं । पापकृद्वरिष्ठत्वाद्विकत्थस इत्यर्थः ॥ ९६ ॥ जानामीति सोपहासोक्तिः । तव विजने यतिवेषेण सीतामपहृतवतः । प्रतापं शत्रुभीषणत्वं । पराक्रमं शौर्यं । " शौर्योद्योगौपराक्रमौ " इत्यमरः । मोघविकत्थनेन निष्फलश्लाघनेन ॥ ९७ ॥ निशिते अग्रधारे अग्रपार्श्वे येषां तैः ॥ ९८ ॥ पृषत्कान् बाणान् ॥ ९९ ॥ कार्मुकसंप्रयुक्तं चापसंहितं । क्षुरेति । क्षुरैः नापितशस्त्राकारैः । अर्धचन्द्रैः अर्धचन्द्राकारमुखैः । उत्तमैः कर्णिभिः कर्णिशरैः । भल्लैः उभयपार्श्वधारैः । शरान् रावणशरान् । चिच्छेद । तथापि न चुक्षुभे न कलुषितहृदयोभूत् ॥ १०० ॥ स इति ॥ त्रिदशारिराजः राक्षसराजः ॥ १०१ ॥ महेन्द्रवज्राशनितुल्यवेगान् महेन्द्रवज्रस्याशनेश्च तुल्यवेगान् ॥ १०२—१०३ ॥ शिथिलं यथा भवति तथा प्रगृह्य ॥ १०४–१०५ ॥ मेदेत्यकारान्तत्वमार्षं । समुदग्रशक्तिः समधिकसामर्थ्यः

ति० मेदार्द्रगात्रइतिसंधिरार्षः । अथरावणः प्राणान्तापदंप्राप्तः प्रकारान्तरेणजीवननिर्वाहमसंभाव्यब्रह्मदत्तामोघांशक्तिंजग्राहेत्याह—**जग्राहेति** ॥ १०६ ॥

[**पा०**] १ घ. युधिस्थितोहं. २ क. ख. ङ. झ. ञ. ट. स्वयमुग्रशक्तिः.

स तां विधूमानलसन्निकाशां वित्रासिनीं वानरवाहिनीनाम् ॥
चिक्षेप शक्तिं तरसा ज्वलन्तीं सौमित्रये राक्षसराष्ट्रनाथः ॥ १०७ ॥
तामापतन्तीं भरतानुजोग्रैर्जघान बाणैश्च हुताग्निकल्पैः ॥
तथापि सा तस्य विवेश शक्तिर्बाह्वन्तरं दाशरथेर्विशालम् ॥ १०८ ॥
स शक्तिमाञ्शक्तिसमाहतः सन्मुहुः प्रजज्वाल रघुप्रवीरः ॥
तं विह्वलन्तं सहसाऽभ्युपेत्य जग्राह राजा तरसा भुजाभ्याम् ॥ १०९ ॥
हिमवान्मन्दरो मेरुस्त्रैलोक्यं वा सहामरैः ॥ शक्यं भुजाभ्यामुद्धर्तुं न संख्ये भरतानुजः ॥ ११० ॥
शक्त्या ब्राह्मयाऽपि सौमित्रिस्ताडितस्तु स्तनान्तरे ॥ विष्णोरचिन्त्यं स्वं भागमात्मानं प्रत्यनुस्मरत् ॥ १११ ॥

॥१०६॥ राक्षसराष्ट्रनाथः राक्षससमूहनाथः ॥१०७॥ बाह्वन्तरंवक्षः ॥ १०८॥ विह्वलन्तं मुह्यन्तं ॥ १०९॥ लक्ष्मणं भुजाभ्यामुद्धर्तुमुद्युक्तं रावणमृषिः परिहसति—हिमवानिति ॥ शक्यमित्यव्ययं । हिमवान् धैर्येण हिमवानिवेति । समस्तधीरोपमानभूतो हिमवानपि रावणस्य भुजाभ्यामुद्धर्तुं शक्यं । तदेकदेशस्य कैलासस्य पुराचालितत्वात् । मन्दरः सकलसागरप्रधानगभीरतरक्षीरोदक्षोभणक्षमोपि मन्दरो वा भुजाभ्यामुद्धर्तुं शक्यं । स्वनिर्जितैरेव निर्जरैरमृतमथने जर्झरितत्वात् । मेरुः सकलकुलाचलवलयललामभूतोपि मेरुस्तथा कर्तुं शक्यं । वायुनैव तच्छिखरस्य लङ्कायां अकूपारकुक्षौ निक्षिप्तत्वात् । त्रैलोक्यं पञ्चाशत्कोटिविस्तीर्णमुत्तीर्णपरिमाणान्तरं त्रैलोक्यमपि तथा कर्तुशक्यं । तदेकदेशधरण्या हिरण्याक्षेण कक्षीकृतत्वात् । सहामरैः त्रैलोक्यनिर्वाहकगीर्वाणैः सहितमपि तथा कर्तुं शक्यं । तदधिपतेर्निजतनुजेनैव निगृहीतत्वात् । भरतानुजः रामानुजानुजः । रामचतुर्थभागइत्यर्थः । रामचतुर्थभागोद्धरणेप्यशक्तः कथं रामेण योद्धुं शक्नोतीति भावः । अयोध्याकाण्डे पञ्चपञ्चाशे—"सीतामादाय गच्छ त्वमग्रतो भरताग्रज" इति वचनं बहुव्रीह्योक्तं । भुजाभ्यामित्यनेन हिमवदादयो द्वाभ्यामेवोद्धर्तुं शक्यं । अयं तु विंशतिभुजैरपि न शक्यत इति सूच्यते । रिपूणामप्रकम्प्योपीत्यनुवादात् सपरिकरेणापि रावणेन न शक्यमित्यपि सिद्धं । कथं तर्हि हनुमतोद्धृत इत्यत्राह—संख्य इति । दुर्हृदयैर्नोद्धर्तुं शक्य इत्यर्थः । अतएव वक्ष्यति—वायुसूनोः सुहृत्त्वेनेति । अनेन हिमवदादिभ्योपि संख्ये पतितस्य लक्ष्मणशरीरस्य गरीयस्त्वोक्ता ॥ ११० ॥ कुतोस्येतादृशी गरीयस्त्वेत्यत्राह—शक्त्येति ॥ ब्राह्मया ब्रह्मसंबन्धिन्या । शक्त्या । स्तनान्तरे वक्षसि सौमि-

ति० विह्वलन्तं विकलंभवन्तं । राजा रावणः । तरसा बलेन । लक्ष्मणंभुजाभ्यांजग्राह । इन्द्रजिद्बद्धयोरपिपुनरुत्थानदर्शनादिदानीमपिपुनरुज्जीवनभयेनगृहीत्वासमुद्रेप्रक्षेपणीयः । तत्रगतेरामोसहायोनङ्क्ष्यत्येवेत्याशयेनायमारंभः । शि० शक्तिमानपिसमाहत इत्यनेन तस्यमर्यादापालकत्वंध्वनितं ॥ १०९ ॥ स० भुजाभ्यां एकैकपार्श्ववृत्तिदशकैकत्वविवक्षयाभुजाभ्यामित्युक्तिः । अन्यथाद्वाभ्यामुद्धरणाशक्तस्तनुयादेवसमग्रैर्भुजैर्यत्नमितितेपिवक्तव्याभवेयुः । तदव्यापारणेचनतस्याशाविच्छेदःस्यात् । यथोक्तमन्यत्र 'स्वबाहुभिर्नेतुमसुंसमैच्छत्' 'बलात्स्वदोर्भिःपरिगृह्यचाखिलैः' इतिच ॥ ११० ॥ ति० कुतस्त्राह—शक्त्येति । अमोघया ब्रह्मदत्तया स्तनान्तरे आहतःसौमित्रिः विष्णोरमीमांस्यं निस्संशयविष्णुभागत्ववन्तं इयत्तयाचिन्तयितुमशक्यंवा । विष्णोर्भागमात्मानं प्रत्यनुस्मरत् अन्वस्मरत् । नहिस्वीयंस्वंहिनस्तीत्याशयेनब्रह्मशक्तिमूलापत्राणार्थंभगवत्तेजोंशएवाहमस्मीतिध्यातवान् । नटवदङ्गीकृतमनुष्यत्वस्येतरेषांदृढप्रतीत्यर्थं । परंनसर्वदातथाध्यानं । एवंचब्रह्मभावनयालक्ष्मणेनस्वशरीरस्यगरीयस्त्वमापादितमित्युक्तंभवति । ती० ब्राह्मया ब्रह्मदत्तया । ताडनानन्तरं स्वं आत्मानं । विष्णोः सर्वव्यापकस्य । अचिन्त्यं इयत्तयाचिन्तितुमशक्यं । भागमंशं प्रत्यनुस्मरत । तद्विपत्परिहारार्थंभगवन्तंस्वमूलकारणंविष्णुमस्मरदित्यर्थः । अन्यथासर्वदैतादृशस्मरणेविद्यमानेसतिसर्वदाऽनुवर्तमानामनुष्यबुद्धिर्बाध्येत । तस्यांचबाधितायांतयासाध्यंरावणसंहारादिरूपंकार्यं नशक्येतेत्यभिप्रायः । एतेन स्वकीयांशस्मरणेन हेतुनालक्ष्मणेन स्वशरीरस्यगरीयस्त्वमुपात्तमित्युक्तंभवति । स० विष्णोः श्रीनारायणस्य अमीमांस्यौ साकल्ये-

[पा०] १ ग. ज. वानरराक्षसानां. ख. घ.—छ. झ. ञ. ट. संयतिवानराणां. २ क.—ङ. छ. झ. ञ. ट. शक्तिर्भुजान्तरं. ३ च. छ. ञ. सन्पपातभूमौसरघु. ङ. झ. ट. सज्जज्वालभूमौसरघु. ४ च. ज. सुरासुरैः. ५ झ. नशक्यो. ६ झ. ट. समीमांस्यभागं. ङ. भागममीमांस्यं.

ततो दानवदर्पघ्नं सौमित्रिं देवकण्टकः ॥ तं पीडयित्वा बाहुभ्यामप्रभुर्लङ्घनेऽभवत् ॥
[1]अथैवं वैष्णवं भागं मानुषं देहमास्थितम् ॥ ११२ ॥
[2]अथ वायुसुतः क्रुद्धो रावणं समभिद्रवत् ॥ आजघानोरसि क्रुद्धो वज्रकल्पेन मुष्टिना ॥ ११३ ॥
तेन मुष्टिप्रहारेण रावणो राक्षसेश्वरः ॥ जानुभ्यामपतद्भूमौ चचाल च पपात च ॥
आस्यैः सनेत्रै[3]श्रवणैर्ववाम रुधिरं बहु ॥ ११४ ॥
विघूर्णमानो निश्चेष्टो रथोपस्थ उपाविशत् ॥ विसंज्ञो मूर्च्छितश्चासीन्न च स्थानं समालभत् ॥११५॥
विसंज्ञं रावणं दृष्ट्वा समरे भीमविक्रमम् ॥ ऋषयो वा[4]नराः सर्वे नेदुर्देवाः सवासवाः ॥ ११६ ॥
हनुमानपि तेजस्वी लक्ष्मणं रावणार्दितम् ॥ अनयद्राघवाभ्याशं बाहुभ्यां परिगृह्य तम् ॥ ११७ ॥
वायुसूनोः सुहृत्त्वेन भक्त्या परमया च सः ॥ शत्रूणामप्रकम्प्योपि लघुत्वमगमत्कपेः ॥ ११८ ॥

त्रिस्ताडितः सन् विष्णोर्भागं अंशभूतं अचिन्त्यं ईदृक्तया इयत्तया च चिन्तयितुमशक्यं । स्वमात्मानं स्वस्वरूपं, " स्वात्माप्येनं विगर्हते " इति तथा प्रयोगात् । स्वात्मांश इति गुरुव्यवहाराच्च । प्रत्यनुस्मरत् स्मृतवान् । स्वस्वरूपस्मरणातिरिक्तव्यापाराकरणोक्त्या स्वाभाविकमेवास्येदं गुरुत्वमित्युक्तं । यत्तु स्वकीयांशस्मरणेन हेतुना लक्ष्मणेन स्वशरीरस्य गरीयस्त्वं संपादितमित्यनेनोक्तमिति । तन्न । अपदार्थत्वादवाक्यार्थत्वाच्च । स्वरूपस्मरणस्य गरीयस्त्वं प्रति कारणताग्राहकप्रमाणाभावाच्च । यदपि विपत्परिहारार्थं भगवन्तं स्वमूलकारणं विष्णुमस्मरदित्यर्थ इति तदपि न । स्वस्यैव विष्णुरूपत्वेन विपत्परिहारान्तराभावात् । ननु मनुष्यभावना क्रियमाणा विरुध्येत यदि स्वतोगौरवं भजेत, अतो विष्णुस्मरणमिति चेन्न । मानसभावनाया अपि लौकिकैरज्ञातत्वेन एवमपि मनुष्यभावनाया अनुपायात् । अतः अपर्यनुयोज्यवस्तुस्वभावेनैव भक्ताभक्तेषु गरीयस्तागरीयस्ते । अतएवाऽचिन्त्यमित्युक्तं ॥ १११ ॥ वस्तुस्वरूपस्यैवंविधत्वात्तोलयितुमशक्तोभवदित्युपसंहरति—तत इत्यादिसार्धश्लोकएकान्वयः ॥ यतः स्वाभाविकमेव गरीयस्त्वं ततो हेतोः । लङ्घने उद्धरणे । अप्रभुः असमर्थः । अथ रणे पतनानन्तरं देवकण्टकः रावणः । मानुषंदेहमास्थितं दानवदर्पघ्नं वैष्णवं भागं सौमित्रिं । भुजाभ्यां पीडयित्वा । ततः वैष्णवभागरूपत्वाद्धेतोः लङ्घने अप्रभुरभवदित्यन्वयः । अत्रापि विशेषणसामर्थ्याद्वस्तुस्वरूपकृतमेवाकम्प्यत्वमित्युक्तं । ननु च कथमंशसंभवः विष्णुस्वरूपस्य निरवयवत्वात् । सत्यं । स्वरूपेण नांशत्वमुच्यते, किंतु गुणाविर्भावतारतम्यात् । "गुणैः षड्भिस्त्वेतैः प्रथमतरमूर्तिस्तव बभौ ततस्तिस्रस्तेषां त्रियुगयुगलैर्हे त्रिभिरभूत् । व्यवस्थायां चैषां ननु वरद साविष्कृतिवशाद्भवान्सर्वत्रैव त्वगणितमहामङ्गलगुणः" इत्यभियुक्तैरुक्तत्वात् । मानुषरूपत्वं चास्य मानुषसमानाकृतिकत्वं ॥ ११२–११३ ॥ जानुभ्य रथभूमावपतत् । अथ चचाल । ततः पपात अशयिष्ट । दशभिरास्यै रुधिरं ववाम । सनेत्रश्रवणैरित्यनेन नेत्रेभ्यः श्रवणेभ्यश्च रुधिरं ववामेत्युच्यते ॥ ११४ ॥ किंचित्कालं विघूर्णमानः भ्रमन् । पुनर्निश्चेष्टः सन् रथोपस्थे रथमध्ये । उपाविशत् स्थितः । ततो मूर्च्छितः अतएव विसंज्ञः संज्ञाशून्यश्चासीत् । पुनः संज्ञां लब्ध्वापि स्थानं स्थितिं । नालभन् नालभत । चचालेत्यर्थः ॥ ११५ ॥ नेदुः हर्षेणेति शेषः ॥ ११६ ॥ अभ्याशं समीपं ॥ ११७ ॥ ननु पूर्वं

नचिन्तयितुमशक्यौभागौ सव्यापसव्यभागौयस्मिन्सतं । आत्मानंमूलरूपंशेषं । प्रत्यनुस्मरत् अस्मरत् । यथोक्तमन्यत्र "सस्मारूपंनिजमेवलक्ष्मणः" इतिस्वस्मरणमात्रस्येयत्कार्यपर्याप्तत्वादितरव्याख्यानममूलत्वादुपेक्ष्यं ॥ १११ ॥ स० ततःक्रुद्धः लक्ष्मणाकर्षणतोतिक्रुद्धः । क्रुद्धः पूर्वमारभ्यकोपी ॥ ११३ ॥ ति० नेदुः संतोषादितिशेषः । सासुराः रावणस्यदेववदसुरेष्वपि क्लेशकरत्वेनतेषामपिवैरित्वात् ॥ ११६ ॥ ति० राघवाभ्याशमानयदित्युक्तं कथमेवंसुग्रहत्वंलक्ष्मणस्येत्यत्राह—वायुसूनोरिति । सुहृत्त्वेन सखित्वेन परमभक्त्याचलक्ष्मणःशत्रूणामप्रकंप्येपि वायुसूनोर्लघुत्वमगमत् । शत्रूण मित्यनेन लक्ष्मणोद्धरणसमयेरावणस्यानुचरैःसाहाय्यंकृतमितिगम्यते । इदंचभक्तमात्रसुग्रहत्वंभगवतोभगवदवताराणांचस्वभावसि द्धमेवेतिबोध्यं । एवंच रामलक्ष्मणयो-

[पा०] १ इदमर्धं झ. पुस्तकादिषुनदृश्यते. २ झ. ञ. ट. ततःक्रुद्धोवायुसुतः. ३ ङ. झ. ट. श्रवणैःपतात. ४ ख. च. ञ. वानरास्सिद्धाः. ५ झ. ञ. ट. श्चसासुराः.

तं समुत्सृज्य सा शक्तिः सौमित्रिं युधि दुर्जयम् ॥ रावणस्य रथे तस्मिन्स्थानं पुनरुपागता ॥११९॥
आश्वस्तश्च विशल्यश्च लक्ष्मणः शत्रुसूदनः ॥ विष्णोर्भागममीमांस्यमात्मानं प्रत्यनुस्मरन् ॥ १२० ॥
रावणोपि महातेजाः प्राप्य संज्ञां महाहवे ॥ आददे निशितान्बाणाञ्जग्राह च महद्धनुः ॥ १२१ ॥
निपातितमहावीरां द्रवन्तीं वानरीं चमूम् ॥ राघवस्तु रणे दृष्ट्वा रावणं समभिद्रवत् ॥ १२२ ॥
अथैनमुपसंगम्य हनुमान्वाक्यमब्रवीत् ॥ मम पृष्ठं समारुह्य राक्षसं शास्तुमर्हसि ॥ १२३ ॥
विष्णुर्यथा गरुत्मन्तं बलवन्तं समाहितः ॥ तच्छ्रुत्वा राघवो वाक्यं वायुपुत्रेण भाषितम् ॥
आरुरोह महाशूरो बलवन्तं महाकपिम् ॥ १२४ ॥
रथस्थं रावणं संख्ये ददर्श मनुजाधिपः ॥ १२५ ॥
तमालोक्य महातेजाः प्रदुद्राव स राघवः ॥ वैरोचनमिव क्रुद्धो विष्णुरभ्युद्यतायुधः ॥ १२६ ॥
ज्याशब्दमकरोत्तीव्रं वज्रनिष्पेषनिस्स्वनम् ॥ गिरा गम्भीरया रामो राक्षसेन्द्रमुवाच ह ॥ १२७ ॥
तिष्ठतिष्ठ मम त्वं हि कृत्वा विप्रियमीदृशम् ॥ क्व नु राक्षसशार्दूल गतो मोक्षमवाप्स्यसि ॥१२८॥
यदीन्द्रवैवस्वतभास्करान्वा स्वयम्भुवैश्वानरशंकरान्वा ॥
गमिष्यसि त्वं दश वा दिशोऽथवा तथापि मे नाद्य गतो विमोक्ष्यसे ॥ १२९ ॥

हिमवानित्यादिना लक्ष्मणस्याकम्प्यत्वमुक्तं तादृशस्य कपिना रामसमीपप्रापणं कथमित्याशङ्क्य विरोधं परिहरति—वायुसूनोरिति ॥ सुहृत्त्वेन शोभनहृदयत्वेन । अनुकूलहृदयत्वेनेत्यर्थः । हृदयानुकूल्यमेवालं भक्तिस्त्वधिकेत्याह—भक्त्या परमया चेति । चशब्दोन्वाचये । सः लक्ष्मणः । शत्रूणां रावणस्य तत्परिकराणां चेत्यर्थः । अप्रकम्प्योपि कम्पितुमशक्योपि । कपेः कपेरपि । हनुमत एकस्य लघुत्वमगमत् लघुत्वमकरोत् । अनेन लघुत्वस्य बुद्धिपूर्वकत्वमुक्तं । शत्रुमित्रयोर्दुष्प्रापत्वसुप्रापत्वे स्वरूपप्रयुक्ते अस्येति भावः । मूर्च्छितस्यापि लक्ष्मणस्य ज्ञानशक्तिप्रतिपादनेन तत्र तत्र राघवयोरज्ञानाशक्तिप्रत्यायकानि वचनानि मानुषवेषनिर्वहणपराणीति मन्तव्यानि ॥ ११८ ॥ दुर्जयमिति हेतुगर्भं । तस्य दुर्जयस्वरूपत्वाच्छक्तिस्तं त्यक्त्वा गतेति भावः । एतच्छ्लोकानन्तरमाश्वस्त इति श्लोकः । ततो रावणोपीति श्लोकः पठनीयः ॥११९॥ आश्वस्तः लब्धसंज्ञः । विशल्यः प्ररूढव्रणमुखः । अभवदिति शेषः । अकाण्डे शक्तिनिर्गमाश्वासनविशल्यत्वेषु को हेतुरत आह—विष्णोरिति । विरोधिप्रत्यनीकस्वभावत्वादिति भावः । अमीमांस्यं अचिन्त्यं । अनुस्मरन्नित्यनेन साधनानुष्ठानं किमपि न कृतवानित्युक्तं ॥ १२०—१२१ ॥ द्रवन्तीमिति । रावणस्य बाणसंधानदर्शनादिति भावः ॥ १२२ ॥ अर्हसीत्यनन्तरमितिकरणं द्रष्टव्यं ॥ १२३ ॥ विष्णुर्यथेति सार्धश्लोक एकान्वयः ॥ वायुपुत्रेण भाषितं तद्वाक्यं श्रुत्वा समाहितः सन् विष्णुर्गरुत्मन्तं यथा तथा महाकपिं हनुमन्तमारुरोहेति योजना ॥१२४॥ रथस्थमित्यर्धमेकं वाक्यं ॥ १२५ ॥ तमालोक्येत्यनुवादः अव्यवहितपूर्वकालद्योतनार्थः । अभ्युद्यतायुधः क्रुद्धो राघवः विष्णुर्वैरोचनं बलिमिव । प्रदुद्राव । साग्रहगमनमात्रे दृष्टान्तः ॥ १२६ ॥ वज्रनिष्पेषः स्फूर्जथुः । "स्फूर्जथुर्वज्रनिष्पेषः" इत्यमरः ॥१२७॥ ईदृशं लक्ष्मणप्रहाररूपं सीताहरणरूपं वा । मोक्षं मत्त इति शेषः ॥ १२८ ॥ इन्द्रादीन्वा स्वयंभ्वादी-

रज्ञानाशक्तिमत्त्वतात्पर्यतयाभासमानानिवचनानिमानुषवेषनिर्वहणमात्रपराणीतिबोध्यं । तदुक्तंभागवते—"मर्त्यावतारस्त्विहमर्त्यशिक्षणंरक्षोवधायैवनकेवलंविभोः । कुतोन्यथास्यूरमतःस्वआत्मन्सीताकृतानिव्यसनानीश्वरस्य"इति । मर्त्यशिक्षणं तत्फलकमित्यर्थः । आत्मनीश्वरस्येत्यनेन लाघवगौरवप्राप्त्योरविरोधउक्तः । **स०** वायुसूनोःसुहृत्त्वेन अनिमित्तोपकर्तृत्वेनकपेः हनुमद्विषयिण्यापरमयाभक्त्याच ॥ ११८ ॥ **ति०** पुनर्विष्णोर्भागमात्मानंस्मरन् आश्वस्तः प्राप्ताश्वासेन्द्रियग्रामः । विशल्योनीरुक्सर्वगात्रः ।

[**पा०**] १ झ. निर्जितं. २ क.—ट. वानराणांमहाचमूं. ३ ख.—च. झ. रावणं. ४ क. ख. ङ.—ट. गरुत्मन्तमारुह्यामरवैरिणं. ५ क. वायुपुत्रप्रभाषितं. ६ ङ. झ. ट. अथारुरोहसहसाहनूमन्तंमहाकपिं. ग. घ. ज. आरोहत्सहसाशूरो. ७ ग. ङ. झ. ट. सरावणं. ८ क. ख. ङ.—ट. निर्भरं. ९ ध. गतोमत्तोविमोक्ष्यसे. ङ. झ. ट. गत्वामोक्षं.

यश्चैव शक्त्याऽभिहतस्त्वयाऽद्य इच्छन्विषादं सहसाऽभ्युपेतः ॥
स एव रक्षोगणराज मृत्युः सपुत्रदारस्य तवाद्य युद्धे ॥ १३० ॥
एतेन चात्यद्भुतदर्शनानि शरैर्जनस्थानकृतालयानि ॥
चतुर्दशान्यात्तवरायुधानि रक्षस्सहस्राणि निषूदितानि ॥ १३१ ॥
राघवस्य वचः श्रुत्वा राक्षसेन्द्रो महाकपिम् ॥ वायुपुत्रं महावीर्यं वहन्तं राघवं रणे ॥
[रोषेण महताऽऽविष्टः पूर्ववैरमनुस्मरन्] ॥ आजघान शरैस्तीक्ष्णैः कालानलशिखोपमैः ॥ १३२ ॥
राक्षसेनाहवे तस्य ताडितस्यापि सायकैः ॥ स्वभावतेजोयुक्तस्य भूयस्तेजोऽभ्यवर्धत ॥ १३३ ॥
ततो रामो महातेजा रावणेन कृतव्रणम् ॥ दृष्ट्वा प्लवगशार्दूलं कोपस्य वशमेयिवान् ॥ १३४ ॥
तस्याभिचक्रम्य रथं सचक्रं साश्वध्वजच्छत्रमहापताकम् ॥
ससारथिं साशनिशूलखड्गं रामः प्रचिच्छेद शरैः सुपुङ्खैः ॥ १३५ ॥
अथेन्द्रशत्रुं तरसा जघान बाणेन वज्राशनिसन्निभेन ॥
भुजान्तरे व्यूढसुजातरूपे वज्रेण मेरुं भगवानिवेन्द्रः ॥ १३६ ॥
यो वज्रपाताशनिसन्निपातान्न चुक्षुभे नापि चचाल राजा ॥
स रामबाणाभिहतो भृशार्तश्चचाल चापं च मुमोच वीरः ॥ १३७ ॥

न्वा यदि गमिष्यसि यद्यपि गमिष्यसि । तथापि अद्य मत्समीपं गतस्त्वं । मे मत्तः । न विमोक्ष्यसे । दश वा दिशो वेत्यत्र एको वाकारश्चार्थः ॥ १२९ ॥ अद्य य एष त्वया शक्त्याभिहतः स एषः तव विषादमिच्छन्सन् सपुत्रदारस्य तव मृत्युः सन् सहसा अभ्युपेतः अभ्युपागतप्रायः । अचिरादागमिष्यतीत्यर्थः । यद्वा अभेदेनोच्यते । यः शक्त्याभिहतः स एवाहमागतवानस्मि । लक्ष्मणं प्राहरमिति मा गा गर्वमिति भावः ॥ १३० ॥ लक्ष्मणेनाप्रहृतः कथं त्वया प्रहृतः स्यामित्याशङ्क्य स्वपराक्रमविशेषं दर्शयति—एतेनेति ॥ एतच्छब्दः सन्निहितपरः एषोरमीत्यादिप्रयोगात् अयं जन इति प्रयोगाच्च । मयेत्यर्थः । मृत्युशब्दापेक्षया वा एतेनेत्युक्तिः । चतुर्दशानि । चतुर्दशशब्दादर्शआद्यचि टिलोपे कृते जसि रूपं । यद्वा एतेनेति स्वाभेदेन लक्ष्मणो निर्दिश्यते ॥ १३१ ॥ राघवस्येत्याद्यर्धत्रयमेकं वाक्यं । वहन्तमिति । आत्मानं प्रहृत्य पुनरपि रामं वहतीति क्रोधादिति भावः ॥ १३२ ॥ स्वभावतेजः स्वाभाविकतेजः ॥ १३३ ॥ एयिवान् प्राप्तः ॥ १३४ ॥ अभिचक्रम्य पौनःपुन्येन समीपं गत्वा ॥ १३५ ॥ वज्राशनिसन्निभेनेति । बाणस्य वज्रसाम्यमुच्यते । वज्रेण मेरुं भगवानिवेन्द्र इति प्रहर्तृ रामस्येन्द्रसाम्यमित्यपुनरुक्तिः । भगवान् वीर्यवान् । " भगः श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु " इत्यमरः ॥ १३६ ॥ यः पुरा । वज्रपातयुक्ताशनिसन्निपातादिति मध्यमपदलोपिसमासः । वज्रं इन्द्रायुधं । अशनिः औत्पातिकः । न चुक्षुभे नार्तिं प्राप्तः । नापि चचाल नार्तिनिमित्तं चलनं प्राप्तः । राजा अन्यूनराजभावश्च स्थितः । सः रामबाणाभिहतः । भृशार्त-

आसीदितिशेषः । स० विष्णोर्भागमिति । व्याख्यातमिदं ॥ १२० ॥ ति० एवंपरमकोपेहेतुमाह—यइति । अद्यत्वयायुद्धंगच्छन्नसौलक्ष्मणःत्वयाशक्त्यानिहतःताडितःसन्सहसाविषादंगतः । अतोऽभ्युपेत्यप्रतिज्ञाय । सएषोहंतदुःखशान्तयेसपुत्रपौत्रस्यतेसंप्रत्ये मृत्युर्भविष्यामीतिशेषः । स० एषलक्ष्मणः । सः सीतापहारः । एषः लक्ष्मणविषादः । हेरक्षोगणराज सपुत्रपौत्रस्यतवअद्यमृत्युः भविष्यति ॥ १३० ॥ स० पूर्ववैरं अक्षक्षपणस्वताडनादिजनितं ॥ १३२ ॥ स० स्वभावतेजोयुक्तस्येत्यनेन वराद्युक्तिर्लोकानुसारेणेतिसूच्यते ॥ १३३ ॥ शि० कृतव्रणं व्रणायकृतःप्रयत्नोयस्मिंस्तं प्लवगशार्दूलंदृष्ट्वा क्रोधस्यप्रातीतिककोपस्यवशमिव एयिवान् । वशशब्दआचारक्विबन्तप्रकृतिककर्तृक्विबन्तः । किंच क्रोधस्य क्रोधवतः वशंकान्ति एयिवान् कोपवत्सदृशकान्तिमानभवदित्यर्थः

[पा०] १ झ. ञ. ट. यश्चैष. २ क. घ. ङ. च. झ. ञ. ट. गच्छन्विषादं. ३ ख. ग. घ. च. झ. ञ. ट. सएष. ४ ङ. झ. ञ. ट. सपुत्रपौत्रस्य. ५ ङ. झ. ट. महाबलः. ६ इदमर्धं क. ख. ङ.—ट. पाठेषुदृश्यते. ७ क.—घ. च.—झ. ट. संकम्य. ८ ङ. झ. शितैःशराग्रैः.

तं विह्वलन्तं प्रसमीक्ष्य रामः समाददे दीप्तमथार्धचन्द्रम् ॥
तेनार्कवर्णं सहसा किरीटं चिच्छेद रक्षोधिपतेर्महात्मा ॥ १३८ ॥
तं निर्विषाशीविषसन्निकाशं शान्तार्चिषं सूर्यमिवाप्रकाशम् ॥
गतश्रियं कृत्तकिरीटकूटमुवाच रामो युधि राक्षसेन्द्रम् ॥ १३९ ॥
कृतं त्वया कर्म महत्सुभीमं हतप्रवीरश्च कृतस्त्वयाहम् ॥
तस्मात्परिश्रान्त इव व्यवस्य न त्वां शरैर्मृत्युवशं नयामि ॥ १४० ॥
गच्छानुजानामि रणार्दितस्त्वं प्रविश्य रात्रिंचरराज लङ्काम् ॥
आश्वास्य निर्याहि रथी च धन्वी तदा बलं द्रक्ष्यसि मे रथस्थः ॥ १४१ ॥
स एवमुक्तो हतदर्पहर्षो निकृत्तचापः स हताश्वसूतः ॥
शरार्दितः कृत्तमहाकिरीटो विवेश लङ्कां सहसा स राजा ॥ १४२ ॥
तस्मिन्प्रविष्टे रजनीचरेन्द्रे महाबले दानवदेवशत्रौ ॥
हरीन्विशल्यान्सह लक्ष्मणेन चकार रामः परमाहवाग्रे ॥ १४३ ॥

भृशमार्तः क्षुब्धः । चचाल । वीरोपि चापं मुमोच । स्वस्य स्वरक्ष्यत्वान्वयं त्यक्तवान् रामैकरक्ष्यत्वद्योतनाय ॥ १३७ ॥ विह्वलन्तं मूर्च्छितं । प्रसमीक्ष्य तस्यानन्यशरण्यत्वमवलोक्य । अर्धचन्द्रं अर्धचन्द्राकाराग्रं बाणं । आददे । तेन मुकुटं चिच्छेद । मानभङ्गमकरोदित्यर्थः । महात्मा महामनाः । दयालुरित्यर्थः । आभ्यांश्लोकाभ्यां भगवद्रक्षणे निमित्तं स्वयत्ननिवृत्तिरेवेत्युक्तं ॥ १३८ ॥ तं त्यक्तचापं । अतएव निर्विषाशीविषसन्निकाशं निर्विषसर्पतुल्यं । अप्रकाशं निस्तेजस्कं । अतएव शान्तार्चिषं शान्तकिरणं सूर्यमिव स्थितं । कृत्तकिरीटकूटं छिन्नकिरीटसमूहं । "मायानिश्चलयत्रेषु कैतवानृतराशिषु । अयोघने शैलशृङ्गे सीराङ्गे कूटमस्त्रियां" इत्यमरः । अतएव गतश्रियं निष्प्रभं । उवाच ॥ १३९ ॥ महत् अनितरदुष्करं । सुभीमं कर्म युद्धं कृतं । किं चाहं हतलक्ष्मणादिप्रवीरश्च कृतोस्मि । तस्मात् अनेकवीरपतनावधिकरणकरणात् । त्वं परिश्रान्तः आयुधधारणेपि श्रान्त इति व्यवस्य निश्चित्य । त्वां मृत्युवशं मृत्योरधीनतां । नयामि । चिररणपरिश्रान्तकृन्तनकृतापवादापनोदाय संप्रति भवतः प्राणापहरणकर्मणो विरमामीत्यर्थः ॥ १४० ॥ रिपौ पुरो विलसति कथं गच्छेयमित्यत्राह—अनुजानामीति । रणार्दितः युद्धे श्रान्तः । रात्रिंचरराजकूटयोधिन्निति सापहासोक्तिः । आश्वास्य विश्रम्य । रथी धन्वी च सन्निर्याहि । स त्वं तदा तादृशं मे बलं रथस्थ इत्युपलक्षणं, धानुष्कश्च सन् द्रक्ष्यसीत्यन्वयः ॥ १४१ ॥ स इति । अत्र क्रियाभेदात्तच्छब्दत्रयमिति न तद्वैयर्थ्यं । सहसा मुकुटभङ्गकृतलज्जयेति भावः ॥ १४२ ॥ प्रविष्टे लङ्कामिति शेषः । दानवदेवशत्रावित्यनेन रावणनिर्गमो देवदानवहर्षहेतुरिति सूच्यते । सह लक्ष्मणेनेति । लक्ष्मणस्य पूर्वमेव विशल्यत्वेप्यादरात्पुनःकरणं । परमाहवाग्र इत्यनेन विशल्यकरणं विना सुग्रीवादीनां हरीणामन्यत्रा-

॥ १३४ ॥ स० सुभीमंकर्मसमरेत्वयाकृतं । अहंहतप्रवीरः हताः हतप्रायाःप्रवीराः नीलाद्यायस्यसतथाकृतः । यद्वा त्वयानिमित्तभूतेन अहं–हताःप्रवीरास्तावकाःयेनसतथाकृतइतिवा । एतेनैकलापराधेनबहूनांघातोजातइतिसूच्यते । सुभीमकर्मकर्तृत्वात्प्रहस्तादीनांसहायभूतानामभावाच्चपरिश्रान्तइतिव्यवस्य निश्चित्य त्वांनमृत्युवशंनयामि । किरीटत्रोटनेनत्वयापिशिरःकर्तनसामर्थ्यंममास्तीतिज्ञातमेवेतिभावः ॥ १४० ॥ स० इतोरणात् रणमण्डलात् । प्रयाहि । जानामि अनुजानामि । उपसर्गाश्चधातुलीनार्थद्योतकाइत्युपपद्यते अनुजानामीति । रथी सहायातानेकरथवान् । सधन्वीत्यप्येवमेव । सत्वं धन्वीतिवा । प्रेक्ष्यसि प्रेक्षिष्यसि

[पा०] १ ट. झ. ट. प्रयाहिजानामि. २ झ. ब. ट. सधन्वी. ३ क. घ.—ट. प्रेक्ष्यसि. ४ ग. रणार्दितः.

तस्मिन्प्रभिन्ने त्रिदशेन्द्रशत्रौ सुरासुरा भूतगणा दिशश्च ॥
ससागराः सर्षिमहोरगाश्च तथैव भूम्यम्बुचराश्च हृष्टाः ॥ १४४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

षष्टितमः सर्गः ॥ ६० ॥

श्रीरामपराभूतभीतेनरावणेन सभायांमन्त्रिमध्ये स्वस्यनानाशापप्राप्तिनिवेदनेनशोचनपूर्वकं राक्षसान्प्रति कुंभकर्णप्रबोधननियोजनम् ॥ १ ॥ राक्षसैर्महताप्रयासेन कुंभकर्णप्रबोधनम् ॥ २ ॥ राक्षसैर्विनिवेदितनिखिलवृत्तान्तेनतेन रावणाज्ञयातद्दर्शनायातिविपुलनिजशरीरावलोकनजभयविद्रुतकपिकुलेनसता राजमार्गेनिर्गमनम् ॥ ३ ॥

स प्रविश्य पुरीं लङ्कां रामबाणभयार्दितः ॥ भग्नदर्पस्तदा राजा बभूव व्यथितेन्द्रियः ॥ १ ॥
मातङ्ग इव सिंहेन गरुडेनेव पन्नगः ॥ अभिभूतोऽभवद्राजा राघवेण महात्मना ॥ २ ॥
ब्रह्मदण्डप्रकाशानां विद्युत्सदृशवर्चसाम् ॥ सरत्नाघवबाणानां विव्यथे राक्षसेश्वरः ॥ ३ ॥
स काञ्चनमयं दिव्यमाश्रित्य परमासनम् ॥ विप्रेक्षमाणो रक्षांसि रावणो वाक्यमब्रवीत् ॥ ४ ॥
सर्वं तत्खलु मे मोघं यत्तप्तं परमं तपः ॥ यत्समानो महेन्द्रेण मानुषेणास्मि निर्जितः ॥ ५ ॥
इदं तद्ब्रह्मणो घोरं वाक्यं मामभ्युपस्थितम् ॥ मानुषेभ्यो विजानीहि भयं त्वमिति तत्तथा ॥ ६ ॥
देवदानवगन्धर्वैर्यक्षराक्षसपन्नगैः ॥ अवध्यत्वं मया प्राप्तं मानुषेभ्यो न याचितम् ॥ ७ ॥
विदितं मानुषं मन्ये रामं दशरथात्मजम् ॥ इक्ष्वाकुकुलनाथेन अनरण्येन यत्पुरा ॥ ८ ॥

नयनासंभवः सूच्यते ॥ १४३ ॥ पूर्वसूचितं देवादिहर्षं प्रपञ्चयति—तस्मिन्निति ॥ प्रभिन्ने पराजिते । दिशः दिक्पालाः । सागराः सागरवासिनः । अम्बुचराः सागरभिन्नाम्बुचराः । हृष्टाः बभूवुरितिशेषः । षष्ठ्यां रावणमुकुटभङ्गः ॥ १४४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनषष्टितमः सर्गः ॥ ५९ ॥

अथ कुम्भकर्णप्रबोधनं षष्टौ—स प्रविश्येत्यादि ॥ रामबाणभयार्दितः किमिदानीमपि रामबाणाः पतेयुरिति भयपीडितः । व्यथितेन्द्रियः दुःखितमनस्कः ॥ १ ॥ मनोव्यथामुपपादयितुं तद्धेतुं सदृष्टान्तमनुवदति—मातङ्ग इवेति ॥ महात्मना महास्वभावेन । बलवतेत्यर्थः ॥ २ ॥ ब्रह्मदण्डेति । ब्रह्मदण्डः ब्रह्मशापः । सर्वनिग्रहणक्षमो वसिष्ठदण्डो वा ब्रह्मास्त्रं वा । युगान्तकालसमुत्थितोग्रिवर्णो धूमकेतुरित्येके । तत्प्रकाशानां बाणानामिति "अधीगर्थदयेशां कर्मणि" इति षष्ठी ॥ ३-४ ॥ मे मया । यत्तप्तस्तप्तं तत् सर्वं मोघं जातमिति शेषः ॥ ५ ॥ ब्रह्मवाक्यं तु फलितमित्याह—इदमिति ॥ त्वं मानुषेभ्यो भयं विजानीहीति यत् ब्रह्मणो घोरं वाक्यं तदिदं मामभि मां प्रति । उपस्थितं मयि फलितमित्यर्थः । यतस्तत् ब्रह्मवाक्यं । तथा । नतु मोघं भविष्यतीत्यर्थः ॥ ६ ॥ प्राप्तं याचित्वा प्राप्तं । मानुषेभ्योऽवध्यत्वं नैव याचितमित्यर्थः ॥ ७ ॥ विदितमित्यादिसार्धश्लोकद्वयमेकान्वयं । यस्त्वामित्यत्र तु आमिति छेदः । आमित्यङ्गीकारे । यस्तु पुरुषस्त्वां संग्रामे निहनिष्यति सः मद्वंशे उत्पत्स्यते । आं निश्चितं । इत्येवंप्रकारेण इक्ष्वाकुकुलनाथेन अनरण्येन यत् यस्मात् । पुरा विदितं प्रतिज्ञातं । "विदितौ ज्ञातविश्रुतौ" इति

॥ १४१ ॥ ति० अयंरावणपराभवः तन्मासीयशुक्लषष्ठ्यांसायंकाले । स० भूम्यंबुचराः भूमिचराः अंबुचराः मनुष्यादयोयादांसिच । हृष्टाः । सर्वोपद्रवकर्तृपराभवस्यसर्वापेक्षितत्वादितिभावः ॥ १४४ ॥ इत्येकोनषष्टितमःसर्गः ॥ ५९ ॥

स० महेन्द्रेणसमानः मानसहितः तेनाविमानितइत्यर्थकरणेऽर्थविशेषोलभ्यते ॥ ५ ॥ स० अनरण्येन तन्नामकेनराज्ञा ।

[पा०] १ घ. ङ. छ. झ. ञ. ट. प्रभग्ने. २ ग. रणार्दितः. ३ घ. ङ. झ. ट. सर्वमहोरगाश्च. ४ ङ. झ. ट. ब्रह्मदण्डप्रतीकानांवियच्चलितवर्चसां. ५ ङ. झ. मानुषेणविनिर्जितः. ६ ग. राक्षसकिंनरैः. ७ ङ.—ट. कुलजातेन.

उत्पत्स्यते हि मद्वंशे पुरुषो राक्षसाधम ॥ यस्त्वां सपुत्रं सामात्यं सबलं साश्वसारथिम् ॥
निहनिष्यति संग्रामे त्वां कुलाधम दुर्मते ॥ ९ ॥
शप्तोऽहं वेदवत्या च यदा सा धर्षिता पुरा ॥ सेयं सीता महाभागा जाता जनकनन्दिनी ॥ १० ॥
उमा नन्दीश्वरश्चापि रम्भा वरुणकन्यका ॥ यथोक्तास्तपसा प्राप्तं न मिथ्या ऋषिभाषितम् ॥ ११ ॥
एतदेवाभ्युपागम्य यत्नं कर्तुमिहार्हथ ॥ राक्षसाश्चापि तिष्ठन्तु चर्यागोपुरमूर्धसु ॥ १२ ॥
स चाप्रतिमगम्भीरो देवदानवदर्पहा ॥ ब्रह्मशापाभिभूतस्तु कुम्भकर्णो विबोध्यताम् ॥ १३ ॥
स पराजितमात्मानं प्रहस्तं च निषूदितम् ॥ ज्ञात्वा रक्षोबलं भीममादिदेश महाबलः ॥ १४ ॥
द्वारेषु यत्नः क्रियतां प्राकारश्चाधिरुह्यताम् ॥ निद्रावशसमाविष्टः कुम्भकर्णो विबोध्यताम् ॥ १५ ॥
सुखं स्वपिति निश्चिन्तः कालोपहतचेतनः ॥ नव षट् सप्त चाष्टौ च मासान्स्वपिति राक्षसः ॥ १६ ॥

नानार्थरत्नमाला । तस्मात् मानुषं रामं दशरथात्मजं दशरथपुत्रत्वेन जातं । मन्ये । राक्षसाधम कुलाधमेति जातितः कुलतश्च नीचत्वमुच्यते । दुःखातिरेकादनरण्योक्तपरुषानुवादः । अन्येतु त्वामिति द्विरुक्तिरनुस्मरणार्थेत्याहुः । अपरे त्वाग्रहातिशयेन द्विरुक्तिरिति । त्वां प्रत्युत्पत्स्यत इति द्वितीयत्वांशब्दान्वय इत्येके ॥ ८—९ ॥ किं चाहं पुरा वेदवत्या शप्तोस्मि । मत्कृते तव विनाशो भविष्यतीति । कदेत्यत्राह—यदेति । सा वेदवती । यदा धर्षिता बलात्कृता । तदा । अद्य तया किं क्रियते सीता ह्येतदुपद्रवमूलमित्यत्राह—सेयमिति । सा वेदवती स्वशापनिर्वाहार्थं सीता जाता ॥ १० ॥ उमादयश्चत्वारः तपसा तपःप्रभावेन । यथोक्ताः यथोक्तवन्तः । तथा प्राप्तं सिद्धं । ऋषिभाषितं न मिथ्या भवति हि । नन्दीश्वररम्भाशापावुत्तररामायणे प्रोक्तौ । उमावरुणकन्यकाशापौ चानेनैव सिद्धौ ॥ ११ ॥ एतत् शापस्वरूपं । अभ्युपागम्य ज्ञात्वा । इह प्रकृते शत्रुविजये कार्ये । यत्नं अवधानं । कर्तुमर्हथ । चर्याः गोपुरपार्श्वस्थभटसंचारप्रदेशाः ॥ १२ ॥ ब्रह्मशापाभिभूतः ब्रह्मशापकृतनिद्रापरवश इत्यर्थः ॥ १३ ॥ किमर्थं कुम्भकर्णो विबोध्यत इत्याशङ्क्य कविराह—स पराजितमिति ॥ आदिदेश कुम्भकर्णविबोधनार्थमिति शेषः ॥ १४ ॥ द्वारेषु अवान्तरद्वारेषु । यत्नः क्रियतां, प्राकारश्चाधिरुह्यतां । वानरानारोहार्थमिति भावः । निद्रावशसमाविष्टः निद्रावशेन शयानः । सद्यः कर्तव्यत्वाय पुनरुक्तिः ॥ १५ ॥ सुखमिति । दुःखिते चिन्ताकुले अनवाप्तकामे मयि जाग्रति सतीति शेषः । न केवलमिदानीमेव सर्वदाप्येवमेवेत्याह—नवेति ।

यत् यः प्रोक्तइतिशेषः ॥ ८ ॥ स० सबलं शारीरबलसहितं । त्वां अन्यांसेनांच । "खलइतिद्वावप्यदन्तावन्यपर्यायौ" इतिकौमुद्यादुक्तेः । आक्रोशाद्वा द्विरुक्तिः ॥ ९ ॥ स० यथा यतः सावेदवत्येवेयंसीता । तस्याःसीतात्वेनोत्पत्तेः रामायणएवस्पष्टमुक्तेः ॥१०॥ ती० उमाशापस्तु कैलासगिरिचलनवेलायां रावणतेस्त्रीनिमित्तंवधइत्येवंरूपइतिज्ञेयं । स० रंभानिमित्तोनलकूबरशापः । वरुणकन्यका पुञ्जकस्थली तन्निमित्तोब्रह्मशापः । यथोक्ताः कर्मणोवैवक्षिकादिलमभ्युपेत्य "आदिकर्मणि—" इतिक्तः । भावेक्तप्रत्ययान्तेनबहुव्रीहिर्वा । तत्तद्वचनानुगुणंफलंप्राप्तं । ऋषयोज्ञानिनः ॥ ११ ॥ स० ब्रह्मशापाभिभूतः ब्रह्मणा इन्द्रवाक्यश्रवणानन्तरंकुंभकर्णायशापोदत्तइतितेनाभिभूतः । "तस्मात्त्वमद्यप्रभृतिमृतकल्पःशयिष्यसे" इत्यत्रैवाग्रेव्यक्तं । नचतस्यवरादेव स्वापसिद्धेः शापोव्यर्थइतिवाच्यं । सरस्वत्यानुकूलंवाचयित्वाब्रह्मणिगतेसति देवैरहंवञ्चितइतिज्ञात्वा स्वच्छन्दत्वात्स्वापस्यनाहं तथाकरोमीतिनिश्चित्यपुनश्चकुंभकर्णेनप्रजाबाधेसतिकथितशापसार्थक्यसंभवात् । अभिभूतः तिरस्कृतः । यथोक्तमुत्तरकाण्डे "वरव्याजेनमोहोऽसौदीयतामितिप्रभ" इति ॥ १३ ॥ स० रक्षः कुंभकर्णाख्यं ॥ १४ ॥ शि० ननुसुप्तोजनोजागर्त्यवेतिस्वयं जागरिष्यतीत्यतआह—नवेति । नवचसप्तच षोडशेत्यर्थः । तेषांयेदश तेषामष्टौ निगरणे निस्सारणेसतीत्यर्थः । मासान् अवशिष्टषण्मासानित्यर्थः । राक्षसः कुंभकर्णः । मन्त्रंकृत्वास्वपिति अस्वपत् । अतःप्रसुप्तोऽयं इतोनवमेऽहनि जागरितेतिशेषः । तद्दिनएवस्वापावधिपूर्तिर्भवितेतितात्पर्यम् । अष्टिशब्दोभक्षणार्थकाशधातुप्रकृतिकक्तिन्नन्तः । "वर्तमानसामीप्ये" इतिभूतेलट् । अतएव "शयिताद्येषषण्मासानेकाहंजागरिष्यति" इतिषण्मासमात्रशयनप्रतिपादकवरदानवाक्येननविरोधः । वस्तुतस्तु नवाद्यन्य-

[पा०] १ ङ. झ. ट. यथोक्तास्तन्मयाप्राप्तं. २ ङ.—ट. एतदेवसमागम्य. ३ क.—ख. च.—झ. चाप्रतिमगांभीर्यो. ४ ग. झ. समरेजितमात्मानं. ५ क. ख. झ. ढ. कामोपहतचेतनः. ६ ट. नवसप्तदशाष्टौच.

कदाचिन्नवमासान् कदाचित् षण्मासान् कदाचित्सप्तमासान् कदाचिदष्टमासांश्चानियमेन स्वपितीत्यर्थः । अतएवोत्तरकाण्डे अविशेषेण वरप्रार्थना कुम्भकर्णेन क्रियते—" स्वप्तुं वर्षाण्यनेकानि देवदेव ममेप्सितं" इति । उत्तरत्र रामंप्रति विभीषणवचने—"शयिता ह्येष षण्मासानेकाहं जागरिष्यति " इति वचनं तु पक्षान्तराणामप्युपलक्षकं । अन्यूनाभिप्रायं वा । सप्तमासादिस्वापासंभवेपि षण्मासस्वापः संभवत्येव । "यद्वा, नवसप्तदशाष्टौ च मासान्स्वपिति राक्षसः " इति पाठः । दशाष्टौ दशमासहानौ सत्यां नवसप्तमासान् षण्मासानित्यर्थः । अष्टिरशनं नाश इति यावत् । नवसप्तमासाः षोडशमासाः तेषु दशमासलोपे हि षण्मासा एवावशिष्यन्ते । अथवा षडहैर्मासान्तसंपाद्याहरुत्सृजन्ति षडहैर्हि मासान्तसंपश्यन्त्यर्धमासैर्मासान्तसंपाद्याहरुत्सृजन्त्यर्धमासैर्हि मासान्तसंपश्यन्त्यमावास्यया मासान्संपाद्याहरुत्सृजन्त्यमावास्यया हि मासान्संपश्यन्ति पौर्णमास्या मासान्तसंपाद्याहरुत्सृजन्ति पौर्णमास्या हि मासान्तसंपश्यन्तीत्युक्तमासविकल्पेषु षडहानामपि मासत्वश्रवणात्तत्प्रकारेण नवषडित्युक्तत्रिंशन्मासा अपि अशीत्युत्तरशतदिनतया अमावास्यया पौर्णमास्या वा परिगणनेन षण्मासा एव संपद्यन्त इति न कश्चिद्विरोधः । तथाहि अस्ति किंचित् उत्सर्गिणामयनं नाम सत्रं गवामयनस्य विकृतिः । तत्र प्रकृतौ द्वादशमासेष्वनुष्ठेयानां सोमयागविशेषाणां त्रिंशतोनुष्ठेयत्वान्न किंचिदहरुत्सृष्टुं शक्यते । तद्विकृतावत्र प्रतिमासमेकस्मिन्नहनि सोमयागपरित्यागो विधीयते । तत्र कतममहस्त्यज्यतामित्यपेक्षायामुच्यते—अमावास्यया मासान्तसंपाद्याहरुत्सृजन्त्यमावास्यया हि मासान्तसंपश्यन्ति पौर्णमास्या मासान्तसंपाद्याहरुत्सृजन्ति पौर्णमास्या हि मासान्तसंपश्यन्तीति । अस्यार्थः अमावास्यायामनुष्ठेयेन यागेन पूर्वमासं परिसमाप्य उत्तरस्यादिभूतमहस्त्यज्यतामिति। पौर्णमास्यामनुष्ठेयेन यागेन पूर्वमासं परिसमाप्य उत्तरस्यादिभूतमहस्त्यज्यतामिति च । अस्मिन्विधाने अर्थवादे प्रसिद्धिवाचिना हिशब्देन अमावास्याया मासान्तत्वं । उत्तरवाक्ये पौर्णमास्या मासान्तत्वं च श्रुतं । एवं अर्धमासैर्मासान्तसंपाद्याहरुत्सृजन्त्यर्धमासैर्हि-मासान्संपश्यन्ति षडहैर्मासान्संपाद्याहरुत्सृजन्ति षडहैर्हि मासान्तसंपश्यन्तीत्यत्रापि पक्षात्मकः षडहात्मकोपि मासोस्तीति हिशब्देन दर्शितं । ननु च षडहैरिति बहुवचननिर्देशात् पञ्चभिः षडहैरिति व्याख्यानेन त्रिंशद्दिनात्मको मास एवात्र कथ्यत इति चेन्न । अर्धमासैरित्यत्रापि तथात्वापत्तेः । तदानीं बह्वर्धमासानां मासत्वस्वीकारे पक्षत्रयस्यापि मासत्वप्रसङ्गः । तत्र पक्षा वै मासा इत्युक्तरीत्या एकैकस्य पक्षस्य मासत्वस्वीकारे अत्राप्येकैकस्यैव षडहस्य मासत्वस्वीकारो युक्तः । पूर्वकल्पेष्विवात्रापि प्रसिद्धिवाचकहिशब्दप्रयोगात् । अन्यथा उत्तरानुवाके षडहैर्मासान्तसंपाद्य यत्सप्तममहस्तस्मिन्नुत्सृजेयुरिति वाक्यविरोधः स्यात् । सप्तमत्वं ह्यत्र विशिष्यते । षडहैर्मा-

---

तमान्मासान्स्वपितीत्यर्थः । वरदानवाक्येनतुनविरोधः । तस्यषण्मासाभ्यन्तरमात्रेप्रबोधाभावपरत्वात् । तदुत्तरंस्वाभाविकनिद्रायानिषेधाभावाच्च । एवमेकाहंजागरिष्यतीतिवाक्यस्यापिस्वापानन्तरकालिकैकदिनेनिश्शेषस्वापाभावपरत्वात् । तदुत्तरदिनेस्वाभाविकजागरणस्यननिषेधः । यद्दिनादारभ्यस्वपितितद्दिनादारभ्यषण्मासान्नजागर्ति । यद्दिनेजागर्ति तदुत्तरदिनेनस्वपितीतितात्पर्यम् । अतएव "स्वप्तुंवर्षाण्यनेकानिदेवदेवममेप्सितं" इतिवक्ष्यमाणोत्तरकाण्डीयतद्वरप्रार्थनस्यननैरर्थक्यं । अतएव "तत्रनिद्रांसमाविष्टःकुंभकर्णोमहाबलः । बहून्यब्दसहस्राणिशयनान्नचबुध्यते" इतिरामंप्रत्यगस्त्यवचनंसंगच्छते । स० तत्स्वापप्रकारमाह—नवेत्यादिना । अत्रेदंबोध्यं । कुंभकर्णः षट्सप्ताष्टनवमासान्स्वपिति । उपलक्षणमेतत् । अनेकाब्दसहस्राण्यपिकदाचित्स्वपितीतिग्राह्यं । प्रबोधस्तुषण्मासादर्वाक्नैवभवति । तदूर्ध्वंभवंश्चननियतः । कदाचित्सप्तमासानन्तरंकदाचिदष्टमासानन्तरमित्येवमादितोबोध्यं । कदाप्रबोधेपिजागरणमेकस्मिन्नेवदिनेद्वितीयदिनेपुनश्चस्वापइति । एतेनैतानिवचनानिसमाहितानि । तथाहि । "शयिताह्येषषण्मासानेकाहंजागरिष्यति" इत्यत्रैवब्रह्मवाक्यं । "स्वप्तुंवर्षाण्यनेकानिदेवदेवममेप्सितं" इतिवरप्रार्थनावाक्यं । तत्रैवोत्तरेऽगस्त्यवचनं "तत्रनिद्रांसमाविष्टःकुंभकर्णोमहाबलः । बहून्यब्दसहस्राणिशयानोनचबुध्यते" इति । मन्त्रं रामेणसह युद्धकरणेआलोचनां । इतः रामस्यलङ्कानिरोधदिवसात्पूर्वनवमेऽहनिसुप्तः । कुंभकर्णस्यापदिनएवविभीषणस्यरामंप्रतिगमनं । ततस्त्रिदिनंसमुद्रप्रार्थना । पञ्चदिनंसेतुबन्धः । पञ्चमेसायंकालेपरपारप्राप्तिः । नवमेलङ्कासमीपगमनमितिविवेकः । यत्तुनागोजिभट्टेन एतदुत्तरं 'मन्त्रंकृत्वाप्रसुप्तोयमितस्तुनवमेऽहनि' इत्यर्धपठ्यते तत्, यच्च तस्य इतः युद्धप्रारंभदिनात्प्राक्तनेनवमेऽहनीतिव्याख्यानं तदसंगतमेव । "अयंतेसुमहान्कालःशयानस्यमहाबल" इत्यनेनषण्मासादधिकस्यसांप्रतनिद्रायांप्रतीतेः अहश्शब्दोलक्षणयामासपरोवा' इतिभाषितं तत्रमन्त्रकालेइदानींसमुत्थितः "कुंभकर्णःप्रचुक्रोधवचनंचेदमब्रवीत्" इत्यादिनाकुंभकर्णस्यजाग्रत्त्ववा. रा. २०७.

मन्त्रयित्वा प्रसुप्तोऽयमितस्तु नवमेऽहनि ॥ तं तु बोधयत क्षिप्रं कुम्भकर्णं महाबलम् ॥ १७ ॥

सानित्यत्र मासशब्दस्य मासैकदेशलक्षणाङ्गीकारे सएव दोषः । तस्मात् षडहात्मकोपि मासोस्तीति सिद्धम् । तमिमं श्रौतं षडहमासत्वपक्षमनुस्मरन्तः षण्मासानेव वदन्ति " नव षट् सप्त चाष्टौ च मासान्स्वपिति राक्षसः " इति ॥ १६ ॥ ननु सुप्तः कथं बोधयितुं शक्य इत्याशङ्क्य इदानीमेव स्वापारम्भात्सुप्रबोधोयमित्याशयेनाह—मन्त्रयित्वेति ॥ अत्र केचित् एकाहं जागरिष्यतीति कुम्भकर्णस्य स्वापोत्सर्जनानन्तरमेकस्मिन्दिन एव प्रबोधनियमस्योक्तत्वान्मन्त्रकरणदिनसमनन्तरदिन एव कुम्भकर्णस्य स्वापारम्भः । आजगाममुहूर्तेनेत्यनेन विभीषणागमनमपि मन्त्रदिनएव, " विभीषणेनाशु जगाम संगमं " इत्यनेन तदागमनानन्तरमेव तस्य स्वीकारः । तद्दिवसप्रभृति दिवसप्रत्यये समुद्रप्रार्थनार्थं रामस्य दर्भशयनं । तदनन्तरं पञ्चदिनेषु सेतुबन्धः । सेतुबन्धपूर्तिदिवस एव सायंकाले सुवेलारोहणं । तस्यामेव रात्रौ सुग्रीवरावणयोर्द्वन्द्वयुद्धं । समनन्तरदिने तुमुलयुद्धं । तत्रैव रात्रौ नागपाशबन्धमोक्षौ । धूम्राक्षवज्रदंष्ट्राकम्पनवधश्च । अनन्तरदिने प्रहस्तवधः रावणमुकुटभङ्गश्च । एवं दिवसगणनोपपत्तिरिति वदन्ति । तच्चिन्त्यं । सुवेलारोहणरात्रौ पूर्णचन्द्रोदयवर्णनेन सुवेलारोहणदिनं पौर्णमासीति सिद्धं । रावणमरणदिनं चामावास्येति स्फुटं । एवंच त्वदुक्तरीत्या द्वितीयायामेव मुकुटभङ्गे रावणस्य दर्शपर्यन्तं विलम्ब्य युद्धकरणं चिन्त्यं । वस्तुतस्तु इतः प्रसक्ताद्युद्धारम्भदिनादित्यर्थः । तदिनमपहाय तत्पूर्वदिनापेक्षया नवमेऽहनि तत्पूर्वदिनकृतमन्त्रः प्रसुप्तः । तथाच पौर्णमास्यां सुवेलारोहणं प्रथमायां युद्धारम्भः । तत्पूर्वं नवमदिनं सप्तमी । तस्यां कुम्भकर्णःसुप्तः । रामस्य दर्भशयनारम्भश्च । षष्ठ्यां कुम्भकर्णादिभिर्मन्त्रविचारः । तस्यामेव विभीषणनिर्गम इति । इत्थं चाहुः । सीताहरणात्पूर्वं त्रयोदशसंवत्सरा गताः । चतुर्दशवर्षारम्भे सीता हृता पम्पातीरे वसन्तवर्णनात् । आषाढे वालिवधः । तदनन्तरं वर्षर्तुवर्णनात् । आश्वयुजे सीतान्वेषणसमुत्साहनमिति स्फुटं । स्वयंप्रभाबिले बहुकालो गतः । फाल्गुनशुद्धत्रयोदश्यां हनुमतो लङ्काप्रवेशः । " पुष्पिताग्रान्वसन्तादौ ददर्श विविधान्द्रुमान् " इति वसन्तादिभूतफाल्गुनमासतासूचकवृक्षाग्रपुष्पितत्वोक्त्या तथाप्रतीतेः । " स्थितः ककुद्मानिव तीक्ष्णशृङ्गः " इति श्लोके प्रतिपूर्णशृङ्ग इति पदेन प्रतिपूर्णशृङ्गवच्चन्द्रवर्णनस्य तस्यामेवसंभवात् । यस्मिन्दिने रात्रौ लङ्कायां सीतान्वेषणं तदनन्तरदिन एव प्रातर्लङ्कादाहः । " अवश्यमेव द्रष्टव्या मया लङ्का निशाक्षये " इत्युक्तत्वात् । अनन्तरं तस्मिन्नेव दिने अविलम्बेन प्रत्यागमनं । " यदि वा मन्यसे वीर वसैकाहमरिन्दम " इति सीतया पृष्टे, " एवमाश्वास्य वैदेहीं हनुमान्मारुतात्मजः । गमनाय मतिं चक्रे " इत्युक्तेः । उषसि लङ्कादाहानन्तरं तस्मिन्नेव दिने मध्याह्नात्पूर्वमेवाङ्गदादिभिर्मधुवनविधमनपूर्वकं रामप्राप्तिः । अरिष्टपर्वतारोहणे तद्वर्णनव्याजेन " बोध्यमानमिवप्रीत्यादिवाकरकरैःसुखैः " इति सूर्योदयसमयमुक्त्वा अनन्तरमस्तमयानुक्तेः । तस्मिन्नेव दिवसे चतुर्दशीशेषयुक्तपौर्णमासीयुते मध्याह्ने युद्धयात्रा । " अस्मिन्मुहूर्तेसुग्रीव प्रयाणमभिरोचये । युक्तो मुहूर्तो विजयः प्राप्तो मध्यं दिवाकरः " इत्युक्तेः । यस्मिन्दिनेभिजिति प्रस्थानं तत्परेद्युरेव समुद्रतीरे सेनानिवेशः । " सा स्म याति दिवारात्रं महती हरिवाहिनी " इत्यारभ्य, मुहूर्तं कापि नासतेत्युक्तेः । यत्र दिने लङ्कादाहस्तत्रैव दिवसे सभायां मन्त्रिभिः सह किंचिद्विचारमुक्त्वा, " विसर्जयित्वा तान्सर्वान्प्रविवेश स्वकं गृहं " इत्यन्तेन लङ्कादाहदिनवृत्तान्तं परिसमाप्य, " ततः प्रत्युषसि प्राप्ते " इत्यादिना अनन्तरदिने उषःकाले विभीषणोपदेशं द्वितीयमुक्त्वा ततो मन्त्रविचाराय रावणे कुम्भकर्णविभीषणादिभिः

स्यप्रतीतेः साप्रतनिद्रायाःषण्मासादधिक्त्ववर्णनं मूलविरुद्धमिव तन्मूलस्वव्याख्यानविरुद्धं ॥ उक्तरीत्यानवदिनीसंभवात् । लक्षणयाऽहश्शब्दोमासपरः । इतिनिरर्थकलक्षणाश्रयणं । नच "अद्यतेसुमहान्कालःशयानस्य" इत्यग्रिमग्रन्थविरोधादित्यमास्थीयतइतिवाच्यं । दुःखसमयत्वेनात्पकालस्यापिबाहुल्योक्तिःप्रथमस्कन्धेभीमंप्रति "गताःसमाधुनामासाः" इति धर्मवचनव्याख्यातात्पर्येमासशब्देनाहान्युच्यन्ते । "अहस्सुमासशब्दोक्तेयत्रचिन्तायुतंव्रजेत् । एवंसंवत्सराद्यंचविपरीतेविपर्ययः" इतिनाममहोदधावित्युक्तेः । अथवाल्पदिन्यावेदनेपुनःस्वापमुपेयात्कुंभकर्णइतिभियाभ्राता महान्कालइत्युदाजहारेतिसंभवात् ॥ १६—१७ ॥

[पा०] १ मन्त्रकृत्वा.

सभां प्रविष्टे विभीषणस्य तृतीयमुपदेशमुक्त्वा, "इत्युक्त्वा परुषं वाक्यं रावणं रावणानुजः । आजगाम मुहूर्तेन यत्र रामः सलक्ष्मणः" इत्यविच्छेदेन लङ्कादाहदिनानन्तरदिन एव समुद्रतीरे रामसकाशागमवर्णनेन च द्वितीयदिने रामेण समुद्रतीरं प्राप्तमित्यवगम्यते । समुद्रतीरप्राप्तिदिनं च शिष्टफाल्गुनपौर्णमासी । अतएव, "उत्तराफल्गुनी ह्यद्ये"ति चतुर्थसर्गश्लोके प्रस्थानदिनस्य पौर्णमासीयुक्तत्ववचनमप्यविरुद्धं । समुद्रतीरप्राप्तिदिनस्य पौर्णमासीयुक्तत्वं च, "चण्डनक्रग्रहं घोरं क्षपादौ दिवसक्षये । चन्द्रोदयसमुद्भूतं प्रतिचन्द्रसमाकुलं" इति, संध्यासमय एव चन्द्रोदयप्रतिपादनात्सिद्धं । सेनानिवेशवृत्तान्तो विभीषणागमनवृत्तान्तश्च एकदिनभाव्यपि वाचः क्रमवर्तित्वात्क्रमेणोक्तः । प्रथमायां रामस्य दर्भशयनारम्भः कुम्भकर्णस्वापारम्भश्च । चतुर्थीपञ्चमीषष्ठीसप्तम्यष्टमीषु सेतुबन्धः । अष्टम्यां रात्रौ सुवेलारोहणं । यत्तु सुवेले, "पूर्णचन्द्रप्रदीपा च निशा समभिवर्तत" इति वचनं तत्पूर्णचन्द्र इव प्रदीपा यस्यां निशायामित्येवमर्थकं व्याख्येयं । सुग्रीवसेनायां भेर्यादीनामिव प्रदीपादीनामपि संभवात् । सुवेलारोहणानन्तरदिने दिवा लङ्कानिरोधः । "तां रात्रिमुषितास्तत्र सुवेले हरिपुङ्गवाः । लङ्कायां ददृशुर्वीरा वनान्युपवनानि च" इत्युपक्रम्य युद्धवर्णनात् । तत्रैव प्रथमदिनयुद्धे रात्रौ नागास्त्रबन्धतद्विमोक्षादि । "युध्यतामेव तेषां तु तथा वानररक्षसाम् । रविरस्तं गतो रात्रिः प्रवृत्ता प्राणहारिणी" इत्यारभ्य, "सा बभूव निशा घोरा हरिराक्षसहारिणी । ततस्ते राक्षसास्तत्र तस्मिंस्तमसि दारुणे ॥ राममेवाभ्यवर्तन्त" । "तं भीमवेगा हरयो नाराचैः क्षतविग्रहाः । अन्धकारे न ददृशुः"इत्यादिभिस्तामेव रात्रिं प्रत्यभिज्ञाप्य, "निरन्तरशरीरौ तौ भ्रातरौ रामलक्ष्मणौ । क्रुद्धेनेन्द्रजिता वीरौ पन्नगैः शरतां गतैः" इत्यादिप्रतिपादनात् । तत्रैव निशीथे वानरहर्षनादकुपितेन रावणेन प्रेषितयोर्धूम्राक्षवज्रदंष्ट्रयोर्युद्धं तद्वधश्च । तयोर्युद्धे दिवा ज्ञापकाभावात् वानरहर्षनन्तर्यश्रवणाच्च । रात्रिशेषेण तयोर्वधानन्तरं द्वितीयदिने अकम्पनयुद्धं । तन्निर्गमनवेलायां—"अभवत्सुदिने चापि दुर्दिनं रूक्षमारुतं" इति दिवा ज्ञापकसत्त्वात् । अकम्पनवधानन्तरमेव रावणस्य पूर्वाह्ण एव पुरीपर्यटनं । अकम्पनवधानन्तरं प्रहस्तयुद्धमविलम्बेन तस्मिन्नेव दिने मध्याह्ने । ननु, "अन्योन्यमभिसंरब्धा ग्रहाश्च न चकाशिरे" इति ग्रहाणां प्रकाशप्रतिषेधेन ग्रहस्तयुद्धं रात्राविति चेन्न । उत्तरत्र दिवायुद्धेषु दिवादर्शनायोग्यानामप्यर्थानां प्रतिपादनात् । यथा, रावणयुद्धे । "प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियाम् । समाक्रम्य बुधस्तस्थौ प्रजानामशुभावहः" इत्यादि । नच सर्वरात्रमवर्ततेति पाठानुरोधाद्रात्रावेव तत्प्रतिपादनमिति वक्तुं शक्यं । तदपपाठत्वस्यान्ते वक्ष्यमाणत्वात् । तस्मिन्नेव द्वितीयदिने रावणपराजयकुम्भकर्णप्रबोधनकुम्भकर्णयुद्धानि । कालविशेषमसंकीर्त्यानन्तरमविच्छेदेन तदुक्तिपूर्वकमग्रिमकृत्ये ब्रह्मास्त्रबन्धनतद्विमोक्षरूपे कालविशेषकीर्तनात् । दृश्यते हि "सप्तषष्टिर्हताः कोट्यो वानराणां तरस्विनाम् । अहः पञ्चमशेषेण बलेन स्वयंभुवः" इति ॥ अत्र अहः पञ्चमशेषोनाम सायंकाल एव । "प्रातःसंगवमध्याह्नापराह्णाः सायमित्यमी । एकस्याहः पञ्च भागा विहिताः कालचिन्तकैः" इति वचनात् ॥ तस्यामेव द्वितीयायां रात्रौ ब्रह्मास्त्रविमोक्षानन्तरं पुनर्लङ्कानिरोधतद्दाहकुम्भनिकुम्भयूपाक्षशोणिताक्षप्रजंघाकम्पनमकराक्षवधाः । "ततोस्तंगत आदित्ये रात्रौ तस्मिन्निशामुखे । लङ्कामभिमुखाःसोल्का जग्मुस्ते प्लवगर्षभाः" इत्युक्तेः ॥ एवं परिपूर्णदिनद्वयेन मूलबलेन्द्रजिद्रावणव्यतिरिक्तेषु व्यपदिष्टराक्षसेषु हतेषु तृतीयदिनमारभ्य दिनत्रयेणेन्द्रजिद्युद्धं । "अहोरात्रैस्त्रिभिर्वीरः कथंचिद्विनिपातितः" इत्युक्तत्वात् । अथ षष्ठदिने मूलबलवधः । तस्मिन्दिने सायंकालमारभ्य दिवारात्रं रावणयुद्धं । सप्तमदिने रावणवधः । अथवा सप्तमदिने रावणयुद्धं । अष्टमदिने प्रातःकाले रावणवधः । "अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्दशीम् । कृत्वा निर्याह्यमावास्यां विजयाय बलैर्वृतः" इत्यादिसंदर्भस्योभयथापि योजयितुं शक्यत्वात् । पुच्छामावास्यायां रावणवध इति कृत्वा अमावास्यायां रावणवध इति प्रवादः । एवंसति "रामरावणयोर्युद्धं सप्तरात्रमवर्तत" इत्यादिपाठोपि सेनासहितरावणयुद्धापेक्षया संगच्छते । "मन्त्रयित्वा प्रसुप्तोयमितस्तु नवमेहनि"इति सकलकोशस्थितवचनं च संगच्छते । इतः अस्मादिनात् मम मुकुटभङ्गदिनादित्यर्थः । नवमेहनि एतद्दिनमपहाय एतत्पूर्वदिनापेक्षया नवमेहनि । मन्त्रयित्वा प्रसुप्तः । तत्पूर्वदिने

स तु संख्ये महाबाहुः ककुदः[1] सर्वरक्षसाम् ॥ वानराजपुत्रौ च क्षिप्रमेव वधिष्यति ॥ १८ ॥
एष केतुः परः संख्ये गुरुर्यो वै सर्वरक्षसाम् ॥ कुम्भकर्णः सदा शेते मूढो ग्राम्यसुखे रतः ॥ १९ ॥
रामेण हि निरस्तस्य संग्रामेष्विन्सुदारुणे ॥ भविष्यति न मे शोकः कुम्भकर्णे विबोधिते ॥ २० ॥
किं करिष्याम्यहं तेन शक्रतुल्यबलेन हि ॥ ईदृशे[2] व्यसने प्राप्ते यो न साह्याय कल्पते ॥ २१ ॥
ते तु तद्वचनं श्रुत्वा राक्षसेन्द्रस्य राक्षसाः ॥ जग्मुः परमसंभ्रान्ताः कुम्भकर्णनिवेशनम् ॥ २२ ॥
ते रावणसमादिष्टा मांसशोणितभोजनाः ॥ गन्धमाल्यांस्तथा भक्ष्यानादाय सहसा ययुः ॥ २३ ॥
तां प्रविश्य महाद्वारां सर्वतो योजनायताम् ॥ कुम्भकर्णगुहां रम्यां सर्वगन्धप्रवाहिनीम्[3] ॥ २४ ॥
कुम्भकर्णस्य निःश्वासादवधूता महाबलाः ॥ प्रतिष्ठमानाः कृच्छ्रेण यत्नात्प्रविविशुर्गुहाम् ॥२५॥
तां प्रविश्य गुहां रम्यां शुभां काञ्चनकुट्टिमाम्[4] ॥ ददृशुर्नैर्ऋतव्याघ्रं शयानं भीमदर्शनम्[5] ॥ २६ ॥
ते तु तं विकृतं सुप्तं विकीर्णमिव पर्वतम् ॥ कुम्भकर्णं महानिद्रं सहिताः प्रत्यबोधयन् ॥ २७ ॥
ऊर्ध्वरोमाञ्चिततनुं श्वसन्तमिव पन्नगम् ॥ त्रासयन्तं महाश्वासैः[6] शयानं भीमदर्शनम् ॥ २८ ॥

मन्त्रं कृत्वा तस्मिन् दिने प्रसुप्त इत्यर्थः । ननु हनुमतो लङ्काप्रवेशकालो दशममास इत्यवगम्यते । तथाहि सीतांप्रति रावणवचनं " द्वौ मासौ रक्षितव्यौ मे योऽवधिस्ते मया कृतः " इति । हनुमन्तं प्रति सीतावचनं च " द्वौ मासौ तेन मे कालोजीवितानुग्रहः कृतः । वर्तते दशमो मासो द्वौ तु शेषौ प्लवङ्गम " इत्यादि । अतः कथमुक्तप्रक्रियासंगतिरिति चेन् । मैवं "ऊर्ध्वं मासान्न जीवेयं" " मासादूर्ध्वं न जीविष्ये त्वया हीना नृपात्मज " इत्यादिवचनविरोधेन तादृशवचनस्य रावणाभिप्रायविषयत्वात् । रावणो हि सीतासान्त्वनाय तथोक्तवान् । सीता तु वर्तमानमासमात्रेण चतुर्दशवर्षपूर्तिं जानन्ती, मासादूर्ध्वं न जीविष्य इति संदिदेशेति सर्वं सुस्थम् ॥ १७ ॥ स तु अहमिव न शापग्रस्त इत्यर्थः । ककुदः प्रधानं । "प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोस्त्रियां " इत्यमरः ॥ १८—२० ॥ अकाले तत्प्रबोधनमनुचितमित्याह—किं करिष्यामीति ॥ साह्याय साहाय्याय ॥ २१ ॥ परमसंभ्रान्ताः कथमेनमकाले प्रबोधयिष्याम इति व्याकुलाः ॥ २२ ॥ त इति । प्रबोधशक्तिविवृद्ध्यर्थं मांसादिकं भुक्त्वा कुम्भकर्णस्य प्रबोधकालिकक्षुत्तापादिशान्तये गन्धमाल्यादिकं गृहीत्वा ययुरित्यर्थः ॥ २३ ॥ तामित्यादिश्लोकद्वयमेकान्वयं ॥ सर्वतः चतसृषु दिक्षु । सर्वगन्धप्रवाहिनीं कुम्भकर्णानुलिप्तचन्दनादिगन्धप्रवाहवतीं । कुम्भकर्णगुहां प्रविश्य निःश्वासादवधूताः सन्तः कृच्छ्रेण प्रतिष्ठमानाः अभिमुखं गच्छन्तः यत्नात्तां गुहां विविशुरिति योजना ॥ २४—२५ ॥ काञ्चनकुट्टिमां स्वर्णमयनिबद्धभूमिं ॥ २६ ॥ विकृतं निद्राकालिकविकारयुक्तं । विकीर्णं शिथिलं ॥ २७ ॥ ऊर्ध्वेत्यादिश्लोकत्रयमेकान्वयं ॥ ऊर्ध्वरोमाञ्चिततनुं ऊर्ध्वभूतरोम-

ति० निलयनपुंसककंककुदमिति ॥ १८ ॥ स० एवंखवचनंश्रुत्वाप्यतदुद्बोधनयत्नान्यातुधानान्किञ्चित्कुटिलकटाक्षःपारोक्ष्येणाह । तेन रामेण । घोरे इतरापरिहार्ये । व्यसनेप्राप्तेपि यःकोपिमेसाह्याय कुंभकर्णप्रबोधरूपकर्मणे नकल्पते तंकिंकरिष्यामि । ममतादृशेननप्रयोजनमितिभावः । निद्रान्तरायस्यनिषिद्धत्वात्त्यजोद्बोधनमित्यतोवाह—**किंकरिष्यामीति** । यः कोपितदितरः साह्यायनकल्पते अतःकिंकरिष्यामि । कुटुंबनाशेसंभावितेतद्रक्षणार्थं "अप्यकार्यशतंकृत्वा" इतिमानमनुसृत्यसुप्तमप्युद्बोधयिष्यामीतिभावः । यः स्वयमेवालोचनकालेसन्नपिसाह्यायनकल्पते तेनोत्तरत्रसर्वनाशेकिंकरिष्यामीतिवा ॥ २१ ॥ स० परमसंभ्रान्ताः अत्रावस्थानेरावणोननुकूलान्घातयति । तत्रगमनेचोत्थापनमेवदुश्शकं । कथंचित्तस्मिञ्जातेऽस्मज्जीवनमतिदुर्घटमितिभीतियुताः ॥ २२ ॥ ति० कुंभकर्णगुहां पातालवद्दैवनिर्मितंभूबिलमित्यर्थः । स० "योजनानांत्रिलक्षंहिकुंभकर्णोऽभ्यवर्धत । पूर्वं पश्चात्संचुकोचलङ्कायामुषितुंस्वयम्" इत्युक्तेरल्पेपिस्थलेवरतपोबलेननिवासस्त्रिलक्षयोजनीमितस्यापिकुंभकर्णस्येतिसर्वतोयोजनायतामितिनविरुद्धमितिज्ञेयम् ॥ २४ ॥

[पा०] १ झ. ककुदं. २ क.—घ. ईदृशेसंभ्रमेघोरे. ङ. च. झ. ट. ईदृशेव्यसनेघोरे. ३ च. छ. झ. ञ. ट. पुष्पगन्ध. घ. सर्वगन्धाधिवासितां. ४ ङ. ज. झ. ट. रत्नकाञ्चन. ५ ङ. च. झ. ञ, ट. भीमविक्रमं. ६ च. छ. ञ. महाकार्यशयानं. ङ. झ. ट. विनिश्वासैः.

भीमनासापुटं तं तु पातालविपुलाननम् ॥ [1]शय्यायां न्यस्तसर्वाङ्गं मेदोरुधिरगन्धिनम् ॥ २९ ॥
काञ्चनाङ्गदनद्धाङ्गं [2]किरीटिनमरिन्दमम् ॥ ददृशुर्नैर्ऋतव्याघ्रं कुम्भकर्णं महाबलम् ॥ ३० ॥
ततश्चक्रुर्महात्मानः [3]कुम्भकर्णाग्रतस्तदा ॥ [4]मांसानां मेरुसंकाशं राशिं परमतर्पणम् ॥ ३१ ॥
मृगाणां महिषाणां च वराहाणां च संचयान् ॥ चक्रुर्नैर्ऋतशार्दूला राशिमग्रस्य चाद्भुतम् ॥ ३२ ॥
ततः शोणितकुम्भांश्च [5]मद्यानि विविधानि च ॥ पुरस्तात्कुम्भकर्णस्य चक्रुस्त्रिदशशत्रवः ॥ ३३ ॥
लिलिपुश्च [6]परार्ध्येन चन्दनेन परंतपम् ॥ दिव्यैराच्छादयामासुर्माल्यैर्गन्धैः सुगन्धिभिः ॥ ३४ ॥
धूपं सुगन्धं ससृजुस्तुष्टुवुश्च परन्तपम् ॥ जलदा इव चोन्नेदुर्यातुधानास्ततस्ततः ॥ ३५ ॥
[7]शङ्खानापूरयामासुः शशाङ्कसदृशप्रभान् ॥ तुमुलं युगपच्चापि विनेदुश्चाप्यमर्षिताः ॥ ३६ ॥
नेदुरास्फोटयामासुश्चिक्षिपुस्ते निशाचराः ॥ कुम्भकर्णविबोधार्थं चक्रुस्ते विपुलं स्वनम् ॥ ३७ ॥

सशङ्खभेरीपणवप्रणादमास्फोटितक्ष्वेलितसिंहनादम् ॥
दिशो द्रवन्तस्त्रिदिवं किरन्तः श्रुत्वा विहङ्गाः सहसा निपेतुः ॥ ३८ ॥
यदा भृशार्तैर्निनदैर्महात्मा न कुम्भकर्णो बुबुधे प्रसुप्तः ॥
ततो मुसुण्ठीर्मुसलानि सर्वे रक्षोगणास्ते जगृहुर्गदाश्च ॥ ३९ ॥
तं शैलशृङ्गैर्मुसलैर्गदाभिर्[8]वृक्षैस्तलैर्मुद्गरमुष्टिभिश्च ॥
सुखप्रसुप्तं भुवि कुम्भकर्णं रक्षांस्युदग्राणि तदा निजघ्नुः ॥ ४० ॥

तस्य निश्श्वासवातेन कुम्भकर्णस्य रक्षसः ॥ [9]राक्षसा बलवन्तोपि स्थातुं नाशक्नुवन्पुरः ॥ ४१ ॥
[10]ततः परिहिता गाढं राक्षसा भीमविक्रमाः ॥ ४२ ॥
मृदङ्गपणवान्भेरीः शङ्खकुम्भगणांस्तदा ॥ दशराक्षससाहस्रा युगपत्पर्य वादयन् ॥ ४३ ॥

व्याप्ततनुं । भीमनासापुटं भयंकरनासारन्ध्रं । मेदोरुधिरेति । पीतावशिष्टेति शेषः ॥ २८–३० ॥ अग्र तश्चक्रुः पुरतश्चिक्षिपुरित्यर्थः । परमतर्पणं अत्यन्ततृप्तिकरं ॥ ३१ ॥ राशिं चक्रुः अग्रतो राशिं चक्रुरित्यर्थः ॥ ३२ ॥ मद्यानि मद्यकुम्भानित्यर्थः ॥ ३३ ॥ लिलिपुः लेपनं चक्रुः । परार्ध्येन श्लाघ्यगन्धेन । माल्यगन्धैः माल्यचन्दनैः ॥ ३४ ॥ ततस्ततः पुनःपुनरित्यर्थः ॥ ३५ ॥ तुमुलं निरन्तरं यथातथा । युगपद्विनेदुः अमर्षिताः महता प्रयत्नेनाप्यनुत्थानाज्जातक्रोधाः सन्तः । नेदुः ॥ ३६ ॥ आस्फोटयामासुः ताडयामासुः । चिक्षिपुः शरीरं कम्पयामासुः । कुम्भेति । इत्थं कुम्भकर्णविबोधार्थं विपुलं स्वनं चक्रुरिति संग्रहः ॥ ३७ ॥ आस्फोटितं बाहुताडनजन्यशब्दः । क्ष्वेलितशब्देन गर्जितमात्रमुच्यते । सिंहनादमित्येकवद्भावः । तद्विहङ्गाः श्रुत्वा भयेन सर्वा दिशो द्रवन्तः गच्छन्तः । तत्रापि भयनिवृत्त्यदर्शनात् त्रिदिवं आकाशं । किरन्तः विशन्तः । तत्रापि भयशान्तिमलभमानाः सहसा निपेतुः भूमौ निपतन्ति स्म ॥ ३८ ॥ भृशार्तैः अत्यन्तार्तिपूर्वकैः उच्चावचैरित्यर्थः । भृशं तैरिति पाठान्तरं । महात्मा महाशरीरः ततः तदा । मुसुण्ठी मुद्गरविशेषः ॥ ३९ ॥ गृहीत्वा प्रजघ्नुश्चेत्याह—तमिति ॥ ४० ॥ रक्षस इति विशेषणं निश्श्वासातिशयद्योतनाय ॥ ४१ ॥ तत इत्यर्धमेकं वाक्यं ॥ परिहिताः दृढीकृतपरिधानाः । आसन् । वक्ष्यमाणकार्ये सावधाना आसन्नित्यर्थः ॥ ४२ ॥ शङ्खकुम्भगणान् शङ्खकुम्भवाद्यगणान् । दशराक्षससाहस्राः दश राक्षससहस्राणि परिवारभूतानि येषां

स० त्रिदिवशत्रवः स्वर्गद्विषः नरकतमआदिगामिनः पापिनइतियावत् । तत्स्थदेवद्वेषिणइतिवा ॥ ३३ ॥

[पा०] १ ख. ङ. च. झ. शयनेन्यस्त. २ ङ. झ. ट. किरीटेनार्कवर्चसं. ३ झ. कुंभकर्णस्यचाग्रतः. ४ झ. ट. भूतानां. ५ झ. ट. मांसानि. ६ ठ. त्रिदिवशत्रवः. ७ ग. ससहस्रशः. ८ ख. झ. ट. शङ्खांश्चपूरयामासुः. ९ घ. च. छ. ञ. ट. भृशंतैः. १० झ. ट. गदाभिर्वृक्षस्थलेमुद्गर. ११ झ. राक्षसाःकुंभकर्णस्यस्थातुंशेकुर्नचाग्रतः. १२ ग. घ. ततोस्यपुरतोगाढं

नीलाञ्जनचयाकारास्ते तु तं प्रत्यबोधयन् ॥ अभिघ्नन्तो नदन्तश्च नैवं संविविदे तु सः ॥ ४४ ॥
यदा चैनं न शेकुस्ते प्रतिबोधयितुं तदा ॥ ततो गुरुतरं यत्नं दारुणं समुपाक्रमन् ॥ ४५ ॥
अश्वानुष्ट्रान्खरान्नागाञ्जघ्नुर्दण्डकशाङ्कुशैः ॥ भेरीशङ्खमृदङ्गांश्च सर्वप्राणैरवादयन् ॥ ४६ ॥
निजघ्नुश्चास्य गात्राणि महाकाष्ठकटङ्करैः ॥ मुद्गरैर्मुसलैश्चैव सर्वप्राणसमुद्यतैः ॥ ४७ ॥
तेन शब्देन महता लङ्का समभिपूरिता ॥ सपर्वतवना सर्वा सोपि नैव प्रबुध्यते ॥ ४८ ॥
ततः सहस्रं भेरीणां युगपत्समहन्यत ॥ मृष्टकाञ्चनकोणानामासक्तानां समन्ततः ॥ ४९ ॥
एवमप्यतिनिद्रस्तु यदा नैव प्रबुध्यते ॥ शापस्य वशमापन्नस्ततः क्रुद्धा निशाचराः ॥ ५० ॥
महाक्रोधसमाविष्टाः सर्वे भीमपराक्रमाः ॥ तद्रक्षो बोधयिष्यन्तश्चक्रुरन्ये पराक्रमम् ॥ ५१ ॥
अन्ये भेरीः समाजघ्नुरन्ये चक्रुर्महास्वनम् ॥ केशानन्ये प्रलुलुपुः कर्णावन्ये दशन्ति च ॥ ५२ ॥
उदकुम्भशतान्यन्ये समसिञ्चन्त कर्णयोः ॥ न कुम्भकर्णः पस्पन्दे महानिद्रावशं गतः ॥ ५३ ॥
अन्ये च बलिनस्तस्य कूटमुद्गरपाणयः ॥ मूर्ध्नि वक्षसि गात्रेषु पातयन्कूटमुद्गरान् ॥ ५४ ॥
रज्जुबन्धनबद्धाभिः शतघ्नीभिश्च सर्वतः ॥ वध्यमानो महाकायो न प्राबुध्यत राक्षसः ॥ ५५ ॥
वारणानां सहस्रं तु शरीरेऽस्य प्रधावितम् ॥ कुम्भकर्णस्ततो बुद्धः स्पर्शं परमबुध्यत ॥ ५६ ॥

स पात्यमानैर्गिरिशृङ्गवृक्षैरचिन्तयंस्तान्विपुलान्प्रहारान् ॥
निद्राक्षयात्क्षुद्भयपीडितश्च विजृम्भमाणः सहसोत्पपात ॥ ५७ ॥

ते तथोक्ताः ॥४३॥ ते राक्षसाः । अभिघ्नन्तो नदन्तश्च सन्तः तं प्रत्यबोधयन्नित्यनुवादः । प्रतिबोधनेपि स न संविविदे न बुबुधे । नीलाञ्जनचयाकारा इति परितः संचारित्वद्योतनायोक्तं ॥ ४४ ॥ गुरुतरं यत्नमुपाक्रमन् प्रबलं बोधनोपायमारेभिर इत्यर्थः ॥४५॥ तमेव यत्नं दर्शयति—अश्वानिति ॥ तस्योपरिधावनायेतिभावः । सर्वप्राणैः सर्वबलैः ॥ ४६ ॥ महाकाष्ठकटङ्करैः महाकाष्ठाग्रस्तंबैः । काष्ठाग्रस्थकशाभिरित्यर्थः । कटङ्करः स्तम्भभेद इति केचित् । सर्वप्राणसमुद्यतैः सर्वबलेन समुद्यतैः ॥४७॥ प्रबुध्यते प्राबुध्यत ॥ ४८ ॥ मृष्टकाञ्चनकोणानां मृष्टकाञ्चनं शोधितकाञ्चनं तन्निर्मिताः कोणाः वादनदण्डाः यासां ताः तथोक्ताः । आसक्तानां संहतानां ॥४९॥ शापस्य ब्रह्मशापस्य । क्रुद्धाः पूर्वमेव कुपिताः ॥ ५० ॥ पुनरपि महाक्रोधसमाविष्टाः अभवन् । पराक्रमं मुष्टिप्रहारादिकं ॥५१॥ महास्वनं महागर्जितं । प्रलुलुपुः लुप्तवन्तः । दशन्ति अदशन् ॥ ५२ ॥ उदकुम्भशतानि आदायेति शेषः ॥ ५३ ॥ कूटमुद्गरपाणयइत्यनेन तत्प्रहारपरिचयोलक्ष्यते । पातयन् अपातयन् ॥ ५४ ॥ बध्यन्ते एभिरिति बन्धनानि चर्मादीनि । रज्जवश्च बन्धनानि च तैर्बद्धाभिः । रज्जुबन्धनादिना दृढीकृताभिरित्यर्थः । शतघ्नीभिः गदाविशेषैः । वध्यमानः पीड्यमानः ॥ ५५ ॥ स्पर्शं परमबुध्यत वारणप्रधावनं केवलस्पर्शमबुध्यत । कीटादिस्पर्शोयमिति मन्यते स्म । बुद्धः विरतनिद्रः ॥ ५६ ॥ पात्यमानैः प्रबोधेप्युत्थानाय पुनः क्षिप्यमाणैः । क्षुद्भयपीडितः क्षुद्भयाभ्यां पीडितः । भयमत्राकालबोधनकृतं । क्षुद्रूपभयपीडित इति वा । विजृम्भमाणः गात्रभङ्गंकुर्वाणः । उत्पपात उदतिष्ठत्

स० प्रत्यबोधयन् प्रतिबोधयितुंयत्नंकृतवन्तः ॥ ४४ ॥ **स०** जघ्नुः अन्तर्णीतण्यर्थः । एतान्कुंभकर्णोपरिगमयामासुः । तंचदण्डादिभिर्जघ्नुः ॥ ४६॥ **ति०** महाकाष्ठानां स्थूणादीनां कटङ्करैः समूहैः । कटङ्कैरितिपाठः । कटङ्कटः स्तंभभेद इतितीर्थः ॥ ४७ ॥ **ती०** आसक्तानां राक्षसगृहीतानां । **स०** आसक्तानां केनापिपदार्थेनासंबद्धानां । तथाचेदेव नादविशेषः ॥ ४९ ॥

[पा०] १ क. च. झ. ट. कारंतुते. २ झ. ट. नचसंबुबुधेतदा. ३ ज. महाकाष्ठोत्कटैःकरैः. ४ ङ. च. छ. झ. ट. ततोभेरीसहस्रंतु. ५ ठ. मसक्तानां. ६ झ. ट. प्रबुध्यत. ७ ङ. च. झ. ट. ततःकोप. ८ ख. सिञ्चन्तस्तस्यकर्णयोः.

स नागभोगाचलशृङ्गकल्पौ विक्षिप्य बाहू गिरिशृङ्गसारौ ॥
विवृत्य वक्त्रं बडबामुखाभं निशाचरोसौ विकृतं जजृम्भे ॥ ५८ ॥
तस्य जाजृम्भमाणस्य वक्त्रं पातालसन्निभम् ॥ ददृशे मेरुशृङ्गाग्रे दिवाकर इवोदितः ॥ ५९ ॥
स जृम्भमाणोतिबलः प्रतिबुद्धो निशाचरः ॥ निश्वासश्वास्य संजज्ञे पर्वतादिव मारुतः ॥ ६० ॥
रूपमुत्तिष्ठतस्तस्य कुम्भकर्णस्य तद्बभौ ॥ तपान्ते सबलाकस्य मेघस्येव विवर्षतः ॥ ६१ ॥
तस्य दीप्ताग्निसदृशे विद्युत्सदृशवर्चसी ॥ ददृशाते महानेत्रे दीप्ताविव महाग्रहौ ॥ ६२ ॥
ततस्त्वदर्शयन्सर्वान्भक्ष्यांश्च विविधान्बहून् ॥ वराहान्महिषांश्चैव स बभक्ष महाबलः ॥ ६३ ॥
अर्दन्बुभुक्षितो मांसं शोणितं तृषितः पिबन् ॥ मेदःकुम्भांश्च मद्यं च पपौ शक्ररिपुस्तदा ॥ ६४ ॥
ततस्तृप्त इति ज्ञात्वा समुत्पेतुर्निशाचराः ॥ शिरोभिश्च प्रणम्यैनं सर्वतः पर्यवारयन् ॥ ६५ ॥
निद्राविशदनेत्रस्तु कलुषीकृतलोचनः ॥ चारयन्सर्वतो दृष्टिं तान्ददर्श निशाचरान् ॥ ६६ ॥
स सर्वान्सान्त्वयामास नैर्ऋतान्नैर्ऋतर्षभः ॥ बोधनाद्विस्मितश्चापि राक्षसानिदमब्रवीत् ॥ ६७ ॥
किमर्थमहमादृत्य भवद्भिः प्रतिबोधितः ॥ कच्चित्सुकुशलं राज्ञो भयवानेष वा न किम् ॥ ६८ ॥
अथवा ध्रुवमन्येभ्यो भयं परमुपस्थितम् ॥ यदर्थमेवं त्वरितैर्भवद्भिः प्रतिबोधितः ॥ ६९ ॥
अद्य राक्षसराजस्य भयमुत्पाटयाम्यहम् ॥ पातयिष्ये महेन्द्रं वा शातयिष्ये तथाऽनलम् ॥ ७० ॥

॥ ५७ ॥ विजृम्भमाणइत्युक्तं विवृणोति—स इति ॥ दैर्घ्ये नागभोगदृष्टान्तः । काठिन्ये अचलशृङ्गदृष्टान्तः । यद्वा पीनत्वे दृष्टान्तः । गिरिशृङ्गसारौ गिरिशृङ्गबलौ । " सारो बले स्थिरांशे च " इत्यमरः । विवृत्य व्यादाय । बडबा समुद्रमध्यवर्तिन्यश्वस्त्री । विकृतं भयंकरं यथा भवति तथा ॥ ५८ ॥ जाजृम्भमाणस्य । यङ्लुक्यात्मनेपदरुगागमाभावावार्षौ । मेरुशृङ्गाग्रे । मेरुरत्र सावर्णिमेरुः तदग्रस्यैव सूर्यसंबन्धसंभवात् । अत्र दिवाकरस्योदितत्वं महामेरोरुत्तरभागस्थपुर्यपेक्षया । यद्वा उदितः दृष्ट इत्यर्थः । गत्यर्थानां बुद्ध्यर्थत्वात् ॥ ५९ ॥ प्रतिबुद्धः अभूदिति शेषः । सम्यक् प्रबोधोत्र विवक्षितः ॥ ६० ॥ तस्य साभरणस्येत्यर्थः । अतः सबलाकस्येति नाधिकोपमा । विवर्षत इति नीलरूपातिशयोक्तिः ॥ ६१ ॥ विद्युत्सदृशवर्चसीइति निद्राविरामकालिकचाञ्चल्योक्तिः । महाग्रहौ शन्यङ्गारकाविति परपीडकत्वोक्तिः । दीप्ताग्निसदृशे इति क्रौर्यातिशयोक्तिः ॥ ६२ ॥ अदर्शयन् राक्षसा इति शेषः । सर्वान् सर्वविधान् । तदवान्तरभेदतो विविधान् । बहून्विपुलान् । वराहान् वराहविकारान् । बभक्ष भक्षयामास । बुभुक्षितो मांसमदन् बुभुक्षाशान्त्यर्थं मांसमदन्नित्यर्थः । तृषितः शोणितं पिबन् तृष्णाशान्त्यर्थं शोणितं पिबन्नित्यर्थः । पुनराप्यायनार्थं मेदःकुम्भान् मद्यं च पपौ । कुम्भपरिमितमेदांसीत्यर्थः ॥ ६३–६४ ॥ समुत्पेतुरितिपूर्वं कुम्भकर्णभयादन्तर्धायस्थिताः । इदानीं तृप्तत्वेन शान्तक्रोधत्वात् प्रकाशमाजग्मुरित्यर्थः ॥ ६५ ॥ निद्रया अविशदे अप्रसन्ने ईषदुन्मीलिते नेत्रे यस्य स तथोक्तः ॥ ६६ ॥ बोधनात् अप्रबोध्यबोधनात् ॥ ६७ ॥ राज्ञः रावणस्य सुकुशलं कच्चित् । एष राजा च भयवान्न किं भययुक्तो न भवति हि ॥ ६८ ॥ एवं संशय्य पुनर्निश्चिनोति—अथवेति ॥ तत्र हेतुमाह—यदर्थमिति । यदर्थं यद्भयनिवृत्त्यर्थं ॥ ६९ ॥ शातयिष्ये शातयिष्यामि छेत्स्यामीत्यर्थः । " शॢ शातने " इति धातोर्णिचि " शदेरगतौ तः " इति तादेशः ।

[पा०] १ ख. ङ. छ. झ. ञ. ट. जितवज्रसारौ. २ ङ. झ. ट. प्रबुद्धस्तु. ३ ङ.—ट. युगान्तेसर्वभूतानिकालस्येवदिधक्षतः. ४ ख. सहस्रकुंभसंपूर्णशोणितंतृषितःपिबन् । मदकुंगान्मयकुंभान्कुंभकर्णस्तदाऽपिबत्. ५ क. ख. ङ. च. छ. झ. ञ. ट. भयंवानेहकिंचन. ज. भयंवानेहविद्यते. ६ घ. महद्भयमुपस्थितं. ७ ङ. झ. ट. दारयिष्ये. ८ ङ. झ. ट. शीतयिष्ये. ख. शोषयिष्येऽथवा.

न ह्यल्पकारणे सुप्तं बोधयिष्यति मां गुरुः ॥ तदाख्यातार्थतत्त्वेन मत्प्रबोधनकारणम् ॥ ७१ ॥
एवं ब्रुवाणं संरब्धं कुम्भकर्णं महाबलम् ॥ यूपाक्षः सचिवो राज्ञः कृताञ्जलिरुवाच ह ॥ ७२ ॥
न नो दैवकृतं किंचिद्भयमस्ति कदाचन ॥ मानुषान्नो भयं राजंस्तुमुलं संप्रबाधते ॥ ७३ ॥
न दैत्यदानवेभ्यो वा भयमस्ति हि तादृशम् ॥ यादृशं मानुषं राजन्भयमस्मानुपस्थितम् ॥ ७४ ॥
वानरैः पर्वताकारैर्लङ्केयं परिवारिता ॥ सीताहरणसंतप्ताद्रामान्नस्तुमुलं भयम् ॥ ७५ ॥
एकेन वानरेणेयं पूर्वं दग्धा महापुरी ॥ कुमारो निहतश्चाक्षः सानुयात्रः सकुञ्जरः ॥ ७६ ॥
स्वयं रक्षोधिपश्चापि पौलस्त्यो देवकण्टकः ॥ मृतेति संयुगे मुक्तो रामेणादित्यतेजसा ॥ ७७ ॥
यन्न देवैः कृतो राजा नापि दैत्यैर्न दानवैः ॥ कृतः स इह रामेण विमुक्तः प्राणसंशयात् ॥ ७८ ॥
स यूपाक्षवचः श्रुत्वा भ्रातुर्युधि पराजयम् ॥ कुम्भकर्णो विवृत्ताक्षो यूपाक्षमिदमब्रवीत् ॥ ७९ ॥
सर्वमद्यैव यूपाक्ष हरिसैन्यं सलक्ष्मणम् ॥ राघवं च रणे हत्वा पश्चाद्द्रक्ष्यामि रावणम् ॥ ८० ॥
राक्षसांस्तर्पयिष्यामि हरीणां मांसशोणितैः ॥ रामलक्ष्मणयोश्चापि स्वयं पास्यामि शोणितम् ॥ ८१ ॥

तत्तस्य वाक्यं ब्रुवतो निशम्य सगर्वितं रोषविवृद्धदोषम् ॥
महोदरो नैर्ऋतयोधमुख्यः कृताञ्जलिर्वाक्यमिदं बभाषे ॥ ८२ ॥

रावणस्य वचः श्रुत्वा गुणदोषौ विमृश्य च ॥ पश्चादपि महाबाहो शत्रून्युधि विजेष्यसि ॥ ८३ ॥
महोदरवचः श्रुत्वा राक्षसैः परिवारितः ॥ कुम्भकर्णो महातेजाः संप्रतस्थे महाबलः ॥ ८४ ॥
तं समुत्थाप्य भीमाक्षं भीमरूपपराक्रमम् ॥ राक्षसास्त्वरिता जग्मुर्दशग्रीवनिवेशनम् ॥ ८५ ॥

॥ ७० ॥ अल्पकारणे अल्पकार्यनिमित्तं । गुरुः अग्रजः । आख्यात कथयत । अर्थतत्त्वेन तत्त्वार्थेन याथार्थ्येनेति यावत् ॥ ७१—७२ ॥ दैवकृतं इन्द्रादिकृतं । नः अस्मान् । मानुषाज्जातं तुमुलं भयं संप्रबाधत इत्यन्वयः ॥ ७३ ॥ वाशब्दार्थोनुक्तसमुच्चयार्थः । देवेभ्यश्चेत्यर्थः । मानुषं मनुष्यादागतं ॥ ७४—७५ ॥ इन्द्रादिभिरपि दुष्पीडमिदं नगरं कथं वानरैः पीड्यत इत्यत्राह—एकेनेत्यादि ॥ सानुयात्रः सानुगः । एकेनैव महती पीडा कृता । किं पुनरनेकैरिहागतैरिति भावः ॥ ७६ ॥ मृतेति । हे मृतेत्युक्त्वा । वस्तुतस्तु मृतेत्यविभक्तिकनिर्देशः । मृत इति कृत्वेत्यर्थः । मृतप्राय इति मत्वेत्यर्थ इत्यप्याहुः ॥ ७७ ॥ यत् य इत्यर्थः । प्राणसंशयादिति ल्यब्लोपे पञ्चमी । यो राजा देवादिभिरपि प्राणसंशयं नीत्वा मुक्तो न कृतः स रावणो रामेण प्राणसंशयं नीत्वा अद्य विमुक्तः कृत इत्यर्थः । यद्वा राजा देवादिभिरपि यत् न कृतः न प्रापितः । तत् रामेण कृतः प्राणसंशयाद्विमुक्तश्चेत्यर्थः ॥ ७८ ॥ पराजयं पराजयबोधकं ॥ ७९—८१ ॥ सगर्वितं सगर्वं । रोषविवृद्धदोषं क्रोधविवृद्धदुर्नयं । कुम्भकर्णमिति शेषः ॥ ८२—८३ ॥ संप्रतस्थे प्रस्थातुमुपचक्रमे । "शयनादुत्पपात हे" त्युत्तरत्र वक्ष्यमाणत्वात् ॥ ८४—

ति० संयुगेमुक्तः जीवन्मृतइत्युक्त्वेतिशेषः ॥ ७७ ॥ ति० यत्नकृतः यामवस्थांनप्रापितः सरामेणकृतः तामवस्थांप्रापितः । प्राणसंशयात् तयावस्थयाप्राप्तोविमुक्तश्च ॥ ७८ ॥ ती० सलक्ष्मणंराघवंहरिसैन्यंचहत्वा । वस्तुतस्तु सलक्ष्मणंराघवंविनेतिशेषः । हरिसैन्यंहत्वारावणंद्रक्ष्यामीतिसंबन्धः ॥ ८० ॥ ती० वस्तुतस्तु रामलक्ष्मणयोरितिसंबन्धार्थेषष्ठी । रामलक्ष्मणसंबन्धिहरीणांमांसशोणितैः राक्षसांस्तर्पयिष्यामि स्वयमपिहरीणांशोणितंपास्यामीतिसंबन्धः ॥ ८१ ॥ स० रोषविवृद्धदोषं रोषेण रामात्पराजयजन्यकोपेनविवृद्धः दोषः आत्मश्लाघनरूपोयस्यतं ॥ ८२ ॥

[पा०] १ घ. ङ. झ. ट. मादृशं. क. ग. मांदृशं. छ. ज. ञ. मांप्रभुः. २ क. ख. ङ. ट.—कुंभकर्णमरिन्दमं. ३ घ. ङ. झ. ट. भयमस्तिननःक्वचित्. ख. ग. भयमस्तिहिनक्वचित्. ४ ग. ङ.—व्रजेति. ५ ङ.—ट. वर्चसा. ६ ङ. च. झ. ञ. ट. जित्वाततोद्रक्ष्यामि. ७ ङ. झ. ट. सुप्तमुत्थाप्य.

ततो गत्वा दशग्रीवमासीनं परमासने ॥ ऊचुर्बद्धाञ्जलिपुटाः सर्व एव निशाचराः ॥ ८६ ॥
प्रबुद्धः कुम्भकर्णोयं भ्राता ते राक्षसर्षभ ॥ कथं तत्रैव निर्यातु द्रक्ष्यस्येनमिहागतम् ॥ ८७ ॥
रावणस्त्वब्रवीद्धृष्टो राक्षसांस्तानुपस्थितान् ॥ द्रष्टुमेनमिहेच्छामि यथान्यायं च पूज्यताम् ॥ ८८ ॥
तथेत्युक्त्वा तु ते सर्वे पुनरागम्य राक्षसाः ॥ कुम्भकर्णमिदं वाक्यमूचू रावणचोदिताः ॥ ८९ ॥
द्रष्टुं त्वां काङ्क्षते राजा सर्वराक्षसपुङ्गवः ॥ गमने क्रियतां बुद्धिर्भ्रातरं संप्रहर्षय ॥ ९० ॥
कुम्भकर्णस्तु दुर्धर्षो भ्रातुराज्ञाय शासनम् ॥ तथेत्युक्त्वा महाबाहुः शयनादुत्पपात ह ॥ ९१ ॥
प्रक्षाल्य वदनं हृष्टः स्नातः परमभूषितः ॥ पिपासुस्त्वरयामास पानं बलसमीरणम् ॥ ९२ ॥
ततस्ते त्वरितास्तस्य राक्षसा रावणाज्ञया ॥ मद्यकुम्भांश्च विविधान्क्षिप्रमेवोपहारयन् ॥ ९३ ॥
पीत्वा घटसहस्रे द्वे गमनायोपचक्रमे ॥ ईषत्समुत्कटो मत्तस्तेजोबलसमन्वितः ॥
कुम्भकर्णो बभौ हृष्टः कालान्तकयमोपमः ॥ ९४ ॥
भ्रातुः स भवनं गच्छन्रक्षोगणसमन्वितः ॥ कुम्भकर्णः पदन्यासैरकम्पयत मेदिनीम् ॥ ९५ ॥
स राजमार्गं वपुषा प्रकाशयन्सहस्ररश्मिर्धरणीमिवांशुभिः ॥
जगाम तत्राञ्जलिमालया वृतः शतक्रतुर्गेहमिव स्वयंभुवः ॥ ९६ ॥
तं राजमार्गस्थममित्रघातिनं वनौकसस्ते सहसा बहिः स्थिताः ॥
दृष्ट्वाप्रमेयं गिरिशृङ्गकल्पं वितत्रसुस्ते हरियूथपालाः ॥ ९७ ॥
केचिच्छरण्यं शरणं स्म रामं व्रजन्ति केचिद्व्यथिताः पतन्ति ॥
केचिद्दिशः स्म व्यथिताः प्रयान्ति केचिद्भयार्ता भुवि शेरते स्म ॥ ९८ ॥
तमद्रिशृङ्गप्रतिमं किरीटिनं स्पृशन्तमादित्यमिवात्मतेजसा ॥
वनौकसः प्रेक्ष्य विवृद्धमद्भुतं भयार्दिता दुद्रुविरे ततस्ततः ॥ ९९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षष्टितमः सर्गः ॥ ६० ॥

॥ ८५ ॥ गत्वा रावणनिवेशनं गत्वा । तत ऊचुरित्यन्वयः ॥ ८६ ॥ तत्रैव निर्यातु वा इहागतमेनं द्रक्ष्यसि वा । कथं, कथं करोत्विति संबन्धः ॥ ८७ ॥ पूज्यतां एष इति शेषः ॥ ८८—९१ ॥ बलसमीरणं बलवर्धनं ॥ ९२ ॥ रावणाज्ञया त्वरितास्ते क्षिप्रं उपहारयन् उपाहारयन्निति संबन्धः ॥ ९३ ॥ ईषत्समुत्कटः पानेन ईषन्मदोत्कटः । मत्तः स्वभावेनोन्मत्तश्चेत्यर्थः । कालान्तकयमोपमः काले प्रलयकाले योन्तकः संहारको यमस्तत्सदृश इत्यर्थः ॥ ९४ ॥ रक्षोबलं राक्षससेना ॥ ९५ ॥ तत्र राजमार्गे । अञ्जलिमालया पौरजनकृतयेति शेषः ॥ ९६ ॥ यूथपाला इत्यत्र चकारो द्रष्टव्यः । अन्यथा तच्छब्दोतिरिच्येत ॥ ९७—९८ ॥ आत्मतेजसा शरीरकान्त्या ॥ ९९ ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

ति० आत्मतेजसाऽऽदित्यंस्पृशन्तमिवतत्सदृशमितियावत् । प्रायोदिनद्वयेनास्यजागरः ॥ ९९ ॥ इतिषष्टितमःसर्गः ॥ ६० ॥

[पा०] १ ङ. च. छ. झ. ञ.ट. तेऽभिगम्य. २ ग. ङ.—ट. द्रक्ष्यसेतमिहागतं. ३ ग. छ. ज. झ. ट. परमर्षितः. ४ घ. तेगत्वा. ५ ङ. ट. त्वरितास्तत्र. ६ ग.—ट. मद्यंभक्ष्यांश्च. ७ झ. ट. सहयूथपालैः. ८ ङ. छ. झ. ट. पतन्ति.

एकषष्टितमः सर्गः ॥ ६१ ॥

लङ्कायांराजमार्गेगच्छन्तंकुंभकर्णमवलोकयतारामेण विभीषणंप्रति तत्स्वरूपप्रश्नः ॥ १ ॥ विभीषणेन रामंप्रति कुंभकर्णस्वरूपनिरूपणम् ॥ २ ॥ रामेणनीलंप्रति रणायसेनासज्जीकरणनियोजनम् ॥ ३ ॥

ततो रामो महातेजा धनुरादाय वीर्यवान् ॥ किरीटिनं महाकायं कुम्भकर्णं ददर्श ह ॥ १ ॥
तं दृष्ट्वा राक्षसश्रेष्ठं पर्वताकारदर्शनम् ॥ क्रममाणमिवाकाशं पुरा नारायणं प्रभुम् ॥
सतोयाम्बुदसंकाशं काञ्चनाङ्गदभूषणम् ॥ २ ॥
दृष्ट्वा पुनः प्रदुद्राव वानराणां महाचमूः ॥ ३ ॥
विद्युतां वाहिनीं दृष्ट्वा वर्धमानं च राक्षसम् ॥ सविस्मयमिदं रामो विभीषणमुवाच ह ॥ ४ ॥
कोसौ पर्वतसंकाशः किरीटी हरिलोचनः ॥ लङ्कायां दृश्यते वीर सविद्युदिव तोयदः ॥ ५ ॥
पृथिव्याः केतुभूतोसौ महानेकोत्र दृश्यते ॥ यं दृष्ट्वा वानराः सर्वे विद्रवन्ति ततस्ततः ॥ ६ ॥
आचक्ष्व मे महान्कोसौ रक्षो वा यदि वाऽसुरः ॥ न मयैवंविधं भूतं दृष्टपूर्वं कदाचन ॥ ७ ॥
स पृष्टो राजपुत्रेण रामेणाक्लिष्टकर्मणा ॥ विभीषणो महाप्राज्ञः काकुत्स्थमिदमब्रवीत् ॥ ८ ॥
येन वैवस्वतो युद्धे वासवश्च पराजितः ॥ सैष विश्रवसः पुत्रः कुम्भकर्णः प्रतापवान् ॥
अस्य प्रमाणात्सदृशो राक्षसोन्यो न विद्यते ॥ ९ ॥
एतेन देवा युधि दानवाश्च यक्षा भुजङ्गा पिशिताशनाश्च ॥
गन्धर्वविद्याधरकिन्नराश्च सहस्रशो राघव संप्रभग्नाः ॥ १० ॥
शूलपाणिं विरूपाक्षं कुम्भकर्णं महाबलम् ॥ हन्तुं न शेकुस्त्रिदशाः कालोऽयमिति मोहिताः ॥ ११ ॥
प्रकृत्या ह्येष तेजस्वी कुम्भकर्णो महाबलः ॥ अन्येषां राक्षसेन्द्राणां वरदानकृतं बलम् ॥ १२ ॥
एतेन जातमात्रेण क्षुधार्तेन महात्मना ॥ भक्षितानि सहस्राणि सत्त्वानां सुबहून्यपि ॥ १३ ॥
तेषु संभक्ष्यमाणेषु प्रजा भयनिपीडिताः ॥ यान्तिस्म शरणं शक्रं तमप्यर्थं न्यवेदयन् ॥ १४ ॥

अथ रामेण कुम्भकर्णस्वरूपप्रश्नः विभीषणेन तदुत्तरं च क्रियत एकषष्टितमे—तत इत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ तं दृष्ट्वा धनुरादाय पुनर्विशेषेण ददर्शेति योजना । महाकायं उन्नतकायं । पर्वताकारदर्शनं । दृश्यत इति दर्शनं शरीरं । पर्वतवत्स्थूलशरीरमित्यर्थः । काञ्चनाङ्गदभूषणं काञ्चनमयाङ्गदभूषणं । अतएव सतोयाम्बुदः वर्षुकमेघः तत्सदृशं ॥ १—॥ २ ॥ दृष्ट्वेत्यर्धं ॥ कुम्भकर्णमिति शेषः ॥ ३ ॥ सविस्मयमिति क्रियाविशेषणं । वर्धमानमिति । कामरूपत्वादिति भावः ॥ ४ ॥ हरिलोचनः कपिलेक्षणः । " हरिर्ना कपिले त्रिषु " इत्यमरः ॥ ५—८ ॥ सैष इत्यत्र " सोचि लोपे चेत्पादपूरणं " इति सुलोपः । प्रमाणं स्थौल्यौन्नत्ये ॥ ९ ॥ संप्रभग्नाः अभज्यन्त ॥ १० ॥ विरूपाक्षं विकटाक्षं । मोहिताः भ्रान्ताः ॥ ११ ॥ प्रकृत्या तेजस्वी स्वप्रभावेन बलवान् । न तु वरप्रदानेनेत्यर्थः । अन्येषां रावणादीनां भवतीति शेषः ॥ १२ ॥ प्रकृत्या तेजस्वित्वमुपपादयति—एते-

---

ती० रामः पुरा आकाशंक्रममाणंनारायणमिव पर्वताकारदर्शनंतंराक्षसश्रेष्ठंदृष्ट्वा धनुरादाय किरीटिनंमहाकायंकुंभकर्णंददर्शेतियोजना । यद्वा तंदृष्ट्वेतिश्लोकोभिन्नंवाक्यं । आकाशंक्रममाणंप्रभुंनारायणमिवपर्वताकारदर्शनंतंराक्षसश्रेष्ठंदृष्ट्वारामोयत्तोबभूवेति शेषः ॥ १—२ ॥ **स०** हरिलोचनः सूर्यसदृशरक्तलोचनोवा । **शि०** किंच हरिलोचनः रिपुस्त्रास्थापहारकनेत्रविशिष्टः ॥ ५ ॥ **स०** शूलपाणिंविरूपाक्षं विरूपेविकृतेअक्षिणीयस्यसतथातं । विरूपाक्षं शूलपाणिंरुद्रमिवेतिवा ॥ ११ ॥

[पा०] १ ग. ङ. झ. ट. नारायणंयथा. २ झ. ट. सविस्मितमिदं. ३ ङ. झ. ट. पृथिव्यां. ४ ङ. झ. ट. सुमहान्. ५ ङ. छ. झ. ट. बालेन.

स कुंभकर्णं कुपितो महेन्द्रो जघान वज्रेण शितेन वज्री ॥
स शक्रवज्राभिहतो महात्मा चचाल कोपाच्च भृशं ननाद ॥ १५ ॥
तस्य नानद्यमानस्य कुंभकर्णस्य धीमतः ॥ श्रुत्वाऽतिनादं वित्रस्ता भूयो भूमिर्वितत्रसे ॥ १६ ॥
तत्र कोपान्महेन्द्रस्य कुंभकर्णो महाबलः ॥ विकृष्यैरावताद्दन्तं जघानोरसि वासवम् ॥ १७ ॥
कुंभकर्णप्रहारार्तो विजज्वाल स वासवः ॥ ततो विषेदुः सहसा देवब्रह्मर्षिदानवाः ॥ १८ ॥
प्रजाभिः सह शक्रश्च ययौ स्थानं स्वयंभुवः ॥ कुंभकर्णस्य दौरात्म्यं शशंसुस्ते प्रजापतेः ॥ १९ ॥
प्रजानां भक्षणं चापि देवानां चापि धर्षणम् ॥ आश्रमध्वंसनं चापि परस्त्रीहरणं भृशम् ॥ २० ॥
एवं प्रजा यदि त्वेष भक्षयिष्यति नित्यशः ॥ अचिरेणैव कालेन शून्यो लोको भविष्यति ॥ २१ ॥
वासवस्य वचः श्रुत्वा सर्वलोकपितामहः ॥ रक्षांस्यावाहयामास कुंभकर्णं ददर्श ह ॥ २२ ॥
कुंभकर्णं समीक्ष्यैव वितत्रास प्रजापतिः ॥ दृष्ट्वा विश्वास्य चैवेदं स्वयंभूरिदमब्रवीत् ॥ २३ ॥
ध्रुवं लोकविनाशाय पौलस्त्येनासि निर्मितः ॥ तस्मात्त्वमद्यप्रभृति मृतकल्पः शयिष्यसे ॥ २४ ॥
ब्रह्मशापाभिभूतोथ निपपाताग्रतः प्रभोः ॥ ततः परमसंभ्रान्तो रावणो वाक्यमब्रवीत् ॥ २५ ॥
विवृद्धः काञ्चनो वृक्षः फलकाले निकृत्यते ॥ न नप्तारं स्वकं न्याय्यं शप्तुमेवं प्रजापते ॥ २६ ॥
न मिथ्यावचनश्च त्वं स्वप्स्यत्येष न संशयः ॥ कालस्तु क्रियतामस्य शयने जागरे तथा ॥ २७ ॥
रावणस्य वचः श्रुत्वा स्वयंभूरिदमब्रवीत् ॥ २८ ॥
शयिता ह्येष षण्मासानेकाहं जागरिष्यति ॥ एकेनाह्ना त्वसौ वीरश्चरन्भूमिं बुभुक्षितः ॥
व्यात्तास्यो भक्षयेल्लोकान्संक्रुद्ध इव पावकः ॥ २९ ॥

नेत्यादिना ॥ १३—१५ ॥ नानद्यमानस्य अतिशयेन नदतः । वित्रस्ता भूमिः भूयो वितत्रसे उत्तरोत्तरं भीताऽभूत् ॥ १६ ॥ तत्र तदानीं । विकृष्य उत्पाट्य ॥ १७ ॥ विजज्वाल चुकोपेति यावत् ॥ १८ ॥ ते शक्रादयः । प्रजापतेः प्रजापतये ॥ १९ ॥ दौरात्म्यं प्रपञ्चयति—प्रजानामित्यादि ॥ २० ॥ एवं इदानींक्रियमाणप्रकारेण । यदि भक्षयिष्यतीत्यन्वयः ॥ २१ ॥ प्राधान्याद्वासवग्रहणं । कुम्भकर्णं तेष्विति शेषः ॥ २२ ॥ इदं रक्षः इदं वक्ष्यमाणमिति इदंशब्दद्वयनिर्वाहः । विश्वास्य प्रलोभ्य । सान्त्वपूर्वकं समीपमानीयेत्यर्थः ॥ २३ ॥ पौलस्त्येन विश्रवसा । तस्मात्त्वमद्यप्रभृति मृतकल्पः शयिष्यसे इत्ययंशापः "स्वप्तुं वर्षाण्यनेकानि देवदेव ममेप्सितम् । एवमस्विति तच्चोक्त्वा प्रहृष्टास्ते दिवौकसः" इति तपश्चर्यानन्तरप्रार्थनालब्धबहुवार्षिकनिद्रासमनन्तरकालभावीत्यवगन्तव्यं । अन्यथा मृतकल्पः शयिष्यस इति शप्तस्य तपश्चर्याद्यसंभवात् ॥ २४ ॥ प्रभोः रावणस्य ॥ २५ ॥ काञ्चनः काञ्चनवत् स्पृहणीयः । चम्पकवृक्षो वा । विवृद्धः वर्धितः । फलकाले पुष्पकाले निकृत्यते छिद्यते । नप्तारं पौत्रं ॥२६॥ कालः कालनियमः ॥२७—२८॥ षण्मासानित्येतदर्वाङ्निषेधपरं । अन्यथा नव षट् सप्त चाष्टौ च मासानिति पूर्वोक्त-

---

स० आवाहयामास आकर्षणमन्त्रेणाजुहाव ॥ २२ ॥ स० काञ्चनोवृक्षः उदुंबरादिः । फलकाले यद्यपिनीरसं जन्त्वादिदूषितं चफलं । तथापि वृद्धः वर्धितःननिकृत्यतेयथातन्निकर्तनमन्याय्यं । तथा स्वकंनप्तारं पौत्रं । एवंशप्तुमन्याय्यं न्यायादपेतं । "काञ्चनः काञ्चनारेस्याच्चंपकेनागकेसरे । उदुंबरेचपुन्नागे" इतिविश्वः । "विषवृक्षोपिसंवर्ध्यस्वयंछेत्तुमसांप्रतं" इत्यादेस्तादृशोपिनच्छेद्यः । अयंतुकाञ्चनमयोवृक्षः फलकाले फलद्वाराकाञ्चनदानकालइतिवा ॥ २६ ॥ ति० जाग्रणे जागरणे । गुणाभावआर्षः । कालः कालनियमः ॥ २७ ॥ स० षण्मासान् विशेषणसमासः । तन्मध्ये नजागरणं । निद्रायांदिनाधिक्यंतुनानिष्टं । विस्तरः प्रागुपपादितोऽनुसंधेयः । षट् मासानितिभिन्नंवापदं । ति० जागरणंत्वेकाहमेव । सत्यत्राहितेकार्येइतिशेषः । अतएवेन्द्रलो.

[पा०] १ ङ. च. छ. झ. ञ. ट. रक्षसः. २ ङ. झ. ट. वित्रस्ताःप्रजाभूयोवितत्रसुः. ३ झ. शशंसुस्तेदिवौकसां. ङ. टधर्षणंचदिवौकसां. ४ ङ. झ. ट. तथा. ५ क. ङ. च. झ. ञ. ट. कुंभकर्णमथाश्वस्तःस्वयंभूः. ६ ग. ङ. झ. ट. जाग्रणे. ७ ङ. झ. ट. संवृद्धइव.

सोसौ व्यसनमापन्नः कुंभकर्णमबोधयत् ॥ त्वत्पराक्रमभीतश्च राजा संप्रति रावणः ॥ ३० ॥
स एष निर्गतो वीरः शिबिराद्भीमविक्रमः ॥ वानरान्भृशसंक्रुद्धो भक्षयन्परिधावति ॥ ३१ ॥
कुंभकर्णं समीक्ष्यैव हरयोद्य प्रविद्रुताः ॥ कथमेनं रणे क्रुद्धं वारयिष्यन्ति वानराः ॥ ३२ ॥
उच्यन्तां वानराः सर्वे यन्त्रमेतत्समुच्छ्रितम् ॥ इति विज्ञाय हरयो भविष्यन्तीह निर्भयाः ॥ ३३ ॥
विभीषणवचः श्रुत्वा हेतुमत्सुमुखेरितम् ॥ उवाच राघवो वाक्यं नीलं सेनापतिं तदा ॥ ३४ ॥
गच्छ सैन्यानि सर्वाणि व्यूह्य तिष्ठस्व पावके ॥ द्वाराण्यादाय लङ्कायाश्चर्याश्चाप्यथ संक्रमान् ॥३५॥
शैलशृङ्गाणि वृक्षांश्च शिलाश्चाप्युपसंहर ॥ तिष्ठन्तु वानराः सर्वे सायुधाः शैलपाणयः ॥ ३६ ॥
राघवेण समादिष्टो नीलो हरिचमूपतिः ॥ शशास वानरानीकं यथावत्कपिकुञ्जरः ॥ ३७ ॥
ततो गवाक्षः शरभो हनुमानङ्गदस्तथा ॥ शैलशृङ्गाणि शैलाभा गृहीत्वा द्वारमभ्ययुः ॥ ३८ ॥
रामवाक्यमुपश्रुत्य हरयो जितकाशिनः ॥ पादपैरर्दयन्वीरा वानराः परवाहिनीम् ॥ ३९ ॥

ततो हरीणां तदनीकमुग्रं रराज शैलोद्यतदीप्तहस्तम् ॥
गिरेः समीपानुगतं यथैव महन्महाम्भोधरजालमुग्रम् ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

विरोधात् ॥ २९ ॥ सोसौ रावणः ॥ ३० ॥ शिबिरात् स्वनिलयात् । भक्षयन् परिधावति भक्षणहेतोः परिधाविष्यति । "लक्षणहेत्वोः क्रियायाः" इति शतृप्रत्ययः । वर्तमानसामीप्यादिना भविष्यदर्थे लट् ॥ ३१—३२ ॥ यन्त्रं विभीषिका । समुच्छ्रितं उन्नतं ॥ ३३ ॥ सुमुखेरितं सुमुखं यथा भवति तथा ईरितं उक्तं ॥ ३४ ॥ गच्छेत्यादिश्लोकद्वयं ॥ आदाय स्वीकृत्य । आवृत्येति यावत् । उपसंहर राशीकुरु । युद्धसाधनशिलादिकामिदानीमेव संपादयेत्यर्थः । तिष्ठन्तु वानराः सर्वे सायुधाः शैलपाणय इति पाठः । सायुधाः खड्गाद्यायुधवन्तः ॥ ३५—३८ ॥ परवाहिनीं नगररक्षार्थं वहिश्चरन्तीं । यद्वा कुम्भकर्णं दृष्ट्वा पलायमानान्वानरान्प्रत्यनुद्रुतां परवाहिनीमित्यर्थः ॥ ३९ ॥ शैलोद्यतदीप्तहस्तं शैलोद्यताः उद्यतशैलाः । महन्महाम्भोधरजालं । महत् गुरु महाम्भोधरजालं मेघजालमित्यर्थः ॥ ४० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकषष्टितमः सर्गः ॥ ६१ ॥

कजयारावणस्यकुंभकर्णेनसहगमनेप्रथमदिनेमधुपुरेवासउक्तः । द्वितीयदिनेकैलासे । यत्ररंभायांबलाद्रावणस्यप्रवृत्तिः । तदनन्तरं " कुंभकर्णस्तुदुष्टात्मानानाप्रहरणोद्यतः" इत्यादिनातृतीयदिवसादिषुयुद्धमुक्तं । तेनयुद्धप्रसङ्गेअनेकदिनमपिजागरणंप्रतीयते । **स०** अनल्पन्तसमाहितमानसंरावणमेकस्मिन्नेवदिनेबहुकार्यकारीभविष्यतीतिवदन्सुमुखीकरोतीत्याह—एकेनेति ॥ २९ ॥ **ति०** पुनारामःपृच्छति—**कथमेनमिति** ॥ ३२ ॥ **ति०** विभीषणउत्तरमाह—उच्यन्तामिति । समुच्छ्रितं रावणेनमाययाविभीषिकार्थंनिर्मितंकिंचिद्यन्त्रमात्रं अतोनकिंचिदेतदित्येववानराउच्यन्तां मयास्वामिभिश्च । नतुरावणानुजलादिकमित्यर्थः । एवंचकार्यसिद्धिरित्याह—इतीति । इह एतस्मिन्विषये । **शि०** ननुवानरस्वास्थ्यार्थंकिंकर्तव्यमित्यतआह—उच्यन्तामिति । समुच्छ्रितं अतिप्रवृद्धं । एतत् प्रदृश्यमानंरक्षः यन्त्रं मत्समीपेसंकुचिततेजोभविष्यतीतिशेषः । इति सर्वेवानराउच्यन्तां । इतिभवदुक्तंहरयोविज्ञायनिर्भयाः भविष्यन्ति ॥ ३३ ॥ **ति०** यथापूर्वंद्वारनिरोधेनियुङ्क्ते—गच्छेति । अनेनरावणपलायनोत्तरंमध्येऽवहारःसूचितः ॥ ३५ ॥ **ति०** शैलशृङ्गादीन्युपसंहरन् उपसंहरन्तः संचिन्वन्तः । भवन्तस्तिष्ठन्त्विति शेषः ॥ ३६ ॥ एकषष्टितमःसर्गः ॥ ६१ ॥

[**पा०**] १ ङ. झ. ट. प्रतीक्ष्यैव. २ ङ. च. छ. झ. ट. प्रदुद्रुवुः. ३ क. ख. ग. ङ. च. ज.—ट. त्सुमुखोद्गतं. ४ ग. ङ. छ. झ. ञ. ट. श्चाप्युपसंहरन्. ५ ङ. छ. ज. झ. ट. शैलोद्यतवृक्षहस्तं. ख. शैलोद्यतदीर्घहस्तं. ग. दीप्तोद्यतशैलहस्तं.

द्विषष्टितमः सर्गः ॥ ६२ ॥

कुंभकर्णेन रावणगृहमेत्यतच्चरणप्रणामपूर्वकं सपरिष्वङ्गंतदुत्तवरासने समुपवेशनम् ॥ १ ॥ रावणेनतंप्रति प्रकृतनिखिलवृत्तान्तनिवेदनपूर्वकं रामादिविजयेननिजरक्षणप्रार्थना ॥ २ ॥

स तु राक्षसशार्दूलो निद्रामदसमाकुलः ॥ राजमार्गं श्रिया जुष्टं ययौ विपुलविक्रमः ॥ १ ॥
राक्षसानां सहस्रैश्च वृतः परमदुर्जयः ॥ गृहेभ्यः पुष्पवर्षेण कीर्यमाणस्तदा ययौ ॥ २ ॥
स हेमजालविततं भानुभास्वरदर्शनम् ॥ ददर्श विपुलं रम्यं राक्षसेन्द्रनिवेशनम् ॥ ३ ॥
स तत्तदा सूर्य इवाभ्रजालं प्रविश्य रक्षोऽधिपतेर्निवेशम् ॥
ददर्श दूरेग्रजमासनस्थं स्वयंभुवं शक्र इवासनस्थम् ॥ ४ ॥
भ्रातुः स भवनं गच्छन्रक्षोगणसमन्वितम् ॥ कुंभकर्णः पदन्यासैरकम्पयत मेदिनीम् ॥ ५ ॥
सोभिगम्य गृहं भ्रातुः कक्ष्यामभिविगाह्य च ॥ ददर्शोद्विग्नमासीनं विमाने पुष्पके गुरुम् ॥ ६ ॥
अथ दृष्ट्वा दशग्रीवः कुंभकर्णमुपस्थितम् ॥ तूर्णमुत्थाय संहृष्टः सन्निकर्षमुपानयत् ॥ ७ ॥
अथासीनस्य पर्यङ्के कुंभकर्णो महाबलः ॥ भ्रातुर्ववन्दे चरणौ किं कृत्यमिति चाब्रवीत् ॥ ८ ॥
उत्पत्य चैनं मुदितो रावणः परिषस्वजे ॥ स भ्रात्रा संपरिष्वक्तो यथावच्चाभिनन्दितः ॥ ९ ॥
कुंभकर्णः शुभं दिव्यं प्रतिपेदे वरासनम् ॥ स तदासनमाश्रित्य कुंभकर्णो महाबलः ॥
संरक्तनयनः कोपाद्रावणं वाक्यमब्रवीत् ॥ १० ॥
किमर्थमहमादृत्य त्वया राजन्विबोधितः ॥ शंस कस्माद्भयं तेऽस्ति कोऽद्य प्रेतो भविष्यति ॥११॥
भ्रातरं रावणः क्रुद्धं कुंभकर्णमवस्थितम् ॥ ईषत्तु परिवृत्ताभ्यां नेत्राभ्यां वाक्यमब्रवीत् ॥ १२ ॥
अद्य ते सुमहान्कालः शयानस्य महाबल ॥ सुखितस्त्वं न जानीषे मम रामकृतं भयम् ॥ १३ ॥

अथ कुम्भकर्णं प्रति रावणस्य सान्त्ववचनं द्विषष्टितमे–स त्वित्यादि ॥ निद्रामदसमाकुलः निद्रया अकालोत्थितत्वेनानुवर्तमानया मदेन मद्यपानकृतेन च समाकुलः । गृहेभ्यः । निर्गतेनेति शेषः ॥१—२॥ हेमजालविततं स्वर्णमयगवाक्षवितनं । भानुभास्वरदर्शनं दृश्यत इति दर्शनं रूपं । भानुवत्प्रकाशमानमित्यर्थः॥३॥ दूरे कक्ष्यान्तरप्रदेशे । ददर्श । उन्नतपुष्पकवत्त्वादितिभावः ॥४—६॥ सन्निकर्षं समीपं ॥ ७ ॥ कृत्यं मया कर्तव्यं ॥ ८—१० ॥ आदृत्य स्थितेनेति शेषः । शंसेति । तमिति शेषः । प्रेतो भविष्यति मृतो भविष्यति ॥ ११ ॥ ईषत्परिवृत्ताभ्यामित्यनेन ईषत्कोपो लक्ष्यते ॥ १२ ॥ ईषत्त्वमेव विवृणोति–

स० गृहेभ्यः तत्स्थितस्त्रीकरेभ्यः यद्वा गृहेभ्यःपरभार्याभ्यः । "गृहिणीगृहमुच्यते" इतिवचनात् । राक्षसानांगृहेभ्यइत्यप्यन्वयोवा ॥ २ ॥ **स०** अभ्रजालं जलसत्तादशायामिन्द्रनीलखचनात् तदभावदशायांवज्रैश्चतन्निदर्शनतोचितेतिनभानुभास्वरेतिविरोधः । अथवा अग्रजं रावणं अभ्रजालमिवददर्शेत्यन्वयः ॥ ४ ॥ **स०** समुदितोरावणः उत्पत्य आसनादुत्थायेत्यर्थः । संधिरार्षः इतिनागोजिभट्टः । समुदितंयथाभवतितथाउत्पत्य । सुप्सुपेतिसमासऐकपद्यंज्ञेयं । मुदितः । अत् पत्येतिच्छेदः । अत् आश्चर्ययथाभवतितथा पतित्वाऽत्पत्य । व्याख्यातंचाद्भुतपदव्याख्यावसरे अदित्याश्चर्यार्थकमव्ययमितीतिवा ॥ ९ ॥ **स०** रोषेणपरिवृत्ताभ्यां नेत्राभ्यामुपलक्षितं कुद्धंभ्रातरंकुंभकर्णंरावणोऽब्रवीदितिनागोजिभट्टः । रोषेणपरिवृत्ताभ्यां नेत्राभ्यां पार्श्वद्वयवर्तिनेत्रत्वेनद्विवचनंपूर्वंभुजाभ्यामितिवत् । तदुपलक्षितोवानरोवाक्यमुवाचेत्यन्वयोवा । अस्मिन्पक्षेक्रुद्धपदंनाधिकं ॥ १२ ॥ **स०** सुमहान्कालः । प्रागस्माभिर्व्याख्यातरूपः । यत्तुनागोजिभट्टेन 'सुमहानित्यनेन ब्रह्मकृतावधिभूतषण्मासादप्यधिकःकालोगतइतिसूच्यते । " शयिताह्येषषण्मासानेकाहंजागरिष्यते " इतितुषण्मासादर्वाग्जागरणाभावपरं " मन्त्रंकृत्वाप्रसुप्तोऽयमितस्तुनवमेऽहनि " इतिपद्यंतुप्रक्षिप्तंतत्राहःपदंमासपरंवेत्युक्तं । अन्यथा षण्मासादर्वाक्कदापिजागरणाभावेनतावत्कालस्यत-

[पा०] १ ख. ततस्तदा. २ ग. घ. ङ. झ. गत्वारक्षोगण. ३ क. ग.—ञ. समन्वितः. ४ ङ. च. छ. झ. ञ. ट. पुनस्समुदितोत्पत्यरावणः. ५ ङ. च. झ. ञ. ट. रोषेणपरि. ६ ङ. झ. ट. अयंते. ७ ङ. झ. ट. सुषुप्तस्त्वं.

एष दाशरथी रामः सुग्रीवसहितो बली ॥ समुद्रं सबलस्तीर्त्वा मूलं नः परिकृन्तति ॥ १४ ॥
हन्त पश्यस्व लङ्कायां वनान्युपवनानि च ॥ सेतुना सुखमागम्य वानरैः कार्णवीकृतम् ॥ १५ ॥
ये रक्षसां मुख्यतमा हतास्ते वानरैर्युधि ॥ वानराणां क्षयं युद्धे न पश्यामि कदाचन ॥ १६ ॥
न चापि वानरा युद्धे जितपूर्वाः कदाचन ॥ १७ ॥
तदेतद्भयमुत्पन्नं त्रायस्वेमां महाबल ॥ नाशय त्वमिमानद्य तदर्थं बोधितो भवान् ॥ १८ ॥
सर्वक्षपितकोशं च स त्वमभ्यवपद्य माम् ॥ त्रायस्वेमां पुरीं लङ्कां बालवृद्धावशेषिताम् ॥ १९ ॥
आतुरार्थं महाबाहो कुरु कर्म सुदुष्करम् ॥ मयैवं नोक्तपूर्वो हि कश्चिद्भ्रातः परंतप ॥ २० ॥
त्वय्यस्ति तु मम स्नेहः परा संभावना च मे ॥ दैवासुरेषु युद्धेषु बहुशो राक्षसर्षभ ॥
त्वया देवाः प्रतिव्यूह्य निर्जिताश्चासुरा युधि ॥ २१ ॥
तदेतत्सर्वमातिष्ठ वीर्यं भीमपराक्रम ॥ न हि ते सर्वभूतेषु दृश्यते सदृशो बली ॥ २२ ॥
कुरुष्व मे प्रियहितमेतदुत्तमं यथाप्रियं प्रियरण बान्धवप्रिय ॥

अद्येत्यादिना ॥ सुमहान्कालः नवदिनपरिमितः । गत इति शेषः ॥ १३ ॥ मूलं मूलबलं । परिकृन्तति बाधतइत्यर्थः ॥ १४ ॥ मूलकृन्तनमुपपादयति–हन्तेति ॥ लङ्कायां वनान्युपवनानि च सर्वं । सेतुना सुखमागम्य स्वनिर्मितसेतुमात्रेण सुखमागम्य । रामेण । वानरैःकार्णवीकृतं वानररूपैःकार्णवीकृतं । पश्यस्व । आत्मनेपदमार्षं । यद्वा स्वलङ्कायामिति च्छेदः । आत्मीयलङ्काद्वीपइत्यर्थः ॥ १५—१७ ॥ तदेतत् एतादृशं । भयमुत्पन्नं । अस्माद्भयादिमां पुरीं त्रायस्व । इमान् वानरान् नाशय । तदर्थं नाशनार्थं ॥ १८ ॥ सर्वक्षपितकोशं क्षपितसर्वैश्वर्यं । "कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः" इत्यमरः । अभ्यवपद्य जानीहीत्यर्थः । बालवृद्धावशेषितामित्यतिशयोक्तिः । मूलबलाद्युत्सादनस्य वक्ष्यमाणत्वात् ॥ १९ ॥ कश्चिदिति प्रश्ने । कदाचिदपि नोक्तपूर्वोसीत्यर्थः । कश्चिदिति पाठे त्वदन्यः कश्चिदपि नैवमुक्तपूर्वइत्यर्थः ॥ २० ॥ संभावना आदरः । दैवासुरेषु देवासुरसंबन्धिषु । प्रतिव्यूह्य विभज्य । असुराः असुराअपीत्यर्थः ॥ २१ ॥ आतिष्ठ अवलम्बस्व ॥ २२ ॥ यथाप्रियं यथास्नेहं ।

त्स्वापेनियतत्वात्ततोऽर्वाङ्मासद्वयादिमध्येएतत्प्रवृत्तौसुमहानित्युक्तेरसंगत्यापत्तेः । अनेनमन्त्रंकृत्वासुप्तस्याष्टनवमासरूपः कालोगतइतिगम्यते । अनेनापियुद्धस्यषण्मासाधिककालव्यापितासूचिताभवतीतिज्ञायते इति उत्तरत्रवक्ष्यमाणमित्युक्तमुक्तं तदसंगतं । सुमहान्कालइत्यस्यगतेश्चिन्तितत्वात् । मन्त्रकालेविनायासंस्कृतएवजागरणदिनएवकुंभकर्णागमनरामागमनानन्तरंनवमेऽहनिप्रयत्न उत्थानंचसंभवतः । युद्धस्यषण्मासादधिककालकल्पनंचास्मदुक्तक्रमेणातन्त्रमूलकं । षण्मासादर्वाक्कदापिजागरणाभाववादस्तु स्वयमेवजागरणाभावपरः । प्रयत्नेतुजागरणस्यषण्मासानन्तरमियतआयासस्यासंभावितत्वरूपसंभवयुक्तिकत्वात् । सीतायाः स्वजीवनस्यमासद्वयावधित्वकथनरूपस्फुटतरबाधकाच्च । अन्यथारामागमनानन्तरमपियुद्धस्यबहुकालावधिकत्वेनमध्येत्वदुक्तःसमयोतिक्रान्तोतोमांभजेतिमध्येमध्येकथयाभाव्यत्वाच्च । क्वापियुद्धदिनेयत्तायाअनुक्तत्वान्मदुक्तप्रकारएवकिंनस्यादितितुदुराशामात्रं यावन्नपद्मपुराणीयपुष्करखण्डगताष्टत्रिंशाध्यायस्थः "अत्रयुद्धंमहद्वृत्तंचैत्रशुक्लत्रयोदशीम् । अष्टचत्वारिंशतिदिनंयत्रासौरावणोहतः" इतिश्लोकोनावलोकितस्तावदितिचतुरस्रं ॥ १३ ॥ स० वानराएवएकः अखण्डः अर्णवःसमुद्रोयेनतत् । कृतं कर्मपश्येत्यन्वयः । वनानि महान्ति । उपवनानि अणूनि कृतानि । विटपोत्पाटात् । रामेणवानरैःकार्णवंकृतं । 'अस्मदीयंगुणार्णवं' इत्यनुव्याख्यानसुधायांअर्णवइवाचरतीत्यर्णवमिति कृते अर्णवतेःपचाद्यचिकृतेअर्णवशब्दस्त्रिलिङ्गः साधुरित्युक्तेः साधु । कृतंवानरैःकार्णवंपश्येत्यन्वयेतुनक्लेशः ॥ १५ ॥ स० बालवृद्धावशेषितां । बालाः स्तनंधयाः । वृद्धाः युद्धानर्हाः । बहूनांयूनांसत्त्वेपीयमुक्तिः कुंभकर्णस्यकारुण्याच्छीघ्रंसमरधरणीप्रवेशार्थं ॥ १९ ॥ इतिद्विषष्टितमःसर्गः ॥ ६२ ॥

[पा०] १ ङ. झ. ट. दाशरथिःश्रीमान्सुग्रीव. २ झ. ट. समुद्रंलङ्घयित्वातुकुलंनः. ३ क. ङ. झ. ट. मागत्य. ४ क. ख ग. ङ. छ.—ट. रैकार्णवंकृतं. ५ क. ग. ङ. झ. ट. कथंचन. ६ ङ. झ. ट. त्रायस्वेह. घ. त्रायस्वलं ७ ख. च. छ. ज. यदर्थं. ८ ङ. झ. ट. मभ्युपपद्य. ९ झ. ज. ट. कश्चित्. १० ङ. झ. ट. श्रामरायुधि. ११ च. छ. विपुलविक्रम.

स्वतेजसा विधम सपत्नवाहिनीं शरद्घनं पवन इवोद्यतो महान् ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

त्रिषष्टितमः सर्गः ॥ ६३ ॥

कुंभकर्णेन रावणंप्रति नीतिशास्त्रार्थानुवादपूर्वकंप्रकृतापत्प्राप्तेस्तदनालोचनहेतुकत्वोक्तिः ॥ १ ॥ रावणेनकुंभकर्णंप्रति सकोपंगतार्थानुशोचनस्यानौचित्योक्तिपूर्वकं विपन्नार्थसमीकरणस्यसुहृल्लक्षणत्वोक्त्या शत्रुजयायनिजपराक्रमोपयोजननियोजनम् ॥ २ ॥ कुंभकर्णेन रावणंप्रति ससान्त्वनंयुद्धेरामादिवधप्रतिज्ञानम् ॥ ३ ॥

तस्य राक्षसराजस्य निशम्य परिदेवितम् ॥ कुंभकर्णो बभाषेदं वचनं प्रजहास च ॥ १ ॥
दृष्टो दोषो हि योस्माभिः पुरा मन्त्रविनिर्णये ॥ हितेष्वनभिरक्तेन सोयमासादितस्त्वया ॥ २ ॥
शीघ्रं खल्वभ्युपेतं त्वां फलं पापस्य कर्मणः ॥ निरयेष्वेव पतनं यथा दुष्कृतकर्मणः ॥ ३ ॥
प्रथमं वै महाराज कृत्यमेतदचिन्तितम् ॥ केवलं वीर्यदर्पेण नानुबन्धो विचारितः ॥ ४ ॥
यः पश्चात्पूर्वकार्याणि कुर्यादैश्वर्यमास्थितः ॥ पूर्वं चापरकार्याणि न स वेद नयानयौ ॥ ५ ॥
देशकालविहीनानि कर्माणि विपरीतवत् ॥ क्रियमाणानि दुष्यन्ति हवींष्यप्रयतेष्विव ॥ ६ ॥
त्रयाणां पञ्चधा योगं कर्मणां यः प्रपश्यति ॥ सचिवैः समयं कृत्वा स सभ्ये वर्तते पथि ॥ ७ ॥

आवयोः प्रीत्यनुरूपमित्यर्थः ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्विषष्टितमःसर्गः ॥ ६२ ॥

अथ कुम्भकर्णबुद्धिस्त्रिषष्टितमे–तस्येत्यादि ॥ परिदेवितं पूर्वोक्तवचनानां परिदेवनतुल्यत्वात् परिदेवितत्वं । कुम्भकर्णो वचनं बभाषे जहास चेत्यत्र व्यत्ययः कार्यः । उक्त्वा जहासेति वार्थः ॥ १ ॥ पुरा मन्त्रनिर्णये क्रियमाणे । अस्माभिः यो दोषो दृष्टः शत्रुभिस्तवापद्भविष्यतीति निश्चितः । हितेषु हितपरेषु । अनभिरक्तेन असक्तेन । हितपरवचनमशृण्वतेत्यर्थः । त्वया सोयं दोष आसादितः । पूर्वमेव चिन्तिता विपत् प्राप्तेत्यर्थः ॥ २ ॥ पापस्य सीताहरणरूपस्य कर्मणः । फलं त्वां शीघ्रं अभ्युपेतं प्राप्तं । "अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते" इति न्यायात् । अत्रोदाहरणमाह–निरयेष्विति । दुष्कृतकर्मणः महापातकिनः पुरुषान् । निरयेष्वेव पतनं यथा प्राप्नोति तद्वत् । एवकारेणापरिहार्यत्वमुच्यते ॥ ३ ॥ हे महाराज । केवलं वीर्यदर्पेण एतत्कृत्यं सीताहरणरूपं कार्यं वै । प्रथमं सीताहरणात्पूर्वं । न चिन्तितं साध्वसाधु वेति त्वया न विचारितं । अनुबन्धातीत्यनुबन्धः दोषोत्पादः । "दोषोत्पादेऽनुबन्धः स्यात्" इत्यमरः ॥ ४ ॥ प्रथमं विचार्य पश्चात् कर्म कर्तव्यमिति प्रेक्षावतां कृत्यं, त्वया तु तद्विपरीतं कृतमित्याह–य इति ॥ ऐश्वर्यं आस्थितः प्राप्तः । यः पुमान् पूर्वकार्याणि कार्यारम्भात्पूर्वं कर्तव्यानि मन्त्रणादीनि कुर्यात् । अपरकार्याणि उत्तरकाले विचार्याणि च पूर्वं कुर्यात् । सः नयानयौ नीत्यनीती न वेद ॥ ५ ॥ एवं देशकालानुरोधेन कर्म कर्तव्यमित्युक्तं, तदननुरोधे दोषमाह–देशेति ॥ देशकालविहीनानि क्रियमाणानि । अदेशे अकाले च कृतानि कर्माणि। विपरीतवत् देशकालवैकल्याद्विपरीतकर्माणीव । अप्रयतेषु मन्त्रानध्ययनादिना अपूतेषु अपात्रेषु हवींषीव दुष्यन्ति विफलानि भवन्तीत्यर्थः ॥ ६ ॥ देशकालानुरोधस्य फलमाह–त्रयाणामिति ॥ सचिवैः मन्त्रिभिः सह । समयं निश्चयरूपं सिद्धान्तं कृत्वा । "समयाः शपथाचारकालसिद्धान्तसंविदः" इत्यमरः । त्रयाणां

स० दं दातारंरावणंप्रति बभाषेजहासच । विभीषणमाल्यवदाद्युक्तंनश्रुतमतइयंदशेतिदशाननंनिरीक्ष्यहासइतिभावः । "दंदा नेछेदेचदातरि" इतिविश्वः । बभाषेऽथेत्यपिक्वचित्पाठः ॥ १ ॥ शि० अनुबन्धः सीतारामयोः परस्परंप्रीतिः । नविचारितः । तत्फलमेवेदमुपस्थितमितिभावः ॥ ४ ॥ ती० हवींषिचपुरोडाशादीनि । अप्रयतेष्विव असावधानजनेष्विव अरुचिजनेष्वितियावत् ॥ ति० अप्रयतेषु असावधानेषु असंस्कृतेष्वग्निषुचहवींषीव ॥ ६ ॥

[पा०] १ ग. ङ. झ. ट. व्यथय. २ ख. घ.—छ. झ. ञ. ट. ध्वनभियुक्तेन. ३ क. ख. घ.—ट. चोत्तरकार्याणि. ४ ख. ङ. च. छ. झ. ञ. ट. प्रपद्यते. ५ क. ङ. झ. ट. सम्यग्वर्तते.

यथागमं च यो राजा समयं विचिकीर्षति ॥ बुध्यते सचिवान्बुद्ध्या सुहृदश्चानुपश्यति ॥ ८ ॥
धर्ममर्थं च कामं च सर्वान्वा रक्षसां पते ॥ भजेत पुरुषः काले त्रीणि द्वन्द्वानि वा पुनः ॥ ९ ॥
त्रिषु चैतेषु यच्छ्रेष्ठं श्रुत्वा तन्नावबुध्यते ॥ राजा वा राजमात्रो वा व्यर्थं तस्य बहुश्रुतम् ॥ १० ॥
उपप्रदानं सान्त्वं वा भेदं काले च विक्रमम् ॥ योगं च रक्षसांश्रेष्ठ तावुभौ च नयानयौ ॥ ११ ॥
काले धर्मार्थकामान्यः संमन्त्र्य सचिवैः सह ॥ निषेवेतात्मवाँल्लोके न स व्यसनमाप्नुयात् ॥ १२ ॥
हितानुबन्धमालोच्य कार्याकार्यमिहात्मनः ॥ राजा सहार्थतत्त्वज्ञैः सचिवैः स हि जीवति ॥ १३ ॥
अनभिज्ञाय शास्त्रार्थान्पुरुषाः पशुबुद्धयः ॥ प्रागल्भ्याद्वक्तुमिच्छन्ति मन्त्रेष्वभ्यन्तरीकृताः ॥ १४ ॥

उत्तममध्यमाधमकर्मणां । तत्र आत्मोदयपरज्यानिसंभवसमये क्रियमाणं दण्डोपयोगि यानमुत्तमं कर्म । आत्मपरयोः बलसाम्ये क्रियमाणं संधानं मध्यमं कर्म । परोदयात्मज्यानिसमये क्रियमाणं दानपूर्वसमाश्रयणमधमं कर्म । तेषां पञ्चधा योगं । कर्मणामारम्भोपायः । पुरुषद्रव्यसंपत् । देशकालविभागः । विनिपातप्रतीकारः । कार्यसिद्धिश्चेत्युक्तैः पञ्चभिर्योगं । यद्वा त्रयाणां उत्तममध्यमाधमभावेन त्रिविधानां कर्मणां । पञ्चधा योगं देशकालात्मद्रव्यप्रयोजनसंबन्धवशात् पञ्चविधं संबन्धं । यः पश्यति सः सभ्ये साधौ । "सभ्यः सामाजिके साधौ"इति रत्नमाला । पथि नीतिमार्गे वर्तते । सम्यङ्नीतिफलं प्राप्नोतीत्यर्थः ॥ ७ ॥ यथागमं नीतिशास्त्रमनतिक्रम्य । यो राजा । समयं कार्यनिर्णयं । चिकीर्षति । सचिवांश्च बुध्यते सचिवैः सहालोचयतीति यावत् । सुहृदश्चानुपश्यति सुहृद्भिः सह विचारयतीति यावत् । स सभ्ये पथि वर्तत इति पूर्वेणान्वयः ॥ ८ ॥ धर्ममर्थं कामं च प्रत्येकं वा । त्रीणि द्वन्द्वानि वा । धर्मार्थौ अर्थधर्मौ कामार्थौ वा । सर्वान्वा । कालेषु विहितेषु प्रातर्मध्याह्नसायाह्नेषु भजेत । अकाले न सेवेतेति भावः । एतदुक्तं भवति । प्रातःकाले धर्मो विहितः, तं तदा सेवेत । मध्याह्ने अर्थो विहितः, तं तदा सेवेत । सायंकाले कामो विहितः, तं तदा सेवेतेति । यद्वा प्रातःकाले स्वकालविहितं धर्मं मध्याह्ने विहितमर्थं च सेवेत । मध्याह्ने स्वकालविहितमर्थं प्रातर्विहितं धर्मं च सेवेत । सायंकाले स्वकालविहितं कामं मध्याह्नविहितमर्थं च सेवेत । अथवा सायंकाले स्वविहितं कामं प्रातर्मध्याह्नयोर्विहितौ धर्मार्थौ च सेवेतेति । केवलकामं सर्वकालेष्वपि सेवमानः पुरुषाधम एवेत्यभिसंधिः ॥ ९ ॥ एवं कर्तव्यमुक्त्वा तदकर्तारं निन्दति—त्रिष्विति ॥ एतेषु पूर्वोक्तेषु त्रिषु भजनेषु धर्मार्थकामेषु वा । यच्छ्रेष्ठं प्रत्येकभजनं धर्मो वा । तच्छ्रुत्वा । यो राजा वा राजमात्रो वा राजसदृशो वा । न बुध्यते आचरितुं न जानाति । तस्य बहुश्रुतं शास्त्रश्रवणं व्यर्थं । अनुष्ठानपर्यवसानाभावादिति भावः । एवं सामान्यरूपया अप्रस्तुतप्रशंसया त्रिवर्गेषु श्रेष्ठं धर्मं परित्यज्य जघन्यं काममेवाश्रितस्य ते शास्त्रश्रवणं समुद्रघोषमात्रमासीदिति प्रस्तुतोऽर्थोऽवगम्यते ॥ १० ॥ अकाले काम इवाकाले विक्रमोपि त्याज्य इत्याह—उपप्रदानमित्यादिश्लोकद्वयेन ॥ काले तत्तदुचितकाले । उपप्रदानं प्रतिपक्षिणः समीपं गत्वाद्रविणादिप्रदानं । सान्त्वं समीचीनभाषणं । भेदं मित्रादिवर्गस्य द्वैधीकरणं । विक्रमं दण्डं च । प्रत्येकं तेषां योगं समवायं च । तौ पूर्वोक्तौ नयानयौ । तेषां निर्वाहप्रकारान् धर्मार्थकामांश्च सचिवैः संमन्त्र्य । काले पूर्वोक्तकाले । आत्मवान् वशीकृतमनस्कः । यो निषेवेत स लोके व्यसनं नाप्नुयान् ॥ ११—१२ ॥ हितेति ॥ अत्र कार्यमित्यध्याहारः । निषेवेतेत्यनुषङ्गः । यो राजा अर्थतत्त्वज्ञैः सचिवैः सह । हितानुबन्धं हितोदर्कं । आत्मनः कार्याकार्यं कर्तव्याकर्तव्यं । आलोच्य निश्चित्य । कार्यमेव निषेवेत सः इह लोके जीवतीत्यर्थः । हीत्यनेनायमर्थो लोकप्रसिद्ध इत्यवगम्यते । हितानुबन्धकार्याकार्यानालोचनात्तवेदं व्यसनमापन्नमिति भावः ॥ १३ ॥ एवं सामान्येन राजानमधिक्षिप्य मन्त्रिणोप्यधिक्षिपति—अनभिज्ञायेति ॥ शास्त्रार्थान् नीतिशास्त्रार्थान् । अनभि-

[पा०] १ ङ. ज. झ. ट. सचिवैर्बुध्या. २ क.—ट. भजते. ३ ख. च. छ. ञ. तात्मवान्राजानस. ४ ख. ङ. झ. ट. मालोक्यकुर्यात्कार्यं. ५ ङ. च. ञ. सर्वार्थतत्त्वज्ञैः. ६ घ. ङ. च. झ. ञ. ट. सचिवैर्बुद्धिजीविभिः.

अशास्त्रविदुषां तेषां न कार्यमहितं वचः ॥ अर्थशास्त्रानभिज्ञानां विपुलां श्रियमिच्छताम् ॥ १५ ॥
अहितं च हिताकारं धाष्ट्र्याज्जल्पन्ति ये नराः ॥ [1]अवेक्ष्य मन्त्रबाह्यास्ते कर्तव्याः [2]कृत्यदूषणाः॥१६॥
विनाशयन्तो भर्तारं सहिताः शत्रुभिर्बुधैः ॥ विपरीतानि कृत्यानि कारयन्तीह मन्त्रिणः ॥ १७ ॥
तान्भर्ता मित्रसंकाशानमित्रान्मन्त्रनिर्णये ॥ व्यवहारेण जानीयात्सचिवानुपसंहितान् ॥ १८ ॥
चपलस्येह कृत्यानि सहसाऽनुप्रधावतः ॥ [3]छिद्रमन्ये प्रपद्यन्ते क्रौञ्चस्य खमिव द्विजाः ॥ १९ ॥
यो हि शत्रुमभिज्ञाय नात्मानमभिरक्षति ॥ अवाप्नोति हि सोनर्थान्स्थानाच्च व्यवरोप्यते ॥ २० ॥
यदुक्तमिह ते पूर्वं [4]क्रियतामनुजेन च ॥ तदेव नो हितं [5]कार्यं यदिच्छसि च तत्कुरु ॥ २१ ॥
तत्तु [6]श्रुत्वा दशग्रीवः कुंभकर्णस्य भाषितम् ॥ भ्रुकुटिं चैव संचक्रे क्रुद्धश्चैनमभाषत ॥ २२ ॥

ज्ञाय गुरुमुखादश्रुत्वा । वेषेण पुरुषाः पशुबुद्धयः आहारनिद्रादिमात्राभिज्ञाः । भ्रान्तेन राज्ञा । मन्त्रेषु राजकार्यविचारेषु । अभ्यन्तरीकृताः मन्त्रयितृत्वेन वृताः सन्तः । प्रागल्भ्यात् ऊहापोहौ विना केवलधाष्ट्र्यात् । वक्तुमिच्छन्ति । ननु सम्यक् संगतं निश्चित्य वदन्तीत्यर्थः ॥ १४ ॥ अशास्त्रेति । शास्त्रानभिज्ञानां तेषां मन्त्रिणां । अहितं वचः अर्थशास्त्रानभिज्ञानां । अथापि विपुलां श्रियमिच्छतां राज्ञां न कार्यं । राजभिस्तदुक्तप्रकारो नानुष्ठेय इत्यर्थः ॥१५॥ न केवलं तद्वचनाश्रवणं, मन्त्रेषु बहिष्कार्याश्च त इत्याह—अहितमिति ॥ वस्तुतः अहितं हिताकारं हितमिवापाततः प्रतीयमानमर्थं । धाष्ट्र्यात् शास्त्रज्ञानं विना केवलप्रागल्भ्यात् । ये जल्पन्ति अक्रमेण वदन्ति । कृत्यदूषणाः कार्यदूषकास्ते । अवेक्ष्य पूर्वमेव परीक्ष्य । मन्त्रबाह्याः मन्त्रबहिर्भूताः कर्तव्याः ॥ १६ ॥ न केवलमहितवचनं, विपरीतं च कुर्वन्तीत्याह—विनाशयन्त इत्यादि ॥ मन्त्रिणः दुर्मन्त्रिणः । बुधैः उपायज्ञैः । शत्रुभिः सहिताः प्रेरिताः । विनाशयन्तः विनाशार्थं । इह प्रयोजनविषये । विपरीतानि विपरीतफलकानि कृत्यानि । भर्तारं कारयन्ति ॥१७॥ दुर्मन्त्रित्वनिर्णयोपायमाह—तानिति ॥ उपसंहितान् उपजापितान् । उत्कोचप्रदानादिना शत्रुभिर्भेदं प्रापितान् । मित्रसंकाशान् मित्रवद्भावयतः कार्यतोऽमित्रान्सचिवान् । व्यवहारेण व्याभिश्रभाषणेन । जानीयात् ॥ १८ ॥ स्वयमसमर्था विपरीतबुद्धयो मन्त्रिणः किं करिष्यन्तीत्यत्राह—चपलस्येति ॥ इह प्रस्तुते कार्ये विषये । कृत्यानि उपसंहितमन्त्रिप्रेरितानि कार्याणि । सहसा अचिरेण । अनुप्रधावतः दुर्मन्त्रिषु मन्त्रित्वमनुसरतः । चपलस्य झटिति कार्ये प्रवर्तमानस्य राज्ञः । छिद्रं रन्ध्रं । अन्ये शत्रवः । क्षिप्रं प्रपद्यन्ते स्वीकुर्वन्ति । कथमिव । द्विजाः पक्षिणः । " दन्तविप्राण्डजा द्विजाः " इत्यमरः । क्रौञ्चस्य स्कन्दशक्तिविदारितस्य क्रौञ्चाख्यपर्वतस्य । खमिव रन्ध्रमिव पण्डिताः शत्रवः उत्कोचप्रदानादिना वशीकृतैर्मन्त्रिभिः कुत्रचिच्चापलकार्ये राजानं प्रापय्य तदेव रन्ध्रमासाद्य अन्तः प्रविशन्तीतिभावः ॥ १९ ॥ एवं कपटवृत्तेः शत्रोः स्वरूपापरिज्ञाने राजा विपद्यत इत्याह—यो हीति ॥ यो हि राजा । शत्रुं वञ्चनपरं । अविज्ञाय मन्त्रव्यवहारादिना अविज्ञाय । आत्मानं च नाभिरक्षति दुर्मन्त्रिनिरासादिना नात्मानं प्रकृतौ स्थापयति । सोऽर्थानवाप्नोति । स्थानात् राजासनात् । व्यवरोप्यते प्रच्याव्यते । इयता ग्रन्थेन तव कामव्यसनात् कुमन्त्रिवचनाच्चेयमापदिति दर्शितं ॥ २०—२१ ॥ क्रुद्धः सन् भ्रुकुटिं ऊर्ध्वीकृ-

स० अधुनापिवर्जनीयानेवाह— **विनाशयन्तइति** । शताहेतौ । भर्तारं स्वस्वामिनं । बुधैः अविज्ञमन्त्रिकलज्ञानैः शत्रुभिः स्वराजविद्वेषिभिः । विपरीतानि राजमरणराज्यहरणादिकारणानिकृत्यानिकारयन्ति । तेमन्त्रिणो निन्दितमन्त्रिणः मन्त्रबाह्याःकर्तव्याइत्यन्वयः ॥ " भूमनिन्दाप्रशंसासु " इत्युक्तेर्निन्दायामयमिनिः । ' केचित्सुमन्त्रिण' इत्यादिनागोजिभट्टव्याख्यानं बुधमन्त्रिमुखशब्दयोजनाज्ञानदारिद्र्येणेतिज्ञेयं । तथास्वरक्षणंकुर्वन्तीतिशेषइतिविशेषोपितन्मूलकएव । प्रकरणानुकूलताचबालानामपिभासतइत्यनादरणीयंतदितिदिक् ॥ **ति०** केचनदुर्मन्त्रिणः । भर्तारंस्वांनाशयंतः । हेतौशता ।

[पा०] १ ङ. झ. ट. अवश्यंमन्त्र. २ ङ. ज.—ट. कृत्यदूषकाः. ३ ङ. झ. ञ. ट. क्षिप्रमन्ये. ४ घ. ङ. झ. ट. पूर्वंप्रिययामेऽनुजेनच. च. पूर्वंप्रिययाद्यनुजेनच. ज. पूर्वंक्रियतांमेऽनुजेनच. ५ ङ. च. झ. ञ. ट. हितंवाक्यं. क. ख. घ. हितंराजन्. ६ ख. एतच्छ्रुत्वा.

मान्यो गुरुरिवाचार्यः किं मां त्वमनुशाससि ॥ किमेवं वाक्यं कृत्वा काले युक्तं विधीयताम् ॥२३॥
विभ्रमाच्चित्तमोहाद्वा बलवीर्याश्रयेण वा ॥ नाभिपन्नमिदानीं यद्व्यर्थास्तस्य पुनः कथाः ॥ २४ ॥
अस्मिन्काले तु यद्युक्तं तदिदानीं विधीयताम् ॥ गतं तु नानुशोचन्ति गतं तु गतमेव हि ॥२५॥
ममापनयजं दोषं विक्रमेण समीकुरु ॥ यदि खल्वस्ति मे स्नेहो विक्रमं वावगच्छसि ॥
यदि वा कार्यमेतत्ते हृदि कार्यतमं मतम् ॥ २६ ॥
स सुहृद्यो विपन्नार्थं दीनमभ्यवपद्यते ॥ स बन्धुर्योपनीतेषु साहाय्यायोपकल्पते ॥ २७ ॥
तमथैवं ब्रुवाणं तु वचनं धीरदारुणम् ॥ रुष्टोऽयमिति विज्ञाय शनैः श्लक्ष्णमुवाच ह ॥ २८ ॥
अतीव हि समालक्ष्य भ्रातरं क्षुभितेन्द्रियम् ॥ कुंभकर्णः शनैर्वाक्यं बभाषे परिसान्त्वयन् ॥
[शृणु राजन्नवहितो मम वाक्यमरिंदम] ॥ २९ ॥
अलं राक्षसराजेन्द्र संतापमुपपद्य ते ॥ रोषं च संपरित्यज्य स्वस्थो भवितुमर्हसि ॥ ३० ॥
नैतन्मनसि कर्तव्यं मयि जीवति पार्थिव ॥ तमहं नाशयिष्यामि यत्कृते परितप्यसे ॥ ३१ ॥

तभ्रुवं चक्रे । एनमभाषत चेत्यन्वयः ॥ २२ ॥ हे कुम्भकर्ण । त्वं मान्यः बहुमानार्हः । आचार्यः आचारप्रवर्तकः गुरुरिव मां मान्यमाचार्यं गुरुं । अनुशाससि शिक्षसे । आर्षः शप् । वैपरीत्यमेवाचरसीत्यर्थः । एवं वचनं तवायुक्तमिति भावः । अफलं चेदं वचनमित्याह—किमेवमिति । एवं उक्तप्रकारेण । वाक्छ्रमं कृत्वा । प्रयासैकफलां वाचमुक्त्वेत्यर्थः । किं फलं । किमपि प्रयोजनं नास्तीत्यर्थः । नीतिकालस्यातीतत्वादिति भावः । काले नयमार्गातीतकाले । यद्युक्तं पराक्रमरूपं । तत् विधीयतां क्रियतां ॥२३॥ पूर्वमनालोच्य कृतस्य निमित्तमाह—विभ्रमादिति ॥ विभ्रमात् अनीतौ नीतिबुद्ध्या । चित्तमोहात् ज्ञानानुदयात् । बलवीर्याश्रयेण । बलवीर्ययोराश्रयणेन । गर्वेणेति यावत् । यत्कार्यं नाभिपन्नं न कृतं । तस्य पुनः कथाः पुनः पुनः कथनानि । इदानीं अतीतकाले । व्यर्थाः ॥ २४ ॥ इदानीं सद्यः । गतंतु गतमेव । न तत्पुनरायास्यतीति भावः ॥ २५ ॥ ममेत्यादिसार्धश्लोक एकान्वयः ॥ दोषं वैषम्यं । शत्रुभिराक्रमणमितियावत् । समीकुरु समतयाकुरु । वैषम्यसमता नाम वैषम्यनाश एव । खलु वाक्यालङ्कारे । मे मयि यदि स्नेहोऽस्ति स्वकीयं विक्रमं यदि वा अवगच्छसि । स्वपराक्रममज्ञात्वैव नीत्युपन्यासस्त्वया कृत इति भावः । एतत् युद्धरूपं कार्यं । ते हृदि कार्यतमं अवश्यकर्तव्यं । मतं इष्टं । अवश्यकर्तव्यत्वेन मन्यसे चेदित्यर्थः । तदा समीकुर्वित्यन्वयः ॥ २६ ॥ इदानीं साहाय्याकरणे तव बन्धुत्वमेव भज्येतेति सदृष्टान्तमाह—स इति ॥ विपन्नार्थं विपन्नः शङ्कितापायः अर्थः प्रयोजनं यस्य तं । दीनं मलिनमनस्कं पुरुषं । यः सुहृत् अभ्यवपद्यते अभितः प्राप्नोति । सदा सन्निधत्त इत्यर्थः । स एव सुहृत् । यो बन्धुः अपनीतेषु विषमितनीतिषु पुरुषेषु । साहाय्यायोपकल्पते साहाय्याय प्रभवति । स एव बन्धुः । सर्वं वाक्यं सावधारणमिति न्यायात् ॥ २७ ॥ धीरदारुणं यदि वा कार्यमित्युक्त्या धीरं सुहृदित्याद्युक्त्या दारुणं निष्ठुरं । रुष्टोयमिति विज्ञाय । भ्रुकुटिबन्धनेनानुमायेत्यर्थः ॥ २८ ॥ उक्तमेवार्थं प्रपञ्चयन्नाह—अतीवेति । अतीव क्षुभितेन्द्रियमित्यनेन रुष्टपदं व्याख्यातं । परिसान्त्वयन्नित्यनेन श्लक्ष्णपदं ॥ २९ ॥ ते त्वया । संतापं । उपपद्य प्राप्य । अलं । संतापो न कर्तव्य इत्यर्थः । " अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा " इति क्त्वाप्रत्ययः । स्वस्थो भव । स्वर्गस्थो भवेत्यर्थान्तरं ॥ ३० ॥ नैतन्मनसि कर्तव्यं विभ्रमाच्चित्तमोहाद्वेत्युक्तं मनसि न कर्तव्यमित्यर्थः ।

तवनाशनिमित्तं विपरीतानिकृत्यानिकारयन्ति । केचित्सुमन्त्रिणः दुर्मन्त्रफलं तवनाशंपश्यन्तोबुधैः सर्वज्ञैस्तवशत्रुभिःसहिताः स्वरक्षणंकुर्वन्तीतिशेषः ॥१७॥ **ति०** प्रियया मन्दोदर्या । मेऽनुजोविभीषणः । समानार्थेचतयोर्वाक्येइतिमन्दोदरीवाक्यं नपृथगुक्तं । स्वमतिसदृशमतित्वान्मेऽनुजइत्युक्तं ॥२५॥ **स०** धीरदारुणं । धीरं अधुनापि । दारुणं वचनाकरणेक्रूरं । एवंवचनं ब्रुवाणं रावणं । धीरदारुणमितिवचनविशेषणंवा । धीरेषुदारुणमितिवा । श्लक्ष्णं रावणमनसःश्लक्ष्णत्वेनभविष्यद्यथातथा उवाच ॥ २८ ॥

[पा०] १ ङ. ञ. ट. यद्युक्तंतद्विधीयतां. २ ङ. ञ. ट. विचिन्त्यतां ३ ङ. ञ. ट. दुःखं. ४ ख. ङ. च. ज.—ट, मभ्युपपद्यते. ५ इदमर्धं ङ. ञ. ट. पाठेषुदृश्यते.

अवश्यं तु हितं वाच्यं सर्वावस्थं मया तव ॥ बन्धुभावादभिहितं भ्रातृस्नेहाच्च पार्थिव ॥ ३२ ॥
सदृशं यत्तु कालेऽस्मिन्कर्तुं स्निग्धेन बन्धुना ॥ शत्रूणां कदनं पश्य क्रियमाणं मया रणे ॥ ३३ ॥
अद्य पश्य महाबाहो मया समरमूर्धनि ॥ हते रामे सह भ्रात्रा द्रवन्तीं परवाहिनीम् ॥ ३४ ॥
अद्य रामस्य तद्दृष्ट्वा मयाऽऽनीतं रणाच्छिरः ॥ सुखी भव महाबाहो सीता भवतु दुःखिता ॥३५॥
अद्य रामस्य पश्यन्तु निधनं सुमहत्प्रियम् ॥ लङ्कायां राक्षसाः सर्वे ये ते निहतबान्धवाः ॥ ३६ ॥
अद्य शोकपरीतानां स्वबन्धुवधकारणात् ॥ शत्रोर्युधि विनाशेन करोम्यास्रप्रमार्जनम् ॥ ३७ ॥
अद्य पर्वतसंकाशं ससूर्यमिव तोयदम् ॥ विकीर्णं पश्य समरे सुग्रीवं प्लवगोत्तमम् ॥ ३८ ॥
कथं त्वं राक्षसैरेभिर्मया च परिरक्षितः ॥ जिघांसुभिर्दाशरथिं वध्यसे त्वमिहानघ ॥ ३९ ॥
अथ पूर्वं हते तेन मयि त्वां हन्ति राघवः ॥ नाहमात्मनि संतापं गच्छेयं राक्षसाधिप ॥ ४० ॥

यत्कृते यस्य रामस्य कृते । अर्थान्तरं तु मयि जीवति सति एतन्मनसि न कर्तव्यं । यद्यहं जीविष्यामि तदा एवं न कर्तव्यं । अहमेव न जीविष्यामीत्यर्थः । यत्कृते यस्य मम कृते । परितप्यसे अयं सुखेन जीवन् मत्कार्यं न करोतीति परितप्तोसि । तं मां रामेण नाशयिष्यामीति ॥ ३१ ॥ तर्हि किमर्थमेवमुक्तमित्यत्राह—अवश्यमित्यादि ॥ बन्धुभावात् सामान्यस्नेहात् विशेषतोभ्रातृस्नेहाच्च । सर्वावस्थं रोषहर्षादिसर्वावस्थावस्थितमित्यर्थः । अवश्यं वाच्यं ते हितं मयाऽभिहितं ॥ ३२ ॥ अस्मिन्काले आपत्काले । स्निग्धेन बन्धुना यत्कर्तुं सदृशं युक्तं । तादृशं कदनं मया क्रियमाणं पश्य । अत्र शत्रुकर्तृकं कदनमित्यर्थान्तरं ॥ ३३ ॥ अद्येति । अर्थान्तरं । हे पर ज्येष्ठ, मया सह समरमूर्धनि हते भग्ने सति रामे रामनिमित्तं । द्रवन्तीं आगच्छन्तीं वाहिनीं पश्येति॥३४॥ अद्य रामस्येति । अर्थान्तरं । मया सह रामस्य रणाद्धेतोः । आनीतं दूरे क्षिप्तं । शिरः मच्छिरः । दृष्ट्वा सुखी भव । तदानीं मयि रोषत्यागादिति भावः । सीता दुःखिता भवतु । सर्वलोकमातृत्वादितिभावः ॥ ३५ ॥ अद्य रामस्य पश्यन्त्विति । अर्थान्तरं । रामस्येति कर्तरि षष्ठी । रामकर्तृकं मन्निधनं ये निहतबान्धवाः ते राक्षसाः पश्यन्तु । " न दुःखं पञ्चभिःसह " इति न्यायादिति भावः । उत्तरश्लोकेप्येवमेव योजना ॥ ३६–३७ ॥ ससूर्यमिव तोयदमिति । रुधिराक्ततया ससूर्यप्रकाशं मेघमिव स्थितमित्यर्थः ॥ ३८ ॥ ससैन्यं दाशरथिं जिघांसुभिः एभिः राक्षसैः मया च परिरक्षितस्त्वं कथं रामेण वध्यस इति योजना । अर्थान्तरं । जिघांसुभिः हननेच्छामात्रवद्भिः । पराक्रमासमर्थैरित्यर्थः । कथं परिरक्षितः । प्रत्युत वध्यस इति । अत्र विभीषणः क्व गत इति कुम्भकर्णस्य प्रश्नः मया धिक्कृतो गत इति रावणस्योत्तरं च क्वचित् कोशे दृश्यते तत्पूर्वापरविरुद्धं ॥३९॥ अत्र अथशब्दः प्रक्रमान्तरे । मयि हते सति हि पश्चात्त्वां रामो हन्ति हनिष्यति । अहं च आत्मनि स्वस्मिन् । संतापं शत्रुपरिभवजं । न कदाचिदपि गच्छेयं । न केनचिद्धन्तुं शक्य इत्यर्थः । अतः कुतस्ते भयमिति भावः । अर्थान्तरं । अहमात्मनि विषये संतापं न गच्छेयं न गच्छामि । " व्यत्ययो बहुलं " इति लकारव्यत्ययः । मन्निधनं नानुशोचामीत्यर्थः । किं तु मयि हते सति । अथ राघवस्त्वां हन्ति हनिष्य-

ति० सर्वावस्थां सुखदुःखादिसर्वावस्थांगतं प्राप्तं । लांप्रतीतिशेषः । "विष्णोरभक्तिकावस्थासर्वावस्थेतिगीयते " इत्यन्ये ॥ ३२ ॥
ती० "अद्यपश्यमहाबाहोमयासमरमूर्धनि" इत्यारभ्यश्रीराममुद्दिश्यकुंभकर्णोक्तपरुषवाक्यानांप्रातीतिकार्थःस्पष्टः । वस्तुतस्तुयद्यपिकुंभकर्णोरावणप्रीतयेपिवाश्रीरामनिष्ठुरभाषणेप्रीतयेपिवाप्रवृत्तः । तथापिकुंभकर्णवाणीप्रकारान्तरेणनिस्सरति । 'अद्यपश्यमहाबाहोमयेत्यादिना 'शत्रूणांकदनंपश्यक्रियमाणंमया'इत्युक्तंत्वया तदयुक्तं । किंतुसीतादुःखसंपादकरामहननेनास्मदादीन्विशोकान्कुर्वितिरावणशङ्कायांतन्नशक्यमितिव्यङ्ग्योक्त्यापरिहरति—अद्यपश्येतिसार्धश्लोकचतुष्टयेन । व्यङ्ग्योक्त्यर्थएषुश्लोकेषुविद्यमानक्रियापदा-

[पा०] १ च. छ. ञ. ट. सर्वावस्थासुतेमया. ङ. झ. सर्वावस्थांगतंमया. २ क. ग.—च. ज.—ट. हरिवाहिनीं. ३ ग. ङ. झ. वधशोचिनां. ४ ञ. शोणितोक्षितं. ५ ङ. झ. परिसान्त्वितः. ६ ख. घ.—ट. व्यथसेत्वंसदाऽनघ. क. व्यथसेराक्षसेश्वर. ७ क. ख. ग. च. छ. ज. अद्यपूर्वं. ध. अद्यपूर्वगतेतेन. ङ. झ. ञ. ट. मांनिहत्यकिलत्वांहिनिहनिष्यतिमिराघवः.

कामं त्विदानीमपि मां व्यादिश त्वं परंतप ॥ न परः प्रेषणीयस्ते युद्धायातुलविक्रम ॥ ४१ ॥
अहमुत्सादयिष्यामि शत्रूंस्तव महाबल ॥ ४२ ॥
यदि शक्रो यदि यमो यदि पावकमारुतौ ॥ तानहं योधयिष्यामि कुबेरवरुणावपि ॥ ४३ ॥
गिरिमात्रशरीरस्य शितशूलधरस्य मे ॥ नर्दतस्तीक्ष्णदंष्ट्रस्य बिभीयाच्च पुरंदरः ॥ ४४ ॥
अथ वा त्यक्तशस्त्रस्य मृद्वतस्तरसा रिपून् ॥ न मे प्रतिमुखे स्थातुं कश्चिच्छक्तो जिजीविषुः ॥ ४५ ॥
नैव शक्त्या न गदया नासिना निशितैः शरैः ॥ हस्ताभ्यामेव संरब्धो हनिष्याम्यपि वज्रिणम् ॥ ४६ ॥
यदि मे मुष्टिवेगं स राघवोऽद्य सहिष्यते ॥ ततः पास्यन्ति बाणौघा रुधिरं राघवस्य तु ॥ ४७ ॥
[अचिन्तयित्वा बाणौघान्रुधिरं राघवस्य च ॥ लक्ष्मणस्य च पास्यामि चिरकालं पिपासितः ॥ ४८ ॥
चिन्तया बाध्यसे राजन्किमर्थं मयि तिष्ठति ॥ सोहं शत्रुविनाशाय तव निर्यातुमुद्यतः ॥ ४९ ॥
मुञ्च रामाद्भयं राजन्हनिष्यामीह संयुगे ॥ राघवं लक्ष्मणं चैव सुग्रीवं च महाबलम् ॥
हनुमन्तं च रक्षोघ्नं लङ्का येन प्रदीपिता ॥ ५० ॥
हरींश्चापि हनिष्यामि संयुगे समवस्थितान् ॥ असाधारणमिच्छामि तव दातुं महद्यशः ॥ ५१ ॥
यदि चेन्द्राद्भयं राजन्यदि वाऽपि स्वयंभुवः ॥ ५२ ॥
अपि देवाः शयिष्यन्ते क्रुद्धे मयि महीतले ॥ यमं च शमयिष्यामि भक्षयिष्यामि पावकम् ॥
आदित्यं पातयिष्यामि सनक्षत्रं महीतले ॥ ५३ ॥
शतक्रतुं वधिष्यामि पास्यामि वरुणालयम् ॥ पर्वतांश्चूर्णयिष्यामि दारयिष्यामि मेदिनीम् ॥ ५४ ॥
दीर्घकालं प्रसुप्तस्य कुंभकर्णस्य विक्रमम् ॥ अद्य पश्यन्तु भूतानि भक्ष्यमाणानि सर्वशः ॥ ५५ ॥
नन्विदं त्रिदिवं सर्वमाहारस्य न पूर्यते ॥ ५६ ॥
वधेन ते दाशरथेः सुखार्हं सुखं समाहर्तुमहं व्रजामि ॥

तीति संतापं गच्छामीति ॥ ४० ॥ इदानीमपि इदानीमेव । युद्धाय व्यादिश । ते त्वया । परः अन्यः । न प्रेषणीयः ॥ ४१ ॥ अहमित्यर्धमेकं वाक्यं ॥ ४२ ॥ उक्तं विवृणोति यदीति ॥ ४३—४४ ॥ मृद्वतः प्रहरतः । प्रतिमुखे अग्रे ॥ ४५—४६ ॥ यदीति । रामः प्रथमं मे मुष्टिप्रहारमेव न सहिष्यते । कुतो मां प्रहरिष्यतीति भावः ॥ ४७—४८ ॥ उद्यतः अस्मीति शेषः ॥ ४९ ॥ मुञ्चेत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ अर्थान्तरं । रामात् भयं अस्तीति शेषः । हनिष्यामीत्येतन्मुञ्चेति । दातुं खण्डितुमित्यर्थान्तरं ॥ ५०—५१ ॥ यदि चेत्यर्धं ॥ इन्द्रात् स्वयंभुवश्च । भयं यद्यस्ति तदपि मोचयिष्यामीत्युपस्कार्यं ॥ ५२—५५ ॥ त्रिदिवं त्रिलोकी । आहारस्य न पूर्यते आहाराय न पूर्यते । न पर्याप्तमित्यर्थः ॥ ५६ ॥ सुखार्हं उत्तरो-

नांवीप्साऽनुसंधेया । तदित्थंयोजना । रामेहतेसतिद्रवन्तींहरिवाहिनींअद्यपश्यपश्य रणादानीतंरामस्यशिरोदृष्ट्वालंसुखीभव सुखीभव । सीतादुःखिताभवतुभवतु । शत्रुपक्षेहतेसतितेशोकोनभविष्यतिनभविष्यति । लङ्कायांयेहतबान्धवाराक्षसाः तेरामनिधनंपश्यन्तु । शोकपरीतानामस्रप्रमार्जनंकरोमिकरोमि । अतोहेभ्रातःरावण एतत्सर्वंनसंगतमितिभावः । किंचायंदुष्टराक्षससमागमः लङ्कधायभविष्यतीत्याशयेनाह—**कथमिति** । कथं कथंचिदित्यर्थः । मयारक्षितोपिलंदाशरथिंजिघांसुभिः राक्षसैर्वध्यसएवेतिसंबन्धः ॥ कथमिति । दाशरथिंजिघांसुभिःराक्षसैःपरिरक्षितःकथंपद्यसइतिसंबन्धः । अद्यपूर्वमिति । अहमात्मनिविषयेसंतापंनगच्छामि । किंतु तेनमयिपूर्वंहतेसति । अद्यैवराघवस्त्वांहन्ति हनिष्यतीतिसंतापंगच्छामीत्यर्थः ॥ ३४—४६ ॥ **रामानु०** राघवोमुष्टिवेगंयदिसहिष्यति ततः राघवस्यबाणौघाः मेरुधिरंपास्यन्ति । राघवोमुष्टिवेगंनस-

[पा०] १ ङ. झ. ट. महाबलान्. २ च. छ. ञ. नेषुभिःशितैः. ३ ङ. झ. ञ. संरब्ध्य. ४ अर्धश्लोकः क. ख. घ. च. छ. ञ. पाठेषुदृश्यते ५ ङ. च. झ. ञ. ट. तप्यसे. ६ ङ.—ट. घोरंनिहनिष्यामि. ७ ङ.—ट. हरींश्चभक्षयिष्यामि. ८ क. ख. ङ. च. ज. झ. ट. नत्विदंत्रिदिवंसर्वमाहारोममपूर्यते. ९ ङ.—ट. सुखावहंसुखं. १० ख. यतिष्ये.

निहत्य रामं सह लक्ष्मणेन खादामि सर्वान्हरियूथमुख्यान् ॥ ५७ ॥
रमस्व कामं पिब चाग्र्यवारुणीं कुरुष्व कृत्यानि विनीयतां ज्वरः ॥
मयाऽद्य रामे गमितेयमक्षयं चिराय सीता वशगा भविष्यति ॥ ५८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

चतुःषष्टितमः सर्गः ॥ ६४ ॥

महोदरेणकुंभकर्णप्रति व्यभिचारप्रदर्शनेनसुकृतदुष्कृतयोःसुखदुःखहेतुत्वनियमनिरसनेन मन्त्रिभिःसहालोचनपूर्वकत्वोक्तयाचसीताहरणस्य न्याय्यत्वसमर्थनम् ॥ १ ॥ तथा रामस्ययुद्धेनदुर्जयत्वसमर्थनेन रावणंप्रति स्वबुद्धिपरिकल्पितकपटोपायप्रदर्शनपूर्वकं तेनैवसीतावशीकरणस्यसुकरत्वोक्तिः ॥ २ ॥

तदुक्तमतिकायस्य बलिनो बाहुशालिनः ॥ कुंभकर्णस्य वचनं श्रुत्वोवाच महोदरः ॥ १ ॥
कुंभकर्ण कुले जातो धृष्टः प्राकृतदर्शनः ॥ अवलिप्तो न शक्नोषि कृत्यं सर्वत्र वेदितुम् ॥ २ ॥
न हि राजा न जानीते कुंभकर्ण नयानयौ ॥ त्वं तु कैशोरकाद्धृष्टः केवलं वक्तुमिच्छसि ॥ ३ ॥
स्थानं वृद्धिं च हानिं च देशकालविभागवित् ॥ आत्मनश्च परेषां च बुध्यते राक्षसर्षभः ॥ ४ ॥
यच्चशक्यं बलवता कर्तुं प्राकृतबुद्धिना ॥ अनुपासितवृद्धेन कः कुर्यात्तादृशं बुधः ॥ ५ ॥

त्तरसुखावहं । ते वधेन दाशरथेः सुखावहमित्यर्थान्तरं ॥ ५७ ॥ मया निमित्तेन रमस्वेत्यादौ काकुः । इयमक्षयमिति च्छेदः । रामे विषये गमिता इयं सीता चिराय वशगा भविष्यतीत्यर्थान्तरं ॥ ५८ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिषष्टितमः सर्गः ॥ ६३ ॥

अथ मन्त्रिकृतानयमसहमानो महोदरः कुम्भकर्णं निर्भर्त्सयति—तदुक्तमित्यादिना ॥ उक्तं सूचनं विना कण्ठरवेण दर्शितं । अतिकायस्य महाशरीरस्य । प्रतिवचनानर्हत्वद्योतनाय विशेषणानि ॥ १ ॥ मन्त्रिभिः सहाविचार्यैव रावणेनाकार्यं कृतमिति अहमसहाय एव रामादिभिर्योत्स्यामीतिच यदुक्तं कुम्भकर्णेन तदुभयं दूषयितुमाह—कुम्भकर्णेत्यादिना ॥ कुले जातोपि प्राकृतदर्शनः क्षुद्रबुद्धिः । केवलं धृष्टः न तु शास्त्रज्ञ इत्यर्थः । अवलिप्तः गर्वितः । त्वं सर्वत्र कार्ये । कृत्यं मन्त्ररूपं । तद्वेदितुं न शक्नोषि ॥ २ ॥ 'केवलं वीर्यदर्पेण नानुबन्धो विचारितः, । न सवेद नयानया''वित्यादिना रावणोद्देशेन कुम्भकर्णोक्तं दूषयति—न हीत्यादिना ॥ राजा नयानयौ न जानीत इति न । जानीत एवेयर्थः । किशोरः बालः तस्य भावः कैशोरकं तस्मात् बाल्यात् । केवलं धृष्टः न तु शास्त्रज्ञानेनेति भावः ॥ ३ ॥ देशकालविभागवित् विविक्तादिमन्त्रोचिततद्भिन्नयोः देशयोः तथा मन्त्रोचितानुचितयोश्च कालयोर्विभागं वेत्तीति तथोक्तः । राक्षसर्षभः रावणः । आत्मनः शत्रूणां च वृद्धिं हानिं स्थानं समतां च बुध्यते । रावणो देशकालविभागाद्यनभिज्ञ इति त्वयोक्तं न युक्तमिति भावः ॥ ४ ॥ लोके कापुरुषेणापि यत्कर्तुमनर्हं तादृशं कर्म विवेकी रावणः कथं कुर्यादित्यभिप्रेत्याह—यत्त्विति ॥ बलवता केवलशौर्यावलम्बिना । प्राकृतबुद्धिना यत्कर्तुं शक्यं तादृशं

ष्यिष्यतइतिभावः ॥ ४७ ॥ इतित्रिषष्टितमःसर्गः ॥ ६३ ॥

स० बलवता बलवानहमित्यभिमानवता । प्राकृतबुद्धिनापियत्कर्तुमशक्यंअयोग्यं । हेअनुपासितवृद्ध कुंभकर्ण । इनकः इन एवेनकः अस्मत्स्वामी । बुधः ज्ञानी तादृशंप्राकृतबुद्धिभिरननुष्ठीयमानंस्वयोग्यंकुर्यात् । शक्यमितिपाठे तादृशेनापिकर्तुंशक्यंबुधः कस्तादृशंकुर्यादित्यर्थः । अनुपासितवृद्धश्चासाविनश्च तत्संबुद्धिः । स्वाम्यनुजस्वान्मध्येकोपेनस्वध्वंससाध्वसाद्वा तमभिमुखीकर्तुमेव-

[पा०] १ ङ. झ. ट. राजन्पिबचाग्र्यवारुणीं. २ ङ.—ट. कृत्यानिविनीयदुःखं. क. ख. घ. कृत्यान्यपनीयतां. ३ झ. ज. ट. विधानवित्. ४ ङ. झ. ट. नरः.

यांस्तु धर्मार्थकामांस्त्वं ब्रवीषि पृथगाश्रयान् ॥ अनुबोद्धुं स्वभावे तान्नहि लक्षणमस्ति ते ॥ ६ ॥
कर्म चैव हि सर्वेषां कारणानां प्रयोजकम् ॥ श्रेयः पापीयसां चात्र फलं भवति कर्मणाम् ॥ ७ ॥
निःश्रेयसफलावेव धर्मार्थावितरावपि ॥ अधर्मानर्थयोः प्राप्तिः फलं च प्रत्यवायिकम् ॥ ८ ॥
ऐहलौकिकपारत्रं कर्म पुंभिर्निषेव्यते ॥ कर्माण्यपि तु कल्यानि लभते काममास्थितः ॥ ९ ॥

कर्म बुधः कः कुर्यात् न कोपि कुर्यात् । किमुत रावण इति भावः ॥ ५ ॥ धर्माधर्मयोर्हिताहितसाधनत्वं निश्चित्य, "शीघ्रं खल्वभ्युपेतं त्वां फलं पापस्य कर्मणः" इत्यादिना सीताहरणरूपात्पापात्तवायमनर्थः प्राप्त इति यदुक्तं कुम्भकर्णेन तदपि धर्माधर्मयोर्हिताहितफलनियमाभावान्न संगच्छत इति प्रतिपादयितुमाह—यांस्त्वित्यादिना ॥ पृथगाश्रयान् पृथक्कारणान् भिन्नफलान् । धर्मार्थकामान् ब्रवीषि । तान् स्वभावे अनुबोद्धुं स्वरूपतो ज्ञातुं । लक्षणं लक्ष्यतेनेनेति लक्षणं प्रमाणं । तव नास्तीत्यर्थः । सुखफलदयागादिधर्मानुष्ठानदशायां तात्कालिकशरीरायासजनितदुःखदर्शनात् दुःखजनकपरद्रव्यापहरणाद्यधर्माचरणसमयेतात्कालिकसुखदर्शनाच्च । अर्थकामयोरप्येवंदर्शनाच्च कर्मणामनियतफलकत्वान्नियतफलकत्वे न किंचित्प्रमाणमुपलभ्यत इत्यर्थः ॥ ६ ॥ तदेव प्रदर्शयति—कर्म चेत्यादिना ॥ सर्वेषां कारणानां स्वर्गनरकरूपाणां फलानां कर्मैव प्रयोजकं साधकं । जात्येकवचनं । किंतु अत्र कर्मजाते पापीयसामपि कर्मणां श्रेयः फलं भवति ॥ ७ ॥ उक्तमेवार्थं विशदयति—निःश्रेयसेति ॥ धर्मार्थौ धर्मार्थसाधनभूते कर्मणी । इतरौ अधर्मानर्थसाधनभूते कर्मणी च । निःश्रेयसफलौ एतानि चतुर्विधानि निःश्रेयसकराण्येव । किंतु कदाचिदधर्मानर्थयोः प्रत्यवायिकं । अश्रेयइति यावत् । प्रत्यवायोस्मिन् कारणतयास्तीति प्रत्यवायिकं । "अत इनिठनौ" इति ठन् । प्राप्यत इति प्राप्तिः फलं । कर्मणि क्तिन्प्रत्ययः । एतेनाधर्मानर्थयोः श्रेयस्तदितरच्चोभयं फलं भवतीत्युक्तं ॥ ८ ॥ एवं धर्माधर्मयोरव्यवस्थितफलत्वमुक्त्वा कामस्यापि तदाह—ऐहलौकिकेति ॥ ऐहलौकिकं इहलोकोपयोगि । पारत्रं परलोकोपयोगि च कर्म पुंभिर्निषेव्यते । तत्फलं चानुभूयते । तथैव

मुक्तिः । अनुपासितवृद्धेन अतएवप्राकृतबुद्धिनेति तीर्थोनागोजिभट्टश्च ॥ ५ ॥ ति० सर्वेषांकारणानां सुखसाधनानां त्रिवर्गलक्षणानां । कर्मैव प्रयोजनं प्रयोजकमुत्पादकं । नह्यक्रियस्यकश्चनपुरुषार्थोधर्मादिः ॥ ७ ॥ ति० तत्रपुरुषप्रयत्नसाध्येष्वप्येषु धर्मार्थयोःकामात्कश्चिद्विशेषोस्तीत्याह—निःश्रेयसेति । धर्मार्थौ निःश्रेयसफलावेवसन्तौ कामनाविशेषेणेतरावपि स्वर्गाभ्युदयफलावपिभवतः । अत्रधर्मशब्देनार्थनिरपेक्षोजपध्यानादिः । अर्थशब्देनचार्थसाध्योयागदानादिः । " यज्ञोदानंतपश्चैवपावनानिमनीषिणाम् " इतिभगवद्वचनात् । तेषांचित्तशुद्धिद्वारामोक्षसाधनत्वमस्ति । कामस्तुनकदापिनिःश्रेयसफलइतिभावः । तयोरपरमपिकामाद्विशेषमाह—अधर्मानर्थयोरिति । जपादिरूपेक्रियामयेवा नित्यधर्मेलेसत्यधर्मानर्थौप्राप्तौभवतः । तयोश्चसतोः प्रात्यवायिकंविहिताकरणप्रयुक्तप्रत्यवायजन्यंफलंपुंसःप्राप्तंभवति । नतुकाम्याकरणेप्रत्यवायइतिभावः ॥ स० अर्थः तद्व्ययसाध्ययागादिः । तौ निष्कामनयानुष्ठितौ निःश्रेयसफलौ मोक्षप्रापकौ । तावेव इतरौ कामनयानुष्ठितौ इतरौ स्वर्गैहिकसंपदादिप्रापकौ भवतः । तथाविरुद्धकामनया कर्तव्यलोपादिनाऽधर्मघटनेवघटनानर्थस्यापिभवेत् । तयोरधर्मानर्थयोःसतोः प्रात्यवायिकं प्रत्यवायजन्यं । फलं अनिष्टं प्राप्तंभवति । यथाविहिताकरणेप्रत्यवायस्तथाकाम्याकरणे नप्रत्यवायइतितदपेक्षयातौविशिष्टाविति । भगवत्सेवादिकामनाप्यकामनैवेति सा धर्ममध्यएवगणनीयेति नहठवादीयभीमकामप्रशंसाविरोधइतिबोध्यं ॥ ८ ॥ ति० कीदृशंतत्फलंतत्राह—ऐहलौकिकेति । इहलोकेपरत्रचभवंकर्म कर्मफलं । इहऋणदारिद्र्यादिरूपं । परत्रनरकयातनादिरूपं । निषेव्यते अनुभूयते एवंधर्मफलमपि । अथकामस्यधर्मार्थाभ्यांवैलक्षण्यमाह—कर्माणीति । कामं तत्पुरुषार्थसिद्धिमुद्दिश्यकर्माणियत्नेनस्थितोनुतिष्ठन्नपिकल्यानिशुभानितुविशिष्यात्रापिसाक्षाल्लभतेनतुधर्मार्थवत्कालान्तरे लोकान्तरेवा । एवंचधर्मार्थकामाएकेनैवसेव्याः । धर्मविरुद्धोयदिकामस्तदासस्वतपोविक्रमादिनासमाधेयः । "नहिभिक्षुकाःसन्तीतिस्थाल्योनाधिश्रियन्ते " इतिन्यायादितिभावः । स० पुंभिः पुरुषैः । रावणस्यप्रस्तुतत्वात्पुंभिरित्युक्तिः । सर्वैःस्त्रीपुंसैरित्यर्थः । ऐहलौकिकं इहलोकेभवं । अनुशतिकादित्वादुभयपदवृद्धिः । कर्म तत्फलं अङ्गचित्तवैकल्यादिकं । पारक्यं परशब्दात् " तद्धितः " इतिबहुवचनज्ञापितः क्यप् । किलाद्यौचपारक्यमितिभवति । यातनादिरूपं निषेव्यते । ऐहलौकिकंपारक्यंशुभमप्येवं । कामोधर्मार्थाभ्यांविलक्षणफलकइत्यालपति—कर्मा-

[पा०] १ ङ. ञ. ट. अवबोद्धुं. २ ङ.—ट. स्वभावेननहि. ३ ङ. ञ. ञ. ट. मस्तितान्. ४ ग: ङ.—ट. प्रयोजनं. ५ क. ख. ङ. ञ. ट. ठ. पारक्यं.

तत्र कृत्यमिदं राज्ञा हृदि कार्यं मतं च नः ॥ शत्रौ हि साहसं यत्स्यात्किमिवात्रापनीयताम् ॥ १० ॥
एकस्यैवाभियाने तु हेतुर्यः प्रकृतस्त्वया ॥ तत्राप्यनुपपन्नं ते वक्ष्यामि यदसाधु च ॥ ११ ॥

कामम्मास्थितः यथेच्छाचारोपि कल्यानि कर्माणि कल्याणानि कर्मफलानि लभते । अतो विहितमेव शुभप्रदं, निषिद्धं तु तथा न भवतीति नियमो नास्तीत्यर्थः ॥ ९ ॥ धर्मादीनां फलनियमो नास्ति, सर्वं सर्वस्य फलमित्यस्मिन्पक्षे स्थित्वा रावणेन सीताहरणं कृतमस्माभिश्चानुमतमित्याह—तत्र कृत्यमिति ॥ तत्र राज्ञा कामसेव्यपि सुखानि लभत इति मते स्थितेन राज्ञा । इदं कार्यं सीताहरणरूपं कार्यं । हृदि कृत्यं हृदि चिन्तितं । नः अस्माकमपि । मतं संमतं । शत्रौ शत्रुविषये यत् साहसं स्यात् । अत्र अस्मिन्साहसकर्मणि किमिवापनीयते । न किंचित्क्रियते इत्यर्थः ॥ १० ॥ एवं रावणस्याविमृश्यकारित्वपक्षं प्रतिक्षिप्य कुम्भकर्णस्यैकस्यैवाभियानपक्षं निरस्यति—एकस्येत्यादिना ॥ एकस्यासहायस्य । अभियाने युद्धाय निर्गमे ।

ण्यपीति । कामंपुरुषार्थमुद्दिश्य कर्माणि आस्थितः अनुतिष्ठन् कल्यानि फलप्रापणसमर्थानि । तत्फलानीतियावत् । लभ ते प्राप्नोति । धर्मादिविरुद्धइतिनत्याज्यः कामोपितुमध्येनुष्ठिततपसावलेनवा धर्मविरुद्धीकर्तुमुसंपादः । " नहिमृगाआयान्तीतिबीजानिनोप्यन्ते " इतिनीतेरितिभावः ॥ ९ ॥ **ति०** यत्तुतीर्थैनोक्तं धर्माधर्मयोर्हिताहितसाधनलंनिश्चित्यपरदाराहरणरूपाधर्माद्राज्ञो दुःखमित्युक्तं तद्धर्माधर्मयोर्हिताहितफलनियमाभावादसंगतमित्याह—यांस्तुधर्मार्थेति । पृथगाश्रयान् पृथक्फलजनकान्वदसि । तान्स्वभावेनाववोद्धुं स्वरूपतोज्ञातुं । लक्ष्यतेऽनेनेतिलक्षणंकारणंच नास्ति । सुखफलकयागादिधर्मानुष्ठानेपितात्कालिकशरीरायासदर्शनात् दुःखजनकपरदारगमनादावपितात्कालिकसुखदर्शनाच्चेतिभावः । तदेवप्रदर्शयति—**कर्मचेति** । सर्वेषांकारणानांसुखानामित्यर्थः । कर्म कर्ममात्रं प्रयोजनं प्रयोजकं । साधकमित्यर्थः । अत्र अस्मिन्पुण्यकर्मणि । फलं भवति अश्रेयोपीतिशेषः । पापीयसांकर्मणांश्रेयःसुखंचफलंभवति । एतदेवविशदयति—**निश्श्रेयसेति** । धर्मार्थौ तत्साधनीभूतेकर्मणी । इतरौ अधर्मानर्थौ । तत्साधनीभूतेकर्मणीइतियावत् । निश्श्रेयसफलावेव । चतुर्विधकर्माण्यपिश्रेयस्करान्येवेत्यर्थः । किंतु कदाचिदधर्मानर्थयोःप्रात्यवायिकंप्रत्यवायकारणकंदुःखं फलंसुखंच । प्राप्यतइतिप्राप्तिः । कर्मण्यिक्तिन् । प्राप्यंभवतीत्यर्थः । एतेनाधर्मानर्थयोःसुखदुःखोभयफलत्वमुक्तं । धर्मार्थयोरव्यवस्थितफलत्वमुक्त्वाकामस्याप्याह—ऐहलौकिकेति । इहलोकपरलोकोपयोगिकर्मधर्मार्थरूपंनिषेव्यते तत्फलं चानुभूयते । तथाकाममास्थितोपि यथेच्छाचारोपि । कल्यानि शुभानि । कर्माणि कर्मफलानि । लभते । एवंचविहितमेवशुभदंनिषिद्धमशुभदमितिनियमोनेतिभावः । एतत्पक्षानुसारेणैवसीताहरणंरावणेनकृतमस्माभिश्चानुमतमित्याह—**तत्रेति** । तथासतीदंकार्यंसीताहरणरूपंराज्ञाहृदिनिश्चितमस्माभिरनुमतंच । किंचशत्रुविषयेरावणेनयत्साहसंकृतं तत्किमिव नकिमपीत्यर्थः । अत्र साहसविषये । अपनीयतां पृथक्कृत्यप्रदर्श्यतां । अत्रपक्षेरावणेनाविचार्यकृतंकिमपिदर्शयितुंनशक्यमित्यर्थइतिपद्यश्लोकीव्याख्यानं तन्न । धर्माद्दुःखस्याधर्मात्सुखस्यसर्वासंमतत्वात् । यदप्युक्तंयागादौ नान्तरीयकंदुःखमिति तन्नतस्यधर्मस्यफलं । किंतु प्राकृतकर्मान्तरस्यैव । एवमधर्मविषयेपि । अनयारीत्यासर्वंपलालप्रायतयादूष्यतांमतिमद्भिरित्यलम् ॥ **स०** अनभिज्ञायशास्त्रार्थमित्यादिना दुर्मन्त्रिणस्त्याज्याइतियदुक्तंतत्परिहरति—**तत्रेति** । धर्मार्थकामानामेकानुष्ठेयत्वेत्वन्मुखबन्धेननिश्चितेराज्ञैकेनापिकामार्थावाप्तौप्रयत्नोनुष्ठेयइति । इदं कार्यं सीताहरणादिकंकामार्थरूपमितिराज्ञाहृदिकृत्यं कर्तव्यत्वेनमनःपूर्वंकंकृत्यंनिश्चितं । मन्त्रिणामस्माकंचमतं । अतोराजनीवयुवराजेष्वपिनाचातुरी । साहसंकृतमित्युक्तंदोषंदूरीकरोति—शत्राविति । शत्रौ शत्रुविषये । यत्साहसं हि कर्तव्यत्वेनप्रसिद्धं । अत्र एतदवस्थायांनकिमिवापनीयते अनयीक्रियते । तस्यशत्रुत्वात्तत्रसाहसंसंभावितानुष्ठेयत्वमेवेति नकोप्यनयोनेनानुष्ठितइतिभावः । यत्तु " नागोजिभट्टेन यत्तुतीर्थैनोक्तमितिपद्यश्लोकीव्याख्यानमनूद्य तत्र धर्माद्दुःखस्याधर्मात्सुखस्यसर्वासंमतत्वात् । यदप्युक्तंयागादौनान्तरीयकंदुःखमितितन्नतस्यधर्मस्यफलं । किंतुप्राकृतकर्मान्तरस्यैव । एवमधर्मविषये । अनयारीत्यासर्वंपलालप्रायतयादूष्यतांमतिमद्भिरित्यलमित्यालपितं तत्तत्तात्पर्यापर्यालोचनयेतिज्ञेयं । तथाहि । अधर्मात्सुखस्य धर्माद्दुःखस्यसर्वासंमतत्वादित्याद्योनानवद्यः । तेननसुखंवादुःखंवापारत्रिकं तत्रापिमुख्यंमौक्तसदसन्मुक्तिगंविवक्षितं । किंतूभयमप्यैहिकं पुनरावृत्तिलोकगंच । धर्मस्यदुःखहेतुत्वं यथार्थवचनंधर्मइतिजानद्भिर्निलीनज्ञातचोरबोधनेनमहानर्थऐहिकोनुभूतइति ज्ञातस्थितिचोरावचनदीपादितैलपानादिलोकमूषकाद्यनुष्ठिताधर्मस्यपुरुषार्थप्रापकेत्येवमादिरर्थोबहुपुराणादिदृष्टइतिस्वव्यतिरिक्तनैकमात्रसंमतमिदंप्रमेयमिति क्वसर्वासंमतिः । एवमसांमत्येचास्तिककामुकादयोनामशास्त्रकृदुदाहताअधिकारिणोनसन्तीत्यभ्युपगन्तव्यंस्यात् । यागादौ नान्तरीयकंदुःखमिति तन्नतस्यधर्मस्यफलंकिंतुप्राकृतकर्मान्तरस्यैवेत्यादिकं भगवद्भक्तिरहितकृतक्रतुविवक्षया । " धर्मोभवत्यधर्मोपियोनभक्तैःकृतोहरे । पापंभवतिधर्मोपिकृतोभक्तैस्तवाच्युत " इत्यादिमानमनुसृत्यतीर्थऊचिवानितितुच्छीकृतंवेदितव्यमितिदिक् ॥ १० ॥ **ति०** प्राहृतः उक्तः ॥ ११ ॥

[**पा०**] १ ङ. झ. ट. यत्तत्किमिवा. २ ङ. झ. ट. प्राहृतस्त्वया.

येन पूर्वं जनस्थाने बहवोऽतिबला हताः ॥ राक्षसा राघवं तं त्वं कथमेको जयिष्यसि ॥ १२ ॥
ये पुरा निर्जितास्तेन जनस्थाने महौजसः ॥ राक्षसांस्तान्पुरे सर्वान्भीतानद्यापि पश्यसि ॥ १३ ॥
तं सिंहमिव संक्रुद्धं रामं दशरथात्मजम् ॥ सर्पं सुप्तमिवाबुध्य प्रबोधयितुमिच्छसि ॥ १४ ॥
ज्वलन्तं तेजसा नित्यं क्रोधेन च दुरासदम् ॥ कस्तं मृत्युमिवासह्यमासादयितुमर्हति ॥ १५ ॥
संशयस्थमिदं सर्वं शत्रोः प्रतिसमासने ॥ एकस्य गमनं तत्र न हि मे रोचते भृशम् ॥ १६ ॥
हीनार्थः सुसमृद्धार्थं को रिपुं प्राकृतं यथा ॥ निश्चित्य जीवितत्यागे वशमानेतुमिच्छति ॥ १७ ॥
यस्य नास्ति मनुष्येषु सदृशो राक्षसोत्तम ॥ कथमाशंससे योद्धुं तुल्येनेन्द्रविवस्वतोः ॥ १८ ॥
एवमुक्त्वा तु संरब्धः कुंभकर्णं महोदरः ॥ उवाच रक्षसां मध्ये रावणं लोकरावणम् ॥ १९ ॥
लब्ध्वा पुनस्त्वं वैदेहीं किमर्थं संप्रजल्पसि ॥ यदीच्छसि तदा सीता वशगा ते भविष्यति ॥२०॥
दृष्टः कश्चिदुपायो मे सीतोपस्थानकारकः ॥ रुचिरश्चेत्स्वया बुद्ध्या राक्षसेश्वर तं शृणु ॥ २१ ॥
अहं द्विजिह्वः संह्रादी कुंभकर्णो वितर्दनः ॥ पञ्च रामवधायैते निर्यान्तीत्यवघोषय ॥ २२ ॥
ततो गत्वा वयं युद्धं दास्यामस्तस्य यत्नतः ॥ जेष्यामो यदि ते शत्रून्नोपायैः कृत्यमस्ति नः ॥२३॥
अथ जीवति नः शत्रुर्वयं च कृतसंयुगाः ॥ तंतस्तदभिपत्स्यामो मनसा यत्समीक्षितम् ॥ २४ ॥
वयं युद्धादिहेष्यामो रुधिरेण समुक्षिताः ॥ विदार्य स्वतनुं बाणै रामनामाङ्कितैः शितैः ॥ २५ ॥

यो हेतुः बलपराक्रमरूपः । त्वयाप्रकृतः प्रस्तावितः । तत्रापीत्यपिशब्देन पूर्वं निराकृतः पक्षः समुच्चीयते । यदनुपपन्नं अयुक्तं । असाधु अहितं च । तद्वक्ष्यामि ॥ ११ ॥ अनुपपत्तिमुपपादयति—येनेति ॥१२॥ असाधुत्वं दर्शयति—ये पुरेति ॥ तान् तज्जातीयानित्यर्थः ॥ १३ ॥ संक्रुद्धं सिंहमिव संक्रुद्धसिंहसदृशं तमबुध्य अबुध्वा । सुप्तं सर्पमिव प्रबोधयितुमिच्छसीत्यन्वयः ॥ १४ ॥ असह्यं सोढुमशक्यं । अपरिहार्यपराक्रममित्यर्थः । आसादयितुं आसादितुं ॥ १५ ॥ यत्र शत्रोः प्रतिसमासने प्रतिमुखस्थितौ इदं सर्वं बलं संशयस्थं भवति । तत्र एकस्य तव गमनं न रोचते ॥ १६ ॥ हीनार्थः हीयमानबलः । कः पुमान् जीवितत्यागे विषये । निश्चित्य निश्चयं कृत्वा । समृद्धार्थं वर्धमानबलं रिपुं प्राकृतं यथा क्षुद्रपुरुषमिव । वशमानेतुमिच्छतीत्यन्वयः । जीवितत्यागे निश्चयोस्ति चेत्तंप्रति युद्धाय याहीत्यर्थः ॥ १७ ॥ यस्य मनुष्येषु सदृशो नास्ति । किंतु देवयोः इन्द्रविवस्वतोः इन्द्रसूर्ययोस्तुल्येन तेन रामेणेति शेषः । योद्धुं कथमाशंससे । वक्तुमेव न शक्यं किमुत कर्तुमिति शेषः॥१८—॥ १९ ॥ लब्ध्वेत्यादिश्लोकद्वयमेकान्वयं ॥ संप्रजल्पसि बहुविधं भाषसे । अद्येति शेषः । यदीच्छसि । वक्ष्यमाणोपायमिति शेषः । तदा तदैव । मे मया । उपस्थानं स्वयमेव समीपागमनं । रुचिरः प्रियः । स्वया बुद्ध्या शृणु । ननु परबुद्धिमनुसरेत्यर्थः ॥ २०—२२ ॥ उपायैः सीताहरणोपायैः । कृत्यं साध्यं । नास्ति । सिद्धे साधनायोगादिति भावः ॥ २३ ॥ अथ जीवति यदि जीवतीत्यर्थः । ततः तदा । समीक्षितं आलोचितं । यत् तत् अभिपत्स्यामः । करिष्याम इति यावत् ॥ २४ ॥ तत्किमित्यत्राह—वयमित्यादि ॥ वयं बाणैः स्वतनुं विदार्य रामेण विदारितां कारयित्वा । रुधिरेण समुक्षिताः रामनामाङ्कितैः शरैः सह युद्धादिहेष्याम इति योजना ।

स० इन्द्रविवस्वतोः एकदेहमाश्रितयोरित्यभूतोपमेयं । अन्यथेन्द्रादीनामेतदादिपराभवस्यबहुवारमनुभवान्ननिदर्शनार्हतेतिबोध्यं ॥ १८ ॥ शि० शरैः विघातकैः ॥ स० वयंयुद्धात्स्वतनुंबाणैः स्वयमेवविदार्य रामनामाङ्कितैःशरैः रुधिरेणसमुक्षिताइव इहैष्यामः ॥ बाणैःशरैरितिपुनरुक्तिकृत्यमनालोचयतातीर्थेनेवनागोजिभट्टेनापि रामनामाङ्कितशरताडितानांमहोदरादीनांजीवतां

[पा०] १ ङ. झ. ट. बलास्तदा । राक्षसाराघवंध्वस्ताः. २ च. झ. ञ. ट. पूर्वं. ३ ङ. झ. ञ. ट. सुप्तमहोबुध्वा. ४ ख. ङ. झ. ट. निश्चितं. ५ क. ख. च छ. त्रिलोकेषु. ६ क. ङ. झ. ट. संरब्धं. ७ ग. ङ. छ. झ. ञ. ट. पुरस्ताद्वैदेहीं. ख. ज. पुनस्त्वांवैदेहीं. ८ ङ. झ. ट. किमर्थंत्वंविलंबसे. च. छ. ञ. किमर्थंपरितप्यसे. ग. घ. किमर्थंत्वंप्रजल्पसि. ९ ङ. च. झ. ञ. ट. राक्षसेन्द्रततःशृणु. १० क. ग.—ट. ततस्समभि. ११ क. ख. ग. ङ.—ट. शरैः.

भक्षितो राघवोऽस्माभिर्लक्ष्मणश्चेति वादिनः ॥ तव पादौ ग्रहीष्यामस्त्वं नः कामं प्रपूरय ॥ २६ ॥
ततोऽवघोषय पुरे गजस्कन्धेन पार्थिव ॥ हतो रामः सह भ्रात्रा ससैन्य इति सर्वतः ॥ २७ ॥
प्रीतो नाम ततो भूत्वा भृत्यानां त्वमरिंदम ॥ भोगांश्च परिवारांश्च कामांश्च वसु दापय ॥ २८ ॥
ततो माल्यानि वासांसि वीराणामनुलेपनम् ॥ [1]पेयं च बहु योधेभ्यः स्वयं च मुदितः पिब ॥२९॥
ततोऽस्मिन्बहुलीभूते कौलीने सर्वतो गते ॥ भक्षितः ससुहृद्रामो राक्षसैरिति विश्रुते ॥ ३० ॥
प्रविश्याश्वास्य चापि त्वं सीतां रहसि सान्त्वय ॥ धनधान्यैश्च कामैश्च रत्नैश्चैनां प्रलोभय ॥ ३१ ॥
अनयोपधया राजन्[2]भयशोकानुबन्धया ॥ अकामा त्वद्वशं सीता नष्टनाथा गमिष्यति ॥ ३२ ॥
[3]रञ्जनीयं हि भर्तारं विनष्टमवगम्य सा ॥ नैराश्यात्स्त्रीलघुत्वाच्च त्वद्वशं प्रतिपत्स्यते ॥ ३३ ॥
सा पुरा सुखसंवृद्धा सुखार्हा दुःखकर्शिता ॥ त्वय्यधीनं सुखं ज्ञात्वा सर्वथोपगमिष्यति ॥ ३४ ॥

एतत्सुनीतं मम दर्शनेन रामं हि दृष्ट्वैव भवेदनर्थः ॥
इहैव ते सेत्स्यति मोत्सुको भूर्महानयुद्धेन सुखस्य लाभः ॥ ३५ ॥
[4]अदृष्टसैन्यो ह्यनवाप्तसंशयो रिपुं[5]नयुद्धेन जयन्नराधिपः ॥
यशश्च पुण्यं च महन्महीपते श्रियं[6] च कीर्तिं च चिरं[7] समश्नुते ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

इदं च रामयुद्धं कृतमिति सीतासमाश्वासाय ॥२५॥ ततः आगमनानन्तरं । रामो लक्ष्मणश्च रिपुः निःशेषं भक्षित इति तव पादौ ग्रहीष्यामः । त्वं संतोषातिशयव्यञ्जनार्थं नः कामं प्रपूरय । अभीष्टं पारितोषिकं देहीत्यर्थः ॥ २६ ॥ गजस्कन्धेन गजस्कन्धगतपुरुषेण ॥ २७ ॥ नामेत्यलीके । परिवारान् दासदासीः गजाश्वादीन्परिच्छदान्वा । " स्याज्जङ्घे परीवारः " इत्यमरः । कामान् काम्यमानानभीष्टान् । वसु सुवर्णं ॥ २८—२९ ॥ तत इत्यादिश्लोकद्वयं ॥ कौलीने लोकवादे । " स्यात्कौलीनं लोकवादे " इत्यमरः । कौलीनमेव विशदयति—भक्षित इति । प्रविश्य । समीपं गत्वेत्यर्थः । आश्वास्य रामात्ययजं शोकं निवार्य । सान्त्वय मयि प्रीतिं कुर्वित्येवं सान्त्ववादं कथयेत्यर्थः । धनैः सुवर्णैः ॥ ३०—३१ ॥ उपधया कपटोपायेन । भयशोकानुबन्धया संपादितसीताभयशोकेनेत्यर्थः । अकामा पूर्वं त्वदनभिलाषिणी ॥ ३२ ॥ स्त्रीलघुत्वात् स्त्रीचापलात् ॥ ३३ ॥ त्वय्यधीनं त्वयि विषये अधीनं परतन्त्रं । उपगमिष्यति । त्वामिति शेषः ॥ ३४ ॥ उक्तमर्थं निगमयति—एतदिति ॥ एतत् मम दर्शनेन बुद्ध्या । सुनीतं निर्णीतं । रामं दृष्ट्वा स्थितस्य तव अनर्थो भवेत् । मोत्सुको भूः मा रणोत्सुको भूः । अयुद्धेन युद्धव्यतिरिक्तासनबलेन । प्रसज्यप्रतिषेधेपि समासस्येष्टत्वात्साधुः ॥ ३५ ॥ तदेवायुद्धं स्तौति—अदृष्टेति ॥ अदृष्टसैन्यः अदृष्टशत्रुसैन्यः । अतएवानवाप्तसंशयः अप्राप्तप्राणसंदेहः । अयुद्धेन

प्रत्यावृत्तौत्सुक्यसंपादितपुण्यमेवनिमित्तमित्यभिप्रेतं । " रामंहिदृष्ट्वैवभवेदनर्थ" इतिसर्गोपान्त्यश्लोकीयानर्थोवधइतिस्वव्याख्यानंपूर्वोत्तराविमर्शमूलंचेतिमतिमद्भिःसंतोष्टव्यं ॥ २५ ॥ **ति०** बहुदेयं देहीतिशेषः । मुदितःपिब मुदितइवपिब मैरेयमितिशेषः ॥२९॥ **ती०** अनयोपधया अनेनकपटोपायेन । भयशोकानुबन्धया संपादितभयशोकयेत्यर्थः । अनयोपधयेत्यादिश्लोकत्रयस्यवास्तवार्थं महोदरवाणी प्रकारान्तरेणनिस्सरति—**अनयेति** । नष्टनाथागमिष्यतीत्यत्र नष्ट न अथ आगमिष्यतीतिच्छेदः । अथेत्यप्यर्थे । हेनष्ट रावण । अकामा विष्णुकामासीता । अनयोपधयापि त्वद्वशंनागमिष्यतीत्यर्थः ॥ ३२ ॥ **स०** अयुद्धेन विनायुद्धं । एतेन सीतालाभानन्तरंकृतकार्यःशरणंव्रजेतिसूच्यतइतिज्ञेयं ॥ ३५ ॥ इतिचतुःषष्टितमःसर्गः ॥ ६४ ॥

[**पा०**] १ ङ. ञ. ञ. ट. देयंचबहु. ग. देयंचबहुधातेभ्यः. २ ङ.—ट. भूयश्शोकानु. ३ च. छ. झ. ट. रमणीयंहि. ४ ग. ङ. च. ज.—ट. अनष्टसैन्यो. ५ ङ. च. झ. ट. रिपुंत्वयुद्धेनजयज्ञनाधिप. ६ छ. ज. ञ. नरांधिप. ७ क. ख. च. छ. ञ. सौख्यंचमहान्महीपतिः. ८ ख. च. छ. ञ. श्रियंसमृद्धांच. ८ ग. सुखं.

पञ्चषष्टितमः सर्गः ॥ ६५ ॥

कुंभकर्णेन महोदरभर्त्सनपूर्वकंरावणंप्रतिरामवधप्रतिज्ञानेन रणायनिर्याणोक्तिः ॥ १ ॥ रावणेन कुंभकर्णस्यनानाभरणैरलङ्कारपूर्वकं रणायप्रेषणम् ॥ २ ॥ कुंभकर्णेन स्वप्रस्थानसमयप्रादुर्भूतदुर्निमित्तालक्षीकारेणैव रणायनिर्याणम् ॥ ३ ॥

[1]स तथोक्तस्तु निर्भर्त्स्य कुंभकर्णो महोदरम् ॥ अब्रवीद्राक्षसश्रेष्ठं भ्रातरं रावणं ततः ॥ १ ॥
सोहं तव भयं घोरं वधात्तस्य दुरात्मनः ॥ रामस्याद्य प्रमार्जामि [2]निर्वैरो हि सुखी भव ॥ २ ॥
गर्जन्ति न वृथा शूरा निर्जला इव तोयदाः ॥ पश्य संपाद्यमानं तु गर्जितं युधि कर्मणा ॥ ३ ॥
न मर्षयति चात्मानं [3]संभावयति नात्मना ॥ अदर्शयित्वा [4]शूरास्तु कर्म कुर्वन्ति दुष्करम् ॥ ४ ॥
विक्लबानामबुद्धीनां राज्ञा पण्डितमानिनाम् ॥ [5]शृण्वता सादितमिदं त्वद्विधानां महोदर ॥ ५ ॥
युद्धे कापुरुषैर्नित्यं भवद्भिः प्रियवादिभिः ॥ राजानमनुगच्छद्भिः [6]कृत्यमेतद्धि सादितम् ॥ ६ ॥
राजशेषा कृता लङ्का क्षीणः कोशो बलं हतम् ॥ राजानमिममासाद्य सुहृच्चिह्नममित्रकम् ॥ ७ ॥
एष निर्याम्यहं युद्धमुद्यतः शत्रुनिर्जये ॥ दुर्नयं भवतामद्य समीकर्तुमिहाहवे [7]॥ ८ ॥

जयन् युद्धव्यतिरिक्तोपायेन जयन्नित्यर्थः । महत् पुण्यं पुण्यफलं सुखं । श्रियं श्रीमत्प्रियालाभेन जनितां संपदं । कीर्तिं प्रसादं । विस्तारं वा । "कीर्तिः प्रसादे यशसि कर्दमे विस्तृतावपि" इति रत्नमाला । महीपते इति संबोधनं । सीतानुरागाभावेन नैराश्याद्रामः स्वयं विनश्यतीति महोदरहृदयम् ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुःषष्टितमः सर्गः॥६४॥

अथ युद्धाय कुम्भकर्णनिर्याणं पञ्चषष्टितमे—स तथोक्तस्त्वित्यादि ॥ निर्भर्त्स्य गर्जन्तीत्यादिवक्ष्यमाणप्रकारेणेति शेषः ॥ १ ॥ प्रमार्जामि । निवर्तयिष्यामीत्यर्थः । वर्तमानसामीप्ये वर्तमानवत्प्रयोगः ॥ २ ॥ वृथा कर्मणा विना । मया तु कर्मणा संपाद्यमानं गर्जितं पश्य । गर्जितानुसारेण कर्म करोमीत्यर्थः ॥ ३ ॥ शूराः परकृतामवमानोक्तिं । न मर्षयति न मर्षयन्ति न सहन्ते । आत्मना स्वयं । आत्मानं न संभावयति न संभावयन्ति न बहुमन्यन्ते । उभयत्रापि व्यत्ययेनैकवचनं । किंतु अदर्शयित्वा अप्रकाश्य । आत्मपौरुषमनुक्त्वेत्यर्थः । दुष्करमपि कर्म कुर्वन्ति ॥ ४ ॥ विक्लबानामिति । अत्र पञ्चम्यर्थे षष्ठी । सादितमिति भावे निष्ठा । विक्लबेभ्यः कातरेभ्यः । अबुद्धिभ्यः पण्डितमानिभ्यः त्वद्विधेभ्यः । शृण्वता राज्ञा । इदमीदृशं । सादितं प्राप्तंभवति ॥ ५ ॥ इदंशब्दनिर्दिष्टं दर्शयति—युद्ध इति ॥ युद्धे कापुरुषैः युद्धभीरुभिरित्यर्थः । राजानमनुगच्छद्भिः राजेच्छानुसारिभिरित्यर्थः । एतत् प्रकृतयुद्धपर्यवसायि सीताहरणकृत्यं । सादितं संपादितं ॥ ६ ॥ राजशेषेति । अत्राप्यनुगच्छद्भिः भवद्भिरित्यनुषञ्जनीयं । सुहृच्चिह्नं सुहृद्व्यपदेश्यं । अमित्रकं भवतामित्रभूतं । इमं राजानमासाद्य अनुगच्छद्भिः भवद्भिः लङ्का राजशेषा कृता । अकार्यप्रवृत्तो राजा यैर्न निवार्यते स तेषामित्र इत्यभिप्रायेण अमित्रकमित्युक्तं ॥ ७ ॥ दुर्नयं समीकर्तुं शत्रुनिर्जये । तद्विनाश इत्यर्थः । उद्यतः उद्युक्तः सन् । युद्धं युद्धभूमिं प्रति । एष निर्याभि ।

ती० सोहमित्यस्यवास्तवार्थस्तु दुरात्मनः दुष्टेष्वप्यात्मबुद्धिः असुग्रहरूपायस्यरामस्याहं रामदासोहंस्यवपि । तथापि तस्यप्रसिद्धस्य प्रहस्तमुखराक्षससमूहस्येत्यर्थः । वधात्तव घोरंभयमुपस्थितमितिशेषः । तत्प्रमार्जामि अपनयामि । सत्वं निर्वैरःसन् सुखीभवेतिसंबन्धः ॥२॥ ति० आत्मनाआत्मानंसंभावयितुं श्लाघयितुंनमर्षयन्ति नसहन्ते । नेच्छन्तीतियावत् ॥ ४ ॥ ति० अशूरस्वरूपवैक्लब्यादिगुणानां त्वद्वचः युद्धनिवृत्तिपरं रोचते नतुवीराणामित्यर्थः । शृण्वतांसादितमिदंत्वद्विधानामितिपाठे विक्लबत्वादिगु-

[पा०] १ ख. ञ. एवमुक्तस्तु. २ ख. च. ज. ञ. निर्वैरस्त्वं. ३ झ. ञ. ट. संभावयितुमात्मना. ४ क. शूरस्तुकुरुते कर्मदुष्करं. ५ क. ख. घ.—ट. राज्ञां. ६ ख. ङ. च. झ. ञ. ट. रोचतेत्वद्वचोनित्यंकथ्यमानंमहोदर. ७ ङ. झ. ट. सर्वे कृत्यंविनाशितं. क.—घ. कृत्यमेतद्विघातितं. च. ञ. कृत्यमेतद्विनाशितं. ८ क. ख. ज.—ट. कर्तुंमहाहवे.

एवमुक्तवतो वाक्यं कुंभकर्णस्य धीमतः ॥ प्रत्युवाच ततो वाक्यं प्रहसन्राक्षसाधिपः ॥ ९ ॥
महोदरोयं रामात्तु परित्रस्तो न संशयः ॥ न हि रोचयते तात युद्धं युद्धविशारद ॥ १० ॥
कश्चिन्मे त्वत्समो नास्ति सौहृदेन बलेन च ॥ गच्छ शत्रुवधाय त्वं कुंभकर्ण जयाय च ॥ ११ ॥
तस्मात्तु भयनाशार्थं भवान्संबोधितो मया ॥ अयं हि कालः सुहृदां राक्षसानामरिंदम ॥ १२ ॥
तद्गच्छ शूलमादाय पाशहस्त इवान्तकः ॥ वानरान्राजपुत्रौ च भक्षयादित्यतेजसौ ॥ १३ ॥
समालोक्य तु ते रूपं विद्रविष्यन्ति वानराः ॥ रामलक्ष्मणयोश्चापि हृदये प्रस्फुटिष्यतः ॥ १४ ॥
एवमुक्त्वा महाराजः कुंभकर्णं महाबलम् ॥ पुनर्जातमिवात्मानं मेने राक्षसपुङ्गवः ॥ १५ ॥
कुंभकर्णबलाभिज्ञो जानंस्तस्य पराक्रमम् ॥ बभूव मुदितो राजा शशाङ्क इव निर्मलः ॥ १६ ॥
इत्येवमुक्तः संहृष्टो निर्जगाम महाबलः ॥ १७ ॥
राज्ञस्तु वचनं श्रुत्वा कुम्भकर्णः समुद्यतः ॥ आददे निशितं शूलं वेगाच्छत्रुनिबर्हणम् ॥ १८ ॥
सर्वकालायसं दीप्तं तप्तकाञ्चनभूषणम् ॥ इन्द्राशनिसमं भीमं वज्रप्रतिमगौरवम् ॥ १९ ॥
देवदानवगन्धर्वयक्षकिन्नरसूदनम् ॥ रक्तमाल्यं महाधाम स्वतश्चोद्गतपावकम् ॥ २० ॥
आदाय निशितं शूलं शत्रुशोणितरञ्जितम् ॥ कुंभकर्णो महातेजा रावणं वाक्यमब्रवीत् ॥ २१ ॥
गमिष्याम्यहमेकाकी तिष्ठत्विह बलं मम ॥ अद्य तान्क्षुभितान्क्रुद्धो भक्षयिष्यामि वानरान् ॥
कुंभकर्णवचः श्रुत्वा रावणो वाक्यमब्रवीत् ॥ २२ ॥
सैन्यैः परिवृतो गच्छ शूलमुद्गरपाणिभिः ॥ वानरा हि महात्मानः शीघ्राः सुव्यवसायिनः ॥२३॥
एकाकिनं प्रमत्तं वा नयेयुर्दशनैः क्षयम् ॥ तस्मात्परमदुर्धर्षैः सैन्यैः परिवृतो व्रज ॥
राक्षसामहितं सर्वं शत्रुपक्षं निषूदय ॥ २४ ॥
अथासनात्समुत्पत्य स्रजं मणिकृतान्तराम् ॥ आबबन्ध महातेजाः कुंभकर्णस्य रावणः ॥ २५ ॥
अङ्गदान्यङ्गुलीवेष्टान्वराण्याभरणानि च ॥ हारं च शशिसंकाशमाबबन्ध महात्मनः ॥ २६ ॥
दिव्यानि च सुगन्धीनि माल्यदामानि रावणः ॥ श्रोत्रे चासंजयामास श्रीमती चास्य कुण्डले ॥२७॥

अद्यैव निर्यास्यामीत्यर्थः ॥ ८–११ ॥ तस्मात् भवतो निःसमत्वात् । संबोधितः प्रबोधितः । अयं हि कालः । युद्धायेतिशेषः ॥ १२–१४ ॥ पुनर्जातमिव मेने । जेष्यत्ययमिति विश्वासादितिभावः ॥ १५—१६ ॥ इत्येवमित्यर्धं ॥ निर्जगाम निर्गन्तुमुद्युक्तः ॥ १७—॥ १८ ॥ सर्वकालायसं बहुकाष्णायसमयमित्यर्थः ॥ १९ ॥ महाधाम महातेजः । स्वतश्चोद्गतपावकं क्रौर्यात्स्वत एवोत्पन्नाग्निकणं ॥ २०—२२ ॥ महामानः महाबुद्धयः । शीघ्राः वेगवन्तः । सुव्यवसायिनः दृढनिश्चयाः ॥ २३—२४ ॥ स्रजं काञ्चनमालां । कुम्भकर्णस्य आबबन्ध कुम्भकर्णे आबबन्धेत्यर्थः ॥ २५ ॥ अङ्गुलीवेष्टान् अङ्गुलीयकानि ॥२६॥ आसञ्जयामास । बबन्धेत्यर्थः । अत्र केयूरादीनामप्युपलक्षणं । काञ्चनाङ्गदकेयूरेत्यनुवादात् ॥ २७ ॥

णानांलद्विधानांवचःश्रण्वतां इदंसादितं ईदृशंदुःखंप्राप्तंभवतीत्यर्थइतितीर्थः ॥ ५ ॥ **ती०** समालोक्येत्यस्यवास्तवार्थस्तु तेरूपंसमालोक्य रामलक्ष्मणयोःसंबन्धिनोवानराः विद्रविष्यन्ति । प्रस्फुटिष्यतः द्यावापृथिव्याविति शेषः । अतोहृदयेयुद्धगमनायमतिंकुर्वित्यर्थः ॥ १४ ॥ **स०** मणयःकृताः अन्तरेयस्याःसा तां । स्रजं मालां ॥ २५ ॥ **स०** माल्यदामानि पुष्पमालाः । "माल्यं

[पा०] १ ख. ङ.—ट. शयानःशत्रुनाशार्थं. २ झ. संगच्छ. क. ख. घ. ङ. च. ट. त्वंगच्छ. ३ क. खं. ङ. च. झ. ट. महातेजाः. ४ ङ. झ. ट. श्रुत्वायोद्धुमुपक्रमांस्तदा. ५ क. ग.—झ. निबर्हणः. ६ ङ. झ. ट. सर्वकालायसं. ७ ङ. च. छ. झ. ट. इन्द्रनीलसमप्रख्यं. ८ क. च. छ. महत्. ९ क. ङ. च. छ. झ. ञ. ट. तान्क्षुधितः. १० ङ. झ. ट. शूराः. ११ ख. च. छ. ञ. रक्षखरक्षसांपक्षं. १२ ग. ङ. च. झ. ट. गात्रेषुसज्जयामासश्रोत्रयोश्चास. ख. छ. अङ्गेष्वासज्जयामास.

काञ्चनाङ्गदकेयूरनिष्काभरणभूषितः ॥ कुंभकर्णो बृहत्कर्णः सुहुतोऽग्निरिवाबभौ ॥ २८ ॥
श्रोणीसूत्रेण महता मेचकेन व्यराजत ॥ अमृतोत्पादने नद्धो भुजङ्गेनेव मन्दरः ॥ २९ ॥
स काञ्चनं भारसहं निवातं विद्युत्प्रभं दीप्तमिवात्मभासा ॥
आबध्यमानः कवचं रराज संध्याभ्रसंवीत इवाद्रिराजः ॥ ३० ॥
सर्वाभरणसर्वाङ्गः शूलपाणिः स राक्षसः ॥ त्रिविक्रमकृतोत्साहो नारायण इवाबभौ ॥ ३१ ॥
भ्रातरं संपरिष्वज्य कृत्वा चाभिप्रदक्षिणम् ॥ प्रणम्य शिरसा तस्मै संप्रतस्थे महाबलः ॥ ३२ ॥
निष्पतन्तं महाकायं महानादं महाबलम् ॥ तमाशीर्भिः प्रशस्ताभिः प्रेषयामास रावणः ॥ ३३ ॥
शङ्खदुन्दुभिनिर्घोषैः सैन्यैश्चापि वरायुधैः ॥ तं गजैश्च तुरङ्गैश्च स्यन्दनैश्चाम्बुदस्वनैः ॥ ३४ ॥
अनुजग्मुर्महात्मानं रथिनो रथिनां वरम् ॥ ३५ ॥
सर्पैरुष्ट्रैः खरैरश्वैः सिंहद्विपमृगद्विजैः ॥ अनुजग्मुश्च तं घोरं कुंभकर्णं महाबलम् ॥ ३६ ॥
स पुष्पवर्षैरवकीर्यमाणो धृतातपत्रः शितशूलपाणिः ॥
मदोत्कटः शोणितगन्धमत्तो विनिर्ययौ दानवदेवशत्रुः ॥ ३७ ॥
पदातयश्च बहवो महानादा महाबलाः ॥ अन्वयू राक्षसा भीमा भीमाक्षाः शस्त्रपाणयः ॥ ३८ ॥
रक्ताक्षाः सुमहाकाया नीलाञ्जनचयोपमाः ॥ शूलानुद्यम्य खड्गांश्च निशितांश्च परश्वधान् ॥ ३९ ॥
बहुव्यामांश्च परिघान्गदाश्च मुसलानि च ॥ तालस्कन्धांश्च विपुलान्क्षेपणीयान्दुरासदान् ॥ ४० ॥
अथान्यद्वपुरादाय दारुणं रोमहर्षणम् ॥ निष्पपात महातेजाः कुंभकर्णो महाबलः ॥ ४१ ॥
धनुःशतपरीणाहः स षट्छतसमुच्छ्रितः ॥ रौद्रः शकटचक्राक्षो महापर्वतसन्निभः ॥ ४२ ॥
संनिपत्य च रक्षांसि दग्धशैलोपमो महान् ॥ कुंभकर्णो महावक्त्रः प्रहसन्निदमब्रवीत् ॥ ४३ ॥
अद्य वानरमुख्यानां तानि यूथानि भागशः ॥ निर्दहिष्यामि संक्रुद्धः शैलभानिव पावकः ॥ ४४ ॥
नापराध्यन्ति मे कामं वानरा वनचारिणः ॥ जातिरस्मद्विधानां सा पुरोद्यानविभूषणम् ॥ ४५ ॥
पुररोधस्य मूलं तु राघवः सहलक्ष्मणः ॥ हते तस्मिन्हतं सर्वं तं वधिष्यामि संयुगे ॥ ४६ ॥
एवं तस्य ब्रुवाणस्य कुम्भकर्णस्य राक्षसाः ॥ नादं चक्रुर्महाघोरं कम्पयन्त इवार्णवम् ॥ ४७ ॥

—२८ ॥ अमृतोत्पादने नद्ध इति निमित्तसप्तमी। भुजङ्गेन वासुकिना ॥ २९ ॥ भारसहं आयुधादिभिः प्रहारेष्यशिथिलमित्यर्थः। दृढमिति वार्थः। यद्वा उपनीतायां तुलायां स्थाप्यमानान्बहून्भारान् सहत इति भारसहः। अनेकभारपरिमाण इत्यर्थः। निवातं वातप्रवेशनिवारकं। निरन्तरमिति यावत्। आत्मभासा कवचकान्त्या। यद्वा निवातं शस्त्राभेद्यं। "निवातावाश्रयावातौ शस्त्राभेद्यं च वर्म यत्" इत्यमरः। आबध्यमानः आबध्नन्। आर्षविकरणव्यत्ययेन श्यन्प्रत्ययः ॥३०॥ सर्वाभरणसर्वाङ्गः सर्वाभरणयुक्तसर्वाङ्गः। त्रिविक्रमकृतोत्साहः त्रिषु विक्रमेषु पदन्यासेषु कृतोत्साहः ॥३१–३५॥ सर्पैरिति। सर्पादीनां महाशरीराणां वाहनत्वं संभवतीति बोध्यं। द्विपाः गजाः। द्विजाः हंसादयः ॥३६॥ मदोत्कटः स्वाभाविकमदेन मत्तः। "मत्ते शौण्डोत्कटक्षीबाः" इत्यमरः ॥ ३७–३९ ॥ बहुव्यामान् अनेकव्यामप्रमाणान्। "व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरं" इत्यमरः। तालस्कन्धान् तालकाण्डान् ॥४०–४१॥ धनुःशतपरीणाहः धनुःशतविशालः। षट्छतसमुच्छ्रितः षट्छतधनुरुच्छ्रायः। संनिपत्य स्वानुगमनायोद्युक्तानां राक्षसानां समीपं गत्वेत्यर्थः ॥ ४२—४४ ॥ सा जातिः वानरजातिः। अस्मद्विधानां क्रीडापराणां ॥ ४५—४७ ॥

[पा०] १ ङ. ञ. ट. भिन्दिपालांश्चपरिघान्. २ घ. विपुलान्प्रासान्. ३ क. ख. ग. ङ. च. ञ. ञ. ट. घोरदर्शनं. ४ ङ. च. छ. ञ. महायूथानि. ख. नानायूथानि. ५ ङ. ञ. ट. पतङ्गानिव. ६ ख. च. छ. ञ. वधिष्याम्यतोयुधि. ७ ग. महाघोराः. ख. च. ञ. महायोधाः.

तस्य निष्पततस्तूर्णं कुम्भकर्णस्य धीमतः ॥ बभूवुर्घोररूपाणि निमित्तानि समन्ततः ॥ ४८ ॥
उल्काशनियुता मेघा बभूवुर्गर्दभारुणाः ॥ ससागरवना चैव वसुधा समकम्पत ॥ ४९ ॥
घोररूपाः शिवा नेदुः सज्वालकबलैर्मुखैः ॥ मण्डलान्यपसव्यानि बबन्धुश्च विहङ्गमाः ॥ ५० ॥
निष्पपात च मालेव गृध्रोस्य पथि गच्छतः ॥ प्रास्फुरन्नयनं चास्य सव्यो बाहुश्च कम्पते ॥ ५१ ॥
निपपात तदा चोल्का ज्वलन्ती भीमनिस्स्वना ॥ आदित्यो निष्प्रभश्चासीन्न प्रवाति सुखोऽनिलः ॥५२॥
अचिन्तयन्महोत्पातानुत्थितान्रोमहर्षणान् ॥ निर्ययौ कुम्भकर्णस्तु कृतान्तबलचोदितः ॥ ५३ ॥
स लङ्घयित्वा प्राकारं पद्भ्यां पर्वतसन्निभः ॥ ददर्शाभ्रघनप्रख्यं वानरानीकमद्भुतम् ॥ ५४ ॥
ते दृष्ट्वा राक्षसश्रेष्ठं वानराः पर्वतोपमम् ॥ वायुनुन्ना इव घना ययुः सर्वा दिशस्तदा ॥ ५५ ॥

तद्वानरानीकमतिप्रचण्डं दिशो द्रवद्भिन्नमिवाभ्रजालम् ॥
स कुम्भकर्णः समवेक्ष्य हर्षान्ननाद भूयो घनवद्घनाभः ॥ ५६ ॥
ते तस्य घोरं निनदं निशम्य यथा निनादं दिवि वारिदस्य ॥
पेतुर्धरण्यां बहवः प्लवङ्गा निकृत्तमूला इव सालवृक्षाः ॥ ५७ ॥
विपुलपरिघबान्स कुम्भकर्णो रिपुनिधनाय विनिस्सृतो महात्मा ॥
कपिगणभयमाददत्सुभीमं प्रभुरिव किङ्करदण्डवान्युगान्ते ॥ ५८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ॥ ६६ ॥

लङ्काप्राकारोल्लङ्घनेनरणायाभ्यागच्छतःकुंभकर्णस्य गिरिसदृशपृथुतरशरीरावलोकनमात्रेण नीलनलादिभिर्भयात्पलायनम् ॥ १ ॥ अङ्गदेन नानाप्रकारैःपरिसान्त्वितैस्तैः पुनःप्रत्यावर्तनेन तरुशिलादिपरिग्रहणेन कुंभकर्णप्रत्यभियानम् ॥ २ ॥

स लङ्घयित्वा प्राकारं गिरिकूटोपमो महान् ॥ निर्ययौ नगराच्तूर्णं कुम्भकर्णो महाबलः ॥ १ ॥

घोररूपाणि अत्यन्तघोराणि ॥ ४८ ॥ गर्दभारुणाः गर्दभवदव्यक्तरागाः । " अव्यक्तरागस्त्वरुणः " इत्यमरः ॥ ४९—५० ॥ गच्छतोस्य उपरिप्रदेशे गृध्रो मालेव निष्पपातेत्यन्वयः । गृध्र इति जात्येकवचनं । सव्यशब्दो लिङ्गव्यत्ययेन नयनशब्देनापि संबध्यते । कम्पते अकम्पत ॥ ५१॥ उल्का मेघनिर्गतज्वालाविशेषः ॥ ५२—५३ ॥ अभ्रघनः अभ्रसंघातः ॥ ५४—५७ ॥ प्रभुः अन्तकः । किंकरदण्डवान किंकरोमीत्यवस्थायी सचेतनो दण्डः तद्वान् ॥ ५८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चषष्टितमः सर्गः ॥ ६५ ॥

अथ कुम्भकर्णयुद्धप्रवृत्तिः—स इत्यादि ॥ १ ॥

मालाप्रसूनयोः " इत्यभिधानात् ॥ २७ ॥ **ति०** विपुलपरिघवानिति । शूलवदिदमप्यस्यायुधं । किङ्करदण्डवान् किङ्कराः संहारपरिकराःकालदण्डाअस्यसन्तितथा । युगान्तेप्रभुःकालाग्निरुद्रइवविनिस्सृतः ॥ **स०** विपुलपरिघवान् विपुलंपरिघादपीतिविपुलपरिघं शूलं तद्वान् । परिघोरोषः । " रोषेचपरिघोमतः " इतिविश्वः । तद्वानितिवा । इदमप्यस्यायुधमितिनागोजिभट्टव्याकरणं तथा प्रभुविशेषणमितितीर्थव्याख्यानंचानुक्तानुवादलेन दण्डस्यनियतायुधस्यपृथग्ग्रहणान्नैरर्थक्याच्चक्रमादुपेक्ष्ये । दण्डोस्यास्तीति दण्डवान् । करोदण्डवान्यस्येतिबहुव्रीहिः । प्रभुः संहारसमर्थोयमः । किं इति कपिगणभयंआददिव सुभीमं द्रष्टृणामपियथाभवतितथानिस्सृतइतिसंबन्धः । " किंकराः संहारपरिकराः कालदण्डाअस्यसन्तीतिकिंकरदण्डवान्" । "किंकरोमीत्युपस्थितदण्डोस्यास्तीति" तिकमान्नागोजिभट्टतीर्थौ बिन्दुसन्दोहविचार्यव्याख्यावक्तारावित्यलम् ॥ ५८ ॥ इतिपञ्चषष्टितमःसर्गः ॥ ६५ ॥

[**पा०**] १ क. ख. च. ज. उल्काशनिमुचो. २ ज. बभूवुर्भृशदारुणाः. ग. घ. च. छ. झ. विनेदुर्गर्दभा. ३ ख. च. छ. ज. ञ. गृध्रोस्यशूलाग्रेपथि. घ. ङ. झ. ट. गृध्रोस्यशूलेवैपथि. ४ क. ग.—ट. बाहुरकंपत. ५ ङ. झ. सददर्शघनप्रख्यं. ६ ख. च. छ. ज. तंदृष्ट्वावानरश्रेष्ठाराक्षसं. ७ क. ग. घ. पर्वतोपमाः. ८ क. ख. च. छ. ज. विनिर्गतो. ९ घ. मादिशन्सुभीमः.

स ननाद महानादं समुद्रमभिनादयन् ॥ [1]जनयन्निव [2]निर्घातान्विधमन्निव पर्वतान् ॥ २ ॥
तमवध्यं मघवता यमेन वरुणेन वा ॥ प्रेक्ष्य भीमाक्षमायान्तं वानरा विप्रदुद्रुवुः ॥ ३ ॥
[3]तांस्तु विप्रद्रुतान्दृष्ट्वा [4]वालिपुत्रोऽङ्गदोऽब्रवीत् ॥ नलं नीलं गवाक्षं च कुमुदं [5]च महाबलम् ॥ ४ ॥
[6]आत्मानमत्र विस्मृत्य वीर्याण्यभिजनानि च ॥ क्व गच्छत भयत्रस्ताः प्राकृता हरयो यथा ॥ ५ ॥
साधु सौम्या निवर्तध्वं किं प्राणान्परिरक्षथ ॥ नालं युद्धाय वै रक्षो महतीयं विभीषिका ॥ ६ ॥
महतीमुत्थितामेनां राक्षसानां [7]विभीषिकाम् ॥ विक्रमाद्विधमिष्यामो निवर्तध्वं प्लवङ्गमाः ॥ ७ ॥
कृच्छ्रेण तु समाश्वस्य संगम्य च ततस्ततः ॥ [8]वृक्षाद्रिहस्ता हरयः [9]संप्रतस्थू रणाजिरम् ॥ ८ ॥
ते निवृत्य तु [10]संक्रुद्धाः कुम्भकर्णं वनौकसः ॥ निजघ्नुः परमक्रुद्धाः समदा इव कुञ्जराः ॥ ९ ॥
प्रांशुभिर्गिरिशृङ्गैश्च शिलाभिश्च महाबलः ॥ पादपैः पुष्पिताग्रैश्च हन्यमानो न [11]कम्पते ॥ १० ॥
[12]तस्य गात्रेषु पतिता भिद्यन्ते [13]शतशः शिलाः ॥ पादपाः पुष्पिताग्राश्च भग्नाः पेतुर्महीतले ॥ ११ ॥
सोपि सैन्यानि संक्रुद्धो वानराणां महौजसाम् ॥ ममन्थ परमायत्तो वनान्यग्निरिवोत्थितः ॥ १२ ॥
लोहितार्द्रास्तु बहवः शेरते वानरर्षभाः ॥ निरस्ताः पतिता भूमौ ताम्रपुष्पा इव द्रुमाः ॥ १३ ॥
लङ्घ्यन्तः प्रधावन्तो वानरा नावलोकयन् ॥ १४ ॥
केचित्समुद्रे पतिताः [14]केचिद्गगनमाश्रिताः ॥ वध्यमानास्तु ते वीरा राक्षसेन बलीयसा ॥ १५ ॥
सागरं येन ते तीर्णाः पथा तेन प्रदुद्रुवुः ॥ १६ ॥
ते स्थलानि तथा निम्नं विषण्णवदना भयात् ॥ ऋक्षा [15]वृक्षान्समारूढाः [16]केचित्पर्वतमाश्रिताः ॥१७॥
ममज्जुरर्णवे केचिद्दुहाः केचित्समाश्रिताः ॥ [17]निषेदुः प्लवगाः केचित्केचिन्नैवावतस्थिरे ॥ १८ ॥
[केचिद्भूमौ निपतिताः केचित्सुप्ता मृता इव] ॥ तान्समीक्ष्याङ्गदो भग्नान्वानरानिदमब्रवीत् ॥१९॥
अवतिष्ठत युध्यामो निवर्तध्वं प्लवङ्गमाः ॥ भग्नानां वो न पश्यामि [18]परिगम्य महीमिमाम् ॥
स्थानं सर्वे निवर्तध्वं किं प्राणान्परिरक्षथ ॥ २० ॥

विधमन् दहन् ॥२—४॥ अभिजनानि प्रशस्तकुलानि ॥ ५ ॥ विभीषिका भयजनकः कृत्रिमपुरुषवेषः ॥ ६—८ ॥ परमक्रुद्धा इति कुञ्जरविशेषणं ॥ ९ ॥ प्रांशुभिः उन्नतैः । महाबलः कुम्भकर्णः ॥ १०—११ ॥ ममन्थ । ददाहेत्यर्थः ॥ १२ ॥ निरस्ताः उत्क्षिप्ताः ॥ १३ ॥ लङ्घ्यन्त इत्यर्धं ॥ नावलोकयन् नावालोकयन् । पृष्ठदेशमित्यर्थः ॥ १४ ॥ केचित्ते वानरा इति योजना ॥ १५ ॥ सागरमित्यर्धं ॥ ते वानराः ॥ १६ ॥ स्थलानि अतिधावनयोग्यान्देशान् उन्नतप्रदेशान्वा । आश्रिता इत्यन्वयः ॥ १७ ॥ निषेदुः भूमौ पतिता इव तस्थुः ॥ १८—१९ ॥ परिगम्य प्रदक्षिणीकृत्येत्यर्थः । स्थानं न पश्यामीत्यन्वयः

स० विजयन् विजयमानः । जयतीतिजयन् । विशिष्टश्चासौजयंश्चेतिसतथेतिवा । ति० निर्घातान् अशनिघोषान् ॥ २ ॥ स० हेसौम्याः क्रौर्यप्रदर्शनकालेपितदप्रकाशकाइतीर्ष्ययासंबोधनं । प्राणान् किंपरिरक्षथ स्वामिकामिताकरणेनजीवनंधिगिति भावः । इदंरक्षः अस्माभिःसहयुद्धंकर्तुनालं नसमर्थं । महतीविभीषिका महद्भिभीषणं । भावेण्वुल् ॥ ६ ॥ स० बहवःशिलाः "ओतोगुणवचनात्" इत्युकारान्तस्त्रीलिङ्गोबहुशब्दः ॥ ११ ॥ स० इमांमहींपरिक्रम्यापिस्थितानां स्थानं निर्भयस्थलं । नप-

[पा०] १ ङ. ञ. ट. विजयन्निव. २ क. ग. घ. च. छ. ज. निर्घोषान्. ३ च. छ. ज. तान्वीरःप्रद्रुतान्दृष्ट्वा. क. ग. घ. ज. तांस्तुविद्रवतोदृष्ट्वा. ४ क. ग. घ. ङ. ञ. ट. राजपुत्रोऽङ्गदो. ५ क. कुमुदंगन्धमादनं. ६ ख. ङ. च. ञ. ट. आत्मनस्तानिविस्मृत्य. ग. आत्मानमथविस्मृत्य. ७ ङ. ञ. ट. वृक्षान्गृहीत्वाहरयः. ८ क.—ङ. ञ. ट. संप्रतस्थूरणाजिरे. च. छ. युद्धार्थंसंप्रतस्थिरे. ९ ख. ग. ङ.—ट. संरब्धाः. १० च. छ. ज. बुध्यते. ११ छ. अस्य. १२ ञ. बहवः. १३ ग. केचित्सुप्ता मृताइव. १४ क. ख. वृक्षानुपारूढाः. १५ च. छ. ज. गोपुच्छास्त्वाश्रितागुहाः. १६ क. ख. घ. निपेतुःकेचिदवटेकेचित्. १७ ञ.—ट. परिक्रम्य.

निरायुधानां द्रवतामसङ्गगतिपौरुषाः ॥ दारा ह्युपहसिष्यन्ति स वै घातस्तु जीविनाम् ॥ २१ ॥
कुलेषु जाताः सर्वे स्म विस्तीर्णेषु महत्सु च ॥ क्व गच्छथ भयत्रस्ता हरयः प्राकृता यथा ॥ २२ ॥
अनार्याः खलु यद्भीतास्त्यक्त्वा वीर्यं प्रधावत ॥ २३ ॥
विकत्थनानि वो यानि तदा वै जनसंसदि ॥ तानि वः क्व नु यातानि सोदग्राणि महान्ति च ॥२४॥
भीरुप्रवादाः श्रूयन्ते यस्तु जीवति धिक्कृतः ॥ मार्गः सत्पुरुषैर्जुष्टः सेव्यतां त्यज्यतां भयम् ॥२५॥
शयामहेऽथ निहताः पृथिव्यामल्पजीविताः ॥ दुष्प्रापं ब्रह्मलोकं वा प्राप्नुमो युधि सूदिताः ॥२६॥
संप्राप्नुयामः कीर्तिं वा निर्हत्वा शत्रुमाहवे ॥ जीवितं वीरलोकस्य मोक्ष्यामो वसु वानराः ॥२७॥
न कुम्भकर्णः काकुत्स्थं दृष्ट्वा जीवन्गमिष्यति ॥ दीप्यमानमिवासाद्य पतङ्गो ज्वलनं यथा ॥ २८ ॥
पलायनेन चोद्दिष्टाः प्राणान्रक्षामहे वयम् ॥ एकेन बहवो भग्ना यशो नाशं गमिष्यति ॥ २९ ॥

॥ २० ॥ असङ्गगतिपौरुषाः अप्रतिबद्धपराक्रमा इति वानरसंबोधनं । निरायुधानां द्रवतां निरायुधेषु द्रवत्सु । यद्वा निरायुधानां द्रवतां दारास्तान् अपहसिष्यन्तीति । सः अपहासः घातः मृतिः ॥ २१ ॥ सर्वे । वयमिति शेषः । विस्तीर्णेषु ज्ञातिपरम्परया विततेषु । महत्सु प्रशस्तेषु ॥ २२ ॥ अनार्या इत्यर्धं । यद्यस्मात् भीताः प्रधावत पलायथ । तस्मादनार्याः खलु ॥ २३ ॥ सोदग्राणि उदग्रतायुक्तानि । महान्ति भूयांसीत्यर्थः ॥२४॥ यस्तु धिक्कृतो जीवति तद्विषये भीरुप्रवादाः । भीरुत्वापवादाः । श्रूयन्ते । सत्पुरुषैः शूरैः । जुष्टः सेवितः ॥ २५ ॥ सत्पुरुषजुष्टो मार्गः क इत्यपेक्षायामाह—शयामह इत्यादि ॥ युद्धमरणं हि सत्पुरुषजुष्टो मार्ग इत्यर्थः । समरान्निवृत्य पलायितानामपि मरणस्यावश्यंभावित्वप्रदर्शनार्थमल्पजीविता इत्युक्तं । समरानिवर्तिनां वीराणां तु मरणजीवनयोरुभयोरपि श्रेयस्करत्वं प्रतिपादयति—दुष्प्रापमिति । निहत्वा निहत्य । जीवितमिति । वीरलोकस्य वीराणं लोको ब्रह्मलोकः तस्य वसु मूल्यभूतं जीवितं मोक्ष्यामः ॥ २६—२७ ॥ दीप्यमानं ज्वलनमिव राममासाद्य कुम्भकर्णः पतङ्गो यथेति यथेवशब्दयोर्निर्वाहः ॥ २८ ॥ उद्दिष्टाः व्यपदिष्टाः । बहवो वयमनेन कुम्भकर्णेन भग्नाः पलायनेन प्राणान् रक्षामहे

श्यामि । राज्ञआज्ञातादृशीत्यत्रावस्थानेकुंभकर्णतोमरणं । गतवतांसुग्रीवतइतिनानिवर्तनेनिर्वृतिर्भवतामितिभावः ॥ २० ॥ **स०** निरायुधानां रिपुमुक्तायुधानङ्कितानां । क्रमतां गृहंप्रतिद्रवतां । सुजीवतां सज्जीवनवतां ॥ २१ ॥ **ति०** " हतोवाप्राप्स्यसिस्वर्गं जित्वावाभोक्ष्यसेमहीम् " इत्याशयवानाह—**शयामहइतिश्लोकद्वयेन** । यदिदैवगत्यानिहताःशयामहे तदाकुयोधिभिर्दुष्प्रापंब्रह्मलोकंप्राप्नुयामः । वाशब्दोव्यवस्थितविकल्पे । शत्रुमाहवेनिहत्वा निहत्य । कीर्तिं वाप्राप्नुयामः । उक्तमर्थंदार्ढ्यायपुनराह—**निहताइति** । निहताश्चेद्वीरलोकस्य वीरैःसूर्यद्वाराप्राप्यस्यब्रह्मलोकस्यवसु धनं हिरण्यगर्भभूमानन्दं । भोक्ष्यामः अनुभविष्यामः । "जीवितंवीरलोकस्यभोक्ष्याम" इतिपाठोपाङ्कः । नापितत्रार्थसामञ्जस्यं । तत्रहिब्रह्मलोकस्य वसु मूल्यभूतंजीवितंमोक्ष्यामइत्यर्थतीर्थ-आह । **स०** ब्रह्मलोकं वीरस्वर्गसंज्ञं । एतेन "हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीं" इतिगीताचैतदुक्तमेवार्थंवदतीतिसूचितं । शत्रुमितिजातावेकवचनं । मुख्यदशमुखविवक्षयैकवचनंवा । आहवइत्युभयान्वयि । तैर्निहताः वीरलोकस्य वीरप्राप्यस्वर्गस्य । वसु तत्रभोग्यंधनादि तेनाधिकमानन्दंभोक्ष्यामः । पूर्वमव्यवहितकपिवरान्प्रतिवचनं । इदंतदपेक्षयादूरवर्तिनउपागतान्प्रतिवचनमित्यधिकारिभेदान्नपुनर्वचनदोषः । यत्परिहारार्थंदार्ढ्यार्थमित्युक्तिरप्यपेक्षितास्यादितिमन्तव्यं ॥ २६—२७ ॥ **ति०** ननुकथमपिजयप्रत्याशाभावेनस्थित्यानप्रयोजनमतआह—नकुंभकर्णइति ॥ **स०** नकुंभकर्णइत्येकदापदंयथाकुंभकर्णंभिन्नस्तत्सदृशःप्रहस्तादिः तथा पतङ्गोज्वलनमिवकुंभकर्णःकाकुत्स्थंदृष्ट्वाजीवन्नगमिष्यति ॥ २८ ॥ **स०** उद्दिष्टाः अत्रायंतिष्ठत्रायंतिष्ठत्रितिनामाङ्कितायदिवयंप्राणान्रक्षामहे रक्षामः । तर्हि एकेनबहवोभग्नाइतियशः प्राक्संपादिताकीर्तिः नाशंगमिष्यति ॥ **ति०** उद्दिष्टाः महावीरेषुगणिताः । बहवोवयमेकेनभग्नाः पलायनेनयदिप्राणान्रक्षामहे तदायशोनाशंगमिष्यति । यद्वा उद्दिष्टाः एतेपलायिताइतिजनैर्निर्दिष्टाइत्यर्थः ॥ २९ ॥ इतिषट्षष्टितमःसर्गः ॥ ६६ ॥

[**पा०**] १ ठ. क्रमतां. २ ङ. झ. ट. ह्युपहसिष्यन्ति. क. परिहसिष्यन्ति. ३ झ. ठ. घातस्त्वजीवतां. ४ ग. गच्छध्वं. ५ घ. मोघानियुध्यतांजनसंसदि. ङ. झ. ट. भवद्भिर्जनसंसदि. ६ ङ. झ. हतानिच. ७ झ. भीरोःप्रवादाः. ख. घ. भीरुप्रवादाञ्श्रुत्वाचयोजीवतिधिगस्तुतं. ८ ङ. झ. ट. प्राप्नुयामोब्रह्मलोकंदुष्प्रापंचकुयोधिभिः. ९ ङ.—ट. अवाप्नुयामः. १० घ. तंहत्वा. ११ ग. ङ. च. झ. ञ. ट. निहतावीरलोकस्यभोक्ष्यामो. १२ च. छ. ञ. पतङ्गश्चपावकं.

एवं ब्रुवाणं तं शूरमङ्गदं कनकाङ्गदम् ॥ द्रवमाणास्ततो वाक्यमूचुः शूरविगर्हितम् ॥ ३० ॥
कृतं नः कदनं घोरं कुम्भकर्णेन रक्षसा ॥ न स्थानकालो गच्छामो दयितं जीवितं हि नः ॥ ३१ ॥
एतावदुक्त्वा वचनं सर्वे ते भेजिरे दिशः ॥ भीमं भीमाक्षमायान्तं दृष्ट्वा वानरयूथपाः ॥ ३२ ॥
द्रवमाणास्तु ते वीरा अङ्गदेन वलीमुखाः ॥ सान्त्वैश्चैवानुमानैश्च ततः सर्वे निवर्तिताः ॥ ३३ ॥
प्रहर्षमुपनीताश्च वालिपुत्रेण धीमता ॥ आज्ञाप्रतीक्षास्तस्थुश्च सर्वे वानरयूथपाः ॥ ३४ ॥

ऋषभशरभमैन्दधूम्रनीलाः कुमुदसुषेणगवाक्षरम्भतारा: ॥
द्विविदपनसवायुपुत्रमुख्यास्त्वरिततराभिमुखं रणं प्रयाताः ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

सप्तषष्टितमः सर्गः ॥ ६७ ॥

कुंभकर्णे वानरसेनामध्येकेषांचिद्भक्षणेनकेषांचित्पाणितलाभिघातेन विक्षोभपूर्वकंसंचरमाणे हनुमता शैलशृङ्गेणतत्ताडनम् ॥ १ ॥ तत्प्रहारक्षुभितेनकुंभकर्णेन हनुमतोवक्षसि शूलाभिघातेनविह्वलताप्रापणपूर्वकं नीलादिभिरायोधनम् ॥ २ ॥ तेषु कुंभकर्णपीडामसहमानेष्वङ्गदेन गिरिशिखरेणकुंभकर्णशिरस्ताडनम् ॥ ३ ॥ तेन मुष्टिघातेनाङ्गदस्यमोहप्रापणपूर्वकं सुग्रीवंप्रत्यभियानम् ॥ ४ ॥ सुग्रीवेण शैलशृङ्गताडितेनकुंभकर्णेन तद्वधायशूलेसमुत्सृष्टे हनुमता तच्छूलस्यनिजजानुसमारोपणेनभञ्जनम् ॥ ५ ॥ कुंभकर्णेन स्वपातितशैलशृङ्गप्रहारेणपतितमूर्च्छितस्यसुग्रीवस्यग्रहणेन लङ्काप्रवेशः ॥ ६ ॥ लङ्काजनैः कुंभकर्णोपरिहर्षेणपुष्पगन्धोदादिवर्षणे तत्सेकेनप्रबुद्धाप्यायितेनसुग्रीवेण स्वरनखरकराग्रैर्दन्तैश्च कुंभकर्णकर्णनासच्छेदनपूर्वकं वियतिसमुत्पतनेन रामपार्श्वागमनम् ॥ ७ ॥ ततःक्रोधात्परावृत्यरणाङ्गणमागतेनकुंभकर्णेन मध्येस्वेनसहयोधितवतोलक्ष्मणस्यश्लाघनेन रामंप्रत्यभियानम् ॥ ८ ॥ रामकुंभकर्णयोर्वीरवादपूर्वकंमहायुद्धम् ॥ ९ ॥ रामेण बाणचतुष्टयेनकुंभकर्णस्यबाहुपादच्छेदपूर्वकं शरान्तरेणशिरश्छेदनम् ॥ १० ॥ कुंभकर्णवधानन्तरं देवर्ष्यादिभिस्सहवानरैः सहर्षं श्रीरामपूजनम् ॥ ११ ॥

ते निवृत्ता महाकायाः श्रुत्वाऽङ्गदवचस्तदा ॥ नैष्ठिकीं बुद्धिमासाद्य सर्वे संग्रामकाङ्क्षिणः ॥ १ ॥
समुदीरितवीर्याश्च समारोपितविक्रमाः ॥ पर्यवस्थापिता वाक्यैरङ्गदेन वलीमुखाः ॥ २ ॥
प्रयाताश्च गता हर्षं मरणे कृतनिश्चयाः ॥ चक्रुः सुतुमुलं युद्धं वानरास्त्यक्तजीविताः ॥ ३ ॥
अथ वृक्षान्महाकायाः सानूनि सुमहान्ति च ॥ वानरास्तूर्णमुद्यम्य कुम्भकर्णमभिद्रुताः ॥ ४ ॥

यदि ततो यशो नाशं गमिष्यतीति योजना ॥ २९ ॥ शूरं पराक्रमवन्तं । कनकाङ्गदं उत्साहातिशयेन प्रकाशितस्वर्णाङ्गदं ॥ ३० ॥ कदनं मर्दनं । दयितमिष्टं ॥ ३१—३२ ॥ अनुमानैः सालगिरिभेदनादिदृष्टान्तपुरस्कृतैर्युक्तिविशेषैः ॥ ३३ ॥ आज्ञाप्रतीक्षाः सुग्रीवाद्याज्ञाप्रतीक्षाः ॥ ३४ ॥ त्वरिततराभिमुखं त्वरिततरं अभिमुखं चेति क्रियाविशेषणं । अत्र वायुपुत्रस्तु न पलाय्य निवृत्तः । किंतु ऋषभादिभिर्मिलित्वा कुम्भकर्णेन सह युद्धार्थं निवृत्त इति ज्ञेयं ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥

ते निवृत्ता इत्यादि, वानरास्त्यक्तजीविता इत्यन्तमेकं वाक्यं ॥ नैष्ठिकीं निष्ठा नाशः तत्संबन्धिनीं । मरणव्यवसायिनीमित्यर्थः । समुदीरितवीर्याः कथितात्मपराक्रमाः । समारोपितविक्रमाः समवलम्बितपराक्रमाः । मरणनिश्चयहेतुमाह—त्यक्तजीविता इति ।

कतक० अत्रसर्गविच्छेदोऽसांप्रदायिकः । एकप्रकरणत्वाद्वृत्तभेदाभावाच्च ॥ १ ॥ **स०** समारोपितविक्रमाः समारोपितः

[**पा०**] १ ङ. च. झ. ञ. ट. सान्त्वनैश्चानुमानैश्च. घ. सान्त्वनैरनुमानैश्च. २ क. ख. ग. ङ.—ट. मास्थाय. ३ क. ग.—ट. वीर्यास्ते. ४ ङ. झ. ट. बलीयसा. ५ ख. ग. घ. छ.—ट. मभिद्रवन्.

स कुम्भकर्णः संक्रुद्धो गदामुद्यम्य वीर्यवान् ॥ अर्दयन्सुमहाकायः समन्ताद्व्याक्षिपद्रिपून् ॥ ५ ॥
शतानि सप्त चाष्टौ च सहस्राणि च वानराः ॥ प्रकीर्णाः शेरते भूमौ कुम्भकर्णेन पोथिताः ॥ ६ ॥
षोडशाष्टौ च दश च विंशत्रिंशत्तथैव च ॥ परिक्षिप्य च बाहुभ्यां खादन्विपरिधावति ॥
भक्षयन्भृशसंक्रुद्धो गरुडः पन्नगानिव ॥ ७ ॥
कृच्छ्रेण च समाश्वस्ताः संगम्य च ततस्ततः ॥ वृक्षाद्रिहस्ता हरयस्तस्थुः संग्राममूर्धनि ॥ ८ ॥
ततः पर्वतमुत्पाट्य द्विविदः प्लवगर्षभः ॥ दुद्राव गिरिशृङ्गाभं विलम्ब इव तोयदः ॥ ९ ॥
तं समुत्पत्य चिक्षेप कुम्भकर्णस्य वानरः ॥ तमप्राप्तो महाकायं तस्य सैन्येऽपतत्तदा ॥ १० ॥
ममर्दाश्वान्गजांश्चापि रथांश्चैव नगोत्तमः ॥ तानि चान्यानि रक्षांसि पुनश्चान्यद्विरेः शिरः ॥ ११ ॥
तच्छैलशृङ्गाभिहतं हताश्वं हतसारथि ॥ रक्षसां रुधिरक्लिन्नं बभूवायोधनं महत् ॥ १२ ॥
रथिनो वानरेन्द्राणां शरैः कालान्तकोपमैः ॥ शिरांसि नदतां जह्रुः सहसा भीमनिस्स्वनाः ॥ १३ ॥
वानराश्च महात्मानः समुत्पाट्य महाद्रुमान् ॥ रथानश्वान्गजानुष्ट्रान्राक्षसानभ्यसूदयन् ॥ १४ ॥
हनुमाञ्शैलशृङ्गाणि वृक्षांश्च विविधान्बहून् ॥ ववर्ष कुम्भकर्णस्य शिरस्यम्बरमास्थितः ॥ १५ ॥
तानि पर्वतशृङ्गाणि शूलेन स बिभेद ह ॥ बभञ्ज वृक्षवर्षं च कुम्भकर्णो महाबलः ॥ १६ ॥

ततो हरीणां तदनीकमुग्रं दुद्राव शूलं निशितं प्रगृह्य ॥
तस्थौ ततोस्थापततः पुरस्तान्महीधराग्रं हनुमान्प्रगृह्य ॥ १७ ॥
स कुम्मकर्ण कुपितो जघान वेगेन शैलोत्तमभीमकायम् ॥
स चुक्षुभे तेन तदाऽभिभूतो मेदार्द्रगात्रो रुधिरावसिक्तः ॥ १८ ॥
स शूलमाविध्य तडित्प्रकाशं गिरिं यथा प्रज्वलिताग्रशृङ्गम् ॥
बाह्वन्तरे मारुतिमाजघान गुहोचलं क्रौञ्चमिवोग्रशक्त्या ॥ १९ ॥
स शूलनिर्भिन्नमहाभुजान्तरः प्रविह्वलः शोणितमुद्वमन्मुखात् ॥
ननाद भीमं हनुमान्महाहवे युगान्तमेघस्तनितस्वनोपमम् ॥ २० ॥

जीवनाशारहिता इत्यर्थः ॥ १—४ ॥ व्याक्षिपत् अपातयत् ॥ ५ ॥ प्रकीर्णाः शिथिलावयवाः । पोथिताः हिंसिताः । कुम्भकर्णस्यैकेन व्यापारेण शतादिसंघरूपेण पतिता इत्यर्थः ॥ ६ ॥ परिक्षिप्य परिगृह्य । खादन् भक्षयन् । पन्नगान् भक्षयन्निवेति गरुडविशेषणं ॥ ७ ॥ हरयः बलवन्त इति शेषः । संगम्य संभूय ॥ ८ ॥ विशेषेण लम्बत इति विलम्बः । पचाद्यच् । गिरिशृङ्गाभं गिरिशृङ्गवदुन्नतं ॥ ९ ॥ तं कुम्भकर्णं । समुत्पत्य समीपमागत्य । कुम्भकर्णस्य कुम्भकर्णाय ॥ १० ॥ ममर्देत्यादि त्रिपादश्लोकः ॥ तानि प्रसिद्धानि । रक्षांसि ममर्देति पूर्वेणान्वयः । पुनश्चेति पादश्लोकः । अन्यत् गिरेःशृङ्गं चिक्षेपेति योज्यं ॥ ११ ॥ तच्छैलशृङ्गाभिहतं अनन्तरप्रयुक्तशैलशृङ्गाभिहतसैन्यं । आयोधनं युद्धं ॥ १२ ॥ कालान्तकः प्रलयकालरुद्रः ॥ १३ ॥ अभ्यसूदयन् अघ्नन् ॥ १४—१६ ॥ दुद्राव द्रावयामास ॥ १७ ॥ मेदार्द्रेत्यत्र संधिरार्षः ॥ १८ ॥ आविध्य भ्रामयित्वा । गुहः स्कन्दः ॥ १९ ॥ प्रविह्वलः प्रमुह्यन् । युगान्तेति ।

भीत्यागतःपुनरङ्गदोज्जीवितः विक्रमोयेषांते ॥ २ ॥ स० गदां माययासृष्टां । माययागदात्वेनदर्शनाद्गदापदेनशूलंवाग्राह्यं । पूर्वोत्तरवाक्संवादात् ॥ ५ ॥ स० आयोधनं युद्धमण्डलं ॥ १२ ॥ स० मेघस्तनितस्वनोपमं । अत्रस्तनितशब्दोध्वनिमात्रपरः । नवि-

[पा०] १ ङ. च. झ. ट. धर्षयन्समहा. २ ङ. झ. ट. ताडिताः. च. छ. योधिताः. ३ घ. शैलेन्द्रमिव. ४ घ. समासाद्य. ग. ङ. झ. समुत्पाट्य. क. च. छ. ञ. ट. समुत्क्षिप्य. ५ क. ग. घ. ङ. झ. ञ. ट. कुंभकर्णाय. ६ क. ख. घ. च. महाशैलस्तस्य. ७ ङ. झ. गजोत्तमान्. ८ ङ. झ. ट. मुद्वमन्मुखा.

ततो विनेदुः सहसा प्रहृष्टा रक्षोगणास्तं व्यथितं समीक्ष्य ॥
प्लवङ्गमास्तु व्यथिता भयार्ताः प्रदुद्रुवुः संयति कुम्भकर्णात् ॥ २१ ॥
ततस्तु नीलो बलवान्पर्यवस्थापयन्बलम् ॥ प्रविचिक्षेप शैलाग्रं कुम्भकर्णाय धीमते ॥ २२ ॥
तमापतन्तं संप्रेक्ष्य मुष्टिनाऽभिजघान ह ॥ मुष्टिप्रहाराभिहतं तच्छैलाग्रं व्यशीर्यत ॥ २३ ॥
सविस्फुलिङ्गं सज्वालं निपपात महीतले ॥ २४ ॥
ऋषभः शरभो नीलो गवाक्षो गन्धमादनः ॥ पञ्च वानरशार्दूलाः कुम्भकर्णमुपाद्रवन् ॥ २५ ॥
शैलैर्वृक्षैस्तलैः पादैर्मुष्टिभिश्च महाबलाः ॥ कुम्भकर्णं महाकायं सर्वतोऽभिप्रदुद्रुवुः ॥ २६ ॥
स्पर्शानिव प्रहारांस्तान्वेदयानो न विव्यथे ॥ ऋषभं तु महावेगं बाहुभ्यां परिषस्वजे ॥ २७ ॥
कुम्भकर्णभुजाभ्यां तु पीडितो वानरर्षभः ॥ निपपातर्षभो भीमः प्रमुखाद्वान्तशोणितः ॥ २८ ॥
मुष्टिना शरभं हत्वा जानुना नीलमाहवे ॥ आजघान गवाक्षं तु तलेनेन्द्ररिपुस्तदा ॥ २९ ॥
पादेनाभ्यहनत्क्रुद्धस्तरसा गन्धमादनम् ॥ दत्तप्रहारव्यथिता मुमुहुः शोणितोक्षिताः ॥ ३० ॥
निपेतुस्ते तु मेदिन्यां निकृत्ता इव किंशुकाः ॥ तेषु वानरमुख्येषु पतितेषु महात्मसु ॥
वानराणां सहस्राणि कुम्भकर्णं प्रदुद्रुवुः ॥ ३१ ॥
तं शैलमिव शैलाभाः सर्वे ते प्लवगर्षभाः ॥ समारुह्य समुत्पत्य ददंशुश्च महाबलाः ॥ ३२ ॥
तं नखैर्दशनैश्चापि मुष्टिभिर्जानुभिस्तथा ॥ कुम्भकर्णं महाकायं ते जघ्नुः प्लवगर्षभाः ॥ ३३ ॥
स वानरसहस्रैस्तैराचितः पर्वतोपमः ॥ रराज राक्षसव्याघ्रो गिरिरात्मरुहैरिव ॥ ३४ ॥
बाहुभ्यां वानरान्सर्वान्प्रगृह्य सुमहाबलः ॥ भक्षयामास संक्रुद्धो गरुडः पन्नगानिव ॥ ३५ ॥
प्रक्षिप्ताः कुम्भकर्णेन वक्त्रे पातालसन्निभे ॥ नासापुटाभ्यां निर्जग्मुः कर्णाभ्यां चैव वानराः ॥३६॥
भक्षयन्भृशसंक्रुद्धो हरीन्पर्वतसन्निभः ॥ बभञ्ज वानरान्सर्वान्संक्रुद्धो राक्षसोत्तमः ॥ ३७ ॥
मांसशोणितसंक्लेदां भूमिं कुर्वन्स राक्षसः ॥ चचार हरिसैन्येषु कालाग्निरिव मूर्च्छितः ॥ ३८ ॥
वज्रहस्तो यथा शक्रः पाशहस्त इवान्तकः ॥ शूलहस्तो बभौ सङ्ख्ये कुम्भकर्णो महाबलः ॥ ३९ ॥
यथा शुष्कान्यरण्यानि ग्रीष्मे दहति पावकः ॥ तथा वानरसैन्यानि कुम्भकर्णो विनिर्दहत् ॥ ४० ॥

युगान्तमेघस्य स्तनितरूपो यः स्वनः तत्तुल्यमिति क्रियाविशेषणं ॥ २० ॥ कुम्भकर्णात् भयार्ता इत्यन्वयः । संयति युद्धे ॥ २१ ॥ पर्यवस्थापयन्बलमिति । पलायमानान् सन्निवर्तयन्नित्यर्थः ॥ २२ ॥ व्यशीर्यत शीर्णमभूत् ॥ २३—२५ ॥ पादैः प्रहारोद्यतैः । सर्वत्रोपलक्षणे तृतीया ॥ २६ ॥ स्पर्शानिव सुखस्पर्शानिव । सुखमर्दनमिव जानन्नित्यर्थः ॥ २७ ॥ प्रेति छेदः । मुखात् वान्तशोणितः प्रणिपपातेत्यन्वयः । "व्यवहिताश्च" इत्युपसर्गस्य व्यवहितप्रयोगः । वान्तशोणितः उद्गीर्णरक्तः ॥ २८—३१ ॥ समारुह्य समुत्पत्य । समुत्पत्य समारुह्येति क्रमः ॥३२—३३॥ आचितः व्याप्तः । आत्मरुहैः वृक्षैः ॥ ३४—३६ ॥ भक्षयन् बभञ्ज । भक्षणार्थं बभञ्जेत्यर्थः ॥ ३७ ॥ मांसशोणितसंक्लेदां मांसशोणितसंसिक्तामित्यर्थः ॥ ३८—३९ ॥ विनिर्दहत् विनिरदहत् ॥ ४० ॥

यतेऽपमायस्यतश्रोपमं । मेघस्तनितंस्वनेनोपमंयस्मिन्कर्मणितद्यथाभवतितथा । मेघध्वन्यपेक्षयाऽधिक्यंयथाभवतितथाननाद ॥२०॥ स० स्पर्शानिव कुसुममालादिस्पर्शानिव । वेदयानः स्वार्थेणिच् । जानन् । तदेवाह—नविव्यथइति ॥ २७ ॥ स० प्रमु-

[पा०] १ क. ग. घ. च. छ. ञ. नीलश्चिक्षेप. २ ख. च. छ. ञ. मुष्टिभिर्जानुभिस्तदा. ३ ङ. ञ. ट. महाकायं निजघ्नुस्सर्वतोयुधि. ज. महाकायंसर्वतोऽभिनिजघ्निरे. ४ क. ख. ग. ङ.—ट. प्रमुखागतशोणितः. ५ ङ. ञ. ट. ददंशुः प्लवगर्षभाः. ६ च. छ. ञ. ट. महाबाहुं.

ततस्ते वध्यमानास्तु हतयूथा विनायकाः ॥ वानरा भयसंविग्ना विनेदुर्विस्वरं भृशम् ॥ ४१ ॥
अनेकशो वध्यमानाः कुम्भकर्णेन वानराः ॥ राघवं शरणं जग्मुर्व्यथिताः खिन्नचेतसः ॥ ४२ ॥
प्रभग्नान्वानरान्दृष्ट्वा वज्रहस्तसुतात्मजः ॥ अभ्यधावत वेगेन कुम्भकर्ण महाहवे ॥ ४३ ॥
शैलशृङ्गं महद्गृह्य विनदंश्च मुहुर्मुहुः ॥ त्रासयन्राक्षसान्सर्वान्कुम्भकर्णपदानुगान् ॥ ४४ ॥
चिक्षेप शैलशिखरं कुम्भकर्णस्य मूर्धनि ॥ ४५ ॥
स तेनाभिहतोत्यर्थं गिरिशृङ्गेण मूर्धनि ॥ कुम्भकर्णः प्रजज्वाल कोपेन महता तदा ॥ ४६ ॥
सोभ्यधावत वेगेन वालिपुत्रममर्षणः ॥ कुम्भकर्णो महानादस्त्रासयन्सर्ववानरान् ॥
शूलं ससर्ज वै रोषादङ्गदे स महाबलः ॥ ४७ ॥
तमापतन्तं बुद्ध्वा तु युद्धमार्गविशारदः ॥ लाघवान्मोचयामास बलवान्वानरर्षभः ॥ ४८ ॥
उत्पत्य चैनं सहसा तलेनोरस्यताडयत् ॥ स तेनाभिहतः कोपात्प्रमुमोहाचलोपमः ॥ ४९ ॥
स लब्धसंज्ञो बलवान्मुष्टिमावर्त्य राक्षसः ॥ अपहासेन चिक्षेप विसंज्ञः स पपात ह ॥ ५० ॥
तस्मिन्प्लवगशार्दूले विसंज्ञे पतिते भुवि ॥ तच्छूलं समुपादाय सुग्रीवमभिदुद्रुवे ॥ ५१ ॥
तमापतन्तं संप्रेक्ष्य कुम्भकर्णं महाबलम् ॥ उत्पपात तदा वीरः सुग्रीवो वानराधिपः ॥ ५२ ॥
पर्वताग्रं समुत्क्षिप्य समाविध्य महाकपिः ॥ अभिदुद्राव वेगेन कुम्भकर्णं महाबलम् ॥ ५३ ॥
तमापतन्तं संप्रेक्ष्य कुम्भकर्णः प्लवङ्गमम् ॥ तस्थौ विकृतसर्वाङ्गो वानरेन्द्रसमुन्मुखः ॥ ५४ ॥
कपिशोणितदिग्धाङ्गं भक्षयन्तं प्लवङ्गमान् ॥ कुम्भकर्णं स्थितं दृष्ट्वा सुग्रीवो वाक्यमब्रवीत् ॥ ५५ ॥
पातिताश्च त्वया वीराः कृतं कर्म सुदुष्करम् ॥ भक्षितानि च सैन्यानि प्राप्तं ते परमं यशः ॥ ५६ ॥
त्यज तद्वानरानीकं प्राकृतैः किं करिष्यसि ॥ सहस्वैकनिपातं मे पर्वतस्यास्य राक्षस ॥ ५७ ॥
तद्वाक्यं हरिराजस्य सत्त्वधैर्यसमन्वितम् ॥ श्रुत्वा राक्षसशार्दूलः कुम्भकर्णोऽब्रवीद्वचः ॥ ५८ ॥
प्रजापतेस्तु पौत्रस्त्वं तथैवर्क्षरजःसुतः ॥ श्रुतपौरुषसंपन्नः कस्माद्वर्जसि वानर ॥ ५९ ॥

विनायकाः विगतनायकाः ॥ ४१–५३ ॥ समुन्मुखः अभिमुखः ॥ ५४—५८ ॥ प्रजापतेरिति । इदमत्रैतिह्यमनुसंधेयं । पुरा किल ब्रह्मणो जृम्भमाणस्य वदनादृक्षरजा नाम वानरो जातः । स कदाचित्पर्यटन् ब्रह्मलोकेप्सरोरूपकारिणि कस्मिंश्चित्सरसि निमज्याप्सरोरूपमभजत् । तां दृष्ट्वा काममोहितावित्यादित्यौ हस्तेन युगपदगृह्णीतां । तत्रान्तरे तयोः क्षुभितं रेतोऽपतत् । तत्र द्वौकुमारावभवतां । वाले पतनाद्वाली ग्रीवायां पतनात्सुग्रीवः । तं दृष्ट्वा प्रहस्य ब्रह्मा अप्सरोरूपधारिणमृक्षरजसं यथापूर्वरूपप्राप्तये कुमारौ गृहीत्वा अन्यस्मिन्वानररूपकारिणि सरसि निमज्जेत्यभ्यधात् । सोपि तथा कृत्वा कुमाराभ्यां सह वानररूपमभजदृक्षरजाः । तत्पुत्रौ वालिसुग्रीवाविति । तदनेन प्रकारेण सुग्रीवः प्रजापतेः पौत्रः ऋक्षरजसः पुत्रश्च । काश्यपात्प्रजापतेर्विवस्वान्

खागतशोणितः कुंभकर्णप्रमुखतएवागतंशोणितंयस्यसः । एतेनाप्रतिष्ठाप्रतिमतासूच्यते ॥ २८ ॥ स० वानराभयसंविग्नाइति पदमेकं । वानराणांसंघोवानरं । तस्ययदभयं भयाभावः क्षेमइतियावत् । तदर्थंसंविग्नाः । कोवाकथंवारक्षतीतिचिन्तातान्ताः । नराभयेति वेतिपदं । हेनराभय मनुष्यमध्येऽभय रामेति इतयूथावाविनेदुरितिवा ॥ ४१ ॥ स० वज्रहस्तात्मजात्मजः इन्द्रपुत्रवालिपुत्रोञ्जदः ॥ ४३ ॥ ति० तदा पतन्तं । पुंस्त्वमार्ष ॥ स० तमापतन्तंशूलं दुष्टवधार्थप्रयुक्तकीलवाञ्छूलस्तं ॥ " शूलोदुष्टवधार्थायकीलवान् " इतिविश्वः । पुंस्त्वमतःसंभवि । लाघवादापतन्तमात्मानंततस्माच्छूलात्मोचयामासमुक्तमकरो-

[पा०] १ ङ. झ. ञ. ट. हतयूथाःप्लवङ्गमाः. २ ङ. झ. ट. विनेदुर्विकृतैःस्वरैः. ३ झ.—ठ. वज्रहस्तात्मजात्मजः. ४ क. च. झ. हतोमूर्ध्निशैलेनेन्द्रारिपुस्तदा. ५ क. ख. घ.—ट. ममर्षणं. ६ क. घ.—ट. लब्धसंज्ञोतिबलोमुष्टिंसंगृह्य. ७ च. छ. झ. ट. विवृतसर्वाङ्गः. ८ घ. त्यज्यतांवानरानीकं.

स कुम्भकर्णस्य वचो निशम्य व्याविध्य शैलं सहसा मुमोच ॥
तेनाजघानोरसि कुम्भकर्ण शैलेन वज्राशनिसन्निभेन ॥ ६० ॥
तच्छैलशृङ्गं सहसा विशीर्णं भुजान्तरे तस्य तदा विशाले ॥
ततो विषेदुः सहसा प्लवङ्गा रक्षोगणाश्चापि मुदा विनेदुः ॥ ६१ ॥
स शैलशृङ्गाभिहतश्चुकोप ननाद कोपाच्च विवृत्य वक्त्रम् ॥
व्याविध्य शूलं च तडित्प्रकाशं चिक्षेप हर्यृक्षपतेर्वधाय ॥ ६२ ॥
तत्कुम्भकर्णस्य भुजप्रविद्धं शूलं शितं काञ्चनधामजुष्टम् ॥
क्षिप्रं समुत्पत्य निगृह्य दोर्भ्यां बभञ्ज वेगेन सुतोऽनिलस्य ॥ ६३ ॥
कृतं भारसहस्रस्य शूलं कालायसं महत् ॥ बभञ्ज जानुन्यारोप्य प्रहृष्टः प्लवगर्षभः ॥ ६४ ॥
शूलं भग्नं हनुमता दृष्ट्वा वानरवाहिनी ॥ हृष्टा ननाद बहुशः सर्वतश्चापि दुद्रुवे ॥
[बभूवाथ परित्रस्तो राक्षसो विमुखोऽभवत् ॥ ६५ ॥]
सिंहनादं च ते चक्रुः प्रहृष्टा वनगोचराः ॥ मारुतिं पूजायांचक्रुर्दृष्ट्वा शूलं तथागतम् ॥ ६६ ॥
स तत्तदा भग्नमवेक्ष्य शूलं चुकोप रक्षोधिपतिर्महात्मा ॥
उत्पाट्य लङ्कामलयात्स शृङ्गं जघान सुग्रीवमुपेत्य तेन ॥ ६७ ॥
स शैलशृङ्गाभिहतो विसंज्ञः पपात भूमौ युधि वानरेन्द्रः ॥
तं प्रेक्ष्य भूमौ पतितं विसंज्ञं नेदुः प्रहृष्टास्त्वथ यातुधानाः ॥ ६८ ॥
तमभ्युपेत्याद्भुतघोरवीर्यं स कुम्भकर्णो युधि वानरेन्द्रम् ॥
जहार सुग्रीवमभिप्रगृह्य यथाऽनिलो मेघमतिप्रचण्डः ॥ ६९ ॥
स तं महामेघनिकाशरूपमुत्पाट्य गच्छन्युधि कुम्भकर्णः ॥
रराज मेरुप्रतिमानरूपो मेरुर्यथाभ्युच्छ्रितघोरशृङ्गः ॥ ७० ॥

विवस्वतः सुग्रीव इत्यन्ये ॥ ५९ ॥ व्याविध्य तोलयित्वा ॥ ६०—६३ ॥ भारसहस्रस्य भारसहस्रेण कृतं जानुन्यारोप्य बभञ्जेत्यन्वयः ॥ ६४ ॥ सर्वतः सर्वस्मात्प्रदेशात् । दुद्रुवे आजगाम ॥ ६५—६६ ॥ सुग्रीवमुपेत्य तेन शृङ्गेण जघान । त्रिकूटशिखरस्थलद्वारे स्थित्वा युध्यतः कुम्भकर्णस्य प्रदेशान्तरस्थलङ्कामलयशृङ्गोत्पाटनं कथमुपपद्यत इति चेत् तदनुगुणप्रमाणशरीरत्वान्न दोषः । लङ्कामलयशब्देन त्रिकूटं वोपचर्यते ॥ ६७-६९ ॥ अभ्युच्छ्रितं उन्नतं । स्वाकारसादृश्याय प्रथमं मेरूपादानं । द्वितीयं तु

दितिवा । बलवान्यःशूलस्तमापतन्तं । बलवानङ्गदः ॥ ४८ ॥ स० जानु मा आरोप्य तत् आहृष्टः इतिच्छेदः । तत् शूलं । जानु आरोप्य जानुनिधाय । तत् सुग्रीवोपरिपतनं मा इतिबभञ्ज । प्लवङ्गमोहनुमान् आहृष्टः अतिहृष्टः ॥ बहुपुराणादिष्वियं कथा सुग्रीवग्रहणानन्तरं कक्ष्यानिक्षिप्तकपिपतिर्यदालङ्कानिलयास्त्रीपुंसजनैस्तुहिनसलिलमाल्यैःसेचितः तस्मान्मोचितःसुग्रीवकरोत्कृत्तगृहीतघोणाकर्णउत्पपात तदामक्षिकोपमः पाक्षिकनीतिर्लौकिकीमनुसृत्यानुसृत्यचतंगतोहनुमांस्तदातन्मुक्तंसुग्रीवाशक्यपरिहारंशूलंबभञ्जेतिश्रूयते । अत्रव्यत्ययस्यकथनंलेखकप्रमादतः । श्लोकाश्चैतेऽनन्तरंपठनीयाइतिवा " कुर्युःक्वचिच्चव्यत्ययं " इतिकविकृतएवार्यंहनुमत्पराक्रमक्रमवर्णनपरायत्तचित्ततयाव्यत्ययसहितवाज्ञेयम् । ननुभारतेवनपर्वणि " हृत्वाकर्णोच्छ्रनासिकं " इत्युक्तेरत्रकर्णनासिकोक्तिःकथमितिचेन्न । नासिकोत्कर्तनकालएवौष्ठद्वयस्यतयासहागमनंज्ञातुंसुशकमित्यत्रानुक्तिः स्पष्टप्रतिपत्त्य-

[पा०] १ झ. भुजप्रणुन्नं. २ क. ङ. च. छ. झ. ञ. ट. जानुमारोप्यतदाहृष्टःप्लवङ्गमः. ३ ज. सर्वतश्चमहास्वनं. ४ इदमर्धं ङ. झ. ट. पाठेषुदृश्यते. ५ ख. ग. प्रहृष्टवदनास्तदा. ६ ख. च. छ. ञ. पूजयामासुः. ७ ख.—ट. प्रहृष्टायुधि. ८ घ.—छ. झ. ञ. ट. समभ्युपेत्य. ९ ङ. च. छ. झ. ञ. ट. मेघमिव.

[1]ततस्तमुत्पाट्य जगाम वीरः संस्तूयमानो युधि [2]राक्षसेन्द्रैः ॥
शृण्वन्निनादं त्रिदशालयानां प्लवङ्गराजग्रहविस्मितानाम् ॥ ७१॥
ततस्तमादाय तदा स मेने हरीन्द्रमिन्द्रोपममिन्द्रवीर्यः ॥
अस्मिन्हृते सर्वमिदं हृतं स्यात्सराघवं सैन्यमितीन्द्रशत्रुः ॥ ७२ ॥
विद्रुतां वाहिनीं दृष्ट्वा वानराणां ततस्ततः ॥ कुम्भकर्णेन सुग्रीवं गृहीतं चापि वानरम् ॥ ७३ ॥
हनुमांश्चिन्तयामास मतिमान्मारुतात्मजः ॥ एवं गृहीते सुग्रीवे किं कर्तव्यं मया भवेत् ॥ ७४ ॥
यद्वै न्याय्यं मया कर्तुं [3]तत्करिष्यामि सर्वथा ॥ भूत्वा पर्वतसंकाशो नाशयिष्यामि राक्षसम् ॥ ७५॥
मया हते संयति कुम्भकर्णे महाबले मुष्टिविकीर्णदेहे ॥
विमोचिते वानरपार्थिवे च भवन्तु हृष्टाः प्लवगाः समस्ताः ॥ ७६ ॥
अथवा स्वयमप्येष मोक्षं प्राप्स्यति [4]पार्थिवः ॥ गृहीतोऽयं [5]यदि भवेत्त्रिदशैः सासुरोरगैः ॥ ७७ ॥
मन्ये न तावदात्मानं बुध्यते वानराधिपः ॥ शैलप्रहाराभिहतः कुम्भकर्णेन संयुगे ॥ ७८ ॥
अयं मुहूर्तात्सुग्रीवो लब्धसंज्ञो महाहवे ॥ आत्मनो वानराणां च यत्पथ्यं तत्करिष्यति ॥ ७९ ॥
मया तु मोक्षितस्यास्य सुग्रीवस्य महात्मनः ॥ अप्रीतिश्च भवेत्कष्टा कीर्तिनाशश्च शाश्वतः ॥ ८० ॥
तस्मान्मुहूर्तं काङ्क्षिष्ये विक्रमं [6]पार्थिवस्य तु ॥ भिन्नं च वानरानीकं तावदाश्वासयाम्यहम् ॥ ८१ ॥
इत्येवं चिन्तयित्वा तु हनुमान्मारुतात्मजः ॥ भूयः संस्तम्भयामास वानराणां महाचमूम् ॥ ८२ ॥
स कुम्भकर्णोऽथ विवेश लङ्कां स्फुरन्तमादाय महाकपिं तम् ॥
विमानचर्यागृहगोपुरस्थैः [7]पुष्पाभ्यवर्षैरवकीर्यमाणः ॥ ८३ ॥
लाजगन्धोदवर्षैस्तु सिच्यमानः शनैः शनैः ॥ राजमार्गस्य शीतत्वात्संज्ञामाप महाबलः ॥ ८४ ॥
ततः स संज्ञामुपलभ्य कृच्छ्राद्बलीयसस्तस्य भुजान्तरस्थः ॥
अवेक्षमाणः पुरराजमार्गं विचिन्तयामास मुहुर्महात्मा ॥ ८५ ॥
एवं गृहीतेन कथं नु नाम शक्यं मया संप्रतिकर्तुमद्य ॥
तथा करिष्यामि यथा हरीणां भविष्यतीष्टं च हितं च कार्यम् ॥ ८६ ॥

सुग्रीवधारणकालिकसादृश्याय ॥ ७० ॥ उत्पाट्य उद्धृत्य । त्रिदशालयानां स्वर्गिणां ॥ ७१ ॥ बलवान्कुंभकर्णो युद्धे पतितं सुग्रीवं किमर्थं हृतवानित्यत्राह—ततस्तमादायेति ॥ ७२—७६ ॥ सासुरोरगैः सुरैः गृहीतोप्ययं मोक्षं प्राप्तुं शक्नोति । किं पुनरनेन राक्षसापसदेनेति भावः ॥ ७७ ॥ तर्हि मोचयित्वात्मानं किमिति न निवर्तत इत्यत्राह—मन्य इत्यादिना ॥ तावदित्यवधारणे । आत्मानमेव न बुध्यतइत्यर्थः । पथ्यं हितं ॥ ७८—७९ ॥ कृच्छ्रगतः स्वामी भृत्येनावश्यं मोचनीय एवेत्याशङ्क्याह—मया त्विति ॥ ८० ॥ तावत् सुग्रीवागमनपर्यन्तं ॥ ८१ ॥ संस्तम्भयामास गमनान्निवर्तयामास ॥ ८२ ॥ पुष्पाभ्यवर्षैः श्लाघ्यपुष्पवृष्टिभिः ॥ ८३—८५ ॥ संप्रतिकर्तुं सम्यक् प्रतिकर्तुं ।

र्यंतत्रोक्तिरितिसंभवात् ॥ ६४ ॥ **ति०** लाजगन्धोदवर्षैःसिच्यमानः दैवगत्यामोहनिवृत्तये । सुग्रीवइतिशेषः ॥ **स०** लाजगन्धोदवर्षैः लाजमन्त्रोशीरं । गन्धसाहचर्यात् । सिच्यमानइतिखारस्याच्च । " उशीरेलाजमुद्दिष्टं " इतिविश्वः ॥ ८४ ॥ **स०** पुरा-

[**पा०**] १ ङ. झ. ञ. ट. ततस्तमादाय. २ ग. घ. ङ. झ. ट. राक्षसेन्द्रः. ३ ङ. छ. झ. ट. करिष्याम्यसंशयं. ४ ङ. झ. ट. वानरः. ५ ज. युधिभवेत्. ६ ङ. झ. ट. मोक्षितस्यतु. क. ख. घ. च. छ. ञ. पार्थिवस्यनः. ७ ख. सलाजपुष्पैः. ८ ङ. छ. झ. ट. रभिपूज्यमानः.

ततः कराग्रैः सहसा समेत्य राजा हरीणाममरेन्द्रशत्रुम् ॥
खरैश्च कर्णौ दशनैश्च नासां ददंश पार्श्वेषु च कुम्भकर्णम् ॥ ८७ ॥
स कुम्भकर्णो हृतकर्णनासो विदारितस्तेन विमर्दितश्च ॥
रोषाभिभूतः क्षतजार्द्रगात्रः सुग्रीवमाविध्य पिपेष भूमौ ॥ ८८ ॥
स भूतले भीमबलाभिपिष्टः सुरारिभिस्तैरभिहन्यमानः ॥
जगाम खं वेगवदभ्युपेत्य पुनश्च रामेण समाजगाम ॥ ८९ ॥
कर्णनासाविहीनस्तु कुम्भकर्णो महाबलः ॥ रराज शोणितैः सिक्तो गिरिः प्रस्रवणैरिव ॥ ९० ॥
शोणितार्द्रो महाकायो राक्षसो भीमविक्रमः ॥ युद्धायाभिमुखो भूयो मनश्चक्रे महाबलः ॥ ९१ ॥
अमर्षाच्छोणितोद्गारी शुशुभे रावणानुजः ॥ नीलाञ्जनचयप्रख्यः ससंध्य इव तोयदः ॥ ९२ ॥
गते तु तस्मिन्सुरराजशत्रुः क्रोधात्प्रदुद्राव रणाय भूयः ॥
अनायुधोऽसीति विचिन्त्य रौद्रो घोरं तदा मुद्गरमाससाद ॥ ९३ ॥
ततः स पुर्याः सहसा महौजा निष्क्रम्य तद्वानरसैन्यमुग्रम् ॥
[तेनैव रूपेण बभञ्ज रुष्टः प्रहारमुष्ट्या च पदेन सद्यः ॥]
बभक्ष रक्षो युधि कुम्भकर्णः प्रजा युगान्ताग्निरिव प्रदीप्तः ॥ ९४ ॥
बुभुक्षितः शोणितमांसगृध्नुः प्रविश्य तद्वानरसैन्यमुग्रम् ॥
चखाद रक्षांसि हरीन्पिशाचान्ऋक्षांश्च मोहाद्युधि कुम्भकर्णः ॥ ९५ ॥
यथैव मृत्युर्हरते युगान्ते स भक्षयामास हरींश्च मुख्यान् ॥ ९६ ॥
एकं द्वे त्रीन्बहून्क्रुद्धो वानरान्सह राक्षसैः ॥ समादायैकहस्तेन प्रचिक्षेप त्वरन्मुखे ॥ ९७ ॥
संप्रस्रवंस्तदा मेदः शोणितं च महाबलः ॥ वध्यमानो नगेन्द्राग्रैर्भक्षयामास वानरान् ॥ ९८ ॥
ते भक्ष्यमाणा हरयो रामं जग्मुस्तदा गतिम् ॥ ९९ ॥
कुम्भकर्णो भृशं क्रुद्धः कपीन्खादन्प्रधावति ॥ १०० ॥
शतानि सप्त चाष्टौ च विंशत्त्रिंशत्तथैव च ॥ संपरिष्वज्य बाहुभ्यां खादन्विपरिधावति ॥ १०१ ॥

अन्यथा अद्येति पुनरुक्तिः स्यात् ॥८६॥ खरैः तीक्ष्णैः । कराग्रैः कर्णौ समेत्य संहृत्य दशनैः नासांचददंश । पार्श्वेषु कपोलयोरंसयोरुदरान्तरयोश्च पादाभ्यां विददारेति शेषः ॥ ८७ ॥ विमर्दितः संपीडितः ॥ ८८—८९ ॥ प्रस्रवणैः निर्दरैः ॥ ९० ॥ अभिमुखः सन् युद्धाय मनश्चक्र इति संबन्धः ॥ ९१—॥ ९५ ॥ शोणितमांसगृध्नुः शोणितमांसलोलुपः ॥ ९६–९७ ॥ संप्रस्रवन् तालुभ्यामुद्गमन् । शोणितं मेदश्च भक्षितवानरसंबन्धि ॥ ९८ ॥ त इत्यर्धं ॥ गतिं शरणं ॥ ९९ ॥ कुम्भकर्ण इत्यर्धं ॥ प्रधावति

जमार्गमवेक्षमाणः अनेनानेनाहमानीतइतिमतिर्जातेतिसूच्यते ॥ ८५ ॥ ति० नीलाञ्जनेत्यनेन निध्यञ्जनादिव्यावृत्तिः ॥ ९२ ॥ ति० रक्षआदेरपिखादनेहेतुः—मोहादिति । मद्यादिनेवरक्तपानजमदवैवश्यादितिभावः ॥ ९५ ॥ स० संप्रस्रवदित्युभयान्वयि । ताडितवानरदेहात् । भक्षयामास अपिबत् । अम्भक्षोवायुभक्षइतियथा । वानरांश्चचखादेत्यर्थः । 'संप्रस्रवत् । अडभावआर्षः । भक्षितवानरसंबन्धिशोणितादि' इतितीर्थनागोजिभट्टौ ॥९८॥ स० गतिं गम्यस्थानं । शरणमितियावत् ॥ ९९ ॥

[पा०] १ ङ. ञ. ट. शत्रोः. २ घ. चिच्छेदकर्णौ. ३ ङ. छ. ञ. ट. ददंशपादैर्विददारपार्श्वौ. ४ ङ. च. छ. ञ. ट. रदैर्नखैश्च. ५ ख. ङ.—ट. कन्दुकवज्जवेन. ६ क. ख. ग. ङ—ट. महात्मा. ७ इदमर्धं क. ख. घ. च. छ. ज. पाठेषुदृश्यते. ८ ञ.—ठ. संप्रस्रवत्तदा.

[मेदोवसाशोणितदिग्धगात्रः कर्णावसक्तग्रथितान्त्रमालः ॥
ववर्ष शूलानि सुतीक्ष्णदंष्ट्रः कालो युगान्तस्य इव प्रवृद्धः] ॥ १०२ ॥
तस्मिन्काले सुमित्रायाः पुत्रः परबलार्दनः ॥ चकार लक्ष्मणः क्रुद्धो युद्धं परपुरंजयः ॥ १०३ ॥
स कुम्भकर्णस्य शराञ्शरीरे सप्त वीर्यवान् ॥ निचखानाददे बाणान्विससर्ज च लक्ष्मणः ॥१०४॥
[पीड्यमानस्तदस्त्रं तु विशेषं तस्य राक्षसः ॥ ततश्चुकोप बलवान्सुमित्रानन्दवर्धनः ॥ १०५ ॥
अथास्य कवचं शुभ्रं जांबूनदमयं शुभम् ॥ प्रच्छादयामास शरैः संध्याभ्रमिव मारुतः ॥ १०६ ॥
नीलाञ्जनचयप्रख्यः शरैः काञ्चनभूषणैः ॥ आपीड्यमानः शुशुभे मेघैस्सूर्य इवांशुमान् ॥ १०७ ॥
ततः स राक्षसो भीमः सुमित्रानन्दवर्धनम् ॥ सावज्ञमेव प्रोवाच वाक्यं मेघौघनिस्स्वनः ॥१०८॥
अन्तकस्याप्यकष्टेन युधि जेतारमाहवे ॥ युध्यता मामभीतेन ख्यापिता वीरता त्वया ॥ १०९ ॥
अगृहीतायुधस्येह मृत्योरिव महामृधे ॥ तिष्ठन्नप्यग्रतः पूज्यः किमु युद्धप्रदायकः ॥ ११० ॥
ऐरावतं समारूढो वृतः सर्वामरैः प्रभुः ॥ नैव शक्रोपि समरे स्थितपूर्वः कदाचन ॥ १११ ॥
अद्य त्वयाऽहं सौमित्रे बालेनापि पराक्रमैः ॥ तोषितो गन्तुमिच्छामि त्वामनुज्ञाप्य राघवम्॥११२॥
यत्तु वीर्यबलोत्साहैस्तोषितोऽहं रणे त्वया ॥ राममेवैकमिच्छामि हन्तुं यस्मिन्हते हतम् ॥ ११३ ॥
रामे मयाऽत्र निहते येऽन्ये स्थास्यन्ति संयुगे ॥ तानहं योधयिष्यामि स्वबलेन प्रमाथिना ॥११४॥
इत्युक्तवाक्यं तद्रक्षः प्रोवाच स्तुतिसंहितम् ॥ मृधे घोरतरं वाक्यं सौमित्रिः प्रहसन्निव ॥ ११५ ॥
यस्त्वं शक्रादिभिर्देवैरसह्यः प्राप्य पौरुषम् ॥ तत्सत्यं नान्यथा वीर दृष्टस्तेऽद्य पराक्रमः ॥ ११६ ॥
एष दाशरथी रामस्तिष्ठत्यद्रिरिवाचलः ॥ इति श्रुत्वा ह्यनादृत्य लक्ष्मणं स निशाचरः] ॥ ११७ ॥
अतिक्रम्य च सौमित्रिं कुम्भकर्णो महाबलः ॥ राममेवाभिदुद्राव दारयन्निव मेदिनीम् ॥ ११८ ॥
अथ दाशरथी रामो रौद्रमस्त्रं प्रयोजयन् ॥ कुम्भकर्णस्य हृदये ससर्ज निशिताञ्शरान् ॥ ११९ ॥
तस्य रामेण विद्धस्य सहसाऽभिप्रधावतः ॥ अङ्गारमित्राः क्रुद्धस्य मुखान्निश्चेरुरर्चिषः ॥ १२० ॥
रामास्त्रविद्धो घोरं वै नदन्राक्षसपुङ्गवः ॥ अभ्यधावत संक्रुद्धो हरीन्विद्रावयन्रणे ॥ १२१ ॥
तस्योरसि निमग्नाश्च शरा बर्हिणवाससः ॥ [रेजुर्नीलाद्रिकटके नृत्यन्त इव बर्हिणः] ॥ १२२ ॥
हस्ताच्चापि परिभ्रष्टा पपातोर्व्यां महागदा ॥ आयुधानि च सर्वाणि विप्राकीर्यन्त भूतले ॥ १२३ ॥

प्राधावत् । उत्तरश्लोकेप्येवमेव ॥ १००—११९ ॥ अर्चिषः ज्वालाः ॥ १२०—१२१ ॥ बर्हिणवाससः | बर्हिणं बर्हिपत्रं वासो वासःस्थानं येषां ते तथोक्ताः । ॥ १२२ ॥ आयुधानि खड्गादीनि ॥ १२३ ॥

ति० कर्णावसक्तेत्यनेनाधोभागएवकर्णलुञ्छनंसुग्रीवेणकृतमितिगम्यते । कर्णावसक्ताः ग्रथिताः परस्परसंलग्नाः अन्त्रमालाः यस्यसः ॥ स० अवसक्ताः वानरशरीरान्मोचिताः ग्रथिताः स्वयमेवग्रन्थीभूयस्थिताः अन्त्रमालाः गलेयस्यसः । कर्णः श्रवणालुः इतरद्दूरोदीरितश्रवणपटुः । "कर्णःश्रवणालौ"इतिविश्वः । शूलानि मायासृष्टानि । निरायुधत्वमुद्ररायुधत्वमात्रोक्तेः । चलचारुकुण्डलः कुण्डलालङ्कृतंशिरइतिवक्ष्यमाणग्रन्थविरोधपरिहारै तद्व्याख्यावसरेकरिष्यामः ॥ १०२ ॥ ति० पीड्यमानःसराक्षसः तदस्त्रं विशेषं अस्त्रान्तरेणविगतशैषंचकारेत्यर्थः ॥ १०५ ॥ स० यद्यपि 'नीलाञ्जनचयप्रख्यः शरैः काञ्चनभूषणैः' इतिदार्ष्टान्तिकानुसारेण दृष्टान्तेपि मेघःसूर्यैरिवेतिवक्तव्यं । तथापि कवयितुर्मेलनमात्रेतात्पर्यं नसर्वसाम्यइतिज्ञेयं ॥ १०७ ॥ ति० अभ्यधावत । तंरामंविसंज्येतिशेषः ॥ १२१ ॥ स० कटके अद्रिनितंबे । बर्हिणोमयूराः नृत्यन्तीवरेजुः ॥ १२२ ॥ स० गदा मायामयीवा आयुधसामान्यवाचित्वाद्गदापदस्य तेनमुद्गरग्रहणंवेति । "आयुधेगदा"इतिविश्वः । आयुधान्यपिमायामयानि ॥ १२३ ॥

[पा०] १ अयंश्लोकः क. ख. ङ.—ट. पाठेषुदृश्यते. २ ख. ग. ङ. च. छ. झ. ट. चान्यान्विससर्ज. ३ पीड्यमानस्तदस्त्रन्त्विल्यादयःलक्ष्मणंसनिशाचरइत्यन्ताःश्लोकाः क. घ.—ट. पाठेषुअधिकादृश्यन्ते. ४ क. ग.—ट. अङ्गारमिश्राः. ५ इदमर्धं क. घ. च. छ. पाठेषुदृश्यते. ६ ख. ङ. झ. ञ. ट. गदाचोर्व्यांपपातह.

स निरायुधमात्मानं यदा मेने महाबलः ॥ मुष्टिभ्यां [1]चरणाभ्यां च चकार कदनं महत् ॥ १२४ ॥
स बाणैरतिविद्धाङ्गः क्षतजेन समुक्षितः ॥ रुधिरं प्रतिसुस्राव गिरिः प्रस्रवणं यथा ॥ १२५ ॥
स तीव्रेण च कोपेन रुधिरेण च मूर्च्छितः ॥ वानरान्राक्षसान्ऋक्षान्खादन्विपरिधावति ॥ १२६ ॥
अथ शृङ्गं समाविध्य भीमं भीमपराक्रमः ॥ चिक्षेप राममुद्दिश्य बलवानन्तकोपमः ॥ १२७ ॥
अप्राप्तमन्तरा रामः सप्तभिस्तैरजिह्मगैः ॥ शरैः काञ्चनचित्राङ्गैश्चिच्छेद [2]पुरुषर्षभः ॥ १२८ ॥
तन्मेरुशिखराकारं द्योतमानमिव श्रिया ॥ द्वे शते वानरेन्द्राणां पतमानमपातयत् ॥ १२९ ॥
तस्मिन्काले स धर्मात्मा लक्ष्मणो [3]वाक्यमब्रवीत् ॥ कुम्भकर्णवधे युक्तो योगान्परिमृशन्बहून् ॥१३०॥
नैवायं वानरान्राजन्नापि जानाति राक्षसान् ॥ मत्तः शोणितगन्धेन स्वान्परांश्चैव खादति ॥ १३१ ॥
साध्वेनमधिरोहन्तु सर्वे ते वानरर्षभाः ॥ यूथपाश्च यथा मुख्यास्तिष्ठन्त्वस्य समन्ततः ॥ १३२ ॥
अप्ययं दुर्मतिः काले गुरुभारप्रपीडितः ॥ प्रपतन्[4]राक्षसो भूमौ नान्यान्हन्यात्प्लवङ्गमान् ॥ १३३ ॥
तस्य तद्वचनं श्रुत्वा राजपुत्रस्य धीमतः ॥ ते समारुरुहुर्हृष्टाः कुम्भकर्णं प्लवङ्गमाः ॥ १३४ ॥
कुम्भकर्णस्तु संक्रुद्धः [5]समारूढः प्लवङ्गमैः ॥ व्यधूनयत्तान्वेगेन दुष्टहस्तीव हस्तिपान् ॥ १३५ ॥
तान्दृष्ट्वा निर्धुतान्रामो दुष्टोऽयमिति राक्षसः ॥ समुत्पपात वेगेन धनुरुत्तममाददे ॥ १३६ ॥
क्रोधताम्रेक्षणो वीरो निर्दहन्निव चक्षुषा ॥ राघवो राक्षसं रोषादभिदुद्राव वेगितः ॥
यूथपान्हर्षयन्सर्वान्कुम्भकर्णभयार्दितान् ॥ १३७ ॥

स चापमादाय भुजङ्गकल्पं दृढज्यमुग्रं तपनीयचित्रम् ॥
हरीन्समाश्वास्य समुत्पपात रामो निबद्धोत्तमतूणबाणः ॥ १३८ ॥

स वानरगणैस्तैस्तु वृतः परमदुर्जयः ॥ लक्ष्मणानुचरो रामः संप्रतस्थे महाबलः ॥ १३९ ॥
स ददर्श महात्मानं किरीटिनमरिंदमम् ॥ [7]शोणितापुतसर्वाङ्गं कुम्भकर्णं महाबलम् ॥ १४० ॥
सर्वान्समभिधावन्तं यथा रुष्टं दिशागजम् ॥ मार्गमाणं हरीन्क्रुद्धं राक्षसैः परिवारितम् ॥ १४१ ॥
विन्ध्यमन्दरसंकाशं काञ्चनाङ्गदभूषणम् ॥ स्रवन्तं रुधिरं वक्त्राद्गर्षमेघमिवोत्थितम् ॥ १४२ ॥
जिह्वया परिलिह्यन्तं शोणितं शोणितेक्षणम् ॥ मृद्नन्तं वानरानीकं कालान्तकयमोपमम् ॥ १४३ ॥
तं दृष्ट्वा राक्षसश्रेष्ठं प्रदीप्तानलवर्चसम् ॥ विस्फारयामास तदा कार्मुकं पुरुषर्षभः ॥ १४४ ॥

कदनं वानराणामिति शेषः ॥१२४–१२५॥ मूर्च्छितः व्याप्तः ॥ १२६—१२८ ॥ द्वे शते उद्दिश्य पतमानं गच्छन्तं । अपातयत् । शरैरिति शेषः ॥ १२९ ॥ योगान् परिमृशन् उपायान् विचारयन् ॥ १३०—१३१ ॥ यथा यथायोग्यं ॥ १३२ ॥ भारः वानरारोहणरूपः ॥ १३३—१३५॥ निर्धुतानिति ह्रस्व आर्षः ॥ १३६ ॥ क्रोधताम्रेत्यादिसार्धश्लोकमेकं वाक्यं ॥ १३७ ॥ निबद्धोत्तमतूणबाणः निबद्धोत्तमबाणतूण इत्यर्थः ॥ १३८—१३९ ॥ स ददर्शेत्यादिचतुःश्लोक्येकान्वया ॥ १४०—१४२ ॥ कालान्तकयमोपमं । रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वेतिवदेकस्यैवावस्थाभेदात्कालादिनामभेदः । यद्वा काले युगान्तकाले अन्तको नाशको यमः उपमा यस्य स तथोक्तः

स० निरायुधंमेने भागवत्स्नेच्छयैवमायासृष्टिरिन्द्रजिदादौ । तथात्रेच्छाभावादेवनैरायुध्यमितिमन्तव्यं ॥ १२४ ॥ ति० योगान् उपायान् । अनेनवधकालेलक्ष्मणसाहित्यंरामस्यगम्यते ॥ १३० ॥ ति० लक्ष्मणानुचरः । बहुव्रीहिः । लक्ष्मणसहितः ॥१३९॥

[पा०] १ ग. ङ.—ठ. कराभ्यांच. २ ङ. छ. झ. ट. भरताग्रजः. ३ क.—घ. च.—ट. राममब्रवीत्. ४ ख. च. सर्वेतेहरयोऽद्भुतं. ५ ङ. झ. ट. अथायं. ६ ङ. झ. ट. प्रचरन्राक्षसो. ७ झ. समारूढैः. ८ क.—च. झ. ट. बलार्दितान्. ९ क. ङ. झ. ट. दुर्जयैः. १० ख.—ट. शोणितावृतरक्ताक्षं.

स तस्य चापनिर्घोषात्कुपितो राक्षसर्षभः ॥ अमृष्यमाणस्तं घोषमभिदुद्राव राघवम् ॥ १४५ ॥
ततस्तु वातोद्धतमेघकल्पं भुजङ्गराजोत्तमभोगबाहुम् ॥
तमापतन्तं धरणीधराभमुवाच रामो युधि कुम्भकर्णम् ॥ १४६ ॥
आगच्छ रक्षोधिप मा विषादमवस्थितोऽहं प्रगृहीतचापः ॥
अवेहि मां शक्रसपत्न रामं मया मुहूर्ताद्भविता विचेताः ॥ १४७ ॥
रामोऽयमिति विज्ञाय जहास विकृतस्वनम् ॥ अभ्यधावत संक्रुद्धो हरीन्विद्रावयन्रणे ॥
पातयन्निव सर्वेषां हृदयानि वनौकसाम् ॥ १४८ ॥
प्रहस्य विकृतं भीमं स मेघस्तनितोपमम् ॥ कुम्भकर्णो महातेजा राघवं वाक्यमब्रवीत् ॥ १४९ ॥
नाहं विराधो विज्ञेयो न कबन्धः खरो न च ॥ न वाली न च मारीचः कुम्भकर्णोऽहमागतः ॥१५०॥
पश्य मे मुद्गरं घोरं सर्वकालायसं महत् ॥ अनेन निर्जिता देवा दानवाश्च पुरा मया ॥ १५१ ॥
विकर्णनास इति मां नावज्ञातुं त्वमर्हसि ॥ स्वल्पाऽपि हि न मे पीडा कर्णनासाविनाशनात् ॥१५२॥
दर्शयेक्ष्वाकुशार्दूल वीर्यं गात्रेषु मे लघु ॥ ततस्त्वां भक्षयिष्यामि दृष्टपौरुषविक्रमम् ॥ १५३ ॥
स कुम्भकर्णस्य वचो निशम्य रामः सुपुङ्खान्विससर्ज बाणान् ॥
तैराहतो वज्रसमग्रवेगैर्न चुक्षुभे न व्यथते सुरारिः ॥ १५४ ॥
यैः सायकैः सालवरा निकृत्ता वाली हतो वानरपुङ्गवश्च ॥
ते कुम्भकर्णस्य तदा शरीरे वज्रोपमा न व्यथयां प्रचक्रुः ॥ १५५ ॥
स वारिधारा इव सायकांस्तान्पिबञ्शरीरेण महेन्द्रशत्रुः ॥
जघान रामस्य शरप्रवेगं व्याविध्य तं मुद्गरमुग्रवेगम् ॥ १५६ ॥
ततस्तु रक्षः क्षतजानुलिप्तं वित्रासनं देवमहाचमूनाम् ॥
विव्याध तं मुद्गरमुग्रवेगं विद्रावयामास चमूं हरीणाम् ॥ १५७ ॥
वायव्यमादाय ततो वरास्त्रं रामः प्रचिक्षेप निशाचराय ॥
समुद्गरं तेन जघान बाहुं स कृत्तबाहुस्तुमुलं ननाद ॥ १५८ ॥
स तस्य बाहुर्गिरिशृङ्गकल्पः समुद्गरो राघवबाणकृत्तः ॥
पपात तस्मिन्हरिराजसैन्ये जघान तां वानरवाहिनीं च ॥ १५९ ॥

॥ १४३—१४६ ॥ मा मां । अविषादं आगच्छेत्यन्वयः । यद्वा विषादं मा गच्छ । मरणेन शरीरभरणक्लेशं त्यजेत्यर्थः । आङ् उपसर्गमात्रं ॥१४७–१४८॥ विकृतमित्यादिविशेषणत्रयं क्रियाविशेषणं ॥ १४९—१५० ॥ पश्य मे मुद्गरमिति । यद्यपि निरायुधत्वं पूर्वमुक्तं तथाप्यद्य मुद्गरं गृहीतवानिति ज्ञेयं । सर्वकालायसं बहुलायसमयमित्यर्थः॥१५१—१५२॥लघु क्षिप्रं । दृष्टपौरुषविक्रमं दृष्टबलपराक्रमम् ॥ १५३ ॥ चुक्षुभ इति । क्षोभोत्र मानसः ॥ १५४ ॥ यैः सायकैरिति । सालभेदकस्य वालिविनाशकस्य च बाणस्यैकत्वेपि बहुवचनं तद्वर्ग्याणामनेकत्वादुपपद्यते ॥१५५॥ शरीरेण पिबन् । शरीरनिमग्नबाण इत्यर्थः । जघान मोघीचकार ॥ १५६ ॥ विव्याध अचालयत्

ति० भुजङ्गराजस्यशेषस्योत्तमोभोगः तद्वद्बाहुर्यस्यसः ॥ १४६ ॥ ति० रामोयमितिविज्ञाय रामवचसेतिशेषः ॥ १४८ ॥ स० यद्यपि 'एकेषुणा—भित्वाचतान्स'इत्यादिष्वेकएवसप्ततालपाटकोविपाठउक्तः तथापिकुंभकर्णमहत्त्ववर्णनंराममाहात्म्योपयोगीति यैरित्याद्युक्तिः । तदवयवबाहुल्याद्वा "अदितिःपाशान्" इत्यादिवद्वा बहुवचनं । नव्यथयांप्रचक्रुः । आर्षोऽयमामन्तव्यवहि-

[पा०] १ झ. धारोद्धत. २ ङ. छ. झ. ट. राक्षसवंशनाशनंयस्त्वंमुहूर्तात्. ३ क. च. भवान्मुहूर्ताद्भविता. ४ ग. विजिताः. ५ ङ. छ. झ. ट. मेऽनघ. ६ ग. ङ. छ. झ. शरीरंवज्रोपमानंव्यथयां. ७ क. ग.—ट. व्याविध्यतं.

ते वानरा भग्नहतावशेषाः पर्यन्तमाश्रित्य तदा विषण्णाः ॥
प्रवेपिताङ्गं ददृशुः सुघोरं नरेन्द्ररक्षोधिपसन्निपातम् ॥ १६० ॥
स कुम्भकर्णोस्त्रनिकृत्तबाहुर्महान्निकृत्ताग्र इवाचलेन्द्रः ॥
उत्पाटयामास करेण वृक्षं ततोऽभिदुद्राव रणे नरेन्द्रम् ॥ १६१ ॥
स तस्य बाहुं सहसालवृक्षं समुद्यतं पन्नगभोगकल्पम् ॥
ऐन्द्रास्त्रयुक्तेन जघान रामो बाणेन जाम्बूनदचित्रितेन ॥ १६२ ॥
स कुम्भकर्णस्य भुजो निकृत्तः पपात भूमौ गिरिसन्निकाशः ॥
विवेष्टमानोऽभिजघान वृक्षाञ्शैलाञ्शिला वानरराक्षसांश्च ॥ १६३ ॥
तं छिन्नबाहुं समवेक्ष्य रामः समापतन्तं सहसा नदन्तम् ॥
द्वावर्धचन्द्रौ निशितौ प्रगृह्य चिच्छेद पादौ युधि राक्षसस्य ॥ १६४ ॥
तौ तस्य पादौ प्रदिशो दिशश्च गिरीन्गुहाश्चैव महार्णवं च ॥
लङ्कां च सेनां कपिराक्षसानां विनादयन्तौ विनिपेततुश्च ॥ १६५ ॥
निकृत्तबाहुर्विनिकृत्तपादो विदार्य वक्त्रं वडवामुखाभम् ॥
दुद्राव रामं सहसाऽभिगर्जन्राहुर्यथा चन्द्रमिवान्तरिक्षे ॥ १६६ ॥
अपूरयत्तस्य मुखं शिताग्रै रामः शरैर्हेमपिनद्धपुङ्खैः ॥
स पूर्णवक्त्रो न शशाक वक्तुं चुक्रोज कृच्छ्रेण मुमोह चापि ॥ १६७ ॥
अथाददे सूर्यमरीचिकल्पं स ब्रह्मदण्डान्तककालकल्पम् ॥
अरिष्टमैन्द्रं निशितं सुपुङ्खं रामः शरं मारुततुल्यवेगम् ॥ १६८ ॥
तं वज्रजाम्बूनदचारुपुङ्खं प्रदीप्तसूर्यज्वलनप्रकाशम् ॥
महेन्द्रवज्राशनितुल्यवेगं रामः प्रचिक्षेप निशाचराय ॥ १६९ ॥
स सायको राघवबाहुचोदितो दिशः स्वभासा दश संप्रकाशयन् ॥
सधूमवैश्वानरदीप्तदर्शनो जगाम शक्राशनिवीर्यविक्रमः ॥ १७० ॥
स तन्महापर्वतकूटसन्निभं विवृत्तदंष्ट्रं चलचारुकुण्डलम् ॥

॥ १५७—१५९ ॥ सन्निपातं द्वन्द्वयुद्धं ॥ १६०—१६१ ॥ ऐन्द्रास्त्रयुक्तेन ऐन्द्रास्त्रमन्त्राभिमन्त्रितेन ॥ १६२ ॥ विवेष्टमानः विवर्तमानः ॥ १६३ ॥ प्रगृह्य युगपत्संधाय ॥ १६४ ॥ विनाशयन्तौ दिगादीन् प्रतिध्वनयन्तौ ॥ १६५ ॥ दुद्राव राममिति । ऊरुशेषाभ्यामिदं । अन्यथेदं गमनं वक्ष्यमाणं पतनं च न संभवतः । राहुर्यथेति । चन्द्रमिव स्थितं रामं राहुर्यथा तथा कुम्भकर्ण इत्यर्थः ॥ १६६—१६७ ॥ अरिष्टं रिपूणामशुभप्रदं । " अरिष्टे तु शुभाशुभे " इत्यमरः ॥ १६८–१६९ ॥ वैश्वानरः अग्निः ॥ १७०–१७१ ॥

तत्प्रयोगः ॥ १५५ ॥ ति० करेण कृत्तेतरेण ॥ १६१ ॥ ति० चुक्रोज अवर्णेनशब्देनेतिशेषः ॥ १६७ ॥ ति० शक्राशन्योरिव शक्राशनेरिववाभीमोविक्रमोयस्यतंकुंभकर्णंजगाम ॥ १७० ॥ ति० चले गते चारुणी रमणीयेकुण्डलेयस्मात्तच्चलचारुकुण्डलं ॥

[पा०] १ क. ग. ङ. च. छ. झ. ट. तंतस्य. २ ङ. च. झ. ट. गिरेर्गुहाश्चैव. ३ ङ. झ. मुमूर्च्छचापि. ४ क. ङ. च. छ. झ. ञ. ट. विधूमवैश्वानरभीमदर्शनो. ५ ङ. झ. ट. भीमविक्रमं. ६ दिव्यंमघवतादत्तंज्वलन्तमिवतेजसा । अवारणीयंविशिखंगिरीणामिवचारणम् ॥ १ ॥ भयङ्करममित्राणांज्ञातीनांनन्दिवर्धनम् । सुपर्वाणंसुपर्वाग्रंशत्रूणांभयवर्धनम् ॥ २ ॥ तंसायकंमुपादायविकृष्यचमहाबलः । ससर्जकुंभकर्णस्यवधायशरमुत्तमम् ॥ ३ ॥ सविसृष्टोबलवतारामेणनिशितःशरः । कुंभकर्णस्यहृदयंभित्त्वाधरणिमाविशत् ॥ ४ ॥ ससायकःइति १७० श्लोकानन्तरमेतेचत्वारःश्लोकाः क. ख. पुस्तकयोरधिकादृश्यन्ते. ७ ख. घ. ङ. च. छ. झ. ट. सुवृत्तदंष्ट्रं.

चकर्त रक्षोधिपतेः शिरस्तथा यथैव वृत्रस्य पुरा पुरंदरः ॥ १७१ ॥
कुम्भकर्णशिरो भाति कुण्डलालङ्कृतं महत् ॥ आदित्येऽभ्युदिते रात्रौ मध्यस्थ इव चन्द्रमाः ॥१७२॥
तद्रामबाणाभिहतं पपात रक्षःशिरः पर्वतसन्निकाशम् ॥
बभञ्ज चर्यागृहगोपुराणि प्राकारमुच्चं तमपातयच्च ॥ १७३ ॥
न्यपतत्कुम्भकर्णोथ स्वकायेन निपातयन् ॥ प्लवङ्गमानां कोट्यश्च परितः संप्रधावताम् ॥ १७४ ॥
तच्चातिकायं हिमवत्प्रकाशं रक्षस्ततस्तोयनिधौ पपात ॥
ग्राहान्वरान्मीनवरान्भुजङ्गान्ममर्द भूमिं च तदा विवेश ॥ १७५ ॥
तस्मिन्हते ब्राह्मणदेवशत्रौ महाबले संयति कुम्भकर्णे ॥
चचाल भूर्भूमिधराश्च सर्वे हर्षाच्च देवास्तुमुलं प्रणेदुः ॥ १७६ ॥
ततस्तु देवर्षिमहर्षिपन्नगाः सुराश्च भूतानि सुपर्णगुह्यकाः ॥
सयक्षगन्धर्वगणा नभोगताः प्रहर्षिता रामपराक्रमेण ॥ १७७ ॥

कुंभकर्णेति । कर्तनवेगादुद्गतं गगने स्थितं । रात्रौ आदित्ये अदितिदेवताके पुनर्वसुनक्षत्रे तारकाद्वयात्मके । अभ्युदिते तन्मध्यगतश्चन्द्रमा इव बभावित्यर्थः ॥ १७२ ॥ चर्याः प्राकारोपान्तकृत्रभटसंचाराईप्रदेशाः ॥ १७३ ॥ कोट्यः कोटीः ॥ १७४ ॥ रक्षः कबन्धरूपं । भूमिं तदा विवेश । भूमिमस्पृश-

---

स० वृत्रस्य त्वष्टृपुत्रस्य चलचारुकुण्डलंशिरः पुरापुरन्दरइव सः रामः रक्षोधिपतेःशिरश्चकर्तेत्यन्वयः ॥ १७१ ॥ ति० कुण्डलाभ्यामलङ्कृतं विनाकृतं । " अलंभूषणपर्याप्तिशक्तिवारणवाचकं " इत्यमरः । कुंभकर्णस्यशिरः अरात्रौ प्रातःकाले । आदित्ये उदिते गगनमध्यस्थचन्द्रमाइवनिष्प्रभंभातीत्यर्थः ॥ अयंश्लोकःप्रक्षिप्तइतिबहवः ॥ स० भातिकुण्डलालङ्कृतं भयाकान्त्या कुण्डलालङ्कृतंयदन्यच्छिरः तदतिक्रम्यवर्ततेतत्तथा । सद्यःपातात्कान्तिर्नगतेतिभावः । " अतिलङ्घनेऽपिच " इतिविश्वः । यद्वा कुण्डलालं कुण्डइतिकुण्डेआस्यपिठरेलालायस्यतत् । पातालसंनिभमितिपूर्वमुक्तेः । " कुण्डंपिठरे " इतिविश्वः । कृतं कालविशेषेण । अतएवाप्रकाशोयुज्यते । कुण्डलाभ्यां विनाकृतमितिद्वावपि । यत् रात्रौमध्यस्थः योग्यतयागगनमध्यस्थः । चन्द्रमाइवाभात् । तदिदानीं आदित्येसूर्येऽभ्युदितेमध्यस्थोऽधमः कान्त्या चन्द्रमाइवभाति । मध्यस्थे न्यायमार्गस्थे । आदित्यइवादित्येरामरूपेवा । तद्वंशसंभूतत्वात्तस्मिन्रामेऽभ्युदितेसतिचन्द्रमाइवभातीतिशेषः । कुण्डलवत्सर्पवदलङ्कृतंभाति । यथाऽहिःकुण्डलीकुण्डलंचेतिवचनात् । कर्णशून्यत्वेनोचितंतदौपम्यं । आदित्ये अदितिदेवताकेपुनर्वसुनक्षत्रेरात्रावभ्युदितेसतितन्मध्यस्थश्चन्द्रमाइवभातीति तथाअरात्रौदिवेतितीर्थनागोजिव्याख्यानेप्रक्रमानानुगुण्यात् एवंद्वितीयमपि आदित्योदयानन्तरं अरात्रावहनीत्यवक्तव्यत्वादुपेक्षणीये ॥ १७२ ॥ ति० उच्चंप्राकारं लङ्कायाइतिशेषः । शिरः कर्तनवेगोत्थितंलङ्कायांपपात । देहस्तुकर्तनवेगविलुठन्समुद्रेपपात । यद्यपि " तंब्रह्मास्त्रेणसौमित्रिर्ददाराद्रिवरोपमम् । सपपातमहावीरोदिव्यास्त्राभिहतोरणे । तंदृष्ट्वावृत्रसंकाशंकुंभकर्णंतरस्विनम् । गतासुंपतितंभूमौराक्षसाःप्राद्रवन्भयात् । " इतिमहाभारतोक्तयालक्ष्मणतःकुंभकर्णवधःप्रतीयते । तथापिनविरोधः । रामलक्ष्मणाभ्यांमिलित्वातद्वधकरणात् । अतएव पूर्वलक्ष्मणानुचरइत्यत्रलक्ष्मणसहितइतिव्याख्यातं । प्राधान्यात्त्वत्ररामस्यैवतद्धन्तृत्वोक्तिः । लक्ष्मणसाहित्येनहननात्तु व्यासोलक्ष्मणस्यहन्तृत्वमुक्तवान् ॥ स० " ब्राह्मेणास्त्रेणसौमित्रिर्ददाराद्रिवरोपमम् " इति भारतेवनपर्वणिमार्कण्डेयोपाख्यानेलक्ष्मणात्कुंभकर्णवधउक्तोत्रतुरामादतोविरोधइतिचेत्सत्यं । सुमित्रायाअपत्यंहिसौमित्रिः । तस्याश्चलक्ष्मणादपिप्रेमपदंरामइतितदपत्यत्वेनोक्तोव्यासेनदाशरथिरितिवा भाषान्तरयेणोक्तंभारतइवान्यत्राभावाद्बुद्ध्यभाषयारामभाबोधयदितिवा पुंव्यत्यासोपि " शतंदुर्योधनादींस्तेधनञ्जयशरैर्हतान् । दर्शयिष्यामि " इतिकृष्णेनकृष्णांप्रत्युदीरितेवचसिभीमसेनशरैर्हतानितिवक्तव्येधनञ्जयेत्युक्तिवद्वाज्ञेयः । " मयैववध्यौ भवतं त्रिजन्मसु " इतिभगवतोक्तत्वात् हिरण्याक्षहिरण्यकशिप्वोः शिशुपालदन्तवक्रयोश्च नृसिंहश्वदुसिंहाभ्यांहतत्वदर्शनाच्च " रामलक्ष्मणाभ्यांमिलित्वातद्वधकरणात् " इत्यादिनागोजिभट्टविरोधसमाधिकथनंकथमितिचिन्त्यम् ॥ १७३ ॥ स० तोयनिधौपपात । खण्डशःखण्डनेनतोयनिधौप्रक्षेपोपि हर्यृक्षासुसाधः । प्रक्षेप्यश्चोत्तरकार्यंदृष्ट्वेतिस्वयमेवपतन्देहो महात्मनामरयोपिसहायकारिणइतिनीतिसूचितवानितिमन्तव्यम् ॥ १७५ ॥ स० भूश्चचाल भूमिधराश्चचेलुः ॥ १७६ ॥ भूतानि आकाशादीनि । स्वकार्यप्रतिबन्धकत्वात्तद्वधेनतेषांतोषः । सोप्यभिमानिविवक्षयाभूभूधरादि-

[पा०] १ ख. च. छ. पर्वतकूटकल्पं. २ क,—ट. रक्षस्तदापयोनिधौ.

ततस्तु ते तस्य वधेन भूरिणा मनस्विनो नैर्ऋतराजबान्धवाः ॥
विनेदुरुच्चैर्व्यथिता रघूत्तमं हरिं समीक्ष्यैव यथा सुरार्दिताः ॥ १७८ ॥
स देवलोकस्य तमो निहत्य सूर्यो यथा राहुमुखाद्विमुक्तः ॥
तथा व्यभासीद्भुवि वानरौघे निहत्य रामो युधि कुम्भकर्णम् ॥ १७९ ॥
प्रहर्षमीयुर्बहवस्तु वानराः प्रबुद्धपद्मप्रतिमैरिवाननैः ॥
अपूजयन्राघवमिष्टभागिनं हते रिपौ भीमबले दुरासदे ॥ १८० ॥
स कुम्भकर्णं सुरसङ्घमर्दनं महत्सु युद्धेषु पराजितश्रमम् ॥
ननन्द हत्वा भरताग्रजो रणे महासुरं वृत्रमिवामराधिपः ॥ १८१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

अष्टषष्टितमः सर्गः ॥ ६८ ॥

कुंभकर्णश्रवणमात्रेण पतितमूर्च्छितेन रावणेन संज्ञाधिगमानन्तरं तंप्रतिशोचनपूर्वकं बहुधाविलापः ॥ १ ॥

कुम्भकर्णं हतं दृष्ट्वा राघवेण महात्मना ॥ राक्षसा राक्षसेन्द्राय रावणाय न्यवेदयन् ॥ १ ॥
राजन्स कालसंकाशः संयुक्तः कालकर्मणा ॥ विद्राव्य वानरीं सेनां भक्षयित्वा च वानरान् ॥ २ ॥
प्रतपित्वा मुहूर्तं च प्रशान्तो रामतेजसा ॥ कायेनार्धप्रविष्टेन समुद्रं भीमदर्शनम् ॥ ३ ॥
निकृत्तकण्ठोरुभुजो विक्षरन्रुधिरं बहु ॥ रुद्ध्वा द्वारं शरीरेण लङ्कायाः पर्वतोपमः ॥ ४ ॥
कुम्भकर्णस्तव भ्राता काकुत्स्थशरपीडितः ॥ लगण्डभूतो विकृतो दावदग्ध इव द्रुमः ॥ ५ ॥

दित्यर्थः ॥ १७५—१७८ ॥ वानरौघे वानरौघमध्ये ॥ १७९ ॥ प्रबुद्धपद्मप्रतिमैरिति । प्रतिमाशब्दोत्र रूपवचनः नतु सदृशवचनः इवशब्दप्रयोगात् । इष्टभागिनं जयरूपेष्टभाजं ॥ १८० ॥ पराजितश्रमं त्यक्तश्रमं । अत्र सर्गे अधिकाः केचन श्लोकाः क्वापि क्वापि दृश्यन्ते ते न व्याख्याताः । अस्मिन्सर्गे सार्धषट्षष्ट्युत्तरशतश्लोकाः ॥ १८१ ॥ इति श्रीगोविन्दराज विरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तषष्टितमः सर्गः ॥ ६७ ॥

कुम्भकर्णवधश्रवणेन रावणस्य प्रलापः—कुम्भकर्णमित्यादि ॥ अत्र रावणायेत्यत्र यकारो गायत्र्या अष्टादशाक्षरं । सप्तदशसहस्रश्लोका गताः ॥ १ ॥ कालकर्मणा कालस्य मृत्योः कर्मणा । मरणरूपक्रियेति यावत् । यद्वा काले कर्मणा कालकर्मणा । परिपक्वकर्मणेत्यर्थः ॥ २ ॥ प्रतपित्वा पराक्रम्य, एतदारभ्य श्लोकत्रयमेकान्वयं ॥ अर्धप्रविष्टेन अर्धेन कबन्धमात्रेण प्रविष्टेन । कायेन समुद्रं रुद्ध्वा । शरीरेण उत्तमाङ्गेन । द्वारं रुद्ध्वा । लगण्डभूतः पिण्डीभूतः । " लगण्डोऽजगर" इत्येके । विकृतः विकृतशरीरः ।

वत् ॥ १७७ ॥ **स०** भूरिणा महता वधेन । वधस्यमहत्त्वंतु कुंभकर्णपराक्रमानङ्गीकरणेन । भूरिणा अच्युतेन तत्कृतेनेतियावत् । " भूरिर्ब्रह्माच्युतेशेषु " इतिविश्वः । अमनस्विनः खिन्नमानसाः । हरिं सिंहं । यथामतङ्गजाःगजाःसमीक्ष्यव्यथितानदन्ति तथामेदुः ॥ १७८ ॥ **ति०** देवलोकस्य आकाशस्य । मध्येइतिशेषः । व्यभासीत् विशेषेणभातिस्म ॥ **स०** सत् एव लोकस्य इतिविभागः । लोकस्य उत्तराधरलोकस्य सत् तमः तत्रत्यमितिभावः । निहत्यैवसूर्योयथा । किंच यथाराहुमुखाद्विमुक्तःसूर्यो भाति तथाव्यभासीत् ॥ १७९ ॥ **ति०** अत्रदिनद्वयेनकुंभकर्णोत्थानं ततः सप्तमवासरेवधइति भाद्रपदपूर्णिमायामेतद्वधइतिपाद्मसंमतिपूर्वकमग्रे स्फुटीभविष्यति ॥ १८१ ॥ इतिसप्तषष्टितमःसर्गः ॥ ६७ ॥

ति० अगण्डभूतः " अशिरःपाणिपादस्तुकबन्धोऽगण्डउच्यते " ॥ **स०** अगण्डभूतः कुंभकर्णचिह्नरहितीभूतः । " गण्डःप्र-

[**पा०**] १ झ. मतंगजाः. ख. पुरासुराः. २ ङ.—ट. व्यभासीद्धरिसैन्यमध्ये. ३ ङ. झ. ट. बलेनृपात्मजं. ४ ख. ङ. झ. ञ. ट. सुरसैन्यमर्दनं. ५ ङ. झ. ट. निकृत्तनासाकर्णेनविक्षरद्रुधिरेणच. ६ ङ.—ट. अगण्डभूतोविवृतो.

तं श्रुत्वा निहतं सङ्ख्ये कुम्भकर्णं महाबलम् ॥ रावणः शोकसंतप्तो मुमोह च पपात च ॥ ६ ॥
पितृव्यं निहतं दृष्ट्वा देवान्तकनरान्तकौ ॥ त्रिशिराश्चातिकायश्च रुरुदुः शोकपीडिताः ॥ ७ ॥
भ्रातरं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा ॥ महोदरमहापार्श्वौ शोकाक्रान्तौ बभूवतुः ॥ ८ ॥
ततः कृच्छ्रात्समासाद्य संज्ञां राक्षसपुङ्गवः ॥ कुम्भकर्णवधादीनो विललाप[2] स रावणः ॥ ९ ॥
हा वीर रिपुदर्पघ्न कुम्भकर्ण महाबल ॥ त्वं मां विहाय वै दैवाद्यातोसि यमसादनम् ॥ १० ॥
मम शल्यमनुद्धृत्य बान्धवानां महाबल ॥ शत्रुसैन्यं प्रताप्यैकस्त्वं मां संत्यज्य गच्छसि ॥ ११ ॥
इदानीं खल्वहं नास्मि यस्य मे दक्षिणो भुजः ॥ पतितो यं समाश्रित्य न बिभेमि सुरासुरात् ॥१२॥
कथमेवंविधो वीरो देवदानवदर्पहा ॥ कालाग्निरुद्रप्रतिमो रणे रामेण वै हतः ॥ १३ ॥
यस्य ते वज्रनिष्पेषो न कुर्याद्व्यसनं सदा ॥ स कथं रामबाणार्तः प्रसुप्तोसि महीतले ॥ १४ ॥
एते देवगणाः सार्धमृषिभिर्गगने स्थिताः ॥ निहतं त्वां रणे दृष्ट्वा निनदन्ति प्रहर्षिताः ॥ १५ ॥
ध्रुवमद्यैव संहृष्टा लब्धलक्षाः प्लवङ्गमाः ॥ आरोक्ष्यन्ति हि दुर्गाणि लङ्काद्वाराणि सर्वशः ॥ १६ ॥
राज्येन नास्ति मे कार्यं किं करिष्यामि सीतया ॥ कुम्भकर्णविहीनस्य जीविते नास्ति मे रति[3]ः ॥१७॥
यद्यहं भ्रातृहन्तारं न हन्मि युधि राघवम् ॥ ननु मे मरणं श्रेयो न चेदं व्यर्थजीवितम् ॥ १८ ॥
अद्यैव तं गमिष्यामि देशं यत्रानुजो मम ॥ न हि भ्रातॄन्समुत्सृज्य क्षणं जीवितुमुत्सहे ॥ १९ ॥
देवा हि मां हसिष्यन्ति दृष्ट्वा पूर्वापकारिणम् ॥ कथमिन्द्रं जयिष्यामि कुम्भकर्णे हते त्वयि ॥२०॥
तदिदं मामनुप्राप्तं विभीषणवचः शुभम् ॥ यदज्ञानान्मया तस्य न गृहीतं महात्मनः ॥ २१ ॥
विभीषणवचो यावत्कुम्भकर्णप्रहस्तयोः ॥ विनाशोऽयं समुत्पन्नो मां व्रीडयति दारुणः ॥ २२ ॥
तस्यायं कर्मणः प्राप्तो विपाको मम शोकदः ॥ यन्मया धार्मिकः श्रीमान्स निरस्तो विभीषणः ॥२३॥

रामतेजसा प्रशान्त इत्यन्वयः ॥ ३—१० ॥ मम बान्धवानां च शल्यं शोकमित्यर्थः ॥ ११ ॥ सुरासुरात् सुरासुरेभ्यः ॥ १२—१५ ॥ लब्धलक्षाः लब्धावसराः ॥ १६—१७ ॥ भ्रातृहन्तारं न हन्मि यदि तदा इदं व्यर्थजीवितं श्रेयःनच । नैवेत्यर्थः । किंतु मरणमेव श्रेयो नन्विति संबन्धः ॥ १८ ॥ भ्रातॄनिति बहुवचनं पूजार्थं ॥ १९—२१ ॥ कुम्भकर्णप्रहस्तयोरयं दारुणो विनाशः यावत् यदा समुत्पन्नः ततआरभ्य विभीषणवचो मां व्रीडयतिपीडयतीत्यर्थः

वीणेचिहेस्यात् " इतिविश्वः । अतएवविकृतः । विधृतइतिपाठे रक्षोभिरपरिवृतइतिवा विभिः काकगृध्रादिभिर्वृतइतिवार्थः ॥५॥ ति० देवान्तकादयोरावणपुत्राः ॥ ७ ॥ ति० महोदरमहापार्श्वौ विमातृजौभ्रातरौतस्य ॥ ८ ॥ स० ममशल्यं रामरूपं । बान्धवानांमध्येमहाबल । " बान्धवानांचशल्यमनुद्धृत्येत्यन्वयइतिनागोजिभट्टव्याख्यायामश्रुतचशब्दाध्याहारइव ममशल्यमित्यनेनमुख्यरावणशल्येनसशल्यानाममुख्यानांपृथग्ग्रहणायोगश्चेतिदोषौप्रादुष्यातामितिज्ञेयं ॥ ११ ॥ स० अहंना पुमान्नास्मि । नपुंसकप्रायइत्यर्थः । सुरासुरात् सुराश्चासुराश्चसुरासुरं । तस्मात् । " येषांचविरोधःशाश्वतिकः " इत्येकवद्भावः । समाहारोवा । नेत्यावर्तते । नबिभेमि । नास्मि मृतप्रायइतिवा ॥ १२ ॥ स० दर्पहा दर्पहन्ति हनिष्यतिवादर्पहा । " नियमेभूतइत्याश्रयणाद्वर्तमानेभविष्यतिवाकालेचोपपदान्तरेपिभवत्येव पुरुषंहन्तिहनिष्यतिवा " इतितत्त्वबोधिन्युक्तेः । प्रकृतिनियमपक्षेअदेवदानवदर्पनविद्यतेदेवदानवानांदर्पोयेनतत्संबुद्धिः अदेवदानवदर्पहा शोकप्रकाशकःशब्दः ॥ १३ ॥ स० भ्रातॄनिति । एकस्यमुख्यस्यभ्रातुर्गमनेनानेकप्रकारेणस्वदौर्बल्यमायातमितिद्योतयतिबहुवचनेन । खरादीन्मृतान्स्मृत्वावा विभीषणकुबेराभ्यांबहिष्कृताभ्यांसहमृतमेकंसंस्मृत्यवाबहुवचनं । उत्सृज्यपदस्वारस्यादिवोत्तरत्र " सनिरस्तोविभीषणः " इतितदनुतापस्वारस्याच्च ॥ १९ ॥ इत्यष्टषष्टितमःसर्गः ॥ ६८ ॥

[पा०] १ ख.—च. ङ. ञ. श्रुत्वा. २ ङ. ञ. ट. विललापाकुलेन्द्रियः. ३ घ. ङ. ञ. ठ. मतिः.

इति बहुविधमाकुलान्तरात्मा कृपणमतीव विलप्य कुम्भकर्णम् ॥
न्यपतदथ दशाननो भृशार्तस्तमनुजमिन्द्ररिपुं हतं विदित्वा ॥ २४ ॥
[[3]ततस्तु संदीपितकोपवह्निर्निशाचराणां च महाबलश्च ॥
तदाऽपतद्भ्रातृविनाशनार्तो मुहुर्मुहुश्चैव विनिश्वसन्बली ॥ २५ ॥]
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टषष्टितमः सर्गः ॥ ६८ ॥

एकोनसप्ततितमः सर्गः ॥ ६९ ॥

कुंभकर्णनिधनाकर्णनेनविषीदन्तंरावणंप्रति त्रिशिरोनाम्नातत्सुतेन रामादिवधप्रतिज्ञानेनसमाश्वासनपूर्वकमतिकायादिभिर्भ्रातृभिःसह रणायनिर्याणम् ॥ १ ॥ वानरकृतराक्षसक्षपणरुष्टेन तुरगाधिष्ठितेननरान्तकेन वानरवाहिनीविध्वंसने सुग्रीवनियोगादङ्गदेन सतुरगनरान्तकहननम् ॥ २ ॥

एवं विलपमानस्य रावणस्य दुरात्मनः ॥ [1]श्रुत्वा शोकाभितप्तस्य त्रिशिरा वाक्यमब्रवीत् ॥ १ ॥
एवमेव महावीर्यो हतो नस्तातमध्यमः ॥ न तु सत्पुरुषा राजन्विलपन्ति यथा भवान् ॥ २ ॥
नूनं त्रिभुवनस्यापि पर्याप्तस्त्वमसि प्रभो ॥ स कस्मात्प्राकृत इव शोचस्यात्मानमीदृशम् ॥ ३ ॥
ब्रह्मदत्ताऽस्ति ते शक्तिः कवचः सायको धनुः ॥ सहस्रखरसंयुक्तो रथो मेघस्वनो महान् ॥ ४ ॥
त्वयाऽसकृद्विशस्त्रेण विशस्ता देवदानवाः ॥ स सर्वायुधसंपन्नो राघवं शास्तुमर्हसि ॥ ५ ॥
कामं तिष्ठ महाराज निर्गमिष्याम्यहं रणम् ॥ उद्धरिष्यामि ते शत्रून्गरुडः पन्नगानिव ॥ ६ ॥
शम्बरो देवराजेन नरको विष्णुना यथा ॥ तथाऽद्य शयिता रामो मया युधि निपातितः ॥ ७ ॥
श्रुत्वा त्रिशिरसो वाक्यं रावणो राक्षसाधिपः ॥ पुनर्जातमिवात्मानं [3]मन्यते कालचोदितः ॥ ८ ॥
श्रुत्वा त्रिशिरसो वाक्यं देवान्तकनरान्तकौ ॥ अतिकायश्च तेजस्वी बभूवुर्युद्धहर्षिताः ॥ ९ ॥
ततोऽहमहमित्येव गर्जन्तो नैर्ऋतर्षभाः ॥ रावणस्य सुता वीराः शक्रतुल्यपराक्रमाः ॥ १० ॥

॥ २२—२५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टषष्टितमः सर्गः ॥ ६८ ॥

अथातिकायनिर्गमः—एवमित्यादि ॥ १ ॥ तातमध्यमः तातेषु मध्यमः मध्यमपितेत्यर्थः । एवमेव महावीर्यः त्वदुक्तप्रकारेणैव महावीर्यः । हतः । दैवादिति शेषः ॥ २ ॥ ईदृशमिति शोकक्रियाविशेषणं । आत्मानं उद्दिश्येति शेषः ॥ ३ ॥ ब्रह्मदत्तेत्यादिश्लोकद्वयमेकान्वयं ॥ विशस्त्रेण निरायुधेन ॥ ४—६ ॥ नरकोत्र सिंहिकायां विप्रचित्तेर्जातेषु वातापिप्रमुखेष्वन्यतमः । " वातापिर्नमुचिश्चैव इल्वलः स्मरस्तथा । अन्धको नरकश्चैव कालनाभस्तथैव च " इत्युक्तेः ॥ ननु कृष्णहतो भूसुतो नरकासुरः । तस्य वाल्मीकिप्रबन्धनिर्माणकाले असंजातत्वात् ॥ ७—८ ॥ श्रुत्वा त्रिशिरस इत्यादि ॥ त्रिशिरसो वचनं स्वेषामपि तुल्यत्वादेवान्तकादयोपि युद्धोद्युक्ता बभूवुरित्यर्थः ॥ ९—१० ॥ अन्तरिक्षे गतं गमनं येषां तेऽन्तरिक्षगताः

ति० विलपमानस्य विलपतः । श्रुत्वा विलापमितिशेषः ॥ १ ॥ स० शंवरोयमन्यःकामशत्रोः ॥ ७ ॥ ति० ननुकुंभकर्णासाध्येऽर्थेकथंरावणस्यतत्साज्जयप्रत्याशायासंतोषस्तत्राह—कालचोदितइति । तन्नाशप्रवृत्तकालात्मकभगवत्प्रेरणयापुनस्तस्ययुद्धबु-

[पा०] १ अयंश्लोकः ज. पाठेदृश्यते. २ घ. गिरंश्रुत्वाभितप्तस्य. ङ. झ. श्रुत्वाशोकाभिभूतस्य. ३ क. ख. ग. च. छ. ज. ट. मन्यतेरावणस्तदा.

अन्तरिक्षगताः सर्वे सर्वे मायाविशारदाः ॥ सर्वे त्रिदशदर्पघ्नाः सर्वे च रणदुर्जयाः ॥ ११ ॥
सर्वे सुबलसंपन्नाः सर्वे विस्तीर्णकीर्तयः ॥ सर्वे समरमासाद्य न श्रूयन्ते पराजिताः ॥
देवैरपि सगन्धर्वैः सकिन्नरमहोरगैः ॥ १२ ॥
सर्वे च विदुषो वीराः सर्वे युद्धविशारदाः ॥ सर्वे प्रवरविज्ञानाः सर्वे लब्धवरास्तथा ॥ १३ ॥
स तैस्तदा भास्करतुल्यवर्चसैः सुतैर्वृतः शत्रुबलप्रमर्दनैः ॥
रराज राजा मघवान्यथाऽमरैर्वृतो महादानवदर्पनाशनैः ॥ १४ ॥
स पुत्रान्संपरिष्वज्य भूषयित्वा च भूषणैः ॥ आशीर्भिश्च प्रशस्ताभिः प्रेषयामास संयुगे ॥ १५ ॥
युद्धोन्मत्तं च मत्तं च भ्रातरौ चापि रावणः ॥ [महापार्श्वं प्रमत्तं वा भ्रातरं च महोदरम् ॥]
रक्षणार्थं कुमाराणां प्रेषयामास संयुगे ॥ १६ ॥
तेऽभिवाद्य महात्मानं रावणं रिपुरावणम् ॥ कृत्वा प्रदक्षिणं चैव महाकायाः प्रतस्थिरे ॥ १७ ॥
सर्वौषधीभिर्गन्धैश्च समालभ्य महाबलाः ॥ निर्जग्मुर्नैर्ऋतश्रेष्ठाः षडेते युद्धकाङ्क्षिणः ॥ १८ ॥
त्रिशिराश्चातिकायश्च देवान्तकनरान्तकौ ॥ महोदरमहापार्श्वौ निर्जग्मुः कालचोदिताः ॥ १९ ॥
ततः सुदर्शनं नाम नीलजीमूतसन्निभम् ॥ ऐरावतकुले जातमारुरोह महोदरः ॥ २० ॥
सर्वायुधसमायुक्तं तूणीभिश्च स्वलंकृतम् ॥ रराज गजमास्थाय सवितेवास्तमूर्धनि ॥ २१ ॥
हयोत्तमसमायुक्तं सर्वायुधसमाकुलम् ॥ आरुरोह रथश्रेष्ठं त्रिशिरा रावणात्मजः ॥ २२ ॥
त्रिशिरा रथमास्थाय विरराज धनुर्धरः ॥ सविद्युदुल्कः शैलाग्रे सेन्द्रचाप इवाम्बुदः ॥ २३ ॥
त्रिभिः किरीटैः शुशुभे त्रिशिराः स रथोत्तमे ॥ हिमवानिव शैलेन्द्रस्त्रिभिः काञ्चनपर्वतैः ॥ २४ ॥
अतिकायोपि तेजस्वी राक्षसेन्द्रसुतस्तदा ॥ [हयोत्तमसमायुक्तं सर्वायुधसमन्वितम् ॥]
आरुरोह रथश्रेष्ठं श्रेष्ठः सर्वधनुष्मताम् ॥ २५ ॥
सुचक्राक्षं सुसंयुक्तं स्वनुकर्षं सुकूबरम् ॥ तूणीबाणासनैर्दीप्तं प्रासासिपरिघाकुलम् ॥ २६ ॥
स काञ्चनविचित्रेण मुकुटेन विराजता ॥ भूषणैश्च बभौ मेरुः किरणैरिव भासयन् ॥ २७ ॥

॥ ११ ॥ देवादिभिः सह समरमासाद्य पराजिता न श्रूयन्त इत्यन्वयः ॥ १२ ॥ विदुषः विद्यावन्तः । प्रवरविज्ञानाः उत्कृष्टशास्त्रज्ञानाः ॥१३॥ तुल्यवर्चसैरित्यत्र समासान्त आर्षः ॥ १४ ॥ आशीर्भिः सहेति शेषः ॥ १५ ॥ युद्धोन्मत्तं च मत्तं च भ्रातरौ चापि रावण इति ॥ अत्र युद्धोन्मत्तौ महोदरमहापार्श्वपर्यायनामानौ रावणभ्रातरौ । एतौ परत्र प्रकाशयिष्येते ॥ १६ ॥ रिपून् रावयतीति रिपुरावणः ॥ १७ ॥ सर्वौषधीभिः । " कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचन्दने । वचाचम्पकमुस्ताश्च सर्वौषध्यो दश स्मृताः" इत्युक्ताभिः आयुधप्रहारनिवर्तिकाभिः ओषधीभिरित्याहुः । समालभ्य समालिप्य ॥ १८–२० ॥ अस्तमूर्धनीत्येतदुत्तरक्षणे विनाशसूचनाय ॥ २१–२३ ॥ त्रिभिः काञ्चनपर्वतैः शिखरभूतैर्हिमवानिवेत्यर्थः ॥ २४ ॥ अतिकाय इत्यादिश्लोकद्वयमेकान्वयं ॥ सुसंयुक्तं सुदृढं । स्वनुकर्षं । " अनुकर्षो दार्ववस्थं" इत्यमरः । सुकूबरं शोभनयुगंधरं । " कूबरस्तु युगंधरः " इत्यमरः ॥ २५—२६ ॥ किरणैः भासयन्

ज्यनुपरमः ॥ ८ ॥ ति० शत्रूणांबलस्यश्रीणांचार्दनैरित्यर्थेश्रियार्दनैरित्यार्षं ॥ १४ ॥ स० युद्धोन्मत्तंचमत्तंच तदपरपर्यायवाच्यौमहापार्श्वमहोदरौ । ' षडेते ' इति वक्ष्यमाणत्वात् । एतौचप्रसिद्धमहापार्श्वमहोदराभ्यांभिन्नौज्ञेयौ । तद्युद्धस्यपुनर्वक्ष्यमाण-

[पा०] १ ख.—छ. झ. ट. सर्वेसमरदुर्मदाः. २ झ. ञ. ट. श्रियार्दनैः. ३ इदमर्धं घ. ज. पाठयोर्दृश्यते. ४ क. ख. ग. ङ.—ट. सुदर्शनंनागं. ५ ख. ग. ङ. झ. ञ. ट. समायुक्तस्तूणीभिश्चाप्यलंकृतः. ६ क. ग. ङ.—ट. सज्वालस्सेन्द्रचापः. ७ इदमर्धं क. ख. पाठयोर्दृश्यते. ८ क. ख. घ.—ट. प्रभाभिरिवभासयन्.

स रराज रथे तस्मिन्राजसूनुर्महाबलः ॥ वृतो नैर्ऋतशार्दूलैर्वज्रपाणिरिवामरैः ॥ २८ ॥
हयमुच्चैःश्रवःप्रख्यं श्वेतं कनकभूषणम् ॥ मनोजवं महाकायमारुरोह नरान्तकः ॥ २९ ॥
गृहीत्वा प्रासमुल्काभं विरराज नरान्तकः ॥ शक्तिमादाय तेजस्वी गुहः शिखिगतो यथा ॥ ३० ॥
देवान्तकः समादाय परिघं वज्रभूषणम् ॥ परिगृह्य गिरिं दोर्भ्यां वपुर्विष्णोर्विडम्बयन् ॥ ३१ ॥
महापार्श्वो महाकायो गदामादाय वीर्यवान् ॥ विरराज गदापाणिः कुबेर इव संयुगे ॥ ३२ ॥
प्रतस्थिरे महात्मानो बलैरप्रतिमैर्वृताः ॥ सुरा इवामरावत्या बलैरप्रतिमैर्वृताः ॥ ३३ ॥
तान्गजैश्च तुरङ्गैश्च रथैश्चाम्बुदनिस्वनैः ॥ अनुजग्मुर्महात्मानो राक्षसाः प्रवरायुधाः ॥ ३४ ॥
ते विरेजुर्महात्मानः कुमाराः सूर्यवर्चसः ॥ किरीटिनः श्रिया जुष्टा ग्रहा दीप्ता इवाम्बरे ॥ ३५ ॥
प्रगृहीता बभौ तेषां शस्त्राणामावलिः सिता ॥ शारदाभ्रप्रतीकाशा हंसावलिरिवाम्बरे ॥ ३६ ॥
मरणं वापि निश्चित्य शत्रूणां वा पराजयम् ॥ ३७ ॥
इति कृत्वा मतिं वीरा निर्जग्मुः संयुगार्थिनः ॥ ३८ ॥
जगर्जुश्च प्रणेदुश्च चिक्षिपुश्चापि सायकान् ॥ जगृहुश्चापि ते वीरा निर्यान्तो युद्धदुर्मदाः ॥ ३९ ॥
ष्वेलितास्फोटनिनदैश्चाल च वसुंधरा ॥ रक्षसां सिंहनादैश्च पुस्फोटेव तदाऽम्बरम् ॥ ४० ॥
तेऽभिनिष्क्रम्य मुदिता राक्षसेन्द्रा महाबलाः ॥ ददृशुर्वानरानीकं समुद्यतशिलानगम् ॥ ४१ ॥
हरयोपि महात्मानो ददृशुर्नैर्ऋतं बलम् ॥ हस्त्यश्वरथसंबाधं किङ्किणीशतनादितम् ॥ ४२ ॥
नीलजीमूतसंकाशं समुद्यतमहायुधम् ॥ दीप्तानलरविप्रख्यैः सर्वतो नैर्ऋतैर्वृतम् ॥ ४३ ॥
तदृष्ट्वा बलमायातं लब्धलक्षाः प्लवङ्गमाः ॥ समुद्यतमहाशैलाः संप्रणेदुर्महाबलाः ॥
अमृष्यमाणा रक्षांसि प्रतिनर्दन्ति वानराः ॥ ४४ ॥

ततः समुद्धुष्टरवं निशम्य रक्षोगणा वानरयूथपानाम् ॥
अमृष्यमाणाः परहर्षमुग्रं महाबला भीमतरं विनेदुः ॥ ४५ ॥

ते राक्षसबलं घोरं प्रविश्य हरियूथपाः ॥ विचेरुरुद्यतैः शैलैर्नगाः शिखरिणो यथा ॥ ४६ ॥
केचिदाकाशमाविश्य केचिदुर्व्यां प्लवङ्गमाः ॥ रक्षस्सैन्येषु संक्रुद्धाश्चेरुर्द्रुमशिलायुधाः ॥
द्रुमांश्च विपुलस्कन्धान्गृह्य वानरपुङ्गवाः ॥ ४७ ॥

भासमानः । मेरुरिव बभावित्यन्वयः ॥ २७–३० ॥ देवान्तक इति ॥ अत्रापि विरराजेति संबध्यते । देवान्तकः परिघमादाय समुद्रमथने गिरिं मन्दरगिरिं । परिगृह्य तिष्ठतो विष्णोर्वपुर्विडम्बयन् विरराज ॥ ३१—३६ ॥ मरणं वेत्यर्धे निर्जग्मुरित्युपस्कार्यं ॥ ३७ ॥ इति कृत्वेत्यर्धं ॥ इत्थं कर्तव्यमित्येवंरूपां मतिं कृत्वेत्यर्थः ॥ ३८ ॥ जगर्जुः मेघध्वनिं चक्रुः । प्रणेदुः सिंहनादंचक्रुः । चिक्षिपुः क्षेपवचनान्यूचुः । सायकान् जगृहुरित्यन्वयः ॥ ३९—४३ ॥ लब्धलक्षाः लब्धपराक्रमविषयाः ॥ ४४—४६ ॥ संचारप्र-

---

लात् ॥ १६ ॥ ति० सुसंयुक्तं सुसंयुक्ताश्वं ॥ २६ ॥ ति० निश्चित्य निश्चयेन मरणंशत्रुपराजयंवा । करिष्यामइतिशेषः ॥ स० शत्रूणांपराजयंनिश्चित्य शत्रूणांमरणंवाभवेदितिमतिंकृत्वासंयुगार्थिनःसन्तःनिर्जग्मुः ॥ ३७—३८ ॥ ति० चिक्षिपुः शत्रुविषयाक्षेपवचनान्यूचुः ॥ ३९ ॥ ति० ष्वेलितास्फोटितानांच तैरित्यर्थः ॥ ४० ॥ ती० रक्षस्सैन्येषुविषयेसंक्रुद्धाःकेचित्प्लवङ्गमाः द्रुमशिलायुधाःसन्तः आकाशमाविश्यचेरुः । केचिद्वानरपुङ्गवाः विपुलस्कन्धान्द्रुमान् गृह्य गृहीत्वा । उर्व्यांचेरुरितियोजना

[पा०] १ ङ. झ. हेमभूषणं. २ क. ग. घ. ङ. ट. तेप्रतस्थुर्महा. ३ घ. ङ. झ. अनुपेतुः. ४ क. घ. च. छ. ञ. ट. र्महाकायाराक्षसाः. ५ ङ. झ. वस्त्राणामावलिःशिवा. ६ ग. ङ. झ. ट. जगृहुश्चमहात्मानोनिर्याताः. ७ ङ. झ. ष्वेलितास्फोटितानांचसंचचालेवमेदिनी. ८ ङ. झ. ञ. ट. संस्फोटितमिवांबरं. ९ क. ख. ज. ञ. ट. शिलायुधं. १० घ.—छ. झ. ञ. ट. संप्रणेदुर्मुहुर्महुः. ११ ङ.—झ. ट. प्रणेदुः. १२ ङ. झ. ञ. ट. संक्रुद्धाःकेचिद्द्रुम.

तद्युद्धमभवद्घोरं रक्षोवानरसंकुलम् ॥ ४८ ॥
ते पादपशिलाशैलैश्चक्रुर्वृष्टिमनूपमाम् ॥ बाणौघैर्वार्यमाणाश्च हरयो भीमविक्रमाः ॥ ४९ ॥
सिंहनादान्विनेदुश्च रणे वानरराक्षसाः ॥ शिलाभिश्चूर्णयामासुर्यातुधानान्प्लवङ्गमाः ॥ ५० ॥
निजघ्नुः संयुगे क्रुद्धाः कवचाभरणावृतान् ॥ केचिद्रथगतान्वीरान्गजवाजिगतानपि ॥ ५१ ॥
निजघ्नुः सहसाप्लुत्य यातुधानान्प्लवङ्गमाः ॥ शैलशृङ्गाचिताङ्गाश्च मुष्टिभिर्वान्तलोचनाः ॥ ५२ ॥
चेरुः पेतुश्च नेदुश्च तत्र राक्षसपुङ्गवाः ॥ राक्षसाश्च शरैस्तीक्ष्णैर्बिभिदुः कपिकुञ्जरान् ॥ ५३ ॥
शूलमुद्गरखड्गैश्च जघ्नुः प्रासैश्च शक्तिभिः ॥ अन्योन्यं पातयामासुः परस्परजयैषिणः ॥ ५४ ॥
रिपुशोणितदिग्धाङ्गास्तत्र वानरराक्षसाः ॥ ततः शैलैश्च खड्गैश्च विसृष्टैर्हरिराक्षसैः ॥ ५५ ॥
मुहूर्तेनावृता भूमिरभवच्छोणिताप्लुता ॥ विकीर्णपर्वताकारै रक्षोभिररिमर्दनैः ॥
आसीद्वसुमती पूर्णा तदा युद्धमदान्वितैः ॥ ५६ ॥
आक्षिप्ताः क्षिप्यमाणाश्च भग्नशूलाश्च वानरैः ॥ पुनरङ्गैस्तथा चक्रुरासन्ना युद्धमद्भुतम् ॥ ५७ ॥
वानरान्वानरैरेव जघ्नुस्ते रजनीचराः ॥ राक्षसान्राक्षसैरेव जघ्नुस्ते वानरा अपि ॥ ५८ ॥
आक्षिप्य च शिलास्तेषां निजघ्नू राक्षसा हरीन् ॥ तेषां चाच्छिद्य शस्त्राणि जघ्नू रक्षांसि वानराः ॥५९॥
निजघ्नुः शैलशूलास्त्रैर्बिभिदुश्च परस्परम् ॥ सिंहनादान्विनेदुश्च रणे वानरराक्षसाः ॥ ६० ॥
छिन्नवर्मतनुत्राणा राक्षसा वानरैर्हताः ॥ रुधिरं प्रस्रुतास्तत्र रससारमिव द्रुमाः ॥ ६१ ॥
रथेन च रथं चापि वारणेनैव वारणम् ॥ ६२ ॥
हयेन च हयं केचिन्निजघ्नुर्वानरा रणे ॥ प्रहृष्टमनसः सर्वे प्रगृहीतमनःशिलाः ॥ ६३ ॥
हरयो राक्षसाञ्जघ्नुर्द्रुमैश्च बहुशाखिभिः ॥ तद्युद्धमभवद्घोरं रक्षोवानरसंकुलम् ॥ ६४ ॥
क्षुरप्रैरर्धचन्द्रैश्च भल्लैश्च निशितैः शरैः ॥ राक्षसा वानरेन्द्राणां चिच्छिदुः पादपाञ्शिलाः ॥ ६५ ॥
विकीर्णैः पर्वताग्रैश्च द्रुमैश्छिन्नैश्च संयुगे ॥ हतैश्च कपिरक्षोभिर्दुर्गमा वसुधाऽभवत् ॥ ६६ ॥

ते वानरा गर्वितहृष्टचेष्टाः संग्राममासाद्य भयं विमुच्य ॥
युद्धं तु सर्वे सह राक्षसैस्तैर्नानायुधाश्चक्रुरदीनसत्त्वाः ॥ ६७ ॥

कारमेवाह—केचिदित्यादिसार्धश्लोक एकान्वयः ॥ द्रुमशिलायुधा इति स्वभावोक्तिः ॥४७—४८॥ अनूपमां अनुपमां ॥४९—५६॥ आक्षिप्ताःक्षिप्यमाणाश्चेति नियुद्धप्रकारकथनं । अङ्गैः हस्तपादादिभिः ॥ ५७ —६०॥ छिन्नवर्मतनुत्राणाः छिन्नवर्मरूपतनुत्राणाः। रुधिरं प्रस्रुताः स्रुतवन्तः । मुमुचुरिति यावत् । रससारं निर्यासं ॥ ६१—६४ ॥ शिलाः शिलाश्चेत्यर्थः ॥ ६५—६६ ॥ गर्वितं हृष्टं च यथा भवति तथा ॥ ४७ ॥ **ती०** शैलशृङ्गाचिताङ्गाः गिरिशिखरैर्व्याप्तदेहाः । मुष्टिभिः मुष्टिप्रहारैः । वान्तलोचनाः बहिर्निर्गतलोचनाः ॥ ५२ ॥ **स०** छिन्नवर्मतनुत्राणाः छिन्नानि वर्मचतनुश्चत्राणंशरणंचेत्येतानियेषांते । 'त्राणंरक्षितेशरणेपिच' इतिविश्वः ॥ ६१ ॥ **ति०** पर्वतास्तैः निरस्तपर्वतैः द्रुमच्छिन्नैः छिन्नद्रुमैः । विकीर्णा व्याप्ता ॥ ६६ ॥

[पा०] १ क. ख. मनुत्तमां. २ ग. शैलशृङ्गनिपातैश्चमुष्टिभिश्चतलेनच. ३ ग. ङ. च. ज.—ट. च्छोणितोक्षिता. ४ ङ. ञ. ट. भग्नशैलैश्च. च. ट. भग्नशैलाश्चवानराः. घ. भग्नशूलाश्चराक्षसाः. ५ ङ. ञ. शैलशृङ्गैश्चबिभिदुश्च. क. ख. ञ. शैलशूलास्त्रैश्चिच्छिदुश्च. ६ क. ख. ग. ङ. ज. ट. प्रगृहीतमहाशिलाः. ७ ङ. ज. ञ. ट. बिभिदुः. ८ ङ. ज. ञ. ञ. विकीर्णाः पर्वतास्तैश्चद्रुमच्छिन्नैश्च. ९ ग. युधिराक्षसैस्तैः.

तस्मिन्प्रवृत्ते तुमुले विमर्दे प्रहृष्यमाणेषु वलीमुखेषु ॥
निपात्यमानेषु च राक्षसेषु महर्षयो देवगणाश्च नेदुः ॥ ६८ ॥
ततो हयं मारुततुल्यवेगमारुह्य शक्तिं निशितां प्रगृह्य ॥
नरान्तको वानरराजसैन्यं महार्णवं मीन इवाविवेश ॥ ६९ ॥
स वानरान्सप्त शतानि वीरः प्रासेन दीप्तेन विनिर्बिभेद ॥
एकक्षणेनेन्द्ररिपुर्महात्मा जघान सैन्यं हरिपुङ्गवानाम् ॥ ७० ॥
ददृशुश्च महात्मानं हयपृष्ठे प्रतिष्ठितम् ॥ चरन्तं हरिसैन्येषु विद्याधरमहर्षयः ॥ ७१ ॥
स तस्य ददृशे मार्गो मांसशोणितकर्दमः ॥ पतितैः पर्वताकारैर्वानरैरभिसंवृतः ॥ ७२ ॥
यावद्विक्रमितुं बुद्धिं चक्रुः प्लवगपुङ्गवाः ॥ तावदेतानतिक्रम्य निर्बिभेद नरान्तकः ॥ ७३ ॥
ज्वलन्तं प्रासमुद्यम्य संग्रामाग्रे नरान्तकः ॥ ददाह हरिसैन्यानि वनानीव विभावसुः ॥ ७४ ॥
यावदुत्पाटयामासुर्वृक्षाञ्शैलान्वनौकसः ॥ तावत्प्रासहताः पेतुर्वज्रकृत्ता इवाचलाः ॥ ७५ ॥
दिक्षु सर्वासु बलवान्विचचार नरान्तकः ॥ प्रमृद्नन्सर्वतो युद्धे प्रावृट्काले यथाऽनिलः ॥ ७६ ॥
न शेकुर्धावितुं वीरा न स्थातुं स्पन्दितुं भयात् ॥ उत्पतन्तं स्थितं यान्तं सर्वान्विव्याध वीर्यवान् ॥७७॥
एकेनान्तककल्पेन प्रासेनादित्यतेजसा ॥ भिन्नानि हरिसैन्यानि निपेतुर्धरणीतले ॥ ७८ ॥
वज्रनिष्पेषसदृशं प्रासस्याभिनिपातनम् ॥ न शेकुर्वानराः सोढुं ते विनेदुर्महास्वनम् ॥ ७९ ॥
पततां हरिवीराणां रूपाणि प्रचकाशिरे ॥ वज्राभिन्नाग्रकूटानां शैलानां पततामिव ॥ ८० ॥
ये तु पूर्वं महात्मानः कुम्भकर्णेन पातिताः ॥ ते स्वस्था वानरश्रेष्ठाः सुग्रीवमुपतस्थिरे ॥ ८१ ॥
विप्रेक्षमाणः सुग्रीवो ददर्श हरिवाहिनीम् ॥ नरान्तकभयत्रस्तां विद्रवन्तीमितस्ततः ॥ ८२ ॥
विद्रुतां वाहिनीं दृष्ट्वा स ददर्श नरान्तकम् ॥ गृहीतप्रासमायान्तं हयपृष्ठे प्रतिष्ठितम् ॥ ८३ ॥
अथोवाच महातेजाः सुग्रीवो वानराधिपः ॥ कुमारमङ्गदं वीरं शक्रतुल्यपराक्रमम् ॥ ८४ ॥
गच्छ त्वं राक्षसं वीरो योसौ तुरगमास्थितः ॥ क्षोभयन्तं हरिबलं क्षिप्रं प्राणैर्वियोजय ॥ ८५ ॥
स भर्तुर्वचनं श्रुत्वा निष्पपाताङ्गदस्ततः ॥ अनीकान्मेघसंकाशान्मेघानीकादिवांशुमान् ॥ ८६ ॥
शैलसंघातसंकाशो हरीणामुत्तमोऽङ्गदः ॥ रराजाङ्गदसन्नद्धः सधातुरिव पर्वतः ॥ ८७ ॥
निरायुधो महातेजाः केवलं नखदंष्ट्रवान् ॥ नरान्तकमभिक्रम्य वालिपुत्रोऽब्रवीद्वचः ॥ ८८ ॥
तिष्ठ किं प्राकृतैरेभिर्हरिभिस्त्वं करिष्यसि ॥ अस्मिन्वज्रसमस्पर्शं प्रासं क्षिप ममोरसि ॥ ८९ ॥

चेष्टन्त इति गर्वितहृष्टचेष्टाः । नानायुधाः गृहीतराक्षसायुधा इत्यर्थः ॥ ६७ ॥ विमर्दे युद्धे ॥ ६८–६९ ॥ जघानेति । इत्थमिति शेषः ॥ ७०–७३ ॥ ज्वलन्तं ज्वलन्तमिव स्थितं । विभावसुः वह्निः ॥ ७४–७५ ॥ प्रमृद्नन् मर्दयन् ॥ ७६ ॥ न शेकुरिति । यतो हेतोरुत्पतन्तं स्थितं यान्तं च विव्याध अतः स्पन्दनादौ न शेकुरित्यर्थः ॥ ७७–८० ॥ कुम्भकर्णेन पातितानां नीलादीनामुत्तरत्र पौरुषकथनसांगत्यायैषां लब्धसंज्ञत्वमाह—ये त्विति ॥ ८१—८५ ॥ मेघसंकाशादिति निबिडत्वलक्षणसमानधर्मप्रयुक्तेयमुपमा । मेघानीकादित्यत्र तु निष्क्रमणापादानत्वधर्मप्रयुक्तेत्युपमाद्वयस्य निर्वाहः ॥ ८६ ॥ संघातः निबिडसंवेशः ।

ती० तस्यमार्गः तेनयुद्धार्थंगतोमार्गइत्यर्थः । पतितैर्वानरैरभिसंवृतःसन् । मांसशोणितकर्दमःसन् ददृशइतिसंबन्धः ॥ ७२ ॥
स० नखदंष्ट्रं प्राण्यङ्गत्वादेकवद्भावः । तद्वान् ॥ ८८ ॥

[पा०] १ ङ. झ. ट. भाषितुं. ख. च. ञ. द्रवितुं. २ ङ. च. झ. ञ. ट. भग्नानि. ३ क.—ट. दृष्ट्वोवाच. ४ घ. ङ. झ. ञ. ट. गच्छैनं. ५ क. ख. घ. वालिपुत्रोऽङ्गदोब्रवीत्. ६ क. ख. च. ञ. ट. तिष्ठत्वं. ७ क. ख. च. ञ. ट. हरिभिःकिं.

अङ्गदस्य वचः श्रुत्वा प्रचुक्रोध नरान्तकः ॥ संदश्य दशनैरोष्ठं विनिश्वस्य भुजङ्गवत् ॥ ९० ॥
अभिगम्याङ्गदं क्रुद्धो वालिपुत्रं नरान्तकः ॥ ९१ ॥

प्रासं समाविध्य तदाऽङ्गदाय समुज्वलन्तं सहसोत्ससर्ज ॥
स वालिपुत्रोरसि वज्रकल्पे बभूव भग्नो न्यपतच्च भूमौ ॥ ९२ ॥
तं प्रासमालोक्य तदा विभग्नं सुपर्णकृत्तोरगभोगकल्पम् ॥
तलं समुद्यम्य स वालिपुत्रस्तुरङ्गमं तस्य जघान मूर्ध्नि ॥ ९३ ॥
निमग्नतालुः स्फुटिताक्षितारो निष्क्रान्तजिह्वोचलसन्निकाशः ॥
स तस्य वाजी निपपात भूमौ तलप्रहारेण विशीर्णमूर्धा ॥ ९४ ॥
नरान्तकः क्रोधवशं जगाम हतं तुरङ्गं पतितं निरीक्ष्य ॥
स मुष्टिमुद्यम्य महाप्रभावो जघान शीर्षे युधि वालिपुत्रम् ॥ ९५ ॥
अथाङ्गदो मुष्टिविभिन्नमूर्धा सुस्राव तीव्रं रुधिरं भृशोष्णम् ॥
मुहुर्विजज्वाल मुमोह चापि संज्ञां समासाद्य विसिष्मिये च ॥ ९६ ॥
अथाङ्गदो वज्रसमानवेगं संवर्त्य मुष्टिं गिरिशृङ्गकल्पम् ॥
निपातयामास तदा महात्मा नरान्तकस्योरसि वालिपुत्रः ॥ ९७ ॥
स मुष्टिनिष्पिष्टविभिन्नवक्षा ज्वालावमच्छोणितदिग्धगात्रः ॥
नरान्तको भूमितले पपात यथाऽचलो वज्रनिपातभग्नः ॥ ९८ ॥
अथान्तरिक्षे त्रिदशोत्तमानां वनौकसां चैव महाप्रणादः ॥
बभूव तस्मिन्निहतेऽप्यवीरे नरान्तके वालिसुतेन सङ्ख्ये ॥ ९९ ॥
अथाङ्गदो राममनःप्रहर्षणं सुदुष्करं तत्कृतवान्हि विक्रमम् ॥
विसिष्मिये सोऽपि च तीव्रविक्रमः पुनश्च युद्धे स बभूव हर्षितः ॥ १०० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥

अङ्गदसन्नद्धः सन्नद्धाङ्गदः ॥ ८७–९० ॥ अभिगम्येति । अयमुत्तरशेषः ॥ ९१—९७ ॥ ज्वालारूपेण वमता उद्गच्छता शोणितेन दिग्धगात्रः ॥ ९८–९९ ॥ तत्कृतवानित्यत्र तदित्यव्ययं पदं । तस्मादित्यर्थः । अङ्गदः हि यस्मात् । सुदुष्करं अतएव राममनःप्रहर्षणं विक्रमं कृतवान् । तस्मादित्यर्थः । विसिष्मिये । सोपीत्यत्र तच्छब्देन राममनःप्रहर्षणमित्यत्र गुणीभूतो रामशब्दः परामृश्यते । हर्षितः विस्मितेन रामेण श्लाघया तोषितः । स च अङ्गदश्च पुनः युद्धे बभूव । युद्धविषये सन्नद्धो बभूवेत्यर्थः ॥ १०० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनसप्ततितमः सर्गः ॥ ६९ ॥

कतक० अत्रसर्गविच्छेदोबहुषुपुस्तकेषुनदृश्यतइत्यस्माभिरपिनकृतः । पूर्वोत्तरवाक्ययोरेककर्तृकयुद्धवर्णनात् ॥ १०० ॥ इत्येकोनसप्ततितमःसर्गः ॥ ६९ ॥

[पा०] १ ङ. झ. वीर्यकल्पं. २ ङ. झ. ट. मुष्टिविशीर्णमूर्धा. ३ ङ. झ. ट. मृत्युसमान. ४ ङ.—झ. निर्भिन्ननिर्मग्नवक्षाः. ५ क. ख. ग. त्रिहतेऽतिवीर्ये. ६ क. ख. ग. ङ. झ. ञ. ट. तंकृतवान्हि. ७ ङ. च. झ. ञ. ट. सोप्यथ भौमकर्मा.

सप्ततितमः सर्गः ॥ ७० ॥

हनुमन्नीलाभ्यांक्रमेणदेवान्तकयुद्धोन्मत्तयोर्वधः ॥ १ ॥ त्रिशिरसामुष्ट्यभिहतेनहनुमतातदीयखड्गाक्षेपेणतच्छिरश्छेदनकर्तनम् ॥ २ ॥ ऋषभनाम्नावानरवरेणमत्तनाम्नोराक्षसस्यवधः ॥ ३ ॥

नरान्तकं हतं दृष्ट्वा चुक्रुशुर्नैर्ऋतर्षभाः ॥ देवान्तकस्त्रिमूर्धा च पौलस्त्यश्च महोदरः ॥ १ ॥
आरूढो मेघसंकाशं वारणेन्द्रं महोदरः ॥ वालिपुत्रं महावीर्यमभिदुद्राव वीर्यवान् ॥ २ ॥
भ्रातृव्यसनसंतप्तस्तथा देवान्तको बली ॥ आदाय परिघं दीप्तमङ्गदं समभिद्रवत् ॥ ३ ॥
रथमादित्यसंकाशं युक्तं परमवाजिभिः ॥ आस्थाय त्रिशिरा वीरो वालिपुत्रमथाभ्ययात् ॥ ४ ॥
स त्रिभिर्देवदर्पघ्नैर्नैर्ऋतेन्द्रैरभिद्रुतः ॥ वृक्षमुत्पाटयामास महाविटपमङ्गदः ॥ ५ ॥
देवान्तकाय तं वीरश्चिक्षेप सहसाऽङ्गदः ॥ महावृक्षं महाशाखं शक्रो दीप्तमिवाशनिम् ॥ ६ ॥
त्रिशिरास्तं प्रचिच्छेद शरैराशीविषोपमैः ॥ स वृक्षं कृत्तमालोक्य उत्पपात तदाऽङ्गदः ॥ ७ ॥
स ववर्ष ततो वृक्षाञ्शैलांश्च कपिकुञ्जरः ॥ तान्प्रचिच्छेद संक्रुद्धस्त्रिशिरा निशितैः शरैः ॥ ८ ॥
परिघाग्रेण तान्वृक्षान्बभञ्ज च सुरान्तकः ॥ त्रिशिराश्चाङ्गदं वीरमभिदुद्राव सायकैः ॥ ९ ॥
गजेन समभिद्रुत्य वालिपुत्रं महोदरः ॥ जघानोरसि संक्रुद्धस्तोमरैर्वज्रसन्निभैः ॥ १० ॥
देवान्तकश्च संक्रुद्धः परिघेण तदाऽङ्गदम् ॥ उपगम्याभिहत्याशु व्यपचक्राम वेगवान् ॥ ११ ॥
स त्रिभिर्नैर्ऋतश्रेष्ठैर्युगपत्समभिद्रुतः ॥ न विव्यथे महातेजा वालिपुत्रः प्रतापवान् ॥ १२ ॥
स वेगवान्महावेगं कृत्वा परमदुर्जयः ॥ तलेन भृशमुत्पत्य जघानास्य महागजम् ॥ १३ ॥
तस्य तेन प्रहारेण नागराजस्य संयुगे ॥ पेततुर्लोचने तस्य विननाद स वारणः ॥ १४ ॥
विषाणं चास्य निष्कृष्य वालिपुत्रो महाबलः ॥ देवान्तकमभिप्लुत्य ताडयामास संयुगे ॥ १५ ॥
स विह्वलितसर्वाङ्गो वातोद्धूत इव द्रुमः ॥ लाक्षारससवर्णं च सुस्राव रुधिरं मुखात् ॥ १६ ॥
अथाश्वास्य महातेजाः कृच्छ्राद्देवान्तको बली ॥ आविध्य परिघं घोरमाजघान तदाऽङ्गदम् ॥ १७ ॥
परिघाभिहतश्चापि वानरेन्द्रात्मजस्तदा ॥ जानुभ्यां पतितो भूमौ पुनरेवोत्पपात ह ॥ १८ ॥
तमुत्पतन्तं त्रिशिरास्त्रिभिर्बाणैरजिह्मगैः ॥ घोरैर्हरिपतेः पुत्रं ललाटेऽभिजघान ह ॥ १९ ॥
ततोऽङ्गदं परिक्षिप्तं त्रिभिर्नैर्ऋतपुङ्गवैः ॥ हनुमानपि विज्ञाय नीलश्चापि प्रतस्थतुः ॥ २० ॥
ततश्चिक्षेप शैलाग्रं नीलस्त्रिशिरसे तदा ॥ तद्रावणसुतो धीमान्बिभेद निशितैः शरैः ॥ २१ ॥
तद्बाणशतनिर्भिन्नं विदारितशिलातलम् ॥ सविस्फुलिङ्गं सज्वालं निपपात गिरेः शिरः ॥ २२ ॥
ततो जृम्भितमालोक्य हर्षाद्देवान्तकस्तदा ॥ परिघेणाभिदुद्राव मारुतात्मजमाहवे ॥ २३ ॥

पौलस्त्य इति त्रिमूर्धविशेषणं । न तु महोदरस्य । देवान्तकादयस्त्रयश्चुक्रुशुरिति संबन्धः ॥ १—२ ॥ समभिद्रवत् समभ्यद्रवत् ॥ ३–१० ॥ व्यपचक्राम पश्चादाजगाम ॥११—१२॥ अस्य महोदरस्य ॥१३॥ तस्य अङ्गदस्य । तस्य नागराजस्येति द्वितीयतच्छब्दान्वयः ॥ १४ ॥ महाबलः वालिपुत्रः अस्य महोदरवाहनस्य गजस्य विषाणं निष्कृष्य अभिप्लुत्य वेगेन सन्निपत्य । देवान्तकं ताडयामासेति संबन्धः ॥ १५–२२ ॥ जृम्भितं भग्नमिति यावत् । जृम्भितं तद्ब-

---

[पा०] १ ङ. ज.—ट. समभिद्रुत्य. २ क. ख. ङ. झ. ट. मभिद्रुत्य. ३ ङ. झ. ञ. ट. गहत्. ४ क. च.—ट. वेगादाजघान. ५ ङ. च. झ. ञ. ट. सविजृंभित. ६ क.—च. झ. ञ. ट. देवान्तकोबली.

तमापतन्तमुत्प्लुत्य हनुमान्मारुतात्मजः ॥ आजघान तदा मूर्ध्नि वज्रकल्पेन मुष्टिना ॥ २४ ॥
शिरसि प्रहरन्वीरस्तदा वायुसुतो बली ॥ नादेनाकम्पयच्चैव राक्षसान्स महाकपिः ॥ २५ ॥
स मुष्टिनिष्पिष्टविकीर्णमूर्धा निर्वान्तदन्ताक्षिविलम्बिजिह्वः ॥
देवान्तको राक्षसराजसूनुर्गतासुरुर्व्यां सहसा पपात ॥ २६ ॥
तस्मिन्हते राक्षसयोधमुख्ये महाबले संयति देवशत्रौ ॥
क्रुद्धस्त्रिमूर्धा निशिताग्रमुग्रं ववर्ष नीलोरसि बाणवर्षम् ॥ २७ ॥
महोदरस्तु संक्रुद्धः कुञ्जरं पर्वतोपमम् ॥ भूयः समधिरुह्याशु मन्दरं रश्मिवानिव ॥ २८ ॥
ततो बाणमयं वर्ष नीलस्योरस्यपातयत् ॥ गिरौ वर्ष तडिच्चक्रचापवानिव तोयदः ॥ २९ ॥
ततः शरौघैरभिवर्ष्यमाणो विभिन्नगात्रः कपिसैन्यपालः ॥
नीलो बभूवाथ निसृष्टगात्रो विष्टम्भितस्तेन महाबलेन ॥ ३० ॥
ततस्तु नीलः प्रतिलभ्य संज्ञां शैलं समुत्पाट्य सवृक्षषण्डम् ॥
ततः समुत्पत्य भृशोग्रवेगो महोदरं तेन जघान मूर्ध्नि ॥ ३१ ॥
ततः स शैलेन्द्रनिपातभग्नो महोदरस्तेन महाद्विपेन ॥
विपोथितो भूमितले गतासुः पपात वज्राभिहतो यथाऽद्रिः ॥ ३२ ॥
पितृव्यं निहतं दृष्ट्वा त्रिशिराश्चापमाददे ॥ हनुमन्तं च संक्रुद्धो विव्याध निशितैः शरैः ॥ ३३ ॥
स वायुसूनुः कुपितश्चिक्षेप शिखरं गिरेः ॥ त्रिशिरास्तच्छरैस्तीक्ष्णैर्बिभेद बहुधा बली ॥ ३४ ॥
तच्छ्यर्थं शिखरं दृष्ट्वा द्रुमवर्षं महाकपिः ॥ विससर्ज रणे तस्मिन्रावणस्य सुतं प्रति ॥ ३५ ॥
तमापतन्तमाकाशे द्रुमवर्षं प्रतापवान् ॥ त्रिशिरा निशितैर्बाणैश्चिच्छेद च ननाद च ॥ ३६ ॥
ततो हनूमानुत्प्लुत्य हयांस्त्रिशिरसस्तदा ॥ विददार नखैः क्रुद्धो गजेन्द्रं मृगराडिव ॥ ३७ ॥
अथ शक्तिं समादाय कालरात्रिमिवान्तकः ॥ चिक्षेपानिलपुत्राय त्रिशिरा रावणात्मजः ॥ ३८ ॥
दिवः क्षिप्तामिवोल्कां तां शक्तिं क्षिप्तामसंगताम् ॥ गृहीत्वा हरिशार्दूलो बभञ्ज च ननाद च ॥ ३९ ॥
तां दृष्ट्वा घोरसंकाशां शक्तिं भग्नां हनूमता ॥ प्रहृष्टा वानरगणा विनेदुर्जलदा इव ॥ ४० ॥
ततः खड्गं समुद्यम्य त्रिशिरा राक्षसोत्तमः ॥ निजघान तदा व्यूढे वायुपुत्रस्य वक्षसि ॥ ४१ ॥
खड्गप्रहाराभिहतो हनूमान्मारुतात्मजः ॥ आजघान त्रिशिरसं तलेनोरसि वीर्यवान् ॥ ४२ ॥
स तलाभिहतस्तेन स्रस्तहस्तायुधो भुवि ॥ निपपात महातेजास्त्रिशिरास्त्यक्तचेतनः ॥ ४३ ॥
स तस्य पततः खड्गं समाच्छिद्य महाकपिः ॥ ननाद गिरिसंकाशस्त्रासयन्सर्वनैर्ऋतान् ॥ ४४ ॥

नुर्दष्ट्वेत्यादिवत् ॥ २३—२९ ॥ निसृष्टगात्रः शिथिलगात्रः । विष्टम्भितः स्तब्धीकृतः । एतन्निसृष्टत्वे हेतुः ॥ ३०—३१ ॥ विपोथितः हिंसितः ॥ ३२—३९ ॥ घोरसंकाशां भयंकरप्रकाशां ॥ ४० ॥ व्यूढे विशाले ॥ ४१—४२ ॥ त्यक्तचेतनः मूर्च्छित

ती० निर्वान्तदन्ताक्षिविलंबिजिह्वः दन्ताक्षीणिचविलंबिजिह्वाचतथा । निर्वान्ताः बहिर्निर्गताःदन्तादयोयस्येतितथा ॥ २६ ॥ ति० भूयःसमधिरुह्येति । युद्धागमनवेलायामारूढगजस्याङ्गदेनहतत्वादितिभावः ॥ २८ ॥ ति० तटिच्चक्रंचापमिन्द्रधनुश्चयस्यास्तिसः ॥ स० तटितांविद्युतांचक्रंसमूहोयस्मिंस्तत् ॥ २९ ॥ ती० असंगतां अनिवारितां ॥ स० असंगतां खसमीपमप्राप्तां

[पा०] १ ङ. ञ. ठ. तडिच्चक्रंसगर्जन्निवतोयदः. २ घ.—ञ. शैलाभिनिपात. ३ ङ. च. झ. ञ. ट. तदाकपिः. ४ ङ. च. झ. ञ. ट. समासाद्य. ५ घ. ङ. झ. निचखानतदाखड्गंवानरेन्द्रस्यवक्षसि. ख. च. ञ. ट. निजघानचखड्गेन. ग. निजघानतदावेगाद्वानरेन्द्रस्य. ६ क.—ङ. ज.—ट. स्रस्तहस्तांबरो.

अमृष्यमाणस्तं घोषमुत्पपात निशाचरः ॥ उत्पत्य च हनूमन्तं ताडयामास मुष्टिना ॥ ४५ ॥
तेन मुष्टिप्रहारेण संचुकोप महाकपिः ॥ कुपितश्च निजग्राह किरीटे राक्षसर्षभम् ॥
[हनुमान्रोषताम्राक्षो राक्षसं परवीरहा] ॥ ४६ ॥

स तस्य शीर्षाण्यसिना शितेन किरीटजुष्टानि सकुण्डलानि ॥
क्रुद्धः प्रचिच्छेद सुतोऽनिलस्य त्वष्टुः सुतस्येव शिरांसि शक्रः ॥ ४७ ॥
तान्यायताक्षाण्यगसन्निभानि प्रदीप्तवैश्वानरलोचनानि ॥
पेतुः शिरांसीन्द्ररिपोर्धरण्यां ज्योतींषि मुक्तानि यथाऽर्कमार्गात् ॥ ४८ ॥
तस्मिन्हते देवरिपौ त्रिशीर्षे हनूमता शक्रपराक्रमेण ॥
नेदुः प्लवङ्गाः प्रचचाल भूमी रक्षांस्यथो दुद्रुविरे समन्तात् ॥ ४९ ॥

हतं त्रिशिरसं दृष्ट्वा तथैव च महोदरम् ॥ हतौ प्रेक्ष्य दुराधर्षौ देवान्तकनरान्तकौ ॥ ५० ॥
चुकोप परमामर्षी मत्तो राक्षसपुङ्गवः ॥ जग्राहार्चिष्मतीं घोरां गदां सर्वायसीं शुभाम् ॥ ५१ ॥
हेमपट्टपरिक्षिप्तां मांसशोणितफेनिलाम् ॥ विराजमानां वपुषा शत्रुशोणितरञ्जिताम् ॥ ५२ ॥
तेजसा संप्रदीप्ताग्रां रक्तमाल्यविभूषिताम् ॥ ऐरावतमहापद्मसार्वभौमभयावहाम् ॥ ५३ ॥
गदामादाय संक्रुद्धो मत्तो राक्षसपुङ्गवः ॥ हरीन्समभिदुद्राव युगान्ताग्निरिव ज्वलन् ॥ ५४ ॥
अथर्षभः समुत्पत्य वानरो रावणानुजम् ॥ मत्तानीकमुपागम्य तस्थौ तस्याग्रतो बली ॥ ५५ ॥
तं पुरस्तात्स्थितं दृष्ट्वा वानरं पर्वतोपमम् ॥ आजघानोरसि क्रुद्धो गदया वज्रकल्पया ॥ ५६ ॥
स तयाऽभिहतस्तेन गदया वानरर्षभः ॥ भिन्नवक्षाः समाधूतः सुस्राव रुधिरं बहु ॥ ५७ ॥
स संप्राप्य चिरात्संज्ञामृषभो वानरर्षभः ॥ [क्रुद्धो विस्फुरमाणोष्ठो महापार्श्वमुदैक्षत ॥ ५८ ॥

स वेगवान्वेगवदभ्युपेत्य तं राक्षसं वानरवीरमुख्यः ॥
संवर्त्य मुष्टिं सहसा जघान बाह्वन्तरे शैलनिकाशरूपः ॥ ५९ ॥
स कृत्तमूलः सहसेव वृक्षः क्षितौ पपात क्षतजोक्षिताङ्गः ॥
तां चास्य घोरां यमदण्डकल्पां गदां प्रगृह्याशु तदा ननाद ॥ ६० ॥

इत्यर्थः ॥४३—४६॥ त्वष्टुः सुतः विश्वरूपः । "विश्वरूपो वै त्वाष्ट्रः पुरोहितः" इत्यादि श्रुतिप्रसिद्धः ॥ ४७ ॥ मुक्तानि अनुभूतपुण्यफलानि । अर्कमार्गात् आकाशात् ॥ ४८—४९ ॥ हतं त्रिशिरसमित्यादि चतुश्श्लोक्येकान्वया । मत्तः महापार्श्वः । मत्त इति महापार्श्वस्य नामान्तरं । मांसशोणितफेनिलामिति युद्धकालिकरूपं । शत्रुशोणितरञ्जितामिति पूर्वकालिकरूपं । महापद्मः पुण्डरीकाह्वयदिग्गजः ॥ ५०—५४ ॥ मत्तानीकं मत्तानीक इति च महापार्श्वस्य नामान्तरं ॥ ५५—५६ ॥ समाधूतः कम्पितः

॥ ३९ ॥ शि० भूमिश्चचाल हर्षेणचकंपे ॥ ४९ ॥ ति० युद्धोन्मत्तंमहोदरं तथैवच हतमितिशेषः । एतद्बोधनूमताकृतइत्यनुवादबलाद्दृष्टव्यं ॥ ५० ॥ इतिसप्ततितमःसर्गः ॥ ७० ॥

[पा०] १ इदमर्धं. क.—घ. च. पाठेषुदृश्यते. २ ङ. झ. दृष्ट्वायुद्धोन्मत्तंतथैवच. क. ग. च. छ. ज. ञ. ट. दृष्ट्वामहोदरमथापिच. घ. महापार्श्वंतथैवच. ३ क. ग. च. ज. ञ. ट. महापार्श्वोनिशाचरः. ४ क. च. छ. ज. ञ. ट. शोणितलेपनां. घ. शोणितलेपितां. ५ ग. घ. ङ. ज. झ. ट. विपुलां. ६ क. घ. ङ. च. झ. ट. शोणिततर्पितां. ख. शोणितरूषितां. ज. पक्षभयंकरां. ७ क. च. ज. ञ. ट. महापार्श्वोनिशाचरः. ८ क. ख. च. ञ. ट. वरुणात्मजः. ९ क. च. ज. ञ. महापार्श्वमुपा. १० झ. वानरेश्वरः. ११ क्रुद्धोविस्फुरमाणोष्ठइत्यादयःधात्वंभइवाद्रिराजइत्यन्ताःश्लोकाः क. ख. ङ. च. झ. ञ. ट. पाठेषु अधिकादृश्यन्ते.

मुहूर्तमासीत्स गतासुकल्पः प्रत्यागतात्मा सहसा सुरारिः ।
उत्पत्य संध्याभ्रसमानवर्णस्तं वारिराजात्मजमाजघान ॥ ६१ ॥
स मूर्च्छितो भूमितले पपात मुहूर्तमुत्पत्य पुनः ससंज्ञः ।
तामेव तस्याद्रिवराद्रिकल्पां गदां समाविध्य जघान संख्ये ॥ ६२ ॥
सा तस्य रौद्रा समुपेत्य देहं रौद्रस्य देवाध्वरविप्रशत्रोः ॥
बिभेद वक्षः क्षतजं च भूरि सुस्राव धात्वंभ इवाद्रिराजः] ॥ ६३ ॥
[1]अभिदुद्राव वेगेन गदां तस्य महात्मनः ॥ ६४ ॥
गृहीत्वा तां गदां भीमामाविध्य च पुनः पुनः ॥ [2]मत्तानीकं महात्मानं जघान रणमूर्धनि ॥६५॥
स स्वया गदया भग्नो विशीर्णदशनेक्षणः ॥ निपपात ततो मत्तो वज्राहत इवाचलः ॥ ६६ ॥
विशीर्णन[3]यने भूमौ गतसत्त्वे गतायुषि ॥ पतिते राक्षसे तस्मिन्विद्रुतं राक्षसं बलम् ॥ ६७ ॥
[[4]उन्मत्तस्तु तदा दृष्ट्वा गतासुं भ्रातरं रणे ॥ चुकोप परमक्रुद्धः प्रलयाग्निसमद्युतिः ॥ ६८ ॥
ततः समादाय गदां स वीरो वित्रासयन्वानरसैन्यमुग्रम् ॥
दुद्राव वेगेन तु सैन्यमध्ये दहन्यथा वह्निरतिप्रचण्डः ॥ ६९ ॥
आपतन्तं तदा दृष्ट्वा राक्षसं भीमविक्रमम् ॥ शैलमादाय दुद्राव गवाक्षः पर्वतोपमः ॥ ७० ॥
जिघांसू राक्षसं भीमं तं शैलेन महाबलः ॥ आपतन्तं तदा दृष्ट्वा उन्मत्तोपि महागिरिम् ॥ ७१ ॥
चिच्छेद गदया वीरः शतधा तत्र संयुगे ॥ चूर्णीकृतं गिरिं दृष्ट्वा रक्षसा कपिकुञ्जरः ॥ ७२ ॥
विस्मितोऽभून्महाबाहुर्जगर्ज च मुहुर्मुहुः ॥ उन्मत्तस्तु सुसंक्रुद्धो ज्वलन्तीं राक्षसोत्तमः ॥ ७३ ॥
गदामादाय वेगेन कपेर्वक्षस्यताडयत् ॥ स तया गदया वीरस्ताडितः कपिकुञ्जरः ॥ ७४ ॥
पपात भूमौ निस्संज्ञः सुस्राव रुधिरं बहु ॥ पुनः संज्ञामथास्थाय वानरः स समुत्थितः ॥ ७५ ॥
तलेन ताडयामास ततस्तस्य शिरः कपिः ॥ तेन प्रताडितो वीरो राक्षसः पर्वतोपमः ॥ ७६ ॥
विस्रस्तदन्तनयनो निपपात महीतले ॥ सुस्राव रुधिरं सोष्णं गतासुश्च ततोऽभवत्] ॥ ७७ ॥
तस्मिन्हते भ्रातरि रावणस्य तन्नैर्[5]कृतानां बलमर्णवाभम् ॥
त्यक्तायुधं केवलजीवितार्थं दुद्राव भिन्नार्णवसन्निकाशम् ॥ ७८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

॥५७—६३॥ गदामभिदुद्राव गदां ग्रहीतुं दुद्रावेत्यर्थः ॥ ६४—७७ ॥ केवलजीवितार्थं यशोरहितजीवनार्थं । भिन्नार्णवसन्निकाशमिति क्रियाविशेषणं ॥७८॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्ततितमः सर्गः ॥ ७० ॥

[पा०] १ ञ. सोभिदुद्राव. क. अभिजग्राह. २ च. ज. ञ. महापार्श्वमहानादौ. ङ. झ. ट. मत्तानीकंमहात्मास. ३ क. ङ. झ. ट. विशीर्णनयनोभूमौगतसत्त्वोगतायुषः. ४ उन्मत्तस्त्वित्यादयः गतासुश्चततोऽभवत्. इत्यन्ताःश्लोकाःक.—ट. पाठेषुन दृश्यन्ते. औत्तराहपाठएवोपलभ्यन्ते. ५ ग. केवलजीविताशं.

एकसप्ततितमः सर्गः ॥ ७१ ॥

भ्रातृनिधनरुष्टे अतिकायेसेनामध्यप्रविष्टे तस्मिन्कुंभकर्णत्वभ्रमेण वानरेषुभयाद्विद्रवमाणेषु रामेण तद्रथायुधादिवर्णन-पूर्वकंविभीषणंप्रति तत्स्वरूपप्रश्नः ॥ १ ॥ विभीषणेनरामंप्रति विस्तरेणतत्पराक्रमादिनिवेदनम् ॥ २ ॥ अतिकायेनरामंप्रति गर्वोक्त्यायुद्धप्रार्थने लक्ष्मणेन तत्प्रतिरोधनम् ॥ ३ ॥ ततस्तयोर्वीरवादपुरस्सरंसमारंभः ॥ ४ ॥ लक्ष्मणेनास्त्रप्रत्यस्त्रप्रयोग-पूर्वकं निशिततरशरगणप्रयोगेपि ब्रह्मवरादभेद्यकवचएवसत्यतिकाये अन्तरिक्षेऽन्तर्हितवायुवचनाद्ब्रह्मास्त्रेण तच्छिरश्छे-दनम् ॥ ५ ॥

स्वबलं व्यथितं दृष्ट्वा तुमुलं रोमहर्षणम् ॥ भ्रातृंश्च निहतान्दृष्ट्वा शक्रतुल्यपराक्रमान् ॥ १ ॥
पितृव्यौ चापि संदृश्य समरे सन्निषूदितौ ॥ युद्धोन्मत्तं च मत्तं च भ्रातरौ राक्षसर्षभौ ॥ २ ॥
चुकोप च महातेजा ब्रह्मदत्तवरो युधि ॥ अतिकायोद्रिसंकाशो देवदानवदर्पहा ॥ ३ ॥
स भास्करसहस्रस्य संघातमिव भास्वरम् ॥ रथमास्थाय शक्रारिरभिदुद्राव वानरान् ॥ ४ ॥
स विस्फार्य महच्चापं किरीटी मृष्टकुण्डलः ॥ नाम विश्रावयामास ननाद च महास्वनम् ॥ ५ ॥
तेन सिंहप्रणादेन नामविश्रावणेन च ॥ ज्याशब्देन च भीमेन त्रासयामास वानरान् ॥ ६ ॥
ते दृष्ट्वा देहमाहात्म्यं कुम्भकर्णोऽयमुत्थितः ॥ भयार्ता वानराः सर्वे संश्रयन्ते परस्परम् ॥ ७ ॥
ते तस्य रूपमालोक्य यथा विष्णोस्त्रिविक्रमे ॥ भयाद्वानरयूथास्ते विद्रवन्ति ततस्ततः ॥ ८ ॥
तेऽतिकायं समासाद्य वानरा मूढचेतसः ॥ शरण्यं शरणं जग्मुर्लक्ष्मणाग्रजमाहवे ॥ ९ ॥
ततोतिकायं काकुत्स्थो रथस्थं पर्वतोपमम् ॥ ददर्श धन्विनं दूराद्गर्जन्तं कालमेघवत् ॥ १० ॥
स तं दृष्ट्वा महात्मानं राघवस्तु विसिष्मिये ॥ वानरान्सान्त्वयित्वाऽथ विभीषणमुवाच ह ॥ ११ ॥
कोसौ पर्वतसंकाशो धनुष्मान्हरिलोचनः ॥ युक्ते हयसहस्रेण विशाले स्यन्दने स्थितः ॥ १२ ॥
य एष निशितैः शूलैः सुतीक्ष्णैः प्रासतोमरैः ॥ अर्चिष्मद्भिर्वृतो भाति भूतैरिव महेश्वरः ॥ १३ ॥
कालजिह्वाप्रकाशाभिर्य एषोतिविराजते ॥ आवृतो रथशक्तीभिर्विद्युद्भिरिव तोयदः ॥ १४ ॥
धनूंषि चास्य सज्यानि हेमपृष्ठानि सर्वशः ॥ शोभयन्ति रथश्रेष्ठं शक्रचाप इवाम्बरम् ॥ १५ ॥

स्वबलमित्यादि । भ्रातरौ अन्योन्यं भ्रातरौ ॥१–४॥ मृष्टकुण्डलः शुद्धकुण्डलः ॥ ५–६ ॥ माहात्म्यं महत्त्वं । उत्थित इत्यनन्तरमितिकरणं द्रष्टव्यं ॥७–११॥ हरिलोचनः सिंहदृष्टिः ॥ १२–१३ ॥ रथशक्तीभिः

ति० भ्रातरौ अन्योन्यंभ्रातरौ ॥ एतदुक्तिःपरस्परसौहार्दातिशयप्रदर्शनाय ॥ २ ॥ ति० परस्परंसंश्रयन्ते । रक्षणार्थमिति शेषः ॥ ७ ॥ ती० तेतस्यरूपमालोक्यतेविद्रवन्तीतितच्छब्दद्वयान्वयः ॥ ति० तेरूपमालोक्य तेइव वानराइव विद्रवन्तीतित-च्छब्दद्वयनिर्वाहः । इवेतिशेषः ॥ स० तेवानराः विद्रवन्ति व्यद्रवन् । वानरयोधास्ते वानरयोधाअस्तायस्मिंस्तस्मिन्त्रणमण्डले । अस्तं भावेक्तः । वानरयोधानामसनेसतित्रायकाभावात्ततस्ततोव्यद्रवन्निति भावः । येयेतस्यरूपमालोक्यस्थितास्तेतेसर्वेततस्ततोवि-द्रवन्तीत्यन्वयेन तेद्वयंसार्थकमितिवा । नचभिन्नार्थगतयोस्तेशब्दयोःकथमैकस्थल्यसंपादनेनवीप्सालमितिवाच्यं । ' येयजत्रायई-ज्याः ' इत्यादिवदन्वयमुखेनैकस्थल्योपपत्तेः । ' ते रूपमालोक्य तइव वानराइवविद्रवन्तीतितच्छब्दद्वयनिर्वाहः । इवेतिशेषः ' इतिनागोजिभट्टः । तेतस्यरूपमालोक्य ते विद्रवन्तीतितच्छब्दद्वयस्यनिर्वाहइतितीर्थश्च । द्वयोर्भावोबिन्दुविभावनीयः ॥ ८ ॥ स० हरिलोचनः सिंहदृष्टिर्मर्कटदृष्टिर्वा हरिष्वेवलोचनंयस्येतिवा ॥ १२ ॥ स० यः कइत्यर्थः । ' यतश्चोदेतिसूर्यः ' इत्यादिव-

[पा०] १ ङ. ञ. संनिपातितौ. २ ङ. च. ज. झ. ञ. मारुह्य. ३ घ. ङ. ञ. महाकायं. ४ क. ख. ङ. ञ. ज. ट. राघवस्तुबुविस्मितः. घ. राघवस्तस्यविस्मितः. ५ ख. घ. एषभुविराजते.

क एष रक्षःशार्दूलो रणभूमिं विराजयन् ॥ अभ्येति रथिनां श्रेष्ठो रथेनादित्यतेजासा ॥ १६ ॥
ध्वजशृङ्गप्रतिष्ठेन राहुणाभिविराजते ॥ सूर्यरश्मिनिभैर्बाणैर्दिशो दश विराजयन् ॥ १७ ॥
त्रिणतं मेघनिर्ह्रादं हेमपृष्ठमलङ्कृतम् ॥ शतक्रतुधनुःप्रख्यं धनुश्चास्य विराजते ॥ १८ ॥
सध्वजः सपताकश्च सानुकर्षो महारथः ॥ चतुःसादिसमायुक्तो मेघस्तनितनिस्वनः ॥ १९ ॥
विंशतिर्दश चाष्टौ च तूण्योस्य रथमास्थिताः ॥ कार्मुकानि च भीमानि ज्याश्च काञ्चनपिङ्गलाः ॥ २० ॥
द्वौ च खड्गौ रथगतौ पार्श्वस्थौ पार्श्वशोभितौ ॥ चतुर्हस्तत्सरुयुतौ व्यक्तहस्तदशायतौ ॥ २१ ॥
रक्तकण्ठगुणो धीरो महापर्वतसन्निभः ॥ कालः कालमहावक्त्रो मेघस्थ इव भास्करः ॥ २२ ॥
काञ्चनाङ्गदनद्धाभ्यां भुजाभ्यामेष शोभते ॥ शृङ्गाभ्यामिव तुङ्गाभ्यां हिमवान्पर्वतोत्तमः ॥ २३ ॥
कुण्डलाभ्यां तु यस्यैतद्भाति वक्त्रं शुभेक्षणम् ॥ पुनर्वस्वन्तरगतं पूर्णं बिम्बमिवेन्दवम् ॥ २४ ॥
आचक्ष्व मे महाबाहो त्वमेनं राक्षसोत्तमम् ॥ यं दृष्ट्वा वानराः सर्वे भयार्ता विद्रुता दिशः ॥२५॥
स पृष्टो राजपुत्रेण रामेणामिततेजसा ॥ आचचक्षे महातेजा राघवाय विभीषणः ॥ २६ ॥
दशग्रीवो महातेजा राजा वैश्रवणानुजः ॥ भीमकर्मा महोत्साहो रावणो राक्षसाधिपः ॥ २७ ॥
तस्यासीद्वीर्यवान्पुत्रो रावणप्रतिमो रणे ॥ वृद्धसेवी श्रुतिधरः सर्वास्त्रविदुषां वरः ॥ २८ ॥
अश्वपृष्ठे रथे नागे खड्गे धनुषि कर्षणे ॥ भेदे सान्त्वे च दाने च नये मन्त्रे च संमतः ॥ २९ ॥
यस्य बाहू समाश्रित्य लङ्का वसति निर्भया ॥ तनयं धान्यमालिन्या अतिकायमिमं विदुः ॥ ३० ॥
एतेनाराधितो ब्रह्मा तपसा भावितात्मना ॥ अस्त्राणि चाप्यवाप्तानि रिपवश्च पराजिताः ॥ ३१ ॥
सुरासुरैरवध्यत्वं दत्तमस्मै स्वयंभुवा ॥ एतच्च कवचं दिव्यं रथश्चैषोर्कभास्वरः ॥ ३२ ॥
एतेन शतशो देवा दानवाश्च पराजिताः ॥ रक्षितानि च रक्षांसि यक्षाश्चापि निषूदिताः ॥ ३३ ॥
वज्रं विष्टम्भितं येन बाणैरिन्द्रस्य धीमतः ॥ पाशः सलिलराजस्य रणे प्रतिहतस्तथा ॥ ३४ ॥
एषोतिकायो बलवान्राक्षसानामथर्षभः ॥ रावणस्य सुतो धीमान्देवदानवदर्पहा ॥ ३५ ॥
तदस्मिन्क्रियतां यत्नः क्षिप्रं पुरुषपुङ्गव ॥ पुरा वानरसैन्यानि क्षयं नयति सायकैः ॥ ३६ ॥

रथस्थितामिः शक्तिभिः ॥ १४–१६॥ ध्वजशृङ्गप्रतिष्ठेनेति ॥ अनेन राहुध्वजोयमित्युक्तं ॥ १७ ॥ त्रिणतं त्रिषुआद्यन्तयोर्मध्ये च नतं । मेघनिर्ह्रादं मेघतुल्यज्यास्वनं । हेमपृष्ठं हेमलिप्तपार्श्वमित्यर्थः । धनुः रथस्थेभ्यः अन्यत् करधृतमिदं ॥ १८ ॥ ध्वजः असाधारणकेतनं । पताका साधारणी । अनुकर्षः रथाधःस्थदारु । चतुःसादिसमायुक्तः चतुःसारथियुक्तः ॥ १९ ॥ कार्मुकाणि धनुर्भेदा इति न पौनरुक्त्यं ॥ २० ॥ पार्श्वशोभितौ पार्श्वाभ्यां शोभितौ । चतुर्हस्तत्सरुयुतौ चतुर्हस्तप्रमाणत्सरुयुक्तौ । " त्सरुः खड्गादिमुष्टौ स्यात् " इत्यमरः । व्यक्तहस्तदशायतौ व्यक्तौ च तौ हस्तदशायतौ चेति तथा ॥ २१ ॥ रक्तकण्ठगुणः रक्तकण्ठमाल्यः । कालमहावक्त्रः कालस्येव महावक्त्रं यस्य स तथोक्तः । काल इव महावक्त्र इति वा ॥ २२—२७ ॥ तस्येत्यादिश्लोकद्वयं ॥ नये युक्तौ । मन्त्रे विचारे ॥ २८–३३ ॥ वज्रमित्यादिश्लोकद्वयं ॥ विष्टम्भितं निश्चलीकृतं । राक्षसानामथर्षभ इत्यत्राथशब्दः कात्स्न्र्ये ॥ ३४—३५ ॥ पुरा नयति

द्यच्छब्दःकिमर्थे ॥ १३ ॥ स० उभाभ्यांकुण्डलाभ्यां एकैकस्मिन्कर्णेउभाभ्यां । अतोनोभाभ्यामधिकं ॥ २४ ॥ ती० अश्वरथगजस्थानांक्रमेणप्रतिनियतायुधान्याह—खड्गेधनुषिकर्षणइति । कृष्यतेऽनेनेतिकर्षणःपाशादिः । तोमरभेदोवा ॥ २९ ॥

[पा०] १ ड. च. झ. ट. खड्गौचपार्श्वस्थौप्रदीप्तौपार्श्वशोभितौ. २ क.—च. झ. ञ. ट. त्सरुचितौ. ३ ङ. झ. कुण्डलाभ्यामुभाभ्यांचभातिवक्त्रंसुभीषणं. ४ ग. च. झ. ञ. ट. गतःपरिपूर्णोनिशाकरः. क. ख. घ. ङ. गतःप्रतिपूर्णोनिशाकरः. ५ ङ. च. झ. ञ. ट. महात्माहि. ग. महेष्वासो. ६ ग.—ट. बले. ७ झ. ञ. ट. नागपृष्ठे. ८ ङ. ट. कर्मणि. ९ ङ. च. झ. ञ. ट. भवति. १० ग. ङ. झ. ञ. ट. धीमता.

ततोतिकायो बलवान्प्रविश्य हरिवाहिनीम् ॥ विस्फारयामास धनुर्ननाद च पुनः पुनः ॥ ३७ ॥
तं भीमवपुषं दृष्ट्वा रथस्थं रथिनां वरम् ॥ अभिपेतुर्महात्मानो ये प्रधाना वनौकसः ॥ ३८ ॥
कुमुदो द्विविदो मैन्दो नीलः शरभ एव च ॥ पादपैर्गिरिशृङ्गैश्च युगपत्समभिद्रवन् ॥ ३९ ॥
तेषां वृक्षांश्च शैलांश्च शरैः काञ्चनभूषणैः ॥ अतिकायो महातेजाश्चिच्छेदास्त्रविदां वरः ॥ ४० ॥
तांश्चैव सर्वान्स हरीञ्शरैः सर्वायसैर्बली ॥ विव्याधाभिमुखः सङ्ख्ये भीमकायो निशाचरः ॥ ४१ ॥
तेऽर्दिता बाणवर्षेण भग्नगात्राः प्लवङ्गमाः ॥ न शेकुरतिकायस्य प्रतिकर्तुं महारणे ॥ ४२ ॥
तत्सैन्यं हरिवीराणां त्रासयामास राक्षसः ॥ मृगयूथमिव क्रुद्धो हरिर्यौवनदर्पितः ॥ ४३ ॥

स राक्षसेन्द्रो हरिसैन्यमध्ये नायुध्यमानं निजघान कंचित् ॥
उपेत्य रामं सधनुः कलापी सगर्वितं वाक्यमिदं बभाषे ॥ ४४ ॥
रथे स्थितोऽहं शरचापपाणिर्न प्राकृतं कंचन योधयामि ॥
यश्चास्ति कश्चिद्व्यवसाययुक्तो ददातु मे क्षिप्रमिहाद्य युद्धम् ॥ ४५ ॥
तत्तस्य वाक्यं ब्रुवतो निशम्य चुकोप सौमित्रिरमित्रहन्ता ॥
अमृष्यमाणश्च समुत्पपात जग्राह चापं च ततः स्मयित्वा ॥ ४६ ॥

क्रुद्धः सौमित्रिरुत्पत्य तूणादाक्षिप्य सायकम् ॥ पुरस्तादतिकायस्य विचकर्ष महद्धनुः ॥ ४७ ॥
पूरयन्स महीं शैलानाकाशं सागरं दिशः ॥ ज्याशब्दो लक्ष्मणस्योग्रस्त्रासयन्त्रजनीचरान् ॥ ४८ ॥
सौमित्रेश्चापनिर्घोषं श्रुत्वा प्रतिभयं तदा ॥ विस्मिष्मिये महातेजा राक्षसेन्द्रात्मजो बली ॥ ४९ ॥
अथातिकायः कुपितो दृष्ट्वा लक्ष्मणमुत्थितम् ॥ आदाय निशितं बाणमिदं वचनमब्रवीत् ॥ ५० ॥
बालस्त्वमसि सौमित्रे विक्रमेष्वविचक्षणः ॥ गच्छ किं कालसदृशं मां योधयितुमिच्छसि ॥ ५१ ॥
न हि मद्बाहुसृष्टानामस्त्राणां हिमवानपि ॥ सोढुमुत्सहते वेगमन्तरिक्षमथो मही ॥ ५२ ॥
सुखप्रसुप्तं कालाग्निं निबोधयितुमिच्छसि ॥ न्यस्य चापं निवर्तस्व मा प्राणाञ्जहि मद्गतः ॥ ५३ ॥
अथ वा त्वं प्रतिष्टब्धो न निवर्तितुमिच्छसि ॥ तिष्ठ प्राणान्परित्यज्य गमिष्यसि यमक्षयम् ॥५४॥
पश्य मे निशितान्बाणानरिदर्पनिषूदनान् ॥ ईश्वरायुधसंकाशांस्तप्तकाञ्चनभूषणान् ॥ ५५ ॥
एष ते सर्पसंकाशो बाणः पास्यति शोणितम् ॥ मृगराज इव क्रुद्धो नागराजस्य शोणितम् ॥
इत्येवमुक्त्वा संक्रुद्धः शरं धनुषि संदधे ॥ ५६ ॥

नेष्यतीत्यर्थः ॥ ३६–३८ ॥ समभिद्रवन् । आगमशासनस्यानित्यत्वादडभावः ॥ ३९—४० ॥ अभिमुखः स्थित इति शेषः ॥ ४१—४२ ॥ हरिः सिंहः ॥ ४३ ॥ कलापी तूणीरवान् । "कलापो भूषणे बर्हे तूणीरे संहतावपि" इत्यमरः । सगर्वितं सगर्वं ॥ ४४ ॥ व्यवसायः उत्साहः ॥ ४५ ॥ स्मयित्वा अनादृत्य । "ष्मिङ् अनादरे" इति धातुः ॥ ४६—४७ ॥ त्रासयन् अभूदिति शेषः ॥ ४८ ॥ प्रतिभयं । "भयंकरं प्रतिभयं" इत्यमरः ॥ ४९–५२ ॥ निबोधयितुं ज्वलयितुं । मा जहि मा हिंसीः । "हन्तेर्जः" इति जादेशः । मद्गतः मां प्राप्तः ॥५३॥ प्रतिष्टब्धः प्रतिमुखं स्थितः ॥ ५४ ॥ ईश्वरायुधं

स० यौवनदर्पितइतिराक्षसविशेषणं । नमृगयूथमथनेसिंहस्यतारुण्यमपेक्षितं । स्वप्नेपिवा चित्रितस्यवासिंहस्यदर्शनमात्रेणगजादिमारकस्यकियान्मृगवधस्तस्येतित्रतस्यासंभवदन्वयलात् । "सिंहीगर्भविनिस्सृतंततुपरिक्रोधात्पतन्तंशिशुं" इत्यादिकवितापि नानुकूलानागोजिभट्टस्यास्माकमिवेतिदिक् ॥ ४३ ॥ **स०** अयुध्यमानंकंचननजघान । एतेनश्रुतधरइत्यादिनासूचितंधर्मिष्ठत्वं ध्वनितं ॥ ४४ ॥ **ति०** यस्यशक्तिरस्ति व्यवसाययुक्तश्चयः सयुद्धंददातु ॥ ४५ ॥

[**पा०**] १ क. ख. घ. ङ. ज. झ. ट. मुखान्सङ्घये. २ क. ङ.—ट. विशारदः. ३ क. ख. घ. ङ. झ. ञ. ट. यस्यास्तिशक्तिर्व्यवसाय. ४ ङ. झ. ञ. ट. महींसर्वामाकाशं.

श्रुत्वाऽतिकायस्य वचः सरोषं सगर्वितं संयति राजपुत्रः ॥
स संचुकोपातिबलो बृहच्छ्रीरुवाच वाक्यं च ततो महार्थम् ॥ ५७ ॥
न वाक्यमात्रेण भवान्प्रधानो न कत्थनात्सत्पुरुषा भवन्ति ॥
मयि स्थिते धन्विनि बाणपाणौ निदर्शय स्वात्मबलं दुरात्मन् ॥ ५८ ॥
कर्मणा सूचयात्मानं न विकत्थितुमर्हसि ॥ पौरुषेण तु यो युक्तः स तु शूर इति स्मृतः ॥ ५९ ॥
सर्वायुधसमायुक्तो धन्वी त्वं रथमास्थितः ॥ शरैर्वा यदि वाऽप्यस्त्रैर्दर्शयस्व पराक्रमम् ॥ ६० ॥
ततः शिरस्ते निशितैः पातयिष्याम्यहं शरैः ॥ मारुतः कालसंपक्वं वृन्तात्तालफलं यथा ॥ ६१ ॥
अद्य ते मामका बाणास्तप्तकाञ्चनभूषणाः ॥ पास्यन्ति रुधिरं गात्राद्बाणशल्यान्तरोत्थितम् ॥ ६२ ॥
बालोऽयमिति विज्ञाय न माऽवज्ञातुमर्हसि ॥ ६३ ॥
बालो वा यदि वा वृद्धो मृत्युं जानीहि संयुगे ॥ बालेन विष्णुना लोकास्त्रयः क्रान्तास्त्रिभिः क्रमैः ॥६४॥
लक्ष्मणस्य वचः श्रुत्वा हेतुमत्परमार्थवत् ॥ अतिकायः प्रचुक्रोध बाणं चोत्तममाददे ॥ ६५ ॥
ततो विद्याधरा भूता देवा दैत्या महर्षयः ॥ गुह्यकाश्च महात्मानस्तद्युद्धं द्रष्टुमागमन् ॥ ६६ ॥
ततोतिकायः कुपितश्चापमारोप्य सायकम् ॥ लक्ष्मणाय प्रचिक्षेप संक्षिपन्निव चाम्बरम् ॥ ६७ ॥
तमापतन्तं निशितं शरमाशीविषोपमम् ॥ अर्धचन्द्रेण चिच्छेदं लक्ष्मणः परवीरहा ॥ ६८ ॥
तं निकृत्तं शरं दृष्ट्वा कृत्तभोगमिवोरगम् ॥॥ अतिकायो भृशं क्रुद्धः पञ्च बाणान्समाददे ॥ ६९ ॥
ताञ्शरान्संप्रचिक्षेप लक्ष्मणाय निशाचरः ॥ तानप्राप्ताञ्शरैस्तीक्ष्णैश्चिच्छेद भरतानुजः ॥ ७० ॥
[पञ्चभिः पञ्च चिच्छेद पावकार्कसमप्रभैः ॥]
स ताञ्छित्त्वा शरैस्तीक्ष्णैर्लक्ष्मणः परवीरहा ॥ आददे निशितं बाणं ज्वलन्तमिव तेजसा ॥ ७१ ॥
तमादाय धनुःश्रेष्ठे योजयामास लक्ष्मणः ॥ विचकर्ष च वेगेन विससर्ज च वीर्यवान् ॥ ७२ ॥
पूर्णायतविसृष्टेन शरेण नतपर्वणा ॥ ललाटे राक्षसश्रेष्ठमाजघान स वीर्यवान् ॥ ७३ ॥
स ललाटे शरो मग्नस्तस्य भीमस्य रक्षसः ॥ ददृशे शोणितेनाक्तः पन्नगेन्द्र इवाचले ॥ ७४ ॥
राक्षसः प्रचकम्पे च लक्ष्मणेषुप्रपीडितः ॥ रुद्रबाणहतं घोरं यथा त्रिपुरगोपुरम् ॥ ७५ ॥
चिन्तयामास चाश्वास्य विमृश्य च महाबलः ॥ साधु बाणनिपातेन श्लाघनीयोसि मे रिपुः ॥७६॥

त्रिशूलं ॥ ५५—५७ ॥ कत्थनात् आत्मश्लाघनात् । सत्पुरुषाः शूरपुरुषाः ॥५८—६०॥ वृन्तात् प्रसवबन्धनात् । " वृन्तं प्रसवबन्धनं " इत्यमरः ॥ ६१ ॥ बाणशल्यान्तरोत्थितमिति । बाणशल्यान्तराणि बाणशल्यकृतान्यन्तराणि ॥ ६२—६३ ॥ मृत्युं जानीहि । मामिति शेषः ॥ ६४—६६ ॥ सायकं चापमारोप्य बाणं धनुषि संधायेत्यर्थः । संक्षिपन्निव बाणवेगेनान्तरावस्थितमाकाशं ग्रसन्निवेत्यर्थः ॥ ६७—७२ ॥ पूर्णायतेन पूर्णाकृष्टेन । विसृष्टेन क्षिप्तेन । नतपर्वणा निलीनपर्वणा । ऋजुनेति यावत् ॥ ७३ ॥ अक्तः लिप्तः ॥ ७४ ॥ त्रिपुरगोपुरं त्रिपुरद्वारं ॥ ७५ ॥ चिन्तयामासेत्यादिश्लोकद्वयमेकान्वयं ॥ विमृश्य करणीयं निर्धार्य । बाणनिपातेन मे साधु श्लाघनीयो रिपुरसीति । एवं लक्ष्मणं विधाय अभिधाय । आस्यं

स० बृहच्छ्रीः महाकान्तिः । मनस्वी प्रशस्तमनाः । द्वाभ्यामप्यभीततांद्योतयति ॥ ५७ ॥ स० शूरस्तुसएव ॥ ५९ ॥ स० रथमास्थितइत्यनेन प्रतियोद्यपेक्षयामहासाहितीसहिततांद्योतयति ॥ ६० ॥ स० कालसंयुक्तं पक्वतादशापन्नं । अन्यत्रमृत्युकालसंयुक्तं ॥ ६१ ॥ ति० बालेनेति । वामनेनेत्यर्थः ॥ ६४ ॥

[पा०] १ ङ. झ. ट. मनस्वीउवाच. २ ङ. झ. ट. बृहच्छ्रीः. क. महात्मा. ३ ङ.—ट. कालसंयुक्तं. ४ क. ग. ङ. च. झ. ञ. ट. ददृशुस्तदा. ५ इदमर्धं ख. च. छ. पाठेषुदृश्यते. ६ क. घ. ङ. झ. ञ. ट. विससर्जचसायकं. ७ ग. विश्रम्यच.

विधायैवं विनम्याशं नियम्य च भुजावुभौ ॥ स रथोपस्थमास्थाय रथे च प्रचचार ह ॥ ७७ ॥
एकं त्रीन्पञ्च सप्तेति सायकान्राक्षसर्षभः ॥ आददे संदधे चापि विचकर्षोत्ससर्ज च ॥ ७८ ॥
ते बाणाः कालसंकाशा राक्षसेन्द्रधनुश्च्युताः ॥ हेमपुङ्खा रविप्रख्याश्चकुर्दीप्तमिवाम्बरम् ॥ ७९ ॥
ततस्तान्राक्षसोत्सृष्टाञ्शरौघान्राघवानुजः ॥ असंभ्रान्तः प्रचिच्छेद निशितैर्बहुभिः शरैः ॥ ८० ॥
ताञ्शरान्युधि संप्रेक्ष्य निकृत्तान्रावणात्मजः ॥ चुकोप त्रिदशेन्द्रारिर्जग्राह निशितं शरम् ॥ ८१ ॥
स संधाय महातेजास्तं बाणं सहसोत्सृजत् ॥ ततः सौमित्रिमायान्तमाजघान स्तनान्तरे ॥ ८२ ॥
अतिकायेन सौमित्रिस्ताडितो युधि वक्षसि ॥ सुस्राव रुधिरं तीव्रं मदं मत्त इव द्विपः ॥ ८३ ॥
स चकार तदाऽऽत्मानं विशल्यं सहसा विभुः ॥ जग्राह च शरं तीक्ष्णमस्त्रेणापि च संदधे ॥८४॥
आग्नेयेन तदाऽऽस्त्रेण योजयामास सायकम् ॥ स जज्वाल तदा बाणो धनुष्यस्य महात्मनः ॥८५॥
अतिकायोपि तेजस्वी सौरमस्त्रं समादधे ॥ तेन बाणं भुजङ्गाभं हेमपुङ्खमयोजयत् ॥ ८६ ॥
तदस्त्रं ज्वलितं घोरं लक्ष्मणः शरमाहितम् ॥ अतिकायाय चिक्षेप कालदण्डमिवान्तकः ॥ ८७ ॥
आग्नेयेनाभिसंयुक्तं दृष्ट्वा बाणं निशाचरः ॥ उत्ससर्ज तदा बाणं दीप्तं सूर्यास्त्रयोजितम् ॥ ८८ ॥
तावुभावम्बरे बाणावन्योन्यमभिजघ्नतुः ॥ तेजसा संप्रदीप्ताग्रौ क्रुद्धाविव भुजङ्गमौ ॥ ८९ ॥
तावन्योन्यं विनिर्दह्य पेततुः पृथिवीतले ॥ निरर्चिषौ भस्मकृतौ न भ्राजेते शरोत्तमौ ॥
[तावुभौ दीप्यमानौ स्म नभ्राजेते महीतले] ॥ ९० ॥
ततोतिकायः संक्रुद्धस्त्वस्त्रमैषीकमुत्सृजत् ॥ तत्प्रचिच्छेद सौमित्रिरस्त्रेणैन्द्रेण वीर्यवान् ॥ ९१ ॥
ऐषीकं निहतं दृष्ट्वा रुषितो रावणात्मजः ॥ याम्येनास्त्रेण संक्रुद्धो योजयामास सायकम् ॥ ९२ ॥
ततस्तदस्त्रं चिक्षेप लक्ष्मणाय निशाचरः ॥ वायव्येन तदस्त्रेण निजघान स लक्ष्मणः ॥ ९३ ॥
अथैनं शरधाराभिर्धाराभिरिव तोयदः ॥ अभ्यवर्षत्सुसंक्रुद्धो लक्ष्मणो रावणात्मजम् ॥ ९४ ॥
तेऽतिकायं समासाद्य कवचे वज्रभूषिते ॥ भग्नाग्रशल्याः सहसा पेतुर्बाणा महीतले ॥ ९५ ॥
तान्मोघानभिसंप्रेक्ष्य लक्ष्मणः परवीरहा ॥ अभ्यवर्षन्महेष्वासां सहस्रेण महायशाः ॥ ९६ ॥
स वृष्यमाणो बाणौघैरतिकायो महाबलः ॥ अवध्यकवचः सङ्ख्ये राक्षसो नैव विव्यथे ॥ ९७ ॥
[शरं चाशीविषाकारं लक्ष्मणाय व्यपासृजत् ॥ स तेन विद्धः सौमित्रिर्मर्मदेशे शरेण ह ॥
मुहूर्तमात्रं निस्संज्ञो ह्यभवच्छत्रुतापनः ॥ ९८ ॥

विनम्य भुजौ नियम्य वशे स्थापयित्वा । रथोपस्थमास्थाय रथेन प्रचचार हेति संबन्धः ॥ ७६—७७ ॥ इति उक्तप्रकारेण ॥ ७८–८३ ॥ अस्त्रेण अस्त्रमन्त्रेण । संदधे योजयामास ॥ ८४ ॥ आग्नेयेनेत्यादि । पूर्वोक्तस्यैव विवरणं ॥ ८५ ॥ समादधे अनुसंदधे ॥८६॥ आहितं संहितं ॥ ८७—८९ ॥ भस्मकृतौ भस्मतया

ति० आत्मानंविशल्यंचकारेत्यत्रहेतुः विभुरिति । विष्वंशल्यानुसंधानवानित्यर्थः ॥ स० विशल्यं तद्बाधारहितं । तत्रहेतुर्विभुरिति ॥ ८४ ॥ ति० दीप्यमानौ तादृशावपि परस्पराभिघातान्नभ्राजेते ॥ स० निरर्चिषौ निष्प्रभौ । भस्मकृतौ भस्मकुर्वातेइतितथा । पृथिवीतलेपतितौ नभ्राजेते । महीतलेविद्यमानौतौमोक्तारौलक्ष्मणातिकायावपि दीप्यमानौ प्राक् हतोऽयमितिपरस्परंजयप्रकाशौनभ्राजेतेस्म मोघीभूतबाणाविद्यभ्राजनंयुक्तमितिभावः । अतोनपुनरुक्तिः । महाहवेइत्यपिक्वचित्पाठः ॥ ९० ॥ ति० त्वाष्ट्रंत्वष्टृदेवताकमैषीकाख्यं ॥ ९१ ॥

[पा०] १ ङ. झ. ट. विदार्यास्यंविनम्यचमहाभुजौ. २ ख.—ट. तेनसौमित्रिं. ३ ङ. च. झ. ञ. ट. रौद्रमस्त्रं. ४ इदमर्धं ग. घ. ङ. झ. ञ. ट. पाठेषुदृश्यते. ५ क. ख. च. महाहवे. ६ झ. ञ. ट. त्वाष्ट्र. ७ क. ग. घ. ङ. झ. ट. कुमारो. ८ ग. हेमभूषिते. ९ क. ग.—च. झ. अभ्यवर्षतबाणानां. १० शरंचाशीविषाकारमित्यादयः तस्यरक्षसइत्यन्ताः श्लोकाःऔत्तराहपाठएवदृश्यन्तेनतुप्राचीनकोशेषु.

ततः संज्ञामुपालभ्य चतुर्भिः सायकोत्तमैः ॥ निजघान हयान्सङ्ख्ये सारथिं च महाबलः ॥ ९९ ॥
ध्वजस्योन्मथनं कृत्वा शरवर्षैररिंदमः ॥ असंभ्रान्तः स सौमित्रिस्ताञ्शरानभिलक्षितान् ॥
मुमोच लक्ष्मणो बाणान्वधार्थं तस्य रक्षसः] ॥ १०० ॥
न शशाक रुजं कर्तुं युधि तस्य शिरोत्तमः ॥ १०१ ॥
अथैनमभ्युपागम्य वायुर्वाक्यमुवाच ह ॥ ब्रह्मदत्तवरो ह्येष अवध्यकवचावृतः ॥ १०२ ॥
ब्राह्मेणास्त्रेण भिन्ध्येनमेष वध्यो हि नान्यथा ॥ अवध्य एष ह्यन्येषामस्त्राणां कवची बली ॥१०३॥

ततस्तु वायोर्वचनं निशम्य सौमित्रिरिन्द्रप्रतिमानवीर्यः ॥
समाददे बाणममोघवेगं तद्ब्राह्ममस्त्रं सहसा नियोज्य ॥ १०४ ॥
तस्मिन्महास्त्रे तु नियुज्यमाने सौमित्रिणा बाणवरे शिताग्रे ॥
दिशश्च चन्द्रार्कमहाग्रहाश्च नभश्च तत्रास चचाल चोर्वी ॥ १०५ ॥
तं ब्रह्मणोस्त्रेण नियोज्य चापे शरं सुपुङ्खं यमदूतकल्पम् ॥
सौमित्रिरिन्द्रारिसुतस्य तस्य ससर्ज बाणं युधि वज्रकल्पम् ॥ १०६ ॥
तं लक्ष्मणोत्सृष्टममोघवेगं समापतन्तं ज्वलनप्रकाशम् ॥
सुवर्णवज्रोत्तमचित्रपुङ्खं तदातिकायः समरे ददर्श ॥ १०७ ॥
तं प्रेक्षमाणः सहसाऽतिकायो जघान बाणैर्निशितैरनेकैः ॥
स सायकस्तस्य सुपर्णवेगस्तदाऽऽतिकायस्य जगाम पार्श्वम् ॥ १०८ ॥
तमागतं प्रेक्ष्य तदाऽऽतिकायो बाणं प्रदीप्तान्तककालकल्पम् ॥
जघान शक्तिर्ऋष्टिगदाकुठारैः शूलैर्हुलैश्चात्यविपन्नचेताः ॥ १०९ ॥
तान्यायुधान्यद्भुतविग्रहाणि मोघानि कृत्वा स शरोऽग्निदीप्तः ॥
प्रगृह्य तस्यैव किरीटजुष्टं ततोतिकायस्य शिरो जहार ॥ ११० ॥
तच्छिरः सशिरस्त्राणं लक्ष्मणेषुप्रपीडितम् ॥ पपात सहसा भूमौ शृङ्गं हिमवतो यथा ॥ १११ ॥
तं तु भूमौ निपतितं दृष्ट्वा विक्षिप्तभूषणम् ॥ बभूवुर्व्यथिताः सर्वे हतशेषा निशाचराः ॥ ११२ ॥
ते विषण्णमुखा दीनाः प्रहारजनितश्रमाः ॥ विनेदुरुच्चैर्बहवः सहसा विस्वरैः स्वरैः ॥ ११३ ॥
ततस्ते त्वरितं याता निरपेक्षा निशाचराः ॥ पुरीमभिमुखा भीता द्रवन्तो नायके हते ॥ ११४ ॥

प्रहर्षयुक्ता बहवस्तु वानराः प्रबुद्धपद्मप्रतिमाननास्तदा ॥
अपूजयँल्लक्ष्मणमिष्टभागिनं हते रिपौ भीमबले दुरासदे ॥ ११५ ॥

कृतौ ॥ ९०—१०३ ॥ ब्राह्ममस्त्रं ब्रह्मास्त्रमस्त्रं । नियोज्य जपित्वेति यावत् ॥ १०४ ॥ दिशश्चेत्यादौ तत्रसुरिति विपरिणम्यानुषज्यते ॥ १०५ ॥ नियोज्य जपित्वा । तस्य यमदूतकल्पमित्यन्वयः ॥ १०६—१०८ ॥ हुलैः द्विफलपत्राग्रायुधविशैषैः । " हुलं द्विफलपत्राग्रं " इति वैजयन्ती ॥ १०९—११२ ॥ विस्वरैः विस्वररूपैः ॥ ११३ ॥ निरपेक्षाः युद्धानपेक्षाः ॥ ११४ ॥ प्रबुद्धेत्यत्र प्रसन्नत्वे तात्पर्यं । इष्टस्य

स० सशिरस्त्राणं समुकुटं । अयमेवभारतोक्तकुंभकर्णाभिधोलक्ष्मणहतः । ' वृहत्तनुःकुंभवदेवकर्णावस्येत्यतोनामचकुंभकर्णः ' इत्यारभ्य 'तेनातिकायःप्रवरोस्त्रवित्सु' इत्यन्तेनतात्पर्यमाचार्यवर्याःप्रत्यपीपदन्नितितथैवभारतार्थोनुसंधेयः । प्रपञ्चितश्चायमर्थो-

[पा०] १ क. ग.—ट. नरोत्तमः. २ क. च. ञ. सतस्यवायोः. ३ क. ङ. च. ज.—ट. रासचोर्वी. ४ ङ. च. झ. ञ. ट. विवृद्धवेगं. ५ ग. घ. ङ. ज. झ. ट. स्तथातिवेगेनजगाम. ६ ज. शूलैश्चितैः. घ. ङ. झ. ट. शूलैःशरैः. ७ ङ. छ. झ. ञ. ट. श्चाप्यविपन्नचेष्टः. ८ घ. ङ. झ. ञ. ट. ततस्तत्परितोयाताः. ख. घ. ततस्तत्त्वरितंयान्ति.

[अतिबलमतिकायमभ्रकल्पं युधि विनिपात्य स लक्ष्मणः प्रहृष्टः ॥
त्वरितमथ तदा स रामपार्श्वं कपिनिवहैश्च सुपूजितो जगाम] ॥ ११६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥

द्विसप्ततितमः सर्गः ॥ ७२ ॥

अतिकायनिधनश्रवणविषण्णेनरावणेन धूम्राक्षप्रभृतिबन्धुजनस्मरणेनतच्छोचनपूर्वकं राक्षसान्प्रतिविशेषतो नगरादिरक्षणनियोजनपूर्वकं भवनप्रवेशः ॥ १ ॥

अतिकायं हतं श्रुत्वा लक्ष्मणेन महौजसा ॥ उद्वेगमगमद्राजा वचनं चेदमब्रवीत् ॥ १ ॥
धूम्राक्षः परमामर्षी धन्वी शस्त्रभृतां वरः ॥ अकम्पनः प्रहस्तश्च कुम्भकर्णस्तथैव च ॥ २ ॥
एते महाबला वीरा राक्षसा युद्धकाङ्क्षिणः ॥ जेतारः परसैन्यानां परैर्नित्यापराजिताः ॥ ३ ॥
निहतास्ते महावीर्या रामेणाक्लिष्टकर्मणा ॥ राक्षसाः सुमहाकाया नानाशस्त्रविशारदाः ॥
अन्ये च बहवः शूरा महात्मानो निपातिताः ॥ ४ ॥
प्रख्यातबलवीर्येण पुत्रेणेन्द्रजिता मम ॥ यौ हि तौ भ्रातरौ वीरौ बद्धौ दत्तवरैः शरैः ॥ ५ ॥
यन्न शक्यं सुरैः सर्वैरसुरैर्वा महाबलैः ॥ मोक्तुं तद्बन्धनं घोरं यक्षगन्धर्वकिन्नरैः ॥ ६ ॥
तन्न जाने प्रभावैर्वा मायया मोहनेन वा ॥ शरबन्धाद्विमुक्तौ तौ भ्रातरौ रामलक्ष्मणौ ॥ ७ ॥
ये योधा निर्गताः शूरा राक्षसा मम शासनात् ॥ ते सर्वे निहता युद्धे वानरैः सुमहाबलैः ॥ ८ ॥
तं न पश्याम्यहं युद्धे योऽद्य रामं सलक्ष्मणम् ॥ शासयेत्सबलं वीरं ससुग्रीवविभीषणम् ॥ ९ ॥
अहो नु बलवान्रामो महदस्त्रबलं च वै ॥ यस्य विक्रममासाद्य राक्षसा निधनं गताः ॥ १० ॥
तं मन्ये राघवं वीरं नारायणमनामयम् ॥ तद्भयाद्धि पुरी लङ्का पिहितद्वारतोरणा ॥ ११ ॥

जयस्य भागः प्राप्तिः सोऽस्यास्तीतीष्टभागी तं ॥ ११५–११६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकसप्ततितमः सर्गः ॥ ७१ ॥

अथ रावणचिन्ता—अतिकायमित्यादि ॥ १–४ ॥ प्रख्यातेत्यादिश्लोकत्रयमेकं वाक्यं ॥ वीरौ यौ भ्रातरौ खरदूषणादिवधेन प्रसिद्धौ तावपि बद्धौ । तदेव बन्धनं वर्णयति—यदिति ॥ यद्बन्धनं सुरादिभिः मोक्तुं मोचयितुं । अशक्यं तद्बन्धनं घोरं । भ्रातरौ तौ शरबन्धाद्विमुक्ताविति यत् तत्प्रभावादिषु केन वा जातं न जान इत्यन्वयः । प्रभावः सामर्थ्यं । माया व्यामोहकारिणी विद्या । मोहनं औषधादिकं ॥ ५–९ ॥ अहो न्वित्यादिश्लोकद्वयमेकान्वयं ॥ पिहितद्वारतोरणा द्वारं अन्तर्द्वारं तोरणंबहिर्द्वारं ॥ १०–११ ॥

स्वाभिःप्राक्ततोनुसंधेयः ॥ १११ ॥ ति० त्रिशिरोतिकायदेवान्तकनरान्तकमहोदरमहापार्श्वनांषड्भिर्दिनैर्भाद्राश्विनकृष्णषष्ठ्यन्तेनवधइत्यग्रेस्पष्टम् ॥ ११६ ॥ इत्येकसप्ततितमःसर्गः ॥ ७१ ॥

ती० प्रख्यातबलवीर्येणेत्यादिश्लोकत्रयमेकंवाक्यं । यौखरदूषणादिनिरासकौतौभ्रातरौ इन्द्रजिता दत्तवरैःशरैर्बद्धौ । यद्बन्धनं सुरासुरादिभिःप्रत्येकंमोक्तुंमोचयितुंनशक्यं । तद्बन्धनं घोरैः प्रचण्डैः सर्वैःसमुदितैरपिमोक्तुंनशक्यं । तौरामलक्ष्मणौ प्रभावैः । सहजसामर्थ्यैः मायया विचित्रशक्त्या मोहनेन बन्धकनागपाशमोहनेनवा । शरबन्धाद्विमुक्तौ तन्नजानइतियोजना ॥ ५–७ ॥ स० अनामयं कार्यवाचकपदेनकारणंदोषोगृह्यते । निर्दोषं नारायणं ॥ ११ ॥ इतिद्विसप्ततितमःसर्गः ॥ ७२ ॥

[पा०] १ ख. ङ. च. झ. ञ. ट. महात्मना. २ ङ. झ. ञ. ट. सर्वशस्त्रभृतां. ३ ङ झ. ट. ससैन्यास्तेहतावीरारामेण. ग. घ. ससैन्यास्तेमहावीर्यारामेण. ख. ससैन्यास्तेमहाकायारामेण. ४ छ. ञ. घोरंसर्वैःसमुदितैरपि. ङ. झ. ट. घोरंयक्षगन्धर्वपन्नगैः. ५ ङ. झ. ट. नाशयेत्सबलं. ६ क. ग. घ. ङ. झ, ञ. ट, सुबलवान्.

अप्रमत्तैश्च सर्वत्र गुप्तै रक्ष्या पुरी त्वियम् ॥ १२ ॥
अशोकवनिकायां च यत्र सीताऽभिरक्ष्यते ॥ निष्क्रामो वा प्रवेशो वा ज्ञातव्यः सर्वथैव नः ॥ १३ ॥
यत्र यत्र भवेद्गुल्मस्तत्र तत्र पुनः पुनः ॥ सर्वतश्चापि तिष्ठध्वं स्वैः स्वैः परिवृता बलैः ॥ १४ ॥
द्रष्टव्यं च पदं तेषां वानराणां निशाचराः ॥ प्रदोषे वाऽर्धरात्रे वा प्रत्यूषे वाऽपि सर्वतः ॥ १५ ॥
नावज्ञा तत्र कर्तव्या वानरेषु कदाचन ॥ द्विषतां बलमुद्युक्तमापतत्किंस्थितं सदा ॥ १६ ॥
ततस्ते राक्षसाः सर्वे श्रुत्वा लङ्काधिपस्य तत् ॥ वचनं सर्वमातिष्ठन्यथावत्तु महाबलाः ॥ १७ ॥
स तान्सर्वान्समादिश्य रावणो राक्षसाधिपः ॥ मन्युशल्यं वहन्दीनः प्रविवेश स्वमालयम् ॥ १८ ॥

ततः स संदीपितकोपवह्निर्निशाचराणामधिपो महाबलः ॥
तदैव पुत्रव्यसनं विचिन्तयन्मुहुर्मुहुश्चैव तदा व्यनिश्वसत् ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

त्रिसप्ततितमः सर्गः ॥ ७३ ॥

देवान्तकादिवधश्रवणेनविषीदतिदशानने तंप्रतीन्द्रजिता रामादिवधप्रतिज्ञानेनसमाश्वासनपूर्वकं रथारोहणेनरणायनिर्याणम्॥१॥ तथा रणाङ्गणेहुतवहेहवनपूर्वकं रथारोहणेनान्तरिक्षेऽन्तर्हितेनसता नानाप्रहरणगणैः कपिकुलशकलीकरणपूर्वकं ब्रह्मास्त्रप्रयोगेण सकलवानरवाहिन्यासहरामलक्ष्मणयोर्मोहप्रापणम् ॥ २ ॥

ततो हतान्राक्षसपुङ्गवांस्तान्देवान्तकादित्रिशिरोतिकायान् ॥
रक्षोगणास्तत्र हतावशिष्टास्ते रावणाय त्वरितं शशंसुः ॥ १ ॥
ततो हतांस्तान्सहसा निशम्य राजा मुमोहाश्रुपरिप्लुताक्षः ॥
पुत्रक्षयं भ्रातृवधं च घोरं विचिन्त्य राजा विपुलं प्रदध्यौ ॥ २ ॥
ततस्तु राजानमुदीक्ष्य दीनं शोकार्णवे संपरिप्लुवानम् ॥
रथर्षभो राक्षसराजसूनुस्तमिन्द्रजिद्वाक्यमिदं बभाषे ॥ ३ ॥

एवं रामप्रभावं सप्रपञ्चमुक्त्वा सैन्यं प्रति पुरीरक्षणं नियमयति—अप्रमत्तैरित्यादिना ॥ गुप्तैः स्वयं कृतरक्षणैः । गुल्मैरिति वा पाठः ॥ १२ ॥ यत्र सीता अभिरक्ष्यते तत्र अशोकवनिकायां । निष्क्रामः निर्गमः प्रवेशो वा । नः अस्माभिः । ज्ञातव्यः । मदनुज्ञां विना न कोपि जनो निर्गमयितव्यो नापि प्रवेष्टव्य इत्यर्थः ॥ १३ ॥ गुल्मः सेनासन्निवेशः ॥ १४ ॥ द्रष्टव्यमित्यादिश्लोकद्वयमेकान्वयं ॥ पदं व्यवसितं । दर्शनप्रकारमाह—द्विषतामिति । द्विषतां बलं स्थितं किं । उद्युक्तं उद्यतं किं । आपतन्तं । लिङ्गादिव्यत्ययआर्षः । आपतत् किमिति सदा द्रष्टव्यमित्यर्थः । आपतत्किमिति पाठः सुशोभनः ॥ १५—१९ ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्विसप्ततितमः सर्गः ॥ ७२ ॥

अथ ब्रह्मास्त्रबन्धस्त्रिसप्ततितमे—तत इत्यादि ॥ १ ॥ पूर्वं कुम्भकर्णादिवधः सामान्येन श्रुतः संप्रत्याप्तैः सविशेषं श्रुत इत्याह—तत इति ॥ पूर्वोक्तसर्वानुवादो वा ॥ २ ॥ संपरिपुप्लुवानं । लटः

रामानु० अत्रदेवान्तकादित्रिशिरोतिकायान् हतांस्तरितंशशंसुः घोरंपुत्रक्षयंभ्रातृवधंचविचिन्त्यविपुलंप्रदध्यावितिचाभि-

[पा०] १ ङ. ञ. ञ. ट. सैन्यैःपरिवृता. २ ख. च. ञ. ट. वहन्दीनंप्रविवेशनिवेशनं. ग. घ. वहंस्तीव्रंप्रविवेश. ३ ख. न्मुहुर्मुहुर्निश्वसितिस्मदीर्घं. ४ क. ग. ङ. ञ. ट. विनिश्वसन्. ५ ख. ङ. ञ. ञ. ट. त्वरिताः.

न तात मोहं प्रतिगन्तुमर्हसि यत्रेन्द्रजिज्जीवति राक्षसेन्द्र ॥
[तद्बाणनिर्भिन्नविकीर्णदेहाः प्राणैर्विमुक्ताः समरे पतन्ति ॥]
नेन्द्रारिबाणाभिहतो हि कश्चित्प्राणान्समर्थः समरेऽभिपातुम् ॥ ४ ॥
पश्याद्य रामं सह लक्ष्मणेन मद्बाणनिर्भिन्नविकीर्णदेहम् ॥
गतायुषं भूमितले शयानं शितैः शरैराचितसर्वगात्रम् ॥ ५ ॥
इमां प्रतिज्ञां शृणु शक्रशत्रोः सुनिश्चितां पौरुषदैवयुक्ताम् ॥
अद्यैव रामं सह लक्ष्मणेन सन्तर्पयिष्यामि शरैरमोघैः ॥ ६ ॥
अद्येन्द्रवैवस्वतविष्णुमित्रसाध्याश्विवैश्वानरचन्द्रसूर्याः ॥
द्रक्ष्यन्तु मे विक्रममप्रमेयं विष्णोरिवोग्रं बलियज्ञवाटे ॥ ७ ॥
स एवमुक्त्वा त्रिदशेन्द्रशत्रुरापृच्छ्य राजानमदीनसत्त्वः ॥
समारुरोहानिलतुल्यवेगं रथं खरश्रेष्ठसमाधियुक्तम् ॥ ८ ॥
तँमास्थाय महातेजा रथं हरिरथोपमम् ॥ जगाम सहसा तत्र यत्र युद्धमरिन्दमः ॥ ९ ॥
तं प्रस्थितं महात्मानमनुजग्मुर्महाबलाः ॥ संहर्षमाणा बहवो धनुःप्रवरपाणयः ॥ १० ॥
गजस्कन्धगताः केचित्केचित्प्रवरवाजिभिः ॥ [व्याघ्रवृश्चिकमार्जारैः खरोष्ट्रैश्च भुजङ्गमैः ॥ ११ ॥
वराहश्वापदैः सिंहैर्जम्बुकैः पर्वतोपमैः ॥ शरभैः समयूरैश्च राक्षसा भीमविक्रमाः] ॥ १२ ॥
प्रासमुद्गरनिस्त्रिंशपरश्वधगदाधरः ॥ [भुशुण्डिमुद्गरायष्टिशतघ्नीपरिघायुधः] ॥ १३ ॥
स शङ्खनिनदैः पूर्णैर्भेरीणां चापि निस्वनैः ॥ जगाम त्रिदशेन्द्रारिः स्तूयमानो निशाचरैः ॥ १४ ॥
स शङ्खशशिवर्णेन छत्रेण रिपुसूदनः ॥ रराज प्रीतिपूर्णेन नभश्चन्द्रमसा यथा ॥ १५ ॥
अवीज्यत ततो वीरो हैमैर्हेमविभूषितैः ॥ चारुचामरमुख्यैश्च मुख्यः सर्वधनुष्मताम् ॥ १६ ॥
[स तु दृष्ट्वा विनिर्यान्तं बलेन महता वृतम् ॥ राक्षसाधिपतिः श्रीमान्रावणः पुत्रमब्रवीत्] ॥१७॥
त्वमप्रतिरथः पुत्र त्वया वै वासवो जितः ॥ किं पुनर्मानुषं धृष्यं निहनिष्यसि राघवम् ॥
तथोक्तो राक्षसेन्द्रेण प्रत्यगृह्णान्महाशिषः] ॥ १८ ॥
ततस्त्विन्द्रजिता लङ्का सूर्यप्रतिमतेजसा ॥ रराजाप्रतिवीरेण द्यौरिवार्केण भास्वता ॥ १९ ॥
स संप्राप्य महातेजा युद्धभूमिमरिन्दमः ॥ स्थापयामास रक्षांसि रथं प्रति समन्ततः ॥ २० ॥

शानजादेशः ॥ ३ ॥ यत्र यदा । इन्द्रारिः इन्द्रजित् ॥४–५॥पौरुषदैवयुक्तां पुरुषबलदैवबलयुक्तां । सन्तर्पयिष्यामि पूरयिष्यामि ॥६–७॥ खरश्रेष्ठसमाधियुक्तं खरश्रेष्ठसंबन्धयुक्तं । खरश्रेष्ठैः समाधिना समाधानेन च युक्तमिति वा ॥ ८॥ हरिरथः सूर्यरथः । "यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु" इत्यमरः । युद्धमिति । कर्तव्यमिति शेषः ॥ ९ ॥ तं प्रस्थितमित्यादिश्लोकद्वयमेकान्वयं ॥ १०—१५॥ हैमैः हेमदण्डैः । हेमविभूषितैः हेमशलाकायुक्तैः ॥१६—१९॥ रथं प्रति

धानात् पूर्वरावणेनातिकायवधएवश्रुतइत्यवगम्यते । यद्वा पूर्वोक्तानुवादः ॥१॥ ति० पौरुषदैवयुक्तां पौरुषेण सहजशौर्यबलेन । दैवबलेन भगवद्ब्रह्मबलेनच युक्तांक्रियमाणां । आदिकर्मणिक्तः ॥६॥ ति० युद्धभूमिं युद्धजयसंपादकहोमसाधनभूमिं निकुंभिला-

[पा०] १ इदमर्धं घ. पाठेदृश्यते. २ ख. ङ. झ. ञ. ट. विष्णुरुद्र. ३ क.—ट. समास्थाय. ४ ग. च. छ. ञ. युद्धभूमिमरिंदमः. ख. यत्रयुद्धंप्रवर्तते. ५ ङ.—ट. त्वरमवाजिभिः. ६ इदमर्धत्रयं. ङ.—ट. पाठेषुदृश्यते. ७ ङ.—ट. काकहंसमयूरैश्च. ८ इदमर्धं च. ञ. पाठयोर्दृश्यते. ९ ग. घ. ङ. झ. ट. त्रिदशेन्द्रारिराजिवेगेनवीर्यवान्. ख. छ. ज. त्रिदशेन्द्रारिर्महासैन्येनवीर्यवान्. १० [illegible] च. छ. ज. ञ. निशिपूर्णेन. ११ इदंश्लोकद्वयं औत्तराहपाठएवदृश्यतेनतुदाक्षिणात्यप्राचीनकोशेषु.

ततस्तु हुतभोक्तारं हुतभुक्सदृशप्रभः ॥ [1]जुहाव राक्षसश्रेष्ठो [2]मन्त्रवद्विधिवत्तदा ॥ २१ ॥
स हविर्लाजसंस्कारैर्[3]माल्यगन्धपुरस्कृतैः ॥ जुहुवे पावकं तत्र राक्षसेन्द्रः प्रतापवान् ॥ २२ ॥
शस्त्राणि शरपत्राणि समिधोथ विभीतकाः ॥ लोहितानि च वासांसि स्रुवं काष्णायसं तथा ॥२३॥
स तत्राग्निं समास्तीर्य शरपत्रैः सतोमरैः ॥ छागस्य [4]कृष्णवर्णस्य गलं जग्राह जीवतः ॥ २४ ॥
सकृदेव समिद्धस्य विधूमस्य महार्चिषः ॥ बभूवुस्तानि लिङ्गानि विजयं यान्यदर्शयन् ॥ २५ ॥
प्रदक्षिणावर्तशिखस्तप्तका[5]ञ्चनभूषणः ॥ हविस्तत्प्रतिजग्राह पावकः [6]स्वयमास्थितः ॥ २६ ॥
सोस्रमाहारयामास ब्राह्ममिन्द्रारिपुस्तदा ॥ धनुश्चात्मरथं चैव [7]सर्वं तत्राभ्यमन्त्रयत् ॥ २७ ॥
तस्मिन्नाहूयमानेऽस्त्रे हूयमाने च पावके ॥ [8]सार्धं ग्रहेन्दुनक्षत्रैर्[9]वितत्रास नभस्थलम् ॥ २८ ॥

स पावकं पावकदीप्ततेजा हुत्वा महेन्द्रप्रतिमप्रभावः ॥
सचापबाणासिरथाश्वसूतः [10]खेऽन्तर्दधेत्मानमचिन्त्यरूपः [12]॥ २९ ॥

ततो हयरथाकीर्णं पताकाध्वजशोभितम् ॥ निर्ययौ राक्षसबलं नर्दमानं युयुत्सया ॥
[[13]अशोभत बलं घोरं किङ्किणीशतनादितम् ॥ ३० ॥
ते शरैर्बहुभिश्चित्रैस्तीक्ष्णवेगैरलंकृतैः ॥ तोमरैरङ्कुशैश्चापि वानराञ्जघ्नुराहवे ॥ ३१ ॥
रावणिस्तु ततः क्रुद्धस्तान्निरीक्ष्य निशाचरान् ॥ हृष्टा भवन्तो युध्यन्तु वानराणां जिघांसया ॥३२॥
ततस्ते राक्षसाः सर्वे [14]नर्दन्तो जयकाङ्क्षिणः ॥ अभ्यवर्षंस्ततो घोरान्वानराञ्शरवृष्टिभिः ॥ ३३ ॥
स तु नालीकनाराचैर्गदाभिर्मुसलैरपि ॥ रक्षोभिः संवृतः सङ्ख्ये वानरान्[15]विचकर्त ह ॥ ३४ ॥

रथसिद्धिमुद्दिश्य ॥ २० ॥ विधिवत् क्रमवत् ॥२१॥ हविर्लाजसंस्कारैः संस्कृतहविर्लाजैः ॥ २२ ॥ शस्त्राणि आयुधानि । शरपत्राणि काशपत्रस्थानीयानि । तानि परिस्तरणान्यासन्नित्यर्थः । शरमयं बर्हिस्तृणातीत्यभिचारे काशश्रोदितः । अत्र त्वभिचारविशेषे तत्स्थाने शस्त्राणि कृतानीति बोध्यं । विभीतकाः कलिद्रुमविकाराः । " वैभीतक इध्मः " इति श्रुतेः । वासांसि स्वधार्याणि । यद्वा शस्त्राणि तोमरादीनि शरपत्राणि च । बर्हीष्यासन्निति शेषः । शरपत्रैः सतोमरैरित्यनुवादात् । काष्णायसं स्रुवं । कृतमिति शेषः ॥ २३ ॥ तत्र युद्धभूमौ । आस्तीर्य परिस्तीर्य ॥ २४ ॥ सकृत्समिद्धस्य एकदा समिद्धिर्ज्वलितस्य । लिङ्गानि उक्तसकृत्समिद्धत्वविधूमत्वमहार्चिष्ट्वानि । विजयं यान्यदर्शयन् । पूर्वमिति शेषः ॥ २५ ॥ प्रदक्षिणेति । प्रदक्षिण आवर्तो भ्रमिर्यासां ताः शिखा यस्येति विग्रहः । स्वयमास्थितः स्वयमास्थावान् । स्वयमुत्थित इति पाठे पुरुषरूपेणोत्थित इत्यर्थः ॥ २६ ॥ आहारयामास आजुहाव । अभ्यमन्त्रयत अभिमन्त्रितवान् ॥ २७ ॥ वितत्रास चचाल ॥२८॥ आत्मानं अन्तर्दधे अन्तर्धापयामास । अन्तर्भावितण्यर्थोयं । खेऽन्तर्दधेत्मानमित्यत्र आर्षं पूर्वरूपत्वं । अचिन्त्यरूपः अचिन्त्यमन्त्रशक्तिः ॥ २९—३१ ॥ रावणिस्त्विति ॥ उवाचेति शेषः ॥ ३२ ॥ ततः तस्माद्रावणिवचनात् । द्वितीयस्ततःशब्दः पश्चाच्छब्दार्थः ॥ ३३ ॥ नालीकः विशालाग्रशरः । रक्षोभिः संवृतः रक्षोगणमध्यत उपरिस्थित इत्यर्थः । अन्यथा

स्थानमित्यर्थः ॥ २० ॥ ति० हुतभोक्तारं अग्निं । विधिः तत्कल्पोक्तप्रकारः ॥ २१ ॥ ति० तस्मिन्नस्त्रे आहूयमाने तदस्त्रमन्त्रदेवतेत्रिमूर्तिरहस्यलक्षणेक्रियमाणावाहनेतदुद्देशेनतन्मन्त्रेणपावकेहूयमानेचसतिसार्कादिकंनभस्थलंतत्रासेतिनायमर्थवादः ॥ २८ ॥ ति० ततइति यागसमाप्त्यनन्तरं । तद्यागभूमेरित्यर्थः ॥ ३० ॥

[पा०] १ ङ. ञ. ट. जुहुवे. २ ङ. ञ. ट. विधिवन्मन्त्रसत्तमैः. ३ ख. ङ.—ठ. लाजसत्कारैः. ४ ख. च. छ. ज. ञ. ट. पावकंदीप्तं. ५ ख. ग. घ. च. ज. ञ. सर्वकृष्णस्य. ६ क. ग. ङ. छ. ञ. ट. काञ्चनसंनिभः. ७ क.—ट. स्वयमुत्थितः. ८ क. ग. ङ.—ट. ब्राह्ममस्त्रविशारदः. ९ च. छ. ञ. ट. कवचंचाभ्यमन्त्रयत्. १० क.—च. ञ. ट. सार्कंग्रहेन्दुनक्षत्रं. ११ ख. ग. छ. खेऽन्तर्दधेराक्षसराजसूनुः. १२ ङ. ञ. ट. मचिन्त्यवीर्यः. १३ इदमर्धं क. ख. ग. पाठेषुदृश्यते. १४ ङ. ञ. ट. गर्जन्तो. १५ ग. ङ. ज. ञ. ट. न्विचकर्षह.

ते वध्यमानाः समरे वानराः पादपायुधाः ॥ अभ्यद्रवन्त सहिता रावणिं रणकर्कशम् ॥ ३५ ॥
इन्द्रजित्तु ततः क्रुद्धो महातेजा महाबलः ॥ वानराणां शरीराणि व्यधमद्रावणात्मजः ॥ ३६ ॥
शरेणैकेन च हरीन्नव पञ्च च सप्त च ॥ चिच्छेद समरे क्रुद्धो राक्षसान्संप्रहर्षयन् ॥ ३७ ॥
स शरैः सूर्यसंकाशैः शातकुम्भविभूषितैः ॥ वानरान्समरे वीरः प्रममाथ सुदुर्जयः ॥ ३८ ॥
ते भिन्नगात्राः समरे वानराः शरपीडिताः ॥ पेतुर्मथितसङ्कल्पाः सुरैरिव महासुराः ॥ ३९ ॥
तं तपन्तमिवादित्यं घोरैर्बाणगभस्तिभिः ॥ अभ्यधावन्त संक्रुद्धाः संयुगे वानरर्षभाः ॥ ४० ॥
ततस्तु वानराः सर्वे भिन्नदेहा विचेतसः ॥ व्यथिता विद्रवन्ति स्म रुधिरेण समुक्षिताः ॥ ४१ ॥
रामस्यार्थे पराक्रम्य वानरास्त्यक्तजीविताः ॥ नर्दन्तस्तेऽभिवृत्तास्तु समरे सशिलायुधाः ॥ ४२ ॥
ते द्रुमैः पर्वताग्रैश्च शिलाभिश्च प्लवङ्गमाः ॥ अभ्यवर्षन्त समरे रावणिं पर्यवस्थिताः ॥ ४३ ॥
तद्द्रुमाणां शिलानां च वर्षं प्राणहरं महत् ॥ व्यपोहत महातेजा रावणिः समितिञ्जयः ॥ ४४ ॥
ततः पावकसंकाशैः शरैराशीविषोपमैः ॥ वानराणामनीकानि बिभेद समरे प्रभुः ॥ ४५ ॥
अष्टादशशरैस्तीक्ष्णैः स विद्ध्वा गन्धमादनम् ॥ विव्याध नवभिश्चैव नलं दूरादवस्थितम् ॥ ४६ ॥
सप्तभिस्तु महावीर्यो मैन्दं मर्मविदारणैः ॥ पञ्चभिर्विंशिखैश्चैव गजं विव्याध संयुगे ॥ ४७ ॥
जाम्बवन्तं तु दशभिर्नीलं त्रिंशद्भिरेव च ॥ सुग्रीवमृषभं चैव सोङ्गदं द्विविदं तथा ॥
घोरैर्दत्तवरैस्तीक्ष्णैर्निष्प्राणानकरोत्तदा ॥ ४८ ॥
अन्यानपि तदा मुख्यान्वानरान्बहुभिः शरैः ॥ अर्दयामास संक्रुद्धः कालाग्निरिव मूर्च्छितः ॥ ४९ ॥
स शरैः सूर्यसंकाशैः सुमुक्तैः शीघ्रगामिभिः ॥ वानराणामनीकानि निर्ममन्थ महारणे ॥ ५० ॥
आकुलां वानरीं सेनां शरजालेन मोहिताम् ॥ हृष्टः स परया प्रीत्या ददर्श क्षतजोक्षिताम् ॥ ५१ ॥
पुनरेव महातेजा राक्षसेन्द्रात्मजो बली ॥ संसृज्य बाणवर्षं च शस्त्रवर्षं च दारुणम् ॥
ममर्द वानरानीकमिन्द्रजित्त्वरितो बली ॥ ५२ ॥

स्वसैन्यमुत्सृज्य समेत्य तूर्णं महारणे वानरवाहिनीषु ॥
अदृश्यमानः शरजालमुग्रं ववर्ष नीलाम्बुधरो यथाऽम्बु ॥ ५३ ॥
ते शक्रजिद्बाणविशीर्णदेहा मायाहता विस्वरमुन्नदन्तः ॥
रणे निपेतुर्हरयोद्रिकल्पा यथेन्द्रवज्राभिहता नगेन्द्राः ॥ ५४ ॥

खेन्तर्दध इति पूर्वोक्तं विरुध्येत । विचकर्त हिंसितवान् ॥ ३४ ॥ रावणिं रावणिमुक्तायुधागमनप्रदेशं ॥ ३५—३८ ॥ मथितसंकल्पाः नाशितमनोरथाः ॥ ३९—४१ ॥ त्यक्तजीविताः त्यक्तजीवितेच्छाः । अभिवृत्ताः अभिमुखं प्रवृत्ताः । तुरवधारणे ॥ ४२—४३ ॥ व्यपोहत वारयामास ॥ ४४—४५ ॥ अष्टादशेत्यादिसार्धश्लोकत्रयमेकान्वयं ॥ दत्तवरैः वरदत्तैः ॥ ४६—४८ ॥ अन्यानिति ॥ मूर्च्छितः प्रवृद्धः ॥ ४९—५० ॥ परया प्रीत्या हृष्टः उद्धतः ॥ ५१ ॥ पुनरेवेत्यादिसार्धश्लोकमेकं वाक्यं ॥ खड्गादीनि शस्त्राणि । अत्र द्वितीयबलिशब्दो वरदानबलवत्तावाचकः । प्रथमो वीर्यवत्तावाचकः ॥ ५२ ॥ स्वसैन्यं

रामानु० रावणिं रावणिमुक्तायुधागमनप्रदेशं । खेन्तर्दधेइत्यभिधानात् ॥ स० अथवापरीक्षाकृतेमन्त्राणांतदान्तर्धानं । यथायथंस्वेच्छानुसारेणप्रत्यक्षीभवनमप्रत्यक्षीभवनंचसंभवीतिरावणिमित्याद्युक्तिःसंभवतीतिवाङ्मेयं ॥ ३५ ॥ शि० निवृत्ताः इहलोकसुखेच्छारहिताः ॥ ४२ ॥ ती० रावणिमभ्यवर्षन्त रावणिसंचारप्रदेशमभ्यवर्षन्तेत्यर्थः । तस्यादर्शनात् ॥ ४३ ॥

[पा०] १ ङ. ञ. ञ. ट. अभ्यवर्षन्तसहसारावणिंशैलपादपैः. २ क. ङ. ञ. ञ. ट. बिभेद. ३ ङ. ञ. ट. तेपतन्तमिवा. म. प्रपतन्तमिवा. ४ ट. स्तेनिवृत्तास्तु. ५ ख. ग. प्रहरतांमहत्. ६ ङ. ञ. ञ. ट. पीडितां.

ते केवलं संददृशुः शिताग्रान्बाणान्रणे वानरवाहिनीषु ॥
मायानिगूढं तु सुरेन्द्रशत्रुं न चावृतं राक्षसमभ्यपश्यन् ॥ ५५ ॥
ततः स रक्षोधिपतिर्महात्मा सर्वा दिशो बाणगणैः शिताग्रैः ॥
प्रच्छादयामास रविप्रकाशैर्विषादयामास च वानरेन्द्रान् ॥ ५६ ॥
स शूलनिस्त्रिंशपरश्वधानि व्याविध्य दीप्तानलसन्निभानि ॥
सविस्फुलिङ्गोज्वलपावकानि ववर्ष तीव्रं प्लवगेन्द्रसैन्ये ॥
[गदाश्च शक्तीः परिघं शतघ्नीर्ववर्ष तीव्रं प्लवगेन्द्रसैन्ये] ॥ ५७ ॥
ततो ज्वलनसंकाशैः शरैर्वानरयूथपाः ॥ ताडिताः शक्रजिद्बाणैः प्रफुल्ला इव किंशुकाः ॥ ५८ ॥
तेऽन्योन्यमभिसर्पन्तो निनदन्तश्च विस्वरम् ॥ राक्षसेन्द्रास्त्रनिर्भिन्ना निपेतुर्वानरर्षभाः ॥ ५९ ॥
उदीक्षमाणा गगनं केचिन्नेत्रेषु ताडिताः ॥ शरैर्विविशुरन्योन्यं पेतुश्च जगतीतले ॥ ६० ॥
हनुमन्तं च सुग्रीवमङ्गदं गन्धमादनम् ॥ जाम्बवन्तं सुषेणं च वेगदर्शिनमेव च ॥ ६१ ॥
मैन्दं च द्विविदं नीलं गवाक्षं गजगोमुखौ ॥ केसरिं हरिलोमानं विद्युद्दंष्ट्रं च वानरम् ॥ ६२ ॥
सूर्याननं ज्योतिर्मुखं तथा दधिमुखं हरिम् ॥ पावकाक्षं नलं चैव कुमुदं चैव वानरम् ॥ ६३ ॥
प्रासैः शूलैः शितैर्बाणैरिन्द्रजिन्मन्त्रसंहितैः ॥ विव्याध हरिशार्दूलान्सर्वांस्तान्राक्षसोत्तमः ॥ ६४ ॥
स वै गदाभिर्हरियूथमुख्यान्निर्भिद्य बाणैस्तपनीयपुङ्खैः ॥
ववर्ष रामं शरवृष्टिजालैः सलक्ष्मणं भास्कररश्मिकल्पैः ॥ ६५ ॥
स बाणवर्षैरभिवर्ष्यमाणो धारानिपातानिव तानचिन्त्य ॥
समीक्षमाणः परमाद्भुतश्री रामस्तदा लक्ष्मणमित्युवाच ॥ ६६ ॥
असौ पुनर्लक्ष्मण राक्षसेन्द्रो ब्रह्मास्त्रमाश्रित्य सुरेन्द्रशत्रुः ॥
निपातयित्वा हरिसैन्यमुग्रमस्माञ्शरैरर्दयति प्रसक्तः ॥ ६७ ॥
स्वयम्भुवा दत्तवरो महात्मा खमास्थितोन्तर्हितभीमकायः ॥
कथं नु शक्यो युधि नष्टदेहो निहन्तुमद्येन्द्रजिदुद्यतास्त्रः ॥ ६८ ॥

स्वसैन्योपरिभागं ॥ ५३—५४ ॥ मायानिगूढं अत एव आवृतं अप्रकाशं ॥ ५५—५७ ॥ ततो ज्वलनेत्यादिश्लोकद्वयमेकान्वयं ॥ शरैः तीक्ष्णैरित्यर्थः ॥ ५८—५९ ॥ विविशुरन्योन्यं अन्योन्योपर्यालम्बनार्थं पेतुरित्यर्थः ॥ ६० ॥ हनुमन्तमित्यादिचतुःश्लोक्येकान्वया ॥ ६१ ॥ केसरिमित्यार्षं ॥ ६२—६४ ॥ गदाभिरित्येतत् पूर्वोक्तप्रासादीनामुपलक्षणं ॥६५॥ बाणवर्षैः बाणनिरन्तरपातैः । अभिवर्ष्यमाणः अभितः पात्यमानः स रामः । तान् बाणवर्षान् । धारानिपातानिव लघूनचिन्त्य । बाणवर्षं तृणीकृत्येत्यर्थः । अत्र हेतुमाह—परमेति । अत्यन्ताश्चर्यकरधैर्यसमृद्धिः सन् लक्ष्मणं समीक्षमाणः स्वस्वभावावलम्बनेन ब्रह्मास्त्रप्रतिक्रियां कर्तुमुद्युक्तमिङ्गितैरभिवीक्षमाणः सन्नित्युवाच ॥ ६६ ॥ असौ ब्रह्मास्त्रं ब्रह्मास्त्रमन्त्रं । आश्रित्य । प्रहरन्निति शेषः ॥ ६७ ॥ नष्टदेहः अदृष्टदेहः । तत्र हेतुः—अन्तर्हितभीमकाय इति ॥ ६८ ॥

[पा०] १ ख. घ.—ठ. नचात्रतंराक्षस. क. ग. नराक्षसेन्द्रात्मजमभ्यपश्यन्. २ ख. घ. ङ. छ.—ट. विंदारयामासच. ३ इदमर्धं क. पाठेअधिकंदृश्यते. ४ क. ख. ग. च. ज. शितैर्वानर. ५ ग.—छ. झ. ञ. ट. शनैर्विविशुः. ६ ङ. छ. झ. ढ. गवाक्षंगवयंतथा. ७ ङ. झ. ट. हरिसैन्यमस्माञ्शतैःशरैरर्दयतिप्रसक्तं.

मन्ये स्वयम्भूर्भगवानचिन्त्यो यस्यैतदस्त्रं प्रभवश्च योऽस्य ॥
बाणावपातांस्त्वमिहाद्य धीमन्मया सहाव्यग्रमनाः सहस्व ॥ ६९ ॥
प्रच्छादयत्येष हि राक्षसेन्द्रः सर्वा दिशः सायकवृष्टिजालैः ॥
एतच्च सर्वं पतिताग्र्यशूरं न भ्राजते वानरराजसैन्यम् ॥ ७० ॥
आवां तु दृष्ट्वा पतितौ विसंज्ञौ निवृत्तयुद्धौ गतरोषहर्षौ ॥
ध्रुवं प्रवेक्ष्यत्यमरारिवासमसौ समादाय रणाग्रलक्ष्मीम् ॥ ७१ ॥
ततस्तु तावेन्द्रजिदस्त्रजालैर्बभूवतुस्तत्र तथा विशस्तौ ॥
स चापि तौ तत्र विदर्शयित्वा ननाद हर्षाद्युधि राक्षसेन्द्रः ॥ ७२ ॥
स तत्तदा वानरसैन्यमेवं रामं च सङ्ख्ये सह लक्ष्मणेन ॥
विषादयित्वा सहसा विवेश पुरीं दशग्रीवभुजाभिगुप्ताम् ॥ ७३ ॥
[संस्तूयमानः स तु यातुधानैः पित्रे च सर्वं हृषितोऽभ्युवाच ॥] ७४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

चतुःसप्ततितमः सर्गः ॥ ७४ ॥

विभीषणेनेन्द्रजिदस्त्रबद्धमुग्धसेनासमाश्वासनपूर्वकं हनुमतासहोल्कापाणिनासता सेनामध्येऽन्वेषणेनजांबवदन्तिकोपसर्पणम् ॥१॥ विभीषणेनकुशलंपृष्टेनजांबवता तंप्रति मन्दस्वरेणहनुमत्कुशलप्रश्ने हनुमताजांबवन्तंप्रति सप्रणाममात्मनोऽभिमतकरणेनियोजनप्रार्थना ॥ २ ॥ तेन तंप्रति सराघवहरिसेनासमुज्जीवनाय हिमवद्गिरिसंनिकृष्टमहौषधिपर्वतान्मृतसंजीवन्यादिदिव्यौषधिसमानयनचोदना ॥ ३ ॥ हनुमताहिमवन्तमेत्य तत्रनानापुण्यस्थानावलोकनपूर्वकमोषधिगिरिमेत्य तदोषधिगवेषणम् ॥ ४ ॥ हनुमता स्वावलोकनेनौषधिभिस्तिरोधाने क्रोधादोषधिगिरेरेवसमुत्पाटनेन वेगाल्लङ्कांप्रत्यागमनम् ॥५॥ पर्वतपाणौहनुमति संनिकृष्टमात्रेणदिव्यौषधिगन्धाघ्राणनमात्रेणराघवाभ्यांसहविगतमोहैर्विशल्यैश्च वानरगणैस्तदोषधिगन्धमारुतसंस्पर्शमात्रेणसमुज्जीवितैर्हतपूर्ववानरैःसह हर्षात्समुद्घोषणम् ॥ ६ ॥ हनुमता पुनरोषधिगिरेर्हिमवद्गिरिंप्रति प्रापणम् ॥ ७ ॥

तयोस्तदा सादितयो रणाग्रे मुमोह सैन्यं हरिपुङ्गवानाम् ॥
सुग्रीवनीलाङ्गदजाम्बवन्तो न चापि किंचित्प्रतिपेदिरे ते ॥ १ ॥

तर्हि तत्र प्रतिक्रिया कर्तव्येत्यत्राह—मन्य इति ॥ स्वयम्भूः अचिन्त्यः अचिन्त्यप्रभाव इति मन्ये । तत्र हेतुमाह—यस्येति । एतदस्त्रं यस्य यद्देवताकं । यः अस्यास्त्रस्य प्रभवः उत्पत्तिकारणं । सोचिन्त्यः । तर्ह्यावाभ्यां किं कर्तव्यमित्यत्राह—बाणेति । धीमन् आपत्सु न चलितव्यमिति ज्ञानिन् ॥ ६९–७० ॥ गतरोषहर्षौ मूर्च्छताविति यावत् । अमरारिवासं लङ्कां । रणाग्रलक्ष्मीं विजयलक्ष्मीं । अग्रपदेन रणमूललक्ष्मीर्न ग्रहीतुं शक्येत्युच्यते । एतेन मूलघातः कर्तुं न शक्यत इत्युच्यते ॥ ७१ ॥ विशस्तौ पीडितौ । तौ पतितौ विदर्शयित्वा दृष्ट्वा ननाद ॥ ७२–७४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिसप्ततितमः सर्गः ॥ ७३ ॥

अथ ब्रह्मास्त्रबन्धविमुक्तिश्चतुःसप्ततौ—तयोरित्यादि

ति० नन्वदृष्टदेहस्यापिसंहारसाधनैः शब्दवेध्यादिदिव्यास्त्रैर्हननंकार्यमितिचेन्न । भगवतोब्रह्मणआज्ञायामारुतिनेवास्माभिरपिपालनौचित्येनैतत्सहनस्यैवौचित्यादित्याशयेनाह—मन्यइति ॥ स० मयासहसहस्व एतेनतत्सहनेममसामर्थ्यमदनुग्रहात्तवसहनमितिध्वन्यते ॥ ६९ ॥ इतित्रिसप्ततितमःसर्गः ॥ ७३ ॥

[पा०] १ ङ. ञ. ट. समासाद्य. २ क. ख. ङ.—ट. विषादयित्वा. ३ ङ. ञ. ट. निषूदयित्वा. ४ इदमर्धं ङ. ञ. ट. पाठेषुदृश्यते.

ततो विषण्णं समवेक्ष्य सैन्यं विभीषणो बुद्धिमतां वरिष्ठः ॥
उवाच शाखामृगराजवीरानाश्वासयन्प्रतिमैर्वचोभिः ॥ २ ॥
मा भैष्ट नास्त्यत्र विषादकालो यदार्यपुत्रौ ह्यवशौ विषण्णौ ॥
स्वयम्भुवो वाक्यमथोद्वहन्तौ यत्सादिताविन्द्रजिदस्त्रजालैः ॥ ३ ॥
[विभीषणस्तत्र वराद्विधातुरसादितोस्त्रेण निरीक्षमाणः ॥
सेनां हरीणां द्रुहिणास्त्रदूनां स्वस्थं हनूमन्तमुवाच दृष्ट्वा]॥ ४ ॥
तस्मै तु दत्तं परमास्त्रमेतत्स्वयम्भुवा ब्राह्मममोघवेगम् ॥
तन्मानयन्तौ युधि राजपुत्रौ निपातितौ कोत्र विषादकालः ॥ ५ ॥

ब्राह्ममस्त्रं ततो धीमान्मानयित्वा तु मारुतिः ॥ विभीषणवचः श्रुत्वा हनुमांस्तमथाब्रवीत् ॥ ६ ॥
एतस्मिन्निहते सैन्ये वानराणां तरस्विनाम् ॥ यो यो धारयते प्राणांस्तं तमाश्वासयावहै ॥ ७ ॥
तावुभौ युगपद्वीरौ हनुमद्राक्षसोत्तमौ ॥ उल्काहस्तौ तदा रात्रौ रणशीर्षे विचेरतुः ॥ ८ ॥
भिन्नलाङ्गूलहस्तोरुपादाङ्गुलिशिरोधरैः ॥ स्रवद्भिः क्षतजं गात्रैः प्रस्रवद्भिस्ततस्ततः ॥ ९ ॥
पतितैः पर्वताकारैर्वानरैरभिसङ्कुलाम् ॥ शस्त्रैश्च पतितैर्दीप्तैर्ददृशाते वसुन्धराम् ॥ १० ॥
सुग्रीवमङ्गदं नीलं शरभं गन्धमादनम् ॥ गवाक्षं च सुषेणं च वेगदर्शिनमाहुकम् ॥ ११ ॥
मैन्दं नलं ज्योतिमुखं द्विविदं पनसं तथा ॥ एतांश्चान्यांस्ततो वीरौ ददृशाते हतान्रणे ॥ १२ ॥
सप्तषष्टिर्हताः कोट्यो वानराणां तरस्विनाम् ॥ अह्नः पञ्चमशेषेण वल्लभेन स्वयम्भुवः ॥ १३ ॥

सादितयोः अवसादितयोः । किंचिन्न प्रतिपेदिरे । मूढा बभूवुरित्यर्थः ॥ १—२ ॥ आर्यपुत्रौ अवशौ विषण्णाविति यत् । अत्र विषादकालो नास्ति विषादहेतुकालो नास्ति । कुतः । स्वयम्भुवो वाक्यम् उद्वहन्तौ मानयन्तौ इन्द्रजिदस्त्रजालैः सादितौ सादिताविव वर्तमानाविति यत् । ततः । मा भैष्टेत्यर्थः ॥३—४॥ उक्तमेवार्थं विशदयति—तस्मा इति ॥ ५ ॥ मानयित्वा मुहूर्तमात्रं ब्रह्मास्त्रपरवशः स्थित्वा ॥ ६—८ ॥ भिन्नलाङ्गूलेत्यादिश्लोकद्वयमेकान्वयम् ॥ स्रवद्भिः मूत्रयद्भिः॥ ९—१० ॥ सुग्रीवमित्यादिश्लोकद्वयमेकान्वयं ॥ आहुक इति कश्चिद्यूथपः । गवाक्षं च सुषेणं च वेगदर्शिनमाहुकमिति पाठः । हतान् हतप्रायान् । प्रहृतानिति वा ॥ ११—१२ ॥ वानराणां यूथपवानराणामित्यर्थः । सुग्रीवाङ्गदादिभिः सह पाठात् ॥ अह्नः पञ्चमशेषेण पञ्चमभागेन । प्रातःसङ्गवमध्याह्नापराह्णसायाह्नसंज्ञाः षण्णाडिकालंकाः अहः पञ्च भागाः सन्ति । तेषु पञ्चमेन सायाह्नसंज्ञेन नाडीषट्केनेत्यर्थः । स्वयम्भुवो वल्लभेन इन्द्र

स० शाखामृगराजाश्चतेवीराश्च तान् । शाखामृगराजेषुवीराश्चेतिवा । ' सप्तमीशौण्डैः ' इतियोगविभागात्समासः । तेन नपूर्वापरेतिवीरशब्दस्यपूर्वनिपातः । आद्यपक्षेतुएकवीरइतिवद्बाहुलकात्परनिपातः ॥ २ ॥ ति० अत्र अस्यामवस्थायां । विषादकालः विषादावसरोनास्ति । कुतस्तत्राह—यदिति । यद्यस्मात्स्वयंभुवोवाक्यमुद्वहन्तौ तदाज्ञांपरिपालयन्तौ । अतएवविवशौ अस्त्रप्रयोगप्रवृत्तिरहितौ । अथानन्तरं तस्मादेवेन्द्रजितासादितावितियत् तस्माद्विषण्णावेव नतुप्राणपीडावन्तौ । अतोमाभैष्ट । यद्वा एतावशौ विषण्णाविति यत् तत्रविषयेमाभैष्ट । एतयोर्विषण्णयोरस्मान्कोवारक्षिष्यतीतिशत्रुभ्योभयंमाभूत् । अत्रएतद्विषयेविषादकालोनास्ति । यद्यस्मात्स्वयंभुवोवाक्यं मन्त्ररूपं उद्वहन्तौ मानयन्तौ इन्द्रजिदस्त्रजालैःसादितौ सादिताविव यतोब्रह्मसंमाननार्थंस्वयमेवपतितावितिमाभैष्टेत्यर्थः ॥ ३ ॥ ति० तदारात्रावित्यनेन सप्तम्यांरात्रावयमस्त्रप्रयोगइतिसूचितं ॥ ८ ॥ ति० सप्तषष्टिकोटिवानरहननेसामर्थ्यमाह—वल्लभेनेति । स्वयंभूवल्लभेनब्रह्मास्त्रेण अपरिमितप्राणिहननसमर्थेन हतमितिभगवद्वैभव—

[पा०] १ अयंश्लोकः क. ख. पाठयोरधिकोदृश्यते. २ ङ.—ट. ममोघवीर्यं. ३ क. ग.—ट. हनूमानिदमब्रवीत्. ४ ङ. ञ. ट. अस्मिन्नस्त्रहते. घ. एतस्मिन्नन्तरे. ५ क.—ङ. ज. ञ. प्रस्रवद्भिःसमन्ततः. ख. च. छ. ट. प्रस्रवद्भिरिवाचलैः. ६ क. ख. घ.—म. जांबवन्तंसुषेणं च. ७ क. घ. ङ. ञ. ट. द्विविदंचापिवानरं. ८ क. ग.—ट. विभीषणोहनूमांश्चददृशाते.

सागरौघनिभं भीमं दृष्ट्वा बाणार्दितं बलम् ॥ मार्गते जाम्बवन्तं स हनुमान्सविभीषणः ॥ १४ ॥
स्वभावजरया युक्तं वृद्धं शरशतैश्चितम् ॥ प्रजापतिसुतं वीरं शाम्यन्तमिव पावकम् ॥ १५ ॥
दृष्ट्वा तमुपसंगम्य पौलस्त्यो वाक्यमब्रवीत् ॥ कच्चिदार्य शरैस्तीक्ष्णैः प्राणा न ध्वंसितास्तव ॥१६॥
विभीषणवचः श्रुत्वा जाम्बवानृक्षपुङ्गवः ॥ कृच्छ्रादभ्युद्गिरन्वाक्यमिदं वचनमब्रवीत् ॥ १७ ॥
नैर्ऋतेन्द्र महावीर्य स्वरेण त्वाऽभिलक्षये ॥ पीड्यमानः शितैर्बाणैर्न त्वां पश्यामि चक्षुषा ॥ १८ ॥
अञ्जना सुप्रजा येन मातरिश्वा च नैर्ऋत ॥ हनुमान्वानरश्रेष्ठः प्राणान्धारयते क्वचित् ॥ १९ ॥
श्रुत्वा जाम्बवतो वाक्यमुवाचेदं विभीषणः ॥ आर्यपुत्रावतिक्रम्य कस्मात्पृच्छसि मारुतिम् ॥२०॥
नैव राजनि सुग्रीवे नाङ्गदे नापि राघवे ॥ आर्य संदर्शितः स्नेहो यथा वायुसुते परः ॥ २१ ॥
विभीषणवचः श्रुत्वा जाम्बवान्वाक्यमब्रवीत् ॥ शृणु नैर्ऋतशार्दूल यस्मात्पृच्छामि मारुतिम् ॥२२॥
तस्मिञ्जीवति वीरे तु हतमप्यहतं बलम् ॥ हनुमत्युज्जितप्राणे जीवन्तोपि वयं हताः ॥ २३ ॥
धरते मारुतिस्तात मारुतप्रतिमो यदि ॥ वैश्वानरसमो वीर्ये जीविताशा ततो भवेत् ॥ २४ ॥
ततो वृद्धमुपागम्य नियमेनाभ्यवादयत् ॥ गृह्य जाम्बवतः पादौ हनुमान्मारुतात्मजः ॥
[अहमस्मि हरिश्रेष्ठः शाधि मां यच्चिकीर्षितम्] ॥ २५ ॥
श्रुत्वा हनुमतो वाक्यं तथापि व्यथितेन्द्रियः ॥ पुनर्जातमिवात्मानं मन्यते स्म ऋक्षपुङ्गवः ॥ २६ ॥
ततोऽब्रवीन्महातेजा हनुमन्तं स जाम्बवान् ॥ आगच्छ हरिशार्दूल वानरांस्त्रातुमर्हसि ॥ २७ ॥
नान्यो विक्रमपर्याप्तस्त्वमेषां परमः सखा ॥ त्वत्पराक्रमकालोयं नान्यं पश्यामि कंचन ॥ २८ ॥
ऋक्षवानरवीराणामनीकानि प्रहर्षय ॥ विशल्यौ कुरु चाप्येतौ सादितौ रामलक्ष्मणौ ॥ २९ ॥
गत्वा परममध्वानमुपर्युपरि सागरम् ॥ हिमवन्तं नगश्रेष्ठं हनुमन्गन्तुमर्हसि ॥ ३० ॥
ततः काञ्चनमत्युच्चमृषभं पर्वतोत्तमम् ॥ कैलासशिखरं चापि द्रक्ष्यस्यरिनिषूदन ॥ ३१ ॥
तयोः शिखरयोर्मध्ये प्रदीप्तमतुलप्रभम् ॥ सर्वौषधियुतं वीर द्रक्ष्यस्योषधिपर्वतम् ॥ ३२ ॥
तस्य वानरशार्दूल चतस्रो मूर्ध्नि संभवाः ॥ द्रक्ष्यस्योषधयो दीप्ता दीपयन्त्यो दिशो दश ॥ ३३ ॥

जिता । ब्रह्मास्त्रेण वा ॥ १३—१६ ॥ वाक्यं वाक्योपयोगि स्वरं ॥ १७—१८ ॥ धारयत इत्यत्र काकुः । किं धारयत इत्यर्थः ॥ १९ ॥ श्रुतेत्यादिश्लोकद्वयमेकं वाक्यं ॥ २०—२४ ॥ मारुतात्मजः हनुमान् वृद्धं जाम्बवन्तं उपागम्य । नियमेन श्रोत्रहस्तसंस्पर्शव्यत्यस्तहस्तत्वादिरूपेण सह । जाम्बवतः पादौ गृह्य गृहीत्वा अभ्यवादयत् । स्वनामोच्चारणपूर्वकं युगपत्पादावगृह्णादित्यर्थः ॥ २५ ॥ वाक्यं हनुमानहमस्मीत्यभिवादनवाक्यं । तथा व्यथितेन्द्रियोपि हनुमतो वाक्यं श्रुत्वा ऋक्षपुङ्गवः जाम्बवान् आत्मानं पुनर्जातं मन्यते स्मेति संबन्धः ॥२६—२७॥ विक्रमपर्याप्तः पर्याप्तविक्रमः । विक्रमपूर्ण इति यावत् अन्यं पराक्रमितारं ॥ २८—२९ ॥ परमं दीर्घं । उपर्युपरिसागरं सागरस्य समीपोपरि प्रदेशे । " उपर्यध्यधसः सामीप्ये" इति सामीप्ये द्विर्वचनं । "धिगुपर्यादिषु त्रिषु द्वितीया" इति द्वितीया ॥ ३० ॥ ऋषभं ऋषभाख्यं । पर्वतोत्तमं शिखरमित्यर्थः ॥ ३१—३२॥ तस्येत्यादिश्लोकत्रयमेकान्वयं ॥ ओषधयः ओषधीः । दीपयन्त्यः दीपयन्तीः । व्यत्ययेन द्वितीयार्थे प्रथमा । मृतं सञ्जीवयतीति मृतसञ्जीवनी । जीवनानन्तरं संचारक्षमतायै विशल्यं करोतीति विशल्यकरणी । विशल्ये कृते त्वचः सन्धानं करोतीति स-

---

मेवैतदितिभावः ॥ १३ ॥ ति० मार्गते विशिष्येत्यर्थः । तस्यबहुज्ञत्वादुपायप्रश्नार्थमितिभावः ॥ १४ ॥ स० अवश्यंस्नेहेनपार्णिंसंगृह्याह—नेति । हेआर्य तथाकिंनदर्शितः । पूर्वलक्ष्मणेनसहरामस्यनिर्देशादेकसत्त्वेपिद्वयंनास्तीतिप्रतीत्यारामानतिक्रमणेपि

[पा०] १ ङ. ञ. ट. विद्धगात्रः. २ ङ. ञ. ट. सुव्रत. ३ ङ. ञ. ट. मृतावयं. ४ इदमर्धं ज. पाठेदृश्यते.

मृतसञ्जीवनीं चैव विशल्यकरणीमपि ॥ सावर्ण्यकरणीं चैव सन्धानकरणीं तथा ॥ ३४ ॥
ताः सर्वा हनुमन्गृह्य क्षिप्रमागन्तुमर्हसि ॥ आश्वासय हरीन्प्राणैर्योज्य गन्धवहात्मज ॥ ३५ ॥
श्रुत्वा जाम्बवतो वाक्यं हनुमान्हरिपुङ्गवः ॥ आपूर्यत बलोद्धर्षैस्तोयवेगैरिवार्णवः ॥ ३६ ॥
स पर्वततटाग्रस्थः पीडयन्पर्वतोत्तमम् ॥ हनुमान्दृश्यते वीरो द्वितीय इव पर्वतः ॥ ३७ ॥
हरिपादविनिर्भग्नो निषसाद स पर्वतः ॥ न शशाक तदाऽऽत्मानं सोढुं भृशनिपीडितः ॥ ३८ ॥
तस्य पेतुर्नगा भूमौ हरिवेगाच्च जज्वलुः ॥ शृङ्गाणि च व्यशीर्यन्त पीडितस्य हनूमता ॥ ३९ ॥
तस्मिन्संपीड्यमाने तु भग्नद्रुमशिलातले ॥ न शेकुर्वानराः स्थातुं घूर्णमाने नगोत्तमे ॥ ४० ॥
सा घूर्णितमहाद्वारा प्रभग्नगृहगोपुरा ॥ लङ्का त्रासाकुला रात्रौ प्रनृत्तेवाभवत्तदा ॥ ४१ ॥
पृथिवीधरसंकाशो निपीड्य धरणीधरम् ॥ पृथिवीं क्षोभयामास सार्णवां मारुतात्मजः ॥ ४२ ॥
आरुरोह तदा तस्माद्गिरिं मलयपर्वतम् ॥ मेरुमन्दरसंकाशं नानाप्रस्रवणाकुलम् ॥ ४३ ॥
नानाद्रुमलताकीर्णं विकासिकमलोत्पलम् ॥ सेवितं देवगन्धर्वैः षष्टियोजनमुच्छ्रितम् ॥ ४४ ॥
विद्याधरैर्मुनिगणैरप्सरोभिर्निषेवितम् ॥ नानामृगगणाकीर्णं बहुकन्दरशोभितम् ॥ ४५ ॥
सर्वानाकुलयंस्तत्र यक्षगन्धर्वकिन्नरान् ॥ हनुमान्मेघसंकाशो ववृधे मारुतात्मजः ॥ ४६ ॥
पद्भ्यां तु शैलमापीड्य बडवामुखवन्मुखम् ॥ विवृत्योग्रं ननादोच्चैस्त्रासयन्निव राक्षसान् ॥ ४७ ॥
तस्य नानद्यमानस्य श्रुत्वा निनदमद्भुतम् ॥ लङ्कास्था राक्षसाः सर्वे न शेकुः स्पन्दितुं भयात् ॥४८॥
नमस्कृत्वाऽथ रामाय मारुतिर्भीमविक्रमः ॥ राघवार्थे परं कर्म समीहत परन्तपः ॥ ४९ ॥

स पुच्छमुद्यम्य भुजङ्गकल्पं विनम्य पृष्ठं श्रवणे निकुञ्च्य ॥
विवृत्य वक्त्रं बडवामुखाभमापुप्लुवे व्योमनि चण्डवेगः ॥ ५० ॥
स वृक्षषण्डांस्तरसाऽऽजहार शैलाञ्शिलाः प्राकृतवानरांश्च ॥
बाहूरुवेगोद्धतसंप्रणुन्नास्ते क्षीणवेगाः सलिले निपेतुः ॥ ५१ ॥

न्धानकरणी । ततो व्रणकृतवैवर्ण्यं विहाय प्रदेशान्तरसावर्ण्यं करोतीति सावर्ण्यकरणी ॥ ३३—३५ ॥ बलोद्धर्षैः बलोत्कर्षैः । आपूर्यत पूर्णोभूत् ॥ ३६ ॥ पर्वततटाग्रस्थः त्रिकूटशिखरस्थः । पर्वतोत्तमं त्रिकूटं ॥ ३७ ॥ हरीति । हरिः हनुमान् ॥ ३८ ॥ तस्य त्रिकूटस्य । नगाः वृक्षाः । हरिवेगात् हनुमतो हिमवदुत्तरप्रदेशस्थौषधिपर्वतपर्यन्तगमनोचितशक्त्यास्थानवेगात् । जज्वलुश्च । वेगोद्धर्षजवह्निनेत्यर्थः पीडितस्य पर्वतस्येति शेषः ॥३९॥ न शेकुरिति । त्रिकूटतटस्य युद्धरङ्गत्वात् । घूर्णमाने कम्पमाने॥४०॥ प्रनृत्तेवाभवत् त्रिकूटाग्रनिर्मितत्वात्तस्याः ॥ ४१—४२॥ आरुरोहेत्यादिश्लोकत्रयमेकान्वयं ॥ मलयपर्वतमित्यत्र लङ्कामलय उच्यते ॥४३—४६॥ त्रासयन् त्रासनार्थं ननाद । "लक्षणहेत्वोः—" इति शतृप्रत्ययः । स्वागमनपर्यन्तं राक्षसनिर्गमनं मा भूदिति तेषां त्रासनार्थं ननादेति भावः । इवशब्दो वाक्यालंकारे ॥ ४७—४८ ॥ नमस्कृत्वाथ रामायेति अयं प्रारीप्सितकर्मसमाप्तये सम्यगिष्टदेवतानमस्कारः ॥ ४९ ॥ स पुच्छमिति पुच्छोद्यमनेनोत्साहातिरेक उक्तः । पृष्ठविनमनेनाकाशगमनानुकूलप्राणवायुनिरोध उक्तः। श्रवणनिकुञ्चनेन बलोद्दीपनं । मुखव्यादानेनाभिनिवेशः ॥५०॥ प्राकृतवानरान् त्रिकूटवननित्यवासिनः । आजहार उज्जहार । अस्यैवानुवादो बाहूरुवेगोद्धतसंप्रणुन्नाः बाहूर्वोर्वेगेन उद्धताः उन्मूलिताः

तदतिक्रमणमितिशङ्कांवारयितुंराघवइतिपृथगुक्तिः ॥ २१ ॥ ति० सुवर्णकरणीं स्वर्णसमानवर्णस्यदेहादेःकरणीं ॥ ३४ ॥

[पा०] १ ग. ङ. ञ. ट. सुवर्णकरणीचैवसंधानींचमहौषधीं. क. ख. घ. च. छ. झ. सवर्णकरणीचैवसंधानींचमहौषधीं. २ ख. झ. प्रतिगन्तुंत्वमर्हसि. ३ ङ. ञ. बलोद्धर्षैर्वायुवेगैरिवा. ४ क. श्रीमान्हरिः. ५ क. न्मेरुसंकाशो. ६ ङ. ञ. ट. शैलमाविध्य. ७ क. ग. ङ. ञ. ट. राक्षसव्याघ्रानशेकुः.

स तौ प्रसार्योरगभोगकल्पौ भुजौ भुजङ्गारिनिकाशवीर्यः ॥
जगाम मेरुं नगराजमग्र्यं दिशः प्रकर्षन्निव वायुसूनुः ॥ ५२ ॥
स सागरं घूर्णितवीचिमालं तदा भृशं भ्रामितसर्वसत्त्वम् ॥
समीक्षमाणः सहसा जगाम चक्रं यथा विष्णुकराग्रमुक्तम् ॥ ५३ ॥
स पर्वतान्वृक्षगणान्सरांसि नदीस्तटाकानि पुरोत्तमानि ॥
स्फीताञ्जनान्तानपि संप्रवीक्ष्य जगाम वेगात्पितृतुल्यवेगः ॥ ५४ ॥
आदित्यपथमाश्रित्य जगाम स गतक्लमः ॥ हनुमांस्त्वरितो वीरः पितृतुल्यपराक्रमः ॥ ५५ ॥
जवेन महता युक्तो मारुतिर्मारुतो यथा ॥ जगाम हरिशार्दूलो दिशः शब्देन पूरयन् ॥ ५६ ॥
स्मरञ्जाम्बवतो वाक्यं मारुतिर्वातरंहसा ॥ ददर्श सहसा चापि हिमवन्तं महाकपिः ॥ ५७ ॥
नानाप्रस्रवणोपेतं बहुकन्दरनिर्झरम् ॥ श्वेताभ्रचयसंकाशैः शिखरैश्चारुदर्शनैः ॥
शोभितं विविधैर्वृक्षैरगमत्पर्वतोत्तमम् ॥ ५८ ॥
स तं समासाद्य महानगेन्द्रमतिप्रवृद्धोत्तमघोरशृङ्गम् ॥
ददर्श पुण्यानि महाश्रमाणि सुरर्षिसङ्घोत्तमसेवितानि ॥ ५९ ॥
स ब्रह्मकोशं रजतालयं च शक्रालयं रुद्रशरप्रमोक्षम् ॥
हयाननं ब्रह्मशिरश्च दीप्तं ददर्श वैवस्वतकिङ्करांश्च ॥ ६० ॥
वज्रालयं वैश्रवणालयं च सूर्यप्रभं सूर्यनिबन्धनं च ॥
ब्रह्मासनं शङ्करकार्मुकं च ददर्श नाभिं च वसुन्धरायाः ॥ ६१ ॥
[विघ्नेश्वरं तत्र सनन्दिकेशं स्कन्दं वृतं देवगणैर्ददर्श ॥
उमां सुदुर्गामथ कन्यकाभिर्विलासयन्तीं ददृशेऽग्र्यवीर्यः] ॥ ६२ ॥

संप्रणुन्नाः । दूरं प्रेरिताः । क्षीणवेगाः क्रमेण क्षीणवेगाः सन्तः ॥५१॥ मेरुं कैलासपार्श्ववर्तिनं । अस्ति ह्यन्यो हिमवदन्तर्वर्ती मेरुः । यद्वा मेरुं मेरूपलक्षितदिशि स्थितं नगराजं हिमवन्तं । यद्वा मेरुमुद्दिश्य जगाम । उत्तरांदिशमुद्दिश्य जगामेत्यर्थः । यद्वा मेरुं मेरुसदृशं । प्रकर्षन् कम्पयन् ॥ ५२—५३ ॥ जनान्तान् जनपदान् ॥ ५४ ॥ पूर्वमुपर्युपरिसागरमित्युक्त्वा आदित्यपथं आकाशं ॥ ५५—५६ ॥ स्मरन् जाम्बवत इति जाम्बवद्वाक्यस्मरणं औषधिपर्वतमतीत्य वेगातिशयेनान्यत्र गमननिवृत्त्यर्थं । वातरंहसा । उपलक्षित इति शेषः ॥ ५७—५९ ॥ दृष्टानामाश्रमाणां नामान्यनुक्रामति—स ब्रह्मकोशमित्यादिना ॥ ब्रह्मणश्चतुर्मुखस्य कोशो गृहं । " कोशोऽस्त्री कुड्मलेऽर्थौघे गुह्यदेशेऽण्डशीर्षयोः । गृहे देहे पुस्तकोघपेट्यामसिपिधानके" इति रत्नमाला । रजतालयं कैलासं । शक्रस्य इन्द्रस्य । स्थानं आश्रमस्थानं । रुद्रशराः प्रमोक्ष्यन्ते लीलार्थं यस्मिन् तद्रुद्रशरप्रमोक्षं स्थानं । हयाननं हयग्रीवाराधनस्थानं । ब्रह्मशिरः रुद्रनिकृत्तब्रह्मशिरःप्रक्षेपस्थानं । वैवस्वतकिङ्करान् विवस्वत्संबन्धिकिङ्करान् । ग्रामण्यादीन् मासान्तपरिचारकान् विश्रमार्थमत्र स्थितान् ॥ ६० ॥ वज्रालयमिति । इन्द्राय ब्रह्मणा वज्रप्रदानस्थानं । सूर्यप्रभमिति वैश्रवणालयविशेषणं । सूर्यनिबन्धनं छायादेवीप्रीतये विश्वकर्मणा शाणारोपणाय सूर्यनिबन्धनस्थानं । ब्रह्मासनं देवगणसंदर्शनाय कृतं ब्रह्मणः सिंहासनं । ब्रह्मणामृषीणामासनं स्थानं वा । शङ्कर-

ति० रजतालयं हिरण्यगर्भापरमूर्तेरजतनाभेःस्थानं । ब्रह्मशिरः ब्रह्मास्त्रदेवता । तत्स्थानं ॥६०॥ ति० सूर्यनिबन्धनं सूर्याणांयत्रस्थानेनिबन्धनंसमावेशः तत्स्थानं । अतएवतत्सूर्यप्रभं । ब्रह्मालयं चतुर्मुखब्रह्मस्थानं ॥ ६१ ॥

[पा०] १ क. ङ. ञ. ट. न्पक्षिगणान्. २ ङ. ञ. मारुतिर्वातरंहसा. ३ क. ख. ग. ङ.—ट. नादयन्. ४ ङ. ञ. म. ट. मारुतिर्भीमविक्रमः. ५ ख. ङ. छ. ञ. ण. ट. हेमशृङ्गं. ६ घ. म. ब्रह्मलोकं. ७ ङ. ञ. ठ. वह्नयालयं. ८ ङ. ञ. ट. ब्रह्मालयं. ९ अयंश्लोकः क. ख. च. छ. पाठेषुदृश्यते.

कैलासमभ्यं हिमवच्छिलां च तथर्षभं काञ्चनशैलमभ्यम् ॥
संदीप्तसर्वौषधिसंप्रदीप्तं ददर्श सर्वौषधिपर्वतेन्द्रम् ॥ ६३ ॥
स तं समीक्ष्यानलरश्मिदीप्तं विसिष्मिये वासवदूतसूनुः ॥
आवृत्य तं चौषधिपर्वतेन्द्रं तत्रौषधीनां विचयं चकार ॥ ६४ ॥
स योजनसहस्राणि समतीत्य महाकपिः ॥ दिव्यौषधिधरं शैलं व्यचरन्मारुतात्मजः ॥ ६५ ॥
महौषध्यस्ततः सर्वास्तस्मिन्पर्वतसत्तमे ॥ विज्ञायार्थिनमायान्तं ततो जग्मुरदर्शनम् ॥ ६६ ॥
स ता महात्मा हनुमानपश्यंश्चुकोप कोपाच्च भृशं ननाद ॥
अमृष्यमाणोऽग्निनिकाशचक्षुर्महीधरेन्द्रं तमुवाच वाक्यम् ॥ ६७ ॥
किमेतदेवं सुविनिश्चितं ते यद्राघवे नासि कृतानुकम्पः ॥
पश्याद्य मद्बाहुबलाभिभूतो विकीर्णमात्मानमथो नगेन्द्र ॥ ६८ ॥
स तस्य शृङ्गं सनगं सनागं सकाञ्चनं धातुसहस्रजुष्टम् ॥
विकीर्णकूटज्वलिताग्रसानुं प्रगृह्य वेगात्सहसोन्ममाथ ॥ ६९ ॥
स तं समुत्पाट्य खमुत्पपात वित्रास्य लोकान्ससुरासुरेन्द्रान् ॥
संस्तूयमानः खचरैरनेकैर्जगाम वेगाद्गरुडोग्रवेगः ॥ ७० ॥
स भास्कराध्वानमनुप्रपन्नस्तं भास्कराभं शिखरं प्रगृह्य ॥
बभौ तदा भास्करसन्निकाशो रवेः समीपे प्रतिभास्कराभः ॥ ७१ ॥
स तेन शैलेन भृशं रराज शैलोपमो गन्धवहात्मजस्तु ॥
सहस्रधारेण सपावकेन चक्रेण खे विष्णुरिवार्पितेन ॥ ७२ ॥

कार्मुकं तत्स्थानमित्यर्थः । नाभिं पातालप्रवेशरन्ध्रं ॥ ६१—६२ ॥ ब्रह्मादिस्थानेषु रजतालयमिति परिगणितमपि जाम्बवदुपदिष्टप्रकारेण दर्शनाय पुनराह—कैलासमिति ॥ हिमवच्छिला नाम कैलासपार्श्वे कश्चिच्छिलाविशेषः । ऋषभं ऋषभाख्यमौषधिपर्वतं । काञ्चनशैलं पूर्वं मेरुमित्युक्तं । संदीप्तसर्वौषधिसंप्रदीप्तं संदीप्ताभिः रात्रौ ज्वलन्तीभिः सर्वाभिः ओषधीभिः तृणज्योतिर्भिः संप्रदीप्तं सम्यक्प्रकाशमानं । सर्वौषधिपर्वतेन्द्रं मृतसञ्जीवन्यादिसर्वौषधियुक्तपर्वतेन्द्रं । ददर्श ॥ ६३ ॥ वासवदूतः वायुः वासवादेशेन मेघप्रेरकत्वात् । अतएवाभिषेकसमये इन्द्रेण प्रेरितो हारं रामायोपाहरत् । विचयं अन्वेषणं ॥ ६४ ॥ अतीत्य अतीत्यापीत्यर्थः । अनेन श्रमरहितत्वमुक्तं ॥ ६५ ॥ ततः तस्य हनुमतः । अदर्शनं ॥ ६६ ॥ ताः ओषधीः ॥ ६७ ॥ राघवे कृतानुकम्पो नासीति यत् एतत् एवं सुविनिश्चितं यदि तर्हि आज्ञानमथो विकीर्णं पश्येति संबन्धः ॥ एतच्छ्लोकानन्तरमित्युक्त्वेत्यध्याहार्यं ॥ ६८ ॥ सनागं सगजं । उन्ममाथ उत्पाटयामास ॥ ६९—७० ॥ भास्काराध्वानं अन्तरिक्षं । भास्कराभशिखरग्रहणात् स्वयं भास्करसन्निकाशत्वाच्च सूर्यसमीपस्थः प्रतिसूर्य इव बभावित्यर्थः ॥ ७१ ॥ सहस्रधारेण । अर्पितेन

ति० हिमवच्छिलां भगवतोरुद्रस्यतपस्समाधिपीठं ॥ ६३ ॥ ति० वासवस्यमेघस्वरूपिणोदेवराजस्यदूतः प्रेरकः वायुरित्यर्थः ॥ स० वासवोदूतःप्रोक्तकारीयस्यसतस्य । सूनुः ॥६४॥ ति० योजनसहस्राणि सहस्रशब्दोऽनेकोपलक्षणं ॥ स० योजनसहस्राणि पञ्चाशत्सहस्रयोजनानि ॥ ६५ ॥ ति० रवेःसमीपइत्यनेन सूर्योदयोत्तरमेतदानयनमितिलभ्यते ॥ सं० रवेस्समीपेबभौ । अनेनसूर्योदयोत्तरंगमनानयनेइतिलभ्यते ॥ ७१ ॥ स० खे हृत्तात्मकेइन्द्रिये । अर्पितेन । खेआकाशेयथातथाबभावितिवा ॥७२॥

[पा०] १ क. विष्णुरिवोद्धतेन.

तं वानराः प्रेक्ष्य विनेदुरुच्चैः स तानपि प्रेक्ष्य मुदा ननाद ॥
तेषां समुद्धुष्टरवं निशम्य लङ्कालया भीमतरं विनेदुः ॥ ७३ ॥
ततो महात्मा निपपात तस्मिञ्शैलोत्तमे वानरसैन्यमध्ये ॥
हर्युत्तमेभ्यः शिरसाऽभिवाद्य विभीषणं तत्र स सस्वजे च ॥ ७४ ॥
तावप्युभौ मानुषराजपुत्रौ तं गन्धमाघ्राय महौषधीनाम् ॥
बभूवतुस्तत्र तदा विशल्यावुत्तस्थुरन्ये च हरिप्रवीराः ॥ ७५ ॥
सर्वे विशल्या विरुजः क्षणेन हरिप्रवीरा निहताश्च ये स्युः ॥
गन्धेन तासां प्रवरौषधीनां सुप्ता निशान्तेष्विव संप्रबुद्धाः ॥ ७६ ॥
यदाप्रभृति लङ्कायां युध्यन्ते कपिराक्षसाः ॥ तदाप्रभृति मानार्थमाज्ञया रावणस्य च ॥ ७७ ॥
ये हन्यन्ते रणे तत्र राक्षसाः कपिकुञ्जरैः ॥ हताहतास्तु क्षिप्यन्ते सर्व एव तु सागरे ॥ ७८ ॥
ततो हरिर्गन्धवहात्मजस्तु तमोषधीशैलमुदग्रवीर्यः ॥
निनाय वेगाद्धिमवन्तमेव पुनश्च रामेण समाजगाम ॥ ७९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुःसप्ततितमः सर्गः ॥ ७४ ॥

हस्तार्पितेन । सपावकेन अग्निज्वालावता । चक्रेण विष्णुरिव रराज ॥ ७२ ॥ तं वानरा इत्यनेन दूरादेव गन्धाघ्राणेन सर्वे जीविता इति गम्यते ॥ ७३ ॥ शैलोत्तमे त्रिकूटशिखरे ॥ ७४—७५ ॥ विशल्यकरण्या विशल्याः । सन्धानकरण्या विरुजः । ये पूर्वं निहतास्तेपि सुप्ता निशान्तेष्विव संप्रबुद्धाः । अनेन सावर्ण्यसिद्धिरप्युक्ता ॥ ७६ ॥ तर्हि निहता राक्षसाः किं न प्रबुद्धा इत्यत्राह—यदाप्रभृतीति ॥ मानार्थं हतानां राक्षसानां इयत्तया अपरिज्ञानार्थं । मृतशरीरसंख्याप्रतिपत्त्यर्थंवा । पूर्वयोजनायामर्थशब्दो निवृत्तिपरः । "अर्थोभिधेयरैवस्तुप्रयोजननिवृत्तिषु" इत्यमरः । परैः परिच्छिद्य ज्ञानं मा भूदित्येवमर्थमिति भावः । हताहताः मुमूर्षावस्थाः । किं पुनर्मृता इति भावः । "क्तेन नञ्विशिष्टेनानञ्" इति कर्मधारयः । यद्वा यदा यदा ये ये हताः तदा तदा ते ते क्षिप्ता इत्यर्थः ॥ ७७—७९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुःसप्ततितमःसर्गः ॥ ७४ ॥

स० विनेदुः । अनेन वातमात्रस्पर्शेनगात्रस्मृतिररोगताचकपीनांजातेइतिध्वन्यते । तेषां सच तेच ते । तेषां हनुमद्वानराणां ॥ ७३ ॥ ति० मानार्थं अर्थशब्दोनिवृत्तिवाची । शत्रूणांहतराक्षसेयत्ताज्ञानाभावार्थमित्यर्थः । तत्परिज्ञानेत्ववशिष्टबलस्याल्पीयस्त्वं ज्ञात्वावानरालङ्कांप्रविशेयुः । तेमाप्रवेक्ष्यन्निल्येतदर्थोऽयंरावणस्येश्वरेच्छयाविचारः ॥ ७७ ॥ स० सागरोपरिगिरिशिखरंपरिगृह्योत्प्लवनेतदन्तस्थानांरक्षसामनुज्जीवनंचनगन्धस्यान्तःप्रवेशासामर्थ्यात् । किंनामयादोभीरक्षसांभक्षितत्वात् । निलयनमात्रेणहनुमत्कृतपर्वतोत्पाटनतःएतदनिष्टकार्यसाधनेऽयमुत्तरत्रकिंकुर्यादितिभीतेर्वा । "भीषास्माद्वातःपवते" इत्यादेःरामविरुद्धकार्यकरणभीतेरिवात्मजप्रीतेर्वावायुर्ननिनायनीरनायकमध्येगन्धमितिवेतिज्ञेयम् । ओषधीनामर्थिनंज्ञात्वाऽदर्शनंगताइत्यनेनज्ञानिलोक्तेरनुसंधानादिकंसंभवतीतिसुघटोऽयमर्थः ॥ ७८ ॥ ति० ओषधीशैलमितिदीर्घआर्षः ॥ आश्विनकृष्णाष्टम्यामिदं ॥ स० ओषधीशैलः तद्वत्पर्वतः । तं । तत्रत्यएववेगात् हिमवन्तंस्वस्थानं । तं उत्कृत्तशैलभागं । निनाय प्रापयामास । "संस्थितएवतत्र" इत्यन्यत्रोक्तेः । पुनः प्रक्षेपानन्तरं रामेणसमाजगामसंगतोभूत् । प्रथमेन्द्रजिद्युद्धएवादृष्टतदृष्ट्यै 'इदमंभोगृहीत्वातु' इत्यारभ्य 'चकारनेत्रयोःशौचं' इतिगर्भीकृत्य "क्षणेनातीन्द्रियाण्येषांचक्षूंषि" इत्यनेन वनपर्वोक्ता 'अनेनदृष्टोऽहमितिस्मदुष्टः' इत्यन्यत्रारीत्यन्तरेणोक्ताचकथाऽनुक्तिर्नदोषायेतिनीतेरविरुद्धेतिचसंप्राह्येतिज्ञेयं । ओषधीतिदीर्घार्षंतालेखनंनिर्बीजं । अत्रैवबहुस्थलेषु ओषध्यइतिपूर्वमुक्तेः । लेखनंयदिकर्तव्यंतर्हितत्रैवकर्तव्यं । ईकारान्तत्वेनसमाधानंतत्रेवात्रापिसममितिनखरसम् ॥ ७९ ॥ इतिचतुस्सप्ततितमःसर्गः ॥ ७४ ॥

पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

सुग्रीवनियोगेन वानरैरात्रौलङ्कादहनम् ॥ १ ॥ ततोरावणाज्ञयाकुंभकर्णात्मजाभ्यांकुंभनिकुंभाभ्यां यूपाक्षादिभिः सेनयाचसह वानरान्प्रतिरणायनिर्याणम् ॥ २ ॥ वानरराक्षससैन्ययोर्महायुद्धम् ॥ ३ ॥

ततोऽब्रवीन्महातेजाः सुग्रीवो वानराधिपः ॥ अर्थ्यं विज्ञापयंश्चापि हनुमन्तमिदं वचः ॥ १ ॥
यतो हतः कुम्भकर्णः कुमाराश्च निषूदिताः ॥ नेदानीमुपनिर्हारं रावणो दातुमर्हति ॥ २ ॥
ये ये महाबलाः सन्ति लघवश्च प्लवङ्गमाः ॥ लङ्कामभ्युत्पतन्त्वाशु गृह्योल्काः प्लवगर्षभाः ॥
[हरयो हरिसंकाशाः प्रदग्धुं रावणालयम् ॥ ३ ॥]
ततोस्तंगत आदित्ये रौद्रे तस्मिन्निशामुखे ॥ लङ्कामभिमुखाः सोल्का जग्मुस्ते प्लवगर्षभाः ॥ ४ ॥
उल्काहस्तैर्हरिगणैः सर्वतः समभिद्रुताः ॥ आरक्षस्था विरूपाक्षाः सहसा विप्रदुद्रुवुः ॥ ५ ॥
गोपुराट्टप्रतोलीषु चर्यासु विविधासु च ॥
प्रासादेषु च संहृष्टाः ससृजुस्ते हुताशनम् ॥ तेषां गृहसहस्राणि ददाह हुतभुक्तदा ॥ ६ ॥
प्रासादाः पर्वताकाराः पतन्ति धरणीतले ॥ अगरुर्दह्यते तत्र वरं च हरिचन्दनम् ॥ ७ ॥
मौक्तिका मणयः स्निग्धा वज्रं चापि प्रवालकम् ॥
क्षौमं च दह्यते तत्र कौशेयं चापि शोभनम् ॥ ८ ॥

एवं हनुमदानीतौषधिपर्वतगन्धमात्रेण समागतप्राणेषु सर्वेषु विशल्येषु समुत्थितेषु सुग्रीवः स्वातिसन्धानजनितकोपातिरेकेण सद्यो निःशेषं लङ्कानिर्दहनं हनुमते नियमयति—तत इत्यादि ॥ अर्थ्यं अर्थादनपेतं । प्रयोजननियतं वाक्यं विज्ञापयन् । रामायेति शेषः । ततो हनुमन्तमब्रवीदिति योजना । यद्वा अर्थ्यं विज्ञापयन् विशेषेण ज्ञापयन् ॥ १ ॥ इदानींलङ्कादाहोपदेशे निमित्तमाह—यत इति ॥ उपनिर्हारं उपनिष्क्रमणं । युद्धाय निर्गमनमिति यावत् । हतपुत्रादित्वेनानुत्साहाद्रावणो न निर्गमिष्यतीति भावः । अत्र आग्रहेण प्रेतनिर्यापनरूढनिर्हारपदप्रयोगः । दातुं कर्तुमिति यावत् । धातूनामनेकार्थत्वात् । उपनिर्हारशब्दः उपनिष्क्रम्य युद्धपरो वा ॥ २ ॥ लघवः वेगवन्तः । उत्पतन्तु प्राकारमुत्प्लुत्य गच्छन्तु ॥ ३ ॥ ततइति । ननु पूर्वमुल्काहस्तौ तदा रात्रावित्युक्तं । अत्र आदित्यास्तमयसमय इति गम्यते अतो विरुद्धमिति चेन्नविरोधः । आदित्येस्तं गत इति प्रकाशाभावोक्तिः । निशामुख इति रात्रेः प्रथमयाम उच्यते । रौद्र इति विशेषणात् यामान्तत्वेन गाढान्धकारत्वमुच्यते । हनुमांश्च महाद्भुतवेगशालितया मुहूर्तमात्रेण प्रस्थायौषधिपर्वतमानीय तं पुनस्तत्र निक्षिप्यागतवानिति तस्य वेगातिशयश्च प्रतिपादितो भवति ॥ ४ ॥ आरक्षस्थाः गुल्मस्थाः नगररक्षिणो वा । आरक्षो दुर्गरक्षिणां स्थानं । तत्रस्था वा । " त्रिष्वारक्षस्तु रक्षणे " इति रत्नमाला । विरूपाक्षाः राक्षसाः ॥ ५ ॥ गोपुरं पुरद्वारं । अट्टन्ति हिंसन्ति योधा एषु स्थित्वेत्यट्टाः प्राकाराग्रस्थितगृहाणि । " स्यादट्टः क्षौममस्त्रियां " इत्यमरः । प्रतोल्यः वीथ्यः । चर्याः अवान्तरवीथ्यः । ते वानराः । ससृजुः क्षिप्तवन्तः । तेषां वानराणां संबन्धी हुतभुगित्यन्वयः ॥ ६ ॥ दहनकार्यं प्रपञ्चयति—प्रासादा इत्यादि ॥ तत्र प्रासादेषु । दह्यते अदह्यत । व्यत्ययेन भूतार्थे लट् । वरं सुगन्धं ॥ ७ ॥ मौक्तिका इत्यादिचतुःश्लोक्येकान्वया ॥ सर्वत्र अदह्यतेत्यस्य

कतक० तस्मादिदानीं उपनिर्हारं पुररक्षां । दातुं संपादयितुं । नार्हति ॥ **ति०** उपनिर्हारं युद्धावहारं । अस्माकंदातुंनार्हतीत्यर्थः । अनेनान्यदायुद्धावहारोजातइतिज्ञायतेइत्यन्ये ॥ **शि०** किंच उपनिर्हारं मृतपुत्रायुद्देश्यकजलं । दातुंनार्हति अवकाशोनदातव्यइतितात्पर्यम् ॥ २ ॥ **ति०** ततोस्तमिति । पूर्वदिवसापररात्रिशेषेउल्काहस्ताभ्यांहनुमद्विभीषणाभ्यांजांबवदन्वेषणं । ततस्तन्नियोगतउषसिपर्वताहरणायगमनं । अथाहरणं । पुनश्चतत्प्रापणंपुनरागमनमितित्रिंशद्घटिकामध्येसर्वं । ततःपुनःप्रदोषे हनुमदादीनांलङ्कादाहगमनमितिकतकादयः ॥४॥ **स०** आरक्षं रक्षणीयंद्वारादि । तत्रतिष्ठन्तीत्यारक्षस्थाः । "आरक्षंरक्षणीयेस्यात्" इतिविश्वः ॥ ५ ॥ **ति०** अट्टः गृहोपरितनंगृहं ॥ ६ ॥

आविकं विविधं चौर्णं काञ्चनं भाण्डमायुधम् ॥ नानाविकृतसंस्थानं वाजिभाण्डपरिच्छदौ ॥ ९ ॥
गजग्रैवेयकक्ष्याश्च रथभाण्डाश्च संस्कृताः ॥ तनुत्राणि च योधानां हस्त्यश्वानां च वर्म च ॥ १० ॥
खड्गा धनूंषि ज्या बाणास्तोमराङ्कुशशक्तयः ॥ रोमजं वालजं चर्म व्याघ्रजं चाण्डजं बहु ॥ ११ ॥
मुक्तामणिविचित्रांश्च प्रासादांश्च समन्ततः ॥ विविधानस्त्रसंयोगानग्निर्दहति तत्र वै ॥ १२ ॥
नानाविधान्गृहच्छन्दान्ददाह हुतभुक्तदा ॥ आवासान्राक्षसानां च सर्वेषां गृहगर्धिनाम् ॥ १३ ॥
हेमचित्रतनुत्राणां स्रग्दामाम्बरधारिणाम् ॥ शीधुपानचलाक्षाणां मदविह्वलगामिनाम् ॥ १४ ॥
कान्तालम्बितवस्त्राणां शत्रुसंजातमन्युनाम् ॥ गदाशूलासिहस्तानां खादतां पिबतामपि ॥ १५ ॥
शयनेषु महार्हेषु प्रसुप्तानां प्रियैः सह ॥ त्रस्तानां गच्छतां तूर्णं पुत्रानादाय सर्वतः ॥ १६ ॥
तेषां शतसहस्राणि तदा लङ्कानिवासिनाम् ॥ अदहत्पावकस्तत्र जज्वाल च पुनः पुनः ॥ १७ ॥

यथायथं विपरिणामेनान्वयः । मणयः उपात्तमौक्तिकादिव्यतिरिक्ताः । क्षौमकौशेययोरुपादानभेदात् भेदः । ' वाल्कं क्षौमादि । कौशेयं कृमिकोशोत्थं ' इत्युभयत्राप्यमरः । शोभनं शोभमानं । आविकं अविरोमनिर्मितं कम्बलं । और्णं मेषादिरोमनिर्मितं कम्बलं " ऊर्णा मेषादिलोम्नि स्यात् " इत्यमरः । भाण्डं उपकरणं । आभरणादि वा । " भाण्डं तु भूषायां नादे पात्राश्वभूषयोः । मार्जने कलशादौ च वणिङ्मूलधनेपि च " इति रत्नमाला । नानाविकृतसंस्थानं नानाविधविकारवद्विचित्रसन्निवेशमिति भूषणादिसर्वविशेषणं । वाजिभाण्डपरिच्छदौ अश्वालंकारपल्ययनादिपरिवहौ । भाण्डशब्देनैवाश्वाभरणसिद्धावपि कर्णावतंसादिवत् साहित्यबोधनार्थं वाजिपदं । गजानां ग्रैवेयकानि कण्ठभूषणानि । कक्ष्याः इभबन्धिन्यः । "ग्रैवेयकं कण्ठभूषा" । "कक्ष्या प्रकोष्ठे हर्म्यादेः काक्ष्यां मध्येभबन्धने " इत्युभयत्राप्यमरः । संस्कृताः उत्तेजिताः । योधानां तनुत्राणि वर्माणि । हस्त्यश्वानां वर्म अयःकांस्यादिनिर्मितं । रोमजं अविमेषादिरोमभिन्नरोमनिर्मितं कम्बलादि । वालजं चामरादि । चर्मसंस्तरणं खेटकं वा । व्याघ्रजं वैयाघ्रं नखवालादि । अण्डजं कस्तूरिकादिद्रव्यं ॥ ८–११ ॥ प्रासादाः पर्वताकारा इत्यत्र केवलप्रासादाः । अत्र मुक्तादिखचिताः । अस्त्रसंयोगान् संयुज्यन्त इति संयोगाः सङ्घाताः तान् । तत्र लङ्कायां ॥ १२ ॥ गृहच्छन्दान् स्वस्तिकादिगृहविन्यासान् । गृहगर्धिनां गृहस्थानां ॥ १३ ॥ हठोपनतत्वेन खेदातिशयं व्यञ्जयितुं तेषां व्यासङ्गं दर्शयति—हेमेत्यादिना ॥ हेमचित्रतनुत्राणां हेममयाद्भुतवर्मणां । " आलेख्याश्चर्ययोश्चित्रं " इत्यमरः । वर्मग्रहणव्यासक्तानामित्यर्थः । स्रग्दामानि पुष्पमालाः । दामशब्दो हारपरः । स्रग्दामशब्देनानेकसरनिर्मितपुष्पमालोच्यत इत्याचार्याः । अत्र सर्वत्रापि व्यासङ्ग एव तात्पर्यं । शीधुपानचलाक्षाणां मद्यपानलोलदृष्टीनां । अतएव मदविह्वलगामिनां मदेन मन्दगामिनां । कान्तालम्बितवस्त्राणां आलम्बितवस्त्रकान्तानां । रतिपराणामिति यावत् । शत्रुषु संजातमन्युनां संजातक्रोधानां । दीर्घाभाव आर्षः । खादतां मांसादिकं भक्षयतां । पिबतां मद्यपानं कुर्वतां । शीधुपानेत्यत्र मद्यपानकार्यमुक्तं । क्षीरादिकं पिबतामिति वा । महार्हेष्विति विशेषणेन सुप्यतिशयहेतुरुक्तः । प्रियैः दारैरिति विशेष्यं । तेषां एवं व्यासक्तानां । शतसहस्राणीति संख्यासंख्येययोरभेदेन निर्देशः । अनेकशतसहस्रराक्षसानित्यर्थः । पुनः पुनरित्यनेन तदुधि-

स० "भाण्डशब्दोलङ्कारमात्रवाची रथभाण्डेत्युक्तेः । अतएववाजिभाण्डेत्यत्र वाजिग्रहणंचरितार्थं । अश्वालङ्कारवाचित्वेतुतद्वैयर्थ्यं स्पष्टमेव । तत्त्वेपिकर्णावतंसादिवत्साहित्यबोधनार्थतत्रसः । रथभाण्डेत्यत्रतुलाक्षणिकइत्यन्ये " इतिनागोजिभट्टव्याख्यायाभिन्नानुपूर्वीमत्याञ्चपिवस्तुतोर्थेनैकतावत्यास्तीर्थव्याख्यायाञ्चपि " भाण्डंभूषणमात्रेपि—नादेपात्रेतुरङ्गाणांभूषणे " इतिविश्वः खानवलोकननिमित्ततांस्पष्टमाचष्टइतिननआयासोपेक्षितः ॥ १० ॥ स० प्रियैः प्रियाश्चप्रियाणिचप्रियाणि कान्तापत्यानि तैः । " नपुंसकमनपुंसकेन " इत्येकशेषः । पुत्रानादायगच्छतां निरग्निकस्थलंप्रति ॥ १६ ॥ लङ्कानिवासिनांशतसहस्राणिगृहाण्यदहत्

[पा०] १ क.—ट. भाण्डपरिच्छदं. २ ख. घ. ङ. झ. ट. नस्त्रसंघातान्. ३ ङ. झ. ट. गृहांश्चित्रान्.

सारवन्ति महार्हाणि गम्भीरगुणवन्ति च ॥ हेमचन्द्रार्धचन्द्राणि चन्द्रशालोन्नतानि च ॥ १८ ॥
रत्नचित्रगवाक्षाणि साधिष्ठानानि सर्वशः ॥ मणिविद्रुमचित्राणि स्पृशन्तीव दिवाकरम् ॥ १९ ॥
क्रौञ्चबर्हिणवीणानां भूषणानां च निस्वनैः ॥ नादितान्यचलाभानि वेश्मान्यग्निर्ददाह सः ॥ २० ॥
ज्वलनेन परीतानि तोरणानि चकाशिरे ॥ विद्युद्भिरिव नद्धानि मेघजालानि घर्मगे ॥ २१ ॥
ज्वलनेन [1]परीतानि निपेतुर्भवनान्यथ ॥ [2]वज्रिवज्रहतानीव शिखराणि महागिरेः ॥ २२ ॥
विमानेषु प्रसुप्ताश्च दह्यमाना वराङ्गनाः ॥ त्यक्ताभरणसर्वाङ्गा हा हेत्युच्चैर्विचुक्रुशुः ॥ २३ ॥
तानि निर्दह्यमानानि दूरतः प्रचकाशिरे ॥ हिमवच्छिखराणीव दीप्तौषधिवनानि च ॥ २४ ॥
हर्म्याग्रैर्दह्यमानैश्च ज्वालाप्रज्वलितैरपि ॥ रात्रौ सा दृश्यते लङ्का पुष्पितैरिव किंशुकैः ॥ २५ ॥
हस्त्यध्यक्षैर्गजैर्मुक्तैर्मुक्तैश्च तुरगैरपि ॥ बभूव लङ्का लोकान्ते भ्रान्तग्राह इवार्णवः ॥ २६ ॥
अश्वं मुक्तं गजो दृष्ट्वा क्वचिद्भीतोपसर्पति ॥ भीतो भीतं गजं दृष्ट्वा क्वचिदश्वो निवर्तते ॥ २७ ॥
लङ्कायां दह्यमानायां शुशुभे स महार्णवः ॥ छायासंसक्तसलिलो लोहितोद इवार्णवः ॥ २८ ॥
सा बभूव मुहूर्तेन हरिभिर्दीपिता पुरी ॥ लोकस्यास्य क्षये घोरे प्रदीप्तेव वसुन्धरा ॥ २९ ॥
नारीजनस्य धूमेन व्याप्तस्योच्चैर्विनेदुषः ॥ स्वनो ज्वलनतप्तस्य शुश्रुवे दशयोजनम् ॥ ३० ॥
प्रदग्धकायानपरान्[3]राक्षसान्निर्गतान्बहिः ॥ सहसाऽभ्युत्पतन्ति स्म हरयोथ युयुत्सवः ॥ ३१ ॥
उद्जुष्टं वानराणां च राक्षसानां च निस्वनः ॥ दिशो दश समुद्रं च पृथिवीं चान्वनादयत् ॥ ३२ ॥

रवसाल्नेहेनाधिकज्वालोच्यते ॥ १४—१७ ॥ रावणस्य पुनर्धननाशं व्यञ्जयितुमुत्तमगृहदहनं दर्शयति—सारवन्तीत्यादिना ॥ सारवन्ति श्रेष्ठधनवन्ति । " सारो बले स्थिरांशेर्थे पुमान्न्याये वरे त्रिषु " इति रत्नमाला । गम्भीराणि महातल्पवन्ति । गुणवन्ति सौन्दर्यवन्ति । हेमचन्द्रार्धचन्द्राणि हेमकृतानि चन्द्राकाराण्यर्धचन्द्राकाराणि चेत्यर्थः । चन्द्रशालाभिः शिरोगृहैः उन्नतानि । " चन्द्रशाला शिरोगृहं " इत्यमरः । साधिष्ठानानि शय्यासनादिसहितानि । स्पृशन्तीव दिवाकरं । सूर्यपथपर्यन्तोन्नतानीत्यर्थः । क्रौञ्चादयो लीलार्थं गृहेषु संवर्धिताः ॥ १८–२० ॥ घर्मोस्माद्गच्छतीति घर्मगः वर्षाकाल इत्यर्थः । घर्मगे निदाघे गच्छतीति शेष इत्यप्याहुः । घर्मशब्देन घर्मान्तो लक्ष्यते । तं गच्छति प्राप्नोतीति घर्मगः वर्षादिरित्यपरे । वस्तुतो घर्मगे ग्रीष्म इत्यर्थः । लङ्कायां दह्यमानायां सन्तापे च समन्ततः प्रसरति दह्यमानतोरणादीनि निदाघप्ररूढसविद्युन्मेघतुल्यानीत्यर्थः ॥ २१ ॥ ज्वलनेन परीतानि निपेतुरित्यस्य वज्रिवज्रहतानीवेत्युत्तरार्धं ॥ २२ ॥ त्यक्ताभरणसर्वाङ्गाः सर्वाङ्गाभरणान्यपि त्यक्त्वेत्यर्थः ॥ २३ ॥ तानि पूर्वश्लोके प्रस्तुतापाधिकरणतयोपात्तानि विमानानि । दीप्तौषधिवनानि प्रकाशिततृणज्योतिर्वनानि ॥ २४ ॥ ज्वालाप्रज्वलितैः ज्वालाविशिष्टैरित्यर्थः ॥ २५ ॥ हस्त्यध्यक्षैः हस्तिपकैः । मुक्तैः निगलान्मोचितैः । मुक्तैश्च तुरगैरपीत्यत्राप्यश्वाध्यक्षैरित्यध्याहार्यं । लोकान्ते प्रलये ॥ २६—२७ ॥ छायासंसक्तसलिलः प्रतिबिम्बसंक्रान्तजलः । लोहितोदकः । उदादेश आर्षः ॥ २८—२९ ॥ नारीति । नारीजनस्यातिसाहसिकत्वादशयोजनस्वनश्रवणं ॥ ३०—३१ ॥ उद्जुष्टं उद्घोषः । भावे क्तः ॥ ३२ ॥

॥ १७ ॥ स० गंभीरगुणवन्ति । गंभीरेतिभावप्रधाननिर्देशः । गांभीर्यमेवगुणस्तद्वन्ति ॥ १८ ॥ स० दिवाकरंस्पृशन्तीव अत्युच्चानीतियावत् । एतेनरात्रावपिदग्धसज्वालोपरिभागोगभस्तिमानिव । तदधःप्रदेशस्तत्स्पर्शीवेतिस्पृशन्तीत्युक्तिरितिवा ॥ १९ ॥ ति० विमानं सप्तभूमिप्रासादः ॥ २३ ॥ स० लोहितोदः लोहितंरक्तवर्णं उदंयस्यसः । उदकशब्दपर्यायोऽयमुदशब्दः । तेनासंज्ञात्वात्कथमुदादेशइतिशङ्कानवकाशः ॥ २८ ॥

[पा०] १ ङ. छ. झ. ञ. ट. परीतानिगृहाणिप्रचकाशिरे. २ ङ. छ. झ. ञ. दावाग्निदीप्तानियथाशिखराणि. ३ ख. प्रतप्तकायान्. छ. ज. विदग्धकायान्.

विशल्यौ तु महात्मानौ तावुभौ रामलक्ष्मणौ ॥ असंभ्रान्तौ जगृहतुस्तदोभे धनुषी वरे ॥ ३३ ॥
ततो विष्फारयानस्य रामस्य धनुरुत्तमम् ॥ बभूव तुमुलः शब्दो राक्षसानां भयावहः ॥ ३४ ॥
अशोभत तदा रामो धनुर्विष्फारयन्महत् ॥ भगवानिव संक्रुद्धो भवो वेदमयं धनुः ॥ ३५ ॥
उद्धुष्टं वानराणां च राक्षसानां च निस्स्वनम्॥ ज्याशब्दस्तावुभौ शब्दावति रामस्य शुश्रुवे ॥३६॥
वानरोद्धुष्टघोषश्च राक्षसानां च निस्स्वनः ॥ ज्याशब्दश्चापि रामस्य त्रयं व्याप दिशो दश ॥ ३७॥
तस्य कार्मुकमुक्तैश्च शरैस्तत्पुरगोपुरम् ॥ कैलासशृङ्गप्रतिमं विकीर्णमपतद्भुवि ॥ ३८ ॥
ततो रामशरान्दृष्ट्वा विमानेषु गृहेषु च ॥ सन्नाहो राक्षसेन्द्राणां तुमुलः समपद्यत ॥ ३९ ॥
तेषां सन्नह्यमानानां सिंहनादं च कुर्वताम् ॥ शर्वरी राक्षसेन्द्राणां रौद्रीव समपद्यत ॥ ४० ॥
आदिष्टा वानरेन्द्रास्तु सुग्रीवेण महात्मना ॥ आसन्नद्वारमासाद्य युध्यध्वं प्लवगर्षभाः ॥ ४१ ॥
यश्च वो वितथं कुर्यात्तत्रतत्र ह्युपस्थितः ॥ स हन्तव्यो हि संप्लुत्य राजशासनदूषकः ॥ ४२ ॥
तेषु वानरमुख्येषु दीप्तोल्कोज्ज्वलपाणिषु ॥ स्थितेषु द्वारमासाद्य रावणं मन्युराविशत् ॥ ४३ ॥
तस्य जृम्भितविक्षेपाद्व्यामिश्रा वै दिशो दश ॥ रूपवानिव रुद्रस्य मन्युर्गात्रेष्वदृश्यत ॥ ४४ ॥
स निकुम्भं च कुम्भं च कुम्भकर्णात्मजावुभौ ॥ प्रेषयामास संक्रुद्धो राक्षसैर्बहुभिः सह ॥ ४५ ॥
यूपाक्षः शोणिताक्षश्च प्रजङ्घः कम्पनस्तथा ॥ निर्ययुः कौम्भकर्णिभ्यां सह रावणशासनात् ॥ ४६ ॥
शशास चैव तान्सर्वान्राक्षसान्सुमहाबलान् ॥ नादयन्गच्छताऽत्रैव जयध्वं शीघ्रमेव च ॥ ४७ ॥
ततस्तु चोदितास्तेन राक्षसा ज्वलितायुधाः ॥ लङ्कायां निर्ययुर्वीराः प्रणदन्तः पुनः पुनः ॥ ४८ ॥
रक्षसां भूषणस्थाभिर्भाभिः स्वाभिश्च सर्वशः ॥ चक्रुस्ते सप्रभं व्योम हरयश्चाग्निभिः सह ॥ ४९ ॥

विशल्यौ निर्गलितशरीरनिमग्नशरफलकौ । तदोभे धनुषी वरे इति पाठः ॥ ३३ ॥ विष्फारयानस्य ध्वनयतः । " विष्फारो धनुषः स्वानः " इत्यमरः । " स्फुरतिस्फुलत्योर्निर्निविभ्यः " इति षत्वं । मुगभाव आर्षः ॥ ३४ ॥ वेदमयं धनुः वेदोक्तलक्षणं धनुः । " कृत्तिवासाः पिनाकी " इति श्रुत्या प्रतिपादितमहिमेति वाऽर्थः ॥ ३५ ॥ रामस्य ज्याशब्दः वानराणामुद्धुष्टं राक्षसानां निस्स्वनं च तावुभावतीत्य शुश्रुवे ॥ ३६ ॥ वानरोद्धुष्टघोषः वानरोत्पादितघोषः ॥ ३७—३८ ॥ तुमुलः अधिकः ॥ ३९ ॥ सन्नह्यमानानां कक्ष्याबन्धनादियुद्धसन्नाहं कुर्वतां । रौद्री प्रलयरात्रिः ॥ ४० ॥ आदिष्टा इत्यादिश्लोकद्वयमेकान्वयं ॥ अन्ते इतिकरणं बोध्यं । व इति निर्धारणे षष्ठी । वितथं कुर्यात् । मच्छासनमितिशेषः । आसन्नद्वारं रावणान्तःपुरासन्नमध्यकक्ष्याद्वारं । तत्रतत्र युद्धभूमौ उपस्थितः ॥ ४१—४३ ॥ जृम्भितविक्षेपात् गात्रविनामविस्तारात् । व्यामिश्राः व्याकुलाः । अभवन्निति शेषः । दिशः दिक्स्थिताः । रुद्रस्य कालाग्निरुद्रस्य गात्रे योरूपवान् मन्युः स इव रावणोऽलक्ष्यत ॥ ४४—४६ ॥ अत्रैव अस्मिन्गृह एवारभ्य । सिंहनादं नादयन् नादयन्तः कुर्वन्तः । गच्छत । नादयन्नित्यत्र " व्यत्ययो बहुलं " इति बहुवचनविषये एकवचनं ॥ ४७ ॥ ज्वलितेति । आयुधानां ज्वलितत्वं युद्धयात्रासु शिक्षाविशेषप्रदर्शनात् । लङ्कायां इति पञ्चमी ॥ ४८ ॥ स्वाभिः स्वासाधारणीभिः । रक्षसां भूषणस्थाभिः भाभिश्च ।

स० वेदमयं वेदात्मकं तदभिमान्यभिमानिकं । भारतेकर्णपर्वान्तर्गतशल्यदुर्योधनसंवादे " संवत्सरोधनुस्तद्वै " " तस्यसंवत्सरोधनुः " इत्युक्तिस्त्वेकस्यानेकेऽभिमानिनोभवन्तीतिनविरुणद्धि ॥ ३५ ॥ स० वानरोद्धुष्टशब्दः वानरकृतशब्दजशब्दः । राक्षसानांचनिस्स्वनः रामस्यज्याशब्दश्चेत्येतत्त्रितयं दशदिशोव्याप व्यापत् । एतच्छब्दद्वयाधरीकरणंचद्वयोस्तस्यचसमव्यापनाभावेऽसंभावितं । सतितस्मिन्नौत्कट्यानौत्कट्येविदितेभवतइत्यतिक्रमणव्यापनेसंभवतइतिनपूर्वोत्तरविरोधः ॥ ३७ ॥

[पा०] १ ठ. वानरोद्धुष्टशब्दश्च. २ क. ख. ङ. ज.—ट. राक्षसागच्छतावैवसिंहनादंचनादयन्.

तत्र ताराधिपस्याभा ताराणां च तथैव च ॥ तयोराभरणस्था च बलयोर्द्यामभासयन् ॥ ५० ॥
चन्द्राभा भूषणाभा च गृहाणां ज्वलतां च भा ॥ हरिराक्षससैन्यानि भ्राजयामास सर्वतः ॥ ५१ ॥
तत्र चोर्ध्वं प्रदीप्तानां गृहाणां सागरः पुनः ॥ भाभिः संसक्तपातालश्चलोर्मिः शुशुभेऽधिकम् ॥५२॥
पताकाध्वजसंसक्तमुत्तमासिपरश्वधम् ॥ भीमाश्वरथमातङ्गं नानापत्तिसमाकुलम् ॥ ५३ ॥
दीप्तशूलगदाखड्गप्रासतोमरकार्मुकम् ॥ तद्राक्षसबलं घोरं भीमविक्रमपौरुषम् ॥ ५४ ॥
ददृशे ज्वलितप्रासं किङ्किणीशतनादितम् ॥ हेमजालाचितभुजं व्यामिश्रितपरश्वधम् ॥ ५५ ॥
व्याघूर्णितमहाशस्त्रं बाणसंसक्तकार्मुकम् ॥ गन्धमाल्यमधूत्सेकसंमोदितमहानिलम् ॥
घोरं शूरजनाकीर्णं महाम्बुधरनिस्स्वनम् ॥ ५६ ॥
तदृष्ट्वा बलमायान्तं राक्षसानां सुदारुणम् ॥ संचचाल प्लवङ्गानां बलमुच्चैर्ननाद च ॥ ५७ ॥
जवेनाप्लुत्य च पुनस्तद्बलं रक्षसां महत् ॥ अभ्ययात्प्रत्यरिबलं पतङ्गा इव पावकम् ॥ ५८ ॥
तेषां भुजपरामर्शव्यामृष्टपरिघाशनि ॥ राक्षसानां बलं श्रेष्ठं भूयस्तरमशोभत ॥ ५९ ॥
तत्रोन्मत्ता इवोत्पेतुर्हरयोथ युयुत्सवः ॥ तरुशैलैरभिघ्नन्तो मुष्टिभिश्च निशाचरान् ॥ ६० ॥
तथैवापततां तेषां कपीनामसिभिः शितैः ॥ शिरांसि सहसा जह्रू राक्षसा भीमदर्शनाः ॥ ६१ ॥
दशनैर्हृतकर्णाश्च मुष्टिनिष्कीर्णमस्तकाः ॥ शिलाप्रहारभग्नाङ्गा विचेरुस्तत्र राक्षसाः ॥ ६२ ॥
तथैवाप्यपरे तेषां कपीनामभिलक्षिताः ॥ प्रवीरानभितो जघ्नू राक्षसानां तरस्विनाम् ॥ ६३ ॥
[अभिपेतुर्महाकायाः प्रतियुक्ता महाबलाः ॥ राक्षसा वानरान्रोषादसिबाणगदाधराः ॥ ६४ ॥

व्योम सेनामध्याकाशं ॥ ४९ ॥ तदानीं चन्द्रोदयात्पुनः प्रकाशातिशयमाह—तत्रेति ॥ तत्र तदानीं । ताराधिपस्याभा ताराणां चाभा तयोर्बलयोराभरणस्था भा च द्यां आकाशं । अभासयन् ॥ ५० ॥ दह्यमानलङ्कागृहप्रकाशैः पुनरपि स प्रकाशोवर्धतेत्याह—चन्द्रेति ॥ ५१ ॥ संसक्तपातालः पातालपर्यन्तं संसक्तः ॥ ५२ ॥ पताकेत्यादिसार्धचतुःश्लोक्येकान्वया ॥ चलत्पटा पताका । मत्स्यादिचिह्नितं ध्वजं । उत्तमासिपरश्वधं । परश्वधोसिरूपः कुठाररूपश्चास्ति । तत्रासिरूपपरश्वधोसिपरश्वधः । तेन वक्ष्यमाणयोः खड्गपरश्वधयोर्नपौनरुक्त्यं । ज्वलितप्रासमित्यत्र प्रासशब्दः क्षेप्नव्ये ह्रस्वकुन्ते वर्तते । तेन तस्यापि न पौनरुक्त्यं । पत्तयः पदातयः । तेषां नानात्वं वेषायुधादिभेदात् । प्रासस्य ज्वलितत्वं युद्धागमनसमये शिक्षाविशेषप्रदर्शकक्रियासंबन्धात् । किङ्किणीशतनादितं रथगजादिकिङ्किणीशतनादितं । हेमजालाचितभुजं हेमाभरणजालाबद्धभुजं । व्यावेष्टितपरश्वधं मदेन चालितपरश्वधं । शस्त्रं उक्तव्यतिरिक्तायुधं । बाणसंसक्तकार्मुकमिति । दीप्तशूलगदाखड्गप्रासतोमरकार्मुकमित्यत्र यत्पूर्वोक्तं कार्मुकं तद्भङ्गे पुनरादातुं पृष्ठे बद्धमपरमिदं कार्मुकमिति ज्ञेयम् । गन्धेति । गन्धः चन्दनादिः गन्धमाल्याभ्यां मधूत्सेकेन वीरपाणरूपमधुसेवनेन च संमोदितमहानिलं वासितमहावातं ॥ ५३—५६ ॥ आयान्तमिति पुंल्लिङ्गमार्षं । संचचाल अभिमुखं जगाम ॥ ५७—५८ ॥ तेषामिति ॥ भुजपरामर्शव्यामृष्टपरिघाशनि सन्ततभुजस्पर्शेन उत्तेजितपरिघवज्रं ॥ ५९–६२ ॥ कपीनां अभिलक्षिताः प्रसिद्धाः । कपिप्रवरा इत्यर्थः ॥ ६३–६४ ॥ कपीनां

स० ग्रहाणां नवानां । " उक्तश्लोकस्यैवव्याख्यानंचन्द्राभेत्यादि " इति नागोजिभट्टव्याख्यानं पूर्वश्लोकेतारधिपतारातद्बलद्वयभाकर्तृकाकाशकर्मकभासनोक्तेः अत्रचन्द्रभूषणग्रहभाकर्तृकहरिराक्षससैन्यकर्मकभासनोक्तेरसंगतम् ॥ ५१ ॥ इतिपञ्चसप्ततितमः सर्गः ॥ ७५ ॥

[पा०] १ झ. ञ. ट. ग्रहाणां. २ घ. तत्रचन्द्रप्रदीप्तानां. ज. त्रिकूटोर्ध्वंप्रदीप्तानां. ङ. झ. ञ. ट. तत्रचार्धप्रदीप्तानां. ३ ङ. झ. ट. संसक्तसलिलः. ४ क. ख. ङ. छ. झ. ञ. ट. भूयःपरमशोभत. ५ झ. ञ. ट. भीमविक्रमाः. ६ ख. ङ. छ. झ. ञ. ट. मुष्टिभिर्भिन्नमस्तकाः. ७ अयंश्लोकः क. ख. पाठयोर्दृश्यते.

तथैवाप्यपरे तेषां कपीनामसिभिः शितैः ॥ हरिवीरान्निजघ्नुश्च घोररूपा निशाचराः ॥ ६५ ॥
घ्नन्तमन्यं जघानान्यः पातयन्तमपातयत् ॥ गर्हमाणं जगर्हेऽन्यो दशन्तमपरोऽदशत् ॥ ६६ ॥
देहीत्यन्यो ददात्यन्यो ददामीत्यपरः पुनः ॥ किं क्लेशयसि तिष्ठेति तत्रान्योन्यं बभाषिरे ॥ ६७ ॥
विप्रलम्बितवस्त्रं च विमुक्तकवचायुधम् ॥ समुद्यतमहाप्रासं यष्टिशूलासिसंकुलम् ॥
प्रावर्तत महारौद्रं युद्धं वानररक्षसाम् ॥ ६८ ॥
वानरान्दश सप्तेति राक्षसा जघ्नुराहवे ॥ राक्षसान्दश सप्तेति वानराश्चाभ्यपातयन् ॥ ६९ ॥
विस्रस्तकेशवसनं विध्वस्तकवचध्वजम् ॥ बलं राक्षसमालम्ब्य वानराः पर्यवारयन् ॥ ७० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

षट्सप्ततितमः सर्गः ॥ ७६ ॥

अङ्गदेन कंपनप्रजङ्घयोर्वधः ॥ १ ॥ मैन्दद्विविदाभ्यां यूपाक्षशोणिताक्षयोर्वधः ॥ २ ॥ सुग्रीवेणकुंभवधः ॥ ३ ॥

प्रवृत्ते संकुले तस्मिन्घोरे वीरजनक्षये ॥ अङ्गदः कम्पनं वीरमाससाद रणोत्सुकः ॥ १ ॥
आहूय सोऽङ्गदं कोपात्ताडयामास वेगितः ॥ गदया कम्पनः पूर्वं स चचाल भृशाहतः ॥ २ ॥
स संज्ञां प्राप्य तेजस्वी चिक्षेप शिखरं गिरेः ॥ अर्दितश्च प्रहारेण कम्पनः पतितो भुवि ॥ ३ ॥
ततस्तु कम्पनं दृष्ट्वा शोणिताक्षो हतं रणे ॥ रथेनाभ्यपतत्क्षिप्रं तत्राङ्गदमभीतवत् ॥ ४ ॥
सोऽङ्गदं निशितैर्बाणैस्तदा विव्याध वेगितः ॥ शरीरदारणैस्तीक्ष्णैः कालाग्निसमविग्रहैः ॥ ५ ॥
क्षुरक्षुरप्रैर्नाराचैर्वत्सदन्तैः शिलीमुखैः ॥ कर्णिशल्यविपाठैश्च बहुभिर्निशितैः शरैः ॥ ६ ॥
अङ्गदः प्रतिविद्धाङ्गो वालिपुत्रः प्रतापवान् ॥ धनुरग्र्यं रथं बाणान्ममर्द तरसा बली ॥ ७ ॥

मध्ये हरिवीरान् वीरहरीन् । निजघ्नुः ॥ ६५–६६ ॥ देहीति । अन्यो वीरः प्रहरणमत्र देहीति बभाषे । अन्यो ददातीति बभाषे । अपरः पुनः ददामीति बभाषे । आत्मानं आयासेन किं क्लेशयसि तिष्ठेत्यन्यो बभाषे । तत्रैवमन्योन्यं बभाषिरे ॥ ६७ ॥ विप्रलम्बितवस्त्रमित्यादि सर्वं क्रियाविशेषणं ॥ ६८ ॥ वानरान् दश सप्तेति । राक्षसाः दश सप्तेत्यनेन प्रकारेण वानरान् जघ्नुः । वानराश्च दश सप्तेत्यनेन प्रकारेण राक्षसानभ्यपातयन्निति संबन्धः ॥ ६९ ॥ आलम्ब्य वेगेन धावमानं प्रतिष्टभ्य । ततः परितोऽवारयन् ॥ ७० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

अथ कुम्भवधः षट्सप्ततितमे—प्रवृत्त इत्यादि ॥ संकुले निरन्तरे ॥ १ ॥ आहूय स्पर्धयित्वा । "ह्वेञ् स्पर्धायां शब्दे च" इति धातोर्ल्यप् । वेगितः संजातवेगः । तारकादित्वादितच् । सः अङ्गदः ॥ २ ॥ चिक्षेप कम्पनोरसीति शेषः ॥ ३ ॥ कम्पनं हतमित्यन्वयः । तत्र कम्पनयुद्धस्थाने । अभीतवत् । अभीतमिति क्रियाविशेषणं ॥ ४ ॥ कालाग्निसमविग्रहैः कालाग्नितुल्याकारैरित्यर्थः ॥ ५ ॥ क्षुरेत्यादि । क्षुरः नापितशस्त्राकारमुखः । क्षुरप्रः अर्धचन्द्राकृतिः । नाराचः शल्यकः । वत्सदन्तैः वत्सदन्ताकारमुखैः । शिलीमुखैः कङ्कपत्राकारमुखैः । उभयपार्श्वकृतकर्णः कर्णी । अर्धनाराचः शल्यः । विपाठः करवीरपत्राग्र-

---

ति० अभीतवत् अभीताई ॥ ४ ॥

[पा०] १ झ. विप्रलंभितशस्त्रंच. २ क. घ. ङ. छ. झ. ञ. ट. मुष्टिशूलासिकुन्तलं. ३ झ. विप्रलंभितवस्त्रंच. ४ ख. ज. युद्धेतस्मिन्वीर. ५ ख. रथेनाभ्यद्रवत्. ६ क. ग.—ञ. धनुरुग्रं.

शोणिताक्षस्ततः क्षिप्रमसिचर्म समाददे ॥ उत्पपात दिवं[1] क्रुद्धो वेगवानविचारयन् ॥ ८ ॥
तं क्षिप्रतरमाप्लुत्य परामृश्याङ्गदो बली ॥ करेण तस्य तं खड्गं समाच्छिद्य ननाद च ॥ ९ ॥
तस्यांसफलके खड्गं निजघान ततोऽङ्गदः ॥ यज्ञोपवीतवच्चैनं चिच्छेद कपिकुञ्जरः ॥ १० ॥
तं प्रगृह्य महाखड्गं विनद्य च पुनः पुनः ॥ वालिपुत्रोऽभिदुद्राव रणशीर्षे[2]ऽपरानरीन् ॥ ११ ॥
आयसीं[3] तु गदां वीरः प्रगृह्य कनकाङ्गदः ॥ शोणिताक्षः समाविध्य तमेवानु पपात ह ॥ १२ ॥
प्रजङ्घसहितो वीरो यूपाक्षस्तु ततो बली ॥ रथेनाभियया[4]वौ क्रुद्धो वालिपुत्रं महाबलम् ॥ १३ ॥
[प्रजङ्घस्तु महावीरो यूपाक्षसहितो बली ॥ गदयाऽभिययौ क्रुद्धो वालिपुत्रं महाबलम्] ॥ १४ ॥
तयोर्मध्ये कपिश्रेष्ठः शोणिताक्षप्रजङ्घयोः ॥ विशाखयोर्मध्यगतः पूर्णचन्द्र इवाभवत् ॥ १५ ॥
अङ्गदं परिरक्षन्तौ मैन्दो द्विविद एव च ॥ तस्य तस्थतुरभ्याशे परस्परदिदृक्षया[7] ॥ १६ ॥
अभिपेतुर्महाकायाः प्रतियत्ता[8] महाबलाः ॥ राक्षसा वानरान्रोषादसिचर्मगदाधराः ॥ १७ ॥
त्रयाणां वानरेन्द्राणां त्रिभी राक्षसपुङ्गवैः ॥ संसक्तानां महद्युद्धमभवद्रोमहर्षणम् ॥ १८ ॥
ते तु वृक्षान्समादाय संप्रचिक्षिपुराहवे ॥ खड्गेन प्रतिचिच्छेद तान्प्रजङ्घो महाबलः ॥ १९ ॥
रथांनश्वान्द्रुमै[10]ः शैलैस्ते प्रचिक्षिपुराहवे ॥ शरौघैः प्रतिचिच्छेद तान्यूपाक्षो निशा[11]चरः ॥ २० ॥
सृष्टान्द्विविदमैन्दाभ्यां द्रुमानुत्पाट्य वीर्यवान् ॥ बभञ्ज गदया मध्ये शोणिताक्षः प्रतापवान् ॥ २१ ॥
उद्यम्य विपुलं खड्गं परमर्म[12]निकृन्तनम् ॥ प्रजङ्घो वालिपुत्राय अभिदुद्राव वेगितः ॥ २२ ॥
तमभ्याशगतं दृष्ट्वा वानरेन्द्रो महाबलः ॥ आजघानाश्वकर्णेन द्रुमेणातिबलस्तदा ॥ २३ ॥
बाहुं चास्य सनिस्त्रिंशमाजघान स मुष्टिना ॥ वालिपुत्रस्य घातेन स पपात क्षितावसिः ॥ २४ ॥
तं दृष्ट्वा पतितं भूमौ खड्ग[13]मुत्पलसन्निभम् ॥ मुष्टिं संवर्तयामास वज्रकल्पं महाबलः ॥ २५ ॥
ललाटे स महावीर्यमङ्गदं वानरर्षभम् ॥ आजघान महातेजाः स मुहूर्तं चचाल ह ॥ २६ ॥
स संज्ञां प्राप्य तेजस्वी वालिपुत्रः प्रतापवान् ॥ प्रजङ्घस्य शिरः काया[14]त्खड्गेनापातयत्क्षितौ ॥ २७ ॥
स यूपाक्षोश्रुपूर्णाक्षः पितृव्ये निहते रणे ॥ अवरुह्य रथात्क्षिप्रं क्षीणेषुः खड्गमाददे ॥ २८ ॥

सदृशः ॥ ६—७ ॥ असिश्चर्म चेत्यसिचर्म । एकवद्भावः । उत्पपात । रथादिति शेषः ॥ ८ ॥ परामृश्य प्रगृह्य ॥ ९ ॥ चिच्छेद । छिन्नस्तु न मृतः ॥ १० ॥ अपरान् प्रजङ्घादीन् ॥ ११ ॥ तमेव अङ्गदमेव ॥ १२—१४ ॥ तयोरिति । यूपाक्षस्य दूरस्थत्वादनुक्तिः ॥ १५ ॥ परिरक्षन्तौ । मातुलत्वादिति भावः । परस्परदिदृक्षया । स्वानुरूपप्रतिभटराक्षसजिज्ञासयेत्यर्थः ॥ १६ ॥ प्रतियत्ताः प्रतियत्नवन्तः । गुणाधानं प्रतियत्नः । आरोपितवीर्या इत्यर्थः ॥ १७—१९ ॥ रथानश्वान् । प्रतीति शेषः ॥ २० ॥ उत्पाट्य सृष्टानित्यन्वयः ॥ २१ ॥ वालिपुत्राय वालिपुत्रं हन्तुं । " क्रियार्थोपपदस्य च कर्मणि स्थानिनः " इति चतुर्थी ॥ २२ ॥ वानरेन्द्रः अङ्गदः ॥ २३ ॥ सनिस्त्रिंशं सखड्गं ॥ २४ ॥ उत्पलसन्निभं । नीलो-

[पा०] १ ङ. ञ. ट. तदाक्रुद्धो. क. ग. छ. ज. दिवंक्षिप्रं. घ. ततःक्षिप्रं. २ ञ. रणशीर्षे. ३ आयसींतुगदांवीरः, प्रजङ्घसहितोवीरो, इत्यनयोःश्लोकयोःपौर्वापर्ये ङ. च. छ. ञ. ञ. ट. पाठेषुदृश्यते. ४ क. घ. ङ. ज.—ट. समाश्वस्य. ५ अयंश्लोकः ञ. पाठेदृश्यते. ६ ङ. ज. ञ. ट. इवाबभौ. ७ क. ग. परस्परजिगीषया. ख. घ. परस्परजिघृक्षया. ८ क. घ. वानरेन्द्रांस्तानसि. ९ ग. ङ. च. ञ. ञ. ट. बाणगदाधराः. १० ङ. ञ. ट. रथान्सर्वान्द्रुमाञ्शैलांस्ते. ११ ख.—च. ञ. ट. महाबलः. १२ ख. घ. ङ. च. ञ. ञ. ट. मर्मविदारणं. क. ग. ज. मर्मविकर्तनं. १३ क.—ट. खड्गंमुसलसंनिभं. १४ ख. कोपाद्दारयामासवीर्यवान्. च. छ. ञ. कायाद्दारयामासवीर्यवान्. ग. घ. कायात्पातयामासवीर्यवान्. ङ. ञ. ट. कायात्पातयामासमुष्टिना. क. कायात्ताम्रश्मश्रुजहारह.

तमापतन्तं संप्रेक्ष्य यूपाक्षं द्विविदस्त्वरन् ॥ आजघानोरसि क्रुद्धो जग्राह[1] च बलाद्बली ॥ २९ ॥
गृहीतं भ्रातरं दृष्ट्वा शोणिताक्षो महाबलः ॥ आजघान गदाग्रेण वक्षसि द्विविदं ततः ॥ ३० ॥
स गदाभिहतस्तेन चचाल च महाबलः ॥ उद्यतां च पुनस्तस्य जहार द्विविदो गदाम् ॥
[तया च गदया क्षिप्रं तयोरुरसि ताडयत्][2] ॥ ३१ ॥
एतस्मिन्नन्तरे वीरो मैन्दो वानरयूथपः ॥ यूपाक्षं ताडयामास तलेनोरसि वीर्यवान् ॥ ३२ ॥
[एतस्मिन्नन्तरे मैन्दो द्विविदाभ्याशमागमत् ॥][3] तौ शोणिताक्षयूपाक्षौ प्लवङ्गाभ्यां तरस्विनौ ॥
चक्रतुः समरे तीव्रमाकर्षोत्पाटनं भृशम् ॥ ३३ ॥
द्विविदः शोणिताक्षं तु विददार नखैर्मुखे ॥ निष्पिपेष च वेगेन क्षितावाविध्य वीर्यवान् ॥ ३४ ॥
यूपाक्षमपि संक्रुद्धो मैन्दो वानरयूथपः ॥ पीडयामास बाहुभ्यां स पपात हतः क्षितौ ॥ ३५ ॥
हतप्रवीरा व्यथिता राक्षसेन्द्रचमूस्तदा ॥ जगामाभिमुखी सा तु कुम्भकर्णसुतो यतः ॥ ३६ ॥
आपतन्तीं[4] च वेगेन कुम्भस्तां सान्त्वयच्चमूम् ॥ ३७ ॥
अथोत्कृष्टं[5] महावीर्यैर्लब्धलक्षैः प्लवङ्गमैः ॥ निपातितमहावीरां दृष्ट्वा रक्षश्चमूं ततः ॥
कुम्भः प्रचक्रे तेजस्वी रणे कर्म सुदुष्करम् ॥ ३८ ॥
स धनुर्धन्विनां श्रेष्ठः प्रगृह्य सुसमाहितः ॥ मुमोचाशीविषप्रख्याञ्शरान्देहविदारणान् ॥ ३९ ॥
तस्य तच्छुशुभे भूयः सशरं धनुरुत्तमम् ॥ विद्युदैरावतार्चिष्मद्वितीयेन्द्रधनुर्यथा ॥ ४० ॥
आकर्णाकृष्टमुक्तेन जघान द्विविदं तदा ॥ तेन हाटकपुङ्खेन पत्त्रिणा पत्त्रवाससा ॥ ४१ ॥
सहसाऽभिहतस्तेन विप्रमुक्तपदः स्फुरन् ॥ निपपाताद्रिकूटाभो विह्वलः प्लवगोत्तमः ॥ ४२ ॥
मैन्दस्तु भ्रातरं दृष्ट्वा भग्नं तत्र महाहवे ॥ अभिदुद्राव वेगेन प्रगृह्य महतीं शिलाम् ॥ ४३ ॥
तां शिलां तु प्रचिक्षेप राक्षसाय महाबलः ॥ विभेद तां शिलां कुम्भः प्रसन्नैः पञ्चभिः शरैः ॥४४॥
सन्धाय चान्यं सुमुखं शरमाशीविषोपमम् ॥ आजघान महातेजा वक्षसि द्विविदाग्रजम् ॥ ४५ ॥
स तु तेन प्रहारेण मैन्दो वानरयूथपः ॥ मर्मण्यभिहतस्तेन पपात भुवि मूर्छितः ॥ ४६ ॥
अङ्गदो मातुलौ दृष्ट्वा पतितौ[6] तु महाबलौ ॥ अभिदुद्राव वेगेन कुम्भमुद्यतकार्मुकम् ॥ ४७ ॥

त्पलसमानकान्तिमित्यर्थः । महाबलः प्रजङ्घः ॥२५—३२ ॥ प्लवङ्गाभ्यां मैन्दद्विविदाभ्यां । आकर्षोत्पाटनं आकर्षणताडने । अन्योन्यमिति शेषः ॥ ३३—३६ ॥ आपतन्तीमित्यर्धं ॥ सान्त्वयत् असान्त्वयत् ॥ ३७ ॥ अथेत्यादिसार्धश्लोक एकान्वयः ॥ लब्धलक्षैः अप्रतिद्वन्द्विभिः ॥ ३८—३९ ॥ विद्युदैरावताभ्यां अर्चिष्मत् । ज्यास्थानीया विद्युत् । बाणस्थानीयमैरावतं । ऐरावतं नाम दीर्घेन्द्रधनुः । " इन्द्रायुधंशक्रधनुस्तद्दीर्घमृजुरोहितं । ऐरावतं च " इति वैजयन्ती । एवंभूतं द्वितीयमिन्द्रधनुरिव स्थितं । ऐरावतादिसंयोग उत्पातकाले भवति । अभूतोपमावा ॥ ४० ॥ हाटकं स्वर्णं । पत्त्रिणा बाणेन । पत्त्रवाससा वासःस्थानीयकङ्कपत्त्रेण ॥ ४१ ॥ विप्रमुक्तपदः शिथिलपदविन्यासः । स्फुरन् चलन् । विह्वलः

ती० उत्कृष्टंरक्षः कुंभः । महावीर्यैः तेजस्विभिः । लब्धलक्षैरप्रतिद्वन्द्वैः । प्लवङ्गमैर्निपातितमहावीरांचमूंदृष्ट्वा रणेदुष्करंकर्मचकइति संबन्धः ॥ ३८ ॥ ति० तस्य कुंभस्य । तत्सशरंधनुः विद्युदैरावतसंबन्धतोर्चिष्मत् भासमानं द्वितीयेन्द्रधनुर्यथा परमिन्द्रधनुरिव भूयःशुशुभे । विद्युच्छरस्थानीया । ऐरावतोऽभ्रमातङ्गः । तस्येन्द्रधनुषासंबन्धात् ॥ ४० ॥

[पा०] १ ग. जग्राहबलवान्बली. २ इदमर्धं क. ख. च. छ. पाठेषुदृश्यते. ३ अयंश्लोकः ङ. झ. ट. पाठेषुनदृश्यते. ४ इदमर्धं ङ. झ. ट. पाठेषुदृश्यते. ५ ख. विद्रुतान्राक्षसान्दृष्ट्वाकुंभः. ६ ग. ङ. झ. ट. मथितौतु. ख. छ. ञ. व्यथितौतुमहाहवे.

तमापतन्तं विव्याध कुम्भः पञ्चभिरायसैः ॥ त्रिभिश्चान्यैः शितैर्बाणैर्मातङ्गमिव तोमरैः ॥ ४८ ॥
सोऽङ्गदं विविधैर्बाणैः कुम्भो विव्याध वीर्यवान् ॥ अकुण्ठधारैर्निशितैस्तीक्ष्णैः कनकभूषणैः ॥ ४९ ॥
अङ्गदः प्रतिविद्धाङ्गो वालिपुत्रो न कम्पते ॥ शिलापादपवर्षाणि तस्य मूर्ध्नि ववर्ष ह ॥ ५० ॥
स प्रचिच्छेद तान्सर्वान्बिभेद च पुनः शिलाः ॥ कुम्भकर्णात्मजः श्रीमान्वालिपुत्रसमीरितान् ॥५१॥
आपतन्तं च संप्रेक्ष्य कुम्भो वानरयूथपम् ॥ भ्रुवोर्विव्याध बाणाभ्यामुल्काभ्यामिव कुञ्जरम् ॥
तस्य सुस्राव रुधिरं पिहिते चास्य लोचने ॥ ५२ ॥
अङ्गदः पाणिना नेत्रे पिधाय रुधिरोक्षिते ॥ सालमासन्नमेकेन परिजग्राह पाणिना ॥ ५३ ॥
संपीड्य चोरसि स्कन्धं करेणाभिनिवेश्य च ॥ किंचिदभ्यवनम्यैनमुन्ममाथ यथा गजः ॥ ५४ ॥
तमिन्द्रकेतुप्रतिमं वृक्षं मन्दरसन्निभम् ॥ समुत्सृजन्तं वेगेन पश्यतां सर्वरक्षसाम् ॥
स बिभेद शितैर्बाणैः सप्तभिः कायभेदनैः ॥ ५५ ॥
अङ्गदो विव्यथेऽभीक्ष्णं ससाद च मुमोह च ॥ ५६ ॥
अङ्गदं व्यथितं दृष्ट्वा सीदन्तमिव सागरे ॥ दुरासदं हरिश्रेष्ठं रामायान्ये न्यवेदयन् ॥ ५७ ॥
रामस्तु व्यथितं श्रुत्वा वालिपुत्रं रणाजिरे ॥ व्यादिदेश हरिश्रेष्ठाञ्जाम्बवत्प्रमुखांस्ततः ॥ ५८ ॥
ते तु वानरशार्दूलाः श्रुत्वा रामस्य शासनम् ॥ अभिपेतुः सुसंक्रुद्धाः कुम्भमुद्यतकार्मुकम् ॥ ५९ ॥
ततो द्रुमशिलाहस्ताः कोपसंरक्तलोचनाः ॥ रिरक्षिषन्तोऽभ्यपतन्नङ्गदं वानरर्षभाः ॥ ६० ॥
जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः ॥ कुम्भकर्णात्मजं वीरं क्रुद्धाः समभिदुद्रुवुः ॥ ६१ ॥
समीक्ष्यापततस्तांस्तु वानरेन्द्रान्महाबलान् ॥ आववार शरौघेण नगेनेव जलाशयम् ॥ ६२ ॥
तस्य बाणपथं प्राप्य न शेकुरतिवर्तितुम् ॥ वानरेन्द्रा महात्मानो वेलामिव महोदधिः ॥ ६३ ॥
तांस्तु दृष्ट्वा हरिगणाञ्शरवृष्टिभिरर्दितान् ॥ अङ्गदं पृष्ठतः कृत्वा भ्रातृजं प्लवगेश्वरः ॥ ६४ ॥
अभिदुद्राव वेगेन सुग्रीवः कुम्भमाहवे ॥ शैलसानुचरं नागं वेगवानिव केसरी ॥ ६५ ॥
उत्पाट्य च महाशैलानश्वकर्णान्धवान्बहून् ॥ अन्यांश्च विविधान्वृक्षांश्चिक्षेप च महाबलः ॥ ६६ ॥
तां छादयन्तीमाकाशं वृक्षवृष्टिं दुरासदाम् ॥ कुम्भकर्णात्मजः शीघ्रं चिच्छेद निशितैः शरैः ॥ ६७ ॥

विवशः सन् ॥ ४२–४७ ॥ तोमरैः अङ्कुशैः ॥४८॥ अकुण्ठधारैः अभग्नाग्रैः । निशितैः उत्कृष्टैः । तीक्ष्णैः अयोमयैः । " तीक्ष्णं गरे मृधे लोहे " इति रत्नमाला ॥ ४९ ॥ न कम्पते नाकम्पत ॥ ५० ॥ तान् वृक्षान् प्रचिच्छेद शिलाः विभेदेत्यन्वयः ॥ ५१—५३ ॥ संपीड्येति । एकहस्तस्य नेत्रपिधानव्यापृतत्वादेकहस्तेनोत्पाटनासम्भवादुरसि संपीड्येत्युक्तं । अभिनिवेश्य । अभिगृह्येत्यर्थः ॥ ५४—५९॥ रिरक्षिषन्तः रक्षितुमिच्छन्तः ॥ ६०—६१ ॥ जलाशयं जलप्रवाहं । नगेनेव वृक्षेणेव । वृक्षौघपरोर्यशब्दः ॥ ६२ ॥ अतिवर्तितुं अतिक्रम्याभिमुख्येन गन्तुं ॥ ६३ ॥ तांस्त्वित्यादिश्लोकद्वयमेकान्वयं ॥ अङ्गदं पृष्ठतः कृत्वा । अन्यथा हन्यादिति भावः । शैलसानुचरं शैलसानुचरत्वेनातिबलं । " गिरिचर इव नागः प्राणसारं बिभर्ति " इति कालिदासोक्तेः

ति० भ्रातृजं भ्रातृपुत्रं । प्लवगेश्वरः सुग्रीवः । एतदन्तमष्टमीरात्रौयुद्धं । अतःपरंनवमीदिनयुद्धं ॥ ६४ ॥

[पा०] १ ख. आकर्णमुक्तैर्निशितैः. क. च. छ. ज. ट. अकुण्ठधारैर्विशिखैस्तीक्ष्णैः. २ ङ. ञ. ट. मुन्ममाथमहारणे. ३ घ. विव्यथेतीक्ष्णंपपातस. ङ. ञ. ट. विव्यथेऽभीक्ष्णंसपपात. ४ ङ. ञ. ट. हरिश्रेष्ठाराघवाय. ५ ग. घ. छ. ज. दृष्ट्वा. ६ क. ख. ग. राक्षसेन्द्रोमहाबलान्. च. ज. राक्षसेन्द्रोमहाबलः. ७ क. वेलयेवजलाशयं. ८ क. ग. घ. बाणरयं. ९ ञ. शेकुरपिवीक्षितुं. १० ङ. ञ. अभिदुद्रावसुग्रीवः. कुंभकर्णात्मजंरणे. च. छ. ज. ट. अभिदुद्राववेगेनकुंभकर्णात्मजंरणे. ११ क. महावेगःसोश्वकर्णान्.

अभिलक्षेण तीव्रेण कुम्भेन निशितैः शरैः ॥ आचितास्ते द्रुमा रेजुर्यथा घोराः शतघ्नयः ॥ ६८ ॥
द्रुमवर्षं तु तच्छिन्नं दृष्ट्वा कुम्भेन वीर्यवान् ॥ वानराधिपतिः श्रीमान्महासत्त्वो न विव्यथे ॥ ६९ ॥
निर्भिद्यमानः सहसा सहमानश्च ताञ्शरान् ॥ कुम्भस्य धनुराक्षिप्य बभञ्जेन्द्रधनुष्प्रभम् ॥ ७० ॥
अवप्लुत्य ततः शीघ्रं कृत्वा कर्म सुदुष्करम् ॥ अब्रवीत्कुपितः कुम्भं भग्नशृङ्गमिव द्विपम् ॥ ७१ ॥
निकुम्भाग्रज वीर्यं ते बाणवेगवदद्भुतम् ॥ सन्नतिश्च प्रभावश्च तव वा रावणस्य वा ॥ ७२ ॥
प्रह्लादबलिवृत्रघ्नकुबेरवरुणोपम ॥ एकस्त्वमनुजातोसि पितरं बलवृत्ततः ॥ ७३ ॥
त्वामेवैकं महाबाहुं चापहस्तमरिंदमम् ॥ त्रिदशा नातिवर्तन्ते जितेन्द्रियमिवाधयः ॥ ७४ ॥
विक्रमस्व महाबुद्धे कर्माणि मम पश्यतः ॥ ७५ ॥
वरदानात्पितृव्यस्ते सहते देवदानवान् ॥ कुम्भकर्णस्तु वीर्येण सहते च सुरासुरान् ॥ ७६ ॥
धनुषीन्द्रजितस्तुल्यः प्रतापे रावणस्य च ॥ त्वमद्य रक्षसां लोके श्रेष्ठोसि बलवीर्यतः ॥ ७७ ॥
महाविमर्दं समरे मया सह तवाद्भुतम् ॥ अद्य भूतानि पश्यन्तु शक्रशम्बरयोरिव ॥ ७८ ॥
कृतमप्रतिमं कर्म दर्शितं चास्त्रकौशलम् ॥ पातिता हरिवीराश्च त्वया वै भीमविक्रमाः ॥ ७९ ॥
उपालम्भभयाच्चापि नासि वीर मया हतः ॥ कृतकर्मा परिश्रान्तो विश्रान्तः पश्य मे बलम् ॥८०॥
तेन सुग्रीववाक्येन सावमानेन मानितः ॥ अग्नेराज्याहुतस्येव तेजस्तस्याभ्यवर्धत ॥
ततः कुम्भस्तु सुग्रीवं बाहुभ्यां जगृहे तदा ॥ ८१ ॥
गजाविवाहितमदौ निश्वसन्तौ मुहुर्मुहुः ॥ अन्योन्यगात्रग्रथितौ कर्षन्तावितरेतरम् ॥
सधूमां मुखतो ज्वालां विसृजन्तौ परिश्रमात् ॥ ८२ ॥
तयोः पादाभिघाताच्च निमग्ना चाभवन्मही ॥ व्याधूर्णिततरङ्गश्च चुक्षुभे वरुणालयः ॥८३ ॥

॥ ६४—६७ ॥ अभिलक्षेण अभिगतलक्ष्येण । आचिताः सर्वतो नीरन्ध्रतया व्याप्ताः । शतघ्नयः शतघ्न्यः । शङ्कुचिता आयुधविशेषाः ॥ ६८—७१ ॥ निकुम्भाग्रजेति । वीर्यस्य बाणवेगवत्त्वं तद्धेतुत्वात् । सन्नतिः राक्षसेषु विनयः राक्षसप्रावण्यं वा । कम्पनप्रजङ्घयूपाक्षशोणिताक्षमारकाणामङ्गदमैन्दद्विविदानां निराकरणाद्राक्षसप्रावण्योक्तिः । तव वा रावणस्य वा । रावणतुल्या तव सन्नतिरित्यर्थः ॥ ७२ ॥ पितरमनुजातोसि पित्रा सदृशोसीत्यर्थः । बलवृत्ततः बलव्यापारेण ॥ ७३ ॥ नातिवर्तन्ते न धर्षयन्तीत्यर्थः ॥ ७४ ॥ विक्रमस्वेत्यर्धं ॥ कर्माणि युद्धकर्माणि प्रति । विक्रमस्व पराक्रमं कुरु । युद्धकर्मसिद्ध्यर्थं पराक्रमं कुर्वित्यर्थः ॥ ७५ ॥ पितृव्यः रावणः । वरदानात् देवदानवान् सहते । कुम्भकर्णस्तु वीर्येण शारीरबलेन । सुरासुरान् सहते । रोद्धुं शक्नोतीत्यर्थः । त्वं तु ताभ्यामुभाभ्यां तान् सहस इति भावः ॥ ७६—७७ ॥ महाविमर्दं महाप्रहारं ॥ ७८—७९ ॥ उपालम्भभयात् बहुभिः सह युद्धेन श्रान्तो हत इत्यपवादभयात् ॥ ८० ॥ सावमानेन मानितः । बहुमानेन व्याजेनावमानित इत्यर्थः । तस्य तथावमानितस्य कुम्भस्य ॥ ८१ ॥ गजावित्यादिसार्धश्लोक एकान्वयः ॥ आहितमदौ आहितमदचेष्टौ । अन्योन्यगात्रग्रथितौ अन्योन्यसंश्लिष्टगात्रौ । परिश्रमात् युद्धजनितश्रमात् । मुखतः सधूमां ज्वालां विसृ-

ति० संनतिः स्वजनप्रावण्यं ॥ ७२ ॥ स० पित्रपेक्षयाकीर्तिरधिकेतिवक्तुं पितामहपौत्रयोःप्रह्लादबल्योर्ग्रहणं । वैरिसंहारेवृत्रघ्नोपमा । धनिकत्वाप्रधृष्यत्वयोःकुबेरवरुणोपमतेतिज्ञेयम् ॥ ७३ ॥ स० उपालंभभयात् बहुभिर्युध्वाश्रान्तमेकलमवधीदश्रान्तइत्यपवादभयात् ॥ ८० ॥ स० सावमानेन अन्तरवमानगर्भेण बहिःस्तुतिरूपेणवाक्येनमानितः ॥ ८१ ॥

[पा०] १ ङ. च. छ. ञ. ट. अर्दितास्ते. २ ङ. ञ. सविध्यमानः. ३ ङ. च. छ. ञ. ञ. ट. बलवत्तरं. क. बलवीर्यतः. ४ क. ख. ग. ङ.—ट. शूलहस्तं. ५ क. ग. ञ. महायुद्धे. ६ ङ. ञ. ट. पश्यच. ७ ङ. संहत्यमया. ८ ख.—च. ञ. ञ. ट. लयैते. ९ ङ. छ. ञ. ञ. राज्यहुतस्येव. १० ञ. धर्षन्तावितरे.

ततः कुम्भं समुत्क्षिप्य सुग्रीवो लवणाम्भसि ॥ पातयामास वेगेन दर्शयन्नुदधेस्तलम् ॥ ८४ ॥
ततः कुम्भनिपातेन जलराशिः समुत्थितः ॥ विन्ध्यमन्दरसंकाशो विससर्प समन्ततः ॥ ८५ ॥
ततः कुम्भः समुत्पत्य सुग्रीवमभिपत्य च ॥ आजघानोरसि क्रुद्धो वज्रवेगेन मुष्टिना ॥ ८६ ॥
तस्य चर्म च पुस्फोट बहु सुस्राव शोणितम् ॥ स च मुष्टिर्महावेगः प्रतिजघ्नेऽस्थिमण्डले ॥ ८७ ॥
तदा वेगेन तत्रासीत्तेजः प्रज्वलितं मुहुः ॥ वज्रनिष्पेषसञ्जाता ज्वाला मेरौ यथा गिरौ ॥
[मुष्टिना तेन संजज्ञे ज्वाला विद्युदिवोत्थिता ॥ ८८ ॥
स तत्राभिहतस्तेन सुग्रीवो वानरर्षभः ॥ मुष्टिं संवर्तयामास वज्रकल्पं महाबलः ॥ ८९ ॥
अर्चिः सहस्रविकचं रविमण्डलसप्रभम् ॥ स मुष्टिं पातयामास कुम्भस्योरसि वीर्यवान् ॥ ९० ॥
स तु तेन प्रहारेण विह्वलो भृशताडितः ॥ निपपात तदा कुम्भो गतार्चिरिव पावकः ॥ ९१ ॥
मुष्टिनाऽभिहतस्तेन निपपाताशु राक्षसः ॥ लोहिताङ्ग इवाकाशाद्दीप्तरश्मिर्यदृच्छया ॥ ९२ ॥
कुम्भस्य पततो रूपं भग्नस्योरसि मुष्टिना ॥ बभौ रुद्राभिपन्नस्य यथा रूपं गवां पतेः ॥ ९३ ॥

तस्मिन्हते भीमपराक्रमेण प्लवङ्गमानामृषभेण युद्धे ॥
मही सशैला सवना चचाल भयं च रक्षांस्यधिकं विवेश ॥ ९४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

सप्तसप्ततितमः सर्गः ॥ ७७ ॥

हनुमता निकुंभहननम् ॥ १ ॥

निकुम्भो भ्रातरं दृष्ट्वा सुग्रीवेण निपातितम् ॥ प्रदहन्निव कोपेन वानरेन्द्रमवैक्षत ॥ १ ॥
ततः स्रग्दामसन्नद्धं दत्तपञ्चाङ्गुलं शुभम् ॥ आददे परिघं वीरो नगेन्द्रशिखरोपमम् ॥ २ ॥

जन्तौ । बभूवतुरिति शेषः ॥ ८२—८३ ॥ दर्शयन्नुदधेस्तलं । कुम्भो यथा उदधितलं पश्येत्तथा वेगेन पातयामासेत्यर्थः ॥ ८४ ॥ विससर्प अभ्यवर्धत ॥ ८५—८६ ॥ पुस्फोट विभिन्नं । सः मुष्टिः । सुग्रीवस्यास्थिमण्डले । प्रतिजघ्ने प्रतिहतः । मोघो बभूवेत्यर्थः । स च मुष्टिर्महावेग इति पाठः ॥ ८७ ॥ वेगेन कुम्भवेगेन । तत्र सुग्रीववक्षसि । तेजः संघट्टजं । प्रज्वलितमासीत् । वज्रनिष्पेषसञ्जाता इन्द्रेण पक्षच्छेदकाले वज्रसंघट्टजन्येत्यर्थः ॥ ८८ ॥ संवर्तयामास चकारेत्यर्थः ॥ ८९ ॥ अर्चिःसहस्रविकचं अर्चिःसहस्रावृतमित्यर्थः । अतएव रविमण्डलसप्रभं ॥ ९०—९२ ॥ गवां पतेः सूर्यस्य ॥ ९३—९४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षट्सप्ततितमः सर्गः ॥ ७६ ॥

अथ निकुम्भवधः सप्तसप्ततितमे—निकुम्भ इत्यादि ॥ १ ॥ तत इत्यादिश्लोकद्वयमेकान्वयं ॥

रामानु० शतयोजनविस्तीर्णत्रिकूटशिखरमध्येयुध्यन्सुग्रीवः कुंभंलङ्काद्वीपतलेलवणांभसिपातयामासेत्यभिधानात्सुग्रीवस्यापरिमेयबलवत्तायोत्यते ॥ ८४ ॥ **स०** समुत्थितः ऊर्ध्वमुत्थितः । विन्ध्यमन्दरसंकाशः तत्सदृशतरङ्गवान् । समन्ततोविससर्प ॥ ' विन्ध्यमन्दरसंकाशःकुंभः ततोजलात्समुत्पत्येत्यन्वयइतिनागोजिभट्टव्याख्यात्वर्थाप्रतिपत्त्या ॥ ८५ ॥ **स०** रुद्राभिपन्नस्य स्ववरतःसूर्यमनुविमानेनगच्छतोसुरस्ययाने तेनासहमानेनपातितेसतिसतीपतिस्तंपातयामासेतिपौराणिक्याकथयारुद्राभिपन्नताज्ञेया ॥ ९३ ॥ इतिषट्सप्ततितमः सर्गः ॥ ७६ ॥

[पा०] १ घ. ङ. ज.—ट. संजज्ञेचापिशोणितं. क. ख. ग. च. संजज्ञेचास्य. २ ग.—च. झ. ञ. ट. तस्यवेगेन. ३ इदमर्धं क. ख. च. छ. पाठेषुदृश्यते. ४ क. सतथाऽभिहतः. ५ ङ. छ. ज. झ. ट. भृशपीडितः. ६ घ. तदाभूमौ.

हेमपट्टपरिक्षिप्तं वज्रविद्रुमभूषितम् ॥ यमदण्डोपमं भीमं रक्षसां भयनाशनम् ॥ ३ ॥
तमाविध्य महातेजाः शक्रध्वजसमं तदा ॥ विननाद विवृत्तास्यो निकुम्भो भीमविक्रमः ॥ ४ ॥
उरोगतेन निष्केण भुजस्थैरङ्गदैरपि ॥ कुण्डलाभ्यां च चित्राभ्यां मालया च विचित्रया ॥ ५ ॥
निकुम्भो भूषणैर्भाति तेन स्म परिघेण च ॥ यथेन्द्रधनुषा मेघः सविद्युत्स्तनयित्नुमान् ॥ ६ ॥
परिघाग्रेण पुरस्फोट वातग्रन्थिर्महात्मनः ॥ प्रजज्वाल सघोषश्च विधूम इव पावकः ॥ ७ ॥
नगर्या विटपावत्या गन्धर्वभवनोत्तमैः ॥ सह चैवामरावत्या सर्वैश्च भवनैः सह ॥ ८ ॥
सतारग्रहनक्षत्रं सचन्द्रं समहाग्रहम् ॥ निकुम्भपरिघाघूर्णं भ्रमतीव नभःस्थलम् ॥ ९ ॥
दुरासदश्च संजज्ञे परिघाभरणप्रभः ॥ कपीनां स निकुम्भाग्निर्युगान्ताग्निरिवोत्थितः ॥ १० ॥
राक्षसा वानराश्चापि न शेकुः स्पन्दितुं भयात् ॥ हनुमांस्तु विवृत्योरस्तस्थौ प्रमुखतो बली ॥ ११ ॥
परिघोपमबाहुस्तु परिघं भास्करप्रभम् ॥ बली बलवतस्तस्य पातयामास वक्षसि ॥ १२ ॥
स्थिरे तस्योरसि व्यूढे परिघः शतधा कृतः ॥ विशीर्यमाणः सहसा उल्काशतमिवाम्बरे ॥ १३ ॥
स तु तेन प्रहारेण विचचाल महाकपिः ॥ परिघेण समाधूतो यथा भूमिचलेऽचलः ॥ १४ ॥
स तदाऽभिहतस्तेन हनुमान्प्लवगोत्तमः ॥ मुष्टिं संवर्तयामास बलेनातिमहाबलः ॥ १५ ॥
तमुद्यम्य महातेजा निकुम्भोरसि वीर्यवान् ॥ अभिचिक्षेप वेगेन वेगवान्वायुविक्रमः ॥ १६ ॥
ततः पुरस्फोट चर्मास्य प्रसुस्राव च शोणितम् ॥ मुष्टिना तेन संजज्ञे ज्वाला विद्युदिवोत्थिता ॥ १७ ॥
स तु तेन प्रहारेण निकुम्भो विचचाल ह ॥ स्वस्थश्चापि निजग्राह हनुमन्तं महाबलम् ॥ १८ ॥
विचुक्रुशुस्तदा संरब्धे भीमं लङ्कानिवासिनः ॥ निकुम्भेनोद्यतं दृष्ट्वा हनुमन्तं महाबलम् ॥ १९ ॥
स तदा ह्रियमाणोऽपि कुम्भकर्णात्मजेन ह ॥ आजघानानिलसुतो वज्रकल्पेन मुष्टिना ॥ २० ॥

स्रग्दामसन्नद्धं स्रक्समूहनिबद्धं। दत्तपञ्चाङ्गुलं चन्दनकुङ्कुमादिनार्पितपञ्चाङ्गुलमुद्रामुद्रितं। अथवा क्रियाविशेषणमेतत्। दत्तपञ्चाङ्गुलं यथा तथा आददे। परिक्षिप्तं परिणद्धं ॥ २—४ ॥ उरोगतेनेत्यादिश्लोकद्वयमेकान्वयं ॥ निष्कः पदकं। भूषणैः हारादिभिः। भाति स्म। "लट् स्मे" इति भूते लट्। स्तनयित्नुमान् गर्जितवान्। "स्तनयित्नुस्तु गर्जिते मेघे" इति रत्नमाला। इन्द्रधनुःस्थाने परिघः। विद्युत्स्थाने भूषणानि। विननादेति पूर्वश्लोकोक्तो विनादः स्तनयित्नुस्थान इति नोपमेयन्यूनता ॥ ५—६ ॥ वातग्रन्थिः आवहादिसप्तवातस्कन्धः। सघोषः सासिंहनाद इति निकुम्भविशेषणं परिघविशेषणं वा ॥ ७ ॥ नगर्येत्यादिश्लोकद्वयमेकान्वयं॥ विटपावत्या अलकया॥ अत्रापि सहेति शेषः। भवनैः अमरभवनैः। ताराः अश्विन्यादयः। ग्रहाः बुधादयः। नक्षत्राणि अश्विन्यादिभिन्नानि। महाग्रहाः शुक्रादयः। अत्र रात्रित्वात्सूर्यो नोक्तः। निकुम्भपरिघाघूर्णं। अत्र परिघशब्देन तद्वात उपलक्ष्यते। इवशब्दो वाक्यालंकारे ॥ ८—९ ॥ परिघेणाभरणैश्च प्रभातीति परिघाभरणप्रभः। यद्वा परिघाभरणान्येव प्रभा यस्य स तथा। कपीनां दुरासदो जज्ञ इति संबन्धः ॥ १० ॥ राक्षसा इति। प्रबलेषु प्रजङ्घादिषु हतेषु दुर्बलैर्भवद्भिः किमर्थं युद्धाय प्रयत्नः कृत इति निकुम्भः कुप्येदिति राक्षसानां भयं वेदितव्यं। विवृत्य विस्तार्य। प्रमुखतः अग्रे ॥ ११ ॥ परिघोपमबाहुः निकुम्भः ॥ १२ ॥ व्यूढे विशाले। उल्काशतमिव बभाविति ॥ १३ ॥ भूमिचले भूकम्पे ॥ १४ ॥ संवर्तयामास। चकारेत्यर्थः ॥ १५—१८ ॥ भीमं विचुक्रुशुः। हनुमद्ग्रहणहर्षादिति भावः। उद्यतं

तीo परिघान्तरणप्रभः परिघान्तकृतरणरक्तप्रभइत्यर्थः ॥ १० ॥

[पाo] १ ख. घ. ङ. च. ट. शक्रध्वजसमौजसं. २ च. छ. परिघान्तरणप्रभः. ३ ग. ङ. झ. ट. क्रोधेन्धनोनिकुंभाग्निः. ४ ङ. झ. ञ. ट. नचचाल. ५ क. ख. घ. ङ. छ. झ. ञ. ट. तत्रपुरस्फोट. ६ ख. ग. ङ. च. झ. ट. मेघेविद्युदिवो. ७ घ. सर्वेभीमं क. हृष्टाभीमं. ८ क. ज. ञ. निकुंभेनोद्धतं. घ. निकुंभेनार्दितं.

आत्मानं मोचयित्वाऽथ क्षितावभ्यवपद्यत ॥ हनुमानुन्मथ्याशु निकुम्भं मारुतात्मजः ॥ २१ ॥
निक्षिप्य परमायत्तो निकुम्भं निष्पिपेष ह ॥ उत्पत्य चास्य वेगेन पपातोरसि वीर्यवान् ॥ २२ ॥
परिगृह्य च बाहुभ्यां परिवृत्य शिरोधराम् ॥ उत्पाटयामास शिरो भैरवं नदतो महत् ॥ २३ ॥
[अथ देवास्सगन्धर्वा विद्याधरमहोरगाः ॥ आकाशचारिणस्सर्वे अप्सरोभिः सहामराः ॥ २४ ॥
हनूमन्तं महाबाहुं वायुपुत्रमरिंदमम् ॥ प्रशंसन्तः परैर्वाक्यैः प्रसूनैरभ्यपूजयन्] ॥ २५ ॥

अथ विनदति सादिते निकुम्भे पवनसुतेन रणे बभूव युद्धम् ॥
दशरथसुतराक्षसेन्द्रसून्वोर्भृशतरमागतरोषयोः सुभीमम् ॥ २६ ॥
व्यपेते तु जीवे निकुम्भस्य हृष्टा विनेदुः प्लवङ्गा दिशः सस्वनुश्च ॥
चचालेव चोर्वी पफालेव च द्यौर्भयं राक्षसानां बलं चाविवेश ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तसप्ततितमः सर्गः ॥ ७७ ॥

अष्टसप्ततितमः सर्गः ॥ ७८ ॥

रावणप्रेरणया समरायनिस्सरतिमकराक्षे राक्षसैस्तत्समयसमुद्भूतदुर्निमित्तनिरीक्षणेपि तदलक्षीकरणेनरणाय तदनुसरणम् ॥ १ ॥

निकुम्भं च हतं श्रुत्वा कुम्भं च विनिपातितम् ॥ रावणः परमामर्षी प्रजज्वालानलो यथा ॥ १ ॥
नैर्ऋतः क्रोधशोकाभ्यां द्वाभ्यां तु परिमूर्छितः ॥ खरपुत्रं विशालाक्षं मकराक्षमचोदयत् ॥ २ ॥
गच्छ पुत्र मयाऽऽज्ञप्तो बलेनाभिसमन्वितः ॥ राघवं लक्ष्मणं चैव जहि तांश्च वनौकसः ॥ ३ ॥

गृहीतं ॥ १९—२० ॥ क्षितावभ्यवपद्यत स्थितः ॥ २१ ॥ निक्षिप्य भूमौ पातयित्वा । परमायत्तः अतिप्रयासयुक्तः । उत्पत्य ऊर्ध्वमुद्गत्य । उरसि वेगेन पपात ॥ २२ ॥ बाहुभ्यां शिरोधरां परिगृह्य परिवर्त्य। शिर उत्पाटयामास ॥ २३—२५ ॥ उत्तरसर्गद्वयार्थं संग्रहेण दर्शयति—अथेति ॥ विनदति निकुम्भे पवनसुतेन सादिते सति । दशरथसुतराक्षसेन्द्रसून्वोः । राममकराक्षयोः । युद्धं बभूव । पुष्पिताग्रावृत्तं । उत्तरत्र भुजङ्गप्रयातं ॥ २६ ॥ दिशः सस्वनुः प्रतिध्वनिं चक्रुः । पफालेव पुस्फोटेव । बलं कर्म । भयं कर्तृ ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तसप्ततितमः सर्गः ॥ ७७ ॥

अथ मकराक्षनिर्गमोष्टसप्ततितमे, प्रथमपक्षे अयं दशम्यां प्रातः, द्वितीयपक्षे तु दशम्यां प्रातरारभ्य कम्पनवधप्रहस्तवधरावणमुकुटभङ्गकुम्भकर्णप्रबोधतद्वधाः, अथापराह्णे ब्रह्मास्त्रबन्धः, रात्रौ तन्मोक्षलङ्कादहनकुम्भनिकुम्भयूपाक्षशोणिताक्षप्रजङ्घकम्पनमकराक्षवधाः—निकुम्भं चेत्यादि ॥ १ ॥ परिमूर्छितः

स० निनदति नानाप्रकारेणकथयतिनिकुंभे दशरथसुतराक्षसेन्द्रसून्वोः दशसुदिक्षुरथोगमनंअप्रतिहतंयस्य तस्यवायोः । " रथः स्यात्स्यन्दनेकायेचरणेच " इतिविश्वः । सुतोहनुमान् । राक्षसेन्द्रसूनुर्निकुंभः । तयोःभृशतरमागतरोषयोः यद्युद्धंबभूव तस्मिन्रणे पवनसुतेनसादितेसति राक्षसानांबलं भयमाविवेशेत्याकर्षः । " अनेनवक्ष्यमाणकथोपक्षेपः " इत्युभौ । तत्र " व्यपेतेतुजीवे " इत्यादिकमसंगतमिवदृश्यते । अस्मत्पक्षेदशरथशब्दएकएवगौणार्थइतिमन्तव्यं । दशरथसुतोस्यास्तीतिदशरथसुतइतिवा । पवनसुतेनरणेनिकुंभेसादितेसति युद्धं नञ्मात्राध्याहारः । नबभूव । परपक्षेरणकर्तुरभावादितिवा ॥ २६ ॥ स० सामान्यतोभयमित्युक्तं । तत्रविशेषमाह—व्यपेतइति । जीवेव्यपेते शरीरादपगते ॥ ति० एतदन्तंनवमीदिनयुद्धं ॥२७॥ इतिसप्तसप्ततितमःसर्गः ॥७७॥

[पा०] १ इदंश्लोकद्वयं क. च. छ. पाठेषुदृश्यते. २ ङ. ञ. ञ. ट. निनदति. ३ ग. ङ. चहतंदृष्ट्वा. क. ख. घ. च. छ. ञ. निहतंश्रुत्वा. ञ. ट. निहतंदृष्ट्वा. ४ क. ग.—ट. तौसवनौकसौ.

रावणस्य वचः श्रुत्वा शूरमानी खरात्मजः ॥ बाढमित्यब्रवीद्धृष्टो मकराक्षो निशाचरः ॥ ४ ॥
सोभिवाद्य दशग्रीवं कृत्वा चापि प्रदक्षिणम् ॥ निर्जगाम गृहाच्छुभ्राद्रावणस्याज्ञया बली ॥ ५ ॥
समीपस्थं बलाध्यक्षं खरपुत्रोऽब्रवीदिदम् ॥ रथैश्चानीयतां शीघ्रं सैन्यं चाहूयतां त्वरात् ॥ ६ ॥
तस्य तद्वचनं श्रुत्वा बलाध्यक्षो निशाचरः ॥ स्यन्दनं च बलं चैव समीपं प्रत्यपादयत् ॥ ७ ॥
प्रदक्षिणं रथं कृत्वा आरुरोह निशाचरः ॥ सूतं संचोदयामास शीघ्रं मे रथमावह ॥ ८ ॥
अथ ताञ्राक्षसान्सर्वान्मकराक्षोऽब्रवीदिदम् ॥ यूयं सर्वे प्रयुध्यध्वं पुरस्तान्मम राक्षसाः ॥ ९ ॥
अहं राक्षसराजेन रावणेन महात्मना ॥ आज्ञप्तः समरे हन्तुं तावुभौ रामलक्ष्मणौ ॥ १० ॥
अद्य रामं वधिष्यामि लक्ष्मणं च निशाचराः ॥ शाखामृगं च सुग्रीवं वानरांश्च शरोत्तमैः ॥ ११ ॥
अद्य शूलनिपातैश्च वानराणां महाचमूम् ॥ प्रदहिष्यामि संग्रामः शुष्केन्धनमिवानलः ॥ १२ ॥
मकराक्षस्य तच्छ्रुत्वा वचनं ते निशाचराः ॥ सर्वे नानायुधोपेता बलवन्तः समागताः ॥ १३ ॥
ते कामरूपिणः सर्वे दंष्ट्रिणः पिङ्गलेक्षणाः ॥ मातङ्गा इव नर्दन्तो ध्वस्तकेशा भयानकाः ॥ १४ ॥
परिवार्य महाकाया महाकार्यं खरात्मजम् ॥ अभिजग्मुस्ततो हृष्टाश्चालयन्तो वसुन्धराम् ॥ १५ ॥
शङ्खभेरीसहस्राणामाहतानां समन्ततः ॥ क्ष्वेलितास्फोटितानां च ततः शब्दो महानभूत् ॥ १६ ॥
प्रभ्रष्टोथ करात्तस्य प्रतोदः सारथेस्तदा ॥ पपात सहसा चैव ध्वजस्तस्य च रक्षसः ॥ १७ ॥
तस्य ते रथयुक्ताश्च हया विक्रमवर्जिताः ॥ चरणैराकुलैर्गत्वा दीनाः सास्रमुखा ययुः ॥ १८ ॥
प्रवाति पवनस्तस्मिन्सपांसुः खरदारुणः ॥ निर्याणे तस्य रौद्रस्य मकराक्षस्य दुर्मतेः ॥ १९ ॥
तानि दृष्ट्वा निमित्तानि राक्षसा वीर्यवत्तमाः ॥ अचिन्त्य निर्गताः सर्वे यत्र तौ रामलक्ष्मणौ ॥ २० ॥

घनगजमहिषाङ्गतुल्यवर्णाः समरमुखेष्वसकृद्गदासिभिन्नाः ॥
अहमहमिति युद्धकौशलास्ते रजनिचराः परितः समुन्नदन्तः ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टसप्ततितमः सर्गः ॥ ७८ ॥

व्याप्तः ॥ २—५ ॥ त्वरात्त्वरया ॥६॥ प्रत्यपादयत् प्रापयत् ॥ ७ ॥ आवह चोदय । अत्रेतिकरणं द्रष्टव्यं ॥ ८ ॥ अथतानित्यादिचतुःश्लोक्येकान्वया ॥ ९—॥१२॥ समागताः समाजग्मुः ॥१३॥ ते कामरूपिण इत्यादिश्लोकद्वयमेकान्वयं ॥ १४—१६ ॥ करात्तस्य आत्तकरस्य वशीकृतकरस्य । लघुहस्तस्येति यावत् ॥१७॥ विक्रमवर्जिताः विविधपदन्यासविरहिताः । प्रथममाकुलैश्चरणैर्गत्वा पश्चाद्ययुरित्यर्थः ॥१८॥ सपांसुः अतएव खरदारुणः खरः परुषः दारुणो भयंकरश्च ॥१९॥ तानीत्यादिश्लोकद्वयमेकान्वयं । असकृद्गदासिभिन्ना इत्यनेन शौर्यातिशयः सूचितः । युद्धकौशलाः युद्धकुशलाः । स्वार्थेण् । अहमहमिति वदन्तः । अचिन्त्य निर्गता इति पूर्वेण संबन्धः ॥२०—२१॥ इति श्रीगो-

---

स० यद्यपिकुंभवधःप्रागितिकुंभंनिकुंभंचेतिवक्तव्यं । तथापिनिकुंभोतिबलवानितिवाऽल्यव्यवहितोनिकुंभवधइतिवानिकुंभग्रहणं प्रागितिमन्तव्यं ॥ १ ॥ स० त्वरात् त्वरया । त्वरयाअततीति त्वरात् । तत्संबुद्धिरितिवा ॥ ६ ॥ स० खराणांक्रूराणामपि दारुणः ॥ १९ ॥ इत्यष्टसप्ततितमःसर्गः ॥ ७८ ॥

[पा०] १ झ. पुत्रोब्रवीद्वचः. २ ख. ङ. च. छ. झ. ञ. ट. रथआनीयतांशीघ्रंसैन्यंत्वानीयतां. ३ क. ख. तद्बलंचोदयामाससस्यन्दनेनसहद्रुतं. ४ ख.—ट. शीघ्रंवै. ५ ङ. ग. झ. संप्राप्तां. ६ ङ झ. क्रूरादंष्ट्रिणः. क. ख. ग. च. छ. ज. ञ. ट. शूरादंष्ट्रिणः. ७ ङ. झ. चालयन्तोनभस्थलं. ८ घ. ङ. छ. झ. ञ. ट. तत्रशब्दो. ९ ख. ङ. च. छ. ञ. ट. सहसाभूमौ. १० ग. झ. तस्मिन्पांसुभिः. ११ झ. परिबभ्रमुर्मुहुस्ते. क. ख. ग. च. ञ. ट. परिबभ्रमुर्नदन्तः. ज. परितस्थुरुन्नदन्तः.

एकोनाशीतितमः सर्गः ॥ ७९ ॥

राममकराक्षयोर्वीरवादपुरस्सरंसमरारंभः ॥ १ ॥ रामेणमकराक्षक्षपणम् ॥ २ ॥

निर्गतं मकराक्षं ते दृष्ट्वा वानरयूथपाः ॥ आप्लुत्य सहसा सर्वे योद्धुकामा व्यवस्थिताः ॥ १ ॥
ततः प्रवृत्तं सुमहत्तद्युद्धं रोमहर्षणम् ॥ निशाचरैः प्लवङ्गानां देवानां दानवैरिव ॥ २ ॥
वृक्षशूलनिपातैश्च शिलापरिघपातनैः ॥ अन्योन्यं मर्दयन्ति स्म तदा कपिनिशाचराः ॥ ३ ॥
शक्तिखड्गगदाकुन्तस्तोमरैश्च निशाचराः ॥ पट्टिशैर्भिन्दिपालैश्च बाणपातैः समन्ततः ॥ ४ ॥
पाशमुद्गरदण्डैश्च निखातैश्चापरे तदा ॥ कदनं कपिवीराणां चक्रुस्ते रजनीचराः ॥ ५ ॥
बाणौघैरर्दिताश्चापि स्वरपुत्रेण वानराः ॥ संभ्रान्तमनसः सर्वे दुद्रुवुर्भयपीडिताः ॥ ६ ॥
तान्दृष्ट्वा राक्षसाः सर्वे द्रवमाणान्वलीमुखान् ॥ नेदुस्ते सिंहवद्धृष्टा राक्षसा जितकाशिनः ॥ ७ ॥
विद्रवत्सु तदा तेषु वानरेषु समन्ततः ॥ रामस्तान्वारयामास शरवर्षेण राक्षसान् ॥ ८ ॥
वारितान्राक्षसान्दृष्ट्वा मकराक्षो निशाचरः ॥ क्रोधानलसमाविष्टो वचनं चेदमब्रवीत् ॥ ९ ॥
तिष्ठ राम मया सार्धं द्वन्द्वयुद्धं ददामि ते ॥ त्याजयिष्यामि ते प्राणान्धनुर्मुक्तैः शितैः शरैः ॥१०॥
यत्तदा दण्डकारण्ये पितरं हतवान्मम ॥ मदग्रतः स्वकर्मस्थं दृष्ट्वा रोषोभिवर्धते ॥ ११ ॥
दह्यन्ते भृशमङ्गानि दुरात्मन्मम राघव ॥ यन्मयासि न दृष्टस्त्वं तस्मिन्काले महावने ॥ १२ ॥
दिष्ट्याऽसि दर्शनं राम मम त्वं प्राप्तवानिह ॥ काङ्क्षितोसि क्षुधार्तस्य सिंहस्येवेतरो मृगः ॥ १३ ॥
अद्य मद्बाणवेगेन प्रेतराड्विषयं गतः ॥ ये त्वया निहता वीराः सह तैश्च समेष्यसि ॥ १४ ॥
बहुनाऽत्र किमुक्तेन शृणु राम वचो मम ॥ पश्यन्तु सकला लोकास्त्वां मां चैव रणाजिरे ॥१५॥
अस्त्रैर्वा गदया वाऽपि बाहुभ्यां वा महाहवे ॥ अभ्यस्तं येन वा राम तेनैव युधि वर्तताम् ॥ १६ ॥

विन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टसप्ततितमःसर्गः॥७८॥

अथ मकराक्षवध एकोनाशीतौ—निर्गतमिति ॥ १—३ ॥ शक्तीत्यादिश्लोकद्वयमेकान्वयं ॥ निखातैः आयुधविशेषैः । निर्घातैरिति पाठे अशनिभिरित्यर्थः । केचिन्निशाचराः शक्तिखड्गादिभिः अपरे रजनीचराः पाशमुद्गरादिभिश्च कदनं चक्रुरिति योजना ॥ ४—६ ॥ राक्षसा जितकाशन इति भिन्नं वाक्यं । जितं जयः तेन काशन्त इति तथोक्ता जितकाशिनः । बभूवुरिति शेषः । अन्यथा द्वितीयराक्षसपदवैयर्थ्यं स्यात् ॥ ७—१० ॥ स्वकर्मस्थं वधकर्मस्थं । यथा पिता हतस्तथा वध्यमित्यर्थः । यद्वा क्षात्रधर्मकर्मानुतिष्ठन्तमित्यर्थः । स्वकर्मस्थमिति सुतरामकृत्यनिरतमिति वार्थः ॥ ११ ॥ तस्मिन्काले महावने यद्यस्मान्न दृष्टोसि तस्मान्ममाङ्गानि दह्यन्ते । तदानीमेव दृष्टश्चेत्प्रतीकारेण तापः शाम्येदित्यर्थः ॥ १२–१५ ॥ महाहवे निमित्ते । येन वा अन्येनायुधेनाभ्यस्तं

शि० निशाचराः निशायामेवभोजनशीलाः । रजनीचराः राक्षसाः ॥ ४ ॥ शि० स्वकर्मस्थं स्वकर्मनिरतं । राक्षसवधपरायणमित्यर्थः ॥ स० स्वकर्मस्थं राक्षसधर्मनिरतं । सु सम्यक् अकर्मस्थंतन्निरतमितिरामविशेषणंवा ॥ ति० मदग्रतःस्वकर्मस्थं दृष्टेतिपाठे मदग्रतस्तिष्ठन्तमितिशेषः ॥ ११ ॥

[पा०] १ ङ. झ. ट. गदापरिघपातनैः. २ क. शक्तिशूलगदाखड्गैः. ३ च. छ. ञ. ट. निर्घातैश्चवरायुधैः. ख. शूलैश्चान्यैर्वरायुधैः. ४ झ. कपिसिंहानां. ख. ङ. कपिसैन्यानां. घ. कपिमुख्यानां. ५ क. ख. घ.—छ. झ. ञ. द्रवमाणान्वनौकसः. ६ झ. द्वन्द्वयुद्धंभविष्यति. घ. द्वन्द्वयुद्धंतुदेहिमे. ७ घ. ङ. झ. तदग्रतः. ख. त्वामग्रतः. ८ ख. ममचाङ्गानि. ९ ख. महाहवे. १० ग.—ट. निहताःशूराः. ११ च.—ञ. रणाजिरे.

मकराक्षवचः श्रुत्वा रामो दशरथात्मजः ॥ अब्रवीत्प्रहसन्वाक्यमुत्तरोत्तरवादिनम् ॥ १७ ॥
कत्थसे किं वृथा रक्षो बहून्यसदृशानि तु ॥ न रणे शक्यते जेतुं विना युद्धेन वाग्बलात् ॥ १८ ॥
चतुर्दशसहस्राणि रक्षसां त्वत्पिता च यः ॥ त्रिशिरा दूषणश्चैव दण्डके निहता मया ॥ १९ ॥
स्वाशितास्तव मांसेन गृध्रगोमायुवायसाः ॥ भविष्यन्त्यद्य वै पाप तीक्ष्णतुण्डनखाङ्कुराः ॥ २० ॥
[रुधिरार्द्रमुखा हृष्टा रक्तपक्षाण्डजाश्च ये ॥ खे गता वसुधायां च भ्रमिष्यन्ति समन्ततः] ॥ २१ ॥
राघवेणैवमुक्तस्तु खरपुत्रो निशाचरः ॥ बाणौघानमुचत्तस्मै राघवाय रणाजिरे ॥ २२ ॥
ताञ्शराञ्शरवर्षेण रामश्चिच्छेद नैकधा ॥ निपेतुर्भुवि ते च्छिन्ना रुक्मपुङ्खाः सहस्रशः ॥ २३ ॥
तद्युद्धमभवत्तत्र समेत्यान्योन्यमोजसा ॥ रक्षसः खरपुत्रस्य सूनोर्दशरथस्य च ॥ २४ ॥
जीमूतयोरिवाकाशे शब्दो ज्यातलयोस्तदा ॥ धनुर्मुक्तः स्वनोत्कृष्टः श्रूयते च रणाजिरे ॥ २५ ॥
देवदानवगन्धर्वाः किन्नराश्च महोरगाः ॥ अन्तरिक्षगताः सर्वे द्रष्टुकामास्तदद्भुतम् ॥ २६ ॥
विद्धमन्योन्यगात्रेषु द्विगुणं वर्धते परम् ॥ कृतप्रतिकृतान्योन्यं कुरुतां तौ रणाजिरे ॥ २७ ॥
राममुक्तांस्तु बाणौघान्राक्षसस्त्वच्छिनद्रणे ॥ रक्षोमुक्तांस्तु रामो वै नैकधा प्राच्छिनच्छरैः ॥२८॥
बाणौघैर्विततः सर्वा दिशश्च प्रदिशस्तथा ॥ संछन्ना वसुधा चैव समन्तान्न प्रकाशते ॥ २९ ॥
ततः क्रुद्धो महाबाहुर्धनुश्चिच्छेद राक्षसः ॥ अष्टाभिरथ नाराचैः सूतं विव्याध राघवः ॥ ३० ॥
भित्त्वा शरै रथं रामो रथाश्वान्समपातयत् ॥ विरथो वसुधां तिष्ठन्मकराक्षो निशाचरः ॥ ३१ ॥
तत्तिष्ठद्वसुधां रक्षः शूलं जग्राह पाणिना ॥ त्रासनं सर्वभूतानां युगान्ताग्निसमप्रभम् ॥ ३२ ॥
[दुरवापं महच्छूलं रुद्रदत्तं भयंकरम् ॥ जाज्वल्यमानमाकाशे संहारास्त्रमिवापरम् ॥
यं दृष्ट्वा देवताः सर्वा भयार्ता विद्रुता दिशः] ॥ ३३ ॥
विभ्राम्य तु महच्छूलं प्रज्वलत्तं निशाचरः ॥ स क्रोधात्प्राहिणोत्तस्मै राघवाय महाहवे ॥ ३४ ॥
तमापतन्तं ज्वलितं खरपुत्रकराच्युतम् ॥ बाणैस्तु त्रिभिराकाशे शूलं चिच्छेद राघवः ॥ ३५ ॥
स च्छिन्नो नैकधा शूलो दिव्यहाटकमण्डितः ॥ व्यशीर्यत महोल्केव रामबाणार्दितो भुवि ॥ ३६ ॥
तच्छूलं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा ॥ साधु साध्विति भूतानि व्याहरन्ति नभोगता ॥ ३७ ॥

तेनैव युधि वर्ततां । भवानिति शेषः ॥ १६ ॥ उत्तरोत्तरवादिनं । बहुप्रलापिनमित्यर्थः ॥ १७ ॥ युद्धेन विना प्रहारेण विना ॥ १८–१९ ॥ स्वाशिताः सुष्ठु आशितवन्तः ॥ २०–२४ ॥ ज्यातलयोः शब्दः ज्यातलयोः संघर्षजः शब्दः । स्वनोत्कृष्टः स्वनेषूत्कृष्टः ॥ २५—२६ ॥ विद्धं वेधनं । वर्धते अवर्धत । कृतप्रतिकृतान्योन्यं कृतस्य प्रतिकृतं ययोस्तौ तादृशावन्योन्यं यस्मिन्युद्धकर्मणि तत्तथोक्तं । कुरुतां अकुरुतां । युद्धमिति शेषः ॥ २७—३० ॥ वसुधां तिष्ठत् वसुधायामतिष्ठत् ॥ ३१ ॥ वसुधां वसुधायां ॥ ३२—३६ ॥ तच्छूलमिति । नभोगता नभोगतानि । "सुपां सुलुक्—" दिना आकारादेशः

ति० भित्वारथं भङ्क्त्वेत्यर्थः । हत्वाअश्वानित्यसंधिपाठः । वसुधास्थः अभूदितिशेषः ॥ ३१ ॥ ति० शूलोऽर्धचंद्रादिः ॥ ३४ ॥

[पा०] १ ख. घ. ज. राक्षसास्त्वत्पिताच. २ क. ख. ङ.—ञ. नखाङ्कुशाः. ३ अयंश्लोकः क. ख. च. छ. ञ. पाठेषुदृश्यते. ४ क. ग. एवमुक्तस्तुरामेण. ५ ख. घ.—छ. झ. ञ. मकराक्षोमहाबलः. ६ ख. नसृजत्तस्मै. ७ क.—छ. झ. ञ. विच्छिन्नाः. ज. तेभिन्नाः. ८ च. छ. ज. ट. बलं. ९ ग. च. ज. कुर्वातांतौ. १० क.—घ. च. छ. विदिशस्तथा. ११ क. ग. घ. ङ. झ. संयुगे. १२ झ. भित्त्वारथंशरैरामोहत्वाअश्वानपातयत्. १३ घ. ङ. ज. ञ. ट. रथादश्वानपातयत्. च. रथानश्वानपातयत्. १४ ग. ञ. ट. वसुधास्थस्समकराक्षो. १५ क. उत्तिष्ठत्. १६ इदमर्धत्रयं क. ङ. च. छ. झ. ञ. ट. पाठेषुदृश्यते. १७ क. ग. घ. ङ. झ. ञ. ट. महात्मने. १८ घ.—छ. झ. ञ. ट. बाणैश्चतुर्भिराकाशे. १९ ङ. झ. भिन्नो. क. छिन्नस्त्रिधा.

तं दृष्ट्वा निहतं शूलं मकराक्षो निशाचरः ॥ मुष्टिमुद्यम्य काकुत्स्थं तिष्ठ तिष्ठेति चाब्रवीत् ॥ ३८ ॥
स तं दृष्ट्वा पतन्तं वै प्रहस्य रघुनन्दनः ॥ पावकास्त्रं ततो रामः सन्दधे तु शरासने ॥ ३९ ॥
तेनास्त्रेण हतं रक्षः काकुत्स्थेन तदा रणे ॥ संछिन्नहृदयं तत्र पपात च ममार च ॥ ४० ॥
दृष्ट्वा ते राक्षसाः सर्वे मकराक्षस्य पातनम् ॥ लङ्कामेवाभ्यधावन्त रामबाणार्दितास्तदा ॥ ४१ ॥
दशरथनृपपुत्रबाणवेगै रजनिचरं निहतं खरात्मजं तम् ॥
ददृशुरथ सुरा भृशं प्रहृष्टा गिरिमिव वज्रहतं यथा विकीर्णम् ॥ ४२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनाशीतितमः सर्गः ॥ ७९ ॥

अशीतितमः सर्गः ॥ ८० ॥

मकराक्षक्षयश्रवणविषण्णरावणचोदितेनेन्द्रजिता हुतभुजिहवनपूर्वकं सायुधरथारोहणेनान्तरिक्षेऽन्तर्हितेनसता रामादिपुशरवर्षणम् ॥ १ ॥ लक्ष्मणेन रामंप्रति ब्रह्मास्त्रप्रयोगेणसकलरक्षःकुलक्षपणप्रतिज्ञानपूर्वकमभ्यनुज्ञानयाचने रामेण सान्त्वनेनतंप्रतिषेधनपूर्वकं यत्रकुत्रगतस्यापितस्यवधप्रतिज्ञानपूर्वकमुपायपर्यालोचनम् ॥ २ ॥

मकराक्षं हतं श्रुत्वा रावणः समितिंजयः ॥ क्रोधेन महताऽऽविष्टो दन्तान्कटकटापयन् ॥ १ ॥
कुपितश्च तदा तत्र किं कार्यमिति चिन्तयन् ॥ आदिदेशाथ संक्रुद्धो रणायेन्द्रजितं सुतम् ॥ २ ॥
जहि वीर महावीर्यौ भ्रातरौ रामलक्ष्मणौ ॥ अदृश्यो दृश्यमानो वा सर्वथा त्वं बलाधिकः ॥ ३ ॥
त्वमप्रतिमकर्माणमिन्द्रं जयसि संयुगे ॥ किं पुनर्मानुषौ दृष्ट्वा न वधिष्यसि संयुगे ॥ ४ ॥
तथोक्तो राक्षसेन्द्रेण प्रतिगृह्य पितुर्वचः ॥ यज्ञभूमौ स विधिवत्पावकं जुहवेन्द्रजित् ॥ ५ ॥
जुह्वतश्चापि तत्राग्निं रक्तोष्णीषधराः स्त्रियः ॥ आजग्मुस्तत्र संभ्रान्ता राक्षस्यो यत्र रावणिः ॥ ६ ॥
शस्त्राणि शरपत्राणि समिधोथ विभीतकाः ॥ लोहितानि च वासांसि स्रुवं काष्णायसं तथा ॥ ७ ॥
सर्वतोग्निं समास्तीर्य शरपत्रैः सतोमरैः ॥ छागस्य कृष्णवर्णस्य गलं जग्राह जीवतः ॥ ८ ॥

॥ ३७—४१ ॥ गिरिमिव वज्रहतं यथेति । द्वे अप्यव्ययपदे संभूयैकार्थमेवाचक्षाते । पक्षद्वयेपि मकराक्षवधेन दशममहः समाप्तं ॥ ४२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनाशीतितमः सर्गः ॥ ७९ ॥

अथेन्द्रजिन्निर्गमोशीतितमे—मकराक्षमित्यादि । आविष्टः अभूदिति शेषः ॥ १—३ ॥ जयसि अजैषीः । पुनःशब्दस्त्वर्थे । मानुषौ पुनः मानुषौ तु । संयुगे दृष्ट्वापि न वधिष्यसि किं दर्शनमात्रेण वधिष्यस्येवेत्यर्थः ॥ ४ ॥ जुहव जुहाव । वृद्ध्यभाव आर्षः ॥ ५ ॥ जुह्वतइति भावलक्षणे षष्ठी । रक्तोष्णीषधराः । ऋत्विग्धारणार्थं रक्तोष्णीषाण्यानयन्त्य इत्यर्थः । "लोहितोष्णीषा ऋत्विजः प्रचरन्ति" इति श्रुतेः । संभ्रान्ताः त्वरावत्यः । समयातिक्रमो मा भूदिति त्वरया उष्णीषाण्यानिन्युरित्यर्थः ॥ ६ ॥ शस्त्राणि अभवन्निति शेषः । शरपत्राणि गुन्द्रपत्राणि । गुन्द्रश्च काशजातीयः । "गुन्द्रस्तेजनकः शरः" इत्यमरः । शस्त्राणि तोमराणि । सतोमरैरित्यनुवादात् । शस्त्राणि शरपत्राणि च परिस्तरणान्यभवन् । विभीतकाः समिधः इध्मानि अभवन् । वासांसि ऋत्विगुष्णीषवासांसि लोहितान्यभवन् । काष्णायसं स्रुव-

ति० प्रधावन्त प्राधावन्त ॥ नवम्यांपूर्वरात्रेऽस्यवधः ॥ ४१ ॥ इत्येकोनाशीतितमःसर्गः ॥ ७९ ॥

[पा०] १ ख. ग. ङ. च. छ. झ. ञ. ट. लङ्कामेव प्रधावन्त रामबाणभयार्दिताः. ज. लङ्कामेवाभिधावंस्ते.

सकृदेव समिद्धस्य विधूमस्य महार्चिषः ॥ बभूवुस्तानि लिङ्गानि विजयं दर्शयन्ति च ॥ ९ ॥
प्रदक्षिणावर्तशिखस्तप्तहाटकसन्निभः ॥ हविस्तत्प्रतिजग्राह पावकः स्वयमुत्थितः ॥ १० ॥
हुत्वाऽग्निं तर्पयित्वा च देवदानवराक्षसान् ॥ आरुरोह रथश्रेष्ठमन्तर्धानगतं शुभम् ॥ ११ ॥
स वाजिभिश्चतुर्भिश्च बाणैश्च निशितैर्युतः ॥ आरोपितमहाचापः शुशुभे स्यन्दनोत्तमः ॥ १२ ॥
जाज्वल्यमानो वपुषा तपनीयपरिच्छदः ॥ मृगैश्चन्द्रार्धचन्द्रैश्च सरथः समलङ्कृतः ॥ १३ ॥
जाम्बूनदमहाकम्बुर्दीप्तपावकसन्निभः ॥ बभूवेन्द्रजितः केतुर्वैडूर्यसमलङ्कृतः ॥ १४ ॥
तेन चादित्यकल्पेन ब्रह्मास्त्रेण च पालितः ॥ स बभूव दुराधर्षो रावणिः सुमहाबलः ॥ १५ ॥
सोभिनिर्याय नगरादिन्द्रजित्समितिंजयः ॥ हुत्वाऽग्निं राक्षसैर्मन्त्रैरन्तर्धानगतोऽब्रवीत् ॥ १६ ॥
अद्य हत्वा रणे यौ तौ मिथ्या प्रव्राजितौ वने ॥ जयं पित्रे प्रदास्यामि रावणाय रणार्जितम् ॥१७॥
अद्य निर्वानरामुर्वीं हत्वा रामं सलक्ष्मणम् ॥ करिष्ये परमप्रीतिमित्युक्त्वाऽन्तरधीयत ॥ १८ ॥
आपपाताथ संक्रुद्धो दशग्रीवेण चोदितः ॥ तीक्ष्णकार्मुकनाराचैस्तीक्ष्णस्त्वेन्द्ररिपू रणे ॥ १९ ॥
स ददर्श महात्मानौ नागौ त्रिशिरसाविव ॥ सृजन्ताविषुजालानि वीरौ वानरमध्यगौ ॥ २० ॥
इमौ तावितिसंचिन्त्य सज्यं कृत्वा च कार्मुकम् ॥ सन्ततानेषुधाराभिः पर्जन्य इव वृष्टिमान् ॥२१॥
सं तु वैहायसं प्राप्य सरथो रामलक्ष्मणौ ॥ अचक्षुर्विषये तिष्ठन्विव्याध निशितैः शरैः ॥ २२ ॥
तौ तस्य शरवेगेन परीतौ रामलक्ष्मणौ ॥ धनुषी सशरे कृत्वा दिव्यमस्त्रं प्रचक्रतुः ॥ २३ ॥
प्रच्छादयन्तौ गगनं शरजालैर्महाबलौ ॥ तमस्त्रैः सूर्यसंकाशैर्नैव पस्पृशतुः शरैः ॥ २४ ॥
स हि धूमान्धकारं च चक्रे प्रच्छादयन्नभः ॥ दिशश्चान्तर्दधे श्रीमान्नीहारतमसा वृताः ॥ २५ ॥
नैव ज्यातलनिर्घोषो न च नेमिखुरस्वनः ॥ शुश्रुवे चरतस्तस्य न च रूपं प्रकाशते ॥ २६ ॥

मासीत् ॥ ७—८ ॥ विजयं दर्शयन्ति विजयसूचकानि ॥ ९—१० ॥ अन्तर्धानगतं अन्तर्धानशक्तियुक्तं ॥ ११—१२ ॥ मृगैः मृगाकारप्रतिमाभिः । चन्द्रैः चन्द्राकारैः । अर्धचन्द्रैः रचनाविशेषैः ॥१३॥ जाम्बूनदमहाकम्बुः सौवर्णमहावलययुक्तः । "कम्बुर्नो वलये शङ्खे" इत्यमरः ॥ १४—१५ ॥ राक्षसैः निर्ऋतिदेवताकैः । अन्तर्धानगतः अन्तर्धानशक्तिं प्राप्तः । अतः इत्युक्त्वान्तरधीयतेत्यनेन न विरोधः ॥ १६ ॥ अद्य हत्वेत्यादिश्लोकद्वयमेकान्वयं । अद्य निर्वानरामिति । पितुरित्यध्याहारः । पितुः परमप्रीतिं परमप्रीतिं प्रति । पितुः प्रीतिमुद्दिश्येत्यर्थः । अद्य सलक्ष्मणं रामं हत्वा उर्वीं निर्वानरां करिष्य इति संबन्धः ॥ १७—१९ ॥ नागौ त्रिशिरसाविवेति दृष्टान्तेन रामलक्ष्मणयोर्महापुरुषलक्षणपृथुलोन्नतभुजशिरस्कत्वं द्योत्यते । सृजन्तौ सृक्ष्यन्तौ । सकलराक्षसक्षयकारिणाविवार्थः ॥ २० ॥ सन्ततान ववर्ष ॥ २१ ॥ वैहायसं विहायसा गमनं ॥ २२—२४ ॥ नभः प्रच्छादयन् । हेतौ शतृप्रत्ययः । अन्तर्धापयामासेत्यर्थः । धूमान्धकारमिति नीहारतमसावृता इति च पूर्वमेवोत्पातकलुषत्वमुच्यते । घनान्धकारे घनका-

---

ति० राक्षसांस्तर्पयित्वा । अभिचारयागीयानितिशेषः ॥११॥ शि० मिथ्या निरर्थयौवनेप्रव्राजितौ आगतौ ॥ स० मिथ्याप्रव्राजितौ कपटविरक्ताचारौ ॥ १७ ॥ ति० यत्त्वेवमादिवचसांरामस्तुतिपरतयाक्लेशेनव्याख्यनंतदृथैव । कवेःकविनिबद्धवक्तुश्चतथातात्पर्याभावादिति । एतत्सजातीयवालिवाक्यावसरेनिरूपितं ॥ १८ ॥ स० त्रिशिरसौ एकत्रतूणी अपरत्रचापकोटिः मध्ये शिरश्चेतित्रिशिरसाविव्यर्थः । नागौ सर्पौ । तोयंसृजन्तौनागौ मेघौत्रिशिरसौचेत्ताविवसृजन्ताविवेतिवा । "नागःकूराचारेषुतोयदे" इतिविश्वः ॥ २० ॥ ति० वैहायसरथः आकाशगामीरथोयस्यसः । अचक्षुर्विषयेतिष्ठन् । इदंयुद्धंतद्रात्रावेवमध्यरात्रे ॥ २२ ॥ रामानु० घनान्धकारे घनयुक्तान्धकारवन्निबिडे ॥ ती० घनान्धकारे सान्द्रतिमिरे । शरवर्षमिव उदकवर्षमिव ॥

[पा०] १ क.—च. झ. ञ. ट. शरहोमसमिद्धस्य. ज. चरुहोमसमिद्धस्य. २ क. च. ज. ञ. यान्यदर्शयन्. ३ च. ज. झ. रणेऽधिकं. ४ क. ख. कृत्वानिर्वानरां. ५ ख. नागौनिदृश्यसितावित्र. ६ ङ. झ. ञ. सतुवैहायसरथोयुधितौ. ७ ख. विरथौ.

घनान्धकारे तिमिरे शरवर्षमिवाद्भुतम् ॥ स ववर्ष महाबाहुर्नाराचशरवृष्टिभिः ॥ २७ ॥
स रामं सूर्यसंकाशैः शरैर्दत्तवरो भृशम् ॥ विव्याध समरे क्रुद्धः सर्वगात्रेषु रावणिः ॥ २८ ॥
तौ हन्यमानौ नाराचैर्धाराभिरिव पर्वतौ ॥ हेमपुङ्खान्नरव्याघ्रौ तिग्मान्मुमुचतुः शरान् ॥ २९ ॥
अन्तरिक्षे समासाद्य रावणिं कङ्कपत्रिणः ॥ निकृत्य पतगा भूमौ पेतुस्ते शोणितोक्षिताः ॥ ३० ॥
अतिमात्रं शरौघेण पीड्यमानौ नरोत्तमौ ॥ तानिषून्पततो भल्लैरनेकैर्निचकृन्ततुः ॥ ३१ ॥
यतो हि दृश्यते तौ शरान्निपततः शितान् ॥ ततस्तु तौ दाशरथी ससृजातेऽस्त्रमुत्तमम् ॥ ३२ ॥
रावणिस्तु दिशः सर्वा रथेनातिरथः पतन् ॥ विव्याध तौ दाशरथी लघ्वस्त्रो निशितैः शरैः ॥३३॥
तेनातिविद्धौ तौ वीरौ रुक्मपुङ्खैः सुसंहितैः ॥ बभूवतुर्दाशरथी पुष्पिताविव किंशुकौ ॥ ३४ ॥
नास्य वेद गतिं कश्चिन्न च रूपं धनुः शरान् ॥ न चान्यद्विदितं किंचित्सूर्यस्येवाभ्रसंप्लवे ॥ ३५ ॥
तेन विद्धाश्च हरयो निहताश्च गतासवः ॥ बभूवुः शतशस्तत्र पतिता धरणीतले ॥ ३६ ॥
लक्ष्मणस्तु सुसंक्रुद्धो भ्रातरं वाक्यमब्रवीत् ॥ ब्राह्ममस्त्रं प्रयोक्ष्यामि वधार्थं सर्वरक्षसाम् ॥ ३७ ॥
तमुवाच ततो रामो लक्ष्मणं शुभलक्षणम् ॥ ३८ ॥
नैकस्य हेतो रक्षांसि पृथिव्यां हन्तुमर्हसि ॥ अयुध्यमानं प्रच्छन्नं प्राञ्जलिं शरणागतम् ॥
पलायन्तं प्रमत्तं वा न त्वं हन्तुमिहार्हसि ॥ ३९ ॥
अस्यैव तु वधे यत्नं करिष्यावो महाबल ॥ आदेक्ष्यावो महावेगानस्त्रानाशीविषोपमान् ॥ ४० ॥
तमेनं मायिनं क्षुद्रमन्तर्हितरथं बलात् ॥ राक्षसं निहनिष्यन्ति दृष्ट्वा वानरयूथपाः ॥ ४१ ॥
यद्येष भूमिं विशते दिवं वा रसातलं वाऽपि नभःस्थलं वा ॥
एवं निगूढोपि ममास्त्रदग्धः पतिष्यते भूमितले गतासुः ॥ ४२ ॥
इत्येवमुक्त्वा वचनं महात्मा रघुप्रवीरः प्लवगर्षभैर्वृतः ॥
वधाय रौद्रस्य नृशंसकर्मणस्तदा महात्मा त्वरितं निरीक्षते ॥ ४३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अशीतितमः सर्गः ॥ ८० ॥

लिमवति ॥ २५—२९ ॥ पतगाः पक्षिणो भूत्वा । तथा वेगवन्त इत्यर्थः ॥ ३०—३३ ॥ सुसंहितैः सुष्ठु निर्मितैः ॥ ३४ ॥ अभ्रसंप्लवे मेघावरणे ॥ ३५—३८ ॥ प्रच्छन्नं युद्धभीत्या प्रच्छन्नं । पलायन्तं पलायमानं ॥ ३९ ॥ आदेक्ष्यावः प्रयोक्ष्यावः । अस्त्रान् अस्त्राणि । लिङ्गव्यत्यय आर्षः ॥४०—४१॥ भूमिं भूविवरं । विशते । आत्मनेपदमार्षं । दिवं स्वर्गं ॥ ४२ ॥ प्लवगर्षभैः वृतः निरीक्षते । उपायं

शि० घने निबिडे अन्धकारे दृष्टयुपघातके । तिमिरे तमसि ॥ २७ ॥ ति० दत्तवरैः वरदत्तैः ॥ २८ ॥ स० " रक्षतीत्येव विश्वासस्तदीयोहमितिस्मृतिः । शरणागतिरेषास्यात् " इत्यायुक्तशरणागतिमान् ॥ ति० अयुध्यमानत्वादिषट्प्रकाराणामपि सर्वरक्षउद्देशेनब्रह्मास्त्रसंधानेवधोभवति । नतुतद्युज्यतइत्यर्थः । अन्ततोविभीषणस्यापिनाशप्रसङ्गइत्याशयः ॥ ३९ ॥ ति० मायय्यान्तर्हितमेनमेवहन्तुंधोरानाशीविषोपमानस्त्राण्यादेक्ष्यावः । अदृष्टवधोस्मदेकसाध्यः । दृष्टस्यतुवधईषत्करोवानराणामपीत्याह—राक्षसमिति । यदिदर्शनंस्यात्तदादृष्ट्वा दर्शनमात्रेणहनुमदादयः एनंराक्षसंनिहनिष्यन्ति । दृष्ट्वावानरयूथपाइत्यत्र तद्दर्शनोपायोभारतेउक्तः ' इदमंभोगृहीत्वातुराजराजस्यशासनात् । गुह्यकोऽभ्यागतःकश्चित्त्वत्सकाशमरिंदम । इदमंभःकुबेरस्तेमहाराजः प्रयच्छति । अन्तर्हितानांभूतानांदर्शनार्थंपरंतप । अनेनमृष्टनयनोभूतान्यन्तर्हितान्युत । भवान्द्रक्ष्यतियस्मैचप्रदास्यतिनरःसच " इतिविभीषणवाक्येन ॥ ४१ ॥ रामानु० भूमिं भूविवरं । विशते । आत्मनेपदमार्षं । दिवं स्वर्गं । एतत् उपरितनलोकानामुपलक्षणं । रसातलं एतदधस्तनलोकानामुपलक्षणं ॥ ४२ ॥ इत्यशीतितमःसर्गः ॥ ८० ॥

पा०] १ क. ख. घ. ङ. ज.—ट. शिलावर्षमिवा. २ ख. ग. ङ. छ. झ. ञ. ट. दत्तवरैः. ३ ङ. छ. झ. ञ. ट. शोणिताप्लुताः. ४ ङ. छ. झ. ञ. ट. दीप्यमानौ.

एकाशीतितमः सर्गः ॥ ८१ ॥

इन्द्रजिताऽन्तर्हितस्यापि स्वस्यवधनिर्धारणरूपरामभावविज्ञानेन भयाल्लङ्काप्रवेशः ॥ १ ॥ तथा शत्रुवधाययजननिर्धारणेन तदन्तरायपरिहृतये रामन्यामोहनायस्वनिर्मितमायासीतायारथारोपणपूर्वकं पश्चिमद्वारान्निर्गतेन हनुमदग्रे खड्गेनमायासीताच्छेदनम् ॥ २ ॥

विज्ञाय तु मनस्तस्य राघवस्य महात्मनः ॥ सन्निवृत्याहवात्तस्मात्संविवेश पुरं ततः ॥ १ ॥
सोनुस्मृत्य वधं तेषां राक्षसानां तरस्विनाम् ॥ क्रोधताम्रेक्षणः शूरो निर्जगाम महाद्युतिः ॥ २ ॥
स पश्चिमेन द्वारेण निर्ययौ राक्षसैर्वृतः ॥ इन्द्रजित्तु महावीर्यः पौलस्त्यो देवकण्टकः ॥ ३ ॥
इन्द्रजित्तु ततो दृष्ट्वा भ्रातरौ रामलक्ष्मणौ ॥ रणायाभ्युद्यतौ वीरौ मायां प्रादुष्करोत्तदा ॥ ४ ॥
इन्द्रजित्तु रथे स्थाप्य सीतां मायामयीं ततः ॥ बलेन महताऽऽवृत्य तस्या वधमरोचयत् ॥ ५ ॥
मोहनार्थं तु सर्वेषां बुद्धिं कृत्वा सुदुर्मतिः ॥ हन्तुं सीतां व्यवसितो वानराभिमुखो ययौ ॥ ६ ॥
तं दृष्ट्वा त्वभिनिर्यान्तं नगर्याः काननौकसः ॥ उत्पेतुरभिसंक्रुद्धाः शिलाहस्ता युयुत्सवः ॥ ७ ॥
हनुमान्पुरतस्तेषां जगाम कपिकुञ्जरः ॥ प्रगृह्य सुमहच्छृङ्गं पर्वतस्य दुरासदम् ॥ ८ ॥
स ददर्श हतानन्दां सीतामिन्द्रजितो रथे ॥ एकवेणीधरां दीनामुपवासकृशाननाम् ॥ ९ ॥
परिक्लिष्टैकवसनामसृजां राघवप्रियाम् ॥ रजोमलाभ्यामालिप्तैः सर्वगात्रैर्वरस्त्रियम् ॥ १० ॥
तां निरीक्ष्य मुहूर्तं तु मैथिलीत्यध्यवस्य तु ॥ बभूवाचिरदृष्टा हि तेन सा जनकात्मजा ॥ ११ ॥
तां दीनां मलदिग्धाङ्गीं रथस्थां दृश्य मैथिलीम् ॥ बाष्पपर्याकुलमुखो हनुमान्व्यथितोऽभवत् ॥१२॥

चिन्तयति स्मेत्यर्थः ॥ ४३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अशीतितमः सर्गः ॥ ८० ॥

अथ मायासीतावध एकाशीतितमे—विज्ञाय त्वित्यादि । अत्र तृतीयाक्षरभूतो यकारो गायत्र्या एकोनविंशतितमाक्षरं । अष्टादशसहस्रश्लोकागताः ॥ १ ॥ तेषां कुम्भकर्णादीनां ॥ २ ॥ निकुम्भिलायां दुर्जयास्त्रबललाभाय होतुकामस्तावत्पर्यन्तं रामलक्ष्मणयोर्युद्धोद्योगं मन्दीकर्तुं मायामारिप्समाणो रामलक्ष्मणयोः कुपितत्वेन दुरासदत्वात् सीतास्वरूपाभिज्ञस्यान्यस्याभावाद्धनुमते मायां दर्शयितुं पश्चिमद्वारेण निर्गत इत्याह—स पश्चिमेनेत्यादिना ॥ ३ ॥ दृष्ट्वा विचिन्त्य । पश्चिमद्वारनिष्क्रान्तस्य रामलक्ष्मणदर्शनासंभवात् । मायां परव्यामोहकरीं शक्तिं । प्रादुष्करोत् प्रादुर्भावयामास ॥ ४ ॥ आवृत्य स्थितेन बलेन । युक्त इति शेषः । युक्ते रथे सीतां स्थाप्य ततस्तस्या वधमरोचयदिति संबन्धः ॥ ५—८ ॥ स ददर्शेत्यादिश्लोकद्वयमेकान्वयं । अमृजां अनुद्वर्तनां । अनलंकारामिति वा । "मृजू शौचालंकारयोः" इति धातोर्भिदादित्वादङ् । सर्वगात्रैः उपलक्षितां ॥ ९—१० ॥ अध्यवस्य निश्चित्य । विषण्ण इति शेषः । निश्चये हेतुमाह—बभूवेति ॥ ११ ॥ दृश्य दृष्ट्वा

ति० मायां परव्यामोहकरींशक्तिं । प्रादुष्करोत् प्रादुर्भावयामास । निकुंभिलांगन्तुकामःपश्चिमेनद्वारेणनिर्गच्छन् स्वगमनविघातकंरामलक्ष्मणयोर्युद्धोद्योगंदृष्ट्वातन्निवारणार्थंमायांप्रकटितवानित्याशयः ॥ स० तुशब्दोन्तर्गच्छन्निति विशेषार्थः ॥ ४ ॥ ति० इन्द्रजित्त्विति । इदंरात्रिशेषे परदिनेदशम्यांवेतिबोध्यं ॥ ५ ॥ स० यापूर्वंआचिरदृष्टा बहुतिथमवलोकिता । साजनकात्मजा वानेतिमुहूर्तं निरीक्ष्य आलोच्य तामध्यवस्य सैवेतिनिश्चित्य । अहिते दुःखे बभूव दुःखितोऽभूदितियावत् । अचिरदृष्टा अल्पकालव्यवधानेनदृष्टेतिवा ॥ ११ ॥

[पा०] १ क. ङ. ज. त्तस्मात्प्रविवेशपुरीं. ख. ग. घ. झ. ट. त्तस्मात्प्रविवेशपुरं. २ घ.—छ. झ. ञ. ट. निर्जगामाथरावणिः. ३ ङ. च. छ. झ. ञ. ट. सर्वेतेकाननौकसः.

अब्रवीत्तां तु शोकार्तां निरानन्दां तपस्विनीम् ॥ सीतां रथस्थितां दृष्ट्वा राक्षसेन्द्रसुताश्रिताम् ॥
किं समर्थितमस्येति चिन्तयन्स महाकपिः ॥ १३ ॥
सह तैर्वानरश्रेष्ठैरभ्यधावत रावणिम् ॥ १४ ॥
तद्वानरबलं दृष्ट्वा रावणिः क्रोधमूर्च्छितः ॥ कृत्वा विकोशं निस्त्रिंशं मूर्ध्नि सीतां परामृशत् ॥ १५ ॥
तां स्त्रियं पश्यतां तेषां ताडयामास रावणिः ॥ क्रोशन्तीं राम रामेति मायया योजितां रथे ॥१६॥
गृहीतमूर्धजां दृष्ट्वा हनुमान्दैन्यमागतः ॥ शोकजं वारि नेत्राभ्यामसृजन्मारुतात्मजः ॥ १७ ॥
तां दृष्ट्वा चारुसर्वाङ्गीं रामस्य महिषीं प्रियाम् ॥ अब्रवीत्परुषं वाक्यं क्रोधाद्रक्षोधिपात्मजम् ॥ १८ ॥
दुरात्मन्नात्मनाशाय केशपक्षे परामृशः ॥ ब्रह्मर्षीणां कुले जातो राक्षसीं योनिमाश्रितः ॥ १९ ॥
धिक्त्वां पापसमाचारं यस्य ते मतिरीदृशी ॥ नृशंसानार्य दुर्वृत्त क्षुद्र पापपराक्रम ॥
अनार्यस्येदृशं कर्म घृणा ते नास्ति निर्घृण ॥ २० ॥
च्युता गृहाच्च राज्याच्च रामहस्ताच्च मैथिली ॥ किं तवैषापराद्धा हि यदेनां हन्तुमिच्छसि ॥ २१ ॥
सीतां च हत्वा न चिरं जीविष्यसि कथंचन ॥ वधार्हकर्मणाऽनेन मम हस्तगतो ह्यसि ॥ २२ ॥
ये च स्त्रीघातिनां लोका लोकवध्येषु कुत्सिताः ॥ इह जीवितमुत्सृज्य प्रेत्य तान्प्रतिपत्स्यसे ॥२३॥
इति ब्रुवाणो हनुमान्सायुधैर्हरिभिर्वृतः ॥ अभ्यधावत संक्रुद्धो राक्षसेन्द्रसुतं प्रति ॥ २४ ॥
आपतन्तं महावीर्यं तदनीकं वनौकसाम् ॥ रक्षसां भीमवेगानामनीकं तु न्यवारयत् ॥ २५ ॥
स तां बाणसहस्रेण विक्षोभ्य हरिवाहिनीम् ॥ हरिश्रेष्ठं हनूमन्तमिन्द्रजित्प्रत्युवाच ह ॥ २६ ॥
सुग्रीवस्त्वं च रामश्च यन्निमित्तमिहागताः ॥ तां हनिष्यामि वैदेहीमद्यैव तव पश्यतः ॥ २७ ॥

॥ १२ ॥ अब्रवीदित्याद्यर्धत्रयमेकान्वयं । सीतां रथे स्थापितवतोस्य किं समर्थितं को वाभिप्राय इति चिन्तयन्नब्रवीत् । इतिर्वचनचिन्तनयोः साधारणः ॥ १३ ॥ सह तैरित्यर्धं । हनुमानिति शेषः ॥ १४ ॥ मूर्च्छितः व्याप्तः ॥ १५ ॥ पश्यतां तेषां । अनादरे षष्ठी । मायया परमोहनशक्त्या ॥ १६—१८ ॥ केशपक्षे केशसमूहे । "पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे" इत्यमरः । परामृशः अस्पृशः ॥ १९ ॥ धिगित्यादिसार्धश्लोक एकान्वयः । ईदृशी । जुगुप्सितेत्यर्थः । नृशंस निर्दय । अनार्य असज्जन । दुर्वृत्त दुराचार । क्षुद्र अल्पबुद्धे । पापः अधर्म्यः पराक्रमो यस्य स पापपराक्रमः । उक्तमनार्यत्वं कार्यतो दर्शयति—अनार्यस्येति । ईदृशं जुगुप्सितं कर्म अनार्यस्यैव भवति । हे निर्घृण निर्दय, ते घृणा जुगुप्सा नास्ति । "जुगुप्सा करुणा घृणा" इत्यमरः ॥ २० ॥ अपराधिषु घृणा न कर्तव्या । अत एव एनं हन्मीत्याशङ्क्यापराधलेशोप्यस्यां नास्तीत्याह—च्युतेति । गृहात् स्वसदनात् । चकारात् परिचारकेभ्यश्च । अनेन बन्धुमुखादपराधकरणं नास्तीत्युक्तं । राज्यात् राज्योपकरणाच्च । अनेन सेनामुखेन नापराध इत्युक्तं । रामहस्तात् रक्षकहस्ताच्च । तन्मुखादप्यपराधप्रसक्तिर्नास्तीत्युक्तं । मैथिली आचारप्रधानकुले जाता । अनेनापराधस्वरूपमेव न जानातीत्युक्तं । यत् येनापराधकार्येण । एनां हन्तुमिच्छसि तादृशं किं प्रयोजनमुद्दिश्य । अपराद्धा अपराधं कृतवती । कर्तरि क्तः ॥ २१—२२ ॥ हे लोकवध्य, एषु चतुर्दशलोकेषु । स्त्रीघातिनां ये कुत्सिता लोकाः तान् इह जीवितमुत्सृज्य प्रेत्य यातनाशरीरं प्राप्य । प्रतिपत्स्यसे । प्राप्स्यसीत्यर्थः ॥ २३ ॥ सायुधैः सहननसाधनैः ॥ २४ ॥ अनीकं अनीकं च ॥२५—

ति० मूर्ध्नि तत्स्थेकेशपाशे । स्पृष्ट्वेतिशेषः ॥ १५ ॥ ति० येलोकवध्यैः चोरादिभिरपिकुत्सिताः अतिदुःखितयापरिहृताः ॥२३॥ ति० आपतन्तमितिलिङ्व्यत्ययआर्षः ॥ ती० रक्षसामनीकंकर्तृ ॥ २५ ॥

[पा०] १ ग. घ. सीतांप्रधर्षयत्. क. सीतांप्रकर्षयत्. ङ. च. छ. झ. ञ. ट. सीतामकर्षयत्. २ झ. ञ. लोकवध्यैश्च.

इमां हत्वा ततो रामं लक्ष्मणं त्वां च वानर ॥
सुग्रीवं च वधिष्यामि तं चानार्यं विभीषणम् ॥ २८ ॥
न हन्तव्याः स्त्रियश्चेति यद्भवीषि प्लवङ्गम ॥ पीडाकरममित्राणां यत्स्यात्कर्तव्यमेव तत् ॥ २९ ॥
[ताटकाया वधं रामः किमर्थं कृतवान्पुरा ॥ तदहं हन्मि रामस्य महिषीं जनकात्मजाम्] ॥ ३० ॥
तमेवमुक्त्वा रुदतीं सीतां मायामयीं तदा ॥ शितधारेण खड्गेन निजघानेन्द्रजित्स्वयम् ॥ ३१ ॥
यज्ञोपवीतमार्गेण भिन्ना तेन तपस्विनी ॥ सा पृथिव्यां पृथुश्रोणी पपात प्रियदर्शना ॥
तामिन्द्रजित्स्वयं हत्वा हनुमन्तमुवाच ह ॥ ३२ ॥
मया रामस्य पश्येमां कोपेन च निषूदिताम् ॥ एषा विशस्ता वैदेही विफलो वः परिश्रमः ॥ ३३ ॥
ततः खड्गेन महता हत्वा तामिन्द्रजित्स्वयम् ॥ हृष्टः स रथमास्थाय विननाद महास्वनम् ॥ ३४ ॥
वानराः शुश्रुवुः शब्दमदूरे प्रत्यवस्थिताः ॥ व्यादितास्यस्य नदतस्तदुर्गे संश्रितस्य च ॥ ३५ ॥
तथा तु सीतां विनिहत्य दुर्मतिः प्रहृष्टचेताः स बभूव रावणिः ॥
तं हृष्टरूपं समुदीक्ष्य वानरा विषण्णरूपाः सहसा प्रदुद्रुवुः ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकाशीतितमः सर्गः ॥ ८१ ॥

द्व्यशीतितमः सर्गः ॥ ८२ ॥

इन्द्रजिता मायासीताच्छेदनानन्तरं हनुमतावानरान्प्रति सीतानिधनाद्युद्धस्यवैफल्योक्त्या प्रतिनिवर्तनपूर्वकं तैस्सह रामसमीपगमनम् ॥ १ ॥ अत्रान्तरेलब्धावकाशेनेन्द्रजिता निकुंभिलामेत्ययागारंभः ॥ २ ॥

श्रुत्वा तु भीमनिर्ह्रादं शक्राशनिसमस्वनम् ॥ वीक्षमाणा दिशः सर्वा दुद्रुवुर्वानरर्षभाः ॥ १ ॥
तानुवाच ततः सर्वान्हनुमान्मारुतात्मजः ॥ विषण्णवदनान्दीनांस्त्रस्तान्विद्रवतः पृथक् ॥ २ ॥
कस्माद्विषण्णवदना विद्रवध्वे प्लवङ्गमाः ॥ त्यक्तयुद्धसमुत्साहाः शूरत्वं क्वनु वो गतम् ॥ ३ ॥
पृष्ठतोऽनुव्रजध्वं मामग्रतो यान्तमाहवे ॥ शूरैरभिजनोपेतैरयुक्तं हि निवर्तितुम् ॥ ४ ॥

---

२८ ॥ न हन्तव्या इति यत् ब्रवीषि तत्रोत्तरं शृण्विति वाक्यशेषः ॥ २९—३१ ॥ यज्ञोपवीतमार्गेण भिन्ना । मार्गशब्दः प्रकारवचनः । यज्ञोपवीतधारणप्रकारेण भिन्नेत्यर्थः । यज्ञोपवीतमादाय भिन्नेति पाठान्तरं । पूर्वं मूर्धजेषु गृहीतामादाय । यज्ञोपवीतभिन्ना यज्ञोपवीतं यथा भवति तथा भिन्ना । यज्ञोपवीतप्रकारेण भिन्नेत्यर्थः ॥ ३२—३४ ॥ व्यादितास्यस्य व्याक्तास्यस्य । तदुर्गे व्यूहीकृतराक्षसपरिवेष्टनरूपं ॥ ३५ ॥ हृष्टरूपं अत्यन्तहृष्टं । विषण्णरूपाः अत्यन्तं विषण्णाः ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकाशीतितमः सर्गः ॥ ८१ ॥

अथेन्द्रजितो निकुम्भिलायां होमारम्भः—श्रुत्वेत्यादि ॥ शक्राशनिसमस्वनं शक्राशनिस्वनसममित्यर्थः ॥ १—२ ॥ विद्रवध्वे विद्रवथ । आत्मनेपदमार्षं ॥ ३ ॥ अनुव्रजध्वं अनुव्रजत । पदव्यत्ययआर्षः

रामानु० रामस्येमां रामसंबन्धिनीं । राममहिषीमितियावत् ॥ ३३ ॥ ति० तदुर्गे खेचररथरूपंदुर्गे ॥ ३५ ॥ इत्येकाशीतितमः सर्गः ॥ ८१ ॥

[पा०] १ अयंश्लोकः क. ख. ग. च. छ. ञ. पाठेषुदृश्यते. २ ङ. छ. झ. ञ. ट. पश्येमांप्रियांशस्त्रनिषूदितां. ख. पश्येमांसीतांकोपेनसूदितां. ३ ख. तद्युद्धं. ४ ख. छ. ञ. ट. समभिप्रदुद्रुवुः.

एवमुक्ताः सुसंहृष्टा वायुपुत्रेण वानराः ॥ शैलशृङ्गाण्यगांश्चैव जगृहुर्हृष्टमानसाः ॥ ५ ॥
अभिपेतुश्च गर्जन्तो राक्षसान्वानरर्षभाः ॥ परिवार्य हनूमन्तमन्वयुश्च महाहवे ॥ ६ ॥
स तैर्वानरमुख्यैश्च हनुमान्सर्वतो वृतः ॥ हुताशन इवार्चिष्मानदहच्छत्रुवाहिनीम् ॥ ७ ॥
स राक्षसानां कदनं चकार सुमहाकपिः ॥ वृतो वानरसैन्येन कालान्तकयमोपमः ॥ ८ ॥
स तु कोपेन चाविष्टः शोकेन च महाकपिः ॥ हनुमान्रावणिरथेऽपातयन्महतीं शिलाम् ॥ ९ ॥
तामापतन्तीं दृष्ट्वैव रथः सारथिना तदा ॥ विधेयाश्वसमायुक्तः सुपूरमपवाहितः ॥ १० ॥
तमिन्द्रजितमप्राप्य रथस्थं सहसारथिम् ॥ विवेश धरणीं भित्त्वा सा शिला व्यर्थमुद्यता ॥ ११ ॥
पातितायां शिलायां तु रक्षसां व्यथिता चमूः ॥ निपतन्त्या च शिलया राक्षसा मथिता भृशम् ॥१२॥
तमभ्यधावञ्छतशो नदन्तः काननौकसः ॥ १३ ॥
ते द्रुमांश्च महावीर्या गिरिशृङ्गाणि चोद्यताः ॥ क्षिपन्तीन्द्रजितः संख्ये वानरा भीमविक्रमाः ॥१४॥
वृक्षशैलमहावर्षं विसृजन्तः प्लवङ्गमाः ॥ शत्रूणां कदनं चक्रुर्नेदुश्च विविधैः स्वरैः ॥ १५ ॥
वानरैस्तैर्महावीर्यैर्घोररूपा निशाचराः ॥ वीर्यादभिहता वृक्षैर्व्यवेष्टन्त रणाजिरे ॥ १६ ॥
स्वसैन्यमभिवीक्ष्याथ वानरार्दितमिन्द्रजित् ॥ प्रगृहीतायुधः क्रुद्धः परानभिमुखो ययौ ॥ १७ ॥
स शरौघानवसृजन्स्वसैन्येनाभिसंवृतः ॥ जघान कपिशार्दूलान्स बहून्दृष्टविक्रमः ॥ १८ ॥
शूलैरशनिभिः खड्गैः पट्टिशैः कूटमुद्गरैः ॥ ते चाप्यनुचरास्तस्य वानराञ्जघ्नुरोजसा ॥ १९ ॥
सस्कन्धविटपैः सालैः शिलाभिश्च महाबलः ॥ हनुमान्कदनं चक्रे रक्षसां भीमकर्मणाम् ॥ २० ॥
स निवार्य परानीकमब्रवीत्तान्वनौकसः ॥ हनुमान्सन्निवर्तध्वं न नः साध्यमिदं बलम् ॥ २१ ॥
त्यक्त्वा प्राणान्विवेष्टन्तो रामप्रियचिकीर्षवः ॥ यन्निमित्तं हि युध्यामो हता सा जनकात्मजा ॥२२॥
इममर्थं हि विज्ञाप्य रामं सुग्रीवमेव च ॥ तौ यत्प्रतिविधास्येते तत्करिष्यामहे वयम् ॥ २३ ॥
इत्युक्त्वा वानरश्रेष्ठो वारयन्सर्ववानरान् ॥ शनैः शनैरसंत्रस्तः सबलः सव्यवर्तत ॥ २४ ॥
ततः प्रेक्ष्य हनूमन्तं व्रजन्तं यत्र राघवः ॥ स होतुकामो दुष्टात्मा गतश्चैत्यनिकुम्भिलाम् ॥ २५ ॥
निकुम्भिलामधिष्ठाय पावकं जुहवेन्द्रजित् ॥ २६ ॥
यज्ञभूम्यां तु विधिवत्पावकस्तेन रक्षसा ॥ हूयमानः प्रजज्वाल मांसशोणितभुक्तदा ॥ २७ ॥
सोर्चिःपिनद्धो ददृशे होमशोणिततर्पितः ॥ सन्ध्यागत इवादित्यः सुतीव्रोऽग्निः समुत्थितः ॥२८॥

॥ ४—१० ॥ व्यर्थमुद्यता व्यर्थं प्रयुक्ता ॥११–१३॥ इन्द्रजितः इन्द्रजितं प्रति ॥ १४—१८ ॥ शूलैरशनिभिरिति अशनेरायुधत्वं शक्तिविशेषात् ॥१९–२०॥ न साध्यं साधयितुमयोग्यं । प्रयोजनाभावादिति-भावः । तदेवाह—त्यक्त्वेति ॥ २१—२४ ॥ चैत्यनिकुम्भिलां चैत्ये विद्यमानं निकुम्भिलाख्यदेवतायतनमित्यर्थः ॥ २५ ॥ निकुम्भिलामित्यर्थे । जुहव जुहाव ॥ २६—२७ ॥ होमशोणितं शोणितहोमः

स० धरणीं भित्त्वा व्यर्थं इन्द्रजिद्धननरूपार्थरहितंयथाभवतितथा । तामेव याविवेश साशिला पुनरुद्यता उपर्यायाता । एवं शिलायांपातितायांसत्यां रक्षसांचमूःसेनाव्यथिता अन्तर्गताचोत्थितापुनःकिंकरोतीतिव्यथांप्राप्ता । भृशंनिपतन्त्यातयाशिलयाच राक्षसाभृशंमथिताइत्यन्वयः । एकेतु व्यर्थमुद्यतासाशिलाऽभूत् धरणींचाविवेश । हनुमताशिलायांपातितायांरक्षसांचमूर्व्यथिता । तयाचनिपतन्त्याशिलयाराक्षसामथिताइत्यन्वयंमन्वते ॥११॥ स० नः इदंबलं साध्यं विनियोज्यंन । साध्यंफलमस्मास्वीतितद्वा ॥ २१ ॥ इदमर्थं पदमेकं । अयंचासावर्थश्चेदमर्थस्तं ॥२३॥ ति० दशम्यांपूर्वाह्णेनिकुंभिलागमनं । निकुंभिलां चैत्यंतदाख्यदेवालयंवटवृक्षंवा ॥ २५ ॥ ति० होमशोणितभुक् होमार्थमाहुतित्वेनप्रक्षिप्तशोणितभुक् ॥ २७ ॥ इतिद्व्यशीतितमःसर्गः ॥ ८२ ॥

[पा०] १ ठ. इदमर्थं. २ क. ख. ङ. च. छ. झ. ञ. ट. राघवौ. ३ ङ. झ. ट. ततोगत्वापावकः. ४ ग. ङ. छ. झ. ञ. ट. होमशोणित.

अथेन्द्रजिद्राक्षसभूतये तु जुहाव हव्यं विधिना विधानवित् ॥
दृष्ट्वा व्यतिष्ठन्त च राक्षसास्ते महासमूहेषु नयानयज्ञाः ॥ २९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे व्यशीतितमः ॥ ८२ ॥

व्यशीतितमः सर्गः ॥ ८३ ॥

हनुमन्मुखादिन्द्रजित्कृतमायासीतामारणश्रवणजशोकेनपतितमूर्च्छितंसुरभिसलिलसेकसमुद्बोधितंरामंप्रति लक्ष्मणेन नास्तिक्यवादाश्रयणेन धर्मादिनिरसनेनपौरुषप्रशंसनपूर्वकं पुनः क्षमापणेनरिपुवधप्रतिज्ञानेन समाश्वासनम् ॥ १ ॥

राघवश्चापि विपुलं तं राक्षसवनौकसाम् ॥ श्रुत्वा सङ्ग्रामनिर्घोषं जाम्बवन्तमुवाच ह ॥ १ ॥
सौम्य नूनं हनुमता क्रियते कर्म दुष्करम् ॥ श्रूयते हि यथा भीमः सुमहानायुधस्वनः ॥ २ ॥
तद्गच्छ कुरु साहाय्यं स्वबलेनाभिसंवृतः ॥ क्षिप्रमृक्षपते तस्य कपिश्रेष्ठस्य युध्यतः ॥ ३ ॥
ऋक्षराजस्तथोक्तस्तु स्वेनानीकेन संवृतः ॥ आगच्छत्पश्चिमं द्वारं हनुमान्यत्र वानरः ॥ ४ ॥
अथायान्तं हनूमन्तं ददर्शर्क्षपतिः पथि ॥ वानरैः कृतसङ्ग्रामैः श्वसद्भिरभिसंवृतम् ॥ ५ ॥
दृष्ट्वा पथि हनूमांश्च तदृक्षबलमुद्यतम् ॥ नीलमेघनिभं भीमं सन्निवार्य न्यवर्तत ॥ ६ ॥
स तेन हरिसैन्येन सन्निकर्षे महायशाः ॥ शीघ्रमागम्य रामाय दुःखितो वाक्यमब्रवीत् ॥ ७ ॥
समरे युध्यमानानामस्माकं प्रेक्षतां पुरः ॥ जघान रुदतीं सीतामिन्द्रजिद्रावणात्मजः ॥ ८ ॥
उद्भ्रान्तचित्तस्तां दृष्ट्वा विषण्णोऽहमरिन्दम ॥ तदहं भवतो वृत्तं विज्ञापयितुमागतः ॥ ९ ॥
तस्य तद्वचनं श्रुत्वा राघवः शोकमूर्च्छितः ॥ निपपात तदा भूमौ छिन्नमूल इव द्रुमः ॥ १० ॥
तं भूमौ देवसंकाशं पतितं प्रेक्ष्य राघवम् ॥ अभिपेतुः समुत्पत्य सर्वतः कपिसत्तमाः ॥ ११ ॥
असिञ्चन्सलिलैश्चैनं पद्मोत्पलसुगन्धिभिः ॥ प्रदहन्तमनासाद्य सहसाऽग्निमिवोच्छिखम् ॥ १२ ॥
तं लक्ष्मणोथ बाहुभ्यां परिष्वज्य सुदुःखितः ॥ उवाच राममस्वस्थं वाक्यं हेत्वर्थसंयुतम् ॥ १३ ॥
शुभे वर्त्मनि तिष्ठन्तं त्वामार्य विजितेन्द्रियम् ॥ अनर्थेभ्यो न शक्नोति त्रातुं धर्मो निरर्थकः ॥१४॥

॥ २८ ॥ नयानयज्ञाः शास्त्रीयाशास्त्रीयविदः ॥२९॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने व्यशीतितमः सर्गः ॥ ८२ ॥

अथ मायासीतावधमूर्च्छितरामसान्त्वनं व्यशीतितमे—राघवश्चापीत्यादि ॥ जाम्बवन्तं यदृच्छया सन्निहितं ॥ १ ॥ यथा यतः ॥ २—६ ॥ हरिसैन्येन सह । सन्निकर्षे । रामस्येति शेषः ॥ ७—११॥ उच्छिखं उद्गतज्वालं । "अर्चिर्हेतिः शिखा स्त्रियां" इत्यमरः ॥ १२ ॥ हेत्वर्थसंयुतं हेतुरुपपत्तिः । अर्थः प्रयोजनं । हेतुरूपोर्थोभिधेयो हेत्वर्थ इति वा ॥१३॥ एवं सीताहननश्रवणजनितमनवधिकमधैर्यमाश्रयन्तं राममाश्वासयितुं लक्ष्मणोन्वारुह्यवादेन धर्माधर्मयोः

शि० देवसंकाशं देवानामपिप्रकाशकंराघवं ॥ ११ ॥ ति० शुभइति । " तदयविपुलंवीरदुःखमिन्द्रजिताकृतम् । कर्मणा व्यपनेष्यामितस्मादुत्तिष्ठराघव " इतियुद्धायपौरुषावलंबनेनप्रोत्साहयिष्यन् केवलधर्मावलंबनमप्रयोजकमितिप्रतिपादयत्यनेनवाक्यसमूहेन ॥ स० शुभेवेदविहितेवर्त्मनिमार्गेतिष्ठन्तंत्वां अनर्थेभ्यः दुःखेभ्यः । त्रातुंधर्मोयस्मान्नशक्नोति तस्मान्निरर्थकइतियोजना ॥ आर्यविजितेन्द्रियमितिपदमेकंवा । आर्यार्थपित्रर्थविजितेन्द्रियं राज्यादिविषयस्पृहारहितत्वाद्विजितमनस्कं "नाहमर्थपरो-

[पा०] १ घ. राघवेन्द्रोपि. २ क. ग. घ. ङ. झ. ट. कृतंकर्मसुदुष्करं. ३ घ. महाभीमः. ४ ज. स्तथाकर्तुं. ख. ङ. च. छ. झ. ञ. ट. स्तथेत्युक्त्वा. ५ घ. न्यत्रतिष्ठति. ६ च. संनिवार्याभ्यवर्तत. ७ ङ. झ प्रेक्षतांचसः. ८ ग. घ. मसह्यंच. ९ ख. ङ.—ट. मिवोत्थितं.

भूतानां स्थावराणां च जङ्गमानां च दर्शनम् ॥ यथास्ति न तथा धर्मस्तेन नास्तीति मे मतिः ॥१५॥
यथैव स्थावरं व्यक्तं जङ्गमं च तथाविधम् ॥ नायमर्थस्तथा युक्तस्त्वद्विधो न विपद्यते ॥ १६ ॥

स्वरूपं खण्डयन्नीतिशास्त्रानुसारेण बलमेव प्रधानतयालम्ब्यतामित्याह—शुभइत्यादिना सर्गशेषेण ॥ पितृवाक्यपरिपालनादिरूपे शुभे वर्त्मनि तिष्ठन्तं । स्थिरतया तदनुतिष्ठन्तमित्यर्थः । विजितेन्द्रियं हस्तप्राप्तराज्यपरित्याजकयोः कैकेयीदशरथयोरुपर्यपि मनःकालुष्याभावेन विजितेन्द्रियं त्वां । निरर्थकः अवस्तुभूतः । अप्रामाणिक इति यावत् । शशविषाणवत् केवलव्यवहारमात्रावलम्बनो धर्मः अनर्थेभ्यः व्यसनेभ्यः । त्रातुं व्यसनानि निवारयितुं । न शक्नोति । "सति धर्मिणि धर्माश्चिन्त्यन्ते" इति न्यायादिति भावः । निरर्थकमेव त्वया पितृवचनपरिपालनमारब्धं । आदावेव मयोक्तमिति भावः । धर्म इत्युपलक्षणं । अधर्मोपि निरर्थकः सन् रावणमर्थेभ्यो न निवारयितुं शक्नोतीत्यर्थः ॥ १४ ॥ ननु कथमनयोरप्रामाणिकत्वमित्यपेक्षायां तत्र किं प्रत्यक्षं प्रमाणं उतानुमानं अथ शब्दो वा, नाद्य इत्याह—भूतानामिति ॥ स्थावराणां जङ्गमानां च भूतानां पदार्थानां । यथा दर्शनं प्रत्यक्षत उपलम्भनं अस्ति । तथा धर्माधर्मयोः दर्शनं न अस्तीत्यनुषङ्गः । तेन अदर्शनेन । धर्मोऽधर्मश्च नास्तीति मे मतिः निर्णयः ॥ १५ ॥ उक्तमेवार्थं प्रत्यक्षानुग्राहकेण तर्केण द्रढयति—यथेति ॥ यथैव स्थावरं व्यक्तं प्रत्यक्षत उपलब्धं । जङ्गमं च तथाविधं व्यक्तं भवति । अयं धर्माधर्मरूपोर्थः तथा युक्तो न भवति, तथा प्रत्यक्षो न भवतीत्यर्थः । यदि कश्चिद्धर्मोऽधर्मो वार्थः प्रत्यक्षसिद्धः स्यात् तर्हि स जङ्गमतया वा स्थावरतया दृश्येत । नच दृश्यते । तस्मान्नासौ प्रत्यक्ष इति भावः । किंच त्वद्विधो न विपद्यते । धर्मस्य प्रत्यक्ष-

देविलोकमावसुमुत्सहे । विद्धिमामृषिभिस्तुल्यंकेवलंधर्ममास्थितम् " इत्युक्तेःकेवलंधर्मावलंबिनंत्वां सधर्मः । उर्वीरितंपूर्ववत् । इदानींधर्मएवंविधोपिस्वसमयेरक्षतीतिसकर्तव्यएवेत्यान्तरङ्गिकभावपक्षेप्यन्वेतुंशक्यतेश्लोकः । तथाहि । अनर्थेभ्यः एवंविधेभ्यः । धर्मस्त्वांत्रातुंशक्नोति । यतःस ननिरर्थकइति ॥१४॥ **ति०** ननुप्रामाणिकस्यधर्मस्यकथमनुपादेयत्वमित्याशङ्क्यतत्सद्भावेकिमनुमानं प्रमाणमुतप्रत्यक्षमितिद्वेधाविकल्प्य धर्मोस्ति फलदर्शनादित्यनुमानपक्षं फलादर्शनान्नास्तीतिपूर्वश्लोकेनिराकृत्येदानींप्रत्यक्षंनिराकर्तुमाह—भूतानामिति । भूतत्वं सत्यत्वं । भूतानां सत्यानामित्यर्थः । स्थावराणांजङ्गमानांचदर्शनंप्रत्यक्षंयथास्ति तथाधर्मस्यदर्शनंनास्तियतः तेनकारणेनधर्मोनास्तीतिमेमतिरितिसंबन्धः ॥ **ति०** एवंधर्मपदार्थमङ्गीकृत्य तस्यार्थत्वंनास्तीत्यनुभवात्प्रदर्श्य इदानींधर्मपदार्थएवनास्ति । फलानुमेयताहितस्योक्ता । फलंचसुखं । प्रकृतेचसुखान्वयव्यतिरेकयोर्धर्मेऽभावेननतेनतदनुमानमित्याह—भूतानामिति । स्थावराणांजङ्गमानांचपश्वादिरूपाणांभूतानांदर्शनं सुखापरोक्षदर्शनंयथास्तितथाधर्मोनास्ति असामर्थ्यादनधिकाराच्च । तस्माद्धर्मःसुखसाधनत्वव्याप्तोनेतिमेमतिः । जन्मान्तरादिकंनास्त्येवेतिबौद्धमतेनेयमुक्तिः । नहितंविनाजायमानस्यापि तत्करणकत्वमितिभावः । यत्तु यथास्थावरादीनांदर्शनात्तत्सत्तातथाधर्मस्यदर्शनाभावाद्धर्मोनास्तीतिव्याचक्षते । तन्न । योग्यानुपलंभस्यैवाभावसाधकत्वात् । धर्मस्यचपिशाचादिवदयोग्यत्वात् ॥ **स०** धर्मोवर्ततइतिप्रवादमात्रतस्तंसिद्धवत्कृत्यवैफल्यमात्रंतस्योक्त्वावस्तुतस्तु यतःसफलानुमेयस्तदेवनास्तीतिसएवनास्त्याह—भूतानामिति । स्थावराणां महीरुहादीनां । जङ्गमानां प्राणिनां । एतदादीनांभूतानां । यथाप्रत्यक्षतोदर्शनंयथास्तीतिसन्तः । एतेन तथाधर्मःप्रात्यक्षिकइतिसनास्त्येवेतिचार्वाकमतंप्रसञ्जयतोमेमतिः । यत्तुखयंसुखापरोक्षदर्शनंयथास्तीतिव्याख्याय यत्तु " यथास्थावरादीनांदर्शनात्तथाधर्मस्यदर्शनाभावाद्धर्मोनास्तीतिव्याचक्षते " तन्न । योग्यानुपलंभस्यैवाभावसाधकत्वाद्धर्मस्यपिशाचादिवदयोग्यत्वादितिनागोजिभट्टेनव्याख्यातंततुचार्वाकमतावलंबेनपूर्वपक्षप्रसञ्जनमेवतीर्थाभिप्रेतमितिनसमञ्जसमिवाश्रुतसुखशब्दाध्याहारेणाध्याहृतस्यापिस्थावरपदार्थान्वयायोग्यत्वेनमौलदर्शनपदास्वारस्याच्चाप्ययुक्तं । नतथादर्शनमित्येतावताधर्मस्तेत्वद्विषये न नास्तीतिमेमतिः । तेनपिशितलोचनानवगमेनधर्मोनास्तीतिमेमतिः । पूर्वपक्षमात्रंप्रसञ्जितं । वस्तुतस्तु कालसहायेव्यक्तोभवतिधर्मइतिभावः ॥१५॥ **ति०** उक्तमेवार्थंसतर्कंविशदयति—**यथैवेति** । स्थावरंयथैवव्यक्तं प्रत्यक्षतउपलब्धं जङ्गमंचतथाविधंव्यक्तंभवति । अयंधर्मरूपोर्थः तथायुक्तोनभवति । प्रत्यक्षोनभवतीत्यर्थः । तेननास्तीतिमेमतिरित्यनुषङ्गः । नन्वप्रत्यक्षत्वमात्रेणधर्मनिरासोनोपपद्यते । अतीन्द्रियस्यापिवस्तुनःसद्भावादित्याशङ्क्यबाधकतर्कंणनिराकरोति—**त्वद्विधइति** । अतीन्द्रियोपिधर्मोयदिस्यात् तर्हित्वद्विधः नविपद्यते नविपद्येत । नचैवं तस्मान्नास्ति धर्मइत्यर्थः ॥ **ति०** यथा यस्मात् स्थावरंव्यक्तं धर्मप्रवक्तिरहितमपिसुखीतिव्यक्तंतथाविधं स्थावरवद्धर्मानधिकृतंजङ्गमंपश्वाद्यपि सुखीतिव्यक्तं । एतेनव्यतिरेकःखण्डितः । अन्वयमपिखण्डयति । नतथायुक्तः अयमर्थःसुखरूपोन । सर्वात्मनाधर्मयुक्तस्त्वद्विधो धर्मस्यसुखान्वये नविपद्यते नविपन्नःस्यात् । दृश्यतेचविपत्तिरित्यन्वयोपिनास्ति । अनेनतदंशेजन्मान्तरीयधर्मकल्पनापिपरास्ता ।

यद्यधर्मो भवेद्भूतो रावणो नरकं व्रजेत् ॥ भवांश्च धर्मयुक्तो वै नैवं व्यसनमाप्नुयात् ॥ १७ ॥
तस्य च व्यसनाभावाद्व्यसनं च गते त्वयि ॥ धर्मो भवत्यधर्मश्च परस्परविरोधिनौ ॥ १८ ॥
धर्मेणोपलभेद्धर्ममधर्मं चाप्यधर्मतः ॥ यद्यधर्मेण युज्येयुर्येष्वधर्मः प्रतिष्ठितः ॥ १९ ॥
यदि धर्मेण युज्येरन्नाधर्मरुचयो जनाः ॥ धर्मेण चरतां धर्मस्तथा चैषां फलं भवेत् ॥ २० ॥
यस्मादर्था विवर्धन्ते येष्वधर्मः प्रतिष्ठितः ॥ क्लिश्यन्तेऽधर्मशीलाश्च तस्मादेतौ निरर्थकौ ॥ २१ ॥
वध्यन्ते पापकर्माणो यद्यधर्मेण राघव ॥ वधकर्महतो धर्मः स हतः कं वधिष्यति ॥ २२ ॥
अथवा विहितेनायं हन्यते हन्ति वा परम् ॥ विधिरालिप्यते तेन न स पापेन कर्मणा ॥ २३ ॥

सिद्धतया सद्भावे त्वद्विधः धार्मिकः विपत्तिं नाप्नुयात् । रावणश्चार्थं न प्राप्नुयादित्यपि द्रष्टव्यं ॥ १६ ॥ नाप्यनुमानं धर्माधर्मयोः प्रमाणमित्याह—यदीति ॥ यद्यधर्मो भूतो भवेत् तदा अधर्मयुक्तो रावणः नरकं व्रजेत् व्यसनं गच्छेत् । यदि धर्मो भूतो भवेत् तदा धर्मयुक्तो भवांश्च एवं व्यसनं नाप्नुयात् । व्यसनाव्यसनरूपकार्याभ्यां हि धर्माधर्मावनुमेयौ । न तथा संभवति । धार्मिकतयाऽभिमते त्वयि व्यसनदर्शनात् । अधार्मिकतयाभिमते रावणे व्यसनादर्शनाच्च । साध्यवति पक्षे हेत्वभावात् स्वरूपासिद्धो हेतुरित्यर्थः ॥ १७ ॥ विरुद्धत्वाच्च सुखदुःखयोः कार्ययोर्न धर्माधर्मानुमापकत्वमित्याह—तस्य चेति ॥ तस्य चाधर्मिष्ठस्य रावणस्य व्यसनाभावात् । व्यसनाभावशब्देन सुखं लक्ष्यते । सुखसद्भावादित्यर्थः । त्वयि च परमधार्मिके व्यसनं दुःखं । गते सति धर्मः अधर्मो भवति अधर्मफलप्रदो भवति । चकारादधर्मोऽपि धर्मफलाभ्युदयप्रदो भवतीति लभ्यते । अतएव परस्परविरोधिनौ स्वाभावव्याप्तहेतुकावित्यर्थः ॥ १८ ॥ व्यभिचाराद्व्याप्यत्वासिद्धत्वाद्वा न ताभ्यां तदनुमानमित्याह—धर्मेणेत्यादिना निरर्थकावित्यन्तेन ॥ उपलभेदित्यत्र काकुः । धर्मेण धर्मानुष्ठानेन धर्मं धर्मफलं सुखं । उपलभेत् । अधर्मतः अधर्मानुष्ठानेन । अधर्मफलं दुःखं उपलभेत् । उपलभेतेति मन्यसे किमित्यर्थः । एवमनूद्य तत्र दूषणमाह—यदीति । येष्वधर्मः प्रतिष्ठितः । ये अधार्मिका इति यावत् । ते अधर्मेण अधर्मफलेन । यदि युज्येयुः युज्येरन् । नाधर्मरुचयो जनाः । धर्मरुचय इति यावत् । "द्वौ नञौ प्रकृतमर्थं गमयतः" इति न्यायात् । ते धर्मेण धर्मफलेन । यदि युज्येरन्, तदा धर्मेण चरतामेषां जनानां । धर्मः धर्मफलं सुखं । भवेत् । चकारात् अधर्मेण चरतां दुःखं भवेदिति सिद्धम् । न चैवमित्याह—यस्मादिति । अनेन च हिताहितप्राप्तिलक्षणकार्ययोरनियतत्वेन व्याप्यभावान्न ताभ्यां धर्माधर्मावनुमातुं शक्याविति व्याप्यत्वासिद्धिर्व्यभिचारो वा दर्शितः ॥ १९—२१ ॥ शब्दोपि न धर्माधर्मयोः प्रमाणमित्याह—वध्यन्त इति ॥ हे राघव । पापकर्माणः पापिनः । अधर्मेण कर्मरूपेण । वध्यन्ते यदि बाध्यन्ते चेत् । वधकर्म वधकर्मरूपोऽधर्मः । धर्मस्याप्युपलक्षणं । हतः त्रिक्षणावस्थायित्वेन ध्वस्तो भवति । शब्दबुद्धिकर्मणां त्रिक्षणावस्थायित्वात् । हतः सः कं वधिष्यति । कं श्रेयसि नियोक्ष्यतीत्यपि द्रष्टव्यं । धर्माधर्मयोः क्रियारूपयोः क्षणिकत्वेन कालान्तरभाविफलजनकत्वासंभवात् बाधितविषयो वेदो ग्रावप्लवनादिवाक्यवदुपचरितार्थक इतिभावः ॥ २२ ॥ कर्मणः क्षणध्वंसित्वेपि तदाराधिता देवतैव फलप्रदेत्यत्राह—अथ वेति ॥ विहितेन विधिना । देवतयेत्यर्थः । अयं जनः । हन्यते बाध्यते । परं अन्यं । हन्ति वा बाधते वा । एवं यदि तेन पापेन कर्मणा पापफलभूतदुःखेन । विधिरेव आलिप्यते संबध्यते । सः प्रयोज्यकर्ता

साधनत्वसिद्धावेवतत्कल्पनावसरात् । अतोऽयमर्थोधर्मरूपेन नास्त्येव ॥ १६ ॥ **ति०** इदानींधर्मादिस्वरूपमेवदुर्निरूपमितिवक्तुं किंव्यापाररूपौवातज्जन्यातिशयरूपौवेतिविकल्पे नाद्यइत्याह—वध्यन्तइति । पापकर्माणःपुरुषाः यद्यधर्मेणक्रियाशरीरेणवध्यन्ते तदाक्रियायास्त्रिक्षणावस्थायित्वाच्चतुर्थक्षणेखतएववधकर्मणा नाशक्रिययाहतोनष्टोऽधर्मःस्वयंहृतः असन्भूत्वाकंहन्तव्यंवधिष्यति । यद्वा वधकर्मरूपोधर्मः चतुर्थक्षणेहतः नष्टः । स्वयमसन्सन्कंवधिष्यति । वधकर्मेत्युपलक्षणं ॥ २२ ॥ **ति०** द्वितीयंदूषयति **अथवेति** । विहितेन विहितश्येनाद्यनुष्ठानजातिशयेनान्यदीयेन । अयंपुरुषोहन्यते । स्वीयेनवाऽन्यंहन्ति । एवंसतिविधिः

[पा०] १ ङ. ञ. ट. धर्मसंयुक्तोनैव. २ क. ङ. ञ. ट. चागते.

अदृष्टप्रतिकारेण त्वव्यक्तेनासता सता ॥ कथं शक्यं परं प्राप्तुं धर्मेणारिविकर्शन ॥ २४ ॥
यदि सत्स्यात्सतां मुख्य नासत्स्यात्तव किंचन ॥ त्वया यदीदृशं प्राप्तं तस्मात्सन्नोपपद्यते ॥ २५ ॥
अथवा दुर्बलः क्लीबो बलं धर्मोऽनुवर्तते ॥ दुर्बलो हृतमर्यादो न सेव्य इति मे मतिः ॥ २६ ॥
बलस्य यदि चेद्धर्मो गुणभूतः पराक्रमे ॥ धर्ममुत्सृज्य वर्तस्व यथा धर्मे तथा बले ॥ २७ ॥

नालिप्यते । अस्य न्यायस्य पुण्यकर्मण्यपि तुल्यत्वात् सुखेनापि प्रयोज्यो न संबध्यते । यदि हि सत्कर्माराधितः असत्कर्माप्रीतो वा ईश्वरः धर्माधर्मशब्दवाच्यः स्यात्, तर्हि स एव सुखदुःखभागी कारयिता स्यात् । न तु प्रयोज्य इति भावः ॥ २३ ॥ ननु यथा स्वतन्त्रो राजा लीलार्थं कामपि मर्यादां प्रवर्त्य तदनुवर्तिनमनुगृह्णाति तदतिलङ्घिनं निगृह्णाति च । तथेश्वरोपि स्वाज्ञारूपकर्मानुष्ठायिनमनुगृह्णाति तदननुष्ठायिनं विपरीतानुष्ठायिनं च निगृह्णातीति चेन्न । स हि किं स्वार्थमनुगृह्णाति उत परार्थं । नाद्यः । अवाप्तसमस्तकामस्यावाप्तव्याभावात् । न द्वितीयः । कंचन विरिंचनं कंचनाकिंचनं च वितन्वतस्तस्य पक्षपातनैर्घृण्यापत्तेः । तत्तत्कर्मानुगुणतया सृष्टेर्न पक्षपातादिप्रसक्तिरिति चेन्न । समीचीने कर्मण्यप्रवर्तयतस्तस्य सर्वज्ञस्य निर्दयत्वापत्तेः । अनादिकर्मप्रवाहकृतपूर्वपूर्वकर्मानुगुण्येन पुनः पुनः सदसतोः कर्मणोः पुरुषं प्रवर्तयतीति चेत्, तर्हि कस्यचिन्नियमेन दुःखं कस्यचिन्नियमेन सुखं च स्यात् । नच तथा दृश्यते, अनियमदर्शनात् । तर्हि कर्मजन्योऽपूर्वरूपोतिशयः फलप्रदो धर्म इत्याशङ्क्याह—अदृष्टेति ॥ हे अरिविकर्शन । प्रतिक्रियते परप्रतिपत्तिर्जन्यत इति प्रतिकारो लिङ्गं । अदृष्टप्रतिकारेण अदृष्टलिङ्गेन अनुमानागम्येनेत्यर्थः । अव्यक्तेन अप्रत्यक्षेण । असता सता असद्भूतेन अग्नीन्द्रादिवदर्थवादवाक्येनागम्येन । धर्मेण अपूर्वाख्येन परं श्रेयः कथं प्राप्तुं शक्यं । न शक्यमित्यर्थः ॥ २४ ॥ उक्तमेवार्थं पुनस्तर्केण दृढीकरोति—यदीति ॥ हे सतां मुख्य । यदि सत् स्यात् । धर्माख्यं वस्त्विति शेषः । धार्मिकस्य तव असत् अनिष्टं । किंचन न स्यात् । तर्कस्य विपर्यये पर्यवसानमाह—त्वयेति । यत् यस्मात्कारणात्, त्वया ईदृशं दुःसहं व्यसनं प्राप्तं । तस्मात्सन्नोपपद्यते । असदेवभवतीत्यर्थः । कार्यानुपलम्भादपूर्वाख्यधर्मो न कल्प्यइत्यर्थः ॥ २५ ॥ ननु न कार्यानुपलम्भमात्रादर्थस्याभावो निश्चेतुं शक्यः, अतीन्द्रियोच्छेदापत्तेः । किंतु सहकारिसंपत्तौ सत्यां कार्यानुपलम्भः कारणत्वाभावं साधयति । सहकारि च पौरुषं । अतस्तदभावात्फलानुदय इत्यत आह—अथवेति । दुर्बलः बलरहितः निरपेक्षतया कार्याक्षमः । अतएव क्लीबः कातरः स्वतःकार्यकरणासमर्थः । धर्मः बलमनुवर्तते । कार्योत्पादनेपौरुषमपेक्षत इत्यर्थः । एवंचेद्दुर्बलो हृतमर्यादः स्वातन्त्र्येण फलप्रदत्वमर्यादाहीनो धर्मः प्राधान्येन न सेव्य इति मे मतिः ॥ २६ ॥ प्रधानभूतं बलमेवाश्रयणीयमित्याह—बलस्येति ॥ पराक्रमे कार्यसाधनेविषये, बलस्य धर्मः गुणभूतो यदि चेत् उपसर्जनभूतो यदि स्यात्, तदा यथेदानीं धर्मे वर्तसे तथा

विहितानुष्ठानजातिशयएव तेनपापेनकर्मणाहत्यारूपेणलिप्यते । नसकर्मानुष्ठातापुरुषः । हत्यायास्तदकर्तृकत्वात् । नहिखोत्पादितपुत्रकृतहत्यापितरंस्पृशति । एवंतस्यकर्मजातिशयस्यातत्रयमभ्युपेत्यात्मालेपउक्तः । एतेन कर्मकरणसंतुष्टस्येश्वरस्यफलदत्वमित्यपास्तं । तस्यैवलेपप्रसङ्गात् । अत्रपक्षेविहितेनेत्यस्यविहितकर्मसंतुष्टेनेश्वरेणेत्यर्थः ॥ २३ ॥ ति० एवमतिशयस्यघातकत्वमङ्गीकृत्यात्मालेपउक्तः । इदानींघातकत्वमेवनास्तीत्याह—अदृष्टेति । अदृष्टप्रतिकारेण अचेतनतयाज्ञातस्वकर्तव्यशत्रुप्रतीकारेण । अथस्वाश्रयचेतनद्वारातज्ज्ञानमितिचेत्तत्राह—अव्यक्तेन स्वाश्रयभूतात्मनोप्रत्यक्षतयाप्रत्यक्षरूपाव्यक्तेन । अतएव असता असत्कल्पेनसतावर्तमानेनापिधर्मेणकर्मजन्यातिशयेनकथंपरंवध्यस्वरूपंप्राप्तुंशक्यं । अप्राप्यपरंहन्तीतिचेदसंबन्धाविशेषात्सर्वहननप्रसङ्गः । अयंहन्तृकृतकर्मजातिशयोवध्यनिष्ठएवेतिचेदन्यधर्मेणान्यस्याधार्मिकत्वप्रसङ्गः । कर्तृनिष्ठत्वेतूक्तदोषइतिभावः ॥ शि० नदृष्टः अचेतनत्वादज्ञातःप्रतिकारः विधातनंयेन । अतएवाव्यक्तेन अप्रकाशमानेन । अतएवासता असत्सदृशेन । सता विद्यमानेनापि धर्मेण कर्मजन्यातिशयरूपविशिष्टेनपरंवध्यादिस्वरूपंप्राप्तुंज्ञातुमित्यर्थः । कथंशक्यं नशक्यमित्यर्थः ॥ २४ ॥ ति० तुल्यन्यायाच्छुभकर्मजातिशयोप्यसभ्येवेतिध्वनितमर्थंतर्केणदृढीकरोति—यदीति । हेसतांमुख्य सत्पुरुषश्रेष्ठ यदिसत्कर्मजन्यमदृष्टंसत्स्यात् तदा तव किञ्चन किंचिदपि । असत् अशुभं दुःखंस्यात् । उक्तस्यतर्कस्यविपर्ययपर्यवसानमाह । त्वयाचेदृशंदुःखंप्राप्तं । तस्मात्तत् सदि-

[पा०] १ च. धर्मेणरिपुकर्शन.

अथ चेत्सत्यवचनं धर्मः किल परंतप ॥ अनृतस्त्वय्यकरुणः किं न बद्धस्त्वया पिता ॥ २८ ॥
यदि धर्मो भवेद्भूतो अधर्मो वा परन्तप ॥ न स्म हत्वा मुनिं वज्री कुर्यादिज्यां शतक्रतुः ॥ २९ ॥
अधर्मसंश्रितो धर्मो विनाशयति राघव ॥ सर्वमेतद्यथाकामं काकुत्स्थ कुरुते नरः ॥ ३० ॥
मम चेदं मतं तात धर्मोऽयमिति राघव ॥ धर्ममूलं त्वया छिन्नं राज्यमुत्सृजता तदा ॥ ३१ ॥

धर्ममुत्सृज्य धर्मप्राधान्यमुत्सृज्य । धर्म इव बलेपि वर्तस्व ॥ २७ ॥ एवं सामान्येन धर्मे दूषितेपि सत्यवचनरूपधर्मविशेषस्य रामेण प्राधान्येनानुरोधात्तत्पृथग्दूषयति—अथेति ॥ हे परंतप । सत्यवचनं धर्मः किल अथ चेदेवं चेत्, अनृतः त्वामभिषेक्ष्यामीत्युक्त्वा तदकरणेन सत्यत्वरहितः । अनृतमिति पाठे वदन्निति शेषः । त्वयि सकलकल्याणगुणाश्रये ज्येष्ठपुत्रे । अकरुणः राज्याद्वनंप्रति निष्कासनान्निर्दयः । अतो बन्धयोग्यः पिता त्वया पितृवचनं करिष्यामीति कृतप्रतिज्ञेनत्वया । किंन बद्धः किं न नियमितः । सर्वप्रजासन्निधौ राममभिषेक्ष्यामीत्युक्तं प्राथमिकं पितृवचनं परित्यज्य पाश्चात्यं वनगमनविषयं पितृवचनं करिष्यामीति कृतप्रतिज्ञेन त्वया पालयता सत्यवचनमपि सम्यक् पालितमितिभावः ॥ २८ ॥ धर्माधर्मयोः सद्भावेपि राज्ञा धर्मोऽधर्मो वा नियमेन नानुष्ठातव्यः । किंतु तत्तत्कालप्रयोजनानुगुण्येनोभावपि कर्तव्यावित्यत्र शिष्टाचारं प्रमाणयति—यदीति ॥ भूतो अधर्मो वेत्यत्र वृत्तानुरोधाय सन्ध्यभावः । यदि धर्मो भवेद्भूतः । यदि केवलं धर्म एवानुष्ठेयत्वेन प्राप्तो भवेत् । तदा वज्री शतक्रतुः मुनिं विश्वरूपं हत्वा इज्यां न कुर्यात्, किन्त्विज्यामेव कुर्यात् । अधर्मो वा । केवलमधर्मो वा । यद्यनुष्ठेयः स्यात्, तदा शतक्रतुः वज्री मुनिं हत्वा इज्यां न कुर्यात्, किंतु हननमेव कुर्यात् । क्षत्रधर्मनिष्ठेनेन्द्रेण धर्माधर्मयोरनुष्ठितत्वाद्राज्ञा यथाकालमुभयमपि कर्तव्यमिति भावः । यान्येतानि देवक्षत्राणीन्द्रो वरुणः पर्जन्यो यम ईशान इतीन्द्रस्य क्षत्रियत्वं श्रूयते ॥ २९ ॥ इदानीमभ्युपगमवादेनैकान्ततो धर्माधर्मयोरेकस्याश्रयणमनर्थपर्यवसायीत्याह—अधर्मेति ॥ अधर्मसंश्रितो धर्मः अधर्मसहितो धर्मः । धर्मश्चाधर्मश्चेत्यर्थः । विनाशयति कर्तारमिति शेषः । नियमेन पृथक् पृथगनुष्ठीयमानौ धर्माधर्मौ कर्तारं विनाशयतः । अत एवैतत्सर्वं धर्माधर्मात्मकं सर्वं कर्मजातं यथाकामं तत्तत्कालोचितं । अनियमेन नरः कुरुते । कुर्यादित्यर्थः ॥ ३० ॥ अस्मिन्नर्थे न मे संदेह इत्याह—ममेति ॥ हे तात अनुकम्प्य । "तातोनुकम्प्ये पितरि" इति रत्नमाला । इदं याथाकाम्येनाचरणं यदस्ति । अयं धर्म इति मम

तिनोपपद्यते ॥ २५ ॥ **ति०** किंच सत्यस्यापिधर्मत्वाद्धर्मपक्षपातिनाभवतासत्यधर्मएवादौकिमितिसम्यङ्नानुष्ठितः । येनैवमनर्थोनवृत्तःस्यादित्याह—अथचेदिति । अथ पक्षान्तरे । हेपरंतप त्वयासत्यवचनं पितृवचनाङ्गीकाररूपसत्यपरिपालनंधर्मोनुष्ठीयतइति चेत्तदात्वयिज्येष्ठेउक्तस्याभिषेकवचनस्याकरणेयदनृतंराज्ञःप्राप्तं तेनानृतेनराजात्वयाविनाभूतः । मृतइतिशेषः । अतस्तेनराज्ञोऽभिषेककरणरूपसत्येनलंबद्धःकिंन भवेरितिशेषः । प्रथमोक्तराज्ञोभिषेकवचनरूपंसत्यंनपरिपालितं । तत्परिपालनेत्वयाविनाभूतत्वात्संभवेनपितृमरणंनस्यात् । एवमाद्यनर्थश्चनवृत्तःस्यादितिभावः । " अनृतंत्वय्यकरणेकिंनबद्धस्त्वयाविना " इतिसर्वत्रपाङ्क्तःपाठइतिकतकः । तीर्थस्तु " अनृतंत्वय्यकरुणःकिंनबद्धस्त्वयापिता " इतिपठित्वासत्यस्यधर्मत्वेत्वय्यभिषेकविषयमनृतंवदन्राज्यान्निष्कासनादकरुणःपितात्वयाकिंनबद्धइतिव्याचष्टे । तदयुक्तं । पितृबन्धनस्यसत्यवचनपरिपालनरूपत्वाभावात् ॥ **स०** अथखलुचेदिति निपातसमुदायोयद्यर्थे । हेपरंतप सत्यवचनंयदिधर्मस्तर्हिअनृतः नवियतेऽतंसत्यवचनंयस्यसतथा । सभायांत्वामभिषेक्ष्यामीतिवचनंदत्त्वावनंप्रतिप्रेषितवानित्यसत्यवचनः । सुकुमारशरीरःसीतयासहकथंप्रवेक्ष्यतीतित्वयित्वद्विषये अकरुणःपितादशरथः सत्यवाक्यत्वेनकर्तुंकिंनबद्धः । तत्प्रतिज्ञायाएवप्रथमत्वात् । यत्तुनागोजिभट्टेन "अनृतंत्वय्यकरणेकिंनबद्धस्त्वयाविना" इतिपाठान्तरंधरतातीर्थस्तु " अनृतस्त्वय्यकरुणःकिंनबद्धःपितात्वया " इतिपठित्वेत्यादिनासर्वमनूद्य तदयुक्तं पितृबन्धनस्यसत्यवचनपरिपालनरूपत्वाभावादितिदूषणं तदसंगतं । तस्यपितृबन्धनएवतात्पर्याभावात् । किंनबद्धः किमर्थंननियमितइतितेनोक्तत्वेनासदनुवादत्वात् ॥ २८ ॥ **ति०** यदिदमुक्तंयथोचितकालदेशमुभयमनुष्ठेयमितिममतं । नन्वेवंधर्मस्यतवापिसंमतत्वेकिमितिमेदुःखमतआह—धर्ममूलमिति । अर्थमूलंराज्यमुत्सृजतात्वया धर्मस्यमूलं अर्थरूपंछिन्नं । अतस्त्वंक्लेशवानितिभावः । यत्तुतीर्थेन ' अधर्मःसंश्रितोधर्मःकर्तारंविनाशयति । तस्माद्यथाकामंतत्कालौचित्येनोभयमप्यनुष्ठेयमिदमेव । यथाकाम्येनोभयाचरणमेवधर्मइतिममतं ।

[पा०] १ ङ. ञ. ट. अनृतंत्वय्यकरणे. २ च. ञ. ट. तदाछिन्नं. घ. त्वयालुप्तं. ख. तथाच्छिन्नं.

अर्थेभ्यो हि विवृद्धेभ्यः संवृत्तेभ्यस्ततस्ततः ॥ क्रियाः सर्वाः प्रवर्तन्ते पर्वतेभ्य इवापगाः ॥ ३२ ॥
अर्थेन हि वियुक्तस्य पुरुषस्याल्पतेजसः ॥ व्युच्छिद्यन्ते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा ॥ ३३ ॥
सोयमर्थं परित्यज्य सुखकामः सुखैधितः ॥ पापमारभते कर्तुं ततो दोषः प्रवर्तते ॥ ३४ ॥
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ॥
यस्यार्थाः स पुमाँल्लोके यस्यार्थाः स च पण्डितः ॥ ३५ ॥
यस्यार्थाः स च विक्रान्तो यस्यार्थाः स च बुद्धिमान् ॥
यस्यार्थाः स महाभागो यस्यार्थाः सं महागुणः ॥ ३६ ॥
अर्थस्यैते परित्यागे दोषाः प्रव्याहृता मया ॥ राज्यमुत्सृजता वीर येन बुद्धिस्त्वया कृता ॥ ३७ ॥
यस्यार्था धर्मकामार्थास्तस्य सर्वं प्रदक्षिणम् ॥ अधनेनार्थकामेन नार्थः शक्यो विचिन्वता ॥ ३८ ॥
हर्षः कामश्च दर्पश्च धर्मः क्रोधः शमो दमः ॥ अर्थादेतानि सर्वाणि प्रवर्तन्ते नराधिप ॥ ३९ ॥
येषां नश्यत्ययं लोकश्चरतां धर्मचारिणाम् ॥ तेऽर्थास्त्वयि न दृश्यन्ते दुर्दिनेषु यथा ग्रहाः ॥ ४० ॥

मतं सिद्धान्त इत्यर्थः । एवं प्रथमं धर्म एवाप्रामाणिक इत्युक्तं । पश्चात्कथंचित्प्रामाणिकत्वसंभवेपि न तस्य प्राधान्यमित्युक्तं । इदानीमप्राधान्येनापि धर्मस्तव न संभवति, मूलाभावादित्याह—धर्ममूलमित्यादिना । धर्मस्य मूलं कारणं अर्थरूपं, तदा प्राप्तकाले, राज्यमुत्सृजता त्वया छिन्नं । मूलच्छेदात्तव कथं धर्म इत्यर्थः ॥ ३१ ॥ तदेव धर्ममूलत्वमर्थस्य प्रतिपादयति—अर्थेभ्य इति ॥ ततस्ततः प्रजापालनाय प्रदेयषड्भागकरप्रदानादिकारणात् । संवृत्तेभ्यः प्राप्तेभ्यः । क्रमाद्विवृद्धेभ्योऽर्थेभ्यः सर्वाः क्रियाः यज्ञदानादिक्रियाः । प्रवर्तन्ते । पर्वतेभ्य इत्युपमानेन मूलधनव्ययमकृत्वैवार्थमूलतया दानादिक्रियाः कार्या इत्युक्तं ॥ ३२ ॥ व्यतिरेकमुखेनापि तदेव प्रतिपादयति—अर्थेनेत्यादिना ॥ कुसरितः अल्पसरितः ॥ ३३ ॥ न केवलमर्थपरित्यागेन धर्मासंभवः किंतु दोषप्राप्तिरपीत्याह—सोयमिति ॥ सुखैधितः पूर्वं सुखेन संवर्धितः । सोयं अर्थपरित्यागी अर्थं प्राप्तं परित्यज्य सुखकामः सन्, पापं अन्यायेनार्थार्जनं सुखसाधनभूतधनसंपादनार्थं स्तेयादिपापं आरभते । ततः तेन कर्मणा । दोषः प्रवर्तत इत्यर्थः ॥ ३४ ॥ यस्यार्थास्तस्य मित्राणीत्यादिश्लोकद्वयं क्वचित्पठ्यते ॥ पुमान् पुंस्त्ववान् । अन्यः स्त्रीप्रायइत्यर्थः । महाभागः महाभाग्यः । महागुणः शीलादिगुणवान् ॥ ३५—३६ ॥ अर्थस्य परित्यागे एते पूर्वोक्तगुणप्रतियोगिनो निर्मित्रत्वादयो दोषाः, प्रव्याहृताः स्पष्टमुक्ताः । राज्यमुत्सृजता त्वया येनगुणेन बुद्धिः अर्थपरित्यागविषया कृता तं गुणं जान इत्यर्थः । यद्वा राज्यमुत्सृजता त्वया । येन कारणेनार्थपरित्यागे बुद्धिः कृता तेन कारणेन एते दोषाः मया प्रव्याहृता इत्यर्थः ॥ ३७ ॥ धर्मकामार्थाः धर्मकामप्रयोजनानि । प्रदक्षिणं अनुकूलं । प्रतिष्ठितमिति वा पाठः । व्यतिरेकमुखेनाप्याह—अधनेनेति । अधनेन धनं विना अर्थकामेनापि । विचिन्वता अर्थार्जनव्यापारं कुर्वता पुरुषेण । अर्थः श्रेयः । न शक्यं न साधयितुं शक्यं । अव्ययमेतत् । " शक्यमरविन्दसुरभिः " इति प्रयोगात् ॥ ३८ ॥ न केवलमर्थकामावेव धनमूलौ, अन्येपि तथेत्याह—हर्ष इति ॥ प्रवर्तन्ते प्रकृष्टा निवर्तन्ते । शोभन्तइत्यर्थः । असतो निर्धनस्य शमदमौ हि धनलाभे निवर्तेते ॥ ३९ ॥ न केवलमामुष्मिकश्रेयःसाधनभूतोर्थः, किंतु ऐहिकश्रेयःसाधनं

इतिव्याख्यातं । तत्तूपहसनीयमेवव्युत्पन्नैरित्यलम् ॥ ३१ ॥ **ति०** अथार्थस्यधर्ममूलत्वमेवप्रतिपादयति । अर्थेभ्यइति । ततस्ततःसंवृत्तेभ्यः नानादेशादाहृतेभ्यः । अतएवप्रवृत्तेभ्योर्थेभ्यःसर्वाःक्रियाः योगप्रधानाः भोगप्रधानाश्चप्रवर्तन्ते । निष्कामतयाकृतायोगप्रधानाभवन्ति । सकामतयाकृताभोगप्रधानाइत्यर्थः ॥ ३२ ॥ **स०** चरतां " चर गतिभक्षणयोः" । गत्यर्थानांज्ञानार्थत्वाज्ज्ञानिनां । धर्मचारिणामपितेषामृष्यादिजनानांयेषामर्थानामभावादयंलोकः ऐहिकसुखं । नश्यति । तेऽर्थास्त्वय्यपिनदृश्यन्ते । चरतां भक्षयतांराक्षसानां । अयंलोकोजनः धर्मचारिणांतेषांयेभ्योनश्यति तेऽर्थास्त्वयिनदृश्यन्तइतिवा । दुर्दिनं मेघच्छन्नदिनं

[पा०] १ ङ. च. झ. ट. विमुक्तस्य. २ ख. सगुणान्वितः. ङ. च. छ. झ. ञ. ट. सगुणाधिकः. ३ क. ख. प्रतिष्ठितं.

त्वयि प्रव्राजिते वीर गुरोश्च वचने स्थिते ॥ रक्षसाऽपहृता भार्या प्राणैः प्रियतरा तव ॥ ४१ ॥
तदद्य विपुलं वीर दुःखमिन्द्रजिता कृतम् ॥ कर्मणा व्यपनेष्यामि तस्मादुत्तिष्ठ राघव ॥ ४२ ॥
उत्तिष्ठ नरशार्दूल दीर्घबाहो दृढव्रत ॥ किमात्मानं महात्मानमात्मानं नावबुध्यसे ॥ ४३ ॥
अयमनघ तवोदितः प्रियार्थं जनकसुतानिधनं निरीक्ष्य रुष्टः ॥
सहयगजरथां सराक्षसेन्द्रां भृशमिषुभिर्विनिपातयामि लङ्काम् ॥ ४४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्र्यशीतितमः सर्गः ॥ ८३ ॥

चतुरशीतितमः सर्गः ॥ ८४ ॥

रामसमीपमुपागतवता लक्ष्मणमुखाद्रामशोककारणमवगतवताविभीषणेन रामंप्रति इन्द्रजिन्निहतसीतायामायामयत्वोक्त्या समाश्वासनम् ॥ १ ॥ तथेन्द्रजितानिकुंभिलायांहोमारंभस्य होमसमाप्तौतस्यदुर्जयत्वस्यच निवेदनेन तद्वधाय लक्ष्मणप्रेषणप्रार्थना ॥ २ ॥

रामं[1] आश्वासयाने तु लक्ष्मणे भ्रातृवत्सले ॥ निक्षिप्य गुल्मान्स्वस्थाने तत्रागच्छद्विभीषणः ॥ १ ॥

चेति व्यतिरेकमुखेन प्रतिपादयन् तादृशोर्थस्त्वयि नास्तीत्याह—येषामिति ॥ येषां चरतामित्यनादरे षष्ठी । येषां चरतां यांश्चरतो विद्यमानानर्थाननादृत्य धर्मचारिणां केवलं धर्ममाचरतां । अयं लोको नश्यति । ऐहिकसुखं नास्तीत्यर्थः । ते तादृशाः सुखसाधनभूताः अर्थाः दुर्दिनेषु मेघच्छन्नदिनेषु । " मेघच्छन्नेऽह्नि दुर्दिनं " इत्यमरः । सूर्यादयो ग्रहाः यथा न दृश्यन्ते, तथा त्वयि न दृश्यन्ते । सकलश्रेयःसाधनभूता अर्थास्त्वया नादृताइत्यर्थः ॥ ४० ॥ अर्थहेतुभूतराज्यपरित्यागेन पितृवचनपरिपालनरूपकेवलधर्मावलम्बनेन च प्राप्तं दोषमाह—त्वयीति ॥ प्राणैः प्राणेभ्यः । प्राणैस्तुल्यं प्रियतरेति वाऽर्थः ॥ ४१ ॥ एवं गते किं करणीयमित्यत्राह—तदद्येति ॥ भवत्कर्मणाप्राप्तंदुःखं मत्कर्मणा व्यपनेष्यामीत्यर्थः । कृतप्रतिक्रियया तद्दुःखं निवारयिष्यामीति भावः ॥ ४२ ॥ एवं भक्तिवादानुक्त्वा क्षमापणं विदधाति—उत्तिष्ठेति ॥ आत्मानं स्वं । महात्मानं महाबुद्धिं । आत्मानं परमात्मानं । किं नावबुध्यसे । तस्मात् भवतः शोककारणं नास्तीति हृदयम् ॥ ४३ ॥ अयं अहं तव विधेयत्वेन सन्निहितः, तव प्रियार्थं उदितः उद्युक्तः उत्पन्नो वा । अनेन दुःखं व्यपनेष्यामीत्येतद्विवृतं ॥ ४४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्र्यशीतितमः सर्गः ॥ ८३ ॥

अथेन्द्रजिद्वधोपायदर्शनं—राममाश्वासयान इत्यादि ॥ आश्वासयाने आश्वासयमाने । आगमशासनस्यानित्यत्वान्मुगभावः । अनेन पूर्वोक्तवादा भ्रातृवात्सल्यात्तदाश्वासनार्था नतु परमार्था इत्युक्तं । पूर्वोक्तयुक्तिपरिहारस्तु, " हैतुकान्बकवृत्तींश्च वाङ्मात्रेणापि

॥ ४० ॥ स० राज्यत्यागाचातुर्यमूलमेतदित्याह—त्वयीति ॥ ४१ ॥ ति० अतःपरमेतावदेवकर्तव्यंकिमतीतार्थानुशोचनेनेत्याह—तदद्येति । कर्मणापौरुषेणअहमेवव्यपनेष्यामि । तस्मान्मत्प्रोत्साहनार्थमुत्तिष्ठ ॥ ४२ ॥ शि० हेमहात्मन् महात्मानं सर्वप्रवर्तकं । आत्मानं स्वस्वरूपं । कुतोनावबुध्यसे । एतेनतवैवेच्छयासर्वजातमितिसूचितं ॥ ४३ ॥ ती० सीतानिधनश्रवणजनितदुःखार्दितोहमितःपरंकिमपिकर्तुनशक्नोमीत्याशङ्क्यतर्ह्यहमेवकरिष्यामिमांनियोजयेत्याशयेनाह—अयमिति । अयमहंतव प्रियार्थमुद्यतःत्वन्नियोजितसेवांकर्तुमेवाहमुत्पन्नइत्यर्थः । अतःजनकसुतानिधननिरीक्ष्यरुष्टःसन् लङ्कांविनिपातयामीत्यर्थः । यद्वा सकलशास्त्रार्थतत्वज्ञस्त्वंकिमर्थमेवंधर्माधर्मखण्डनंकरोषि । शक्तश्चेच्छौर्यप्रदर्शयेत्यतआह—अयमिति । जनकसुतानिधनंनिरीक्ष्य रुष्टःसन् अयमहंधर्माधर्मखण्डनरूपमर्थं उदितः उक्तवानस्मि । इतःपरंतवप्रियार्थं तवप्रिया या सीता तदर्थं सीतानिधनप्रतिकारार्थंलङ्कांविनिपातयामीत्यर्थः ॥ ४४ ॥ इतित्र्यशीतितमःसर्गः ॥ ८३ ॥

[पा०] १ ट. महात्मानंमहात्मन्नावबुध्यसे. २ क. ख. ग. ट. अहमनघ. च. अयमहमद्य. ३ ङ. च. झ. ञ. ट. माश्वासमानेतु.

नानाप्रहरणैर्वीरैश्चतुर्भिः सचिवैर्वृतः ॥ नीलाञ्जनचयाकारैर्मातङ्गैरिव यूथपः ॥ २ ॥
सोभिगम्य महात्मानं राघवं शोकलालसम् ॥ वानरांश्चैव ददृशे बाष्पपर्याकुलेक्षणान् ॥ ३ ॥
राघवं च महात्मानमिक्ष्वाकुकुलनन्दनम् ॥ ददर्श मोहमापन्नं लक्ष्मणस्याङ्कमाश्रितम् ॥ ४ ॥
व्रीडितं शोकसंतप्तं दृष्ट्वा रामं विभीषणः ॥ अन्तर्दुःखेन दीनात्मा किमेतदिति सोब्रवीत् ॥ ५ ॥
विभीषणमुखं दृष्ट्वा सुग्रीवं तांश्च वानरान् ॥ लक्ष्मणोवाच मन्दार्थमिदं बाष्पपरिप्लुतः ॥ ६ ॥
हतामिन्द्रजिता सीतामिह श्रुत्वैव राघवः ॥ हनुमद्वचनात्सौम्य ततो मोहमुपागतः ॥ ७ ॥
कथयन्तं तु सौमित्रिं सन्निवार्य विभीषणः ॥ [पुष्कलार्थमिदं वाक्यं विसंज्ञं राममब्रवीत् ॥ ८ ॥]
मनुजेन्द्रार्तरूपेण यदुक्तं च हनूमता ॥ तदयुक्तमहं मन्ये सागरस्येव शोषणम् ॥ ९ ॥
अभिप्रायं तु जानामि रावणस्य दुरात्मनः ॥ सीतां प्रति महाबाहो न च घातं करिष्यति ॥ १० ॥
याच्यमानस्तु बहुशो मया हितचिकीर्षुणा ॥ वैदेहीमुत्सृजस्वेति न च तत्कृतवान्वचः ॥ ११ ॥
नैव साम्ना न दानेन न भेदेन कुतो युधा ॥ सा द्रष्टुमपि शक्येत नैव चान्येन केनचित् ॥ १२ ॥
[मायामयीं महाबाहो तां विद्धि जनकात्मजाम् ॥] वानरान्मोहयित्वा तु प्रतियातः स राक्षसः ॥
चैत्यं निकुम्भिलां नाम यत्र होमं करिष्यति ॥ १३ ॥

नार्चयेत् " इति मनूक्तरीत्या प्रेक्षणीयः । गुल्मान् सेनासन्निवेशान् । स्वस्थाने स्वकार्यकरणार्थं ॥ १—२ ॥ सोभिगम्येति । अत्र राघवपदं लक्ष्मणपरं । उत्तरश्लोके रामदर्शनस्य वक्ष्यमाणत्वात् । ददृशे ददर्श ॥ ३-४ ॥ सः विभीषणः रामं दृष्ट्वा दीनात्मा दीनमनस्कःसन् । अन्तर्दुःखेन अबहिःप्रकटितदुःखविकारेण उपलक्षितःसन् अब्रवीत् ॥ ५ ॥ लक्ष्मणोवाचेत्यत्र छान्दसः सुलोपः । मन्दार्थं अल्पार्थं । संगृहीतार्थमित्यर्थः ॥ ६—७ ॥ कथयन्तमित्यर्धं ॥ मध्ये निवारणोक्तिः सर्वस्य वृत्तान्तस्य स्वेनावगतत्वात् । विभीषणः उवाचेति शेषः ॥ ८—९ ॥ करिष्यति । रावण इति शेषः ॥ १० ॥ तत्र हेतुमाह—याच्यमान इत्यादिना ॥ ११ ॥ सा साम्ना द्रष्टुमपि नैव शक्येत । दानेनापि द्रष्टुं न शक्येत । भेदेनापि द्रष्टुं न शक्येत । युधा दण्डेन कुतो द्रष्टुमपि शक्येत । अन्येन सामोपायेन केनचिद्द्रष्टुमपि नैव शक्येत॥१२॥ कथं तर्हीन्द्रजिता हतेत्याशङ्क्य मायेयमित्याह—वानरानित्यादिना ॥ मोहयित्वा । लङ्कायां स्वव्यतिरिक्तस्य योद्धुरभावात् स्वस्मिन्कर्मव्याकुले वानराः प्रहरेयुः यज्ञश्च विच्छिद्येत । विच्छिन्ने च तस्मिन् ब्रह्मवरानुसारेण स्वस्य विनाशो भविष्यतीति

स० आर्तरूपेण दीनसदृशेन । सागरस्यशोषणं अगस्त्यादिसमावेशाभावदशायांयथाऽयुक्तं तथेदमयुक्तंमन्ये ॥ शि० सागरस्यशोषणमिति । एतेन तत्कालेऽगस्त्यकर्तृकसागरशोषणंनप्रसिद्धमितिध्वनितं ॥ ९ ॥ ति० कथमयुक्तंतत्राह—अभिप्रायं लिति । सीतांप्रति सीतामुद्दिश्यवर्तमानंतदभिप्रायं सर्वनाशेपिसीतानत्याज्येत्येवंरूपंजानामिच । अतोघातंनकरिष्यति । सीतायाइतिशेषः ॥ स० हतालीतेत्यभिहितंश्रुतवतोदुःखंकथयकथमयुक्तमित्यतोवक्ति—अभिप्रायमिति । सीतांप्रति तामुद्दिश्यदुरात्मनोपिरावणस्याभिप्रायंजानामि । कोसावभिप्रायइत्यतआह—नचेति । सीतायाइतिशेषः । सीतांप्रतिसीतायाघातंनचकरिष्यतीतिदुरात्मनोरावणस्याभिप्रायंजानामि । अद्यवाश्वोवाऽहमपिहतःस्यांनत्यजेथंजानकीपाक्षिक्यादुराशयापिदुराशयोननाशयतीतितदभिप्रायंजानामीतिभावः ॥ १० ॥ स० हेख स्वकीय भ्रातरितियावत् । सीतामुत्सृजेतियाच्यमानः नचतत् मद्याचितप्रमेयकंवचःकृतवान् ॥ ११ ॥ स० सातुखनिमित्तमशेषनर्कवरनाशोभावीत्येवरावणकरग्रहंप्राप्ताकुपिताचेत्सद्योनाशयेदितिवक्तुंतद्घुणानाह—नैवेति । युधा युद्धेन । क्षिवन्तः । अन्येनकेनापिवञ्चनाद्युपायेन । किंचसीताऽन्येनकेनापिकेनाप्युपायेनद्रष्टुमेवाशक्या कुतस्तस्याहरणपूर्वंकंवधइत्याहेतिपद्यमवतारयतानागोजिभट्टेन समग्रंरामायणंद्वादशवारंश्रुतवतःसीतायारामस्यचकोनुबन्धइतिप्रश्न-

---

[पा०] १ क.—ट. श्चतुर्भिरभिसंवृतः. २ ङ. झ. ट. यूथपैः. ३ क. ख. सोभिवाद्य. ४ ज. व्रीडितःशोकसंतप्तो. ५ ख. धर्मात्मा. ६ ङ. च. झ. ञ. ट. सुपाश्रितः. ७ इदमर्धं क. ख. घ.—ट. पाठेषुदृश्यते. ८ क—ट. यदुक्तस्तं. ९ इदमर्धं ङ. झ. ट. पाठेषुदृश्यते. १० ङ. झ. ट. निकुंभिलामद्यप्राप्य.

हुतवानुपयातो हि देवैरपि सवासवैः ॥ दुराधर्षो भवत्येव सङ्गामे रावणात्मजः ॥ १४ ॥
तेन मोहयता नूनमेषा माया प्रयोजिता ॥ विघ्नमन्विच्छता तत्र वानराणां पराक्रमे ॥ १५ ॥
ससैन्यास्तत्र गच्छामो यावत्तन्न समाप्यते ॥ त्यजेमं नरशार्दूल मिथ्या सन्तापमागतम् ॥
सीदते हि बलं सर्वं दृष्ट्वा त्वां शोककर्शितम् ॥ १६ ॥
इह त्वं स्वस्थहृदयस्तिष्ठ सत्वसमुच्छ्रितः ॥ लक्ष्मणं प्रेषयास्माभिः सह सैन्यानुकर्षिभिः ॥ १७ ॥
एष तं नरशार्दूलो रावणिं निशितैः शरैः ॥ त्याजयिष्यति तत्कर्म ततो वध्यो भविष्यति ॥ १८ ॥
तस्यैते निशितास्तीक्ष्णाः पैत्रिपत्राङ्गवाजिनः ॥ पतत्रिण इवासौम्याः शराः पास्यन्ति शोणितम् ॥ १९ ॥
तं सन्दिश महाबाहो लक्ष्मणं शुभलक्षणम् ॥ राक्षसस्य विनाशाय वज्रं वज्रधरो यथा ॥ २० ॥
मनुजवर न कालविप्रकर्षो रिपुनिधनं प्रति यत्क्षमोऽद्य कर्तुम् ॥
त्वमतिसृज रिपोर्वधाय वाणीममररिपोर्मथने यथा महेन्द्रः ॥ २१ ॥
समाप्तकर्मा हि स राक्षसाधिपो भवत्यदृश्यः समरे सुरासुरैः ॥
युयुत्सता तेन समाप्तकर्मणा भवेत्सुराणामपि संशयो महान् ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुरशीतितमः सर्गः ॥ ८४ ॥

पञ्चाशीतितमः सर्गः ॥ ८५ ॥

सीताशोकाकुलतयाविभीषणभाषितमनवधारितवतोरामस्यचोदनया पुनर्विभीषणेन तंप्रति इन्द्रजितं प्रतिनिकुंभिलायां होमसमाप्तौ सर्वदुर्जयत्वरूपब्रह्मवरदानप्रकारस्य ब्रह्मणैवोक्तस्यहोमापरिसमाप्तेस्तद्वधहेतुत्वस्यच निवेदनेन तद्वधायानुजनियोजनप्रार्थना ॥ १ ॥ रामचोदनया लक्ष्मणेनेन्द्रजिद्वधायविभीषणादिभिःसह निकुंभिलांप्रतिप्रस्थानम् ॥ २ ॥

तस्य तद्वचनं श्रुत्वा राघवः शोककर्शितः ॥ नोपधारयते व्यक्तं यदुक्तं तेन रक्षसा ॥ १ ॥

मत्वा वध्वचनमितिभावः ॥ १३—१४ ॥ अन्विच्छता चिन्तयता ॥ १५ ॥ तत् होमरूपं कर्म ॥ १६ ॥ सैन्यानुकर्षिभिः सैन्यपालैः ॥ १७ ॥ तत्कर्म होमकर्म । णिजन्तत्वाद्विकर्मकत्वं ॥ १८ ॥ एते लक्ष्मणीयाः । पत्रिपत्राणि पक्षिपक्षाः, तेषामङ्गानि बर्हाणि, तैः वाजिनः वेगवन्तः ॥ १९—२० ॥ यद्यस्मात्कारणात् रिपुनिधनं प्रति कालविप्रकर्षः कालविलम्बः । अद्य कर्तुं न क्षमः । तत्तस्मात् । त्वं रिपुवधाय वाणीमतिसृज । आज्ञापयेत्यर्थः । यथा महेन्द्र इत्यापन्मात्रेदृष्टान्तः ॥ २१—२२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुरशीतितमः सर्गः ॥ ८४ ॥

अथेन्द्रजिद्वधाय लक्ष्मणनिर्गमनं—तस्य तद्वचन-

नीतिरुपार्जितेतिसंतोष्टव्यं ॥ १२ ॥ शि० एषलक्ष्मणः रावणिं तत् मायाजनकहुवनरूपंकर्म । त्याजयिष्यति । ततः तस्माद्धेतोः । वध्योभविष्यति । इन्द्रजिदितिशेषः । रावणेःकर्मत्वंतुकृतपूर्वीकटमित्यत्रेव पूर्वंकटरूपकर्माविवक्षयाऽकर्मकत्वेनाविवक्षितकर्माणोपियथाऽकर्मकत्वेनगृह्यन्ते तथाऽकर्मकत्वेनशब्देन्दुशेखरादौनिरूपितं ॥ १८ ॥ ति० तस्मात्त्वंरिपोर्वधायलक्ष्मणमतिसृज्ज प्रेषय । यथादिविजरिपुमथनेअमरेन्द्रोवज्रमतिसृजतितथेत्यर्थः ॥ २१ ॥ स० प्रेष्यप्रेषणावश्यंभावितासूचनायपुनरुक्तीकरोति—**समाप्तकर्मेति** । सुराणामपिसंशयः प्राणसंशयः । पूर्वंसुरासुरैरितिप्रकृतत्वात्सुरासुराणांसंशयइतिवाच्यं । तथापिकेचिदेवदेवपक्षिणोसुराएतद्वेष्याः । इतरेत्वेतत्कूटघटिताएवेतिसुराणामित्येवोक्तमितिमन्तव्यं ॥ २२ ॥ इतिचतुरशीतितमःसर्गः ॥ ८४ ॥

[पा०] १ ख. ङ. च. झ. ट. भवत्येष. २ ङ. झ. ट. त्यजैनं. ३ च. ज. कङ्कपत्राङ्ग. ४ क. घ. ङ. ज.—ट. तत्संदिश. ५ ङ. झ. वैधायवज्रंदिविजरिपोर्मथने. क. ज. वैधायवाणीमसुरपुरोन्मथने. ञ. वैधायवज्रममर.

ततो धैर्यमवष्टभ्य रामः परपुरञ्जयः ॥ विभीषणमुपासीनमुवाच कपिसन्निधौ ॥ २ ॥
नैर्ऋताधिपते वाक्यं यदुक्तं ते विभीषण ॥ भूयस्तच्छ्रोतुमिच्छामि ब्रूहि यत्ते विवक्षितम् ॥ ३ ॥
राघवस्य वचः श्रुत्वा वाक्यं वाक्यविशारदः ॥ यत्तत्पुनरिदं वाक्यं बभाषे स विभीषणः ॥ ४ ॥
यथाज्ञप्तं महाबाहो त्वया गुल्मनिवेशनम् ॥ तत्तथाऽनुष्ठितं वीर त्वद्वाक्यसमनन्तरम् ॥ ५ ॥
तान्यनीकानि सर्वाणि विभक्तानि समन्ततः ॥ विन्यस्ता यूथपाश्चैव यथान्यायं विभागशः ॥ ६ ॥
भूयस्तु मम विज्ञाप्यं तच्छृणुष्व महायशः ॥ ७ ॥
त्वय्यकारणसन्तप्ते सन्तप्तहृदया वयम् ॥ त्यज राजन्निमं शोकं मिथ्या सन्तापमागतम् ॥ ८ ॥
तदियं त्यज्यतां चिन्ता शत्रुहर्षविवर्धनी ॥ उद्यमः क्रियतां वीर हर्षः समुपसेव्यताम् ॥ ९ ॥
प्राप्तव्या यदि ते सीता हन्तव्याश्च निशाचराः ॥ रघुनन्दन वक्ष्यामि श्रूयतां मे हितं वचः ॥१०॥
साध्वयं यातु सौमित्रिर्बलेन महता वृतः ॥ निकुम्भिलायां संप्राप्य हन्तुं रावणिमाहवे ॥ ११ ॥
धनुर्मण्डलनिर्मुक्तैराशीविषविषोपमैः ॥ शरैरर्हन्तुं महेष्वासो रावणिं समितिंजयः ॥ १२ ॥
तेन वीर्येण तपसा वरदानात्स्वयंभुवः ॥ अस्त्रं ब्रह्मशिरः प्राप्तं कामगाश्च तुरङ्गमाः ॥ १३ ॥
स एष सह सैन्येन प्राप्तः किल निकुम्भिलाम् ॥ यद्युत्तिष्ठेत्कृतं कर्म हतान्सर्वांश्च विद्धि नः ॥ १४ ॥
निकुम्भिलामसंप्राप्तमहुताग्निं च यो रिपुः ॥ त्वामाततायिनं हन्यादिन्द्रशत्रोः स ते वधः ॥
वरो दत्तो महाबाहो सर्वलोकेश्वरेण वै ॥ १५ ॥
इत्येवं विहितो राजन्वधस्तस्यैष धीमतः ॥ वधायेन्द्रजितो राम संदिशस्व महाबल ॥
हते तस्मिन्हतं विद्धि रावणं ससुहृज्जनम् ॥ १६ ॥

मित्यादि ॥ व्यक्तं नोपधारयते । हृदि सम्यङ्निधातुं नाशकदित्यर्थः ॥ १—२ ॥ ते त्वया ॥ ३ ॥ यत्तत्पुनरिति । यद्वाक्यं पूर्वमुक्तवान् तदिदं पुनर्बभाष इत्यन्वयः ॥ ४ ॥ यथाज्ञप्तमित्याद्युक्तिः रामस्य व्याकुलत्वनिवारणाय ॥५—७॥ सन्तापं सन्तापं च। मिथ्येति शोकसन्तापयोर्विशेषणं । सन्तापः शोककार्यमिति तयोर्भिदा ॥८॥ उद्यमः उत्साहः॥९—१२॥ ब्रह्मशिरः ब्रह्मशिरःसंज्ञकमस्त्रं । तुरङ्गमशब्दो रथस्याप्युपलक्षणं । प्राप्तं । होमद्वारेति शेषः ॥१३॥ यदीति । यदि च निकुम्भिलाया उत्तिष्ठेत्, यदि कर्म कृतं स्यात् । तदा हतान् विद्धीत्यन्वयः ॥ १४ ॥ तर्हि कथं स वध्य इत्यत्राह—निकुम्भिलामित्यादिसार्धश्लोक एकान्वयः । यो रिपुः । अहुताग्निं असमाप्तहोमं । निकुम्भिलामसंप्राप्तं निकुम्भिलाख्यन्यग्रोधमूलस्थानमसंप्राप्तं च । तमप्रविष्टन्यग्रोधमित्युत्तरसर्गे वक्ष्यति । आततायिनं शस्त्रपाणिं रिपुवधोद्यतं च त्वां यो हन्यात् हिंस्यात्, सः इन्द्रशत्रोस्ते वधो मारक इति सर्वलोकेश्वरेण ब्रह्मणा वरो दत्त इति योजना । " वध हतौ " इति धातोः पचाद्यचि वध इति रूपं । यद्यप्येतच्छापवचनमिव प्रतिभाति । तथापि निकुम्भिलाप्राप्तिहोमयोर्विघ्नाभावे अवध्य इति पर्यवसानाद्वररूपत्वं द्रष्टव्यं ॥ १५ ॥ इत्येवमित्यादिसार्धश्लोक एकान्वयः ॥ इत्येवंप्रकारेण । एषः होमविघ्नकारी तस्य इन्द्रजितः वधः मारकः । विहितः

स० उपासीनं समीपस्थकपिसंनिधौ सीतावार्ताकथकहनुमत्संनिहितकपिसंनिधाने । वक्तृवक्त्रदर्शनंपुनःपुनःखेदोद्बोधकमिति सूच्यतेऽनेन ॥ २ ॥ स० शोकपरायत्ततया श्रुतमश्रुतप्रायमितिविवक्षितंब्रूहीत्यवादीदितिभावः ॥ ३ ॥ स० अकारणसंतप्ते मिथ्यावार्तोत्थितेत्यकारणंसंतप्तेसति । वयंसंतप्तहृदयाः । ' अस्मदोद्वयोश्च ' इतिवयमितिबहुवचनं । अस्मदादयइत्याद्यर्थोवा । मिथ्येतिभिन्नंपदं । संतापं सं अत्यन्तं तापयतिपार्श्वस्थानस्मानितिसतथातं । मिथ्या मिथ्याभूतसीतावधश्रवणजत्वान्मिथ्याभूतं । आगतंशोकंत्यज ॥ ८ ॥ स० यद्यस्मात् शत्रुहर्षविवर्धनी तस्मादियंचिन्तात्यज्यतामित्यन्वयः ॥ ९ ॥ स० यदिसीताप्राप्तव्या । निशाचराश्चयदिहन्तव्यास्तर्हि हेवीरउद्यमःक्रियतां । त्वया हर्षःसमुपसेव्यताम् ॥ १० ॥ स० यदिकृतंकर्मनिमित्तीकृत्योत्तिष्ठेत्

[पा०] १ झ. ञ. ट. यदियं. २ ग. ङ. च. झ. ट. संप्राप्तं. ३ क. ख. घ. ज. निर्मुक्तैःशरैराशीविषोपमैः. ४ घ. हुतंहन्तुं. ५ ङ. झ. ट. मकृताग्निंच. ६ घ. संदिशास्य. ७ ङ. ज.—ट. महाबलं. ८ ख. ङ. झ. ञ. ट. समुहृद्गणं.

विभीषणवचः श्रुत्वा राघवो वाक्यमब्रवीत् ॥ १७ ॥
जानामि तस्य रौद्रस्य मायां सत्यपराक्रम ॥ स हि ब्रह्मास्त्रवित्प्राज्ञो महामायो महाबलः ॥
करोत्यसंज्ञान्सङ्ग्रामे देवान्सवरुणानपि ॥ १८ ॥
तस्यान्तरिक्षे चरतो रथस्थस्य महायशः ॥ न गतिर्ज्ञायते तस्य सूर्यस्येवाभ्रसंप्लवे ॥ १९ ॥
राघवस्तु रिपोर्ज्ञात्वा मायावीर्यं दुरात्मनः ॥ लक्ष्मणं कीर्तिसंपन्नमिदं वचनमब्रवीत् ॥ २० ॥
यद्वानरेन्द्रस्य बलं तेन सर्वेण संवृतः ॥ हनुमत्प्रमुखैश्चैव यूथपैः सह लक्ष्मण ॥ २१ ॥
जाम्बवेनर्क्षपतिना सहसैन्येन संवृतः ॥ जहि तं राक्षससुतं मायाबलविशारदम् ॥ २२ ॥
अयं त्वां सचिवैः सार्धं महात्मा रजनीचरः ॥ अभिज्ञस्तस्य देशस्य पृष्ठतोऽनुगमिष्यति ॥ २३ ॥
राघवस्य वचः श्रुत्वा लक्ष्मणः सविभीषणः ॥ जग्राह कार्मुकश्रेष्ठमैन्द्रमद्भुतपराक्रमः ॥ २४ ॥
सन्नद्धः कवची खड्गी सशरो हेमचापधृत् ॥ राघवपादावुपस्पृश्य हृष्टः सौमित्रिरब्रवीत् ॥ २५ ॥
अद्य मत्कार्मुकोन्मुक्ताः शरा निर्भिद्य रावणिम् ॥ लङ्कामभिपतिष्यन्ति हंसाः पुष्करिणीमिव ॥ २६ ॥
अद्यैव तस्य रौद्रस्य शरीरं मामकाः शराः ॥ विधमिष्यन्ति भित्त्वा तं महाचापगुणच्युताः ॥ २७ ॥
स एवमुक्त्वा द्युतिमान्वचनं भ्रातुरग्रतः ॥ स रावणिवधाकाङ्क्षी लक्ष्मणस्त्वरितो ययौ ॥ २८ ॥
सोभिवाद्य गुरोः पादौ कृत्वा चापि प्रदक्षिणम् ॥ निकुम्भिलामभिययौ चैत्यं रावणिपालितम् ॥ २९ ॥
विभीषणेन सहितो राजपुत्रः प्रतापवान् ॥ कृतस्वस्त्ययनो भ्रात्रा लक्ष्मणस्त्वरितो ययौ ॥ ३० ॥
वानराणां सहस्रैस्तु हनुमान्बहुभिर्वृतः ॥ विभीषणश्च सामात्यस्तदा लक्ष्मणमन्वगात् ॥ ३१ ॥
महता हरिसैन्येन सवेगमभिसंवृतः ॥ ऋक्षराजबलं चैव ददर्श पथि विष्ठितम् ॥ ३२ ॥
स गत्वा दूरमध्वानं सौमित्रिर्मित्रनन्दनः ॥ राक्षसेन्द्रबलं दूरादपश्यद्व्यूहमास्थितम् ॥ ३३ ॥
स तं प्राप्य धनुष्पाणिर्मायायोगमरिन्दमः ॥ तस्थौ ब्रह्मविधानेन विजेतुं रघुनन्दनः ॥ ३४ ॥

ब्रह्मणा कृप्तः । तस्मात् तस्य इन्द्रजितो वधाय संदिशस्व । अस्मासु कंचिदिति शेषः ॥ १६—१८ ॥ तस्य प्रसिद्धस्येति सूर्यविशेषणं द्वितीयं तस्येति पदं । अभ्रसंप्लवे मेघावरणे ॥ १९–२० ॥ यद्वानरेन्द्रस्येत्यादिश्लोकत्रयमेकान्वयं ॥ जाम्बवेन जाम्बवता । सहसैन्येन सैन्यसहितेन । " वोपसर्जनस्य " इति विकल्पेन सभावाभावः । संवृतः । त्वमिति शेषः ॥ २१–२७ ॥ असत्यपि कर्तृभेदे क्रियाभेदमाश्रित्य स इति द्विरुक्तिः। स एवमुक्त्वा स ययाविति निर्वाहः । वस्तुतस्तु स लक्ष्मणः । सः तादृशवीरवेषविशिष्ट एवेत्यर्थः । यद्वा सरावणिवधाकाङ्क्षीत्येकं पदं । रावणिना सहवर्तन्त इति सरावणयः निकुम्भिलास्था राक्षसाः । तेषां वधाकाङ्क्षीत्यर्थः ॥ २८—३३ ॥ स तं प्राप्येत्यादिश्लोकद्वयमेकान्वयं ॥ ब्रह्मविधानेन निकुम्भिलामसंप्राप्तमित्यादिनोक्तब्रह्मवरदानप्रकारेण । मायायोगं मायारूपोपायं । तं इन्द्रजितं विजेतुं प्राप्य तस्थौ । मायायागमिति पाठे मायायागं जेतुं नाश-

---

तदा नःसर्वान्हतान्विद्धि ॥ १४ ॥ **ति०** मायानामभिज्ञातस्य तद्विषयज्ञानवतः । अभिज्ञस्येतिपाठेप्ययमेवार्थः ॥ **शि०** अभिज्ञेतिपाठे तृतीयान्तत्वात्सहितइत्यध्याहार्यं ॥ २३ ॥ **ति०** वामचापभृत् वामहस्तेनचापभृत् ॥ २५ ॥ **ति०** ब्रह्मविधानेन " निकुंभिलामसंप्राप्तः " इत्यायुक्तब्रह्मवरदानप्रकारेणतंविजेतुंतस्थौ ॥ **कतक०** ब्रह्मविमानेनेतिपाठान्तरं । ब्रह्मविमानेन ब्रह्मणोभगवतस्तेजोंशोऽहमस्मीतिविशिष्यजायमानेनध्यानेनशत्रुंजेतुंतस्थौ । संकटकालेतादृशध्यानस्यतस्यनिसर्गसिद्धत्वात् ॥ ३४ ॥ इतिपञ्चाशीतितमःसर्गः ॥ ८५ ॥

[**पा०**] १ ख. ङ. च. झ. ञ. ट. ज्ञायतेवीर. २ ङ. झ. अभिज्ञातस्यमायानां. ट. अभिज्ञस्तस्यमायानां. ३ क. घ. ङ. ज.—ट. मन्यद्भीमपराक्रमः. ख. मन्यद्घोरपराक्रमः. ४ झ. ञ. ट. वामचापभृत. ५ ङ. च. झ. ञ. ट. सामात्योलक्ष्मणंत्वरितंययौ. ६ क.—ङ. ज.—ट. सर्वसंप्राप्य.

विभीषणेन सहितो राजपुत्रः प्रतापवान् ॥ अङ्गदेन च वीरेण तथाऽनिलसुतेन च ॥ ३५ ॥
विविधममलशस्त्रभास्वरं तद्वृजगहनं विपुलं महारथैश्च ॥
प्रतिभयतममप्रमेयवेगं तिमिरमिव द्विषतां बलं विवेश ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चाशीतितमः सर्गः ॥ ८५ ॥

षडशीतितमः सर्गः ॥ ८६ ॥

निकुंभिलासमीपगमनावसरेलक्ष्मणंप्रतिविभीषणेन समीपस्थराक्षससैन्यप्रदर्शनपूर्वकं वानरैस्सहतद्विक्षोभे यागापरिसमाप्तावेवेन्द्रजिन्निर्गमनोक्तिः ॥ १ ॥ लक्ष्मणेन वानरैस्सह राक्षससेनाविक्षोभारंभे कुपितेनेन्द्रजिता यागापरिसमाप्तावे. वनिकुंभिलातोनिर्गमनेन वानरैस्सहयुद्धारंभः ॥ २ ॥ हनुमता विशेषतोराक्षससेनाविध्वंसने क्रोधादिन्द्रजितातदभिद्रवणम् ॥ ३ ॥

अथ तस्यामवस्थायां लक्ष्मणं रावणानुजः ॥ परेषामहितं वाक्यमर्थसाधकमब्रवीत् ॥ १ ॥
यदेतद्राक्षसानीकं मेघश्यामं विलोक्यते ॥ एतदायोध्यतां शीघ्रं कपिभिः पादपायुधैः ॥ २ ॥
अस्यानीकस्य महतो भेदने यत लक्ष्मण ॥ राक्षसेन्द्रसुतोप्यत्र भिन्ने दृश्यो भविष्यति ॥ ३ ॥
स त्वमिन्द्राशनिप्रख्यैः शरैरेवकिरन्परान् ॥ अभिद्रवाशु यावद्वै नैतत्कर्म समाप्यते ॥ ४ ॥
जहि वीर दुरात्मानं मायापरमधार्मिकम् ॥ रावणिं क्रूरकर्माणं सर्वलोकभयावहम् ॥ ५ ॥
विभीषणवचः श्रुत्वा लक्ष्मणः शुभलक्षणः ॥ ववर्ष शरवर्षाणि राक्षसेन्द्रसुतं प्रति ॥ ६ ॥
ऋक्षाः शाखामृगाश्चापि द्रुमाद्रिनखयोधिनः ॥ अभ्यधावन्त सहितास्तदनीकमवस्थितम् ॥ ७ ॥
राक्षसाश्च शितैर्बाणैरसिभिः शक्तितोमरैः ॥ उद्यतैः समवर्तन्त कपिसैन्यजिघांसवः ॥ ८ ॥
स संप्रहारस्तुमुलः संजज्ञे कपिरक्षसाम् ॥ शब्देन महता लङ्कां नादयन्वै समन्ततः ॥ ९ ॥
शस्त्रैश्च बहुधाकारैः शितैर्बाणैश्च पादपैः ॥ उद्यतैर्गिरिशृङ्गैश्च घोररैराकाशमावृतम् ॥ १० ॥
ते राक्षसा वानरेषु विकृताननबाहवः ॥ निवेशयन्तः शस्त्राणि चक्रुस्ते सुमहद्भयम् ॥ ११ ॥
तथैव सकलैर्वृक्षैर्गिरिशृङ्गैश्च वानराः ॥ अभिजघ्नुर्निजघ्नुश्च समरे राक्षसर्षभान् ॥ १२ ॥
ऋक्षवानरमुख्यैश्च महाकायैर्महाबलैः ॥ रक्षसां वध्यमानानां महद्भयमजायत ॥ १३ ॥

यितुं । तं देशं प्राप्य तस्थावित्यन्वयः ॥ ३४–३५ ॥ प्रतिभयतमं अतिशयेन भयंकरं ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चाशीतितमःसर्गः ८५॥

अथेन्द्रजिद्युद्धारम्भः—अथ तस्यामित्यादि ॥ तस्यामवस्थायां निकुम्भिलासमीपगमनावसरे । अर्थसाधकं । स्वानामिति शेषः॥१॥ आयोध्यतां हन्यतां । शीघ्रमिति । विलम्बे यागः समाप्येतेति भावः॥२॥ यत यतस्व । अत्र राक्षसानीके ॥३—५॥ शुभलक्षणः सुहृद्वचनसारग्राहित्वलक्षणयुक्तः ॥ ६—७ ॥ कपिसैन्यजिघांसवः कपिसैन्यं हन्तुमिच्छवः ॥ ८ ॥ संप्रहारः युद्धं ॥ ९–१० ॥ शस्त्रनिवेशनविकृताननबाहुत्वरूपक्रियाभेदात् तच्छब्दद्वयनिर्वाहः ॥ ११—

ती० मायापरमधार्मिकं परमधार्मिकवत्प्रतीयमानं ॥ स० मायापरमधार्मिकं माययापरमधनुर्धारिणंवा । मायापरं अधार्मिकमितिवा ॥ ५ ॥

[पा०] १ ङ. झ. ट. गहनंमहारथैश्च. २ ङ. झ. ञ. ट. कपिभिश्चशिलायुधैः. ३ ङ. झ. ट. तस्यानीकस्य. ४ ख रक्षकिरस्वह. ५ क. ख. च. मायाधरं. ६ ङ. झ. ञ. शरवर्षेण. ७ झ. ञ. ट. अभ्यवर्तन्तसमरेकपिसैन्य. ८ ङ. च. झ. ञ. ट. सर्वराक्षसान्. ९ ङ. च. झ. ट. युध्यमानानां.

स्वमनीकं विषण्णं तु श्रुत्वा शत्रुभिरर्दितम् ॥ उदतिष्ठत दुर्धर्षस्तत्कर्मण्यननुष्ठिते ॥ १४ ॥
वृक्षान्धकारान्निर्गत्य जातक्रोधः स रावणिः ॥ आरुरोह रथं सज्जं पूर्वयुक्तं स राक्षसः ॥ १५ ॥
स भीमकार्मुकधरः कालमेघसमप्रभः ॥ रक्ताक्षनयनः क्रुद्धो बभौ मृत्युरिवान्तकः ॥ १६ ॥
दृष्ट्वैव तु रथस्थं तं पर्यवर्तत तद्बलम् ॥ रक्षसां भीमवेगानां लक्ष्मणेन युयुत्सताम् ॥ १७ ॥
तस्मिन्काले तु हनुमानुद्यम्य सुदुरासदम् ॥ धरणीधरसंकाशो महावृक्षमरिन्दमः ॥ १८ ॥
स राक्षसानां तत्सैन्यं कालाग्निरिव निर्दहन् ॥ चकार बहुभिर्वृक्षैर्निस्संज्ञं युधि वानरः ॥ १९ ॥
विध्वंसयन्तं तरसा दृष्ट्वैव पवनात्मजम् ॥ राक्षसानां सहस्राणि हनुमन्तमवाकिरन् ॥ २० ॥
शितशूलधराः शूलैरसिभिश्चासिपाणयः ॥ शक्तिभिः शक्तिहस्ताश्च पट्टिशैः पट्टिशायुधाः ॥ २१ ॥
परिघैश्च गदाभिश्च चक्रैश्च शुभदर्शनैः ॥ शतशश्च शतघ्नीभिरायसैरपि मुद्गरैः ॥ २२ ॥
घोरैः परश्वधैश्चैव भिन्दिपालैश्च राक्षसाः ॥ मुष्टिभिर्वज्रकल्पैश्च तलैरशनिसन्निभैः ॥
अभिजघ्नुः समासाद्य समन्तात्पर्वतोपमम् ॥ २३ ॥
तेषामपि च संक्रुद्धश्चकार कदनं महत् ॥ २४ ॥
स ददर्श कपिश्रेष्ठमचलोपममिन्द्रजित् ॥ सूदयन्तममित्रघ्नममित्रान्पवनात्मजम् ॥ २५ ॥
स सारथिमुवाचेदं याहि यत्रैष वानरः ॥ क्षयमेष हि नः कुर्याद्राक्षसानामुपेक्षितः ॥ २६ ॥
इत्युक्तः सारथिस्तेन ययौ यत्र स मारुतिः ॥ वहन्परमदुर्धर्षं स्थितमिन्द्रजितं रथे ॥ २७ ॥
सोभ्युपेत्य शरान्खड्गान्पट्टिशांश्च परश्वधान् ॥ अभ्यवर्षत दुर्धर्षः कपिमूर्ध्नि स राक्षसः ॥ २८ ॥
तानि शस्त्राणि घोराणि प्रतिगृह्य स मारुतिः ॥ रोषेण महताऽऽविष्टो वाक्यं चेदमुवाच ह ॥२९॥
युध्यस्व यदि शूरोसि रावणात्मज दुर्मते ॥ वायुपुत्रं समासाद्य जीवन्न प्रतियास्यसि ॥ ३० ॥
बाहुभ्यां प्रतियुध्यस्व यदि मे द्वन्द्वमाहवे ॥ वेगं सहस्व दुर्बुद्धे ततस्त्वं रक्षसां वरः ॥ ३१ ॥
हनुमन्तं जिघांसन्तं समुद्यतशरासनम् ॥ रावणात्मजमाचष्टे लक्ष्मणाय विभीषणः ॥ ३२ ॥

---

१३ ॥ तत्कर्मणि तस्मिन्होमकर्मणि ॥ १४ ॥ वृक्षान्धकारात् नीरन्ध्रवृक्षषण्डादित्यर्थः । सज्जं आयुधादिभिः । पूर्वयुक्तं पूर्वमेव युक्ताश्वं । सराक्षसः राक्षससहितः ॥ १५ ॥ अन्तकः अन्तकरः ॥ १६ ॥ पर्यवर्तत परितोतिष्ठत् ॥ १७ ॥ तस्मिन्नित्यादि ॥ आदावेकं वृक्षमुद्यम्य निर्दहन्सन् पश्चात् बहुभिर्वृक्षैस्तद्रक्षोबलं निःसंज्ञं चकारेत्यन्वयः ॥ १८—२० ॥ अवाकिरन्नित्युक्तं प्रपञ्चयति—शितेत्यादि ॥ शितशूलधरा इत्यादिविशेषणेन येषां येष्वस्त्रेष्वत्यन्तपाटवमस्ति तैस्ते अवाकिरन्निति गम्यते । परिघैरित्यादौ परिघपाणयइत्याद्यूह्यं । शुभदर्शनैरित्यनेन तैक्ष्ण्यमुपलक्ष्यते । पर्वतोपमं हनुमन्तमिति शेषः ॥ २१—२३ ॥ तेषामित्यर्धं ॥ संक्रुद्धः । हनुमानिति शेषः ॥२४—२५॥ हि यस्मात्कारणात् । उपेक्षितः एषः नः अस्माकं संबन्धिनां राक्षसानां क्षयं कुर्यात् । अतः एष वानरो यत्र । वर्तत इति शेषः । तत्र याहीतीदं वचः सारथिमुवाचेत्यन्वयः ॥ २६ ॥ वहन् प्रापयन् ॥ २७ ॥ सोभ्युपेत्येति । अत्रापि क्रियाभेदात् तच्छब्दस्य द्विःप्रयोगः ॥ २८—३० ॥ द्वन्द्वं द्वन्द्वयुद्धं । ददासीति शेषः । यदि ददासि तर्हि शस्त्राणि त्यक्त्वा बाहुभ्यां प्रतियुध्यस्वेत्यन्वयः । ततः तदानीं द्वन्द्वयुद्धकाले

ति० वृक्षान्धकारात् निकुंभिलाक्षेत्रीयात् । इदंनिस्सरणंदशम्यांसायाह्ने ॥ १५ ॥ इतिषडशीतितमः सर्गः ॥ ८६ ॥

[पा०] १ ङ. ञ. ट. स्सकर्मण्यननु. २ ङ. ञ. ट. सुसंयतं. ३ क. ख. घ. ङ. च. ज.—ट. कार्मुकशरः. ४ क. ख. ग. ङ. च. ज. ञ. ट. कृष्णाञ्जनचयोपमः. ५ ज. युयुत्सया. ६ ङ. च. ञ. कुन्तैश्च. ७ ग. घ. च. ज. ञ. ट. वैज्रवेगैश्च. ८ क. ख. सूदयानमसंत्रस्तं. घ. च. ज. ट. सूदयानममित्रघ्नं. ९ क.—च. ञ. ञ. पट्टिशासिपरश्वधान्. १० घ. रावणिंदुष्टमाचष्टे.

यः स वासवनिर्जेता रावणस्यात्मसंभवः ॥ स एष रथमास्थाय हनुमन्तं जिघांसति ॥ ३३ ॥
तमप्रतिमसंस्थानैः शरैः शत्रुविदारणैः ॥ जीवितान्तकरैर्घोरैः सौमित्रे रावणिं जहि ॥ ३४ ॥
इत्येवमुक्तस्तु तदा महात्मा विभीषणेनारिविभीषणेन ॥
ददर्श तं पर्वतसन्निकाशं रणे स्थितं भीमबलं नदन्तम् ॥ ३५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षडशीतितमः सर्गः ॥ ८६ ॥

सप्ताशीतितमः सर्गः ॥ ८७ ॥

विभीषणेनलक्ष्मणंप्रतिनिकुंभिलायांन्यग्रोधतरुप्रदर्शनपूर्वकंतत्रहोमसमाप्तावेन्द्रजितोदुर्जयत्वोक्त्यान्यग्रोधतलप्रवेशात्प्रागेवतद्वधचोदना ॥ १ ॥ लक्ष्मणेनरणायसमाहूतेनेन्द्रजितातत्पार्श्वस्थंविभीषणंप्रतिभ्रातृपक्षपरित्यागेनपरपक्षसमाश्रयणादिदोषोत्कीर्तनपूर्वकं गर्हणम् ॥ २ ॥ विभीषणेनतंप्रतिरावणदोषोद्घाटनपूर्वकं तत्त्यागस्यन्याय्यत्वोक्त्यातद्गर्हणम् ॥ ३ ॥

एवमुक्त्वा तु सौमित्रिं जातहर्षो विभीषणः ॥ धनुष्पाणिनमादाय त्वरमाणो जगाम ह ॥ १ ॥
अविदूरं ततो गत्वा प्रविश्य च महद्वनम् ॥ दर्शयामास तत्कर्म लक्ष्मणाय विभीषणः ॥ २ ॥
नीलजीमूतसंकाशं न्यग्रोधं भीमदर्शनम् ॥ तेजस्वी रावणभ्राता लक्ष्मणाय न्यवेदयत् ॥ ३ ॥
इहोपहारं भूतानां बलवान्रावणात्मजः ॥ उपहृत्य ततः पश्चात्सङ्गाममभिवर्तते ॥ ४ ॥
अदृश्यः सर्वभूतानां ततो भवति राक्षसः ॥ निहन्ति समरे शत्रून्बध्नाति च शरोत्तमैः ॥ ५ ॥
तमप्रविष्टन्यग्रोधं बलिनं रावणात्मजम् ॥ विध्वंसय शरैस्तीक्ष्णैः सरथं साश्वसारथिम् ॥ ६ ॥
तथेत्युक्त्वा महातेजाः सौमित्रिर्मित्रनन्दनः ॥ बभूवावस्थितस्तत्र चित्रं विस्फारयन्धनुः ॥ ७ ॥
स रथेनाग्निवर्णेन बलवान्रावणात्मजः ॥ इन्द्रजित्कवची धन्वी सध्वजः प्रत्यदृश्यत ॥ ८ ॥
तमुवाच महातेजाः पौलस्त्यमपराजितम् ॥ समाह्वये त्वां समरे सम्यग्युद्धं प्रयच्छ मे ॥ ९ ॥
एवमुक्तो महातेजा मनस्वी रावणात्मजः ॥ अब्रवीत्परुषं वाक्यं तत्र दृष्ट्वा विभीषणम् ॥ १० ॥
इह त्वं जातसंवृद्धः साक्षाद्भ्राता पितुर्मम ॥ कथं द्रुह्यसि पुत्रस्य पितृव्यो मम राक्षस ॥ ११ ॥

॥ ३१—३२ ॥ यः सः । प्रसिद्धो य इत्यर्थः ॥३३॥ अप्रतिमसंस्थानैः अनुपमसन्निवेशैः करवीरपत्राद्याकारैरित्यर्थः ॥ ३४ ॥ अरिविभीषणेन शत्रुभयंकरेण ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षडशीतितमः सर्गः ॥ ८६ ॥

अथेन्द्रजिद्विभीषणसंवादः—एवमुक्त्वेत्यादि ॥ धनुष्पाणिनमिति नकारान्तत्वमार्षम् ॥ १ ॥ अविदूरमिति ॥ तत्कर्म होमकर्मस्थानम् ॥ २—३ ॥ उपहारं बलिं । उपहृत्य कृत्वा । ओदनपाकं पचतीतिवत् । ततः तस्माद्देशात् ॥ ४—५ ॥ अप्रविष्टन्यग्रोधं रावणात्मजं विध्वंसय । पुनः प्रवेशात्पूर्वमेव विध्वंसयेत्यर्थः ॥ ६—८ ॥ महातेजा इति लक्ष्मणो विशेष्यः । सम्यग्युद्धं अमायायुद्धं ॥ ९ ॥ मनस्वी दृढमनस्कः ॥ १० ॥ इह लङ्कायां । जातसंवृद्धः । " पूर्वकाल—" इत्यादिना पूर्वकालार्थवाचिनो जातशब्दस्य उत्तरकालार्थवाचिना संवृद्धशब्देन सह समासः । पुत्रस्य पुत्राय । " क्रुधद्रुह—" इत्यादिना चतुर्थीनियमात् । राक्षसेत्यनेन साजात्यमपि न दृष्ट-

[पा०] १ ख. ग. घ. ज. ञ. रथेस्थितं. ङ. च. झ. ट. रथस्थितं. २ घ. जातरोषो. ३ क.—च. ज. झ. ट. जगामसः. ४ ङ. च. झ. ट. अदर्शयत. ५ ङ. झ. शरैर्दीप्तैः. ६ ङ. झ. खड्गी.

न ज्ञातित्वं न सौहार्दं न जातिस्तव दुर्मते ॥ प्रमाणं न च सौदर्यं न धर्मो धर्मदूषण ॥ १२ ॥
शोच्यस्त्वमसि दुर्बुद्धे निन्दनीयश्च साधुभिः ॥ यस्त्वं स्वजनमुत्सृज्य परभृत्यत्वमागतः ॥ १३ ॥
नैतच्छिथिलया बुद्ध्या त्वं वेत्सि महदन्तरम् ॥ क्व च स्वजनसंवासः क्व च नीचपराश्रयः ॥ १४ ॥
गुणवान्वा परजनः स्वजनो निर्गुणोपि वा ॥ निर्गुणः स्वजनः श्रेयान्यः परः पर एव सः ॥ १५ ॥
यः स्वपक्षं परित्यज्य परपक्षं निषेवते ॥ स स्वपक्षे क्षयं प्राप्ते पश्चात्तैरेव हन्यते ॥ १६ ॥
[तस्माच्छृणुष्व दुर्बुद्धे राक्षसानां कुलाधम ॥ त्वां गृह्य बन्धुरूपेण रामो बुद्धिमतांवरः ॥
ज्ञात्वोपायं स्वया पूर्वं जेतुमस्मान्स राघवः ॥ १७ ॥
जित्वाऽस्मान्युधि शक्तश्चेत्पश्चात्त्वां च वधिष्यति ॥ शत्रुस्त्वमसि रामस्य रावणस्यानुजोसि यत् ॥१८॥]
निरनुक्रोशता चेयं यादृशी ते निशाचर ॥ स्वजनेन त्वया शक्यं परुषं रावणानुज ॥ १९ ॥
इत्युक्तो भ्रातृपुत्रेण प्रत्युवाच विभीषणः ॥ २० ॥
अजानन्निव मच्छीलं किं राक्षस विकत्थसे ॥ राक्षसेन्द्रसुतासाधो पारुष्यं त्यज गौरवात् ॥ २१ ॥
कुले यद्यप्यहं जातो रक्षसां क्रूरकर्मणाम् ॥ गुणोयं प्रथमो नॄणां तन्मे शीलमराक्षसम् ॥ २२ ॥
न रमे दारुणेनाहं न चाधर्मेण वै रमे ॥ भ्रात्रा विषमशीलेन कथं भ्राता निरस्यते ॥ २३ ॥
धर्मात्प्रच्युतशीलं हि पुरुषं पापनिश्चयम् ॥ त्यक्त्वा सुखमवाप्नोति हस्तादाशीविषं यथा ॥ २४ ॥
हिंसापरस्वहरणे परदाराभिमर्शनम् ॥ त्याज्यमाहुर्दुराचारं वेश्म प्रज्वलितं यथा ॥ २५ ॥

वानसीति व्यज्यते ॥ ११ ॥ प्रमाणं मर्यादानियामकं ॥ १२ ॥ शोच्यत्वादौ हेतुमाह—यस्त्वमिति ॥ १३ ॥ शिथिलया कोमलया, तुच्छया वा । अन्तरं तारतम्यं ॥ १४ ॥ ननु परस्य नीचत्वाभावान्न भवदुक्तदोष इत्यत्राह—गुणवानिति ॥ १५ ॥ तदेव वैषम्यं स्वरूपतो दर्शयति—य इति ॥ १६—१८ ॥ इयं होमविघातपूर्वकं लक्ष्मणस्य न्यग्रोधप्रवेशकरणरूपा । निरनुक्रोशता निर्दयता, यादृशी यथा घोरा तादृशं परुषं निर्दयत्वं । स्वजनेन बन्धुभूतेन त्वयैव कर्तुं शक्यं नान्येनेत्यर्थः । यद्वा स्वजने विषये त्वया न शक्यं न कर्तव्यं । अनुचितं कृतमिति भावः ॥ १९—२० ॥ गौरवात् । गुरोर्भावो गौरवं । पितृव्यत्वादित्यर्थः ॥ २१ ॥ रक्षसां कुले यद्यप्यहं जातः । तत् तथापि । मे शीलं अराक्षसं अक्रूरं । अयं मे शीलाख्यो गुणः नृणां सत्पुरुषाणां । प्रथमः मुख्यः ॥ २२ ॥ तन्मे शीलमराक्षसमित्युक्तमेव दर्शयति—न रम इति ॥ दारुणेन कर्मणा न रमे । अधर्मेण परपीडाकरेण च कर्मणा न रमे । न केवलं मय्येव दोषः रावणेपीत्याह—भ्रात्रेति । निरस्यते । 'त्वां तु धिक्कुलपांसनं' इति वचनेनेत्यर्थः ॥ २३ ॥ इन्द्रजिदुक्तस्वदोषपरिहाराय परित्यागहेतून् रावणदोषानाह—धर्मादित्यादिना ॥ २४ ॥ हिंसा च परस्वहरणं च ते हिंसापरस्वहरणे । हिंसादिरूपं दुराचाररूपं कर्म त्याज्यमाहुः । तद्युक्तस्त्याज्य इत्यर्थः ॥२५॥

स० एकैकएवप्रयोजकःप्रीतावेतन्मध्येऽन्यत्र । तेसर्वेपिलक्ष्यन्यथाजाताइत्याह—नज्ञातित्वमित्यादिना । जातिः राक्षसजातिः । प्रमाणं ज्येष्ठविरोधेनविरोध्याश्रयोनसंपाद्यइतिप्रवेदयत्प्रमाणं । सौदर्यं सोदरत्वं । त्रयाणामपिकैकसीपुत्रत्वात् । नचपद्मपुराणे—" निकषा पुत्रमाहूय " " निकषाचात्रवीद्रामं " इत्युक्तेःभागवतोत्तरकाण्डादौकैकसीपुत्रत्वंकथितंतदसंगतमितिवाच्यं । तस्माएवनामान्तरंतदित्यविरोधः ॥ १२ ॥ **शि०** निर्गुणोपिस्वजनःश्रेयान्भवति । परोयःसगुणोपिसपरएव । स्वकुलेनसहविरोधेभिन्न एवभवतीत्यर्थः ॥१५॥ **ती०** नृणां सज्जनानां । यःप्रथमः मुख्यः । गुणः साधित्वं । तत् मे अराक्षसं अक्रूरंशीलं ममगुणइत्यर्थः ॥ २२ ॥ **ती०** नरमइति । दारुणेनकर्मणानरमे । अधर्मेणचनरमे अन्यथा विषमशीलेन रावणाद्विलक्षणशीलेनभ्रात्रामया कथमयं भ्राता रावणः निरस्यते ॥ २३ ॥

[**पा०**] १ ङ. च. झ. ट. यातेः । २ तस्माच्छृणुष्वेत्यादयःअनुजोसियदित्यन्ताःश्लोकाः क. ख. च. छ. ज. पाठेषु दृश्यन्ते. ३ ग. ङ. ज.—ट. गुणोयः. ४ घ. छ.—ट. परस्वहरणेयुक्तंपरदाराभिमर्शकं त्याज्यमाहुर्दुरात्मानं.

परस्वानां च हरणं परदाराभिमर्शनम् ॥ सुहृदामतिशङ्का च त्रयो दोषाः क्षयावहाः ॥ २६ ॥
महर्षीणां वधो घोरः सर्वदेवैश्च विग्रहः ॥ अभिमानश्च कोपश्च वैरित्वं प्रतिकूलता ॥ २७ ॥
एते दोषा मम भ्रातुर्जीवितैश्वर्यनाशनाः ॥ गुणान्प्रच्छादयामासुः पर्वतानिव तोयदाः ॥ २८ ॥
दोषैरेतैः परित्यक्तो मया भ्राता पिता तव ॥ नेयमस्ति पुरी लङ्का न च त्वं न च ते पिता ॥२९॥
अतिमानी च बालश्च दुर्विनीतश्च राक्षस ॥ बद्धस्त्वं कालपाशेन ब्रूहि मां यद्यदिच्छसि ॥ ३० ॥
अद्य ते व्यसनं प्राप्तं किं मां त्वमिह वक्ष्यसि ॥ प्रवेष्टुं न त्वया शक्यो न्यग्रोधो राक्षसाधम ॥३१॥
धर्षयित्वा च काकुत्स्थौ न शक्यं जीवितुं त्वया ॥ युध्यस्व नरदेवेन लक्ष्मणेन रणे सह ॥
हतस्त्वं देवताकार्यं करिष्यसि यमक्षये ॥ ३२ ॥

निदर्शय स्वात्मबलं समुद्यतं कुरुष्व सर्वायुधसायकव्ययम् ॥
न लक्ष्मणस्यैत्य हि बाणगोचरं त्वमद्य जीवन्सबलो गमिष्यसि ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्ताशीतितमः सर्गः ॥ ८७ ॥

अष्टाशीतितमः सर्गः ॥ ८८ ॥

लक्ष्मणेन्द्रजितोर्वीरवादपुरस्सरंसमरप्रवर्तनम् ॥ १ ॥

विभीषणवचः श्रुत्वा रावणिः क्रोधमूर्च्छितः ॥ अब्रवीत्परुषं वाक्यं वेगेनाभ्युत्पपात ह ॥ १ ॥
उद्यतायुधनिस्त्रिंशो रथे सुसमलंकृते ॥ कालाश्वयुक्ते महति स्थितः कालान्तकोपमः ॥ २ ॥
महाप्रमाणमुद्यम्य विपुलं वेगवद्दृढम् ॥ धनुर्भीमं परामृश्य शरांश्चामित्रशातनान् ॥ ३ ॥
तं ददर्श महेष्वासो रथे सुसमलङ्कृतः ॥ अलङ्कृतममित्रघ्नं राघवस्यानुजं बली ॥
हनुमत्पृष्ठमासीनमुदयस्थरविप्रभम् ॥ ४ ॥

सुहृदामतिशङ्का सुहृत्स्वविश्वासः ॥ २६ ॥ दोषवत्तया यदि त्याज्यत्वं, तर्ह्यभिजनविद्यादिगुणवत्तया किमिति न ग्राह्यत्वमित्यत आह—महर्षीणामिति सार्धश्लोकद्वयमेकान्वयं ॥ अभिमानः गर्वः । वैरित्वं बद्धवैरत्वं । प्रतिकूलता परश्रेयोद्वेषित्वं । तथा चाभिजनविद्यादिगुणवत्त्वेपि परस्त्रीहरणादिदोषदूषिततया विषसंपृक्तमधुवन्न ग्राह्योयमिति भावः ॥२७-२८॥ नेयमस्तीत्यादि ॥ उत्तरक्षणे अवश्यं न शिष्यतीत्यर्थः ॥ २९-३१ ॥ देवताकार्यं यमदूतरूपदेवताकार्यं । नरकयातनानुभवं वा ॥ ३२-३३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्ताशीतितमः सर्गः ॥ ८७ ॥

अथेन्द्रजिल्लक्ष्मणयुद्धं—विभीषणवच इत्यादि ॥ अभ्युत्पपात अभिमुखमुज्जगाम ॥ १ ॥ कीदृग्भूतो भ्युज्जगामेत्यत्राह—उद्यतेत्यादिश्लोकद्वयेन ॥ सुसमलंकृते सुष्ठु समन्तात् अलंकृते । महाप्रमाणं महादी धनुरुद्यम्य शरान् परामृश्य गृहीत्वा । अभ्युज्जग अब्रवीच्चेत्यन्वयः । अमित्रान् शत्रून् शातयां खण्डयन्तीत्यमित्रशातनान् ॥ २—३ ॥ रथे सि

ति० प्रतिकूलता हितवक्तृषुप्रतिकूलबुद्धिता ॥२७॥ ति० अत्रहतः यमक्षयं यमगृहंगतःसन् देवताकार्यं सर्वदेवानां संतोषः करिष्यसि ॥ ३२ ॥ इतिसप्ताशीतितमःसर्गः ॥ ८७ ॥

ति० उद्यतायुधनिस्त्रिंशः उद्यतायुधोनिस्त्रिंशोनिर्घृणश्चेत्यर्थइतिकतकः । उद्यतान्यायुधानिनिस्त्रिंशश्चयेनसः । गोबलीवर्द योगइत्यन्ये ॥ स० उद्यतानिचतान्यायुधानिच । तैर्निस्त्रिंशोनिर्दयः । " निस्त्रिंशोनिर्दयेखड्गे " इतिविश्वः । गोबलीवर्दन्य

[पा०] १ ङ. झ. ट. यमक्षयं. २ ङ. झं. ट. क्रोधेन. ३ ङ. झ. धनुर्भीमबलोभीमंशरांश्चामित्रनाशनान्. ४ घ.—झ. ञ. ट. रथस्थःसमलंकृतः. ५ ख.—ङ. झ. ञ. ममित्रघ्नोरावणस्यात्मजोबली.

उवाचैनं समारब्धः सौमित्रिं सविभीषणम् ॥ तांश्च वानरशार्दूलान्पश्यध्वं मे पराक्रमम् ॥ ५ ॥
अद्य मत्कार्मुकोत्सृष्टं शरवर्षं दुरासदम् ॥ मुक्तं वर्षमिवाकाशे वारयिष्यथ संयुगे ॥ ६ ॥
अद्य वो मामका बाणा महाकार्मुकनिस्सृताः ॥ विधमिष्यन्ति गात्राणि तूलराशिमिवानलः ॥ ७ ॥
तीक्ष्णसायकनिर्भिन्नाञ्शूलशक्त्यष्टितोमरैः ॥ अद्य वो गमयिष्यामि सर्वानेव यमक्षयम् ॥ ८ ॥
क्षिपतः शरवर्षाणि क्षिप्रहस्तस्य मे युधि ॥ जीमूतस्येव नदतः कः स्थास्यति ममाग्रतः ॥ ९ ॥
रात्रियुद्धे मया पूर्वं वज्राशनिसमैः शरैः ॥ शायितौ स्थो मया भूमौ विसंज्ञौ सपुरस्सरौ ॥ १० ॥
स्मृतिर्न तेऽस्ति वा मन्ये व्यक्तं वा यमसादनम् ॥ आशीविषमिव क्रुद्धं यन्मां योद्धुं व्यवस्थितः ॥ ११ ॥
तच्छ्रुत्वा राक्षसेन्द्रस्य गर्जितं लक्ष्मणस्तदा ॥ अभीतवदनः क्रुद्धो रावणिं वाक्यमब्रवीत् ॥ १२ ॥
उक्तश्च दुर्गमः पारः कार्याणां राक्षस त्वया ॥ कार्याणां कर्मणा पारं यो गच्छति स बुद्धिमान् ॥ १३ ॥
स त्वमर्थस्य हीनार्थो दुरवापस्य केनचित् ॥ वचो व्याहृत्य जानीषे कृतार्थोस्मीति दुर्मते ॥ १४ ॥
अन्तर्धानगतेनाजौ यस्त्वयाऽऽचरितस्तदा ॥ तस्कराचरितो मार्गो नैष वीरनिषेवितः ॥ १५ ॥
यथा बाणपथं प्राप्य स्थितोऽहं तव राक्षस ॥ दर्शयस्वाद्य तत्तेजो वाचा त्वं किं विकत्थसे ॥ १६ ॥
एवमुक्तो धनुर्भीमं परामृश्य महाबलः ॥ ससर्ज निशितान्बाणानिन्द्रजित्समितिंजयः ॥ १७ ॥
ते निसृष्टा महावेगाः शराः सर्पविषोपमाः ॥ संप्राप्य लक्ष्मणं पेतुः श्वसन्त इव पन्नगाः ॥ १८ ॥

इति शेषः । अलंकृतं स्वतेजसा भूषितं । हनुमत्पृष्ठमासीनमित्यनुवादेन हनुमान् पूर्वं राक्षसैर्युद्ध्वा इन्द्रजित्यागते लक्ष्मणं स्वपृष्ठभागमारोप्य स्थितवानिति गम्यते । उदयस्थरविप्रभमित्यनेन हनुमतः काञ्चनाकृतित्वं लक्ष्मणस्य रविवर्णत्वं चोक्तं ॥ ४ ॥ उवाचैनमिति त्रिपादश्लोक एकान्वयः ॥ एतत् 'अब्रवीत्परुषं' इति पूर्वोक्तस्य विवरणं नभवति । तद्विभीषणमात्रंप्रति । इदं तु सर्वान्प्रति । तच्च परुषं । इदं तु पराक्रमविषयं । समारब्धः संरब्धः ॥ ५ ॥ मुक्तं मेघमुक्तं । वारयिष्यथेत्येतत् सापहासोक्तिः ॥ ६ ॥ वः युष्माकं । विधमिष्यन्ति धक्ष्यन्ति ॥ ७ ॥ तीक्ष्णसायकेति लुप्तविभक्तिकं पदं । तीक्ष्णसायकैरित्यर्थः । शूलशक्त्यष्टितोमरैरित्यत्र शक्तियष्टितोमरैरित्यर्थः । सन्धिरार्षः । तीक्ष्णसायकैः शूलशक्त्यष्टितोमरैश्च निर्भिन्नान् वः युष्मान् । यमक्षयं यमनिलयं । गमयिष्यामीत्यन्वयः ॥ ८ ॥ जीमूतस्येति नादमात्रे दृष्टान्तः ॥ ९ ॥ आग्रहातिशयेन मयेति द्विरुक्तिः ॥ १० ॥ यन्मां योद्धुं व्यवस्थितः अतः स्मृतिर्नास्तीति वा मन्ये । अथवा यमसादनं यमप्रापणं । व्यक्तं प्रत्यक्षं प्रत्यासन्नमिति यावत् । यद्वा सादनं सदनं । स्वार्थेण् प्रत्ययः ॥ ११ ॥ अभीतवदनः भयविकृतिशून्यवदनः ॥ १२ ॥ दुर्गमः दुर्लभः । कार्याणां यमप्रापणादीनां । पारः निर्वाहः । उक्तश्च उक्त एव, न कृतः । अतो दुर्बुद्धिरसीत्यर्थः । कस्तर्हि बुद्धिमानित्यत आह—कार्याणामिति । कार्याणां कर्मणां, आचरणेनेत्यर्थः ॥ १३ ॥ अर्थस्येति तादर्थ्यसंबन्धे षष्ठी । अर्थस्य वचः प्रयोजनार्थं वचः ॥ १४ ॥ दृष्टेप्यस्मत्पराक्रमे कथमित्थं कथ्यत इत्याशङ्क्य मायामयत्वान्न स वीरसंमत इत्याह—अन्तर्धानेति ॥ आजौ युद्धे ॥ १५ ॥ प्रत्यक्षेणापि योद्धुं शक्तोस्मीत्यत आह—यथेति ॥ यथा स्थितोस्मि तथैव, तत्तेजः पूर्वकृततेजः । दर्शयस्वेत्यन्वयः ॥ १६—१७ ॥ सर्पविषोपमाः सर्पविषवत् घोराः ।

श्वागतिकागतिः ॥ २ ॥ ति० एवमपियन्मांयोद्धुमुपस्थितोसि तत्प्रायःपूर्वस्यतेस्मृतिर्नास्ति । वा अथवा । व्यक्तंयातोयमक्षयं । आदिकर्मणिक्तः । यमक्षयं यमगृहं प्रयातुमुपक्रान्तोसि ॥ ११ ॥ ति० अभीतवदनः निर्भयप्रवृत्ताभिवदनव्यवहारः ॥ स० अभीतवदनः भीतं भीतिस्तद्वान्अनःप्राणोयस्यसः । सनभवतीत्यभीतवदनः । भीतस्यवदनं भीतवदनं । नविद्यतेभीतवदनंयस्य सवा ॥ १२ ॥ ती० हेदुर्मते हीनार्थः । शत्रुविजयरूपप्रयोजनहीनःसत्वं केनचित् केनापिदुरवापस्य अर्थस्यविजयरूपप्रयोजन-

[पा०] १ झ. शक्त्यृष्टि. २ ङ. झ. ट. व्यक्तंयातोयमक्षयं. ३ क. ख. घ. ङ. च. झ. ञ. विषसमं. ४ ख. ङ.—ट. योद्धुमुपस्थितः. ५ ङ. झ. ट. राघवस्तदा. ६ ङ. झ. ञ. ट. वाचाव्याहृत्य. ७ ख. तदा. ८ ङ. झ. ञ. ट. स्थितोस्मि.

शरैरतिमहावेगैर्वेगवान्रावणात्मजः ॥ सौमित्रिमिन्द्रजिद्युद्धे विव्याध शुभलक्षणम् ॥ १९ ॥
स शरैरतिविद्धाङ्गो रुधिरेण समुक्षितः ॥ शुशुभे लक्ष्मणः श्रीमान्विधूम इव पावकः ॥ २० ॥
इन्द्रजित्त्वात्मनः कर्म प्रसमीक्ष्याधिगम्य च ॥ विनद्य सुमहानादमिदं वचनमब्रवीत् ॥ २१ ॥
पत्रिणः शितधारास्ते शरा मत्कार्मुकच्युताः ॥ आदास्यन्तेऽद्य सौमित्रे जीवितं जीवितान्तगाः॥२२॥
अद्य गोमायुसङ्घाश्च श्येनसङ्घाश्च लक्ष्मण ॥ गृध्राश्च निपतन्तु त्वां गतासुं निहतं मया ॥ २३ ॥
[अद्य यास्यति सौमित्रे कर्णगोचरतां तव ॥ तर्जनं यमदूतानां सर्वभूतभयावहम्] ॥ २४ ॥
क्षत्रबन्धुं सदाऽनार्यं रामः परमदुर्मतिः ॥ भक्तं भ्रातरमद्यैव त्वां द्रक्ष्यति मया हतम् ॥ २५ ॥
विशस्तकवचं भूमौ व्यपविद्धशरासनम् ॥ हतोत्तमाङ्गं सौमित्रे त्वामद्य निहतं मया ॥ २६ ॥
इति ब्रुवाणं संरब्धं परुषं रावणात्मजम् ॥ हेतुमद्वाक्यमर्थ्यार्थं लक्ष्मणः प्रत्युवाच ह ॥ २७ ॥
वाग्बलं त्यज दुर्बुद्धे क्रूरकर्मासि राक्षस ॥ अथ कस्माद्वदस्येतत्संपादय सुकर्मणा ॥ २८ ॥
अकृत्वा कत्थसे कर्म किमर्थमिह राक्षस ॥ कुरु तत्कर्म येनाहं श्रद्ध्यां तव कत्थनम् ॥ २९ ॥
अनुक्त्वा परुषं वाक्यं किंचिदप्यनवक्षिपन् ॥ अविकत्थन्वधिष्यामि त्वां पश्य पुरुषाधम ॥ ३० ॥
इत्युक्त्वा पञ्च नाराचानाकर्णापूरिताञ्शितान् ॥ निजघान महावेगाँल्लक्ष्मणो राक्षसोरसि ॥ ३१ ॥
सुपत्रवाजिता बाणा ज्वलिता इव पन्नगाः ॥ नैर्ऋतोरस्यभासन्त सवितू रश्मयो यथा ॥ ३२ ॥
स शरैराहतस्तेन सरोषो रावणात्मजः ॥ सुप्रयुक्तैस्त्रिभिर्बाणैः प्रतिविव्याध लक्ष्मणम् ॥ ३३ ॥
स बभूव तदा भीमो नरराक्षससिंहयोः ॥ विमर्दस्तुमुलो युद्धे परस्परजयैषिणोः ॥ ३४ ॥
उभौ हि बलसंपन्नावुभौ विक्रमशालिनौ ॥ उभावपि सुविक्रान्तौ सर्वशस्त्रास्त्रकोविदौ ॥
उभौ परमदुर्जेयावतुल्यबलतेजसौ ॥ ३५ ॥
युयुधाते तदा वीरौ ग्रहाविव नभोगतौ ॥ ३६ ॥
बलवृत्राविवाभीतौ युधि तौ दुष्प्रधर्षणौ ॥ युयुधाते महात्मानौ तदा केसरिणाविव ॥ ३७ ॥
बहूनवसृजन्तौ हि मार्गणौघानवस्थितौ ॥ नरराक्षससिंहौ तौ ग्रहृष्टावभ्ययुध्यताम् ॥ ३८ ॥

पेतुः । भूमाविति शेषः ॥ १८ ॥ शरैरिति । अतिविव्याधेत्यन्वयः । " व्यवहिताश्च " इति व्यवहितप्रयोगः ॥ १९—२० ॥ अधिगम्य फलवत्त्वेन दृष्ट्वा ॥ २१—२५ ॥ विशस्तेति । विशस्तं भिन्नं कवचं यस्य तं त्वां रामो द्रक्ष्यतीत्यनुषङ्गेण योजना ॥ २६—२७ ॥ अथ इदानीं ॥ २८—३१ ॥ सुपत्रवाजिताः सुपत्रैः संजातवेगाः ॥ ३२—३३ ॥ विमर्दः संघर्षः ॥ ३४ ॥ उभौ हीत्यादिसार्धश्लोक एकान्वयः ॥ सुविक्रान्तौ सुष्ठुपराक्रमौ ॥ ३५ ॥ युयुधाते इत्याद्यर्धं ॥ ३६ ॥ बलशब्दो बलशक्त्विन्द्र-

---

स्यसंबन्धिवचोव्याहृत्य कृतार्थोस्मि कृतकृत्योस्मीतिजानीषइतियोजना ॥ १४ ॥ **ती०** पत्रिणःशितधाराइत्यादिश्लोकचतुष्टयस्य श्रुतार्थःस्पष्टः । वास्तवार्थस्तुहेसौमित्रे मत्कार्मुकच्युताःशराः अप्रयोजकशराइत्यर्थः । तेतवशितधाराः जीवितान्तकाःपत्रिणः । मत्तःजीवितमादास्यन्तइतिसंबन्धः ॥ **अद्येति** । हेलक्ष्मण त्वामुद्दिश्य मया लक्ष्म्या लक्ष्म्यैश्वर्येणसहगतासुं मामितिशेषः । गोमायवादयःनिपतन्त्वितिसंबन्धः ॥ क्षत्रबन्धुमिति । सदानार्यमित्यत्रसदा न आर्यमितिच्छेदः । हेसदान दानसहित दानशीलेत्यर्थः । क्षत्रबन्धुं क्षत्रस्यराघवस्यबन्धुं । अतःभ्रातरं अतएवार्यमयाअहतंत्वां परमदुर्मतिः परमदुष्टेष्वपिमतिःअनुग्रहरूपायस्यसःरामः अद्यद्रक्ष्यतीतिसंबन्धः ॥ विशस्तेति । हेसौमित्रे त्वां विनेतिशेषः । विशस्तकवचं हतोत्तमाङ्गं मयानिहतंसैन्यंत्वितिशेषः । रामोद्रक्ष्यतीतिपूर्वेणसंबन्धः ॥ २२—२६ ॥

[पा०] १ अयंश्लोकः ज. पाठेदृश्यते. २ घ. मन्वर्थं. ङ. च. छ. झ. ञ. ट. मर्थज्ञोलक्ष्मणः. ३ ङ. च. छ. झ. क्रूरकर्मन्हि. ४ ङ.—ट. श्रद्धेयं. ५ ख. त्वामद्यपुरुषान्तक. ग. ङ. झ. त्वांपश्यपुरुषादन. घ. ज. ञ. ट. त्वांपश्यपुरुषादक. ६ क. ख. पावकाः. ७ क.—घ. परस्परवधैषिणोः. ८ ङ. झ. ट. विक्रान्तौबलसंपन्नावुभौ. ९ झ. नरराक्षसमुख्यौतौ.

सुसंप्रहृष्टौ नरराक्षसोत्तमौ जयैषिणौ मार्गणचापधारिणौ ॥
परस्परं तौ प्रववर्षतुर्भृशं शरौघवर्षेण बलाहकाविव ॥ ३९ ॥
अभिप्रवृद्धौ युधि युद्धकोविदौ शरासिचण्डौ शितशस्त्रधारिणौ ॥
अभीक्ष्णमाविध्यधतुर्महाबलौ महाहवे शम्बरवासवाविव ॥ ४० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टाशीतितमः सर्गः ॥ ८८ ॥

एकोननवतितमः सर्गः ॥ ८९ ॥

लक्ष्मणेन्द्रजितोर्महायुद्धम् ॥ १ ॥

ततः शरं दाशरथिः संधायामित्रकर्शनः ॥ ससर्ज राक्षसेन्द्राय क्रुद्धः सर्प इव श्वसन् ॥ १ ॥
तस्य ज्यातलनिर्घोषं स श्रुत्वा रावणात्मजः ॥ विवर्णवदनो भूत्वा लक्ष्मणं समुदैक्षत ॥ २ ॥
तं विवर्णमुखं दृष्ट्वा राक्षसं रावणात्मजम् ॥ सौमित्रिं युद्धसंयुक्तं प्रत्युवाच विभीषणः ॥ ३ ॥
निमित्तान्यनुपश्यामि यान्यस्मिन्रावणात्मजे ॥ त्वर तेन महाबाहो भग्न एष न संशयः ॥ ४ ॥
ततः संधाय सौमित्रिर्बाणानग्निशिखोपमान् ॥ मुमोच निशितांस्तस्मिन्सर्पानिव महाविषान् ॥ ५ ॥
शक्राशनिसमस्पर्शैर्लक्ष्मणेनाहतः शरैः ॥ मुहूर्तमभवन्मूढः सर्वसंक्षुभितेन्द्रियः ॥ ६ ॥
उपलभ्य मुहूर्तेन संज्ञां प्रत्यागतेन्द्रियः ॥ ददर्शावस्थितं वीरं वीरो दशरथात्मजम् ॥ ७ ॥
सोभिचक्राम सौमित्रिं रोषात्संरक्तलोचनः ॥ अब्रवीच्चैनमासाद्य पुनः स परुषं वचः ॥ ८ ॥
किं न स्मरसि तद्युद्धे प्रथमे मत्पराक्रमम् ॥ निबद्धस्त्वं सह भ्रात्रा यदा भुवि विवेष्टसे ॥ ९ ॥
युवां खलु महायुद्धे शक्राशनिसमैः शरैः ॥ शायितौ प्रथमं भूमौ विसंज्ञौ सपुरस्सरौ ॥ १० ॥
स्मृतिर्वा नास्ति तें मन्ये व्यक्तं वा यमसादनम् ॥ गन्तुमिच्छसि यस्मात्त्वं मां धर्षयितुमिच्छसि॥ ११॥

परः । नामैकदेशे नामग्रहणात् ॥३७—३८॥ शरौघः मेघपक्षे जलौघः । शरशब्दो हि जलवाची । शरधिरिति समुद्रपर्यायात् ॥ ३९—४० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टाशीतितमः सर्गः ॥ ८८ ॥

अथ लक्ष्मणेन्द्रजितोः सुमहान्संप्रहारः—ततः शरमित्यादि ॥ १—२ ॥ सौमित्रिं प्रति उद्दिश्य ॥ ३ ॥ अस्मिन् यानि मुखवैवर्ण्यस्तब्धत्वादीनि निमित्तानि अनुपश्यामि, तैरयं भग्न इति जाने । तेन कारणेन त्वर त्वरस्व ॥ ४—५ ॥ सर्वसंक्षुभितेन्द्रियः संक्षुभितसर्वेन्द्रियः ॥ ६—८ ॥ त्वं भ्रात्रा सह निबद्ध इति यत् प्रथमे तद्युद्धे तस्मिन्युद्धे । मत्पराक्रमं त्वन्निबन्धनरूपं । न स्मरसि किं । यदा यत्र युद्धकाले । विवेष्टसे विवेष्टितवानसि ॥ ९ ॥ तमेव पराक्रमं विशिनष्टि—युवामिति ॥ १० ॥ व्यक्तं

ति० " नरराक्षसमुख्यौतौ " इत्युत्तरश्लोकद्वयंभिन्नवृत्तंप्रक्षिप्तं । तदुत्तरंसर्गविच्छेदश्चासंप्रदायः । तयोर्युद्धस्यैवाग्रेसत्त्वेनप्रकरणान्तराभावादितिकतकः ॥ स० सुसंप्रहृष्टावित्यादिश्लोकद्वयंसर्गव्यवच्छेदकत्वेनप्रक्षिप्तमितिसंप्रदायः ॥ ४० ॥ इत्यष्टाशीतितमःसर्गः ॥ ८८ ॥

स० यानि पराजयकालेतत्सूचकत्वेनगृहीतव्याप्तिकानि तानिनिमित्तानि वदनवैवर्ण्यादीनि अस्मिन्ननुपश्यामि । त्वर त्वरस्व ॥ ४ ॥ स० विषवैद्यः विषोल्बणान् सर्पान्पेट्व्यायथामुञ्चति तथाऽऽशीविषोपमान् शरान् । मुमोच । सर्पान् अनयतिचेष्टयतीतिसर्पान् विषवैद्यः । विषोल्बणान् सर्पानिवेतिवा । अस्मिन्पक्षेनाध्याहारः ॥ ५ ॥

[पा०] १ सुसंप्रहृष्टाविति, अभिप्रवृद्धाविति चश्लोकद्वयं झ. पाठेनदृश्यते. अत्रसर्गविच्छेदश्चनोपलभ्यते. २ ङ. झ. ञ. ट. शरान्दाशरथिः. ३ झ. ञ. ट. शरानाशीविषोपमान्. ४ ङ. च. झ. ट. विषोल्बणान्. ५ क. ङ. च. छ. झ. ट. युधिविचेष्टसे.

यदि ते प्रथमे युद्धे न दृष्टो मत्पराक्रमः ॥ अद्य ते दर्शयिष्यामि तिष्ठेदानीं व्यवस्थितः ॥ १२ ॥
इत्युक्त्वा सप्तभिर्बाणैरभिविव्याध लक्ष्मणम् ॥ दशभिस्तु हनूमन्तं तीक्ष्णधारैः शरोत्तमैः ॥ १३ ॥
ततः शरशतेनैव सुप्रयुक्तेन वीर्यवान् ॥ क्रोधाद्विगुणसंरब्धो निर्बिभेद विभीषणम् ॥ १४ ॥
तद्दृष्ट्वेन्द्रजिता कर्म कृतं रामानुजस्तदा ॥ अचिन्तयित्वा प्रहसन्नैतत्किंचिदिति ब्रुवन् ॥
मुमोच स शरान्घोरान्संगृह्य नरपुङ्गवः ॥ १५ ॥
अभीतवदनः क्रुद्धो रावणिं लक्ष्मणो युधि ॥ नैवं रणगताः शूराः प्रहरन्ते निशाचर ॥ १६ ॥
लघवश्चाल्पवीर्याश्च सुखा हीमे शरास्तव ॥ नैवं शूरास्तु युध्यन्ते समरे जयकाङ्क्षिणः ॥
इत्येवं तं ब्रुवाणस्तु शरवर्षैरवाकिरत् ॥ १७ ॥
तस्य बाणैः सुविध्वस्तं कवचं हेमभूषितम् ॥ व्यशीर्यत रथोपस्थे ताराजालमिवाम्बरात् ॥ १८ ॥
विधूतवर्मा नाराचैर्बभूव स कृतव्रणः ॥ इन्द्रजित्समरे वीरः प्ररूढ इव सानुमान् ॥ १९ ॥
ततः शरसहस्रेण संक्रुद्धो रावणात्मजः ॥ बिभेद समरे वीरं लक्ष्मणं भीमविक्रमः ॥ २० ॥
व्यशीर्यत महादिव्यं कवचं लक्ष्मणस्य च ॥ कृतप्रतिकृतान्योन्यं बभूवतुरभिद्रुतौ ॥ २१ ॥
अभीक्ष्णं निःश्वसन्तौ तौ युध्येतां तुमुलं युधि ॥ शरसंकृत्तसर्वाङ्गौ सर्वतो रुधिरोक्षितौ ॥ २२ ॥
सुदीर्घकालं तौ वीरावन्योन्यं निशितैः शरैः ॥ ततक्षतुर्महात्मानौ रणकर्मविशारदौ ॥ २३ ॥
बभूवतुश्चात्मजये यत्तौ भीमपराक्रमौ ॥ तौ शरौघैस्तदा कीर्णौ निवृत्तकवचध्वजौ ॥
स्रवन्तौ रुधिरं चोष्णं जलं प्रस्रवणाविव ॥ २४ ॥
शरवर्षं ततो घोरं मुञ्चतोर्भीमनिस्स्वनम् ॥ सासारयोरिवाकाशे नीलयोः कालमेघयोः ॥ २५ ॥
तयोरथ महान्कालो व्यत्ययाद्युध्यमानयोः ॥ न च तौ युद्धवैमुख्यं श्रमं वाऽप्युपजग्मतुः ॥२६॥
अस्त्राण्यस्त्रविदां श्रेष्ठौ दर्शयन्तौ पुनः पुनः ॥ शरानुच्चावचाकारानन्तरिक्षे बबन्धतुः ॥ २७ ॥
व्यपेतदोषमस्यन्तौ लघु चित्रं च सुष्ठु च ॥ उभौ तौ तुमुलं घोरं चक्रतुर्नरराक्षसौ ॥ २८ ॥
तयोः पृथक्पृथक्भीमः शुश्रुवे तलनिस्स्वनः ॥ प्रकम्पयञ्जनं घोरो निर्घात इव दारुणः ॥ २९ ॥
स तयोर्भ्राजते शब्दस्तदा समरसक्तयोः ॥ सुघोरयोर्निष्टनतोर्गगने मेघयोर्यथा ॥ ३० ॥

नूनमित्यर्थः ॥ ११—१३ ॥ क्रोधाद्विगुणसंरब्ध इति । लक्ष्मणादिविषयरोषापेक्षया विभीषणविषये द्विगुणं कुपित इत्यर्थः ॥ १४ ॥ तद्दृष्ट्वेत्यादिसार्धश्लोक एकान्वयः ॥ नैतत्किंचिदिति ब्रुवन् एतदकिंचित्करमिति ब्रुवन्नित्यर्थः ॥ १५ ॥ अभीतवदन इत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ अकिंचित्करत्वमेवाह—नैवमिति ॥ १६—१८ ॥ प्ररूढः प्ररूढवृक्षः ॥ १९—२० ॥ कृते प्रतिकृतं अन्योन्यं यस्मिन् कर्मणि तत्तथोक्तं ॥ २१ ॥ युध्येतां अयुध्येतां ॥ २२ ॥ ततक्षतुः अन्योन्यं बभञ्जतुः ॥ २३ ॥ यत्तौ यत्नवन्तौ ॥ २४ ॥ शरवर्षमित्यादिश्लोकद्वयमेकान्वयं ॥ सासारयोः सधारापातयोः । "धारासंपात आसारः" इत्यमरः ॥ २५—२७ ॥ व्यपेतदोषं व्यपगतमोहत्वदोषं । अस्यन्तौ बाणान्क्षिपन्तौ ॥ २८—३० ॥

स० व्यवस्थितः युद्धार्थनिश्चितः सन् । तिष्ठ । व्यवस्थितः अवस्थितस्संस्त्वांदर्शयिष्यामीतिवा । अनेनपूर्ववदन्तर्धानंनास्तीतिसूच्यते ॥ १२ ॥ ति० प्रत्यूषेभानुमानिवक्षतजरक्तवर्णत्वादितिभावः ॥ १९ ॥ स० उच्चावचाकारान् अनेकप्रभेदविशिष्टाकारान् ॥ २७ ॥

[पा०] १ क. ख. घ.—छ. झ. ञ. ट. अद्यत्वां. २ ज. रावणिंवाक्यमब्रवीत्. क. ख. रावणिंलक्ष्मणोब्रवीत्. च. रावणिंलक्ष्मणोवदत्. ३ ङ. झ. ञ. ट. युद्धकाङ्क्षिणः. ४ ङ. च. झ. ञ. ट. ब्रुवन्धन्वीशरैरभिववर्षह ख. वदन्वीरःशरैरभिववर्षह. ५ ङ. झ. ट. वीरः प्रत्यूषेभानुमानिव. ६ ख. च. ट. ररिंदमौ. ७ ग. ङ.—ट. व्यतीयात्. ८ झ. ञ. ट. तुमुलखनः. ९ ङ. झ. ट. सकंपंजनयामासनिर्घातइव. १० ङ. झ. ञ. ट. निस्स्वनतोः.

सुवर्णपुङ्खैर्नाराचैर्बलवन्तौ कृतव्रणौ ॥ प्रसुस्रुवाते रुधिरं कीर्तिमन्तौ जये धृतौ ॥ ३१ ॥
ते गात्रयोर्निपतिता रुक्मपुङ्खाः शरा युधि ॥ असृङ्मद्वा[1] विनिष्पत्य विविशुर्धरणीतलम् ॥ ३२ ॥
अन्ये सुनिशितैः शस्त्रैराकाशे संजघट्टिरे ॥ बभञ्जुश्चिच्छिदुश्चान्ये तयोर्बाणाः सहस्रशः ॥ ३३ ॥
स बभूव रणो घोरस्तयोर्बाणमयश्चयः ॥ अग्निभ्यामिव दीप्ताभ्यां सत्रे कुशमयश्चयः ॥ ३४ ॥
तयोः कृतव्रणौ देहौ शुशुभाते महात्मनोः ॥ सपुष्पाविव निष्पत्रौ वने शाल्मलिकिंशुकौ ॥ ३५ ॥
चक्रतुस्तुमुलं घोरं सन्निपातं मुहुर्मुहुः ॥ इन्द्रजिल्लक्ष्मणश्चैव परस्परवधैषिणौ[2] ॥ ३६ ॥
लक्ष्मणो रावणिं युद्धे रावणिश्चापि लक्ष्मणम् ॥ अन्योन्यं तावभिघ्नन्तौ न श्रमं प्रत्यपद्यताम्[3] ॥ ३७ ॥
बाणजालैः शरीरस्थैरवगाढैस्तरस्विनौ ॥ शुशुभाते महावीर्यौ प्ररूढाविव पर्वतौ ॥ ३८ ॥
तयो रुधिरसिक्तानि संवृतानि शरैर्भृशम् ॥ बभ्राजुः सर्वगात्राणि ज्वलन्त इव पावकाः ॥ ३९ ॥
तयोरथ महान्कालो व्यत्ययाद्युध्यमानयोः[4] ॥ न च तौ युद्धवैमुख्यं श्रमं वाऽप्युपजग्मतुः ॥ ४० ॥

अथ समरपरिश्रमं निहन्तुं समरमुखेष्वजितस्य लक्ष्मणस्य ॥
प्रियहितमुपपादयन्महौजाः[5] समरमुपेत्य विभीषणोऽवतस्थे ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोननवतितमः सर्गः ॥ ८९ ॥

नवतितमः सर्गः ॥ ९० ॥

विभीषणेन्द्रजितोर्युद्धम् ॥ १ ॥ हनुमदादीनांराक्षसैस्सहमहायुद्धम् ॥ २ ॥ पुनर्लक्ष्मणेन्द्रजितोर्युद्धम् ॥ ३ ॥ लक्ष्मणेनेन्द्रजित्सारथिवधः ॥ ४ ॥ प्रमाथिप्रमुखवानरैर्हयहननपूर्वकमिन्द्रजिद्रथविमथनम् ॥ ५ ॥

युध्यमानौ तु तौ दृष्ट्वा प्रसक्तौ नरराक्षसौ ॥ प्रभिन्नाविव मातङ्गौ परस्परवधैषिणौ ॥ १ ॥
तौ द्रष्टुकामः संग्रामे परस्परगतौ बली ॥ शूरः स रावणभ्राता तस्थौ संग्राममूर्धनि ॥ २ ॥
ततो विस्फारयामास महद्धनुरवस्थितः ॥ उत्ससर्ज च तीक्ष्णाग्रान्राक्षसेषु महाशरान् ॥ ३ ॥

धृतौ अवहितौ ॥ ३१—३२ ॥ तयोः अन्ये केचन बाणाः आकाशे सुनिशितैः शस्त्रैः संजघट्टिरे संघट्टिताः । अन्ये बाणाः बाणान् सहस्रशः बभञ्जुः । चिच्छिदुश्चेति संबन्धः ॥ ३३ ॥ रणः घोरो बभूव । यस्मिन् तयोर्बाणमयश्चयः सत्रे दीप्ताभ्यामग्निभ्यां सहितः कुशमयश्चय इवासीत् । अग्नी गार्हपत्याहवनीयौ ॥ ३४—३५ ॥ सन्निपातं युद्धं ॥ ३६ ॥ प्रत्यपद्यतां प्रत्यपद्येतां ॥ ३७—३८ ॥ बभ्राजुः । आर्षं परस्मैपदं ॥ ३९—४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोननवतितमः सर्गः ॥ ८९ ॥

अथेन्द्रजितो रथभङ्गः—युध्यमानौ त्वित्यादिश्लोकद्वयमेकान्वयं ॥ प्रभिन्नौ मत्तमातङ्गाविव परस्परगतौ परस्परं युद्धार्थं सङ्गतौ । तौ लक्ष्मणेन्द्रजितौ प्रथमं द्रष्टुकामः स विभीषणस्तौ दृष्ट्वा संग्राममूर्धनि योद्धुं तस्थावित्यन्वयः । स्वयं प्रथमं युद्धं कर्तुमुद्युक्तोपि तयोर्बलाधिक्यं द्रष्टुं तूष्णीं स्थितः । तयोर्बलतौल्ये दृष्टे स्वस्य रामविषयकिञ्चित्कारार्थमिदानीं युद्धाय तस्थावित्यर्थः ॥ १—२ ॥ धनुः तादात्विकं

तीo समरपरिश्रमं समरेपरिश्रमोयस्यतं । इन्द्रजितमितिशेषः ॥ ४१ ॥ इत्येकोननवतितमःसर्गः ॥ ८९ ॥

[पाo] १ ङ.—ट. असृग्दिग्धाविनिष्पेतुर्विविशुः. २ क. ख. ग. ङ.—ट. परस्परजयैषिणौ. ३ क. ग. ङ. च. झ. ञ. व्यतीयात्. ४ ख. च. छ. झ. ञ. ट. न्महात्मा.

ते शराः शिखिसंकाशा निपतन्तः समाहिताः ॥ राक्षसान्दारयामासुर्वज्राणीव महागिरीन् ॥ ४ ॥
विभीषणस्यानुचरास्तेऽपि शूलासिपट्टिशैः ॥ चिच्छिदुः समरे वीरान्राक्षसान्राक्षसोत्तमाः ॥ ५ ॥
राक्षसैस्तैः परिवृतः स तदा तु विभीषणः ॥ बभौ मध्ये ग्रहाणां कलभानामिव द्विपः ॥ ६ ॥
ततः संचोदयानो वै हरीन्रक्षोरणप्रियान् ॥ उवाच वचनं काले कालज्ञो रक्षसां वरः ॥ ७ ॥
एकोऽयं राक्षसेन्द्रस्य परायणमिव स्थितः ॥ एतच्छेषं बलं तस्य किं तिष्ठत हरीश्वराः ॥ ८ ॥
अस्मिन्विनिहते पापे राक्षसे रणमूर्धनि ॥ रावणं वर्जयित्वा तु शेषमस्य हतं बलम् ॥ ९ ॥
प्रहस्तो निहतो वीरो निकुम्भश्च महाबलः ॥ कुम्भकर्णश्च कुम्भश्च धूम्राक्षश्च निशाचरः ॥ १० ॥
जम्बुमाली महामाली तीक्ष्णवेगोशनिप्रभः ॥ सुप्तघ्नो यज्ञकोपश्च वज्रदंष्ट्रश्च राक्षसः ॥ ११ ॥
संह्रादी विकटो निघ्नस्तपनो दम एव च ॥ प्रघासः प्रघसश्चैव प्रजङ्घो जङ्घ एव च ॥ १२ ॥
अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च वीर्यवान् ॥ विद्युज्जिह्वो द्विजिह्वश्च सूर्यशत्रुश्च राक्षसः ॥ १३ ॥
अकम्पनः सुपार्श्वश्च चक्रमाली च राक्षसः ॥ कम्पनः सत्त्ववन्तौ तौ देवान्तकनरान्तकौ ॥ १४ ॥
एतान्निहत्यातिबलान्बहून्राक्षससत्तमान् ॥ बाहुभ्यां सागरं तीर्त्वा लङ्घ्यतां गोष्पदं लघु ॥ १५ ॥
एतावदेव शेषं वो जेतव्यमिह वानराः ॥ हताः सर्वे समागम्य राक्षसा बलदर्पिताः ॥ १६ ॥
अयुक्तं निधनं कर्तुं पुत्रस्य जनितुर्मम ॥ घृणामपास्य रामार्थे निहन्यां भ्रातुरात्मजम् ॥ १७ ॥
हन्तुकामस्य मे बाष्पं चक्षुश्चैव निरुध्यति ॥ तमेवैष महाबाहुर्लक्ष्मणः शमयिष्यति ॥
वानरा यत संभूय भृत्यानस्य समीपगान् ॥ १८ ॥
इति तेनातियशसा राक्षसेनाभिचोदिताः ॥ वानरेन्द्रा जहृषिरे लाङ्गूलानि च विव्यधुः ॥ १९ ॥
ततस्ते कपिशार्दूलाः क्ष्वेलन्तश्च मुहुर्मुहुः ॥ मुमुचुर्विविधान्नादान्मेघान्दृष्ट्वेव बर्हिणः ॥ २० ॥
जाम्बवानपि तैः सर्वैः स्वयूथैरपि संवृतः ॥ अश्मभिस्ताडयामास नखैर्दन्तैश्च राक्षसान् ॥ २१ ॥
निघ्नन्तमृक्षाधिपतिं राक्षसास्ते महाबलाः ॥ परिवव्रुर्भयं त्यक्त्वा तमनेकविधायुधाः ॥ २२ ॥
शरैः परशुभिस्तीक्ष्णैः पट्टिशैर्यष्टितोमरैः ॥ जाम्बवन्तं मृधे जघ्नुर्निघ्नन्तं राक्षसीं चमूम् ॥ २३ ॥
स संग्रहारस्तुमुलः संजज्ञे कपिरक्षसाम् ॥ देवासुराणां क्रुद्धानां यथा भीमो महास्वनः ॥ २४ ॥

किंचित् । विभीषणस्य केवलगदापाणित्वात् ॥ ३ ॥ वज्राणि अशनयः ॥ ४—७ ॥ परायणं गतिः ॥ ८—९ ॥ उक्तानुक्तांश्च राक्षसान् युद्धे हतान्कांश्चित्परिगणयत्युत्साहनाय—प्रहस्त इत्यादिना श्लोकपञ्चकेन ॥ अकम्पनः कम्पनश्च राक्षसौ सर्वत्र निहत इत्यनेनान्वयः । देवान्तकनरान्तकाविति तत्र निहताविति विपरिणामः कार्यः ॥ १०—१४ ॥ एतान् राक्षससत्तमान् निहत्य स्थितानां भवतां इन्द्रजितो हननं, बाहुभ्यां सागरं तीर्त्वा स्थितस्य पुंसो गोष्पदतरणमिव सुकरमिति निदर्शना । बाहुभ्यां सागरं तीर्त्वैव एतानतिबलान् बहून् राक्षससत्तमान् निहत्य स्थितैः भवद्भिः गोष्पदमिव लघु इन्द्रजिद्धननरूपं स्वल्पं कार्यं लङ्घ्यतामित्यन्वयः ॥ १५ ॥ एतावदेव इन्द्रजिन्मात्रमेव ॥१६॥ जनितुः जनयितुः । पितृव्यस्येत्यर्थः ॥ १७ ॥ बाष्पं कर्तृ । चक्षुः निरुध्यति निरुणद्धि ॥ १८—२३ ॥ यथा भीम इति । महास्वनो देवानां संग्रहारो यथा तथे-

---

ति० निहन्यां हननोपायप्रवर्तनेनेतिभावः ॥१७॥ शि० ननुतर्हित्वयैवनिहन्यतां किंलक्ष्मणयुद्धेनेत्यतआह—हन्विति ॥१८॥

[पा०] १ ग. ङ.—ट. वैज्राइव. २ ख. च. छ. ज. प्रसुप्तानां. ग. ङ. झ. ट. प्रधृष्टानां. ३ ङ. झ. ट. संचोदमानोवै. च. संचोदयामास. ४ ख. ङ.—ट. वधप्रियान्. ५ ङ. झ. तास्मिंश्चनिहते. ६ ख. ग. च. छ. ज. महाबलः. ७ ङ. च. झ. ज. ट. मन्दएवच. ८ ङ. झ. परिभर्त्स्यभर्तृ.

हनुमानपि संक्रुद्धः सालमुत्पाट्य वीर्यवान् ॥ [सं लक्ष्मणं स्वयं पृष्ठादवरोप्य महामनाः ॥]
रक्षसां कदनं चक्रे समासाद्य सहस्रशः ॥ २५ ॥
स दत्त्वा तुमुलं युद्धं पितृव्यस्येन्द्रजिद्युधि ॥ लक्ष्मणं परवीरघ्नं पुनरेवाभ्यधावत ॥ २६ ॥
तौ प्रयुद्धौ तदा वीरौ मृधे लक्ष्मणराक्षसौ ॥ शरौघानभिवर्षन्तौ जघ्नतुस्तौ परस्परम् ॥ २७ ॥
अभीक्ष्णमन्तर्दधतुः शरजालैर्महाबलौ ॥ चन्द्रादित्याविवोष्णान्ते यथा मेघैस्तरस्विनौ ॥ २८ ॥
न ह्यादानं न संधानं धनुषो वा परिग्रहः ॥ न विप्रमोक्षो बाणानां न विकर्षो न विग्रहः ॥ २९ ॥
न मुष्टिप्रतिसंधानं न लक्ष्यप्रतिपादनम् ॥ अदृश्यत तयोस्तत्र युध्यतोः पाणिलाघवात् ॥ ३० ॥
चापवेगविनिर्मुक्तबाणजालैः समन्ततः ॥ अन्तरिक्षे हि संछन्ने न रूपाणि चकाशिरे ॥ ३१ ॥
लक्ष्मणो रावणिं प्राप्य रावणिश्चापि लक्ष्मणम् ॥ अव्यवस्था भवत्युग्रा ताभ्यामन्योन्यविग्रहे ॥३२॥
ताभ्यामुभाभ्यां तरसा विसृष्टैर्विशिखैः शितैः ॥ निरन्तरमिवाकाशं बभूव तमसाऽऽवृतम् ॥ ३३ ॥
तैः पतद्भिश्च बहुभिस्तयोः शरशतैः शितैः ॥ दिशश्च प्रदिशश्चैव बभूवुः शरसंकुलाः ॥ ३४ ॥
तमसा संवृतं सर्वमासीद्भीमतरं महत् ॥ अस्तं गते सहस्रांशौ संवृतं तमसेव हि ॥ ३५ ॥
रुधिरौघमहानद्यः प्रावर्तन्त सहस्रशः ॥ क्रव्यादा दारुणा वाग्भिश्चिक्षिपुर्भीमनिस्स्वनम् ॥ ३६ ॥

त्यर्थः ॥ २४ ॥ हनुमानिति । अत्र हनुमतो युद्धकथनात् किंचिद्विश्रमार्थं तस्य पृष्ठादवरूढो लक्ष्मण इत्यवगम्यते । सहस्रशः कदनमित्यन्वयः ॥२५–२८॥ न ह्यादानमित्यादिश्लोकद्वयमेकान्वयं ॥ आदानं बाणस्य तूणादुद्धरणं । संधानं उद्धृतस्य बाणस्य धनुष्यवस्थापनं । धनुषो वा परिग्रहः सव्यापसव्यत्वेन कार्मुकग्रहणं । बाणानां विप्रमोक्षः विसर्जनं । विकर्षः आकर्णग्रहणं । विग्रहः आलीढाद्यवस्थानविशेषः, सावष्टम्भावस्थानं वा, धनुर्ज्यादीनां प्रविभागो वा । "विग्रहः समरे काये विरोधप्रविभागयोः" इति विश्वः । मुष्टिप्रतिसंधानं ज्याकार्मुकयोर्मुष्टिबन्धनं । लक्ष्यप्रतिपादनं लक्ष्यप्रापणं । लक्ष्यवेध इति यावत् ॥ २९—३० ॥ रूप्यन्त इति रूपाणि वस्तूनि । बाणव्यतिरेकेण न किंचित्तदानीं दृश्यत इति भावः ॥ ३१ ॥ लक्ष्मण इति ॥ लोकव्यवहारानुसारेणात्र क्रियाकारकसंबन्धः । लक्ष्मणो रावणिं रावणिश्चापि लक्ष्मणं प्राप्य ताभ्यामन्योन्यविग्रहे अन्योन्याभिभवे । उग्रा अव्यवस्था भवति । अन्योन्यप्राप्तावयमेनं निगृह्णाति अयं वा एनमिति निश्चयो नाभवदित्यर्थः । यद्वा रावणिं लक्ष्मणो रावणिश्चापि लक्ष्मणं प्राप्य अयुध्येतामिति शेषः । ताभ्यां तथा युद्धं कुर्वद्भ्यां । अन्योन्यविग्रहे परस्परप्रहारे क्रियमाणे । उग्रा अव्यवस्था भवति । क्षणे क्षणे जयपराजयनियमो नाभूदित्यर्थः ॥ ३२—३३ ॥ तैः पतद्भिरित्यादिश्लोकद्वयमेकान्वयं ॥ शरशतैः निमित्तभूतैः । महत् अत्यन्तं ॥ ३४—३५ ॥ चिक्षिपुः चक्रुः ॥ ३६ ॥

ति० लक्ष्मणं पृष्ठादवरोप्य विश्रमार्थंस्वारूढंलक्ष्मणंभूमावस्थाप्यविभीषणसहायार्थंहनुमान्कदनंचक्रे ॥ २५ ॥ ती० उष्णान्ते वर्षादौचन्द्रादित्याविवस्थितौ तरस्विनौ वेगवन्तौ । महाबलौलक्ष्मणेन्द्रजितौ मेघैर्यथा मेघैरिव । शरजालैरभीक्ष्णं अन्तर्दधतुः अदृश्यौबभूवतुः ॥ २८ ॥ ति० उग्राऽव्यवस्था तत्तद्वाणैरयुध्यद्वानरराक्षसवधरूपा भवति अभवदित्यर्थः । यत्तु " अयमेनं निगृह्णाति सएनंवेत्यनिश्चयरूपाव्यवस्था " इतिव्याख्यानं तच्चिन्त्यं । तस्याअव्यवस्थायाउग्रत्वस्यनिरूपयितुमशक्यत्वादुग्रेति विशेषणवैयर्थ्याच्च ॥ स० लक्ष्मणोरावणिंप्राप्य रावणिरपिलक्ष्मणंप्राप्येत्येवंस्थिताभ्यांताभ्यां अन्योन्यविग्रहेयुद्धे उग्रा दुःखकारणत्वात्क्रूरा अव्यवस्था इममिदानींजेष्यामीतिसंकल्पासिद्धिरूपाभवति अभूत् । एवंचोक्तरीत्याऽव्यवस्थायाउग्रत्वेसंभवतिसति । " उग्रत्वस्यनिरूपयितुमशक्यत्वात् " इतियन्नागोजिभट्टेनोक्तं तदसंगतं । उग्रत्वस्यनिरूपयितुमशक्यत्वादित्यनेनैववैयर्थ्यलाभे उग्रेतिविशेषणवैयर्थ्याच्चेतिदूषणान्तरतयाकथनंत्वसंगततरमितिज्ञेयं ॥ ३२ ॥ स० शरसंकुलाः जलसंकुलाः वर्षाकालेदिशःप्रदिशश्चयथातथा शरशतैःसंकुलाइतिबुद्ध्याविवेकेनान्वयः ॥ ३४ ॥

[पा०] १ घ.—ट. सानुमुत्पाट्यपर्वतात्. २ इदमर्धं ङ.—ट. पाठेषुदृश्यते. ३ क. ङ. झ. ञ. ट. दुरासादः. घ. दुरावारः. ख. शतशोथ. ४ ङ. च. झ. ञ. ट. स्येन्द्रजिद्बली. ५ ङ. झ. ञ. परवीरघ्नः. ६ क. ख. ग. च. छ. भीमनिस्स्वनाः. ङ. झ. ट. भीमनिस्स्वनान्.

न तदानीं ववौ वायुर्न च जज्वाल पावकः ॥ स्वस्त्यस्तु लोकेभ्य इति जजल्पुश्च महर्षयः ॥
संपेतुश्चात्र संप्राप्ता[1] गन्धर्वाः सह चारणैः ॥ ३७ ॥
अथ राक्षससिंहस्य कृष्णान्कनकभूषणान् ॥ शरैश्चतुर्भिः सौमित्रिर्विव्याध चतुरो हयान् ॥ ३८ ॥
ततोऽपरेण भल्लेन शितेन निशितेन च ॥ संपूर्णायतमुक्तेन सुपत्रेण[3] सुवर्चसा ॥ ३९ ॥
महेन्द्राशनिकल्पेन सूतस्य विचरिष्यतः ॥ स तेन बाणाशनिना तलशब्दानुनादिना ॥
लाघवाद्राघवः श्रीमाञ्शिरः कायादपाहरत् ॥ ४० ॥
स यन्तरि महातेजा हते मन्दोदरीसुतः ॥ स्वयं सारथ्यमकरोत्पुनश्च धनुरस्पृशत् ॥
तदद्भुतमभूत्तत्र सामर्थ्यं पश्यतां युधि ॥ ४१ ॥
हयेषु व्यग्रहस्तं तं विव्याध निशितैः शरैः ॥ धनुष्यथ पुनर्व्यग्रे हयेषु मुमुचे शरान् ॥ ४२ ॥
छिद्रेषु तेषु बाणेषु सौमित्रिः शीघ्रविक्रमः ॥ अर्दयामास बाणौघैर्विचरन्तमभीतवत् ॥ ४३ ॥
निहतं सारथिं दृष्ट्वा समरे रावणात्मजः ॥ प्रजहौ समरोद्धर्षं विषण्णः स बभूव ह ॥ ४४ ॥
विषण्णवदनं दृष्ट्वा राक्षसं हरियूथपाः ॥ ततः परमसंहृष्टा लक्ष्मणं चाभ्यपूजयन् ॥ ४५ ॥
ततः प्रमाथी शरभो रंभसो गन्धमादनः ॥ अमृष्यमाणाश्चत्वारश्चकुर्वेगं हरीश्वराः ॥ ४६ ॥
ते चास्य हयमुख्येषु तूर्णमुत्प्लुत्य[8] वानराः ॥ चतुर्षु समहावीर्या[12] निपेतुर्भीमविक्रमाः ॥ ४७ ॥
तेषामधिष्ठितानां तैर्वानरैः पर्वतोपमैः ॥ मुखेभ्यो रुधिरं रक्तं[13] हयानां समवर्तत ॥
ते हया मथिता भग्ना व्यसवो धरणीं गताः ॥ ४८ ॥
ते निहत्य हयांस्तस्य प्रमथ्य च महारथम् ॥ पुनरुत्पत्य वेगेन तस्थुर्लक्ष्मणपार्श्वतः[10] ॥ ४९ ॥
स हताश्वादवप्लुत्य रथान्मथितसारथेः[11] ॥ शरवर्षेण सौमित्रिमभ्यधावत रावणिः ॥ ५० ॥

ततो महेन्द्रप्रतिमः स लक्ष्मणः पदातिनं तं[12] निशितैः शरोत्तमैः ॥
सृजन्तमाजौ निशिताञ्शरोत्तमान्भृशं तदा बाणगणैर्न्यवारयत्[13] ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे नवतितमः सर्गः ॥ ९० ॥

अत्र युद्धस्थले । पूर्वं संप्राप्ताः गन्धर्वाः चारणैः सह संपेतुः । अन्यत्र गता इत्यर्थः । अतिघोरयुद्धदर्शनभयादिति भावः ॥ ३७—३८ ॥ ततोऽपरेणेत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ संपूर्णायतमुक्तेन संपूर्णाकृष्टमुक्तेन ॥ ३९—४२ ॥ छिद्रेषु रन्ध्रेषु । बाणेषु बाणप्रयोगेषु । शीघ्रविक्रम इत्यन्वयः ॥४३॥ समरोद्धर्षं युद्धगर्वं ॥ ४४—४६ ॥ समहावीर्याः महावीर्यसहिताः ॥ ४७ ॥ रक्तं शोणितं ॥ ४८—५० ॥ पदातिनं पदाभ्यामापतन्तं गच्छन्तं । "अत सातत्यगमने" इत्यस्माण्णिनिः ॥ ५१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने नवतितमः सर्गः ॥ ९० ॥

ति० संपूर्णायतमुक्तेन संपूर्णआकर्णपर्यन्तं आयतेन आकृष्टेन ततोमुक्तेन ॥ ३९ ॥ ति० तलशब्दानुनादिना तलं ज्याघातवारणं तस्यज्याघट्टनजोयश्शब्दः तस्यानुनादोयस्यास्तितेन ॥ ४० ॥ स० निहतैर्हयोत्तमैः तन्निमित्तंपदातिनं ॥ ५१ ॥ इति नवतितमःसर्गः ॥ ९० ॥

[पा०] १ ङ. झ. ञ. संतप्ताः. २ क. ग.—ट. पीतेन. ३ घ. सुपर्वेण. ४ क. ख. घ.—ट. छिन्नेषुतेषुबाणौघैः. ग. भिन्नेषुतेषुबाणौघैः. ५ ख.—ट. शीघ्रकृत्तमः. ६ ङ. झ. ञ. ट. समरेविचरन्तं. क. संकुद्धोविचरन्तं. ७ घ. गवयोगन्ध. ८ ख. ग. ङ. च. झ. ञ. ट. मुत्पत्य. ९ ख. ग. ङ. ज.—ट. व्यक्तं. १० घ. लक्ष्मणदक्षपथि. ११ झ. मथितसारथिः. १२ घ. ङ. च. झ. ञ. ट. निहतैर्हयोत्तमैः. १३ ख. ङ.—ट. बाणगणैर्व्यदारयत्. क. वज्रसमैर्व्यदारयत्.

एकनवतितमः सर्गः ॥ ९१ ॥

लक्ष्मणेनेन्द्रजिद्वधः ॥ १ ॥

स हताश्वो महातेजा भूमौ तिष्ठन्निशाचरः ॥ इन्द्रजित्परमक्रुद्धः संप्रजज्वाल तेजसा ॥ १ ॥
तौ धन्विनौ जिघांसन्तावन्योन्यमिषुभिर्भृशम् ॥ विजयेनाभिनिष्क्रान्तौ वने गजवृषाविव ॥ २ ॥
निर्बर्हयन्तश्चान्योन्यं ते राक्षसवनौकसः ॥ भर्तारं न जहुर्युद्धे संपतन्तस्ततस्ततः ॥ ३ ॥
ततस्तान्राक्षसान्सर्वान्हर्षयन्नावणात्मजः ॥ स्तुवानो[1] हर्षमाणश्च इदं वचनमब्रवीत् ॥ ४ ॥
तमसा बहुलेनेमाः संसक्ताः सर्वतो दिशः ॥ नेह विज्ञायते स्वो वा परो वा राक्षसोत्तमाः ॥ ५ ॥
धृष्टं[2] भवन्तो युध्यन्तु हरीणां मोहनाय वै ॥ अहं तु रथमास्थाय आगमिष्यामि संयुगम्[3] ॥ ६ ॥
तथा भवन्तः कुर्वन्तु यथेमे काननौकसः ॥ नैं[4] युध्येयुर्दुरात्मानः प्रविष्टे नगरं मयि ॥ ७ ॥
इत्युक्त्वा रावणसुतो वञ्चयित्वा वनौकसः ॥ प्रविवेश पुरीं लङ्कां रथहेतोरमित्रहा ॥ ८ ॥
स रथं भूषयित्वा तु रुचिरं हेमभूषितम् ॥ प्रासासिशतसंपूर्णं[5] युक्तं परमवाजिभिः ॥ ९ ॥
अधिष्ठितं हयज्ञेन सूतेनाप्तोपदेशिना ॥ आरुरोह महातेजा रावणिः समितिंजयः ॥ १० ॥
स राक्षसगणैर्मुख्यैर्वृतो मन्दोदरीसुतः ॥ निर्ययौ नगरात्तूर्णं कृतान्तबलचोदितः ॥ ११ ॥
सोभिनिष्क्रम्य नगरादिन्द्रजित्परवीरहा ॥ अभ्ययाज्जवनैरश्वैर्लक्ष्मणं सविभीषणम् ॥ १२ ॥
ततो रथस्थमालोक्य सौमित्री रावणात्मजम् ॥ वानराश्च महावीर्या राक्षसश्च विभीषणः ॥
विसयं परमं जग्मुर्लाघवात्तस्य धीमतः ॥ १३ ॥
रावणिश्चापि संक्रुद्धो रणे वानरयूथपान् ॥ पातयामास बाणौघैः शतशोथ सहस्रशः ॥ १४ ॥
स मण्डलीकृतधनू रावणिः समितिंजयः ॥ हरीनभ्यहनत्क्रुद्धः परं लाघवमास्थितः ॥ १५ ॥
ते वध्यमाना हरयो नाराचैर्भीमविक्रमाः ॥ सौमित्रिं शरणं प्राप्ताः प्रजापतिमिव प्रजाः ॥ १६ ॥
ततः समरकोपेन ज्वलितो रघुनन्दनः ॥ चिच्छेद कार्मुकं तस्य दर्शयन्पाणिलाघवम् ॥ १७ ॥
सोन्यत्कार्मुकमादाय सज्यं चक्रे त्वरन्निव ॥ तदप्यस्य [6]त्रिभिर्बाणैर्लक्ष्मणो निरकृन्तत ॥ १८ ॥
अथैनं छिन्नधन्वानमाशीविषविषोपमैः ॥ विव्याधोरसि सौमित्री रावणिं पञ्चभिः शरैः ॥ १९ ॥
ते तस्य कायं निर्भिद्य महाकार्मुकनिस्सृताः ॥ निपेतुर्धरणीं बाणा रक्ता इव महोरगाः ॥ २० ॥

अथेन्द्रजितद्वधः—स हताश्व इत्यादि ॥ १ ॥ विजयेनेति प्रयोजने तृतीया । विजयायेत्यर्थः । अभिनिष्क्रान्तौ बभूवतुरिति शेषः । गजवृषाविव गजश्रेष्ठाविव । यद्वा किंचिद्धीनबलत्वादिन्द्रजितो वृषभतुल्यत्वं ॥ २ ॥ संपतन्तः परितः संचरन्त इत्यर्थः ॥ ३ ॥ स्तुवानः स्तुवन् । आर्षः शानच् ॥ ४—५ ॥ मोहनाय मन्निर्गमनापरिज्ञानाय ॥ ६—८ ॥ स रथमित्यादिश्लोकद्वयमेकान्वयं भूषयित्वा स्वतेजसा भूषयित्वा । आप्तोपदेशिना हितोपदेशिना ॥ ९—१२ ॥ तत इत्यादिसार्धश्लोक एकान्वयः ॥ ततः तस्माद्युद्धप्रदेशात् ॥ १३—१७ ॥ त्वरन्निवेति । इवशब्दो वाक्यालंकारे । निरकृन्तत

ती० विजयेन विजयहेतुना । अभिनिष्क्रान्तौ अभिमुखावधावतां ॥ २ ॥ शि० वनौकसोवञ्चयित्वा तज्ज्ञानविषयत्वमप्राप्येत्यर्थः । रथहेतोर्लङ्कांविवेश ॥ ८ ॥ ति० हयज्ञेन अश्वहृदयज्ञेन ॥ स० आप्तश्चासौ उपदेशोस्यास्तीत्याप्तोपदेशी । साम-

[पा०] १ ङ. च. छ. झ. ट. स्तुन्वानो. क. ख. स्वयंप्रहर्षमाणश्च. २ घ. हृष्टाभवन्तो. ३ ङ. झ. ञ. ट. संयुगे. ४ क. ज. नबुध्येयुः. ५ ग. ङ. झ. ट. महात्मानः. ६ क. चापासि. ७ ङ. च. झ. शरसंयुक्तं. ८ ङ. झ. ट. त्वरमौजसा. ९ च. ञ. ट. शितैर्बाणैः.

स भिन्नवर्मा रुधिरं वमन्वक्त्रेण रावणिः ॥ जग्राह कार्मुकश्रेष्ठं दृढज्यं बलवत्तरम् ॥ २१ ॥
स लक्ष्मणं समुद्दिश्य परं लाघवमास्थितः ॥ ववर्ष शरवर्षाणि वर्षाणीव पुरन्दरः ॥ २२ ॥
मुक्तमिन्द्रजिता तत्तु शरवर्षमरिन्दमः ॥ अवारयदसंभ्रान्तो लक्ष्मणः सुदुरासदम् ॥ २३ ॥
दर्शयामास च तदा रावणिं रघुनन्दनः ॥ असंभ्रान्तो महातेजास्तदद्भुतमिवाभवत् ॥ २४ ॥
ततस्तान्राक्षसान्सर्वान्त्रिभिरेकैकमाहवे ॥ अविध्यत्परमक्रुद्धः शीघ्रास्त्रं संप्रदर्शयन् ॥
राक्षसेन्द्रसुतं चापि बाणौघैः समताडयत् ॥ २५ ॥
सोतिविद्धो बलवता शत्रुणा शत्रुघातिना ॥ असक्तं प्रेषयामास लक्ष्मणाय बहून्शरान् ॥ २६ ॥
तानप्राप्तान्शितैर्बाणैश्चिच्छेद रघुनन्दनः ॥ सारथेरस्य च रणे रथिनो रथसत्तमः ॥
शिरो जहार धर्मात्मा भल्लेनानतपर्वणा ॥ २७ ॥
अमूतास्ते हयास्तत्र रथमूहुरविक्लबाः ॥ मण्डलान्यभिधावन्तस्तदद्भुतमिवाभवत् ॥ २८ ॥
अमर्षवशमापन्नः सौमित्रिर्दृढविक्रमः ॥ प्रत्यविध्यद्धयांस्तस्य शरैर्विंत्रासयन्रणे ॥ २९ ॥
अमृष्यमाणस्तत्कर्म रावणस्य सुतो बली ॥ विव्याध दशभिर्बाणैः सौमित्रिं तममर्षणम् ॥ ३० ॥
ते तस्य वज्रप्रतिमाः शराः सर्पविषोपमाः ॥ विलयं जग्मुराहत्य कवचं काञ्चनप्रभम् ॥ ३१ ॥
अभेद्यकवचं मत्वा लक्ष्मणं रावणात्मजः ॥ ललाटे लक्ष्मणं बाणैः सुपुङ्खैस्त्रिभिरिन्द्रजित् ॥
अविध्यत्परमक्रुद्धः शीघ्रास्त्रं च प्रदर्शयन् ॥ ३२ ॥
तैः पृषत्कैर्ललाटस्थैः शुशुभे रघुनन्दनः ॥ रणाग्रे समरश्लाघी त्रिशृङ्ग इव पर्वतः ॥ ३३ ॥
स तथा ह्यर्दितो बाणै राक्षसेन महामृधे ॥ तमाशु प्रतिविव्याध लक्ष्मणः पञ्चभिः शरैः ॥
विकृष्येन्द्रजितो युद्धे वदने शुभकुण्डले ॥ ३४ ॥
लक्ष्मणेन्द्रजितौ वीरौ महाबलशरासनौ ॥ अन्योन्यं जघ्नतुर्बाणैर्विशिखैर्भीमविक्रमौ ॥ ३५ ॥
ततः शोणितदिग्धाङ्गौ लक्ष्मणेन्द्रजितावुभौ ॥ रणे तौ रेजतुर्वीरौ पुष्पिताविव किंशुकौ ॥ ३६ ॥

अच्छिनत् ॥ १८–२३ ॥ दर्शयामास पराक्रममिति शेषः ॥२४॥ ततस्तानित्यादिसार्धश्लोक एकान्वयः ॥ शीघ्रास्त्रं शीघ्रमस्त्रं ॥ २५ ॥ असक्तं अव्यासङ्गं अविलम्बितं वा ॥ २६ ॥ तानप्राप्तानित्यादिसार्धश्लोक एकान्वयः ॥ रथिनोस्य रावणेः सारथेरित्यन्वयः ॥ २७ ॥ अविक्लबाः अनाकुलाः । शिक्षापाटवातिशयादिति मन्तव्यं ॥ २८—३० ॥ विलयं नाशं ॥ ३१ ॥ अभेद्येत्यादिसार्धश्लोकः ॥ अभेद्यकवचमित्यनेन पूर्वकवचस्य भग्नत्वात् कवचान्तरं धृतमिति गम्यते । शीघ्रास्त्रं च प्रदर्शयन् । आत्मनः शीघ्रास्त्रत्वं प्रदर्शयन्नित्यर्थः ॥ ३२ ॥ समरं श्लाघत इति समरश्लाघी । समरप्रिय इत्यर्थः । पृषत्कैः बाणैः ॥ ३३ ॥ स तथेत्यादिसार्धश्लोकएकान्वयः ॥ विकृष्य धनुराकृष्य ॥ ३४ ॥ लक्ष्मणेन्द्रजिताविति । विशिखैः विविधशिखैः । करवीरपत्राद्याकारागैरि-

---

र्थ्यादाप्तिमूलत्वमुपदेशस्यलभ्यते । तेन ॥ १० ॥ रामानु० भिन्नवर्मेति । अनेनपुनश्चकवचान्तरमपिस्वीकृतवानित्यवगम्यते ॥ २१ ॥ रामानु० दर्शयामासेति । हस्तलाघवमितिशेषः ॥ रावणिंहस्तलाघवंदर्शयामासेतिसंबन्धः ॥ २४ ॥ ति० ननुकथं सर्वेराक्षसाःइन्द्रजितियुध्यतित्रिभित्रिभिर्बाणैर्वेद्धुंशक्यास्तत्राह—शीघ्रास्त्रमिति । प्रयोगमात्रेणसर्ववेधकमस्त्रंशीघ्रास्त्रं । यद्वा भावप्रधानो निर्देशः । अस्त्रविषयकशीघ्रप्रयोगसामर्थ्यरूपंशीघ्रास्त्रत्वंसंप्रदर्शयन्नित्यर्थः ॥ २५ ॥ ति० रथसत्तमोलक्ष्मणः ॥ २७ ॥

[पा०] १ ङ. ञ. छिन्नधन्वा. २ क. ग. घ. शत्रुतापिना. ३ ङ. ञ. ट. परवीरहा. ४ ख. ञ. ट. रघुसत्तमः. ५ क. ख. ङ. च. झ. ञ. ट. धावन्ति. ६ घ. र्विंध्यथयत्रणे. ७ क. ङ. झ. अमर्षमाणः. ८ ङ. झ. सुतोरणे. ९ ङ. झ. ञ. रोमहर्षणं. १० च. सपृषत्कैः. ११ घ. त्रिकूटइव. १२ ख. घ. ङ. च. झ. ञ. ट. तथाप्यर्दितो. १३ ख. महाहवे. १४ ङ. झ. जघ्नतुर्वीरौविशिखैः. १५ क. ख. ज. ट. भीमविक्रमैः.

तौ परस्परमभ्येत्य सर्वगात्रेषु धन्विनौ ॥ घोरैर्विव्यधतुर्बाणैः कृतभावावुभौ जये ॥ ३७ ॥
ततः समरकोपेन संयुक्तो रावणात्मजः ॥ विभीषणं त्रिभिर्बाणैर्विव्याध वदने शुभे ॥ ३८ ॥
अयोमुखैस्त्रिभिर्विद्ध्वा राक्षसेन्द्रं विभीषणम् ॥ एकैकेनाभिविव्याध तान्सर्वान्हरियूथपान् ॥ ३९ ॥
तस्य दृढतरं क्रुद्धो जघान गदया हयान् ॥ विभीषणो महातेजा रावणेः स दुरात्मनः ॥ ४० ॥
स हताश्वादवप्लुत्य रथान्निहतसारथेः ॥ रथशक्तिं महातेजाः पितृव्याय मुमोच ह ॥ ४१ ॥
तामापतन्तीं संप्रेक्ष्य सुमित्रानन्दवर्धनः ॥ चिच्छेद निशितैर्बाणैर्दशधा साऽपतद्भुवि ॥ ४२ ॥
तस्य दृढधनुः क्रुद्धो हताश्वाय विभीषणः ॥ वज्रस्पर्शसमान्पञ्च ससर्जोरसि मार्गणान् ॥ ४३ ॥
ते तस्य कायं निर्भिद्य रुक्मपुङ्खा निमित्तगाः ॥ बभूवुर्लोहितादिग्धा रक्ता इव महोरगाः ॥ ४४ ॥
स पितृव्याय संक्रुद्ध इन्द्रजिच्छरमाददे ॥ उत्तमं रक्षसां मध्ये यमदत्तं महाबलः ॥ ४५ ॥
तं समीक्ष्य महातेजा महेषुं तेन संहितम् ॥ लक्ष्मणोप्याददे बाणमन्यं भीमपराक्रमः ॥ ४६ ॥
कुबेरेण स्वयं स्वप्ने स्वयं दत्तं महात्मना ॥ दुर्जयं दुर्विषह्यं च सेन्द्रैरपि सुरासुरैः ॥ ४७ ॥
तयोस्ते धनुषी श्रेष्ठे बाहुभिः परिघोपमैः ॥ विकृष्यमाणे बलवत्क्रौञ्चाविव चुक्रुजतुः ॥ ४८ ॥

ताभ्यां तौ धनुषी श्रेष्ठे संहितौ सायकोत्तमौ ॥
विकृष्यमाणौ वीराभ्यां भृशं जज्वलतुः श्रिया ॥ ४९ ॥

तौ भासयन्तावाकाशं धनुर्भ्यां विशिखौ च्युतौ ॥ मुखेन मुखमाहत्य संनिपेततुरोजसा ॥ ५० ॥
सन्निपातस्तयोरासीच्छरयोर्घोररूपयोः ॥ सधूमविस्फुलिङ्गश्च तज्जोग्निर्दारुणोऽभवत् ॥ ५१ ॥
तौ महाग्रहसंकाशावन्योन्यं सन्निपत्य च ॥ संग्रामे शतधा यान्तौ मेदिन्यां विनिपेततुः ॥ ५२ ॥
शरौ प्रतिहतौ दृष्ट्वा तावुभौ रणमूर्धनि ॥ व्रीडितौ जातरोषौ च लक्ष्मणेन्द्रजितौ तदा ॥ ५३ ॥
सुसंरब्धस्तु सौमित्रिरस्त्रं वारुणमाददे ॥ ५४ ॥
रौद्रं महेन्द्रजिद्युद्धे व्यसृजद्युधि निष्ठितः ॥ तेन तद्विहतं त्वस्त्रं वारुणं परमाद्भुतम् ॥ ५५ ॥
ततः क्रुद्धो महातेजा इन्द्रजित्समितिंजयः ॥ आग्नेयं संदधे दीप्तं स लोकं संक्षिपन्निव ॥ ५६ ॥
सौरेणास्त्रेण तद्वीरो लक्ष्मणः प्रत्यवारयत् ॥ ५७ ॥
अस्त्रं निवारितं दृष्ट्वा रावणिः क्रोधमूर्च्छितः ॥ आसुरं शत्रुनाशाय घोरमस्त्रं समाददे ॥ ५८ ॥

त्यर्थः ॥ ३५—३६ ॥ जये कृतभावावित्यन्वयः ॥ ३७—४० ॥ रथशक्तिं रथेऽवस्थितां शक्तिं ॥ ४१—४२ ॥ दृढधनुः दृढधन्वा । समासान्तविधेरनित्यत्वात्साधुः ॥४३॥ निमित्तगाः लक्ष्यगाः । "वेध्यं लक्ष्यं शरव्यं च निमित्तं च समं विदुः" इति निघण्टुः ॥ ४४ ॥ रक्षसां मध्ये आदद इत्यन्वयः ॥ ४५ ॥ तं समीक्ष्येत्यादिश्लोकद्वयमेकान्वयं ॥ महात्मना अप्रमेयबुद्धिना । भाविवृत्तान्तज्ञेनेति यावत् ॥ ४६—४९ ॥ सन्निपेततुः संघर्षं प्राप्तौ ॥ ५० ॥ तज्जः सन्निपातजः ॥ ५१—५५ ॥ संक्षिपन् संहरन् ॥ ५६ ॥ सौरेण सूर्यदेवताकेन । "सूर्यतिष्यागस्त्य" इत्यादिना यलोपः ॥ ५७–५८ ॥

ति० अमितात्मना अपरिच्छिन्नमाहात्म्येन ॥ ४७ ॥ ति० महाग्रहः अङ्गारकशन्यादिः ॥ ५२ ॥ ति० व्रीडितौ स्वस्वप्रयुक्तशरस्यमोघत्वदर्शनेननसंजातलज्जौ । यद्यपिरावणेरेवव्रीडायुक्ता । लक्ष्मणस्यतुतद्बाणनिवारणायप्रयोक्तुःसार्थक्यसत्त्वेनव्रीडाभावः । तथापितन्निराकरणपूर्वकंरिपुवधपर्यन्तव्यापारेणोपादानात्तदभावेनतस्यापिलज्जेतिबोध्यं । छत्रिन्यायेनद्विवचनप्रयोगइतिकतकः ।

[पा०] १ ख. संक्रुद्धो. २ ख. ङ. च. झ. ञ. ट. रथान्मथितसारथिः. क. ग. घ. रथान्निहतसारथिः. ३ क. ख. ङ. च. ज.—ट. अथशक्तिं. ४ क. ख. घ. ज. नन्दिवर्धनः. ५ ख. घ. च. ञ. बाणैःशतधा. ६ ख. ङ. च. झ. ट. भित्त्वाततः. ७ क. ख. ङ. झ. पितृव्यस्य. ८ ङ. झ. ञ. ट. महाबलं. ९ क. ख. घ. ङ. च. झ. ञ. ट. यदत्तममितात्मना. १० क. रजसा. ११ ख. च. तत्राग्निः. ग. ततोग्निः.

तस्माच्चापाद्विनिष्पेतुर्भास्वराः कूटमुद्गराः ॥ शूलानि च भुशुण्ड्यश्च गदाः खड्गाः परश्वधाः ॥ ५९ ॥
तदृष्ट्वा लक्ष्मणः सङ्ख्ये घोरमस्त्रमथासुरम् ॥ अवार्यं सर्वभूतानां सर्वशत्रुविनाशनम् ॥
माहेश्वरेण द्युतिमांस्तदस्त्रं प्रत्यवारयत् ॥ ६० ॥
तयोः सुतुमुलं युद्धं संबभूवाद्भुतोपमम् ॥ गगनस्थानि भूतानि लक्ष्मणं पर्यवारयन् ॥ ६१ ॥
भैरवाभिरुते भीमे युद्धे वानररक्षसाम् ॥ भूतैर्बहुभिराकाशं विस्मितैरावृतं बभौ ॥ ६२ ॥
ऋषयः पितरो देवा गन्धर्वा गरुडोरगाः ॥ शतक्रतुं पुरस्कृत्य ररक्षुर्लक्ष्मणं रणे ॥ ६३ ॥
अथान्यं मार्गणश्रेष्ठं संदधे राघवानुजः ॥ हुताशनसमस्पर्शं रावणात्मजदारणम् ॥ ६४ ॥
सुपत्रमनुवृत्ताङ्गं सुपर्वाणं सुसंस्थितम् ॥ सुवर्णविकृतं वीरः शरीरान्तकरं शरम् ॥ ६५ ॥
दुरावारं दुर्विषह्यं राक्षसानां भयावहम् ॥ आशीविषविषप्रख्यं देवसङ्घैः समर्चितम् ॥ ६६ ॥
येन शक्रो महातेजा दानवानजयत्प्रभुः ॥ पुरा दैवासुरे युद्धे वीर्यवान्हरिवाहनः ॥ ६७ ॥
तदैन्द्रमस्त्रं सौमित्रिः संयुगेष्वपराजितम् ॥ शरश्रेष्ठं धनुःश्रेष्ठे नरश्रेष्ठोऽभिसंदधे ॥ ७८ ॥
संधायामित्रदलनं विचकर्ष शरासनम् ॥ सज्यमायम्य दुर्धर्षः कालो लोकक्षये यथा ॥ ६९ ॥
संधाय धनुषि श्रेष्ठे विकर्षन्निदमब्रवीत् ॥ लक्ष्मीवाँल्लक्ष्मणो वाक्यमर्थसाधकमात्मनः ॥ ७० ॥
धर्मात्मा सत्यसंधश्च रामो दाशरथिर्यदि ॥ पौरुषे चाप्रतिद्वन्द्वः शरैनं जहि रावणिम् ॥ ७१ ॥
इत्युक्त्वा बाणमाकर्ण विकृष्य तमजिह्मगम् ॥ लक्ष्मणः समरे वीरः ससर्जेन्द्रजितं प्रति ॥
ऐन्द्रास्त्रेण समायोज्य लक्ष्मणः परवीरहा ॥ ७२ ॥
स शिरः सशिरस्त्राणं श्रीमज्ज्वलितकुण्डलम् ॥ प्रमथ्येन्द्रजितः कायात्पातयामास भूतले ॥ ७३ ॥
तद्राक्षसतनूजस्य छिन्नस्कन्धं शिरो महत् ॥ तपनीयनिभं भूमौ ददृशे रुधिरोक्षितम् ॥ ७४ ॥
हतस्तु निपपाताशु धरण्यां रावणात्मजः ॥ कवची सशिरस्त्राणो विध्वस्तः सशरासनः ॥ ७५ ॥
चुक्रुशुस्ते ततः सर्वे वानराः सविभीषणाः ॥ हृष्यन्तो निहते तस्मिन्देवा वृत्रवधे यथा ॥ ७६ ॥

तस्मादिति । असुरास्त्रप्रयोगाद्धेतोः । चापात् इन्द्रजिद्धनुषोपादानात् । कूटमुद्गरादयो विनिष्पेतुरित्यन्वयः । भुशुण्ड्यः मुसलविशेषाः ॥ ५९ ॥ तदृष्ट्वेत्यादिसार्धश्लोक एकान्वयः ॥ क्रियाद्वयार्थं तदस्त्रमिति द्विरुक्तिः ॥ ६०—६१ ॥ भैरवाभिरुते भयंकरशब्दे ररक्षुः । जय जयेत्याद्युक्तिभिरित्यर्थः ॥६२—६४ ॥ सुपत्रमित्यादिचतुःश्लोक्येकान्वया ॥ अनुवृत्ताङ्गं वर्तुलस्वरूपं । सुसंस्थितं सुसंस्थानं । सुवर्णविकृतं सुवर्णविचित्रितं । हरिवाहनः हरितवर्णाश्वः । ऐन्द्रमस्त्रं ऐन्द्रास्त्रमन्त्रयोजितं ॥ ६५—६८ ॥ अमित्रदलनं शत्रुनाशनं । कालः यमः ॥ ६९—७१ ॥ इत्युक्त्वेत्यादिसार्धश्लोक एकान्वयः ॥ बाणमैन्द्रास्त्रमन्त्रेण समायोज्य ससर्जेत्यन्वयः । एको लक्ष्मणशब्दो लक्ष्मीयुक्तवचनः । "लक्ष्मीवाँल्लक्ष्मणः श्रीलः श्रीमान्" इत्यमरः ॥ ७२ ॥ सः बाणः ॥ ७३—७४ ॥ कवचीति । कवचादिभिः सह विध्वस्तः हतः

जातरोषौ रामाविशेषेविभीषणेबाणः प्रयुक्तइतिलक्ष्मणस्यरोषः । लक्ष्मणस्तंपरिहृतवानितिरावणेरोषः ॥ ५३ ॥ ति० संनिहितैतदस्त्रेणैवार्यंवध्यइतिनिश्चित्यैन्द्रास्त्रंसंदधइत्याह—अथेति । अत्रप्रत्यस्त्रंरावणेर्ब्रह्मशापवशान्नबुद्ध्यारूढं । वस्तुतोस्यप्रत्यस्त्रंनास्त्येवेति कतकः ॥ ६४ ॥ स० ऐन्द्रमस्त्रं । अनेनेन्द्रजितोहननंतत्पराजितेन्द्रदेवताकेनास्त्रेणकुर्वल्लक्ष्मणःस्वपक्षस्थेन्द्रापप्रथांवारयामासेति ध्वन्यते ॥ ६८ ॥ ति० अर्थसाधकमात्मनः कार्यसिद्धिहेतुभूतं इदं वक्ष्यमाणवचनंअस्त्राधिष्ठात्रींदेवतांप्रत्यब्रवीत् ॥ ७० ॥ स० पौरुषे पराक्रमे । अप्रतिद्वन्द्वः असदृशोयदि तर्हितेनसत्येन तमेनंजहि । अनेनरामगुणशपथपुरस्सरमस्त्रमोचनादस्यास्त्रस्याप्रति-

[पा०] १ ख. ङ. च. झ. ञ. ट. घोरमस्त्रंसुदारुणं. २ ख. च. शत्रुविदारणं. ३ क. ख. च. ट. स्तैर्भीमे. ४ घ. विकृतंघोरं. ५ क. ख. ग. ङ. झ. ञ. ट. दुर्विषहं. ६ ख. दानवानर्दयन्मुहुः. ७ ङ. च. झ. अथैन्द्रं. ८ क. ख. ङ. च. झ ञ. तच्छिरः. ९ ङ. झ. हतस्सनिपपाताथ. १० ङ. झ. विप्रविद्धशरासनः. ११ क. ङ. झ. हृष्यन्ते.

अथान्तरिक्षे देवानामृषीणां च महात्मनाम् ॥ अभिजज्ञे च सन्नादो गन्धर्वाप्सरसामपि ॥ ७७ ॥
पतितं तमभिज्ञाय राक्षसी सा महाचमूः ॥ वध्यमाना दिशो भेजे हरिभिर्जितकाशिभिः ॥ ७८ ॥
वानरैर्वध्यमानास्ते शस्त्राण्युत्सृज्य राक्षसाः ॥ लङ्कामभिमुखाः सप्तुर्नष्टसंज्ञाः प्रधाविताः ॥ ७९ ॥
दुद्रुवुर्बहुधा भीता राक्षसाः शतशो दिशः ॥ त्यक्त्वा प्रहरणान्सर्वे पट्टिशासिपरश्वधान् ॥ ८० ॥
केचिल्लङ्कां परित्रस्ताः प्रविष्टा वानरार्दिताः ॥ समुद्रे पतिताः केचित्केचित्पर्वतमाश्रिताः ॥ ८१ ॥
हतमिन्द्रजितं दृष्ट्वा शयानं समरक्षितौ ॥ राक्षसानां सहस्रेषु न कश्चित्प्रत्यदृश्यत ॥ ८२ ॥
यथास्तंगत आदित्ये नावतिष्ठन्ति रश्मयः ॥ तथा तस्मिन्निपतिते राक्षसास्ते गता दिशः ॥ ८३ ॥
शान्तरश्मिरिवादित्यो निर्वाण इव पावकः ॥ सँ बभूव महातेजा व्यपास्तगतजीवितः ॥ ८४ ॥
प्रशान्तपीडाबहुलो नष्टारिष्टः प्रतापवान् ॥ बभूव लोकः पतिते राक्षसेन्द्रसुते तदा ॥ ८५ ॥
हर्षं च शक्रो भगवान्सह सर्वैः सुरर्षभैः ॥ जगाम निहते तस्मिन्राक्षसे पापकर्मणि ॥ ८६ ॥
आकाशे चापि देवानां शुश्रुवे दुन्दुभिस्वनः ॥ नृत्यद्भिरप्सरोभिश्च गन्धर्वैश्च महात्मभिः ॥ ८७ ॥
ववृषुः पुष्पवर्षाणि तदद्भुतमभूत्तदा ॥ प्रशशंसुर्हते तस्मिन्राक्षसे क्रूरकर्मणि ॥
शुद्धा आपो दिशश्चैव जहृषुर्दैत्यदानवाः ॥ ८८ ॥
आजग्मुः पतिते तस्मिन्सर्वलोकभयावहे ॥ ऊचुश्च सहिताः सर्वे देवगन्धर्वदानवाः ॥
विज्वराः शान्तकलुषा ब्राह्मणा विचरन्त्विति ॥ ८९ ॥
ततोऽभ्यनन्दन् संहृष्टाः समरे हरियूथपाः ॥ तमप्रतिबलं दृष्ट्वा हतं नैर्ऋतपुङ्गवम् ॥ ९० ॥
विभीषणो हनूमांश्च जाम्बवांश्चर्क्षयूथपः ॥ विजयेनाभिनन्दन्तस्तुष्टुवुश्चापि लक्ष्मणम् ॥ ९१ ॥
क्ष्वेलन्तश्च नदन्तश्च गर्जन्तश्च प्लवङ्गमाः ॥ लब्धलक्षा रघुसुतं परिवार्योपतस्थिरे ॥ ९२ ॥
लाङ्गूलानि प्रविध्यन्तः स्फोटयन्तश्च वानराः ॥ लक्ष्मणो जयतीत्येवं वाक्यं विश्रावयंस्तदा ॥ ९३ ॥
अन्योन्यं च समाश्लिष्य कपयो हृष्टमानसाः ॥ चक्रुश्चावचगुणा राघवाश्रयजाः कथाः ॥ ९४ ॥

धरण्यां निपपातेत्यन्वयः ॥ ७५—८३ ॥ व्यपास्तगतजीवितः व्यपास्तो विक्षिप्ताङ्गो गतजीवितश्च, सः शान्तरश्मिरादित्य इव । निर्वाणः शान्तः । पावक इव च बभूव । निस्तेजस्कोऽभूदित्यर्थः ॥ ८४ ॥ प्रशान्तेति । इदमारभ्य लोकविशेषणं । प्रशान्तपीडाबहुलः प्रशान्तबहुलपीडः । प्रतापवान् सूर्यप्रकाशवान् । पूर्वं भयेन मन्दसूर्यत्वात् ॥ ८५—८६ ॥ अप्सरोभिर्गन्धर्वैश्च कृतनर्तनगानजन्यस्वनः शुश्रुव इत्यर्थः । नृत्यद्भिरित्यत्र ङीबभावः आर्षः ॥ ८७ ॥ ववृषुरिति । अत्रापि देवाः कर्तारः । ववृषुः प्रशशंसुश्च ॥ ८८ ॥ आजग्मुरित्यादिसार्धश्लोक एकान्वयः ॥ देवगन्धर्वदानवाः आजग्मुः विचरन्त्वित्यूचुश्चेति संबन्धः ॥ ८९—९२ ॥ विश्रावयन् व्यश्रा-

हततार्क्षेया ॥ ७१ ॥ **रामानु०** गतजीवितःसः शान्तरश्मिरादित्यइव बभूव । निर्वाणःपावकइवव्यपास्त अतिष्ठदितिसंबन्धः ॥ **ति०** व्यपास्तोविशेषधर्मैः । अतएवगतजीवितः ॥ **शि०** व्यपास्तेन धर्मत्यागेन गतजीवितः ॥ **स०** व्यपास्तेन स्वेनपूर्वमलक्ष्यतयानिरस्तेनलक्ष्मणेन गतंजीवितंयस्यसतथा ॥ ८४ ॥ **ति०** देवदानवाः दानवानामपितच्छत्रुत्वात्तेषामपिहर्षः ॥ ८८ ॥ **ति०** लब्धलक्षाः प्राप्तहर्षावसराः । रलयोरभेदात्प्राप्तरक्षणाइत्यपि । रघुसुतं रघुवंशजं ॥ ९२ ॥ इत्येकनवतितमः सर्गः ॥ ९१ ॥

[पा०] १ क. ग. घ. ङ. ञ. भूतानां. २ ख. च. ञ. ट. मृषीणांभावितात्मनां. ग. मृषीणांचमहास्वनः. ३ ङ. ञ. जज्ञेऽथजयसन्नादो. ४ ज. अतिष्ठत्समहातेजाः. ५ क. ग—च. ज.—ट. विनष्टारिः. ६ क. ख. ङ. च. ञ. ञ. ट. प्रशशामहते. ७ ञ. देवदानवाः. ८ ख. ङ. च. ज.—ट. सहितास्तुष्टादेव. ९ ङ. ञ. ट. राघवाश्रयसत्कथाः.

तदसुकरमथाभिवीक्ष्य हृष्टाः प्रियसुहृदो युधि लक्ष्मणस्य कर्म ॥
परमसुपलभन्मनःप्रहर्षं विनिहतमिन्द्ररिपुं निशम्य देवाः ॥ ९५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकनवतितमः सर्गः ॥ ९१ ॥

द्विनवतितमः सर्गः ॥ ९२ ॥

इन्द्रजिद्विजयहृष्टेनलक्ष्मणेन विभीषणादिभिः सह रामसमीपमेत्य तच्चरणयोः प्रणामः ॥१॥ विभीषणमुखाल्लक्ष्मणकृतेन्द्रजिद्वधश्रवणहृष्टेनरामेण लक्ष्मणस्यनिजाङ्कारोपणेनपरिष्वङ्गपूर्वकं प्रशंसनम् ॥ २ ॥ रामप्रेरणयासुषेणेनेन्द्रजिद्बाणविशकलीकृतानांलक्ष्मणादीनां समुचितचिकित्सयाविशल्यीकरणम् ॥ ३ ॥

रुधिरक्लिन्नगात्रस्तु लक्ष्मणः शुभलक्षणः ॥ बभूव हृष्टस्तं हत्वा शक्रजेतारमाहवे ॥ १ ॥
ततः स जाम्बवन्तं च हनुमन्तं च वीर्यवान् ॥ संनिहत्य[1] महातेजास्तांश्च सर्वान्वनौकसः ॥ २ ॥
आजगाम ततस्तीव्रं यत्र सुग्रीवराघवौ ॥ विभीषणमवष्टभ्य हनूमन्तं च लक्ष्मणः ॥ ३ ॥
ततो राममभिक्रम्य सौमित्रिरभिवाद्य च ॥ तस्थौ भ्रातुःसमीपस्थ इन्द्रस्येव बृहस्पतिः ॥ ४ ॥
निष्टनन्निव[3] चागम्य राघवाय महात्मने ॥ आचचक्षे तदा[4] वीरो घोरमिन्द्रजितो वधम् ॥ ५ ॥
रावणेस्तु शिरश्छिन्नं लक्ष्मणेन महात्मना ॥ न्यवेदयत रामाय तदा हृष्टो विभीषणः ॥ ६ ॥
श्रुत्वैतत्तु महावीर्यो लक्ष्मणेनेन्द्रजिद्वधम् ॥ प्रहर्षमतुलं लेभे राम[5]ो वाक्यमुवाच ह ॥ ७ ॥
साधु लक्ष्मण तुष्टोस्मि कर्मणा सुकृतं कृतम् ॥ रावणेर्हि विनाशेन जितमित्युपधारय ॥ ८ ॥
स तं शिरस्युपाघ्राय लक्ष्मणं लक्ष्मिवर्धनम् ॥ लज्जमानं बलात्स्नेहादङ्कमारोप्य वीर्यवान् ॥ ९ ॥

वयन् ॥ ९३—९४ ॥ असुकरं दुष्करं । सर्वेषां प्राणप्रतिष्ठापकमिति वा । प्रियसुहृदः सर्वप्रियसुहृदः । उपलभन्नित्यत्र अडाभ्यासनेपदाभावावार्षौ । देवाः इन्द्ररिपुं विनिहतं निशम्य परमं मनःप्रहर्षं उपलभन् उपालभन्त । अथ असुकरं तत् इन्द्रजिद्धननं । प्रियसुहृदः लक्ष्मणस्य । कर्म कृतिविषयभूतं । अभिवीक्ष्य हृष्टाः विस्मिताः । आसन्निति शेषः । "विस्मितप्रतिघातयोश्चेति वक्तव्यं" इति हृषेः पाक्षिक इडभावः । देवाश्चारणादिमुखेन प्रथममिन्द्रजिद्धननं श्रुत्वा संतुष्टाः सन्तः पश्चात्तस्यात्यन्ताशक्यत्वादतथ्यं मन्वाना युद्धभूमिमागत्य तत्प्रत्यक्षीकृत्य विस्मिता आसन्निति भावः ॥ ९५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकनवतितमः सर्गः ॥ ९१ ॥

अथ लक्ष्मणश्लाघनं—रुधिरक्लिन्नगात्रेत्यादि ॥१॥ तत इत्यादिश्लोकद्वयमेकान्वयं ॥ सन्निहत्य संघीभूय । अवष्टभ्य युद्धपारवश्यादवलम्ब्य ॥ २—३ ॥ इन्द्रस्येव बृहस्पतिरिति पारतन्त्र्यमात्रे साम्यं ॥ ४ ॥ निष्टनन् अव्यक्ताक्षरंवदन्नित्यर्थः । इवशब्दो वाक्यालंकारे । आयासस्याभिनयनमात्रेणालीकत्वद्योतनाय वा ॥ ५ ॥ रामसन्निधौ संकोचवता लक्ष्मणेनाविशेषेणेन्द्रजिद्वधकथनाद्विभीषणः स्पष्टतयाह—रावणेरिति ॥ यद्वा लक्ष्मणेन सूचनयोक्तावपि हर्षप्रकर्षेण विभीषणः पुनराह—रावणेरिति ॥ ६ ॥ महावीर्यो राम इत्यन्वयः ॥ ७ ॥ सुकृतं कृतं सुकर्तव्यं कृतं । कर्मणा युद्धकर्मणा ॥ ८ ॥ स तमित्यादिश्लोकद्वयमेकान्वयं ॥ आरोप्य आरोपणायाकृष्य । अवपीडितं शल्यपीडितं । गाढं यथा भवति तथेति वा । क्रिया-

---

ति० संनिपत्य संगृह्य ॥ २ ॥ ति ० अभिक्रम्य प्रदक्षिणीकृत्य शक्रस्येन्द्रानुजोयथा यथोपेन्द्रइन्द्रसमीपेतिष्ठति तद्वत् ॥४॥

[पा०] १ क. ख. घ.—ट. संनिपत्य. २ ङ. ज. झ. ट. समीपस्थःशक्रस्येन्द्रानुजोयथा. ३ च. निश्श्वसन्निवचागत्य. ङ. झ. ञ. ट. निष्टनन्निवचागत्य. ४ क. ख. घ. ट. महावीरो. ५ ङ. झ. वाक्यंचेदमुवाचह.

उपवेश्य तमुत्सङ्गे परिष्वज्यावपीडितम् ॥ भ्रातरं लक्ष्मणं स्निग्धं पुनःपुनरुदैक्षत ॥ १० ॥
शल्यसंपीडितं शस्तं निश्श्वसन्तं तु लक्ष्मणम् ॥ रामस्तु दुःखसंतप्तस्तदा निश्श्वसितो भृशम् ॥११॥
मूर्ध्नि चैनमुपाघ्राय भूयः संस्पृश्य च त्वरन् ॥ उवाच लक्ष्मणं वाक्यमाश्वास्य पुरुषर्षभः ॥ १२ ॥
कृतं परमकल्याणं कर्म दुष्करकर्मणा ॥ अद्य मन्ये हते पुत्रे रावणं निहतं युधि ॥
अद्याहं विजयी शत्रौ हते तस्मिन् दुरात्मनि ॥ १३ ॥
रावणस्य नृशंसस्य दिष्ट्या वीर त्वया रणे ॥ छिन्नो हि दक्षिणो बाहुः स हि तस्य व्यपाश्रयः ॥१४॥
विभीषणहनूमद्भ्यां कृतं कर्म महद्रणे ॥ अहोरात्रैस्त्रिभिर्वीरः कथंचिद्विनिपातितः ॥ १५ ॥
निरमित्रः कृतोस्म्यद्य निर्यास्यति हि रावणः ॥ बलव्यूहेन महता श्रुत्वा पुत्रं निपातितम् ॥ १६ ॥
तं पुत्रवधसंतप्तं निर्यान्तं राक्षसाधिपम् ॥ बलेनावृत्य महता निहनिष्यामि दुर्जयम् ॥ १७ ॥
त्वया लक्ष्मण नाथेन सीता च पृथिवी च मे ॥ न दुष्प्रापा हते त्वद्य शक्रजेतरि चाहवे ॥ १८ ॥
स तं भ्रातरमाश्वास्य परिष्वज्य च राघवः ॥ रामः सुषेणं मुदितः समाभाष्येदमब्रवीत् ॥ १९ ॥
सशल्योयं महाप्राज्ञ सौमित्रिर्मित्रवत्सलः ॥ यथा भवति सुखस्थस्तथा त्वं समुपाचर ॥ २० ॥
विशल्यः क्रियतां क्षिप्रं सौमित्रिः सविभीषणः ॥ ऋक्षवानरसैन्यानां शूराणां द्रुमयोधिनाम् ॥ २१ ॥
ये चाप्यन्येऽत्र युध्यन्ति सशल्या व्रणिनस्तथा ॥ तेऽपि सर्वे प्रयत्नेन क्रियन्तां सुखिनस्त्वया ॥ २२ ॥
एवमुक्तस्तु रामेण महात्मा हरियूथपः ॥ लक्ष्मणाय ददौ नस्तः सुषेणः परमौषधिम् ॥ २३ ॥
स तस्या गन्धमाघ्राय विशल्यः समपद्यत ॥ तथा निर्वेदनश्चैव संरूढव्रण एव च ॥ २४ ॥
विभीषणमुखानां च सुहृदां राघवाज्ञया ॥ सर्ववानरमुख्यानां चिकित्सां स तदाऽकरोत् ॥ २५ ॥
ततः प्रकृतिमापन्नो हृतशल्यो गतव्यथः ॥ सौमित्रिर्मुदितस्तत्र क्षणेन विगतज्वरः ॥ २६ ॥
तथैव रामः प्लवगाधिपस्तदा विभीषणश्चर्क्षपतिश्च जाम्बवान् ॥
अवेक्ष्य सौमित्रिमरोगमुत्थितं मुदा ससैन्याः सुचिरं जहर्षिरे ॥ २७ ॥

भेदात्तमिति द्विरुक्तिः ॥ ९—१० ॥ शल्यसंपीडितमित्यादिश्लोकद्वयमेकान्वयं ॥ शस्तं प्रहृतं । निश्वसितः स्वयंकृतनिश्वासः । त्वरन् संस्पृश्य । त्वरा च प्रहारव्यथापनयनायेति भावः ॥ ११—१२ ॥ कृतमित्यादिसार्धश्लोकः ॥ दुष्करकर्मणा त्वयेति शेषः ॥ १३ ॥ व्यपाश्रयः आलम्बनं ॥ १४ ॥ अहोरात्रैस्त्रिभिरिति । एकादशीद्वादशीत्रयोदशीभिरित्यर्थः ॥ १५ ॥ निरमित्र इत्यादि श्लोकद्वयमेकान्वयं ॥ १६—१७ ॥ नाथेन याचमानेन । "नाथृयाच्ञायां" इत्यस्मात्पचाद्यच् ॥ १८ ॥ समाभाष्य आमन्त्र्य ॥ १९ ॥ समुपाचर चिकित्सां कुरु ॥२०॥ विशल्य इति श्लोकद्वयमेकान्वयं ॥ ऋक्षवानरसैन्यानामिति निर्धारणे षष्ठी ॥ २१—२२ ॥ नस्तः नासिकायां ॥ २३ ॥ निर्वेदनः वेदनारहितः ॥ २४—२६ ॥ मुदा युक्तमिति शेषः । मुदा युक्तं सौमित्रिमवेक्ष्य इति जहर्षिर इति संबन्धः । जहर्षिर इत्यत्र

ति० हेलक्ष्मण नाथेन । उपलालनार्थंनाथशब्दप्रयोगः ॥ १८ ॥ ति० विशल्यइति । ओषधिपर्वतानयनोत्तरमोषध्यःसुषेणेनसंगृह्यस्थापिताइत्यनेनज्ञायते ॥ २४ ॥ इतिद्विनवतितमःसर्गः ॥ ९२ ॥

[पा०] १ ग. घ. क्षयोरणे. २ ङ. च. ज.—ट. हृतेतस्मिञ्शक्र. ३ ख. सुषेणमुद्दिश्यसमाहूयेदं. ४ ङ. झ. विशल्योयं महाप्राज्ञः. ५ ख. ङ. झ.—ट. समुदाचर. ६ ङ. झ. सौमित्रिर्मित्रवत्सलः. ७ च. ञ. ट. ततो. ८ घ. ङ. झ. ञ. ट. वीर्यवान्. ९ च. ञ. ट. परमं.

अपूजयत्कर्म स लक्ष्मणस्य सुदुष्करं दाशरथिर्महात्मा ॥
हृष्टा बभूवुर्युधि यूथपेन्द्रा निपातितं शक्रजितं निशम्य ॥ २८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विनवतितमः सर्गः ॥ ९२ ॥

त्रिनवतितमः सर्गः ॥ ९३ ॥

लक्ष्मणकृतेन्द्रजिद्वधश्रवणमुग्धेनरावणेनेन्द्रजितंप्रति शोचनपूर्वकं बहुधाविलापः ॥ १ ॥ तथामन्त्रिणःप्रति स्वप्रतापप्रशंसनेन रामादिवधप्रतिज्ञानम् ॥ २ ॥ तथा सीतावधप्रतिज्ञानेनाशोकवनिकांप्रतिजवादभिधावनम् ॥ ३ ॥ तदवलोकनभीतयासीतया बहुधाविलापः ॥ ४ ॥ अत्रान्तरे सुपार्श्वनाम्नासचिवेन युक्त्युपन्यासेनसान्त्वनपूर्वकं सीतावधोद्यमात्प्रतिनिवर्तनेन गृहंप्रतियापनम् ॥ ५ ॥

ततः पौलस्त्यसचिवाः श्रुत्वा चेन्द्रजितं हतम् ॥ आचचक्षुरभिज्ञाय दशग्रीवाय सव्यथाः ॥ १ ॥
युद्धे हतो महाराज लक्ष्मणेन तवात्मजः ॥ विभीषणसहायेन मिषतां नो महाद्युतिः ॥ २ ॥
शूरः शूरेण संगम्य संयुगेष्वपराजितः ॥ लक्ष्मणेन हतः शूरः पुत्रस्तु विबुधेन्द्रजित् ॥
गतः स परमाँल्लोकाञ्शरैः संतर्प्य लक्ष्मणम् ॥ ३ ॥
स तं प्रतिभयं श्रुत्वा वधं पुत्रस्य दारुणम् ॥ घोरमिन्द्रजितः सङ्ख्ये कश्मलं चाविशन्महत् ॥ ४ ॥
उपलभ्य चिरात्संज्ञां राजा राक्षसपुङ्गवः ॥ पुत्रशोकार्दितो दीनो विललापाकुलेन्द्रियः ॥ ५ ॥
हा राक्षसचमूमुख्य मम वत्स महारथ ॥ जित्वेन्द्रं कथमद्य त्वं लक्ष्मणस्य वशं गतः ॥ ६ ॥

गुण आर्षः ॥ २७—२८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्विनवतितमः सर्गः ॥ ९२ ॥

अथ सीतावधोद्योगपर्यन्तो रावणस्य पुत्रशोकातिशय उच्यते—ततः पौलस्त्यसचिवा इत्यादि ॥ पौलस्त्यसचिवाः रावणागारवर्तिनः सहायभूताः । इन्द्रजितंहतं श्रुत्वा स्वयमभिज्ञाय साभिज्ञानं दृष्ट्वा । सव्यथाःसन्तो रावणाय आचचक्षुः आचचक्षिरे । अथवा अभिज्ञायेति चतुर्थी । पूर्वमेव यज्ञविघ्नेन निश्चिततद्वधायेत्यर्थः । अवज्ञायेति पाठेपि चतुर्थीपक्षे अयमेवार्थः । पक्षान्तरे साक्षात्कारपर्यन्तदर्शनं प्राप्येत्यर्थः ॥ १ ॥ मिषतां नः अस्मासु पश्यत्सु सत्स्वित्यर्थः । अनन्तरयोजनायामस्मासु जीवत्स्वित्यर्थः । अनादरे षष्ठी ॥ २ ॥ शूर इत्यादिसार्धश्लोक एकान्वयः ॥ क्रियाभेदाच्छूरपदद्वयं । विबुधेन्द्रजित् देवेन्द्रजित् ॥ ३ ॥ दारुणं करुणं । घोरं तीक्ष्णं । कश्मलं मूर्च्छा । "मूर्च्छा तु कश्मलं मोहः" इत्यमरः

ति० सचिवाः अवशिष्टसुपार्श्वादिमन्त्रिणः । अवज्ञाय अवक्षिप्ता ज्ञा ज्ञानंयस्यतस्मै । पुत्रवधवृत्तान्तज्ञानरहितायेत्यर्थः । तीर्थंतु अवज्ञाय अभिज्ञाय दृष्ट्वा पूर्वंश्रुत्वापश्चाद्युद्धभूमिंगत्वाप्रत्यक्षीकृत्याचचक्षुरित्यर्थमाह । स० जानाति यः स ज्ञः सनभवतीत्यवज्ञः एतद्वार्तानभिज्ञस्तस्मै । लक्ष्मणेनावज्ञायहतइत्युत्तरत्रान्वयोवा । एतावतापिनसीताप्रदानप्रज्ञातवेतितमवज्ञाय तिरस्कृत्येतिवा । शि० अवज्ञाय सर्वसत्पुरुषानादरकर्त्रेदशग्रीवाय ॥ १ ॥ ति० मिषतांनइति । योद्धृराक्षसैर्दर्शनाच्छत्रिन्यायेनबोध्यं । स० अत्यासन्नैर्दृष्टत्वात्तैस्सहाद्रष्टृभिरपि मिषतांनइत्युक्तिःसंभवति ॥ २ ॥ स० हेविबुध इतउत्तरंकर्तव्यज्ञान । इन्द्रजित् विबुधैःसहित इन्द्रस्तंजयतीतिसतथावा । विबुधान्देवान् इन्द्रंचजयतीतिनागोजिभट्टव्याख्यानंतु सर्वथापीन्द्रशब्दस्यपूर्वनिपातस्यावर्जनीयत्वादुपेक्ष्यं । देवदेवेन्द्रोभयप्राधान्याच्चारस्याच्च । अस्मत्पक्षे "सहयुक्तेऽप्रधाने" इतिदेवाप्राधान्येन्द्रपारम्यलाभस्चारस्यात् ॥ ३ ॥

[पा०] १ ङ. च. झ. ञ. ट. चेन्द्रजितोवधं. २ ङ—ट. रवज्ञाय. ३ घ. राक्षसाः. ङ. झ. सत्वराः. ४ क.—च. ज. झ ट. पुत्रस्ते. ५ ख. ग. ङ. झ. संतर्प्य. ६ ख. ङ. झ. ट. प्राविशन्महत्.

ननु त्वमिषुभिः क्रुद्धो भिन्द्याः कालान्तकावपि ॥ मन्दरस्यापि शृङ्गाणि किं पुनर्लक्ष्मणं युधि ॥७॥
अद्य वैवस्वतो राजा भूयो बहुमतो मम ॥ येनाद्य त्वं महाबाहो संयुक्तः कालधर्मणा ॥ ८ ॥
एष पन्थाः सुयोधानां सर्वामरगणेष्वपि ॥ यः कृते हन्यते भर्तुः स पुमान्स्वर्गमृच्छति ॥ ९ ॥
अद्य देवगणाः सर्वे लोकपालास्तथर्षयः ॥ हतमिन्द्रजितं श्रुत्वा सुखं स्वप्स्यन्ति निर्भयाः ॥ १० ॥
अद्य लोकास्त्रयः कृत्स्ना पृथिवी च सकानना ॥ ऐकेनेन्द्रजिता हीना शून्येव प्रतिभाति मे ॥११॥
अद्य नैर्ऋतकन्यानां श्रोष्याम्यन्तःपुरे रवम् ॥ करेणुसङ्घस्य यथा निनादं गिरिगह्वरे ॥ १२ ॥
यौवराज्यं च लङ्कां च रक्षांसि च परंतप ॥ मातरं मां च भार्यां च क गतोसि विहाय नः ॥१३॥
मम नाम त्वया वीर गतस्य यमसादनम् ॥ प्रेतकार्याणि कार्याणि विपरीते हि वर्तसे ॥ १४ ॥
स त्वं जीवति सुग्रीवे लक्ष्मणे च सराघवे ॥ मम शल्यमनुद्धृत्य क गतोसि विहाय नः ॥ १५ ॥
एवमादिविलापार्तं रावणं राक्षसाधिपम् ॥ आविवेश महान्कोपः पुत्रव्यसनसंभवः ॥ १६ ॥
प्रकृत्या कोपनं ह्येनं पुत्रस्य पुनराधयः ॥ दीप्तं संदीपयामासुर्घर्मेऽर्कमिव रश्मयः ॥ १७ ॥
ललाटे भ्रुकुटीभिश्च संगताभिर्व्यरोचत ॥ युगान्ते सह नक्षत्रैस्तु महोर्मिभिरिवोदधिः ॥ १८ ॥
कोपाद्विजृम्भमाणस्य वक्त्राद्व्यक्तमभिज्वलन् ॥ उत्पपात सै भूयोग्निर्वृत्रस्य वदनादिव ॥ १९ ॥
स पुत्रवधसंतप्तः शूरः क्रोधवशं गतः ॥ समीक्ष्य रावणो बुद्ध्या वैदेह्या रोचयद्वधम् ॥ २० ॥
तस्य प्रकृत्या रक्ते च रक्ते क्रोधाग्निनाऽपि च ॥ रावणस्य महाघोरे दीप्ते नेत्रे बभूवतुः ॥ २१ ॥
घोरं प्रकृत्या रूपं तत्तस्य क्रोधाग्निमूर्च्छितम् ॥ बभूव रूपं क्रुद्धस्य रुद्रस्येव दुरासदम् ॥ २२ ॥
तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन्नस्रबिन्दवः ॥ दीप्ताभ्यामिव दीपाभ्यां सार्चिषः स्नेहबिन्दवः ॥ २३ ॥
दन्तान्विदशतस्तस्य श्रूयते दशनस्वनः ॥ यन्त्रस्यावेष्ट्यमानस्य महतो दानवैरिव ॥ २४ ॥
कालाग्निरिव संक्रुद्धो यां यां दिशमवैक्षत ॥ तस्यां तस्यां भयत्रस्ता राक्षसाः संविलिल्यिरे ॥२५॥

॥ ४—६ ॥ नन्वित्यामन्त्रणे । कालान्तकौ यमस्य मूर्तिभेदौ ॥ ७ ॥ भूयः अतिशयेन । कालधर्मणा मरणेन । आर्षोनिच् समासान्तः । संयुक्तः संयोजितः ॥ ८ ॥ युद्धमरणस्य सर्वाकाङ्क्षितत्वाद्युद्धहतं त्वां न शोचामीत्याह—एष इति ॥ एषः युद्धमरणरूपः पन्थाः ॥ एवं यशस्यत्वादशोच्यत्वमुक्त्वा स्वर्ग्यत्वादशोच्यत्वमाह—य इति ॥ ९—११ ॥ लोकास्त्रय इत्युक्तावपि पृथिव्याः पृथगुपादानं प्राधान्यात् । यथा ब्राह्मणा आगता वसिष्ठोप्यागत इत्यादौ ॥ १२ ॥ नः सर्वानिति योजनीयं ॥ १३—१६ ॥ प्रकृत्या कोपनमित्यस्य विवरणं दीप्तमिति । पुत्रस्य पुत्रसंबन्धिन्यः । पुत्रविषया इत्यर्थः । आधयः शोकाः । पुनः भूयः । संदीपयामासुः कोपयामासुः । अर्कपक्षे क्रूरयामासुरित्यर्थः ॥ १७ ॥ भ्रुकुटीभिरिति बहुवचनं दशशिरस्कत्वात् ॥ १८—२३ ॥ आवेष्ट्यमानस्य भ्राम्यमाणस्य । यन्त्रस्य तिलपीडनयन्त्रस्य । दानवैर्बलवद्भिरित्यर्थः ॥ २४ ॥ संविलिल्यिरे ।

ती० कालान्तकावपि कालः सर्वसंहारकः । अन्तकः कालाभिमानीपुरुषः ॥ ७ ॥ स० वैवस्वतोराजा प्रेतराजः । बहुमतः । एतादृशमपित्वांनिनायेतिश्लाघनीयइतिभावः । कालधर्मणा कालोमारणंधर्मोयस्यासौ कालधर्मा । तेन यमेनत्वमद्यसंयुक्तः मृतइतियावत् । शि० बहुभूयः अत्यधिकोममममतः ज्ञातः ॥ ८ ॥ ति० रावणंचसमाधिगमितिपाठे सम्यगाधिः समाधिः मनोव्यथा तांगच्छतीत्यर्थइतितीर्थः ॥ १६ ॥ ती० सपुत्रवधेत्यस्यप्रातीतिकार्थःस्पष्टः । वस्तुतस्तु—रावणः वैदेह्या हेतुभूतया वधं स्ववधंबुद्ध्यासमीक्ष्य इतःपरंरामोमामवश्यंवधिष्यतीतिनिश्चित्येत्यर्थः । अरोचयत् स्ववधमित्यनुषङ्गः ॥ २० ॥ ति० यन्त्रस्य

[पा] १ ख. ग. ङ. च. ज.—ट. दृष्ट्वासुखं. २ घ. मृतेनेन्द्रजिता. ३ ङ. झ. भार्याश्च. ४ ख. सर्वाणि. ५ क. ख. ग. च. सधूमोग्निः. ङ. झ. ट. सधूमाग्निः. घ. विधूमोग्निः. ६ ङ.—ट. व्यवस्थितं. ७ ङ. झ. ट. स्याकृष्यमाणस्य. ८ क. ख. ग. संनिलिल्यिरे.

तमन्तकमिव क्रुद्धं चराचरचिखादिषुम् ॥ वीक्षमाणं दिशः सर्वा राक्षसा नोपचक्रमुः ॥ २६ ॥
ततः परमसंक्रुद्धो रावणो राक्षसाधिपः ॥ अब्रवीद्रक्षसां मध्ये संस्तम्भयिषुराहवे ॥ २७ ॥
मया वर्षसहस्राणि चरित्वा दुश्चरं तपः ॥ तेषु तेष्ववकाशेषु स्वयंभूः परितोषितः ॥ २८ ॥
तस्यैव तपसो व्युष्ट्या प्रसादाच्च स्वयंभुवः ॥ नासुरेभ्यो न देवेभ्यो भयं मम कदाचन ॥ २९ ॥
कवचं ब्रह्मदत्तं मे यदादित्यसमप्रभम् ॥ देवासुरविमर्देषु न भिन्नं वज्रशक्तिभिः ॥ ३० ॥
तेन मामद्य संयुक्तं रथस्थमिह संयुगे ॥ प्रतीयात्कोऽद्य मामाजौ साक्षादपि पुरन्दरः ॥ ३१ ॥
यत्तदाऽभिप्रसन्नेन सशरं कार्मुकं महत् ॥ देवासुरविमर्देषु मर्म दत्तं स्वयंभुवा ॥ ३२ ॥
अद्य तूर्यशतैर्भीमं धनुरुत्थाप्यतां मम ॥ रामलक्ष्मणयोरेव वधाय परमाहवे ॥ ३३ ॥
स पुत्रवधसंतप्तः शूरः क्रोधवशं गतः ॥ समीक्ष्य रावणो बुद्ध्या सीतां हन्तुं व्यवस्यत ॥ ३४ ॥
प्रत्यवेक्ष्य तु ताम्राक्षः सुघोरो घोरदर्शनः ॥ दीनो दीनस्वरान्सर्वांस्तानुवाच निशाचरान् ॥ ३५ ॥
मायया मम वत्सेन वञ्चनार्थं वनौकसाम् ॥ किंचिदेव हतं तत्र सीतेयमिति दर्शितम् ॥ ३६ ॥
तदिदं तथ्यमेवाहं करिष्ये प्रियमात्मनः ॥ वैदेहीं नाशयिष्यामि क्षत्रबन्धुमनुव्रताम् ॥ ३७ ॥
इत्येवमुक्त्वा सचिवान्खड्गमाशु परामृशत् ॥ ३८ ॥
उद्धृत्य गुणसंपन्नं विमलाम्बरवर्चसम् ॥ निष्पपात स वेगेन सभार्यः सचिवैर्वृतः ॥ ३९ ॥
रावणः पुत्रशोकेन भृशमाकुलचेतनः ॥ संक्रुद्धः खड्गमादाय सहसा यत्र मैथिली ॥ ४० ॥
व्रजन्तं राक्षसं प्रेक्ष्य सिंहनादं प्रचुक्रुशुः ॥ ऊचुश्चान्योन्यमाश्लिष्य संक्रुद्धं प्रेक्ष्य राक्षसाः ॥ ४१ ॥

स्तम्भादिव्यवहिता बभूवुरित्यर्थः ॥ २५ ॥ चिखादिषुं संहर्तुमिच्छुमित्यर्थः । नोपचक्रमुः नोपसेदुः ॥२६॥ संस्तम्भयिषुराहवे युद्धभीतान्राक्षसान् युद्धे स्थापयितुकामः । सनि द्विर्वचनाभाव आर्षः ॥ २७ ॥ अवकाशेषु तपःसमाप्तिषु ॥२८॥ व्युष्ट्या समृद्ध्या । "व्युष्टिः फले समृद्धौ च" इत्यमरः । भयाभावे हेतुमाह—कवचमिति ॥ यत् यस्मात् । कवचमस्ति तस्मादिति पूर्वेणान्वयः ॥ २९–३० ॥ तेन कवचेन । संयुक्तं रथस्थं मां इह संयुगे कः प्रतीयात् आभिमुख्येनागच्छेत् । अद्य मामाजौ साक्षात्पुरन्दरोपि न प्रतीयादिति च योज्यं । अर्थसिद्धौ नञ् । क्रियापदमस्त्येव । अनेवंव्याख्याने अद्य मामाजाविति पुनरुक्तं स्यात् ॥ ३१ ॥ यत्तदेत्यादिश्लोकद्वयमेकान्वयं ॥ देवासुरविमर्देषु विमर्दकाल इत्यर्थः । अद्य तूर्यशतैरित्यनेन इतः पूर्वमिदं धनुर्न नीतमिति गम्यते ॥ ३२—३४ ॥ सुघोरः सुघोरप्रकृतिः ॥३५॥ मायायेत्यादिश्लोकद्वयमेकान्वयं ॥ सीतेयमिति दर्शितं किंचित् अलीकमेवेत्यर्थः ॥ ३६—३७ ॥ इत्येवमित्यर्धं ॥ परामृशत् आददे ॥ ३८ ॥ उद्धृत्येत्यादिश्लोकद्वयमेकं वाक्यं ॥ गुणसंपन्नं माल्यालंकृतं । विमलाम्बरवर्चसं विमलाकाशसदृशं । खड्गमादाय कोशादुद्धृत्य । यत्र मैथिली तं देशंप्रति निष्पपातेत्यन्वयः ॥ ३९—४० ॥ व्रजन्तमित्यादिसार्धश्लोकत्रयमेकान्वयं ॥ रत्नानि श्रेष्ठवस्तूनि । "रत्नं स्वजाति-

मन्दररूपमथनयन्त्रस्य । वासुकिना करणेन । दानवैः कृष्यमाणस्य मथ्नतः क्षीराब्धिमथनंकुर्वतोमन्दरस्येव ॥२४॥ स० तेन कवचेन । संयुक्तं संयुगे संयुगार्थं । रथस्थं इहाद्य मां आजौ रणभूमौ कःप्रतीयात् नकोपि । देवाधिपश्चेदागच्छेदित्यतआह—साक्षादिति । साक्षात्पुरन्दरश्चेदप्यद्यनप्रतीयादितिशेषः । तेननपुनरुक्तिः ॥३१॥ ती० वस्तुतस्तु सीतांहन्तुं गन्तुं सीतादर्शनार्थंगन्तुंव्यवस्यतेत्यर्थः । 'हनहिंसागत्योः' इति धातुः ॥ ३४ ॥ ति० क्षत्रबन्धुं वस्तुतोऽज्ञत्रियं । ती० मायायेत्यादिश्लोकद्वयस्यवास्तवार्थस्तु—ममवत्सेन बालेनापिसता इन्द्रजिता वनौकसांवञ्चनार्थं इयंसीतेतिकिंचिदेवालीकमेवहतंदर्शितं । अहं क्षत्रबन्धुं क्षत्राणांबन्धुंपरमासंराममनुव्रतां वैदेहीं तथ्यंयथाभवतितथानाशयिष्यामि यदितदिदमात्मानंप्रत्यप्रियमेवस्यात् । अतःकरिष्ये इतरराक्षससंतो-

[पा०] १ घ. तेषुचकालेषु. २ ङ. ञ. वज्रमुष्टिभिः. ३ ख. च. मयाप्राप्तंस्वयंभुवा. ४ ख. वैदेह्यारोचयद्वधं. ५ ख. च. सुघोरान्घोरदर्शनात. क. ज. ञ. ट. सुघोरोघोरदर्शनान्. ६ ङ. ञ. ट. उत्प्लुत्य. ख. घ. उद्गृह्य. ७ क. ख. ग. ङ. च. ञ. ञ. ट. मालिङ्ग्य. घ. मालोक्य. ८ ङ. च. ञ. ञ. ट. राक्षसं.

अद्यैनं तावुभौ दृष्ट्वा भ्रातरौ प्रव्यथिष्यतः ॥ लोकपाला हि चत्वारः क्रुद्धेनानेन निर्जिताः ॥४२॥
बहवः शत्रवश्चापि संयुगेषु निपातिताः ॥ त्रिषु लोकेषु रत्नानि भुङ्क्ते चाहृत्य रावणः ॥
विक्रमे च बले चैव नास्त्यस्य सदृशो भुवि ॥ ४३ ॥
तेषां संजल्पमानानामशोकवनिकां गताम् ॥ अभिदुद्राव वैदेहीं रावणः क्रोधमूर्च्छितः ॥ ४४ ॥
वार्यमाणः सुसंक्रुद्धः सुहृद्भिर्हितबुद्धिभिः ॥ अभ्यधावत संक्रुद्धः खे ग्रहो रोहिणीमिव ॥ ४५ ॥
मैथिली रक्ष्यमाणा तु राक्षसीभिरनिन्दिता ॥ ददर्श राक्षसं क्रुद्धं निस्त्रिंशवरधारिणम् ॥ ४६ ॥
[1]तं निशाम्य सनिस्त्रिंशं व्यथिता जनकात्मजा ॥ निवार्यमाणं बहुशः सुहृद्भिरनुवर्तिनम् ॥
सीता दुःखसमाविष्टा विलपन्तीदमब्रवीत् ॥ ४७ ॥
यथाऽयं मामभिक्रुद्धः समभिद्रवति स्वयम् ॥ वधिष्यति सनाथां [2]मामनाथामिव दुर्मतिः ॥ ४८ ॥
बहुशश्चोदयामास भर्तारं मामनुव्रताम् ॥ भार्या [3]मे रमस्वेति प्रत्याख्यातो ध्रुवं मया ॥ ४९ ॥
सोयं ममानुपस्थाने व्यक्तं नैराश्यमागतः ॥ क्रोधमोहसमाविष्टो निहन्तुं मां समुद्यतः ॥ ५० ॥
अथवा तौ नरव्याघ्रौ भ्रातरौ रामलक्ष्मणौ ॥ मन्निमित्तमनार्येण समरेऽद्य निपातितौ ॥ ५१ ॥
[भैरवो हि महान्नादो राक्षसानां श्रुतो मया ॥ बहूनामिह हृष्टानां तथा विक्रोशतां प्रियम् ॥]
अहो धिङ्मन्निमित्तोयं विनाशो राजपुत्रयोः ॥ ५२ ॥
अथवा पुत्रशोकेन अहत्वा[4] रामलक्ष्मणौ ॥ विधमिष्यति मां रौद्रो राक्षसः पापनिश्चयः ॥ ५३ ॥
हनूमतोपि यद्वाक्यं न कृतं क्षुद्रया मया ॥ ५४ ॥
यद्यहं तस्य पृष्ठेन तदा यायामनिन्दिता ॥ नाद्यैवमनुशोचेयं भर्तुरङ्कगता सती ॥ ५५ ॥
मन्ये तु हृदयं तस्याः कौसल्यायाः फलिष्यति ॥ एकपुत्रा यदा पुत्रं विनष्टं श्रोष्यते युधि ॥५६॥
सा हि जन्म च बाल्यं च यौवनं च महात्मनः ॥ धर्मकार्यानुरूपं च रुदन्ती संस्मरिष्यति ॥५७॥
निराशा निहते पुत्रे दत्त्वा श्राद्धमचेतना ॥ अग्निमारोक्ष्यते नूनमपो वाऽपि प्रवेक्ष्यति ॥ ५८ ॥
धिगस्तु कुब्जामसतीं मन्थरां पापनिश्चयाम् ॥ यन्निमित्तमिदं दुःखं कौसल्या प्रतिपत्स्यते ॥ ५९ ॥
इत्येवं मैथिलीं दृष्ट्वा विलपन्तीं तपस्विनीम् ॥ रोहिणीमिव चन्द्रेण विना ग्रहवशं गताम् ॥ ६० ॥
एतस्मिन्नन्तरे तस्य अमात्यो बुद्धिमाञ्शुचिः ॥ सुपार्श्वो नाम मेधावी [5]राक्षसो राक्षसेश्वरम् ॥
[6]निवार्यमाणं सचिवैरिदं वचनमब्रवीत् ॥ ६१ ॥

श्रेष्ठेपि" इत्यमरः ॥ ४१—४४ ॥ ग्रहः अङ्गारकः ॥ ४५—४७ ॥ यथा यस्मादित्यर्थः ॥ ४८—४९ ॥ अनुपस्थाने अनुपस्थानात् ॥ ५० ॥ तौ निहत्य तेन निस्त्रिंशेन सह प्रवेशनमपि संभवतीत्यभिप्रायेणाह—अथवेत्यादि ॥ ५१—५२ ॥ अत्र निमित्तान्तरमाशङ्कते—अथवा पुत्रशोकेनेति ॥ अहत्वा हन्तुमशक्तो भूत्वा ॥ ५३ ॥ हनूमत इत्यर्धं ॥ क्षुद्रया विचारमूढया ॥ ५४ ॥ यायामनुशोचेयमिति "हेतुहेतुमतोर्लिङ्"इति लिङ् ॥ ५५ ॥ प्रथमपक्षानुसारेण शोचति—मन्य इति ॥ ५६ ॥ धर्मकार्यानुरूपं धर्मकार्यानुरूपत्वं ॥ ५७ ॥ अचेतना मूर्च्छिता ॥ ५८—५९ ॥ मैथिलीं दृष्ट्वा रावणमब्रवीदित्यन्वयः ॥ ६०—

षार्थतस्याःकिंचित् दुःखमितिशेषः ॥ ३६—३७ ॥ ति० निवार्यमाणमप्यनिवर्तिनं । अनुवर्तिनमितिपाठे अभिमुखमागच्छन्तं ॥ ४७ ॥ ति० यदाश्रोष्यते तदा फलिष्यति स्फुटिष्यति । यदिरामोपिहन्यतइतिशेषः ॥ ५६ ॥ ति० सुपार्श्वोनामामात्यः शुचिः शुद्धव्रतः । तदितरसचिवैरेवंवक्तुमयोग्यमितिनिवार्यमाणोपि रावणंप्रतीदमब्रवीत् । अस्यैवाविन्ध्यइतिनामान्तरं । अत एवभारते "अशोकवनिकास्थांतांरामदर्शनलालसाम् । खड्गमादायदुष्टात्माजवेनापिपपातह । तद्बुद्ध्यातस्यदुर्बुद्धेरविन्ध्यःपापनिश्च-

[पा०] १ ख. सानिशम्य. २ झ. रनिवर्तिनं. ३ क. ख. ग. ङ. च. झ. ञ. ट. ममभवस्वेति. ४ अयंश्लोकः क. ख. ङ. च. झ. ञ. ट. पाठेषुदृश्यते. ५ क. घ. हत्वातौ. ६ क. ख. ग. ङ. च. झ. ञ. ट. रावणंराक्षसेश्वरं. ७ झ. निवार्यमाणः.

कथं नाम दशग्रीव साक्षाद्वैश्रवणानुज ॥ हन्तुमिच्छसि वैदेहीं क्रोधाद्धर्ममपास्य हि ॥ ६२ ॥
वेदविद्याव्रतस्नातः स्वकर्मनिरतः सदा ॥ स्त्रियाः कस्माद्वधं वीर मन्यसे राक्षसेश्वर ॥ ६३ ॥
मैथिलीं रूपसंपन्नां प्रत्यवेक्षस्व पार्थिव ॥ त्वमेव तु सहास्माभी राघवे क्रोधमुत्सृज ॥ ६४ ॥
अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्दशीम् ॥ कृत्वा निर्याह्यमावास्यां विजयाय बलैर्वृतः ॥ ६५ ॥
शूरो धीमान्रथी खड्गी रथप्रवरमास्थितः ॥ हत्वा दाशरथिं रामं भवान्प्राप्स्यति मैथिलीम् ॥ ६६ ॥
स तद्वुरात्मा सुहृदा निवेदितं वचः सुधर्म्यं प्रतिगृह्य रावणः ॥
गृहं जगामाथ ततश्च वीर्यवान्पुनः सभां च प्रययौ सुहृद्वृतः ॥ ६७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिनवतितमः सर्गः ॥ ९३ ॥

चतुर्नवतितमः सर्गः ॥ ९४ ॥

रामेण रावणमूलबलवधः ॥ १ ॥

स प्रविश्य सभां राजा दीनः परमदुःखितः ॥ निषसादासने मुख्ये सिंहः क्रुद्ध इव श्वसन् ॥ १ ॥
अब्रवीच्च स तान्सर्वान्बलमुख्यान्महाबलः ॥ रावणः प्राञ्जलिर्वाक्यं पुत्रव्यसनकर्षितः ॥ २ ॥
सर्वे भवन्तः सर्वेण हस्त्यश्वेन समावृताः ॥ निर्यान्तु रथसङ्घैश्च पादातैश्चोपशोभिताः ॥ ३ ॥
एकं रामं परिक्षिप्य समरे हन्तुमर्हथ ॥ वर्षन्तः शरवर्षेण प्रावृट्काल इवाम्बुदाः ॥ ४ ॥

---

६४ ॥ अभ्युत्थानं युद्धनिर्याणप्रारम्भं । चतुर्दशीं चतुर्दश्यां । अमावास्यां अमावास्यायां । अनेन त्रयोदशयुद्धदिनान्यतीतानीत्यवगम्यते । तथाहि "ततोऽस्तमगमत्सूर्यः संध्यया प्रतिरञ्जितः । पूर्णचन्द्रप्रदीपा च क्षपा समभिवर्तत" इति वचनात् । पौर्णमास्यां सुवेलाप्रवेशः । ततः कृष्णपक्षप्रथमायां युद्धस्यारम्भः । तस्यामेव रात्रौ नागपाशबन्धतद्विमोक्षौ । द्वितीयायां धूम्राक्षस्य वधः । तृतीयायां वज्रदंष्ट्रस्य । चतुर्थ्यामकम्पनस्य । प्रहस्तस्य पञ्चम्यां । षष्ठ्यां रावणमुकुटभङ्गः । सप्तम्यां कुम्भकर्णस्य वधः । अष्टम्यामतिकायादीनां । नवम्यां पुनरिन्द्रजिद्युद्धं । तस्यामेव रात्रौ कुम्भनिकुम्भादीनां वधः । दशम्यां मकराक्षस्य । एकादश्यां द्वादश्यां त्रयोदश्यां चेन्द्रजिद्वधः । वस्तुतस्तु नवम्यां युद्धारम्भात्तदारभ्य दिनद्वयेन रावणेन्द्रजिन्मूलबलव्यतिरिक्तराक्षसनिबर्हणात् एकादशीद्वादशीत्रयोदशीभिरिन्द्रजिद्वध इति चतुर्दश्यामभ्युत्थानवचनं युज्यत एव ॥ ६५—६७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिनवतितमः सर्गः ॥ ९३ ॥

अथ मूलबलयुद्धं—स प्रविश्येत्यादि ॥ १ ॥ रावणः प्राञ्जलिरिति । अनुनयार्थमञ्जलिकरणं ॥ २—३ ॥ परिक्षिप्य आवार्य । शरवर्षेण वृष्ट्या

यम् । शमयामाससंक्रुद्धंश्रूयतांयेनहेतुना"इत्युक्तं ॥ ६१ ॥ स० वैश्रवणानुज ऋषिवंशसंभवस्याधर्मप्रवृत्तिरनुचितेत्यनेनध्वन्यते ॥ ६२ ॥ ति० वेदविद्याग्रहापेक्षितब्रह्मचर्यव्रतपूर्वविद्यां गृहीत्वास्नातोगुरुकुलात्समावृत्तः तदनन्तरंदारग्रहणपूर्वकं नित्याग्निहोत्रादिस्वकर्मनिरतः ॥ ६३ ॥ ती० प्रत्यवेक्षस्व कालान्तरेमैथिलीवशगाभविष्यतीतिप्रत्यवेक्षस्वेत्यर्थः । ति० प्रत्यवेक्षस्व रामवधपर्यन्तमितिशेषः । त्वंतस्मिन्नेव राघवएवक्रोधमुत्सृज ॥ ६३ ॥ रामानु० रथी महारथइत्यर्थः ॥ ६६ ॥ इतित्रिनवतितमः सर्गः ॥ ९३ ॥

स० आहवेसर्वान्हताञ्छ्रुत्वाऽनुत्साहान्युद्धायप्रोत्साहयितुंप्राञ्जलिर्भूत्वाऽब्रवीदित्यर्थः ॥ २ ॥ स० शरवर्षाणि जलवर्षाणि

[पा०] १ ग. ङ. च. झ. ञ. ट. तस्मिन्नेवसहास्माभिराहवे. २ घ. ङ. झ. ञ. चतुर्दशी. ३ ख. सन्नद्धःकवचीखड्गी. ४ ङ. झ. भीमंभवान्. ५ क.—घ. ञ. प्रवृष्टाः. ङ. च. झ. ट. प्रहृष्टाःशरवर्षाणि.

अथ वाऽहं शरैस्तीक्ष्णैर्भिन्नगात्रं महारणे ॥ भवद्भिः श्वो निहन्तास्मि रामं लोकस्य पश्यतः ॥ ५ ॥
इत्येतद्राक्षसेन्द्रस्य वाक्यमादाय राक्षसाः ॥ निर्ययुस्ते रथैः शीघ्रैर्नानानीकैः[1] सुसंवृताः ॥ ६ ॥
परिघान्पट्टिशांश्चैव शरखड्गपरश्वधान् ॥ शरीरान्तकरान्सर्वे चिक्षिपुर्वानरान्प्रति ॥ ७ ॥
वानराश्च द्रुमाञ्शैलान्राक्षसान्प्रति चिक्षिपुः ॥ ८ ॥
स संग्रामो महान्भीमः सूर्यस्योदयनं प्रति ॥ रक्षसां वानराणां च तुमुलः समपद्यत ॥ ९ ॥
ते गदाभिर्विचित्राभिः प्रासैः खड्गैः परश्वधैः ॥ अन्योन्यं समरे जघ्नुस्तदा वानरराक्षसाः ॥ १० ॥
एवं प्रवृत्ते संग्रामे ह्युद्धूतं सुमहद्रजः ॥ रक्षसां वानराणां च शान्तं शोणितविस्रवैः ॥ ११ ॥
मातङ्गरथकूलाश्च वाजिमत्स्या ध्वजद्रुमाः ॥ शरीरसंघाटवहाः प्रसस्रुः शोणितापगाः ॥ १२ ॥
ततस्ते वानराः सर्वे शोणितौघपरिप्लुताः ॥ ध्वजवर्मरथानश्वान्नानाप्रहरणानि च ॥
आप्लुत्याप्लुत्य समरे राक्षसानां बभञ्जिरे ॥ १३ ॥
केशान्कर्णललाटांश्च नासिकाश्च प्लवङ्गमाः ॥ रक्षसां दशनैस्तीक्ष्णैर्नखैश्चापि न्यकर्तयन्[3] ॥ १४ ॥
एकैकं राक्षसं सङ्ख्ये शतं वानरपुङ्गवाः ॥ अभ्यधावन्त फलिनं वृक्षं शकुनयो यथा ॥ १५ ॥
तथा गदाभिर्गुर्वीभिः प्रासैः खड्गैः परश्वधैः ॥ निजघ्नुर्वानरान्घोरा[4]राक्षसाः पर्वतोपमाः ॥ १६ ॥
राक्षसैर्युध्यमानानां[5] वानराणां महाचमूः ॥ शरण्यं शरणं याता रामं दशरथात्मजम् ॥ १७ ॥
ततो रामो महातेजा धनुरादाय वीर्यवान् ॥ प्रविश्य राक्षसं सैन्यं शरवर्षं ववर्ष ह ॥ १८ ॥
प्रविष्टं तु तदा रामं मेघाः सूर्यमिवाम्बरे ॥ नाभिजग्मुर्महाघोरं निर्दहन्तं शराग्निना[6] ॥ १९ ॥
कृतान्येव सुघोराणि रामेण रजनीचराः ॥ रणे रामस्य ददृशुः कर्माण्यसुकराणि च ॥ २० ॥
चालयन्तं महानीकं विधमन्तं महारथान्[7] ॥ ददृशुस्ते न वै रामं वातं वनगतं यथा ॥ २१ ॥

हन्तुमर्हथेत्यन्वयः ॥ ४ ॥ स रामो यदि हन्तुं न शक्येत तथापि भवतां शरैः भिन्नगात्रः स्यात् तेन तस्य वधः सुकरो मे भवेदित्यभिप्रायेणाह—अथ वेति ॥ इदानीं यूयं तं हन्तुं न शक्ताश्चेदिदानीं तीक्ष्णैः शरैर्भवद्भिर्भिन्नगात्रं श्वो निहन्तास्मि ॥ ५—८ ॥ सूर्यस्योदयनं प्रति सूर्योदयमारभ्य अन्योन्यं जघ्नुरित्यत्र शिलावृक्षाणामप्युपलक्षणं । राक्षसेभ्योपहृतानि गदाखड्गादीनि राक्षसानामिव वानराणामपि संभवन्तीति वा तथोक्तमिति ज्ञेयं ॥ ९—११ ॥ शरीराण्येव संघाटाः प्लवाः तान् वहन्तीति शरीरसंघाटवहाः ॥ १२ ॥ ततस्ते वानराः सर्वे शोणितौघपरिप्लुता इत्यारभ्य राक्षसानां बभञ्जिर इत्यन्तं सार्धश्लोक एकान्वयः ॥ १३ ॥ रक्षसां केशानिति क्रमेणान्वयः । न्यकर्तयन् चिच्छिदुः ॥ १४—१६ ॥ राक्षसैरिति ॥ वानरसेनाशरणागतिरियं । राक्षसैर्वध्यमानानामित्याकिंचन्यानन्यगतिकत्वोक्तिः । शरण्यमिति दयाद्युक्तिः । राममिति परत्वोक्तिः । दशरथात्मज इति सौलभ्योक्तिः ॥ १७—१९ ॥ कृतान्येव ददृशुः नतु क्रियमाणानीत्यर्थः ॥ २० ॥ न केवलं हस्तलाघवातिशयेन

बाणवर्षाणीतिनीरदसेनोभयपक्षेपिक्रमादर्थोबोध्यः । ति० शरवर्षाणि वर्षयतेति शेषः ॥ ४ ॥ ति० सूर्यस्योदयनंप्रति चतुर्दशीसूर्योदयमारभ्येत्यर्थः । त्रयोदशीरात्रिशेषेरावणस्यसीतासमीपगमनमितिबोध्यं ॥ ९ ॥ स० गदाभिरन्योन्यमित्यादितुनिहतराक्षसानामाच्छिद्यस्थापितैरिदानीमानीतैरितिवावानरैरिदानीमाच्छिन्नैर्गदादिभिरितिवाज्ञेयं । अथवा वानराश्चद्रुमाञ्छैलानितिपूर्वस्मादभिलषितविभक्त्यन्ततयानुकर्षः । ततश्चद्रुमादिभिर्गदादिभिश्चान्योन्यंजघ्नुरित्यन्वयःसंभवतिचायमर्थःसमसमरसमारंभसमयत्वादितिमन्तव्यम् ॥ १० ॥ स० शरीराण्येवसंघाटाः काष्ठनिचयाः । वहन्तीतिवहास्तेषांवहाः । तान्वहन्तीतिनागोजिभट्टविप्रहृप्रदर्शनमदर्शनंज्ञापयतिकर्मण्यण्सूत्रस्य ॥ १२ ॥ स० वानराणांमहाचमूः तदभिन्नासेना ॥ १७ ॥

[पा०] १ ङ. ञ. ट. र्नानानीकैश्चसंयुताः. २ ख. च. छ. ट. व्यदारयन्. घ. ङ. ज. ञ. व्यकर्तयन्. ३ क.—ट. राक्षसैर्वध्यमानानां. ४ ख. ङ.—ट. नाधिजग्मुः. ५ घ. व्यथयन्तं. ६ ग. महाबलान्.

छिन्नं भिन्नं शरैर्दग्धं प्रभग्नं शस्त्रपीडितम् ॥ बलं रामेण ददृशुर्न रामं शीघ्रकारिणम् ॥ २२ ॥
प्रहरन्तं शरीरेषु न ते पश्यन्ति राघवम् ॥ इन्द्रियार्थेषु तिष्ठन्तं भूतात्मानमिव प्रजाः ॥ २३ ॥
एष हन्ति गजानीकमेष हन्ति महारथान् ॥ एष हन्ति शरैस्तीक्ष्णैः पदातीन्वाजिभिः सह ॥२४॥
इति ते राक्षसाः सर्वे रामस्य सदृशात्रणे ॥ अन्योन्यं कुपिता जघ्नुः सादृश्याद्राघवस्य ते ॥ २५ ॥
न ते ददृशिरे रामं दहन्तमरिवाहिनीम् ॥ मोहिताः परमास्त्रेण गान्धर्वेण महात्मनः ॥ २६ ॥
ते तु रामसहस्राणि रणे पश्यन्ति राक्षसाः ॥ पुनः पश्यन्ति काकुत्स्थमेकमेव महाहवे ॥ २७ ॥
भ्रमन्तीं काञ्चनीं कोटिं कार्मुकस्य महात्मनः ॥ अलातचक्रप्रतिमां ददृशुस्ते न राघवम् ॥ २८ ॥
शरीरनाभि सत्त्वार्चिः शरारं नेमिकार्मुकम् ॥ ज्याघोषतलनिर्घोषं तेजोबुद्धि गुणप्रभम् ॥ २९ ॥

कर्मणामदर्शनं रणसंचारलाघवातिशयेन कर्तारमपि न ददृशुरित्याह—चालयन्तमिति ॥ यथा चालनविधमनादिकार्यलिङ्गात् वायुरनुमितो भवति तद्वद्रामोप्यनुमितः। नतु प्रत्यक्षित इत्यर्थः ॥ २१ ॥ उक्तमर्थं विशदयति—छिन्नमिति ॥ छिन्नं खण्डितं। भिन्नं विदारितं। प्रभग्नं शकलीकृतं। शस्त्रपीडितं हृदयार्पितशल्यं ॥२२॥ इन्द्रियार्थेषु तिष्ठन्तं इन्द्रियार्थाननुतिष्ठन्तं अनुभवन्तं। तेनानुभवेनानुमीयमानमपि भूतात्मानं भूतस्य पञ्चभूतात्मकशरीरस्य आत्मानं जीवात्मानं। प्रजाः यथा न पश्यन्ति तथैव शरीरेषु प्रहरन्तं तेन प्रहारेणानुमीयमानमपि राघवं पुरतश्चक्षुषा नाद्राक्षुरित्यर्थः। यद्वा इन्द्रियार्थेषु प्रत्यक्षतोनुभूयमानेषु गन्धादिगुणेषु निराश्रयगुणावस्थानासंभवात् सौक्ष्म्येणानुवृत्तं भूतात्मानमिव पुष्पाद्यवयवभूतपृथिव्यादिस्वरूपमिवेत्यर्थः ॥ २३ ॥ एष हन्तीत्यादिश्लोकद्वयमेकान्वयं ॥ सदृशान् सादृश्येन प्रतीयमानान्। अन्योन्यं सादृश्यादेव हेतोर्जघ्नुश्चेत्यन्वयः ॥ २४—२५ ॥ राक्षसानां रामादर्शनकारणमाह—न त इति ॥ इदमुपलक्षणं। सादृश्यदर्शनमपि मोहनास्त्रेणेति द्रष्टव्यं। महात्मना महास्वभावेन ॥ २६ ॥ अदर्शनवत्सदृशदर्शनवच्चानेकत्वदर्शनं नास्त्रकृतं किंतु भीतिकृतमित्याह—ते त्विति ॥ तुशब्दः पूर्वस्माद्विशेषपरः। मारीचेनाप्युक्तं—"अपि रामसहस्राणि भीतः पश्यामि रावण" इति ॥ २७ ॥ भ्रमन्तीं रामस्य मण्डलाकारगतिविशेषेष्विति केचित्। निरन्तरज्याकर्षणादिति वयं। अलातचक्रप्रतिमां निर्व्वालं काष्ठं निरन्तरभ्रमणेनान्तरालाग्रहणाच्चक्रत्वेन प्रतीयमानामिवेत्यर्थः ॥ २८ ॥ अथ तत्र समरसमये मण्डलीकृतकार्मुकं रामं सकलरिपुनिघातिसुदर्शनत्वेन रूपयति—शरीरेत्यादिना ॥ "ज्वाला-

ति० इति एषहन्तीत्यादिप्रकारेण कुपिताःसर्वेतेराक्षसाः रामस्यसदृशान् सदृशत्वेनप्रतीयमानान्। राक्षसान् रामसादृश्यादन्योन्यंजघ्नुः। "सदृशारावणस्यैतेरणेराक्षससत्तमाः" इतिपूर्वार्धपाठेरावणेनदेवासुरयुद्धादौसाक्षात्साह्यार्थंमूलबलतयातेषांदृष्टप्रत्ययानामत्यूर्जितबलानामेवसंगृहीतत्वात्तेषांरावणसादृश्यं। स० इति इत्याकारकज्ञानेन। तेसर्वेराक्षसाः एकसैन्यस्थाः रणेराघवास्त्रेणमोहिताःसन्तः रामस्यसदृशाबभूवुः। ततश्चराघवस्यसादृश्यात्कुपिताःसन्तः अन्योन्यं अयंरामइतिसरामइतिपरस्परं जघ्नुः ॥ २५ ॥ स० एतदेवविशदयति—नतइति। सैन्यैकदेशस्थाः रामं अरिवाहिनींगान्धर्वास्त्रेणदहन्तं स्वस्थानेस्थितंतेनास्त्रेणमहात्मना कर्त्रामोहिताःसन्तः नददृशिरे इतियोजना ॥ २६ ॥ स० तत्रैवसैन्यान्तरेवृत्तंरामचरितमाह—तइति। ते रावणप्रेरिताराक्षसाः। रामसहस्राणि विश्वरूपत्वाद्रामस्यतद्गृहीतान्यनन्तरामरूपाणीत्यर्थः। रणेपश्यन्ति। उक्तंचभगवत्पादैः "सएवसर्वत्रचदृश्यमानो विदिक्षुदिक्षुप्रजघानसर्वशः" इति। पुनःक्षणान्तरे एकमेवपश्यन्ति। उक्तंचसंग्रहरामायणे—"अपाङ्गमात्रेणजगन्नियन्तानन्वेकरूपोपिरिपून्निहन्यात्। स्वैश्वर्यमेवंचनिदर्शयन्हिसविश्वरूपोकृतविश्वरूपम्" इत्याद्यारभ्य "एकीचकाराथसरामदेवोदीपाभिमानीहियथाग्निदेवः" इत्यन्तेन। यत्तुभारते "मायावीचासृजन्मायांरावणोराक्षसाधिपः" "अथभूयोपिमायांसव्यदधाद्राक्षसाधिपः" इत्यादिनारावणमायायाऽनेकराक्षसरामलक्ष्मणरूपनिर्माणकथनं तदविरुद्धमित्यत्रापिग्राह्यं ॥ २७ ॥ ति० लाघवातिशयान्मण्डलीकृतकार्मुकंराक्षसान्निघ्नन्तंरामंकालचक्रेणोपमिनोति—शरीरेति। शरीरंमध्यदेहएवनाभिश्चक्रस्येवमध्यंयस्यतत्। सत्वं बलमेवार्चिर्ज्वालायस्यतत्। शराएवाराः मध्यकाष्ठानियस्यतत्। नेमिर्वलयाकारोऽवयवविशेषःतद्रूपंकार्मुकंयस्यतत्। तलंज्याघातवारणं तेनतज्जोघोषोलक्ष्यते। ज्याघोषतलघोषावेवनिर्घोषोध्वनिर्यस्यतत्। तेजः प्रतापः बुद्धिर्ज्ञानं तद्रूपौगुणावेवप्रभायस्यतत् ॥ २९ ॥

[पा०] १ घ. सारथीन्वाजिभिः.

दिव्यास्त्रगुणपर्यन्तं निघ्नन्तं युधि राक्षसान् ॥ ददृशू रामचक्रं तत्कालचक्रमिव प्रजाः ॥ ३० ॥
अनीकं दशसाहस्रं रथानां वातरंहसाम् ॥ अष्टादश सहस्राणि कुञ्जराणां तरस्विनाम् ॥ ३१ ॥

नेम्यरनाभ्यक्षपुरुषाङ्गं सुदर्शनं" इत्युक्तरीत्या चक्रं षडङ्गं भवति। तत्र कोदण्डचक्रमध्यस्थत्वाद्दृढत्वाच्च शरीरं नाभित्वेन दर्शयति—शरीरेति। नाभिः चक्रमध्योन्नतप्रदेशः। शरीरमेव नाभिर्यस्य तत्तथोक्तं। सत्त्वं बलमेवार्चिः ज्वाला यस्य तत् सत्त्वार्चिः। "वह्नेर्द्वयोर्ज्वालकीलावार्चिर्हेतिः शिखा स्त्रियां" इत्यमरः। सत्त्वस्य परसन्तापहेतुत्वादर्चिष्ट्वेन निरूपणं। शरा एवारणि चक्रमध्यशलाकाः यस्य तच्छरारं। सुदर्शनस्य सहस्रारत्वाच्छराणामरत्वरूपणेन युगपत्सहस्रशरसंधानं व्यज्यते। नेमिः आधारश्चक्रप्रान्तः। नेमिभूतं मण्डलीकृतकार्मुकं यस्य तत्कार्मुकनेमीत्यर्थः। एतेन मण्डलीकृतदशायामपि नाभिभूतरामशरीरपरिवेषेण धनुषो महोन्नतत्वमुच्यते। सुदर्शनस्य ज्वालामालया निरन्तरघोषवत्त्वाज्ज्यातलघोषं तद्घोषत्वेन रूपयति—ज्याघोषतलनिर्घोषमिति। तलं ज्याघातवारणं तेन तद्घोषो लक्ष्यते। ज्याघोषतलघोषावेव निर्घोषो यस्य तत्तथोक्तं। तेजः पराक्रम एव बुद्धिः अक्षं यस्य तत्तेजोबुद्धि। यथा "प्लवगसैन्यमुलूकजिता जितं" इत्यत्र उलूकशब्दो लक्षणया कौशिकशब्दं लक्षयित्वा इन्द्रजितमाह, तथा बुद्धिशब्दो बुद्धिजनकाक्षलक्षणया अक्षप्रदेशमाह। गुणः शरीरकान्तिः स एव प्रभा यस्य तत्तथोक्तं। दिव्यास्त्राणां गुणः शक्तिः माहात्म्यं वा तदेव पर्यन्तो धारा यस्य तद्दिव्यास्त्रगुणपर्यन्तं। निघ्नन्तं निघ्नत्। लिङ्गव्यत्यय आर्षः। किंच कालचक्रं ज्योतिश्चक्रमिव स्थितं। विष्णुपुराणे 'यत्र कालचक्रं प्रतिष्ठितं' इति प्रयोगात्। रामचक्रं उक्तरीत्या चक्रमिव स्थितं रामं ददृशुः। ननु यदि रामो मोहनास्त्रेण राक्षसान्संहरेत्तदेन्द्रजितोस्य को विशेषः। उच्यते। नात्र गान्धर्वास्त्रेण मोहनं कृतं। अपितु गान्धर्वप्रयोगे सति वेगातिशयेनाज्ञातस्वपरविभेदतया मोहिताः परस्परं जघ्नुः। यत्र रामो दृष्टः तत्क्षणे तत्र तस्यादर्शनाद्राममुद्दिश्य क्षिप्ताः शराः स्वकीयानेव घ्नन्ति। वेगातिशयादेव नानादिक्षु चक्षुःप्रसरे नानात्वेन दर्शनं। अतएव 'न रामं शीघ्रकारिण'मित्युक्तिः। कार्मुककोटेरलातचक्रप्रतिमत्वं रामस्य चक्रत्वरूपणं च प्रयोगशैघ्र्यादेव संगच्छते। अतएव सुग्रीवादयो मायाबलत्वं शङ्केरन्निति परिहरिष्यति—एतदस्त्रबलमिति। न ते ददृशिर इत्यस्य श्लोकस्यैवं योजना। गान्धर्वास्त्रेण दहन्तं रामं मोहिताः सन्तो न ददृशिरे। मोहोत्र वेगादग्रहणं। गान्धर्वास्त्रं दाहमात्रे हेतुरिति बोध्यं ॥२९–३०॥ अनीकमित्यादि॥ "एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका। पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरं॥ सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः" इत्युक्तरीत्या दशसंख्यासंख्याता पत्तिः। पत्तितस्त्रिगुणं सेनामुखं। सेनामुखतस्त्रिगुणो गुल्मः। गुल्मतस्त्रिगुणो गणः। गणतस्त्रिगुणा वाहिनी। तत्त्रिगुणा पृतना। पृतनातस्त्रिगुणा चमूः। एवंच दशोनत्रिंशताधिकसप्तसहस्रसंख्यालक्षणा चमूरनीकशब्देनोच्यते। सहस्राण्येव साहस्राणि दश साहस्राण्यस्मिन्सन्तीति दशसाहस्रं। रथानां दशसहस्राण्यनीकानीत्यर्थः। एकोनत्रिंशल्लक्षाधिकसप्तकोटिसंख्यासंख्याता रथा इत्युक्तं भवति। रथाङ्गं ७ कोटि २९ लक्षं। अष्टादश सहस्राणीत्यनेन अनीकमित्येतद्विभक्तिविपरिणामेनानुषज्यते। अष्टादश सहस्राण्यनीकानीत्यर्थः। विंशतिसहस्राधिकद्वादशलक्षोत्तरत्रयोदशकोटिसंख्यासंख्याता स्तरस्विनः कुञ्जरा इत्यर्थः। गजाङ्गं १३ कोटि १२ लक्ष २०००० सहस्रं। चतुर्दश सहस्राणीत्यत्रापि अनीकमित्येतद्विपरिणाम्यानुषञ्जनीयम्। चतुर्दश सहस्राण्यनीकानीत्यर्थः। षष्टिसहस्राधिकविंशतिलक्षोत्तरदशकोटिसंख्यासंख्याताः सारोहा वाजिन इत्यर्थः। तुरङ्ग १० कोटि २० लक्ष सहस्रं ६०००। पूर्णे शतसहस्रे द्वे अनीकानीत्यर्थः। अशीतिलक्षोत्तरपञ्चचत्वारिंशत्कोट्यधिकशतकोटिसंख्यासंख्याताः पदातयो राक्षसा इत्यर्थः। पदाति १४५ कोटि ८० लक्षम्। वातरंहसामित्यादिविशेषण-

स० तत्सैन्यसंख्यामाह—**अनीकमिति**। अत्र एकोगजोरथश्चैकइत्याद्यारभ्यानीकगणनायांयावतीसंख्याभवति तावत्संख्याकानांरथानांपुनश्चदशसहस्रं। अनीकमित्येतद्विपरिणतंसत्सर्वत्रान्वेति। एवंचास्यसर्वस्यापिसैन्यस्यसंख्यानिर्णयस्तु "त्रिंशत्सहस्राणिमहौघकानामक्षौहिणीनामथषट्सहस्रं" इत्याचार्योक्तरीत्यानुसंधेयः॥ ३१॥

चतुर्दश सहस्राणि सारोहाणां च वाजिनाम् ॥ पूर्णे शतसहस्रे द्वे राक्षसानां पदातिनाम् ॥ ३२ ॥
दिवसस्याष्टमे भागे शरैरग्निशिखोपमैः ॥ हतान्येकेन रामेण रक्षसां कामरूपिणाम् ॥ ३३ ॥
ते हताश्वा हतरथाः शान्ता विमथितध्वजाः ॥ अभिपेतुः पुरीं लङ्कां हतशेषा निशाचराः ॥३४॥
हतैर्गजपदात्यश्वैस्तद्बभूव रणाजिरम् ॥ आक्रीडमिव रुद्रस्य क्रुद्धस्य सुमहात्मनः ॥ ३५ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ साधु साध्विति रामस्य तत्कर्म समपूजयन् ॥ ३६ ॥
अब्रवीच्च तदा रामः सुग्रीवं प्रत्यनन्तरम् ॥ विभीषणं च धर्मात्मा हनूमन्तं च वानरम् ॥ ३७ ॥
जाम्बवन्तं हरिश्रेष्ठं मैन्दं द्विविदमेव च ॥ एतदस्त्रबलं दिव्यं मम वा त्र्यम्बकस्य वा ॥ ३८ ॥
निहत्य तां राक्षसवाहिनीं तु रामस्तदा शक्रसमो महात्मा ॥
अस्त्रेषु शस्त्रेषु जितक्लमश्च संस्तूयते देवगणैः प्रहृष्टैः ॥ ३९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्नवतितमः सर्गः ॥ ९४ ॥

पञ्चनवतितमः सर्गः ॥ ९५ ॥

तत्रतत्रराक्षसीभिस्सङ्गीभूय बन्धुनिधनशोकेन रावणगर्हणपूर्वकंविलापः ॥ १ ॥

तानि तानि सहस्राणि सारोहाणां च वाजिनाम् ॥ रथानां त्वग्निवर्णानां सध्वजानां सहस्रशः ॥ १ ॥
राक्षसानां सहस्राणि गदापरिघयोधिनाम् ॥ काञ्चनध्वजचित्राणां शूराणां कामरूपिणाम् ॥ २ ॥
निहतानि शरैस्तीक्ष्णैस्तप्तकाञ्चनभूषणैः ॥ रावणेन प्रयुक्तानि रामेणाक्लिष्टकर्मणा ॥ ३ ॥

महिम्ना तद्भिन्ना रथगजतुरगपदातयोसंख्येया इति भावः । अत एवैवमनुसंदधते—"नागानामयुतं तुरङ्गनियुतं सार्धं रथानां शतं पादातं शतकोटि कर्तनविधावेकः कबन्धो रणे । एवं कोटिकबन्धकर्तनविधौ किंचिद्भनिः किंकिणी यामार्धं परमात्मनो रघुपतेः कोदण्डघण्टारवः" इति ॥ कामरूपिणां रक्षसां संबन्धीनि । रथादिचतुरङ्गबलानि एकेन रामेण दिवसस्याष्टमेभागे पादोनघटिकाचतुष्टये निहतानीत्यन्वयः ॥ ३१—३४ ॥ हतैरिति । हतगजाद्युपलक्षितं सुमहात्मनो रामस्य तद्रणाजिरं रुद्रस्य आक्रीडं क्रीडास्थानं श्मशानमिव बभूव । आर्षं नपुंसकत्वं । "अचिरेण पुरी लङ्का श्मशानसदृशी भवेत्" इति पूर्वोक्तेः ॥ ३५—३६ ॥ अब्रवीच्चेत्यादिश्लोकद्वयमेकान्वयं ॥ प्रत्यनन्तरं समीपस्थं । क्षणेनानेन रक्षःप्रतिक्षेपजनितां मायावित्वशङ्कां वारयति—एतदस्त्रबलमिति । अत्रान्ते इतिकरणं द्रष्टव्यं । अस्त्रबलं अस्त्रप्रयोगशक्तिः । न त्वस्त्रमपि, 'गान्धर्वेण च गान्धर्वं' इति रावणादेरपि तत्संभवकथनात् । त्र्यम्बकस्य वा संहारकाले अस्तीति शेषः ॥ ३७—३८ ॥ संस्तूयत इति वर्तमाननिर्देशेन स्तुतेरद्याप्यविच्छिन्नत्वमुच्यते ॥ ३९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्नवतितमः सर्गः ॥ ९४ ॥

अथ राक्षसीनां प्रलापः—तानितानीत्यादिचतुःश्लोकी ॥ वाजिनामित्येतद्रजानामप्युपलक्षणं । सह-

---

ति० दिवसस्याष्टभागेन चतुर्दशीसंबन्ध्यन्त्यमुहूर्तद्वयेन ॥ ३३ ॥ ति० ममवार्त्र्यंबकस्यवा । अनेनास्त्रस्यविष्णुत्वंसूचितं ॥ ३८ ॥ इतिचतुर्नवतितमःसर्गः ॥ ९४ ॥

[पा०] १ क. ग. ङ.—ट. दिवसस्याष्टभागेन. २ ग. घ. आक्रीडभूमीरुद्रस्यक्रुद्धस्येवमहात्मनः. क. ख. ङ. च. छ. झ. ञ. ट. आक्रीडभूमिःक्रुद्धस्यरुद्रस्येवमहात्मनः. ज. आक्रीडभूमीरुद्रस्यक्रुद्धस्येवपिनाकिनः. ३ ग. घ. ङ. झ. ञ. ट. बलंभीमं. क. ख. बलंसर्वं. ४ ख. ङ. च. छ. झ. ञ. राक्षसराजवाहिनींरामः. घ. राक्षससंघवाहिनीं. ५ क. ग. ङ. प्रहृष्टः. ६ क. ख. ङ. च. छ. झ. ञ. ट. तानिनागसहस्राणि. ७ घ. परिघशोभिनां.

दृष्ट्वा श्रुत्वा च संभ्रान्ता हतशेषा निशाचराः ॥ राक्षसीश्च समागम्य दीनाश्चिन्तापरिप्लुताः ॥ ४ ॥
विधवा हतपुत्राश्च क्रोशन्त्यो हतबान्धवाः ॥ राक्षस्यः सह संगम्य दुःखार्ताः पर्यदेवयन् ॥ ५ ॥
कथं शूर्पणखा वृद्धा कराला निर्णतोदरी ॥ आससाद वने रामं कन्दर्पमिव रूपिणम् ॥
सुकुमारं महासत्त्वं सर्वभूतहिते रतम् ॥ ६ ॥
तं दृष्ट्वा लोकनिन्द्या सा हीनरूपा प्रकामिता ॥ कथं सर्वगुणैर्हीना गुणवन्तं महौजसम् ॥
सुमुखं दुर्मुखी रामं कामयामास राक्षसी ॥ ७ ॥
जनस्थास्थाल्पभाग्यत्वाद्वलिनी श्वेतमूर्धजा ॥ अकार्यमप्रहास्यं च सर्वलोकविगर्हितम् ॥ ८ ॥
राक्षसानां विनाशाय दूषणस्य खरस्य च ॥ चकाराप्रतिरूपा सा राघवस्य प्रधर्षणम् ॥
तन्निमित्तमिदं वैरं रावणेन कृतं महत् ॥ ९ ॥
वधाय सीता सानीता दशग्रीवेण रक्षसा ॥ न च सीतां दशग्रीवः प्राप्नोति जनकात्मजाम् ॥
बद्धं बलवता वैरमक्षयं राघवेण च ॥ १० ॥
वैदेहीं प्रार्थयानं तं विराधं प्रेक्ष्य राक्षसम् ॥ हतमेकेन रामेण पर्याप्तं तन्निदर्शनम् ॥ ११ ॥
चतुर्दशसहस्राणि रक्षसां भीमकर्मणाम् ॥ निहतानि जनस्थाने शरैरग्निशिखोपमैः ॥ १२ ॥
खरश्च निहतः सङ्ख्ये दूषणस्त्रिशिरास्तथा ॥ शरैरादित्यसंकाशैः पर्याप्तं तन्निदर्शनम् ॥ १३ ॥
हतो योजनबाहुश्च कबन्धो रुधिराशनः ॥ क्रोधान्नादं नदन्सोथ पर्याप्तं तन्निदर्शनम् ॥ १४ ॥
जघान बलिनं रामः सहस्रनयनात्मजम् ॥ वालिनं मेरुसंकाशं पर्याप्तं तन्निदर्शनम् ॥ १५ ॥
ऋश्यमूके वसञ्शैले दीनो भग्नमनोरथः ॥ सुग्रीवः स्थापितो राज्ये पर्याप्तं तन्निदर्शनम् ॥ १६ ॥
[एको वायुसुतः प्राप्य लङ्कां हत्वा च राक्षसान् ॥ दग्ध्वा तां च पुनर्यातः पर्याप्तं तन्निदर्शनम् ॥१७॥
निगृह्य सागरं तस्मिन्सेतुं बद्ध्वा प्लवङ्गमैः ॥ वृतोऽतरत्तं यद्रामः पर्याप्तं तन्निदर्शनम् ॥ १८ ॥]
धर्मार्थसहितं वाक्यं सर्वेषां रक्षसां हितम् ॥ युक्तं विभीषणेनोक्तं मोहात्तस्य न रोचते ॥ १९ ॥
विभीषणवचः कुर्याद्यदि स धनदानुजः ॥ श्मशानभूता दुःखार्ता नेयं लङ्का पुरी भवेत् ॥ २० ॥

स्रशः सहस्राणि । राक्षसीः राक्षसस्त्रियः । समागम्य चिन्तापरिप्लुताः । आसन्निति शेषः ॥ १—४ ॥ संगम्य संघीभूय । परस्परमालिङ्गिता इत्यर्थः ॥ ५ ॥ कथमित्यादिसार्धश्लोकमेकं वाक्यं ॥ कराला विकटा ॥ ६ ॥ तं दृष्ट्वेत्यादिसार्धश्लोकमेकं वाक्यं ॥ प्रकामिता सा कथं कामयामास ॥ ७ ॥ जनस्थेत्यादिसार्धश्लोकद्वयमेकं वाक्यं ॥ वलयोस्याः सन्तीति वलिनी । पामादित्वान्नः । आर्षो ङीप् । अप्रतिरूपा अननुरूपा । तन्निमित्तं प्रधर्षणनिमित्तात् । शूर्पणखयाऽन्यथोक्तावपि तत्कामनादिकमकम्पनादिमुखात्सर्वैर्ज्ञातमिति ज्ञेयं ॥ ८—१० ॥ विराधं प्रेक्ष्य ज्ञात्वा स्थितानामस्माकं तत् विराधहननं । विरोधिनिरसनाय पर्याप्तं पूर्णं निदर्शनं ॥ ११ ॥ चतुर्दशेतिश्लोके पर्याप्तं तन्निदर्शनमित्यनुषज्यते ॥ उत्तरश्लोकेनैकवाक्यत्वे शरपदद्वयवैयर्थ्यं ॥ १२—१३ ॥ अथ खरवधानन्तरं । नादं शब्दं । नदन् कुर्वन् । सः

ति० वलिनी जरावशाज्जातवलिः । व्रीह्यादित्वादिनिः ॥ ८ ॥ शि० अक्षयंवैरंबलवतारावणेन । बद्धंरावणेनेतिशेषः । एतेनरावणस्यापिविघातोऽवश्यंभविष्यतीतिसूचितं ॥ १० ॥

[पा०] १ क. ग.—ट. राक्षस्यश्च. २ ख. ङ. च. छ. झ. ट. कंदर्पसमरूपिणं. ३ ग. ङ.—ट. लोकवध्या. ४ क.—ङ. छ. झ. ट. मेघसंकाशं. ५ ङ. झ. वसंश्चैवदीनो. ६ ङ. झ. ट. प्रापितो. ७ एतच्छ्लोकद्वयं क. पाठेदृश्यते. ८ घ. इत्थं. ९ ङ. झ. भविष्यति.

कुम्भकर्णं हतं श्रुत्वा राघवेण महाबलम् ॥ अतिकायं च दुर्धर्षं लक्ष्मणेन हतं पुनः ॥
प्रियं चेन्द्रजितं पुत्रं रावणो नावबुध्यते ॥ २१ ॥
[पुरा हनुमता लङ्कां दग्धां लाङ्गूलवह्निना ॥ हतमक्षकुमारं च दृष्ट्वाऽसौ नावबुध्यते ॥ २२ ॥]
मम पुत्रो मम भ्राता मम भर्ता रणे हतः ॥ इत्येवं श्रूयते शब्दो राक्षसानां कुले कुले ॥ २३ ॥
रथाश्चाश्वाश्च नागाश्च हताः शतसहस्रशः ॥ रणे रामेण शूरेण राक्षसाश्च पदातयः ॥ २४ ॥
रुद्रो वा यदि वा विष्णुर्महेन्द्रो वा शतक्रतुः ॥ हन्ति नो रामरूपेण यदि वा स्वयमन्तकः ॥२५॥
हतप्रवीरा रामेण निराशा जीविते वयम् ॥ अपश्यन्तो भयस्यान्तमनाथा विलपामहे ॥ २६ ॥
रामहस्तादृशग्रीवः शूरो दत्तमहावरः ॥ इदं भयं महाघोरमुत्पन्नं नावबुध्यते ॥ २७ ॥
न देवा न च गन्धर्वा न पिशाचा न राक्षसाः ॥ उपसृष्टं परित्रातुं शक्ता रामेण संयुगे ॥ २८ ॥
उत्पाताश्चापि दृश्यन्ते रावणस्य रणे रणे ॥ कथयिष्यन्ति रामेण रावणस्य निबर्हणम् ॥ २९ ॥
पितामहेन प्रीतेन देवदानवराक्षसैः ॥ रावणस्याभयं दत्तं मानुषेभ्यो न याचितम् ॥ ३० ॥
तदिदं मानुषं मन्ये प्राप्तं निस्संशयं भयम् ॥ जीवितान्तकरं घोरं रक्षसां रावणस्य च ॥ ३१ ॥
पीड्यमानास्तु बलिना वरदानेन रक्षसा ॥ दीप्तैस्तपोभिर्विबुधाः पितामहमपूजयन् ॥ ३२ ॥
देवतानां हितार्थाय महात्मा वै पितामहः ॥ उवाच देवताः सर्वा इदं तुष्टो महद्वचः ॥ ३३ ॥
अद्यप्रभृति लोकांस्त्रीन्सर्वे दानवराक्षसाः ॥ भयेन प्रावृता नित्यं विचरिष्यन्ति शाश्वतम् ॥ ३४ ॥
दैवतैस्तु समागम्य सर्वैश्चेन्द्रपुरोगमैः ॥ वृषध्वजस्त्रिपुरहा महादेवः प्रसादितः ॥ ३५ ॥
प्रसन्नस्तु महादेवो देवानेतद्वचोऽब्रवीत् ॥ उत्पत्स्यति हितार्थं वो नारी रक्षःक्षयावहा ॥ ३६ ॥
एषा देवैः प्रयुक्ता तु क्षुद्यथा दानवान्पुरा ॥ भक्षयिष्यति नः सीता राक्षसघ्नी सरावणान् ॥३७॥
रावणस्यापनीतेन दुर्विनीतस्य दुर्मतेः ॥ अयं निष्ठानको घोरः शोकेन समभिप्लुतः ॥ ३८ ॥
तं न पश्यामहे लोके यो नः शरणदो भवेत् ॥ राघवेणोपसृष्टानां कालेनेव युगक्षये ॥ ३९ ॥
नास्ति नः शरणं कश्चिद्भये महति तिष्ठताम् ॥ दवाग्निवेष्टितानां हि करेणूनां यथा वने ॥ ४० ॥

प्रसिद्धः कबन्धः ॥ १४—२० ॥ नावबुध्यते राम-प्रभावमिति शेषः ॥ २१—२२ ॥ कुले कुले गृहे गृहे । इदमपि राक्षसीवाक्यमेव ॥ २३-२५ ॥ वय-मित्येतदपेक्षया अपश्यन्त इति पुँलिङ्गं । विलपामहे इत्यात्मनेपदमार्षं ॥ २६—२७ ॥ उपसृष्टं उपद्रुतं ॥ २८ ॥ कथयिष्यन्ति इतः परमपि कानिचिन्नि-मित्तानि प्रादुर्भूय कथयिष्यन्तीत्यर्थः । वर्तमाने तात्पर्यमित्यप्याहुः ॥ २९ ॥ देवदानवराक्षसैः देव-दानवराक्षसेभ्यः ॥ ३० ॥ मानुषं मानुषादागतं । मन्ये मन्यामहे ॥ ३१ ॥ रक्षसा रावणेन । वरदा-नेन करणेन ॥ ३२—३३ ॥ दानवराक्षसा इत्युक्ते-र्मन्दोदरीसंबन्धेन दानवाश्च केचिद्राक्षसैः सह तिष्ठन्तीति ज्ञेयम् ॥ ३४—३६ ॥ क्षुद्यथा दानवा-न्पुरेति । देवेभ्योऽमृतप्रदानानन्तरमिति बोध्यं । अस्मच्छब्दापेक्षया सरावणानित्युक्तिः ॥ ३७ ॥ निष्ठानकः नाश इत्याहुः ॥ ३८ ॥ पश्यामह इत्या-

ति० दानवाराक्षसाश्चभयेनप्रभृताः देवेभ्योभयंबिभ्राणाएवविचरिष्यन्ति । देवाःस्वतःपरतोवाअस्मान्पीडयिष्यन्तीतिभययुक्ता एवभविष्यन्तीत्यर्थः ॥ ३४ ॥ **ति०** एवंब्रह्मणःप्रसादात्सभयत्वमात्रंप्राप्तं । संहाराधिकृतरुद्रप्रसादेनतुनाशएवास्माकमित्याहुः—दैवतैरिति ॥ ३५ ॥ **रामानु०** अपनीतेन अपनयेन । निष्ठानको विनाशः ॥ ३८ ॥

[**पा०**] १ ज. निपातितं. २ घ. नानुमन्यते. ३ अर्धश्लोकः च. छ. पाठयोर्दृश्यते. ४ क. ख. ग. ङ.—ट. इत्येष. ५ ख. ङ. च. ज. ट. राक्षसीनां. ६ ङ. झ. हताश्चापिपदातयः. ७ क. रावणस्यनिवेशने. ८ झ. ञ. ट. भयेनप्रभृताः. ख. तेभयैःप्रावृताः. ९ ङ. झ. प्रतोषितः. १० ङ. झ. नस्सर्वांत्राक्षसघ्नी. ११ ङ. झ. किंचिद्भयं.

प्राप्तकालं कृतं तेन पौलस्त्येन महात्मना ॥ यत एव भयं दृष्टं तमेव शरणं गतः ॥ ४१ ॥
इतीव सर्वा रजनीचरस्त्रियः परस्परं संपरिरभ्य बाहुभिः ॥
[1]विषेदुरार्ता भयभारपीडिता विनेदुरुच्चैश्च तदा सुदारुणम् ॥ ४२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चनवतितमः सर्गः ॥ ९५ ॥

षण्णवतितमः सर्गः ॥ ९६ ॥

राक्षसीगणविलापश्रवणरुष्टेनरावणेन राक्षसान्प्रतिसंनाहनचोदनपूर्वकं स्वप्रतापप्रशंसनेन रामादिवधप्रतिज्ञानम् ॥ १ ॥ तथा महापार्श्वादिभिःसह रथाधिरोहणेनरणधरणिंगतेनतेन बाणगणैर्वानरगणविदारणम् ॥ २ ॥

आर्तानां राक्षसीनां तु लङ्कायां वै कुले कुले ॥ रावणः करुणं शब्दं शुश्राव परिदेवितम् ॥ १ ॥
स तु दीर्घं [2]विनिश्वस्य मुहूर्तं ध्यानमास्थितः ॥ बभूव परमक्रुद्धो रावणो भीमदर्शनः ॥ २ ॥
संदश्य दशनैरोष्ठं क्रोधसंरक्तलोचनः ॥ राक्षसैरपि दुर्दर्शः [3]कालाग्निरिव मूर्च्छितः ॥ ३ ॥
उवाच च समीपस्थान्राक्षसान्राक्षसेश्वरः ॥ भयाँव्यक्तकथस्तत्र निर्दहन्निव चक्षुषा ॥ ४ ॥
महोदरमहापार्श्वौ विरूपाक्षं च राक्षसम् ॥ शीघ्रं वदत सैन्यानि निर्यातेति ममाज्ञया ॥ ५ ॥
तस्य तद्वचनं श्रुत्वा राक्षसास्ते भयार्दिताः ॥ चोदयामासुरव्यग्रान्राक्षसांस्तान्नृपाज्ञया ॥ ६ ॥
ते तु सर्वे तथेत्युक्त्वा राक्षसा घोरदर्शनाः ॥ कृतस्वस्त्ययनाः सर्वे रणायाभिमुखा ययुः ॥ ७ ॥
प्रतिपूज्य यथान्यायं रावणं ते निशाचराः ॥ तस्थुः प्राञ्जलयः सर्वे भर्तुर्विजयकाङ्क्षिणः ॥ ८ ॥
अथोवाच प्रहस्यैतान्रावणः क्रोधमूर्च्छितः ॥ महोदरमहापार्श्वौ विरूपाक्षं च राक्षसम् ॥ ९ ॥

लनेपदमार्षं ॥ ३९—४० ॥ प्राप्तकालं उचितं । पौलस्त्येनविभीषणेन । इतः परं तस्यैव पौलस्त्यकुलप्रतिष्ठापकत्वात्तच्छब्दप्रयोगः । अत्र पितामहादिवरप्रदानवृत्तान्तो राक्षसीभिर्मन्दोदरीसकाशाच्छ्रुत इति ज्ञेयं । सा च ज्ञानवृद्धेति वक्ष्यते ॥४१—४२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चनवतितमःसर्गः९५

अथ रावणनिर्याणं—आर्तानामित्यादि ॥ परिदेवितं परिदेवितरूपं शब्दं ॥ १—२ ॥ संदश्येत्यादिश्लोकत्रयमेकान्वयं ॥ मूर्च्छितः अभिवृद्धः, कालाग्निरिव स्थितः । भयाव्यक्तकथः भयादव्यक्तवचनः । ममाज्ञया वदतेत्युवाचेत्यन्वयः । इमौ महोदरमहापार्श्वौ सचिवौ । पूर्वहतौ तु मत्तप्रमत्तापरपर्यायौ रावणभ्रातरौ ॥ ३—८ ॥ प्रहस्येति । शत्रुषु तृणी-

ति० प्राप्तकालं कालोचितं । यतएव यस्माद्रामादेव । भयंदृष्टंस्वमन्त्रशक्तिवैभवेनेतिशेषः ॥४१॥ इतिपञ्चनवतितमःसर्गः ॥९५॥

स० करुणं करुणयतीति करुणस्तं । परिदेवितं प्रलापात्मकं ॥ रामानु० भयाव्यक्तकथः स्वानिष्टभयेनास्पष्टराक्षसकथ इत्यर्थः । भयाव्यक्तकथानितिचपाठः । स० भयाव्यक्तकथः भयेनरामभीत्या अव्यक्तामन्दा कथा कथनंयस्यसः । भयाव्यक्तकथ इतिपाठे व्यक्ता अबहिःप्रकाश्यार्थस्यापिप्रकाशिकाकथायस्य । आच्छाद्यानाच्छादनहेतुर्भीतिरितिभावः ॥ ४ ॥ शि० ममाज्ञयासैन्यानि यूयंनिर्यात निर्यापयत निस्सारयत इतिमहोदरादीन् शीघ्रंवदत । यदितुसैन्यशब्देन रिपुसेनागृह्येत तदानान्तर्भावितणिच्कल्पना ॥ ५ ॥ स० भयार्दिताः गमनेरामतोभीतिः भीतिश्चागमनेरावणादितिभयार्दिताः । अव्यग्रान् सहगामिभामिनीवन्निर्णीतमरणत्वेनाव्यक्तान् । यत्तुनागोजिभट्टेनरावणप्रोत्साहनेनत्यक्तभयानितिव्याख्यातं तत्तु सुपार्श्वादीनांनेतॄणांयदाभयार्दितत्वोक्तापूर्वं तन्नियम्यानांराक्षसानांरावणप्रोत्साहनेनाव्यग्रत्वोक्त्यसंभवादुपेक्ष्यं ॥ ६ ॥ स० सर्वे हिंसकेरामे तद्विषयेरणाभिमुखाः सर्वे कृतस्वस्त्ययनाययुः ॥ ७ ॥ ति० क्रोधजोत्रप्रहासः । स० प्रहस्य रोदनापरपर्यायोऽयंहासः ॥ ९ ॥

[पा०] १ क. च. छ. ञ. विलेपुरार्ताः. ङ. झ. ट. विषेदुरार्तातिभयाभिपीडिताः. २ समुच्छ्वस्य. ३ ङ. झ. कालाग्निरिवमूर्तिमान्. ४ ङ. झ. ट. क्रोधाव्यक्तकथः, ख. भियाऽव्यक्तकथः. ५ क. ङ.—ट. महोदरंमहापार्श्वं. ६ क.—ट. महारथाः.

अद्य बाणैर्धनुर्मुक्तैर्युगान्तादित्यसन्निभैः ॥ राघवं लक्ष्मणं चैव नेष्यामि यमसादनम् ॥ १० ॥
खरस्य कुम्भकर्णस्य प्रहस्तेन्द्रजितोस्तथा ॥ करिष्यामि प्रतीकारमद्य शत्रुवधादहम् ॥ ११ ॥
नैवान्तरिक्षं न दिशो न नद्यो नापि सागराः ॥ प्रकाशत्वं गमिष्यन्ति मद्बाणजलदावृताः ॥ १२ ॥
अद्य वानरमुख्यानां तानि यूथानि भागशः ॥ धनुषा शरजालेन विधमिष्यामि पत्त्रिणा ॥ १३ ॥
अद्य वानरसैन्यानि रथेन पवनौजसा ॥ धनुःसमुद्रादुद्भूतैर्मथिष्यामि शरोर्मिभिः ॥ १४ ॥
आकोशपद्मवक्त्राणि पद्मकेसरवर्चसाम् ॥ अद्य यूथतटाकानि गजवत्प्रमथाम्यहम् ॥ १५ ॥
सशरैरद्य वदनैः सङ्ख्ये वानरयूथपाः ॥ मण्डयिष्यन्ति वसुधां सनालैरिव पङ्कजैः ॥ १६ ॥
अद्य युद्धप्रचण्डानां हरीणां द्रुमयोधिनाम् ॥ मुक्तैनैकेषुणा युद्धे भेत्स्यामि च शतं शतम् ॥ १७ ॥
हतो भर्ता हतो भ्राता यासां च तनया हताः ॥ वधेनाद्य रिपोस्तासां करोम्यस्रप्रमार्जनम् ॥ १८ ॥
अद्य मद्बाणनिर्भिन्नैः प्रकीर्णैर्गतचेतनैः ॥ करोमि वानरैर्युद्धे यत्रावेक्ष्यतलां महीम् ॥ १९ ॥
अद्य गोमायवो गृध्रा ये च मांसाशिनोऽपरे ॥ सर्वांस्तांस्तर्पयिष्यामि शत्रुमांसैः शरार्पितैः ॥२० ॥
कल्प्यतां मे रथः शीघ्रं क्षिप्रमानीयतां धनुः ॥ अनुप्रयान्तु मां सर्वे येऽवशिष्टा निशाचराः ॥ २१॥
तस्य तद्वचनं श्रुत्वा महापार्श्वोब्रवीद्वचः ॥ बलाध्यक्षान्स्थितांस्तत्र बलं संत्वर्यतामिति ॥ २२ ॥
[बलाध्यक्षस्य तच्छ्रुत्वा महापार्श्वस्य भाषितम् ॥] बलाध्यक्षास्तु संरब्धा राक्षसांस्तान्गृहाद्गृहात् ॥
चोदयन्तः परिययुर्लङ्कायां तु महाबलाः ॥ २३ ॥
ततो मुहूर्तान्निष्पेतू राक्षसा भीमदर्शनाः ॥ नर्दन्तो भीमवदना नानाप्रहरणैर्भुजैः ॥ २४ ॥
असिभिः पट्टिशैः शूलैर्गदाभिर्मुसलैर्हुलैः ॥ शक्तिभिस्तीक्ष्णधाराभिर्महद्भिः कूटमुद्गरैः ॥ २५ ॥
यष्टिभिर्विमलैश्चक्रैर्निशितैश्च परश्वधैः ॥ भिण्डिपालैः शतघ्नीभिरन्यैश्चापि वरायुधैः ॥ २६ ॥
अथानयद्बलाध्यक्षः सत्वरो रावणाज्ञया ॥ [रथानां नियुतं साग्रं नागानां नियुतत्रयम् ॥ २७ ॥

कारात् ॥ ९—१० ॥ खरस्येत्यादिषु वधस्येति शेषः ॥ ११—१४ ॥ आकोशपद्मवक्त्राणि ईषद्विकसितपद्मभूतवक्त्राणि । पद्मकेसरवर्चसां वानराणामिति शेषः । प्रमथामि प्रमथ्नामि । आभाव आर्षः ॥ १५—१८ ॥ गतचेतनैः गतप्राणैः । यत्रावेक्ष्यतलामिति । नैरन्तर्येण भूमौ वानरान्पातयिष्यामीत्यर्थः ॥ १९—२० ॥ कल्प्यतां आकल्प्यतां । अलंक्रियतामित्यर्थः ॥ २१—२२ ॥ संरब्धा इति । पुनःपुनराह्वानेप्यनागमनात्कुपिताइत्यर्थः । परिययुः प्रतिरभ्यं ययुरित्यर्थः ॥ २३ ॥ तत इत्यादिश्लोकत्रयमेकान्वयं ॥ हुलैः द्विफलपत्राग्रायुधविशेषैः । "हुलं द्विफलपत्राग्रं"इति वैजयन्ती । भुजैरित्याद्युपलक्षणे तृतीया ॥ २४—२६ ॥ 'अथानयद्बलाध्यक्षः सर्वतो रावणाज्ञया । द्रुतं सूतसमायुक्तं युक्ताष्टतुरगं

स० यंरामं असादनंअसंहार्यमन्यध्वे तंराघवंलक्ष्मणंच । यमसादनं यमलोकं । "वस्तुतस्तु रामलक्ष्मणंचविनाऽन्यानितिशेषः" इतितीर्थस्य एकस्यापिकपेरनाशादत्रेवपूर्वत्रोत्तरत्रचवास्तविकीवस्तुतस्तुभ्रान्तिरितिनमनस्तदवलोकनायासेनखेदनीयंविदा । यथा वानराणांनैरोग्यस्यभाविलेपितद्धननोक्तिस्तथारामपक्षेपिसंभवात्तस्याः ॥ १० ॥

[पा० १ ख. धनुस्समुद्रनिर्मुक्तैः. २ क. ख. ग. ङ. ज.—ठ. व्याकोश. ३ घ. यूथप्रचण्डानां. ४ ङ. ञ. ट. हतोभ्राता चयेषांवैयेषांचतनयोहतः. ५ ङ. ञ. ट. स्तेषांकरोम्यश्रु. ६ ङ. ञ. ट. अद्यकाकाश्चगृध्राश्च. ७ ञ. शराहतैः. ग. घ. ज. शरार्दितैः क. सुशोणितैः. ८ ख. अद्यप्रयान्तु. ९ क. घ. ङ. ञ. मांयुद्धे. १० ङ. ञ. ट. येत्रशिष्टाः. ११ इदमर्धं क. च. छ. पाठेषुदृश्यते. १२ ङ. च. ज.—ट. संयुक्ताराक्षसांस्तान्गृहेगृहे. १३ क. घ. ङ. ज.—ट. लङ्कांलघुपराक्रमाः. १४ ङ. ञ. ट. मुसलैर्हलैः. ग. घ. मुसलैश्शरैः. १५ क. ग.—ट. अथानयन्बलाध्यक्षाश्चत्वारो. १६ रथानांनियुतमित्यादयः ज्वलन्तमिवपावकमित्यन्ताःश्लोकाः ग. ङ. च. छ. ञ. पाठेषुदृश्यन्ते.

अश्वानां षष्टिकोट्यस्तु खरोष्ट्राणां तथैव च ॥ पदातयस्त्वसंख्याता जग्मुस्ते राजशासनात् ॥
बलाध्यक्षाश्च संस्थाप्य राज्ञः सेनां पुरस्थिताम् ॥ २८ ॥
एतस्मिन्नन्तरे सूतः स्थापयामास तं रथम् ॥ दिव्यास्त्रवरसंपन्नं नानालङ्कारभूषितम् ॥ २९ ॥
नानायुधसमाकीर्णं किङ्किणीजालसंयुतम् ॥ नानारत्नपरिक्षिप्तं रत्नस्तंभैर्विराजितम् ॥ ३० ॥
जांबूनदमयैश्चैव सहस्रकलशैर्वृतम् ॥ तं दृष्ट्वा राक्षसास्सर्वे विस्मयं परमं गताः ॥ ३१ ॥
तं दृष्ट्वा सहसोत्थाय रावणो राक्षसेश्वरः ॥ कोटिसूर्यप्रतीकाशं ज्वलन्तमिव पावकम् ॥]
द्रुतं सूतसमायुक्तं युक्ताष्टतुरगं रथम् ॥ ३२ ॥
आरुरोह रथं भीमो दीप्यमानं स्वतेजसा ॥ ३३ ॥
ततः प्रयातः सहसा राक्षसैर्बहुभिर्वृतः ॥ रावणः सत्त्वगाम्भीर्याद्दारयन्निव मेदिनीम् ॥ ३४ ॥
[ततश्चासीन्महानादस्तूर्याणां च ततस्ततः ॥ मृदङ्गैः पटहैः शङ्खैः कलहैः सह रक्षसाम् ॥ ३५ ॥
आगतो रक्षसां राजा छत्रचामरसंयुतः ॥ सीतापहारी दुर्वृत्तो ब्रह्मघ्नो देवकण्टकः ॥
योद्धुं रघुवरेणेति शुश्रुवे कलहध्वनिः ॥ ३६ ॥
तेन नादेन महता पृथिवी समकंपत ॥ तं शब्दं सहसा श्रुत्वा वानरा दुद्रुवुर्भयात् ॥ ३७ ॥
रावणस्तु महाबाहुः सचिवैः परिवारितः ॥ आजगाम महातेजा जयाय विजयं प्रति ॥ ३८ ॥]
रावणेनाभ्यनुज्ञातौ महापार्श्वमहोदरौ ॥ विरूपाक्षश्च दुर्धर्षो रथानारुरुहुस्तदा ॥ ३९ ॥
ते तु हृष्टा विनर्दन्तो भिन्दन्त इव मेदिनीम् ॥ नादं घोरं विमुञ्चन्तो निर्ययुर्जयकाङ्क्षिणः ॥४०॥
ततो युद्धाय तेजस्वी रक्षोगणबलैर्वृतः ॥ निर्ययावुद्यतधनुः कालान्तकयमोपमः ॥ ४१ ॥
ततः प्रंजवनाश्वेन रथेन स महारथः ॥ द्वारेण निर्ययौ तेन यत्र तौ रामलक्ष्मणौ ॥ ४२ ॥
ततो नष्टप्रभः सूर्यो दिशश्च तिमिरावृताः ॥ द्विजाश्च नेदुर्घोराश्च संचचालेव मेदिनी ॥ ४३ ॥
ववर्ष रुधिरं देवश्चस्खलुस्तुरगाः पथि ॥ ध्वजाग्रे न्यपतद्गृध्रो विनेदुश्चाशिवं शिवाः ॥ ४४ ॥
नयनं चास्फुरद्वामं सैन्यो बाहुरकम्पत ॥ विवर्णं वदनं चासीत्किंचिदभ्रश्यत स्वरः ॥ ४५ ॥
ततो निष्पततो युद्धे दशग्रीवस्य रक्षसः ॥ रणे निधनशंसीनि रूपाण्येतानि जज्ञिरे ॥ ४६ ॥
अन्तरिक्षात्पपातोल्का निर्घातसमनिस्वना ॥ विनेदुरशिवा गृध्रा वायसैरनुनादिताः ॥ ४७ ॥
एतानचिन्तयन्घोरानुत्पातान्समुपस्थितान् ॥ निर्ययौ रावणो मोहाद्वधार्थी कालचोदितः ॥ ४८ ॥
तेषां तु रथघोषेण राक्षसानां महात्मनाम् ॥ वानराणामपि चमूर्युद्धायैवाभ्यवर्तत ॥ ४९ ॥
तेषां तु तुमुलं युद्धं बभूव कपिरक्षसाम् ॥ अन्योन्यमाह्वयानानां क्रुद्धानां जयमिच्छताम् ॥ ५० ॥

रथमिति पाठः ॥२७–३२॥ आरुरोहेत्यर्धमेकं वाक्यं॥ भीमः रावणः ॥ ३३ ॥ सत्त्वगाम्भीर्यात् बलातिशयात् ॥ ३४—४१ ॥ द्वारेणेति । उत्तरद्वारेणेत्यर्थः ॥ ४२ ॥ ततो नष्टप्रभ इत्यादिश्लोकचतुष्टयमेकान्वयं ॥ ४३–४५ ॥ रूपाणि दुर्निमित्तरूपाणि । ततः अनन्तरं । ततः उत्तरद्वारात् । निष्पततः निष्क्रमतः । सूर्यनष्टप्रभत्वादीनि रूपाणि जज्ञिर इतिसंबन्धः ॥ ४६–४९ ॥ आह्वयानानां आह्वयमानानां स्पर्धया

ति० अमायांसूर्योदयइदंरथारोहणं ॥ ३३ ॥ स० वायसैरभिमिश्रितागृध्राः पूर्वंकेवलानां गृध्राणामत्रतुवायससंमिश्रितानामितिनपुनरुक्तिः ॥ ४७ ॥

[पा०] १ ग. च. छ. झ. ट. दीप्यमानः. २ ततश्चासीदित्यादयःविजयंप्रतीत्यन्ताःश्लोकाः झ. पाठेदृश्यन्ते. ३ ङ. झ. ट. हृष्टाभिनर्दन्तो. ४ क. ङ. झ. ट. प्रजविताश्वेन. ५ ङ. च. झ. ञ. ट. चस्खलुश्चतुरङ्गमाः. ६ ङ. झ. ट. श्चाशिवाः. ७ ग.—छ. झ. ञ. ट. वामोबाहुः. ८ ङ. च. झ. ञ. ट. वायसैरभिमिश्रिताः. ९ ङ. झ. वधार्थं.

ततः क्रुद्धो दशग्रीवः शरैः काञ्चनभूषणैः ॥ वानराणामनीकेषु चकार कदनं महत् ॥ ५१ ॥
निकृत्तशिरसः केचिद्रावणेन वलीमुखाः ॥ केचिद्विच्छिन्नहृदयाः केचिच्छ्रोत्रविवर्जिताः ॥ ५२ ॥
निरुच्छ्वासा हताः केचित्केचित्पार्श्वेषु दारिताः ॥ केचिद्विभिन्नशिरसः केचिच्चक्षुर्विवर्जिताः ॥५३॥
दशाननः क्रोधविवृत्तनेत्रो यतो यतोऽभ्येति रथेन संख्ये ॥
ततस्ततस्तस्य शरप्रवेगं सोढुं न शेकुर्हरिपुङ्गवास्ते ॥ ५४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षण्णवतितमः सर्गः ॥ ९६ ॥

सप्तनवतितमः सर्गः ॥ ९७ ॥

सुग्रीवेण विरूपाक्षवधः ॥ १ ॥

तथा तैः कृत्तगात्रैस्तु दशग्रीवेण मार्गणैः ॥ बभूव वसुधा तत्र प्रकीर्णा हरिभिस्तदा ॥ १ ॥
रावणस्याप्रसह्यं तं शरसंपातमेकतः ॥ न शेकुः सहितुं दीप्तं पतङ्गा ज्वलनं यथा ॥ २ ॥
तेऽर्दिता निशितैर्बाणैः क्रोशन्तो विप्रदुद्रुवुः ॥ पावकार्चिःसमाविष्टा दह्यमाना यथा गजाः ॥३॥
प्लवङ्गानामनीकानि महाभ्राणीव मारुतः ॥ स ययौ समरे तस्मिन्विधमन्रावणः शरैः ॥ ४ ॥
कदनं तरसा कृत्वा राक्षसेन्द्रो वनौकसाम् ॥ आससाद ततो युद्धे राघवं त्वरितस्तदा ॥ ५ ॥
सुग्रीवस्तान्कपीन्दृष्ट्वा भग्नान्विद्रवतो रणे ॥ गुल्मे सुषेणं निक्षिप्य चक्रे युद्धेऽद्भुतं मनः ॥ ६ ॥
आत्मनः सदृशं वीरः स तं निक्षिप्य वानरम् ॥ सुग्रीवोऽभिमुखः शत्रुं प्रतस्थे पादपायुधः ॥ ७ ॥
पार्श्वतः पृष्ठतश्चास्य सर्वे यूथाधिपाः स्वयम् ॥ अनुजह्रुर्महाशैलान्विविधांश्च महाद्रुमान् ॥ ८ ॥
स नर्दन्युधि सुग्रीवः स्वरेण महता महान् ॥ पातयन्विविधांश्चान्यान्नागमोत्तमराक्षसान् ॥ ९ ॥
ममन्थ च महाकायो राक्षसान्वानरेश्वरः ॥ युगान्तसमये वायुः प्रवृद्धानगमानिव ॥ १० ॥
राक्षसानामनीकेषु शैलवर्षं ववर्ष ह ॥ अश्मवर्षं यथा मेघः पक्षिसङ्घेषु कानने ॥ ११ ॥
कपिराजविमुक्तैस्तैः शैलवर्षैस्तु राक्षसाः ॥ विकीर्णशिरसः पेतुर्निकृत्ता इव पर्वताः ॥ १२ ॥
अथ संक्षीयमाणेषु राक्षसेषु समन्ततः ॥ सुग्रीवेण प्रभग्नेषु पतत्सु निनदत्सु च ॥ १३ ॥

आह्वयतां । आगमशासनस्यानित्यत्वान्मुगागमाभावः ॥ ५०—५१ ॥ निकृत्तशिरस इत्यादिश्लोकद्वयं ॥ ५२—५४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षण्णवतितमः सर्गः ॥ ९६ ॥

अथ विरूपाक्षवधः—तथा तैरित्यादि ॥ १ ॥ एकतः एकस्य अद्वितीयस्य ॥ २—५ ॥ अद्भुतमिति क्रियाविशेषणं ॥ ६—७ ॥ महाद्रुमान् उत्पाट्येति शेषः । उत्पाट्य अस्य पार्श्वतः पृष्ठतश्चानुजह्रुरिति संबन्धः । यथा महाराजे युद्धाय गच्छति । तदाऽऽयुधानि भृत्या आहरन्ति ॥ तथा वानरराजे युद्धाय निष्क्रामति तदायुधभूतान् शैलवृक्षादीन् समये दातुं वानरा आजह्रुरिति भावः ॥ ८—९ ॥ अगमान् वृक्षान् । "पलाशी द्रुद्रुमागमाः" इत्यमरः ॥ १०—१२ ॥ संक्षीयमाणेषु हिंस्यमानेषु । " क्षि हिंसायां"

स० तेहरियूथपाः प्राक्तये समरसमर्थत्वेनप्रमितास्ते ॥ ५३ ॥ इतिषण्णवतितमःसर्गः ॥ ९६ ॥

[पा०] १ ङ. च. झ. ञ. ट. चक्षुर्विनाकृताः. २ घ. नशक्तायुधिवानरेन्द्राः. झ.—ठ. नशेकुर्हरियूथपास्ते. ३ क. हरिभिर्हतैः. ४ ज. शरसंघातं. ५ ग. ज. पतङ्गाइवपावकं. ६ ङ. तेहतानिशितैः. ७ ख. ङ. च. छ. झ. ञ. ट. न्विद्राविताव्रणे ८ घ. ङ. छ.—ट. युद्धेद्भुतंमनः. ९ ङ. झ. ट. सर्ववानरयूथपाः. १० ङ. झ. ञ. ट. ननर्दयुधि. ११ च. झ. ञ. ट. पोथयन्नपि. १२ ङ. च. छ. झ. ञ. ट. श्चान्यान्ममन्थोत्तम. १३ ङ. झ. ञ. ट. ममर्दच. १४ ङ. छ. झ. ञ. ट. पेतुर्विकीर्णाइव.

विरूपाक्षः स्वकं नाम धन्वी विश्राव्य राक्षसः ॥ रथादाप्लुत्य दुर्धर्षो गजस्कन्धमुपारुहत् ॥ १४ ॥
स तं द्विरदमारुह्य विरूपाक्षो महारथः ॥ विनदन्भीमनिर्ह्रादं वानरानभ्यधावत ॥ १५ ॥
सुग्रीवे स शरान्घोरान्विससर्ज चमूमुखे ॥ स्थापयामास चोद्विग्नान्राक्षसान्संप्रहर्षयन् ॥ १६ ॥
स तु विद्धः शितैर्बाणैः कपीन्द्रस्तेन रक्षसा ॥ चुक्रोध स महाक्रोधो वधे चास्य मनो दधे ॥ १७ ॥
ततः पादपमुद्धृत्य शूरः संप्रधनो हरिः ॥ अभिपत्य जघानास्य प्रमुखे तु महागजम् ॥ १८ ॥
स तु प्रहाराभिहतः सुग्रीवेण महागजः ॥ अपासर्पद्धनुर्मात्रं निषसाद ननाद च ॥ १९ ॥
गजात्तु मथितात्चूर्णमपक्रम्य स वीर्यवान् ॥ राक्षसोऽभिमुखः शत्रुं प्रत्युद्गम्य ततः कपिम् ॥ २० ॥
आर्षभं चर्म खड्गं च प्रगृह्य लघुविक्रमः ॥ भर्त्सयन्निव सुग्रीवमाससाद व्यवस्थितम् ॥ २१ ॥
स हि तस्याभिसंक्रुद्धः प्रगृह्य विपुलां शिलाम् ॥ विरूपाक्षाय चिक्षेप सुग्रीवो जलदोपमाम् ॥२२॥
स तां शिलामापतन्तीं दृष्ट्वा राक्षसपुङ्गवः ॥ अपक्रम्य सुविक्रान्तः खड्गेन प्राहरत्तदा ॥ २३ ॥
तेन खड्गप्रहारेण रक्षसा बलिना हतः ॥ मुहूर्तमभवद्वीरो विसंज्ञ इव वानरः ॥ २४ ॥
स तदा सहसोत्पत्य राक्षसस्य महाहवे ॥ मुष्टिं संवर्त्य वेगेन पातयामास वक्षसि ॥ २५ ॥
मुष्टिप्रहाराभिहतो विरूपाक्षो निशाचरः ॥ तेन खड्गेन संक्रुद्धः सुग्रीवस्य चमूमुखे ॥
कवचं पातयामास पद्भ्यामभिहतोपतत् ॥ २६ ॥
स समुत्थाय पतितः कपिस्तस्य व्यसर्जयत् ॥ तलप्रहारमशनेः समानं भीमनिस्स्वनम् ॥ २७ ॥
तलप्रहारं तद्रक्षः सुग्रीवेण समुद्यतम् ॥ नैपुण्यान्मोचयित्वैनं मुष्टिनोरस्यताडयत् ॥ २८ ॥
ततस्तु संक्रुद्धतरः सुग्रीवो वानरेश्वरः ॥ मोक्षितं चात्मनो दृष्ट्वा प्रहारं तेन रक्षसा ॥
स ददर्शान्तरं तस्य विरूपाक्षस्य वानरः ॥ २९ ॥
ततो न्यपातयत्क्रोधाच्छङ्खदेशे महत्तलम् ॥ ३० ॥
महेन्द्राशनिकल्पेन तलेनाभिहतः क्षितौ ॥ पपात रुधिरक्लिन्नः शोणितं च समुद्वमन् ॥
स्रोतोभ्यस्तु विरूपाक्षो जलं प्रस्रवणादिव ॥ ३१ ॥

इति धातुः ॥ १३—१७ ॥ संप्रधनः । बहुलमहणात् कर्तरि ल्युट् । प्रहर्तेत्यर्थः । प्रमुखे मुखे ॥ १८ ॥ धनुर्मात्रं धनुःप्रमाणं । "प्रमाणे द्वयसच्दघ्नमात्रचः" इत्यादिना मात्रचूप्रत्ययः ॥ १९ ॥ गजात्त्विति श्लोकद्वयमेकं वाक्यं ॥ व्यवस्थितं निश्चलतया स्थितं ॥ २०—२२ ॥ अपक्रम्य शिलापातपरिहारार्थमन्यतोपसृत्य प्राहरत् । सुग्रीवमिति शेषः ॥ २३—२५ ॥ मुष्टिप्रहारेत्यादिसार्धश्लोक एकान्वयः ॥ कवचमिति । अनेन सुग्रीवस्यापि कवचधारणमस्तीति गम्यते । पद्भ्यामिति । अभिहतः सन् पद्भ्यामपतदित्यन्वयः ॥ २६—२७ ॥ नैपुण्यात् शिक्षापाटवात् ॥ २८ ॥ ततस्त्विति सार्धश्लोकमेकं वाक्यं ॥ अन्तरं अवकाशं ॥ २९ ॥ तत इत्यर्धं ॥ शङ्खदेशे ललाटास्थिप्रदेशे । "शङ्खो निधौ ललाटास्थ्नि" इत्यमरः ॥ ३० ॥ महे-

---

ति० आर्षभं ऋषभकृत्तिपरिवीतंचर्मफलकं ॥ २१ ॥ ति० तस्यापि तेनापि । दत्तंप्रहारं संगृह्य गृहीत्वा ॥ २२ ॥ रामानु० सखड्गाभिहतोपतत् सखड्गश्चासावभिहतश्चसखड्गाभिहतः । विरूपाक्षप्रेरितखड्गसहितोपतदित्यर्थः । उत्तरत्रविरूपाक्षस्यमुष्टिनैवयुद्धाभिधानात् । ति० अभिहतःसुग्रीवः पद्भ्यामपतत् आकुञ्चितजानुरभवदित्यर्थः ॥ २६ ॥ इतिसप्तनवतितमः सर्गः ॥ ९७ ॥

[पा०] १ ङ. समत्तंद्विपमारुह्य. २ ङ. छ. झ. ञ. ट. ननर्दभीम. ३ ङ. झ. तस्यापिसंगृह्य. ४ ख. ङ. झ. ट. विरूपाक्षस्य. ५ ङ. झ. मभवद्भूमौ. ख. च. छ. ञ. ट. मभवद्दीनो. घ. मभवन्मूढो. ६ क. च. छ. ज. सखड्गाभिहतोपतत्. ट. पद्भ्यामभिहतोभवत्.

विवृत्तनयनं क्रोधात्सफेनं रुधिरप्लुतम् ॥ ददृशुस्ते विरूपाक्षं विरूपाक्षतरं कृतम् ॥ ३२ ॥
स्फुरन्तं परिवर्तन्तं पार्श्वेन रुधिरोक्षितम् ॥ करुणं च विनर्दन्तं ददृशुः कपयो रिपुम् ॥ ३३ ॥
तथा तु तौ संयति संप्रयुक्तौ तरस्विनौ वानरराक्षसानाम् ॥
बलार्णवौ सस्वनतुः सुभीमं महार्णवौ द्वाविव भिन्नवेलौ ॥ ३४ ॥
विनाशितं प्रेक्ष्य विरूपनेत्रं महाबलं तं हरिपार्थिवेन ॥
बलं समस्तं कपिराक्षसानामुन्मत्तगङ्गाप्रतिमं बभूव ॥ ३५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तनवतितमः सर्गः ॥ ९७ ॥

अष्टनवतितमः सर्गः ॥ ९८ ॥

सुग्रीवेण महोदरवधः ॥ १ ॥

हन्यमाने बले तूर्णमन्योन्यं ते महामृधे ॥ सरसीव महाघर्मे सोपक्षीणे बभूवतुः ॥ १ ॥
स्वबलस्य विघातेन विरूपाक्षवधेन च ॥ बभूव द्विगुणं क्रुद्धो रावणो राक्षसाधिपः ॥ २ ॥
प्रक्षीणं तु बलं दृष्ट्वा वध्यमानं वलीमुखैः ॥ बभूवास्य व्यथा युद्धे प्रेक्ष्य दैवविपर्ययम् ॥
उवाच च समीपस्थं महोदरमरिंदमम् ॥ ३ ॥
अस्मिन्काले महाबाहो जयाशा त्वयि मे स्थिता ॥ जहि शत्रुचमूं वीर दर्शयाद्य पराक्रमम् ॥
भर्तृपिण्डस्य कालोऽयं निर्देष्टुं साधु युध्यताम् ॥ ४ ॥
एवमुक्तस्तथेत्युक्त्वा राक्षसेन्द्रो महोदरः ॥ प्रविवेशारिसेनां तां पतङ्ग इव पावकम् ॥ ५ ॥
ततः स कदनं चक्रे वानराणां महाबलः ॥ भर्तृवाक्येन तेजस्वी स्वेन वीर्येण चोदितः ॥ ६ ॥
वानराश्च महासत्त्वाः प्रगृह्य विपुलाः शिलाः ॥ प्रविश्यारिबलं भीमं जघ्नुस्ते रजनीचरान् ॥ ७ ॥
महोदरस्तु संक्रुद्धः शरैः काञ्चनभूषणैः ॥ चिच्छेद पाणिपादोरून्वानराणां महाहवे ॥ ८ ॥
ततस्ते वानराः सर्वे राक्षसैरर्दिता भृशम् ॥ दिशो दश द्रुताः केचित्केचित्सुग्रीवमाश्रिताः ॥ ९ ॥
प्रभग्नां समरे दृष्ट्वा वानराणां महाचमूम् ॥ अभिदुद्राव सुग्रीवो महोदरमनन्तरम् ॥ १० ॥
प्रगृह्य विपुलां घोरां महीधरसमां शिलाम् ॥ चिक्षेप च महातेजास्तद्वधाय हरीश्वरः ॥ ११ ॥
तामापतन्तीं सहसा शिलां दृष्ट्वा महोदरः ॥ असंभ्रान्तस्ततो बाणैर्निर्बिभेद दुरासदाम् ॥ १२ ॥

न्द्राशनीत्यादि सार्धश्लोकमेकं वाक्यं ॥ स्रोतोभ्यः नासादिनवद्वारेभ्यः ॥ ३१ ॥ विरूपाक्षतरं नेत्रोद्गमनेनात्यन्तविकटाक्षं ॥ ३२ ॥ स्फुरन्तं ऊर्ध्वमुत्पतन्तं । परिवर्तन्तं परिवर्तमानं ॥ ३३ ॥ भिन्नवेलौ विदीर्णवेलौ ॥ ३४ ॥ उन्मत्तगङ्गा उद्वेलगङ्गा ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तनवतितमः सर्गः ॥ ९७ ॥

अथ महोदरवधः—हन्यमान इत्यादि ॥ सरसी इवेति वक्तव्ये सरसीवेति संधिरार्षः ॥ १—३ ॥ अस्मिन्काल इत्यादिसार्धश्लोक एकान्वयः ॥ भर्तृपिण्डस्येति संबन्धमात्रे षष्ठी । भर्तृपिण्डस्य निर्देष्टुं स्वामिदत्तवेतनमपाकर्तुमित्यर्थः ॥ ४—५ ॥ भर्तृवाक्येन चोदितः सन् स्वेन वीर्येण कदनं चक्र इत्यन्वयः ॥६—७॥ पाणिपादोरूनिति । एकवद्भावाभाव आर्षः ॥ ८—९ ॥ अनन्तरं समीपस्थं ॥ १०—१२ ॥

ती० सोपक्षीणे उपक्षीणं उपक्षयः तत्सहिते ॥ स० सूपक्षीणे अत्यन्तक्षीणे । सरसी वेतिपदं ॥ १ ॥

[पा०] १ ख. ङ. ञ. सुभीमौ. २ ख.—च. ञ. ट. सूपक्षीणे. ३ क. ङ. ञ. सेनांसपतङ्गः. ४ ङ. ञ. ट. सर्वराक्षसान्. ५ ञ. ञ. ट. ठ. पाणिपादोरु. ६ ङ. ञ. ट. राक्षसानांमहामृधे. ७ ङ. ञ. ट. निर्बिभेदततःशिलां.

रक्षसा तेन बाणौघैर्निकृत्ता सा सहस्रधा ॥ निपपात शिला भूमौ गृध्रचक्रमिवाकुलम् ॥ १३ ॥
तां तु भिन्नां शिलां दृष्ट्वा सुग्रीवः क्रोधमूर्च्छितः ॥ सालमुत्पाट्य चिक्षेप राक्षसे रणमूर्धनि ॥१४॥
शरैश्च विददारैनं शूरः पुरंजयः ॥ १५ ॥
स ददर्श ततः क्रुद्धः परिघं पतितं भुवि ॥ आविध्य तु स तं दीप्तं परिघं तस्य दर्शयन् ॥
परिघाग्रेण वेगेन जघानास्य हयोत्तमान् ॥ १६ ॥
तस्माद्रथाद्वीरः सोवप्लुत्य महारथात् ॥ गदां जग्राह संक्रुद्धो राक्षसोथ महोदरः ॥ १७ ॥
गदापरिघहस्तौ तौ युधि वीरौ समीयतुः ॥ नर्दन्तौ गोवृषप्रख्यौ घनाविव सविद्युतौ ॥ १८ ॥
ततः क्रुद्धो गदां तस्मै चिक्षेप रजनीचरः ॥ ज्वलन्तीं भास्कराभासां सुग्रीवाय महोदरः ॥ १९ ॥
गदां तां सुमहाघोरामापतन्तीं महाबलः ॥ सुग्रीवो रोषताम्राक्षः समुद्यम्य महाहवे ॥
आजघान गदां तस्य परिघेण हरीश्वरः ॥ २० ॥
पपात स गदोद्भिन्नः परिघस्तस्य भूतले ॥ २१ ॥
ततो जग्राह तेजस्वी सुग्रीवो वसुधातलात् ॥ आयसं मुसलं घोरं सर्वतो हेमभूषितम् ॥ २२ ॥
स तमुद्यम्य चिक्षेप सोप्यन्यां व्याक्षिपद्गदाम् ॥ भिन्नावन्योन्यमासाद्य पेततुर्धरणीतले ॥ २३ ॥
ततो भग्नप्रहरणौ मुष्टिभ्यां तौ समीयतुः ॥ तेजोबलसमाविष्टौ दीप्ताविव हुताशनौ ॥ २४ ॥
जघ्नतुस्तौ तदाऽन्योन्यं नेदतुश्च पुनः पुनः ॥ तलैश्चान्योन्यमाहत्य पेततुर्धरणीतले ॥ २५ ॥
उत्पेततुस्ततस्तूर्णं जघ्नतुश्च परस्परम् ॥ भुजैश्चिक्षिपतुर्वीरावन्योन्यमपराजितौ ॥
जग्मतुस्तौ श्रमं वीरौ बाहुयुद्धे परंतपौ ॥ २६ ॥
आजहार ततः खड्गमदूरपरिवर्तिनम् ॥ राक्षसश्चर्मणा सार्धं महावेगो महोदरः ॥ २७ ॥
तथैव च महाखड्गं चर्मणा पतितं सह ॥ जग्राह वानरश्रेष्ठः सुग्रीवो वेगवत्तरः ॥ २८ ॥
तौ तु रोषपरीताङ्गौ नर्दन्तावभ्यधावताम् ॥ उद्यतासी रणे हृष्टौ युधि शस्त्रविशारदौ ॥ २९ ॥
दक्षिणं मण्डलं चोभौ सुतूर्णं संपरीयतुः ॥ अन्योन्यमभिसंक्रुद्धौ जये प्रणिहितावुभौ ॥ ३० ॥
स तु शूरो महावेगो वीर्यश्लाघी महोदरः ॥ महाचर्मणि तं खड्गं पातयामास दुर्मतिः ॥ ३१ ॥

गृध्रचक्रं गृध्रसमूहः ॥१३-१४॥ शरैरित्यर्धं ॥ शूरः ॥ १९ ॥ गदां दृष्ट्वेति शेषः । समुद्यम्य । परिघमिति महोदरः एनं च सालं च शरैः विददारेत्यन्वयः ॥१५॥ सः सुग्रीवः । आविध्येति । आदायेति शेषः । तस्य महोदरस्य दर्शयन् । पाणिलाघवमिति शेषः ॥ १६—१८ ॥ भास्कराभासां भास्करवद्भासमानां सिद्धं ॥ २० ॥ पपात स गदोद्भिन्न इत्यर्धं ॥ उभावपि परस्परामिहतौ विशीर्णौ पेततुरिति भावः ॥ २१—२९ ॥ दक्षिणं प्रदक्षिणं चकारात् सव्यं च । सुतूर्णं संपरीयतुः अकुर्वतां ॥ ३० ॥ वीर्येण

स० गृध्रचक्रं शिलायाः शकलीभावात् ॥ १३ ॥ स० गोवृषप्रख्यौ वृषभश्रेष्ठसमौ ॥ १८ ॥ ती० गदापपात । सपरिघश्चोद्भिन्नइत्यर्थः ॥ २१ ॥ स० उद्यतासीरणइतिपदमेकं । उद्यतास्योः ईरणं परस्परंकंपनंतस्मिन्प्रदृष्टौ । युद्धेविशारदौ । अतो न रणपुनरीरणं ॥ २९ ॥ शि० ओः रुद्रस्येवभाययोस्तौ उभौ सुग्रीवमहोदरौ ॥ ३० ॥ स० दुर्मतिः ॥ असिरन्तर्गच्छेदितिज्ञानहीनः ॥ ३१ ॥

[पा०] १ ङ. ञ. ट. चिक्षेपतंसचिच्छेदनैकधा. २ ङ. च. ञ. ट. परबलार्दनं ञ. परबलार्दनः. ३ ङ. ञ. पपाततरभ्नः. ४ ङ. च. छ. ञ. ञ. ट. नदन्तौच. ५ ङ. च. छ. ञ. ट. मासाद्य. ६ ङ.—ट. जहारचतदाखड्गं. ७ छ. ञ. ञविशारदौ. ङ. ञ. युद्धे शस्त्रविशारदौ.

लग्नमुत्कर्षतः खड्गं खड्गेन कपिकुञ्जरः ॥ जहार सशिरस्त्राणं कुण्डलोपहितं शिरः ॥ ३२ ॥
निकृत्तशिरसस्तस्य पतितस्य महीतले ॥ तद्बलं राक्षसेन्द्रस्य दृष्ट्वा तत्र न तिष्ठते ॥ ३३ ॥
हत्वा तं वानरैः सार्धं ननाद मुदितो हरिः ॥ चुक्रोध च दशग्रीवो बभौ हृष्टश्च राघवः ॥ ३४ ॥
विषण्णवदनाः सर्वे राक्षसा दीनचेतसः ॥ विद्रवन्ति ततः सर्वे भयविस्रस्तचेतसः ॥ ३५ ॥
महोदरं तं विनिपात्य भूमौ महागिरेः कीर्णमिवैकदेशम् ॥
सूर्यात्मजस्तत्र रराज लक्ष्म्या सूर्यः स्वतेजोभिरिवाप्रधृष्यः ॥ ३६ ॥
अथ विजयमवाप्य वानरेन्द्रः समरमुखे सुरयक्षसिद्धसङ्घैः ॥
अवनितलगतैश्च भूतसङ्घैर्हरुषसमाकुलितैः स्तुतो महात्मा ॥ ३७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टनवतितमः सर्गः ॥ ९८ ॥

एकोनशततमः सर्गः ॥ ९९ ॥

अङ्गदेनमहापार्श्वभङ्गः ॥ १ ॥

महोदरे तु निहते महापार्श्वो महाबलः ॥ सुग्रीवेण समीक्ष्याथ क्रोधात्संरक्तलोचनः ॥
अङ्गदस्य चमूं भीमां क्षोभयामास सायकैः ॥ १ ॥
स वानराणां मुख्यानामुत्तमाङ्गानि सर्वशः ॥ पातयामास कायेभ्यः फलं वृन्तादिवानिलः ॥ २ ॥
केषांचिदिषुभिर्बाहून्स्कन्धांश्चिच्छेद राक्षसः ॥ वानराणां सुसंक्रुद्धः पार्श्वे केषां व्यदारयत् ॥ ३ ॥
तेऽर्दिता बाणवर्षेण महापार्श्वेन वानराः ॥ विषादविमुखाः सर्वे बभूवुर्गतचेतसः ॥ ४ ॥
निरीक्ष्य बलमुद्विग्नमङ्गदो राक्षसार्दितम् ॥ वेगं चक्रे महाबाहुः समुद्र इव पर्वणि ॥ ५ ॥
आयसं परिघं गृह्य सूर्यरश्मिसमप्रभम् ॥ समरे वानरश्रेष्ठो महापार्श्वे न्यपातयत् ॥ ६ ॥
स तु तेन प्रहारेण महापार्श्वो विचेतनः ॥ समूतः स्यन्दनात्तस्माद्विसंज्ञः प्रापतद्भुवि ॥ ७ ॥
सर्क्षराजस्तु तेजस्वी नीलाञ्जनचयोपमः ॥ निष्पत्य सुमहावीर्यः स्वाद्यूहान्मेघसंनिभात् ॥ ८ ॥
प्रगृह्य गिरिशृङ्गाभां क्रुद्धः सुविपुलां शिलाम् ॥ अश्वाञ्जघान तरसा स्यन्दनं च बभञ्ज तम् ॥ ९ ॥

श्लाघत इति वीर्यश्लाघी ॥ ३१ ॥ लग्नं चर्मलग्नं । उत्कर्षतः महोदरस्येति शेषः ॥ ३२ ॥ तत् शिरः । न तिष्ठते नातिष्ठत ॥ ३३–३४ ॥ विषण्णवदनाः अभवन्निति शेषः । अतः सर्वशब्दापौनरुक्त्यं ॥३५॥ लक्ष्म्या जयलक्ष्म्या ॥३६—३७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टनवतितमः सर्गः ॥ ९८ ॥

अथ महापार्श्ववधः—महोदरेत्यादि ॥ महोदरे सुग्रीवेण निहत इत्यन्वयः ॥ १—७ ॥ सर्क्षराज-

---

स० सर्वेसप्तम्यन्तं । हिंसायांसत्यां । भयं तत्साधनं ॥ ३५ ॥ ति० हर्षपदस्थाने हरुषेतिपाठश्छन्दोनुरोधात् ॥ बभूवेतिशेषः ॥ ३७ ॥ इत्यष्टनवतितमःसर्गः ॥ ९८ ॥

ति० सुग्रीवेणमहोदरेनिहतेसतितद्बधकर्तारंसुग्रीवंमहापार्श्वः समीक्ष्य ॥ स० सुग्रीवेण समीक्ष्य " लग्नमुत्कर्षतः खड्गं" इत्युक्तावसरं समीक्ष्य । महोदरेनिहतेसति क्रोधात्संरक्तलोचनोमहापार्श्वः चमूंक्षोभयामासेत्यन्वयः ॥ १ ॥

[पा०] १ ङ, छ. झ. भ. ट. समाकुलितैर्निरीक्ष्यमाणः. २ च. ञ. ट. राक्षसः. ३ ङ. झ. बाहूंश्चिच्छेदाथसराक्षसः. ४ ञ. ट. सुसंरब्धः. ५ ङ. छ. झ. ट. केषांचिदाक्षिपत्. ६ ङ.—ट. निशम्य.

मुहूर्ताल्लब्धसंज्ञस्तु महापार्श्वो महाबलः ॥ अङ्गदं बहुभिर्बाणैर्भूयस्तं प्रत्यविध्यत ॥ १० ॥
जाम्बवन्तं त्रिभिर्बाणैराजघान स्तनान्तरे ॥ ऋक्षराजं गवाक्षं च जघान बहुभिः शरैः ॥ ११ ॥
जाम्बवन्तं गवाक्षं च स दृष्ट्वा शरपीडितौ ॥ जग्राह परिघं घोरमङ्गदः क्रोधमूर्च्छितः ॥ १२ ॥
तस्याङ्गदः प्रकुपितो राक्षसस्य तमायसम् ॥ दूरस्थितस्य परिघं रविरश्मिसमप्रभम् ॥ १३ ॥
द्वाभ्यां भुजाभ्यां संगृह्य भ्रामयित्वा च वेगवान् ॥ महापार्श्वस्य चिक्षेप वधार्थं वालिनः सुतः ॥१४॥
स तु क्षिप्तो बलवता परिघस्तस्य रक्षसः ॥ धनुश्च सशरं हस्ताच्छिरस्त्रं चाप्यपातयत् ॥ १५ ॥
तं समासाद्य वेगेन वालिपुत्रः प्रतापवान् ॥ तलेनाभ्यहनत्क्रुद्धः कर्णमूले सकुण्डले ॥ १६ ॥
स तु क्रुद्धो महावेगो महापार्श्वो महाद्युतिः ॥ करेणैकेन जग्राह सुमहान्तं परश्वधम् ॥ १७ ॥
तं तैलधौतं विमलं शैलसारमयं दृढम् ॥ राक्षसः परमक्रुद्धो वालिपुत्रे न्यपातयत् ॥ १८ ॥
तेन वामांसफलके भृशं प्रत्यवपादितम् ॥ अङ्गदो मोक्षयामास सरोषः स परश्वधम् ॥ १९ ॥
स वीरो वज्रसंकाशमङ्गदो मुष्टिमात्मनः ॥ संवर्तयत्सुसंक्रुद्धः पितुस्तुल्यपराक्रमः ॥ २० ॥
राक्षसस्य स्तनाभ्याशे मर्मज्ञो हृदयंप्रति ॥ इन्द्राशनिसमस्पर्शं स मुष्टिं विन्यपातयत् ॥ २१ ॥
तेन तस्य निपातेन राक्षसस्य महामृधे ॥ पफाल हृदयं चाशु स पपात हतो भुवि ॥ २२ ॥
तस्मिन्निपतिते भूमौ तत्सैन्यं संप्रचुक्षुभे ॥ अभवच्च महान्क्रोधः समरे रावणस्य तु ॥ २३ ॥
वानराणां च हृष्टानां सिंहनादश्च पुष्कलः ॥ स्फोटयन्निव शब्देन लङ्कां साट्टालगोपुराम् ॥
महेन्द्रेणेव देवानां नादः समभवन्महान् ॥ २४ ॥

अथेन्द्रशत्रुस्त्रिदिवालयानां वनौकसां चैव महाप्रणादम् ॥
श्रुत्वा सरोषं युधि राक्षसेन्द्रः पुनश्च युद्धाभिमुखोऽवतस्थे ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनशततमः सर्गः ॥ ९९ ॥

स्त्वित्यादिश्लोकद्वयमेकान्वयं ॥ ऋक्षराजः जाम्बवान् तेन सहितः सर्क्षराजः गवाक्षः । जाम्बवन्तं गवाक्षं चेत्युत्तरत्र वक्ष्यमाणत्वात् ॥ ८—१० ॥ ऋक्षराजं जाम्बवन्तं त्रिभिर्बाणैराजघान । गवाक्षं च बहुभिः शरैर्जघानेत्यन्वयः ॥ ११—१२ ॥ तस्याङ्गद इत्यादिश्लोकद्वयमेकान्वयं ॥ दूरस्थितस्य तस्य वधार्थमित्यन्वयः ॥ १३—१७ ॥ तैलधौतं प्रतिदिनं तैलसेचनान्निष्कल्मषं । शैलसारमयं तद्वत्कठिनमित्यर्थः । दृढं अशिथिलं ॥ १८—१९ ॥ आत्मन इत्यस्य पितुस्तुल्यपराक्रम इत्यनेन संबन्धः । संवर्तयत् समवर्तयत् । भ्रामयामासेत्यर्थः ॥ २०—२३ ॥ स्फोटयन् दलयन् । वानराणां च सिंहनादः समभवत् । महेन्द्रेण सह देवानां नाद इव वानराणां च देवानां च नादः समभवदित्यर्थः । एतच्चानन्तरश्लोके स्फुटीभविष्यति ॥ २४—२५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनशततमः सर्गः ॥ ९९ ॥

ति० तस्यरक्षसोहस्तात् सशरंधनुः चात् एकंहस्तंशिरस्त्राणं चापातयत् ॥ अतएवाग्रेवक्ष्यति—एकेनकरेणेति ॥ १५ ॥ ति० मोक्षयामास मोघीचकार ॥ १९ ॥ ती० संवर्तयत् समवर्तयत् बबन्धेत्यर्थः ॥ स० संवर्तयत्सुसंक्रुद्धइतिपदमेकं । संवर्तयंश्चासौसुसंक्रुद्धश्चसः । विन्यपातयत् ॥ २०—२१ ॥ ति० वानराणांसिंहनादः लङ्कांस्फोटयन्निवउदभूदितिशेषः । इन्द्रेणसह देवानामिव अङ्गदेनसहवानराणांसिंहनादःसमभवत् ॥ २४ ॥ इत्येकोनशततमः सर्गः ॥ ९९ ॥

[पा०] १ क. घ. ङ. च. झ. ट. महापार्श्वाय. २ ग. निपपात. ३ ख. ग. ङ. झ. ञ. ट. प्रहृ[illegible] ४ ङ. झ. नादःसुपुष्कलः.

शततमः सर्गः ॥ १०० ॥

महोदरादिनिधनक्रुद्धेनरावणेन सूतंप्रति रामवधप्रतिज्ञानेनरथतुरगचोदनचोदनापूर्वकं लक्ष्मणातिक्रमणेनरामंप्रत्यभिया नम् ॥ १ ॥ रामरावणाभ्यां विचित्रास्त्रनिकरप्रयोगेण समरप्रवर्तनम् ॥ २ ॥

महोदरमहापार्श्वौ हतौ दृष्ट्वा तु राक्षसौ ॥ तेसिंश्च निहते वीरे विरूपाक्षे महाबले ॥
आविवेश महान्क्रोधो रावणं तं महामृधे ॥ १ ॥
सूतं संचोदयामास वाक्यं चेदमुवाच ह ॥ २ ॥
निहतानाममात्यानां रुद्धस्य नगरस्य च ॥ दुःखमेषोपनेष्यामि हत्वा तौ रामलक्ष्मणौ ॥ ३ ॥
रामवृक्षं रणे हन्मि सीतापुष्पफलप्रदम् ॥ प्रशाखा यस्य सुग्रीवो जाम्बवान्कुमुदो नलः ॥ ४ ॥
मैन्दश्च द्विविदश्चैव ह्यङ्गदो गन्धमादनः ॥ हनूमांश्च सुषेणश्च सर्वे च हरियूथपाः ॥ ५ ॥
सं दिशो दश घोषेण रथस्यातिरथो महान् ॥ नादयन्प्रययौ तूर्णं राघवं चाभ्यवर्तत ॥ ६ ॥
पूरिता तेन शब्देन सनदीगिरिकानना ॥ संचचाल मही सर्वा सवराहमृगद्विपा ॥ ७ ॥
तामसं स महाघोरं चकारास्त्रं सुदारुणम् ॥ निर्दहन्कपीन्सर्वांस्ते प्रपेतुः समन्ततः ॥ ८ ॥
उत्पपात रजो घोरं तैर्भग्नैः संप्रधावितैः ॥ न हि तत्सहितुं शेकुर्ब्रह्मणा निर्मितं स्वयम् ॥ ९ ॥
तान्यनीकान्यनेकानि रावणस्य शरोत्तमैः ॥ दृष्ट्वा भग्नानि शतशो राघवः पर्यवस्थितः ॥ १० ॥
ततो राक्षसशार्दूलो विद्राव्य हरिवाहिनीम् ॥ स ददर्श ततो रामं तिष्ठन्तमपराजितम् ॥ ११ ॥
लक्ष्मणेन सह भ्रात्रा विष्णुना वासवं यथा ॥ आलिखन्तमिवाकाशमवष्टभ्य महद्धनुः ॥
पद्मपत्रविशालाक्षं दीर्घबाहुमरिंदमम् ॥ १२ ॥
ततो रामो महातेजाः सौमित्रिसहितो बली ॥ वानरांश्च रणे भग्नानापतन्तं च रावणम् ॥
समीक्ष्य राघवो हृष्टो मध्ये जग्राह कार्मुकम् ॥ १३ ॥
विस्फारयितुमारेभे ततः स धनुरुत्तमम् ॥ महावेगं महानादं निर्भिन्दन्निव मेदिनीम् ॥ १४ ॥
रावणस्य च बाणौघै रामविस्फारितेन च ॥ शब्देन राक्षसास्ते च पेतुश्च शतशस्तदा ॥ १५ ॥

अथ रामरावणयुद्धारम्भः शततमे—महोदरेत्यादि ॥ तस्मिन् विरूपाक्षे निहते सति पश्चान्महोदरमहापार्श्वौ हतौ दृष्ट्वा स्थितमिति शेषः ॥ १—८ ॥ सहितुं सोढुं । आर्ष इडागमः ॥ ९—१० ॥ तत इत्यादिसार्धश्लोकद्वयेन रामस्यापराजितत्वं निरवधिकसौन्दर्यनिधित्वेन वैरं विहाय निरन्तरानुभाव्यत्वं रावणस्य दुर्बुद्धित्वं अमृतप्रवाहमावर्तेनेव महता धनुर्वरेणावर्तितं श्रीरामदेहलावण्यामृतपूरमनवगाहमानस्य तस्य दौर्भाग्यं चोच्यते ॥ ११—१२ ॥ ततो राम इत्यादिसार्धश्लोक एकान्वयः ॥ हृष्टः चिराद्वैरी समागत इति संतुष्टः । कार्मुकं जग्राह ॥ १३ ॥ विस्फारयितुमारेभ इत्यादि विलम्बोक्त्या किमिदानीमपिवा नतोभविष्यति रावण इति रामस्य दयालुतोच्यते ॥ १४ ॥ रावणस्य बाणौघैः रामवि-

---

ति० हतौदृष्ट्वासरावणः क्रुद्धोजातइतिशेषः ॥ १ ॥ ति० मूलोच्छेदंकरिष्यामीत्याशयेनरामंसर्वाश्रयंमहावृक्षत्वेननिरूपयति—रामवृक्षमिति । सीता पुष्पंयस्यसः । सचासौतेनैवपुष्पेण सर्वेषांवानराणांतत्तत्कर्मजफलप्रदस्तं । सुग्रीवादयः प्रशाखायस्यतं । प्रशाखासहितंहन्मीति शेषः ॥ रामानु० सीतापुष्पफलप्रदं सीता पुष्पंयस्यसः । सीतापुष्पश्चासौफलप्रदश्चतं ॥ ४ ॥ शि० तामसं राहुदेवताकमस्त्रं ॥ ८ ॥ रामानु० तेच वानराश्च ॥ १५ ॥

[पा०] १ ङ. झ. ट. दृष्ट्वासरावणः. २ ख. च. छ. ञ. ट. तस्मिन्विनिहते. ३ ङ.—झ. ट. दुःखमेवाप. ४ ख. घ. च. छ. ञ. ट. जांबवान्पनसो. ५ ज. एवमुक्त्वाथघोषेणरथस्यातिदिशोदश. ६ ङ. झ. ट. चाभ्यधावत. ७ ङ. झ. त्रस्तसिंहमृगद्विजा. ८ ङ. झ. रजोभूमौ. ९ ख. ग. च छ. ञ. निर्दहन्निव. १० ङ. रोदसी.

तयोः शरपथं प्राप्तो रावणो राजपुत्रयोः ॥ स बभौ च यथा राहुः समीपे शशिसूर्ययोः ॥ १६ ॥
तमिच्छन्प्रथमं योद्धुं लक्ष्मणो निशितैः शरैः ॥ मुमोच धनुरायम्य शरानग्निशिखोपमान् ॥ १७ ॥
तान्मुक्तमात्रानाकाशे लक्ष्मणेन धनुष्मता ॥ बाणान्बाणैर्महातेजा रावणः प्रत्यवारयत् ॥ १८ ॥
एकमेकेन बाणेन त्रिभिस्त्रीन्दशभिर्दश ॥ लक्ष्मणस्य प्रचिच्छेद दर्शयन्पाणिलाघवम् ॥ १९ ॥
अभ्यतिक्रम्य सौमित्रिं रावणः समितिंजयः ॥ आससाद ततो रामं स्थितं शैलमिवाचलम् ॥२०॥
स सङ्ख्ये राममासाद्य क्रोधसंरक्तलोचनः ॥ व्यसृजच्छरवर्षाणि रावणो राघवोपरि ॥ २१ ॥
शरधारास्ततो रामो रावणस्य धनुश्च्युताः ॥ दृष्ट्वैवाप्ततः शीघ्रं भल्लाञ्जग्राह सत्वरम् ॥ २२ ॥
ताञ्शरौघांस्ततो भल्लैस्तीक्ष्णैश्चिच्छेद राघवः ॥ दीप्यमानान्महाघोरान्क्रुद्धानाशीविषानिव ॥ २३ ॥
राघवो रावणं तूर्णं रावणो राघवं तदा ॥ अन्योन्यं विविधैस्तीक्ष्णैः शरैरभिववर्षतुः ॥ २४ ॥
चेरतुश्च चिरं चित्रं मण्डलं सव्यदक्षिणम् ॥ बाणवेगात्समुत्क्षिप्तावन्योन्यमपराजितौ ॥ २५ ॥
तयोर्भूतानि वित्रेसुर्युगपत्संप्रयुध्यतोः ॥ रौद्रयोः सायकमुचोर्यमान्तकनिकाशयोः ॥ २६ ॥
संततं विविधैर्बाणैर्बभूव गगनं तदा ॥ घनैरिवातपापाये विद्युन्मालासमाकुलैः ॥ २७ ॥
गवाक्षितमिवाकाशं बभूव शरवृष्टिभिः ॥ २८ ॥
महावेगैः सुतीक्ष्णाग्रैर्गृध्रपत्रैः सुवाजितैः ॥ शरान्धकारं तौ भीमं चक्रतुः समरं तदा ॥
गतेऽस्तं तपने चापि महामेघाविवोत्थितौ ॥ २९ ॥
बभूव तुमुलं युद्धमन्योन्यवधकाङ्क्षिणोः ॥ अनासाद्यमचिन्त्यं च वृत्रवासवयोरिव ॥ ३० ॥
उभौ हि परमेष्वासावुभौ शस्त्रविशारदौ ॥ उभावस्त्रविदां मुख्यावुभौ युद्धे विचेरतुः ॥ ३१ ॥
उभौ हि येन व्रजतस्तेनतेन शरोर्मयः ॥ ऊर्मयो वायुना विद्धा जग्मुः सागरयोरिव ॥ ३२ ॥
ततः संसक्तहस्तस्तु रावणो लोकरावणः ॥ नाराचमालां रामस्य ललाटे प्रत्यमुञ्चत ॥ ३३ ॥
रौद्रचापप्रयुक्तां तां नीलोत्पलदलप्रभाम् ॥ शिरसा धारयन्रामो न व्यथां प्रत्यपद्यत ॥ ३४ ॥

स्फारितेन च जातेन शब्देनेत्यर्थः ॥ १५ ॥ शशिसूर्ययोरिति । अमायामिति शेषः ॥ १६—१९ ॥ अभ्यतिक्रम्य एकस्यापि बाणस्य स्वस्मिन्नपतनादनादरेणातिक्रम्य ॥ २०—२५ ॥ यमान्तकनिकाशयोः यमतदन्तकौ यमरुद्रौ तत्तुल्ययोः ॥ २६ ॥ गगनं संततं निबिडं बभूवेत्यन्वयः ॥ २७ ॥ गवाक्षितमित्यर्धं ॥ गवाक्षितं संजातगवाक्षं ॥ २८ ॥ महावेगैरित्यादिसार्धश्लोक एकान्वयः ॥ गृध्रपत्रैः हेतुभिः। सुवाजितैः संजातशोभनपक्षैः । बाणैरिति शेषः ॥ २९ ॥ अनासाद्यं इतः पूर्वं केनापि दुर्लभं । अचिन्त्यं रावणस्यैवं भविष्यतीति चिन्तानर्हं ॥ ३०—३१ ॥ येन येन मण्डलचारेण ॥ ३२ ॥ संसक्तहस्तः बाणप्रयोगासक्तहस्तः ॥ ३३—३४ ॥

रामानु० तयोरिति । अतिक्रूरस्वभावस्यरावणस्यरामलक्ष्मणयोः समीपागमनं अमावास्यायांराहोश्चन्द्रसूर्यसमीपागमनमिवेति कृत्वादृष्टान्तदार्ष्टान्तिकयोरैकरूप्यं ॥ १६ ॥ ति० तपने सूर्ये । अस्तंगतेचापिशब्दादस्ताचलंप्राप्योदयाद्रिंगतेपीत्यर्थः । दिवापीतियावत् । यत्तु यथाश्रुतरीत्यारात्रावपीतिव्याचक्षते तत्रनकश्चिच्चमत्कारः ॥ स० तपने सूर्येच अस्तं तन्नामकंपर्वतं । गतेसति । प्रदोषसमयइतियावत् । उत्थितौ महामेघाविव । चन्द्रादिकमाच्छाद्यसतिमिरीकरणंचमत्कारइति "नकश्चिच्चमत्कारः" इतिनागोजिभट्टोक्तिरेवनिश्चमत्कारा । यद्वा तपनेसूर्येसति अस्तंगतइवयथातथामहामेघाविवचक्रतुः । चापिशब्दादित्यादिचमत्कृत्यपेक्षया चमत्कृतिरतिचमत्कृतिर्वानवेतिकृतिनोविदांकुर्वन्तु ॥ सूर्येऽस्तंगतेचाप्युदितेइत्येतन्मध्येऽस्तंगतइत्यस्याधिक्येनावक्तव्यत्वाच्च ॥२९॥

[पा०] १ ङ. ञ. शरान्धकारमाकाशंचक्रतुःप्रथमंतदा. २ क. ख. ग. च. छ. झ. ट. परमंतदा. ३ ङ. ञ. झ. ट. युद्धविशारदौ.

अथ मन्त्रानभिजपन्रौद्रमस्त्रमुदीरयन् ॥ शरान्भूयः समादाय रामः क्रोधसमन्वितः ॥
मुमोच च महातेजाश्चापमायम्य वीर्यवान् ॥ ३५ ॥
[तांश्छरान्राक्षसेन्द्राय चिक्षेपाच्छिन्नसायकः] ॥ ते महामेघसंकाशे कवचे पतिताः शराः ॥
अवध्ये राक्षसेन्द्रस्य न व्यथां जनयंस्तदा ॥ ३६ ॥
पुनरेवाथ तं रामो रथस्थं राक्षसाधिपम् ॥ ललाटे परमास्त्रेण सर्वास्त्रकुशलो रणे ॥ ३७ ॥
ते भित्त्वा बाणरूपाणि पञ्चशीर्षा इवोरगाः ॥ श्वसन्तो विविशुर्भूमिं रावणप्रतिकूलिताः ॥ ३८ ॥
निहत्य राघवस्यास्त्रं रावणः क्रोधमूर्च्छितः ॥ आसुरं सुमहाघोरमस्त्रं प्रादुश्चकार ह ॥ ३९ ॥
सिंहव्याघ्रमुखांश्चान्यान्कङ्ककाकमुखानपि ॥ गृध्रश्येनमुखांश्चाऽपि शृगालवदनांस्तथा ॥ ४० ॥
ईहामृगमुखांश्चान्यान्व्यादितास्यान्भयानकान् ॥ पञ्चास्याँल्लेलिहानांश्च ससर्ज निशिताञ्शरान् ॥४१॥
शरान्खरमुखांश्चान्यान्वराहमुखसंस्थितान् ॥ श्वानकुक्कुटवक्त्रांश्च मकराशीविषाननान् ॥ ४२ ॥
एतानन्यांश्च मायावी ससर्ज निशिताञ्शरान् ॥ रामं प्रति महातेजाः क्रुद्धः सर्प इव श्वसन् ॥४३॥
आसुरेण समाविष्टः सोस्त्रेण रघुनन्दनः ॥ ससर्जास्त्रं महोत्साहः पावकं पावकोपमः ॥ ४४ ॥
अग्निदीप्तमुखान्बाणांस्तथा सूर्यमुखानपि ॥ चन्द्रार्धचन्द्रवक्त्रांश्च धूमकेतुमुखानपि ॥ ४५ ॥
ग्रहनक्षत्रवक्त्रांश्च महोल्कामुखसंस्थितान् ॥ विद्युज्जिह्वोपमांश्चान्यान्ससर्ज निशिताञ्शरान् ॥ ४६ ॥
ते रावणशरा घोरा राघवास्त्रसमाहताः ॥ विलयं जग्मुराकाशे जग्मुश्चैव सहस्रशः ॥ ४७ ॥
तदस्त्रं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा ॥ हृष्टा नेदुस्ततः सर्वे कपयः कामरूपिणः ॥
सुग्रीवप्रमुखा वीराः परिवार्य तु राघवम् ॥ ४८ ॥

शरान् रौद्रास्त्रप्रपञ्चरूपान्बाणान् मुमोचेत्यन्वयः । मुमोच च महातेजाश्चापमायम्य वीर्यवानिति पाठः । तदनन्तरं । ते महामेघसंकाश इति श्लोकः । तदनन्तरं पुनरेवेति श्लोकः । तदनन्तरं ते भित्त्वेति श्लोकात्पूर्वं ग्रन्थपतनमस्ति तदन्वेष्टव्यं ॥ ३५ ॥ अवध्ये अभेद्ये । व्यथां न जनयन् नाजनयन् ॥ ३६ ॥ ललाटे विषये ललाटमुद्दिश्येत्यर्थः । यद्वा परमास्त्राणि विव्याधेति शेषः ॥ ३७ ॥ ते अस्त्रविकृतिरूपाः शराः बाणरूपाणि रावणास्त्राणि । भित्त्वा रावणप्रतिकूलिताः रावणेन निवारिताः सन्तः भूमिं विविशुः ॥ ३८—३९ ॥ आसुरास्त्रं प्रपञ्चयति—सिंहेत्यादि श्लोकचतुष्टयेन ॥ लेलिहानान् सर्पान् । तदाकारानिति यावत् । श्वानशब्दोप्यस्ति । मकराशीविषाननानित्यत्रआशीविषशब्दः पञ्चास्यसर्पेतरसर्पपरः ॥४०—४३॥ पावकं पावकसंबन्धि ॥४४॥ पावकास्त्रं प्रपञ्चयति—अग्नीत्यादिश्लोकद्वयेन ॥ महोल्कामुखसंस्थितान् महोल्कामुखेन वर्तमानान् । विद्युज्जिह्वोपमान् विद्युदर्चिःसदृशान् ॥ "कणा जिह्वास्त-

---

स० अच्छिन्नसायकः अधाराविच्छेदशरः ॥ अवध्ये तद्भेदनद्वाराव्यथांनाजनयन् ॥३६॥ **रामानु०** परमास्त्रेण श्रेष्ठास्त्रमन्त्रेण । योजितान्बाणान्मुमोचेत्यध्याहर्तव्यं । समनन्तरश्लोकेबाणबहुत्वाभिधानात् ॥ ३७ ॥ **रामानु०** श्वसन्तः पञ्चशीर्षाः उरगाइव स्थितास्तेबाणाः रावणप्रतिकूलिताः रावणेनप्रत्यस्त्रेणखण्डिताः । अतएवबाणरूपाणिभित्त्वा भूमिंविविशुरितियोजना ॥ **स०** तेशराः बाणरूपाणि बाणं कार्यरूपयन्तिसुन्दरीकुर्वन्तीतितानिकरायज्ञानिभित्त्वा पञ्चशीर्षाउरगाइव श्वसन्तः रावणप्रतिकूलिताः व्यंसिताः भूमिंविविशुः ॥ ३८ ॥ **स०** यदासुरमस्त्रंचकार प्रादुश्चकार तदेतान्ससर्ज ॥ ३९ ॥ पञ्चास्यान् सिंहमुखान् । पञ्चमुखान्शरानितिवा ॥ ४१ ॥ इतिशततमः सर्गः ॥ १०० ॥

[**पा०**] १ इदमर्धं झ. ञ. ट. ठ. पाठेषुपञ्च्यते. २ झ. ञ. ट. ठ. मन्यदस्त्रंचकारसः. ३ झ. कोकमुखानपि. ४ ङ. झ. सुग्रीवाभिमुखावीराःसंपरिक्षिप्यराघवं.

ततस्तदस्त्रं विनिहत्य राघवः प्रसह्य तद्रावणबाहुनिस्सृतम् ॥
मुदान्वितो दाशरथिर्महाहवे विनेदुरुच्चैर्मुदिताः कपीश्वराः ॥ ४९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे शततमः सर्गः ॥ १०० ॥

एकोत्तरशततमः सर्गः ॥ १०१ ॥

रामरावणयोर्युद्धावसरे मध्येलब्धावकाशेनलक्ष्मणेन रावणंप्रतियोधनम् ॥ १ ॥ तत्रलक्ष्मणेन रावणस्यध्वजसारथिधनुषांछेदनम् ॥ २ ॥ विभीषणेन गदया रावणरथहयहननम् ॥ ३ ॥ लक्ष्मणेन रावणेनविभीषणजिघांसया क्षिप्तायाः शक्तेः शरैः शकलीकरणम् ॥ ४ ॥ ततो रावणक्षिप्तयामहत्याशक्त्या वक्षसिगाढाभिहतेनलक्ष्मणेन मूर्च्छयाभूमौपतनम् ॥ ५ ॥ ततः कोपाद्रामेणशरगणवर्षणे पुरस्स्थातुमशक्नुवतारावणेन पलायनम् ॥ ६ ॥

तस्मिन्प्रतिहतेऽस्त्रे तु रावणो राक्षसाधिपः ॥ क्रोधं च द्विगुणं चक्रे क्रोधाच्चास्त्रमनन्तरम् ॥ १ ॥
मयेन विहितं रौद्रमन्यदस्त्रं महाद्युतिः ॥ उत्सृष्टुं रावणो घोरं राघवाय प्रचक्रमे ॥ २ ॥
ततः शूलानि निश्चेरुर्गदाश्च मुसलानि च ॥ कार्मुकाद्दीप्यमानानि वज्रसाराणि सर्वशः ॥ ३ ॥
मुद्गराः कूटपाशाश्च दीप्ताश्चाशनयस्तथा ॥ निष्पेतुर्विविधास्तीक्ष्णा वाता इव युगक्षये ॥ ४ ॥
तदस्त्रं राघवः श्रीमानुत्तमास्त्रविदां वरः ॥ जघान परमास्त्रेण गान्धर्वेण महाद्युतिः ॥ ५ ॥
तस्मिन्प्रतिहतेऽस्त्रे तु राघवेण महात्मना ॥ रावणः क्रोधताम्राक्षः सौरमस्त्रमुदैरयत् ॥ ६ ॥
ततश्चक्राणि निष्पेतुर्भास्वराणि महान्ति च ॥ कार्मुकाद्भीमवेगस्य दशग्रीवस्य धीमतः ॥ ७ ॥
तैरासीद्गगनं दीप्तं संपतद्भिरितस्ततः ॥ पतद्भिश्च दिशो दीप्ताश्चन्द्रसूर्यग्रहैरिव ॥ ८ ॥
तानि चिच्छेद बाणौघैश्चक्राणि स तु राघवः ॥ आयुधानि च चित्राणि रावणस्य चमूमुखे ॥ ९ ॥
तदस्त्रं तु हतं दृष्ट्वा रावणो राक्षसाधिपः ॥ विव्याध दशभिर्बाणै रामं सर्वेषु मर्मसु ॥ १० ॥
स विद्धो दशभिर्बाणैर्महाकार्मुकनिस्सृतैः ॥ रावणेन महातेजा न प्राकम्पत राघवः ॥ ११ ॥
ततो विव्याध गात्रेषु सर्वेषु समितिंजयः ॥ राघवस्तु सुसंक्रुद्धो रावणं बहुभिः शरैः ॥ १२ ॥
एतस्मिन्नन्तरे क्रुद्धो राघवस्यानुजो बली ॥ लक्ष्मणः सायकान्सप्त जग्राह परवीरहा ॥ १३ ॥
तैः सायकैर्महावेगै रावणस्य महाद्युतिः ॥ ध्वजं मनुष्यशीर्षं तु तस्य चिच्छेद नैकधा ॥ १४ ॥

र्षाधिषः" इति हलायुधः ॥ ४५—४८ ॥ तत् प्रसिद्धं । मुदान्वितः बभूवेति शेषः ॥ ४९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने शततमः सर्गः ॥ १०० ॥

अथ लक्ष्मणस्य शक्त्या पतनं—तस्मिन्नित्यादि ॥ क्रोधाच्चास्त्रमनन्तरमित्यत्रापि चक्र इत्यनुषज्यते ॥ १ ॥ किं तदस्त्रमित्यपेक्षायामाह—मयेनेति ॥ रौद्रं रुद्रदेवताकं ॥ २ ॥ ततः शूलानीत्यादिश्लोकद्वयमेकान्वयं ॥ कूटपाशाः कपटपाशाः ॥ ३—७ ॥ चन्द्रसूर्यग्रहैरिवेति । तत्समानाकारैरित्यर्थः ॥ ८—१२ ॥ एतस्मिन्नन्तरइति । एवं रावणं प्रहृत्य क्षणं रामे विश्राम्यति सतीत्यर्थः । लक्ष्मणः पूर्वं युद्धे प्रवृत्तो मध्ये रामेण युद्धकरणादवसरप्रतीक्ष इत्यर्थः । एवमव्याख्याने कथमन्येन युध्यमानमन्यो युध्येतेति महान्दोषः स्यात् ॥ १३ ॥ गृहीतानां सप्तबाणानां विनियोगप्रकारमाह—तैः सायकैरित्यादिश्लोकत्रयेण ॥ तैः सायकैरिति षष्ठ्यर्थेतृतीया । तेषां सायकानां मध्ये

ति० मनुष्यः शीर्षेयस्यतम् । मनुष्यशीर्षयुक्तमित्यर्थइत्यन्ये ॥ १४ ॥

[पा०] १ क.—ट. महात्मा. २ च. छ. ञ. तदस्त्रंनिहतंदृष्ट्वारावणो. ३ क्रोधंतंद्विगुणं. ४ घ. निहतंघोरं. ५ ङ. च. छ. झ. ञ. ट. भीमं.

सारथेश्चापि बाणेन शिरो ज्वलितकुण्डलम् ॥ जहार लक्ष्मणः श्रीमान्नैर्ऋतस्य महाबलः ॥ १५ ॥
तस्य बाणैश्च चिच्छेद धनुर्गजकरोपमम् ॥ लक्ष्मणो राक्षसेन्द्रस्य पञ्चभिर्निशितैः शरैः ॥ १६ ॥
नीलमेघनिभांश्चास्य सदश्वान्पर्वतोपमान् ॥ जघानाप्लुत्य गदया रावणस्य विभीषणः ॥ १७ ॥
हताश्वाद्वेगवान्वेगादवप्लुत्य महारथात् ॥ क्रोधमाहारयत्तीव्रं भ्रातरं प्रति रावणः ॥ १८ ॥
ततः शक्तिं महाशक्तिर्दीप्तां दीप्ताशनीमिव ॥ विभीषणाय चिक्षेप राक्षसेन्द्रः प्रतापवान् ॥ १९ ॥
अप्राप्तामेव तां बाणैस्त्रिभिश्चिच्छेद लक्ष्मणः ॥ अथोदतिष्ठत्सन्नादो वानराणां तदा रणे ॥ २० ॥
सा पपात त्रिधा च्छिन्ना शक्तिः काञ्चनमालिनी ॥ सविस्फुलिङ्गा ज्वलिता महोल्केव दिवश्च्युता ॥२१॥
ततः संभाविततरां कालेनापि दुरासदाम् ॥ जग्राह विपुलां शक्तिं दीप्यमानां स्वतेजसा ॥ २२ ॥
सा वेगिता बलवता रावणेन दुरासदा ॥ जज्वाल सुमहाघोरा शक्राशनिसमप्रभा ॥ २३ ॥
एतस्मिन्नन्तरे वीरो लक्ष्मणस्तं विभीषणम् ॥ प्राणसंशयमापन्नं तूर्णमभ्यवपद्यत ॥ २४ ॥
तं विमोक्षयितुं वीरश्चापमायम्य लक्ष्मणः ॥ रावणं शक्तिहस्तं वै शरवर्षैरवाकिरत् ॥ २५ ॥
कीर्यमाणः शरौघेण विसृष्टेन महात्मना ॥ स ग्रहर्तुं मनश्चक्रे विमुखीकृतविक्रमः ॥ २६ ॥
मोक्षितं भ्रातरं दृष्ट्वा लक्ष्मणेन स रावणः ॥ लक्ष्मणाभिमुखस्तिष्ठन्निदं वचनमब्रवीत् ॥ २७ ॥
मोक्षितस्ते बलश्लाघिन्यस्मादेवं विभीषणः ॥ विमुच्य राक्षसं शक्तिस्त्वयीयं विनिपात्यते ॥ २८ ॥
एषा ते हृदयं भित्त्वा शक्तिर्लोहितलक्षणा ॥ मद्बाहुपरिघोत्सृष्टा प्राणानादाय यास्यति ॥ २९ ॥
इत्येवमुक्त्वा तां शक्तिमष्टघण्टां महास्वनाम् ॥ मयेन मायाविहिताममोघां शत्रुघातिनीम् ॥ ३० ॥
लक्ष्मणाय समुद्दिश्य ज्वलन्तीमिव तेजसा ॥ रावणः परमक्रुद्धश्चिक्षेप च ननाद च ॥ ३१ ॥
सा क्षिप्ता भीमवेगेन शक्राशनिसमस्वना ॥ शक्तिरभ्यपतद्वेगाल्लक्ष्मणं रणमूर्धनि ॥ ३२ ॥
तामनुव्याहरच्छक्तिमापतन्तीं स राघवः ॥ स्वस्त्यस्तु लक्ष्मणायेति मोघा भव हतोद्यमा ॥ ३३ ॥
रावणेन रणे शक्तिः क्रुद्धेनाशीविषोपमा ॥ मुक्ताऽऽशूरस्यभीतस्य लक्ष्मणस्य ममज्ज सा ॥ ३४ ॥
न्यपतत्सा महावेगा लक्ष्मणस्य महोरसि ॥ जिह्वेवोरगराजस्य दीप्यमाना महाद्युतिः ॥ ३५ ॥

एकेन बाणेन ध्वजं, एकेन बाणेन सारथिशिरः, पञ्चभिर्धनुश्च चिच्छेदेत्यर्थः । निशितैः शरैरित्यत्र शरशब्दः काशदण्डविशेषमयत्वपरो बाणविशेषणं ॥ १४—१६ ॥ एवं धनुषि छिन्ने क्षणं तूष्णीं तिष्ठति रावणे विभीषणेन किंचित्कारमाह—नीलेति ॥ १७ —२१ ॥ संभाविततरां चन्दनादिभिरर्चितां ॥ २२ —२३॥ अभ्यवपद्यत तमाच्छाद्य स्वयमतिष्ठदित्यर्थः ॥ २४—२५ ॥ विमुखीकृतविक्रमः विमुखीकृतविभीषणविषयपराक्रमः ॥२६—२७॥ ते त्वया ॥२८॥ लोहितलक्षणा रुधिरचिह्ना । अनेन पूर्वमपि बहवो रिपवोऽनया हता इति व्यज्यते । लोहितलक्षणा सती यास्यतीति वा ॥ २९—३२ ॥ राघवः लक्ष्मणाय स्वस्त्यस्तु । त्वं हतोद्यमा नष्टहननोद्योगा मोघा भवेति तामनुव्याहरदित्यन्वयः ॥३३॥ क्षणाद्भस्मीकरणक्षमा शक्तिः रामेण मोघीकृता सती केवलमपतदित्याह—रावणेनेति ॥ मुक्तेति । आशु उरसि अभीतस्येति

ति० लोहितलक्षणा शत्रुरुधिरग्रहणस्वभावा ॥ २९ ॥ ति० आपतन्तीतांशक्तिं शक्त्यधिष्ठातृदेवतामुद्दिश्यानुव्याहरत् । तदेवाह—लक्ष्मणायस्वस्त्यस्तु । त्वंहतोद्यमा हतप्राणनाशोद्योगा । अतएवमोघा प्राणापहारांशेमोघाभव । तच्छक्तिस्तुपीडामात्रेचरितार्थास्त्वितिभावः । स्पर्शमात्रेणप्राणापहरणसामर्थ्ययुक्तायाः शक्तेरनेनस्वाक्येनमोघीकरणात्स्वस्यसत्यसंकल्पत्वंसूचितं ॥ ३३ ॥ ति० अभीतस्यभगवत्तत्त्वानुसंधानेननिर्भयस्य ॥ ३४ ॥ ति० मुक्ता आशु उरसीतिच्छेदस्यगूढत्वात्स्पष्टमेवाहकविः—न्यपतदिति ॥ ३५ ॥

[पा०] १ क. ङ.—ट. हताश्वात्तुतदावेगादवप्लुत्य. २ ख. ङ. च. झ. ञ. ट. शक्तिःप्रदीप्तामशनीमिव. ३ ङ. च. झ. ट. महारणे. ४ ख. सागृहीता. ५ क. ख. घ. ज. महात्मना. ङ. झ. दुरात्मना. ६ ङ. झ. ञ. ट. वज्राशनि.

ततो रावणवेगेन सुदूरमवगाढया ॥ शक्त्या निर्भिन्नहृदयः पपात भुवि लक्ष्मणः ॥ ३६ ॥
तदवस्थं समीपस्थो लक्ष्मणं प्रेक्ष्य राघवः ॥ भ्रातृस्नेहान्महातेजा विषण्णहृदयोऽभवत् ॥ ३७ ॥
स मुहूर्तमनुध्याय[1] बाष्पव्याकुललोचनः ॥ बभूव संरब्धतरो युगान्त इव पावकः ॥ ३८ ॥
न विषादस्य कालोऽयमिति संचिन्त्य राघवः ॥ चक्रे सुतुमुलं युद्धं रावणस्य वधे धृतः ॥
सर्वयत्नेन महता लक्ष्मणं सन्निरीक्ष्य[2] च ॥ ३९ ॥
स ददर्श ततो रामः शक्त्या भिन्नं महाहवे ॥ लक्ष्मणं रुधिरादिग्धं सपन्नगमिवाचलम् ॥ ४० ॥
तामपि प्रहितां शक्तिं रावणेन बलीयसा ॥ यत्नतस्ते हरिश्रेष्ठा न शेकुरवमर्दितुम् ॥
अर्दिताश्चैव बाणौघैः क्षिप्रहस्तेन रक्षसा ॥ ४१ ॥
सौमित्रिं सा विनिर्भिद्य प्रविष्टा धरणीतलम् ॥ ४२ ॥
तां कराभ्यां परामृश्य रामः शक्तिं भयावहाम् ॥ बभञ्ज समरे क्रुद्धो बलवान्विचकर्ष च ॥ ४३ ॥
तस्य निष्कर्षतः शक्तिं रावणेन बलीयसा ॥ शराः सर्वेषु गात्रेषु पातिता मर्मभेदिनः ॥ ४४ ॥
अचिन्तयित्वा तान्बाणान्समाश्लिष्य[3] च लक्ष्मणम् ॥ अब्रवीच्च हनूमन्तं सुग्रीवं[4] चैव राघवः ॥
लक्ष्मणं परिवार्येह तिष्ठध्वं वानरोत्तमाः ॥ ४५ ॥
पराक्रमस्य कालोऽयं संप्राप्तो मे चिरेप्सितः ॥ पापात्माऽयं दशग्रीवो वध्यतां पापनिश्चयः ॥
काङ्क्षितः स्तोककस्येव[5] घर्मान्ते मेघदर्शनम् ॥ ४६ ॥
अस्मिन्मुहूर्ते नचिरात्सत्यं प्रतिशृणोमि वः ॥ अरावणमरामं वा जगद्द्रक्ष्यथ वानराः ॥ ४७ ॥
राज्यनाशं वने वासं दण्डके परिधावनम् ॥ वैदेह्याश्च परामर्शं रक्षोभिश्च समागमम् ॥ ४८ ॥
प्राप्तं दुःखं महद्घोरं क्लेशं च निरयोपमम् ॥ अद्य सर्वमहं त्यक्ष्ये निहत्वा रावणं रणे ॥ ४९ ॥
यदर्थं वानरं सैन्यं समानीतमिदं मया ॥ सुग्रीवश्च कृतो राज्ये निहत्वा वालिनं रणे ॥ ५० ॥

पदानि । लक्ष्मणस्योरसि ममज्रेति संबन्धः ॥३४—३७॥ अनुध्याय तत्कालकर्तव्यं चिन्तयित्वा ॥ ३८ ॥ न विषादस्येति सार्धश्लोकमेकं वाक्यं । लक्ष्मणं सन्निरीक्ष्य महता सर्वयत्नेन रावणस्य वधे धृतः अवहितः सुतुमुलं युद्धं चक्र इत्यन्वयः । न केवलं सीताहरणात् किंतु लक्ष्मणदर्शनादपीति चशब्दार्थः ॥ ३९ ॥ कथं लक्ष्मणदर्शनं रावणवधकारणं भवतीत्यत्राह—स ददर्शेति ॥ तदानीं लक्ष्मणस्य तादृशशोच्यत्वदर्शनं रावणवधनिश्चयकारणं भवतीत्याशयः ॥४०॥ तामपीति ॥ अपिशब्दस्य यत्नतोपीत्युत्तरत्रान्वयः । बाणार्दितत्वेन सुतरां न शेकुरित्याह—अर्दिताश्चेति ॥४१॥ कारणान्तरमाह—सौमित्रिमिति ॥ ४२—४५ ॥ पराक्रमस्येत्यादिसार्धश्लोक एकान्वयः ॥ वध्यतामिति प्राप्तकाले लोट् । स्तोककस्य चातकस्य । "स्तोककश्चातकः समाः" इत्यमरः ॥ ४६ ॥ अस्मिन्मुहूर्ते तत्रापि न चिराद्द्रक्ष्यथेत्यन्वयः ॥ ४७ ॥ राज्यनाशमित्यादिश्लोकद्वयमेकान्वयं ॥ प्राप्तं पंपोपवनादौ । क्लेशं लक्ष्मणप्रहरणजन्यं ॥ ४८—४९ ॥ यदर्थमित्यादिश्लोकत्रयमेकान्वयं ॥ दृष्टिं दृष्टिविषयं । दृष्टौ विषं यस्यासौ दृष्टिविषः तस्य । केचिद्धि सर्पाः दर्शनमात्रेण मनुष्यान्मारयन्तीति प्रसिद्धिः ॥५०—

स० तदवस्थं साऽवस्थायस्थतं ॥ ३७ ॥ स० इवेनकविः स्वतः सर्वविदोध्यानं लोकानुकृतितइतिसूचयति ॥ ३८ ॥ ति० समाश्लिष्येति । समाश्लेषोऽयंसकलपीडानिवृत्तिफलकः स्वतादात्म्यावभासनरूपः ॥ ३९ ॥ ति० राज्यनाशं राज्यनाशजनितंदुःखं । वनेवासं वनवासजनितंदुःखं । एवमुत्तरत्रापिदुःखविशेषणानि । क्लेशंचनिरयोपमंअतिजुगुप्सितंदुःखं लक्ष्मणप्रहारजनितमित्यर्थः ॥ ४८ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. मुहूर्तमिवध्यात्वा. २ घ. ङ. झ. बाष्पपर्याकुलेक्षणः. ३ ङ. झ. परिवीक्ष्यच. ४ ङ. झ. ट. सुग्रीवंचमहाकपिं. ५ ङ. झ. ञ. ट. काङ्क्षितंचातकस्येव. क. ख. च. छ. ज. काङ्क्षतश्चातकस्येव.

यदर्थं सागरः क्रान्तः सेतुर्बद्धश्च सागरे ॥ सोयमद्य रणे पापश्चक्षुर्विषयमागतः ॥ ५१ ॥
चक्षुर्विषयमागम्य नायं जीवितुमर्हति ॥ दृष्टिं दृष्टिविषस्येव सर्पस्य मम रावणः ॥ ५२ ॥
स्वस्थाः पश्यत दुर्धर्षा युद्धं वानरपुङ्गवाः ॥ आसीनाः पर्वताग्रेषु ममेदं रावणस्य च ॥ ५३ ॥
अद्य रामस्य रामत्वं पश्यन्तु मम संयुगे ॥ त्रयो लोकाः सगन्धर्वाः सदेवाः सर्षिचारणाः ॥ ५४ ॥
अद्य कर्म करिष्यामि यल्लोकाः सचराचराः ॥ सदेवाः कथयिष्यन्ति यावद्भूमिर्धरिष्यति ॥
समागम्य सदा लोके यथा युद्धं प्रवर्तितम् ॥ ५५ ॥
एवमुक्त्वा शितैर्बाणैस्तप्तकाञ्चनभूषणैः ॥ आजघान दशग्रीवं रणे रामः समाहितः ॥ ५६ ॥
अथ प्रदीप्तैर्नाराचैर्मुसलैश्चापि रावणः ॥ अभ्यवर्षत्तदा रामं धाराभिरिव तोयदः ॥ ५७ ॥
रामरावणमुक्तानामन्योन्यमभिनिघ्नताम् ॥ शरैराणां च शराणां च बभूव तुमुलः स्वनः ॥ ५८ ॥
ते भिन्नाश्च विकीर्णाश्च रामरावणयोः शराः ॥ अन्तरिक्षात्प्रदीप्ताग्रा निपेतुर्धरणीतले ॥ ५९ ॥
तयोर्ज्यातलनिर्घोषो रामरावणयोर्महान् ॥ त्रासनः सर्वभूतानां संबभूवाद्भुतोपमः ॥ ६० ॥
स कीर्यमाणः शरजालवृष्टिभिर्महात्मना दीप्तधनुष्मताऽर्दितः ॥
भयात्प्रदुद्राव समेत्य रावणो यथाऽनिलेनाभिहतो बलाहकः ॥ ६१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोत्तरशततमः सर्गः ॥ १०१ ॥

द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

रामेणसुषेणंप्रति रावणशक्तिघातपतितलक्ष्मणप्रदर्शनपूर्वकं तस्यनिधनशङ्कया विषादेनबहुधाविलापः ॥ १ ॥ सुषेणेनरामंप्रति हेतूपन्यासेनलक्ष्मणप्राणधारणनिर्धारणोक्त्यासमाश्वासनपूर्वकं हनुमन्तंप्रति विशल्यकरण्याद्योषधिसमानयनचोदना ॥ २ ॥ ओषधिगिरिंगत्वेनहनुमता ओषधीनामन्तर्धानेकोपादुत्पाटनेनतच्छिखरस्यैव समानयनम् ॥ ३ ॥ सुषेणेनानान्यस्तमहौषधिक्षोदसमाघ्राणनमात्राद्विशल्येनलक्ष्मणेन स्वापादिव समुत्थानम् ॥ ४ ॥ सहर्षबाष्पंरामपरिष्वक्तेनलक्ष्मणेन तंप्रति सत्वरं रावणवधप्रार्थना ॥ ५ ॥

शक्त्या विनिहतं दृष्ट्वा रावणेन बलीयसा ॥ लक्ष्मणं समरे शूरं रुधिरौघपरिप्लुतम् ॥ १ ॥

---

५३ ॥ रामत्वं जगदेकवीरत्वं । आचार्यास्तु रामावतारप्रयोजनमित्याहुः ॥ ५४ ॥ अद्येत्यादिसार्धश्लोक एकान्वयः ॥ सदेवाः सचराचराः लोकाः जनाः । समागम्य संघीभूय । यथेदानीं युद्धं प्रवर्तितं तथा यावद्भूमिर्धरिष्यति तावत्कालं सदा नित्यशः । लोके यत्कर्म कथयिष्यन्ति तत्कर्माद्य करिष्यामीत्यन्वयः ॥ ५५—६१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोत्तरशततमः सर्गः ॥ १०१ ॥

अथ लक्ष्मणसंजीवनं द्विशततमे—शक्त्या विनिहतमित्यादिश्लोकद्वयमेकं वाक्यं ॥ विसृजन्नेवेत्यादि-

---

ति० रामस्यरामत्वं रमयतीतिरामइतिव्युत्पत्त्यापराक्रमेणापिरमयितृत्वमुच्यते ॥ ती० रामस्यरामत्वं त्रीँल्लोकान्सर्षिदेवान्धर्मेणसत्येनशौर्येणचरमयतीत्यन्वर्थंरामत्वं । तदुचितंकर्माद्यकरिष्यामीतिभावः ॥ स० रामस्यममरामत्वंपश्यन्तु । अन्यथानामेदं त्यक्ष्यामीतिभावः ॥ ५४ ॥ ति० यावद्भूमिर्धरिष्यति प्राणिनः ॥ ५५ ॥ वराणां शराणां श्रेष्ठानांशराणां । चान्मुसलानां ॥ ५८ ॥ ति० भयात् भ्रातृपीडाजनितकोपेनसर्वथामांहनिष्यत्येवेतिभयादित्यर्थः ॥ इदंपलायनममासार्यकाले ॥ ६१ ॥ इत्येकोत्तरशततमःसर्गः ॥ १०१ ॥

[पा०] १ क. ख. ङ. झ. ञ. सुखंपश्यत. २ ङ. च. छ. झ. ञ. ट. तथाप्रसिद्धैर्नाराचैः. ३ ज. अभ्यवर्षततंशैलं धाराभिरिव. ४ झ. ट. वराणांचशराणांच. घ. उद्यतानांशराणांच. ५ ङ. च. छ. झ. ञ. विच्छिन्नाविकीर्णाश्च. ६ ङ.—ट. विकीर्यमाणः.

स दृष्ट्वा तुमुलं युद्धं रावणस्य दुरात्मनः ॥ विसृजन्नेव बाणौघान्सुषेणं वाक्यमब्रवीत् ॥ २ ॥
एष रावणवीर्येण लक्ष्मणः पतितः क्षितौ ॥ सर्पवद्वेष्टते वीरो मम शोकमुदीरयन् ॥ ३ ॥
शोणितार्द्रमिमं वीरं प्राणैरिष्टतमं मम ॥ पश्यतो मम का शक्तिर्योद्धुं पर्याकुलात्मनः ॥ ४ ॥
अयं स समरश्लाघी भ्राता मे शुभलक्षणः ॥ यदि पञ्चत्वमापन्नः प्राणैर्मे किं सुखेन च ॥ ५ ॥
लज्जतीव हि मे वीर्यं भ्रश्यतीव कराद्धनुः ॥ सायका व्यवसीदन्ति दृष्टिर्बाष्पवशं गता ॥
अवसीदन्ति गात्राणि स्वप्नयाने नृणामिव ॥ ६ ॥
चिन्ता मे वर्धते तीव्रा मुमूर्षा चोपजायते ॥ भ्रातरं निहतं दृष्ट्वा रावणेन दुरात्मना ॥ ७ ॥
विनिष्टनन्तं दुःखार्तं मर्मण्यभिहतं भृशम् ॥ राघवो भ्रातरं दृष्ट्वा प्रियं प्राणं बहिश्चरम् ॥
दुःखेन महताऽऽविष्टो ध्यानशोकपरायणः ॥ ८ ॥
परं विषादमापन्नो विललापाकुलेन्द्रियः ॥ ९ ॥
न हि युद्धेन मे कार्यं नैव प्राणैर्न सीतया ॥ भ्रातरं निहतं दृष्ट्वा लक्ष्मणं रणपांसुषु ॥ १० ॥
किं मे राज्येन किं प्राणैर्युद्धे कार्यं न विद्यते ॥ यत्रायं निहतः शेते रणमूर्धनि लक्ष्मणः ॥ ११ ॥
देशे देशे कलत्राणि देशेदेशे च बान्धवाः ॥ तं तु देशं न पश्यामि यत्र भ्राता सदोहरः ॥ १२ ॥
[किंनु राज्येन दुर्धर्ष लक्ष्मणेन विना मम ॥ कथं वक्ष्याम्यहं त्वंबां सुमित्रां पुत्रवत्सलाम् ॥
उपालंभं न शक्ष्यामि सोढुं दत्तं सुमित्रया ॥ १३ ॥
किंनु वक्ष्यामि कौसल्यां मातरं किंनु कैकयीम् ॥ भरतं किंनु वक्ष्यामि शत्रुघ्नं च महाबलम् ॥
सह तेन वनं यातो विना तेनागतः कथम् ॥ १४ ॥
इहैव मरणं श्रेयो न तु बन्धुविगर्हणम् ॥ १५ ॥
किं मया दुष्कृतं कर्म कृतमन्यत्र जन्मनि ॥ येन मे धार्मिको भ्राता निहतश्चाग्रतः स्थितः ॥ १६ ॥
हा भ्रातर्मनुजश्रेष्ठ शूराणांप्रवर प्रभो ॥ एकाकी किंनु मां त्यक्त्वा परलोकाय गच्छसि ॥ १७ ॥
विलपन्तं च मां भ्रातः किमर्थं नावभाषसे ॥ उत्तिष्ठ पश्य किं शेषे दीनं मां पश्य चक्षुषा ॥ १८ ॥
शोकार्तस्य प्रमत्तस्य पर्वतेषु वनेषु च ॥ विषण्णस्य महाबाहो समाश्वासयिता मम ॥ १९ ॥]
इत्येवं विलपन्तं तं शोकविह्वलितेन्द्रियम् ॥ विवेष्टमानं करुणमुच्छ्वसन्तं पुनः पुनः ॥
राममाश्वासयन्वीरः सुषेणो वाक्यमब्रवीत् ॥ २० ॥

वर्तमाननिर्देशेन रावणपलायनानन्तरं लक्ष्मणयोगक्षेमानुसंधाने अविलम्बः सूचितः ॥ १—२ ॥ उदीरयन् जनयन् ॥ ३ ॥ प्राणैः प्राणेभ्यः ॥ ४—५ ॥ लज्जतीवेत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ लज्जतीव । आर्षं परस्मैपदं । स्वप्नयाने स्वप्नगमने । स्वप्ने हि गच्छतां पुरुषाणां पादाः पश्चादाकृष्टा भवन्ति । भ्रातरं निहतं दृष्ट्वेति पूर्वशेषः ॥ ६—७ ॥ विनिष्टनन्तमित्यादिसार्धश्लोकमेकं वाक्यं ॥ विनिष्टनन्तं निश्वसन्तं । ध्यानशोकपरायणः अभूदिति शेषः ॥ ८ ॥ परं विषादमित्यर्धं ॥ राघव इत्यनुषञ्जनीयं ॥ ९ ॥ दृष्ट्वा स्थितस्येति शेषः ॥ १० ॥ यत्र यतः ॥ ११—२० ॥

स० सहोदरः तत्तुल्यः । पायसस्यकौसल्याविभागादुद्भूतस्यसुमित्रायैप्रदानान्निमित्ताद्भ्रातृलक्ष्मणस्यसाहोदर्यं । सहोदरस्यमेलनं भवेत् असहोदरःसन्नेतादृशोभ्रातायत्रमिलेत्तंदेशंनपश्यामीत्यर्थोवा । भिन्नोदरेएतादृशंसौहार्दंदुर्लभमितिभावः ॥ १२ ॥

[पा०] १ झ. प्राणैःप्रियतरं. २ किंनुराज्येनेत्यादयः समाश्वासयितामम्मेत्यन्ताःश्लोकाः ङ. झ. ञ. ट. पाठेषुदृश्यन्ते. ३ इत्येवमित्यादीनां स्रस्तगात्रस्यभूतलइत्यन्तानांश्लोकानांस्थाने ङ. झ. ञ. ट. पाठेषु "राममेवंब्रुवाणंतुशोकव्याकुलितेन्द्रियम् । आश्वासयन्नुवाचेदंसुषेणःपरमंवचः । त्यजेमांनरशार्दूलबुद्धिर्वैक्लव्यकारिणीम् । शोकसंजननींचिन्तांतुल्यांबाणैश्चमूमुखे ।

न मृतोऽयं महाबाहो लक्ष्मणो लक्ष्मिवर्धनः ॥ न चास्य विकृतं वक्त्रं नापि श्यावं न निष्प्रभम् ॥२१॥
सुप्रभं च प्रसन्नं च मुखमस्याभिलक्ष्यते ॥ पद्मपत्रतलौ हस्तौ सुप्रसन्ने च लोचने ॥ २२ ॥
एवं न विद्यते रूपं गतासूनां विशांपते ॥ दीर्घायुषस्तु ये मर्त्यास्तेषां तु मुखमीदृशम् ॥ २३ ॥
नायं प्रेतत्वमापन्नो लक्ष्मणो लक्ष्मिवर्धनः ॥ मा विषादं कृथा वीर सप्राणोऽयमरिन्दमः ॥२४ ॥
आख्यास्यते प्रसुप्तस्य स्रस्तगात्रस्य भूतले ॥ सोच्छ्वासं हृदयं वीर कम्पमानं मुहुर्मुहुः ॥ २५ ॥
एवमुक्त्वा तु वाक्यज्ञः सुषेणो राघवं वचः ॥ हनुमन्तमुवाचेदं हनुमन्तमभित्वरन् ॥ २६ ॥
सौम्य शीघ्रमितो गत्वा शैलमोषधिपर्वतम् ॥ पूर्वं ते कथितो योसौ वीर जाम्बवता शुभः ॥२७ ॥
दक्षिणे शिखरे तस्य जातामोषधिमानय ॥ विशल्यकरणीं नाम विशल्यकरणीं शुभाम् ॥ २८ ॥
सवर्णकरणीं चापि तथा संजीवनीमपि ॥ संधानकरणीं चापि गत्वा शीघ्रमिहानय ॥
संजीवनार्थं वीरस्य लक्ष्मणस्य महात्मनः ॥ २९ ॥
इत्येवमुक्तो हनुमान्गत्वा चौषधिपर्वतम् ॥ चिन्तामभ्यगमच्छ्रीमानजानंस्तां महौषधिम् ॥ ३० ॥
तस्य बुद्धिः समुत्पन्ना मारुतेरमितौजसः ॥ इदमेव गमिष्यामि गृहीत्वा शिखरं गिरेः ॥ ३१ ॥
अस्मिन्हि शिखरे जातामोषधीं तां सुखावहाम् ॥ प्रतर्केणावगच्छामि सुषेणोप्येवमब्रवीत् ॥ ३२ ॥
अगृह्य यदि गच्छामि विशल्यकरणीमहम् ॥ कालात्ययेन दोषः स्याद्वैक्लव्यं च महद्भवेत् ॥ ३३ ॥

श्यावं कपिशं । विवर्णमिति यावत् । "श्यावः स्यात्कपिशः" इत्यमरः ॥ २१—२४ ॥ मुहुर्मुहुः कम्पमानं हृदयमेनं सोच्छ्वासं सप्राणं । आख्यास्यते आचष्टे । लडर्थे लृट् ॥ २५—२६ ॥ सौम्य शीघ्रमित्यादि सार्धश्लोकत्रयमेकान्वयं ॥ ओषधिपर्वतं ओषधिपर्वताख्यं । द्वितीयो विशल्यकरणीशब्दो गुणवचनः । विशल्याः क्रियन्तेनयेति विशल्यकरणी तां ॥ २७—३० ॥ तस्य बुद्धिरित्यादिश्लोकत्रयमेकान्वयं । प्रतर्केण अन्तःकरणप्रसादादिना लिङ्गेन । सुषेणोप्येवमब्रवीदिति । "दक्षिणे शिखरे तस्य जातामोषधिमानय" इति सुषेणवचनं । अगृह्य यदि गच्छामि । पुनः सुषेणं प्रष्टुमिति भावः । दोषः लक्ष्मणहानिरूपः । वैक्लव्यं निष्पौरुषत्वं । अन्ते इतिकरणेन पूर्वमन्वयः

ति० अत्र द्वितीयोहनुशब्दः प्रशस्तहनुवचनः ॥ यद्वा हनुशब्दोज्ञानवाची । "ज्ञानवान्हनुमान्स्मृतः" इतिशब्दार्णवे ॥ २६ ॥ स० अजानन् दृष्टपूर्वाणामप्योषधीनांपूर्ववन्निलीनानांज्ञानार्थं मार्गणेसमयोऽयंमयातीतोभवेद्भवेयंचराघवाश्लाघ्यइत्यजानन्निति वदन्सूचयतिकविरितिज्ञेयं । यत्तुनागोजिभट्टेन " पूर्वदृष्टानामप्यपरिचयेपुराणान्तरोक्तकालनेमियुद्धकृतचित्तचाञ्चल्यंहेतुरिति बोध्यमित्युक्तं तत्तुकालनेमिंदृष्ट्वागतवतश्चित्तप्राशस्त्यस्यैवसंभवदुक्तिकत्वादुपेक्ष्यं । यथोक्तमध्यात्मरामायणे " रामेणप्रेषितोवीरहनुमान्क्षीरसागरम् । गतोनेतुंलक्ष्मणस्यजीवनार्थंमहोदधिम् । कृत्वातच्चारवचनंराजाचिन्तापरोऽभवत् । जगामरात्रावेकाकी कालनेमिगृहंक्षणात्" इत्यारभ्य—"ततआगत्यमकरीमहाकायामहाकपिम् । त्वत्प्रसादादहंपाशान्मुक्तोह्यस्मिकपीश्वर । आश्रमेयस्तुतेदृष्टःकालनेमिर्महासुरः । रावणप्रहितोमार्गेविघ्नंकर्तुंतवानघ । मुनिवेषधरो नासौमुनिर्विघ्नविहिंसकः । जहिदुष्टंगच्छशीघ्रं द्रोणाचलमनुत्तमम् । गच्छाम्यहंब्रह्मलोकंत्वत्स्पर्शादूतकल्मषा" इतिगर्भीकृत्य—"गृहाणमत्तोमन्त्रंत्वंदेहिमेगुरुदक्षिणाम् । इत्युक्तो हनुमान्मुष्टिंदत्वंबद्ध्वाहराक्षसम् । गृहाणदक्षिणामेतामित्युक्त्वानिजघानतम् । जघानमुष्टिनाकीर्णभग्नमूर्धाममारसः" इत्यन्तेन । "अदृष्ट्वाचौषधीस्तत्रगिरिमुत्पाट्यसर्वतः" इतिच । विष्णुहतादयमन्यःकालनेमिरितिज्ञेयम् ॥ ३० ॥ स० विशल्यकरणीं विशल्यः लक्ष्मणप्राणसंशयात्मकशल्यरहितोरामः क्रियतेअनया चतुर्विधयौषध्येतिसा सुषेणभाषितसवौंषधिः । तामगृह्य अगृहीत्वा ।

[पा०] नैवपद्मत्वमापन्नो लक्ष्मणोलक्ष्मिवर्धनः । नह्यस्यविकृतंवक्त्रंनचश्यामत्वमागतम् । सुप्रभंचप्रसन्नंचमुखमस्यनिरीक्ष्यताम् । पद्मपत्रतलौहस्तौसुप्रसन्नेचलोचने । नेदृशंदृश्यतेरूपंगतासूनांविशांपते । विषादं माकृथावीर सप्राणोयमरिंदम । आख्यातितुप्रसुप्तस्यस्रस्तगात्रस्यभूतले" इत्येतेश्लोकाः पाठभेदवत्तयादृश्यन्ते.

१ ङ. ञ. ञ. ट. मुक्त्वामहाप्राज्ञः. २ ङ. ज.—ट. समीपस्थमुवाचेदंहनुमन्तंमहाकपिम्. ३ घ. याहिशैलं. ञ. ट. गत्वापर्वतंहिमहोदयं.

इति संचिन्त्य हनुमान्गत्वा क्षिप्रं महाबलः ॥ आसाद्य पर्वतश्रेष्ठं त्रिः प्रक्रम्य [1]गिरेः शिरः ॥३४॥
फुल्लनानातरुगणं समुत्पाट्य महाबलः ॥ गृहीत्वा हरिशार्दूलो हस्ताभ्यां समतोलयत् ॥ ३५ ॥
स नीलमिव जीमूतं तोयपूर्णं नभःस्थलात् ॥ [2]आपपात गृहीत्वा तु हनुमाञ्शिखरं गिरेः ॥ ३६ ॥
समागम्य महावेगः संन्यस्य शिखरं गिरेः ॥ विश्रम्य किंचिद्धनुमान्सुषेणमिदमब्रवीत् ॥ ३७ ॥
[3]ओषधीं नावगच्छामि तामहं हरिपुङ्गव ॥ तदिदं शिखरं कृत्स्नं गिरेस्तस्याहृतं मया ॥ ३८ ॥
एवं कथयमानं तं प्रशस्य पवनात्मजम् ॥ सुषेणो वानरश्रेष्ठो जग्राहोत्पाट्य चौषधीम् ॥ ३९ ॥
विस्मितास्तु बभूवुस्ते रणे वानरराक्षसाः ॥ दृष्ट्वा हनुमतः कर्म सुरैरपि सुदुष्करम् ॥ ४० ॥
ततः संक्षोदयित्वा तामोषधीं वानरोत्तमः ॥ लक्ष्मणस्य ददौ नस्तः सुषेणः सुमहाद्युतेः ॥ ४१ ॥
सशल्यस्तां समाघ्राय लक्ष्मणः परवीरहा ॥ विशल्यो विरुजः शीघ्रमुदतिष्ठन्महीतलात् ॥ ४२ ॥
तमुत्थितं ते हरयो भूतलात्प्रेक्ष्य लक्ष्मणम् ॥ साधुसाध्विति सुप्रीताः सुषेणं प्रत्यपूजयन् ॥ ४३ ॥
एह्येहीत्यब्रवीद्रामो लक्ष्मणं परवीरहा ॥ [4]संस्वजे स्नेहगाढं च बाष्पपर्याकुलेक्षणः ॥ ४४ ॥
अब्रवीच्च परिष्वज्य सौमित्रिं राघवस्तदा ॥ दिष्ट्या त्वां वीर पश्यामि मरणात्पुनरागतम् ॥ ४५ ॥
न हि मे जीवितेनार्थः सीतया चापि लक्ष्मण ॥ को हि मे विजयेनार्थस्त्वयि पञ्चत्वमागते ॥४६॥
इत्येवं वदतस्तस्य राघवस्य महात्मनः ॥ खिन्नः शिथिलया वाचा लक्ष्मणो वाक्यमब्रवीत् ॥ ४७ ॥
तां प्रतिज्ञां प्रतिज्ञाय पुरा सत्यपराक्रम ॥ लघुः कस्मिदिवासत्त्वो नैवं वक्तुमिहार्हसि ॥ ४८ ॥
न हि प्रतिज्ञां कुर्वन्ति वितथां साधवोऽनघ ॥ लक्षणं हि महत्त्वस्य प्रतिज्ञापरिपालनम् ॥ ४९ ॥
नैराश्यमुपगन्तुं ते तदलं मत्कृतेऽनघ ॥ वधेन रावणस्याद्य प्रतिज्ञामनुपालय ॥ ५० ॥

कार्यः ॥ ३१—३३ ॥ इति संचिन्त्येत्यादिश्लोकद्वयमेकान्वयं ॥ समतोलयत् उदक्षिपत् ॥ ३४—३६ ॥ संन्यस्य सेनामध्ये निक्षिप्य ॥३७—४४॥ अब्रवीदित्यादिश्लोकद्वयमेकान्वयं ॥ ४५—४७ ॥ तां प्रतिज्ञां रावणं हत्वा विभीषणमभिषेक्ष्यामीत्येवंरूपां ॥४८—४९॥ नैराश्यं सीतायां विजये चोपेक्षां ॥ ५० ॥

यदिगच्छामि तदादोषः स्यात् लक्ष्मणप्राणप्रणाशेनप्रत्यवेयां । वैक्लव्यं अचातुर्यप्रयोजकचित्तलोलता । यत्तुनागोजिभट्टेन 'विशल्यकरणीपदंतन्मात्रपरंरूढ्याव्याख्याय, लक्ष्मणस्यसप्राणत्वादवश्यमपेक्षितांययगृहीत्वाऽन्यांवातदाभासांगृहीत्वागच्छामितदा महद्वैक्लव्यं अचतुराज्ञत्वादिदोषः स्यात् । विचारकरणेतु कालात्ययेनलक्ष्मणस्यप्राणनाशोदोषः स्यात्' इतिव्याख्यातंतत्तु पूर्वंसुषेणेन चतस्रणामोषधीनामानयनविषयेस्पष्टमुक्तेरेकमात्रानधिकारिकत्वाद्धनूमांवानराणामेतच्चतुष्टययोग्यावस्थावत्त्वोज्जीवनादिवैचित्र्यदर्शनाच्च 'ओषधीर्नावगच्छामि' इत्युत्तरत्रोक्तेश्चासंभावितम् ॥ ३३ ॥ **ति०** त्रिः प्रकंप्य स्वेनपुरास्थापितस्यापिपुनरुत्पाटनार्थंत्रिः कंपनं । पूर्वंसंगृहीतौषधीनांमूर्च्छितयूथपेषुव्ययात्पुनरस्यप्रेषणमितिबोध्यं ॥ **स०** हनुमद्बलेनप्राक्तोपिटङ्कितवदतिश्लेषात्त्रिःकंपनमितिमन्तव्यं ॥ ३४ ॥ **स०** नभस्तलादितिबहुषुपुस्तकेषुपाठः । यत्तुनागोजिभट्टः स्थलान्नभउत्पपातेतिव्याख्यातवान् तत्तु पञ्चम्येव साक्षादितिभ्रान्त्येवयोजनाऽसामर्थ्येनचेतिज्ञेयं ॥ नभस्तलादितिल्यब्लोपनिमित्तापञ्चमी । नभस्तलंप्राप्योत्पपातेत्यन्वयः । स्थलशब्दोपिपदान्तरसापेक्षार्थइतिभ्वादिपदाभावाल्लक्षणयास्थलविशेषस्यकल्प्यत्वाच्च ॥ ३६ ॥ **रामानु०** "लक्ष्मणायददौनस्यंसुषेणः परमौषधं" इत्येतत्प्रकारेणेन्द्रजिद्युद्धेशल्यपीडितानांलक्ष्मणादीनांचिकित्सांकृतवतासंगृहीतौषधेनसुषेणेन " सौम्यशीघ्रमितोगत्वा शैलमोषधिपर्वतम्" इतिहनुमत्प्रेषणमनुपपन्नमिवप्रतीयते । अत्रलक्ष्मणविभीषणादिचिकित्सायामोषधिजातंसर्वविनियुक्तमितिपरिहारस्यवक्तुंशक्यत्वेपिअविस्मरणशीलस्यहनुमतः स्वेनैवाचिरस्थापितपर्वतविषयकंप्रतकेंणावगच्छामीत्यभिधानं त्रिःप्रकंप्योत्पाटनं चविरुद्धमिवप्रतीयते । अत्रपरिहारोविद्वद्भिश्चिन्तनीयः ॥ ४१ ॥ **स०** यंपूर्वमालिङ्ग्यबाष्पपर्याकुलेक्षणोऽभूत्तंगाढंसस्वजे ॥४४॥ **ति०** शिथिलयावाचाखिन्नः 'कोहिमेजीवितेनार्थः' इत्येवंरूपया रावणवधविभीषणराज्यदानप्रतिज्ञाशैथिल्यकरयावाचाखिन्नइत्यर्थः ॥ ४७ ॥ **स०** प्रतिज्ञां प्रतिज्ञायतइतिप्रतिज्ञा रावणवधादिः ॥ ४८ ॥

[पा०] १ ख. ग. श्रेष्ठमप्रकंप्योगिरेस्तटं. २ ग. घ. ङ. ञ. गिरेस्तटं. ३ ङ. ञ. ञ. ट. उत्पपात. ४ ञ.—ट. ओषधीर्नावगच्छामितामहं. ५ ङ. ञ. ञ. ट. सर्वेवानरपुङ्गवाः. घ. ऋक्षवानरपुङ्गवाः. ६ च. छ. ञ. ट. सस्वजेगाढमालिङ्ग्य.

न जीवन्यास्यते शत्रुस्तव बाणपथं गतः ॥ नर्दतस्तीक्ष्णदंष्ट्रस्य सिंहस्येव महागजः ॥ ५१ ॥
अहं तु वधमिच्छामि शीघ्रमस्य दुरात्मनः ॥ यावदस्तं न यात्येष कृतकर्मा दिवाकरः ॥ ५२ ॥
यदि वधमिच्छसि रावणस्य संख्ये यदि च कृतां त्वमिहेच्छसि प्रतिज्ञाम् ॥
यदि तव राजवरात्मजाभिलाषः कुरु च वचो मम शीघ्रमद्य वीर ॥ ५३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

त्र्युत्तरशततमः सर्गः ॥ १०३ ॥

रथान्तरारोहणेनपुनस्समरायसमागच्छति रावणे इन्द्रेण रामाय मातलिसनाथनिजरथप्रेषणम् ॥ १ ॥ रथस्थाभ्यां रामरावणाभ्यामद्भुतयुद्धप्रवर्तनम् ॥ २ ॥ तदा लोकभयावहमहोत्पातप्रादुर्भावः ॥ ३ ॥

लक्ष्मणेन तु तद्वाक्यमुक्तं श्रुत्वा स राघवः ॥ संदधे परवीरघ्नो धनुरादाय वीर्यवान् ॥
रावणाय शरान्घोरान्विससर्ज चमूमुखे ॥ १ ॥
अथान्यं रथमास्थाय रावणो राक्षसाधिपः ॥ अभ्यद्रवत काकुत्स्थं स्वर्भानुरिव भास्करम् ॥ २ ॥
दशग्रीवो रथस्थस्तु रामं वज्रोपमैः शरैः ॥ आजघान महाघोरैर्धाराभिरिव तोयदः ॥ ३ ॥
दीप्तपावकसंकाशैः शरैः काञ्चनभूषणैः ॥ निर्बिभेद रणे रामो दशग्रीवं समाहितम् ॥ ४ ॥
भूमौ स्थितस्य रामस्य रथस्थस्य च रक्षसः ॥ न समं युद्धमित्याहुर्देवगन्धर्वदानवाः ॥ ५ ॥
[ततो देववरः श्रीमाञ्श्रुत्वा तेषां वचोऽमृतम् ॥ आहूय मातलिं शक्रो वचनं चेदमब्रवीत् ॥ ६ ॥
रथेन मम भूयिष्ठं शीघ्रं याहि रघूत्तमम् ॥ आहूय भूतलं यातः कुरु देवहितं महत् ॥ ७ ॥
इत्युक्तो देवराजेन मातलिर्दैवसारथिः ॥ प्रणम्य शिरसा देवं ततो वचनमब्रवीत् ॥ ८ ॥
शीघ्रं यास्यामि देवेन्द्र सारथ्यं च करोम्यहम् ॥ ततो हयैश्च संयोज्य हरितैः स्यन्दनोत्तमम् ॥९॥]
ततः काञ्चनचित्राङ्गः किङ्किणीशतभूषितः ॥ तरुणादित्यसंकाशो वैडूर्यमयकूबरः ॥ १० ॥

यास्यते यास्यति ॥५१॥ कृतकर्मा कृतसंचारः ॥५२॥ कृतां निर्व्यूढां ॥ ५३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

अथेन्द्ररथमारुह्य संग्रामस्त्रिशततमे—लक्ष्मणेनेत्यादि ॥ १—९ ॥ तत इत्यादिसार्धश्लोकत्रयमेकान्वयं ॥ कूबरः युगाधारदारु । "कूबरस्तु युगंधरः" इत्यमरः । काञ्चनापीडैः काञ्चनालंकारैः । श्वेतप्रकीर्णकैः श्वेतचामरैः । "चामरं तु प्रकीर्णकं" इत्यमरः । हरिभिः हरितवर्णैः । रुक्मवेणुध्वजः कनकदण्डध्वजः । देवराजरथ इति । य इति शेषः ।

ति० कृतकर्मा अद्यतनकर्तव्यांशेकृतलोकानुग्रहः । यावदस्तंनयातीत्यनेनाश्विनशुक्लप्रतिपद्येषावार्तेतिगम्यते । स० कृतकर्मालोककृतकर्मसाक्षी ॥ ५२ ॥ इतिद्व्युत्तरशततमःसर्गः ॥ १०२ ॥

स० धनुरादायबाणान्संदधे । चमूमुखेरावणाय तस्य ॥ १ ॥ स्वर्भानुः राहुः अत्रापिनागोजिभट्टेन " अथान्यंरथमास्थाय " त्यनेनरावणेनशुक्राज्ञयाजयनिमित्तंनिर्कुंभिलायामारब्धहोमकर्मणोवानरद्वाराहिंसनंपुराणान्तरोक्तमत्रानुसंधेयमितिसूचितमितिवदता"शीघ्रंशुक्रान्तिकंययौ"इत्यारभ्य–"प्रविश्यान्तःपुरेवेश्मन्यङ्गदोवेगवत्तरः । समानयत्केशपाशेधृत्वामन्दोदरींशुभाम् ।" इत्यादिगर्भीकृत्य—"दृढंस्यन्दनमास्थाय"इत्यन्तमध्यात्मरामायणं संगृहीतमितिज्ञायते । तत्प्रामाण्येसंदिहतेमहान्तइतिनतदुक्तंज्ञापकं ।

[पा०] १ ङ. च. ञ. ञ. ट. बाणवशंगतः. २ क.—ङ. ञ. ञ. ट. राजसुताभिलाषश्चार्यकुरुच. ३ ख. ग. ङ. ञ. मास्थाय. ४ ङ. च. छ. ञ. ट. महाशैलंधाराभिरिव. ५ ततोदेववरइत्यादयः स्यन्दनोत्तममित्यन्ताःश्लोकाः ङ. च. छ. ञ. ञ. ट. पाठेषुदृश्यन्ते.

मदश्वैः काञ्चनापीडैर्युक्तः श्वेतप्रकीर्णकैः ॥ हरिभिः सूर्यसंकाशैर्हेमजालविभूषितैः ॥
कार्मुकवेणुध्वजः श्रीमान्देवराजरथो वरः ॥ ११ ॥
देवराजेन संदिष्टो रथमास्थाय मातलिः ॥ अभ्यवर्तत काकुत्स्थमवतीर्य त्रिविष्टपात् ॥ १२ ॥
अब्रवीच्च तदा रामं प्रतोदो रथे स्थितः ॥ प्राञ्जलिर्मातलिर्वाक्यं सहस्राक्षस्य सारथिः ॥ १३ ॥
सहस्राक्षेण काकुत्स्थ रथोयं विजयाय ते ॥ दत्तस्तव महासत्त्व श्रीमञ्शत्रुनिबर्हण ॥ १४ ॥
इदमैन्द्रं महच्चापं कवचं चाग्निसन्निभम् ॥ शराश्चादित्यसंकाशाः शक्तिश्च विमला शिता ॥ १५ ॥
आरुह्येमं रथं वीर राक्षसं जहि रावणम् ॥ मया सारथिना राजन्महेन्द्र इव दानवान् ॥ १६ ॥
इत्युक्तः संपरिक्रम्य रथं समभिवाद्य च ॥ आरुरोह तदा रामो लोकाँल्लक्ष्म्या विराजयन् ॥ १७ ॥
तद्बभूवाद्भुतं युद्धं तुमुलं रोमहर्षणम् ॥ रामस्य च महाबाहो रावणस्य च रक्षसः ॥ १८ ॥
स गान्धर्वेण गान्धर्वं दैवं दैवेन राघवः ॥ अस्त्रं राक्षसराजस्य जघान परमास्त्रवित् ॥ १९ ॥
अस्त्रं तु परमं घोरं राक्षसं राक्षसाधिपः ॥ ससर्ज परमक्रुद्धः पुनरेव निशाचरः ॥ २० ॥
ते रावणधनुर्मुक्ताः शराः काञ्चनभूषणाः ॥ अभ्यवर्तन्त काकुत्स्थं सर्पा भूत्वा महाविषाः ॥ २१ ॥
ते दीप्तवदना दीप्तं वमन्तो ज्वलनं मुखैः ॥ राममेवाभ्यवर्तन्त व्यादितास्या भयानकाः ॥ २२ ॥
तैर्बभूवुकिसमस्पर्शैर्दीप्तभोगैर्महाविषैः ॥ दिशश्च संतताः सर्वाः प्रदिशश्च समावृताः ॥ २३ ॥
तान्दृष्ट्वा पन्नगास्त्रामः समापतत आहवे ॥ अस्त्रं गारुत्मतं घोरं प्रादुश्चक्रे भयावहम् ॥ २४ ॥
ते राघवशरा मुक्ता रुक्मपुङ्खाः शिखिप्रभाः ॥ सुपर्णाः काञ्चना भूत्वा विचेरुः सर्पशत्रवः ॥ २५ ॥
ते तान्सर्वाञ्शराञ्जघ्नुः सर्परूपान्महौजवान् ॥ सुपर्णरूपा रामस्य विशिखाः कामरूपिणः ॥ २६ ॥
अस्त्रे प्रतिहते क्रुद्धो रावणो राक्षसाधिपः ॥ अभ्यवर्षत्तदा रामं घोराभिः शरवृष्टिभिः ॥ २७ ॥
ततः शरसहस्रेण राममक्लिष्टकारिणम् ॥ अर्दयित्वा शरौघेण मातलिं प्रत्यविध्यत ॥ २८ ॥
चिच्छेद केतुमुद्दिश्य शरेणैकेन रावणः ॥ पातयित्वा रथोपस्थे रथात्केतुं च काञ्चनम् ॥
ऐन्द्रानपि जघानाश्वाञ्शरजालेन रावणः ॥ २९ ॥
तं दृष्ट्वा सुमहत्कर्म रावणस्य दुरात्मनः ॥ विषेदुर्देवगन्धर्वा दानवाश्चारणैः सह ॥ ३० ॥

योस्ति तमारुह्येत्युत्तरत्रान्वयः । संदिष्टः चोदितः । त्रिविष्टपात् स्वर्गात् ॥ १०—१२ ॥ प्रतोदः अश्वप्रेरणकाष्ठं ॥ १३ ॥ सहस्राक्षेणेत्यादिश्लोकद्वयमेकान्वयं ॥ इदमिति ॥ अत्र चापादिषु यथायोग्यं दत्त इत्येतल्लिङ्गवचनविपरिणामेन योजनीयं ॥ १४—१६ ॥ संपरिक्रम्य प्रदक्षिणीकृत्य । लोकान् लक्ष्म्या विराजयन् चन्द्रप्रभयेव स्वकान्त्या सर्वलोकान् प्रकाशयन्नित्यर्थः ॥ १७—२१ ॥ व्यादितास्याः व्याप्ताननाः । भयानकाः भयंकराः ॥ २२ ॥ दीप्तभोगैः दीप्तफणैः । "भोगः सुखे रुयादिभृतावहेश्च फणकाययोः" इत्यमरः । प्रदिशः दिक्कोणाः ॥ २३ ॥ प्रादुश्चक्रे प्रयुयुजे ॥ २४ ॥ शिखिप्रभाः अग्निप्रभाः । सुपर्णाः गरुडाः ॥ २५—२८ ॥ चिच्छेदेत्यादिसार्धश्लोकमेकं वाक्यं ॥ केतुं ध्वजपटं । उद्दिश्य लक्षी-

---

अथान्यमित्यस्य पूर्वयुद्धकालेरथध्वजादीनांशैथिल्यादन्यमित्युक्तिसंभवेनोक्तार्थस्यासूचकत्वाच्च । ति० पूर्वरणात्पलायनोत्त्यारावणोद्देश्यकशरविसर्गस्मरणभूमावसंभवादाश्विनप्रतिपन्मध्याह्नेएतद्युद्धप्रवृत्तिः ॥ २ ॥ ति० देवराजेनसंदिष्टः शीघ्रंगच्छेत्याज्ञप्तो मातलिरित्यन्वयः । पूर्वाज्ञयावस्तुसज्जीकरणं । पुनराज्ञयामनुष्यलोकंप्रतिचलनमितिबोध्यम् ॥ १२ ॥ ति० द्वैरथं द्वौरथौयस्तौ द्विरथौ । तयोरिदंद्वैरथं ॥ १८ ॥

[पा०] १ ख. च. छ. झ. ट. द्वैरथंरोम. २ ज. न्महाविषान्. ३ च. ज. ञ. केतुमिन्द्रस्य.

राममार्तं तदा दृष्ट्वा सिद्धाश्च परमर्षयः ॥ व्यथिता वानरेन्द्राश्च बभूवुः सविभीषणाः ॥ ३१ ॥
रामचन्द्रमसं दृष्ट्वा ग्रस्तं रावणराहुणा ॥ प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियाम् ॥
समाक्रम्य बुधस्तस्थौ प्रजानामशुभावहः ॥ ३२ ॥
सधूमपरिवृत्तोर्मिः प्रज्वलन्निव सागरः ॥ उत्पपात तदा क्रुद्धः स्पृशन्निव दिवाकरम् ॥ ३३ ॥
शस्त्रवर्णः सुपरुषो मन्दरश्मिर्दिवाकरः ॥ अदृश्यत कबन्धाङ्कः संसक्तो धूमकेतुना ॥ ३४ ॥
कोसलानां च नक्षत्रं व्यक्तमिन्द्राग्निदैवतम् ॥ आक्रम्याङ्गारकस्तस्थौ विशाखामपि चाम्बरे ॥३५॥
दशास्यो विंशतिभुजः प्रगृहीतशरासनः ॥ अदृश्यत दशग्रीवो मैनाक इव पर्वतः ॥ ३६ ॥
निरस्यमानो रामस्तु दशग्रीवेण रक्षसा ॥ नाशक्नोदभिसंधातुं सायकान्रणमूर्धनि ॥ ३७ ॥
स कृत्वा भ्रुकुटिं क्रुद्धः किंचित्संरक्तलोचनः ॥ जगाम सुमहाक्रोधं निर्दहन्निव चक्षुषा ॥ ३८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्र्युत्तरशततमः सर्गः ॥ १०३ ॥

चतुरुत्तरशततमः सर्गः ॥ १०४ ॥

रामेण मातलिसमानीतेन्द्रशक्त्या रावणविसृष्टशूलविभेदनपूर्वकं रावणललाटोरसिबाणैः प्रहरणम् ॥ १ ॥

तस्य क्रुद्धस्य वदनं दृष्ट्वा रामस्य धीमतः ॥ सर्वभूतानि वित्रेसुः प्राकम्पत च मेदिनी ॥ १ ॥
सिंहशार्दूलवाञ्शैलः संचचाल चलद्रुमः ॥ बभूव चातिक्षुभितः समुद्रः सरितांपतिः ॥ २ ॥
खगाश्च खरनिर्घोषा गगने परुषा घनाः ॥ औत्पातिकानि नर्दन्तः समन्तात्परिचक्रमुः ॥ ३ ॥
रामं दृष्ट्वा सुसंक्रुद्धमुत्पातांश्च सुदारुणान् ॥ वित्रेसुः सर्वभूतानि रावणस्याभवद्भयम् ॥ ४ ॥
विमानस्थास्तदा देवा गन्धर्वाश्च महोरगाः ॥ ऋषिदानवदैत्याश्च गरुत्मन्तश्च खेचराः ॥ ५ ॥
ददृशुस्ते महायुद्धं लोकसंवर्तसंस्थितम् ॥ नानाप्रहरणैर्भीमैः शूरयोः संप्रयुध्यतोः ॥ ६ ॥
ऊचुः सुरासुराः सर्वे तदा विग्रहमागताः ॥ प्रेक्षमाणा महद्युद्धं वाक्यं भक्त्या प्रहृष्टवत् ॥ ७ ॥

कृत्य । रथात् रथावयवदण्डात् ॥ २९—३१ ॥ रामस्य तादृशदशादर्शनेन संजातानि दिव्यानि भौमानि च वैकृतान्याह-रामचन्द्रमसमित्यादिना ॥ प्राजापत्यं नक्षत्रं प्रजापतिदेवताकनक्षत्रभूतां रोहिणीं। बुधे रोहिणीं प्राप्ते जगत्पीडा भवतीति भावः ॥३२—३३ ॥ शस्त्रवर्णः असिश्यामः ॥ ३४ ॥ कोसलानां इक्ष्वाकूणां । विशाखायास्तन्नक्षत्रत्वमेतत्काण्डचतुर्थसर्गे दर्शितं ॥ ३५—३६ ॥ अभिसंधातुं धनुष्यारोपयितुं ॥ ३७ ॥ अथैतद्दर्शनेन रामकोपं दर्शयति-स कृत्वेति ॥ ३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्र्युत्तरशततमः सर्गः ॥ १०३ ॥

अथ रावणस्य शूलोद्धरणं चतुःशततमे-तस्येत्यादि ॥ १—२ ॥ औत्पातिकानि उत्पातसूचकानि । नर्दन्तः गर्जन्तः ॥ ३—४ ॥ विमानस्था इत्यादिश्लोकद्वयमेकान्वयं । लोकसंवर्तस्य प्रलयस्येव संस्थितं संस्थानं यस्य तत्तथोक्तं ॥ ५—६ ॥ विग्रहमागताः विग्रहं युद्धं उद्दिश्यआगताः । युद्धं द्रष्टुमागता इत्यर्थः । यद्वा विग्रहमागताः रामरावणपक्षपातात् परस्परं कलहाय-

---

ति० एतेउत्पातारामस्यतथामनुष्यधर्मनटनसूचकाइतिबोध्यं ॥ ३७ ॥ ती० क्रुद्धः सरामः सुमहाक्रोधंजगाम । सुमहाक्रोधप्राप्तौ स्वजनार्तिर्भूतवैपरीत्यंरावणपराक्रमश्चनिमित्तं ॥ ३८ ॥ इतित्र्युत्तरशततमःसर्गः ॥ १०३ ॥

स० उत्तरग्रन्थेनसहैकःखण्डःएकोनसप्ततिश्लोकात्मासर्गइतिकेचिदाहुः । सर्गान्तिमश्लोकवृत्तादिभेदस्यप्रायिकत्वात् 'तस्यक्रुद्धस्य'इतिसर्गप्रारंभपद्यमिति केचित् ॥ १ ॥

[पा०] १ ख. ग. ङ.—ट. तदायुद्धं.

दशग्रीवं जयेत्याहुरसुराः समवस्थिताः ॥ देवा राममथोचुस्ते त्वं जयेति पुनः पुनः ॥ ८ ॥
एतस्मिन्नन्तरे क्रोधाद्राघवस्य स रावणः ॥ प्रहर्तुकामो दुष्टात्मा स्पृशन्प्रहरणं महत् ॥ ९ ॥
वज्रसारं महानादं सर्वशत्रुनिबर्हणम् ॥ शैलशृङ्गनिभैः कूटैश्चितं दृष्टिभयावहम् ॥ १० ॥
सधूममिव तीक्ष्णाग्रं युगान्ताग्निचयोपमम् ॥ अतिरौद्रमनासाद्यं कालेनापि दुरासदम् ॥ ११ ॥
त्रासनं सर्वभूतानां दारणं भेदनं तदा ॥ प्रदीप्तमिव रोषेण शूलं जग्राह रावणः ॥ १२ ॥
तच्छूलं परमक्रुद्धो मध्ये जग्राह वीर्यवान् ॥ अनेकैः समरे शूरै राक्षसैः परिवारितः ॥ १३ ॥
समुद्यम्य महाकायो ननाद युधि भैरवम् ॥ संरक्तनयनो रोषात्स्वसैन्यमभिहर्षयन् ॥ १४ ॥
पृथिवीं चान्तरिक्षं च दिशश्च प्रदिशस्तथा ॥ प्राकम्पयत्तदा शब्दो राक्षसेन्द्रस्य दारुणः ॥ १५ ॥
अतिनादस्य नादेन तेन तस्य दुरात्मनः ॥ सर्वभूतानि वित्रेसुः सागरश्च प्रचुक्षुभे ॥ १६ ॥
स गृहीत्वा महावीर्यः शूलं तद्रावणो महत् ॥ विनद्य सुमहानादं रामं परुषमब्रवीत् ॥ १७ ॥
शूलोऽयं वज्रसारस्ते राम रोषान्मयोद्यतः ॥ तव भ्रातृसहायस्य सद्यः प्राणान्हरिष्यति ॥ १८ ॥
रक्षसामद्य शूराणां निहतानां चमूमुखे ॥ त्वां निहत्य रणश्लाघिन्करोमि तरसा समम् ॥
तिष्ठेदानीं निहन्मि त्वामेष शूलेन राघव ॥ १९ ॥
एवमुक्त्वा स चिक्षेप तच्छूलं राक्षसाधिपः ॥ २० ॥
तद्रावणकरान्मुक्तं विद्युज्ज्वालासमाकुलम् ॥ अष्टघण्टं महानादं वियद्गतमशोभत ॥ २१ ॥
तच्छूलं राघवो दृष्ट्वा ज्वलन्तं घोरदर्शनम् ॥ ससर्ज विशिखान्रामश्चापमायम्य वीर्यवान् ॥ २२ ॥
आपतन्तं शरौघेण वारयामास राघवः ॥ उत्पतन्तं युगान्ताग्निं जलौघैरिव वासवः ॥ २३ ॥
निर्ददाह स तान्बाणान्रामकार्मुकनिस्सृतान् ॥ रावणस्य महाशूलः पतङ्गानिव पावकः ॥ २४ ॥
दृष्ट्वातान्भस्मसाद्भूताञ्शूलसंस्पर्शचूर्णितान् ॥ सायकानन्तरिक्षस्थान्राघवः क्रोधमाहरत् ॥ २५ ॥
स तां मातलिनाऽऽनीतां शक्तिं वासवनिर्मिताम् ॥ जग्राह परमक्रुद्धो राघवो रघुनन्दनः ॥ २६ ॥

माना इत्यर्थः । भक्त्या प्रेक्षमाणाः सन्तः प्रहृष्टवद्वाक्यमूचुरिति संबन्धः ॥ ७ ॥ तद्वाक्यं विविच्य दर्शयति—दशग्रीवमिति ॥ यद्यप्यसुराणामपि रावणो बाधकः तथापि देवानामतिशयो मा भूदित्यसूयया रावणं वर्धयन्तीति बोध्यम् ॥ ८ ॥ एतस्मिन्नन्तर इत्यादिश्लोकचतुष्टयमेकान्वयं ॥ राघवस्य क्रोधात् राघवविषयक्रोधात् । प्रहरणं आयुधं । स्पृशन् परामृशन् । किं वेदानीं ग्रहीतुमुचितमिति क्षणं चिन्तयन्नित्यर्थः । कूटैः शिखराकारैरयःशङ्कुभिः चितं युक्तमित्यर्थः । अतिरौद्रं रौद्रं शूलमतिवर्तमानं । अनासाद्यं शत्रुभिरप्रधृष्यं । कालेन यमेन दारणं क्रकचवत्कृन्तनं । भेदनं द्विधाकरणं । दुष्टात्मा रावणः राघवस्य क्रोधात् प्रहर्तुकामः महत्प्रहरणं स्पृशन्सन् वज्रसारत्वादिविशिष्टं शूलं रोषेण प्रदीप्त इव स्थितो रावणो जग्राहेति संबन्धः ॥ ९—१६ ॥ विनद्येति । पूर्वं शूलोद्यमनजनितोत्साहकृतो नाद उक्तः । इह प्रक्षेपजनितोत्साहकृतो नाद इति विवेकः ॥ १७—१८ ॥ रक्षसामित्यादिसार्धश्लोकमेकान्वयं ॥ त्वां विनिहत्य रक्षोभिः समं करिष्यामीत्यर्थः । "तुल्यार्थैः" इत्यादिना षष्ठी ॥ १९—२० ॥ विद्युज्ज्वाला विद्युत्सदृ-

स० यद्यपि पूर्वंसुरासुराइतिसमीरणाद्देवाराममथोचुरितिपूर्वंदेवाः पूर्वदेवास्तुतदनन्तरमुदाहर्तव्याः । तथापि तेषांबाहुल्यात्तच्चायानैष्फल्यान्निर्देशमात्रेणमाननीयताभिप्रेणनाद्वाप्रथमतोनिर्देशः । तत्रापिसाधवोसुरारामपक्षपातिनःसन्तीतिविशेषद्योतनायव्युत्क्रमनिर्देशश्चेतिवारामपराजयरूपोव्युत्क्रमोन । अपितु निर्देशमात्रइतिज्ञापनायवाऽयंनिर्देशइतिज्ञेयम् ॥८॥ स० भ्रातृसहायस्य लक्ष्मणमात्रसहायकस्य मद्भ्रातृविभीषणसहायस्यवा ॥ १८ ॥

[पा०] १ क. ख. ङ. ञ. ट. कूटैश्चित्तदृष्टि. २ च. छ. भयावहैः. ३ क. ख. ङ. च. छ. ञ. ण. ट. जग्राहयुधि. ४ ङ. ञ. क्रोधमूर्च्छितः.

सा तोलिता बलवता शक्तिर्घण्टाकृतस्वना ॥ नभः प्रज्वालयामास युगान्तोल्केव सप्रभा ॥ २७ ॥
सा क्षिप्ता राक्षसेन्द्रस्य तस्मिञ्शूले पपात ह ॥ भिन्नः शक्त्या महाञ्शूलो निपपात हतद्युतिः ॥
[साधुसाध्विति भूतानि प्रशशंसुः रघूत्तमम् ॥ २८ ॥]
निर्बिभेद ततो बाणैर्हयानस्य महाजवान् ॥ रामस्तीक्ष्णैर्महावेगैर्वज्रकल्पैः शितैः शरैः ॥ २९ ॥
निर्बिभेदोरसि ततो रावणं निशितैः शरैः ॥ राघवः परमायत्तो ललाटे पत्रिभिस्त्रिभिः ॥ ३० ॥
स शरैर्भिन्नसर्वाङ्गो गात्रप्रस्रुतशोणितः ॥ राक्षसेन्द्रः समूहस्थः फुल्लाशोक इवाबभौ ॥ ३१ ॥
स रामबाणैरभिविद्धगात्रो निशाचरेन्द्रः क्षतजार्द्रगात्रः ॥
जगाम खेदं च समाजमध्ये क्रोधं च चक्रे सुभृशं तदानीम् ॥ ३२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुरुत्तरशततमः सर्गः ॥ १०४ ॥

पञ्चोत्तरशततमः सर्गः ॥ १०५ ॥

रामेणरावणंप्रति सीताहरणरूपकुकर्मानुव्याहरणेनगर्हणपूर्वकं बाणगणाभिवर्षणम् ॥ १ ॥ रामबाणगणाभिघातनिर्विण्ण-तया कर्तव्यमूढेसतिरावणे तत्सारथिना रणाङ्गणादन्यतोरथापवाहनम् ॥ २ ॥

स तेन तु तथा क्रोधात्काकुत्स्थेनार्दितो रणे ॥ रावणः समरश्लाघी महाक्रोधमुपागमत् ॥ १ ॥
स दीप्तनयनो रोषाच्चापमायम्य वीर्यवान् ॥ अभ्यर्दयत्सुसंक्रुद्धो राघवं परमाहवे ॥ २ ॥
बाणधारासहस्रैस्तैः सतोयद इवाम्बरात् ॥ राघवं रावणो बाणैस्तटाकमिव पूरयत् ॥ ३ ॥
पूरितः शरजालेन धनुर्मुक्तेन संयुगे ॥ महागिरिरिवाकम्प्यः काकुत्स्थो न प्रकम्पते ॥ ४ ॥
स शरैः शरजालानि वारयन्समरे स्थितः ॥ गभस्तीनिव सूर्यस्य प्रतिजग्राह वीर्यवान् ॥ ५ ॥
ततः शरसहस्राणि क्षिप्रहस्तो निशाचरः ॥ निजघानोरसि क्रुद्धो राघवस्य महात्मनः ॥ ६ ॥
स शोणितसमादिग्धः समरे लक्ष्मणाग्रजः ॥ दृष्टः फुल्ल इवारण्ये सुमहान्किंशुकद्रुमः ॥ ७ ॥
शराभिघातसंरब्धः सोपि जग्राह सायकान् ॥ काकुत्स्थः सुमहातेजा युगान्तादित्यतेजसः ॥
ततोऽन्योन्यं सुसंरब्धावुभौ तौ रामरावणौ ॥ शरान्धकारे समरे नोपालक्षयतां तदा ॥ ९ ॥
ततः क्रोधसमाविष्टो रामो दशरथात्मजः ॥ उवाच रावणं वीरः प्रहस्य परुषं वचः ॥ १० ॥

शज्वाला ॥२१—२८ ॥ बाणैः शब्दायमानैः । "अण बाण शब्दे" इत्यस्मात् पचाद्यच् । बाणशब्दः शरभेद-संज्ञेत्यप्याहुः ॥२९॥ पत्रिभिस्त्रिभिरिति प्रयोगभेदान्न-पुनरुक्तिः । पत्रिभिः पत्रवद्भिरित्येके ॥३०॥ समूहस्थः युद्धस्थः ॥ ३१ ॥ समाजे युद्धे ॥३२॥ इति श्रीगोवि-न्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुरुत्तरशततमः सर्गः ॥१०४॥

अथ श्रान्तस्य रावणस्य सूतेन रथापवाहनं पञ्च-शततमे—स तु तेनेत्यादि ॥ १—२ ॥ बाणधारास-हस्रैः हेतुभिः तोयद इव रावणः तैः धाराभूतैः बाणैः तटाकमिव रामं पूरयत् अपूरयत् ॥३—८॥ अन्योन्यं

स० बाणवद्भिः "वणशब्दे बाणेलेके" इत्युक्तेःशब्दायमानैः । बाणवद्भिः केषुचित्प्रधानेषुसाक्षाज्ज्याविसृष्टेष्विषुषु तेभ्योपिराम-माहात्म्येननिस्सरन्तिबाणाइतिबाणानांबाणवत्त्वंसंभवतीतिवातथोक्तिः ॥ २९ ॥ ति० समूहस्थः समूहतयास्थितः । बहुशिरः-पाणिलात्तथात्वं ॥ ३१ ॥ इतिचतुरधिकशततमःसर्गः ॥ १०४ ॥

[पा०] १ क. ङ.—ट. गतद्युतिः. ख. ग. महाद्युतिः. २ इदमर्धं क. ख. च. छ. पाठेषुदृश्यते. ३ ङ. ठ. रामः क्षिप्तैर्महावेगैर्बाणवद्भिरजिह्मगैः. ४ च. छ. ब. ट. सुभृशंदशास्यः. ५ ङ.—ट. भृशं. ६ ख. ङ.—ट. दीप्तनयनोमर्षाच्चापमुद्यम्य.

मम भार्या जनस्थानादज्ञानाद्राक्षसाधम ॥ हृता ते विवशा यस्मात्तस्मात्त्वं नासि वीर्यवान् ॥ ११ ॥
मया विरहितां दीनां वर्तमानां महावने ॥ वैदेहीं प्रसभं हृत्वा शूरोऽहमिति मन्यसे ॥ १२ ॥
स्त्रीषु शूर विनाथासु परदाराभिमर्शक ॥ कृत्वा कापुरुषं कर्म शूरोहमिति मन्यसे ॥ १३ ॥
भिन्नमर्याद निर्लज्ज चारित्रेष्वनवस्थित ॥ दर्पान्मृत्युमुपादाय शूरोऽहमिति मन्यसे ॥ १४ ॥
शूरेण धनदभ्रात्रा बलैः समुदितेन च ॥ श्लाघनीयं यशस्यं च कृतं कर्म महत्त्वया ॥ १५ ॥
उत्सेकेनाभिपन्नस्य गर्हितस्याहितस्य च ॥ कर्मणः प्राप्तुहीदानीं तस्याद्य सुमहत्फलम् ॥ १६ ॥
शूरोऽहमिति चात्मानमवगच्छसि दुर्मते ॥ नैव लज्जाऽस्ति ते सीतां चोरवद्व्यपकर्षतः ॥ १७ ॥
यदि मत्सन्निधौ सीता धर्षिता स्यात्त्वया बलात् ॥ भ्रातरं तु खरं पश्येस्तदा मत्सायकैर्हतः ॥१८॥
दिष्ट्याऽसि मम दुष्टात्मंश्चक्षुर्विषयमागतः ॥ अद्य त्वां सायकैस्तीक्ष्णैर्नयामि यमसादनम् ॥ १९ ॥
अद्य ते मच्छरैश्छिन्नं शिरो ज्वलितकुण्डलम् ॥ क्रव्यादा व्यपकर्षन्तु विकीर्णं रणपांसुषु ॥ २० ॥
निपत्योरसि गृध्रास्ते क्षितौ क्षिप्तस्य रावण ॥ पिबन्तु रुधिरं तर्षाच्छरशल्यान्तरोत्थितम् ॥ २१ ॥
अद्य मद्बाणभिन्नस्य गतासोः पतितस्य ते ॥ कर्षन्त्वन्त्राणि पतगा गरुत्मन्त इवोरगान् ॥ २२ ॥
[दुष्टोसि महतः कालाद्दिष्ट्या दृष्टिपथं गतः ॥ अद्य क्रोधं विमोक्ष्यामि सीताहरणसंभवम्] ॥२३॥
इत्येवं संवदन्वीरो रामः शत्रुनिबर्हणः ॥ राक्षसेन्द्रं समीपस्थं शरवर्षैरवाकिरत् ॥ २४ ॥
बभूव द्विगुणं वीर्यं बलं हर्षश्च संयुगे ॥ रामस्यास्त्रबलं चैव शत्रोर्निधनकाङ्क्षिणः ॥ २५ ॥
प्रादुर्बभूवुरस्त्राणि सर्वाणि विदितात्मनः ॥ प्रहर्षाच्च महातेजाः शीघ्रहस्ततरोऽभवत् ॥ २६ ॥
शुभान्येतानि चिह्नानि विज्ञायात्मगतानि सः ॥ भूय एवार्दयद्रामो रावणं राक्षसान्तकृत् ॥ २७ ॥
हरीणां चाश्मनिकरैः शरवर्षैश्च राघवात् ॥ हन्यमानो दशग्रीवो विघूर्णहृदयोऽभवत् ॥ २८ ॥
यदा च शस्त्रं नारेभे न व्यकर्षच्छरासनम् ॥ नास्य प्रत्यकरोद्वीर्यं विक्लवेनान्तरात्मना ॥ २९ ॥
क्षिप्ताश्चापि शरास्तेन शस्त्राणि विविधानि च ॥ न रणार्थाय वर्तन्ते मृत्युकालेऽभिवर्तते ॥ ३० ॥

नोपालक्षयतामित्यन्वयः ॥ ९—१० ॥ मम अज्ञानात् ममादर्शनात् त्वदविवेकादिति वा । ते त्वया ॥११—१२ ॥ कापुरुषं कापुरुषसंबन्धि ॥ १३—१४ ॥ शूरेणेत्यादि सोपहासोक्तिः ॥ १५ ॥ उत्सेकेन गर्वेण ॥ १६—१९ ॥ शिरो ज्वलितकुण्डलमित्यनेन तदानीमन्तकाले रावण एकशिरस्कः स्थित इति गम्यते ॥ २० ॥ तर्षः पिपासा । शरशल्यान्तरोत्थितं शरशल्यक्षतविवरादुत्थितमित्यर्थः ॥ २१–२७ ॥ राघवात् राघवस्य । विभक्तिव्यत्यय आर्षः । विघूर्णहृदयः भ्रान्तहृदयः ॥ २८ ॥ यदा चेत्यादिश्लोकत्रयमेकान्वयं । यदा शस्त्रं नारेभे शस्त्रं न प्रयुक्तवान् । शरासनं च न व्यकर्षत् । यदा च विक्लवेन विवशेन । अन्तरात्मना मनसा हेतुना । अस्य रामस्य वीर्यं स्ववीर्यं च न प्रत्यकरोत् न प्रतिजघान । तेन रावणेन क्षिप्ताः शरा अपि विविधानि शस्त्राणि च न रणार्थाय वर्तन्ते । छेदनभेदनादिरणप्रयोजनं कर्तुं यदा नाशक्नुवन् । तदा मृत्युकाले अभिवर्ततः अभिवर्तमानस्य अस्य रावणस्य । रथनेता सूतः असंभ्रान्तः सत् तदवस्थं पूर्वोक्तावस्थं रावणं समीक्ष्य तस्य रथं युद्धान् युद्धस्थलात् शनैः । अपवाहयत् अपावाहयत् । अन्य-

---

ति० अज्ञानात् अविवेकात् मत्स्वरूपाज्ञानाच्च ॥ ११ ॥ शस्त्रंनारेभे मोक्तुंनारब्धवान् । शरासनंयदानचकर्ष । विक्लवेन बलेनान्तरात्मना उपलक्षितोयमितिमतीरामोनास्यरावणस्यविषये वीर्यंप्रत्यकरोत् तत्संहारायनप्रदर्शितवानितिभावः । अनेन क्षिणिग्लानिमति मतिमता तदमतेन नतत्रशस्त्रास्त्रप्रयोगःकर्तव्यइतिनीतिमादर्शितवात्रामइतिसूचितंभवति ॥ २९ ॥ स० गार्थायेतिपाठेऽर्थोनिवृत्तिरित्यर्थः ॥ ३० ॥

पा०] १ ङ. ञ. चौरवत्. २ ख. ङ. च. छ. ञ. ट. क्षिप्तस्यसायकैः. ३ अयंश्लोकः क. ख. च. छ. पाठेषुदृश्यते. —ङ. ञ. ञ. ट. मरणार्थाय. ५ ख. ङ. च. छ. ञ. कालोऽभ्यवर्तत.

सूतस्तु रथनेताऽस्य तदवस्थं समीक्ष्य तम् ॥ शनैर्युद्धादसंभ्रान्तो रथं तस्यापवाहयत् ॥ ३१ ॥
[रामबाणविभिन्नाङ्गो रावणो राक्षसेश्वरः ॥ निरस्तविक्रमस्सङ्ख्ये रणे श्रान्तः पपात सः ॥ ३२ ॥
सूतस्तु व्यथितं बाणैः स्यन्दनस्थं निरीक्ष्य तम् ॥ तस्माद्रणादथोवाह रावणं हतपौरुषम् ॥ ३३ ॥
रथं च तस्याथ जवेन सारथिर्निवार्य भीमं जलदस्वनं तदा ॥
जगाम भीत्या समरान्महीपतिं निरस्तवीर्यं पतितं समीक्ष्य ॥ ३४ ॥]
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चोत्तरशततमः सर्गः ॥ १०५ ॥

षडुत्तरशततमः सर्गः ॥ १०६ ॥

अपवाहितरथंसारथिंप्रति क्रुद्धेनरावणेनभर्त्सनम् ॥ १ ॥ सारथिना तंप्रति रथापवहनस्यहेतुकत्वोक्त्यासमाश्वासनपूर्वकं तदाज्ञया पुनारामाभ्मतोरथानयनम् ॥ २ ॥

स तु मोहात्सुसंक्रुद्धः कृतान्तबलचोदितः ॥ क्रोधसंरक्तनयनो रावणः सूतमब्रवीत् ॥ १ ॥
हीनवीर्यमिवाशक्तं पौरुषेण विवर्जितम् ॥ भीरुं लघुमिवासत्त्वं विहीनमिव तेजसा ॥ २ ॥
विमुक्तमिव मायाभिरस्त्रैरिव बहिष्कृतम् ॥ मामवज्ञाय दुर्बुद्धे स्वया बुद्ध्या विचेष्टसे ॥ ३ ॥
किमर्थं मामवज्ञाय मच्छन्दमनवेक्ष्य च ॥ त्वया शत्रोः समक्षं मे रथोऽयमपवाहितः ॥ ४ ॥
त्वयाऽद्य हि ममानार्य चिरकालसमार्जितम् ॥ यशो वीर्यं च तेजश्च प्रत्ययश्च विनाशितः ॥ ५ ॥
शत्रोः प्रख्यातवीर्यस्य रञ्जनीयस्य विक्रमैः ॥ पश्यतो युद्धलुब्धोऽहं कृतः कापुरुषस्त्वया ॥ ६ ॥
यस्त्वं रथमिमं मोहान्न चोद्वहसि दुर्मते ॥ सत्योऽयं प्रतितर्को मे परेण त्वमुपस्कृतः ॥ ७ ॥
न हि तद्विद्यते कर्म सुहृदो हितकाङ्क्षिणः ॥ रिपूणां सदृशं चैतन्न त्वयैतत्स्वनुष्ठितम् ॥ ८ ॥
निवर्तय रथं शीघ्रं यावन्नोपैति मे रिपुः ॥ यदि वाऽध्युषितो वाऽसि स्मर्यन्ते यदि वा गुणाः ॥ ९ ॥
एवं परुषमुक्तस्तु हितबुद्धिरबुद्धिना ॥ अब्रवीद्रावणं सूतो हितं सानुनयं वचः ॥ १० ॥

त्रानयदिति योजना ॥२९—३४॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चोत्तरशततमः सर्गः ॥१०५॥

अथ रावणरथप्रत्यानयनं षट्शततमे—स तु मोहादित्यादि ॥ मोहात् अविवेकात् ॥ १ ॥ हीनवीर्यमिवेत्यादिश्लोकद्वयमेकान्वयं। यत्र यत्र इवशब्दो नास्ति तत्र तत्रानुषञ्जनीयः । हीनवीर्यमिव हीनबलमिव । अशक्तमिव निरुत्साहमिव । असत्त्वमिव अधीरमिव । तेजसा परिभवासहनेन ॥ २—३॥ मच्छन्दं मदभिप्रायं । "वशाभिप्राययोश्छन्दः" इत्यमरः ॥४॥ प्रत्ययः रावणस्य युधि पलायनं नास्तीति सर्वेषां विश्वासः । विनाशित इत्यस्य यशआदिषु लिङ्गविपरिणामः ॥ ५॥ शत्रोः पश्यतः शत्रौ पश्यति ॥ ६ ॥ यः नोद्वहसि अभिमुखं न प्रापयसि किं त्वपवाहयसि । स त्वं उपस्कृतः परेणोत्कोचादिना वशीकृत इत्ययं प्रतितर्कः सत्यः प्रतिभाति ॥ ७ ॥ न त्वयैतत् स्वनुष्ठितमिति । त्वयानुष्ठितमेतत् नतु स्वनुष्ठितं तत् ॥ ८ ॥ अध्युषितः सहवासी । सुहृदिति यावत् । उपधयोपसर्पितो वा । गुणाः सत्काराः ॥९—१०॥

स० सूतः "सारथीरथिकंरक्षेत्संग्रामेप्राणसंकटे" इत्याद्युक्तिज्ञमर्यादावेदितृखान्तरात्मप्रेरितः । रथनेता सारथिः । 'सूतःप्रसूतेप्रेरितेपिच' इतिविश्वः ॥ ३१ ॥ इतिपञ्चोत्तरशततमः सर्गः ॥ १०५ ॥

रामानु० अध्युषितः चिरकालंमत्समीपइतिशेषः । स्मर्यन्ते यदिवागुणाः मन्निष्ठाउपकर्तृत्वादिगुणाःस्मर्यन्ते यदि ॥ ९ ॥

[पा०] १ क. ख. ञ. ट. निरीक्ष्यतं. २ रामबाणविभिन्नाङ्गइत्यादयः, पतितंसमीक्ष्येत्यन्ताःश्लोकाः ङ. च. छ. झं. ञ. ट. पाठेषुदृश्यन्ते.

न भीतोऽसि न मूढोऽसि नोपजप्तोऽसि शत्रुभिः ॥ न प्रमत्तो न निस्स्नेहो विस्मृता न च सत्क्रिया ॥११॥
मया तु हितकामेन यशश्च परिरक्षता ॥ स्नेहप्रस्कन्नमनसा प्रियमित्यप्रियं कृतम् ॥ १२ ॥
नास्मिन्नर्थे महाराज त्वं मां प्रियहिते रतम् ॥ कश्चिल्लघुरिवानार्यो दोषतो गन्तुमर्हसि ॥ १३ ॥
श्रूयतां त्वभिधास्यामि यन्निमित्तं मया रथः ॥ नदीवेग इवाभोगे संयुगे विनिवर्तितः ॥ १४ ॥
श्रमं तवावगच्छामि महता रणकर्मणा ॥ न हि ते वीर सौमुख्यं प्रहर्षं वोपधारये ॥ १५ ॥
रथोद्वहनखिन्नाश्च त इमे रथवाजिनः ॥ दीना घर्मपरिश्रान्ता गावो वर्षहता इव ॥ १६ ॥
निमित्तानि च भूयिष्ठं यानि प्रादुर्भवन्ति नः ॥ तेषु तेष्वभिपन्नेषु लक्षयाम्यप्रदक्षिणम् ॥ १७ ॥
देशकालौ च विज्ञेयौ लक्षणानीङ्गितानि च ॥ दैन्यं खेदश्च हर्षश्च रथिनश्च बलाबलम् ॥ १८ ॥
स्खलनिम्नानि भूमेश्च समानि विषमाणि च ॥ युद्धकालश्च विज्ञेयः परस्यान्तरदर्शनम् ॥ १९ ॥
उपयानापयाने च स्थानं प्रत्यपसर्पणम् ॥ सर्वमेतद्रथस्थेन ज्ञेयं रथकुटुम्बिना ॥ २० ॥
तव विश्रमहेतोश्च तथैषां रथवाजिनाम् ॥ रौद्रं वर्जयता खेदं क्षमं कृतमिदं मया ॥
न मया स्वेच्छया वीर रथोऽयमपवाहितः ॥ २१ ॥
भर्तृस्नेहपरीतेन मयेदं यत्कृतं विभो ॥ २२ ॥
आज्ञापय यथातत्त्वं वक्ष्यस्यरिनिषूदन ॥ तत्करिष्याम्यहं वीर गतानृण्येन चेतसा ॥ २३ ॥
संतुष्टस्तेन वाक्येन रावणस्तस्य सारथेः ॥ प्रशस्यैनं बहुविधं युद्धलुब्धोऽब्रवीदिदम् ॥ २४ ॥
रथं शीघ्रमिमं सूत राघवाभिमुखं कुरु ॥ नाहत्वा समरे शत्रून्निवर्तिष्यति रावणः ॥ २५ ॥

नोपजप्तः उपजापं भेदं न गमितः । "भेदोपजापौ" इत्यमरः ॥ ११—१२ ॥ अस्मिन्नर्थे रथापवाहनरूपेऽर्थे कश्चित् कुत्रापि कुले जातः । लघुः अल्पबुद्धिः । अनार्यः दुष्टहृदय इव । मा दोषतः गन्तुं ज्ञातुं । नार्हसि । गत्यर्था ज्ञानार्थाः ॥ १३ ॥ यन्निमित्तं यत्कारणात् । "निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्" इति प्रथमा । आभोगे उन्नतप्रदेशे । आभोगान्नदीवेग इव रथः संयुगाद्विनिवर्तित इत्यर्थः । आभोगे संयुग इत्यत्र विभक्तिव्यत्ययः ॥ १४ ॥ सौमुख्यं सुमुखत्वं तन्मूलं प्रहर्षं ॥१५॥ रथेति अत्र आसन्निति शेषः ॥ १६ ॥ अभिपन्नेषु आविर्भूतेषु सत्सु । अप्रदक्षिणं प्रतिकूलं ॥१७॥ निमित्तानिकिमर्थं त्वया विचारणीयानीत्यतआह—देशेत्यादिना ॥ श्लोकत्रयमेकान्वयं । लक्षणानि शुभाशुभनिमित्तानि । इङ्गितानि मुखप्रसादवैगुण्यादीनि । दैन्यं अनुत्साहः । स्खलानि उन्नतप्रदेशाः । निम्नानि अवनतप्रदेशाः । समानि सर्वत्र समप्रदेशाः । विषमाणि निम्नोन्नतप्रदेशाः । युद्धकाल इति पूर्वोक्तानुवादः । अन्तरदर्शनं दृश्यत इति दर्शनं द्रष्टव्यं । द्रष्टव्यं रन्ध्रमित्यर्थः । अन्तरदर्शनं रन्ध्रदर्शनं कर्तव्यमित्यध्याहारो वा । उपयानं समीपगमनं । अपयानं पार्श्वतो गमनं । स्थानं स्थैर्येणावस्थानं । प्रत्यपसर्पणं अभिमुखस्थित्या पृष्ठतोपसरणं । रथकुटुम्बिना सारथिना ॥१८—२०॥ तवेत्यादिसार्धश्लोक एकान्वयः । तथा वाजिनां विश्रमहेतोश्चेत्यन्वयः । रौद्रं दुःसहं । वर्जयता अपनयता । हेतौ शतृप्रत्ययः । क्षमं युक्तं । स्वेच्छया अपनयननिमित्तं विना ॥२१॥ भर्तृस्नेहेत्यर्धं । मया यत्कृतं तदिदं भर्तृस्नेहपरीतेनैव कृतमित्यर्थः ॥ २२ ॥ यथातत्त्वं यत् कार्यस्वरूपं वक्ष्यसि तत्तथा गतानृण्येन आनृण्यं गतेन आनृण्यं कर्तव्यमिति कृतसंकल्पेन चेतसा मनसा । करिष्यामि ॥ २३—२४ ॥ निवर्तिष्यति

तीo यन्निमित्तं यस्मात्कारणात् । नदीवेगइवाभोगिः चन्द्रोदयादिनाप्रवृद्धसमुद्रांभोभिःनदीवेगइव संयुगाद्रथोविनिवर्तितः तच्छ्रूयतामितिसंबन्धः । नदीवेगइवाभोगइतिपाठे आभोगे उन्नतप्रदेशे पर्वताद्युन्नतप्रदेशेनदीवेगइवेत्यर्थः ॥ १४ ॥ इतिषड्डुत्तरशततमःसर्गः ॥ १०६ ॥

पाo] १ क. ग. ज. वीर. २ घ. ङ. छ. झ. ञ. ट. नय.

एवमुक्त्वा ततस्तुष्टो रावणो राक्षसेश्वरः ॥ ददौ तस्मै शुभं ह्येकं हस्ताभरणमुत्तमम् ॥ २६ ॥
श्रुत्वा रावणवाक्यं तु सारथिः संन्यवर्तत ॥ २७ ॥
ततो द्रुतं रावणवाक्यचोदितः प्रचोदयामास हयान्स सारथिः ॥
स राक्षसेन्द्रस्य ततो महारथः क्षणेन रामस्य रणाग्रतोऽभवत् ॥ २८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षडुत्तरशततमः सर्गः ॥ १०६ ॥

सप्तोत्तरशततमः सर्गः ॥ १०७ ॥

अगस्त्यर्षिणा श्रीरामायरावणवधसौकर्यायादित्यहृदयस्तोत्रोपदेशः ॥ १ ॥ श्रीरामकृतादित्यहृदयजपतुष्टेनसूर्येण तंप्रति रावणवधत्वरणम् ॥ २ ॥

आदित्यहृदयप्रारम्भः ॥

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ॥ रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥ १ ॥
दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ॥ उपागम्याब्रवीद्रामममगस्त्यो भगवानृषिः ॥ २ ॥
रामराम महाबाहो शृणु गुह्यं सनातनम् ॥ येन सर्वानरीन्वत्स समरे विजयिष्यसि ॥ ३ ॥

निवार्तिष्यते ॥२५—२७॥ महांश्चासौ रथश्च महारथ इति विग्रहः ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षडुत्तरशततमः सर्गः ॥ १०६ ॥

अथादित्यहृदयोपदेशः ॥ ततो युद्धपरिश्रान्तमित्यादिश्लोकद्वयमेकान्वयं ॥ रणं द्रष्टुं दैवतैः समागम्य आगतः दैवतैः सहागतः अगस्त्यः युद्धपरिश्रान्तं उपस्थितं रावणं दृष्ट्वा कथमेनं परत्वप्रकटनं विना जेष्यामीति चिन्तया स्थितं चिन्तयन्तं च रामं दृष्ट्वा उपागम्याब्रवीत् ॥ १—२ ॥ राम रामेत्यादिश्लोकत्रयमेकान्वयं ॥ रामस्य चिन्ताविष्टत्वात् स्वादरातिशयात्कार्यत्वरया च द्विरुक्तिः । महाबाहो इत्यनेन पूर्वकृतपराक्रमप्रकटनं । सनातनं वेदवन्नित्यं । गुह्यं रहस्यं । शृणु । तदेव रहस्यमाह—आदित्यहृदयमित्यादि ॥ आदित्यस्य हृदयं आदित्यमनःप्रसादकमित्यर्थः । पुण्यं पठतां पुण्यवर्धकं । सर्वशत्रुविनाशेपि तुल्यायव्ययन्यायेन कस्यचिन्न जयः स्यात् न तथा भवतीदमित्याह—जयावहमिति । अक्षय्यं अक्षय्यफलकं । परमं शिवं परमपावनं । सर्वमङ्गलमाङ्गल्यं सर्वमङ्गलानामपि मङ्गलं । मङ्गलानां च मङ्गलमितिवत् । स्वार्थे यत्प्रत्ययः । सर्वश्रेयः-

---

सी० ततोयुद्धपरिश्रान्तमित्यादिश्लोकद्वयमेकंवाक्यं । रणंद्रष्टुंदैवतैःसहसमागम्यागतोऽगस्त्यः ततः सर्वान्रयुद्धपरिश्रान्तस्य रावणस्यरथेसूतेनरणादपनीतेसति तदन्तरं प्रोद्यतिचभास्करेयुद्धपरिश्रान्तंसमरेचिन्तयास्थितं रावणवधोपायचिन्तयोपलक्षितंरामं अग्रतः समनन्तरकाले। युद्धाय युद्धंकर्तुं समुपस्थितंरावणंचदृष्ट्वा तदा रावणमद्यैवजेष्यसि माचिन्तापरोभूः॥ किंतुस्ववीर्योपबृंहणायादित्यहृदयाख्येनस्तोत्रेण एनंसूर्यमुपतिष्ठस्वेतिस्तोत्रमुपदेक्ष्यन्नन्तरिक्षादवनिमुपगम्यरामममन्त्रवीदित्यर्थः ॥१—२॥ **ति०** अथरावणवैभवंदृष्ट्वात्रस्तमिवभगवन्तंरामंभगवद्ब्रह्मदत्तरावणवैभवनिवर्तनस्यभगवद्ब्रह्मानुग्रहैकसाध्यत्वात्तदनुग्रहसिद्धयेविद्यामण्डलऋषिरगस्त्योब्रह्मरूपादित्यदेवताकत्वादादित्यहृदयाख्यंस्तोत्रमुपदिशतिस्मेत्याह—**ततोयुद्धेत्यादि** । अस्यस्तोत्रस्यागस्त्यऋषिः अनुष्टुप्छन्दः आदित्यहृदयभूतोभगवान्ब्रह्मादेवता । निरस्ताशेषविघ्नतयाब्रह्मविद्यासिद्धौसर्वत्रजयसिद्धौचविनियोगः । अस्यषडङ्गंप्रणवेन 'रश्मिमतेनमः' इत्यनेनवा । गायत्र्याषडङ्गमित्यन्ये । ततोयुद्धेत्यादि त्वरस्वेत्यन्तंस्तोत्रं । एवंभयनाटनं तन्मूलकमगस्त्यादुपदेशग्रहणंलोकानुग्रहाय । लोकस्यजयसाधनवस्तुप्रकाशनार्थमितितत्वं । युद्धपरिश्रान्तं अनेकाहोरात्रयुद्धपरिश्रान्तं तमिवस्थितं समरे समरविषये चिन्तया प्रबलोयमरिःकथंजेतव्यइतिचिन्तयायुक्तं । सारथिनापवाहितं । रावणं प्रातर्युद्धायअग्रतःरामसंमुखे समुपस्थितंदृष्ट्वास्थितं धनुरवष्टभ्यस्थितंरामं ॥ १ ॥ **ति०** सनातनं प्रवाहानादिभूतं अनेनस्वकल्पितत्वनिरासः ॥ ३ ॥

[पा०] १ क.—ट. तस्य. २ ख. ङ.—ट. भगवांस्तदा.

आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ॥ जयावहं जपेन्नित्यमक्षय्यं परमं शिवम् ॥ ४ ॥
सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ॥ चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम् ॥ ५ ॥
रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ॥ पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥ ६ ॥
सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः ॥ एष देवासुरगणाँल्लोकान्पाति गभस्तिभिः ॥ ७ ॥

साधनमित्यर्थः । सर्वपापप्रणाशनं सर्वपूर्वाघविनाशनं । चिन्ताशोकप्रशमनं आधिव्याधिनिवर्तकं । आयुर्वर्धनं विहितायुषोप्यधिकायुःप्रदं । उत्तमं जप्येषु श्रेष्ठं । आदित्यहृदयाख्यं स्तोत्रं जपेत् । आदित्यहृदयस्तोत्रजपे पुण्यादिवृद्धिर्भवति अतोवश्यं तत्कामस्तज्जपेदिति भावः ॥ ३—५ ॥ स्तोतव्यदेवतास्वरूपमाह—रश्मिमन्तमिति ॥ रश्मिमन्तं स्वर्णवर्णतया प्रशस्तकिरणं । समुद्यन्तं अर्घोदयादिकं विना सम्यगुदयं प्राप्नुवन्तं । इदं च ध्येयाभिप्रायेणोक्तं । न तु तदानीं सूर्योदयकालः । अगस्त्यागमनकालस्यापराह्णत्वात् । अतएव लक्ष्मणवचनं—"अहं तु वधमिच्छामि शीघ्रमस्य दुरात्मनः । यावदस्तं न यात्येष कृतकर्मा दिवाकरः" इति ॥ विवस्ते आच्छादयति तेजोन्तरमिति विवस्वान् तं । स्वभासा सर्वतेजसामाच्छादकमित्यर्थः । भास्करं भाः करोतीति भास्करः । "दिवाविभानिशाप्रभाभास्कारा—"इत्यादिना टः सकारश्च । भुवनेश्वरं वर्षातपाभ्यां समस्तभुवननियन्तारं । पूजयस्व आदित्यहृदयेन तोषयस्वेत्यर्थः ॥ ६ ॥ ननु सत्सु देवतान्तरेषु कथमस्यैव पूज्यत्वं तत्राह—सर्वदेवात्मक इति ॥ सर्वदेवात्मकः सर्वदेवानामात्मा । स्वार्थे कः । "सूर्य आत्मा जगतस्तस्थुषश्च" इति श्रुतेः । रश्मिभिर्लोकाननुभावयतीति रश्मिभावनः । रश्मिभिः रक्षतीत्यर्थः । एतदेवाह—एष इति । देवासुरगणान् लोकान् देवासुरगणरूपाञ्जनानित्यर्थः । पाति रक्षति । "याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति" इति श्रुतेः ॥ ७ ॥

तनि० आदित्यशब्देन तन्मण्डलमुच्यते । "यएषोन्तरादित्येहिरण्मयःपुरुषोदृश्यते" इत्यत्रादित्यशब्दवत् । तस्यहृदयं अन्तःतन्मण्डलमध्यवर्तीपुरुषः । यद्वा आदित्यः सूर्यः । तस्यहृदयं हृद्गतं । 'अयपयगतौ' इतिधातुः । "यआदित्येतिष्ठन् यआदित्यमन्तरोयमयति" इत्यादिश्रुतेः । तत्प्रतिपादनंस्तोत्रमित्यर्थः । **ति०** पुण्यं पुण्यजनकं । अनेनपारत्रिकंफलमुक्तं । सर्वशत्रुविनाशनं जयावहमित्यैहिकंफलं । जपं जप्यतइतिजपं स्तोत्रं । **स०** नित्यं अर्थतः । अक्षयं नविद्यतेक्षयोयस्मात् । परमं स्तोत्ररत्नं । शिवं मङ्गलरूपं ॥ ४ ॥ सर्वमङ्गलमाङ्गल्यं सर्वमङ्गलवस्तूनामपिमाङ्गल्ययंयस्मादितितथा ॥५॥ रश्मिमन्तं रश्मयः ज्ञानरूपाःप्रकाशरूपाश्चतद्वन्तं । यवादिरयं । जपसमयेप्रणवादिलंनमोन्तलंचसंपाद्यं । "जपे न्यासेनमोन्तस्तुस्वाहान्तोहोमकर्मणि" इत्यादेः । तथाच ॐ रश्मिमतेनमः' इतिमन्त्रनिष्पत्तिः । एवमुत्तरत्रापिज्ञेयं । समुद्यन्तं सृष्टिपालनादावुद्योगवन्तं । उदयपर्वतेसमुद्यन्तंवा । देवासुरनमस्कृतं सत्वप्रधानादेवाः । तमःप्रधानाअसुराः । उपलक्षणयारजःप्रधानामनुष्याअपिग्राह्याः । तैर्नमस्कृतं । भास्करं करोतीतिकरः भासांकरः भास्करः "तस्यभासासर्वमिदंविभाति"इत्यादेः । **तनि०** रश्मिमन्तं रश्मिशब्दोनित्यसूरिपरः । तद्वन्तं । तन्मध्येभासमानं । रश्मिरश्मीनांमध्येतपन्तं"इतिसुवर्णसूक्तोक्तेः । समुद्यन्तं नित्योदितदशावन्तं । यद्वा "यःपूर्व्यायवेधसे नवीयसे" इत्यादुक्तरीत्यानवंनवमुदितमिवस्थितं । **ति०** रश्मिमन्तं पञ्चेन्द्रियद्वाराऽनेकज्ञानरश्मिमन्तं । रश्मिमतेनमः । समुद्यन्तंलोकान्क्रियासुप्रवर्तयन्तं । समुद्यतेनमः । एवंनमोन्ताएतेऽस्यनमस्कारार्चनमन्त्राइत्युच्यन्ते । भुवनानां मूलादिब्रह्मरन्ध्रान्तयोगाधारभूमीनां ईश्वरं अधिष्ठातारं । भूराद्यशेषभुवनानांप्रकाशकतयेश्वरंच । भुवनेश्वरायनमः । **शि०** विवस्वन्तं विवस्वना विशेषमणिनाअन्यतेसंबध्यतेतं । नित्यंविशेषमणिधारिणमित्यर्थः । "वसु तोयेधनेमणौ" इतिकोशः ॥ ६ ॥ **तनि०** अत्रदेवासुरशब्दौ तत्तत्प्रकृतिपरौ । "दैवीसंपद्विमोक्षायनिबन्धायासुरीमता"इतिगीतोक्तेः । गभस्तिभिः तेजोलेशैः तेजोंशसंभवमित्युक्ततेजोलेशैः । **ती०** अस्यस्तोत्रस्यकथमेतावन्माहात्म्यमित्याशंक्यतत्प्रतिपाद्यस्यसर्वदेवतामयत्वात्संभवतीतितस्यसर्वदेवतामयत्वंप्रतिपादयति—सर्वदेवात्मकइत्यादिना । सर्वदेवात्मकः सर्वदेवशरीरः । "यःसर्वदेवेषुतिष्ठन्"इत्यादिश्रुतेः । तेजस्वी पराभिभवनसामर्थ्यवान् । रश्मिभावनः रश्मीन् नित्यमुक्तान्भावयतितत्सत्तांनिर्वहतीति तथोक्तः । तेषांभगवन्नित्येच्छाधीनसत्ताकत्वात् । "नित्यंप्रियास्तवतुकेचनतेहि नित्याः"इत्युक्तत्वात् । "एषदेवासुरगणाँल्लोकान्यातिगभस्तिभिः"इति "अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते । आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाः" इत्युक्तरीत्यावृष्ट्यन्नदानेन "देवान्भावयतानेनतेदेवाभावयन्तुवः" इतिपुरोडाशादिदानेनचसर्वान्पातीत्यर्थः । "याभिरादित्यस्तपतिरश्मिभिस्ताभिः पर्जन्योवर्षति"इत्यादिश्रुत्युक्तरीत्यागभस्तिभिःपातीत्युक्तं । **ति०** रश्मिमदादिशब्दप्रतिपाद्यस्यब्रह्मत्वंस्फुटयन्नाह—सर्वेति । हि यस्मात्सर्वदेवोपादानकारणत्वादेषसर्वदेवात्मकः । इदंसर्वात्मकत्वोपलक्षणं ।

[पा०] १ ज्ञ. ञ. ट. जपंनित्यं. २ क. घ. ङ. छ.—ट. माङ्गल्यं.

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः ॥ महेन्द्रो धनदः कालो यमः सोमो ह्यपां-पतिः ॥८॥
पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः ॥ वायुर्वह्निः प्रजाप्राण ऋतुकर्ता प्रभाकरः ॥ ९ ॥

सर्वदेवात्मकत्वमाह—एष ब्रह्मेत्यादिना ॥ अयमेव ब्रह्मादिसमस्तदेवताशरीरे वर्तत इत्यर्थः । प्रजापतिरिति जात्येकवचनं । नव प्रजापतय उच्यन्ते । कालशब्देन मृत्युरुच्यते । यमस्तु ततोन्यः । मरुतः आवहादिवायवः । वायुर्भूर्लोकसंचारी । प्राणः शरीरान्तःस्थो वायुः । ऋतुकर्तेति प्रभाकरविशेषणं ।

सर्वदेवात्मकायनमः । तेजस्वी सर्वभासनसमर्थतेजोयुक्तः । तेजस्विनेनमः । रश्मिभिः ज्ञानरश्मिभिः सर्ववस्तुजातं भावयति सत्तास्फूर्तिमत्संपादयतिसः । रश्मिभिर्योगिनोभावयति ब्रह्मलोकंप्रापयतीत्यर्थ इत्यन्ये । अत्रएषपातीत्युक्त्या सूर्यस्यपुरतःस्थितत्वनिर्देशेनसूर्योदयकालेएतत्स्तोत्रदानमितिलभ्यते । स० सर्वसत्ताप्रदत्वाच्चासावुपास्यइत्याह—सर्वेति । एषः सूर्यनारायणः । सर्वदेवात्मकः सर्वदेवसत्तानांभगवदधीनत्वात्तदात्मकत्वोक्तिः । सर्वदेवानामपि आत्मकं स्वरूपानन्दो यस्मादितिवा । शि० रश्मिभानां सूर्यकिरणदीप्तीनां अवनोरक्षकः । एषसूर्यान्तर्वर्तीरामः ॥ ७ ॥ तनि० स्कन्दःसंसारदुःखंस्कन्नंकरोतीतिस्कन्दः । महेन्द्रोवरुणइतिपाठे वरुणोवरुणपदाभिधेयः । "वरुणोवारुणोवृक्षः" इतिसहस्रनामोक्तेः । ती० "यएषोन्तरादित्येहिरण्मयः पुरुषोदृश्यते"इत्युक्तयोगिजनसाक्षात्कारेणएषइतिपुनःपुनर्निर्देशः । ब्रह्मा चतुर्मुखशरीरः । "तवान्तरात्माममचयेचान्येदेहिसंज्ञिताः"इतिशिवंप्रतिचतुर्मुखवचनात् । विष्णुः उपेन्द्रावतारः शिवः । शिवशरीरकः। "सब्रह्मासशिवःसहरिः सेन्द्रः" इत्युभयत्रापि श्रुतेः । स्कन्दः 'स्कन्दिर्गतिशोषणयोः' इतिधातोः शत्रून्शोषयतीतिस्कन्दः । षण्मुखशरीरकोवा । प्रजापतिः "प्रजापतिश्चरति गर्भे अन्तः" इत्युक्तप्रजापतिशब्दवाच्यः । महेन्द्रः स्वरूपतऐश्वर्यतश्चनिरवधिकः । "इन्द्रंनिचिक्युःपरमेव्योमन् इन्द्रोमायाभिः पुरुरूपईयते"इतिश्रुतेः । धनदः "अन्नादोवसुदान" इतिश्रुतिप्रसिद्धःसकलफलप्रदः । कालः जगत्संहारकः । "कालायमहाग्रासायवैनमः । अत्ताचराचरग्रहणात्" इतिश्रुतिसूत्राभ्यां 'अनादिर्भगवान्कालः'इतिपराशरस्मरणाच्च । यमः यमयति शिक्षयतीतियमः । 'यमोवैवस्वतोराज्ञायस्तवैषहृदिस्थितः'इतिमनुस्मरणात् । सूते अमृतमितिसोमः । 'षु प्रसवैश्वर्ययोः'इतिधातुः । 'सोमःपवतेजनिता मतीनां जनितादिवः'इत्यादुक्तसकलकारणसोमशब्दवाच्यः । अपांपतिः "आपोनाराइतिप्रोक्ताआपोवैनरसूनवः । अयनंतस्यताः पूर्वंतेननारायणःस्मृतः"इत्युक्तेः । 'अपएवससर्जादौ'इत्युक्तेश्चाप्छब्दवाच्यानांस्वामी ॥ ति० एषः 'एषोन्तरादित्येहिरण्मयः पुरुषः' इतिश्रुतेर्योगजनितसाक्षात्कारविषयःपुरोदृश्यमानश्च । ब्रह्मा निस्तुलैश्वर्यविद्यास्रष्टृत्वशक्तिः । ब्रह्मणेनमः । विष्णुः स्वसृष्टपरिपालनप्रयोजकतयापरिगृहीतविष्णुमूर्तिर्नारायणः । विष्णवेनमः । शिवः अपरिमितकल्याणपुण्यस्वभावः । मृगपरश्वादिचिह्नोभगवान्महादेवश्च । शिवायनमः । जीवज्योतिर्द्वारासर्वाणीन्द्रियाणिस्कन्दतीतिस्कन्दः । भगवान्मयूरवाहनश्च । स्कन्दायनमः । प्रजानां जन्यवस्तूनांस्वामी । स्वशक्तिद्वारासर्वोपादानत्वात् । दशयज्ञायुधचिह्नोभगवान्यज्ञेश्वरश्च । प्रजापतयेनमः । महेन्द्रः 'इदिपरमैश्वर्ये' "ष्टन्सर्वधातुभ्यः" परमैश्वर्यकाष्ठांप्राप्तः । वज्रहस्तत्वादिचिह्नोदेवराजश्च । महेन्द्रायनमः । धनंचैतन्यंसर्वानुग्रहायसर्वस्यान्तर्ददातिस्थापयतीतिधनदः । 'अन्नादोवसुदानः'इत्युक्तसकलफलदः । कुबेरश्च । धनदायनमः । कालः बुद्धिवृत्तिजातमपरोक्षतयाकलयतीतिकालः । मण्डलस्पन्दानुमेयक्रियापरिच्छेदकश्चकालः । कालायनमः । यमयतीतियमः सर्वान्तर्यामी । "यमोवैवस्वतोराजायस्तवैषहृदिस्थितः । तेनचेदविवादस्तेमागङ्गांमाकुरून्गमः ।" अविवादोऽभेदाभावइतिमनुः । पितृपतिश्च । यमायनमः । सोमः उमा उः केवलनिपातः । मा प्रभा उ सर्वदाप्रभयासहितःसोमोभगवानर्धनारीश्वरश्च । "सोमःपवतेजनिता मतीनां"इतिश्रुतेः सर्वकारणंसोमशब्दवाच्यं । उमयाशक्त्याप्रकृत्याख्ययासहितइत्यर्थमन्ये । सोमायनमः । आपःसत्त्वंचित्तात्मकं तस्यान्तःकरणोपाधिवृशतोऽनन्तस्यपतिः वरुणश्च । अपांपतयेनमः ॥ स० एषः प्रत्यक्षमण्डलान्तर्वर्ती । ब्रह्मा बृंहयति वर्धयतिभक्तानितितथा । "सर्ववेष्टयितृत्वाच्चविशिष्टबलतस्तथा । विष्णुरित्यभिधामह्यंसा नयुक्तादिवौकसाम्"इत्यैतरेयभाष्यादिशाप्यर्थोबोध्यः । शिवंमङ्गलमस्यास्तीतिशिवः । अर्शआद्यच् । शिवयतीतिवातथा । "तत्करोती"तिण्यन्तात्पचाद्यच् । "शःस्यान्नपुंसकेशास्त्रेयशसीन्द्रशरासने । तूष्णींगतेसुखे"इतिनानार्थरत्नमालोक्तेः । शंसुखमेषामस्तीतिशिनोमुक्ताः तान्वर्तयतीतिवा । स्कन्दनात् जलशोषणात् स्कन्दः । स्कन्दान्तर्गतत्वेनच्युतत्वात्स्कन्दः । "स्कन्नत्वात्स्कन्दतांप्राप्तः"इतिभारतदानधर्मोक्तेः ॥ प्रजापालकत्वात्प्रजापतिः । प्रकर्षेणजनयतीतिप्रजः । नविद्यतेपतिर्यस्यसोपतिः । प्रजश्चासावपतिश्चेतितथेतिवा ॥ ८ ॥ स० मनुः सर्वज्ञः । 'मनुअवबोधने'इतिधातुः । ती० पितरः अग्निष्वात्तादयः । सदावसन्तीतिवसवः । तेचाष्टौ । सिद्धिरेषामस्तीतिसाध्याः । अर्शआद्यच् । तेचद्वादश । अश्विनौ बडबारूपिण्यांआदित्यमहिष्यांसंज्ञयाऽश्वरूपयुक्तस्यादित्यस्यतस्यांजातावश्विनौ । म्रियन्तेन कदाचिदितिमरुतः । तेचवायुपुराणोक्ताः शुक्रज्योतिःप्रभृतय एकोनपञ्चाशत् । मननान्मनुः । "नान्योतोस्तिमन्ता'इतिश्रुतेः । वाति सुरभीकरोतीतिवायुः । 'वा गतिगन्धनयोः' इतिधातुः । "सर्वगन्धःसर्वरसः"इतिश्रुतेः । वहतिहव्यमितिवह्निः 'वहप्रापणे' । प्रजाप्राणः प्रजानांप्राणनहेतुः । इयर्तीतिऋतुः । 'ऋगतौ' । "ऋतुः सुदर्शनः कालः" इतिसहस्रनामपाठात् । कर्ता तेन

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ॥ सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः ॥१०॥

ऋतूनां वसन्तादीनां कर्ता एष प्रभाकरः ब्रह्मा चेत्यादिरीत्याऽन्वयः ॥ ८—९ ॥ एवमादित्यस्वरूपमुपदिश्य तद्विषयमादित्यहृदयस्तोत्रमुपदिशति–आदित्यः सवितेत्यादिना लोकसाक्षिण इत्यन्तेन ॥ तत्र आदित्यादिप्रथमान्तपदेषु त्वंपदमध्याहार्यं। अदितेरपत्यत्वेनावतीर्ण आदित्यः । "दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः" इति ण्यप्रत्ययः । अदितेः अखण्डितायाः भूमेरयं पतिरित्यादित्यः। सूते जगदिति सविता । सुवति प्रेरयति जनान् कर्मणीति सूर्यः। "पू प्रेरण" इति धातोः "राजसूयसूर्य—" इति निपातनात् क्यप्प्रत्ययो रुडागमश्च ॥ खे गच्छतीति खगः। लोकोपकारार्थमाकाशे संचरन्नित्यर्थः। वर्षेण पुष्णाति जगदिति पूषा । श्वन्नुक्षन्नित्यादौ निपातितः । गभस्तयः किरणाः अस्य सन्तीति गभस्तिमान् । सुवर्णसदृशः सुवर्णवर्णः । "हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्ण" इति श्रुतेः । भातीति भानुः । "दाभाभ्यां नुः" इति नुप्रत्ययः । हिरण्यं रेतो यस्य स हिरण्यरेताः हिरण्मयब्रह्माण्डकर्तेत्यर्थः । अक्षराधिक्यमार्षत्वात् । दिवा करोतीति दिवाकरः, दिवा अह्नि प्राणिनः चेष्टां करोतीति वा दिवाकरः ॥ १० ॥

विनातृणाग्रमपिनचलतीतिकृत्वासर्वभूतान्तःप्रवेशेनसकलकर्मकर्ता । प्रभाकरः प्रकृष्टज्ञानसाधनं ॥ ति० पितरोबीजप्रदाः तद्रूपोयंसर्वेषांबीजप्रदः । "तासांब्रह्ममहद्योनिरहंबीजप्रदःपिता"इत्युक्तेः । बहुत्वंपूजार्थं । कव्यवाहनादयः पितृदेवताश्च । वसुरहमर्थः अष्टौ वसवश्च । साध्याः प्राधान्येनयोगिनः । प्रसाधनीयत्वात्साध्याः । देवगणविशेषाश्च । अश्विनौ अश्नोतेर्वन्प्रत्ययान्तोश्वशब्दः । सर्वव्याप्तौदेवभिषजौच । मरुत् 'मृङ्प्राणत्यागे' । अस्यधातोरुतिप्रत्ययान्तंरूपं । अनर्थमारकः । एकोनपञ्चाशत्सैन्यमरुद्गणश्च । मनुतइतिमनुः सर्वज्ञः । आदिराजश्च । वातीतिवायुः 'वागतिगन्धनयोः' गतिर्ज्ञानंज्ञापनंच । ज्ञाताज्ञापकश्च । प्रपञ्चवृत्तिःप्राणश्च । बर्हेर्निः बर्हिः । स्वेनहिम्निस्वयंप्रतिष्ठितोभूत्वास्वस्मिन्सर्वसारंवहतीतिवर्हिः अग्निश्च । प्रजायन्तेजीवात्मनेतिप्रजाः । प्रकृष्टजनिमन्तोविभूत्यध्यायोक्ताः । देवाश्च । प्राणयतीतिप्राणः । "नप्राणेननापानेनमर्त्योजीवतिकश्चन । इतरेणतु जीवन्तियस्मिन्नेतावुपाश्रितौ"इतिश्रुतेः । प्राणयात्राप्रवर्तकः प्राणः । ऋतूनांज्ञानानांकर्तोपादानं वसन्तायृतुकर्तासंवत्सरात्मा कालश्च । प्रभाकरोभास्करवत् । शब्दस्याप्यर्थतादात्म्येनदेवतास्वरूपत्वाद्भास्करप्रभाकरयोःशब्दयोःशब्दभेदेनमूर्त्यन्तरत्वंज्ञेयं ॥९॥ **तनि०** सूर्यः स्थावरजङ्गमात्मकजगदन्तर्यामीसूर्यशब्दवाच्यः । "सूर्यआत्माजगतस्तस्थुषश्च"इतिश्रुतेः ॥ **ती०** अधुनास्तोत्रस्वरूपंदर्शयति—**आदित्यइत्यादिना** । अत्र प्रथमान्तेषुशब्देषुत्वंशब्दमध्याहृत्यत्वमादित्यस्त्वंसवितेत्येवंयोजनीयं । "यस्मात्सर्वमादत्तेतस्मादादित्यः"इत्यौपनिषदव्युत्पत्त्याअशेषविषयभोक्ता आदित्यइत्यर्थः । सविता सर्वस्यजगतः प्रसविता । सूते जगदितिवासविता । सुवतिप्रेरयतिजगदितिवासविता । सुवतिप्रेरयतिकर्मणीतिसूर्यः । सुष्ठुईरयतिप्रेरयतीतिवासूर्यः परमात्मा । प्रेरणसौष्ठवंचनिरुपाधिकत्वं । तच्चभगवतएव । 'अन्तःप्रविष्टःशास्ताजनानां'इत्यादिश्रुतेः । खं परमाकाशंगच्छतिअध्यास्तइतिखगः । 'योअस्याध्यक्षःपरमेव्योमन्'इतिश्रुतेः । पुष्णातीतिपूषा स्थितिकर्तेत्यर्थः । 'पुषपुष्टावि'तिधातुः । गभस्तिमान् गांदिशंव्याप्यभासयतिप्रकाशयतीतिगभस्तिः । 'भासृदीप्ता'वितिधातुः । पृषोदरादित्वात्साधुः । तथाचगभस्तिः सर्वव्यापिनीलक्ष्मीस्तद्वान् । लक्ष्मीनित्ययुक्तइत्यर्थः । नित्ययोगेमतुप् । लक्ष्म्याःसर्वव्यापित्वं "यथासर्वगतोविष्णुस्तथैवेयंद्विजोत्तम"इतिपराशरस्मरणात्सिद्धं । शोभनेपर्णेपक्षौयस्यससुपर्णःपरमात्मा । "द्वासुपर्णासयुजासखाया"इतिश्रुतेः । तपतीतितपनः । 'तपसन्तापे' । 'सुखसुप्तःपरंतपः' इतिस्मर्यते । सुवर्णसदृशइतिपाठेसुवर्णवर्णइत्यर्थः । "हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्वएवसुवर्णः"इतिश्रुतेः । भातीतिभानुः । 'तमेवभान्तं'इतिश्रुतेः । हिरण्यरेताः । हिरण्यं हिरण्मयं रेतः अण्डोत्पादकद्रव्यंयस्यसः । 'अपएवससर्जादौतासुवीर्यमवासृजत् । तदण्डमभवद्धैमंसहस्रांशुसमप्रभम् ।' इतिमनुस्मरणात् । अज्ञाननिवर्तनद्वारा दिवा द्युतिज्ञानंकरोतिव्युत्पादयतीतिदिवाकरः । हरिदश्वः हरतिमनइतिहरित् मनोहरः अश्वःवाहनंगरुडोयस्यसः । पृषदश्वइतिवत् । सहस्रार्चिः अर्च्यतइत्यर्चिः । अर्चिश्शब्देन पूज्यमङ्गलगुणाउच्यन्ते । अनन्तकल्याणगुणइत्यर्थः । सप्तसप्तिः सप्ताश्वयःसप्तिः अश्वोयस्यसः । "एकोअश्वोवहतिसप्तनामा" इतिश्रुतेः । अनेनकल्क्यवतारःसूचितः । मरीचिमान् म्रियन्तेशत्रवोऽनेनेतिमरीचिश्चक्रं । तद्वान् । उपलक्षणमेतत् । शङ्खचक्रगदाधरइत्यर्थः । तिमिरोन्मथनः ज्ञानोत्पत्तिप्रतिबन्धकदोषनिवर्तकः । "ह्यन्तःस्थोह्यभद्राणिविधुनोतिसुहृत्सतां"इतिस्मरणात् । शंसुखमस्माद्भवतीतिशंभुः । 'विश्वाक्षंविश्वशंभुवं'इतिस्मरणात् ॥ त्वष्णोति त्रिस्सप्तकृत्वःसक्षत्रियांभूमिमितित्वष्टा । 'तक्ष्लूक्ष्णूतनूकरणे'इतिधातुः । अनेनपरशुरामावतारःसूचितः । मृतं अचेतनंब्रह्माण्डंजीवयतीतिमार्ताण्डः । 'जीवाजीवमजीवयत्' इतिभागवतोक्तेः । अंशुमान् अन्तर्बहिर्व्याप्तिमान् । 'अशूव्याप्तौ'इतिधातुः । 'अन्तर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थितः'इतिश्रुतेः । हिरण्यं सकलजगदुत्पादकसमष्टिजीवजातंगर्भेयस्यसः हिरण्यगर्भः । "हिरण्यगर्भःसमवर्ततात्रे"इतिश्रवणात् । तापत्रयतप्तानांविश्रमस्थानत्वाच्छिशिरः । तपनः 'तपसंतापे' स्वाश्रितविरोधिनांतापकारीत्यर्थः । सर्ववस्तुसाक्षात्कारहेतुभूतालोककर्ता । रूयतेस्तूयतेसर्वै-

हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ॥ तिमिरोन्मथनः शंभुस्त्वष्टा मार्तण्ड अंशुमान् ॥ ११ ॥
हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः ॥ अग्निगर्भोदितेः पुत्रः शङ्खः शिशिरनाशनः ॥ १२ ॥

हरितः श्यामा अश्वा अस्य सन्तीति हरिदश्वः । सहस्रार्चिः सहस्रकिरणः । सप्तनामा सप्तिरश्वो यस्यासौ सप्तसप्तिः । "एको अश्वो वहति सप्तनामा" इति श्रुतेः । मरीचयोस्य सन्तीति मरीचिमान् । प्रकाशवानित्यर्थः । तिमिराण्युन्मथ्नातीति तिमिरोन्मथनः । शंसुखं भवत्यस्मादिति शंभुः । "डुप्रकरणे मितद्वादिभ्य उपसंख्यानम्" इति डुः । सर्वाणि रूपाणि त्वष्टा । सर्वसंहारक इत्यर्थः । मृतेण्डे जातो मार्तण्डः । सर्वसंहारे तत्सृष्टये पुनः प्रादुर्भूत इत्यर्थः । अंशवोस्य सन्तीत्यंशुमान् । प्रकाशमान इत्यर्थः ॥ ११ ॥ हिरण्यं हिरण्मयाण्डं । "तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्" इति स्मृतेः । तस्य गर्भो हिरण्यगर्भः । ब्रह्माण्डोदरवर्तीत्यर्थः । यद्वा हिरण्यं हितरमणीयं गर्भमन्तःकरणं यस्यासौ हिरण्यगर्भः । तापत्रयतप्तानां विश्रमस्थानत्वाच्छिशिरः । तपतीति तपनः । भासः करोतीति भास्करः । रूयते स्तूयते सर्वैरिति रविः । "अच इः" इतीप्रत्ययः । दिवा अग्निर्गर्भे यस्यासावग्निगर्भः । "उद्यन्तं वावादित्यमग्निरनुसमारोहति" इति श्रुतेः । अदितेः पुत्रः अदितेः पुत्रत्वेनावतीर्णः । शाम्यति स्वयमेव सायंकाल इति शङ्खः । "शिशिरं हिमं

रितिरविः । रौतिउपदिशतिवेदानितिवारविः । 'योवैवेदांश्चप्रहिणोतितस्मै'इतिश्रुतेः । अग्निःकालाग्निरुद्रोगर्भेयस्यसोग्निगर्भः । 'नारायणाद्ब्रह्मोजायते'इतिश्रुतेः । अदितेःपुमपत्यंपुरन्दरंत्रायतइत्यदितेः पुत्रः । शंसुखंखेआकाशेहृदयाकाशेयस्यसः शङ्खः । निरवधिकानन्दवानित्यर्थः । शिशिरनाशनः सूर्यरूपेणशिशिरंहिमंनाशयतीतितथा ॥ ति० आदित्यः अशेषविषयभोक्तामण्डलाभिमानीअदितिपुत्रश्च । सविता अन्तःकरणोपाधिनापरिमितचिदात्मवर्गस्रष्टा । रश्मिभिःपर्जन्यादिप्रवृत्त्यातत्तदन्नादिस्रष्टा । सर्तेः सूर्यः सर्वगः । 'सूर्यएकाकीचरति'इतिश्रुतेः । कर्मप्रेरकोवा । गभस्तिमान् रश्मिवत्समानार्थः । शब्दभेदान्मूर्तिभेदः । सुवर्णसदृशः 'आत्मलाभान्नपरंविद्यते'इतिश्रुतेः । सुवर्णसदृशनिधिलाभतुल्यकामः । यद्वा हिरण्यं तत्साधनंपारदएवरेतोयस्येत्यर्थः । अक्षराधिक्यमार्षं । दिवेत्यव्ययंप्रकाशवाचकं । प्रकाशंकरोतीतिदिवाकरः । हरितोदिशोश्नोतिव्याप्नोतीतिहरिदश्वः । श्यामवर्णश्च । सहस्राण्यनन्तानिअर्चींषिज्ञानानियस्यसः । यद्वा सहस्रसंख्याकान्यर्चींषिरश्मयोयस्यसः । सप्तसप्तिः सप्तशीर्षण्याःप्राणा इन्द्रियाणिद्वेचक्षुषीद्वेश्रोत्रेद्वेनासिकेवाक्चैकेति "सप्तप्राणाःप्रभवन्तितस्मात्"इतिश्रुतेः । सप्तप्राणानांसप्तिःप्रवृत्तिर्यतःसः । सप्तसंख्याश्च । मरीचिमच्छब्दोगभस्तिमच्छब्देनव्याख्यातः । अज्ञानलक्षणंतिमिरमुन्मथ्नातीतितिमिरोन्मथनः अन्धकारनाशनश्च ॥ हिरण्यगर्भः सकलजगदुत्पत्तिस्थितिलयकर्ता । ब्रह्मविष्णुरुद्ररूपोहिरण्यगर्भः । "भगवतेहिरण्यगर्भायनमः"इतिद्वादशाक्षरीआदित्यहृदयरहस्यमितिकतकः । शिशिरःशीतःसुखस्वभावः । तपनः 'तपऐश्वर्ये' स्वभावतएवसर्वेश्वरइत्यर्थः । दितिर्नाशोनविद्यतेयस्यास्साऽदितिर्ब्रह्मविद्या । तस्याःपुत्रः तल्लभ्यत्वात् । आदित्यश्च । शंचखंचशंखः । परमानन्दगगनात्मेत्यर्थः । शिशिरंजाड्यंमन्दबुद्धित्वं नाशयतीतिशिशिरनाशनः । हिमनाशकश्च ॥ स० आदित्यः आदौ अनादिकालमारभ्यवर्तमाने ल्ये आनन्दज्ञानेयस्यसः । तिश्च यंच ल्ये । 'आनन्दंतीतिवैवेदत्' येतिज्ञानंसमुद्दिष्टं'इतिसत्यशब्दव्याख्यापरभागवततात्पर्यात् । 'अदभक्षण'इत्यतआदिनोराक्षसाः । तांस्त्यजतीतिवा । त्यजविसर्गइत्यतोडःकर्तरि । "आदिनोराक्षसाःप्रोक्ताः" इतिभागवततात्पर्ये । अदितेरपत्यमितिवा । वामनरूपेणादित्यपत्यत्वाच्छ्रीपतेरादित्यता । आदितएवल्योव्याप्तः । तनोतेर्ज्यः । आदौविद्यमानइतिवा । सुवति सतःसत्कर्मणि असतोसत्कर्मणिचप्रेरयतीतिवा । 'षूप्रेरण'इतितौदादिकात्क्यपोरुट् । सूरिगम्यत्वात् ज्ञानिप्राप्यत्वाच्चेतिवा । निर्वचनलाद्रेफैकारलोपः । "सूर्यःससूरिगम्यत्वात्"इतीशावास्यभाष्योक्तेः । शंसुखंभावयतीतिशंभुः । यत्तुतीर्थनागोजिभट्टाभ्यां शंभवत्यस्मादितिव्युत्पत्तिप्रदर्शनंकृतं तत्तुमुकुटस्वामिव्याख्यानवत्कर्तरिकृतोभिधानेनापादानेडुप्रत्ययाभावादयुक्तं । मार्तण्डः मृतेअण्डेतथामात्रेणतत्राये परीक्षित्पेश्यण्डेभवतीतिसतथा । कृष्णरूपी । शकन्ध्वादिरयं । मार्ताण्डइतिवा । 'पुनर्मार्ताण्डमाभरत्'इतिमन्त्रात् । 'अथमार्तण्डमार्ताण्डौ'इतिनामनिधानाच्छब्दार्णवाच्च । मार्तण्डोवराहरूपीतिवा । 'मार्तण्डस्तपनेक्रोडे'इतिविश्वः । सूर्यान्तर्गतत्वाद्वा । सएवमार्ताण्डकः ॥ अग्निगर्भः अग्निर्गर्भेयस्यसः । 'उद्यन्तंवावादित्यमग्निःसमारोहति'इत्यादेर्मन्त्रवर्णात् । अग्नेर्गर्भः । 'अग्नौक्रियावतांविष्णुः'इत्यादेः । शंखः शंसुखं खं आकाशमिवव्याप्तंयस्य । शंसुखरूपाणिखानिइन्द्रियाणियस्येतिवा ॥ शि० हरिदश्वः हरेःसुग्रीवस्य देनराज्यप्रदानेनश्वयतिवर्धते ॥ मरीचयः उपलक्षणतयामरीचिप्रभृतयोमुनयोस्यसन्ति सेवकत्वेनेतिमरीचिमान् ॥ तक्षति महान्तमपिक्षीयानामपराधंतनूकरोतिनगणयतीत्यर्थः । त्वष्टा ॥ हिरण्योहिरण्यगर्भोगर्भेबालकइवयस्यसः । शिशिरः सर्वतापरहितत्वान्निर्व्यलक्षणशैत्यविशिष्टः ॥ अहोदिवसस्यतदुपलक्षितकालमात्रस्यकरःप्रवर्तकः । नरविःप्रकाशकोय-

[पा०] १ ङ. ञ. ट. मार्तण्डकोंशुमान्.

व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः ॥ घनवृष्टिरपां-मित्रो विन्ध्यवीथी प्लवङ्गमः ॥ १३ ॥
आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ॥ कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ॥ १४ ॥

नाशयतीति शिशिरनाशनः ॥ १२ ॥ व्योम्नो नाथो व्योमनाथः । तमः राहुं भेत्तुं शीलमस्यास्तीति तमोभेदी । ऋग्यजुःसाम्नां पारं गच्छतीति ऋग्यजुःसामपारगः । "ऋग्भिः पूर्वाह्णे दिवि देव ईयते । यजुर्वेदे तिष्ठति मध्ये अह्नः । सामवेदेनास्तमये महीयते । वेदैरशून्यस्त्रिभिरेति सूर्यः" इति श्रुतेः । घना वृष्टिर्यस्मादसौ घनवृष्टिः । "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" इति स्मृतेः । अत एवापां मित्रः । पुल्लिङ्गत्वमार्षं । दक्षिणायने विन्ध्यो वीथी संचारभूमिर्यस्यासौ विन्ध्यवीथिः । प्लवं यथा तथा गच्छतीति प्लवङ्गमः । विन्ध्यवीथीप्लवङ्गम इत्येकपदत्वेन पाठे विन्ध्यवीथी गगनमार्गः ॥ १३ ॥ आतपोस्यास्तीत्यातपी । मण्डलं वृत्ताकारो बिम्बोस्यास्तीति मण्डली । मृत्युः विरोधिनिवर्तकः । उदयसमये पिङ्गलवर्णत्वात् पिङ्गलः । सर्वानपि मध्याह्ने तापयतीति सर्वतापनः । कविः पण्डितः । व्याकरणादिसर्वशास्त्रप्रवर्तक इत्यर्थः । विश्वः विश्वनिर्वाहकः । महान्ति तेजांसि यस्य स

स्यारविः स्वयंप्रकाशइत्यर्थः ॥ १०—१२ ॥ **ती०** व्योमनाथः तामसाहङ्काररूपेणाकाशस्याप्यष्टेत्यर्थः । "आत्मनआकाशः संभूतः"इतिश्रुतेः । तमः भक्तानांतमोगुणंभिनत्तीतितमोभेदी । ऋग्यजुस्सामपारगः सकलवेदपर्यवसानभूमिः । "वेदैश्चसर्वैरहमेववेद्यः"इतिश्रुतेः । घनवृष्टिः घनावृष्टिः सकलकर्मफलरूपायस्मात्सः । 'अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवच' ।—'फलमतउपपत्तेः'इत्यादिप्रमाणात् । अपांमित्रः महार्णवशायी । 'यमन्तःसमुद्रेकवयोऽवयन्ति'इत्यादिश्रुतेः । विन्ध्यवद्दुर्गमायांवीथ्यांसुषुम्नामार्गेप्लवंशीघ्रंगमयतीतिविन्ध्यवीथीप्लवङ्गमः । मुक्तप्रापकइत्यर्थः । 'सएनान्ब्रह्मगमयति—हार्दानुगृहीतशताधिकया'इत्यादिश्रवणात् । आतपी आसमन्तात्तपःजगन्निर्माणसंकल्पोस्यास्तीत्यातपी । 'तपआलोचने'इतिधातुः । 'यस्यज्ञानमयंतपः'इतिश्रुतेः । मण्डयतेऽनेनेतिमण्डलंकौस्तुभादिः अस्यास्तीतिमण्डली । 'मडिभूषायां'इतिधातुः । मृत्युः । अत्रमृत्युशब्दः प्रकृतवाची । मृत्युशरीरकइत्यर्थः । 'यस्यमृत्युःशरीरं'इतिश्रुतेः । पिङ्गतिमिलतीतिपिङ्गलः । 'पिङ्गमेलने'इतिधातुः । मेलनंसुशीलस्यैवसंभवति । अतःपिङ्गलः । सौशील्यंनाममहात्मनोमूढैःसहनीरन्ध्रेणसंश्लेषः । सर्वतापः युगपत्सकलाण्डसंहारकः । कविः विदिताखिलवेद्यः । 'यःसर्वज्ञःसर्ववित्' इतिश्रुतेः । विश्वः विश्वशरीरकः । "विश्वमेवेदंपुरुषः"इतिश्रुतेः । महातेजाः महत् निरवधिकंतेजः पराभिभवनसामर्थ्ययस्यसः । रक्तः सर्वरञ्जकः । सर्वभवोद्भवः भवतीतिभवःकार्यवर्गः । सर्वोत्पत्तिहेतुरित्यर्थः । यद्वा सर्वेषांभवःसंसारो यस्मादुद्भवतिसतथा । नक्षत्रग्रहताराणामधिपः नक्षत्रग्रहताराणामन्तर्यामीत्यर्थः । "यश्चन्द्रतारकमन्तरोयमयती" इत्यादिश्रुतेः । विश्वभावनः विश्वस्थितिहेतुः । "द्यौःसचन्द्रार्कनक्षत्रंखंदिशोभूर्महोदधिः । वासुदेवस्यवीर्येणविधृतानिमहात्मनः"इतिश्रवणात् । तेजसामपितेजस्वी प्रशस्ततेजस्कइत्यर्थः । 'येनसूर्यस्तपतितेजसेद्धः'इतिश्रुतेः । 'सूर्यस्यापिभवेत्सूर्यः'इत्युक्तत्वाच्च । द्वादशात्मन् द्वादशमण्डलान्तर्वर्तिन् । ते तुभ्यंनमोस्तु ॥ **ति०** अपांसालिकानांमित्रः चैतन्यदानेनोपकर्ता । जलानामुत्पादकश्च । विन्ध्यवीथी सूर्यमार्गः तेनशीघ्रगन्ताच विन्ध्यवीथीप्लवङ्गमः । मृत्युः सर्वमृत्युसंपादकः । 'अमुमाहुःपरंमृत्युं' इतिश्रुतेः । पिङ्गलः पिङ्गलनाडीप्रवर्तनेनकर्ममार्गप्रवर्तकइत्यर्थः । पीतवर्णश्च । द्वादशात्मन् द्वादशमासस्वरूप । प्रागनुक्रान्तसर्वमूर्तिरूपायतुभ्यंनम इत्यर्थः । द्वादशात्मनेनमः ॥ **शि०** कविः इच्छामात्रेणगद्यपद्यादिनिर्माता ॥ **स०** विन्ध्यवीथीप्लवङ्गमः विन्ध्यस्थयावीथी अगस्त्यमुखतोदक्षिणभागेसंपादितातस्यांद्रुतगन्तेतिवा । यथोक्तंभारतेवनपर्वण्यागस्त्ये—'सूर्याचन्द्रमसोर्मार्गेनक्षत्राणांगतिंतथा । मार्गमिच्छाम्यहंदत्तंभवतापर्वतोत्तम । दक्षिणामभिगन्तास्मिदिशंकार्येणकेनचित् । यावदागमनंमह्यंतावत्त्वंप्रतिपालय । निवृत्तेमयिशैलेन्द्रततोवर्धस्वकामतः'इत्यादिना ॥ विश्वः जगत्प्रविष्टः । 'विशप्रवेशने' इत्यस्मात् 'अशूप्रुषिलटिकणिखटिविशिभ्यःक्वन्नि'ति क्वन्प्रत्ययेतस्यकित्त्वाद्गुणाभावेचरूपं ॥ 'तत्सृष्ट्वातदेवानुप्राविशत्'इतिश्रुतेः । सर्वत्रप्रविष्टत्वात् ज्ञानरूपत्वाद्विश्वः । 'विशप्रवेशन'इतिधातोःक्विप्रत्ययः । 'वागतिगन्धनयो'रितिधातोर्डप्रत्ययः । विश्वतद्वचेतिविग्रहः । 'विवेशभूतानिचराचराणि—विज्ञानमानन्दं ब्रह्म'इतिचश्रुतेः । विःपक्षीगरुडस्तेनश्वयतिगच्छतीतिवा । विशेषेणश्वयति व्याप्नोतीतिवा । विशेषेणवर्धतइतिवा । 'टुओश्विगतिवृद्ध्यो'रितिधातुव्याख्यानात् । विश्वंवायुंअन्तर्यामितयावर्तयतीतिवा । विश्वशब्दोपपदात् 'वृतुवर्तने'इत्यतोडः । 'लोपः समाने'तिवलोपः । "गुहाशयांनिहिताःसप्तसप्त"इतिवत् । विश्वंजगद्वर्तयतीतिवा । विश्वस्यकारणत्वाद्वा । 'कार्यकारणयोरेकशब्दव्यवस्थितिर्भवेत्' इतिशब्दनिर्णये । जीवनियामकत्वाद्वा । 'शरीरेषुप्रविष्टत्वाद्विश्वोजीवउदीर्यते । जीवस्यतदधीनत्वाद्विष्णुर्विश्वइतिस्मृतः'त्युक्तेः । प्रत्यहंसुप्तौमोक्षेप्रलयेचभूतान्यत्रप्रविशन्तीतिवा । 'यत्प्रयन्त्यभिसंविशन्ति'इतिश्रुतेः । विशिष्टसुखज्ञानरूपत्वाद्विशिष्टसुखबलरूपत्वाद्वा । 'विश्वंसुबलरूपत्वात्'इत्युक्तेः । अत्रप्रमाणेसुशब्दःसुखवाची । 'खित्यानन्दःसमुदिष्टः'इत्युक्तेः । सर्वभवोद्भवः

[पा०] १ ख. ग. घ. रविर्विश्वो.

नक्षत्रग्रहताराणामधिपो विश्वभावनः ॥ तेजसामपि तेजस्वी द्वादशात्मन्नमोस्तु ते ॥ १५ ॥
नमः पूर्वाय गिरये पश्चिमे गिरये नमः ॥ ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥ १६ ॥
जयाय जयभद्राय हर्यश्वाय नमोनमः ॥ नमोनमः सहस्रांशो आदित्याय नमोनमः ॥ १७ ॥
नम उग्राय वीराय सारङ्गाय नमोनमः ॥ नमः पद्मप्रबोधाय मार्ताण्डाय नमोनमः ॥ १८ ॥

महातेजः । रक्तः सर्वेष्वनुरक्तः । सर्वेषां भवः संसारः उद्भवत्यस्मादिति सर्वभवोद्भवः ॥ १४ ॥ नक्षत्राणां ग्रहाणां ताराणां चाधिपः । विश्वं भावयति स्थापयतीति विश्वभावनः । तेजसामग्न्यादीनां तेजसामपि तेजस्वी प्रशस्ततेजाः । द्वादश आत्मानो मूर्तयो यस्य स द्वादशात्मा । ते च दर्शिताः स्मृतौ—"इन्द्रो धाता भगः पूषा मित्रोथ वरुणोर्यमा । अंशुर्विवस्वांस्त्वष्टा च सविता विष्णुरेव च" इति ॥ एवंभूतस्त्वमसि । अतस्तुभ्यं नम इति योजना ॥ १५ ॥ नमः पूर्वायेत्यादिश्लोकषट्कमेकान्वयं ॥ पूर्वाय गिरये पूर्वभागस्थगिर्युपलक्षिताय । पश्चिमे गिरये पश्चिमभागस्थपर्वतोपलक्षिताय । जयाय उपासकानां जयकराय । जयतीति जयः जयी तस्मा इति वा । जयभद्राय जयभद्रयोः प्रदात्रे । हर्यश्वाय श्यामाश्वाय । अत्र स्तुतित्वान्नपुनरुक्तिश्चिन्त्या । आदरातिशयेन नमःशब्दस्य द्विरुक्तिः । उग्राय अनुपासकानामुग्राय । विविधमीरयति प्रेरयति प्राणिनश्चेष्टयतीति वीरः तस्मै । सारं शीघ्रं गच्छतीति सारङ्गः तस्मै । एकेन निमिषार्धेन द्विसहस्रयोजनं गच्छतीति पुराणप्रसिद्धिः । ब्रह्मेशानाच्युतेशाय ब्रह्मेशानाच्युतानां सृष्टिसंहारस्थितिकर्तृणामीशाय । परब्रह्मरूपत्वेन स्तूयते "असावादित्यो ब्रह्म" इति श्रुतिः । अथवा ब्रह्मेशानयोः ब्रह्मरुद्रयोः अच्युतेशः अच्युतनियन्ता । सर्वापत्स्वपि पालक इत्यर्थः । 'वेदापहारगुरुपातकदैत्यपीडाद्यापद्विमोचनमहिष्ठफलप्रदाता' इत्यर्थः । ब्रह्मेशायाच्युतेशायेत्यपि पाठः । तस्मै । आदित्यरूपं वर्चो दीप्तिर्यस्य तस्मै आदित्यवर्चसे । भा अस्यास्तीति भास्वान् तस्मै । सर्वभक्षाय सर्वसंहर्त्रे । अतएव तस्मिन्समये रौद्राय वपुषे । तमः अन्धकारं हन्तीति तमोघ्नः । आश्रितशत्रून् हन्तीति शत्रुघ्नः । अमितः अपरिच्छिन्नः आत्मा स्वरूपं यस्यासौ अमितात्मा । कृतघ्नं हन्तीतिकृतघ्नघ्नः । देवाय दीप्यमानाय । तप्तचामीकराभाय हिरण्यवपुषे । वह्नये अग्निरूपेण हव्यवाहनाय । विश्वं जगत् कर्म कर्तव्यं यस्य तस्मै विश्वकर्मणे । सर्वजगत्कर्त्रे इत्यर्थः । लोकसाक्षिणे लोकानां जनानां अन्तर्यामि-

जगद्व्याप्तित्वात्सर्वः । 'सर्वसमाप्नोषिततोसिसर्वः' इतिगीतोक्तेः । भवोद्भवेतिश्रुतिस्थपदानुवादः । मङ्गलरूपत्वाद्भवः । उद्भवः उद्गतसंसृतिः । उद्गमनंचात्रात्यन्ताभावोविवक्षितः । सचासौसच । विश्वभावनः विश्वभावोविश्वत्वं जगदभेदइतियावत् । न यस्यसविश्वभावनइतिवा ॥ १३—१५ ॥ **ती०** पूर्वायगिरये विष्णुपुराणोक्तरीत्यातत्तद्गिर्यन्तर्यामिणेइत्यर्थः । ज्योतिर्गणानांपतये ज्योतिर्गणान्मुक्तानांपतयेस्वामिने । सूर्यपर्यायनामानिसर्वाण्यपितदन्तर्यामिपर्यवसितानीतिहृदिनिधायाह—**दिनाधिपतयइत्यादि** । जयाय जयतीतिजयः अप्रतिहतपराक्रमस्तस्मै । जयन्त्यनेनभक्ताःसंसारमितिवाजयः । जयभद्राय उपासकानांरोगपापादिजयंभद्रंकल्याणंचप्रयच्छतीतिजयभद्रः । हर्यश्वाय हरिःहनुमान् अश्वःवाहनंयस्यसः । अनेनरामावतारःसूचितः । आदरातिशयेननमःपदस्यद्विरुक्तिः । सहस्राण्यंशवोजीवायस्यससहस्रांशुः । 'ममैवांशोजीवलोकेजीवभूतः' इतिस्मरणात् ॥ **ति०** जयाय ब्रह्मलोकान्तसकलजयप्रदाय जयाख्यब्रह्मद्वारपालमूर्तयेच । जयभद्राय ब्रह्मलोकादिजयप्राप्यंयद्भद्रं भूमानन्दस्तदात्मकाय । जयभद्राख्यद्वितीयद्वारपालमूर्तयेच । इमावेवशापवशतोऽवतीर्णौरावणकुंभकर्णौ । हर्यश्वोहरिदश्वपर्यायः । आदित्येतिनाम्नःप्राधान्यबोधनायतस्यद्विरुक्तिः ॥ **स०** ज्योतिर्गणानां अभ्यादिप्रकाशकवस्तूनांपतये । अलुक्षष्ठ्याः । तेनधिसंज्ञोपपत्तिः । आक्रोशश्च सर्वसुपर्ववर्यस्यज्योतिर्गणमात्रपतित्वोक्ताविति ज्ञेयं । दिनाधिपतये दिनाधिपस्यसूर्यस्य पतिः आनन्दोयस्मादितिसवा ॥ १६—१७ ॥ **ती०** उग्राय अनुपासकानामुग्ररूपाय । विविधमीरयतिप्रेरयतिप्राणिनश्चेष्टयतीतिवीरस्तस्मै । सारंशीघ्रंगच्छतीतिसारङ्गः । यद्वा सारग्राहिणे । यद्वा हंसावताराय । यद्वा सारंप्रणवःतेनप्रतिपाद्यतइतिसारङ्गः ब्रह्मेशानाच्युतेशाय ब्रह्मेशानाच्युतानां सृष्टिसंहारस्थितिकर्तृणां ईशःस्वामी । परब्रह्मणस्तादृशत्वात् । "सृष्टिस्थित्यन्तकरिणींब्रह्मविष्णुशिवात्मिकां । ससंज्ञांयातिभगवानेकएवजनार्दनः ।" इतिस्मरणात् । सर्वभक्षाय सर्वयज्ञभोक्त्रे । सर्वसंहर्त्रेवा । 'यस्यब्रह्मचक्षत्रंचोभेभवतओदनः'इतिश्रुतेः । शत्रुसंहारा-

[**पा०**] १ घ. रश्मिभावनः. २ ख. ङ. झ. ञ. ट. पश्चिमायाद्रयेनमः. घ. पश्चिमायनमोनमः. ३ घ. हरिदश्वायतेनमः- ४ ङ. झ. ञ. ट. प्रचण्डायनमोस्तुते.

ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे ॥ भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥ १९ ॥
तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ॥ कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥ २० ॥
तप्तचामीकराभाय वह्नये विश्वकर्मणे ॥ नमस्तमोभिनिघ्नाय रुचये लोकसाक्षिणे ॥ २१ ॥
नाशयत्येष वै भूतं तदेव सृजति प्रभुः ॥ पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥ २२ ॥
एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ॥ एष एवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ॥ २३ ॥
वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च ॥ यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः ॥ २४ ॥

तया सुकृतदुष्कृतकर्मसाक्षिणे ॥ १६—२१ ॥ एवमादित्यहृदयमुपदिश्य पुनरपितत्प्रतिपाद्यदेवतांस्तौति—नाशयतीत्यादिना श्लोकत्रयेण ॥ भवतीति भूतं जगत् नाशयति । महाप्रलये पुनस्तदेव सृजति । अत्ययकालनिवृत्तौ । प्रभुः पालकः । पालकत्वमेव प्रपञ्चयति—पायतीति । पायति शोषयति । "पै शोषणे" इति धातुः । सुप्तेषु भूतेषु प्राणिषु परिनिष्ठितः अन्तर्यामित्वेन स्थितः जागर्ति । सकलयज्ञकर्तृत्वफलप्रदत्वान्याह—एष इति ॥ वेदवेद्यत्वमाह—वेदा इति ॥ सर्वकर्मसमाराध्यत्वमाह—क्रतव इति । क्रतुफलप्रदत्वमाह—क्रतूनामिति । लौकिककर्मफलप्रदत्वमाह—यानीति । तेषामिति शेषः । सर्वः सर्वात्मको रविरेव प्रभुर्नियन्ता ॥ २२—२४ ॥

र्थेउग्रायवपुषे । अनेननृसिंहावतारःसूचितः । शत्रुघ्नाय शत्रुसंहर्त्रे । जितहृषीकायेत्यर्थः । अमितात्मने अपरिमितमहिम्ने । कृतघ्नान्हन्तीतिकृतघ्नाय । देवाय स्वयंप्रकाशाय । तप्तचामीकराभाय हिरण्मयपुरुषाय । वह्नये वसूनांपावकइतिस्मरणात् । हरय इतिपाठे हरत्यशेषमज्ञानंतत्कार्यंचेतिहरिः । विश्वकर्मणे विश्वंकर्मकार्यंयस्यसः । "सर्वकर्मासर्वकामः"इतिस्मृतेः । तमोभिनिघ्नाय तूलाज्ञाननाशकाय । रुचये रोचतइतिरुचिस्तस्मै । घृणयेलोकसाक्षिणेइतिपाठे—'घृक्षरणदीप्त्योः'इतिधातोः स्वयंप्रकाशैकतानत्वात् घृणिः । लोकसाक्षिणे सर्वसाक्षिणे । 'सर्वदेवात्मकोह्येष'इत्यारभ्यघृणयेलोकसाक्षिणेइत्येतदन्ताः अष्टोत्तरशतसंख्याआदित्यहृदयतोत्रनाममन्त्रावेदितव्याः ॥ स० वीराय विक्रान्ताय । विगरुडंगम्यस्थानंप्रतीरयतीतिवा विगतःईरःप्रेरकोयस्येतिवा विविधमीरयतीतिवावीरस्तस्मै । अरैःसहवर्ततइतिसारंकालचक्रं । तद्रूपयतीतिसारंगः । द्वितीयायाअलुक् । लोकसारंस्वात्मानंजनान्प्रतिगमयतिज्ञापयतीतिवासारंगः । पद्मप्रबोधाय कमलविकासकाय । पद्मोगजेन्द्रस्तस्यप्रबोधोगजत्वेपिजन्मान्तरानुस्मृतिर्यस्मात् । 'हर्यर्चनानुभावेनयद्गजत्वेप्यनुस्मृतिः'इतिभागवतोक्तेः । ब्रह्मेशानाच्युतेशाय ब्रह्मेशानयोःअच्युतश्चासावीशश्च नित्याच्युतस्वामीत्यर्थः । ब्रह्माचईशश्चअनोवायुश्च नच्यवतइत्यच्युता श्रीश्चब्रह्मेशानाच्युताः । तदीशइतिवा । सर्वभक्षाय सर्वंचराचरंभक्षयतीतिसतथा । 'अत्ताचराचरग्रहणात्'इतिसूत्रात् 'सर्वंवाअत्ती'तिश्रुतेश्च । सर्वाःहिंसकाः तद्रक्षायेतिवा । रुद्राय तदन्तर्गताय । रोगद्रावकायवा । 'रुजंद्रावयतेयस्माद्रुद्रस्तस्माज्जनार्दनः'इत्युक्तेः । निर्वचनत्वाद्वकारलोपः । वपुषे वंज्ञानंसद्वर्तिवा असाधारण्येनन्यायेन तत्पुष्णातीतिवपुद्र । तस्मै । विश्वकर्मणेव्याप्तव्यापाराय । विनागरुडेनशुवतिगच्छतीतिविशुः । विपूर्वात्सौत्रात्च्छुवतेरौणादिकोडुः । नवियतेकर्मबन्धकंयस्येतिवा नवियतेक्लिष्टंकर्मेतिवा अकर्मा । विशुश्चासावकर्माचेतिवा विश्वंकर्मयस्येतिवा । 'हरिरक्लिष्टकारित्वादकर्मा'इतिवचनात् । 'नक्रतेत्वत्कियतेकिंचनारे'इतिश्रुतेः । ति० रुद्दुःखंतन्मूलौरागद्वेषौतन्मूलाज्ञानंचविद्रावयतीतिरुद्रस्तस्मैदंरौद्रं अज्ञानसंहारसमर्थज्ञानाकारायेत्यर्थः । शत्रुर्देहाहंभावः । निजतत्वभगवदनुसंधानजसौख्येनतस्यशातनात्तस्यहन्ता । रिपुक्रणगदादिहन्ताच । कृतघ्नघ्नाय कृतं चेतनत्वलक्षणंभगवत्कृतमुपकारंघ्नन्तिविस्मरन्तियेतेकृतघ्नाः भगवद्विमुखाअज्ञाःसंसारिणः । तान्संसारानर्थप्रापणेनहन्तितादृशाय ॥ १८—२१ ॥ ति० एषइत्युक्तार्थः । भूतंप्रपञ्चं प्रतिसुप्ति नाशयति भूतंप्राणिजातंतत्तदायुरन्तेनाशयति । स्वदिनान्तेचनाशयति । तेन । तमेवोक्तमेवोक्तभूतंजगंगरादावहरादौचसृजति । प्रभुः प्रकर्षेणस्वशक्तिवैभवेनसकलप्रपञ्चात्मनाभवतीतिप्रभुः । सकलप्रपञ्चस्यसाक्षादधिष्ठाताच । पायतिशोषयतिगभस्तिभिः । पायतेनमः । तपतिनाशयति । तपतेनमः । वर्षतिसृजति । वर्षतेनमः ॥ २२ ॥ एषकरणेषु सुप्तेषु उपरतेषुस्वयमनुपरतशक्तिर्नित्यचिद्रूपोजागर्ति । निजमण्डलादर्शनतःप्राणिषुसुप्तेषु । तदगोचरदेशस्थेस्वमण्डलेजागर्तिच । सुप्तेषुजाग्रतेनमः । भूतेषुपरिनिष्ठितः अन्तर्यामितयास्थितः । अग्नयः पञ्चेन्द्रियलक्षणाःपञ्चाग्नयः तेषुहोत्रंहोमः तत्तद्विषयानुभवरूपः । अग्निहोत्रिणां बाह्याभ्यन्तराग्निहोत्रानुष्ठातृणांप्राप्यंयत्स्वर्गापवर्गरूपंफलंतत्प्रदश्च ॥ २३ ॥ ति० देवाः क्रतुदेवाः 'अष्टौवसवः एकादशरुद्रा'इत्यादिक्रमेणोपदिष्टात्रयस्त्रिंशद्देवाः । क्रतवः सोमाद्यश्वमेधान्ताः । क्रतुफलं श्रुत्युक्तंस्वर्गादि । किंचसर्वेषुलोकेषुप्राणिषुयानिकृत्यानिक्रियास्त-

[पा०] १ ङ. ञ. ट. सूराय. २ ङ. ञ. अ. हरयेविश्व. ३ च. छ. घृणये. क. ग. घ. रवयेलोक. ४ क. घ. ज. सृजतेपुनः. ५ ख. ङ. च. छ. ञ. ट. देवाश्च.

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ॥ कीर्तयन्पुरुषः कश्चिन्नावसीदति राघव ॥ २५ ॥
पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ॥ एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥ २६ ॥
अस्मिन्क्षणे महाबाहो रावणं त्वं वधिष्यसि ॥ एवमुक्त्वा तदाऽगस्त्यो जगाम च यथागतम् ॥२७॥
एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ॥ धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥ २८ ॥
आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान् ॥ त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥ २९ ॥
रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत् ॥ सर्वयत्नेन महता वधे तस्य धृतोऽभवत् ॥ ३० ॥
अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः ॥
निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ॥ ३१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तोत्तरशततमः सर्गः ॥ १०७ ॥

इदानीं स्तोत्रस्य फलमाह—एनमिति ॥ कृच्छ्रेषु कष्टेषु । कान्तारेषु भयेषु दुर्गममार्गेषु । भयहेतुषु सत्सु। कश्चिदित्यधिकारिनियमाभावो दर्शितः ॥ २५–२७ ॥ एतच्छ्रुत्वेत्यादिश्लोकद्वयमेकान्वयं ॥ त्रिराचम्येत्यन्त्याचमनमाद्याचमनस्याप्युपलक्षणं । धारयामास। जप्त्वेत्यत्र आदित्यहृदयमिति शेषः ॥ २८—२९ ॥ युद्धाय युद्धं कर्तुं । "तुमर्थाच्च भाववचनात्" इति चतुर्थी । सर्वयत्नेन सर्वप्रकारेण यत्नेन ॥ ३० ॥ प्रहृष्यमाणः प्रहृष्यन् । पुलकित इति यावत् । निशिचरपतिरिति । "तत्पुरुषे कृति बहुलं" इति सप्तम्या अलुक् । रविः आत्मानं स्तुवन्तं रामं निरीक्ष्य मुदितमनाः स्तोत्रेण संतुष्टमनाः प्रहृष्यमाणः सन् निशिचरपतेः संक्षयं विदित्वा अनुगृह्य सुरगणमध्यगतः सन् त्वर रावणवधं प्रति त्वरस्वेति वचोवदत् । अत्र सुरगणमध्यगत इत्यनेन युद्धदर्शनार्थं स्वमण्डलादवतीर्य रामसमीपे गगने स्थित्वा स्तोत्रफलमनुगृहीतवानित्युच्यते । ननूक्तरत्र ब्रह्मरुद्रादयः सर्वे एकवाक्यतया भवान्नारायणो देव इत्यादिना विष्णोरेव सर्वस्मात्परत्वं महता ग्रन्थेन प्रतिपादितवन्तः । अत्र सूर्यस्यैव सर्वोत्तरत्वमुच्यते कथमिदं संगच्छते । उच्यते । यथा मधुविद्यायामादित्यस्य परतया प्रतिपादनेपि तदन्तर्यामिण्येव परमात्मनि मधुविद्यायास्तात्पर्यमिति बादरायणो ब्रह्ममीमांसायामुक्तवान् । तथास्य मन्त्रस्यादित्यान्तर्यामिविषयतया सर्वमिदं संगच्छते । नारायणपरत्वं ह्युपक्रमप्रभृत्योपसंहारमविवादमिति पूर्वमेव बहुलं प्रतिपादितम् । ब्रह्मेशानाच्युतेशायेत्येतदपि मूर्तित्रयस्य परमात्मजन्यत्वादुपपद्यते । अयं च सर्गः केषुचित्कोशेषु न दृश्यते । उडारिणा न व्याख्यातश्च । आरम्भात्प्रभृति प्रबन्धप्रतिपादितनारायणपरत्वविरुद्धं चात्र प्रतिभाति सूर्यपरत्वं । अस्मिंश्चकाण्डे त्रिंशदुत्तरशतसर्गा उडारिणा गणिताः एतदन्तर्भावे एकत्रिंशदुत्तरशतसर्गास्तेन गणिता भवेयुः ॥ ३१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तोत्तरशततमः सर्गः ॥ १०७ ॥

त्साधनानिचक्रुर्विग्रयजमानसमिदाज्यपश्वादीनि । तैर्निजभक्तद्विजानांसंघटनेपरमप्रभुः परमसमर्थः । परमसमर्थायभगवतेब्रह्मणेनमः ॥ स० एवंपञ्चविंशत्युत्तरशतसंख्याभगवत्पूजारहस्यनाममन्त्राइतिकतकः । 'सर्वदेवात्मकोह्येषइत्यारभ्य—लोकसाक्षिणे' इत्यन्ताष्टोत्तरशतसंख्याएवादित्यहृदयस्तोत्रनाममन्त्राइतितीर्थः । कविनातुस्पष्टमिदंमुद्रणंनकृतमितिव्युत्पत्तिवित्त्यायथायथंनामानिज्ञेयानि । निरुक्तिवैचित्र्याच्चफलाधिक्यसंभवादितिमन्तव्यं ॥ २४ ॥ ति० एवंकथितस्यस्तोत्रस्यफलमाह—एनमिति आदित्यहृदयस्तवंकीर्तयन्नापदादिषुकश्चिदपिद्विजोनावसीदति नदुःखनिमग्नोभवति । यद्वा एनं आदित्यहृदयार्थभूतंसूर्यं । आपदादिनिमित्तेषुउक्तैर्नाममन्त्रैःविशिष्यकीर्तयन् स्तुवन् नावसीदति । अत्र आपत् अकालमृत्युः । कृच्छ्रं ज्वरादिदुःखं । भयं चोरादिनिमित्तं ॥ २५ ॥ ति० इदं शीघ्रसिद्धिकरंस्तोत्रं जप्त्वा हृष्टात्मा प्रातर्युद्धायागतंरावणंप्रेक्ष्यजयार्थंमनसाभगवन्तं अगमत् ध्यातवान् ॥ २९—३० ॥ इतिसप्तोत्तरशततमःसर्गः ॥ १०७ ॥

[पा०] १ च. छ. ज. जप्त्वात्रिः. झ. ञ. ट. जप्त्वेदं. २ झ. ञ. ट. जयार्थं.

अष्टोत्तरशततमः सर्गः ॥ १०८ ॥

स्वाभिमुखसमागच्छद्दशमुखरथावलोकिनादाशरथिना चोदितेनमातलिना दशमुखमुखाभिमुखतया निजरथचोदना ॥ १॥ ततोनिजसमरसमालोकनकुतूहलेन गगनाङ्गणमलंकुर्वाणेसुरमुखसुजनगणे निजविजयपरपराजयसूचकनिमित्तोदयदर्शिना दाशरथिना हर्षेणसमरोद्यमनम् ॥ २ ॥

स रथं सारथिर्हृष्टः परसैन्यप्रधर्षणम् ॥ गन्धर्वनगराकारं समुच्छ्रितपताकिनम् ॥ १ ॥
युक्तं परमसंपन्नैर्वाजिभिर्हेममालिभिः ॥ युद्धोपकरणैः पूर्णं पताकाध्वजमालिनम् ॥ २ ॥
ग्रसन्तमिव चाकाशं नादयन्तं वसुन्धराम् ॥ प्रणाशं परसैन्यानां स्वसैन्यानां प्रहर्षणम् ॥
रावणस्य रथं क्षिप्रं चोदयामास सारथिः ॥ ३ ॥
तमापतन्तं सहसा स्वनवन्तं महास्वनम् ॥ रथं राक्षसराजस्य नरराजो ददर्श ह ॥ ४ ॥
कृष्णवाजिसमायुक्तं युक्तं रौद्रेण वर्चसा ॥ [दीप्यमानमिवाकाशे विमानं सूर्यवर्चसम् ॥]
तडित्पताकागहनं दर्शितेन्द्रायुधायुधम् ॥ शरधारा विमुञ्चन्तं धारासारमिवाम्बुदम् ॥ ५ ॥
तं दृष्ट्वा मेघसंकाशमापतन्तं रथं रिपोः ॥ गिरेर्वज्राभिमृष्टस्य दीर्यतः सदृशस्वनम् ॥ ६ ॥
विस्फारयन्वै वेगेन बालचन्द्रनतं धनुः ॥ उवाच मातलिं रामः सहस्राक्षस्य सारथिम् ॥ ७ ॥
मातले पश्य संरब्धमापतन्तं रथं रिपोः ॥ ८ ॥
यथापसव्यं पतता वेगेन महता पुनः ॥ समरे हन्तुमात्मानं तथा तेन कृता मतिः ॥ ९ ॥
तदप्रमादमातिष्ठन्प्रत्युद्गच्छ रथं रिपोः ॥ विध्वंसयितुमिच्छामि वायुर्मेघमिवोत्थितम् ॥ १० ॥

अथ रावणदुर्निमित्तानि–स रथमित्यादिसार्धश्लोकत्रयमेकान्वयं ॥ अत्र द्वितीयसारथिशब्दः अनेकविशेषणव्यवधानात् पूर्वोक्ताविस्मरणाय । गन्धर्वनगराकारं गन्धर्वनगरसदृशं । तल्लक्षणमुक्तं मिहिरेण– "चित्रवर्णं चित्ररूपप्राकारगृहगोपुरम् । अलंकृतमनेकाभैर्वितानध्वजतोरणैः ॥ गन्धर्वनगरं दन्तिनृवाजिक्षययुद्धकृत् । दृश्यते चेन्महद्युद्धमन्योन्यं धरणीभुजां" इति ॥ युद्धोपकरणैः धनुःकवचादिभिः । पताकायुक्ताः ध्वजाः तैर्मालन्त इति पताकाध्वजमाली तं । "मल मल्ल धारणे" इत्यस्माण्णिनिः । ग्रसन्तमिव । स्वविस्तारेणेति भावः । प्रणाशयतीति प्रणाशं ॥ १–३ ॥ स्वनवन्तं शब्दवन्तं । महास्वनं । प्रतिध्वनियुक्तमित्यर्थः ॥ ४ ॥ कृष्णवाजिसमायुक्तमित्यादिसार्धश्लोकत्रयमेकान्वयं ॥ रौद्रेण उग्रेण । तडित्पताकागहनं तडित्तुल्यपताकावनं । दर्शितेन्द्रायुधायुधं दर्शितानीन्द्रायुधसदृशानि आयुधानि येन तं । यद्वा दर्शितेन्द्रायुधानि स्वप्रभाविशेषविरचितेन्द्रचापान्यायुधानि यस्मिन् दृश्यन्ते तादृशं । यद्वा आयुधं धनुः दर्शितेन्द्रधनुस्तुल्यधनुष्कं । धारासारं धारासमूहमित्यर्थः । वज्राभिमृष्टस्य वज्राहतस्य । अतएव दीर्यतः भिद्यमानस्य । बालचन्द्रनतं आरोपितमौर्वीकत्वेन बालचन्द्रवन्नतं ॥ ५—७ ॥ मातले इत्यर्धमेकं वाक्यं ॥ संरब्धं वेगवन्तं ॥ ८ ॥ यथापसव्यमिति । यथा आ अपसव्यमिति छेदः । अपसव्यं अप्रदक्षिणं यथा स्यात्तथा महता वेगेन पुनः आपतता आगच्छता तेन रावणेन समरे आत्मानं हन्तुं मतिः कृता । अपसव्यतया गमनं विनाशद्योतकमित्यर्थः ॥ ९ ॥ तत् अपसव्यगमनस्य विनाशहेतुत्वात्, अप्रमादमातिष्ठन् सावधानतामवलम्बमानः । अपसव्यतां परिहरन्नित्यर्थः । रिपोः रथं प्रत्युद्गच्छ ॥ १० ॥

ति० परमसंपन्नैः परमैःरथवहनोचिताश्वगुणैर्जवादिभिःसंपन्नैः । स० परमेतिभावप्रधानं परमत्वेनसंपन्नैः उत्तमैः ॥ २ ॥ रामानु० पताकायुक्तश्चासौध्वजश्चपताकाध्वजः । पताकाध्वजश्चमालाश्चपताकाध्वजमालं । तदस्यास्तीतिपताकाध्वजमालीतेन । द्वितीयरथसारथिशब्दावनेकविशेषणव्यवधानात्पूर्वोक्ताविस्मरणार्थौतदनुवादकावेव । स० सारथिर्मातलिःयंरथंचोदयामासतंप्रति रावणस्यसारथिःरथंप्रचोदयामासेत्यन्वयेनानयोरथसारथिशब्दयोःपुनरुक्ताभीत्याऽनुवादतांगीकरणप्रयासउभयोरफलः ॥ ३ ॥

[पा०] १ घ. परमसंहृष्टैः. २ इदमर्धं. क. ख. ङ. च. झ. ट. पाठेषुदृश्यते.

अविक्लबमसंभ्रान्तमव्यग्रहृदयेक्षणम् ॥ रश्मिसंचारनियतं प्रचोदय रथं द्रुतम् ॥ ११ ॥
कामं न त्वं समाधेयः पुरन्दररथोचितः ॥ युयुत्सुरहमेकाग्रः स्मारये त्वां न शिक्षये ॥ १२ ॥
परितुष्टः स रामस्य तेन वाक्येन मातलिः ॥ प्रचोदयामास रथं सुरसारथिसत्तमः ॥ १३ ॥
अपसव्यं ततः कुर्वन्रावणस्य महारथम् ॥ चक्रोत्क्षिप्तेन रजसा रावणं व्यवधानयत् ॥ १४ ॥
ततः क्रुद्धो दशग्रीवस्ताम्रविस्फारितेक्षणः ॥ रथप्रतिमुखं रामं सायकैरवधूनयत् ॥ १५ ॥
धर्षणामर्षितो रामो धैर्यं रोषेण लम्भयन् ॥ जग्राह सुमहावेगमैन्द्रं युधि शरासनम् ॥
शरांश्च सुमहातेजाः सूर्यरश्मिसमप्रभान् ॥ १६ ॥
तदोपोढं महद्युद्धमन्योन्यवधकाङ्क्षिणोः ॥ परस्पराभिमुखयोर्दृप्तयोरिव सिंहयोः ॥ १७ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ समेयुर्द्वैरथं द्रष्टुं रावणक्षयकाङ्क्षिणः ॥ १८ ॥
समुत्पेतुरथोत्पाता दारुणा रोमहर्षणाः ॥ रावणस्य विनाशाय राघवस्य जयाय च ॥ १९ ॥
ववर्ष रुधिरं देवो रावणस्य रथोपरि ॥ वाता मण्डलिनस्तीक्ष्णा ह्यपसव्यं प्रचक्रमुः ॥ २० ॥
महद्गृध्रकुलं चास्य भ्रममाणं नभःस्थले ॥ येनयेन रथो याति तेनतेन प्रधावति ॥ २१ ॥
संध्यया चावृता लङ्का जपापुष्पनिकाशया ॥ दृश्यते संप्रदीप्तेव दिवसेऽपि वसुंधरा ॥ २२ ॥
सनिर्घाता महोल्काश्च संप्रचेरुर्महास्वनाः ॥ विषादयंस्ते रक्षांसि रावणस्य तदाहिताः ॥ २३ ॥
रावणश्च यतस्तत्र संचचाल वसुंधरा ॥ रक्षसां च प्रहरतां गृहीता इव बाहवः ॥ २४ ॥
ताम्राः पीताः सिताऽश्वेताः पतिताः सूर्यरश्मयः ॥ दृश्यन्ते रावणस्याङ्गे पर्वतस्येव धातवः ॥२५॥

अविक्लबं अदीनं । असंभ्रान्तं अप्रमादं । अव्यग्रहृदयेक्षणं अव्याकुलमनोनयनं । रश्मिसंचारनियतं नियतरश्मिसंचारं । एतानि क्रियाविशेषणानि ॥ ११ ॥ न समाधेयः नोपदेष्टव्यः । अत्र हेतुः—पुरन्दररथोचित इति । अभ्यस्तपुरन्दररथ इत्यर्थः ॥ १२—१३ ॥ रावणस्य महारथमपसव्यं कुर्वन् स्वरथस्यापसव्यतां परिहरन्नित्यर्थः । चक्रोत्क्षिप्तेन रथचक्रोत्थापितेन रजसा रावणं व्यवधानयत् व्यवहितमकरोत् ॥१४॥ रथप्रतिमुखं सर्वथाभिमुखं । अवधूनयत् प्राहरत् ॥ १५ ॥ धर्षणेत्यादिसार्धश्लोकमेकं वाक्यं ॥ धैर्यं रोषेण लम्भयन् रोषेण निवृत्तधैर्यं इत्यर्थः । ऐन्द्रं मातलिनानीतं शरासनं शरांश्च जग्राहेति योजना ॥ १६ ॥ उपोढं प्रवृत्तं ॥ १७ ॥ द्वैरथं द्वाभ्यां रथाभ्यां प्रवर्तितं युद्धं ॥ १८ ॥ समुत्पेतुरिति । अत्रोत्पातानां राघवजयसूचकत्वं रावणवधद्वारा ॥ १९ ॥ दवेः पर्जन्यः । मण्डलिनो वाताः वात्याः । अपसव्यं अप्रदक्षिणं । प्रचक्रमुः चेरुः ॥ २० ॥ अस्य रावणस्य रथो येन मार्गेण याति स्म तेन मार्गेण महत् गृध्रकुलं नभःस्थले भ्रममाणं सत् प्रधावति स्म । अनेन रावणस्यासन्नमरणत्वं सूचितम् । तदुक्तं शकुनार्णवे—"आसन्नमृत्योर्निकटे चरन्ति गृध्रादयो मूर्ध्नि गृहोर्ध्वभागे" इति ॥२१॥ जपापुष्पनिकाशया संध्यया लङ्का आवृता । अतएव वसुंधरा लङ्कापर्यन्तभूमिः रात्रावग्निना संप्रदीप्तेव दिवसेपि संप्रदीप्ता दृश्यत इत्यर्थः ॥२२॥ सनिर्घाता महोल्काः संप्रचेरुः । ते उल्काः लिङ्गव्यत्ययः । रावणस्याहिताः प्रतिकूलाः सन्तः रक्षांसि विषादयन् व्यषादयन् ॥ २३ ॥ यतः यत्र रावणो गतः तत्र वसुंधरा संचचाल । रावणसमीप एव भूकम्पो जात इत्यर्थः । गृहीता इव बाहवः । कैश्चिद्गृहीता बाहवो यथा प्रहर्तुं न क्षमन्ते तथाभूवन्नित्यर्थः ॥ २४ ॥ सिता अश्वेताश्च सिताश्वेताः । पर्वतस्येवेति । पर्वतस्याङ्गे धातव

ति० अविक्लबत्वादिचतुर्गुणयुक्तंयथातथाद्रुतंरथंप्रचोदय । अविक्लबत्वमभीरुत्वं । असंभ्रान्तत्वंरणक्षोभादक्षुभितचित्तत्वं । अव्यग्रमश्वीयहृदयेक्षणंयत्र । रश्मिसंचारनियतं रश्मिसंचारेनैपुण्यं तत्तत्कालानुगुण्येनसंयमनमोचनव्यवस्थावत्त्वं । स० प्रचोदनक्रियान्वयद्वाराविक्लबत्वादीनांचतुर्णांसारथौतत्कर्तरिसंगततामन्तव्या ॥ ११ ॥ ती० ऐन्द्रंशरासनं 'इदिपरमैश्वर्ये'इतिधातोरिन्द्रः परमात्मा । तदीयंनिजायुधंजग्राहेत्यर्थः ॥ १६ ॥

[पा०] १ ङ. ञ. रावणस्याग्रे. क. ग. ज. रावणस्याङ्के.

गृध्रैरनुगताश्चास्य वमन्त्यो ज्वलनं मुखैः ॥ प्रणेदुर्मुखमीक्षन्त्यः संरब्धमशिवं शिवाः ॥ २६ ॥
प्रतिकूलं ववौ वायू रणे पांसून्समाकिरन् ॥ तस्य राक्षसराजस्य कुर्वन्दृष्टिविलोपनम् ॥ २७ ॥
निपेतुरिन्द्राशनयः सैन्ये चास्य समन्ततः ॥ दुर्विषह्यस्वना घोरा विना जलधरस्वनम् ॥ २८ ॥
दिशश्च प्रदिशः सर्वा बभूवुस्तिमिरावृताः ॥ पांसुवर्षेण महता दुर्दर्शं च नभोऽभवत् ॥ २९ ॥
कुर्वन्त्यः कलहं घोरं शारिकास्तद्रथं प्रति ॥ निपेतुः शतशस्तत्र दारुणं दारुणारुताः ॥ ३० ॥
जघनेभ्यः स्फुलिङ्गांश्च नेत्रेभ्योश्रूणि संततम् ॥ मुमुचुस्तस्य तुरगास्तुल्यमग्निं च वारि च ॥ ३१ ॥
एवंप्रकारा बहवः समुत्पाता भयावहाः ॥ रावणस्य विनाशाय दारुणाः संप्रजज्ञिरे ॥ ३२ ॥
रामस्यापि निमित्तानि सौम्यानि च शुभानि च ॥ बभूवुर्जयशंसीनि प्रादुर्भूतानि सर्वशः ॥ ३३ ॥
निमित्तानि च सौम्यानि राघवः स्वजयाय च ॥ दृष्ट्वा परमसंहृष्टो हतं मेने च रावणम् ॥ ३४ ॥

ततो निरीक्ष्यात्मगतानि राघवो रणे निमित्तानि निमित्तकोविदः ॥
जगाम हर्षं च परां च निर्वृतिं चकार युद्धे ह्यधिकं च विक्रमम् ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टोत्तरशततमः सर्गः ॥ १०८ ॥

नवोत्तरशततमः सर्गः ॥ १०९ ॥

रामरावणयोः समसमरः ॥ १ ॥

ततः प्रवृत्तं सुक्रूरं रामरावणयोस्तदा ॥ सुमहद्वैरथं युद्धं सर्वलोकभयावहम् ॥ १ ॥
ततो राक्षससैन्यं च हरीणां च महद्बलम् ॥ प्रगृहीतप्रहरणं निश्चेष्टं समतिष्ठत ॥ २ ॥

इवेति योजना ॥ २५ ॥ गृध्रैरनुगताः गृध्रसहिता इत्यर्थः । शिवाः गोमायवः मुखैर्ज्वलनं वमन्त्यः सत्यः अस्य रावणस्य मुखमीक्षन्त्यः । रावणाभिमुखा इत्यर्थः । संरब्धं कुपितं अशिवं अमङ्गलं च यथा भवति तथा प्रणेदुः । गृध्राणां साहित्यमात्रं नतु ज्वलनवमनादिकं ॥ २६ ॥ वायुः रणे पांसून् समाकिरन् तेन तस्य रावणस्य दृष्टिविलोपनं दृष्टिप्रतिघातं कुर्वन् प्रतिकूलं अभिमुखं ववौ ॥ २७ ॥ इन्द्राशनयः उल्काशनयः । उल्काशन्योः स्वरूपमुक्तं मिहिरेण—"उल्का शिरसि विशाला निपतन्ती वर्धते च तनुपुच्छा । अशनिः स्वनेन महता युक्ता नृगजाश्वतरुपशुमुखेषु ॥ निपतति विदारयन्ती धरातलं चक्रसंस्थाना" इति ॥ २८—२९ ॥ तद्रथं प्रति तद्रथोपरि ॥ ३० ॥ तुरगाः जघनेभ्यः स्फुलिङ्गान् नेत्रेभ्यः अश्रूणि च मुमुचुः । एवमग्निं च वारि च तुल्यं यथा भवति तथा मुमुचुः ॥ ३१—३२ ॥ एवं रावणपराजयसूचकदुर्निमित्तान्युक्तानि । इदानीं रामजयसूचकनिमित्तान्याह—रामस्यापीति ॥ सौम्यानि मनोज्ञानि । शुभानि शुभोदर्काणि । अत एव जयशंसीनि निमित्तानि प्रादुर्बभूवुः सत्तां लेभिरे । रामविषये किंचित्कारो हि सत्तालाभहेतुः ॥ ३३ ॥ जयाय निमित्तानि जयसूचकनिमित्तानीत्यर्थः ॥ ३४ ॥ रणे आत्मगतानि आत्मार्थं प्रादुर्भूतानि । हर्षं पुलकं निर्वृतिं सुखं च जगाम ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टोत्तरशततमः सर्गः ॥ १०८ ॥

द्वैरथं द्वाभ्यां रथाभ्यां प्रवृत्तं युद्धं प्रवृत्तमिति योजना ॥ १ ॥ निश्चेष्टं समतिष्ठत । युद्धाद्भुतदर्शन-

ति० परमसंहृष्टः लक्ष्मणोमातलिर्वेतिशेषः ॥ ३४ ॥ इत्यष्टोत्तरशततमःसर्गः ॥ १०८ ॥

[पा०] १ क. ख. ङ.—ट. न्समुत्किरन्. २ क.—ट. राघवस्यजयायवै. ३ च. छ. ज. सक्रूरं. घ. तत्क्रूरं. ४ ङ ञ. ट. समवर्तत.

संप्रयुद्धौ ततो दृष्ट्वा बलवन्नरराक्षसौ ॥ व्याक्षिप्तहृदयाः सर्वे परं विस्मयमागताः ॥ ३ ॥
नानाप्रहरणैर्व्यग्रैर्भुजैर्विस्मितबुद्धयः ॥ सर्पन्तं प्रेक्ष्य संग्रामं नाभिजग्मुः परस्परम् ॥ ४ ॥
रक्षसां रावणं चापि वानराणां च राघवम् ॥ पश्यतां विस्मिताक्षाणां सैन्यं चित्रमिवाबभौ ॥ ५ ॥
तौ तु तत्र निमित्तानि दृष्ट्वा रावणराघवौ ॥ कृतबुद्धी स्थिरामर्षौ युयुधाते ह्यभीतवत् ॥ ६ ॥
जेतव्यमिति काकुत्स्थो मर्तव्यमिति रावणः ॥ धृतौ स्वकीर्यसर्वस्वं युद्धेऽदर्शयतां तदा ॥ ७ ॥
ततः क्रोधादशग्रीवः शरान्संधाय वीर्यवान् ॥ मुमोच ध्वजमुद्दिश्य राघवस्य रथे स्थितम् ॥ ८ ॥
ते शरास्तमनासाद्य पुरन्दररथध्वजम् ॥ रथशक्तिं परामृश्य निपेतुर्धरणीतले ॥ ९ ॥
ततो रामोऽभिसंक्रुद्धश्चापमायम्य वीर्यवान् ॥ कृतप्रतिकृतं कर्तुं मनसा संप्रचक्रमे ॥ १० ॥
रावणध्वजमुद्दिश्य मुमोच निशितं शरम् ॥ महासर्पमिवासह्यं ज्वलन्तं स्वेन तेजसा ॥ ११ ॥
[रामश्चिक्षेप तेजस्वी केतुमुद्दिश्य सायकम् ॥] जगाम स महीं छित्त्वा दशग्रीवध्वजं शरः ॥
स निकृत्तोपतद्भूमौ रावणस्य रथध्वजः ॥ १२ ॥
ध्वजस्योन्मथनं दृष्ट्वा-रावणः सुमहाबलः ॥ [क्रोधेनाग्निना सङ्ख्ये प्रदीप्त इव पावकः ॥]
संप्रदीप्तोऽभवत्क्रोधादमर्षात्प्रदहन्निव ॥ १३ ॥
स रोषवशमापन्नः शरवर्षं महद्वमन् ॥ रामस्य तुरगान्दीप्तैः शरैर्विव्याध रावणः ॥ १४ ॥
ते विद्धा हरयस्तत्र नास्खलन्नापि बभ्रमुः ॥ बभूवुः स्वस्थहृदयाः पद्मनालैरिवाहताः ॥ १५ ॥
तेषामसंभ्रमं दृष्ट्वा वाजिनां रावणस्तदा ॥ भूय एव सुसंक्रुद्धः शरवर्षं मुमोच ह ॥ १६ ॥
गदाश्च परिघाश्चैव चक्राणि मुसलानि च ॥ गिरिशृङ्गाणि वृक्षांश्च तथा शूलपरश्वधान् ॥ १७ ॥
मायाविहितमेतत्तु शस्त्रवर्षमपातयत् ॥ तुमुलं त्रासजननं भीमं भीमप्रतिस्वनम् ॥ १८ ॥

कुतूहलादिति भावः ॥ २ ॥ एतदेव विवृणोति द्वाभ्यां—संप्रयुद्धाविति ॥ संप्रयुद्धौ सम्यग्योद्धुमुपक्रान्तौ । कर्मणि क्तः । बलवत् अत्यन्तं व्याक्षिप्तहृदयाः युद्धदर्शनसक्तचित्ताः ॥ ३ ॥ भुजैरित्युपलक्षणे तृतीया ॥ ४ ॥ रावणं पश्यतां विस्मिताक्षाणां विकसितनेत्राणां रक्षसां सैन्यं राघवं पश्यतां विस्मिताक्षाणां वानराणां सैन्यं च चित्रमिवाबभौ ॥ ५ ॥ निमित्तानि दुर्निमित्तानि शुभनिमित्तानिचेत्यर्थः । कृतबुद्धी निश्चितबुद्धी ॥ ६ ॥ निश्चयमेवाह—जेतव्यमिति ॥ जयोवश्यंभावीति । मर्तव्यमिति । मरणमवश्यंभावीति । आवश्यकत्वार्थे तव्यः । धृतौ धैर्यवन्तौ ॥ ७—८ ॥ रथशक्तिं रथबलं । परामृश्य प्राप्य । रथशक्तिप्रघातेन ध्वजमनासाद्य निपेतुरित्यर्थः ॥ ९ ॥ संप्रचक्रमे उद्युक्तवान् । संकल्पितवानित्यर्थः ॥ १० ॥ असह्यं दुर्दर्शमित्यर्थः ॥११॥ सः शरः ध्वजं छित्त्वा जगाम न तु केवलं जगाम ॥१२॥ क्रोधादमर्षाच्च प्रदहन्निव प्रदहन्नग्निरिव संप्रदीप्तः ज्वलितः अभवत् ॥ १३ ॥ शरवर्षं वमन् वमन्निवेत्यर्थः ॥ १४ ॥ हरयः हरितवर्णाः । इन्द्राश्वत्वादिति भावः ॥ १५—१६ ॥ गदाश्चेति । मुमोचेत्यनुषज्यते ॥ १७ ॥ धनुषा कथं गदादिमोचनमित्यत्राह—मायेति ॥ शस्त्रवर्षं गदादिवर्षं । मायाविहितं आश्चर्यकरशक्तिकृतं । तुमुलं नानाविधमित्यर्थः ॥ १८ ॥

ति० विस्मिताक्षाणां विस्मयपरवशेन्द्रियाणां ॥ ५ ॥ ति० निश्चयमाह—जेतव्यमिति मर्तव्यमिति । मृत्युरूपशत्रौप्रहर्तव्यमित्यर्थ इतिकतकः । स० स्वकीर्यसर्वस्वमित्यत्रारावणसंहारकारणंयावत्तावदत्रसर्वस्वपदेनरामपक्षेग्राह्यं । अन्यत्रानुपचरितोर्थः ॥७॥

[पा०] १ झ. तस्थुःप्रेक्ष्यचसर्वंतेनाभिजग्मुः. ङ.च. छ. ट. तस्थुः प्रेक्ष्यचतंसर्वंनाभि. ग. घ. तस्थुःप्रेक्ष्यचसर्वंतन्नाभि. ख. ज. तस्थुःप्रेक्ष्यचसंग्रामंनाभि. २ ख. ङ. च. छ. झ. ञ. ट. माकृष्य. ३ इदमर्धं ङ. च. छ. झ. ञ. ट. पाठेषुदृश्यते. ४ च. छ. झ. ञ. ट. भित्त्वा. ५ ख. ङ. च. छ. ञ. ट. पाठेष्विदमर्धंदृश्यते. ६ ख. ङ. च. छ. झ. ञ. ट. शरवर्षं ववर्षह. ७ ङ. झ. ञ. ट. तेदिव्याहरयः.

तद्वर्षमभवद्युद्धे नैकशस्त्रमयं महत् ॥ विमुच्य राघवरथं समन्ताद्वानरे बले ॥ १९ ॥
सायकैरन्तरिक्षं च चकाराशु निरन्तरम् ॥ सहस्रशस्ततो बाणानश्रान्तहृदयोद्यमः ॥
मुमोच च दशग्रीवो निःसङ्गेनान्तरात्मना ॥ २० ॥
व्यायच्छमानं तं दृष्ट्वा तत्परं रावणं रणे ॥ प्रहसन्निव काकुत्स्थः संदधे सायकाञ्शितान् ॥ २१ ॥
स मुमोच ततो बाणान्रणे शतसहस्रशः ॥ तान्दृष्ट्वा रावणश्चक्रे स्वशरैः खं निरन्तरम् ॥ २२ ॥
ततस्ताभ्यां प्रमुक्तेन शरवर्षेण भास्वता ॥ शरबद्धमिवाभाति द्वितीयं भास्वदम्बरम् ॥
[चक्राते तौ शरौघाभ्यां निरुच्छ्वासमिवांबरम्] ॥ २३ ॥
नानिमित्तोऽभवद्बाणो नातिभेत्ता न निष्फलः ॥ २४ ॥
अन्योन्यमभिसंहत्य निपेतुर्धरणीतले ॥ तथा विसृजतोर्बाणान्रामरावणयोर्मृधे ॥ २५ ॥
प्रायुध्यतामविच्छिन्नमस्यन्तौ सव्यदक्षिणम् ॥ चक्रतुश्च शरौघैस्तौ निरुच्छ्वासमिवाम्बरम् ॥ २६ ॥
[नान्तरं ददृशे किंचित्पश्यद्भिरनिमेषणम् ॥ भूमिष्ठैः कपिरक्षोभिः स्वस्थैर्वा देवदानवैः] ॥ २७ ॥
रावणस्य हयात्रामो हयात्रामस्य रावणः ॥ जघ्नतुस्तौ तथाऽन्योन्यं कृतानुकृतकारिणौ ॥ २८ ॥
एवं तौ तु सुसंक्रुद्धौ चक्रतुर्युद्धमद्भुतम् ॥ मुहूर्तमभवद्युद्धं तुमुलं रोमहर्षणम् ॥ २९ ॥

प्रयुध्यमानौ समरे महाबलौ शितैः शरै रावणलक्ष्मणाग्रजौ ॥
ध्वजावपातेन स राक्षसाधिपो भृशं प्रचुक्रोध तदा रघूत्तमे ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे नवोत्तरशततमः सर्गः ॥ १०९ ॥

नैकशस्त्रमयं अनेकशस्त्रप्रचुरं तद्वर्षं क्रोधातिशयेन प्रयुक्तै रामशरैर्निवारणाल्लक्ष्यभूतं राघवरथं विमुच्य वानरबले अभवत् । तत्रापतदित्यर्थः ॥ १९ ॥ सायकैरित्यादि सार्धश्लोक एकान्वयः ॥ ततः दशग्रीवः अश्रान्तहृदयोद्यमः अविच्छिन्नोत्साहः सन् निःसङ्गेन अव्यासक्तेन अन्तरात्मना मनसा उपलक्षितः सहस्रशो बाणान् मुमोच । सायकैरन्तरिक्षं च निरन्तरं चकार ॥ २० ॥ व्यायच्छमानं व्यायच्छन्तं । यत्नं कुर्वन्तं रणे तत्परं सक्तं । प्रहसन्निव संदधे अनायासेन संदधे ॥ २१—२२ ॥ शरवर्षेण भास्वत् अम्बरं शरबद्धं द्वितीयमम्बरमिवाभाति स्म ॥ २३ ॥ नानिमित्त इत्यर्धं ॥ अनिमित्तः लक्ष्यविशेषोद्देशरहितः । अतिभेत्ता अपेक्षितप्रमाणादधिकभेत्ता । निष्फलः लक्ष्ये पतितोपि प्रयोजनाकारी ॥ २४ ॥ तथा विसृजतोः उक्तप्रकारेण विसृजतोः । अत्र बाणा इत्यध्याहार्यं ॥ २५ ॥ अस्यन्तौ शरान् क्षिपन्तौ । इवशब्दो वाक्यालंकारे । निरुच्छ्वासं उच्छ्वासावकाशरहितं ॥ २६—२७ ॥ रावणस्येति । अत्र जघानेति वचनविपरिणामेनानुषज्यते । तौ अन्योन्यं कृतानुकृतकारिणौ कृतप्रतिक्रियाकारिणौ सन्तौ । तथा जघ्नतुः । हय इवान्यत्रापि सारथ्यादौ जघ्नतुरित्यर्थः ॥ २८—२९ ॥ प्रयुध्यमानाविति । यदा बभूवतुरित्युपस्कार्यं ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने नवोत्तरशततमः सर्गः ॥ १०९ ॥

ति० रथशक्तिं दिव्यरथवैभवं रथावयवविशेषवापरामृश्यप्राप्यतन्महिम्ना केवलं धरणीतले पेतुः ॥ ९ ॥ ति० निस्सङ्गेन प्राणाशासङ्गरहितेन ॥ २० ॥ ति० तुमुलंरोमहर्षणं । एतदनन्तरं 'प्रयुध्यमानौसमरेमहाबलौशितैःशरैरावणलक्ष्मणाग्रजौ । ध्वजावपातेनसराक्षसाधिपोभृशंप्रचुक्रोधतदारघूत्तमे ।' इत्येकंश्लोकंप्रक्षिप्यात्रसर्गावच्छेदंकुर्वन्ति । तदयुक्तं पश्चादपितुमुलयुद्धस्यैवसत्त्वादेकप्रकरणत्वाच्च । अनवच्छेदस्यैवबहुषुपुस्तकेषुदर्शनाच्चेतिकतकः ॥ २९ ॥ इतिनवोत्तरशततमःसर्गः ॥ १०९ ॥

[पा०] १ च. छ. ञ. बाणाऽशतशोथसहस्रशः. २ ख. च. ञ. विशिष्टैः. ३ ख. ङ. च. छ. ञ. ट. प्रयुक्तेन. झ. नियुक्तेन. ४ च. छ. ञ. द्वितीयमिवचांबरं. ५ इदमर्धं क. ख. च. पाठेषुदृश्यते. ६ ङ. ज. झ. ट. प्रायुङ्क्षेतां. ७ अयंश्लोकः क. ख. च. छ. पाठेषुदृश्यते. ८ ङ.—ट. युद्धमुत्तमं.

दशोत्तरशततमः सर्गः ॥ ११० ॥

रामेण रावणस्यैकैकशिरश्छेदे पुनः पुनः शिरोन्तरप्ररोहे एकोत्तरशतवारं तावच्छिरसांछेदनम् ॥ १ ॥

तौ तदा युध्यमानौ तु समरे रामरावणौ ॥ ददृशुः सर्वभूतानि विस्मितेनान्तरात्मना ॥ १ ॥
अर्दयन्तौ तु समरे तयोस्तौ स्यन्दनोत्तमौ ॥ परस्परमभिक्रुद्धौ परस्परमभिद्रुतौ ॥
परस्परवधे युक्तौ घोररूपौ बभूवतुः ॥ २ ॥
मण्डलानि च वीथीश्च गतप्रत्यागतानि च ॥ दर्शयन्तौ बहुविधां सूतसारथ्यजां गतिम् ॥ ३ ॥
अर्दयन्रावणं रामो राघवं चापि रावणः ॥ गतिवेगं समापन्नौ प्रवर्तननिवर्तने ॥ ४ ॥
क्षिपतोः शरजालानि तयोस्तौ स्यन्दनोत्तमौ ॥ चेरतुः संयुगमहीं सासारौ जलदौ यथा ॥ ५ ॥
दर्शयित्वा तथा तौ तु गतिं बहुविधां रणे ॥ परस्परस्याभिमुखौ पुनरेवावतस्थतुः ॥ ६ ॥
धुरं धुरेण रथयोर्वक्त्रं वक्त्रेण वाजिनाम् ॥ पताकाश्च पताकाभिः समेयुः स्थितयोस्तदा ॥ ७ ॥
रावणस्य ततो रामो धनुर्मुक्तैः शितैः शरैः ॥ चतुर्भिश्चतुरो दीप्तैर्हयान्प्रत्यपसर्पयत् ॥ ८ ॥
स क्रोधवशमापन्नो हयानामपसर्पणे ॥ मुमोच निशितान्बाणान्राघवाय निशाचरः ॥ ९ ॥
सोतिविद्धो बलवता दशग्रीवेण राघवः ॥ जगाम न विकारं च न चापि व्यथितोऽभवत् ॥ १० ॥
चिक्षेप च पुनर्बाणान्वज्रपातसमस्वनान् ॥ सारथिं वज्रहस्तस्य समुद्दिश्य निशाचरः ॥ ११ ॥
मातलेस्तु महावेगाः शरीरे पतिताः शराः ॥ न सूक्ष्ममपि संमोहं व्यथां वा प्रददुर्युधि ॥ १२ ॥
तया धर्षणया क्रुद्धो मातलेर्न तथाऽऽत्मनः ॥ चकार शरजालेन राघवो विमुखं रिपुम् ॥ १३ ॥
विंशतं त्रिंशतं षष्टिं शतशोथ सहस्रशः ॥ मुमोच राघवो वीरः सायकान्स्यन्दने रिपोः ॥ १४ ॥

अथ रावणशिरश्छेदः—तौ तदेत्यादि ॥ समरे युद्धभूमौ । तदा उत्पातकाले । अन्तरात्मना अन्तःकरणेन उपलक्षितानि ॥ १ ॥ अर्दयन्तावित्यादिसार्धश्लोकद्वयमेकान्वयं ॥ अर्दयन्तौ परस्परं पीडयन्तौ । रथयोः क्रोधादिकं रथिकद्वारा । मण्डलानि मण्डलगतीः । गतप्रत्यागतानि शत्रुरथं प्रति गमनं गतं पुनः स्थानं प्रत्यागमनं प्रत्यागतं तयोरावृत्त्या बहुवचनं । एवंप्रकारेण बहुविधां सूतसारथ्यजां सूतस्य यत् सारथ्यं सारथिकर्म तज्जां । गतिं संचारं दर्शयन्तौ तयोः रथौ घोररूपौ बभूवतुः ॥ २—३ ॥ रावणमर्दयन् रामो राघवमर्दयन् रावणश्चोभौ प्रवर्तननिवर्तने तद्रूपं गतिवेगं समापन्नौ । बभूवतुरिति शेषः ॥ ४ सासारौ सजलधारौ ॥ ५ ॥ तथा गतिं पूर्वोक्तगभेदं ॥ ६ ॥ धुरं युगं । धुरेण । अकारान्तत्वम स्थितयोः युद्धे गतिं विना स्थितयोः । तयोरिति ॥ ७ ॥ प्रत्यपसर्पयत् न्यवर्तयत् ॥ ८ ॥ अपसर्पणे विषये ॥९॥ विकारं वेदनासूचकमुखविकारं ॥१०॥ वज्रपातोशनिपातः ॥ ११ ॥ सूक्ष्मं अल्पं ॥ १२ ॥ यथा मातलेः तया धर्षणया क्रुद्धः तथा आत्मनो धर्षणया न क्रुद्धः । एवं क्रुद्धो रिपुं विमुखं चकार ॥ १३ ॥ विंशतमिति ॥ इकारलोपश्छान्दसः ॥१४॥

स० यौपरस्परमभिक्रुद्धौ परस्परवधेयुक्तौ समरे अर्दयन्तौरामरावणौ । तयोःस्यन्दनोत्तमावित्यन्वयः । मच्चाःक्रोशन्तीतिवद्गौणोवाप्रयोगः । सारथ्यंतत्कर्म । सूतं सम्यक्संबद्धं चिराभ्यस्तमितियावत् ॥ २—३ ॥ ति० प्रत्यपसर्पयत् प्रत्यपसर्प[illegible]त्यक्ताभिमुख्यानामेवपश्चार्धेनापसर्पणं ॥ ८ ॥ स० व्यथांनप्रददुः श्रीरामसांनिध्यात् । यत्तुनागोजिभट्टेन देवलेनदिव मत्त्वात् अपसर्पणकालेरावणेनप्रक्षिप्तानामतिवेधासामर्थ्यांचेतिव्याख्यातं । तत् यदा इन्द्रादीनां दशाननदत्ता वित्ता तदाहि यन्तेति वृत्तेसतिसमग्ररामायणंश्रुत्वापिसीता रामस्यकिंभाविनीत्याभाणकमनुकरोति ॥ १२ ॥

[पा०] १ ग. ङ. च. छ. झ. ट. सूतौसारथ्यजां. २ ख.—छ. ञ. ट. क्षिपन्तौशर. ३ क.—ट. जलदाविव. ख. घ—ट. दीप्तान्हयान्. ५ ङ. च. झ. ञ. ट. दशाननः. ६ ङ. झ. ट. न्वज्रसारसम. ७ ङ. च. झ. ञ. ट. दशा

रावणोपि ततः क्रुद्धो रथस्थो राक्षसेश्वरः ॥ गदामुसलवर्षेण रामं प्रत्यर्दयद्रणे ॥ १५ ॥
तत्प्रवृत्तं महद्युद्धं तुमुलं रोमहर्षणम् ॥ १६ ॥
गदानां मुसलानां च परिघाणां च निस्स्वनैः ॥ शराणां पुङ्खपातैश्च क्षुभिताः सप्त सागराः ॥१७॥
क्षुब्धानां सागराणां च पातालतलवासिनः ॥ व्यथिताः पन्नगाः सर्वे दानवाश्च सहस्रशः ॥ १८ ॥
चकम्पे मेदिनी कृत्स्ना सशैलवनकानना ॥ भास्करो निष्प्रभश्चासीन्न ववौ चापि मारुतः ॥ १९ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ चिन्तामापेदिरे सर्वे सकिन्नरमहोरगाः ॥ २० ॥
स्वस्ति गोब्राह्मणेभ्यस्तु लोकास्तिष्ठन्तु शाश्वताः ॥ जयतां राघवः सङ्ख्ये रावणं राक्षसेश्वरम् ॥२१॥
एवं जपन्तोपश्यंस्ते देवाः सर्षिगणास्तदा ॥ रामरावणयोर्युद्धं सुघोरं रोमहर्षणम् ॥ २२ ॥
गन्धर्वाप्सरसां सङ्घा दृष्ट्वा युद्धमनूपमम् ॥ २३ ॥
गगनं गगनाकारं सागरः सागरोपमः ॥ रामरावणयोर्युद्धं रामरावणयोरिव ॥
एवं ब्रुवन्तो ददृशुस्तद्युद्धं रामरावणम् ॥ २४ ॥
ततः क्रुद्धो महाबाहू रघूणां कीर्तिवर्धनः ॥ संधाय धनुषा रामः क्षुरमाशीविषोपमम् ॥ २५ ॥
रावणस्य शिरोच्छिन्दच्छ्रीमज्ज्वलितकुण्डलम् ॥ तच्छिरः पतितं भूमौ दृष्टं लोकैस्त्रिभिस्तदा ॥ २६ ॥

रथस्थः रथे निश्चलतया स्थित इत्यर्थः ॥ १५ ॥ तत्प्रवृत्तमित्यर्धमेकं वाक्यं ॥ १६ ॥ निस्स्वनैः वेगजैरिति शेषः ॥१७॥ क्षुब्धानामिति ॥ क्षुब्धेषु सागरेष्वित्यर्थः ॥ १८–२२ ॥ गन्धर्वेति ॥ गन्धर्वाप्सरसामित्यर्धानन्तरं गगनं गगनाकारमिति श्लोकः । तदनन्तरं एवं ब्रुवन्त इत्यर्धं । गन्धर्वाप्सरसां संघाः अनूपमं अनुपमं युद्धं दृष्ट्वा गगनं गगनाकारमित्येवं ब्रुवन्तः सन्तः पुनर्ददृशुरित्यन्वयः । अनुपमत्वमेवाह—गगनमिति ॥ यथा गगनसागरयोः सदृशवस्त्वन्तराभावः तथा रामरावणयुद्धस्य सदृशं युद्धं किंचिन्नास्तीत्यर्थः । सदृशान्तरनिवृत्तिफलकोनन्वयालंकारः । रामरावणं रामरावणसंबन्धि ॥२३–२४॥ ततः क्रुद्ध इत्यादिसार्धश्लोकपञ्चकमेकं वाक्यं ॥ क्षुरं क्षुराग्रबाणं । शिरः अच्छिन्दत् अच्छिनत् । एकवचनात्तदानीं रावण एकशिरा एव युद्धमकरोदिति गम्यते । अतएव वक्ष्यति—विक्षिप्य दीर्घौ निश्चेष्टौ भुजावङ्गदभूषितावित्यादिना । छिन्नमात्रं तु तच्छीर्षमिति । तच्छीर्षे छिन्ने तदानीमेवेत्यर्थः । एकशतं छिन्नं एकोत्तरशतवारं छिन्नमित्यर्थः । पुनः पुनः शिरश्छेदनं चिरतृषितशरतृष्णानिवृत्त्यर्थं । जीवितक्षये विषये, अन्तः अवधिः निश्चयो वा, न दृश्यते

ती० श्लोकद्वयमेकंवाक्यं । यथागगनसागरयोःसदृशवस्त्वन्तराभावाद्गगनंगगनेनैवोपमीयते सागरःसागरेणैवोपमीयते तथैवरामरावणयुद्धं रामरावणयोर्युद्धमिवाभवदित्येवंब्रुवन्तोगन्धर्वादयः रामरावणंरामरावणयोस्संबन्धितयुद्धंददृशुरित्यन्वयार्थौ । सागरंसागरोपममितिपाठे आर्षोलिङ्गव्यत्ययः । अनन्वयश्चात्रालङ्कारः । तदुक्तंकाव्यप्रकाशिकायां 'एकस्यैवोपमानोपमेयत्वेऽनन्वयोमतः' इति । राहोःशिरइतिवदभेदेपिभेदव्यवहारः । ति० वचनप्रकारमाह—गन्धर्वाप्सरसामिति । अनूपममितिदीर्घआर्षः । दृष्ट्वायुद्धमनूपममित्युत्तरंसागरंचांबरप्रख्यमंबरंसागरोपमम्' इतिपाठे सागरंनैल्यवैपुल्यादिना । अंबरप्रख्यं आकाशतुल्यं इतिवक्तुं शक्यं । एवमंबरमपिसागरोपममितिशक्यं । रामरावणयोर्युद्धंतु तदतिरिक्ताद्दशयुद्धासंभवात्स्वतुल्यमित्येववक्तुंशक्यं । तेनानुपमत्वं फलतीत्यनन्वयोत्रालङ्कारः । पूर्वार्धेतूपमेयोपमेतिकृतकः । सागरशब्देलिङ्गव्यत्ययआर्षः । अर्धचादिर्वासः । गगनंगगनाकारंसागरः सागरोपमः ।' इतिपाठेऽर्धद्वयेप्यनन्वयएवेतिबोध्यं । एवंब्रुवन्तोगन्धर्वादिसंघास्तद्युद्धंददृशुः । रामरावणं तत्कर्तृकमित्यर्थः । स० अनूपमं दीर्घआर्षः । उ उत्कृष्टा उपमा सर्वसाम्यं । नविद्यतेउपमायस्येतिवा । सागरं तत्समूहः ॥ २३—२४ ॥ ति० शिरोच्छिन्दत् एकैकशइतिशेषः । सकृद्दशशिरसांछेदेतुनपुनःप्ररोहइतिकृतकः । तस्यैवसदृशं यद्भूमौपतितं तस्यैवसदृशमित्यर्थः । स० शिरः एकवचनंजातावेकवचनमत्रोत्तरत्रच 'दशास्योविंशतिभुजःप्रगृहीतशरासनः । अदृश्यतदशग्रीवोमैनाकइवपर्वतः ।' इतीव 'तस्योत्तमाङ्गदशकंयुगपन्यकृन्तत् । कृत्तानितानिपुनरेवसमुत्थितानि' इत्याचार्यैरप्युक्तेः । पद्मपुराणेच 'दशग्रीवस्यच्छिन्नेदशिरांसि

[पा०] १ क. ख. ज. झ. प्रत्यर्पयत्. २ ङ. झ. ञ. ट. तत्प्रयुक्तंपुनर्युद्धं. ३ ङ. झ. ट. सागरंचांबरप्रख्यमंबरंसागरोपमम्. ४ क. ख. ज. रोमहर्षणं. ५ ङ. च. छ. झ. ञ. ट. क्रोधान्महाबाहुः. ६ च. छ. झ. ञ. ट. शरं.

तस्यैव सदृशं चान्यद्रावणस्योत्थितं शिरः ॥ तत्क्षिप्रं क्षिप्रहस्तेन रामेण क्षिप्रकारिणा ॥ २७ ॥
द्वितीयं रावणशिरश्छिन्नं संयति सायकैः ॥ छिन्नमात्रं तु तच्छीर्षं पुनरन्यत्स दृश्यते ॥ २८ ॥
तदप्यशनिसंकाशैश्छिन्नं रामेण सायकैः ॥ एवमेकशतं छिन्नं शिरसां तुल्यवर्चसाम् ॥ २९ ॥
न चैव रावणस्यान्तो दृश्यते जीवितक्षये ॥ ३० ॥
ततः सर्वास्त्रविद्वीरः कौसल्यानन्दवर्धनः ॥ मार्गणैर्बहुभिर्युक्तश्चिन्तयामास राघवः ॥ ३१ ॥
मारीचो निहतो यैस्तु खरो यैस्तु सदूषणः ॥ क्रौञ्चावने विराधस्तु कबन्धो दण्डकावने ॥ ३२ ॥
[यैः साला गिरयो भग्ना वाली च क्षुधितोऽम्बुधिः ॥] त इमे सायकाः सर्वे युद्धे प्रात्ययिका मम ॥
किंनु तत्कारणं येन रावणे मन्दतेजसः ॥ ३३ ॥
इति चिन्तापरश्चासीदप्रमत्तश्च संयुगे ॥ ववर्ष शरवर्षाणि राघवो रावणोरसि ॥ ३४ ॥
रावणोपि ततः क्रुद्धो रथस्थो राक्षसेश्वरः ॥ गदामुसलवर्षेण रामं प्रत्यर्दयद्रणे ॥ ३५ ॥
तत्प्रवृत्तं महद्युद्धं तुमुलं रोमहर्षणम् ॥ अन्तरिक्षे च भूमौ च पुनश्च गिरिमूर्धनि ॥ ३६ ॥
देवदानवयक्षाणां पिशाचोरगरक्षसाम् ॥ पश्यतां तन्महद्युद्धं सर्वरात्रमवर्तत ॥ ३७ ॥
नैव रात्रं न दिवसं न मुहूर्तं न च क्षणम् ॥ रामरावणयोर्युद्धं विराममुपगच्छति ॥ ३८ ॥

नादृश्यत ॥ २५—३१ ॥ मारीच इत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ क्रौञ्चावने कबन्धः । दण्डकावने विराध इत्यन्वयः । प्रात्ययिकाः विश्वस्ताः । त इमे रावणे विषये मन्दतेजसः अल्पशक्तिकाः । अभवन् । तत्कारणं किं नु न जानामीति शेषः ॥ ३२—३५ ॥ त्रिकूटशिखरे युध्यतोस्तयोराग्रहकृतगतिवशेन अन्तरिक्षे भूमौ च पुनश्च गिरिमूर्धनि त्रिकूटशिखरे च तन्महद्युद्धं प्रवृत्तमित्यर्थः ॥ ३६ ॥ देवदानवेति ॥ " यस्य च भावेन " इति भावलक्षणे षष्ठी । सर्वरात्रं अहोरात्रमित्यर्थः । सप्तरात्रमित्यपपाठः । वक्ष्यमाणदिनसंख्याविरोधात् । यद्वा सर्वरात्रमित्यपपाठः । सप्तरात्रमित्येव सम्यक्पाठः । फाल्गुनचतुर्दश्यां हनुमता लङ्कादाहः । पौर्णमास्यां रामस्य समुद्रतीरप्राप्तिः । प्रथमाद्वितीयातृतीयासु दर्भशयनं । अष्टम्यां सुवेलारोहणं । नवम्यां युद्धारम्भ इति सप्तरात्रं रामरावणयुद्धमिति । इदं च इतस्तु नवमेहनीत्यत्र विस्तृतं ॥ ३७ ॥ नैवरात्रमिति ॥ "कालाध्वनोरत्यन्तसंयोगे"

रघुनन्दनः । समुत्थितानिबहुशोवरदानान्ममांबिके' इति ॥ २६ ॥ ति० एवमेवशतंछिन्नमितिपाठः । तुल्यवर्चसां तुल्याकारणां । शिरसांशतं रामेणच्छिन्नं । एवंचभगवतःसर्वतोभद्रचक्रपदशतंरामेणरावणीयशिरश्शतकमलैः पूजितमितिकतकः ॥ २९ ॥ ति० क्रोञ्चावटे क्रौञ्चवनसंबन्धिनिअवटे श्वभ्रे । स० यैरितिजातौबहुवचनं । येन । एकेषुणेतिप्रतिज्ञाकालउक्तेः । वालीचभग्नइत्यन्वयः ॥ ३२ ॥ ति० प्रात्ययिकाः अमोघत्वेननिश्चिताः ॥ ३३ ॥ ति० अन्तरिक्षेचेत्यादि । रथयोःकामगत्वात्तत्रतत्रकियत्कालंस्थितेरितिभावः ॥ ३६ ॥ ती० देवादीनांपश्यतांसतांसप्तरात्रंमहद्युद्धमवर्ततेतिसंबन्धः । अगस्त्यागमनात्प्रागेवसिद्धस्ययुद्धस्यायमनुवादः । अस्मिन्पाठेसप्तरात्रकृतरामरावणयुद्धस्यास्मिन्नामायणे अश्रूयमाणत्वेनानुपपन्नत्वाच्च । सर्वरात्रमवर्ततेतिपाठःसम्यक् सर्वरात्रं अहोरात्रमित्यर्थः ॥ ति० सर्वरात्रं जातावेकवचनं । तेनानेकाहोरात्रानित्यर्थः । वस्तुतःशर्वर्गेसकारस्तृतीयः । तेनत्रयउच्यन्ते । यवर्गेचवकारश्चतुर्थः । तेनचत्वारउच्यते । मिलितासप्तरात्रमित्यर्थः । सप्तरात्रमेवचतयोर्द्वैरथंयुद्धमितिवक्ष्यमाणपाद्मकालिकापुराणयोःस्पष्टमितिदिक् ॥ ३७ ॥

[पा०] १ ज. छिन्नमात्रेतुतच्छीर्षं. २ ङ. च. छ. झ. ञ. ट. पुनरेवप्रदृश्यते. ३ ङ.—ट. रामस्य. ४ ङ. झ. क्रौञ्चावटे. घ. च. छ. ज. ट. क्रौञ्चारण्ये. ५ क. ङ. च. छ. झ. ञ. ट. पाठेष्विदमर्धंदृश्यते. ६ घ. ञ. ट. सप्तरात्रमवर्तत. ७ ज. मधिगच्छति.

दशरथसुतराक्षसेन्द्रयोर्जयमनवेक्ष्य रणे स राघवस्य ॥
सुरवररथसारथिर्महात्रणगतमेनमुवाच वाक्यमाशु ॥ ३९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे दशोत्तरशततमः सर्गः ॥ ११० ॥

एकादशोत्तरशततमः सर्गः ॥ १११ ॥

रावणस्य पूर्वपूर्वस्मिञ्छिरसिछिन्नेछिन्नेपि पुनः पुनः शिरोन्तरप्ररोहेसति मातलिसमुद्बोधितेन रामेण ब्रह्मास्त्रेण रावणहृदयविभेदनम् ॥ १ ॥ रावणेहते हर्षादिन्द्रादिभी रामस्योपरिपुष्पवर्षणम् ॥ २ ॥ सुग्रीवविभीषणादिभिर्हर्षाच्छ्रीरामाभिपूजनम् ॥ ३ ॥

अथ संस्मारयामास राघवं मातलिस्तदा ॥ अजानन्निव किं वीर त्वमेनमनुवर्तसे ॥ १ ॥
विसृजास्मै वधाय त्वमस्त्रं पैतामहं प्रभो ॥ विनाशकालः कथितो यः सुरैः सोद्य वर्तते ॥ २ ॥
ततः संस्मारितो रामस्तेन वाक्येन मातलेः ॥ जग्राह सशरं दीप्तं निश्वसन्तमिवोरगम् ॥ ३ ॥
यमस्त्रं प्रथमं प्रादादगस्त्यो भगवानृषिः ॥ ब्रह्मदत्तं महाबाणममोघं युधि वीर्यवान् ॥ ४ ॥
ब्रह्मणा निर्मितं पूर्वमिन्द्रार्थममितौजसा ॥ दत्तं सुरपतेः पूर्वं त्रिलोकजयकाङ्क्षिणः ॥ ५ ॥
यस्य वाजेषु पवनः फले पावकभास्करौ ॥ शरीरमाकाशमयं गौरवे मेरुमन्दरौ ॥ ६ ॥
जाज्वल्यमानं वपुषा सुपुङ्खं हेमभूषितम् ॥ तेजसा सर्वभूतानां कृतं भास्करवर्चसम् ॥ ७ ॥
सधूममिव कालाग्निं दीप्तमाशीविषं यथा ॥ परनागाश्ववृन्दानां भेदनं क्षिप्रकारिणम् ॥ ८ ॥
द्वाराणां परिघाणां च गिरीणामपि भेदनम् ॥ नानारुधिरसिक्ताङ्गं मेदोदिग्धं सुदारुणम् ॥ ९ ॥

इति द्वितीया ॥ ३८ ॥ दशरथेति । निर्धारणे षष्ठी । दशरथसुतराक्षसेन्द्रयोः रामरावणयोर्मध्ये । राघवस्य जयमनवेक्ष्य महान् महाबुद्धिरित्यर्थः । सुरवररथसारथिः एनं रामं उवाच ॥३९॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने दशोत्तरशततमःसर्गः ॥११०॥

अथ रावणवधः—अथ संस्मारयामासेत्यादिश्लोकद्वयमेकान्वयं ॥ अजानन्निव ब्रह्मास्त्रमजानन्निव एनं रावणं अनुवर्तसे अस्त्रस्य प्रत्यस्त्रप्रयोगमात्रं करोषि । विनाशकालः मानुषेण वध इत्युक्तः कालः ॥ १—२ ॥ ततः संस्मारित इत्याद्येकादश श्लोका एकान्वयाः ॥ ३—४ ॥ प्रथमं पूर्वं दण्डकारण्ये । ब्रह्मदत्तमित्येतद्विवृणोति—ब्रह्मणेत्यादिना ॥ ५ ॥ यस्य वाजेष्विति । पवनादीनामधिदेवतात्वेनावस्थानं । फले शल्ये । तेजसा सारांशेन कृतं ॥ ६—८ ॥ द्वाराणां रिपुगोपुराणां । नानारुधिरेति वध्यासुरभेदात् ।

ति० तयोर्मध्येराघवस्यजयमनवेक्ष्याऽदृष्ट्वाससुरवरस्यसारथिरिति । रणेरतोरणरतः । रणरतश्चासौरामश्च ॥ ३९ ॥ इतिदशोत्तरशततमःसर्गः ॥ ११० ॥

स० संस्मारयामास रावणस्यब्रह्मास्त्रवध्यतामितिशेषः । अजानन्निवेत्यनेन रामस्यसार्वज्ञंसूचयति ॥ १ ॥ ति० अस्यबाणस्य ब्रह्मानुग्रहवैशिष्ट्यमाह—यस्येति । वाजेषु वेगसाधनपक्षेषु । तत्रतत्रपवनादीनामधिदेवतात्वेनावस्थानंबोध्यं । शरीरं मध्यभागः । आकाशमयं आसमन्तात्काशतेप्रकाशतेइत्याकाशोब्रह्मभगवान् भूताकाशोवा । तेनव्याप्तिसामर्थ्यं । पवनवत्त्वेनगतिसामर्थ्यं । पावकादिमत्त्वेनदुस्सहत्वं । तर्हिलघुःस्यात्तत्राह—गौरवे इति ॥ ६ ॥ रामानु० द्वाराणां पुरद्वाराणां गोपुराणामितियावत् ॥

[पा०] १ क. ख. च.—ञ. राक्षसेन्द्रयोस्तयोर्जयं. २ ज. रणेपराजयंच. ३ क.—ट. महात्मारणरतरामसुवाच. ४ ख. च. छ. ञ. विनाशःकथितोरामसुरैःसोद्यप्रवर्तते. ५ ङ. झ. ट. यंतस्मै. ६ ज. मादाय. ७ क. ख. ङ. च, झ, ञ. ट. माशीविषोपमं. ८ झ. नरनागाश्व, ख, ङ, छ, ञ. ट. रथनागाश्व. ९ ग. ङ. च, छ. झ. ञ. ट. दिग्धाङ्गं.

वज्रसारं महानादं नानासमितिदारणम् ॥ सर्वत्रासनं भीमं श्वसन्तमिव पन्नगम् ॥ १० ॥
कङ्कगृध्रबलानां च गोमायुगणरक्षसाम् ॥ नित्यं भक्ष्यप्रदं युद्धे यमरूपं भयावहम् ॥ ११ ॥
नन्दनं वानरेन्द्राणां रक्षसामवसादनम् ॥ वाजितं विविधैर्वाजैश्चारुचित्रैर्गरुत्मतः ॥ १२ ॥
तमुत्तमेषुं लोकानामिक्ष्वाकुभयनाशनम् ॥ द्विषतां कीर्तिहरणं प्रहर्षकरमात्मनः ॥ १३ ॥
अभिमन्त्र्य ततो रामस्तं महेषुं महाबलः ॥ वेदप्रोक्तेन विधिना संदधे कार्मुके बली ॥ १४ ॥
तस्मिन्संधीयमाने तु राघवेण शरोत्तमे ॥ सर्वभूतानि वित्रेसुश्चचाल च वसुंधरा ॥ १५ ॥
स रावणाय संक्रुद्धो भृशमायम्य कार्मुकम् ॥ चिक्षेप परमायत्तस्तं शरं मर्मघातिनम् ॥ १६ ॥
स वज्र इव दुर्धर्षो वज्रिबाहुविसर्जितः ॥ कृतान्त इव चात्रार्यो न्यपतद्रावणोरसि ॥ १७ ॥
स विसृष्टो महावेगः शरीरान्तकरः शरः ॥ बिभेद हृदयं तस्य रावणस्य दुरात्मनः ॥ १८ ॥
रुधिराक्तः स वेगेन जीवितान्तकरः शरः ॥ रावणस्य हरन्प्राणान्विवेश धरणीतलम् ॥ १९ ॥
स शरो रावणं हत्वा रुधिरार्द्रीकृतच्छविः ॥ कृतकर्मा निभृतवत्स्वतूणीं पुनरागमत् ॥ २० ॥
तस्य हस्ताद्धृतस्याशु कार्मुकं तत्ससायकम् ॥ निपपात सह प्राणैर्भ्रश्यमानस्य जीवितात् ॥ २१ ॥
गतासुर्भीमवेगस्तु नैर्ऋतेन्द्रो महाद्युतिः ॥ पपात स्यन्दनाद्भूमौ वृत्रो वज्रहतो यथा ॥ २२ ॥
तं दृष्ट्वा पतितं भूमौ हतशेषा निशाचराः ॥ हतनाथा भयत्रस्ताः सर्वतः संप्रदुद्रुवुः ॥ २३ ॥
नर्दन्तश्चाभिपेतुस्तान्वानरा द्रुमयोधिनः ॥ [दशग्रीववधं दृष्ट्वा सर्वलोकप्रियं प्रियम् ॥ २४ ॥]
दशग्रीववधं दृष्ट्वा विजयं राघवस्य च ॥ अर्दिता वानरैर्हृष्टैर्लङ्कामभ्यपतन्भयात् ॥
गताश्रयत्वात्करुणैर्बाष्पप्रस्रवणैर्मुखैः ॥ २५ ॥
ततो विनेदुः संहृष्टा वानरा जितकाशिनः ॥ वदन्तो राघवजयं रावणस्य च तद्वधम् ॥ २६ ॥
अथान्तरिक्षे व्यनदत्सौम्यस्त्रिदशदुन्दुभिः ॥ दिव्यगन्धवहस्तत्र मारुतः ससुखो ववौ ॥ २७ ॥
निपपातान्तरिक्षाच्च पुष्पवृष्टिस्तदा भुवि ॥ किरन्ती राघवरथं दुरवापा मनोरमा ॥ २८ ॥
राघवस्तवसंयुक्ता गगनेऽपि च शुश्रुवे ॥ साधुसाध्विति वाग्म्या दैवतानां महात्मनाम् ॥ २९ ॥

मेदः मांसविशेषः ॥ ९ ॥ वज्रसारं वज्रतुल्यदार्ढ्यं । नानासमितिदारणं कपटयुद्धस्यापि निवर्तकं । सर्वत्रासनत्वे हेतुः—भीममिति । दीप्तं श्वसन्तमिति भेदादुपमानभेदः ॥१०—११॥ बलाः गृध्रविशेषाः । रक्षसां पिशाचसहचारिणां । यमरूपं यमतुल्यं यथा भवति तथा भयावहमिति वित्रासनाद्भेदः । गरुत्मतः वाजैः पत्रैः । वाजितं संजातपत्रं । गरुडपत्रकृतपत्रमित्यर्थः ॥ १२ ॥ लोकानां मध्ये उत्तमेषुं प्रहर्षकरमात्मन इत्यन्तस्य जग्राहेत्यनेन संबन्धः ॥ १३ ॥ ततः ग्रहणानन्तरं तं इषुं संदधे ॥ १४—१५ ॥ रावणाय चिक्षेपेत्यन्वयः ॥ १६ ॥ वज्रिबाहुविसर्जितो वज्र इवेत्यन्वयः ॥ १७—१९ ॥ निभृतवत् विनीतवत् ॥ २० ॥ प्राणैः सह जीवितात् प्राणधारणयत्नात् भ्रश्यमानस्य तस्य हस्तात् ससायकं कार्मुकं पपात ॥ २१—२३ ॥ नर्दन्तश्चेत्यर्धमेकं वाक्यं ॥२४॥ दशग्रीवेत्यादिसार्धश्लोक एकान्वयः ॥ मुखैः उपलक्षिताः । राक्षसा इति शेषः ॥ २५ ॥ तद्वधं तं वधं ॥ २६—२८ ॥ राघवस्तवसंयुक्ता वा-

---

परिघाणामित्येतत्सर्वायुधानामप्युपलक्षणं ॥ ९ ॥ ति० नानासमितिदारणमित्यन्वर्थनाम भगवत्कृतंरामबाणस्य ॥ १० ॥ ति० इक्ष्वाकूरामः । तत्पक्षाणांभयनाशनं । तमुत्तमेषुमभिमन्त्र्येत्यनेनान्वयः ॥ १३ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. गृध्रबकानांच. २ घ. यस्यरूपं. ३ ङ. झ. ट. संत्रेसुश्चचाल. ४ ज. महाघोरः. ५ क. ङ. च. छ. झ. ञ. ट. पुनराविशत्. ६ ङ. झ. चापिसायकं. ट. तस्यसायकं. ७ इदमर्धं घ. पाठेदृश्यते. ८ क. ङ. च. छ. झ. ञ. ट. हताश्रयत्वात्. ख. गताश्रयारात्रिचराबाष्प. ९ ख. च. छ. ञ. व्यनदद्घोषवान्देवदुन्दुभिः. १० ख. घ. ङ. झ. ञ. ट. सुसुखोववौ. ज. सुसुखंववौ. ११ ग. ङ. च. छ. झ. ञ. ट. मनोहरा.

आविवेश महाहर्षो देवानां चारणैः सह ॥ रावणे निहते रौद्रे सर्वलोकभयंकरे ॥ ३० ॥
ततः सकामं सुग्रीवमङ्गदं च महाबलम् ॥ चकार राघवः प्रीतो हत्वा राक्षसपुङ्गवम् ॥ ३१ ॥
ततः प्रजग्मुः प्रशमं मरुद्गणा दिशः प्रसेदुर्विमलं नभोऽभवत् ॥
मही चकम्पे न हि मारुतो ववौ स्थिरप्रभश्चाप्यभवद्दिवाकरः ॥ ३२ ॥
ततस्तु सुग्रीवविभीषणादयः सुहृद्विशेषाः सहलक्ष्मणास्तदा ॥
समेत्य हृष्टा विजयेन राघवं रणेऽभिरामं विधिना ह्यपूजयन् ॥ ३३ ॥
स तु निहतरिपुः स्थिरप्रतिज्ञः स्वजनबलाभिवृतो रणे रराज ॥
रघुकुलनृपनन्दनो महौजास्त्रिदशगणैरभिसंवृतो यथेन्द्रः ॥ ३४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकादशोत्तरशततमः सर्गः ॥ १११ ॥

गित्यन्वयः ॥ २९ ॥ चारणैःसह चारणैः सहितान् देवानित्यर्थः ॥ ३० ॥ तत इति । सुग्रीववयुवराजत्वेन प्रत्युपकारायाङ्गदेनापि रावणवधस्य काङ्क्षितत्वात्सकामत्वं ॥ ३१ ॥ प्रशमं प्रसादं । मरुद्गणाः देवगणाः । मही न चकम्पे महीकम्पाभावस्य शुभसूचकत्वादित्याहुः । रावणवधपर्यन्तं सकम्पा स्थिता मही तद्वधानन्तरं निष्कम्पाऽभवदिति चाहुः । ववौ सुखमिति शेषः ॥ ३२ ॥ सुहृद्विशेषाः जाम्बवदादयः । हिशब्दः पादपूरणे । विजयेन हृष्टा इत्यन्वयः । विधिना क्रमेण ॥ ३३—३४ ॥ फाल्गुनामावास्यायां रावणवधः । यद्वा चैत्रशुद्धप्रतिपदि शिष्टामावास्यायां प्रातःकाले रावणवधः । पूर्वं सर्वरात्रमवर्ततेत्युक्तेः ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकादशोत्तरशततमः सर्गः ॥ १११ ॥

ति० महीनचकंपे मारुतोनववौ क्रूरइतिशेषः । 'महीचकंपेनहि' इतिपाठे मारुतोववौ सुखइतिशेषः । स्थिरप्रभश्चेति । अनेनाश्विनशुक्लनवम्यांयामावशेषदिनइतिबोधितं ॥ ३२ ॥ ति० अत्रयुद्धदिवसगणनायांकतकतीर्थौ । पूर्वंसुवेलारोहणदिने 'ततोस्तमगमत्सूर्यःसन्ध्ययाप्रतिरञ्जितः । पूर्णचन्द्रप्रदीप्ताचक्षमासमतिवर्तते' इत्युक्तेस्तद्दिनंचतुर्दशीपूर्णिमान्यतरदितिस्पष्टं । ततःकृष्णप्रतिपदियुद्धारंभः । तस्यामेवरात्रौनागपाशबन्धतद्विमोक्षौ । द्वितीयायांधूम्राक्षवधः । तृतीयायांवज्रदंष्ट्रस्य । चतुर्थ्यामकंपनस्य । पञ्चम्यांप्रहस्तस्य । षष्ठ्यांरावणभङ्गः । सप्तम्यांकुंभकर्णवधः । अष्टम्यामतिकायादेः । नवम्यामिन्द्रजितोब्रह्मास्त्रप्रयोगः । दशम्यां दिवानिकुंभवधः । तद्रात्रौमकराक्षवधः । एकादश्यादित्रयोदश्यन्तदिनत्रयेणेन्द्रजिद्वधः । चतुर्दश्यांमूलबलवधः । अमायांरावणयुद्धारंभतद्वधावितिपञ्चदशदिनानिसर्वंयुद्धमिति । अत्रेदंवक्तव्यं—केयंकृष्णप्रतिपन्माघकृष्णस्यवाचैत्रकृष्णस्यवा । नाद्यः । चैत्रेपुष्यनक्षत्रेऽयोध्यातोवनंप्रतिरामस्यप्रस्थानमितिस्पष्टमयोध्याकाण्डे । चैत्रेपुष्यश्चशुक्लपक्षएव । तत्रापिनवम्यादिदिनत्रयएवेति स्पष्टमेवज्योतिषादौ । तत्रनवमी रिक्तात्वादभिषेकायोग्या । दशम्येवतुपूर्णात्वायोग्या । एवंच चैत्रशुक्लदशम्यांप्रस्थानं । तत्रमाघकृष्णामायांयुद्धसमाप्तौतदुत्तरपञ्चम्यांभरद्वाजाश्रमागमनं । 'पूर्णेचतुर्दशेवर्षेपञ्चम्यांलक्ष्मणाग्रजः । भरद्वाजाश्रमंप्राप्यववन्देनियतोमुनिम्' इतिवक्ष्यमाणत्वात् । तत्रचनचतुर्दशवर्षसमाप्तिरितिभगवतःप्रतिज्ञाहानिः । 'पूर्णेचतुर्दशेवर्षे' इत्युक्तेरसंगतिश्च । युद्धोत्तरंतावत्कालंलङ्कायामवस्थानस्यालाभाच्च । चैत्रशुक्लपञ्चम्यांतत्रागमनेपिपञ्चदिनन्यूनतैवेतितद्धानिस्तदवस्थैव । तदुत्तरद्वितीयदिन एवायोध्याप्रवेशस्यलाभात् अमान्तमानेन चैत्रकृष्णोत्तरपञ्चम्यांतदाश्रमगतावपि चतुर्दशवर्षतोबहुदिनाधिक्येन चतुर्दशवर्षसमाप्तिदिनेअयोध्यानागमेमयाप्राणादेयाइतिभरतप्रतिज्ञाहानिः । साचप्रतिज्ञाचित्रकूटेरामसंनिधावित्ययोध्याकाण्डान्तेस्पष्टम् । एतेन चैत्रकृष्णप्रतिपदियुद्धारंभः । तच्छुक्लप्रतिपदिरावणसंस्कारइतितीर्थोक्तश्चैत्रकृष्णस्येत्यन्योपिपरास्तः । पूर्णिमान्तमानेनतिथिबद्धद्वादशमासैर्वर्षगणनेपञ्चदिनानान्यूनत्वात् । अमान्तमानेनचैत्रकृष्णप्रहणेबहुदिनाधिक्यं । सावनमानेनषष्ट्युत्तरत्रिशतदिनैर्वर्षगणनेतुतिथिबद्धवर्षात्तत्रषड्दिनाधिक्येनचतुर्दशवर्षाणां चतुरशीत्यहोरात्रवृद्ध्याबहुदिनन्यूनतैव । किंचमहाभारतेयुधिष्ठिरवनवासेत्रयोदशवर्षमितेकिञ्चित्कालादर्वागेवतेषांप्राकट्येदुर्योधनेनतदसमाप्तावेषांप्राकट्येनपुनस्तावत्पर्यन्तमेतैर्वनवासःकर्तव्योभविष्य-

[पा०] १ क.—ट. महान्हर्षो. २ ख. ङ. च. छ. झ. ञ. ट. भयावहे. ३ क. ख. ङ. झ. ट. मङ्गदंचविभीषणं. ४ ग. श्रीमान्हत्वा. ५ झ. नच. ६ ङ. च. छ. झ. ञ. ट. सुग्रीवविभीषणाङ्गदाः. ७ ख.—ट. विधिनाभ्यपूजयन्. ८ ख. च. छ. ञ. कृतप्रतिज्ञः. ९ ङ. झ. ट. रणेबभूव. १० झ. महेन्द्रः.

तीतिभीष्मंप्रत्युक्तेभीष्मवाक्यंविराटपर्वणि—'पञ्चमेपञ्चमेवर्षेद्वौमासावुपजायतः । एषामप्यधिकामासाः'पञ्चचद्वादशक्षपाः । त्रयोदशानांवर्षाणामितिमेधीयतेमतिः । सर्वंयथावच्चरितंयद्यदेभिःप्रतिश्रुतम् । एवमेतद्ध्रुवंज्ञात्वाततोबीभत्सुरागतः । सर्वेचैवमहात्मानः सर्वेधर्मार्थकोविदाः । येषांयुधिष्ठिरोराजाकस्माद्धर्मेऽपराभ्युयुः ।' इति । एवंचेदशन्यवहारेतिथिबद्धद्वादशमासैरेववर्षगणनाधिकमासगणनाचोचितैव । एवंचाधिकमासगणनायांधर्महानौन्याय्यत्वेचस्थितेकस्माद्रामस्तानुपेक्षेत भरतोवातान्नगणयेत् । एवंचामान्तमानेन चतुर्दशी । याऽऽश्विनकृष्णेपूर्णिमान्तमानेनकार्तिककृष्णेषष्ठ्यांतत्समाप्तिरित्यायाति । अन्यथाचैत्रशुक्लदशम्यारब्धस्यवनवासस्यषष्ठ्यांचतुर्दशवर्षसमाप्तिर्नकथमप्युपपद्यते । तद्गणनेत्वेकादशदिनन्यूनषण्मासानांचतुर्दशवर्षेषुवृद्धावुपपद्यत एवसा । तस्माद्वाशदसमाप्त्युत्तरंत्रयोदशेकिञ्चिद्व्यतीतेअरण्यकाण्डोक्तास्रद्दीत्याफाल्गुनाष्टम्यांरावणकृतसीतापहारः । ततश्चतुर्दशेकिञ्चिद्व्यतीतेरामस्यलङ्कासमीपगनम् । 'वर्ततेदशमोमासोद्वौतुशेषौऽवङ्गम' इतिसीतोक्तिःसावनमानेनस्वहरणदिनतःकालगणनया । तत्र 'पूर्णचन्द्रप्रदीप्ताचे'तिरामोक्त्यापौषशुक्लचतुर्दश्यांपूर्णिमायांवात्रिकूटशिखरप्राप्तीरामस्य । किंचहनूमतोलङ्काप्रवेशोत्तरंसीतादर्शनकाले 'हिमव्यपायेनचशीतरश्मिरभ्युत्थितोनैकसहस्ररश्मिः'इतिवाक्येन 'द्वौमासौरक्षितव्यौमेयोऽवधिस्तेमयाकृतः' इतिरावणवाक्येन मार्गशुक्लदशम्युत्तरंहनुमतोलङ्काप्रवेशोदिनद्वयान्तरेलभ्यतइतिनिरूपितंसुन्दरकाण्डे । ततोमार्गकृष्णेऽष्टम्यांराघवप्रस्थानस्यान्यत्रोक्तत्वेनपौषपूर्णिमात्वमेवोचितंतत्प्राप्तिदिनस्य । ततोदशपञ्चदिनानिसेनानिवेशदूतप्रेषणादिनागतानि । ततोयुद्धारंभः तत्रतदारभ्य भाद्रश्रावणोभयामान्तंलङ्कापुराद्बहिःसेनयोःसंकुलंयुद्धं । ततोबहुराक्षसक्षयेणभीताराक्षसालङ्कांप्रविष्टाइतितद्दिनेऽवहारः । तदुत्तरप्रतिपदिरात्राविन्द्रजित्कृतशरबन्धइत्यादि । अतएवशरबद्धराघवदर्शनकालेसीतावाक्यं—'तीर्त्वासागरमक्षोभ्यंभ्रातरौगोष्पदेहतौ'इति । अनेनबहुदिनयुद्धेनबहुषुराक्षसेषुक्षयितेषुकतिपययूथपरूपेऽल्पावशिष्टेसैन्येतयोःशरबन्धइतिलभ्यते । तथा 'अयंतेसुमहान्कालः शयानस्यमहाबल'इतिकुंभकर्णप्रतिरावणोक्त्यासांप्रतंतन्निद्रायाःषण्मासाधिकत्वप्रतीतेरप्येवमेवोचितम् । निरूपितंचैतत्प्राक्सेतुबन्धादिवृत्तान्तंलंनजानीषइतिकुंभकर्णप्रतिरावणोक्त्यापूर्वमन्त्रकरणोत्तरंमध्येजागरणाभावस्यप्रतीतेः । किंचशरबन्धदिनंनकृष्णप्रतिपत् । तस्याःपूर्णिमोत्तरत्वेनसंपूर्णरात्रौचन्द्रसत्तया 'तस्मिंस्तमसिदारुणे'इत्याद्युक्तेरसंगत्यापत्तेः । अतःसाशुक्लप्रतिपद्वाच्या । एवंचामान्तपक्षमात्रंयुद्धमित्यस्यात्यन्तमसङ्गत्यापत्तिः । यत्तु—अमायामेवरावणवधइति तत्तुनयुक्तं । इन्द्रजिद्वधोत्तरं 'अभ्युत्थानंत्वमद्यैवकृष्णपक्षचतुर्दशीम् । कृत्वानिर्याह्यमावास्यांविजयायबलैर्वृतः' इतिरावणंप्रतिसुपार्श्वस्योक्त्याचतुर्दश्यांरावणप्रेषितबलवधोत्तरममायांनिर्गतरावणेनरामलक्ष्मणयोर्युद्धेरात्रौलक्ष्मणस्यशक्तिघातोत्तरंरावणलङ्काप्रवेशस्योक्ततयातत्तोलक्ष्मणचिकित्सोत्तरंपुनारामरावणयुद्धस्यवाल्मीकिनैवस्पष्टमुक्ततयातदसंभवात् । किंचादित्यहृदयस्य 'आदित्यंप्रेक्ष्यजप्त्वेदंपरंहर्षमवाप्तवान्'इत्यनेनसूर्यदर्शनोत्तरंजपस्योक्ततयारावणमरणोत्तरं 'स्थिरप्रभश्चाप्यभवद्दिवाकरः'इत्युक्त्यादिवातद्वधप्रतीत्याचचिरकालयुद्धोत्तरंलक्ष्मणेशक्तिघातस्य तदर्थमोषधिपर्वतानयनस्यचोक्तत्वेनामारात्रौशक्तिघातप्रतीत्यारणाद्रावणापगमस्यप्रतीत्याचतद्विरोधात् । तथापाद्मे—'ततोजज्ञेमहायुद्धंसंकुलंकपिरक्षसाम् । मध्याह्नेप्रथमंयुद्धंप्रारब्धंप्रतिपद्यभूत् । प्रतिपदि शुक्लप्रतिपदीत्यर्थः । उक्तयुक्तेः 'ततोनिशिसमागम्यमायावीशक्रजिद्बली । बबन्धनागपाशैस्तौराघवौचहरित्रजान्' । ततः चिरकालसंकुलयुद्धोत्तरं । अन्यथातस्यांनिशीत्येवबदेत् । अग्रेद्वितीयेऽह्निषष्ठ्यामितिचोक्त्यादारुणेतमसीतिरामायणोक्त्याचभाद्रश्रावणोभयोत्तरप्रतिपद्येतदितिबोध्यं । 'वैनतेयस्तदाभ्येत्य तानिचास्त्राण्यमोचयत् । द्वितीयेऽह्निधूम्राक्षंहनुमान्निजघानवै । तृतीयेऽह्निवज्रदंष्ट्रंखड्गाच्चिच्छेदचाङ्गदः । जघानहनुमान्भूयश्चतुर्थेऽहन्यकंपनम् । प्रहस्तंपञ्चमीतिथ्यांनीलश्चिच्छेदमूर्धनि । रावणःपरिभूतोऽभूत्षष्ठ्यांरामेणधन्विना । अथलङ्केश्वरःखिन्नःकुंभकर्णं सहोदरम् । शैलमुद्गरघाताश्वधावनाद्यैरबोधयत् । जघानतंकुंभकर्णंरामःसप्तमवासरे" । इदंबोधनंदिनद्वयेन । तंबोधितंकुंभकर्णं सप्तमवासरे बोधनोत्तरंसप्तमवासरेइत्यर्थः । यत्तुबोधनंषष्ठ्यांरात्रौ सप्तम्यांचैतद्वधइति । तन्न । तदुत्थापनेउक्तस्यातिप्रयासस्यरात्रिमात्रेणासंभवात् । रावणमन्दिरगमनकालेसूर्यप्रभयारावणमन्दिरस्यातिभास्वरत्ववर्णनेनमन्त्रादिनासप्तम्यांयुद्धासंभवात् इन्द्रजितो दिनत्रयेणवधोस्ययामषट्केनेत्यस्यासंगतत्वाच्च । एवंचभाद्रपूर्णिमायामेतद्वधः । "जघानलक्ष्मणोन्येद्युरतिकायंदशास्यजम् । बबन्धान्येद्युरिन्द्रारिर्ब्रह्मास्त्रेणनृपौकपीन् । हनूमतासमानीतोमहौषधमहीधरः । तस्यानिलस्पर्शवशात्सर्वएतेसमुत्थिताः । अन्येद्युःकपिराट्कुंभंनिकुंभंवायुजोऽवधीत् । तस्यांनिशिरघुश्रेष्ठोजघानमकरेक्षणम् । मायासीतावधंचक्रेशक्रजिद्रणमूर्धनि । तेनखिन्नोऽभवद्रामआश्वस्तोलक्ष्मणेनसः । त्रयोदशाहेसौमित्रिस्त्रिदिनंयोधयन्बली । जघानशक्रजेतारंरामध्यानेनहेतुना" अन्येद्युः अन्येषुदिवसेषु । अत्रातिकायग्रहणंत्रिशिरोदेवान्तकनरान्तकमहोदरमहापार्श्वोपलक्षणं । लक्ष्मणग्रहणमङ्गदहनूमतोरप्युपलक्षणम् । एवंषड्भिर्दिनैः षण्णांवधः। पूर्वैकमेणैवतद्वधोक्तेः। अन्येद्युः सप्तम्यां । पर्वतानयनमष्टम्यां । अन्येद्युर्नवम्यां तस्यांनिशि नवमीरात्रौ। तदन्तेमायासीतावधः । ततोदशमीचतुर्थयाममारभ्यत्रयोदशीचतुर्थयामपर्यन्तमिन्द्रजिद्वधः । "ततोऽवधीन्मूलबलंचतुर्दश्यांरघूद्वहः । दर्शेथनिर्ययौराजायोद्धुंरामेणसंयुगे । चतुरङ्गबलैःसार्धंमन्त्रिभिर्दशकन्धरः । छत्रचामरसंयुक्तःसर्वाभरणभूषितः । महारथगतोद्वारादुत्तरान्निर्ययौबहिः । आगतोरक्षसांराजाब्रह्मघ्नोदेवकण्टकः । योद्धुंरघुवरेणेतिशुश्रुवेकलहध्वनिः । तत्रयुद्धंसमभवद्वानराणांचरक्षसाम् । रामरावणयोश्चैवतथासौमित्रिणासह । शक्तिंचिक्षेपसंक्रुद्धःसोनुजंप्रतिरावणः । वक्षसाधारयामाससौमित्रिस्तांवियद्गताम् । तयासबाध्यमानःसन्पपातधरणीतले । हनूमताजीवितोऽभूदोषध्यानयनात्पुनः । ततःक्रुद्धोमहातेजाराघवोराक्षसान्तकः । जघानराक्षसा-

न्सर्वाञ्छरैःकालान्तकोपमैः । भयात्प्रदुद्रावरणेलङ्कांप्रतिनिशाचरः । जगद्राममयंपश्यन्निर्वेदात्स्वगृहंविशत् । निकुंभिलांततःप्राप्य होमंचक्रेजिगीषया । ध्वंसितंवानरेन्द्रैस्तदभिचारात्मकंरिपोः । पुनरुत्थायपौलस्त्योरामेणसहयोधितुं । दिव्यंस्यन्दनमारुह्यराक्षसैर्निर्ययौबहिः" इदंनिर्गमनमाश्विनशुक्लप्रतिपदि । "ततःशतमखोदिव्यंरथंहर्यश्वसंयुतम् । राघवायस्वसूतेनप्रेषयामासभक्तिमान् । तंतुमातलिनानीतमारुह्यरथसत्तमम् । स्तूयमानःसुरगणैर्युयुधेतेनरक्षसा । ततोयुद्धमभूद्घोरंरामरावणयोर्महत् । सप्ताह्निकमहोरात्रं शस्त्रास्त्रैरतिभीषणैः ।"इति । ततः मातलिरथागमनदिनोक्तरं । एवंचनवम्यांतद्वधः । तदुक्तंकालिकापुराणे—"रामस्यानुग्रहार्थं वैरावणस्यवधायच । रात्रावेवमहादेवीब्रह्मणाबोधितापुरा । ततस्तुत्यक्तनिद्रासानन्दायामाश्विनेसिते । जगामानगरींलङ्कांयत्रासीद्राघवःपुरा"आगतइतिशेषः । इदंचागमनंराज्यन्ते । तदैवमातलिरथागमनं । "तत्रगत्वामहादेवीतदातौरामलक्ष्मणौ । युद्धेनयोजयामासस्वयमन्तर्हितांबिका । राक्षसानांवानराणांजग्धवासामांसशोणितम् । रामरावणयोर्युद्धंसप्ताहंसान्ययोजयत् । व्यतीतेसप्तमे रात्रेनवम्यांरावणंततः । रामेणघातयामासमहामायाजगन्मयी । यावत्तयोःस्वयंदेवीयुद्धकेलिमुदैक्षत । तावत्तुअष्टरात्राणिसर्वैर्देवैः सुपूजिता । निहतेरावणेवीरेनवम्यांसकलैःसुरैः । विशेषपूजांदुर्गायाश्चक्रेलोकपितामहः ।" सकलैःसुरैरित्यस्यसहेतिशेषः । रामरावणबाणैस्तुयुद्धंचावेक्ष्यभीतिदम् । तृतीयायांतुलङ्कायाःपूर्वोत्तरदिशिस्थितम् । स्वातिनक्षत्रयुक्तायांभीतंसुरबलंमहत् । शान्त्यर्थं वारयामासदेवेन्द्रोवचनाद्धरेः" । शान्त्यर्थं भयशान्त्यर्थं । "ततस्तुश्रवणेनाथदशम्यांचण्डिकांशुभाम् । विसृज्यचक्रेशान्त्यर्थंबलनीराजनंहरिः ।" रिपुजनितभयशान्त्यर्थमित्यर्थः । "नीराजितबलःशक्रस्तत्रारामंसलक्ष्मणम् । संभाष्यप्रययौस्वर्गंसहदेवैःशचीपतिः । इतिवृत्तंपुराकल्पेमनोःस्वायंभुवेऽन्तरे । पुराकल्पेयथावृत्तंप्रतिकल्पंतथैवतु । प्रवर्ततेस्वयंदेवीदैत्यानांनाशनायवै ।" स्वायंभुवमन्वन्तररूपेपुराकल्पेइत्यर्थः । प्रतिकल्पं प्रतिमन्वन्तरमित्यर्थः । जलप्लवसामान्येनतत्रापिकल्पव्यवहारात् । "प्रतिकल्पंभवेद्रामोरावणश्चापिराक्षसः । तथैवजायतेयुद्धंतथैवत्रिदशागमः । एवंरामसहस्राणिरावणानांतथैवच । भक्षितव्यानिभूतानि तेषुदेवीप्रवर्तते । तांपूजन्तिसुराःसर्वेबलंनीराजयन्तिच । तथैवचनराःसर्वेकुर्युःपूजांतथाविधि । बलनीराजनंराजाकुर्याद्बलविवृद्धये ।" इति । इयंचब्रह्मबोधितामहादेव्यग्नौप्रविष्टासीतैवभगवच्छक्तिरूपेतिप्रतिभाति । अतएवब्रह्मवैवर्तेप्रथमेंशविभागे प्रतिकल्पंविष्णोश्चरितंकीदृशमितिनारदप्रश्नेब्रह्मवाक्यं— "सएवभगवान्नूनंप्रतिमन्वन्तरंमुने । वधायदुष्टदैत्यानांभूमिभारकृतांभुवि । कलिद्वापरयोः संधौभविष्यतिनसंशयः । प्रतिकल्पंत्वेवमेवभविष्यतिनसंशयः ।" इति । " सहस्रकृत्वोरामोपिभविताब्रह्मणोदिने " इतिब्रह्मवैवर्तेप्रथमविभागस्थेराधांप्रतिकृष्णवाक्ये । दिनइतिजातावेकवचनं । दिनेष्वित्यर्थः । पूर्वंप्रतिमन्वन्तरमित्युक्तेः । प्रतिचतुर्युगंरामावतारइतितुनयुक्तं । चतुर्विंशतितमचतुर्युग्यांरामावतारस्याष्टाविंशतितमचतुर्युग्यांकृष्णावतारस्यहरिवंशेपुराणान्तरेचप्रसिद्धत्वादितिदिक् । अग्निवेश्यरामायणमितिप्रसिद्धग्रन्थेतु—"रामःपञ्चदशेवर्षेभ्रुवंरामपिमैथिलीम् । उपयेमेलयोध्यायां द्वादशाब्दानुवासस्तः । सप्तविंशतिमेवर्षेवनवासमकल्पयत् । अष्टादशतुवर्षाणिसीतायास्तुतदाऽभवन् । त्रिरात्रमुदकाहारश्चतुर्थेऽह्निफलाशनः । पञ्चमेचित्रकूटेतुरामोवासमकारयत् । अथत्रयोदशेवर्षेपञ्चवट्यांमहामनाः । रामोविरूपयामासघोरांशूर्पणखांवने । ततोमाघेसिताष्टम्यांमुहूर्तेवृन्दसंज्ञके । राघवाभ्यांविनासीतांजहारदशकन्धरः । माघेशुक्लचतुर्दश्यामितिपाठान्तरं । मार्गशुक्लदशम्यांतुवसन्तींरावणालये । संपातिर्दर्शमेमासेआचख्यौवानरेषुताम् । एकादश्यांमहेन्द्राग्रात्पुप्लुवेशतयोजनम् । तद्रात्रिशेषेसीतायादर्शनंहिहनूमतः । द्वादश्यांशिंशुपावृक्षेहनूमान्पर्यवस्थितः । तस्यांनिशायांसीतायाविश्वासालापसत्कथाः । अक्षादिभिस्त्रयोदश्यांततोयुद्धमवर्तत । वधोह्यक्षकुमारस्यवनविध्वंसनंतथा । ब्रह्मास्त्रेणचतुर्दश्यांबद्धःशक्रजिताकपिः । वह्निनापुच्छयुक्तेनलङ्कायादहनंतथा । पौर्णमास्यांमहेन्द्राद्रौपुनरागमनंकपेः । मार्गासितप्रतिपदःपञ्चभिःपथिवासरैः । पुनरागम्यषष्ठेऽह्निध्वस्तंमधुवनंचतैः । सप्तम्यांप्रत्यभिज्ञानदानंशुद्धिनिवेदनं । अष्टम्युत्तरफल्गुन्यांमुहूर्तेविजयाभिधे । मध्यं प्राप्तेसहस्रांशौप्रस्थानंराघवस्यतु । वासरेसप्तमेभोधौस्कन्धावारनिवेशनम् । पौषशुक्लप्रतिपदस्तृतीयायावदंबुधेः । उपस्थानंससैन्यस्यराघवस्यबभूवह । विभीषणश्चतुर्थ्यांवैरामेणसहसंगतः । समुद्रतरणार्थायप्रवृत्तोमन्त्रउद्गमः । प्रायोपवेशनंचक्रेरामोदिनचतुष्टयम् । समुद्रवरलाभश्चसेतूपायप्रकीर्तनम् । सेतोर्दशम्यामारंभस्त्रयोदश्यांसमापनम् । चतुर्दश्यांसुवेलाग्रेरामःसैन्यंन्यवेशयत् । पौर्णमास्यांद्वितीयान्तंत्रिदिनैःसैन्यतारणम् । तृतीयायादशम्यन्तंमन्त्रोगुल्मनिवेशने । शुकसारणयोःसैन्यप्राप्तिरेकादशीदिने । माघेसितायांद्वादश्यांसैन्यसंख्याकृतातुवै । सारणेनकपीनांतुसारासारोपवर्णनम् । त्रयोदश्यांयमांयावल्लङ्कायांदिवसैस्त्रिभिः । रावणःसैन्यसंख्यानंरणायोत्साहनंतथा । ययावथाङ्गदोदूत्यंमाघशुक्लादिवासरे । माघशुक्लद्वितीयादिदिनैःसप्तभिरेवतु । रक्षसांवानराणांचयुद्धमासीत्सुदारुणम् । माघशुक्लनवम्यांतुरात्राविन्द्रजिताहरेःरामलक्ष्मणयोर्नागपाशैर्बन्धोबभूवह । नागपाशविमोक्षार्थंदशम्यांगरुडोभ्यगात् । अत्रावहारःकथितोदशम्यादिदिनद्वयम् । द्वादश्यामाज्ञनेयेनधूम्राक्षस्यवधःकृतः । त्रयोदश्यांतुतेनैवनिहतोकंपनोरणे । माघशुक्लचतुर्दश्यायावत्कृष्णादिवासरम् । त्रिदिनेनप्रहस्तस्यनीलेनविहितोवधः । माघासितद्वितीयायाश्चतुर्थ्यन्तंत्रिभिर्दिनैः । रामेणतुमुलेयुद्धे रावणोद्रावितोरणात् । पञ्चम्यास्त्वष्टमीयावद्रावणेनप्रबोधितः । कुंभकर्णःसमुत्तस्थावत्रयुद्धंचतुर्दिनम् । कुंभकर्णोदिनैःषड्भिर्नवम्यास्तुचतुर्दशीम् । रामेणनिहतोयुद्धेबहुवानरभक्षकः । अमावास्यादिनेशोकादवहारोबभूवह । फाल्गुनादिप्रतिपदश्चतुर्थ्यन्तदिनैस्ततः । नरान्तकप्रभृतयोनिहताःपञ्चराक्षसाः । पञ्चम्याःसप्तमीयावदतिकायवधरुग्यहात् । अष्टम्याद्वादशीयावन्निहतौदिनपञ्चकात् ।

द्वादशोत्तरशततमः सर्गः ॥ ११२ ॥

दुःखाद्रावणंप्रतिशोचनपूर्वकं विलपन्तंविभीषणंप्रति रामेणसमाश्वासनपूर्वकं रावणस्यौर्ध्वदैहिककरणाभ्यनुज्ञानम् ॥ १ ॥

भ्रातरं निहतं दृष्ट्वा शयानं रामनिर्जितम् ॥ शोकवेगपरीतात्मा विललाप विभीषणः ॥ १ ॥
वीर विक्रान्तविख्यात विनीत नयकोविद ॥ महार्हशयनोपेत किं शेषेऽद्य हतो भुवि ॥ २ ॥
विक्षिप्य दीर्घौ निश्चेष्टौ भुजावङ्गदभूषितौ ॥ मुकुटेनापवृत्तेन भास्कराकारवर्चसा ॥ ३ ॥
तदिदं वीर संप्राप्तं मया पूर्वं समीरितम् ॥ काममोहपरीतस्य यत्ते न रुचितं वचः ॥ ४ ॥
यन्न दर्पात्प्रहस्तो वा नेन्द्रजिन्नापरे जनाः ॥ न कुम्भकर्णोतिरथो नातिकायो नरान्तकः ॥
न स्वयं त्वममन्येथास्तस्योदर्कोऽयमागतः ॥ ५ ॥
गतः सेतुः सुनीतानां गतो धर्मस्य विग्रहः ॥ गतः सत्त्वस्य संक्षेपः प्रस्तावानां गतिर्गता ॥ ६ ॥

अथ भ्रातृवधदर्शनेन हठात्प्रवृत्तं प्रकृतिसंबन्धकृतं शोकं सोढुमशक्नुवन्विभीषणो विलपति—भ्रातरमित्यादि ॥ शयानं शयानमिव स्थितं । शोकवेगपरीतात्मा शोकवेगेन परीतमनस्कः । वेगशब्देन हठकृतः शोक इति द्योत्यते ॥ १ ॥ विनीत विद्यासुशिक्षित । विक्षिप्येत्यस्य श्लोकस्य पूर्वश्लोकेनान्वयः । भुजाविति नेनान्त्ययुद्धे द्विभुजस्थितिर्गम्यते । मुकुटेन उपलक्षितइति शेषः । अपवृत्तेन पतनवेगादीषच्चलितेन ॥ २—३ ॥ मया पूर्वं समीरितं यद्वचः काममोहपरीतस्य ते न रुचितं नेष्टमासीत् । तदिदं वचः संप्राप्तं त्वयानुभूतमित्यर्थः ॥ ४ ॥ यदित्यादिसार्धश्लोक एकान्वयः ॥ यत्पापकर्म प्रहस्तो दर्पात् नामन्यतेति विपरिणामेनानुषज्यते । एवं सर्वत्र योजनीयं । अतिरथ इत्यतिकायविशेषणं । अमन्येथाः अमन्यथाः । एत्वमार्षं । तृणीकृतवानसीत्यर्थः । तस्य सीताहरणरूपस्य उदर्कः फलमागतं ॥ ५ ॥ सुनीतानां नयानां । सेतुः मर्यादा । धर्मस्य विग्रहः विरोधः । यद्वा अधर्मस्येति छेदः । विग्रहः देहः । यद्वा धर्मस्य विग्रहः देहः । एषोग्निहोत्री च महातपाश्चेत्यादिना रावणस्य धार्मिकत्वकथनात् । सत्त्वस्य बलस्य संक्षेपः संग्रहः । प्रस्तावानां प्रकृष्टस्तुतीनां ।

निकुंभकुंभावूर्ध्वतुमकराक्षश्चतुर्दिनैः । फाल्गुनस्यद्वितीयायांकृष्णेशक्रजिताजितम् । तृतीयायास्तुसप्तम्यांहरयःपञ्चवासरात् । ओषध्यानयनेव्यग्रास्तदासीदवहारकः । तत्रत्रयोदशीयावद्दिनैःषड्भिस्तुशक्रजित् । लक्ष्मणेनहतोयुद्धेविघ्नितोऽभिचरन्क्रमात् । चतुर्दश्यांदशग्रीवरणदीक्षाविधिक्रमात् । अमावास्यांयशैवीरोयुद्धायदशकंधरः । चैत्रशुक्लप्रतिपदःपञ्चमीदिनपञ्चकैः । रावणस्यप्रधानानांयुध्यतामभवत्क्षयः । चैत्रषष्ठ्यष्टमीयावन्महापार्श्वादिमारणम् । चैत्रशुक्लनवम्यांतुसौमित्रेःशक्तिभेदनम् । द्रोणाद्रिराजनेयेन लक्ष्मणार्थमुपाहृतः । दशम्यामवहारोभूद्रात्रौयुद्धंनृरक्षसोः । एकादश्यांतुरामार्थंरथोमातलिसारथिः । अष्टादशदिनैरामोद्वैरथेरावणं वधीत् । द्वादश्याःशुक्लपक्षस्ययावत्कृष्णचतुर्दशीम् । माघशुक्लद्वितीयायाश्चैत्रकृष्णचतुर्दशीम् । अष्टाशीतिदिनंयुद्धंमध्येपञ्चदशाहकम् । युद्धावहारंसंग्रामस्त्रिसप्ततिदिनान्यभूत् । संस्कारोरावणादीनाममावास्यादिनेऽभवत् । वैशाखादितिथौरामःसुवेलंपुनरागमत् । अभिषिक्तोद्वितीयायांलङ्काराज्येविभीषणः । सीताशुद्धिस्तृतीयायांदेवेभ्योवरलंभनम् । वैशाखस्यचतुर्थ्यांतुरामःपुष्पकमास्थितः । पूर्णेचतुर्दशेवर्षेपञ्चम्यांमाधवस्यतु । भरद्वाजाश्रमंरामःससीतःपुनरागमत् । नन्दिग्रामेतुषष्ठ्यांवैभरतेनसमागतः । सप्तम्यामभिषिक्तोसावयोध्यायांरघूत्तमः । जानकीरामसहितारावणस्यनिवेशने । मनुमासान्स्थितापक्षदशवासरसंयुते" इति । तत्तुसर्वांशेअनिश्चितप्रामाण्यं । कालिकापुराणादिविरोधात् । इदंकल्पान्तरविषयमितिनयुक्तं । तद्विरोधादेव । तस्मात्क्रियाविरोधेपुराणेषूपसंहारएवन्याय्यः । शाखान्तरोक्ताङ्गोपसंहारवत् । यथाकुंभकर्णवधोत्ररामेणोक्तः भारतेलक्ष्मणेन । तादृशेविषये नतुकल्पभेदेनव्यवस्था । जन्मविषयएवतुहरिवंशोक्तासेतिबोध्यम् ॥ ३४ ॥ इत्येकादशोत्तरशततमःसर्गः ॥ १११ ॥

ति० सुहृत्तानां वीराणां ॥ ६ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. यन्मयापूर्वमीरितं. २ ङ. झ. ञ. ट. यत्तन्नरुचितंतव. ३ ङ. झ. ञ. ट. बहुमन्येथाः. च. छ. किंतुमन्येथाः. ग. तत्तुमन्येथाः. ४ ङ. झ. ट. सुहृत्तानां.

आदित्यः पतितो भूमौ मग्नस्तमसि चन्द्रमाः ॥ चित्रभानुः प्रशान्तार्चिर्व्यवसायो निरुद्यमः ॥
अस्मिन्निपतिते भूमौ वीरे शस्त्रभृतांवरे ॥ ७ ॥
किं शेषमिव लोकस्य हतवीरस्य सांप्रतम् ॥ रणे राक्षसशार्दूले प्रसुप्त इव पांसुषु ॥ ८ ॥
धृतिप्रवालः प्रसहाग्र्यपुष्पस्तपोबलः शौर्यनिबद्धमूलः ॥
रणे महात्राक्षसराजवृक्षः संमर्दितो राघवमारुतेन ॥ ९ ॥
तेजोविषाणः कुलवंशवंशः कोपप्रसादापरगात्रहस्तः ॥
इक्ष्वाकुसिंहावगृहीतदेहः सुप्तः क्षितौ रावणगन्धहस्ती ॥ १० ॥
पराक्रमोत्साहविजृम्भितार्चिर्निःश्वासधूमः स्वबलप्रतापः ॥
प्रतापवान्संयति राक्षसाग्निर्निर्वापितो रामपयोधरेण ॥ ११ ॥
सिंहर्क्षलाङ्गूलककुद्विषाणः पराभिजिद्गन्धनगन्धहस्ती ॥
रक्षोवृषश्चापलकर्णचक्षुः क्षितीश्वरव्याघ्रहतोऽवसन्नः ॥ १२ ॥

गतिः विषयः ॥ ६ ॥ आदित्य इत्यादिसार्धश्लोक एकान्वयः ॥ अस्मिन्निपतिते आदित्यः पतित इत्याद्यभेदातिशयोक्तिः । चित्रभानुः वह्निः । " सूर्यवह्नी चित्रभानू " इत्यमरः । व्यवसायो निरुद्यमः । रावणसदृशाश्रयाभावाद्व्यवसायः उत्साहशक्तिः । निर्व्यापारोभूदित्यर्थः ॥ ७ ॥ राक्षसशार्दूले रावणे पांसुषु प्रसुप्त इव स्थिते । मृत इति यावत् । सांप्रतं हतवीरस्य लोकस्य किमिव शेषं । सर्वं शून्यमभूदित्यर्थः ॥ ८ ॥ धृतिरेव प्रवालो यस्य स तथा । धैर्यं हि वृक्षस्य पल्लववत् प्रथमफलं । प्रसहत इति प्रसहः । पचाद्यच् । भावप्रधानो निर्देशः । स एव अग्र्यपुष्पं श्रेष्ठपुष्पं यस्य स तथा । प्रसहनं हि पुष्पवत्कार्यफलस्य अव्यवहितहेतुः । तप एव बलं स्थैर्यांशो यस्य स तथा । शौर्यमेव निबद्धमूलं निश्चलमूलं यस्य स तथा । शौर्यमूलत्वात्तपःप्रभृतीनां सर्वेषां ॥ ९ ॥ तेजः पराक्रम एव विषाणो यस्य स तथा । तेजो हि विषाणवत् परमर्मभेदि । कुलवंशवंशः कुलं पितृपितामहादयः तेषां वंशः सर्गः स एव वंशः पृष्ठावयवविशेषो यस्य स तथा । " वंशो वेणौ कुले वर्गे पृष्ठस्यावयवेपि च " इत्युभयत्रापि विश्वः । कुलेन हि वंशेनेव स्वाश्रितधारणं । कोप एवापरगात्रं शिरोव्यतिरिक्तशरीरं यस्य स तथा । प्रसाद एव हस्तो यस्य स तथा । कोपस्य बहुत्वादपरगात्रत्वेन रूपणं । इक्ष्वाकुः रामः स एव सिंहः तेन अवगृहीतदेहः रावणगन्धहस्ती रावण एव मत्तगजः क्षितौ सुप्तः । मृत इत्यर्थः ॥ १० ॥ पराक्रमोत्साहावेव विजृम्भितार्चिः विस्तृतज्वालः । निश्वास एव धूमो यस्य स तथा । स्वबलप्रतापः स्वबलोष्णः । प्रतापवान् तेजस्वी । राक्षसाग्निः रामपयोधरेण निर्वापितः ॥ ११ ॥ सिंहर्क्षा राक्षसाः ते एव लाङ्गूलककुद्विषाणानि यस्य स तथा । " सिंहर्क्षा राक्षसाः प्रोक्ता यक्षा उष्णीषिणो मताः " इति निघण्टुः । यद्वा सिंहर्क्षं मूलानक्षत्रं तच्च राक्षसनक्षत्रं । यथाह ज्योतिषे काश्यपः— " अग्निर्मघा विशाखा च आश्लेषा शततारका । धनिष्ठा चित्रया युक्ता ज्येष्ठा मूला च राक्षसाः " इति ॥ तत्संबन्धाद्राक्षसा अपि तच्छब्देनोच्यन्ते । राक्षससमृद्धेर्गर्वहेतुत्वेन लाङ्गूलादित्वेन रूपणं । परानभिजयतीति पराभिजित् । गन्धने परोत्सादने गन्धहस्ती मुख्यः । " गन्धनं सूचनोत्साहहिंसनेषु प्रकाशने " इति विश्वः । चापलं विषयलौल्यं तदेव

ती० प्रसहाग्र्यपुष्पः प्रसहतइतिप्रसहः । पचाद्यच् । भावप्रधानोनिर्देशः । प्रसहः प्रसहनं तदेवाग्र्यपुष्पंयस्यसः । प्रसवाग्र्यपुष्पइतिपाठे प्रसवः सन्तानं ॥ १ ॥ स० पराभिजिद्गन्धनगन्धहस्ती परानभिजयन्तीतिपराभिजितः । तद्गन्धने हिंसायां गन्धहस्ती मत्तगजतुल्यः । चापलकर्णचक्षुः चापलं चञ्चलंकर्णचक्षुर्यस्यसः । कर्णयोश्चापलं अश्राव्यशुर्पणखादिप्रलपितश्रवणेनतत्रचित्तप्रणिधानं । चक्षुषोःअनवलोकनीयपरदारसौन्दर्यदर्शनं ॥ १२ ॥

[पा०] १ ङ. ञ. गतसत्त्वस्य. ग. ब. ट. हतवीर्यस्य. २ क. ङ. ज. ञ. प्रसभाग्र्य. ३ घ. इक्ष्वाकुसिंहेनगृहीतदेहः. ४ ङ. ञ. गन्धवाहः.

वदन्तं हेतुमद्वाक्यं परिमृष्टार्थनिश्चयम् ॥ रामः शोकसमाविष्टमित्युवाच विभीषणम् ॥ १३ ॥
नायं विनष्टो निश्चेष्टः समरे चण्डविक्रमः ॥ अत्युन्नतमहोत्साहः पतितोऽयमशङ्कितः ॥ १४ ॥
नैवं विनष्टाः शोच्यन्ते क्षत्रधर्ममवस्थिताः ॥ वृद्धिमाशंसमाना ये निपतन्ति रणाजिरे ॥ १५ ॥
येन सेन्द्रास्त्रयो लोकास्त्रासिता युधि धीमता ॥ तस्मिन्कालसमायुक्ते न कालः परिशोचितुम् ॥१६॥
नैकान्तविजयो युद्धे भूतपूर्वः कदाचन ॥ परैर्वा हन्यते वीरः परान्वा हन्ति संयुगे ॥ १७ ॥
इयं हि पूर्वैः संदिष्टा गतिः क्षत्रियसंमता ॥ क्षत्रियो निहतः संख्ये न शोच्य इति निश्चयः ॥१८॥
तदेवं निश्चयं दृष्ट्वा तत्त्वमास्थाय विज्वरः ॥ यदिहानन्तरं कार्यं कल्प्यं तदनुचिन्तय ॥ १९ ॥
तमुक्तवाक्यं विक्रान्तं राजपुत्रं विभीषणः ॥ उवाच शोकसंतप्तो भ्रातुर्हितमनन्तरम् ॥ २० ॥

योऽयं विमर्देषु न भग्नपूर्वः सुरैः समेतैः सह वासवेन ॥
भवन्तमासाद्य रणे विभग्नो वेलामिवासाद्य यथा समुद्रः ॥ २१ ॥
अनेन दत्तानि सुपूजितानि भुक्ताश्च भोगा निभृताश्च भृत्याः ॥
धनानि मित्रेषु समर्पितानि वैराण्यमित्रेषु च यापितानि ॥ २२ ॥
एषोहिताग्निश्च महातपाश्च वेदान्तगः कर्मसु चाग्र्यवीर्यः ॥
एतस्य यत्प्रेतगतस्य कृत्यं तत्कर्तुमिच्छामि तव प्रसादात् ॥ २३ ॥

कर्णचक्षुषी यस्य स तथा । रक्षोवृषः रावणवृषभः क्षितीश्वरव्याघ्रेण रामशार्दूलेन हतः अवसन्नः मृतः ॥ १२ ॥ परिमृष्टार्थनिश्चयं कृतार्थनिश्चयं ॥ १३ ॥ अयं निश्चेष्टः निर्विक्रमः न विनष्टः अपि त्वयं समरे चण्डविक्रमः अत्युन्नतमहोत्साहः । अशङ्कितः पतितः विनष्टः ॥ १४ ॥ यदि समरे विक्रम्य नष्टः ततः किमित्यत्राह—नैवमित्यादि ॥ ये वृद्धिं परलोकवृद्धिं आशंसमानाः आकाङ्क्षमाणाः सन्तः रणाजिरे निपतन्ति । क्षत्रधर्ममवस्थिताः शूरधर्मव्यवस्थिताः । एवं विनष्टाः ते न शोच्यन्ते ॥ १५ ॥ न केवलं समरमरणादेव न शोच्यत्वं किंतु यशःप्रत्यासक्त्यापीत्याह येनेति ॥ येन त्रासिताः तस्मिन् रावणे कालसमायुक्ते शोचितुं न कालः नावसरः । तद्विषये शोको न युक्तः । वीरस्वर्गगमनादिति भावः ॥ १६ ॥ तथापि मरणे सति कथं न शोचितव्यमित्याशङ्क्य जयवत्पराजयोपि न शोकस्थानमित्याह—नैकान्तेति ॥ एकान्तविजयः न भूतपूर्वः इतः पूर्वं न भूतः । अनैकान्त्यमुपपादयति—परैर्वेति ॥ १७ ॥ क्षत्रधर्मपर्यालोचनेनापि न शोच्य इत्याह—इयं हीति ॥ क्षत्रियः शूरः ॥ १८ ॥ दृष्ट्वा ज्ञात्वा । तत्त्वमास्थाय परमार्थबुद्धिमवलम्ब्य । जनिमतामवश्यं मृत्युं ज्ञात्वेत्यर्थः । विज्वरः निःशोकः । यत् कार्यं कर्म । कल्प्यं अनुष्ठेयं । तदनुचिन्तय । कल्यमिति पाठे यत् कार्यं कल्यं । योग्यमित्यर्थः । "कल्यो योग्यश्च ते समाः" इति निघण्टुः ॥ १९—२० ॥ विमर्देषु समरेषु । अनेन महावीरतया सम्यक् संस्कारमर्हतीत्युक्तं ॥२१॥ धर्मशीलत्वाच्च तदर्हतीत्याह—अनेनेति ॥ दत्तानि दानानि कृतानि । सुपूजितानि गुरुदैवतानीति शेषः । निभृताः नितरां भृताः । यापितानि सफलीकृतानीत्यर्थः ॥ २२ ॥ आहिताग्न्यादित्वाच्च तदर्हतीत्याह—एषोहिताग्निरिति ॥ हिताग्निः आहिताग्निः । संधिरार्षः । वेदान्तं गच्छति जानातीति वेदान्तगः । कर्मसु चाग्र्यवीर्यः कर्मशूर इत्यर्थः । प्रेतग प्रेतत्वं गतस्य । इच्छामि । पुत्राणां विनष्टत्वेन भ्रा

स० यमःशङ्कितोभीतोयस्मादितिवा ॥ १४ ॥ ति० अयंसमरेनिश्चेष्टः अशक्तोभूत्वानविनष्टः । अपिचण्डविक्रमत्वादिगुणा एवायमशङ्कितोमृत्युशङ्कारहितएवदैवात्पतितः ॥ १५ ॥ ति० कालसमायुक्ते कालधर्मसंबद्धे । एवंदुर्गुणयुक्तस्यमरणमेवसम्यगितिभावः ॥ १६ ॥ ति० वनीपकेषुयाचकेषु । अनेनदत्तानि ॥ २२ ॥

[पा०] १ क.—ट. परिदृष्टार्थ. २ क.—ङ. ज.—ट. क्षत्रधर्मेव्यव. ३ क.—घ. च. छ. ञ. ट. अस्मिन्काल. ४ ङ. ञ. ट. समस्तैः. ५ ञ. दत्तानिवनीपकेषु. ६ क. ङ. ञ. निपातितानि.

स तस्य वाक्यैः करुणैर्महात्मा संबोधितः साधु विभीषणेन ॥
आज्ञापयामास नरेन्द्रसूनुः स्वर्गीयमाधानमदीनसत्त्वः ॥ २४ ॥
मरणान्तानि वैराणि निर्वृत्तं नः प्रयोजनम् ॥ क्रियतामस्य संस्कारो ममाप्येष यथा तव ॥ २५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्वादशोत्तरशततमः सर्गः ॥ ११२ ॥

त्रयोदशोत्तरशततमः सर्गः ॥ ११३ ॥

रावणान्तःपुराङ्गनाभीरणाङ्गणमेत्य तदङ्गपरिष्वङ्गेणबहुधाविलापः ॥ १ ॥

रावणं निहतं श्रुत्वा राघवेण महात्मना ॥ अन्तःपुराद्विनिष्पेतू राक्षस्यः शोककर्शिताः ॥ १ ॥
वार्यमाणाः सुबहुशो वेष्टन्त्यः क्षितिपांसुषु ॥ विमुक्तकेश्यो दुःखार्ता गावो वत्सहता इव ॥ २ ॥
उत्तरेण विनिष्क्रम्य द्वारेण सह राक्षसैः ॥ प्रविश्यायोधनं घोरं विचिन्वन्त्यो हतं पतिम् ॥ ३ ॥
राजपुत्रेतिवादिन्यो हा नाथेति च सर्वशः ॥ परिपेतुः कबन्धाङ्कां महीं शोणितकर्दमाम् ॥ ४ ॥
ता बाष्पपरिपूर्णाक्ष्यो भर्तृशोकपराजिताः ॥ करेण्व इव नर्दन्त्यो विनेदुर्हतयूथपाः ॥ ५ ॥

रेवाधिकारित्वादिति भावः ॥ २३ ॥ करुणैरित्यनेन दुःखातिशयादिदानीमेवमुक्तमिति द्योत्यते । वक्ष्यति हि नाहमस्य संस्कारं करिष्यामीति । स्वर्गीयं स्वर्गाय हितं । आधानं अन्त्येष्टिसंज्ञिकं कर्म ॥ २४ ॥ वैरातिरेकात् संस्कारे मम द्वेष इति न शङ्कनीयमित्याह—मरणेति ॥ मरणानन्तरमपि वैरकरणं निष्प्रयोजनमित्याह—निर्वृत्तमिति । प्रयोजनं सीतालाभरूपं । अस्य संस्कारः यायजूकोचितसंस्कारः । क्रियतां। ममाप्येष यथा तव । तव यथा भ्राता तथा ममापि भ्राता । मद्भ्रातृभूतस्य तव भ्रातृत्वात् । त्वमस्य दोषं दृष्ट्वा न करोषि चेदहमेव करिष्यामि । भ्रातृषु येनकेनापि कर्तव्यमिति भावः । अत्र श्लोके न इति गायत्र्यक्षरं । अत्राचार्या व्याचख्युः । मरणान्तानि वैराणि ऋषिजनस्थानभ्रंशमैथिलीहरणमत्प्राणभूतजटायुविध्वंसनप्रभृतिमद्द्वेषाचरणमितः परं कर्तुं न शक्नोति हीति भावः । निर्वृत्तं नः प्रयोजनं । यदि वा रावणः स्वयमिति वदता मयास्य विषये किंचिच्छुभं कर्तव्यमिति मनसि कृतं । तदनेन 'द्विधा भज्येयमप्येवं न नमेयं तु कस्यचित्'इति वदता प्रतिहतं । तत्करणस्येदानीमवसरः संजात इति भावः । क्रियतामस्य संस्कारः । मत्कृतहितप्रतिषेधानर्हावस्था इदानीमस्य संजाता अतोयं न त्याज्यः । अतः परं यत्कर्तव्यं तत्कार्यमेव । ममाप्येष यथा तव । अयं मच्चित्तानुकूलो जातः अतो मन्मित्रभूतो भवानपि तमनुवर्तितुमर्हति । अथवा एषः तव यथा तथा ममापि । अस्य संस्कारस्तव यथा प्राप्तः तथा ममापीत्यर्थः । भवानस्य संस्कारं न करोति चेदहमेव करोमि । बन्धुषु येन केनापि कर्तव्यं खल्विदं तद्दूरे तिष्ठ अहमेव करिष्यामीत्यर्थ इति ॥२५॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्वादशोत्तरशततमः सर्गः ॥ ११२ ॥

अथ रावणान्तःपुरस्त्रीविलापः—रावणमित्यादिश्लोकद्वयमेकान्वयं ॥ वत्सहताः हतवत्साः ॥१—२॥ उत्तरेणेत्यादिश्लोकद्वयमेकान्वयं ॥ शोणितैः कर्दमो यस्यास्तां शोणितकर्दमां ॥ ३—४ ॥ हतयूथपा इति करेणुविशेषणं । अतएव नर्दन्त्यः करेण्व इव विने-

---

ती० तवयथा ममापितथा । ममापिस्नेहविषयइत्यर्थः ॥ अतःसंस्क्रियतां शङ्कांमाकुर्वितिभावः ॥ स० निर्वृत्तं निष्पन्नं । तद्धर्मस्यैवप्रयोजनरूपत्वात् ॥ तथामम । तवममचसौभ्रात्रादितिभावः ॥ २५ ॥ इतिद्वादशोत्तरशततमःसर्गः ॥ ११२ ॥

ति० गावइति । अयमत्यन्तवियोगजशोकमात्रेदृष्टान्तः ॥ २ ॥

[पा०] १ च. सुसंधितः. २ घ. ज. झ. दृष्ट्वा. ३ ङ. ज. झ. ट. वेष्टन्त्योरणपांसुषु. ४ क.—ट. आर्यपुत्रेति. ५ ज. ट. मरेजुर्हत.

ददृशुस्तं महावीर्यं महाकायं महाद्युतिम् ॥ रावणं निहतं भूमौ नीलाञ्जनचयोपमम् ॥ ६ ॥
ताः पतिं सहसा दृष्ट्वा शयानं रणपांसुषु ॥ निपेतुस्तस्य गात्रेषु च्छिन्ना वनलता इव ॥ ७ ॥
बहुमानात्परिष्वज्य काचिदेनं रुरोद ह ॥ चरणौ काचिदालिङ्ग्य काचित्कण्ठेऽवलम्ब्य च ॥ ८ ॥
उद्धृत्य च भुजौ काचिद्भूमौ स्म परिवर्तते ॥ हतस्य वदनं दृष्ट्वा काचिन्मोहमुपागमत् ॥ ९ ॥
काचिदङ्के शिरः कृत्वा रुरोद मुखमीक्षती ॥ स्नापयन्ती मुखं बाष्पैस्तुषारैरिव पङ्कजम् ॥ १० ॥
एवमार्ताः पतिं दृष्ट्वा रावणं निहतं भुवि ॥ चुक्रुशुर्बहुधा शोकाद्भृयस्ताः पर्यदेवयन् ॥ ११ ॥
येन वित्रासितः शक्रो येन वित्रासितो यमः ॥ येन वैश्रवणो राजा पुष्पकेण वियोजितः ॥ १२ ॥
गन्धर्वाणामृषीणां च सुराणां च महात्मनाम् ॥ भयं येन महद्दत्तं सोयं शेते रणे हतः ॥ १३ ॥
असुरेभ्यः सुरेभ्यो वा पन्नगेभ्योपि वा तथा ॥ न भयं यो विजानाति तस्येदं मानुषाद्भयम् ॥१४॥
अवध्यो देवतानां यस्तथा दानवरक्षसाम् ॥ हतः सोयं रणे शेते मानुषेण पदातिना ॥ १५ ॥
यो न शक्यः सुरैर्हन्तुं न यक्षैर्नासुरैस्तथा ॥ सोयं कश्चिदिवासक्तो मृत्युं मर्त्येन लम्भितः ॥ १६ ॥
एवं वदन्त्यो बहुधा रुरुदुस्तस्य ताः स्त्रियः ॥ भूय एव च दुःखार्ता विलेपुश्च पुनः पुनः ॥ १७ ॥
अशृण्वता च सुहृदां सततं हितवादिनाम् ॥ मरणायाहृता सीता घातिताश्च निशाचराः ॥ १८ ॥
एताः सममिदानीं ते वयमात्मा च पातिताः ॥ ब्रुवाणोपि हितं वाक्यमिष्टो भ्राता विभीषणः ॥
धृष्टं परुषितो मोहात्त्वयाऽऽत्मवधकाङ्क्षिणा ॥ १९ ॥
यदि निर्यातिता ते स्यात्सीता रामाय मैथिली ॥ न नः स्याद्व्यसनं घोरमिदं मूलहरं महत् ॥ २० ॥
वृत्तकामो भवेद्भ्राता रामो मित्रकुलं भवेत् ॥ वयं चाविधवाः सर्वाः सकामा न च शत्रवः ॥२१॥
त्वया पुनर्नृशंसेन सीतां संरुन्धता बलात् ॥ राक्षसा वयमात्मा च त्रयं तुल्यं निपातितम् ॥२२॥
न कामकारः कामं वा तव राक्षसपुङ्गव ॥ दैवं चेष्टयते सर्वं हतं दैवेन हन्यते ॥ २३ ॥
वानराणां विनाशोऽयं रक्षसां च महाहवे ॥ तव चैव महाबाहो दैवयोगादुपागतः ॥ २४ ॥
नैवार्थेन न कामेन विक्रमेण न चाज्ञया ॥ शक्या दैवगतिर्लोके निवर्तयितुमुद्यता ॥ २५ ॥

दुरित्यन्वयः ॥ ५—७ ॥ बहुमानादित्यादिश्लोकत्रयमेकान्वयं ॥ परिवर्तते वेष्टते । ईक्षती ईक्षमाणा ॥ ८—१० ॥ चुक्रुशुरिति । क्रोशः निरक्षरध्वनिः । परिदेवनं साक्षरशब्दः ॥ ११—१३ ॥ मानुषाद्भयं । जातमिति शेषः ॥ १४—१५ ॥ कश्चिदि वयः कश्चित्पुरुष इव लम्भितः प्रापितः ॥ १६—१७ ॥ सुहृदां सुहृद्भ्यः । पञ्चम्यर्थे षष्ठी । वचनमितिवाशेषः । अशृण्वता त्वया ॥ १८ ॥ एताः वयं ते राक्षसाः आत्मा च समं युगपत् इदानीं पातिताः । मारिताइत्यर्थः । इष्टः प्रीतिमान् ॥ १९ ॥ यदीत्यादिश्लोकद्वयमेकान्वयं ॥ ते त्वया । निर्यातिता प्रत्यर्पिता । मूलहरं मूलभूतत्वत्पर्यन्तहरं । यदि सीता निर्यातिता स्यात्तदा भ्राता विभीषणो वृत्तकामः निष्पन्नमनोरथः भवेत् । स्ववाक्यकरणादिति भावः । तथा रामः मित्रकुलं कुलमित्रं । शत्रवः देवादयः ॥२०—२१॥ तुल्यमिति । युगपदित्यर्थः ॥ २२ ॥ एवं रावणस्वेच्छाचरणस्य राक्षसनाशहेतुतामभिधाय संप्रति तन्निरासपूर्वकं दैवकारितत्वं दर्शयति—न कामकार इति ॥ कामकारः स्वच्छन्दकरणं कामं प्रकामं । नास्ति । कुतः दैवं चेष्टयते सर्वं हतं दैवेन हन्यते । दैवेन हतमन्येन हन्यते ॥ २३—२४ ॥ उद्यता कार्योन्मुखी दैवगतिः अर्थादिना न निवर्तयितुं शक्या ।

स० असत्वः अल्पबलइत्यर्थः । अनुदराकन्येत्यत्रेव । मर्त्येन स्वकर्तृकमरणयोग्येनरामेण । लंभितः प्रापितः मृत्युं यमंप्रतीतिवा ॥ १६ ॥ स० दैवं अदृष्टप्रेरकोहरिरेव । सर्वं चराचरं चेष्टयते चेष्टयति । अतोऽन्येषां तत्खातन्त्र्यभ्रमइत्यर्थः । दैवेनहतमेव केनचिन्निमित्तेनहन्यते नत्वन्यथा ॥ २३ ॥ इति त्रयोदशाधिकशततमः सर्गः ॥ ११३ ॥

[पा०] १ ख. च. छ. ञ. निहतंदृष्ट्वा. २ च. अशृण्वतातु. ३ ङ. झ. राक्षसाश्चनिपातिताः.

विलेपुरेवं दीनास्ता राक्षसाधिपयोषितः ॥ कुर्यं इव दुःखार्ता बाष्पपर्याकुलेक्षणाः ॥ २६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रयोदशोत्तरशततमः सर्गः ॥ ११३॥

चतुर्दशोत्तरशततमः सर्गः ॥ ११४ ॥

मण्डोदर्या रणाङ्गणेरावणानुशोचनपूर्वकं शोकेनबहुधाविलापः ॥ १ ॥ विभीषणेन रामाज्ञया यथाविधिरावणसंस्करणम् ॥ २ ॥

तासां विलपमानानां तथा राक्षसयोषिताम् ॥ ज्येष्ठा[1] पत्नी प्रिया दीना भर्तारं समुदैक्षत ॥ १ ॥
दशग्रीवं हतं दृष्ट्वा रामेणाचिन्त्यकर्मणा ॥ पतिं मण्डोदरी तत्र कृ[3]पणा पर्यदेवयत् ॥ २ ॥
ननु नाम महाभाग[4] तव वैश्रवणानुज ॥ क्रुद्धस्य प्रमुखे स्थातुं त्रस्त्यपि पुरन्दरः ॥
ऋषयश्च महीदे[5]वा गन्धर्वाश्च यशस्विनः ॥ ३ ॥
ननु नाम तवोद्वेगाच्चारणाश्च दि[6]शो गताः ॥ स त्वं मानुषमात्रेण रामेण युधि निर्जितः ॥
न व्यपत्रपसे राजन्किमिदं राक्षसर्षभ ॥ ४ ॥
कथं त्रैलोक्यमाक्रम्य श्रिया वीर्येण चान्वितम् ॥ अविषह्यं जघान त्वां मानुषो वनगोचरः ॥ ५ ॥
[जहि वीर महावीर्यौ विस्मितौ रामलक्ष्मणौ ॥ ६ ॥]
मानुषाणामविषये चरतः कामरूपिणः ॥ विनाशस्तव रामेण संयुगे नोपपद्यते ॥ ७ ॥
न चैतत्कर्म रामस्य श्रद्दधामि चमूमुखे ॥ सर्वतः समुपेतस्य तव तेनाभिमर्शनम्[9] ॥ ८ ॥
यदैव[10] च जनस्थाने राक्षसैर्बहुभिर्वृतः ॥ खरस्तव हतो भ्राता तदेवासौ न मानुषः ॥ ९ ॥

कामेन स्वेच्छया ॥ २५ ॥ कुर्यः क्रौञ्च्यः ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रयोदशोत्तरशततमः सर्गः ॥ ११३ ॥

अथ मण्डोदरीप्रलापादि—तासामित्यादि ॥ विलपमानानां विलपन्तीनां । तथा विलपमानानामित्यन्वयः । दीना सती समुदैक्षत ॥ १ ॥ मण्डोदरी मण्डनभूतोदरी । कृशोदरीति यावत् । " मडि भूषायां " इति धातोर्भावे कप् प्रत्ययः । मण्डं सारं सुन्दरमिति यावत् । तादृशोदरीत्येके । मण्डा पृथुपिपीलिका तस्या इव उदरं यस्याः सा मण्डोदरीत्यप्याहुः ॥ २ ॥ यद्यपि समरमरणं शूराणां श्लाघ्यमिति न वीरपत्नी तच्छोचितुमर्हा, तथाप्यसमानान्मानुषात्प्राप्तमिदं लज्जावहमिति शोचति—ननु नाम तवेत्यादिना सार्धश्लोकेन ॥ नाम प्रसिद्धौ । महीदेवाः ब्राह्मणाश्च । त्रस्यन्तीत्यनुषङ्गः । स कथं मानुषेण जित इति शेषः ॥ ३ ॥ ननु नामेत्यादिसार्धश्लोक एकान्वयः ॥ चारणाश्च आकाशचारिणश्च । न व्यपत्रपसे । मानुषविजयेनेति शेषः । किमिदं किमेवमवस्थानकारणमित्यर्थः ॥ ४ ॥ वीर्येण त्रैलोक्यमाक्रम्य श्रियान्वितं त्वां मानुषस्तत्रापि वनगोचरः कथं जघान । अद्भुतमित्यर्थः ॥ ५—६ ॥ तदेवासंभावितत्वं निरूपयति—मानुषाणामिति ॥ अविषये अगम्यदेशे ॥ ७ ॥ सर्वतः समुपेतस्य सर्वयुद्धोपकरणैः पूर्णस्य । तव तेन रामेण अभिमर्शनं आक्रमणमिति यत् एतद्रामस्य न श्रद्दधामि रामसंबन्धिकर्मेति न श्रद्दधामि ॥ ८ ॥ रावणवधस्य मानुषे-

---

स० त्रस्यतिस्म ॥ ३ ॥ स० उद्वेगात् तंप्राप्य । शोकातिशयाद्विवेकाभावादनुदाहार्यस्यापिक्रुध्यादेरद्वेषिणोप्युद्वेगोक्तिरिति

[पा०] १ ख. च. छ. ञ. ट. रावणयोषितां. २ ख. ङ. ञ. ञ. ज्येष्ठपत्नी. ३ ज. कृपणं. ४ क.—ट. महाबाहो. ५ ख. च. छ. ञ. महात्मानो. ङ. ञ. ट. महान्तोपि. ६ घ. नभोगताः. ७ इदमर्धं घ. पाठेदृश्यते. ८ ङ. ज. मनुष्याणां. ९ ञ. तेनाभिमर्षणं. १० यदैवचजनस्थानइत्यादिश्लोकद्वयं ग. ङ. ञ. ञ. ट. पाठेषु इन्द्रियाणिपुराजित्वेतिश्लोकानन्तरंदृश्यते.

यदैव नगरीं लङ्कां दुष्प्रवेशां सुरैरपि ॥ प्रविष्टो हनुमान्वीर्यात्तदैव व्यथिता वयम् ॥ १० ॥
यदैव वानरैर्घोरैर्बद्धः सेतुर्महार्णवे ॥ तदैव हृदयेनाहं शङ्के रामममानुषम् ॥ ११ ॥
अथवा रामरूपेण कृतान्तः स्वयमागतः ॥ मायां तव विनाशाय विधायाप्रतितर्किताम् ॥ १२ ॥
अथवा वासवेन त्वं धर्षितोसि महाबल ॥ वासवस्य कुतः शक्तिस्त्वां द्रष्टुमपि संयुगे ॥
[महाबलं महावीर्यं देवशत्रुं महौजसम् ॥ १३ ॥]
व्यक्तमेष महायोगी परमात्मा सनातनः ॥ अनादिमध्यनिधनो महतः परमो महान् ॥ १४ ॥

णाकृतत्वे केन कृतः स्यादित्याशङ्क्य पक्षान्तरमुपक्षिपति—यदैवेत्यादिना ॥ ९—११ ॥ एवं सामान्यतो रामस्यामानुषत्वं प्रतिपाद्य उत्तरोत्तरोत्कृष्टयमेन्द्रादिदेवताविशेषत्वं प्रतिपादयति—अथवेत्यादिना ॥ मायां सीतारूपां । अप्रतितर्कितां अपरिमेयरूपलावण्यां ॥ १२—१३ ॥ यदैवेत्यादिना सामान्यतउपन्यस्तममानुषत्वमेकत्र व्यवस्थापयितुमाह—व्यक्तमित्यादिना ॥ महायोगित्वादिगुणविशिष्टो यो विष्णुः स एवैष राम इति स्त्रीवचनमुखेनैव विष्णोः सर्वदेवतापारम्यं भगवान्वाल्मीकिर्व्यवस्थापयति । महान् योगः लोकरक्षणोपायचिन्ता सोस्यास्तीति महायोगी । परमश्चासावात्मा च परमात्मा । सर्वजीवात्मभ्य उत्कृष्ट इत्यर्थः । परमत्वमस्य कथमित्याशङ्क्य षड्भावविकाररहितत्वादित्याह—सनातन इति। सदास्तित्वयुक्त इत्यर्थः।अनादिमध्यनिधनः जन्मवृद्धिविनाशशून्यः।शाश्वतः अपक्षयरहितः। ध्रुवः परिणामरहितः । एतैर्विशेषणैर्जीवगतषड्भावविकारशून्यत्वमुक्तं । तथोक्तं विष्णुपुराणे—"अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः। वर्जितः शक्यते वक्तुं यः सदास्तीति केवल" इति॥ परमात्मशब्दार्थं विवृणोति—महतः परमो महानिति । महान् इन्द्रादिः । तस्मान्महान् ब्रह्मादिः । तस्मादपि महानित्यर्थः । स्थानविशेषेणापि परमत्वमाह—तमस इति ॥ तमसः प्राकृतमण्डलस्य परमः परस्तादप्राकृते वैकुण्ठे विद्यमानः । " आदित्यवर्णं तमसः परस्तात् " " आदित्यवर्णं तमसस्तु पारे " इति श्रुतेः । सर्वत्र व्याप्तस्य कथं तत्रावस्थानमित्याशङ्क्य विग्रहद्वारेत्याह—शङ्खेत्यादिना । सदा शङ्खचक्रधारणप्रयोजनमाह—धाते-

ज्ञेयं ॥ ४ ॥ **तनिश्लोकी** व्यक्तमेषः परिशेषतःप्रमाणेननिश्चितोदशग्रीवहन्तारामः महायोगी महासन्नहनः आश्रितत्राणसंनाहवान् । महायोगी विविधविचित्रजगन्निर्माणोपायचतुरः । महायोगी ' बहुस्यांप्रजायेयेति ' इत्याद्युक्तबहुभवनसंकल्पवान् । ' सोभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाःप्रजाः ' इतिमनुस्मरणात् । महायोगी जगन्निर्माणोपयुक्तप्रकृतिपुरुषकारकर्मसंसर्गवान् । महायोगी शरणागतरक्षणादिष्वसंचाल्ययुक्तिमान् । ' योगःसन्नहनोपायध्यानसंगतियुक्तिषु ' इत्यमरः । परमात्मा चेतनाचेतनशरीरः । सकलशरीरत्वप्रसक्तदोषासंस्पर्शमाह—**सनातनइति** । अनादिमध्यनिधनः आदिमध्यान्तशून्यः । " महतः परमोमहान्—अणोरणीयान्महतोमहीयान् " इत्याद्युक्तपरममहत्त्ववान् । तमसःपरमः 'अक्षरात्परतःपरः " यस्मात्क्षरमतीतोऽहमक्षरादपिचोत्तमः" इतिश्रुतिस्मृतिभ्यां । तमसःपरमः " आदित्यवर्णंतमसःपरस्तात् " इत्युक्तपरमपदवासी । धाता भूतभविष्यद्वर्तमानकालावच्छिन्नसकलजगन्निर्माता । " सूर्याचन्द्रमसौधातायथापूर्वमकल्पयत् " इतिश्रुतेः । धाता स्थितिकर्ता । साचस्थितिरनेकरूपाजगद्विविधकरणेन । " डुधाञ् धारणपोषणयोः " इतिधातोः धारणं प्रशासनाधीनलोकत्वं । ' एतस्यवाअक्षरस्यप्रशासने ' इत्यादिश्रुतेः । एवंकारणस्वरूपमुपास्यं तदुपयुक्तागुणाश्चोक्ताः । अथदिव्यमङ्गलविग्रहयोगमाह—शङ्खचक्रगदाधरइति । अनेनोपास्यत्वानुगुणशरणागतविरोधिनिरसनजागरूकत्वमुक्तं । श्रीवत्सवक्षाः श्रीवत्सकौस्तुभादीनांनित्यत्वाद्रुद्रादिवैलक्षण्यमुक्तं । नित्यश्रीरिति । नित्या अनपायिनीश्रीर्यस्यसः । अत्रविग्रहनित्यत्वमेवोक्तं स्वरूपनित्यत्वस्यसाधारणप्राप्तत्वात् । नित्यैवैषाजगन्मातेतियावत् । श्रीसंबन्धादुत्तेजितपराभिभवनसामर्थ्यमाह—अजेयइति । "अप्रमेयंहितत्तेजोयस्यसाजनकात्मजा" इतिह्युक्तं । अजेयः उपायव्यतिरिक्तैर्जेतुमशक्यः । ' अप्रधृष्यश्चसंग्रामेसेन्द्रैरपिसुरासुरैः ' इत्याद्युक्तरीत्याजेतुमशक्यः । शाश्वतः त्रिविधपरिच्छेदरहितः विकारशून्यश्च । ध्रुवः अप्रकंप्यः । अत्रधातेतिरूढ्याविशेषणनिर्देशः । " अनादिनिधनोधाता " इतिसहस्रनामपाठात् । नित्यश्रीरितिच ॥ **ती०** महायोगी स्वाभाविकज्ञानशक्तियुक्तः " परास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाच " इतिश्रुतेः । **शि०** सनातनः सनंब्रह्माणमातनोतीतिसनातनः । सत्यपरानाक्रमते अतिसत्यवक्तेत्यर्थः ॥ **स०** सनादनः दस्तकारस्यनिर्वचनत्वात् । नादेन वेदवादादिनासहितःसनादः । सएवसनादनः । सएवसनातनः । यथोक्तंगीतातात्पर्येना-

[पा०] १ अयंश्लोकः झ. पाठेनदृश्यते. २ इदमर्धं क. ग. घ. ज. झ. पाठेषुदृश्यते.

तमसः परमो धाता शङ्खचक्रगदाधरः ॥ श्रीवत्सवक्षा नित्यश्रीरजय्यः शाश्वतो ध्रुवः ॥ १५ ॥
मानुषं वपुरास्थाय विष्णुः सत्यपराक्रमः ॥ सर्वैः परिवृतो देवैर्वानरत्वमुपागतैः ॥ १६ ॥
सर्वलोकेश्वरः साक्षाल्लोकानां हितकाम्यया ॥ सराक्षसपरीवारं हतवांस्त्वां महाद्युतिः ॥ १७ ॥
इन्द्रियाणि पुरा जित्वा जितं त्रिभुवनं त्वया ॥ स्मरद्भिरिव तद्वैरमिन्द्रियैरेव निर्जितः ॥ १८ ॥
क्रियतामविरोधश्च राघवेणेति यन्मया ॥ उच्यमानो न गृह्णासि तस्येयं व्युष्टिरागता ॥ १९ ॥
अकस्माच्चाभिकामोसि सीतां राक्षसपुङ्गव ॥ ऐश्वर्यस्य विनाशाय देहस्य स्वजनस्य च ॥ २० ॥
अरुन्धत्या विशिष्टां तां रोहिण्याश्चापि दुर्मते ॥ सीतां धर्षयता मान्यां त्वया ह्यसदृशं कृतम् ॥२१॥
वसुधायाश्च वसुधां श्रियः श्रीं भर्तृवत्सलाम् ॥ सीतां सर्वानवद्याङ्गीमरण्ये विजने शुभाम् ॥ २२ ॥
आनयित्वा तु तां दीनां छद्मनाऽऽत्मस्वदूषण ॥ अप्राप्य चैव तं कामं मैथिलीसंगमे कृतम् ॥
पतिव्रतायास्तपसा नूनं दग्धोसि मे प्रभो ॥ २३ ॥
तदैव यन्न दग्धस्त्वं धर्षयंस्तनुमध्यमाम् ॥ देवा बिभ्यति ते सर्वे सेन्द्राः साग्निपुरोगमाः ॥ २४ ॥

ति । धाता पोषकः । " डुधाञ् धारणपोषणयोः " इत्यस्मात्तृच् । सर्वदा रक्षणार्थमायुधधारणमित्यर्थः । तथोक्तमियुक्तैः—" पातु प्रणतरक्षायां विलम्बमसहन्निव । सदा पञ्चायुधीं बिभ्रत्स नः श्रीरङ्गनायकः " इति ॥ तस्य सर्वेश्वरत्वद्योतकं लक्षणमाह—श्रीवत्सवक्षा इति । श्रीकरो वत्सः श्रीवत्सः स च रक्तवर्णो मत्स्यविशेषः सः वक्षसि दक्षिणे यस्य स श्रीवत्सवक्षाः । जगद्रक्षणोपयोगिपुरुषकारसंबन्धमाह—नित्यश्रीरिति । नित्या अनपायिनी श्रीर्यस्यासौ नित्यश्रीः । " विष्णोः श्रीरनपायिनी " इत्यन्यत्रोक्तेः । अत एवाजय्यः जेतुमशक्यः । " क्षय्यजय्यौ शक्यार्थे " इति निपातनात् । एष रामः एवंभूतः परमात्मा व्यक्तं निश्चितमिति संबन्धः ॥१४—१५॥ एवंभूतस्य परमात्मनः किमर्थमेवं व्यापार इत्यत्राह द्वाभ्यां—मानुषमित्यादि ॥ सर्वलोकेश्वरः सर्वलोकानां नियन्ता अनिष्टनिवृत्तीष्टप्रापणयोः कर्ता । विष्णुः विष्णुसकाशादविनाशित्ववरं परिहर्तुं मानुषं वपुः आस्थाय परिगृह्य साक्षात् अव्यवधानेन लोकानां हितकाम्यया लोकहितेच्छया सर्वलोकविरोधिनं त्वां हतवान् । व्यक्तमित्यत्रानुषज्यते ॥ १६—१७ ॥ त्वद्दोषकृत एवायं वध इत्याह—इन्द्रियाणीति ॥१८॥ एवं सर्वज्ञा त्वं पूर्वं किमिति नोक्तवतीत्यत्राह—क्रियतामिति ॥ न गृह्णासि नागृह्णाः । व्युष्टिः फलं । " व्युष्टिः फले समृद्धौ च " इत्यमरः ॥ १९ ॥ अकस्मान्निर्हेतुकं सीतामुद्दिश्य अभिकामोसि अभिलाष्यसि तां प्रति त्वदभिलाषोऽयुक्त इत्यर्थः ॥२०॥ अयुक्ततामेवाह—अरुन्धत्या इति ॥ विशिष्टां उत्कृष्टां । मान्यामित्यनेन न केवलमरुन्धत्यादिवत्पातिव्रत्यमात्रं किंतु मातृत्वं चेत्युच्यते । असदृशं अनुचितं ॥ २१ ॥ सा पतिव्रता चेत् किमर्थं न दग्धवतीत्यत्राह—वसुधाया इत्यादिसार्धश्लोकद्वयेन ॥ वसुधायाश्च वसुधां अत्यन्तक्षमावतीमित्यर्थः । श्रीमित्यत्र इयङभाव आर्षः । सर्वसंपदधिष्ठात्रीमित्यर्थः । भर्तृवत्सलां पतिव्रतां । सर्वानवद्याङ्गीं अनवद्यसर्वाङ्गीं । अरण्ये विजने स्थितामिति शेषः । दीनां त्वदनमिलाषिणीमित्यर्थः । छद्मना मारीचमुखेन आनयित्वा । तं पूर्वमुक्तं । पतिव्रतायास्तस्यास्तपसा दग्धोसि । मे प्रभो इत्यनेन अस्य सर्वस्य मद्दौर्भाग्यमेव निमित्तमिति द्योत्यते । आत्मस्वदूषणेत्यनेन निजस्वभूताया मम त्यागे त्वद्दूषणमेवहेतुः न त्वस्मत्सौन्दर्यहानिरित्युच्यते ॥ २२—२३ ॥ तनुमध्यमां धर्षयन्सन् त्वं तदैव न दग्ध इति यत् तेन माहात्म्येन त्वत्तो देवा बिभ्यती-

देनसहवर्ततइतिसनादनः । सएवसनातनः । ' निषेधविधिपात्रत्वात्सनातनइतिस्मृतः ' इति ॥ १४—१५ ॥ ति० सराक्षसपरीवारं राक्षसरूपपरीवारसहितं । हतवानितिशेषः ॥ १७ ॥ ती० श्लोकान्तर्भूतस्यरावणस्यहननेसर्वलोकेश्वरस्यरामस्यवैषम्यनैर्घृण्येनस्तइत्याशयेनाह—इन्द्रियाणीति ॥ ति० देवशत्रुंभयावहमित्यनेनभगवतोवैषम्यनैर्घृण्येपरिहृते । अवतारप्रयोजनंरावणवधप्रयोजनंचदेवभयनिवृत्तिरूपंदर्शितं । पुरा भगवदुद्देशेनतपोनुष्ठानकाले ॥ १८ ॥ ति० मान्यां उपास्यदेवतां ॥ २१ ॥ शि० विजने

[पा०] १ क. ख. ङ. च. छ. झ. ञ. ट. रूपमास्थाय. २ ङ.—ट. श्रीमाँल्लोकानां. ३ झ. परीवारंदेवशत्रुंभयावहं.

अवश्यमेव लभते फलं पापस्य कर्मणः ॥ घोरं पर्यागते काले कर्ता नास्त्यत्र संशयः ॥ २५ ॥
शुभकृच्छुभमाप्नोति पापकृत्पापमश्नुते ॥ विभीषणः सुखं प्राप्तस्त्वं प्राप्तः पापमीदृशम् ॥ २६ ॥
सन्त्यन्याः प्रमदास्तुभ्यं रूपेणाभ्यधिकास्ततः ॥ अनङ्गवशमापन्नस्त्वं तु मोहान्न बुध्यसे ॥ २७ ॥
न कुलेन न रूपेण न दाक्षिण्येन मैथिली ॥ मयाऽधिका वा तुल्या वा त्वं तु मोहान्न बुध्यसे ॥२८॥
सर्वथा सर्वभूतानां नास्ति मृत्युरलक्षणः ॥ तव तावदयं मृत्युर्मैथिलीकृतलक्षणः ॥ २९ ॥
सीतानिमित्तजो मृत्युस्त्वया दूरादुपाहृतः ॥ ३० ॥
मैथिली सह रामेण विशोका विहरिष्यति ॥ अल्पपुण्या त्वहं घोरे पतिता शोकसागरे ॥ ३१ ॥
कैलासे मन्दरे मेरौ तथा चैत्ररथे वने ॥ देवोद्यानेषु सर्वेषु विहृत्य सहिता त्वया ॥ ३२ ॥
विमानेनानुरूपेण यायाम्यतुलया श्रिया ॥ पश्यन्ती विविधान्देशांस्तांस्तांश्चित्रस्रगम्बरा ॥
भ्रंशिता कामभोगेभ्यः साऽस्मि वीर वधात्तव ॥ ३३ ॥
सैवान्येवास्मि संवृत्ता धिग्राज्ञां चञ्चलाः श्रियः ॥ ३४ ॥
हा राजन्सुकुमारं ते सुभ्रु सुत्वक्समुन्नसम् ॥ कान्तिश्रीद्युतिभिस्तुल्यमिन्दुपद्मदिवाकरैः ॥ ३५ ॥
किरीटकूटोज्ज्वलितं ताम्रास्यं दीप्तकुण्डलम् ॥ मदव्याकुललोलाक्षं भूत्वा यत्पानभूमिषु ॥ ३६ ॥
विविधस्रग्धरं चारु वल्गुस्मितकथं शुभम् ॥ तदेवाद्य तवेदं हि वक्त्रं न भ्राजते प्रभो ॥ ३७ ॥
रामसायकनिर्भिन्नं सिक्तं रुधिरविस्रवैः ॥ विशीर्णमेदोमस्तिष्कं रूक्षं स्यन्दनरेणुभिः ॥ ३८ ॥

ति संबन्धः । भीता देवाः कथं ते धर्षणफलं दाहं दद्युरिति भावः ॥ २४ ॥ कर्ता घोरं पापस्य फलं काले पर्यागते प्राप्ते अवश्यं लभते नात्र संशयः ॥ २५ ॥ पापं दुःखं ॥ २६ ॥ तुभ्यं तव । ततः तस्याः सीतायाः । न बुध्यसे । अभ्यधिकत्वमिति शेषः ॥ २७ ॥ मैथिली मया कुलेन तुल्या अधिका वा न इत्येवं योज्यं । दाक्षिण्येन विद्यासामर्थ्येन ॥ २८ ॥ अलक्षणः निर्निमित्तः । मैथिल्याः कृतं मैथिलीकृतं मैथिल्यानयनमित्यर्थः । तदेव लक्षणं निमित्तं यस्य स तथा ॥२९—३१॥ कैलास इत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ याहं कैलासादिषु विहृत्य विमानेन विविधान्देशान्पश्यन्ती यामि अथ सा भ्रंशिताऽस्मीत्येवं संबन्धः ॥ ३२—३३ ॥ सैवेत्यर्धं ॥ सैव एवमुक्तभोगैव । अन्येव अस्पृष्टभोगेव ॥ ३४ ॥ एवं रावणस्य मतिं राज्यश्रियं च निन्दित्वा भर्तृसौन्दर्यवैपरीत्यं शोचति—हा राजन्नित्यादिश्लोकचतुष्टयमेकान्वयं ॥ सुत्वक् स्निग्धत्वक् । समुन्नसं समुन्नतनासिकं । कान्तिः प्रभा । श्रीः सौन्दर्यं । द्युतिः तेजः । किरीटकूटोज्ज्वलितं शिखरतुल्यकिरीटविराजितं । ताम्रास्यं रक्ताधरमित्यर्थः । चारु सुन्दरं तव यद्वक्त्रं मदव्याकुललोलाक्षं भूत्वा अभ्राजत तदेवेदं वक्त्रमद्य न भ्राजते । अप्रकाशनिमित्तमाह—रामेति ॥ विस्रवैः प्रवाहैः । मेदः वसा । मस्तिष्कं मांस-

विरुद्धजनसहिते ॥ २२ ॥ शि० मैथिली कुलादिनामयालक्ष्म्या अधिकैव नतुतुल्या । तदितिमोहात् मोहंप्राप्यविद्यमानोपित्वं नबुध्यसे काक्षाबुध्यसएवेत्यर्थः । एतेन पूजाबुद्ध्यैवतस्याःस्वीकारस्त्वयाकृतइतिसूचितं ॥ २८ ॥ ति० सैवाहंसौभाग्यलक्षणवत्येव तववधादन्येव विधवेवसंवृत्तेत्यर्थः । अत्रान्येवेतीवकारेणदेवस्थित्या । वस्तुतोऽवैधव्यंसूचितं ॥ ३४ ॥ ति० कान्तिराह्लादकारीप्रभा । तयाचन्द्रतुल्यं । श्रीरुज्ज्वलता । तयापद्मवत् । द्युतिः पराभिभवसामर्थ्यंतेजः । तेनरवितुल्यं ॥ ३५ ॥ स० ननुश्रीमन्महाभारतेवनपर्वणि ' शरीरधातवोह्यस्यमांसंरुधिरमेवच । नेशुर्ब्रह्मास्त्रनिर्दग्धंनचभस्माप्यदृश्यत ' इतिरावणशरीरभस्मनोप्यदर्शनोक्तेःकथमेवंतच्छिरोवर्णनमितिचेन्न । ब्रह्मास्त्रनिर्दग्धंमांसंरुधिरंचेत्येतेअस्यशरीरधातवोनेशुः अदर्शनंगताः । ब्रह्मास्त्रदाहेदेहस्यभस्मदृश्येत कथंशरीरस्यदर्शनमित्यतआह—नचेति । भस्मापि भस्मतु नदृश्यते विचित्रोऽयंदाहइतिभारतस्यैतदर्थकताङ्गीकारेणाविरोधोपपत्तेः । तथाचोक्तमाचार्यैः "बाणेनवज्रसदृशेनसभिन्नहृत्कोरक्तंवमन्यपतदाशुमहाविमानात्" इति । तथैवचपाद्मोत्त-

[पा०] १ ङ. भर्तःपर्यागते. क. घ. नूनंपर्यागते. २ ज. पापःपापं. ३ क. रूपेणाप्रतिमाभुवि. ४ च. छ. कीर्तिश्री.

हा पश्चिमा मे संप्राप्ता दशा वैधव्यकारिणी ॥ या मयाऽऽसीन्न संबुद्धा कदाचिदपि मन्दया॥३९॥
पिता दानवराजो मे भर्ता मे राक्षसेश्वरः ॥ पुत्रो मे शक्रनिर्जेता इत्येवं गर्विता भृशम् ॥ ४० ॥
दृप्तारिमर्दनाः शूराः प्रख्यातबलपौरुषाः ॥ अकुतश्चिद्भया नाथा ममेत्यासीन्मतिर्दृढा ॥ ४१ ॥
तेषामेवंप्रभावानां युष्माकं राक्षसर्षभ ॥ कथं भयमसंबुद्धं मानुषादिदमागतम् ॥ ४२ ॥
स्निग्धेन्द्रनीलनीलं तु प्रांशुशैलोपमं महत् ॥ केयूराङ्गदवैडूर्यमुक्तादामसगुज्ज्वलम् ॥ ४३ ॥
कान्तं विहारेष्वधिकं दीप्तं संग्रामभूमिषु ॥ [विनीतं गुरुपूजासु शान्तं शङ्करपूजने ॥]
भात्याभरणभाभिर्यद्विद्युद्भिरिव तोयदः ॥ ४४ ॥
तदेवाद्य शरीरं ते तीक्ष्णैर्नैकैः शरैश्चितम् ॥ पुनर्दुर्लभसंस्पर्शं परिष्वक्तुं न शक्यते ॥ ४५ ॥
श्वाविधः शल्लकैर्यद्वद्बाणैर्लग्नैर्निरन्तरम् ॥ स्वर्पितैर्मर्मसु भृशं संछिन्नस्नायुबन्धनम् ॥
क्षितौ निपतितं राजञ्श्यावं रुधिरसच्छवि ॥ ४६ ॥
वज्रप्रहाराभिहतो विकीर्ण इव पर्वतः ॥ ४७ ॥
हा स्वप्नः सत्यमेवेदं त्वं रामेण कथं हतः ॥ त्वं मृत्योरपि मृत्युः स्याः कथं मृत्युवशं गतः ॥४८॥
त्रैलोक्यवसुभोक्तारं त्रैलोक्योद्वेगदं महत् ॥ जेतारं लोकपालानां क्षेप्तारं शंकरस्य च ॥ ४९ ॥
दृप्तानां निगृहीतारमाविष्कृतपराक्रमम् ॥ लोकक्षोभयितारं च नादैर्भूतविराविणम् ॥ ५० ॥

विशेषः ॥ ३५—३८ ॥ मे वैधव्यकारिणी ते पश्चिमावस्था मृतिः संप्राप्ता ॥ ३९ ॥ अस्थिरस्य देहस्य विनाशः कुतो न संबुद्ध इत्यत्राह—पितेति ॥ दानवराजः मयः ॥ ४०—४१ ॥ तेषामिति ॥ तेषु युष्मास्वेवंप्रभावेष्वित्यर्थः । मयस्य मरणाभावेपि इदानीमकार्यकरत्वादेवमुक्तं । असंबुद्धं पूर्वमचिन्तितं ॥ ४२ ॥ स्निग्धेत्यादि सार्धश्लोकचतुष्टयमेकान्वयं ॥ प्रांशुशैलः उन्नतशैलः । अङ्गदवैडूर्यं वैडूर्यमयाङ्गदमिति केयूराद्भेदः । यच्छरीरं भाति आलिङ्गनयोग्यमभूत् । तदेव शरीरं दुर्लभसंस्पर्शं सत् पुनः परिष्वक्तुं न शक्यते । दुर्लभसंस्पर्शत्वमुपपादयति—श्वाविधः इत्यादिना ॥ श्वाविधं शल्यमृगस्य शललैः तल्लोमभिः यद्वत् यथा । कण्टकाकारश्वाविल्लोमतुल्यैरिति शरविशेषणं । मर्मसु स्वर्पितैः क्षिप्तैः । तत्रैव मर्मसु निरन्तरं लग्नैरिति योजना । श्यावं कपिशवर्णं । " श्वावित्तु शल्यस्तल्लोम्नि शलली शललं शलम्। 'श्याव: स्यात्कपिशः " इत्युभयत्राप्यमरः । स्नायवः धमन्यः । रुधिरसच्छवि रुधिरतुल्यकान्ति । स्वकान्तिं विहाय रुधिरकृतकान्त्यन्तरमित्यर्थः ॥४३-४६॥ वज्रेत्यर्धं ॥ असीति शेषः ॥ ४७ ॥ इदं ते मरणं स्वप्नः स्वप्नानुभवविषयः । सत्यमेव नात्र संशयः । तत्र हेतुमाह—त्वमिति । तत्रापि हेतुमाह—त्वं मृत्योरिति ॥ ४८ ॥ त्रैलोक्येत्यादि हतप्रियेत्यन्तं श्लोकाष्टकमेकं वाक्यं ॥ एवंभूतं भर्तारं दृष्ट्वा या इमं देहं धारयामि साहं स्थिरास्मि वज्रसारमय्यस्मि । कथमन्यथा न शीर्येदिति भावः । महदिति त्रैलोक्यवसुविशेषणं । यद्वा त्रैलोक्योद्वेगदं महद्वसु महत् यथा भवति तथा त्रैलोक्योद्वेगदमिति वा । उद्वेगो भयसंभ्रमः । शंकरस्य क्षेप्तारं कैलासचलनद्वारा । स्वयूथाः स्वबन्धवः निवातकवचा नाम केचनासुराः । तेषां संग्रहीतारं तैः सख्यकृतमित्यर्थः । स्वजनस्य स्वाश्रितजनस्य धर्मव्यवस्था आचारव्यवस्था । यज्ञकर्मभेक्तृत्वकथनेनातीव स्वतन्त्रत्वमुक्तं । कन्यानामिति । स्त्रीमात्रमुच्यते । स्वजनस्य नेतारमिति । पूर्वत्रानिष्टनिवर्तकत्वमुक्तं । अत्रेष्टप्रापकत्वं । भीमकर्मणां

रखण्डे " सगतासुर्महादैत्यःपपातचममारच " इत्यादि ॥ ३८ ॥ स० मुक्ताहारस्नगुज्ज्वलं मुक्तानांहाराः । स्रजः इतरामणिमय्यः । ताभिरुज्ज्वलं । यद्वा मुक्तानांहारः परस्परंसंघर्षजंयुद्धमिव । स यासांताःस्रजोमुक्तामालाः । तदुज्ज्वलं । 'हारोमुक्ताव-

[पा०] १ ङ. च. छ. झ. ञ. वैधव्यदायिनी. २ क.—ट. इत्यहं. ३ ख. च. छ. ज. नीलसदृशं. ज. ट. नीलसंकाशं. ४ इदमर्धं क. ख. च. छ. ज. पाठेषुदृश्यते. ५ ङ. च. छ. झ. ञ. शललैर्युक्तंलमैर्बाणैः. ६ ख. श्यामंशरीरंरुधिरच्छवि. ७ ङ. झ. साभ्रभूतविदारणं.

ओजसा दृप्तवाक्यानां वक्तारं रिपुसन्निधौ ॥ स्वयूथभृत्यवर्गाणां गोप्तारं भीमकर्मणाम् ॥ ५१ ॥
हन्तारं दानवेन्द्राणां यक्षाणां च सहस्रशः ॥ निवातकवचानां च संग्रहीतारमीश्वरम् ॥ ५२ ॥
नैकयज्ञविलोप्तारं त्रातारं स्वजनस्य च ॥ धर्मव्यवस्थाभेत्तारं मायास्रष्टारमाहवे ॥ ५३ ॥
देवासुरनृकन्यानामाहर्तारं ततस्ततः ॥ शत्रुस्त्रीशोकदातारं नेतारं स्वजनस्य च ॥ ५४ ॥
लङ्काद्वीपस्य गोप्तारं कर्तारं भीमकर्मणाम् ॥ अस्माकं कामभोगानां दातारं रथिनांवरम् ॥ ५५ ॥
एवंप्रभावं भर्तारं दृष्ट्वा रामेण पातितम् ॥ स्थिराऽस्मि या देहमिमं धारयामि हतप्रिया ॥ ५६ ॥
शयनेषु महार्हेषु शयित्वा राक्षसेश्वर ॥ इह कस्मात्प्रसुप्तोसि धरण्यां रेणुपाटलः ॥ ५७ ॥
यदा मे तनयः शस्तो लक्ष्मणेनेन्द्रजिद्युधि ॥ तदास्म्यभिहता तीव्रमद्य त्वय्यिनिपातिता ॥ ५८ ॥
नाहं बन्धुजनैर्हीना हीना नाथेन तु त्वया ॥ विहीना कामभोगैश्च शोचिष्ये शाश्वतीः समाः ॥५९॥
प्रपन्नो दीर्घमध्वानं राजन्नद्यासि दुर्गमम् ॥ नय मामपि दुःखार्तां नं जीविष्ये त्वया विना ॥६०॥
कस्मात्त्वं मां विहायेह कृपणां गन्तुमिच्छसि ॥ दीनां विलपितैर्मन्दां किंवा मां नाभिभाषसे ॥६१॥
दृष्ट्वा न खल्वसि क्रुद्धो मामिहानवकुण्ठिताम् ॥ निर्गतां नगरद्वारात्पद्भ्यामेवागतां प्रभो ॥ ६२ ॥
पश्येष्टदार दारांस्ते भ्रष्टलज्जावकुण्ठितान् ॥ बहिर्निष्पतितान्सर्वान्कथं दृष्ट्वा न कुप्यसि ॥ ६३ ॥
अयं क्रीडासहायस्तेऽनाथो लालप्यते जनः ॥ न चैनमाश्वासयसे किं वा न बहुमन्यसे ॥ ६४ ॥
यास्त्वया विधवा राजन्कृता नैकाः कुलस्त्रियः ॥ पतिव्रता धर्मपरा गुरुशुश्रूषणे रताः ॥
ताभिः शोकाभितप्ताभिः शप्तः परवशं गतः ॥ ६५ ॥
त्वया विप्रकृताभिर्यत्तदा शप्तं तदागतम् ॥ ६६ ॥
प्रवादः सत्य एवायं त्वां प्रति प्रायशो नृप ॥ पतिव्रतानां नाकस्मात्पतन्त्यश्रूणि भूतले ॥ ६७ ॥
कथं च नाम ते राजँल्लोकानाक्रम्य तेजसा ॥ नारीचौर्यमिदं क्षुद्रं कृतं शौण्डीर्यमानिना ॥ ६८ ॥

स्वशिरोहवनादीनां ॥ ४९—५७ ॥ शस्तः हतः । तदा अभिहता प्रहृता । अद्य अस्मिन् त्वद्धनने सति तीव्रं निपातिता । मारितेत्यर्थः ॥ ५८ ॥ बन्धुजनैः हीनाहं न शोचिष्ये यदि त्वं स्थितः स्याः । किंतु त्वया हीना अत एव कामभोगैर्हीना शोचिष्य इति योजना ॥ ५९ ॥ दीर्घमध्वानं वीरस्वर्गं ॥ ६० ॥ विलपितैः प्रलापैः । दीनां मन्दां अभाग्यां ॥६१॥ अनवकुण्ठितां अनावरणां । इहागतामित्यन्वयः ॥ ६२ ॥ इष्टदारेति संबुद्धिः । भ्रष्टलज्जावकुण्ठितान् हीनलज्जावकुण्ठितान् ॥६३॥ नाथो लालप्यत इति पाठे अनाथ इति छेदः ॥६४॥ यास्त्वयेत्यादिसार्धश्लोक एकान्वयः॥ परवश परवशत्वं । शत्रुवशत्वमिति यावत् ॥ ६५ ॥ त्वयेत्यर्धं ॥ त्वया विप्रकृताभिः परिभूताभिः । तदा भर्तृवधकाले यच्छप्तं तत् आगतं फलदमासीदित्यर्थः ॥ ६६ ॥ पतिव्रतानामश्रूणि अकस्मान्निर्हेतुकतया भूतले न पतन्ति । पतन्ति चेत् किंचित्कुर्वन्त्येव । इत्येवं प्रायशः प्रवादः जनवार्ता । त्वां प्रत्येव सत्यः यथार्थो जातः । पतिव्रतानामास्रपातकरणमनर्थावहमित्येवं जनवादः तथा कुर्वति त्वयि दृष्टफल आसीदित्यर्थः ॥ ६७ ॥ शौण्डीर्यमानिना

लौयुद्धे ' इतिविश्वः ॥ ४३ ॥ स० शस्तः विशस्तः । अभिहता अभिघातमात्रंप्राप्ता । अद्यतु निपातितास्मि । सतित्वयिमयि जायेततनयइत्याशासंभवादभिहतमात्रता मारणेइन्द्रजितः । इदानींतवनाशान्नाऽऽशाऽवकाशमासादयतीतिनिपातितेतिसंभवतीतिभावः ॥ ५८ ॥ स० शाश्वतीःसमाः यावदायुः ॥ ५९ ॥ स० नयमां नवियतेयमोयस्याःसा तामपिमां । नय त्वयासहेतिशेषः । इतित्रिकोर्थः ॥ ६० ॥

[पा०] १ घ. शक्रस्यशोक. २ ख. च. छ. नेतारंनिजसैनिकान्. ३ च. छ. हर्तारंबद्धवैरिणां. ४ ख. च. छ. ञ. स्थितास्म्यहंदेहं. ५ ङ. ञ. ञ. रेणुगुण्ठितः. ६ क.—ट. साहं. ७ ख. घ.—ञ. नवर्तिष्ये. ८ ङ. ञ. खल्वभिकुद्धो. ९ ङ. ञ. गुण्ठनान्.

अपनीयाश्रमाद्रामं यन्मृगच्छद्मना त्वया ॥ आनीता रामपत्नी सा तत्ते कातर्यलक्षणम् ॥ ६९ ॥
कातर्यं च न ते युद्धे कदाचित्संस्मराम्यहम् ॥ तत्तु भाग्यविपर्यासान्नूनं ते पक्वलक्षणम् ॥ ७० ॥
अतीतानागतार्थज्ञो वर्तमानविचक्षणः ॥ मैथिलीमाहृतां दृष्ट्वा ध्यात्वा निश्वस्य चायतम् ॥ ७१ ॥
सत्यवाक्स महाभागो देवरो मे यदब्रवीत् ॥ सोयं राक्षसमुख्यानां विनाशः पर्युपस्थितः ॥
कामक्रोधसमुत्थेन व्यसनेन प्रसङ्गिना ॥ ७२ ॥
निर्वृत्तस्त्वत्कृतेऽनर्थः सोयं मूलहरो महान् ॥ त्वया कृतमिदं सर्वमनार्यं राक्षसां कुलम् ॥ ७३ ॥
न हि त्वं शोचितव्यो मे प्रख्यातबलपौरुषः ॥ स्त्रीस्वभावात्तु मे बुद्धिः कारुण्ये परिवर्तते ॥ ७४ ॥
सुकृतं दुष्कृतं च त्वं गृहीत्वा स्वां गतिं गतः ॥ आत्मानमनुशोचामि त्वद्वियोगेन दुःखिता ॥७५॥
सुहृदां हितकामानां न श्रुतं वचनं त्वया ॥ भ्रातॄणां चापि कात्स्न्र्येन हितमुक्तं त्वयाऽनघ ॥७६॥
हेत्वर्थयुक्तं विधिवच्छ्रेयस्करमदारुणम् ॥ विभीषणेनाभिहितं न कृतं हेतुमत्त्वया ॥ ७७ ॥
मारीचकुम्भकर्णाभ्यां वाक्यं मम पितुस्तदा ॥ नँ श्रुतं वीर्यमत्तेन तस्येदं फलमीदृशम् ॥ ७८ ॥
नीलजीमूतसंकाश पीताम्बर शुभाङ्गद ॥ स्वगात्राणि विनिक्षिप्य किं शेषे रुधिराप्लुतः ॥
प्रसुप्त इव शोकार्तो किं मां न प्रतिभाषसे ॥ ७९ ॥
महावीर्यस्य दक्षस्य संयुगेष्वपलायिनः ॥ यातुधानस्य दौहित्र किं च मां नाभ्युदीक्षसे ॥ ८० ॥
उत्तिष्ठोत्तिष्ठ किं शेषे प्राप्ते परिभवे नवे ॥ अद्य वै निर्भया लङ्कां प्रविष्टाः सूर्यरश्मयः ॥ ८१ ॥
येन सूदयसे शत्रून्समरे सूर्यवर्चसा ॥ वज्रो वज्रधरस्येव सोयं ते सततार्चितः ॥ ८२ ॥
रणे शत्रुप्रहरणो हेमजालपरिष्कृतः ॥ परिघो व्यवकीर्णस्ते बाणैश्छिन्नः सहस्रधा ॥ ८३ ॥
प्रियामिवोपगुह्य त्वं शेषे समरमेदिनीम् ॥ अप्रियामिव कस्माच्च मां नेच्छस्यभिभाषितुम् ॥ ८४ ॥
धिगस्तु हृदयं यस्या ममेदं न सहस्रधा ॥ त्वयि पञ्चत्वमापन्ने फलते शोकपीडितम् ॥ ८५ ॥

शूरमानिना ॥ ६८ ॥ त्वया कर्त्रा मृगच्छद्मना मृगरूपकपटोपायेन । कातर्यलक्षणं कातर्यसूचनं ॥६९॥ ते युद्धे कातर्यं कदाचिदपि न स्मरामि न जानामीत्यर्थः । एवमकातरप्रकृतेस्तव भाग्यविपर्यासात् यत्कातर्यं चौर्यरूपमस्ति तत् पक्वलक्षणं पक्वलक्षणं विनाशज्ञापकमिति यावत् । महतो हीनकृत्यं हानिकरमिति लोकप्रवादादिति भावः ॥ ७० ॥ अतीतेत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ देवरो यदब्रवीत् अयं तद्वाक्यार्थभूतो विनाशः प्रसङ्गिना प्रसक्तेन व्यसनेन हेतुना पर्युपस्थितः ॥ ७१—७२ ॥ त्वत्कृते त्वन्निमित्तं । निर्वृत्तः प्रवृत्तः ॥ ७३ ॥ कारुण्ये दैन्ये ॥ ७४—७५ ॥ कात्स्न्र्येनोक्तं हितं त्वया न श्रुतमित्यनुषज्यते ॥ ७६ ॥ हेत्वर्थयुक्तं युक्तिप्रयोजनाभ्यां युक्तं । विधिवत् शास्त्रोक्तप्रकारवत् । श्रेयस्करं हितभूतं । अदारुणं सान्त्वपूर्वकं । विभीषणेनाभिहितं वचनं त्वया हेतुमद्युक्तिमद्यथा भवति तथा न गृहीतं । ज्ञातित्वेन मद्व्यसनं काङ्क्षसे इत्यादिना हेतूपपादनपूर्वकं न गृहीतमित्यर्थः ॥ ७७ ॥ मारीचकुम्भकर्णाभ्यां सह मम पितुर्मयस्य वाक्यं न श्रुतं । तस्य अश्रवणस्य ईदृशं फलं । आगतमिति शेषः । अत्रानुवादान्मयोप्यस्तीत्यवगन्तव्यं ॥ ७८ ॥ नीलेत्यादि सार्धश्लोक एकान्वयः ॥ विनिक्षिप्य भूमौ प्रसार्य प्रसुप्त इव शेषे, शोकार्तो मां च किमिति न प्रतिभाषस इत्यन्वयः ॥ ७९ ॥ यातुधानस्य माल्यवतः । सुमालिनो वा । तत्संबन्धकीर्तनमप्रतिहतकुलप्रभावप्रकटनार्थं ॥ ८०—८१ ॥ येनेत्यादिश्लोकद्वयमेकान्वयं ॥ ते त्वया । सततार्चितः बाणैः रामबाणैश्छिन्नः वज्रधरस्य वज्र इव स्थितः ते परिघः अद्य विशीर्णः ॥ ८२—८४ ॥ यस्या मम हृदयं न फलते न स्फुटति । तादृशीं मां धिगित्यन्वयः

[पा०] १ ङ. ञ. साऽपनीयचलक्ष्मणं. २ ट. महाबाहुर्देवरो. ३ क.—ट. अयं. ४ ङ. ञ. राक्षसंकुलं. ५ ङ. च. छ. ञ ञ. ट. लङ्घिनाशेन. ६ ख. ङ. ञ. ञ. ट. मुक्तंदशानन. ७ ङ. च. छ. ञ. ञ. नकृतं. ८ ङ. ञ. ञ. किंमांनप्रतिभाषसे.

इत्येवं विलपन्त्येव बाष्पव्याकुललोचना ॥ स्नेहावस्कन्नहृदया देवी मोहमुपागमत् ॥ ८६ ॥
कश्मलाभिहता सन्ना बभौ सा रावणोरसि ॥ संध्यानुरक्ते जलदे दीप्ता विद्युदिवासिते ॥ ८७ ॥
तथागतां समुत्पत्य सपत्न्यस्ता भृशातुराः ॥ पर्यवस्थापयामासू रुदन्त्यो रुदतीं भृशम् ॥ ८८ ॥
न ते सुविदिता देवि लोकानां स्थितिरध्रुवा ॥ दशाविभागपर्याये राज्ञां चञ्चलया श्रिया ॥ ८९ ॥
इत्येवमुच्यमाना सा सशब्दं प्ररुरोद ह ॥ स्रोपयन्ती त्वभिमुखौ स्तनावस्राम्बुविस्रवैः ॥ ९० ॥
एतस्मिन्नन्तरे रामो विभीषणमुवाच ह ॥ संस्कारः क्रियतां भ्रातुः स्त्रियश्चैता निवर्तय ॥ ९१ ॥
तं प्रश्रितस्ततो रामं श्रुतवाक्यो विभीषणः ॥ विमृश्य बुद्ध्या धर्मज्ञो धर्मार्थसहितं वचः ॥
रामस्यैवानुवृत्त्यर्थमुत्तरं प्रत्यभाषत ॥ ९२ ॥
त्यक्तधर्मव्रतं क्रूरं नृशंसमनृतं तथा ॥ नाहमर्होस्मि संस्कर्तुं परदाराभिमर्शिनम् ॥ ९३ ॥
भ्रातृरूपो हि मे शत्रुरेष सर्वाहिते रतः ॥ रावणो नार्हते पूजां पूज्योपि गुरुगौरवात् ॥ ९४ ॥
नृशंस इति मां कामं वक्ष्यन्ति मनुजा भुवि ॥ श्रुत्वा तस्यागुणान्सर्वे वक्ष्यन्ति सुकृतं पुनः ॥९५॥
तच्छ्रुत्वा परमप्रीतो रामो धर्मभृतां वरः ॥ विभीषणमुवाचेदं वाक्यज्ञो वाक्यकोविदम् ॥ ९६ ॥
तवापि मे प्रियं कार्यं त्वत्प्रभावाच्च मे जितम् ॥ अवश्यं तु क्षमं वाच्यो मया त्वं राक्षसेश्वरः ॥९७॥
अधर्मानृतसंयुक्तः कामं त्वेष निशाचरः ॥ तेजस्वी बलवाञ्शूरः संयुगेषु च नित्यशः ॥ ९८ ॥

॥ ८५ ॥ अवस्कन्नहृदया विलीनहृदया ॥ ८६ ॥ कश्मलेन अभिहता मूर्च्छिता । सन्ना कृशा ॥८७—८८ ॥ नेत्यादिश्लोकद्वयमेकान्वयं ॥ दशाविभागपर्याये दशानां बाल्यकौमारयौवनवार्धकाद्यवस्थानां विभागस्य भेदस्य पर्याये प्राप्तौ विषये लोकानामध्रुवा स्थितिः राज्ञां चञ्चलया श्रिया सह ते त्वया । सुविदिता नेति काकुः । सुविदितैवेत्यर्थः । लोकानां स्थितिरध्रुवेति राज्ञां श्रीश्चञ्चलेति च त्वया सुविदितैवेत्यर्थः । उच्यमाना बन्धुवृद्धादिभिरिति शेषः । अभिमुखौ उन्नतौ ॥ ८९—९१ ॥ प्रश्रितः विनयान्वितः । विमृश्य ' एतस्य यत्प्रेतगतस्य कृत्यं तत्कर्तुमिच्छामि तव प्रसादात् ' इत्युक्तमङ्गीकृतं विचिन्त्येत्यर्थः । रामस्यैवानुवृत्त्यर्थं रामेणानुज्ञातोस्मि चेत्तदा करिष्यामि नान्यथेत्येवमनुवृत्त्यर्थं ॥ ९२ ॥ त्यक्तेति । त्यक्तो धर्मो व्रतं च येन तं । अनृतं अनृतवादिनं ॥ ९३ ॥ गुरुगौरवात् गुरुरिति गौरवात् । पूज्योपि उक्तदोषान्मत्तः पूजां नार्हति ॥ ९४ ॥ भ्रातुः संस्काराकरणे त्वां नृशंसं लोका वक्ष्यन्तीत्याशङ्क्य वदन्तु नाम त एव पुनस्तद्गुणं विचारयन्तो मां युक्तकारिणं वक्ष्यन्तीत्याह—नृशंस इति ॥ संस्काराकरणे नृशंस इति मां कामं मनुष्या वक्ष्यन्ति । तस्य रावणस्य । अगुणान् दोषान् । श्रुत्वा असंस्कुर्वता विभीषणेन सुकृतं शोभनं कृतमिति वक्ष्यन्तीत्यर्थः ॥ ९५ ॥ परमप्रीतः सत्यवचनकथनादिति भावः । अप्रीत इति वा छेदः ॥ ९६ ॥ दोषसद्भावेपि गुणबाहुल्यादयं संस्कारयोग्य इत्याह—तवापीत्यादिना ॥ तव त्वया । मे प्रियमपि प्रियमेव । कार्यं । चो हेतौ । यस्मात्कारणात् त्वत्प्रभावात् मे मया जितं तस्मान्मया त्वं क्षमं हितमेव वाच्यः । मत्प्रियत्वात् त्वद्धितत्वाच्च रावणसंस्कारः क्रियतामित्यर्थः । यद्वा तवापि मे प्रियं कार्यं मद्वैरिणो रावणस्यासंस्करणं नाम मम पियं तवापि कर्तव्यमेव । त्वत्प्रभावाच्च मे जितं पूर्वं च तस्य जयसाहाय्यरूपं प्रियं त्वया कृतं । तथाप्यवश्यं तु क्षमं वाच्यः । यदर्हं तत्र नियोजनीयोसीत्यर्थः ॥ ९७ ॥ दोषिणः कथमर्हत्वमित्याशङ्क्य गुणाधिक्यादित्याह—अधर्मे-

ति० सुग्रीवस्येवतवापिप्रियं राज्याभिषेकलक्षणं । मयाकार्यं कर्तव्यं । हि यतःत्वत्प्रभावान्मयाजितं । तस्मादवश्यंक्षमं अभिषेकसंपादनयोग्यंयत्कृत्यं प्रेतनिर्हारलक्षणं तन्मयात्वंवाच्यः ॥ ९७ ॥

[पा०] १ ङ. झ. ञ. ट. विद्युदिवोज्ज्वला. २ ङ. झ. स्रापयन्तीतदाऽत्रेणस्तनौवक्रंसुनिर्मलं. ३ ङ. च. छ. झ. ञ. ट. नाहमर्हामि. ४ क.—घ. च. छ. ञ. ट. मांराम. ५ ग. ङ. झ. वाक्यकोविदः.

शतक्रतुमुखैर्देवैः श्रूयते न पराजितः ॥ महात्मा बलसंपन्नो रावणो लोकरावणः ॥ ९९ ॥
मरणान्तानि वैराणि निर्वृत्तं नः प्रयोजनम् ॥ क्रियतामस्य संस्कारो ममाप्येष यथा तव ॥ १००॥
[1]त्वत्सकाशाद्दशग्रीवः संस्कारं विधिपूर्वकम् ॥ प्राप्तुमर्हति[2] धर्मज्ञ त्वं यशोभाग्भविष्यसि ॥ १०१ ॥
राघवस्य वचः श्रुत्वा त्वरमाणो विभीषणः ॥ [3]संस्कारेणानुरूपेण योजयामास रावणम् ॥ १०२ ॥
[सँ प्रविश्य पुरीं लङ्कां राक्षसेन्द्रो विभीषणः ॥ रावणस्याग्निहोत्रं तु निर्यापयति सत्वरम् ॥१०३॥
शकटान्दारुरूपाणि अग्नीन्वै याजकास्तथा ॥ तथा चन्दनकाष्ठानि काष्ठानि विविधानि च ॥१०४॥
अगरूणि सुगन्धीनि गन्धांश्च सुरभींस्तथा ॥ मणिमुक्ताप्रवालानि निर्यापयति राक्षसः ॥ १०५ ॥
आजगाम मुहूर्तेन राक्षसैः परिवारितः ॥ ततो माल्यवता सार्धं क्रियामेव चकार सः ॥ १०६ ॥
सौवर्णीं शिबिकां दिव्यामारोप्य क्षौमवाससम् ॥ रावणं राक्षसाधीशमश्रुपूर्णमुखा द्विजाः ॥
तूर्यघोषैश्च विविधैः स्तुवद्भिश्चाभिनन्दितम् ॥ १०७ ॥
पताकाभिश्च चित्राभिः सुमनोभिश्च चित्रिताम् ॥ उत्क्षिप्य शिबिकां तां तु विभीषणपुरोगमाः ॥
दक्षिणाभिमुखाः सर्वे गृह्य काष्ठानि भेजिरे ॥ १०८ ॥
अग्नयो दीप्यमानास्ते तदाऽध्वर्युसमीरिताः ॥ शरणाभिगताःसर्वे पुरस्तात्तस्य ते ययुः ॥ १०९ ॥
अन्तःपुराणि सर्वाणि रुदमानानि सत्वरम् ॥ पृष्ठतोऽनुययुस्तानि प्लवमानानि सर्वतः ॥ ११० ॥
रावणं प्रयते देशे स्थाप्य ते भृशदुःखिताः ॥] चितां चन्दनकाष्ठानां पद्मकोशीरसंवृताम् ॥
ब्राह्मया [6]संवेशयांचक्रू राङ्कवास्तरणावृताम् ॥ १११ ॥
वैतते वेदविहितो राज्ञो वै पश्चिमः क्रतुः ॥ प्रचक्रू राक्षसेन्द्रस्य पितृमेधमनुक्रमम् ॥ ११२ ॥
वेदिं च दक्षिणप्राच्यां यथास्थानं च पावकम् ॥ घृतदाज्येन संपूर्णं स्रुवं सर्वे प्रचिक्षिपुः ॥ ११३॥

त्यादिना ॥ ९८ ॥ संयुगेष्वपराजितत्वमुदाहरति—शतक्रत्विति ॥ ९९ ॥ गुणबाहुल्येपि त्वद्वैरी कथं संस्कार्य इत्यत्राह—मरणेति ॥ यथायं तव बन्धुस्तथा ममापि त्वद्वत् बन्धुरेवायमित्यर्थः ॥ १०० ॥ यशोभागिति । पापकारिणमपि संस्कृतवानिति यशस्तव भविष्यतीत्यर्थः ॥ १०१ ॥ अनुरूपेण यायजूकानुगुणेन । अत्र संस्कारारम्भान् स्त्रीनिवर्तनमर्थसिद्धं ॥ १०२—११० ॥ चन्दनकाष्ठानां संबन्धिनौ । पद्मकमुशीरं च गन्धद्रव्यं प्रसिद्धं । ब्राह्मया वेदोक्तप्रक्रियया । रङ्कुः मृगविशेषः तत्संबन्धि चर्म राङ्कवं तदेवास्तरणं तेनावृतां चितां संवेशयाञ्चक्रुः योजयाञ्चक्रुः । रावणं ऋत्विज इति च शेषः ॥ १११ ॥ पश्चिमः क्रतुः अन्त्येष्टिः । वर्तते अवर्तत । चितानिर्माणानन्तरमन्तिमेष्टिं चक्रुरित्यर्थः । राक्षसेन्द्रस्य पितृमेधं पितृमेधसंस्कारं च अनुक्रमं यथाक्रमं प्रचक्रुः ॥ ११२ ॥ संग्रहेणोक्तं संस्कारं प्रपञ्चयति—वेदि-

ति० त्वच्छत्रुत्वादसंस्कार्यइतिचेत्तत्राह **मरणान्तानीति** । नः सात्विकानामस्माकं । प्रयोजनं वैरनिर्यातनरूपं । निर्वृत्तं संपन्नं । अतःपरंनवैरप्रयोजनमस्ति ॥ यदेवं अतः अस्य संस्कारःक्रियतामिति । एषयथातवभ्रातासंस्कारादिनातवानुग्राह्यः तथा ममाप्यनुग्राह्यएव । चतुर्विधमुक्तिष्वेकापिनास्य । तदुक्तंविष्णुपुराणे । " हिरण्यकशिपोर्विष्णुरयमित्येवंमनस्यभूत् । दशाननस्त्वेष्यनङ्गपराधीनतयाजानकीसमासक्तचेतसोदाशरथिरूपदर्शनमेवासीत् । नायमच्युतइत्यासक्तिः । विपद्यतोन्तःकरणस्यमानुषबुद्धिरेवकेवलमभूत् " इति । अतएव रावणकुंभकर्णयोःशिशुपालदन्तवक्त्रूपेणजन्मश्रूयते । नहिभगवत्सालोक्यंप्राप्तयोरपिजन्म भवति । किंतु ब्रह्मणासहमुक्तिरेवेतिसिद्धान्तः ॥ १०० ॥ ति० यशोभागिति । रामवाक्येनत्यक्तवैरोभ्रातरंसंस्कृतवानितिख्यातिरेवभविष्यतीत्यर्थः ॥ १०१ ॥ ति० द्विजाः राक्षसद्विजाः ॥१०७॥ ति० वेदिंचेत्यादि । दक्षिणाप्राचीं चितायादक्षिणाप्राग्दे-

[पा०] १ क. ख. घ.—ट. त्सकाशान्महाबाहोसंस्कारं. २ क.—घ. च. छ. झ. ञ. क्षिप्रमर्हति. ३ झ. संस्कारयितुमारेभेभ्रातरंरावणंहतं. ४ सप्रविश्यपुरींलङ्कामित्यादयः स्थाप्यतेभृशदुःखिताइत्यन्ताःश्लोकाः झ. पाठेदृश्यन्ते. ५ ङ. झ. ञ. ट. चन्दनकाष्ठैश्चपद्मकोशीरचन्दनैः. ६ ङ. झ. ट. संवर्तयामासू. ७ इदमर्धं झ. पाठेनदृश्यते. ८ क.—ट. मनुत्तमं. ९ ङ. च. झ. ञ. ट. दक्षिणप्राचीं. १० ज. पूर्णेनस्रुवंस्कन्धेप्रचि. क.—घ. च. छ. पूर्णेस्रुवंसर्वेप्रचि. ङ. झ. ञ. ट. संपूर्णेस्रुवंस्कन्धेप्रचि.

पादयोः शकटं प्रादुरन्तरूर्वोरुलूखलम् ॥ दारुपात्राणि सर्वाणि अरणिं चोत्तरारणिम् ॥ ११४ ॥
दत्त्वा तु मुसलं चान्यद्यथास्थानं विचक्षणाः ॥ शास्त्रदृष्टेन विधिना महर्षिविहितेन च ॥ ११५ ॥
तत्र मेध्यं पशुं हत्वा राक्षसेन्द्रस्य राक्षसाः ॥ परिस्तरणिकां राज्ञो घृताक्तां समवेशयन् ॥ ११६ ॥
गन्धैर्माल्यैरलंकृत्य रावणं दीनमानसाः ॥ विभीषणसहायास्ते वस्त्रैश्च विविधैरपि ॥
लाजैश्चावकिरन्ति स्म बाष्पपूर्णमुखास्तदा ॥ ११७ ॥
ददौ च पावकं तस्य विधियुक्तं विभीषणः ॥ ११८ ॥
स्नात्वा चैवार्द्रवस्त्रेण तिलान्दूर्वाभिमिश्रितान् ॥ उदकेन च संमिश्रान्प्रदाय विधिपूर्वकम् ॥११९॥
प्रदाय चोदकं तस्मै मूर्ध्ना चैनं नमस्य च ॥ ताः स्त्रियोऽनुनयामास सान्त्वमुक्त्वा पुनःपुनः ॥
गम्यतामिति ताः सर्वा विविशुर्नगरं तदा ॥ १२० ॥
प्रविष्टासु च सर्वासु राक्षसीषु विभीषणः ॥ रामपार्श्वमुपागम्य तदाऽतिष्ठद्विनीतवत् ॥ १२१ ॥

मित्यादिना ॥ दक्षिणप्राच्यां चिताया आग्नेयभागे वेदिं तत्र यथास्थानं पावकं च त्रेताग्निं च प्रचक्रुरित्यनुषज्यते । वेद्यां पश्चिमे गार्हपत्यं प्राच्यामाहवनीयं दक्षिणतो दक्षिणाग्निं च स्थापयामासुरित्यर्थः । पृषदाज्येन दधिमिश्रघृतेन । " पृषदाज्यं सदध्याज्यं " इत्यमरः । संपूर्णं स्रुवं होमपात्रं प्रचिक्षिपुः प्रतिपत्त्यर्थं चितायामिति शेषः ॥ ११३ ॥ यज्ञपात्रान्तराणामपि प्रतिपत्तिं दर्शयति—पादयोरित्यादिना श्लोकत्रयेण ॥ शकटं सोमराजानयनशकटम् । उलूखलं यज्ञीयव्रीह्यवहननसाधनं । अन्यत् स्थाल्यादिकं दारुपात्रादिकं । यथास्थानं दत्त्वा । शास्त्रदृष्टेन वेदविहितेन महर्षिविहितेन स्मृत्युक्तेन विधिना क्रमेण तत्र चितासमीपे मेध्यं पवित्रं पशुं छागं हत्वा । हननं होमपर्यन्तस्याप्युपलक्षणं । परिस्तरणिकां परिस्तरणानि । जात्येकवचनं । समवेशयन् चिक्षिपुरित्यर्थः ॥ ११४—११६ ॥ अथ शवालंकारमाह—गन्धैरित्यादिसार्धश्लोकमेकं वाक्यं ॥ अवकिरन्ति चितामिति शेषः ॥ ११७ ॥ अथ संस्कारमाह—ददाविति ॥ तस्य तस्मै रावणाय । विधियुक्तं मन्त्रयुक्तं ॥ ११८ ॥ स्नात्वेत्यादि गम्यतामितीतिपर्यन्तं किंचिदधिकं श्लोकद्वयमेकान्वयं ॥ दूर्वोदकमिश्रितान तिलान् प्रेतावाहनार्थं भूमौ प्रदाय तत्र तस्मै रावणाय उदकं दत्त्वा ताः स्त्रियः गम्यतामिति पुनः पुनः सान्त्वमुक्त्वा अनुनयामास पुरीं प्रापयामास ॥११९—१२० ॥ ताः सर्वा इत्युत्तरवाक्यादि ॥ रामपार्श्वमुपागम्येति । रणशिरसि हतत्वेन रावणस्याशौचाभावादागतः अतएवोत्तरदिने राज्याभिषेकोऽयोध्यागमनं चानुष्ठितं । प्रथमायां रावणसंस्कारः ॥

शेइत्यर्थः । यथास्थानंपावकंचप्रचक्रुः " दक्षिणपूर्वदेशेआहवनीयंनिदधाति । उत्तरपश्चिमेगार्हपत्यं । दक्षिणपश्चिमेदक्षिणाग्निं ।" इतिसूत्रोक्तस्थानमनतिक्रम्येत्यर्थः ॥ पृषदाज्येनसंपूर्णेनोपलक्षितंस्रुवंस्कन्धे स्कन्धदेशेप्रचिक्षिपुः । यद्यपि 'नासिकेस्रुवौ' इत्यापस्तंबेनोक्तं । तथापिसूत्रान्तरात्स्कन्धेपिनिक्षेपःस्रुवस्यबोध्यः । तथा " पादयोःशकटमूर्वोरुलूखलं " इतिचसूत्रान्तरादेवबोध्यं । स० स्रुवं स्कन्धे स्वस्कन्धेघृतांविचिक्षिपुः । नासिकयोरितिशेषः । " नासिकेस्रुवौ " इत्यापस्तंबोक्तेः । ऋष्यन्तरसूत्रान्तरंवास्कन्धइत्यत्रोत्तरत्रचोहनीयंवा ॥ ११३ ॥ ति० दारुपात्रादिसर्वंसूत्रोक्ततत्तत्स्थानेदत्त्वाऽन्यंमुसलं चातुर्मास्यमुसलंयथास्थानंदत्त्वाच विचक्रमुः पितृमेधंचक्रुः ॥ ११५ ॥ ती० अनुस्तरणिकां घृताक्तांसमवेशयन् । अनुस्तरणिकांराजगवीं । राजगवीमालभ्यतच्चर्मणायजमानमास्तृतवन्तइत्यर्थः । 'यथामृतायानुस्तरणींघ्नन्ति ' इतिश्रुतेः ॥ ति० परिस्तीर्यतेमुखमनयेतिपरिस्तरणिका वपा । तांराक्षसेन्द्रस्यमुखेसमवेशयन् । ' वपास्यमुखंप्रौर्णोति ' इतिसूत्रात् ॥ ११६ ॥ ति० विधिपूर्वकंप्रदाय स्थितइतिशेषः । ननु " निहतंरावणंदृष्ट्वारामेणाक्लिष्टकर्मणा । तत्यजुस्तंमहाभागंपञ्चभूतानिरावणम् । शरीरधातवोह्यस्यमांसंरुधिरमेवच । नेशुर्ब्रह्मास्त्रनिर्दग्धानचभस्माप्यदृश्यत" इतिमहाभारतउक्तत्वेनकथमस्यवाल्मीकिनास्मशाननयनपूर्वकंदाहउक्तइतिचेन्न । तस्यरामबाणतेजोवर्णनविषयेऽत्युक्त्यलङ्कारपरत्वादितिवदन्ति ॥ ११९ ॥ ति० गम्यतामित्युवाचेत्यर्थः । रावणपत्नीरितिशेषः ॥ अयंसंस्कारो नवम्यामेवसायंकाले ॥ १२० ॥

[पा०] १ च. छ. अनुस्तरणिकां. २ च. छ. झ. ञ. ट. तिलान्दर्भविमिश्रितान्. ३ ग. ङ. झ. ञ. ट. सान्त्वयित्वा. ४ ङ. झ. ट. प्रविष्टासुपुरींस्त्रीषुराक्षसेन्द्रोविभीषणः. ५ क. तदातिष्ठत्कृताञ्जलिः.

रामोपि सह सैन्येन ससुग्रीवः सलक्ष्मणः ॥ हर्षं लेभे रिपुं हत्वा यथा वृत्रं शतक्रतुः ॥ १२२ ॥
[ततो विमुक्त्वा सशरं शरासनं महेन्द्रदत्तं कवचं च तन्महत् ॥
विमुच्य रोषं रिपुनिग्रहात्ततो रामः स सौम्यत्वमुपागतोऽरिहा] ॥ १२३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्दशोत्तरशततमः सर्गः ॥११४॥

पञ्चदशोत्तरशततमः सर्गः ॥ ११५ ॥

लक्ष्मणेन रामाज्ञया विभीषणस्यलङ्काराज्येऽभिषेचनम् ॥ १ ॥ रामेण मैथिलींप्रति निजविजयकुशलनिवेदनाय हनुमत्प्रेषणम् ॥ २ ॥

ते रावणवधं दृष्ट्वा देवगन्धर्वदानवाः ॥ जग्मुः स्वैःस्वैर्विमानैस्ते कथयन्तः शुभाः कथाः ॥ १ ॥
रावणस्य वधं घोरं राघवस्य पराक्रमम् ॥ सुयुद्धं वानराणां च सुग्रीवस्य च मन्त्रितम् ॥ २ ॥
अनुरागं च वीर्यं च सौमित्रेर्लक्ष्मणस्य च ॥ [पतिव्रतात्वं सीताया हनूमति पराक्रमम् ॥]
कथयन्तो महाभागा जग्मुर्हृष्टा यथागतम् ॥ ३ ॥
राघवस्तु रथं दिव्यमिन्द्रदत्तं शिखिप्रभम् ॥ अनुज्ञाय महाभागो मातलिं प्रत्यपूजयत् ॥ ४ ॥
राघवेणाभ्यनुज्ञातो मातलिः शक्रसारथिः ॥ दिव्यं तं रथमास्थाय दिवमेवारुरोह सः ॥ ५ ॥
तस्मिंस्तु दिवमारूढे सुरसारथिसत्तमे ॥ राघवः परमप्रीतः सुग्रीवं परिषस्वजे ॥ ६ ॥
परिष्वज्य च सुग्रीवं लक्ष्मणेन प्रचोदितः ॥ पूज्यमानो हरिश्रेष्ठैराजगाम बलालयम् ॥ ७ ॥

॥ १२१—१२३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्दशोत्तरशततमः सर्गः ॥ ११४ ॥

अथ विभीषणाभिषेकः—ते रावणवधमित्यादि ॥ अत्र क्रियाभेदात्तच्छब्दद्वयं ॥ १ ॥ शुभाः कथाः कथयन्त इत्यस्यैव विवरणं—रावणस्य वधमित्यादि ॥ मन्त्रितं मन्त्रं । सौमित्रेरिति तन्मातुः श्लाघनव्यञ्जनाय अस्य जननी हि भाग्यवतीति ॥ २—३ ॥ इन्द्रदत्तं इन्द्रप्रेरितं । शिखिप्रभं अग्निप्रभं । प्रत्यपूजयत् उपचचार ॥ ४—६ ॥ प्रचोदितः विज्ञप्तः ।

स० सौम्यत्वमुपागतः । एतेनक्रोधमुपादातुंहातुंचशक्तोरामइतिख्यातत्र्यंद्योत्यते ॥१२३॥ इतिचतुर्दशोत्तरशततमःसर्गः ॥११४॥

ति० सुग्रीवस्यमन्त्रितं सेनासंमेलनसीतान्वेषणादिसर्वकार्यसाधकंमन्त्रसामर्थ्यं ॥ २ ॥ ति० अनुज्ञाप्य रथंनयेत्याज्ञांदत्वा । यद्यपिभारतेसीतायाआगमनोत्तरंरथादवतरणंभगवतंउक्तं । तथापितत्रपौर्वापर्यक्रमेतात्पर्याभावान्नक्षतिः । स० शिखिप्रभं अग्नितेजसं । ननुवनपर्वणि " दृष्ट्वारामंतुजानक्यासंगतंशक्रसारथिः । उवाचपरमप्रीतःसुहृन्मध्यइदंवचः । देवगन्धर्वयक्षाणांमानुषासुरभोगिनाम् । अपनीतंत्वया दुःखमिदंसत्यपराक्रम । सदेवासुरगन्धर्वायक्षराक्षसपन्नगाः । कथयिष्यन्तिलोकास्त्वांयावद्भूमिर्धरिष्यति । इत्येवमुक्त्वानुज्ञाप्यरामंशस्त्रभृतांवरम् । संपूज्यापाक्रमत्तेनरथेनादित्यवर्चसा " इतिसीतासंगमनानन्तरंरथस्यसमातलेःप्रेषणोक्तेरत्र पूर्वमेवतदुक्तेर्विरोधइतिचेत्सत्यं । भारतस्योत्तरत्वात्तदनुसारेणकथोद्घापउत्तरत्रात्रकार्यः । मातलिना दृष्टसीतारामसंगमेनगमनेसर्ववार्तायाइन्द्रंप्रतिप्रतिवक्तुंसुशकत्वगुणलाभाच्च । अथवासंकोचेनकथांकथयितुर्बादरायणस्यनिर्भरःपौर्वापर्यविषयइत्येवमुक्तिः । रावणहननानन्तरंसीतासंगत्यन्तरायस्यान्तराभावान्मातलिनास्वनाथंप्रतिप्रतिबोधयितुंशक्यत्वाच्चेतिवासमाधिरवधेयः ॥४॥ ति० अथ त्रिभिर्दिनैर्दशरात्रैकादशाहद्वादशाहकर्तव्यक्रियासमाप्तौ । चतुर्थेऽहनीत्यर्थः ॥ नात्रदशाहमाशौचमितिभ्रमितव्यं । "उद्यतैराहवे शस्त्रैःक्षत्रधर्ममृतस्यतु । सद्यःसंतिष्ठतेयज्ञस्तथाशौचमितिस्थितिः " इतिमनूक्तेः ॥ ७ ॥

[पा०] १ ङ. ञ. वृत्रंवज्रधरोयथा. २ अयंश्लोकः ङ. ञ. ञ. ट. पाठेषुदृश्यते. ३ च. छ. वधंदृष्ट्वा. ४ क. च. मित्रतां. ५ ख. ङ. च. ञ. ञ. ट. मारुतेर्लक्ष्मणस्यच. ६ इदमर्धं ङ. ञ. ट. पाठेषुदृश्यते. ७ ख. ग. च. शशिप्रभं. ८ ञ. अनुज्ञाप्य. ९ ङ. ञ. दिवमेवोत्पपातह. १० ङ. ञ. सरथेरथिनांवरः. ११ च. छ. लक्ष्मणेनाभिचोदितः. क. ख. ङ. ञ. ट. लक्ष्मणेनाभिवादितः.

[1]अब्रवीच्च तदा रामः [2]सेमीपपरिवर्तिनम् ॥ सौमित्रिं [3]सैत्यसंपन्नं लक्ष्मणं दीप्ततेजसम् ॥ ८ ॥
विभीषणमिमं सौम्य लङ्कायामभिषेचय ॥ अनुरक्तं च भक्तं च मम चैवोपकारिणम् ॥ ९ ॥
एष मे परमः कामो यदीमं रावणानुजम् ॥ लङ्कायां सौम्य पश्येयमभिषिक्तं विभीषणम् ॥ १० ॥
एवमुक्तस्तु सौमित्री राघवेण महात्मना ॥ तथेत्युक्त्वा तु संहृष्टः सौवर्णं घटमाददे ॥ ११ ॥
तं घटं वानरेन्द्राणां हस्ते दत्त्वा मनोजवान् ॥ आदिदेश महासत्त्वान्समुद्रसलिलानये ॥ १२ ॥
इति [5]शीघ्रं ततो गत्वा वानरास्ते [6]महाबलाः ॥ आगतास्तज्जलं गृह्य समुद्राद्वानरोत्तमाः ॥ १३ ॥
ततस्त्वेकं घटं गृह्य संस्थाप्य परमासने ॥ घटेन तेन सौमित्रिरभ्यषिञ्चद्विभीषणम् ॥ १४ ॥
लङ्कायां रक्षसां मध्ये राजानं रामशासनात् ॥ विधिना मन्त्रदृष्टेन सुहृद्गणसमावृतम् ॥
अभ्यषिञ्चत्स धर्मात्मा शुद्धात्मानं विभीषणम् ॥ १५ ॥
[[7]अभ्यषिञ्चंस्तदा सर्वे राक्षसा वानरास्तदा ॥ प्रहर्षमतुलं गत्वा तुष्टुवू राममेव हि] ॥ १६ ॥
तस्यामात्या जहृषिरे भक्ता ये चास्य राक्षसाः ॥ दृष्ट्वाऽभिषिक्तं लङ्कायां राक्षसेन्द्रं विभीषणम् ॥
[राघवः परमां प्रीतिमाजगाम सलक्ष्मणः] ॥ १७ ॥
स तद्राज्यं महत्प्राप्य रामदत्तं विभीषणः ॥ प्रकृतीः सान्त्वयित्वा च ततो राममुपागमत् ॥१८॥
अक्षतान्मोदकाँल्लाजान्दिव्याः सुमनसस्तदा ॥ आजहुरथ संहृष्टाः पौरास्तत्र निशाचराः ॥ १९ ॥
स तान्गृहीत्वा दुर्धर्षो राघवाय न्यवेदयत् ॥ [8]मङ्गल्यं मङ्गलं सर्वं लक्ष्मणाय च वीर्यवान् ॥ २० ॥

बलालयं शिबिरं ॥ ७ ॥ सत्यसंपन्नत्वादिविशेषणं यथोक्तकारित्वद्योतनाय ॥ ८ ॥ विभीषणमित्यादिश्लोकद्वयमेकान्वयं । लङ्कायामभिषेचय लङ्कायां गत्वाऽभिषेचय । समुद्रतीरएव लङ्काराज्याभिषेके कृतेपि पुनर्विधानं रावणसिंहासनेभिषेकार्थं । अनुरक्तमित्यनेन मित्रकृत्यमुक्तं । भक्तमित्यनेन दास्यकृत्यं । उपकारिणमित्यनेनानुरागभक्त्योः कार्यपर्यवसानमुक्तं । परमःकामइत्यनेन शरणागतविभीषणाभिमतपरिपूरणमेव विजयस्य प्रधानप्रयोजनमित्यवगम्यते ॥ ९—१० ॥ घटमिति जात्येकवचनं ॥ ११ ॥ आनये आनयने । हस्त इत्यत्रापि जात्येकवचनं । वानरेन्द्राणामिति बहुवचनप्रयोगात् ॥ १२ ॥ इतीति । आदेशाद्धेतोरित्यर्थः । "इति हेतुप्रकरणप्रकारादिसमाप्तिषु" इत्यमरः । वानरा वानरोत्तमा इति वचनं वानरोत्तमत्वेपि मानुषत्वव्यावर्तनाय । समुद्रात् समुद्रेभ्यः ॥ १३—१४ ॥ लङ्कायामित्यादिसार्धश्लोकएकान्वयः । अनेन रामनिदेशानन्तरमेव लक्ष्मणो विभीषणादिभिः सह लङ्कां प्रविष्टवानित्यवगम्यते । मन्त्रदृष्टेन मन्त्रेषु वेदेषु दृष्टेन स्पष्टमवगम्यमानेन विधिना प्रकारेण । शुद्धात्मानमित्यनेन रामाज्ञया अभिषेकमङ्गीकृतवान् । परमार्थस्तु रामकैङ्कर्य एवासक्तोभूदित्यवगम्यते । आज्ञाकैङ्कर्यं हि कर्तव्यं ॥ १५—१७ ॥ प्रकृतीः अमात्यप्रभृतीन् । सान्त्वयित्वा पुत्रमित्रादिविनाशजशोकापनोदनं कृत्वा । राममुपागमत् । लक्ष्मणेन सहेति शेषः ॥ १८—१९ ॥ मङ्गलमर्हतीति मङ्गल्यं । मङ्गलप्रयोजनमित्यर्थः । मङ्गलं हरिद्रादिमङ्गलद्रव्यं । सर्वं उक्ताक्षतादिभिन्नं । रामाय

स० लङ्कायां तत्सिंहासनइतिशेषः । एतेन पूर्वंविभीषणाभिषेकेपिसाक्षात्सिंहासनएवेदानींकरणान्नदोषइतिज्ञेयं ॥ ९ ॥ स० हस्ते जातावेकवचनं । समुद्रसलिलं पूर्वादिचतुस्समुद्रसलिलंप्रतिचतुर्दिग्गतमप्युदकंस्वल्पंस्वल्पमस्मिन्प्रस्थाप्यानयतेतिव्यादिदेश । उत्तरत्रैकंघटमित्युक्तेःपङ्क्तीभूयातिद्रुतमानयनार्थं बहूनामाज्ञापनं ॥ १२ ॥ स० समुद्रात् चतुस्समुद्राः । तस्याराज्याभिषेकोपयुक्तत्वस्यरामाद्यभिषेकस्थलेकथनात् । अन्यथा दक्षिणसमुद्रस्यातिसमीपगतत्वेनतदानेतॄणांबहुत्वकथनस्यमनोजवानितिविशेषणस्यवैयर्थ्यस्यात् ॥ १३ ॥ इतिपञ्चदशोत्तरशततमःसर्गः ॥ ११५ ॥

[पा०] १ ङ. झ. अथोवाचसकाकुत्स्थः. २ घ. समीपेसमुपस्थितं. ३ घ. ट. सौम्यसंपन्नं. क. ग. च. छ. ञ. सत्वसंपन्नं. ङ. झ. मित्रसंपन्नं. ४ ङ. झ. ट. लक्ष्मणंशुभलक्षणं. ५ क. ख. च.—अ. अतिशीघ्रं. ६ ङ. झ. मनोजवाः. ७ अयंश्लोकः ङ.—झ. पाठेषुदृश्यते. ८ इदमर्धं क. ङ. झ. अ. ट. पाठेषुदृश्यते. ९ घ. ङ झ. माङ्गल्यं.

कृतकार्यं समृद्धार्थं दृष्ट्वा रामो विभीषणम् ॥ प्रतिजग्राह तत्सर्वं तस्यैव प्रियकाम्यया ॥
[तत्प्रगृह्य परां प्रीतिं जगाम सहलक्ष्मणः] ॥ २१ ॥
ततः शैलोपमं वीरं प्राञ्जलिं पार्श्वतः स्थितम् ॥ अब्रवीद्राघवो वाक्यं हनुमन्तं प्लवङ्गमम् ॥ २२ ॥
अनुमान्य महाराजमिमं सौम्य विभीषणम् ॥ [प्रविश्य नगरीं लङ्कां कौशलं ब्रूहि मैथिलीम्] ॥२३॥
गच्छ सौम्य पुरीं लङ्कामनुज्ञाप्य यथाविधि ॥ प्रविश्य रावणगृहं विजयेनाभिनन्द्य च ॥ २४ ॥
वैदेह्यै मां कुशलिनं ससुग्रीवं सलक्ष्मणम् ॥ आचक्ष्व जयतांश्रेष्ठ रावणं च मया हतम् ॥ २५ ॥
प्रियमेतदुदाहृत्य मैथिल्यास्त्वं हरीश्वर ॥ प्रतिगृह्य च संदेशमुपावर्तितुमर्हसि ॥ २६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चदशोत्तरशततमः सर्गः ॥११५॥

षोडशोत्तरशततमः सर्गः ॥ ११६ ॥

हनुमताऽशोकवनमैत्यसीतांप्रति रामसंदेशनिवेदनपूर्वकं कृतागसांराक्षसीनां हिंसनाभ्यनुज्ञानप्रार्थना ॥ १ ॥ सीतया तदागसां परप्रयोज्यत्वाभिधानेन ऋक्षप्रोक्तश्लोकानुवादेनचक्षमाप्रशंसनपूर्वकं तन्निषेधनम् ॥ २ ॥ सीतया स्वस्यरामावलोकनाभिलाषं निवेदितेनहनुमता तत्समाश्वासनपूर्वकं पुनारामसमीपगमनम् ॥ ३ ॥

इति प्रतिसमादिष्टो हनुमान्मारुतात्मजः ॥ प्रविवेश पुरीं लङ्कां पूज्यमानो निशाचरैः ॥ १ ॥
[प्रविश्य च पुरीं लङ्कामनुज्ञाप्य विभीषणम् ॥ ततस्तेनाभ्यनुज्ञातो हनुमान्वृक्षवाटिकाम् ॥
संप्रविश्य यथान्यायं सीताया विदितो हरिः] ॥ २ ॥
प्रविश्य च महातेजा रावणस्य निवेशनम् ॥ ददर्श मृजया हीनां सातङ्कामिव रोहिणीम् ॥
वृक्षमूले निरानन्दां राक्षसीभिः समावृताम् ॥ ३ ॥
निभृतः प्रणतः प्रह्वः सोभिगम्याभिवाद्य च ॥ ४ ॥
दृष्ट्वा तमागतं देवी हनुमन्तं महाबलम् ॥ तूष्णीमास्त तदा दृष्ट्वा स्मृत्वा प्रमुदिताऽभवत् ॥ ५ ॥

लक्ष्मणाय च न्यवेदयत् ॥ २० ॥ तस्यैव प्रियकाम्यया न तु स्वभोगेच्छया ॥ २१—२२ ॥ अनुमान्येत्यादिसार्धश्लोकत्रयमेकान्वयं। विभीषणमनुमान्य लङ्कां गच्छ। विभीषणमनुज्ञाप्य रावणगृहं प्रविश्य। विजयेन विजयकथनेन। अभिनन्द्य सीतां तोषयित्वा। वैदेह्यै मां कुशलिनमाचक्ष्वेति संबन्धः। संदेशं सीतावाचिकं ॥ २३—२६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चदशोत्तरशततमः सर्गः ॥११५॥

अथ हनुमत्सीतासंवादः—इति प्रतिसमादिष्ट इत्यादि। मारुतात्मज इत्यनेन वेगातिशय उच्यते। पूज्यमान इति। मार्गप्रदर्शनादिभिः पूज्यमानत्वं ॥ १—२ ॥ प्रविश्येत्यादिसार्धश्लोक एकान्वयः। मृजया शरीरसंस्कारेण। सातङ्कां सग्रहपीडां ॥ ३ ॥ निभृत इत्यर्धं। अभिगम्य समीपं प्राप्य। अभिवाद्य स्वनाम संकीर्त्य। प्रणतः कृतप्रणामः सन्। निभृतः निश्चलः। प्रह्वः प्रकर्षेण संकुचितगात्रः। स्थित इति शेषः। आचार्यास्तु करणत्रयेणापि निश्चलो बभूवेत्यर्थ इति प्राहुः ॥ ४ ॥ तं दृष्ट्वा विस्मृत्य प्रथमं तूष्णीमास्त। पुनर्दृष्ट्वा स्मृत्वा प्रमुदिताऽभवत्। यद्वा सामान्यतो दृष्ट्वा तूष्णीमास्त। ततो विशेषतो दृष्ट्वा स्मृत्वा

स० दृष्ट्वा रामविजयादिकंदृष्ट्वैवसमागतं ननुश्रुत्वा एतादृशंहनुमन्तंदृष्ट्वातदातूष्णीमास्त किंवदिष्यतिवेति। स्मृत्वा रामानयनादिकंयथाप्रतिज्ञंतेनकृतंस्मृत्वाहृष्टाचाभवत्। एवमथांगीकारादेवदृष्ट्वेत्यनेनपौनरुक्त्यं ॥ ५ ॥

[पा०] १ इदमर्धं ग. झ. पाठयोर्दृश्यते. २ ग. ङ. झ. प्रणतंस्थितं. च. ञ. ट. पुरतःस्थितं. ३ इदमर्धं ङ. झ. पाठयोर्दृश्यते. ४ ङ. झ. ञ. वदतांश्रेष्ठ. ५ अयंश्लोकः ङ. झ. ट. पाठेषुदृश्यते. ६ क. ख. च. छ. ज. शशिनाहीनां. ७ ङ. झ. स्मृत्वाहृष्टाऽभवत्तदा.

सौम्यं दृष्ट्वा मुखं तस्या हनुमान्प्लवगोत्तमः ॥ रामस्य वचनं सर्वमाख्यातुमुपचक्रमे ॥ ६ ॥
वैदेहि कुशली रामः सहसुग्रीवलक्ष्मणः ॥ विभीषणसहायश्च हरीणां सहितो बलैः ॥ ७ ॥
कुशलं चाह सिद्धार्थो हतशत्रुररिंदमः ॥ ८ ॥
विभीषणसहायेन रामेण हरिभिः सह ॥ निहतो रावणो देवि लक्ष्मणस्य नयेन च ॥ ९ ॥
पृष्ट्वा तु कुशलं रामो वीरस्त्वां रघुनन्दनः ॥ अब्रवीत्परमप्रीतः कृतार्थेनान्तरात्मना ॥ १० ॥
प्रियमाख्यामि ते देवि त्वां तु भूयः सभाजये ॥ दिष्ट्या जीवसि धर्मज्ञे जयेन मम संयुगे ॥११॥
[तव प्रभावाद्धर्मज्ञे महान्रामेण संयुगे ॥] लब्धो नो विजयः सीते स्वस्था भव गतव्यथा ॥
रावणश्च हतः शत्रुर्लङ्का चेयं वशे स्थिता ॥ १२ ॥
मया ह्यलब्धनिद्रेण दृढेन तव निर्जये ॥ प्रतिज्ञैषा विनिस्तीर्णा बद्ध्वा सेतुं महोदधौ ॥ १३ ॥
संभ्रमश्च न गन्तव्यो वर्तन्त्या रावणालये ॥ विभीषणविधेयं हि लङ्काश्वर्यमिदं कृतम् ॥ १४ ॥
तदाश्वसिहि विश्वस्ता स्वगृहे परिवर्तसे ॥ अयं चाभ्येति संहृष्टस्त्वद्दर्शनसमुत्सुकः ॥ १५ ॥
एवमुक्ता समुत्पत्य सीता शशिनिभानना ॥ प्रहर्षेणावरुद्धा सा व्याजहार न किंचन ॥ १६ ॥
अब्रवीच्च हरिश्रेष्ठः सीतामप्रतिजल्पतीम् ॥ किंनु चिन्तयसे देवि किंनु मां नाभिभाषसे ॥ १७ ॥
एवमुक्ता हनुमता सीता धर्मे व्यवस्थिता ॥ अब्रवीत्परमप्रीता हर्षगद्गदया गिरा ॥ १८ ॥
प्रियमेतदुपश्रुत्य भर्तुर्विजयसंश्रितम् ॥ प्रहर्षवशमापन्ना निर्वाक्याऽस्मि क्षणान्तरम् ॥ १९ ॥
न हि पश्यामि सदृशं चिन्तयन्ती प्लवङ्गम ॥ मत्प्रियाख्यानकस्येह तव प्रत्यभिनन्दनम् ॥ २० ॥

हनुमानिति ज्ञात्वा प्रमुदिताऽभवत् । अथवा तं दृष्ट्वा स्मृत्वा प्रत्यभिज्ञाय । प्रमुदिताऽभवत् । प्रमोदातिरेकेण स्तब्धा सती तूष्णीमास्तेत्यर्थः ॥ ५ ॥ सौम्यं निजदर्शनेन विकसितं ॥ ६—१० ॥ रामसंदेशवाक्यमाह—प्रियमाख्यामीत्यादिश्लोकद्वयमेकान्वयं । हे देवि, ते प्रियमाख्यामि । त्वां तु भूयः भूयिष्ठं । सभाजये प्रीणये । धर्मज्ञे पातिव्रत्यधर्मज्ञे । त्वं दिष्ट्या जीवसि । अन्यथा मम जयो व्यर्थ एव स्यादिति भावः । मम जयेन मत्पराक्रमेण । नः संयुगे जयो लब्धः । गतव्यथा सती स्वस्था भवेति योजना ॥ ११—१२ ॥ हे सीते तव निर्जये शत्रुहस्तात्तव विमोचने । दृढेन एकाग्रचित्तेन । अतएव अलब्धनिद्रेण मया महोदधौ सेतुं बद्ध्वा एषा प्रतिज्ञा रावणं हनिष्यामीति प्रतिज्ञा । विनिस्तीर्णा प्रतिपालितेत्यर्थः ॥ १३ ॥ संभ्रमः व्यग्रता । वर्तन्त्या वर्तमानया ॥ १४ ॥ यस्मात् स्वगृहे परिवर्तसे तस्माद्विश्वस्ता सती आश्वसिहि विश्रान्ता भव । निवृत्तखेदा भवेत्यर्थः । अयं विभीषणः ॥ १५ ॥ समुत्पत्य हर्षेण समुत्थाय । अवरुद्धा अवरुद्धव्यापारा ॥ १६—१८ ॥ क्षणान्तरं क्षणमात्रं । निर्वाक्यास्मि । हर्षावरुद्धव्यापारत्वादिति भावः ॥ १९ ॥ निर्वाक्यास्मीत्यत्र हेत्वन्तरमाह—न हीत्यादि । सदृशं प्रत्यभिनन्दनं प्रति-

स० तवप्रभावात् त्वत्पातिव्रत्यमाहात्म्यात् । तत्स्तुतिकालत्वादेवमुक्तिः । तव त्वत्संबन्धिनारामेण । प्रभावात् स्वसामर्थ्यात् । अयंविजयोलब्धइतिवा ॥ १२ ॥ स० अत्रेदानीमभावेपिकालान्तरेदेशान्तरेदीयतामित्यतआह—नचेति । पृथिव्यांनास्तीत्यनेन मममातुर्गृहेऽभावेपिभर्तुर्गृहेसहभोगरूपमस्तीतिसूचयति ॥ २० ॥

[पा०] १ इदमर्धं ङ. ञ. पाठयोर्नदृश्यते. २ घ. धर्मज्ञेयत्नेमहतिसंयति. क. च. छ. धर्मज्ञेजयोमेप्रतिगृह्यतां. ३ इदमर्धं ङ. ञ. पाठयोर्दृश्यते. ४ ङ. ञ. लब्धोयंविजयः. ५ ख. च. ञ. रावणोनिहतःपापःसहामात्यसुतोमृधे. ६ ख. च. छ. प्रतिज्ञापालितादेवि. ७ क. ख. ङ. च. छ. झ. ञ. ट. नकर्तव्यो. ८ ङ. झ. विलब्धं. ९ ङ. झ. ट. व्याहर्तुनशशाकह. १० ङ. झ. ट. ततोऽब्रवीद्धरिवरः. ११ ङ. च. छ. झ. ट. किंत्वंचिन्तयसे. १२ ङ. झ. धर्मपथेस्थिता. १३ ङ. झ. बाष्पगद्गदया. १४ ङ. झ. आख्यानकस्यभवतोदातुं.

न हि पश्यामि तत्सौम्य पृथिव्यामपि वानर ॥ सदृशं मत्प्रियाख्याने तव दातुं भवेत्समम् ॥२१॥
हिरण्यं वा सुवर्णं वा रत्नानि विविधानि च ॥ राज्यं वा त्रिषु लोकेषु नैतदर्हति भाषितुम् ॥२२॥
एवमुक्तस्तु वैदेह्या प्रत्युवाच प्लवङ्गमः ॥ गृहीतप्राञ्जलिर्वाक्यं सीतायाः प्रमुखे स्थितः ॥ २३ ॥
भर्तुः प्रियहिते युक्ते भर्तुर्विजयकाङ्क्षिणि ॥ स्निग्धमेवंविधं वाक्यं त्वमेवार्हसि भाषितुम् ॥ २४ ॥
तवैतद्वचनं सौम्ये सारवत्स्निग्धमेव च ॥ रत्नौघाद्विविधाच्चापि देवराज्याद्विशिष्यते ॥ २५ ॥
अर्थतश्च मया प्राप्ता देवराज्यादयो गुणाः ॥ हतशत्रुं विजयिनं रामं पश्यामि सुस्थितम् ॥ २६ ॥
तस्य तद्वचनं श्रुत्वा मैथिली जनकात्मजा ॥ ततः शुभतरं वाक्यमुवाच पवनात्मजम् ॥ २७ ॥
अतिलक्षणसंपन्नं माधुर्यगुणभूषितम् ॥ बुद्ध्या ह्यष्टाङ्गया युक्तं त्वमेवार्हसि भाषितुम् ॥ २८ ॥
श्लाघनीयोऽनिलस्य त्वं पुत्रः परमधार्मिकः ॥ बलं शौर्यं श्रुतं सत्त्वं विक्रमो दाक्ष्यमुत्तमम् ॥२९॥
तेजः क्षमा धृतिर्धैर्यं विनीतत्वं न संशयः ॥ एते चान्ये च बहवो गुणास्त्वय्येव शोभनाः ॥३०॥
अथोवाच पुनः सीतामसंभ्रान्तो विनीतवत् ॥ प्रगृहीताञ्जलिर्हर्षात्सीतायाः प्रमुखे स्थितः ॥३१॥

प्रियवचनं ॥ २० ॥ सदृशंप्रदेयवस्त्वपि नपश्यामीत्याह–न हीत्यादिना । अत्र अपिशब्देन अन्तरिक्षस्वर्गौ समुच्चीयेते । त्रिष्वपि लोकेषु न पश्यामि । यत् मत्प्रियाख्याने विषये तव दातुं समं अत्यन्तसदृशं भवेत् ॥ २१ ॥ उक्तंविवृणोति–हिरण्यमिति । हिरण्यं रजतं । "रजतश्हिरण्यं"इति श्रुतेः । त्रिषु लोकेषु राज्यं त्रिलोकविषयराजत्वं । नैतदर्हति भाषितुं । हिरण्याद्येतत्सर्वमपि प्रियाख्यानसमत्वेन भाषितुंनार्हतीत्यर्थः ॥ २२ ॥ प्रमुखे अग्रे ॥ २३ ॥ प्रतिप्रियवचनं न पश्यामीत्यस्योत्तरमाह–भर्तुरिति । एवंविधं स्निग्धं वाक्यं भाषितुं त्वमेवार्हसि नान्या । अनेन सर्वोत्तरं प्रीतिप्रियवचनं मह्यं दत्तमित्युक्तं भवति ॥ २४ ॥ प्रियाख्यानसदृशं प्रदेयं वस्तु नास्तीत्यस्योत्तरमाह–तवेति । एतत् प्रत्यभिनन्दनं न पश्यामीत्येतत् । सारवत् प्रत्यभिनन्दनवचनराहित्यकथनेन मद्वचनस्य निरवधिकप्रीतिजनकत्वकथनान्महातात्पर्यवत् । स्निग्धं मयि प्रीतिपुरःसरं । एतद्वचनश्रवणेनैव मया सर्वोत्तरं वस्तु समुपलब्धमिति भावः ॥ २५ ॥ पूर्वमेव लब्धदेवराज्यादिकस्य तत्प्रदानं निरर्थकमित्याशयेनाह–अर्थत इति । रामं विजयिनं पश्यामीति यत् अस्मात् अर्थतः प्रयोजनात् । देवराज्यादयो गुणाः उत्कर्षाः प्राप्ताः । रामविजयदर्शनमेव राज्यादिकमित्यर्थः ॥ २६—२७ ॥ नानृग्वेदेत्यादिना राम इव स्वयमपि तद्वाक्यसौष्ठवं प्रशंसति—अतीति । अतिलक्षणसंपन्नं आकाङ्क्षायोग्यतासन्निधिमत्पदवत्त्वरूपवाक्यलक्षणसंपन्नं । "बहुव्याहरताऽनेन न किंचिदपशब्दितं" इत्युक्तशब्दसाधुत्वसंपन्नं । माधुर्यगुणभूषितं " संश्रवे मधुरंवाक्यम्" इत्युक्तरीत्या श्रवणमात्रेणानन्दजनकत्वरूपमाधुर्यगुणभूषितं । अष्टाङ्गया "ग्रहणं धारणं चैव स्मरणं प्रतिपादनम् । ऊहापोहोर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः " इत्युक्ताष्टाङ्गयुक्तया बुद्ध्या युक्तं । तादृशबुद्धिपूर्वकमित्यर्थः ॥ २८ ॥ न केवलं वाक्यतः गुणतोपि श्लाघ्योसीत्याह—श्लाघनीय इत्यादिना श्लोकद्वयेन । अनिलस्य श्लाघनीयः पुत्रः । अनिलादपि संजीवनकर इत्यर्थः । संजीवनं चानृशंस्यधर्मादित्याह—परमधार्मिक इति । बलं प्रयाससहिष्णुत्वं । शौर्यं युद्धोत्साहः । श्रुतं शास्त्रज्ञानं । " श्रुतं शास्त्रावधृतयोः " इत्यमरः । सत्त्वं शारीरः सारः । विक्रमः पराक्रमः । दाक्ष्यं सामर्थ्यं । उत्तममिति सर्वविशेषणं । तेजः पराभिभवनसामर्थ्यं । क्षमा अपराधसहिष्णुत्वं । धृतिः प्रभावः । धैर्यं क्षोभके सत्यक्षोभ्यत्वं । विनीतत्वं विनयवत्त्वं । विशिष्टनीतिमत्त्वं वा । एते चान्ये च दयादयो बहवो गुणाः त्वय्येव शोभनाः त्वामाश्रयमधिगम्य शोभमाना भवन्ति । न संशयः नाहमसतो गुणानारोप्य स्तौमीत्यर्थः ॥ २९—३१ ॥

शि० तत्रबलं शरीरसामर्थ्यं । सत्त्वमिन्द्रियसामर्थ्यं । विक्रमःपादविक्षेपविशेषइतिनपौनरुक्त्यं । श्लोकद्वयमेकान्वयि ॥ २८ ॥
ति० असंभ्रान्तः सुखाऽविकृतचित्तः । विनीतवत् विनीतार्हं ॥ ३१ ॥ इतिषोडशोत्तरशततमःसर्गः ॥ ११६ ॥

[पा०] १ ङ. ञ. ट. दलाभवेत्सुखं. २ ग. ङ. ञ. ण. ट. एतन्नार्हति. ३ ङ. ञ. ट. त्वमेवार्हस्यनिन्दिते.

इमास्तु खलु राक्षस्यो यदि त्वमनुमन्यसे ॥ हन्तुमिच्छाम्यहं सर्वा याभिस्त्वं तर्जिता पुरा ॥३२॥
क्लिश्यन्तीं पतिदेवां त्वामशोकवनिकां गताम् ॥ घोररूपसमाचाराः क्रूराः क्रूरतरेक्षणाः ॥
राक्षस्यो दारुणकथा वरमेतत्प्रयच्छ मे ॥ ३३ ॥
मुष्टिभिः पाणिभिः सर्वाश्चरणैश्चैव शोभने ॥ इच्छामि विविधैर्घातैर्हन्तुमेताः सुदारुणाः ॥ ३४ ॥
घातैर्जानुप्रहारैश्च दशनानां च पातनैः ॥ भक्षणैः कर्णनासानां केशानां लुञ्चनैस्तथा ॥ ३५ ॥
नखैः शुष्कमुखीभिश्च दारणैर्लङ्घनैर्हतैः ॥ [[2]विभिन्नशङ्खग्रीवांसपार्श्वकैश्च कलेवरैः ॥]
निपात्य हन्तुमिच्छामि तव विप्रिय[3]कारिणीः ॥ ३६ ॥
[4]एवंप्रकारैर्बहुभिर्विप्रकारैर्यशस्विनि ॥ हन्तुमिच्छाम्यहं देवि तवेमाः कृतकिल्बिषाः ॥ ३७ ॥
एवमुक्ता हनुमता वैदेही जनकात्मजा ॥ उवाच धर्मसहितं हनुमन्तं यशस्विनी ॥ ३८ ॥
राजसंश्रयवश्यानां कुर्वन्तीनां पराज्ञया ॥ विधेयानां च दासीनां कः कुप्येद्वानरोत्तम ॥ ३९ ॥
भाग्यवैषम्ययोगेन पुरादुश्चरितेन च ॥ मयैतत्प्राप्यते सर्वं स्वकृतं ह्युपभुज्यते ॥ ४० ॥
प्राप्तव्यं तु दशायोगान्मयैतदिति निश्चितम् ॥ दासीनां रावणस्याहं मर्षयामीह दुर्बला ॥ ४१ ॥
आज्ञप्ता [5]रावणेनैता राक्षस्यो मामतर्जयन् ॥ हते तस्मिन्[6] कुर्युर्हि तर्जनं वानरोत्तम ॥ ४२ ॥
अयं व्याघ्रसमीपे तु पुराणो धर्मसंस्थितः ॥ ऋक्षेण गीतः श्लोको मे तन्निबोध प्लवङ्गम ॥ ४३ ॥

इदं तु मे प्रियाख्यानपारितोषिकत्वेन देयमित्यर्थयते—इमा इत्यादिना । सार्धश्लोकद्वयमेकान्वयं । क्लिश्यन्तीं पतिदेवतां त्वां प्रति या राक्षस्यो दारुणकथा अब्रुवन् । पुरा याभिस्त्वं तर्जिता इमा राक्षस्यः राक्षसीः । यद्यनुमन्यसे हन्तुमिच्छामि । एतद्वरं मे प्रयच्छेति संबन्धः ॥ ३२—३३ ॥ हननप्रकारं स्वक्रोधानुरूपं दर्शयति—मुष्टिभिरित्यादिना । श्लोकत्रयमेकान्वयं । घातैः प्रहारैः । भक्षणैः खादनैः । लुञ्चनैः उन्मूलनैः । शुष्कमुखीभिः नखैः । दारणैः पीडनैः । कपोलताडनैर्वा । लङ्घनैः उत्प्लुत्योपरिपातनैः । हतैः हस्तैस्ताडनैः । निपात्य भूमौ पातयित्वा । मुष्ट्यादिभिर्हन्तुमिच्छामीत्यन्वयः ॥ ३४—३६ ॥ उक्तमर्थमावश्यकत्वज्ञापनाय पुनरपि संग्रहेण याचते—एवमिति ॥ ३७ ॥ धर्मसहितमिति क्रियाविशेषणं ॥ ३८ ॥ राजसंश्रयवश्यानां राजसेवापरवशानां । अतएव पराज्ञया कुर्वन्तीनां राज्ञोदितकार्यं कुर्वन्तीनां । विधेयानां चोदिताकरणे दण्डार्हाणां । रावणस्य दासीनां दासीभ्यः । कः कुप्येत् ॥ ३९ ॥ भाग्यवैषम्ययोगेन भाग्यविपर्ययोगेन । भाग्यस्यापरिपक्वतयेत्यर्थः । पुरादुश्चरितेन च पूर्वकृतदुष्कृतेन च एतत्तर्जनभर्त्सनादिकं प्राप्यते । तत्र हेतुमाह—स्वकृतमिति । हि यस्मात् । स्वकृतमुपभुज्यते स्वकृतकर्मफलं प्राप्यते लोकैः । अतो मयापि भुज्यत इत्यर्थः ॥ ४० ॥ रावणस्य दासीनां एतत्तर्जनादिकं । दशायोगात् अवस्थायोगात् । अनुभवयोग्यकालसंबन्धादिति यावत् । प्राप्तव्यमिति मया निश्चितं । दुर्बला पूर्वमेतादृशापन्निवारककर्मकरणाशक्ता । अतोहमिह राक्षसीविषये मर्षयामीति संबन्धः । दुर्बला कृपापरवशा वा । हते रावणे दौर्बल्यान्तराभावात् । परदुःखसहिष्णुत्वमेव हि तदानीं दौर्बल्यं ॥ ४१ ॥ राक्षसीनामपराधस्य राजाज्ञामूलकत्वमन्वयव्यतिरेकाभ्यां दर्शयति—आज्ञप्ता इति ॥ ४२ ॥ अथासां स्वातन्त्र्येणापकारकरणमभ्युपेत्य तथापि क्षन्तव्यमित्यत्र इतिहासं दर्शयति—अयमिति । पुरा किल कश्चिद्व्याधो व्याघ्रेणानुसृतो वृक्षमारूढः । वृक्षमूलगतो व्याघ्रो वृक्षोपरि स्थितमृक्षं वन्यमृगाणामस्माकं जात्या शत्रुरेषः । तस्मादेनं वृक्षात्पातयेत्यब्रवीत् । एवमुक्तो भल्लूकः स्वावासस्थानगतमेनं न पात-

---

[पा०] १ ख. च. छ. ञ. ट. कृन्तनैः. २ इदमर्धं क. ख. च. छ. ञ. पाठेषुदृश्यते. ३ क. ख. ञ. विप्रियकारिकाः. ४ एवंप्रकारैरित्यादिश्लोकद्वयस्यस्थाने एवंप्रकारैर्बहुभिःसंप्रहार्यंयशस्विनि । घातयेतीवरूपाभिर्याभिस्त्वंतर्जितापुरा । इत्युक्ता साहनुमताकृपणादीनवत्सला । हनूमन्तमुवाचेदंचिन्तयित्वाविमृश्यच । इतिश्लोकद्वयं ङ. झ. पाठयोर्दृश्यते. ५ ङ. झ. वैषम्यदोषेणपुरस्ताद्दुष्कृतेनच. ६ ङ. झ. ट. राक्षसेनेहराक्षस्यस्तर्जयन्तिमां. ७ ख. ङ. च. झ. ञ. नकुर्वन्ति.

न परः पापमादत्ते परेषां पापकर्मणाम् ॥ समयो रक्षितव्यस्तु सन्तश्चारित्रभूषणाः ॥ ४४ ॥
पापानां वा शुभानां वा वधार्हाणां प्लवङ्गम ॥ कार्यं [1]करुणमार्येण न कश्चिन्नापराध्यति ॥ ४५ ॥
लोकहिंसाविहाराणां रक्षसां कामरूपिणाम् ॥ कुर्वतामपि पापानि नैव कार्यमशोभनम् ॥ ४६ ॥
एवमुक्तस्तु हनुमान्सीतया वाक्यकोविदः ॥ प्रत्युवाच ततः सीतां [3]रामपत्नीं यशस्विनीम् ॥ ४७ ॥
युक्ता रामस्य भवती धर्मपत्नी [4]यशस्विनी ॥ प्रतिसंदिश मां देवि गमिष्ये यत्र राघवः ॥ ४८ ॥
एवमुक्ता हनुमता वैदेही जनकात्मजा ॥ अब्रवीद्रष्टुमिच्छामि भर्तारं वानरोत्तम ॥ ४९ ॥
तस्यास्तद्वचनं श्रुत्वा हनुमान्मारुतात्मजः ॥ हर्षयन्मैथिलीं वाक्यमुवाचेदं महाद्युतिः ॥ ५० ॥
पूर्णचन्द्राननं रामं [5]द्रक्ष्यस्यार्ये सलक्ष्मणम् ॥ स्थिरमित्रं हतामित्रं [6]शचीव त्रिदशेश्वरम् ॥ ५१ ॥
तामेवमुक्त्वा राजन्तीं सीतां साक्षादिव श्रियम् ॥ आजगाम [7]महावेगो हनुमान्यत्र राघवः ॥ ५२ ॥
[[8]संपदि हरिवरस्ततो हनूमान्प्रतिवचनं जनकेश्वरात्मजायाः ॥
कथितमकथयद्यथाक्रमेण त्रिदशवरप्रतिमाय राघवाय] ॥ ५३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षोडशोत्तरशततमः सर्गः ॥ ११६ ॥

यिष्यामि । तथात्वे धर्महानिः स्यादित्युक्त्वा सुष्वाप। तदनन्तरं त्वां रक्षिष्यामि सुप्तमृक्षं पातयेति व्याघ्रेण चोदितः सन् व्याधस्तमृक्षमपातयत् । स त्वभ्यासवशेन शाखान्तरमवलम्ब्य नापतत् । तदनु कृतापराधमेनं पातयेति पुनः पुनर्व्याघ्रेणोच्यमानोपि भल्लूको बहुशः कृतापराधमप्येनं तुभ्यं न दास्यामीत्यभिधाय ररक्षेति पौराणिकी गाथा ॥ ४३ ॥ तत्रत्यं श्लोकं पठति—न पर इति । सुग्रीवं प्रति रामः कपोतोपाख्यानमिव हनुमन्तमुद्दिश्य देव्यपि स्वाभिप्रेतेर्थे ऋक्षगीतं प्रमाणयतिस्म । परेषां पापकर्मणां परानुद्दिश्य पापं कुर्वतां । परः प्राज्ञः पुरुषः पापं प्रत्यपकाररूपं नादत्ते नाङ्गीकरोति । न करोतीत्यर्थः । समयः आचारः अपकर्तृष्वपि प्रत्यपकारवर्जनरूपः । रक्षितव्यस्तु रक्षितव्य एव । तथाहि सन्तश्चारित्रभूषणाः । सद्भिश्चारित्रभूषणैरिति वा पाठः ॥ ४४ ॥ अथ देव्या अभयप्रदानश्लोकः—पापानामिति । पापानां वा शुभानां वा त्वदभिप्रायेण पापानां वा अस्मदभिप्रायेण शुभानां वा । तदेव ममोद्देश्यं 'दोषो यद्यपितस्यस्यात्'इतिवत् ।मलिनस्य हि स्नानमपेक्षितं । तासां पापत्वादेवास्मदपेक्षा । किं शुभानामस्माभिः । तत्पुण्यानामेव तद्रक्षकत्वात् । तस्मात्तत्पापमेवास्माकमुद्देश्यं । ननु तर्हि दण्ड्या दण्डनीयाः नादण्ड्या इति धर्मशास्त्रं भवतीमासाद्य भज्येतेत्याशङ्क्य दुष्टोपि शरणागतो रक्षणीय इति विशेषशास्त्रं भवन्तमासाद्य किं भञ्जनीयमित्याह—वधार्हाणामिति । वधार्हाणामपीत्यर्थः । सप्तम्यर्थे षष्ठी । प्लवङ्गम अनभिलषितमेवाभिलषितवान् खलु भवान् । तेपु । आर्येण महता पुरुषेण । करुणं दयाकार्यं । तिष्ठतु । पुण्यं पापं च इदानीमेतद्दयनीयदशां पश्य । यद्वा शुभानामिति दृष्टान्तार्थं । शुभेषु वधार्हेषु यथा करुणं कार्यं तथा पापेषु वधार्हेष्वपि कार्यमित्यर्थः । सापराधादण्डनेतिप्रसङ्गःस्यादित्याशङ्क्याह—न कश्चिन्नापराध्यतीति । सर्वोप्यपराध्यतीत्यर्थः ॥ ४५ ॥ रक्षसां स्वजातिप्रयुक्तहिंसादेरदोषावहत्वाच्छास्त्रोक्तदण्डविषयत्वं नास्तीत्याह—लोकेति । अशोभनं दण्डनं ॥४६—४७॥ रामस्य युक्ता। किं पुनर्मद्विधो जन इति स्वस्योत्तमशरणत्वं प्रतिपादितवतो रामस्य शरण्यत्वादिगुणवत्तया सदृशीत्यर्थः। अनेन सर्गेण सीताया दयालुत्वं अपराधसहिष्णुत्वं घटकत्वं चोक्तमिति ध्येयम् ॥४८—५३॥ इच्छामीत्यत्र इतिकरणं द्रष्टव्यं ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षोडशोत्तरशततमः सर्गः॥११६॥

[पा०] १ ङ. च. ज. ञ. ट. कारुण्यमार्येण. २ झ. रामपत्नीमनिन्दितां. ३ ङ. झ. गुणान्विता. ४ ङ. झ. द्रक्ष्यस्यथ. ५ क. ग.—ट. स्थितमित्रं. ख. हितमित्रं. ६ ङ. झ. शचीवेन्द्रसुरेश्वरं. ७ ङ. च. छ. झ. ञ. ट. महातेजाहनुमान्. ८ अयंश्लोकः ङ.—ट. पाठेषुदृश्यते.

सप्तदशोत्तरशततमः सर्गः ॥ ११७ ॥

हनुमन्मुखात्सीतायाः स्वमुखावलोकनाभिलाषंनिवेदितेनरामेण विभीषणंप्रति स्नातालंकृतायाःसीतायाः स्वसमीपनयनचोदना ॥ १ ॥ विभीषणेन सीतायाः शिबिकारोपणेनरामसमीपप्रापणावसरे सरणिगतवानरगणदूरापसारणे तंप्रतिरामेण सरोषोपालम्भं पादचारेणसीतानयनचोदना ॥ २ ॥ तथासमागतयासीतया सुहृद्गणमध्यगतश्रीरामचन्द्रमुखावलोकनेन हर्षाधिगमः ॥ ३ ॥

स उवाच महाप्राज्ञमभिगम्य प्लवङ्गमः ॥ रामं वचनमर्थज्ञो वरं सर्वधनुष्मताम् ॥ १ ॥
यन्निमित्तोऽयमारम्भः कर्मणां च फलोदयः ॥ तां देवीं शोकसंतप्तां मैथिलीं द्रष्टुमर्हसि ॥ २ ॥
सा हि शोकसमाविष्टा बाष्पपर्याकुलेक्षणा ॥ मैथिली विजयं श्रुत्वा तव हर्षमुपागमत् ॥ ३ ॥
पूर्वकात्प्रत्ययाच्चाहमुक्तो विश्वस्तया तया ॥ भर्तारं द्रष्टुमिच्छामि कृतार्थं सहलक्ष्मणम् ॥ ४ ॥
एवमुक्तो हनुमता रामो धर्मभृतां वरः ॥ अगच्छत्सहसा ध्यानमीषद्बाष्पपरिप्लुतः ॥ ५ ॥
दीर्घमुष्णं विनिश्वस्य मेदिनीमवलोकयन् ॥ उवाच मेघसंकाशं विभीषणमुपस्थितम् ॥ ६ ॥
दिव्याङ्गरागां वैदेहीं दिव्याभरणभूषिताम् ॥ इह सीतां शिरस्स्नातामुपस्थापय मा चिरम् ॥ ७ ॥
एवमुक्तस्तु रामेण त्वरमाणो विभीषणः ॥ प्रविश्यान्तःपुरं सीतां स्वाभिः स्त्रीभिरचोदयत् ॥ ८ ॥
[ततः सीतां महाभागां दृष्ट्वोवाच विभीषणः ॥ मूर्ध्नि बद्धाञ्जलिः श्रीमान्विनीतो राक्षसेश्वरः ॥९॥]
दिव्याङ्गरागा वैदेहि दिव्याभरणभूषिता ॥ यानमारोह भद्रं ते भर्ता त्वां द्रष्टुमिच्छति ॥ १० ॥
एवमुक्ता तु वैदेही प्रत्युवाच विभीषणम् ॥ अस्नाता द्रष्टुमिच्छामि भर्तारं राक्षसाधिप ॥ ११ ॥
तस्यास्तद्वचनं श्रुत्वा प्रत्युवाच विभीषणः ॥ यदाह राजा भर्ता ते तत्तथा कर्तुमर्हसि ॥ १२ ॥

अथ सीतानयनं–स उवाचेत्यादि ॥१॥ आरम्भः उद्योगः । कर्मणां सेतुबन्धादिव्यापाराणां । फलोदयः रावणविजयश्च यन्निमित्तः यस्याः सीताया लाभार्थः। तां द्रष्टुमर्हसि ॥ २—३ ॥ पूर्वकात् पूर्वोत्पन्नात् । प्रत्ययात् विश्वासात् ॥ ४ ॥ रामः ईषद्बाष्पपरिप्लुतः सन् सहसा ध्यानमागच्छत् । रावणभवनोषितसीतापरिग्रहे महान् लोकापवादो भवेत् निर्दोषायास्तस्याः परित्यागे महान् दोषः स्यादित्येवं कार्यदौस्थ्यात् किं कर्तव्यमिति चिन्तयामासेत्यर्थः ॥ ५ ॥ निःश्वासदैर्घ्येण चिन्तादैर्घ्यं गृह्यते । औष्ण्येन कथं क्लिष्टां तां पुनः क्लेशयिष्यामीत्यन्तस्तापो व्यज्यते । भूमिं समवलोकयन्निति चिन्तापारवश्याभिनयः । मेघसंकाशमित्यनेन सीतानयने कृतत्वरत्वमुच्यते ॥ ६ ॥ दिव्याङ्गरागामिति । अलंकृत्यानयनादेशः उत्तरकालिकपरुषभाषणार्हताप्रतिपादनाय । नहि तादृशदशापन्नां दीनां परुषं भाषितुं युज्यते । तच्च तस्या न परित्यागार्थं किंतु चतुर्मुखादिदेवतामुखेन तस्याः पातिव्रत्यं ख्यापयितुं । मा चिरं बिलम्बो न कार्य इत्यर्थः ॥ ७ ॥ एवमित्यादिश्लोकद्वयमेकान्वयं । स्वाभिः स्त्रीभिरचोदयत् निजस्त्रीमुखेनाचोदयत् ॥ ८—११ ॥ प्रत्युवाच स्त्रीमुखेनेति शेषः । यथानियोगं कर्तव्यत्वे हेतुद्वयम्—राजा भर्तेति ॥ १२ ॥

ति० ध्यानमगच्छत् । वस्तुतोमुख्यसीतालाभोन्नेःकथंस्यादितिचिन्तात्र ॥ ५ ॥ ति० दिव्याङ्गरागामिति । तैस्तस्यारूपाधिक्याभिव्यक्तावीदृश्यर्थेऽयंमेउद्यमइतिसर्वोज्ञापयितुमेवंवादः ॥ ७ ॥ स० स्वाभिः स्त्रीभिः सरमात्रिजटादिभिः । सीतामवादयत् । राजस्त्रीत्वात्साक्षादसंभाषणमितिज्ञेयं ॥ ८ ॥ ती० भर्तात्वांद्रष्टुमिच्छतीति । स्वाभिःस्त्रीभिरचोदयदिति पूर्वेण संबन्धः ॥ १० ॥ ति० तस्यास्तद्वचनं स्नानाद्यनङ्गीकारवचनं । यथारामआह तथाकर्तुमर्हसि । " तांदृष्ट्वाचारुसर्वाङ्गींयानस्थांशोककर्शिताम् । मलोपचितसर्वाङ्गींजटिलांकृष्णवाससम् । उवाचरामोवैदेहींपरामर्शविशङ्कितः । " इति। भारतेतु मलोपचितेत्यर्धंपूर्वमितिशेषः ॥

[पा०] १ ख. प्राज्ञमभिवाद्य. ङ. झ. ट. प्राज्ञःसोभिवाद्य. २ ङ. झ. ट. रामंकमलपत्राक्षं. ३ ख. च. छ. ञ सीतां तांशोक. ४ ङ. झ. श्रुत्वाद्रष्टुंत्वामभिकाङ्क्षति. ५ ज. विश्वसितस्तदा. ६ ङ. झ. द्रष्टुमिच्छामिभर्तारमितिपर्याकुलेक्षण. ७ क. घ. ज. रवादयत्. ८ घ. ङ. च. छ. झ. ञ. ट. पाठेष्वयंश्लोकोदृश्यते.

तस्य तद्वचनं श्रुत्वा मैथिली भर्तृदेवता ॥ भर्तृभक्तिव्रता साध्वी तथेति प्रत्यभाषत ॥ १३ ॥
ततः सीतां शिरःस्नातां[1] युवतीभिरलंकृताम् ॥ महार्हाभरणोपेतां महार्हाम्बरधारिणीम् ॥ १४ ॥
आरोप्य शिबिकां दीप्तां परार्ध्याम्बरसंवृताम् ॥ रक्षोभिर्बहुभिर्गुप्तामाजहार विभीषणः ॥ १५ ॥
सोभिगम्य महात्मानं ज्ञात्वाऽपि ध्यानमास्थितम् ॥ प्रणतश्च प्रहृष्टश्च प्राप्तां सीतां न्यवेदयत् ॥१६॥
तामागतामुपश्रुत्य रक्षोगृहचिरोषिताम् ॥ हर्षो[3] दैन्यं च रोषश्च त्रयं राघवमाविशत् ॥ १७ ॥
ततः[4] पार्श्वगतं दृष्ट्वा सविमर्शं विचारयन् ॥ विभीषणमिदं वाक्यमहृष्टं[6] राघवोऽब्रवीत् ॥ १८ ॥
राक्षसाधिपते सौम्य नित्यं मद्विजये रत ॥ वैदेही सन्निकर्षं मे शीघ्रं समुपगच्छतु ॥ १९ ॥
सं[8] तद्वचनमाज्ञाय राघवस्य विभीषणः ॥ तूर्णमुत्सारणे यत्नं कारयामास सर्वतः ॥ २० ॥
कञ्चुकोष्णीषिणस्तत्र वेत्रजर्जरपाणयः ॥ उत्सारयन्तः पुरुषाः समन्तात्परिचक्रमुः ॥ २१ ॥
ऋक्षाणां वानराणां च राक्षसानां च सर्वशः ॥ वृन्दान्युत्सार्यमाणानि दूरमुत्सस्रुजुस्तदा ॥ २२ ॥
तेषामुत्सार्यमाणानां[12] सर्वेषां ध्वनिरुत्थितः ॥ वायुनोद्वर्तमानस्य[12] सागरस्येव निस्स्वनः ॥ २३ ॥
उत्सार्यमाणांस्तान्दृष्ट्वा[13] समन्ताज्जातसंभ्रमान् ॥ दाक्षिण्यात्तदमर्षाच्च वारयामास राघवः ॥ २४ ॥
संरब्धश्चाब्रवीद्रामश्चक्षुषा प्रदहन्निव ॥ विभीषणं महाप्राज्ञं सोपालम्भमिदं वचः ॥ २५ ॥
किमर्थं मामनादृत्य क्लिश्यतेऽयं त्वया जनः ॥ निवर्तयैनं[14] मुद्योगं जनोऽयं स्वजनो मम ॥ २६ ॥
न गृहाणि न वस्त्राणि न प्राकारास्तिरस्क्रियाः ॥ नेदृशा राजसत्कारा वृत्तमावरणं स्त्रियाः ॥२७॥
व्यसनेषु न कृच्छ्रेषु न युद्धेषु स्वयंवरे ॥ न क्रतौ न विवाहे च दर्शनं दुष्यति स्त्रियाः ॥ २८ ॥

अङ्गीकारेहेतुद्वयं भर्तृदेवता भर्तृभक्तिव्रतेति ॥ १३—१५ ॥ ज्ञात्वापि विभीषणागमनं विदित्वापि । अनेन चिन्तानुवृत्तिरुक्ता ॥ १६ ॥ तामिति । रावणवधपूर्वकसीतागमेन हर्षः । रावणभवनोषितत्वेन दैन्यं रोषश्च । अत्र रोषो भाविशपथोपयोगित्वादारोपित इति द्रष्टव्यं ॥ १७ ॥ सविमर्शं विचारयन् सवितर्कं चिन्तयन् । अहृष्टमिति क्रियाविशेषणं विभीषणविशेषणं वा ॥ १८—१९ ॥ उत्सारणे जननिवारणे ॥ २० ॥ कञ्चुकेति । कञ्चुकं वारबाणं । उष्णीषं शिरोवेष्टनं । वेत्रेण जर्जराः सदावलम्बनजनितपारुष्याः पाणयो येषां ते ॥२१॥ उत्सस्रुजुः अपचक्रमुः ॥ २२ ॥ उद्वर्तमानस्य उज्जृम्भमाणस्य ॥ २३ ॥ दाक्षिण्यात् वानरेषुदाक्षिण्यात् । अमर्षात् उत्सारणासहनात् ॥ २४ ॥ चक्षुषा प्रदहन्निवेति लोचनाभ्यां पिबन्निवेत्युक्तादरपात्रभूतस्य विभीषणस्यैवंविधदर्शनविषयताकरणं स्वजननिग्रहासहिष्णुत्वात् । सीताविषयसमारोपितरोषविशेषाद्वा ॥ २५—२६ ॥ तिरस्क्रियाः तिरस्करिण्यः । राजसत्काराः उत्सारणादिकं । वृत्तं आचारः ॥ २७ ॥ व्यसनेषु इष्टजनवियोगेषु । कृच्छ्रेषु राज्यक्षोभादिषु । युद्धे युद्धभूमौ

स० ननुभारते " तांदृष्ट्वाचारुसर्वाङ्गींयानस्थांशोककर्शिताम् । मलोपचितसर्वाङ्गींजटिलांकृष्णवाससम् " इत्युक्तेःकथमत्रैवंकथनमितिचेदुच्यते । स्वच्छन्देनाङ्गशोधनाद्यभावेनभारतेमलोपचितेत्याद्युक्तिः । अत्रतु रामाज्ञयातत्सजातत्वेनप्रतिकर्मणासंयुक्तामित्याद्युक्तिः । अथवा भारतवचनोत्तरार्धे हनुमद्वचनेनमलोपचितसर्वाङ्गींसंस्मरतोरामस्यतथैवदर्शनमितिपूर्वमेतादृशीमितिवार्थाङ्गीकारेणवाऽविरोधोपपत्तेः ॥१२॥ स० वहनोचितैः राजावरोधयानवहनोचितैः । राक्षसैः वृद्धैरविन्ध्यादिभिः । उक्तंचभारते— " ततःसीतांपुरस्कृत्येत्यारभ्य—अविन्ध्योनामसुप्राज्ञोवृद्धामात्योविनिर्ययौ " इति ॥ १५ ॥ ति० रोषं सर्वानर्थमूलयाऽनयाकिलसमुहृद्भ्रातृकेणेदंबहुदुःखमनुभूतमितिरोषः ॥ १७ ॥

[पा०] १ ख. ङ. ञ. स्नातांसंयुक्तांप्रतिकर्मणा. २ ङ. ञ. ट. सीतांराक्षसैर्वहनोचितैः ॥ राक्षसैर्बहुभिर्गुप्तां. ३ ङ. ञ. रोषंहर्षंचदैन्यंचराघवःप्रापशत्रुहा. ४ ज. राघवमागतं. ५ ङ. ञ. ट. ततोयानगतांसीतां. ६ क. घ. ङ. ज—ट. वाक्यमहृष्टो. ख. वाक्यंप्रहृष्टो. ७ ख. ङ. च. छ. ञ. ञ. ट. तस्यतद्वचनंश्रुत्वा. ८ ङ. ञ. तूर्णमुत्सारणंतत्र. ९ ङ. ञ. उत्सारयन्तस्तान्योधान्. १० ङ. ञ. ञ. ट. दूरमुत्तस्थुरन्ततः. ११ ङ. ञ. ट. निस्स्वनस्सुमहानभूत्. १२ ञ. वायुनोद्भूयमानस्य. १३ ङ. ञ. माणान्दृष्ट्वाथजगत्यांजात. १४ ङ. ञ. मुद्वेगं.

सैषा युद्धगता चैव कृच्छ्रे च महति स्थिता ॥ दर्शनेऽस्या न दोषः स्यान्मत्समीपे विशेषतः ॥२९॥
[विसृज्य शिबिकां तस्मात्पद्भ्यामेवापसर्पतु ॥ समीपे मम वैदेहीं पश्यन्त्वेते वनौकसः] ॥ ३० ॥
तदानय समीपं मे शीघ्रमेनां विभीषण ॥ सीता पश्यतु मामेषा सुहृद्गणवृतं स्थितम् ॥ ३१ ॥
एवमुक्तस्तु रामेण सविमर्शो विभीषणः ॥ रामस्योपानयत्सीतां सन्निकर्षं विनीतवत् ॥ ३२ ॥
ततो लक्ष्मणसुग्रीवौ हनुमांश्च प्लवङ्गमः ॥ निशम्य वाक्यं रामस्य बभूवुर्व्यथिता भृशम् ॥ ३३ ॥
कलत्रनिरपेक्षैश्च इङ्गितैरस्य दारुणैः ॥ अप्रीतमिव सीतायां तर्कयन्ति स्म राघवम् ॥ ३४ ॥
लज्जया त्ववलीयन्ती स्वेषु गात्रेषु मैथिली ॥ विभीषणेनानुगता भर्तारं साऽभ्यवर्तत ॥ ३५ ॥
सा वस्त्रसंरुद्धमुखी लज्जया जनसंसदि ॥ रुरोदासाद्य भर्तारमार्यपुत्रेति भाषिणी ॥ ३६ ॥
विस्मयाच्च प्रहर्षाच्च स्नेहाच्च पतिदेवता ॥ उदैक्षत मुखं भर्तुः सौम्यं सौम्यतराननाः ॥ ३७ ॥

अथ समपनुदन्मनःक्लमं सा सुचिरमदृष्टमुदीक्ष्य वै प्रियस्य ॥
वदनमुदितपूर्णचन्द्रकान्तं विमलशशाङ्कनिभानना तदानीम् ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तदशोत्तरशततमः सर्गः ॥ ११७ ॥

अष्टादशोत्तरशततमः सर्गः ॥ ११८ ॥

रामेणसीतांप्रति रावणवधावधिप्रयासस्य निजापयशःप्रमार्जनप्रयोजकत्वोक्तिपूर्वकं तच्चारित्र्यबुद्धिसंदेहरूपहेतूक्त्वा तत्परिग्रहानभिरोचनवचनम् ॥ १ ॥

तां तु पार्श्वस्थितां ह्रीमां रामः संप्रेक्ष्य मैथिलीम् ॥ हृदयान्तर्गतं क्रोधो व्याहर्तुमुपचक्रमे ॥ १ ॥
एषाऽसि निर्जिता भद्रे शत्रुं जित्वा मया रणे ॥ पौरुषाद्यदनुष्ठेयं तदेतदुपपादितम् ॥ २ ॥
गतोस्म्यन्तममर्षस्य धर्षणा संप्रमार्जिता ॥ अवमानश्च शत्रुश्च मया युगपदुद्धृतौ ॥ ३ ॥
अद्य मे पौरुषं दृष्टमद्य मे सफलः श्रमः ॥ अद्य तीर्णप्रतिज्ञत्वात्प्रभवामीह चात्मनः ॥ ४ ॥

॥ २८ ॥ कृच्छ्रे वक्ष्यमाणाग्निप्रवेशे ॥ २९—३१ ॥ सविमर्शः कृच्छ्रशब्दप्रयोगात्साशङ्कः ॥३२—३३॥ व्यथायां हेतुमाह—कलत्रेति ॥ ३४ ॥ अवलीयन्ती संकुचन्ती ॥ ३५–३६ ॥ विस्मयात् अघटितराम-पुनर्दर्शनाद्विस्मयः । प्रियस्य दर्शनेन प्रहर्षः । स्नेहः स्वाभाविकः । उदीक्षणकालिकमुखप्रसादमाह—सौम्येति ॥ ३७ ॥ उदितपूर्णचन्द्रेत्यनेन कोपरक्तत्व-मुक्तं। विमलशशाङ्केत्यनेन उत्तरकालिकक्षयः सूच्यते ॥३८॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तदशोत्तरशततमः सर्गः ॥ ११७ ॥

अथ रामपरुषोक्तिः—तां तु पार्श्वस्थितामित्यादि । ह्रीमां लज्जया नम्रां ॥ १ ॥ एषेति प्रत्यक्षेण दर्शयति। भद्रे इत्यसंबन्धनिवेदकसंबोधनं । पौरुषाद्यदनुष्ठेयं तदेव कृतं । नतु त्वल्लाभाय यत्नः कृत इति भावः ॥ २ ॥ अन्तं फलं । उद्धृतौ निर्मूलितौ ॥ ३ ॥ आत्मनः प्रभवामि स्वतन्त्रो भवामि ॥ ४ ॥

स० मनःक्लमंसमपनुदत् यद्वदनं तदुदीक्ष्यशशाङ्कनिभाननासीदित्यन्वयः ॥ एतेनसमपनुददित्यस्यसमपानुददित्याख्याततयाव्याख्यानंनागोजिभट्टस्यान्वयाप्रतिभासमूलं ॥ ३८ ॥ इतिसप्तदशोत्तरशततमःसर्गः ॥ ११७ ॥

[पा०] १ ङ. ञ. ट. सैषाविपद्गताचैवकृच्छ्रेणचसमन्विता. २ अयंश्लोकः ङ. ञ. ट. पाठेषुदृश्यते. ३ क. ङ. च. छ. ञ. ट. तदासीत्. ४ ख. च. छ. ट. गतद्वेषो.

या त्वं विरहिता नीता चलचित्तेन रक्षसा ॥ दैवसंपादितो दोषो मानुषेण मया जितः ॥ ५ ॥
संप्राप्तमवमानं यस्तेजसा न प्रमार्जति ॥ कस्तस्य पुरुषार्थोस्ति पुरुषस्याल्पतेजसः ॥ ६ ॥
लङ्घनं च समुद्रस्य लङ्कायाश्चावमर्दनम् ॥ सफलं तस्य तच्छ्लाघ्यं महत्कर्म हनूमतः ॥ ७ ॥
युद्धे विक्रमतश्चैव हितं मन्त्रयतश्च मे ॥ सुग्रीवस्य ससैन्यस्य सफलोऽद्य परिश्रमः ॥ ८ ॥
निर्गुणं भ्रातरं त्यक्त्वा यो मां स्वयमुपस्थितः ॥ विभीषणस्य भक्तस्य सफलोद्य परिश्रमः ॥ ९ ॥
इत्येवं ब्रुवतस्तस्य सीता रामस्य तद्वचः ॥ मृगीवोत्फुल्लनयना बभूवाश्रुपरिप्लुता ॥ १० ॥
पश्यैतस्यां तु रामस्य भूयः क्रोधो व्यवर्धत ॥ प्रभूताज्यावसिक्तस्य पावकस्येव दीप्यतः ॥ ११ ॥
स बद्ध्वा भ्रुकुटीं वक्त्रे तिर्यक्प्रेक्षितलोचनः ॥ अब्रवीत्परुषं सीतां मध्ये वानररक्षसाम् ॥ १२ ॥
यत्कर्तव्यं मनुष्येण धर्षणां परिमार्जता ॥ तत्कृतं सकलं सीते शत्रुहस्तादमर्षणात् ॥ १३ ॥
निर्जिता जीवलोकस्य तपसा भावितात्मना ॥ अगस्त्येन दुराधर्षा मुनिना दक्षिणेव दिक् ॥१४॥
विदितश्चास्तु ते भद्रे योऽयं रणपरिश्रमः ॥ स तीर्णः सुहृदां वीर्यान्न त्वदर्थे मया कृतः ॥ १५ ॥
रक्षता तु मया वृत्तमपवादं च सर्वशः ॥ प्रख्यातस्यात्मवंशस्य न्यङ्गं च परिरक्षता ॥ १६ ॥
प्राप्तचारित्रसंदेहा मम प्रतिमुखे स्थिता ॥ दीपो नेत्रातुरस्येव प्रतिकूलासि मे दृढम् ॥ १७ ॥

मया विरहिता या त्वं चलचित्तेन रक्षसा नीता । तया त्वया हेतुभूतया दैवसंपादितः दोषः अवमानः । मानुषेण प्रमार्जितः । दैवकृतं पुरुषयत्नेन निवारितमिति भावः ॥ ५ ॥ धर्षणाया अमार्जने दोषमाह—संप्राप्तमिति । प्रमार्जेति प्रमार्ष्टि ॥ ६ ॥ इदानीं हनुमदादिपौरुषस्यापि धर्षणावमार्जनहेतुत्वमाह—लङ्घनं चेत्यादिना । समुद्रस्य लङ्घनं लङ्कायाः अवमर्दनं इत्येवंरूपं हनुमतः श्लाघ्यं कर्मचाद्य सफलं । धर्षणापरिमार्जनेन सफलमित्यर्थः ॥ ७ ॥ मन्त्रयतः चिन्तयतः ॥ ८ ॥ निर्गुणमिति ॥ तस्येत्यध्याहार्यं ॥ ९ ॥ तद्वचः नैराश्येनोक्तं वचः । तस्य ब्रुवतः । तस्मिन् ब्रुवति सति ॥ १० ॥ पावकस्येति । पावकस्य क्रोधोतीव ज्वलनं ॥ ११ ॥ तिर्यक्प्रेक्षितलोचनः तिर्यक्प्रेक्षणं पुरतः सीतादर्शनासहिष्णुत्वकृतं ॥१२॥ यत्कर्तव्यमित्यादित्रिपादश्लोक एकान्वयः ॥ हे सीते धर्षणां परिमार्जता । "मृजेरजादौ विभाषा वृद्धिः" इति वृद्धिः । मनुष्येण यत्कर्तव्यं तत् सकलं कृतं । शत्रुहस्तादमर्षणादित्युत्तरशेषः ॥ १३ ॥ भावितात्मना ध्यातात्मस्वरूपेण । अगस्त्येन । इत्वलाक्रान्तत्वाज्जीवलोकस्य दुराधर्षा दुःसंचारा दक्षिणा दिगिव । अमर्षणात् अमर्षाद्धेतोः । शत्रुहस्तान्मया त्वं निर्जितेति संबन्धः ॥ १४ ॥ योयं रणपरिश्रमः सुहृदां वीर्यात्तीर्णः निर्व्यूढः सः त्वदर्थं मया न कृत इति विदितोस्तु ॥ १५ ॥ तर्हि किमर्थमेष परिश्रम इत्यत आह—रक्षतेति ॥ अत्र मया रणपरिश्रमः कृत इत्यनुषज्यते । वृत्तं रक्षता अपवादं न्यङ्गं अयशस्यं च परिरक्षता परिहरता निवारयता । मया रणपरिश्रमः कृतः ॥ १६ ॥ परगृहवासेन प्राप्तचारित्रसंदेहा त्वं नेत्रातुरस्य दीप इव प्रतिकूलासि । अनेनोपमानेन वस्तुतः सीताया दोषो नास्ति । स्वसंदेहेनाहं प्रतिकूलीकरोमीति व्यज्य-

---

स० हृदयप्रियां मनोहरां । श्रीवत्साश्रितरमारूपत्वाद्वा । एतादृशदैन्यदर्शनंस्वीकारहेतुः । जनवादः जनापवादः । द्विधा प्राप्यावाप्याज्यावेति ॥ ति० तद्रूपदर्शनादङ्गीकारबुद्धिः । जनवादभयात्त्यागबुद्धिः । भावसंधिरत्र ॥ इदंव्याख्यानद्वयंपाठान्तरस्थश्लोकद्वयस्य ॥ ११ ॥ इत्यष्टादशोत्तरशततमस्सर्गः ॥ ११८ ॥

[पा०] १ ग. दशग्रीवेणरक्षसा. २ ङ. झ. कस्तस्यपौरुषेणार्थोमहताप्यल्पचेतसः. ३ क. ख. घ. ङ. ज.—ट. तच्छ्लाघ्यमथकर्म. ४ पश्यतस्तांत्रिलिखादिश्लोकद्वयस्यस्थाने पश्यतस्तांतुरामस्यसमीपेहृदयप्रियां । जनवादभयाद्राज्ञोबभूवहृदयंद्विधा । सीतामुत्पलपत्राक्षींनीलकुञ्चितमूर्धजां । अवदद्वैदेहारोहांमध्येवानररक्षसां । इतिश्लोकद्वयं ङ. झ. पाठयोर्दृश्यते. ५ ख. च. छ. ञ. ट. मयापितत्कृतंसीते. ङ. झ. तत्कृतंरावणंहत्वामयेदंमानकाङ्क्षिणा. ६ ख. सीतेतवदुभद्रंतेयोयो. ७ ङ. झ. ट. परिमार्जता-

तद्गच्छ ह्यभ्यनुज्ञाता यथेष्टं जनकात्मजे ॥ एता दश दिशो भद्रे कार्यमस्ति न मे त्वया ॥ १८ ॥
कः पुमान्हि कुले जातः स्त्रियं परगृहोषिताम् ॥ तेजस्वी पुनरादद्यात्सुहृल्लेख्येन चेतसा ॥ १९ ॥
रावणाङ्कपरिभ्रष्टां दृष्टां दुष्टेन चक्षुषा ॥ कथं त्वां पुनरादद्यां कुलं व्यपदिशन्महत् ॥ २० ॥
तदर्थं निर्जिता मे त्वं यशः प्रत्याहृतं मया ॥ नास्ति मे त्वय्यभिष्वङ्गो यथेष्टं गम्यतामितः ॥२१॥
इति प्रव्याहृतं भद्रे मयैतत्कृतबुद्धिना ॥ लक्ष्मणे भरते वा त्वं कुरु बुद्धिं यथासुखम् ॥ २२ ॥
सुग्रीवे वानरेन्द्रे वा राक्षसेन्द्रे विभीषणे ॥ निवेशय मनः सीते यथा वा सुखमात्मनः ॥ २३ ॥
न हि त्वां रावणो दृष्ट्वा दिव्यरूपां मनोरमाम् ॥ मर्षयेत चिरं सीते स्वगृहे परिवर्तिनीम् ॥ २४ ॥

ततः प्रियार्हश्रवणा तदप्रियं प्रियादुपश्रुत्य चिरस्य मैथिली ॥
मुमोच बाष्पं सुभृशं प्रवेपिता गजेन्द्रहस्ताभिहतेव सल्लकी ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टादशोत्तरशततमः सर्गः ॥ ११८ ॥

एकोनविंशत्युत्तरशततमः सर्गः ॥ ११९ ॥

सीतयारामंप्रति स्वचारित्रशुद्धिप्रतिज्ञापूर्वकं लक्ष्मणंप्रत्यग्निप्रवेशनिर्धारणोक्त्याऽग्निकुण्डनिर्माणचोदना ॥ १ ॥ ततोरामेङ्गिताभिज्ञलक्ष्मणनिर्मिताग्निकुण्डे सशपथंप्रवेशः ॥ २ ॥

एवमुक्ता तु वैदेही परुषं रोमहर्षणम् ॥ राघवेण सरोषेण भृशं प्रव्यथिताऽभवत् ॥ १ ॥
सा तदश्रुतपूर्वं हि जने महति मैथिली ॥ श्रुत्वा भर्तृवचो रूक्षं लज्जया व्रीडिताऽभवत् ॥ २ ॥
प्रविशन्तीव गात्राणि स्वान्येव जनकात्मजा ॥ वाक्यशल्यैस्तैः सशल्येव भृशमश्रूण्यवर्तयत् ॥ ३ ॥
ततो बाष्पपरिक्लिष्टं प्रमार्जन्ती स्वमाननम् ॥ शनैर्गद्गदया वाचा भर्तारमिदमब्रवीत् ॥ ४ ॥
किं मामसदृशं वाक्यमीदृशं श्रोत्रदारुणम् ॥ रूक्षं श्रावयसे वीर प्राकृतः प्राकृतामिव ॥ ५ ॥
न तथाऽस्मि महाबाहो यथा त्वमवगच्छसि ॥ प्रत्ययं गच्छ मे येन चारित्रेणैव ते शपे ॥ ६ ॥

ते ॥ १७—१८ ॥ सुहृल्लेखेन सुहृल्लेखा रणरणकं सुहृल्लेखामर्हतीति सुहृल्लेख्यं तेन । रणरणकातिशययुक्तेनेत्यर्थः ॥ १९ ॥ व्यपदिशन् कीर्तयन् ॥ २० ॥ तदर्थं कुलार्थं । अभिष्वङ्गः आसक्तिः । अनुरागो वा ॥ २१ ॥ इति प्रव्याहृतमित्यादिश्लोकद्वयमेकान्वयं ॥ अत्र लक्ष्मणादौ मनःकरणं नाम अनाथाया रक्षकत्वेन तत्तद्गृहे वर्तनं । भर्त्रा परित्यक्तायाः स्त्रियो बन्धुगृहे वासविधानात् । "न स्त्री स्वातन्त्र्यमर्हति" इति स्मृतेः । न त्वत्रान्यथा ग्रहीतुं युक्तं । महापुरुषेण तादृशोक्त्ययोगात् ॥ २२—२४ ॥ सल्लकी गजभक्ष्यलताविशेषः ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टादशोत्तरशततमः सर्गः ॥ ११८ ॥

अथ सीताग्निप्रवेशः—एवमुक्त्वा त्विति ॥ १ ॥ जने महति महाजनमध्ये लज्जया व्रीडिता । अतिनम्रमुखी बभूवेत्यर्थः ॥ २ ॥ गात्राणि प्रविशन्ती संकुचन्तीत्यर्थः ॥ ३—४ ॥ असदृशं त्वया वक्तुं मया श्रोतुं चायोग्यं । रूक्षं परुषं । अतएव श्रोत्रदारुणं श्रवणकटु ॥ ५ ॥ चारित्रेण ममेति शेषः । ते तुभ्यं । "श्लाघह्नुङ्स्थाशपां—" इति संप्रदानत्वं । सुकृतेन शपमाना त्वां शापं ज्ञापयामीत्यर्थः ॥ ६ ॥

[पा०] १ ग. ङ. झ. ट. त्सुहृल्लोभेन. २ ङ. झ. शत्रुघ्नेवाथसुग्रीवेराक्षसेवाविभीषणे. ३ ङ. झ. ट. पर्यवस्थितां. ४ ङ. झ. ट. मानिनी. ५ ख. सुवेपिता. ६ ख.—ट. वल्लरी. ७ ख. च. छ. ट. भृशंप्रव्यथिताऽभवत्. ८ क. ख. ङ. च. छ. झ. ट. मेखेन.

पृथक्स्त्रीणां प्रचारेण [1]जातिं तां परिशङ्कसे ॥ [2]परित्यजेमां शङ्कां तु यदि तेऽहं परीक्षिता ॥ ७ ॥
यद्यहं गात्रसंस्पर्शं गताऽस्मि विवशा प्रभो ॥ कामकारो न मे तत्र दैवं तत्रापराध्यति ॥ ८ ॥
मदधीनं तु यत्तन्मे हृदयं त्वयि वर्तते ॥ पराधीनेषु गात्रेषु किं करिष्याम्यनीश्वरा ॥ ९ ॥
सह [3]संवृद्धभावाच्च संसर्गेण च मानद ॥ यद्यहं ते न विज्ञाता हता तेनास्मि शाश्वतम् ॥ १० ॥
प्रेषितस्ते यदा वीरो हनुमानवलोककः ॥ लङ्कास्थाऽहं त्वया वीर किं तदा न विसर्जिता ॥ ११ ॥
प्रत्यक्षं वानरेन्द्रस्य त्वद्वाक्यसमनन्तरम् ॥ त्वया संत्यक्तया वीर त्यक्तं स्याज्जीवितं मया ॥ १२ ॥
न वृथा ते श्रमोऽयं स्यात्संशये न्यस्य जीवितम् ॥ सुहृज्जनपरिक्लेशो न चायं निष्फलस्तव ॥१३॥
त्वया तु नरशार्दूल क्रोधमेवानुवर्तता ॥ लघुनेव मनुष्येण स्त्रीत्वमेव पुरस्कृतम् ॥ १४ ॥
[4]अपदेशेन जनकान्नोत्पत्तिर्वसुधातलात् ॥ मम वृत्तं च वृत्तज्ञ बहु तेन पुरस्कृतम् ॥ १५ ॥
न प्रमाणीकृतः पाणिर्बाल्ये बालेन पीडितः ॥ मम भक्तिश्च शीलं च सर्वं ते पृष्ठतः कृतम् ॥१६॥
एवं ब्रुवाणा रुदती बाष्पगद्गदभाषिणी ॥ [5]अब्रवील्लक्ष्मणं सीता दीनं ध्यानपरं स्थितम् ॥ १७ ॥
चितां मे कुरु सौमित्रे व्यसनस्यास्य भेषजम् ॥ [6]मिथ्योपघातोपहता नाहं जीवितुमुत्सहे ॥ १८ ॥
[7]अप्रीतस्य गुणैर्भर्तुस्त्यक्तायां जनसंसदि ॥ या क्षमा मे गतिर्गन्तुं प्रवेक्ष्ये हव्यवाहनम् ॥ १९ ॥

स्त्रीमात्रसाधारण्येन नाहं द्रष्टव्येत्याह—पृथक्स्त्रीणामिति ॥ पृथक्स्त्रीणां प्राकृतस्त्रीणां । प्रचारेण आचारेण हेतुना । सर्वामपि स्त्रीजातिं तथात्वेन शङ्कसे । अहं ते त्वया । यदि परीक्षिता ज्ञातस्वभावा तर्हीमां शङ्कां त्यज ॥ ७ ॥ त्वयि ज्ञातस्वभावायामपि रावणाङ्गस्पर्शलक्षणो दोषस्त्यागहेतुरित्याशङ्क्याह—यद्यहमित्यादि। यद्यपि अहं विवशा सती गात्रसंस्पर्शं गतास्मि तथापि तत्र मे कामकारः स्वेच्छाचरणं । नास्ति । तर्हि कस्यात्रापराध इत्यत्राह—दैवं तत्रेति ॥ ८ ॥ मदधीनं परैर्ग्रहीतुमशक्यं । यद्धृदयं तत्तु तस्मिन्काले त्वयि वर्तते अवर्तत । पराधीनेषु परैर्ग्रहीतुं शक्येषु गात्रेषु विषये। अनीश्वरा अस्वतन्त्रा । अहं किं करिष्यामि किं कुर्या ॥ ९ ॥ स्वभावपरिज्ञानहेतुभूतसहसंवर्धनसंसर्गावपि प्रत्ययं यदि नोत्पादयतः तर्हि न किमपि ते प्रत्ययमुत्पादयितुं शक्नुयादित्याशयेनाह—सह संवृद्धेति ॥ सह संवृद्धभावात् स्वभावपरिज्ञानहेतुना सह संवर्धनेन संसर्गेण संश्लेषेण च यद्यहं ते न विज्ञाता । ततः मत्स्वभावाज्ञानेन शाश्वतं अत्यर्थं । हतास्मि ॥ १० ॥ अवलोककः अवलोकितुं । अन्वेष्टुमिति यावत् । " तुमुन्ण्वुलौ क्रियायां क्रियार्थायां " इति ण्वुल्प्रत्ययः ॥ ११ ॥ तदात्वे को विशेष इत्यत आह—प्रत्यक्षमिति ॥ १२ ॥ एवं कृते न केवलं ममैव व्यथाभावः तव त्वत्सुहृदां च जयार्थप्रयासोपि न स्यादित्याह—न वृथेति ॥ जीवितं संशये न्यस्य कृतोयं श्रम इत्यर्थः ॥ १३—१४ ॥ अपदेशेन जनकात् जनकमपदिश्येत्यर्थः ॥ १५—१७ ॥ मिथ्योपघातः मिथ्यापवादः ॥१८॥ गुणैरप्रीतस्य विद्यमानैः पातिव्रत्यादिगुणैरपि अप्रीतस्य भर्तुस्त्यक्तायां मे या गन्तुं क्षमा गतिः प्रत्ययजननार्थं या योग्या गतिः । तं हव्यवाहनं प्रवेक्ष्य इति योजना ॥ १९ ॥

स० पृथक्स्त्रीणां मूर्खस्त्रीणां । पृथग्जनशब्दस्यमूर्खेप्रयोगवदयंप्रयोगः । यद्वा स्त्रीणांपृथक्त्वंनाम पतिबुद्धिविरुद्धबुद्धिमत्त्वं । विभिन्नयोरपिमत्यैक्येनैक्यव्यवहारदर्शनात् । तथाच स्वैरिणीनामितिफलितोर्थः । प्रचारेण आचारेण । जातिं सर्वस्त्रीसमूहं । यदि ते त्वयाऽहं परीक्षितास्यां तदेमांशङ्कांएकस्मायत्रक्वापिदुष्टत्वे सर्वांअपितादृग्यइतिविपरीतसंभावनां त्यज त्यक्ष्यसि ॥७॥ ति० स्वतोदोषजनकं कर्मतुमेनास्तीत्याह—**मदधीनमिति** । परैर्ग्रहीतुमशक्यमित्यर्थः । पराधीनेषु परैर्ग्रहीतुंशक्येषु दैवाधीनेषुच । यस्याश्छायास्मि तदधीनानिगात्राणि । तथैवतदर्थमेवैषांनिर्माणात् । हृदयंतुतदीयमेवात्रापीतिभावः ॥ ९ ॥ ति० तदाकिंनत्वयाविसर्जिता पुनरङ्गीकाराभावंकिमितिनश्रावित ॥११॥ ति० तदोक्तौ कोविशेषस्तत्राह—**प्रत्यक्षमिति** । एवंचतदैक्यजीवत्यागेएतावत्पर्यन्तंमहतीलज्जियंगव्यथानस्यादितिभावः ॥ १२ ॥ ति० जीवितंसंशयेन्यस्य युद्धेजयस्यसंदिग्धत्वात् ॥ १३ ॥

[पा०] १ क. ख. घ.—ट. जातिलं. २ ङ. झ. परित्यजैनां. ३ ङ. झ. ट. संवृद्धभावेन. ४ ङ. झ. ञ. ट. अपदेशोमे. ५ ङ. झ. ट. ब्रवाचलक्ष्मणं. ६ ङ. च. छ. झ. ञ. ट. मिथ्यापवादोपहता. ७ ङ. झ. ट. अप्रीतेनगुणैर्भर्त्रा.

एवमुक्तस्तु वैदेह्या लक्ष्मणः परवीरहा ॥ अमर्षवशमापन्नो राघवाननमैक्षत ॥ २० ॥
स विज्ञाय ततश्छन्दं रामस्याकारमुचितम् ॥ चितां चकार सौमित्रिर्मते रामस्य वीर्यवान् ॥ २१ ॥
[नै हि रामं तदा कश्चित्कालान्तकयमोपमम् ॥ अनुनेतुमथो वक्तुं द्रष्टुं वाऽप्यशकत्सुहृत् ॥२२॥]
अधोमुखं तदा रामं शनैः कृत्वा प्रदक्षिणम् ॥ उपासर्पत वैदेही दीप्यमानं हुताशनम् ॥ २३ ॥
प्रणम्य देवताभ्यश्च ब्राह्मणेभ्यश्च मैथिली ॥ बद्धाञ्जलिपुटा चेदमुवाचाग्निसमीपतः ॥ २४ ॥
यथा मे हृदयं नित्यं नापसर्पति राघवात् ॥ तथा लोकस्य साक्षी मां सर्वतः पातु पावकः ॥२५॥
यथा मां शुद्धचारित्रां दुष्टां जानाति राघवः ॥ तथा लोकस्य साक्षी मां सर्वतः पातु पावकः ॥२६॥
कर्मणा मनसा वाचा यथा नातिचराम्यहम् ॥ राघवं सर्वधर्मज्ञं तथा मां पातु पावकः ॥ २७ ॥
आदित्यो भगवान्वायुर्दिशश्चन्द्रस्तथैव च ॥ अहश्चापि तथा संध्ये रात्रिश्च पृथिवी तथा ॥
यथाऽन्येपि विजानन्ति तथा चारित्रसंयुताम् ॥ २८ ॥
एवमुक्त्वा तु वैदेही परिक्रम्य हुताशनम् ॥ विवेश ज्वलनं दीप्तं निस्सङ्गेनान्तरात्मना ॥ २९ ॥
जनः स सुमहांस्त्रस्तो बालवृद्धसमाकुलः ॥ ददर्श मैथिलीं तत्र प्रविशन्तीं हुताशनम् ॥ ३० ॥
सा तप्तनवहेमाभा तप्तकाञ्चनभूषणा ॥ पपात ज्वलनं दीप्तं सर्वलोकस्य सन्निधौ ॥ ३१ ॥
ददृशुस्तां महाभागां प्रविशन्तीं हुताशनम् ॥ सीतां कृत्स्नास्त्रयो लोकाः पुण्याामाज्याहुतीमिव ॥ ३२॥
प्रचुक्रुशुः स्त्रियः सर्वास्तां दृष्ट्वा हव्यवाहने ॥ पतन्तीं संस्कृतां मन्त्रैर्वसोर्धारामिवाध्वरे ॥ ३३ ॥
ददृशुस्तां त्रयो लोका देवगन्धर्वदानवाः ॥ शप्तां पतन्तीं निरये त्रिदिवादेवतामिव ॥ ३४ ॥
तस्यामग्निं विशन्त्यां तु हाहेति विपुलः स्वनः ॥ रक्षसां वानराणां च संबभूवाद्भुतोपमः ॥ ३५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनविंशत्युत्तरशततमः सर्गः ॥११९॥

अमर्षवशं दैन्यवशं ॥ २० ॥ आकारः भ्रूसंज्ञादिः । मते सिद्धान्ते । स्थित इति शेषः ॥२१—२२॥ अधोमुखमिति ॥ पतिव्रतायाः कथं निर्व्याजं प्रत्ययं पश्यामीति लज्जया मुखदर्शने दाक्षिण्यं भविष्यतीति बुद्ध्या चावनतमुखं । शनैः रामानुभवेन मन्दं यथा तथा ॥ २३—२५ ॥ यथा शुद्धचारित्रामेव मामन्यायेन दुष्टां जानाति । तथा चेत् अदुष्टां दुष्टेति जानाति चेत् । पावकः पातु । रामस्य मयि दोषज्ञानं यथार्थं चेत्पावित्यर्थः ॥ २६—२७ ॥ आदित्य इत्यादिसार्धश्लोक एकान्वयः ॥ आदित्यादयोन्ये च यथा मां चारित्रसंयुतां विजानन्ति तथा मां पातु पावक इति संबन्धः ॥ २८ ॥ परिक्रम्य प्रदक्षिणीकृत्य । निःसङ्गेन शरीरे निरभिलाषेण । अन्तरात्मना मनसा । उपलक्षणे तृतीया ॥ २९—३१ ॥ आज्याहुतीमिवेत्यादिदृष्टान्तेन देव्याः परमपावनत्वं द्योत्यते ॥ ३२ ॥ वसोर्धारां संततां घृतधारां । अनेनाभ्युज्जृम्भणं गम्यते ॥३३॥ देवाः स्वर्गवासिनः । गन्धर्वा भूलोकवासिनः । दानवाः पातालवासिनः । सकलभोगार्हरूपवत्याः सीतायाः अनलप्रवेशस्यानर्हत्वान्निरयपतनानर्हस्वर्गीयदेवतादृष्टान्तः ॥ ३४ ॥ अद्भुतोपमः अद्भुततुल्यः । रावणागमनमारभ्य एतावत्पर्यन्तं सीतायाः परमभागवतभूतलक्ष्मणापचार-

---

ति० राघवःशुद्धचारित्रां अदुष्टामेवमांयदिदुष्टांजानाति अहंतथाचेत् अदुष्टाचेत् पावकोमांसर्वतःपातु केशांबरादिकमपिमाधाक्षीदित्यर्थः ॥२६॥ ति० सातप्तेत्यादि । एतदर्थमेवस्नातायाअलङ्कारयुतायाआनयनंकारितं ॥ ३१ ॥ ति० सर्वाणिरूपाणि सर्वाणि भूतानि । "सर्वाणिरूपाणिविचित्यधीरः" इत्यादौतद्बोधकतयाप्रसिद्धोरूपशब्दः ॥३२॥ इत्येकोनविंशत्युत्तरशततमःसर्गः ॥११९॥

[पा०] १ ङ. ञ. ट. मनश्छन्दं. २ अर्धश्लोकः ङ. ञ. ञ. ट. पाठेषुदृश्यते. ३ ङ. ञ. ञ. ट. मैथिलींदीप्तां. ४ क. च. छ. ञ. ददृशुस्तांविशालाक्षींपतन्तींहव्यवाहनं. ५ सीतांसर्वाणिरूपाणिरुक्मवेदिंनिभांतदा. ६ ङ. ञ. ट. ऋषयोदेवगन्धर्वा यज्ञेपूर्णाहुतीमिव.

विंशत्युत्तरशततमः सर्गः ॥ १२० ॥

सीतायामग्निप्रविष्टायां विमानगणैर्व्योमाङ्गणमलंकुर्वाणैर्ब्रह्मरुद्रादिसुरगणैः श्रीरामंप्रति सीतायास्तत्सचक्रमेणलक्ष्मीनारायणस्वरूपत्वनिवेदनेनानेकप्रकारैःस्तवनपूर्वकं सीतात्यागस्यायुक्तत्वकथनम् ॥ १ ॥

ततो हि दुर्मना रामः श्रुत्वैवं वदतां गिरः ॥ दध्यौ मुहूर्तं धर्मात्मा बाष्पव्याकुललोचनः ॥ १ ॥
ततो वैश्रवणो राजा यमश्चामित्रकर्शनः ॥ सहस्राक्षो महेन्द्रश्च वरुणश्च परंतपः ॥ २ ॥
षडर्धनयनः श्रीमान्महादेवो वृषध्वजः ॥ कर्ता सर्वस्य लोकस्य ब्रह्मा ब्रह्मविदां वरः ॥ ३ ॥
एते सर्वे समागम्य विमानैः सूर्यसन्निभैः ॥ आगम्य नगरीं लङ्कामभिजग्मुश्च राघवम् ॥ ४ ॥
ततः सहस्राभरणान्प्रगृह्य विपुलान्भुजान् ॥ अब्रुवंस्त्रिदशश्रेष्ठाः प्राञ्जलिं राघवं स्थितम् ॥ ५ ॥
कर्ता सर्वस्य लोकस्य श्रेष्ठो ज्ञानवतां वरः ॥ उपेक्षसे कथं सीतां पतन्तीं हव्यवाहने ॥
कथं देवगणश्रेष्ठमात्मानं नावबुध्यसे ॥ ६ ॥
ऋतधामा वसुः पूर्वं वसूनां त्वं प्रजापतिः ॥ त्रयाणां त्वं हि लोकानामादिकर्ता स्वयंप्रभुः ॥ ७ ॥
रुद्राणामष्टमो रुद्रः साध्यानामसि पञ्चमः ॥ अश्विनौ चापि ते कर्णौ चन्द्रसूर्यौ च चक्षुषी ॥ ८ ॥

फलमुपपादितं । वस्तुतः सीताया रावणागमनकाले अग्नौ प्रविष्टत्वात्तस्याः पुनर्गमनार्थं मायासीताया रावणगृहीताया अग्नौ प्रवेश इत्यप्याहुः ॥ ३५ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनविंशत्युत्तरशततमः सर्गः ॥ ११९ ॥

अथ रामस्तवः—ततो हीत्यादि ॥ दुर्मनाः दुःखितमनाः । दध्यौ मनसा ध्यानं कृतवान् ॥१॥ तत इत्यादिश्लोकत्रयमेकं वाक्यं ॥ २—४ ॥ प्रगृह्य उद्धृत्य ॥ ५ ॥ कर्तेत्यादि ॥ पूर्वं ब्रह्मणः अद्वारकं कर्तृत्वं । अत्र सद्वारकं कर्तृत्वमिति न विरोधः । सर्वज्ञस्त्वं कथमज्ञ इवोपेक्षस इति भावः । देवगणश्रेष्ठं ब्रह्मादिदेवगणश्रेष्ठं ॥ ६ ॥ आत्मस्वरूपमेवाह—ऋतधामेत्यादिश्लोकत्रयमेकं वाक्यं ॥ ऋतधामाख्यो वसुरित्यर्थः । प्रजापतिः प्रजास्वामीति वसुविशेषणं । आदिकर्ता । अण्डाधिपतिपर्यन्ताद्वारकसृष्टिकर्तेत्यर्थः । स्वयं प्रभवतीति स्वयंप्रभुः । अनियाम्य इत्यर्थः । रुद्राणां मध्ये अष्टमो रुद्रः तथा साध्यानामित्यत्रापि । अन्ते प्रलये, आदौ सृष्टेः प्राक् दृश्यसे । अनेनोत्पत्तिविनाशराहित्यमुक्तं । एवं सर्वज्ञः सर्वशक्तिः सर्वेश्वरोपि सन् अज्ञ इव विदेहकुले प्रादुर्भूतां सीतां

ति० एवंवदतां हाहेतिवदतां । प्राकृतस्त्रीवत्सीतायेतदनर्हेतिद्वियोगतोबाष्पव्याकुललोचनोभूत्वा मुहूर्तंदध्यौ किमुक्तं किंकृतं किंचातःपरंकर्तव्यमितिचिन्तापरोबभूव ॥ १ ॥ ति० अत्रावसरेदिक्पालसहितोरुद्रोहिरण्यगर्भश्चरामानुग्रहायसमागतावित्याह—ततइति ॥ २ ॥ ति० षडर्धनयनः त्रिनेत्रइत्यर्थः ॥ सर्वलोकस्य ब्रह्मलोकपर्यन्तंसर्वलोकवर्तिपदार्थानांस्रष्टा । ब्रह्मविदां चतुर्मुखप्रजापतिविष्णुदेवराजादिदिक्पालवसिष्ठादृषितत्सन्तानजब्राह्मणाब्रह्मविदः । तेषांवरोज्येष्ठोहिरण्यगर्भः । 'योवैब्रह्माणंविदधाति पूर्वं योवैवेदांश्चप्रहिणोतितस्मै ' इतिश्रुतेः । ' हिरण्यगर्भःसमवर्तताग्रे ' इतिश्रुतेश्च ॥ ३ ॥ ति० प्रगृह्य उद्यम्य । भारतेतु—अग्निप्रवेशंसीतायाअनुक्त्वारामस्यचारित्रसंदेहेसीतादुःखंदृष्ट्वाब्रह्मादिभिस्तुत्यैवसीताङ्गीकारउक्तः । तत्रानुक्तोप्यग्निप्रवेशोमध्ये द्रष्टव्यइत्याहुः । पाद्मेतु—" सातेनगर्हितासाध्वीविवेशज्वलनंतदा । " इत्युक्तं ॥ ५ ॥ ति० कर्तासर्वस्येति । मनुष्यवेहेराघवे सर्वलोककर्तृत्वायुक्तिर्मूलस्वरूपाभिप्रायेण । ज्ञानविदामौपनिषदज्ञानवतां । देवगणा इन्द्रादयः तेषां श्रेष्ठं । ' विष्णुमुखावैदेवाः ' इतिश्रुतेः ॥ स० मूलरूपावतारररूपेषुभेदस्य ' एकमेवनेहनानास्तिकिंचन—पूर्णमदः ' इत्यादिश्रुतिनिषिद्धत्वेनसर्वथानिर्विशेषत्वमेवमन्तव्यमित्याह—कर्तेति । अन्यथादाशरथौ ' कर्तासर्वस्यलोकस्य ' इत्याद्ययुक्तंस्यात् ॥ ६ ॥ स० इदानींरामस्यविभूतिरूपाणिवक्तुंतद्विभूतीनां " नान्तोस्तिममदिव्यानांविभूतीनांपरंतप " इत्याद्युक्तरीत्याऽनन्तत्वेनसामस्त्येनवक्तुमशक्यत्वात्प्राधान्येनाह—ऋतधामेति । वसूनांमध्येपूर्वत्वं ऋतधामानामवसुः । विभूतिरूपेणतत्रसंनिहितइत्यर्थः । एवमुत्तरत्रप्रजापतीनांमध्यइतिपूरणीयं ॥ अष्टमःमहादेवाख्यः कैलासवासीशंकरोत्रविवक्षितः । पञ्चमोवीर्यवान्नाम ॥ ७ ॥ ति० विराड्रूपंवर्णयति । अश्विनौचेत्यादि ॥ स० इदानींसंकुच्यविश्वरूपमाह—अश्विनाविति । कर्णयोर्दिग्देवतानामिवाश्विनोरप्यभिमानादियमुक्तिः

[पा०] १ ङ. ञ. ट. यमश्चपितृभिस्सह. २ ङ. ञ. ट, वरुणश्चजलेश्वरः. ३ क. ग. ङ. ञ. ज्ञानविदांविभुः.

अन्ते चादौ च लोकानां दृश्यसे त्वं परंतप ॥ उपेक्षसे च वैदेहीं मानुषः प्राकृतो यथा ॥ ९ ॥
इत्युक्तो लोकपालैस्तैः स्वामी लोकस्य राघवः ॥ अब्रवीत्त्रिदशश्रेष्ठान्रामो धर्मभृतां वरः ॥ १० ॥
आत्मानं मानुषं मन्ये रामं दशरथात्मजम् ॥ योहं यस्य यतश्चाहं भगवांस्तद्ब्रवीतु मे ॥ ११ ॥
इति ब्रुवन्तं काकुत्स्थं ब्रह्मा ब्रह्मविदां वरः ॥ अब्रवीच्छृणु मे राम सत्यं सत्यपराक्रम ॥ १२ ॥
भवान्नारायणो देवः श्रीमांश्चक्रायुधो विभुः ॥ एकशृङ्गो वराहस्त्वं भूतभव्यसपत्नजित् ॥ १३ ॥
अक्षरं ब्रह्म सत्यं च मध्ये चान्ते च राघव ॥ लोकानां त्वं परो धर्मो विष्वक्सेनश्चतुर्भुजः ॥१४॥

किमर्थमुपेक्षस इत्यर्थः ॥ ७—९ ॥ लोकपालैः लोकरक्षकैः ॥ १० ॥ ब्रह्मादिभिः सामान्यतः स्तूयमानोपि सर्वदेवपूजनीयाच्चतुर्मुखान् स्वप्रभावं लोके प्रख्यापयितुं स्वसौशील्यं दर्शयति—आत्मानमिति ॥ आत्मानं मानुषं मन्ये । परत्वापेक्षया मानुषत्वाभिनय एव ममाभिमत इत्यर्थः । अत्रापि विशेषमाह—राममिति । रामं रामनामकं । ततोप्यतिशयमाह—दशरथात्मजमिति । अवतारापेक्षया चक्रवर्तिपुत्रत्वमेव प्रियतममिति भावः । स्वस्य विष्ण्ववतारत्वं सुग्रीवादिभिरनवगतमिति तत्प्रतिपत्त्यर्थं स्वस्वरूपं पृच्छति—योहमिति । योहमिति स्वरूपप्रश्नः । यस्येति संबन्धिप्रश्नः । यतइति प्रयोजनप्रश्नः । भगवांस्तद्ब्रवीत्विति । चक्रवर्तिपुत्रत्वमेव ममात्यन्तप्रियतमं । स्वयं सर्वज्ञतया ममानभिमतमपि परत्वं प्रकटयत्वित्यर्थः । आकारगोपनविवरणस्यानभिमतत्वेपि स्वयमनुमतिदानं रावणनिरसनेन निष्पन्नकार्यतया ॥११—१२॥ स्वरूपप्रश्नोत्तरमाह—भवानिति ॥ नाराः अयनं यस्यासौ नारायणः । "आपो नारा इति प्रोक्ता आपो वै नरसूनवः । ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः" इति मनुस्मरणात् । तेन जगत्कारणत्वमुक्तं । "एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी" इति श्रुतेः । अवाप्तसमस्तकामस्य जगद्व्यापारानुपपत्तिं परिहरति—देव इति । दीव्यतीति देवः क्रीडाप्रवृत्तः । लीलायाः प्रयोजनत्वात्परिपूर्णस्यापि व्यापारः संभवतीति भावः । एवं परत्वासाधारणं नामधेयमुक्त्वा पत्नीवैशिष्ट्यमाह—श्रीमानिति । नित्यं श्रीरस्यास्तीति श्रीमान् । नित्ययोगे मतुप् । असाधारणमायुधमाह—चक्रायुध इति । स्वरूपवैलक्षण्यमाह—विभुरिति । व्यापक इत्यर्थः । फलितं रक्षकत्वमाह—एकशृङ्गो वराह इति । प्रलयोदधिसंप्लवे वराहरूपं कृत्वा भूमेरुद्धारक इत्यर्थः । "उद्धृतासि वराहेण" इति श्रुतेः । अनिष्टनिवर्तकत्वमाह—भूतभव्यसपत्नजिदिति । भूताः सपत्नाः मधुकैटभादयः भव्याः सपत्नाः शिशुपालादयः तान् जयतीति तथोक्तः ॥ १३ ॥ अथ सर्वविद्योपसंहारार्थमाह—अक्षरमित्यादि ॥ न क्षरतीत्यक्षरं अश्नोति व्याप्नोतीति वा अक्षरं । "एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति" इति श्रुतेः । भवानित्यनुषज्यते । अक्षरं भवान् । एवमुत्तरत्राप्यनुषञ्जनीयं । बृहति बृंहयतीति च ब्रह्म । "बृहति बृंहयति तस्मादुच्यते

॥८॥ ती० दिक्पालैःस्तूयमानोपिैःपूजनीयाच्चतुर्मुखादात्मस्वरूपगुणविभूतीःस्वजनेषुप्रख्यापयितुंस्वसौशील्यंवर्णयति—आत्मानमिति । यः यत्स्वरूपः । यस्य यदीयः । यतः प्रयोजनाद्धेतोः उत्पन्नः ॥ तनि० अत्रसंप्रदायोदाहरणं । शङ्खचक्रगदापाणे इत्युक्त्यापरत्वव्यञ्जकतयातत्रानादरेणाधःकृतमुखत्वं द्वारकानिलयेत्यवतारोल्लेखनेनकिंचिदुत्तानमुखत्वं गोविन्दपुण्डरीकाक्षेतिगोपालपुत्रत्वश्रवणेनपरत्वापेक्षयावशुद्देवपुत्रत्वमेवाभिमतमिति विकसिताक्षत्वंचव्यज्यतइति ॥ ११ ॥ तनि० श्रीमानिति नित्ययोगेमतुप् । भवान्श्रीमानिति 'सीतालक्ष्मीर्भवान्विष्णुः' इत्युक्तश्रियःपतित्वंनित्यानपायित्वंचदर्शितं । एकशृङ्गोवराहः सवराहो रूपंकृत्वेतिश्रुत्युक्तोवराहस्त्वं ॥ ती० नारायणः नराणांसमूहोनारं । तस्यायनं प्राप्यभूतः । देवः स्वप्रकाशः । एकशृङ्गोवराहः आदिवराहः । तस्यैकशृङ्गतास्कान्देदर्शिता "दंष्ट्रयापर्वतेन्द्राणांचलनंकृतवान्महत् । ततस्तुष्टुवुर्देवाएकशृङ्गत्वसिद्धये । एकशृङ्ग वराहोभूत्तदाप्रभृतिमाधवः" इति ॥ ति० भूतभव्यसपत्नजित् भूतभव्यकालरूपोयःसपत्नः जनिमृतिहेतुत्वात् । तंजयतिसः । नित्यइतियावत् ॥ स० भूतभव्यसपत्नजित् भूताः हिरण्याक्षहिरण्यकशिप्वादयः । भव्याः शिशुपालदन्तवक्रकंसादयः । वर्तमानरावणखरदूषणादिशत्रुजयस्यप्रत्यक्षसिद्धत्वादनुक्तिः । यद्वा भूतभव्यशब्देनजन्ममरणहेतूकालावुच्येते । तद्रूपसपत्नजित् । आद्यन्तशून्यइत्यर्थः । मध्यकालजयस्यपूर्वोत्तरकालजयेनैवसिद्धेरनुक्तिः ॥ १३ ॥ ति० लोकानां धर्माधिकृतप्राणिनां त्वमेवपर-

[पा०] १ क. ख. घ.—ट. ब्रुवाणं.

शार्ङ्गधन्वा हृषीकेशः पुरुषः पुरुषोत्तमः ॥ अजितः खड्गधृद्विष्णुः कृष्णश्चैव बृहद्बलः ॥ १५ ॥
सेनानीर्ग्रामणीश्च त्वं बुद्धिः सत्त्वं क्षमा दमः ॥ प्रभवश्चाप्ययश्च त्वमुपेन्द्रो मधुसूदनः ॥ १६ ॥
इन्द्रकर्मा महेन्द्रस्त्वं पद्मनाभो रणान्तकृत् ॥ शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः ॥ १७ ॥

परं ब्रह्म " इति श्रुतिनिर्वचनात् । सत्यं अविपर्यस्तं । षड्भावविकारशून्यमित्यर्थः । अस्ति जायते परिणमते विवर्धते अपक्षीयते विनश्यतीति षड्भावविकाराः । मध्ये चान्ते चेति । चकारादादौ चेत्यर्थः । वर्तमानमिति शेषः । नित्यत्वमुक्तमनेन । लोकानां परो धर्मः सिद्धरूपो धर्मः । सर्वलोकश्रेयःसाधनीभूत इत्यर्थः । विष्वग्द्रीची सर्वगता सेना यस्य सः विष्वक्सेनः । सर्वस्वामीत्यर्थः । चतुर्भुजः युगपच्चतुर्विधपुरुषार्थप्रद इत्यर्थः ॥ १४ ॥ शृङ्गविकारः शार्ङ्गं धनुर्यस्य स शार्ङ्गधन्वा । " धनुषश्च " इत्यनङादेशः । अनेन रक्षणोपकरणवत्त्वमुक्तं । हृषीकाणां इन्द्रियाणां ईशः नियन्ता । सर्वेन्द्रियाकर्षकदिव्यविग्रह इत्यर्थः । पुरु सनोतीति पुरुषः । " षणु दाने " इत्यस्माद्धातोर्डप्रत्ययः । बहुप्रद इत्यर्थः । यद्वा पुरि हृदयगुहायां शेत इति पुरुषः । " पुरि शयं पुरुषमीक्षते " इति निर्वचनश्रुतेः । यद्वा येन जगत्पूर्णं स पुरुषः । "तेनेदं पूर्णं पुरुषेण सर्वं" इति श्रुतेः । यद्वा पुरातनत्वात् पुरुषः । " पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वं " इति श्रुतेः । पुरुषेभ्यः क्षराक्षरेभ्यः उत्तमः पुरुषोत्तमः । " यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः । अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" इति हि गीयते । यद्वा पुरुषेषु उत्तमः पुरुषोत्तमः । सप्तमीति योगविभागान्नागोत्तमादिवत्समासः । कैश्चिदपि न जित इत्यजितः । आश्रितसंरक्षणे कदाचिदपि भङ्गं न प्राप्नोतीत्यर्थः । खड्गं नन्दकाख्यं धरतीति खड्गधृत् । विष्णुः व्यापनशीलः । यो दयापदं प्राप्नोति तं तदा तत्रैव स्थितो रक्षतीत्यर्थः । कृष्णः भूनिर्वृतिहेतुः । " कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः " इति निर्वचनात् । बृहत् बलं धारणसामर्थ्यं यस्य सः बृहद्बलः ॥ १५ ॥ सेनां नयतीति सेनानीः । देवसेनानिर्वाहक इत्यर्थः । ग्रामं नयतीति ग्रामणीः । दिव्यजनपदादिपालक इत्यर्थः । बुद्धिः सत्त्वं क्षमा दम इति बुद्ध्यादिप्रवर्तक इत्यर्थः । "न देवा यष्टिमादाय रक्षन्ति पशुपालवत् । यं हि रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तं"इति वचनात् । "महान्प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः" इति श्रुतेश्च । प्रभवत्यस्माज्जगदिति प्रभवः उत्पत्तिस्थानं । सर्वोपादानमित्यर्थः । अप्ययः सर्वजगल्लयस्थानं । "कृष्ण एव हि भूतानामुत्पत्तिरपि चाप्ययः"इति श्रुतेः । उपेन्द्रः इन्द्रानुजत्वेन प्रथममवतीर्णः । मधुसूदनः वेदापहारकदैत्यसंहारी ॥१६॥ इन्द्रस्य कर्मेव कर्म यस्य स इन्द्रकर्मा । "तं विष्णुरन्वतिष्ठत"इति श्रुतेः । महेन्द्रः निरतिशयैश्वर्यसंपन्नः । पद्मं नाभौ यस्य स पद्मनाभः । ममापि जनक इत्यर्थः । वक्ष्यति हि—"पद्मे दिव्येर्कसंकाशे नाभ्यामुत्पाद्य मामपि । प्राजापत्यं त्वया कर्म सर्वं मयि निवेशितं" इति । रणे अन्तं शत्रुनाशं करोतीति रणान्तकृत् । शरण्यं शरणार्हं । तदुचितज्ञानशक्तिदयादिसंपन्नमित्यर्थः । शरणं रक्षणोपायं "उपाये गृहरक्षित्रोः शब्दः शरणमित्ययं" इति वचनात् । "सर्वस्य शरणं सुहृत्"

मोधर्मः ॥ " यज्ञोवैविष्णुः " इत्यादिश्रुतेरश्वमेधान्तधर्मस्त्वमेव ॥ १४ ॥ **ती०** शार्ङ्गधन्वा कालरूपंशार्ङ्गं धनुर्यस्यसः । पुरूणिफलानिसनोतीतितथा । 'षणु दाने' । पुरि हृदयपुण्डरीकेशेतइतिपुरुषः । पूर्णत्वाद्वापुरुषः । 'तेनेदंपूर्णंपुरुषेणसर्वं' इतिश्रुतेः । अजितः गुणैरैश्वर्येणचकेनाप्यजितः । विद्यामयंनन्दकाख्यंखड्गंधारयतीतिखड्गधृत् ॥ वृहद्बलः बृहन्तिवानरबलानियस्येतितथा ॥१५॥ **तनि०** क्षमा क्षमानिर्वाहकः । 'कीर्त्याःकीर्तिःक्षमाक्षमा' इत्युक्तत्वात् । दमः इन्द्रियजेता । प्रभावः उत्पत्तिमत्कार्यवर्गशरीरः । स्थूलचिदचिद्विशिष्टस्यकार्यत्वात् । ' बहुस्यां ' इत्यादिश्रुतेः ॥ **स०** इनेनपत्यासहिताःसेनाःहिरण्यगर्भमारभ्ययवसावसानाजीवास्तान् आसमन्तान्नयतीतिवा सेनानीः । सर्वं सर्वान्तर्यामी ॥ क्षमा भजकापराधसहनं । दमः इन्द्रियनिग्रहः । धर्माणांधर्मिणाऽभेदादियमुक्तिः ॥ प्रभवाप्ययौ सृष्टिविनष्टी । कार्यकारणभावापन्नत्वादयंवैलोकोमहानान्नीत्यादिवच्छब्दसांकर्य ॥ १६ ॥ **तनि०** इन्द्रस्येवकर्मयस्यसइन्द्रकर्मा । वृत्रादिवधस्येन्द्रान्तर्यामिकर्तृकत्वात् । महर्षयः अलौकिकतत्वसाक्षात्कारसमर्थाः । तत्रापिदिव्याः अवताररहस्यादिविशेषज्ञानवन्तोवाल्मीकिप्रभृतयः । यद्वा नित्यसूरयः । ' तद्विप्रासोविपन्यवोजागृवाँसः ' इति श्रुतेः ॥ **ति०** ' प्रजापतिरिन्द्रमसृजत ' इतिश्रुतेः इन्द्रः कर्म सृष्टिर्यस्य सः इन्द्रकर्मा ॥ **स०** रणान्तकृत् रणेअन्तः निर्णयः

[पा०] १ ठ. सर्व.

सहस्रशृङ्गो वेदात्मा शतजिह्वो महर्षभः ॥ त्वं त्रयाणां हि लोकानामादिकर्ता स्वयंप्रभुः ॥
सिद्धानामपि साध्यानामाश्रयश्चासि पूर्वजः ॥ १८ ॥
त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारः परन्तपः ॥ प्रभवं निधनं वा ते न विदुः को भवानिति ॥ १९ ॥
दृश्यसे सर्वभूतेषु ब्राह्मणेषु च गोषु च ॥ दिक्षु सर्वासु गगने पर्वतेषु वनेषु च ॥ २० ॥
सहस्रचरणः श्रीमाञ्शतशीर्षः सहस्रदृक् ॥ त्वं धारयसि भूतानि वसुधां च सपर्वताम् ॥ २१ ॥
अन्ते पृथिव्याः सलिले दृश्यसे त्वं महोरगः ॥ त्रींल्लोकान्धारयन्राम देवगन्धर्वदानवान् ॥ २२ ॥

इति श्रुतेः।महर्षयः अलौकिकतत्त्वसाक्षात्कारसमर्थाः। दिव्या महर्षयः सनकादयः। "यत्रर्षयः प्रथमजा ये पुराणा" इत्युक्ता नित्यसूरयो वा । नित्यनिर्दोषा वेदावा ॥ १७ ॥ सहस्रशृङ्ग इत्यादिसार्धश्लोक एकान्वयः ॥ सहस्रशृङ्गः सहस्रशाखारूपशृङ्गः । शतजिह्वः अनेकविधचोदनारूपजिह्वः । ऋषभः कर्मणामालोचयिता । "ऋष आलोचने" इति धातुः । महांश्चासावृषभश्च महर्षभः । एवंभूतो वेदात्मा त्वमित्यर्थः । आदिकर्ता समष्टिकर्ता । अनेन व्यष्टिकर्तुः स्वस्याव्यावृत्तिः । स्वयंप्रभुः अनन्यप्रेर्यः । "न तस्येशे कश्चन"इति श्रुतेः । सिद्धानां मुक्तानां । साध्यानां "यत्र पूर्वे साध्याः सन्ति देवा" इत्युक्तानां नित्यानामाश्रयः साम्यभोगप्रदः । पूर्वजः आश्रितापेक्षायाः पूर्वं तद्रक्षणाय जनितः ॥ १८ ॥ सर्वकर्मसमाराध्यत्वमाह—त्वं यज्ञ इति ॥ त्वं यज्ञः । "यज्ञो वै विष्णुः"इति श्रुतेः । यज्ञनिर्वाहकपशुहविराज्यस्रुक्स्रुवादिशरीरको यज्ञाराध्येन्द्रादिशरीरकश्चेत्यर्थः । "ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतं" इति हि गीयते । वषट्कार इत्युपलक्षणं । आश्रावयेति चतुरक्षरम्अस्तुश्रौषडिति चतुरक्षरम् यजेति द्व्यक्षरम् ये यजामह इति पञ्चाक्षरमित्युक्तानां सप्तदशाक्षराणां । तैराराध्य इत्यर्थः । तथोक्तं—"चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च। हूयते च पुनर्द्वाभ्यां स नो विष्णुः प्रसीदतु"इति ॥ ओंकारः प्रणववाच्यः । "ओमित्येकाक्षरं ब्रह्म"इति श्रुतेः । परन्तपः उत्कृष्टतप इत्यर्थः । उत्कृष्टतपःसमाराध्य इति यावत्। ते प्रभवं निधनं वा न विदुः, वेदा वैदिकाश्च को भवानिति च न विदुः । अपरिच्छिन्नमहिमत्वात् । "क इत्था वेद यत्र सः" इति श्रुतेः ॥१९॥ सर्वान्तर्यामित्वमाह—दृश्यस इति ॥ योगिभिरिति शेषः । अनेन संबन्धप्रश्नोत्तरमुक्तं ॥ २० ॥ पुरुषसूक्तार्थमाह—सहस्रेति ॥ अत्र शतशब्दः सहस्रवाचकः । "सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्"इति श्रुतेः । श्रीमानिति भूपतित्वस्याप्युपलक्षणं । "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ "इत्युत्तरनारायणोक्तेः । अथ सर्वाधारत्वमाह—त्वमिति । भूतानीति भूव्यतिरिक्तमहाभूतपरं । अनेनाधाराधेयभावसंबन्ध उक्तः ॥ २१ ॥ दैनंदिनप्रलयवृत्तान्तमाह—अन्त इति ॥ पृथिव्या अन्ते विनाशे । महानुरगः शेषो यस्य सः शेषशायी सन् । धारयन् कुक्षौ धारयन् दृश्यसे ।

अवश्यंयुद्धेसंनद्धाःस्यामेतियेषांतेरणान्ताः । तान्कर्तयति छिनत्तीतिकृत् ॥ १७ ॥ **तनि०** वेदात्मा वेदपुरुषान्तर्यामी । पूर्वजः 'पूर्वमेवाहमिहासं' इतिश्रुतेः । हिहेतौ । आदिकर्तृत्वेपूर्वजत्वंहेतुरित्यर्थः । सिद्धाद्याश्रयत्वेचायमेवहेतुः ॥ **ती०** सहस्रशृङ्गोवेदात्मा सहस्रशाखसामवेदस्वरूपः । 'सहस्रंसामवर्त्म'इतिप्रसिद्धेः । 'वेदानांसामवेदोस्मि' इतिस्मृतेः । शतजिह्वः नित्यनैमित्तिककाम्यरूपसामान्यविशेषचोदनारूपशतजिह्वः । शतशीर्षइति वा पाठः । आदिकर्ता ब्रह्मादीनामपिकर्ता । स्वयंप्रभुः अनन्यप्रेर्यः । साध्यन्ते आराध्यन्तइतिसाध्याः । तेषांसिद्धानांमुक्तानामपि आश्रयःप्राप्यः । पूर्वजः सृष्टेःपूर्वमपिस्थितः ॥ **कतक०** महर्षभः श्रेष्ठतमः शिशुमारप्रजापतिरूपइत्यर्थः ॥ **ति०** सिद्धानां आरूढानां । साध्यानां आरुरुक्षूणां । आश्रयः प्राप्यः । पूर्वजश्चासि ' अहमस्मिप्रथमजाऋतस्य ' इत्यादिश्रुतेः ॥ १८ ॥ **ती०** नविदुःकोभवानिति इदंतयानविदुरित्यर्थः ॥ १९ ॥ **तनि०** सर्वान्तर्यामित्वमाह—दृश्यसइति पण्डितैरितिशेषः । 'भूतानिविष्णुर्भुवनानिविष्णुर्वनानिविष्णुर्गिरयोदिशश्च । नद्यःसमुद्राश्चसएवसर्वंयदस्तियन्नास्तिचविप्रवर्य ॥ ' इतिहिस्मर्यते ॥ **ती०** सर्वात्मतयास्तौति—**दृश्यसइति** । सर्वभूतेषुगोषुच अन्तर्यामितयादृश्यसे । गोब्राह्मणयोर्विश्वान्तर्वर्तित्वेपिपृथगभिधानंविशिष्टाविर्भावस्थानतया । एवंसर्वजङ्गमान्तर्यामितामभिधायस्थावरान्तर्यामितामाह—दिक्ष्विति ॥ २० ॥ **ती०** इदानींसंकर्षणात्मनास्तौति—**अन्तइति** । महोरगः संकर्षणइत्यर्थः ॥ २२ ॥

[**पा०**] १ ङ. झ. ञ. ट. शतशीर्षो. २ ङ. च. छ. झ. ञ. ट. परात्परः. ३ ङ. झ. ट. नोविदुः. ४ ङ. झ. नदीषुच. ५ ज. महोरगे.

अहं ते हृदयं राम जिह्वा देवी सरस्वती ॥ देवा गात्रेषु रोमाणि निर्मिता ब्रह्मणः प्रभो ॥ २३ ॥
निमेषस्ते भवेद्रात्रिरुन्मेषस्ते भवेद्दिवा ॥ संस्कारास्तेऽभवन्वेदा न तदस्ति त्वया विना ॥ २४ ॥
जगत्सर्वं शरीरं ते स्थैर्यं ते वसुधातलम् ॥ अग्निः कोपः प्रसादस्ते सोमः श्रीवत्सलक्षणः ॥ २५ ॥
त्वया लोकास्त्रयः क्रान्ताः पुराणे विक्रमैस्त्रिभिः ॥ महेन्द्रश्च कृतो राजा बलिं बद्ध्वा महासुरम् ॥२६॥
सीता लक्ष्मीर्भवान्विष्णुर्देवः कृष्णः प्रजापतिः ॥ वधार्थं रावणस्येह प्रविष्टो मानुषीं तनुम् ॥ २७ ॥
तदिदं नः कृतं कार्यं त्वया धर्मभृतां वर ॥ निहतो रावणो राम प्रहृष्टो दिवमाक्रम ॥ २८ ॥
अमोघं बलवीर्यं ते अमोघस्ते पराक्रमः ॥ अमोघं दर्शनं राम न च मोघः स्तवस्तव ॥ २९ ॥

मार्कण्डेयादिभिरिति शेषः ॥ २२ ॥ अथ 'अङ्गान्यन्या देवताः'इत्युक्तसर्वदेवाद्यात्मकत्वं दर्शयति—अहं त इत्यादिना ॥ हृदयं वक्षः । ब्रह्मणः परब्रह्मणः । ते देवा गात्रेषु स्थिताः रोमाणीव स्थिताः तद्वदविनाभूताः ॥२३॥ दिवा अहः । वेदाः संस्काराः निःश्वसितभूता इत्यर्थः । "तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः "इत्यादि श्रुतेः । किं बहुना संग्रहेणोच्यत इत्याह—न तदस्ति विना त्वयेति । यत्त्वया विनाभूतं त्वदनन्तर्यामिकं । तन्नास्तीत्यर्थः ॥२४॥ एवं निषेधश्रुत्यर्थमुक्त्वा "सर्वं खल्विदं ब्रह्म, तत्त्वमसि"इत्यादिसामानाधिकरण्यश्रुत्यर्थमाह—जगदिति ॥ सर्वं जगत् ते शरीरं तव नियमेन आधेयं विधेयं शेषभूतं चेत्यर्थः । इदमेव हि शरीरलक्षणं । एवं जगतस्त्वच्छरीरत्वाच्छरीरगतविशेषणानित्वद्विशेषणानीत्याह—स्थैर्यमिति । वसुधातलं वसुधातलस्थैर्यं । "काठिन्यवान्यो बिभर्ति तस्मै भूम्यात्मने नमः"इति विष्णुपुराणोक्तेः । अग्निः अग्नितापः । ते कोपः । सोमः सोमगतप्रसादः । ते प्रसादः त्वत्प्रसाद इत्यर्थः ॥ २५ ॥ त्वया त्रिविक्रमेण । पुराणे पूर्वकाले । लोकाक्रमणफलमाह—महेन्द्र इति । राजा कृतः । त्रैलोक्यस्येति शेषः ॥ २६ ॥ प्रयोजनप्रश्नस्योत्तरमाह—वधार्थमिति ॥ २७—२९ ॥

ति० हेराम त्रींल्लोकान्धारयंस्त्वंविराट् । नारायणोसीत्यर्थः । एतेन यतश्चाहमुत्पन्नइतिप्रश्नस्योत्तरंदत्तं । एवंदेहत्वमुपदिश्यदेहित्वमुपदिशति—**अहंतेहृदयमिति** । हेराम ते रामोपग्रहस्य तवहृदयं सर्वाधारभूतं आन्तरं त्वदात्मतत्वमहमेवज्ञानस्वरूपः । महाकाशइवघटाकाशस्य । तवजिह्वामन्निर्मिता । वाग्देवीसरस्वती । **स०** तेहृदयं प्रीतिपात्रं । हृदयमाश्रितइति । सरस्वती जिह्वा तदाश्रिता । देवी द्योतमाना । देवाः रोमाणि तत्रस्थाओषध्याद्यभिमानिनः । एवंगात्रेषुअवयवेषु देवाः वाय्वादयः । ब्रह्मणा मया ॥ २३ ॥ **स०** निमेषोन्मेषौ रात्रिर्दिनंच । स्मृतेतिपुराणप्रसिद्धिमाह ॥ वेदास्तवसंस्काराःसंस्क्रियन्तेलोकाएभिरितिसंस्काराः कर्तव्याकर्तव्यव्यापारव्यवस्थापकाः ॥ २४ ॥ **तनि०** त्वयालोकास्त्रयःक्रान्ताइति बलेःप्रतिग्रहीतेत्यर्थः । एतेन वामनावतारोऽप्यजितः । विक्रमैःपादविन्यासैस्त्रिभिःक्रान्ताइति त्रिविक्रमावतारःकथितः । ' इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ' इतिश्रुतेः । पुराणे पूर्वकाले । महेन्द्रोराजाकृतः । बलिनापदान्निर्यासितइन्द्रः पुनस्त्वयाराजाकृतइत्यर्थः ॥ २६ ॥ **तनि०** भगवदवतारेषुलक्ष्म्याअनुवृत्तिमाह—सीतेति । कृष्णः भविष्यत्कृष्णावतारश्चत्वमेवेत्यर्थः । प्रजापतिः प्रजापतिशब्दवाच्यस्त्वमेव । अवतारप्रयोजनमाह—वधार्थमिति । मानुषीं मनुष्यसंस्थानरूपां । तनुं अप्राकृतशरीरं । **स०** प्रजापतिः सर्वप्रजापालकः । कृष्णः प्रलयेसर्वंजगत्स्वस्मिन्कर्षतीतितन्नामकोविष्णुर्देवोभगवान् । " कृष्णोमुक्तैरिज्यते " इतिमूलरूपेपिकृष्णशब्दप्रयोगात् । मानुषींतनुं कौसल्यादेहं । भगवद्देहस्यचिदानन्दमात्रत्वस्यस्थितत्वात् ॥ २७ ॥ **ति०** अथवृत्तानुष्ठानानुवादपूर्वकंवर्तिष्यमाणकर्तव्यमाह—निहतइति । रावणोनिहतः । एवंचावतारकार्यंनिर्वृत्तं । अतःपरंमहाराज्येनकिंचित्कालंप्रहृष्टःसन्दिवं परनाकाख्यंब्रह्मलोकमाक्रम प्रागुहि । एवंसिद्धकार्यत्वात्तेवीर्यंबलं अमोघं । तन्मूलाःपराक्रमाश्च नमोघाः ननिष्फलाः । अपितुसफलाएवेत्यर्थः ॥ **स०** दिवं वैकुण्ठं ॥ २८ ॥ **ति०** अथरामस्यसर्वोपास्यत्वंसर्वाभीष्टसिद्धिप्रदत्वंचाह—अमोघमिति । हेराम तेदर्शनं एवंमूर्तेस्तेदर्शनंसुग्रीवादीनाममोघं । एवंकालान्तरेश्रुत्वा चित्तत्वद्रष्टृणामप्यमोघंऐहिकामुष्मिकसकलफलसाधनं । तवसंस्तवः रामनारायणेत्येवंरूपः अमोघः सकलेष्टदः । येचत्वयिभक्तिमन्तः सोहमेवेतिगौणवृत्त्यात्वदुपासकाः तवाहमितिवोपासकाः तेप्यमोघं संसारमार्गमतिक्रान्ताः सत्यसंकल्पत्वादिमन्तःसन्तोमल्लोकप्राप्तिरूपामोघफलाभविष्यन्ति । किंपुनर्येसर्वात्मनात्वदभेदध्यानवन्त इत्यर्थः ॥ २९ ॥

[पा०] १ ठ. ब्रह्मणा. २ ङ. ञ. ट. रुन्मेषोदिवसस्तथा. ३ ङ. ञ. नैतदस्ति. ४ ख. घ. ङ. ञ. ट. पुराखैर्विक्रमैः.

अमोघास्ते भविष्यन्ति भक्तिमन्तश्च ये नराः ॥ ३० ॥
ये त्वां देवं ध्रुवं भक्ताः पुराणं पुरुषोत्तमम् ॥ प्राप्नुवन्ति सदा कामानिह लोके परत्र च ॥ ३१ ॥
इममार्षं स्तवं नित्यमितिहासं पुरातनम् ॥ ये नराः कीर्तयिष्यन्ति नास्ति तेषां पराभवः ॥ ३२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे विंशत्युत्तरशततमः सर्गः ॥ १२० ॥

एकविंशत्युत्तरशततमः सर्गः ॥ १२१ ॥

मूर्तीभूय सीतायाः स्वाङ्कारोपणपूर्वकंकुण्डादुद्धृतेनाग्निना रामंप्रति सीतायानिर्दोषत्वोद्घोषणेन तत्स्वीकारचोदना ॥ १ ॥ रामेणापि सीतायाअदोषत्वोत्कीर्तनपूर्वकमग्निप्रवेशोपेक्षणस्य लोकापवादपरिजिहीर्षामूलकत्वोक्त्या तत्स्वीकारः ॥ २ ॥

एतच्छ्रुत्वा शुभं वाक्यं पितामहसमीरितम् ॥ अङ्केनादाय वैदेहीमुत्पपात विभावसुः ॥ १ ॥
स विधूय चितां तां तु वैदेहीं हव्यवाहनः ॥ उत्तस्थौ मूर्तिमानाशु गृहीत्वा जनकात्मजाम् ॥ २ ॥
तरुणादित्यसंकाशां तप्तकाञ्चनभूषणाम् ॥ रक्ताम्बरधरां बालां नीलकुञ्चितमूर्धजाम् ॥ ३ ॥
अक्लिष्टमाल्याभरणां तथारूपां मनस्विनीम् ॥ ददौ रामाय वैदेहीमङ्के कृत्वा विभावसुः ॥ ४ ॥
अब्रवीच्च तदा रामं साक्षी लोकस्य पावकः ॥ ५ ॥

अमोघा इत्यर्धं ॥ अमोघाः अप्रतिबद्धफलाः ये त्वयि भक्तिमन्तः ते अविलम्बेन फलमभिमतं लभन्त इति इदं चावतारस्यैकं प्रयोजनं ॥ ३० ॥ इदमेव विवृणोति—य इति ॥ त्वामुद्दिश्येति शेषः । अनेन सर्वस्मादपि तपःप्रभृतेः रामभक्तिरेव परो धर्म इत्युक्तं । काम्यन्त इति कामाः भोगोपकरणानि । इह लोके परत्र च प्राप्नुवन्ति । सदेत्यनेन यावच्छरीरपातमत्र भोगान् भुक्त्वा शरीरावसाने परलोके सर्वान्कामान्प्राप्नुवन्तीत्यर्थः ॥ ३१ ॥ ये रामभक्तिं कर्तुमदक्षास्तेषामिदं स्तोत्रमेव तादृशफलप्रदमित्याह—इममिति ॥ ऋषिः वेदः तत्संबन्ध्यार्षं । अतएव पुरातनं । पराभवः पुनरावृत्तिः ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने विंशत्युत्तरशततमः सर्गः ॥ १२० ॥

विभावसुः अग्निः ॥ १ ॥ विधूय चितां शिथिलीकृत्य । मूर्तिमान् मनुष्यविग्रहवान् ॥ २ ॥ तरुणादित्येत्यादिश्लोकद्वयमेकान्वयं ॥ तथारूपां प्रवेशकालिकरूपवतीं । मनस्विनीं प्रसन्नमनस्कामित्यर्थः ।

ति० इदानींतत्परैतत्स्तोत्रपाठफलमुपदिशति—इममिति । ऋषिर्वेदः । तदुक्तसगुणनिर्गुणब्रह्मविद्याप्रतिपादकत्वात् । एवंभूतं ब्रह्मविद्यास्तवं येकीर्तयिष्यन्ति तेषांपराभवः परैः इहामुत्रलोकशत्रुभिःपुत्रदारादिभिःपापैश्चाभिभवःआक्रमणं नास्ति नभविष्यतिच ॥ स० ऋषिः वेदद्रष्टा । तद्दृष्टत्वादार्षोवेदः । तत्तुल्यंस्तवंस्तोत्रं । इतिहासं अनादिसिद्धकथाविषयत्वात् । पराभवः बाह्याभ्यन्तरशत्रुतिरस्करणंनास्ति ॥ ३२ ॥ इतिविंशत्युत्तरशततमःसर्गः ॥ १२० ॥

ति० पितामहसमीरितं शुभं परमशोभनं । निजब्रह्मत्वप्रतिपादकंवाक्यं । श्रुत्वा ध्यात्वाचप्रसन्नतयाऽवस्थानकालेइतिशेषः । अङ्केनादाय 'रयिंचपुत्रांश्चादादग्निर्मह्यं'इतिश्रुत्यर्थमपरोक्षमेवसंपादयन्नित्यर्थः ॥ स० शुभं स्वाभिलषितसीतारघुवरसंयोगसाधनत्वात् । अङ्केन आरोपितकलंकेनपतितांसीतां आदाय स्वयंस्वीकृत्य । अङ्केनस्वदक्षिणोत्सङ्गेनआदाय । तस्यपुत्रीभागत्वात् । यथोक्तं 'भागोहिदक्षोदुहितुःस्नषायाः'इति । अग्निपातानन्तरंजीवनेऽग्निजातत्वप्राप्त्यातत्पुत्रीत्वस्योचितत्वात् । अन्यथाअङ्केनेतिव्यर्थं । विभावसुरग्निः ॥ १ ॥ स० मूर्तिमान्'चत्वारिश्रृङ्गात्रयोअस्यपादाः'इत्याद्युक्तलक्षणशरीरवान् ॥ २ ॥ स० रक्तांबरधरां पूर्वविद्यमानपीतवस्त्रंविसर्जयित्वाविभीषणेनदत्तरक्तवस्त्रधरां ॥ ३ ॥ स० हेराम यापूर्वंरावणहरणकालेमयि प्रविश्यकैलासं गता सैषातेत्वदीयानिजपत्नी । अस्यांपापंत्वच्छङ्कितंनविद्यते । अत्रयदुक्तव्यंतत्सर्वमरण्यकाण्डव्याख्यायांकूर्मपुराणाद्युदाहरणेनोक्तंपुरस्तात् ॥ ति० तदा दानसमये । लोकस्य मनोवाक्कायैर्लोककृतपुण्यपापकर्मणः । साक्षी साक्षाद्द्रष्टा । सर्वदेहान्तर्वैश्वानरात्मनानित्यप्रतिष्ठितत्वादितिभावः । एषा या मयिरावणहरणकालेप्रविष्टासैव । एवंहिकूर्मपुराणानुसारेणव्याख्यातं । तच्चप्राङ्नि-

[पा०] १ क. ख. घ.—ट. विधूयाथ. २ क. शुक्लांबर. ३ ङ. झ. ट. तथारूपामनिन्दितां.

एषा ते राम वैदेही पापमस्यां न विद्यते ॥ ६ ॥
नैव वाचा न मनसा नानुध्यानान्न चक्षुषा ॥ सुवृत्ता वृत्तशौण्डीर न त्वामतिचचार ह ॥ ७ ॥
रावणेनापनीतैषा वीर्योत्सिक्तेन रक्षसा ॥ त्वया विरहिता दीना विवशा निर्जनाद्वनात् ॥ ८ ॥
रुद्धा चान्तःपुरे गुप्ता त्वच्चित्ता त्वत्परायणा ॥ रक्षिता राक्षसीसंघैर्विकृतैर्घोरदर्शनैः ॥ ९ ॥
प्रलोभ्यमाना विविधं भर्त्स्यमाना च मैथिली ॥ नाचिन्तयत तद्रक्षस्त्वद्गतेनान्तरात्मना ॥ १० ॥
विशुद्धभावां निष्पापां प्रतिगृह्णीष्व राघव ॥ न किंचिदभिधातव्यमहमाज्ञापयामि ते ॥ ११ ॥
ततः प्रीतमना रामः श्रुत्वैतद्वदतां वरः ॥ दध्यौ मुहूर्तं धर्मात्मा बाष्पव्याकुललोचनः ॥ १२ ॥
एवमुक्तो महातेजा द्युतिमान्दृढविक्रमः ॥ अब्रवीत्त्रिदशश्रेष्ठं रामो धर्मभृतां वरः ॥ १३ ॥
अवश्यं त्रिषु लोकेषु न सीता पापमर्हति ॥ दीर्घकालोषिता हीयं रावणान्तःपुरे शुभा ॥ १४ ॥
बालिशः खलु कामात्मा रामो दशरथात्मजः ॥ इति वक्ष्यन्ति मां सन्तो जानकीमविशोध्य हि ॥ १५ ॥
अनन्यहृदयां भक्तां मच्चित्तपरिवर्तिनीम् ॥ अहमप्यवगच्छामि मैथिलीं जनकात्मजाम् ॥ १६ ॥
प्रत्ययार्थं तु लोकानां त्रयाणां सत्यसंश्रयः ॥ उपेक्षे चापि वैदेहीं प्रविशन्तीं हुताशनम् ॥ १७ ॥
इमामपि विशालाक्षीं रक्षितां स्वेन तेजसा ॥ रावणो नातिवर्तेत वेलामिव महोदधिः ॥ १८ ॥
न हि शक्तः स दुष्टात्मा मनसाऽपि हि मैथिलीम् ॥ प्रधर्षयितुमप्राप्तां दीप्तामग्निशिखामिव ॥ १९ ॥

अङ्के कृत्वा अङ्केनादायेत्यर्थः ॥ ३—५ ॥ एषा या पूर्वं मयि प्रविष्टा सैषेत्यर्थः । एतेन मायासीताग्निं प्रविष्टा साक्षात्सीताग्निना दत्तेति प्रत्युक्तं । ते त्वदीयेत्यर्थः । एनां परिगृह्णीणेति शेषः ॥६॥ पापाभावमेवोपपादयति—नैवेत्यादिना ॥ अनुध्यानात् संकल्पात् । अत्यन्ताभिमतां देवीं निर्दोषां जानन्नपि स्ववृत्तावद्यत्वपरिहारार्थं वह्निं प्रावेशयदिति संतोषातिशयाद्वृत्तशौण्डीरेति संबोधनं ॥ ७ ॥ एतत्संमतिं विना कथं रावणः समानीतवानित्यत्राह—रावणेनेत्यादि ॥ ८ ॥ विवशा नीतेत्यत्र लिङ्गं दर्शयति—रुद्धेति ॥ त्वयि चित्तं यस्याः सा त्वच्चित्ता । त्वमेव परायणमुत्तमगतिर्यस्याः सा त्वत्परायणा ॥ ९–१० ॥ विशुद्धभावां विशुद्धहृदयां । अभिधातव्यं मद्वचनस्योत्तरमिति शेषः ॥ ११ ॥ दध्यौ न वृथैव सीता त्यक्तेत्यचिन्तयत् ॥ १२–१३ ॥ वस्तुतो निर्दोषत्वेपि अपवादोस्तीत्याह—अवश्यमिति ॥ १४ ॥ अपवादपरिहारार्थमयं मम प्रयत्न इत्याह—बालिश इति ॥ अविशोध्येति । परिग्रह इति शेषः ॥ १५ ॥ अनन्यहृदयां मय्येव सक्तहृदयां । मच्चित्तपरिवर्तिनीं मच्चित्तानुवर्तिनीं । त्यक्तस्वव्यापारामित्यर्थः । जनकात्मजामिति हेतुगर्भविशेषणं । जनकपुत्र्याः किमाचारसंपत्तिर्वक्तव्येति भावः ॥ १६ ॥ तर्हि किमर्थमुपेक्षितवानसीत्यत्राह—प्रत्ययार्थमिति ॥ प्रत्ययार्थं विश्वासजननार्थमित्यर्थः । सत्यसंश्रयः सत्यैकाश्रयः । यथावद्वृत्तप्रवर्तनाकाङ्क्षीत्यर्थः ॥ १७ ॥ एतादृशसुन्दरीं रावणः कथं नेक्षेतेत्यत्राह—इमामपीति ॥ १८ ॥ दृष्टान्तान्तरमाह—न हीति ॥ अप्राप्तां प्रधर्षणानर्हां ॥ १९ ॥

रूपितं । पापं रावणस्पर्शरूपमपि ॥ ५—६ ॥ ति० तद्रक्षोनाचिन्तयत नागणयत । तत्रहेतुरन्तरात्मनस्त्वद्गतत्वं । एवंचयत्प्रतिबिंबस्याप्येवंव्यवस्था तद्बिंबस्यशुद्धत्वंकिंवक्तव्यमितिध्वनिः ॥ १० ॥ ति० नकिंचिदिति । मन्नियोगानन्तरंप्रतिग्राह्यानवेतिसन्देहोनगृह्णामीतिनिषेधश्चनकर्तव्यइत्यर्थः । कुतएवंतत्राह—आज्ञापयामितइति । एवमुक्तिस्तुरामेणस्वस्वरूपाज्ञाननटनात्तदनुसारेणरुद्रमूर्तेर्भगवतोमेरपीतिमन्तव्यं ॥ ११ ॥ ति० मच्चित्तपरिरक्षिणीं मद्गतचित्तत्वेनात्मनोदोषपरिरक्षिणीं । स० मच्चित्तपरिरक्षिणीं मन्मनोनुकूलां ॥ १६ ॥

[पा०] १ ङ. झ. ञ. ट. नैववुद्ध्यानचक्षुषा. २ ङ. झ. ञ. वृत्तशौटीर्यनलामत्यचरच्छुभा. ३ ग. च. छ. ञ. निर्जनेवने. ङ. झ. निर्जनेसति. ४ ङ. झ. ट. राक्षसीभिश्चघोराभिर्घोरबुद्धिभिः. ५ ङ. झ. गृह्णीष्वमैथिलीं. ६ क. ख. ङ. च. छ. झ. ट. सीतापावनमर्हति. ७ ख. ट. सीतांमच्चित्तपरिरक्षिणी. ८ ञ. कर्मणा.

नेयमर्हति चैश्वर्यं रावणान्तःपुरे शुभा ॥ अनन्या हि मया सीता भास्करेण प्रभा यथा ॥ २० ॥
विशुद्धा त्रिषु लोकेषु मैथिली जनकात्मजा ॥ नै हि हातुमियं शक्या कीर्तिरात्मवता यथा ॥२१॥
अवश्यं तु मया कार्यं सर्वेषां वो वचः शुभम् ॥ स्निग्धानां लोकमान्यानामेवं च भुवतां हितम् ॥२२॥
इतीदमुक्त्वा विदितं महाबलैः प्रशस्यमानः स्वकृतेन कर्मणा ॥
समेत्य रामः प्रियया महाबलः सुखं सुखार्होऽनुबभूव राघवः ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकविंशत्युत्तरशततमः सर्गः ॥१२१॥

द्वाविंशत्युत्तरशततमः सर्गः ॥ १२२ ॥

महेश्वरेण रामप्रशंसनपूर्वकंतंप्रतिविमानस्थदशरथप्रशंसनेन तन्नमनचोदना ॥ १ ॥ दशरथेन स्वप्रणामिनोरामस्याङ्कारोपणेन सप्रशंसनपरिष्वङ्गमाशीर्वचनम् ॥ २ ॥ तथा रामप्रार्थनया कैकेयीशापापवदनपूर्वकं सीतालक्ष्मणौप्रति सप्रशंसनं रामसेवानुशासनेनस्वर्गगमनम् ॥ ३ ॥

एतच्छ्रुत्वा शुभं वाक्यं राघवेण सुभाषितम् ॥ इदं शुभतरं वाक्यं व्याजहार महेश्वरः ॥ १ ॥
पुष्कराक्ष महाबाहो महावक्षः परन्तप ॥ दिष्ट्या कृतमिदं कर्म त्वया शस्त्रभृतांवर ॥ २ ॥
दिष्ट्या सर्वस्य लोकस्य प्रवृद्धं दारुणं तमः ॥ अपावृत्तं त्वया संख्ये राम रावणजं भयम् ॥ ३ ॥
आश्वास्य भरतं दीनं कौसल्यां च यशस्विनीम् ॥ कैकेयीं च सुमित्रां च दृष्ट्वा लक्ष्मणमातरम् ॥ ४ ॥

तथाप्येषा तादृशमैश्वर्यं कथं जह्यात्तत्राह—नेरमिति । रावणैश्वर्यं नेयमर्हति किंतु ममैश्वर्यमर्हतीत्यर्थः । तत्र हेतुमाह—अनन्येति । मया अनन्या अभिन्ना । अविनाभूतेति यावत् ॥ २० ॥ अहमपि तया अनन्य इत्याह—विशुद्धेति ॥ २१ ॥ सीतापरिग्रहे भवद्वचनं तु प्रधानहेतुरित्याह—अवश्यमिति ॥ वचनकरणे स्नेहः सर्वपूज्यत्वं हितोपदेष्टृत्वं च हेतुरित्यर्थः ॥ २२ ॥ विदितं स्वेन विदितं । इदं उक्तं वचनं । उक्त्वा स्वकृतेन कर्मणा करणेन महाबलैः कर्तृभिः प्रशस्यमानः प्रियया समेत्य सीतां स्वसमीपमानीयेत्यर्थः ॥ २३ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकविंशत्युत्तरशततमः सर्गः ॥ १२१ ॥

देवकार्यस्य कृतत्वात्त्रिदिवमाक्रमेति ब्रह्मणोक्त्वा लोके धर्मसंस्थापनपरं रामहृदयं जानन् रुद्रस्तदनुमन्यते—एतच्छ्रुत्वेत्यादि ॥ १ ॥ पुष्कराक्ष पुण्डरीकाक्ष । अनेन तस्य "यथा कप्यासं पुण्डरीकमेवमक्षिणी, पुरुषः पुण्डरीकाक्ष" इति श्रुतिस्मृतिभ्यामुदीरितस्य परब्रह्मासाधारणचिह्नस्य रामेरुद्रेण प्रतिपादनाद्रामत्वेनावतीर्णो विष्णुरेव वेदान्तवेद्यं परब्रह्मेत्युक्तं । श्रीनिवासत्वेन महावक्षस्त्वं । दिष्ट्या भाग्येन । अस्माकमिति शेषः ॥ २ ॥ उक्तमेव विवृणोति—दिष्ट्येति ॥ सर्वस्य लोकस्य रावणजं भयमेव प्रवृद्धं तमः अपावृत्तं निरस्तं ॥ ३ ॥ आश्वास्येत्यादिश्लोकत्रयमेकान्वयं ॥ यशस्विनीमिति कैकेयीविशेषणं । तन्मूलत्वाद्रावणवधस्य तस्या यशस्वित्वं । लक्ष्मणमातरमित्यनेन सा लक्ष्मणस्नेहाद्विशेषतो वन्द्ये-

ति० वैक्लव्यं कातर्यपीडां । अनन्याहीति । 'अर्धोवाएषआत्मनोयत्पत्नी' इतिश्रुतेः ॥ शक्तिशक्तिमतोरभेदाच्च । अनेनाग्निदत्तायारावणस्पर्शाद्यभावःस्पष्टमेवोक्तः ॥ २० ॥ इत्येकविंशत्युत्तरशततमःसर्गः ॥ १२१ ॥

ति० एतद्वाक्यंश्रुत्वा युष्मदाज्ञयासीतामङ्गीकरोम्येवेत्युक्तंवाक्यंश्रुत्वा । ततः सीताग्रहणनियोगानुष्ठानानन्तरं ॥ स० अनुभाषितं स्ववचनमनुस्मृत्यभाषितं । ततः तदनन्तरं । शुभतरं रामवाक्यस्यशुभत्वोक्तेः तद्वच्युत्पादकवाक्येनप्रकृतोपयोगिनाऽतिशुभेनभवितव्यमितिशुभतरमित्युक्तमितिभावः ॥ १ ॥ स० दीनं पितृनाशेन स्वदर्शनेन च । कैकेयींचाश्वास्य अनेन रामप्रा-

[पा०] १ ङ. झ. वैक्लव्यं. २ ङ. झ. ट. भास्करस्य. ३ ङ. झ. ट. नविहातुंमयाशक्या. ४ ख. घ. ङ. झ. ञ. ट. वचोहितं. ५ ग. घ. लोकपालानामेवं. ६ ङ. झ. ट. इत्येवमुक्त्वाविजयीमहाबलः. ख. इत्येवमुक्त्वावचनंमहाबलं. ७ ङ. च. छ. झ. ट. राघवेणानुभाषितं. ८ ङ. च. छ. झ. ट. ततःशुभतरं. ९ ख. ङ. च. छ. झ. ट. धर्मभृतांवर.

प्राप्य राज्यमयोध्यायां नन्दयित्वा सुहृज्जनम् ॥ इक्ष्वाकूणां कुले वंशं स्थापयित्वा महाबल ॥ ५ ॥
इष्ट्वा तुरगमेधेन प्राप्य चानुत्तमं यशः ॥ ब्राह्मणेभ्यो धनं दत्त्वा त्रिदिवं गन्तुमर्हसि ॥ ६ ॥
एष राजा विमानस्थः पिता दशरथस्तव ॥ काकुत्स्थ मानुषे लोके गुरुस्तव महायशाः ॥ ७ ॥
इन्द्रलोकं गतः श्रीमांस्त्वया पुत्रेण तारितः ॥ लक्ष्मणेन सह भ्रात्रा त्वमेनमभिवादय ॥ ८ ॥
महादेववचः श्रुत्वा काकुत्स्थः सहलक्ष्मणः ॥ विमानशिखरस्थस्य प्रणाममकरोत्पितुः ॥ ९ ॥
दीप्यमानं स्वया लक्ष्म्या विरजोम्बरधारिणम् ॥ लक्ष्मणेन सह भ्रात्रा ददर्श पितरं विभुः ॥१०॥
हर्षेण महताऽऽविष्टो विमानस्थो महीपतिः ॥ प्राणैः प्रियतरं दृष्ट्वा पुत्रं दशरथस्तदा ॥ ११ ॥
आरोप्याङ्कं महाबाहुर्वरासनगतः प्रभुः ॥ बाहुभ्यां संपरिष्वज्य ततो वाक्यं समाददे ॥ १२ ॥
न मे स्वर्गो बहुमतः संमानश्च सुरर्षिभिः ॥ त्वया राम विहीनस्य सत्यं प्रतिशृणोमि ते ॥ १३ ॥
अद्य त्वां निहतामित्रं दृष्ट्वा संपूर्णमानसम् ॥ निस्तीर्णवनवासं च प्रीतिरासीत्परा मम ॥ १४ ॥
कैकेय्या यानि चोक्तानि वाक्यानि वदतां वर ॥ तव प्रव्राजनार्थानि स्थितानि हृदये मम ॥१५॥
त्वां तु दृष्ट्वा कुशलिनं परिष्वज्य सलक्ष्मणम् ॥ अद्य दुःखाद्विमुक्तोस्मि नीहारादिव भास्करः ॥१६॥
तारितोहं त्वया पुत्र सुपुत्रेण महात्मना ॥ अष्टावक्रेण धर्मात्मा तारितो ब्राह्मणो यथा ॥ १७ ॥

त्युक्तं । अयोध्यायां सुहृज्जनं नन्दयित्वेत्यन्वयः । वंशं पुत्रपौत्रादिपरम्परां । इक्ष्वाकूणां कुले इक्ष्वाकुकुलनिमित्तं । स्थापयित्वा । प्राप्य चानुत्तमं यश इति तुरगमेधफलोक्तिः । आश्वास्येत्यादिना " दशवर्षसहस्राणि दशवर्षशतानि च । वत्स्यामि मानुषे लोके" इत्यवतारात्पूर्वं तत्कृतां प्रतिज्ञामनुसृत्यरुद्रेणोक्तं ॥४—६ ॥ एष इत्यादिश्लोकद्वयमेकान्वयं ॥ देवदेहपरिग्रहेणापरिज्ञायमानत्वात् पुरस्थितोप्येष इत्यङ्गुल्या निर्दिश्यते । मानुषेलोके गुरुरित्यनेन, " पिता पुत्रेण पितृमान् योनियोनौ'इति श्रुतिरुपबृंहिता ॥ ७—१० ॥ हर्षेणेत्यादिश्लोकद्वयमेकान्वयं ॥ पुत्रं रामं ॥ ११—१२ ॥ सुरर्षिभिः संमानः देवर्षिभिः संमानोपि ॥ १३—१४ ॥ हृदये स्थितानि । न विस्मरामीत्यर्थः । तेन दुःखितोभूवमिति सूचितं ॥ १५ ॥ सलक्ष्मणमित्यनेन द्वितीयपरिष्वङ्गे लक्ष्मणोपि विषयीकृत इत्युच्यते ॥ १६ ॥ तारितोहं त्विति ॥ कहोलो नाम ऋषिरष्टावक्रेण तारित इतीयं कथा भार-

---

वण्यस्येवतदमात्सर्यस्यचनिस्सीमतयास्वानुभूतत्वेनैतदाश्वासनाशंसनंननुधामाधवस्तनुयादितिद्योतयति ॥ ४ ॥ **ति०** तुरगमेधेनेष्ट्वा भगवन्तंप्रजापतिमितिशेषः । अनुत्तमंयशः ' महद्यशः ' इत्यादिकंप्रजापतिनाम । ' तस्यनाममहद्यशः ' इतिश्रुतेः । अश्वमेधफलंचतत्प्राप्तिरेव । ' प्रजापतिंवाएषईप्सतीत्याहुः, योश्वमेधेनयजते ' इतिश्रुतेरितिकतकः । त्रिदिवं भूस्वःपदापेक्षया तृतीयंदिवंब्रह्मलोकं ॥ **स०** तुरगमेधेन अश्वमेधेन । इष्ट्वा संपूज्य । स्वात्मानमितिशेषः । अनुत्तमं महत् । यशः कीर्तिविशेषं । ' दिक्षुयानाद्यशःप्रोक्तं ' इतिच्छान्दोग्यभाष्योक्तेः । प्राप्य त्रिदिवं श्वेतद्वीपानन्तासनवैकुण्ठाख्यप्रकाशमानलोकत्रयं । अनुत्तमं यशः तन्नामकंप्रजापतिं स्वमेवेष्ट्वा हेप्राप्य सर्वैःसर्वकर्मभिःप्राप्यराम । शिष्टमविशिष्टं । ' तस्यनाममहद्यशः'—'प्रजापतिंवाएषईप्सतियोश्वमेधेनयजते ' इतिश्रुतिभ्यां ॥ ६ ॥ **स०** मानुषेलोके लीलागृहीतमानुषदेहविषये । तवपिता । मानुषेलोके मनुष्यलोकइतिवा । किंचिद्व्यत्यस्ताकारतयाएषइत्यङ्गुल्यानिर्देशइतिज्ञेयं । गुरुस्तवेतिरामसंबोधनं । गुरुस्तव ब्रह्मादिमहाजनस्तुत्य । एतेननगुर्विति तवेतिचाधिकमितिमन्तव्यं । गुरुस्तवमहायशाइतिदशरथविशेषणंवा । गुरुस्तवेषु बहुभिःस्तुतेषुमहायशाः तदपेक्षयाऽतियशस्वीतिवा । ' जनिताचोपनेताचयश्चविद्यांप्रयच्छति । अन्नदाताभयत्राताषञ्चैतेपितरःस्मृताः ' इतिगुरुत्वस्यपितृपदार्थतानतिरेकात् ॥ ७ ॥ **स०** सुरर्षिभैःसमानः बहुमानसहितोपियोऽहं तस्यमेस्वर्गोनबहुमतः ॥ १३ ॥ **स०** अष्टावक्रेण तन्नामकपुत्रेण । जनकसभायांस्वपितृपराजयकारिणंबन्दिनंजित्वाकहोलोब्राह्मणः तन्नामकोष्टावक्रपितायथातारितस्तथा । तदुक्तं-भारतेवनपर्वणि—'कहोलउवाच । इत्यर्थमिच्छन्तिसुताञ्जना जनक कर्मणा । यदहंनाशकंकर्तुंतत्पुत्रःकृतवान्मम । ' इति ॥१७॥

[**पा०**] १ ख. ग. ङ. छ. झ. ट. मयोध्यांच. २ ङ. च. छ. झ. ट. आरोप्याङ्के. ३ घ. महाबुद्धिर्वरा. ४ ख. ग. ङ. छ. झ. ञ. ट, समानश्चसुरर्षभैः, ५ ङ, च, छ, झ, ञ, ट. कहोळोब्राह्मणोयथा.

इदानीं तु विजानामि यथा सौम्य सुरेश्वरैः ॥ वधार्थं [1]रावणस्येदं विहितं पुरुषोत्तम ॥ १८ ॥
सिद्धार्था खलु कौसल्या या त्वां राम गृहं गतम् ॥ वनान्निवृत्तं संहृष्टा द्रक्ष्यत्यरिनिषूदन ॥१९॥
सिद्धार्थाः खलु ते राम नरा ये त्वां पुरीं गतम् ॥ जलार्द्रमभिषिक्तं च द्रक्ष्यन्ति वसुधाधिपम् ॥२०॥
अनुरक्तेन बलिना शुचिना धर्मचारिणा ॥ इच्छामि त्वामहं द्रष्टुं भरतेन समागतम् ॥ २१ ॥
चतुर्दश समाः सौम्य वने निर्यापितास्त्वया ॥ वसता सीतया सार्धं लक्ष्मणेन च धीमता ॥ २२॥
निवृत्तवनवासोसि प्रतिज्ञा सफला कृता ॥ रावणं च रणे हत्वा देवास्ते परितोषिताः ॥ २३ ॥
कृतं कर्म यशः श्लाघ्यं प्राप्तं ते शत्रुसूदन ॥ भ्रातृभिः सह राज्यस्थो दीर्घमायुरवाप्नुहि ॥
इति ब्रुवाणं राजानं रामः प्राञ्जलिरब्रवीत् ॥ २४ ॥
कुरु प्रसादं धर्मज्ञ कैकेय्या भरतस्य च ॥ सपुत्रां त्वां त्यजामीति यदुक्ता केकयी त्वया ॥ २५ ॥
स शापः केकयीं घोरः सपुत्रां न स्पृशेत्प्रभो ॥ २६ ॥
स तथेति महाराजो राममुक्त्वा कृताञ्जलिम् ॥ लक्ष्मणं च परिष्वज्य पुनर्वाक्यमुवाच ह ॥२७॥
रामं शुश्रूषता भक्त्या वैदेह्या सह सीतया ॥ कृता मम महाप्रीतिः प्राप्तं धर्मफलं च ते ॥ २८ ॥
धर्मं प्राप्स्यसि धर्मज्ञ यशश्च विपुलं भुवि ॥ रामे प्रसन्ने स्वर्गं च महिमानं तथैव च ॥ २९ ॥
रामं शुश्रूष भद्रं ते सुमित्रानन्दवर्धन ॥ रामः सर्वस्य लोकस्य शुभेष्वभिरतः सदा ॥ ३० ॥
एते सेन्द्रास्त्रयो लोकाः सिद्धाश्च परमर्षयः ॥ अभिगम्य महात्मानमर्चन्ति पुरुषोत्तमम् ॥ ३१ ॥
एतत्तदुक्तमव्यक्तमक्षरं ब्रह्म निर्मितम् ॥ देवानां हृदयं सौम्य गुह्यं रामः परन्तपः ॥ ३२ ॥

तोक्ता ॥१७॥ रावणस्य वधार्थं सुरेश्वरैरिदमभिषेकविघ्नादिकं कर्म यथा विहितं तथा इदानीमेव जानामि। पुरुषोत्तमेत्यनेन भवान्विष्णुरेव रावणवधार्थं मनुष्यत्वंगत इत्युच्यते ॥१८॥ सिद्धार्था कृतार्था। मम स्वर्गसुखादपि तस्याः सुखमधिकमिति भावः॥१९—२०॥ अनुरक्तेनेति ॥ अवश्यं राम भरतं प्राप्नुहीति भावः ॥ २१—२४ ॥ कैकेय्या भरतस्य च कैकेय्यां भरते चेत्यर्थः । संबन्धसामान्ये षष्ठी । यस्मादुक्ता तस्मात् प्रसादं कुर्विति संबन्धः ॥ २५ ॥ स शाप इत्यर्धमेकं वाक्यं ॥ शापः संबन्धविच्छेदरूपः ॥ २६—२७ ॥ सीतया सह रामं शुश्रूषतेत्यन्वयः ॥ २८ ॥ स्वर्गं सुखं। लक्ष्मणस्यापि विष्ण्ववतारत्वं न जानाति दशरथः । महिमानं महत्त्वं ॥ २९–३०॥ रामस्य सर्वोत्तमत्वं शिष्टाचारेण दर्शयति—एत इति। अर्चन्तीतिणिजभाव आर्षः । एत इति हस्तनिर्देशेन रुद्रोप्यन्तर्गतः ॥ ३१ ॥ देवानां हृदयं सर्वदेवान्तर्यामी । वेदानामिति पाठे वेदतात्पर्यभूतं । उभयथाप्यग्नीन्द्रादिरूपेण सर्वकर्मसमाराध्यमित्यर्थः । गुह्यं साक्षादुपनिषद्वेद्यं । अव्यक्तं भक्तिशून्यैर्दुर्ज्ञेयं । अक्षरं षड्भावविकाररहितं । तदेतत् ब्रह्म रामः रामरूपेण निर्मितं । रामरूपेणावतीर्णं । इति उक्तं । ब्रह्मादिभि-

---

ति० पिहितं पुरुषोत्तमं आच्छादितं । मत्पुत्रत्वेनेतिशेषः ॥ १८ ॥ स० रामेप्रसन्ने 'किमलभ्यंभगवतिप्रसन्नेश्रीनिकेतने' इत्यादेः ॥ २९ ॥ ति० एतत् रामरूपंवस्तु । तज्जानीहीतिशेषः । यद्देवानांहृदयमुक्तं 'देवानांहृदयंब्रह्मान्वविन्दत्' इतिश्रुत्यादेवहृदयत्वेनोपदिष्टं । तथादेवानांगुह्यं । 'एतद्वैमहोपनिषदंदेवानांगुह्यं' इतिश्रुत्यादेवगुह्यत्वेनोपदिष्टं । ब्रह्मसंमितं ब्रह्मणा 'अन्तरस्मिन्निमेलोकाः' इत्यादिश्रुत्याप्रतिपादितं । अक्षरं अशेषजगत्कारणतयानिर्लयंयद्ब्रह्मास्तिब्रह्मशब्दतन्त्रे ॥ ३२ ॥ ति०

[पा०] १ ङ. छ. झ. ञ. ट. रावणस्येहपिहितंपुरुषोत्तमं. ख. रावणस्येहप्रापितंपुरुषोत्तमं. २ क.—ञ. द्रक्ष्यतेशत्रुसूदन. ट. द्रक्ष्यतेशत्रुसूदनं. ३ ङ. ट. राज्येनैवाभिषिक्तंच. झ. राज्येचैवाभिषिक्तंचद्रक्ष्यन्ते. ४ ङ. ब्रह्मचारिणा. ५ ङ. झ. ट. मत्प्रीत्यालक्ष्मणेनच. ६ घ. निवृत्तवनवासश्च. ७ ग. वाक्यमभाषत. ८ ङ. ञ. ट. तथोत्तमं. झ. तथोत्तरं. ९ ङ. झ. ट. हितेष्वभिरतः. छ. ञ. सुखेष्वभिरतः. १० ङ. झ. ञ. अभिवाद्य. ११ घ. महात्मानंस्तुवन्ति. १२ ख. ग. घ. छ. ञ. मव्यग्रं. १३ ङ. झ. ञ. ट. ब्रह्मसंमितं.

अवाप्तं धर्मचरणं यशश्च विपुलं त्वया ॥ [1]रामं शुश्रूषता भक्त्या वैदेह्या सह सीतया ॥ ३३ ॥
स तथोक्त्वा महाबाहुर्लक्ष्मणं प्राञ्जलिं स्थितम् ॥ उवाच राजा धर्मात्मा वैदेहीं वचनं शुभम् ॥३४॥
कर्तव्यो न तु वैदेहि मन्युस्त्यागमिमं प्रति ॥ रामेण त्वद्विशुद्ध्यर्थं कृतमेतद्धितैषिणा ॥ ३५ ॥
[[2]सुदुष्करमिदं पुत्रि तव चारित्रलक्षणम् । कृतं यत्तेऽन्यनारीणां यशो ह्यभिभविष्यति] ॥ ३६ ॥
[3]न त्वं सुभ्रु समाधेया पतिशुश्रूषणं प्रति ॥ अवश्यं तु मया वाच्यमेष ते दैवतं परम् ॥ ३७ ॥
इति प्रतिसमादिश्य पुत्रौ [4]सीतां तथा स्नुषाम् ॥ इन्द्रलोकं विमानेन ययौ [5]दशरथो ज्वलन् ॥३८॥
[[6]विमानमास्थाय महानुभावः श्रिया च संहृष्टतनुर्नृपोत्तमः ॥
आमन्त्र्य पुत्रौ सह सीतया च जगाम देवप्रवरस्य लोकम् ॥ ३९ ॥]
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्वाविंशत्युत्तरशततमः सर्गः ॥ १२२ ॥

त्रयोविंशत्युत्तरशततमः सर्गः ॥ १२३ ॥

इन्द्रेण रामप्रार्थनयातंप्रति मृतविकलाङ्गवानरगणानांपुनर्जीवनावैकल्यस्वालयवर्तिसरित्तरुसार्वकालिकसलिलफलसमृद्धिसंभवरूपवरदानपूर्वकं सुरगणैः सहस्वर्गगमनम् ॥ १ ॥ रामेण सुरपतिसमुज्जीविताविकलवानरनिकरैः सह हर्षाधिगमः ॥ २ ॥

प्रीतियाते तु काकुत्स्थे महेन्द्रः पाकशासनः ॥ अब्रवीत्परमप्रीतो राघवं प्राञ्जलिं स्थितम् ॥ १ ॥
अमोघं दर्शनं राम तवास्माकं [7]परन्तप ॥ प्रीतियुक्ताः स्म तेन त्वं ब्रूहि यन्मनसेच्छसि ॥ २ ॥

रिति शेषः ॥ ३२—३६ ॥ न समाधेया नोपदेष्टव्या ॥ ३७—३९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्वाविंशत्युत्तरशततमः सर्गः ॥ १२२ ॥

अथेन्द्रानुशासनं—प्रतिप्रयात इत्यादि ॥ काकुत्स्थे दशरथे । महेन्द्रः लब्धमहेन्द्रभावः ॥ १ ॥ तवास्माकं दर्शनं । अस्मत्कर्तृकं दर्शनं दशरथपुत्रकामेष्टिकालिकं । अमोघं रावणवधपर्यन्तं जातमित्यर्थः । तेन प्रीतियुक्तत्वेन यत् प्रत्युपकाररूपं कार्यमिच्छसि

एवंभूतोरामोब्रह्मादिभिस्त्वत्समक्षमेवोक्तः । अतएनंशुश्रूषतालब्धयासर्वधर्माचरणंप्राप्तं । ब्रह्मज्ञधर्मेसर्वधर्मान्तर्भावस्यसंवर्गविद्यायामुक्तत्वादितिभावः ॥ ३३ ॥ इतिद्वाविंशत्युत्तरशततमःसर्गः ॥ १२२ ॥

ति० काकुत्स्थेदशरथे । महेन्द्रः तत्सहितोब्रह्मेत्यर्थः । सत्यसंकल्पत्वस्यतस्मिन्नेवप्रसिद्धेः । वानराणांसंकल्पमात्रेणोत्थानस्य वक्ष्यमाणत्वात् । भारतेपि " ततस्तेब्रह्मणाप्रोक्तेतथेतिवचनेतदा । समुत्तस्थुर्महाराजवानरालब्धचेतसः " । इत्युक्तं पाद्मेपि ' पितामहवरात्तूर्णंजीवयामासतान्नृप ' प्राञ्जलिंस्थितंराघवंप्रतीतिशेषः ॥ **स०** महेन्द्रःपाकशासनइत्यत्रमहेन्द्रशब्देनसर्वेस्वामित्वेनब्रह्माग्राह्यः । अत्रोत्तरश्लोकेषुचविद्यमानाःपाकशासनादयःशब्दाअर्शआद्यजन्ताः । तथाच पाकशासनसहितोब्रह्मोवाचेति लभ्यते । अतोनभारतादिविसंवादः । यथोक्तंभारते—" तमुवाचततोब्रह्मादेवैःशक्रपुरोगमैः । कौसल्यामातरिष्टांस्तेवरानद्यददामिकान् । वव्रेरामःस्थितिंधर्मेशत्रुभिश्चापराजयम् । राक्षसैर्निहतानांचवानराणांसमुत्थितिम् । ततस्तेब्रह्मणाप्रोक्तेतथेतिवचनेतदा । समुत्तस्थुर्महाराजवानरालब्धचेतसः ' इति । पाद्मेच—'पितामहवरात्तूर्णंजीवयामासतान्नृप ' इति । ननुभ्रूविभ्रममात्रेणचराचरजगत्सृष्ट्यादिकर्तृरामस्यकथंब्रह्मवराद्वानरोज्जीवनादिकमितिचेदुच्यते । प्रादुर्भावेषुब्रह्ममाननार्थंब्रह्मणेदत्तस्यवरस्यरक्षणार्थंचतथानटनस्यावश्यकत्वान्नेदमनुपपन्नं । यथोक्तंशान्तौमोक्षधर्मेषु ' मयासृष्टःपुराब्रह्मा ' इत्यारभ्य ' अनुशास्यस्त्वयाब्रह्मन्नियोज्यश्चसुतोयथा । एतांश्चान्यांश्चरुचिरान्ब्रह्मणेऽमिततेजसे । अहंदत्वावरान्प्रीतोनिवृत्तिपरमोऽभव ' इतिभगवद्वचनं । एतेनप्राञ्जलिंस्थितं'

[**पा०**] १ झ. एवंशुश्रूषताव्यग्रं. ञ. ट. रामंशुश्रूषताव्यग्रं. २ अयंश्लोकः ङ. झ. ट. पाठेषुदृश्यते. ३ ङ. झ. ट. नत्वंकामं. ४ ङ. झ. ट. सीतांचराघवः. ५ ङ. झ. ट. दशरथोनृपः. ६ अयंश्लोकः ङ. झ. ट. पाठेषुदृश्यते. ७ क.—ट. प्रतिप्रयाते. ८ ङ. झ. ट. नरर्षभ. ९ ङ. झ. ट. न्मनसेप्सितं.

एवमुक्तस्तु काकुत्स्थः प्रत्युवाच कृताञ्जलिः ॥ लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया ॥ ३ ॥
यदि प्रीतिः समुत्पन्ना मयि सर्वसुरेश्वर ॥ वक्ष्यामि कुरु ते सत्यं वचनं वदतां वर ॥ ४ ॥
मम हेतोः पराक्रान्ता ये गता यमसादनम् ॥ ते सर्वे जीवितं प्राप्य समुत्तिष्ठन्तु वानराः ॥ ५ ॥
मत्कृते विप्रयुक्ता ये पुत्रैर्दारैश्च वानराः ॥ मत्प्रियेष्वभियुक्ताश्च न मृत्युं गणयन्ति च ॥
त्वत्प्रसादात्समेयुस्ते वरमेतदहं वृणे ॥ ६ ॥
नीरुजो निर्व्रणांश्चैव संपन्नबलपौरुषान् ॥ गोलाङ्गूलांस्तथैवर्क्षान्द्रष्टुमिच्छामि मानद ॥ ७ ॥
अकाले चापि मूलानि फलानि च ॥ नद्यश्च विमलास्तत्र तिष्ठेयुर्यत्र वानराः ॥ ८ ॥
श्रुत्वा तु वचनं तस्य राघवस्य महात्मनः ॥ महेन्द्रः प्रत्युवाचेदं वचनं प्रीतिलक्षणम् ॥ ९ ॥
महानयं वरस्तात त्वयोक्तो रघुनन्दन ॥ द्विर्मया नोक्तपूर्वं हि तस्मादेतद्भविष्यति ॥ १० ॥
समुत्थास्यन्ति हरयो ये हता युधि राक्षसैः ॥ ऋक्षाश्च सहगोपुच्छा निकृत्ताननबाहवः ॥ ११ ॥
नीरुजो निर्व्रणाश्चैव संपन्नबलपौरुषाः ॥ समुत्थास्यन्ति हरयः सुप्ता निद्राक्षये यथा ॥ १२ ॥
सुहृद्भिर्बान्धवैश्चैव ज्ञातिभिः स्वजनैरपि ॥ सर्व एव समेष्यन्ति संयुक्ताः परया मुदा ॥ १३ ॥
अकाले पुष्पशबलाः फलवन्तश्च पादपाः ॥ भविष्यन्ति महेष्वास नद्यश्च सलिलायुताः ॥ १४ ॥
सव्रणैः प्रथमं गात्रैः संवृत्तैर्निर्व्रणैः पुनः ॥ १५ ॥
ततः समुत्थिताः सर्वे सुप्त्वेव हरिपुङ्गवाः ॥ बभूवुर्वानराः सर्वे किमेतदिति विस्मिताः ॥ १६ ॥
ते सर्वे वानरास्तस्मै राघवायाभ्यवादयन् ॥ १७ ॥
काकुत्स्थं परिपूर्णार्थं दृष्ट्वा सर्वे सुरोत्तमाः ॥ ऊचुस्ते प्रथमं स्तुत्वा स्तवार्हं सहलक्ष्मणम् ॥ १८ ॥
गच्छायोध्यामितो वीर विसर्जय च वानरान् ॥ मैथिलीं सान्त्वयस्वैनामनुरक्तां तपस्विनीम् ॥१९॥

तद्ब्रूहि । केचित्तुत्वत्कर्तृकमस्मद्विषयं दर्शनमित्यर्थ इत्याहुः ॥ २—५ ॥ मत्कृत इत्यादिसार्धश्लोकमेकं वाक्यं ॥ मत्प्रियेषु अभियुक्ता निरताः । समेयुरित्यत्र पुत्रैर्दारैश्चेत्यावर्तनीयं ॥ ६ ॥ नीरुजः निष्पीडान् ॥ ७ ॥ विमलाः विमलोदकाः ॥ ८ ॥ प्रीतिर्लक्ष्यतेनेनेति प्रीतिलक्षणं प्रीतिव्यञ्जकं ॥ ९ ॥ महानयं वर इति वरस्य महत्त्वं इतस्ततो विप्रकीर्णकरचरणपुच्छादिस्वसंस्थानसंधानलोकान्तरगतानयनादिरूपाघटितार्थघटितत्वं । द्विर्मयानोक्तपूर्वमिति । उक्तवचनस्य विपरीतं वचनान्तरं नोक्तपूर्वमित्यर्थः ॥ १०—१३ ॥ पुष्पशबलाः पुष्पैर्नानावर्णाः । सलिलायुताः सलिलैर्व्याप्ताः ॥ १४ ॥ ये निहताः सव्रणास्तेषां निर्व्रणत्वमनुगृह्णाति—सव्रणैरिति ॥ प्रथमं वरदानात्पूर्वं सव्रणैः अथ निर्व्रणैः संवृत्तैः निर्व्रणीभूतैः गात्रैरुपलक्षिताः । वानरा भविष्यन्तीत्यनुकृष्य योजना ॥ १५ ॥ तत इति । अत्र क्रियाभेदात्सर्वशब्दद्वयं । किमेतदिति । युद्धे मृतस्य कथमेवं जीवनमित्यर्थः ॥ १६—१८ ॥ गच्छायोध्यामित्यादिसा-

---

इत्यादिसमाहितं ॥ १ ॥ रामानु० राघवायाभ्यवादयन् राघवमभ्यवादयन्निल्यर्थः । व्यत्ययेनद्वितीयार्थेचतुर्थी । द्वितीयायांविभीषणाभिषेकसीताप्राप्तिदेवताप्रस्थापनानि ॥ १७ ॥

[पा०] १ एवमुक्तस्तुकाकुत्स्थइतिश्लोकस्यस्थाने एवमुक्तोमहेन्द्रेणप्रसन्नेनमहात्मना । सुप्रसन्नमनाहृष्टोवचनंप्राहराघवः. इतिश्लोको ङ. झ. ट. पाठेषुदृश्यते. २ ङ. झ. ट. विबुधेश्वर. ३ ख. घ.—ट. कुरुमे. ४ मत्कृतेविप्रयुक्ताइत्यर्धात्परं—तान्मीतमनसस्सर्वान्द्रष्टुमिच्छामिमानद । विक्रान्ताश्चापिशूराश्चनमृत्युंगणयन्तिच । कृतयत्नाविपन्नाश्चजीवयैतान्पुरन्दर । इत्यर्ध क. ख. ङ. च. छ. झ. ञ. ट. पाठेष्वधिकंदृश्यते. ५ ख. घ.—ट. ष्वभिरक्ताश्च. ६ छ. झ. ज. गणयन्तिते. क. गणयन्तिये. ७ क. ङ. छ. झ. ञ. ट. पुष्पाणि. ८ ङ. च. छ. झ. ञ. ट. समुत्तिष्ठन्तुतेसर्वेहतायेयुधि. गात्रैरिदानींनिर्व्रणैःसमैः. १० ख. ङ. छ. झ. ञ. किंत्वेतदिति. ११ ङ. झ. ञ. ट. अब्रुवन्परमप्रीताः ख. छ. ऊचुस्तेप्राञ्जलिंरामंसहसीतंसलक्ष्मणं.

शत्रुघ्नं च महात्मानं मातृः सर्वाः परन्तप ॥ १९ ॥
भ्रातरं पश्य भरतं त्वच्छोकाद्व्रतधारिणम् ॥ अभिषेचय चात्मानं पौरान्गत्वा प्रहर्षय ॥ २० ॥
एवमुक्त्वा तमामन्त्र्य रामं सौमित्रिणा सह ॥ विमानैः सूर्यसंकाशैर्हृष्टा जग्मुः सुरा दिवम् ॥२१॥
अभिवाद्य च काकुत्स्थः सर्वांस्तांस्त्रिदशोत्तमान् ॥ लक्ष्मणेन सह भ्रात्रा वासमाज्ञापयत्तदा ॥२२॥
ततस्तु सा लक्ष्मणरामपालिता महाचमूर्हृष्टजना यशस्विनी ॥
श्रिया ज्वलन्ती विरराज सर्वतो निशाप्रणीतेव हि शीतरश्मिना ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रयोविंशत्युत्तरशततमः सर्गः ॥१२३॥

चतुर्विंशत्युत्तरशततमः सर्गः ॥ १२४ ॥

विभीषणेन रात्रौसुखसुप्तोत्थितंरामंप्रति प्रभातेस्नीयवस्त्राभ्यङ्गाङ्गरागाद्युपचाराङ्गीकरणप्रार्थना ॥ १ ॥ रामेणतंप्रति सुग्रीवादीनांतदुपचारकरणचोदनपूर्वकं भरतेनविना भोगाननुभवनरूपस्वीयव्रतनिवेदनेनसहायोध्यांप्रति गमनत्वरानिवेदनम् ॥ २ ॥ विभीषणेनतंप्रति पुष्पकविमानेनसत्वरमयोध्याप्रापणप्रतिज्ञानपूर्वकं लङ्कायांद्वित्रदिनावस्थानप्रार्थनेनसह तत्समीपंप्रतिपुष्पकानयनम् ॥ ३ ॥

तां रात्रिमुषितं रामं सुखोत्थितमरिन्दमम् ॥ अब्रवीत्प्राञ्जलिर्वाक्यं जयं पृष्ट्वा विभीषणः ॥ १ ॥
स्नानानि चाङ्गरागाणि वस्त्राण्याभरणानि च ॥ चन्दनानि च दिव्यानि माल्यानि विविधानि च ॥२॥
अलंकारविदश्चेमा नार्यः पद्मनिभेक्षणाः ॥ उपस्थितास्त्वां विधिवत्स्नापयिष्यन्ति राघव ॥
प्रतिगृह्णीष्व तत्सर्वं मदनुग्रहकाम्यया ॥ ३ ॥
एवमुक्तस्तु काकुत्स्थः प्रत्युवाच विभीषणम् ॥ हरीन्सुग्रीवमुख्यांस्त्वं स्नानेनाभिनिमन्त्रय ॥ ४ ॥
स तु ताम्यति धर्मात्मा मम हेतोः सुखोचितः ॥ सुकुमारो महाबाहुः कुमारः सत्यसंश्रवः ॥ ५ ॥

धर्मश्लोकद्वयमेकान्वयं ॥ त्वच्छोकात् त्वद्वियोगशोकात् ॥ १९—२१ ॥ वासमाज्ञापयत् वानराणामिति शेषः ॥ २२ ॥ प्रणीता प्रकाशिता ॥ २३ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रयोविंशत्युत्तरशततमः सर्गः ॥ १२३ ॥

अथ रामस्य विभीषणसत्कारः—तां रात्रिमित्यादि । तां रात्रिं । यस्मिन्दिने ब्रह्मादयो निर्जग्मुः तां रात्रिमित्यर्थः ॥ १ ॥ स्नानानीत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ स्नानानि स्नानीयजलानि । अत्र सर्वत्रेमानीत्यनुषज्यते । अङ्गरागाणि कुङ्कुमादीनि । माल्यानि स्रजः । विधिवत् सोपचारमित्यर्थः ॥ २—३ ॥ सुग्रीवमुख्यान् सुग्रीवप्रमुखानेव हरीन् । स्नानेन स्नानेन हेतुना । अभिनिमन्त्रय ॥ ४ ॥ त्वां विनातेषामामन्त्रणे किंकारणमित्यतआह—सत्विति ॥ सः सर्वदा मनसि परिवर्तमानः । धर्मात्मा ताम्यति । धर्माचरणेनैव ताम्यतीति भावः । मम हेतोः मद्भा-

---

ति० येप्यमृतवृष्ट्याइन्द्रेणसर्वेसमुत्थानंकृतमितिवदन्तितत्पक्षेपिरावणसंस्कारदिनेसर्वरक्षसांदाहादिसंस्कारपूर्वकंभस्मनः समुद्रेप्रक्षेपान्नतदुत्थानशङ्का । पूर्वंयुद्धकालएवमृतानांसमुद्रेप्रक्षेपइतिमूलएवपूर्वमुक्तत्वाच्च । अन्येतु सश्लोकस्तत्राधुनिकप्रक्षिप्तः । नह्योषधिगन्धमात्रेणसर्वेषांविशल्यता । किंतुचूर्णीकृत्यतत्प्रदानेनेतिप्रागेवोक्तं । तथाचतदभावान्नतेषांविशल्यता । मृतानांगन्धाघ्राणाभावाच्च । रावणस्यतथाऽऽज्ञायाअश्रवणाच्चेत्याहुः ॥ २३ ॥ इतित्रयोविंशत्युत्तरशततमःसर्गः ॥ १२३ ॥

शि० सुखोदितं सुखकथनविशिष्टंयथाभवतितथा उषितंरामंजयंपृष्ट्वाऽब्रवीत् ॥ स० सुखोदितं सुखमुदितं उदयःखप्रबोधः

[पा०] १ ङ. ञ. ट. एवमुक्त्वासहस्राक्षोरामंसौमित्रिणासह । विमानैःसूर्यसंकाशैर्यथौहृष्टःसुरैस्सह. २ ख. सुखसुप्तमरिंदमं. ङ. ञ. न. ट. सुखोदितं. घ. च. सुखोषितं. ३ ङ. च. छ. ञ. न. ट. विदश्चैताः. ४ घ. न्सुग्रीवमिश्रांस्त्वं. ५ ङ. ञ. ट. महाबाहुर्भरतः.

तं विना केकयीपुत्रं भरतं धर्मचारिणम् ॥ न मे स्नानं बहुमतं वस्त्राण्याभरणानि च ॥ ६ ॥
इत एव पथा क्षिप्रं प्रतिगच्छामि तां पुरीम् ॥ अयोध्यामागतो ह्येष पन्थाः परमदुर्गमः ॥ ७ ॥
एवमुक्तस्तु काकुत्स्थं प्रत्युवाच विभीषणः ॥ अह्ना त्वां प्रापयिष्यामि तां पुरीं पार्थिवात्मज ॥८॥
पुष्पकं नाम भद्रं ते विमानं सूर्यसन्निभम् ॥ मम भ्रातुः कुबेरस्य रावणेनाहृतं बलात् ॥ ९ ॥
हृतं निर्जित्य संग्रामे कामगं दिव्यमुत्तमम् ॥ त्वदर्थे पालितं चैतत्तिष्ठत्यतुलविक्रम ॥ १० ॥
तदिदं मेघसंकाशं विमानमिह तिष्ठति ॥ तेन यास्यसि यानेन त्वमयोध्यां गतज्वरः ॥ ११ ॥
अहं ते यद्यनुग्राह्यो यदि स्मरसि मे गुणान् ॥ वस तावदिह प्राज्ञ यद्यस्ति मयि सौहृदम् ॥ १२ ॥
लक्ष्मणेन सह भ्रात्रा वैदेह्या चापि भार्यया ॥ अर्चितः सर्वकामैस्त्वं ततो राम गमिष्यसि ॥१३॥
प्रीतियुक्तस्य मे राम ससैन्यः ससुहृद्गणः ॥ सत्क्रियां विहितां तावद्गृहाण त्वं मयोद्यताम् ॥१४॥
प्रणयाद्बहुमानाच्च सौहृदेन च राघव ॥ प्रसादयामि प्रेष्योऽहं न खल्वाज्ञापयामि ते ॥ १५ ॥
एवमुक्तस्ततो रामः प्रत्युवाच विभीषणम् ॥ रक्षसां वानराणां च सर्वेषां चोपशृण्वताम् ॥ १६ ॥
पूजितोऽहं त्वया सौम्य साचिव्येन परन्तप ॥ सर्वात्मना च चेष्टाभिः सौहृदेनोत्तमेन च ॥ १७ ॥
न खल्वेतन्न कुर्यां ते वचनं राक्षसेश्वर ॥ तं तु मे भ्रातरं द्रष्टुं भरतं त्वरते मनः ॥ १८ ॥

भार्थमित्यर्थः । सत्यसंश्रयः । "चतुर्दशे हि संपूर्णे वर्षेऽहनि रघूत्तम । न द्रक्ष्यामि यदि त्वां हि प्रवेक्ष्यामि हुताशनं" इति कृतप्रतिज्ञः ॥ ५ ॥ तं विना स्नानोपकरणं विना । स्नानं कथं कार्यं । केकयीपुत्रं मध्यमाम्बा तस्मिन् यदुःखमकरोत् तत्किं मयापि कर्तव्यं । भरतं राज्ञा मया च विरहितं राज्यं सम्यक्कृतवन्तं । धर्मचारिणं मद्वियोगेन बहुव्रतपरे तस्मिन् कथं मया व्रतत्यागः कर्तुं युक्त इति भावः । न मे स्नानं बहुमतं । प्रथमं मे स्नानमेव नेष्टं कथं तदनन्तरभावीनि वस्त्रादीनि ॥ ६ ॥ इत एवेति । अनेन पथा येनाहमागतस्तेनेत्यर्थः । एष इति हस्तनिर्देशपूर्वकमुच्यते । अयोध्यां आगतः प्राप्तः अयमयोध्यामार्गः । तेन क्षिप्रं तां प्रति गच्छामीत्यर्थः । परमदुर्गमः अतिदूरत्वादिति भावः ॥ ७ ॥ मार्गस्य परमदुर्गमत्वमात्रं परिहर्तुमाह—एवमुक्तस्त्विति । अह्नात्वामित्यादिसार्धश्लोकत्रयमेकान्वयं ॥ किं रावणेन चौर्येणापहृतमित्यत्राह—आहृतं निर्जित्येति । तर्हि कुबेराय समागताय तत्किमर्थं न दत्तमित्यत्राह—त्वदर्थं इति ॥ त्वदर्थे त्वद्गमनार्थे । पालितमिति । न दत्तमित्यर्थः । यद्वा त्वदर्थे त्वत्पूजार्थमेव । मेघसंकाशमिति वेगे दृष्टान्तः ॥ ८—११ ॥ स्नानाकरणे द्वित्रदिनमात्रस्थितिं याचते—अहं त इत्यादिनाचतुःश्लोक्येकान्वया । गुणान् भक्त्यादिगुणान् । सर्वकामैः भूषणादिभिः । विहितां मया कृतां । उद्यतां । इतः परं नोद्योगः कार्यः येन विलम्बः स्यात् । किंतु पूर्वमेव समुद्युक्तामित्यर्थः । निर्बन्धदोषं परिहरति—प्रणयादिति । प्रणयात् मद्वाक्यमवश्यं श्रोष्यतीति विस्रम्भात् । बहुमानात् त्वत्कृतलालनात् । सौहृदेन भक्त्या । प्रसादयामि प्रार्थयामि ॥ १२—१५ ॥ उपशृण्वताम् उपशृण्वत्सु । भावलक्षणे षष्ठी ॥ १६ ॥ साचिव्येन साहाय्येन । चेष्टाभिः पौरुषैः । सर्वात्मना पूजित इत्यन्वयः ॥ १७ ॥ न खल्वेतदित्यातिश्लोकद्वयमेका-

---

सूर्योदयोवायस्यतं । सुखप्रबुद्धमित्यर्थः । जयंपृष्ट्वा जयेतिशब्दमुक्त्वा ॥ १ ॥ **ति०** लङ्कायांवर्तमानस्यापिपुष्पकस्यात्युन्नततत्वेनबहिःस्थितैरपिदृश्यमानत्वादिदमितिप्रत्यक्षवन्निर्देशः ॥ ११ ॥ **स०** हेराम प्रीतियुक्तस्यपुरुषस्य शास्त्रविहितां मयाउद्यतांकार्यतयाउद्युक्तां सत्क्रियां । मे अव्ययं । मत्तः । गृहाण । मे ममेतिवा । नचरामेत्यस्यामन्त्रितत्वेनाविद्यमानवद्भावेनापदत्वेनपदात्परत्वाभावात्कथंमइत्यादेशइतिवाच्यं । सत्क्रियामितिपदात्परत्वेनादेशसंभवात् ॥ **शि०** प्रीतियुक्तस्यमे प्रार्थनयेतिशेषः । मया उद्यतां प्रकृष्टां । विहितां उचितां सत्क्रियांगृहाण ॥ १४ ॥

[**पा०**] १ ञ. नवस्त्राभरणानिच. २ ङ. झ. ट. एतत्पश्ययथाक्षिप्रं. ३ ङ. झ. ट. अयोध्यांगच्छतोह्येष. ४ ङ. झ. ट. रावणेनबलीयसा. ५ ङ. झ. येन. ६ ज. गतव्यथः. ७ ङ. छ. झ. ञ. ट. प्रीतियुक्तस्यविहितांससैन्यस्ससुहृद्गणः । सत्क्रियां राममेतावत्. ८ क.—ङ. झ. ट. सर्वेषामेवशृण्वतां. ९ ख. ग. ङ.—ट. लयावीर. १० झ. ट. सौहार्देनपरेणच.

मां निवर्तयितुं योसौ चित्रकूटमुपागतः ॥ शिरसा याचतो यस्य वचनं न कृतं मया ॥ १९ ॥
कौसल्यां च सुमित्रां च कैकेयीं च यशस्विनीम् ॥ गुरूंश्च सुहृदश्चैव पौरांश्च तनयैः सह ॥ २० ॥
उपस्थापय मे क्षिप्रं विमानं राक्षसेश्वर ॥ कृतकार्यस्य मे वासः कथं स्विदिह संमतः ॥ २१ ॥
अनुजानीहि मां सौम्य पूजितोसि विभीषण ॥ मन्युर्न खलु कर्तव्यस्त्वरितं त्वाऽनुमानये ॥२२॥
राघवस्य वचः श्रुत्वा राक्षसेन्द्रो विभीषणः ॥ तं विमानं समादाय तूर्णं प्रतिनिवर्तत ॥ २३ ॥
ततः काञ्चनचित्राङ्गं वैडूर्यमयवेदिकम् ॥ कूटागारैः परिक्षिप्तं सर्वतो रजतप्रभम् ॥ २४ ॥
पाण्डुराभिः पताकाभिर्ध्वजैश्च समलंकृतम् ॥ शोभितं काञ्चनैर्हर्म्यैर्हेमपद्मविभूषितम् ॥ २५ ॥
प्रकीर्णं किङ्किणीजालैर्मुक्तामणिगवाक्षितम् ॥ घण्टाजालैः परिक्षिप्तं सर्वतो मधुरस्वनम् ॥ २६ ॥
यन्मेरुशिखराकारं निर्मितं विश्वकर्मणा ॥ बहुभिर्भूषितं हर्म्यैर्मुक्तारजतसंनिभैः ॥ २७ ॥
तलैः स्फाटिकचित्राङ्गैर्वैडूर्यैश्च वरासनैः ॥ महार्हास्तरणोपेतैरुपपन्नं महाधनैः ॥ २८ ॥
उपस्थितमनाधृष्यं तद्विमानं मनोजवम् ॥ निवेदयित्वा रामाय तस्थौ तत्र विभीषणः ॥ २९ ॥

[तत्पुष्पकं कामगमं विमानमुपस्थितं भूधरसंनिकाशम् ॥
दृष्ट्वा तदा विस्मयमाजगाम रामस्ससौमित्रिरुदारसत्वः ॥ ३० ॥]

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्विंशत्युत्तरशततमः सर्गः ॥ १२४ ॥

न्वयं ॥ विभीषणवचनाकरणे हेतुमाह—तं त्विति ॥ १८ ॥ त्वरायां हेतुमाह—शिरसेति ॥ १९ ॥ कौसल्यामिति । अत्रापि द्रष्टुं त्वरते मे मन इति संबध्यते । पौरांश्च तनयैः सहेत्यत्र पौरैरेव तनयशब्दोन्वेति ॥२०॥ द्वित्रदिनान्यत्र स्थातव्यमित्यस्योत्तरमाह—कृतेति । निर्वर्तितचतुर्दशवर्षप्रव्राजनस्य कृतकार्यस्य मे इह लङ्कायां । वासः संमतः कथं स्वित् । न संमत इत्यर्थः । अन्यथा भरतस्याग्निप्रवेशादिति भावः ॥ २१ ॥ पूजितोसि विमानप्रदानेनेति शेषः । प्रदत्तत्वेन स्वत्वादुत्तरत्र कुबेराय प्रेषयिष्यति । मन्युः दैन्यं कोपो वा । "मन्युर्दैन्ये क्रतौ क्रुधि" इत्यमरः । त्वरितं उक्तप्रकारेण त्वरावन्तं मामिति संबन्धः । यद्वा त्वरितं यथा भवति तथा अनुमानये । अनुमतिं कारये ॥ २२ ॥ राघवस्य वचः श्रुत्वेत्यादिश्लोकचतुष्टयमेकं वाक्यं ॥ प्रतिनिवर्तत प्रतिन्यवर्तत । काञ्चनचित्राङ्गं काञ्चनमयचित्रावयवं । कूटागारैः मण्डपैः । परिक्षिप्तं व्याप्तं । रजतप्रभं । रजतशब्देनात्र विशदत्वमुच्यते । पताकाभिः केवलध्वजैः । ध्वजैः सचिह्नैः । हर्म्यैः अवान्तरराजगृहैः । हेमपद्मानि लम्बमानानि तैर्विभूषितं । प्रकीर्णं व्याप्तं । मुक्तामणिगवाक्षितं मुक्तामणिनिर्मितगवाक्षयुक्तं । घण्टाजालैः परिक्षिप्तं चतुर्षु पार्श्वेषु किङ्किणीजालयुक्तं । कोणेषु घण्टाजालयुक्तं । अतएव मधुरस्वनं ॥२३—२६ ॥ यन्मेर्वित्यादिश्लोकत्रयमेकान्वयं ॥ मुक्तारजतसन्निभैः तद्वन्निर्मलैरित्यर्थः । स्फाटिकचित्राङ्गैः स्फटिकमयचित्रावयवैः । महाधनैः महामूल्यैः ॥२७—३०॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्विंशत्युत्तरशततमः सर्गः ॥ १२४ ॥

स० आजुहाव मनोनुकूलगतिमत्त्वात्तस्य ॥ २३ ॥ इतिचतुर्विंशत्युत्तरशततमःसर्गः ॥ १२४ ॥

[पा०] १ ङ. ञ. ट. गुहंचसुहृदंचैवपौराञ्जानपदैःसह. २ ङ. ञ. ट. कर्तव्यःसखेलांचानुमानये. ख. च. छ. ज. कर्तव्यस्त्वरितंयानमानय. ३ ङ. ञ. ट. एवमुक्तस्तुरामेणराक्षसेन्द्रोविभीषणः । विमानंसूर्यसंकाशमाजुहावत्वरान्वितः. ४ ख. ङ. च. ञ. ज. ट. हैमपद्मविभूषितैः. ५ घंटाजालैरित्यर्धस्यस्थाने घ. पाठे घंटाजालैःपरिक्षिप्तंसर्वतःस्यन्दनोत्तमं । स्निग्धगंभीरनिर्घोषंसर्वतोमधुरस्वनं इत्येकःश्लोकोदृश्यते. ६ ख. ग. ङ.—ट. तंमेरु. ७ ङ. ञ. ट. बृहद्भिर्भूषितं. ८ ङ. ञ. ट. रजतशोभितैः. ९ अयंश्लोकः ङ. ञ. ट. पाठेषुदृश्यते.

पञ्चविंशत्युत्तरशततमः सर्गः ॥ १२५ ॥

विभीषणेनरामंप्रति स्वसमानीतपुष्पकप्रदर्शनपूर्वकं स्वकर्तव्यनिवेदनप्रार्थना ॥ १ ॥ रामेणतंप्रति वानरकृतोपकारस्मारणपूर्वकं वस्त्रालंकारादिभिस्तत्संमाननचोदना ॥ २ ॥ तथा विभीषणेनपूजितेषुसत्सुतेषु सीतालक्ष्मणाभ्यांसह पुष्पकारोहणेन सुग्रीवविभीषणादीनां स्वस्वावासेषुसुखावस्थानचोदनपूर्वकं स्वस्यायोध्यागमनाभ्यनुज्ञानयाचनम् ॥ ३ ॥ तथा सुग्रीवविभीषणादिभिः स्वेषामयोध्याऽऽगमनेन स्वाभिषेकावलोकनकुतूहलनिवेदने स्वाज्ञयापुष्पकारूढैस्तैस्सहायोध्यांप्रति प्रस्थानम् ॥ ४ ॥

उपस्थितं तु तं दृष्ट्वा पुष्पकं पुष्पभूषितम् ॥ [1]अविदूरस्थितो रामं प्रत्युवाच विभीषणः ॥ १ ॥
स तु [2]बद्धाञ्जलिः प्रह्वो विनीतो राक्षसेश्वरः ॥ अब्रवीच्चरयोपेतः किं करोमीति राघवम् ॥ २ ॥
तमब्रवीन्महातेजा लक्ष्मणस्योपशृण्वतः ॥ विमृश्य राघवो वाक्यमिदं स्नेहपुरस्कृतम् ॥ ३ ॥
कृतप्रयत्नकर्माणो [3]विभीषण वनौकसः ॥ रत्नैरर्थैश्च [4]विविधैर्भूषणैश्चापि पूजय ॥ ४ ॥
[5]सैन्यैरजिता लङ्का निर्जिता राक्षसेश्वर ॥ हृष्टैः प्राणभयं त्यक्त्वा संग्रामेष्वनिवर्तिभिः ॥ ५ ॥
त इमे [6]कृतकर्माणः पूज्यन्तां सर्ववानराः ॥ धनरत्नप्रदानेन कर्मैषां सफलं कुरु ॥ ६ ॥
एवं संमानिताश्चैते [7]मानार्हा मानद त्वया ॥ भविष्यन्ति कृतज्ञेन निर्वृता हरियूथपाः ॥ ७ ॥
त्यागिनं संग्रहीतारं सानुक्रोशं यशस्विनम् ॥ [8]सर्वे त्वामवगच्छन्ति ततः संबोधयाम्यहम् ॥ ८ ॥
हीनं रतिगुणैः सर्वैरभिहन्तारमाहवे ॥ [9]त्यजन्ति नृपतिं सैन्याः संविग्नास्तं नरेश्वरम् ॥ ९ ॥
एवमुक्तस्तु रामेण वानरांस्तान्विभीषणः ॥ रत्नार्थैः संविभागेन [10]सर्वानेवाभ्यपूजयत् ॥ १० ॥
ततस्तान्पूजितान्दृष्ट्वा रत्नैरर्थैश्च यूथपान् ॥ आरुरोह ततो रामस्तद्विमानमनुत्तमम् ॥ ११ ॥

अथ वानरसेनासंमाननं—उपस्थितमित्यादि ॥ तं दृष्ट्वा दर्शयित्वा । तत्कृत्वेति वा पाठः । प्रत्युवाच विमानमागतमितीति शेषः । स त्विति द्वितीयश्लोकसंग्रहो वायं श्लोकः ॥ १ ॥ त्वरयोपेतः आदरोपेत इत्यर्थः । किं करोमीति । इतःपरं किं करवाणीत्यर्थः ॥ २ ॥ लक्ष्मणस्योपशृण्वतः लक्ष्मणसंमतिपूर्वकमित्यर्थः ॥ ३ ॥ प्रयत्नकर्म प्रयत्नसाध्यं कर्मेत्यर्थः । अर्थैः प्रयोजनैः वस्त्रादिभिरित्यर्थः ॥ ४ ॥ अजिता पूर्वं सुरादिभिरप्यजिता । तव लङ्काराज्यप्राप्तिरेव तदधीनेत्यर्थः । हृष्टैः मयि प्रीतिमद्भिरित्यर्थः ॥ ५ ॥ त इम इत्यर्धोक्तं भङ्ग्यन्तरेणाह—धनरत्नेति ॥ ६ ॥ निर्वृताः सुखिताः । निर्वृत्ता इति पाठे निष्पन्नाः । परिपूर्णा इति यावत् ॥ ७ ॥ अर्थव्ययेन खेदो मा भूदित्याह—त्यागिनमिति ॥ संग्रहीतारं धनप्रदानेन मित्रसंग्रहकारिणमित्यर्थः । संग्रहार्थं त्यागित्वमुक्त्वा दयया त्यागित्वमाह—सानुक्रोशमिति । यशस्विनं त्यागकृतयशोवन्तं । संबोधयामि न तु चोदयामीत्यर्थः ॥ ८ ॥ सैनिकसंमानाकरणे दोषमाह—हीनमिति ॥ नृपतिं स्वामिनमपि । रतिगुणैः प्रीतिकरैरौदार्यादिगुणैः हीनं । अभिहन्तारं हिंसनशीलं । प्रसादं विना क्रोधैकनिरतमिति यावत् । तं नरेश्वरं सैन्याः संविग्नाः आहवे त्यजन्तीति योजना ॥ ९ ॥ संविभागेन यथार्हमंशकल्पनया । समतया प्रदाने अधिकानां कोपप्रसङ्गादिति भावः ॥ १० ॥ तत इत्यादिश्लोकद्वयमेकान्वयं ॥ ततः पूजानन्तरं ततः पूजादर्शनादेव हेतोरिति ततःशब्दद्वययोजना ।

ति० सर्ववानरपूजार्थंदिनद्वयंवासः । भारतेपि "ततस्तीरेसमुद्रस्ययत्रशिश्येसपार्थिवः । तत्रैवोवासधर्मात्मासहितस्तत्रवानरैः । अथैतान्वानरान्दृष्ट्वाससंमान्याभिपूज्यच । विसर्जयामासतदारत्नैःसंतोष्यसर्वथा । " इत्युक्तं ॥ १० ॥

[पा०] १ ङ. झ. ट. तत्कृत्वा. २ ग. ङ. झ. ट. अविदूरेस्थितो. ३ ङ. झ. बद्धाञ्जलिपुटोविनीतो. ४ ङ. झ. ट. कर्माणःसर्वएववनौकसः. ५ ङ. झ. ट. विविधैःसंपूज्यन्तांविभीषण. ६ ङ. झ. ट. सहामीभिस्त्वयालङ्का. ७ ङ. झ. कर्माणः सवनौकसः. ख. च. ञ. ट. कर्माणःपूज्यन्तांसाधुवानराः. ८ ङ. च. झ. ञ. ट. नन्द्यमानायथात्वया. ९ ङ. झ. जितेन्द्रियं. १० क. घ. यतस्त्वां. ११ ङ. झ. ट. सेनात्यजतिसंविग्नानृपतिंतंनरेश्वर.

अङ्केनादाय वैदेहीं लज्जमानां यशस्विनीम् ॥ लक्ष्मणेन सह भ्रात्रा विक्रान्तेन धनुष्मता ॥ १२ ॥
अब्रवीच्च विमानस्थः पूजयन्सर्ववानरान् ॥ सुग्रीवं च महावीर्यं काकुत्स्थः सविभीषणम् ॥ १३ ॥
मित्रकार्यं कृतमिदं भवद्भिर्वानरोत्तमाः ॥ अनुज्ञाता मया सर्वे यथेष्टं प्रतिगच्छत ॥ १४ ॥
यत्तु कार्यं वयस्येन सुहृदा वा परन्तप ॥ कृतं सुग्रीव तत्सर्वं भवताऽधर्मभीरुणा ॥
किष्किन्धां प्रतियाह्याशु स्वसैन्येनाभिसंवृतः ॥ १५ ॥
स्वराज्ये वस लङ्कायां मया दत्ते विभीषण ॥ न त्वां धर्षयितुं शक्ताः सेन्द्रा अपि दिवौकसः ॥१६॥
अयोध्यां प्रतियास्यामि राजधानीं पितुर्मम ॥ अभ्यनुज्ञातुमिच्छामि सर्वांश्चामन्त्रयामि वः ॥१७॥
एवमुक्तास्तु रामेण वानरास्ते महाबलाः ॥ ऊचुः प्राञ्जलयो रामं राक्षसश्च विभीषणः ॥ १८ ॥
अयोध्यां गन्तुमिच्छामः सर्वान्नयतु नो भवान् ॥ उद्युक्ता विचरिष्यामो वनानि नगराणि च ॥१९॥
दृष्ट्वा त्वामभिषेकार्द्रं कौसल्यामभिवाद्य च ॥ अचिरेणागमिष्यामः स्वान्गृहान्नृपतेः सुत ॥ २० ॥
एवमुक्तस्तु धर्मात्मा वानरैः सविभीषणैः ॥ अब्रवीद्राघवः श्रीमान्ससुग्रीवविभीषणान् ॥ २१ ॥
प्रियात्प्रियतरं लब्धं यदहं ससुहृज्जनः ॥ सर्वैर्भवद्भिः सहितः प्रीतिं लप्स्ये पुरीं गतः ॥ २२ ॥
क्षिप्रमारोह सुग्रीव विमानं वानरैः सह ॥ त्वमध्यारोह सामात्यो राक्षसेन्द्र विभीषण ॥ २३ ॥
ततस्तत्पुष्पकं दिव्यं सुग्रीवः सह सेनया ॥ अध्यारोहत्त्वरञ्शीघ्रं सामात्यश्च विभीषणः ॥ २४ ॥
तेष्वारूढेषु सर्वेषु कौबेरं परमासनम् ॥ राघवेणाभ्यनुज्ञातमुत्पपात विहायसम् ॥ २५ ॥
ययौ तेन विमानेन हंसयुक्तेन भास्वता ॥ प्रहृष्टश्च प्रतीतश्च बभौ रामः कुबेरवत् ॥ २६ ॥
ते सर्वे वानरा हृष्टा राक्षसाश्च महाबलाः ॥ यथासुखमसंबाधं दिव्ये तस्मिन्नुपाविशन् ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चविंशत्युत्तरशततमः सर्गः ॥ १२५ ॥

लज्जमानां सदस्यङ्कारोहणाय लज्जन्तीं । रामेणाङ्कारोपणं च स्त्रीसहायरहितत्वात् । धनुष्मता रामधनुर्धारिणा ॥ ११—१३ ॥ अब्रवीच्चेत्यत्र संग्रहेणोक्तं विवृणोति–मित्रेत्यादिना ॥ वानरान्प्रत्याह–मित्रेति ॥ १४ ॥ सुग्रीवं प्रत्याह–यत्त्वित्यादिना ॥ सुहृदा शोभनहृदयेन । वाशब्द एवकारार्थः । अधर्मभीरुणेति च्छेदः ॥ १५ ॥ विभीषणं प्रत्याह–स्वेति ॥ स्वराज्ये वस । न तु परकीयं रावणवदाक्रमितव्यं । अतो जनस्थानरक्षिणः समानेतव्या इति भावः ॥ १६—१८ ॥ उद्युक्ताः सावधानाः । जनपदपीडामकुर्वन्त इत्यर्थः ॥ १९—२१ ॥ प्रियात्प्रियतरमिति ॥ सीतालाभः प्रियं । भरतदर्शनं प्रियात्प्रियं । भवद्भिः सह पुरप्रवेशः प्रियात्प्रियतरमित्यर्थः ॥ २२—२३ ॥ शीघ्रं शीघ्रगमिति विमानविशेषणं । त्वरन्निति सुग्रीवविशेषणात् ॥ २४ ॥ आसनं वाहनं ॥ २५ ॥ हंसयुक्तेन प्रतिमारूपहंसयुक्तेन । प्रतीतः श्लाघितः ॥ २६ ॥ यथासुखमसंबाधमिति पदद्वयेन दिव्यस्य पुष्पकस्य अपेक्षितावकाशप्रदत्वं गम्यते

स० अधर्मभीरुणा कृतप्रतिकरणाभावप्रत्यवायरूपाधर्मभीरुणा ॥ १५ ॥ ति० मुद्युक्ताः हर्षयुक्ताः ॥ १९ ॥ स० खगतेन आकाशगतेन । हंसयुक्तेन वाहकत्वेननिर्मितहंसप्रतिमायुक्तेन । सुन्दरकाण्डेराक्षसपिशाचादीनांतद्वाहकत्वोक्तिस्तुलीलयारावणनियुक्तराक्षसादीनपेक्ष्य । वस्तुतस्तु तद्विमानदेवस्यैवतादृशशक्तिमत्त्वेनस्वेच्छयैवान्यनिरपेक्षेणगतिरितिज्ञेयं ॥ प्रतीतः प्रसिद्धः ॥ २६ ॥ इतिपञ्चविंशत्युत्तरशततमःसर्गः ॥ १२५ ॥

[पा०] १ ङ. ञ. ट. मनस्विनीं. २ ङ. ञ. ट. स्निग्धेनचहितेनच. ३ ख. सेन्द्रास्सर्वेमरुद्गणाः. ४ ङ. ञ. ट. प्राञ्जलयस्सर्वे. ख. च. ञ. प्राञ्जलयोभूत्वा. ५ क. ङ. छ. ञ. ञ. ट. मुद्युक्ताः. ६ ङ. ञ. ञ. ट. अचिरादागमिष्यामः. ७ ङ. ञ. ट. अब्रवीद्वानरान्रामस्ससुग्रीव. ८ ङ. ञ. ट. ततस्सपुष्पकं. ९ ङ. ञ. ट. सहवानरैः. १० ङ. ञ. ट. आरुरोहमुदायुक्तः. ख. च. छ. ञ. आरुरोहततःश्रीमान्. ११ ङ. ञ. ट. खगतेनविमानेन. १२ ख. ङ. च. छ. ञ. ञ. ट. वानरक्षोश्च.

षड्विंशत्युत्तरशततमः सर्गः ॥ १२६ ॥

पुष्पकस्थेनरामेण सीतांप्रति लंकाकिष्किन्धयोर्मध्येविद्यमानयुद्धभूमिसेतुप्रभृतीनां प्रदर्शनम् ॥ १ ॥ किष्किन्धांदृष्टवत्यासीतया ताराप्रभृतिवानरनारीणांसहानयनंप्रार्थितेनरामेण सुग्रीवेणतासामानयनम् ॥ २ ॥ तथा पुनःसीतांप्रति किष्किन्धायोध्ययोर्मध्यस्थपंपादिप्रदर्शनपूर्वकमयोध्याप्रदर्शनम् ॥ ३ ॥ सीतयासुग्रीवादिभिश्च सहर्षकौतुकमयोध्यादर्शनम् ॥४॥

अनुज्ञातं तु रामेण तद्विमानमनुत्तमम् ॥ उत्पपात महामेघः श्वसनेनोद्धतो यथा ॥ १ ॥
पातयित्वा ततश्चक्षुः सर्वतो रघुनन्दनः ॥ अब्रवीन्मैथिलीं सीतां रामः शशिनिभाननाम् ॥ २ ॥
कैलासशिखराकारे त्रिकूटशिखरे स्थिताम् ॥ लङ्कामीक्षस्व वैदेहि निर्मितां विश्वकर्मणा ॥ ३ ॥
एतदायोधनं पश्य मांसशोणितकर्दमम् ॥ हरीणां राक्षसानां च सीते विशसनं महत् ॥ ४ ॥
अत्र दत्तवरः शेते प्रमाथी राक्षसेश्वरः ॥ तव हेतोर्विशालाक्षि रावणो निहतो मया ॥ ५ ॥
कुम्भकर्णोत्र निहतः प्रहस्तश्च निशाचरः ॥ धूम्राक्षश्चात्र निहतो वानरेण हनूमता ॥ ६ ॥
विद्युन्माली हतश्चात्र सुषेणेन महात्मना ॥ ७ ॥
लक्ष्मणेनेन्द्रजिच्चात्र रावणिर्निहतो रणे ॥ अङ्गदेनात्र निहतो विकटो नाम राक्षसः ॥ ८ ॥
विरूपाक्षश्च दुर्धर्षो महापार्श्वमहोदरौ ॥ अकम्पनश्च निहतो बलिनोऽन्ये च राक्षसाः ॥ ९ ॥
[त्रिशिराश्चातिकायश्च देवान्तकनरान्तकौ ॥ युद्धोन्मत्तश्च मत्तश्च राक्षसप्रवरावुभौ ॥ १० ॥
निकुंभश्चैव कुंभश्च कुंभकर्णात्मजो बली ॥ वज्रदंष्ट्रश्च दंष्ट्रश्च बहवो राक्षसा हताः ॥ ११ ॥
मकराक्षश्च दुर्धर्षो मया युधि निपातितः ॥ अकंपनश्च निहतः शोणिताक्षश्च वीर्यवान् ॥ १२ ॥
यूपाक्षश्च प्रजंघश्च निहतौ तु महाहवे ॥ विद्युज्जिह्वोत्र निहतो राक्षसो भीमदर्शनः ॥ १३ ॥
यज्ञशत्रुश्च निहतः सुप्तघ्नश्च महाबलः ॥ सूर्यशत्रुश्च निहतो ब्रह्मशत्रुस्तथाऽपरः ॥ १४ ॥]
अत्र मण्डोदरी नाम भार्या तं पर्यदेवयत् ॥ सपत्नीनां सहस्रेण सांस्रेण परिवारिता ॥ १५ ॥
एतत्तु दृश्यते तीर्थं समुद्रस्य वरानने ॥ यत्र सागरमुत्तीर्य तां रात्रिमुषिता वयम् ॥ १६ ॥
एष सेतुर्मया बद्धः सागरे सलिलार्णवे ॥ तव हेतोर्विशालाक्षि नलसेतुः सुदुष्करः ॥ १७ ॥

॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चविंशत्युत्तरशततमः सर्गः ॥ १२५ ॥

अथ विलासेन सीतायै तत्तद्देशप्रदर्शनं–अनुज्ञातं त्वित्यादि ॥ १ ॥ मैथिलीं राजपुत्रीत्वेन लालनीयत्वोक्तिः ॥ २—३ ॥ आयोधनं युद्धभूमिं । विशस्यन्तेस्मिन्निति विशसनं । अधिकरणे ल्युट् ॥ ४ ॥ दत्तवरः ब्रह्मणा दत्तवरः । प्रमाथी हिंसकः शेते । भस्मस्वरूपेणेत्यर्थः ॥ ५ ॥ प्रहस्तश्चेत्यत्र नीलेनेत्यध्याहार्यं ॥ ६ ॥ विद्युन्मालीति । पूर्वमनुक्तमप्यत्रानुवादाद्राह्यं । एवं विकट इत्यत्रापि ॥ ७—१५ ॥ तीर्थं उत्तरणस्थानं । यत्र तीर्थे तां रात्रिं सागरतरणरात्रिं ॥ १६ ॥ सागरे सगरखानिते । सलिलेति क्षीरोदादिव्यावृत्तिः । एष सेतुः नलसेतुः नलबद्धः । " षिञ् बन्धने " इति धातुः । एतेन नलसेतुः सेतुरित्युक्त्या पूर्वकल्पकृतसेत्वन्तरं व्यावर्त्यते इति प्रत्युक्तं । पूर्वमेव

ति० एषइतितद्दाहभूमिप्रदर्शनं । अग्रेपिसर्वत्रतत्तद्युद्धभूमिप्रदर्शनमेव । अत्युच्चस्थलाद्विमानस्यसर्वयुद्धभूमिप्रत्यक्षंयुगपत् ॥ स० एषइति प्रत्यक्षसिद्धलङ्कापतित्वेनप्रस्तुतः । अत्रशेते अशयत ॥ ५ ॥ रामानु० "अङ्गदेनात्रनिहतोविकटोनामराक्षसः"

[पा०] १ ख. ङ.—ट. हंसयुक्तंमहानादमुत्पपातविहायसं. २ क. ग.—ट. एषदत्तवरः. ३ ख.—ट. दुष्प्रेक्षो. ४ त्रिशिराश्चातिकायश्चेत्यादयः. ब्रह्मशत्रुस्तथापरइत्यन्ताःश्लोकाः क. ख. ङ.—ट. पाठेपुदृश्यन्ते. ५ ख, ङ. ज.—ट. साग्रेण. ६ ख. ङ.—ट. लवणार्णवे.

पश्य सागरमक्षोभ्यं वैदेहि वरुणालयम् ॥ अपारमभिगर्जन्तं शङ्खशुक्तिनिषेवितम् ॥ १८ ॥
हिरण्यनाभं शैलेन्द्रं काञ्चनं पश्य मैथिलि ॥ विश्रमार्थं हनुमतो भित्त्वा सागरमुत्थितम् ॥ १९ ॥
एतत्कुक्षौ समुद्रस्य स्कन्धावारनिवेशनम् ॥ २० ॥
एतत्तु दृश्यते तीर्थं सागरस्य महात्मनः ॥ सेतुबन्ध इति ख्यातं त्रैलोक्येनाभिपूजितम् ॥
एतत्पवित्रं परमं महापातकनाशनम् ॥ २१ ॥
अत्र पूर्वं महादेवः प्रसादमकरोत्प्रभुः ॥ २२ ॥

सेतुसत्त्वे पुनः सेतुकरणवैयर्थ्यात् ॥ १७ ॥ अपारं मध्ये द्वीपभूतपाररहितं ॥ १८ ॥ हिरण्यनाभं मैनाकं ॥ १९ ॥ एतदित्यर्धं ॥ कुक्षौ मध्ये । सेतूपरीति शेषः । स्कन्धावारनिवेशनं स्कन्धावारनिवेशनरूपस्थानं । स्कन्धावारः शिबिरं ॥ २० ॥ एतत्त्वित्यादिसार्धश्लोकमेकं वाक्यं ॥ पूजितं पूजितुमर्हं । पूर्वं सेतोर्दक्षिणकोटिरुक्ता । अत्रोत्तरकोटिरिति ज्ञेयं । अनुगृह्णाति—एतदिति । पवित्रं पावनं । महापातकनाशनं च । भविष्यतीति शेषः ॥ २१ ॥ एवं लङ्कामारभ्य सेतुबन्धपर्यन्तमुक्त्वा तत उत्तरे दर्भशयनस्थानं निर्दिशति—अत्र पूर्वमिति ॥ महादेव इति समुद्रराज उच्यते औचित्यात् । प्रभुः समुद्रजलाधिष्ठाता । प्रसादमकरोत् सागरं शोषयिष्यामीति कुपितस्य मे प्रसादं प्रसन्नत्वं । अकरोत् । " प्रसादस्तु प्रसन्नता " इत्यमरः । न त्वत्र रुद्रो महादेवः । तेन पूर्वं प्रसादकरणानुक्तेः । पूर्वोक्तानामेव ह्यत्रानुवादः कृतः । न चाङ्गदेन विकटनिरसनस्य पूर्वमनुक्तत्वेपि यथानुवादात्तत्सिद्धिः तथात्रापि भविष्यतीति वाच्यं तद्वदत्राविरोधाभावात् । उपलभ्यते हि विरोधः । तथाहि । तत्र प्रसादः किं सेतुनिर्माणकाले वा पुनरागमनकाले वा । नाद्यः । प्रसादकरणहेतुरावणवधादेरभावात् पूर्वसिद्धसमुद्रप्रसादेनैवोपपत्तेश्च महादेवसमाख्यायाः समुद्रप्रसादश्रुत्या बाधितुं युक्तत्वाच्च । न द्वितीयः । पूर्वशब्दविरोधात् । नच पूर्वमित्यस्य पूर्वकल्प इत्यर्थ इति वाच्यं । " आत्मानं मानुषं मन्ये " इति वदता सुग्रीवादिसन्निधौ स्वस्य विष्ण्ववतारत्वद्योतकपूर्ववृत्तोद्घाटनानौचित्यात् । पूर्वकल्पकृतसेतुसद्भावे पुनस्तन्निर्माणवैयर्थ्यात् । किंच अत्रेतिपदस्य पूर्वश्लोकोक्तनलकारितसेतुपरामर्शित्वमेवोचितं । नतु पूर्वकल्पकृतसेतुपरामर्शित्वं । तस्य सद्भावेप्यन्तरितत्वसंभवात् । ननु पुराणान्तरानुसारात्तदर्थपरत्वं युक्तं । तथाहि कूर्मपुराणे—" सेतुमध्ये महादेवमीशानं कृत्तिवाससम् । स्थापयामास वै लिङ्गं पूजयामास राघवः ॥ तस्य देवो महादेवः

इत्यनुक्तस्यविकटस्यात्रनिहतत्वानुवादान्येप्येतादृशाबहवोनिहताइत्यवगम्यते ॥ ८ ॥ स० मैनाकस्यैवहिरण्यनाभइतिनामान्तरमितिप्राग्व्याख्यातं । काञ्चनं तद्वर्णं तत्प्रचुरंवा । पूर्वसागरंभित्त्वाहनुमतोविश्रमार्थमुत्थितं इदानीमस्मद्दर्शनार्थमुत्थितमित्यर्थः । तेनहनुमद्दर्शनानन्तरंपुनःसागरप्रवेशोक्तिरुपपन्ना । हिरण्यनाभोत्थितिस्थलप्रदर्शनंवा ॥ १९ ॥ स० अत्र तीरे । पूर्वं सेतुबन्धप्रारंभसमये । महादेवः पूजितःसन् प्रसादं निर्विघ्नंसेतुसमाप्तिशत्रुवधाद्युपयोग्यनुग्रहं अकरोत् । तत्स्थलंसीतायैप्रदर्श्यविमानादवतीर्यतत्रलिङ्गस्थापनंरामश्चकार । क्षेत्रस्यत्रैनेत्रत्वात्प्राक्तत्प्रार्थनायुक्ता । अतःपूर्वमित्युक्तिरनुग्रहमात्रविषयिणी । नतुप्रतिष्ठापनपरेतिमन्तव्यं ॥ यथोक्तमामेयपुराणेएकोत्तराशीत्यध्याये— "धन्योस्मिकृतकृत्योस्मिपूज्योस्मिपुरुषोत्तम । यदद्राक्षं सुदुर्दर्शंत्वद्रूपंयोगिपुङ्गवैः । त्वदाज्ञयामयापूर्वंत्वद्भक्तिविमुखंहरे । शैवंपाशुपतंलैङ्गमसच्छास्त्रंप्रवर्तितम् । तदिदानींमहापापंदिव्यरूपस्यदर्शनात् । सर्वंविनष्टमेवेशतवरामप्रसादतः । तरेयमेवत्वन्मायांत्वन्नामस्मरणादहम् । तथाअनुगृह्णात्वंयथास्यात्संततं स्मृतिः । रामः । रावणोऽयंमहापापीगोब्राह्मणवधेरतः । निर्लज्जैवैपरदारार्थीवैदिकाचारदूषकः । एतद्ग्रामात्सकृत्पार्श्वेयदघंप्रतिपद्यते । तदघंसर्वतीर्थेषुस्नानेनापिननश्यति । अब्रह्मण्यस्यलुब्धस्यमूर्खस्याशास्त्रवेदिनः । भूमिराक्रम्यतेयेनसोपिस्यात्तादृशःक्षणात् । त्यजेद्देशंकृतयुगेत्रेतायांगृहमेवच । द्वापरेकुलमेकंतुकर्तारंतुकलौयुगे । एतद्देशविशुद्ध्यर्थमत्रसंनिहितःसदा । मयात्रस्थापितेलिङ्गेभुक्तिमुक्तिप्रदोभव । श्रीकृष्णः । इतिरामस्यतद्वाक्यंश्रुत्वातत्वार्थसंयुतं । कृताञ्जलिर्दाशरथिंप्रहसन्परमेश्वरः । श्रीमहादेवः । सर्वभूतसर्वभूतस्थःसर्वात्मासर्ववत्सलः । त्वमेवरामविश्वात्मन्विडंबयसिलीलया । त्वद्वाक्यमेवधार्यमेतथाप्यार्यमहाविभो । यदुक्तं तत्तथैवास्तुत्वन्नाम्नास्थापयेहमाम् । इत्युक्त्वातंपरिक्रम्यप्रणम्याथययौहरः । सखेपश्यन्तियेलिङ्गंरामनाथइतिश्रुतम् । ततःसंसारिणोनरयुःसत्यंसत्यंवदाम्यहम् । सेतुबन्धस्थितंलिङ्गंयेसेवन्तेसकृत्कलौ । महापातकलक्षाद्वामुच्यतेनात्रसंशयः । कुरुक्षेत्रेयजेद्यः

[पा०] १ ख. ङ. छ. झ. ञ. ट. शुक्तिसमाकुलं. २ क. घ. दयार्थयोहनुमतोहित्वासागरमुत्थितः.

अत्र राक्षसराजोऽयमाजगाम विभीषणः ॥ २३ ॥

पार्वत्या सह शङ्करः । प्रत्यक्षमेव भगवान्दत्तवान्वरमुत्तमम् ॥ ये त्वया स्थापितं लिङ्गं द्रक्ष्यन्तीह द्विजातयः । महापातकसंयुक्तास्तेषां पापं विनश्यति ॥ अन्यानि चैव पापानि तीरे तत्र महोदधेः । दर्शनादेव लिङ्गस्य नाशं यान्ति न संशयः ॥ यावत्स्थास्यन्ति तरवो यावदेव च मेदिनी । यावत्सेतुश्च तावच्च स्थास्याम्यत्र तिरोहितः ॥ स्नानं दानं जपः श्राद्धं भविष्यत्यक्षयं ततः । स्मरणादेव लिङ्गस्य दिनपापं प्रणश्यति ॥ इत्युक्त्वा भगवान्वाचं परिष्वज्य च राघवम् । सनन्दी सगणो रुद्रस्तत्रैवान्तरधीयत " इति ॥ पाद्मे पुराणेपि–रामः पुष्पकादवरुह्य महादेवं प्रतिष्ठापितवान् सोस्मै प्रसन्नोभूदित्युच्यते । एतादृशपुराणवचनानुसारेणायं श्लोकोलिङ्गप्रतिष्ठां बोधयतीति । मैवं । उक्तदोषानिस्तारात्, इतिहासो हि परिग्रहातिशयात्, ग्रन्थसौष्ठवाच्च, इतिहासपुराणं पञ्चममित्यादावधिकाक्षरत्वेपि पूर्वप्रयोगेणाभ्यर्हितत्वाच्च पुराणेभ्यो गरीयानिति ' वेदः प्राचेतसादासीत् ' इति वेदमयत्वोक्त्या चतुर्मुखवरप्रदानमूलतया च प्रबलतरः । तद्विरोधे तामसपुराणवचनानि न प्रमाणानि । किंच पुराणं सर्गप्रतिसर्गादिष्वन्यपरमिति नेतिहासवत्पुरावृत्तकथने तात्पर्यवत् । अथवा, अस्मिन्सर्गे श्लोकाः प्रायशो व्यत्यस्ता दृश्यन्ते इत्युडारिप्रभृतिभिरुक्तं । तथा चेदमर्धं अत्र मण्डोदरीति श्लोकानन्तरं पठितव्यं । तत्र च महादेवप्रसादः स्वपितृदर्शनमेव । अतएव भरतं प्रति हनुमत्प्रेषणावसरे वक्ष्यति—' महादेवप्रसादाच्च पित्रा मम समागमम् ' इति । पुराणान्तरं तु माहात्म्यप्रतिपादनपरं बोध्यमिति संक्षेपः ॥ २२ ॥ अत्र राक्षसराज इति ॥

ज्ञानश्चमेधादिकाञ्छतम् । यत्फलंलभतेसद्यःसेतुलिङ्गस्यदर्शनात् । अभक्ष्याश्यसमिद्भर्णीयोनग्निरमखोगृही । योवनीचरिरंसुः स्याद्यतिर्योभैक्षभुग्भवेत् । एतेसर्वेचपापिष्ठादंभात्स्वाश्रमदूषकाः । दृष्ट्वारामेश्वरंलिङ्गंसद्यःपूताभवन्तिहि । कावेर्यांतुतुलास्नानंयःकुर्याद्रङ्गसंनिधौ । भवेत्तस्यकृतार्थस्यरामेश्वरनिरीक्षणम् ।" इत्यादि । कूर्मपुराणेचैकोनविंशेऽध्याये—"सेतुमध्येमहादेवमीशानंकृत्तिवाससम् । स्थापयामासलिङ्गस्थंपूजयामासराघवः । तस्यदेवोमहादेवःपार्वत्यासहशङ्करः । प्रत्यक्षमेवभगवान्दत्तवान्वरमुत्तमम् । येत्वयास्थापितंलिङ्गंद्रक्ष्यन्तीहद्विजातयः । महापातकसंयुक्तास्तेषांपापंविनश्यतु । अन्यानिचैवपापानिस्नातस्यात्रमहोदधौ । दर्शनादेवलिङ्गस्यनाशंयान्तिनसंशयः । यावत्स्थास्यन्तिगिरयोयावदेवचमेदिनी । यावत्सेतुश्चतावच्चस्थास्याम्यप्यतिरोहितः । स्नानंदानंतपःश्राद्धंभविष्यत्यक्षयंमहत् । स्मरणादेवलिङ्गस्यदिनपापंप्रणश्यति । इत्युक्त्वाभगवान्साक्षात्परिष्वज्यचराघवम् । सनन्दी सगणोरुद्रस्तत्रैवान्तरधीयत ।" इति । स्कान्देसेतुमाहात्म्येत्रिंचत्वारिंशेऽध्याये—'रावणस्यसदाविप्रायत्पापंमथिविद्यते । तस्यमेनिष्कृतिंब्रूतरावणस्यवधस्यच । यत्कृत्वातेनपापेनमुच्येयंमुनिपुङ्गवाः । मुनयऊचुः । सत्यव्रतजगन्नाथजगद्रक्षाधुरंधर । सर्वलोकोपकारार्थंकुरुरामशिवार्चनम् । गन्धमादनशृङ्गेस्मिन्महापुण्येविमुक्तिदे । शिवलिङ्गंप्रतिष्ठाप्यलोकसंग्रहकाम्यया । कुरुरामदशग्रीववधदोषापनुत्तये । लिङ्गस्थापनजंपुण्यंचतुर्वक्त्रोपिभाषितुं । नशक्नोतिसतैर्वक्तुंकिंपुनर्मनुजेश्वराः। इत्यारभ्य मध्येहनुमत्प्रेषणादिप्रकारमुक्त्वा सुमुहूर्तेकिंचिदवकाशमासादयतिहनुमतिचिरायतिच "रामराममहाबाहोकालोयातिहिसांप्रतम् । जानक्यायत्कृतंलिङ्गंसैकर्तलीलयाविभो । तल्लिङ्गंस्थापयस्वाद्यमहालिङ्गमनुत्तमम् । इत्येवंसहितोरामःसीतयासहसत्वरम् । मुनिभिःसहितःप्रीत्याकृतकौतुकमङ्गलः । ज्येष्ठमासेसितेपक्षेसप्तम्यांबुधहस्तयोः । होरान्तेचव्यतीपातेकन्याचन्द्रेवृषेरवौ । दशयोगेमहापुण्येगन्धमादनपर्वते । सेतुमध्येमहादेवंलिङ्गरूपधरंहरम् । ईशानंकृत्तिवसनंगङ्गाचन्द्रकलाधरम् । रामोवैस्थापयामासशिवलिङ्गमनुत्तमम् । लिङ्गस्थंपूजयामासराघवस्तंसईश्वरम् । लिङ्गस्थःसमहादेवःपार्वत्यासहशंकरः । प्रत्यक्षमेवभगवान्दत्तवान्वरमुत्तमम् । सर्वलोकशरण्यायराघवायमहात्मने । त्वयात्रस्थापितंलिङ्गंयेपश्यन्तिरघूद्वह । महापातकयुक्ताश्चतेषांपापंप्रणश्यति । सर्वाण्यपिहिपापानिधनुष्कोटौनिमज्जनात् । दर्शनाद्रामलिङ्गस्यपातकानिमहान्त्यपि । विलयंयान्तिराजेन्द्ररामचन्द्रनसंशयः । प्रादादेवंहिरामायवरंपूर्णायशङ्करः ।" इत्यादि । नागोजिभट्टस्तु पूर्वभागमनसमयएवाहभूतपतिप्रतिष्ठापनं । 'अत्र सेतुमूले । पूर्वं सेतुबन्धनात्पूर्वंविभुर्महादेवःमम रामस्यप्रसादमकरोत् मत्स्थापितलेनात्रस्थितोभूत् । सेतोर्निर्विघ्नतासिद्ध्यैसमुद्रप्रसादानन्तरंशिवस्थापनं रामेणकृतमितिगम्यते । अत्रस्थलेमहात्मनःसागरस्यतीर्थंसेतुनिर्माणमूलप्रदेशत्वात्सेतुबन्धइतिख्यातं भविष्यतीतिशेषः । ' इति । इदंतुपुरुपुराणानवलोकनमूलमित्युपेक्ष्यं । तीर्थंतु—'महदितिजलं । तद्रूपीदेवोमहादेवःसमुद्रः । तदाह्वैजयन्ती 'गंभीरं गहनंरत्नंगह्वरंशरणंवपुः । ह्रेहः स्नेह्यंमहच्छुद्धंवरुणंसर्वतोमुखम् । पातालंस्वादुदिव्यंचतानिपञ्चादशाप्सुच'इति । यद्वामहादेवमूर्तिष्वन्यतमत्वात्समुद्रस्य महादेवशब्देनात्रसमुद्रएवोच्यते । पूर्वं सेतुबन्धात्पूर्वं । प्रसादमकरोत् जलोपरिसेतुधारणरूपमकरोत् । यद्वा प्रसादं स्वसंनिधानरूपं । 'दर्शयामासचात्मानंसमुद्रःसरितांपतिः ।' इत्युक्तत्वात् महादेवःसमुद्रएवेतिव्याचख्यौ । सोपितद्वन्माननीयः । केचित्तुअत्रपुरु

एषा सा दृश्यते सीते किष्किन्धा चित्रकानना ॥ सुग्रीवस्य पुरी रम्या यत्र वाली मया हतः ॥२४॥
अथ दृष्ट्वा पुरीं सीता किष्किन्धां वालिपालिताम् ॥ अब्रवीत्प्रश्रितं वाक्यं रामं प्रणयसाध्वसा ॥२५॥
सुग्रीवप्रियभार्याभिस्ताराप्रमुखतो नृप ॥ अन्येषां वानरेन्द्राणां स्त्रीभिः परिवृता ह्यहम् ॥
गन्तुमिच्छे सहायोध्यां राजधानीं त्वयाऽनघ ॥ २६ ॥
एवमुक्तोथ वैदेह्या राघवः प्रत्युवाच ताम् ॥ एवमस्त्विति किष्किन्धां प्राप्य संस्थाप्य राघवः ॥
विमानं प्रेक्ष्य सुग्रीवं वाक्यमेतदुवाच ह ॥ २७ ॥
ब्रूहि वानरशार्दूल सर्वान्वानरपुङ्गवान् ॥ स्वदारसहिताः सर्वे ह्ययोध्यां यान्तु सीतया ॥ २८ ॥
तथा त्वमपि सर्वाभिः स्त्रीभिः सह महाबल ॥ अभित्वरस्व सुग्रीव गच्छामः प्लवगेश्वर ॥ २९ ॥
एवमुक्तस्तु सुग्रीवो रामेणामिततेजसा ॥ वानराधिपतिः श्रीमांस्तैश्च सर्वैः समावृतः ॥ ३० ॥
प्रविश्यान्तःपुरं शीघ्रं तारामुद्वीक्ष्य भाषत ॥ ३१ ॥

अत्र समुद्रराजप्रसादप्रदेशादुत्तरतः ॥ २३ ॥ पम्पावनमधुवनाद्यपेक्षया चित्रकाननेत्युक्तिः ॥ २४ ॥ प्रणयसाध्वसा प्रणययुक्तसाध्वसवती । प्रणतसाध्वसेति पाठे उपनतसाध्वसा । सुग्रीवादिसन्निधानात्प्रणयसाध्वसेति प्रथमभाषणरूपत्वाद्वा ॥ २५ ॥ सुग्रीवेत्यादिसार्धश्लोक एकान्वयः ॥ अहं ताराप्रमुखतः ताराप्रमुखाभिः सुग्रीवप्रियभार्याभिः सह अन्येषां वानरेन्द्राणां स्त्रीभिश्च परिवृता सती त्वया सह अयोध्यां गन्तुं इच्छे इच्छामीति संबन्धः । आत्मनेपदमार्षम् ॥ २६ ॥ एवमित्यादिसार्धश्लोक एकान्वयः ॥ एवमस्त्विति सीतां प्रत्युवाच । अथ किष्किन्धां प्राप्य विमानं संस्थाप्य सुग्रीवं प्रेक्ष्योवाचेति संबन्धः ॥२७॥ यान्त्वित्यत्र इतिकरणं द्रष्टव्यं । सीतया निमित्तभूतया । सीताप्रियार्थमित्यर्थः ॥ २८ ॥ तथा त्वमपीति अत्र याहीति विपरिणामेन संबन्धः । अभित्वरस्व । किष्किन्धायां विलम्बो न कार्य इत्यर्थः ॥ २९ ॥ सर्वैः समावृतो वानराधिपतिरुक्त इत्यन्वयः ॥ ३० ॥ प्रविश्येति ॥ अर्धमेकं वाक्यं । प्रवेशः सुग्रीवस्यैव

भ्रपुभिर्नेत्रपुसदक्षुवर्णं । तद्वर्णौऊरूयस्याःसातथातत्संबुद्धिःहेसीते । अम्महादेवोवरुणइतिव्याचक्षाणानोदाहृतवैजयन्त्यवलोका इवाम्महादेवइत्येकपदोपरिपरिदर्शितसाहसाउदाहृतबहुपुराणश्रवणविकलादुराग्रहग्रहगृहीतास्ततोप्यवमवरुणकरुणपात्रतांसोद्वापिरामस्यसदाशिवप्रसादंस्वरसतःपयपद्यायातमवधूयविधुशेखरमवमन्यन्त इत्युपेक्ष्याः । 'यच्छौचनिस्सृतसरित्प्रवरोदकेनतीर्थेनमूर्ध्न्यधिधृतेनशिवःशिवोभूत् । सेशंपुनाज्जगदिदंयदहंणांभःसद्यःपुनातिसहचन्द्रललामलोकान्'इत्यादिभागवतादुदाहृतपुराणेषुच 'लोकसंग्रहकाम्यया'इत्याद्युक्तेश्चलीलेयंराघवस्येतिसर्वंचतुरश्रं । शि० अत्र अस्मिन्सेतुमूलभूतदेशे । महादेवः महाशंभुः। प्रसादं अतिप्रीतिं अकरोत् । एतेन नीलादिवन्महादेवोपिसेतुबन्धनसाहाय्यंकृतवानितिसूचितं । तेनशिवस्यरामेऽतिप्रीतिःसूचिता । अतएवस्वसाहाय्यसूचनार्थमिदानीमपितत्रतस्यस्थितिःप्रसिद्धा । यद्वा अत्र अस्मिन्देशे । महादेवः प्रसादं प्रकर्षेणसादंप्राप्तिं स्वनिस्वस्थितिमित्यर्थः । अकरोत् सेतुरक्षणार्थंममाज्ञयात्रैवस्थितइत्यर्थः । नचप्रसन्नतादौरूढस्यप्रसादशब्दस्यकथमुक्तोर्थइतिवाच्यं । योगवृत्तिस्वीकारेबाधकाभावात् । अतएव यौगिकार्थमादायपङ्कजशब्दादीनांशुक्तिकादौप्रवृत्तिःप्रदर्शितानैयायिकादिभिः । रामकर्तृकशिवस्थापनं पुराणेषुविस्तरतोनिरूपितं । अतएव 'शंभोःप्रीत्यैयोमयाकारिधर्मःखेखेकालेमाननीयोभवद्भिः । नानावर्णान्भाविनोभूमिपालान्भूयोभूयोयाचतेरामचन्द्रः" इतिरामकृतस्ताम्रपत्रलिखितः स्वतोविदीर्णदेवालयैकदेशान्निस्सृतः इदानीन्तनसार्वभौमेनवाराणसींप्रेषितः श्लोकोपिसंगच्छते । ननुपूर्वमनुक्तेरिदंनयुक्तमितितुनभ्रमितव्यं । पूर्वमनुक्तखेप्यनयैवोक्त्यापूर्ववृत्तस्यानुमानेनपूर्वोक्त्यभावस्याकिञ्चित्करत्वेनयुक्तत्वेबाधकाभावात् । अतएवजयन्तमारीचवृत्तादीनांपूर्वमनुक्तत्वेप्युत्तरत्रोक्तेर्नायुक्तम् । यद्वा अत्रस्थितःसन्महादेवः प्रसादं संशयास्पदीभूतरावणसाहाय्यगमननिरोधमकरोत् । तथाचमेदिनी " मूलेप्रत्यन्तशैलेच्चप्रसादस्त्वरोधने " इति । एतेन पूर्वंशंभुप्रसादानुक्त्याऽयमर्थोनयुक्तइत्याद्युक्तयआपाततोरमणीयाइतिदिक् ॥२२॥ ती० प्रणतसाध्वसेतिपाठे प्रणेतुं उपनेतुं प्राप्तं साध्वसंययासा । शि० प्रणयस्यसाधुनाशोभनतया असतिप्रक्राशतेसा प्रणयसाध्वसा । स० प्रणयसाध्वसा । प्रणयःस्नेहः । साध्वसंयथेच्छंकथनेकिंवदिष्यतिवारामइतिचिरंप्रियवियोगेनतत्स्वभावपरिज्ञानशून्यायाइवस्थितायाभयंच । प्रणयपूर्वंसाध्वसंयस्याःसा ॥ २५ ॥ ति० गन्तुमिच्छे इच्छामि । अत्रैतदर्थमेकदिनवासः । अतएवभारतेऽङ्गदस्ययौवराज्याभिषेकोप्येतद्दिनउक्तः ॥ २६ ॥ वानराणांनारीणांसह ताभिःसहेत्यर्थः । षष्ठ्यार्षी ॥ २७ ॥

[पा०] १ क.—ट. त्वयासह. २ क. ङ.—ञ, ट, मुद्वीक्ष्यसोब्रवीत्.

प्रिये त्वं सह नारीभिर्वानराणां महात्मनाम् ॥ राघवेणाभ्यनुज्ञाता मैथिलीप्रियकाम्यया ॥ ३२ ॥
त्वर त्वमभिगच्छामो गृह्य वानरयोषितः ॥ अयोध्यां दर्शयिष्यामः सर्वा दशरथस्त्रियः ॥ ३३ ॥
सुग्रीवस्य वचः श्रुत्वा तारा सर्वाङ्गशोभना ॥ आहूय चाब्रवीत्सर्वा वानराणां तु योषितः ॥ ३४ ॥
सुग्रीवेणाभ्यनुज्ञाता गन्तुं सर्वैश्च वानरैः ॥ मम चापि प्रियं कार्यमयोध्यादर्शनेन च ॥ ३५ ॥
प्रवेशं चापि रामस्य पौरजानपदैः सह ॥ विभूतिं चैव सर्वासां स्त्रीणां दशरथस्य च ॥ ३६ ॥
तारया चाभ्यनुज्ञाता सर्वा वानरयोषितः ॥ नेपथ्यं विधिपूर्वेण कृत्वा चापि प्रदक्षिणम् ॥
अध्यारोहन्विमानं तत्सीतादर्शनकाङ्क्षया ॥ ३७ ॥
ताभिः सहोत्थितं शीघ्रं विमानं प्रेक्ष्य राघवः ॥ ऋश्यमूकसमीपे तु वैदेहीं पुनरब्रवीत् ॥ ३८ ॥
दृश्यतेऽसौ महान्सीते सविद्युदिव तोयदः ॥ ऋश्यमूको गिरिश्रेष्ठः काञ्चनैर्धातुभिर्वृतः ॥ ३९ ॥
अत्राहं वानरेन्द्रेण सुग्रीवेण समागतः ॥ समयश्च कृतः सीते वधार्थं वालिनो मया ॥ ४० ॥
एषा सा दृश्यते पम्पा नलिनी चित्रकानना ॥ त्वया विहीनो यत्राहं विललाप सुदुःखितः ॥४१॥
अस्यास्तीरे मया दृष्टा शबरी धर्मचारिणी ॥ अत्र योजनबाहुश्च कबन्धो निहतो मया ॥ ४२ ॥
दृश्यते च जनस्थाने सीते श्रीमान्वनस्पतिः ॥ यत्र युद्धं महद्वृत्तं तव हेतोर्विलासिनि ॥
रावणस्य नृशंसस्य जटायोश्च महात्मनः ॥ ४३ ॥
खरश्च निहतो यत्र दूषणश्च निपातितः ॥ त्रिशिराश्च महावीर्यो मया बाणैरजिह्मगैः ॥

नतु वानराणां । भाषत अभाषत ॥ ३१ ॥ नारीभिः स्त्रीभिः सह अनुज्ञाता । अयोध्यागमनं प्रतीति शेषः। त्वं च वानरस्त्रियश्चानुज्ञाता इत्यर्थः । नारीणामिति पाठे तृतीयार्थे षष्ठी ॥ ३२ ॥ गृह्य गृहीत्वा । आनीयेति यावत् । दर्शयिष्यामः द्रक्ष्यामः । दशरथस्त्रियः दशरथस्त्रियश्च ॥ ३३ ॥ सर्वाङ्गशोभनेत्यनेन पूर्वं स्वयमलंकृतवतीति गम्यते ॥ ३४ ॥ सुग्रीवेणेत्यादिश्लोकद्वयमेकान्वयं ॥ सुग्रीवेण सर्वैर्वानरैः स्वस्वभर्तृभिर्वानरैः सह अयोध्यां गन्तुमभ्यनुज्ञाताः । यूयमिति शेषः । न केवलं सुग्रीवानुज्ञामात्रं मत्प्रियार्थं च भवतीभिरागन्तव्यमित्याह—मम चापीति । अयोध्यादर्शनेन मम यत्प्रियं तद्भवतीभिः सहागत्य कार्यमित्यर्थः । रामस्य प्रवेशं च दशरथस्य स्त्रीणां विभूतिं ऐश्वर्यं च । द्रक्ष्याम इति शेषः ॥३५—३६॥ तारयेत्याद्यर्धत्रयमेकान्वयं ॥ नेपथ्यं अलंकारं । विधिपूर्वेण मङ्गलालम्भनादिविधिपूर्वकमित्यर्थः । अत्रालंकरणाह्वानादिना दिनमेकं गतमित्याहुः । प्रदक्षिणं कृत्वा । विमानस्येति शेषः । प्रादक्षिण्येन गमनमात्रमत्र विवक्षितं । अतिविपुलस्य तस्य सद्यः प्रदक्षिणासंभवात् ॥ ३७ ॥ उत्थितमित्यनेन तारागमनपर्यन्तं भूमौ विमानं स्थितमिति ज्ञायते ॥ ३८—३९ ॥ समयः संकेतः ॥ ४० ॥ विललाप । लिङुत्तमैकवचनं ॥ ४१—४२ ॥ दृश्यते चेत्यादिसार्धश्लोकमेकं वाक्यं ॥ श्रीमान् वनस्पतिः जटायुनिवासभूतो वटः । तस्य श्रीमत्त्वं महात्मना जटायुषाधिष्ठितत्वात् ॥ ४३ ॥ खरश्चेत्यादिसार्धश्लोक

रामानु० सुग्रीवेणाभ्यनुज्ञाताः वयमितिशेषः । वानरैश्चाभ्यनुज्ञाताः यूयमितिशेषः । ममचापिप्रियंकार्यमित्यत्रभवतीभिरिति शेषः । **स०** अयोध्यादर्शनेनभवतीभिर्ममप्रियंकार्यं ॥ ३५ ॥ **स०** अध्यारोहन् । ननुपूर्वंरामस्यनागपाशबन्धसमयेरामदर्शनार्थं विमानेनानीतांसीतांप्रति तवपतिश्चेन्नजीवतितर्हिनेदंविमानंत्वांवहेदितिसरमावाक्येनपुष्पकस्याविधवावाहकत्वनियमोक्त्याकथमत्रतारायाविमानारोहणमितिचेदुच्यते । सरमावाक्यंनसीतायाविधवात्वपुरस्कारेणविपक्षेयानारोहनिषेधपरं । किंतु दृश्यमानरामस्यमरणेतवाशुचित्वेननेदंत्वामावहेदित्येवंपरं । यद्वा उक्तनियमाङ्गीकारेपिनक्षतिः । तारायारामवाक्यात्सुग्रीवपतिकत्वेनवाविमानारोहसंभवात् । "पुत्रिण्यविधवा" इतिस्मृतेःपुत्रेणवातस्याअविधवात्वंबोध्यं ॥ ३७ ॥ **ती०** ताभिःसहोत्थितमित्यनेन चतुर्थ्यांकिष्किंधायामुषित्वापश्चम्यांततःप्रस्थानमित्यवगम्यते । उपरिपश्चम्यां भरद्वाजाश्रमप्रवेशस्यवक्ष्यमाणत्वात् ॥ ३८ ॥
इतिषड्विंशत्युत्तरशततमोऽध्यायः ॥ १२६ ॥

[**पा०**] १ ङ. छ. झ. ञ. ट. नारीणांवानराणां. २ ख. प्रवेशंचापिपश्यामःपौर. ३ ङ. च. छ. झ. ञ. ट. दृश्यतेऽसौ.

एतत्तदाश्रमपदमस्माकं वरवर्णिनि ॥ ४४ ॥
पर्णशाला तथा चित्रा दृश्यते शुभदर्शना ॥ यत्र त्वं राक्षसेन्द्रेण रावणेन हृता बलात् ॥ ४५ ॥
एषा गोदावरी रम्या प्रसन्नसलिला शिवा ॥ अगस्त्यस्याश्रमो ह्येष दृश्यते पश्य मैथिलि ॥ ४६ ॥
दीप्तश्चैवाश्रमो ह्येष सुतीक्ष्णस्य महात्मनः ॥ ४७ ॥
वैदेहि दृश्यते चात्र शरभङ्गाश्रमो महान् ॥ उपयातः सहस्राक्षो यत्र शक्रः पुरन्दरः ॥ ४८ ॥
अस्मिन्देशे महाकायो विराधो निहतो मया ॥ ४९ ॥
एते हि तापसावासा दृश्यन्ते तनुमध्यमे ॥ अत्रिः कुलपतिर्यत्र सूर्यवैश्वानरप्रभः ॥
अत्र सीते त्वया दृष्टा तापसी धर्मचारिणी ॥ ५० ॥
असौ सुतनु शैलेन्द्रश्चित्रकूटः प्रकाशते ॥ यत्र मां केकयीपुत्रः प्रसादयितुमागतः ॥ ५१ ॥
एषा सा यमुना दूरादृश्यते चित्रकानना ॥ ५२ ॥
भरद्वाजाश्रमो यत्र श्रीमानेष प्रकाशते ॥ ५३ ॥
एषा त्रिपथगा गङ्गा दृश्यते वरवर्णिनि ॥ नानाद्विजगणाकीर्णा संप्रपुष्पितकानना ॥ ५४ ॥
शृङ्गिबेरपुरं चैतद्गुहो यत्र समागतः ॥ ५५ ॥
एषा सा दृश्यते सीते सरयूर्यूपमालिनी ॥ नानातरुशताकीर्णा संप्रपुष्पितकानना ॥ ५६ ॥
एषा सा दृश्यतेऽयोध्या राजधानी पितुर्मम ॥ अयोध्यां कुरु वैदेहि प्रणामं पुनरागता ॥ ५७ ॥
ततस्ते वानराः सर्वे राक्षसश्च विभीषणः ॥ उत्पत्योत्पत्य ददृशुस्तां पुरीं शुभदर्शनाम् ॥ ५८ ॥

ततस्तु तां पाण्डुरहर्म्यमालिनीं विशालकक्ष्यां गजवाजिसंकुलाम् ॥
पुरीमयोध्यां ददृशुः प्लवङ्गमाः पुरीं महेन्द्रस्य यथाऽमरावतीम् ॥ ५९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षड्विंशत्युत्तरशततमः सर्गः ॥ १२६ ॥

एकान्वयः ॥ तत् पञ्चवटीति प्रसिद्धं ॥४४—४५॥ एषा गोदावरीति । अयमेव पाठः सम्यक् । एषा मन्दाकिनीति पाठे अगस्त्याश्रमसमीपे मन्दाकिनीति काचिन्नद्यस्तीति ज्ञेयं । एतच्छ्लोकात्पूर्वं पर्णशालेति श्लोकः पठनीयः ॥ ४६ ॥ दीप्तश्चेत्यर्धं ॥ ४७ ॥ पुराणि शत्रुशरीराणि शत्रुपुराणि वा दारयतीति पुरन्दरः ॥ ४८ ॥ अस्मिन्देश इत्यर्धं ॥ ४९ ॥ एते हीत्यादिसार्धश्लोक एकान्वयः ॥ तापसावासाः । अस्माभिर्दश वर्षाणि यत्रोषितमिति भावः । तापसी अनसूया ॥ ५०—५१ ॥ एषा सेत्यर्धं ॥ ५२ ॥ भरद्वाजेत्यर्धं ॥ यत्र भरद्वाजाश्रमः । पूर्वं दृष्ट इति शेषः । श्रीमान् स एष प्रदेशः प्रकाशते । अदूरवर्तितया सम्यग्दृश्यते ॥ ५३ ॥ वरवर्णिनीति सीतासंबोधनं ॥ ५४ ॥ शृङ्गिबेरपुरमित्यर्धं ॥ यत्र गुहः समागतः तच्छृङ्गिबेरपुरं एतदित्यन्वयः ॥ ५५ ॥ यूपमालिनी इक्ष्वाकुभिस्तीरे यागानन्तरं कीर्त्यर्थं शिलाभिः कृतयूपवतीत्यर्थः ॥ ५६ ॥ अयोध्यामिति । उद्दिश्येति शेषः । विमानस्याकाशगतत्वेन दूरस्था अपि गङ्गाशृङ्गिबेरपुरसरय्वयोध्या दृष्टा इति बोध्यम् । भरद्वाजाश्रमे हि तदा स्थितिः ॥ ५७—५८ ॥ पाण्डुरेत्यादिस्वभावोक्तिः ॥ ५९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणेरत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षड्विंशत्युत्तरशततमः सर्गः १२६

[पा०] १ ङ. ञ. ट. अत्रमां. २ ङ. छ. ञ. ञ. राक्षसाःसविभीषणाः. ३ ङ. ञ. ट. संहृष्टास्तांपुरींददृशुस्तदा.

सप्तविंशत्युत्तरशततमः सर्गः ॥ १२७ ॥

रामेण भरद्वाजाश्रममेत्य तंप्रत्यभिवादनपूर्वकं भरतादिकुशलप्रश्नः ॥ १ ॥ तेन तंप्रति सकलजनकुशलनिवेदनपूर्वकं स्वस्यतपसैव तस्यपुरास्वाश्रमनिर्गमप्रभृतिपुनरागमनावधिकालमध्यवृत्तवृत्तान्तपरिज्ञाननिवेदनेनसह स्वीयातिथ्यस्वीकारेणपरेद्युरयोध्यागमनचोदना ॥ २ ॥ तथा रामप्रार्थनया वानरनिकरभोगायायोध्याध्वगततरुकुलेषु स्वतपोमहिम्नाऽमृतकल्पफलकुलनिष्पादनम् ॥ ३ ॥

पूर्णे चतुर्दशे वर्षे पञ्चम्यां लक्ष्मणाग्रजः ॥ भरद्वाजाश्रमं प्राप्य ववन्दे नियतो मुनिम् ॥ १ ॥

अथ भरद्वाजाश्रमवासः—पूर्ण इति ॥ पूर्णे चैत्रशुद्धपञ्चम्यामयोध्यातो निर्गमनं । तदारभ्य चतुर्दशवर्षे पूर्णे सति पञ्चम्यां चैत्रशुद्धपञ्चम्यां । तथा हि चैत्रशुद्धपञ्चम्यां निर्गमः । तद्रात्र्यां तमसातीरे निवासः । षष्ठ्यां शृङ्गिबेरपुरे । सप्तम्यां वनस्पतिमूले । अष्टम्यां भरद्वाजाश्रमे । नवम्यां यमुनातीरे । दशम्यां रामश्चित्रकूटं गमिष्यतीति गुहचारमुखेन विदितवृत्तान्तस्य सुमन्त्रस्य सायाह्ने अयोध्याप्रवेशः । तद्रात्रावेव दशरथस्य निर्याणं । एकादश्यां राज्ञस्तैलद्रोण्यां निक्षेपः । द्वादश्यां भरतं प्रति दूतप्रेषणं । ते च दूता मार्गे त्रयोदशीं चतुर्दशीं चापनीय पौर्णमास्यां रात्रौ केकयनगरं प्रविविशुः । प्रतिपदि भरतस्यायोध्यां प्रत्यागमनं । तत्र च मार्गे सप्त रात्रीरुषित्वा अष्टमे दिने त्वरातिशयेनाहोरात्रमागत्य नवम्यां सूर्योदये भरतस्यायोध्याप्रवेशः । तस्यामेव दशरथसंस्कारः । तदहरारभ्य त्रयोदशदिने वैशाखशुद्धपञ्चम्यां तत्पूर्वदिने च भरतेन राज्ञः श्राद्धकर्मकरणं । षष्ठ्यां तद्देशीयाचारसिद्धं दहनदेशशोधनं । सप्तम्यां मार्गशोधनाय कर्मान्तिकप्रेषणं । कर्मान्तिकैश्च दशमीपर्यन्तं चतुर्दिनं मार्गशोधनं । एकादश्यां भरतस्य रामसकाशं प्रति गमनं । तद्रात्रौ गङ्गातीरे निवासः । द्वादश्यां भरद्वाजाश्रमे । त्रयोदश्यां रामसमागमः । चतुर्दशीपौर्णमासीप्रतिपत्सु चित्रकूटे भरतस्य निवासः । वैशाखबहुलद्वितीयायां भरतस्यायोध्यां प्रति प्रयाणम् । चतुर्थ्यामयोध्याप्रवेशः । इत्येवं सार्धमासे गते वैशाखबहुलपञ्चम्यां रामस्य चित्रकूटान्निर्गमः अत्र्याश्रमप्रवेशश्च । एवमाश्रममण्डलवासेन सह सार्धमासेषु दशसंवत्सरेषु गतेषु अवशिष्टकाले पञ्चवटीवासे तत्र त्रयोदशवर्षेषु गतेषु ततश्चतुर्दशे वर्षे चैत्रमासे सीताहरणम् । वैशाखे सुग्रीवदर्शनम् । आषाढे वालिवधः । आश्वयुजे सैन्योद्योगः । फाल्गुने प्रायोपवेशः । फाल्गुनशुद्धचतुर्दश्यां लङ्कादाहः । फाल्गुनामावास्यायां रावणवधः । चैत्रशुद्धप्रतिपदि रावणसंस्कारादि । द्वितीयायां विभीषणाभिषेकः, सीताप्राप्तिर्देवताप्रस्थानानि च । तृतीयायां लङ्कातो निर्गमः । चतुर्थ्यां किष्किन्धायां वासः । पञ्चम्यां भरद्वाजाश्रमे वासः । अत्र वक्तव्योपपत्तयस्तत्र तत्र प्रदर्शिताः । अस्मिन् प्रकारे हनुमत्सन्निधाने, ' द्वौ मासौ रक्षितव्यौ मे ' इति रावणवचनं सीतासान्त्वनपरम् । ' मासादूर्ध्वं न जीविष्ये ' इति सीतावचनं तु सम्यक् संगच्छते । मासशब्दस्य वर्तमानमासपरत्वं चासकृदुक्तम् । रावणेन दश मासा गताः अविशिष्टौ द्वौ मासावित्युक्तिर्मधुपानमत्ततयाऽविवेककृता । सीताया मासादूर्ध्वमिति वचनं तु वर्तमानमासपरमिति विवेकः । भरद्वाजाश्रमं प्राप्येत्यनेन महतां स्थानमपि प्राप्यमित्यु-

---

ती० 'पूर्णेचतुर्दशेवर्षेपञ्चम्यांलक्ष्मणाग्रजः । भरद्वाजाश्रमंप्राप्य' इत्यनेनेदंप्रतिपाद्यते । फाल्गुनपूर्णिमायांसुवेलारोहणं । अत्रप्रमाणं 'ततोस्तमगमत्सूर्यःसन्ध्ययाप्रतिरञ्जितः । पूर्णचन्द्रप्रदीपाचक्षपासमभिवर्तत'इतिवचनं । ततोपरेद्युःकृष्णपक्षप्रथमायांयुद्धस्यप्रारंभः । तस्यामेवरात्रौनागपाशबन्धमोक्षौ । द्वितीयायांवज्रदंष्ट्रस्यवधः । चतुर्थ्यांमकराक्षस्यवधः । वस्तुतस्तुदशम्यामेवकुंभनिकुंभमकराक्षाणांवधः । एकादशीमारभ्यपुनरिन्द्रजितत्रिरात्रंयुद्धं । लक्ष्मणेनत्रयोदश्यामिन्द्रजिद्वधः । अत्रचप्रमाणं—'अहोरात्रैस्त्रिभिर्वीरःकथंचिद्विनिपातितः ।' इत्येतद्वचनं । चैत्रशुक्लप्रथमायांरावणस्यसंस्कारः । द्वितीयायांविभीषणस्याभिषेकः । तृतीयायांदेवीसमागमः । 'तांरात्रिमुषितंरामं' इत्युक्त्वाचतुर्थ्यांप्रतिप्रयाणंकिष्किन्धाप्राप्तिश्च । पञ्चम्यांभरद्वाजाश्रमप्राप्तिरिति । अस्यांपञ्चम्यांचतुर्दशवर्षैस्संपूर्णः । 'चतुर्दशेहिसंपूर्णेवर्षेऽहनिरघूत्तम । नद्रक्ष्यामियदित्वांतुप्रवेक्ष्यामिहुताशनम् । तथेतिचप्रतिज्ञाय संपरिष्वज्यसादरम्' इत्येतदत्रप्रमाणं । षष्ठ्यांनन्दिग्रामंप्राप्यजटाविशोधनंकृत्वाऽयोध्याप्राप्तिः । सप्तम्यांपुष्यनक्षत्रेश्रीरामचन्द्रस्य पट्टाभिषेकइत्येवंक्रमोवेदितव्यः ॥ १ ॥

सोपृच्छदभिवाद्यैनं भरद्वाजं तपोधनम् ॥ शृणोषि कच्चिद्भगवन्सुभिक्षानामयं पुरे ॥
कच्चिच्च युक्तो भरतो जीवन्त्यपि च मातरः ॥ २ ॥
एवमुक्तस्तु रामेण भरद्वाजो महामुनिः ॥ प्रत्युवाच रघुश्रेष्ठं स्मितपूर्वं प्रहृष्टवत् ॥ ३ ॥
पङ्कदिग्धस्तु भरतो जटिलस्त्वां प्रतीक्षते ॥ पादुके ते पुरस्कृत्य सर्वं च कुशलं गृहे ॥ ४ ॥
त्वां पुरा चीरवसनं प्रविशन्तं महावनम् ॥ स्त्रीतृतीयं च्युतं राज्याद्धर्मकामं च केवलम् ॥ ५ ॥
पदातिं त्यक्तसर्वस्वं पितुर्वचनकारिणम् ॥ सर्वभोगैः परित्यक्तं स्वर्गच्युतमिवामरम् ॥ ६ ॥
दृष्ट्वा तु करुणा पूर्वं ममासीत्समितिंजय ॥ कैकेयीवचने युक्तं वन्यमूलफलाशिनम् ॥ ७ ॥
सांप्रतं सुसमृद्धार्थं समित्रगणबान्धवम् ॥ समीक्ष्य विजितारिं त्वां मम प्रीतिरनुत्तमा ॥ ८ ॥
सर्वं च सुखदुःखं ते विदितं मम राघव ॥ ९ ॥
यत्त्वया विपुलं प्राप्तं जनस्थानवधादिकम् ॥ ब्राह्मणार्थे नियुक्तस्य रक्षितुः सर्वतापसान् ॥ १० ॥
रावणेन हृता भार्या बभूवेयमनिन्दिता ॥ मारीचदर्शनं चैव सीतोन्मथनमेव च ॥ ११ ॥
कबन्धदर्शनं चैव पम्पाभिगमनं तथा ॥ सुग्रीवेण च ते सख्यं यच्च वाली हतस्त्वया ॥ १२ ॥
मार्गणं चैव वैदेह्याः कर्म वातात्मजस्य च ॥ विदितायां च वैदेह्यां नलसेतुर्यथा कृतः ॥ १३ ॥
यथा वा दीपिता लङ्का प्रहृष्टैर्हरियूथपैः ॥ सपुत्रबान्धवामात्यः सबलः सहवाहनः ॥ १४ ॥
यथा विनिहतः संख्ये रावणो देवकण्टकः ॥ [यथा च निहते तस्मिन्रावणे देवकण्टके] ॥
समागमश्च त्रिदशैर्यथा दत्तश्च ते वरः ॥ १५ ॥

क्तम् । नियतः नियतकरणत्रयः ॥ १ ॥ स इत्यादिसार्धश्लोक एकान्वयः ॥ सुभिक्षानामयं । भिक्ष्यन्त इति भिक्षाः अन्नानि भिक्षाणां समृद्धिः सुभिक्षं । समृद्धावव्ययीभावः । आमयस्याभावोनामयं । प्रसज्यप्रतिषेधेपि समासस्येष्टत्वात्साधुः । सुभिक्षं चानामयं चेति विग्रहः । अनामयं आरोग्यं । " अनामयं स्यादारोग्यं " इत्यमरः । युक्तः प्रजापालने समाहितः ॥ २ ॥ प्रहृष्टवत् प्रहृष्टं । क्रियाविशेषणं । स्मितपूर्वं । सर्वज्ञोप्यजानान इव पृच्छतीति स्मितं । यद्वा किं भरतः प्रजापालनसंतुष्टो वर्तत इति प्रश्नसारं मत्वा परतन्त्रे तस्मिन् कथमित्थं संभवतीति स्मितकरणं ॥ ३ ॥ अतएव तदनुरूपमुत्तरयति—पङ्केति ॥ स्नानाभावात्पङ्कदिग्धत्वं । स्नानाभावेपि नित्यानुष्ठानं दीक्षितवद्गौणस्नानेन । स्नानाभावे निमित्तमाह—जटिल इति । जटिलः जटावान् । पिच्छादित्वादिलच् । जटिलानां वारुणस्नानं निषिद्धमिति भावः । " कथंन्वपररात्रेषु सरयूमवगाहते " इत्याद्युक्तिस्तु कादाचित्कस्नानपरत्वेप्युपपद्यते । यद्वा सदाऽनास्तृतभूमिशयनादिना वा तादृशत्वं । एवं व्रतनिष्ठो भरतस्ते पादुके राज्याय पुरस्कृत्य त्वां प्रतीक्षते । त्वदागमनाकाङ्क्षया वर्तत इत्यर्थः । कच्चिच्च युक्तो भरत इत्यस्योत्तरमुक्त्वा जीवन्त्यपि च मातर इत्यस्योत्तरमाह—सर्वं चेति । तव गृहे यद्यदस्ति तत्सर्वं कुशलं क्षेमयुक्तं । जीवन्त्यपि चेति समुच्चाय्य पृष्टाः सर्वे मातृपरिचारकादयो जीवन्तीत्यर्थः ॥ ४ ॥ त्वां पुरेत्यादिश्लोकत्रयमेकं वाक्यं ॥ पुराचीरवसनं पुरातनचीरवसनं । अतो न पूर्वपदेन पौनरुक्त्यं । करुणा दुःखं । परदुःखदुःखित्वं हि करुणा ॥ ५—७ ॥ सांम्प्रतं इदानीं तु त्वां समीक्ष्य । स्थितस्येति शेषः । प्रीतिः । जातेति शेषः । अनुत्तमेत्यनेन देवकार्यकरणहेतुत्वात्पूर्वमपि काचित्प्रीतिरासीदिति द्योत्यते ॥ ८ ॥ सर्वमित्यर्धं ॥ सुखं पञ्चवटीवासादिकृतं । दुःखं सीताहरणजं ॥ ९ ॥ यत्त्वयेत्यादिसार्धश्लोकषट्कमेकान्वयं । ब्राह्मणार्थे ऋषिजनरक्षणार्थे । नियुक्तस्य तैर्याचितस्य ।

[पा०] १ ङ. छ. झ. ञ. ट. आज्ञावशत्वेभरतो. २ ख. ङ.—ट. पितृनिर्देशकारिणं. ३ ङ. झ. ट. जनस्थाननिवासिना. ४ च. छ. ञ. तस्योन्मथनमेवच. ५ झ. ट. रावणोबलदर्पितः. ङ. च. छ. ञ. रावणोवरदर्पितः. घ: रावणोलोककण्टकः. ६ इदमर्धं ख. ग. ङ.—ट. पाठेषुदृश्यते.

सर्वं ममैतद्विदितं तपसा धर्मवत्सल ॥ [संपतन्ति च मे शिष्याः प्रवृत्त्याख्याः पुरीमितः ॥१६॥]
अहमप्यत्र ते दद्मि वरं शस्त्रभृतां वर ॥ अर्घ्यमद्य गृहाणेदमयोध्यां श्वो गमिष्यसि ॥ १७ ॥
तस्य तच्छिरसा वाक्यं प्रतिगृह्य नृपात्मजः ॥ बाढमित्येव संहृष्टो धीमान्वरमयाचत ॥ १८ ॥
अकाले फलिनो वृक्षाः सर्वे चापि मधुस्रवाः ॥ फलान्यमृतकल्पानि बहूनि विविधानि च ॥
भवन्तु मार्गे भगवन्नयोध्यां प्रति गच्छतः ॥ १९ ॥
तथेति च प्रतिज्ञाते वचनात्समनन्तरम् ॥ अभवन्पादपास्तत्र स्वर्गपादपसन्निभाः ॥ २० ॥
निष्फलाः फलिनश्चासन्विपुष्पाः पुष्पशालिनः ॥ शुष्काः समग्रपत्रास्ते नगाश्चैव मधुस्रवाः ॥
सर्वतो योजना त्रीणि गच्छतामभवंस्तदा ॥ २१ ॥
ततः प्रहृष्टाः प्लवगर्षभास्ते बहूनि दिव्यानि फलानि चैव ॥
कामादुपाश्नन्ति सहस्रशस्ते मुदान्विताः स्वर्गजितो यथैव ॥ २२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तविंशत्युत्तरशततमः सर्गः ॥ १२७ ॥

अष्टाविंशत्युत्तरशततमः सर्गः ॥ १२८ ॥

भरद्वाजाश्रमस्थेनरामेण हनुमन्तंप्रति गुहेस्वागमननिवेदनचोदनयासह नन्दिग्रामगंभरतंप्रति स्वागमननिवेदनादिचोदना ॥ १ ॥ हनुमता गुहभरतयोः श्रीरामसंदेशनिवेदनम् ॥ २ ॥

अयोध्यां तु समालोक्य चिन्तयामास राघवः ॥ चिन्तयित्वा हनूमन्तमुवाच प्लवगोत्तमम् ॥ १ ॥

अतएव रक्षितुः खरादिवधमुखेन पालयितुः । तव भार्या हृता बभूवेति यत् तच्चेति योजना । हृता हर्तुमीप्सिता । आशंसायां क्तः । अतो न सीतोन्मथनमित्यनेन पौनरुक्त्यं । वरः मृतवानरजीवनादिः ॥ १०—१६ ॥ वरं दद्मि ददामि । अत्र आश्रमे । अद्य अर्घ्यं पूजां । गृहाणेति संबन्धः ॥ १७ ॥ तस्येत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ बाढमिति प्रतिगृह्य तस्मिन् दिने तत्र पूजामङ्गीकृत्येत्यर्थः । धीमान् अद्यात्र स्थित्वा भरतं प्रति दूतप्रेषणमुचितमिति ज्ञानवानित्यर्थः । मधूनि स्रवन्तीति मधुस्रवाः । गच्छतः ममेति शेषः । मयि गच्छति सतीत्यर्थः । भवन्तु । अत्रेतिकरणं बोध्यं । इति वरमयाचतेति संबन्धः ॥ १८—१९ ॥ तथेति चेत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ योजना योजनानि । "सुपां सुलुक्" इत्यादिना पूर्वसवर्णादेशः । अत्यन्तसंयोगे द्वितीया । गच्छतां वानराणां फलिनश्चासन्निति क्रमेणान्वयः । इदं चोत्तरदिनकार्यं सौकर्याय ऋषिणा दर्शितं ॥ २० —२१ ॥ ते प्रस्थिताः । स्वर्गजितो यथा स्वर्गिण इव ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तविंशत्युत्तरशततमः सर्गः ॥ १२७ ॥

अथ भरतं प्रति हनुमत्प्रेषणमष्टाविंशत्युत्तरशततमे—अयोध्यां त्विति ॥ अर्धमेकं वाक्यं । समालोक्य

ति० इतः मदाश्रमात् । मेशिष्याः प्रवृत्त्याख्याः तवप्रवृत्तिमुदन्तं आचक्षते प्रवृत्त्याख्याः । तथाभूताःसन्तः तवपुरीं अयोध्यां । संपतन्ति । अतस्त्वत्पुरीवृत्तान्तोपिज्ञायतइतिशेषः ॥ १६ ॥ इतिसप्तविंशत्युत्तरशततमस्सर्गः ॥ १२७ ॥

ति० पञ्चम्यांचतुर्दशवर्षस्यपूर्णत्वात्तद्दिनेभरद्वाजाश्रमेविलंबस्यप्राप्तत्वाच्चतुर्दशसमाप्तौ यदित्वांनपश्यामितदाहुताशनंप्रवेक्ष्यामीति भरतोक्तेर्भरतस्यस्वागमननिवेदनायहनूमत्प्रेषणंकृतवानित्याह—अयोध्यांत्विति । समालोक्य भरद्वाजाश्रमेविमानादवतरणसमयइ-

[पा०] १ क. ख. ङ.—ट. पाठेष्विदमर्धंदृश्यते. २ ख. ङ. च. छ. झ. ट. संहृष्टःश्रीमान्वर. ३ ग. ङ.—ट. योजनास्त्रिलो. ४ ख. ङ. च. छ. झ.ट. मुदेव. ५ अस्यश्लोकस्यस्थाने. क. ख. ङ.—ट. पाठेषु अयोध्यांतुसमालोक्यचिन्तयामास राघवः । प्रियकामःप्रियंरामस्ततस्त्वरितविक्रमः । चिन्तयित्वाततोदृष्टिंवानरेषुन्यपातयत् । उवाचधीमांस्तेजस्वीहनूमन्तंप्लवंगमम् । अयोध्यांत्वरितोगत्वाशीघ्रंप्लवगसत्तम । इत्यर्धपञ्चकंदृश्यते.

जानीहि कच्चित्कुशली जनो नृपतिमन्दिरे ॥ २ ॥
शृङ्गिबेरपुरं प्राप्य गुहं गहनगोचरम् ॥ निषादाधिपतिं ब्रूहि कुशलं वचनान्मम ॥ ३ ॥
श्रुत्वा तु मां कुशलिनमरोगं विगतज्वरम् ॥ भविष्यति गुहः प्रीतः स ममात्मसमः सखा ॥ ४ ॥
अयोध्यायाश्च ते मार्गं प्रवृत्तिं भरतस्य च ॥ निवेदयिष्यति प्रीतो निषादाधिपतिर्गुहः ॥ ५ ॥
भरतस्तु त्वया वाच्यः कुशलं वचनान्मम ॥ सिद्धार्थं शंस मां तस्मै सभार्यं सहलक्ष्मणम् ॥ ६ ॥
हरणं चापि वैदेह्या रावणेन बलीयसा ॥ सुग्रीवेण च संसर्गं वालिनश्च वधं रणे ॥ ७ ॥
मैथिल्यन्वेषणं चैव यथा चाधिगता त्वया ॥ लङ्घयित्वा महातोयमापगापतिमव्ययम् ॥ ८ ॥
उपयानं समुद्रस्य सागरस्य च दर्शनम् ॥ यथा च कारितः सेतू रावणश्च यथा हतः ॥ ९ ॥
वरदानं महेन्द्रेण ब्रह्मणा वरुणेन च ॥ महादेवप्रसादाच्च पित्रा मम समागमम् ॥ १० ॥
उपयातं च मां सौम्य भरतस्य निवेदय ॥ सह राक्षसराजेन हरीणां प्रवरेण च ॥ ११ ॥
एतच्छ्रुत्वा यमाकारं भजते भरतस्तदा ॥ स च ते वेदितव्यः स्यात्सर्वं यच्चापि मां प्रति ॥ १२ ॥
जित्वा शत्रुगणान्रामः प्राप्य चानुत्तमं यशः ॥ उपयाति समृद्धार्थः सह मित्रैर्महाबलैः ॥ १३ ॥
ज्ञेयाश्च सर्वे वृत्तान्ता भरतस्येङ्गितानि च ॥ तत्त्वेन मुखवर्णेन दृष्ट्वा व्याभाषणेन च ॥ १४ ॥

समालोच्येत्यर्थः । आश्रमस्थस्य तदवलोकनासंभवात् । चिन्तयामास । कर्तव्यमिति शेषः ॥ १ ॥ जानीहीत्यर्धं ॥ नृपतिमन्दिरे जनः मात्रादिः ॥ २ ॥ गहनगोचरं वनचारिणं ॥ ३ ॥ गुहाय निवेदनस्य प्रयोजनमाह—श्रुत्वा त्विति ॥ विगतज्वरं मद्विश्लेषचिन्ताज्वररहितं यथा तथा भविष्यतीति क्रियाविशेषणं । आत्मसमः हीनजातिमनवेक्ष्य प्रेमातिशयेन गुहमिक्ष्वाकुकुलीनममन्यत ॥ ४ ॥ प्रवृत्तिं वृत्तान्तं ॥ ५ ॥ सिद्धार्थं निर्व्यूढपितृवचनपरिपालनरूपप्रयोजनं ॥ ६ ॥ हरणमित्यादिश्लोकपञ्चकमेकान्वयं ॥ रणे सुग्रीववालिनोर्युद्धे । वालिनो वध इत्यर्थः ॥७॥ यथा चेति । महातोयं अव्ययं । आपगापतिं लङ्घयित्वा त्वया सीता यथा अधिगता तथा शंसेत्यन्वयः ॥ ८ ॥ समुद्रस्योपयानं समुद्रं प्रति गमनमित्यर्थः । संबन्धसामान्ये षष्ठी । समीपयानं वा । सागरस्य समुद्रराजस्य ॥ ९ ॥ ब्रह्मणा वरुणेन चेति सहार्थे तृतीया । अनेन महेन्द्रेण वानरसमुत्थापनरूपवरप्रदाने ब्रह्माद्यनुमतिरस्तीति द्योतितं । पित्रा मम समागममित्येतदन्तस्य शंसेति पूर्वेण संबन्धः ॥ १० ॥ उपयातमिति । अन्यथा चतुर्ध्यामेव चतुर्दशवर्षातिक्रमात् सोऽग्निं प्रविशेदिति भावः । सौम्येत्यनेन मन्दं मन्दं कथय । अन्यथा हठान्मदागमनश्रवणे हर्षोऽस्य उन्मस्तको भवेदिति भावः ॥ ११ ॥ त्वमेव राज्यं पालयेति मयोक्ते भरतस्तदङ्गीकरोति न वेति तदाकारस्त्वया ज्ञातव्य इत्याह—एतच्छ्रुत्वेति ॥ एतत् उपयानं । आकारं मुखप्रसादादिकं । मां प्रति यत् इङ्गितचेष्टादिकं ॥ १२ ॥ जित्वा शत्रुगणानित्यादिश्लोकद्वयमेकान्वयं ॥ एतच्छ्लोकान्ते इत्युक्त्वेत्यध्याहर्तव्यं । ज्ञेया इति श्लोकेन पूर्वोक्तमेव विशेष्यते । तत्त्वेनेत्यस्य ज्ञेया इत्यनेन संबन्धः । अत्रापि पूर्ववद्राज्यं पालयेति मदुक्तिं भरतः किमङ्गीकरोतीति परीक्षस्वेतिभावः । अन्यथा भरतप्रकृतेः रामप्रकृतेश्च विरुद्धं स्यात् । यावेवमूचतुः । "न सर्वे भ्रातरस्तात भवन्ति भरतोपमाः" इति "यावन्न चरणौ भ्रातुः

तिभावः । सुग्रीवादीनांसम्यक्चिह्नाचारकरणायसुहृष्टरूपतदाकारज्ञानायचपूर्वंहनुमत्प्रेषणं । अतएवपाद्मे पञ्चम्यामेवविसृष्टहनुमत्प्रवेशसमयेभरतवर्णनमेवंकृतं । 'अग्निप्रवेशेसोद्योगकालेभ्रातुरनागमात् । न्यवेदयत्तदातस्मैश्रीरामागमनोत्सवम्' इति । किंच प्रियकामइति । सुग्रीवादीनांप्रियकामः अयोध्यायांसर्वतत्प्रियपूरणकामः । तेषांप्रियंयथाभवतितथाचिन्तयामास कर्तव्यजातमितिशेषः ॥ १ ॥

[पा०] १ क. श्रुत्वासमां. २ क. घ. ङ. च. ज.—ट. संवादं. ३ क. तमक्षोभ्यमापगापतिं. ४ ख. उपासनं. ५ क. च—ट. भरताय. ६ क. ङ. झ. ञ. ट. हरीणामीश्वरेणच. ७ ङ. च. छ. झ. ञ. ट. व्याभाषितेनच.

सर्वकामसमृद्धं हि हस्त्यश्वरथसंकुलम् ॥ पितृपैतामहं राज्यं कस्य नावर्तयेन्मनः ॥ १५ ॥
संगत्या भरतः श्रीमान्राज्यार्थी चेत्स्वयं भवेत् ॥ प्रशास्तु वसुधां कृत्स्नामखिलां रघुनन्दनः ॥१६॥
तस्य बुद्धिं च विज्ञाय व्यवसायं च वानर ॥ यावन्न दूरं याताः स्म क्षिप्रमागन्तुमर्हसि ॥ १७ ॥
इति प्रतिसमादिष्टो हनुमान्मारुतात्मजः ॥ मानुषं धारयन्रूपमयोध्यां त्वरितो ययौ ॥ १८ ॥
अथोत्पपात वेगेन हनुमान्मारुतात्मजः ॥ गरुत्मानिव वेगेन जिघृक्षन्भुजगोत्तमम् ॥ १९ ॥
लङ्घयित्वा पितृपथं भुजगेन्द्रालयं शुभम् ॥ गङ्गायमुनयोर्मध्यं सन्निपातमतीत्य च ॥ २० ॥
शृङ्गिबेरपुरं प्राप्य गुहमासाद्य वीर्यवान् ॥ स वाचा शुभया हृष्टो हनुमानिदमब्रवीत् ॥ २१ ॥
सखा तु तव काकुत्स्थो रामः सत्यपराक्रमः ॥ सहसीतः ससौमित्रिः स त्वां कुशलमब्रवीत् ॥२२॥
पञ्चमीमद्य रजनीमुषित्वा वचनान्मुनेः ॥ भरद्वाजाभ्यनुज्ञातं द्रक्ष्यस्यद्यैव राघवम् ॥ २३ ॥
एवमुक्त्वा महातेजाः संप्रहृष्टतनूरुहः ॥ उत्पपात महावेगो वेगवानविचारयन् ॥ २४ ॥
सोपश्यद्रामतीर्थं च नदीं वालुकिनीं तथा ॥ गोमतीं तां च सोपश्यद्धीमं सालवनं तथा ॥

पार्थिवव्यञ्जनान्वितौ ॥ शिरसा धारयिष्यामि न मे शान्तिर्भविष्यति " इति च ॥ १३—१४ ॥ ननु किं परीक्षणीयं सर्वस्यापि राज्याधिपत्यकाङ्क्षित्वादित्याशङ्क्याह—सर्वेति ॥ पितृपितामहशब्दौ कुलपरम्परोपलक्षकौ । पितृपितामहेभ्य आगतं । उत्तरपदवृद्धिरार्षी । नावर्तयेत् नाकर्षेत् । कस्य भरतादन्यस्यैवेत्यर्थः ॥ १५ ॥ एवं भरतेङ्गिते ज्ञाते तव किं कर्तव्यमित्यत्राह—संगत्येति । संगत्या अस्मत्संगत्या। यद्यपि पूर्वं सर्वात्मना न राज्यपालनमङ्गीकरोमीत्युक्तं । तथापि चतुर्दशवर्षपर्यन्तं मद्विरहातुरतया मद्दर्शनजहर्षप्रकर्षातिरेकेण त्वमभिषिक्तो भवेति मदुक्तिमङ्गीकरिष्यति किमिति भावः । भरतः मत्प्रीत्यर्थं पूर्वं राज्यभारमङ्गीकृतवान् खलु । स्वयं श्रीमान् स्वाभाविकपारतन्त्र्यश्रीमान् । भवेदित्याशंसायां लिङ् । प्रशास्तु वसुधां कृत्स्नां । ततो मदभिषेकसंभ्रमं न लब्धवान् । अहं तु भरताभिषेकमहोत्सवमनुभवेयं । अतएव ह्ययोध्याकाण्डेपि शनैर्जगाम सापेक्ष इत्युक्तं । भरताभिषेकदर्शनसापेक्ष इत्यर्थः । अखिलां खिलरहितां। समृद्धजनामित्यर्थः । कथमसौ भरणक्षम इत्यत्राह—रघुनन्दन इति । त्रैलोक्यभरणक्षमकुलोद्भूत इत्यर्थः ॥ १६ ॥ बुद्धिं मत्सन्निधाने कथंचिद्राज्यमङ्गीकरिष्यतीति बुद्धिं व्यवसायं सर्वात्मना नाङ्गीकरिष्यतीति व्यवसायं च ज्ञात्वा अङ्गीकरिष्यति चेदस्मादेशाद्यावद्दूरं न याताः स्म तावदागन्तुमर्हसि । अन्यथा नागच्छेति भावः । अत एव हनुमानपि तस्य व्यवसायं ज्ञात्वा नागतवानिति ज्ञेयं । केचित्तु भरतभावज्ञोपि रामः सर्वात्मना सुरक्तोपि राज्ञा परीक्षणीय इति लोके राजनीतिप्रवर्तनायैवमतिशङ्कावचनमुक्तवान् । वस्तुतः स्वस्य झटिति गमने भरतस्य हर्ष उन्मस्तको भवेदिति । तस्मात्सत्त्वाय हनुमन्तं प्रेषितवान् । तदाशयज्ञो हनुमानपि रामागमनमुक्त्वा भरतेन सहैवागतवानित्याहुः ॥ १७ ॥ प्रतिसमादिष्टः प्रतिकूलं समादिष्टः । अहृदयं समादिष्ट इत्यर्थः । ययौ यातुमुद्युक्तः ॥१८॥ अथ उद्योगानन्तरं । वेगेन जिघृक्षन्निवेत्यन्वयः ॥१९॥ लङ्घयित्वेत्यादिश्लोकद्वयमेकान्वयं ॥ पितृपथं स्वपितृपथं । वायुमार्गमित्यर्थः । भुजगेन्द्रालयमिति गङ्गायमुनासंगमविशेषणं ॥ २०—२२ ॥ पञ्चमीं पञ्चमीसंबन्धिनीं । अद्य रजनीं एतां रजनीं । उषित्वा । निर्गतमिति शेषः । भरद्वाजाभ्यनुज्ञातं । प्रातरिति शेषः । अद्यैव अचिरेणैव ॥ २३ ॥ संप्रहृष्टतनूरुहः । सकललोकानन्दकारिरामप्रत्यागमनं मया श्रावयितव्यं लब्धमित्यस्माद्धेतोरिति भावः । महावेगः महावेगस्वभावः । वेगवान् तादात्विकवेगवान् । अविचारयन् मार्गस्थवनगिरिनदीसौन्दर्यादिकमगणयन्निति भावः ॥ २४ ॥ सोपश्यदित्यादिसार्धश्लोकमेकं वाक्यं ॥

स० संगत्या चिरकालपरिचयेन कैकेयीसंगत्यावा । यदिकैकेयीवत्स्वयमपिराज्येनार्थीभवेत्तर्हि सएववसुधांशास्तु वयंयत्रकापितपसाकालंनेष्यामइतिशेषः ॥ १६ ॥ इत्यष्टाविंशत्युत्तरशततमस्सर्गः ॥ १२८ ॥

[पा०] १ क.—ट. राज्येनार्थीस्वयं. २ ङ. च. झ. ञ. ट. यमुनयोर्भीमसमतीत्यसमागमं. क. ख. घ. ज. यमुनयोर्भीमसंनिपातं. ३ ग.—छ. झ. ञ. ट. महावेगाद्वेगवान्. ज. महावेगोहनुमान्. ४ क. घ. ज. तांनदींवालुकींतदा. ग. तांनदींवालुकांतदा. ५ क. ख. ङ. छ. झ. ञ. ट. वरूथिनीमतींचैवभीमं.

प्रजाश्च बहुसाहस्राः स्फीताञ्जनपदानपि ॥ २५ ॥
स गत्वा दूरमध्वानं त्वरितः कपिकुञ्जरः ॥ आससाद द्रुमान्फुल्लान्नन्दिग्रामसमीपगान् ॥ २६ ॥
स्त्रीभिः सपुत्रैर्वृद्धैश्च रममाणैरलंकृतान् ॥ सुराधिपस्योपवने यथा चैत्ररथे द्रुमान् ॥ २७ ॥
क्रोशमात्रे त्वयोध्यायाश्चीरकृष्णाजिनाम्बरम् ॥ ददर्श भरतं दीनं कृशमाश्रमवासिनम् ॥ २८ ॥
जटिलं मलदिग्धाङ्गं भ्रातृव्यसनकर्शितम् ॥ फलमूलाशिनं दान्तं तापसं धर्मचारिणम् ॥ २९ ॥
समुन्नतजटाभारं वल्कलाजिनवाससम् ॥ नियतं भावितात्मानं ब्रह्मर्षिसमतेजसम् ॥ ३० ॥
पादुके ते पुरस्कृत्य शासन्तं वै वसुन्धराम् ॥ चातुर्वर्ण्यस्य लोकस्य त्रातारं सर्वतो भयात् ॥ ३१ ॥
उपस्थितममात्यैश्च शुचिभिश्च पुरोहितैः ॥ बलमुख्यैश्च युक्तैश्च काषायाम्बरधारिभिः ॥ ३२ ॥
न हि ते राजपुत्रं तं चीरकृष्णाजिनाम्बरम् ॥ परि भोक्तुं व्यवस्यन्ति पौरा वै धर्मवत्सलम् ॥३३॥
तं धर्ममिव धर्मज्ञं देहवन्तमिवापरम् ॥ उवाच प्राञ्जलिर्वाक्यं हनुमान्मारुतात्मजः ॥ ३४ ॥
वसन्तं दण्डकारण्ये यं त्वं चीरजटाधरम् ॥ अनुशोचसि काकुत्स्थं स त्वां कुशलमब्रवीत् ॥ ३५ ॥
प्रियमाख्यामि ते देवं शोकं त्यक्ष्यसि दारुणम् ॥ अस्मिन्मुहूर्ते भ्रात्रा त्वं रामेण सह सङ्गतः ॥३६॥
निहत्य रावणं रामः प्रतिलभ्य च मैथिलीम् ॥ उपयाति समृद्धार्थः सह मित्रैर्महाबलैः ॥ ३७ ॥

रामतीर्थं परशुरामतीर्थं । तां प्रसिद्धां । प्रजाः कोसलजनपदस्थाः ॥२५॥ स गत्वेत्यादिश्लोकद्वयमेकान्वयं ॥ फुल्लान् फुल्लपुष्पान् । स्त्रीभिः सपुत्रैर्वृद्धैश्च । स्त्रीबालवृद्धाविशेषेण सर्वेषामानन्दकरत्वादिति भावः । सुराधिपस्य उपवने नन्दनवने चैत्ररथे च स्थितान् द्रुमान् यथा तत्सदृशानित्यर्थः ॥ २६—२७ ॥ क्रोशमात्रे त्रिंत्यादिश्लोकपञ्चकमेकान्वयं ॥ क्रोशमात्रे घटिकाद्वयमात्रे घटिकाद्वयगन्तव्यभूमौ । क्रोशलक्षणमुक्तं ज्यौतिषदर्पणे—"यत्रोदरैरङ्गुलमष्टसंख्यैर्हस्तोङ्गुलैः षड्गुणितैश्चतुर्भिः । हस्तैश्चतुर्भिर्भवतीह दण्डः क्रोशः सहस्रद्वितयेन तेषां" इति । दीनं रामादर्शनेन ॥ २८ ॥ दान्तं बहिरिन्द्रियनिग्रहशालिनं ॥ २९ ॥ समुन्नतजटाभारमिति ॥ पूर्वं जटावत्त्वोक्तिः अत्र तद्भारस्य समुन्नतत्वोक्तिरिति वैषम्यं । वल्कलाजिनवाससमित्युत्तरीयोक्तिः । अतश्चीरकृष्णाजिनाम्बरमित्यनेन न पुनरुक्तिः । नियतं नियतवाचं । भावितात्मानं ध्यातात्मानमिति मनोनियमोक्तिः ॥३०॥ ते पूर्वं रामेण दत्ते । चातुर्वर्णस्य चतुर्वर्णरूपस्य । स्वार्थे ष्यञ् । लोकस्य जनस्य ॥ ३१ ॥ युक्तैः सन्नद्धैः । " योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु " इत्यमरः ॥३२॥ भ्रातृवियोगाद्भरतस्य वल्कलादिधारणमस्तु अमात्यादीनां तत् किंनिमित्तमित्याशङ्क्य तत्र कारणमाह—न हीति ॥ राजपुत्रं भरतं परिवर्जयित्वा भोक्तुं समीचीनवस्त्राभरणादीन्यनुभवितुं न व्यवस्यन्ति व्यवसायं न कुर्वन्ति । " अपपरी वर्जने " इति परेः कर्मप्रवचनीयसंज्ञा । आचार्याः प्राहुः परि परितो वर्तमाना अपि पौराः । भरतं भोक्तुं अनुभवितुं । द्रष्टुमिति यावत् । न व्यवस्यन्ति व्यवसायं न कुर्वन्ति । तद्दर्शने निराशा भवन्तीत्यर्थः । तत्र हेतुमाह—राजपुत्रमिति । रामविरहानन्तरक्षणे मृतस्य पुत्रः खल्वयं । अद्य रामानागमने किमयमस्माभिर्लभ्यत इति भावः । हेत्वन्तरमाह—धर्मवत्सलं धर्मार्थतया स्वात्मत्यागे पितृसदृशमित्यर्थः । चतुर्दशे वर्षे पूर्णेपि रामागमनादर्शनात् प्राणत्यागे व्यवसितं भरतमालोकयतां पौराणां खेदातिशयोनेन श्लोकेन सूच्यते ॥ ३३ ॥ देहवन्तमपरं धर्ममिव स्थितं । द्वितीय इवशब्दो वाक्यालंकारे ॥ ३४—३५ ॥ संगतः भविष्यसीति शेषः । अत्रापरिचितत्वाद्भरतं हनुमान्नावन्दत । यद्वा प्राञ्जलिरिति पदं वन्दनपूर्वकाञ्जलिपरं । अथवा भरतदशादर्शनेन प्रियाख्याने क्षणविलम्बेपि प्राणहानिशङ्कया सति कुड्य इति न्यायेन वन्दनोद्देश्यवस्तुनि शीर्यमाणे किं वन्दनेनेति तदुज्जीवकं प्रियाख्यानमेवाकरोत् । यद्वा तदशादर्शनेन स्वरूपं विसस्मार ॥ ३६ ॥ समृद्धार्थः संपूर्णमनोरथः ॥ ३७ ॥

[पा०] १ क. ङ. च. झ. साहस्रीः. २ क. ग. च. ज. समीपजान्. ३ ङ. च. झ. सपुत्रैःपौत्रैश्चरममाणैःस्वलंकृतैः. ४ ङ. च. छ. झ. ञ. ट. प्रशासन्तं. ५ ङ. च. छ. झ. ञ. ट. धर्मवत्सलाः. ६ घ. ङ. झ. ञ. ट. देहबन्धं. ७ घ. वीर.

लक्ष्मणश्च महातेजा वैदेही च यशस्विनी ॥ सीता समग्रा रामेण महेन्द्रेण यथा शची ॥ ३८ ॥
एवमुक्तो हनुमता भरतो भ्रातृवत्सलः ॥ पपात सहसा हृष्टो हर्षान्मोहं जगाम ह ॥ ३९ ॥
ततो मुहूर्तादुत्थाय प्रत्याश्वस्य च राघवः ॥ हनुमन्तमुवाचेदं भरतः प्रियवादिनम् ॥ ४० ॥
अशोकजैः प्रीतिमयैः कपिमालिङ्ग्य संभ्रमात् ॥ सिषेच भरतः श्रीमान्विपुलैरास्रबिन्दुभिः ॥४१॥
देवो वा मानुषो वा त्वमनुक्रोशादिहागतः ॥ प्रियाख्यानस्य ते सौम्य ददामि ब्रुवतः प्रियम् ॥४२॥
गवां शतसहस्रं च ग्रामाणां च शतं परम् ॥ सुकुण्डलाः शुभाचारा भार्याः कन्याश्च षोडश ॥४३॥
हेमवर्णाः सुनासोरूः शशिसौम्याननाः स्त्रियः ॥ सर्वाभरणसंपन्नाः संपन्नाः कुलजातिभिः ॥४४॥
निशम्य रामागमनं नृपात्मजः कपिप्रवीरस्य तदद्भुतोपमम् ॥
प्रहर्षितो रामदिदृक्षयाऽभवत्पुनश्च हर्षादिदमब्रवीद्वचः ॥ ४५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टाविंशत्युत्तरशततमः सर्गः ॥ १२८ ॥

एकोनत्रिंशदुत्तरशततमः सर्गः ॥ १२९ ॥

हनुमता भरतप्रश्नेनतंप्रति रामस्यनगरनिर्गमप्रभृतिपुनर्भरद्वाजाश्रमागमनावधिकालमध्यवृत्ततदीयसर्ववृत्तान्तनिवेदनम् ॥ १ ॥

बहूनि नाम वर्षाणि गतस्य सुमहद्वनम् ॥ शृणोम्यहं प्रीतिकरं मम नाथस्य कीर्तनम् ॥ १ ॥
कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे ॥ एति जीवन्तमानन्दो नरं वर्षशतादपि ॥ २ ॥
राघवस्य हरीणां च कथमासीत्समागमः ॥ कस्मिन्देशे किमाश्रित्य तत्त्वमाख्याहि पृच्छतः ॥ ३ ॥
स पृष्टो राजपुत्रेण बृस्यां समुपवेशितः ॥ आचचक्षे ततः सर्वं रामस्य चरितं वने ॥ ४ ॥
यथा प्रव्राजितो रामो मातुर्दत्तो वरस्तव ॥ यथा च पुत्रशोकेन राजा दशरथो मृतः ॥ ५ ॥

समग्रा संपूर्णमनोरथा । उपयात इति शेषः ॥ ३८ ॥ हृष्टः पपात हर्षान्मोहं जगामहेत्यनेन वार्ताश्रवणमात्रेणैतादृशावस्थे भरते झटिति रामागमने कावस्था भवेदिति ऋषिर्विस्मयते ॥३९-४०॥ भरतः कपिमालिङ्ग्य । अशोकजैः शोकजभिन्नैः । प्रीतिमयैः आनन्दजैरित्यर्थः । विपुलैः गुरुभिः ॥४१॥ देवो वेत्यादिश्लोकत्रयमेकान्वयं ॥ परिगृहीतमनुष्यदेहेपि हनुमति तेजोविशेषात्संशयः । अनुक्रोशात् दयया प्रियं ब्रुवतस्ते प्रियाख्यानस्य प्रियवचनस्य पारितोषिकत्वेन गवादिकं ददामि । भार्याः भरणार्हाः । कन्याः अनूढाःस्त्रियः ॥ ४२—४४ ॥ रामदिदृक्षया उपलक्षितो भरतः । अद्भुता उपमा यस्य तत् अद्भुतोपमं । निरुपममित्यर्थः । तद्रामगमनं । कपिप्रवीरस्य कपिप्रवरात् निशम्य । नटस्य शृणोतीतिवत्षष्ठी । प्रहर्षितोभवत् ॥ ४५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टाविंशत्युत्तरशततमः सर्गः ॥ १२८ ॥

बहूनीत्यादिश्लोकद्वयमेकान्वयं ॥ बहूनि वर्षाणि वनं गतस्येति संबन्धः । वर्षशतादपीत्यत्रेतिकरणं द्रष्टव्यं । वर्षशतात्परमिति शेषः ॥ १—२ ॥ राघवस्येति । अत्र वानरसमागमप्रश्नेन पूर्वं भरतः सामान्यतो वानरसेनासन्नाहं श्रुतवानिति गम्यते । किमाश्रित्य किं प्रयोजनमवलम्ब्य ॥ ३ ॥ बृस्यां तपस्विसमुचितासने । "व्रतिनामासनं बृसी" इत्यमरः ॥ ४ ॥ वक्ष्यमाणवृत्तान्ते प्रामाण्यसिद्धये तत्पूर्ववृत्तं संग्रहेणानुवदति—यथेत्यादिना ॥ अत्र यथेत्यस्य येन प्रकारेणेत्यर्थः । मातुः मात्रे राज्येन निमन्त्रित इत्यन्व-

---

[पा०] १ क. ख. ग. ङ.—ट. भरतःकैकयीसुतः. २ ङ. ञ. ट. मोहमुपागमत्. ३ क. भवतःप्रियं. ४ ग.—ट. तदाद्भुतोपमं. ५ क. घ. च. ञ. भातिमां. ६ ङ. ञ. ट. दत्तौवरौतव.

यथा दूतैस्त्वमानीतस्तूर्णं राजगृहात्प्रभो ॥ त्वयाऽयोध्यां प्रविष्टेन यथा राज्यं न चेप्सितम् ॥६॥
चित्रकूटं गिरिं गत्वा राज्येनामित्रकर्शन ॥ निमन्त्रितस्त्वया भ्राता धर्ममाचरता सताम् ॥ ७ ॥
स्थितेन राज्ञो वचने यथा राज्यं विसर्जितम् ॥ आर्यस्य पादुके गृह्य यथाऽसि पुनरागतः ॥ ८ ॥
सर्वमेतन्महाबाहो यथावद्विदितं तव ॥ त्वयि प्रतिप्रयाते तु यद्वृत्तं तन्निबोध मे ॥ ९ ॥
अपयाते त्वयि तदा समुद्भ्रान्तमृगद्विजम् ॥ परिधूनमिवात्यर्थं तद्वनं समपद्यत ॥ १० ॥
तद्वस्तिमृदितं घोरं सिंहव्याघ्रमृगायुतम् ॥ प्रविवेशाथ विजनं सुमहद्दण्डकावनम् ॥ ११ ॥
तेषां पुरस्ताद्बलवान्गच्छतां गहने वने ॥ निनदन्सुमहानादं विराधः प्रत्यदृश्यत ॥ १२ ॥
तमुत्क्षिप्य महानादमूर्ध्वबाहुमधोमुखम् ॥ निखाते प्रक्षिपन्ति स्म नदन्तमिव कुञ्जरम् ॥ १३ ॥
तत्कृत्वा दुष्करं कर्म भ्रातरौ रामलक्ष्मणौ ॥ सायाह्ने शरभङ्गस्य रम्यमाश्रममीयतुः ॥ १४ ॥
शरभङ्गे दिवं प्राप्ते रामः सत्यपराक्रमः ॥ अभिवाद्य मुनीन्सर्वाञ्जनस्थानमुपागमत् ॥ १५ ॥
ततः पश्चाच्छूर्पणखा रामपार्श्वमुपागता ॥ १६ ॥
ततो रामेण संदिष्टो लक्ष्मणः सहसोत्थितः ॥ प्रगृह्य खड्गं चिच्छेद कर्णनासं महाबलः ॥ १७ ॥
चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् ॥ हतानि वसता तत्र राघवेण महात्मना ॥ १८ ॥
एकेन सह संगम्य रणे रामेण सङ्गताः ॥ अह्नश्चतुर्थभागेन निःशेषा राक्षसाः कृताः ॥ १९ ॥
महाबला महावीर्यास्तपसो विघ्नकारिणः ॥ निहता राघवेणाजौ दण्डकारण्यवासिनः ॥ २० ॥
राक्षसाश्च विनिष्पिष्टाः खरश्च निहतो रणे ॥ २१ ॥
[दूषणं चाग्रतो हत्वा त्रिशिरास्तदनन्तरम् ॥] ततस्तेनार्दिता बाला रावणं समुपागता ॥ २२ ॥
रावणानुचरो घोरो मारीचो नाम राक्षसः ॥ लोभयामास वैदेहीं भूत्वा रत्नमयो मृगः ॥ २३ ॥
अथैनमब्रवीद्रामं वैदेही गृह्यतामिति ॥ अहो मनोहरः कान्त आश्रमो नो भविष्यति ॥ २४ ॥
ततो रामो धनुष्पाणिर्धावन्तमनुधावति ॥ स तं जघान धावन्तं शरेणानतपर्वणा ॥ २५ ॥
अथ सौम्य दशग्रीवो मृगं याते तु राघवे ॥ लक्ष्मणे चापि निष्क्रान्ते प्रविवेशाश्रमं तदा ॥ २६ ॥

यः। अमित्रकर्शनेत्यनेन राज्यकरणसामर्थ्ये स्वस्यसत्यपि ज्येष्ठानुवृत्त्यर्थं निमन्त्रित इति गम्यते ॥५—९॥ समुद्भ्रान्तेति। अपूर्वपुरुषदर्शनेनेति भावः। परिधूनं परितप्तं ॥ १० ॥ तत् प्रसिद्धं। हस्तिभिः वनगजैः मृदितं ॥११—१२॥ निखाते अवटे। प्रक्षिपन्ति स्मेति बहुवचनेन सीतयाऽपि तत्र किंचित्साहाय्यं कृतमिति गम्यते ॥१३—१५॥ ततः पश्चादित्यर्थः ॥१६॥ कर्णनासमित्यत्र प्राण्यङ्गत्वादेकवद्भावः ॥ १७—१८ ॥ संगताः पार्थक्येन विना सर्वे राक्षसाः परस्परं मिलिताः सन्तः। एकेन रामेण सह संगम्यः निःशेषाः कृता इत्यन्वयः। अह्नश्चतुर्थभागेनेत्यत्रअह्नश्चतुर्थो यामः। तस्य भागः त्रिपादघटिकान्यूनार्धांशः तेन। अन्यथा अर्धाधिकमुहूर्तेनेति पूर्वोक्तविरोधः प्रसज्येत ॥ १९ ॥ महाबला इति श्लोके तपसो विघ्नकारिण इत्युक्त्या राक्षसहननं तपोविघ्नशान्त्यर्थमिति दर्शितं ॥ २० ॥ राक्षसा इत्यर्धं ॥ २१ ॥ तत इत्यर्धं ॥ बाला मूर्खा। "मूर्खेऽर्भकेपि बालः स्यात्" इत्यमरः ॥ २२—२३ ॥ एनं रामं। गृह्यतां मृग इति शेषः ॥ २४—२५ ॥ निष्क्रान्त इति। क्रूरत्वान्निष्क्रान्तिकारणानुक्तिः। अतएवाह काम-

स० कर्णश्चनासाचकर्णनासं। पुनःकर्णश्चनासाचकर्णनासं। कर्णनासंचकर्णनासंचकर्णनासे। अतःप्राण्यङ्गताप्रयुक्तैकवद्भावाभावः कथमितिशङ्कानवकाशः ॥ १७ ॥ शि० अयंमृगः नः आश्रमः खेलनाश्रयोभविष्यति ॥ २४ ॥

[पा०] १ ङ. च. छ. झ. ट. मृगाकुलं. २ इदमर्धं क. ख. ङ.—ट. पाठेषुदृश्यते. ख. दूषणश्चहतोमूर्खस्त्रिशिराः. ३ क. ख. घ. च. छ. ज. ट. सारामम्रवीद्भृष्टावैदेही. ङ. झ. ञ. सारामम्रवीद्दृष्ट्वावैदेही. ४ ङ. झ. ट. अयंमनोहरः ५ ङ.—ट. धनुष्पाणिर्मृगंतमनु.

जग्राह तरसा सीतां ग्रहः खे रोहिणीमिव ॥ त्रातुकामं ततो युद्धे हत्वा गृध्रं जटायुषम् ॥ २७ ॥
प्रगृह्य सीतां सहसा जगामाशु स रावणः ॥ २८ ॥
ततस्त्वद्भुतसंकाशाः स्थिताः पर्वतमूर्धनि ॥ सीतां गृहीत्वा गच्छन्तं वानराः पर्वतोपमाः ॥
ददृशुर्विस्मितास्तत्र रावणं राक्षसाधिपम् ॥ २९ ॥
[ततः शीघ्रतरं गत्वा तद्विमानं मनोजवम् ॥ आरुह्य सह वैदेह्या पुष्पकं स महाबलः ॥]
प्रविवेश ततो लङ्कां रावणो लोकरावणः ॥ ३० ॥
तां सुवर्णपरिक्रान्ते शुभे महति वेश्मनि ॥ प्रवेश्य मैथिलीं वाक्यैः सान्त्वयामास रावणः ॥ ३१ ॥
तृणवद्भाषितं तस्य तं च नैर्ऋतपुङ्गवम् ॥ अचिन्तयन्ती वैदेही अशोकवनिकां गता ॥ ३२ ॥
न्यवर्तत ततो रामो मृगं हत्वा महावने ॥ निवर्तमानः काकुत्स्थोऽदृष्ट्वा गृध्रं प्रविव्यथे ॥ ३३ ॥
गृध्रं हतं ततो दग्ध्वा रामः प्रियसखं पितुः ॥ मार्गमाणस्तु वैदेहीं राघवः सहलक्ष्मणः ॥
गोदावरीमन्वचरद्वनोद्देशांश्च पुष्पितान् ॥ ३४ ॥
आसेदतुर्महारण्ये कबन्धं नाम राक्षसम् ॥ ३५ ॥
ततः कबन्धवचनाद्रामः सत्यपराक्रमः ॥ ऋश्यमूकं गिरिं गत्वा सुग्रीवेण समागतः ॥ ३६ ॥
तयोः समागमः पूर्वं प्रीत्या हार्दोऽव्यजायत ॥ भ्रात्रा निरस्तः क्रुद्धेन सुग्रीवो वालिना पुरा ॥३७॥
इतरेतरसंवादात्प्रगाढः प्रणयस्तयोः ॥ ३८ ॥
रामस्य बाहुवीर्येण स्वराज्यं प्रत्यपादयत् ॥ वालिनं समरे हत्वा महाकायं महाबलम् ॥ ३९ ॥
सुग्रीवः स्थापितो राज्ये सहितः सर्ववानरैः ॥ रामाय प्रतिजानीते राजपुत्र्याश्च मार्गणम् ॥ ४० ॥
आदिष्टा वानरेन्द्रेण सुग्रीवेण महात्मना ॥ दश कोट्यः प्लवङ्गानां सर्वाः प्रस्थापिता दिशः ॥ ४१ ॥

न्दकः—" प्रियं पथ्यं च तथ्यं च वदेद्धर्मार्थमेव च । अश्राव्यमयशस्यं च परोक्षे कटु चोत्सृजेत् " इति ॥ २६ ॥ तरसा बलात्कारेण । ग्रहः अङ्गारक इति यावत् ॥ २७—२८ ॥ ततस्त्वित्यादिसार्धश्लोक एकान्वयः ॥ अद्भुतसंकाशाः अद्भुताकाराः ॥२९—३० ॥ सुवर्णपरिक्रान्ते सुवर्णानुलिप्ते ॥ ३१ ॥ तस्य रावणस्य । भाषितं तृणवत् । मत्वेति शेषः । तं च नैर्ऋतपुङ्गवं अचिन्तयन्ती वैदेही अशोकवनिकां गता । तत्रैव स्थितेत्यर्थः ॥ ३२ ॥ अदृष्ट्वेति च्छेदः । सीतामिति शेषः । सीतां गृध्रं चादृष्ट्वा प्रविव्यथ इत्यन्वयः ॥३३॥ गृध्रमित्यादिसार्धश्लोक एकान्वयः॥ ततो वैदेहीं मार्गमाणो राघवः पितुः प्रियसखं हतं गृध्रं दग्ध्वा गोदावरीं तद्वनोद्देशांश्चान्वचरत् । पुष्पितानित्यनेन पुष्पलोभेन किं सीताऽत्र गतेति मतिर्व्यज्यते ॥ ३४ ॥ आसेदतुरित्यर्धमेकं वाक्यं ॥ राघवाविति शेषः ॥३५—३६॥ तयोः रामसुग्रीवयोः । पूर्वं दर्शनात्प्रागेव । हार्दः समागमः मानसः संबन्धः । व्यजायत । मनसा परस्परं सख्यमाचकाङ्क्षाते इत्यर्थः । सुग्रीवस्य कुतः सख्यापेक्षेत्यत्र आह—भ्रात्रेति ॥ ३७ ॥ इतरेतरसंवादात् अन्योन्यप्रयोजनकथनात् प्रणयः । प्रगाढः अतिशयितः । अभूत् ॥ ३८ ॥ रामस्येति । अत्र सुग्रीव इति शेषः । सुग्रीवः रामस्य बाहुवीर्येण वालिनं हत्वा स्वराज्यं प्रत्यपादयत् समपादयदिति संबन्धः ॥३९॥ राज्ये स्थापितः सुग्रीवः सर्ववानरैः सहितोभूत् । रामायेति । सुग्रीव इति शेषः । प्रतिजानीते प्रतिज्ञातवान् ॥ ४० ॥ आदिष्टाः मार्गणायादिष्टाः दिशः प्रस्थापिताश्च ॥ ४१ ॥

ति० सुवर्णपरिष्कारे सुवर्णप्राकारे ॥ ३१ ॥ स० रामः स्वराज्यं स्वेनद्रव्येणसहितंचतद्राज्यंचेतितत् । राज्ञिमृतेसमरेस्वस्वामिकमितिस्वराज्यंवा । प्रत्यपादयत् दत्तवान् ॥ ३९ ॥

[पा०] १ ख. ङ. च. छ. झ. ञ. ट. पाठेष्विदंपद्यंदृश्यते. २ ङ. च. झ. ट. राक्षसेश्वरः. ३ झ. परिष्कारे. ४ ङ. झ. ञ. ट. सविव्यथे. ५ ङ. च. झ. ञ. ट. तदादृष्ट्वारामःप्रियतरं. ६ ङ. च. छ. झ. ट रामःस्वबाहु.

तेषां नो विप्रकृष्टानां विन्ध्ये पर्वतसत्तमे ॥ भृशं शोकाभितप्तानां महान्कालोत्यवर्तत ॥ ४२ ॥
भ्राता तु गृध्रराजस्य संपातिर्नाम वीर्यवान् ॥ समाख्याति स्म वसतिं सीताया रावणालये ॥४३॥
सोहं शोकपरीतानां दुःखं तज्ज्ञातिनां नुदन् ॥ आत्मवीर्यं समास्थाय योजनानां शतं प्लुतः ॥४४॥
तत्राहमेकामद्राक्षमशोकवनिकां गताम् ॥ कौशेयवस्त्रां मलिनां निरानन्दां दृढव्रताम् ॥ ४५ ॥
तया समेत्य विधिवत्पृष्ट्वा सर्वमनिन्दिताम् ॥ अभिज्ञानं च मे दत्तमर्चिष्मान्स महामणिः ॥४६॥
[मां दृष्ट्वा मैथिली हृष्टा प्रशंसे च जीवितम् ॥ ४७ ॥
रावणस्य मनःकान्तामशोकवनिकां तदा ॥ विध्वंसयित्वा समरे हत्वा राक्षसपुङ्गवान् ॥ ४८ ॥
लङ्कां च भस्मसात्कृत्वा प्रहृष्टेनान्तरात्मना ॥] अभिज्ञानं मणिं लब्ध्वा चरितार्थोऽहमागतः ॥४९॥
मया च पुनरागम्य रामस्याक्लिष्टकर्मणः ॥ अभिज्ञानं मया दत्तमर्चिष्मान्स महामणिः ॥ ५० ॥
श्रुत्वा तु मैथिलीं हृष्टस्त्वाशंसे च जीवितम् ॥ जीवितान्तमनुप्राप्तः पीत्वाऽमृतमिवातुरः ॥ ५१ ॥
उद्योजयिष्यन्नुद्योगं दध्रे कामं वधे मनः ॥ जिघांसुरिव लोकान्ते सर्वाल्लोकान्विभावसुः ॥ ५२ ॥
ततः समुद्रमासाद्य नलं सेतुमकारयत् ॥ अतरत्कपिवीराणां वाहिनी तेन सेतुना ॥ ५३ ॥
प्रहस्तमवधीन्नीलः कुम्भकर्णं तु राघवः ॥ लक्ष्मणो रावणसुतं स्वयं रामस्तु रावणम् ॥ ५४ ॥
स शक्रेण समागम्य यमेन वरुणेन च ॥ महेश्वरस्वयंभूभ्यां तथा दशरथेन च ॥ ५५ ॥
तैश्च दत्तवरः श्रीमानृषिभिश्च समागतः ॥ सुरर्षिभिश्च काकुत्स्थो वरान्लेभे परन्तपः ॥ ५६ ॥
स तु दत्तवरः प्रीत्या वानरैश्च समागतः ॥ पुष्पकेण विमानेन किष्किन्धामभ्युपागमत् ॥ ५७ ॥
तं गङ्गां पुनरासाद्य वसन्तं मुनिसन्निधौ ॥ अविघ्नं पुष्ययोगेन श्वो रामं द्रष्टुमर्हसि ॥ ५८ ॥

तेषां स्थापितानां विप्रकृष्टानां बहुकालविलम्बितानां । यद्वा स्वयंप्रभाबिले प्रविष्टतया दूरं गतानां ॥४२-४३॥ ज्ञातिनामिति नकारान्तत्वमार्षं । प्लुतः समुद्र इति शेषः ॥४४॥ तत्र रावणालये ॥ ४५ ॥ अनिन्दितां सीतां । सर्वं वृत्तान्तं पृष्ट्वा । प्रच्छिर्द्विकर्मकः । पृष्ट्वा स्थिताय मे मह्यं । सः प्रसिद्धः । महामणिः अभिज्ञानं । दत्तं ॥४६—४९॥ क्रियाभेदान्मयाशब्दद्वयं प्रयुक्तं॥५०॥ जीवितमाशंसे ततः पूर्वं जीविते निराशः स्थित इति व्यक्तं । जीवितान्तं प्राप्तः, आतुरः अमृतं पीत्वा यथा जीवितमाशास्ते तथेत्यर्थः ॥ ५१ ॥ उद्योगमुद्योजयिष्यन् उद्योगं कुर्वन् । ओदनपाकं पचतीतिवत् । विभावसुः अग्निः ॥ ५२ ॥ नलं सेतुमकारयत् नलेन सेतुमकारयत् ॥ ५३—५७ ॥ पुनर्गङ्गामासाद्य मुनिसन्निधौ भरद्वाजसमीपे अध्यवसन्तं तं अविघ्नं यथा भवति तथा श्वः पुष्ययोगेन द्रष्टुमर्हसि । पुष्ययोगलाभार्थं अद्य गङ्गातीरे रामः स्थित इति

स० यद्वा ज्ञातं भावेक्तः ज्ञानं संपातिमुखतएषामस्तितेज्ञातिनस्तेषां । शि० तज्ज्ञातिनां संपातिवचनेनसीतास्थितिज्ञानवतां । दुःखं अतिदुर्गमलङ्कायां सीतायाःस्थितत्वेनसीतादर्शनाशक्यताज्ञानजनितखेदंनुदन् । एतेनज्ञातिनामित्यत्रदीर्घाभावआर्षइतिभट्टाद्युक्तिश्चिन्त्या ॥ ४४ ॥ रामानु० मेमया समहामणिः रामदत्ताभिज्ञानस्याङ्गुलीयकरूपत्वेपितद्युक्तमणिप्राधान्यान्मणिशब्दप्रयोगः ॥ ४६ ॥ स० आतुरोरोगी । जीवितान्तं आसन्नप्राणविनाशमनुप्राप्तः अमृतं मृतिहरमौषधंपीत्वायथाजीवनं लब्धमितिशंसतितथेत्यर्थः ॥ ५१ ॥ ति० उद्युज्यतेजयोऽनेनेत्युद्योगं बलं । तत् उद्योजयिष्यन् प्रोत्साहयिष्यन् । स० लङ्कावधे तत्संहारे । लङ्कामवतीतितदवोरावणः तस्य धं बन्धनंतस्मिन्वा । 'धंबन्धने'इतिविश्वः ॥ ५२ ॥ ति० मुनिसंनिधावद्यवसन्तंश्वोद्रष्टुमर्हसि । आश्विनशुक्लचतुर्दश्यामश्विनीतद्वर्षे इतिषष्ठ्यांपुष्यस्यसंभवः । पूर्णिमायामश्विन्यामप्येकक्षेक्षयेणवा ॥ ५८ ॥ इत्येकोनत्रिंशदुत्तरशततमः सर्गः ॥ १२९ ॥

[पा०] १ ङ.—ट. वसतींसीतांरावणमन्दिरे. २ क. ङ.—ट. अभिज्ञानंमयादत्तंरामनामाङ्गुलीयकं. ३ मांदृष्ट्वेत्यादयः प्रहृष्टेनान्तरात्मनेत्यन्ताः श्लोकाः क. च. ज. पाठेषुदृश्यन्ते. ४ ग.—छ. झ. ञ. ट. तांमैथिलीं. ५ ख. पीत्वौषधमिवा. ६ क. ख. ग. ङ.—ञ. लङ्कावधेमनः. ७ ङ. च. छ. झ. ट. समागतैः. ८ क. घ. ज. मुनिभिश्च. ९ क. ग. ङ.—ञ. तांगङ्गां.

ततस्तु सत्यं हनुमद्वचो महन्निशम्य हृष्टो भरतः कृताञ्जलिः ॥
उवाच वाणीं मनसः प्रहर्षिणीं चिरस्य पूर्णः खलु मे मनोरथः ॥ ५९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनत्रिंशदुत्तरशततमः सर्गः ॥ १२९ ॥

त्रिंशदुत्तरशततमः सर्गः ॥ १३० ॥

हनुमतोरामागमनंश्रुतवताभरतेन शत्रुघ्नंप्रत्ययोध्यामार्गशोधननगरालंकरणगणिकागणतूर्यसेवादिसहितनागरिकजनप्रत्युद्गमनादिचोदनचोदना ॥ १ ॥ कौसल्यादिभिः सकलनागरिकैश्चसह सवाद्यघोषंप्रत्युद्गतवताभरतेन रामागमनानुपलंभखेदेन हनुमन्तंप्रति तत्रहेतुप्रश्ने तेनतंप्रति तदागमनचिह्ननिवेदनसमयसमागतविमानप्रदर्शनम् ॥ २ ॥ पुष्पकावलोकनहर्षेणसमुद्भुष्यत्सुपौरनिकरेषु भरतेचदूरादभिवन्दमाने रामेण स्वाज्ञयाधरणितलमवतीर्णेपुष्पके भरतस्यसमारोपणम् ॥ ३ ॥ तथा पुनर्निजचरणप्रणामिनोभरतस्य सहर्षपरिष्वङ्गः ॥ ४ ॥ भरतेन लक्ष्मणसमागमपूर्वकं सीताचरणप्रणामः ॥ ५ ॥ शत्रुघ्नेन सीतारामलक्ष्मणचरणप्रणामः ॥ ६ ॥ रामेण कौसल्यादिमातृप्रभृतिपादाभिवादनम् ॥ ७ ॥ रामेण पुनर्विमानेनभरताश्रममेत्य कुबेरंप्रति पुष्पकप्रेषणम् ॥ ८ ॥

श्रुत्वा तु परमानन्दं भरतः सत्यविक्रमः ॥ हृष्टमाज्ञापयामास शत्रुघ्नं परवीरहा ॥ १ ॥
दैवतानि च सर्वाणि चैत्यानि नगरस्य च ॥ सुगन्धमाल्यैर्वादित्रैरर्चन्तु शुचयो नराः ॥ २ ॥
सूताः स्तुतिपुराणज्ञाः सर्वे वैतालिकास्तथा ॥ सर्वे वादित्रकुशला गणिकाश्चापि संघशः ॥
अभिनिर्यान्तु रामस्य द्रष्टुं शशिनिभं मुखम् ॥ ३ ॥
भरतस्य वचः श्रुत्वा शत्रुघ्नः परवीरहा ॥ विष्टीरनेकसाहस्राश्चोदयामास वीर्यवान् ॥ ४ ॥
समीकुरुत निम्नानि विषमाणि समानि च ॥ स्थलानि च निरस्यन्तां नन्दिग्रामादितः परम् ॥ ५ ॥
सिञ्चन्तु पृथिवीं कृत्स्नां हिमशीतेन वारिणा ॥ ततोऽभ्यवकिरन्त्वन्ये लाजैः पुष्पैश्च सर्वशः ॥ ६ ॥
समुच्छ्रितपताकास्तु रथ्याः पुरवरोत्तमे ॥ शोभयन्तु च वेश्मानि सूर्यस्योदयनं प्रति ॥ ७ ॥
स्रग्दामभिर्मुक्तपुष्पैः सुगन्धैः पञ्चवर्णकैः ॥ राजमार्गमसंबाधं किरन्तु शतशो नराः ॥ ८ ॥

भावः ॥ ५८ ॥ सत्यं अविरुद्धभङ्ग्या सत्यत्वेन ज्ञातं । मनोरथ इत्यनन्तरमितिकरणं द्रष्टव्यं ॥५९॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनत्रिंशदुत्तरशततमः सर्गः ॥ १२९ ॥

परमानन्दं परमानन्दकरं । वच इति शेषः ॥१॥ चैत्यानि चतुष्पथमण्डपान् । अर्चन्तु अर्चयन्तु ॥२॥ सूता इत्यादिसार्धश्लोक एकान्वयः ॥ सूताः स्तुतिशीलाः । वैतालिकाः बन्दिनः ॥ ३ ॥ भरतस्येत्यादिश्लोकपञ्चकमेकान्वयं ॥ विष्टीः भृतिं विना कर्मकरान् । नन्दिग्रामादितः परं । अयोध्यापर्यन्तमित्यर्थः । अन्ये पुरुषाः हिमवच्छीतेन वारिणा सिञ्चन्तु । ततः सेचनानन्तरं लाजादिभिः किरन्तु । रथ्याः समुच्छ्रितपताकाः कुर्वन्त्विति शेषः । सूर्यस्योदयनं प्रति सूर्यस्योदयमारभ्य । यावत्सूर्योदयमिति वा । स्रजः मालिकाः तासां दाममिः पङ्क्तिभिः । मुक्तपुष्पैः असूत्रबद्धपद्मकुवलयादिमिश्च वेश्मानि शोभयन्तु । सुगन्धैः पञ्चवर्णकैः पञ्चविधवर्णद्रव्यचूर्णैः । राजमार्गं किरन्तु । राजमार्गे वर्णद्रव्यचूर्णैः नानाविधलतापद्मादिचित्ररेखाः कुर्वन्त्वित्यर्थः ॥ ४—८ ॥

स० परमानन्दं परमआनन्दोजन्यत्वेनयस्यतत् वचइतिशेषः ॥ १ ॥ ति० विरलपुष्पबन्धाः स्रजः । निबिडपुष्पबन्धं दाम ।

[पा०] १ ख. ङ. च. छ. झ. ञ. ट. ततस्सवाक्यैर्मधुरैर्हनूमतोनिशम्य. २ ज. देवालयाश्चसर्वाणिचैत्यानिनगराणिच. ३ ज. शशिनिभाननं. ४ घ. च. छ. स्रग्दाममुक्तपुष्पैश्चसुवर्णरजतैरपि. ख. ङ. झ. ट. स्रग्दाममुक्तपुष्पैश्चसुवर्णैः. ज. स्रग्दाममुक्तपुष्पैश्चसुगन्धैः.

राजदारास्तथाऽमात्याः सैन्याः सेनागणाङ्गनाः ॥ ब्राह्मणाश्च सराजन्याः श्रेणीमुख्यास्तथा गणाः॥९॥
धृष्टिर्जयन्तो विजयः सिद्धार्थो ह्यर्थसाधकः ॥ अशोको मन्त्रपालश्च सुमन्त्रश्चापि निर्ययुः ॥
मत्तैर्नागसहस्रैश्च शातकुम्भविभूषितैः ॥ १० ॥
अपरे हेमकक्ष्याभिः सगजाभिः करेणुभिः ॥ निर्ययुस्तुरगाक्रान्तै रथैश्च सुमहारथाः ॥ ११ ॥
शक्त्यृष्टिप्रासहस्तानां सध्वजानां पताकिनाम् ॥ तुरगाणां सहस्रैश्च मुख्यैर्मुख्यनरान्वितैः ॥
पदातीनां सहस्रैश्च वीराः परिवृता ययुः ॥ १२ ॥
ततो यानान्युपारूढाः सर्वा दशरथस्त्रियः ॥ कौसल्यां प्रमुखे कृत्वा सुमित्रां चापि निर्ययुः ॥१३॥
कैकेय्या सहिताः सर्वा नन्दिग्राममुपागमन् ॥ १४ ॥
कृत्स्नं च नगरं तत्तु नन्दिग्राममुपागमत् ॥ १५ ॥
अश्वानां खुरशब्देन रथनेमिस्वनेन च ॥ शङ्खदुन्दुभिनादेन संचचालेव मेदिनी ॥ १६ ॥
द्विजातिमुख्यैर्धर्मात्मा श्रेणीमुख्यैः सनैगमैः ॥ माल्यमोदकहस्तैश्च मन्त्रिभिर्भरतो वृतः ॥ १७ ॥
शङ्खभेरीनिनादैश्च बन्दिभिश्चाभिवन्दितः ॥ आर्यपादौ गृहीत्वा तु शिरसा धर्मकोविदः ॥ १८ ॥
पाण्डुरं छत्रमादाय शुक्लमाल्योपशोभितम् ॥ शुक्ले च वालव्यजने राजार्हे हेमभूषिते ॥ १९ ॥
उपवासकृशो दीनश्चीरकृष्णाजिनाम्बरः ॥ भ्रातुरागमनं श्रुत्वा तत्पूर्वं हर्षमागतः ॥
प्रत्युद्ययौ ततो रामं महात्मा सचिवैः सह ॥ २० ॥
समीक्ष्य भरतो वाक्यमुवाच पवनात्मजम् ॥ २१ ॥
कच्चिन्न खलु कापेयी सेव्यते चलचित्तता ॥ न हि पश्यामि काकुत्स्थं राममार्यं परन्तपम् ॥

अथ परेद्युः प्रातः रामभक्त्यतिशयेन सर्वेषां निर्गमनं दर्शयति—राजदारा इत्यादिना ॥ श्रेणीमुख्याः श्रेणीमुखाः । तथा गणाः । श्रेणी श्रेणय इति यावत् । अत्र श्लोके निर्ययुरिति वक्ष्यमाणमनुषज्यते ॥ ९ ॥ अमात्यान्विशिष्य दर्शयति—धृष्टिरित्यादिना ॥ सार्धश्लोक एकान्वयः । अत्र धृष्ट्यादयो गजारूढा ययुरित्यर्थः ॥ १० ॥ अपरे राजान्तरङ्गाः पुरुषाः करेणुभिर्निर्ययुः ॥ ११ ॥ शक्तीत्यादिसार्धश्लोक एकान्वयः ॥ उक्तविशेषणानां तुरगाणां सहस्रैः पदातीनां सहस्रैश्च परिवृता वीरा ययुः ॥ १२ ॥ प्रमुखे अग्रे ॥१३॥ कैकेय्येति । अत्र भरतेनोपेक्षयानाहूतत्वात् पश्चान्निर्गत्य कैकेय्या नन्दिग्रामप्राप्तिकाले साहित्यमुच्यते ॥ १४ ॥ कृत्स्नमित्यर्थः । अत्र नगरशब्देन तत्रत्यजना लक्ष्यन्ते ॥ १५ ॥ संचचाल कम्पितेव ॥ १६ ॥ अथोक्तपरिवारैः सह भरतस्य नन्दिग्रामान्निर्गमं दर्शयति—द्विजातिमुख्यैरित्यादिभिः सार्धैश्चतुर्भिः श्लोकैः ॥ ततो महात्मा भरतः सर्वैर्वृतः प्रत्युद्ययाविति वाक्यार्थः । सनैगमैः सवणिग्भिः । " वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक् " इत्यमरः । मन्त्रिभिः वसिष्ठादिभिः । सचिवैः सुमन्त्रादिभिः । आर्यपादौ रामपादुके । हेमभूषिते हेमदण्डभूषिते । तत्पूर्वं श्रवणादिहर्षमागतः । श्रवणात्पूर्वं तु नास्य हर्षोभूदित्यर्थः ॥ १७—२० ॥ समीक्ष्येत्यर्धं ॥ समीक्ष्य समन्ताद्रामगमनं निरीक्ष्य ॥ २१ ॥ कच्चिदित्यादि सार्धश्लोक एकान्वयः ॥ कच्चिदिति प्रश्ने ।

मुक्तपुष्पाणि बन्धनरहितानि पुष्पाणि ॥ ८ ॥ स० सेनाङ्गनागणाः सपतिकयोषिज्जनाः सुवासिन्यइतियावत् । सेनोपयुक्तानपत्याङ्गनासंघाइतिवा । 'वंध्याभार्यावहुप्रदोराजा' इत्यादेः । सेनागणाः अङ्गनागणा इतिवा ॥ ९ ॥ स० रामपादौ तच्चिह्नितत्वात्तत्त्वेनव्यपदेशः पादुके ॥ १८ ॥ स० प्रत्युद्ययौ अनेनेदृशींदशामापन्नस्यापिभरतस्यतस्यागमनवार्तैवश्रमशामिकेतिद्योत्यते ॥ २० ॥ स० 'यावन्नदूरयातोस्मिक्षिप्रमागन्तुमर्हसि'इत्यत्र भारतेचवनपर्वणि 'लक्षयित्वेङ्गितंसर्वंप्रियंतस्मैनिवेद्यच । वायुपुत्रेपुनः

[पा०] १ अयंश्लोकः क.—ट. पाठेषु अभिनिर्यान्तुरामस्येत्यर्धात्पूर्वंदृश्यते. २ क.—ट. सेनाङ्गनागणाः. ३ ङ. च. ञ. ञ. ट. सध्वजैःसुविभूषितैः. ४ क. ङ. च. छ. झ. मुख्यतरान्वितैः. ५ ठ. रामपादौ.

कच्चिन्न खलु दृश्यन्ते वानराः कामरूपिणः ॥ २२ ॥
अथैवमुक्ते वचने हनुमानिदमब्रवीत् ॥ अर्थं[1] विज्ञापयन्नेव भरतं सत्यविक्रमम् ॥ २३ ॥
सदाफलान्कुसुमितान्वृक्षान्प्राप्य मधुस्रवान् ॥ भरद्वाजप्रसादेन मत्तभ्रमरनादितान् ॥ २४ ॥
तस्य चैष वरो दत्तो वासवेन परन्तप ॥ ससैन्यस्य तथाऽऽतिथ्यं कृतं सर्वगुणान्वितम् ॥ २५ ॥
निस्स्वनः श्रूयते भीमः प्रहृष्टानां वनौकसाम् ॥ मन्ये वानरसेना सा नदीं तरति गोमतीम् ॥२६॥
रजोवर्ष समुद्भूतं पश्य वालुकिनीं प्रति ॥ मन्ये सालवनं रम्यं लोलयन्ति प्लवङ्गमाः ॥ २७ ॥
तदेतदृश्यते दूराद्विमलं चन्द्रसन्निभम् ॥ विमानं पुष्पकं दिव्यं मनसा ब्रह्मनिर्मितम् ॥
रावणं बान्धवैः सार्धं हत्वा लब्धं महात्मना ॥ २८ ॥
तरुणादित्यसंकाशं विमानं रामवाहनम् ॥ धनदस्य प्रसादेन दिव्यमेतन्मनोजवम् ॥ २९ ॥
एतस्मिन्भ्रातरौ वीरौ वैदेह्या सह राघवौ ॥ सुग्रीवश्च महातेजा राक्षसश्च विभीषणः ॥ ३० ॥
ततो हर्षसमुद्भूतो निस्स्वनो दिवमस्पृशत् ॥ स्त्रीबालयुववृद्धानां रामोऽयमिति कीर्तिते ॥ ३१ ॥
रथकुञ्जरवाजिभ्यस्तेऽवतीर्य महीं गताः ॥ ददृशुस्तं विमानस्थं नराः सोममिवाम्बरे ॥ ३२ ॥
प्राञ्जलिर्भरतो भूत्वा प्रहृष्टो राघवोन्मुखः ॥ स्वागतेन यथार्थेन ततो राममपूजयत् ॥ ३३ ॥
मनसा ब्रह्मणा सृष्टे विमाने भरताग्रजः ॥ रराज पृथुदीर्घाक्षो वज्रपाणिरिवापरः ॥ ३४ ॥
ततो विमानाग्रगतं भरतो भ्रातरं तदा ॥ ववन्दे प्रयतो[2] रामं मेरुस्थमिव भास्करम् ॥ ३५ ॥
ततो रामाभ्यनुज्ञातं तद्विमानमनुत्तमम् ॥ हंसयुक्तं महावेगं निष्पपात[3] महीतले ॥ ३६ ॥

सेव्यते । त्वयेति शेषः । तत्र हेतुमाह—न हीति । रामस्य दूरागमनेपि नासीरचारिणः कपयो दृश्येरन् तेषां कामरूपित्वेन स्वरूपेणादर्शनेपि रूपान्तरेण वा दृश्येरन् । तदपि नास्तीत्यर्थः ॥ २२ ॥ अर्थं विलम्बहेतुं । " अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने । व्यवहारे धने शास्त्रे वस्तुहेतुनिवृत्तिषु "इति वैजयन्ती ॥ २३ ॥ भरद्वाजप्रसादेन सदाफलानिति संबन्धः । प्राप्य वानराः हृष्यन्तीति च शेषः ॥२४॥ ससैन्यस्य रामस्य वासवेन एष वरो दत्तः अकालफलित्ववरो दत्तः । तथा सर्वगुणान्वितं आतिथ्यं मधुस्रवत्वरूपं भरद्वाजेन कृतं । अतोऽकालफलित्वं मधुस्रवत्वं च वनस्य युक्तमित्यर्थः ॥ २५ ॥ एवं विलम्बहेतुमुक्त्वा समीपागमनचिह्नं दर्शयति—निस्स्वन इति ॥ इदानीं वानरसेना गोमतीं नदीं तरतीति मन्ये । यस्मात् भीमो निस्स्वन इति भावः ॥ २६ ॥ ततोपि सन्निकर्षमाह—रज इति ॥ समुद्भूतं रजोवर्षं पश्य । तस्माद्वालुकिनीं नदीं प्रति यातीति मन्ये ॥ क्षिप्रं वानरसेनाया अनागमने हेतुमाह—मन्य इति ॥ तस्मात्तस्याः विलम्बः ॥ २७ ॥ विमानं तु दृश्यत इत्याह—तदेतदिति ॥ पुष्पकं विमानं पुष्पकाख्यं विमानम् ॥ २८ ॥ दिव्यं मनोजवं तरुणादित्यसंकाशं रामवाहनमेतद्विमानं । प्रसादेन धनदस्य ब्रह्मप्रसादेन धनदस्य लब्धमित्यर्थः । " परेण तपसा लेभे यत्कुबेरः पितामहात् " इति सुन्दरकाण्डोक्तेः ॥ २९ ॥ एतस्मिन्निति ॥ आसत इति शेषः ॥ ३०—३२ ॥ यथार्थेन स्वागतेन चतुर्दशे वर्षे पूर्णे अवश्यमागमिष्यामीति प्रतिज्ञानुसारिणा स्वागमनेनेत्यर्थः । अपूजयत् अश्लाघयत् ॥ ३३—३६ ॥

प्राप्तेनन्दिग्राममुपागमत् ' इत्युक्तेः पाद्मेपि ' पुनरागत्यकाकुत्स्थंहनुमान्त्सर्वमब्रवीत् ' इत्युक्तेश्चमध्येपुनारामंगत्वोक्त्वाचभरतरीतिं पुनर्हनुमान्भरतमुपागतइतिकथा 'कच्चिन्नखलुकापेयी' इत्यतःपूर्वमनुसंधेया । कापेयी कपिसंबन्धिनीचलचित्तता । नसेव्यतेकचित् । कुतस्तवशङ्क्येत्यतआह—नहीति । पश्चादायातुनश्चार्यः किंकपयोपिनोपयाताःपुरतइतिपृच्छति—**कच्चिदिति** ॥ २२ ॥ **ती०** मनसाब्रह्मनिर्मितं विश्वकर्मणामनसाब्रह्मार्थंनिर्मितं । **ति०** ब्रह्मनिर्मितं ब्रह्मणा स्रष्टृत्वसाम्याद्विश्वकर्मणा ॥ २८ ॥

[पा०] १ ङ. ञ. ञ. ट. अर्थ्यं. २ ख. ग. ङ. च. छ. झ. ञ. रिवामरः. ३ ख. घ. ङ. च. ज.—ट. प्रणतो. ४ क. ख. ग. च.—ट. निपपात.

आरोपितो विमानं तद्भरतः सत्यविक्रमः ॥ राममासाद्य मुदितः पुनरेवाभ्यवादयत् ॥ ३७ ॥
तं समुत्थाप्य काकुत्स्थश्चिरस्याक्षिपथं गतम् ॥ अङ्के भरतमारोप्य मुदितः परिषस्वजे ॥ ३८ ॥
ततो लक्ष्मणमासाद्य वैदेहीं[1] चाभ्यवादयत् ॥ अभिवाद्य ततः प्रीतो भरतो नाम चाब्रवीत् ॥३९॥
सुग्रीवं केकयीपुत्रो जाम्बवन्तं तथाऽङ्गदम् ॥ मैन्दं च द्विविदं नीलमृषभं परिषस्वजे ॥ ४० ॥
सुषेणं च नलं चैव गवाक्षं गन्धमादनम् ॥ शरभं पनसं चैव भरतः परिषस्वजे ॥ ४१ ॥
ते कृत्वा मानुषं रूपं वानराः कामरूपिणः ॥ कुशलं पर्यपृच्छंस्ते प्रहृष्टा भरतं तदा ॥ ४२ ॥
अथाब्रवीद्राजपुत्रः सुग्रीवं वानरर्षभम् ॥ परिष्वज्य महातेजा भरतो धर्मिणां वरः ॥ ४३ ॥
त्वमस्माकं चतुर्णां तु भ्राता सुग्रीव पञ्चमः ॥ सौहृदाज्जायते मित्रमपकारोरिलक्षणम् ॥ ४४ ॥
विभीषणं च भरतः सान्त्ववाक्यमथाब्रवीत् ॥ दिष्ट्या त्वया सहायेन कृतं कर्म सुदुष्करम् ॥४५॥
शत्रुघ्नश्च तदा राममभिवाद्य सलक्ष्मणम् ॥ सीतायाश्चरणौ पश्चाद्विनयादभ्यवादयत् ॥ ४६ ॥

आरोपित इति । अत्र भरतस्य विमानारोपणं सर्वेषां प्रदर्शनार्थमिति बोध्यं ॥ ३७—३८ ॥ लक्ष्मणमासाद्य कृतनमस्कारं लक्ष्मणमालिङ्गनेन संभाव्य । इदं च लक्ष्मणस्य कनिष्ठत्वात् । लक्ष्मणेन चिकीर्षितो नमस्कारो रामसन्निधौ भरतेन प्रतिषेधित इति चाहुः । वैदेहीं चाभ्यवादयत् । चकारो रामनमस्कारं समुच्चिनोति । " न संख्ये भरतानुजः "इत्युक्तेः । " सीतामादाय गच्छ त्वमग्रतो भरताग्रज "इत्यत्र बहुव्रीहिरित्युक्तं । न च वैपरीत्यं शङ्क्यम् । 'पुष्ये जातस्तु भरतः, सार्पे जातौ तु सौमित्री' इति जन्मक्रमोक्तेः । पायसप्रदाने विवाहे च प्राथम्यं तत्र परिहृतं । लक्ष्मणासादनानन्तरं सीतानमस्काराभिधानात् सीता तारादिभिः सह रामसमीप एव किंचिदन्यत्र स्थितेत्यवगम्यते ॥ ३९—४१ ॥ मानुषं रूपं कृत्वा स्थिता इति शेषः ॥ ४२—४६ ॥

ति० लक्ष्मणमासाद्य वन्दमानंलक्ष्मणंपरिष्वङ्गादिनासंभाव्य । 'अन्येद्युःपाञ्चजन्यात्माकैकेय्यांभरतोऽभवत् । तदन्येद्युःसुमित्रायामनन्तात्माचलक्ष्मणः । सुदर्शनात्माशत्रुघ्नोद्वौजातौयुगपत्प्रिये ।' इतिपाद्मेशिवोक्तेः । वैदेहीं अभ्यवादयत् अभ्यवन्दत् । परेतु—यद्यपिलक्ष्मणोभरतात्कनिष्ठोवयसा । स्पष्टंचेदंजन्मप्रकरणे । तथापिज्येष्ठानुवर्तनेनस्वापेक्षयाऽधिकगुणत्वेनस्वव्यवहारेण ज्येष्ठानुवृत्तिरेवंकर्तव्येतिभरतंप्रत्युपदेशदानेनचगुरुत्ववुद्ध्यातस्यनतिरुचितैव । किंच कौसल्यायैप्रथमंदत्तपायसांशजलाल्लक्ष्मणस्य ज्येष्ठत्वंततोहिकैकेय्यैपायसार्धदानंतदंशजश्चशत्रुघ्नइतिसएवभरतात्कनिष्ठः । अतएववैदेहींचेतिचकारः स्वरसतःसंगच्छते । अतएवशत्रुघ्नकृतोलक्ष्मणनमस्कारउपपद्यते । तयोर्युगपदुत्पन्नत्वादित्याहुः । स० ततः रामनमनानन्तरं । लक्ष्मणं आसाद्य प्राप्य । सीतांचासाद्यनामच भरतोऽहंभोअभिवादयामीतिस्वनामाब्रवीत् । अथाभ्यवादयत् ननाम । अत्रसंप्रदायद्वयं । तथाहि । भरतोज्येष्ठः कनिष्ठोलक्ष्मणइति वैपरीत्येनचेति । लक्ष्मणआसाद्यस्वयंतेनसत्कृतस्तमालिङ्ग्य अथवैदेहीमभ्यवादयत् । 'अन्येद्युः पाञ्चजन्यात्माकैकेय्यांभरतोभवत् । तदन्येद्युः सुमित्रायामनन्तात्मासलक्ष्मणः । सुदर्शनात्माशत्रुघ्नोद्वौजातौयुगपत्प्रिये' इतिपाद्मेशिववचनात् । 'ततोदाशरथिर्वीरोधर्मज्ञोलोकविश्रुतः । भरतोलक्ष्मणश्चैवशत्रुघ्नश्चमहाबलः' इतिकूर्मपुराणेलक्ष्मणात्प्राग्भरतग्रहणाच्चात्रापितत्रत. त्रभरतज्यैष्ठ्यस्यस्पष्टप्रतिभानाच्चभरतज्यैष्ठ्यंकेचिन्मन्वते । अन्येतु लक्ष्मणंवैदेहींचासाद्याभ्यवादयदित्यन्वयेविनामूलपीडांलक्ष्मणज्यैष्ठ्यावगतेरुदाहृतपुराणादेस्तदन्येद्युरित्यस्यएतदन्यत्वंतस्यैवतदन्यत्वमेतस्यैतित्तत्पूर्वदिनस्यापितत्परेद्युश्शब्दवाच्यतासंभवात् । एतावद्राघवकीर्तिहेतुत्वात्कैकेय्यास्तत्पुत्रत्वेनप्रथमतउक्तिसंभवाच्च । पायससंविभागेनापिलक्ष्मणज्यैष्ठ्यस्यैवसंभवयुक्तिकत्वात् । भरतस्यादितोग्रहणंतुक्वाचित्कमितिबहुलस्थललक्ष्मणप्रागुक्तिपर्यावर्तनचतुरैर्भरतज्यैष्ठ्यवादिभिरनायासेनसमाधातुंशक्यंनवयंयतामहेतत्रेतिपायसस्योदरप्रवेशविवक्षयायुगपदित्युक्त्युपपत्तेरितिचमन्यन्ते । अत्रवक्तव्यं । प्रकरणानुरोधेनास्माभिःपूर्वंव्याख्यातमनुसन्धेयम् । शि० भरतोलक्ष्मणमासाद्य अभ्यवादयत् लक्ष्मणेनप्रणाममकारयत् । हेतुमतिणिच् । अथवैदेहीमासाद्य अभ्यवादयत् अवन्दत । अत्रस्वार्थेणिच् । उभयार्थलाभस्तुशब्दावृत्त्या ॥ ३९ ॥ ति० पञ्चमोभ्राता भ्रातृविषयकपञ्चत्वसंख्यापूरणः । सौहृदात् तत्पूर्वकोपकारात् ॥ ४४ ॥

[पा०] १ क.—ङ. छ. झ. ट. वैदेहींचपरंतपः. २ ङ.—ट. अथाभ्यवादयत्प्रीतो. ३ ज. सान्त्वयन्वाक्यमब्रवीत्. ४ क. घ. ज. पश्चाद्वन्देविनयान्वितः. ङ. च. छ. झ. ञ. ट. वीरोविनयादभ्यवादयत्.

रामो मातरमासाद्य विषण्णां शोककर्शिताम् ॥ जग्राह प्रणतः पादौ मनो मातुः प्रसादयन् ॥४७॥
अभिवाद्य सुमित्रां च कैकेयीं च यशस्विनीम् ॥ स मातृश्च ततः सर्वाः पुरोहितमुपागतम् ॥४८॥
स्वागतं ते महाबाहो कौसल्यानन्दवर्धन ॥ इति प्राञ्जलयः सर्वे नागरा राममब्रुवन् ॥ ४९ ॥
तान्यञ्जलिसहस्राणि प्रगृहीतानि नागरैः ॥ व्याकोशानीव पद्मानि ददर्श भरताग्रजः ॥ ५० ॥
पादुके ते तु रामस्य गृहीत्वा भरतः स्वयम् ॥ चरणाभ्यां नरेन्द्रस्य योजयामास धर्मवित् ॥
अब्रवीच्च तदा रामं भरतः स कृताञ्जलिः ॥ ५१ ॥
एतत्ते रक्षितं राजन्राज्यं निर्यातितं मया ॥ अद्य जन्म कृतार्थं मे संवृत्तश्च मनोरथः ॥ ५२ ॥
यस्त्वां पश्यामि राजानमयोध्यां पुनरागतम् ॥ अवेक्षतां भवान्कोशं कोष्ठागारं पुरं बलम् ॥
भवतस्तेजसा सर्वं कृतं दशगुणं मया ॥ ५३ ॥
तथा ब्रुवाणं भरतं दृष्ट्वा तं भ्रातृवत्सलम् ॥ मुमुचुर्वानरा बाष्पं राक्षसश्च विभीषणः ॥ ५४ ॥
ततः प्रहर्षाद्भरतमङ्कमारोप्य राघवः ॥ ययौ तेन विमानेन ससैन्यो भरताश्रमम् ॥ ५५ ॥
भरताश्रममासाद्य ससैन्यो राघवस्तदा ॥ अवतीर्य विमानाग्रादवतस्थे महीतले ॥ ५६ ॥
अब्रवीच्च तदा रामस्तद्विमानमनुत्तमम् ॥ वह वैश्रवणं देवमनुजानामि गम्यताम् ॥ ५७ ॥
ततो रामाभ्यनुज्ञातं तद्विमानमनुत्तमम् ॥ उत्तरां दिशमागम्य जगाम धनदालयम् ॥ ५८ ॥
[विमानं पुष्पकं दिव्यं संगृहीतं तु रक्षसा ॥ अगमद्धनदं वेगाद्रामवाक्यप्रचोदितम्] ॥ ५९ ॥
पुरोहितस्यात्मसमस्य राघवो बृहस्पतेः शक्र इवामराधिपः ॥
निपीड्य पादौ पृथगासने शुभे सहैव तेनोपविवेश राघवः ॥ ६० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिंशदुत्तरशततमः सर्गः ॥ १३० ॥

मनो मातुः प्रसादयन्निति पूर्वं त्वद्वाक्यं नाश्रौषमिति त्वया मनस्तापो न कार्य इत्येवं प्रसन्नामकरोदित्यर्थः ॥ ४७ ॥ यशस्विनीं । रावणजयस्य तन्मूलत्वात् । सर्वैः प्रशस्यमानामित्यर्थः । पुरोहितं वसिष्ठं । अभिवाद्येत्यनुषज्यते । अभिवाद्योपागमदित्यन्वयः ॥ ४८—५१ ॥ एतत्त इत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ हे राजन् मया रक्षितं न्यासत्वेन पालितं एतद्राज्यं ते निर्यातितं तुभ्यं निवेदितं । कोष्ठागारं धान्यशालां । दशगुणत्वं रामनिर्गमनकालिककोशापेक्षया ॥ ५२—५३ ॥ मुमुचुरिति । स्वकुलीनेष्वेतादृशभ्रातृवृत्त्यदर्शनादिति भावः ॥ ५४ ॥ भरताश्रमं नन्दिग्रामं ॥ ५५—५६ ॥ गम्यतामित्यनन्तरमितिकरणं बोध्यं ॥ ५७ ॥ दिशमागम्य दिशमुद्दिश्य ॥ ५८—५९ ॥ आत्मसमस्य स्वानुरूपस्य । पृथगासने तेन सहैवोपविवेश । पृथगासने युगपदे-

---

रामानु० कैकेय्यायशस्विनीमितिविशेषणंदेवकार्यहेतुभूतत्वादृषिःप्रायुङ्क्त । **ति०** यशस्विनीं अस्यामनोदार्ढ्येनराजानरकात्तारितः । देवाब्रह्मर्षयश्चपरमंसुखंप्राप्ताः । रामस्यचयशोजातं । अतएषायशस्विन्येव । **स०** यशस्विनीं भरतरूपसत्पुत्रप्रसवित्रीतिकीर्तिमतीं । 'सूत्वातुभरतंनैषागच्छेतनिरयानिति ।' इत्यादेः । स्वयशस्साधनीभूतेतियशस्विनीतिवा ॥ ४८ ॥ **ति०** पुरोहितस्येति । वसिष्ठपुत्रस्यसुयज्ञस्येत्यर्थः । आत्मसमस्येति पाठान्तरं । ब्रह्मज्ञत्वादितिभावः । वसिष्ठस्येत्यर्थइतितीर्थः ॥ ६० ॥ इतित्रिंशदुत्तरशततमःसर्गः ॥ १३० ॥

[**पा०**] १ ङ. ञ. ञ. ट. विवर्णां. २ क. ग. ङ. च. ञ. ञ. ट. प्रहर्षयन्. ३ ज. तदासर्वाःपुरोहितमुपागमत्. ४ ङ. च. छ. एतत्तेसकलंराज्यंन्यासंनिर्यातितं. ५ ङ. च. छ. ञ. ञ. ट. दिशमुद्दिश्य. ६ ख. ग. ङ. च. छ. ञ. ञ. ट. पाठेष्वयं श्लोकोदृश्यते. ७ ङ. ञ. ट. स्वात्मसखस्य. ८ क. ग. ङ. च. छ. ञ. ट. वीर्यवान्.

एकत्रिंशदधिकशततमः सर्गः ॥ १३१ ॥

भरतेनरामंप्रति हेतूक्तिपूर्वकंराज्यस्वीकारप्रार्थना ॥ १ ॥ तत्प्रार्थनांसफलीकृतवतारामेण भरतलक्ष्मणाभ्यांसह जटाशोधनमाङ्गलिकाभ्यङ्गस्नानालंकरणादिकरणपूर्वकं भरतप्रेर्यमाणरथारोहणेन पौरनारीनरनिकरैर्मानुषवेषधारिभिर्वानरतन्नारीनिकरैरप्यनुगम्यमानेन राजोपचारैरुपचर्यमाणेनचसताऽयोध्याप्रवेशेन राजवीथीपरिक्रमणेनदशरथगृहप्रवेशः ॥ २ ॥ वामदेवादिमहर्षिभिस्सहितेनवसिष्ठेन श्रीसीतयासहश्रीरामभद्रस्य भद्रतररत्नपीठोपवेशनपूर्वकं नानामणिगणखचितसुवर्णघटपूर्णहनुमदादिसमानीतनदीसमुद्रशुभसलिलैः पट्टाभिषेकः ॥ ३ ॥ रामेण निजराज्याभिषेकोत्सवे ब्राह्मणादिभ्योनानामणिगणादिवितरणम् ॥ ४ ॥ सुग्रीवादीनां यथार्हसंमानम् ॥ ५ ॥ सीतया हनुमते रामानुमत्यास्वकण्ठस्थहारप्रदानम् ॥ ६ ॥ श्रीरामेण विभीषणसुग्रीवादीनांयथार्हसंमाननेनस्वस्वावासप्रेषणपूर्वकं भरतस्ययौवराज्याभिषेकः ॥ ७ ॥ श्रीरामेणाश्वमेधादियजनपूर्वकं सुखेनप्रजापरिपालनम् ॥ ८ ॥

शिरस्यञ्जलिमाधाय कैकेय्यानन्दवर्धनः ॥ बभाषे भरतो ज्येष्ठं रामं सत्यपराक्रमम् ॥ १ ॥
पूजिता मामिका माता दत्तं राज्यमिदं मम ॥ तद्ददामि पुनस्तुभ्यं यथा त्वमददा मम ॥ २ ॥
धुरमेकाकिना न्यस्तामृषभेण बलीयसा ॥ किशोरवद्गुरुं भारं न वोढुमहमुत्सहे ॥ ३ ॥
वारिवेगेन महता भिन्नः सेतुरिव क्षरन् ॥ दुर्बन्धनमिदं मन्ये राज्यच्छिद्रमसंवृतम् ॥ ४ ॥
गतिं खर इवाश्वस्य हंसस्येव च वायसः ॥ नान्वेतुमुत्सहे रामं तव मार्गमरिन्दम ॥ ५ ॥

वोपविविशतुरित्यर्थः ॥ ६० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिंशदुत्तरशततमः सर्गः ॥१३०॥

एवं पुष्पकं धनदाय प्रेषयित्वा वसिष्ठेन च समागम्य भरतानुज्ञां विना नायोध्या प्रवेष्टव्येति तात्पर्येण नन्दिग्राम एवासनोपविष्टे रामे निविष्टेषु च पौरवर्गेषु सन्निहितासु च मातृषु तादात्विकसूक्ष्मेङ्गितदर्शननिपुणो भरतः स्वहृदयमग्रजाय निवेदयति—शिरस्यञ्जलिमित्यादिना ॥ शिरस्यञ्जलिमाधायेत्यनेन पूर्वकृता प्रपत्तिः स्मार्यते । अनन्यगतिकत्वसूचिका मुद्रा ह्यञ्जलिः । कैकेय्यानन्दवर्धन इत्यनेन भरतवचने कैकेयीसन्तोषो मुखप्रसादादिनाऽवगम्यत इति द्योत्यते ॥ १ ॥ रामस्य राज्यपरिग्रहे अपरिहार्यं हेतुं दर्शयति—पूजितेति ॥ मामिका मत्संबन्धिनी माता पूजिता । राज्यपरित्यागपूर्वकवनवासाङ्गीकारेण त्वया तोषिता । अनन्तरमिदं राज्यं मम मयि चित्रकूटे दत्तं । तद्राज्यं त्वं यथा येन प्रकारेण । ममाददाः तेन प्रकारेण तुभ्यं ददामि । न्यासरूपेण मयि स्थापितं राज्यं न्यासरूपत्वाप्रहाणेनैव पुनर्ददामीत्यर्थः ॥ २ ॥ अयोध्यायां राज्यभोगान् यथाकामं भोक्ष्ये राज्यं त्वमेव परिपालयेत्याकाङ्क्षायामाह—धुरमिति ॥ यद्वा पुनरर्थनपर्यन्तं न्यासधारणे नदोष इत्याशङ्क्याह—धुरमिति ॥ एकाकिना असहायेन । बलीयसा ऋषभेण न्यस्तां धुरं किशोरवत् बालवत्स इव । गुरुं भारं वोढुं नोत्सहे ॥ ३ ॥ तर्हि कथमेतावत्पर्यन्तं सोढमित्यत आह—वारीति ॥ महता वारिवेगेन भिन्नः अतएव क्षरन् बहिर्निःसरन् जलसेतुरिव इदं राज्यच्छिद्रं छिद्रवद्राज्यं असंवृतं संवरणरहितं सत् दुर्बन्धनं मन्ये । यथा महता वारिवेगेन भिन्नः क्षरन् सेतुर्वारिवेगाहतिनिरोधकतृणपुलशाखापुञ्जादिसंवरणं विना न बद्धुं शक्यते । एवं बहुविधच्छिद्रं राज्यमपि मन्त्रगोपनादिराजगुणावरणं विना पालितुं न शक्यमिति भावः ॥ ४ ॥ अहमिव भवानपि लोकान् गुणैर्वशीकरोत्वित्यत्राह—

[पा०] १ क. ख. घ. ङ. छ. झ. कैकेयीनन्दिवर्धनः. २ च. ज. भिन्नसेतुरिव. ३ क. ज. दुर्बन्धमिवमन्येऽहं. ४ ख. घ.—छ. झ, ट. वीरतव.

यथा चारोपितो वृक्षो जातश्चान्तर्निवेशने ॥ महांश्च सुदुरारोहो महास्कन्धप्रशाखवान् ॥ ६ ॥
शीर्येत पुष्पितो भूत्वा न फलानि प्रदर्शयन् ॥ तस्य नानुभवेदर्थं यस्य हेतोः स रोप्यते ॥ ७ ॥
एषोपमा महाबाहो त्वदर्थं वेत्तुमर्हसि ॥ यद्यस्मान्मनुजेन्द्र त्वं भक्तान्भृत्यान्न शाधि हि ॥ ८ ॥
जगदद्याभिषिक्तं त्वामनुपश्यतु सर्वतः ॥ प्रतपन्तमिवादित्यं मध्याह्ने दीप्ततेजसम् ॥ ९ ॥
तूर्यसङ्घातनिर्घोषैः काञ्चीनूपुरनिस्वनैः ॥ मधुरैर्गीतशब्दैश्च प्रतिबुध्यस्व राघव ॥ १० ॥
यावदावर्तते चक्रं यावती च वसुन्धरा ॥ तावत्त्वमिह सर्वस्य स्वामित्वमनुवर्तय ॥ ११ ॥
भरतस्य वचः श्रुत्वा रामः परपुरञ्जयः ॥ तथेति प्रतिजग्राह निषसादासने शुभे ॥ १२ ॥
ततः शत्रुघ्नवचनान्निपुणाः श्मश्रुवर्धकाः ॥ सुखहस्ताः सुशीघ्राश्च राघवं पर्युपासत ॥ १३ ॥
पूर्वं तु भरते स्नाते लक्ष्मणे च महाबले ॥ सुग्रीवे वानरेन्द्रे च राक्षसेन्द्रे विभीषणे ॥ १४ ॥

गतिमिति ॥ ५ ॥ तर्हि ममैवोपोद्बलेन भवानेव राज्यं परिपालयत्वित्याशङ्क्य तर्हि तातेन भवत्पोषणं विफलं स्यादित्याह—यथा चेत्यादिश्लोकत्रयेण ॥ अन्तर्निवेशने आरोपितः उप्तः वृक्षः महान् जातः सुदुरारोहो महास्कन्धप्रशाखवान् पुष्पितोपि भूत्वा फलानि न प्रदर्शयन् यथा शीर्येत अफलो भवति । यथा च यस्य फलस्य हेतोर्येन रोप्यते सः रोपयिता तस्य वृक्षस्य अर्थं तत्फलं । नानुभवेत् । मनुजेन्द्र भक्तान् भृत्यान् अस्मान्न शाधि यदि । महाबाहो एषोपमा त्वदर्थमुक्तेति वेत्तुमर्हसीति योजना । अत्र वृक्षरामयोरारोपयितृदशरथयोश्च उपमानोपमेयभावः । बीजावापस्य पुत्रेष्ट्यादेश्च महास्कन्धस्य सभ्रातृकत्वस्य च प्रशाखवत्त्वस्य सुग्रीवादिमित्रगणस्य च पुष्पाणां कल्याणगुणानां च राज्याकरणस्य फलाभावस्य च साम्यं द्योत्यते ॥ ६—८ ॥ भवतस्तु राज्यपरिपालने महती शक्तिरित्याह—जगदिति ॥ ९ ॥ सर्वभोगार्हस्त्वमेव भोगान् भुङ्क्ष्वेत्याह—तूर्येति । काञ्चीनूपुरनिस्वनैरित्यनेन प्रबोधकललितनृत्यं गम्यते ॥ १० ॥ मध्ये स्वस्य राज्याशानुद्गमं द्योतयन्नाह—यावदिति ॥ चक्रं ज्योतिश्चक्रमिति यावत् । यावती यावत्कालस्थितिः। तावत् तावत्कालम् । सर्वस्य राज्यस्य स्वामित्वमनुवर्तय । स्वामित्वानुवर्तनं हि पालनमेव ॥११॥निषसादेति । भरत इति शेषः ॥१२॥ श्मश्रुवर्धकाः श्मश्रुकर्तकाः । " वर्धनछेदनेथ द्वे आनन्दनसभाजने " इत्यमरः । सुशीघ्राः अभिषेकमुहूर्तातिलङ्घनं विना शीघ्रं कर्तुं समर्थाः । उपासत श्मश्रूण्यवर्धन्त । भरतलक्ष्मणापेक्षया श्मश्रुवर्धकानां बहुवचनं । राघवमिति भरतलक्ष्मणयोःप्रदर्शनार्थं ॥ १३ ॥ पूर्वमित्यादिश्लोकद्वयमेकान्वयं ॥ " न मे स्नानं बहुमतं तं विना केकयीसुतं "इत्युक्त्या प्रथमं स्नानं भरतस्य सुग्रीवस्यापि किष्किन्धानिर्गमनप्रभृतिस्नानाभावादद्य स्नानं । तथा विभीषणस्यापि

ती० एतदुक्तंभवति—केनचित्कुटुंबिनाकुटुंबार्थंसमारोपितोवृक्षःपुष्पितोमूलायदिनफलेत् तदातस्यकुटुंबस्यतद्वृक्षान्नप्रयोजनंभवेत् । एवंपित्राजनितःसर्वगुणसंपन्नोयदिलंलोकंनरक्षेःतदालोकस्यत्वयानप्रयोजनमिति । स० यथाचारोपितः बीजावापादिद्वारा । अन्तर्निवेशनेमूलस्य भूम्यन्तर्निवेशने जाते मूलप्रवेशने जाते । वृक्षोमहाञ्जातः । भाविसंज्ञांगृहीत्वेयमुक्तिः । महास्कन्धः प्रशाखवान् । 'शाखावेदविभागेचपादपान्नेन्तिकेपिच' इतिविश्वात्प्रशाखावानितियद्यपिवक्तव्यं । तथापि 'अपिमाषंमषंकुर्याच्छन्दोभङ्गंनकारयेत्' इत्युक्तेर्हस्वः । यद्वा महास्कन्धः प्रकृष्टाःशाखायस्यसप्रशाखःमहास्कन्धः । तद्वान्जातः । पुष्पितः । तारकादिरयं । यस्यहेतोःयेनकारणेनआरोपितः ॥ ६ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. महानपिदुरारोहो. २ ख. च. छ. झ. ञ. सरोपितः. ३ ख. ङ.—ञ. त्वमर्थं. ४ ग. ङ. झ. ञ. ट. भर्ताभृत्यान्नशाधिहि. ५ ख. ङ. च. छ. झ. ञ. ट. राघव. ज. सर्वशः. ६ क. ख. ग. ङ.—ट. बुध्यस्वशेष्वच. ७ ख.—च. झ. ञ. ट. लोकस्य. ८ क. ज. मभिवर्तय. ९ क. दासनेचसः. १० ख. ङ. ज.—ट. वर्धनाः. क. कर्तकाः. ११ क. ङ. च. झ. ञ. ट. पर्यवारयन्.

विशोधितजटः स्नातश्चित्रमाल्यानुलेपनः ॥ महार्हवसनो रामस्तस्थौ तत्र श्रिया ज्वलन् ॥ १५ ॥
प्रतिकर्म च रामस्य कारयामास वीर्यवान् ॥ लक्ष्मणस्य च लक्ष्मीवानिक्ष्वाकुकुलवर्धनः ॥ १६ ॥
प्रतिकर्म च सीतायाः सर्वा दशरथस्त्रियः ॥ आत्मनैव तदा चक्रुर्मनस्विन्यो मनोहरम् ॥ १७ ॥
ततो वानरपत्नीनां सर्वासामेव शोभनम् ॥ चकार यत्नात्कौसल्या प्रहृष्टा पुत्रलालसा ॥ १८ ॥
ततः शत्रुघ्नवचनात्सुमन्त्रो नाम सारथिः ॥ योजयित्वाऽभिचक्राम रथं सर्वाङ्गशोभनम् ॥ १९ ॥
अर्कमण्डलसंकाशं दिव्यं दृष्ट्वा रथोत्तमम् ॥ आरुरोह महाबाहू रामः सत्यपराक्रमः ॥ २० ॥
सुग्रीवो हनुमांश्चैव मेहेन्द्रसदृशद्युती ॥ स्नातौ दिव्यनिभैर्वस्त्रैर्जग्मतुः शुभकुण्डलौ ॥ २१ ॥
वरांभरणसंपन्ना ययुस्ताः शुभकुण्डलाः ॥ सुग्रीवपत्न्यः सीता च द्रष्टुं नगरमुत्सुकाः ॥ २२ ॥
अयोध्यायां तु सचिवा राज्ञो दशरथस्य ये ॥ पुरोहितं पुरस्कृत्य मन्त्रयामासुरर्थवत् ॥ २३ ॥
अशोको विजयश्चैव सुमन्त्रश्चैव सङ्गताः ॥ मन्त्रयन्तो मनृद्ध्यर्थमृद्ध्यर्थं नगरस्य च ॥ २४ ॥
सर्वमेवाभिषेकार्थं जयार्हस्य महात्मनः ॥ कर्तुमर्हथ रामस्य यद्यन्मङ्गलपूर्वकम् ॥ २५ ॥
इति ते मन्त्रिणः सर्वे संदिश्य तु पुरोहितम् ॥ नगरान्निर्ययुस्तूर्णं रामदर्शनबुद्धयः ॥ २६ ॥
हरियुक्तं सहस्राक्षो रथमिन्द्र इवानघः ॥ प्रययौ रथमास्थाय रामो नगरमुत्तमम् ॥ २७ ॥
जग्राह भरतो रश्मीञ्शत्रुघ्नश्छत्रमाददे ॥ लक्ष्मणो व्यजनं तस्य मूर्ध्नि संपर्यवीजयत् ॥ २८ ॥
श्वेतं च वालव्यजनं जग्राह पुरतः स्थितः ॥ अपरं चन्द्रसंकाशं राक्षसेन्द्रो विभीषणः ॥ २९ ॥
ऋषिसङ्घैस्तदाऽऽकाशे देवैश्च समरुद्गणैः ॥ स्तूयमानस्य रामस्य शुश्रुवे मधुरध्वनिः ॥ ३० ॥

लङ्कानिर्गमनप्रभृतिस्नानाभावात् । शत्रुघ्नस्य स्नानाश्रवणमधिकर्तृत्वेन तदानीमवसराभावात् । पूर्वं व्रतग्रहणानुक्तेश्च । " नन्दिग्रामे जटां हित्वा भ्रातृभिः सहितोनघ " इति संक्षेपोक्तेरत्रापि शत्रुघ्नस्नानमर्थसिद्धमित्याहुः । जटाशोधनं शुद्धकेशीकरणं । स्नात इति कर्तरिक्तः । नानावर्णपुष्पयुक्तत्वेन चित्रमाल्यत्वं । कुङ्कुमकर्पूरकस्तूर्यादिवस्तुभेदेन चित्रानुलेपनत्वं । महार्हवसनं पीताम्बरं । श्रिया इति अलंकारश्रिया । तत्र सिंहासने ज्वलन् प्रकाशमानः तस्थौ ॥ १४—१५ ॥ प्रतिकर्म हारादालंकरणं । इक्ष्वाकुकुलवर्धनः शत्रुघ्नः ॥ १६ ॥ आत्मनैव स्वयमेव ॥ १७ ॥ शोभनं प्रतिकर्मेत्यर्थः ॥ १८—२० ॥ दिव्यनिभैः दिव्यवस्त्रसदृशैः वस्त्रैरुपलक्षितावितिशेषः ॥ २१—२२ ॥ अयोध्यायामिति । गत्वेति शेषः । मन्त्रयामासुः अभिषेकोपयोगिमङ्गलद्रव्यसंपादनार्थं एवं कर्तव्यमिति मन्त्रयामासुः ॥ २३ ॥ उक्तमर्थं विवृणोति—अशोक इति ॥ मन्त्रयन् अमन्त्रयन् ॥ २४ ॥ सर्वमित्यादिश्लोकद्वयमेकान्वयं ॥ अर्हथेति पूजायां बहुवचनं ॥ २५—२६ ॥ हरियुक्तं हरितवर्णयुक्ताश्वयुक्तं ॥ २७ ॥ जग्राहेत्यादिश्लोकद्वयमेकान्वयं ॥ रश्मीन् जग्राह सारथ्यमकरोत् । लक्ष्मण इति । पुरतः स्थितो लक्ष्मणः व्यजनं तालवृन्तकं । मूर्ध्नि संपर्यवीजयत् । श्वेतं वालव्यजनं च जग्राह । अहं सर्वं करिष्यामीति त्वरया उभयग्रहणं । अपरं चन्द्रसंकाशमित्यत्र जग्राहेत्यनुषज्यते ॥२८—२९॥ समरुद्गणैः सवायुगणैः । रामस्य मधुर-

[पा०] १ ख. ङ. च. छ. झ. ञ. ट. वसनोपेतस्तस्थौ. २ ख. ङ.—ट. पुत्रवत्सला. ३ घ. ङ. च. छ. झ. ञ. ट. आर्यकामलसंकाशं. ४ क. ख. ङ. च. छ. झ. ञ. ट. रथंस्थितं. ५ ख. ङ. च. छ. झ. ञ. ट. रामःपरपुरंजयः. ६ क. ज. दिव्यांबरधरौजग्मतुः. ७ स. घ.—छ. झ. ञ. ट. सर्वाभरणजुष्टाश्वययुः. ८ ख. ङ. च. छ. झ. ञ. ट. सिद्धार्थाश्चसमाहिताः. ९ ङ. च. छ. झ. ञ. ट. मृद्ध्यर्थमृद्ध्यर्थनगरस्यच. १० क. घ. व्यजने. ११ च. छ. ञ. संवीजयत्तदा. ङ. झ. ट. संवीजयंस्तदा. १२ क. ग. ङ. च. छ. झ. ञ. ट. जग्राहेपरितःस्थितः, ख. जग्राहोपरिसंस्थितं.

ततः शत्रुञ्जयं नाम कुञ्जरं पर्वतोपमम् ॥ आरुरोह महातेजाः सुग्रीवः प्लवगर्षभः ॥ ३१ ॥
नवनागसहस्राणि ययुरास्थाय वानराः ॥ मानुषं विग्रहं कृत्वा सर्वाभरणभूषिताः ॥ ३२ ॥
शङ्खशब्दप्रणादैश्च दुन्दुभीनां च निस्स्वनैः ॥ प्रययौ पुरुषव्याघ्रस्तां पुरीं हर्म्यमालिनीम् ॥ ३३ ॥
ददृशुस्ते समायान्तं राघवं सपुरस्सरम् ॥ विराजमानं वपुषा रथेनातिरथं तदा ॥ ३४ ॥
ते वर्धयित्वा काकुत्स्थं रामेण प्रतिनन्दिताः ॥ अनुजग्मुर्महात्मानं भ्रातृभिः परिवारितम् ॥३५॥
अमात्यैर्ब्राह्मणैश्चैव तथा प्रकृतिभिर्वृतः ॥ श्रिया विरुरुचे रामो नक्षत्रैरिव चन्द्रमाः ॥ ३६ ॥
स पुरोगामिभिस्तूर्यैस्तालस्वस्तिकपाणिभिः ॥ प्रव्याहरद्भिर्मुदितैर्मङ्गलानि ययौ वृतः ॥ ३७ ॥
अक्षतं जातरूपं च गावः कन्यास्तथा द्विजाः ॥ नरा मोदकहस्ताश्च रामस्य पुरतो ययुः ॥ ३८ ॥
सख्यं च रामः सुग्रीवे प्रभावं चानिलात्मजे ॥ वानराणां च तत्कर्म राक्षसानां च तद्बलम् ॥
विभीषणस्य संयोगमाचचक्षे च मन्त्रिणाम् ॥ ३९ ॥
श्रुत्वा तु विस्मयं जग्मुरयोध्यापुरवासिनः ॥ ४० ॥
द्युतिमानेतदाख्याय रामो वानरसंवृतः ॥ हृष्टपुष्टजनाकीर्णामयोध्यां प्रविवेश ह ॥ ४१ ॥
ततो ह्यभ्युच्छ्रयन्पौराः पताकास्ते गृहे गृहे ॥ ४२ ॥
ऐक्ष्वाकाध्युषितं रम्यमाससाद पितुर्गृहम् ॥ ४३ ॥
अथाब्रवीद्राजसुतो भरतं धर्मिणां वरम् ॥ अर्थोपहितया वाचा मधुरं रघुनन्दनः ॥ ४४ ॥
पितुर्भवनमासाद्य प्रविश्य च महात्मनः ॥ कौसल्यां च सुमित्रां च कैकेयीमभिवाद्य च ॥ ४५ ॥
यच्च मद्भवनं श्रेष्ठं साशोकवनिकं महत् ॥ मुक्तावैडूर्यसंकीर्णं सुग्रीवाय निवेदय ॥ ४६ ॥
तस्य तद्वचनं श्रुत्वा भरतः सत्यविक्रमः ॥ पाणौ गृहीत्वा सुग्रीवं प्रविवेश तमालयम् ॥ ४७ ॥

ध्वनिः रावणनिरसनापदानकथनध्वनिः ॥३०–३२॥ शङ्खशब्दप्रणादैः शङ्खशब्दैः । जनहर्षप्रणादैश्चेत्यर्थः ॥ ३३ ॥ ये नगरं प्रविश्य वसिष्ठं पुरस्कृत्य रामाभिषेकममन्त्रयन् ते सुमन्त्रादयः ॥ ३४—३५ ॥ प्रकृतिभिः पौरजनैः ॥ ३६ ॥ तूर्यैः तूर्यवादकैः । स्वस्तिको वाद्यविशेषः । मङ्गलानि प्रव्याहरद्भिः मङ्गलपाठकैः ॥ ३७ ॥ अक्षतं जातरूपमिति ॥ हरिद्रया जातरूपमक्षतं । वहद्भिरिति शेषः ॥ ३८ ॥ सख्यं चेत्यादिसार्धश्लोकमेकं वाक्यं ॥ सख्यं जातमिति शेषः । मन्त्रिणां मन्त्रिभ्यः ॥ ३९ ॥ श्रुत्वेत्यर्धं । श्रुत्वा सुग्रीवसख्यादिकमिति शेषः ॥ ४०—४१ ॥ अभ्युच्छ्रयन् अभ्युदश्राययन् । उन्नम्य स्थापितवन्तः ॥ ४२ ॥ ऐक्ष्वाकेत्यर्धं । राम इति शेषः ॥ ४३ ॥ अथाब्रवीदित्यादिश्लोकद्वयमेकान्वयं । अथ रघुनन्दनः महात्मनः पितुर्भवनमासाद्य प्रविश्य च कौसल्याप्रभृतीरभिवाद्य च भरतमब्रवीदिति योजना ॥४४–४५ साशोकवनिकं अन्तःपुरोद्यानसहितं ॥ ४६—४७ ॥

ति० शङ्खशब्दप्रणादैः शङ्खशब्दैर्जनानां हर्षप्रणादैश्चेत्यर्थः । तदुक्तंपाद्मे—'आगतोरावणद्वेषीकुंभकर्णखरान्तकः । अतिकायेन्द्रजिच्छेत्तामहर्षिजनरक्षकः । समाप्तदेवताकार्यःसीतेशोलक्ष्मणानुजः । सत्यैकनिरतःशास्तापरदारसहोदरः । सुग्रीवराज्यदो धन्वीरावणानुजराज्यदः । शरणागतसंत्राताधर्मस्थापनतत्परः । रामोदाशरथिःश्रीमान्भगवान्भरताग्रजः । शरण्योरामइत्येवं शुश्रुवेकाहलध्वनिः' । इति ॥ ३३ ॥ ति० पितुर्भवनमासाद्यतत्रमहात्मनःसुग्रीवादीन्मुख्यान्प्रवेश्य कौसल्याद्याअभिवादय । वानरैरितिशेषः । इतिभरतमब्रवीदितिसंबन्धः । तत्रपूर्वंसुग्रीवादिप्रवेशबीजमुक्तंपाद्मे—'स्वंश्रीमद्भवनंरामोभक्तपादाब्जरेणुभिः । शुद्धीकर्तुमनाराजाहनूमन्तमकल्मषम् । विभीषणंचसुग्रीवंगृहंप्रावेशयत्तदा ।' इति । आपाततस्तुकौसल्यादिप्रणामकरणंफलमितिभाति । आन्तरंमुख्यंतुपाद्मोक्तंबोध्यं । पूर्वंतुरामेणैकान्तएवतद्वन्दनंकृतं नतुसर्वसमक्षमितिगम्यते ॥ ४५ ॥

[पा०] १ घ. शङ्खभेरीप्रणादैश्च. ख. शङ्खवंशप्रणादैश्च. २ च. विभ्राजमानं. ३ झ. प्रवेश्यच. ४ झ. मभिवादय.

ततस्तैलप्रदीपांश्च पर्यङ्कास्तरणानि च ॥ गृहीत्वा विविशुः क्षिप्रं शत्रुघ्नेन प्रचोदिताः ॥ ४८ ॥
उवाच च महातेजाः सुग्रीवं राघवानुजः ॥ अभिषेकाय रामस्य दूतानाज्ञापय प्रभो ॥ ४९ ॥
सौवर्णान्वानरेन्द्राणां चतुर्णां चतुरो घटान् ॥ ददौ क्षिप्रं स सुग्रीवः सर्वरत्नविभूषितान् ॥ ५० ॥
यथा प्रत्यूषसमये चतुर्णां सागराम्भसाम् ॥ पूर्णैर्घटैः प्रतीक्षध्वं तथा कुरुत वानराः ॥ ५१ ॥
एवमुक्ता महात्मानो वानरा वारणोपमाः ॥ उत्पेतुर्गगनं शीघ्रं गरुडा इव शीघ्रगाः ॥ ५२ ॥
जाम्बवांश्च हनूमांश्च वेगदर्शी च वानरः ॥ ऋषभश्चैव कलशाञ्जलपूर्णानथानयन् ॥ ५३ ॥
नदीशतानां पञ्चानां जलं कुम्भेषु चाहरन् ॥ ५४ ॥
पूर्वात्समुद्रात्कलशं जलपूर्णमथानयत् ॥ सुषेणः सत्त्वसंपन्नः सर्वरत्नविभूषितम् ॥ ५५ ॥
ऋषभो दक्षिणात्पूर्णं समुद्राज्जलमाहरत् ॥ रक्तचन्दनशाखाभिः संवृतं काञ्चनं घटम् ॥ ५६ ॥
गवयः पश्चिमात्तोयमाजहार महार्णवात् ॥ रत्नकुम्भेन महता शीतं मारुतविक्रमः ॥ ५७ ॥
उत्तराच्च जलं शीघ्रं गरुडानिलविक्रमः ॥ आजहार स धर्मात्मानलः सर्वगुणान्वितः ॥ ५८ ॥
ततस्तैर्वानरश्रेष्ठैरानीतं प्रेक्ष्य तज्जलम् ॥ अभिषेकाय रामस्य शत्रुघ्नः सचिवैः सह ॥
पुरोहिताय श्रेष्ठाय सुहृद्भ्यश्च न्यवेदयत् ॥ ५९ ॥

विविशुः । परिचारिका इति शेषः ॥ ४८—५० ॥ हे वानराः चतुर्णां सागराम्भसां चतुर्भिः सागराम्भोभिः पूर्णैर्घटैः उपलक्षिताः प्रत्यूषसमये यथा प्रतीक्षध्वं यथास्मान् प्रतीक्षिष्यध्वे तथा कुरुतेति योजना । सागरजलानयननियोगो नदीजलानयननियोगस्याप्युपलक्षकः ॥ ५१—५३ ॥ जलपूर्णानथानयन्नित्युक्तमेवार्थं विवृणोति—नदीशतानामिति ॥ ५४ ॥ एवं जाम्बवद्धनुमद्वेगदर्शर्षभैर्नदीजलानयनमुक्त्वा सुषेणर्षभगवयानलैः सागरजलानयनं दर्शयति—पूर्वादिति ॥५५॥ ऋषभो दक्षिणादिति । अयं चर्षभः पूर्वस्मादन्यः ॥५६–५८॥ तत इत्यादिसार्धश्लोक एकान्वयः । तत् प्रसिद्धं । तज्जलं तेषां

ति० जांबवांश्चेति । अत्रचकारैः सुषेणगवयादिपञ्चशतवानरपरिग्रहः । तद्वक्ष्यति—'नदीशतानांपञ्चाना'मिति । अतएवसुषेणगवयोःसमुद्रजलाहर्तृत्वेनवक्ष्यमाणेननविरोधः ॥५३॥ स० सुषेणश्चतुर्णामाज्ञानन्तरमाज्ञापितः । एवंगवयोपि । अतोनपूर्वोक्तिविरोधः ॥ ५५ ॥ ति० आनिलः हनुमान् । स० उत्तरसमुद्रस्यबहुदूरगतत्वेनशीघ्रंतस्माज्जलमानिनायेतिगरुडानिलविक्रमइतितत्स्तुतिः । आनिलः अनिलसुतः ॥ ५८ ॥

[पा०] १ क. ङ. च. छ. झ. ञ. ट. जलंकुंभैरुपाहरन्. २ क. ङ. च. छ. झ. ञ. ट. चन्दनकर्पूरैः. ३ ङ. झ. ञ. ट. धर्मात्मानिलः.

श्रीरामस्य पट्टाभिषेकघट्टः ।



ततः स प्रयतो वृद्धो वसिष्ठो ब्राह्मणैः सह ॥ रामं रत्नमये पीठे सहसीतं न्यवेशयत् ॥ ६० ॥
वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः ॥ कात्यायनः सुयज्ञश्च गौतमो विजयस्तथा ॥ ६१ ॥
अभ्यषिञ्चन्नरव्याघ्रं प्रसन्नेन सुगन्धिना ॥ सलिलेन सहस्राक्षं वसवो वासवं यथा ॥ ६२ ॥
ऋत्विग्भिर्ब्राह्मणैः पूर्वं कन्याभिर्मन्त्रिभिस्तथा ॥ योधैश्चैवाभ्यषिञ्चंस्ते संप्रहृष्टाः सनैगमैः ॥ ६३ ॥

नदीसागराणां जलं ॥ ५९–६२ ॥ ते वसिष्ठादयः | ऋत्विगादिभिः सहाभ्यषिञ्चन्निति योजना ॥६३॥

[पा०] १ च. छ. झ. ञ. ट. ससीतंसंन्यवेशयत्. ङ. ससीतंसमवेशयत्. २ क. ख. ङ. च. छ. झ. ञ. ट. वसिष्ठो विजयश्चैव. ३ क. घ. ङ. झ. ञ. ट. कात्यायनोगौतमश्च वामदेवस्तथैवच. ४ ङ. च. छ. झ. ञ. ट. संप्रहृष्टैः. ज. संप्रहृष्टाः-सनैगमाः.

सर्वौषधिरसैर्दिव्यैर्दैवतैर्नभसि स्थितैः ॥ चतुर्भिर्लोकपालैश्च [1]सर्वैर्देवैश्च संगतैः ॥ ६४ ॥
[ब्रह्मणा निर्मितं पूर्वं किरीटं रत्नशोभितम् ॥ अभिषिक्तः पुरा येन मनुस्तं दीप्ततेजसम् ॥ ६५ ॥
तस्यान्ववाये राजानः क्रमाद्येनाभिषेचिताः ॥ सभायां हेमकक्षायां शोभितायां [3]महाजनैः ॥
रत्नैर्नानाविधैश्चैव चित्रितायां सुशोभनैः ॥ ६६ ॥
नानारत्नमये पीठे कल्पयित्वा यथाविधि ॥ किरीटेन ततः पश्चाद्वसिष्ठेन महात्मना ॥
[4]ऋत्विग्भिर्भूषणैश्चैव [5]समयोक्ष्यत राघवः ॥ ६७ ॥]
छत्रं तु तस्य जग्राह शत्रुघ्नः पाण्डुरं शुभम् ॥ श्वेतं च बालव्यजनं सुग्रीवो वानरेश्वरः ॥
अपरं चन्द्रसंकाशं राक्षसेन्द्रो विभीषणः ॥ ६८ ॥
मालां ज्वलन्तीं वपुषा काञ्चनीं शतपुष्कराम् ॥ राघवाय ददौ वायुर्वासवेन प्रचोदितः ॥ ६९ ॥
सर्वरत्नसमायुक्तं [6]मणिरत्नविभूषितम् ॥ मुक्ताहारं नरेन्द्राय ददौ शक्रप्रचोदितः ॥ ७० ॥
प्रजगुर्देवगन्धर्वा ननृतुश्चाप्सरोगणाः ॥ अभिषेके तदर्हस्य तदा रामस्य धीमतः ॥ ७१ ॥
भूमिः सस्यवती चैव फलवन्तश्च पादपाः ॥ गन्धवन्ति च पुष्पाणि बभूवू राघवोत्सवे ॥ ७२ ॥
सहस्रशतमश्वानां धेनूनां च गवां तथा ॥ ददौ शतं वृषान्पूर्वं द्विजेभ्यो मनुजर्षभः ॥ ७३ ॥
त्रिंशत्कोटीर्हिरण्यस्य ब्राह्मणेभ्यो ददौ पुनः ॥ नानाभरणवस्त्राणि महार्हाणि च राघवः ॥ ७४ ॥
अर्करश्मिप्रतीकाशां काञ्चनीं मणिविग्रहाम् ॥ सुग्रीवाय स्रजं दिव्यां प्रायच्छन्मनुजर्षभः ॥ ७५ ॥
वैडूर्यमणिचित्रे च [7]वज्ररत्नविभूषिते ॥ वालिपुत्राय धृतिमानङ्गदायाङ्गदे ददौ ॥ ७६ ॥
मणिप्रवरजुष्टं च मुक्ताहारमनुत्तमम् ॥ सीतायै प्रददौ रामश्चन्द्ररश्मिसमप्रभम् ॥ ७७ ॥
अरजे वाससी दिव्ये शुभान्याभरणानि च ॥ अवेक्षमाणा वैदेही प्रददौ वायुसूनवे ॥ ७८ ॥
अवमुच्यात्मनः कण्ठाद्धारं जनकनन्दिनी ॥ अवैक्षत हरीन्सर्वान्भर्तारं च मुहुर्मुहुः ॥ ७९ ॥

सर्वौषधिरसैरित्यत्रापि अभ्यषिञ्चंस्त इत्यनुषज्यते ॥६४—६८॥ शतपुष्करां शतपद्मां ॥६९॥ सर्वरत्नैः नवरत्नैः समायुक्तं । मणिरत्नेन मणिश्रेष्ठेन नायकेन मध्ये विराजन्तं । मुक्ताहारं मुक्ताप्रचुरहारं ददौ । वायुरित्यनुषज्यते ॥ ७०—७१ ॥ पूर्वं रामविश्लेषे 'अपि वृक्षाः परिम्लाना' इत्युक्तावस्थं वस्तुजातं रामसंश्लेषे तादृगवस्थां विहाय प्रहृष्टतममभूदित्याह—भूमिरिति ॥ ७२ ॥ धेनूनां नवप्रसूतिकानां "धेनुः स्यान्नवसूतिका" इत्यमरः । पूर्वं हिरण्यदानादेः पूर्वं सुग्रीवादिभ्यः पूर्वं वा ॥ ७३—७४ ॥ मणिविग्रहां मणिप्रचुरां ॥ ७५ ॥ धृतिमान् प्रीतिमान् ॥ ७६ ॥ सीतायै प्रददौ हनुमते दातव्यमित्याशयेन ददौ ॥७७॥ अरजे निर्मले । अकारान्तत्वमार्षं । अवेक्षमाणा भर्तारमिति शेषः । स्त्रियाः स्वातन्त्र्याभावात् भर्त्रनुज्ञां काङ्क्षितवतीति भावः॥७८॥हारं रामदत्तं । सदसि मह्यं हारप्रदानं कस्मैचित् पारितोषिकतया दापयितुमिति निश्चित्य अयं हारःएषु कस्मै देय इत्याशयेनावैक्षतेत्यर्थः

स० वपुषा रामशरीरेण ज्वलन्तीं शतपुष्करांकाञ्चनींसुवर्णरूपिणींमालां । अनेनकायकान्तिरधिकेतिसूचितंभवति । यथोक्तं संग्रहे—'परस्परालंक्रियतेतिमिथ्यासभूषणंसर्वविभूषणानाम्'इति ॥ ६९ ॥

[पा०] १ ङ. छ. झ. सर्वदेवैश्च. २ ब्रह्मणानिर्मितमित्यादयः समयोक्ष्यतराघवइत्यन्ताःश्लोकाः क. ख. ङ.—ञ. पाठेषुदृश्यन्ते. ३ क. ख. ङ. च. ज. झ. ञ. महाधनैः. ४ क. च. छ. ज. ऋलिग्भिर्ऋषिभिश्चैव. ५ क. ज. सहितेनाभिषेचितः. ६ क. मणिविद्रुमभूषितं. ७ ङ. च. छ. झ. ञ. ट. चन्द्ररश्मिविभूषिते.

तामिङ्गितज्ञः संप्रेक्ष्य बभाषे जनकात्मजाम् ॥ प्रदेहि सुभगे हारं यस्य तुष्टासि भामिनि ॥
पौरुषं[1] विक्रमो बुद्धिर्यस्मिन्नेतानि सर्वशः[2] ॥ ८० ॥
ददौ सा वायुपुत्राय तं हारमसितेक्षणा ॥ हनुमांस्तेन हारेण शुशुभे वानरर्षभः ॥
चन्द्रांशुचयगौरेण श्वेताभ्रेण यथाऽचलः ॥ ८१ ॥
ततो द्विविदमैन्दाभ्यां नीलाय च परन्तपः ॥ सर्वान्कामगुणान्वीक्ष्य प्रददौ वसुधाधिपः ॥ ८२ ॥
सर्वे[3]वानरवृद्धाश्च ये चान्ये वानरेश्वराः ॥ वासोभिर्भूषणैश्चैव यथार्हं प्रतिपूजिताः ॥ ८३ ॥
विभीषणोथ सुग्रीवो हनुमाञ्जाम्बवांस्तथा ॥ सर्ववानरमुख्याश्च रामेणाक्लिष्टकर्मणा ॥ ८४ ॥
यथार्हं पूजिताः सर्वैः कामै रत्नैश्च पुष्कलैः ॥ प्रहृष्टमनसः सर्वे जग्मुरेव यथागतम् ॥ ८५ ॥
नत्वा[4] सर्वे महात्मानं ततस्ते प्लवगर्षभाः ॥ विसृष्टाः पार्थिवेन्द्रेण किष्किन्धामभ्युपागमन्[5] ॥ ८६ ॥
सुग्रीवो वानरश्रेष्ठो दृष्ट्वा रामाभिषेचनम् ॥ [पूजितश्चैव रामेण किष्किन्धां प्राविशत्पुरीम्[6]] ॥ ८७ ॥
[रामेण सर्वकामैश्च यथार्हं प्रतिपूजितः[7]] ॥ लब्ध्वा[8] कुलधनं राजा लङ्कां प्रायाद्विभीषणः[9] ॥ ८८ ॥

॥ ७९ ॥ तामिङ्गितज्ञ इत्यादिसार्धश्लोक एकान्वयः । यस्य यस्मिन् । पौरुषं बलं समुद्रलङ्घनेन । विक्रमो लङ्कादहनेन । बुद्धिः अशोकवनिकाप्रवेशेन । सर्वशः सर्वाणि यस्मिन् सन्तीति यस्य संतुष्टासि तस्मै देहीति योजना । अन्यथा अन्येषां निन्दोक्तिरेव स्यात् ॥ ८० –८१ ॥ कामगुणान् काम्यन्त इति कामाः प्रार्थनीयाः गुणाः येषांते तान् आभरणादिवस्तुविशेषान् ॥ ८२—८३ ॥ बिभीषणोथेति। अत्र संभावितपरिगणने प्रथमं कीर्तनाल्लब्ध्वा कुलधनमित्यनुवादाच्च आदावेव विभीषणः संभावित इति बोध्यं॥ ८४—८६ ॥ सुग्रीव इत्यर्धं॥ अत्रापि वचनव्यत्ययेन किष्किन्धामभ्युपागमदित्यनुषज्यते॥ ८७ ॥ लब्ध्वेत्यर्धं। कुलधनं इक्ष्वाकुकुल-

रामानु० कुलधनं इक्ष्वाकुकुलधनंश्रीरङ्गसंज्ञकंविमानमितिसन्तोवदन्ति । विभीषणकुलक्रमागतं लङ्काराज्यमितिकेचित् । ती० अत्रकुलधनशब्देनपूर्वमेवरामाभ्यनुज्ञातंराक्षसकुलधनं लङ्काराज्यंलब्ध्वेतिऋषिणानुवादःक्रियते । केचित्तु कुलधनमित्यत्रकुलधनशब्दस्यार्थं इक्ष्वाकुकुलदैवतंरङ्गविमानमितिवर्णयन्ति । तन्नोपपद्यते । कुतः कुलधनमित्यत्रेक्ष्वाकुकुलधनस्याश्रूयमाणत्वात् । अवतारसमाप्तिसमयेविभीषणायइक्ष्वाकुकुलदैवतंरङ्गविमानदानस्योत्तरश्रीरामायणेवक्ष्यमाणत्वाच्च । तथाहिविभीषणंप्रतिश्रीरामवचनं—'किंचान्यद्वक्तुमिच्छामिराक्षसेन्द्रमहाबल । आराधयजगन्नाथमिक्ष्वाकुकुलदैवतम्' इति । पाद्मपुराणेचावतारसमाप्तिसमये समागतंविभीषणंप्रतिश्रीरामवचनं 'यावच्चन्द्रश्चसूर्यश्चयावत्तिष्ठतिमेदिनी । तावद्रमस्वराज्यस्थःकालेममपदंव्रज । इत्युक्त्वाप्रददौ तस्मैस्वविश्लेषासहिष्णवे । श्रीरंगशायिनंस्वाचर्यमिक्ष्वाकुकुलदैवतम् । रङ्गंविमानमादायलङ्कांप्रायाद्विभीषणः' इत्यवतारसमाप्तिकालेरङ्गविमानदानश्रवणात् । कुलधनशब्देनराक्षसकुलधनंलङ्काराज्यमेवोक्तमितिवेदितव्यमिति । स० कुलधनं कुलस्य इक्ष्वाकुकुलस्यधनरूपं श्रीरामं लब्ध्वा सखित्वेनेतिशेषः । यत्तुकुलधनं इक्ष्वाकुकुलधनरूपं श्रीरङ्गविमानमितिव्याख्यानं तत्तुपाद्मवचनविरुद्धं । तथाहिपाद्मपुराणेउत्तरखण्डेकालाख्यब्रह्मदूतसंवादलक्ष्मणपरित्यागादिकमुक्त्वा 'अभिप्रायंतुरामस्यज्ञात्वाचारमुखात्तदा । आजग्मुर्वानराःक्षाराजानोराक्षसाद्विजाः । विभीषणोगुहोनीलः' इत्यादिनाविभीषणादीनांपुनरागमनंचोक्त्वापरलोकगमनप्रस्तावे 'अथैवाचमहातेजाराक्षसेन्द्रंविभीषणम् । राज्यंप्रशाधिधर्मेणमद्वाक्यंमावृथाकृथाः । यावच्चन्द्रश्चसूर्यश्चयावत्तिष्ठतिमेदिनी । तावद्रम

[पा०] १ पौरुषंविक्रमोबुद्धिः ददौसावायुपुत्राय इत्यर्धद्वयस्यस्थाने ङ. च. छ. झ. ञ. ट. पाठेषु अथसावायुपुत्रायतं हारमसितेक्षणा । तेजोधृतिर्यशोदाक्ष्यंसामर्थ्यंविनयोनयः । पौरुषंविक्रमोबुद्धिर्यस्मिन्नेतानिसर्वशः । इत्यर्धत्रयं पौर्वापर्यभेदेन अधिकैकार्धवत्तयाचदृश्यते. २ क. वानरयोधाश्च. ३ क. ख. घ. ङ. च. ज. झ. ट. दृष्ट्वासर्वे. ४ ङ. झ. ञ. ट. किष्किन्धां समुपागमन्. ५ इदमर्धं क. झ. पाठयोर्दृश्यते. ६ क. प्राविशद्बली. ७ इदमर्धं. औत्तराहपाठएवदृश्यते. ८ लब्ध्वाकुलधनमित्यर्धात्पूर्वं. क. ख. घ. च.—ट. पाठेषु विभीषणोपि धर्मात्मा सहतैर्नैर्ऋतर्षभैः इत्यर्धमधिकंदृश्यते. ९ क. ख. घ. च.—ट. प्रायान्महायशाः.

स राज्यमखिलं शासन्निहतारिर्महायशाः ॥ राघवः परमोदारः शशास परया मुदा ॥ ८९ ॥
उवाच लक्ष्मणं रामो धर्मज्ञं धर्मवत्सलः ॥ ९० ॥

आतिष्ठ धर्मज्ञ मया सहेमां गां पूर्वराजाध्युषितां बलेन ॥
तुल्यं मया त्वं पितृभिर्धृता या तां यौवराज्ये धुरमुद्वहस्व ॥ ९१ ॥
सर्वात्मना पर्यनुनीयमानो यदा न सौमित्रिरुपैति योगम् ॥
नियुज्यमानोपि च यौवराज्ये ततोऽभ्यषिञ्चद्भरतं महात्मा ॥ ९२ ॥

पौण्डरीकाश्वमेधाभ्यां वाजपेयेन चासकृत् ॥ अन्यैश्च विविधैर्यज्ञैरयजत्पार्थिवर्षभः ॥ ९३ ॥
राज्यं दश सहस्राणि प्राप्य वर्षाणि राघवः ॥ शताश्वमेधानाजह्रे सदश्वान्भूरिदक्षिणान् ॥ ९४ ॥
आजानुलम्बबाहुः स महास्कन्धः प्रतापवान् ॥ लक्ष्मणानुचरो रामः पृथिवीमन्वपालयत् ॥९५॥

धनं श्रीरङ्गविमानमिति संप्रदायः ॥ ८८ ॥ शासन् दुष्टनिग्रहं कुर्वन् शशास बुभुज इत्यर्थः । धातूनामनेकार्थत्वात् ॥ ८९—९० ॥ 'लक्ष्मणेमां मया सार्धं प्रशाधि त्वं वसुन्धरां' इति पूर्वाभिषेकारम्भे भरतासन्निधाने प्रतिज्ञानात् 'रामो द्विर्नाभिभाषत' इति नियमाल्लक्ष्मणमेव यौवराज्ये नियुङ्क्ते—आतिष्ठेति । पूर्वराजैः मन्वादिभिः अध्युषितां। आतिष्ठ पालय । पितृभिः पितृपितामहप्रपितामहैः या धृता तां धुरं मया तुल्यं यथा भवति तथा यौवराज्ये स्थित्वा उद्वहस्व ॥ ९१ ॥ यौवराज्ये नियुज्यमानः यौवराज्यमङ्गीकुरुष्वेति नियम्यमानः। पर्यनुनीयमानः पुनःपुनरनुनयेन पृच्छ्यमानः सन्नपि च सर्वात्मना सर्वप्रकारेणापि यदा योगं संमतिं नोपैति । स्वशेषत्वविरुद्धत्वज्ञानाज्ज्येष्ठे भरते विद्यमाने स्वस्य तदनुचितत्वज्ञानाच्चेति भावः । तदा भरतं अत्यन्तपरतन्त्रं यौवराज्ये अभ्यषिञ्चत् ॥ ९२ ॥ पौण्डरीकेति । अत्रोत्तरकृत्वारम्भोक्तिर्वनवासात्परमग्न्याधानपूर्वकं पूर्वकृतवोपि रामेण

राज्यस्थःकालेममपदंव्रज । इत्युक्त्वाप्रददौतस्मैस्वविश्लेषासहिष्णवे । श्रीरङ्गशायिनंस्वार्च्यमिक्ष्वाकुकुलदैवतम् । रङ्गविमानमादायलङ्कांप्रायाद्विभीषणः' इतिवचनात् । नचस्कान्दपुराणेउमासंहितायांद्वादशाध्यायेऽभिषेकोत्सवप्रस्तावे 'उपित्वावत्सरंसर्वैरक्षसाधानराक्षथा । अनुज्ञातोराघवेणलङ्कांप्रायाद्विभीषणः । मध्याह्नेविष्णुपूजार्थंकावेर्यामध्यतोहरिम् । निधायविधिवत्स्नानंनिर्लंसर्वं समाप्यच । मञ्जूषामध्यगंविष्णुंपूजयामासभक्तितः । तस्मिन्क्षणेपरिणतंविमानंप्रणवाकृति' इत्यादिनाऽभिषेकानन्तरमेवश्रीरङ्गनाथविमानदानस्योक्तत्वात्तद्रीत्यात्रापितदेवप्राप्यमितिवाच्यं । स्कान्दवचनानांसंकुचितकथाप्रबन्धरूपत्वेनागामिनींकथांपुरस्तादेवाकथयदितिस्वीकारेबाधकाभावात् । अन्यथापूर्वमेवतद्दानेश्रीरामस्यस्वकुलदैवश्रीरङ्गनाथार्चनेनैवैकादशसहस्राब्दावस्थानापत्तेः । नचेष्टापत्तिरेवेतिवाच्यं । पाद्मेसर्वत्रनित्याह्निकप्रस्तावेश्रीरङ्गनाथार्चनस्यवर्णितत्वात् । यथोक्तंपाद्मे नित्याह्निके—'गृहंगत्वाऽनलेहुत्वानत्वाश्रीरङ्गशायिनम् ।' इति । तथान्यत्र 'उत्थायकृतमध्याह्नस्नानोरङ्गेदसमर्पितम् । भुक्त्वाऽन्नं' इत्यादिपूर्वोदाहृतपाद्मवचननिरवकाशत्वस्यस्फुटत्वाच्च । अतउक्तएवार्थइत्यलम् ॥ ८८ ॥ **ती०** आत्मनासहवनवासदुःखानुभवाद्राज्येसहसुखानुभवार्थं लक्ष्मणंप्रतियौवराज्यप्रार्थनेतिभावः ॥ ९१ ॥ **स०** सर्वात्मनासर्वप्रकारेण पर्यनुनीयमानः मयासहचिरंवनवासप्रयासानुभवाद्यौवराज्यसौख्यमनुभुङ्क्ष्वेतिपुनःपुनःप्रार्थितोपि सौमित्रिः योगं यौवराज्याधिपत्यं । यदानोपैति ज्येष्ठेभरतेसतिनाहंतदर्हइतिस्वीकरोति-ज्येष्ठत्वात्त्वमेवयौवराज्यंकुर्वितिबहुशःनियुज्यमानोपिउक्तोपि भरतोबहुक्लेशभागितिसएवतत्करोत्वितिवा योगं यदानोपैति ततोनन्तरंभुवियौवराज्ये भरतमभ्यषिञ्चत् ॥ ९२ ॥ **ति०** पौण्डरीकाश्वमेधेत्यादुत्तरकाण्डार्थसंक्षेपः । पौण्डरीकाश्वमेधाभ्यामितिसामान्यतउक्तत्वातत्रैवविशेषमाह—वाजिमेधेनचासकृदिति ॥ ९३ ॥

[पा०] १ ख. च. ञ. रराज. २ ङ. झ. ट. तुल्यंयथात्वंपितृभिःपुरस्तात्तैर्यौवराज्ये. ३ क. ख. घ.—ज. ट. नियुज्यमानोभुवि. ४ ङ. च. झ. ञ. ठ. वाजिमेधेन. ५ घ. यैरिष्टवानाप्तदक्षिणैः. क. ख. ङ. च. झ. ञ. ट. यज्ञैरयजत्पार्थिवात्मजः. ६ क. छ.—ट. आजानुलम्बिबाहुः.

राघवश्चापि धर्मात्मा प्राप्य राज्यमनुत्तमम् ॥ ईजे बहुविधैर्यज्ञैः ससुहृज्ज्ञातिबान्धवः ॥ ९६ ॥
न पर्यदेवन्विधवा न च व्यालकृतं भयम् ॥ न व्याधिजं भयं वाऽपि रामे राज्यं प्रशासति ॥९७॥
निर्दस्युरभवल्लोको नानर्थः कंचिदस्पृशत् ॥ न च स्म वृद्धा बालानां प्रेतकार्याणि कुर्वते ॥ ९८ ॥
सर्वं मुदितमेवासीत्सर्वो धर्मपरोऽभवत् ॥ राममेवानुपश्यन्तो नाभ्यहिंसन्परस्परम् ॥ ९९ ॥
आसन्वर्षसहस्राणि तथा पुत्रसहस्रिणः ॥ निरामया विशोकाश्च रामे राज्यं प्रशासति ॥ १०० ॥
रामो रामो राम इति प्रजानामभवन्कथाः ॥ रामभूतं जगदभूद्रामे राज्यं प्रशासति ॥ १०१ ॥
नित्यपुष्पा नित्यफलास्तरवः स्कन्धविस्तृताः ॥ काले वर्षी च पर्जन्यः सुखस्पर्शश्च मारुतः ॥१०२॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा लोभविवर्जिताः ॥ स्वकर्मसु प्रवर्तन्ते तुष्टाः स्वैरेव कर्मभिः ॥१०३॥
आसन्प्रजा धर्मरता रामे शासति नानृताः ॥ सर्वे लक्षणसंपन्नाः सर्वे धर्मपरायणाः ॥ १०४ ॥
दश वर्षसहस्राणि दश वर्षशतानि च ॥ भ्रातृभिः सहितः श्रीमान्रामो राज्यमकारयत् ॥ १०५ ॥
धन्यं यशस्यमायुष्यं राज्ञां च विजयावहम् ॥ आदिकाव्यमिदं त्वार्षं पुरा वाल्मीकिना कृतम् ॥
यः पठेच्छृणुयाल्लोके नरः पापाद्विमुच्यते ॥ १०६ ॥
पुत्रकामस्तु पुत्रान्वै धनकामो धनानि च ॥ लभते मनुजो लोके श्रुत्वा रामाभिषेचनम् ॥ १०७ ॥

कृता इत्यस्योपलक्षणं ॥ ९३—९५ ॥ चापीति निपातसमुदायोऽवधारणार्थोऽभिन्नक्रमः । ससुहृज्ज्ञातिबान्धव एवेत्यर्थः ॥ ९६ ॥ न पर्यदेवन्निति । नपर्यदेवयन्निति पाठे विलापयन्तीत्यर्थः ॥ ९७—९८ ॥ राममेवेति । अन्योन्यनिर्मूलनवैरे सत्यपि रामसुखं म्लानं भविष्यतीति मत्वा परस्परं नाभ्यहिंसन् । परमधार्मिकं राममेवानुचिन्तयन्तोऽन्योन्यवैरं प्रजहुरित्यर्थः ॥ ९९–१०५ ॥ अथ रामायणपठने फलं दर्शयति—धन्यमित्यादिसार्धश्लोकमेकं वाक्यं ॥ ऋषिः वेदः तत्संबन्धि । वेदोपबृंहणमिति यावत् । पुरा अवतारात्पूर्वं । रामोत्तरतापनीयमूलत्वेन पुरातनमितिवार्थः । यद्वा पुरा सर्वकविभ्यः पूर्वं । न त्ववतारात्पूर्वमित्यर्थः । "प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवानृषिः। चकार चरितं कृत्स्नं विचित्रपदमात्मवान्" इति रामे प्राप्तराज्ये सति चकारेत्युपक्रमात् "रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान्" इति राज्यप्राप्तिपर्यन्तं भूततया निर्दिश्य ततः परं ब्रह्मलोकं प्रयास्यतीत्येतदन्तं भविष्यत्तयानिर्देशात् 'कोन्वस्मिन्सांप्रतं लोके' इत्यादौ सांप्रतशब्दप्रयोगात् "रामभूतं जगदभूद्रामे राज्यं प्रशासति" इति सकललोकविदितरामविषयप्रश्नानुपपत्तेः सर्वथा परिहृतत्वात् । 'इतिहासं पुरातनम्' इत्यस्य आदिकाव्यत्वात्सङ्गतेरन्येषामपि विरोधाभासानां सुपरिहार्यत्वाच्चायमेवार्थः ॥१०६॥ पुत्रकामस्त्वित्यादिसार्धश्लोकद्वयमेकं वाक्यं॥ रामाभिषेचनं रामाभिषेकावधिकं । अधितिष्ठति

स० धर्मात्मापि साक्षाद्यज्ञपुरुषनारायणात्मापि । यदर्थकत्वादिकरणं तदात्मासत्रपीतियावत् । लोकशिक्षायाइतिभावः । राघवः बहुविधैर्यज्ञैरीजे "स्वात्मानंयज्ञपुरुषंयज्ञेनायजताथसः ।" इत्यादेः ॥ ९६ ॥ स० दशवर्षशतानिचेत्यनेनैकादशसहस्रसंख्यालभ्यते अस्याएवमानभेदात् 'एवंत्रयोदशसहस्र—' इत्याद्युक्तिरितिनविरोधः ॥ १०५ ॥ ति० रामाभिषेचनं तदवधिकमित्यर्थः

[पा०] १ ङ. झ. ट. ससुतभ्रातृबान्धवः. क. ख. घ. च. ज. ञ. ससुहृद्भ्रातृबान्धवः. २ क ङ.—ट. भयंचासीद्रामे. ३ ङ.—ट. नानर्थकश्चित्. ४ ङ. झ. ट. कामवर्षीच. ५ ङ. छ. झ. ञ. ट. धर्म्यं. ६ क. ख. च.—ट. यःशृणोतिसदालोकेनरःपापात्प्रमुच्यते.

महीं विजयते राजा रिपूंश्चाप्यधितिष्ठति ॥ राघवेण यथा माता सुमित्रा लक्ष्मणेन च ॥ १०८ ॥
भरतेनेव कैकेयी जीवपुत्रास्तथा स्त्रियः ॥ [भविष्यन्ति सदानन्दाः पुत्रपौत्रसमन्विताः] ॥१०९॥
श्रुत्वा रामायणमिदं दीर्घमायुश्च विन्दति ॥ रामस्य विजयं चैव सर्वमक्लिष्टकर्मणः ॥ ११० ॥
शृणोति य इदं काव्यमार्षं वाल्मीकिना कृतम् ॥ श्रद्दधानो जितक्रोधो दुर्गाण्यतितरत्यसौ ॥१११॥
समागमं प्रवासान्ते लभते चापि बान्धवैः ॥ प्रार्थितांश्च वरान्सर्वान्प्राप्नुयादिह राघवात् ॥ ११२ ॥
श्रवणेन सुराः सर्वे प्रीयन्ते संप्रशृण्वताम् ॥ विनायकाश्च शाम्यन्ति गृहे तिष्ठन्ति यस्य वै ॥११३॥
विजयेत महीं राजा प्रवासी स्वस्तिमान्व्रजेत् ॥ स्त्रियो रजस्वलाः श्रुत्वा पुत्रान्सूयुरनुत्तमान् ॥११४॥
पूजयंश्च पठंश्चेममितिहासं पुरातनम् ॥ सर्वपापात्प्रमुच्येत दीर्घमायुरवाप्नुयात् ॥ ११५ ॥
प्रणम्य शिरसा नित्यं श्रोतव्यं क्षत्रियैर्द्विजात् ॥ ऐश्वर्यं पुत्रलाभश्च भविष्यति न संशयः ॥ ११६ ॥
रामायणमिदं कृत्स्नं शृण्वतः पठतः सदा ॥ प्रीयते सततं रामः स हि विष्णुः सनातनः ॥११७॥
आदिदेवो महाबाहुर्हरिर्नारायणः प्रभुः ॥ [साक्षाद्रामो रघुश्रेष्ठः शेषो लक्ष्मण उच्यते] ॥११८॥

कुटुम्बवृद्धिं धनधान्यवृद्धिं स्त्रियश्च मुख्याः सुखमुत्तमं च ॥
श्रुत्वा शुभं काव्यमिदं महार्थं प्राप्नोति सर्वां भुवि चार्थसिद्धिम् ॥ ११९ ॥
आयुष्यमारोग्यकरं यशस्यं सौभ्रातृकं बुद्धिकरं सुखं च ॥
श्रोतव्यमेतन्नियमेन सद्भिराख्यानमोजस्करमृद्धिकामैः ॥ १२० ॥
[वस्त्रेण दिव्येन धनेन चैव धान्येन भूम्याभरणेन वेश्मना ॥
संतर्पयेद्वाचकमर्थजालैर्न चेत्फलं विन्दति वित्तशाठ्यकृत् ॥ १२१ ॥]

एवमेतत्पुरावृत्तमाख्यानं भद्रमस्तु वः ॥ प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम् ॥ १२२ ॥
देवाश्च सर्वे तुष्यन्ति ग्रहणाच्छ्रवणात्तथा ॥ रामायणस्य श्रवणात्तुष्यन्ति पितरस्तथा ॥ १२३ ॥

आक्रम्य तिष्ठतीत्यर्थः। माता कौसल्या। जीवपुत्राः भवन्तीति शेषः॥ १०७—११० ॥ शृणोति य इत्यादिश्लोकद्वयमेकान्वयं ॥ दुर्गाणि दारिद्र्यादीनि ॥ १११—११२ ॥ विनायकाः विघ्नकरा ग्रहाः ॥ ११३—११५ ॥ ब्राह्मणवत् क्षत्रियस्यापि पाठप्राप्तौ नियममाह—प्रणम्येति। वैश्यादीनां कैमुतिकसिद्धं ब्राह्मणात् प्रणमनपूर्वकं श्रवणं ॥ ११६—११९॥ सौभ्रातृकं सौभ्रातृकरं सुखं सुखकरं ॥ १२०—१२३॥

॥ १०७ ॥ **ती०** संप्रशृण्वतां संक्षिप्यशृण्वतां। **ति०** विनायकाः विघ्नकारिणोदेवगणविशेषाः। **स०** विनायकाः विघ्नाः। 'विनायकस्तुहेरंबेविघ्नेताक्ष्येजिनेगुरौ'इतिविश्वः ॥ ११३ ॥ **ति०** स्त्रियोरजस्वलाः शुद्धिस्नानानन्तरंषोडशदिनावधि ॥ ११४ ॥

[**पा०**] १ इदमर्धं औत्तराहपाठएवदृश्यते. २ ङ. च. छ. झ. ञ. ट. काव्यंपुरा. ३ ङ.—ट. समागम्यप्रवासान्तेरमस्तेसहबांधवैः. ४ ख. घ.—ट. तेप्रार्थितान्वरान्सर्वान्प्राप्नुवन्तीह. ५ ङ. परिशृण्वतां. ६ ङ. च. छ. झ. ञ. ट. स्वस्तिमान्भवेत्. ७ इदमर्धं औत्तराहपाठेदृश्यते. ८ ख. घ.—ट. शुभंच. ९ अयंश्लोकः क. पाठेदृश्यते.

भक्त्या रामस्य ये चेमां संहितामृषिणा कृताम् ॥ लेखयन्तीह च नरास्तेषां वासस्त्रिविष्टपे ॥ १२४॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशतिसहस्रिकायां संहितायां युद्धकाण्डे श्रीरामपट्टाभिषेको नाम एकत्रिंशदुत्तरशततमः सर्गः ॥ १३१ ॥

इति युद्धकाण्डः समाप्तः ॥ ६ ॥

संहितातुल्यत्वात् संहितेति व्यपदेशः ॥ १२४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकत्रिंशदुत्तरशततमः सर्गः ॥ १३१ ॥

इत्थं श्रीमच्छठारेश्चरणसरसिजद्वन्द्वसेवातिरेकादुद्भूतोद्दामबोधः कुशिकसुतकुलापाम्पतेरोषधीशः । श्रीमान्गोविन्दराजो वरदगुरुसुतो भावनाचार्यवर्यप्रेम्णैव प्रेर्यमाणो व्यतनुत विपुलां युद्धकाण्डस्य टीकाम् ॥ १ ॥

तीo रामस्यसंहितांरामायणमित्यर्थः । संहितालक्षणसप्तकाण्डवत्साद्दश्यादस्यसंहितेतिव्यपदेशः । लेखयन्ति चकारालिखन्तिच । तिo अत्रफलश्रुतिश्लोकाःकतकव्याख्यानेनोपलभ्यन्ते ॥ १२४ ॥ इत्येकत्रिंशदधिकशततमःसर्गः ॥ १३१ ॥

इदं युद्धकाण्डं कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम् । शकाब्दाः १८३५ सन १९१३.

।। श्रीः ।।

श्रीमद्वाल्मीकिरामायणम्

नानादेशीयकोशानुसारेण संशोधितम्।

श्रीमद्गोविन्दराजीयव्याख्यानेन तिलकप्रभृत्यनेकापूर्वव्याख्यानोद्धृतैः
गोविन्दराजीयानुक्तापूर्वविषयैश्च समलंकृतम्।

सुन्दरकाण्डम्
युद्धकाण्डम्

पद्मभूषण-आचार्य-बलदेव-उपाध्याय-भूमिकया-विभूषितम्

उत्तर प्रदेश संस्कृत संस्थान
लखनऊ

- DONATED BY -
Lt. PADMASHREE
Prof. V. VENKATACHALAM
VARANASI



प्रकाशक : **श्रीमती अलका श्रीवास्तव**
निदेशक
उत्तर प्रदेश संस्कृत संस्थान, लखनऊ

प्राप्ति स्थान : **विक्रय विभाग**
उत्तर प्रदेश संस्कृत संस्थान,
नया हैदराबाद, लखनऊ-२२६ ००७

प्रथम संस्करण : वि.सं. २०५४ (१९९८ ई.)

प्रतियाँ : १०००

मूल्य : रु. २२० (दो सौ बीस रुपये)

© उत्तर प्रदेश संस्कृत संस्थान, लखनऊ

मुद्रक : शिवम् आर्टस् निशातगंज, लखनऊ।
दूरभाष : ३८६३८९

श्रीः

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यासमलंकृतम् ।

सुन्दरकाण्डम् ५

श्रीरामचन्द्राय नमः ॥

प्रथमः सर्गः ॥ १ ॥

सीतान्वेषणाय लङ्काजिगमिषया महेन्द्रगिरिशिखराज्जलधिमुल्लङ्घयताहनुमता मध्येसमुद्रं तच्चोदनया जलमध्यादभ्युद्गच्छतःस्वशिखरे स्वस्यविश्रममर्थयतोमैनाकगिरेः स्वकरतलसंस्पर्शनेन संमाननं ॥ १ ॥ तथा देवैः स्वबलपरीक्षणाय वरदानपूर्वकं प्रेषितया राक्षसरूपधारिण्यासुरसया स्वनिगरणाय बहुयोजनपरिमाणनिजवदनव्यादाने स्वतनुतनूकरणपूर्वकं तदुदरप्रवेशेन तदर्हिंसयैव बहिर्निर्गमनं ॥ २ ॥ तथा सिंहिकाख्ययामहाराक्षस्या स्वच्छायाग्रहणपूर्वकं स्वग्रसनाय बहुयोजनविस्तीर्णनिजमुखव्यादाने स्वशरीरसंकोचनपूर्वकं तन्मुखप्रवेशेन तदुदरविदारणेन तदसुहरणपूर्वकंबहिर्निर्गमनं ॥ ३ ॥ तथा राक्षसजनासंभ्रमाय स्वशरीरतनुकरणेन लङ्कावहिस्स्थलंबगिरिशिखरे निपतनं ॥ ४ ॥

ततो रावणनीतायास्सीतायाश्शत्रुकर्शनः ॥ इयेष पदमन्वेष्टुं चारणाचरिते पथि ॥ १ ॥

तत्त्वज्ञानसमुद्भवो घनदयासारस्य सारो महान्निष्कर्षः कमलानिवासचरणद्वन्द्वानुरागस्मृतेः ॥ अक्लेशः परिपाक एष जगतामक्षय्यपुण्यावलेरस्माकं निधिरक्षयो विजयते श्रीमाञ्शठारिर्गुरुः ॥ १ ॥ श्रीरामायणभूषायै प्रवृत्तो रामभक्तितः ॥ व्याख्यां सुन्दरकाण्डस्य तिलकं कलयाम्यहम् ॥ २ ॥ उक्तं परत्वासाधारणं समस्तकल्याणगुणाकरत्वं किष्किन्धाकाण्डे । अत्र सर्वसंहर्तृत्वमुच्यते । वक्ष्यति हि तत् " ब्रह्मा स्वयंभूः " इत्यादिना । यद्वा पूर्वस्मिन्काण्डे सर्वथा मित्रसंरक्षणं कार्यमित्युक्तं । अत्र दूतेन पतिव्रतया चैवं वर्तितव्यमित्यर्थः प्रतिपाद्यते । यद्वा पूर्वत्र सर्वरक्षणप्रवृत्तस्य विष्णोराचार्यरूपपुरुषकारलाभ उक्तः । अधुना आचार्यकृत्यमुच्यते । तत्र प्रथमे सर्गे शिक्षणीयशिष्यान्वेषणमुपपाद्यते । तत इत्यादि । ततः जाम्बवत्प्रोत्साहनानन्तरं । चारणाः सञ्चारिणो देवगायकाः तैराचरिते पथि आकाशे । रावणनीतायास्सीतायाः पदं स्थानमन्वेष्टुमियेष । शत्रुकर्शनः तदन्वेषणविरोधिनिरसनसमर्थः । यद्वा चारणाचरिते पथि गत्वा सीतायाः पदमन्वेष्टुमियेष । यद्वा यथापाङ्क्तमेवान्वयः । आकाशेपि पदन्यासान्वेषणसमर्थोयमिति बुद्धिचातुर्यातिशय उच्यते । अनेन शिष्यस्थानान्वेषणपरगुरुस्वरूपमुच्यते । ततः मुद्राप्रदानपूर्वकभगवदनुज्ञालाभानन्तरं शत्रुकर्शनः । " गुशब्दस्त्वन्धकारः स्याद्रुशब्दस्तन्निरोधकः । अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते " इत्युक्तरीत्या अज्ञाननिवर्तनशीलो गुरुः । चारयन्ति आचारयन्ति धर्मानिति चारणाः पूर्वाचार्याः तैराचरिते पथि । " महाजनो येन गतस्स पन्थाः " इत्युक्तसदाचारे स्थित इति शेषः । रावयति असत्प्रलापा-

---

श्रीरामोजयति ॥ **रामानु०** श्रीमत्सुन्दरकाण्डेव्याख्येयानिव्याक्रियन्ते । पूर्वस्मिन्काण्डेमनसागमनंकृतमित्युक्तं । इदानींकायेनापिगमनंकर्तुमैच्छदित्याशयेनाह—ततइति ॥ अत्रगन्तुमितिपदमध्याहर्तव्यं । शत्रुकर्शनोहनुमान् रावणनीतायाःसीतायाः पदं निवासस्थानं अन्वेष्टुं चारणाचरितेपथि वर्त्मनि गन्तुमियेषेतियोजना । **शि०** चारणैः आचरिते अतिसंचारविशिष्टे ॥ १ ॥

दुष्करं निष्प्रतिद्वन्द्वं चिकीर्षन्कर्म वानरः ॥ समुदग्रशिरोग्रीवो गवांपतिरिवाऽऽबभौ ॥ २ ॥
अथ वैडूर्यवर्णेषु शाद्वलेषु महाबलः ॥ धीरस्सलिलकल्पेषु विचचार यथासुखम् ॥ ३ ॥
द्विजान्वित्रासयन्धीमानुरसा पादपान्हरन् ॥ मृगांश्च सुबहून्निघ्नन्प्रवृद्ध इव केसरी ॥ ४ ॥
नीललोहितमाञ्जिष्ठपत्रवर्णैस्सितासितैः ॥ स्वभावविहितैश्चित्रैर्धातुभिस्स्वमलंकृतम् ॥ ५ ॥
कामरूपिभिराविष्टमभीक्ष्णं सपरिच्छदैः ॥ यक्षकिन्नरगन्धर्वैर्देवकल्पैश्च पन्नगैः ॥ ६ ॥
स तस्य गिरिवर्यस्य तले नागवरायुते ॥ तिष्ठन्कपिवरस्तत्र ह्रदे नाग इवाबभौ ॥ ७ ॥
स सूर्याय महेन्द्राय पवनाय स्वयंभुवे ॥ भूतेभ्यश्चाञ्जलिं कृत्वा चकार गमने मतिम् ॥ ८ ॥
अञ्जलिं प्राङ्मुखः कृत्वा पवनायात्मयोनये ॥ ततोभिववृधे गन्तुं दक्षिणो दक्षिणां दिशम् ॥ ९ ॥
प्लवङ्गप्रवरैर्दृष्टः प्लवने कृतनिश्चयः ॥ ववृधे रामवृद्ध्यर्थं समुद्र इव पर्वसु ॥ १० ॥
निष्प्रमाणशरीरस्सँल्लिलङ्घयिषुरर्णवम् ॥ [प्रगृह्य बलवान्बाहू लङ्कामभिमुखः स्थितः] ॥
बाहुभ्यां पीडयामास चरणाभ्यां च पर्वतम् ॥ ११ ॥

न्कारयतीति रावणः अविवेकः तेन नीतायाः स्ववशं प्रापितायाः सीतायाः अनादिभगवत्परतन्त्रचेतनस्य । सीताशब्देनायोनिजत्वोक्तेः । स्त्रीलिङ्गेन पारतन्त्र्योक्तेश्च । स्त्रीप्रायमितरत्सर्वमिति ह्युक्तं । पदं स्थानं संसारमण्डलमन्वेष्टुं । सात्त्विकसंभाषणादिचिह्नं वा । तथोक्तं " विष्णोः कटाक्षश्चाद्वेष आभिमुख्यं च सात्त्विकैः । संभाषणं षडेतानि त्वाचार्यप्राप्तिहेतवः " इति । यद्वा पदं व्यवसायमन्वेष्टुं कस्य चेतनस्य भगवत्प्राप्तावध्यवसाय इत्यन्वेष्टुं । इयेष । " पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु " इत्यमरः । अत्रैकादशसहस्रश्लोका गताः । द्वादशसहस्रस्यादिमोयं श्लोकः । अत्र गायत्र्याः द्वादशमक्षरं प्रयुक्तं । तदवलोकनीयं विद्वद्भिः ॥ १ ॥ निष्प्रतिद्वन्द्वं यथा भवति तथा दुष्करं चिकीर्षन् समुदग्रशिरोग्रीवः समुन्नतशिरोग्रीवः । गवां पतिः वृषभः ॥ २ ॥ शाद्वलानांसलिलकल्पत्वं वैडूर्यवर्णतया ॥ ३ ॥ केसरीव बभावेति शेषः ॥ ४ ॥ नीलेति अत्र यच्छब्दोध्याहार्यः । यदेवंविधं तलं तत्र तिष्ठन्नित्यन्वयः । पत्रवर्णैः पत्रश्यामैः । " पलाशो हरितो हरित् " इति हलायुधः । सितासितैः कल्माषैः । स्वभावविहितैः स्वतस्सिद्धैः ॥ ५–७ ॥ स्वयंभुवे चतुर्मुखाय । भूतेभ्यः देवयोनिभ्यः ॥ ८ ॥ आत्मयोनये स्वकारणभूताय । दक्षिणः समर्थः । हनुमान् प्राङ्मुखःसन् आत्मयोनये पवनाय । अञ्जलिं कृत्वा ततो दक्षिणां दिशं गन्तुं ववृध इत्यन्वयः । हिः पादपूरणे । अञ्जलिं प्राङ्मुखः कुर्वन्निति पाठस्त्वयुक्तः शतृप्रत्ययेन प्राङ्मुखत्वविशिष्टाञ्जलिकरणदक्षिणदिग्गमनोद्योगयोरेककालिकत्वप्रतीत्या विरोधात् । नहि प्राङ्मुखस्यैव सतो दक्षिणदिग्गमनोद्योगो युज्यते ॥ ९ ॥ रामवृद्ध्यर्थं रामप्रयोजनार्थं ॥ १० ॥ निष्प्रमाणशरीरः निर्मर्यादशरीरः । बाहु-

रामानु० निष्प्रतिद्वन्द्वं प्रतिद्वन्द्वान्निष्क्रान्तं । प्रतिबन्धकरहितमित्यर्थः ॥ २ ॥ **रामानु०** वैडूर्यवर्णेषु हरितत्वसंवलितशौक्ल्यविशिष्टतयावैडूर्यवर्णत्वं । शाद्वलानांसलिलकल्पत्वं शैत्यमार्दवादिना ॥ ३ ॥ **स०** सूर्याय स्वस्यविद्योपदेष्टृत्वाल्लोकदृष्ट्या । महेन्द्राय व्यवहारसिद्ध्यर्थंप्रकृतसीताप्रतिकृतिसंनिहितत्वात् । यथोक्तंभगवत्पादैः—" तस्यास्तुतांप्रतिकृतिंप्रविवेशशक्रः " इत्यादि । पवनाय पितृत्वात् । स्वयंभुवे सर्वगुरुत्वात्स्वस्यवरदानाद्वा । भूतेभ्यः विघ्ननिवारकेभ्योदेवेभ्यः । अञ्जलिं हस्तद्वयमेलनं ॥ ८ ॥ **स०** वृद्ध्यर्थंस्वपितृत्वोपाधिना पुनरपिवायुंप्रणमति । अञ्जलिमिति । स्वयोनये स्वकारणाय । अथवा आत्मैवयोनिःस्वोत्पत्तिकारणं यस्य तस्मैरामायेतिवा ॥ ९ ॥ **स०** रामवृद्ध्यर्थं रामयशोवृद्ध्यर्थं । योववृधे सप्लवङ्गप्रवरैर्दृष्टइत्यन्वयः । तेन नपौनरुक्त्यं । अथवा अरामवृद्ध्यर्थमितिच्छेदः । अर्थस्तु नविद्यतेरामोयेषांस्वपक्षीयत्वेन तेअरामाः । यद्वा अरामाः रामविरुद्धाः । तेषांवृद्ध्यर्थं छेदनार्थं । ' वृधु हिंसायां ' इतिधातुव्याख्यानात् । यद्वा वृद्धिरभिवृद्धिः तस्याअर्थोनिवृत्तिस्तमुद्दिश्य । 'अर्थोऽभिधेयरैवस्तुप्रयो-

[पा०] १ क. च. छ. ज. ञ. वीरः. २ क. च.—ञ. न्भीमान्. ३ क. ङ. छ.—ट. पद्मवर्णैः. ४ ङ. ञ. ञ. ट. स्वभावसिद्धैर्विमलैः. ५ ङ. ञ. ञ. ट. दैवकल्पैस्स. ६ क. तिष्ठन्हरिवरः. ७ ञ. कुर्वन्. ८ ङ.—ट. ततोहि. ९ क. सिध्यर्थं. १० इदमर्धं च. छ. ज. पाठेषुदृश्यते.

स चचालाचलश्चापि मुहूर्तं कपिपीडितः ॥ तरूणां पुष्पिताग्राणां सर्वं पुष्पमशातयत् ॥ १२ ॥
तेन पादपमुक्तेन पुष्पौघेण सुगन्धिना ॥ सर्वतः संवृतश्शैलो बभौ पुष्पमयो यथा ॥ १३ ॥
तेन चोत्तमवीर्येण पीड्यमानस्स पर्वतः ॥ सलिलं संप्रसुस्राव मदं मत्त इव द्विपः ॥ १४ ॥
पीड्यमानस्तु बलिना महेन्द्रस्तेन पर्वतः ॥ रीतीर्निर्वर्तयामास काञ्चनाञ्जनराजतीः ॥ १५ ॥
मुमोच च शिलाश्शैलो विशालास्समनश्शिलाः ॥ मध्यमेनार्चिषा जुष्टो धूमराजीरिवानलः ॥१६॥
गिरिणा पीड्यमानेन पीड्यमानानि सर्वतः ॥ गुहाविष्टानि भूतानि विनेदुर्विकृतैस्स्वरैः ॥ १७ ॥
स महासत्त्वसन्नादश्शैलपीडानिमित्तजः ॥ पृथिवीं पूरयामास दिशश्चोपवनानि च ॥ १८ ॥
शिरोभिः पृथुभिस्सर्पा व्यक्तस्वस्तिकलक्षणैः ॥ वमन्तः पावकं घोरं ददंशुर्दशनैश्शिलाः ॥ १९ ॥
तास्तदा सविषैर्दष्टाः कुपितैस्तैर्महाशिलाः ॥ जज्वलुः पावकोद्दीप्ता विभिदुश्च सहस्रधा ॥ २० ॥
यानि चौषधजालानि तस्मिञ्जातानि पर्वते ॥ विषघ्नान्यपि नागानां न शेकुश्शमितुं विषम् ॥ २१ ॥
[अपरे तु महाकाया वमन्तोऽग्निं स्वतेजसा ॥ कन्दरेभ्यो विनिष्पेतुः कपिपादनिपीडिताः ॥ २२ ॥
गिरेराक्रममाणस्य तरवस्तरुणाङ्कुराः ॥ मुमुचुः पुष्पवर्षाणि व्यक्तमुत्पलगन्धिनः ॥ २३ ॥
गैरिकाञ्जनसंजुष्टा हरितालसमावृताः ॥ व्यदीर्यन्त गिरेस्तस्य शिलास्ताः समनश्शिलाः ॥ २४ ॥
सचन्दनारुणस्ताम्रश्चित्रः काननधातुभिः ॥ क्षिप्तः शिखिनिभैर्दीप्तैः सगैरिकधातुभिः] ॥ २५ ॥
भिद्यतेऽयं गिरिर्भूतैरिति मत्वा तपस्विनः ॥ २६ ॥
त्रस्ता विद्याधरास्तस्मादुत्पेतुः स्त्रीगणैस्सह ॥ पानभूमिगतं हित्वा हैममासवभाजनम् ॥
पात्राणि च महार्हाणि करकांश्च हिरण्मयान् ॥ २७ ॥
लेह्यानुच्चावचान्भक्ष्यान्मांसानि विविधानि च ॥ आर्षभाणि च चर्माणि खड्गांश्च कनकत्सरून् ॥२८॥
कृतकण्ठगुणाः क्षीबा रक्तमाल्यानुलेपनाः ॥ रक्ताक्षाः पुष्कराक्षाश्च गगनं प्रतिपेदिरे ॥ २९ ॥

भ्यामित्युक्तिर्वानरस्य चतुर्भिः संचारात् ॥ ११ ॥ चापीत्येकमव्ययमप्यर्थकं । अशातयत् अगच्छत् । स्वार्थे णिच् ॥ १२–१४ ॥ रीतीः रेखाः । काञ्चनाञ्जनरजतगर्भासु शिलासु विदीर्यमाणासु दृश्यमानास्तास्ता भेदधारा इत्यर्थः ॥ १५ ॥ समनश्शिलाः धातुविशेषसहिताः । मध्यमेनार्चिषा मध्यमया ज्वालया । पार्श्वज्वाला हि न धूमनिवर्तिका ॥ १६ ॥ विकृतैः विकृतिमद्भिः दैन्यव्यञ्जकैरित्यर्थः ॥ १७ ॥ सत्त्वसन्नादः भूतसन्नादः ॥ १८ ॥ स्वस्तिकंनाम फणोपरि दृश्यमानार्धचन्द्रकं । ददंशुरिति दंशनं कोपव्यापारः ॥ १९ ॥ बिभिदुः भिन्नाः ॥ २० ॥ यानीति अत्र तानीत्यध्याहार्यं । शमितुं शमयितुं ॥ २१–२५ ॥ भिद्यत इत्यर्धमेकं ॥ उत्पेतुरित्यनुषज्यते ॥ २६ ॥ त्रस्ता इत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ आसवभाजनं मद्यपात्रं । पात्राणि भोजनपात्राणि । आर्षभाणि चर्माणि ऋषभचर्मापिनद्धानि खेटकानि । त्सरुः मुष्टिबन्धनं ॥ २७–२८ ॥ कृतकण्ठगुणाः कृतकण्ठस्रजः । क्षीबाः मत्ताः । रक्ताक्षाः मधुपानात् । पुष्कराक्षाः स्वभावत इत्यर्थः ॥ २९ ॥

जननिवृत्तिषु ' इत्यमरः ॥ १० ॥ **रामानु०** अशातयत् अपातयदित्यर्थः । अत्राप्यचलःकर्ता । **ति०** अशातयत् पर्वतःकर्ता चलनंकरणं ॥ १२ ॥ **रामानु०** पुष्पौघेणेत्यत्र ' कुमतिच ' इतिणत्वं । पुष्पमयोयथा पुष्पमयइव ॥ १३ ॥ **ति०** मुमोच निपीडनात् । अतएव मध्यमेनमध्यभागेन अर्चिषाज्वालयाजुष्टोयोऽनलस्तस्यधूमराजिरिव बभावित्यर्थः । यस्येत्यध्याहारः ।

[**पा०**] १ ङ. झ. ञ. ट. श्वाशु. क. ख. च. छ. श्वारु. २ झ. सवृतः. ३ ज. सलिलंच. ४ ङ. च. ज.—ट. मदमत्तः. ५ ङ.—ट. हरिणा. ६ क. च. छ. ज. ञ. सर्वशः. ७ ट. सत्वानि. ८ ङ.च. छ. झ. ञ. ट. महान्सत्व. ९ क. शब्देनोपवनानिच. १० ङ. झ. ट. पृथुभिर्नागाः. ११ इमेचत्वारःश्लोकाः च. छ. ज. पाठेषुदृश्यन्ते. १२ क. ख. ङ. च. छ. झ. ञ. मासनभाजनं.

हारनूपुरकेयूरपारिहार्यधराः स्त्रियः ॥ विस्मितास्सस्मितास्तस्थुराकाशे रमणैस्सह ॥ ३० ॥
दर्शयन्तो महाविद्यां विद्याधरमहर्षयः ॥ सहितास्तस्थुराकाशे वीक्षांचक्रुश्च पर्वतम् ॥ ३१ ॥
शुश्रुवुश्च तदा शब्दमृषीणां भावितात्मनाम् ॥ चारणानां च सिद्धानां स्थितानां विमलेऽम्बरे ॥३२॥
एष पर्वतसंकाशो हनुमान्मारुतात्मजः ॥ तितीर्षति महावेगस्समुद्रं मकरालयम् ॥ ३३ ॥
रामार्थं वानरार्थं च चिकीर्षन्कर्म दुष्करम् ॥ समुद्रस्य परं पारं दुष्प्रापं प्राप्तुमिच्छति ॥ ३४ ॥
इति विद्याधराः श्रुत्वा वचस्तेषां महात्मनाम् ॥ तमग्रमेयं ददृशुः पर्वते वानरर्षभम् ॥ ३५ ॥
दुधुवे च स रोमाणि चकम्पे चाचलोपमः ॥ ननाद सुमहानादं सुमहानिव तोयदः ॥ ३६ ॥
आनुपूर्व्येण वृत्तं च लाङ्गूलं रोमभिश्चितम् ॥ उत्पतिष्यन्विचिक्षेप पक्षिराज इवोरगम् ॥ ३७ ॥
तस्य लाङ्गूलमाविद्धमात्तवेगस्य पृष्ठतः ॥ ददृशे गरुडेनेव ह्रियमाणो महोरगः ॥ ३८ ॥
बाहू संस्तम्भयामास महापरिघसन्निभौ ॥ ससाद च कपिः कट्यां चरणौ संचुकोच च ॥ ३९ ॥
संहृत्य च भुजौ श्रीमांस्तथैव च शिरोधराम् ॥ तेजस्सत्त्वं तथा वीर्यमाविवेश स वीर्यवान् ॥ ४० ॥
मार्गमालोकयन्दूरादूर्ध्वं प्रणिहितेक्षणः ॥ रुरोध हृदये प्राणानाकाशमवलोकयन् ॥ ४१ ॥
पद्भ्यां दृढमवस्थानं कृत्वा स सुमहाकपिः ॥ निकुञ्च्य कर्णौ हनुमानुत्पतिष्यन्महाबलः ॥
वानरान्वानरश्रेष्ठ इदं वचनमब्रवीत् ॥ ४२ ॥
यथा राघवनिर्मुक्तश्शरश्श्वसनविक्रमः ॥ गच्छेत्तद्वद्गमिष्यामि लङ्कां रावणपालिताम् ॥ ४३ ॥
न हि द्रक्ष्यामि यदि तां लङ्कायां जनकात्मजाम् ॥ अनेनैव हि वेगेन गमिष्यामि सुरालयम् ॥४४॥
यदि वा त्रिदिवे सीतां न द्रक्ष्याम्यकृतश्रमः ॥ बद्ध्वा राक्षसराजानमानयिष्यामि रावणम् ॥ ४५ ॥

पारिहार्यं वलयं । तस्थुः तस्थुश्च ॥ ३० ॥ दर्शयन्तः प्रयोजयन्तः । महाविद्यां अणिमाद्यष्टमहासिद्धिं । विद्याधरमहर्षयः विद्याधराः महर्षय इवेत्युपमितसमासः । " उपमितंव्याघ्रादिभिःसामान्याप्रयोगे " इत्यनुशासनात् । विद्याधरश्रेष्ठा इत्यर्थः । विद्याधरा महर्षयश्चेति द्वन्द्वसमासो न युक्तः । इति विद्याधराः श्रुत्वेत्युपरितनश्लोके विद्याधराणामेवोपादानात्॥३१॥ सा पुनरत्राकाशस्थितिः । शुश्रुवुः विद्याधरा इति शेषः । इति विद्याधराः श्रुत्वेत्युपसंहारात्॥ ३२–३३ ॥ समुद्रं तितीर्षतीत्युक्तं तस्य प्रयोजनकथनायोक्तमनुवदति—रामार्थमिति ॥ ३४–३६ ॥ आनुपूर्व्येण वृत्तं क्रमेण वृत्तं ॥ ३७–३८ ॥ लङ्घनोद्योगकालिकावस्थां वर्णयति बाहू इत्यादिना । बाहू संस्तम्भयामास निश्चलीचकार । कट्यां ससाद शरीरं संचुकोचेत्यर्थः । चरणौ संचुकोच च ॥ ३९ ॥ संहृत्य संकोच्य ॥४०॥ प्राणान् उच्छ्वासरूपान् । प्राणनिरोधो व्योमोत्पतनार्थं ॥ ४१–४३ ॥ हिशब्दःपादपूरणे ॥ ४४ ॥ अकृतश्रमः अप्राप्तश्रमः । राक्षसराजानमित्यत्र टजभावआर्षः ।

धूमराजिरिवेतिहस्वपाठः ॥ १६ ॥ **ति०** पारिहार्यशब्दः श्रेष्ठवाचीति । एतदग्रे ' दर्शयन्तइत्यादि विमलेंबरे ' इत्यन्तंश्लोकद्वयंप्रक्षिप्तंक्वचिदितिचकतकः ॥ ३० ॥ **शि०** महाविद्यांमहाविद्याजनितां निरवलंबनस्थितिरूपांखशक्तिंदर्शयन्तः । **स०** महाविद्याःअणिमाद्याः ॥ ३१ ॥ **रामानु०** महावेगमितिक्रियाविशेषणं ॥ ३३ ॥ **स०** परंपारं स्वगमनोद्दिष्टं ॥ ३४ ॥ **रामानु०** वीर्यवान्वीर्यमाविवेशेत्यभिधानात् पूर्वंविद्यमानमेववीर्यंविशेषतोऽधिष्ठितवानित्यवगम्यते । तेजस्सत्त्वयोरप्येवंद्रष्टव्यं । तेजः पराभिभवनसामर्थ्यं । सत्त्वं बलं । वीर्यं आकाशाद्यभिनिष्क्रमणसामर्थ्यं ॥४०॥ **रामानु०** राघवशरदृष्टान्तेनस्वस्याविलंबितत्वाप्रति-

[पा०] १ ख. सस्मितास्तस्थुः. ज. सभार्यास्तस्थुः. क. विस्मितास्तस्थुः. २ च. छ. ज. वीक्षमाणाश्च. ३ च. छ. तितीर्षुस्समहावेगं. ज. तितीर्षुस्सुमहावेगं. ४ ङ. झ. ञ. ट. वरुणालयं. ५ क. द्रष्टुमिच्छति. ६ ङ. झ. ञ. ट. विद्याधरावाचः श्रुत्वातेषां. ७ क. ङ.—ट. तपस्विनां. ८ ङ. झ. ट. चानलोपमः. ९ ङ. झ. ञ. ट. ननादच. १० ङ.—ट. आनुपूर्व्याच. ११ ङ. झ. ञ. ट. वृत्तंतल्लाङ्गूलं. १२ क. ङ. च. छ. झ. ञ. ट. लोमभिश्चितं. १३ क. ख. ङ.—ञ. मतिवेगस्य. १४ ख. ह्रियमाणइवोरगः. क. च. छ. ज. ह्रियमाणोयथोरगः. १५ ङ. छ. झ. ट. आससाद. १६ क. ख. ङ.—ट. द्रक्ष्यामिकृतश्रमः.

सर्वथा कृतकार्योऽहमेष्यामि सह सीतया ॥ आनयिष्यामि वा लङ्कां समुत्पाट्य सरावणाम् ॥ ४६ ॥
एवमुक्त्वा तु हनुमान्वानरान्वानरोत्तमः ॥ उत्पपाताथ वेगेन वेगवानविचारयन् ॥
सुपर्णमिव चात्मानं मेने स कपिकुञ्जरः ॥ ४७ ॥
समुत्पतति तस्मिंस्तु वेगात्ते नगरोहिणः ॥ संहृत्य विटपान्सर्वान्समुत्पेतुः समन्ततः ॥ ४८ ॥
स मत्तकोयष्टिभकान्पादापान्पुष्पशालिनः ॥ उद्वहन्वूरुवेगेन जगाम विमलेऽम्बरे ॥ ४९ ॥
ऊरुवेगोद्धता वृक्षा मुहूर्तं कपिमन्वयुः ॥ प्रस्थितं दीर्घमध्वानं स्वबन्धुमिव बान्धवाः ॥ ५० ॥
तमूरुवेगोन्मथिताः सालाश्चान्ये नगोत्तमाः ॥ अनुजग्मुर्हनूमन्तं सैन्या इव महीपतिम् ॥ ५१ ॥
सुपुष्पिताग्रैर्बहुभिः पादपैरन्वितः कपिः ॥ हनुमान्पर्वताकारो बभूवाद्भुतदर्शनः ॥ ५२ ॥
सारवन्तोथ ये वृक्षा न्यमज्जँल्लवणाम्भसि ॥ भयादिव महेन्द्रस्य पर्वता वरुणालये ॥ ५३ ॥
स नानाकुसुमैः कीर्णः कपिः साङ्कुरकोरकैः ॥ शुशुभे मेघसंकाशः खद्योतैरिव पर्वतः ॥ ५४ ॥
विमुक्तास्तस्य वेगेन मुक्त्वा पुष्पाणि ते द्रुमाः ॥ अवशीर्यन्त सलिले निवृत्ताः सुहृदो यथा ॥५५॥
लघुत्वेनोपपन्नं तद्विचित्रं सागरेऽपतत् ॥ द्रुमाणां विविधं पुष्पं कपिवायुसमीरितम् ॥ ५६ ॥
ताराचितमिवाकाशं प्रबभौ स महार्णवः ॥ ५७ ॥
पुष्पौघेणानुबद्धेन नानावर्णेन वानरः ॥ बभौ मेघ इवाकाशे विद्युद्गणविभूषितः ॥ ५८ ॥
तस्य वेगसमाधूतैः पुष्पैस्तोयमदृश्यत ॥ ताराभिरभिरामाभिरुदिताभिरिवाम्बरम् ॥ ५९ ॥
तस्याम्बरगतौ बाहू ददृशाते प्रसारितौ ॥ पर्वताग्राद्विनिष्क्रान्तौ पञ्चास्याविव पन्नगौ ॥ ६० ॥

आनयिष्यामि आनेष्यामि ॥ ४५—४७ ॥ तस्मिन् हनुमति । वेगात्समुत्पततिसति नगरोहिणः शैलरुहावृक्षाः । विटपान् संहृत्य आदाय समुत्पेतुरित्यर्थः ॥ ४८ ॥ संग्रहेणोक्तं विवृणोति—स मत्तेत्यादिना ॥ कोयष्टिभकः कोयष्टिः ॥ ४९—५० ॥ तमूरुवेगेति पाठः । ऊरुवेगेन उन्मथिताः सालाः सालवृक्षाः । अन्ये नगोत्तमाः अन्ये वृक्षश्रेष्ठाः । सैन्याः सेनायां समवेताः पुरुषाः । " सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते " इत्यमरः ॥ ५१—५२ ॥ सारवन्तः स्थिरांशवन्तः । " सारो बले स्थिरांशे च " इत्यमरः ॥ ५३ ॥ मेघसंकाशः स कपिरित्यन्वयः । खद्योतैः रात्राविति शेषः ॥ ५४ ॥ अवशीर्यन्त अवाशीर्यन्त । आगमशासनस्यानित्यत्वादडभावः । स्थितवन्त इत्यर्थः । निवृत्ताः बन्धूननुगम्य निवृत्ताः सुहृत्पक्षे सलिल इति सामीप्येसप्तमी । " ओदकान्तात्स्नग्घो बन्धुमनुव्रजेत् " इत्युक्तेः ॥ ५५ ॥ लघुत्वेनोपपन्नं लघुत्वेन युक्तं ॥ ५६ ॥ तारेत्यर्धमेकं वाक्यं ॥ ५७ ॥ अनुब-

हतत्वामोघत्वादिकंसूचितवान् ॥४३॥ **ति०** मत्ताःकोयष्टिभाःयेषुतान् । **स०** यद्वा कोयष्टिभिः भा शोभायस्यतत्कोयष्टिभं । तच्चततकं शिरःप्रदेशश्च । तेनसहितान् ॥ ४९ ॥ **रामानु०** तस्यवेगेनविमुक्ताःदूरगमनहेतुभूतवेगेनहेतुनाविमुक्ताःगतसंबन्धाः अवशीर्यन्त । आगमशासनस्यानित्यत्वादडभावः । पुष्पाणिमुक्त्वासलिलेअवशीर्यन्तेत्यनेनप्रस्थितेभ्यःसुहृज्जोनिवृत्तानामश्रुमोक्षणपूर्वंकंशोकसागरेनिमग्नानांसुहृदांसमाधिर्ध्वन्यते ॥ ५५ ॥ **रामानु०** हनुमन्तमनुद्गताःसारवन्तोवृक्षाःप्रथमंसागरेपतिताःअल्पसाराःततोप्यधिकंगत्वाजलेविशीर्णाइत्युक्त्वापुष्पाण्यप्यतिलघुत्ववत्तयामहद्दूरंगत्वापतितानीत्याह—लघुत्वेनेति ॥ ५६ ॥ **ति०** सर्ववर्णानां विद्युत्सुसत्त्वान्नानावर्णपुष्पोद्यानबद्धस्यसविद्युद्गणमेघोपमा ॥ ५८ ॥ **रामानु०** बाह्वोःपञ्चशाखत्वात्पञ्चास्यपन्नगदृष्टान्तः

[**पा०**] १ क. इत्येवमुक्त्वा. २ ख. वानरान्वानरर्षभः. ङ. वानरोवानरोत्तमः. ३ ङ.—ट. वेगात्तु. ख. वेगेन. क. वेगात्तुतास्मिंस्ते. ४ ठ. कोयष्टिमकान्. ५ ङ.—ट. ऊरुवेगोत्थिताः. ६ क. तदूरु. ७ क. नगादयः. ९ ख. ङ.—ट. व्यवशीर्यन्त. ९ घ. च. छ. ज. बान्धवायथा. १० क. तन्निवृत्तं. ११ ङ.—ट. पुष्पौघेणसुगन्धेन. १२ ख. नानागन्धेन. १३ क. घ.—ट. इवोद्यन्वै. १४ ख. ङ.—ट. समुद्भूतैः. १५ ङ. ञ. ट. ताराभिरिवरामाभिः.

पिबन्निव बभौ चापि सोर्मिजालं महार्णवम् ॥ पिपासुरिव चाकाशं ददृशे स महाकपिः ॥ ६१ ॥
तस्य विद्युत्प्रभाकारे वायुमार्गानुसारिणः ॥ नयने विप्रकाशेते पर्वतस्थाविवानलौ ॥ ६२ ॥
पिङ्गे पिङ्गाक्षमुख्यस्य बृहती परिमण्डले ॥ चक्षुषी संप्रकाशेते चन्द्रसूर्याविवोदितौ ॥ ६३ ॥
मुखं नासिकया तस्य ताम्रया ताम्रमाबभौ ॥ सन्ध्यया समभिस्पृष्टं यथा तत्सूर्यमण्डलम् ॥ ६४ ॥
लाङ्गूलं च समाविद्धं प्लवमानस्य शोभते ॥ अम्बरे वायुपुत्रस्य शक्रध्वज इवोच्छ्रितः ॥ ६५ ॥
लाङ्गूलचक्रेण महाञ्शुक्लदंष्ट्रोऽनिलात्मजः ॥ व्यरोचत महाप्राज्ञः परिवेषीव भास्करः ॥ ६६ ॥
स्फिग्देशेनाभिताम्रेण रराज स महाकपिः ॥ महता दारितेनेव गिरिर्गैरिकधातुना ॥ ६७ ॥
तस्य वानरसिंहस्य प्लवमानस्य सागरम् ॥ कक्षान्तरगतो वायुर्जीमूत इव गर्जति ॥ ६८ ॥
खे यथा निपतन्त्युल्का ह्युत्तरान्ताद्विनिस्सृता ॥ दृश्यते सानुबन्धा च तथा स कपिकुञ्जरः ॥६९॥
पतत्पतङ्गसंकाशो व्यायतः शुशुभे कपिः ॥ प्रवृद्ध इव मातङ्गः कक्ष्यया बध्यमानया ॥ ७० ॥
उपरिष्टाच्छरीरेण च्छायया चावगाढया ॥ सागरे मारुताविष्टा नौरिवासीत्तदा कपिः ॥ ७१ ॥
यंयं देशं समुद्रस्य जगाम स महाकपिः ॥ स तस्योरुवेगेन सोन्माद इव लक्ष्यते ॥ ७२ ॥
सागरस्योर्मिजालानामुरसा शैलवर्ष्मणाम् ॥ अभिघ्नंस्तु महावेगः प्लुप्लुवे स महाकपिः ॥ ७३ ॥
कपिवातश्च बलवान्मेघवातश्च निर्गतः ॥ सागरं भीमनिर्घोषं कम्पयामासतुर्भृशम् ॥ ७४ ॥
विकर्षन्नूर्मिजालानि बृहन्ति लवणाम्भसि ॥ प्लुप्लुवे कपिशार्दूलो विकिरन्निव रोदसी ॥ ७५ ॥

द्धेन व्याप्तेन ॥ ५८—६० ॥ अर्णवं पिबन्निव आकाशं पिपासुरिवेत्याभ्यामस्य महानुद्योगस्सूच्यते । लङ्घनवेगेन सहसा क्षीयमाणे सागरविस्तारे स पीयमान इव भवति एवमंबरं च । ततोतिवेगेन गच्छन्समहार्णवं पिबन्निव बभौ तथा आकाशमपीत्याहुः ॥ ६१—६२ ॥ पिङ्गे पिङ्गलवर्णे । पिङ्गाक्षाणां वानराणां मुख्यस्य । परिमण्डले मण्डलाकारे । चन्द्रसूर्याविव्यभूतोपमा ॥ ६३ ॥ तत्सूर्यमण्डलं सन्ध्यासूर्यमण्डलं ॥ ६४ ॥ समाविद्धं उन्नतीकृतं ॥ ६५—६६ ॥ स्फिग्देशेन वालमूलप्रदेशेन ॥ ६७ ॥ गर्जति अगर्जत् ॥ ६८ ॥ सानुबन्धा सपुच्छा । उल्का हि पुच्छयुक्ता निपतति ॥ ६९ ॥ पतङ्गः सूर्यः । व्यायतो दीर्घः । प्रवृद्ध इव दीर्घ इव । कक्ष्यायां बध्यमानायां हि मातङ्गो दीर्घो भवति ॥ ७० ॥ नौर्जलावगाढेनाधोभागेन व्योमावगाढेन चोर्ध्वभागेन गच्छति । अयं च उपरिगतशरीरेणाधोजलावगाढच्छायया चैकाकारस्सन् मारुतपूरितकटा नौरिवासीत् ॥ ७१ ॥ सोन्माद इव समुद्धर्षइव समुद्धतजल इत्यर्थः ॥ ७२ ॥ शैलवर्ष्मणां शैलतुल्यानां । " वर्ष्मदेहप्रमाणयोः " इति सज्जनः ॥ ७३—७४ ॥ विकिरन्निव विभजन्निव ।

॥ ६० ॥ **ति०** विवृतवक्त्रत्वात्पिबन्निवेति । अधोवक्त्रत्वेइयमुत्प्रेक्षा । ऊर्ध्ववक्त्रत्वेआकाशंपिपासुरिवेति । **ती०** अर्णवसमीपगमनवेलायामुदार्धिंपिबन्निवबभौ । उपरिगमनावस्थायामाकाशंपिपासुरिवदृदृशे ॥ ६१ ॥ **स०** कक्षान्तरगतःबाहुमूलमध्यगतः । ' बाहुमूलेऽभेकक्षौ ' इत्यमरः ॥ **ति०** जीमूतइतिसप्तम्यन्तमितिकतकः ॥ ६८ ॥ **रामानु०** उल्कापातोपमयारावणस्यभाव्यशुभंसूच्यते ॥ ६९ ॥ **रामानु०** कक्ष्या इभमध्यबन्धनं । ' कक्ष्याप्रकोष्ठेहर्म्यादेःकाक्ष्यांमध्येभबन्धने । ' इत्यमरः ॥ ७० ॥ **ती०** सोन्मादइव समुद्रःअपस्सारीवलक्ष्यते भ्रमणफेनजलोद्गमनघोषादिमत्त्वादियमुपमा ॥ ७२ ॥ **रामानु०** ऊर्मिजालानामित्यत्र ' नलोकाव्यय—'इतिषष्ठ्यानिषेधेपिरूपिप्रयोगात्साधुत्वं । उरसा । उरश्शब्देनोरोवेगजनितोवायुर्लक्ष्यते ॥ ७३ ॥ **स०**

[**पा०**] १ ख. श्रीमान्. २ क. ख. च. छ. ज. ञ. सोर्मिमालं. ३ घ. नयनेच. ४ च. छ. ज. चन्द्रसूर्याविवांबरे. क. घ. ङ. झ. ञ. ट. चन्द्रसूर्याविवस्थितौ. ५ ख. यथासूर्यस्यमण्डलं. ङ.—ट. तथास्यात्सूर्यमण्डलं. ६ घ. ङ. च. ज.—ट. ध्वज़मिवोच्छ्रितं. छ. ध्वजमिवोत्थितं. ख. ध्वजइवोत्थितः. ७ ङ.—ट. लाङ्गूलचक्रोहनुमान्. ८ क. ञ्शुक्लदंष्ट्रोमहाकपिः. ९ ङ. झ. नातिताम्रेण. १० क. यथातु. ११ क. घ.—ट. सतुतस्याङ्गवेगेन. १२ घ. च. ज. ञ. जालानिउरसा. ख. मालानामुरसा. १३ क. घ. च.—ञ. शैलवर्ष्मणा. १४ क. अभिघ्नन्सुमहावेगः. १५ ङ.—ट. निर्गतः. १६ ङ.—ट. भीमनिर्हादं. १७ क. हरिशार्दूलो.

मेरुमन्दरसंकाशानुद्धतान्स महार्णवे ॥ अतिक्रामन्महावेगस्तरङ्गान्गणयन्निव ॥ ७६ ॥
तस्य वेगसमुद्धूतं जलं सजलदं तदा ॥ अम्बरस्थं विभ्राज शारदाभ्रमिवाततम् ॥ ७७ ॥
तिमिनक्रझषाः कूर्मा दृश्यन्ते विवृतास्तदा ॥ वस्त्रापकर्षणेनेव शरीराणि शरीरिणाम् ॥ ७८ ॥
प्लवमानं समीक्ष्याथ भुजङ्गास्सागरालयाः ॥ व्योम्नि तं कपिशार्दूलं सुपर्ण इति मेनिरे ॥ ७९ ॥
दशयोजनविस्तीर्णा त्रिंशद्योजनमायता ॥ छाया वानरसिंहस्य जले चारुतराऽभवत् ॥ ८० ॥
श्वेताभ्रघनराजीव वायुपुत्रानुगामिनी ॥ तस्य सा शुशुभे छाया विततां लवणाम्भसि ॥ ८१ ॥
शुशुभे स महातेजा महाकायो महाकपिः ॥ वायुमार्गे निरालम्बे पक्षवानिव पर्वतः ॥ ८२ ॥
येनासौ याति बलवान्वेगेन कपिकुञ्जरः ॥ तेन मार्गेण सहसा द्रोणीकृत इवार्णवः ॥ ८३ ॥
आपाते पक्षिसंघानां पक्षिराज इव व्रजन् ॥ हनुमान्मेघजालानि प्रकर्षन्मारुतो यथा ॥ ८४ ॥
पाण्डुरारुणवर्णानि नीलमाञ्जिष्ठकानि च ॥ कपिनाकृष्यमाणानि महाभ्राणि चकाशिरे ॥ ८५ ॥
प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः ॥ प्रच्छन्नश्च प्रकाशश्च चन्द्रमा इव लक्ष्यते ॥ ८६ ॥
प्लवमानं तु तं दृष्ट्वा प्लवङ्गं त्वरितं तदा ॥ ववर्षुः पुष्पवर्षाणि देवगन्धर्वदानवाः ॥ ८७ ॥
ततापन हि तं सूर्यः प्लवन्तं वानरोत्तमम् ॥ सिषेवे च तदा वायू रामकार्यार्थसिद्धये ॥ ८८ ॥
ऋषयस्तुष्टुवुश्चैनं प्लवमानं विहायसा ॥ जगुश्च देवगन्धर्वाः प्रशंसन्तो महौजसम् ॥ ८९ ॥
नागाश्च तुष्टुवुर्यक्षा रक्षांसि विबुधाः खगाः ॥ प्रेक्ष्य सर्वे कपिवरं सहसा विगतक्लमम् ॥ ९० ॥

रोदसी द्यावापृथिव्यौ ॥ ७५ ॥ अतिक्रामत् अत्यक्रामत् ॥ ७६ ॥ तस्य हनुमतः । वेगेन ऊरुवातेन । समुद्धूतं समुत्थापितं । सजलदं जलं जलदो जलं चोद्धूतमित्यर्थः ॥ ७७ ॥ तिमयो महामत्स्याः नक्राः ग्राहाः झषाः मकराः । विवृताः जलविभेदेन प्रकाशिताः ॥ ७८—७९ ॥ दशयोजनविस्तीर्णेति । ननु त्रिंशद्योजनायतत्वे चतुर्थपदेपि लङ्काप्राप्तिः स्यात् मैनाकसंवादसुरसासंवादादिकं च विरुध्येत । नहि विम्बादधिकपरिणाहं संभवतीति न शङ्कनीयं । छायाशब्दो हि नात्र प्रतिविम्बपरः किन्त्वनातपपरः । प्रातरेव हि समुद्रतरणमुक्तं तदा तस्य छाया समुद्रे तथाप्रमाणा दृश्येतैव ॥ ८० ॥ अभ्रघनः अभ्रमूर्तिः ॥ ८१—८२ ॥ द्रोणी कटाहः ॥ ८३ ॥ आपाते मार्गे ॥ ८४—८७ ॥ रामकार्यं सीतान्वेषणं तदेवार्थः प्रयोजनं तस्य सिद्धये लाभाय तद्धेतुभूतहनुमच्छ्रमनिवर्तनायेत्यर्थः ॥ ८८—८९ ॥ रक्षांसि

मेरुमन्दरसंकाशानुत्थौल्यतारतम्येनतयोःसदृशान् । मेरुमन्दरइतिमहामेरोरवष्टंभपर्वतः । तत्सदृशान्वा ॥ ७६ ॥ **रामानु०** जलंसजलदमित्यनेनसमुद्धूतंजलंमेघमण्डलपर्यन्तमभूदित्यवगम्यते ॥ ७७ ॥ **ति०** छायाप्रमाणवर्णनेनतच्छरीरप्रमाणमपिवर्णितप्रायं । इयंमाध्याह्निकीच्छाया ॥८०॥ **ती०** श्वेताभ्रघनराजीव अत्रश्वेतशब्देनस्वच्छतोच्यते । घनशब्देनसान्द्रता । तथाचनिर्मलाभ्रसान्द्रपङ्क्तिरित्यर्थः ॥ **ति०** श्वेताभ्रघनराजीव श्वेताभ्रयुक्तमेघपङ्क्तिवत्तस्यच्छायाशुशुभे । शुक्लदंष्ट्रादिनानानावर्णत्वादुक्तोपमानिर्वाहः ॥ **स०** श्वेताभ्रघनराजीवशुभ्रमेघदीर्घपङ्क्तिरिव । छायाचसमुद्रेप्रतिफलितप्रतिविंबः । नातपाभावः । तेनशौक्ल्यं संगच्छते । " घनःसान्द्रेदृढेदीर्घे " " छायास्यादातपाभावेप्रतिविंबार्कयोषितोः " इत्युभयतोविश्वः ॥ ८१ ॥ **वि०** तस्य उपरीतिशेषः ॥ ८७ ॥ **स०** तत्रहनुमति । दानवाःसज्जनाः ॥ ८७ ॥ **रामानु०** सिषेवइत्यनेन पुत्रत्वेपिरामकार्यप्रवृत्तत्वात्पूज्यतैवद्योत्यते

[**पा०**] १ ङ. छ. झ. ट. नुद्धतान्सुमहार्णवे. २ क. घ. ङ. झ. ञ. ट. अत्यक्रामन्महा. ३ क. न्महावेगांस्तरङ्गान्. ४ क. ख. घ.—ट. समुद्भुष्टं. ५ ख. जलमध्येजलंतदा. ६ घ. ङ. छ. ज. ञ. ट. विवभ्राजे. ७ च. छ. विविधास्तदा. घ. विकृतास्तदा. ८ ङ. ज.—ट. क्रममाणं. ९ ङ. झ. ट. भुजगाःसागरंगमाः. क. च. छ. ज. भुजगाः. १० क. ङ.—ट. सुपर्णमिव. ११ ङ. झ. ट. जवे. १२ ज. वारिचरा. १३ ङ.—ट. पतिता. १४ घ. न्वेगवान्कपि. १५ ग. घ. च. आकाशे. १६ ङ.—ट. दृश्यते. १७ ग. घ. च.—ट. प्लवगं. १८ च. छ. ज. ञ. ववर्षुस्तस्यपुष्पाणि. झ. ट. ववर्षुस्तत्रपुष्पाणि. १९ क. ख. घ.—ट. वानरेश्वरं. २० ग. विहायसि. २१ ङ.—ट. वनौकसं. २२ क. ग. च. छ. ज. ञ. विविधाःखगाः. ङ. झ. ट. विविधानिच. २३ क. ख. ग. प्रेक्ष्याकाशे.

तस्मिन्प्लवगशार्दूले प्लवमाने हनूमति ॥ इक्ष्वाकुकुलमानार्थी चिन्तयामास सागरः ॥ ९१ ॥
साहाय्यं वानरेन्द्रस्य यदि नाहं हनूमतः ॥ करिष्यामि भविष्यामि सर्ववाच्यो विवक्षताम् ॥ ९२ ॥
अहमिक्ष्वाकुनाथेन [1]सगरेण विवर्धितः ॥ इक्ष्वाकुसचिवश्चायं [2]नावसीदितुमर्हति ॥ ९३ ॥
तथा मया विधातव्यं विश्रमेत यथा कपिः ॥ शेषं च मयि विश्रान्तस्सुखेनातिपतिष्यति [3]॥ ९४ ॥
इति कृत्वा मतिं साध्वीं समुद्रश्छन्नमम्भसि ॥ हिरण्यनाभं मैनाकमुवाच गिरिसत्तमम् ॥ ९५ ॥
त्वमिहासुरसंघानां पातालतलवासिनाम् ॥ देवराज्ञा गिरिश्रेष्ठ परिघस्सन्निवेशितः ॥ ९६ ॥
त्वमेषां [4]जातवीर्याणां पुनरेवोत्पतिष्यताम् ॥ पातालस्याप्रमेयस्य द्वारमावृत्य तिष्ठसि ॥ ९७ ॥
तिर्यगूर्ध्वमधश्चैव शक्तिस्ते शैल वर्धितुम् ॥ तस्मात्संचोदयामि [5]त्वामुत्तिष्ठ गिरिसत्तम ॥ ९८ ॥
स एष कपिशार्दूलस्त्वामुपर्येति वीर्यवान् ॥ हनूमान्रामकार्यार्थं भीमकर्मा खमाप्लुतः ॥ ९९ ॥
अस्य साह्यं मया कार्यमिक्ष्वाकु[6]कुलवर्तिनः ॥ [7]मम हीक्ष्वाकवः पूज्याः परं पूज्यतमास्तव ॥ १०० ॥
कुरु साचिव्यमस्माकं न नः कार्यमतिक्रमेत् ॥ [8]कर्तव्यमकृतं कार्यं सतां मन्युमुदीरयेत् ॥ १०१ ॥
सलिलादूर्ध्वमुत्तिष्ठ तिष्ठत्वेष कपिस्त्वयि ॥ अस्माकमतिथिश्चैव [9]पूज्यश्च प्लवतांवरः ॥ १०२ ॥
चामीकरमहानाभ देवगन्धर्वसेवित ॥ [10]हनुमांस्त्वयि विश्रान्तस्ततश्शेषं गमिष्यति ॥
स एष कपिशार्दूलस्त्वामुपर्येति वीर्यवान् ॥ १०३ ॥
काकुत्स्थस्यानृशंस्यं च मैथिल्याश्च विवासनम् ॥ श्रमं च प्लवगेन्द्रस्य समीक्ष्योत्थातुमर्हसि ॥ १०४ ॥

दिक्पालकरक्षस्सबन्धीनि ॥ ९० । मानार्थी बहुमानार्थी । स्वयं सागरत्वादिति भावः ॥ ९१ ॥ सर्ववाच्यः सर्वप्रकारेण निन्द्यः । विवक्षतां वक्तुमिच्छतां ॥ ९२—९४ ॥ हिरण्यनाभं हिरण्यशृङ्गं । नाभिशब्दो ह्यध्यक्षवाची । शृङ्गं च पर्वतस्याध्यक्षमेव । " नाभिरध्यक्षकस्तूर्योः " इति दर्पणः ॥ ९५ ॥ परिघः अर्गलं । " परिघो मुद्गरेऽर्गले " इति दर्पणः ॥ ९६ ॥ परिघत्वमेवाह त्वमेषामिति ॥ ९७ ॥ शक्तिः अस्तीति शेषः ॥ ९८—९९ ॥ इक्ष्वाकोः कुले वंशे वर्तते शुश्रूषत इति इक्ष्वाकुकुलवर्ती तस्य । पूज्यतमास्तव मत्संबन्धादिति भावः । यद्वा त्वदुपकारकवायुपुत्रमुद्दिश्य ॥ १०० ॥ कार्यं प्रयोजनं विश्रान्त्यादि । कर्तव्यं कार्यमकृतं सतां मन्युं कोपं उदीरयेत् प्रेरयेत् उत्पादयेत् ॥ १०१—१०२ ॥ चामीकरमहानाभ स्वर्णमयमहाशृङ्ग ॥ १०३ ॥ काकुत्स्थस्यानृशंस्यं रामस्य सीताविषयां दयां ॥१०४॥

॥ ८८ ॥ **ती०** सर्ववाच्यःसर्वनिन्दावाग्विषयः भविष्यामीत्यर्थः ॥ ९२ ॥ **ति०** सागरेणविवर्धितइत्युक्त्या कश्चिद्देशः सागरखातस्यापिएतत्संबद्धइतिज्ञायते ॥ ९३ ॥ **ती०** हिरण्यनाभं हिरण्यप्रधानं । हिरण्मयमित्यर्थः । ' नाभिःप्रधानेकस्तूर्यो ' इतिविश्वः । **स०** हिरण्यनाभं नाम्ना । मैनाकं मेनकाहिमवत्पर्वतभार्या । तत्पुत्रं ॥ ९५ ॥ **ती०** परिघःसंनिवेशितः आयुधविशेषत्वेनसंनिवेशितः । अनेन पक्षच्छेदभयात्समुद्रप्रवेशानन्तरं पातालस्थराक्षसनिरोधार्थं देवराजेनमैनाकःस्थापितइत्यवगम्यते ॥ **स०** देवराज्ञा देवराजेननिवेशितइवासि । देवराजभयात्क्षिप्तत्वात्तेनप्रक्षिप्तइत्युत्प्रेक्षा । अतो नोत्तरग्रन्थविरोधः ॥ ९६ ॥ **ति०** ज्ञातवीर्याणां देवराजेनेतिशेषः ॥ ९७ ॥ **ति०** शक्तिस्ते अस्तीतिशेषः । तस्मात्पिहितपातालमुखएवसन्वृद्धिशक्त्यावर्धमानस्सन्नूर्ध्वमुत्तिष्ठ ॥ ९८ ॥ **ति०** उपर्येति तवोपरिप्रदेशंप्राप्नोति । तस्माद्विश्रमायत्नमुत्तिष्ठेतिपूर्वेणान्वयः । एतदुत्तरं ' हनूमान्रामकार्यार्थंभीमकर्माखमाप्लुतः । श्रमंचप्लवगेन्द्रस्यसमीक्ष्योत्थातुमर्हसि ' इतिप्राचीनःपाङ्क्तःपाठः । अत्रखमाप्लुतइत्यनन्तरंकेचिच्छ्लोकाःप्रक्षिप्ताःपरैरितिकतकः ॥ ९९ ॥ **रामानु०** साहाय्यंसहायकर्म । सहकारित्वमितियावत् । ब्राह्मणादित्वात्ष्यञ् । ममइक्ष्वाकवःपूज्याहि ।

[**पा०**] १ झ. ट. सागरेण. २ ङ. झ. ट. तन्नार्हत्यवसादितुं. घ. नचार्हत्यवसादितुं. ३ ङ. ज.—ट. सुखीसोतितरिष्यति. च. सुखीसोतिगमिष्यति. घ. सुखेननिपतिष्यति. ४ ङ. झ. ट. सङ्ज्ञानंदेवराज्ञामहात्मना । पातालनिलयानांहिपरिघः संनिवेशितः. ५ ङ.—ट. ज्ञातवीर्याणां. ६ च. छ. ज. त्संबोधयामि. ७ क. ग. च. छ. ज. नगसत्तम. ख. त्वंनगोत्तम. ८ ङ. झ. ट. कार्यार्थी. ९ एतदादयः—'मैथिल्याश्चविवासनं' इत्येतदन्ताःपञ्चश्लोकाः झ. पुस्तकेनदृश्यन्ते. । ग. साहाय्यंतस्यकर्तव्यं. क. तस्यसाह्यं. १० क. वशवर्तिनः. ११ ञ. ममचेक्ष्वाकवः. ग. मयाहीक्ष्वाकवः. १२ छ. ज. कर्तव्यंनतुयत्कार्यं. ग घ. कर्तव्यंनकृतंकार्यं. १३ क. ग. मतिथिर्ह्येष. घ. मतिथिश्चैष. १४ क. हनूमांस्त्वेष.

हिरण्यनाभो मैनाको निशम्य लवणाम्भसः ॥ उत्पपात जलात्पूर्णं महाद्रुमलतायुतः ॥ १०५ ॥
स सागरजलं भित्त्वा बभूवाभ्युत्थितस्तदा ॥ यथा जलधरं भित्त्वा दीप्तरश्मिर्दिवाकरः ॥ १०६ ॥
स महात्मा मुहूर्तेन पर्वतस्सलिलावृतः ॥ दर्शयामास शृङ्गाणि सागरेण नियोजितः ॥ १०७ ॥
शातकुम्भनिभैश्शृङ्गैः सकिन्नरमहोरगैः ॥ आदित्योदयसंकाशैरालिखद्भिरिवाम्बरम् ॥ १०८ ॥
तप्तजाम्बूनदैश्शृङ्गैः पर्वतस्य समुत्थितैः ॥ आकाशं शस्त्रसंकाशमभवत्काञ्चनप्रभम् ॥ १०९ ॥
जातरूपमयैश्शृङ्गैर्भ्राजमानैः स्वयंप्रभैः ॥ आदित्यशतसंकाशस्सोभवद्गिरिसत्तमः ॥ ११० ॥
तमुत्थितमसङ्गेन हनुमानग्रतः स्थितम् ॥ मध्ये लवणतोयस्य विघ्नोऽयमिति निश्चितः ॥ १११ ॥
स तमुच्छ्रितमत्यर्थं महावेगो महाकपिः ॥ उरसा पातयामास जीमूतमिव मारुतः ॥ ११२ ॥
स तदा पातितस्तेन कपिना पर्वतोत्तमः ॥ बुद्ध्वा तस्य कपेर्वेगं जहर्ष च ननन्द च ॥ ११३ ॥
तमाकाशगतं वीरमाकाशे समुपस्थितः ॥ प्रीतो हृष्टमना वाक्यमब्रवीत्पर्वतः कपिम् ॥
मानुषं धारयन्रूपमात्मनश्शिखरे स्थितः ॥ ११४ ॥
दुष्करं कृतवान्कर्म त्वमिदं वानरोत्तम ॥ निपत्य मम शृङ्गेषु विश्रमस्व यथासुखम् ॥ ११५ ॥
राघवस्य कुले जातैरुदधिः परिवर्धितः ॥ स त्वां रामहिते युक्तं प्रत्यर्चयति सागरः ॥ ११६ ॥
कृते च प्रतिकर्तव्यमेष धर्मस्सनातनः ॥ सोयं तत्प्रतिकारार्थी त्वत्तः संमानमर्हति ॥ ११७ ॥
त्वन्निमित्तमनेनाहं बहुमानात्प्रचोदितः ॥ तिष्ठ त्वं कपिशार्दूल मयि विश्रम्य गम्यताम् ॥ ११८ ॥

निशम्य वचनमितिशेषः ॥ १०५—१०७ ॥ शातकुम्भनिभैः स्वर्णसदृशैः । आदित्योदयसंकाशैः आदित्योदयतुल्यैरित्यर्थः । शृङ्गैरुपलक्षितः शृङ्गाणि दर्शयामासेति योजना ॥ १०८ ॥ शस्त्रसंकाशं नीलमित्यर्थः । " शस्त्रमायुधलोहयोः " इतिविश्वः ॥ १०९—११० ॥ निश्चितः निश्चितवान् । कर्तरिनिष्ठा ॥ १११—११२ ॥ जहर्ष विसिष्मिये ॥ ११३ ॥ प्रीतः प्रीतिद्योतकव्यापारः ॥ ११४—११६ ॥ कृते उपकारे । त्वत्प्रतिकारार्थी त्वदातिथ्यकरणापेक्षी त्वत्तः संमाननमर्हतीति त्वया तत्कृतातिथ्यपरिग्रह एवास्य संमाननमित्यर्थः ॥ ११७ ॥ चोदनाप्रकारमाह योजनानामिति ॥ प्रक्रमतामिति प्रचोदित इति पूर्वे-

महद्धिहेतुत्वात् । तवपरंपूज्यतमाः सगरविवृद्धमदन्तःप्रवेशसुखावस्थानादिफलभोक्तृत्वादितिभावः ॥ १०० ॥ **रामानु०** जीमूतइवमारुतइत्यनेनअनायासेनपर्वतंपातितवानितिद्योत्यते ॥ ११२ ॥ **रामानु०** जहर्षचननन्दचेतिपदद्वयेनकायमनसोर्विकृतिरुच्यते । अस्यवेगेनग्लानिराहित्यंबुद्ध्वाहृष्टमनाबभूवेत्यर्थः । **ति०** सादितःअवसादितः अधःकृतइतियावत् । जहर्षचननादचेतिप्राचीनःपाठः । बलवैभवंदृष्ट्वाजहर्ष । स्वोत्थानप्रयोजनावेदनाय ननाद शब्दंकृतवान् । ननन्देतित्वाधुनिककल्पितःपाठः ॥ ११३ ॥ **रामानु०** प्रीतःसुखितः । हृष्टमनाः प्रसन्नमनाः ॥ ११४ ॥ **रामानु०** विश्रमस्वेति । श्रमिरात्मनेपदीकश्चिदस्ति । तथाचोक्तंभट्टमल्लेन— " विश्राम्यतीतिविश्रान्तौकश्चिद्विश्रमतेपिच " इति ॥ ११५ ॥ **रामानु०** त्वन्निमित्तमित्यादिश्लोकद्वयमेकंवाक्यं । एषकपिःयोजनानांशतंचापिसमाप्लुतःसमापतितुमुपक्रान्तः । तवसानुषुविश्रान्तःशेषं मार्गशेषंप्रक्रमतामितित्वन्निमित्तंअहमनेनसागरेणबहुमानात्प्रचोदितः । अतःकपिशार्दूल त्वंतिष्ठ । मयिविश्रम्यगम्यतामित्यन्वयः ।

[पा०] १ ङ. झ. ट. हिरण्यगर्भो. क. हिरण्यनाभस्तद्वाक्यंनिशम्य. २ क. उत्पपाताथवेगेनजलाद्रुम. ३ ङ. झ. ट. लतावृतः. ४ ग. च. छ. ज. ञ. सागरस्यजलं. ५ ङ. झ. ट. बभूवात्युच्छ्रितस्तदा. क. बभूवावस्थितस्तदा. ६ ख. घ.—ट. शातकुंभमयैः. ७ ङ. झ. ञ. ट. संकाशैरुल्लिखद्भिः. ८ क.—ट. तप्तजांबूनदैः. ९ क. च. समुच्छ्रितैः. १० ङ. झ. ञ. ट. महाप्रभैः. ख. खलंकृतैः. ११ झ. तमुत्थितं. १२ घ. च. छ. तथासादितस्तेन. ङ. झ. ञ. ट. तदासादितस्तेन. क. ख. ग. तथापातितः. १३ ज. बुद्ध्वास्यसुमहावेगं. १४ च. छ. महावेगं. ङ. झ. ञ. ट. हरेर्वेगं. १५ क. ग. ङ. झ. ञ. ट. ननादच. १६ च. छ. ज. समवस्थितं. ख. ग. घ. समवस्थितः. क. समुपस्थितं. १७ ग. प्रीतिहृष्टमनाः. १८ च. छ. ज. वाक्यं पर्वतःकपिमब्रवीत्. १९ ट. दुष्कृतं. २० क. वानरर्षभ. २१ ङ. झ. ट. सुखंविश्रम्यगम्यतां. २२ ग. रामहितार्थाय. २३ घ. युक्तमभ्यर्चयति. २४ क.—ज. ञ. हरिशार्दूल. २५ क. विश्रम्यमयि.

योजनानां शतं चापि कपिरेष समाप्लुतः ॥ तव सानुषु विश्रान्तश्शेषं प्रक्रमतामिति ॥ ११९ ॥
तदिदं गन्धवत्स्वादु कन्दमूलफलं बहु ॥ तदास्वाद्य हरिश्रेष्ठ विश्रान्तोनुगमिष्यसि ॥ १२० ॥
अस्माकमपि संबन्धः कपिमुख्य त्वयाऽस्ति वै ॥ प्रख्यातस्त्रिषु लोकेषु महागुणपरिग्रहः ॥ १२१ ॥
वेगवन्तः प्लवन्तो ये प्लवगा मारुतात्मज ॥ तेषां मुख्यतमं मन्ये त्वामहं कपिकुञ्जर ॥ १२२ ॥
अतिथिः किल पूजार्हः प्राकृतोपि विजानता ॥ धर्मं जिज्ञासमानेन किं पुनस्त्वादृशो महान्१२३
त्वं हि देववरिष्ठस्य मारुतस्य महात्मनः ॥ पुत्रस्तस्यैव वेगेन सदृशः कपिकुञ्जर ॥ १२४ ॥
पूजिते त्वयि धर्मज्ञ पूजां प्राप्नोति मारुतः ॥ तस्मात्त्वं पूजनीयो मे शृणु चाप्यत्र कारणम् ॥१२५॥
पूर्वं कृतयुगे तात पर्वताः पक्षिणोऽभवन् ॥ ते हि जग्मुर्दिशः सर्वा गरुडानिलवेगिनः ॥१२६॥
ततस्तेषु प्रयातेषु देवसङ्घाः सहर्षिभिः ॥ भूतानि च भयं जग्मुस्तेषां पतनशङ्कया ॥ १२७ ॥
ततः क्रुद्धः सहस्राक्षः पर्वतानां शतक्रतुः ॥ पक्षांश्चिच्छेद वज्रेण तत्र तत्र सहस्रशः ॥ १२८ ॥
स मामुपगतः क्रुद्धो वज्रमुद्यम्य देवराट् ॥ ततोऽहं सहसा क्षिप्तः श्वसनेन महात्मना ॥ १२९ ॥
अस्मिंल्लवणतोये च प्रक्षिप्तः प्लवगोत्तम ॥ गुप्तपक्षसमग्रश्च तव पित्राऽभिरक्षितः ॥ १३० ॥
ततोऽहं मानयामि त्वां मान्यो हि मम मारुतः ॥ त्वया मे ह्येष संबन्धः कपिमुख्य महागुणः ॥१३१॥
तस्मिन्नेवंगते कार्ये सागरस्य ममैव च ॥ प्रीतिं प्रीतमनाः कर्तुं त्वमर्हसि महाकपे ॥ १३२ ॥
श्रमं मोक्षय पूजां च गृहाण कपिसत्तम ॥ प्रीतिं च बहु मन्यस्व प्रीतोस्मि तव दर्शनात् ॥१३३॥
एवमुक्तः कपिश्रेष्ठस्तं नगोत्तममब्रवीत् ॥ प्रीतोस्मि कृतमातिथ्यं मन्युरेषोपनीयताम् ॥ १३४ ॥
त्वरते कार्यकालो मे अहश्चाप्यतिवर्तते ॥ प्रतिज्ञा च मया दत्ता न स्थातव्यमिहान्तरे ॥ १३५ ॥

णान्वयः ॥ ११८—११९ ॥ तत् प्रसिद्धं । कन्दः करहाटः । मूलं पादः । तत् तस्मात् ॥ १२० ॥ प्रख्यात इति संबन्धविशेषणं । महागुणानां परिग्रहो यस्मिन्स तथा ॥ १२१—१२५ ॥ संबन्धं विवृणोति पूर्वमित्यादिना ॥ पक्षिणः पक्षवन्तः । हिः पादपूरणे ॥ १२६—१२९ ॥ समग्रः समग्रपक्षः । गुप्तसमग्रपक्षश्च यथा भवामि तथा अभिरक्षितोस्मीत्यर्थः ॥ १३०—१३३ ॥ कृतमातिथ्यं तव दर्शनादिनेति भावः । मन्युः कोपः । मत्कृता पूजानगृहीतेति कोपो निरस्यतामित्यर्थः ॥ १३४ ॥ कार्यकालः त्वरते शीघ्रं गच्छेति मां प्रेरयति । अहश्चाप्यतिवर्तते अत्र विलम्बःक्रियते चेदिदमहोतिवर्तत इत्यर्थः । इह समुद्रे ।

॥ ११८—११९ ॥ **रामानु०** हनुमतःपूज्यतमत्वेहेलन्तरंदर्शयति—अस्माकमपीति । संबन्धः अतिथ्यतिथिमद्भावलक्षणः । महागुणपरिग्रहः परिगृह्यतइतिपरिग्रहः । महागुणानांसतांपरिग्रहःमहागुणपरिग्रहः ॥ **ती०** महागुणपरिग्रहःमहागुणेनवायुनापरिगृह्यतइतितथा ॥ १२१ ॥ **रामानु०** किंचातिथेस्तवपूजायांकाम्यार्थसिद्धिवद्वायोरपिप्रत्युपकारसिद्धिःस्यादित्याह—लंघीत्यादिना ॥ १२४ ॥ **रामानु०** मोक्षय मुञ्च । 'मोक्षनिरसने' इतिचौरादिकोधातुः ॥ **ति०** मान्यस्य वायुसंबन्धात्तवपूज्यस्यममप्रीतिं कुर्वितिशेषः ॥ १३३ ॥ **ती०** मन्युःपूजानङ्गीकारनिबन्धनदैन्यं ॥ १३४ ॥ **रामानु०** कार्यकालइति । कार्यःकरणयो-

[पा०] १ च. छ. ज. ञ. वापि. २ ङ. झ. ट. खमाप्लुतः. ३ च. छ. ज. ञ. तवसानुनि. ४ ङ. छ. ज. ञ. विक्रमतामिति. ५ ङ. झ. ञ. ट. विश्रान्तोथगमिष्यति. क. ग. विश्रान्तोनूत्पतिष्यति. ६ ख. घ. ञ. ट. प्लवङ्गाः. ७ ग. तेषु. ८ छ. ज. विधानतः. ९ ङ.—ज. पुत्रस्त्वंतस्य. ख. पुत्रस्तस्यच. १० ङ.—ट. धर्मज्ञे. ११ ख.—ट. तेपि. १२ क. ङ. झ. ञ. ट. गरुडाइववेगिनः. १३ ङ.—ज. ञ. सहस्रशः. ख. महर्षिभिः. ग. सुरर्षिभिः. १४ च. छ. ज. ञ. क्षणायवै. १५ घ.—ट. ततःशतसहस्रशः. ग. शतशश्चसहस्रशः. १६ क. घ. झ. मामुपागतः. १७ क. च.—झ. गुप्तपक्षःसमग्रश्च. १८ ङ. झ. ट. मान्योसिममामरुते. १९ ग. ङ. झ. ञ. ट. ममैष. २० क.—ट. अस्मिन्नेवं. २१ क.—घ. च. छ. ज. ममैवहि. २२ ख. ग. च. छ. ज. कर्तुमर्हसिलं. २३ ङ. झ. ञ. ट. महामते. २४ क. पूजांलं. २५ ङ. ञ. ट. हरिसत्तम. घ. कपिकुञ्जर. २६ ङ. झ. ट. ममामान्यस्य. २७ घ. ङ. झ. ञ. ट. मिहान्तरा.

इत्युक्त्वा पाणिना शैलमालभ्य हरिपुङ्गवः ॥ जगामाकाशमाविश्य वीर्यवान्प्रहसन्निव ॥ १३६ ॥
स पर्वतसमुद्राभ्यां बहुमानादवेक्षितः ॥ पूजितश्चोपपन्नाभिराशीर्भिरनिलात्मजः ॥ १३७ ॥
अथोर्ध्वं दूरमुत्पत्य हित्वा शैलमहार्णवौ ॥ पितुः पन्थानमास्थाय जगाम विमलेऽम्बरे ॥ १३८ ॥
भूयश्चोर्ध्वगतिं प्राप्य गिरिं तमवलोकयन् ॥ वायुसूनुर्निरालम्बे जगाम विमलेऽम्बरे ॥ १३९ ॥
तद्द्वितीयं हनुमतो दृष्ट्वा कर्म सुदुष्करम् ॥ प्रशशंसुः सुराः सर्वे सिद्धाश्च परमर्षयः ॥ १४० ॥
देवताश्चाभवन्हृष्टास्तत्रस्थास्तस्य कर्मणा ॥ काञ्चनस्य सुनाभस्य सहस्राक्षश्च वासवः ॥ १४१ ॥
उवाच वचनं धीमान्परितोषात्सगद्गदम् ॥ सुनाभं पर्वतश्रेष्ठं स्वयमेव शचीपतिः ॥ १४२ ॥
हिरण्यनाभ शैलेन्द्र परितुष्टोस्मि ते भृशम् ॥ अभयं ते प्रयच्छामि तिष्ठ सौम्य यथासुखम् ॥१४३॥
साह्यं कृतं ते सुमहद्विक्रान्तस्य हनूमतः ॥ क्रमतो योजनशतं निर्भयस्य भये सति ॥ १४४ ॥
रामस्यैष हि दूत्येन याति दाशरथेर्हरिः ॥ सत्क्रियां कुर्वता तस्य तोषितोसि दृढं त्वया ॥१४५॥
ततः प्रहर्षमगमद्विपुलं पर्वतोत्तमः ॥ देवतानां पतिं दृष्ट्वा परितुष्टं शतक्रतुम् ॥ १४६ ॥
स वै दत्तवरः शैलो बभूवावस्थितस्तदा ॥ हनुमांश्च मुहूर्तेन व्यतिचक्राम सागरम् ॥ १४७ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ [तं प्रयान्तं समुद्वीक्ष्य ह्याकाशे मारुतात्मजम् ॥]
अब्रुवन्सूर्यसंकाशां सुरसां नागमातरम् ॥ १४८ ॥
अयं वातात्मजः श्रीमान्प्लवते सागरोपरि ॥ हनुमान्नाम तस्य त्वं मुहूर्तं विघ्नमाचर ॥ १४९ ॥
राक्षसं रूपमास्थाय सुघोरं पर्वतोपमम् ॥ दंष्ट्राकरालं पिङ्गाक्षं वक्त्रं कृत्वा नभस्समम् ॥ १५० ॥

अन्तरे मध्ये । मया नस्थातव्यमिति वानरसन्निधौ प्रतिज्ञा कृता ॥ १३५ ॥ प्रहसन्निव प्रसन्नमुख इवेत्यर्थः ॥ १३६—१३७ ॥ हित्वा शैलमहार्णवौ मूर्तिमन्तौ तौ हित्वेत्यर्थः । अनेन शैलवत्समुद्रोपि मूर्तिमत्तया तत्राद्दश्यतेति सूचितं ॥ १३८—१३९ ॥ द्वितीयं समुद्रलङ्घनापेक्षया द्वितीयं तत्पर्वतजयरूपंकर्म ॥ १४०—१४३ ॥ भये सति समुद्रलङ्घनेस्य किं भवि-

---

ष्यः कालः कार्यकालः । त्वरतेत्वरयति । अहश्चाप्यतिवर्ततेतिलङ्बाद्वीपप्रवेशयोग्यमहश्चातिवर्तते । प्रतिज्ञाचेति—' यथाराघवनिर्मुक्तः शरःश्वसनविक्रमः । गच्छेत्तद्वद्भिष्यामिलङ्कांरावणपालिताम् ' इतिप्रतिज्ञादत्ता । तस्मादिहान्तरेनस्थातव्यं ॥ १३५ ॥ **ति०** प्रहसन्निवेति । एतावत्प्लवनेपिश्रममारोप्यवृथायंप्रयासएतयोरितिप्रहासः ॥ **रामानु०** आलभ्यस्पृष्ट्वा । प्रहसन्निवेत्यत्रेवशब्दोहासप्रकर्षस्यपारमार्थ्यपरःप्रीतिसूचकः । मन्दस्मितंकुर्वन्नित्यर्थः ॥ १३६ ॥ **ति०** भूयऊर्ध्वंततोपिबहूर्ध्वंतंगिरिंअधःप्रदेशवर्तिनमवलोकयन् ॥ १३९ ॥ **रामानु०** साह्यंसहायकर्मसहकारिलमितियावत् । तेत्वयानिर्भयस्यभयेसतिअतिविस्तृतसमुद्रोपर्याकाशगमनेसमुद्रपतनादिभयनिमित्तसंभावनायामपिनिर्भयस्य ॥१४४॥ **रामानु०** बभूवावस्थितस्तदा तस्मिन्कालेस्वस्थोभूदित्यर्थः । प्रतिप्रयाणवेलायापि ' पर्वतेन्द्रंसुनाभंचसमुपस्पृश्यवीर्यवान् ' इतिमैनाकावस्थानाभिधानात् । सागरं मैनाकाधिष्ठितसागरप्रदेशं ॥ १४७ ॥ **रामानु०** श्रीमान्अत्रश्रीशब्देनातिदूरसमुद्रलङ्घनेप्युपर्युपरिबलाभिवृद्धिप्रयुक्तासुषमोच्यते ॥१४९॥ **स०** रक्षसामयंराक्षसस्तं । करालंक्रूरं । पिङ्गलवर्णयुक्तेअक्षिणीयस्यतं । वक्त्रं मुखं । अर्धर्चादिनिविष्टइतिवक्त्रशब्दःपुंल्लिङ्गः । अतोनभस्स्पृशमित्युपपन्नं । अतएवार्धर्चादिगणोक्तप्रपञ्चनपरे ' वक्त्रनेत्रारण्यगाण्डीवानिनपुंसकेच ' इतिलिङ्गानुशासने चशब्देनपुंल्लिङ्गत्वमप्यनुशिष्टं ।

[**पा०**] १ ख. श्चोपहाराभिः. २ घ. ङ. झ. ञ. ट. रभिनन्दितः. ३ च. छ. ज. अतऊर्ध्वंसमुत्पत्य. ग. ङ. झ. ञ. ट. अथोर्ध्वंदूरमाप्लुत्य. क. ख. अथोर्ध्वंदूरमुत्प्लुत्य. ४ ख. ङ—ट. मासाद्य. ५ ख. ग. घ. ततश्चोर्ध्वंगतिं. झ. ततश्चोर्ध्वंगतिं. ६ ङ.—ट. वायुसूनुर्निरालंबो. ख. वायुपुत्रोनिरालंबो. ७ घ. ङ. झ. ट. कपिकुञ्जरः. ८ च. ज. कर्मणि. ९ घ. प्रदास्यामि. १० झ. ञ. ट. गच्छसौम्य. ११ ग. ङ. झ. द्विश्रान्तस्य. १२ क. च. छ. ज. रामस्यैव. १३ ङ. झ. ञ. ट. हितायैव. १४ ङ. झ. ञ. ट. दाशरथेःकपिः. १५ क. ग.—ट. शक्त्या. १६ ङ. झ. ट. सतत्प्रहर्ष. १७ क. ख. छ.—ट. मलभत्. १८ ञ. पर्वतोभृशं. १९ इदमर्धं च. छ. ज. पाठेषुदृश्यते. २० घ. अब्रुवन्देवसंकाशां. २१ ग.—झ. ट. नभस्स्पृशं. ञ. दिवस्पृशं.

बलमिच्छामहे ज्ञातुं भूयश्चास्य पराक्रमम् ॥ त्वां विजेष्यत्युपायेन विषादं वा गमिष्यति ॥ १५१ ॥
एवमुक्ता तु सा देवी दैवतैरभिसत्कृता ॥ समुद्रमध्ये सुरसा बिभ्रती राक्षसं वपुः ॥ १५२ ॥
विकृतं च विरूपं च सर्वस्य च भयावहम् ॥ प्लवमानं हनूमन्तमावृत्येदमुवाच ह ॥ १५३ ॥
मम भक्ष्यः प्रदिष्टस्त्वमीश्वरैर्वानरर्षभ ॥ अहं त्वां भक्षयिष्यामि प्रविशेदं ममाननम् ॥ १५४ ॥
[वरं एष पुरा दत्तो मम धात्रेति सत्वरा ॥ व्यादाय वक्त्रं विपुलं स्थिता सा मारुतेः पुरः]॥१५५॥
एवमुक्तः सुरसया प्राञ्जलिर्वानरर्षभः ॥ प्रहृष्टवदनः श्रीमानिदं वचनमब्रवीत् ॥ १५६ ॥
रामो दाशरथिर्नाम प्रविष्टो दण्डकावनम् ॥ लक्ष्मणेन सह भ्रात्रा वैदेह्या चापि भार्यया ॥१५७॥
अन्यकार्यविपक्तस्य बद्धवैरस्य राक्षसैः ॥ तस्य सीता हृता भार्या रावणेन यशस्विनी ॥ १५८ ॥
तस्याः सकाशं दूतोऽहं गमिष्ये रामशासनात् ॥ कर्तुमर्हसि रामस्य साह्यं विषयवासिनी ॥ १५९ ॥
अथवा मैथिलीं दृष्ट्वा रामं चाक्लिष्टकारिणम् ॥ आगमिष्यामि ते वक्त्रं सत्यं प्रतिशृणोमि ते ॥१६०॥
एवमुक्ता हनुमता सुरसा कामरूपिणी ॥ अब्रवीन्नातिवर्तेन्मां कश्चिदेष वरो मम ॥ १६१ ॥
तं प्रयान्तं समुद्वीक्ष्य सुरसा वाक्यमब्रवीत् ॥ बलं जिज्ञासमाना वै नागमाता हनूमतः ॥ १६२ ॥

ष्यतीत्यस्माकं भये सतीत्यर्थः ॥ १४४–१५७ ॥ अन्यत्कार्यविषक्तस्य मारीचमृगग्रहणव्यासक्तस्य ॥ १५८ ॥ विषयवासिनी रामराज्यवासिनी ॥ १५९—१६० ॥ नातिवर्तेन्मां ममाननमप्रविश्य न गच्छेत् । अतिवर्तेदित्यत्र परस्मैपदमार्षं । अत्र इतिकरणं द्रष्टव्यं । " अब्रवीन्नातिवर्तेन्मां कश्चिदेष वरो मम " इत्यस्यानन्तरं " तद्दृष्ट्वा व्यादितं वक्त्रं वायुपुत्रः सुबुद्धिमान् " इत्यादिश्लोकाद्रष्टव्याः । मध्ये तं प्रयान्तमित्यादयः केचन श्लोकाः प्रक्षिप्ताः असङ्गताश्च । शतयोजनायतत्वे वानरैर्लङ्कावासिभिश्च ज्ञातः स्यादिति विरोधात् । त इमे प्रक्षिप्तश्लोकाः ॥ " तं प्रयान्तं समुद्वीक्ष्य सुरसा वाक्यमब्रवीत् । बलं जिज्ञासमाना वै नागमाता हनूमतः ॥ प्रविश्य वदनं मेद्य गन्तव्यं वानरोत्तम । वर एष पुरा दत्तो मम धात्रेति सत्वरा ॥ व्यादाय विपुलं वक्त्रं स्थिता सा मारुतेः पुरः । एवमुक्तः सुरसया क्रुद्धो वानरपुङ्गवः ॥ अब्रवीत्कुरु वै वक्त्रं येन मां विषहिष्यसे । इत्युक्त्वा सुरसां क्रुद्धो दशयोजनमायतः ॥ दशयोजनविस्तारो बभूव हनुमांस्तदा । तं दृष्ट्वा मेघसंकाशं दशयोजनमायतम् ॥ चकार सुरसा चास्यं विंशद्योजनमायतम् । हनूमांस्तु ततः क्रुद्धस्त्रिंशद्योजनमायतः ॥ चकार सुरसा वक्त्रं चत्वारिंशत्तथोच्छ्रितम् । बभूव हनुमान्वीरः पञ्चाशद्योजनोच्छ्रितः ॥ चकार सुरसा वक्त्रं षष्टियोजनमायतम् । तथैव हनुमान्वीरस्सप्ततीयोजनोच्छ्रितः ॥ चकार सुरसा वक्त्रमशीतीयोजनोच्छ्रितम् । हनुमानचलप्रख्यो नवतीयोजनोच्छ्रितः ॥ चकार सुरसा वक्त्रं शतयोजनमायतं" इति । प्रकृतं विलिख्यते— तद्दृष्ट्वा व्यादितं त्वास्यं वायुपुत्रः सुबुद्धिमान् । सुसं-

---

अथवा ' यथावाचानिशादिशा' इत्यादिवत्स्पृक्छब्दस्यहलन्तत्वाट्टाबन्तताआश्रित्यनभसःस्पृशायस्यतदिति ॥१५०॥ ति० बलंज्ञानबलमुपायबलंच । पराक्रमंचज्ञातुमिच्छामहे । तदेवविवृणोति—त्वामितिभयस्यचभयावहमितिपाठेसर्वलोकभयस्यापीत्यर्थः ॥ स० बलंशारीरं । मैनाकाविश्रमेणैवज्ञातत्वाद्भूयइत्युक्तं । इच्छामहेइच्छामः । केनचिदुपायेनत्वांविजेष्यतिवाकिंवाविषादंदैन्यंगमिष्यतीतिविचारयामः । यद्वाबलं तुभ्यमस्मद्दत्तवरबलं अस्यहनुमतःपराक्रमंचज्ञातुमिच्छामः । यद्युपायेनत्वांविजेष्यतितर्हितत्पराक्रमोविज्ञातः । यदिविषादंगमिष्यतितदास्मद्वरबलंविज्ञातंभवेदिति ॥ १५१ ॥ शि० अन्यकार्यविषक्तस्यदेवादिकार्यसाधनासक्तस्य ॥ १५८ ॥ ती० विषयवासिनि रामराज्यवासिनि । त्रैलोक्यनाथत्वाद्रामस्येतिभावः ॥ १५९ ॥

[पा०] १ ख. दैवतैश्चापि. घ. देवैस्तैरभि. च. छ. ज. देवैरपिच. २ क. सहसा. ३ क. प्रविशस्व. ४ ग. ङ.—ट. पाठेष्वयंश्लोकोदृश्यते. ५ ग. छ. ज. ञ. प्राञ्जलिःपवनात्मजः. ६ ख. श्रीमान्सुरसांवाक्यमब्रवीत्. ७ क. ख. दाशरथिः श्रीमान्. ८ च. छ. ज. ञ. सीतया. ९ चैव. ट. सह. १० ङ.—ञ. अस्यकार्यं. ११ ग. ततःसीता. घ. तस्यभार्याहृतादेवी. १२ क. तपस्विनी. १३ ग. न्नातिवर्तेथाः. च. छ. ज. न्नातिवर्तेत. १४ ङ.—ट. मानासा.

प्रविश्य वदनं मेऽद्य गन्तव्यं वानरोत्तम ॥ वर एष पुरा दत्तो मम धात्रेति सत्वरा ॥
व्यादाय वक्त्रं विपुलं स्थिता सा मारुतेः पुरः ॥ १६३ ॥
एवमुक्तः सुरसया क्रुद्धो वानरपुङ्गवः ॥ अब्रवीत्कुरु वै वक्त्रं येन मां विषहिष्यसे ॥ १६४ ॥
इत्युक्त्वा सुरसां क्रुद्धो दशयोजनमायतः ॥ दशयोजनविस्तारो बभूव हनुमांस्तदा ॥ १६५ ॥
तं दृष्ट्वा मेघसंकाशं दशयोजनमायतम् ॥ चकार सुरसा चास्यं विंशद्योजनमायतम् ॥ १६६ ॥
तां दृष्ट्वा विस्तृतास्यां तु वायुपुत्रः सुबुद्धिमान् ॥ हनूमांस्तु ततः क्रुद्धस्त्रिंशद्योजनमायतः ॥१६७॥
चकार सुरसा वक्त्रं चत्वारिंशत्तथोच्छ्रितम् ॥ बभूव हनुमान्वीरः पञ्चाशद्योजनोच्छ्रितः ॥ १६८ ॥
चकार सुरसा वक्त्रं षष्टियोजनमायतम् ॥ तथैव हनुमान्वीरः सप्ततीयोजनोच्छ्रितः ॥ १६९ ॥
चकार सुरसा वक्त्रमशीतीयोजनायतम् ॥ हनुमानचलप्रख्यो नवतीयोजनोच्छ्रितः ॥ १७० ॥
चकार सुरसा वक्त्रं शतयोजनमायतम् ॥ १७१ ॥
तदृष्ट्वा व्यादितं त्वास्यं वायुपुत्रः सुबुद्धिमान् ॥ दीर्घजिह्वं सुरसया सुघोरं नरकोपमम् ॥
संसंक्षिप्यात्मनः कायं बभूवाङ्गुष्ठमात्रकः ॥ १७२ ॥
सोभिपत्याशु तद्वक्त्रं निष्पत्य च महाजवः ॥ अन्तरिक्षे स्थितः श्रीमानिदं वचनमब्रवीत् ॥१७३॥
प्रविष्टोस्मि हि ते वक्त्रं दाक्षायणि नमोस्तु ते ॥ गमिष्ये यत्र वैदेही सत्यश्चासीद्वरस्तव ॥ १७४ ॥
तं दृष्ट्वा वदनान्मुक्तं चन्द्रं राहुमुखादिव ॥ अब्रवीत्सुरसा देवी स्वेन रूपेण वानरम् ॥ १७५ ॥
अर्थसिद्ध्यै हरिश्रेष्ठ गच्छ सौम्य यथासुखम् ॥ समानयस्व वैदेहीं राघवेण महात्मना ॥ १७६ ॥
तत्तृतीयं हनुमतो दृष्ट्वा कर्म सुदुष्करम् ॥ साधुसाध्विति भूतानि प्रशशंसुस्तदा हरिम् ॥ १७७ ॥
स सागरमनाधृष्यमभ्येत्य वरुणालयम् ॥ जगामाकाशमाविश्य वेगेन गरुडोपमः ॥ १७८ ॥
सेविते वारिधाराभिः पतगैश्च निषेविते ॥ चरिते कैशिकाचार्यैरैरावतनिषेविते ॥ १७९ ॥

क्षिप्यात्मनः कायं बभूवाङ्गुष्ठमात्रकः ॥१६१–१७३॥ | दक्षस्यापत्यं दाक्षायणी । तत्त्वं च पूर्वं वरप्रदा-

ति० विंशद्योजनमायतमित्यनन्तरं 'तदृष्ट्वाव्यादितंत्वास्यं' इतिप्राचीनःपाठः । 'तांदृष्ट्वा' इत्यादयः 'शतयोजनमायतं' इत्यन्ताःश्लोकास्तुप्रक्षिप्ताइतिकतकः ॥ १६६ ॥ **रामानु०** व्यादितं व्यात्तं । इङागमस्त्वार्षः । अतिविस्तृतंवक्त्रंसूक्ष्मरूपेणप्रविश्याक्लेशेन । निर्गन्तुमयंसमीचीनःसमयइति ज्ञानयोगात्सुबुद्धिमानिति विशेषणं ॥ १७२ ॥ **रामानु०** दाक्षायणीत्यनुवादात्स्ववरप्रदानकथनसमये हनुमन्तमुद्दिश्यस्वकीयंदाक्षायणीत्वमपितयैवकथितमित्यवगन्तव्यं । सत्यंचासीद्वरंतव त्वदास्यप्रविश्यनिर्गमनाद्ब्रह्मणादत्तोवरःसत्यआसीदित्यर्थः । वरशब्दस्य नपुंसकत्वमार्षं ॥ १७४ ॥ **रामानु०** समानयस्व संगमय ॥ १७६ ॥ **रामानु०** कैशिकंरागविशेषः तदाचार्यैः तुंबुरुप्रभृतिभिरित्यर्थः । ऐरावतनिषेविते ऐरावतमितिऋजुदीर्घमिन्द्रधनुरुच्यते । तेननिषेवितेयुक्ते । 'इन्द्रायुधंत्विन्द्रधनुस्त्वदीर्घमृजुरोहितम् । ऐरावतंचविद्युत्तुचञ्चलाचपला' इतिवैजयन्ती ॥ १७९ ॥

[पा०] १ ङ. झ. ट. निविश्य. २ घ.—ट. विपुलंवक्त्रं. ३ घ. ङ. झ. ञ. ट. विषहिष्यसि. ४ ङ. झ. ञ. ट. दशयोजनमायतां. घ. पञ्चयोजनमायतः. ५ ङ. झ. ञ. ट. हनूमानभवत्तदा. ६ इदमर्धं. झ. पाठेनदृश्यते. ७ च. छ. ज. गिरिसंकाशं. ८ क. ख. ङ.—ज. ट. सुरसाप्यास्यं. ९ तांदृष्ट्वाविस्तृतास्यांतुइत्यर्धमारभ्यनवार्धानि झ. पाठेनदृश्यन्ते. १० क. अतःपरंहनूमांस्तुत्रिंशद्योजनं. ११ घ. सुरसाचास्यं. क. सुरसाप्यास्यंचत्वारिंशत्तथायतं. १२ ग.—ज. ञ. ट. मुच्छ्रितं. १३ ङ. ञ. ट. तदैव. १४ क. वक्त्रंयोजनाशीतिमायतं. १५ घ. ञ. योजनोच्छ्रितं. १६ ङ. ञ. ट. ननलप्रख्यः. १७ ख. वक्त्रं. कः घ. चास्यं. १८ क. झ. वायुपुत्रस्स. ख. वायुपुत्रस्तु. १९ घ. सुघोरनरकोपमं. ङ.—झ. सुभीमं. २० ख.—ट. ससंक्षिप्यात्मनः. क. संक्षिप्यचात्मनः. घ. ङ. झ. ञ. ट. पाठेषु. ससंक्षिप्यात्मनःकायमित्यर्धस्यस्थाने. ससंक्षिप्यात्मनःकायंजीमूतइवमारुतः । तस्मिन्मुहूर्तेहनुमान्बभूवाङ्गुष्ठमात्रकः. इत्येकःश्लोकोदृश्यते. २१ ङ.—ट. सोभिपत्याथ. ग. सन्निपत्याशु. २२ ङ.—ट. महाबलः. २३ क. ख. घ. श्रीमान्प्रहसन्निदमब्रवीत्. २४ ख. घ. संत्यंचास्तुवचस्तव. क. सत्यश्चास्तुवरस्तव. २५ ग. वातजं. २६ क. ग.—ट. समानयच. २७ घ. गरुडोयथा.

सिंहकुञ्जरशार्दूलपतगोरगवाहनैः ॥ विमानैः संपतद्भिश्च विमलैः समलंकृते ॥ १८० ॥
वज्राशनिसमाघातैः पावकैरवशोभिते ॥ कृतपुण्यैर्महाभागैः स्वर्गजिद्भिरलंकृते ॥ १८१ ॥
वहता हव्यमित्यर्थं सेविते चित्रभानुना ॥ ग्रहनक्षत्रचन्द्रार्कतारागणविभूषिते ॥ १८२ ॥
महर्षिगणगन्धर्वनागयक्षसमाकुले ॥ विविक्ते विमले विश्वे विश्वावसुनिषेविते ॥ १८३ ॥
देवराजगजाक्रान्ते चन्द्रसूर्यपथे शिवे ॥ विताने जीवलोकस्य विततेते ब्रह्मनिर्मिते ॥ १८४ ॥
बहुशः सेविते वीरैर्विद्याधरगणैर्वरैः ॥ जगाम वायुमार्गे तु गरुत्मानिव मारुतिः ॥ १८५ ॥
[हनुमान्मेघजालानि प्राकर्षन्मारुतो यथा ॥ १८६ ॥
कालागरुसवर्णानि रक्तपीतसितानि च ॥ कपिनाऽऽकृष्यमाणानि महाभ्राणि चकाशिरे ॥ १८७ ॥
प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः ॥ प्रावृषीन्दुरिवाभाति निष्पतन्प्रविशंस्तदा] ॥ १८८ ॥
प्रदृश्यमानस्सर्वत्र हनुमान्मारुतात्मजः ॥ भेजेऽम्बरं निरालम्बं लम्बपक्ष इवाद्रिराट् ॥ १८९ ॥
प्लवमानं तु तं दृष्ट्वा सिंहिका नाम राक्षसी ॥ मनसा चिन्तयामास प्रवृद्धा कामरूपिणी ॥ १९० ॥
अद्य दीर्घस्य कालस्य भविष्याम्यहमाशिता ॥ इदं हि मे महत्सत्त्वं चिरस्य वशमागतम् ॥१९१॥
इति संचिन्त्य मनसा छायामस्य समाक्षिपत् ॥ छायायां गृह्यमाणायां चिन्तमायास वानरः ॥१९२॥
समाक्षिप्तोऽसि सहसा पङ्कृतपराक्रमः ॥ प्रतिलोमेन वातेन महानौरिव सागरे ॥ १९३ ॥
तिर्यगूर्ध्वमधश्चैव वीक्षमाणस्ततः कपिः ॥ ददर्श स महत्सत्वमुत्थितं लवणाम्भसि ॥ १९४ ॥

नकथनसमये तयैव कथितमित्यनुवादात्कल्प्यते ॥ १७४—१७८ ॥ आकाशगमनमतिदुष्करमित्यमुमर्थं कथयितुं आकाशस्वरूपं वर्ण्यते सेवित इत्यादिना श्लोकसप्तकेन ॥ कैशिकाचार्यैः कैशिके रागविशेषे आचार्यैः विद्याधरविशेषैरित्यर्थः ॥१७९–१८०॥ वज्राशनिसमाघातैः पावकैः वज्राशनिसमाघातैर्हेतुभिर्जातैः पावकैः ॥ १८१ ॥ हव्यं वहता देवेभ्यो हव्यवहनार्थं गतेन । चित्रभानुना वह्निना ॥ १८२ ॥ विश्वे विश्वगते व्यापक इत्यर्थः ॥ १८३ ॥ देवराजगजाक्रान्ते ऐरावतभिन्नदिग्गजाक्रान्ते । विताने वितानतुल्ये । विवत इति वितानविशेषणं ॥१८४—१९० ॥ दीर्घस्य कालस्य दीर्घकाले गते सति । अद्य आशिता आशित्री भुक्तवती । भविष्यामि ॥ १९१ ॥ समाक्षिपत् सम्यग्गृहीतवती ॥ १९२ ॥ पङ्कृतपराक्रमः कुण्ठितगतिः । प्रतिलोमेन प्रतिकू-

---

ति० पतगोरगाः पक्षिसर्पाः ॥ १८० ॥ **रामानु०** वज्राशनिसमाघातैःवज्राशन्योःसमःतुल्यःआघातःअभिघातःयेषांतैः ॥ १८१ ॥ **ती०** आकाशस्यैकोनपञ्चाशदग्निसंबन्धमुक्त्वातत्प्रधानभूतचित्रभानुसंबन्धमाह वहतेति ॥ **ति०** वज्राशनिसमस्पर्शैः तद्वत्प्राणहरैः । पावकैःपञ्चाग्निभिरिवस्वर्गजिद्भिरधिष्ठिते ॥ **स०** स्वर्गजिद्भिःप्राप्तस्वर्गैः । धनजिते स्वर्जितेइत्यादाविवजिधातुः प्राप्त्यर्थकः ॥ १८१ ॥ **स०** नक्षत्राणिपुंनक्षत्राणि । तारागणःअश्विन्यादिसमूहः ॥ १८२ ॥ **रामानु०** विविक्तइति । विश्वेविशतीति विश्वःव्यापकइत्यर्थः ॥ १८३ ॥ **रामानु०** वितानेउल्लोचभूते । 'अस्त्रीवितानमुल्लोचः' इत्यमरः । हनुमान्मेघजालानीत्यादिसार्धश्लोकद्वयंप्रमादाल्लिखितं ॥ १८४ ॥ **ति०** महानौर्यथापङ्कृतपराक्रमास्तब्धगतिःप्रतिलोमेनवातेनक्रियते । गम्यदेशगतिनिरोधएवात्रस्तब्धगतित्वं । यद्वातेनयथाविपरीतगतिवारणायत्नैःस्तब्धगतिःकार्यतेतथाऽहंकेनचित्स्तब्धगतिःकृतः ॥ १९३ ॥

[पा०] १ ग. च. छ. ज. संपतद्भिश्चविमलैर्विमानैः. घ. विमानैर्निष्पतद्भिश्चविविधैः. २ झ. ट. समस्पर्शैः. ३ ङ. झ. ट. पावकैरिव. ४ ङ. झ. ट. रधिष्ठिते. च. छ. ज. ञ. रधिश्रिते. ५ क. ख. घ.—ट. मल्यन्तं. ६ घ. कृष्णवर्त्मना. ७ क. ख. घ. गणनिषेविते. ८ क. देवगन्धर्व. ९ ग. ङ.—ट. विमले. १० क. घ. ङ. झ. ञ. ट. गणैर्वृते. ११ ख. च. छ. ज. वायुमार्गेण. ङ. झ. ञ. ट. वायुमार्गेच. क. घ. वायुवेगेन. १२ क. वानरः. १३ इमानिपञ्चार्धानि क. ख. घ.—ट. पाठेपुदृश्यन्ते. १४ ङ—ट. पक्षयुक्तइवाद्रिराट्. १५ क. ग. प्लवमानंहि. १६ घ. अद्यैवदीर्घकालस्य. १७ ङ.—ट. इदंममहासत्वं. १८ क.—घ. संगृहीतायां. १९ क. मारुतिः. २० ङ. झ. ञ. ट. स्तदाकपिः. क. ग. घ. च. छ. ज. स्ततस्ततः. २१ ख. ददर्शच. ग. ददर्शसहसासत्वं.

तदृष्ट्वा चिन्तयामास मारुतिर्विकृताननम् ॥ [1]कपिराजेन कथितं सत्त्वमद्भुतदर्शनम् ॥
छायाग्राहि [2]महावीर्यं तदिदं नात्र संशयः ॥ १९५ ॥
स तां बुद्ध्वाऽर्थतत्त्वेन सिंहिकां मतिमान्कपिः ॥ व्यवर्धत महाकायः प्रावृषीव बलाहकः ॥१९६॥
तस्य सा कायमुद्वीक्ष्य वर्धमानं महाकपेः ॥ वक्त्रं प्रसारयामास [3]पातालान्तरसन्निभम् ॥ १९७ ॥
[4]घनराजीव गर्जन्ती वानरं समभिद्रवत् ॥ १९८ ॥
स ददर्श ततस्तस्या [5]विवृतं सुमहन्मुखम् ॥ कायमात्रं च मेधावी मर्माणि च महाकपिः ॥ १९९ ॥
स तस्या विवृते वक्त्रे वज्रसंहननः कपिः ॥ संक्षिप्य मुहु[6]रात्मानं निष्पपात महाबलः ॥ २०० ॥
आस्ये तस्या निमज्जन्तं ददृशुः सिद्धचारणाः ॥ ग्रस्यमानं यथा चन्द्रं पूर्णं पर्वणि राहुणा ॥२०१॥
ततस्तस्या नखैस्तीक्ष्णैर्मर्माण्युत्कृत्य वानरः ॥ उत्पपाताथ वेगेन मनस्संपातविक्रमः ॥ २०२ ॥
तां तु दृष्ट्वा च धृत्या च दाक्षिण्येन निपा[7]त्य च ॥ स[8] कपिप्रवरो वेगाद्ववृधे पुनरात्मवान् ॥२०३॥
हृतहृत्सा हनुमता पपात विधु[9]रांभसि ॥ [स्वयंभुवैव हनुमान्सृष्टस्तस्या निपातने] ॥ २०४ ॥
तां हतां वा[10]नरेणाशु पतितां वीक्ष्य सिंहिकाम् ॥ भूतान्याकाशचारीणि तमूचुः प्ल[11]वगोत्तमम् ॥२०५॥
भीम[12]मद्य कृतं कर्म महत्सत्त्वं त्वया हतम् ॥ साधयार्थमभिप्रेतमरिष्टं प्लवतां वर ॥ २०६ ॥
यस्य त्वेतानि चत्वारि वानरेन्द्र यथा तव ॥ धृतिर्दृष्टिर्मतिर्दाक्ष्यं स्वकर्मसु न सीदति ॥ २०७ ॥

लेन ॥ १९३—१९४ ॥ तदिदं छायाग्राहि कपिराजेन कथितं नात्र संशय इति योजना ॥ १९५—१९७ ॥ समभिद्रवत् समभ्यद्रवत् ॥१९८॥ कायमात्रं देहप्रमाणं ॥ १९९ ॥ मुहुस्संक्षिप्य संनिकर्षानुगुणं संकुच्य ॥ २००—२०१ ॥ ततः तेन रूपेण मनस्संपातविक्रमः मनोवेगतुल्यगतिः ॥ २०२ ॥ दृष्ट्या दूरादेव दर्शनेन । धृत्या अस्य नियमनजननधार्ष्ट्येन । दाक्षिण्येन पाटवेन ॥ २०३ ॥ विधुरा आर्ता ॥ २०४—२०५ ॥ अरिष्टं शुभं यथा भवति तथा । यस्य सिंहिकारूपसत्त्वस्य । दृष्टिः आयतिक्षमसूक्ष्मेक्षणं । मतिः अर्थतत्त्वनिश्चयः । क्रियावत्त्वं दाक्ष्यं यथा तव तथा यस्य चत्वारि सन्ति तत्त्वया हतं । तान्येव चत्वार्याह—धृतिरिति । या धृतिः स्वकर्मसु स्वानुकूलकार्येषु नावसीदति । या दृष्टिर्नावसीदति । या मतिर्नावसीदति । यद्दाक्ष्यं नावसीदति एतानि चत्वारि यस्य सन्ति तत्त्वया हतमिति योजना

स० कायमात्रं कायस्य स्वदेहस्य मात्रा परिमाणं यस्यतत् । स्वशरीरकबलीकरणयोग्यमितियावत् । मर्माणि सन्धिस्थानानि ॥ १९९ ॥ स० आत्मानंआत्मीयंवपुः । कंपयतिशत्रूनितिकपिः । कंपेर्नलोपश्चेतिनलोपः । कुडिकेभ्यइतीलं ॥ २०० ॥ रामानु० अथवानरःमनस्संपातविक्रमःमनोगमनसमानगतिःसन्तीक्ष्णैर्नखैःतस्यामर्माण्युत्कृत्यततःआस्यात्वेगेनोत्पपात । आस्यविधानात्पूर्वमेवोत्पपातेत्यर्थः ॥ २०२ ॥ ति० ननुप्रथमप्रवृत्तवेगस्यसुरसादिःकुण्ठीभावेसतिकथंपुनराकाशगमनंतत्राह—आत्मवान् । वायोरिवस्वाधीनएवतद्गमनविषयोयत्नः । प्रथमंलाकाशमार्गप्राप्तिमात्रायमहेन्द्रपर्वतालंबनमितरजनप्रतारणायवेत्याहुः । अत्रकविरुत्प्रेक्षते—तस्याच्छायाग्रहणमात्रेणभक्षणादिशक्तिमत्याःसिंहिकायानिपातने निपातनिमित्तं रावणनाशायस्वात्मरूपरामवत्स्वस्वरूपोहनुमान्सृष्टः । ति० महत्सत्वं महाबलाराक्षसीरावणवदशक्यसंहारा । त्वयासंहृतेत्यर्थः । अरिष्टं बाधारहितं । 'रिष हिंसायां' ॥ २०६ ॥ स० यस्यपुरुषस्यदृष्टिःअपरोक्षज्ञानं । मतिःपरोक्षज्ञानं दाक्ष्यंदक्षत्वं ॥ २०७ ॥

[पा०] १ ङ.—ट. कपिराज्ञायथाख्यातं. क. ख. घ. कपिराज्ञायदाख्यातं. २ घ. महासत्वं. ३ ग.—च. झ. ञ. ट. पातालांबरसंनिभं. क. पातालतलसंनिभं. ४ घ. मेघराजीव. ५ ङ.—ट. विकृतं. ६ ग. ङ.—ट. विकृते. ७ क. च. छ. ज. पुनरात्मानं. ८ क. ङ. झ. ञ. ट. निपपातमहाकपिः. छ. ज. निष्पपातमहाकपिः. ९ क. गृह्यमाणं. १० च. छ. ज. निहत्यसः. ङ. झ. ट. निपात्यसः. ११ ङ. छ. ञ. ट. कपिप्रवीरोवेगेनवृधे. १२ ख. ग. लवणांभसि. १३ इदमर्धं ग.—ट. पाठेषुदृश्यते. १४ च. छ. ज. ञ. वानरेणाथ. ग. वानरेन्द्रेण. १५ क.—घ. छ. ज. प्लवगर्षभं. १६ च. छ. ज. भीममत्यद्भुतंकर्म. क. भीममद्यमहत्कर्म.

स तैः संभावितः पूज्यः प्रतिपन्नप्रयोजनः ॥ जगामाकाशमाविश्य पन्नगाशनवत्कपिः ॥ २०८ ॥
प्राप्तभूयिष्ठपारस्तु सर्वतः प्रतिलोकयन् ॥ योजनानां शतस्यान्ते वनराजिं ददर्श सः ॥ २०९ ॥
ददर्श च पतन्नेव विविधद्रुमभूषितम् ॥ द्वीपं शाखामृगश्रेष्ठो मलयोपवनानि च ॥ २१० ॥
सागरं सागरानूपं सागरानूपजान्द्रुमान् ॥ सागरस्य च पत्नीनां मुखान्यपि विलोयकन् ॥ २११ ॥
स महामेघसंकाशं समीक्ष्यात्मानमात्मवान् ॥ निरुन्धन्तमिवाकाशं चकार मतिमान्मतिम् ॥२१२॥
कायवृद्धिं प्रवेगं च मम दृष्ट्वैव राक्षसाः ॥ मयि कौतूहलं कुर्युरिति मेने महाकपिः ॥ २१३ ॥
ततः शरीरं संक्षिप्य तन्महीधरसन्निभम् ॥ पुनः प्रकृतिमापेदे वीतमोह इवात्मवान् ॥ २१४ ॥
तद्रूपमतिसंक्षिप्य हनुमान्प्रकृतौ स्थितः ॥ त्रीन्क्रमानिव विक्रम्य बलिवीर्यहरो हरिः ॥ २१५ ॥
स चारुनानाविधरूपधारी परं समासाद्य समुद्रतीरम् ॥
परैरशक्यः प्रतिपन्नरूपः समीक्षितात्मा समवेक्षितार्थः ॥ २१६ ॥
ततस्स लम्बस्य गिरेस्समृद्धे विचित्रकूटे निपपात कूटे ॥
सकेतकोद्दालकनालिकेरे महाद्रिकूटप्रतिमो महात्मा ॥ २१७ ॥
ततस्तु संप्राप्य समुद्रतीरं समीक्ष्य लङ्कां गिरिवर्यमूर्ध्नि ॥
कपिस्तु तस्मिन्निपपात पर्वते विधूय रूपं व्यथयन्मृगद्विजान् ॥ २१८ ॥

॥ २०६—२०७ ॥ संभावितः पूजितः । प्रतिपन्नप्रयोजनः प्राक्प्रतिभासितकार्यसारः । सच स्त्रीत्वे दोषे समानेपि सुरसाया जयप्रतिपत्तिः सिंहिकाया वधप्रतिपत्तिश्च ॥ २०८ ॥ प्राप्तभूयिष्ठपारः प्राप्तप्रायतीरः ॥ २०९ ॥ मलयोपवनानि लङ्कामलय इति दक्षिणतीरे स्थितमलयः तस्योपवनानि ॥ २१० ॥ सागरस्य पत्नीनां नदीनां त्रिकूटोत्पन्नानां आत्मानं स्वशरीरं । मतिं चकार मेन इति यावत् ॥ २११—॥ २१२ ॥ कथं मेन इत्यत्राह कायवृद्धिमिति ॥ २१३ ॥ पुनः प्रकृतिमापेदे पुनर्निजाकारं प्राप्तवान् ॥ २१४ ॥ उक्तं शरीरसंक्षेपं दृष्टान्तार्थमनुवदति—तद्रूपमिति ॥२१५॥ प्रतिपन्नरूपः प्रतिपन्नस्वभावशरीरः । अभूदितिशेषः । समीक्षितात्मा समीक्षितदेहः । समवेक्षितार्थः निरूपितकार्यः । पूर्वोक्तोपसंहारश्लोक एषः ॥ २१६ ॥ लम्बस्य लम्बमानस्येव स्थितस्य अविज्ञाताग्रस्येत्यर्थः । विचित्रकूटे विविधाश्चर्यसमूहे । " कूटस्त्वस्त्रियां पुञ्जपालयोः " इति दर्पणः । उद्दालकाः श्लेष्मातकाः ॥ २१७ ॥ व्यथयन्मृगद्विजानित्यादिविशेषं वक्तुमुक्तमर्थमनुवदति—ततस्त्विति ॥ समुद्रतीरं तीरोपर्याकाशं । विधूय

स० प्राप्तभूयिष्ठपारः प्राप्तप्रायं भूयिष्ठपारं महालङ्काद्वीपतीरंयेनसः ॥ २०९ ॥ ति० पतन्नेवगच्छेन्नवमलयोपवनानि । अनेनोत्तरतीरइवदक्षिणतीरेपिमलयाख्यःपर्वतोस्तीतिगम्यते ॥ २१० ॥ ती० वीतमोहःनिवृत्ताविद्यः ॥ २१४ ॥ रामानु० चारुनानाविधरूपधारीतत्तत्कार्यानुगुण्येनपरिगृहीतरमणीयस्थूलसूक्ष्मादिरूपः । परैःसिंहिकादिभिः । अशक्यःअग्रधृष्यः । सःपरंसमुद्रतीरमासाद्यसमीक्षितात्मा समालोकितातिप्रमाणस्वशरीरः समवेक्षितार्थःसमालोचितकार्यः प्रतिपन्नरूपः अङ्गीकृतनिजशरीरः अभूदितिशेषः । ती० समवेक्षितार्थःआलोचितानन्तरकार्यः । प्रतिपन्नरूपःअङ्गीकृतपूर्वपदंशदेहः ॥११६ ॥ इतिप्रथमःसर्गः ॥१॥

[पा०] १ क. संपूजितःपूज्यैः. क. ज.—झ. ट. संपूजितःपूज्यः. २ ङ. झ. ञ. ट. परिलोकयन्. च. प्रविलोकयन्. ३ क. ङ. च. छ. झ. ञ. ट. सागरानूपान्. ४ ख. ग. मुखान्यभि. ५ ख. मात्मना. ६ घ. संनिरुद्धमिवा. ७ घ. दृष्ट्वैवमम. ८ ङ. ट. महागतिः. ९ ग. च. छ. ज. तद्रूपमपि. १० घ. वलियज्ञहरो. क. बलवीर्याधिको. ११ ख. ङ. झ. ट. रशक्यं. १२ क. सचित्रकूटे. १३ ङ.—ट. नारिकेले. १४ ख.—छ. झ. ञ. ट. महाभ्रकूट.

स सागरं दानवपन्नगायुतं बलेन विक्रम्य महोर्मिमालिनम् ॥
निपत्य तीरे च महोदधेस्तदा ददर्श लङ्काममरावतीमिव ॥ २१९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे प्रथमः सर्गः ॥ १ ॥

द्वितीयः सर्गः ॥ २ ॥

हनुमता लङ्काया राक्षसगणरक्षणादिनिरीक्षणेनेतरदुराधर्षत्वादिचिन्तनपूर्वकं बिडालतुल्यपरिमाणकवपुषासता चन्द्रोदयसमये लङ्काप्रवेशनं ॥ १ ॥

स सागरमनाधृष्यमतिक्रम्य महाबलः ॥ त्रिकूटशिखरे लङ्कां स्थितां स्वस्थो ददर्श ह ॥ १ ॥
ततः पादपमुक्तेन पुष्पवर्षेण वीर्यवान् ॥ अभिवृष्टः स्थितस्तत्र बभौ पुष्पमयो यथा ॥ २ ॥
योजनानां शतं श्रीमांस्तीर्त्वाऽप्युत्तमविक्रमः ॥ अनिश्वसन्कपिस्तत्र न ग्लानिमधिगच्छति ॥ ३ ॥
शतान्यहं योजनानां क्रमेयं सुबहून्यपि ॥ किं पुनस्सागरस्यान्तं संख्यातं शतयोजनम् ॥ ४ ॥
स तु वीर्यवतां श्रेष्ठः प्लवतामपि चोत्तमः ॥ जगाम वेगवाँल्लङ्कां लङ्घयित्वा महोदधिम् ॥ ५ ॥
शाद्वलानि च नीलानि गन्धवन्ति वनानि च ॥ गण्डवन्ति च मध्येन जगाम नगवन्ति च ॥६॥
शैलांश्च तरुसंछन्नान्वनराजीश्च पुष्पिताः ॥ अभिचक्राम तेजस्वी हनुमान्प्लवगर्षभः ॥ ७ ॥
स तस्मिन्नचले तिष्ठन्वनान्युपवनानि च ॥ स नगाग्रे च तां लङ्कां ददर्श पवनात्मजः ॥ ८ ॥
सरलान्कर्णिकारांश्च खर्जूरांश्च सुपुष्पितान् ॥ प्रियालान्मुचुलिन्दांश्च कुटजान्केतकानपि ॥ ९ ॥
प्रियङ्गून्गन्धपूर्णांश्च नीपान्सप्तच्छदांस्तथा ॥ असनान्कोविदारांश्च करवीरांश्च पुष्पितान् ॥ १० ॥
पुष्पभारनिबद्धांश्च तथा मुकुलितानपि ॥ पादपान्विहगाकीर्णान्पवनाधूतमस्तकान् ॥ ११ ॥
हंसकारण्डवाकीर्णा वापीः पद्मोत्पलायुताः ॥ आक्रीडान्विविधान्रम्यान्विविधांश्च जलाशयान्॥१२॥

रूपं पूर्वरूपं विहाय । वृत्तमुपजातिः ॥२१८—२१९॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने प्रथमः सर्गः ॥ १ ॥

स सागरमित्यादि ॥ १—३ ॥ समुद्रलङ्घने कुतो ग्लानिं नाध्यगच्छदित्यत्राह—शतानीति ॥ ४—५॥ गण्डवन्ति स्थूलोपलवन्ति । नामैकदेशे नामग्रहणेन गण्डशब्देन गण्डशैल उच्यते ॥ ६—७ ॥ स तस्मिन्नित्यर्धे ददर्शेत्यपकृष्यते ॥ ८ ॥ सरलान् यूपसरलान् । कर्णिकारान्परिव्याधान् । खर्जूरान् कण्टकच्छदान् । प्रियालान् धनुःपटान् । मुचुलिन्दान् जम्बीरान् ॥ ९ ॥ प्रियङ्गून् फलिनः । गन्धपूर्णान् नीपान् असनान् । कोविदारान् चमरिकान् ॥१०—११ ॥ आक्रीडान् सर्वसाधारणक्रीडास्थानानि ॥१२॥

स० स्वस्थउत्तरत्रकथंकर्तव्यमितिचित्तवैक्लव्यरहितः ॥ १० ॥ रामानु० समुद्रलङ्घनेकुतःश्रमेणाध्यगच्छत्तत्राह—शतान्यहमिति । अहंसुबहून्यपियोजनानांशतानिक्रमेयं । शतयोजनसंख्याकंसागरस्यान्तंकिंपुनरित्यमन्यतेतिशेषः ॥ ४ ॥ रामानु० अत्र शैलशब्दःशृङ्गपरः । लंबाख्यगिरेरुपरितनस्योच्यमानत्वात् ॥ ७ ॥ वनानि स्वतएवजातवृक्षसमूहान् । उपवनानिस्थापितवृक्ष-

[पा०] १ क. घ. ङ. झ. ञ. ट. त्रिकूटस्यतटे. २ क. ग. घ. ङ. झ. ञ. ट. स्थितःस्वस्थो. ३ ग. ङ. झ. ञ. ट. अभिवृष्टस्ततस्तत्र. ४ ङ. झ. ञ. ट. हरिः. ५ च. छ. ज. शतंतीर्त्वातथाप्युत्तम. ६ क. ङ. झ. ञ. ट. मधुमन्तिच. ग. च. छ. गजवन्तिच. ७ घ. छ. तरुसंपन्नान्. ८ ग. ङ.—ट. स्थितांलङ्कां. ९ ग. बकुलान्सु. १० क. ख. न्सप्तच्छदानपि. ११ ग. पनसान्को. १२ छ. ज. भारपिनद्धांश्च. ग. भारातिभारांश्च. क. भारातिबद्धांश्च. १३ झ. ञ. ट. पद्मोत्पलावृताः.

Abstract

Abstract text.

संततान्विविधैर्वृक्षैः सर्वर्तुफलपुष्पितैः ॥ उद्यानानि च रम्याणि ददर्श कपिकुञ्जरः ॥ १३ ॥
समासाद्य च लक्ष्मीवाँल्लङ्कां रावणपालिताम् ॥ परिघाभिः सपद्माभिः सोत्पलाभिरलंकृताम् ॥१४॥
सीतापहरणार्थेन रावणेन सुरक्षिताम् ॥ समन्ताद्विचरद्भिश्च राक्षसैरुग्रधन्विभिः ॥ १५ ॥
काञ्चनेनावृतां रम्यां प्राकारेण महापुरीम् ॥ गृहैश्च ग्रहसंकाशैः शारदाम्बुदसन्निभैः ॥ १६ ॥
पाण्डुराभिः प्रतोलीभिरुच्चाभिरभिसंवृताम् ॥ अट्टालकशताकीर्णां पताकाध्वजमालिनीम् ॥ १७ ॥
तोरणैः काञ्चनैर्दिव्यैर्लतापङ्क्तिविचित्रितैः ॥ ददर्श हनुमाँल्लङ्कां दिवि देवपुरीमिव ॥ १८ ॥
गिरिमूर्ध्नि स्थितां लङ्कां पाण्डुरैर्भवनैः शुभैः ॥ ददर्श स कपिश्रेष्ठः पुरीमाकाशगं यथा ॥ १९ ॥
पालितां राक्षसेन्द्रेण निर्मितां विश्वकर्मणा ॥ प्लवमानामिवाकाशे ददर्श हनुमान्पुरीम् ॥ २० ॥
वप्रप्राकारजघनां विपुलाम्बुनवाम्बराम् ॥ शतघ्नीशूलकेशान्तामट्टालकवतंसकाम् ॥
मनसेव कृतां लङ्कां निर्मितां विश्वकर्मणा ॥ २१ ॥
द्वारमुत्तरमासाद्य चिन्तयामास वानरः ॥ २२ ॥
कैलासशिखरप्रख्यामालिखन्तीमिवाम्बरम् ॥ डीयमानामिवाकाशमुच्छ्रितैर्भवनोत्तमैः ॥ २३ ॥

उद्यानानि राजयोग्यानि। सर्वर्तुफलपुष्पितैः सर्वर्तुषु फलपुष्पाण्येषां संजातानि तैः॥ १३ ॥ समासाद्य ददर्शेति क्रियाभेदाल्लङ्कापदावृत्तिः। लक्ष्मीवान् जयहेतुकान्तिमान्। उत्पलानि पद्मव्यतिरिक्तानि सरसिजानि ॥ १४ ॥ सीतापहरणं अर्थः प्रयोजनं यस्य तेन। सुरक्षितत्वे हेतुरयं। विचरद्भिश्चेत्यत्र चकारो भिन्नक्रमः। राक्षसैश्च सुरक्षितां ॥ १५ ॥ ग्रहसंकाशैः नवग्रहतुल्यैः ॥ १६ ॥ पाण्डुराभिः सुधालिप्तभूमिकत्वात्सिताभिः। प्रतोलीभिः वीथीभिः। अट्टालकाः अट्टाः। पताकाध्वजमालिनीं लतादिरेखाविचित्रितपटविशिष्टाः पताकाः। मत्स्यमकराद्याकारा ध्वजाः। त्रीह्यादित्वादिनिः ॥ १७ ॥ लतापङ्क्तयः लताकाररेखाः॥ १८—२० ॥ वप्रेत्यादावपि ददर्श हनुमान्कपिरित्यनुवर्तते। वप्रं प्राकारमूर्तिकः। प्राकारः सालः। विपुलाम्बु परिघारूपं नवाम्बरं यस्यास्सा। शतघ्नी यन्त्रविशेषः। वतंसः अवतंसः। भागुरिमतेनाल्लोपः। वस्तुतो विश्वकर्मणा निर्मितां विचार्यमाणे केनापि मनसा निर्मितामिव स्थितामित्युत्प्रेक्षा ॥२१॥ उत्तरं द्वारमासाद्य। चिन्तयामास मनसा निरूपयामास। वैदेहीदर्शनोपायमिति शेषः ॥ २२ ॥ डीयमानां गच्छन्तीं। डीङ् विहायसागतौ इत्यस्मा-

षण्डानि। सनगंवृक्षसहितंयदग्रंतस्मिन्स्थितांलङ्कांचददर्श ॥ ८ ॥ **ती०** अट्टालकशताकीर्णां प्राकारवेदिकोपरियुद्धार्थंपरिकल्पितमञ्चविशेषशतसंकुलां। ददर्शहनुमाँल्लङ्कामितिपुनर्दर्शनाभिधानंविशेषान्तरविवक्षयोपमानान्तरविवक्षयावा ॥ **स०** पताकासौभाग्यं तस्याध्वजः सूचकसचेलयष्टिविशेषः। तेनमालतेशोभतेसातथा ॥ अभिधानंतूक्तं। **ति०** गिरिमूर्धस्थत्वादेवाकाशेप्लवमानामिव। लङ्कांद्रष्टुर्हनूमतइवतद्वर्णनप्रसक्तस्यकवेरप्याश्चर्यमग्नतयाददर्शेतिपुनरुक्तिर्नदोषाय। विस्मयेनपुनःपुनर्ददर्शेतिवातात्पर्यं ॥१७—२०॥ **रामानु०** वप्रं चयः। प्राकाराधारवेदिकेतियावत्। 'स्याच्चयोवप्रमस्त्रियां' इत्यमरः। अट्टालकाःवतंसःकर्णाभरणंयस्यास्सातां। **ति०** विपुलांबुःसमुद्रोवनानिचांबरंवासोयस्यास्तां। **स०** विश्वकर्मणानिर्मितामपिमनसेवकृतां मनोमयसदृशीं ॥२१॥ **ति०** कैलासोनिलयःस्थानंयस्यअलकाद्वारस्यतत्प्रख्यंउत्तरद्वारं। उच्छ्रितैर्भवनोत्तमैःअंबरमालिखन्तमिव। आकाशंध्रियमाणमिवआकाशधारणं कुर्वंदिव ॥ **स०** कैलासरूपोयोनिलयःरुद्रभवनंतत्प्रख्यंतत्सदृशं। यद्वाकैलासनिलयोभवस्तत्प्रख्यं हरस्यापिकेवलंशुभ्ररूपत्वात्। एतादृशंद्वारमासाद्येतिपूर्वेणान्वयः। आलिखन्तं आलिखत्। 'तदशिष्यं' इतिलिङ्गस्यातत्रलोक्तेः। **रामानु०** आलिखन्तमिति लिङ्गव्यत्ययः ॥ डीयमानामिवउद्गच्छन्तीमिव। डीयमानत्वादिविशेषणविशिष्टा या तस्यालङ्कायाःमहतींगुप्तिंसागरंचरावणंघोरं

[पा०] १ छ. ज. संततैर्विविधैः. २ ज. विहायसिचरद्भिश्च. ३ क.—ट. गिरिसंकाशैः. ४ च. ज. समाकीर्णां. ५ ङ. ञ. ञ. ट. ध्वजशोभितां. घ. ध्वजशालिनीं. ६ ञ. ट. विराजितैः. ७ ङ. ञ. ञ. ट. देवोदेवपुरीमिव. ८ क. ग. च. रम्यां. ९ ग. सददर्शकपिःश्रीमान्. क. ख. घ.—ट. ददर्शसकपिःश्रीमान्. १० ङ. ञ. ट. पुरीमाकाशगामिव. ११ घ.—ट. हनुमान्कपिः. १२ घ. विपुलांबुधरांबरां. ङ. ञ. ञ. ट. विपुलांबुवनांबरां. १३ ग. मनसैवतदालङ्कां. १४ क. ख. ङ. च. छ. ञ. ञ. ट. कैलासनिलयप्रख्यमालिखन्तमिवा. १५ ङ. ञ. ट. ध्रियमाणमिवाकाशं. ख. पिबन्तीमिवचाकाशं.

संपूर्णां [1]राक्षसैर्घोरैर्नागैर्भोगवतीमिव ॥ अचिन्त्यां सुकृतां [2]स्पष्टां कुबेराध्युषितां पुरा ॥ २४ ॥
दंष्ट्रिभिर्बहुभिः शूरैः [3]शूलपट्टिशपाणिभिः ॥ रक्षितां राक्षसैर्घोरैर्गुहामाशीविषैरिव ॥ २५ ॥
तस्याश्च महतीं गुप्तिं सागरं च निरीक्ष्य सः ॥ रावणं च रिपुं घोरं चिन्तयामास वानरः ॥ २६ ॥
[4]आगत्यापीह हरयो भविष्यन्ति निरर्थकाः ॥ नहि युद्धेन वै लङ्का शक्या जेतुं [5]सुरैरपि ॥ २७ ॥
[6]इमां तु विषमां [7]दुर्गां लङ्कां रावणपालिताम् ॥ प्राप्यापि [8]स महाबाहुः किं करिष्यति राघवः ॥२८॥
अवकाशो न [9]सान्त्वस्य राक्षसेष्व[10]भिगम्यते ॥ न दानस्य न भेदस्य नैव युद्धस्य दृश्यते ॥ २९ ॥
चतुर्णामेव हि गतिर्वानराणां [11]महात्मनाम् ॥ वालिपुत्रस्य नीलस्य मम राज्ञश्च धीमतः ॥ ३० ॥
यावज्जानामि वैदेहीं यदि जीवति वा नवा ॥ [12]तत्रैव चिन्तयिष्यामि दृष्ट्वा तां जनकात्मजाम् ॥३१॥
ततः स चिन्तयामास मुहूर्तं कपिकुञ्जरः ॥ गिरि[13]शृङ्गे स्थित[14]स्तस्मिन्[15]रामस्याभ्युदये रतः ॥ ३२ ॥
अनेन रूपेण मया न शक्या रक्षसां पुरी ॥ प्रवेष्टुं राक्षसैर्गुप्ता क्रूरैर्बलसमन्वितैः ॥ ३३ ॥
[16]उग्रौजसो महावीर्या बलवन्तश्च राक्षसाः ॥ वञ्चनीया मया सर्वे जानकीं परिमार्गता ॥ ३४ ॥
लक्ष्यालक्ष्येण रूपेण रात्रौ लङ्कापुरी मया ॥ प्रवेष्टुं प्राप्तकालं मे कृत्यं साधयितुं महत् ॥ ३५ ॥
तां पुरीं तादृशीं दृष्ट्वा दुराधर्षां सुरासुरैः ॥ हनुमांश्चिन्तयामास विनि[17]श्चित्य मुहुर्मुहुः ॥ ३६ ॥
केनोपायेन पश्येयं मैथिलीं जनकात्मजाम् ॥ अदृष्टो राक्षसेन्द्रेण रावणेन दुरात्मना ॥ ३७ ॥
न विनश्येत्कथं कार्यं [18]रामस्य विदितात्मनः ॥ एकामे[19]कश्च पश्येयं रहिते जनकात्मजाम् ॥ ३८ ॥
[20]भूताश्चार्था [21]विपद्यन्ते देशकालविरोधिताः ॥ विक्लबं दूतमासाद्य तमः सूर्योदये यथा ॥ ३९ ॥

च्छानच् ॥ २३—३० ॥ एवं विचार्य नायमेतद्विचारकाल इत्यनुशेते—यावदिति ॥ यावत् यदा । जीवति वा न वेति वैदेहीं जानामि । तत्रैव काले तां जनकात्मजां दृष्ट्वा चिन्तयिष्यामि । यद्वा यावच्छब्दोवधारणे । जानाम्येव जीवति वा नवेति जानाम्येव । यदि जीवति तदा तां जनकात्मजां दृष्ट्वा तत्रैव तत्काल एव । चिन्तयिष्यामीत्यन्वयः ॥ ३१ ॥ चिन्तयामास वैदेहीदर्शनोपायमिति शेषः ॥ ३२—३४ ॥ लक्ष्यालक्ष्येति लक्ष्यशरीरत्वे राक्षसा गृह्णीयुः । अलक्ष्यशरीरत्वे सर्वा लङ्का न विचेतुं शक्या । कृत्यं साधयितुं प्रवेष्टुं कृत्यसाधनाय प्रवेष्टुं । प्राप्तकालं युक्तं ॥३५॥ विनिश्चित्य सीतान्वेषणप्रकारं विनिश्चित्य । मुहुर्मुहुस्तमेव चिन्तयामासेत्यर्थः ॥३६—३७॥ एकश्च पश्येयमिति अत्रापि कथमित्यनुषञ्जनीयं । रहिते एकान्ते ॥३८॥ पण्डितेन मुहुर्मुहुर्विचार्य कार्याणि कर्तव्यानि नतु पण्डितमानिना सकृद्विचार्य कर्तव्यानि तथासति

रिपुंचनिरीक्ष्यज्ञात्वावानरश्चिन्तयामासेतिसंबन्धः ॥ २३ ॥ **रामानु०** आगत्यापीति । अत्रापिशब्देनदुस्तरसागरलङ्घनपूर्वकमागमनमेवदुर्घटमितिसूच्यते ॥ २७ ॥ **रामानु०** सःसालगिरिभूविदलनादिपुरुषपराक्रमइत्यर्थः ॥ **स०** राघवःकिंकरिष्यतीत्येतल्लङ्कास्तुत्यर्थं । नतुरामस्यासामर्थ्याभिप्रायं । **ति०** अविषमांनविद्यतेविषमायतस्तां ॥२८॥ **रामानु०** सान्त्वस्यावकाशाभाव आसुरप्रकृतित्वात् । दानस्यावकाशाभावोऽर्थोपचितत्वात् । भेदस्यावकाशाभावो बलदर्पितत्वात् । युद्धस्यावकाशाभावो बुद्धिपराक्रमयुक्तत्वात् ॥ २९ ॥ **स०** आगत्यापीति पूर्वमङ्गीकृत्य सर्वेषामागमनमुक्तं । वस्तुतस्तदपि नसंभवतीत्याह—चतुर्णामिति ॥३०॥ **ति०** रामस्याभ्युदयं तदभ्युदयरूपसीतान्वेषणोपायं ॥ ३२ ॥ **रामानु०** विनिश्चस्यमुहुर्मुहुरित्यनेन समुद्रलङ्घनादपि लङ्काप्रवेशस्यदुष्करत्वंद्योत्यते ॥ ३६ ॥ **ती०** पृषदंशकमात्रः पृषान्मूषिकान्दशतीतिपृषदंशोमार्जारः । ' ओतुर्बिडालोमार्जारःपृषदंशकआखुभुक् ' इत्यमरः ॥ **शि०** वृषदंशकमात्रःवृषाणांमूषकाणांदंशकोमार्जारःतन्मात्रः । " वृषोगव्याखुधर्मयोः " इतिहैमः

[**पा०**] १ ट. राक्षसैर्वीरैः. २ घ. पुष्टां. ३ घ. शूलमुद्गरपाणिभिः. ४ ग. आगताश्चापि. ५ ग. सुरासुरैः. ६ ङ. झ. ञ. ट. इमांत्वविषमां. ७ क. ख. घ.—ट. लंकांदुर्गां. ८ ङ. च. छ. ञ. ट. सुमहाबाहुः. ९ सान्त्रस्तु. १० क. ग. ध्वधिगम्यते. ११ ङ. ञ. ट. तरस्विनां. १२ ञ. तदैव. १३ ख. ङ. झ. ञ. ट. गिरेःशृङ्गे. १४ च. छ. ज. स्थितःश्रीमान्. १५ ङ. झ. त्रामस्याभ्युदयंततः. १६ ङ.—ट. महौजसो. १७ झ. विनिश्चस्य. १८ क. रामस्याक्लिष्टकर्मणः. १९ झ. ञ. मेकस्तु. २० ग. च. ज. ञ. भूतार्थाश्च. २१ ङ. झ. विनश्यन्ति.

अर्थानर्थान्तरे बुद्धिर्निश्चिताऽपि न शोभते ॥ घातयन्ति हि कार्याणि दूताः पण्डितमानिनः ॥४०॥
न विनश्येत्कथं कार्यं वैक्लव्यं न कथं भवेत् ॥ लङ्घनं च समुद्रस्य कथं नु न वृथा भवेत् ॥ ४१ ॥
मयि दृष्टे तु रक्षोभी रामस्य विदितात्मनः ॥ भवेद्व्यर्थमिदं कार्यं रावणानर्थमिच्छतः ॥ ४२ ॥
न हि शक्यं क्वचित्स्थातुमविज्ञातेन राक्षसैः ॥ अपि राक्षसरूपेण किमुतान्येन केनचित् ॥ ४३ ॥
वायुरप्यत्र न ज्ञातश्चरेदिति मतिर्मम ॥ न ह्यस्त्यविदितं किंचिद्राक्षसानां बलीयसाम् ॥ ४४ ॥
इहाहं यदि तिष्ठामि स्वेन रूपेण संवृतः ॥ विनाशमुपयास्यामि भर्तुरर्थश्च हीयते ॥ ४५ ॥
तदहं स्वेन रूपेण रजन्यां ह्रस्वतां गतः ॥ लङ्कामधिपतिष्यामि राघवस्यार्थसिद्धये ॥ ४६ ॥
रावणस्य पुरीं रात्रौ प्रविश्य सुदुरासदाम् ॥ विचिन्वन्भवनं सर्वं द्रक्ष्यामि जनकात्मजाम् ॥ ४७ ॥
इति संचिन्त्य हनुमान्सूर्यस्यास्तमयं कपिः ॥ आचकाङ्क्ष तदा वीरो वैदेह्या दर्शनोत्सुकः ॥ ४८ ॥
सूर्ये चास्तं गते रात्रौ देहं संक्षिप्य मारुतिः ॥ वृषदंशकमात्रः सन्बभूवाद्भुतदर्शनः ॥ ४९ ॥
प्रदोषकाले हनुमांस्तूर्णमुत्प्लुत्य वीर्यवान् ॥ प्रविवेश पुरीं रम्यां सुविभक्तमहापथाम् ॥ ५० ॥
प्रासादमालावितताम स्तम्भैः काञ्चनराजतैः ॥ शातकुम्भमयैर्जालैर्गन्धर्वनगरोपमाम् ॥ ५१ ॥
सप्तभूमाष्टभूमैश्च स ददर्श महापुरीम् ॥ तलैः स्फटिकसंकीर्णैः कार्तस्वरविभूषितैः ॥ ५२ ॥

दोषः स्यादित्याह—भूताश्चेति ॥ भूताश्चार्थाः सम्यगुपायप्रयोगान्निष्पन्नप्राया अप्यर्थाः । विक्लबं अधीरं अविमृश्यकारिणं । दूतमासाद्य देशकालविरोधितास्सन्तः । सूर्योदये तमो यथा तम इव तद्दूतस्याविमृश्यकारित्वेन सद्य एव विपद्यन्ते । नश्यन्तीत्यर्थः ॥ ३९ ॥ न केवलं कार्यहानिः किन्तु स्वाम्यादीनां बुद्धिशून्यतापि स्यादित्याह—अर्थेति ॥ अत्रापि विक्लबं दूतमासाद्येत्यनुवर्तते । अर्थानर्थान्तरे अर्थानर्थयोः प्रयोजनसाधनयोः कार्याकार्ययोः । अन्तरे विषये । निश्चिता राज्ञा सचिवैश्च निर्णीता । बुद्धिः । विक्लबं दूतमासाद्य न शोभते अनर्थकारिणी भवतीत्यर्थः । इदमेव समर्थयते—घातयन्तीति ॥ ४० ॥ प्रागुक्तदोषाः स्वस्मिन्कथं न स्युरिति चिन्तयति—न विनश्येदिति ॥ कार्यं रामकार्यं । कथं केनोपायेन न विनश्येत् । किमद्यापराह्ण एव लङ्काप्रवेष्टव्या उत रात्रौ । किमनेनैव महता रूपेण प्रवेष्टव्या उत ह्रस्वेन रूपेणेत्यर्थः । वैक्लव्यं ममापाण्डित्यं कथं न भवेत् ॥ ४१ ॥ अपराह्णे प्रवेशेदोषमाह—मयीति ॥ ४२ ॥ महता रूपेण प्रवेशं निराचष्टे—न हीति ॥ ४३—४४ ॥ स्वेन रूपेण स्वाभाविकमहता रूपेण ॥ ४५ ॥ परिशेषाद्रात्रौ ह्रस्वरूपेणैव प्रवेष्टव्यमित्याह—तदहमिति ॥ ४६—४८ ॥ स्वेन रूपेण वृषदंशकमात्रः बिडालप्रमाणः ॥ ४९ ॥ प्रविवेश प्रवेष्टुमुपक्रान्तः । चतुर्थे सर्गे प्रवेशस्य वक्ष्यमाणत्वात् । लङ्कादर्शनं तु त्रिकूटदर्शनस्थित्या ॥ ५० ॥ काञ्चनराजतैः स्तम्भैः शातकुम्भमयैर्जालैश्च उपलक्षितां । गन्धर्वनगरोपमामिति । गन्धर्वनगरं नाम नानारत्नमयगोपुरप्रासादादियुक्तनगरादिवद्भासमानमभ्रचित्रं तद्वदाश्चर्यावहामित्यर्थः । यथोक्तं " अनेन रत्नाकृति खे विराजते पुरं पताकाध्वजतोरणान्वितम् । यदा तदा हस्तिमनुष्यवाजिनां पिबत्यसृग्भूरि रणे वसुन्धरा" इति॥५१॥ सप्तभूमाष्टभूमैश्चेति । भूमिशब्देनआसनशयनादियो-

॥ ३९ ॥ रामानु० अभ्रंलिहत्वातिविचित्रत्वाभ्यांगन्धर्वनगरौपम्यं ॥ स्फटिकसंकीर्णैःकार्तस्वरविभूषितैश्चतलैरुपलक्षितैः सप्तभौमाष्टभौमाः भूमिषुभवन्तीतिभौमानिस्थलानि । सप्त भौमानियेषांतेसप्तभौमाः । एवमष्टभौमाः । सप्तभौमाश्चाष्टभौमाश्चतैः । प्रासादैरितिशेषः । तैरुपलक्षितांपुरींददर्शेतियोजना ॥ ५१—५२ ॥

[पा०] १ घ. ङ. झ. ट. घातयन्तीह. २ ख. घ. ङ. झ. ञ. ट. नभवेद्वृथा. ३ ग. ङ. च. छ. झ. ञ. नाज्ञातः. ४ ङ. झ. ट. ह्यत्राविदितं. ५ झ. ञ. ट. हास्यति. ६ क. ख. ग. ङ. च. ज. झ. ट. लङ्कामभि. ७ च. छ. ज. ञ. रम्यां. ८ ङ.—ट. प्रविश्यभवनं. ९ ङ. च. झ. ञ. ट. निश्चित्य. १० क. च. छ. ज. हरिः. ११ क. ङ. झ. ञ. ट. मात्रोथ. १२ क. घ. च.—ट. मुत्पत्य. १३ ङ. च. छ. ञ. ट. प्रविभक्त. १४ ङ. झ. ञ. ट. काञ्चनसंनिभैः. १५ झ. सप्तभौमाष्टभौमैश्च. १६ ङ.—ट. स्थलैः. १७ च. छ. ज. ञ. परिष्कृतैः.

वैडूर्यमणिचित्रैश्च मुक्ताजालविभूषितैः ॥ तलैः शुशुभिरे तानि भवनान्यत्र रक्षसाम् ॥ ५३ ॥
काञ्चनानि विचित्राणि तोरणानि च रक्षसाम् ॥ लङ्कामुद्द्योतयामासुः सर्वतः समलङ्कृताम् ॥ ५४ ॥
अचिन्त्यामद्भुताकारां दृष्ट्वा लङ्कां महाकपिः ॥ आसीद्विषण्णो हृष्टश्च वैदेह्या दर्शनोत्सुकः ॥ ५५ ॥
स पाण्डुरोद्विद्धविमानमालिनीं महार्हजाम्बूनदजालतोरणाम् ॥
यशस्विनीं रावणबाहुपालितां क्षपाचरैर्भीमबलैः समावृताम् ॥ ५६ ॥
चन्द्रोपि साचिव्यमिवास्य कुर्वंस्तारागणैर्मध्यगतो विराजन् ॥
ज्योत्स्नावितानेन वितत्य लोकमुत्तिष्ठते नैकसहस्ररश्मिः ॥ ५७ ॥
शङ्खप्रभं क्षीरमृणालवर्णमुद्गच्छमानं व्यवभासमानम् ॥
ददर्श चन्द्रं स हरिप्रवीरः पोप्लूयमानं सरसीव हंसम् ॥ ५८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्वितीयः सर्गः ॥ २ ॥

तृतीयः सर्गः ॥ ३ ॥

लङ्काभिमानिन्यामहाराक्षस्या निशि लङ्कांप्रविशतोहनुमतः प्रत्यक्षीभूय साधिक्षेपंप्रतिषेधनपूर्वकं स्वपाणितलेन ताडनं ॥ १ ॥ ततोहनुमता नारीतिकरुणया वाममुष्टिनामन्दंताडने पतितविह्वलयातया तंप्रति कपिना स्वपराजयेसति लङ्काविनाशप्रतिपादकब्रह्मवचननिवेदनेन नगरान्तःप्रवेशाभ्यनुज्ञानं ॥ २ ॥

स लम्बशिखरे लम्बे लम्बतोयदसन्निभे ॥ सत्त्वमास्थाय मेधावी हनुमान्मारुतात्मजः ॥ १ ॥

ग्यं तलमुच्यते । सप्त भूमयो येषां ते सप्तभूमाः । "कृष्णोक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते" इत्यच् समासान्तः । एवमष्टभूमाः । सप्तभूमादिशब्देन तादृशाः प्रासादविशेषा उच्यन्ते । यद्वा प्रासादैरिति शेषः । तैरुपलक्षितां ॥ ५२—५४ ॥ विषण्णः हृष्टश्चेति । अचिन्त्या दुष्प्रवेशेति च विषण्णः । यतोद्भुताकारा अतो विस्मयनीयतया हृष्टः ॥ ५५ ॥ स इति पूर्वश्लोकेनायमेकान्वयः । सुधाधवलनिम्नोन्नतविमानाकारभवनमालिनीमित्यर्थः ॥ ५६ ॥ इदानीं चन्द्रोदयकाल इत्याह—चन्द्रोपीति ॥ मध्यगतः सन्निधानात्तारागणमध्यगतः । तारागणैरिति सहयोगे तृतीया । ज्योत्स्नावितानेन लोकं वितत्य व्याप्य । उत्तिष्ठते आविर्भवति स्म । "उदोनूर्ध्वकर्मणि" इत्यात्मनेपदं ॥ ५७—५८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वितीयः सर्गः ॥ २ ॥

लम्बे लम्बाख्ये । लम्बशिखरे लम्बगिरिशिखरे इति

रामानु० सपाण्डुरेत्यस्यदृष्ट्वेति पूर्वेणसंबन्धः । पाण्डुरोद्विद्धविमानमालिनीं सुधाधौतोन्नतसप्तभूमगृहमालिनीं । "विमानोस्त्रीदेवयानेसप्तभूमेचसद्मनि" इतिवैजयन्ती ॥ ५६ ॥ **ति०** मध्यगतःखमध्यगतः । अनेकसहस्रेत्यनेनपूर्णत्वं । अनेकेत्यस्यैवसहस्रेत्यनेनविवरणं । उत्तिष्ठते आर्षस्तङ् । ज्योत्स्नावितानेनलोकान्वितत्यआवार्यसम्यगवलोकनसाधनतयाअस्यहनूमतःसाचिव्यंसाहाय्यंकुर्वन्निव ॥ **ति०** ननुखमध्यगतस्यप्रदोषेउदयोष्टम्यांनतदापूर्णत्वं । पूर्णस्यतुनखमध्यगतस्योदयइतिचेन्न । शुक्लैकादश्यांखमध्यसमीपगतत्वेनमध्यगतत्वोपचारात् । पूर्णत्वंचपूर्णकल्पत्वेनव्यवहृतं । यद्वानेकन्यूनाः सहस्रंरश्मयोयस्येतिमध्यमपदलोपितत्पुरुषगर्भोबहुव्रीहिः । अतएवरात्रिशेषेहनूमत्प्रशोकवनिकास्थेसीतासविधेरावणस्यागमनकालेदीपिकावर्णनंकृतं । तेनहितदाचन्द्रास्तानुमानं । साचेयंमार्गशीर्षस्य । फाल्गुनेलङ्कांप्रविष्टायाःसीतायाः "वर्ततेदशमोमासोद्वौतुशेषौऽवबुध्यम" इतिहनूमन्तंप्रतिवचनात् । हरणदिनएवचसीतायालङ्काप्रवेशनंरामभयादितिस्पष्टमेव । **रामानु०** सागरमैनाकदिवाकरादिवच्चन्द्रोपिसाचिव्यंकुर्वन्प्रादुरभूदित्यपिशब्देनावगम्यते ॥ ५७ ॥ इतिद्वितीयःसर्गः ॥ २ ॥

रामानु० पूर्वसर्गोक्तंलङ्काप्रवेशोपक्रमंविस्तरेणाह । सलंबशिखरइत्यादिना । सः सागराक्लेशतरणेनप्रसिद्धः । महासत्त्वःसमुद्र-

[पा०] १ ङ. झ. ट. तैस्तैःशुशुभिरे. २ घ. भवनान्यपि. ३ ङ. छ. ज. झ. ट. पाण्डरावि्द्ध. ४ झ. ट. सुपालितां. क. दुरासदां. ५ ङ.—ट. लोकानुत्तिष्ठते. ६ क.—ट. कपिप्रवीरः.

निशि लङ्कां महासत्त्वो विवेश कपिकुञ्जरः ॥ रम्यकाननतोयाढ्यां पुरीं रावणपालिताम् ॥ २ ॥
शारदाम्बुधरप्रख्यैर्भवनैरुपशोभिताम् ॥ सागरोपमनिर्घोषां सागरानिलसेविताम् ॥ ३ ॥
सुपुष्टबलसंघुष्टां यथैव विटपावतीम् ॥ चारुतोरणनिर्यूहां पाण्डुरद्वारतोरणाम् ॥ ४ ॥
भुजगाचरितां गुप्तां शुभां भोगवतीमिव ॥ तां सविद्युद्घनाकीर्णां ज्योतिर्मार्गनिषेविताम् ॥ ५ ॥
मन्दमारुतसंचारां यथेन्द्रस्यामरावतीम् ॥ शातकुम्भेन महता प्राकारेणाभिसंवृताम् ॥ ६ ॥
किङ्किणीजालघोषाभिः पताकाभिरलङ्कृताम् ॥ आसाद्य सहसा हृष्टः प्राकारमभिपेदिवान् ॥ ७ ॥
विस्मयाविष्टहृदयः पुरीमालोक्य सर्वतः ॥ ८ ॥
जाम्बूनदमयैर्द्वारैर्वैडूर्यकृतवेदिकैः ॥ वज्रस्फटिकमुक्ताभिर्मणिकुट्टिमभूषितैः ॥
तप्तहाटकनिर्यूहै राजतामलपाण्डुरैः ॥ ९ ॥
वैडूर्यकृतसोपानैः स्फाटिकान्तरपांसुभिः ॥ चारुसंजवनोपेतैः खमिवोत्पतितैः शुभैः ॥ १० ॥
क्रौञ्चबर्हिणसंघुष्टै राजहंसनिषेवितैः ॥ तूर्याभरणनिर्घोषैः सर्वतः प्रतिनादिताम् ॥ ११ ॥
वस्वोकसाराप्रतिमां तां वीक्ष्य नगरीं ततः ॥ खमिवोत्पतितुं कामां जहर्ष हनुमान्कपिः ॥ १२ ॥
तां समीक्ष्य पुरीं रम्यां राक्षसाधिपतेः शुभाम् ॥ अनुत्तमार्द्धियुतां चिन्तयामास वीर्यवान् ॥१३॥
नेयमन्येन नगरी शक्या धर्षयितुं बलात् ॥ रक्षिता रावणबलैरुद्यतायुधधारिभिः ॥ १४ ॥
कुमुदाङ्गदयोर्वापि सुषेणस्य महाकपेः ॥ प्रसिद्धेयं भवेद्भूमिर्मैन्दद्विविदयोरपि ॥ १५ ॥

चाहुः । यद्वा लम्बे लम्बमान इव स्थिते । लम्बशिखरे त्रिकूटशिखरे । सत्त्वं व्यवसायं । धैर्यमिति यावत् । विवेश प्राप ॥ १—३ ॥ विटपावतीं अलकां । निर्यूहो मत्तवारणः । पाण्डुरद्वारतोरणां पाण्डुरे द्वारतोरणे यस्यास्तां ॥४—७॥ विस्मयाविष्टहृदयः । अभूदिति शेषः ॥ ८ ॥ पुनर्हर्षहेतूनाह—जाम्बूनदमयैरित्यादिना ॥ जाम्बूनदमयैर्द्वारैरित्यादौसहयोगे तृतीया । वज्रस्फटिकमुक्ताभिरित्यत्रापि कृतवेदिकैरिति संबध्यते । राजतामलपाण्डुरैः अवयवैः ॥९॥ स्फाटिकान्तरपांसुभिः स्फटिकमयाङ्गणपांसुभिः । संजवनं चतुश्शालं ॥ १०—११ ॥ वस्वोकसारा अलका । यद्वा वस्वोकसारा पूर्वदिगवस्थिताशक्रपुरी । " वस्वोकसारा शक्रस्य पूर्वस्यां दिशि वै पुरी " इतिपुराणवचनात् ॥ १२—१४ ॥ प्रसिद्धेयमिति । इयं लङ्का विदिता

लङ्घनादावप्रतिहतशक्तिः । हनुमान्लंबेलंबमानाकारे । लंबतोयदसंनिभेलंबशिखरे लंबपर्वतशिखरे । मेधावीतत्कालोचितकर्तव्यविषयप्रज्ञायुक्तःसन् । सत्त्वमास्थाय लङ्काप्राप्तिमात्रोपयुक्तलङ्घनशक्तिमास्थायनिशिविवेशेतिसंबन्धः ॥ **ति०** लंबशिखरेऽवतत्तशिखरेलंबेलंबाख्यपर्वते ॥ १—२ ॥ **रामानु०** सागरोपमनिर्घोषांसागरनिर्घोषोपमनिर्घोषां । विटपावतींअलकां । 'क्षयःपुण्यजनानांस्यादलकाविटपावती' इतिवचनात् । तोरणस्यनिर्यूहःतोरणनिर्यूहः । चारुःतोरणनिर्यूहोयस्यास्तां । प्राकारशब्देनप्राकारसमीपोलक्ष्यते । ' अद्वारेणमहाबाहुःप्राकारमभिपुप्लुवे ' इत्युपरिवक्ष्यमाणत्वात् ॥ २—८ ॥ **ति०** चण्डमारुतानांपरिवहादीनांशब्दोयस्यांतादृशींअमरावतीमिवस्थितां । अत्रामराःसन्त्यस्यामित्यमरावतीशब्दोः । असंज्ञायामपि ' मतौबह्वचः ' इत्यार्षोदीर्घः । नत्विहेन्द्रपुर्यमरावती । उक्तलक्षणाभावात् । लङ्कायाउक्तसादृश्यंचसालङ्काररक्षसवत्त्वाद्बलवद्घोषबाहुल्याच्चेतिकतकः ॥ **शि०** अमरावतींयथा संपत्त्याइन्द्रपुरीसदृशीं ॥ ६ ॥ **शि०** अन्येन रामभिन्नेनजनेन । बलात्पराक्रमात्धर्षयितुंनशक्या ॥ १४ ॥ **रामानु०** प्रसिद्धा दुष्प्रवेशत्वेनप्रसिद्धाइयंनगरीकुमुदाङ्गदयोःमहाकपेःसुषेणस्यापिमैन्दद्विविदयोरपिभूमिःविषयोभवेत् । **ति०**

[**पा०**] १ च. छ. ज. पाठेषु. सुपुष्टबलसंघुष्टामित्यर्धस्यस्थाने. सुपुष्टबलसंघुष्टांगुप्तांरक्षोगणैर्भृशं । वस्वोकसारप्रतिमांयथैव विटपावतीं । इत्येकःश्लोकोदृश्यते. ङ. झ. सुपुष्टबलसंपुष्टां. ग. सुदुर्गोराक्षसैर्गुप्तां. क. सुपुष्पफलसंयुक्तां. २ ञ. पाण्डुरध्वजतोरणां. ३ च. छ. ञ. गुहां. ४ ग. ङ.—ट. ज्योतिर्गण. ५ ख. ग. ङ.—ट. चण्डमारुतनिर्ह्रादां. ६ क. ङ. झ. ञ. ट. यथाचाप्यमरावतीं. ग. च. छ. ज. यथावदमरावतीं. ७ ञ. कृततोरणैः. ८ ख. ङ. झ. ञ. ट. मणिस्फटिक. ९ क. च. छ. ज. कुट्टिमवेदिकैः. १० ङ. झ. ट. परिनादितां. ११ क. ग.—ट. समीक्ष्य. १२ क. ख. ङ. छ. ट. खमिवोत्पतितांलङ्कां. १३ क. ख. ङ. झ. ञ. ट. लङ्कां. १४ क. ङ. झ. ञ. ट. मृद्धिमतीं. च. छ. ज. मृद्धियुक्तां. १५ क. वानरः. १६ ङ. झ. ट. पाणिभिः. १७ क. ख. महात्मनः.

विवस्वतस्तनूजस्य हरेश्च कुशपर्वणः ॥ ऋक्षस्य केतुमालस्य मम चैव गतिर्भवेत् ॥ १६ ॥
समीक्ष्य तु महाबाहू राघवस्य पराक्रमम् ॥ लक्ष्मणस्य च विक्रान्तमभवत्प्रीतिमान्कपिः ॥ १७ ॥
तां रत्नवसनोपेतां गोष्ठागाराश्वतंसकाम् ॥ यत्रागारस्तनीमृद्धां प्रमदामिव भूषिताम् ॥ १८ ॥
तां नष्टतिमिरां दीप्तैर्भास्वरैश्च महागृहैः ॥ नगरीं राक्षसेन्द्रस्य ददर्श स महाकपिः ॥ १९ ॥
अथ सा हरिशार्दूलं प्रविशन्तं महाबलम् ॥ नगरी स्वेन रूपेण ददर्श पवनात्मजम् ॥ २० ॥
सा तं हरिवरं दृष्ट्वा लङ्का रावणपालिता ॥ स्वयमेवोत्थिता तत्र विकृताननदर्शना ॥ २१ ॥
पुरस्तात्कपिवर्यस्य वायुसूनोरतिष्ठत ॥ मुञ्चमाना महानादमब्रवीत्पवनात्मजम् ॥ २२ ॥
कस्त्वं केन च कार्येण इह प्राप्तो वनालय ॥ कथयस्वेह यत्तत्त्वं यावत्प्राणा धरन्ति ते ॥ २३ ॥
न शक्यं खल्वियं लङ्का प्रवेष्टुं वानर त्वया ॥ रक्षिता रावणबलैरभिगुप्ता समन्ततः ॥ २४ ॥
अथ तामब्रवीद्वीरो हनुमानग्रतः स्थिताम् ॥ कथयिष्यामि ते तत्त्वं यन्मां त्वं परिपृच्छसि ॥ २५ ॥
का त्वं विरूपनयना पुरद्वारेऽवतिष्ठसि ॥ किमर्थं चापि मां रुद्ध्वा निर्भर्त्सयसि दारुणा ॥ २६ ॥
हनुमद्वचनं श्रुत्वा लङ्का सा कामरूपिणी ॥ उवाच वचनं क्रुद्धा परुषं पवनात्मजम् ॥ २७ ॥
अहं राक्षसराजस्य रावणस्य महात्मनः ॥ आज्ञाप्रतीक्षा दुर्धर्षा रक्षामि नगरीमिमाम् ॥ २८ ॥
न शक्या मामवज्ञाय प्रवेष्टुं नगरी त्वया ॥ अद्य प्राणैः परित्यक्तः स्वप्स्यसे निहतो मया ॥ २९ ॥

भवेत् ॥ १५ ॥ गतिस्तु सुग्रीवस्य कुशपर्वणः केतुमालस्य मम चैव भवेत् । पूर्वं नीलादीनामेव गतिरुक्ता । अत्र त्वन्येषामित्युक्तिश्चिन्ताप्रकारविशेषः ॥ १६—१७ ॥ तां रत्नेत्यत्र ददर्शेत्यपकृष्यते । नत्वेकं वाक्यं श्लोकद्वयं तच्छब्दद्वयप्रयोगात्प्रथमे श्लोके स्त्रीसाम्योक्तेश्च ॥ १८—२३ ॥ अभिगुप्ता समावृतेत्यर्थः ।

प्रसिद्धाप्रकर्षेण सिद्धगतिका ॥ १५ ॥ **रामानु०** अत्रइयमित्यनुषज्यते । गतिः विषयः भवेत् । ममचेतिपश्चान्निर्देशेनसर्वोत्तरेणापिहनुमतास्वस्यनैच्यमनुसंहितमित्यवगम्यते ॥ **ति०** कुशपर्वणइति । कुशपर्वसदृशलोमवतइत्यर्थकमृक्षस्यविशेषणं । अतिदीर्घकठोरलोमावृतत्वात्कपिमुख्यस्येतिविशेषणंच । तस्यैवममचैवगतिः अस्यामितिशेषः ॥ १६ ॥ **रामानु०** विक्रान्तंविक्रमं । भावेनिष्ठा । प्रीतिमानभवत् । रामलक्ष्मणाभ्यामनायासेनजेतुंशक्येतिमत्प्रीतिमानभूदित्यर्थः ॥ **स०** सर्वेषामेषां विनारामावलंबेनेयंजेतुंनशक्येत्येतत्प्रसंगात्स्मारितंरामलक्ष्मणयोर्विक्रमंस्मृत्वातुतोषेत्याह—समीक्ष्येति ॥ १७ ॥ **रामानु०** तामिति । अत्रददर्शेत्यपकृष्यते । यद्वाएकस्यतच्छब्दस्यप्रसिद्धिपरत्वेनश्लोकद्वयमेकंवाक्यं ॥ **ति०** रत्नवसनोपेतां रत्नप्राकारवाससंच । गोष्ठान्यगाराणिचावतंसोयस्यास्तां । गोष्ठंगोशाला । इदंवाजिशालादेरप्युपलक्षणं । यत्राणिप्राकारोपरिस्थापितानिक्षेपण्यादीनि । तद्वृहस्तनीं ॥ १८ ॥ **ति०** तांप्रसिद्धांलङ्कांभास्वरैश्चमहाग्रहैः । चाचन्द्रकिरणैः ॥ १९ ॥ **रामानु०** स्वेनरूपेणअधिदेवतारूपेण ॥ २० ॥ **रामानु०** अतिष्ठततस्मैस्वात्मानंप्रदर्शितवती । ' प्रकाशनस्थेयाख्ययोश्च ' इत्यात्मनेपदं ॥ २२ ॥ **रामानु०** तेतवप्राणाःयावद्धरन्तिप्रियन्तेतावत्तत्त्वं तत्कथयस्वकथय । "वृङ्अवसाने" विकरणादिप्रत्ययआर्षः । यावत्प्राणान्हरामितेइतिवापाठः ॥ २३ ॥ **रामानु०** नशक्यमिति । लिङ्गसामान्येनपुंसकं । तथाचोक्तं भगवताभाष्यकारेण—' श्वमांसेनापिशक्यंक्षुदपहन्तुंइति । रावणबलैःसमन्ततःअभिगुप्तासमन्ततःसंवृता । अतएवरक्षिता ॥ **शि०** किंच अभितःचतुर्दिक्षुगुप्ताः राक्षसविजातीयनिरीक्षणार्थंमलक्ष्यरूपेणस्थितारक्षसायस्मात्सा ॥ **स०** त्वांहल्लाऽन्तर्गच्छेयमित्याशापितवमास्त्रितिवाह—अभिगुप्तेति । अहंअन्ततःमृत्योस्सकाशादभिगुप्ताआसंअस्मि । अतोनत्वयावध्या ॥ २४ ॥ **ति०** अथतयापृष्टोहनुमांस्तांप्रतितत्प्रश्नोत्तरकथनं प्रतिज्ञायसुरसावदेषापूज्यावासिंहिकावद्वध्यावेतिनिर्णेतुंपृच्छति—कात्वमिति ॥ २६ ॥ **रामानु०** आज्ञाप्रतीक्षा आज्ञानुवर्तिनी

[**पा०**] १ ङ. झ. ञ. ट. कपिमुख्यस्य. २ ङ.—ज. ञ. ट. समीक्ष्यच. ३ ङ. झ. ञ. ट. महाबाहोः. ४ च. छ. ज. लक्ष्मणस्यापि. ५ ङ. झ. ञ. ट. रावतंसिकां. ६ ख. ङ. झ. ञ. ट. दीप्तैः. च. छ. ज. दीप्तांभास्वरैः. क. दीप्तैर्भास्वरैर्भवनैः शुभैः. ७ झ. महाग्रहैः. ८ ङ.—ञ. सददर्श. क. घ. ददर्शहनुमान्कपिः. ९ ङ. झ. ञ. ट. महाकपिं. १० क.—ट. पुरस्तात्तस्यवीरस्य. ११ क.—ङ. नशक्या. ञ. अशक्यं. १२ ङ. ज. ट. यत्तत्त्वं. क. तत्त्वेन. झ. तत्तत्त्वं. १३ क.—ट. द्वारेऽवतिष्ठसे. १४ क. ख. च. छ. ज. क्रुद्धा. ङ. ञ. ट. क्रोधान्निर्भर्त्सयसि. १५ क. ङ.—ट. दारुणे. १६ क. ग. ङ.—ञ. शक्यं. १७ ङ. ञ. ट. नगरीमिमां. क. वानरत्वया. १८ च. छ. ज. प्राणान्परित्यज्य.

अहं हि [1]नगरी लङ्का स्वयमेव प्लवंगम ॥ सर्वतः परिरक्षामि [2]ह्येतत्ते कथितं मया ॥ ३० ॥
लङ्काया वचनं श्रुत्वा [3]हनुमान्मारुतात्मजः ॥ [4]यत्नवान्स हरिश्रेष्ठः स्थितः [5]शैल इवापरः ॥ ३१ ॥
स तां स्त्रीरूपविकृतां दृष्ट्वा वानरपुङ्गवः ॥ आबभाषेऽथ मेधावी [6]सत्त्ववान्प्लवगर्षभः ॥ ३२ ॥
द्रक्ष्यामि नगरीं लङ्कां साट्टप्राकारतोरणाम् ॥ [निर्विशङ्कमिमं लोकं पश्यन्त्यास्तव सांप्रतम्] ॥
[7]इत्यर्थमिह संप्राप्तः परं कौतूहलं हि मे ॥ ३३ ॥
वनान्युपवनानीह लङ्कायाः काननानि च ॥ सर्वतो गृहमुख्यानि द्रष्टुमागमनं हि मे ॥ ३४ ॥
तस्य तद्वचनं श्रुत्वा लङ्का सा कामरूपिणी ॥ [8]भूय एव पुनर्वाक्यं बभाषे परुषाक्षरम् ॥ ३५ ॥
मामनिर्जित्य दुर्बुद्धे राक्षसेश्वरपालिताम् ॥ न शक्यमद्य [9]ते द्रष्टुं पुरीयं वानराधम ॥ ३६ ॥
ततः स [10]कपिशार्दूलस्तामुवाच निशाचरीम् ॥ दृष्ट्वा पुरीमिमां भद्रे पुनर्यास्ये यथागतम् ॥ ३७ ॥
ततः कृत्वा महानादं सा वै लङ्का [11]भयावहम् ॥ तलेन वानरश्रेष्ठं ताडयामास वेगिता ॥ ३८ ॥
ततः स [12]कपिशार्दूलो लङ्कया ताडितो भृशम् ॥ ननाद सुमहानादं [13]वीर्यवान्पवनात्मजः ॥ ३९ ॥
ततः संवर्तयामास वामहस्तस्य सोङ्गुलीः ॥ मुष्टिनाऽभिजघानैनां हनुमान्क्रोधमूर्च्छितः ॥ ४० ॥
स्त्री चेति मन्यमानेन नातिक्रोधस्स्वयं कृतः ॥ ४१ ॥
सा तु तेन प्रहारेण विह्वलाङ्गी निशाचरी ॥ पपात सहसा भूमौ विकृताननदर्शना ॥ ४२ ॥
ततस्तु [14]हनुमान्प्राज्ञस्तां दृष्ट्वा विनिपातिताम् ॥ कृपां चकार तेजस्वी मन्यमानः [15]स्त्रियं तु ताम् ॥४३॥
ततो वै [16]भृशसंविग्ना लङ्का सा गद्गदाक्षरम् ॥ उवाच गर्वितं वाक्यं हनुमन्तं प्लवङ्गमम् ॥ ४४ ॥
प्रसीद सुमहाबाहो त्रायस्व हरिसत्तम ॥ समये सौम्य तिष्ठन्ति सत्त्ववन्तो महाबलाः ॥ ४५ ॥
अहं तु नगरी लङ्का स्वयमेव प्लवङ्गम ॥ निर्जिताऽहं त्वया वीर विक्रमेण महाबल ॥ ४६ ॥
[17]इदं तु [18]तथ्यं [19]शृणु वै ब्रुवन्त्या मे हरीश्वर ॥ [20]स्वयंभुवा पुरा दत्तं वरदानं यथा मम ॥ ४७ ॥

अतो न रक्षितेत्यनेन पुनरुक्तिः ॥ २४—३३ ॥ उपवनानि गृहोद्यानानि । काननानि शून्यारण्यानि ॥ ३४ ॥ भूयः अतिशयेन । परुषाक्षरमित्यन्वयः ॥ ३५ ॥ शक्यमित्येतदव्ययं । तदाह कालिदासः—" शक्यमरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम् । अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः " इति । पुरीरूपं वस्तु शक्यमिति शक्यपुर्योस्सामानाधिकरण्यं वा ॥ ३६ ॥ यास्ये यास्यामि । इत्युवाचेति संबन्धः ॥ ३७ ॥ वेगिता संजातवेगा ॥ ३८—३९ ॥ संवर्तयामास संकोचयामास ॥ ४०—४४ ॥ समये स्त्रीवधवर्जनव्यवस्थायां । सत्त्ववन्तः धैर्यवन्तः ॥ ४५ ॥ अहं त्वित्यर्धं भिन्नं वाक्यं । एकवाक्यत्वेऽ-

---

॥ २८ ॥ **रामानु०** स्वयमेवसर्वतःसर्वंपरिरक्षामीतिसंबन्धः ॥ ३० ॥ **रामानु०** इत्यर्थंएतदर्थं ॥ ३३ ॥ **स०** वानराधमेति संबोधितेनापि भद्रेइतिसंबोधनं समर्थेनसता कार्यतएवप्रतीकारःकार्यो नवाचेतिदर्शयितुं ॥ ३७ ॥ **स०** क्रोधःमूर्च्छितः मध्यमावस्थांप्राप्तोयस्मिन् । अनुद्रिक्तइतियावत् । एवंचेदेवपूर्वोत्तरग्रन्थस्यारस्यंभवति ॥ ४० ॥ **स०** कृपांचकार पुनर्नताड ॥ ४४ ॥ **स०** सत्त्ववन्तः निश्चयवन्तः । ' सत्त्वमात्मलेव्यवसायेच ' इतिविश्वः ॥ ४५ ॥

[**पा०**] १ ङ. नगरींलङ्कां. २ ङ. छ.—ट. अतस्ते. ३ च. छ. ज. हनुमान्पवनात्मजः. घ. हनुमान्कपिकुञ्जरः. ४ घ. वीर्यवान्स. ५ घ. स्थितोगिरिरिवा. ६ घ. वीर्यवान्. ७ इदमर्धं. क. ग. च. छ. ज. ञ. पाठेषुदृश्यते. क. निर्विशङ्कमिमांलङ्कां. ८ ग. एतदर्थं. ९ क. भृशमेवपुनः. ख. ग. भूयएवहिसावाक्यं. १० ङ. ञ. ट. शक्याह्यय. ११ ङ.—ट. हरिशार्दूलः. १२ ङ. झ. ञ. ट. भयंकरं. क. च. छ. ज. भयानकं. १३ च.—ट. हरिशार्दूलो. १४ ङ. झ. ञ. ट. वीर्यवान्मारुतात्मजः. च. छ. ज. वीर्यवान्प्लवगर्षभः. १५ ङ. झ. ञ. न्वीरस्तां. १६ ख. च. ज.—ट. स्त्रियंच. ङ. स्त्रियंकपिः. ग. स्त्रियंत्विमां. १७ ग.—ट. भृशमुद्विग्ना. १८ ग. ङ. छ.—ट. इदंचे. १९ ख. सत्यं. २० ग. ङ. छ. झ. ञ. ट. शृणुमेब्रुवन्त्यावै. २१ क. ग.—च. झ. ञ. ट. स्वयंस्वयंभुवादत्तं.

यदा त्वां वानरः कश्चिद्विक्रमाद्वशमानयेत् ॥ तदा त्वया हि विज्ञेयं रक्षसां भयमागतम् ॥ ४८ ॥
स हि मे समयस्सौम्य प्राप्तोऽद्य तव दर्शनात् ॥ स्वयंभूविहितस्सत्यो न तस्यास्ति व्यतिक्रमः ॥ ४९ ॥
सीतानिमित्तं राज्ञस्तु रावणस्य दुरात्मनः ॥ राक्षसां चैव सर्वेषां विनाशः समुपागतः ॥ ५० ॥
तत्प्रविश्य हरिश्रेष्ठ पुरीं रावणपालिताम् ॥ विधत्स्व सर्वकार्याणि यानि यानीह वाञ्छसि ॥ ५१ ॥
प्रविश्य शापोपहतां हरीश्वरः शुभां पुरीं राक्षसमुख्यपालिताम् ॥
यदृच्छया त्वं जनकात्मजां सतीं विमार्ग सर्वत्र गतो यथासुखम् ॥ ५२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः ॥ ४ ॥

वामपादनिक्षेपपूर्वकमद्वारेणलङ्कांप्रविष्टवताहनुमता नगरान्तर्नानागीतवादित्रश्रवणेनसह विचित्रतरगृहाणां नानाविधायुधाकारधारिरावणमूलबलादीनांचावलोकनं ॥ १ ॥

स निर्जित्य पुरीं श्रेष्ठां लङ्कां तां कामरूपिणीम् ॥ विक्रमेण महातेजा हनुमान्कपिसत्तमः ॥
अद्वारेण महाबाहुः प्राकारमभिपुप्लुवे ॥ १ ॥
[निशि लङ्कां महासत्वो विवेश कपिकुञ्जरः] ॥ प्रविश्य नगरीं लङ्कां कपिराजहितंकरः ॥
चक्रेऽथ पादं सव्यं च शत्रूणां स तु मूर्धनि ॥ २ ॥
प्रविष्टः सत्वसंपन्नो निशायां मारुतात्मजः ॥ स महापथमास्थाय मुक्तापुष्पविराजितम् ॥ ३ ॥

हंशब्दस्य पुनरुक्तिः ॥ ४६–४७ ॥ वरदानस्वरूपमाह —यदेति ॥ अत्र रावणस्य दिग्विजये नन्दिकेश्वरादिभिर्लङ्कायाः सद्यो विनाशशापे दत्ते सा ब्रह्माणं गत्वा प्रार्थयामास । विनाशो मे माभूदिति । स च तस्यै वरमदात् । तव सद्यो विनाशो न भविष्यति । यदा तु वानरस्त्वामभिभविष्यति तदा तु विनाशो भविष्यतीति कथोन्नीयते ॥ ४८—५१ ॥ शापो नन्दिकेश्वरादिकृतः । यदृच्छयेत्यस्य गत इति संबन्धः । यदृच्छयाऽत्र प्राप्तस्त्वमित्यर्थः ॥ ५२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने तृतीयः सर्गः ॥ ३ ॥

अद्वारेणेत्यनेन लङ्कापरिभवो राक्षसैर्न ज्ञातुं शक्य इति द्योत्यते ॥ १ ॥ चक्र इति । शत्रुदेशप्रवेशे प्रथमं सव्यपादः कार्यः स तु शत्रोर्मूर्ध्नि कृतो भवेदिति राजशास्त्रं । अनेन प्रथमं सव्यं पादं लङ्कायां कृतवानित्यर्थः सिद्धः । तदाह बृहस्पतिः " प्रयाणकाले च गृहप्रवेशे विवाहकालेपि च दक्षिणाङ्घ्रिम् । कृत्वाग्रतः

ती० रावणाधिक्षेपक्षुभितनन्दिकेश्वरशापात्सद्यःप्राप्तोपिविनाशः स्वयंभूवरप्रसादाद्वानरास्कन्दनपर्यन्तं प्रतिबद्धइति कथात्रानुसंधेया ॥ ४९ ॥ **ति०** शापोपहतां सत्यसंकल्पभगवद्वचनेन नन्दिकेश्वरशापेनचप्रापितनाशकालां हरीश्वरस्त्वंप्रविश्ययदृच्छया सर्वत्ररावणान्तःपुरपर्यन्तं यथासुखंगतःसन् सतीं अप्रच्युतपातिव्रत्यांजानकींविमार्ग अन्वेषय । अनेनचवचनेन सीताऽकल्मषाऽत्रपुरेवर्ततइत्युपदिष्टम् ॥ ५२ ॥ इतितृतीयः सर्गः ॥ ३ ॥

रामानु० "ग्रामंवानगरंवापिपत्तनंवापरस्यहि । विशेषात्समयेसौम्यनद्वारेणविशेन्नृपः" इत्युक्तप्रकारेणअद्वारेणप्रविष्टवान् ॥ १ ॥ **स०** कपिराजहितंकरः कपीश्वरसुग्रीवायहितकारीत्यर्थः । हितशब्दोपपदात्करोतेः खश्विधायकाभावेपिप्रामाणिकप्रयोगानुसारेणतस्योद्यत्वात् । अतएवकाशिकायां भगंदरइतिरूपसिद्धये 'भगेचदारेः' इत्युक्तं ॥ २ ॥ **रामानु०** महापथं आस्थाय गम्यत्वेना-

[**पा०**] १ क.—ट. पुरींशुभां. २ च. छ. ज. राक्षसराज. ३ क. ग. तां. ४ घ. ङ. झ. ञ. ट. लङ्कांश्रेष्ठां. ५ छ.—ट. न्कपिकुञ्जरः. क. न्मारुतात्मजः. ६ झ. ज. ट. महावीर्यः. ङ. महाकायः. ७ ञ. प्राकारंचसपुप्लुवे. ग. ङ.—झ. ट. प्राकारमवपुप्लुवे. ८ ङ.—ट. पाठेष्विदमर्धदृश्यते. ९ छ. ज. चक्रेच. १० क. शत्रूणामपि. ११ क. घ. ङ. झ. ञ. ट. मुक्तपुष्प.

[[1]सेवितां राक्षसैर्भीमैर्बलिभिः शस्त्रपाणिभिः] ॥ ततस्तु तां पुरीं लङ्कां रम्यामभिययौ कपिः॥४॥
हसितोत्कृष्टनिनदैस्तूर्यघोषपुरस्सरैः [2]॥ वज्राङ्कुशनिकाशैश्च वज्रजालविभूषितैः ॥
[3]गृहमेधैः पुरी रम्या बभासे द्यौरिवाम्बुदैः ॥ ५ ॥
प्रजज्वाल तदा लङ्का रक्षोगणगृहैः शुभैः ॥ ६ ॥
सिताभ्रसदृशैश्चित्रैः पद्मस्वस्तिकसंस्थितैः ॥ वर्धमानगृहैश्चापि सर्वतः सुविभूषिता ॥
गृहमुख्यैः पुरी [4]रम्या बभासे द्यौरिवाम्बुदैः ॥ ७ ॥
तां चित्रमाल्याभरणां कपिराजहितंकरः ॥ राघवार्थं चरञ्श्रीमान्ददर्श च ननन्द च ॥ ८ ॥
भवनाद्भवनं गच्छन्ददर्श पवनात्मजः ॥ विविधाकृतिरूपाणि भवनानि ततस्ततः ॥ ९ ॥
शुश्राव मधुरं गीतं त्रिस्थानस्वरभूषितम् ॥ स्त्रीणां मदसमृद्धानां दिवि चाप्सरसामिव ॥ १० ॥
शुश्राव काञ्चीनिनदं नूपुराणां च निस्वनम् ॥ सोपाननिनदांश्चैव भवनेषु महात्मनाम् ॥
आस्फोटितनिनादांश्च क्ष्वेलितांश्च ततस्ततः ॥ ११ ॥
शुश्राव जपतां तत्र मन्त्रान्रक्षोगृहेषु वै ॥ १२ ॥
स्वाध्यायनिरतांश्चैव यातुधानान्ददर्श सः ॥ रावणस्तवसंयुक्तान्गर्जतो राक्षसानपि ॥ १३ ॥
राजमार्गं समावृत्य स्थितं [9]रक्षोबलं महत् ॥ ददर्श मध्यमे गुल्मे [10]रावणस्य चरान्बहून् ॥ १४ ॥
दीक्षिताञ्जटिलान्मुण्डान्गोजिनाम्बरधारिणः [12]॥ दर्भमुष्टिप्रहरणानग्निकुण्डायुधांस्तथा [13]॥ १५ ॥

शत्रुपुरप्रवेशे वामं निदध्याच्चरणं नृपालः" इति ॥ २—४ ॥ तूर्यघोषपुरस्सरैः हसितोत्कृष्टनिनदैः हसितानामुत्कृष्टस्वरैः युक्तेत्यर्थः । वज्राङ्कुशनिकाशैः वज्रमङ्कुशो यस्य सः वज्राङ्कुशः ऐरावतः तत्तुल्यैः तद्वच्छुभ्रैरित्यर्थः । वज्राङ्कुशतुल्यसंस्थानैर्वा । वज्रजालविभूषितैः वज्रो रत्नविशेषः । गृहमेधैः गृहश्रेष्ठैः । "उपमितं व्याघ्रादिभिः—" इत्युपमितसमासः ॥ ५—६ ॥ पद्मस्वस्तिकसंस्थितैः पद्मस्वस्तिकनामभ्यां संस्थानविशेषाभ्यां संस्थितैः । वर्धमानगृहैः वर्धमाननाम्ना संस्थानेन संस्थितैः गृहैः । तल्लक्षणानि वराहमिहिरसंहितायां व्यक्तानि विस्तरभयान्न लिख्यन्ते ॥ ७—९ ॥ त्रिस्थानस्वरभूषितं त्रिस्थानेषु उरःकण्ठशिरस्सु भवैः स्वरैर्भूषितं । ते च मन्द्रमध्यतारा: ॥ १० ॥ सोपाननिनदांश्च मणिहेमकृतानां सोपानानां नूपुरादिताडनेन ये निनादाः संभवन्ति तान् । आस्फोटितनिनादान् व्यत्यस्तकरतलाभ्यां भुजाग्रास्फालनशब्दान् । क्ष्वेलितान् सिंहनादान् ॥ ११ ॥ मन्त्रान् ऋग्वेदादीन् ॥ १२ ॥ स्वाध्यायनिरतान् ब्रह्मभागपाठनिरतान् ॥ १३ ॥ मध्यमे गुल्मे नगरमध्यस्थितसैन्यसमाजे । चरान् स्वजनवृत्तान्तजिज्ञासया प्रधानप्रेरितान् प्रणिधीन् ॥ १४ ॥ गोजिनाम्बरधारिणः वृषभचर्मरूपवस्त्रधारिणः । दर्भमुष्टिप्र-

वलंब्यप्रविष्टइतिसंबन्धः ॥ ३ ॥ **रामानु०** हसितोद्भुष्टनिनदैः हसितोच्चध्वनिभिः । गृहमुख्यैरितिपाठः ॥५॥ **ति०** स्वस्तिकाख्यगृहाः आकृत्याचतुरश्राः । " चतुश्शालाचतुर्द्वारासर्वतोभद्रसंज्ञिता । पश्चिमद्वाररहितामध्यावर्ताह्वयाननाः । दक्षिणद्वाररहितावर्धमाना धनप्रदा । प्राग्द्वाररहिता स्वस्तिकाख्यापुत्रधनप्रदा ' इत्युक्तेः पद्मस्वस्तिकवर्धमानाख्यगृहाः प्रभुगृहभेदाइत्यर्थः ॥ ७ ॥ **ति०** दीक्षितजटिलमुण्डाः गृहविनियतयः । गोजिनंगवाजिनं तद्वाससः । अंबरवाससः विवाससः । ननुलङ्कायाभारतखण्डाद्बहिर्भावेनकर्मभूमित्वाभावात्कथंतत्ररक्षसांदीक्षितत्वमितिचेन्न । नित्यकर्मस्वन्यदेशेप्यधिकारात् । रावणादेस्तपोमाहात्म्यात्तत्रकाम्यकर्मसिद्धिरपीत्यन्यत् । 'यथाक्षुरमेन्द्रमेवसोममाजहे' इत्यादिशतपथोक्तरीत्या । एतेनदेवानामीषद्विकृतानपियज्ञान्दर्शयतीतिभाष्यरीत्याचाङ्गवैकल्येप्यनुष्ठितात्कर्मणोवृत्रोत्पत्तिरूपकामनासिद्धिस्तथाप्रकृतेदेशरूपाङ्गवैकल्येपितत्सिद्धिः । रक्षसामपिदेवयो-

[पा०] १ इदमर्धं क. च. छ. ज. पाठेषु. २ ङ. छ.—ट. पुरस्कृतैः. ३ क. ग. घ. गृहमुख्यैः. ४ ख. पुरी. ५ क. ख. घ.—ट. विभूषितै. ६ क. घ. च. छ. ज. ञ. भूयो. ७ ख. ङ.—ज. ञ. ट. राघवार्थे. ८ ङ.—ज. ञ. ट. रुचिरं. ९ ङ.—ञ. ट. मदनविद्धानां. १० क. ख. ग. ङ.—ज. ञ. ट. रक्षोगणं. ११ क. ख. ग. ङ.—ट. राक्षसस्य. १२ च. छ. ञ. जिनांबरवाससः. १३ ख. स्तदा.

कूटमुद्गरपाणींश्च दण्डायुधधरानपि ॥ एकाक्षानेककर्णांश्च[1] लम्बोदरपयोधरान्[2] ॥ १६ ॥
करालान्भुग्नवक्त्रांश्च विकटान्वामनांस्तथा ॥ धन्विनः खड्गिनश्चैव शतघ्नीमुसलायुधान् ॥ १७ ॥
परिघोत्तमहस्तांश्च विचित्रकवचोज्ज्वलान् ॥ नातिस्थूलान्नातिकृशान्नातिदीर्घातिह्रस्वकान्[3] ॥ १८ ॥
नातिगौरान्नातिकृष्णान्नातिकुब्जान्न वामनान्[4] ॥ विरूपान्बहुरूपांश्च सुरूपांश्च सुवर्चसः ॥
ध्वजीन्पताकिनश्चैव ददर्श विविधायुधान्[5] ॥ १९ ॥
शक्तिवृक्षायुधांश्चैव पट्टिशाशनिधारिणः ॥ क्षेपणीपाशहस्तांश्च ददर्श स महाकपिः[6] ॥ २० ॥
स्रग्विणस्त्वनुलिप्तांश्च वराभरणभूषितान्[7] ॥ नानावेषसमायुक्तान्यथास्वैरगतान्बहून्[8] ॥
तीक्ष्णशूलधरांश्चैव वज्रिणश्च महाबलान् ॥ २१ ॥
शतसाहस्रमव्यग्रमारक्षं मध्यमं कपिः ॥ रक्षोधिपतिनिर्दिष्टं ददर्शान्तःपुराग्रतः ॥ २२ ॥
स तदा तद्गृहं दृष्ट्वा महाहाटकतोरणम् ॥ राक्षसेन्द्रस्य विख्यातमद्रिमूर्ध्नि प्रतिष्ठितम् ॥ २३ ॥
पुण्डरीकावतंसाभिः परिघाभिरलंकृतम्[9] ॥ प्राकाराबृतमत्यन्तं ददर्श स महाकपिः[10] ॥ २४ ॥
त्रिविष्टपनिभं दिव्यं दिव्यनादविनादितम्[11] ॥ वाजिहेषितसंघुष्टं नादितं भूषणैस्तदा[12] ॥ २५ ॥
रथैर्यानैर्विमानैश्च तथा हयगजैः शुभैः[13] ॥ वारणैश्च चतुर्दन्तैः श्वेताभ्रनिचयोपमैः ॥ २६ ॥

हरणान् । " यथा वज्रं हरेः पाणौ तथा विप्रकरे कुशः " इतिस्मरणादिति भावः । अग्निकुण्डायुधान् जयार्थं होमशीलान् ॥ १५ ॥ कूटमुद्गरपाणीन् कूटो नामायस्कारकूटसदृश आयुधविशेषः । " कूटोस्त्री पुञ्जमायाद्रिशृङ्गायोघनवेश्मसु । छले बाणान्तरे दम्भे भग्नशृङ्गवृषे तु ना " इति शब्दरत्नाकरे । मुद्गरो द्रुघणः । " मुद्गरो द्रुघणो घनः " इति वैजयन्ती ॥ १६ ॥ करालान् भीमान् । " करालो दन्तुरे तुङ्गे विशाले विकृतेऽपि च " इति भागुरिः । भुग्नवक्त्रान् कुटिलवक्त्रान् । " आविद्धं कुटिलं भुग्नं " इत्यमरः । विकटान् विषमाङ्गान् । शतघ्नी शतशङ्कुरयोगदा । " अयःकण्टकसञ्छन्ना शतघ्नी परिकीर्तिता " इति वैजयन्ती । मुसलं आयसोरत्निप्रमाणको दण्डः । "मुसलं त्वायसो दण्डो धार्योऽरत्निप्रमाणकः " इति शब्दरत्नाकरे ॥ १७ ॥ परिघः दण्डविशेषः । नातिदीर्घातिह्रस्वकानित्यत्र हकारोपरि ऋकारोच्चारणं वृत्तभङ्गपरिहाराय । एवं ध्वजिन इति वक्तव्ये ध्वर्जीनित्युक्तिश्च छन्दोभङ्गपरिहारायैव ॥ १८—१९ ॥ पट्टिशः तीक्ष्णधारो लोहदण्डः । " पट्टिशोऽयोदीर्घदण्डस्तीक्ष्णधारः क्षुरोपमः " इति निघण्टुः । क्षेपणी क्षेपणीयः ॥२०॥ वेषः अलङ्कारः । यथास्वैरगतान् यथेष्टचारिणः ॥ २१ ॥ शतसहस्रमेव शतसाहस्रं स्वार्थे अण् । आरक्षं गुल्मं । अन्तःपुराग्रतः अन्तर्नगराग्रतः । रक्षोधिपतिनिर्दिष्टं मध्यमगुल्मभूतं रावणमूलबलं ददर्शेत्यर्थः ॥ २२ ॥ स तदेत्यादिश्लोकद्वयमेकान्वयं ॥ सः कपिः । तत् आरक्षं दृष्ट्वा सः राक्षसेन्द्रस्य गृहं ददर्शेत्यन्वयः । क्रियाभेदात्तच्छब्दद्वयं ॥ २३—२४ ॥ त्रिविष्टपेत्यादि ॥ यानैः शिविकादिभिः । विमानैः व्योमयानैः । हयगजैरित्यत्र गजशब्दः द्विदन्तगजपरः । अतो न वारणैरित्यनेन पुनरुक्तिः । मृगपक्षिभिश्च भूषितमित्यन्वयः । रक्षिभिर्यातुधानैर्गुप्तमिति संबन्धः । आविवेश जगाम । गृहप्रवेशस्य दूरे वक्ष्यमाणत्वात्

नित्वात् ॥ १५ ॥ **ती०** द्वितीयस्तच्छब्दःप्रसिद्धिपरः ॥ २३—२४ ॥ **ति०** विचित्रवर्णादिमत्त्वादद्भुतत्वंहयानां । हयगजैः हयाकारैर्गजैः । स्वल्पगजैरितियावत् । **स०** वाजिशब्दसमभिव्याहाराद्धेषितशब्दोध्वनिमात्रपरः ॥ २५—२६ ॥

[पा०] १ ङ. झ. वर्णांश्च. २ ख. ङ. झ. ट. चलदेकपयोधरान्. ग. च. छ. ज. ञ. लंबकर्णपयोधरान्. क. चलल्बपयोधरान्. ३ अतिगौरान्महाकृष्णानतिकुब्जातिवामनान्. ४ ख. ग. घ. त्रातिकुब्जातिवामनान्. ५ क. च. छ. ज. ञ. पताकध्वजिनश्चैव. ख. ङ. झ. ञ. ट. ध्वजिनःपताकिनश्चैव. ग. खड्गिनःपाशिनश्चैव. ६ च. महान्कपिः. ७ क. च. छ. स्रग्विणस्त्वनु. ८ ख. ङ.—ट. खैरचरान्. घ. खैरंगतान्. ९ क. ख. घ.—ट. परिघाभिःसमावृतं. १० ग. विभूषितं. ११ ङ. झ. ट. संघुष्टमद्भुतैश्चहयैस्तथा. १२ च. छ. ज. ञ. भूषणस्वनैः. १३ च. छ. ज. ञ. तथाद्भुतहयैः.

भूषितं रुचिरद्वारं मत्तैश्च मृगपक्षिभिः ॥ रक्षितं सुमहावीर्यैर्यातुधानैः सहस्रशः ॥
राक्षसाधिपतेर्गुप्तमाविवेश महाकपिः ॥ २७ ॥

सहेमजाम्बूनदचक्रवालं महार्हमुक्तामणिभूषितान्तम् ॥
परार्ध्यकालागरुचन्दनाक्तं स रावणान्तःपुरमाविवेश ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुर्थः सर्गः ॥ ४ ॥

पञ्चमः सर्गः ॥ ५ ॥

सितकिरणे गगनाङ्गणमलङ्कुर्वाणेनानावस्थाकारगुणकराक्षसस्त्रीपुरुषकुलमवलोकयतोऽनवलोकयतश्च सतींसीतां हनुमतोदुःखोदयः ॥ १ ॥

ततः स मध्यं गतमंशुमन्तं ज्योत्स्नावितानं महदुद्वमन्तम् ॥
ददर्श धीमान्दिवि भानुमन्तं गोष्ठे वृषं मत्तमिव भ्रमन्तम् ॥ १ ॥
लोकस्य पापानि विनाशयन्तं महोदधिं चापि समेधयन्तम् ॥
भूतानि सर्वाणि विराजयन्तं ददर्श शीतांशुमथाभियान्तम् ॥ २ ॥
या भाति लक्ष्मीर्भुवि मन्दरस्था तथा प्रदोषेषु च सागरस्था ॥
तथैव तोयेषु च पुष्करस्था रराज सा चारुनिशाकरस्था ॥ ३ ॥
हंसो यथा राजतपञ्जरस्थः सिंहो यथा मन्दरकन्दरस्थः ॥
वीरो यथा गर्वितकुञ्जरस्थश्चन्द्रो विबभ्राज तथाऽम्बरस्थः ॥ ४ ॥

॥ २५—२७ ॥ हेम अन्यत्र जातं सुवर्णं । जाम्बूनदं जम्बूनद्यां जातं । चक्रवालं प्राकारमण्डलं । रावणान्तःपुरं रावणान्तर्नगरं ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुर्थः सर्गः ॥ ४ ॥

ततः स मध्यमित्यादि ॥ दिवि आकाशे मध्यं गतं आकाशमध्यगतमित्यर्थः । लङ्काप्रवेशे चन्द्रोदयोक्तेः रावणनगरप्रवेशे अर्धरात्र इति सूच्यते । उत्तरश्लोके अभियान्तमित्यनेनाभिगमनमुच्यते । दक्षिणां दिशं गच्छतोभिमुखत्वासंभवात् । किन्तु गमनमात्रं । सप्तदशे सर्गेपि प्रजगाम नभश्चन्द्र इति प्रकर्षेण गमनवचनं नभोमध्यातीतत्वमाचष्टे । अंशुमन्तमिति चन्द्र एवोच्यते । भानुमन्तं दीप्तिमन्तं । वृषं श्वेतं । अस्मिन्सर्गे च्छेकानुप्रासः नतु यमकं अर्थभेदाभावात् । तदुक्तं काव्यप्रकाशे । "भिन्नार्थानां त्र्यादीनां वर्णानां विवृत्तिर्यमक"मिति ॥ १ ॥ पापानि दुःखानि ॥ २ ॥ भुवि मन्दरो लक्ष्मीवान् । प्रदोषेषु सागरः । तोयेषु पद्मं श्रीमत् । तद्वत्तदानीं चन्द्रो विशिष्टलक्ष्मीको बभूवेत्यर्थः । अत्रान्यस्यान्यत्रासंबन्धान्मन्दरादिलक्ष्मीरिवास्य लक्ष्मीरिति सादृश्याक्षेपान्निदर्शनालङ्कारः । तदुक्तं काव्यप्रकाशे निदर्शनायाम् "अभिमान्यस्तु संबन्ध उपमापरिकल्पक" इति ॥३॥ राजतपञ्जरस्थः गगनगर्भस्य ज्योत्स्नाक्षालितत्वात् ।

ती० सहेमेतिच्छेदः । हेमसहितंजांबूनदचक्रवालसहितंस्वर्णप्राकारमण्डलयुक्तं । **स०** हेम्ना पीतवर्णसुवर्णेनसहितंयज्जांबूनदं श्वेतवर्णसुवर्णं ॥ २८ ॥ इतिचतुर्थः सर्गः ॥ ४ ॥

ती० यद्वातारामध्यंगतं ॥ **ति०** ततः अन्तःपुरप्रवेशोत्तरं । रात्रेःप्रथमयामस्यसमाप्तकल्पत्वमत्रेतिबोध्यं ॥ **स०** ज्योत्स्नारूपं वितानमुद्वमन्तमितिविशेषणबलादंशुमन्तमित्यस्यसूर्यैरूढस्यापियोगेनचन्द्रपरता । किंचतमेवचन्द्रंसीतायारामस्यवाभानुमन्तंसूर्यमिव । विरहितापकत्वगुणयोगेनददर्शेत्यर्थः । चन्द्रपक्षेभानुमन्तंदीप्तिमन्तमित्यर्थः ॥१॥ **ती०** पापशब्देनपापफलंदुःखमुच्यते । लो-

[पा०] १ ङ. झ. ट. भूषितैः. २ क.—ट. गृहंकपिः. ३ च. ज. ञ. चन्दनाङ्कितं. ङ. झ. ट. चन्दनार्हं. ४ घ. ङ. झ. ञ. ट. मुहुरुद्वमन्तं. ५ झ. ञ. ट. धीमान्भुवि. ६ ङ. झ. ट. यथा. ख. ञ. प्रदोषकालेषुच.

स्थितः ककुभानिव तीक्ष्णशृङ्गो महाचलः श्वेत [1]इवोच्चशृङ्गः ॥
हस्तीव जाम्बूनदबद्धशृङ्गो [2]रराज चन्द्रः [3]परिपूर्णशृङ्गः ॥ ५ ॥
विनष्टशीताम्बुतुषारपङ्को महाग्रहग्राहविनष्टपङ्कः ॥
प्रकाशलक्ष्म्याश्रयनिर्मलाङ्को रराज चन्द्रो भगवाञ्शशाङ्कः ॥ ६ ॥
शिलातलं प्राप्य यथा मृगेन्द्रो महारणं प्राप्य यथा गजेन्द्रः ॥
राज्यं समासाद्य यथा नरेन्द्रस्तथाप्रकाशो विरराज चन्द्रः ॥ ७ ॥
प्रकाशचन्द्रोदयनष्टदोषः प्रवृद्धरक्षःपिशिताशदोषः ॥
रामाभिरामेरितचित्तदोषः स्वर्गप्रकाशो भगवान्प्रदोषः ॥ ८ ॥
तन्त्रीस्वनाः कर्णसुखाः प्रवृत्ताः स्वपन्ति नार्यः पतिभिस्सुवृत्ताः ॥
नक्तंचराश्चापि तथा प्रवृत्ता विहर्तुमत्यद्भुतरौद्रवृत्ताः ॥ ९ ॥

मन्दरकन्दरस्थः तस्य श्वेतगिरित्वात् । गर्वितकुञ्जरस्थः नीलरूपस्य नभस उपर्यवस्थानात् । अत्र पुष्टत्वादीनां साधारणधर्माणामनुपादानाल्लुप्तोपमालङ्कारः॥४॥परिपूर्णशृङ्गः परिपूर्णकलः । अत्र शृङ्गशब्दस्य विषाणाद्यर्थभेदेपि बिम्बप्रतिबिम्बभावेनौपम्यम् ॥५॥ शीताम्बु हिमाम्बु तुषाराः पृषताः पङ्कः तमः । विनष्टाः शीताम्बुतुषारा एव पङ्काः यस्मिंस्तथा । " तुषारः शीकरे हिमे " इति विश्वः । महाग्रहाणां शुक्रबृहस्पत्यादीनां ग्राहेण ग्रहणेन आच्छादनेन विनष्टः पङ्को मलं यस्य सः महाग्रहग्राहविनष्टपङ्कः । स्वतेजसा महाग्रहतिरस्कारेण व्यक्तनैर्मल्य इत्यर्थः । यद्वा महाग्रहः सूर्यः तस्य ग्राहेण किरणपरिग्रहेण विनष्टः विनाशितः पङ्कः तमः येन सः । तदा तरणिकिरणसंक्रमणेन देदीप्यमानमण्डल इत्यर्थः । तदुक्तं वराहमिहिरेण । " सलिलसमे शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम् । क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः " इति ॥ प्रकाशलक्ष्म्याश्रयनिर्मलाङ्कः तेजस्समृद्धियोगात्स्पष्टकलङ्कः । अतिधवले चन्द्रे परभागयोगेन कलङ्कस्याप्यौज्ज्वल्यं भवतीत्यर्थः । शशाङ्क इति । भूच्छायामयः शशरूपः अङ्कः यस्य स तथा । " लोकच्छायामयं लक्ष्म तवाङ्के शशसन्निभं " इति हरिवंशोक्तेः । भगवान् महाप्रभाववान् ॥ ६ ॥ प्रकाशः प्रकाशमानः ॥ ७ ॥ प्रकाशेन चन्द्रोदयेन नष्टः दोषः तिमिरं यस्मिन्सः । प्रवृद्धः रक्षसां पिशिताशनानां च दोषः सञ्चाररूपो यस्मिन्स तथा । रामाभिः अभिरामैः कान्तैश्च ईरितः त्यक्तः चित्तदोषः कोपाभिमानरूपः यस्मिन् । स्वर्गप्रकाशः स्वर्गतुल्यः । तद्वदानन्दावह इत्यर्थः । भगवान् श्रीमान् । " भगः श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु " इत्यमरः । प्रदोषः गत इति शेषः ॥ ८ ॥ तन्त्रीति स्पष्टम् ॥ ९ ॥

काह्लादकत्वाच्चन्द्रस्यदुःखविनाशकरत्वं । यद्वासूर्यचन्द्रादीनांलोकपावनत्वादितिभावः ॥२॥ **ती०** प्रवृत्तरक्षःपिशिताशदोषः प्रवृत्तःरक्षसांपिशितभक्षणरूपदोषोयस्मिन् ।पिशितभक्षणस्यदोषत्वमविहितजनहिंसाहेतुत्वात् । स्वर्गप्रकाशःसीतान्वेषणस्यानुकूलत्वेनानन्दहेतुतयाप्रदोषकालस्यस्वर्गसदृशत्वोक्तिः । अतएवभगवान् पूज्यः आदरणीयइतियावत् ॥ **स०** भगवान् पूर्वोक्तरीत्यामाहात्म्यवान् प्रदोषः रात्रिकालः । स्वर्गप्रकाशः स्वर्गस्थानवत्सुखकरः । कीदृशः प्रकाशचन्द्रोदयनष्टदोषः प्रकाशायजातोयश्चन्द्रोदयस्तेननष्टोदोषः अन्धकाराख्यःयस्यसतथा । प्रवृद्धरक्षसांपिशिताशरूपःमांसभक्षणरूपोदोषो यस्मिन् । रामाभिःस्त्रीभिःअभिरामान्पतीन् प्रति ईरितेनवचनेनचित्तदस्यचित्तंदयतिखण्डयतीतिव्युत्पत्त्यामन्मथस्य उषःदाहः निवृत्तिरितियावत् । यस्मिन् कान्तासुरतसँल्लापजनितमन्मथोत्सववानित्यर्थः । अथवारामाभिरामाणांपरस्परमीरितरूपप्रणयकलहाख्यचित्तदोषवानित्यर्थः ॥ उषदाहे । 'घञर्थेकविधानं' इतिकः ॥ **शि०** प्रदोषेचन्द्रनियन्तृत्वमारोप्याह—प्रकाशेति । प्रकाशविशिष्टचन्द्रस्योदयेननष्टोविनाशितः दोषः स्त्रीविषयकपुरुषदयाभावोयेनसः । रामस्याभिरामाय सीतयासहरमणाय ईरितः चन्द्रोदयनेनप्रापितः चित्तदोषः सीताविषयकराममनोल्यासक्तिरूपदोषः दोषाभासोयेन । अतएव स्वर्गस्यसुखविशेषस्य प्रकाशःधर्मात्मसुप्रापकः । अतएवभगवान्समर्थः ॥ ८ ॥ **ति०** सुपृक्ताःभेदग्रहाविषयाः । स्ववृत्ताइतिपाठेस्वंस्वीयंसहजपातिव्रत्यलक्षणंवृत्तंचारित्र्यंयासांताः । नक्तंचराः उलूकादयोराक्षसाश्चतथा-

[पा०] १ ङ. झ. ञ. ट. इवोर्ध्वशृङ्गः. २ ख. ग.—ट. विभाति. ३ ख. ग. घ. च. छ. प्रतिपूर्ण. ४ ङ. झ. ट. स्सुपृक्ताः.

मत्तप्रमत्तानि समाकुलानि रथाश्वभद्रासनसंकुलानि ॥
वीरश्रिया चापि समाकुलानि ददर्श धीमान्स कपिः कुलानि ॥ १० ॥
परस्परं चाधिकमाक्षिपन्ति भुजांश्च पीनानधिनिक्षिपन्ति ॥
मत्तप्रलापानधिकं क्षिपन्ति मत्तानि चान्योन्यमधिक्षिपन्ति ॥ ११ ॥
रक्षांसि वक्षांसि च विक्षिपन्ति गात्राणि कान्तासु च विक्षिपन्ति ॥
रूपाणि चित्राणि च विक्षिपन्ति दृढानि चापानि च विक्षिपन्ति ॥ १२ ॥
ददर्श कान्ताश्च समालभन्त्यस्तथापरास्तत्र पुनः स्वपन्त्यः ॥
सुरूपवक्त्राश्च तथा हसन्त्यः क्रुद्धाः पराश्चापि विनिःश्वसन्त्यः ॥ १३ ॥
महागजैश्चापि तथा नदद्भिः सुपूजितैश्चापि तथा सुसद्भिः ॥
रराज वीरैश्च विनिःश्वसद्भिर्ह्रदो भुजङ्गैरिव निःश्वसद्भिः ॥ १४ ॥
बुद्धिप्रधानाञ्शुचिराभिधानान्सश्रद्दधानाञ्जगतः प्रधानान् ॥
नानाविधानाञ्शुचिराभिधानान्ददर्श तस्यां पुरि यातुधानान् ॥ १५ ॥
ननन्द दृष्ट्वा स च तान्सुरूपान्नानागुणानात्मगुणानुरूपान् ॥
विद्योतमानान्स तदानुरूपान्ददर्श कांश्चिच्च पुनर्विरूपान् ॥ १६ ॥
ततो वरार्हाः सुविशुद्धभावास्तेषां स्त्रियस्तत्र महानुभावाः ॥
प्रियेषु पानेषु च सक्तभावा ददर्श तारा इव सुप्रभावाः ॥ १७ ॥

मत्ताः मधुमदक्षीवाः । प्रमत्ताः प्रस्तुतकार्यविस्मारिणः । मत्तप्रमत्तजनयोगात्कुलान्यपि तथोच्यन्ते । कुलानि गृहाणि । समाकुलानि समाकुलजनानि । वीरश्रिया वीरलक्ष्म्या । वीर इति भिन्नं पदं वा कपिविशेषणं ॥ १० ॥ परस्परं चेत्यादिश्लोकद्वयमेकान्वयं ॥ ददर्शेति संबध्यते । आक्षिपन्तीत्यादीनि शत्रन्तानि रक्षोविशेषणानि । आक्षिपन्ति अपहसन्ति । अधिविक्षिपन्ति अन्योन्यस्योपरि दधति । अधिविक्षिपन्ति अधिकं मुञ्चन्ति । अधिक्षिपन्ति भर्त्सयन्ति । विक्षिपन्ति विवृण्वन्ति । चित्राणि रूपाणि विविधान्वेषान् । विक्षिपन्ति वितन्वन्ति । चापानि चापान् विक्षिपन्ति विस्फारयन्ति ॥ ११—१२ ॥ समालभन्त्यः अङ्गरागेणानुलिंपन्त्यः । समालपन्त्य इति च पाठः । सर्वत्र व्यत्ययेन द्वितीयार्थे प्रथमा ॥ १३ ॥ महागजैरिति ॥ सा पुरीति शेषः । सुसद्भिः सुतरां सद्भिः । विनिःश्वसद्भिः युद्धयोग्यवीरालाभात् ॥ १४ ॥ बुद्धिप्रधानान् बुद्ध्या श्रेष्ठान् प्रधानबुद्धीन्वा उत्तमबुद्धीनित्यर्थः । रुचिराभिधानान् शोभनव्यवहारान् सश्रद्दधानान् आस्तिकान् । नानाविधानान्नानाकारान् । रुचिराभिधानान् हृद्यनाम्नः ॥ १५ ॥ आत्मगुणानुरूपान् आत्मगुणानुरूपव्यवहारान् ॥ १६ ॥ वराणां श्रेष्ठानां अर्हाः वरार्हाः । सुविशुद्धभावाः कान्तेषु निर्मलहृदयाः । महानुभावाः पातिव्रत्यरूपमहाप्रभावाः । यद्वा महानुभावाः अनुभावाः कटाक्षभुज-

विहर्तुंप्रवृत्ताः ॥ ९ ॥ स० मत्ताः स्वभावतः । प्रमत्ताः मद्यादिना । तेचते अनिनःप्राणिनश्चतैःसमाकुलानि । चापिभिःधनुर्धारिभिःसमाकुलानीत्यर्थः ॥ १० ॥ स० सुसद्भिः विभीषणादिभिः ॥ १४ ॥ स० जगतःस्वावरलोकस्यप्रधानंज्ञानंयेषांतेतथा तान् । अलुक्समासः । 'प्रधानंस्यात्प्रज्ञायां' इतिविश्वः । जगतः उक्तरूपस्यप्रधानान् प्रकृष्टाधानाःतदुपलक्षितजीवनोपायाःयैस्ते तान् । अतोनोभयत्रलिङ्गानुपपत्तिः ॥ १५ ॥ ति कांश्चित्पुनर्विरूपानपिविद्योतमानान्सुरूपानिवददर्शेत्यन्वयः ॥ स० सरूपान्

[पा०] १ क. चापिसमाक्षिपन्ति. २ क. ख. घ. —ट. विक्षिपन्ति. ३ ग. —ट. प्रलापानधिविक्षिपन्ति. क. प्रमत्तानधिविक्षिपन्ति. ४ क. गात्रेषुच. ५ छ. ज. स्पृधापराश्चापि. ६ क. च. छ. ज. ञ. सुहृद्भिः. ७ ङ. सुनिश्चसद्भिः. ८ ञ. दृष्ट्वास्वपतः. ९ ख. घ.—ट. विद्योतमानान्सचतान्सुरूपान्. क. ग. विद्योतयन्तीःसचताःसुरूपाददर्शकान्ताश्चपुनर्विरूपाः. १० क. महार्हाः. ११ क. विशुद्धभावाः. १२ ङ. छ.—ट. सुखभावाः.

श्रिया ज्वलन्तीस्त्रपयोपगूढा निशीथकाले रमणोपगूढाः ॥
ददर्श काश्चित्प्रमदोपगूढा यथा विहङ्गाः कुसुमोपगूढाः ॥ १८ ॥
अन्याः पुनर्हर्म्यतलोपविष्टास्तत्र प्रियाङ्केषु सुखोपविष्टाः ॥
भर्तुः प्रिया धर्मपरा निविष्टा ददर्श धीमान्मदनाभिविष्टाः ॥ १९ ॥
अप्रावृताः काञ्चनराजिवर्णाः काश्चित्परार्ध्यास्तपनीयवर्णाः ॥
पुनश्च काश्चिच्छशलक्ष्मवर्णाः कान्तप्रहीणा रुचिराङ्गवर्णाः ॥ २० ॥
ततः प्रियान्प्राप्य मनोभिरामान्सुप्रीतियुक्ताः प्रसमीक्ष्य रामाः ॥
गृहेषु हृष्टाः परमाभिरामा हरिप्रवीरः स ददर्श रामाः ॥ २१ ॥
चन्द्रप्रकाशाश्च हि वक्त्रमाला वक्त्राक्षिपक्ष्माश्च सुनेत्रमालाः ॥
विभूषणानां च ददर्श मालाः शतह्रदानामिव चारुमालाः ॥ २२ ॥
न त्वेव सीतां परमाभिजातां पथि स्थिते राजकुले प्रजाताम् ॥
लतां प्रफुल्लामिव साधुजातां ददर्श तन्वीं मनसाऽभिजाताम् ॥ २३ ॥
सनातने वर्त्मनि सन्निविष्टां रामेक्षणान्तां मदनाभिविष्टाम् ॥
भर्तुर्मनः श्रीमदनुप्रविष्टां स्त्रीभ्यो वराभ्यश्च सदा विशिष्टाम् ॥ २४ ॥
उष्णार्दितां सानुसृतास्रकण्ठीं पुरा वराहोत्तमनिष्ककण्ठीम् ॥

क्षेपादयः सुप्रभावाः शोभनवैभवाः ॥ १७ ॥ प्रमदोपगूढाः हर्षोपगूढाः विहङ्गाः विहङ्गीः ॥ १८ ॥ निविष्टाः ऊढाः पाणिगृहीता इत्यर्थः । " निवेशः शिबिरोद्वाहन्यासे " इति विश्वः ॥ १९ ॥ अप्रावृताः अनवकुण्ठिताः। काञ्चनराजिवर्णाः कनकरेखाकाराः। तपनीयवर्णाः तप्तकाञ्चनवर्णाः । शशलक्ष्मवर्णाः चन्द्रपाण्डुराः । कान्तप्रहीणाः विरहिण्यः ॥ २० ॥ प्रियान्प्राप्य अभिसृत्य । सुप्रीतियुक्ताः मनोभिरामाः रामाः प्रसमीक्ष्य गृहेषु रामाश्च ददर्श । अभिसारिकाः कुलपालिकाश्च ददर्शेत्यर्थः ॥ २१ ॥ वक्त्रनेत्रदर्शनं मानुषीत्वराक्षसीत्वविवेकार्थं । आभरणदर्शनं स्वदृष्टसीताभरणतुल्याभरणदर्शनार्थं ॥२२॥ परमाभिजातां अत्यन्ताभिरामां । साधुजातां सुरूपां । मनसाभिजातां अयोनिजामित्यर्थः॥२३॥सनातने अविच्छिन्ने वर्त्मनि पातिव्रत्यधर्मे । रामेक्षणे अन्तो निश्चयो यस्यास्तां श्रीमत् सीताचिन्तनश्रीमत् । विशिष्टां उत्कृष्टां ॥ २४ ॥ सानुसृतास्रकण्ठीं अनुगतास्रेण अनुगतबाष्पेण कण्ठेन सह वर्तमानां । पुरा रामपार्श्वा-

समानरूपान् । आत्मगुणानांशौर्यादीनांअनुरूपान्अनुकूलाकृतिमतः । सुरूपान्सुन्दरान् ॥ १६ ॥ **ति०** यथाविहङ्गाःविहङ्गीरिवेत्यर्थः । इन्द्रनीलमणिमयोर्ध्वगेहेषुनीलतमस्सदृशेषुशयनात्तत्सादृश्यं ॥ **शि०** विहगेनपक्षिविशेषेणउपगूढाःविहङ्गाइवददर्श । अत्युन्नतप्रासादेषुशयनादीदृगुपमानोपमेयभावः ॥ **स०** प्रमदोपगूढाःविहगीभिरुपगूढाःविहङ्गायथाभवन्तितथाएतादृददर्श ॥१८॥ **रामानु०** वक्त्राणिअक्षिपक्ष्माणियासांताः । 'डाबुभाभ्यामन्यतरस्यां' इतिडाप् । सीतामन्वेषमाणस्यहनुमतःस्त्रीणांमुखनयनादिदर्शनंमानुषीत्वराक्षसीत्वविभागपरिज्ञानार्थं । आभरणदर्शनंरामोक्तसीताभरणस्वरूपनिरूपणार्थं । एतच्च "तांसमीक्ष्यविशालाक्षींराजपुत्रीमनिन्दिताम् । तर्कयामाससीतेतिकारणैरुपपादयन् । वैदेह्यायानिचाङ्गेषुतदारामोऽन्वकीर्तयत् । तान्याभरणजालानिशाखाशोभीन्यलक्षयत्' इति । राजपुत्रीत्वविशालाक्षीत्वाभरणदर्शनैःसीतात्वनिर्णयस्योपरिवक्ष्यमाणत्वादवगम्यते ॥ **ती०** परमाभिरामाश्च ददर्शेतिसंबन्धः । पूर्वोक्ताःनियतभर्तृकाः । अभिसारिकासमभिव्याहारात्उत्तरार्धेनस्वगृहप्राप्तरमणावाराङ्गनाउच्यन्ते ॥ **ति०** वक्त्राक्षिपक्ष्माइतिपाठेऽक्षिपदमधिकं । वक्त्रपक्ष्माइत्येवोचितं । पक्ष्मसुवक्त्रत्वमपिकिमित्यपिचिन्त्यं ॥ २२ ॥ **रामानु०** साधुजातामित्येतत्कृताविशेषणं । मनसाभिजातां 'यस्मात्तुधर्षिताचाहमपापाचाप्यनाथवत् । तस्मात्तववधार्थंवैउत्पत्स्येऽहंधुवंपुनः" इत्युत्तररामायणोक्तप्रकारेणस्वसंकल्पेनावतीर्णामित्यर्थः ॥ २३ ॥ **स०** मदनाभिविष्टां तामिवविद्यमानां । मदनोमन्मथःअभि-

[**पा०**] १ ङ. झ. स्त्रियोज्वलन्तीः. २ ङ. झ. ञ. ट. विहङ्गाविहगोपगूढाः. ३ झ. ञ. प्रियाङ्केसुसुखोप. ४ ङ. ट. पराः. ५ ङ. झ. ञ. ट. मदनोपविष्टाः. ६ झ. ञ. ट. सुमनोभिरामाः. ७ ङ. झ. ञ. ट. वक्त्राःसुपक्ष्माश्च. ८ ग. ङ झ. ट. रामेक्षणांतां. ९ ङ.—ज. स्त्रीभ्योपराभ्यश्च. झ. ञ. ट. स्त्रीभ्यःपराभ्यश्च.

सुजातपक्ष्मामभिरक्तकण्ठीं वने प्रनृत्तामिव नीलकण्ठीम् ॥ २५ ॥
अव्यक्तरेखामिव चन्द्ररेखां पांसुप्रदिग्धामिव हेमरेखाम् ॥
क्षतप्ररूढामिव बाणरेखां वायुप्रभिन्नामिव मेघरेखाम् ॥ २६ ॥
सीतामपश्यन्मनुजेश्वरस्य रामस्य पत्नीं वदतां वरस्य ॥
बभूव दुःखाभिहतश्चिरस्य प्लवङ्गमो मन्द इवाचिरस्य ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चमः सर्गः ॥ ५ ॥

षष्ठः सर्गः ॥ ६ ॥

हनुमता पुनर्लङ्काभरणायमानाद्भुततररावणभवनमेत्य तत्समीपस्थप्रहस्तादिनानानामकराक्षसगृहेषु सीतान्वेषणपूर्वकं रावणगृहप्रवेशनं ॥ १ ॥

स निकामं विमानेषु विषण्णः कामरूपधृक् ॥ विचचार पुनर्लङ्कां लाघवेन समन्वितः ॥ १ ॥
आससादाथ लक्ष्मीवान्राक्षसेन्द्रनिवेशनम् ॥ प्राकारेणार्कवर्णेन भास्वरेणाभिसंवृतम् ॥ २ ॥

वस्थानकाले वरार्होत्तम, निष्ककण्ठीं वरार्हः उत्तमश्चनिष्कः कण्ठे यस्याः त उरःकण्ठसंबन्धी भूषणविशेषो निष्कः । अभिरक्तकण्ठीं स्निग्धकण्ठीम् ॥ २५ ॥ अव्यक्तरेखां अव्यक्तस्वरूपां चन्द्ररेखां चन्द्रकलामिव स्थितां । अत्यन्तकृशत्वे कान्तिहीनत्वे च दृष्टान्तोयं । पांसुप्रदिग्धां पांसुकलुषितां हेमरेखां कनकशलाकामिव स्थितां । स्वतःशुद्धस्वभावस्य आगन्तुकमालिन्ये दृष्टान्तोयं । क्षतप्ररूढां क्षतेन प्ररूढां औषधादिना समाहितां । अन्तःशल्यदोषवतीं बहिस्समाहितां । बाणरेखां बाणक्षतिमिव स्थितां । अन्तर्वेदनातिशये दृष्टान्तोयं । वायुप्रभग्नामिव मेघलेखां पुनरसमाधेयशैथिल्ये दृष्टान्तोयं ॥ २६ ॥ चिरस्यापश्यन् चिरकालं निरीक्ष्याप्यपश्यन् । अचिरस्य अचिरेण सपदीत्यर्थः । मन्दो मुग्ध इव दुःखाभिहतो बभूव । " मुग्धो मन्दो विवर्णश्च " इति हलायुधः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चमः सर्गः ॥ ५ ॥

स निकाममित्यादि ॥ विमानेषु विषण्णः विमानेषु सीतामदृष्ट्वा विषण्ण इत्यर्थः । लाघवेनवेगेन

निविष्टः उदरेयस्यास्तांमदनमातरं ॥ २४ ॥ स० उष्णार्दितां रामविरहतप्तां । अनुसृतंअस्रंअश्रुयस्य सचासौकण्ठश्चतेनसहवर्ततइतितथातां । सानुसृतास्रकण्ठीमित्यादिस्थानत्रयेपिडीबार्षः । यद्वा 'स्राङ्गाच्च' इतिसूत्रस्थचशब्दसूचिता'ङ्गगात्रकण्ठेभ्यइतिवक्तव्यं' इतिवृत्तिकृदुक्तेर्ङीष् । नचभाष्यानुक्तेरप्रामाणिकाइतिप्रामाणिकाः 'अप्रामाणिकाएव' इतिभट्टोजिनागोजिभट्टोक्तेःकथमितिशङ्क्यं । अनुवृत्त्यैवङीपिसिद्धेचशब्दस्यवैयर्थ्यादेवमादिरूपाणांदुरुपपादनत्वावर्णनाच्च 'अप्रतिषिद्धमनुमतं' इत्युक्तेर्महाभाष्यकारस्यमतमितिसूचितत्वात्कवेर्महत्त्वाच्च । अश्रुकण्ठामितिवापाठइतिनागोजिभट्टोक्तिरनुप्रासभङ्गभीरुभिरनादरणीया ॥ अभिरक्तकण्ठींसुस्वरां । नीलकण्ठीं मयूरीं ॥ २५ ॥ इतिपञ्चमःसर्गः ॥ ५ ॥

स० विमानेषुसप्तभौमाष्टभौमादिप्रासादेषु।विचचार विचारयामास॥ रामानु०सःलङ्कायामन्विष्टायामपिवैदेह्याअदर्शनेनविषण्णः। विचचारपुनर्लङ्कामितिसम्यक् । कपिर्लङ्कामितिपाठेपिवैदेह्याअन्वेषणेनविषण्णस्यहनुमतोऽन्वेषणकर्तृत्वाभिधानात्पुनरन्वेषणंकृतवानित्ययमर्थोलभ्यते॥ १॥ रामानु० आससादाथलक्ष्मीवान्राक्षसेन्द्रनिवेशनंइतिरावणभवनंप्रविष्टस्यहनुमतः पुनरपिरावणभवनप्राप्त्यभिधानान्मध्येलङ्कान्वेषणाभिधानाच्चपूर्वंरावणभवनंप्रविष्टोहनुमांस्तदानींजाग्रद्बहुरक्षस्संकीर्णतयासीतान्वेषणावसरोऽयंनभवतीतिम-

[पा०] १ ग. मभिराम. २ ख. ग. झ. ञ. ट. प्रवृत्तामिव. ३ क. ङ.—झ. ट. चन्द्रलेखां. ४ ङ. झ. ट. वर्णरेखां. ५ ग. घ. ङ. ट. प्रभग्नामिव. ञ. प्रभुग्नामिव. क. प्रणुन्नामिव. ६ ग. ङ. झ. ट. दुःखोपहतः ७ क. ग.—ट. विचरन्काम. ८ क. ग.—ट. कपिर्लङ्कां. ९ क. ङ. झ. ञ. ट. आससादच. घ. आससादस.

रक्षितं [1]राक्षसैर्घोरैः सिंहैरिव महद्वनम् ॥ समीक्षमाणो भवनं चकाशे कपिकुञ्जरः ॥ ३ ॥
रूप्यकोपहितैश्चित्रैस्तोरणैर्[2]हेमभूषितैः ॥ विचित्राभिश्च कक्ष्याभिर्द्वारैश्च रुचिरैर्[3]वृतम् ॥ ४ ॥
गजास्थितैर्[4]महामात्रैः शूरैश्च विगतश्रमैः ॥ उपस्थितमसंहार्यैर्[5]हयैः स्यन्दनयायिभिः ॥ ५ ॥
सिंहव्याघ्रतनुत्राणैर्दान्तकाञ्चनराजतैः ॥ घोषवद्भिर्विचित्रैश्च सदा विचरितं रथैः ॥ ६ ॥
बहुरत्नसमाकीर्णं [7]पराध्यासनभाजनम् ॥ महारथसमावासं महारथमहास्वनम् ॥ ७ ॥
दृश्यैश्च परमोदारैस्तैस्तैश्च मृगपक्षिभिः ॥ विविधैर्बहुसाहस्रैः [9]परिपूर्णं समन्ततः ॥ ८ ॥
विनीतैरन्तपालैश्च रक्षोभिश्च सुरक्षितम् ॥ मुख्याभिश्च वरस्त्रीभिः परिपूर्णं समन्ततः ॥ ९ ॥
मुदितप्रमदारत्नं राक्षसेन्द्रनिवेशनम् ॥ वरा[11]भरणसंह्रादैः समुद्रस्वननिस्वनम् ॥ १० ॥
तद्राजगुणसंपन्नं [12]मुख्यैश्चागुरुचन्दनैः ॥ महा[13]जनैः समाकीर्णं सिंहैरिव महद्वनम् ॥ ११ ॥
भेरीमृदङ्गाभिरुतं शङ्खघोषनिनादितम् ॥ नित्यार्चितं [15]पर्वहुतं पूजितं राक्षसैः सदा ॥ १२ ॥

॥ १—२ ॥ चकाशे जहर्षेत्यर्थः ॥ ३ ॥ रूप्यकोपहितैः रजतनिर्मितैः । कक्ष्याभिः प्रकोष्ठैः ॥ ४ ॥ असंहार्यैः अवध्यैः । स्यन्दनयायिभिः स्यन्दनवाहकैः ॥ ५ ॥ सिंहव्याघ्रतनुत्राणैः सिंहव्याघ्रचर्मपरिवृतैरित्यर्थः ॥ ६ ॥ महारथसमावासं महारथानां रक्षसामाकरं । महारथमहास्वनं महतां रथानां महान् स्वनः यस्मिन् ॥ ७—८ ॥ अन्तपालैः बाह्यरक्षिभिः ॥ ९ ॥ राक्षसेन्द्रनिवेशनं राक्षसेन्द्राः राक्षसश्रेष्ठाः निविशन्ते समीपे निवसन्त्यस्मिन्निति राक्षसेन्द्रनिवेशनमित्यर्थः । अन्यथा वक्ष्यमाणवेश्मा.देन पुनरुक्तिःस्यात् । संह्रादः शब्दः । समुद्रस्वनवन्निस्वनतीति समुद्रस्वननिस्वनम् । पचाद्यच् ॥ १० ॥ तत् प्रसिद्धं राजगुणसंपन्नं राजोपच[illegible]दिभिः संपन्नं । अगुरुचन्दनैरित्यत्रापि संप[illegible]ति संबध्यते ॥ ११ ॥ पर्वसु हुतं होमो

ल्लाततोनिष्क्रम्यपुनर्लङ्कांविचित्यराक्षसेन्द्रनिवेशनमाससादेत्यवगम्यते ॥ २ ॥ **ती०** चकाशे विस्मयादुल्ललासेत्यर्थः । चचारकपिकुञ्जरइतिपाठः । **रामानु०** भवनमितस्ततोनिरीक्षमाणस्सन्नर्कवर्णभवनप्राकारतेजस्संबन्धात्सप्रकाशोऽभूदित्यर्थः ॥ **स०** चकाशे भयाभावादितिभावः॥ ३॥ **ति०**चकाशे चन्द्रसाहित्याद्यक्तान्वेषणक्रियोबभूवेत्यर्थः॥ **स०**रूप्यस्यायत्कंउदकंतेनउपहितैःलिखितैः।रूप्यशब्देनाहतसुवर्णंग्राह्यं । 'रूप्यंस्यादाहतेखर्णे' इतिविश्वः । कक्ष्याभिः प्रकोष्ठापरपर्यायरक्षकनिवासस्थानैः ॥४॥ **स०** महामात्रैः अंबष्ठैः । असंहार्यैःउपसंहर्तुमशक्यवेगैरितिहयविशेषणंवा ॥ **रामानु०** महामात्रैःप्रधानैः । 'महामात्राःप्रधानानि' इत्यमरः ॥ ५ ॥ **रामानु०** महारथसमावापमितिपाठेपिमहारथानांरथिकविशेषाणांआवापं आवासभूतमित्यर्थः ॥ **ति०** महतांरथानामावापःस्थानंसमन्ताद्यस्मिंस्तत् ॥ **स०** एकोदशसहस्राणियोधयेद्यस्तुधन्विनाम् । अस्त्रशस्त्र(शस्त्रशास्त्र)प्रवीणश्चसमहारथउच्यते ' इत्युक्तलक्षणानांयस्समावापः उपवेशनवेदिका सयस्मिन् । ' आवापःपरिक्षेपालवालयोः ' इतिविश्वः । महारथानांउक्तलक्षणानामपिशत्रूणां महत् असनं गतिनिवृत्तिर्यस्मिन् । ' असनंयात्रानिवृत्तिः ' इतिविश्वः ॥ ७ ॥ **रामानु०** दृश्यैः दर्शनीयैः । परमोदारैः अतिमहद्भिः । ' उदारोदात्तमहतोः ' इत्यमरः ॥ ८ ॥ **रामानु०** राक्षसेन्द्रनिवेशनं राक्षसेन्द्राणांनिवेशनानियस्मिंस्तत् ॥ **स०** वराभरणनिर्ह्रादैःकरणैःसमुद्रस्वननिस्वनं तद्धनिसदृशध्वनिमत् ॥ १० ॥ **रामानु०** राजगुणाः छत्रचामरादयःतैः संपन्नं समृद्धं ॥ ११ ॥ **ति०** पर्वसुसुतःसोमोयस्मिन्यज्ञार्थेतत्पर्वसुतं । राक्षसैःसदापूजितं स्वपूजनीयदेवताकं ॥ **रामानु०** नित्यार्चितं । गन्धपुष्पादिभिर्नित्यमार्चितं । पर्वसु हुतंहोमोयस्मिंस्तत्पर्वहुतं । रावणस्याहिताग्नित्वात्तद्गृहेदर्शपूर्णमासादिहोमसद्भावः । अस्याहिताग्निलंयुद्धकाण्डेप्रसिद्धं । पूजितंराक्षसैस्सदा स्वामिगृहत्वाद्राक्षसैस्सदानमस्कृतं । ' पूजानमस्यापचितिः ' इत्यमरः ।

[**पा०**] १ ग. घ. ङ. च. ज. ट. राक्षसैर्भीमैः. २ घ.—ट. तोरणैर्हेमभूषणैः. क. तोरणैस्सुविभूषितैः. ३ ङ. ञ. रुचिरावृतं. ४ च. छ. ञ. गजस्थितैः. ५ ग. च. ज. शूरैश्चापगतश्रमैः. ६ ख. ग. घ. हयस्यन्दन. ७ ङ. ञ. ज. ट. भूषितं. ८ ख. घ. ङ. ञ. ज. ट. समावापं. ९ क.—च. ज.—ट. महासनं. १० क. परिकीर्णं. ११ ख. महाभरण. क. ग. च. छ. ज. महाभरणनिर्ह्रादैः. १२ क.—ङ. ञ. ज. ट. मुख्यैश्चवरचन्दनैः. १३ क. ग.—ट. महाजनसमाकीर्णं. १४ क. ख. ग. च.— ट. विनादितं. १५ घ. ङ. ञ. ट. पर्वसुतं.

समुद्रमिव गम्भीरं समुद्रमिव निस्स्वनम् ॥ महात्मनो महद्वेश्म महारत्नपरिच्छदम् ॥
महारत्नसमाकीर्णं ददर्श स महाकपिः ॥ १३ ॥
विराजमानं वपुषा गजाश्वरथसंकुलम् ॥ लङ्काभरणमित्येव सोमन्यत महाकपिः ॥ १४ ॥
चचार हनुमांस्तत्र रावणस्य समीपतः ॥ १५ ॥
गृहाद्गृहं राक्षसानामुद्यानानि च वानरः ॥ वीक्षमाणो ह्यसंत्रस्तः प्रासादांश्च चचार सः ॥ १६ ॥
अवप्लुत्य महावेगः प्रहस्तस्य निवेशनम् ॥ ततोऽन्यत्पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान् ॥ १७ ॥
अथ मेघप्रतीकाशं कुम्भकर्णनिवेशनम् ॥ विभीषणस्य च तदा पुप्लुवे स महाकपिः ॥ १८ ॥
महोदरस्य च गृहं विरूपाक्षस्य चैव हि ॥ विद्युज्जिह्वस्य भवनं विद्युन्मालेस्तथैव च ॥
वज्रदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः ॥ १९ ॥
शुकस्य च महोतजाः सारणस्य च धीमतः ॥ तथा चेन्द्रजितो वेश्म जगाम हरियूथपः ॥ २० ॥
जम्बुमालेः सुमालेश्च जगाम हरिसत्तमः ॥ रश्मिकेतोश्च भवनं सूर्यशत्रोस्तथैव च ॥ २१ ॥
वज्रकायस्य च तथा पुप्लुवे स महाकपिः ॥ धूम्राक्षस्य च संपातेर्भवनं मारुतात्मजः ॥ २२ ॥
विद्युद्रूपस्य भीमस्य घनस्य विघनस्य च ॥ २३ ॥
शुकनासस्य वक्रस्य शठस्य विकटस्य च ॥ ब्रह्मकर्णस्य दंष्ट्रस्य रोमशस्य च रक्षसः ॥ २४ ॥
युद्धोन्मत्तस्य मत्तस्य ध्वजग्रीवस्य नादिनः ॥ विद्युज्जिह्वेन्द्रजिह्वानां तथा हस्तिमुखस्य च ॥ २५ ॥
करालस्य पिशाचस्य शोणिताक्षस्य चैव हि ॥ क्रममाणः क्रमेणैव हनुमान्मारुतात्मजः ॥ २६ ॥
तेषु तेषु महार्हेषु भवनेषु महायशाः ॥ मृद्धिमतामृद्धिं ददर्श स महाकपिः ॥ २७ ॥
सर्वेषां समतिक्रम्य भवनानि समन्ततः ॥ आससादाथ लक्ष्मीवान्राक्षसेन्द्रनिवेशनम् ॥ २८ ॥
रावणस्योपशायिन्यो ददर्श हरिसत्तमः ॥ विचरन्हरिशार्दूलो राक्षसीर्विकृतेक्षणाः ॥
शूलमुद्गरहस्ताश्च शक्तितोमरधारिणीः ॥ २९ ॥

यस्मिंस्तत् पर्वहुतम् ॥ १२ ॥ समुद्रमिव निस्स्वनं निश्शब्दं । रावणभीत्या जनकोलाहलरहितमित्यर्थः । समुद्रस्वनमिति तु बाह्यकक्ष्यापेक्षया ॥ १३—१४ ॥ रावणस्य रावणगृहस्य ॥ १५—२४ ॥ विद्युज्जिह्वेन्द्रजिह्वानामिति बहुवचनं तन्नाम्नां बहूनां सत्त्वात् ॥ २५—२८ ॥ उपशायिन्यः पर्यायशायिनीः ।

नित्यार्चितंसर्वसुखमूर्जितमितिवापाठः । पर्वयुतमितिपाठेपर्वशब्देनोत्सवउच्यते ॥ १२ ॥ **रामानु०** समुद्रमिवनितरांस्वनतीति निस्वनं । पचाद्यच् ॥ **ति०** परिच्छदः अलङ्कारः ॥ १३ ॥ **स०** लङ्कायाआभरणरूपमिदमित्यमन्यत ॥ १४ ॥ **रामानु०** राक्षसानां रावणभ्रातृकुमारामात्यादीनांगृहाद्गृहं । उद्यानानिचचारेतियोजना ॥ १६ ॥ **ति०** विद्युज्जिह्वेन्द्रजिह्वानामितिबहुवचनमार्षं । तयोरित्यर्थः ॥ २५ ॥ **स०** उपशायिन्यः शयनस्थानंपर्यायेणरक्षयित्र्योयास्ताइत्यर्थः । ' उपशायोविशायश्चपर्यायशय-

[पा०] १ क. घ. समुद्रस्वननिस्स्वनं. झ. समुद्रसमनिस्स्वनं. २ च. छ. ज. महावेश्म. ३ ख. महाजनसमाकीर्णं. ४ ङ. झ. ञ. ट. चसर्वशः. क. घ. वनानिच. ५ क. अवप्लुतो. ६ क. घ.—ट. तथा. ७ घ.—ट. तथा. ८ झ. बहुदंष्ट्रस्य. ९ क. ग.—ट. महावेगः. १० ग. पुप्लुवे. ११ घ. सूर्यकेतोः. १२ भवनं. १३ क. धूम्राक्षस्यैवसदनंसंपातेः. ख. घ. धूम्राक्षस्यापि. ग. ङ. छ. झ. ञ. ट. धूम्राक्षस्याथ. १४ ज. यूपनेत्रस्य. १५ क. प्रघसस्यघनस्यच. च. छ. ज. प्रघस्यप्रघसस्यच. १६ छ. शुभनाभस्य. क.—च. ज.—ट. शुकनाभस्य. १७ ङ. च. छ. झ. ट. चक्रस्य. ञ. शक्रस्य. ख. ग. वज्रस्य. १८ ङ. च. झ. ट. कपटस्यच. क. घ. विशठस्यच. १९ ख. ग. ङ. च. छ. झ. ट. हस्तकर्णस्य. घ. हस्तदंष्ट्रस्यकण्ठस्य. क. हस्तकर्णस्यवीरस्य. २० घ. भवनं. २१ ङ. च. ज.—ट. सादिनः. २२ ङ. झ. ट. विद्युज्जिह्वद्विजिह्वानां. २३ च. —ट. विशालस्य. २४ च.—ट. ध्रुवमानः. २५ क. हनुमान्कपिः. २६ क. आससादच. २७ क. घ. विकृताननाः. २८ ग. ङ.— ट. धारिणः.

ददर्श विविधान्गुल्मांस्तस्य रक्षःपतेर्गृहे ॥ राक्षसांश्च महाकायान्नानाप्रहरणोद्यतान् ॥ ३० ॥
रक्ताञ्श्वेतान्सितांश्चैव हरींश्चापि महाजवान् ॥ कुलीनान्रूपसंपन्नान्गजान्परगजारुजान् ॥ ३१ ॥
निष्ठितान्गजशिक्षायामैरावतसमान्युधि ॥ निहन्तॄन्परसैन्यानां गृहे तस्मिन्ददर्श सः ॥ ३२ ॥
क्षरतश्च यथा मेघान्स्रवतश्च यथा गिरीन् ॥ मेघस्तनितनिर्घोषान्दुर्धर्षान्समरे परैः ॥ ३३ ॥
सहस्रं वाहिनीस्तत्र जाम्बूनदपरिष्कृताः ॥ हेमजालपरिच्छन्नास्तरुणादित्यसन्निभाः ॥
ददर्श राक्षसेन्द्रस्य रावणस्य निवेशने ॥ ३४ ॥
शिबिका विविधाकाराः स कपिर्मारुतात्मजः ॥ लतागृहाणि चित्राणि चित्रशालागृहाणि च ॥ ३५ ॥
क्रीडागृहाणि चान्यानि दारुपर्वतकानपि ॥ कामस्य गृहकं रम्यं दिवागृहकमेव च ॥
ददर्श राक्षसेन्द्रस्य रावणस्य निवेशने ॥ ३६ ॥
स मन्दरगिरिप्रख्यं मयूरस्थानसंकुलम् ॥ ध्वजयष्टिभिराकीर्णं ददर्श भवनोत्तमम् ॥ ३७ ॥
अनेकरत्नसंकीर्णं निधिजालं समन्ततः ॥ धीरनिष्ठितकर्मान्तं गृहं भूतपतेरिव ॥ ३८ ॥
अर्चिर्भिश्चापि रत्नानां तेजसा रावणस्य च ॥ विरराजाथ तद्वेश्म रश्मिवानिव रश्मिभिः ॥ ३९ ॥
जाम्बूनदमयान्येव शयनान्यासनानि च ॥ भाजनानि च मुख्यानि ददर्श हरियूथपः ॥ ४० ॥
मध्वासवकृतक्लेदं मणिभाजनसंकुलम् ॥ मनोरममसंबाधं कुबेरभवनं यथा ॥ ४१ ॥
नूपुराणां च घोषेण काञ्चीनां निनदेन च ॥ मृदङ्गतलघोषैश्च घोषवद्भिर्विनादितम् ॥ ४२ ॥

रावणे शयाने जाग्रतीरित्यर्थः ॥ २९—३० ॥ सितान् बद्धान् । " षिञ् बन्धने " इत्यस्मात् क्तः । हरीन् अश्वान् । परगजानारुजन्ति पीडयन्तीति परगजारुजान् ॥ ३१—३२ ॥ क्षरतश्चेति श्लोकः पूर्वोक्तगजविशेषकः । क्षरतः किंचिद्वर्षतः । स्रवन्मदत्वे दृष्टान्तः । स्रवतः निर्झरिणः ॥ ३३ ॥ वाहिनीः सेनाः । पदातीनित्यर्थः । जाम्बूनदं जम्बूनदीप्रभवं स्वर्णं । हेम केवलस्वर्णं । उभयविधस्वर्णमयाभरणयुक्ता इत्यर्थः ॥ ३४ ॥ शिबिका इत्यादि ॥ दारुपर्वतकान् क्रीडापर्वतकान् । कामस्य गृहकं रतिगृहं । दिवागृहकं दिवाविनोदस्थानं । रावणस्य निवेशन इति पाठः ॥ ३५—३६ ॥ स इत्यादि ॥ मयूरस्थानं क्रीडामयूरविश्रमस्थानं । कपोतानामिव मयूराणामपि स्थानानि शिलाभिः कल्प्यन्त इति प्रसिद्धं । धीरनिष्ठितकर्मान्तं धीरैः कृतकल्पकर्मकं । भूतपतेः प्रमथाधिपस्य ॥ ३७—३८ ॥ रश्मिवान् सूर्यः ॥ ३९—४० ॥ मध्वासवकृतक्लेदं मध्वासवैः मधुविकारमद्यैः । कृतक्लेदं कृतसेकं ॥ ४१ ॥ घोषवद्भिः नादवद्भिः । नादश्च दीर्घशब्दस्य विराम-

नार्थकौ ' इत्यमरः ॥ २९ ॥ **रामानु०** गुल्मान् सेनाः । ' गुल्मास्तुक्स्तंबसेनाश्च ' इत्यमरः ॥ ३० ॥ **वि०** सहस्रंवाजिनः अनेकानश्वान् ॥ ३४ ॥ **वि०** हेमजालैरविच्छिन्नाः सर्वतोभूषिताइतिशिबिकाविशेषणं ॥ ३५ ॥ **ति०** दारुनिर्मिताःक्रीडापर्वताः दारुपर्वतकानि । क्लीबत्वमार्ष ॥ ३६ ॥ **शि०** भूतपतेःब्रह्मणः ॥ **ति०** निधिजालंनिधिजालवदित्यर्थः । धीरनिष्ठितकर्माङ्गं धीरैः निर्भयस्थिरचित्तैःनिष्ठितंनिर्वर्तितंकर्मणः निधिरक्षादिकर्मणःअङ्गंमहिषादिबलिरूपंयस्मिन् । कश्चित्तुकर्मान्तमितिपठित्वा । धीरैः निष्ठितस्यअनुष्ठितस्यकर्मणःतपोरूपस्यअन्तंफलरूपं इत्यर्थमाह । भूतपतेःमहेश्वरस्ययक्षेश्वरस्यवा ॥ ३८ ॥ इतिषष्ठःसर्गः ॥ ६ ॥

[पा०] १ ग. हनुमान्गुल्मान्राक्षसानांपतेर्गृहे. २ ङ. प्रहरणोदितान्. ३ क. ग.—ट. न्सितांश्चापि. ४ ग. हरीनश्वान्. घ. हारितांश्च. ५ ङ. झ. ट. शिक्षितान्. ६ ज. न्संगरे. ७ क. ग. च. छ. ज. ञ. वाजिनस्तत्रजांबूनदपरिष्कृतान्. ८ घ. ङ. झ. ञ. हेमजालैरविच्छिन्नाः. ट. हेमजालैःपरिच्छिन्नाः. ९ ग. च. छ. ज. स्तरुणादित्यवर्चसः. १० क. ग. घ. चन्द्रशाला. ११ ङ.—ट. पर्वतकानिच. क. ग. घ. पर्वतकान्यपि. १२ ख. ङ. झ. कामस्यचगृहं. १३ च. छ. ज. दिव्यं. १४ क. ग. ङ. —ज. ञ. ट. मन्दरतलप्रख्यं. झ. मन्दरसमप्रख्यं. १५ क.—ट. अनन्तरत्ननिचयं. १६ ग. जालनिरन्तरं. ख. जालसमावृतं. १७ ङ. झ. ञ. ट. कर्माङ्गं. १८ ङ.—ट. विरराजच. १९ क.—ट. शुभ्राणि. २० क. ग. मनोहरं. २१ च. छ. ज. नादेन. ङ. झ. ञ. ट. निस्वनेनच. २२ ग. तालघोषैश्च. ङ. च. छ. झ. ञ. ट. तलनिर्घोषैः. २३ क. निनादितं.

प्रासादसंघातयुतं स्त्रीरत्नशतसंकुलम् ॥ सुव्यूढकक्ष्यं हनुमान्प्रविवेश महागृहम् ॥ ४३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षष्ठः सर्गः ॥ ६ ॥

सप्तमः सर्गः ॥ ७ ॥

ग्रन्थकृतारावणभवनतद्गतपुष्पकविमानयोर्वर्णनं ॥ १ ॥

स वेश्मजालं बलवान्ददर्श व्यासक्तवैडूर्यसुवर्णजालम् ॥
यथा महत्प्रावृषि मेघजालं विद्युत्पिनद्धं सविहङ्गजालम् ॥ १ ॥
निवेशनानां विविधाश्च शालाः प्रधानशङ्खायुधचापशालाः ॥
मनोहराश्चापि पुनर्विशाला ददर्श वेश्मादिषु चन्द्रशालाः ॥ २ ॥
गृहाणि नानावसुराजितानि देवासुरैश्चापि सुपूजितानि ॥
सर्वैश्च दोषैः परिवर्जितानि कपिर्ददर्श स्वबलार्जितानि ॥ ३ ॥
तानि प्रयत्नाभिसमाहितानि मयेन साक्षादिव निर्मितानि ॥
महीतले सर्वगुणे स्थितानि ददर्श लङ्काधिपतेर्गृहाणि ॥ ४ ॥
ततो ददर्शोच्छ्रितमेघरूपं मनोहरं काञ्चनचारुरूपम् ॥
रक्षोधिपस्यात्मबलानुरूपं गृहोत्तमं ह्यप्रतिरूपरूपम् ॥ ५ ॥

समयसंभवो ध्वनिः ॥ ४२ ॥ व्यूढकक्ष्यं विशालप्रकोष्ठं ॥ ४३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षष्ठः सर्गः ॥ ६ ॥

स वेश्मजालमित्यादि ॥ व्यासक्तवैडूर्यसुवर्णजालं वैडूर्यघटितसुवर्णमयजालकरन्ध्रं ॥ १ ॥ निवेशनानां शालाः । गृहान्तःशालाः । प्रधानैर्मुख्यैः शङ्खायुधचापैः शालन्ते प्रकाशन्त इति प्रधानशङ्खायुधचापशालाः । पचाद्यच् । वेश्मादिषु हर्म्यप्रासादादिषु । चन्द्रशालाः शिरोगृहाणि ॥ २ ॥ नानावसुराजितानि नानारत्नराजितानि ॥ ३ ॥ प्रयत्नाभिसमाहितानि प्रयत्नेन यथायोगं स्थापितानि । मयेनेति विश्वकर्मा लक्ष्यते । महीतले निर्मितानि । इवशब्देन मयस्य निर्मातृत्वव्याजमात्रं । रावणप्रयत्नेनैव निर्मितानीत्यर्थः । यद्वा अन्यानि गृहाणि विश्वकर्मनिर्मितानि । इमानि तु मयं व्याजीकृत्य स्वयमुपायप्रदर्शनमुखेन निर्मितानीति पूर्वगृहेभ्यो विशेष उच्यते ॥ ४ ॥ तदन्तर्वर्तिपुष्पकविमानं दर्शयति—तत इति ॥ अप्रतिरूपरूपं अप्रतिमसौन्दर्यं । प्रकीर्णं दैवाच्युतं । रजसा पुष्परजसा ।

रामानु० नानाविधानिकर्माणियासांताःनानाविधकर्माणःशालाश्चनानाविधकर्मशालाः । कक्ष्याश्चनानाविधकर्मशालाइत्ययं पाठः । निवेशनानांविविधाश्चशालाइतिपाठेप्रधानभवनानांसंबन्धिनीःविविधाःशालाइत्यर्थः । प्रधानशङ्खायुधचापशालाः प्रधानैः मुख्यैःशङ्खैरायुधैश्चापैश्चशालन्तइतिप्रधानशङ्खायुधचापशालाःताः । पचाद्यच् । वेश्मान्यद्रयइववेश्माद्रयस्तेषु । वेश्मादिष्वितिपाठे आदिशब्देनप्रासादादयउच्यन्ते । चन्द्रशालाःशिरोगृहाणि । ' चन्द्रशालाशिरोगृहं ' इत्यमरः ॥ **ति०** चन्द्रशालाः चन्द्रकान्तमणिबद्धशालावा ॥ २ ॥ **ति०** वसु धनं । स्वबलेत्यत्रस्वशब्दोरावणवाची । कुबेराद्रावणेनलङ्कायाआच्छिद्यगृहीतत्वात् । यद्वा स्वशब्दोहनुमद्वाची । स्वबलेनार्जितानिलब्धप्रवेशानि ॥ ३ ॥ **ति०** विश्वकर्मकृतान्यपिमाययाविचित्ररचनादक्षेणमयेननिर्मितानीव ॥ **स०** प्रयत्नाभिसमाहितानि प्रयत्नेन विश्वकर्मणइतिशेषः ॥ ४ ॥ **रामानु०** वैश्रवर्णनिर्जित्यगृहीतंपुष्पकंवर्ण्यतेततइत्यादिना । ततः गृहदर्शनानन्तरं । आत्मबलानुरूपं आत्मनोप्रतिबलस्यसदृशं । गृहोत्तममितिपुष्पकमुच्यते । पुष्पकस्यापिगृहलक्षणसद्भावात् । एतच्चपुष्पाह्वयमित्यनेनव्यक्तीभविष्यति । रजसा पुष्परजसा ॥ तटिद्भिरिवस्थितैर्नारीप्रवेकैःअंभोदद्दीप्यमानमिव स्थितमितिसंबन्धः । वाह्यमानं उह्यमानं । आर्षःस्वार्थेणिच् । अतएवसंप्रसारणाभावः । यद्वाहंसप्रवेकैर्वाह्यमानं स्वामिनेतिशेषः ॥ यथेति । युक्तीकृतमेघचित्रं समूहीकृतनानावर्णमेघचित्रमित्यर्थः ॥ **ति०** नानावर्णैरयुक्तोपितयुक्तःकृतो युक्तीकृतः । सचासौचा-

[**पा०**] १ घ. प्रासादशतसंबाधं. २ क. गृहोत्तमं. ३ ग. च. छ. प्रयत्नेनसमाहितानि. ४ घ. ददर्शाद्भुतमेघ. ५ घ. गुणानुरूपं-

महीतले [1]स्वर्गमिव प्रकीर्णं श्रिया ज्वलन्तं बहुरत्नकीर्णम् ॥
नानातरूणां कुसुमावकीर्णं गिरेरिवाग्रं रजसावकीर्णम् ॥ ६ ॥
नारीप्रवेकैरिव [2]दीप्यमानं तडिद्भिरम्भोदवदर्च्यमानम् [3]॥
हंसप्रवेकैरिव वाह्यमानं श्रिया युतं खे [4]सुकृतां विमानम् ॥ ७ ॥
यथा नगाग्रं [5]बहुधातुचित्रं यथा नभश्च ग्रहचन्द्रचित्रम् ॥
ददर्श [6]युक्तीकृतमेघचित्रं विमानरत्नं बहुरत्नचित्रम् ॥ ८ ॥
मही कृता पर्वतराजिपूर्णा शैलाः कृता [7]वृक्षवितानपूर्णाः ॥
वृक्षाः कृताः पुष्पवितानपूर्णाः पुष्पं कृतं [8]केसरपत्रपूर्णम् ॥ ९ ॥
कृतानि वेश्मानि च पाण्डुराणि तथा [9]सुपुष्पाण्यपि पुष्कराणि ॥
पुनश्च पद्मानि सकेसराणि [10]धन्यानि चित्राणि तथा वनानि ॥ १० ॥
पुष्पाह्वयं नाम विराजमानं रत्नप्रभाभिश्च [11]विवर्धमानम् ॥
वेश्मोत्तमानामपि चोत्तमानं महाकपिस्तत्र महाविमानम् ॥ ११ ॥
कृताश्च वैडूर्यमया विहङ्गा रूप्यप्रवालैश्च तथा विहङ्गा ॥
चित्राश्च नानावसुभिर्भुजङ्गा जात्यानुरूपास्तुरगाः शुभाङ्गाः ॥ १२ ॥
प्रवालजाम्बूनदपुष्पपक्षाः [12]सलीलमावर्जितजिह्मपक्षाः ॥
कामस्य साक्षादिव भान्ति पक्षाः कृता विहङ्गाः सुमुखाः सुपक्षाः ॥ १३ ॥
[13]नियुज्यमानास्तु गजाः सुहस्ताः सकेसराश्चोत्पलपत्रहस्ताः ॥
बभूव देवी च कृता सुहस्ता लक्ष्मीस्तथा पद्मिनि पद्महस्ता ॥ १४ ॥

नारीप्रवेकैः नारीश्रेष्ठैः।"प्रवेकानुत्तमोत्तमा" इत्यमरः। इवशब्दो वाक्यालंकारे । अर्च्यमानं सर्वैरिति शेषः। हंसप्रवेकैर्वाह्यमानं सुकृतां पुण्यकृतां विमानमिव स्थितमित्यन्वयः। युक्तीकृतमेघचित्रं पुञ्जीकृतमेघचित्रं चित्रमेघसङ्घातसदृशमित्यर्थः । विमानरत्नं पुष्पकं ॥५—८॥महीति॥ यत्रेति शेषः। यत्र विमाने। पर्वतराजिपूर्णामही कृता चित्ररूपेण लिखिता । एवमुत्तरत्रापि बोध्यं । अत्र पूर्वपूर्वं प्रत्युत्तरोत्तरस्य विशेषवत्त्वादधिकालङ्कारः ॥ ९ ॥ कृतानीति ॥ अत्रापि यत्रेत्यध्याहार्यं । पुष्कराणि पुष्करिण्यः ॥ १० ॥ पुष्पाह्वयं पुष्पकं । उत्तमानं अधिकमानं । सर्वत्र ददर्शेत्यन्वयः ॥ ११ ॥ यत्रेति शेषः । नानावसुभिः नानारत्नैः । जात्यानुरूपाः जात्या सदृशाः । स्पष्टजातिस्वभावा इत्यर्थः ॥ १२ ॥ प्रवालजाम्बूनदकृतानि पुष्पाणि पक्षेषु येषां ते प्रवालजाम्बूनदपुष्पपक्षाः । सलीलमावर्जितजिह्मपक्षाः सलीलमालम्बिवक्रपक्षाः । कामस्य पक्षा इव कामस्य सहाया इव ॥ १३ ॥ नियुज्यमानाः स्वयमेवात्मानं नियोजयन्तः । कर्मकर्तरि यक् । यत्र विमाने । पद्मिनि पद्माकरे । स्वयमेवोत्पलपत्राभिषेककर्मणि प्रवर्तमानाः । सुहस्ताः

रुमेघश्चतद्वद्विचित्रं ॥ ५—८ ॥ ति० यत्रपुष्पके मही अनेकजनानामाधारस्थानं पर्वतराज्यापूर्णं । पर्वतादयश्चात्रमणिस्वर्णादिनिर्मिताः । नत्विदंचित्ररूपमितिभ्रमितव्यं । अनन्तवानरसेनायानिर्बाधंतत्रावस्थानस्यवक्ष्यमाणत्वात् । किंचस्वामीच्छानुसारेण संकोचविकासौतस्यवक्ष्यतिस्वेच्छयाहनुमद्देहवत् । वितानंसमूहः । एकावल्यत्रालङ्कारः ॥ ९ ॥ **रामानु०** महीत्यादि । यत्रेति शेषः। ददर्शेत्यनुषज्यते । महीकृतेस्यारभ्यपद्मिनिपद्महस्तेत्यन्तमेकंवाक्यं । यत्रमह्यादयोलक्ष्म्यन्ताःपदार्थाःकृताःतत्पुष्पाह्वयंनाम

[पा०] १ च. छ. ज. स्वर्गमिवावतीर्णं. २ घ. प्रवेकैरभि. ३ ङ. झ. ञ. ट. रंभोधरमर्च्यमानं. ४ ग. ङ. छ.—ञ. सुकृतं. ५ क. बहुधाविचित्रं. ६ ङ—झ. ञ. ट. युक्तीकृतचारुमेघचित्रंविमानंबहु. ७ ग. वृक्षसमूहपूर्णाः. ८ ग. केसरजालपूर्णं. घ. केसररत्नपूर्णं. ९ क.—ट. सुपुष्पाअपिपुष्करिण्यः. १० ङ. झ. ञ. ट. वनानिचित्राणिसरोवराणि. च. छ. ज. वनानिचारूणितथापराणि. ग. वनानिचित्राणितथापराणि.. ११ ङ. झ. ञ. ट. विघूर्णमानं. १२ घ. जांबुनदजातपक्षाः. १३ क. ख. ग. ङ.—ट. नियुज्यमानाश्च.

इतीव तद्गृहमभिगम्य शोभनं सविस्मयो नगमिव चारुशोभनम् ॥
पुनश्च तत्परमसुगन्धि सुन्दरं हिमात्यये नगमिव चारुकन्दरम् ॥ १५ ॥
ततः स तां कपिरभिपत्य पूजितां चरन्पुरीं दशमुखबाहुपालिताम् ॥
अदृश्य तां जनकसुतां सुपूजितां सुदुःखितः पतिगुणवेगनिर्जिताम् ॥ १६ ॥
ततस्तदा बहुविधभावितात्मनः कृतात्मनो जनकसुतां सुवर्त्मनः ॥
अपश्यतोऽभवदतिदुःखितं मनः सुचक्षुषः प्रविचरतो महात्मनः ॥ १७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तमः सर्गः ॥ ७ ॥

शोभनशुण्डादण्डाः । सकेसराः कृ जलावगाहत्वेनाङ्गलग्नकिञ्जल्काः । उत्पलपत्रहस्ताः उत्पलपत्रवर्षिणः । गजाश्च कृताः तदभिषिच्यमाना पद्महस्ता अतएव सुहस्ता लक्ष्मीश्च कृता बभूवेत्यर्थः ॥ १४ ॥ इवशब्दो वाक्यालंकारे । तद्गृहं तस्य रावणस्य गृहं । सविस्मयः अभूदिति शेषः । नगं पर्वतमिव स्थितं । शोभनं शोभमानं । चारुशोभनं चारुमङ्गलं । इतीवेत्येकनिपातो वा प्रकारार्थः । इतीव तद्गृहं अभिगम्य अभिगत्य । अद्भुतदर्शनात्पुनश्चाभिगम्य सविस्मयोभूदिति योजना । रुचिरावृत्तमिदं । "चतुर्ग्रहैरिह रुचिरा जभस्जगाः" इति लक्षणात् ॥१५॥ अदृश्य अदृष्ट्वा । ऋषिनिपातनान्नञ्पूर्वेपि ल्यप् । सुदुःखितः अभूदिति शेषः । पतिगुणवेगनिर्जितां भर्तृगुणजवेन वशीकृतां ॥ १६ ॥ बहुविधभावितात्मनः बहुविधं यथा भवति तथा चिन्तितात्मनः । कृतात्मनः निशितबुद्धेः । सुवर्त्मनः सदाचारसंपन्नस्य । सुचक्षुषः दूरसूक्ष्मादिदर्शनेषु अप्रतिहतनयनतेजसः । महात्मनः महाधैर्यस्य ॥ १७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तमः सर्गः ॥ ७ ॥

महाविमानंददर्शेतिसंबन्धः । महीकृता महीनिर्मिता । एवमुत्तरत्रापिकृतशब्दार्थः । वेश्मोत्तमानामितिपञ्चम्यर्थेषष्ठी । वेश्मोत्तमेभ्योप्युच्चमानं । यद्वापूर्वंगृहोत्तमंह्यप्रतिरूपरूपमितिपुष्पकस्यगृहोत्तमत्वप्रतिपादनेनसजातीयत्वान्निर्धारणेषष्ठी । तेषांमध्येउच्चमानं उन्नतमितियावत् । अपिचेतिनिपातसमुदायोविशेषणान्तरसमुच्चयपरः । जात्यानुरूपाः आरट्टजत्लवनायुजत्वादिविशिष्टाश्वाकारसदृशाः । प्रवालजांबूनदमयानिपुष्पाणिपक्षेषुयेषांतेतथोक्ताः । सलीलमावर्जितजिह्मपक्षाः सलीलमानमितवक्रपक्षाः । कामस्यसाक्षात्पक्षाइव मदनस्यसाक्षात्सहायाइव कामोद्दीपकाइतियावत् । नियुज्यमानाःस्वयमेवव्याप्रियमाणाः । कर्मकर्तरियक् । सकेसराः पद्माकरविहारिगजाकारनिर्माणात्सकेसरत्वं । पद्मिनि पद्माकरे ॥ १४ ॥ स० हिमात्ययेवसन्ते । हिमशब्देनतद्युक्तमासचतुष्टयग्रहणात् ॥ १५ ॥ स० दृश्यस्याभावोदृश्यता । नविद्यतेदृश्यतायस्यास्सातथा । तामुद्दिश्यदुःखितोऽभूदितिवा । पतिगुणवेगनिर्जितां पत्युःरामस्ययोगुणवेगःगुणप्रवाहःतेननिर्जितां । पत्यारामेणकर्त्रा गुणवेगेन ज्याकर्षणवेगेन धनुर्भङ्गद्वारानिर्जितांनितरां प्राप्तां ॥ १६ ॥ रामानु० बहुविधभावितात्मनः बहुविधभावितमनसः । बहुविधचिन्तान्वितस्येतियावत् । कृतात्मनःकृतप्रयत्नस्य । 'आत्मादेहेधृतौयत्नेस्वभावपरमात्मनोः' इतिवैजयन्ती । सुवर्त्मनःशोभननीतिमार्गवर्तिनइत्यर्थः । सुचक्षुषःसकृदालोकनेनद्रष्टव्यंसर्वंकरतलामलकवत्साक्षात्कर्तुक्षमस्य ॥ ति० बहुविधभावितात्मनः नानाप्रकारेणसर्वंजगत्पूजितस्वभावस्य । स्वभाववाच्यात्मशब्दः । कृतात्मनःशिक्षितान्तःकरणस्य । सचक्षुषः श्रुतिस्मृतिन्यायरूपचक्षुस्सहितस्य ॥ स० बहुविधभावितात्मनः बहुप्रकारंध्यातरामरूपस्वामिकस्य ॥ १७ ॥ इतिसप्तमःसर्गः ॥ ७ ॥

[पा०] १ ग. मुपगम्य. २ ङ. झ. ञ. ट. चारुकन्दरं. ३ ग. ततस्तां. ४ च. छ. ज. सूर्जितां. ५ क. थ.—ज. ट. बाहुनिर्जितां. ६ घ.—ट. सुदुःखितां. ७ ख. ङ. झ. ञ. ट. सचक्षुषः.

अष्टमः सर्गः ॥ ८ ॥

ग्रन्थकृताविस्तारेणपुनः पुष्पकविमानवर्णनं ॥ १ ॥

स तस्य मध्ये भवनस्य संस्थितं महद्विमानं मणिवज्रचित्रितम् ॥
प्रतप्तजाम्बूनददजालकृत्रिमं ददर्श वीरः पवनात्मजः कपिः ॥ १ ॥
तदप्रमेयाप्रतिकारकृत्रिमं कृतं स्वयं साध्विति विश्वकर्मणा ॥
दिवं गतं वायुपथप्रतिष्ठितं व्यराजतादित्यपथस्य लक्ष्मवत् ॥ २ ॥
न तत्र किंचिन्न कृतं प्रयत्नतो न तत्र किंचिन्न महार्हरत्नवत् ॥
न ते विशेषा नियताः सुरेष्वपि न तत्र किंचिन्न महाविशेषवत् ॥ ३ ॥
तपःसमाधानपराक्रमार्जितं मनःसमाधानविचारचारिणम् ॥
अनेकसंस्थानविशेषनिर्मितं ततस्ततस्तुल्यविशेषदर्शनम् ॥ ४ ॥
मनस्समाधाय तु शीघ्रगामिनं दुरावरं मारुततुल्यगामिनम् ॥
महात्मनां पुण्यकृतां महर्द्धिनां यशस्विनामभ्यमुदामिवालयम् ॥ ५ ॥

पूर्वोक्तविमानवर्णनं विस्तृणीते—स तस्येत्यादि ॥ प्रतप्तजाम्बूनदजालकृत्रिमं निष्टप्तस्वर्णविशेषकृतकृत्रिमपक्ष्यादिकं ॥ १ ॥ अप्रतिमेयाप्रतिकारकृत्रिमं अपरिच्छेद्याप्रतिक्रियकृत्रिमं । तत्र हेतुमाह—कृतमिति ॥ स्वयं निर्मात्रा विश्वकर्मणा इदं साधु सुन्दरमिति श्लाघापूर्वं कृतं। सर्वत्राप्रतिहतसंचारं चैतदित्याह—दिवं गतं आकाशगतं । वायुपथप्रतिष्ठितं वायुमार्गभूतान्तरिक्षस्थितं । मध्ये भवनस्य संस्थितमिति पूर्वमुक्तत्वात् भूतलप्रत्यासन्नान्तरिक्षस्थितमित्यर्थः । आदित्यपथस्य लक्ष्मवत् । लक्ष्म लक्षणं व्यावर्तकं व्यराजत प्रचकाश इत्यर्थः ॥ २ ॥ ते विशेषाः तद्विमानस्थितविशेषाः । सुरेष्वपि सुरालयेष्वपि ॥ ३ ॥ तपस्समाधानेत्यादि पञ्चश्लोकी कुलकं ॥ सर्वत्र ददर्शेति संबन्धः । तपस्समाधानपराक्रमार्जितं तपस्समाधानेन तपोनुष्ठानेन पराक्रमेण च अर्जितं । मनस्समाधानविचारचारिणं समाधानमभिसंधानं । कर्मणि चैतत् । विचारो विविधा गतिः । मनोभिसंहितविविधगतिचारिणं । अनेकसंस्थानविशेषनिर्मितं अनेकैस्संस्थानविशेषैः विमानगोपुरादिसन्निवेशैः निर्मितं । ततस्ततस्तुल्यविशेषदर्शनं तत्र तत्र तुल्यं विशेषदर्शनं यस्मिन् ॥४॥मनस्समाधाय मन एकाग्रीकृत्य। स्वयं मनस्वीति यावत् । दुरावरं दुर्वारं महर्द्धिनां महर्द्धीनां । "अपि माषं मषं कुर्याच्छन्दोभङ्गं न कारयेत्" इत्युक्तरीत्या वृत्तभङ्गभिया ह्रस्वोच्चारणं । अभ्यमुदां इन्द्रादीनां

ति० मणिरत्नैः मणिश्रेष्ठैःचित्रितं । प्रतप्तजांबूनदजालानां तन्मयगवाक्षाणांकृत्रिमंकृतिःयस्मिंस्तत् ॥ १ ॥ ति० अप्रमेयप्रतिकारकृत्रिमं अप्रमेयैः अपरिच्छेद्यसौन्दर्यादिभिः प्रतिकारैःप्रतिमादिभिःकृत्रिमंनिर्वृत्तचित्रशोभं । पाठान्तरंत्वसांप्रदायिकमिति कतकः ॥ २ ॥ ती० तुल्यविशेषदर्शनं तुल्यानांरमणीयत्वेनसदृशानांविशेषाणांदर्शनंयस्मिंस्तत् । सर्वतोरमणीयमित्यर्थः ॥ स० मनस्समाधानविचारचारिणं । अन्तरुपविष्टानांमनस्समाधानंयथाभवतितथा विचारवत् पक्षिसंचारवत्चरतीतितथातं ॥ शि० तपस्समाधानाभ्यांकृच्छ्रचान्द्रायणादिदेवविशेषध्यानाभ्यांजातेनपराक्रमेणआर्जितं रावणेनप्राप्तं ॥ ४ ॥ ति० मनस्समाधाय स्वामिनोनुरुध्य तु शीघ्रगामित्वादिधर्मकं । दुरासदंपापिभिरितिशेषः । दुरावरमितिपाठे शत्रुभिर्दुर्निवारमित्यर्थः । महर्द्धिनां दीर्घाभावश्छान्दसः । एवंतुल्यगामिनमित्यत्रपुंस्त्वं । विमानशब्दोधैर्चादिर्वा । अभ्यमुदांमहासुखानांपुण्यकृतामेवआलयंआस्पदं ।

[पा०] १ क. ग. घ. ङ. झ. ञ. ट. संस्थितो. २ क. घ.—ट. मणिरत्नचित्रितं. ३ क. जालसन्ततं. ४ ङ. झ. ज. ट. धीमान्पवनात्मजः. ५ ग. ङ. झ. ञ. ट. तदप्रमेयप्रतिकार. ६ ङ. झ. ञ. ट. गतेवायुपथे. ७ ङ. झ. ट. लक्ष्मतत्. ८ ङ. ञ. महार्घरत्नवत्. ९ क. विशेषचारिणं. ङ. झ. ञ. ट. विशेषनिर्मितं. १० ङ. झ.—ञ. ट. दुरासदं. ११ च.—छ. महर्षिणामुदारमभ्यंमरुतामिवालयं घ. मनस्विनां. ज. महर्षिणां.

विशेषमालम्ब्य विशेषसंस्थितं विचित्रकूटं बहुकूटमण्डितम् ॥
मनोभिरामं शरदिन्दुनिर्मलं विचित्रकूटं शिखरं गिरेर्यथा ॥ ६ ॥
वहन्ति [1]यं कुण्डलशोभिताननाः महाशनाः व्योमचराः निशाचराः ॥
विवृत्तविध्वस्तविशाललोचनाः महाजवाः भूतगणाः सहस्रशः ॥ ७ ॥
[2]वसन्तपुष्पोत्करचारुदर्शनं वसन्तमासादपि [3]कान्तदर्शनम् ॥
सः [4]पुष्पकं तत्र विमानमुत्तमं ददर्श तद्वानरवीरसत्तमः ॥ ८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः ॥ ९ ॥

सीतान्वेषणाय रावणगृहस्थात्यद्भुतपुष्पकविमानमारूढवताहनुमता तत्रप्रसुप्तनानावस्थापन्ननानाजातीयनारीनिकरावलोकनं ॥ १ ॥

तस्यालयवरिष्ठस्य मध्ये विपु[5]लमायतम् ॥ ददर्श [6]भवनश्रेष्ठं हनुमान्मारुतात्मजः ॥ १ ॥
अर्धयोजनविस्तीर्णमायतं योज[7]नं हि तत् ॥ भवनं राक्षसेन्द्रस्य बहुप्रासादसंकुलम् ॥ २ ॥
मार्गमाणस्तु वैदेहीं सीतामा[8]तलोचनाम् ॥ सर्वतः परिचक्राम हनुमानरिसूदनः ॥ ३ ॥

॥ ५ ॥ विशेषमालम्ब्य विशेषसंस्थितं विशेषं गृहीत्वा विशेषेण संस्थितं । सविशेषविशेषणसंस्थितमिति यावत् । सविशेषसंस्थानविशेषविशिष्टमित्यर्थः । कूटानां विचित्रत्वबहुत्वे विशेषणद्वयेन दर्शयति—विचित्रेत्यादिना । विचित्रकूटं शिखरं गिरेर्यथा । कूटं अवान्तरशृङ्गं । शिखरं महाशृङ्गमिति प्रयोगादवधार्यते ॥ ६ ॥ यं यत् । आर्षो व्यत्ययः । महाशनाः । महाकाया इत्यर्थः । व्योमचाराः व्योमचरसदृशसंस्थानाः । विवृत्तविध्वस्तविशाललोचनाः विवृत्तानि वर्तुलानि विध्वस्तानि भुग्नानि विशालानि लोचनानि येषां ते तथा । महाजवाः महाजवा इव स्थिताः । भूतगणाः गोपुरवाहका इव प्रतिमारूपेण स्थिताः । अन्यथा रावणान्तःपुरे पुरुषसञ्चारायोगात् कामगस्य विमानस्य वहनासंभवाच्च । यद्वा शिबिकावाहका इव भूतगणा अधोभागे वहन्ति । तद्वारेणैव कामगत्वमपि । चेतनप्रेरणं विना अचेतनसंचारस्यात्यन्तमनुचितत्वाच्च ॥ ७ ॥ उत्करः समूहः ॥ ८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टमः सर्गः ॥ ८ ॥

तस्येत्यादि ॥ आलयवरिष्ठस्य पुष्पकस्य ॥ १ ॥ तद्भवनं कियत्प्रमाणमित्यत्राह—अर्धयोजनेति ॥ २ ॥ सर्वतः पुष्पकादन्यत्र सर्वत्र । पुष्पकारोहणस्य पश्चाद्व-

इवशब्दएवार्थे । अत्रतस्याचेतनत्वेपितदभिमानिदेवतायाश्चित्तज्ञत्वादितिबोध्यं ॥ ५ ॥ **रामानु०** वहन्तीत्यनेनश्लोकेनविमानस्यराक्षसवाह्यत्वंप्रतीयते । कामगस्यदिव्यस्यतन्नोपपद्यते । एतद्विरोधपरिहारार्थंवहतेर्धातोःरक्षणार्थत्वस्वीकारोपिनोपपद्यते । अन्तःपुरमध्येविमानरक्षणार्थंराक्षसावस्थानायोगात् । अतोत्रसमाधानंविद्वद्भिश्चिन्त्यं ॥ **ती०** वहन्ति वहन्तीव इवशब्दोत्राध्याहार्यः । तथाचविमानेनिर्मिताःनिशाचराकाराःप्रतिमाःवहन्तीवेत्यर्थः । अन्यथाकामगमस्यान्तःपुरेविद्यमानस्यराक्षसवहनरक्षणयोरयोगात् ॥ **स०** विवृत्तविध्वस्तविशाललोचनाः वि विरुद्धं स्वामिविरुद्धं वृत्तं चरित्रं विध्वस्तं येषां ते तथा । तेचतेविशाललोचनाश्चेतितथा ॥ ७ ॥ इत्यष्टमःसर्गः ॥ ८ ॥

रामानु० 'तस्यालयवरिष्ठस्य' 'सतस्यमध्येभवनस्यसंस्थितं' इतिपुष्पकाधारत्वेनप्रकृतस्यगृहश्रेष्ठस्य । भवनश्रेष्ठं पुष्पकाख्यं ॥ १ ॥ **रामानु०** सर्वतःपरिचक्राम रावणभवनपर्यन्तवर्तितद्भ्रातृकुमारामात्यादिभवनेषुपरितश्चचारेत्यर्थः । उत्तरश्लोके-

[पा०] १ च. झ. ञ. यत्कुण्डल. २ च. छ. ज. प्रतप्तचामीकरचारु. क. वसन्तपुष्पोद्गम. ३ ङ. झ. ञ. ट. चारुदर्शनं. ४ च. छ. ज. सुपुष्पकं. ५ च. छ. ज. ञ. विपुलमास्थितं. ङ. झ. ट. विमलमायतं. ६ च. ज. भवनं. ७ क. ग. ङ.—ट. योजनंमहत्.

[1]उत्तमं [2]राक्षसावासं हनुमानवलोकयन् ॥ आससादाथ लक्ष्मीवान्राक्षसेन्द्रनिवेशनम् ॥ ४ ॥
चतुर्विषाणैर्द्विरदैस्त्रिविषाणैस्तथैव च ॥ परिक्षिप्तमसंबाधं रक्ष्यमाणमुदायुधैः ॥ ५ ॥
राक्षसीभिश्च पत्नीभी रावणस्य निवेशनम् ॥ आहृताभिश्च विक्रम्य राजकन्याभिरावृतम् ॥ ६ ॥
तन्नक्रमकराकीर्णं तिमिभिर्झिलझषाकुलम् ॥ वायुवेगसमाधूतं पन्नगैरिव सागरम् ॥ ७ ॥
यौ हि वैश्रवणे लक्ष्मीर्या चेन्द्रे हरिवाहने ॥ सा रावणगृहे सर्वा नित्यमेवानपायिनी ॥ ८ ॥
या च राज्ञः कुबेरस्य यमस्य वरुणस्य च ॥ तादृशी तद्विशिष्टा वा ऋद्धी रक्षोगृहेष्विह ॥ ९ ॥
तस्य हर्म्यस्य मध्यस्थं वेश्म चान्यत्सुनिर्मितम् ॥ बहुनिर्यूहसंकीर्णं ददर्श पवनात्मजः ॥ १० ॥
ब्रह्मणोर्थे कृतं दिव्यं दिवि यद्विश्वकर्मणा ॥ विमानं पुष्पकं नाम सर्वरत्नविभूषितम् ॥
परेण तपसा लेभे यत्कुबेरः पितामहात् ॥ ११ ॥
कुबेरमोजसा जित्वा लेभे तद्राक्षसेश्वरः ॥ १२ ॥
ईहामृगसमायुक्तैः कार्तस्वरहिरण्मयैः ॥ सुकृतैराचितं स्तम्भैः प्रदीप्तमिव च श्रिया ॥ १३ ॥

क्ष्यमाणत्वात् ॥ ३ ॥ राक्षसेन्द्रनिवेशनं पुष्पकमध्यस्थालयादन्यन्मूलस्थानं । राक्षसीभिरित्यादिश्लोकद्वये आससादेति संबध्यते । रावणस्य निवेशनमिति पुनरुपादानमपूर्वविशेषणविवक्षया । नक्रः कुम्भीरः । तिमिङ्गिलः महामत्स्यः । झषः केवलमत्स्यः ॥४—९॥ तस्य हर्म्यस्येत्यादि ॥ पूर्वमुक्तार्थस्यापि पुनरुपन्यासः पुष्पकस्य मध्ये रावणस्य निवासभवनमन्यदस्तीत्यस्यार्थस्य स्पष्टीभावार्थम् । निर्यूहः मत्तवारणः ॥ १० ॥ ब्रह्मणोर्थे कृतं यत्कुबेरस्तपसा लेभे तद्वेश्म ददर्शेति पूर्वेण संबन्धः ॥ ११ ॥ कुबेरमित्यादि ॥ ईहामृगसमायुक्तैः वृकप्रतिकृतियुक्तैः कार्तस्वरहिरण्मयैः कार्तस्वरं सुवर्णं । हिरण्यं रजतं । " कृताकृतं हेम रूप्यं हिरण्यमभिधीयते " इति रजतस्यापि हिरण्यत्वाभिधानात् । जालवातायनैः जालानि तिर्यगूर्ध्वविन्यस्तफलकघटितानि । वातायनानि केवलानि रन्ध्राणि । अर्थवैशद्यार्थमेकार्थे शब्दद्वयप्रयोगो वा । महानीलाः सिंहलद्वीपोद्भवनीलरत्नानि । महाधनैः महामूल्यैः । निस्तुलाभिः सुवृत्ताभिः । तुलेन निर्मितेनेति शेषः । आदित्यतरुणोपमं तरुणादित्योपमं । एतदन्ते लेभे तद्राक्षसेश्वर इति संबध्यते । अन्यथा कूटागारै-

रावणगृहप्राप्तेरभिधानात् ॥ ३ ॥ **ती०** रावणस्यनिवेशनं निवेश्यन्तेपरिगृह्यन्तेपत्न्योत्रेतिनिवेशनं । रावणस्थानमित्यर्थः ॥ ६ ॥ **रामानु०** हनुमताप्राप्तरावणभवनस्यराक्षसभवनानांचसर्वोत्तरतांदर्शयितुंतत्समृद्धिमनुसंधत्ते—याहिवैश्रवणइत्यादिश्लोकद्वयेन । वैश्रवणेन्द्रयोर्ग्रहणमितरदिक्पालानामप्युपलक्षणं । 'रावणस्यगृहेसर्वा नित्यमेवानपायिनी' इत्यभिधानात् सर्वदिक्पालानामैश्वर्यमेकस्मिन्रावणभवनेसर्वदावर्ततइत्यवगम्यते ॥ **स०** हरिवाहने ' त्वङ्केशवालरोमाणिसुवर्णाभानियस्यतु । हरिःसवर्णतोश्वस्तुपीतकौशेयसप्रभ'इतिशालिहोत्रोक्तलक्षणोपेतोयोश्वःसहरिरित्युच्यते । सवाहनंयस्यतस्मिन् । यद्वाहरिवाहनेसूर्ये । ' हरिवाहनइत्युक्तिः शचीपतिविषयतोः ' इतिविश्वः । अनपायिनी अविश्लेषा ॥ ८ ॥ **रामानु०** तद्विशिष्टा ततोप्यधिका । रक्षोगृहेषुरावणभ्रातृपुत्रामात्यादिराक्षसगृहेषु । अत्रऋद्धेःसर्वशब्देनाविशेषितत्वात्कुबेरादेकैकदिक्पालैश्वर्यंरक्षसांगृहेषुप्रत्येकंवर्ततइत्यर्थः ॥ ९ ॥ **ति०** वेश्म सस्त्रीकशयनगृहमितिकतकः । वेश्म पुष्पकाख्यमितितीर्थः । अत्रतीर्थव्याख्याज्यायसी ॥ १० ॥ **रामानु०** कुबेरमित्यारभ्यसर्वत्तस्समलङ्कृतमित्यन्तमेकंवाक्यं । अतोवक्ष्यमाणेनकूटागारशब्देननपौनरुक्त्यं । ईहामृगसमायुक्तैः कृत्रिमवृकयुक्तैः । कार्तस्वरहिरण्मयैः सुवर्णरजतमयैः । ' कृताकृतंहेमरूप्यंहिरण्यमभिधीयते ' इतिरजतस्यापिहिरण्यत्वाभिधानात् । ज्वलनार्कप्रतीकाशमित्यारभ्य आरुरोहमहाकपिरित्यन्तमेकंवाक्यं । जालवातायनैर्युक्तं कुड्योपरिभागेऽलङ्कारार्थंस्वस्तिकसर्वतोभद्राद्याकारेणयन्त्रवत्तयाकृतंजालं । वायुसंचारार्थंकृतोगवाक्षोवातायनं । इन्द्रनीलमहानीलेति । " क्षीरमध्येक्षिपेन्नीलंक्षीरंचेन्नीलतांव्रजेत् । इन्द्रनीलमितिख्यातमितिचागस्त्यभाषितम् ' इतिरत्नशास्त्रोक्तलक्षणमिन्द्रनीलं । ' सिंहलाकारसंभूतामहानीलाइतिस्मृताः ' इत्युक्ता महानीलाइतितयोर्भेदः । विद्रुमेणमहाधनैर्मणिभिःनिस्तुलाभिर्मुक्ताभिश्चकरणैःविचित्रेणतलेनाभिविराजितमितिसंबन्धः । आदि-

[**पा०**] १ च. छ. ज. राक्षसेन्द्रस्यचावासमवलोकयन्. २ ग. तिमिमीनसमाकुलं. ३ ङ. ञ. समाधूतैः. ४ क. याच. ५ ङ.—ट. रम्यानिर्त्यं. क. लक्ष्मीर्निर्त्यं. ६ ग. लक्ष्मीरक्षोगृहेष्विह. ट. लक्ष्मीरक्षोगृहेष्वपि. ७ ङ. ञ. ट. संयुक्तं. ८ ङ. च. छ. ज. विधिवद्विश्व. ९ घ. श्रेष्ठंरत्न. १० क. वरेण. ११ क. ख. स्वरविभूषितैः. १२ ट. सुकृतंराजतस्तंभैः. क. ग. घ. च. ज. सुकृतैराजतस्तंभैः.

मेरुमन्दरसंकाशैरुल्लिखद्भिरिवाम्बरम् ॥ कूटागारैः शुभाकारैः सर्वतः समलंकृतम् ॥ १४ ॥
ज्वलनार्कप्रतीकाशं सुकृतं विश्वकर्मणा ॥ हेमसोपानसंयुक्तं चारुप्रवरवेदिकम् ॥ १५ ॥
जालवातायनैर्युक्तं काञ्चनैः स्फाटिकैरपि ॥ इन्द्रनीलमहानीलमणिप्रवरवेदिकम् ॥ १६ ॥
विद्रुमेण विचित्रेण मणिभिश्च महाधनैः ॥ निस्तुलाभिश्च मुक्ताभिस्तलेनाभिविराजितम् ॥ १७ ॥
चन्दनेन च रक्तेन तपनीयनिभेन च ॥ सुपुण्यगन्धिना युक्तमादित्यतरुणोपमम् ॥ १८ ॥
कूटागारैर्वराकारैर्विविधैः समलंकृतम् ॥ विमानं पुष्पकं दिव्यमारुरोह महाकपिः ॥ १९ ॥
तत्रस्थः स तदा गन्धं पानभक्ष्यान्नसंभवम् ॥ दिव्यं संमूर्च्छितं जिघ्रद्धूपवन्तमिवानिलम् ॥ २० ॥
स गन्धस्तं महासत्त्वं बन्धुर्बन्धुमिवोत्तमम् ॥ इत एहीत्युवाचेव तत्र यत्र स रावणः ॥ २१ ॥
ततस्तां प्रास्थितः शालां ददर्श महतीं शुभाम् ॥ रावणस्य मनःकान्तां कान्तामिव वरस्त्रियम् ॥२२॥
मणिसोपानविकृतां हेमजालविभूषिताम् ॥ स्फाटिकैरावृततलां दन्तान्तरितरूपिकाम् ॥ २३ ॥
मुक्ताभिश्च प्रवालैश्च रूप्यचामीकरैरपि ॥ विभूषितां मणिस्तम्भैः सुबहुस्तम्भभूषिताम् ॥२४॥
समैर्ऋजुभिरत्युच्चैः समन्तात्सुविभूषितैः ॥ स्तम्भैः पक्षैरिवात्युच्चैर्दिवं संप्रस्थितामिव ॥ २५ ॥
महत्या कुथयाऽऽस्तीर्णां पृथिवीलक्षणाङ्कया ॥ पृथिवीमिव विस्तीर्णां सराष्ट्रगृहमालिनीम् ॥ २६ ॥
नादितां मत्तविहगैर्दिवगन्धाधिवासिताम् ॥ परार्ध्यास्तरणोपेतां रक्षोधिपनिषेविताम् ॥ २७ ॥
धूम्रामगरुधूपेन विमलां हंसपाण्डुराम् ॥ चित्रां पुष्पोपहारेण कल्माषीमिव सुप्रभाम् ॥ २८ ॥
मनःसंह्लादजननीं वर्णस्यापि प्रसाधिनीम् ॥ तां शोकनाशिनीं दिव्यां श्रियः संजननीमिव ॥२९॥
इन्द्रियाणीन्द्रियार्थैस्तु पञ्च पञ्चभिरुत्तमैः ॥ तर्पयामास मातेव तदा रावणपालिता ॥ ३० ॥

रित्यनेन पुनरुक्तिः स्यात् ॥ १२—१९ ॥ जिघ्रत् अजिघ्रत् ॥ २०—२१ ॥ दन्तान्तरितरूपिकां दन्तैः व्यवहितरूपिकां । अन्तरान्तराकृतदन्तफलकामिति यावत् । सुबहुस्तम्भभूषितां अवान्तरबहुस्तम्भभूषितां । सुबहुस्तम्भभूषितैरिति पाठे सुबहुस्तम्भैः स्तम्भदार्ढ्यकारिपट्टैरलंकृतामित्यर्थः । अत्युच्चैः अत्यन्तोन्नतैः । दिवं आकाशं । कुथया आस्तरणेन । पृथिवीलक्षणाङ्कया सरित्समुद्रगिरिवनादिभिः पृथिवीलक्षणैरङ्कितया । कल्माषीं शबलवर्णां वसिष्ठधेनुमिव । सर्वकामप्रदत्वेन कल्माषीसादृश्यं । वर्णस्यापि प्रसाधिनीं वर्णोत्कर्षकरीमित्यर्थः । तां शोकनाशिनीमिति । ततस्तामिति वर्तमाने पुनस्तच्छब्द उपसंहारार्थः । तां प्रति प्रस्थितः ददर्शेति वासंबन्धः ॥ २२—२९ ॥ इन्द्रियाणीति ॥ हनुमत इति शेषः ॥ ३० ॥

त्यतरुणोपमं तरुणादित्योपमं । उपसर्जनस्यपरनिपातआर्षः ॥१२—१९॥ **ति०** यत्तु पुष्पकस्यैव साशाला । ततइत्यस्य तदनन्तरमित्यर्थइति तच्चिन्त्यं । प्रस्थितइतिपदाद्वारस्यात् अर्धयोजनविस्तीर्णमित्यादिना मूलालयप्रदर्शनोपक्रमाच्च । मूलालयंदृष्ट्वा तद्गृहिस्थंपुष्पकमन्विष्य तत्स्थएव रावणशयनगृहं तद्गृहवर्त्यनुमाय पुष्पकादवरुह्य तंप्रतिस्थितस्तांददर्शेत्येवन्याय्यमितिकतकः । यत्त्वित्यादिनोक्तव्याख्यैवयुक्तेति ममभाति । ' अवतीर्यविमानाच्चहनुमान्मारुतात्मजः' इत्यग्रे उपसंहारात् ॥ २२ ॥ **ती०** सुबहुस्तंभभूषितामित्यत्रबहुत्वविधानायस्तंभानुवादान्नपौनरुक्त्यं ॥ **स०** बहूनांशत्रूणांस्तंभःजडीभावःतेनविभूषितां यदाशयाप्रवृत्ताश-

---

[पा०] १ ङ. ञ. ज. ट. शुभागारैः. २ ङ. ञ. युक्तंच. ३ ज. वर्तुलाभिश्च. ४ क. ग. घ. युक्ततरुणादित्यसंनिभं. ५ च. छ. ज. कूटागारैर्महागारैःसर्वतः. ६ ङ. ञ. ज. ट. सर्वतो. क. घ. सततं. ७ घ. ततःसंप्रस्थितः. ८ ङ.—ट. शिवां. ९ ख. सुकृतां. १० ग.—ट. विराजितां. क. समावृतां. ११ ङ.—ट. मुक्तावज्रप्रवालैश्च. १२ क. सुगन्धैःसुविभूषितां. च. बहुस्तंभविभूषितां. घ. सुबहुस्तंभशोभितां. १३ घ. च. छ. ज. ञ. कुथयाकीर्णां. १४ ञ. ट. सराष्ट्रगृहशालिनीं. ग. सुराष्ट्रग्राममालिनीं. १५ च. छ. ज. रक्षोधिपतिसेवितां. १६ ङ. ञ. ज. ट. पत्रपुष्पोपहारेण. १७ ङ. ञ. ज. ट. मनसोमोदजननीं. १८ च. छ. ज. सेविता.

स्वर्गोयं देवलोकोऽयमिन्द्रस्येयं पुरी भवेत् ॥ सिद्धिर्वेयं परा हि स्यादित्यमन्यत मारुतिः ॥ ३१ ॥
प्रध्यायत इवापश्यत्प्रदीपांस्तत्र काञ्चनान् ॥ धूर्तानिव महाधूर्तैर्दैवनेन पराजितान् ॥ ३२ ॥
दीपानां च प्रकाशेन तेजसा रावणस्य च ॥ अर्चिर्भिर्भूषणानां च प्रदीप्तेत्यभ्यमन्यत ॥ ३३ ॥
ततोपश्यत्कुथासीनं नानावर्णाम्बरस्रजम् ॥ सहस्रं वरनारीणां नानावेषविभूषितम् ॥ ३४ ॥
परिवृत्तेऽर्धरात्रे तु पाननिद्रावशं गतम् ॥ क्रीडित्वोपरतं रात्रौ सुष्वाप बलवत्तदा ॥ ३५ ॥
तत्प्रसुप्तं विरुरुचे निःशब्दान्तरभूषणम् ॥ निःशब्दहंसभ्रमरं यथा पद्मवनं महत् ॥ ३६ ॥
तासां संवृतदन्तानि मीलिताक्षाणि मारुतिः ॥ अपश्यत्पद्मगन्धीनि वदनानि सुयोषिताम् ॥३७॥
प्रबुद्धानीव पद्मानि तासां भूत्वा क्षपाक्षये ॥ पुनः संवृतपत्राणि रात्राविव बभुस्तदा ॥ ३८ ॥
इमानि मुखपद्मानि नियतं मत्तषट्पदाः ॥ अम्बुजानीव फुल्लानि प्रार्थयन्ति पुनःपुनः ॥ ३९ ॥
इति चामन्यत श्रीमानुपपत्त्या महाकपिः ॥ मेने हि गुणतस्तानि समानि सलिलोद्भवैः ॥ ४० ॥
सा तस्य शुशुभे शाला ताभिः स्त्रीभिर्विराजिता ॥ शारदीव प्रसन्ना द्यौस्ताराभिरभिशोभिता ॥४१॥
स च ताभिः परिवृतः शुशुभे राक्षसाधिपः ॥ यथा ह्युडुपतिः श्रीमांस्ताराभिरभिसंवृतः ॥ ४२ ॥
याश्यवन्तेम्बरात्ताराः पुण्यशेषसमावृताः ॥ इमास्ताः संहृताः कृत्स्ना इति मेने हरिस्तदा ॥ ४३ ॥
ताराणामिव सुव्यक्तं महतीनां शुभार्चिषाम् ॥ प्रभावर्णप्रसादाश्च विरेजुस्तत्र योषिताम् ॥ ४४ ॥

स्वर्गोयमिति ॥ सामान्यतः स्वर्गोयं । तत्रापि देवलोकः त्रयस्त्रिंशद्देवानां लोकः । तत्रापीन्द्रस्य पुरी अमरावती । परा सिद्धिः ब्रह्मणः स्थानमित्युत्तरोत्तरोत्कर्षः ॥ ३१ ॥ प्रध्यायत इव निश्चलतया प्रकृष्टध्यानयुक्तानिव । धूर्तान् अक्षधूर्तान् । देवनेन द्यूतेन ॥ ३२ ॥ प्रदीप्ता शाला दग्धेति अभ्यमन्यत ॥ ३३ ॥ कुथासीनं कुथशयितं । नानावर्णाम्बरस्रजमिति । हलन्तस्य स्रक्छब्दस्य भागुरिमतेन टावन्तत्वादजन्तत्वोपपत्तिः ॥ ३४—३५ ॥ निःशब्दान्तरभूषणं निःशब्दविशेषाणि भूषणानि यस्य ॥ " अथान्तरं रन्ध्रेप्यपरव्यवधानयोः । अवकाशावसरयोरवसानविनार्थयोः । विशेषमध्यतादर्थ्येषु " इति दर्पणः ॥ अतिनिद्रापरवशत्वेन निश्चलाङ्गतया निःशब्दभूषणमित्यर्थः ॥ ३६—३७ ॥ अत्र वदनानीत्यनुषज्यते । तासां वदनानि क्षपाक्षये दिवसे पद्मानीव प्रबुद्धानि भूत्वा रात्रौ पुनः संवृतपत्राणि सङ्कुचितपत्राणि पद्मानीव बभुः ॥ ३८ ॥ प्रार्थयन्ति प्रार्थयेरन् । मधुरसलुब्धतया अत्र पुनःपुनः पतेयुरित्यर्थः । व्यत्ययेन परस्मैपदं । अनुदात्तत्वेनात्मनेपदत्वात् । नियतं नूनं । उपपत्त्या युक्त्या । उपपत्तिमेवाह—मेन इति । तानि मुखानि । गुणतः सौरभादिगुणैः । सलिलोद्भवैः पद्मैः ॥ ३९—४३ ॥ प्रभा कान्तिः ।

त्रवोजडीभवन्तीत्यर्थः । " स्तंभौस्थूणाजडीभावौ " इत्यमरः ॥ २४ ॥ ती० प्रध्यायतइतिपाठेऽप्यटितिप्रकाशसंभारात्प्रत्यागच्छतइवस्थितान् । काञ्चनान् काञ्चनस्तंभगतानित्यर्थः ॥ ३२ ॥ ति० प्रदीप्ता अग्निज्वालाज्वालिता । अनेनाग्निमोऽग्निदाहस्सूचितः ॥ ३३ ॥ ति० निद्रितत्वात्संवृतानि संवृतपक्ष्माणि । तादृशानिचतानि दान्तानि ग्लानानि । मीलिताक्षीणि अतिसंवृतपक्ष्माणि । स्वर्गदेवलोकादेरिवसंवृतमीलितयोरपिभेदोबोध्यः । यद्वासंवृतदान्तानीत्यस्यैवव्याख्यानंनिमीलिताक्षीणीति । यद्वा संवृतत्वमोष्ठयोः

[पा०] १ ङ. झ. ञ. ट. देवलोकोयमिन्द्रस्यापि. ग. देवलोकोयंगान्धर्वीयं. २ च. छ. ज. गान्धर्वीयंपरासिद्धिरित्यमन्यत. क. गान्धर्वीयंपुरीवास्यादित्यमन्यत. ग. इन्द्रस्येयंपुरीवास्यादित्यमन्यत. ३ च. नानाभरणभूषितं. छ. ज. वराभरणभूषितं. ४ क. नानारत्नविभूषितं. ५ ङ. झ. ञ. ट. प्रसुप्तं. ६ ङ. च. झ. ञ. ट. भूषितं. ७ ङ. झ. दान्तानि. ८ ङ. च. छ. झ. ट. मीलिताक्षीणि. ९ क. ञ. क्षपाक्षये. १० घ.—छ. झ. ञ. ट. इतिवामन्यत. ११ क. संहृताः. १२ घ. सर्वाइति.

[1]व्यावृत्तगुरुपीनस्रक्प्रकीर्णवरभूषणाः ॥ पानव्यायामकालेषु निर्द्रापहृतचेतसः ॥ ४५ ॥
व्यावृत्ततिलकाः काश्चित्काश्चिदुद्भ्रान्तनूपुराः ॥ पार्श्वे गलितहाराश्च काश्चित्परमयोषितः ॥ ४६ ॥
[3]मुक्ताहारावृताश्चान्याः [4]काश्चिद्विस्रस्तवाससः ॥ [5]व्याविद्धरशनादामाः किशोर्य इव वाहिताः ॥४७॥
[6]सुकुण्डलधराश्चान्या विच्छिन्नमृदितस्रजः ॥ गजेन्द्रमृदिताः फुल्ला लता इव महावने ॥ ४८ ॥
चन्द्रांशुकिरणाभाश्च हाराः कासांचिदुत्कटाः ॥ हंसा इव बभुः सुप्ताः स्तनमध्येषु योषिताम् ॥ ४९ ॥
अपरासां च वैडूर्याः कादम्बा इव पक्षिणः ॥ हेमसूत्राणि चान्यासां चक्रवाका इवाभवन् ॥ ५० ॥
हंसकारण्डवाकीर्णाश्चक्रवाकोपशोभिताः ॥ आपगा इव ता रेजुर्जघनैः पुलिनैरिव ॥ ५१ ॥
[10]किङ्किणीजालसंकोशास्ता [11]हैमविपुलाम्बुजाः ॥ भावग्राहा यशस्तीराः सुप्ता नद्य इवाबभुः ॥५२॥
[12][13]दुष्वङ्गेषु कासांचित्कुचाग्रेषु च संस्थिताः ॥ बभूवुर्भूषणानीव शुभा भूषणराजयः ॥ ५३ ॥
अंशुकान्ताश्च कासांचिन्मुखमारुतकम्पिताः ॥ उपर्युपरि वक्त्राणां व्याधूयन्ते पुनःपुनः ॥ ५४ ॥
ताः पताका इवोद्भूताः पत्नीनां रुचिरप्रभाः ॥ नानावर्णसुवर्णानां वक्त्रमूलेषु रेजिरे ॥ ५५ ॥

वर्णः रूपं । प्रसादः प्रसन्नता ॥ ४४ ॥ पानव्यायामकालेषु पानानन्तरं भाविरतिव्यापारसमयेषु । व्यावृत्तगुरुपीनस्रक्प्रकीर्णवरभूषणाः विपर्यस्तगुरुपीनस्रजः प्रकीर्णवरभूषणाश्च सत्यः निद्रापहृतचेतसः विरेजुः ॥ ४५ ॥ व्यावृत्ततिलकाः उन्मृष्टतिलकाः । उद्भ्रान्तनूपुराः स्वस्थानानवस्थितनूपुराः ॥ ४६ ॥ मुक्ताहारावृताः मुक्ताहारैरावृताः । छिन्नमुक्ताहारा इत्यर्थः । व्याविद्धरशनादामाः छिन्नकाञ्चीगुणाः । किशोर्यः प्रथमवयस्काबडबाः । वाहिताः मार्गश्रमनिवृत्त्यर्थं भूमौ प्रवेष्टनं कारिताः । सर्वत्र रेजुरित्यन्वयः ॥ ४७—४८ ॥ चन्द्रांशुकिरणाभाः अंशुः सूर्यः । "अथांशुः स्यान्मयूखे सवितर्यपि" इति दर्पणः । चन्द्रसूर्ययोः किरणानामाभेवाभा येषां ते तथा । उत्कटाः स्थूलाः ॥४९—५१॥ अथासां नदीसमाधिं दर्शयति—किङ्किणीति ॥ किङ्किणीजालसंकोशाः किङ्किणीजालान्येव संकोशा मुकुलानि यासां ताः । एतत्स्थाने सत्कोशा इति पाठान्तरदर्शनात्संकोशशब्दो मुकुलवाचीत्यवगम्यते । भावाः शृङ्गारचेष्टाः त एव ग्राहाः नक्रा यासां ताः । सुप्तिदशायामपि वासनावशाद्भावाभिव्यञ्जकसंस्थानवत्त्वाद्भावग्राहा इत्युक्तं । यशस्तीराः यशश्शब्देन यशोहेतुभूता पर्यन्तप्रसृतप्रभोच्यते । सैव तीरं यासां ताः॥५२॥ संस्थिताः लग्नाः भूषणराजयः । भ्रमराणीव भ्रमरा इव । व्यत्यय आर्षः । कामुका इव । बभूवुः । "भ्रमरः कामुके भृङ्गे" इति दर्पणः । केचित्तु भूषणानीति पाठं कल्पयित्वा भूषणराजयः भूषणविमर्दकृतरेखाः । विस्रस्तभूषणानामपि कासांचिद्भूषणानीव बभूवुरित्यर्थ इत्याहुः ॥ ५३ ॥ मुखमारुतकम्पिताः अंशुकान्ताः सूक्ष्मवस्त्रदशाः । उपर्युपरि वक्त्राणां वक्त्राण्युपर्युपरि । "धिगुपर्यादिषु त्रिषु । द्वितीयाम्रेडितान्तेषु" इति द्वितीयाभाव आर्षः । व्याधूयन्त इति श्यन्नार्षः । धूनातेः क्र्यादित्वात् ॥५४॥ ता इति विधेयत्वात्स्त्रीलिङ्गता । नानावर्णसुवर्णानां नानाविधशोभनवर्णानां ॥ ५५ ॥

स० पद्मगन्धीनि ' उपमानाच्च ' इतीत्वं ॥ ३७ ॥ ति० व्यावृत्ताःकचाःपीनस्रजश्चयासांताश्च ॥ ४५ ॥ ति० अकुण्डलधराः कुण्डलधरणरहिताः गलितकुण्डलाइतियावत् ॥ विच्छिन्नाःआमृदिताश्चस्रजोयासांताः ॥ ४८ ॥ ति० अंशवःप्रभाः किरणास्तदाधाराः । अंशवःसूक्ष्मरश्मयः । किरणाःस्थूलरश्मयइत्यन्ये । शि० सुप्ताहंसाइवबभुः ॥ ४९ ॥ ति० किङ्किणीजालसंकाशाःतद्वन्मुकुलितनयनाः तत्स्थानेचनद्यांमुकुलितकुमुदानि । हेमविपुलांबुजत्वेनवक्त्रनिगरणं । उपमानेतुननिगरणं । किङ्किणीजालसंबाधा इतिपाठेकिङ्किणीजालसंबाधत्वमुभयत्रापिस्पष्टमेव । शब्दवत्त्वसाधर्म्यात्किङ्किणीशब्देनलहरीणामप्युक्तेः । भावाविलासाएवस्वाभाविकसुरतभावोवाग्राह्योयासांताः । यशःअतिगुणवत्त्वकृतयशएवतीरंयासांताः । यशश्शब्देनलक्षणयाकान्तिरित्यन्ये । सुप्तानार्यो

[पा०] १ ङ. च. ञ. ट. व्यावृत्तकुचपीन. झ. व्यावृत्तकचपीन. २ ङ.—ट. निद्रोपहृत. ३ ख. घ. ङ. झ. ञ. ट. मुक्ताहारवृताः. ४ क. ख. ग. ङ.—ट. काश्चित्प्रस्रस्त. घ. काश्चित्प्रहृत. ५ क. ग. व्यावृत्तरशना. ६ ङ. झ. ञ. ट. अकुण्डलधराः. ७ ङ.—ज. ञ. ट. विच्छिन्नामृदित. ८ ङ. झ. ञ. दुद्गताः. ९ ङ. झ. ञ. ट. कारण्डवोपेताः. १० च. छ. ज. जालसंबाधाः. ग. ङ. झ. ञ. ट. जालसंकाशाः. ११ क. वक्त्रकनकांबुजाः. १२ क. मृदुष्वंशेषु. १३ ङ. राशयः.

ववल्गुश्चात्र कासांचित्कुण्डलानि शुभार्चिषाम् ॥ मुखमारुतसंसर्गान्मन्दं मन्दं सुयोषिताम् ॥५६॥
शर्करासवगन्धैश्च प्रकृत्या सुरभिः सुखः ॥ तासां वदननिःश्वासः सिषेवे रावणं तदा ॥ ५७ ॥
रावणाननशङ्काश्च काश्चिद्रावणयोषितः ॥ मुखानि स्म सपत्नीनामुपाजिघ्रन्पुनः पुनः ॥ ५८ ॥
अत्यर्थं सक्तमनसो रावणे ता वरस्त्रियः ॥ अस्वतन्त्राः सपत्नीनां प्रियमेवाचरंस्तदा ॥ ५९ ॥
बाहूनुपनिधायान्याः पारिहार्यविभूषितान् ॥ अंशुकानि च रम्याणि प्रमदास्तत्र शिश्यिरे ॥ ६० ॥
अन्या वक्षसि चान्यस्यास्तस्याः काश्चित्पुनर्भुजम् ॥ अपरा त्वङ्कमन्यस्यास्तस्याश्चाप्यपरा भुजौ ॥६१॥
ऊरुपार्श्वकटीपृष्ठमन्योन्यस्य समाश्रिताः ॥ परस्परनिविष्टाङ्ग्यो मदस्नेहवशानुगाः ॥ ६२ ॥
[अन्योन्यस्याङ्गसंस्पर्शात्प्रीयमाणाः सुमध्यमाः ॥ एकीकृतभुजाः सर्वाः सुषुपुस्तत्र योषितः ॥६३॥]
अन्योन्यभुजसूत्रेण स्त्रीमाला ग्रथिता हि सा ॥ मालेव ग्रथिता सूत्रे शुशुभे मत्तषट्पदा ॥ ६४ ॥
लतानां माधवे मासि फुल्लानां वायुसेवनात् ॥ अन्योन्यमालाग्रथितं संसक्तकुसुमोच्चयम् ॥ ६५ ॥
व्यतिवेष्टितसुस्कन्धमन्योन्यभ्रमराकुलम् ॥ आसीद्वनमिवोद्भूतं स्त्रीवनं रावणस्य तत् ॥ ६६ ॥
उचितेष्वपि सुव्यक्तं न तासां योषितां तदा ॥ विवेकः शक्य आधातुं भूषणाङ्गाम्बरस्रजाम् ॥ ६७ ॥
रावणे सुखसंविष्टे ताः स्त्रियो विविधप्रभाः ॥ ज्वलन्तः काञ्चना दीपाः प्रेक्षन्तानिमिषा इव ॥६८॥
राजर्षिपितृदैत्यानां गन्धर्वाणां च योषितः ॥ राक्षसानां च याः कन्यास्तस्य कामवशं गताः ॥६९॥

ववल्गुरिति ॥ उपधानपरिसरे घनमणिखचिततया लम्बमानानि कुण्डलानि मन्दं मन्दं चेलुरित्यर्थः ॥५६—५८॥ रावणे अत्यर्थं सक्तमनसः । अस्वतन्त्राः पाननिद्रापरवशाः ताः सपत्नीभिराघ्रातमुखाः । वरस्त्रियः तदा मुखाघ्राणसमये सपत्नीनां प्रियमेवाचरन् रावणोऽजिघ्रदिति बुद्ध्या स्वयमप्यजिघ्रन्नित्यर्थः । अथवा कथं सपत्न्योपि सह स्वपन्तीत्याशङ्क्याह—अत्यर्थमिति ॥ ५९ ॥ पारिहार्यो वलयः । अंशुकानि च उपनिधायेत्यनुषज्यते ॥ ६० ॥ अन्या वक्षसि चान्यस्या इत्यादिश्लोकद्वये शिश्यिर इत्येतद्वचनविपरिणामेन यथायोगं संबध्यते उपनिधायेति च ॥ ६१—६३ ॥ मालेव पुष्पमालेव । मत्तषट्पदस्थानीयाः केशाः ॥ ६४ ॥ लतानामित्यादिश्लोकद्वयमेकान्वयं ॥ तद्रावणस्य स्त्रीवनं लतानां वनमिवासीदिति संबन्धः। विशेषणान्युभयत्र योज्यानि। वायुसेवनाद्धेतोः अन्योन्यमालाग्रथितं अन्योन्यमालारूपेण ग्रथितं सुखमुखमारुतसेवनादन्योन्यमालाग्रथितमिति स्त्रीपक्षे । संसक्तकुसुमोच्चयं । अन्योन्यसंसक्तनीवीकं संसक्तकुसुमसमूहं चेत्यर्थः । व्यतिवेष्टितसुस्कन्धं अन्योन्यपरिवेष्टितांसं अन्योन्यपरिवेष्टितप्रकाण्डं च । अन्योन्यं भ्रमरैश्चिकुरैराकुलं भ्रमरैः भृङ्गैराकुलं च । " भ्रमरश्चिकुरे भृङ्गे " इति विश्वः ॥ ६५—६६॥ उचितेषु स्थानेषु स्थितानामपि भूषणाङ्गाम्बरस्रजां साधारण्यादेकतामापन्नानामिति भावः । विवेकः सुव्यक्तमाधातुं न शक्यः । अन्योन्यसंग्रथितत्वेन सुप्तत्वात् । इमा अस्या भूषणाङ्गाम्बरस्रजः इमा अपरस्या इति विवेकः कर्तुं न शक्य इत्यर्थः ॥ ६७ ॥ सुखसंविष्टे सुखसुप्ते । काञ्चनाः काञ्चनदीपस्तम्भस्था दीपाः अनिमिषास्सन्तः प्रैक्षन्तेव । अनेन रावणस्य जाग्रद्दशायां दीपैरपि ताः स्त्रियो निश्चलं द्रष्टुमशक्या इति गम्यते ॥ ६८ ॥ अथ सीतयैकया अकाम्यत्वं वक्तुं सर्वस्त्रीकाम्यत्वमाह—

नद्यइवबभुः ॥ ५२ ॥ ति० शर्करासवः आसवविशेषः । तद्योगात्तद्गन्धः । प्रकृत्याचसुरभिः । यद्वाप्रकृत्याअसुरभिरपि वायुरिति शेषः । तासांवदननिश्श्वासःतद्युक्तः । अर्शआद्यजन्तं । अतएवशर्करासवगन्धःरावणंसिषेवे ॥ ५७ ॥ ति० राजर्षयोविप्रदैत्याश्च ।

[पा०] १ ग. श्चारु. क. स्तत्र. २ च. छ. ज. मारुतसंक्षोभात्. ग. घ. मारुतसंसर्गैर्मन्दं. क. ङ. झ. ञ. ट. मारुतसंकंपैर्मन्दं. ३ झ. ञ. ट. मन्दंच. क. च. छ. ज. मन्दंस्म. ४ क. घ.—ट. गन्धस्स. ग. गन्धाढ्यः. ५ ग. च.—झ. ट. मुखानिच. ६ क. अंशुकानीव. ७ ग. ङ.—ट. कुचौ. ८ अयंश्लोकः क.—ट. पाठेषुदृश्यते. ९ ङ.—ट. प्रतिवेष्टित. १० ङ. च. छ. ज. सुखसंसुप्ते. ११ ख. ङ. झ. ट. प्रेक्षन्तोऽनिमिषाइव. क. च. छ. ज. ञ. प्रेक्षन्तेऽनिमिषाइव. १२ ङ. झ. ट. राजर्षिविप्र. १३ क.—ट. रक्षसांचाभवन्कन्याः. १४ क. स्तथा.

युद्धकामेन ताः सर्वा रावणेन हृताः स्त्रियः ॥ समदा मदनेनैव मोहिताः काश्चिदागताः ॥ ७० ॥
न तत्र काश्चित्प्रमदाः प्रसह्य वीर्योपपन्नेन गुणेन लब्धाः ॥
न चान्यकामापि न चान्यपूर्वा विना वरार्हां जनकात्मजां ताम् ॥ ७१ ॥
न चाकुलीना न च हीनरूपा नादक्षिणा नानुपचारयुक्ता ॥
भार्याऽभवत्तस्य न हीनसत्त्वा न चापि कान्तस्य न कामनीया ॥ ७२ ॥
बभूव बुद्धिस्तु हरीश्वरस्य यदीदृशी राघवधर्मपत्नी ॥
इमा यथा राक्षसराजभार्याः सुजातमस्येति हि साधुबुद्धेः ॥ ७३ ॥

राजर्षीत्यादिना श्लोकत्रयेण ॥ तस्य कामवशं गताः तं प्रति यः कामः तस्य वशंगताः। तं कामयित्वा स्वयमेवागतास्ताः न तु तेन कामयित्वा हृता इत्यर्थः ॥ ६९ ॥ हृताश्च काश्चन श्रूयन्ते तत्र कथमित्यत्राह —युद्धेति ॥ तासु हृतासु तासां संबन्धिभिस्सह युद्धं भविष्यतीति युद्धं कामयित्वानेन हृताः नतु ताः कामयित्वा हृताः ॥ ७० ॥ अमुमेवार्थं विवृणोति— न तत्रेति ॥ तत्र तासु काश्चिदपि प्रमदाः प्रसह्य वीर्येण न लब्धाः। किंतु स्वसंवादेनैवेत्यर्थः। वीर्योपपन्नेन रावणेन न लब्धाः अपि तु गुणेन लब्धाः। अन्यकामा च काचित्तत्र नास्ति। अन्यपूर्वा च न। अन्यत्रासक्ता च न काचिदित्यर्थः ॥ ७१—७२ ॥ राघवधर्मपत्नी ईदृशी यदि स्वयंवरात्पूर्वमेवास्य धर्मपत्नी चेत्। अस्य सुजातं सुकृतं। इयमसाध्वी बुद्धिः कापेयत्वप्रमादकृता न तु स्वयं तस्य बुद्धिरिति द्योतयितुं साधुबुद्धेरित्युक्तं। एवं प्रमादोपस्थितबुद्ध्या पश्चात्तापोभूदित्याह—पुनश्चेति। यद्वा इमाःराक्षसराजभार्याःयथा स्वभर्त्रा विशिष्टास्सकलभोगयुक्ताश्च तथा राघवधर्मपत्नी ईदृशी यदि स्वभर्त्रा सहिता भोगयुक्ता च यदि तदाऽस्य रावणस्य सुजातं शोभनं जन्मेति साधुबुद्धेः परसमृद्धिपरस्य हरीश्वरस्य स्वयमाधिपत्यार्हस्य बुद्धिर्बभूव। अयं रावणः राघवधर्मपत्नीं यदि प्रत्यर्पयेत्तदास्य

अस्यब्रह्मराक्षसत्वादस्तिविप्रकन्याविवाहेऽधिकारः । कामवशंगतास्सत्यस्तस्ययोषितोऽभवन् । अनेनतासामप्यनुरागःसूचितः ॥ ६९ ॥ **तनि०** रावणःस्त्रीभिःसहयथासंततसंश्लेषेणतिष्ठति । एवंरामःसीतयासंश्लेषेणतिष्ठतिचेद्रावणस्यैश्वर्यमविच्छिन्नंस्यात् । साधुबुद्धेः शत्रूणामपिहितमन्वेषयतः ॥ **स०** साधुबुद्धेःदेवावतारादिषुसम्यग्बुद्धिमतःहरीश्वरस्यहनुमतःइतिवक्ष्यमाणाबुद्धिर्बभूव । तदेवव्यनक्ति—यदीति । इमाःपुरतस्सुप्ताःराक्षसराजभार्याःलङ्कायांयथावर्तन्ते तथाराघवधर्मपत्नीसीतापि यदीदृशी एतत्पुरगताचेत्तर्ह्यस्यअत्रसुप्तस्यरावणस्य सुजातंराक्षसत्वनिर्गमेनशोभनजन्म शिशुपालत्वावस्थायांभगवदङ्गप्रवेशकारणंजन्म हि प्रसिद्धं भवतीत्यर्थः । युद्धेरामेणहतस्सन्शिशुपालत्वंप्राप्यजयोभवत्वीतिभावः। विस्तरस्तुतीर्थव्याख्यानेद्रष्टव्यः॥ **ती०** यद्वा राघवधर्मपत्नी यथा रावणेनबलादानीताइमाराक्षसराजभार्याः तथायदि सुग्रीवेणबलाद्धृतायदि तदा हरीश्वरस्यसुग्रीवस्य सुजातंहीतिसाधुबुद्धेः सन्मन्त्रिबुद्धेः अस्यहनुमतः ईदृशीबुद्धिर्बभूवेत्यन्वयः । यद्वा इमाराक्षसराजभार्यायथारावणेनाहृताइत्यर्थः । राघवधर्मपत्नी ईदृशीयदि अनेनाहृतायदि तदा अस्य रावणस्य सुजातंकिं सम्यग्भविष्यतिकिं । नभविष्यत्येवेति हरीश्वरस्यबुद्धिर्बभूव । " मम दयिततरा हृतावनान्तात्प्रजनिचरेण तदा विमथ्य सा । कथय मम रिपुं तमद्य वै प्लवगपते यमसादनं नयामि " इति रामवाक्याद्रावणस्यन सम्यग्भविष्यतीत्यर्थः । यद्वा इमाराक्षसराजभार्यायथामयादृष्टाइतिशेषः । राघवधर्मपत्नी ईदृशीयदि मयादृष्टायदीत्यर्थः । तदा अस्यमम सुजातंजन्मसफलमितिहरीश्वरस्यबुद्धिर्बभूव । "यश्चमासान्निवृत्तोमे दृष्टास्नीतेतिवक्ष्यति । मत्तुल्यविभवोभोगैः सुखंसविहरिष्यति । ततःप्रियतरोनास्ति ममप्राणाद्विशेषतः " इतिसुग्रीववचनात् प्रभोःसुग्रीवस्य प्रियसंवादकत्वेन ममजन्म सफलमितिभावः । यद्वा इमाराक्षसराजभार्याः यथामयादृष्टाः राघवधर्मपत्नी ईदृशीयदि दृष्टायदि अस्यसीतायाअदर्शनहेतुना सुग्रीवरामादिभयात्प्रायोपवेशनायोद्युक्ताङ्गदादिवानरसमानस्येत्यर्थः । सुजातमितिबुद्धिर्बभूव । "अप्रवृत्तौचसीतायाः पापमेवकरिष्यति । तस्मात्क्षममिहाद्यैव प्रायोपविशनंहिनः । त्यक्त्वापुत्रांश्चदारांश्च धनानिचगृहाणिच " इतिसीताऽदर्शनव्यथिताङ्गदादीनां पुनर्जीवितलाभात्सुजातमितिभावः । यद्वा इमाराक्षसराजभार्या यथाजीवन्तीत्यर्थः । राघवधर्मपत्नी ईदृशी जीवतियदि तदा अस्य रामस्य सुजातमितिबुद्धिर्बभूव । " ज्ञायतांसौम्यवैदेही यदिजीवतिवानवा । नह्यहंजीवितुंशक्तस्तामृतेजनकात्मजां " इतिसीताजीवितसंशयव्यथितस्यरामस्य सीताजीवितनिश्चयेसति स्वजीवितलाभात्सुजातमितिभावः । यद्वा हेराक्षसराज इमाःस्त्रियो यथाभार्याः एवं राघवधर्मपत्नी ईदृशीयदि अस्यतव सर्वसंपत्समृद्धियुक्तपुत्रपौत्रादिसहितस्यास्यतवेत्यर्थः । सुजातंहिकिंसम्यग्भविष्यतीति रावणस्याहि-

[पा०] १ क. ग. दक्षनाः. २ ग. घ. च.—ट. जनकात्मजांतु. ३ ङ. झ. ट. महाराक्षसराज.

पुनश्च सोचिन्तयदार्तरूपो ध्रुवं विशिष्टा गुणतो हि सीता ॥
अथायमस्यां कृतवान्महात्मा लङ्केश्वरः कष्टमनार्यकर्म ॥ ७४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे नवमः सर्गः ॥ ९ ॥

शोभनं जन्म स्यादिति बुद्धिर्जातेत्यर्थः ॥ ७३ ॥ किंच चिन्तान्तरमाह—पुनश्चेति ॥ अथ सः हनुमान् सीता गुणतः पातिव्रत्यादिगुणतः ध्रुवं विशिष्टा हि । अस्यां एतद्विषये । महात्मा महाकुलप्रसूतोपि अयं लङ्केश्वरः । अनार्यकर्म अपहरणरूपं कर्म कृतवान् । कष्टमिति । आर्तरूपः अत्यन्तमार्तः । " प्रशंसायां रूपप् " पुनश्चाचिन्तयत् । वैदेह्याः दृढव्रतत्वात्पातिव्रत्यभङ्गो न भवेदेव । अपि तु मिथ्यापवादमेवोत्पादितवानिति भृशं दुःखितस्सन् चिन्तितवानित्यर्थः । यद्वा बभूवेत्यादि । राक्षसराजपत्नीवत्सीता स्वभर्त्रा संगता चेत्सीतापहरणं न कृतवांश्चेत्तदास्य सुजातमित्युक्तं । तत्र निरतिशयसौन्दर्यादिशालिन्या मैथिल्याः रक्षस्स्त्रीसाम्यं चिन्तयता मया हीनोपमा कृतेति पश्चात्तापयुक्तस्सन् अचिन्तयत् । हि यस्मात्सीता गुणतः विशिष्टा अतः आर्तस्वरूपस्सन्नचिन्तयत् । मया हीनोपमैव कृतेत्यचिन्तयत् । अथ अथापि अस्यां सीतायां । अनार्यकर्म धर्षणरूपं कर्म । कृतवान् । कष्टं सर्वमिदं लङ्केश्वर्यं भ्रष्टं भविष्यतीत्यचिन्तयच्चेत्यर्थः । यद्वा राघवधर्मपत्नी यथा रावणेन बलादानीता तथा राक्षसराजभार्याः बलात्सुग्रीवेण बन्दीकृताश्चेदस्य हरीश्वरस्य सुग्रीवस्य सुजातं हीति साधुबुद्धेः सन्मन्त्रिबुद्धेः अस्य हनुमतः बुद्धिर्बभूवेत्यर्थः । यद्वा । इमा राक्षसराजभार्याः यथा रावणेनुरक्ताः ईदृशी राघवधर्मपत्नी यदि एवमनुरक्ता चेत् अस्य सुजातमिति साधुबुद्धेरपि बुद्धिर्बभूव ऐश्वर्यातिशयदर्शनविस्मयादिति भावः । अतएव वक्ष्यति—अहो वीर्यमित्यादिना । एवंहठादुक्त्वानुशयितवानित्याह—पुनश्चेति ॥ हि यस्मात्सीता गुणतः पातिव्रत्येन विशिष्टा सर्वोत्कृष्टा अतः आर्तरूपः किं मया व्याहृतमित्यनुतप्तः सन् । अस्यामनार्यकर्म कृतवानित्यचिन्तयत् ॥ ७४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने नवमः सर्गः ॥ ९ ॥

तमुपदेष्टव्यमितिबुद्धिर्बभूव । " तद्ववान्दृष्टधर्मार्थस्तपःकृतपरिग्रहः । परदारान्महाप्राज्ञनोपरोद्धुंलमर्हसि " इतिहितोपदेशस्यवक्ष्यमाणत्वात् । यद्वा एतासांमध्ये सीतानास्तीतिनिश्चिनोति—बभूवेति । इमाराक्षसराजभार्याः यथा यादृग्रूपवत्यइत्यर्थः । यदि किमित्यर्थे । राघवधर्मपत्नी ईदृशी किं ईदृग्रूपवतीकिं । किंतुत्रिलोकसुन्दरीत्यर्थः । अतएवात्र नास्तीतिशेषः । इत्यस्यहरीश्वरस्यसुजातं निश्चितंयथातथाबुद्धिर्बभूव ॥ **ति०** अथ सीताप्येतत्क्रियन्तर्गता नवेति विकल्प्याद्ये रावणस्यभद्रमेवेति बुद्धिर्हनुमतोजातेत्याह—बभूवेति । साधुबुद्धेर्हरीश्वरस्य इतिबुद्धिर्बभूव । इमामहाराक्षसराजभार्याःयथातद्भुक्ताः राघवधर्मपत्न्यपि ईदृशी एतदन्तर्गता एतद्भुक्ताचयदिस्यात् तदाऽस्य रावणस्यसुजातंभद्रमेवभवति । रावणभुक्तेति मयानिवेदितेसति सीतायांमृतायामिव राघवस्योपेक्षणाद्रावणवधयत्नाप्रसक्तेरितिभावः ॥ **शि०** इमाराक्षसराजभार्या यथा स्वपतिस्मरणादिषुनिरताः । ईदृशी तथारामस्मरणादिनिरता यदि राघवधर्मपत्नी । तत्स्मरणादीनांविघ्नोनकृतःस्यादित्यर्थः । तदा अस्य रावणस्यसुजातं कल्याणमेवेत्यर्थः । इतिसाधुबुद्धेर्हरीश्वरस्यबुद्धिः निश्चयोबभूव ॥ ७३ ॥ **ति०** यदीत्यनेन सूचितमस्यपक्षस्यात्यन्तासंभावितत्वमाह—पुनश्चेति । पक्षान्तरंचसोचिन्तयत् विचारेणनिश्चितवानित्यर्थः । चिन्ताप्रकारः हिप्रसिद्धमेतत् । यत्सीतादेवीगुणतःपातिव्रत्यादिगुणैर्विशिष्टा । अथ यतइत्यर्थे । यतोमहात्मामहाबलोलङ्केश्वरः । निरवधिकैश्वर्यवैशिष्ट्यमनेनसूचितं । ईदृशःअस्यांजानक्यांअनार्यकर्म अपहरणरूपंकर्म । आर्तरूपः परिगृहीतमायारूपःसन्कष्टं सक्लेशंयथाभवतितथाकृतवान् । ययेषाऐश्वर्यादौसरागास्यात्तदास्वरसतएवनयनंस्यात्नचतदस्ति । अस्माभिस्तद्विक्रोशनादेवरावणेनक्लेशपूर्वंनयनस्यचानुभवादित्याशयः । आर्तरूपइतिपाठे आर्तंसंजातपीडंरूपंयस्येत्यर्थे हनुमद्विशेषणं । आन्तरपीडासूचकरूपइत्यर्थः ॥ **स०** समहात्माहनूमान् पुनश्चैवमचिन्तयत् । हियस्मात् गुणतः पातिव्रत्यादिगुणैः सीता विशिष्टाश्रेष्ठा । अथ तस्मात् अस्यांसीतायांतद्विषये । अयं रावणः अनार्यकर्म अपहरणादिजुगुप्सितंकर्म कृतवान् । अतोमृत्वा आर्तरूपस्सन् ध्रुवंकदाप्यनिवर्त्यतयाशाश्वतंकष्टं पञ्चकष्टाख्यंतमः यातीतिशेषः । रावणदेहे जीवद्वयसमावेशात्सञ्जीवस्यपूर्वंश्लोकेगतिरुक्ता द्वितीयस्यत्वत्रेतिविवेकः ॥ ७४ ॥ इतिनवमस्सर्गः ॥ ९ ॥

[पा०] १ दात्तरूपो.

दशाग्र· सर्गः ॥ १० ॥

हनुमता पुष्पकविमाने नानालङ्कारोपशोभितशयनोत्तमशायिनो नानाभरणादिविभूषितवपुषोरावणस्यावलोकनं ॥ १ ॥ तथातत्पादमूलेवीणावेणुमृदङ्गादिनानावाद्यैस्सहसंसुप्तनानावस्थापन्ननारीनिकरनिरीक्षणं ॥ २ ॥ तथा तासांमध्येऽद्भुतशयनशायिमन्दोदरींदृष्टवतातेन तदद्भुतरूपेणतस्यांसीतात्वबुद्ध्या हर्षेण पुच्छचुंबनादिकापेयचेष्ताविष्करणं ॥ ३ ॥

तत्र दिव्योपमं मुख्यं स्फाटिकं रत्नभूषितम् ॥ अवेक्षमाणो हनुमान्ददर्श शयनासनम् ॥ १ ॥
दान्तकाञ्चनचित्राङ्गैर्वैडूर्यैश्च वरासनैः ॥ महार्हास्तरणोपेतैरुपपन्नं महाधनैः ॥ २ ॥
तस्य चैकतमे देशे सौम्यमालाविभूषितम् ॥ ददर्श पाण्डुरच्छत्रं ताराधिपतिसन्निभम् ॥ ३ ॥
जातरूपपरिक्षिप्तं चित्रभानुसमप्रभम् ॥ अशोकमालाविततं ददर्श परमासनम् ॥ ४ ॥
वालव्यजनहस्ताभिर्वीज्यमानं समन्ततः ॥ गन्धैश्च विविधैर्जुष्टं वरधूपेन धूपितम् ॥ ५ ॥
परमास्तरणास्तीर्णमाविकाजिनसंवृतम् ॥ दामभिर्वरमाल्यानां समन्तादुपशोभितम् ॥ ६ ॥
तप्तजाम्बूनदनिभं प्रदीप्तोत्तमकुण्डलम् ॥ लोहिताक्षं महाबाहुं महारजतवाससम् ॥ ७ ॥
लोहितेनानुलिप्ताङ्गं चन्दनेन सुगन्धिना ॥ सन्ध्यारक्तमिवाकाशे तोयदं सतडिद्गुणम् ॥ ८ ॥
वृतमाभरणैर्दिव्यैः सुरूपं कामरूपिणम् ॥ सवृक्षवनगुल्माढ्यं प्रसुप्तमिव मन्दरम् ॥ ९ ॥
क्रीडित्वोपरतं रात्रौ वराभरणभूषितम् ॥ प्रियं राक्षसकन्यानां राक्षसानां सुखावहम् ॥ १० ॥
पीत्वाऽप्युपरतं चापि ददर्श स महाकपिः ॥ भास्वरे शयने वीरं प्रसुप्तं राक्षसाधिपम् ॥ ११ ॥
निश्श्वसन्तं यथा नागं रावणं वानरर्षभः ॥ आसाद्य परमोद्विग्नः सोपासर्पत्सुभीतवत् ॥ १२ ॥

शयनासनं शयनस्यासनं खट्वामित्यर्थः । दान्तानि दन्तविकारभूतानि । काञ्चनानि काञ्चनमयानि च । अतएव चित्राणि नानावर्णानि अङ्गानि येषां तैः प्रान्ते दन्तमयैः ततः परं काञ्चनमयैः । सर्वत्र वैडूर्यनिर्मितैरित्यर्थः । महाधनैः महामूल्यैः वरासनैः शयनावरोहणकाले विश्रमाय स्थापितैः । उपपन्नं आवृतं ॥ १—२ ॥ एकतमे देशे शिरोभाग इत्यर्थः ॥ ३ ॥ उक्तमेवपर्यङ्कं पुनर्वर्णयन्नाह—जातरूपेत्यादिना ॥ चित्रभानोः सूर्यस्य ॥ ४—५ ॥ आविकाजिनं ऊर्णायुचर्म तेनपर्यङ्कस्योपरि फलका संधीयते । वरमाल्यानां अशोकातिरिक्तपुष्पाणां ॥ ६ ॥ महारजतवाससं हेमचित्रितवाससं । महारजतं हेम । महारजनवाससमिति पाठे कुसुम्भरागरञ्जितवस्त्रमित्यर्थः ॥ ७—८ ॥ सवृक्षवनगुल्माढ्यं सवृक्षैर्वनैः गुल्मैश्चाढ्यं प्रसुप्तं निश्चलमित्यर्थः ॥ ९—१२ ॥

रामानु० शयनासनं आस्यतेऽस्मिन्नित्यासनं । शयनासनंपर्यङ्काधारधिष्ण्यमितियावत् ॥ **ती०** शयनासनं शयनंचतदासनंच शयनासनंपर्यङ्कं । उभयोपकारादुभयव्यपदेशः । यद्वा आस्यतेअस्मिन्नित्यासनं । शयनस्यासनं शयनासनं । शयनगृहमित्यर्थः ॥ १ ॥ **ति०** वरासनैः स्त्रीशयनपल्यङ्कैः ॥ २ ॥ **रामानु०** तत्रैवप्रदेशे परमासनंचददर्शेत्याह—जातरूपपरिक्षिप्तमित्यादिनाश्लोकत्रयेण । परमासनंपर्यङ्कं ॥ **ति०** यद्वायत्सन्निधानेशोकाभावस्तादृशमालायुतं ॥ ४ ॥ **ति०** ननुसंभोगगृहेतत्रापि निद्राणस्यकर्थंवालव्यजनवीजनं कर्थंचहनुमतस्ताभिरदर्शनमितिचेन्न । यन्त्रनिर्मितस्त्रीप्रतिमादिभिस्तत्रापितत्संभवात् ॥ ५ ॥ **ति०** रावणस्यतटित्स्थानीयंसौवर्णंवासः ॥ ८ ॥ **ति०** सवृक्षवनगुल्माढ्यं पुष्पसहितवृक्षवनगुल्माढ्यंमन्दरमिवस्थितं । बाहवोस्यवृक्षाः । नासादयोगुल्माः ॥ **स०** सुरूपिणंसुन्दरं । कथमस्येत्यतउक्तंकामरूपिणमिति ॥ ९ ॥ **ति०** परमोद्विग्नःअयंपापी देवींहृतवानित्येतत्समीपेऽवस्थानमनुचितमितिमत्वाखिन्नचित्तःअपासर्पत् । सुभीतवत्सुभीतोयथाभयहेतोःपिशाचादेःसंमुखे स्थातुमशक्तोपसर्पतितद्वत् ॥ **स०** परमाःमहाबलाअपिउद्विग्नाःयेनसतथा । अतोभीतवदित्युपपन्नं ॥ **शि०** परमोद्विग्नःभविष्य-

[पा०] १ ग. च. छ. ज. रम्यं. २ क.—घ. च. छ. ज. महासंस्तरणोपेतैः. ३ तस्यचैकतमेदेशे. जातरूपपरिक्षिप्तं. इतिश्लोकयोःपौर्वापर्यं क. ग. घ. पाठेषुदृश्यते. ४ झ. ञ. दिव्यमालोपशोभितं. ट. दिव्यमाल्योपशोभितं. च. छ. ज. सोभ्यमाल्य. ५ ग. राभरणैर्मुख्यैः.

अथारोहणमासाद्य वेदिकान्तरमाश्रितः ॥ सुप्तं राक्षसशार्दूलं प्रेक्षते स्म महाकपिः ॥ १३ ॥
शुशुभे राक्षसेन्द्रस्य स्वपतः शयनोत्तमम् ॥ गन्धहस्तिनि संविष्टे यथा प्रस्रवणं महत् ॥ १४ ॥
काञ्चनाङ्गदनद्धौ च ददर्श स महात्मनः ॥ विक्षिप्तौ राक्षसेन्द्रस्य भुजाविन्द्रध्वजोपमौ ॥ १५ ॥
ऐरावतविषाणाग्रैरापीडनकृतव्रणौ ॥ वज्रोल्लिखितपीनांसौ विष्णुचक्रपरिक्षतौ ॥ १६ ॥
पीनौ समसुजातांसौ सङ्गतौ बलसंयुतौ ॥ सुलक्षणनखाङ्गुष्ठौ स्वङ्गुलीतललक्षितौ ॥ १७ ॥
संहतौ परिघाकारौ वृत्तौ करिकरोपमौ ॥ विक्षिप्तौ शयने शुभ्रे पञ्चशीर्षाविवोरगौ ॥ १८ ॥
शशक्षतजकल्पेन सुशीतेन सुगन्धिना ॥ चन्दनेन परार्घ्येन स्वनुलिप्तौ स्वलंकृतौ ॥ १९ ॥
उत्तमस्त्रीविमृदितौ गन्धोत्तमनिषेवितौ ॥ यक्षपन्नगगन्धर्वदेवदानवराविणौ ॥ २० ॥
ददर्श स कपिस्तस्य बाहू शयनसंस्थितौ ॥ मन्दरस्यान्तरे सुप्तौ महाही रूषिताविव ॥ २१ ॥
ताभ्यां स परिपूर्णाभ्यां भुजाभ्यां राक्षसेश्वरः ॥ शुशुभेऽचलसंकाशः शृङ्गाभ्यामिव मन्दरः ॥२२॥
चूतपुन्नागसुरभिर्वकुलोत्तमसंयुतः ॥ मृष्टान्नरससंयुक्तः पानगन्धपुरस्सरः ॥ २३ ॥
तस्य राक्षससिंहस्य निश्चक्राम महामुखात् ॥ शयानस्य विनिश्श्वासः पूरयन्निव तद्गृहम् ॥ २४ ॥
मुक्तामणिविचित्रेण काञ्चनेन विराजितम् ॥ मुकुटेनापवृत्तेन कुण्डलोज्ज्वलितानानम् ॥ २५ ॥
रक्तचन्दनदिग्धेन तथा हारेण शोभिना ॥ पीनायतविशालेन वक्षसाभिविराजितम् ॥ २६ ॥

अथ अपसर्पणानन्तरं । आरोहणं सोपानं । आसाद्य अधिरुह्य । वेदिकान्तरं सोपानपर्वमध्यं ॥१३॥ यस्यगन्धेनान्ये हस्तिनोभीता भवन्ति स गन्धहस्ती । प्रस्रवणं निर्झरं ॥१४॥ निक्षिप्तौ प्रसारितौ ॥१५॥ विष्णुचक्रपरिक्षतौ । विष्णुः उपेन्द्रः ॥ १६ ॥ सङ्गतौ देहानुरूपौ ॥१७॥ संहतौ दृढसंधिबन्धौ । विक्षिप्तौ शयने निहितौ । पञ्चाङ्गुलिमत्तया पञ्चशीर्षावित्युक्तं । एतदन्तस्य ददर्शेत्यनेनान्वयः । अत्र द्विभुजत्वैकमुखत्वोक्तिः स्त्रीणां कामनीयत्वाय ॥ १८—१९ ॥ यक्षादीन् रावयितुं शीलमनयोरस्तीति तथा ॥ २० ॥ ददर्शेति पुनरभिधानं विशेषणान्तरविवक्षया ॥ २१ ॥ परिपूर्णाभ्यां दीर्घवृत्ताभ्यामित्यर्थः ॥ २२ ॥ निश्वासस्य चूतादिसुरभित्वं तदधिवासितरसावल्यादिमधुसेवनात् । मृष्टान्नरससंयुक्तः षड्रसपदार्थगन्धयुक्तः । पानगन्धपुरस्सरः पीयत इति पानं मधु तद्गन्धयुक्तः ॥ २३—२४॥ अपवृत्तेन स्थानात्किंचिच्चलितेन ॥२५—२६॥

देतदैश्वर्यध्वंसहेतुकोद्वेगविशिष्टःसन्नपासर्पत् । एतेनहनुमतोदयालुत्वातिशयःसूचितः ॥ १२ ॥ **रामानु०** आरोहणमासाद्यवेदिकान्तरमाश्रितः सोपानमार्गेणान्यवेदिकामारूढइत्यर्थः ॥ १३ ॥ **स०** गन्धहस्तिनिसंविष्टं गन्धहस्तिनामत्तगजेननितरांसंविष्टंअध्यारूढं प्रस्रवणंगिरिमिवस्थितं ॥ १४ ॥ कृतव्रणौ कृतव्रणकिणौ । वज्रचक्रयोरप्यसाध्यमृत्युरितिभावः ॥ **स०** विष्णुचक्रपरिक्षतौ विष्णोरुपेन्द्रस्ययच्चक्रंसैन्यंदेवगणस्तेनपरिक्षतौ विविधायुधजालेनपरिक्षतौ । तेनसुदर्शनस्यामोघत्वमक्षुण्णं । ' चक्रंसैन्यरथाङ्गयोः ' इतिविश्वः । भगवच्चक्रादन्यदिदंवा ॥ १६ ॥ **शि०** रुषितौ क्रुद्धौ ॥ **ति०** ददर्श अत्यादरेणददर्श । नातःपुनरुक्तिः । महाही महासर्पौ ॥ अत्रद्विभुजत्वकथनायुद्धादिकालएवविंशतिभुजत्वंदशशीर्षत्वंचेतिबोध्यं ॥ २१ ॥ **ती०** भुजाभ्यामितिद्विभुजत्वं महामुखादितिवक्ष्यमाणमेकमुखत्वंचरावणस्यकामरूपत्वात्संगच्छते ॥ २२ ॥ **ति०** बकुलोत्तमसंयुतः उत्तमबकुलगन्धयुतः । अयंपुरुषविशेषश्चासधर्मइतिकतकः । पानंमधु । राक्षसत्वादेववामाचारेणपूजाकरणान्मधुपानं ॥ २३ ॥ **ति०** विराजतामुकुटेन । उपलक्षितमितिशेषः । शोभिनाहारेण शोभनहारवता वक्षसा उपलक्षितमितिशेषः ॥ २५—२६ ॥

[**पा०**] १ च. वेदिकांपरमांश्रितः. २ ङ. झ. ञ. ट. क्षीवं. ३ ख. च. छ. ज. राक्षसराजानं. ४ ङ. झ. ञ. ट. शयनंशुभं. ५ ङ. झ. ञ. ट. हस्तिनिसंविष्टं. ६ च. छ. ज. सुमहात्मनः. क. घ. समहाकपिः. ७ क. ग. घ. रापीडित. च. छ. ज. रुत्पीडन. ८ क. ग. घ. संहतौ. ९ ग. सलक्षण. १० क. ङ.—ट. स्वङ्गुलीयकलक्षितौ. ११ ङ. झ. ट. संवृतौ. १२ घ. संहतौपरिघाकारौ उत्तमस्त्रीविमर्दितौ । समौचविपुलौशुद्धौ गन्धोत्तमनिषेवितौ. १३ ग. विभूषितौ. १४ ग. च. छ. ज. स्तत्र. १५ ट. रुषिताविव. १६ ङ. झ. ट. पूर्णाभ्यामुभाभ्यां. १७ ङ—ट. राक्षसराजस्य. १८ क. पूरयामास. १९ क. ख. घ. ङ. झ. ञ. ट. विराजता. २० ङ. झ. ञ. ट. विराजता.

पाण्डरेणापविद्धेन क्षौमेण क्षतजेक्षणम् ॥ महार्हेण सुसंवीतं पीतेनोत्तमवाससा ॥ २७ ॥
मापराशिप्रतीकाशं निःश्वसन्तं भुजङ्गवत् ॥ गाङ्गे महति तोयान्ते प्रसुप्तमिव कुञ्जरम् ॥ २८ ॥
चतुर्भिः काञ्चनैर्दीपैर्दीप्यमानचतुर्दिशम् ॥ प्रकाशीकृतसर्वाङ्गं मेघं विद्युद्गणैरिव ॥ २९ ॥
पादमूलगताश्चापि ददर्श सुमहात्मनः ॥ पत्नीः स प्रियभार्यस्य तस्य रक्षःपतेर्गृहे ॥ ३० ॥
शशिप्रकाशवदनाश्चारुकुण्डलभूषिताः ॥ अम्लानमाल्याभरणा ददर्श हरियूथपः ॥ ३१ ॥
नृत्तवादित्रकुशला राक्षसेन्द्रभुजाङ्कगाः ॥ वराभरणधारिण्यो निषण्णा ददृशे हरिः ॥ ३२ ॥
वज्रवैडूर्यगर्भाणि श्रवणान्तेषु योषिताम् ॥ ददर्श तापनीयानि कुण्डलान्यङ्गदानि च ॥ ३३ ॥
तासां चन्द्रोपमैर्वक्त्रैः शुभैर्ललितकुण्डलैः ॥ विरराज विमानं तन्नभस्तारागणैरिव ॥ ३४ ॥
मदव्यायामखिन्नास्ता राक्षसेन्द्रस्य योषितः ॥ तेषु तेष्ववकाशेषु प्रसुप्तास्तनुमध्यमाः ॥ ३५ ॥
अङ्गहारैस्तथैवान्या कोमलैर्नृत्तशालिनी ॥ विन्यस्तशुभसर्वाङ्गी प्रसुप्ता वरवर्णिनी ॥ ३६ ॥
काचिद्वीणां परिष्वज्य प्रसुप्ता संप्रकाशते ॥ महानदीप्रकीर्णेव नलिनी पोतमाश्रिता ॥ ३७ ॥
अन्या कक्षगतेनैव मडुकेनासितेक्षणा ॥ प्रसुप्ता भामिनी भाति बालपुत्रेव वत्सला ॥ ३८ ॥
पटहं चारुसर्वाङ्गी पीड्य शेते शुभस्तनी ॥ चिरस्य रमणं लब्ध्वा परिष्वज्येव भामिनी ॥ ३९ ॥
काचिद्वंशं परिष्वज्य सुप्ता कमललोचना ॥ रहः प्रियतमं गृह्य सकामेव च कामिनी ॥ ४० ॥
विपञ्चीं परिगृह्यान्या नियता नृत्तशालिनी ॥ निद्रावशमनुप्राप्ता सहकान्तेव भामिनी ॥ ४१ ॥
अन्या कनकसंकाशैर्मृदुपीनैर्मनोरमैः ॥ मृदङ्गं परिपीड्याङ्गैः प्रसुप्ता मत्तलोचना ॥ ४२ ॥
भुजपार्श्वान्तरस्थेन कक्षगेन कृशोदरी ॥ पणवेन सहानिन्द्या सुप्ता मदकृतश्रमा ॥ ४३ ॥
डिण्डिमं परिगृह्यान्या तथैवासक्तडिण्डिमा ॥ प्रसुप्ता तरुणं वत्समुपगूह्येव भामिनी ॥ ४४ ॥

अपविद्धेन पर्यस्तेन । क्षौमेण उत्तरीयरूपेण ॥ २७—२८ ॥ विद्युद्गणैरिव विद्युत्समूहैरिव । रावणं तस्य पत्नीश्च ददर्शेत्यन्वयः ॥ २९ ॥ रक्षःपतेर्गृह इति परशेषः ॥ ३०—३१ ॥ राक्षसेन्द्रस्य भुजं अङ्कं गच्छन्तीति राक्षसेन्द्रभुजाङ्कगाः । उत्सङ्गोपवेशनालिङ्गनाभ्यां लालिता इत्यर्थः । वराभरणधारिण्यइति द्वितीयार्थे प्रथमा । निषण्णाः शयानाः । ददृशे इत्यात्मनेपदमार्षं ॥३२॥ श्रवणान्तेष्वङ्गददर्शनं बाहूनुपधाय शयनात् ॥ ३३—३५ ॥ अङ्गहारः नृत्तविशेषादङ्गविक्षेपविशेषः । तथोक्तं भरतशास्त्रे "अङ्गानां योग्यदेशेषु हरणेन यथोचितम् । अङ्गनिर्वर्तनीयत्वादङ्गहारस्तथोच्यते" इत्यादि । कोमलैः सुकुमारैः । नृत्तशालिनी सुषुप्त्यवस्थायामपि वासनाबलेन नृत्तसन्निवेशविशिष्टा स्थितेत्युच्यते ॥ ३६ ॥ महानदीप्रकीर्णा महानदीप्रसृता । नलिनी समूलनालदलं पद्मजालकं । पोतं यानपात्रं । वीणां परिष्वज्य प्रसुप्ता काचित् नद्यां प्लवमाना यदृच्छया पोतसंयुक्ता नलिनीव प्रकाशत इत्यर्थः ॥ ३७ ॥ मडुकेन वाद्यविशेषेण ॥ ३८—३९ ॥ वंशं वेणुं ॥ ४० ॥ विपञ्ची सप्ततन्त्री । षट्तन्त्री वीणा ॥ ४१—४२ ॥ पणवेन मर्दलेन ॥ ४३ ॥ यथा पूर्वा तथैवासक्तडिण्डिमान्या तं डिण्डिमं परिगृह्य परिष्वज्य । प्रसुप्ता । कथमिव । तरुणं वत्समुपगूह्येव । डिण्डिमः पणवभेदः । यद्वा अन्या भामिनी डिण्डिमं परिगृह्यावलम्ब्य

ति० विमानं मञ्चकविशेषः । पुष्पकमित्यन्ये । विराजत व्यराजत ॥ ३४ ॥ ति० मदव्यायामेन रतिजेन ॥ ३५ ॥ ती० विन्यस्तशुभसर्वाङ्गी विशेषेणन्यस्तंशुभंयेषुधात्रा तादृशानिसर्वाण्यङ्गानियस्यास्सा ॥ शि० विन्यस्तानि विधिनानिर्मितानि सं-

[पा०] १ ङ. झ. ञ. ट. दीप्यमानं. २ ग. घ. च. छ. ज. विद्युल्लतैरिव. ३ ङ. झ. ञ. ट. विराजत. ४ घ. निषण्णाः. ५ ग. घ. स्तथाचान्याः. ६ क. ग.—ट. कामिनी. ७ ख. ङ. झ. ञ. ट. काचिद्वीणां. ८ ङ. झ. ञ. ट. वरंप्रियतमं. ९ क. लब्ध्वा. १० ग. ङ. ञ. ट. सकामेवहि. ११ क. घ. कामिनी. १२ घ. कनकवर्णाङ्गीमृदु. क. कनकवर्णाभैर्मृदु. १३ घ. शुभोदरी. १४ ग. च. छ. ज. सहैवान्या. १५ क. ख. मुपगूह्यैव.

काचिदाडम्बरं नारी भुजसंभोगपीडितम् ॥ कृत्वा कमलपत्राक्षी प्रसुप्ता मदमोहिता ॥ ४५ ॥
कलशीमपविध्यान्या प्रसुप्ता भाति भामिनी ॥ वसन्ते पुष्पशबला मालेव परिमार्जिता ॥ ४६ ॥
पाणिभ्यां च कुचौ काचित्सुवर्णकलशोपमौ ॥ उपगूह्याबला सुप्ता निद्राबलपराजिता ॥ ४७ ॥
अन्या कमलपत्राक्षी पूर्णेन्दुसदृशानना ॥ अन्यामालिङ्ग्य सुश्रोणीं प्रसुप्ता मदविह्वला ॥ ४८ ॥
आतोद्यानि विचित्राणि परिष्वज्य वरस्त्रियः ॥ निपीड्य च कुचैः सुप्ताः कामिन्यः कामुकानिव ॥४९॥
तासामेकान्तविन्यस्ते शयानां शयने शुभे ॥ ददर्श रूपसंपन्नामपरां स कपिः स्त्रियम् ॥ ५० ॥
मुक्तामणिसमायुक्तैर्भूषणैः सुविभूषिताम् ॥ विभूषयन्तीमिव तत्स्वश्रिया भवनोत्तमम् ॥ ५१ ॥
गौरीं कनकवर्णाङ्गीमिष्टामन्तःपुरेश्वरीम् ॥ कपिर्मन्दोदरीं तत्र शयानां चारुरूपिणीम् ॥ ५२ ॥
स तां दृष्ट्वा महाबाहुर्भूषितां मारुतात्मजः ॥ तर्कयामास सीतेति रूपयौवनसंपदा ॥ ५३ ॥
हर्षेण महता युक्तो ननन्द हरियूथपः ॥ [दृष्ट्वा सीतेति हृष्टोऽभूद्दीनश्चारित्रदर्शनात्] ॥ ५४ ॥
आस्फोटयामास चुचुम्ब पुच्छं ननन्द चिक्रीड जगौ जगाम ॥
स्तम्भानरोहन्निपपात भूमौ निदर्शयन्स्वां प्रकृतिं कपीनाम् ॥ ५५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे दशमः सर्गः ॥ १० ॥

एकादशः सर्गः ॥ ११ ॥

युक्तिपर्यालोचनयामन्दोदर्यांसीतात्वबुद्धिविधूननपूर्वकं पानभूमिंगतवताहनुमता परितोरावणं प्रसुप्तानां नानावस्थायुक्तनानास्त्रीणामवलोकनेनसह नानाविधपानपात्राद्यवलोकनं ॥ १ ॥ तथा परदारदर्शनेन स्वस्य दुरिताशङ्कनपूर्वकंपुनः स्वस्य वशीकृतमनस्कत्वादिहेतुभिस्तत्पराकरणं ॥ २ ॥ तथापानभूमौ सीतायाअदर्शने ततोन्यत्र तदन्वेषणोपक्रमः ॥ ३ ॥

अवधूय च तां बुद्धिं बभूवावस्थितस्तदा ॥ जगाम चापरां चिन्तां सीतां प्रति महाकपिः ॥ १ ॥

तथैव आसक्तडिण्डिमा आलिङ्गितान्यडिण्डिमा तरुणं रमणमुपगूह्य वत्सं पुत्रं परिगृह्यैव प्रसुप्ता । यद्वा डिण्डिमं परिगृह्य वादनार्थं परिगृह्य । तथैव वादनकाल एव आसक्तडिण्डिमा अन्या तरुणं वत्समुपगूह्येव प्रसुप्ता ॥ ४४ ॥ आडम्बरं तूर्यभेदं । भुजसंभोगपीडितं भुजपरिणाहपीडितं भुजपरिश्लेषपीडितं वा ॥४५॥ अपविध्य पर्यस्य । अनेन सलिलसंबन्धः सूच्यते । परिमार्जिता सलिललवसंमार्जिता । अपविद्धकलशनिर्गलितगन्धोदकसिक्ता काचित् । वसन्ते म्लानिपरिहाराय सलिललवसमुक्षिता मालेव बभावित्यर्थः । पुष्पशबलेत्यनेन कलशस्थजलस्य कुङ्कुमादिरससिक्तत्वमुच्यते । सर्वाभरणभूषितत्वं वा । इयं च रावणस्य करकधारिणीति गम्यते ॥ ४६—४८ ॥ आतोद्यानि । "ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् । चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकं" इत्यमरः ॥ ४९—५१ ॥ किमिव गौरीमित्यत्राह—कनकवर्णाङ्गीमिति । इष्टां रावणस्येति शेषः ॥ ५२—५३ ॥ हर्षेणेत्यर्थं ॥ हर्षेण युक्तः ननन्द उत्तरोत्तरमानन्दमवापेत्यर्थः ॥ ५४ ॥ तदेवोपपादयति—आस्फोटयामासेति ॥ चिक्रीड ननर्तेति यावत् । स्वां प्रकृतिं स्वासाधारणं चापल्यं ॥ ५५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने दशमः सर्गः ॥ १० ॥

तां बुद्धिं मन्दोदर्यां सीताबुद्धिं । अवस्थितो बभूव

स्थापितानिवाशुभाज्ञानियस्यास्सा ॥ ३६ ॥ **ती०** जगौ हर्षान्मन्दगानंकृतवानित्यर्थः ॥ ५५ ॥ इतिदशमः सर्गः ॥ १० ॥

[**पा०**] १ ङ. ञ. ञ. ट. मथतां. २ क. ख. ग. ङ.—ट. चस्वश्रिया. ३ ख. ग. ङ.—ञ. ट. कनकवर्णाभां. ४ ग. ञ. तांदृष्ट्वास. ५ ग. हर्षेणचसमायुक्तो. ६ क. ननाद. ७ इदमर्धं ङ.—ज. ञ. ट. पाठेषुदृश्यते. ८ क. च. छ. ज. निदर्शयानः.

न रामेण वियुक्ता सा स्वप्तुमर्हति भामिनी ॥ न भोक्तुं नाप्यलंकर्तुं न पानमुपसेवितुम् ॥
नान्यं नरमुपस्थातुं सुराणामपि चेश्वरम् ॥ २ ॥
न हि रामसमः कश्चिद्विद्यते त्रिदशेष्वपि ॥ अन्येयमिति निश्चित्य पानभूमौ चचार सः ॥ ३ ॥
क्रीडितेनापराः क्लान्ता गीतेन च तथा पराः ॥ नृत्तेन चापराः क्लान्ताः पानविप्रहतास्तथा ॥ ४ ॥
मुरवेषु मृदङ्गेषु पीठिकासु च संस्थिताः ॥ तथास्तरणमुख्येषु संविष्टाश्चापराः स्त्रियः ॥ ५ ॥
अङ्गनानां सहस्रेण भूषितेन विभूषणैः ॥ रूपसँल्लापशीलेन युक्तगीतार्थभाषिणा ॥ ६ ॥
देशकालाभियुक्तेन युक्तवाक्याभिधायिना ॥ रताभिरतसंसुप्तं ददर्श हरियूथपः ॥ ७ ॥
तासां मध्ये महाबाहुः शुशुभे राक्षसेश्वरः ॥ गोष्ठे महति मुख्यानां गवां मध्ये यथा वृषः ॥ ८ ॥
स राक्षसेन्द्रः शुशुभे ताभिः परिवृतः स्वयम् ॥ करेणुभिर्यथाऽरण्ये परिकीर्णो महाद्विपः ॥ ९ ॥
सर्वकामैरुपेतां च पानभूमिं महात्मनः ॥ ददर्श हरिशार्दूलस्तस्य रक्षःपतेर्गृहे ॥ १० ॥
मृगाणां महिषाणां च वराहाणां च भागशः ॥ तत्र न्यस्तानि मांसानि पानभूमौ ददर्श सः ॥ ११ ॥
रौक्मेषु च विशालेषु भाजनेष्वर्धभक्षितान् ॥ ददर्श हरिशार्दूलो मयूरान्कुकुटांस्तथा ॥ १२ ॥
वराहवार्ध्राणसकान्दधिसौवर्चलायुतान् ॥ शल्यान्मृगमयूरांश्च हनुमानन्ववैक्षत ॥ १३ ॥

स्वस्थचित्तो बभूव ॥ १—२ ॥ त्रिदशेष्वपीत्यनन्तरं अन्येयमित्यर्धं ॥ पानभूमौ ततोन्यत्रेत्यर्थः ॥ ३ ॥ क्रीडितेनेत्याद्यपराः स्त्रिय इत्यन्तमेकं वाक्यं । ददर्शेत्यनुषज्यते । क्रीडितेन क्रीडया । भावे निष्ठा । विप्रहताः क्लान्ता इत्यर्थः॥४॥ संस्थिताः उपधानीकृत्य शयिताः । संविष्टाः सुप्ताः॥५॥ तत्र सीताया अदर्शनात्पुनरपि रावणस्थानमागत्य ददर्शेत्याह—अङ्गनानामिति ॥ रूपसँल्लापशीलेन स्वसौन्दर्यवर्णनशीलेन । रावणविषयरूपप्रशंसाशीलेन वा। युक्तगीतार्थभाषिणा युक्तं उपपन्नं गीतार्थं भाषितुं शीलमस्येति युक्तगीतार्थभाषी तेन । देशकालाभियुक्तेन देशकालाभिज्ञेनेत्यर्थः। अङ्गनानां सहस्रेण रताभिरतसंसुप्तमित्यन्वयः । रतशब्देन बाह्यसुरतमुच्यते । अभिरतशब्देन करणबन्धादिकमुच्यते । रताभिरतश्चासौ संसुप्तश्च तं तथा । स्नातानुलिप्तादिवत्समासः । क्रीडाखेदेन सुप्तमित्यर्थः । रावणमिति शेषः ॥ ६—८ ॥ परिकीर्णः परिवृतः ॥ ९ ॥ पानभूमेः पुनर्दर्शनोक्तिस्तत्रत्यपदार्थकथनाय ॥ १० ॥ भागशः पिण्डशः ॥ ११ ॥ मयूरादिशब्दाः मयूरादिविकारमांसपराः ॥ १२ ॥ वार्ध्राणसाः छागविशेषाः । "त्रिपिबंत्विन्द्रियक्षीणं

रामानु० अत्रपुनरपिपानभूमौ स्त्रीणांरावणस्यचदर्शनाभिधानात्क्षणमन्यत्रान्विष्य विशेषेणमार्गितुं पुनःपानभूम्यादिकं दृष्टवानित्यवगम्यते ॥ ४ ॥ **ती०** युक्तगीतार्थभाषिणा युक्तं उपपन्नंयथातथा गीतस्य भरतशास्त्रस्यार्थभाषितुंशीलमस्येतितथा तेन । भरतशास्त्रार्थव्याख्यानचतुरेणेत्यर्थः ॥ ६ ॥ **रामानु०** मयूरान्कुकुटानितिस्वरूपेणनिर्देशात्तत्तदाकारविशिष्टतयातेपक्वा इत्यवगम्यते ॥ १२ ॥ **ती०** वार्ध्राणसःपक्षिविशेषः । ' कृष्णग्रीवोरक्तशिराःश्वेतपक्षोविहङ्गमः । सवैवार्ध्राणसःपक्षी ' इति

[पा०] १ क. रामादुपस्थातुं. २ क. ग. नराणामपि. ३ ज. पानभूमिंददर्शसः. ङ.—ञ. ट. भूयस्तत्रचचारसः । पानभूमौहरिश्रेष्ठःसीतासंदर्शनोत्सुकःइत्यर्धमधिकंचदृश्यते. ४ ग. ङ. ज.—ट. मुरजेषु. ५ ञ. चेलिकासु. ६ ख. च. छ. ज. तदास्तरण. ग. कुथास्तरण. ७ देशकालाभियुक्तेनेत्यर्धानन्तरं क. ग. ङ.—ट. पाठेषु रताधिकेनसंयुक्तां ददर्शहरियूथपः । अन्यत्रापिवरस्त्रीणांरूपसँल्लापशायिनाम् । सहस्रंयुवतीनांतुप्रसुप्तंसददर्शह । देशकालाभियुक्तंतु युक्तवाक्याभिधायितत् । इतिचत्रार्धानिअधिकानिदृश्यन्ते. एषांतिलकव्याख्यानंचदृश्यते. तथाहि । देशकालाभियुक्तेन तद्विषयपरिज्ञानकुशलेन । युक्तवाक्यस्यदेशकालोचितवाक्यस्याभिधानशीलेन । एतत्सर्वं निद्रोद्भमवशादेवबोध्यं । रताधिकेन उक्तप्रकीडावता संयुक्तांपानभूमिं ददर्श । अन्यत्रापीत्यादिश्लोकद्वयंनव्याःप्रमादान्नपठन्ति । अन्यत्रापि पानभूमिभिन्नेरावणशयनगृहे । बहिस्थांपानभूमिं दृष्ट्वा पुनरभ्यन्तरे शयनस्थानआगत्यान्वेषणं । रूपविषयोयःसँल्लापो वर्णनं तत्पूर्वं शयानानां युवतीनांवरस्त्रीणां सहस्रमुच्यमानगुणंददर्श । तत् पूर्वदृष्टं. ८ क. ङ. ञ. ट. रताविरतसंयुक्तं. ९ ज. तथा. १० ञ. ट. भोजनेष्वप्यभक्षितान्. ङ. भोजनेष्वथभक्षितान्. ११ ङ. ञ. ज. ट. वराहवार्ध्राणसकान. ज. वराहयूथान्दयितान्. क. ग. वराहगृध्रान्सुकृतान्. १२ च. छ. ज. शल्यकान्मृगमायूरान्.

[1]ककरान्विविधान्सिद्धांश्चकोरानर्धभक्षितान् ॥ महिषानेक[2]शल्यांश्च [3]च्छागांश्च कृतनिष्ठितान् ॥
लेह्यानुच्चावचान्पेयान्भोज्यानि विविधानि च ॥ १४ ॥
तथाम्ललवणोत्तंसैर्विविधै रागषाडवैः ॥ हारनूपुरकेयूरैरपविद्धैर्महाधनैः ॥ १५ ॥
पानभाजनविक्षिप्तैः फलैश्च विविधैरपि ॥ कृतपुष्पोपहारा भूरधिकं पुष्यति श्रियम् ॥ १६ ॥
[4]तत्रतत्र च विन्यस्तैः [5]सुश्लिष्टैः शयनासनैः ॥ पानभूमिर्विना वह्निं प्रदीप्तेवोपलक्ष्यते ॥ १७ ॥
बहुप्रकारैर्विविधैर्वरसंस्कारसंस्कृतैः ॥ मांसैः कुशलसंयुक्तैः पानभूमिगतैः पृथक् ॥ १८ ॥
दिव्याः प्रसन्ना विविधाः सुराः [6]कृतसुरा अपि ॥ शर्करासवमाध्वीकपुष्पासवफलासवाः ॥ १९ ॥
[7]वासचूर्णैश्च विविधैर्दृष्टास्तैस्तैः पृथक्पृथक् ॥ सन्तता शुशुभे भूमिर्माल्यैश्च बहुसंस्थितैः ॥ २० ॥
हिरण्मयैश्च [8]विविधैर्भाजनैः स्फाटिकैरपि ॥ जाम्बूनदमयैश्चान्यैः करकैरभिसंवृता ॥ २१ ॥

यूषस्याग्रचरं तथा । रक्तवर्णं च राजेन्द्र च्छागं वार्ध्राणसं विदुः " इति स्मृतेः ॥ पक्षिविशेषइत्यन्ये । खड्गमृगइत्यपरे । " वार्ध्राणसः खड्गमृगः " इतिहलायुधः । दधिसौवर्चलायुतान् दधिसौवर्चलाभ्यांसंस्कृतानित्यर्थः । सौवर्चलं रुचकाख्योलवणविशेषः । " सौवर्चलेक्षरुचके " इत्यमरः । शल्यान् श्वाविधः । " श्वावित्तुशल्यः " इत्यमरः । मृगमयूरादीनां पुनःकथनं प्रदेशभेदात् ॥ १३ ॥ ककरान् पक्षिविशेषान् । " कृकणककरौ समौ " इत्यमरः । सिद्धान् पक्कान् । एकशल्यान् मत्स्यविशेषान् । कृतनिष्ठितान् पर्याप्तपक्कान् । "युगपर्याप्तयोः कृतं" इत्यमरः॥१४॥ आम्ललवणोत्तंसैः आम्लप्रधानैः लवणप्रधानैश्च । रागषाडवैः रागयुक्तैः षाडवैः । रागः श्वेतसर्षपः । "रागस्सिद्धार्थकोज्ञेयः " इतिसूदशास्त्रं । षाडवाः षड्रससंयोगकृताभक्ष्यविशेषाः । प्रदीपे त्वन्यथोक्तं " सिताम्ध्वादिमधुरो द्राक्षादाडिमजो रसः । विरलश्चेत्कृतो रागस्सान्द्रश्चेत्षाडवः स्मृतः " इति ॥ १५—१७ ॥ कुशलसंयुक्तैः समर्थसूदसंयोजितैः ।एवंभूतैः मांसैः सह दृष्ट्वा इति वक्ष्यमाणेनान्वयः ॥ १८ ॥ दिव्याः अमृतमथनोद्भूतवारुणीजातीयाः । प्रसन्नाः निष्कल्मषाः । कृतसुराः कृत्रिमसुराः । कृत्रिमसुरा एवाह—शर्करेति । शर्करासवाः शर्करया कृताः । माध्वीकाः मधुना कृताः । पुष्पासवाः पुष्पमकरन्दकृताः । फलासवाः फलरसकृताः । तथोक्तमर्णवे —" पानकं द्राक्षमाधूकं खार्जूरं तालमैक्षवम् । मधूत्थं शीधुमाध्वीकं मैरेयं नारिकेलजं " इति ॥ १९ ॥ वासचूर्णैः अधिवासचूर्णैः सह दृष्टाः हनुमतेतिशेषः । बहुप्रकारैर्मांसैः सह सुराः वासचूर्णैः सह हनुमता तत्र पानभूमौ दृष्टा इति संबन्धः । तैस्तैरित्याद्युत्तरशेषः । तैस्तैर्मांसविशेषैस्सुराविशेषैर्वासचूर्णैश्च पृथक्पृथक् संततेति संबन्धः । बहुसंस्थितैः बहुसंस्थानैः ॥ २० ॥ हिरण्मयैरिति अत्रापि संततेति पूर्वेणान्वयः । हिरण्मयैः रजतमयैः । " कृताकृतं हेमरूप्यं हिरण्यमभिधीयते " इति वचनात् । तैस्तैः पृथक्पृथक् संतता बहुसंस्थितैर्माल्यैर्हिरण्मयैः स्फाटिकैरपि

विष्णुधर्मोक्तेः । छागविशेषोवा ' त्रिपिबंत्रिन्द्रियक्षीणंश्वेतंवृद्धमजापतिं । वार्ध्राणसंचतंप्राहुर्याज्ञिकाःश्राद्धकर्मणि ' इतिस्मरणात् ॥ त्रिपिबं पानकालेमुखपर्यन्तंकर्णयोर्लंबमानत्वात् त्रिभिः मुखेनकर्णाभ्यांचपिबतीतित्रिपिबं । खड्गमृगोवा । ' वार्ध्राणसःखड्गमृग' इतिहलायुधः ॥ १३ ॥ **ती०** कृसरानितिपाठेतिलादिमिश्रितौदनान् ॥ १४ ॥ **स०** संयुक्तैःसम्यग्रचितैः । दातृतयाक्षेमसंयुक्तैरितिवा । ' पर्याप्तिक्षेमपुण्येषुकुशलंशिक्षितेत्रिषु ' इत्यमरः ॥ दिव्याःमनोहराः । प्रसन्नाःदर्शनमात्रेपिपासाजनिकाः । सुराः स्वतएवसमुद्राद्युत्पन्नाः । कृतसुराःमादकरसैर्नूतनतयाकृताः ॥ **ती०** माद्वीकाइतिपाठे द्राक्षाफलविकारा । ' मृ-

[**पा०**] १ ङ. झ. ट. कृकलान्विविधाञ्छागान्शशकानर्ध. च. छ. ज. ककरान्विविधाञ्छागान्. २ छ. ज. ञ. मेषांश्चानेक. ३ ङ. झ. ट. छेदाश्च. ४ ङ. झ. ञ. ट. भोज्यान्युच्चावचानिच. ५ च. छ. ज. विमलैर्विविधैरपि. ६ ङ. ज.—ट. रधिकां. ७ क. ख. ततस्तत्र. ८ ग. संश्लिष्टैः. झ. ञ. सुश्लिष्टशयनासनैः. ९ च. छ. ज. कृतसुरास्तथा. १० क. घ.—ट. माध्वीकाः. ११ क. वासचूर्णाश्चविविधाः. १२ ङ. झ. ञ. ट. कलशैर्भाजनैः. च. छ. ज. सुकृतैःकरकैः. क—घ. करकैर्भाजनैः.

राजतेषु च कुम्भेषु जाम्बूनदमयेषु च ॥ पानश्रेष्ठं तदा भूरि कपिस्तत्र ददर्श सः ॥ २२ ॥
सोपश्यच्छातकुम्भानि शीधोर्मणिमयानि च ॥ राजतानि च पूर्णानि भाजनानि महाकपिः ॥२३॥
कुचिदर्धावशेषाणि क्वचित्पीतानि सर्वशः ॥ क्वचिन्नैव प्रपीतानि पानानि स ददर्श ह ॥ २४ ॥
क्वचिद्भक्ष्यांश्च विविधान्क्वचित्पानानि भागशः ॥ क्वचिद्दत्तावशेषाणि पश्यन्वै विचचार ह ॥ २५ ॥
क्वचित्प्रभिन्नैः करकैः क्वचिदालोलितैर्घटैः ॥ क्वचित्संपृक्तमाल्यानि जलानि च फलानि च ॥२६ ॥
शयनान्यत्र नारीणां शुभ्राणि बहुधा पुनः ॥ परस्परं समाश्लिष्य कांश्चित्सुप्ता वराङ्गनाः ॥ २७ ॥
कांचिच्च वस्त्रमन्यस्याः स्रंपन्त्याः परिधाय च ॥ आहृत्य चाबलाः सुप्ता निद्राबलपराजिताः ॥ २८ ॥
तासामुच्छ्वासवातेन वस्त्रं माल्यं च गात्रजम् ॥ नात्यर्थं स्पन्दते चित्रं प्राप्य मन्दमिवानिलम् ॥२९॥
चन्दनस्य च शीतस्य शीधोर्मधुरसस्य च ॥ विविधस्य च माल्यस्य धूपस्य विविधस्य च ॥
बहुधा मारुतस्तत्र गन्धं विविधमुद्वहन् ॥ ३० ॥
रसानां चन्दनानां च धूपानां चैव मूर्छितः ॥ प्रववौ सुरभिर्गन्धो विमाने पुष्पके तदा ॥ ३१ ॥
श्यामा वदातास्तत्रान्याः काश्चित्कृष्णा वराङ्गनाः ॥ काश्चित्काञ्चनवर्णाङ्ग्यः प्रमदा राक्षसालये ॥३२॥
तासां निद्रावशत्वाच्च मदनेन विमूर्च्छितम् ॥ पद्मिनीनां प्रसुप्तानां रूपमासीद्यथैव हि ॥ ३३ ॥
एवं सर्वमशेषेण रावणान्तःपुरं कपिः ॥ ददर्श सुमहातेजा न ददर्श च जानकीम् ॥ ३४ ॥
निरीक्षमाणश्च तदा ताः स्त्रियः स महाकपिः ॥ जगाम महतीं चिन्तां धर्मसाध्वसशङ्कितः ॥३५॥

भाजनैस्संतता जाम्बूनदमयैरन्यैः करकैश्चाभिसंवृता भूमिः शुशुभ इति संबन्धः ॥ २१—२२ ॥ शीधोः मद्यस्य ॥ २३ ॥ पानानि पानपात्राणि ॥ २४ ॥ क्वचिद्भक्ष्यानित्यादिनिद्राबलपराजिता इत्यन्तमेकं वाक्यं ॥ क्वचित्प्रभिन्नैरित्यादिषु सहयोगे तृतीया हेतौतृतीया वा । प्रभिन्नत्वादालोलितत्वाच्च संपृक्तमाल्यानि माल्यमिश्राणीत्यर्थः । परस्परमित्यादि पश्यन्वै विचचारेति पूर्वेणान्वयः ॥ २५—२८ ॥ गात्रजं गात्रस्थं । मन्दमनिलं प्राप्येव अत्यर्थं न स्पन्दत इत्यन्वयः ॥ २९ ॥ चन्दनस्येत्यादि उद्वहन् प्रववाविति पकृष्यते ॥ ३० ॥ रसादीनां सुरभिर्गन्धः विमाने मूर्च्छितः व्याप्तः सन् प्रववौ चचार ॥ ३१ ॥ वदाताः अवदाताः । भागुरिमतेनाल्लोपः । शुभ्रा इत्यर्थः ॥ ३२ ॥ चकारोप्यर्थकः । निद्रापरवशानामपि तासां रूपं प्रसुप्तानां पद्मिनीनां रूपमिव रम्यमासीदित्यर्थः ॥ ३३—३४ ॥ धर्मसाध्वसशङ्कितः धर्मलोपभया-

द्वीकागोस्तनीद्राक्षा ' इत्यमरः ॥ **शि०** दिव्याःवृक्षकोटरादिद्वारावरुणादिप्रेषिताःसुराः ॥ १९ ॥ **ति०** शून्यानि पतिशून्यानि । अतएवपरस्परंसमाश्लिष्येति ॥ २७ ॥ **ति०** अपहृत्य बलाद्गृहीत्वा । उपगुह्य प्रावृत्य । उपगम्य तच्छयनस्थानंप्राप्य । तांच पश्यन्विचचारेतिसंबन्धः ॥ २८ ॥ **रामानु०** चन्दनस्य अनुलेपनचन्दनस्य । धूपस्य गृहाधिवासार्थधूपस्य । स्नानानांचन्दनानां स्नानार्हचन्दनानां । धूपानां केशाधिवासधूपानां । मारुतःएतेषांविविधंगन्धमुद्वहन्प्रववौ । अतएवसुरभिः घ्राणतर्पणः गन्धः । विमानेपुष्पके । मूर्च्छितःव्याप्तइतिसंबन्धः ॥३१॥ **ति०** ततोनिरीक्षणानन्तरं । ' नेक्षेतनग्नांपरस्त्रियं ' इतिशास्त्रस्मरणादिति शेषः । तदेवाह—धर्मेति । धर्मलोपनिमित्तंयत्साध्वसंभयंतेनशङ्कितःभीतइत्यर्थः ॥ ३५ ॥

[**पा०**] १ क. ङ. झ. ञ. ट. पानश्रेष्ठांतथाभूमिं. २ ञ. तानितानिच. ३ ख. क्वचिदल्पावशेषाणि. ४ ङ. झ. ञ. ट. स्पीतान्यशेषतः. ५ ङ. झ. ट. त्पानंविभागतः. ञ. त्पानंविभागशः. च. छ. ज. त्पानानिसर्वशः. ६ ख. ङ.—ट. क्वचिदर्धावशेषाणि. ७ क.—ट. शून्यानि. ८ क. सुप्ताःपुनःपुनः. ९ ङ. च. छ. झ. ञ. ट. काचिच्चवस्त्रमन्यस्याअपहृत्योपगुह्यच । उपगम्याबलासुप्तानिद्रावलपराजिता. १० ग. घ. अपहृत्योपगूह्यतां. ११ ग. ज. उपगम्याबलाः. १२ क. ग. ङ. झ. ञ. ट. पुष्पस्य. १३ क. ङ.—ट. मारुतस्तस्य. १४ ट. रसानांचधनानांच. क. ख. ग. ङ.—ञ. स्नानानांचन्दनानांच. ग. पानानां चन्दनानांच. १५ क. स्तास्तत्र. १६ क. मासीत्तदद्भुतं. १७ ख. ङ. झ. ञ. ट. समहातेजाः. ग. चमहातेजाः. च. ज. सुमहावीरः. १८ क. ख. ङ. झ. ञ. ट. शङ्कां.

परदारावरोधस्य प्रसुप्तस्य निरीक्षणम् ॥ इदं खलु ममात्यर्थं धर्मलोपं करिष्यति ॥ ३६ ॥
न हि मे परदाराणां दृष्टिर्विषयवर्तिनी ॥ अयं चात्र मया दृष्टः परदारपरिग्रहः ॥ ३७ ॥
तस्य प्रादुरभूच्चिन्ता पुनरन्या मनस्विनः ॥ निश्चितैकान्तचित्तस्य कार्यनिश्चयदर्शिनी ॥ ३८ ॥
कामं दृष्टा मया सर्वा विश्वस्ता रावणस्त्रियः ॥ न हि मे मनसः किंचिद्वैकृत्यमुपपद्यते ॥ ३९ ॥
मनो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्तने ॥ शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम् ॥ ४० ॥
नान्यत्र हि मया शक्या वैदेही परिमार्गितुम् ॥ स्त्रियो हि स्त्रीषु दृश्यन्ते सदा संपरिमार्गणे ॥४१॥
यस्य सत्त्वस्य या योनिस्तस्यां तत्परिमार्ग्यते ॥ न शक्या प्रमदा नष्टा मृगीषु परिमार्गितुम् ॥ ४२ ॥
तदिदं मार्गितं तावच्छुद्धेन मनसा मया ॥ रावणान्तःपुरं सर्वं दृश्यते न च जानकी ॥ ४३ ॥
देवगन्धर्वकन्याश्च नागकन्याश्च वीर्यवान् ॥ अवेक्षमाणो हनुमान्नैवापश्यत जानकीम् ॥ ४४ ॥
तामपश्यन्कपिस्तत्र पश्यंश्चान्या वरस्त्रियः ॥ अपक्रम्य तदा वीरः प्रध्यातुमुपचक्रमे ॥ ४५ ॥
स भूयस्तु परं श्रीमान्मारुतिर्यत्नमास्थितः ॥ आपानभूमिमुत्सृज्य तद्विचेतुं प्रचक्रमे ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकादशः सर्गः ॥ ११ ॥

च्छङ्कितः ॥ ३५ ॥ परदारावरोधस्य परदाररूपान्तःपुरस्य ॥ ३६ ॥ मे दृष्टिः कदाचिदपि परदाराणां विषयवर्तिनी नहि । परदारसंबन्धिविषयपरा नहीत्यर्थः । तथाप्ययं परदारपरिग्रहः दृष्टः इदमसङ्गतमित्यर्थः ॥ ३७ ॥ निश्चितैकान्तचित्तस्य नियतैकरूपचित्तस्य ॥ ३८ ॥ वैकृत्यं विकारः । उपपद्यते उत्पद्यते ॥ ३९ ॥ शुभाशुभास्ववस्थासु शुभकरणाशुभकरणेषु विषये । इन्द्रियाणां प्रवर्तने मन एव हेतुः सुव्यवस्थितं न तदभिलाषि जातमित्यर्थः ॥ ४० ॥ ननु परदारदर्शनमपि परिहरणीयं तत्किमर्थं कृतं तत्राह—नान्यत्रेति ॥ अन्यत्र स्त्रीव्यतिरिक्ते । संपरिमार्गणे कर्तव्ये स्त्रीष्वेव हि स्त्रियो दृश्यन्ते ॥ ४१ ॥ योनिः जातिः । सजातीयइत्यर्थः ॥ ४२—४३ ॥ अपश्यत अपश्यत् ॥ ४४—४५ ॥ तत् रावणान्तःपुरं ॥ ४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकादशः सर्गः ॥ ११ ॥

ति० धर्मलोपंदर्शयति—परदारेति । परदारावरोधस्य । दारशब्दःस्त्रीसामान्यवाची । अवरोधशब्दःस्वधर्मयुक्तकुलस्त्रीवाची । प्रसुप्तस्य । अनेननग्नप्रायत्वंसूचितं । तत्समयेवसनानांविपर्यासात् । किंचपरदाराएवपरिग्रहो भार्यायस्यसःअतिपापीरावणश्चदृष्टः । तादृशदर्शनमपिधर्मलोपकारीतिभावः ॥ ३७ ॥ ति० अथपुनर्विचारेणतदलोपबुद्धिरप्युत्पन्नेत्याह—तस्येति । अन्याचिन्ता पूर्वचिन्ताविरोधिनी । निश्चितेप्रमाणप्रतिपन्ने । एकान्तेसिद्धान्तेतद्विषयज्ञानेचित्तं । अतएवसाचिन्ताकार्यनिश्चयदर्शिनी कर्तव्याकर्तव्यनिर्णयसमर्था ॥ ८ ॥ इत्येकादशः सर्गः ॥ ११ ॥

[पा०] १ क. ग. घ. च. ज.—ट. ननु. २ घ. मूलं. ३ च. छ. स्त्रियाःसंपरिमार्गणे. ४ ख. ङ.—ट. शक्यं. ५ ग. ननु. च. छ. ज. नात्र. ख. नापि. ६ क. नैवपश्यति. ७ ख. ग. ङ.—ट. प्रस्थातुं. ८ ङ. छ.—ट. भूयस्सर्वतःश्रीमान्. च. भूयस्तांपुरींश्रीमान्. घ. ज. भूयस्तत्परःश्रीमान्. ९ च. छ. ज. पानभूमिंसमुत्सृज्यविचेतुंचप्रचक्रमे. १० क. ग. घ. ङ. झ. ञ. ट. तांविचेतुं.

द्वादशः सर्गः ॥ १२ ॥

पुनरपिहनुमता रावणगृहे लतागृहचित्रगृहादिनानास्थानेष्वन्वेषणेपि सीतायाअदर्शनेन तस्यारावणेनप्रमापणादिसंभावनया स्वयत्नस्यवैफल्यशङ्कया अकृतकार्यतयासुग्रीवाद्यवलोकनस्यातिजुगुप्सितत्वशङ्कयाच निर्वेदाधिगमः ॥ १ ॥ तथा निर्वेदस्यानर्थसाधनत्वाध्यवसायेन अनिर्वेदस्यश्रेयस्साधनत्वनिर्धारणेनच पुनरप्यन्वेषणेसमुद्यमः ॥२॥ तथा चतुरङ्गुलदेशमात्रानवशेषीकरणेनपुनरन्वेषणेपि सीतायाअदर्शनेनविषादाधिगमः ॥ ३ ॥

स तस्य मध्ये भवनस्य मारुतिर्लतागृहाञ्चित्रगृहान्निशागृहान् ॥
जगाम सीतां प्रति दर्शनोत्सुको न चैव तां पश्यति चारुदर्शनाम् ॥ १ ॥
स चिन्तयामास ततो महाकपिः प्रियामपश्यन्रघुनन्दनस्य ताम् ॥
ध्रुवं हि सीता म्रियते यथा न मे विचिन्वतो दर्शनमेति मैथिली ॥ २ ॥
सा राक्षसानां प्रवरेण जानकी स्वशीलसंरक्षणतत्परा सती ॥
अनेन नूनं प्रतिदुष्टकर्मणा हता भवेदार्यपथे परे स्थिता ॥ ३ ॥
विरूपरूपा विकृता विवर्चसो महानना दीर्घविरूपदर्शनाः ॥
समीक्ष्य सा राक्षसराजयोषितो भयाद्विनष्टा जनकेश्वरात्मजा ॥ ४ ॥
सीतामदृष्ट्वा ह्यनवाप्य पौरुषं विहृत्य कालं सह वानरैश्चिरम् ॥
न मेस्ति सुग्रीवसमीपगा गतिः सुतीक्ष्णदण्डो बलवांश्च वानरः ॥ ५ ॥
दृष्टमन्तःपुरं सर्वं दृष्टा रावणयोषितः ॥ न सीता दृश्यते साध्वी वृथा जातो मम श्रमः ॥ ६ ॥
किंनु मां वानराः सर्वे गतं वक्ष्यन्ति संगताः ॥ गत्वा तत्र त्वया वीर किं कृतं तद्वदस्व नः ॥
अदृष्ट्वा किं प्रवक्ष्यामि तामहं जनकात्मजाम् ॥ ७ ॥
ध्रुवं प्रायमुपैष्यन्ति कालस्य व्यतिवर्तने ॥ ८ ॥

निशागृहान् रात्रिनिवासयोग्यगृहान् । "गृहाः पुंसि च भूम्न्येव" इति पुँल्लिङ्गत्वं । पश्यति अपश्यत् ॥ १ ॥ यथा यस्मात्कारणात् । विचिन्वतो मे मैथिली दर्शनं नैति तस्मात् म्रियते ममार । यद्वा अथवा नेति वाक्यं पठनीयं । तदा अपश्यन्निति हेतुगर्भं । अदर्शनान्मृता वा अथवा दर्शनं नैति । कुत्रचिद्गहने प्रदेशे स्थितावेत्यर्थः ॥२॥ प्रतिदुष्टकर्मणा अतिदुष्टकर्मणा । वीप्सायां प्रतिः । "प्रतिप्रतिनिधौ वीप्सालक्षणादौ" इत्यमरः । परे उत्कृष्टे । आर्यपथे सन्मार्गे ॥ ३ ॥ विरूपाणि न्यूनाधिकानि रूपाणि शरीरावयवाः यासां ताः । विकृताः विकृतवेषाः । विवर्चसोनिस्तेजस्काः। महाननाः अतिविशालमुखाः । दीर्घाणि विरूपाणि दर्शनानि चक्षूंषि यासां ताः । राक्षसराजयोषितः रावणस्याज्ञाकारिणीःस्त्रियः ॥४॥ पौरुषं शत्रुविषयपराक्रमं । चिरं कालं विहृत्य अतिक्रम्येत्यर्थः । एवंभूतस्य मे सुग्रीवसमीपगा तत्समीपगामिनी । गतिः मार्गः । नास्ति । सुग्रीवसमीपगतिः ममायोग्येत्यर्थः । तत्र हेतुमाह—सुतीक्ष्णेति । यत इति—शेषः ॥ ५—६ ॥ किंन्विति सामान्येन निर्वेदोक्तिः । विशेषतश्चाह—गत्वेति । इत्युक्त इति शेषः । वदस्व न इत्युक्तः किं प्रवक्ष्यामि । यद्वा किन्त्विति पाठः । पूर्ववदर्धत्रयमेकं वाक्यं । किन्त्विति पूर्वस्माद्विशेषोक्तिः । मां वानराः वदस्व न इति वक्ष्यन्ति तदा अदृष्ट्वा किं प्रवक्ष्यामीति योजना ॥ ७ ॥ तार्हि अत्रैव कालविलम्बः क्रियतां तत्राह—ध्रुवमिति ॥ कालस्य व्यतिवर्तने अस्मदागमनकालेऽ-

ति० नम्रियतेनजीवतिस्म । ध्रुवंनुसीताम्रियतेइतिक्वचित्पाठः । तत्रहेतुःयथेति । यतइत्यर्थः ॥ २ ॥

[पा०] १ ङ.—ट. संस्थितोलता. घ. संश्रितोलता. २ क. ग. घ. च. छ. ज. ध्रुवंतु. ङ. ञ. ञ. ट. ध्रुवंनसीता म्रियते. ३ क. ग.—च. ज.—ट. बाला. ४ च. छ. प्रतिष्ठिता. ५ घ. समाजसंगतिः. ६ ङ. ञ. ट. सुपासिष्ये. ख. सुपेष्यामि.

किं[1] वा वक्ष्यति वृद्धश्च जाम्बवानङ्गदश्च सः ॥ गतं पारं समुद्रस्य वानराश्च समागताः ॥ ९ ॥
अनिर्वेदः श्रियो मूलमनिर्वेदः परं सुखम् ॥ अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तकः ॥ १० ॥
करोति सफलं जन्तोः कर्म यच्चत्करोति[2] सः ॥ तस्मादनिर्वेदकृतं यत्नं चेष्टेऽहमुत्तमम्[3] ॥ ११ ॥
भूयस्तावद्विचेष्यामि देशान्रावणपालितान्[4] ॥ भूयस्तत्र विचेष्यामि न यत्र विचयः कृतः ॥
आपानशाला[5] विचितास्तथा पुष्पगृहाणि च ॥ १२ ॥
चित्रशालाश्च विचिता भूयः क्रीडागृहाणि च ॥ निष्कुटान्तररथ्याश्च विमानानि च सर्वशः ॥ १३ ॥
इति संचिन्त्य भूयोपि विचेतुमुपचक्रमे ॥ भूमीगृहांश्चैत्यगृहान्गृहातिगृँहकानपि[6] ॥ १४ ॥
उत्पतन्निपतंश्चापि तिष्ठन्गच्छन्पुनः पुनः ॥ अपावृण्वंश्च द्वाराणि कपाटान्यवघाटयन्[7] ॥ १५ ॥
प्रविशन्निष्पतंश्चापि प्रपतन्नुत्पतन्नपि[8] ॥ सर्वमप्यवकाशं स विचचार महाकपिः ॥ १६ ॥
चतुरङ्गुलमात्रोपि नावकाशः स विद्यते ॥ रावणान्तःपुरे तस्मिन्यं कपिर्न जगाम सः ॥ १७ ॥
प्राकारान्तररथ्याश्च[9] वेदिकाश्चैत्यसंश्रयाः ॥ दीर्घिकाः[10] पुष्करिण्यश्च सर्वे तेनावलोकितम् ॥ १८ ॥
राक्षसो विविधाकारा विरूपा विकृतास्तथा ॥ दृष्टा हनुमता तत्र न तु सा[11] जनकात्मजा ॥ १९ ॥
रूपेणाप्रतिमा लोके वरा[12] विद्याधरस्त्रियः ॥ दृष्टा हनुमता तत्र न तु राघवनन्दिनी ॥ २० ॥
नागकन्या[13] वरारोहा पूर्णचन्द्रनिभाननाः ॥ दृष्टा हनुमता तत्र न तु सीता[14] सुमध्यमा ॥ २१ ॥
प्रमथ्य राक्षसेन्द्रेण नागकन्या[15] बलाद्धृताः ॥ दृष्टा हनुमता तत्र न सा जनकनन्दिनी ॥ २२ ॥

तीते । प्रायमुपैष्यन्ति । जाम्बवत्प्रभृतयइतिशेषः ॥ ८ ॥ सामान्येन निर्वेदं प्रतिवक्ति—किं वेति ॥ समुद्रलङ्घनरूपं महत्कर्म कृतवन्तं मां ते किं वक्ष्यन्ति । किमपि वक्ष्यन्ति । यद्वा मद्वृत्तान्तं प्रशंसन् जाम्बवान् तदुत्साहकोऽङ्गदस्तदुपशृण्वन्तोन्ये च मां किं वा जुगुप्सितं वक्ष्यन्ति । " किं पृच्छायां जुगुप्सने " इत्यमरः ॥ ९ ॥ चिरं निर्वेदे कार्यहानिः स्यादिति मत्वा अनिर्वेदमवलम्बते—अनिर्वेद इति ॥ १० ॥ अनिर्वेद उत्साहः तत्कृतं तत्प्रयुक्तं । यत्नं चेष्टे । करोमीत्यर्थः । यत्करोति जन्तुरिति सिद्धम् । जन्तोस्सबन्धि तत्सर्वं कर्म सः अनिर्वेद एव । सफलं करोतीत्यन्वयः ॥ ११ ॥ आपानेति । एता विचिताः अथापि पुनर्विचेष्यामीत्यनुषज्यते ॥ १२ ॥ निष्कुटाः गृहारामाः । अन्तररथ्याः अवान्तरवीथ्यः ॥ १३ ॥ भूमीगृहान् भूमीबिलगृहान् । चैत्यगृहान् चतुष्पथमण्डपान् । गृहातिगृहकान् गृहानतीत्य दूरे स्वैरविहारार्थं निर्मितान्गृहान् ॥ १४ ॥ उत्पतन्निपतन् पूर्वमुच्चस्थानान्यधिरुह्य ततोवरोहन् । अवघाटयन् पाटयन् ॥ १५ ॥ निष्पतन् निर्गच्छन् । प्रपतन्नुत्पतन् बिलगृहादीनि नीचस्थानानि प्रथममधिरुह्य ततःसमुद्गच्छन् ॥१६—१७॥ प्राकारान्तररथ्याः प्राकारमध्यवर्तिवीथ्यः । वेदिकाश्चैत्यसंश्रयाः चैत्यवृक्षमूलपीठिकाबन्धाः ॥ १८—२१ ॥ प्रमथ्य प्रसह्य । बलाद्धृता नागकन्या इत्यभिधानादत्र बन्दीकृतानां ग्रहणं । पूर्व-

---

ती० चैत्यगृहान् बुद्धायतनानि । गृहातिगृहकानपि गृहानतीत्यानतिदूरेस्वैरविहारार्थंनिर्मितगृहान् ॥ ति० गृहातिगृहकाःगृहोपरिगृहाइतिकतकः । स० भूमीगृहान् भूविवरस्थगृहान् । चैत्यगृहान् देवायतनानि । अपावृण्वन् अपगतावरणानिकुर्वन् ॥१४॥ चैत्यःचतुष्पथवृत्तिवृक्षः ॥ १८ ॥ स० राघवंनन्दयतीतिराघवनन्दिनीसीता ॥ २० ॥

[पा०] १ क. ग. किंमां. २ क. घ. ङ. झ. ट. यच्चकरोति. ख. यच्चकरोतिच. ३ क. ङ. दनिर्वेदकरं. ४ ख.—ट. अदृष्टांश्चविचेष्यामि. ५ क. घ.—ट. पाठेष्विदमर्धंदृश्यते. ६ क. विविधास्तथा. ७ ख. गृहकानिच. ८ क. ख. ग. ङ. ञ. न्पुनःक्वचित्. ९ च. छ. ज. अपावृतानि. १० क. ग.—ट. न्यवघट्टयन्. ११ ङ.—झ. ट. त्पतन्निव. १२ क. सर्वानप्यवकाशांश्च. १३ ङ.—झ. ट. वीथ्यश्च. १४ क. ग. संश्रिताः. १५ क.—ट. श्वभ्राश्च. १६ क. ग. सीतासुमध्यमा. १७ झ. ञ. ट. पराः. १८ घ. राजकन्याः. १९ ङ.—ट. साजनकात्मजा. २० ग. देवकन्याः. ख. राजकन्याः. २१ च. छ. बलात्कृताः.

सोपश्यंस्तां महाबाहुः पश्यंश्चान्या वरस्त्रियः ॥ विषसाद मुहुर्धीमान्हनुमान्मारुतात्मजः ॥ २३ ॥
उद्योगं वानरेन्द्राणां प्लवनं सागरस्य च ॥ व्यर्थं वीक्ष्यानिलसुतश्चिन्तां पुनरुपागमत् ॥ २४ ॥
अवतीर्य विमानाच्च हनुमान्मारुतात्मजः ॥ चिन्तामुपजगामाथ शोकोपहतचेतनः ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्वादशः सर्गः ॥ १२ ॥

त्रयोदशः सर्गः ॥ १३ ॥

पुष्पकविमानात्प्राकारंपरिक्रान्तवताहनुमता प्रायस्सर्वत्रान्वेषणेपिसीतायाअदर्शने तत्रानेकहेतूत्प्रेक्षणपूर्वकं रामेतत्वनिवेदनानिवेदनपक्षयोर्महानर्थोत्प्रेक्षणं ॥ १ ॥ तथा सीतानवलोकनशोकेन स्वप्राणविमोक्षणरावणमारणाद्यनेकविकल्पान्परिकल्पयतातेनदैवादशोकवनिकावलोकनं ॥२ ॥ तथा स्वेनतस्याअनन्वेषितत्वनिर्धारणेन तत्रान्वेषणनिर्धारणपूर्वकं रामादीन्प्रति सकलसुरनिकरान्प्रतिच सप्रणामंस्वान्वेषणस्यसाफल्यसिद्धिप्रार्थनं ॥ ३ ॥

विमानात्तु सुसंक्रम्य प्राकारं हरियूथपः ॥ हनुमान्वेगवानासीद्यथा विद्युद्घनान्तरे ॥ १ ॥
संपरिक्रम्य हनुमान्रावणस्य निवेशनात् ॥ अदृष्ट्वा जानकीं सीतामब्रवीद्वचनं कपिः ॥ २ ॥
भूयिष्ठं लोलिता लङ्का रामस्य चरता प्रियम् ॥ न हि पश्यामि वैदेहीं सीतां सर्वाङ्गशोभनाम् ॥ ३ ॥
पल्वलानि तटाकानि सरांसि सरितस्तथा ॥ नद्योनूपवनान्ताश्च दुर्गाश्च धरणीधराः ॥
लोलिता वसुधा सर्वा न तु पश्यामि जानकीम् ॥ ४ ॥
इह संपातिना सीता रावणस्य निवेशने ॥ आख्याता गृध्रराजेन न च पश्यामि तामहम् ॥ ५ ॥
किंनु सीताऽथ वैदेही मैथिली जनकात्मजा ॥ उपतिष्ठेत विवशा रावणं दुष्टचारिणम् ॥ ६ ॥
क्षिप्रमुत्पततो मन्ये सीतामादाय रक्षसः ॥ बिभ्यतो रामबाणानामन्तरा पतिता भवेत् ॥ ७ ॥

श्लोके ऊढानां नागकन्यानामित्यपुनरुक्तिः ॥ २२–२५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वादशः सर्गः ॥ १२ ॥

विमानादित्यादि । इदानीं विमानादवतरणोत्तया मध्ये विमानमधिरूढ इत्यवगम्यते । वेगवत्त्वे दृष्टान्तमाह—विद्युदिति ॥ १ ॥ संपरिक्रम्य प्राकारमिति शेषः । अब्रवीत् स्वयमितिशेषः ॥२॥ लोलिता बहुशोन्विष्टेत्यर्थः॥३॥ सरितः क्षुद्रनद्यः। अनूपवनान्ताः जलप्रायवनप्रदेशाः ॥ ४—५ ॥ सीता अयोनिजा । वैदेही जन्मभूमिप्रयुक्तातिशयवती । मैथिली आचारप्रधानकुलोत्कर्षवती । अथशब्दस्समुच्चये । एवंभूता जनकात्मजा दुष्टचारिणं रावणं विवशा कामपरवशा सती उपतिष्ठेत किंनु । नेत्यर्थः ॥६॥ अथास्या अदर्शने हेतूनुत्प्रेक्षते—क्षिप्रमित्यादिना ॥ रामबाणानां

ति० अवतीर्य विमानएवैतत्सर्वदर्शनमितितत्वं ॥ २५ ॥ इतिद्वादशः सर्गः ॥ १२ ॥

रामानु० जनकात्मजेत्यनेन ' कर्मणैवहिसंसिद्धिमास्थिताजनकादयः ' इतिप्रसिद्धजनकसंबन्धकृतवैशिष्ट्यं । एवंगुणविशिष्टादेवीदुष्टचारिणंरावणंउपतिष्ठेतकिंनु मित्रत्वेनप्राप्नुयात्किंनु । नप्राप्नुयादेवेत्यर्थः । " उपाद्देवपूजासंगतिकरणमित्रकरणपथिष्विति वक्तव्यं ' इत्यात्मनेपदं ॥ ६ ॥ तर्ह्यदर्शनंकुतः तत्रहेतूनुत्प्रेक्षते । क्षिप्रमिति । एतेपक्षाः दुःखातिशयात्संपातिवचनविस्मरणमूलकाः । बिभ्यतःकराद्भ्रष्टेतिशेषः । रामबाणानां । आघातादितिशेषः । शेषेषष्ठीवा । **स०** यद्यपिसंपातिनालङ्कायांसीतास्तीत्यभिधानादेवमाशुत्प्रेक्षानशक्यातु । तथापिसंपात्युक्तरीत्याऽन्वेषणेपियतोनदृश्यतेअतस्तद्वचनमेवविचारणीयमितिमतिमतो-

[पा०] १ ख. घ. ङ. झ. ञ. ट. विषसादमहाबाहुः. ग. विषादमगमद्वीरो. क. च. छ. ज. विषादमगमद्धीमान् २ ङ.—ट. पुनरुपागतः. ३ क. विमानाग्राद्धनुमान्. ४ ख. सर्वाङ्गसुन्दरीं. ५ क.—ङ. झ. ञ. ट. नच. ६ ङ. झ. ट सादृश्यतेतुकिं. ७ ङ.—झ. ट. रावणेनहृतावलात्.

अथवा ह्रियमाणायाः पथि सिद्धनिषेविते ॥ मन्ये पतितमार्याया हृदयं प्रेक्ष्य सागरम् ॥ ८ ॥
रावणस्योरुवेगेन भुजाभ्यां [1]पीडितेन च ॥ तया मन्ये विशालाक्ष्या त्यक्तं जीवितमार्यया ॥ ९ ॥
उपर्युपरि वा नूनं सागरं क्रमतस्तथा ॥ विवेष्टमाना पतिता समुद्रे जनकात्मजा ॥ १० ॥
अहो क्षुद्रेण [2]वाऽनेन रक्षन्ती शीलमात्मनः ॥ अबन्धुर्भक्षिता सीता रावणेन तपस्विनी ॥ ११ ॥
अथवा राक्षसेन्द्रस्य पत्नीभिरसितेक्षणा ॥ अदुष्टा दुष्टभावाभि[3]र्भक्षिता सा भविष्यति ॥ १२ ॥
संपूर्णचन्द्रप्रतिमं पद्मपत्रनिभेक्षणम् ॥ रामस्य ध्यायती वक्त्रं पञ्चत्वं कृपणा गता ॥ १३ ॥
हा राम लक्ष्मणेत्येवं हायोध्ये चेति मैथि[4]ली ॥ विलप्य बहु वैदेही न्यस्तदेहा भविष्यति ॥ १४ ॥
अथवा निहिता मन्ये रावणस्य निवेशने ॥ [5]नूनं लालप्यते सीता पञ्जरस्थेव शारिका ॥ १५ ॥
जनकस्य सुता सीता रामपत्नी सुमध्यमा ॥ कथमुत्पलपत्राक्षी रावणस्य वशं व्रजेत् ॥ १६ ॥
विनष्टा वा प्रणष्टा वा मृता वा जनकात्मजा ॥ रामस्य प्रियभार्यस्य न निवेदयितुं क्षमम् ॥ १७ ॥
निवेद्यमाने दोषः स्यादोषः स्यादनिवेदने ॥ कथं नु खलु कर्तव्यं विषमं प्रतिभाति मे ॥ १८ ॥
अस्मिन्नेवं गते कार्ये प्राप्तकालं क्षमं च किम् ॥ भवेदिति [6]मतं भूयो हनुमान्[7]प्रविचारयत् ॥ १९ ॥
यदि सीतामदृष्ट्वाहं वानरेन्द्रपुरीमितः ॥ गमिष्यामि ततः को मे पुरुषार्थो भविष्यति ॥ २० ॥
ममेदं लङ्घनं व्यर्थं सागरस्य भविष्यति ॥ [8]प्रवेशश्चैव [9]लङ्काया राक्षसानां च दर्शनम् ॥ २१ ॥

रामबाणेभ्यः ॥ ७ ॥ सागरं प्रेक्ष्य भीतं हृदयं सागरे पतितमिति मन्ये । हृदयस्य भयस्थानत्वेन तन्मूलतया तच्छरीरं लक्ष्यते ॥ ८ ॥ पीडितेन पीडनेन ॥ ९ ॥ उपर्युपरि सागरं सागरस्य सन्निहितोपरिप्रदेशे । " उपर्यध्यधसस्सामीप्ये " इति द्विर्वचनं । " धिगुपर्यादिषु त्रिषु " इति द्वितीया ॥ १० ॥ अहो इति खेदे ॥ ११ ॥ दुष्टभावाभिः सापत्न्यप्रयुक्तक्रोधाभिः ॥ १२—१३ ॥ न्यस्तदेहा त्यक्तदेहा । भविष्यति भवेदित्यर्थः ॥१४॥ निहिता भूगृहादौ गूढं स्थापिता । लालप्यते मुहुर्मुहुः प्रलपति ॥ १५ ॥ एवं निरुध्यमानापि सीता रावणस्य वशं न व्रजेदित्याह—जनकस्येति ॥ कथं व्रजेत् । न व्रजेदेवेत्यर्थः ॥ १६ ॥ ननु किं चिन्तया गत्वा यथावृत्तं निवेद्यतामित्याशङ्क्य तदनुचितमित्याह—विनष्टेति ॥ विनष्टा भूगृहादौ स्थापनेनादर्शनं गता । " णश अदर्शने " इति धातोर्निष्ठा । प्रणष्टा समुद्रपतनादिना त्यक्तजीविता । " उपसर्गादसमासेपि णोपदेशस्य " इति णत्वं । मृता रामविरहदुःखासहिष्णुतया स्वयं मृता ॥ १७ ॥ निवेद्यमाने वक्ष्यमाणो दोषः स्यात् । दोषः स्यादनिवेदने । यथावृत्तानिवेदने स्वामिवञ्चनदोषः स्यात् । विषमं परस्परविरुद्धं ॥ १८ ॥ हनुमान् अस्मिन्कार्ये एवंगते एवं विषमत्वं प्राप्ते सति । किंप्राप्तकालं कालोचितं । क्षमं समर्थं च भवेदिति मतं पक्षं । भूयः प्रविचारयत् ॥ १९—२० ॥ पुरुषार्थाभाव-

हनुमतःसायुक्तेतिज्ञेयं ॥ ७ ॥ **ति०** रामपरोक्षंतथाभयायोगात्पक्षान्तरं—अथवेति । हृदयंपतितं मनउत्क्रान्तं । मनउत्क्रमणस्यैव मरणत्वात् ॥ ८ ॥ **स०** अबन्धुःअसंनिहितबन्धुः ॥ ११ ॥ **स०** रिपुभिर्योधयितुंशक्योयोध्यः । सनभवतीत्ययोध्यः । तस्य संबुद्धिः । हायोध्येत्युपपन्नं ॥१४॥ **ति०** नन्वनेनविचारेणालं यथानुभूतंनिवेद्यतां तत्राह—विनष्टेति । अस्यक्वचिद्वर्ततइतिशेषः । ' णशअदर्शने ' इतिधात्वनुसाराददृष्टासतीक्वचिदस्तीतिवक्तुं अशक्यं अक्षमं । सर्वतोन्विष्टत्वात् प्रणष्टा प्रगतंनष्टंअदर्शनंयस्यास्सा दृष्टेत्यर्थः । एतदपिनवक्तुंक्षमं । स्वयमदृष्टत्वात् ॥ एवंमृतेत्यपिवक्तुंनशक्यं । तत्साधकदृढतरप्रमाणाभावात् । तस्माद्रामस्याग्रेकिमपिवक्तुंनशक्यं । दृश्यदेशेमाययाऽदर्शनंविनाशः । अदृश्यदेशेऽवस्थापनंप्रणाशइतितुतीर्थः ॥ १७ ॥ **ति०** प्राप्तकालं

[**पा०**] १ क. ख. ङ. पीडनेनच. २ ग. पापेन. ३ क. झ. ट. भक्षितावा. ४ ङ. ञ. ट. भामिनी. ५ ज. रहोवानिहिता. ६ ङ. झ. ट. भृशं. ७ ङ. झ. ट. लालप्यतेबाला. क. घ. च. छ. ञ. लालप्यतेमन्दं. ग. विलपतेमन्दं. ८ क. ग. ङ.—ट. कुलेजाता. ९ च. छ. ज. सुधार्मिका. १० ग. ङ.—ट. मतिं. ११ ग. ङ. ज. झ. ञ. न्प्रविचारयन्. घ. न्विचचारह. क. न्प्रव्यचारयत्. १२ च. छ. ज. प्रवेशश्चापि. १३ क. ञ. लङ्कायां.

किं[1] मां वक्ष्यति सुग्रीवो हरयो वा[2] समागताः ॥ किष्किन्धां समनुप्राप्तं[3] तौ वा दशरथात्मजौ ॥२२॥
गत्वा तु यदि काकुत्स्थं वक्ष्यामि परमप्रियम्[4] ॥ न दृष्टेति मया सीता ततस्त्यक्ष्यति जीवितम् ॥ २३ ॥
परुषं दारुणं क्रूरं[5] तीक्ष्णमिन्द्रियतापनम्[6] ॥ सीतानिमित्तं दुर्वाक्यं श्रुत्वा स नभविष्यति ॥ २४ ॥
तं तु कृच्छ्रगतं दृष्ट्वा पञ्चत्वगतमानसम्[7] ॥ भृशानुरक्तो मेधावी नभविष्यति लक्ष्मणः ॥ २५ ॥
विनष्टौ भ्रातरौ श्रुत्वा भरतोपि मरिष्यति[8] ॥ भरतं च मृतं दृष्ट्वा शत्रुघ्नो नभविष्यति ॥ २६ ॥
पुत्रान्मृतान्समीक्ष्याथ नभविष्यन्ति मातरः ॥ कौसल्या च सुमित्रा च कैकेयी च न संशयः ॥ २७ ॥
कृतज्ञः सत्यसन्धश्च सुग्रीवः प्लवगाधिपः ॥ रामं तथागतं दृष्ट्वा ततस्त्यक्ष्यति जीवितम् ॥ २८ ॥
दुर्मना व्यथिता दीना निरानन्दा तपस्विनी ॥ पीडिता भर्तृशोकेन रुमा त्यक्ष्यति जीवितम् ॥२९॥
वालिजेन तु दुःखेन पीडिता शोककर्शिता[9] ॥ पञ्चत्वं[10] च गते राज्ञि ताराऽपि नभविष्यति ॥ ३० ॥
मातापित्रोर्विनाशेन सुग्रीवव्यसनेन च[11] ॥ कुमारोप्यङ्गदः कस्माद्धारयिष्यति जीवितम् ॥ ३१ ॥
भर्तृजेन तु दुःखेन ह्यभिभूता[12] वनौकसः[13] ॥ शिरांस्यभिहनिष्यन्ति तलैर्मुष्टिभिरेव च ॥ ३२ ॥
सान्त्वेनानुप्रदानेन मानेन च यशस्विना ॥ लालिताः कपिराजेन[14] प्राणांस्त्यक्ष्यन्ति वानराः ॥३३॥
न वनेषु न शैलेषु न[15] निरोधेषु वा पुनः ॥ क्रीडामनुभविष्यन्ति समेत्य कपिकुञ्जराः ॥ ३४ ॥
सपुत्रदाराः सामात्या भर्तृव्यसनपीडिताः[16] ॥ शैलाग्रेभ्यः पतिष्यन्ति समेत्य[17] विषमेषु च ॥ ३५ ॥
विषमुद्बन्धनं वाऽपि प्रवेशं ज्वलनस्य वा ॥ उपवासमथो शस्त्रं प्रचरिष्यन्ति वानराः ॥ ३६ ॥
घोरमारोदनं मन्ये गते मयि भविष्यति ॥ इक्ष्वाकुकुलनाशश्च नाशश्चैव वनौकसाम् ॥ ३७ ॥
सोहं नैव गमिष्यामि किष्किन्धां नगरीमितः ॥ न[18] च शक्ष्याम्यहं द्रष्टुं सुग्रीवं मैथिलीं विना ॥३८॥
मय्यगच्छति चेहस्थे धर्मात्मानौ महारथौ[19] ॥ आशया तौ धरिष्येते वानराश्च मनस्विनः[20] ॥ ३९ ॥
हस्तादानो मुखादानो नियतो वृक्षमूलिकः[21] ॥ वानप्रस्थो भविष्यामि ह्यदृष्ट्वा[22] जनकात्मजाम् ॥ ४० ॥
सागरानूपजे देशे बहुमूलफलोदके ॥ चितां[23] कृत्वा प्रवेक्ष्यामि समिद्धमरणीसुतम् ॥ ४१ ॥

माह—ममेदमिति ॥ २१—२२ ॥ निवेद्यमाने दोषः स्यादित्येतदुपपादयति—गत्वेत्यादिना ॥ अप्रियमिति च्छेदः ॥ २३ ॥ परुषं श्रवणकटुकं । दारुणं भयंकरं । क्रूरं उग्रं । तीक्ष्णं असह्यम् । इन्द्रियतापनं इन्द्रियक्षोभकं । सीतानिमित्तं सीताविषयं ॥ २४ ॥ पञ्चत्वगतमानसं मरणे कृतनिश्चयं ॥ २५—३२ ॥ मानेन प्रत्युत्थानादिना ॥ ३३ ॥ निरोधेषु गृहादिसंवृतप्रदेशेषु ॥ ३४—३५ ॥ प्रचरिष्यन्ति करिष्यन्तीत्यर्थः । शस्त्रं शस्त्रपतनं ॥ ३६ ॥ आरोदनं आसमन्ताद्रोदनं ॥ ३७—३९ ॥ हस्तादानः हस्तपतितभोजी । मुखादानः मुखपतितभोजी । वृक्षमूलिकः वृक्षमूलवासी ॥ ४० ॥ बहुमूलफलोदक इति स्वरू-

---

कालोचितं किंक्षमं किंवक्तुंयुक्तंभवेदिति भूयोमर्तिं तद्विषयंपक्षंविचारयन्नभूदितिशेषः ॥ १९ ॥ स० सत्यसंधः प्रागितिशेषः । यद्वा मनसासीतांसंबोध्यवदति—सतीति । असंधः अनिष्पन्नस्वप्रतिज्ञः । अथवा अनुवादेन सीतायाअनानयनेप्राणांस्त्यक्ष्यामीतिवादऊह्यः । ततश्च सत्यसन्धइति यथावस्थितमन्वेति ॥ २८ ॥ स० हस्तादानः हस्तेयत्पतितंदैवात् तस्यादा-

[पा०] १ क.—ट. किंवा. २ ङ. झ. ञ. ट. वापिसंगताः. क. च. छ. ज. वामहाबलाः. ३ ङ. झ. ञ. ट. किष्किन्धामनुसंप्राप्तं. ४ क. ग. घ. च. छ. ज. समनुप्राप्तौ. ५ ङ. झ. ञ. ट. परुषंवचः. ६ ङ.—ट. तीक्ष्णंक्रूरमिन्द्रिय. ७ क. घ. शत्रुघ्नोपिमरिष्यति. ८ क. च. छ. ज. वालिनोमृतिंदुःखेन. ९ क. ग. दुःखकर्शिता. १० ङ. झ. ञ. ट. पञ्चत्वमागताराज्ञी. क. च. छ. ज. पञ्चत्वंगताराज्ञी. ११ ङ. झ. ञ., ट. प्यङ्गदस्तस्माद्विजहिष्यतिजीवितं. च. छ. ज. प्यङ्गदोबालस्तस्मात्सनभविष्यति. १२ घ. शोकेन. १३ ख.—ङ. झ. ञ. ट. अभिभूताः. १४ ङ.—ट. कपिनाथेन. १५ च. छ. ज. निरोधेषुचवानराः. १६ क. च. छ. ज. कर्शिताः. १७ ङ.—झ. समेषु. १८ क.—ट. नहि. १९ ग. महाबलौ. २० ङ. झ. ट. तरस्विनः. २१ ख. ग. ङ.—ट. अदृष्ट्वा. २२ ङ. झ. ञ. ट. चितिं. २३ घ. प्रदीप्तं.

उपविष्टस्य वा सम्यग्लिङ्गिनीं[1] साधयिष्यतः ॥ शरीरं भक्षयिष्यन्ति वायसाः श्वापदानि च ॥ ४२ ॥
इदं[2] महर्षिभिर्दृष्टं निर्याणमिति मे मतिः ॥ सम्यगापः प्रवेक्ष्यामि न चेत्पश्यामि जानकीम् ॥ ४३ ॥
सुजातमूला सुभगा कीर्तिमाला यशस्विनी ॥ प्रभग्ना चिररात्रीयं[3] मम सीतामपश्यतः ॥ ४४ ॥
तापसो वा भविष्यामि नियतो वृक्षमूलिकः ॥ नेतः[4] प्रतिगमिष्यामि तामदृष्ट्वाऽसितेक्षणाम्[5] ॥ ४५ ॥
यदीतः[6] प्रतिगच्छामि सीतामनधिगम्य ताम् ॥ अङ्गदः सह[7] तैः सर्वैर्वानरैर्नभविष्यति ॥ ४६ ॥
विनाशे बहवो दोषा जीवन्भद्राणि पश्यति ॥ तस्मात्प्राणान्धरिष्यामि ध्रुवो[8] जीवितसंगमः ॥ ४७ ॥
एवं बहुविधं दुःखं मनसा धारयन्मुहुः[9] ॥ नाध्यगच्छत्तदा पारं शोकस्य कपिकुञ्जरः ॥ ४८ ॥
[ततो[10] विक्रममासाद्य धैर्यवान्कपिकुञ्जरः ॥] रावणं वा वधिष्यामि दशग्रीवं महाबलम्[11] ॥
कामम[12]स्तु हृता सीता प्रत्याचीर्णं भविष्यति ॥ ४९ ॥
अथ[13] वैनं समुत्क्षिप्य उपर्युपरि सागरम् ॥ रामायोपहरिष्यामि पशुं पशुपतेरिव ॥ ५० ॥

पकथनं । अरणीसुतं अरण्युत्पन्नं ॥ ४१ ॥ उपविष्टस्य प्रायोपविष्टस्य । लिङ्गिनीं लिङ्गं संन्यासः अनशनं तद्वती लिङ्गिनी तां । साधयिष्यतः । लिङ्गिनमिति क्वचित्पाठः । तत्र लिङ्गं शरीरं तद्वान् लिङ्गी आत्मा तं साधयिष्यतः । शरीरादात्मानं मोचयिष्यत इत्यर्थः । श्वापदानि श्वापदाः व्याघ्रादयः ॥ ४२ ॥ न चैवमात्मत्यागे दोष इत्याह—इदमिति । निर्याणं मारणं । आपः अपः ॥ ४३ ॥ सुजातमूला । आदौ लङ्काधिदेवताजयेन शोभनप्रारम्भा । सुभगा चन्द्रोदयेन रम्या । कीर्तिमाला मम कीर्तिमयमाला । यशस्विनी हनुमतो लङ्काप्रवेशरात्रिरिति लोके विख्याता । चिररात्री जागरणेन दीर्घभूता रात्रिः । प्रभग्ना समाप्ता । एवं कल्याणीयं रात्रिः सीतामपश्यतो मे व्यर्थैव जातेत्यर्थः । "कृदिकारादक्तिन" इति दीर्घः ॥ ४४ ॥ आत्मत्यागापेक्षया तापसभाव एव ज्यायानित्याह—तापस इति ॥ वाशब्दोऽवधारणे । "वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये" इतिविश्वः ॥ ४५ ॥ मा भूत्सुग्रीवसमीपगमनं अङ्गदादिभिस्संयुज्यतामित्याशङ्क्याह—यदीत इति ॥ ४६ ॥ बहवो दोषाः पूर्वोक्तास्सर्वविनाशादयः । संगमः श्रेयस्संगमः ॥ ४७—४८ ॥ प्रत्याचीर्णं प्रत्याचरितं प्रतिकृतमिति यावत् ॥ ४९ ॥ पशुं पशुपतेरिवेति पशुपतेः अग्नेः ।

नंयस्यसः ॥ ४० ॥ **ति०** लिङ्गिनीमितिपाठे प्राणलिङ्गिनींचितिंचैतन्यमित्यर्थः ॥ **स०** लिङ्गिनंसाधयिष्यतः केवललिङ्गदेहविशिष्टमात्मानंकुर्वतः स्थूलदेहंत्यजतइतियावत् ॥ ४२ ॥ **ति०** सीतामपश्यतोमम यशस्विनी यशस्संपादिका । मृतस्यख्यातिर्यशः । सुजातमूला सुजातकारणवती । कीर्तिरूपामाला । जीवतःसा कीर्तिः । चिररात्रायेत्यव्ययं । चिरायेत्यर्थः । चिरायभग्ना आत्यन्तिकलयंगतेत्यर्थः ॥ **ती०** सुभगा सीतान्वेषणसौकर्यापादकचन्द्रिकयामनोहरा । कीर्तिमाला कीर्तनंकीर्तिः सीतान्वेषणसहकारिणीति सर्वत्रक्रियमाणाकीर्तिरेव मालायस्यास्सा । यशस्विनी हनुमल्लङ्काप्रवेशरात्रिरिति ख्यातिमती । चिररात्रिः चिरकालविशिष्टारात्रिः । दीर्घरात्रिरितियावत् । अनेन रामकार्यसहायेच्छया रात्रिरपिवर्धितवतीत्यवगम्यते ॥ **शि०** चिररात्राय बहुकालंसीतामपश्यतोमम सुजातमूला सुजातं रामसुग्रीवसंबन्धहेतुकवार्ताहरत्वेननिष्पन्नं मूलंयस्यास्सा । सुभगा शोभनैश्वर्यदात्री । यशस्विनी मुद्रिकादानोपलक्षितरामप्रीतिपात्रत्वहेतुकातियशोविशिष्टाकीर्तिमाला प्रभग्ना । अतः तापसः विचारपरः भविष्यामि । तांसीतामदृष्ट्वा इतोनप्रतिगमिष्यामि ॥ श्लोकद्वयमेकान्वयि ॥ **स०** सुजातमूला सद्वंशप्रभवा सुभगा सुन्दरी यशस्विनी या सीता तांचिररात्राय बहुकालमपश्यतोममकीर्तिमालाप्रभग्ना ॥ ४४ ॥ **ति०** एवमगमनेनिश्चिते मरणजीवितयोःकिंश्रेयस्तत्राह—विनाशइति । दोषाबहवःप्रागुक्ताः । चिरंमदगमने सीताविनाशनिश्चयेन रामादयोनस्युरेव । आत्मघातादयश्च । जीवंस्तु ममात्मा भद्रंकंप्राप्नोति वक्ष्यमाणनानाविधोपायाश्रयणेन । तस्मात्प्राणान्धरिष्यामि । यतोमयिजीवतिसति संगमः रामादीनांध्रुवः संभावितइत्यर्थः । काव्यलिङ्गमत्रालङ्कारः ॥ तीर्थस्तु अत्रजीवितसंगमइतिपाठंकल्पयामास । **स०** जीवितसंगमः

[पा०] १ ख. छ.—ञ. सम्यग्लिङ्गिनं. २ क. ग.—ट. इदमप्यृषिभिर्दृष्टं. ३ झ. ञ. ट. चिररात्राय. ४ क. च. छ. ज. नतुप्रति. ५ च. छ. ज. ञ. मदृष्ट्वायतेक्षणां. ६ क. ग. ङ.—ञ. यदितुप्रति. घ. यदिप्रतिगमिष्यामि. ७ ग. ङ. झ. ञ. ट. सहितस्सर्वैः. क. घ. च. छ. ज. सहितैः. ८ ङ. झ. ञ. ट. जीवन्प्राप्नोतिभद्रकं. ९ ग. घ. च. छ. ज. त्प्राणान्हिरक्ष्यामो. १० ख. झ. ञ. ट. ध्रुवोजीवति. क. ध्रुवंजीवति. ठ. श्रेयोजीवितसंगमः. ११ ङ. झ. ट. धारयन्बहु. १२ इदमर्धं ङ.—ट. पाठेषुदृश्यते. १३ क. घ. च. छ. ज. ञ. रामपत्नीहतायेनप्रत्याचीर्णं. १४ ख. घ. ञ. अथचैनं.

इति चिन्तां[1] समापन्नः सीतामनधिगम्य ताम् ॥ ध्यानशोकपरीतात्मा चिन्तयामास वानरः ॥ ५१ ॥
यावत्सीतां[2] हि पश्यामि रामपत्नीं यशस्विनीम् ॥ तावदेतां पुरीं लङ्कां विचिनोमि पुनःपुनः ॥५२॥
संपातिवचनाच्चापि रामं यद्यानयाम्यहम् ॥ अपश्यन्नाघवो भार्यां निर्दहेत्सर्ववानरान् ॥ ५३ ॥
इहैव नियताहारो वत्स्यामि नियतेन्द्रियः ॥ न मत्कृते विनश्येयुः सर्वे ते नरवानराः ॥ ५४ ॥
अशोकवनिका[3] चेयं दृश्यते या महाद्रुमा ॥ इमां[4]मधिगमिष्यामि न हीयं विचिता मया ॥ ५५ ॥
वसुरुद्रांस्तथाऽऽदित्यानश्विनौ मरुतोपि[5] च ॥ नमस्कृत्वा गमिष्यामि रक्षसां शोकवर्धनः ॥ ५६ ॥
जित्वा तु राक्षसान्सर्वानिक्ष्वाकुकुलनन्दिनीम्[6] ॥ संप्रदास्यामि रामाय यथा सिद्धिं[7] तपस्विने ॥५७॥
स मुहूर्तमिव ध्यात्वा चिन्ताव्यथितेन्द्रियः[8] ॥ उदतिष्ठन्महातेजा हनूमान्मारुतात्मजः[9] ॥ ५८ ॥

नमोस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै ॥
नमोस्तु रुद्रेन्द्रयमानिलेभ्यो नमोस्तु[10] चन्द्रार्कमरुद्गणेभ्यः ॥ ५९ ॥

स[11] तेभ्यस्तु नमस्कृत्य[12] सुग्रीवाय च मारुतिः ॥ दिशः सर्वाः समालोक्य[13] सोशोकवनिकां प्रति ॥६०॥
स गत्वा मनसा पूर्वमशोकवनिकां शुभाम् ॥ उत्तरं चिन्तयामास वानरो मारुतात्मजः ॥ ६१ ॥
ध्रुवं तु रक्षोबहुला भविष्यति वनाकुला ॥ अशोकवनिका चिन्त्या[14] सर्वसंस्कारसंस्कृता ॥ ६२ ॥
रक्षिणश्चात्र विहिता नूनं रक्षन्ति पादपान् ॥ भगवानपि सर्वात्मा[15] नातिक्षोभं प्रवाति[16] वै ॥ ६३ ॥

पशुं अजमिव । " इमं पशुं पशुपते ते अद्य बध्नाम्यग्ने " इति श्रुतेः । अनेन सुप्रापत्वमुक्तं ॥ ५० ॥ प्रथमं चिन्ता विचारः । ततो ध्यानं ज्ञातव्यविषयनिरंतरप्रत्ययः । ततश्चिन्तेति दुरन्तचिन्तोच्यते ॥५१॥ चिन्ताप्रकारमाह—यावदिति ॥ ५२ ॥ यदि पूर्वमेव संपातिवचनप्रामाण्येन रामोत्रानीयेत तदा महान्प्रमादः स्यादित्याह—संपातीति ॥ ५३—५६ ॥ सिद्धिं तपःफलं ॥ ५७—५८ ॥ " सर्वान्देवान्नमस्यन्ति रामस्यार्थे यशस्विनः " इत्युक्तरीत्या अभिमतलाभत्वरया सर्वान्नमस्करोति—नमोस्त्विति॥५९॥ स तेभ्यस्त्वित्यादिश्लोकद्वयमेकान्वयं ॥ नमस्कृत्यालोकनरूपक्रियाभेदात्तच्छब्दद्वयं । नमस्कृत्य अशोकवनिकां प्रति उद्दिश्य सर्वा दिशस्समालोक्य अशोकवनिकां परिच्छेत्तुं तस्यास्सर्वा दिशो दृष्ट्वा तां स मनसा गत्वा उत्तरं चिन्तयामासेति योजना । अशोकशब्दः संक्षेपेव्याख्यातः ॥ ६०—६१ ॥ रक्षोबहुला रक्षकराक्षसबहुला । वनाकुला जलावृता द्रुमषण्डमण्डिता वा । सर्वसंस्कारैः कर्षणतृणनिरसनादिभिः संस्कृता कृतातिशयाधाना । अशोकवनिका ध्रुवं चिन्त्या भविष्यति । अवश्यमन्वेषणीया भवेदित्यर्थः ॥ ६२ ॥ अत्र अशोकवनिकायां । विहिताः नियुक्ताः । सर्वात्मा सर्वमाप्नोतीति सर्वात्मा वायुः । सोपि नातिक्षोभं प्रवाति । अतिकम्पनपूर्वकं नात्र संचरतीत्यर्थः ॥६३॥

जीवितेनसंगमः श्रेयः श्रेयस्साधनं ॥ ४७ ॥ **ति०** चिन्तया विग्रथितानि संबद्धानि व्याकुलानि इन्द्रियाणियस्यसः ॥ ५८ ॥ **ती०** सुग्रीवायचेत्यत्र नमश्चक्रइति करोतेर्विपरिणामः । अशोकवनिकांगतः मनसेतिशेषः ॥ अशोकवनिकांप्रतीतिपाठे समालोकयदित्यालोकयतेर्विपरिणामः । अन्यथा तच्छब्दोतिरिच्यते ॥ **ति०** स्वामित्वात्सूर्यांशत्वाच्च सुग्रीवनतिः ॥ **ति०** अत्र

[पा०] १ क. ग. ङ. च. झ. ञ. ट. चिन्तासमापन्नः. २ क. ख. ङ. झ. ञ. ट. त्सीतांन. ग. च. छ. ज. त्सीतांतु. ३ क.—ट. चापिमहतीयंमहाद्रुमा. ४ ख. इमाममि. ५ क. ग.—ट. वसून्रुद्रान्. ६ क. ञ. मरुतोपिवा. ७ क. ग.—ट. राक्षसान्देवीमिक्ष्वाकु. ८ घ.—ट. सिद्धीमिव. क. खसिद्धिमिवयोगिने. ९ क. ग. चिन्तयाग्रथिते. ख. ङ.—ट. चिन्ताविग्रथिते. १० क. ग. ङ.—ट. न्महाबाहुः. ११ ग. घ. नमश्च. १२ ङ. झ. ञ. ट. चन्द्राग्नि. १३ ग. इतितेभ्योऽञ्जलिंकृत्वा. क. इतितेभ्यो. ञ. सतुतेभ्यो. १४ क. ख. ङ.—झ. ट. नमस्कृत्वा. १५ च. छ. ज. ञ. सोशोकवनिकांगतः. ख. घ. ङ. झ. ट. सोशोकवनिकांप्रति. १६ ङ.—ट. पुण्या. १७ ङ.—ट. विश्वात्मा. १८ घ. ञ. ट. प्रवात्यसौ. ख. झ. प्रवायति.

संक्षिप्तोऽयं मयाऽऽत्मा च रामार्थे रावणस्य च ॥ [1]सिद्धिं मे संविधास्यन्ति देवाः सर्षिगणास्त्विह ॥६४॥
ब्रह्मा स्वयंभूर्भगवान्[2]देवाश्चैव दिशन्तु मे ॥ सिद्धिमग्निश्च वायुश्च पुरुहूतश्च वज्रभृत् ॥ ६५ ॥
वरुणः पाशहस्तश्च सोमादित्यौ तथैव च ॥ अश्विनौ च महात्मानौ मरुतः [3]शर्व एव च ॥ ६६ ॥
सिद्धिं सर्वाणि भूतानि भूतानां चैव यः प्रभुः ॥ [4]दास्यन्ति मम [5]ये चान्ये ह्यदृष्टाः पथिगोचराः ॥ ६७ ॥
तदुन्नसं [6]पाण्डुरदन्तमव्रणं शुचिस्मितं पद्मपलाशलोचनम् ॥
द्रक्ष्ये तदार्यावदनं कदान्वहं प्रसन्नताराधिपतुल्यदर्शनम् ॥ ६८ ॥
क्षुद्रेण [7]पापेन [8]नृशंसकर्मणा सुदारुणालङ्कृतवेषधारिणा ॥
बलाभिभूता ह्यबला तपस्विनी कथं नु मे दृष्टिपथेऽद्य सा भवेत् ॥ ६९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

चतुर्दशः सर्गः ॥ १४ ॥

अशोकवनिकाप्राकारावस्थानेन वनरामणीयकावलोकनपूर्वकं वनंप्रविष्टेन शाखाचालनात्पुष्पादिशातनेन वृक्षाद्वृक्षान्तरोत्प्लवनेन सर्वतः सीतांचिन्वताहनुमता मध्येवनं काञ्चनवेदिकामण्डलमध्यवर्तिन्याः काञ्चनवृक्षपरिवृतायाः कस्याश्चित्काञ्चनमयशिंशुपाया दर्शनं ॥ १ ॥ तद्देशे रमणीयतरनदीप्रति सन्ध्योपास्त्याद्यर्थं सीतायाआगमनसंभावनेन तद्दिदृक्षया शिंशुपारोहणेन पर्णनिबिडविटपाग्रे निलीयावस्थानं ॥ २ ॥

स मुहूर्तमिव ध्यात्वा मनसा चाधिगम्य ताम् ॥ [9]अवप्लुतो महातेजाः प्राकारं तस्य वेश्मनः ॥ १ ॥
स तु संहृष्टसर्वाङ्गः प्राकारस्थो महाकपिः ॥ पुष्पिताग्रान्वसन्तादौ ददर्श विविधान्द्रुमान् ॥ २ ॥

एवंभूतप्रदेशे भवतः कथं गमनमित्याशङ्क्याह—संक्षिप्त इति ॥ मया अयमात्मा देहः । रामार्थे रामप्रयोजनसिद्ध्यर्थं । रावणस्य चार्थे रावणादृश्यत्वार्थं च । संक्षिप्तः अल्पीकृतः । एवं मया कार्यानुकूलो यत्नः कृतः कार्यसिद्धिं तु देवा विधास्यन्तीत्याह—सिद्धिमिति । संविधास्यन्ति ददत्वित्यर्थः ॥६४—६५॥ शर्वः रुद्रः ॥ ६६ ॥ उक्तमर्थं पुनः संग्रहेणाह—सिद्धिं सर्वाणि भूतानीति ॥ भूतानां प्रभुः उक्तब्रह्मरुद्राद्यधिपतिः । परिशेषाद्विष्णुरित्यवगम्यते । पन्थानो गोचरः येषां ते पथिगोचराः मार्गवर्तिनः ॥ ६७ ॥ तत् तस्मात्कारणात् । उन्नता नासिका यस्य तदुन्नसं । "उपसर्गाच्च" इति समासान्तोचूप्रत्ययः नसादेशश्च । अव्रणं अनवद्यं । तत् अभिज्ञातव्यत्वेन रामेण निवेदितं ॥ ६८ ॥ सुदारुणालंकृतवेषधारिणा सुदारुणत्वेऽप्यापातप्रसन्नवेषधारिणा ॥ ६९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रयोदशः सर्गः ॥ १३ ॥

इवशब्दो वाक्यालंकारे । प्राकारं अशोकवनिकाप्राकारं । तस्य वेश्मनः रावणस्य गृहात् । अवप्लुतः प्राप्तः ॥ १ ॥ संहृष्टसर्वाङ्गः पुलकितसर्वाङ्गः ।

ध्रुवंरक्षोबहुलेत्युत्प्रेक्षया चन्द्रास्तःसूचितः । अन्यथा तत्प्रकाशेन निश्चयएवस्यात् ॥ ६२ ॥ **शि०** रामार्थेरावणस्यवनिकायां अयंममात्मादेहःसंक्षिप्तः प्रवेशितः । मेसिद्धिंतु सर्षिगणादेवादिशंतु । किंच संक्षिप्तशब्दस्यलघूकृतइत्यर्थः । रावणस्य समासघटकीभूतार्थेन्वयः । सविशेषणानामित्यस्यतु नविषयः । अर्थस्यविशेष्यत्वात् । रावणसंबद्धार्थशब्दस्यविनाशपरत्वं । वनिकानिरीक्षणार्थमित्यध्याहारोवा ॥ **ति०** रावणस्य अर्थेइत्यनुकर्षः । रावणकर्तृकदर्शनपरिहारायेत्यर्थः ॥ ६४ ॥ **ति०** भूतानांप्रभुः प्रजापतिः । दास्यन्ति । तेषामप्यस्यार्थस्येष्टत्वादितिभावः । पूर्वप्रार्थना इदानींतु तन्निश्चयः ॥ ६७ ॥ इतित्रयोदशः सर्गः ॥१३॥

स० मुहूर्तमिवध्यात्वा मुहूर्तंध्यात्वेव ॥ १ ॥ **शि०** वसन्तादौचैत्रे । किंच वसन्तआदीयते नित्यंप्रतीयते यस्यांतस्यांभूमौ ॥

[**पा०**] १ ङ. झ. ट. सिद्धिंदिशन्तुमेसर्वे. क. कार्यसिद्धिंप्रयच्छन्ति. २ ङ. झ. ञ. ट. न्देवाश्चैवतपस्विनः. क. च. छ. ज. न्वेदाश्चैव. ३ क. सोमसूर्यौ. ख. इन्द्रादित्यौ. ४ झ. ञ. सर्वएवच. ५ क. ग. च. छ. ज. दास्यन्तिसिद्धिं. ६ ग. च. छ. ज. येचान्येभूताश्च. घ. ङ. झ. ञ. येचान्येप्यदृष्टाः. ७ क. च. छ. ज. समुन्नसं. ८ ङ. झ. ञ. तुल्यवर्चसं. ९ ङ.—ट हीनेन. १० नृशंसमूर्तिना. ११ क. अवप्लुत्य.

सालानशोकान्भव्यांश्च चम्पकांश्च सुपुष्पितान् ॥ उद्दालकान्नागवृक्षांश्चूतान्कपिमुखानपि ॥ ३ ॥
अथाम्रवणसंछन्नां लताशतसमावृताम् ॥ ज्यामुक्त इव नाराचः पुप्लुवे वृक्षवाटिकाम् ॥ ४ ॥
स प्रविश्य विचित्रां तां विहंगैरभिनादिताम् ॥ राजतैः काञ्चनैश्चैव पादपैः सर्वतो वृताम् ॥ ५ ॥
विहगैर्मृगसङ्घैश्च विचित्रां चित्रकाननाम् ॥ उदितादित्यसंकाशां ददर्श हनुमान्कपिः ॥ ६ ॥
वृतां नानाविधैर्वृक्षैः पुष्पोपगफलोपगैः ॥ कोकिलैर्भृङ्गराजैश्च मत्तैर्नित्यनिषेविताम् ॥ ७ ॥
प्रहृष्टमनुजे काले मृगपक्षिसमाकुले ॥ मत्तबर्हिणसंघुष्टां नानाद्विजगणायुताम् ॥ ८ ॥
मार्गमाणो वरारोहां राजपुत्रीमनिन्दिताम् ॥ सुखप्रसुप्तान्विहगान्बोधयामास वानरः ॥ ९ ॥
उत्पतद्भिर्द्विजगणैः पक्षैः सालाः समाहताः ॥ अनेकवर्णा विविधा मुमुचुः पुष्पवृष्टयः ॥ १० ॥
पुष्पावकीर्णः शुशुभे हनुमान्मारुतात्मजः ॥ अशोकवनिकामध्ये यथा पुष्पमयो गिरिः ॥ ११ ॥
दिशः सर्वाः प्रधावन्तं वृक्षषण्डगतं कपिम् ॥ दृष्ट्वा सर्वाणि भूतानि वसन्त इति मेनिरे ॥ १२ ॥
वृक्षेभ्यः पतितैः पुष्पैरवकीर्णा पृथग्विधैः ॥ रराज वसुधा तत्र प्रमदेव विभूषिता ॥ १३ ॥
तरस्विना ते तरवस्तरसाऽभिप्रकम्पिताः ॥ कुसुमानि विचित्राणि ससृजुः कपिना तदा ॥ १४ ॥
निर्धूतपत्रशिखराः शीर्णपुष्पफलद्रुमाः ॥ निक्षिप्तवस्त्राभरणा धूर्ता इव पराजिताः ॥ १५ ॥
हनूमता वेगवता कम्पितास्ते नगोत्तमाः ॥ पुष्पपर्णफलान्याशु मुमुचुः पुष्पशालिनः ॥ १६ ॥
विहङ्गसङ्घैर्हीनास्ते स्कन्धमात्राश्रया द्रुमाः ॥ बभूवुरगमाः सर्वे मारुतेनेव निर्धुताः ॥ १७ ॥
निर्धूतकेशी युवतिर्यथा मृदितवर्णका ॥ निष्पीतशुभदन्तोष्ठी नखैर्दन्तैश्च विक्षता ॥ १८ ॥

वसन्तादौ " पौर्णमास्या मासान् संपाद्य " इति पक्षमनुसृत्य फाल्गुनपौर्णमासीप्रपूर्वदिनत्वेन वसन्तादावित्युक्तं ॥ २ ॥ सालान् सर्जकान् । भव्यान् शुभानित्यशोकविशेषणं । यद्वा भवं रुद्रमर्हन्तीति भव्यान् रुद्रप्रियपुष्पान् वृक्षविशेषान् । उद्दालकान् बहुवारकान् । नागवृक्षान् नागकेसरवृक्षान् । कपिमुखान् मर्कटकान् ॥ ३—४ ॥ काञ्चनैः काञ्चनमयैरिव स्थितैः ॥ ५ ॥ चित्रकाननां चित्रावान्तरवनां । चम्पकवनं चूतवनमित्येवंविधवनवतीं ॥ ६ ॥ पुष्पाण्युपगच्छन्तीति पुष्पोपगाः पुष्पसंपन्नाः तैः । फलोपगैः फलसंपन्नैः ॥ ७ ॥ प्रहृष्टमनुजे काले वसन्ते । वसन्तस्य प्रचुरमन्मथत्वात्प्रहृष्टमनुजत्वं ॥ ८—९ ॥ सालाः वृक्षाः । " अनोकहः कुटस्सालः " इत्यमरः । पुष्पवृष्टयः पुष्पवृष्टीः ॥ १०—१४ ॥ धूर्ताः अक्षधूर्ताः ॥ १५—१६ ॥ स्कन्धमात्राश्रयाः पुष्पादीनामनाश्रयाइत्यर्थः । अतएव अगमाः अगम्याः असेव्या इत्यर्थः । निर्धुताः कम्पिताः ॥ १७ ॥ मृदितवर्णका मृष्टाङ्गरागा । "अङ्गरा-

ति० वसन्तादौ वसन्तादिसर्वर्तुषु संनिहितैःपुष्पैःपुष्पिताम्रान् ॥ २ ॥ ति० कपिमुखान् कपिमुखाकारफलवतः । चूतविशेषणमेतत् ॥ ३ ॥ राजतैः रजतादिसंस्कृतैस्तद्वर्णैर्वा ॥ ५ ॥ ति० उदितादित्यसंकाशां पुष्पैरितिशेषः ॥ ६ ॥ ति० काले सर्वस्मिन् । मृगादीन्मदेनाकुलयति तां ॥ ७ ॥ ति० सर्वाभिधावन्तमिति संधिरार्षः । वसन्तइतिमेनिरइति अन्यस्येहवनेऽशक्यप्रवेशत्वाद्वसन्तएव वृक्षसंचारोचितंकपिरूपमास्थाय चरतीतिमेनिरइत्यर्थः । एतेन द्रष्टृणांतस्मिन्विमतिनिवृत्तिरीश्वरानुग्रहादिति सूचितं ॥ स० वसन्तइतिमेनिरे सर्ववृक्षपत्रादिशातनात् ' वसन्तेसर्वसस्यानां जायतेपत्रशातनं ' इतिवचनात् पुष्पावकीर्णइत्युक्तिस्वारस्यात् ॥ १२ ॥ ति० निपीतः शुभदन्तयुक्तओष्ठोयस्यास्सा । स० निष्पीताः अत्यन्तमन्तर्गमिताः आच्छादिताइति

[पा०] १ ख. झ. ञ. ट. तथाम्रवणसंपन्नाँल्लताशतसमन्वितान्. ङ. च. छ. ज. तथाम्रवणसंछन्नाँल्लतागृहसमावृतान्. २ ङ. च. ञ. ट. विहङ्गैः. ३ ङ. झ. ञ. ट. हनुमान्बली. ४ ङ. झ. प्रहृष्टमनुजां. ५ घ. बहुपक्षि. ख. मृगद्विजमदाकुलां. ६ ञ. समाकुलां, क. मदाकुले. ङ. झ. ट. मदाकुलां. ७ ङ. झ. ट. पक्षैर्वातैः. ८ ञ. समावृताः. ९ च. छ. ज. ञ. सर्वादिशोऽभि. धावन्तं. ख. ग. सर्वादिशोविधावन्तं. घ. ङ. झ. ट. दिशः सर्वाभिधावन्तं. १० ग. सुभूषिता. ११ ङ. झ. ट. स्तरसाबहुकंपिताः. घ. स्तरसाहिप्रकंपिताः. १२ क. च. छ. ज. कपिनोद्धताः. १३ ग. जीर्णपत्रफल. ञ. शीर्णपत्र. १४ ङ. झ. ट. पुष्पपत्र. १५ ग. घ. ङ. झ. ञ. ट. विधूत. १६ ङ. झ. ञ. ट. निपीत.

तथा लाङ्गूलहस्तैश्च चरणाभ्यां च मर्दिता ॥ वैभूवाशोकवनिका प्रभग्नवरपादपा ॥ १९ ॥
महालतानां दामानि व्यधमत्तरसा कपिः ॥ यथा प्रावृषि विन्ध्यस्य मेघजालानि मारुतः ॥ २० ॥
स तत्र मणिभूमीश्च राजतीश्च मनोरमाः ॥ तथा काञ्चनभूमीश्च ददर्श विचरन्कपिः ॥ २१ ॥
वापीश्च विविधाकाराः पूर्णाः परमवारिणा ॥ महार्हैर्मणिसोपानैरुपपन्नास्ततस्ततः ॥ २२ ॥
मुक्ताप्रवालसिकताः स्फाटिकान्तरकुट्टिमाः ॥ काञ्चनैस्तरुभिश्चित्रैस्तीरजैरुपशोभिताः ॥ २३ ॥
फुल्लपद्मोत्पलवनाश्चक्रवाकोपकूजिताः ॥ नत्यूहरुतसंघुष्टा हंससारसनादिताः ॥ २४ ॥
दीर्घाभिर्द्रुमयुक्ताभिः सरिद्भिश्च समन्ततः ॥ अमृतोपमतोयाभिः शिवाभिरुपसंस्कृताः ॥ २५ ॥
लताशतैरवततास्सन्तानकसमावृताः ॥ नानागुल्मावृतघनाः करवीरकृतान्तराः ॥ २६ ॥
ततोऽम्बुधरसंकाशं प्रवृद्धशिखरं गिरिम् ॥ विचित्रकूटं कूटैश्च सर्वतः परिवारितम् ॥ २७ ॥
शिलागृहैरवततं नानावृक्षैः समावृतम् ॥ ददर्श हरिशार्दूलो रम्यं जगति पर्वतम् ॥ २८ ॥
ददर्श च नगात्तस्मान्नदीं निपतितां कपिः ॥ अङ्कादिव समुत्पत्य प्रियस्य पतितां प्रियाम् ॥ २९ ॥
जले निपतिताग्रैश्च पादपैरुपशोभिताम् ॥ वार्यमाणामिव क्रुद्धां प्रमदां प्रियबन्धुभिः ॥ ३० ॥
पुनरावृत्ततोयां च ददर्श स महाकपिः ॥ प्रसन्नामिव कान्तस्य कान्तां पुनरुपस्थिताम् ॥ ३१ ॥
तस्यादूरात्स पद्मिन्यो नानाद्विजगणायुताः ॥ ददर्श हरिशार्दूलो हनुमान्मारुतात्मजः ॥ ३२ ॥
कृत्रिमां दीर्घिकां चापि पूर्णां शीतेन वारिणा ॥ मणिप्रवरसोपानां मुक्तासिकतशोभिताम् ॥ ३३ ॥
विविधैर्मृगसङ्घैश्च विचित्रां चित्रकाननाम् ॥ प्रासादैः सुमहद्भिश्च निर्मितैर्विश्वकर्मणा ॥ ३४ ॥
काननैः कृत्रिमैश्चापि सर्वतः समलङ्कृताम् ॥ ३५ ॥
ये केचित्पादपास्तत्र पुष्पोपगफलोपगाः ॥ सच्छत्राः सवितर्दीकाः सर्वे सौवर्णवेदिकाः ॥ ३६ ॥

गस्समालम्भो वर्णकश्च विलेपनं " इत्युक्तेः । निष्पीतशुभदन्तोष्ठी निष्पीततयाशुभदन्ततुल्योष्ठी ॥ १८—१९ ॥ लतानां दामानि प्रतानानि ॥ २०—२३ ॥ नत्यूहाः दात्यूहाः ॥ २४—२५ ॥ संतानकाः कल्पवृक्षास्तैस्समावृताः । घनाः निबिडाः । नानागुल्मावृताश्च ताः घनाश्चेति समासः । करवीरकृतान्तराः करवीरैः कृतविशेषाः ॥ २६—२७ ॥ जगति लोके । रम्यं एतत्सदृशं रम्यं किंचिन्नास्तीत्यर्थः । पर्वतं ददर्शेत्यन्वयः ॥ २८ ॥ अथ नद्याः कुपितया निर्गतया सखीसान्त्वनेन पुनरागतया साम्यं दर्शयति —ददर्श चेति ॥ २९—३० ॥ पुनरावृत्ततोयां वृक्षाग्रप्रतिहत्या पुनःपर्वताभिमुखतोयप्रवाहां । उपमाने उपमेये चान्वयाय ददर्शेति पदद्वयं ॥ ३१ ॥ तस्य पर्वतस्य । पद्मिन्यः पद्मिनीः ॥ ३२ ॥ कृत्रिमां क्रियया निर्वृत्तां निर्मितामित्यर्थः ॥ ३३—३५ ॥ सच्छत्राः सवितानाइत्यर्थः । सवितर्दिकाः सवेदिकाः । सौवर्णवेदिकाः वितर्दिकारोहणार्थं सुवर्णमयसोपान-

---

यावत् । शुभदन्ता याभ्यांतौ ओष्ठौयस्यास्सा ॥ १८ ॥ **रामानु०** जगतिपर्वतं । जगतीशब्दस्यहस्वभावआर्षः । जगती भूमिः मृदितियावत् । तत्प्राधान्याज्जगतिपर्वतमित्युक्तं । यद्वा जगतिपर्वतइतिसंज्ञा ॥ **ति०** जगति लोकेरम्यं सुन्दरवस्तुभ्योपि परमसुन्दरं । तीर्थस्तु—जगतीपर्वतमित्यर्थः । मृत्पर्वतइतियावदितिव्याचक्षाण उपेक्ष्यएव । **शि०** पर्वतं पर्वभिः अनेकग्रन्थिभिः

[**पा०**] १ च.—ञ. हस्तैस्तु. २ ङ. झ. ञ. ट. तयैवाशोक. ३ ख. ङ. च. झ. ञ. ट. वनपादपा. ४ ङ. झ. ञ. ट. प्रावृषिवेगेन. च. छ. ज. प्रावृष्प्रवृद्धानि. ५ ख. ग. ङ. ञ. ट. विचरन्ददृशेकपिः. ६ ग. घ. ङ. झ. ञ. ट. बुद्धपद्मोत्पल. ७ ङ.—ट. श्रक्रवाकोपशोभिताः. ८ ख. छ. ज. शुभाभिः. ९ क. रुपसंवृताः. घ. रभिसंस्कृताः. १० क.—घ. च. छ. ज. संतानकसमावृताः. ११ क. ग.—ट. वनाः. १२ ङ. झ. ञ. ट. वृक्षसमावृतं. १३ क. रजतपर्वतं. १४ घ. तोयांतां. १५ क. अदूरात्तत्र. १६ क. च. छ. ज. गणावृताः. १७ ङ.—ज. वापि. १८ ख. ञ. निर्मितांविश्व.

[1]लताप्रतानैर्बहुभिः पर्णैश्च बहुभिर्वृताम् ॥ काञ्चनीं शिंशुपामेकां ददर्श [3]हनुमान्कपिः ॥
वृतां [3]हेममयीभिस्तु वेदिकाभिः समन्ततः ॥ ३७ ॥
सोपश्यद्भूमिभागांश्च [5]गर्तप्रस्रवणानि च ॥ सुवर्णवृक्षानपरान्ददर्श शिखिसन्निभान् ॥ ३८ ॥
तेषां द्रुमाणां प्रभया मेरोरिव दिवाकरः ॥ अमन्यत तदा वीरः काञ्चनोस्मीति वानरः ॥ ३९ ॥
तां काञ्चनैस्तरुगणैर्मारुतेन च वीजिताम् ॥ किङ्किणीशतनिर्घोषां दृष्ट्वा विस्मयमागमत् ॥ ४० ॥
स पुष्पिताग्रां [9]रुचिरां तरुणाङ्कुरपल्लवाम् ॥ तामारुह्य [11]महाबाहुः शिंशुपां पर्णसंवृताम् ॥ ४१ ॥
इतो द्रक्ष्यामि वैदेहीं रामदर्शनलालसाम् ॥ इतश्चेतश्च दुःखार्तां [12]संपतन्तीं यदृच्छया ॥ ४२ ॥
अशोकवनिका चेयं दृढं रम्या दुरात्मनः ॥ [13]चम्पकैश्चन्दनैश्चापि बकुलैश्च विभूषिता ॥ ४३ ॥
इयं च नलिनी रम्या द्विजसङ्घनिषेविता ॥ इमां सा [15]राममहिषी नूनमेष्यति जानकी ॥ ४४ ॥
सा रामा [15]राममहिषी राघवस्य प्रिया [16]सती ॥ वनसंचारकुशला [17]नूनमेष्यति जानकी ॥ ४५ ॥
अथवा मृगशावाक्षी वनस्यास्य विचक्षणा ॥ वनमेष्यति [18]सार्येह रामचिन्तानुकर्शिता ॥ ४६ ॥
रामशोकाभिसंतप्ता सा देवी वामलोचना ॥ [20]वनवासे रता नित्यमेष्यते वनचारिणी ॥ ४७ ॥
वनेचराणां सततं नूनं स्पृहयते [21]पुरा ॥ रामस्य दयिता [22]भार्या जनकस्य सुता सती ॥ ४८ ॥
संध्याकालमनाः श्यामा [23]ध्रुवमेष्यति [24]जानकी ॥ नदीं चेमां [25]शिवजलां सन्ध्यार्थे वरवर्णिनी ॥४९॥
तस्याश्चाप्यनुरूपेयमशोकवनिका शुभा ॥ शुभा या पार्थिवेन्द्रस्य पत्नी रामस्य संमता ॥ ५० ॥
यदि जीवति सा देवी ताराधिपनिभानना ॥ आगमिष्यति साऽवश्यमिमां [26]शिवजलां नदीम् ॥५१॥

वेदिकायुक्ताः ॥ ३६—३९ ॥ काञ्चनैस्तरुगणैः उपलक्षितां तां शिंशुपां । किङ्किणीशतनिर्घोषां किङ्किण्यः क्षुद्रघण्टिकाः तासां निर्घोषो यस्याः । यद्वा किङ्किणीभिः शतमनन्ताः निर्घोषा यस्याः सा तां ॥ ४० ॥ स पुष्पिताग्रामित्याद्यासर्गसमाप्त्येकं वाक्यं ॥ ४१ ॥ इतो द्रक्ष्यामि इमामारुह्य द्रक्ष्यामि । ल्यब्लोपे पञ्चमी ॥ ४२ ॥ दुरात्मनः रावणस्य ॥ ४३—४५ ॥ अथवेति पक्षान्तरे । विचक्षणा तापापनोदनचतुरा । अस्य वनस्य अशोकवनस्य । इह वनं नलिनीपरिसरवर्तिवनं । रामचिन्तानुकर्शिता सती एष्यति । रामविश्लेषजनिततापापनोदनार्थमेतद्वनप्रदेशमागमिष्यतीत्यर्थः । सा आर्येतिपदच्छेदः ॥ ४६ ॥ एष्यते एष्यति ॥ ४७ ॥ वनेचराणां स्पृहयते वनेचरेभ्यस्स्पृहयते ॥ ४८ ॥ संध्याकाले मनः यस्यास्सा संध्याकालमनाः संध्योपासनतत्परेत्यर्थः । संध्यार्थे एष्यति प्रतिदिनमितिशेषः ॥ ४९—५१ ॥

तन्यतेवर्ध्यते सतं ॥ २८ ॥ शि० मेरोरिव द्रुमाणांप्रभयोपलक्षितोमहाकपिः अहंकाञ्चनोस्मीत्यमन्यत ॥ ३९ ॥ ति० सन्ध्यादिनरात्र्योःसन्धिरूपानुष्ठानकालोयस्यकर्मणस्तत्रमनोयस्यास्सातथा । सन्ध्यार्थे सन्ध्याकालक्रियमाणस्नानाद्यर्थे । पूर्ववदेवात्राप्युक्तस्यैवार्थस्यावृत्तिः । रात्रिशेषे हनुमतोस्यवचसःप्रवृत्तेः सन्ध्याशब्देनात्रप्रातःकालोविवक्षितः । तत्रकर्तव्यस्नानादौचास्त्रेवस्त्रीणामप्यधिकारइति कथंस्त्रीणांसन्ध्यावन्दनमितिपरास्तंवेदितव्यं । किंच सम्यग्भगवज्ज्ञानस्यैव सन्ध्यापदार्थत्वेनास्त्येव तत्रस्त्रियाअधिकारः । गायत्रीमन्त्रेण तदर्थस्मरणपूर्वकध्यानेतु द्विजस्यैवाधिकारइत्यन्यत् ॥ ४९ ॥ इतिचतुर्दशः सर्गः ॥ १४ ॥

[पा०] १ घ. च. छ. ज. लताविताने:. २ क. ङ.—ट. समहाकपिः. ३ च. हेममयीभिश्च. ४ ङ. झ. ञ. ट. नगप्रस्रवणानिच. ५ घ. गिरिसंनिभान्. ६ क. घ. ङ. ट. महाकपिः. ७ ङ. झ. ट. सर्वतः. ८ ग. ङ. झ. ञ. ट. तान्काञ्चनान्वृक्षगणान्मारुतेनप्रकंपितान् । किङ्किणीशतनिर्घोषान्दृष्ट्वा. ९ क. च. छ. ज. मागतः. १० क. च. छ. ज. हनुमांस्तरुणाङ्कुर. ११ क. ग.—ट. महावेगः. १२ झ. ञ. संतपन्तीं. १३ ग. ङ.—ट. चन्दनैश्चंपकैश्चापि. १४ क. ख. ग. ङ. च. छ. झ. ञ. ट. राजमहिषी. १५ ङ.—ट. राजमहिषी. १६ ख.—ङ. ञ. ट. सदा. १७ घ.—ट. ध्रुवं. १८ ङ. झ. ञ. ट. साद्येह. घ. साध्वीह. १९ ङ.—ट. सुकर्शिता. २० ख.—ट. वनवासरता. २१ क. सदा. २२ ङ. झ. ञ. चार्या. २३ क. नूनं. २४ ग. मैथिली. २५ ख. घ.—ट. शुभजलां. क. शीतजलां. २६ ख. ग. ङ.—ट, शीतजलां.

एवं तु मत्वा हनुमान्महात्मा प्रतीक्षमाणो मनुजेन्द्रपत्नीम् ॥
अवेक्षमाणश्च ददर्श सर्वं सुपुष्पिते पर्णघने निलीनः ॥ ५२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

पञ्चदशः सर्गः ॥ १५ ॥

शिंशुपाविटपाग्रावस्थानेनैव सर्वतश्चक्षुषीचालयताहनुमताऽत्यद्भुताकारचैत्यप्रासादगताया ग्रन्थकृदुपवर्णितगुणावस्थोपलक्षितायाःसीतायाअवलोकनं ॥ १ ॥ अथबहुहेतुभिस्तस्याःसीतात्वनिर्धारणं ॥ २ ॥

सं वीक्षमाणस्तत्रस्थो मार्गमाणश्च मैथिलीम् ॥ अवेक्षमाणश्च महीं सर्वां तामन्ववैक्षत ॥ १ ॥
सन्तानकलताभिश्च पादपैरुपशोभिताम् ॥ दिव्यगन्धरसोपेतां सर्वतः समलङ्कृताम् ॥ २ ॥
तां स नन्दनसंकाशां मृगपक्षिभिरावृताम् ॥ हर्म्यप्रासादसंबाधां कोकिलाकुलनिस्वनाम् ॥ ३ ॥
काञ्चनोत्पलपद्माभिर्वापीभिरुपशोभिताम् ॥ बह्वासनकुथोपेतां बहुभूमिगृहायुताम् ॥ ४ ॥
सर्वर्तुकुसुमै रम्यां फलवद्भिश्च पादपैः ॥ पुष्पितानामशोकानां श्रिया सूर्योदयप्रभाम् ॥ ५ ॥
प्रदीप्तामिव तत्रस्थो मारुतिः समुदैक्षत ॥ निष्पत्रशाखां विहगैः क्रियमाणामिवासकृत् ॥ ६ ॥
विनिष्पतद्भिः शतशश्चित्रैः पुष्पावतंसकैः ॥ आमूलपुष्पनिचितैरशोकैः शोकनाशनैः ॥ ७ ॥
पुष्पभारातिभारैश्च स्पृशद्भिरिव मेदिनीम् ॥ कर्णिकारैः कुसुमितैः किंशुकैश्च सुपुष्पितैः ॥ ८ ॥
स देशः प्रभया तेषां प्रदीप्त इव सर्वतः ॥ पुन्नागाः सप्तपर्णाश्च चम्पकोद्दालकास्तथा ॥
विवृद्धमूला बहवः शोभन्ते स्म सुपुष्पिताः ॥ ९ ॥
शातकुम्भनिभाः केचित्केचिदग्निशिखोपमाः ॥ नीलाञ्जननिभाः केचित्तत्राशोकाः सहस्रशः ॥१०॥
नन्दनं त्रिविधोद्यानं चित्रं चैत्ररथं यथा ॥ अतिवृत्तमिवाचिन्त्यं दिव्यं रम्यं श्रिया वृतम् ॥ ११ ॥

पर्णघने पर्णसमूहे । महात्मा स हनुमान् । पुष्पिताग्र्यादिविशिष्टां तामारुह्य इतो द्रक्ष्यामीत्यारभ्य आगमिष्यति सावश्यमिमां शिवजलां नदीमित्यन्तेन यः प्रकार उक्तः एवमुक्तप्रकारेणमत्वा । मनुजेन्द्रपत्नीं प्रतीक्षमाणः अवेक्षमाणः मार्गमाणः । सुपुष्पिते पर्णघने निलीनश्च सन् सर्वं ददर्शेत्यन्वयः ॥ ५२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुर्दशः सर्गः ॥ १४ ॥

सः तत्रस्थः शिंशुपास्थः। मैथिलीं मार्गमाणः मैथिलीमार्गणाद्धेतोः। "लक्षणहेत्वोः क्रियायाः" इति शानच्। वीक्षमाणः विविधं चक्षुर्विक्षिपन्। महीं चावेक्षमाणः सर्वां तां अशोकवनिकां अन्ववैक्षतेत्यन्वयः ॥ १—३ ॥ बह्वासनैः कुथैः आस्तरणैश्चोपेतां । भूमिगृहाणि बिलगृहाणि ॥ ४ ॥ सर्वर्तुकुसुमैः पादपैः रम्यामित्यन्वयः । सूर्योदयप्रभां उद्यत्सूर्यप्रभां ॥ ५ ॥ विहगैः निष्पत्रशाखां क्रियमाणामिव स्थितां । युगपत्पातिपक्षिपक्षविहतपत्रतया पत्ररहितशाखामिव स्थितामित्यर्थः ॥ ६ ॥ पुष्पावतंसकैः चञ्चुपुटलग्नपुष्पालंकृतैरित्यर्थः । आमूलेति आमूलं पुष्पैर्निचितैः व्याप्तैः । पुन्नागादौ तथा दृष्टं ॥ ७ ॥ पुष्पभारः पुष्पसमूहः स एवातिभारो येषां तैः । अशोकैरित्यादावुपलक्षणे तृतीया । अशोकादिभिरुपलक्षितां समुदैक्षतेति पूर्वेणान्वयः ॥ ८—१० ॥ पुनरशोकवनं विविधोपमानदर्शनेन वर्णयति—नन्दनमित्यादिना श्लोकच-

---

[पा०] १ झ. ञ. ट. गत्वा. २ ग. पुत्रीं. ३ घ. समीक्षमाणस्सर्वत्र. क. वीक्षमाणस्तुतत्रस्थो. ४ ग. ङ.—ट. रम्यैः. ५ ङ. झ. ञ. ट. समूलंपुष्परचितैः. क. ग. च. छ. ज. समूलंपुष्पविचितैः. ख. आमूलपुष्पोपचितैः. ६ ङ. झ. ट. शिखप्रभाः. ७ ख. ङ. झ. ञ. ट. विबुधोद्यानं. ८ ख. अभिवृद्धमिवा. ९ क. ग. ङ. झ. ञ. ट. श्रियायुतं.

द्वितीयमिव चाकाशं पुष्पज्योतिर्गणायुतम् ॥ पुष्परत्नशतैश्चित्रं पञ्चमं सागरं यथा ॥ १२ ॥
सर्वर्तुपुष्पैर्निचितं पादपैर्मधुगन्धिभिः ॥ नानानिनादैरुद्यानं रम्यं मृगगणैर्द्विजैः ॥ १३ ॥
अनेकगन्धप्रवहं पुण्यगन्धं मनोरमम् ॥ शैलेन्द्रमिव गन्धाढ्यं द्वितीयं गन्धमादनम् ॥ १४ ॥
अशोकवनिकायां तु तस्यां वानरपुङ्गवः ॥ स ददर्शाविदूरस्थं चैत्यप्रासादमुच्छ्रितम् ॥ १५ ॥
मध्ये स्तम्भसहस्रेण स्थितं कैलासपाण्डुरम् ॥ प्रवालकृतसोपानं तप्तकाञ्चनवेदिकम् ॥ १६ ॥
मुष्णन्तमिव चक्षूंषि द्योतमानमिव श्रिया ॥ विमलं प्रांशुभावत्वादुल्लिखन्तमिवाम्बरम् ॥ १७ ॥
ततो मलिनसंवीतां राक्षसीभिः समावृताम् ॥ उपवासकृशां दीनां निःश्वसन्तीं पुनः पुनः ॥
ददर्श शुक्लपक्षादौ चन्द्ररेखामिवामलाम् ॥ १८ ॥
मन्दं प्रख्यायमानेन रूपेण रुचिरप्रभाम् ॥ पिनद्धां धूमजालेन शिखामिव विभावसोः ॥ १९ ॥
पीतेनैकेन संवीतां क्लिष्टेनोत्तमवाससा ॥ सपङ्कामनलंकारां विपद्मामिव पद्मिनीम् ॥ २० ॥
व्रीडितां दुःखसंतप्तां परिम्लानां तपस्विनीम् ॥ ग्रहेणाङ्गारकेणेव पीडितामिव रोहिणीम् ॥ २१ ॥
अश्रुपूर्णमुखीं दीनां कृशामनशनेन च ॥ शोकध्यानपरां दीनां नित्यं दुःखपरायणाम् ॥ २२ ॥
प्रियं जनमपश्यन्तीं पश्यन्तीं राक्षसीगणम् ॥ स्वगणेन मृगीं हीनां श्वगणाभिवृतामिव ॥ २३ ॥
नीलनागाभया वेण्या जघनं गतयैकया ॥ नीलया नीरदापाये वनराज्या महीमिव ॥ २४ ॥

तुष्टयेन ॥ उद्यानं अशोकवनं । अत्र ददर्शेत्यपकृष्यते । नन्दनं इन्द्रक्रीडावनं । विविधोद्यानं विविधवृक्षषण्डं । चैत्ररथं कुबेरक्रीडावनं । नन्दनमतिवृत्तमिव अतिक्रम्य स्थितमिव । चैत्ररथं यथा चैत्ररथमिव चित्रमित्यन्वयः ॥ ११ ॥ आकाशसाम्ये साधारणधर्ममाह—पुष्पेति । एवं सागरौपम्ये पुष्परत्नेति ॥१२—१४ ॥ चैत्यप्रासादं चैत्यं बुद्धमन्दिरं तदाकारं प्रासादं ॥१५—१६॥ प्रांशुभावत्वात् दीर्घत्वभावत्वात् ॥१७॥ मलिनसंवीतां मलिनवस्त्रेणावृतां मलिनैरङ्गैः संवीतां वा । शुक्लपक्षादावित्यनेन वर्धिष्णुत्वं द्योतितं ॥ १८ ॥ मन्दं प्रख्यायमानेन इदं तदिति कथंचित्प्रत्यभिज्ञायमानेन रूपेणोपलक्षितां । पिनद्धामिति मलिनसंवीतत्वे उपमा । पिनद्धां बद्धां ॥ १९ ॥ उत्तरीयराहित्यं द्योतयितुमेकेनेत्युक्तिः । सपङ्कां भूमेराविर्भवन्तीमिव स्थितां । अनलंकारां पङ्कं निवर्त्य अलंकुर्वतोसन्निधानादलंकाररहितां । रामागमनेप्ययमाश्रयो नोत्सादयितुमर्हतीत्येवं मन्यमानां । विपद्मामिवपद्मिनीं पद्मरहितां सरसीमिव स्थितां ॥ २० ॥ ग्रहेण क्रूरग्रहेण । द्वितीय इवशब्दो वाक्यालंकारे ॥२१॥ कृशां दीनामिति पुनःपुनरुक्तिः कार्श्यदैन्ययोरतिशयप्रदर्शनाय । अत्र उपवासकृशां कृशामनशनेनेत्युक्त्या पूर्वकाण्डान्ते इन्द्रदत्तपायसाशनवृत्तान्तः कल्पित इति तत्रैवोक्तं ॥ २२—२३ ॥ नीलनागाभया कृष्णसर्पतुल्यया । नीरदापाये शरदि

स० एकेनसंवीतां उत्तरीयवस्त्रस्यसुग्रीवसंनिधौप्रक्षिप्तत्वात् ॥ २० ॥ शि० अङ्गारकेणग्रहेणपीडितांरोहिणीमिवपीडितां ॥ ति० अङ्गारकेणेव तत्तुल्येनग्रहेणकेतुना पीडितांरोहिणीमिव ॥ २१ ॥ शोकध्यानपरां शोकेन रामविरहजन्येन ध्यानपरां रामध्यानसक्तां ॥ २२ ॥ स० एकया अत्रिगुणितया ॥ ति० जघनं पृष्ठभागं गतया प्राप्तया । एकया हरणदिनकृतैकसंस्कारवत्या यद्वा पुरोभागीयवेणीद्वयराहित्येन पृष्ठलंबया एकयावेण्या । नीलनागाभया नीलसर्पतुल्यया वेण्या उपलक्षितां । अनेन तत्सर्शे-

[पा०] १ क. तद्वितीयमिवाकाशं. २ क. ङ.—ट. गणद्विजैः. ३ क. घ.—ट. मनोहरं. ४ ख. घ. ङ. झ. ञ. ट. मूर्जितं. ग. च. छ. ज. मुत्तमं. ५ ङ. झ. ञ. ट. निर्मलं. ६ ग. चन्द्रलेखामिवावृतां. ७ क.—ट. मन्दप्रख्याय. ८ च. छ. ज. पद्मिनीमिवश्रियं. ९ ङ.—ट. पीडितां. १० ङ. झ. ञ. ट. परिक्षीणां. ग. परिक्लिन्नां. घ. व्यसनानामकोविदां. ११ ग. घ. ङ. ट. नित्यदुःख. १२ क. ग. जनं. १३ ङ. झ. ञ. ट. श्वगणेनावृतामिव. ग. श्वगणेनसमावृतां. १४ ग. प्रतिलंबया.

सुखार्हां दुःखसंतप्तां व्यसनानामकोविदाम् ॥ तां समीक्ष्य विशालाक्षीमधिकं मलिनां कृशाम् ॥
तर्कयामास सीतेति कारणैरुपपादिभिः ॥ २५ ॥
ह्रियमाणा तदा तेन रक्षसा कामरूपिणा ॥ यथारूपा हि दृष्टा वै तथारूपेयमङ्गना ॥ २६ ॥
पूर्णचन्द्राननां सुभ्रूं चारुवृत्तपयोधराम् ॥ कुर्वन्तीं प्रभया देवीं सर्वा वितिमिरा दिशः ॥ २७ ॥
तां नीलकेशीं बिम्बोष्ठीं सुमध्यां सुप्रतिष्ठिताम् ॥ सीतां पद्मपलाशाक्षीं मन्मथस्य रतिं यथा ॥२८॥
इष्टां सर्वस्य जगतः पूर्णचन्द्रप्रभामिव ॥ भूमौ सुतनुमासीनां नियतामिव तापसीम् ॥ २९ ॥
निःश्वासबहुलां भीरुं भुजगेन्द्रवधूमिव ॥ शोकजालेन महता विततेन न राजतीम् ॥ ३० ॥
संसक्तां धूमजालेन शिखामिव विभावसोः ॥ तां स्मृतीमिव संदिग्धामृद्धिं निपतितामिव ॥ ३१ ॥
विहतामिव च श्रद्धामाशां प्रतिहतामिव ॥ सोपसर्गां यथा सिद्धिं बुद्धिं सकलुषामिव ॥
अभूतेनापवादेन कीर्तिं निपतितामिव ॥ ३२ ॥
रामोपरोधव्यथितां रक्षोहरणकर्शिताम् ॥ अबलां मृगशाबाक्षीं वीक्षमाणां ततस्ततः ॥ ३३ ॥
बाष्पाम्बुपरिपूर्णेन कृष्णवक्त्राक्षिपक्ष्मणा ॥ वदनेनाप्रसन्नेन निःश्वसन्तीं पुनः पुनः ॥ ३४ ॥
मलपङ्कधरां दीनां मण्डनार्हाममण्डिताम् ॥ प्रभां नक्षत्रराजस्य कालमेघैरिवावृताम् ॥ ३५ ॥
तस्य संदिदिहे बुद्धिर्मुहुः सीतां निरीक्ष्य तु ॥ आम्नायानामयोगेन विद्यां प्रशिथिलामिव ॥३६॥
दुःखेन बुबुधे सीतां हनुमाननलङ्कृताम् ॥ संस्कारेण यथा हीनां वाचमर्थान्तरं गताम् ॥ ३७ ॥

॥ २४ ॥ उपपादिभिः उपपादनशीलैः । मन्दप्रख्यायमानेनेत्यारभ्य सीतां समीक्ष्य उपपादिभिः कारणैस्सीतेति तर्कयामासेत्यन्वयः ॥ २५ ॥ एवं लिङ्गैः सीतेति विचार्य प्रत्यभिज्ञयापि तथा तर्कयामासेत्याह —ह्रियमाणेति ॥ इति तर्कयामासेति शेषः ॥ २६ ॥ पूर्णचन्द्राननामित्यारभ्य विद्यां प्रशिथिलामिवेत्यन्तमेकं वाक्यं । सुभ्रूं सुभ्रुवं । उवङभाव आर्षः । कुर्वन्तीमिति दश मासान् स्नानेन विना मलिनापि प्रभया दिशः वितिमिराः कुर्वन्तीमिति प्रभातिशयोक्तिः ॥ २७ ॥ सुप्रतिष्ठितां सुप्रतिष्ठितपादतलां ॥ २८—२९ ॥ नराजतीं नराजन्तीं ॥ ३० ॥ तां प्रसिद्धां । स्मृतिं मन्वाद्युक्तिं । संदिग्धां संदिग्धार्थां । ऋद्धिं संपदं । निपतितां क्षीणां ॥ ३१ ॥ विहतां अविश्वासबहुलां । प्रतिहतां अलब्धकार्यां । सोपसर्गां सविघ्नां । सकलुषां सकालुष्यां । भावप्रधानो निर्देशः । अभूतेन असत्येन ॥ ३२ ॥ रामोपरोधव्यथितां रामप्राप्तिनिरोधेन व्यथितां ॥ ३३—३५ ॥ पुनः सीताशब्दोऽव्यवहितानुस्मरणार्थः । आम्नायानां वेदानां । अयोगेन असंबन्धेन । प्रशिथिलां अप्राप्तप्रतिष्ठां । विद्यां वेदबाह्यविद्यां । यद्वा आम्नायानां अभ्यासानामभावेन प्रशिथिलां अस्थिरपदां विद्यामिव सीतां निरीक्ष्य तस्य हनुमतो बुद्धिः संदिदिहे इत्यन्वयः । कार्श्यमालिन्यादिना तिरोहितरूपत्वादिति भावः ॥ ३६ ॥ संस्कारः शब्दव्युत्पत्तिः तेन हीनां अतएव विवक्षितादर्थान्तरंगतां विपरीतार्थामित्यर्थः । संस्कारहीनतया प्रतिपिपादयिषितार्थवक्तुमशक्तुव-

ऽन्यस्यमरणमेवेतिसूचितं ॥ शि० जघनं पृष्ठान्तदेशंगतया । एकया केशविन्यासाभावेनजटीभूतया ॥ २४ ॥ स० व्यसनानामकोविदां कदाप्यदृष्टव्यसनां ॥ २५ ॥ ति० नीलकण्ठीं सौभाग्यसूचकेन्द्रनीलमणिमयकण्ठस्थभूषणप्रभया तद्वर्णकण्ठां । सुप्रतिष्ठितां सुप्रतिष्ठितसर्वावयवसंस्थानां ॥ २८ ॥ ती० चन्द्रप्रभामिवेति सर्वानन्दकरत्वमुक्तं । भुजगेन्द्रवधूमिवेति दुष्प्रधर्षत्वं । शिखामिवविभावसोरिति पातिव्रत्यं ॥ २९ ॥ स० रामोपरोधव्यथितां रामाभिः राक्षसस्त्रीभिः यउपरोधः इतस्ततोगमनप्रतिबन्धस्तेनव्यथितां ॥ ३३ ॥ ति० दुःखबोध्यत्वेहेतुः अनलङ्कृतामिति । संस्कारेणेति स्नानानुलेपनादिरङ्गसंस्कारः । वाचो व्याकरणज्ञानादिजःसंस्कारः । देव्या अर्थान्तरगतत्वं देशान्तरगतत्वं । वाचस्तु विवक्षितार्थादन्यार्थबोधकत्वं । वाचोऽर्थो यथा-

[पा०] १ ङ. झ. ञ. ट. विलोक्य. २ ग. च. ज. ह्रियमाणातुसा. ३ घ. क्रूररूपिणा. ४ ञ. सादृष्टा. ङ. झ. ट. दृष्टासा. ५ ग. तेजसास्वेन. ६ झ. ट. नीलकण्ठीं. ७ ङ. झ. ट. रक्षोगणनिपीडितां. ८ घ. वीक्षमाणामितस्ततः. ९ घ. नीलमेघैः. १० ङ. झ. ञ. ट. बुद्धिस्तथा. ११ ग. निरीक्ष्यतां. ङ.—ट. निरीक्ष्यच.

तां समीक्ष्य विशालाक्षीं राजपुत्रीमनिन्दिताम् ॥ तर्कयामास सीतेति कारणैरुपपादिभिः ॥ ३८ ॥
वैदेह्या यानि चाङ्गेषु तदा रामोऽन्वकीर्तयत् ॥ तान्याभरणजालानि शाखाशोभीन्यलक्षयत् ॥३९॥
सुकृतौ कर्णवेष्टौ च श्वदंष्ट्रौ च सुसंस्थितौ ॥ मणिविद्रुमचित्राणि हस्तेष्वाभरणानि च ॥
श्यामानि चिरयुक्तत्वात्तथा संस्थानवन्ति च ॥ ४० ॥
तान्येवैतानि मन्येऽहं यानि रामोऽन्वकीर्तयत् ॥ ४१ ॥
तत्र यान्यवहीनानि तान्यहं नोपलक्षये ॥ यान्यस्या नावहीनानि तानीमानि न संशयः ॥ ४२ ॥
पीतं कनकपट्टाभं स्रस्तं तद्वसनं शुभम् ॥ उत्तरीयं नगासक्तं तदा दृष्टं प्लवङ्गमैः ॥ ४३ ॥
भूषणानि च मुख्यानि दृष्टानि धरणीतले ॥ अनयैवापविद्धानि स्वनवन्ति महान्ति च ॥ ४४ ॥
इदं चिरगृहीतत्वाद्वसनं क्लिष्टवत्तरम् ॥ तथाऽपि नूनं तद्वर्णं तथा श्रीमद्यथेतरत् ॥ ४५ ॥
इयं कनकवर्णाङ्गी रामस्य महिषी प्रिया ॥ प्रनष्टाऽपि सती यॉऽस्य मनसो न प्रणश्यति ॥ ४६ ॥
इयं सा यत्कृते रामश्चतुर्भिः परितप्यते ॥ कारुण्येनानृशंस्येन शोकेन मदनेन च ॥ ४७ ॥

न्तीमविवक्षितमर्थं बोधयन्तीं वाचमिव। सम्यग्व्युत्पत्त्यभावादर्थान्तरंगतां व्युत्पत्त्यनन्तरं स्वार्थं प्रतिपादयन्तीमिव स्थितामित्यर्थः ॥ ३७—३८ ॥ शाखायां शोभन्त इति शाखाशोभीनि भर्तृविरहकाले भूषणधारणस्यानुचितत्वात् स्वाङ्गेभ्य उन्मुच्य शाखायां न्यस्तानीत्यर्थः ॥ ३९ ॥ कर्णवेष्टौ कुण्डले। "कर्णिका तालपत्रं स्यात्कुण्डलं कर्णवेष्टनं" इति सज्जनः। श्वदंष्ट्रः त्रिकर्णकाख्यः पुष्पाकारःकर्णपार्श्वभूषणविशेषः। "त्रिकर्णकः श्वदंष्ट्रश्च" इत्यभिधानरत्नमाला। हस्तेषु हस्तावयवेषु। श्यामानि विरहतापौष्ण्यवशाच्छ्यामीभूतानि। तथा चिरयुक्तत्वात् चिरधृतत्वात्। संस्थानवन्ति हस्तेषु तत्तदाभरणसंस्थानानि दृश्यन्त इत्यर्थः ॥ ४० ॥ तान्येवेत्यर्धमेकं वाक्यं ॥ ४१ ॥ तत्र ऋश्यमूके। यान्यवहीनानि पतितानि तान्यहं नोपलक्षये। अत्रेति शेषः। अस्याः सीतायाः सकाशाद्यानि नावहीनानि न पतितानि। तानीमानि तत्तुल्यत्वात् ॥ ४२ ॥ प्लवङ्गमैः सुग्रीवादिप्लवङ्गमैः। यदुत्तरीयं दृष्टं यानि भूषणानि दृष्टानि तानि सर्वाण्यनयैव अपविद्धानि पातितानि। नगासक्तमित्यनेन पतनदशायामुत्तरीयाग्रं वृक्षे किंचित्सक्तमिति द्योत्यते ॥ ४३—४४ ॥ इतरत् उत्सृष्टं। तदुत्तरीयं यथा यादृशवर्णयुक्तं यथा श्रीमत् इदं इदानीं धार्यमाणं। तद्वर्णं तथा श्रीमत् नूनमिति योजना ॥ ४५ ॥ या रामस्य प्रिया सती महिषीति कृत्वा प्रनष्टापि अस्य रामस्य मनसः सकाशात् न प्रणश्यति सदा मनसा दृष्टा भवतीत्यर्थः। सा कनकवर्णाङ्गी इयं मया परिदृश्यमानेत्यर्थः ॥ ४६ ॥ रामः कारुण्यादिभिश्चतुर्भिः यत्कृते परितप्यते सेयं। कारुण्यादीनां परितापहेतुत्वं विभज्य दर्शयति—स्त्रीति ॥ आपत्काले स्त्रियो रक्षणीयाः तन्न कृतमिति कारुण्यात्परितप्यते। आनृशंस्यमक्रूरत्वं। आश्रितसंरक्षणैकस्वभावत्वमिति यावत्। तस्मात् आश्रिता न रक्षितेति परितप्यते। "अर्धो वा एष आत्मनो यत्पत्नी" इत्युक्तरीत्या आत्मार्धभूता पत्नी नष्टेति

व्याकरणाद्यभ्यासदुःखेनव्युत्पत्तिंसंपाद्यबुध्यते तद्वत्सीतांकष्टेनबुबुधे ॥ ३७ ॥ स० उपपादिभिः अनुमापकैः ॥ ३८ ॥ ति० इदानीं सीतालोपपादकमाह—वैदेह्याइति। तदा स्वप्रस्थानसमये। गात्रशोभीनीतिपाठः कतकसंमतः। येष्वङ्गेषुयान्याभरणजालान्यकीर्तयत् तान्याभरणजालानि तत्तद्गात्रशोभीन्यलक्षयदिति प्रत्यभिज्ञाप्रामाण्यंसिद्धं ॥ तीर्थस्तु—शाखाशोभीनीति पाठंप्रकल्प्य रामविश्लेषसमये भूषणधारणस्यानुचितत्वाद्वैदेह्याभूषणानिस्वाङ्गेभ्यउन्मुच्यशाखायांन्यस्तानीतिगम्यतइतिव्याचख्यौ। तत्तूत्तरश्लोकयोर्हस्तेष्विति तथा श्यामानिचिरयुक्तत्वादिति पदस्वरसविरुद्धं। किंचैवं तदङ्गेरामोक्ताभरणाभावादसीतात्वमेवस्यात् ॥ ३९ ॥ ति० अथकस्मिन्गात्रेकिमाभरणंदृश्यतेतत्राह—सुकृताविति। सुसंस्थितौ कर्णरूपाङ्गेसुप्रतिष्ठितौ उपलक्षयेइतिशेषः। यानिरामेणोक्तानि तथैवसुस्थितान्युपलक्षये ॥ ४० ॥ ति० चिरयुक्तत्वात्चिरकालमसंस्कृतदेहस्थितत्वेनश्यामान्यपि तथासंस्था-

[पा०] १ क. ङ. झ. ञ. ट. रुपपादयन्. २ घ. ङ. झ. ट. गात्रशोभीनि. क. च. छ. ज. शाखाशोभीनिलक्षये. ३ क. च. छ. ज. सुसंस्कृतौकर्णवेष्टौ. ४ क. च. छ. ज. ञ. श्वदंष्ट्रौचापिसंस्थितौ. ५ क. ग. च. ज. अनयैवप्रमुक्तानि. ६ झ. तथाप्यनूनं. ग. च. छ. ज. ञ. तथाह्यनूनं. ७ ग. घ. ङ. झ. ट. यस्य. ८ ङ. झ. ञ. ट. श्चतुर्भिरिहतप्यते.

स्त्री प्रनष्टेति कारुण्यादाश्रितेत्यानृशंस्यतः ॥ पत्नी नष्टेति शोकेन प्रियेति मदनेन च ॥ ४८ ॥
अस्या देव्या यथा रूपमङ्गप्रत्यङ्गसौष्ठवम् ॥ रामस्य च यथा रूपं तस्येयमसितेक्षणा ॥ ४९ ॥
अस्या देव्या मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितम् ॥ तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति ॥५०॥
दुष्करं कृतवान्रामो हीनो यदनया [1]प्रभुः ॥ धारयत्यात्मनो देहं न शोकेनावसीदति ॥ ५१ ॥
दुष्करं कुरुते रामो य इमां मत्तकाशिनीम् ॥ [2]सीतां विना महाबाहुर्मुहूर्तमपि जीवति ॥ ५२ ॥
एवं सीतां [3]तदा दृष्ट्वा हृष्टः पवनसंभवः ॥ जगाम मनसा रामं प्रशशंस च तं प्रभुम् ॥ ५३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

शोकेन परितप्यते । प्रिया नष्टेति मदनेन परितप्यत इति योजना ॥ ४७—४८ ॥ अथानयोरन्योन्याभिरूप्यानुगुण्यमाह—अस्या इति ॥ अस्याः सीतायाः । रूपं शरीरं अङ्गप्रत्यङ्गसौष्ठवं च यथा यथाविधं । तथाविधमेव रामस्यापि रूपं अङ्गप्रत्यङ्गसौष्ठवं च । तथा रामस्य रूपमङ्गप्रत्यङ्गसौष्ठवं च यथा यथाविधं । तथाविधमेवास्यारूपमङ्गप्रत्यङ्गसौष्ठवं च । अतः इयमसितेक्षणा तस्य योग्येति शेषः ॥ ४९ ॥ तथानयोरन्योन्यस्यानुरागमाह—अस्या इति ॥ अस्या देव्या मनस्तस्मिन्रामे प्रतिष्ठितं । तेन हेतुना इयं मुहूर्तमपि जीवति । तस्य च मनोऽस्यां प्रतिष्ठितं तेन कारणेन स मुहूर्तमपि जीवति । तयोरन्योन्यंमनोनिवेशनाभावे मुहूर्तजीवनमपि न घटत इति भावः ॥५०॥ माल्यवति शैले रामस्य सीताविरहक्लेशातिशयं निशाम्य हन्त वसिष्ठशिष्यः कस्याश्चित्स्त्रियाः कृते कथमेवमभूदिति विनिन्द्य परिहसितवान् स्वयं विरक्ततया । संप्रत्यस्या वैलक्षण्यातिशयदर्शनेन विशेषज्ञतया एतद्विरहे रामस्य देहधारणं सर्वात्मना अशक्यमित्याह—दुष्करमिति ॥ दुष्करं कृतवान्रामः । इमां वियुज्य समाधानपरो रामः प्रकाममशक्यं कृत्यमकरोत् । हीनो यदनया प्रभुः । अनया विना देहं धृत्वावस्थित इति यत्तदत्यन्तमशक्यं । प्रभुः गजाश्वादिकं शिक्षयितुं राज्यं पालयितुं च जानाति । न प्रणयधारायां प्रथमांशमपि भुक्तवान् । धारयत्यात्मनो देहं । किमिदं याचितकं शरीरं धारयति स्वस्यैव हि देहोयं देहं भोगायतनं हीदं न दुःखायतनं " दिह उपचये" इत्यस्माद्धातोः "इगुपधे"त्यादिना कः । तेनायमर्थो लभ्यते । सीताशरीरस्य परतन्त्रतया तत्त्यक्तुमयुक्तं नतु स्वाधीनशरीरस्य धारणं युक्तमितिभावः । विशेषज्ञेनापि कथमिदं त्यक्तुं शक्यं तत्राह—न शोकेनावसीदति ॥ ५१ ॥ उक्तमर्थं किंचिद्विशेषान्तरेण दर्शयति—दुष्करंकुरुतइति ॥ ५२ ॥ एवं दृष्ट्वा मलिनसंवीतत्वोपवासकृशत्वशोकध्यानपरायणत्वादिपतिव्रताधर्मयुक्तां सीतां दृष्ट्वा । हृष्टःसन् मनसा रामं जगाम सस्मार । तं प्रभुं बुद्धिस्थं रामं । प्रशशंस च । पुनः प्राग्युपयुक्तपतिव्रतोक्तधर्मनिष्ठत्वदर्शनात् भाग्योत्तरो रामइत्यस्तौषीत् । यद्वा एतादृशसौन्दर्यवतीं सीतांदृष्ट्वा एतद्विरहितस्यमहाञ्शोकः प्राप्तः अतः युक्तमेवकृतवान्राम इत्यस्तौषीत् ॥ ५३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चदशः सर्गः ॥ १५ ॥

नवन्ति रामोक्तसंनिवेशवन्ति ॥ ४१ ॥ स० अङ्गप्रत्यङ्गसौष्ठवं अङ्गानिहस्ताद्यवयवाः । प्रत्यङ्गानिअङ्गुल्यादीनि । तेषांसौष्ठवं सामीचीन्यं ॥ ४९ ॥ स० मुहूर्तशब्दएतावत्कालोपलक्षकः ॥ अन्यथानजीवेदित्याशयः ॥ ५२ ॥ इतिपञ्चदशः सर्गः ॥ १५ ॥

[पा०] १ ब. विभुः. २ ग. घ. विनासीतां. ३ ट. तथा.

कामये त्वां विशालाक्षि बहुमन्यस्व मां प्रिये ॥ सर्वाङ्गगुणसंपन्ने सर्वलोकमनोहरे ॥ ३ ॥
नेह केचिन्मनुष्या वा राक्षसाः कामरूपिणः ॥ व्यपसर्पतु ते सीते भयं मत्तः समुत्थितम् ॥ ४ ॥
स्वधर्मो रक्षसां भीरु सर्वथैव न संशयः ॥ गमनं वा परस्त्रीणां हरणं संप्रमथ्य वा ॥ ५ ॥
एवं चैतदकामां तु न त्वां स्प्रक्ष्यामि मैथिलि ॥ कामं कामः शरीरे मे यथाकामं प्रवर्तताम् ॥६॥
देवि नेह भयं कार्यं मयि विश्वसिहि प्रिये ॥ प्रणयस्व च तत्त्वेन मैवं भूः शोकलालसा ॥ ७ ॥
एकवेणी धराशय्या ध्यानं मलिनमम्बरम् ॥ अस्थानेऽप्युपवासश्च नैतान्यौपयिकानि ते ॥ ८ ॥
विचित्राणि च माल्यानि चन्दनान्यगुरूणि च ॥ विविधानि च वासांसि दिव्यान्याभरणानि च ॥९॥
महार्हाणि च पानानि शयनान्यासनानि च ॥ गीतं नृत्तं च वाद्यं च लभ मां प्राप्य मैथिलि॥१०॥
स्त्रीरत्नमसि मैवं भूः कुरु गात्रेषु भूषणम् ॥ मां प्राप्य हि कथं नु स्यास्त्वमनर्हा सुविग्रहे ॥ ११ ॥
इदं ते चारु संजातं यौवनं व्यतिवर्तते ॥ यदतीतं पुनर्नैति स्रोतः शीघ्रमपामिव ॥ १२ ॥
त्वां कृत्वोपरतो मन्ये रूपकर्ता स विश्वसृक् ॥ न हि रूपोपमा त्वन्या तवास्ति शुभदर्शने ॥१३॥

र्शनं अदृश्यत्वं ॥ २ ॥ मां दृष्ट्वा भीतिर्न कर्तव्येत्याह —कामय इति ॥ ३ ॥ अन्ये च भयहेतवोत्र न सन्तीत्याह—नेहेति ॥ ४ ॥ परदारेच्छा दोष इत्याशङ्क्याह—स्वधर्म इति ॥ संप्रमथ्य बलात्कृत्य ॥५॥ कामं अत्यन्तं । यथाकामं यथेच्छं ॥ ६ ॥ प्रणयस्व स्नेहंकुरु ॥ ७ ॥ एकवेणी असीमन्ततवेणी । धराशय्या भूशयनं । औपयिकानि युक्तानि । " युक्तमौपयिकं " इत्यमरः ॥ ८—१० ॥ मां प्राप्य हीति । हिः पादपूरणे अप्यर्थो वा । हे सुविग्रहे मां प्राप्यापि कथमनर्हा स्याः ॥ ११—१२ ॥ उपरतः निवृत्तः । अत्रेतिकरणं द्रष्टव्यं । उत्तरोत्तरं सातिशयं रूपं सिसृक्षुर्विधाता त्वां सृष्ट्वा इतः परं सातिशयं रूपं स्रष्टुं न शक्यत इति धिया सृष्टेरुपरत इति मन्य

मिच्छसि तत्किंसितिशेषः ॥ २ ॥ ती० वस्तुतस्तु त्वांकामये ईश्वरीत्वेनेतिशेषः । अतोमांबहुमन्यस्व ॥ ३ ॥ ती० नेहेति । मनुष्याराक्षसावा । त्वद्भयकर्तारइतिशेषः । वस्तुतस्तु सर्वेश्वर्यास्तवनकुत्रापिभयशङ्केतिभावः । ति० किमिदानींमदतिरिक्तपुरुषान्तरजंतवभयं उतममस्पर्धेधर्महानिजं । नाद्यइत्याह—नेहेति । मत्तः मदागमनात्समुत्थितं पुरुषान्तरागमनसंभावनयाजातं भयं व्यपसर्पतु । अन्येषामभावात् ॥४॥ ति० नान्त्यइत्याह—स्वधर्मइति । तंस्वधर्ममाह—गमनंवेति । आनुकूल्यंसंपादयेतिशेषः । संप्रमथ्य बलात्कृत्य । एवंस्वधर्मत्वान्ममनाधर्मः । बलात्कारेचास्ततत्रत्वात्क्रियाअपिनदोषइतिभावः ॥ ५ ॥ ती० यद्यपिपरदाराभिमर्शःस्वधर्मः तथापि नाहंत्वाम मागमयमानांस्प्रक्ष्यामीत्याह—**स्वधर्मइत्यादिश्लोकद्वयेन** । कामं अत्यर्थं । यथाकामं यथेच्छं । मेशरीरेकामः । तवेतिशेषः । मयितवेच्छाप्रवर्ततामितिभावः । स्वधर्मइत्यादिश्लोकद्वयस्यवास्तवार्थस्तु—कामुकस्त्वं नविश्वसनीयइत्यतआह—स्वधर्मइत्यादि । यद्यपिरक्षसांपरदाराहरणादि स्वधर्मःस्वभावः । मेशरीरेकामं अत्यर्थं । यथाकामं यथेच्छं कामःप्रवर्ततांनाम मन्मथविकारोस्तुनाम । तथाप्येतत्सर्वंममेष्टदेवतायांत्वयिनघटतइतिशेषः । अतएव अकामां मयि भृत्यत्वकामनारहितां । यद्वा अकामां विष्णुकामांत्वां । नस्प्रक्ष्यामि त्वदाज्ञांविना पूजांकर्तुमपिबिभेमीतिशेषः ॥ ति० एवंच एवमपि । बलात्कारपक्षे तवममचदोषाभावेपितस्वपक्षस्यरसाभाससंपादकत्वात् । अतएवमकामां अनेनप्रकारेणमयिकामरहितांत्वां मद्भिन्नेच्छावतींच । नच नतु । स्प्रक्ष्यामि । एवंचैतदकामांत्वामितिपाठे एतत् रक्षोधर्मत्वं । एवंच एवमेव मदुक्तरीतिकमेव । तथाप्युक्तप्रकारेण त्वामकामां नस्प्रक्ष्यामीत्यर्थः । नन्वेवंसतिदुस्सहाकामपीडातवस्यात्तत्राह—**काममिति** । कामः मन्मथः । यथाकामं यथेच्छं । कामं तद्विषयेच्छां । प्रवर्ततां प्रवर्तयत्वित्यर्थः ॥ ६ ॥ ती० वस्तुतस्तु विचित्राणीत्यादिश्लोकद्वयमेकंवाक्यं । मांप्राप्य भृत्यत्वेनेतिशेषः । माल्यादीनिलभ प्राप्नुहीतिसंबन्धः ॥ ९—१० ॥ ती० वस्तुतस्तु त्वत्पूजाक्षमंमदीयमायुर्व्यर्थंगच्छतीतिखिद्यति—**इदंतइति** । ते तवभृत्यस्य । ममेतिशेषः । यौवनं दार्ढ्यावस्था । यत् यतः । भृत्यक्षममायुः व्यर्थंगच्छति ।

[पा०] १ ख. ङ. च. ज.—ट. सर्वदैव. २ च. ज. ञ. चैवमकामां. ङ. झ. ट. चैवमकामांत्वां. घ. त्वेतदकामां. ३ ङ. झ. ट. नच. ४ ङ. अधश्शय्या. ५ क. ख. घ. यानानिशयनानिच. ६ क.—ट. स्त्रीरत्नमसि. ७ घ.—ट. कथंवा. क. कथंस्यास्त्वमनाहारा. ८ ङ.—ट. स्रोतस्विनामिव. ९ ख. ङ. झ. ट. विश्वकृत्. १० क. ङ.—ट. त्वन्या.

त्वां समासाद्य वैदेहि रूपयौवनशालिनीम् ॥ [1]कः पुमानतिवर्तेत साक्षादपि पितामहः ॥ १४ ॥
यद्यत्पश्यामि ते गात्रं शीतांशुसदृशानने ॥ तस्मिंस्तस्मिन्पृथुश्रोणि चक्षुर्मम निबध्यते ॥ १५ ॥
भव मैथिलि [3]भार्या मे मोहं[4]मेनं विसर्जय ॥ बह्वीनामुत्तमस्त्रीणामाहृतानामितस्ततः ॥
सर्वासामेव भद्रं ते ममाग्रमहिषी भव ॥ १६ ॥
लोकेभ्यो यानि रत्नानि संप्रमथ्याहृतानि वै ॥ [6]तानि मे भीरु सर्वाणि राज्यं चैतदहं च ते ॥१७॥
विजित्य पृथिवीं सर्वां नानानगरमालिनीम् ॥ जनकाय प्रदास्यामि तव हेतोर्विलासिनि ॥ १८ ॥
नेहं पश्यामि लोकेऽन्यं यो मे प्रतिबलो भवेत् ॥ पश्य मे सुमहद्वीर्यमप्रतिद्वन्द्वमाहवे ॥ १९ ॥
असकृत्संयुगे भग्ना मया विमृदितध्वजाः ॥ अशक्ताः प्रत्यनीकेषु स्थातुं मम सुरासुराः ॥ २० ॥
इच्छया क्रियतामद्य प्रतिकर्म तवोत्तमम् ॥ २१ ॥
[9]संप्रभाण्यवसज्यन्तां तवाङ्गे [11]भूषणानि च ॥ साधु पश्यामि ते रूपं संयुक्तं [12]प्रतिकर्मणा ॥ २२ ॥
प्रतिकर्माभिसंयुक्ता दाक्षिण्येन वरानने ॥ भुङ्क्ष्व भोगान्यथाकामं पिब भीरु रमस्व च ॥ २३ ॥
यथेष्टं च प्रयच्छ त्वं पृथिवीं वा धनानि च ॥ [13]ललस्व मयि विस्रब्धा धृष्टमाज्ञापयस्व च ॥
[14]मत्प्रसादाल्ललन्त्याश्च [15]ललन्तां बान्धवास्तव ॥ २४ ॥
ऋद्धिं ममानुपश्य त्वं श्रियं भद्रे [16]यशश्च मे ॥ किं करिष्यसि रामेण सुभगे चीर[17]वाससा ॥ २५ ॥
निक्षिप्तविजयो रामो गतश्रीर्वनगोचरः ॥ व्रती स्थण्डिलशायी च शङ्के जीवति वा न वा ॥ २६ ॥

इत्यर्थः ॥ १३ ॥ कः अतिवर्तेत न कोपीत्यर्थः ॥ १४ —१९ ॥ विमृदितध्वजाः भग्नध्वजाः । प्रत्यनीकेषु शत्रुषु मध्ये ॥ २० ॥ प्रतिकर्म अलंकारः । " प्रतिकर्म प्रसाधनं " इत्यमरः ॥ २१ ॥ अवसज्यन्तां अर्प्यन्तां । प्रतिकर्मणा संयुक्तं पश्यामि पश्येयं ॥ २२ ॥ दाक्षिण्येन सरलत्वेन । भुङ्क्ष्व अनुभव । "दक्षिणे सरलोदारौ" इत्यमरः ॥२३॥ ललस्व प्रीतिं कुरु । " लल ईप्सायाम् " इति धातुः ॥ २४ ॥ एवमात्मानं प्रशस्य रामं निन्दति—किं करिष्यसीत्यादिना ॥२५॥ निक्षिप्तविजयः त्यक्तविजय इत्यर्थः ।

अतोमम तवपूजार्थमनुज्ञांदेहीतिशेषः ॥ १२ ॥ **ति०** कोनातिवर्तेत क्षुभ्येतेत्यर्थः । कःपुमानतिवर्तेतेतिपाठे कामवशतामतिक्रम्य कोवर्तेतेत्यर्थः ॥ **ती०** वस्तुतस्तु मदाराधनेतवबुद्धिःकथंस्यादतआह—त्वामिति । त्वां लक्ष्मीं । " सीतालक्ष्मीर्भवान्विष्णुः " इतिवक्ष्यमाणत्वात् । समासाद्य साक्षात्पितामहोपिनातिवर्तेत अनाराधितुंनशक्नुयात् । पुमांस्तुकोवाऽतिवर्तेतेत्यर्थः ॥ १४ ॥ **ती०** यद्यदिति । गात्रं अवयवविशेषं । तस्मिंस्तस्मिन्नवयवविशेषेचक्षुर्निबध्यते । इष्टदेवतायास्तवदर्शनस्यमुक्तिसाधकत्वादिति भावः ॥ १५ ॥ **ती०** वस्तुतस्तु मैथिलि भार्या भयाकान्ता आर्याश्रेष्ठाभव । एनंमोहं मयिशत्रुत्वशङ्कां । विसर्जय । मेमम उत्तमस्त्रीणांममयाअग्रमहिषीमन्दोदरी तस्याश्चममचभव ईश्वरोतिशेषः । **शि०** हे भवमैथिलि भवति भावयति नितरां स्वपतिं चिन्तयति सैवमैथिली । तत्संबोधनं । अग्रस्यसर्वोत्कृष्टस्यरावणस्यमहिषीत्वं ममबह्वीनामुत्तमस्त्रीणां भार्या सेव्याभव । अतएव तं वियमानं मेमोहं वैचित्यं । विसर्जय त्याजय ॥१६॥ **ती०** लोकेभ्यइत्यस्यवास्तवार्थस्तु इष्टदेवतायैदेव्यै रावणस्त्वात्मात्मीयसमर्पणं करोति—**लोकेभ्यइतिश्लोकद्वयेन** । अहमित्यनेनात्मसमर्पणं । रत्नानीत्यादिनाऽऽत्मीयसमर्पणमिति ज्ञेयं ॥ १७ ॥ **ति०** इच्छयेति । वस्तुतस्तु मां लक्ष्मींसंपदमित्यर्थः ॥२१॥ **ती०** वस्तुतस्तु मत्प्रसादात् मयिप्रसादोऽनुग्रहः । तस्मात् । तवललन्त्याः रमन्त्याः सत्याः बान्धवाश्चरमन्तामितिसंबन्धः ॥ २४ ॥ **रामानु०** ऋद्धिं संपदं । श्रियं भां ॥ २५ ॥ **ती०** ऋद्धिमित्यादीनांवास्तवार्थस्तु—सरामाऽहंतेअखिलसंपत्समृद्धिंददामि । गांरामेणसहसंयोजयेत्याशङ्क्यनाहंसंपदाद्यर्थी किंतुमोक्षकामी । अतो यावन्मोक्षंत्वत्पादाब्जंनत्यजामीत्यभिप्रायेणाह—**ऋद्धिममेत्यादिश्लोकचतुष्टयेन** । हेसुभगे ममऋद्ध्यादिकंपश्य । निक्षिप्तविजयः स्वतस्सिद्धविजयइत्यर्थः । वनगोचरः वनंजलंगोचरंनिवासस्थानंयस्यसः । नारायणइत्यर्थः । अतएवगतश्रीः गताप्राप्ता

[पा०] १ ङ. झ. ट. कःपुनर्नातिवर्तेत. घ. च. छ. ञ. कःपुमान्नातिवर्तेत. २ ख. शीतांशुसमदर्शने. ३ क. मेभार्या. ४ च. ज. झ. ट. मेतं. ५ ख. झ. ञ. ट. संप्रमथ्याहृतानिमे. क. ङ.—ज. संप्रमथ्यहृतानिमे. ६ ख. घ. ङ. झ. ट. तानिते. ७ झ. ट. चैवददामिते. ८ च. छ. ज. ञ. नैव. ९ क. ङ. च. ज. ट. इच्छमां. १० ङ. छ. झ. ञ. ट. सुप्रभाण्यव. च. छ. सुप्रभाण्यपि. ११ ङ.—ट. भूषणानिहि. १२ ङ.—ट. सुयुक्तं. १३ घ. रमस्व. १४ क. घ. मत्प्रभावात्. १५ ङ, ज, झ. ञ. ललतांबान्धवस्तव. १६ ङ.—ट. यशस्विनि. १७ ङ. झ. ट. चीरवासिना.

न हि वैदेहि रामस्त्वां द्रष्टुं वाऽप्युपलप्स्यते ॥ पुरोबलाकैरसितैर्मेघैर्ज्योत्स्नामिवावृताम् ॥ २७ ॥
न चापि मम हस्तात्त्वां प्राप्तुमर्हति राघवः ॥ हिरण्यकशिपुः कीर्तिमिन्द्रहस्तगतामिव ॥ २८ ॥
चारुस्मिते चारुदति चारुनेत्रे विलासिनि ॥ मनो हरसि मे भीरु सुपर्णः पन्नगं यथा ॥ २९ ॥
क्लिष्टकौशेयवसनां तन्वीमप्यनलङ्कृताम् ॥ त्वां दृष्ट्वा स्वेषु दारेषु रतिं नोपलभाम्यहम् ॥ ३० ॥
अन्तःपुरनिवासिन्यः स्त्रियः सर्वगुणान्विताः ॥ यावत्यो मम सर्वासामैश्वर्यं कुरु जानकि ॥ ३१ ॥
मम ह्यसितकेशान्ते त्रैलोक्यप्रवराः स्त्रियः ॥ तास्त्वां परिचरिष्यन्ति श्रियमप्सरसो यथा ॥ ३२ ॥
यानि वैश्रवणे सुभ्रु रत्नानि च धनानि च ॥ तानि लोकांश्च सुश्रोणि मां च भुङ्क्ष्व यथासुखम् ॥३३॥
न रामस्तपसा देवि न बलेन न विक्रमैः ॥ न धनेन मया तुल्यस्तेजसा यशसाऽपि वा ॥ ३४ ॥

पिब विहर रमस्व भुङ्क्ष्व भोगान्धननिचयं प्रदिशामि मेदिनीं च ॥
मयि लल ललने यथासुखं त्वं त्वयि च समेत्य ललन्तु बान्धवास्ते ॥ ३५ ॥
कुसुमिततरुजालसंततानि भ्रमरयुतानि सरिद्वतीरजानि ॥
कनकविमलहारभूषिताङ्गी विहर मया सह भीरु काननानि ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे विंशः सर्गः ॥ २० ॥

स्थण्डिलशायी भूतलशायी ॥२६॥ वाशब्दोऽवधारणे । द्रष्टुमपि नोपलप्स्यत एवेत्यर्थः । दर्शनमात्रफलमपि दर्शनं नप्राप्स्यसीत्यर्थः । पुरोऽग्रे बलाका येषां ते पुरोबलाकाः तैः । अनेन मेघानामतिविपुलतोच्यते । महामेघेष्वेव बलाकासंचारवर्णनात् ॥ २७ ॥ हिरण्यकशिपुः कीर्तिमिन्द्रहस्तगतामिवेति वैधर्म्यदृष्टान्तः । अत्र कीर्तिशब्देन भार्या लक्ष्यते । हिरण्यकशिपुरिन्द्रहस्तगतां भार्यां पुनः प्राप्तवानित्येतच्छ्रीभागवते प्रसिद्धम् । " व्यलुम्पन्नाजशिबिरममरा राज्यकाङ्क्षिणः । इन्द्रस्तु राजमहिषीं मातरं मम चाग्रहीत् " इत्यादिप्रह्लादवचनात् ॥ २८—३० ॥ ऐश्वर्यं अन्तःपुरैश्वर्यं । स्वामिनीत्वं कुरु प्राप्नुहीत्यर्थः ॥ ३१—३२ ॥ भुङ्क्ष्व स्वाधीनं कुरु ॥ ३३—३४ ॥ पिब मद्यमिति शेषः । विहर संचर । विहारशब्दस्य संचारेऽपि प्रयोगात् ॥ ३५—३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने विंशः सर्गः ॥ २० ॥

श्रीर्लक्ष्मीर्येन । अतएव प्रतिभक्तसंरक्षणव्रतशीलः । अतएव पितृवाक्यपरिपालनायस्थण्डिलशायीयोरामः । अचीरवाससेति च्छेदः । पीतांबरधारिणेत्यर्थः । एतादृशेनतेनरामेणसहवात्वं इदानींविद्यमानैश्वर्यापेक्षयानकिमपिकरिष्यसीति शङ्के मन्ये । अतोजीवतिमयिसतीतिशेषः । रामस्त्वांद्रष्टुमपिनोपलप्स्यते । नचममहस्तात्त्वांराघवःप्राप्तुमर्हति । मद्वधानन्तरंरामस्त्वांद्रष्टुमप्युपलप्स्यतेप्राप्तुमप्यर्हतीतिभावः ॥ ति० उपलभ्यते व्यत्ययेनश्यन्प्रत्ययः । समर्थोभवतीत्यर्थः । उपलप्स्यतइतिपाठे समर्थोभविष्यतीत्यर्थः ॥ २५—२७ ॥ ती० हिरण्यकशिपुरिति । पुराकिलहिरण्यकशिपोर्भार्यांह्लानारदमुखेनप्रार्थितस्तस्मैपुनःप्रादादिति भागवतेकथाऽस्ति । तथाच भार्याहरणमेवकीर्तिहरणमितिभावः ॥ स० हिरण्यकशिपुः इन्द्रहस्तगतां इन्द्राधीनांकीर्तिं । इन्द्रः स्वरिपुहिरण्यकशिपोर्भार्यामपहृतवानितिकीर्तियथानप्राप्तुमर्हति तथेत्यर्थः । इन्द्रनीतांकयाधूंहिरण्यकशिपुःपुनरपीन्द्रंनिर्जित्यानीतवानित्यप्रसिद्धेः । नारदएवतांतस्मैदत्तवानितिभावः ॥ २८ ॥ शि० अनलङ्कृतांत्वां त्वदुःखमित्यर्थः । दृष्ट्वा स्वेषुदारेषु । रतिं प्रीतिं । नोपलभामि । अतिदुःखितंमनःकापिनप्रवर्ततइत्यर्थः । एतेन रावणस्यदयालुत्वंसूचितं ॥ स० अनलङ्कृतामपित्वांदृष्ट्वा स्वभार्यासुरतिं नोपलभामि नोपलभे । अलङ्कृतांपुनर्दृष्ट्वातत्ररतिंनोपलभइतिकिंवक्तव्यमित्यर्थः । एतेनसौन्दर्यातिशयोद्योत्यते ॥ ती० क्लिष्टकौशेयेत्यस्यवास्तवार्थस्तु त्वांममेव्देवतांदृष्ट्वा स्वेषुधनेषुदारेषुचरतिंनोपलभामि । इष्टदेवतायास्तवदर्शनमात्रेणानन्दपूर्णोऽहंसर्वतोनिवृत्तोस्मीतिभावः ॥ ३० ॥ ती० नरामइत्यस्यवास्तवार्थस्तु—रामः तपआदिनामयातुल्योनभवति । किंतुनिरवधिकषड्गुणैश्वर्यसंपन्नोभगवाञ्श्रीरामोमत्तोप्यधिकएवेतिभावः ॥३४॥ ती० मयि ललल रमस्व । वस्तुतस्तु मयिभृत्येसति ललं ॥३५॥ ती० मयासह । वस्तुतस्तु सह एकदैव । मया संवर्धितानीतिशेषः । काननानिविहर ॥ ३६ ॥ इतिविंशः सर्गः ॥ २० ॥

[पा०] १ च. द्रष्टुमप्युपलप्स्यते. ङ. ञ. ञ. ट. द्रष्टुंवाप्युपलभ्यते. क. ख. द्रष्टुंवाप्युपपद्यते. २ क. सर्वगुणोत्तराः, ३ ङ. ञ. ट. प्रवरस्त्रियः. ४ ङ. ञ, ट, मया. ५ क. रूपेण, ङ. ञ. ट, बलेनच. ६ क. ख. यशसापिच.

एकविंशः सर्गः ॥ २१ ॥

सीतयारावणंप्रति मध्येतृणप्रक्षेपेण साम्नाहितोपदेशपूर्वकं रामगुणानुवर्णनेनतस्मैस्वप्रत्यर्पणेन तेनसहमैत्रीविरोधसंपादनयोः क्रमेणशुभाशुभफलहेतुत्वोक्तिः ॥ १ ॥

तस्य तद्वचनं श्रुत्वा सीता रौद्रस्य रक्षसः ॥ आर्ता दीनस्वरा दीनं प्रत्युवाच शनैर्वचः ॥ १ ॥
दुःखार्ता रुदती सीता वेपमाना तपस्विनी ॥ चिन्तयन्ती वरारोहा पतिमेव पतिव्रता ॥
तृणमन्तरतः कृत्वा प्रत्युवाच शुचिस्मिता ॥ २ ॥
निवर्तय मनो मत्तः स्वजने क्रियतां मनः ॥ न मां प्रार्थयितुं युक्तं सुसिद्धिमिव पापकृत् ॥ ३ ॥
अकार्यं न मया कार्यमेकपत्न्या विगर्हितम् ॥ कुलं संप्राप्तया पुण्यं कुले महति जातया ॥ ४ ॥
एवमुक्त्वा तु वैदेही रावणं तं यशस्विनी ॥ राक्षसं पृष्ठतः कृत्वा भूयो वचनमब्रवीत् ॥ ५ ॥
नाहमौपयिकी भार्या परभार्या सती तव ॥ साधुधर्ममवेक्षस्व साधु साधुव्रतं चर ॥ ६ ॥
यथा तव तथाऽन्येषां दारा रक्ष्या निशाचर ॥ आत्मानमुपमां कृत्वा स्वेषु दारेषु रम्यताम् ॥ ७ ॥
अतुष्टं स्वेषु दारेषु चपलं चलितेन्द्रियम् ॥ नयन्ति निकृतिप्रज्ञं परदाराः पराभवम् ॥ ८ ॥
इह सन्तो न वा सन्ति सतो वा नानुवर्तसे ॥ तथाहि विपरीता ते बुद्धिराचारवर्जिता ॥ ९ ॥

तस्येत्यादि ॥ १ ॥ तृणमिति रावणस्य साक्षात्संभाषणानर्हत्वात्तृणव्यवधानकरणम् । प्रत्युवाचेति पुनरभिधानं वचनप्रकारविशेषकथनार्थं । दुःखार्तायाअपि शुचिस्मितत्वाभिधानं वस्तुस्वभावेन सस्मितवत्प्रतीयमानत्वात् ॥२—३॥एकः पतिर्यस्यास्सा एकपत्नी तया। "नित्यं सपत्न्यादिषु" इति ङीप्॥४॥ पृष्ठतः कृत्वा अनादृत्येर्थः ॥ ५ ॥ सती अहं तव औपयिकी युक्ता भार्या न किन्तु परिहार्या । साधूनां सतां धर्मं साधुधर्मं । साधूनांव्रतं साधुव्रतं। साधु सम्यक् । चर ॥६॥ आत्मानमुपमां कृत्वा यथा तव दारा रक्ष्यास्तथान्येषां दारा रक्ष्याः। तस्मात् स्वेषु दारेषु रम्यतां॥७॥ अतुष्टं अतृप्तं निकृतिप्रज्ञं निकृतौ शाठ्ये प्रज्ञा यस्य तं । पराभवं आयुरैश्वर्यादिक्षयरूपं ॥८॥ इह अतिविशालेपि दुर्जनसंकुले देशे। सन्तः त्वामनर्थान्निवारयन्तः। न सन्ति वा नसन्ति किं सन्त्येव । श्रीविभीषणप्रभृतीनां संभवान्न सन्तीति कथं वक्तुं शक्यं । सतो वा नानुवर्तसे । "तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः"

तनि० तृणमन्तरतःकृत्वेति । परपुरुषमुखंनिरीक्ष्यवार्तानकर्तव्येतिमर्यादयावा तृणवदलक्षीकृत्यवा अस्मद्वक्ष्यमाणवचनंतृणसमानमित्यंनलक्षीकरोतीतिबुद्ध्यावा " सश्लाघ्यःसगुणीधन्यःसकुलीनःसबुद्धिमान् । सशूरःसचविक्रान्तोयंत्वंदेविनिरीक्षसे" इत्युक्तकटाक्षपाताद्दोमाभूदितिवा स्वामिनातृणमादायकाकासुरनिरासवदनेनतृणेनैतन्निरासःकार्यइतिवा अचेतनंचेतनंकृत्वासंबोधनेनवाक्यंवदामीतिबुद्ध्यावा आसन्नस्यास्यव्यवधानेनभाव्यमितिबुद्ध्यावा पशुसमानस्यतवेदमेवभोग्यमितिबुद्ध्यावा रामविरोधेन भवान्सानुबन्धोनशिष्यतीतिनिवेदनायवा तृणंमध्येस्थापयित्वा ॥ स० प्रत्युवाचेतिपूर्वंप्रतिज्ञातं । तत्रेत्थंकारमाह—तृणमन्तरतःकृत्वाप्रत्युवाचेति । अतोनपुनर्वचनं ॥ २ ॥ ति० कुद्धोक्त्यामनःपदादेःपौनरुक्त्यंनदोषभाक् । वर्णनीयमयीभावाच्चकवेरपि तादृशंनदोषाय ॥ स० युक्तः योग्यः । सिद्धिं मोक्षं ॥ ३ ॥ स० एकपत्न्या एकःपतिर्यस्यास्सा रामकृतयज्ञफलभोक्त्री । पतिव्रतेतियावत् । तया । विगर्हितं विनिन्दितं । तर्हि कदापिगर्हितंत्वयानानुष्ठितंकिमित्यतस्तथैवेत्याह—मयेति । मयायदकारि तत्सर्वं अं मत्पतिंविष्णुमुद्दिश्यैवाकारीतिविगर्हितंतनकार्यमितिभावः ॥ ४ ॥ ति० पृष्ठतःकृत्वा परावृत्यस्थित्वा ॥ ५ ॥ ती० वस्तुतस्तु अहंतव त्वया भार्या भर्तव्यान किंतुपरभार्या परेणरामेणभार्या भर्तव्या ॥ स० औपयिकी उपभोगयोग्यान । तत्रहेतुः परभार्येति । तत्रापिनस्वैरिणीत्युदीरयति—सतीति । साधूनांसतांधर्मं धर्मशास्त्रायाशंसितं । अवेक्षस्व । साधुव्रतं साधोः साध्व्याःपतिव्रतायाममव्रतं परित्यजनंचर । " वोतोगुणवचनात् " इति साधुस्साधुः ॥ ६ ॥ स० दाराः रक्ष्याः शीलतःसंरक्ष-

[पा०] १ क. घ. ङ. छ.—ट. ततःशनैः. २ क. चिन्तयित्वा. ३ च. ज. क्रियतांहितत्. क. ख. घ. झ. प्रीयतांमनः. ४ क. घ. ङ. च. ज.—ट. युक्तस्त्वंसिद्धिमिव. ५ क. अनार्यं. ६ घ. तपस्विनी. ७ घ. ङ. च. ज.—ट. रावणं. ८ घ. ङ. च. ज.—ट. रक्ष्यादाराः. ९ ङ. झ. ट. चपलेन्द्रियं. १० ख. झ. ञ. ट. यथाहि.

विकृताः पिङ्गलाः काली: क्रोधनाः कलहप्रियाः ॥ कालायसमहाशूलकूटमुद्गरधारिणीः ॥ ९ ॥
वराहमृगशार्दूलमहिषाजशिवामुखीः ॥ गजोष्ट्रहयपादीश्च निखातशिरसोपराः ॥ १० ॥
एकहस्तैकपादाश्च खरकर्ण्यः श्वकर्णिकाः ॥ गोकर्णीर्हस्तिकर्णीश्च हरिकर्णीस्तथापराः ॥ ११ ॥
अनासा अतिनासाश्च तिर्यङ्नासा विनासिकाः ॥ गजसन्निभनासाश्च ललाटोच्छ्वासनासिकाः ॥१२॥
हस्तिपादा महापादा गोपादाः पादचूडिकाः ॥ अतिमात्रशिरोग्रीवा अतिमात्रकुचोदरीः ॥ १३ ॥
अतिमात्रास्यनेत्राश्च दीर्घजिह्वानखास्तथा ॥ अजामुखीर्हस्तिमुखीर्गोमुखीः सूकरीमुखीः ॥ १४ ॥
हयोष्ट्रखरवक्त्राश्च राक्षसीर्घोरदर्शनाः ॥ शूलमुद्गरहस्ताश्च क्रोधनाः कलहप्रियाः ॥ १५ ॥
कराला धूम्रकेशीश्च राक्षसीर्विकृताननाः ॥ पिबन्तीः सततं पानं सदा मांससुराप्रियाः ॥ १६ ॥
मांसशोणितदिग्धाङ्गीर्मांसशोणितभोजनाः ॥ ता ददर्श कपिश्रेष्ठो रोमहर्षणदर्शनाः ॥
स्कन्धवन्तमुपासीनाः परिवार्य वनस्पतिम् ॥ १७ ॥
तस्याधस्ताच्च तां देवीं राजपुत्रीमनिन्दिताम् ॥ लक्षयामास लक्ष्मीवान्हनुमाञ्जनकात्मजाम् ॥१८॥
निष्प्रभां शोकसंतप्तां मलसंकुलमूर्धजाम् ॥ क्षीणपुण्यां च्युतां भूमौ तारां निपतितामिव ॥ १९ ॥
चारित्रव्यपदेशाढ्यां भर्तृदर्शनदुर्गताम् ॥ भूषणैरुत्तमैर्हीनां भर्तृवात्सल्यभूषणाम् ॥ २० ॥
राक्षसाधिपसंरुद्धां बन्धुभिश्च विनाकृताम् ॥ विधूतां सिंहसंरुद्धां बद्धां गजवधूमिव ॥ २१ ॥
चन्द्ररेखां पयोदान्ते शारदाभ्रैरिवावृताम् ॥ क्लिष्टरूपामसंस्पर्शादयुक्तामिव वल्लकीम् ॥ २२ ॥
सीतां भर्तृवशे युक्तामयुक्तां राक्षसीवशे ॥ अशोकवनिकामध्ये शोकसागरमाप्लुताम् ॥ २३ ॥
ताभिः परिवृतां तत्र सग्रहामिव रोहिणीम् ॥ ददर्श हनुमान्देवीं लतां कुसुमितामिव ॥ २४ ॥
सा मलेन च दिग्धाङ्गी वपुषा चाप्यलंकृता ॥ मृणाली पङ्कदिग्धेव विभाति न विभाति च ॥२५॥

भुग्नवक्त्रां निम्नवक्त्रां । विकृताननां नासिकौष्ठविरहितानना मित्यर्थः । एतदन्तस्य पूर्वेण ददर्शेत्यनेनान्वयः ॥ ८ ॥ विकृता इत्यादेरुत्तरेण ददर्शेत्यनेनान्वयः । एता एकाक्ष्यादिराक्षसीभ्योन्याः । विकृताः विकृतवेषाः ॥ ९ ॥ निखातशिरसः गात्रान्तरवर्तिशिरसः ॥ १० ॥ हरिकर्णीः कपिकर्णीः ॥ ११—१२ ॥ पादे चूडिका यासां ताः पादचूडिकाः । " शिखा चूडा केशपाशी" इत्यमरः ॥ १३—१५ ॥ राक्षसीर्विकृताननाः इत्यत्र पुनः राक्षसीपदमविस्मरणार्थं ॥ १६—१७ ॥ लक्ष्मीवान् सीतादर्शनजनितशोभायुक्तः ॥ १८ ॥ च्युतां स्थानाच्चलितां ॥ १९ ॥ चारित्रव्यपदेशाढ्यां पतिव्रताधर्माचरणख्यातिसंपन्नां । भर्तृदर्शनेन दुर्गतां दरिद्रां । भर्तृदर्शनरहितामित्यर्थः । भर्तृवात्सल्यभूषणां वात्सल्यपदमत्र स्नेहमात्रवाचि ॥ २०—२१ ॥ पयोदान्ते वर्षान्ते । चन्द्ररेखायाः स्पष्टास्पष्टत्वद्योतनायेदं विशेषणं । असंस्पर्शात् उद्वर्तनादिसंस्काररहित्यात् । अयुक्तां अनारोपितत्रीं । वल्लकीं वीणां ॥ २२ ॥ सीतामित्यादिपरशेषः ॥ राक्षसीवशे अयुक्तां अनवस्थितां । तद्वचनान्यशृण्वन्तीमित्यर्थः ॥ २३ ॥ लतां कुसुमितामिव तथादर्श-

ति० पयोदान्ते वर्षान्ते । अनेन दुःखस्यात्यल्पावशिष्टत्वंसूच्यते ॥ २२ ॥ ती० लतामकुसुमामिव आभरणपरिहारादितिभावः ॥ २४ ॥

[पा०] १ क. महाप्रास. २ ग.—ट. शिवामुखाः. ३ घ. ङ. झ. ञ. ट. हयपादाश्च. च. छ. ज. शिववक्त्राश्च. क. ग. हयवक्त्राश्च. ४ ग. घ. खरकर्णाश्चकर्णिकाः. ५ छ. ज. गोकर्णाहस्तिकर्णाश्चहरिकर्णास्तथा. ६ ङ. झ. ट. अतिनासाश्चकाश्चित्तिर्यक्स्रवासाअनासिकाः. ७ ग. कृशोदरीः. ट. कुचोदराः. ८ ङ. छ. झ. ञ. ट. जिह्वाननास्तथा. ९ झ. ञ. ट. करालधूम्रकेशिन्यो. १० झ. ञ. ट. सुरामांससदाप्रियाः. ११ क. वैदेहीं. १२ क. दर्शयामास. १३ घ. ञ. हनूमान्मारुतात्मजः. १४ क. ख. घ.—ट. भूषितां. १५ ङ. झ. ञ. ट. सतांभर्तृहिते. च. छ. ज. सतांपतिहिते. ग. सदाभर्तृहिते. १६ क. ग. घ. ङ. झ. रक्षसांवशे. १७ ङ. झ. ञ. ट. हनुमांस्तत्र. १८ ङ. ट. लतामकुसुमामिव. १९ क. ग. ङ. झ. ट. विभातिचनभातिच.

मलिनेन तु वस्त्रेण परिक्लिष्टेन भामिनीम् ॥ संवृतां मृगशाबाक्षीं ददर्श हनुमान्कपिः ॥ २६ ॥
तां देवीं दीनवदनामदीनां भर्तृतेजसा ॥ रक्षितां स्वेन शीलेन सीतामसितलोचनाम् ॥ २७ ॥
तां दृष्ट्वा हनुमान्सीतां मृगशाबनिभेक्षणाम् ॥ मृगकन्यामिव त्रस्तां वीक्षमाणां समन्ततः ॥ २८ ॥
दहन्तीमिव निःश्वासैर्वृक्षान्पल्लवधारिणः ॥ संघातमिव शोकानां दुःखस्योर्मिमिवोत्थिताम् ॥२९॥
तां क्षमां सुविभक्ताङ्गीं विनाभरणशोभिनीम् ॥ प्रहर्षमतुलं लेभे मारुतिः प्रेक्ष्य मैथिलीम् ॥ ३० ॥
हर्षजानि च सोश्रूणि तां दृष्ट्वा मदिरेक्षणाम् ॥ मुमोच हनुमांस्तत्र नमश्चक्रे च राघवम् ॥ ३१ ॥
नमस्कृत्वा स रामाय लक्ष्मणाय च वीर्यवान् ॥ सीतादर्शनसंहृष्टो हनुमान्संवृतोऽभवत् ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तदशः सर्गः ॥ १७ ॥

अष्टादशः सर्गः ॥ १८ ॥

शिंशुपाविटपाग्रगेनहनुमता अपररात्रेप्रबुध्यमदनपरवशतयाप्रमदाशतेनसह सीतासमीपमागच्छतोरावणस्यावलोकनम् ॥ १ ॥ ततः सीतासमीपमागतस्यरावणस्यचेष्टादेःस्फुटावगमाय उच्चशाखाग्रादवरोहणेनाधश्शाखाग्रेनिगूढमवस्थानम् ॥२॥

तथा विप्रेक्षमाणस्य वनं पुष्पितपादपम् ॥ विचिन्वतश्च वैदेहीं किंचिच्छेषा निशाऽभवत् ॥ १ ॥
षडङ्गवेदविदुषां क्रतुप्रवरयाजिनाम् ॥ शुश्राव ब्रह्मघोषांश्च विरात्रे ब्रह्मरक्षसाम् ॥ २ ॥
अथ मङ्गलवादित्रैः शब्दैः श्रोत्रमनोहरैः ॥ प्रबुध्यत महाबाहुर्दशग्रीवो महाबलः ॥ ३ ॥
विबुध्य तु यथाकालं राक्षसेन्द्रः प्रतापवान् ॥ स्रस्तमाल्याम्बरधरो वैदेहीमन्वचिन्तयत् ॥ ४ ॥
भृशं नियुक्तस्तस्यां च मदनेन मदोत्कटः ॥ न स तं राक्षसः कामं शशाकात्मनि गूहितुम् ॥ ५ ॥

नीयामित्यर्थः ॥ २४—२५ ॥ मलिनेनेत्यादिश्लोकद्वयमेकं वाक्यं ॥ २६—२७ ॥ तामित्यादिश्लोकत्रयमेकं वाक्यं ॥ २८—२९ ॥ क्षमां क्षमामिव स्थितां । निगीर्याध्यवसानादभेदोक्तिः । तां दृष्ट्वा तां प्रेक्ष्येत्यनयोर्विशेषणविशेष्यभेदान्न पौनरुक्त्यं । दूरप्रयुक्तस्यानुस्मरणार्थं वा पुनरुक्तिः ॥ ३० ॥ राघवं नमश्चक्रे । उपपदविभक्त्यपेक्षया कारकविभक्तेर्बलीयस्त्वान्नमस्करोति देवानित्यादाविव द्वितीया ॥ ३१ ॥ संवृतः राक्षस्यदर्शनाय शिंशुपापर्णैर्गूढोऽभूत् ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तदशः सर्गः ॥ १७ ॥

विप्रेक्षमाणस्य विचिन्वतश्च विप्रेक्षमाणे विचिन्वति च तस्मिन्नित्यर्थः । " यस्य च भावेन भावलक्षणं " इत्यर्थे षष्ठी ॥ १ ॥ विरात्रे अपररात्रे " अहस्सर्वैकदेशसंख्यातपुण्याच्च रात्रेः " इत्यत्र चकारादव्ययादुत्तरस्य रात्रिशब्दस्य समासान्तोच् प्रत्ययः । ब्रह्मरक्षसां ब्राह्मणत्वविशिष्टरक्षसां । ब्रह्मघोषान् वेदघोषान् ॥ २—४ ॥ नियुक्तः प्रेरितः

ति० क्षामां कृशां ॥ ३० ॥ **तो०** अत्रतांतामितितच्छब्दावृत्त्यातत्तदवस्थाभेदस्यवर्णितत्वादपौनरुक्त्यं ॥ ३१ ॥ इति सप्तदशः सर्गः ॥ १७ ॥

तो० वस्तुतस्तुमदनेसत्यपिमदोत्कटोन । अतएवतस्यांसीतायांनियुक्तः नितरांयुक्तः विनीतइत्यर्थः । अतएवराक्षसः तंकामं आत्मनिगूहितुंनशशाकेतिकाकुः ॥ **ति०** भृशंनियुक्तः गाढाभिनिवेशितचित्तः । कामं कामवेगं । ईदृशेषुतीर्थस्यान्यथायोजनं भ्रान्त्यैव । रक्षसस्तमोगुणाविष्टस्यभगवन्मायामोहितस्याकृत्येष्वेवप्रवृत्तेः । तथाक्रियमाणंभगवद्ध्यानमपिपापभोगोत्तरंजन्मान्तरेउत्तमफलायेतिबोध्यं । अतएवऋक्षाश्वमेधनाम्नोराज्ञोदानस्तावकऋङ्मन्त्रः " नयुष्मेवाजबन्धवनिनित्सुश्वनमर्त्यः । अवद्यमधिदीधरत् "

[पा०] १ ङ. महीनां. २ ग. नागकन्यामिव. ३ ग. ततस्ततः. ४ घ. ङ. झ. ञ. ट. तांक्षामां. क. च. छ. ज. तांसमां. ग. सीतांसमविभक्ताङ्गीं. ५ क. च. छ. ज. तथाश्रूणि. ६ क. घ. च. ज.—ट. नमस्कृत्वाच. ७ ङ. ज. झ. ट. ब्रह्मघोषान्स. ८ घ. ङ. च. झ. ञ. ट. प्राबोध्यत. ९ ग. विबुध्यच. १० ङ. झ. ञ. ट. महाभागो. ११ ङ. झ. ट. नतु.

स सर्वाभरणैर्युक्तो बिभ्रच्छ्रियमनुत्तमाम् ॥ तां नगैर्बहुभिर्जुष्टां सर्वपुष्पफलोपगैः ॥ ६ ॥
वृतां पुष्करिणीभिश्च नानापुष्पोपशोभिताम् ॥ सदामदैश्च विहगैर्विचित्रां परमाद्भुताम् ॥ ७ ॥
ईहामृगैश्च विविधैर्जुष्टां दृष्टिमनोहरैः ॥ वीथीः संप्रेक्षमाणश्च मणिकाञ्चनतोरणाः ॥ ८ ॥
नानामृगगणाकीर्णां फलैः प्रपतितैर्वृताम् ॥ अशोकवनिकामेव प्राविशत्संततद्रुमाम् ॥ ९ ॥
अङ्गनाशतमात्रं तु तं व्रजन्तमनुव्रजत् ॥ महेन्द्रमिव पौलस्त्यं देवगन्धर्वयोषितः ॥ १० ॥
दीपिकाः काञ्चनीः काश्चिज्जगृहुस्तत्र योषितः ॥ वालव्यजनहस्ताश्च तालवृन्तानि चापराः ॥११॥
काञ्चनैरपि भृङ्गारैर्जहुः सलिलमग्रतः ॥ मण्डलाग्रान्बृसीं चैव गृह्यान्याः पृष्ठतो ययुः ॥ १२ ॥
काचिद्रत्नमयीं स्थालीं पूर्णां पानस्य भामिनी ॥ दक्षिणा दक्षिणेनैव तदा जग्राह पाणिना ॥ १३ ॥
राजहंसप्रतीकाशं छत्रं पूर्णशशिप्रभम् ॥ सौवर्णदण्डमपरा गृहीत्वा पृष्ठतो ययौ ॥ १४ ॥
निद्रामदपरीताक्ष्यो रावणस्योत्तमाः स्त्रियः ॥ अनुजग्मुः पतिं वीरं घनं विद्युल्लता इव ॥ १५ ॥
व्याविद्धहारकेयूराः समामृदितवर्णकाः ॥ समागलितकेशान्ताः सस्वेदवदनास्तथा ॥ १६ ॥
घूर्णन्त्यो मदशेषेण निद्रया च शुभाननाः ॥ स्वेदक्लिष्टाङ्गकुसुमाः सुमाल्याकुलमूर्धजाः ॥ १७ ॥
प्रयान्तं नैर्ऋतपतिं नार्यो मदिरलोचनाः ॥ बहुमानाच्च कामाच्च प्रियं भार्यास्तमन्वयुः ॥ १८ ॥
स च कामपराधीनः पतिस्तासां महाबलः ॥ सीतासक्तमना मन्दो मदाञ्चितगतिर्बभौ ॥ १९ ॥
ततः काञ्चीनिनादं च नूपुराणां च निस्स्वनम् ॥ शुश्राव परमस्त्रीणां स कपिर्मारुतात्मजः ॥२०॥

॥ ५—७ ॥ वीथीः उद्यानवीथीः ॥ ८—९ ॥ महेन्द्रं देवगन्धर्वयोषितइव व्रजन्तं तं । अङ्गनाशतमात्रं अनुव्रजत् अन्वव्रजत् ॥ १० ॥ तालवृन्तानि व्यजनानि ॥ ११ ॥ भृङ्गारैः कनकालुकाभिः । "भृङ्गारः कनकालुका" इत्यमरः । मण्डलाग्रान् असिविशेषान् । "मण्डलाग्रो नतार्थकः" इति वैजयन्ती । बृसीं आस्तरणं । गृह्य गृहीत्वा ॥ १२ ॥ पानस्य पूर्णा पीयत इति पानं मधु तस्य पूर्णा तेन पूर्णा । "पूरणगुण—" इत्यादिना सुहितार्थयोगे षष्ठीसमासनिषेधज्ञापकादत्र षष्ठी । स्थालीं पात्रीं ॥ १३—१५ ॥ व्याविद्धाः व्यत्यस्ततया न्यस्ताः । समामृदितवर्णकाः संमृष्टानुलेपनाः । "अङ्गरागः समालम्भो वर्णकश्च विलेपनं" इति निघण्टुः ॥१६—१८ ॥ मदेनाञ्चिता गतिर्यस्य स मदाञ्चितगतिः

इति । तस्यार्थः—वाजमित्यन्ननाम । अन्नदानेनयेसर्वेषांबन्धवःतेषांसंबोधनं । हेवाजबन्धवः युष्मेयुष्माखधि । सप्तम्यर्थानुवाद्यधिः । निनित्सुश्चन निन्दनेच्छाशीलोपिमर्त्योऽवद्यं नदीधरत् नधारयति । भगवदनुसन्धानेनैवनिष्पापत्वादिति । एवंचभगवतो निन्दावरुद्धभावेनध्यानमपिनरकभोगोत्तरंजन्मान्तरेउत्तमफलाय । अतएवास्यमरणोत्तरंचतुर्थचतुर्युग्यांचेदिराजकुलेजन्म । चतुर्विंशतिचतुर्युग्यांरामावतारइतिहरिवंशोक्तेः । तावत्पर्यन्तंचैतत्पापफलभोगइत्यर्थोयातमितिबोध्यं ॥ **शि०** मदनेन मादकसुरापानादिना मदोत्कटः उत्कटदैन्यविशिष्टोपिराक्षसः । यतस्तस्यांसीतायां । भृशं अत्यन्तं । नियुक्तः संस्थापितचित्तः । अतः तं सीतागोपनविषयकं कामं इच्छां । आत्मनि मनसि । गूहितुं नियमितुं । नशशाक ॥ **स०** मदनेन तस्यांसीतायांनियुक्तः प्रेरितः पूर्वमेव । मदोत्कटः व्यक्तमदः । तं मदनं । गूहितुं निग्रहीतुं ॥ ५ ॥ **ति०** अङ्गनाः । शतमात्रमित्यवधारणेइतिकतकः । देवादियोषितोमहेन्द्रमिव पौलस्त्यं अनुव्रजन् । अडभावआर्षः ॥ **स०** अङ्गनाशतमेवाङ्गनाशतमात्रं देवगन्धर्वयोषितोमहेन्द्रमिवपौलस्त्यं अनुव्रजदभूत् ॥ १० ॥ **ती०** भृङ्गाराः धत्तूरकुसुमसदृशजलपात्राणि ॥ **ति०** मण्डलाग्रावृत्तपर्यन्ताः बृसीः आसनविशेषान् । तपस्विनामिमेतृणादिना । अस्यतुस्वर्णेनेतिविशेषः ॥ **स०** बृसीः ऋषिपुत्रत्वाद्रावणस्यऋष्यासनवत्त्वं ॥ १२ ॥

[**पा०**] १ ग. ङ.—ट. नगैर्विविधैः. २ ग. ङ. ट. मत्तैश्च. ३ क. ङ. झ. ञ. ट. परमाद्भुतैः. ४ क. ग. घ. च.—ट. विविधैर्वृतां. ५ ख. ङ. झ. ञ. ट. तोरणां. ६ ख. झ. ञ. ट. अङ्गनाःशतमात्रंतु. ७ ख. झ. ञ. ट. मनुव्रजन्. ८ घ. काञ्चनीश्चापिजगृहुः. ९ ङ. झ. ञ. ट. काञ्चनैश्चैव. १० ग. ङ.—ट. मण्डलाग्रावृसीश्चैव. क. घ. मण्डलाग्रानसींश्चैव. ११ घ. वहन्त्यःपृष्ठतो. १२ क.—ङ. छ. झ. ञ. ट. पात्रीं. १३ ङ. झ. ञ. ट. भ्राजतीं. १४ क. परिजग्राह. १५ च. छ. ज. वदनांबुजाः. १६ ख. घ.—ञ. समाल्याकुल. १७ च.—ट. प्रियभार्याः.

तं चाप्रतिमकर्माणमचिन्त्यबलपौरुषम् ॥ द्वारदेशमनुप्राप्तं ददर्श हनुमान्कपिः ॥ २१ ॥
दीपिकाभिरनेकाभिः समन्तादवभासितम् ॥ गन्धतैलावसिक्ताभिर्धियमाणाभिरग्रतः ॥ २२ ॥
कामदर्पमदैर्युक्तं जिह्मताम्रायतेक्षणम् ॥ समक्षमिव कन्दर्पमपविद्धशरासनम् ॥ २३ ॥
मथितामृतफेनाभमरजो वस्त्रमुत्तमम् ॥ सलीलमनुकर्षन्तं विमुक्तं सक्तमङ्गदे ॥ २४ ॥
तं पत्रविटपे लीनः पत्रपुष्पघनावृतः ॥ समीपमिव संक्रान्तं निध्यातुमुपचक्रमे ॥ २५ ॥
अवेक्षमाणस्तु ततो ददर्श कपिकुञ्जरः ॥ रूपयौवनसंपन्ना रावणस्य वरस्त्रियः ॥ २६ ॥
ताभिः परिवृतो राजा सुरूपाभिर्महायशाः ॥ तन्मृगद्विजसंघुष्टं प्रविष्टः प्रमदावनम् ॥ २७ ॥
क्षीबो विचित्राभरणः शङ्ककर्णो महाबलः ॥ तेन विश्रवसः पुत्रः स दृष्टो राक्षसाधिपः ॥ २८ ॥
वृतः परमनारीभिस्ताराभिरिव चन्द्रमाः ॥ तं ददर्श महातेजास्तेजोवन्तं महाकपिः ॥ २९ ॥
रावणोऽयं महाबाहुरिति संचिन्त्य वानरः ॥ [सोऽयमेव पुरा शेते पुरमध्ये गृहोत्तमे ॥]
अवप्लुतो महातेजा हनुमान्मारुतात्मजः ॥ ३० ॥
स तथाप्युग्रतेजाः सन्निधूतस्तस्य तेजसा ॥ पत्रगुह्यान्तरे सक्तो हनुमान्संवृतोऽभवत् ॥ ३१ ॥
सं तामसितकेशान्तां सुश्रोणीं संहतस्तनीम् ॥ दिदृक्षुररसितापाङ्गामुपावर्तत रावणः ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टादशः सर्गः ॥ १८ ॥

॥१९—२०॥ द्वारदेशं अशोकवनद्वारदेशं ॥ २१ ॥ गन्धतैलं गन्धवासिततैलं ॥ २२ ॥ समक्षं प्रत्यक्षं । अपविद्धशरासनं अधृतशरासनं ॥ २३ ॥ मथितामृतफेनाभं मथितं तक्रं अमृतं धारोष्णं तयोर्यत्फेनं तदाभं । "निरम्बु वोलं मथितं धारोष्णं त्वमृतंपयः" इत्युभयत्र वैजयन्ती । विमुक्तं स्वस्थानात्प्रचलितं । अङ्गदे सक्तं वस्त्रं सलीलं यथा भवति तथा अनुकर्षन्तमित्यन्वयः ॥ २४ ॥ पत्रविटपे पत्रवति विटपे । लीनः छन्नः । पत्रपुष्पघनावृतः पत्रपुष्पसमूहावृतः । इवशब्दोवाक्यालंकारे । यद्वा दूरे समागतमपि तेजसा समीपे संक्रान्तमिव स्थितं । तं निध्यातुं द्रष्टुमुपचक्रमे । "निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणं" इत्यमरः ॥ २५—२६ ॥ प्रमदावनं अन्तःपुरोद्यानं ॥ २७ ॥ क्षीबः मत्तः । शङ्ककर्णः गर्वेण स्तब्धकर्ण इत्यर्थः ॥ २८—२९ ॥ अवप्लुतः अवरूढः । रावणचेष्टास्सर्वा द्रष्टुं पूर्वस्थानादधःशाखां समाश्रित इत्यर्थः ॥ ३० ॥ सः हनुमान् । तथा पूर्वोक्तरीत्या । उग्रतेजास्सन्नपि । तस्य रावणस्य । तेजसा निर्धूतः सन् । पत्रगुह्यान्तरे पत्रगूढप्रदेशे । संवृतोऽभवत् गूढोऽभवत् ॥ ३१—३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टादशः सर्गः ॥ १८ ॥

ति० अपविद्धशरासनं त्यक्तेक्ष्वाकुचापं । कन्दर्पमिवस्थितं ॥२३॥ **ति०** अमृतंपयः । मथितपयःफेनवच्छुक्लाआभायस्यतत् । सपुष्पं पुष्पमालासहितं । विमुक्तं विशिष्टमुक्तावन्तं । सपुष्पमवकर्षन्तमित्येवपाठः । तीर्थस्तु एतद्योजनाशक्त्यासलीलमवकर्षन्तमितिपाठंकल्पयति ॥ २४ ॥ **स०** क्षीबः मत्तः । शङ्ककर्णः तन्नामकोयोऽनपालस्तेनदृष्टः ॥ २८ ॥ **स०** सोयंरावणः पुरमध्ये प्रासादमध्ये । "गृहोपरिगृहंपुरं" इतिविश्वः । शेतेपुरा अशेत ॥ ३० ॥ **ति०** यद्यपिससमुद्रलङ्घनकर्ता समारुतात्मजः उग्रतेजाः । तथापि तस्यरावणस्यतेजसानिर्धूतः तस्यपुरोऽवस्थातुमशक्नुवन् पत्रे पत्रबहुले । अतएव गुह्यान्तरे शाखान्तरे । सक्तः स्थितः । तत्राप्यल्पशरीरतयासंवृतः गुप्तोऽभवत् । सर्वमायातिरस्कारकमायावतस्तस्यदृष्ट्वाग्रेमाययाऽल्पशरीरादिमत्त्वेनस्थातुमशक्यत्वादेवंकरणं ॥ ३१ ॥ इत्यष्टादशः सर्गः ॥ १८ ॥

[**पा०**] १ ङ. झ. ञ. ट. सपुष्पमवकर्षन्त. घ. च. छ. ज. सपुष्पमनु. २ ङ. च. ज.—ट. पुष्पशतावृतः. घ. पुष्पवनावृतः. ३ क. ख. घ.—ट. मुपसंक्रान्तं. ४ घ. प्रध्यातुं. ङ. झ. ट. विज्ञातुं. ५ ङ.—ट. तदा. ६ इदमर्धं क. ङ.—ट. पाठेषुदृश्यते. ७ क. ख. ङ. ज. झ. ट. सनिर्धूतः. ८ ङ. झ. ञ. ट. पत्रेगुह्यान्तरे. ९ ङ.—ट. मतिमान्. १० क. च. ज. सीतां. ११ ङ.—ट. रसितापाङ्गां.

एकोनविंशः सर्गः ॥ १९ ॥

ग्रन्थकृतानानावस्त्वौपम्येन बहुधोपवर्णितांसीतांप्रति रावणेनप्रलोभनोपक्रमः ॥ १ ॥

तस्मिन्नेव ततः काले राजपुत्री त्वनिन्दिता ॥ रूपयौवनसंपन्नं भूषणोत्तमभूषितम् ॥ १ ॥
ततो दृष्ट्वैव वैदेही रावणं राक्षसाधिपम् ॥ प्रावेपत वरारोहा प्रवाते कदली यथा ॥ २ ॥
ऊर्च्छाद्योदरमूरुभ्यां बाहुभ्यां च पयोधरौ ॥ उपविष्टा विशालाक्षी रुदन्ती वरवर्णिनी ॥ ३ ॥
दशग्रीवस्तु वैदेहीं रक्षितां राक्षसीगणैः ॥ ददर्श सीतां दुःखार्तां नावं सन्नामिवार्णवे ॥ ४ ॥
असंवृतायामासीनां धरण्यां शंसितव्रताम् ॥ छिन्नां प्रपतितां भूमौ शाखामिव वनस्पतेः ॥ ५ ॥
मलमण्डनचित्राङ्गीं मण्डनार्हाममण्डिताम् ॥ मृणाली पङ्कदिग्धेव विभाति न विभाति च ॥ ६ ॥
समीपं राजसिंहस्य रामस्य विदितात्मनः ॥ संकल्पहयसंयुक्तैर्यान्तीमिव मनोरथैः ॥ ७ ॥
शुष्यन्तीं रुदतीमेकां ध्यानशोकपरायणाम् ॥ दुःखस्यान्तमपश्यन्तीं रामां राममनुव्रताम् ॥ ८ ॥
वेष्टमानां तथाऽऽविष्टां पन्नगेन्द्रवधूमिव ॥ धूप्यमानां ग्रहेणेव रोहिणीं धूमकेतुना ॥ ९ ॥
वृत्तशीलकुले जातामाचारवति धार्मिके ॥ पुनःसंस्कारमापन्नां जातामिव च दुष्कुले ॥ १० ॥
अभूतेनापवादेन कीर्तिं निपतितामिव ॥ आम्नायानामयोगेन विद्यां प्रशिथिलामिव ॥ ११ ॥
सन्नामिव महाकीर्तिं श्रद्धामिव विमानिताम् ॥ पूजामिव परिक्षीणामाशां प्रतिहतामिव ॥ १२ ॥
आयतीमिव विध्वस्तामाज्ञां प्रतिहतामिव ॥ दीप्तामिव दिशं काले पूजामपहृतामिव ॥ १३ ॥

तस्मिन्नित्यादिश्लोकद्वयमेकान्वयं ॥ ततः रावणागमनानन्तरं । तस्मिन्नेव काले तदागमनानन्तरकाल एव । भूषणोत्तमभूषितं रूपयौवनसंपन्नं रावणं ततो दृष्ट्वैव तत्र दूरदेश एव दृष्ट्वा प्रावेपतेतिसंबन्धः ॥ १–५ ॥ मलमण्डनचित्राङ्गीं मलरूपमण्डनेन चित्राङ्गीं । मलावृतामप्याश्चर्यावहदेहामित्यर्थः । मृणाली पङ्कदिग्धेवेत्यत्र येत्यध्याहार्यं ॥ ६—८ ॥ आविष्टां मणिमन्त्राद्यभिभूतां । धूप्यमानां संतप्यमानां । धूमः केतुरिव धूमकेतुः केतुना ग्रहेणेत्यर्थः । यद्वा ग्रहेण ग्राहकेण आच्छादकेनेति धूमकेतुर्विशिष्यते ॥ ९ ॥ वृत्तं दृढं शीलं स्वभावो यस्य तत् तच्च तत् कुलं च तस्मिन् । आचारवति समयाचारवति । धार्मिके यज्ञादिधर्मप्रधाने एवंभूते कुले जातां । संस्कारमापन्नां विवाहरूपसंस्कारमापन्नां । अतः संस्कारद्वारा दुष्कुले पुनर्जातामिव स्थितां । कुमाराणामुपनयनमिव कुमारीणां विवाहो द्वितीयं जन्म । " वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृतः " इति स्मृतेः ॥ १०—११ ॥ सन्नां क्षीणां । श्रद्धामिव विमानितां अवमानितामित्यर्थः । अवमाने हि कृते अवमन्तरि श्रद्धा मन्दीभवति । पूजामिव परिक्षीणां स्वल्पपूजाद्रव्यामित्यर्थः । प्रतिहतां निष्फलां ॥ १२ ॥ आयतीं धनलाभं । विध्वस्तां मन्दीभूतां । प्रतिहतां अननुष्ठितां । दीप्तां दाहयुक्तां । काले उत्पातकाले । पूजामपहृतामिव । अत्र पूजाशब्देन पूजाद्रव्यमुच्यते

ति० मलेनमण्डनस्थानेषुदिग्धाङ्गीं रूषिताङ्गीं । चित्राङ्गीमितिपठित्वा मलरूपेणमण्डनेन चित्राङ्गीं कर्बुरामित्यर्थतीर्थआह । संन्यासिलादुचितैवतस्यमलेपिमण्डनत्वबुद्धिः । ईदृशींयांददर्श सा दिग्धामृणालीवविभातिनविभातिच ॥ स्वरूपशोभयाअतिमलावराच्चविभाति नविभातिचेत्यर्थः ॥ ६ ॥ ति० वृत्तमाचारः । शीलं सत्स्वभावः । तद्युते विहितकर्मानुष्ठानवतिचकुलेजातां । तादृशएवकुले पुनःसंस्कारं पाणिग्रहणसंस्कारमापन्नामपि दुष्कुलेजातां उत्पन्नां तत्रैवप्राप्तसंस्कारामिवचमलिनांस्थितां ॥ स० धार्मिके एतादृशेपितृकुलेजाता । सैवदुष्कुले वृत्तादिरहितेविवाहाख्यसंस्कारेणपुनर्जाताचेत्सायथावर्तेत तथाविद्यमानां ॥ १० ॥

[पा०] १ घ. ह्यनिन्दिता. २ क. ख. घ. ङ. छ.—ट. ऊरुभ्यामुदरंछाद्य. ३ क. घ.—ट. दीनां. ४ ख. ङ. झ. ञ. ट. मण्डनदिग्धाङ्गीं. ५ क. ख. विभातिचनभातिच. ६ क. शोकध्यानपरायणां. ७ क. ख. घ.—ज. ञ. ट. वेष्टमानामथा. ८ झ. ट. वृत्तशीलेकुले. ९ ख. विनाशितां. १० क. ख. ङ. ज. झ. ट. प्रज्ञामिव. ११ ङ.—ञ. पूजामपहृतामिव. क. पूजांप्रतिहतामिव.

पद्मिनीमिव विध्वस्तां हतशूरां चमूमिव ॥ प्रभामिव तमोध्वस्तामुपक्षीणामिवापगाम् ॥ १४ ॥
वेदीमिव परामृष्टां शान्तामग्निशिखामिव ॥ पौर्णमासीमिव निशां राहुग्रस्तेन्दुमण्डलाम् ॥ १५ ॥
उत्कृष्टपर्णकमलां वित्रासितविहङ्गमाम् ॥ हस्तिहस्तपरामृष्टामाकुलां पद्मिनीमिव ॥ १६ ॥
पतिशोकातुरां शुष्कां नदीं विस्रावितामिव ॥ परया मृजया हीनां कृष्णपक्षनिशामिव ॥ १७ ॥
सुकुमारीं सुजाताङ्गीं रत्नगर्भगृहोचिताम् ॥ तप्यमानामिवोष्णेन मृणालीमचिरोद्धृताम् ॥ १८ ॥
गृहीतामालितां स्तम्भे यूथपेन विनाकृताम् ॥ निःश्वसन्तीं सुदुःखार्तां गजराजवधूमिव ॥ १९ ॥
एकया दीर्घया वेण्या शोभमानामयत्नतः ॥ नीलया नीरदापाये वनराज्या महीमिव ॥ २० ॥
उपवासेन शोकेन ध्यानेन च भयेन च ॥ परिक्षीणां कृशां दीनामल्पाहारां तपोधनाम् ॥ २१ ॥
आयाचमानां दुःखार्तां प्राञ्जलिं देवतामिव ॥ भावेन रघुमुख्यस्य दशग्रीवपराभवम् ॥ २२ ॥
समीक्षमाणां रुदतीमनिन्दितां सुपक्ष्मताम्रायतशुक्ललोचनाम् ॥
अनुव्रतां राममतीव मैथिलीं प्रलोभयामास वधाय रावणः ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

विंशः सर्गः ॥ २० ॥

रावणेन सीतांप्रति प्रलोभनाय चाटुवचनोपन्यासपूर्वकंस्वाङ्गीकरणप्रार्थना ॥ १ ॥

सं तां पतिव्रतां दीनां निरानन्दां तपस्विनीम् ॥ साकारैर्मधुरैर्वाक्यैर्न्यदर्शयत रावणः ॥ १ ॥
भीं दृष्ट्वा नागनासोरु गूहमाना स्तनोदरम् ॥ अदर्शनमिवात्मानं भयान्नेतुं त्वमिच्छसि ॥ २ ॥

॥ १३ ॥ विध्वस्तां हिमादिहतां । तमोध्वस्तां तमःसंवृतां । उपक्षीणां स्वल्पजलामित्यर्थः ॥ १४ ॥ परामृष्टां शूद्रादिभिरितिशेषः ॥ १५ ॥ उत्कृष्टपर्णकमलां उद्धृतपत्रकमलां ॥ १६ ॥ विस्रावितां रोधोभङ्गादिना अन्यनिर्गमितजलामित्यर्थः । मृजया उद्वर्तनाद्यङ्गशोधनेन ॥ १७ ॥ सुजाताङ्गीं सुन्दराङ्गीं ॥ १८ ॥ आलितां बद्धां ॥ १९—२० ॥ अल्पाहारां तोयमात्राहारामित्यर्थः । यद्वा अल्पाहारां मितभोजिनीमित्युत्तमस्त्रीलक्षणमुच्यते ॥ २१ ॥ रघुमुख्यस्य कर्तुः दशग्रीवपराभवं भावेन मनसा । आयाचमानां प्रार्थयन्तीमिव स्थितां ॥ २२ ॥ समीक्षमाणां रक्षकं समीक्षमाणां । सुपक्ष्मेति । अन्ते ताम्रं मध्ये शुक्लमस्या लोचनमित्युच्यते ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनविंशः सर्गः ॥ १९ ॥

साकारैः सेङ्गितैः । " आकाराविङ्गिताकृती " इत्यमरः । न्यदर्शयत स्वाभिप्रायमिति शेषः । सीतायै स्वाभि ायं प्रकाशितवानित्यर्थः ॥ १ ॥ अद-

ति० परामृष्टां वेदवेदिरहितपतितैराक्रान्तां ॥ १५ ॥ ति० गृहीतां धृतां । पश्चात्स्तंभे लाडितां बद्धां ॥१९॥ ति० अल्पाहारां जलमात्राहारां । अन्नातयाऽन्नस्यग्रहीतुमशक्यत्वात् । देवराज्ञः पायसलाभेनतदनपेक्षणाच्च ॥ स० शोकेन रामविश्लेषजेन । ध्यानेन पत्युः । भयेन रावणजन्येन । अल्पाहारां पत्युच्छिष्टंविनान्यस्यस्वीकारायोग्यत्वाच्छरीरयात्रार्थं नीरस्याशितानशितलोक्तेस्तद्ग्रहणस्यादोषत्वात् । पत्युर्नारायणावतारत्वेनतत्रततसांनिध्यविशेषात्तद्ग्रहोयुक्तः । उपेन्द्रावतारत्वादामस्य इन्द्रस्यतदप्रजत्वात्तदुत्तपायसाशनंगौरवतःस्वान्नत्वाच्चभोजनंयुक्तमितिमन्तव्यं ॥ शि० अल्पः अतिसूक्ष्मः वायुरित्यर्थः । आहारोयस्यास्तां ॥ २१ ॥ वधाय स्ववधार्थमेव । नतुतेनकिंचित्प्रयोजनमितिभावः ॥ २३ ॥ इत्येकोनविंशः सर्गः ॥ १९ ॥

ति० परिवृतां राक्षसीभिरितिशेषः ॥ १ ॥ ती० वस्तुतस्तु पुत्रसमभृत्यदर्शनविषयेभयादिकंनोचितमितिभावः । ति० नेतु-

[पा०] १ ङ. झ. ट. तमोग्रस्तेन्दु. २ क. ध. च.—ट. माकुलामिवपद्मिनीं. ३ क. घ. शोकाकुलां. ४ ख. ङ. झ. ट. गृहीतांलाडितां. क. गृहीतांबलिनास्तंभे. ५.क. सीतां, ६ ङ. झ. ञ. ट. परिवृतां.

कामये त्वां विशालाक्षि बहुमन्यस्व मां प्रिये ॥ सर्वाङ्गगुणसंपन्ने सर्वलोकमनोहरे ॥ ३ ॥
नेह केचिन्मनुष्या वा राक्षसाः कामरूपिणः ॥ व्यपसर्पतु ते सीते भयं मत्तः समुत्थितम् ॥ ४ ॥
स्वधर्मो रक्षसां भीरु सर्वथैव न संशयः ॥ गमनं वा परस्त्रीणां हरणं संप्रमथ्य वा ॥ ५ ॥
एवं चैतदकामां तु नं त्वां स्प्रक्ष्यामि मैथिलि ॥ कामं कामः शरीरे मे यथाकामं प्रवर्तताम् ॥६॥
देवि नेह भयं कार्यं मयि विश्वसिहि प्रिये ॥ प्रणयस्व च तत्त्वेन मैवं भूः शोकलालसा ॥ ७ ॥
एकवेणी धराशय्या ध्यानं मलिनमम्बरम् ॥ अस्थानेऽप्युपवासश्च नैतान्यौपयिकानि ते ॥ ८ ॥
विचित्राणि च माल्यानि चन्दनान्यगुरूणि च ॥ विविधानि च वासांसि दिव्यान्याभरणानि च ॥९॥
महार्हाणि च पानानि शयनान्यासनानि च ॥ गीतं नृत्तं च वाद्यं च लभ मां प्राप्य मैथिलि॥१०॥
स्त्रीरत्नमपि मैवं भूः कुरु गात्रेषु भूषणम् ॥ मां प्राप्य हि कथं नु स्यास्त्वमनर्हा सुविग्रहे ॥ ११ ॥
इदं ते चारु संजातं यौवनं व्यतिवर्तते ॥ यदतीतं पुनर्नैति स्रोतः शीघ्रमपामिव ॥ १२ ॥
त्वां कृत्वोपरतो मन्ये रूपकर्ता स विश्वसृक् ॥ न हि रूपोपमा त्वन्या तवास्ति शुभदर्शने ॥१३॥

र्शनं अदृश्यत्वं ॥ २ ॥ मां दृष्ट्वा भीतिर्न कर्तव्येत्याह —कामय इति ॥ ३ ॥ अन्ये च भयहेतवोत्र न सन्तीत्याह—नेहेति ॥ ४ ॥ परदारेच्छा दोष इत्याशङ्क्याह—स्वधर्म इति ॥ संप्रमथ्य बलात्कृत्य ॥५॥ कामं अत्यन्तं । यथाकामं यथेच्छं ॥ ६ ॥ प्रणयस्व स्नेहंकुरु ॥ ७ ॥ एकवेणी असीमन्ततवेणी । धराशय्या भूशयनं । औपयिकानि युक्तानि । " युक्तमौपयिकं " इत्यमरः ॥ ८—१० ॥ मां प्राप्य हीति । हिः पादपूरणे अप्यर्थो वा । हे सुविग्रहे मां प्राप्यापि कथमनर्हा स्याः ॥ ११—१२ ॥ उपरतः निवृत्तः । अत्रेतिकरणं द्रष्टव्यं । उत्तरोत्तरं सातिशयं रूपं सिसृक्षुर्विधाता त्वां सृष्ट्वा इतः परं सातिशयं रूपं स्रष्टुं न शक्यत इति धिया सृष्टेरुपरत इति मन्य

मिच्छसि तत्किमितिशेषः ॥ २ ॥ **ती०** वस्तुतस्तु त्वांकामये ईश्वरीत्वेनेतिशेषः । अतोमांबहुमन्यस्व ॥ ३ ॥ **ती०** नेहेति । मनुष्याराक्षसावा । त्वद्भयकर्तारइतिशेषः । वस्तुतस्तु सर्वेश्वर्यास्तवनकुत्रापिभयशङ्केतिभावः । **ति०** किमिदानींमदतिरिक्तपुरुषान्तरजंतवभयं उतममस्पर्शेधर्महानिजं । नाद्यइत्याह—**नेहेति** । मत्तः मदागमनात्समुत्थितं पुरुषान्तरागमनसंभावनयाजातं भयं व्यपसर्पतु । अन्येषामभावात् ॥४॥ **ति०** नान्त्यइत्याह—स्वधर्मइति । तंस्वधर्ममाह—गमनंवेति । आनुकूल्यंसंपाद्येतिशेषः । संप्रमथ्य बलात्कृत्य । एवंस्वधर्मत्व.ममनाधर्मः । बलात्कारेचास्वतन्त्रत्वात्स्त्रियाअपिनदोषइतिभावः ॥ ५ ॥ **ती०** यद्यपिपरदाराभिमर्शःस्वधर्मः तथापि नाहंत्वाम मयमानांस्प्रक्ष्यामीत्याह—**स्वधर्मइत्यादिश्लोकद्वयेन** । कामं अत्यर्थं । यथाकामं यथेच्छं । मेशरीरेकामः । तवेतिशेषः । मयितवेच्छाप्रवर्ततामितिभावः । स्वधर्मइत्यादिश्लोकद्वयस्यवास्तवार्थस्तु—कामुकस्त्वं नविश्वसनीयइत्यतआह—स्वधर्मइत्यादि । यद्यपिरक्षसांपरदाराहरणादि स्वधर्मःस्वभावः । मेशरीरेकामं अत्यर्थं । यथाकामं यथेच्छं कामःप्रवर्ततांनाम मन्मथविकारोस्तुनाम । तथाप्येतत्सर्वंममेष्टदेवतायांत्वयिनघटतइतिशेषः । अतएव अकामां मयि भृत्यत्वकामनारहितां । यद्वा अकामां विष्णुकामांत्वां । नस्प्रक्ष्यामि त्वदाज्ञांविना पूजांकर्तुमपिबिभेमीतिशेषः ॥ **ति०** एवंच एवमपि । बलात्कारपक्षे तवममचदोषाभावेपितस्यपक्षस्यरसाभाससंपादकत्वात् । अतएवमकामां अनेनप्रकारेणमयिकामरहितांत्वां मद्भिन्नेच्छावतींच । नच नतु । स्प्रक्ष्यामि । एवंचैतदकामांत्वामितिपाठे एतत् रक्षोधर्मत्वं । एवंच एवमेव मदुक्तरीतिकमेव । तथाप्युक्तप्रकारेण त्वामकामां नस्प्रक्ष्यामीत्यर्थः । नन्वेवंसतिदुस्सहाकामपीडातवस्यात्तत्राह—**काममिति** । कामः मन्मथः । यथाकामं यथेच्छं । कामं तद्विषयेच्छां । प्रवर्ततां प्रवर्तयत्वित्यर्थः ॥ ६ ॥ **ती०** वस्तुतस्तु विचित्राणीत्यादिश्लोकद्वयमेकंवाक्यं । मांप्राप्य भृत्यत्वेनेतिशेषः । माल्यादीनिलभ प्राप्नुहीतिसंबन्धः ॥ ९—१० ॥ **ती०** वस्तुतस्तु त्वत्पूजाक्षमंमदीयमायुर्व्यर्थंगच्छतीतिखियति—**इदंतइति** । ते तवभृत्यस्य । ममेतिशेषः । यौवनं दार्ढ्यावस्था । यत् यतः । भृत्यस्यममायुः व्यर्थंगच्छति ।

[पा०] १ ख. ङ. च. ज.—ट. सर्वदैव. २ च. ज. ञ. चैवमकामां. ङ. झ. ट. चैवमकामांत्वां. घ. त्वेतदकामां. ३ ङ. झ. ट. नच. ४ ङ. अधश्शय्या. ५ क. ख. घ. यानानिशयनानिच. ६ क.—ट. स्त्रीरत्नमसि. ७ घ.—ट. कथंवा. क. कथंस्यास्त्वमनाहारा. ८ ङ.—ट. स्रोतस्विनामिव. ९ ख. ङ. झ. ट. विश्वकृत्. १० क. ङ.—ट. त्वन्या.

त्वां समासाद्य वैदेहि रूपयौवनशालिनीम् ॥ कः[1] पुमानतिवर्तेत साक्षादपि पितामहः ॥ १४ ॥
यद्यत्पश्यामि ते गात्रं शीतांशुसदृशानने[2] ॥ तस्मिंस्तस्मिन्पृथुश्रोणि चक्षुर्मम निबध्यते ॥ १५ ॥
भव मैथिलि भार्या मे मोहमेनं[3] विसर्जय[4] ॥ बह्वीनामुत्तमस्त्रीणामाहृतानामितस्ततः ॥
सर्वासामेव भद्रं ते ममाग्रमहिषी भव ॥ १६ ॥
लोकेभ्यो यानि रत्नानि संप्रमथ्याहृतानि वै[5] ॥ तानि[6] मे भीरु सर्वाणि राज्यं चैतदहं च ते ॥१७॥
विजित्य पृथिवीं सर्वां नानानगरमालिनीम् ॥ जनकाय प्रदास्यामि तव हेतोर्विलासिनि ॥ १८ ॥
नेह[7] पश्यामि लोकेऽन्यं यो मे प्रतिबलो भवेत् ॥ पश्य मे सुमहद्वीर्यमप्रतिद्वन्द्वमाहवे ॥ १९ ॥
असकृत्संयुगे भग्ना मया विमृदितध्वजाः ॥ अशक्ताः प्रत्यनीकेषु स्थातुं मम सुरासुराः ॥ २० ॥
इच्छया क्रियतामद्य प्रतिकर्म[8] तवोत्तमम् ॥ २१ ॥
संप्रभाण्यवसज्यन्तां[9] तवाङ्गे भूषणानि[10] च ॥ साधु पश्यामि ते रूपं संयुक्तं[11] प्रतिकर्मणा ॥ २२ ॥
प्रतिकर्माभिसंयुक्ता दाक्षिण्येन[12] वरानने ॥ भुङ्क्ष्व भोगान्यथाकामं पिब भीरु रमस्व च ॥ २३ ॥
यथेष्टं च प्रयच्छ त्वं पृथिवीं वा धनानि च ॥ ललस्व[13] मयि विस्रब्धा धृष्टमाज्ञापयस्व च ॥
मत्प्रसादाल्ललन्त्याश्च[14] ललन्तां[15] बान्धवास्तव[16] ॥ २४ ॥
ऋद्धिं ममानुपश्य त्वं श्रियं भद्रे यशश्च[17] मे ॥ किं करिष्यसि रामेण सुभगे चीरवाससा[18] ॥ २५ ॥
निक्षिप्तविजयो रामो गतश्रीर्वनगोचरः ॥ व्रती स्थण्डिलशायी च शङ्के जीवति वा न वा ॥ २६ ॥

इत्यर्थः ॥ १३ ॥ कः अतिवर्तेत न कोपीत्यर्थः ॥ १४—१९ ॥ विमृदितध्वजाः भग्नध्वजाः । प्रत्यनीकेषु शत्रुषु मध्ये ॥ २० ॥ प्रतिकर्म अलंकारः । "प्रतिकर्म प्रसाधनं" इत्यमरः ॥ २१ ॥ अवसज्यन्तां अर्प्यन्तां । प्रतिकर्मणा संयुक्तं पश्यामि पश्येयं ॥ २२ ॥ दाक्षिण्येन सरलत्वेन । भुङ्क्ष्व अनुभव । "दक्षिणे सरलोदारौ" इत्यमरः ॥२३॥ ललस्व प्रीतिं कुरु । "ल ईप्सायाम्" इति धातुः ॥ २४ ॥ एवमात्मानं प्रशस्य रामं निन्दति—किं करिष्यसीत्यादिना ॥२५॥ निक्षिप्तविजयः त्यक्तविजय इत्यर्थः ।

अतोमम तवपूजार्थमनुज्ञांदेहीतिशेषः ॥ १२ ॥ **ति०** कोनातिवर्तेत क्षुभ्येतेत्यर्थः । कःपुमानतिवर्तेतेतिपाठे कामवशतामतिक्रम्य कोवर्तेतेत्यर्थः ॥ **ती०** वस्तुतस्तु मदाराधनेतवबुद्धिःकथंस्यादतआह—त्वामिति । त्वां लक्ष्मीं । "सीतालक्ष्मीर्भवान्विष्णुः" इतिवक्ष्यमाणत्वात् । समासाद्य साक्षात्पितामहोपिनातिवर्तेत अनाराधितुंनशक्नुयात् । पुमांस्तुकोवाऽतिवर्तेतेत्यर्थः ॥ १४ ॥ **ती०** यद्यदिति । गात्रं अवयवविशेषं । तस्मिंस्तस्मिन्नवयवविशेषेचक्षुर्निबध्यते । इष्टदेवतायास्तवदर्शनस्यमुक्तिसाधकत्वादिति भावः ॥ १५ ॥ **ती०** वस्तुतस्तु मैथिलि भार्या भयाक्रान्ता आर्याश्रेष्ठाभव । एनंमोहं मयिशत्रुत्वशङ्कां । विसर्जय । मेमम उत्तमस्त्रीणांममयाअग्रमहिषीमन्दोदरी तस्याश्चममचभव ईश्वरोतिशेषः । **शि०** हे भवमैथिलि भवति भावयति नितरां स्वपतिं चिन्तयति सैवमैथिली । तत्संबोधनं । अग्रस्यसर्वोत्कृष्टस्यराज्ञोमहिषीत्वं ममबह्वीनामुत्तमस्त्रीणां भार्या सेव्याभव । अतएव तं वियमानं मेमोहं वैचित्यं । विसर्जय त्याजय ॥१६॥ **ती०** लोकेभ्यइत्यस्यवास्तवार्थस्तु इष्टदेवतायैदेव्यै रावणस्त्वात्मात्मीयसमर्पणं करोति—**लोकेभ्यइतिश्लोकद्वयेन** । अहमित्यनेनात्मसमर्पणं । रत्नानीत्यादिनाऽऽत्मीयसमर्पणमिति ज्ञेयं ॥ १७ ॥ **ति०** इच्छयेति । वस्तुतस्तु मां लक्ष्मींसंपदमित्यर्थः ॥२१॥ **ती०** वस्तुतस्तु मत्प्रसादात् मयिप्रसादोऽनुग्रहः । तस्मात् । तवललन्त्याः रमन्त्याः सत्याः बान्धवाश्चरमन्तामितिसंबन्धः ॥ २४ ॥ **रामानु०** ऋद्धिं संपदं । श्रियं भां ॥ २५ ॥ **ती०** ऋद्धिमित्यादीनांवास्तवार्थस्तु—सरामाऽहंतेअखिलसंपत्समृद्धिंददामि । गांरामेणसहसंयोजयेत्याशङ्क्यनाहंसंपदाद्यर्थी किंतुमोक्षकामी । अतो यावन्मोक्षंत्वत्पादाब्जंनत्यजामीत्यभिप्रायेणाह—**ऋद्धिममेत्यादिश्लोकचतुष्टयेन** । हेसुभगे ममऋद्ध्यादिकंपश्य । निक्षिप्तविजयः स्वतस्सिद्धविजयइत्यर्थः । वनगोचरः वनंजलंगोचरंनिवासस्थानंयस्यसः । नारायणइत्यर्थः । अतएवगतश्रीः गताप्राप्ता

[पा०] १ ङ. झ. ट. कःपुनर्नातिवर्तेत. घ. च. छ. ञ. कःपुमान्नातिवर्तेत. २ ख. शीतांशुसमदर्शने. ३ क. मेभार्या. ४ च. ज. झ. ट. मेतं. ५ ख. झ. ञ. ट. संप्रमथ्याहृतानिमे. क. ङ.—ज. संप्रमथ्यहृतानिमे. ६ ख. घ. ङ. झ. ट. तानिते. ७ झ. ट. चैवददामिते. ८ च. छ. ज. ञ. नैव. ९ क. ङ. च. ज. ट. इच्छमां. १० ङ. छ. झ. ञ. ट. सुप्रभाण्यव. च. छ. सुप्रभाण्यपि. ११ ङ.—ट. भूषणानिहि. १२ ङ.—ट. सुयुक्तं. १३ घ. रमस्व. १४ क. घ. मत्प्रभावात्. १५ ङ. ज. झ. ञ. ललतांबान्धवस्तव. १६ ङ.—ट. यशस्विनि. १७ ङ. झ. ट. चीरवासिना.

न हि वैदेहि रामस्त्वां द्रष्टुं वाऽप्युपलप्स्यते ॥ पुरोबलाकैरसितैर्मेघैर्ज्योत्स्नामिवावृताम् ॥ २७ ॥
न चापि मम हस्तात्त्वां प्राप्तुमर्हति राघवः ॥ हिरण्यकशिपुः कीर्तिमिन्द्रहस्तगतामिव ॥ २८ ॥
चारुस्मिते चारुदति चारुनेत्रे विलासिनि ॥ मनो हरसि मे भीरु सुपर्णः पन्नगं यथा ॥ २९ ॥
क्लिष्टकौशेयवसनां तन्वीमप्यनलङ्कृताम् ॥ त्वां दृष्ट्वा स्वेषु दारेषु रतिं नोपलभाम्यहम् ॥ ३० ॥
अन्तःपुरनिवासिन्यः स्त्रियः सर्वगुणान्विताः ॥ यावत्यो मम सर्वासामैश्वर्यं कुरु जानकि ॥ ३१ ॥
मम ह्यसितकेशान्ते त्रैलोक्यप्रवराः स्त्रियः ॥ तास्त्वां परिचरिष्यन्ति श्रियमप्सरसो यथा ॥ ३२ ॥
यानि वैश्रवणे सुभ्रु रत्नानि च धनानि च ॥ तानि लोकांश्च सुश्रोणि मां च भुङ्क्ष्व यथासुखम् ॥३३॥
न रामस्तपसा देवि न बलेन न विक्रमैः ॥ न धनेन मया तुल्यस्तेजसा यशसाऽपि वा ॥ ३४ ॥

पिब विहर रमस्व भुङ्क्ष्व भोगान्धननिचयं प्रदिशामि मेदिनीं च ॥
मयि लल ललने यथासुखं त्वं त्वयि च समेत्य लल्लन्तु बान्धवास्ते ॥ ३५ ॥
कुसुमिततरुजालसंततानि भ्रमरयुतानि समुद्रतीरजानि ॥
कनकविमलहारभूषिताङ्गी विहर मया सह भीरु काननानि ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे विंशः सर्गः ॥ २० ॥

स्थण्डिलशायी भूतलशायी ॥२६॥ वाशब्दोऽवधारणे । द्रष्टुमपि नोपलप्स्यत एवेत्यर्थः । दर्शनमात्रफलमपि दर्शनं नप्राप्स्यसीत्यर्थः । पुरोऽग्रे बलाका येषां ते पुरोबलाकाः तैः । अनेन मेघानामतिविपुलतोच्यते । महामेघेष्वेव बलाकासंचारवर्णनात् ॥ २७ ॥ हिरण्यकशिपुः कीर्तिमिन्द्रहस्तगतामिवेति वैधर्म्यदृष्टान्तः । अत्र कीर्तिशब्देन भार्या लक्ष्यते । हिरण्यकशिपुरिन्द्रहस्तगतां भार्यां पुनः प्राप्तवानित्येतच्छ्रीभागवते प्रसिद्धम् । " व्यलुम्पन्राजशिबिरममरा राज्यकाङ्क्षिणः । इन्द्रस्तु राजमहिषीं मातरं मम चाग्रहीत् " इत्यादिप्रह्लादवचनात् ॥ २८—३० ॥ ऐश्वर्यं अन्तःपुरैश्वर्यं । स्वामिनीत्वं कुरु प्राप्नुहीत्यर्थः ॥ ३१—३२ ॥ भुङ्क्ष्व स्वाधीनं कुरु ॥ ३३—३४ ॥ पिब मद्यमिति शेषः । विहर संचर । विहारशब्दस्य संचारेऽपि प्रयोगात् ॥ ३५—३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने विंशः सर्गः ॥ २० ॥

श्रीलक्ष्मीयेन । अतएव प्रतिभक्तसंरक्षणव्रतशीलः । अतएव पितृवाक्यपरिपालनायस्थण्डिलशायीयोरामः । अचीरवाससेति च्छेदः । पीतांबरधारिणेत्यर्थः । एतादृशेनतेनरामेणसहवात्वं इदानींविद्यमानंस्वार्थापेक्षयानकिमपिकरिष्यसीति शङ्के मन्ये । अतोजीवतिमयिसतीतिशेषः । रामस्त्वांद्रष्टुमपिनोपलप्स्यते । नचममहस्तात्त्वांराघवःप्राप्तुमर्हति । मद्बधानन्तरंरामस्त्वांद्रष्टुमप्युपलप्स्यतेप्राप्तुमप्यर्हतीतिभावः ॥ ति० उपलभ्यते व्यत्ययेनश्यन्प्रत्ययः । समर्थोभवतीत्यर्थः । उपलप्स्यतइतिपाठे समर्थोभविष्यतीत्यर्थः ॥ २५—२७ ॥ ती० हिरण्यकशिपुरिति । पुराकिलहिरण्यकशिपोर्भार्यांहृत्वानारदमुखेनप्रार्थितस्तस्मैपुनःप्रादादिति भागवतेकथाऽस्ति । तथाच भार्याहरणमेवकीर्तिहरणमितिभावः ॥ स० हिरण्यकशिपुः इन्द्रहस्तगतां इन्द्राधीनांकीर्तिं । इन्द्रः स्वरिपुहिरण्यकशिपोर्भार्यामपहृतवानितिकीर्तियथानप्राप्तुमर्हति तथेत्यर्थः । इन्द्रनीतांकयाधूंहिरण्यकशिपुःपुनरपीन्द्रंनिर्जित्यानीतवानित्यप्रसिद्धेः । नारदएवतांतस्मैदत्तवानितिभावः ॥ २८ ॥ शि० अनलङ्कृतांत्वां लक्ष्यःखमित्यर्थः । दृष्ट्वा स्वेषुदारेषु । रतिं प्रीतिं । नोपलभामि । अतिदुःखितंमनःक्वापिनप्रवर्ततइत्यर्थः । एतेन रावणस्यदयालुत्वंसूचितं ॥ स० अनलङ्कृतामपित्वांदृष्ट्वा स्वभार्यासुरतिं नोपलभामि नोपलभे । अलङ्कृतांपुनर्दृष्ट्वातत्ररतिंनोपलभइतिकिंवक्तव्यमित्यर्थः । एतेनसौन्दर्यातिशयोद्योत्यते ॥ ती० क्लिष्टकौशेयेत्यस्यवास्तवार्थस्तु त्वांमम देवतांदृष्ट्वा स्वेषुधनेषुदारेषुचरतिंनोपलभामि । इष्टदेवतायास्तवदर्शनमात्रेणानन्दपूर्णोऽहंसर्वतोनिवृत्तोस्मीतिभावः ॥ ३० ॥ ती० नरामइत्यस्यवास्तवार्थस्तु—रामः तपआदिनामयातुल्योनभवति । किंतुनिरवधिकषड्गुणैश्वर्यसंपन्नोभगवाञ्श्रीरामोमत्तोप्यधिकएवेतिभावः ॥३४॥ ती० मयि लल रमस्व । वस्तुतस्तु मयिश्लेषति लल ॥३५॥ ती० मयासह । वस्तुतस्तु सह एकदैव । मया संवर्धितानीतिशेषः । काननानिविहर ॥ ३६ ॥ इतिविंशः सर्गः ॥ २० ॥

[पा०] १ च. द्रष्टुमप्युपलप्स्यते. ङ. झ. ञ. ट. द्रष्टुंवाप्युपलभ्यते. क. ख. द्रष्टुंवाप्युपपद्यते. २ क. सर्वगुणोत्तराः. ३ ङ. झ. ट. प्रवरस्त्रियः. ४ ङ. झ. ट. मया. ५ क. रूपेण, ङ. झ. ट. बलेनच. ६ क. ख. यशसापिच.

एकविंशः सर्गः ॥ २१ ॥

सीतयारावणंप्रति मध्येतृणप्रक्षेपेण साक्षाहितोपदेशपूर्वकं रामगुणानुवर्णनेनतस्मैस्वप्रत्यर्पणेन तेनसहमैत्रीविरोधसंपादनयोः क्रमेणशुभाशुभफलहेतुत्वोक्तिः ॥ १ ॥

तस्य तद्वचनं श्रुत्वा सीता रौद्रस्य रक्षसः ॥ आर्ता दीनस्वरा दीनं प्रत्युवाच शनैर्वचः ॥ १ ॥
दुःखार्ता रुदती सीता वेपमाना तपस्विनी ॥ चिन्तयन्ती वरारोहा पतिमेव पतिव्रता ॥
तृणमन्तरतः कृत्वा प्रत्युवाच शुचिस्मिता ॥ २ ॥
निवर्तय मनो मत्तः स्वजने क्रियतां मनः ॥ न मां प्रार्थयितुं युक्तं सुसिद्धिमिव पापकृत् ॥ ३ ॥
अकार्यं न मया कार्यमेकपत्न्या विगर्हितम् ॥ कुलं संप्राप्तया पुण्यं कुले महति जातया ॥ ४ ॥
एवमुक्त्वा तु वैदेही रावणं तं यशस्विनी ॥ राक्षसं पृष्ठतः कृत्वा भूयो वचनमब्रवीत् ॥ ५ ॥
नाहमौपयिकी भार्या परभार्या सती तव ॥ साधुधर्ममवेक्षस्व साधु साधुव्रतं चर ॥ ६ ॥
यथा तव तथाऽन्येषां दारा रक्ष्या निशाचर ॥ आत्मानमुपमां कृत्वा स्वेषु दारेषु रम्यताम् ॥ ७ ॥
अतुष्टं स्वेषु दारेषु चपलं चलितेन्द्रियम् ॥ नयन्ति निकृतिप्रज्ञं परदाराः पराभवम् ॥ ८ ॥
इह सन्तो न वा सन्ति सतो वा नानुवर्तसे ॥ तथाहि विपरीता ते बुद्धिराचारवर्जिता ॥ ९ ॥

तस्येत्यादि ॥ १ ॥ तृणमिति रावणस्य साक्षात्संभाषणानर्हत्वात्तृणव्यवधानकरणम् । प्रत्युवाचेति पुनरभिधानं वचनप्रकारविशेषकथनार्थं । दुःखार्तायाअपि शुचिस्मितत्वाभिधानं वस्तुस्वभावेन सस्मितवत्प्रतीयमानत्वात् ॥२—३॥एकः पतिर्यस्यास्सा एकपत्नी तया। "नित्यं सपत्न्यादिषु" इति ङीप्॥४॥ पृष्ठतः कृत्वा अनादृत्येर्थः ॥ ५ ॥ सती अहं तव औपयिकी युक्ता भार्या न किन्तु परिहार्या । साधूनां सतां धर्मं साधुधर्मं । साधूनांव्रतं साधुव्रतं। साधु सम्यक् । चर ॥६॥ आत्मानमुपमां कृत्वा यथा तव दारा रक्ष्यास्तथान्येषां दारा रक्ष्याः। तस्मात् स्वेषु दारेषु रम्यतां॥७॥ अतुष्टं अतृप्तं निकृतिप्रज्ञं निकृतौ शाठ्ये प्रज्ञा यस्य तं । पराभवं आयुरैश्वर्यादिक्षयरूपं ॥८॥ इह अतिविशालेपि दुर्जनसंकुले देशे। सन्तः त्वामनर्थान्निवारयन्तः। न सन्ति वा नसन्ति किं सन्त्येव । श्रीविभीषणप्रभृतीनां संभवान्न सन्तीति कथं वक्तुं शक्यं । सतो वा नानुवर्तसे । "तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः"

ति० तृणमन्तरतःकृत्वेति । परपुरुषमुखंनिरीक्ष्यवार्तानकर्तव्येतिमर्यादयावा तृणवदलक्षीकृत्यवा अस्मद्वक्ष्यमाणवचनंतृणसमानमित्यर्थंनलक्षीकरोतीतिबुद्ध्यावा " सश्लाघ्यःसगुणीधन्यःसकुलीनःसबुद्धिमान् । सशूरःसचविक्रान्तोयंत्वंदेविनिरीक्षसे" इत्युक्तकटाक्षपाताद्दोमाभूदितिवा स्वामिनातृणमादायकाकासुरनिरासवदनेनतृणेनैतन्निरासःकार्यइतिवा अचेतनंचेतनंकृत्वासंबोधनेनवाक्यंवदामीतिबुद्ध्यावा आसन्नस्यास्यव्यवधानेनभाव्यमितिबुद्ध्यावा पशुसमानस्यतवेदमेवभोग्यमितिबुद्ध्यावा रामविरोधेन भवान्सानुबन्धोनशिष्यतीतिनिवेदनायवा तृणमध्येस्थापयित्वा ॥ **स०** प्रत्युवाचेतिपूर्वंप्रतिज्ञातं । तत्रेत्थंकारमाह—तृणमन्तरतःकृत्वाप्रत्युवाचेति । अतोनपुनर्वचनं ॥ २ ॥ **ति०** कुद्वोक्त्यामनःपदादेःपौनरुक्त्यंनदोषभाक् । वर्णनीयमयीभावाच्चकवेरपि तादृशंनदोषाय ॥ **स०** युक्तः योग्यः । सिद्धिं मोक्षं ॥ ३ ॥ **स०** एकपत्न्या एकःपतिर्यस्यास्सा रामकृतयज्ञफलभोक्त्री । पतिव्रतेतियावत् । तया । विगर्हितं विनिन्दितं । तर्हि कदापिगर्हितंत्वयानानुष्ठितंकिमित्यतस्तथैवेत्याह—**मयेति** । मयायदकारि तत्सर्वं अं मत्पतिंविष्णुमुद्दिश्यैवाकारीतिविगर्हितंनकार्यमितिभावः ॥ ४ ॥ **ति०** पृष्ठतःकृत्वा परावृत्यस्थित्वा ॥ ५ ॥ **ती०** वस्तुतस्तु अहंतव त्वया भार्या भर्तव्यान किंतुपरभार्या परेणरामेणभार्या भर्तव्या ॥ **स०** औपयिकी उपभोगयोग्यान । तत्रहेतुः **परभार्येति** । तत्रापिनस्वैरिणीत्युदीरयति—**सतीति** । साधूनांसतांधर्मं धर्मशास्त्राद्याशंसितं । अवेक्षस्व । साधुव्रतं साधोः साध्व्याःपतिव्रतायाममव्रतं परित्यजनंचर । " वोतोगुणवचनात् " इति साधुस्साधुः ॥ ६ ॥ **स०** दाराः रक्ष्याः शीलतःसंरक्ष-

[**पा०**] १ क. घ. ङ. छ.—ट. ततःशनैः. २ क. चिन्तयित्वा. ३ च. ज. क्रियतांहितत्. क. ख. घ. झ. प्रीयतांमनः. ४ क. घ. ङ. च. ज.—ट. युक्तस्त्वंसिद्धिमिव. ५ क. अनार्यं. ६ घ. तपस्विनी. ७ घ. ङ. च. ज.—ट. रावणं. ८ घ. ङ. च. ज.—ट. रक्ष्यादाराः. ९ ङ. झ. ट. चपलेन्द्रियं. १० ख. झ. ञ. ट. यथाहि.

वचो मिथ्याप्रणीतात्मा पथ्यमुक्तं विचक्षणैः ॥ राक्षसानामभावाय त्वं वा न प्रतिपद्यसे ॥ १० ॥
अकृतात्मानमासाद्य राजानमनये रतम् ॥ समृद्धानि विनश्यन्ति राष्ट्राणि नगराणि च ॥ ११ ॥
तेक्ष्वं त्वं समासाद्य लङ्का रक्षोघसंकुला ॥ अपराधात्तवैकस्य नचिराद्विनशिष्यति ॥ १२ ॥
स्वकृतैर्हन्यमानस्य रावणादीर्घदर्शिनः ॥ अभिनन्दन्ति भूतानि विनाशे पापकर्मणः ॥ १३ ॥
एवं त्वां पापकर्माणं वक्ष्यन्ति निकृता जनाः ॥ दिष्ट्यैतद्व्यसनं प्राप्तो रौद्र इत्येव हर्षिताः ॥ १४ ॥
शक्या लोभयितुं नाहमैश्वर्येण धनेन वा ॥ अनन्या राघवेणाहं भास्करेण प्रभा यथा ॥ १५ ॥
उपधाय भुजं तस्य लोकनाथस्य सत्कृतम् ॥ कथं नामोपधास्यामि भुजमन्यस्य कस्यचित् ॥ १६ ॥
अहमौपयिकी भार्या तस्यैव वसुधापतेः ॥ व्रतस्नातस्य धीरस्य विद्येव विदितात्मनः ॥ १७ ॥

इत्युक्तरीत्या प्रणिपातमन्तरेण न ते उपदिशन्ति । त्वं च तत्पादेषु कदाचिदपि न प्रणतवानसि । कथमिदं भवती जानातीत्याशङ्क्याह—तथाहीति । तथाहि विपरीता ते बुद्धिः तव बुद्धिवैपरीत्यमेव तव शिष्टाननुवर्तनं सूचयतीत्यर्थः । परबुद्धेरप्रत्यक्षत्वात् कथं मदीया बुद्धिस्त्वया ज्ञायत इत्यत्राह—आचारवर्जितेति । आचारवर्जिता तव दुरनुष्ठानमेव तव बुद्धिं द्योतयतीति भावः ॥ ९ ॥ वच इति पूर्वश्लोके रावणस्याभाव उपन्यस्तः । अनेन राक्षसाभावपक्ष उपन्यस्यते । मिथ्याप्रणीतात्मा मिथ्यास्निग्धात्मा । स्नेहीति भावयन्निवेति यावत् । त्वं विचक्षणैस्साधुभिरुक्तं पथ्यं हितं वचः राक्षसानामभावाय न प्रतिपद्यसे नाङ्गीकरोषि वा । राक्षसेषु स्नेहं भावयन् तद्विनाशमेव हृदि कृत्वा साधु वचनं न शृणोषीत्यर्थः ॥ १०—१२ ॥ रावणादीर्घदर्शिन इत्यत्र रावणेति संबुद्धिः ॥ १३ ॥ निकृताः त्वया वञ्चिताः ॥ १४ ॥ शक्येति । अनेन रावणोक्तप्रलोभनानामुत्तरमुच्यते । ऐश्वर्येण अन्तःपुरस्त्रीणामीश्वरत्वेन । धनेन आभरणादिना वा । लोभयितुं वञ्चयितुं । अहं न शक्या । अत्र हेतुमाह—अनन्येति । अहं नित्यानपायिनी । राघवेण रघुकुलावतीर्णेन विष्णुना । अनन्या अविभक्ता । यत्र यत्र कुले विष्णुरवतरति तत्र तत्रावतीर्णा लक्ष्मीरित्यर्थः । तृतीयया तत्परतन्त्रा चास्मीति द्योत्यते । न केवलं तस्य परतन्त्राहं प्रत्युत तस्याप्यतिशयावहेति दृष्टान्तेन द्योतयति—भास्करेणेति । प्रभा हि भास्करस्याप्यतिशयमावहति तथैव हि मारीचो भवन्तं प्रति निवेदितवान् । "अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा" इति । किं तद्धितवचनमपि मोहेन विस्मृतोसीति तत्त्वमाह ॥ १५ ॥ लोकनाथस्य सर्वैर्ब्रह्मादिदेवगणैः स्वस्वपदप्राप्तये नाथ्यमानस्य याच्यमानस्य । "नाथृ याच्ञायाम्" इति धातुः । तस्य रामस्य । सत्कृतं भुजं दक्षिणं भुजमित्यर्थः । उपधाय उपधानीकृत्य । तेन तत्परिष्वक्तत्वं गम्यते । एवं श्लाघिताहं अन्यस्य ततो भोगं याचमानस्य कस्यचिदनामधेयस्य क्षुद्रस्य त्वादृशः । भुजं असत्कृतं कथं नामोपधास्यामि । नकथंचिदपीत्यर्थः ॥ १६ ॥ अहं तु शीलवयोवृत्ता तस्यैव तुल्यशीलवयोवृत्तस्य वसुधापतेः औपयिकी उचिता भार्या । "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति भूमिनाथस्याहं लक्ष्मीदेव्युचितेति हृदयम् । कथमिव । व्रतस्नातस्य वेदव्रतैः स्नातस्य । धीरस्य धीमतः ब्राह्मणस्य । विदितात्मनः आत्मज्ञानवतः । विद्येव योगाभ्यासरूपविद्येव ।

णीयाः। आत्मानं स्वं। उपमां निदर्शनं । स्वदारधर्षणंदुर्मर्षणममयथा तथाऽन्येषामित्यत्र ॥७॥ स०भुजमित्यनेन मत्परिरंभणकामनयातवभुजानांछेदः " येभैष्म्याःपरिरंभणंचकमिरेतेषांभुजांश्चिच्छिदुः" इत्यादुक्तेःभावीतिद्योतयति ॥१६॥ ति० औपयिकी योग्या । व्रतस्नातस्य ब्रह्मचर्यव्रतपूर्वंकंकृतसमावर्तनस्य । यथाशास्त्रंमत्पाणिग्रहणंकृतवतः । विदितात्मनः ज्ञातस्वतत्वस्यज्ञातपुरुषार्थसाधनस्यचतस्यैवार्हयोग्या । विप्रस्य विद्येव ब्रह्मविद्येव । ब्रह्मविद्यायथा ब्राह्मणस्यैवासाधारणंस्वंन्यायप्राप्तं तद्वत् । संन्यासेतस्यैवाधिकाराद्ब्रह्मविद्यायांब्राह्मणस्यैवाधिकारइतिभावः । अन्येतु विप्रपदंत्रैवर्णिकपरं । त्रैवर्णिकस्यैवब्रह्मविद्यायामधिकारः । अतएव धीरस्येतिक्वचित्पाठइत्याहुः ॥ स० विदितात्मनः अवगतभगवत्तत्वस्य । व्रतस्नातस्य ब्रह्मचर्यादिव्रतसंकल्पपूर्वंस्नातस्य । अभिषिक्तस्यविप्रस्य विद्येव उपनिषदादिविद्येव । विप्रस्येत्यनेनोत्तरवर्णद्वयापेक्षयापृथग्जातेरेवमुख्याधिकारः यथाऽहंतथामुख्यातस्यौपयि.

[पा०] १ क. घ. विविधानिच. २ ख. ङ. झ. ट. तथैव. ३ ङ. झ. ट. यथाप्रभा. ४ ख. लोककान्तस्य. ५ ङ. झ. ट. तस्यैवचधरापतेः. ६ ख. च. छ. ञ. विप्रस्य. घ. वीरस्य. ङ. झ. ट. विद्येवविप्रस्य.

साधु रावण रामेण मां समानय दुःखिताम् ॥ वने वाशितया सार्धं करेण्वेव गजाधिपम् ॥ १८ ॥
मित्रमौपयिकं कर्तुं रामः स्थानं परीप्सता ॥ वधं चानिच्छता घोरं त्वयाऽसौ पुरुषर्षभः ॥
विदितः[1] स हि धर्मज्ञः शरणागतवत्सलः ॥ १९ ॥
तेन मैत्री भवतु ते यदि जीवितुमिच्छसि ॥ प्रसादयस्व त्वं चैनं शरणागतवत्सलम् ॥ २० ॥
मां चास्मै प्रयतो भूत्वा निर्यातयितुमर्हसि[2] ॥ २१ ॥
एवं हि ते भवेत्स्वस्ति संप्रदाय रघूत्तमे ॥ अन्यथा त्वं हि कुर्वाणो[3] वधं प्राप्स्यसि रावण ॥ २२ ॥
वज्रमुत्सृष्टं वर्जयेद्वज्रमुत्सृष्टं वर्जयेदन्तकश्चिरम्[4] ॥ त्वद्विधं तु न संक्रुद्धो लोकनाथः स राघवः ॥ २३ ॥
रामस्य धनुषः शब्दं श्रोष्यसि त्वं महास्वनम् ॥ शतक्रतुविसृष्टस्य निर्घोषमशनेरिव ॥ २४ ॥

द्येव ॥ १७ ॥ पथिचोरं पानीययाचकवद्रावणमर्थयते—साध्विति ॥ साधु रावण मद्वियोगेन त्वत्कौर्यमधिकंजातमितिभावः । एवमुत्कटक्रौर्यं प्रति याचनात् स्वस्यातिशयोव्यज्यते । रामेण सर्वाङ्गसुन्दरेण मां तस्यानन्यार्हां तद्वियोगे जीवितं धारयितुमशक्तां। नच सीतेत्यादि । समानय संगमय । तत्र हेतुः—दुःखितामिति । करेण्वा गजवध्वा । वाशितया यौवनं गतया । "वाशितायुवतिःप्रोक्ता कलभःकरिपोतकः" इतिवचनात् । यद्वा वासितयेतिपाठः । वने वासितया बद्धया । अत्र विभक्तिव्यत्यासःकार्यः । वने वासितां करेणुं गजाधिपेनेति । वस्तुतस्तु यथान्यास एवान्वेति । रामेणसंगमनंनाम रामाह्वानं । नहि पुनरपि रामस्थानं तेन नेतुमीष्टे किंत्वत्र राममाहूय समर्पणमेव । अतएव करेण्वा गजाधिपमित्युक्तं ॥ १८ ॥ एवं रावणे जननीत्वप्रतिपत्तिं विहाय कानिचिदसंगतानि जल्पति देवी खिन्ना सती कोयमस्य स्वभावः कथमस्य कोप्युपदेष्टा सेत्स्यतीति इह सन्तो न वासन्तीत्यादिना विचिन्त्य दयावती स्वयमेवोपदिशति मातृत्वप्रयुक्तवात्सल्येन—मित्रमिति ॥ रामं शरणं गच्छेत्युक्ते तन्न रावणस्सहेत दुर्मानितया आलसद्बुद्ध्यनुसारेणमित्रमित्याह । किंच शरणागतं स्वस्याधीनं मन्यते देवी देवश्च । अतएव रामो वक्ष्यति । "मित्रभावेन संप्राप्तं न त्यजेयं कथंचन" इति । इमं च तथाह । मित्रमिति । रामः मित्रं कर्तुं युक्तमित्यर्थः । मित्रशब्दापेक्षया औपयिकमिति नपुंसकनिर्देशः । स्थानंपरीप्सता मार्गचोरस्यापि भूमौ पदानि स्थापयित्वा चौर्यं कर्तव्यं । तवापि यदि स्थानमभीप्सितं तर्हि तमेव भजेत्यर्थः । शरणागतिदैन्यादपि मरणमेववरमितियदिमन्यसे तदानीं तज्जनंकर्तव्यमित्याह—वधं चानिच्छता घोरं तव सम्यङ्मरणं न दास्यति । त्वां संस्थाप्य त्वत्समक्षं त्वत्सन्तानजान् हिंसित्वा ततस्ते चित्रवधं करिष्यति तं यदि नेच्छसि तदा प्रत्तव्य इत्यर्थः । त्वया तत्प्रतीकारावलोकनेन त्वयाऽवश्यं तच्छरणागतिः कर्तव्या । एवं स रक्षक इत्यत्र किं प्रमाणं तत्राह—असौ निरन्तरप्रत्ययेनास्या रामः प्रत्यक्ष इवभासते । रावणस्यापि मायामृगानुसरणसमये तदाकारदर्शनजभयेन "वृक्षे वृक्षे च पश्यामि" इत्युक्तरीत्या पुरःस्थित इव भासते । पुरुषर्षभः मत्कृतापराधेन कथं मामङ्गीकरिष्यतीत्येवं त्वया नचिन्तनीयं । आनुकूल्यलेशे सति सर्वमपराधं विस्मरिष्यति पुरुषधौरेयत्वात् । मित्रकरणप्रकारमाह –प्रसादयस्वेति । त्वं चेत्यनेनाहमपि प्रसादयिष्यामीति सिद्धम् । प्रयतो भूत्वा मनःकालुष्यंत्यक्त्वेत्यर्थः । निर्यातयितुं प्रत्यर्पयितुं ॥ १९—२१ ॥ संप्रदाय स्थितायेति शेषः ॥ २२ ॥ उत्सृष्टं इन्द्रमुक्तं वज्रं अन्तकश्च त्वद्विधं वर्जयेत् । राघवस्त्वद्विधं न वर्जयेदिति संबन्धः ॥ २३ ॥ महास्वनं महानादं । नादो नाम स्वरावयवविशेषः

कीर्तिसूचयति ॥ १७ ॥ **ति०** करेण्वासाकंगजाधिपमिव । उपमानोपमेयवाक्ययोर्वैषम्यंतुकुद्धविरहिण्युक्तित्वान्नदोषावहं । **स०** यद्यपिनीधातुर्द्विकर्मकइतिरामंमांसमानयेतिवक्तव्यं । तथापि रामेणेतितृतीयया सहयोगःसार्वकालिकः त्वयासंमेलनंतु लोकदृष्ट्येतिसूचयितुं । गजाधिपेनकरिणीमिवेतिदार्ष्टान्तिकानुगुण्यार्थंवक्तव्यं । तथापीत्थमुक्त्यातद्दांपत्यमकृत्रिमितिद्योतयति ॥ १८ ॥

[**पा०**] १ च. छ. ज. ञ. विदितस्तवधर्मात्मा. ङ. ञ. ट. विदितःसर्वधर्मज्ञः. क. विदितस्सहिधर्मात्मा. २ क. ख. ग. निर्यापयितुं. ३ ङ. ञ. ट. कुर्वाणःपरांप्राप्स्यतिचापदं. ४ क. ग. ङ.—ट. नतु.

इह शीघ्रं सुपर्वाणो ज्वलितास्या इवोरगाः ॥ इषवो निपतिष्यन्ति रामलक्ष्मणलक्षणाः ॥ २५ ॥
रक्षांसि परिनिघ्नन्तः पुर्यामस्यां समन्ततः ॥ असंपातं करिष्यन्ति पतन्तः कङ्कवाससः ॥ २६ ॥
राक्षसेन्द्रमहासर्पान्स रामगरुडो महान् ॥ उद्धरिष्यति वेगेन वैनतेय इवोरगान् ॥ २७ ॥
अपनेष्यति मां भर्ता त्वत्तः शीघ्रमरिन्दमः ॥ असुरेभ्यः श्रियं दीप्तां विष्णुस्त्रिभिरिव क्रमैः ॥२८॥
जनस्थाने हतस्थाने निहते रक्षसां बले ॥ अशक्तेन त्वया रक्षः कृतमेतदसाधु वै ॥ २९ ॥
आश्रमं तु तयोः शून्यं प्रविश्य नरसिंहयोः ॥ गोचरं गतयोर्भ्रात्रोरपनीता त्वयाऽधम ॥ ३० ॥
न हि गन्धमुपाघ्राय रामलक्ष्मणयोस्त्वया ॥ शक्यं संदर्शने स्थातुं शुना शार्दूलयोरिव ॥ ३१ ॥
तस्य ते विग्रहे ताभ्यां युगग्रहणमस्थिरम् ॥ वृत्रस्येवेन्द्रबाहुभ्यां बाहोरेकस्य निग्रहः ॥ ३२ ॥
क्षिप्रं तव स नाथो मे रामः सौमित्रिणा सह ॥ तोयमल्पमिवादित्यः प्राणानादास्यते शरैः ॥३३॥
गिरिं कुबेरस्य गतोपधाय वा सभां गतो वा वरुणस्य राज्ञः ॥
असंशयं दाशरथेर्न मोक्ष्यसे महाद्रुमः कालहतोशनेरिव ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकविंशः सर्गः ॥ २१ ॥

॥ २४ ॥ रामलक्ष्मणलक्षणाः रामलक्ष्मणनामाङ्काः ॥ २५ ॥ असंपातं अनवकाशं ॥ २६ ॥ राक्षसेन्द्रमहासर्पानिति रूपकोक्तमेवोपमयाप्याह—वैनतेय इति ॥ २७ ॥ न चापि मम हस्तात्त्वां प्रामुमर्हतीत्युक्तस्योत्तरमाह—अपनेष्यतीति ॥ २८ ॥ एतद्वं विना चौर्येणापहरणं ॥ २९ ॥ गोचरं गतयोः ाह्यदेशं गतयोः ॥ ३०—३१ ॥ तस्य ते असमर्थतया चोरवृत्तेस्तव । ताभ्यां रामलक्ष्मणाभ्यां । विग्रहे सति युद्धे सति । युगग्रहणं संयुगे जयग्रहणं । अस्थिरं असंभावितं । यद्वा युगग्रहणं युद्धारम्भः अस्थिरं अध्रुवं किंतु ताभ्यां प्रसह्य वधस्ते सिद्ध इति दृष्टान्तेनाह—वृत्रस्येवेति । वृत्रस्य एकस्य बाहोर्द्वाभ्यामिन्द्रस्य बाहुभ्यां सह विग्रहे सति निग्रह इव जय इव । वृत्रस्यैकेन बाहुना इन्द्रस्य द्वयोर्बाह्वोरिव एकेन त्वया तयोर्द्वयोर्जयो न शक्य इत्यर्थः ॥ ३२ ॥ सः नाथ इति पदच्छेदः ॥ ३३ ॥ अपधाय अपक्रम्य । कुबेरस्य गिरिं कैलासं । "कैलासःस्थानमलका" इत्यमरः ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकविंशः सर्गः ॥ २१ ॥

ति० उद्धरणशैघ्र्येउपमा—**वैनतेयइति**। **स०** राक्षसेन्द्रमहासर्पान् रामलक्षणोगरुडउद्धरिष्यति । तत्रदृष्टान्तः । वैनतेयः विनतायामुत्पन्नःगरुडातिरिक्तःकश्चित्पक्षी उरगान् दुर्बलसर्पानिव ॥ २७ ॥ **ती०** कुबेरस्यगिरिं गन्धमादनं । अपधाय अतिक्रम्य । पुरीमितिपाठे कुबेरस्यपुरीमित्येतदुपरितनलोकानामुपलक्षणं । वरुणस्यसभामित्यनेनाधस्तनलोकानामुपलक्षणं । तत्वदृष्ट्याऽपरुषवचनंतंरावणमुद्दिश्यसीतयोक्तानांपरुषवाक्यानामयमाशयः । रावणेनदेवींप्रतितत्वदृष्ट्यासौम्यरूपाण्येववाक्यान्युक्तानियद्यपि तथापि बाह्यदृष्ट्यापरुषवाक्यवत्प्रतीयमानत्वेनदेव्यपितत्वदृष्टिसंगोप्य बाह्यदृष्टिमनुसृत्य परुषवाक्यैरेवतस्योत्तरमाहेति ॥ कालहतस्त्वंअशनेस्संबन्धान्महाद्रुमइवदाशरथेस्संबन्धात्विमोक्षसेप्राणानितिशेषः । विमोक्ष्यसइतिपाङ्क्तःपाठइतिकतकः ॥ ३४ ॥ इत्येकविंशः सर्गः ॥ २१ ॥

[पा०] १ क. ङ.—ट. लक्षिताः. २ ङ. ज. झ. ट. निहनिष्यन्तः. ३ ङ. झ. ट. नसंशयः. ४ घ. सुदूरं. ५ ग. स्तयोः. ६ क.—ट. गतोथवालयं. ७ ङ. झ. ट. दाशरथेर्विमोक्षसे.

द्वाविंशः सर्गः ॥ २२ ॥

सीतयागर्हितेनरावणेन तांप्रति सकोपाटोपंस्वसंकेतितकालस्यमासद्वयात्मकशेषावसाने मारणोक्तिः ॥ १ ॥ ततोरावणस्त्रीभिर्वक्रनेत्रादिसंज्ञयासमाश्वासितयासीतया पुनर्बहुधारावणगर्हणम् ॥ २ ॥ ततोघोरतरविकृतनानाकृतीनामेकाक्ष्यादिराक्षसीनां तर्जनसान्त्वनादिनासीतावशीकरणनियोजनपूर्वकं पुनस्सरोषंसीतातर्जनोद्यतस्यरावणस्य धान्यमालिनीनामकतत्पत्न्या सपरिष्वङ्गंसान्त्वनपूर्वकमन्यतोपसरणम् ॥ ३ ॥ ततोरावणेन स्त्रीजनैस्सहनिजगृहप्रवेशनम् ॥ ४ ॥

सीताया वचनं श्रुत्वा परुषं राक्षसाधिपः ॥ प्रत्युवाच ततः सीतां विप्रियं प्रियदर्शनाम् ॥ १ ॥
यथायथा सान्त्वयिता वश्यः स्त्रीणां तथातथा ॥ यथायथा प्रियं वक्ता परिभूतस्तथातथा ॥ २ ॥
संनियच्छति मे क्रोधं त्वयि कामः समुत्थितः ॥ द्रवतोऽमार्गमासाद्य हयानिव सुसारथिः ॥ ३ ॥
वामः कामो मनुष्याणां यस्मिन्किल निबध्यते ॥ जने तस्मिंस्त्वनुक्रोशः स्नेहश्च किल जायते ॥४॥
एतस्मात्कारणान्न त्वां घातयामि वरानने ॥ वधार्हामवमानार्हां मिथ्याप्रव्रजिते रताम् ॥ ५ ॥
परुषाणीह वाक्यानि यानियानि ब्रवीषि माम् ॥ तेषुतेषु वधो युक्तस्तव मैथिलि दारुणः ॥ ६ ॥
एवमुक्ता तु वैदेही रावणो राक्षसाधिपः ॥ क्रोधसंरम्भसंयुक्तः सीतामुत्तरमब्रवीत् ॥ ७ ॥
द्वौ मासौ रक्षितव्यौ मे योवधिस्ते मया कृतः ॥ ततः शयनमारोह मम त्वं वरवर्णिनि ॥ ८ ॥
ऊर्ध्वं द्वाभ्यां तु मासाभ्यां भर्तारं मामनिच्छतीम् ॥ मम त्वां प्रातराशार्थमारभन्ते महानसे ॥९॥
तां तर्ज्यमानां संप्रेक्ष्य राक्षसेन्द्रेण जानकीम् ॥ देवगन्धर्वकन्यास्ता विषेदुर्विकृतेक्षणाः ॥ १० ॥

सीताया इत्यादि ॥ १ ॥ सान्त्वयिता अनुनेता ॥ २ ॥ संनियच्छति निरुणद्धि । द्रवतः धावतः । अमार्गमितिच्छेदः ॥ ३ ॥ वामः प्रतिकूलः । मनुष्याणां प्राणिनां । अनुक्रोशः कृपा । परिभवादिप्रदानेन मनुष्याणां प्रतिकूलः कामः यस्मिञ्जने निबध्यते तस्मिंस्त्वनुक्रोशः स्नेहश्च जायते किल ॥ ४ ॥ मिथ्याप्रव्रजिते कपटेन वन्यवृत्तिभाजि । रामे रतां सक्तां ॥ ५—६ ॥ क्रोधसंरम्भसंयुक्तः क्रोधप्रणयाभ्यां संयुक्तः ॥ ७ ॥ ते मया योऽवधिः कृतः "मासान्द्वादशभामिनि" इत्यारण्यकाण्डोक्तोद्वादशमासात्मकोऽवधिः कल्पितः । अत्र द्वौ मासाववशिष्टौ । तौ द्वौ मासौ । मे मया । रक्षितव्यौ प्रतीक्षणीयौ । ततः तस्मात्कारणात् । मम शयनमारोहेत्यन्वयः ॥८॥ प्रातराशार्थं मासद्वयान्तर्गतरात्रिसमाप्त्यनन्तरं हिंसायां कालविलम्बंविना प्रातःकालिकाशनार्थमित्यर्थः । आरभन्ते आलभन्ते । रलयोरभेदः । "आलम्भस्स्पर्शहिंसयोः" इत्यमरः । महानसे पाकशालायां

ती० सीतायाइत्यस्यवास्तवार्थस्तु राक्षसाधिपः सीतायाःपरुषं अतएवविप्रियंवचनंश्रुत्वा प्रत्युवाचेतिसंबन्धः ॥१॥ **ती०** वस्तुतस्तु इष्टदेवतायांसमुत्थितः कामः इच्छा समुत्पन्नाभक्तिरित्यर्थः । मेक्रोधं राक्षसजातेर्ममसर्वदाविद्यमाननंनैजंक्रोधं । क्रोधशब्देनकामक्रोधादिषड्वर्गउच्यते । तंनियच्छतीतिसंबन्धः ॥ ३ ॥ **ती०** एतस्मादित्यादिश्लोकद्वयस्यवास्तवार्थस्तु ननुमद्वधोद्युक्तः स्त्रीघातकश्चत्वंनसंभाष्यइत्यत्राह—एतस्मादिति । एतस्मात्कारणात् त्वद्भर्तृकारणात् । प्रव्रजिते मत्स्वामिनिरामेइतिशेषः । रतांत्वां ममेष्टदेवतांत्वां । नघातयाम्येव । वधार्हामवमानार्हामपित्रियंघातयामीतिमिथ्येतिसंबन्धः ॥ ५–६ ॥ **स०** उत्तरं उत्तरत्रक्रियमाणं । यद्वा सीतामुत्तरं सीतायाः मुत् संतोषातिशयोयस्माद्वचनात् मासद्वयावधिप्रदात्तत् । "व्यवधानेनयद्दुःखंतद्दुःखंनैवचिन्तयेत्" इत्युक्तेरितिभावः ॥ ७ ॥ **स०** द्वौमासौरक्षितव्यौ । "वर्ततेदशमोमासोद्वौतुशेषौप्लवङ्गम" इतिसीतावचनाद्दशममासस्यतदावर्तमानत्वेपिमासत्वेनावशिष्टौतुद्वावेव । उर्वरितदिनानांतुमासत्वाभावादनुक्तिः । सीतासंगौत्सुक्येनाल्पदिनानामगणनेतिवा ॥ ८ ॥ **ती०** एवमुक्त्वेत्यादिश्लोकत्रयस्यवास्तवार्थस्तु क्रोधसंरंभसंयुक्तइत्यनेन राक्षसस्वभावोवर्णितः । पतिवियोगदुःखितांनिद्राहाररहितांप्रत्याह—**द्वौमासावित्यादिश्लोकद्वयेन** । हे मे लक्ष्मीस्सीते मयायोऽवधिःकृतः "मासान्द्वादशभामिनि । प्रतीक्षस्व" इतियःसमयःप्रार्थितः तन्मध्यतःपरंरक्षितव्यौ प्रतीक्षणीयौ द्वौमासावेव द्वाभ्यांमासाभ्यामूर्ध्वंन । ततः तदनन्तरं

[**पा०**] १ ङ.—ट. राक्षसेश्वरः. २ ङ. ञ. ट. प्रव्रजने. क. प्रव्राजने. ३ क.—ट. द्वाभ्यामूर्ध्वंतु. ४ ञ. ट. प्रातराशार्थंसूदाश्छेत्स्यन्तिखण्डशः. ५ ङ. ञ. ट. भर्त्स्यमानां.

ओष्ठप्रकारैरपरा वक्त्रनेत्रैस्तथाऽपराः ॥ सीतामाश्वासयामासुस्तर्जितां तेन रक्षसा ॥ ११ ॥
ताभिराश्वासिता सीता रावणं राक्षसाधिपम् ॥ उवाचात्महितं वाक्यं वृत्तशौण्डीर्यगर्वितम् ॥१२॥
नूनं न ते जनः कश्चिदस्ति निःश्रेयसे स्थितः ॥ निवारयति यो न त्वां कर्मणोऽस्माद्विगर्हितात् ॥१३॥
मां हि धर्मात्मनः पत्नीं शचीमिव शचीपतेः ॥ त्वदन्यस्त्रिषु लोकेषु प्रार्थयेन्मनसाऽपि कः ॥१४॥
राक्षसाधम रामस्य भार्यामिततेजसः ॥ उक्तवानसि यच्छापं क गतस्तस्य मोक्ष्यसे ॥ १५ ॥
यथा दृप्तश्च मातङ्गः शशश्च सहितो वने ॥ तथा द्विरदवद्रामस्त्वं नीच शशवत्स्मृतः ॥ १६ ॥
स त्वमिक्ष्वाकुनाथं वै क्षिपन्निह न लज्जसे ॥ चक्षुषोर्विषयं तस्य न तावदुपगच्छसि ॥ १७ ॥
इमे ते नयने क्रूरे विरूपे कृष्णपिङ्गले ॥ क्षितौ न पतिते कस्मान्मामनार्य निरीक्षतः ॥ १८ ॥
तस्य धर्मात्मनः पत्नीं स्नुषां दशरथस्य च ॥ कथं व्याहरतो मां ते न जिह्वा व्यवशीर्यते ॥ १९ ॥
असंदेशात्तु रामस्य तपसश्चानुपालनात् ॥ न त्वां कुर्मि दशग्रीव भस्म भस्मार्ह तेजसा ॥ २० ॥
नापहर्तुमहं शक्या तस्य रामस्य धीमतः ॥ विधिस्तव वधार्थाय विहितो नात्र संशयः ॥ २१ ॥
शूरेण धनदभ्रात्रा बलैः समुदितेन च ॥ अपोह्य रामं कस्माद्धि दारचौर्यं त्वया कृतम् ॥ २२ ॥
सीताया वचनं श्रुत्वा रावणो राक्षसाधिपः ॥ विवृत्य नयने क्रूरे जानकीमन्ववैक्षत ॥ २३ ॥
नीलजीमूतसंकाशो महाभुजशिरोधरः ॥ सिंहसत्त्वगतिः श्रीमान्दीप्तजिह्वाग्रलोचनः ॥ २४ ॥

॥ ९—१० ॥ ओष्ठप्रकारैः रुरुदिषतामोष्ठेषु भङ्गस्फुरणादयो ये विकारास्ते ओष्ठप्रकाराः ओष्ठभङ्गादिरूपसंज्ञादिभिरित्यर्थः । एवं वक्त्रनेत्रैः वक्त्रनेत्रसंज्ञादिभिरित्यर्थः ॥ ११ ॥ वृत्तशौण्डीर्यगर्वितं वृत्तं पातिव्रत्यं तस्य शौण्डीर्यं बलं तेन गर्वितमिति क्रियाविशेषणं ॥ १२ ॥ ते निःश्रेयसे स्थितः कश्चिज्जनः नास्ति । यः अस्माद्विगर्हितात्कर्मणस्त्वां निवारयति स चापि नास्ति । नूनमिति योजना । तवेष्टप्रापकः अनिष्टनिवारकश्च नास्तीत्यर्थः ॥ १३—१४ ॥ तस्य मोक्ष्यसे तस्मान्मोक्ष्यसे ॥ १५ ॥ यथा मातङ्गः शशश्च । सहितः युयुत्सादिना संगतः । तथान्योन्यसंगतो रामस्त्वं च । अत्र रावणः स्वस्य मातङ्गसाम्यमुक्तमिति भ्राम्येदिति परिहरति—तथेति । तत्र गज इव रामः । शश इव त्वं ॥ १६ ॥ इक्ष्वाकुनाथं क्षिपन् मायामृगव्याजेन दूरं निस्सारयन् । इह स्वजनेषु न तावदुपगच्छसि । यद्युपगच्छसि तदा तत्प्रभावं वेत्स्यसीत्यर्थः ॥ १७—१९ ॥ रामस्य भर्तुः । असंदेशात् अपकारिषु शपेथा इति संदेशाभावात् । तपसः पातिव्रत्यरूपस्य । कुर्मि करोमि । उक्त्वविकरणप्रत्ययलोपावार्षौ । भस्मार्ह भस्मीकरणार्हं । तेजसा पातिव्रत्यप्रभावेन ॥ २० ॥ तस्य रामस्य तस्मात् रामात् । विधिः चौर्येणापहरणं । विहितः दैवेनेति शेषः ॥ २१ ॥ बलैस्समुदितेन बलेन सर्वश्रेष्ठेनेत्यर्थः । अपोह्य रामं मृगच्छद्मनापवाह्य ॥ २२ ॥ विवृत्य विवर्त्य ॥ २३ ॥ सिंहस्येव बलगमने यस्यासौ सिंहसत्त्वगतिः । जिह्वाग्रं लोचने च दीप्तानि यस्य सोयं दीप्तजिह्वाग्रलोचनः । कोपेन चलं अग्रं यस्य तत् चलाग्रंचतत् मुकुटंच तेन प्रांशुः दीर्घः । चित्रमाल्यवत्त्वेपि रक्तमाल्यवत्त्वं तत्प्राचुर्यादुक्तं । तप्ताङ्गदविभूषणः तप्तशब्देन तेजिष्ठत्वमुक्तं । मेचकेन

ते तव भर्तारं अनिच्छतीमामनङ्गीकुर्वाणां ममामदीयराज्यलक्ष्मींचप्राप्स्यसीतिशेषः । लांप्रार्थयइतिशेषः । ममहानसेप्रातराशार्थं आलभन्तेपशून् तान्भक्षयेतिशेषः । शयनमारोह शयनंकुर्वित्यर्थः ॥ १० ॥ ति० ओष्ठप्रकारैः वराकोऽयंकिंकरिष्यति नभेतव्यमित्येवौष्ठाग्रोत्क्षेपणैः ॥ ११ ॥ ति० यत्पापं ममशयनमारोहेत्यादिरूपं । क्रुतोमोक्ष्यसे तत्साध्यसमूलनाशस्यलयापरि-

[पा०] १ क. घ.—ट. नेत्रैर्वक्त्रैस्तथा. २ ङ. झ. ट. कश्चिदस्मिन्निश्रेयसिस्थितः. ३ क.—ट. यत्पापं. ४ क. ख. ङ. झ. ञ. सहितौ. ५ ङ. झ. ट. चक्षुषोविषये. ६ ङ. झ. ट. यावत्. ७ ङ. च. झ. ट. विकृते. ८ च. यन्मामनाथांनिरीक्षते. ९ ङ. झ. नजिह्वापापशीर्यति. क. ग. च. छ. ज. जिह्वापापनशीर्यते. ञ. ट. जिह्वापापनशीर्यति. १० ख. त्वया. ११ ङ. च. ज.—ट. कस्माच्चिद्दारचौर्यं. १२ क. परुषं. १३ ग. च. छ. ज. ञ. सिंहसंहननः. ख. सिंहसत्वगतोवीरोदीप्त. १४ क. ग. घ. ङ. झ. ञ. ट. जिह्वाग्रलोचनः.

चलाग्रमुकुटप्रांशुश्चित्रमाल्यानुलेपनः ॥ रक्तमाल्याम्बरधरस्तप्ताङ्गदविभूषणः ॥ २५ ॥
श्रोणीसूत्रेण महता मेचकेन सुसंवृतः ॥ अमृतोत्पादनद्धेन भुजगेनेव मन्दरः ॥ २६ ॥
ताभ्यां स परिपूर्णाभ्यां भुजाभ्यां राक्षसेश्वरः ॥ शुशुभेऽचलसंकाशः शृङ्गाभ्यामिव मन्दरः ॥ २७ ॥
तरुणादित्यवर्णाभ्यां कुण्डलाभ्यां विभूषितः ॥ रक्तपल्लवपुष्पाभ्यामशोकाभ्यामिवाचलः ॥ २८ ॥
स कल्पवृक्षप्रतिमो वसन्त इव मूर्तिमान् ॥ श्मशानचैत्यप्रतिमो भूषितोपि भयङ्करः ॥ २९ ॥
अवेक्षमाणो वैदेहीं कोपसंरक्तलोचनः ॥ उवाच रावणः सीतां भुजङ्ग इव निःश्वसन् ॥ ३० ॥
अनयेनाभिसंपन्नमर्थहीनमनुव्रते ॥ नाशयाम्यहमद्य त्वां सूर्यः संध्यामिवौजसा ॥ ३१ ॥
इत्युक्त्वा मैथिलीं राजा रावणः शत्रुरावणः ॥ संदिदेश ततः सर्वा राक्षसीर्घोरदर्शनाः ॥ ३२ ॥
एकाक्षीमेककर्णां च कर्णप्रावरणां तथा ॥ गोकर्णीं हस्तिकर्णीं च लम्बकर्णीमकर्णिकाम् ॥ ३३ ॥
हस्तिपाद्यश्वपाद्यौ च गोपादीं पादचूलिकाम् ॥ एकाक्षीमेकपादीं च पृथुपादीमपादिकाम् ॥ ३४ ॥
अतिमात्रशिरोग्रीवामतिमात्रकुचोदरीम् ॥ अतिमात्रास्यनेत्रां च दीर्घजिह्वामजिह्विकाम् ॥ ३५ ॥
अनासिकां सिंहमुखीं गोमुखीं सूकरीमुखीम् ॥ यथा मद्वशगा सीता क्षिप्रं भवति जानकी ॥
तथा कुरुत राक्षस्यः सर्वाः क्षिप्रं समेत्य च ॥ ३६ ॥
प्रतिलोमानुलोमैश्च सामदानादिभेदनैः ॥ आवर्जयत वैदेहीं दण्डस्योद्यमनेन च ॥ ३७ ॥
इति प्रतिसमादिश्य राक्षसेन्द्रः पुनः पुनः ॥ काममन्युपरीतात्मा जानकीं पर्यतर्जयत् ॥ ३८ ॥
उपगम्य ततः क्षिप्रं राक्षसी धान्यमालिनी ॥ परिष्वज्य दशग्रीवमिदं वचनमब्रवीत् ॥ ३९ ॥
मया क्रीड महाराज सीतया किं तवानया ॥ विवर्णया कृपणया मानुष्या राक्षसेश्वर ॥ ४० ॥
नूनमस्या महाराज न दिव्यान्भोगसत्तमान् ॥ विदधात्यमरश्रेष्ठस्तव बाहुबलार्जितान् ॥ ४१ ॥

नीलेन । अमृतोत्पादनद्धेन अमृतोत्पादनार्थं नद्धेन । ताभ्यां प्रसिद्धाभ्याम् ॥ २४—२७ ॥ तरुणेत्यादि ॥ अलंकृतत्वे कल्पकसाम्यं । भयंकरत्वेपुनश्चैत्यसाम्यं । चैत्यं श्मशानवृक्षः । श्मशानमण्डपो वा । सीताया अत्यन्तभयंकरत्वज्ञापनाय रावणवर्णनं कृतं ॥ २८—३१ ॥ इत्युक्त्वेत्यादि ॥ प्रधानाप्रधानभूते द्वे एकाक्ष्यौ । अतो न पुनरुक्तिः । अथवा अक्षं इन्द्रियं । एकाक्षी एकैकेन्द्रियां । श्रोत्रनासादावेकमात्रवतीत्यर्थः ॥ ३२—३६ ॥ प्रतिलोमानुलोमैः प्रतिकूलानुकूलाचरणैः । सामदानादिभेदनैः सामदानमुख्यैर्भेदैः । प्रथमप्रयुक्तसामदानैरित्यर्थः । आवर्जयत वशीकुरुत ॥ ३७—३८ ॥ धान्यमालिनी रावणस्य कनिष्ठपत्नी । इदं मन्दोदर्या अप्युपलक्षणं । उत्तरत्र वानरान्प्रति हनुमद्वचने तथा वक्ष्यमाणत्वात् ॥ ३९—४० ॥ अस्याः सीतायाः । अमरश्रेष्ठो ब्रह्मा । दिव्यान् भोगान्न विदधाति । अस्या दिव्यभोगे

हारोशक्यइत्यर्थः ॥ १५ ॥ ति० ताभ्यां प्रसिद्धपराक्रमाभ्यां । भुजद्वयमेवसर्वदा । युद्धादौस्वेच्छयादशभुजत्वमितिद्विवचनं ॥ वामदक्षेषुभुजत्वजात्यैकवचनमित्यन्ये ॥ २७ ॥ स० अनयेन स्त्रीवधतन्नासिकाछेदाद्यन्यायेन । अभिसंपन्नं युक्तं । अर्थहीनं निर्भाग्यं । एतादृशंराममनुव्रतेसीतेत्वां नाशयामि । सन्ध्यां सन्ध्याकालिकंतमः ॥ ३१ ॥ स० पुनरेकाक्षीमित्युपादानं व्यक्तिभेदाभिप्रायेण । अथवा पूर्वमेकाक्षीमितिमैथिलीविशेषणं । एकस्मिन्नामेअक्षिणीयस्यासा तामित्यर्थः । एकमक्षियस्यास्तेत्येकत्र । अपरत्रच एकस्मिन्भागेअक्षिणीयस्यास्सापि निर्नासिकाव्यवधानमक्षिद्वयमेकस्मिन्प्रदेशेवर्ततइतिनैकाक्षीमितिपुनरुक्तं ॥ ३४ ॥ ति० प्रतिगर्जत प्रत्यगर्जत् ॥ ३८ ॥ उपगम्य समीपमागम्य । ततः अतिसंतर्जनंत्रासीतायांदययेतिशेषः ॥ स० परिष्वज्य सीताताडनवारणार्थमालिङ्ग्य ॥ ३९ ॥ शि० अमरश्रेष्ठाइति । अस्याराज्यभोगोब्रह्मणानलिखितइत्यर्थः । आदराद्बहुवचनं ॥

[पा०] १ च. ज. विराजितः. २ क. ङ.—ट. अमृतोत्पादनेनद्धो. ३ क.—च. ज.—ट. भुजङ्गेनेव. ४ क. च. छ. ज. ञ. द्वाभ्यां. घ. सताभ्यांपरिपीनाभ्यां. ५ ख. फुल्लपल्लव. ६ ङ. झ. संददर्श. ७ क. घ. ङ. च. ज.—ट. जिह्वानखामपि. ८ ङ. झ. ट. समेत्यवा. ९ क. ग.—ज. आवर्तयत. १० ङ. झ. ञ. ट, प्रतिगर्जत. ११ क.—ट. देवाभोगसत्तमान् । विदधत्यमरश्रेष्ठाः.

अकामां कामयानस्य शरीरमुपतप्यते ॥ इच्छन्तीं कामयानस्य प्रीतिर्भवति शोभना ॥ ४२ ॥
एवमुक्तस्तु राक्षस्या समुत्क्षिप्तस्ततो बली ॥ प्रहसन्मेघसंकाशो राक्षसः स न्यवर्तत ॥ ४३ ॥
प्रस्थितः स दशग्रीवः कम्पयन्निव मेदिनीम् ॥ ज्वलद्भास्करवर्णाभं प्रविवेश निवेशनम् ॥ ४४ ॥
देवगन्धर्वकन्याश्च नागकन्याश्च सर्वतः ॥ परिवार्य दशग्रीवं विविशुस्तद्गृहोत्तमम् ॥ ४५ ॥
स मैथिलीं धर्मपरामवस्थितां प्रवेपमानां परिभर्त्स्य रावणः ॥
विहाय सीतां मदनेन मोहितः स्वमेव वेश्म प्रविवेश भास्वरम् ॥ ४६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

त्रयोविंशः सर्गः ॥ २३ ॥

रावणचोदनया एकजटादिभीराक्षसीभिः पृथक्पृथक् सीतांप्रति रावणप्रशंसनपूर्वकंतद्भार्याभावस्वीकरणचोदना ॥ १ ॥

इत्युक्त्वा मैथिलीं राजा रावणः शत्रुरावणः ॥ संदिश्य च ततः सर्वा राक्षसीर्निर्जगाम ह ॥ १ ॥
निष्क्रान्ते राक्षसेन्द्रे तु पुनरन्तःपुरं गते ॥ राक्षस्यो भीमरूपास्ताः सीतां समभिदुद्रुवुः ॥ २ ॥
ततः सीतामुपागम्य राक्षस्यः क्रोधमूर्च्छिताः ॥ परं पौरुषया वाचा वैदेहीमिदमब्रुवन् ॥ ३ ॥
पौलस्त्यस्य वरिष्ठस्य रावणस्य महात्मनः ॥ दशग्रीवस्य भार्यात्वं सीते न बहु मन्यसे ॥ ४ ॥
ततस्त्वेकजटा नाम राक्षसी वाक्यमब्रवीत् ॥ आमृश्य क्रोधताम्राक्षी सीतां करतलोदरीम् ॥ ५ ॥
प्रजापतीनां पण्णां तु चतुर्थो यः प्रजापतिः ॥ मानसो ब्रह्मणः पुत्रः पुलस्त्य इति विश्रुतः ॥ ६ ॥
पुलस्त्यस्य तु तेजस्वी महर्षिर्मानसः सुतः ॥ नाम्ना स विश्रवा नाम प्रजापतिसमप्रभः ॥ ७ ॥
तस्य पुत्रो विशालाक्षि रावणः शत्रुरावणः ॥ तस्य त्वं राक्षसेन्द्रस्य भार्या भवितुमर्हसि ॥
मयोक्तं चारुसर्वाङ्गि वाक्यं किं नानुमन्यसे ॥ ८ ॥
ततो हरिजटा नाम राक्षसी वाक्यमब्रवीत् ॥ विवर्त्य नयने कोपान्मार्जारसदृशेक्षणा ॥ ९ ॥
येन देवास्त्रयस्त्रिंशद्देवराजश्च निर्जिताः ॥ तस्य त्वं राक्षसेन्द्रस्य भार्या भवितुमर्हसि ॥ १० ॥
ततस्तु प्रघसा नाम राक्षसी क्रोधमूर्च्छिता ॥ भर्त्सयन्ती तदा घोरमिदं वचनमब्रवीत् ॥ ११ ॥

भाग्यं नास्तीत्यर्थः ॥ ४१—४५ ॥ सर्गार्थं संग्रहेण दर्शयति—स इति ॥ ४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

प्रजापतीनामिति । " मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः " इति षट् प्रजापतयः । तेषां चतुर्थः

ति० अमरश्रेष्ठाइन्द्रादयः । दैवहतेयमदृष्टहीनेत्यर्थः ॥ ४१ ॥ ति० समुत्क्षिप्तः अन्यतोपसारितः । प्रहसन् धान्यमालिन्योचितव्यवहारदर्शनेनावशप्राप्तस्त्रीप्रहारापकीर्तिपरिहारेणचप्रसन्नइत्यर्थः ॥ स० समुत्क्षिप्तः बलात्परिवर्तितः । अतएवप्रहसन् ॥ ४३ ॥ ति० प्रविविशुः प्रविविशुः ॥ ४५ ॥ इतिद्वाविंशःसर्गः ॥ २२ ॥

ति० शत्रून्रावयति हाहाशब्दंकारयति सशत्रुरावणः ॥ १ ॥ ति० नबहुमन्यसे मोहादितिशेषः ॥ ४ ॥ ति० तस्यपुत्रइत्यनेन कुलीनत्वंसूचितं ॥ ८ ॥ स० अष्टौवसवः । एकादशरुद्राः । द्वादशादित्याः । द्वावश्विनौ । आहत्यत्रयस्त्रिंशद्देवाः । द्वादशा-

[पा०] १ क. ङ. झ. ट. भास्करसंकाशं. २ ङ.—ज. ञ. कन्याश्चताःस्त्रियः. ग. ङ. झ. ट. कन्याश्चतास्तत्रः. क. कन्याश्चशोभनाः. ख. कन्याश्चसर्वशः. ३ क. ग. च. छ. ज. ञ. ट. विविशुस्तागृहोत्तमं. ङ. झ. प्रविशुस्तागृहोत्तमं. ४ च. प्रतिपद्यवीर्यवान्. क. ज. ञ. प्रविवेशवीर्यवान्. ङ. झ. ट. प्रविवेशरावणः. ५ क. परुषंपरुषावाचो. ६ च. छ. ज. ञ. पाठेषु ततोहरिजटेत्यर्धस्यस्थाने. ततोहरिजटानाम राक्षसीक्रोधमूर्छिता । भर्त्समानातदाघोरमिदंवचनमब्रवीत् इत्यर्धद्वयंदृश्यते.

वीर्योत्सिक्तस्य शूरस्य संग्रामेष्वनिवर्तिनः ॥ बलिनो वीर्ययुक्तस्य भार्यात्वं किं न लप्स्यसे ॥ १२ ॥
प्रियां बहुमतां भार्यां त्यक्त्वा राजा महाबलः ॥ सर्वासां च महाभागां त्वामुपैष्यति रावणः ॥१३॥
समृद्धं स्त्रीसहस्रेण नानारत्नोपशोभितम् ॥ अन्तःपुरं समुत्सृज्य त्वामुपैष्यति रावणः ॥ १४ ॥
अन्या तु विकटा नाम राक्षसी वाक्यमब्रवीत् ॥ १५ ॥
असकृद्देवता युद्धे नागगन्धर्वदानवाः ॥ निर्जिताः समरे येन स ते पार्श्वमुपागतः ॥ १६ ॥
तस्य सर्वसमृद्धस्य रावणस्य महात्मनः ॥ किमद्य राक्षसेन्द्रस्य भार्यात्वं नेच्छसेऽधमे ॥ १७ ॥
ततस्तु दुर्मुखी नाम राक्षसी वाक्यमब्रवीत् ॥ १८ ॥
यस्य सूर्यो न तपति भीतो यस्य च मारुतः ॥ न वाति सायतापाङ्गे किं त्वं तस्य न तिष्ठसि ॥ १९ ॥
पुष्पवृष्टिं च तरवो मुमुचुर्यस्य वै भयात् ॥ शैलाश्च सुभ्रूः पानीयं जलदाश्च यदेच्छति ॥ २० ॥
तस्य नैर्ऋतराजस्य राजराजस्य भामिनि ॥ किं त्वं न कुरुषे बुद्धिं भार्यार्थे रावणस्य हि ॥ २१ ॥
साधु ते तत्त्वतो देवि कथितं साधु भामिनि ॥ गृहाण सुस्मिते वाक्यमन्यथा न भविष्यसि ॥२२॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

चतुर्विंशः सर्गः ॥ २४ ॥

रावणचोदनया राक्षसीभिस्तर्जितयासीतया ताःप्रति भर्तुरन्यस्यापरिग्रहविषये शच्यरुन्धतीप्रभृतिपतिव्रतानांदृष्टान्तीकरणपूर्वकं स्वस्यमारणेपिरामान्यपुरुषापरिग्रहविषये दृढप्रतिज्ञानम् ॥ १ ॥ ततःशिंशुपास्थेहनुमति गूढंतूष्णींशृण्वति नानाराक्षसीभिर्नानापरुषभाषणैर्नानाविधायुधोद्यमनेनच भीषणपूर्वकंसंतर्जने सीतयादुःखाद्रोदनम् ॥ २ ॥

ततः सीतामुपागम्य राक्षस्यो विकृताननाः ॥ परुषं परुषा नार्य ऊचुस्तां वाक्यमप्रियम् ॥ १ ॥
किं त्वमन्तःपुरे सीते सर्वभूतमनोहरे ॥ महार्हशयनोपेते न वासमनुमन्यसे ॥ २ ॥
मानुषी मानुषस्यैव भार्यात्वं बहु मन्यसे ॥ प्रत्याहर मनो रामान्न त्वं जातु भविष्यसि ॥ ३ ॥

पुलस्त्यः ॥ ६—१२ ॥ सर्वासां मध्ये प्रियां बहुमतां । महाभागां च भार्यां मन्दोदरीं त्यक्त्वा त्वामुपैष्यति ॥ १३—१७ ॥ यस्य यस्मात् । तस्य न तिष्ठसि तस्मै न तिष्ठसे । प्रकाशनार्थेप्यार्षत्वात्परस्मैपदं षष्ठी च ॥ १९ ॥ शैलाश्च जलदाश्च पानीयं रावणः यदेच्छति तदा मुञ्चन्तीति विपरिणम्यते॥२०—१२॥ साधु ते कथितं साधु गृहाणेति साधुशब्दद्वयस्य निर्वाहः ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥

न त्वं जातु भविष्यसितस्येति शेषः ॥ ३—

दित्यमध्यप्रविष्टस्यविष्णोःस्वरूपस्यराक्षसीभिरज्ञानादेवमुक्तं ॥ १० ॥ स० वीर्योत्सिक्तस्य वीर्योन्मत्तस्यसकाशादपिवीर्ययुक्तस्य । नलिप्ससे नेच्छसि ॥ १२ ॥ स० यस्यसकाशाद्भीतः तस्य वशेइतिशेषः ॥ १८ ॥ स० मुमुचुः मुमुचुः । आर्षोविसर्गलोपः ॥ १९ ॥ ति० भार्यार्थे भार्यालनिमित्तं ॥ २० ॥ स० अधुते रावणेनानिराकृते सत्कृतेइतियावत् । सात्वंगृहाणेतिवा ॥२१॥ इतित्रयोविंशःसर्गः ॥ २३ ॥

स० परुषमपिसरुषापित्रापुत्रंप्रत्युदीरितं शठ तर्हिनपठेत्येवमादिवाक्यमन्ततोगत्वाप्रायःप्रियपर्यवसायिदृष्टमित्यतोप्रियमित्युक्तं ॥ १ ॥ ति० प्रत्याहर निवर्तय । एवं लदभीष्टंरामसंगमरूपंवस्तु । जातु कदाचिदपि । अतःपरंनभविष्यति । अत्ररामागमन-

[पा०] १ झ. ठ. लिप्ससे. २ ग. रत्नेनशोभितं. ३ घ. झ. ट. तदुत्सृज्य. ४ झ. ट. असकृद्भीमवीर्येण. ५ झ. ट. किमर्थं. ६ ङ. झ. ट. यस्यस. ७ क. झ. ञ. ट. तिष्ठसे. ८ च. वृष्टीश्च. ९ झ. ञ. ट. शैलाःसुस्रुवुः पानीयं. ठ. शैलाः सुस्रुवुपानीयं. १० क. च. छ. निश्चितं. ११ क. ग.—ट. सीतांसमस्तास्ताः. १२ ङ. झ. ञ. ट. परुषानर्हा. १३ ख. ङ. झ. ञ. ट. ऊचुस्तद्वाक्यं. ग. घ. च. छ. ज. ऊचुस्तावाक्यं. १४ झ. मनोरमे. १५ घ. वासंबहुमन्यसे. १६ झ. ट. रामान्नैवंजातु.

त्रैलोक्यवसुभोक्तारं रावणं राक्षसेश्वरम् ॥ भर्तारमुपसंगम्य विहरस्व यथासुखम् ॥ ४ ॥
मानुषी मानुषं तं तु राममिच्छसि शोभने ॥ राज्याद्भ्रष्टमसिद्धार्थं विक्लवं त्वमनिन्दिते ॥ ५ ॥
राक्षसीनां वचः श्रुत्वा सीता पद्मनिभेक्षणा ॥ नेत्राभ्यामश्रुपूर्णाभ्यामिदं वचनमब्रवीत् ॥ ६ ॥
यदिदं लोकविद्विष्टमुदाहरथ संगताः ॥ नैतन्मनसि वाक्यं मे किल्बिषं प्रतिभाति वः ॥ ७ ॥
न मानुषी राक्षसस्य भार्या भवितुमर्हति ॥ कामं खादत मां सर्वा न करिष्यामि वो वचः ॥ ८ ॥
दीनो वा राज्यहीनो वा यो मे भर्ता स मे गुरुः ॥ तं नित्यमनुरक्तास्मि यथा सूर्यं सुवर्चला ॥ ९ ॥
यथा शची महाभागा शक्रं समुपतिष्ठति ॥ अरुन्धती वसिष्ठं च रोहिणी शशिनं यथा ॥ १० ॥
लोपामुद्रा यथाऽगस्त्यं सुकन्या च्यवनं यथा ॥ सावित्री सत्यवन्तं च कपिलं श्रीमती यथा ॥११॥
सौदासं मदयन्तीव केशिनी सगरं यथा ॥ नैषधं दमयन्तीव भैमी पतिमनुव्रता ॥
तथाऽहमिक्ष्वाकुवरं रामं पतिमनुव्रता ॥ १२ ॥
सीताया वचनं श्रुत्वा राक्षस्यः क्रोधमूर्च्छिताः ॥ भर्त्सयन्ति स्म परुषैर्वाक्यै रावणचोदिताः ॥१३॥
अवलीनः स निर्वाक्यो हनुमाञ्छिंशुपाद्रुमे ॥ सीतां संतर्जयन्तीस्ता राक्षसीरशृणोत्कपिः ॥ १४ ॥
तामभिक्रम्य संक्रुद्धा वेपमानां समन्ततः ॥ भृशं संलिलिहुर्दीप्तान्प्रलम्बान्दशनच्छदान् ॥ १५ ॥
ऊचुश्च परमक्रुद्धाः प्रगृह्याशु परश्वधान् ॥ नेयमर्हति भर्तारं रावणं राक्षसाधिपम् ॥ १६ ॥
संभर्त्स्यमाना भीमाभी राक्षसीभिर्वरानना ॥ सा बाष्पमुपमार्जन्ती शिंशुपां तामुपागमत् ॥ १७ ॥
ततस्तां शिंशुपां सीता राक्षसीभिः समावृता ॥ अभिगम्य विशालाक्षी तस्थौ शोकपरिप्लुता ॥१८॥
तां कृशां दीनवदनां मलिनाम्बरधारिणीम् ॥ भर्त्सयांचक्रिरे सीतां राक्षस्यस्तां समन्ततः ॥ १९ ॥
ततस्तां विनता नाम राक्षसी भीमदर्शना ॥ अब्रवीत्कुपिताकारा कराला निर्णतोदरी ॥ २० ॥
सीते पर्याप्तमेतावद्धर्तुः स्नेहो निदर्शितः ॥ सर्वत्रातिकृतं भद्रे व्यसनायोपकल्पते ॥ २१ ॥
परितुष्टास्मि भद्रं ते मानुषस्ते कृतो विधिः ॥ ममापि तु वचः पथ्यं ब्रुवन्त्याः कुरु मैथिलि ॥२२॥

४ ॥ मानुषीति हेतुगर्भं । मानुषी त्वं मानुषं तमिच्छसि ॥ ५—६ ॥ किल्बिषं पापावहं ॥ ७—८ ॥ सुवर्चलेत्यादि बहुदृष्टान्तप्रदर्शनं स्वस्य पातिव्रत्यदार्ढ्यद्योतनाय ॥ ९—१३ ॥ अवलीनः छन्नः । राक्षसीरशृणोत् राक्षसीवाक्यान्यशृणोदित्यर्थः ॥ १४—१५ ॥ नेयमर्हतीत्यत्रेतिकरणं बोध्यं । अस्य ऊचुरित्यनेनसंबन्धः ॥ १६ ॥ संभर्त्स्यमानेति । सा भर्त्स्यमानेतिपाठे भर्त्सनोपगमनरूपक्रियाभेदात्तच्छब्दद्वयं । तां हनुमदधिष्ठितां शिंशुपां ॥ १७—१९ ॥ निर्णतोदरी उन्नतोदरी ॥ २० ॥ अतिकृतं अतिमात्रकृतं ॥ २१ ॥ मानुषो विधिः कृतः । मनुष्यजात्युचितपातिव्रत्यप्रकटनं कृतं एतावत्कालमित्यर्थः

स्यतएवातत्रगमनस्यप्रसक्त्यभावादितिभावः ॥ यद्वा अतःपरंजातुकदाचिदप्येवंभावश्चेत् भवती नभविष्यति मारयामइत्यर्थः ॥३॥ ति० नेत्राभ्यां उपलक्षितेतिशेषः ॥ ६ ॥ स० एतत् युष्मद्वाक्यं मेकिल्बिषंप्रति पापसाधनपरपुरुषसंसर्गप्रति मनउत्पादनंप्रति नप्रतितिष्ठति ॥ ७ ॥ ति० सुवर्चला सूर्यपत्नी । सूर्याभिमुखपुष्पवतीकाचिदोषधिरित्यन्यः ॥ ९ ॥ स० दुस्समयगमनायानेकनिदर्शनान्याह—यथेति ॥ १० ॥ स० भैमीदमयन्तीतिसामानाधिकरण्यं ॥१२॥ स० साभर्त्स्यमानेतिपदमेकं । सांहिंसामुद्दिश्यभर्त्स्यमाना साभर्त्स्यमाना । "सातुहिंसायां" इतिविश्वः । यासेत्यन्वयः । उपेत्यनेनातिसामीप्यंसूचयति ॥१७॥ स० विधिः

[पा०] १ क. ख. त्रैलोक्यमनु. २ क. ङ. च. ज.—ट. प्रतितिष्ठति. ३ क. ख. घ. च. छ. ज. ञ. समनुतिष्ठति. ४ क. ख. घ. च. छ. ज. ञ. तामतिक्रम्य. ५ क. ख. घ. च.—ट. संरब्धाः. ६ क. ख. च. ज. प्रलंबदशन. ७ क. च. छ. ज. ञ. ऊचुःपरमसंक्रुद्धाः. ८ क. ख. ग. ङ. छ.—ट. साभर्त्स्यमाना. घ. साभर्त्स्यमानावैदेही. ९ क. ङ. झ. ट. वैराङ्गना. १० क. खबाष्पमवमार्जन्ती. घ. ङ. झ. ञ. ट. साबाष्पमपमार्जन्ती. ११ क. ङ.-ट. वासिनीं. १२ घ. ङ. झ. ट. भीमाः. १३ क. घ. झ. ट. राक्षस्यस्ताः. १४ ङ. झ. ट. ततस्तु. १५ ख. च. ञ. कराली. १६ ङ.—ञ. ञ. ट. स्नेहःप्रदर्शितः.

रावणं भज भर्तारं भर्तारं सर्वरक्षसाम् ॥ विक्रान्तं रूपवन्तं च सुरेशमिव वासवम् ॥ २३ ॥
दरिणं त्यागशीलं च सर्वस्य प्रियदर्शनम् ॥ २४ ॥
मानुषं कृपणं रामं त्यक्त्वा रावणमाश्रय ॥ दिव्याङ्गरागा वैदेहि दिव्याभरणभूषिता ॥ २५ ॥
अद्य प्रभृति सर्वेषां लोकानामीश्वरी भव ॥ अग्नेः स्वाहा यथा देवी शची वेन्द्रस्य शोभने ॥ २६ ॥
किं ते रामेण वैदेहि कृपणेन गतायुषा ॥ एतदुक्तं च मे वाक्यं यदि त्वं न करिष्यसि ॥
अस्मिन्मुहूर्ते सर्वास्त्वां भक्षयिष्यामहे वयम् ॥ २७ ॥
अन्या तु विकटा नाम लम्बमानपयोधरा ॥ अब्रवीत्कुपिता सीतां मुष्टिमुद्यम्य गर्जती ॥ २८ ॥
बहून्यप्रियरूपाणि वचनानि सुदुर्मते ॥ अनुक्रोशान्मृदुत्वाच्च सोढानि तव मैथिलि ॥ २९ ॥
न च नः कुरुषे वाक्यं हितं कालपुरस्सरम् ॥ ३० ॥
आनीतासि समुद्रस्य पारमन्यैर्दुरासदम् ॥ रावणान्तःपुरं घोरं प्रविष्टा चासि मैथिलि ॥ ३१ ॥
रावणस्य गृहे रुद्धामस्माभिस्तु सुरक्षिताम् ॥ न त्वां शक्तः परित्रातुमपि साक्षात्पुरन्दरः ॥ ३२ ॥
कुरुष्व हितवादिन्या वचनं मम मैथिलि ॥ अलमश्रुप्रपातेन त्यज शोकमनर्थकम् ॥ ३३ ॥
भज प्रीतिं प्रहर्षं च त्यजैतां नित्यदैन्यताम् ॥ सीते राक्षसराजेन सह क्रीड यथासुखम् ॥ ३४ ॥
जानासि हि यथा भीरु स्त्रीणां यौवनमध्रुवम् ॥ यावन्न ते व्यतिक्रामेत्तावत्सुखमवाप्नुहि ॥ ३५ ॥
उद्यानानि च रम्याणि पर्वतोपवनानि च ॥ सह राक्षसराजेन चर त्वं मदिरेक्षणे ॥ ३६ ॥
स्त्रीसहस्राणि ते सप्त वशे स्थास्यन्ति सुन्दरि ॥ रावणं भज भर्तारं भर्तारं सर्वरक्षसाम् ॥ ३७ ॥
उत्पाट्य वा ते हृदयं भक्षयिष्यामि मैथिलि ॥ यदि मे व्याहृतं वाक्यं न यथावत्करिष्यसि ॥३८॥
ततश्चण्डोदरी नाम राक्षसी क्रोधमूर्च्छिता ॥ भ्रामयन्ती महच्छूलमिदं वचनमब्रवीत् ॥ ३९ ॥
इमां हरिणलोलाक्षीं त्रासोत्कम्पिपयोधराम् ॥ रावणेन हृतां दृष्ट्वा दौर्हृदो मे महानभूत् ॥ ४० ॥
यकृत्प्लीहमथोत्पीडं हृदयं च सबन्धनम् ॥ अत्राण्यपि तथा शीर्षं खादेयमिति मे मतिः ॥ ४१ ॥

॥ २२—२८ ॥ सोढानि रावणेनेति शेषः ॥ २९ ॥ कालपुरस्सरं कालानुरूपं ॥ ३०—३३ ॥ प्रीतिं रावणविषयप्रीतिं । प्रहर्षं कालकृतमनोविकासं ॥ ३४—३७ ॥ उत्पाट्य वा उत्पाट्यैव ॥ ३८ —३९ ॥ दौर्हृदः इच्छा ॥ ४० ॥ कुक्षिदक्षिणभागस्थः कालखण्डाख्यो मांसपिण्डो यकृत् । " स्नायुस्त्रियां कालखण्डयकृती तु समे इमे " इत्यमरः । प्लीहा तु गुल्माख्यो वामभागस्थो मांसपिण्डविशेषः ।

करणं । मानुषः मनुष्यजात्युचितः । तेनेतिशेषः । अमानुषः देवादिगोचरोवा । अमानुषः राक्षससंबन्धी अविधिः अननुष्ठानं । कृतः । तेनतुष्टास्मि सहसाहस्तगतयानभाव्यमितित्वयेत्यर्थकृतमितितुष्टास्मीत्यर्थोवा । " सभाराजाऽमनुष्यपूर्वा " इतिसूत्रवृत्तावमनुष्यशब्दोरक्षःपिशाचादीनाहेत्युक्तेः ॥ २२ ॥ स० आपतन्तं शत्रूणामुपरीतिशेषः ॥ २३ ॥ स० गतायुषा अस्मदाहाररूपत्वाद्गतायुष्टमितिभावः ॥ सर्वास्त्वांभक्षयिष्यामहइत्युक्त्वानैकापित्वत्पक्षपातिनीवर्ततइतिद्योतयति ॥ २७ ॥ ति० तर्जती तर्जयन्ती ॥ २८ ॥ स० दैन्यं स्वार्थेघञ् । दैन्यतां दीनतां ॥ रामानु० प्रीतिं स्नेहं । प्रहर्षं आनन्दं । नित्यदैन्यतां

[पा०] १ ङ. झ. ट. विक्रान्तमापतन्तं. २ क. ख. घ.—ट. प्रियवादिनं. ३ ङ.—ट. लोकानांसर्वेषामीश्वरी. ४ ङ. झ. ञ. ट. तर्जती. ५ ख. घ. झ. ट. बहून्यप्रतिरूपाणि. ६ च. छ. ज. ञ. प्रोक्तानि. ७ क. ख. घ.—ट. कालपुरस्कृतं. ८ ङ. झ. ञ. ट. पुरेघोरे. ९ क. ख. ङ. झ. ञ. ट. रुद्धाअस्माभिस्त्वभिरक्षिता. १० घ.—ट. मश्रुनिपातेन. ११ झ. त्यजन्ती. ङ. छ. ज. ट. त्यजतां. १२ ख. निजदैन्यतां. १३ ङ. झ. ट. परिक्रीड. १४ झ. ट. जानीमहेयथा. १५ ङ. झ. ञ. ट. देविवशे. १६ क. ङ. च. ज.—ट. क्रूरदर्शना. १७ ङ. झ. ट. हरिणशावाक्षीं. १८ क. ख. घ.—झ. ट. त्रासोत्कंप. १९ ख. ङ. झ. ट. महानयं. २० ङ. च. ज.—ट. यकृत्प्लीहंमहत्क्रोडं. क. यकृत्प्लीहमथोत्क्रुत्य. २१ च. छ. ज. स्नायुबन्धनं. २२ झ. ट. गात्राण्यपि. २३ ङ.—ज. ञ. खादयामीति.

ततस्तु प्रघसा नाम राक्षसी वाक्यमब्रवीत् ॥ कण्ठमस्या नृशंसायाः पीडयाम किमास्यते ॥ ४२ ॥
निवेद्यतां ततो राज्ञे मानुषी सा मृतेति ह ॥ नात्र कश्चन संदेहः खादतेति स वक्ष्यति ॥ ४३ ॥
ततस्त्वजामुखी नाम राक्षसी वाक्यमब्रवीत् ॥ विशस्येमां ततः सर्वाः समान्कुरुत पीलुकान् ॥४४॥
विभजाम ततः सर्वा विवादो मे न रोचते ॥ पेयमानीयतां क्षिप्रं लेह्यमुच्चावचं बहु ॥ ४५ ॥
ततः शूर्पणखा नाम राक्षसी वाक्यमब्रवीत् ॥ अजामुख्या यदुक्तं हि तदेव मम रोचते ॥ ४६ ॥
सुरा चानीयतां क्षिप्रं सर्वशोकविनाशिनी ॥ मानुषं मांसमास्वाद्य नृत्यामोथ निकुम्भिलाम् ॥ ४७ ॥
एवं संभर्त्स्यमाना सा सीता सुरसुतोपमा ॥ राक्षसीभिः सुघोराभिर्धैर्यमुत्सृज्य रोदिति ॥ ४८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

पञ्चविंशः सर्गः ॥ २५ ॥

राक्षसीगणसंतर्जनमसहमानयासीतयाऽशोकशाखालंबनेन रामलक्ष्मणादीन्प्रत्याक्रोशनपूर्वकमश्रुधाराविसर्जनेन बहुपरिदेवनम् ॥ १ ॥

अथ तासां वदन्तीनां परुषं दारुणं बहु ॥ राक्षसीनामसौम्यानां रुरोद जनकात्मजा ॥ १ ॥
वमुक्ता तु वैदेही राक्षसीभिर्मनस्विनी ॥ उवाच परमत्रस्ता बाष्पगद्गदया गिरा ॥ २ ॥
मानुषी राक्षसस्य भार्या भवितुमर्हति ॥ कामं खादत मां सर्वा न करिष्यामि वो वचः ॥ ३ ॥
सा राक्षसीमध्यगता सीता सुरसुतोपमा ॥ न शर्म लेभे दुःखार्ता रावणेन च तर्जिता ॥ ४ ॥
वेपते स्माधिकं सीता विशन्तीवाङ्गमात्मनः ॥ वने यूथपरिभ्रष्टा मृगी कोकैरिवार्दिता ॥ ५ ॥
सा त्वशोकस्य विपुलां शाखामालम्ब्य पुष्पिताम् ॥ चिन्तयामास शोकेन भर्तारं भग्नमानसा ॥६॥

नकारान्तस्य ह्रीहन्शब्दस्य अकारान्तत्वमार्षं । " अस्रं पुरीतद्बुल्मस्तु ह्रीहा पुंसि " इत्यमरः । उत्पीडं तस्योपरि स्थितं मांसं । हृदयं पद्मकोशप्रतीकाशं मांसं । बन्धनं तस्य धारणमधोमांसं । उत्क्रोडमिति पाठे उत्क्रोडोहृदयस्थानं । अस्रं पुरीतत् ॥ ४१—४३ ॥ पीलुकान् मांसखण्डान् ॥ ४४ ॥ पेयं लेह्यं चास्या उपदंशलेनोच्यते ॥ ४५—४६ ॥ निकुम्भिला नाम लङ्कायाः पश्चिमद्वारप्रदेशवासिनी भद्रकाली ॥४७॥ रोदिति अरुदत् ॥४८॥इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्यानेचतुर्विंशःसर्गः ॥२४॥

तासां वदन्तीनां तासु वदन्तीषु ॥ १ ॥ मनस्विनी पातिव्रत्ये दृढमनाः ॥ २ ॥ खादत भक्षयत ॥ ३ ॥ शर्म सुखं ॥ ४ ॥ कोकैः ईहामृगैः । " कोकस्त्वीहामृगो वृकः " इत्यमरः ॥ ५ ॥ अशोकस्य हनुमद्-

---

निर्लज्जदैन्यमस्यास्तानिर्लज्जदैन्या तस्याभावोनिर्लज्जदैन्यतातां ॥ २४ ॥ **ति०** प्रघसावाक्यं **विशस्येमामिति** । मध्ये-कण्ठमस्या इत्यादिततस्त्वजामुखीत्यन्तंश्लोकद्वयंप्रक्षिप्तमितिकतकः ॥ ४४ ॥ **ति०** शूर्पणखेयमन्या ॥ ४६ ॥ इतिचतुर्विंशःसर्गः ॥ २४ ॥

स० परुषं बहिःक्रूरं । दारुणं अन्तः ॥ १ ॥ **ति०** शर्मनलेभेइव । शोकार्तैव ॥ **ती०** सीताविलापस्यवास्तवार्थस्तु श्रीरामवियोगेन घोरराक्षसपुरावस्थानेन विरूपराक्षसीसमागमेनच विविधप्रलापादिकमितिज्ञेयं । अस्मिन्काण्डेयत्रयत्रसीताप्रलापस्तत्रतत्रैवमेवोहनीयः ॥ ४ ॥ **स०** आत्मनः स्वस्य अङ्गं विशन्तीमहाङ्गेष्ववान्तराङ्गानिनिवेशयन्तीव ॥ **ति०** आत्मनोऽङ्गंविशन्तीव भीत्यातिसंकुचितशरीराकमठवदभूदित्यर्थः ॥ ५ ॥ **शि०** अशोकस्य अशोकसदृशशिंशुपायाः । अशोकशब्दआचारक्विबन्तप्रकृ-

[**पा०**] १ एतदार्धचतुष्टयं झ. पाठेनदृश्यते. २ ङ. च. झ. ञ. ट. सर्वान्समान्. ३ ङ. झ. ञ. ट. पिण्डकान्. ४ ङ. झ. ञ. ट. माल्यंचविविधंबहु. क. माल्यानिविविधानिच. ५ ङ.—ट. यदुक्तंवै. ६ ङ. च. ज.—ट. मासाद्य. ७ ङ. च. ज.—ट. निर्भर्त्स्यमाना. ८ राक्षसीभिर्विरूपाभिः. ९ क. ङ. झ. ट. अथ. १० ख. ङ.—ट. शोकार्ता. ११ झ. रावणेनेव. १२ क. सिंहैरिवा. १३ क. दुःखार्तांभर्तारं. १४ क. गतमानसा. घ. ज. सक्तमानसा.

सा स्रापयन्ती विपुलौ स्तनौ नेत्रजलस्रवैः ॥ चिन्तयन्ती न शोकस्य तदाऽन्तमधिगच्छति ॥ ७ ॥
सा वेपमाना पतिता प्रवाते कदली यथा ॥ राक्षसीनां भयत्रस्ता विवर्णवदनाऽभवत् ॥ ८ ॥
तस्याः सा दीर्घविपुला वेपन्त्या सीतया तदा ॥ ददृशे कम्पिनी वेणी व्यालीव परिसर्पती ॥ ९ ॥
सा निःश्वसन्ती दुःखार्ता शोकोपहतचेतना ॥ आर्ता व्यसृजदश्रूणि मैथिली विललाप ह ॥ १० ॥
हा रामेति च दुःखार्ता हा पुनर्लक्ष्मणेति च ॥ हा श्वश्रु मम कौसल्ये हा सुमित्रेति भामिनी ॥ ११ ॥
लोकप्रवादः सत्योऽयं पण्डितैः समुदाहृतः ॥ अकाले दुर्लभो मृत्युः स्त्रिया वा पुरुषस्य वा ॥१२॥
यत्राहमेवं क्रूराभी राक्षसीभिरिहार्दिता ॥ जीवामि हीना रामेण मुहूर्तमपि दुःखिता ॥ १३ ॥
एषाऽल्पपुण्या कृपणा विनशिष्याम्यनाथवत् ॥ समुद्रमध्ये नौः पूर्णा वायुवेगैरिवाहता ॥ १४ ॥
भर्तारं तमपश्यन्ती राक्षसीवशमागता ॥ सीदामि खलु शोकेन कूलं तोयहतं यथा ॥ १५ ॥
तं पद्मदलपत्राक्षं सिंहविक्रान्तगामिनम् ॥ धन्याः पश्यन्ति मे नाथं कृतज्ञं प्रियवादिनम् ॥ १६ ॥
सर्वथा तेन हीनाया रामेण विदितात्मना ॥ तीक्ष्णं विषमिवास्वाद्य दुर्लभं मम जीवितम् ॥ १७ ॥
कीदृशं तु मया पापं पुरा जन्मान्तरे कृतम् ॥ येनेदं प्राप्यते दुःखं मया घोरं सुदारुणम् ॥ १८ ॥
जीवितं त्यक्तुमिच्छामि शोकेन महता वृता ॥ राक्षसीभिश्च रक्ष्यन्त्या रामो नासाद्यते मया ॥ १९ ॥
धिगस्तु खलु मानुष्यं धिगस्तु परवश्यताम् ॥ न शक्यं यत्परित्यक्तुमात्मच्छन्देन जीवितम् ॥२०॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

धिष्ठितशिंशुपासन्निहितस्य ॥ ६ ॥ अन्तं अवधिं । अधिगच्छति अध्यगच्छत् ॥ ७ ॥ राक्षसीनां राक्षसीभ्यः ॥ ८ ॥ सीतयेति व्यत्ययेन षष्ठ्यर्थे तृतीया । परिसर्पती परिसर्पन्ती । नुमभावआर्षः ॥ ९ ॥ दुःखार्ता राक्षसीवचनश्रवणजदुःखार्ता । आर्ता रामविरहार्ता ॥ १० ॥ सुमित्रेत्यत्र संबुद्धावाप एकारादेशाभाव आर्षः ॥ ११ ॥ लोकप्रवाद इत्यादिश्लोकद्वयमेकं वाक्यं ॥ अकाले अप्राप्तकाले । दुर्लभ इत्यत्र इतिकरणं बोध्यं । यत्र यतः ॥ १२—१३ ॥ पूर्णा पदार्थैरिति शेषः ॥ १४—१५ ॥ मम धनं सर्वेषां स्वं भविष्यतीत्याह—तमिति ॥ तं " बहवो नृप कल्याणगुणाः पुत्रस्य सन्तिते " इति प्रसिद्धं । आत्मगुणानुक्त्वा विग्रहगुणानाह—पद्मदलपत्राक्षं दलतीति दलं विकसितपद्माक्षमित्यर्थः । यद्वा दलतीति दलं गर्भपत्रं । विस्पष्टार्थमेकार्थे शब्दद्वयं वा । सिंहविक्रान्तगामिनं विक्रान्तं विक्रमः गमनं तद्वत् गच्छतीति तथा ॥ १६—१७ ॥ पुरा जन्मान्तरे पूर्वजन्मनि । घोरं सुदारुणं अत्यन्तघोरमित्यर्थः ॥ १८ ॥ रक्ष्यन्त्या रक्ष्यमाणया ॥ १९ ॥ परवश्यतां भर्तृपरतन्त्रतां । परस्वभूतं शरीरं न स्वेच्छया त्यक्तुं शक्यमित्यर्थः । आत्मच्छन्देन मदिच्छया ॥ २० ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

तिककर्तृक्रिबन्तः । इवार्थस्तुशब्दोवा ॥ ती० हनुमदधिष्ठितशिंशुपामूलंप्राप्तायास्सीतायाअशोकशाखालंबनाभिधानादशोकशाखाःशिंशुपाशाखाश्चपरस्परंसंमिलितावर्तन्तइत्यवगम्यते ॥ ६ ॥ स० भयत्रस्ता भयैः घोरैरायुधादिभिः । त्रस्ता भीता । "भयं प्रतिभयेघोरे " इतिविश्वः ॥ ८ ॥ स० अनाथवत् अनाथेव । आर्षःपुंवद्भावः ॥ १४ ॥ इतिपञ्चविंशःसर्गः ॥ २५ ॥

[पा०] १ क. विषण्णवदना. २ ङ. झ. ट. दीर्घबहुला. ३ ङ. झ. ट. कंपिता. ४ झ. शोकार्तोपोपहतचेतना. ५ क. घ. ङ. झ. ट. विललापच. ६ क. घ.—छ. झ. ञ. ट. यत्राहमाभिः. ७ ङ. झ. ञ. ट. जीवनं. ८ ङ.—ट. महापापं मयादेहान्तरे. ९ ङ. ज.—ट. घोरंमहादुःखं. ङ. ट. घोरंमहद्दुःखं.

षड्विंशः सर्गः ॥ २६ ॥

राक्षसीसंतर्जनमसहमानयासीतया ताःप्रति स्वस्यचित्राहिंसयामारणेपि रावणानङ्गीकरणेदृढप्रतिज्ञानपूर्वकं स्वानयनाय रामानागमने बहुकारणविकल्पनेनबहुधाविलापः ॥ १ ॥

प्रसक्ताश्रुमुखी[1]त्येवं ब्रुवन्ती जनकात्मजा ॥ [2]अधोमुखमुखी बाला विलप्तुमुपचक्रमे ॥ १ ॥
उन्मत्तेव प्रमत्तेव भ्रान्तचित्तेव शोचती ॥ उपावृत्ता किशोरीव विवेष्टन्ती महीतले ॥ २ ॥
राघवस्य प्रमत्तस्य रक्षसा कामरूपिणा ॥ रावणेन प्रमथ्याहमानीता क्रोशती बलात् ॥ ३ ॥
राक्षसीवशमापन्ना भर्त्स्यमाना [3]सुदारुणम् ॥ चिन्तयन्ती सुदुःखार्ता नाँ[4]हं जीवितुमुत्सहे ॥ ४ ॥
न हि मे [5]जीवितैर्थो नैवार्थैर्न च भूषणैः ॥ वसन्त्या राक्षसीमध्ये विना रामं [6]महारथम् ॥ ५ ॥
अश्मसारमिदं नूनमथवाऽप्यजरामरम् ॥ हृदयं मम येनेदं न [7]दुःखेनावशीर्यते ॥ ६ ॥
धिङ्मामनार्यामसतीं याऽहं तेन विना कृता ॥ मुहूर्तमपि [8]रक्षामि जीवितं [9]पापजीविता ॥ ७ ॥
का च मे जीविते श्रद्धा सुखे वा तं प्रियं विना ॥ भर्तारं सागरान्ताया वसुधायाः प्रियंवदम् ॥८॥
भिद्यतां भक्ष्यतां वाऽपि शरीरं विसृजाम्यहम् ॥ न चाप्यहं चिरं दुःखं सहेयं प्रियवर्जिता ॥ ९ ॥
चरणेनापि सव्येन न स्पृशेयं निशाचरम् ॥ रावणं किं पुनरहं कामयेयं [10]विगर्हितम् ॥ १० ॥
[11]प्रत्याख्यातं न जानाति नात्मानं नात्मनः कुलम् ॥ यो नृशंसस्वभावेन मां प्रार्थयितुमिच्छति ॥११॥
छिन्ना [12]भिन्ना विभक्ता वा दीप्ते[13]वाग्नौ प्रदीपिता ॥ रावणं नोपतिष्ठेयं किं प्रलापेन वश्चिरम् ॥१२॥
ख्यातः प्राज्ञः कृतज्ञश्च सानुक्रोशश्च राघवः ॥ [14]सद्वृत्तो निरनुक्रोशः शङ्के मद्भाग्यसंक्षयात् ॥ १३ ॥

उन्मत्ता चित्तविभ्रमवती । " उन्मादश्चित्तविभ्रमः " इत्युक्तेः । प्रमत्ता अनवधाना । " प्रमादोनवधानता " इत्यमरः । भ्रान्तचित्ता अनवस्थितचित्ता । उपावृत्ता श्रमापनोदनार्थं वेष्टिता । किशोरीव बडवेव ॥ २ ॥ प्रमत्तस्य अनवहितस्य ॥ ३–४ ॥ मे जीवितैर्जीवनैः कोप्यर्थो नास्ति । केवलजीवितस्यानपेक्षितत्वेप्यर्थसहितत्वेन तदपेक्षा स्यात् नेत्याह—नैवार्थैर्न च भूषणैः भूषणैरर्थैश्च सहितैर्जीवनैर्मे नार्थः । कुत इत्यत्राह—वसन्त्या इति । राक्षसीमध्यवासाद्रामविरहाच्च सर्वोपकरणसहितमपि जीवितं नापेक्षितमित्यर्थः ॥ ५—१० ॥ प्रत्याख्यातं प्रत्याख्यानं । भावे निष्ठा । आत्मानं स्वस्वरूपं ॥११॥ छिन्ना द्विखण्डतया कृता । भिन्ना दलिता । विभक्ता अवयवशः कृता । दीप्तेव अग्नौ प्रदीपिता वा ॥ १२ ॥ एवं पातिव्रत्यदार्ढ्यमुक्त्वा रामस्यानागमने कारणानि बहुधा शङ्कते—ख्यात इत्यादिना ॥ प्राज्ञः दोषवत्यपि गुणदर्शी । " न तेऽम्बा मध्यमा माता गर्हितव्या कथंचन" इत्युक्तं । कृतज्ञः "कथंचिदुपकारेण कृतेनैकेन तुष्यति" इत्युक्तरीत्या स्वाश्रितैः कृतं किंचित्कारं सर्वदा मनसि कुर्वन्नित्यर्थः । सानुक्रोशः किंचित्कारकरणे "भृशं भवति दुःखितः" इत्युक्तरीत्या तेषां व्यसने सति अतिदुःखितः राघवः । जनित्वार्जितानां गुणान्तराणामुपसंग्रहणमिदं । सद्वृत्तः परसमृद्ध्येकप्रयोजनः । ख्यातः एवं शत्रुगोष्ठ्यामपि प्रसिद्धः । निरनुक्रोशः शङ्के अस्यामप्यवस्थायां सुखप्रदानाभावान्नृशंसमाशङ्के । मद्भाग्यसंक्षयात् । मद्भाग्यविपर्य-

---

ति० असतीं असतीवत्परगृहस्थां । जीवामि जीवितंरक्षामीत्यर्थः । पाकंपचतीतिवत्प्रयोगः ॥ ७ ॥

[पा०] १ ख. ङ.—ञ. त्येवं. २ ङ.—ट. अधोगतमुखी. ३ ङ. च. ज.—ट. चदारुणं. ४ क. नहि. ५ क. घ.—ट. जीवितेनार्थो. ६ क. ख. घ. महाबलं. ७ ङ. च. ज. झ. ट. नदुःखेनविशीर्यते. क. दुःखेननविशीर्यते. ८ झ. ट. जीवामि. ९ ङ. झ. ट. पापजीविका. १० ङ. झ. ट. निशाचरं. ११ क. ङ. झ. ञ. ट. प्रत्याख्यानं. १२ ङ. झ. ट. भिन्नाप्रभिन्ना. १३ ङ. झ. दीप्तावाग्नौ. १४ क. च. ज. ञ. सुवृत्तो.

राक्षसानां [1]सहस्राणि जनस्थाने चतुर्दश ॥ [2]येनैकेन निरस्तानि स मां किं नाभिपद्यते ॥ १४ ॥
निरुद्धा रावणेनाहमल्पवीर्येण रक्षसा ॥ समर्थः खलु मे भर्ता रावणं हन्तुमाहवे ॥ १५ ॥
विराधो दण्डकारण्ये येन राक्षसपुङ्गवः ॥ रणे रामेण निहतः स [3]मां किं नाभिपद्यते ॥ १६ ॥
कामं मध्ये समुद्रस्य लङ्केयं दुष्प्रधर्षणा ॥ न तु राघवबाणानां [4]गतिरोधीह विद्यते ॥ १७ ॥
किंनु तत्कारणं येन रामो दृढपराक्रमः ॥ रक्षसापहृतां भार्यामिष्टां [5]नाभ्यवपद्यते ॥ १८ ॥
इहस्थां मां न जानीते शङ्के लक्ष्मणपूर्वजः ॥ जानन्नपि हि तेजस्वी [6]धर्षणं मर्षयिष्यति ॥ १९ ॥
हृतेति योधि[7]गत्वा मां राघवाय निवेदयेत् ॥ गृध्रराजोपि स रणे रावणेन निपातितः ॥ २० ॥
कृतं कर्म महत्तेन मां [8]तथाऽभ्यवपद्यता ॥ तिष्ठता रा[9]वणद्वन्द्वे वृद्धेनापि जटायुषा ॥ २१ ॥
यदि मामिह जानीयाद्वर्तमानां [10]सं राघवः ॥ अद्य बाणैरभिक्रुद्धः कुर्याल्लोकमराक्षसम् ॥ २२ ॥
[11]विधमेच्च पुरीं लङ्कां शोषयेच्च महोदधिम् ॥ रावणस्य च नीचस्य कीर्तिं नाम च नाशयेत् ॥ २३ ॥
ततो निहतनाथानां राक्षसीनां गृहे गृहे ॥ यथाहमेवं रुदती तथा भूयो न संशयः ॥ २४ ॥
अन्विष्य रक्षसां लङ्कां कुर्याद्रामः सलक्ष्मणः ॥ न हि ताभ्यां रिपुर्दृष्टो मुहूर्तमपि जीवति ॥ २५ ॥
चिताधूमाकुलपथा गृध्रम[12]ण्डलसंकुला ॥ [13]अचिरेण तु लङ्केयं श्मशानसदृशी भवेत् ॥ २६ ॥
अचिरेणैव कालेन प्राप्स्याम्येवं [14]मनोरथम् ॥ दुष्प्रस्थानोयमा[15]ख्याति सर्वेषां वो [16]विपर्ययम् ॥ २७ ॥
[17]यादृशानीह दृश्यन्ते लङ्कायामशुभानि वै ॥ [18]अचिरेण तु कालेन भविष्यति हतप्रभा ॥ २८ ॥
नूनं लङ्का हते पापे रावणे [19]रा[20]क्षसाधमे ॥ [21]शोषं यास्यति दुर्धर्षा प्रमदा विधवा यथा ॥ २९ ॥

येणैवं वैपरीत्यं जातं ॥ १३ ॥ एकमात्रसहायः स किं करिष्यतीत्यत्राह—राक्षसानामिति ॥ जनस्थाने रक्षसां चतुर्दश सहस्राणि एकेन येन रामेण निरस्तानि घातितानि सः नाभिपद्यते न रक्षति ॥ १४ ॥ प्रबलो रावणः कथं निरस्य इत्यत्राह—निरुद्धेति ॥ १५ ॥ सामर्थ्यं निदर्शयति—विराध इति ॥ १६ ॥ अस्तु-रामःसमर्थः तथापि समुद्रमध्यस्थालङ्कादुष्प्रधर्षेत्याशङ्क्याह—काममिति ॥ गतिरोधि गतिप्रतिबन्धकं । किंचिदिति शेषः ॥ १७ ॥ एतत्फलितमाह—किंन्विति ॥१८॥ लक्ष्मणपूर्वज इत्यनेन निरनुक्रोशत्वादिप्रसक्त्यभावस्सूच्यते । मर्षयिष्यतीत्यत्र काकुरनुसंधेया ॥१९॥ इहास्तीत्यज्ञाने हेतुमाह—हृतेति ॥२०॥ प्रसङ्गादाह—कृतमिति ॥ अभ्यवपद्यता रक्षता । रावणद्वन्द्वे रावणद्वन्द्वयुद्धे ॥ २१—२३ ॥ अहं यथा एवं रुदती रुदन्त्यस्मि । तथा निहतनाथानां राक्षसीनां गृहे गृहे भूयः भूरि । रुदन्त्यो भविष्यन्तीत्यर्थः ॥ २४ ॥ रक्षसां लङ्कामन्विष्य कुर्यात् । रिपुनाशनमिति शेषः ॥ २५—२६ ॥ दुष्प्रस्थानः दुर्मार्गः दुराचार इति यावत् ॥ २७ ॥ अशुभानि अशुभसूचकानि । हतप्रभेत्यत्र लङ्केत्यनुकर्षः । लङ्का अचिरेण कालेन हतप्रभा भविष्यतीत्यत्र यादृशानि सूचकानि स्युः इह लङ्कायां तादृशान्यशुभानिदृश्यन्त इत्यन्वयः ॥ २८ ॥ दुर्धर्षेति लङ्काविशेषणं ॥ २९ ॥

शि० सरामः मां नाभ्यवपद्यते किमर्थमितिशेषः ॥ १६ ॥ ति० रावणवधेतिष्ठता रावणवधार्थंयतता ॥ २१ ॥ स० दुष्प्रस्थानः दुस्साध्यप्रस्थानः । अनिवर्त्यइतियावत् ॥ २७ ॥ ति० शोषं ऐश्वर्यादेरितिशेषः ॥ २९ ॥

[पा०] १ क. घ.—ट. जनस्थानेसहस्राणि. २ च. झ. ट. एकेनैव. ३ क. ख. च. ज. ट. मांनाभ्यवपद्यते. ४ झ. ट. गतिरोधोभविष्यति. च. ज. ञ. गतिरोधोत्रदृश्यते. ५ ङ. झ. मिष्टांयोनाभिपद्यते. ख. च. छ. ट. मिष्टांनाभ्युपपद्यते. ६ क. घ.—छ. झ. ञ. ट. धर्षणां. ७ ङ. झ. ट. मांयोधिगत्य. क. च. छ. ज. ञ. योभिगत्वामां. ८ च. ज. झ. ट. तदा. ९ क. ङ. झ. ट. रावणवधे. १० ङ. ज. झ. ट. हिराघवः. ११ ङ. झ. ट. निर्दहेच्च. १२ ङ.—ट. मण्डलमण्डिता. १३ ख. ङ. झ. ट. अचिरेणैवकालेन. १४ ङ. झ. ट. म्येनं. १५ ङ. झ. ट. माभाति. १६ ङ. झ. ट. विपर्ययः. १७ ग. ङ. च. ज. झ. ट. यादृशानितु. १८ क. ख. घ. ङ. च. ज.—ट. अचिरेणैव. १९ क. घ.—ट. राक्षसाधिपे. २० ङ. झ. ञ. ट. शोषमेष्यति.

पुण्योत्सवसंमुत्था[1] च नष्टभर्त्री[2] सराक्षसी ॥ भविष्यति पुरी लङ्का नष्टभर्त्री यथाऽङ्गना ॥ ३० ॥
नूनं राक्षसकन्यानां रुदन्तीनां[3] गृहे गृहे ॥ श्रोष्यामि नचिरादेव दुःखार्तानामिह ध्वनिम् ॥ ३१ ॥
सान्धकारा हतद्योता हतराक्षसपुङ्गवा ॥ भविष्यति पुरी लङ्का निर्दग्धा रामसायकैः ॥ ३२ ॥
यदि नाम[4] स शूरो मां रामो रक्तान्तलोचनः[5] ॥ जानीयाद्वर्तमानां[6] हि रावणस्य निवेशने ॥ ३३ ॥
अनेन तु नृशंसेन रावणेनाधमेन मे ॥ समयो यस्तु निर्दिष्टस्तस्य कालोऽयमागतः ॥ ३४ ॥
[सँ च मे विहितो मृत्युरस्मिन्दुष्टेन[7] वर्तते ॥] अकार्यं ये न जानन्ति नैर्ऋताः[8] पापकारिणः ॥
अधर्मात्तु महोत्पातो भविष्यति हि साम्प्रतम् ॥ ३५ ॥
नैते धर्मं विजानन्ति राक्षसाः पिशिताशनाः ॥ ध्रुवं मां प्रातराशार्थे राक्षसः[9] कल्पयिष्यति ॥३६॥
साऽहं कथं करिष्यामि[10] तं विना प्रियदर्शनम् ॥ रामं रक्तान्तनयनमपश्यन्ती सुदुःखिता ॥ ३७ ॥
यदि कश्चित्प्रदाता मे विषस्याद्य[11] भवेदिह ॥ क्षिप्रं वैवस्वतं देवं पश्येयं पतिना विना ॥ ३८ ॥
नाजानाज्जीवतीं रामः स मां लक्ष्मणपूर्वजः[12] ॥ जानन्तौ तौ न कुर्यातां नोर्व्यां हि मम मार्गणम्[13] ३९
नूनं ममैव शोकेन स वीरो लक्ष्मणाग्रजः ॥ देवलोकमितो यातस्त्यक्त्वा देहं महीतले ॥ ४० ॥
धन्या देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ मम पश्यन्ति ये नाथं[14] रामं राजीवलोचनम् ॥ ४१ ॥
अथवा न हि तस्यार्थो धर्मकामस्य धीमतः ॥ मया रामस्य राजर्षेर्भार्यया परमात्मनः ॥ ४२ ॥
दृश्यमाने भवेत्प्रीतिः सौहृदं नास्त्यपश्यतः[15] ॥ नाशयन्ति कृतघ्नास्तु न रामो नाशयिष्यति ॥४३॥

पुण्योत्सवेभ्यस्समुत्था निकृत्तपुण्योत्सवेत्यर्थः । सराक्षसी राक्षसीजनमात्रयुक्तेत्यर्थः । इयं लङ्कापुरी । नष्टभर्त्री सराक्षसी अर्थात् हतराक्षसा । नष्टभर्त्री अङ्गना यथा अङ्गनेव पुण्योत्सवसमुत्था भविष्यतीत्यन्वयः ॥३०—३२॥ स रामः रावणस्य निवेशने मां वर्तमानां जानीयाद्यदि तदा लङ्का निर्दग्धा भविष्यतीति पूर्वेण संबन्धः ॥ ३३ ॥ समयः द्वादशमासात्मकः संकेतः । तस्य कालः आगतः सन्निहितः । मासद्वयमात्रपरिशेषादिति भावः ॥ ३४ ॥ पापकारिणः ये नैर्ऋताः अधर्मोद्धेतोः अकार्यं च जानन्ति । तैर्महोत्पातस्संभविष्यति ॥ ३५ ॥ एतदेव विवृणोति—नैत इति ॥ ३६—३७ ॥ पतिनेति नाभाव आर्षः ॥ ३८ ॥ जीवतीं जीवन्तीं । न न कुर्यातां कुर्यातामेव । तदाह वामनः—" संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ " इति ॥ ३९—४१ ॥ धर्मकामस्य तस्य कामानपेक्षिण इत्यर्थः । मया भार्यया कोर्थः । परमात्मनः उत्कृष्टस्वभावस्य ॥ ४२ ॥ सौहृदं नास्त्यपश्यतः अदृश्यमाने प्रीतिर्न भवति । तस्माददृश्यायां मयि रामस्य किं प्रीतिर्नासीदित्यर्थः । एवमाशङ्कितं प्रतिषेधति—नाशयन्तीति । कृतघ्नाः प्रथममुत्पन्नां प्रीतिं नाशयन्ति । न तु रामो नाशयिष्यति । मयिप्रीतिमितिशेषः

ति० पुण्योत्सवसमृद्धाच । अद्येतिशेषः ॥३०॥ ति० अस्मिन्काले दुष्टेन रावणेन । सकालोमेमृत्युर्विहितः । वर्ततइत्यर्थः । ननुततःपरमपिस्त्रीत्वात्त्वांनहिंस्युस्तत्राह—अकार्यमिति ॥ ३५ ॥ ति० ननुत्वज्जीवनाभावनिश्चयप्रमाणोपलंभंविनाकथंरामेणदेहस्त्यक्तइत्यतःपक्षान्तरमाह—अथवेति । धर्मकामस्यहिभार्ययाऽर्थः अर्थतुनतथा । तदेवाह—धीमतः आत्मानात्मविवेकवतः । अतएवपरमात्मनः परमात्मब्रह्मात्मनास्थितस्यजीवन्मुक्तस्यतस्यमयानार्थः । अनेनवैराग्यादप्रवृत्तिरितिसूचितं ॥ ४२ ॥ ती० यद्वा सौहृदं स्नेहं । अपश्यतःपुंसः । दृश्यमानेपि सुहृदीतिशेषः । प्रीतिर्नभवेत् किमुतादृश्यमाने ॥ स० सौहृदमिति । " हृद्भगसिन्धवन्ते " इत्यादिनोभयपदवृद्ध्यभावआर्षः ॥ अवृत्तच्छित्तेस्तथैवपठितुंसुशकंवा ॥ ४३ ॥

[पा०] १ क. घ. च. झ. ञ. ट. समृद्धाच. २ क. ख. घ. ङ. च. ज.—ट. सराक्षसा. ३ घ. च. झ. ट. रुदतीनां. ४ क. च. छ. ज. ञ. रामःसशूरोमामिह. ५ घ. राजीवलोचनः. ६ ङ.—ज. वर्तमानांमां. झ. वर्तमानांयां. ७ इदमर्धं ङ. झ. ट. पाठेषुदृश्यते. ८ क. ग. घ. च. छ. ज. पापचारिणः. ९ झ. राशार्थं. १० क. ग. छ. चरिष्यामि. ११ च. छ. ज. विषमद्य. १२ घ. ङ. झ. ट. भरतपूर्वजः. १३ ङ.—ट. परिमार्गणं. १४ ग. ङ. च. ज.—ट. वीरं. १५ ङ. झ. ट. नास्त्यदृश्यतः.

किंनु[1] मे न गुणाः केचित्किंवा भाग्यक्षयो[2] मम ॥ याऽहं सीदामि रामेण हीना मुख्येन भामिनी ॥४४॥
श्रेयो[3] मे जीवितान्मर्तुं विहीनाया महात्मनः[4] ॥ रामादक्लिष्टचारित्राच्छूराच्छत्रुनिबर्हणात् ॥ ४५ ॥
अथवा न्यस्तशस्त्रौ तौ वने मूलफलाशिनौ ॥ भ्रातरौ हि नरश्रेष्ठौ संवृत्तौ[5] वनगोचरौ ॥ ४६ ॥
अथवा राक्षसेन्द्रेण रावणेन दुरात्मना ॥ छद्मना सादितौ[6] शूरौ भ्रातरौ रामलक्ष्मणौ ॥ ४७ ॥
साऽहमेवं[7] गते काले मर्तुमिच्छामि सर्वथा ॥ न च मे विहितो मृत्युरस्मिन्दुःखेऽपि वर्तति ॥४८॥
धन्याः खलु महात्मानो[8] मुनयस्त्यक्तकिल्बिषाः[9] ॥ जितात्मानो[10] महाभागा[11] येषां न स्तः प्रियाप्रिये ४९
प्रियान्न संभवेद्दुःखमप्रियादधिकं भयम्[12] ॥ ताभ्यां हि [13]ये वियुज्यन्ते नमस्तेषां महात्मनाम् ॥५०॥
साऽहं त्यक्ता [14]प्रियेणेह रामेण विदितात्मना[15] ॥ प्राणांस्त्यक्ष्यामि पापस्य रावणस्य गता वशम् ॥५१॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षड्विंशः सर्गः ॥ २६ ॥

सप्तविंशः सर्गः ॥ २७ ॥

सीतांसंतर्जयन्तीराक्षसीःप्रति स्वापात्प्रबुद्धयात्रिजटाख्ययाराक्षस्या स्वेनसीताराघवयोः स्वबन्धोरावणस्यच क्रमेणाभ्युदयानभ्युदयसूचकाद्भुतस्वप्नदर्शननिवेदनेन सभर्त्सनंसीतातर्जनप्रतिषेधनपूर्वकं दूरेतासामपसारणम् ॥ १ ॥ तथा तासां प्रार्थनया ताःप्रति स्वस्यस्वामिकार्यदर्शनप्रकारनिरूपणपूर्वकं सीतायाविजयाशंसकशुभशकुनप्रदर्शनम् ॥ २ ॥

इत्युक्ताः सीतया घोरा[16] राक्षस्यः क्रोधमूर्च्छिताः ॥ [17]काश्चिज्जगमुस्तदाख्यातुं रावणस्य [18]तरस्विनः ॥१॥
ततः सीतामुपागम्य राक्षसो घोरदर्शनाः ॥ पुनः परुषमेकार्थमनर्थार्थमथाब्रुवन् ॥ २ ॥

॥ ४३ ॥ नगुणाः दुष्कृतानि ॥ ४४ ॥ मर्तुमिति भावार्थे तुमुन् । मरणमित्यर्थः । महात्मनः रामाद्विहीनायाः महात्मना रामेण हीनायाः । तृतीयार्थे पञ्चमी ॥४५॥ न्यस्तशस्त्रौ संवृत्तौ किमिति संबन्धः ॥ ४६ ॥ सादितौ हतौ ॥ ४७ ॥ वर्ततिवर्तमाने ॥ ४८ ॥ महात्मानः महाधैर्याः । त्यक्तकिल्बिषाः त्यक्तपापाः । जितात्मानः जितान्तःकरणाः । महाभागाः महाभाग्याः ॥ ४९ ॥ प्रियान्न संभवेद्दुःखं किंतु सुखमेव भवेदित्यर्थः । प्रियात् अनुकूलवस्तुनः । अप्रियात् प्रतिकूलवस्तुनः । अधिकं भयं अधिकं दुःखं । ताभ्यां । प्रियाप्रियाभ्यां । नमस्तेषां त एव सर्वोत्तमा इत्यर्थः ॥ ५० ॥ साहं तद्विलक्षणाहं । केवलप्रियपरेत्यर्थः । प्रियेण त्यक्ता अप्रियं प्राप्ता । प्राणांस्त्यक्ष्यामीत्यर्थः ॥ ५१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षड्विंशः सर्गः ॥ २६ ॥

तत् मरणाध्यवसायं ॥ १ ॥ एकार्थं पूर्वोक्तवचनैरेकाभिधेयं । अनर्थार्थं अनर्थफलकं । एकाक्ष्यादयः पूर्वोक्तार्थमेव परुषवचनं पुनरब्रुवन्नित्यर्थः ॥ २ ॥

ति० मयितदुपेक्षाहेतवःकेचनअगुणाः दोषाःस्युः । अयमपिपक्षोनयुक्तः । स्वापरिज्ञातस्वापचाराभावात् । तस्मात्प्राग्भवीयदुष्कर्मजोभाग्यक्षयएवहेतुरित्याह—किंवेति ॥४४॥ ति० भाग्यक्षयनिश्चयस्यकर्तुमशक्यत्वात्पक्षान्तरं—अथवेति ॥ ४६ ॥ ति० इदमप्यसंभावितं । रक्षोभिःकृतवैरेणक्षत्रियेणतत्त्यागायोगात् । अतःपक्षान्तरं—अथवेति॥४७॥ इतिषड्विंशःसर्गः॥२६॥

स० तत् सीताव्यवसितंमरणं ॥ १ ॥ स० एकार्थं रावणसंगमरूपैकाभिधेययुक्तं । अनर्थः राक्षसविनाशरूपः अर्थः प्रयो-

[पा०] १ ङ. ञ. ट. किंवामय्यगुणाः. २ क. ग.—ट. क्षयोहिमे. क. ग. घ. ङ. ञ. ट. याहिसीतावरार्हेणहीनारामेणभामिनी. ३ क. श्रेयोहि. ४ ख. घ. च. ज. ञ. महात्मना. ५ क. ग.—ट. चरन्तौ. ६ ख. ग. ङ.—ट. घातितौ. ७ क. घ. वीरौ. ८ ङ.—ट. मेवंविधे. ९ ङ. ञ. ट. दुःखेऽतिवर्तति. १० क. ग. ट. मुनयःसत्यसंमताः. ११ घ. महात्मानो. १२ ङ.—ट. भवेत्. १३ ञ. तेवियुज्यन्ते. १४ ङ. ञ. ट. प्रियेणैव. १५ ग. ङ. ञ. ट. घोरं. १६ घ. स्थिताःकाश्चिद्गताःकाश्चिद्रावणायनिवेदितुं. १७ ङ. ञ. ञ. ट. दुरात्मनः.

[1]अद्येदानीं तवानार्ये सीते पापविनिश्चये ॥ राक्षस्यो [2]भक्षयिष्यन्ति मांसमेतद्यथासुखम् ॥ ३ ॥
सीतां ताभिरनार्याभिर्दृष्ट्वा संतर्जितां तदा ॥ राक्षसी त्रिजटा [3]वृद्धा शयाना वाक्यमब्रवीत् ॥ ४ ॥
आत्मानं खादतानार्या न सीतां भक्षयिष्यथ ॥ जनकस्य सुतामिष्टां स्नुषां दशरथस्य च ॥ ५ ॥
स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः ॥ राक्षसानामभावाय भर्तुरस्या [4]भवाय च ॥ ६ ॥
एवमुक्तास्त्रिजटया राक्षस्यः क्रोधमूर्च्छिताः ॥ सर्वा एवाब्रुवन्भीतास्त्रिजटां तामिदं वचः ॥
कथयस्व त्वया दृष्टः स्वप्नोऽस्याः कीदृशो निशि ॥ ७ ॥
तासां श्रुत्वा तु वचनं राक्षसीनां [5]मुखाच्च्युतम् ॥ उवाच वचनं काले त्रिजटा स्वप्नसंश्रितम् ॥ ८ ॥
गजदन्तमयीं दिव्यां शिबिकामन्तरिक्षगाम् ॥ युक्तां [6]हंससहस्रेण स्वयमास्थाय राघवः ॥
[7]शुक्लमाल्याम्बरधरो लक्ष्मणेन [8]सहागतः ॥ ९ ॥
स्वप्ने चाद्य मया दृष्टा सीता शुक्लाम्बरावृता ॥ सागरेण परिक्षिप्तं [9]श्वेतं पर्वतमास्थिता ॥
रामेण संगता सीता भास्करेण [10]प्रभा यथा ॥ १० ॥
राघवश्च [11]मया दृष्टश्चतुर्दन्तं महागजम् ॥ आरूढः शैलसंकाशं [12]चचार सहलक्ष्मणः ॥ ११ ॥
[13]ततस्तौ नरशार्दूलौ दीप्यमानौ स्वतेजसा ॥ शुक्लमाल्याम्बरधरौ जानकीं पर्युपस्थितौ ॥ १२ ॥
ततस्तस्य नगस्याग्रे ह्याकाशस्थस्य दन्तिनः ॥ भर्त्रा परिगृहीतस्य जानकी स्कन्धमाश्रिता ॥ १३ ॥
भर्तुरङ्कात्समुत्पत्य ततः कमललोचना ॥ चन्द्रसूर्यौ मया दृष्टा [14]पाणिना परिमार्जती ॥ १४ ॥
ततस्ताभ्यां कुमाराभ्यामास्थितः स गजोत्तमः ॥ सीतया च विशालाक्ष्या लङ्काया उपरि स्थितः ॥१५
पाण्डुरर्षभयुक्तेन रथेनाष्टयुजा स्वयम् ॥ [[15]शुक्लमाल्यांबरधरो लक्ष्मणेन सहागतः ॥
ततोन्यत्र मया दृष्टो रामः सत्यपराक्रमः] ॥ १६ ॥
इहोपयातः काकुत्स्थः सीतया सह भार्यया ॥ १७ ॥

अद्य अस्मिन्दिने। इदानीं अस्मिन्क्षणे। भक्षयिष्यन्तीत्यब्रुवन्निति पूर्वेण संबन्धः ॥ ३ ॥ त्रिजटा विभीषणपुत्री। शयानेत्यनेन स्वप्नवृत्तान्तकथनत्वरोच्यते ॥ ४—६ ॥ निशीत्यनन्तरमितिकरणं द्रष्टव्यं ॥ ७ ॥ काले उषःकाले यस्स्वप्नः तत्संश्रितं ॥ ८ ॥ आगतः लङ्कामिति शेषः ॥९—१०॥ महागजमारूढ इति शिबिकात इति शेषः। तथोक्तं स्वप्नाध्याये—"आरोहणं गोवृषकुञ्जराणां प्रासादशैलाग्रवनस्पतीनाम्। विष्ठानुलेपो रुदितं मृतं च स्वप्नेष्वनन्यागमनं च धन्यं" इति ॥११॥ चचार सीतां प्रतीति शेषः ॥१२॥ ततस्तस्य नगस्याग्र इति ॥ अत्र द्वादशसहस्रश्लोकागताः त्रयोदशसहस्रादिमोयं श्लोकः। गायत्र्याख्योदशमक्षरमत्र बोध्यम् ॥ १३ ॥ चन्द्रसूर्यौ पाणिना परिमार्जतीति। अत्र स्वप्नाध्यायवचनं। "आदित्यमण्डलं वातु चन्द्रमण्डलमेव वा। स्वप्ने गृह्णाति हस्ताभ्यां राज्यं संप्राप्नुयान्महत् इति ॥ १४—१७ ॥

जनं यस्यतादृशं। परुषं परुषवाक्यमब्रुवन् ॥ २ ॥ **स०** अद्येत्युक्तौ श्वःप्रातःपर्यन्तमितिभ्रमोमाहिभूदितीदानीमित्युक्तं ॥ ३ ॥ **ति०** प्रबुद्धेत्यनेन तावत्पर्यन्तंसुप्तवतीतिगम्यते ॥४॥ **ती०** कालेप्रातःकाले। स्वप्नसंश्रितं प्रातःकालदृष्टस्वप्नदृष्टार्थविषयकं। अनेन स्वप्नस्यशीघ्रफलदत्वंसूचितं ॥७॥ **ती०** एतेन लङ्कायामेवरामस्यसीतादर्शनंसूचितं ॥९॥ **शि०** सीता स्वर्गगङ्गासदृशी। सीता वैदेही। सार्धश्लोकएकान्वयी। एकःसीताशब्दः आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः। "सीता लाङ्गलपद्धतिवैदेहीस्वर्गगङ्गासु" इतिमेदिनी ॥ १० ॥ **ति०** शुक्लमाल्यांबरधरोरामोलक्ष्मणेनसहेहागतइत्यन्वयः। अन्यत्र स्वप्नान्तरे ॥ १६ ॥

[**पा०**] १ घ. ह्यन्तेदानीं. २ छ. ज. ञ. भक्षयिष्यामो. ३ ङ. ञ. ट. वृद्धाप्रबुद्धा. ४ क. ग. घ. जयायच. ५ क. ग. ङ.—ट. मुखोद्गतं. ६ ग. घ. ङ. छ. ञ. ञ. ट. वाजिसहस्रेण. ७ क. च. छ. ञ. शुक्लांबरधरोवीरो. ८ क. ख. ङ. च. ज.—ट. समागतः. ९ ङ. च. छ. ञ. ञ. ट. श्वेतपर्वतं. १० ट. यथाप्रभा. ११ ङ. ञ. ञ. ट. पुनर्दृष्टः. १२ ग. ङ. ञ. ञ. ट. चकास. च. छ. ज. जगाम. १३ ङ. ञ. ट. ततस्तुसूर्यसंकाशौ. क. च. छ. ज. ततस्तु. १४ ङ—ट. पाणिभ्यां. १५ इदमर्धद्वयं क. ग.—ट. पाठेषुदृश्यते.

लक्ष्मणेन सह भ्रात्रा सीतया सह वीर्यवान् ॥ आरुह्य पुष्पकं दिव्यं विमानं सूर्यसन्निभम् ॥
उत्तरां दिशमालोक्य जगाम पुरुषोत्तमः ॥ १८ ॥
एवं स्वप्ने मया दृष्टो रामो विष्णुपराक्रमः ॥ लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया ॥ १९ ॥
[साण्डं त्रिभुवनं सर्वं सर्वतः सचराचरम् ॥ सर्वं ग्रस्तं मया दृष्टं रामेणाक्लिष्टकर्मणा ॥ २० ॥
क्षीरोदधिजले मध्ये श्वेतः शैलः समुच्छ्रितः ॥ तस्य मूर्ध्नि ततः श्वेतश्चतुर्दन्तो महागजः ॥
तस्य पृष्ठे स्थितः श्रीमान्रामो राजीवलोचनः ॥ २१ ॥
ततः सीता समुत्पत्य भर्तुरङ्काश्रिता तदा ॥ बाहुभ्यां संपरिष्वज्य संपूर्णं चन्द्रमण्डलम् ॥ २२ ॥
ततोऽन्यत्र मया दृष्टो रामो राजीवलोचनः ॥ आसीनः प्राङ्मुखः श्रीमानासने परमाद्भुते ॥ २३ ॥
अभिषिक्तस्तु काकुत्स्थः सर्वदेवैर्नमस्कृतः ॥ सब्रह्मर्षिगणैः सर्वैः सर्वतीर्थजलेन च ॥ २४ ॥
शुक्लमाल्यांबरधरा शुक्लमाल्यानुलेपना ॥ साधु सा तत्र सुश्रोणी रराज जनकात्मजा ॥ २५ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ ब्रह्माणमग्रतः कृत्वा रामं तत्र ववन्दिरे ॥ २६ ॥
पुनरेव मया दृष्टो रामो रमयतांवरः ॥ विष्णुरेव स्वयं भूत्वा तस्मिन्नास्ते वरासने ॥ २७ ॥
परं ब्रह्म परं तत्वं परं ज्ञानं परं तपः ॥ परं बीजं परं क्षेत्रं परं कारणकारणम् ॥ २८ ॥
शङ्खचक्रगदः श्रीमान्पुण्डरीकायतेक्षणः ॥ श्रीवत्सवक्षा नित्यश्रीरजेयः शाश्वतो ध्रुवः ॥ २९ ॥
एवंभूतो महातेजा रामः कमललोचनः ॥ सर्वलोकेश्वरः श्रीमान्ससर्ज रघुनन्दनः ॥ ३० ॥

ततोमरेन्द्राः पितरो मुनीन्द्रा गन्धर्वविद्याध्वरपन्नगेन्द्राः ॥
कृताभिषेकं परिवार्य रामं प्रतुष्टुवुः प्राञ्जलयः प्रहृष्टाः ॥ ३१ ॥
ततस्तु सर्वाप्सरसः प्रहृष्टा नृत्यन्ति गायन्ति समेत्य तत्र ॥
वाद्यं प्रकुर्वन्ति समेत्य शङ्खा वंशाश्च वीणा मुरजाश्च भेर्यः ॥ ३२ ॥]

न हि रामो महातेजाः शक्यो जेतुं सुरासुरैः ॥ राक्षसैर्वाऽपि चान्यैर्वा स्वर्गः पापजनैरिव ॥ ३३ ॥

अयमिह स्वप्नक्रमः । शिबिकास्थितो रामो दृष्टः । श्वेतपर्वतस्था सीता च । ततः शिबिकाया गजमारुह्य लक्ष्मणेन सह पर्वतमभ्येत्य ततस्सीतां गजस्कन्धेधिरोप्य लङ्काया उपरि स्थित्वा ताभ्यां सहाष्टर्षभयुक्तेन रथेनेहागत्य स्वं देशं प्रति ताभ्यां पुष्पकमधिरुह्यागत इति अन्ये श्लोकाः प्रक्षिप्ताः । तेन ते न व्याख्याता इत्याहुः । लक्ष्मणेन सह भ्रात्रेति ॥ एतत्पादस्यानन्तरं, सीतया सह वीर्यवान् ॥ आरुह्य पुष्पकं दिव्यं विमानं सूर्यसन्निभम् । उत्तरां दिशमालोक्य जगाम पुरुषोत्तमः ॥ एवं स्वप्ने मया दृष्टो रामो विष्णुपराक्रमः । लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया ॥ इति पाठक्रमः । विमाने पुष्पके स्थितः । साण्डं त्रिभुवनमित्यारभ्य रामः सत्यपराक्रम इत्यन्तो ग्रन्थः प्रक्षिप्तः प्रकृतासंगतश्च । विष्णुरेव स्वयंभूत्वेति प्रक्षिप्तवचनस्य विष्णुपराक्रम इत्यनेन विरोधात्

ति० अत्रमध्ये ' साण्डंत्रिभुवनं ' इत्यादयोबहवःश्लोकाः रामानुजसंप्रदायपुस्तकेषुदृश्यन्ते । तेप्रक्षिप्ताइतिकतकादयोऽन्येच ॥ १९ ॥ स० विष्णुःउपेन्द्ररूपीसन् ॥ २७ ॥ स० तत्स्वरूपंनिरूपयति—परंब्रह्मेति । कीदृशंब्रह्म परंतत्वं अत्यन्तानारोपितरूपं । परंज्ञानं उत्तमज्ञानस्वरूपं । परंतपः फलरूपं । परंबीजं अतिशयेननिमित्तकारणं । परंक्षेत्रं मुख्याश्रयः । कारणकारणं प्रकृतिकालादिरूपकारणानामपिकारणं ॥ २८ ॥ नित्यश्रीः अनपायलक्ष्मीवान् । अत्रसाण्डंभुवनमित्याद्येतदन्तंश्लोकजातंप्रक्षिप्तमितिकतकप्रभृतयः । अस्माभिस्तुगङ्गाजलमिश्ररथ्योदकवदुपादेयतयाव्याख्यातं ॥ २९ ॥

[पा०] १ ङ. ञ. ट. मालोच्यप्रस्थितः. २ घ. च. छ. ज. ञ. वीर्यवान्. ३ साण्डंत्रिभुवनमित्यारभ्यवीणामुरजाश्चभेर्यइत्यन्ताःश्लोकाः च. छ. ज. ञ. पाठेषुदृश्यन्ते. ४ च. छ. नतु. ५ क. च. छ. रक्षसांवापिलोकेन. ग. रक्षसांवापिलोकैर्वा·

रावणश्च मया दृष्टः क्षितौ[1] तैलसमुक्षितः ॥ रक्तवासाः पिबन्मत्तः करवीरकृतस्रजः ॥ ३४ ॥
विमानात्पुष्पकाद्य रावणः पतितो[2] भुवि ॥ कृष्यमाणः स्त्रिया[3] दृष्टो मुण्डः कृष्णाम्बरः[4] पुनः ॥३५॥
रथेन खरयुक्तेन रक्तमाल्यानुलेपनः[5] ॥ पिबंस्तैलं हसन्नृत्यन्भ्रान्तचित्ताकुलेन्द्रियः[6] ॥
गर्दभेन ययौ शीघ्रं दक्षिणां दिशमाश्रितः[7] ॥ ३६ ॥
पुनरेव मया दृष्टो रावणो राक्षसेश्वरः ॥ पतितोऽवाक्शिरा भूमौ गर्दभाद्भयमोहितः[8] ॥ ३७ ॥
सहसोत्थाय संभ्रान्तो भयार्तो मदविह्वलः[9] ॥ उन्मत्त[5] इव दिग्वासा दुर्वाक्यं प्रलपन्बहु ॥ ३८ ॥
दुर्गन्धं दुःसहं घोरं तिमिरं नरकोपमम् ॥ मलपङ्कं प्रविश्याशु मग्नस्तत्र स रावणः ॥
[प्रस्थितो दक्षिणामाशां[10] प्रविष्टः कर्दमह्रदम्] ॥ ३९ ॥
कण्ठे बद्ध्वा दशग्रीवं प्रमदा रक्तवासिनी ॥ काली कर्दमलिप्ताङ्गी दिशं याम्यां प्रकर्षति ॥ ४० ॥
एवं तत्र मया दृष्टः कुम्भकर्णो निशाचरः[11] ॥ रावणस्य सुताः सर्वे दृष्टास्तैलसमुक्षिताः[12] ॥ ४१ ॥
वराहेण दशग्रीवः शिंशुमारेण चेन्द्रजित् ॥ उष्ट्रेण कुम्भकर्णश्च प्रयातो[13] दक्षिणां दिशम् ॥ ४२ ॥
एकस्तत्र मया दृष्टः श्वेतच्छत्रो विभीषणः ॥ शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः ॥
शङ्खदुन्दुभिनिर्घोषैर्नृत्तगीतैरलङ्कृतः ॥ ४३ ॥
आरुह्य शैलसंकाशं[14] मेघस्तनितनिस्स्वनम् ॥ चतुर्दन्तं गजं दिव्यमास्ते तत्र विभीषणः ॥
चतुर्भिः सचिवैः सार्धं वैहायसमुपस्थितः[15] ॥ ४४ ॥
समाजश्च मया[16] दृष्टो गीतवादित्रनिःस्वनः ॥ पिबतां रक्तमाल्यानां राक्षसां[17] रक्तवाससाम् ॥ ४५ ॥
लङ्का चेयं पुरी रम्या सवाजिरथकुञ्जरा ॥ सागरे पतिता दृष्टा भग्नगोपुरतोरणा ॥ ४६ ॥
लङ्का दृष्टा मया स्वप्ने रावणेनाभिरक्षिता ॥ दग्धा रामस्य दूतेन वानरेण तरस्विना ॥ ४७ ॥
पीत्वा तैलं प्रनृत्ताश्च[18] प्रहसन्त्यो महास्वनाः ॥ लङ्कायां भस्मरूक्षायां[19] प्रविष्टा राक्षसस्त्रियः ॥ ४८ ॥
कुम्भकर्णादयश्चेमे सर्वे राक्षसपुङ्गवाः ॥ रक्तं निवसनं गृह्य प्रविष्टा गोमयह्रदे[20] ॥ ४९ ॥
अपगच्छत नश्यध्वं[21] सीतामाप[22] स राघवः ॥ घातयेत्परमामर्षी सर्वैः[23] सार्धं हि राक्षसैः ॥
[रावणं राघवो घोरे भार्याहर्तारमाहवे] ॥ ५० ॥

॥ १८—३३ ॥ पिबन्निति । तैलसमुक्षित इत्यनेन तैलमित्युपस्थाप्यते । करवीरकृतस्रज इत्याकारान्तत्वमार्षं । हलन्ताद्वा इत्यापो विधानात् स्रक्छब्दस्याबन्तत्वेन वा निर्वाहः ॥ ३४—४२ ॥ एवं रावणविनाशसूचकमुक्त्वा विभीषणस्य राज्यप्राप्तिसूचकमाह —एकस्तत्र मया दृष्टः श्वेतच्छत्र इत्यादिना ॥ ४३ ॥ वैहायसं विमानं ॥ ४४—४९ ॥ अपगच्छत अपसरत । नश्यध्वं अदर्शनं प्राप्नुत । आत्मनेपद-

स० करवीरकृतस्रजइतिरावणविशेषणं । करवीरैः रक्तकरवीरपुष्पैः कृतास्रजामालायस्यसतथा । " टापंचैव " इत्यायुक्तेः । विमानविशेषणत्वेतु पृथक्साक्षादपशकुनत्वाप्रतीत्यस्वारस्यं । नचनागोजिभट्टेन टापंचैवेत्यादेःशब्देन्दुशेखरेऽनङ्गीकृतत्वेनकथमेतदितिवाच्यं । बहुप्रयोगविप्लवापत्तेःसाहसमात्रंतदित्यवधेयं । रक्तमाल्यानुलेपनइत्युत्तरग्रन्थानुगुण्याच्च ॥ ३४ ॥ स० स्त्रियासह मुण्डस्तया कृष्यमाणइत्यन्वयः । सुवासिनीकर्षणस्यहर्षहेतुत्वात् । अतउभयत्रतथाविधतायुक्ता । अपशकुनान्तरलाभाच्च । अथवा स्त्रियानीलवासोदन्तादिमत्या ॥ ३५ ॥

[पा०] १ ङ. झ. ञ. ट. मुण्डस्तैल. २ ङ. झ. ट. पतितःक्षितौ. ३ झ. ट. मुण्डोदृष्टः. ४ क. च. छ. ज. ञ. कृष्णांबरावृतः. ५ ङ. च. ज.—ट. माश्रितः. ६ ङ. झ. ट. उन्मत्तरूपो. ७ इदमर्धं क. ङ.—ट. पाठेषुदृश्यते. ८ ङ. झ. ट. महाबलः. ९ क. ग.—ट. मुण्डास्तैल. १० क. घ. च. छ. ञ. ट. प्रयातादक्षिणां. ११ घ. ङ. च. ज. ञ. मेघसंकाशं. १२ क. राघवंसमुपस्थितः. १३ झ. ञ. ट. महान्नृत्तो. १४ घ. नर्दतां. १५ क. ङ. छ.—ट. प्रमत्ताश्च. ग. घ. प्रनृत्यन्ति. १६ घ. भस्मदिग्धायां. १७ क. ग.—ट. सर्वाराक्षसयोषितः. १८ क. घ. ङ. झ. ट. गोमयहृदं. १९ क. घ.—ट. पश्यध्वं. २० ङ. झ. ट. सीतामाप्नोति. ग. सीतांसंप्राप्य. २१ झ. ट. युष्मान्सार्धं. २२ इदमर्धं क. पाठेदृश्यते.

प्रियां बहुमतां भार्यां वनवासमनुव्रताम् ॥ भर्त्सितां तर्जितां वाऽपि नानुमंस्यति राघवः ॥ ५१ ॥
तदलं क्रूरवाक्यैर्वः सान्त्वमेवाभिधीयताम् ॥ अभियाचाम वैदेहीमेतद्धि मम रोचते ॥ ५२ ॥
यस्यामेवंविधः स्वप्नो दुःखितायां प्रदृश्यते ॥ सा दुःखैर्विविधैर्मुक्ता प्रियं प्राप्नोत्यनुत्तमम् ॥ ५३ ॥
भर्त्सितामपि याचध्वं राक्षस्यः किं विवक्षया ॥ राघवाद्धि भयं घोरं राक्षसानामुपस्थितम् ॥ ५४ ॥
प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा ॥ अलमेषा परित्रातुं राक्षसो महतो भयात् ॥ ५५ ॥
अपि चास्या विशालाक्ष्या न किंचिदुपलक्षये ॥ विरूपमपि चाङ्गेषु सुसूक्ष्ममपि लक्षणम् ॥ ५६ ॥
छायावैगुण्यमात्रं तु शङ्के दुःखमुपस्थितम् ॥ अदुःखार्हामिमां देवीं वैहायसमुपस्थिताम् ॥ ५७ ॥
अर्थसिद्धिं तु वैदेह्याः पश्याम्यहमुपस्थिताम् ॥ राक्षसेन्द्रविनाशं च विजयं राघवस्य च ॥ ५८ ॥
निमित्तभूतमेतत्तु श्रोतुमस्या महत्प्रियम् ॥ दृश्यते च स्फुरच्चक्षुः पद्मपत्रमिवायतम् ॥ ५९ ॥
ईषच्च हर्षितो वास्या दक्षिणाया ह्यदक्षिणः ॥ अकस्मादेव वैदेह्या बाहुरेकः प्रकम्पते ॥ ६० ॥
करेणुहस्तप्रतिमः सव्यश्चोरुरनुत्तमः ॥ वेपमानः सूचयति राघवं पुरतः स्थितम् ॥ ६१ ॥
पक्षी च शाखानिलयः प्रहृष्टः पुनःपुनश्चोत्तमसान्त्ववादी ॥
सुस्वागतां वाचमुदीरयानः पुनःपुनश्चोदयतीव हृष्टः ॥ ६२ ॥

मार्षं । सीतामाप सीतामचिरेणाप्स्यतीत्यर्थः । सर्वैः राक्षसैस्सार्धं घातयेत् । व इति सिद्धं । अपगच्छत नश्यध्वमित्युक्तेः । रावणमित्यध्याहारो वा ॥ ५० ॥ नानुमंस्यति न सहिष्यत इत्यर्थः ॥ ५१ ॥ अभियाचाम अभयमिति शेषः ॥ ५२—५३ ॥ किं विवक्षया अस्माभिस्तदा भर्त्सिता कथं प्रसन्ना भविष्यतीति वक्तुमिच्छया किं । शङ्का न कर्तव्येत्यर्थः ॥ ५४ ॥ कुत इत्यत आह—प्रणिपातप्रसन्ना हीति ॥ ५५ ॥ स्वप्रदर्शनकथनेन सीतायाः शोभनं भावीत्यभिधाय शरीरलक्षणप्रदर्शनेनापि शुभं भावीत्याह—अपिचेति ॥ लक्षणं दुःखप्राप्तिहेतुभूतं रेखोपरेखादिकं ॥ ५६ ॥ तर्हि कुतस्तादृशदुःखानुभव इत्यत्राह—छायेति ॥ छायावैगुण्यमात्रं उपलक्षय इत्यनुषज्यते । वैहायसं विमानं । उपस्थितां प्राप्तां । दिव्यभोगार्हामिति यावत् । अन्वयस्तु छायावैगुण्यमात्रं तूपलक्षये अतः अदुःखार्हां दिव्यभोगार्हामिमां दुःखं उपस्थितमिति शङ्क इति । अत्र छायावैगुण्यं नाम कान्तिवैकल्यं । " छायात्वनातपेकान्तौ " इत्यमरः । यद्वा छायात्राऽनातपः तद्वैगुण्यं तस्य विषमत्वं । सर्वलक्षणलक्षिताया अपि छायावैगुण्यमेतावद्दुःखकरमासीदिति भावः ॥ ५७—५८ ॥ इदानीं रामवार्ताश्रवणसूचकमाह—निमित्तभूतमिति ॥ चक्षुरिति अदक्षिणमित्येतदत्राप्यनुषज्यते । हृषितो वा हृष्ट इव पुलकित इव । पद्मपत्रमित्यनेन रोगादिदृष्टहेत्वन्तरराहित्यमुक्तं । अकस्मात् दृष्टहेत्वन्तरं विना ॥ ५९—६१ ॥ एवं देहनिमित्तमुक्त्वा शाकुनमप्याह—पक्षीति ॥ पक्षी पिङ्गलिका । शाखानिलयः प्रहृष्टः । पुनःपुनश्चोत्तमसान्त्ववादी भूयोभूयो मधुरवादी । उत्तरोत्तरमुत्तमसान्त्वस्वरवादी वा । सुस्वागतां शोभनबन्ध्वागमनमिति यावत् । " बन्धुस्वस्वजनास्समाः " इत्यमरः । वाचं स्वरमुदीरयानः चोदयतीव रामागमनं कथयतीव । यद्वा पूर्वोक्तराघव एव कर्म । राघवमुपपादयतीवेत्यर्थः । आचार्यास्तु पक्षावस्य स्त इति पक्षी गरुत्मान् । भूम्नि प्रशंसायां च मत्वर्थीयः । तदुक्तम् —"भूमनिन्दाप्रशंसासु नित्ययोगेतिशायने । संसर्गेस्तिविवक्षायां भवन्ति मतुवादयः " इति ॥ तथाच पक्षौ विस्तार्य प्रदक्षिणं सञ्चरन् । शाखानिलयः कुसुमितपल्लवितशाखायां दृढतरं स्थितः ।

ति० किंविवक्षया कुत्सितभर्त्सनादिवचनेच्छया । अलमितिशेषः । तत्रहेतुः राघवादिति ॥ ५४ ॥ ति० सुस्वागतां शोभनस्वस्वागतंप्राप्तिर्यस्यां तादृशींवाचं । चोदयतीव शोभनप्राप्तिंसूचयतीव ॥ ६२ ॥ इतिसप्तविंशःसर्गः ॥ २७ ॥

[पा०] १ ङ. झ. ट. वाक्यैश्च. २ क. ग. च. ज.—ट. यस्याह्येवंविधः. घ. यस्यास्त्वेवंविधः. ३ क. ग. च. झ. ञ. ट. दुःखितायाः. ४ क.—ट. दुःखैर्बहुभिः. ५ घ. च. छ. ज. हृषितोबाहुः. ६ ङ. झ. ट. वेपन्कथयतीवास्याः. ७ क. ख. ग. ङ.—ट. शाखानिलयंप्रविष्टः.

आर्द्रतरतरुभाग एव शाखात्वव्यपदेशः । प्रदक्षिणभ्रमणं आर्द्रशाखावरोहणं दृढतरावस्थानं च शुभशंसीत्यर्थः । प्रहृष्टः तत्र फलभोजनादिना सन्तुष्टः । पुनःपुनश्चोत्तमसान्त्ववादी उत्तरोत्तरं सान्त्ववचनं कुर्वन्निव स्थितः । मा शुचः सद्यः समागमिष्यति ते भर्ता नायमवसरश्शोकस्य-इत्येवं सान्त्वयन्निव स्थितः । तदुपरि सुस्वागतां वाचमुदीरयानः । एतावन्मात्रं न भवति तस्य संतापातिरेक इति कथयन्निव स्थितः । विरहक्लिष्टायास्सुस्वागतवचनं हि नाम प्रतियोगिनः संतापातिशयकथनमेव । उक्तं हि—" तपति तनुगात्रि मदनस्त्वामनिशं मां पुनर्दहत्येव । ग्लपयति यथा शशाङ्कं न तथाहि कुमुद्वितीं दिवसः "इति ॥ पुनः पुनश्चोदयतीव प्रियागमने निश्चिते मज्जनालंकरणादिकं किमर्थं न करोषीत्येवं सीतां चोदयतीवेत्युत्प्रेक्षा । हृष्टः नायिकागमनकालिकहर्षः स्वस्यैवेत्येतद्वैलक्षण्यं हृषिततनूरुहैस्सूचयन्निव स्थितः । इदंहि रामायणमुत्तमं काव्यं । तथाहि–काव्यं तावत्त्रिविधं उत्तमं मध्यममधमं चेति।यत्र वाच्यातिशायिव्यङ्ग्यं तदुत्तमं। सएव ध्वनिरित्युच्यते । यत्र वाच्यानतिशायिव्यङ्ग्यं तन्मध्यमं काव्यं । तदेव गुणीभूतव्यङ्ग्यमित्युच्यते । यत्र व्यङ्ग्यमेव नास्ति तदधमं । तदेव चित्रमित्युच्यते । व्यङ्ग्यं च पदगतं वाक्यगतं प्रबन्धगतं चेति त्रिविधं भवति । एतत्काण्डरूपप्रबन्धेन अनादिभगवत्संबन्धवतश्चेतनस्योज्जीवने प्रवृत्तस्याचार्यस्य प्रवृत्तिरभिव्यज्यते । उक्तश्चायमर्थस्ततो रावणनीताया इति श्लोके । अत्र लङ्कापदेन शरीरं द्योतितं । एकाक्षीप्रभृतय इन्द्रियाणि । रावणकुम्भकर्णावहंकारममकारौ । इन्द्रजित्प्रभृतयः कामक्रोधलोभमोहमदमात्सर्यदम्भादयः।तादृशलङ्कानिरुद्धसीतासदृशश्चेतनः। तस्य भगवज्ज्ञानोपदेष्टाचार्यतुल्यो मारुतिः । तादृशाचार्यलक्षणमनेन श्लोकेन सूच्यते । पक्षी । पक्षिशब्देन गमनसाधनत्वात् ज्ञानकर्मणी उच्येते । तदुक्तं —"उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः। तथैव ज्ञानकर्मभ्यां नियता परमा गतिः " इति । ज्ञानकर्मणोरङ्गाङ्गिभावेनात्र समुच्चयो विवक्षितः । " ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन " इति श्रुतेः । अनेनाचार्यशब्दनिर्वचनमुक्तं । " आचिनोति हि शास्त्रार्थानाचारे स्थापयत्यपि । स्वयमाचरते यस्मात्तस्मादाचार्य उच्यते " इति ॥ शाखाशब्देन वेदशाखा उच्यन्ते । निलयशब्देन तदेकपरत्वं । त्यागे प्रत्यवायश्रवणात् । तदुक्तं शिक्षायां—" अधीतमपि योवेदं विमुञ्चति नराधमः । भ्रूणहा स तु विज्ञेयो वियोनिमभिगच्छति " इति ॥ किंच निलय इत्यनेन तदर्थविषयकश्रवणमननदिध्यासनरूपतदनुष्ठानान्युच्यन्ते । अनेनाचार्यलक्षणमुक्तं । तथाहुः—" आचार्यो वेदसंपन्नो विष्णुभक्तो विमत्सरः। मन्त्रज्ञो मन्त्रभक्तश्च सदा मन्त्राश्रयश्शुचिः॥ गुरुभक्तिसमायुक्तः पुराणज्ञो विशेषतः । एवंलक्षणसंपन्नो गुरुरित्यभिधीयते " इति ॥ प्रहृष्टः सदा संतुष्टहृदयः । अनेन सर्वदा सेवनीयत्वमुक्तं । तथोक्तं —"आह्लादशीतनेत्राम्बुः पुलकीकृतगात्रवान् । सदा परगुणाविष्टो द्रष्टव्यस्सर्वदेहिभिः " इति ॥ पुनःपुनश्चोत्तमसान्त्ववादी । उत्तमः " उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः " इत्युक्तः परमात्मा । तद्विषयं सान्त्वं शिष्येभ्यो वदतीत्युत्तमसान्त्ववादी । "त्वं मेहं मे कुतस्तत्तदपि कुत इदं वेदमूलप्रमाणादेतच्चानादिसिद्धादनुभवविभवात्तर्हि साक्रोश एव । काक्रोशः कस्य गीतादिषु मम विदितः कोत्र साक्षी सुधीस्याद्धन्त त्वत्पक्षपाती स इति नृकलहे मृग्यमध्यस्थवक्त्वं " इत्युक्तरीत्या भगवति मनुष्याणां कलहे । " यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः । तेन चेदविवादस्ते मा गङ्गां मा कुरून्गमः " इति सान्त्ववादशील इत्यर्थः । पुनः पुनरित्यनेन कर्षकः कदाचिन्न फलितमित्येतावता यथा कृषिं न परित्यजति पुनःपुनस्तत्रैव प्रवर्तते । तथाचार्योपि कदाचित्त्ववचनाश्रवणेपि न निवर्तते इत्युक्तं । अनेनाचार्यस्य भगवतोप्यतिशय उक्तः । स हि पार्थाय गीतामुपदिश्य पुनरात्मेधिके तेन पूर्वोक्तमर्थं विस्मृत्य पुनः पृष्टेनाहं वक्ष्यामीत्युक्तवान् " नूनमश्रद्दधानोसि दुर्मेधाश्चासि पाण्डव " इत्यादिना । किंच सुस्वागतां वाचमुदीरयानः । सुष्ठु संप्रदायाविच्छेदो यथा तथाचार्यपरंपरया स्वस्मै आगतां वाचं अष्टाक्षरादिमन्त्रराजरूपां निर्हेतुक्यैव दयया समुदीरयन् । 'आचार्याणामसावसाविला भगवत्त' इति गुरुपरम्पराया अनुसन्धेयत्वमनेन सूचितम् । पुनःपुनश्चोदयतीव । उक्तार्थस्यानुष्ठानाय चोदनां दर्शयति । अन्यथा ह्युपदेशोप्यनर्थक एव स्यात् । अत एवाहुर्निगमान्ताचार्याः— स्खालित्ये शासितारमिति । हृष्टः । एतेन शिष्यशि-

[ततस्सा ह्रीमती बाला भर्तुर्विजयहर्षिता ॥ अवोचद्यदि तत्तथ्यं भवेयं शरणं हि वः] ॥ ६३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

अष्टाविंशः सर्गः ॥ २८ ॥

सीतयारावणराक्षसीगणकृतसंतर्जनाद्यसहिष्णुतयाबहुधाविलापपूर्वकं वेण्युद्बन्धनादसुविमोक्षणनिश्चयेनशिंशुपाशाखावलंबने तदङ्गेष्वनुभूतपूर्वशुभशकुनप्रादुर्भावः ॥ १ ॥

सा राक्षसेन्द्रस्य वचो निशम्य तद्रावणस्याप्रियमप्रियार्ता ।
सीता वितत्रास यथा वनान्ते सिंहाभिपन्ना गजराजकन्या ॥ १ ॥
सा राक्षसीमध्यगता च भीरुर्वाग्भिर्भृशं रावणतर्जिता च ॥
कान्तारमध्ये विजने विसृष्टा बालेव कन्या विललाप सीता ॥ २ ॥
सत्यं बतेदं प्रवदन्ति लोके नाकालमृत्युर्भवतीति सन्तः ॥
यत्राहमेवं परिभर्त्स्यमाना जीवामि किंचित्क्षणमप्यपुण्या ॥ ३ ॥
सुखाद्विहीनं बहुदुःखपूर्णमिदं तु नूनं हृदयं स्थिरं मे ॥
विशीर्यते यन्न सहस्रधाऽद्य वज्राहतं शृङ्गमिवाचलस्य ॥ ४ ॥
नैवास्ति दोषं मम नूनमत्र वध्याहमस्याप्रियदर्शनस्य ॥
भावं न चास्याहमनुप्रदातुमलं द्विजो मन्त्रमिवाद्विजाय ॥ ५ ॥
नूनं ममाङ्गान्यचिरादनार्यः शस्त्रैः शितैश्छेत्स्यति राक्षसेन्द्रः ॥
तस्मिन्ननागच्छति लोकनाथे गर्भस्थजन्तोरिव शल्यकृन्तः ॥ ६ ॥

क्षणं स्वप्रयोजनमाचार्यस्येत्युक्तम् ॥ ६२–६३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तविंशः सर्गः ॥ २७ ॥

यत्र येन । किंचिज्जीवामि कुत्सितं जीवामि ॥ ३—४ ॥ नन्वात्महनने महान्दोषः स्यादित्याशङ्क्याह—नैवेति ॥ दोषं दोषः । आर्षं नपुंसकं । अत्र आत्महनने कथमदोष इत्याशङ्क्य रावणकृतान्मरणादात्मनैव मरणं श्रेय इत्याह—वध्येति । अप्रियदर्शनस्य अस्य रावणस्य । दुर्मरणत्वाविशेषेपि दुष्टराक्षसेन मरणमतिकष्टमितिभावः । तर्हि तदनुप्रवेशेनात्मा रक्ष्यतां " सर्वत आत्मानं गोपायेत् " इति श्रुतेरित्याशङ्क्याह—भावमिति । अस्य अस्मिन्रावणे । भावं हृदयं अनुप्रदातुं नालं न शक्ता । रामस्वत्वाधस्य न ह्यन्यस्य स्वमन्योन्यस्मै दातुमर्हतीति भावः । अनर्हश्चायं भावोन्यप्रदानस्येत्यमुमर्थं दृष्टान्तमुखेनाह—द्विज इति । मन्त्रं वेदं । अद्विजाय शूद्राय ॥ ५ ॥ अनागच्छति मासद्वयादर्वागिति शेषः । गर्भस्थजन्तोः निरुद्धनिर्गमस्य गर्भस्थजन्तोः । शल्यकृन्तः

स० तद्वचः प्रातराशायकुरुतेत्यादिरूपंवचः । अप्रियार्ता उत्तरत्रकिंभविष्यतीतिभाव्यप्रियेणार्ता ॥ १ ॥ स० विसृष्टा मात्रादिभिर्नैर्घृण्यादिनाशकुन्तलादिवत्त्यक्ता ॥ २ ॥ स० यत्र अस्यां दुर्दशायां । अपुण्या शीघ्रमरणप्रापकपुण्यरहिता ॥ ३ ॥ ति० नन्वात्मघातेऽतिदोषात्सोयुक्तइत्याशङ्क्य सत्यंविचित्रवधाद्भिमेमीत्याह—तस्मिन्निति । तस्मिन्रामे अनागच्छतिसति ममाङ्गानि जीवन्त्याएवछेत्स्यन्ति । निरुद्धायाविशसनेदृष्टान्तः गर्भेति । शल्यं शस्त्रं तेनकृणत्तीतिशल्यकृन्तः आंबष्ठवैद्यः । आर्षत्वात्साधु । सयथागर्भस्थजन्तुंव्याधिरूपंजीवन्तंकृणत्ति तद्वत् ॥ एतच्छ्लोकद्वयंकतकेनेत्थंव्याख्यातं—अन्यायप्राप्तवधेपिममदोषोनेत्याह—नैवेति । यद्यप्यस्याहंवध्याभवामि । ममदोषोन । एवंभावाप्रदानेनपातिव्रत्यरक्षणात्सर्वदोषनिस्तारइत्यर्थः । किंचमरणप्राप्तिःपाक्षि-

[पा०] १ अयंश्लोकः. ङ—ट. पाठेषुदृश्यते. २ क. झ. सिंहाविपन्ना. ३ क. ङ. झ. यस्मात्क्षणं. ४ क. घ.—ट. विदीर्यते. ५ क. ग. ङ.—ट. नूनंममदोषं. ६ ङ. झ. ञ. ट. शरैःशितैः.

दुःखं बतेदं मम दुःखिताया मासौ चिरायाधिगमिष्यतो द्वौ ॥
बद्धस्य वध्यस्य तथा निशान्ते राजापराधादिव तस्करस्य ॥ ७ ॥
हा राम हा लक्ष्मण हा सुमित्रे हा राममातः सह मे जनन्या ॥
एषा विपद्याम्यहमल्पभाग्या महार्णवे नौरिव मूढवाता ॥ ८ ॥
तरस्विनौ धारयता मृगस्य सत्त्वेन रूपं मनुजेन्द्रपुत्रौ ॥
नूनं विशस्तौ मम कारणात्तौ सिंहर्षभौ द्वाविव वैद्युतेन ॥ ९ ॥
नूनं स कालो मृगरूपधारी मामल्पभाग्यां लुलुभे तदानीम् ॥
यत्रार्यपुत्रं विससर्ज मूढा रामानुजं लक्ष्मणपूर्वजं च ॥ १० ॥
हा राम सत्यव्रत दीर्घबाहो हा पूर्णचन्द्रप्रतिमानवक्त्र ॥
हा जीवलोकस्य हितः प्रियश्च वध्यां न मां वेत्सि हि राक्षसानाम् ॥ ११ ॥
अनन्यदेवत्वमियं क्षमा च भूमौ च शय्या नियमश्च धर्मे ॥
पतिव्रतात्वं विफलं ममेदं कृतं कृतघ्नेष्विव मानुषाणाम् ॥ १२ ॥

नापितः ॥ ६ ॥ चिरायदुःखिताया मम द्वौ मासौ वधस्यावधिभूतौ अधिगमिष्यतः । इदं दुःखं बत । कस्य दुःखमिव । राजापराधात् बद्धस्य तथा निशान्ते वध्यस्य तस्करस्येव दुःखं । यथेति पाठे इवशब्दो वाक्यालंकारे ॥ ७ ॥ मूढो वात्यारूपो वातो यस्यास्सा मूढवाता । वात्याहतेत्यर्थः । "मूढस्तन्द्रितवात्ययोः" इतिविश्वः ॥८॥ मृगस्य रूपं धारयता सत्त्वेन जन्तुना । मम कारणात् मन्निमित्तं । विशस्तौ हिंसितौ । द्वौ सिंहर्षभाविव द्वौ सिंहाविव द्वौ वृषभाविवेत्यर्थः । वैद्युतेन अशनिना ॥९॥ लुलुभे प्रलोभयामास । यत्र यस्मिन्काले । विससर्जेति सृजेर्लिट्युत्तमपुरुषैकवचनं । रामानुजं लक्ष्मणपूर्वजं च । परस्परस्य सदृशावित्युक्तपरस्परसादृश्यात् । बाल्यात्प्रभृति सुस्निग्धतया च परस्परनिरूपकभूतौ ॥ १०—११ ॥ अनन्यदेवत्वं आश्रयणीया देवतान्यास्ति या रक्षिष्यतीति बुद्धिर्मे नास्ति । " नारायणमुपागमत् " इत्यत्राप्याप्राधान्येन सह पठ्येति ह्युक्तं । नारायणमाराधयतो रामस्यपरिचारिकास्मीत्यर्थः । इयं क्षमा च । रावणपरुषाक्षराणि राक्षसीनां तर्जनभर्त्सनादीनि राममधुरालापश्रवणकुतूहलेन ह्यहं क्षान्तवती । भूमौ च शय्या । तवाङ्के समुपाविशमित्येवंविधभोगःकदाचिदपि किं सेत्स्यतीत्याशया हि मया भूमौ शयनं क्रियते । नियमश्च धर्मे । रक्षकत्वधर्मोपि तस्मिन्नेवेति मनीषया हि मया स्थितं । " न त्वां कुर्मि दशग्रीव भस्म भस्मार्ह तेजसा " इत्युक्तिरपि तं दृष्ट्वैव । पतिव्रतात्वं एतद्व्रतं ममेत्युक्तं व्रतं विना मम किञ्चिद्व्रतं नास्तीत्यर्थः । पत्युर्व्रतमेव व्रतं यस्यास्सा पतिव्रता तस्या भावः पतिव्रतात्वं । विफलं ममेदं अमोघमपि मोघमासीत् । कस्येवेति चेत्तत्राह—कृतं कृतघ्नेष्विव मानुषाणां । " आत्मानं मानुषं मन्ये " इत्युक्तरीत्या मानुषत्वं रामस्याप्यस्ति । अतस्तदितरमानुषाणां मध्ये कृतघ्नेषु कृतं कार्यमिव । अस्य किं मूलमिति चेत्

कीत्याह—**तस्मिन्निति** । अनागच्छत्येववधप्रसक्तिर्नान्यथेतिभावः । अनागमनपक्षेप्राप्तविशसनेदृष्टान्तः **गर्भस्येति** ॥ ६ ॥ **ति०** चिरायभर्तृवियोगदुःखितायामेइदंविशसनदुःखमपिबतागमिष्यति । यतोद्वौमासौविशसनावधिभूतौकतिपयदिनावधिकावप्यभिगमिष्यतः शीघ्रंगमिष्यतःकिल । तत्रवधप्राप्तौदृष्टान्तः बद्धस्येति । तस्करस्यवधइवेतिशेषः । **स०** दुःखितायामम । द्वौमासौ यद्यपि चिरायबहुव्यवधानरूपौ । तथापि ममदुर्दैववशात्तावभिगमिष्यतः शीघ्रमागमिष्यतः ॥ ७ ॥ **स०** मूढाऽहंविससर्जेत्यन्वयः । प्रलापकालल्लिङ्संभवति 'सुप्तोऽहंकिलविललाप' 'बहुजगदपुरस्तात्तस्यमत्ताकिलाऽहं' इत्यादिवत् **ति०** अहंविससर्ज अपरोक्षेपिचित्तविक्षेपादिनापारोक्ष्यमारोप्यलिट् ॥ १० ॥ **ति०** हारामेत्यादौ हेराममांहा अहंशोचेइत्यर्थः । हाजीवममप्राणरूप । हितो हितकरः प्रियश्चेत्यस्य त्वमितिशेषः ॥ ११ ॥ **ति०** धर्मोरक्षतीतिसर्वाविवादसिद्धमपिमांप्रतिनिष्फलमित्याह—अनन्यदेवत्वमिति । पत्येकदेवत्वमित्यर्थः । इयंक्षमा शापेनसंहारशक्तावप्येवंपीडासहनरूपा । पत्यतिरिक्तेकामासक्तिराहित्यं पतिव्रतात्वं । कृतं

[पा०] १ क.—घ. च.—ट. यथा. २ ङ. ञ. ट. जनन्याः. ३ च. छ. मन्दवाता. ४ ङ. ञ. ञ. ट. यत्रार्यपुत्रौ.

मोघो हि धर्मश्चरितो मयाऽयं तथैकपत्नीत्वमिदं निरर्थम् ॥
या त्वां न पश्यामि कृशा विवर्णा हीना त्वया संगमने निराशा ॥ १३ ॥
पितुर्निदेशं नियमेन कृत्वा वनान्निवृत्तश्चरितव्रतश्च ॥
स्त्रीभिस्तु मन्ये विपुलेक्षणाभिस्त्वं रंस्यसे वीतभयः कृतार्थः ॥ १४ ॥
अहं तु राम त्वयि जातकामा चिरं विनाशाय निबद्धभावा ॥
मोघं चरित्वाऽथ तपो व्रतं च त्यक्ष्यामि धिग्जीवितमल्पभाग्या ॥ १५ ॥
सा जीवितं क्षिप्रमहं त्यजेयं विषेण शस्त्रेण शितेन वाऽपि ॥
विषस्य दाता न हि मेऽस्ति कश्चिच्छस्त्रस्य वा वेश्मनि राक्षसस्य ॥ १६ ॥
इतीव देवी बहुधा विलप्य सर्वात्मना राममनुस्मरन्ती ॥
प्रवेपमाना परिशुष्कवक्त्रा नगोत्तमं पुष्पितमाससाद ॥ १७ ॥
शोकाभितप्ता बहुधा विचिन्त्य सीताऽथ वेणुं युद्ग्रथनं गृहीत्वा ॥
उद्बध्य वेण्युद्ग्रथनेन शीघ्रमहं गमिष्यामि यमस्य मूलम् ॥ १८ ॥
उपस्थिता सा मृदुसर्वगात्रा शाखां गृहीत्वाऽथ नगस्य तस्य ॥ १९ ॥
तस्यास्तु रामं प्रविचिन्तयन्त्या रामानुजं स्वं च कुलं शुभाक्ष्याः ॥
शोकानिमित्तानि तथा बहूनि धैर्यार्जितानि प्रवराणि लोके ॥
प्रादुर्निमित्तानि तदा बभूवुः पुराऽपि सिद्धान्युपलक्षितानि ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥

ममेदं तस्मिन्न काचिन्न्यूनता । ममैव दुष्कृतमत्र हेतुः ॥ १२—१३ ॥ पितुर्निदेशं आज्ञां नियमेन अविच्छेदेन कृत्वा चरितव्रतः चरितवन्यवृत्तिव्रतः वनान्निवृत्तश्च सन् । स्त्रीभिस्तु मत्तोपि विलक्षणाभिः स्त्रीभिः त्वं रंस्यसे । वीतभयः गतवनवासभयः । कृतार्थः निष्पन्नसर्वपुरुषार्थः। मद्विनाशेन पुनर्वह्वीरूढ्वा रंस्यस इति भावः ॥ १४ ॥ त्वयि जातकामा अतएव त्वयि निबद्धभावा निबद्धहृदया । विनाशाय त्वयि निबद्धभावेति दुःखातिरेकोक्तिः। तपः अनशनं । व्रतं नियमं । अल्पभाग्या जन्मान्तरसुकृतरहिता । इदानीमनुष्ठितानां तपोव्रतादीनां जन्मान्तरफलदत्वेन मोघत्वोक्तिः । अतएवाल्पभाग्येत्युक्तं ॥ १५ ॥ वेश्मनि राक्षसस्य । एवं सम्यङ्मरणकारी क्रूरस्यास्य गृहे कथं लभ्येतेति भावः ॥ १६ ॥ वेणुद्ग्रथनं वेणीबन्धनं । यमस्य मूलं यमस्य समीपं । अत्रेतिकरणं बोध्यं । इति विचिन्त्य नगोत्तमं शिंशुपामाससाद । शिंशुपां तामुपागमदिति पूर्वमुक्तं । तस्य सामीप्येन गमनमद्योच्यते । पुष्पितं शुभसूचनं । यद्वा पुष्पितमाससाद अग्निप्रवेशं कुर्वन्तीवेत्यर्थः ॥ १७—१८ ॥ उपस्थितेत्यर्धमेकं वाक्यं ॥ नगस्य शाखां गृहीत्वा उपस्थिता ॥ १९ ॥ स्वं च कुलं विचिन्तयन्त्या इत्यनेन दुर्मरणाद्भीतत्वं व्यज्यते । शोकानिमित्तानि शुभसूचकानीत्यर्थः । धैर्यार्जितानि आर्जितधैर्याणि । धैर्यकराणीत्यर्थः । लोके प्रवराणि लोके प्रसिद्धानीत्यर्थः । प्रवरं हि प्रसिद्धं भवति । प्रादुर्बभूवुरित्यन्वयः । पुरापि सिद्धान्युपलक्षितानि पूर्वमपि फलव्याप्तत्वेन दृष्टानि । तान्युत्तरसर्गे विवरिष्यति ॥ २० ॥ इति श्रीगोविन्दराजविरचिते

उपकृतं ॥ १२ ॥ **ति०** वेश्मनिराक्षससेत्येतदनन्तरंइतीवदेवीत्यादिरेकःश्लोकःप्रक्षिप्तः ॥ १६ ॥ **वि०** शोकाभितप्तेत्यादिसार्धश्लोकमेकंवाक्यं । शोकाभितप्तासीताबहुधाविचिन्त्यवेणुद्ग्रथनंगृहीत्वा वेणुद्ग्रथनेनउद्बध्य उद्बंधनंकृत्वायमस्यमूलंसमीपंगमिष्यामीतिनगस्यशाखांगृहीत्वाउपस्थिताअवस्थितेतिसंबन्धः ॥१८॥ **ति०** विशोकानि विशोककराणि ॥ २० ॥ अष्टाविंशःसर्गः ॥ २८ ॥

[**पा०**] १ क. ग.—ट. मोघंहि. २ ग. घ. ङ. झ. ट. निरर्थकं. ३ क. ङ.—ट. स्संरस्यसे. ४ ङ. झ. ट. मल्पभाग्यां. ५ ङ. झ. ट. संजीवितं. ६ क. ख. ग. सीता. ७ झ. ट. वेणीग्रथनं. ८ क. ख. ग. ङ.—ट. सर्वगात्री. ९ ङ. झ. ञ. ट. परिचिन्तयित्वा. १० ङ. झ. तस्याविशोकानितदा. क. ग. शोकापनोदानितदा.

एकोनत्रिंशः सर्गः ॥ २९ ॥

ग्रन्थकृता विशिष्यसीतायाःशुभशकुनप्रतिपादनम् ॥ १ ॥ सीतया शुभशकुनानांपुरोपलब्धफलकशकुनसाजात्याच्छुभफलावश्यंभावनिर्धारणेन हर्षाधिगमः ॥ २ ॥

तथागतां तां व्यथितामनिन्दितां व्यपेतहर्षां परिदीनमानसाम् ॥
शुभां निमित्तानि शुभानि भेजिरे नरं श्रिया जुष्टमिवोपजीविनः ॥ १ ॥
तस्याः शुभं वाममरालपक्ष्मराजीवृतं कृष्णविशालशुक्लम् ॥
प्रास्पन्दतैकं नयनं सुकेश्या मीनाहतं पद्ममिवाभिताम्रम् ॥ २ ॥
भुजश्च चार्वञ्चितपीनवृत्तः परार्ध्यकालागरुचन्दनार्हः ॥
अनुत्तमेनाध्युषितः प्रियेण चिरेण वामः समवेपताशु ॥ ३ ॥
गजेन्द्रहस्तप्रतिमश्च पीनस्तयोर्द्वयोः संहतयोः सुजातः ॥
प्रस्पन्दमानः पुनरूरुरस्या रामं पुरस्तात्स्थितमाचचक्षे ॥ ४ ॥
शुभं पुनर्हेमसमानवर्णमीषद्रजोध्वस्तमिवामलाक्ष्याः ॥
वासस्थितायाः शिखराग्रदन्त्याः किंचित्परिस्रंसत चारुगात्र्याः ॥ ५ ॥

श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टाविंशः सर्गः ॥ २८ ॥

तथागतां रहस्यं च प्रकाशं चेत्युक्तरीत्या सर्वं यथावत्साक्षात्कृतवतो मुनेरपि तथाशब्दप्रयोगादित्थमिति परिच्छिद्य वक्तुमशक्यदुःखां । तां धर्मिस्वरूपातिरिक्तयत्किंचिदतिशयरहितां । व्यथितां । "आशंसायां भूतवच्च" इति निष्ठा । तथाच पूर्वोक्तं सर्वं धर्मिस्वरूपमात्रं । इतःपरमेव व्यसनानि भविष्यन्तीति मन्यमानां । "समा द्वादश तत्राहं राघवस्य निवेशने । भुञ्जाना मानुषान्भोगान्सर्वकामसमृद्धिनी" इत्युक्तं भोगजातं सर्वमकिंचित्करमासीत् । दुःखमेव निरूपकमासीत् । अनिन्दितां रामविरहे यथा स्थातव्यं तथा स्थितां । एवमनवस्थाने निन्दितैव भवति । व्यपेतहर्षां हर्षः पूर्वमस्यां वसित्वा गत इति न ज्ञातामित्यर्थः । व्यपाभ्यामुपसर्गाभ्यां तथा प्रतीयते । परिदीनमानसां हर्षे समागतेष्याश्रयरहितां । परीत्यनेनतथाऽवगम्यते । शुभां गुणाधिकविषयविरहकृतविकृतित्वेन तद्दशाया एव नीराजना कर्तव्येत्येवंस्थितां । निमित्तानि शुभानि भेजिरे । निमित्तानि तद्विषये शुभानि सूचयित्वा स्वसत्तां लेभिरे । नरं श्रिया जुष्टमिवोपजीविनः । आर्थिनो हि लक्ष्मीकटाक्षवद्विषये किंचित्कृत्य स्वप्रयोजनं लभन्ते । इमानि तु साक्षाल्लक्ष्मीविषये किंचित्कृत्य निमित्तस्वामित्वं लेभिर इत्यर्थः ॥ १ ॥ शुभनिमित्तान्येवाह—तस्या इत्यादिना ॥ अरालं वक्रं । कृष्णविशालशुक्लं मध्ये कनीनिकायां कृष्णं सर्वतो विशालं शुभ्रं च । अभिताम्रं अभितस्ताम्रं । प्रान्तरक्तमित्यर्थः । "प्रान्तरक्ते च नेत्रे" इति पद्मिनीलक्षणात् ॥ २—३ ॥ तयोः सुलक्षणवत्तया प्रसिद्धयोः ऊरुः वाम इत्यनुषज्यते । सुजातः सुन्दरः ॥ ४ ॥ शिखराग्रदन्त्याः वृत्ताग्रदन्तयुक्तायाः । "शिखरं निस्तुलं वृत्तं" इत्युत्पलमाला । शिखरं दाडिमफलबीजमित्यन्ये नैघण्टुकाः । यद्वा शिखराकाराग्रदन्तायाः "अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च" इति दन्तस्य दत्रादेशः । वासः वस्त्रं । परिस्रंसत पर्यस्रंसत । अडभाव आर्षः । ऊरुकम्पा-

स० उपसेविनः योगविभागादादन्तादिनिः । उपसेवितुंशीलमेषामित्यर्थे "सुप्यजातौ" इतिणिनिः ॥ १ ॥ स० संहतयोः मांसलत्वेनश्लिष्टयोः । तयोरूर्वोर्मध्ये ऊरुःप्रस्पन्दमानः रामंपुरस्थितमाचचक्षे । शकुनप्रस्तावाद्वामइत्यनुक्तावप्येकवचनेनैकइति प्रतीयते । सचमानान्तरेणवामएवेत्यवसेयं ॥ ४ ॥ ति० शिखरं दाडिमबीजं तदग्रतुल्यदन्त्याः । "शिखरंशैलवृक्षाग्रेकक्षाग्र-

[पा०] १ घ. पुरापिसिद्धानि. २ ङ. झ. ट. जुष्टमिवोपसेविनः. ३ ङ. झ. ट. राज्यावृतं. ४ ग. शुभाङ्ग्याः. ५ ङ.—ट. वृत्तपीनः. ६ च. छ. ज. ञ. संगतयोः. झ. संहतयोस्तु. ७ ङ. झ. मिवातुलाक्ष्याः. ८ क. परिस्पन्दत.

एतैर्निमित्तैरपरैश्च सुभ्रूः संबोधिता प्रागपि साधु सिद्धैः ॥
वातातपक्लान्तमिव प्रनष्टं वर्षेण बीजं प्रतिसंजहर्ष ॥ ६ ॥
तस्याः पुनर्बिम्बफलाधरोष्ठं स्वक्षिभ्रु केशान्तमरालपक्ष्म ॥
वक्त्रं बभासे सितशुक्लदंष्ट्रं राहोर्मुखाच्चन्द्र इव प्रमुक्तः ॥ ७ ॥
सा वीतशोका व्यपनीततन्द्री शान्तज्वरा हर्षविवृद्धसत्त्वा ॥
अशोभतार्या वदनेन शुक्ले शीतांशुना रात्रिरिवोदितेन ॥ ८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

त्रिंशः सर्गः ॥ ३० ॥

शिंशुपाग्रावस्थानेनैवनिखिलसीतावृत्तान्तमवगतवताहनुमता सीतायाआश्वासनानाश्वासनपक्षयोर्गुणदोषविमर्शनपूर्वकं समुचितसमयेसमाश्वासननिर्धारणम् ॥ १ ॥

हनुमानपि विश्रान्तः सर्वं शुश्राव तत्त्वतः ॥ सीतायास्त्रिजटायाश्च राक्षसीनां च तर्जनम् ॥ १ ॥
अवेक्षमाणस्तां देवीं देवतामिव नन्दने ॥ ततो बहुविधां चिन्तां चिन्तयामास वानरः ॥ २ ॥
यां कपीनां सहस्राणि सुबहून्ययुतानि च ॥ दिक्षु सर्वासु मार्गन्ते सेयमासादिता मया ॥ ३ ॥
चारेण तु सुयुक्तेन शत्रोः शक्तिमवेक्षता ॥ गूढेन चरता तावदवेक्षितमिदं मया ॥ ४ ॥

दिति भावः । स्थितायाः तिष्ठन्त्या इति वस्त्रसंसनानुगुणावस्थोक्तिः । यद्वा वासस्संसनं कान्तागमनसूचकमिति भावः । शिखरदन्तत्वे सामुद्रिकम्—"स्निग्धास्समानुरूपास्सुपङ्क्तयः शिखरिणः श्लक्ष्णाः । दन्ता भवन्ति यासां तासां पादे जगत्सर्वं " इति ॥ "यासां शिखरिणो दन्ता दीर्घं जीवन्ति ताः स्त्रियः " इति च ॥ ५ ॥ अपरैः पूर्वोक्तशकुनैः । संबोधिता सद्यः कान्तागमवार्ता भविष्यतीति बोधिता । वातातपक्लान्तं सम्यग्वातातपसंशोषितं । प्रनष्टं भूमावदर्शनं गतं । यद्वा प्रनष्टं प्रकर्षेण कृशीभूतं । बीजं वर्षेणेव प्रतिसंजहर्ष । बीजस्य प्रहर्षो नाम अङ्कुरादिभावेन स्थूलीभूय बहिर्निर्गमः ॥ ६ ॥ स्वक्षिभ्रु शोभनाक्षिभ्रूयुक्तं । केशाः अन्ते यस्य तत् केशान्तं । उपरिभागप्रकीर्णालकमित्यर्थः । सितशुक्लदंष्ट्रं अत्यन्तशुक्लदन्तं । एकार्थे शब्दद्वयप्रयोगोतिशयज्ञापनाय । यथा मुग्धमनोज्ञ इति । नीरन्ध्रत्वेन संसक्तशुक्लदंष्ट्रमिति वार्थः । " षिञ् बन्धने " इत्यस्माद्धातोर्निष्ठा ॥ ७ ॥ व्यपनीततन्द्री निरस्तजाड्या । हर्षविवृद्धसत्वा हर्षविकसितचित्ता । शुक्ले शुक्लपक्षे ॥ ८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनत्रिंशस्सर्गः ॥ २९ ॥

विक्रान्तः पराक्रमशाली । सीतायास्त्रिजटायाश्च सर्वं सर्ववृत्तान्तं । तर्जनं तर्जनवचनं ॥ १ ॥ चिन्तां चिन्तयामास चिन्तां चकार ॥ २ ॥ यामिति सर्ववानराभिलषितोर्थो मयैकेन लब्ध इति विस्मितवान् ॥ ३ ॥ इदं वक्ष्यमाणं । तावत् कात्स्न्र्येन

गृहकोटिषु । पक्वेदाडिमबीजेच " इतिविश्वः ॥ ५ ॥ ति० सितशुक्लदंष्ट्रं स्फटिकादिसितपदार्थवच्छुक्लादंष्ट्रायत्रतत् । ती० सितशुक्लदंष्ट्रं पङ्क्तिबद्धधवलदन्तमित्यर्थः ॥ ७ ॥ इत्येकोनत्रिंशःसर्गः ॥ २९ ॥

ती० विश्रान्तः विगतव्यापारः ॥ स० सीतायागर्जितं विलापरूपं । त्रिजटायास्स्वप्नकथनरूपं । राक्षसीनांसीतातर्जनरूपमितिविवेकः ॥ १ ॥ स० चिन्तां चिन्तनीयं । चिन्तयामास । देवीं तां चिन्तां तदीयचिन्तांचावेक्षमाणश्चिन्तयामासेत्यन्वयोवा

[पा०] १ ङ—ट. संचोदिता. २ क. ङ.—ट. फलोपमोष्ठं. ३ क. शुक्लदन्तं. ४ ङ.—ट. तन्द्रा. ५ क. ख. ग. ङ. झ. ञ. ट. विबुद्धसत्त्वा. ६ क. घ. ङ. झ. ञ. ट. विक्रान्तः. ७ ङ. झ. राक्षसानां. ८ च. छ. ञ. ट. तर्जितं. ङ. झ. गर्जितं.

राक्षसानां विशेषश्च पुरी चेयमवेक्षिता ॥ राक्षसाधिपतेरस्य प्रभावो रावणस्य च ॥ ५ ॥
युक्तं तस्याप्रमेयस्य सर्वसत्त्वदयावतः ॥ समाश्वासयितुं भार्यां पतिदर्शनकाङ्क्षिणीम् ॥ ६ ॥
अहमाश्वासयाम्येनां पूर्णचन्द्रनिभाननाम् ॥ अदृष्टदुःखां दुःखार्तां दुःखस्यान्तमगच्छतीम् ॥ ७ ॥
यद्यप्यहमिमां देवीं शोकोपहतचेतनाम् ॥ अनाश्वास्य गमिष्यामि दोषवद्गमनं भवेत् ॥ ८ ॥
गते हि मयि तत्रेयं राजपुत्री यशस्विनी ॥ परित्राणमविन्दन्ती जानकी जीवितं त्यजेत् ॥ ९ ॥
मया च स महाबाहुः पूर्णचन्द्रनिभाननः ॥ समाश्वासयितुं न्याय्यः सीतादर्शनलालसः ॥ १० ॥
निशाचरीणां प्रत्यक्षमनर्हं चापि भाषणम् ॥ कथं नु खलु कर्तव्यमिदं कृच्छ्रगतो ह्यहम् ॥ ११ ॥
अनेन रात्रिशेषेण यदि नाश्वास्यते मया ॥ सर्वथा नास्ति संदेहः परित्यक्ष्यति जीवितम् ॥ १२ ॥
रामश्च यदि पृच्छेन्मां किं मां सीताऽब्रवीद्वचः ॥ किमहं तं प्रतिब्रूयामसंभाष्य सुमध्यमाम् ॥ १३ ॥
सीतासंदेशरहितं मामितस्त्वरया गतम् ॥ निर्दहेदपि काकुत्स्थः क्रुद्धस्तीव्रेण चक्षुषा ॥ १४ ॥
यदि चोद्योजयिष्यामि भर्तारं रामकारणात् ॥ व्यर्थमागमनं तस्य ससैन्यस्य भविष्यति ॥ १५ ॥
अन्तरं त्वहमासाद्य राक्षसीनामिहं स्थितः ॥ शनैराश्वासयिष्यामि सन्तापबहुलामिमाम् ॥ १६ ॥
अहं ह्येवंतितनुश्चैव वानरश्च विशेषतः ॥ वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम् ॥ १७ ॥
यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ॥ रावणं मन्यमाना मां सीता भीता भविष्यति ॥
वानरस्य विशेषेण कथं स्यादभिभाषणम् ॥ १८ ॥
अवश्यमेव वक्तव्यं मानुषं वाक्यमर्थवत् ॥ मया सान्त्वयितुं शक्या नान्यथेयमनिन्दिता ॥ १९ ॥

॥ ४—५ ॥ समाश्वासयितुं युक्तं न्याय्यं ॥ ६ ॥ आश्वासयामि " वर्तमानसामीप्ये वर्तमानवद्वा " इति लट् ॥ ७—८ ॥ दोषवत्त्वमुपपादयति—गते हीति ॥ ९ ॥ समाश्वासयितुं न्याय्यः सीतासंदेशकथनेनेति शेषः ॥ १०—१२ ॥ सीताब्रवीद्वच इत्यत्रेतिकरणं द्रष्टव्यं ॥ १३—१४ ॥ भर्तारं सुग्रीवं । व्यर्थं अनाश्वास्य गमने तदागमनपर्यन्तं देव्याः प्राणानवस्थानादिति भावः ॥१५॥ राक्षसीनां अन्तरं अवकाशं विच्छेदं वा राक्षस्यसन्निधानसमयमित्यर्थः ॥ १६ ॥ अतितनुः अतिसूक्ष्मतनुः । संस्कृतां प्रयोगसौष्ठवलक्षणसंस्कारयुक्तां ॥ १७ ॥ गीर्वाणभाषया व्यवहारे दोषमाह—यदीति ॥ १८ ॥ अथमानु-

॥२॥ ति० राक्षसानांविश... तारतम्यमैश्वर्यादिकृतं ॥५॥ ति० अप्रमेयस्य अपरिच्छेद्यस्वरूपस्यापरिच्छेद्यगुणस्यच ॥ स० सर्वसत्त्वदयावतइति । सर्वेअहिंसाविषयेसत्त्ववान् बलवांश्चासौदयावांश्चतस्य । सर्वबलवान्सर्वदयावांस्तस्येतिवा सर्वप्राणिषुदयावांस्तस्येतिवा । समाश्वासयितुं मयायुक्तमितिशेषः ॥६॥ स० आश्वासयामीतिवर्तमानसामीप्यालृडर्थेलट् । अथवा क्रियाप्रबन्धेलडित्युक्तेर्धात्वर्थमात्रेलडवन्योग्येऽर्थेलृडर्थेभविष्यतीतिलटउपपत्तेः । अन्तं पारं । नाधिगच्छन्ती । यद्वा दुःखस्य कर्मणिषष्ठी । दुःखं नाद्यप्यन्तंबध्नन्तं क्षणेक्षणेदुःखंनूतनयन्तमितियावत् । तंरावणं प्रकारंवा । अधिगच्छतीं प्राप्नुवन्तीं । रामाश्वासनपरतयाशेषेणचार्थापयतस्तीर्थस्योत्तरश्लोकइव इतरेषांतदुत्तरश्लोकःसाधकइत्युभयव्याकरणे समूले इतिज्ञेयं ॥ ७ ॥ स० यद्यपिरावणमरणेनदेवताप्रयोजनंभविष्यतीति नसर्वात्मनावैयर्थ्यं । तथापि सीतावाप्तिरूपैहिकफलालाभाद्वैयर्थ्यमेवेतिभावः ॥१५॥ ति० मानुषीं मनुष्यशरीरसाध्यां । संस्कृतां व्याकरणसंस्कारवतीं ॥ स० वाचंचोदाहर्तव्यांविकल्प्यैकांनिश्चिनोति—अहंहीति । मानुषींसंस्कृतांवा वाचं । संस्कृतायाविकल्पकोटौप्रथमतोनिर्देशस्यमुख्यत्वेनन्याय्यत्वेपि मानुष्याएवभाषायाःसीतयासहभाष्यत्वेननिर्धार्यमाणत्वात् तस्याएवादौनिवेशोयुक्तइतिनानौचिती ॥ १७ ॥ स० सीताभीतेति । रावणस्यविश्रवस्सुतत्वेनगीर्वाणवाणीतस्तद्भ्रमःसंभा-

[पा०] १ ङ. झ. ट. चेयंनिरीक्षिता. २ ङ. झ. ट. यथा. ३ झ. दुःखस्यनाद्यन्तमधिगच्छतीं. ४ ङ. झ. ट. यदिह्यहंसतीमेनां. क. घ. च. छ. ज. ञ. यदिह्यहमिमामेवं. ५ ङ.—ट. मपश्यन्ती. क. ग. मजानन्ती. ६ ङ. झ. ट. यथाच. ७ क. ग. घ. च. छ. ज. ञ. मक्षमंचापि. ङ. झ. ट. मक्षमंचाभिभाषितं. ८ ङ. झ. ट. क्रोधतीव्रेण च. छ. ज. ञ. कुपितस्तीक्ष्णचक्षुषा. ९ ङ. झ. ञ. ट. योद्योजयिष्यामि. १० क. ग. घ. सुग्रीवं. ११ झ. ट. मवस्थितः १२ ङ. झ. ट. राश्वासयाम्यथ. १३ क. ख. ग. ङ.—ट. ह्यतितनुः. १४ ञ. ट. प्रवक्ष्यामि.

सेयमालोक्य मे रूपं जानकी भाषितं तथा ॥ रक्षोभिस्त्रासिता पूर्वं भूयस्त्रासं गमिष्यति ॥ २० ॥
ततो जातपरित्रासा शब्दं कुर्यान्मनस्विनी ॥ जानमाना विशालाक्षी रावणं कामरूपिणम् ॥ २१ ॥
सीतया च कृते शब्दे सहसा राक्षसीगणः ॥ नानाप्रहरणो घोरः समेयादन्तकोपमः ॥ २२ ॥
ततो मां संपरिक्षिप्य सर्वतो विकृताननाः ॥ वधे च ग्रहणे चैव कुर्युर्यत्नं यथाबलम् ॥ २३ ॥
गृह्य शाखाः प्रशाखाश्च स्कन्धांश्चोत्तमशाखिनाम् ॥ दृष्ट्वा विपरिधावन्तं भवेयुर्भयशङ्किताः ॥२४॥
मम रूपं च संप्रेक्ष्य वने विचरतो महत् ॥ राक्षस्यो भयवित्रस्ता भवेयुर्विकृताननाः ॥ २५ ॥
ततः कुर्युः समाह्वानं राक्षस्यो रक्षसामपि ॥ राक्षसेन्द्रनियुक्तानां राक्षसेन्द्रनिवेशने ॥ २६ ॥
ते शूलशक्तिनिस्त्रिंशविविधायुधपाणयः ॥ आपतेयुर्विमर्देऽस्मिन्वेगेनोद्विग्नकारिणः ॥ २७ ॥
संरुद्धैस्तैः सुपरितो विधमन्राक्षसां बलम् ॥ शक्नुयां न तु संप्राप्तुं परं पारं महोदधेः ॥ २८ ॥
मां वा गृह्णीयुरायुल्य बहवः शीघ्रकारिणः ॥ स्वादियं चागृहीतार्था मम च ग्रहणं भवेत् ॥ २९ ॥
हिंसाभिरुचयो हिंस्युरिमां वा जनकात्मजाम् ॥ विपन्नं स्यात्ततः कार्यं रामसुग्रीवयोरिदम् ॥ ३० ॥
उद्देशे नष्टमार्गेऽस्मिन्राक्षसैः परिवारिते ॥ सागरेण परिक्षिप्ते गुप्ते वसति जानकी ॥ ३१ ॥
विशस्ते वा गृहीते वा रक्षोभिर्मयि संयुगे ॥ नान्यं पश्यामि रामस्य साहाय्यं कार्यसाधने ॥ ३२ ॥
विमृशंश्च न पश्यामि यो हते मयि वानरः ॥ शतयोजनविस्तीर्णं लङ्घयेत महोदधिम् ॥ ३३ ॥
कामं हन्तुं समर्थोऽस्मि सहस्राण्यपि रक्षसाम् ॥ न तु शक्ष्यामि संप्राप्तुं परं पारं महोदधेः ॥ ३४ ॥
असत्यानि च युद्धानि संशयो मे न रोचते ॥ कश्च निस्संशयं कार्यं कुर्यात्प्राज्ञः ससंशयम् ॥३५॥
प्राणत्यागश्च वैदेह्या भवेदनभिभाषणे ॥ एष दोषो महान्हि स्यान्मम सीताभिभाषणे ॥ ३६ ॥

षभाषया व्यवहर्तव्यत्वं निश्चिनोति—अवश्यमिति ॥ अत्र वाक्यस्य मानुषत्वं कोसलदेशवर्तिमनुष्यसंबन्धित्वं विवक्षितं । तादृग्वाक्यस्यैव देवीपरिचितत्वात् ॥ १९ ॥ एवं मानुषभाषया व्यवहर्तव्यत्वं निश्चित्य संप्रति तयापि भाषयानेन वानररूपेण पुरः स्थित्वाभिभाषणे दोषोस्तीति विचारयति—सेयमिति ॥ २० ॥ जानमाना जानाना । सुमागम आर्षः ॥ २१—२३ ॥ प्रशाखाः उपशाखाः । विपरिधावन्तं मामिति शेषः ॥ २४—२६ ॥ उद्विग्नकारिणः उद्वेगकारिणः ॥ २७ ॥ तैः परितः संरुद्धः । अतएव रक्षसां बलं विधमन् प्रहरन् । अहं महोदधेः परं पारं प्राप्तुं न शक्नुयामित्यन्वयः ॥ २८ ॥ अगृहीतार्था अविदितरामसंदेशार्था ॥ २९—३० ॥ उद्देशे प्रदेशे । नष्टमार्गे अदृष्टमार्गे । उक्तविशेषणे उद्देशे वसतीत्यन्वयः ॥ ३१ ॥ सहाय एव साहाय्यः तं । कार्यसाधने सीतादर्शननिवेदनलक्षणकार्यसाधने ॥ ३२ ॥ यो लङ्घयेत तं न पश्यामीत्यन्वयः ॥ ३३—३४ ॥ असत्यानि अनिश्चितजयापजयानि । क्रेशस्तु भूयानिति भावः । ततो नैतन्मम मतमित्याह—संशय इति । संशयः संशयितार्थः । स च सङ्ग्रामः अथापि तथाकरणे स एव कार्यहन्ता बुद्धिहीनो निन्दाभाजनं चेत्याशयेनाह—कश्चेति । प्राज्ञः कः ससंशयं कार्यं निःसंशयं निर्विचारं कुर्यात् ॥ ३५ ॥ अनभिभाषणे रामसंदेशानिवेदने । एष दोषः पूर्वोक्तसीतासंत्रासा-

वितइति तेन भीतिभवनंयुक्तमितिभावः ॥१८॥ ति० नतुशक्ष्यामि युद्धश्रान्त्येतिभावः ॥ शि० नशक्ष्यामि सीतामरणशङ्कयाक्षीणशक्तिर्भविष्यामीतितात्पर्यं ॥३४॥ ति० किंचयुद्धेजयोपिसंदिग्धइत्याह—असत्यानीति ॥ स० असत्यानि अनिश्चितजयकानि ।

[पा०] १ ङ. झ. ट. त्रासमुपैष्यति. २ क. शङ्कमाना. ङ.—ट. जानानामां. ३ ङ. झ. ट. महाबलाः. ४ ख. ङ. झ. ञ. ट. तंमांशाखाः. ५ ङ.—ट. दृष्ट्वाच. क. दृष्ट्वामां. ६ ङ. झ. ट. भवेयुःपरिशङ्किताः. क. भवेयुर्भयशङ्किनः. घ. भवेच्छङ्कितविह्वलः. ७ ङ.—ट. विकृतस्वराः. ८ ङ.—ट. शूलशर. क. ग. घ. शूलाशनि. ९ झ. ञ. ट. वेंगेनोद्विग्नकारणात्. १० क.—ङ. संक्रुद्धस्तैस्तु. ११ क. ब.—ट. त्राक्षसं. १२ ङ.—ट. रावृत्य. १३ ख. घ. सहायं. १४ ङ. च. ज.—ट. शक्ष्याम्यहंप्राप्तुं.

भूताश्चार्था विनश्यन्ति देशकालविरोधिताः ॥ विक्लबं दूतमासाद्य तमः सूर्योदये यथा ॥ ३७ ॥
अर्थानर्थान्तरे बुद्धिर्निश्चिताऽपि न शोभते ॥ [यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने ॥]
घातयन्ति हि कार्याणि दूताः पण्डितमानिनः ॥ ३८ ॥
न विनश्येत्कथं कार्यं वैक्लव्यं न कथं भवेत् ॥ लङ्घनं च समुद्रस्य कथं नु न वृथा भवेत् ॥ ३९ ॥
कथं नु खलु वाक्यं मे शृणुयान्नोद्विजेत वा ॥ इति संचिन्त्य हनुमांश्चकार मतिमान्मतिम् ॥४०॥
राममक्लिष्टकर्माणं स्वबन्धुमनुकीर्तयन् ॥ नैनामुद्वेजयिष्यामि तद्बन्धुगतमानसाम् ॥ ४१ ॥
इक्ष्वाकूणां वरिष्ठस्य रामस्य विदितात्मनः ॥ शुभानि धर्मयुक्तानि वचनानि समर्पयन् ॥ ४२ ॥
श्रावयिष्यामि सर्वाणि मधुरां प्रब्रुवन्गिरम् ॥ श्रद्धास्यति यथा हीयं तथा सर्वं समादधे ॥ ४३ ॥
इति स बहुविधं महानुभावो जगतिपतेः प्रमदामवेक्षमाणः ॥
मधुरमवितथं जगाद वाक्यं द्रुमविटपान्तरमास्थितो हनूमान् ॥ ४४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिंशस्सर्गः ॥ ३० ॥

एकत्रिंशः सर्गः ॥ ३१ ॥

शिंशुपास्थेनहनुमता मानुषभाषाश्रयणेन रामजननप्रभृतिस्वीयसीतादर्शनावधिसकलवृत्तान्तप्रतिपादनम् ॥ १ ॥ तच्छ्रवणेनहर्षविस्मयापन्नयासीतया सर्वतश्चक्षुश्चालनेनशिंशुपाशाखायां हनुमतोऽवलोकनम् ॥ २ ॥

एवं बहुविधां चिन्तां चिन्तयित्वा महाकपिः ॥ संश्रवे मधुरं वाक्यं वैदेह्या व्याजहार ह ॥ १ ॥

क्रोशतन्निमित्तराक्षसागमनादिः । सीताभिभाषणे वानररूपेण पुरःस्थित्वाभिभाषणे ॥ ३६ ॥ भूताश्चार्थाः निष्पन्नार्थाः । विक्लबं अविवेकिनं । दूतमासाद्य देशकालविरोधिताः सन्तः सूर्योदये तमो यथा विनश्यति तथा विनश्यन्तीति संबन्धः ॥३७॥ अत्र विक्लबं दूतमासाद्येत्यनुषज्यते । अर्थानर्थान्तरे कार्याकार्यविषये । निश्चितापि स्वामिना सचिवैः सह निश्चितापि । बुद्धिः विक्लबं दूतमासाद्य न शोभते । अकिंचित्कराभिभवतीत्यर्थः । एतदेवोपपादयति—घातयन्तीति ॥ ३८ ॥ प्रागुक्ता दूतदोषास्त्वस्मिन्यथा न स्युस्तथा कर्तव्यमित्याह—न विनश्येदिति ॥ कार्यं स्वामिकार्यं कथं केन प्रकारेण । न विनश्येत् । वैक्लव्यं बुद्धिहीनता । मम कथं न भवेत् । समुद्रलङ्घनं कथं न वृथा भवेत् । तथा कर्तव्यमिति शेषः ॥ ३९ ॥ कथमिति अथ सीतेत्यध्याहार्यं । हनुमान् मे वाक्यं सीता कथं केन प्रकारेण । शृणुयात्कथं नोद्विजेतेति विचार्य मतिमान् प्रशस्तमतिः । मतिं तत्कालोचितकर्तव्यविषयां । चकार निष्पादयामास ॥ ४० ॥ स्वबन्धुं राममनुकीर्तयन् " लक्षणहेत्वोः—"इति हेत्वर्थे शतृप्रत्ययः । नैनामुद्वेजयिष्यामि एनां मद्रूपप्रदर्शनमन्तरेण रामस्य कीर्तनेनैवानुद्विग्नांकरिष्यामीत्यर्थः । तद्बन्धुगतमानसां स चासौ बन्धुश्च तद्बन्धुः रामः तद्गतमानसां ॥ ४१—४३ ॥ जगतिपतेरिति दीर्घाभाव आर्षः । जगादेति वक्ष्यमाणसर्गार्थसंग्रहः ॥ ४४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रिंशः सर्गः ॥३०॥

चिन्तां चिन्तयित्वा चिन्तां कृत्वा । कर्तव्यमर्थं

यद्वा राक्षसानांमायिकत्वान्मायामयानि ॥ ३५ ॥ शि० भूताः सिद्धप्रायाः ॥ ३७ ॥ स० सुबन्धुं कदाप्यवियोगिबान्धवं । तद्बन्धुः सः तद्रूपीबन्धुः । रामः तद्गतचेतनां तस्यरामस्यबन्धुरासःकोवाऽऽगच्छेदितितद्गतमानसांवा ॥ ४१ ॥ स० जगतिपतेः भूपतेः । " ङ्यापोःसंज्ञाछन्दसोः " इतिसंज्ञात्वात् "जाहविसूर्यकन्ययोः " इत्यादिवद्ह्रस्वः । अजगतिपतेरितिवाछेदः । अजस्य चतुर्मुखस्य गतिः उदरतोनिस्सरणं सद्गतिर्वाययासा अजगतिः रमा तस्याःपतिस्तस्येतिवा ॥ ४४ ॥ इतित्रिंशःसर्गः ॥ ३० ॥

स० चिन्तांचिन्तयित्वेतिपूर्ववत् । संश्रवे संश्रूयतेशब्दोयत्रससंश्रवः अन्यानाकलनेनसीताऽऽकलनंयस्मिन् । समीपप्रदेशे

[पा०] १ ग. ञ. भूतार्थाहिविपद्यन्ते. ङ—ञ. ट. भूताश्चार्थाविरुद्ध्यन्ति. २ इदमर्धं ख. पाठेदृश्यते. ३ क. ख. घ. च. छ. ज. ञ. विनश्येदिदंकार्यं. ४ ख. ङ.—ट. कथंमम. ५ क. मतिमुत्तमां. ६ ङ. ञ. ट. सुबन्धुमनु. ७ ङ. ञ. ट. गतचेतनां. ८ ङ. ञ. ञ. ट, यथासीतातथा. ९ ङ. ञ. ट. महामतिः.

राजा दशरथो नाम रथकुञ्जरवाजिमान् ॥ पुण्यशीलो महाकीर्तिर्ऋजुरासीन्महायशाः ॥ २ ॥
राजर्षीणां गुणश्रेष्ठस्तपसा चर्षिभिः समः ॥ चक्रवर्तिकुले जातः पुरन्दरसमो बले ॥ ३ ॥
अहिंसारतिरक्षुद्रो घृणी सत्यपराक्रमः ॥ मुख्यश्चेक्ष्वाकुवंशस्य लक्ष्मीवांल्लक्ष्मिवर्धनः ॥ ४ ॥
पार्थिवव्यञ्जनैर्युक्तः पृथुश्रीः पार्थिवर्षभः ॥ पृथिव्यां चतुरन्तायां विश्रुतः सुखदः सुखी ॥ ५ ॥
तस्य पुत्रः प्रियो ज्येष्ठस्ताराधिपनिभाननः ॥ रामो नाम विशेषज्ञः श्रेष्ठः सर्वधनुष्मताम् ॥ ६ ॥
रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ॥ रक्षिता जीवलोकस्य धर्मस्य च परन्तपः ॥ ७ ॥
तस्य सत्याभिसंधस्य वृद्धस्य वचनात्पितुः ॥ सभार्यः सह च भ्रात्रा वीरः प्रव्राजितो वनम् ॥ ८ ॥
तेन तत्र महारण्ये मृगयां परिधावता ॥ राक्षसा निहताः शूरा बहवः कामरूपिणः ॥ ९ ॥
जनस्थानवधं श्रुत्वा हतौ च खरदूषणौ ॥ ततस्त्वमर्षापहृता जानकी रावणेन तु ॥
वञ्चयित्वा वने रामं मृगरूपेण मायया ॥ १० ॥
स मार्गमाणस्तां देवीं रामः सीतामनिन्दिताम् ॥ आससाद वने मित्रं सुग्रीवं नाम वानरम् ॥ ११ ॥
ततः स वालिनं हत्वा रामः पुरपुरञ्जयः ॥ प्रायच्छत्कपिराज्यं तत्सुग्रीवाय महाबलः ॥ १२ ॥
सुग्रीवेणापि संदिष्टा हरयः कामरूपिणः ॥ दिक्षु सर्वासु तां देवीं विचिन्वन्ति सहस्रशः ॥ १३ ॥
अहं संपातिवचनाच्छतयोजनमायतम् ॥ अस्या हेतोर्विशालाक्ष्याः सागरं वेगवान्प्लुतः ॥ १४ ॥
यथारूपां यथावर्णां यथालक्ष्मीं च निश्चिताम् ॥ अश्रौषं राघवस्याहं सेयमासादिता मया ॥ १५ ॥
विरामैवमुक्त्वासौ वाचं वानरपुङ्गवः ॥ जानकी चापि तच्छ्रुत्वा विस्मयं परमं गता ॥ १६ ॥
ततः सा वक्रकेशान्ता सुकेशी केशसंवृतम् ॥ उन्नम्य वदनं भीरुः शिंशुपावृक्षमैक्षत ॥ १७ ॥

निश्चित्येत्यर्थः । संश्रवे सम्यक् श्रूयतेस्मिन्निति संश्रवः । समीपं समीपे व्याजहार । यद्वा पाठ्ये गेये च मधुरमिति संश्रवे श्रवणे मधुरं ज्ञानप्रसरणद्वारा इन्द्रियेभ्यो निस्सृत्य विषयान्गृहीत्वा तदनन्तरं हि रसो जायते लोके अत्र न तथा यत्र शब्दसंसर्गो जायते तत्र रसो जायत इत्यतिशयोक्तिः । मधुरं ज्ञानमपि तद्द्वारा रसजनकं वाक्यं पूर्वापरनिरूपणं विना स्वयं रसजनकं वैदेह्याः वैदेहीनिमित्तं । कुलानुरोधेन देहेनिस्स्पृहायाः देहमपि दत्त्वा रसावहत्वमुच्यते ॥ १ ॥ वितरणविक्रमादिजनितत्वेन कीर्तियशसोर्भेदोवगन्तव्यः ॥ २—४ ॥ पार्थिवव्यञ्जनैः राजलक्षणैः ॥ ५—७ ॥ तस्य पितुर्वचनाद्वनं प्रव्राजितः गतः । स्वार्थे णिच् ॥ ८ ॥ मृगयां परिधावता मृगयामुद्दिश्य परिधावता । अनेन लीलया खरादिवधः सूच्यते ॥ ९ ॥ जनस्थानवधं जनस्थानरक्षोवधं । अमर्षेणापहृता अमर्षापहृता । मृगरूपेण मृगसौन्दर्येण प्रशस्तमृगेण वा । " प्रशंसायां रूपप् " ॥ १०—१४ ॥ यथारूपां यादृशशरीरां । यथावर्णां यादृशरूपाम् । यथालक्ष्मीं यादृशकान्तिं । राघवस्य राघवात् ॥ १५—१६ ॥ सुकेशी नीलसूक्ष्मकेशी ।

॥ १ ॥ ति० मायया मृगरूपेण मारीचेनकरणेन । रामंवञ्चयित्वेत्यर्थः ॥ १० ॥ ति० तस्याहेतोः तदन्वेषणहेतोः ॥ १४ ॥ ति० केशसंवृतं असंस्कारतःप्रकीर्णत्वात् ॥ १७ ॥

[पा०] १ ङ—ट. महाकीर्तिरिक्ष्वाकूणांमहायशाः. क. ग. महाकीर्तिःप्रादुरासीन्महायशाः. २ क. गुणैःश्रेष्ठः. ३ क. व्यञ्जनोपेतः. ४ क. ग. ङ.—ट. वृत्तस्य. ५ ख. स्वजनस्याभि. क. ङ.—ज. ञ. ट. स्वजनस्यापि. ६ ङ.—ट. निहतौ. ७ घ. सत्यपराक्रमः. ८ ङ. च. झ. ञ. ट. आयच्छत्कपिराज्यंतुसुग्रीवाय. ९ ङ.—झ. ट. महात्मने. १० ङ. झ. ट. विचिन्वन्तः. ११ क. ततस्ततः. १२ घ.—ट. तस्माहेतोः. १३ ङ.—ट. समुद्रं. १४ ङ. झ. ट. यथालक्ष्मवतींचतां. च. ज. ञ. यथालक्ष्मींविनिश्चितां. क. यथालक्ष्मींचतामपि. १५ क. घ. ङ. झ. ट. मुक्त्वास. ग. च. छ. ज. ञ. मुक्त्वातु. १६ ङ. ज.—ट. शिंशुपामन्ववैक्षत.

निशम्य सीता वचनं कपेश्च दिशश्च सर्वाः प्रदिशश्च वीक्ष्य ॥
स्वयं प्रहर्षं परमं जगाम सर्वात्मना राममनुस्मरन्ती ॥ १८ ॥
सा तिर्यगूर्ध्वं च तथाप्यधस्तान्निरीक्षमाणा तमचिन्त्यबुद्धिम् ॥
ददर्श पिङ्गाधिपतेरमात्यं वातात्मजं सूर्यमिवोदयस्थम् ॥ १९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकत्रिंशस्सर्गः ॥ ३१ ॥

द्वात्रिंशः सर्गः ॥ ३२ ॥

सीतया शिंशुपायांदृष्टस्यहनूमतःस्वामित्वबुद्ध्या स्वप्नेवानरदर्शनस्यानर्थहेतुतया दैवंप्रति रामादिकुशलप्रार्थना ॥ १ ॥ पुनःकारणाभावात्स्वप्नाद्यभावनिर्धारणेन ब्रह्मादीन्प्रति हनुमदुक्तस्ययाथार्थ्यसिद्ध्यर्थप्रार्थना ॥ २ ॥

ततः शाखान्तरे लीनं दृष्ट्वा चलितमानसा ॥ वेष्टितार्जुनवस्त्रं तं विद्युत्संघातपिङ्गलम् ॥ १ ॥
सा ददर्श कपिं तत्र प्रश्रितं प्रियवादिनम् ॥ फुल्लाशोकोत्करामासं तप्तचामीकरेक्षणम् ॥ २ ॥
[सांऽथ दृष्ट्वा हरिश्रेष्ठं विनीतवदवस्थितम् ॥] मैथिली चिन्तयामास विस्मयं परमं गता ॥ ३ ॥
अहो भीममिदं रूपं वानरस्य दुरासदम् ॥ दुर्निरीक्ष्यमिति ज्ञात्वा पुनरेव मुमोह सा ॥ ४ ॥
विललाप भृशं सीता करुणं भयमोहिता ॥ रामरामेति दुःखार्ता लक्ष्मणेति च भामिनी ॥ ५ ॥
रुरोद बहुधा सीता मन्दं मन्दस्वरा सती ॥ ६ ॥

वक्रिण्णः पूर्वमुक्तत्वात् ॥ १७—१८ ॥ पार्श्वे आकाशं भूमिं चावेक्षमाणा । अधस्तादित्यनेन यथा भूमिं भित्त्वा कश्चिन्नरः रामनामानि कीर्तयेत्तथान्यत्रापीत्यपिना संभावनोच्यते । शिंशुपावृक्षस्याधस्तात्तिर्यगूर्ध्वमिति वा । तमचिन्त्यबुद्धिं ददर्श । तद्वपुरवलोकनात्पूर्वं तस्यहृदयमेवं परिच्छिनत्ति स्म । इह लङ्कायां प्रविश्यावरोधारामम्मध्यप्रवेशेनायं निपुणतरमतिरिति निश्चितवतीत्यर्थः । पिङ्गाधिपतेरमात्यं स्वरविशेषेणायं वानरः । तत्रापि न स्वतन्त्रः । किन्तु स्वसजातीयस्य राज्ञः कस्यचिदमात्योयं । तद्राज्यकार्यमेतद्वस्तगतमिति निश्चितवती । वातात्मजं रामप्राणहेतुभूतमत्प्राणनहेतुत्वेन सर्वप्राणिप्राणनहेतुत्वेन वायुपुत्रोयमित्यवगतवती । सूर्यमिवोदयस्थं रामदिवाकरस्योदयसूचकमुदयगिरिस्थमरुणमिव स्थितं । सूरः सूर्यः । "सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः" इत्यमरः। "सूरसूतोरुणोनूरुः" इत्युक्तेस्सूरस्य संबन्धी सूर्यः । दिगादित्वाद्यत् । भवतापि संबन्धः विशेष एव । यद्वा सूर्यशब्देन तत्संबन्ध्यरुणो लक्ष्यते । " सूर्योरुणे च सूर्ये च " इति निघण्टुरस्तीत्याहुः । औचित्यादत्र सूर्योरुणः ॥ १९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकत्रिंशः सर्गः ॥३१॥

ततः शाखान्तरे लीनमित्यादिश्लोकद्वयमेकान्वयं ॥ दृष्ट्वा पूर्वं सामान्यतो दृष्ट्वा भयाच्चलितमानसा सती विशेषतो ददर्श । वेष्टितार्जुनवस्त्रं वेष्टितधवलवस्त्रं । तं पूर्वोक्तं ॥ १—५ ॥ रुरोदेत्यर्धं ॥ मन्दं राक्षस्यः श्रुत्वा किमिदमिति विचारयिष्यन्तीति भयेनेति भावः

स० पिङ्गाधिपतेः पिङ्गाक्षस्वामिनः ॥ १९ ॥ इत्येकत्रिंशःसर्गः ॥ ३१ ॥

ति० लीनंदृष्ट्वा स्फुरन्तंदृष्ट्वा । चलितमानसा दृष्टरूपोऽयमपिमायामृगोवेतिचलितचित्ता ॥ स० विद्युतांसंघातः समूहः । सदृवपिङ्गलस्तं ॥ १ ॥ स० विनीतवत् स्वार्थवतिः । विनीताःसन्त्यस्येतिविनीतवान् । सचासाववस्थितश्च तंवा । अथवा विनीतं विनीतिः तद्वांश्चासाववस्थितश्चतं । यद्वा विनीतं विशिष्टनीतंवदतीतिसविनीतवदः विनीतवाग्मी । सचासौ वस्थितश्चतं ॥ ३ ॥ ति० वानरस्य निर्धारणेषष्ठी । जातावेकवचनं । वानराणांमध्ये इदंसत्वं जीवः । भीमं प्राकृतप्राणिभयावहं । अतएवतैर्दुरासदं

[पा०] १ ख. निरीक्षमाणातथाप्यधस्तात्तमचिन्त्य. २ क. ग. ङ.—ट. पाठेष्विदमर्धंदृश्यते. ३ ङ.—ट. सत्वं. ४ झ. ट. मिदंमला. ५ क. ङ. च. छ. झ. ञ. ट. सहसासीता.

सा तं दृष्ट्वा हरिश्रेष्ठं विनीतवदुपस्थितम् ॥ मैथिली चिन्तयामास स्वप्नोऽयमिति भामिनी ॥ ७ ॥
सा वीक्षमाणा पृथुभुग्नवक्त्रं शाखामृगेन्द्रस्य यथोक्तकारम् ॥
ददर्श पिङ्गाधिपतेरमात्यं वातात्मजं बुद्धिमतां वरिष्ठम् ॥ ८ ॥
सा तं समीक्ष्यैव भृशं विसंज्ञा गतासुकल्पेव बभूव सीता ॥
चिरेण संज्ञां प्रतिलभ्य भूयो विचिन्तयामास विशालनेत्रा ॥ ९ ॥
स्वप्ने मयाऽयं विकृतोऽद्य दृष्टः शाखामृगः शास्त्रगणैर्निषिद्धः ॥
स्वस्त्यस्तु रामाय सलक्ष्मणाय तथा पितुर्मे जनकस्य राज्ञः ॥ १० ॥
स्वप्नोपि नायं न हि मेस्ति निद्रा शोकेन दुःखेन च पीडितायाः ॥
सुखं हि मे नास्ति यतोस्मि हीना तेनेन्दुपूर्णप्रतिमाननेन ॥ ११ ॥
रामेति रामेति सदैव बुद्ध्या विचिन्त्य वाचा ब्रुवती तमेव ॥
तस्यानुरूपां च कथां तमर्थमेवं प्रपश्यामि तथा शृणोमि ॥ १२ ॥
अहं हि तस्याद्य मनोभवेन संपीडिता तद्गतसर्वभावा ॥
विचिन्तयन्ती सततं तमेव तथैव पश्यामि तथा शृणोमि ॥ १३ ॥
मनोरथः स्यादिति चिन्तयामि तथाऽपि बुद्ध्या च वितर्कयामि ॥
किं कारणं तस्य हि नास्ति रूपं सुव्यक्तरूपश्च वदत्ययं माम् ॥ १४ ॥

॥ ६—७ ॥ वीक्षमाणा विचारयन्ती । ददर्श पुनरनुकूलोयं स्यादिति ददर्शेत्यर्थः । भुग्नवक्त्रं वक्त्रमुखं । यथोक्तकारं आज्ञाकरं ॥ ८ ॥ विसंज्ञा मूर्च्छिता । गतासुकल्पा मृतप्राया । इवशब्दो वाक्यालङ्कारे । चिरेण संज्ञां प्रतिलभ्य कालेनैव प्रबोधकेन प्रबुद्धवतीत्यर्थः । विकृतवानरवेषदर्शनेन मूर्च्छिता पुनः कालेन प्रबुद्धेत्यर्थः ॥ ९ ॥ स्वप्ने स्वप्नस्थाने । स्वप्ने वानरदर्शनं बन्धुविनाशकरमिति भावः ॥ १० ॥ एवं दर्शनस्य स्वप्नत्वं संभाव्य पुनर्याथार्थ्यमाह—स्वप्नोपीति ॥ स्वप्नाभावे हेतुमाह—नहि मेस्ति निद्रेति । निद्राभावे हेतुः—शोकेनेत्यादिः । एवं प्रतिबन्धकेन निद्राभावमुक्त्वा सुखरूपहेत्वभावाच्च न निद्रेत्याह—सुखंहीति । इन्दुपूर्णप्रतिमाननेन पूर्णेन्दुप्रतिमाननेन ॥ ११ ॥ सदैव बुद्ध्या विचिन्त्य तमेव राममेव । वाचा ब्रुवती । तस्यानुरूपां विचिन्तितस्याभिवदनस्यानुरूपां । कथां तथा शृणोमि । तमर्थं कथार्थमेवं प्रपश्यामि । एवं उक्तप्रकारेण जानामीत्यन्वयः । तदर्थामिति पाठे अयमर्थः । तस्यानुरूपां रामकीर्तनस्यानुरूपां । तदर्थां स रामोर्थोभिधेयो यस्याः तां ॥ १२ ॥ उक्तमर्थं विवृणोति—अहं हीति ॥ १३ ॥ प्रथमं इदं रामनामकथयितृदर्शनं मनोरथः अभिलाषमात्रमिति चिन्तयामि । तथापि तथा चिन्तायां सत्यामपि । बुद्ध्या वितर्कयामि मनोरथो न भवतीति विचारयामि । किं कारणमिति चेत् तस्य मनोरथस्य रूपं नास्ति । अयं वानरस्तु सुव्यक्तरूपश्च मां वदति च । तस्मान्मनोरथो न भवेदेवेत्यर्थः

दुर्निरीक्ष्यंचेतिमत्वा पुनरपिमायैवेयमितिभयान्मुमोह ॥ ४ ॥ ति० यथोक्तकारं कामाज्ञाकरं । यद्वा यथोक्तवेष्टितार्जुनवस्त्राद्याकारं । छान्दसोहस्वः ॥ स० यथोक्तकारं वेष्टितार्जुनवस्त्राकारंवा । उपसर्गाणांचधातुलीनार्थबोधकत्वेनाङ्गिकलोपिकारशब्दएवाकारवाची ॥ ८ ॥ शि० तं हनूमन्तं । समीक्ष्य रावणत्वेनवितर्क्य । गतासुकल्पा विपन्नाचेष्टारहितावभूव । चिरेणकिंचिद्विलंबतः संज्ञांप्रतिलभ्यचिन्तयामास ॥ ९ ॥ ति० दृश्यमानोऽयंस्वप्नोमयाविकृतएवदृष्टः । कुतस्त्राह—शाखामृगइत्यादि । एवंदु-

[पा०] १ ङ. झ. ट. हरिवरं. २ च. छ. झ. ञ. ट. दुपागतं. ३ ग. घ. च.—ट. पिङ्गप्रवरंमहार्हं. क. कीशप्रवरंमहार्हं. ४ ङ. ट. विपन्ना. ५ क. ग. च.—ट. चैवं. ख. चित्तेसाचिन्तयामास. ६ क. ख. ग. ङ.—ट. स्वप्नो. ७ ख. स्वप्नेनचायं. ८ ग.—छ. झ. ञ. ट. यतोविहीना. ९ ख. विचिन्त्यबुद्ध्यासदैव. १० ङ. झ. ट. तस्यानुरूपंचकथांतदर्थां. ११ ख. तदर्थंतमेवपश्यामि.

नमोस्तु वाचस्पतये सवज्रिणे स्वयंभुवे चैव हुताशनाय च ॥
अनेन चोक्तं यदिदं ममाग्रतो वनौकसा तच्च तथाऽस्तु नान्यथा ॥ १५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

जानतापिहनुमता तन्मुखाच्छ्रवणेच्छया सीतांप्रति सुरस्त्रीत्वादिनाविकल्पैःप्रश्नपूर्वकमनेकहेतुभिःसीतात्वनिर्धारणोक्तिः ॥ १ ॥ सीतयाहनुमन्तंप्रति रावणकर्तृकस्वापहरणान्तनिखिलवृत्तान्तकथनपूर्वकं रावणसंकेतितस्वजीवनकालेमासद्वयस्यावशिष्टत्वोक्त्या तदनन्तरंस्वेनैव स्वजीवितत्यागप्रतिज्ञानम् ॥ २ ॥

सोवतीर्य द्रुमात्तस्माद्विद्रुमप्रतिमाननः ॥ विनीतवेषः कृपणः प्रणिपत्योपसृत्य च ॥ १ ॥
तामब्रवीन्महातेजा हनूमान्मारुतात्मजः ॥ शिरस्यञ्जलिमाधाय सीतां मधुरया गिरा ॥ २ ॥
कां नु पद्मपलाशाक्षि क्लिष्टकौशेयवासिनि ॥ द्रुमस्य शाखामालम्ब्य तिष्ठसि त्वमनिन्दिते ॥ ३ ॥
किमर्थं तव नेत्राभ्यां वारि स्रवति शोकजम् ॥ पुण्डरीकपलाशाभ्यां विप्रकीर्णमिवोदकम् ॥ ४ ॥
सुराणामसुराणां वा नागगन्धर्वरक्षसाम् ॥ यक्षाणां किन्नराणां वा का त्वं भवसि शोभने ॥ ५ ॥
का त्वं भवसि रुद्राणां मरुतां वा वरानने ॥ वसूनां वा वरारोहे देवता प्रतिभासि मे ॥ ६ ॥
किंनु चन्द्रमसा हीना पतिता विबुधालयात् ॥ रोहिणी ज्योतिषां श्रेष्ठा श्रेष्ठसर्वगुणान्विता ॥ ७ ॥
का त्वं भवसि कल्याणि त्वमनिन्दितलोचने ॥ ८ ॥
कोपाद्वा यदि वा मोहाद्भर्तारमसितेक्षणे ॥ वसिष्ठं कोपयित्वा त्वं नासि कल्याण्यरुन्धती ॥ ९ ॥
को नु पुत्रः पिता भ्राता भर्ता वा ते सुमध्यमे ॥ अस्माल्लोकादमुं लोकं गतं त्वमनुशोचसि ॥ १० ॥

॥ १४ ॥ अनेनोक्तं सत्यमस्त्विति देवताः प्रार्थयते—नम इति ॥ हुताशनाय च अग्नये च ॥ १५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वात्रिंशः सर्गः ॥ ३२ ॥

सः राक्षसीषु सुप्तासु लब्धावसर इत्यर्थः । कृपणः सीतादौस्थ्यदर्शनेन दीनः । जानन्नपि वैदेह्यैव वाचयितुमब्रवीत् ॥ १—३ ॥ तव नेत्राभ्यां आनन्दाश्रुयोगार्हाभ्यां । किमर्थं कस्य कुलच्छेदाय । यद्वा किमर्थं किं चेतसि कृत्वा । पुण्डरीकेत्यादि हन्तैतत्सौन्दर्यं प्रणयिना रामेण दृष्टमासीदिति भावः ॥ ४ ॥ सुराणामित्यादिषु निर्धारणे षष्ठी । का त्वं कस्य संबन्धिनीत्यर्थः ॥ ५—७ ॥ हे कल्याणि त्वं का । अनिन्दितलोचने त्वं का भवसीति योजना ॥ ८ ॥ वसिष्ठं कोपयित्वेत्यत्रापि पतिता विबुधालयादित्यनुषज्यते । नासीत्यत्र काकुरनुसंधेया ॥ ९ ॥ अमुं लोकं गतं । यमिति शेषः । परलोकं गतं यं पुत्रं पितरं भ्रातरं भर्तारं वानुशोचसि स क इत्यर्थः । गता त्वमित्यपि पाठः । तस्मात् स्वर्गादमुं मनुष्यलोकं गता या

स्वप्नंमत्वा स्वस्तिप्रार्थयते । जनकस्य तद्वंश्यस्य ॥ १० ॥ ति० एवंहनुमद्वचसोऽवास्तवत्वंनिर्णायानाप्तप्रणीतत्वेनमिथ्यार्थकत्वस्यापिसंभवात्तद्व्यावृत्तयेदेवान्प्रणमति—नमोस्त्विति । वाचस्पतिरत्रेनवाचस्सत्यत्वसंपादनयोग्यता । वज्रिणोपि बृहस्पतितःसत्यवाग्रूपशब्दपारायणग्रन्थरूपमन्त्रलाभात्तदुपासकत्वेनवाचःसत्यत्वसंपादनयोग्यता । स्वयंभुवे सत्यादिरूपब्रह्मणे । वागधिष्ठातृदेवतात्वाच्चाग्नयेनतिः ॥ १५ ॥ इतिद्वात्रिंशःसर्गः ॥ ३२ ॥

ती० कृपणः दीनः । सीतादैन्यात्स्वयंकृपणइत्यर्थः । अत्रराक्षसीनांनिद्राजाड्यात्त्रिजटास्वप्नश्रवणजन्यभयानन्तरमात्मत्राणायसीतैकशरणत्वेनोपेक्षणाच्चदैवानुग्रहाच्चसीताहनुमतोरयमप्रत्यूहःसंल्लापइत्यनुसन्धेयं ॥ अस्यार्थस्याष्टपञ्चाशत्सर्गेअङ्गदाग्रेहनुमतैव " ततस्ताःसहिताःसर्वाः " इत्यादिनावक्ष्यमाणत्वादिति ॥ ति० अत्यूर्ध्वशाखातःसीतासंमुखशाखायामवतीर्य । द्रुम-

[पा०] १ ग. पद्मपत्रविशालाक्षि. घ. कालंपद्म. ज. कासिपद्म. २ क. ख. ङ.—ट. मसुराणांच. ३ ङ. ञ. ट. गुणाधिका.

रोदनादतिनिःश्वासाद्धूमिसंस्पर्शनादपि ॥ न त्वां देवीमहं मन्ये राज्ञः संज्ञावधारणात् ॥ ११ ॥
व्यञ्जनानि च ते यानि लक्षणानि च लक्षये ॥ महिषी भूमिपालस्य राजकन्याऽसि मे मता ॥१२॥
रावणेन जनस्थानाद्वैलादपहृता यदि ॥ सीता त्वमसि भद्रं ते तन्ममाचक्ष्व पृच्छतः ॥ १३ ॥
यथा हि तव वै दैन्यं रूपं चाप्यतिमानुषम् ॥ तपसा चान्वितो वेषस्त्वं राममहिषी ध्रुवम् ॥१४॥
सा तस्य वचनं श्रुत्वा रामकीर्तनहर्षिता ॥ उवाच वाक्यं वैदेही हनुमन्तं द्रुमाश्रितम् ॥ १५ ॥
पृथिव्यां राजसिंहानां मुख्यस्य विदितात्मनः ॥ स्नुषा दशरथस्याहं शत्रुसैन्यप्रतापिनः ॥ १६ ॥
दुहिता जनकस्याहं वैदेहस्य महात्मनः ॥ सीता च नाम नाम्नाऽहं भार्या रामस्य धीमतः ॥ १७ ॥
समा द्वादश तत्राहं राघवस्य निवेशने ॥ भुञ्जाना मानुषान्भोगान्सर्वकामसमृद्धिनी ॥ १८ ॥
तत्र त्रयोदशे वर्षे राज्येनेक्ष्वाकुनन्दनम् ॥ अभिषेचयितुं राजा सोपाध्यायः प्रचक्रमे ॥ १९ ॥
तस्मिन्संभ्रियमाणे तु राघवस्याभिषेचने ॥ कैकेयी नाम भर्तारं देवी वचनमब्रवीत् ॥ २० ॥
न पिबेयं न खादेयं प्रत्यहं मम भोजनम् ॥ एष मे जीवितस्यान्तो रामो यद्यभिषिच्यते ॥ २१ ॥
यत्तदुक्तं त्वया वाक्यं प्रीत्या नृपतिसत्तम ॥ तच्चेन्न वितथं कार्यं वनं गच्छतु राघवः ॥ २२ ॥

त्वमनुशोचसि । तस्यास्ते को वा पुत्रादिरिति योजना ॥ १० ॥ देवीं देवस्त्रियं । संज्ञावधारणात् संज्ञायते अनयेति संज्ञा लक्षणं । राजलक्षणनिश्चयादित्यर्थः ॥११॥ व्यञ्जनानि स्तनजघनादीनि । "व्यञ्जनं तेमने चिह्ने श्मश्रुण्यवयवेपि च" इति विश्वः । लक्षणानि शुभावर्तरेखादिसामुद्रिकलक्षणानि ॥ १२—१३ ॥ यथा यादृशं ॥ १४ ॥ द्रुमाश्रितं द्रुममूलाश्रितं । सोवतीर्येति द्रुमावतरणस्य पूर्वमुक्तत्वात् । यद्वा पूर्वमग्रादवतरणमुक्तमिति ज्ञेयं ॥ १५ ॥ शत्रुसैन्यप्रतापिनः शत्रुषु जीवत्सु न मे श्वशुरो जीवितवान् । स चेदिदानीं वर्तेत कथमहमेतादृशीमवस्थां प्राप्नुयामिति भावः ॥ १६ ॥ सीता च नामेत्यत्र नामशब्दः प्रसिद्धौ ॥ १७ ॥ अहं एतादृशावस्था अहं । तत्र मम श्वशुरगृहे । द्वादश समाः द्वादश संवत्सरान् । अत्यन्तसंयोगे द्वितीया । तेनाविच्छिन्नैकरूपभोगभोक्तृत्वमुच्यते । मानुषानित्यनेन नाम्नो मानुषत्वं स्वाभाविकमिति सूच्यते । भोगान् भुञ्जाना अनुभवन्ती । काम्यन्त इति कामाः भोगोपकरणानि स्रक्चन्दनादीनि । तेषां समृद्धं समृद्धिः । भावे निष्ठा । तदस्यास्तीति सर्वकामसमृद्धिनी । " अत इनिठनौ " इति इनिप्रत्ययः । अभवमिति शेषः ॥ १८—१९ ॥ संभ्रियमाणे संभारान् संपादयति सति राघवस्याभिषेचने रामाभिषेकनिमित्तं । देवी महिषी ॥ २० ॥ भुज्यत इति भोजनं खाद्यं पेयं च । रामो यद्यभिषिच्यते तदा मम संबन्धियत् भोजनं तन्न पिबेयं न खादेयं । एषः अयमभिषेकः । जीवितस्यान्तश्च ॥ २१ ॥ तत्पूर्वोक्तं यद्वरदानरूपं वाक्यं तन्न वितथं

शब्दस्तदवयवपरः । अतएवाग्रेद्रुमाश्रितइतिवक्ष्यति ॥ १ ॥ ति० रोदनादिति । अश्रुसंबन्धोभूस्पर्शोदेवानांनास्तीतिश्रुतं । तद्वत्त्वात्त्वांनमन्ये । किंचराज्ञोरामस्यसंज्ञावधारणात् नामग्रहणात् ॥ ११ ॥ ती० व्यञ्जनानि संस्थानविशेषविशिष्टतयोत्तमस्त्रीत्वव्यञ्जकानिस्तनजघनादीनि ॥ १२ ॥ अनुक्तेपित्वत्स्वरूपनिश्चयोममास्तीतिप्रौढ्याह—यथाहीति ॥ १४ ॥ स० द्रुमाश्रितं द्रुमशब्देन तच्छायाग्राह्या । अथवा यःपूर्वंद्रुममाश्रितस्तंप्रत्युवाचेति ॥ १५ ॥ स० अमानुषान् देवभोगसमान् ॥ १८ ॥ स० सोपाध्यायः सपुरोहितः ॥ १९ ॥ स० अभिषेचनं अभिषेकसाधनं तस्मिन् ॥ २० ॥ स० अहं प्रत्यहं निरन्तरं । ममभोजनंभोज्यंयद्वर्ततेतन्नपिबेयं नखादेयं । कुतएतदित्यतआह—एषइति । एषइतिबुद्ध्याविवेकेनाभिषेकेऽन्वेति । अथवा एषमेजीवितस्यान्तः एतच्चममभोजनं पालनं । तत्किमित्युक्ते यदिरामोऽभिषिच्यते तर्ह्येषः अभिषेकः मेजीवितस्यान्तः । यदिनाभिषिच्यते तर्हि एतत् ममभोजनं पालनमिति । यदि नाभिषिच्यत इतिपदानामावृत्त्याऽन्वयः । " भुजपालनाभ्यवहारयोः " इति

[पा०] १ ख. व्यञ्जनानीह. क. ग. घ. च. छ. झ. ञ. ट. व्यञ्जनानिहि. २ क. ङ. च. ज.—ट. द्वुलात्प्रमथिता. ३ क. रामसत्कथयाश्रितं. ४ घ. राजसिंहस्य. ५ ङ. झ. ट. प्रणाशिनः. क. ख. घ. प्रमाथिनः. ६ ङ. झ. ट. सीतेतिनाम्नाचोक्ताहं. ७ ङ.—ट. ततस्त्रयोदशे. ८ क. रामं. ९ ङ. झ. ट. भर्तारमिदं.

स राजा सत्यवाग्देव्या क्रूरदानमनुस्मरन् ॥ मुमोह वचनं श्रुत्वा कैकेय्याः क्रूरमप्रियम् ॥ २३ ॥
ततस्तु स्थविरो राजा सत्ये धर्मे व्यवस्थितः ॥ ज्येष्ठं यशस्विनं पुत्रं रुदन्राज्यमयाचत ॥ २४ ॥
स पितुर्वचनं श्रीमानभिषेकात्परं प्रियम् ॥ मनसा पूर्वमासाद्य वाचा प्रतिगृहीतवान् ॥ २५ ॥
दद्यान्न प्रतिगृह्णीयान्न ब्रूयात्किंचिदप्रियम् ॥ अपि जीवितहेतोर्वा रामः सत्यपराक्रमः ॥ २६ ॥
स विहायोत्तरीयाणि महार्हाणि महायशाः ॥ विसृज्य मनसा राज्यं जनन्यै मां समादिशत् ॥२७॥
साऽहं तस्याग्रतस्तूर्णं प्रस्थिता वनचारिणी ॥ न हि मे तेन हीनाया वासः स्वर्गेऽपि रोचते ॥ २८ ॥
प्रागेव तु महाभागः सौमित्रिर्मित्रनन्दनः ॥ पूर्वजस्यानुयात्रार्थे द्रुमचीरैरलङ्कृतः ॥ २९ ॥
ते वयं भर्तुरादेशं बहुमान्य दृढव्रताः ॥ प्रविष्टाः स्म पुराऽदृष्टं वनं गम्भीरदर्शनम् ॥ ३० ॥
वसतो दण्डकारण्ये तस्याहममितौजसः ॥ रक्षसाऽपहृता भार्या रावणेन दुरात्मना ॥ ३१ ॥

द्वौ मासौ तेन मे कालो जीवितानुग्रहः कृतः ॥
ऊर्ध्वं द्वाभ्यां तु मासाभ्यां ततस्त्यक्ष्यामि जीवितम् ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

कार्यं चेत्तदा रामो वनं गच्छतु ॥ २२ ॥ देव्यास्संबन्धि स्वकृतं वरदानं स्मृत्वा कैकेय्याः वचनं श्रुत्वा मुमोह ॥ २३—२४ ॥ अभिषेकात्परं प्रियं पितुर्वचनं विवासयाचनारूपं पूर्वं मनसा आसाद्य अङ्गीकृत्य । अथ वाचा प्रतिगृहीतवान् । मनःपूर्वकमङ्गीकृतवानित्यर्थः ॥ २५—२६ ॥ उत्तरीयाणि वासांसि । जनन्यै कौसल्यायै । मां समादिशत् तन्निकटे त्वया स्थातव्यमित्युक्तवानित्यर्थः ॥ २७ ॥ अग्रतः प्रस्थाने हेतुमाह—न हीति ॥ २८ ॥ प्रागेव यद्यपि रामानन्तरमेव लक्ष्मणेन द्रुमचीरादिस्वीकारः तथापि तस्य त्वरातिशयव्यञ्जनाय तथोक्तिः । महाभागः अहं सर्वं करिष्यामीति प्रतिज्ञानुसारेण सर्वविधकैङ्कर्यकरणोचिताभिषेकविघ्नहेतुभाग्यसंपन्नः । सौमित्रिः सृष्टस्त्वं वनवासायेत्युक्तवत्याः गर्भे संजातः । मित्रनन्दनः स लक्ष्मणः सर्वविधकैङ्कर्यकर्तेत्यनुकूलैरभिनन्दनीयः पूर्वजस्येत्यादि । रामकैङ्कर्यानुरूपत्वेन द्रुमचीरादीनामलंकरणत्वमित्यर्थः ॥ २९ ॥ पुरादृष्टं पूर्वमदृष्टं । अत्र गम्भीरशब्देन दुष्प्रवेशत्वं । दर्शनशब्देन स्वरूपमप्युच्यते ॥ ३०—३१ ॥ द्वौ मासौ द्विमासरूपः कालः । मे जीवितानुग्रहः जीवितानुग्राहकः जीवितधारणानुकूलःकृतः । त्यक्ष्यामि स्वयमेवेति भावः ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

धातुव्याख्यानात् ॥ २१ ॥ स० अभिषेकात्परं प्रियं रावणादिदुष्टनिग्रहशिष्टपरिपालनरूपावतारफलकारणत्वात् ॥ २५ ॥ ति० सीतारामंस्तौति—दद्यादिति ॥ २६ ॥ स० उत्तरीयाणि । उपलक्षणमेतत् । परिधानवस्त्राण्यपीत्यर्थः ॥ २७ ॥ स० भर्तुः दशरथस्य । पुरा अयोध्यानिर्गमात्प्राक् । अदृष्टं ॥ ३० ॥ स० द्वौमासौ तत्परिमितःकालः । जीवितानुग्रहः जीवनार्थमनुग्रहरूपः । ततः रावणात् ॥ ३२ ॥ इतित्रयस्त्रिंशःसर्गः ॥ ३३ ॥

[पा०] १ ख. झ. ट. ततस्तं. २ क. ग. ङ. च. छ. झ. ट. सत्यधर्मे. ख. घ. सत्यधर्मव्यवस्थि... ३ क. ग. ङ.—ट. गृह्णीयात्सत्यंब्रूयान्नचानृतं. ४ क.—ट. हेतोर्हि. ५ च.—ट. कुशचीरैः. ६ घ. दुरार्षं.

चतुस्त्रिंशः सर्गः ॥ ३४ ॥

हनुमता स्वप्रश्नस्यसमुचितोत्तरदानेन सीतायाःस्वस्मिन्नाश्वाससंभावनया तांप्रति स्वस्यरामदूतत्वनिवेदनपूर्वकं क्रमेण रामलक्ष्मणकर्तृककुशलप्रश्नाभिवादननिवेदनम् ॥ १ ॥ हनुमता समीपोपसर्पणेनाभिवादने सीतयातस्मिन्नावणत्वबुद्ध्या गर्हणम् ॥ २ ॥ हनुमता पुनःसीतांप्रति रामगुणानुवर्णनादिपूर्वकं स्वस्यसुग्रीवसचिवत्वहनुमन्नामकत्वाद्युक्त्या स्वस्मिन्नावणत्वशङ्कात्यागेनस्ववचनस्यश्रद्धेयत्वप्रार्थना ॥ ३ ॥

तस्यास्तद्वचनं श्रुत्वा हनुमान्हरियूथपः ॥ दुःखादुःखाभिभूतायाः सान्त्वमुत्तरमब्रवीत् ॥ १ ॥
अहं रामस्य संदेशादेवि दूतस्तवागतः ॥ वैदेहि कुशली रामस्त्वां च कौशलमब्रवीत् ॥ २ ॥
यो ब्राह्ममस्त्रं वेदांश्च वेद वेदविदां वरः ॥ स त्वां दाशरथी रामो देवि कौशलमब्रवीत् ॥ ३ ॥
लक्ष्मणश्च महातेजा भर्तुस्तेऽनुचरः प्रियः ॥ कृतवाञ्छोकसंतप्तः शिरसा तेऽभिवादनम् ॥ ४ ॥
सा तयोः कुशलं देवी निशम्य नरसिंहयोः ॥ प्रीतिसंहृष्टसर्वाङ्गी हनुमन्तमथाब्रवीत् ॥ ५ ॥
कल्याणी बत गाथेयं लौकिकी प्रतिभाति मा ॥ एति जीवन्तमानन्दो नरं वर्षशतादपि ॥ ६ ॥
तया समागते तस्मिन्प्रीतिरुत्पादिताऽद्भुता ॥ परस्परेण चालापं विश्वस्तौ तौ प्रचक्रतुः ॥ ७ ॥
तस्यास्तद्वचनं श्रुत्वा हनुमान्हरियूथपः ॥ सीतायाः शोकदीनायाः समीपमुपचक्रमे ॥ ८ ॥
यथा यथा समीपं स हनुमानुपसर्पति ॥ तथा तथा रावणं सा तं सीता परिशङ्कते ॥ ९ ॥

दुःखात् दुःखाभिभूतायाः उत्तरोत्तरं दुःखं प्राप्तायाः ॥१॥तव दूतः त्वां प्रति प्रेषितो दूतः॥२॥वेद वेत्ति। वेदविदां वेदार्थज्ञानवतां ॥३—४॥ प्रीतिसंहृष्टसर्वाङ्गी प्रीत्यापुलकितसर्वाङ्गी ॥५॥ दुःखबाहुल्येपि रामदर्शनप्रत्याशया कृच्छ्रेणजीवन्त्याः देव्याः जीवनफलस्य लब्धत्वात्तत्संवादिनीं गाथां स्तौति—कल्याणीति ॥ कल्याणी सत्यार्था । मा प्रतिभाति मां प्रतिभाति । वर्षशतादपीत्यन्ते इतिकरणं बोध्यम् ॥ ६ ॥ तया सीतया । तस्मिन् हनुमति विषये । अद्भुता प्रीतिरुत्पादिता । परस्परेणेत्यादिकं वक्ष्यमाणस्य सर्गस्य संग्रहः ॥ ७ ॥ उपचक्रमे गन्तुमिति शेषः । प्रापेतिवार्थः ॥ ८ ॥ रावणं परिशङ्कते रामकुशलकथनेन

ति० दुःखादुःखाभिभूतायाइत्यलुगार्षः । दुःखपरंपराखिन्नायाइत्यर्थः ॥ स० यद्वा दुःखेनातन्तीतिदुःखार्त्तास्तेषामिवयदुःखं तेनाभिभूतायाः । यद्वा दुःखात् सान्त्वमुत्तरमब्रवीदित्यन्वयः । दुश्चखंचतयोःसमाहारः द्वन्द्वैकवद्भावोवा उत्तरपदलोपिसमासान्तंवा । तस्मात् सीताएवंक्लिश्यतीतिदुःखात् खागमनप्रयोजनंजातमितिखात् सुखात् । " दुर्दुःखमितिसंप्रोक्तंखंसुखंचोच्यतेबुधैः " इतिवचनाद्दुःखशब्दउभयवाची ॥ १ ॥ ती० तवागतः समीपमितिशेषः ॥ स० रामस्यसन्देशादागतइतितवदूतः ॥ २ ॥ ती० ब्राह्ममस्त्रंयोवेद । अनेनसर्वास्त्रपारगत्वमुक्तं । तदस्त्रदेवतायाब्रह्मणःसर्वजगत्समष्टित्ववत्तदस्त्रस्यापिसर्वास्त्रसमष्टित्वात् वेदांश्चेत्यनेन सर्वकर्ममार्गपरत्वं । वेदविदांवरइत्यनेन ज्ञानमार्गपरत्वमुक्तं ॥ स० योब्राह्ममस्त्रं वेदांश्च वेदेत्यन्वयः । यद्वा वेदवेदेतिद्विरभिधानेन उभयोरपिमुख्यतामभिप्रैति । यद्वा वेदान् व्याख्येयानृगादीन् । वेदवेदान् भारतादीन्व्याख्यानरूपान्विदन्ति तेतथा । तेषु वरइति । " इतिहासपुराणःपञ्चमोवेदानांवेदः " इत्युक्तेः ॥ ३ ॥ स० प्रीतिसंहृष्टसर्वाङ्गी अन्तःसंभृतस्तोषइतिसूचकरोमाञ्चितसर्वावयवा ॥ ५ ॥ स० जीवन्तंनरं आनन्दःवर्षशतादेतीतिलौकिकी लोकसिद्धागाथा या सेयं मा मांप्रति कल्याणी कल्याणसूचिका प्रतिभाति । बत हर्षः विस्मयोवा । " जीवन्नरोभद्रशतानिपश्यति " इत्युक्तेः । अस्यस्वविषयेसीतयोदाहृतत्वाज्जीवन्तीं स्त्रियमितिवक्तव्यं । तथापि नरंजीवन्तमित्युक्तिः सर्वांअपियोषितःपुरुषेपरतन्त्राः । तत्राप्यहं सदातन्मात्रायत्तमङ्गलेतिसूचयितुमिति मन्तव्यं ॥ ६ ॥ ति० तस्मिन् तस्मिन्काले रामलक्ष्मणकुशलवचश्श्रवणकाले । तयोः रामलक्ष्मणयोःसमागमकालइव । सीतायास्तेनवचसा अद्भुता अचिन्त्यस्वरूपाप्रीतिरुत्पादिता । किंच तयोः सीताहनुमतोः । तस्मिन्समागमेपरस्परस्यअद्भुता प्रीतिरुत्पादिता । देवीदृष्टेतिहनुमतःप्रीतिः । रामदूतोदृष्टइतिदेव्याःप्रीतिः । अतस्तौविश्वस्तौभूत्वा परस्परेणालापंचक्रतुः ॥ ७ ॥ ति० तद्व-

[पा०] १ ङ. ञ. ट. रामस्सलां. २ ङ. ञ. ट. प्रतिसंहृष्ट. ३ क. ख. ग. प्रतिभातिमे. ४ ग. ङ.—ञ. तयोःसमागमे. ५ ङ. ञ. ट. शोकतप्तायाः. ६ घ. हनूमान्ससमीपमुप. क. समीपंतां.

अहो धिग्दुष्कृतमिदं कथितं हि यदस्य मे ॥ रूपान्तरमुपागम्य स एवायं हि रावणः ॥ १० ॥
तामशोकस्य शाखां सा विमुक्त्वा शोककर्शिता ॥ तस्यामेवानवद्याङ्गी धरण्यां समुपाविशत् ॥११॥
हनुमानपि दुःखार्तां तां दृष्ट्वा भयमोहिताम् ॥ अवन्दत महाबाहुस्ततस्तां जनकात्मजाम् ॥
सा चैनं भयवित्रस्ता भूयो नैवाभ्युदैक्षत ॥ १२ ॥
तं दृष्ट्वा वन्दमानं तु सीता शशिनिभानना ॥ अब्रवीद्दीर्घमुच्छ्वस्य वानरं मधुरस्वरा ॥ १३ ॥
मायां प्रविष्टो मायावी यदि त्वं रावणः स्वयम् ॥ उत्पादयसि मे भूयः संतापं तन्न शोभनम् ॥ १४ ॥
स्वं परित्यज्य रूपं यः परिव्राजकरूपधृत् ॥ जनस्थाने मया दृष्टस्त्वं स एवासि रावणः ॥ १५ ॥
उपवासकृशां दीनां कामरूप निशाचर ॥ संतापयसि मां भूयः संतप्तां तन्न शोभनम् ॥ १६ ॥
अथवा नैतदेवं हि यन्मया परिशङ्कितम् ॥ मनसो हि मम प्रीतिरुत्पन्ना तव दर्शनात् ॥ १७ ॥
यदि रामस्य दूतस्त्वमागतो भद्रमस्तु ते ॥ पृच्छामि त्वां हरिश्रेष्ठ प्रियं रामकथां हि मे ॥
गुणान्रामस्य कथय प्रियस्य मम वानर ॥ १८ ॥
चित्तं हरसि मे सौम्य नदीकूलं यथा रयः ॥ १९ ॥
अहो स्वप्नस्य सुखता याऽहमेवं चिराहृता ॥ प्रेषितं नाम पश्यामि राघवेण वनौकसम् ॥ २० ॥
स्वप्नेऽपि यद्यहं वीरं राघवं सहलक्ष्मणम् ॥ पश्येयं नावसीदेयं स्वप्नोपि मम मत्सरी ॥ २१ ॥
नाहं स्वप्नमिमं मन्ये स्वप्ने दृष्ट्वा हि वानरम् ॥ न शक्योऽभ्युदयः प्राप्तुं प्राप्तश्चाभ्युदयो मम ॥ २२ ॥
किंनु स्याच्चित्तमोहोऽयं भवेद्वातगतिस्त्वियम् ॥ उन्मादजो विकारो वा स्यादियं मृगतृष्णिका ॥२३॥

संजातरावणमायास्मरणा पुनः शङ्कितवतीत्यर्थः ॥९॥ मे मया । अस्य पुरतः यत्कथितं तत् दुष्कृतं अनुचितं कृतं । इदं अनालोच्य कथनं । धिक् । अहो इति खेदे । खेदहेतुमाह—रूपान्तरमिति । वर्तत इति शेषः ॥ १० ॥ यद्यपि पूर्वं शिंशुपाशाखावलम्बनमुक्तं तथापि शिंशुपाशाखा अशोकसंवलितेति क्वचिच्छिंशुपेत्युच्यते क्वचिदशोक इति । अतो न कश्चिद्दोषः ॥ ११ ॥ भयवित्रस्ता भयहेतुना वित्रस्ता ॥ १२—१३ ॥ मायावी स्वतएव मायावान् । " अस्मायामेधास्रजो विनिः " इति विनिप्रत्ययः । इदानीं मायां प्रविष्टः आश्रितः । स्वयं रावणस्सन् मम सन्तापमुत्पादयसीति यदि उत्पादयसीति यत् तत्सन्तापोत्पादनं ते न शोभनं । तवाप्यभीष्टविरहसन्तापो भविष्यतीत्यर्थः ॥ १४—१६ ॥ हनुमन्तं रावणमाशङ्क्य तज्जनितमनःप्रसादमालोच्य तां शङ्कां निराचष्टे—अथवेति ॥ मया यत् परिशङ्कितं एतन्नैवं हि नैवमेव । कुत इत्यत आह—मनस इति ॥ १७—१९ ॥ इह रामदूतागमनमत्यन्तासंभावितमिति मत्वा पुनर्बहुधा शङ्कते—अहो इत्यादिना ॥ २० ॥ स्वप्नेऽपि यद्यहं वीरं । राक्षसीमध्यवासकृतं दुःखं स्वप्नदृष्टोपि निवर्तयितुं क्षम इति वीर्यातिशयोक्तिः । राघवं सहलक्ष्मणं । विश्लेषदशायामुभयोर्दर्शनात् स्वप्नदर्शनेप्युभयोर्दर्शनं भवेत् । यद्वा तदानीमुभयोर्विश्लेषात्तौ किं परस्परं संयुक्तौ न वेति शङ्कते—पश्येयं नावसीदेयं । एवमुभयोस्स्वप्ने दर्शनेपि महद्दुःखं निवर्तेत । कथंचिज्जीवितं धारयेयं । स्वप्नोपि मम मत्सरी । मद्दशां विज्ञाय राम इव स्वप्नोपि मयि मात्सर्यं करोति ॥ २१—२२ ॥ एवं यथार्थस्वप्नपक्षौ निरस्य पुनश्चतुरो विभ्रमपक्षानुत्प्रेक्षते—किंनु स्यादिति ॥ चित्तमोहः रामक्षेमवार्ताश्रवणकुतूहलकन्दलितनिरन्तरचिन्तनं कल्याणीत्यादिसीतावचनं ॥ ८ ॥ ति० चित्तमोहः निरन्तररामध्यानजनितस्तत्प्रेषितदूतदर्शनसंभाषणादिविषयोभ्रमः । वातगतिः भूतावेशादिजनितोभ्रमः । उन्मादोविरहिणांपित्तोद्रेकरूपावस्थाविशेषजोभ्रमः । मृगतृष्णिका तद्वत्प्रत्यक्षोभ्रमः ॥ स० चित्तमोहः सर्वदारामध्यानात्तद्वृत्तेनसहसंभाषणादिरूपोमनोविकारः । वातगतिः पिशाचव्यापारः । ऊषरभूमौजलवत्प्रतीतंमृग-

[पा०] १ ङ. ज. झ. ट. धिग्धिक्कृतमिदं. २ ङ. झ. ट. शाखांतु. घ. साशाखां. ३ ख. ग. दुःखार्तांस्तां. ४ च.—ट. भयसंत्रस्ता. ५ क. ङ. छ.—ट. नैनमुदैक्षत. ६ ग. ङ—ट. रूपवान्. ७ ङ. झ. ट. एवहि. ८ ख. घ. ङ. झ. ट. संतापंतन्नशोभनं. ९ घ. ब्रूहिरामकथांहिमे. १० ख. जातश्चा. क. ग. घ. प्रियश्चा.

अथवा नायमुन्मादो मोहोप्युन्मादलक्षणः ॥ संबुध्ये चाहमात्मानमिमं चापि वनौकसम् ॥ २४ ॥
इत्येवं बहुधा सीता संप्रधार्य बलाबलम् ॥ रक्षसां कामरूपत्वान्मेने तं राक्षसाधिपम् ॥ २५ ॥
एतां बुद्धिं तदा कृत्वा सीता सा तनुमध्यमा ॥ न प्रतिव्याजहाराथ वानरं जनकात्मजा ॥ २६ ॥
सीतायाश्चिन्तितं बुद्ध्वा हनुमान्मारुतात्मजः ॥ श्रोत्रानुकूलैर्वचनैस्तदा तां संप्रहर्षयत् ॥ २७ ॥
आदित्य इव तेजस्वी लोककान्तः शशी यथा ॥ राजा सर्वस्य लोकस्य देवो वैश्रवणो यथा ॥२८॥
विक्रमेणोपपन्नश्च यथा विष्णुर्महायशाः ॥ सत्यवादी मधुरवाग्देवो वाचस्पतिर्यथा ॥ २९ ॥
रूपवान्सुभगः श्रीमान्कन्दर्प इव मूर्तिमान् ॥ स्थानक्रोधः प्रहर्ता च श्रेष्ठो लोके महारथः ॥३०॥
बाहुच्छायामवष्टब्धो यस्य लोको महात्मनः ॥ ३१ ॥
अपकृष्याश्रमपदान्मृगरूपेण राघवम् ॥ शून्ये येनापनीतासि तस्य द्रक्ष्यसि यत्फलम् ॥ ३२ ॥
नचिराद्रावणं संख्ये यो वधिष्यति वीर्यवान् ॥ रोषप्रमुक्तैरिषुभिर्ज्वलद्भिरिव पावकैः ॥ ३३ ॥
तेनाहं प्रेषितो दूतस्त्वत्सकाशमिहागतः ॥ त्वद्वियोगेन दुःखार्तः स त्वां कौशलमब्रवीत् ॥ ३४ ॥
लक्ष्मणश्च महातेजाः सुमित्रानन्दवर्धनः ॥ अभिवाद्य महाबाहुः स त्वां कौशलमब्रवीत् ॥ ३५ ॥
रामस्य च सखा देवि सुग्रीवो नाम वानरः ॥ राजा वानरमुख्यानां स त्वां कौशलमब्रवीत् ॥३६॥
नित्यं स्मरति रामस्त्वां ससुग्रीवः सलक्ष्मणः ॥ दिष्ट्या जीवसि वैदेहि राक्षसीवशमागता ॥ ३७ ॥

न्तासंततिपरिणतिविशेषरूपः कोपि मनसो विभ्रम इत्यर्थः। असत्यश्चित्तसंकल्पो वा। वातगतिः उपवासादिप्रयुक्तधातुक्षोभजो वातविकाररूपो भ्रमः। तदध्यारोपो वा यथा त्वरूपस्य वायोः पांसुपुञ्जरूपविशेषोध्यारोपः। उन्मादजो विकारो वा। उन्मादो नाम विरहिणां कश्चिदवस्थाविशेषः। तज्जो विकारो भ्रमः। मृगतृष्णिका अन्यस्यान्यरूपेणावभासः। चित्तमोहोन्मादावप्रकृतिस्थप्रतिभासविशेषौ। वातगतिमृगतृष्णिके तु प्रकृतिस्थस्य ॥ २३ ॥ अनन्तरोक्तचतुष्टयं निराकरोति—अथवेत्यादिना ॥ अथवा अयं वानरतद्भाषणादिप्रतिभासः। उन्मादो न। मोहोप्युन्मादलक्षणः उन्मादस्य लक्षणमिव लक्षणं यस्य स तथोक्तः। अतः उन्मादनिराकरणेनैव सोपि निराकृत इत्यर्थः। अनयोर्निराकरणमितरपक्षद्वयनिराकरणस्योपलक्षणं कृत इत्यत आह—संबुध्य इति। अहं आत्मानमिमं वनौकसं चापि संबुध्ये सम्यग्जानामि ॥ २४ ॥ बलाबलं मोहत्वादीनामबलत्वं रावणत्वस्य बलवत्त्वं च ॥ २५—२६ ॥ संप्रहर्षयत् संप्राहर्षयत् ॥ २७ ॥ राजेति। कुबेरस्य सर्वलोकराजत्वमुक्तं। "राजाधिराजाय प्रसह्यसाहिने नमो वयं वैश्रवणाय कुर्महे" इति ॥ २८ ॥ सत्यमधुरवाक्त्वं बृहस्पतेर्वाचस्पतित्वादेव॥२९॥रूपवान् सौन्दर्यवान्। सुभगः रमणीयः। श्रीमान् कान्तिमान्। स्थाने क्रोधस्थाने क्रोधः यस्यासौ स्थानक्रोधः। प्रहर्ता क्रोधविषयेप्रहर्ता। आदित्य इवेत्यादिनोक्तैर्विशेषणैर्विशिष्टो राम इतियोज्यं ॥ ३० ॥ लोकः महात्मनो यस्य बाहुच्छायां अवष्टब्धः आश्रितः। तं मृगरूपेण प्रशस्तमृगेण हेतुना। आश्रमपदादपकृष्य शून्ये येनापनीतासि तस्य रावणस्य

तृष्णा। तद्वदयमपिकिंभ्रमविशेषइत्यर्थः ॥ २३ ॥ स० उन्मादस्यलक्षणमिवलक्षणंयस्यपिशाचस्यसतथा एतेन। नपुनरुक्तिर्नवातगतेरसंग्रहश्च। मोहोनेति उन्मादलक्षणोपिनेतित्रावृत्तिः। संबुध्ये परीक्षयाजानामि ॥ २४ ॥ **ती०** बलाबलं बलं रक्षसां कामरूपधारणंबलं। अबलं रामदूतस्यापिवानरस्यात्रागमनासामर्थ्यंअबलंसंप्रधार्येत्यर्थः ॥ २५ ॥ **ति०** निश्चितं रावणबलनिश्चयं। श्रोत्रानुकूलैर्वचनैः रामगुणकथनरूपैः। विश्वासार्थं 'गुणान्रामस्यकथय' इतिसीतोक्तेरितिभावः। संप्रहर्षयन् वक्ष्यमाणंवचःकथयामासेतिशेषः ॥ २७ ॥ **ति०** स्थानक्रोधे उचितक्रोधविषये। क्रोधौचित्येप्रहर्तेतियावत् ॥ **स०** स्थानक्रोधी उचितस्थलेकोपी। प्रहर्ता वैरिहन्ता। स्थानक्रोधप्रहर्तेतिपाठे कोपयोग्यस्थानेशिक्षाकर्तेत्यर्थः ॥ ३० ॥ इतिचतुस्त्रिंशःसर्गः ॥ ३४ ॥

[पा०] १ ग. ङ.—ट. सीतायानिश्चितं. २ ग. समहर्षयत् क. झ. ट. संप्रहर्षयन्. ३ झ. स्थानकोधे. ठ. स्थानकोधी. ४ ङ. झ. ट. तत्फलं. ५ .—ट. अचिरात्. ६ क. ख. ग. सोपि. ७ ङ.—ट. तेरामः.

नचिराद्द्रक्ष्यसे रामं लक्ष्मणं च [1]महाबलम् ॥ मध्ये वानरकोटीनां [2]सुग्रीवं चामितौजसम् ॥ ३८ ॥
अहं सुग्रीवसचिवो हनुमान्नाम वानरः ॥ प्रविष्टो नगरीं लङ्कां लङ्घयित्वा महोदधिम् ॥ ३९ ॥
कृत्वा मूर्ध्नि पदन्यासं रावणस्य दुरात्मनः ॥ त्वां द्रष्टुमुपयातोऽहं समाश्रित्य पराक्रमम् ॥ ४० ॥
नाहमस्मि तथा [3]देवि यथा मामवगच्छसि ॥ विशङ्का त्यज्यतामेषा श्रद्धत्स्व वदतो मम ॥ ४१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

पञ्चत्रिंशः सर्गः ॥ ३५ ॥

सीतया रामसुग्रीवसख्यप्रकारंरामलक्ष्मणलक्षणंचपृष्टेनहनुमता तदङ्गलक्षणनिरूपणेनसह सविस्तरंरामसुग्रीवसख्यप्रभृतिस्वीयसीतादर्शनान्तवृत्तवृत्तान्तकथनपूर्वकं प्रभञ्जनादञ्जनायांस्वजननादिप्रतिपादनम् ॥ १ ॥

तां तु रामकथां श्रुत्वा वैदेही वानरर्षभात् ॥ उवाच वचनं सान्त्वमिदं मधुरया गिरा ॥ १ ॥
क्व ते रामेण संसर्गः कथं जानासि लक्ष्मणम् ॥ वानराणां नराणां च कथमासीत्समागमः ॥ २ ॥
यानि रामस्य लिङ्गानि लक्ष्मणस्य च वानर ॥ तानि [4]भूयः समाचक्ष्व न मां शोकः समाविशेत् ॥३॥
कीदृशं तस्य संस्थानं रूपं [5]रामस्य कीदृशम् ॥ कथमूरू कथं बाहू लक्ष्मणस्य च शंस मे ॥ ४ ॥
एवमुक्तस्तु वैदेह्या हनुमान्मारुतात्मजः ॥ ततो रामं यथातत्त्वमाख्यातुमुपचक्रमे ॥ ५ ॥
जानन्ती [6]बत दिष्ट्या मां वैदेहि परिपृच्छसि ॥ भर्तुः कमलपत्राक्षि संस्थानं लक्ष्मणस्य च ॥ ६ ॥
यानि रामस्य चिह्नानि लक्ष्मणस्य च यानि वै ॥ लक्षितानि विशालाक्षि वदतः शृणु तानि मे ॥७॥
रामः कमलपत्राक्षः [7]सर्वसत्त्वमनोहरः ॥ रूपदाक्षिण्यसंपन्नः प्रसूतो जनकात्मजे ॥ ८ ॥
तेजसाऽऽदित्यसंकाशः क्षमया पृथिवीसमः ॥ बृहस्पतिसमो बुद्ध्या यशसा वासवोपमः ॥ ९ ॥

यत्फलं मरणरूपं तत् द्रक्ष्यसीति योजना । यद्वा बाहुच्छायामवष्टब्धो यस्य लोको महात्मनः असावादित्य इव तेजस्वीत्येवं योजना ॥ ३१—४० ॥ वञ्चनार्थं परिगृहीतवेष इति मां यथावगच्छसि तथा नास्मीत्यर्थः ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुस्त्रिंशः सर्गः ॥ ३४ ॥

लिङ्गानि चिह्नानि ॥ ३ ॥ संस्थानं अवयवसंनिवेशः । रूपं आकारः वर्णः कान्तिर्वा ॥४—५॥ बतेत्यामन्त्रणे । जानन्ती त्वं दिष्ट्या मां परिपृच्छसीति संबन्धः ॥ ६ ॥ लक्षितानि त्वया दृष्टानि । मे मत्तः ॥ ७ ॥ रामः सर्वाङ्गसुन्दरः । कमलपत्राक्षः कान्तिप्रवाहे आवर्त इव अत्यन्तमाकर्षकनयनशोभः । तादृशनयनसौन्दर्यसीमाभूमिमाह—सर्वसत्त्वमनोहरः । तिर्यग्जातितया विटपाद्विटपं प्लवतो ममापि चित्तापहारकः अविशेषज्ञस्यापि मनोहर इत्यर्थः । रूपदाक्षिण्यसंपन्नः रूपमित्येतद्विग्रहगुणानामुपलक्षणं दाक्षिण्यमित्यात्मगुणानामुपलक्षणं देहगुणैरात्मगुणैश्चान्यून इत्यर्थः । संपन्नः प्रसूतः । इदं सर्वं नागन्तुकं किंतु औत्पत्तिकमित्यर्थः । अत्युत्कटं वदसि किमेवंविधोपरोप्यस्ति न वेत्यपेक्षायामाह—जनकात्मजे इति । भवती च तादृशीत्यर्थः ॥ ८ ॥ संग्रहेणोक्तान्गुणान्विवृणोति

तनि० गुरुकुलवासायोग्यानांवानराणांवसिष्ठशिष्याणांचईदृशसमागमःकथंजातः । शास्त्रवश्यानामेवगुरुकुलवासयोग्यत्वात् । रमयतीतिरमन्तेयोगिनइतिचरामः । रामत्वमेवाह—**कमलपत्राक्षइति** । सर्वसत्वमनोहरइति । तत्रवानरजातीयमचित्तापकर्षणमेवप्रमाणमितिध्वन्यते । तर्ह्येवंविधःपुमान्वियतेकिमितिचेन्नेत्याह—जनकात्मजइति । "तुल्यशील" इत्यादिना

[पा०] १ क. ग. घ. च. छ. झ. ञ. ट. महारथं. २ ग. च. छ. ज. ञ. सुग्रीवममितौजसं. ३ च. मातर्यथा. ४ घ. सौम्यमिदं. ५ क. ख. घ. ङ. झ. ट. चिह्नानि. ६ ग. घ. ङ.—ज. भूयस्त्वमाचक्ष्व. ७ ङ.—ट. तस्यच. ८ ख. यदिदिष्ट्या. ९ ङ.—ट. पूर्णचन्द्रनिभाननः. ख. ग. घ. सर्वभूतमनोहरः. क. सर्वभूतहितेरतः.

रक्षिता जीवलोकस्य स्वजनस्याभिरक्षिता ॥ रक्षिता स्वस्य वृत्तस्य धर्मस्य च परन्तपः ॥ १० ॥
रामो भामिनि लोकस्य चातुर्वर्ण्यस्य रक्षिता ॥ मर्यादानां च लोकस्य कर्ता कारयिता च सः ॥११॥
अर्चिष्मानर्चितोत्यर्थं ब्रह्मचर्यव्रते स्थितः ॥ साधूनामुपकारज्ञः प्रचारज्ञश्च कर्मणाम् ॥ १२ ॥
राजविद्याविनीतश्च ब्राह्मणानामुपासिता ॥ श्रुतवाञ्शीलसंपन्नो विनीतश्च परन्तपः ॥ १३ ॥
यजुर्वेदविनीतश्च वेदविद्भिः सुपूजितः ॥ धनुर्वेदे च वेदेषु वेदाङ्गेषु च निष्ठितः ॥ १४ ॥
विपुलांसो महाबाहुः कम्बुग्रीवः शुभाननः ॥ गूढजत्रुः सुताम्राक्षो रामो देवि जनैश्श्रुतः ॥ १५ ॥
दुन्दुभिस्वननिर्घोषः स्निग्धवर्णः प्रतापवान् ॥ समः समविभक्ताङ्गो वर्णं श्यामं समाश्रितः ॥१६॥
त्रिस्थिरस्निग्धप्रलम्बश्च त्रिसमस्निग्धु चोन्नतः ॥ त्रिताम्रस्निग्धु च स्निग्धो गम्भीरस्निग्धु नित्यशः ॥१७॥
त्रिवलीमांस्त्रियवनतश्चतुर्व्यङ्गस्त्रिशीर्षवान् ॥ चतुष्कलश्चतुर्लेखश्चतुष्किष्कुश्चतुस्समः ॥ १८ ॥

—तेजसेत्यादिना ॥ ९—११ ॥ ब्रह्मचर्यव्रते स्थितः गृहस्थस्यास्य ब्रह्मचर्यं नाम ऋतोरन्यत्र स्त्रीसङ्गमत्यागः । तदाह मनुः—"षोडशर्तुनिशाः स्त्रीणां तस्मिन्युग्मासु संविशेत् । ब्रह्मचार्येव पर्वाद्याश्चतस्रश्च विवर्जयेत् " ॥ प्रचारज्ञः प्रयोगज्ञः । ऐहिकामुष्मिकानां कर्मणां । प्रचारं गतिं हेतुफलभावव्यवस्थां तत्त्वतो जानातीत्यर्थ इत्यप्याहुः ॥ १२ ॥ राजविद्याविनीतश्च चतस्रो राजविद्याः । "आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती । एता विद्याश्चतस्रस्तु लोकसंस्थितिहेतवः" इत्युक्ताः । तासु विनीतः शिक्षितः । श्रुतवान् अवधृतवान् । शीलसंपन्नः सदाचारसंपन्नः । पूर्वं यज्ञादिकर्मानुष्ठातृत्वमुक्तमिति नपुनरुक्तिः ॥ १३ ॥ वेदेषु यजुर्व्यतिरिक्तवेदेषु । अनेन स्वस्य यजुर्वेदत्वं सूचितं ॥ १४ ॥ एवमात्मगुणानभिधाय विग्रहगुणानाशास्ते—विपुलांस इत्यादिना ॥ गूढजत्रुः अस्पष्टभुजसन्ध्यस्थिः ॥ १५ ॥ समः अन्यूनातिरिक्तदेहप्रमाणः ॥ १६ ॥ त्रिस्थिर इति त्रिषु स्थानेषु स्थिरः । तथोक्तं सामुद्रिके—" उरश्च मणिबन्धश्च मुष्टिश्च नृपतेः स्थिराः " इति । त्रिप्रलम्बः त्रिषु प्रलम्बः । " दीर्घभ्रूबाहुमुष्कस्तु चिरजीवी धनी नरः " इति वचनात् । अन्यत्र तु । " त्रयश्च यस्य विद्यन्ते प्रलम्बा मेढ्बाहवः " इति । त्रिसमः त्रिषु समः । " केशाग्रं.वृषणं जानु समा यस्य स भूपतिः " इति वचनात् । त्रिषु चोन्नतः । तदाहवराहमिहिरः—" उन्नतकुक्षिः क्षितिपः परिमण्डलोन्नतनाभयः क्षितिपाः । हृदयं न वेपनं पृथु समोन्नतं मांसलं च नृपतीनां " इति ॥ त्रिताम्रः त्रिषु ताम्रः । " स्निग्धाङ्गुलीरुचिरताम्रनखौ सुपार्ष्णी पादौ करावपि सुरक्तनखाल्परेखौ " इति वचनात् । " नेत्रान्तनखपाण्यङ्घ्रितलैस्ताम्रैस्निग्धिस्सुखी " इति च । त्रिषु स्निग्धः । " स्निग्धा भवन्ति वै येषां पादरेखाः शिरोरुहाः । तथा लिङ्गमणिस्तेषां महाभाग्यं विनिर्दिशेत् " इति सामुद्रिकवचनात् । त्रिषु गम्भीरः । अत्र वररुचिः—" स्वरः सत्त्वं च नाभिश्च गम्भीरः शस्यते बुधैः " इति । ब्राह्मे तु—" स्वरे गतौ च नाभौ च गम्भीरस्निग्धु शस्यते " इति । नित्यश इति सर्वत्र विशेषणीयं । तेन रोगाद्युपाधिकृतरागादिनिवृत्तिः ॥ १७ ॥ त्रिवलीमान् उदरे वलित्रयवान् । कण्ठवलित्रयवान्वा । अत्र गर्गः—" स्थिरा त्रिरेखा सुभगोपपन्ना स्निग्धा सुमांसोपचिता सुवृत्ता । न

भवत्येवप्रसिद्धा नपुमान्कश्चिदितिभावः ॥ **ती०** प्रसूतइत्यनेन गुणानामुत्पत्तिविशिष्टत्वमवगम्यते ॥ ८ ॥ **ति०** लोकस्य सर्वस्यकर्ता हर्ताभर्ताचेतिशेषः । अनेनसृष्टिस्थितिसंहारकर्तृत्वरूपंब्रह्मलक्षणंरामस्योक्तंगूढं । एवंज्ञानंतत्क्षणंभगवतैवस्वमायातिरस्करिणीनिरासादितिबोध्यं । लोकस्यमर्यादानां वर्णाश्रममर्यादानांकर्ता । भगवदवतारत्वात् । कारयिता कालात्मना अवतीर्णरूपेणचातुर्वर्ण्यरक्षिताच ॥ **स०** चातुर्वर्ण्यस्य स्वार्थेष्यञ् ॥ ११ ॥ **ति०** अर्चिष्मान् आदित्यरूपःसन्नर्चितः । त्रैवर्णिकैरितिशेषः । ब्रह्मचर्यव्रते गृहस्थोचितपर्वादिवर्जनपूर्वकमृतुगमनलक्षणेस्थितः । वस्तुतस्तु गार्हस्थ्येप्यस्खलितरेताः । मनस्संकल्पेनैवदेव्यारतिप्रीतेःसंतानस्यचसंपादनमितिभावः ॥ **स०** यद्वा स्वरतत्राद्रोगार्थमनपेक्षितस्त्रीसङ्गादिरितिब्रह्मचर्यव्रतंवा ॥ १२ ॥ **स०** विशिष्ययजु-

[पा०] १ क. घ.—ट. स्वजनस्यचरक्षिता. २ क. धर्मस्यवृत्तस्यच. ३ ख. लोकेऽस्मिंश्चातुर्वर्ण्यस्य. ४ ख. घ. नर्चितो नित्यं. ५ ङ.—ट. राजनीत्यांविनीतश्च. ६ ङ. ज. झ. ट. मुपासकः. ७ क. च. छ. ज. ञ. ट. ज्ञानवाञ्शीलसंपन्नः. ८ क. ज. वेदविद्भिश्च. ९ ङ.—ट. रामोनाम. ख. देविरामो. १० घ. ङ. झ. ट. समश्चसुविभक्ताङ्गः.

चतुर्दशसमद्वन्द्वश्चतुर्दंष्ट्रश्चतुर्गतिः ॥ महोष्ठहनुनासश्च पञ्चस्निग्धोष्ठवंशवान् ॥ १९ ॥
दशपद्मो दशबृहत्त्रिभिर्व्याप्तो द्विशुक्लवान् ॥ षडुन्नतो नवतनुस्त्रिभिर्व्याप्नोति राघवः ॥ २० ॥

चातिदीर्घा चतुरङ्गुला च ग्रीवा सुदीर्घा भवतीह धन्या " इति ॥ त्र्यवनतः त्रीण्यवनतानि निम्नानि यस्यासौ त्र्यवनतः । तानि स्तनचूचुकपादरेखाः । अत्र मिहिरः—" पीनोपचितैर्निम्नैः क्षितिपतयश्चूचुकैः स्तनैः सुखिनः । स्निग्धा निम्ना रेखा धनिनां तद्व्यत्ययेन निस्वानां" इति ॥ चत्वारि व्यङ्गानि ह्रस्वानि यस्यासौ चतुर्व्यङ्गः । अत्र वररुचिः—"ग्रीवा प्रजननं पृष्ठं ह्रस्वं जङ्घा च पूज्यते " इति । यद्वा चत्वारो व्यङ्गाः विकलाः यस्य सः चतुर्व्यङ्गः । ते च सिराविकलः पादः रोमान्तरविकलो रोमकूपः दैर्घ्यविकलो मेढ्रः मांसविकलो बस्तिः । अत्र नारदः—" पादैः प्रस्वेदरहितैः सिराहीनश्च पार्थिवः । एकरोमा भवेद्राजा द्विरोमा पण्डितो भवेत् ॥ त्रिरोमा चतूरोमा च भवेद्भाग्यविवर्जितः । समपादोपविष्टस्य गुल्फं स्पृशति मेहनम् ॥ यस्येश्वरं तं जानीयात्सुखिनं चैव मानवम् । निर्मांसः संहतो बस्तिर्येषां तेसुखभागिनः " इति । त्रिशीर्षवान् त्रिभिर्लक्षणैर्युक्तं शीर्षं तदस्यास्तीति त्रिशीर्षवान् । तानि लक्षणान्यावर्ताः । " आवर्तत्रयरुचिरं यस्य शिरः स क्षितिभृतांनेता " इति कथनात् । यद्वा त्रिप्रकारं समवृत्तंछत्राकारं विशालं च शीर्षमस्यास्तीति त्रिशीर्षवान् । अत्र नारदः—" समवृत्तशिराश्चैव छत्राकारशिरास्तथा । एकछत्रां महीं भुङ्क्ते दीर्घमायुश्च विन्दति " ॥ चतस्रः कलाः वेदाः यस्य चतुष्कलः । अत्र शरीरलक्षणप्रकरणे कलाशब्दस्तत्सूचकरेखापरः । अत्र नन्दी—" मूलेङ्गुष्ठस्य वेदानां चतस्रस्तिस्र एव वा । एका द्वे वा यथायोगं रेखा ज्ञेया द्विजन्मनां " इति ॥ चतुर्लेखः ललाटे पादयोः पाण्योश्चतस्रो लेखा रेखा यस्य स चतुर्लेखः । "ललाटे यस्य दृश्यन्ते चतुस्त्रिंश्चैकरेखिकाः । शतद्वयं शतं षष्टिस्तस्यायुर्विंशतिस्तथा" इति काश्यायनः । "यस्य पादतले वज्रध्वजशङ्खाङ्कुशोपमाः । रेखास्सम्यक्प्रकाशन्ते मनुजेन्द्रं तमादिशेत्" इति नारदः । "पाणौ चतस्रो रेखाश्च यस्य तिष्ठन्त्यभङ्गुराः " इतिब्रह्मा । चत्वारः किष्कवः यस्य स चतुष्किष्कुः । चतुर्विंशत्यङ्गुलात्मको हस्तः किष्कुः । षण्णवत्यङ्गुलोत्सेध इत्यर्थः । " षण्णवत्यङ्गुलोत्सेधो यः पुमान्स दिवौकसः " इतिब्राह्मपुराणवचनम् । चतुस्समः चत्वारः समा यस्य स चतुस्समः । ते च बाहुजानूरुगण्डाः । तदुक्तं ब्रह्माण्डे—" बाहुजानूरुगण्डाश्च चत्वार्यथ समानि च " इति ॥ १८ ॥ चतुर्दशसमद्वन्द्वः चतुर्दशसंख्यानि समानि द्वन्द्वानि यस्य सः । तथात्र सामुद्रिकं । " भ्रुवौ नासापुटे नेत्रे कर्णावोष्ठौ च चूचुके । कूर्परौ मणिबन्धौ च जानुनी वृषणौ कटी ॥ करौ पादौ स्फिजौ यस्य समौ ज्ञेयः स भूपतिः " इति । चत्वारो दंष्ट्राकारा दन्ता यस्य स चतुर्दंष्ट्रः । तदाह मिहिरः—" स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः समाश्च शुभाः " इति । चतुर्गतिः चतुर्णां सिंहशार्दूलगजवृषभाणां गतिरिव गतिर्यस्य सः । " गजसिंहगती वीरौ शार्दूलवृषभोपमौ " इति बालकाण्डोक्तेः । महोष्ठहनुनासश्च ओष्ठस्य महत्त्वं बन्धुजीवबिम्बफलारुणमांसलत्वं हनोस्तु परिपूर्णमांसलत्वं नासिकाया दीर्घतुङ्गत्वं । तथाच संहिता । "बन्धुजीवकुसुमोपमोधरो मांसलो रुचिरबिम्बरूपधृत् । पूर्णमांसलहनुस्तु भूमिपस्तुङ्गतुण्डरुचिराकृतिस्तथा " इति ॥ तुण्डशब्देन नासिकोच्यते । पञ्चस्निग्धः पञ्च स्निग्धाः अवयवाः यस्य सः । ते च वाक्यवक्त्रनखलोमत्वचः केशनेत्रदन्तत्वक्पादतलानि वा । अत्र वररुचिः—" चक्षुस्स्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम् । त्वचःस्नेहेन शयनं पादस्नेहेन वाहनं " इति ॥ " स्निग्धनीलमृदुकुञ्चितास्तथा मूर्धजाः सुखकराः समं शिरः " इति मिहिरः । पूर्वं त्रिषु स्निग्ध इत्युक्तेः अत्र पञ्चस्निग्ध इतीदं मतभेदमाश्रित्योक्तं । अष्टवंशवान् अष्टौ वंशाः आयतावयवा यस्य सः आयताष्टावयव इत्यर्थः । अत्र सामुद्रिकं । " पृष्ठवंशः शरीरं च हस्तपादाङ्गुली करौ । नासिका चक्षुषी कर्णौ प्रजनो यस्य चायताः " इति ॥ प्रजनस्यायतत्वमार्जवं ॥ १९ ॥ दशपद्मः दशपद्माकारावयवाः यस्य सः दशपद्मः । " मुखने-

---

वेंदग्रहणेन रामोयाजुषइतिसूचयति ॥ १४ ॥ **तीo** द्विशुक्लवान् द्वौशुक्लौ शुद्धौ मातृपितृवंशौयस्यसः । तदुक्तं " द्वौशुक्लौतुशुभौ शुद्धौवंशौमातुःपितुस्तथा " इति । ननुत्रिसमस्निग्धेषुचोन्नतः । 'त्रिषुस्निग्धस्त्रिभिर्व्याप्तः' इत्युक्तंप्राक् । इहतुचतुस्समःषडुन्नतःपञ्च

सत्यधर्मपरः श्रीमान्संग्रहानुग्रहे रतः ॥ देशकालविभागज्ञः सर्वलोकप्रियंवदः ॥ २१ ॥
भ्राता च तस्य द्वैमात्रः सौमित्रिरपराजितः ॥ अनुरागेण रूपेण गुणैश्चैव तथाविधः ॥
[स सुवर्णच्छविः श्रीमान्रामः श्यामो महायशाः] ॥ २२ ॥
तावुभौ नरशार्दूलौ त्वद्दर्शनसमुत्सुकौ ॥ विचिन्वन्तौ महीं कृत्स्नामस्माभिरभिसंगतौ ॥ २३ ॥
त्वामेव मार्गमाणौ तौ विचरन्तौ वसुन्धराम् ॥ ददर्शतुर्मृगपतिं पूर्वजेनावरोपितम् ॥ २४ ॥
ऋश्यमूकस्य पृष्ठे तु बहुपादपसंकुले ॥ भ्रातुर्भयार्तमासीनं सुग्रीवं प्रियदर्शनम् ॥ २५ ॥
वयं तु हरिराजं तं सुग्रीवं सत्यसङ्गरम् ॥ परिचर्यामहे राज्यात्पूर्वजेनावरोपितम् ॥ २६ ॥
ततस्तौ चीरवसनौ धनुःप्रवरपाणिनौ ॥ ऋश्यमूकस्य शैलस्य रम्यं देशमुपागतौ ॥ २७ ॥
स तौ दृष्ट्वा नरव्याघ्रौ धन्विनौ वानरर्षभः ॥ अवप्लुतो गिरेस्तस्य शिखरं भयमोहितः ॥ २८ ॥
ततः स शिखरे तस्मिन्वानरेन्द्रो व्यवस्थितः ॥ तयोः समीपं मामेव प्रेषयामास सत्वरम् ॥ २९ ॥
तावहं पुरुषव्याघ्रौ सुग्रीववचनात्प्रभू ॥ रूपलक्षणसंपन्नौ कृताञ्जलिरुपस्थितः ॥ ३० ॥

स्निग्धः त्रिभिर्व्याप्नोतीत्युच्यते । सत्यं मतभेदमाश्रित्योक्तत्वान्नदोषः । अन्येषामप्येवंविधानांसकलशास्त्रोक्तमहापुरुषलक्षणानामेक सकलगुणारामोरामएवलक्ष्यमितिसूचनाय ॥ ति० नवतनुः नवसुसूक्ष्मः । तानिच—" सूक्ष्माण्यङ्गुलिपर्वाणिकेशरोमनखत्वचः । शेफश्चयेषांसूक्ष्माणितेनरादीर्घजीविनः " इतिप्रोक्तंषट्कं । मृदुश्मश्रुत्वंसूक्ष्मदृष्टित्वंसूक्ष्मबुद्धित्वंचेतिनवसूक्ष्मत्वं । दृष्टेःसौक्ष्म्यं रत्नपरीक्षान्तसूक्ष्मदर्शनचातुर्यं । बुद्धेःसूक्ष्मत्वं तत्त्वसाक्षात्कारसमर्थत्वं । त्रिभिर्व्याप्नोति धर्मार्थकामैःकालंयथोचितंव्याप्नोति । त्रिवर्गसेवीत्यर्थः ॥ २० ॥ ति० संग्रहानुग्रहे संग्रहः धनबलादीनां । अनुग्रहः ताभ्यांप्रजारक्षणं । तदुभयनिष्ठः ॥ २१ ॥ रामानु० द्वैमात्रः द्वयोर्मात्रोरपत्यंपुमान्द्वैमात्रः । " मातुरुत्संख्यासंभद्रपूर्वायाः " इत्यण्प्रत्ययः । उकाराभावआर्षः । सुमित्रापत्यस्यलक्ष्मणस्यद्वैमातुरत्वंजन्मप्रभृतिरामवत्कौसल्ययासंवर्धितत्वात् । ति० द्वैमात्रः राममात्रपेक्षयाद्वितीयामाता । तस्याअपत्यमित्यर्थः । भिन्नोदरभ्रातेत्यर्थः । वैमात्रइतिपाठान्तरं ॥ २२ ॥ रामानु० परिचर्य परिचर्याकृत्वा । आस्महे तिष्ठामइत्यर्थः ॥ ति० परिचर्यामहे । तङ्ङ्यनावार्षौ ॥ परिचरामइत्यर्थः ॥ स० परिचर्यामहे सुग्रीवमुद्दिश्ययापरिचर्यासेवातद्प्रेमहेउत्सवेइत्यर्थः । स्थिताइतिशेषः । द्वितीयाषष्ठ्यर्थवा ॥ २६ ॥ स० धनुःप्रवरपाणिनौ पणोव्यवहारएवपाणः । धनुःप्रवराभ्यांपाणोऽनयोरस्तीतितथा । धनुःप्रवरपाणिनां नौ नायकावित्यर्थइतिवा । " नेतानश्वसमाख्यातः " इतिनानार्थपदमञ्जर्यां । नान्तोवायंशब्दः ॥ २७ ॥

[पा०] १ ङ. ज.—ट. सत्यधर्मरतः. २ ङ. ञ. ट. रमितप्रभः. ३ च. छ. ञ. अनुकारेण. ४ ख. गुणैरपि. ङ. ञ. ट. गुणैश्चापि. ५ इदमर्धं ङ. ञ. ट. पाठेषुदृश्यते. ६ ग. उभौतौ. ७ घ.—ट. मस्माभिःसहसंगतौ. ८ ञ. ट. मूलेतु ९ ख. घ. प्रियवादिनं. १० ङ. ञ. ट. वयंच. ११ क.—ट. परिचर्यामहे. १२ ग. घ. प्रवरधारिणौ. १३ क. ग.—ट. अभिप्लुतो.

तौ परिज्ञाततत्त्वार्थौ मया प्रीतिसमन्वितौ ॥ पृष्ठमारोप्य तं देशं प्रापितौ पुरुषर्षभौ ॥ ३१ ॥
निवेदितौ च तत्त्वेन सुग्रीवाय महात्मने ॥ तयोरन्योन्यसंलापाद्दृढं प्रीतिरजायत ॥ ३२ ॥
ततस्तौ प्रीतिसंपन्नौ हरीश्वरनरेश्वरौ ॥ परस्परकृताश्वासौ कथया पूर्ववृत्तया ॥ ३३ ॥
ततः स सान्त्वयामास सुग्रीवं लक्ष्मणाग्रजः ॥ स्त्रीहेतोर्वालिना भ्रात्रा निरस्तमुरुतेजसा ॥ ३४ ॥
ततस्त्वन्नाशजं शोकं रामस्याक्लिष्टकर्मणः ॥ लक्ष्मणो वानरेन्द्राय सुग्रीवाय न्यवेदयत् ॥ ३५ ॥
स तं श्रुत्वा वानरेन्द्रस्तु लक्ष्मणेनेरितं वचः ॥ तदासीन्निष्प्रभोत्यर्थं ग्रहग्रस्त इवांशुमान् ॥ ३६ ॥
ततस्त्वद्भात्रशोभीनि रक्षसा ह्रियमाणया ॥ यान्याभरणजालानि पातितानि महीतले ॥ ३७ ॥
तानि सर्वाणि रामाय आनीय हरियूथपाः ॥ संहृष्टा दर्शयामासुर्गतिं तु न विदुस्तव ॥ ३८ ॥
तानि रामाय दत्तानि मयैवोपहृतानि च ॥ स्रवन्त्यवकीर्णानि तस्मिन्विगतचेतसि ॥ ३९ ॥
तान्यङ्के दर्शनीयानि कृत्वा बहुविधं तव ॥ तेन देवप्रकाशेन देवेन परिदेवितम् ॥ ४० ॥
पश्यतस्तानि रुदतस्ताम्यतश्च पुनः पुनः ॥ प्रादीपयन्दाशरथेस्तानि शोकहुताशनम् ॥ ४१ ॥
शयितं च चिरं तेन दुःखार्तेन महात्मना ॥ मयाऽपि विविधैर्वाक्यैः कृच्छ्रादुत्थापितः पुनः ॥४२॥
तानि दृष्ट्वा महाबाहुर्दर्शयित्वा मुहुर्मुहुः ॥ राघवः सहसौमित्रिः सुग्रीवे संन्यवेदयत् ॥ ४३ ॥
स तवादर्शनादार्ये राघवः परितप्यते ॥ महता ज्वलता नित्यमग्निनेवाग्निपर्वतः ॥ ४४ ॥
त्वत्कृते तमनिद्रा च शोकश्चिन्ता च राघवम् ॥ तापयन्ति महात्मानमभ्यगारमिवाग्नयः ॥ ४५ ॥
तवादर्शनशोकेन राघवः प्रविचाल्यते ॥ महता भूमिकम्पेन महानिव शिलोच्चयः ॥ ४६ ॥
काननानि सुरम्याणि नदीः प्रस्रवणानि च ॥ चरन्न रतिमाप्नोति त्वामपश्यन्नृपात्मजे ॥ ४७ ॥
स त्वां मनुजशार्दूलः क्षिप्रं प्राप्स्यति राघवः ॥ समित्रबान्धवं हत्वा रावणं जनकात्मजे ॥ ४८ ॥
सहितौ रामसुग्रीवावुभावकुरुतां तदा ॥ समयं वालिनं हन्तुं तव चान्वेषणं तथा ॥ ४९ ॥
ततस्ताभ्यां कुमाराभ्यां वीराभ्यां स हरीश्वरः ॥ किष्किन्धां समुपागम्य वाली युद्धे निपातितः ॥५०॥
ततो निहत्य तरसा रामो वालिनमाहवे ॥ सर्वर्क्षहरिसङ्घानां सुग्रीवमकरोत्पतिम् ॥ ५१ ॥
रामसुग्रीवयोरैक्यं देव्येवं समजायत ॥ हनुमन्तं च मां विद्धि तयोर्दूतमिहागतम् ॥ ५२ ॥

नान्तत्वमार्षं ॥ २७—३५ ॥ अत्यर्थं निष्प्रभ इति आत्मवद्रामस्यापि दुःखहेतुश्रवणादिति भावः। यद्वा रामापेक्षया अत्यन्तनिष्प्रभः। रामः सीताविरहेण निष्प्रभोभूत् सुग्रीवस्तु तयोस्साहित्यादर्शनाद्रामक्लेशदर्शनाच्चात्यर्थं निष्प्रभोभूत् ॥ ३६—३७ ॥ आनीय हरियूथपा इति पूर्वं सुग्रीवेणानयनमुक्तं तद्धरियूथपद्वारेत्यत्रोच्यते। गतिं रावणस्थानं ॥ ३८ ॥ दत्तानि सुग्रीवेणेति शेषः। मयैवोपहृतानि पूर्वं पतनकाल इतिशेषः। इदानीं हरियूथपैरानीतत्वोक्तेः। स्रवन्ति आकाशात्पतनकाले ॥ ३९—४१ ॥ शयितं मूर्च्छितं ॥ ४२ ॥ सुग्रीवे संन्यवेदयत् सुग्रीवहस्ते न्यस्तवानित्यर्थः ॥ ४३ ॥ अग्निपर्वतो नाम मेरुशिखरवर्ती कश्चिद्गिरिः। उक्तंच भारते। "अत्र माल्यवतः शृङ्गे दृश्यते हव्यवाट् सदा। नाम्ना संवर्तको नाम कालाग्निर्भरतर्षभ" इति ॥४४–५१॥ ननु वानराणां नराणां च कथमासीत्समागम इति

स० त्वन्नाशजं त्वदनुपलंभजं। "नाशो निधनानुपलंभयोः" इतिविश्वः ॥ ३५ ॥ स० ताभ्यां रामलक्ष्मणाभ्यां। छत्रिन्यायेनेयमुक्तिः ॥ हरीश्वरः वाली ॥ ५० ॥ स० ऐक्यं मत्त्वैक्यं ॥ ५२ ॥

[पा०] १ क. ग.—ट. संभाषात्. २ ख. घ. ङ. झ. ट. तत्रतौ. ३ क. ग.—ट. कीर्तिसंपन्नौ. ४ ङ. ज. झ. निरस्तपुरु. ५ क. ग घ. त्वन्नाशजनितं. ६ क. ग.—ज. तच्छ्रुत्वा. ७ क.—घ. च.—ट. महार्हाणिदर्शयित्वा. ८ क. ग.—झ. संन्यवेशयत्. ९ क. घ. ङ. झ. ञ. ट. परिचाल्यते. ज. प्रतिचाल्यते. १० ख. हत्वा. ११ ङ. च. छ. झ. ञ. ट. प्रति. १२ क.—घ. च. छ. ज. ञ. युधि. १३ ङ.—ट. मुपागतं.

स्वराज्यं प्राप्य सुग्रीवः समानीय हरीश्वरान् ॥ त्वदर्थं प्रेषयामास दिशो दश महाबलान् ॥५३॥
आदिष्टा वानरेन्द्रेण सुग्रीवेण महौजसा ॥ अद्रिराजप्रतीकाशाः सर्वतः प्रस्थिता महीम् ॥ ५४ ॥
ततस्ते मार्गमाणा वै सुग्रीववचनातुराः ॥ चरन्ति वसुधां कृत्स्नां वयमन्ये च वानराः ॥ ५५ ॥
अङ्गदो नाम लक्ष्मीवान्वालिसूनुर्महाबलः ॥ प्रस्थितः कपिशार्दूलस्त्रिभागबलसंवृतः ॥ ५६ ॥
तेषां नो विप्रनष्टानां विन्ध्ये पर्वतसत्तमे ॥ भृशं शोकपरीतानामहोरात्रगणा गताः ॥ ५७ ॥
ते वयं कार्यनैराश्यात्कालस्यातिक्रमेण च ॥ भयाच्च कपिराजस्य प्राणांस्त्यक्तुं व्यवस्थिताः ॥५८॥
विचित्य वनदुर्गाणि गिरिप्रस्रवणानि च ॥ अनासाद्य पदं देव्याः प्राणांस्त्यक्तुं समुद्यताः ॥५९॥
दृष्ट्वा प्रायोपविष्टांश्च सर्वान्वानरपुङ्गवान् ॥ भृशं शोकार्णवे मग्नः पर्यदेवयदङ्गदः ॥ ६० ॥
तव नाशं च वैदेहि वालिनश्च वधं तथा ॥ प्रायोपवेशमस्माकं मरणं च जटायुषः ॥ ६१ ॥
तेषां नः स्वामिसंदेशान्निराशानां मुमूर्षताम् ॥ कार्यहेतोरिवायातः शकुनिर्वीर्यवान्महान् ॥ ६२ ॥
गृध्रराजस्य सोदर्यः संपातिर्नाम गृध्रराट् ॥ श्रुत्वा भ्रातृवधं कोपादिदं वचनमब्रवीत् ॥ ६३ ॥
यवीयान्केन मे भ्राता हतः क्व च निपातितः ॥ एतदाख्यातुमिच्छामि भवद्भिर्वानरोत्तमाः ॥६४॥
अङ्गदोकथयत्तस्य जनस्थाने महद्वधम् ॥ रक्षसा भीमरूपेण त्वामुद्दिश्य यथातथम् ॥ ६५ ॥
जटायुषो वधं श्रुत्वा दुःखितः सोरुणात्मजः ॥ त्वां शशंस वरारोहे वसन्तीं रावणालये ॥ ६६ ॥
तस्य तद्वचनं श्रुत्वा संपातेः प्रीतिवर्धनम् ॥ अङ्गदप्रमुखास्तूर्णं ततः संप्रस्थिता वयम् ॥ ६७ ॥
विन्ध्यादुत्थाय संप्राप्ताः सागरस्यान्तमुत्तरम् ॥ त्वद्दर्शनकृतोत्साहा हृष्टास्तुष्टाः प्लवङ्गमाः ॥ ६८ ॥
अङ्गदप्रमुखाः सर्वे वेलोपान्तमुपस्थिताः ॥ चिन्तां जग्मुः पुनर्भीतास्त्वदर्शनसमुत्सुकाः ॥ ६९ ॥

वामदक्षिणहस्तवैषम्यमप्यविजानानां शाखायाश्शाखामाप्लुत्य जीवतां तिरश्चां वसिष्ठशिष्यतया निरतिशयाचारसंपन्नयोश्चक्रवर्तिपुत्रयोश्च कथं समागमो जात इति पृष्टं तस्य किमुत्तरमुक्तमित्यत्राह—रामसुग्रीवयोरिति ॥ रामसुग्रीवयोरैक्यमेवं समजायत । एवमिति प्रत्यक्षनिर्देशः । स्वानुजे विद्यमानेपि यथाहं सुग्रीवदूतोन्तःपुरकार्यसमाधानायागतः । तथा तयोरैक्यं मैत्री जातेत्यर्थः । यद्वा एवं समजायत अहमप्येवं दृष्टवान् । न योग्यतामवगच्छामीत्यर्थः ॥५२—५४॥ सुग्रीववचनातुराः सुग्रीवाज्ञाभीताः । सुग्रीववचनानुगा इति च पाठः ॥ ५५ ॥ त्रिभागबलसंवृतः तृतीयांशेन बलेन सैन्येन संवृत इत्यर्थः । वृत्तिविषये पूरणार्थत्वं संख्याशब्दस्येष्यते ॥ ५६ ॥ विप्रनष्टानां बिले अदर्शनं गतानां ॥५७॥ कालस्य सुग्रीवकल्पितमासस्य । कपिराजस्य सुग्रीवात् ॥ ५८—५९ ॥ दृष्ट्वेत्यादिश्लोकद्वयमेकं वाक्यं ॥ परिदेवनकर्माह—तवेति ॥ ६०—६१ ॥ स्वामिसंदेशात् मासादूर्ध्वमनागतानां भयमित्येवंरूपात् । तेषां कार्यहेतोः ॥ ६२—६७॥ हृष्टाः उत्साहवन्तः । तुष्टाः आनन्दवन्तः ॥ ६८ ॥ वेलोपान्तं वेला सिन्धुपूरः तस्यो-

---

ति० त्रिभागबलसंवृतः सेनायास्त्रिष्वंशेषुएकांशसेनावृतइत्यर्थः ॥ ५६ ॥ ति० कार्यहेतोः कार्यसिद्ध्यर्थमिवायातः । दैवादितिशेषः । स० कार्यहेतोः अस्मद्रक्षणाख्यकार्येण । इहायातः अस्मत्समीपंप्राप्तः ॥ ६२ ॥ ति० आख्यातुमित्यसमानकर्तृकेपितुमुन्नार्षः ॥ स० आख्यातुं आख्यापयितुं । तेनसमानकर्तृकत्वोपपत्तिः ॥ ६४ ॥ स० महद्वधं महतोजटायुषोवधः महद्वधः तं । परोपकारेप्राणत्यागान्महत्त्वं ॥६५॥ स० वरारोहाभ्यांसहिता सवरारोहा । तस्यास्संबुद्धिः । अतोनसइत्यस्याधिक्यं ॥६६॥

[पा०] १ झ. ठ. स्वंराज्यं. २ ङ. झ. ञ. ट. स्वानानीयमहाकपीन्. ३ क. ग. च. छ. ज. ञ. हरयश्चमहौजसः. ख. घ. सुग्रीवेणवनौकसः. ङ. झ. ट. सुग्रीवेणमहौजसः. ४ ङ. झ. ट. त्यक्तुमुपस्थिताः. ५ क. ख. घ. च.—ट. त्यक्तुंव्यवस्थिताः. ६ क.—ट. तथावधं. ७ क. ख. च. छ. ज. ञ. ट. रिहायातः. ८ ग. सचविनाशितः. ९ झ. ञ. ट. यथार्थतः. १० झ. ट. ठ. त्वामाहसवरारोहे. ११ क.—च. ज. ञ. प्रमुखास्सर्वे. १२ झ. ट. प्रस्थापितावयं. १३ घ.—ट. मुपागताः. १४ ग. जग्मुर्महात्मानः. ख. ङ. छ. झ. ट. जग्मुःपुनर्भीमां.

तथाऽहं हरिसैन्यस्य सागरं प्रेक्ष्य सीदतः ॥ व्यवधूय भयं तीव्रं योजनानां शतं प्लुतः ॥ ७० ॥
लङ्का चापि मया रात्रौ प्रविष्टा राक्षसाकुला ॥ रावणश्च मया दृष्टस्त्वं च शोकपरिप्लुता ॥ ७१ ॥
एतत्ते सर्वमाख्यातं यथावृत्तमनिन्दिते ॥ अभिभाषस्व मां देवि दूतो दाशरथेरहम् ॥ ७२ ॥
तं मां रामकृतोद्योगं त्वन्निमित्तमिहागतम् ॥ सुग्रीवसचिवं देवि बुध्यस्व पवनात्मजम् ॥ ७३ ॥
कुशली तव काकुत्स्थः सर्वशस्त्रभृतां वरः ॥ गुरोराराधने युक्तो लक्ष्मणश्च सुलक्षणः ॥ ७४ ॥
तस्य वीर्यवतो देवि भर्तुस्तव हिते रतः ॥ अहमेकस्तु संप्राप्तः सुग्रीववचनादिह ॥ ७५ ॥
मयेयमसहायेन चरता कामरूपिणा ॥ दक्षिणा दिगनुक्रान्ता त्वन्मार्गविचयैषिणा ॥ ७६ ॥
दिष्ट्याऽहं हरिसैन्यानां त्वन्नाशमनुशोचताम् ॥ अपनेष्यामि संतापं तवाभिगमशंसनात् ॥ ७७ ॥
दिष्ट्या हि मम न व्यर्थं देवि सागरलङ्घनम् ॥ प्राप्स्याम्यहमिदं दिष्ट्या त्वद्दर्शनकृतं यशः ॥ ७८ ॥
राघवश्च महावीर्यः क्षिप्रं त्वामभिपत्स्यते ॥ समित्रबान्धवं हत्वा रावणं राक्षसाधिपम् ॥ ७९ ॥
माल्यवान्नाम वैदेहि गिरीणामुत्तमो गिरिः ॥ ततो गच्छति गोकर्णं पर्वतं केसरी हरिः ॥ ८० ॥
स च देवर्षिभिर्दिष्टः पिता मम महाकपिः ॥ तीर्थे नदीपतेः पुण्ये शंबसादनमुद्धरत् ॥ ८१ ॥
तस्याहं हरिणः क्षेत्रे जातो वातेन मैथिलि ॥ हनुमानिति विख्यातो लोके स्वेनैव कर्मणा ॥ ८२ ॥
विश्वासार्थं तु वैदेहि भर्तुरुक्ता मया गुणाः ॥ अचिराद्राघवो देवि त्वामितो नयिताऽनघे ॥ ८३ ॥
एवं विश्वासिता सीता हेतुभिः शोककर्शिता ॥ उपपन्नैरभिज्ञानैर्दूतं तमवगच्छति ॥ ८४ ॥
अतुलं च गता हर्षं प्रहर्षेण च जानकी ॥ नेत्राभ्यां वक्त्रपक्ष्मभ्यां मुमोचानन्दजं जलम् ॥ ८५ ॥
चारु तद्वदनं तस्यास्ताम्रशुक्लायतेक्षणम् ॥ अशोभत विशालाक्ष्या राहुमुक्त इवोडुराट् ॥ ८६ ॥
हनुमन्तं कपिं व्यक्तं मन्यते नान्यथेति सा ॥ अथोवाच हनूमांस्तामुत्तरं प्रियदर्शनाम् ॥ ८७ ॥
एतत्ते सर्वमाख्यातं समाश्वसिहि मैथिलि ॥ किं करोमि कथं वा ते रोचते प्रतियाम्यहम् ॥ ८८ ॥

पान्तं । "वेलाम्बुधेस्तीरवृक्ष्योः कालमर्यादयोरपि" इति दर्पः ॥ ६९—७२ ॥ रामकृतोद्योगं रामकृतोत्साहं ॥ ७३ ॥ गुरोः ज्येष्ठस्य । आराधने शुश्रूषणे । रतः लक्ष्मणश्च कुशली ॥ ७४—७५ ॥ विचयैषिणा अन्वेषणेच्छुना ॥ ७६ ॥ तवाभिगमशंसनात् त्वत्समीपप्राप्तिकथनात् ॥ ७७—७९ ॥ बुध्यस्व पवनात्मजमिति पवनात्मजत्वमुक्तं तत्कथं वानरस्येत्यपेक्षायामाह—माल्यवानिति ॥ गच्छति अगच्छत् ॥ ८० ॥ सः गोकर्णं गतः । देवर्षिभिः तत्रत्यैः । दिष्टः नियुक्तः । शंबसादनं तीर्थोपद्रवकारिणमसुरं शंबसादनाख्यं । उद्धरत् उदहरत् । देवर्षिप्रार्थनया अवधीदित्यर्थः ॥ ८१ ॥ हरिणः हरेः केसरिणः । क्षेत्रे पत्न्यां अञ्जनायां । जातः पितुर्देशान्तरगमनकाले जातः । अनेनान्यक्षेत्रे कथमन्येनोत्पादनमिति शङ्का परास्कृता ॥ ८२ ॥ नयिता नेता ॥ ८३ ॥ अवगच्छति अवा-

ति० कामरूपिणा । अनेनरावणान्तःपुराद्यन्वेषणसामर्थ्यं सूचितं ॥ ७६ ॥ ति० सर्वमुत्तरं सर्वप्रत्युत्तरमाख्यातमित्यन्वयः ॥ किंकरोमीति । वर्तमानसामीप्येलटौ । प्रतियामि प्रतियास्ये रामसमीपं । किंकरोमि किंकरिष्ये । कथंवारोचते चिकीर्षितमितिशेषः ॥ ८८ ॥

[पा०] १ क. ङ. झ. ट. अथाहं. २ क. च. ज. ञ. हरिसैन्यानां. ३ क. च. छ. ज. ञ. सीदतां. ४ ग. व्यवधूयचसर्वान्. ५ ग. च. छ. ट. शोकनिपीडिता. ६ ङ.—ट. लक्ष्मणःशुभलक्षणः. ७ ङ. झ. तवाधिगमशासनात्. ८ ङ. च. ज. झ. ट. नममव्यर्थं. ९ घ. सागरस्यचलङ्घनं. ङ.—ट. सागरस्येहलङ्घनं. १० ङ. झ. ट. देवि. ११ ङ. झ. सपुत्रबान्धवं. १२ ख. छ. ज. कौरवोनाम. क. कुञ्जरोनाम. १३ ग. देवर्षिनिर्दिष्टः. १४ क.—च. ज. झ. ट. मुद्धरन्. १५ ङ. झ. ट. यस्याहं. १६ ङ. झ. ट. अचिरात्त्वामितोदेविराघवोनयिताध्रुवं. १७ ग. ङ. ञ. ट. तमधिगच्छतिः १८ ग. पयः. १९ च. छ. ज. ञ. सातस्यवचनंश्रुत्वाताम्रशुक्लायतेक्षणा. अशोभतविशालाक्षी. क. चारुतच्चाननंदेव्याःपुण्डरीकायतेक्षणं.

हतेऽसुरे संयति शंबसादने कपिप्रवीरेण महर्षिचोदनात् ॥
ततोस्मि वायुप्रभवो हि मैथिलि प्रभावतस्तत्प्रतिमश्च वानरः ॥ ८९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

षट्त्रिंशः सर्गः ॥ ३६ ॥

हनुमता स्वस्मिन्नाश्वासदार्ढ्याय सीतायैश्रीरामाङ्गुलीयकदानम् ॥ १ ॥ तल्लाभहृष्टयासीतया हनुमच्छ्लाघनपूर्वकंराम-लक्ष्मणकुशलादिप्रश्नः ॥ २ ॥ हनुमता सीतांप्रत्येतावत्पर्यन्तंरामस्यानागमनात्स्वस्मिन्नप्रीतिशङ्काजातकोपापनोदनाय रामानागमनस्य सीतावस्थानस्थानापरिज्ञानहेतुकत्वाभिधानम् ॥ ३ ॥ तयातस्यां रामस्यतद्विषयकप्रीत्यतिशयनिश्चयजन-नाय सशपथंरामशोकावस्थानप्रतिपादनपूर्वकं तत्प्राप्तयेरामप्रयत्नातिशयाभिधानेन तत्समाश्वासनम् ॥ ४ ॥

भूय एव महातेजा हनुमान्मारुतात्मजः ॥ अब्रवीत्प्रश्रितं वाक्यं सीताप्रत्ययकारणात् ॥ १ ॥
वानरोऽहं महाभागे दूतो रामस्य धीमतः ॥ रामनामाङ्कितं चेदं पश्य देव्यङ्गुलीयकम् ॥ २ ॥
प्रत्ययार्थं तवानीतं तेन दत्तं महात्मना ॥ समाश्वसिहि भद्रं ते क्षीणदुःखफला ह्यसि ॥
[इत्युक्त्वा प्रददौ तस्यै सीतायै वानरोत्तमः] ॥ ३ ॥
गृहीत्वा प्रेक्षमाणा सा भर्तुः करविभूषणम् ॥ भर्तारमिव संप्राप्ता जानकी मुदिताऽभवत् ॥ ४ ॥
चारु तद्वदनं तस्यास्ताम्रशुक्लायतेक्षणम् ॥ अशोभत विशालाक्ष्या राहुमुक्त इवोडुराट् ॥ ५ ॥
ततः सा ह्रीमती बाला भर्तृसंदेशहर्षिता ॥ परितुष्टा प्रियं कृत्वा प्रशशंस महाकपिम् ॥ ६ ॥

गच्छत् ॥ ८४—८८ ॥ देवीनियुक्तार्थकरणे स्वस्य शक्तिरस्तीति द्योतयितुं स्वमाहात्म्यमाह—हत इति ॥ ततः असुरवधोपकारात् ॥ ८९ ॥ इति श्रीगोविन्द-राजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलका-ख्याने सुन्दरकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥ ३५ ॥

इत्थं संदेशकथनादिना देवीं विश्वास्याभिज्ञानाङ्गु-लीयकदानेन दृढं विश्वासयति—वानरोहमित्यादिना ॥ २—३ ॥ गृहीत्वा देशान्तरादागतं बन्धुं दृष्ट्वेव स्वयं गृहीतवती । प्रेक्षमाणा वर्तमानार्थेन शानचा दत्तदृष्टिं न विचालितवतीत्युच्यते सा पूर्वं रावणत्वेन शङ्कितवती । भर्तुःकरविभूषणं पाणिग्रहणकाले हस्तस्पृष्टमाभरणं । करविभूषणमित्यनेन भोगातिश-यात् प्रणयकोपे प्रवृत्ते परस्परमालोकनभाषणादिविर-हदशायां काङ्क्षिते भाषणे मानातिशयेन मौने कृते रामोङ्गुलीयकं भूमौ च्यावयति स्म । तदा व्याजेन च्युतमङ्गुलीयकमिति सीतयाभिहिते प्रणयकोपशैथि-ल्यात् परस्परसंश्लेषो भूयोप्यभूत् । एवं घटकभूतं करविभूषणं भर्तारमिव संप्राप्ता अङ्गुलीयकदर्शनात्तस्य कान्तस्य करं स्मृतवती । तत्स्मृत्या बाहुं तत्स्मरणेन तद्विग्रहं । एवं भावनाप्रकर्षेण तं पुरस्थितमिव मत्वा तमालिङ्गितवती । जननीबुद्ध्या मुनिस्संप्राप्ते-वेत्याह । जननीकृतभोगस्यावर्ण्यत्वात् । जानकी शोकहर्षाभ्यां क्ष्वेडुमनर्हे कुले जाता । मुदिताऽभवत् इयमिदानीं मुदिता उदर्के किं भविष्यतीति न जान इत्याहर्षिः ॥ ४—५ ॥ प्रियं कृत्वा संमानं कृत्वा

ति० नहिरावणआत्मानंकथमपिकपिपुत्रइतिब्रूयादितिकपित्वनिश्चयायपुनःस्वजन्मानुवादः । ततः शंबसादनासुरवधप्रीतमहर्षेः प्रसादतइत्यर्थः । स० ततः मत्पितुस्तद्धननार्थंगमनानन्तरं । वायुप्रभवोस्मि तदवकाशे वायुनाजातोस्मि ॥ ८९ ॥ इति पञ्चत्रिंशःसर्गः ॥ ३५ ॥

ति० असि शीघ्रमेवभविष्यसि ॥ स० दुःखं तमआदिस्थं फलंयेषांते दुःखफलाः राक्षसाः । क्षीणाःदुःखफलायस्यानिमित्तेन सातथा । दुःखरूपंयत्फलं तत्क्षीणंयस्यांसावा । एष्यन्निश्चयेनेदंवचनं ॥ ३ ॥ ति० ह्रीमती अङ्गुलीयसांनिध्येभर्तृसांनिध्यादिवकिं-चिल्लज्जावती । स० ह्रीमती पत्न्यौयद्रत्न्यौन्नत्यंकपिरपिममापश्यदितिलज्जावती । प्रियंकृत्वा रावणादिविकल्पंविधूयप्रेमास्पदमेवकृत्वा

[पा०] १ क. पाठेइदमर्धदृश्यते. २ घ. ङ. झ. ञ. ट. बभूवहर्षोदग्रं. च. ख. बभूवहर्षितोदग्रं. ३ छ. राहुमुक्तेन्दुमण्डलं. ४ क. छ. झ. श्रीमती. ५ क.—ट. भर्तुस्संदेश. ६ क. श्रुत्वा. ७ क. ग. च. ज. ञ. प्राशंसत.

विक्रान्तस्त्वं समर्थस्त्वं प्राज्ञस्त्वं वानरोत्तम ॥ येनेदं राक्षसपदं त्वयैकेन प्रधर्षितम् ॥ ७ ॥
शतयोजनविस्तीर्णः सागरो मकरालयः ॥ विक्रमश्लाघनीयेन क्रमता गोष्पदीकृतः ॥ ८ ॥
न हि त्वां प्राकृतं मन्ये वानरं वानरर्षभ ॥ यस्य ते नास्ति संत्रासो रावणान्नापि संभ्रमः ॥ ९ ॥
अर्हसे च कपिश्रेष्ठ मया समभिभाषितुम् ॥ यदि प्रेषितस्तेन रामेण विदितात्मना ॥ १० ॥
प्रेषयिष्यति दुर्धर्षो रामो न ह्यपरीक्षितम् ॥ पराक्रममविज्ञाय मत्सकाशं विशेषतः ॥ ११ ॥
दिष्ट्या च कुशली रामो धर्मात्मा सत्यसङ्गरः ॥ लक्ष्मणश्च महातेजाः सुमित्रानन्दवर्धनः ॥१२॥
कुशली यदि काकुत्स्थः किंनु सागरमेखलाम् ॥ महीं दहति कोपेन युगान्ताग्निरिवोत्थितः ॥१३॥
अथवा शक्तिमन्तौ तौ सुराणामपि निग्रहे ॥ ममैव तु न दुःखानामस्ति मन्ये विपर्ययः ॥ १४ ॥
कच्चिन्न व्यथितो रामः कच्चिन्न परितप्यते ॥ उत्तराणि च कार्याणि कुरुते पुरुषोत्तमः ॥ १५ ॥
कच्चिन्न दीनः संभ्रान्तः कार्येषु च न मुह्यति ॥ कच्चित्पुरुषकार्याणि कुरुते नृपतेः सुतः ॥ १६ ॥
द्विविधं त्रिविधोपायमुपायमपि सेवते ॥ विजिगीषुः सुहृत्कच्चिन्मित्रेषु च परन्तपः ॥ १७ ॥

॥ ६ ॥ विक्रान्तइत्यादिपदत्रयेण तत्प्रत्यक्षमेण ज्ञानशक्तिबलान्युच्यन्ते। इदं राक्षसपदमिति प्रज्ञोक्ता। त्वयैकेनेति सामर्थ्यं। प्रधर्षितमिति विक्रमः ॥ ७—८ ॥ प्राकृतं क्षुद्रं। संभ्रमः व्यग्रता ॥ ९ ॥ यद्यपीतिनिपातसमुदायो यस्मादित्यर्थे। अव्ययानामनेकार्थत्वात् ॥ १०—१२ ॥ अथ प्रणयरोषेण दूतसन्निधौ रामं गर्हते—कुशलीति ॥ काकुत्स्थः परपरिभवासहकुलेजातः। अनेन परपरिभव एव परिहरणीयः न स्वीय इति नियमोस्ति किं। किंनु सागरमेखलां महीं दहति। अत्र काकुत्स्थः दहति किंनु न दहतीत्यर्थः। सागरमेखलामिति विशेषणेन द्रवद्रव्यस्यैकेन कठिनद्रव्यस्यचैकेन बाणेन भवितव्यं किं। सागरं सलिलमेव तैलं कृत्वा महीं दग्धुं समर्थो न क्रिमित्यर्थः। यद्वा स्वपत्नीं वा सुरक्षितपरिधानाङ्करोतीति भावः। अनादिकृतमर्यादा मही कथं दग्धुं शक्येत्यत्राह—युगान्तेति। महीमर्यादा तन्नयनरागपर्यन्तैवेति भावः। किं न सागरमेखलामित्यपि पाठः। काकुत्स्थः कुशली यदि तदा महीं किं न दहति। शक्तश्चेद्दहत्येव। न दहति अतो न शक्त इत्यर्थः ॥ १३ ॥ पक्षान्तरमाह—अथवेति ॥ १४ ॥ न व्यथितः न कृशः। उत्तराणि कार्याणि मत्प्राप्तिसाधकानि कच्चित्कुरुते ॥ १५ ॥ न दीनः कच्चित्संभ्रान्तः सन् कार्येषु न मुह्यति कच्चिदित्यन्वयः। पुरुषकार्याणि पुरुषेण कर्तव्यानि ॥ १६ ॥ तान्येवाह—द्विविधमिति ॥ परन्तपो रामः मित्रेषु विषये सुहृत्सन् द्विविधं सामदानरूपमुपायमपि। सेवते कच्चित्। चकारेणामित्रास्समुच्चीयन्ते। अमित्रेषु विषये

मलावा ॥ ६ ॥ **ति०** विक्रान्तः शूरः। समर्थः देशकालोचितकृत्यचतुरः। प्राज्ञः धर्मार्थविषयकसर्वशास्त्रार्थतत्त्वज्ञः। पदं स्थानं ॥ ७ ॥ **ति०** संत्रासः समुद्रादितिशेषः। **स०** प्राकृतं साधारणं। यतः मेइतिशेषः। यतः मेसंभ्रमः भयं। तस्माद्रावणादपिनसंत्रासः ॥ ९ ॥ **ति०** यदि यस्मात् ॥ **ती०** यद्यपीत्यवधारणे। मयासमभिभाषितुंअर्हसेयद्यपि अर्हस्येवेत्यर्थः। कुतः विदितात्मनारामेणप्रेषितइतिसंबन्धः ॥ यद्वा अप्यवधारणे। यदि यस्मात्। विदितात्मनारामेणप्रेषितः। तस्मान्मयासमभिभाषितुं अर्हस्यवेतिसंबन्धः ॥ १० ॥ **शि०** कोपेन रावणापराधज्ञानजनितक्रोधेन। महीं लङ्काभूमिं। किंनुदहति ॥ १३ ॥ **ति०** ननुकेवलंमहीमेवेतिकिमुच्यतेइत्याशयेनपक्षान्तरं—**अथवेति**। तथाशक्तिमन्तौयदि तर्हिकिमितितूष्णींतिष्ठतःतत्राह—ममैवेति। दुःखानां दुःखहेतुपापानां। विपर्ययः नाशः। नाद्यापिसंवृत्तइत्यर्थः ॥ १४ ॥ **ति०** ममदुःखक्षयः ईषत्करः अपितु तस्यसुखावस्थानमेवमुख्यमित्याशयेनाह—**कच्चिदिति**। उत्तराणिकार्याणि मद्विमोचनफलानि ॥१५॥ **ति०** द्विविधं सौम्यासौम्यरूपप्रकारद्वयवत् ॥ त्रिविधोपायं धर्मार्थकामलक्षणत्रिविधपुरुषार्थानांप्राप्त्युपायभूतमुपायं सामाद्युपायमपिसेवतेकच्चित्। तथा मित्रेषुच विजिगीषुसुहृत्कच्चित्। विजिगीषुसुहृदिति बहुव्रीहिस्तत्पुरुषश्चेतिकतकः। सुहृत्परंतपोरामोविजिगीषुःसन् त्रिविधोपायं सामदानभेदरूपमुपायंदण्डोपायंच। मित्रेषुच चादमित्रेषुच द्विविधंयथाभवतितथा सेवतेकच्चित्। मित्रेषुसामदाने अमित्रेषुभेददण्डौचेत्येवंविभज्यप्रयुङ्क्तेकच्चिदित्यर्थइतितीर्थः ॥ **स०** त्रिविधोपायं धर्मार्थकामसाधनरूपं। तज्ज्ञानरूपासाधारणकारणकस्यमोक्षस्यसाधारण-

[**पा०**] १ क. ग. ङ.—ट. रावणादपि. २ क. ङ. झ. ट. यद्यसि. च. छ. ज. ञ. यदसि. ३ क. ग. च. ज. झ. ञ. दिष्ट्यास. ४ क. धर्मवत्सलः. ख. ग. ञ. सत्यवत्सलः. ५ क.—ट. व्यथते. ६ झ. विजिगीषुसुहृत्कच्चित्. ७ झ. परंतप.

कच्चिन्मित्राणि लभते मित्रैश्चाप्यभिगम्यते ॥ कच्चित्कल्याणमित्रश्च मित्रैश्चापि पुरस्कृतः ॥ १८ ॥
कच्चिदाशास्ति देवानां प्रसादं पार्थिवात्मजः ॥ कच्चित्पुरुषकारं च दैवं च प्रतिपद्यते ॥ १९ ॥
कच्चिन्न विगतस्नेहः प्रसादान्मयि राघवः ॥ कच्चिन्मां व्यसनादस्मान्मोक्षयिष्यति वानर ॥ २० ॥
सुखानामुचितो नित्यमसुखानामनूचितः ॥ दुःखमुत्तरमासाद्य कच्चिद्रामो न सीदति ॥ २१ ॥
कौसल्यायास्तथा कच्चित्सुमित्रायास्तथैव च ॥ अभीक्ष्णं श्रूयते कच्चित्कुशलं भरतस्य च ॥ २२ ॥
मन्निमित्तेन मानार्हः कच्चिच्छोकेन राघवः ॥ कच्चिन्नान्यमना रामः कच्चिन्मां तारयिष्यति ॥२३॥
कच्चिदक्षौहिणीं भीमां भरतो भ्रातृवत्सलः ॥ ध्वजिनीं मन्त्रिभिर्गुप्तां प्रेषयिष्यति मत्कृते ॥ २४ ॥
वानराधिपतिः श्रीमान्सुग्रीवः कच्चिदेष्यति ॥ मत्कृते हरिभिर्वीरैर्वृतो दन्तनखायुधैः ॥ २५ ॥
कच्चिच्च लक्ष्मणः शूरः सुमित्रानन्दवर्धनः ॥ अस्त्रविच्छरजालेन राक्षसान्विधमिष्यति ॥ २६ ॥
रौद्रेण कच्चिदस्त्रेण ज्वलता निहतं रणे ॥ द्रक्ष्याम्यल्पेन कालेन रावणं ससुहृज्जनम् ॥ २७ ॥

कच्चिन्न तद्वेमसमानवर्णं तस्याननं पद्मसमानगन्धि ॥
मया विना शुष्यति शोकदीनं जलक्षये पद्ममिवातपेन ॥ २८ ॥
धर्मोपदेशात्त्यजतश्च राज्यं मां चाप्यरण्यं नयतः पदातिम् ॥
नासीद्व्यथा यस्य न भीर्न शोकः कच्चिच्च धैर्यं हृदये करोति ॥ २९ ॥
न चास्य माता न पिता च नान्यः स्नेहाद्विशिष्टोस्ति मया समो वा ॥
तावच्चहं दूत जिजीविषेयं यावत्प्रवृत्तिं शृणुयां प्रियस्य ॥ ३० ॥

विजिगीषुस्सन् त्रिविधोपायं दानभेददण्डान् । सेवते प्रयुङ्क्ते कच्चित् । सुहृत्सु कदाचिदपि भेददण्डौ न कार्यौ । शत्रुषु नसामेति भावः । योजनान्तरे विजिगीषुसुहृत्पदयोः प्रयोजनं मृग्यं ॥ १७ ॥ अभिगम्यते लभ्यते । मित्रस्य कंचिदुपकारं कृत्वा स्वयमुपकारं मित्रादपेक्षते कच्चिदित्यर्थः । कल्याणमित्रः पुरस्कृतमित्र इत्यर्थः ॥ १८ ॥ आशास्ति आशास्ते । पुरुषकारं स्वबलं । एकैकस्यानर्थहेतुत्वादिति भावः ॥ १९—२० ॥ अनूचित इति दीर्घ आर्षः । उत्तरं उत्कृष्टं ॥ २१—२२ ॥ मन्निमित्तेन मया हेतुना । अन्यमनाः कार्यान्तरासक्तः ॥ २३ ॥ ध्वजिनीं सेनां ॥ २४—२७ ॥ हेमशब्देन तद्वर्ण उच्यते । अभेदेन हेमवत्स्पृहणीयमित्यर्थः । मया विनेति जलक्षयस्थानं । शोकदीनमित्यातपस्थानं ॥ २८ ॥ धर्मोपदेशात् धर्मोद्देशार्थं । धर्ममुद्दिश्येत्यर्थः । यद्वा धर्मव्याजाद्धेतोः । राज्यत्यागाद्यथा नासीत् । अरण्यसञ्चाराद्धीर्नासीत् । मत्पादसञ्चाराच्छोको नासीत् । सः तादृशधैर्ययुक्तो रामो मद्विश्लेषेपि हृदये धैर्यं करोति कच्चित् ॥ २९ ॥ धैर्याकरणे हेतुमाह—न चास्येति ॥ प्रवृत्तिं मदानयनवार्तां । प्रणयरोषपक्षे किमेष पितृवचनपरिपालनाय वनं प्राप्तः न । किन्तु ममैव हिंसायै इति भावः । रामस्यैव दोषः न ममेति सीतयोक्ते वयमेव किं सम्यक् स्थितवन्तः रामविश्लेषानन्तरक्षणे न तनुस्त्यक्ता हीत्येवं हनुमदाशयं ज्ञात्वाह—नचास्येति ॥ रामस्य मात्रादयः अन्योबन्धुश्च स्नेहाद्विशिष्टा न भवन्ति । लोके कस्यचिन्माता पिता भ्रातेत्येवं स्नेहो विसृत्वरो भवति । नचैवं रामस्य मात्रादिषु संभावितः । सर्वोपि मय्येकमार्गः कृतः । यावत्प्रि-

---

साधनसाध्यकोटौनिवेशोनसमञ्जसइतित्रयाणांग्रहणं ॥ सुहृदितिमित्रपक्षे । इतरत्रविजिगीषुरिति ॥ १७ ॥ **स०** लभते स्वयं प्राप्नोति । कल्याणमित्रः कल्याणंगूढद्वेषरहितंमित्रंयस्यसतथा । मित्रैः स्वोपद्रवपरिहाराय चापीति धानुष्कचूडामणिरितिपुरस्कृतः ॥ १८ ॥ **रामानु०** अनुचितएवानौचितः । 'प्रज्ञादिभ्यश्च' इतिस्वार्थेऽण्प्रत्ययः । उत्तरं उत्कृष्टं ॥ **स०** अनूचितः अनुचितः । यद्वा अनुहीनं उचितं उचितलं । भावप्रधानोनिर्देशः । यस्येति । 'अनुहीने' इतिविश्वः ॥ २१ ॥ **स०** कुशलं क्षेमवार्ता । कैकेय्याभरतसांनिध्यादप्रश्नः ॥ २२ ॥ **स०** अन्यमनाःक्वयन्तरविवाहासक्तचित्तः ॥ २३ ॥ **स०** प्रवृत्तिं पुनर्वार्तां ॥ ३० ॥

[पा०] १ क.—ट. विवासान्मयि. २ ग. ङ.—ट. राघवः. ३ च. छ. मनौचितः. ४ क. ख. ग. ङ.—ट. रामेण. ५ ङ. झ. ट. त्यजतस्स्वराज्यं. ६ छ. झ. ञ. ट. पदातेः. ७ क. ग. ङ. च. छ. झ. ञ. ट. नचान्यः. ८ तावज्जहं.

इतीव देवी वचनं महार्थं तं वानरेन्द्रं मधुरार्थमुक्त्वा ॥
श्रोतुं पुनस्तस्य वचोभिरामं रामार्थयुक्तं विरराम रामा ॥ ३१ ॥
सीताया वचनं श्रुत्वा मारुतिर्भीमविक्रमः ॥ शिरस्यञ्जलिमाधाय वाक्यमुत्तरमब्रवीत् ॥ ३२ ॥
न त्वामिहस्थां जानीते रामः कमललोचने ॥ तेन त्वां नानयत्याशु शचीमिव पुरन्दरः ॥ ३३ ॥
श्रुत्वैव तु वचो मह्यं क्षिप्रमेष्यति राघवः ॥ चमूं प्रकर्षन्महतीं हर्यृक्षगणसंकुलाम् ॥ ३४ ॥
विष्टम्भयित्वा बाणौघैरक्षोभ्यं वरुणालयम् ॥ करिष्यति पुरीं लङ्कां काकुत्स्थः शान्तराक्षसाम् ॥३५॥
तत्र यद्यन्तरा मृत्युर्यदि देवाः सहासुराः ॥ स्थास्यन्ति पथि रामस्य स तानपि वधिष्यति ॥ ३६ ॥
तवादर्शनजेनार्ये शोकेन समभिप्लुतः ॥ न शर्म लभते रामः सिंहार्दित इव द्विपः ॥ ३७ ॥
मलयेन च विन्ध्येन मेरुणा मन्दरेण च ॥ दर्दुरेण च ते देवि शपे मूलफलेन च ॥ ३८ ॥
यथा सुनयनं वल्गु बिम्बोष्ठं चारुकुण्डलम् ॥ मुखं द्रक्ष्यसि रामस्य पूर्णचन्द्रमिवोदितम् ॥ ३९ ॥
क्षिप्रं द्रक्ष्यसि वैदेहि रामं प्रस्रवणे गिरौ ॥ शतक्रतुमिवासीनं नाकपृष्ठस्य मूर्धनि ॥ ४० ॥

यस्य प्रवृत्तिं शृणुयां शृणोमि । तावज्जिजीविषेयं जीवेयं । इच्छाया इष्यमाणप्रधानत्वादिष्यमाणं जीवनमिहाभिधीयते । रामः " न मांसं राघवो भुङ्क्ते " इत्युक्तरीत्या भोजनं, " अनिद्रः सततं रामः " इति निद्रां च हित्वा समुद्रं बद्ध्वा समागच्छन् तापार्ते प्रपां गते तस्यां भिन्नपानीयपात्रायां सत्यामिव मयि नष्टायां न जीवेत् । अतस्तदागमनपर्यन्तं मया जीवितव्यं परतन्त्रशरीरत्वात् । तदागमनानन्तरमपि यदि जीविष्यामि तदेत्थं वदेदिति भावः । एतावत्पर्यन्तं वानरेति संबोध्य संप्रति दूतेत्याह—रामविषयप्रणयरोषस्य दूतपर्यन्तं व्यापनात् । तेन प्रहितः खलु भवानपीति भावः । प्रणयरोषाभावपक्षेपि—न चास्येति ॥ अस्य माता चास्मिन्स्नेहात् मत्तः न विशिष्टा मया न समा च । यथाहमस्मिन् स्निग्धा तथानान्यइत्यर्थः । एतदेवोत्तरार्धेन समर्थयति—तावदिति ॥ ३० ॥ इतीव पूर्वं कतिपयानर्थान्विविच्योक्तवान् । संप्रति प्रणयधारासूक्ष्ममृषीणामपदं हि तत इतीवेत्याह—देवी । वल्लभाया व्यवहारो बहिष्ठानां न प्रतिभाति हि । वचनं महार्थं न केवलं बहिष्ठानां देशिकानामस्माकमपीत्यर्थः । महार्थमित्युक्तेः । तं वानरेन्द्रं । सुग्रीवस्य शेषत्वेभिषिक्तत्वेपि पारतन्त्र्ये हनुमानभिषिक्त इत्यर्थः । मधुरार्थं माधुर्येण मध्ये हनुमान्न वक्तुमारभतेति भावः । उक्त्वा स तदीयाश्च तयाभिवर्धन्ते तथोक्त्वा । श्रोतुं पुनस्तस्य वचोभिरामं स्ववचनानुरूपोत्तरं श्रोतुं । रामार्थयुक्तं रामप्रयोजनयुक्तं रामरूपाभिधेययुक्तं वा । विरराम स्वयं चिरभाषणात्स्वामिन्यां भाषमाणायां मध्ये भृत्येनोक्त्ययोगाच्च तूष्णींभूतस्यावकाशप्रदानमकरोत् । रामा पारंपर्यं विना साक्षाद्वचःसौन्दर्यदर्शनं रामेण न लब्धं हीति मुनिः खिद्यति ॥ ३१—३२ ॥ रामः न जीवेयं क्षणमपि विना तामसितेक्षणामित्यध्यवसायी। कथं नागच्छेत् । कमललोचने त्वन्नयनसौन्दर्यं दर्पणतलेपि किंन दृष्टवती भवती । एतत्सौन्दर्यवतीं कथं त्वां विना स तिष्ठेत् । तेन अनेन हेतुना । आशु त्वां नानयति । शचीं पुरन्दर इव । अनुद्वादहस्तगतां शचीमिन्द्रः कंचित्कालमविज्ञाय ज्ञानानन्तरं यथा आनीतवान् तथेति भावः ॥ ३३ ॥ मह्यं मम । व्यत्ययेन षष्ठ्यर्थे चतुर्थी ॥ ३४ ॥ समुद्रं कथमतिक्रमिष्यतीत्यत्राह—विष्टम्भयित्वेति ॥ विष्टम्भयित्वा स्तब्धं कृत्वेत्यर्थः ॥ ३५ ॥ स्थास्यन्ति प्रतिबन्धकतयेति शेषः ॥ ३६—३७ ॥ गिरीणां स्वजीवनस्थानत्वात्तैः शपति—मलयेनेति ॥ दर्दुरो नाम मलयपरिसरवर्ती चन्दनप्रभवः कश्चित्पर्वतः ॥ ३८ ॥ यथेति तथा शप इति पूर्वेणान्वयः ॥ ३९ ॥ नाकपृष्ठो नाम

ती० नागराजस्य ऐरावतस्य । नाकपृष्ठस्येतिपाठे स्वर्गोपरीत्यर्थः ॥ ति० प्रस्रवणेगिरौविद्यमानमपि । इहद्रक्ष्यसीत्यर्थः । नागपृष्ठस्यमूर्धनि ऐरावतोपरिस्थितमिन्द्रमिवमत्पृष्ठगंरामंद्रक्ष्यसीत्यर्थः । शि० नागाः गजाः पृष्ठे पार्श्वेइत्यर्थः । यस्यतस्य ॥ ४० ॥

[पा०] १ क. हनूमान्वाक्यमब्रवीत्. २ क. त्वामिहस्थांनजानीते. ३ ग. ङ.—ट. कमललोचनः. ४ ङ. ञ. ट. परिपूरितः. ५ ग.—ट. मन्दरेणचतेदेविशपेमूलफलेनच । मलयेनचविन्ध्येनमेरुणादर्दुरेणच. ६ ख. च. छ. नागराजस्य. ञ. ञ. ट. नागपृष्ठस्य.

न मांसं राघवो भुङ्क्ते न चापि मधु सेवते ॥ वन्यं सुविहितं नित्यं भक्तमश्नाति पञ्चमम् ॥ ४१ ॥
नैव दंशान्न मशकान्न कीटान्न सरीसृपान् ॥ राघवोपनयेद्भात्रात्त्वद्गतेनान्तरात्मना ॥ ४२ ॥
नित्यं ध्यानपरो रामो नित्यं शोकपरायणः ॥ नान्यच्चिन्तयते किंचित्स तु कामवशं गतः ॥४३॥
अनिद्रः सततं रामः सुप्तोपि च नरोत्तमः ॥ सीतेति मधुरां वाणीं व्याहरन्प्रतिबुध्यते ॥ ४४ ॥
दृष्ट्वा फलं वा पुष्पं वा यद्वाऽन्यत्सुमनोहरम् ॥ बहुशो हा प्रियेत्येवं शंसंस्त्वामभिभाषते ॥ ४५ ॥
स देवि नित्यं परितप्यमानस्त्वामेव सीतेत्यभिभाषमाणः ॥
दृढव्रतो राजसुतो महात्मा तवैव लाभाय कृतप्रयत्नः ॥ ४६ ॥
सा रामसंकीर्तनवीतशोका रामस्य शोकेन समानशोका ॥
शरन्मुखे साम्बुदशेषचन्द्रा निशेव वैदेहसुता बभूव ॥ ४७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

इन्द्रस्यासाधारणस्वर्गस्थानविशेषः ॥ ४० ॥ न मांसमिति "दृङ्मनःसङ्गसङ्कल्पजागराः कृशताऽरतिः । ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश" इति दशावस्थास्वरतिरनेनोच्यते । मांसाद्यभोजनं अरत्या ततः पूर्वं तद्भोजनोक्तेः । वन्यं वने भवं कन्दमूलादिकं । सुविहितं वानप्रस्थयोग्यत्वेन विहितं । भक्तं अन्नं । पञ्चमं प्रातःसङ्गवमध्याह्नापराह्णसायंरूपेषु कालेषु पञ्चमकालिकं शरीरधारणमात्रोपयुक्तं भुङ्क्ते इत्यर्थः ॥ ४१ ॥ अथ मनःसङ्गावस्थामाह—नैवेति ॥ दंशास्तु वनमक्षिकाः तान् । मशकांश्चेत्यनेन दंशमशकापरिज्ञानमुक्तं । कीटसरीसृपोक्त्या उपरिशरीरं चरतामनिवृत्तिरुच्यते । तत्र हेतुः त्वद्गतेनान्तरात्मना । परकायप्रविष्टस्य कथं त्यक्तशरीरविकृतिज्ञानं । तत्र स्थितः खलु तत्रत्यपीडां ज्ञास्यतीति भावः ॥ ४२—४३ ॥ तथास्य जागरावस्थामाह—अनिद्र इति ॥ अनिद्रः सततं रामः निद्रया सर्वदा कालक्षेपार्होपि संततमनिद्रोभूत् । सुप्तोपिचेत्यनेन परगतार्थानुसंधानाभाव उच्यते । नरोत्तमः अभिमतविश्लेषे तथावस्थानमेव हि पुरुषोत्तमत्वस्य लक्षणमिति भावः । सीतेति अप्राकृतसौन्दर्याद्यनुसंधानेन वासनावशाद्विलपति । मधुरां वाणीं । वासनावशाद्विलपत्यपिशब्दस्वभावाद्रसनाजलस्यन्दिनी भवतीत्यर्थः । प्रतिबुध्यते क्लेशहीनदशाविगमात्पुनरपि बाधकोद्दीपनसंदर्शनेन बाधार्हः स्थित इत्यर्थः ॥ ४४—४६ ॥ रामसद्भावातिशङ्क्या कश्चिच्छोकः सीतायाः रामविरहेण कश्चिच्छोकः । तत्राद्यो हनुमदुक्त्या निवृत्तः द्वितीयस्तु वर्तत इत्याह—रामस्य शोकेन समानशोका तद्विरहकृतत्वेन तत्तुल्यशोका । अधिकशोकस्तु निवृत्त इति भावः । यद्वा रामसंकीर्तनेन वीतशोकापि नैवं दंशान्न मशकानित्यादिश्रवणेन रामतुल्यशोका प्रकाशाप्रकाशशरन्मुखनिशेवाभूदित्यर्थः ॥ ४७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्त्रिंशः सर्गः ॥ ३६ ॥

ती० भक्तं अन्नं पञ्चमं पञ्चानामन्नानांपूरणं । वानप्रस्थाहिमूलफलादिकंपञ्चधाकृत्वादेवपित्रतिथिभूतेभ्यस्तद्भागान्दत्वा पञ्चमं स्वयंभुञ्जते । यद्वा षोडशारण्यवासिनइत्युक्तवानप्रस्थभोज्यस्यपञ्चमांशंभुङ्क्ते । अनेनरामस्याल्पाहारतोक्ता ॥ ति० पञ्चमं कालं प्राप्येतिशेषः । यद्वा प्रातस्सायंसायंप्रातरितिकालचतुष्टयंलक्ष्यं पञ्चमेप्रातःकालइत्यर्थः । दिनद्वयमतीत्यभुङ्क्तइत्यर्थः । शि० मांसं सुग्रीवसंसर्गेणवनेपि प्राप्तराज्यभोगं । नभुङ्क्ते नकरोति । वन्यं फलादिरूपंअन्नं पञ्चमं पूर्वभोज्यापेक्षयापञ्चमं ॥ ४१ ॥ ति० स्त्रीमनोहरं स्त्रीसंनिधानेमनोहरं । स्त्रीणांमनोहरंवा । श्वसन् दीर्घोच्छ्वासंत्यजन् ॥ ४५ ॥ ती० नमांसंराघवोभुङ्क्तेइत्युक्तशोकेनहेतुना समानशोका ॥ ति० नमांसंराघवोभुङ्क्तेइत्युक्तेनरामशोकेन समानशोका । शरत् लुप्तषष्ठीकं । शरदोनिशेव प्रकाशाप्रकाशयुक्तशरन्निशेवहर्षशोकवतीबभूव ॥ ४७ ॥ इतिषट्त्रिंशःसर्गः ॥ ३६ ॥

[पा०] १ ङ. ज. झ. ट. नचैव. २ ख. देवंसतु. ३ क. रात्रौ. ४ क. ग. घ. ङ. ज. झ. ट. यच्चान्यत्स्त्रीमनोहरं. च. छ. ञ. यद्वान्यत्स्त्रीमनोहरं. ५ क. शोचंस्त्वां. ट. स्मरंस्त्वां. ६ ग. ङ. झ. ट. धृतव्रतो. ७ ङ. झ. शरन्मुखेनांबुद. च. छ. ञ. शरन्मुखेसाम्बुदचन्द्रशे ा.

सप्तत्रिंशः सर्गः ॥ ३७ ॥

स्ववियोगहेतुकरामशोकातिरेकश्रवणखिन्नयासीतया सत्वरंरामसमानयनंचोदितेनहनुमता सीताशोकासहनेनतांप्रति तस्याःस्वपृष्ठारोपणेनरामसमीपप्रापणोक्तिः ॥ १ ॥ सीतया हनुमतोऽणुरूपतयास्वप्रापणासंभावनाशङ्कयोपहासे हनुमता तस्याःप्रत्ययजननाय मेरुतुल्यपरिमाणकपृथुतरशरीरपरिग्रहणम् ॥ २ ॥ सीतयातंप्रति बहुहेतूपन्यासेनतेनसहगमनस्यानौचित्यप्रतिपादनपूर्वकं सत्वरंरामस्यैवसमानयनचोदना ॥ ३ ॥

सीता तद्वचनं श्रुत्वा पूर्णचन्द्रनिभानना ॥ हनूमन्तमुवाचेदं धर्मार्थसहितं वचः ॥ १ ॥
अमृतं विषसंसृष्टं त्वया वानर भाषितम् ॥ यच्च नान्यमना रामो यच्च शोकपरायणः ॥ २ ॥
ऐश्वर्ये वा सुविस्तीर्णे व्यसने वा सुदारुणे ॥ रज्ज्वेव पुरुषं बद्ध्वा कृतान्तः परिकर्षति ॥ ३ ॥
विधिर्नूनमसंहार्यः प्राणिनां प्लवगोत्तम ॥ सौमित्रिं मां च रामं च व्यसनैः पश्य मोहितान् ॥ ४ ॥
शोकस्यास्य कदा पारं राघवोऽधिगमिष्यति ॥ प्लवमानः परिश्रान्तो हतनौः सागरे यथा ॥ ५ ॥
राक्षसानां वधं कृत्वा सूदयित्वा च रावणम् ॥ लङ्कामुन्मूलितां कृत्वा कदा द्रक्ष्यति मां पतिः ॥ ६ ॥
स वाच्यः संत्वरस्वेति यावदेव न पूर्यते ॥ अयं संवत्सरः कालस्तावद्धि मम जीवितम् ॥ ७ ॥
वर्तते दशमो मासो द्वौ तु शेषौ प्लवङ्गम ॥ रावणेन नृशंसेन समयो यः कृतो मम ॥ ८ ॥
विभीषणेन च भ्रात्रा मम निर्यातनं प्रति ॥ अनुनीतः प्रयत्नेन न च तत्कुरुते मतिम् ॥ ९ ॥
मम प्रतिप्रदानं हि रावणस्य न रोचते ॥ रावणं मार्गते सङ्घे मृत्युः कालवशं गतम् ॥ १० ॥
ज्येष्ठा कन्याऽनला नाम विभीषणसुता कपे ॥ तया ममेदमाख्यातं मात्रा प्रहितया स्वयम् ॥ ११ ॥
[अविन्ध्यो नाम मेधावी विद्वान्राक्षसपुङ्गवः । द्युतिमाञ्शीलवान्वृद्धो रावणस्य सुसंमतः ॥
रामक्षयमनुप्राप्तं रक्षसां प्रत्यचोदयत् ॥ न च तस्य स दुष्टात्मा शृणोति वचनं हितम् ॥ १३ ॥]
असंशयं हरिश्रेष्ठ क्षिप्रं मां प्राप्स्यते पतिः ॥ अन्तरात्मा हि मे शुद्धस्तस्मिंश्च बहवो गुणाः ॥ १४ ॥
उत्साहः पौरुषं सत्त्वमानृशंस्यं कृतज्ञता ॥ विक्रमश्च प्रभावश्च सन्ति वानर राघवे ॥ १५ ॥
चतुर्दश सहस्राणि राक्षसानां जघान यः ॥ जनस्थाने विना भ्रात्रा शत्रुः कस्तस्य नोद्विजेत् ॥ १६ ॥
न स शक्यस्तुलयितुं व्यसनैः पुरुषर्षभः ॥ अहं तस्य प्रभावज्ञा शक्रस्येव पुलोमजा ॥ १७ ॥
शरजालांशुमाञ्छूरः कपे रामदिवाकरः ॥ शत्रुरक्षोमयं तोयमुपशोषं नयिष्यति ॥ १८ ॥

यच्च नान्यमना इत्यमृतत्वे हेतुः । यच्छोकपरायण इति विषसंसृष्टत्वे ॥ २ ॥ रामवियोगो न स्वबुद्धिकृत इत्याह—ऐश्वर्य इति ॥ कृतान्तः दैवं ॥ ३ ॥ विधिः दैवं । असंहार्यः अनिवार्यः ॥ ४—७ ॥ दशमोमासः दशममासान्तः ॥ ८ ॥ निर्यातनं प्रत्यर्पणं ॥ ९—१४ ॥ लोकोत्तरेषु कार्येषु स्थेयान् प्रयत्न उत्साहः । पौरुषं तादृक्कार्यकरणं । सत्त्वं बलं । आनृशंस्यं अक्रूरत्वं । कृतज्ञता उपकारज्ञत्वं । विक्रमः शौर्यं । प्रभावः शक्तिः ॥ १५—१६ ॥ तुलयितुं चालयितुं ॥ १७—

शि० ऐश्वर्येव्यसनेवाविद्यमानंपुरुषं रज्ज्वाबद्ध्वेवकृतान्तःकालःपरिकर्षति । एतेन रावणविध्वंसोऽवश्यंभवितेतिसूचितं ॥ ३ ॥ ति० कन्या अजातपुरुषसंबन्धा । एतत् विभीषणानुनयनं । इदमेवाग्रे रामश्रुतंविभीषणस्यनिश्शङ्कपरिग्रहाभिषेकयोर्बीजं ॥ ११ ॥ ति०व्यसनैः व्यसनदातृभीराक्षसैः । तुलयितुं उपमितुं । तस्यतत्वंचममप्रत्यक्षमेवेत्याह—अहंतस्येति । तद्रूपत्वादितिगूढं ॥ १७ ॥

[पा०] १ क. ग. ङ. च. छ. झ. ञ. ट. सासीतावचनं. घ. सीताचवचनं. २ ङ. च. छ. झ. ञ. ट. विषसंपृक्तं. ख. घ. विषसंस्पृष्टं. ३ च. छ. ज. शोकस्यच. ४ ङ. झ. ट. कथं. ५ ङ. च. छ. झ. ञ. ट. परिक्रान्तो. ६ क—घ. क्षयं. ७ ङ. झ. ट. सुन्मथितां. ८ घ. मनः. ९ ङ. झ. ञ. कन्याकला. १० झ. ममैतदाख्यातं. ११ च. छ. ट. मात्राऽभिहितया १२ इदंश्लोकद्वयं ङ—ट. पाठेषुदृश्यते. १३ क.—घ. झ. ट. आशंसेयं. १४ ग. ङ. च. छ. झ. ञ. ट. तस्यानुभावज्ञा.

इति संजल्पमानां तां रामार्थे शोककर्शिताम् ॥ अश्रुसंपूर्णनयनामुवाच वचनं कपिः ॥ १९ ॥
कृत्वैव[2] तु वचो मह्यं क्षिप्रमेष्यति राघवः ॥ चमूं प्रकर्षन्महतीं हर्यृक्षगणसंकुलाम् ॥ २० ॥
अथवा मोचयिष्यामि त्वामद्यैव वरानने[3] ॥ अस्माद्दुःखादुपारोह मम पृष्ठमनिन्दिते ॥ २१ ॥
त्वां तु पृष्ठगतां कृत्वा संतरिष्यामि सागरम् ॥ शक्तिरस्ति हि मे वोढुं लङ्कामपि सरावणाम्[4] ॥२२॥
अहं प्रस्रवणस्थाय राघवायाद्य मैथिलि ॥ प्रापयिष्यामि शक्राय हव्यं[5] हुतमिवानलः ॥ २३ ॥
द्रक्ष्यस्यद्यैव वैदेहि राघवं सहलक्ष्मणम् ॥ व्यवसायसमायुक्तं विष्णुं दैत्यवधे यथा ॥ २४ ॥
त्वद्दर्शनकृतोत्साहमाश्रमस्थं महाबलम् ॥ पुरन्दरमिवासीनं नाकराजस्य[6] मूर्धनि ॥ २५ ॥
पृष्ठमारोह मे देवि मा विकाङ्क्षस्व शोभने ॥ योगमन्विच्छ रामेण शशाङ्केनेव रोहिणी[7] ॥ २६ ॥
कथयन्तीव[8] चन्द्रेण सूर्येण च महार्चिषा ॥ मत्पृष्ठमधिरुह्य[9] त्वं तेराकाशमहार्णवौ[10] ॥ २७ ॥
न हि मे संप्रयातस्य त्वामितो नयतोऽन्तरे ॥ अनुगन्तुं गतिं शक्ताः सर्वे लङ्कानिवासिनः ॥ २८ ॥
यथैवाहमिह प्राप्तस्तथैवाहमसंशयः[11] ॥ यास्यामि पश्य वैदेहि त्वामुद्यम्य विहायसम्[12] ॥ २९ ॥
मैथिली तु हरिश्रेष्ठाच्छ्रुत्वा वचनमद्भुतम् ॥ हर्षविस्मितसर्वाङ्गी[13] हनुमन्तमथाब्रवीत् ॥ ३० ॥
हनुमन्दूरमध्वानं कथं मां[14] वोढुमिच्छसि ॥ तदेव खलु ते मन्ये कपित्वं हरियूथप ॥ ३१ ॥
कथं वाऽल्पशरीरस्त्वं मामितो नेतुमिच्छसि ॥ सकाशं मानवेन्द्रस्य भर्तुर्मे प्लवगर्षभ ॥ ३२ ॥
सीतायाः[15] वचनं श्रुत्वा हनुमान्मारुतात्मजः ॥ चिन्तयामास लक्ष्मीवान्नवं परिभवं कृतम् ॥ ३३ ॥
न मे जानाति सत्त्वं वा प्रभावं वासितेक्षणा ॥ तस्मात्पश्यतु वैदेही यद्रूपं मम कामतः[16] ॥ ३४ ॥
इति संचिन्त्य हनुमांस्तदा प्लवगसत्तमः ॥ दर्शयामास वैदेह्याः स्वरूपमरिमर्दनः ॥ ३५ ॥
स तस्मात्पादपाद्धीमानाप्लुत्य प्लवगर्षभः ॥ ततो वर्धितुमारेभे सीताप्रत्ययकारणात् ॥ ३६ ॥
मेरुमन्दरसंकाशो बभौ दीप्तानलप्रभः ॥ अग्रतो व्यवतस्थे च सीताया वानरोत्तमः ॥ ३७ ॥

---

२४ ॥ नाकराजस्य मूर्धनि । नाकपृष्ठसंज्ञस्य मूर्धनि । नगराजस्येति पाठे मेरोरित्यर्थः ॥ २५ ॥ मा विकाङ्क्षस्व मोपेक्षिष्ठाः ॥ २६ ॥ चन्द्रेण कथयन्तीव चन्द्रेण भाषमाणेव तरेत्यन्वयः ॥२७—२९॥ हर्षविस्मितसर्वाङ्गी हर्षेण पुलकितसर्वाङ्गी ॥ ३० —३३ ॥ न मे जानाति सत्त्वं वा प्रभावं वासितेक्षणा । तस्मात्पश्यतु वैदेही यद्रूपं मम कामतः ॥ इति पाठः । अन्यथा पाठे वक्ष्यमाणेन विरोधः स्यात् ॥ ३४ ॥ स्वरूपं स्वस्य शरीरं ॥ ३५ ॥ एतदेवाह— स तस्मादिति ॥ अयं श्लोको वर्धनार्थं वृक्षादवरोहणं दर्शयति स्म । अनेन सोवतीर्य द्रुमादिति पूर्वं द्रुमाग्रात्सीतासमीपस्थशाखायामवतरणमुक्तं । अत्र भूमाविति बोध्यं ॥ ३६ ॥ अग्रतोऽव्यवतस्थे । संभाषणाय

ति० नगराजस्य श्रेष्ठस्यप्रस्रवणगिरेरित्यर्थः ॥२५॥ ति० कथयन्तीव संगतव्योरामइतिवचनंकथयन्तीव । शशिनारोहिणीवसंगमिष्यसीत्यन्वयः । एतद्वचनसमकालमेवरामसमीपंप्रापयिष्यामीत्यर्थः । यथातद्वचने नप्रयासः एवमनायासेनत्वांनयामीत्यर्थोवा । स० त्वत्पृष्ठारोहणेकिंफलमित्यतआह—कथयन्तीति । त्वंमत्पृष्ठारोहिणीति रोहिणी अतिसुखात्मकत्वाच्छशीरामः । यद्वा शशीरामः'नक्षत्राणामहंशशी'इतिश्रीभगवदुक्तेः । कथयन्तीवसंगमिष्यसि । रामेणसंगतव्यमित्यालापनसमयएवसंगमिष्यसि । अनेनातित्वराद्योत्यते ॥ २७ ॥ ती० पादपात् पादपमूलात् । आप्लुत्य शरीरवर्धनवेगकृतशाखाभङ्गध्वनिनाराक्षस्योज्ञास्यन्तीतिमत्वा

[पा०] १ ग.—ट. संपूर्णवदनां. २ ङ. झ. ट. श्रुत्वैवच. क. घ. च. छ. ज. ञ. श्रुत्वैवतु. ३ ङ. च. छ. झ. ञ. ट. सराक्षसात्. क. ख. हिराक्षसात्. घ. ज. सरावणात्. ४ घ. हुतंहव्यं. ५ क. क्षिप्रंद्रक्ष्यसि. ६ ख. ग. ङ. च. छ. झ. ञ. ट. नगराजस्य. ७ क. ग. घ. च. छ. ज. ञ. ट. पौलोमीवमहेन्द्रेणसूर्येणेवसुवर्चला. ङ. झ. कथयन्तीवशशिनासंगमिष्यसिरोहिणी. ८ ङ.—ट. मधिरोहत्वं. ९ ग. घ. ङ. झ. ट. तराकाशंमहार्णवं. १० ग. ङ.—ट. मसंशयं. ११ ख. घ. विहायसा. १२ घ. सासीतास्मितपूर्वंहि. १३ ङ. झ. ट. मानेतुं. १४ घ. ङ. झ. ट. सीतायास्तुवचः. १५ क. काङ्क्षतः.

हरिः पर्वतसंकाशस्ताम्रवक्त्रो महाबलः ॥ वज्रदंष्ट्रनखो भीमो वैदेहीमिदमब्रवीत् ॥ ३८ ॥
सपर्वतवनोद्देशां साट्टप्राकारतोरणाम् ॥ लङ्कामिमां सनाथां वा नयितुं शक्तिरस्ति मे ॥ ३९ ॥
तदवस्थाप्यतां बुद्धिरलं देवि विकाङ्क्षया ॥ विशोकं कुरु वैदेहि राघवं सहलक्ष्मणम् ॥ ४० ॥
तं दृष्ट्वा भीमसंकाशमुवाच जनकात्मजा ॥ पद्मपत्रविशालाक्षी मारुतस्यौरसं सुतम् ॥ ४१ ॥
तव सत्त्वं बलं चैव विजानामि महाकपे ॥ वायोरिव गतिं चापि तेजश्चाग्नेरिवाद्भुतम् ॥ ४२ ॥
प्राकृतोऽन्यः कथं चेमां भूमिमागन्तुमर्हति ॥ उदधेरप्रमेयस्य पारं वानरपुङ्गव ॥ ४३ ॥
जानामि गमने शक्तिं नयने चापि ते मम ॥ अवश्यं संप्रधार्यांशु कार्यसिद्धिर्महात्मनः ॥ ४४ ॥
अयुक्तं तु कपिश्रेष्ठ मम गन्तुं त्वयाऽनघ ॥ वायुवेगसवेगस्य वेगो मां मोहयेत्तव ॥ ४५ ॥
अहमाकाशमापन्ना ह्युपर्युपरि सागरम् ॥ प्रपतेयं हि ते पृष्ठाद्भयाद्वेगेन गच्छतः ॥ ४६ ॥
पतिता सागरे चाहं तिमिनक्रझषाकुले ॥ भवेयमाशु विवशा यादसामन्नमुत्तमम् ॥ ४७ ॥
न च शक्ष्ये त्वया सार्धं गन्तुं शत्रुविनाशन ॥ कलत्रवति संदेहस्त्वय्यपि स्यादसंशयः ॥ ४८ ॥
ह्रियमाणां तु मां दृष्ट्वा राक्षसा भीमविक्रमाः ॥ अनुगच्छेयुरादिष्टा रावणेन दुरात्मना ॥ ४९ ॥
तैस्त्वं परिवृतः शूरैः शूलमुद्गरपाणिभिः ॥ भवेस्त्वं संशयं प्राप्तो मया वीर कलत्रवान् ॥ ५० ॥
सायुधा बहवो व्योम्नि राक्षसास्त्वं निरायुधः ॥ कथं शक्ष्यसि संयातुं मां चैव परिरक्षितुम् ॥५१॥
युध्यमानस्य रक्षोभिस्तव तैः क्रूरकर्मभिः ॥ प्रपतेयं हि ते पृष्ठाद्भयार्ता कपिसत्तम ॥ ५२ ॥
अथ रक्षांसि भीमानि महान्ति बलवन्ति च ॥ कथंचित्सांपराये त्वां जयेयुः कपिसत्तम ॥ ५३ ॥
अथवा युध्यमानस्य पतेयं विमुखस्य ते ॥ पतितां च गृहीत्वा मां नयेयुः पापराक्षसाः ॥ ५४ ॥
मां वा हरेयुस्त्वद्वस्ताद्विशसेयुरथापि वा ॥ अव्यवस्थौ हि दृश्येते युद्धे जयपराजयौ ॥ ५५ ॥
अहं वाऽपि विपद्येयं रक्षोभिरभितर्जिता ॥ त्वत्प्रयत्नो हरिश्रेष्ठ भवेन्निष्फल एव तु ॥ ५५ ॥
कामं त्वमसि पर्याप्तो निहन्तुं सर्वराक्षसान् ॥ राघवस्य यशो हीयेत्त्वया शस्तैस्तु राक्षसैः ॥ ५७ ॥
अथवाऽऽदाय रक्षांसि न्यसेयुः संवृते हि माम् ॥ यत्र ते नाभिजानीयुर्हरयो नापि राघवौ ॥
आरम्भस्तु मदर्थोऽयं ततस्तव निरर्थकः ॥ ५८ ॥

वृक्षमूलगतो बभूवेत्यर्थः ॥ ३७—३९ ॥ अवस्थाप्यतां निश्चलीक्रियतां। विकाङ्क्षया उपेक्षया ॥ ४०–४३ ॥ संप्रधार्या विचारणीया ॥ ४४ ॥ स्वप्रापणे प्रधानं दोषं हृदि कृत्वा आपाततो दोषमाह—अयुक्तमिति ॥ ४५ ॥ उपर्युपरि सागरमिति। " उपर्यध्यधसस्सामीप्ये " इति द्विवचनं। 'धिगुपर्यादिषु'इति द्वितीया ॥ ४६ ॥ यादसां जलजन्तूनां ॥ ४७ ॥ कलत्रवति रक्ष्यवति त्वयि संदेहः स्यात्। मयि रक्ष्यायां त्वयि विपत्संदेहः स्यादित्यर्थः ॥ ४८ ॥ एतदेव प्रपञ्चयति—ह्रियमाणामित्यादिना ॥ ४९ ॥ त्वं तैः परिवृतो भवेः। कलत्रवान् रक्ष्यवान्। त्वं संशयं प्राप्तश्च भवेरिति योजना ॥ ५० ॥ संयातुं सम्यग्योद्धुं ॥ ५१ ॥ पूर्वश्लोकोक्तं समर्थयति—युध्यमानस्येत्यादिना ॥ ५२ ॥ सांपराये युद्धे ॥ ५३ ॥ विमुखस्य युद्धपरवशस्येत्यर्थः ॥ ५४—५७ ॥ संवृते गूढ-

---

ऽन्यत्रापहृतवानित्यर्थः ॥ ३६ ॥ ति० कलत्रवति स्त्रियासहगन्तरि। संदेहः राक्षसानामितिशेषः। स० कलत्रवति मद्रूपकल-

[पा०] १ क.—ट. दृष्टाचलसंकाशं. २ ङ.—झ. ट. गतिश्चापि. ३ ङ. झ. सिद्धिरिवात्मनः. क. च. छ. ज. सिद्धिरिहात्मनः. ४ ग. ङ.—ट. मयागन्तुं. ५ ग. ङ.—ट. त्वयासह. ६ क. ग. ङ.—ट. मासक्ता. ७ ङ.—ट. द्रुवोवेगेन. ८ च. छ. ज. नाहंशक्ष्ये. ९ क. संयोद्धुं. १० क. ग. ङ. च. छ. झ. ञ. ट. रक्षोभिस्तततस्तैः. घ. रक्षोभिस्समस्तैः. ११ ग. च. छ. नयेयुः. १२ क. ख. ग. ङ.—ट. राघवः. १३ क. प्रयत्नस्तुमदर्थाय.

त्वया हि सह रामस्य महानागमने गुणः ॥ ५९ ॥
मयि जीवितमायत्तं राघवस्य महात्मनः ॥ भ्रातॄणां च महाबाहो तव राजकुलस्य च ॥ ६० ॥
तौ निराशौ मदर्थं तु शोकसंतापकर्शितौ ॥ सह सर्वर्क्षहरिभिस्त्यक्ष्यतः प्राणसंग्रहम् ॥ ६१ ॥
भर्तृभक्तिं पुरस्कृत्य रामादन्यस्य वानर ॥ नं स्पृशामि शरीरं तु पुंसो वानरपुङ्गव ॥ ६२ ॥
यदहं गात्रसंस्पर्शं रावणस्य बलाद्गता ॥ अनीशा किं करिष्यामि विनाथा विवशा सती ॥ ६३ ॥
यदि रामो दशग्रीवमिह हत्वा सबान्धवम् ॥ मामितो गृह्य गच्छेत तत्तस्य सदृशं भवेत् ॥ ६४ ॥
श्रुता हि दृष्टाश्च मया पराक्रमा महात्मनस्तस्य रणावमर्दिनः ॥
न देवगन्धर्वभुजङ्गराक्षसा भवन्ति रामेण समा हि संयुगे ॥ ६५ ॥
समीक्ष्य तं संयति चित्रकार्मुकं महाबलं वासवतुल्यविक्रमम् ॥
सलक्ष्मणं को विषहेत राघवं हुताशनं दीप्तमिवानिलेरितम् ॥ ६६ ॥
सलक्ष्मणं राघवमाजिमर्दनं दिशागजं मत्तमिव व्यवस्थितम् ॥
सहेत को वानरमुख्य संयुगे युगान्तसूर्यप्रतिमं शरार्चिषम् ॥ ६७ ॥
स मे हरिश्रेष्ठ सलक्ष्मणं पतिं सयूथपं क्षिप्रमिहोपपादय ॥
चिराय रामं प्रति शोककर्शितां कुरुष्व मां वानरमुख्य हर्षिताम् ॥ ६८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

प्रदेशे ॥५८—५९॥ तवराजकुलस्य सुग्रीवराजकुलस्य ॥६०—६२॥ अनीशा स्वयं किंचित्कर्तुमसमर्था । विनाथा विगतस्वामिका । विवशा विचेष्टा ॥ ६३—६४ ॥ प्रथमहिशब्दो गुणप्रसिद्धौ । द्वितीयो निस्समत्वप्रसिद्धौ ॥ ६५—६७ ॥ हर्षितां हर्षमासादितां । उत्तरोत्तरहर्षवतीमित्यर्थः । अनया भक्तिकया उपायान्तरं स्वरूपविरुद्धं भगवत्प्राप्तौ स एवोपाय इति दर्शितः ॥ ६८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तत्रिंशस्सर्गः ॥ ३७ ॥

त्रवतिरामे । त्वयि त्वद्विषये । असंशयंयथातथा संदेहः परपुरुषेणसहैकाऽऽयातेतिसंदेहः ॥ ४८ ॥ **ती०** ननुरावणाङ्गसंस्पर्शः कथंस्यादित्यतआह—भर्तुरिति । यस्मात्कारणात्भर्तुर्भक्तिंपुरस्कृत्य भर्तुर्भक्त्यालक्ष्मणःप्रस्थापितः । तस्माद्रावणस्यगात्रसंस्पर्शबलाद्गतेतिसंबन्धः । हासीतेलक्ष्मणेतिमारीचवाक्यंश्रुत्वा रामानर्थशङ्कयाभर्तृभक्त्यालक्ष्मणप्रस्थापनात्प्राप्तोऽयमनर्थोकामकृतइतिभावः । अनीशा स्वयंकिंचित्कर्तुमशक्नुवती । विवशा विचेष्टा । विनाथा विगतस्वामिका असंनिहितनाथेत्यर्थः ॥ ६२—६३ ॥ **ति०** तत्तस्यसदृशं स्वमहिम्नासगर्णशत्रुंहत्वामन्नयनं । सगणरावणवधार्थमेवावतारात् तस्यचमद्गमनेऽसंभवात् । एवंचस्वकार्यानिष्पत्त्यागतायामपिकुज्ञेदितिगूढं ॥ ६४ ॥ **ति०** तादृशबलंचतस्यमयासुविदितमित्याह—श्रुताश्चेति । विश्वामित्रयज्ञादौकृताः वालिवधादयश्चश्रुताः । अन्येदृष्टाः ॥ **स०** रणावमर्दिनः रणेवैर्यवमर्दी । रणेअवन्तिरक्षयन्तिआगच्छन्तिस्वानितिवा रणावाः । तान्मर्दीतिवा ॥ ६५ ॥ **स०** वासवतुल्यविक्रमं वासवोपितुल्यविक्रमः योग्यतानुसारिपराक्रमोयेनसतथा । इतरोर्थःस्फुटः ॥ ६६ ॥ **स०** सयूथपं ससुग्रीवं । कपिश्रेष्ठ वानरवीरेति प्रलापकालत्वाद्विरुक्तिः । यद्वा रामंप्रतिशोककर्शितां नरवीरेणरामेणहर्षितां कुरुष्वेत्यर्थः ॥ ६८ ॥ इतिसप्तत्रिंशःसर्गः ॥ ३७ ॥

[**पा०**] १ ङ.—ट. राघवस्यामितौजसः. २ क.—घ. ज.—ट. भर्तुर्भक्तिं. ३ ङ. झ. ट. नाहंस्प्रष्टुंस्वतोगात्रमिच्छेयं वानरोत्तम. च. छ. ज. ञ. मयांपुनःपुमानन्योनयुक्तःस्प्रष्टुमात्मना. ४ ग.—ट. गतावलात्. ५ क. ख. घ.—ट. सराक्षसं. ६ ङ. झ. ट. प्रियं. ७ क.—ज. ट. वानरवीर.

अष्टत्रिंशः सर्गः ॥ ३८ ॥

हनुमता रामप्रत्यायनायाभिज्ञानंयाचितयासीतया तंप्रति काकासुरवृत्तान्तस्याभिज्ञानत्वेननिवेदनचोदना ॥ १ ॥ तथा हनुमन्तंप्रति रामलक्ष्मणयोःक्रमेणाभिवादनकुशलप्रश्ननिवेदनचोदनपूर्वकं मासद्वयस्यसंकेतसमयावशिष्टत्वेष्येकमासपर्यन्तमेव स्वेनप्राणधारणप्रतिज्ञानेनसहाभिज्ञानान्तरत्वेनतस्मिन्स्वचूडामणिदानम् ॥ २ ॥

ततः स कपिशार्दूलस्तेन वाक्येन हर्षितः ॥ सीतामुवाच तच्छ्रुत्वा वाक्यं वाक्यविशारदः ॥ १ ॥
युक्तरूपं त्वया देवि भाषितं शुभदर्शने ॥ सदृशं स्त्रीस्वभावस्य साध्वीनां विनयस्य च ॥ २ ॥
स्त्रीत्वं न तु समर्थं हि सागरं व्यतिवर्तितुम् ॥ मामधिष्ठाय विस्तीर्णं शतयोजनमायतम् ॥ ३ ॥
द्वितीयं कारणं यच्च ब्रवीषि विनयान्विते ॥ रामादन्यस्य नार्हामि संस्पर्शमिति जानकि ॥ ४ ॥
एतत्ते देवि सदृशं पत्न्यास्तस्य महात्मनः ॥ का ह्यन्या त्वामृते देवि ब्रूयाद्वचनमीदृशम् ॥ ५ ॥
श्रोष्यते चैव काकुत्स्थः सर्वं निरवशेषतः ॥ चेष्टितं यत्त्वया देवि भाषितं मम चाग्रतः ॥ ६ ॥
कारणैर्बहुभिर्देवि रामप्रियचिकीर्षया ॥ स्नेहप्रस्कन्नमनसा मयैतत्समुदीरितम् ॥ ७ ॥
लङ्घाया दुष्प्रवेशत्वाद्दुस्तरत्वान्महोदधेः ॥ सामर्थ्यादात्मनश्चैव मयैतत्समुदीरितम् ॥ ८ ॥
इच्छामि त्वां समानेतुमद्यैव रघुबन्धुना ॥ गुरुस्नेहेन भक्त्या च नान्यथैतदुदाहृतम् ॥ ९ ॥
यदि नोत्सहसे यातुं मया सार्धमनिन्दिते ॥ अभिज्ञानं प्रयच्छ त्वं जानीयाद्राघवो हि तत् ॥१०॥
एवमुक्ता हनुमता सीता सुरसुतोपमा ॥ उवाच वचनं मन्दं बाष्पप्रग्रथिताक्षरम् ॥ ११ ॥
इदं श्रेष्ठमभिज्ञानं ब्रूयास्त्वं तु मम प्रियम् ॥ शैलस्य चित्रकूटस्य पादे पूर्वोत्तरे पुरा ॥ १२ ॥

तच्छ्रुत्वा तेन वाक्येन हर्षितः वाक्यमुवाच ॥१॥ युक्तरूपं युक्ततरमित्यर्थः । प्रशंसायां रूपप् । प्राशस्त्यंचात्र प्रकृत्यर्थवैशिष्ट्यं । स्त्रीस्वभावस्य भीरुत्वादेः । साध्वीनां पतिव्रतानां । विनयस्य वृत्तस्य ॥ २ ॥ विस्तीर्णं मामधिष्ठाय शतयोजनमायतं सागरं व्यतिवर्तितुं तर्तुं । स्त्रीत्वं न समर्थं हि । स्त्री न समर्थेत्यर्थः । यद्वा सागरस्य शतयोजनं आयतं विस्तीर्णं च मामधिष्ठायापि स्त्रीत्वं व्यतिवर्तितुं अपगन्तुं । न समर्थं हि । सागरस्य शतयोजनं यावत्तावदायतं तथा विस्तीर्णं च मामधितिष्ठन्त्या अपि तव स्त्रीत्वं भीरुत्वं नापगच्छतीत्यर्थः ॥ ३—५ ॥ त्वया चेष्टितं उद्बन्धनादिकं । भाषितं रावणं तृणीकृत्य फणितं । मम प्रत्युत्तरत्वेन कथितं च ॥ ६ ॥ बहुभिः कारणैः बहुभिरुपायैः । स्नेहप्रस्कन्नमनसा स्नेहशिथिलमनसा ॥ ७ ॥ लङ्घायाइति दुष्प्रवेशलङ्घाप्रवेशे दुस्तरसागरतरणे च मम शक्तिरस्तीति ज्ञापयितुमेवमुक्तमित्यर्थः ॥ ८ ॥ रघुबन्धुना रघुवंश्येन । " सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनास्समाः " इत्यमरः। रघुवंश्यानां बन्धुना तत्कीर्तिसंपादकेनेत्यथः । समानेतुं संगमयितुं । इच्छामि ऐच्छं ॥ ९—१० ॥ बाष्पप्रग्रथिताक्षरं बाष्पेण विघ्निताक्षरं । एकान्तवृत्तान्तस्मरणाद्बाष्पः ॥ ११ ॥ इदमित्यादिश्लोकद्वयमेकान्वयं ॥ चित्रकूटस्य पादे चित्रकूटप्रत्यन्तपर्वते । मन्दाकिन्या अदूरे सिद्धैराश्रिते प्राज्यमूलफलोदके

ती० यद्वा स्त्रीलमित्यत्र स्त्रीइतिच्छेदः । समर्थमितिलिङ्गव्यत्ययआर्षः । स्त्रीभूता त्वं सागरंव्यतिवर्तितुंनसमर्थासीत्यर्थः । स्त्रीणांभीरुस्वभावत्वात्तत्तुभूषणमेवेतिभावः । सागरस्यनिवर्तितुमितिपाठे सागरस्ययादृक्छतयोजनंतावदायतंविस्तीर्णमपिमामधिष्ठायनिवर्तयितुं उपगन्तुं स्त्री त्वं नसमर्थं नसमर्थेतियोजना ॥ ३ ॥ **ति०** ईदृशंवचनं त्वयासहनयास्यामीत्येतद्वचनंत्वद्भिन्नाईदृश्यामापदिईदृशंवचनंकाब्रूयात् ॥ ५ ॥ **ति०** चेष्टितं व्यापारः विलापादिरूपः । कारणैर्बहुभिरुपपन्नंयत्त्वयाममाग्रतोभाषितं तत् रामाग्रेउच्यमानगुणकेनमयाईरितं । काकुत्स्थोनिरवशेषतःश्रोष्यतइत्यन्वयइतिकतकः ॥ ६—७ ॥ **स०** श्रेष्ठं झटितिरामस्यसंदेहनिवर्तकत्वात् ॥ १२ ॥

[**पा०**] १ ङ.—ट. तोषितः. २ घ. स्त्रीस्वभावानां. ३ ङ. झ. ट. स्त्रीत्वान्नत्वंसमर्थासि. ४ क.—ट. संसर्गमिति. ५ ङ.—ट. भाषितंचममाग्रतः. ६ ङ. झ. ट. रघुनन्दिना. ७ च. छ. ज. ञ. सार्कं. ८ क. ग. घ. च. छ. तदा. ङ. ज.—ट. पदे.

तापसाश्रमवासिन्याः प्राज्यमूलफलोदके ॥ तस्मिन्सिद्धाश्रमे देशे मन्दाकिन्या ह्यदूरतः ॥ १३ ॥
तस्योपवनषण्डेषु नानापुष्पसुगन्धिषु ॥ विहृत्य सलिलक्लिन्ना तवाङ्के समुपाविशम् ॥ १४ ॥
ततो मांससमायुक्तो वायसः पर्यतुण्डयत् ॥ तमहं लोष्टमुद्यम्य वारयामि स्म वायसम् ॥ १५ ॥
दारयन्स च मां काकस्तत्रैव परिलीयते ॥ न चाप्युपारमन्मांसाद्भक्षार्थी बलिभोजनः ॥ १६ ॥
उत्कर्षन्त्यां च रशनां क्रुद्धायां मयि पक्षिणि ॥ स्रंसमाने च वसने ततो दृष्टा त्वया ह्यहम् ॥ १७ ॥
त्वयापहसिता चाहं क्रुद्धा संलज्जिता तदा ॥ भक्षगृध्नेन काकेन दारिता त्वामुपागता ॥ १८ ॥
आसीनस्य च ते श्रान्ता पुनरुत्सङ्गमाविशम् ॥ क्रुध्यन्ती च प्रहृष्टेन त्वयाऽहं परिसान्त्विता ॥ १९ ॥
बाष्पपूर्णमुखी मन्दं चक्षुषी परिमार्जती ॥ लक्षिताहं त्वया नाथ वायसेन प्रकोपिता ॥ २० ॥
परिश्रमात्प्रसुप्ता च राघवाङ्केऽप्यहं चिरम् ॥ पर्यायेण प्रसुप्तश्च ममाङ्के भरताग्रजः ॥
स तत्र पुनरेवाथ वायसः समुपागमत् ॥ २१ ॥
ततः सुप्तप्रबुद्धां मां रामस्याङ्कात्समुत्थिताम् ॥ वायसः सहसाऽऽगम्य विददार स्तनान्तरे ॥ २२ ॥
पुनः पुनरथोत्पत्य विददार स मां भृशम् ॥ ततः समुक्षितो रामो मुक्तैः शोणितबिन्दुभिः ॥ २३ ॥
वायसेन ततस्तेन बलवत्क्लिश्यमानया ॥ स मया बोधितः श्रीमान्सुखसुप्तः परन्तपः ॥ २४ ॥

तस्मिन्देशे तापसाश्रमवासिन्याः तापसाश्रमे वसन्त्या मम इदं वक्ष्यमाणं श्रेष्ठमभिज्ञानं प्रियंप्रति त्वं ब्रूया इति योजना ॥ १२—१३ ॥ रामाय सीतया वक्तव्यं वचनं हनुमन्तं प्रत्युच्यते--तस्येत्यादि ॥ १४ ॥ मांससमायुक्तः मांसप्रतिलुब्धः । "आयुक्तकुशलाभ्यां च—" इत्यत्र आयुक्तशब्दस्य तात्पर्यपरतया व्याख्यानात् । लोष्टं मृत्पिण्डं । पर्यतुण्डयत् पर्यखण्डयत् । स्तनान्तर इति शेषः । " तुडि तोडने " इत्ययं धातुश्चौरादिकः ॥ १५ ॥ परिलीयते अन्तर्हितो भवति स्म । बलिभोजनः काकः ॥ १६ ॥ उत्कर्षन्त्यां च रशनां काकोत्सारणार्थमिति शेषः ॥१७॥ भक्षगृध्नेन भक्षलोलुपेन । दारिता विदारिता । त्वामुपागता पुनरुत्सङ्गमाविशमित्येताभ्यां काकोत्सारणार्थमङ्कादुत्थानमनुधावनं च कृतं देव्येत्यवगम्यते ॥१८—१९॥ बाष्पेति रामाङ्के केवलं स्थितास्मि । तदा काको मां किंचिददारयत् । तं दृष्ट्वा तत्पलायनार्थं स्वयमायासं कुर्वन्तीं तदशक्त्या रुदन्तीं मां रामः परिहासपूर्वकं सान्त्वितवानित्यर्थः । अनेन स्वरक्षणे स्वयं प्रवृत्तश्चेदीश्वर उपेक्षते स्वयमप्रवृत्तौ स रक्षतीति द्योतितम ॥२०—२३॥ सः निखिललोकविदितनिरतिशयसौन्दर्यप्रसिद्धः । मया बोधितः । मयैवाहंहता स्वापकालिकश्रीविशेषाननुभवात् । लोके कश्चित्संचारदशायां सुन्दरइव भाति शयने दुर्लक्षणादिभिर्दोषादृश्यन्ते न तथायं । श्रीमान् स्वापकालिकश्रीरुच्यते । सुख-

ती० तवाङ्केसमुपाविशमिति । ननुहनुमन्तमुद्दिश्याभिज्ञानंवक्तुमुपक्रान्तादेवीरामंसंबोध्यकिमर्थंकथयतीतिचेत् सत्यं । मद्यमभिज्ञानंवक्तुमुपक्रान्तात्तामेवाभिमुखीकृत्यएवमुत्तरंप्रादादितिहनुमतारामायवाचयितुमितिनदोषः ॥ १४ ॥ ति० सः त्वदनुभवसिद्धः । समायुक्तः विकाराभियुक्तःसन् पर्यतुण्डयत् । स्तनान्तरइतिशेषः । यद्वा मांससमायुक्तः मांसेच्छायुक्तइत्यर्थः ॥ १५ ॥ ति० तत्रैवपरिलीयते वार्यमाणोपिनदेशान्तरंगच्छतिस्म । नचमांसात् मांसविदारणात् । भक्षार्थी उपारमत् । यद्ययंवस्तुतोनमांसार्थीत्युच्यते तदेत्थंयोज्यं । सवायसः मांसात् भक्षार्थीव । इवाध्याहारः । ल्यब्लोपेपञ्चमी । मांसमुपगृह्यभक्षार्थीव । यद्वा मांसभोजनेभक्षार्थीवपुनःपुनर्विलेखनान्नविरराम ॥ १६ ॥ ति० त्वयिस्वपति मयिजाग्रत्यामित्यर्थः । सुप्तप्रबुद्धां राघवाङ्केसुप्त्वाततःप्रबुद्धां । अतएव राघवाङ्कादुत्थितां । वायसःपुनरागम्यस्तनान्तरे विरराद व्यलिखत् ॥ २२ ॥

[पा०] १ क. ङ. झ. ट. सिद्धाश्रिते. २ ङ. झ. ट. मन्दाकिन्याविदूरतः. क. च. छ. ज. मन्दाकिन्यास्त्वदूरतः. ३ झ. खण्डेषु. ४ क. ग. ङ. झ. सलिलेक्लिन्नोममाङ्केसमुपाविशः. ५ ख. ङ. च. ज.—ट. पक्षिणे. ६ ङ. झ. ञ. ट. स्रंसमाने. ७ क. ग.—ट. त्वयाविहसिता. ८ ङ. ज. झ. ट. ततःश्रान्ताऽहमुत्सङ्गमासीनस्यतवाविशं. ९ ङ. झ. परिश्रान्ताचसुप्ताहं. १० क. ग. ङ.—ट. राघवाङ्केऽस्म्यहं. ११ ग. च. छ. ञ. समुपागम्य. १२ क. विररादस्तनौभृशं. झ. विररादस्तनान्तरे. १३ क. च. छ. मयाप्रबोधितः.

स मां दृष्ट्वा महाबाहुर्वितुन्नां स्तनयोस्तदा ॥ आशीविष इव क्रुद्धः श्वसन्वाक्यमभाषत ॥ २५ ॥
केन ते नागनासोरु विक्षतं वै स्तनान्तरम् ॥ कः क्रीडति सरोषेण पञ्चवक्त्रेण भोगिना ॥ २६ ॥
वीक्षमाणस्ततस्तं वै वायसं समुदैक्षत ॥ नखैः सरुधिरैस्तीक्ष्णैर्मामेवाभिमुखं स्थितम् ॥ २७ ॥
पुत्रः किल स शक्रस्य वायसः पततां वरः ॥ धरान्तरगतः शीघ्रं पवनस्य गतौ समः ॥ २८ ॥
ततस्तस्मिन्महाबाहुः कोपसंवर्तितेक्षणः ॥ वायसे कृतवान्क्रूरां मतिं मतिमतां वरः ॥ २९ ॥
स दर्भं संस्तराद्गृह्य ब्रह्मणास्त्रेण योजयत् ॥ स दीप्त इव कालाग्निर्ज्वालाभिमुखो द्विजम् ॥ ३० ॥
स तं प्रदीप्तं चिक्षेप दर्भं तं वायसं प्रति ॥ ततस्तं वायसं दर्भः सोम्बरेऽनुजगाम ह ॥ ३१ ॥
अनुसृप्तस्तदा काको जगाम विविधां गतिम् ॥ लोकैकाम इमं लोकं सर्वं वै विचचार ह ॥ ३२ ॥
स पित्रा च परित्यक्तः सुरैश्च समहर्षिभिः ॥ त्रीँल्लोकान्संपरिक्रम्य तमेव शरणं गतः ॥ ३३ ॥

सुप्तः तत्त्वानुगुणैव हि सुप्तिरपि । परन्तपः शयनमेव सकलशत्रुनिवर्तनक्षममित्यर्थः । सुप्तः श्रीमान् । लोके स्थानगमनशयनादिदशायां रूपवानिवलक्ष्यतेकश्चित् । संशयने प्रकाशितप्रच्छन्नदोषतयाजुगुप्सितोभवति । अयंतु शयनावस्थायामेवनीराजनाकर्तव्या दृष्टिदोषपरिहारायेत्येवंस्थितः ॥ २४ ॥ वितुन्नां दारितां ॥ २५ ॥ पञ्चवक्त्रेण व्यात्तमुखेन । " पचि विस्तारे " इत्यस्मात्पचाद्यच् । कार्यातिशयद्योतनार्थं वा पञ्चसङ्ख्याकवक्त्रत्वोक्तिः । नागनासोरु नागहस्तोरु । कुपितपञ्चवक्त्रक्रीडासमं तवस्तनविदारणमितिभावः ॥ २६—२७ ॥ ननु वायसमात्रे किमर्थमस्त्रं मुक्तमित्याशङ्क्याह—पुत्रः किलेति ॥ इदं रक्षणानन्तरं तेनैवोक्तमिति ज्ञेयं । किलेति प्रसिद्धौ । इन्द्रपुत्रत्वेन प्रसिद्धो जयन्त एव वायसरूपेणागत इत्याहुः । वायसरूपोन्यः पुत्र इत्यप्याहुः ॥ २८—२९ ॥ संस्तरात् आस्तरणात् । गृह्य गृहीत्वा । अस्त्रेण अस्त्रमन्त्रेण । योजयत् अयोजयत् । अभिमन्त्रितवानित्यर्थः । द्विजं काकं ॥ ३०—३१ ॥ अनुसृप्तः अनुसृतः । विविधां गतिं विविधं स्थानं । लोककामः लोकयितृकामः । रक्षकापेक्षीत्यर्थः ॥ ३२ ॥ भगवद्व्यतिरिक्ता बान्धवाभासा न रक्षका इत्याह—स पित्रेति । सः पुरुषकारभूतायामपि कृतापराधः । सः आर्द्रापराधः । पित्रा च परित्यक्तः अस्त्रक्षतिभीततया प्रथमं पितरं रक्षकं गतः तेन त्रैलोक्याधिपतिना च त्यक्तः । "इन्द्रो महेन्द्रस्सुरनायकोवा" इति तस्यासमर्थत्वोक्तेः । परित्यक्तः त्यागोपि नापाततः बुद्धिपूर्वं त्यक्तः । " त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थं कुलं त्यजेत्" इति न्यायात् । यद्वापरित्यक्तः भार्यापुत्रादिभिस्सह त्यक्तः । चकारेण माता समुच्चीयते । न केवलं हितपरेण पित्रा प्रियपरयामात्रा च परित्यक्तः । " सीता नारी जनस्यास्य योगक्षेमं विधास्यति " इति स्वरक्षकभूतायामपि सापराधत्वादिति भावः । पित्रपेक्षया मातुर्वात्सल्यातिशयात्तामेव प्रथमं गच्छति स्म ततः पितरं । पित्रा त्यागवचनान्मात्रा त्यागः सिद्ध एवेति चकारेण सूचितम् । पितृभ्यां त्यागेपि बान्धवा न त्यज्यन्ति । किं पितरौ सर्वथा त्यक्ष्यत इति तैरपि त्यक्त इत्याह—सुरैश्च । " कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे " इति रामनयने रक्ते तेपि बिभ्यति हि । एवं पूर्वसजातीयैस्त्यक्तत्वेपि परिगृहीतपक्षिरूपसजातीयैः किं त्यक्त इत्यपेक्षायां तथेत्याह—चकारेण । " पक्षिणोपि प्रयाचन्ते सर्वभूतानुकम्पिनं " इति पक्षिणामपि शरण्यत्वात् । स्वनायकगरुडस्वामित्वाच्च पक्षिभिरपि परित्यक्तः । स महर्षिभिः । पित्रादिबन्धूनामरक्षकत्वेपि आनृशंस्यप्रधाना महर्षयो रक्षिष्यन्तीति गतः । तैरपि प्रकामं दूरदर्शिभिः परित्यक्तः ।

ति० तदा स्तनयोर्वितुन्नांमांदृष्ट्वाक्रुद्धः । अनेन पूर्वपर्यायेकेवलंरामःकाकचेष्टाबुद्ध्यापरिहासमेवकृतवानितिसूचितं ॥ २५ ॥ ति० शक्रपुत्रः जयन्तः । सतुवायसः । वायसरूपधारीत्यर्थः । धरान्तरंगतः भूमिविलंप्राप्तः । शीघ्रगतौ पवनसमः । धरान्तरचारित्वंतु पवनादस्यविशेषः । नहिवायुस्तत्संचारीतिकतकः । ननुसावधानजनशरीरस्यकाककर्तृकविदारणंलोकेनदृष्टमिति कोऽयमीदृशःकाकइतिहनुमतःशङ्कांदूरीकुर्वतीआह—**पुत्रइति** । शक्रस्यपुत्रः । एतेन रामपराक्रमपरीक्षार्थंशक्रप्रेरणयैवायमागत

[पा०] १ क.—ट. समवैक्षत. २ झ. दर्भसंस्तरात्. ३ ग. ङ. झ. ट. ब्रह्मणोस्त्रेण. ४ क. ङ.—ट. त्राणकामः. ५ ङ. झ, ट. सर्वैश्च. ६ ङ. झ. ट. परमर्षिभिः

स तं निपतितं भूमौ शरण्यः शरणागतम् ॥ वधार्हमपि काकुत्स्थः कृपया पर्यपालयत् ॥ ३४ ॥
न शर्म लब्ध्वा लोकेषु तमेव शरणं गतः ॥ ३५ ॥
परिद्यूनं विषण्णं च स तमायान्तमब्रवीत् ॥ मोघं कर्तुं न शक्यं तु ब्राह्ममस्त्रं तदुच्यताम् ॥ ३६ ॥
हिनस्तु दक्षिणाक्षि त्वच्छर इत्यथ सोब्रवीत् ॥ ततस्तस्याक्षि काकस्य हिनस्ति स्म स दक्षिणम् ॥
दत्त्वा स दक्षिणं नेत्रं प्राणेभ्यः परिरक्षितः ॥ ३७ ॥
स रामाय नमस्कृत्वा राज्ञे दशरथाय च ॥ विसृष्टस्तेन वीरेण प्रतिपेदे स्वमालयम् ॥ ३८ ॥
मत्कृते काकमात्रे तु ब्रह्मास्त्रं समुदीरितम् ॥ कस्माद्यो मां हरत्त्वत्तः क्षमसे तं महीपते ॥ ३९ ॥
सं कुरुष्व महोत्साहः कृपां मयि नरर्षभ ॥ त्वया नाथवती नाथ ह्यनाथा इव दृश्यते ॥ ४० ॥

आनृशंस्यविषयव्यवस्थास्तीति तैस्त्यक्त इत्यर्थः । एतदङ्गीकारे वयमपि संसर्गदोषेण नश्येम । अस्मिन्त्यागेऽनन्यगतिकत्वाद्राम एनं स्वीकरिष्यतीति तैस्त्यक्तः महर्षिभिः " यो विष्णुं सततं द्वेष्टि तं विद्यादन्त्यरेतसं " इति विष्णुद्वेषेण चण्डालत्वात् । " चण्डालः पक्षिणां काकः " इत्युक्तेश्च । चण्डालो नाम्नद्वाटमागच्छेदिति त्यक्तः । एवं रक्षकान्तरादर्शनात् " नष्टगजो घटमप्यन्वेषते " इति न्यायेन स्वैरविवृतद्वारान्सर्वान्गृहान्गत इत्याह—त्रींल्लोकान्संपरिक्रम्य परिक्रम्य एतदेव नवकृत्वो गतः । संपरिक्रम्य गृहस्थैरविज्ञाततया कवाटमूलेषु लीनश्चेत्यर्थः । अपि कदाचित्कृपैषामुत्पद्येतेति मत्वा पुनःपुनर्गत इत्यर्थः । अमुं निष्कास्य कवाटबन्धनं सर्वैः कृतमित्यर्थः । ततः किं कृतमित्यत्राह—तमेव शरणं गतः । रक्षकत्वेन प्राप्तापेक्षया हिंसकत्वेन स्थितस्य मुखमेव शीतलमित्यवस्थितः । अतस्तमेव शरणं गतः । " यदिवारावणस्स्वयं " इत्येवं स्थितो हि रामः तमेव सर्वलोकशरण्यमेव । तमेव दोषो यद्यपि न त्यजेयमिति स्थितं । शरणं गतः निवासं गतः । न तूपायतया गतः । " निवासवृक्षः साधूनां " इत्युक्तेः ॥ ३३ ॥ स तमिति ॥ सः रक्षणैकस्वभावः । तं प्रातिकूल्यैकनिरतं भूमौ निपतितं देवजातितया भूमिमस्पृशन्तमपि भूमौ पतितं । भूमौ दुष्पुत्रं पितरि शिक्षमाणे स यथा मातुः पादयोः पतति तथापतत् । शरण्यः सर्वावस्थास्वपि शरणवरणार्हः । शरणागतं अनन्यगतिकतया स्वमुपागतं । वधार्हमपि रामसिद्धान्तेनापि वधार्हं । काकुत्स्थः कृपया पर्यपालयत कुलोचितस्वभावेन रक्षितवान् । कृपया अस्मदाद्यारब्धं कार्यं प्रबलकर्मणा न समाप्यते । तथा तेनारब्धमपि कृपया न पूर्यत इति भावः ॥ ३४—३५ ॥ परिद्यूनं परितप्तं । तदुच्यतामित्यनन्तरं । " हिनस्तु दक्षिणाक्षि त्वच्छर इत्यथ सोब्रवीत् " इत्यर्धमनुसन्धेयम् ॥ ३६—३७ ॥ दशरथाय स्वलोकस्थतया पूर्वमेव मित्रभूताय ॥ ३८ ॥ समुदीरितं प्रमुक्तं । हरत् अहरत् ॥ ३९ ॥ सः परदुःखं दृष्ट्वा न सहामहे इत्युक्तवान् । त्वं महोत्साहः एतदनुष्ठानपर्यन्तं कुर्वन मयि अत्यन्तदुःखितायां कृपां परदुःखासहिष्णुत्वं । प्रकाशयितुमर्हसि । नरोत्तम एवंनकरोषिचेत्तव नरोत्तमत्वस्यहानिरेवस्यात् । तस्मादेतद्वचनमनुष्ठानपर्यन्तंकृत्वा मां जीवयित्वा तवनरोत्तमत्वं परिपालयेतिभावः । अनाथाइव अनाथेव । आर्षो गुणाभावः । आनृशंस्यं परो धर्मः । नावारोपणानन्तरं वेतनाभ्य-

इतिध्वनितं । वायसः तदन्तर्गतः ॥ २८ ॥ ति० दर्भसंस्तरात् । एकमितिशेषः ॥ ३० ॥ स० ब्राह्ममस्त्रं दर्भान्तर्गर्भितं । तदुच्यतां एतेनवध्यमुच्यतां भार्गववदितिभावः । रामानु० तदुच्यतामितिप्रश्नानन्तरं हिनस्तिस्मसदक्षिणमितिवचनादस्त्रलक्ष्यत्वेनदक्षिणाक्षिप्रदानपरंप्रतिवचनंकाकेनकृतमित्यवगम्यते ॥ ३६ ॥ ति० सः दक्षिणाक्षि अस्यसंहार्यभवत्वित्युक्तः । परिरक्षितः परिरक्षितवान् । आत्मानमितिशेषः । स० प्राणेभ्यः प्राणार्थं दत्वास्थितः । परिरक्षितः रामेणेतिशेषः ॥ ३७ ॥ ती० एवंहनुमतेरामैकसंवेद्यमभिज्ञानमभिधायदुःखावेशाद्राममेवबुद्धिस्थंसंबोध्यसोपालंभंप्रार्थयते—मत्कृतइत्यादिनासार्धचतुष्टयेन । ति० कस्मात्क्षमसेइत्यवान्तरवाक्यान्तेइत्युक्तवतीतिबुद्धीतिवाक्यशेषोद्रष्टव्यइतिकतकः ॥ ३९ ॥ शि० अनाथा-

[पा०] १ क. ग. ङ.—ट. विवर्णंच. २ झ. ट. पतमानंतमब्रवीत्. ३ घ. च.—ञ. मोघमस्त्रं. ४ घ. च.—ञ. ब्राह्मंकर्तुं. ५ ख. काकमात्रेतद्ब्रह्मास्त्रं. झ. ट. काकमात्रेऽपि. ६ ङ. झ. ञ. माऽहरत्त्वत्तः. ७ क. त्वंकुरुष्व. ८ ग. ङ. झ. ञ. ट. महोत्साहां. ९ ख. घ. च. अनाथेवहि.

आनृशंस्यं परो धर्मस्त्वत्त एव मया श्रुतः ॥ ४१ ॥
जानामि त्वां महावीर्यं महोत्साहं महाबलम् ॥ अपारपारक्षोभ्यं गाम्भीर्यात्सागरोपमम् ॥
भर्तारं संसमुद्राया धरण्या वासवोपमम् ॥ ४२ ॥
एवमस्त्रविदां श्रेष्ठः सत्यवान्बलवानपि ॥ किमर्थमस्त्रं रक्षस्सु न योजयति राघवः ॥ ४३ ॥
न नागा नापि गन्धर्वा नासुरा न मरुद्गणाः ॥ रामस्य समरे वेगं शक्ताः प्रतिसमाधितुम् ॥४४॥
तस्य वीर्यवतः कश्चिद्यद्यस्ति मयि संभ्रमः ॥ किमर्थं न शरैस्तीक्ष्णैः क्षयं नयति राक्षसान् ॥ ४५ ॥
भ्रातुरादेशमादाय लक्ष्मणो वा परन्तपः ॥ कस्य हेतोर्न मां वीरः परित्राति महाबलः ॥ ४६ ॥
यदि तौ पुरुषव्याघ्रौ वाय्वग्निसमतेजसौ ॥ सुराणामपि दुर्धर्षौ किमर्थं मामुपेक्षतः ॥ ४७ ॥
ममैव दुष्कृतं किंचिन्महदस्ति न संशयः ॥ समर्थावपि तौ यन्मां नावेक्षेते परन्तपौ ॥ ४८ ॥
वैदेह्या वचनं श्रुत्वा करुणं साश्रु भाषितम् ॥ अथाब्रवीन्महातेजा हनुमान्मारुतात्मजः ॥ ४९ ॥
त्वच्छोकविमुखो रामो देवि सत्येन मे शपे ॥ रामे दुःखाभिपन्ने च लक्ष्मणः परितप्यते ॥ ५० ॥

र्थनवत्संश्लेषदशायां तवात्यन्ताभिमतोधर्मःक इति मयापृष्टे परदुःखं चेत्तदसहिष्णुत्वमेव परमो धर्म इति ममाभिमतं तथैवमत्स्वभाव इतित्वयारहस्योद्भेदनंकृतं । त्वत्तएव नतु दूतमुखेन मया श्रुतः । इदं श्रवणमात्रपर्यवसायिजातं नत्वनुष्ठानपर्यवसायीतिरामंपृच्छेतिभावः । एवं पृच्छन्त्याःसीतायाःप्रत्युत्तरं दिशतोरामस्यच कोभिप्राय इतिचेदुच्यते । एतस्य संश्लेपस्यविच्छेदोभवतिचेत् किंकरिष्यामीति कातरतया पृष्टवती । सोपि मद्विरहक्लेशेन काम्यन्तीं त्वां न कदाचिदपि पश्येयमित्युक्तवान् । अयमर्थोप्यरण्यकाण्डे अप्यहं जीवितं जह्यामिति श्लोकप्रघट्टिकादौ दर्शितः ॥ ४०—४१ ॥ अपारपारं दुरधिगमपारं असीममित्यर्थः । दुरधिगमगुणसीममित्यर्थो वा ॥ ४२—४३ ॥ प्रतिसमाधितुं प्रतिबद्धुं ॥ ४४ ॥ संभ्रमः भावबृत्तिः ॥ ४५—४६ ॥ उपेक्षतः उपेक्षेते । यदि तौ संगताविति शेषः ॥ ४७ ॥ समर्थौ विरोधिवर्गमुन्मूल्य मद्रक्षणानुगुणशक्तिमन्तौ । परन्तपौ इतःपूर्वंप्रतिपक्षनिर्दहनंकुर्वन्तौ । एवंभूतावपि तौ मां प्राणपर्यन्तं रक्षणप्रवृत्त्यर्हदशां प्राप्तां मां नावेक्षेते इति यत् न कटाक्षयतइतियत् अस्यनिमित्तं तयोर्वा मयि वा किंचिद्भवितुमर्हति । तत्र तद्विषये तादृशनिमित्तप्रसक्तिर्नास्ति सामर्थ्यपरन्तपत्वादिदर्शनात् । परिशेषान्ममैव पापं अस्य निमित्तं भवितुमर्हति । यद्वा ममैव " द्विषन्तः पापकृत्यां " इत्युक्तरीत्या अन्यतो नागतमित्यर्थः । किंचित् नहि वयं सर्वज्ञाः अस्माभिरज्ञातं किंचिद्भवितुमर्हति । महत् प्रारब्धफलतयाऽनुभवं विना दुष्परिहरं । अस्ति न संशयः । कार्ये सति कारणे किमस्ति संदेहः । यद्वा किंचिदनिर्वचनीयं । महद्दुष्कृतमस्तीत्यनेन " किं त्वामन्यत वैदेहः " इत्यादिनोक्तो भगवदपचारः । उक्तंहि " कीदृशं तु मया पापं पुरा देहान्तरे कृतं " इति । देहान्तरे बालशरीरे ॥ ४८ ॥ साश्रु यथा तथा भाषितं उक्तं ॥ ४९ ॥ त्वच्छोकविमुखः त्वच्छोकेन विमुखः विषयान्तरपराङ्मुखः ।

इवदृश्यते ममतनुरितिशेषः ॥ ४० ॥ शि० ननुतवरक्षणेममनकिंचित्प्रयोजनमित्यतआह—आनृशंस्यमिति । आनृशंस्यं निर्हेतुककृपा परोधर्मः इतित्वत्तएवमयाश्रुतं । एतेन प्रयोजनाभावेपिस्वकृपयापालयेतिसूचितं ॥ ४१ ॥ रामानु० अपारपारं " पार कर्मसमाप्तौ " इतिधातोर्निष्पन्नत्वादत्रपारशब्देनकर्मसमाप्तिरुच्यते । अपाराः पाराः कर्मसमाप्तयोयस्यसतथोक्तः । निरवधिकापदानइत्यर्थः ॥ ४२ ॥ ति० प्रतिसमीहितुं प्रतिभटतयास्थित्वानिरोद्धुमित्यर्थः । प्रतिसमाधितुमितिपाठान्तरं । तत्रार्थेत्वंशरणं ॥ ४४ ॥ ति० ममसंभ्रमइतिपाठे ममप्राप्तयेसंभ्रमइत्यर्थः ॥ ४५ ॥

[पा०] १ ङ. झ. ट. श्रुतं. २ घ. सागरान्तायाः. ३ ङ. झ. ट. बलवान्सत्ववानपि. ख. ग. घ. च. छ. ज. ञ. सत्ववान्. ४ ट. मोचयसि. ५ ङ. झ. ट. प्रतिसमीहितुं. ६ ङ. च. ज. झ. ट. वाग्विन्द्र. ७ ग. मन्येमहदस्ति. ८ क. यन्मामुपेक्षेतां. ग. यन्मांनावेक्षेतां. ९ ख. तदाऽब्रवीत्. १० क. ख. घ. ङ. च. ज.—ट. सत्येनते. ११ क. ङ. झ. ञ. ट. दुःखाभिपन्नेतु. ग. घ. दुःखाभिभूतेच.

कथंचिद्भवती दृष्टा न कालः परिशोचितुम् ॥ इमं मुहूर्तं दुःखानां द्रक्ष्यस्यन्तमनिन्दिते ॥ ५१ ॥
तावुभौ पुरुषव्याघ्रौ राजपुत्रौ महाबलौ ॥ त्वद्दर्शनकृतोत्साहौ लङ्कां भस्मीकरिष्यतः ॥ ५२ ॥
हत्वा च समरे क्रूरं रावणं सहबान्धवम् ॥ राघवस्त्वां विशालाक्षि नेष्यति स्वां पुरीं प्रति ॥ ५३ ॥
ब्रूहि यद्राघवो वाच्यो लक्ष्मणश्च महाबलः ॥ सुग्रीवो वाऽपि तेजस्वी हरयोऽपि समागताः ॥ ५४ ॥
इत्युक्तवति तस्मिंश्च सीता सुरसुतोपमा ॥ उवाच शोकसंतप्ता हनुमन्तं प्लवङ्गमम् ॥ ५५ ॥
कौसल्या लोकभर्तारं सुषुवे यं मनस्विनी ॥ तं ममार्थे सुखं पृच्छ शिरसा चाभिवादय ॥ ५६ ॥
स्रजश्च सर्वरत्नानि प्रिया याश्च वराङ्गनाः ॥ ऐश्वर्यं च विशालायां पृथिव्यामपि दुर्लभम् ॥ ५७ ॥
पितरं मातरं चैव संमान्याभिप्रसाद्य च ॥ अनुप्रव्रजितो रामं सुमित्रा येन सुप्रजाः ॥ ५८ ॥
आनुकूल्येन धर्मात्मा त्यक्त्वा सुखमनुत्तमम् ॥ अनुगच्छति काकुत्स्थं भ्रातरं पालयन्वने ॥ ५९ ॥
सिंहस्कन्धो महाबाहुर्मनस्वी प्रियदर्शनः ॥ पितृवद्वर्तते रामे मातृवन्मां समाचरन् ॥ ६० ॥
ह्रियमाणां तदा वीरो न तु मां वेद लक्ष्मणः ॥ वृद्धोपसेवी लक्ष्मीवाञ्शक्तो न बहु भाषिता ॥ ६१ ॥

प्रत्युत त्वय्येव दत्तचित्त इत्यर्थः ॥ ५० ॥ इमं मुहूर्तं अस्मिन्मुहूर्ते । सप्तम्यर्थे द्वितीया ॥ ५१—५५ ॥ मनस्विनी लोकभर्तारं सुषुवे । लोके स्त्रियः इहलोकपरलोकयोः स्वरक्षणार्थं पुत्रान् सुवते नैवं मेऽश्वशूः । मनस्विनी विपुलमनस्का । सर्वलोकरक्षकः पुत्रो मे भवेदिति व्रतमनुष्ठाय लोकोपकाराय पुत्रं सूतवती । एवंभूतः कौसल्यासंकल्पः कथं मोघस्स्यात् । अहमत्र लोके न किमन्तर्भूता । तं ममार्थे सुखं पृच्छ । अस्मद्रक्षणं न मया प्रार्थ्यं तच्चिन्ता तस्यैव । अस्मत्त्वरातु विलम्बासहिष्णुतया । तस्मात्तत्सत्ता चेन्मद्रक्षणस्य न कापि हानिः । अतस्तत्सत्तैवास्माभिराशास्यते । तेन तस्य सुखमस्ति किमितिमया पृष्टमिति वद । एवंच लोकवदस्माभिश्च तस्मात्किंचिदपेक्षितंचेत् लोकैर्यत्कार्यं तत्कार्यं मयापि कार्यमित्याह—शिरसा चाभिवादय । अहं तं शिरसा प्रणतवत्यस्मीति तमभिवादय । प्रणिपातंकुर्वित्यर्थः । कथं नायिका नायकं शिरसा प्रणमेदितिचेत् आचारप्रधानजनककुलनन्दिन्यैवमनुष्ठितमिति किमत्र प्रमाणं प्रष्टव्यं । प्रणयरोषेणैवमाहेति चेन्न । हनुमद्वचनेन तस्य शान्तत्वात् । ननु ममार्थे मत्कार्यसिद्ध्यर्थं तं प्रणमेत्यर्थः किंनस्यादिति चेत्, ममार्थ इत्यस्योभयत्रान्वयात् । पूर्वमत्र मया पृष्टमिति पृच्छेत्यर्थस्यावश्यकत्वादत्रापि मया प्रणतमिति प्रणमेत्यस्य स्वरसत्वात् ॥ ५६ ॥ स्रजश्चेति ॥ सन्तीति शेषः । स्रगादयः सन्ति पृथिव्यां दुर्लभमैश्वर्यमप्यस्ति । तथा पितरं मातरं चैव संमान्य सुमित्रा येन सुप्रजाः सः राममनु प्रव्रजितः ॥ ५७—५८ ॥ आनुकूल्येन भक्त्येत्यर्थः ॥ ५९ ॥ समा-

शि० यस्मात्कथंचिद्भवतीदृष्टा मयेतिशेषः । अतः इमंमुहूर्तं आरभ्येतिशेषः । दुःखानामन्तंद्रक्ष्यसि । किंच दुःखानामन्तं विध्वंसकं इमं आगामिनंमुहूर्तंद्रक्ष्यसि अतःपरिशोचितुंकालः समयोन ॥ ५१ ॥ तनि० लोकेस्त्रियःस्वजीवनदशायांपोषकंपरत्रोत्तारकंचपुत्रमभिलषन्ति । कौसल्यातु विपुलमनस्कतयासर्वेलोकरक्षकंपुत्रंप्रार्थ्यव्रताचरणेनलब्धवती तत्प्रार्थनाविकलाकिं । अहं लोकशब्दान्तर्भूतानभवामिकिं । जलसमीपस्थितसस्यस्यशुष्कतावत्सर्वावस्थास्वप्यनुसृतायाममरक्षणेतत्प्रार्थनासंकुचिताकिं । तंममार्थेसुखंपृच्छ । ममरक्षणंनप्रार्थनीयं तस्यमनसितिष्ठत्येव । किंतु त्वयातस्यसुखजनकेनभाव्यं । तस्यावस्थाने अस्मद्रक्षणं भविष्यतीतितदेवाशास्यते । शिरसाचाभिवादय । अग्निसाक्षिकंगृहीतपाणिनाचरक्षणंकार्यं तत्रक्रियते । इतरसाधारण्येनवारक्षणं क्रियतां । तैर्यत्क्रियते तन्मयाप्यभिवादनंक्रियतेइत्यस्मदर्थमभिवादनंकुरु ॥ ति० ममार्थे मत्प्रतिनिधित्वेनेत्यर्थः ॥ ५६ ॥ ति० लक्ष्मणःपूर्वंमारीचवधायगतेरामेतत्पृष्ठगमनायसम्यक्कृतपारुष्यइतिज्ञात्वातस्यविमोचनप्रवृत्त्युपेक्षामाभूदितिविशिष्यकुशलप्रश्नं ब्रूहीत्याह—स्रजश्चेति । दुर्लभमित्यत्र त्यक्त्वेत्यनुकर्षः ॥ ५७ ॥

[पा०] १ ङ. झ. ट. दुःखानामन्तंद्रक्ष्यसिशोभने. २ ङ. झ. ट. लोकान्भस्मी. ३ क.—ट. स्वांपुरींप्रतिनेष्यति. ४ घ. इत्युक्तासाहनुमता. ५ ख.—ट. सीतापुनरथाब्रवीत्. ६ इदमर्धं ख.—ट. पाठेषुनदृश्यते. ७ क. ग. च. छ. विसृज्य. ८ घ. संमान्याभिप्रणम्यच. ग. परित्यज्यप्रसाद्यच. ९ क. घ. च. छ. ज. ञ. भाषितुं.

राजपुत्रः प्रियः श्रेष्ठः सदृशः श्वशुरस्य मे ॥ मम प्रियतरो नित्यं भ्राता रामस्य लक्ष्मणः ॥ ६२ ॥
नियुक्तो धुरि यस्यां तु तामुद्वहति वीर्यवान् ॥ यं दृष्ट्वा राघवो नैव वृत्तमार्यमनुस्मरेत् ॥ ६३ ॥
स ममार्थाय कुशलं वक्तव्यो वचनान्मम ॥ मृदुर्नित्यं शुचिर्दक्षः प्रियो रामस्य लक्ष्मणः ॥ ६४ ॥
यथा हि वानरश्रेष्ठ दुःखक्षयकरो भवेत् ॥ त्वमस्मिन्कार्यनिर्योगे प्रमाणं हरिसत्तम ॥ ६५ ॥
राघवस्त्वत्समारम्भान्मयि यत्नपरो भवेत् ॥ इदं ब्रूयाश्च मे नाथं शूरं रामं पुनः पुनः ॥ ६६ ॥
जीवितं धारयिष्यामि मासं दशरथात्मज ॥ ऊर्ध्वं मासान्न जीवेयं सत्येनाहं ब्रवीमि ते ॥ ६७ ॥
रावणेनोपरुद्धां मां निकृत्या पापकर्मणा ॥ त्रातुमर्हसि वीर त्वं पातालादिव कौशिकीम् ॥ ६८ ॥
ततो वस्त्रगतं मुक्त्वा दिव्यं चूडामणिं शुभम् ॥ प्रदेयो राघवायेति सीता हनुमते ददौ ॥ ६९ ॥
प्रतिगृह्य ततो वीरो मणिरत्नमनुत्तमम् ॥ अङ्गुल्या योजयामास नह्यस्य प्राभवद्भुजः ॥ ७० ॥
मणिरत्नं कपिवरः प्रतिगृह्याभिवाद्य च ॥ सीतां प्रदक्षिणं कृत्वा प्रणतः पार्श्वतः स्थितः ॥ ७१ ॥
हर्षेण महता युक्तः सीतादर्शनजेन सः ॥ हृदयेन गतो रामं शरीरेण तु विष्ठितः ॥ ७२ ॥

चरन् परिचरन् ॥ ६०—६२ ॥ यस्यां धुरि यस्मिन्कार्यनिर्वाहइत्यर्थः । आर्यं श्वशुरं दशरथं नानुस्मरेत् । पितृवत्सम्यग्रक्षकत्वादिति भावः ॥ ६३—६४ ॥ रामः यथा दुःखक्षयकरो भवेत्तथा वक्तव्यमित्यर्थः । कार्यनिर्योगे कार्यसंघटने । प्रमाणं व्यवस्थापकः ॥ ६५ ॥ त्वत्समारम्भात् त्वदुत्साहात् ॥ ६६ ॥ ऊर्ध्वं मासात् । रावणकृतमासद्वयावधिं न सहिष्य इति भावः ॥ ६७ ॥ निकृत्या वञ्चनेन । पातालादिव कौशिकीं । अत्रेतिकरणं द्रष्टव्यं । इदं च ब्रूया इति पूर्वेणान्वयः । कौशिकः इन्द्रः तत्संबन्धिनी श्रीः कौशिकी तामिव । एवं ब्रह्मपुराणे श्रूयते । पुरा वृत्रवधे ब्रह्महत्याभिभूतं निश्श्रीकमिन्द्रं भगवान्नारायणो देवैस्सह वैष्णवेनाश्वमेधेन निष्कल्मषं कृत्वा त्रैलोक्यराज्येऽभिषिच्य पुरातनीं पौरंदरीं श्रियमुपाह्वयत् । ततोऽशरीरवाक्याद्गवाक्षतीर्थवर्तिनीं तामुपश्रुत्य स देवदेवो देवाश्च तत्र जग्मुः । ततस्तान् दृष्ट्वा सा श्रीः पातालं प्रविवेश । तत्र प्रवेष्टुमशक्नुवन्तो देवाः पुनरप्यशरीरं वाक्यं युष्मासु सर्वलक्षणसंपन्नस्तां प्रतिनेतुमर्हतीत्युपश्रुत्य तमेव पुरुषोत्तमं प्रार्थयामासुः । स तत्र प्रविश्य पातालात्तां समुद्धृत्य तैस्सह शक्राय प्रादादिति ॥ महाभारते तु उतथ्यस्य भार्यां यमुनायां स्नान्तीं वरुणो हृत्वा पातालमनयत् । तामुतथ्यो नारदेन याचित्वा तामलब्ध्वा कुपितः पातालह्रदशोषेण तामवापेति श्रूयते । सा कौशिकीति केचित्कथयन्ति ॥ ६८—६९ ॥ मणिरत्नं मणिश्रेष्ठं । अङ्गुल्या योजयामास । चूडामणेरधिष्ठानस्य पृष्ठे या केशसरणिः तत्राङ्गुलिं प्रावेशयदित्यर्थः । एवं तनीयसी किमङ्गुलिरित्यत्राह—नहीति । अस्य हनुमतः भुजः न प्राभवत् न स्थूलोभवत् । न तदानीं स महाकायः भुजश्च न स्थूलः तेनाङ्गुलिस्तनीयसीत्यर्थः । एतेन देव्यैप्रदर्शितं महद्रूपंविहाय पुरप्रवेशकालिकं सूक्ष्मरूपमङ्गीकृतवानित्यवगम्यते ॥ ७० ॥ प्रणतः नम्रगात्रः ॥ ७१—७२ ॥

ति० रावणदत्तावध्यवशिष्टंकिंचिदधिकंमासद्वयमपिनसहिष्यइतिभावः । तत्समाप्तौत्वदनागमनेऽनार्योऽनार्यमेवाचरेत् । अतोऽर्वागेवमरणंज्यायइतिशीघ्रमागमनायैवमुक्तिरितिबोध्यं । निकृत्या राक्षसीकर्तृकनिग्रहेण । उपरुद्धां पातालादिवकौशिकीं पातालमग्नांभुवंभगवानिवत्रातुमर्हसि । गायत्र्याःसांख्यायनगोत्रखवद्भूःकौशिकीतिकतकः ॥ ६८ ॥ ति० ननुतदासूक्ष्मरूपत्वात्तत्रभुजासञ्जनमेवोचितमतआह—नहीति । अस्यभुजःसूक्ष्मोपि नप्राभवत् । तद्रन्ध्रे नप्राविशदित्यर्थः । निषेधस्यप्रसक्तिमूलकत्वात् प्रसक्तेश्चसूक्ष्मरूपएवसंभवात् । पूर्वंदेव्यैप्रदर्शितंमहद्रूपंविहाय सूक्ष्मरूपेणैवस्थितइतिगम्यतइतितीर्थः । कतकस्तु—अङ्गुल्यायोजयामाससूक्ष्मवासोबद्धं अङ्गुल्यांदृढंबबन्धेत्यर्थः । अस्यबन्धनेभुजोनप्राभवत् व्यक्तयासवौनुभवप्रसङ्गाद्रोपणीयत्वाच्चभुजोनोचितोऽभूदित्यर्थइत्याह ॥ ७० ॥

[पा०] १ क. ग.—ट. मत्तः. २ ङ. झ. ट. मनुस्मरत्. ३ ङ. झ. ट. निर्वाहे. ४ क. मासमात्रंनृपात्मज. ५ क. मासाद्ध्वंन. ६ क. ज. अङ्गुल्यां. ७ ङ. झ. ट. रामंलक्ष्मणंचसलक्षणं.

मणिवरमुपगृह्य तं महार्हं जनकनृपात्मजया धृतं प्रभावात् ॥
गिरिरिव पवनावधूतमुक्तः सुखितमनाः प्रतिसंक्रमं प्रपेदे ॥ ७३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टत्रिंशः सर्गः ॥ ३८ ॥

एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

सीतया चूडामणिग्रहणेनप्रयाणोन्मुखंहनुमन्तंप्रति रामलक्ष्मणादिषुस्वकुशलप्रश्ननिवेदनचोदनपूर्वकं सत्वरंस्वानयनाय रामप्रोत्साहनचोदना ॥ १ ॥ हनुमता रामलक्ष्मणयोः सुग्रीवादीनांच दुस्तरसागरतरणेशङ्कमानांसीतांप्रति वानरप्रभाववर्णनेन कैमुत्येनतेषांतरणसमर्थनपूर्वकं राघवयोः स्वपृष्ठारोपणेनसागरतारणप्रतिज्ञानादिना समाश्वासनम् ॥ २ ॥

मणिं दत्त्वा ततः सीता हनुमन्तमथाब्रवीत् ॥ अभिज्ञानमभिज्ञातमेतद्रामस्य तत्त्वतः ॥ १ ॥
मणिं तु दृष्ट्वा रामो वै त्रयाणां संस्मरिष्यति ॥ वीरो जनन्या मम च राज्ञो दशरथस्य च ॥ २ ॥
स भूयस्त्वं समुत्साहे चोदितो हरिसत्तम ॥ अस्मिन्कार्यसमारम्भे प्रचिन्तय यदुत्तरम् ॥ ३ ॥
त्वमस्मिन्कार्यनिर्योगे प्रमाणं हरिसत्तम ॥ हनुमन्यत्नमास्थाय दुःखक्षयकरो भव ॥
तस्य चिन्तयतो यत्नो दुःखक्षयकरो भवेत् ॥ ४ ॥
स तथेति प्रतिज्ञाय मारुतिर्भीमविक्रमः ॥ शिरसाऽऽवन्द्य वैदेहीं गमनायोपचक्रमे ॥ ५ ॥
ज्ञात्वा संप्रस्थितं देवी वानरं मारुतात्मजम् ॥ बाष्पगद्गदया वाचा मैथिली वाक्यमब्रवीत् ॥ ६ ॥
कुशलं हनुमन्ब्रूयाः सहितौ रामलक्ष्मणौ ॥ ७ ॥
सुग्रीवं च सहामात्यं वृद्धान्सर्वांश्च वानरान् ॥ ब्रूयास्त्वं वानरश्रेष्ठ कुशलं धर्मसंहितम् ॥ ८ ॥
यथा स च महाबाहुर्मां तारयति राघवः ॥ अस्माद्दुःखाम्बुसंरोधात्त्वं समाधातुमर्हसि ॥ ९ ॥

पवनावधूतमुक्तः महावातकम्पितः तेन रहितश्चेत्यर्थः । प्रतिसंक्रमं प्रतिप्रयाणं । प्रपेदे प्राप्तुमुद्युक्तः ॥ ७३ ॥ इति गोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टत्रिंशः सर्गः ॥ ३८ ॥

अभिज्ञातं सम्यग्ज्ञातं ॥ १ ॥ त्रयाणामिति "अधीगर्थदयेशां कर्मणि" इति षष्ठी । विवाहकाले शिरोमणिदातृत्वात्पित्रोर्ग्रहीतृत्वाच्च मम स्मरणमिति भावः । पाणिग्रहणोत्सवे मम श्वशुराभ्यां प्रथमं शिरोभूषणतया एष दत्तः । अतः त्रीनस्मान् युगपत्स्मरिष्यतीत्यर्थ इत्याह कश्चित् । तदनुचितं "मणिरत्नमिदं दत्तं वैदेह्याः श्वशुरेण मे । वधूकाले तथा बद्धमधिकं मूर्ध्नि शोभते" इत्युपरि वक्ष्यमाणत्वाद्विवाहकाले रामजनन्या अनागमनाच्च ॥ २—३ ॥ कार्यनिर्योगे कार्यसंघटने । प्रमाणं व्यवस्थापकः । चिन्तयतस्तस्य । तवेति शेषः ॥ ४ ॥ आवन्द्येति पदच्छेदः ॥ ५—६ ॥ धर्मसंहितं धर्मसहितं धर्मपुरस्सरं कुशलंब्रूया इत्यर्थः ॥ ८ ॥ दुःखाम्बुसंरोधात् अम्बूनि संरुध्यन्ते अनेनेत्यम्बुसंरोधः जलधिः ।

स० प्रभावात् सर्वदासमीपवर्तिनोपिपदार्थस्येतरादृश्यत्वप्रापकसामर्थ्यविशेषात् ॥ ति० प्रभावात् सामर्थ्यविशेषात् । राक्षसीभिर्यथानज्ञायते तथाधृतं । गिरिवरपवनावधूतमुक्तः पर्वतश्रेष्ठोर्ध्वभागीयपवनकंपितः पश्चात्तेनकंपेनमुक्तः । सहवसुखितमनाः । अयमपि पूर्वंसीतायाअदर्शनेनदुःखवशात्कंपितः । ततस्तद्दर्शनेनततःकंपान्मुक्तः । अतःसुखितमनाः । प्रतिसंक्रमं लङ्कादुर्गप्राकारंप्राप्तुं प्रपेदे यत्नमारभतेत्यर्थः ॥ ७३ ॥ इत्यष्टत्रिंशःसर्गः ॥ ३८ ॥

ती० त्रयाणांसंस्मरिष्यतीति । पाणिग्रहणकालिममजननी इमंमणिंदशरथसंनिधौ जनकहस्तादादायशिरोभूषणतयामह्यंदत्तवती । अतोममजननीं दशरथं जनकं मांच स्मरिष्यतीत्यर्थः ॥ २ ॥ स० वानरात्मजं केसरिपुत्रं वानरंच । ब्रह्मजातलेपिजांबवानिव कश्यपा-

[पा०] १ ग. ङ.—ट. गिरिवरपवना. २ च. ज.—ट. मणिंदृष्ट्वातु. ख. ग. मणिंतुरामोवैदृष्ट्वा. ३ क. तस्मिन्. ४ ङ. झ. ट. समुत्साहे. ५ ङ. ज.—ट. चिन्तययोयत्नः. ६ ठ. वानरात्मजं. ७ ङ. झ, ट. हनूमन्कुशलंब्रूयाः. ८ क. ख. ग. ङ. झ. ञ. ट. यथाचस.

जीवन्तीं मां यथा रामः संभावयति कीर्तिमान् ॥ तत्तथा हनुमन्वाच्यं वाचा धर्ममवाप्नुहि ॥ १० ॥
नित्यमुत्साहयुक्ताश्च वाचः श्रुत्वा त्वयेरिताः ॥ वर्धिष्यते दाशरथेः पौरुषं मदवाप्तये ॥ ११ ॥
मत्संदेशयुता वाचस्त्वत्तः श्रुत्वैव राघवः ॥ पराक्रमविधिं वीरो विधिवत्संविधास्यति ॥ १२ ॥
सीताया वचनं श्रुत्वा हनुमान्मारुतात्मजः ॥ शिरस्यञ्जलिमाधाय वाक्यमुत्तरमब्रवीत् ॥ १३ ॥
क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्रवरैर्वृतः ॥ यस्ते युधि विजित्यारीञ्शोकं व्यपनयिष्यति ॥ १४ ॥
न हि पश्यामि मर्त्येषु नासुरेषु सुरेषु वा ॥ यस्तस्य क्षिपतो बाणान्स्थातुमुत्सहतेऽग्रतः ॥ १५ ॥
अप्यर्कमपि पर्जन्यमपि वैवस्वतं यमम् ॥ स हि सोढुं रणे शक्तस्तव हेतोर्विशेषतः ॥ १६ ॥
स हि सागरपर्यन्तां महीं शासितुमीहते ॥ त्वन्निमित्तो हि रामस्य जयो जनकनन्दिनि ॥ १७ ॥
तस्य तद्वचनं श्रुत्वा सम्यक्सत्यं सुभाषितम् ॥ जानकी बहुमेनेऽथ वचनं चेदमब्रवीत् ॥ १८ ॥
ततस्तं प्रस्थितं सीता वीक्षमाणा पुनःपुनः ॥ भर्तृस्नेहान्वितं वाक्यं सौहार्दादनुमानयत् ॥ १९ ॥
यदि वा मन्यसे वीर वसैकाहमरिन्दम ॥ कस्मिंश्चित्संवृते देशे विश्रान्तः श्वो गमिष्यसि ॥ २० ॥
मम चेदल्पभाग्यायाः सान्निध्यात्तव वानर ॥ अस्य शोकस्य महतो मुहूर्तं मोक्षणं भवेत् ॥ २१ ॥
गते हि हरिशार्दूल पुनरागमनाय तु ॥ प्राणानामपि संदेहो मम स्यान्नात्र संशयः ॥ २२ ॥
तवादर्शनजः शोको भूयो मां परितापयेत् ॥ दुःखाद्दुःखपरामृष्टां दीपयन्निव वानर ॥ २३ ॥
अयं च वीर संदेहस्तिष्ठतीव ममाग्रतः ॥ सुमहांस्त्वत्सहायेषु हर्यृक्षेषु हरीश्वर ॥ २४ ॥
कथं नु खलु दुष्पारं तरिष्यन्ति महोदधिम् ॥ तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ॥ २५ ॥
त्रयाणामेव भूतानां सागरस्यास्य लङ्घने ॥ शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ॥ २६ ॥

समाधातुं राममनुकूलयितुं ॥ ९ ॥ जीवन्तीं संभावयति जीवन्तीं करोतीत्यर्थः । तत्तथा अव्ययमेतत् । वचनस्य प्रयोजनमाह—वाचेति । वाचाधर्मं वाचिकधर्मं ॥ १० ॥ तमेवधर्ममुपपादयति द्वाभ्यां—नित्यमित्यादि ॥ ११—१५ ॥ पर्जन्यं इन्द्रं । "पर्जन्यौ रसदेवेन्द्रौ" इत्यमरः ॥ १६ ॥ जयः भविष्यतीति शेषः ॥ १७ ॥ सम्यक् सोपपत्तिकं । सत्यं परमार्थं । सुभाषितं श्रुतिमधुरं ॥ १८ ॥ वचनं चेदमब्रवीदित्युक्तं विवृणोति—ततस्तमिति ॥ भर्तृस्नेहान्वितं आत्मनि यो भर्तुः स्नेहस्तेनान्वितं । स्वविषयभर्तृस्नेहप्रकाशकमिति यावत् । अनुमानयत् अन्वमानयत् । वक्ष्यमाणोक्तिरूपं संमानवचनमब्रवीदित्यर्थः ॥ १९—२२ ॥ दुःखाद्दुःखपरामृष्टां पूर्वदुःखादधिकेन दुःखेन स्पृष्टां । दीपयन्निव वर्धयन्निवेत्यर्थः ॥ २३ ॥ अयं वक्ष्यमाणः । तिष्ठतीव मूर्तीभूतइत्यर्थः

त्मजत्वेपिसर्पादिवद्वानेतिसूचयितुंपदद्वयं । यद्वा नरेष्वात्माधैर्यंयस्यनरात्मा दशरथः । तस्माज्जायतइतिसतथा । तंरामं प्रतिगन्तुमुपचक्रमेवेत्यन्वयः ॥ ६ ॥ ति० वमतः बाणान्विसृजतइत्यर्थः ॥ १५ ॥ ति० महींसाधितुमर्हति जेतुमुयुङ्क्तइत्यर्थः ॥ १७ ॥ स० अल्पभाग्यायाममतवसांनिध्यादस्यमहतःशोकस्यमोक्षणं त्यागः ॥ २१ ॥ स० पुनरागमनायसंदेहेसति मम प्राणानांसंदेहः स्यादित्यर्थः ॥ २२ ॥ ती० दुःखंदुःखपरामृष्टामितिपाठे दुःखंमां दीपयन् ज्वलयन्निवपरितापयेदितिसंबन्धः ॥ २३ ॥ ति० त्वत्सहायेष्विति । साक्षात्साधकस्यतवसहायभूतेषु मिलितेषुहर्यृक्षेषुहरीश्वरः सुग्रीवः । कथमुदधिंतरिष्यति । सैन्यानिकथंतरिष्यन्ति । तौवाकथंतरिष्यतइत्यर्थः ॥ २४—२५ ॥

[पा०] १ क. राघवः. २ क. ख. ग. ङ. च. ज. झ. ट. तत्त्वया. ३ ङ. झ. ट. युक्तस्य. ४ क. ख. ग. ङ.—ट. मयेरिताः. ५ क. झ. ञ. ट. पराक्रमेमतिं. ङ. पराक्रमेगतिं. ६ ख. ङ. झ. ट. सीतायास्तद्वचः. ७ क. ख. च. छ. ज. ञ. नासुरेष्वमरेषुवा. ग. घ. नामरेष्वसुरेषुच. ८ ङ. झ. ट. वमतो. ९ ख. ग. सतु. १० ग. शासितुमर्हति. ङ. झ. ट. साधितुमर्हति. ११ क. ग. घ. छ. भर्तुःस्नेहान्वितं. १२ ङ. झ. ट. चैवाल्पभाग्यायाः. च. छ. ज. ञ. वाल्पभाग्यायाः. १३ ङ. झ. ट. ततोहि. ख. ततस्तु. १४ ग. पुनश्चागमनायतु. १५ झ. हरीश्वरः. १६ क. ख. ग. छ. झ. ञ. तरिष्यति. १७ क. दशरथात्मजौ. १८ ङ.—ट. सागरस्नेह.

तदस्मिन्[1]कार्यनिर्योगे वीरैवं दुरितक्रमे ॥ किं पश्यसि समाधानं त्वं हि कार्यविदां वरः ॥ २७ ॥
काममस्य त्वमेवैकः कार्यस्य परिसाधने ॥ पर्याप्तः परवीरघ्न यशस्यस्ते फलोदयः ॥ २८ ॥
बलैः [3]समग्रैर्यदि मां रावणं जित्य संयुगे ॥ विजयी [4]स्वपुरीं [5]यायात्तत्तु मे स्याद्यशस्करम् ॥ २९ ॥
[6]शरैस्तु संकुलां कृत्वा लङ्कां परबलार्दनः ॥ मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥ ३० ॥
तद्यथा तस्य विक्रान्तमनु[7]रूपं महात्मनः ॥ भवेदाहवशूरस्य तथा त्वमुपपादय ॥ ३१ ॥
तदर्थोपहितं वाक्यं [8]सहितं हेतुसंहितम् ॥ निशम्य हनुमाञ्शेषं वाक्यमुत्तरमब्रवीत् ॥ ३२ ॥
देवि हर्यृक्षसैन्यानामीश्वरः प्लवतां वरः ॥ सुग्रीवः सत्त्वसंपन्नस्तवार्थे कृतनिश्चयः ॥ ३३ ॥
स वानरसहस्राणां कोटीभिरभिसंवृतः ॥ क्षिप्रमेष्यति वैदेहि राक्षसानां निबर्हणः ॥ ३४ ॥
तस्य विक्रमसंपन्नास्सत्त्ववन्तो महाबलाः ॥ मनःसंकल्पसंपाता निदेशे हरयः स्थिताः ॥ ३५ ॥
येषां नोपरि नाधस्तान्न तिर्यक्सज्जते गतिः ॥ न च कर्मसु सीदन्ति महत्स्वमिततेजसः ॥ ३६ ॥
असकृत्तैर्महोत्साहैः ससागरधराधरा ॥ प्रदक्षिणीकृता भूमिर्वायुमार्गानुसारिभिः ॥ ३७ ॥
मद्विशिष्टाश्च तुल्याश्च सन्ति तत्र वनौकसः ॥ मत्तः प्रत्यवरः कश्चिन्नास्ति सुग्रीवसन्निधौ ॥ ३८ ॥
अहं तावदिह प्राप्तः किं पुनस्ते महाबलाः ॥ न हि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे जनाः ॥ ३९ ॥
तदलं परितापेन देवि शोको व्यपैतु ते ॥ एकोत्पातेन ते लङ्कामेष्यन्ति हरियूथपाः ॥ ४० ॥
मम पृष्ठगतौ तौ च चन्द्रसूर्याविवोदितौ ॥ त्वत्सकाशं महासत्त्वौ नृसिंहावागमिष्यतः ॥ ४१ ॥
तौ हि वीरौ नरवरौ सहितौ रामलक्ष्मणौ ॥ आगम्य नगरीं लङ्कां सायकैर्विधमिष्यतः ॥ ४२ ॥
सगणं रावणं हत्वा राघवो रघुनन्दनः ॥ त्वामादाय वरारोहे [9]स्वपुरं प्रतियास्यति ॥ ४३ ॥
तदाश्वसिहि भद्रं ते भव त्वं कालकाङ्क्षिणी ॥ नचिराद्द्रक्ष्यसे रामं प्रज्वलन्तमिवानलम् ॥ ४४ ॥
निहते [10]राक्षसेन्द्रेऽस्मिन्सपुत्रामात्यबान्धवे ॥ त्वं समेष्यसि रामेण शशाङ्केनेव रोहिणी ॥ ४५ ॥
[11]क्षिप्रं त्वं देवि शोकस्य पारं [12]यास्यसि मैथिलि ॥ रावणं चैव रामेण [13]निहतं द्रक्ष्यसेऽचिरात् ॥ ४६ ॥

॥ २४—२६ ॥ समाधानं परिहारं ॥ २७ ॥ अहमेव साधयिष्यामीत्याशङ्क्याह—काममिति ॥ हे परवीरघ्न त्वं अस्य कार्यस्य सर्वराक्षसवधपूर्वकमत्प्रापणरूपस्य । परिसाधने कामं पर्याप्तः शक्तः । एवं चेत्फलोदयः शक्तिसमृद्धिः । ते यशस्यः तव यशस्करः । नतु ममेति भावः ॥ २८ ॥ तर्हि तव किं यशस्यमित्याकाङ्क्षायामाह—बलैरिति ॥ जित्य जित्वा । मां गृहीत्वेति शेषः । यायात् राम इतिच शेषः ॥ २९ ॥ एतन्नकेवलंमम रामस्यापीत्याह—शरैरिति ॥ ३० ॥ तस्य अनुरूपं विक्रान्तं यथा भवेत्तथा उपपादय कुरु ॥ ३१ ॥ अर्थोपहितं अर्थयुक्तं । सहितं परस्परसंगतं । हेतुसंहितं युक्तियुक्तं । शेषं पूर्वमनुक्तं । उत्तरं वाक्यमब्रवीत् ॥ ३२–३४ ॥ मनःसंकल्पसंपाताः मनोव्यापारतुल्यगमनाः ॥ ३५ ॥ न सज्जते न विलंबेत ॥ ३६—३७ ॥ प्रत्यवरः हीनः । पूर्वं चतुर्णामेवात्र गतिरिति विचारप्रकारमात्रमुक्तं । अत्र तु परमार्थः । यद्यपि बले हनुमानधिकः तथापि वेगे सुग्रीवसन्निहिता नीलादयः सर्वे तुल्या एवेति नानृतोक्तिः ॥ ३८—३९ ॥ एकोत्पातेन एकयत्नेन ॥ ४०–४१ ॥ विधमिष्यतः दहिष्यतः ॥ ४२—४३ ॥ कालकाङ्क्षिणी भव दिवसगणनायां तत्परा भवेत्यर्थः । नचिरात् अचिरात् ॥ ४४—४६ ॥ पुनरब्रवीदिति । दार्ढ्याय

नतुभवत्वेवंहरीणामागमनं । राघवयोःकथंतत्राह—**ममेति** । महासंघौ महासमुदाययुक्तौ ॥ ४१ ॥ इत्येकोनचत्वारिंशःसर्गः ॥ ३९ ॥

[पा०] १ ख. घ. त्वमस्मिन्. क. एतस्मिन्. २ ङ. झ. ञ. ट. समग्रैर्युधि. ३ घ. ङ. झ. ट. स्वपुरं. क. स्वांपुरीं. ग. स्वंपुरं. ४ ग. ङ. झ. ट. तत्तस्यसदृशंभवेत्. ५ क. ख. ग. ङ. झ. ट. बलैस्तु. ६ ङ.—ट. प्रश्रितं. ७ ख. हनुमाञ्श्रेष्ठं. ८ क. संपन्नाः. ९ ङ. छ.—ञ. स्वपुरीं. घ. च. ट. स्वांपुरीं. ख. स्वंपुरं. १० क.—ट. राक्षसेन्द्रेचसपुत्रा. ११ च. छ. ज. ञ. क्षिप्रमेष्यसिशोकस्यपरंपारंचमैथिलि. १२ ङ. झ. ट. द्रक्ष्यसिमैथिलि. १३ ङ. झ. ट. द्रक्ष्यसेनिहतंबलात्. ख. विहतं.

एवमाश्वास्य वैदेहीं हनुमान्मारुतात्मजः ॥ गमनाय मतिं कृत्वा [1]वैदेहीं पुनरब्रवीत् ॥ ४७ ॥
तमरिघ्नं कृतात्मानं क्षिप्रं द्रक्ष्यसि राघवम् ॥ लक्ष्मणं च धनुष्पाणिं लङ्काद्वारमुपस्थितम् ॥
[[3]सुग्रीवसहितं शूरं वानरैः परिवारितम्] ॥ ४८ ॥
नखदंष्ट्रायुधान्वीरान्सिंहशार्दूलविक्रमान् ॥ वानरान्वारणेन्द्राभान्क्षिप्रं द्रक्ष्यसि संगतान् ॥ ४९ ॥
शैलाम्बुदनिकाशानां लङ्कामलयसानुषु ॥ नर्दतां कपिमुख्यानामार्ये यूथान्यनेकशः ॥ ५० ॥
स तु मर्मणि घोरेण ताडितो मन्मथेषुणा ॥ न शर्म लभते रामः सिंहार्दित इव द्विपः ॥ ५१ ॥
मा[6] रुदो देवि शोकेन मा भूत्ते मनसोप्रियम् ॥ [7]शचीव पत्या [8]शक्रेण भर्त्रा नाथवती ह्यसि ॥५२॥
रामाद्विशिष्टः कोन्योस्ति कश्चित्सौमित्रिणा समः ॥ अग्निमारुतकल्पौ तौ भ्रातरौ [9]तेव संश्रयौ ॥ ५३ ॥
नासिंश्चिरं वत्स्यसि देवि देशे रक्षोगणैरध्युषितेतिरौद्रे ॥
न ते चिरादागमनं प्रियस्य क्षमस्व मत्सङ्गमकालमात्रम् ॥ ५४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनचत्वारिंशस्सर्गः ॥ ३९ ॥

चत्वारिंशः सर्गः ॥ ४० ॥

सीतयाहनुमन्तंप्रति श्रीरामे तेनस्वस्यमनश्शिलयातिलकरचनायाः प्रत्यभिज्ञानत्वेननिवेदनचोदनम् ॥ १ ॥ तथा स्वचरणप्रणामपूर्वकंप्रयाणोद्यतंहनुमन्तंप्रति श्रीरामे स्वीयदुरवस्थानिवेदनचोदनपूर्वकमाशीर्वचनेन गमनाभ्यनुज्ञानम् ॥ २ ॥

श्रुत्वा तु वचनं तस्य वायुसूनोर्महात्मनः ॥ उवाचात्महितं वाक्यं सीता सुरसुतोपमा ॥ १ ॥
त्वां दृष्ट्वा प्रियवक्तारं संप्रहृष्यामि वानर ॥ अर्धसंजातसस्येव वृष्टिं प्राप्य वसुन्धरा ॥ २ ॥
यथा तं पुरुषव्याघ्रं गात्रैः शोकाभिकर्शितैः[12] ॥ संस्पृशेयं [13]सकामाऽहं तथा कुरु दयां मयि ॥ ३ ॥
अभिज्ञानं च रामस्य दद्या हरिगणोत्तम[14] ॥ क्षिप्तामिषीकां काकस्य कोपादेकाक्षिशातनीम् ॥ ४ ॥
मनश्शिलायास्तिलको गण्डपार्श्वे निवेशितः ॥ त्वया प्रनष्टे तिलके [15]तत्किल स्मर्तुमर्हसि ॥ ५ ॥

पुनरुक्तिः ॥ ४७—४९ ॥ शैलाम्बुदेति द्रक्ष्यसीति शेषः ॥५०-५१॥ मा रुदः रोदनं मा कुरु ॥५२—५३॥ मत्सङ्गमकालमात्रं मम रामेण सङ्गमकालमात्रं ॥ ५४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

श्रुत्वेत्यादि ॥ १ ॥ अर्धसंजातसस्या अर्धोत्पन्नसस्या ॥ २—३ ॥ काकस्यैकाक्षिशातनीं क्षिप्तां इषीकां इषीकतृणरूपमभिज्ञानं पूर्वोक्तं दद्याः । अन्यच्च वक्ष्यामीति भावः । तदेवाह—मन इति ॥ तिलके पूर्वतिलके प्रनष्टे सति । गण्डपार्श्वे गण्डस्थले गण्डशैलपार्श्वे वा । मनश्शिलायास्तिलकः मनश्शिलाकृततिलकः । तत् मनश्शिलातिलकनिर्माणं । स्मर्तुमर्हसि । इदमप्यभिज्ञानं दद्या इति योजना ॥ ४—

ति० अर्धसंजातानिअर्धवयःप्राप्तानि । ततःपरंजलाभावादासन्नशोषाणिसस्यानियस्यास्सा । यथादैवात्संपन्नवृष्ट्यासंपन्नसस्या भवति तथाऽहमपि प्राप्तजीवितनाशा मृतोपमा त्वद्दर्शनाद्धृतजीविततिभावः ॥ २ ॥ ति० स्मर्तुमर्हसीति मयोक्तमितिब्रूहीतिशेषः

[पा०] १ क. ख. च. छ. ज. ञ. मैथिलीं. २ ङ. झ. ट. मुपागतं. ३ इदमर्धं ग. पाठेदृश्यते. ४ क. च. छ. ज. न्वानरेन्द्रेणक्षिप्रं. ५ च. छ. ज. ञ. मुख्यानामचिराच्छ्रोष्यसिध्वानिं. ख. घ. मुख्यानांनचिराच्छ्रोष्यसिस्वनं. ग. मुख्यानांमध्ये यूथा. ६ ङ. छ. झ. ट. रुदमादेविशोकेन. क. ज. ञ. अलंतेदेविशोकेन. ७ ङ. झ. ट. मनसोभयं. ८ क. घ. ङ. च. ज.—ट. शचीवभर्त्रा. ९ च. ज. ञ. शक्रेणपत्या. ङ. झ. ट. शक्रेणसङ्गमेष्यसिशोभने. १० क. च. छ. ज. ञ. रणसंश्रयौ. ११ ग. च. छ. ज. ञ. रध्युषितेहि. १२ घ. पीडितैः. १३ च. छ. ज. समासक्ता. १४ ख. घ. दत्तं. १५ झ. तंकिल.

स वीर्यवान्कथं सीतां हृतां समनुमन्यसे ॥ वसन्तीं रक्षसां मध्ये महेन्द्रवरुणोपमः ॥ ६ ॥
एष चूडामणिर्दिव्यो मया सुपरिरक्षितः ॥ एतं दृष्ट्वा प्रहृष्यामि व्यसने त्वामिवानघ ॥ ७ ॥
एष निर्यातितः श्रीमान्मया ते वारिसंभवः ॥ अतः परं न शक्ष्यामि जीवितुं शोकलालसा ॥ ८ ॥
असह्यानि च दुःखानि वाचश्च हृदयच्छिदः ॥ राक्षसीनां सुघोराणां त्वत्कृते मर्षयाम्यहम् ॥ ९ ॥
धारयिष्यामि मासं तु जीवितं शत्रुसूदन ॥ मासादूर्ध्वं न जीविष्ये त्वया हीना नृपात्मज ॥ १० ॥
घोरो राक्षसराजोयं दृष्टिश्च न सुखा मयि ॥ त्वां च श्रुत्वा विषज्जन्तं न जीवेयमहं क्षणम् ॥ ११ ॥
वैदेह्या वचनं श्रुत्वा करुणं साश्रु भाषितम् ॥ तथाऽब्रवीन्महातेजा हनुमान्मारुतात्मजः ॥ १२ ॥
त्वच्छोकविमुखो रामो देवि सत्येन ते शपे ॥ रामे दुःखाभिभूते तु लक्ष्मणः परितप्यते ॥ १३ ॥
कथंचिद्धृती दृष्ट्वा न कालः परिशोचितुम् ॥ इमं मुहूर्तं दुःखानामन्तं द्रक्ष्यसि भामिनि ॥ १४ ॥
तावुभौ पुरुषव्याघ्रौ राजपुत्रावरिन्दमौ ॥ त्वद्दर्शनकृतोत्साहौ लङ्कां भस्मीकरिष्यतः ॥ १५ ॥
हत्वा तु समरे क्रूरं रावणं सहबान्धवम् ॥ राघवौ त्वां विशालाक्षि स्वां पुरीं प्रापयिष्यतः ॥ १६ ॥
यत्तु रामो विजानीयादभिज्ञानमनिन्दिते ॥ प्रीतिसंजननं तस्य भूयस्त्वं दातुमर्हसि ॥ १७ ॥
साब्रवीद्दत्तमेवेति मयाभिज्ञानमुत्तमम् ॥ एतदेव हि रामस्य दृष्ट्वा मत्केशभूषणम् ॥
श्रद्धेयं हनुमन्वाक्यं तव वीर भविष्यति ॥ १८ ॥
स तं मणिवरं गृह्य श्रीमान्प्लवगसत्तमः ॥ प्रणम्य शिरसा देवीं गमनायोपचक्रमे ॥ १९ ॥
तमुत्पातकृतोत्साहमवेक्ष्य हरिपुङ्गवम् ॥ वर्धमानं महावेगमुवाच जनकात्मजा ॥
अश्रुपूर्णमुखी दीना बाष्पगद्गदया गिरा ॥ २० ॥
हनुमन्सिंहसंकाशौ भ्रातरौ रामलक्ष्मणौ ॥ सुग्रीवं च सहामात्यं सर्वान्ब्रूया ह्यनामयम् ॥ २१ ॥
यथा च स महाबाहुर्मां तारयति राघवः ॥ अस्माद्दुःखांबुसंरोधात्त्वं समाधातुमर्हसि ॥ २२ ॥
इमं च तीव्रं मम शोकवेगं रक्षोभिरेभिः परिभर्त्सनं च ॥
ब्रूयास्तु रामस्य गतः समीपं शिवश्च तेऽध्वाऽस्तु हरिप्रवीर ॥ २३ ॥

६ ॥ प्रहृष्यामीति । अस्य चूडामणेस्त्वया बहुशो लालितत्वेन त्वत्स्मारकत्वादितिभावः ॥ ७ ॥ वारिसंभवः । रत्नं हि रत्नाकरे उत्पद्यते । अतःपरं मासात्परं ॥ ८—१० ॥ विषज्जन्तं विलम्बमानं ॥ ११—१३ ॥ इमं मुहूर्तं अस्मिन्मुहूर्ते ॥ १४—२२ ॥ शिवः अव्याहत इत्यर्थः ॥ २३ ॥

॥ ५ ॥ ति० दिव्यएषचूडामणिः एतावत्कालंसुपरिरक्षितः । एतंव्यसनेत्वामिवदृष्ट्वाप्रहृष्यामि । एतत्संनिधानेरक्षोऽभिभवासंभवादितिभावः ॥ ७ ॥ ती० त्वत्कृते त्वत्प्राप्त्याशया ॥ ९ ॥ स० मासादूर्ध्वमित्युक्तिस्तुकालेधिकेसत्यपितीव्रागमनाभिप्रायेणवा दिनेषुसत्स्वप्यात्मघाताभिप्रायेणवेतिज्ञातव्यं ॥ १० ॥ ति० यतोऽयंघोरस्तस्यदृष्टिश्च । चाद्बुद्धिः नसुखा अवधिकालादूर्ध्वकृतविनाशनिश्चया । अतस्तत्पूर्वमेवमरणौचित्यादवधिकालस्याधिकक्लेपिमासादूर्ध्वमेवनजीविष्यामि । किंचत्वां विषज्जन्तं विलम्बंकुर्वन्तं । यदिश्रृणुयां तदा तथाश्रुत्वामासादर्वागेवक्षणमपिनजीवेयमित्युक्तमितिब्रूहीतिशेषः ॥ स० विषज्जन्तं असक्तमिवविद्यमानं ॥ ११ ॥ ति० त्वच्छोकविमुखः त्वत्स्थित्यपरिज्ञानजशोकेनत्वदुद्धारप्रवृत्तिविमुखः । नतुज्ञात्वेति सत्येनतेशपे ॥ १३ ॥ ति० त्वंसमाधातुमित्यस्य तथेत्यादिः । समाधानं संविधानं । अथापिसमहाबाहुरितिपाठे यथेत्यपिपूरणीयमेव । यद्यपिश्रुतवृत्तान्तःस्वयमेवयतिष्य-

[पा०] १ क. ख. घ. च.—ट. वरुणोपम. २ क. ङ. ट. संपरि. ३ ङ. झ. ट. राक्षसैस्सहसंवासं. ४ घ. विपन्नंतु. ५ ङ. झ. ट. मपिक्षणं. ६ क. ख. ग. ङ.—ट. अथाब्रवीत्. घ. ततोऽब्रवीत्. ७ क. ग.—च. ज. झ. ट. शोकाभिभूते. ८ क. ग. ङ.—ट. दृष्टाकथंचिद्धृती. ९ ङ. झ. ट. परिदेवितुं. १० घ.—ट. वनिन्दितौ. ११ घ. छित्त्वातु. १२ क. ग. घ. च. छ. ज. ञ. घोरं. ङ. झ. ट. रक्षो. १३ क. ङ.—ट. बान्धवैः. १४ क. ग. च. छ. ज. ञ. राघवस्त्वां. १५ ङ. झ. ट. प्रतिनेष्यतः. क. च. छ. ज. ञ. प्रतिनेष्यति. ग. प्रापयिष्यति. १६ ङ. झ. ट. यत्नेनभूषणं. १७ क. ग, च. ज, ञ, बाष्पसंदिग्धया. १८ क. ग. ञ. शोकंममतीव्रवेगं. १९ घ. शिवश्चपन्थास्तु.

स राजपुत्र्या प्रतिवेदितार्थः कपिः कृतार्थः परिहृष्टचेताः ॥
अल्पावशेषं प्रसमीक्ष्य कार्यं दिशं ह्युदीचीं मनसा जगाम ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

एकचत्वारिंशः सर्गः ॥ ४१ ॥

हनुमता रावणेनसह साक्षात्संभाषणादिनातदीयबलाध्यवसायादिपरिज्ञानस्यावश्यकत्वनिर्धारणपूर्वकंवनभङ्गनस्य तद्दर्शनोपायत्वनिर्धारणेनाशोकवनभङ्गनम् ॥ १ ॥

स च वाग्मिः प्रशस्ताभिर्गमिष्यन्पूजितस्तया ॥ तस्मादेशादपक्रम्य चिन्तयामास वानरः ॥ १ ॥
अल्पशेषमिदं कार्यं दृष्टेयमसितेक्षणा ॥ त्रीनुपायानतिक्रम्य चतुर्थ इह लक्ष्यते ॥ २ ॥
न साम रक्षस्सु गुणाय कल्पते न दानमर्थोपचितेषु युज्यते ॥
न भेदसाध्या बलदर्पिता जनाः पराक्रमस्त्वेव ममेह रोचते ॥ ३ ॥
न चास्य कार्यस्य पराक्रमादृते विनिश्चयः कश्चिदिहोपपद्यते ॥
हतप्रवीरा हि रणे हि राक्षसाः कथंचिदीयुर्यदिहाद्य मार्दवम् ॥ ४ ॥
कार्ये कर्मणि निर्दिष्टे यो बहून्यपि साधयेत् ॥ पूर्वकार्याविरोधेन स कार्यं कर्तुमर्हति ॥ ५ ॥
न ह्येकः साधको हेतुः स्वल्पस्यापीह कर्मणः ॥ यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने ॥ ६ ॥

अल्पावशेषं अल्पावशिष्टं । प्रसमीक्ष्य विचार्य॥२४॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चत्वारिंशः सर्गः ॥ ४० ॥

" अभिगम्य तु वैदेहीं निलयं रावणस्यच " इत्युक्तकार्यद्वये सीतादर्शनरूपं कार्यं जातं । इदं कार्यं रावणनिलयपरिज्ञानरूपं । अल्पशेषं अल्पावशिष्टं । सान्तःपुरलङ्कायाः सम्यक्परिज्ञातत्वेपि राक्षसबलाबलरावणहृदयाद्यपरिज्ञानात्कार्यस्याल्पशेषत्वोक्तिः । इह राक्षसबलाबलरावणहृदयपरिज्ञानरूपकार्ये । त्रीनुपायानतिक्रम्य सामदानभेदानतिक्रम्य । चतुर्थो लक्ष्यते साधनतया दण्ड एवदृश्यतइत्यर्थः ॥ २ ॥ उपपत्तिपूर्वकमेतदेव विवृणोति—न सामेति ॥ " अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः । पराजयश्च संग्रामे तस्माद्युद्धं विसर्जयेत् " इति युद्धस्याव्यवस्थितफलकत्वेपि " सर्वं बलवतः पथ्यं " इति न्यायेन सर्वातिशायिबलपराक्रमस्य मम पराजयप्रसङ्ग एव नास्तीत्यभिप्रायेणाह—पराक्रम इति । मम तु इह रक्षोविषये पराक्रम एव रोचत इति संबन्धः ॥ ३—४ ॥ " अभिगम्य तु वैदेही निलयं रावणस्य च " इत्यनुज्ञातस्यातिरिक्तकार्यकरणे दोषमाशङ्क्य परिहरति—कार्य इति ॥ कार्ये विहिते कर्तव्ये । बहूनि कार्याणि ॥ ५ ॥ अल्पस्यापि कर्मणः एको

ति तथापि त्वमपियथामांशीघ्रंतारयसि तथासंविधानंकुर्वित्यर्थः ॥२२॥ **ति०** तत्कार्यं लङ्कागमनप्रयोजनं । अल्पशेषं । देवीदर्शनरूपस्यमहतःप्रधानकृत्यस्यनिष्पन्नत्वात्परबलार्दनरूपस्यानुषङ्गिकत्वादल्पशेषत्वमित्याशयः ॥२५॥ इतिचत्वारिंशःसर्गः ॥४०॥

ति० अस्यकार्यस्य परबलाशयपरिज्ञानरूपस्य । सर्वातिशायिपराक्रमवतोममपराजयएवनास्तीत्याशयेनाह—पराक्रमादृते इति । विनिश्चयः निश्चितोपायः । स्वबलप्रकाशनेप्रयोजनान्तरमप्यस्तीत्याह—हतेति । अथ हताःप्रवीराः श्रेष्ठायेषांतेराक्षसाः यत् यस्मात् इह भाविनिरणे । मार्दवं एकेनैवैवंपराक्रमःकृतः तादृग्भिरनेकैःकथमस्माकंजयाशेतिरणप्रवृत्तिराहित्यंप्राप्नुयुः । अतः पराक्रमात्परबलस्यमनोभङ्गरूपंकार्यंसिध्यतीत्याशयः । **शि०** इह अस्मिन्समये । राक्षसाःकथंचित् केनाप्युपायेनयदिहतप्रवीराः तर्हिमार्दवं किंचिन्नश्रुतं । ईयुः । एतेन नश्रीभूययदिसीतांरामायसमर्पयेत् तर्हिराक्षसकुलविध्वंसो नभवेदितिसूचितं । तेनहनुमतो दयालुत्वंव्यक्तं ॥४॥ **ति०** उक्तमेवविवृणोति—**नहीति**।यस्तु स्वल्पस्यापिकर्मणोतिशयितयत्नेनसिद्धिहेतुर्भवति असावेकोमुख्यः

[पा०] १ घ. ट. प्रतिपादितार्थः. २ क.—ट. तदल्पशेषं. ३ च. स्तदा. ४ क. ग. घ. च. छ. ज. वर्तते. ५ ख. ग. ङ. झ. ट. स्त्वेष. ६ ङ. च. छ. झ. ञ. ट. निर्वृत्ते. क. संवृत्ते.

इहैव तावत्कृतनिश्चयो ह्यहं यदि व्रजेयं प्लवगेश्वरालयम् ॥
परात्मसंमर्दविशेषतत्त्ववित्ततः कृतं स्यान्मम भर्तृशासनम् ॥ ७ ॥
कथं नु खल्वद्य भवेत्सुखागतं प्रसह्य युद्धं मम राक्षसैः सह ॥
तथैव खल्वात्मबलं च सारवत्समानयेन्मां च रणे दशाननः ॥ ८ ॥
ततः समासाद्य रणे दशाननं समन्त्रिवर्गं सबलप्रयायिनम् ॥
हृदि स्थितं तस्य मतं बलं च वै सुखेन मत्वाऽहमितः पुनर्व्रजे ॥ ९ ॥
इदमस्य नृशंसस्य नन्दनोपममुत्तमम् ॥ वनं नेत्रमनःकान्तं नानाद्रुमलतायुतम् ॥ १० ॥
इदं विध्वंसयिष्यामि शुष्कं वनमिवानलः ॥ अस्मिन्भग्ने ततः कोपं करिष्यति दशाननः ॥ ११ ॥
ततो महत्साश्वमहारथद्विपं बलं समादेक्ष्यति राक्षसाधिपः ॥
त्रिशूलकालायसपट्टसायुधं ततो महद्युद्धमिदं भविष्यति ॥ १२ ॥
अहं तु तैः संयति चण्डविक्रमैः समेत्य रक्षोभिरसह्यविक्रमः ॥
निहत्य तद्रावणचोदितं बलं सुखं गमिष्यामि कपीश्वरालयम् ॥ १३ ॥
ततो मारुतवत्क्रुद्धो मारुतिर्भीमविक्रमः ॥ ऊरुवेगेन महता द्रुमान्क्षिप्रमथारभत् ॥ १४ ॥
ततस्तु हनुमान्वीरो बभञ्ज प्रमदावनम् ॥ मत्तद्विजसमाघुष्टं नानाद्रुमलतायुतम् ॥ १५ ॥

हेतुस्साधकोन किमुत महतः कर्मण इति भावः । बहुधा बहुभिर्हेतुभिः ॥ ६ ॥ पूर्वोक्तसमर्थनायाह— इहैवेति ॥ अहमिहैव परात्मसंमर्दविशेषतत्त्ववित् परात्मनोर्युद्धतारतम्यतत्त्ववित् । कृतनिश्चयः कृतबलाबलनिश्चयः सन् यदि प्लवगेश्वरालयं व्रजेयं ततः भर्तृशासनं सीतादर्शनरावणनिलयसम्यक्परिज्ञानविषयं शासनं । तावत्साकल्येन कृतं स्यात् । अन्यथा राक्षसबलावलं कीदृशमितिभर्त्रापृष्टे निरुत्तरः स्यामिति भावः ॥ ७ ॥ युद्धं कथं सुखागतं सुखेन प्राप्तं भवेत्तथा कर्तव्यमित्यर्थः । युद्धस्य फलमाह— तथैवेत्यादिना सार्धश्लोकेन ॥ तथैव खलु युद्धकरणे खलु । स दशाननः । रणे आत्मबलं स्वपक्षबलं मां च । सारवत् मानयेत्परिच्छिन्द्यात् ॥ ८ ॥ बलप्रयायिना सेनान्या सह वर्तत इति सबलप्रयायी तं । तस्य हृदिस्थितं मतं सीताविषयाध्यवसायं बलं च मत्वा । सुखेन इतः अस्मात्स्थानात् । पुनः व्रजे व्रजिष्यामि ॥ ९ ॥ नेत्रमनःकान्तं वर्तत इति शेषः ॥ १०— १२ ॥ समादेक्ष्यति नियोजयिष्यति । इदं अव्यवहितोत्तरकालिकं ॥ १२ ॥ कपीश्वरालयमित्यनन्तरमितिकरणं द्रष्टव्यं । इति चिन्तयामासेत्यन्वयः ॥१३॥ ततः तेन चिन्तितेन हेतुना ॥ १४ ॥ प्रमदावनं अन्तःपुरवनं । "प्रमदावनमन्तःपुरोचितं" इत्यमरः

साधकोहेतुर्नभवति । अपितु योद्ध्यर्थं प्रयोजनं । अल्पेनयत्नेन बहुधाकर्तुंवेद सएवार्थसाधने समर्थः ॥ ६ ॥ **ति०** एवंनिश्चितार्थो युद्धप्रवृत्तिप्रकारंचिन्तयति—**कथंन्विति** । अद्यखलु ममेहागतं आगमनं । सुखागतं सुखफलकमागमनंकथंभवेत् । तथा राक्षसैः सहप्रसह्यस्वयमेवबलात्कृत्ययुद्धंच कथंममभवेत् । तथा तथैवकरणेसति । सारवत् ऊर्जितंस्वबलंमांच सदशाननः कथंमानयेत् श्लाघयेत् । यद्वा तथैवयुद्धकरणेखलु दशाननः आत्मबलंमांचसारवत्संमानयेत् सम्यक्परिच्छिन्द्यादित्यर्थेनयुद्धफलमुक्तं ॥ ८ ॥ **ति०** ततोमद्बलवशादेवमारणेसमासाद्यवर्तमानं सबलं सयायिनं ससारथिं । अन्तर्भावितण्यर्थाद्यातेर्णिनौ यापयितायायी सारथिः । तेनसहितंरावणंज्ञात्वा हृदिस्थितंतस्यमतं अभीष्टंबलंच । सुखेन अक्लेशतोमत्वा ज्ञात्वा । पुनरितोव्रजे व्रजिष्ये । सबलप्रयायिनमित्याधुनिककल्पितःपाठः ॥ ९ ॥ **शि०** इदंवनं अस्य रावणस्य । मनःकान्तं मनःप्रियं । अस्तीतिशेषः ॥ १० ॥ **शि०** इदंवनं शुष्कंवनमनलइवविध्वंसयिष्यामि । यदितु एतच्छ्लोकघटकस्य इदमित्यस्य स्वप्रवेशिनोजनस्योद्दीपनद्वारा इंकामंददातीतितथाइत्यर्थः तदापूर्वस्मापीहैवान्वयः । एवंच पूर्वत्रास्तेरध्याहारस्य न प्रयोजनं ॥ ११ ॥

[पा०] १ ग. घ. सुखावहं. २ ङ. च. झ. ट. सबलंसयायिनं. घ. सबलंसबान्धवं. ३ क. ङ.—ट. समानेष्यति. ४ ङ. झ. ञ. ट. रभङ्गविक्रमः. घ. रसह्यविक्रमैः. ५ ग. ङ. झ. ढ. ततस्तद्धनुमान्.

तद्वनं मथितैर्वृक्षैर्भिन्नैश्च सलिलाशयैः ॥ चूर्णितैः पर्वताग्रैश्च बभूवाप्रियदर्शनम् ॥ १६ ॥
नानाशकुन्तविरुतैः प्रभिन्नैः सलिलाशयैः ॥ ताम्रैः किसलयैः क्रान्तैः क्रान्तद्रुमलतायुतम् ॥
न बभौ तद्वनं तत्र दावानलहतं यथा ॥ १७ ॥
व्याकुलावरणा रेजुर्विह्वला इव ता लताः ॥ १८ ॥
लतागृहैश्चित्रगृहैश्च नाशितैर्महोरगैर्व्यालमृगैश्च निर्धुतैः ॥
शिलागृहैरुन्मथितैस्तथा गृहैः प्रनष्टरूपं तदभून्महद्वनम् ॥ १९ ॥
सा विह्वलाऽशोकलताप्रताना वनस्थली शोकलताप्रताना ॥
जाता दशास्यप्रमदावनस्य कपेर्बलाद्धि प्रमदावनस्य ॥ २० ॥
सं तस्य कृत्वाऽर्थपतेर्महाकपिर्महद्व्यलीकं मनसो महात्मनः ॥
युयुत्सुरेको बहुभिर्महाबलैः श्रिया ज्वलंस्तोरणमाश्रितः कपिः ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

द्विचत्वारिंशः सर्गः ॥ ४२ ॥

हनुमताऽवभञ्जने संभ्रान्तपक्षिकुलकोलाहलैर्वृक्षभङ्गरवैश्च प्रबुद्धाभीराक्षसीभिःसीतांप्रति हनुमत्स्वरूपादिप्रश्नः ॥ १ ॥ सीतया कैतवेनस्वस्यतदपरिज्ञानोक्तौ राक्षसीभीरावणायतन्निवेदनम् ॥ २ ॥ रावणचोदितैरशीतिसंख्याकैःकिङ्करनामकै राक्षसैस्तोरणस्थंहनुमन्तंप्रति युद्धायाभियानम् ॥ ३ ॥ हनुमता रामादिजयोद्घोषणेनसह स्वनामनिर्देशेनस्वस्यरामदूतत्वोद्घोषणपूर्वकं सकलकिङ्करराक्षससंहरणम् ॥ ४ ॥

ततः पक्षिनिनादेन वृक्षभङ्गस्वनेन च ॥ बभूवुस्त्रासंभ्रान्ताः सर्वे लङ्कानिवासिनः ॥ १ ॥

॥ १५ ॥ पर्वताग्रैः क्रीडापर्वताग्रैः ॥ १६—१७ ॥ व्याकुलावरणाः आवरणादुपन्नाव्याकुलाः । विह्वलाः स्त्रिय इव ॥ १८ ॥ व्यालमृगैः श्वापदादिहिंस्रमृगैः । निर्धुतैः पीडितैः । गृहैः केवलगृहैः ॥ १९ ॥ शोच्यत इति शोकः । प्रतानं विततिः । अशोकं अशोच्यं लताप्रतानं यस्यास्सा अशोकलताप्रताना । दशास्यप्रमदावनस्य भोगवर्धनेन रावणवनितारक्षकस्य । प्रमदावनस्य अन्तःपुरोद्यानस्य । सा वनस्थली तृणगुल्मलतादिविशिष्टप्रदेशः । कपेर्बलाद्धि विह्वला लुलिता शोकलताप्रताना च जाता । यद्वा शोकलताश्शोकरताः । रलयोरभेदः । अप्रतानाः अप्सु प्रतानाः कमलकह्लारादयोऽस्यां सा शोकलताप्रताना । म्लानजलजेति यावत् । दशास्यप्रमदावनस्य रावणप्रमदावनस्य । "ङ्यापोस्संज्ञाच्छन्दसोर्बहुलम्" इति बहुलवचनाद्भस्वाभावः । दशास्यप्रमदावनस्य वनस्थलीत्यत्र शिलापुत्रकस्य शरीरमितिवदुपचारात्षष्ठी । प्रमदावनस्य सीतारूपप्रमदापालकस्य । वनस्थली कपेर्बलाद्विह्वला शोकलताप्रताना च जाता । अशोकलतेत्युपलक्षणं ॥ २० ॥ अर्थपतेः राज्ञो रावणस्य । मनसः व्यलीकं अप्रियं पीडनं वा । "अलीकं त्वप्रियाकार्यवैलक्ष्यानृतपीडने" इति निघण्टुः।युयुत्सुः योद्धुमिच्छुः । तोरणं उद्यानबहिर्द्वारं । "तोरणोस्त्री बहिर्द्वारं" इत्यमरः ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकचत्वारिंशः सर्गः ॥ ४१ ॥

उतशब्दो वार्थे । "उताप्यर्थविकल्पयोः"

ति० पर्वताग्रैः उपलक्षितमितिशेषः ॥ १६ ॥ शि० विह्वलाः अशोकलताप्रतानाः विस्तृताशोकलताःयस्यांसा वनस्थली । प्रमदस्य उत्कृष्टमदस्य अवनेरक्षणंयस्मिंस्तस्य । निर्लमदविशिष्टस्येत्यर्थः । दशास्यप्रमदावनस्य रावणस्त्रीसमूहस्य । कपेर्बलात् शोकरूपलताप्रतानःलताविस्तारोयस्यांसा जाता ॥ २० ॥ इत्येकचत्वारिंशःसर्गः ॥ ४१ ॥

[पा०] १ ख. घ. बभूवाद्भुतदर्शनं. ङ. च. ट. बहुधाप्रियदर्शनं. झ. बहुधाप्रियदर्शनैः. २ ङ. झ. ट. लतायुतैः. ३ ङ.—ट. सादितैर्व्यालैर्मृगैरार्तरवैश्चपक्षिभिः. ४ क. व्याघ्रमृगैश्च. ५ ङ. झ. ट. ततस्सकृत्वाजगतीपतेर्महान्कपिः. ६ ग. बहुभिर्निशाचरैः. ७ क. ग.—च. झ. ञ. ट. माश्रितः.

विद्रुताश्च भयत्रस्ता विनेदुर्मृगपक्षिणः ॥ रक्षसां च निमित्तानि क्रूराणि प्रतिपेदिरे ॥ २ ॥
ततो गतायां निद्रायां राक्षस्यो विकृताननाः ॥ तद्वनं ददृशुर्भग्नं तं च वीरं महाकपिम् ॥ ३ ॥
स ता दृष्ट्वा महाबाहुर्महासत्त्वो महाबलः ॥ चकार सुमहद्रूपं राक्षसीनां भयावहम् ॥ ४ ॥
ततस्तं गिरिसंकाशमतिकायं महाबलम् ॥ राक्षस्यो वानरं दृष्ट्वा पप्रच्छुर्जनकात्मजाम् ॥ ५ ॥
कोयं कस्य कुतो वाऽयं किंनिमित्तमिहागतः ॥ कथं त्वया सहानेन संवादः कृत इत्युत ॥ ६ ॥
आचक्ष्व नो विशालाक्षि मा भूत्ते सुभगे भयम् ॥ संवादमसितापाङ्गे त्वया किं कृतवानयम् ॥७॥
अथाब्रवीत्तदा साध्वी सीता सर्वाङ्गसुन्दरी ॥ रक्षसां भीमरूपाणां विज्ञाने मम का गतिः ॥ ८ ॥
यूयमेवाभिजानीत योऽयं यद्वा करिष्यति ॥ अहिरेव ह्यहेः पादान्विजानाति न संशयः ॥ ९ ॥
अहमप्यस्य भीताऽस्मि नैनं जानामि कोन्वयम् ॥ वेद्मि राक्षसमेवैनं कामरूपिणमागतम् ॥१०॥
वैदेह्या वचनं श्रुत्वा राक्षस्यो विद्रुता दिशः ॥ स्थिताः काश्चिद्गताः काश्चिद्रावणाय निवेदितुम् ॥११॥
रावणस्य समीपे तु राक्षस्यो विकृताननाः ॥ विरूपं वानरं भीममाख्यातुमुपचक्रमुः ॥ १२ ॥
अशोकवनिकामध्ये राजन्भीमवपुः कपिः ॥ सीतया कृतसंवादस्तिष्ठत्यमितविक्रमः ॥ १३ ॥
न च तं जानकी सीता हरिं हरिणलोचना ॥ अस्माभिर्बहुधा पृष्टा निवेदयितुमिच्छति ॥ १४ ॥
वासवस्य भवेद्दूतो दूतो वैश्रवणस्य वा ॥ प्रेषितो वाऽपि रामेण सीतान्वेषणकाङ्क्षया ॥ १५ ॥
तेन त्वद्भुतरूपेण यत्तत्तव मनोहरम् ॥ नानामृगगणाकीर्णं प्रमृष्टं प्रमदावनम् ॥ १६ ॥
न तत्र कश्चिदुद्देशो यस्तेन न विनाशितः ॥ यत्र सा जानकी सीता न स तेन न विनाशितः ॥१७॥
जानकीरक्षणार्थं वा श्रमाद्वा नोपलभ्यते ॥ अथवा कः श्रमस्तस्य सैव तेनाभिरक्षिता ॥ १८ ॥
चारुपल्लवपुष्पाढ्यं यं सीता स्वयमाश्रिता ॥ प्रवृद्धः शिंशुपावृक्षः स च तेनाभिरक्षितः ॥ १९ ॥
तस्योग्ररूपस्योग्र त्वं दण्डमाज्ञातुमर्हसि ॥ सीता संभाषिता येन तद्वनं च विनाशितम् ॥ २० ॥

इत्यमरः । संवादो वा कथं कृत इति पप्रच्छुरिति पूर्वेण संबन्धः । कः किंनामकः । कस्य कस्य संबन्धी पुरुषः । कुतः कस्मादेशादागतः । किंनिमित्तं किं प्रयोजनमुद्दिश्य । संवादं किं कृतवान् किमुद्दिश्य कृतवान् । सर्वस्यापि पप्रच्छुरितिपूर्वेणान्वयः ॥६–८॥ अयं यः यादृशः । यद्वा कार्यं करिष्यति तद्यूयमेवाभिजानीतेति संबन्धः ॥ ९ ॥ नैनं जानामीति । "विवाहकाले रतिसंप्रयोगे प्राणात्यये सर्वधनापहारे । मित्रस्य चार्थेष्यनृतं वदेयुः पञ्चानृतान्याहुरपातकानि" इति स्मरणादसत्योक्तिः ॥ १० ॥ दिशः दिक्षु । वनस्यपार्श्वेष्वित्यर्थः । विद्रुताः विलीनाः । निवेदितुं निवेदयितुं ॥११—१५॥ प्रमृष्टं भग्नमित्यर्थः ॥१६—१९॥ हे उग्र त्वं आज्ञातुं आज्ञापयितुं ॥२०

ति० पप्रच्छुः तस्यानिर्निद्रतयाऽवस्थानंमलेतिभावः ॥ ५ ॥ ति० त्वयाऽनेनकथंसंवादःकृतइतिचपप्रच्छुः । यद्यपितानिद्रिताः । वनभङ्गध्वनिनाजागरिताइतिसंवादज्ञानस्यैवाभावात्कथंप्रश्नोनिरवसरः । तथापि निद्रामध्येकिञ्जिज्जागरेणेषत्संवादश्रवणेपि देवमायया पुनर्निद्रेतितत्प्रश्नोपपत्तिरित्याहुः । सीतायास्तदृर्शनेपिनिर्भयप्रसन्नमुखतयाऽवस्थानादर्शनादयंकश्चिदेतत्परिचितएतद्वृत्तान्तज्ञानार्थमेवप्रायेणागतइतिसंभाव्यानयासंवादकरणंचसंभाव्य तत्प्रश्ननिर्वाहइतिकतकः ॥ ६ ॥ ति० कागतिः कउपायः ॥८॥ ति० ननिवेदयितुमिच्छति । प्रायेणेयंतंजानातीतिसामाशयः ॥ १४ ॥ ति० उद्देशः प्रदेशः ॥ १७ ॥

[पा०] १ क. विद्राविताश्वसंत्रस्ताः. २ ङ. झ. ट. निषेदुः. ३ घ. ददृशुर्भिन्नं. ४ च. भीमं. ५ च. ज. ञ. महामतिं. ६ च. छ. ज. ञ. त्वयानेनपुनः. ७ क.—ट. सर्वाङ्गशोभना. ८ क.—ट. कामरूपाणां. ९ ङ. झ. ट. कागतिर्मम. १० घ. ङ. झ. ट. यूयमेवास्यजानीत. क. ग. यूयमेवात्र. च. छ. ज. ञ. यूयमेवहि. ११ ङ. झ. ट. अहमप्यति. १२ ङ. झ. ट. नैवजानामिकोह्यहं. १३ क. ख. दृढं. ङ. झ. ट. द्रुतं. ग. भयात्. १४ ङ. झ. ट. भीमंरावणायन्यवेदिषुः. क. भीमंव्याख्यातुमुप. १५ ङ. झ. ट. तेनैवाद्भुत. १६ क. ञ. वीर्येण. १७ ङ. झ. ट. देवी, १८ क. ङ. ज—ट. लक्ष्यते. १९ क. घ. ङ. झ. ट. पत्राढ्यं. च. छ. ज. ञ. शोभाढ्यं. २० ङ. छः झ. ञ. रूपस्योग्रं. २१ ग. ङ.—ट. वनंतेन.

मनःपरिगृहीतां तां तव रक्षोगणेश्वर ॥ कः सीतामभिभाषेत यो न स्यात्त्यक्तजीवितः ॥ २१ ॥
राक्षसीनां वचः श्रुत्वा रावणो राक्षसेश्वरः ॥ हुताग्निरिव जज्वाल कोपसंवर्तितेक्षणः ॥ २२ ॥
तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन्नास्रबिन्दवः ॥ दीप्ताभ्यामिव दीपाभ्यां सार्चिषः स्नेहबिन्दवः ॥२३॥
आत्मनः सदृशाञ्छूरान्किंकरान्नाम राक्षसान् ॥ व्यादिदेश महातेजा निग्रहार्थं हनूमतः ॥ २४ ॥
तेषामशीतिसाहस्रं किंकराणां तरस्विनाम् ॥ २५ ॥
निर्ययुर्भवनात्तस्मात्कूटमुद्गरपाणयः ॥ महोदरा महादंष्ट्रा घोररूपा महाबलाः ॥
युद्धाभिमनसः सर्वे हनुमद्ग्रहणोन्मुखाः ॥ २६ ॥
ते कपीन्द्रं समासाद्य तोरणस्थमवस्थितम् ॥ अभिपेतुर्महावेगाः पतङ्गा इव पावकम् ॥ २७ ॥
ते गदाभिर्विचित्राभिः परिघैः काञ्चनाङ्गदैः ॥ आजघ्नुर्वानरश्रेष्ठं शरैश्चादित्यसन्निभैः ॥ २८ ॥
मुद्गरैः पट्टिशैः शूलैः प्रासतोमरशक्तिभिः ॥ परिवार्य हनूमन्तं सहसा तस्थुरग्रतः ॥ २९ ॥
हनुमानपि तेजस्वी श्रीमान्पर्वतसन्निभः ॥ क्षितावाविध्य लाङ्गूलं ननाद च महास्वनम् ॥ ३० ॥
स भूत्वा सुमहाकायो हनुमान्मारुतात्मजः ॥ धृष्टमास्फोटयामास लङ्कां शब्देन पूरयन् ॥ ३१ ॥
तस्यास्फोटितशब्देन महता सानुनादिना ॥ पेतुर्विहङ्गा गगनाद्दुश्चैश्चेदमघोषयत् ॥ ३२ ॥
जयत्यतिबलो रामो लक्ष्मणश्च महाबलः ॥ राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ ३३ ॥
दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः ॥ हनुमाञ्शत्रुसैन्यानां निहन्ता मारुतात्मजः ॥ ३४ ॥
न रावणसहस्रं मे युद्धे प्रतिबलं भवेत् ॥ शिलाभिस्तु प्रहरतः पादपैश्च सहस्रशः ॥ ३५ ॥
अर्दयित्वा पुरीं लङ्कामभिवाद्य च मैथिलीम् ॥ समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम् ॥३६॥
तस्य सन्नादशब्देन तेऽभवन्भयशङ्किताः ॥ ददृशुश्च हनूमन्तं संध्यामेघमिवोन्नतम् ॥ ३७ ॥

—२१॥ संवर्तितेक्षणः परिवर्तितेक्षणः ॥२२—२३॥ नाम प्रसिद्धौ । किंकर इति प्रसिद्धानित्यर्थः ॥ २४ ॥ किंकराणां संख्यां निर्दिशति—तेषामिति ॥ २५ ॥ सर्व इति विशेष्यं । कूटो नाम अयस्कारकूटसदृश आयुधविशेषः । मुद्गरः द्रुघणः ॥ २६ ॥ अवस्थितं युद्धाय सन्नद्धमित्यर्थः ॥ २७ ॥ परिघैः परिघपातनैः । काञ्चनाङ्गदैः काञ्चनपटैः ॥ २८ ॥ पट्टिशो नाम लोहदण्डः तीक्ष्णधारः क्षुरोपमआयुधविशेषः । अत्रेत्थंभूतलक्षणे तृतीया । प्रासः कुन्तः । तोमरः आयुधविशेषः ॥ २९ ॥ श्रीमानिति तात्कालिकहर्षकृतकान्तिरुच्यते ॥ ३० ॥ धृष्टमिति क्रियाविशेषणं ॥ ३१ ॥ सानुनादिना सप्रतिध्वनिना । यद्वा अनुनादिनः पर्वतगुहादयः तत्सहितेन । यद्वा सानुषु प्रतिध्वनिंकुर्वता । उच्चैश्चेदमघोषयदिति । स हनुमान इदं वक्ष्यमाणं वचनमुच्चैरघोषयत् ॥ ३२ ॥ घोषणवचनमाह—जयतीत्यादि ॥ अभिपालितः वालिवधेन ॥३३॥अक्लिष्टकर्मण इत्यनेन स्वदास्यं न कर्मकृतं किंतु स्वरूपप्रयुक्तमित्युच्यते॥३४॥ प्रतिबलं समानबलं । प्रहरतः राक्षसानितिशेषः । प्रहारमात्रेणवा हनुमद्विशेषणं ॥ ३५ ॥ मिषतां पश्यतां । अनादरे षष्ठी ॥ ३६ ॥ संध्यामेघमिवेति रक्तवर्णत्वात् ॥ ३७ ॥

ती० सीतयासहसंभाषणस्यापराधत्वंसाधयन्ति—**मनःपरिगृहीतामिति** । राजपरिग्रहसंभाषणंपुंसोपराधइतिभावः । **ति०** त्यक्तजीवितः त्यक्तजीविताशः ॥ २१ ॥ **स०** आत्मनःसदृशान् स्वदूतत्वयोग्यान् ॥ २४ ॥ तेषांसंख्या अशीतिसाहस्रमित्यन्वयः । **शि०** तेषामिति । किङ्कराणांमध्येअशीतिसाहस्रंकिङ्करास्तस्माद्भवनान्निर्ययुः ॥ २५ ॥ **ति०** क्षितावाविध्यलाङ्गूलमिति स्वभावोक्तिरलङ्कारः ॥ ३० ॥

[पा०] १ घ. ङ. झ. ट. सदृशान्वीरान्. २ क.—ङ. झ. ञ. ट. कपिंतं. ३ ख. ग. ङ. झ. ट. शरैरादित्य. च. छ. ज. ञ. शरैरशनि. ४ क. ख. ग. ङ. च. ज.—ट. तोमरपाणयः. ५ ङ. झ. ट. पुच्छमास्फोट. ६ क. ख. च. छ. ज. ञ. दुश्चैर्घोषमघोषयत्. ७ क. राघवेणानु. ८ ट. ददृशुस्ते.

स्वामिसंदेशनिःशङ्कास्ततस्ते राक्षसाः कपिम् ॥ चित्रैः प्रहरणैर्भीमैरभिपेतुस्ततस्ततः ॥ ३८ ॥
स तैः परिवृतः शूरैः सर्वतः स महाबलः ॥ आससादायसं भीमं परिघं तोरणाश्रितम् ॥
स तं परिघमादाय जघान रजनीचरान् ॥ ३९ ॥
स पन्नगमिवादाय स्फुरन्तं विनतासुतः ॥ विचचाराम्बरे वीरः परिगृह्य च मारुतिः ॥
[सूदयामास वज्रेण दैत्यानिव सहस्रदृक्] ॥ ४० ॥
स हत्वा राक्षसान्वीरान्किङ्करान्मारुतात्मजः ॥ युद्धकाङ्क्षी पुनर्वीरस्तोरणं समुपाश्रितः ॥ ४१ ॥
ततस्तस्माद्भयान्मुक्ताः कतिचित्तत्र राक्षसाः ॥ निहतान्किङ्करान्सर्वान्रावणाय न्यवेदयन् ॥ ४२ ॥

स राक्षसानां निहतं महद्बलं निशम्य राजा परिवृत्तलोचनः ॥
समादिदेशाप्रतिमं पराक्रमे प्रहस्तपुत्रं समरे सुदुर्जयम् ॥ ४३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

किङ्करहननानन्तरं तोरणाच्चैत्यप्रासादमाप्लुतेनहनुमता तत्प्रासादभञ्जनम् ॥ १ ॥ तद्रक्षिभीराक्षसैर्युद्धाय तदभियानम् ॥ २ ॥ हनुमता प्रासादस्तंभोत्पाटनेनतद्भ्रामणे तदुद्गताग्निना प्रासाददहनम् ॥ ३ ॥ हनुमता प्रासादरक्षकराक्षसहनन-पूर्वकमन्तरिक्षस्थित्या सवानरबलेनसुग्रीवेण लङ्काभङ्गस्यभविष्यत्त्वोद्घोषणम् ॥ ४ ॥

ततः स किंकरान्हत्वा हनुमान्स्थानमास्थितः ॥ १ ॥
वनं भग्नं मया चैत्यप्रासादो न विनाशितः ॥ तस्मात्प्रासादमप्येव भीमं विध्वंसयाम्यहम् ॥ २ ॥
इति संचिन्त्य मनसा हनुमान्दर्शयन्बलम् ॥ चैत्यप्रासादमाप्लुत्य मेरुशृङ्गमिवोन्नतम् ॥
आरुरोह हरिश्रेष्ठो हनुमान्मारुतात्मजः ॥ ३ ॥
आरुह्य गिरिसंकाशं प्रासादं हरियूथपः ॥ बभौ स सुमहातेजाः प्रतिसूर्य इवोदितः ॥ ४ ॥

ततस्तत इति । अनेनास्य समीपं सहसा गन्तुमशक्ता इत्यवगम्यते ॥३८-३९॥ सपन्नगमिति सपरिघत्वमात्रे दृष्टान्तः । परिगृह्य परिघमिति शेषः । स्फुरन्तं पन्नगमादाय विनतासुतइव स वीरो मारुतिः परिघं परिगृह्याम्बरे विचचारेति संबन्धः ॥४०-४१॥ तस्माद्भयान्मुक्ताः दूरस्था इत्यर्थः ॥४२-४३॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्विचत्वारिंशः सर्गः ॥ ४२ ॥

ध्वंसनफलमाह—दर्शयन् बलमिति । बलदर्शनार्थमित्यर्थः । ध्वंसनप्रकारमाह—चैत्येति ॥ चैत्यं देवायतनं तद्रूपः प्रासादः चैत्यप्रासादः तं । आप्लुत्य तोरणाल्लङ्घयित्वा । हरिश्रेष्ठो हनुमान्मारुतात्मज इत्यस्योत्तरश्लोकेनान्वयः ॥ ३ ॥ हरियूथपत्वेऽप्यहरिर्भविष्यतीति तद्व्यावृत्त्यर्थं हरिश्रेष्ठ इत्युक्तं । प्रतिसूर्यः द्वितीयसूर्यइत्यर्थः । अनेनसूर्योदयस्सूचितः

ति० स्वामिनोरामस्यसंदेशेननामग्रहणेन कस्यायंभटइतिसंदेहरहिताः । किंच स्वामिसंदेशेनरावणाज्ञयाऽतिघोरेणाप्यनेनयोद्धव्यमेवेतिनिश्चयात्पक्षान्तरशङ्कारहिताः । प्रहरणैः आयुधैः । अभिपेतुः प्राहरन्नित्यर्थः ॥ ३८ द्विचत्वारिंशःसर्गः ॥ ४२ ॥

ति० ध्यानं विचारः ॥ १ ॥ ति० चैत्यप्रासादः रक्षःकुलदेवताप्रासादः । एवं प्रमदावनवत् ॥ २ ॥

[पा०] १ इदमर्धं ङ. झ. ञ. ट. पाठेषुदृश्यते. २ ख. घ.—च. झ. ञ. ट. न्वीरःकिंकरान्. ३ ङ. च. छ. झ. ञ. ट. युद्धाकाङ्क्षी. ४ ङ. च. झ. ट. महावीरः. ५ क. ङ. झ. ट. समवस्थितः. ङ. च. छ. ज. ञ. समुपस्थितः. ६ ग. ङ.—ट. महाबलं. ७ क. ख. ग. ङ. च. छ. झ. ञ. ट. हनुमान्ध्यानं. ज. हनुमान्द्वारं. ८ ग. ङ. झ. ट. मप्येवमिमं क. ग. घ. च. छ. मप्येवमिमं. ९ घ. इवोत्थितः.

संप्रधृष्य च दुर्धर्षं चैत्यप्रासादमुत्तमम् ॥ हनुमान्प्रज्वलँल्लक्ष्म्या पारियात्रोपमोऽभवत् ॥ ५ ॥
स भूत्वा सुमहाकायः प्रभावान्मारुतात्मजः ॥ धृष्टमास्फोटयामास लङ्कां शब्देन पूरयन् ॥ ६ ॥
तस्यास्फोटितशब्देन महता श्रोत्रघातिना ॥ पेतुर्विहङ्गमास्तत्र चैत्यपालाश्च मोहिताः ॥ ७ ॥
अस्त्रविज्जयतां रामो लक्ष्मणश्च महाबलः ॥ राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ ८ ॥
दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः ॥ हनुमाञ्शत्रुसैन्यानां निहन्ता मारुतात्मजः ॥ ९ ॥
न रावणसहस्रं मे युद्धे प्रतिबलं भवेत् ॥ शिलाभिस्तु प्रहरतः पादपैश्च सहस्रशः ॥ १० ॥
अर्दयित्वा पुरीं लङ्कामभिवाद्य च मैथिलीम् ॥ समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम् ॥११॥
एवमुक्त्वा विमानस्थश्चैत्यस्थान्हरियूथपः ॥ ननाद भीमनिर्ह्रादो रक्षसां जनयन्भयम् ॥ १२ ॥
तेन शब्देन महता चैत्यपालाः शतं ययुः ॥ गृहीत्वा विविधानस्त्रान्प्रासान्खड्गान्परश्वधान् ॥
विसृजन्तो महाकाया मारुतिं पर्यवारयन् ॥ १३ ॥
ते गदाभिर्विचित्राभिः परिघैः काञ्चनाङ्गदैः ॥ आजघ्नुर्वानरश्रेष्ठं बाणैश्चादित्यसन्निभैः ॥ १४ ॥
आवर्त इव गङ्गायास्तोयस्य विपुलो महान् ॥ परिक्षिप्य हरिश्रेष्ठं स बभौ रक्षसां गणः ॥ १५ ॥
ततो वातात्मजः क्रुद्धो भीमरूपं समास्थितः ॥ १६ ॥
प्रासादस्य महान्तस्य स्तम्भं हेमपरिष्कृतम् ॥ उत्पाटयित्वा वेगेन हनुमान्पवनात्मजः ॥
ततस्तं भ्रामयामास शतधारं महाबलः ॥ १७ ॥
तत्र चाग्निः समभवत्प्रासादश्चाप्यदह्यत ॥ १८ ॥
दह्यमानं ततो दृष्ट्वा प्रासादं हरियूथपः ॥ स राक्षसशतं हत्वा वज्रेणेन्द्र इवासुरान् ॥
अन्तरिक्षे स्थितः श्रीमानिदं वचनमब्रवीत् ॥ १९ ॥
मादृशानां सहस्राणि विसृष्टानि महात्मनाम् ॥ बलिनां वानरेन्द्राणां सुग्रीववशवर्तिनाम् ॥ २० ॥
अटन्ति वसुधां कृत्स्नां वयमन्ये च वानराः ॥ २१ ॥
दशनागबलाः केचित्केचिद्दशगुणोत्तराः ॥ केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः ॥ २२ ॥
सन्ति चौघबलाः केचित्केचिद्वायुबलोपमाः ॥ अप्रमेयबलाश्चान्ये तत्रासन्हरियूथपाः ॥ २३ ॥
ईदृग्विधैस्तु हरिभिर्वृतो दन्तनखायुधैः ॥ शतैः शतसहस्रैश्च कोटीभिरयुतैरपि ॥
आगमिष्यति सुग्रीवः सर्वेषां वो निषूदनः ॥ २४ ॥

॥ ४ ॥ संप्रधृष्य आक्रम्य। पारियात्रोनाम कुलपर्वतः ॥ ५—११ ॥ चैत्यस्थान् चैत्यपालान् ॥ १२—१६ ॥ पवनात्मजः भ्रामयामासेत्यन्वयः। शतधारं धारा कोटिः। वज्रवत्स्थितमित्यर्थः। यद्वा शतधा अरमिति च्छेदः। अरं शीघ्रं ॥ १७ ॥ अग्निः समभवत्। भ्रामितस्तम्भैः स्तम्भान्तरसंघट्टनादिति भावः ॥ १८—१९ ॥ राक्षसानामुत्साहभङ्गं कारयितुमाह—मादृशानामित्यादि ॥ २०—२२ ॥ ओघबलाः

स० शतं बहवः ॥ १३ ॥ ति० परिक्षिप्येत्यंशे तोयस्यावर्तइवेतिदृष्टान्तः ॥ १५ ॥ रामानु० महान्तस्य महाग्रस्य। अत्युन्नतशिखरस्येत्यर्थः। महार्हस्येतिवापाठः ॥ १७ ॥ स० अग्निःप्रासादस्तंभान्तरसंघर्षाद्वा वायुसूनुकरपरिभ्रमणरूपमथनतो वाग्निःसमभवदितिभावः। समदह्यत समग्रग्रामदाहस्यभाविनइयंनान्दीतिभावः ॥ १८ ॥ ती० ओघबलाः ओघसंख्यासंख्यातगजबलाः ॥ २३ ॥

[पा०] १ ङ. ञ. ट. धर्षयित्वा. २ ग. ङ.—ट. महाकायश्चैत्यस्थोहरिपुङ्गवः. ३ ङ. ञ. ट. नादेन. ४ क. पालाश्चते. ५ च. ज. ञ. समाश्रितः. ६ ग. घ. ङ. ञ. ट. केचित्सन्तिवायुबलोपमाः. क. केचिच्छतगुणोत्तराः. वैनतेयबलाःकेचित्केचिद्वायुबलोपमाः. ७ क. ङ. च. ज.—ट. बलाःकेचित्त्रासन्. ८ ग. घ. कोटिभिर्बहुभिर्वृतः. ङ. ञ. ञ. ट. कोटिभिश्चायुतैरपि.

नेयमस्ति पुरी लङ्का न यूयं न च रावणः ॥ यस्मादिक्ष्वाकुनाथेन बद्धं वैरं महात्मना ॥ २५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

हनुमता रावणचोदनयासमागतवतःप्रहस्तात्मजस्यजंबुमालिनोवधः ॥ १ ॥

संदिष्टो राक्षसेन्द्रेण प्रहस्तस्य सुतो बली ॥ जम्बुमाली महादंष्ट्रो निर्जगाम धनुर्धरः ॥ १ ॥
रक्तमाल्याम्बरधरः स्रग्वी रुचिरकुण्डलः ॥ महान्विवृत्तनयनश्चण्डः समरदुर्जयः ॥ २ ॥
[दग्धैत्रिकूटप्रतिमो महाजलदसंनिभः ॥ महाभुजशिरस्स्कन्धो महादंष्ट्रो महाननः ॥ ३ ॥
महाजवो महोत्साहो महासत्वोरुविक्रमः ॥ आजगामातिवेगेने वज्राशनिसमस्वनः ॥ ४ ॥]
धनुः शक्रधनुःप्रख्यं महद्रुचिरसायकम् ॥ विस्फारयानो वेगेन वज्राशनिसमस्वनम् ॥ ५ ॥
तस्य विस्फारघोषेण धनुषो महता दिशः ॥ प्रदिशश्च नभश्चैव सहसा समपूर्यत ॥ ६ ॥
[उद्गच्छन्निव चादित्यः प्रभाभिरिव लोहितः ॥ लोहिताङ्गेन महता कवचेनाभिसंवृतः ॥
तिष्ठतिष्ठेति सहसा हनूमन्तमथाब्रवीत् ॥ ७ ॥]
रथेन खरयुक्तेन तमागतमुदीक्ष्य सः ॥ हनुमान्वेगसंपन्नो जहर्ष च ननाद च ॥ ८ ॥
तं तोरणविटङ्कस्थं हनुमन्तं महाकपिम् ॥ जम्बुमाली महाबाहुर्विव्याध निशितैः शरैः ॥ ९ ॥
अर्धचन्द्रेण वदने शिरस्येकेन कर्णिना ॥ बाह्वोर्विव्याध नाराचैर्दशभिस्तं कपीश्वरम् ॥ १० ॥
तस्य तच्छुशुभे ताम्रं शरेणाभिहतं मुखम् ॥ शरदीवाम्बुजं फुल्लं विद्धं भास्कररश्मिना ॥ ११ ॥
तत्तस्य रक्तं रक्तेन रञ्जितं शुशुभे मुखम् ॥ यथाऽऽकाशे महापद्मं सिक्तं चन्दनबिन्दुभिः ॥ १२ ॥

ओघाख्यसंख्याकवलाः ॥ २३—२५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

विवृत्तनयनः मण्डलीकृतनयनः ॥ २—४ ॥ रुचिरसायकं रुचिरसायकार्हं । विस्फारयानः विस्फारयमाणः । ज्याकर्षणं कुर्वन्नित्यर्थः । वज्राशनिसमस्वनमिति विस्फारणक्रियाविशेषणं ॥ ५ ॥ नभस्समपूर्यत दिशः प्रदिशश्च समपूर्यन्तेति विपरिणामेनानुषङ्गः ॥ ६—८ ॥ तोरणविटङ्कं तोरणस्य कपोतपालिका । " कपोतपालिकायां तु विटङ्कं पुन्नपुंसकं " इत्यमरः । स्तम्भोपरि तिर्यङ्निहितदार्वित्यर्थः ॥ ९ ॥ एकेनेत्येतदर्धचन्द्रस्यापि विशेषणं । अर्धचन्द्राकाराग्रशरेणेत्यर्थः । कर्णिना कर्णवच्छरेण ॥ १० ॥ अम्बुजं रक्तपद्मं । भास्कररश्मिना विद्धं अतएव फुल्लमित्यर्थः ॥ ११ ॥ रक्तं स्वतएव रक्तं । रक्तेन शोणितेन । महापद्मं रक्तोत्पलं । चन्दनबिन्दुभिः

शि० नास्ति नङ्क्ष्यतीत्यर्थः ॥ २५ ॥ इतित्रिचत्वारिंशःसर्गः ॥ ४३ ॥

स० स्रग्वी सुवर्णमालः । " प्रहस्तपुत्रस्त्विहजंबुमालीप्राभञ्जनिंप्राप्यसुवर्णमाली " इति संग्रहरामायणोक्तेः ॥ २ ॥ ति० समपूर्यत । दिगादिसमुदायापेक्षमेकवचनं ॥ स० नभः आकाशं । दिशःप्रदिशश्चयदात्मिकास्तत्समपूर्यत । " साक्षिसिद्धमेव गगनंतद्भागाएवदिशोनद्रव्यान्तरं " इतिसुधोक्तेः ॥ ६ ॥ ति० कर्णी अङ्कुशाकाराग्रशरविशेषः ॥ १० ॥

[पा०] १ क. ङ.—ट. यस्यलिक्ष्वाकुवीरेण. २ इदंश्लोकद्वयं क. पाठेदृश्यते. ३ इदमर्धत्रयं क. ग. पाठयोर्दृश्यते. ४ ङ. ञ. ट. महातेजाविव्याध. ५ घ. र्दशभिस्तुस्तनान्तरे. ६ ङ. ञ. ण. ट. काञ्चनबिन्दुभिः.

चुकोप बाणाभिहतो राक्षसस्य महाकपिः ॥ १३ ॥
ततः पार्श्वेतिविपुलां ददर्श महतीं शिलाम् ॥ तरसा तां समुत्पाट्य चिक्षेप बलवद्बली ॥
तां शरैर्दशभिः क्रुद्धस्ताडयामास राक्षसः ॥ १४ ॥
विपन्नं कर्म तद्दृष्ट्वा हनुमांश्चण्डविक्रमः ॥ सालं विपुलमुत्पाट्य भ्रामयामास वीर्यवान् ॥ १५ ॥
भ्रामयन्तं कपिं दृष्ट्वा सालवृक्षं महाबलम् ॥ चिक्षेप सुबहून्बाणाञ्जम्बुमाली महाबलः॥ १६ ॥
सालं चतुर्भिश्चिच्छेद वानरं पञ्चभिर्भुजे ॥ उरस्येकेन बाणेन दशभिस्तु स्तनान्तरे ॥ १७ ॥
स शरैः पूरिततनुः क्रोधेन महता वृतः ॥ तमेव परिघं गृह्य भ्रामयामास वेगितः ॥ १८ ॥
अतिवेगोतिवेगेन भ्रामयित्वा बलोत्कटः ॥ परिघं पातयामास जम्बुमालेर्महोरसि ॥ १९ ॥
तस्य चैव शिरो नास्ति न बाहू न च जानुनी ॥ न धनुर्न रथो नाश्वास्तत्राद्दृश्यन्त नेषवः ॥२०॥
स हतस्तरसा तेन जम्बुमाली महाबलः ॥ पपात निहतो भूमौ चूर्णिताङ्गविभूषणः ॥ २१ ॥
जम्बुमालिं च निहतं किंकरांश्च महाबलान् ॥ चुक्रोध रावणः श्रुत्वा कोपसंरक्तलोचनः ॥ २२ ॥

स रोषसंवर्तिततामलोचनः प्रहस्तपुत्रे निहते महाबले ॥
अमात्यपुत्रानतिवीर्यविक्रमान्समादिदेशाशु निशाचरेश्वरः ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

हनुमता रावणप्रेषितमन्त्रिपुत्रसप्तकहननम् ॥ १ ॥

ततस्ते राक्षसेन्द्रेण चोदिता मन्त्रिणः सुताः ॥ निर्ययुर्भवनात्तस्मात्सप्त सप्तार्चिवर्चसः ॥ १ ॥
महाबलपरीवारा धनुष्मन्तो महाबलाः ॥ कृतास्त्रास्त्रविदां श्रेष्ठाः परस्परजयैषिणः ॥ २ ॥

रक्तचन्दनबिन्दुभिः ॥ १२ ॥ चुक्रोपेत्यर्धं ॥ राक्षसस्य राक्षसविषये ॥ १३—१६ ॥ पञ्चभिर्भुज इत्यादौ विव्याधेत्यध्याहारः ॥ १७—१९ ॥ नाश्वा इति अश्वशब्देनात्र खरा उच्यन्ते । रथेन खरयुक्तेनेति पूर्वमुक्तत्वात् ॥ २०—२३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

भवनात्तस्मात् रावणभवनात् । सप्तार्चिवर्चसइत्यत्र सप्तार्चीति इकारान्तत्वमार्षं ॥ १ ॥ कृतास्त्राः शिक्षि-

ति० काञ्चनबिन्दुभिःरक्ताशोकपुष्परसबिन्दुभिः । सिक्तंमहापद्मं महत्तरंरक्तपद्ममिवेत्यभूतोपमेयं ॥ " अशोकःकाञ्चनाह्वयः " स० काञ्चनबिन्दुभिः सुवर्णरसबिन्दुभिः । अभूतोपमेयं ॥ १२ ॥ स० राक्षसस्यबाणाभिहतः । एकदेशान्वयः ससंबन्धिकत्वाद्युक्तः । यद्वा बाणाभिहतोराक्षसस्यचुकोपेत्यन्वयः । हनुमत्कोपसहनासुशकत्वाद्यप्रतीत्यप्रवृत्तेःषष्ठी । साचशैषिकीतिकर्मणि ॥१३॥ ति० ताडयामास विभेद ॥१४॥ ति० विपन्नं व्यर्थीकृतं ॥१५॥ स० जंबुमालेः रूढः इकारान्तोनकारान्तश्चेतिजंबुमालेरिति साधु ॥ १९ ॥ स० नाश्वाः अश्वभिन्नाः अश्वसदृशावाखराः । ते नादृश्यन्त । नञर्थस्यनशब्दस्यतद्भिन्नतत्सदृशार्थकता स्वपरसाधारण्येनदृष्टा । अथवा विभाषानुवृत्तेर्नलोपाभावान्नाश्वाइतिसंभवति । तेनखरयुक्तयानत्वमुक्तमुपपन्नं ॥२०॥ स० चूर्णिताङ्गः चूर्णीकृतशाखः चूर्णीकृतावयवोराक्षसोपि ॥२१॥ स० क्रोधसंरक्तलोचनः पूर्वंकिङ्करनाशात् । पुनर्जंबुमालिनंनिहतंश्रुत्वा पूर्वापेक्षयाबहुकोपंकृतवानित्यर्थः ॥२२॥ स० वीर्यं वैरिपराक्रमः । तदतिक्रम्यपराक्रमोयेषांतान् ॥२३॥ इतिचतुश्चत्वारिंशःसर्गः ॥४४॥

स० सप्तार्चीः प्रतिमारूपाः कालीकरालीइत्याद्याः अस्यसन्तीतिसप्तार्ची वह्निः । तद्वद्वर्चोयेषांतेतथा । यद्वा इकारान्तोर्चिश्शब्दोर्चिशब्दपर्यायः । सप्तअर्चयोर्चींषि शिखायस्यसोग्निः । " अर्चिर्मयूरशिखयोः " इतिविश्वः । " इकारान्तोप्यस्ति " ' अग्नेर्भ्राजन्तेअर्चयः ' इतीतिभानुदीक्षितलेखात् ॥ १ ॥ स० परस्परजयैषिणः परस्परमुत्कर्षापेक्षाः ॥ २ ॥

[पा०] १ ग. झ. जववद्बली. २ क. ग. शिरस्येकेन. ३ ख. मारुतिः. क. ङ. झ. ञ. ट. वेगितः. ४ क. ग. ङ.—ट. महारथः. ५ ग. निपपातहतो. ६ ङ.—ट. चूर्णिताङ्गइवद्रुमः. ७ ख. महारथान्. क. महाजवान्. ८ झ. ठ. क्रोधसंरक्त.

हेमजालपरिक्षिप्तैर्ध्वजवद्भिः पताकिभिः ॥ तोयदस्वननिर्घोषैर्वाजियुक्तैर्महारथैः ॥ ३ ॥
तप्तकाञ्चनचित्राणि चापान्यमितविक्रमाः ॥ विस्फारयन्तः संहृष्टास्तडिद्वन्त इवाम्बुदाः ॥ ४ ॥
जनन्यस्तु ततस्तेषां विदित्वा किंकरान्हतान् ॥ बभूवुः शोकसंभ्रान्ताः सबान्धवसुहृज्जनाः ॥ ५ ॥
ते परस्परसंघर्षात्तप्तकाञ्चनभूषणाः ॥ अभिपेतुर्हनूमन्तं तोरणस्थमवस्थितम् ॥ ६ ॥
सृजन्तो बाणवृष्टिं ते रथगर्जितनिःस्वनाः ॥ वृष्टिमन्त इवाम्भोदा विचेरुर्नैर्ऋताम्बुदाः ॥ ७ ॥
अवकीर्णस्ततस्ताभिर्हनुमाञ्शरवृष्टिभिः ॥ अभवत्संवृताकारः शैलराडिव वृष्टिभिः ॥ ८ ॥
स शरान्मोघयामास तेषामाशुचरः कपिः ॥ रथवेगं च वीराणां विचरन्विमलेऽम्बरे ॥ ९ ॥
स तैः क्रीडन्धनुष्मद्भिर्व्योम्नि वीरः प्रकाशते ॥ धनुष्मद्भिर्यथा मेघैर्मारुतः प्रभुरम्बरे ॥ १० ॥
स कृत्वा निनदं घोरं त्रासयंस्तां महाचमूम् ॥ चकार हनुमान्वेगं तेषु रक्षस्सु वीर्यवान् ॥ ११ ॥
तलेनाभ्यहनत्कांश्चित्पादैः कांश्चित्परन्तपः ॥ मुष्टिनाभ्यहनत्कांश्चिन्नखैः कांश्चिद्व्यदारयत् ॥ १२ ॥
प्रममाथोरसा कांश्चिदूरुभ्यामपरान्कपिः ॥ केचित्तस्य निनादेन तत्रैव पतिता भुवि ॥ १३ ॥
ततस्तेष्ववसन्नेषु भूमौ निपतितेषु च ॥ तत्सैन्यमगमत्सर्वं दिशो दश भयार्दितम् ॥ १४ ॥
विनेदुर्विस्वरं नागा निपेतुर्भुवि वाजिनः ॥ भग्ननीडध्वजच्छत्रैर्भूश्च कीर्णाऽभवद्रथैः ॥ १५ ॥
स्रवता रुधिरेणाथ स्रवन्त्यो दर्शिताः पथि ॥ विविधैश्च स्वरैर्लङ्का ननाद विकृतं तदा ॥ १६ ॥

स तान्प्रवृद्धान्विनिहत्य राक्षसान्महाबलश्चण्डपराक्रमः कपिः ॥
युयुत्सुरन्यैः पुनरेव राक्षसैस्तमेव वीरोभिजगाम तोरणम् ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

ताम्राः ॥ आर्षः सन्धिः । कृतास्त्राणामस्त्रविदां च श्रेष्ठा इति वा । ज्ञानशिक्षे उभे अप्येषां स्त इति भावः । परस्परजयैषिणः प्रत्येकं हनुमज्जयैषिण इत्यर्थः ॥ २ ॥ हेमजालपरिक्षिप्तैः सुवर्णजालविनिर्मितैः । स्वासाधारणचिह्नयुक्तं ध्वजं । केवलचित्रवस्त्रालंकृता पताका । तोयदस्वननिर्घोषैः तोयदस्वनतुल्यनिर्घोषवद्भिः ॥३—८॥ स शरान् मोघयामास । यथा शराः स्वस्मिन्न पतन्ति तथा चकारेत्यर्थः । रथवेगं च मोघयामासेत्यन्वयः । यथा रथवेगास्त्वप्रहाराय न भवन्ति तथासमचरदित्यर्थः ॥ ९—१० ॥ वेगं संहारोद्योगं ॥ ११ ॥ पादैः कांश्चिदिति बहुवचनं वानराणां द्विपात्सु चतुष्पात्सु च ग्रहणात् ॥ १२—१४ ॥ नीडं ध्वजावयवविशेषः ॥ १५ ॥ स्रवन्त्यः नद्यः । विकृतं यथा तथा ननाद प्रतिध्वानवती बभूव ॥ १६—१७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चचत्वारिंशः सर्गः ॥४५॥

स० एकजिह्वाः ध्वजाः । द्विजिह्वाः पताकाः ॥ ३ ॥ शि० सिंहावलोकनन्यायेननिहतकिङ्करगृहवृत्तान्तमाह—**जनन्यइति** ॥ ५ ॥ ति० तोरणस्थमवस्थितं तत्रस्थितं निश्चलमित्यर्थः ॥ ६ ॥ स० राक्षसानांशरवर्षेणकार्ष्ण्येनचमेघसमता । पूर्वमखण्डतः शरसारगमनादेकवचनंवृष्टिमिति प्रत्येकंपृथक्पृथगञ्चनाद्वृष्टिभिरितिबहुवचनंचसंभवतः ॥ ७ ॥ ति० संवृताकारः अदृश्यइति यावत् ॥ ८ ॥ ति० नीडं रथस्थंरथ्यधिष्ठानस्थानं ॥ १५ ॥ इतिपञ्चचत्वारिंशःसर्गः ॥ ४५ ॥

[पा०] १ ग. धनुष्यमित. २ ख. घ.—ट. जनन्यस्तास्ततस्तेषां. ३ ङ. ज. झ. ट. परस्परसंघर्षास्तप्त. ४ ङ. झ. ट. प्रावृट्कालइवांभोदाः. ५ क.—ट. रथवेगांश्च. ६ ङ. झ. ट. तलेनाभिहनत्. ७ ग. घ. पद्भ्यांकांश्चित्. ८ ग. ङ. छ.—ट. मुष्टिभिश्चाहनत्. ९ ङ. झ. ट. मपरानपि. १० क. ग. र्विस्वराः. ११ क. ख. ङ.—ट. स्तुदेव.

षट्चत्वारिंशः सर्गः ॥ ४६ ॥

हनुमता रावणप्रहितसेनापतिपञ्चकस्य पञ्चताप्रापणम् ॥ १ ॥

हतान्मन्त्रिसुतान्बुद्ध्वा वानरेण महात्मना ॥ रावणः संवृताकारश्चकार मतिमुत्तमाम् ॥ १ ॥
स विरूपाक्षयूपाक्षौ दुर्धरं चैव राक्षसम् ॥ प्रघसं भासकर्णं च पञ्च सेनाग्रनायकान् ॥ २ ॥
संदिदेश दशग्रीवो वीरान्नयविशारदान् ॥ हनुमद्ग्रहणव्यग्रान्वायुवेगसमान्युधि ॥ ३ ॥
यात सेनाग्रगाः सर्वे महाबलपरिग्रहाः ॥ सवाजिरथमातङ्गाः स कपिः शास्यतामिति ॥ ४ ॥
यत्तैश्च खलु भाव्यं स्यात्तमासाद्य वनालयम् ॥ कर्म चापि समाधेयं देशकालविरोधिनम् ॥ ५ ॥
[वानरोयमिति ज्ञात्वा न हि शुध्यति मे मनः ॥ नैवाहं तं कपिं मन्ये यथेयं प्रस्तुता कथा ॥६॥]
न ह्यहं तं कपिं मन्ये कर्मणा प्रतितर्कयन् ॥ सर्वथा तन्महद्भूतं महाबलपरिग्रहम् ॥
भवेदिन्द्रेण वा सृष्टमसदर्थं तपोबलात् ॥ ७ ॥
सनागयक्षगन्धर्वा देवासुरमहर्षयः ॥ युष्माभिः सहितैः सर्वैर्मया सह विनिर्जिताः ॥ ८ ॥
तैरवश्यं विधातव्यं व्यलीकं किंचिदेव नः ॥ तदेव नात्र संदेहः प्रसह्य परिगृह्यताम् ॥ ९ ॥
नावमान्यो भवद्भिश्च हरिर्धीरपराक्रमः ॥ दृष्टा हि हरयः पूर्वं मया विपुलविक्रमाः ॥ १० ॥
वाली च सहसुग्रीवो जाम्बवांश्च महाबलः ॥ नीलः सेनापतिश्चैव ये चान्ये द्विविदादयः ॥ ११ ॥
नैवं तेषां गतिर्भीमा न तेजो न पराक्रमः ॥ न मतिर्न बलोत्साहौ न रूपपरिकल्पनम् ॥ १२ ॥
महत्सत्त्वमिदं ज्ञेयं कपिरूपं व्यवस्थितम् ॥ प्रयत्नं महदास्थाय क्रियतामस्य निग्रहः ॥ १३ ॥
कामं लोकास्त्रयः सेन्द्राः ससुरासुरमानवाः ॥ भवतामग्रतः स्थातुं न पर्याप्ता रणाजिरे ॥ १४ ॥
तथापि तु नयज्ञेन जयमाकाङ्क्षता रणे ॥ आत्मा रक्ष्यः प्रयत्नेन युद्धसिद्धिर्हि चञ्चला ॥ १५ ॥
ते स्वामिवचनं सर्वे प्रतिगृह्य महौजसः ॥ समुत्पेतुर्महावेगा हुताशसमतेजसः ॥ १६ ॥

संवृताकारः अन्तर्मनाः । मतिं चिन्तां ॥ १-३ ॥ इति वक्ष्यमाणप्रकारेण ॥ ४ ॥ तमेवाह—यत्तैरित्यादिना ॥ यत्तैः यतमानैः । अप्रमत्तैरिति यावत् । यतेः कर्तरि क्तः । समाधेयं परिहर्तव्यं । देशकालविरोधिनं देशकालविरोधीत्यर्थः ॥ ५—६ ॥ महद्भूतं मन्य इत्यनुषज्यते । इन्द्रेण वा अन्यैर्वेति शेषः । वाशब्दस्य विकल्पार्थस्य प्रयोगात् ॥ ७—८ ॥ व्यलीकं अप्रियं ॥ ९ ॥ नावमान्यो भवद्भिश्च हरिर्धीरपराक्रम इति ॥ अत्र त्रयोदशसहस्रश्लोका गताः । अयं चतुर्दशसहस्रस्यादिः । धीति गायत्र्याश्चतुर्दशाक्षरं ॥ १०—११ ॥ गतिः वेगः । रूपपरिकल्पनं यथेष्टरूपग्रहणं ॥ १२ ॥ महदिति ॥ इत्थं महत्सत्त्वं किमपि कपिरूपं सत् व्यवस्थितमिति ज्ञेयमित्यर्थः

ती० संवृताकारः गूढाकारः । अन्तस्संजातशङ्कइत्यर्थः । उत्तमांमतिं धैर्यं ॥ १ ॥ **ती०** किंचात्रदेशकालाविरुद्धंकर्मकार्यमित्याह—**कर्मचेति** । देशकालविरोधिनंदेशकालविरोधीत्यर्थः । आर्षोलिङ्गविभक्तिव्यत्ययः । कर्म समाधेयं परिहर्तव्यं । देशकालाविरोधितमितिपाठे समाधेयं कर्तव्यं । अत्रहेतुमाह—नहीति ॥ ५ ॥ **ती०** असदर्थं अस्मन्निग्रहार्थं ॥ **स०** असदर्थं अस्माकमर्थंनिवृत्तिमुद्दिश्य ॥ ७ ॥ **स०** वालीति । जांबवानपिकपिमध्येबहुस्थलेगणितइतिनानुपपत्तिः ॥ ११ ॥ **ती०** नैवंतेषामित्यादौसर्वत्रईदृक्छब्दोऽध्याहर्तव्यः । तथाचेत्थंयोजना तेषां वाल्यादिनां । हनुमतोभीमागतिस्तेजआदिकंचयथा तथा ईदृङ्नास्तीतिसंबन्धः । रूपपरिकल्पनंयथेप्सितरूपपरिग्रहणं ॥ १२ ॥ **ति०** प्रयत्नमित्यार्षक्लिबत्वं ॥ १३ ॥ **ति०** कामं यद्यपीत्यर्थः

[**पा०**] १ ङ. ञ. ट. दुर्धर्षं. २ क.—ट. हनुमद्ग्रहणे. ३ क.—ट. कालाविरोधितं. ४ अयंश्लोकः ङ. ञ. पाठेषुदृश्यते. ५ ख. ग. ङ. च. छ. ञ. ट. गन्धर्वदेवासुर. ६ क. युधि. ७ ख. नावमान्यश्चयुष्माभिः.

[1]रथैर्मत्तैश्च मातङ्गैर्वाजिभिश्च महाजवैः ॥ शस्त्रैश्च विविधैस्तीक्ष्णैः सर्वैश्चोपचिता बलैः ॥ १७ ॥
ततस्तं ददृशुर्वीरा दीप्यमानं महाकपिम् ॥ रश्मिमन्तमिवोद्यन्तं स्वतेजोरश्मिमालिनम् ॥ १८ ॥
तोरणस्थं महोत्साहं महासत्त्वं महाबलम् ॥ महामतिं महावेगं महाकायं महाबलम् ॥ १९ ॥
तं समीक्ष्यैव ते सर्वे दिक्षु सर्वास्ववस्थिताः ॥ तैस्तैः प्रहरणैर्भीमैरभिपेतु[3]स्ततस्ततः ॥ २० ॥
तस्य पञ्चायसास्तीक्ष्णाः शिताः पीतमुखाः शराः ॥ शिरस्युत्पलपत्राभा दुर्धरेण निपातिताः ॥२१॥
स तैः पञ्चभिराविद्धः शरैः शिरसि वानरः ॥ उत्पपात नदन्व्योम्नि दिशो दश विनादयन् ॥ २२ ॥
ततस्तु दुर्धरो वीरः सरथः सज्यकार्मुकः ॥ किरञ्शरशँतैस्तीक्ष्णैरभिपेदे महाबलः ॥ २३ ॥
स कपिर्वारयामास तं व्योम्नि शरवर्षिणम् ॥ वृष्टिमन्तं पयोदान्ते पयोदमिव मारुतः ॥ २४ ॥
[4]अर्द्यमानस्ततस्तेन दुर्धरेणानिलात्मजः ॥ चकार [5]कदनं भूयो व्यवर्धत च वेगवान् ॥ २५ ॥
स दूरं सहसोत्पत्य दुर्धरस्य रथे हरिः ॥ निपपात महावेगो विद्युद्राशिर्गिरावि[6]व ॥ २६ ॥
ततः स मथिताष्टाश्वं रथं भग्नाक्षकूबरम् ॥ विहाय न्यपतद्भूमौ दुर्धरस्त्यक्तजीवितः ॥ २७ ॥
तं विरूपाक्षयूपाक्षौ दृष्ट्वा निपतितं भुवि ॥ [7]संजातरोषौ दुर्धर्षावुत्पेततुररिन्दमौ ॥ २८ ॥
स ताभ्यां सहसोत्पत्य विष्ठितो विमलेऽम्बरे ॥ मुद्गराभ्यां महाबाहुर्वक्षस्यभिहतः कपिः ॥ २९ ॥
तयोर्वेगवतोर्वेगं विनिहत्य महाबलः ॥ निपपात पुनर्भूमौ [8]सुपर्णसमविक्रमः ॥ ३० ॥
स सालवृक्षमासाद्य तमुत्पाट्य च वानरः ॥ तावुभौ राक्षसौ वीरौ जघान पवनात्मजः ॥ ३१ ॥
ततस्तांस्त्रीन्हताञ्ज्ञात्वा वानरेण तरस्विना ॥ [9][10]अभिपेदे महावेगः प्रसह्य प्रघसो [11]हरिम् ॥ ३२ ॥
भासकर्णश्च संक्रुद्धः शूलमादाय वीर्यवान् ॥ एकतः कपिशार्दूलं यशस्वि[12]नमवस्थितम् ॥ ३३ ॥
पट्टिशेन शिताग्रेण प्रघसः प्रत्ययोधयत् ॥ भासकर्णश्च शूलेन राक्षसः कपिसत्तमम् ॥ ३४ ॥
स ताभ्यां विक्षतैर्गात्रैरसृग्दिग्धतनूरुहः ॥ अभवद्वानरः क्रुद्धो बालसूर्यसमप्रभः ॥ ३५ ॥
समुत्पाट्य गिरेः शृङ्गं समृगव्यालपादपम् ॥ जघान हनुमान्वीरो राक्षसौ कपिकुञ्जरः ॥
[[13]गिरिशृँङ्गविनिष्पिष्टौ तिलशस्तौ बभूवतुः] ॥ ३६ ॥

॥ १३—१७ ॥ स्वतेजोरश्मिमालिनं स्वतेजसा सूर्यं । रश्मिमन्तमिवेत्यत्र उपमा । अत्र रूपकमिति भिदा ॥ १८ ॥ उत्साहः लोकोत्तरकार्येषु स्थेयान्प्रयत्नः । महासत्त्वं महाध्यवसायं । " द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु" इत्यमरः । द्वितीयबलशब्दश्शक्तिवचनः । " बलं रूपेस्थनि स्थौल्ये शक्तिरेतश्चमूषु च"इति वैजयन्ती ॥१९—२०॥ तीक्ष्णाः क्रूराः । शिताः निशिताः । पीतमुखाः समीचीनायसनिर्मितत्वेन पीतरेखाग्राः । उत्पलपत्राभाः उत्पलपत्राणि यथा निपात्यन्ते तथा निपातिता इत्यर्थः॥२१—२३॥ वारयामास स्ववेगेन प्रापयामासेत्यर्थः ॥२४॥ कदनं युद्धं ॥ २५ ॥ विद्युद्राशिः अशनिः ॥ २६ ॥ कूबरः युगन्धरः ॥२७—२९॥ वेगं विनिहत्य परिहृत्य

॥ १४ ॥ स० रश्मिमन्तं रश्मिवंतं । यवादिरयं ॥ स्वतेजोरश्मिमालिनं सु अत्यन्तंअतेजसोरश्मिमालिनोयेन भवन्तिसतथा ॥१८॥ ति० दिक्षुसर्वास्ववस्थिताःद्राक्तत्समीपमागन्तुंचकिताइतिभावः ॥ २० ॥ ती० पीतमुखाः शत्रुशोणितरञ्जिताइत्यर्थः । उत्पलपत्राभाः तद्वर्णाः ॥ ती० पीतमुखाः फलभागेस्वर्णरूषिताः । उत्पलपत्राभाएव नतुतत्पीडार्हाइत्यर्थः ॥ स० पीतमुखाः पायितपानीयमुखाः ॥ २१ ॥ ति० ताभ्यां कर्तृभ्यां । मुद्गराभ्यां करणाभ्यांहतः ॥ २९ ॥ इतिषट्चत्वारिंशःसर्गः ॥ ४६ ॥

[पा०] १ छ. ज. रथैश्चमत्तनागैश्च. ङ. च. झ. ञ. ट. रथैर्मत्तैश्चनागैश्च. २ क. ङ.—ञ. निशितैः. ३ क. पेतुस्सहस्रशः. ४ क. ग. ङ. झ. ट. शतैर्नैकैः. ५ घ. हन्यमानस्ततः. ६ क. घ. ङ. च. झ. ञ. ट. निनर्द. ७ क. ख. ततस्तं. ८ ङ.—ट. तौजातरोषौ. ९ क. ङ.—ट. निहत्यसमबाहुलः. १० ङ.—ट. सुपर्णइववेगितः. ११ ङ. च. छ. झ. ट. अभिगम्य. १२ ङ.—ञ. बली. १३ ग. ङ.—ट. मवस्थितौ. १४ इदमर्धं ङ.—ट. पाठेषुदृश्यते.

ततस्तेष्ववसन्नेषु सेनापतिषु पञ्चसु ॥ बलं तदवशेषं च नाशयामास वानरः ॥ ३७ ॥
अश्वैरश्वान्गजैर्नागान्योधैर्योधान्रथै रथान् ॥ स कपिर्नाशयामास सहस्राक्ष इवासुरान् ॥ ३८ ॥
हतैर्नागैश्च तुरगैर्भग्नाक्षैश्च महारथैः ॥ हतैश्च राक्षसैर्भूमी रुद्धमार्गा समन्ततः ॥ ३९ ॥
ततः कपिस्तान्ध्वजिनीपतीन्रणे निहत्य वीरान्सबलान्सवाहनान् ॥
समीक्ष्य वीरः परिगृह्य तोरणं कृतक्षणः काल इव प्रजाक्षये ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

हनुमता रावणसुतस्याक्षकुमारस्यक्षपणम् ॥ १ ॥

सेनापतीन्पञ्च स तु प्रमापितान्हनूमता सानुचरान्सवाहनान् ॥
समीक्ष्य राजा समरोद्धतोन्मुखं कुमारमक्षं प्रसमैक्षताग्रतः ॥ १ ॥
स तस्य दृष्ट्यर्पणसंप्रचोदितः प्रतापवान्काञ्चनचित्रकार्मुकः ॥
समुत्पपाताथ सदस्युदीरितो द्विजातिमुख्यैर्हविषेव पावकः ॥ २ ॥
ततो महद्बालदिवाकरप्रभं प्रतप्तजाम्बूनदजालसंततम् ॥
रथं समास्थाय ययौ स वीर्यवान्महाहरिं तं प्रति नैर्ऋतर्षभः ॥ ३ ॥
ततस्तपःसंग्रहसञ्चयार्जितं प्रतप्तजाम्बूनदजालशोभितम् ॥
पताकिनं रत्नविभूषितध्वजं मनोजवाष्टाश्ववरैः सुयोजितम् ॥ ४ ॥
सुरासुराधृष्यमसङ्गचारिणं रविप्रभं व्योमचरं समाहितम् ॥
सतूणमष्टासिनिबद्धबन्धुरं यथाक्रमावेशितशक्तितोमरम् ॥ ५ ॥

॥३०—३९॥ ध्वजिनीपतीन् सेनापतीन् । कृतक्षणः दत्तावसरः । अभूदिति शेषः ॥ ४० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्चत्वारिंशः सर्गः ॥ ४६ ॥

समीक्ष्य विज्ञाय ॥ १ ॥ द्विजातिमुख्यैः हविषा उदीरितः अभिवर्धितः पावक इवेत्यन्वयः ॥ २–३ ॥ ततो महदित्यनेनोक्तं विस्तरेणाह—ततस्तपस्संग्रहेत्यादिना ॥ तपस्संग्रहसञ्चयार्जितं तपोनुष्ठानसमूहसंपादितं ॥ ४ ॥ समाहितं सज्जीकृतं । अष्टासिनिबद्धबन्धुरं अष्टासिभिर्निबद्धं अतएव बन्धुरं सुन्दरं । " बन्धुरं सुन्दरे नम्रे " इति विश्वः । यद्वा अष्टासिभिर्निबद्धं बन्धुरं यस्य स तथा । बन्धुरं फलकासंघाट इत्याहुः । अन्ये घण्टा इत्यप्याहुः । तदानीं अष्टासिश्चासौ निबद्धबन्धुरश्चेति समासः । यथाक्रमावेशितशक्तितोमरं पङ्क्तितया स्थापितशक्तितोमरं

ति० प्रमापितान् मारितान् । समरोद्धतोन्मुखं समरोद्धतश्चासौसमरायोन्मुखश्चतं । आक्षं समक्षमवस्थितं । अक्षाख्यंकुमारं निशाम्य दृष्ट्वा । प्रसमैक्षत दृष्ट्यायुद्धार्थमाज्ञापयामासेत्यर्थः ॥ स० समरोद्धतोन्मुखं समरोद्धताः वैरिणः तदुन्मुखः तदभिमुखः तं । आक्षं अक्षाणां नेत्राणामिन्द्रियाणामयं विषयआक्षः तं । नेत्रविषयमितियावत् ॥ १ ॥ ति० सदसि यज्ञशालायां ॥ २ ॥ ति० महान्सइत्यन्वयः ॥ ३ ॥ ति० अष्टसुदिक्षु असिभिःसहनिबद्धाबन्धुरारथफलकायस्मिंस्तं ॥ शि० असङ्गचारिणं निरालंब-

[पा०] १ घ. हयैर्नागैश्चमत्तैश्च. २ ङ.—ट. तथैववीरः. क.—घ. तदेववीरः. ३ ङ.—ट. निशम्य. ४ झ. प्रसमैक्षताक्षं. ५ क. समुत्पपाताशु. ६ ग. ङ.—ट. महान्बाल. ७ ङ.—ट. जालचित्रितं. ८ ङ—ट. तडित्प्रभं.

विराजमानं प्रतिपूर्णवस्तुना सहेमदाम्ना शशिसूर्यवर्चसा ॥
दिवाकराभं रथमास्थितस्ततः स निर्जगामामरतुल्यविक्रमः ॥ ६ ॥
स पूरयन्खं च महीं च साचलां तुरङ्गमातङ्गमहारथस्वनैः ॥
बलैः समेतैः स हि तोरणस्थितं समर्थमासीनमुपागमत्कपिम् ॥ ७ ॥
स तं समासाद्य हरिं हरीक्षणो युगान्तकालाग्निमिव प्रजाक्षये ॥
अवस्थितं विस्मितजातसंभ्रमः समैक्षताक्षो बहुमानचक्षुषा ॥ ८ ॥
स तस्य वेगं च कपेर्महात्मनः पराक्रमं चारिषु पार्थिवात्मजः ॥
विधारयन्स्वं च बलं महाबलो हिमक्षये सूर्य इवाभिवर्धते ॥ ९ ॥
स जातमन्युः प्रसमीक्ष्य विक्रमं स्थिरं स्थितः संयति दुर्निवारणम् ॥
समाहितात्मा हनुमन्तमाहवे प्रचोदयामास शरैस्त्रिभिः शितैः ॥ १० ॥
ततः कपिं तं प्रसमीक्ष्य गर्वितं जितश्रमं शत्रुपराजयोर्जितम् ॥
अवैक्षताक्षः समुदीर्णमानसः स बाणपाणिः प्रगृहीतकार्मुकः ॥ ११ ॥
स हेमनिष्काङ्गदचारुकुण्डलः समाससादाशुपराक्रमः कपिम् ॥
तयोर्बभूवाप्रतिमः समागमः सुरासुराणामपि संभ्रमप्रदः ॥ १२ ॥
ररास भूमिर्न ततापे भानुमान्ववौ न वायुः प्रचचाल चाचलः ॥
कपेः कुमारस्य च वीक्ष्य संयुगं ननाद च द्यौरुदधिश्च चुक्षुभे ॥ १३ ॥
ततः स वीरः सुमुखान्पतत्रिणः सुवर्णपुङ्खान्सविषानिवोरगान् ॥
समाधिसंयोगविमोक्षतत्त्ववित्छरानथ त्रीन्कपिमूर्ध्न्यपातयत् ॥ १४ ॥
स तैः शरैर्मूर्ध्नि समं निपातितैः क्षरन्नसृग्दिग्धविवृत्तलोचनः ॥
नवोदितादित्यनिभः शरांशुमान्व्यराजतादित्य इवांशुमालिकः ॥ १५ ॥

॥ ५ ॥ प्रतिपूर्णवस्तुना समग्रोपकरणेन । शरधनुः-कवचादीन्युपकरणानि । प्रतिपूर्णमस्तिनेति पाठे अस्तिना धनेनेत्यर्थः । हेमदाम्ना हेममयाश्वादिबन्धन-रज्जुना । शशिसूर्यवर्चसा । दामसु किञ्चित्सितवर्णे किञ्चित्सूर्यवत्पीतवर्णमित्यर्थः । प्रतिपूर्णवस्तुना शशिसूर्यवर्चसा हेमदाम्ना च विराजमानमित्यन्वयः । यद्वा क्वचिच्छशिवर्चसा क्वचित्सूर्यवर्चसा च विराज-मानमित्यन्वयः । वितानादिषु शशिवर्चसा हेममयर-थाङ्गेषु सूर्यवर्चसा । दिवाकराभमित्याकाशचारित्वे दृष्टान्तः । अतो न रविप्रभमित्यनेन पुनरुक्तिः । तच्छब्दद्वयं च पूर्वानुस्मरणार्थं ॥ ६ ॥ सः अक्षः । हिः प्रसिद्धौ ॥ ७ ॥ हरीक्षणः सिंहप्रेक्षणः । प्रजा-क्षये अवस्थितं प्राणिनाशे प्रवृत्तं । विस्मितश्चासौ जातसंभ्रमश्च विस्मितजातसंभ्रमः ॥ ८ ॥ विधारयन् निर्धारयन् । विचारयन्निति च पाठः ॥ ९—१२ ॥ न ततापे भानुमान् । सूर्योदयः पूर्वं सूचितः सः न तापेत्युच्यते ॥ १३ ॥ समाधिसंयोगविमोक्षतत्त्व-वित् समाधिः लक्ष्यवेदनं संयोगः शरसंधानं विमोक्षः तद्विसर्गः तेषां तत्त्ववित् यथार्थवित् ॥१४॥ रक्तसिक्तत्वे दृष्टान्तो नवोदितेति । शरार्चितत्वे

गमनशीलं । अतएव व्योमचरं । समाहितं सम्यक्संस्थापितं ॥ ५ ॥ ति० विस्मितंचतंजातसंभ्रमंच । बालोऽयंमांयोद्धुमिच्छती-तिविस्मयः । रावणपुत्रत्वाच्च तत्रजातादरत्वं ॥ ८ ॥ ति० निष्कं उरोभूषणं । आशुपराक्रमः तीक्ष्णपौरुषइतियावत् । समागमः युद्धं । संभ्रमप्रदः भयप्रदः ॥ १२ ॥ ती० अक्षयुद्धसमयेसूर्योदयाभावादेशान्तरस्थोपिसूर्यः एतज्ज्ञात्वानतातापेतिभावः ॥ ति० भूमिः भूमिस्थप्राणिजातं । ररास । वीर्यप्रवृत्तसंयुगंवीक्ष्येतिशेषः ॥१३॥ ति० अताडयत् अपातयत् ॥१४॥ ति० असृग्दिग्धश्चा-

[पा०] १ क. ख. परिपूर्णवस्तुना. २ क. ङ.—ट. जातसंभ्रमं. ३ ङ. च. झ. ञ. ट. रावणात्मजः. ४ क. ख. ङ.—ट. विचारयन्. ५ ग. बलोत्कटो. ६ ख. ङ.—ट. युगक्षये. ७ ग.—ट. पराजयोचितं. क. पराजयोद्यतं. ८ दाशुनिशाचरः. ९ ङ. झ. ञ. ट. मूर्ध्नताडयत्. १० झ. निपातैः. ११ झ. विवृत्तनेत्रः.

ततः स पिङ्गाधिपमन्त्रिसत्तमः समीक्ष्य तं राजवरात्मजं रणे ॥
उदग्रचित्रायुधचित्रकार्मुकं जहर्ष चापूर्यत चाहवोन्मुखः ॥ १६ ॥
स मन्दराग्रस्थ इवांशुमालिको विवृद्धकोपो बलवीर्यसंयुतः ॥
कुमारमक्षं सबलं सवाहनं ददाह नेत्राग्निमरीचिभिस्तदा ॥ १७ ॥
ततः स बाणासनचित्रकार्मुकः शरप्रवर्षो युधि राक्षसांबुदः ॥
शरान्मुमोचाशु हरीश्वराचले बलाहको वृष्टिमिवाचलोत्तमे ॥ १८ ॥
ततः कपिस्तं रणचण्डविक्रमं विवृद्धतेजोबलवीर्यसंयुतम् ॥
कुमारमक्षं प्रसमीक्ष्य संयुगे ननाद हर्षाद्घनतुल्यविक्रमः ॥ १९ ॥
स बालभावाद्युधि वीर्यदर्पितः प्रवृद्धमन्युः क्षतजोपमेक्षणः ॥
समाससादाप्रतिमं कपिं रणे गजो महाकूपमिवावृतं तृणैः ॥ २० ॥
स तेन बाणैः प्रसभं निपातितैश्चकार नादं घननादनिस्स्वनः ॥
समुत्पपाताशु नभः स मारुतिर्भुजोरुविक्षेपणघोरदर्शनः ॥ २१ ॥
समुत्पतन्तं समभिद्रवद्बली स राक्षसानां प्रवरः प्रतापवान् ॥
रथी रथिश्रेष्ठतमः किरञ्शरैः पयोधरः शैलमिवाश्मवृष्टिभिः ॥ २२ ॥
स ताञ्शरांस्तस्य हरिर्विमोक्षयंश्चचार वीरः पथि वायुसेविते ॥
शरान्तरे मारुतवद्विनिष्पतन्मनोजवः संयति चण्डविक्रमः ॥ २३ ॥
तमाक्तबाणासनमाहवोन्मुखं खमास्तृणन्तं विशिखैः शरोत्तमैः ॥
अवैक्षताक्षं बहुमानचक्षुषा जगाम चिन्तां च स मारुतात्मजः ॥ २४ ॥
ततः शरैर्भिन्नभुजान्तरः कपिः कुमारवीरेण महात्मना नदन् ॥
महाभुजः कर्मविशेषतत्त्वविद्विचिन्तयामास रणे पराक्रमम् ॥ २५ ॥
अबालवद्बालदिवाकरप्रभः करोत्ययं कर्म महन्महाबलः ॥
न चास्य सर्वाहवकर्मशोभिनः प्रमापणे मे मतिरत्र जायते ॥ २६ ॥

दृष्टान्तः आदित्यइवांशुमालिक इति ॥ १५ ॥ आपूर्यत व्यवर्धत ॥ १६ ॥ मन्दराग्रस्थः मन्दरो नाम भूमध्यपर्वतः । तदग्रे मध्याह्ने वर्तत इत्यौ-ड्योक्तिः ॥ १७ ॥ बाणासनचित्रकार्मुकः बाणाः अस्यन्ते क्षिप्यन्तेनेनेति बाणासनः बाणविमोक्षक-चित्रकार्मुक इत्यर्थः ॥ १८—२२ ॥ विमोक्षयन् शरीरे असंयोजयन् । लाघवातिशयेनेति भावः ॥ २३ ॥ आस्तृणन्तं आच्छादयन्तं । विशिखैः विविधशिखैः । चिन्तां जगाम कथमेतादृशमेनं वधिष्यामीत्येवं ॥ २४ ॥ इदमेवोपपादयति ततश्शरै-

सौविवृत्तनेत्रश्च । विवृत्तलोचनइतिपाठे अवसरोचितचक्षुरित्यर्थः । नवोदितादित्यसंनिभः रक्तवर्णइत्यर्थः । शरांशुमान् स्वमस्तक-स्थशररूपांशुमान् । अंशुमालाभृत्सूर्यइव व्यराजत ॥ १५ ॥ रामानु० मन्दराग्रस्थः मन्दरोनामसालग्रामपर्वतोत्तरभागेभारः तखण्डमध्येवर्तमानःकश्चनपर्वतः । तदग्रस्थः । अनेनोत्तरायणेमध्याह्नगतत्वमुक्तंभवति ॥ १७ ॥ रामानु० बाणासनचित्रका-मुर्कः बाणानामसनं बाणान्क्षिपत् चित्रंचकार्मुकंयस्यसतथोक्तः । बाणासनचक्रकार्मुकइतिपाठे बाणान्क्षिपत् चक्राकारंकार्मुकं यस्यसः ॥ ति० बाणासनमेवशक्रकार्मुकंयस्यसः ॥ १८ ॥ ति० चिन्ताप्रकारः अबालवदिति० । सर्वाहवकर्मशालिन-

[पा०] १ ङ.—ट. संवृतः. २ क. मरीचिभिःकपिः. ३ ख.—ट. शक्रकार्मुकः. ४ ख. ज.—ट. प्रवृद्ध. ५ क.—ट. सायकं. ६ क.—ट. तुल्यनिस्स्वनः. ७ ङ. छ. झ. ट. समुत्सहेनाशुनभस्समारुजन्. ८ ख. घ. स्तस्यविमोचयन्कपिश्चचार. ९ ख. ङ.—ट. भीमविक्रमः क. घ. चेन्द्रविक्रमः. १० ङ.—ट. विविधैः. ११ क. ख. घ. शरोत्करैः. १२ क. ख. ग. ङ.—ट. कुमारवर्येण. १३ ङ.—ट. कर्मशालिनः.

अयं महात्मा च महांश्च वीर्यतः समाहितश्चातिसहश्च संयुगे ॥
असंशयं कर्मगुणोदयादयं सनागयक्षैर्मुनिभिश्च पूजितः ॥ २७ ॥
पराक्रमोत्साहविवृद्धमानसः समीक्षते मां प्रमुखागतः स्थितः ॥
पराक्रमो ह्यस्य मनांसि कम्पयेत्सुरासुराणामपि शीघ्रगामिनः ॥ २८ ॥
न खल्वयं नाभिभवेदुपेक्षितः पराक्रमो ह्यस्य रणे विवर्धते ॥
प्रमापणं त्वेव ममास्य रोचते न वर्धमानोऽग्निरुपेक्षितुं क्षमः ॥ २९ ॥
इति प्रवेगं तु परस्य तर्कयन्स्वकर्मयोगं च विधाय वीर्यवान् ॥
चकार वेगं तु महाबलस्तदा मतिं च चक्रेऽस्य वधे महाकपिः ॥ ३० ॥
स तस्य तानष्टहयान्महाजवान्समाहितान्भारसहान्विवर्तने ॥
जघान वीरः पथि वायुसेविते तलप्रहारैः पवनात्मजः कपिः ॥ ३१ ॥
ततस्तलेनाभिहतो महारथः स तस्य पिङ्गाधिकमन्त्रिनिर्जितः ॥
प्रभग्ननीडः परिमुक्तकूबरः पपात भूमौ हतवाजिरम्बरात् ॥ ३२ ॥
स तं परित्यज्य महारथो रथं सकार्मुकः खड्गधरः खमुत्पतन् ॥
तपोभियोगाद्दपिरुग्रवीर्यवान्विहाय देहं मरुतामिवालयम् ॥ ३३ ॥
ततः कपिस्तं विचरन्तमम्बरे पतत्रिराजानिलसिद्धसेविते ॥
समेत्य तं मारुततुल्यविक्रमः क्रमेण जग्राह स पादयोर्दृढम् ॥ ३४ ॥
स तं समाविध्य सहस्रशः कपिर्महोरगं गृह्य इवाण्डजेश्वरः ॥
मुमोच वेगात्पितृतुल्यविक्रमो महीतले संयति वानरोत्तमः ॥ ३५ ॥
स भग्नबाहूरुकटीशिरोधरः क्षरन्नसृङ्मर्मथितास्थिलोचनः ॥
सभग्नसंधिः प्रविकीर्णबन्धनो हतः क्षितौ वायुसुतेन राक्षसः ॥
महाकपिर्भूमितले निपीड्य तं चकार रक्षोधिपतेर्महद्भयम् ॥ ३६ ॥
महर्षिभिश्चक्रचरैर्महाव्रतैः समेत्य भूतैश्च सयक्षपन्नगैः ॥
सुरैश्च सेन्द्रैर्मृगजातविस्मयैर्हते कुमारे स कपिर्निरीक्षतः ॥ ३७ ॥

रित्यादिना ॥ २५—२६ ॥ अतिसहः अतिसोढा । कर्मगुणोदयात् युद्धकर्मोत्कर्षाभिवृद्धेः ॥२७—२९॥ परस्य शत्रोः । प्रवेगंतर्कयन् आलोचयन् । स्वकर्मयोगं विधाय युद्धक्रमं च सङ्कल्प्य । पूर्वमश्वान् हत्वा ततो रथं भङ्क्ष्यामीति निश्चित्येत्यर्थः ॥ ३० ॥ विवर्तने सव्यापसव्यभ्रमणेपि । भारसहान् रथभारसहान् ॥ ३१ ॥ तलेनाभिहतः अतएव पिङ्गाधिपमन्त्रिनिर्जितः हनुमता निर्जित इत्यर्थः । प्रभग्ननीडः प्रभग्नरथाङ्गः । कूबरः युगन्धरः । वाजिरिति इकारान्तत्वमार्षं ॥ ३२ ॥ मरुतामालयमुत्पतन् ऋषिरिव अभवदितिशेषः ॥ ३३—३४ ॥ गृह्य इवेत्यत्र गुणाभावआर्षः ॥ ३५ ॥ प्रविकीर्णबन्धनः प्रविकीर्णकक्ष्यादिबन्धनः । प्रभिन्नसंधिरितिसंधिबन्धभङ्गस्योक्तत्वात् ॥ ३६ ॥ चक्रचरैः ज्योतिश्चक्रचरैः । नभश्चक्र-

सर्वप्रकाराहवकर्मशालिनः । अत्र अस्मिन्काले । अस्यप्रमापणेमेमतिर्नजायते । प्रमापणेमारुतिरत्रजायतेइतिपाठे अयंजनइतिवत्स्वैवहनुमतोमारुतिरितिनिर्देशः ॥ २६ ॥ ति० स्वकर्मयोगं स्वस्यकर्मणियोगं ज्ञानबलविशेषावस्थानलक्षणमुपायं ॥ ३० ॥ शि० विवर्तने अनेकविधमण्डलगमने । समाहितान् प्राप्तशिक्षानित्यर्थः ॥ ३१ ॥ इतिसप्तचत्वारिंशःसर्गः ॥ ४७ ॥

[पा०] १ ग. ङ. झ. ञ. ट. प्रमुखोग्रतः. २ ख.—ट. शीघ्रकारिणः. ३ ङ.—झ. ट. प्रमापणंह्यस्यममाद्य. ४ ख. छ. झ. घ. ङ. झ. ट. वधेतदानीं. क. च. छ. ज. वधेदुरात्मनः. ५ ङ. छ. ज. झ. ट. तानष्टवरान्महाहयान्. ६ ख. ङ. च. ट. सभग्ननीडः. ७ ङ.—ट. संभिन्नसन्धिः क. ग. प्रभिन्नसन्धिः. ८ ङ. झ. ट. चक्रचरैःसमागतैः. घ. चक्रचरैर्महाबलैः.

निहत्य तं वज्रिसुतोपमप्रभं कुमारमक्षं क्षतजोपमेक्षणम् ॥
तमेव वीरोऽभिजगाम तोरणं कृतक्षणः काल इव प्रजाक्षये ॥ ३८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

इन्द्रजिता हितोपदेशपूर्वकरावणप्रेरणया रणायहनुमन्तंप्रत्यभियानम् ॥ १ ॥ हनुमता लाघवातिशयेनेन्द्रजिद्बाणादीनांमोघीकरणे इन्द्रजिताब्रह्मास्त्रेण तद्बन्धनम् ॥ २ ॥ अस्त्रमोचनशक्तस्यापि रावणदर्शनादिप्रयोजनायास्त्रमनुवर्तमानस्यहनुमतोराक्षसैरावणसमीपप्रापणम् ॥ ३ ॥

ततः स रक्षोधिपतिर्महात्मा हनूमताऽक्षे निहते कुमारे ॥
मनः समाधाय तदेन्द्रकल्पं समादिदेशेन्द्रजितं सरोषम् ॥ १ ॥
त्वमस्त्रविच्छस्त्रविदां वरिष्ठः सुरासुराणामपि शोकदाता ॥
सुरेषु सेन्द्रेषु च दृष्टकर्मा पितामहाराधनसंचितास्त्रः ॥ २ ॥
तवास्त्रबलमासाद्य नासुरा न मरुद्गणाः ॥ न शेकुः समरे स्थातुं सुरेश्वरसमाश्रिताः ॥ ३ ॥
न कश्चित्त्रिषु लोकेषु संयुगे नगतश्रमः ॥ भुजवीर्याभिगुप्तश्च तपसा चाभिरक्षितः ॥
देशकालविभागज्ञस्त्वमेव मतिसत्तमः ॥ ४ ॥
न तेऽस्त्यशक्यं समरेषु कर्मणा न तेऽस्त्यकार्यं मतिपूर्वमञ्जसे ॥
न सोस्ति कश्चित्त्रिषु संग्रहेषु वै न वेद यस्तेऽस्त्रबलं बलं च ते ॥ ५ ॥
ममानुरूपं तपसो बलं च ते पराक्रमश्चास्त्रबलं च संयुगे ॥
न त्वां समासाद्य रणावमर्दे मनः श्रमं गच्छति निश्चितार्थम् ॥ ६ ॥

चरैर्वा ॥ ३७—३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

मनः समाधाय धैर्यं कृत्वेत्यर्थः ॥ १ ॥ अस्त्रवित् ब्रह्मास्त्रवित् । संचितास्त्रः संचितास्त्रविशेषः ॥ २ ॥ तव अस्त्रबलमासाद्य असुराः न नश्यन्तीत्यर्थः ॥ ३ ॥ त्रिषु लोकेषु तव संयुगे नगतश्रमः अप्राप्तश्रमः कश्चिन्न । " सुप्सुपा " इति समासः । सर्वेप्राप्तश्रमाइत्यर्थः । हरिहयादयोपि श्रमंप्राप्नुवन्तीत्यर्थः । मतिसत्तमः मतिश्रेष्ठइत्यर्थः ॥ ४ ॥ समरेषु कर्मणा पुरुषकारेण । ते अशक्यं नास्तीत्यर्थः । तथा मतिपूर्वमञ्जसे विवेकपूर्वविचारे । अकार्यं अज्ञातकार्यं । ज्ञातुमशक्यं कार्यं नास्तीत्यर्थः । संग्रहेषु संगृह्यन्ते भोग्यतया स्वीक्रियन्ते भोक्तृभिरिति संग्रहाः लोकाः । तेषु त्रिष्वपि यस्तवास्त्रबलं शारीरं बलं च न वेद स नास्ति । सर्वलोकप्रख्यातशस्त्रास्त्रबलसंपन्नस्त्वमित्यर्थः ॥ ५ ॥ रणावमर्दे रणसंकटे । निश्चितार्थं निश्चितजयरूपार्थं । त्वां आसाद्य विचिन्त्य । मे मनः श्रमं न

स० समाधाय पुत्रशोकोपहतंमनःपुनःकार्यगौरवाद्धैर्येणैकाग्र्यंविधाय । इन्द्रकल्पं इन्द्रोपमंकपिंप्रति इन्द्रजितंसमादिदेश । अनेनानायासेनहनुमज्जयेसमर्थइतिभ्रमेणसमादिदेशेतिभावःसूचितोभवति । इन्द्रकल्पं इन्द्रसमसमरेकल्पो दक्षइतीन्द्रजितोविशेषणंवा । एतत्पक्षेकल्पशब्दः । प्राक्पक्षेप्रत्ययइतिविवेकः ॥ ति० मनःसमाधाय पुत्रनाशखिन्नमपिचेतोधीरतयाऽप्रकाशितभयंप्रतिष्ठाप्य ॥ १ ॥ स० सुरेश्वरंसमाश्रिताःकेप्यन्ये नशेकुरित्यन्वयः ॥ ३ ॥

[पा०] १ ङ. ञ. ञ. ट. सुतोपमंरणे. २ क. ख. ग. ङ.—ट. तदेव. ३ ख. झ. ञ. ट. सदेवकल्पं. ४ क. ङ. ट. सरोषः. ५ क. ख. घ. ङ. ज.—ट. रछस्त्रभृतां. ६ ङ. च. छ. झ. ञ. ट. त्वदस्त्र. ७ ङ. झ. ट. ससुरास्समरुद्गणाः. ८ ङ.—ट. देशकालप्रधानश्च.

निहताः किंकराः सर्वे जम्बुमाली च राक्षसः ॥ अमात्यपुत्रा वीराश्च पञ्च सेनाग्रयायिनः ॥ ७ ॥
बलानि सुसमृद्धानि साश्वनागरथानि च ॥ सहोदरस्ते दयितः कुमारोक्षश्च सूदितः ॥ ८ ॥
न हि तेष्वेव मे सारो यस्त्वय्यरिनिषूदन ॥ ९ ॥
इदं हि दृष्ट्वा मतिमन्महद्बलं कपेः प्रभावं च पराक्रमं च ॥
त्वमात्मनश्चापि समीक्ष्य सारं कुरुष्व वेगं स्वबलानुरूपम् ॥ १० ॥
बलावमर्दस्त्वयि सन्निकृष्टे यथागते शाम्यति शान्तशत्रौ ॥
तथा समीक्ष्यात्मबलं परं च समारभस्वास्त्रविदां वरिष्ठ ॥ ११ ॥
न वीर सेनागणशोच्यवन्ति न वज्रमादाय विशालसारम् ॥
न मारुतस्यास्य गतेः प्रमाणं न चाग्निकल्पः करणेन हन्तुम् ॥ १२ ॥

गच्छति विषादंनगच्छतीत्यर्थः ॥ ६—८ ॥ त्वयि मे यस्सारः उत्कर्षप्रत्ययः । सः तेषु नास्त्येवहीति योजना ॥ ९ ॥ इदं किङ्कराध्यक्षकुमारान्तमारकं मतिमत् प्रशस्तमतियुक्तं । बलं शारीरं । प्रभावं अन्तःशक्तिं । पराक्रमं पौरुषं ॥ १० ॥ शान्तशत्रौ शमितशत्रौ । शत्रुशमनस्वभाव इति यावत् । " वा दान्तशान्त—" इत्यादिना निपातनाण्णिलोप इडभावश्च । त्वयि संनिकृष्टे कपेरासन्ने सति । यथा बलावमर्दः सेनाक्षयः । शाम्यति । तथा आत्मबलं परं परबलं च समीक्ष्य समारभस्व । बलनाशात्पूर्वमेव शत्रुशान्तिं कुर्वित्यर्थः ॥ ११ ॥ हे वीर गणशोचि गणानां शोचयितरि । शोचतेर्ण्यन्तात्किप् । एकदाऽनेकप्रहर्तरीत्यर्थः । एवंभूते हनुमति निमित्ते सेनाः नावन्ति न रक्षन्ति । युगपदनेकविनाशके सेना अप्रयोजिकेत्यर्थः । अतः सेनाभिः सह मा गच्छेत्यर्थः । उपायान्तरं प्रतिषेधति—न वज्रमिति । अलसारं हनुमद्विषये जीर्णसारं । वज्रं वज्राख्यमायुधविशेषं । आदाय न विश । तत्समीपमिति शेषः । तत्र हेतुमाह—न मारुतस्येति । अस्य गतिप्रमाणं मारुतस्य नास्ति । मारुतादप्यतिशयितगतिप्रमाण इत्यर्थः । अतस्तरसा यया कयापि दिशा समागम्य प्रहर्तरि न वज्रं किञ्चित्करमिति भावः । यदि समीपमागमिष्यति तदा मुष्टयादिभिरेव निहन्यत इत्याशङ्क्याह—न चेति । अग्निकल्पो हनुमान् करणेन मुष्टया-

---

शि० ननुतर्हिममापिवधःस्यादित्यतआह—नेति । मे ममसंबन्धीयस्सारोबलं त्वय्यस्ति सः तेषुनिहतेषुनैव । एतेनातिप्रबलत्वात्तववधोनभविष्यतीतिध्वनितं ॥ ति० यद्वा मेसारः सर्वजगज्जयसामर्थ्यं स त्वय्येव त्वत्साहाय्यनिमित्तएव । नतुतेषु नतुतत्साहाय्यनिमित्तकइत्यर्थः ॥ स० सारोबलं यस्त्वयि । स तेषुपूर्वविनाशितेषुनेतिमे मह्यंरोचतइतिवा भातीतिवा क्रमाच्चतुर्थीषष्ठीवाऽऽश्रयणीयेतिशेषोध्येयः ॥ ९ ॥ स० बलावमर्दैः अस्मदीयैस्सह त्वयिसंनिकृष्टे हनुमत्समीपंप्राप्तेसति । शान्तशत्रुः नाशिताक्षादिः शाम्यति शान्तोभवति मृतोभवतीतियावत् । तथा आत्मबलं परबलंचसमीक्ष्यारभस्व ॥ ११ ॥ स० हनुमद्बलाकर्णनदीप्तहृदयःसेनादिसत्त्वभ्रमतोनसाहसंकुर्वितिसुतंप्रति शंसति—नेति । हेवीर आरब्धान्तगामिन् । गणशः सङ्घीभूताःसेनाः न नोपयुक्ताः । तत्रहेतुश्चयन्तीति । स्वामिनंगमयित्वा पलायन्ते । उत्वमार्षं । विशालसारंवज्रमादायापिनप्रयोजनं । मारुतस्य हनुमतः । गतेः प्रमाणं इयत्ता । न नास्ति । करणेन सेनादिरूपेण । अग्निकल्पोऽयं नच नशक्यइतिशेषः । यद्वा नवीर नविद्यतेवीरोयस्मादन्यइतिनवीरः तत्संबुद्धिः । सेनाः गणशः अ च्यवन्ति नच्यवन्ति स्वस्थलाद्रणाङ्गणंप्रतिनोपसर्पन्ति । " अमानोनाःप्रतिषेधे " इत्यनुशिष्टं अ इत्यव्ययं । ततश्च अ च्यवन्तीतिपदद्वयं । अथवा नसेनाइत्यनेनाक्षेपोज्ञायते । अतःसमासोपपत्तिः । विशालसारंवज्रं तन्नामकायुधमादायापिन नगच्छतस्तवकृत्यं । अतद्गोचरइति भावः । यद्वा हेनवीरगणश स्वसंघसुखद सेनाउच्यवन्ति परिसर्पन्ति । नचच्यवन्ति उच्यवन्तीत्यत्र एकचकारद्विचकारपदयोरुच्चरणवैलक्षण्यावश्यंभावात्कथमेवंपदमितिवाच्यं । " असिद्धवदत्राभात् " इतिसूत्रमहाभाष्ये " नव्यञ्जनपरस्यैकस्यवानेकस्यवोच्चारणेश्रवणंप्रतिविशेषोस्ति" इत्युक्तेः । इदंप्रकारस्तुभाष्यदीपिकायुक्तिवाल्यायामस्मत्कृतायांविस्तरतउदञ्चितस्ततोनुसंधेयः । कुतःसेनाप्रयोजनंनास्तीत्यतआह—नेति । विशालसारंवज्रमादायन नायाति । एकवचनेनएकंवज्रमादायनायाति किंतु बहुवज्रा-

[पा०] १ ग. ज. ञ. सेनाग्रनायकाः. ङ. झ. ट. सेनाग्रगामिनः. २ ग. मेमनसस्सारो. ३ ङ—ट. निरीक्ष्य. ४ ङ. च, छ. झ. ञ. बलावमर्दैः. ५ ङ. च. छ. झ. ञ. शान्तशत्रुः. ६ क. ग. ङ.—ञ. मारुतस्यास्तिगतिप्रमाणं.

तमेवमर्थं प्रसमीक्ष्य सम्यक्स्वकर्मसाम्याद्धि समाहितात्मा ॥
स्मरंश्च दिव्यं धनुषोस्त्रवीर्यं व्रजाक्षतं कर्म समारभस्व ॥ १३ ॥
न खल्वियं मतिः श्रेष्ठा यत्त्वां संप्रेषयाम्यहम् ॥
इयं च राजधर्माणां क्षत्रस्य च मतिर्मता ॥ १४ ॥
नानाशस्त्रैश्च संग्रामे वैशारद्यमरिन्दम ॥ अवश्यमेव बोद्धव्यं काम्यश्च विजयो रणे ॥ १५ ॥
ततः पितुस्तद्वचनं निशम्य प्रदक्षिणं दक्षसुतप्रभावः ॥
चकार भर्तारमदीनसत्त्वो रणाय वीरः प्रतिपन्नबुद्धिः ॥ १६ ॥

दिना । हन्तुं न शक्यः । अग्नितुल्ये मुष्टयादिप्रहारा-प्रवृत्तेरितिभावः ॥ १२ ॥ तर्हि कथं कर्तव्यं तत्राह —तमिति ॥ तं पूर्वोक्तमर्थं एवं । सम्यक् । प्रसमीक्ष्य विचार्य । स्वकर्मसाम्यात् स्वकार्यसिद्ध्यर्थं । फलस्यापि हेतुत्वात्पञ्चमी । साम्यं समत्वं । अन्यूनातिरिक्तत्वं । समाहितात्मा एकाग्रचित्तः । दिव्यं धनुस्संबन्धि अस्त्रवीर्यं अस्त्रबलं । स्मरन् व्रज । अस्त्रबलं विना स निगृहीतुमशक्यः । तेन तन्मन्त्रं स्मरन्नेव गच्छेतिभावः ॥ १३ ॥ अहं त्वां संप्रेषयामीति यत् इयं मतिः न श्रेष्ठा खलु । नोचितेत्यर्थः । इयं मतिः त्वत्प्रेषणविषया मतिः । राजधर्माणां राजनीतिस्वरूपधर्माणां । क्षत्रस्य तदनुष्ठातुः क्षत्रियस्य च मता उचिता । यद्यपि बालस्य प्रेषणमनुचितं तथापि स्वीयेषु सत्सु प्रधानगमनं नीतिशास्त्रविरुद्धमिति त्वां प्रेषयामीति भावः ॥ १४ ॥ नानाशस्त्रैः वैशारद्यं प्रहरणसामर्थ्यं । अवश्यं बोद्धव्यं स्मर्तव्यमित्यर्थः । रणे विजयश्च काम्यः प्रार्थनीयः । जयार्थं सर्वाण्यस्त्राणि स्मर्तव्यानीत्यर्थः ॥ १५ ॥ दक्षसुतप्रभावः दक्षसुता

नादायायातो वासवापेक्षयाथमतिशयितबलइत्यवलेपोनकार्यइतिभावः । यथोक्तंसंग्रहे—" नन्वेकवज्रोरिपुमेतिवज्रीदशास्यघोरानखनामवज्राः " इति । योमारुतः अग्निकल्पः अग्निसदृशः । आवम्येनन । " अग्निर्वैदेवानामवमः " इतिश्रुतेः । अतः-करणेन कस्य आत्मनः । रणेन युद्धेन अस्मज्जातियुद्धेन । मायामयेनेतियावत् । यद्वा कशब्दःकुत्सितवाची । कपटेत्यकापट्यंकुत्सितपटवत्त्वंचविवक्ष्यतइतिश्लेषकविसंप्रदायात् । केनकुत्सितेनरणेनहन्तुंन नहन्तुंयोग्यइत्यर्थः । केनापिकरणेनहन्तुंनशक्यइति । अलसारं पर्याप्तबलं । वज्रमिव वज्रंदृढंहनुमन्तं । आदायविश लङ्कामितिशेषः । हेअलस न्यायमार्गेणयुद्धंकर्तुमसमर्थ । अरं अलं अत्यन्तं । रलयोरभेदात् । वर्जनात् वैरिवर्जनाद्वज्रोहरिः तद्वान् । अर्शआद्यच् । तंहनुमन्तमादायेतिपूर्ववत् । यत्तुनागोजिभट्टेनतत्रावतेस्त्रायतिसमानार्थत्वेनपञ्चमीप्राप्तौसप्तमीत्वार्षी । अलतेर्धातोःपर्याप्त्यर्थत्वेनपर्याप्तसारमितिव्याख्यातुंयोग्यं । कुण्ठेत्यर्थस्यततोऽलाभादितितीर्थोपरिसाहसंकृतं तत्तु प्रथमपक्षेतदुक्त्यैव द्वितीयपक्षे कुण्ठधारमित्युक्त्यैवनयुक्तं । तथाहि । शब्देन्दुशेखरे " ततश्चसंबन्धसामान्येषष्ठ्यैवसमासः । भीत्रार्थानामिति हेतुलप्रकारकबोधेतृतीयाबाधनार्थंविभक्तिप्रकरणे नकृतं । कारकलप्रयुक्तकार्यानापत्तेरितिभावः । किंचहेतुलाविवक्षायांसंबन्धित्वेनविवक्षायाषष्ठीसूत्रारंभेपिबोध्या । अभ्युच्चयेनाहेत्यादि" । क्तितिचेत्यादाविवगणशोचीतिनिमित्तसप्तम्युपपत्तेः । मारुतस्येति । किंचिद्भूतमित्युक्तिस्तु तद्बलासहिष्णुतयेतिज्ञेयं ॥ १२ ॥ ति० स्वकर्मसाम्यात् स्वेनैवकर्मणःप्रकृतकार्यस्यसाम्यात्सिद्धेःसंपादनीयत्वात्त्वं समाहितात्मा समाहितचित्तोभूत्वा अस्यविषये दिव्यं धनुषोवीर्यं दिव्यास्त्रमोक्षसामर्थ्यंस्मरन् निश्चिन्वन्व्रज गच्छ ॥ स० एवं एवंविधं तंहनुमन्तं अर्थं त्वत्प्रयोजनंचप्रसमीक्ष्य स्वकर्मसाम्यात् स्वव्यापारानुगुण्यात् । समाहितात्मा अस्यहनुमतः अस्यधनुषोवीर्यंचस्मरन् व्रज । तेकर्म व्यापारः अक्षतं फलपर्यवसायियथास्यात्तथासमारभस्व ॥ १३ ॥ स० मतिश्रेष्ठ बुद्ध्यावरिष्ठ । यदित्यव्ययंतृतीयार्थे । ययामत्या त्वांप्रेषयिष्यामिइयंमतिर्नेत्यर्थः । अथवासंप्रेषयिष्यामीतियत् इयंप्रेरणा न नोचितेत्यर्थः । इयंप्रेरणविषयामतिः राज्ञांधर्माः राजधर्माःएषांसन्तीतिराजधर्माः तेषामस्माकं । क्षत्रियस्यचमता उचिता नान्येषामितिभावः । अतोनानिच्छसक्तिः । एतेन स्वस्यक्षत्रियत्वाभावेपिक्षत्रधर्मानुष्ठानात्पुत्रप्रेषणंयुक्तमितिसूचयति ॥ १४ ॥ अथराज्ञःक्षत्रियस्यचकृत्यमाह—नानेति । नानाशास्त्रेषु धर्मार्थनीत्यादिशास्त्रेषु संग्रामेच वैशारद्यं संपाद्यमितिशेषः । यस्यरणेविजयःकाम्योभवति तेनोक्तं नानाशास्त्रंअवश्यंबोद्धव्यमेवेत्यर्थः । यद्वा परस्यनानाशास्त्रेषुयद्वैशारद्यमस्ति तद्योद्भावश्यमेवबोद्धव्यं । बुद्ध्वापिरणेस्वस्यविजयःप्रार्थ्यएव । अहंजेष्याम्येवेतिबुद्ध्यायुद्धमारभ्यमेव । नतुतादृशशत्रोरपिनिवर्तितव्यमित्यर्थः । केचित्तु नानाशस्त्रैरितियोद्धव्यमितिचपठित्वा नानाशस्त्रकरणकसंग्रामेवैशारद्यंसामर्थ्यंतवास्ति अतस्त्वयाऽवश्ययोद्धव्यमेव रणेजयश्चप्रार्थनीयएवेतिव्याचक्षते ॥ १५ ॥ स० दक्षःसुतेषांप्रचेतसांब्रह्मणइतिवा तत्प्रभावः तत्स-

[पा०] १ ख. सामर्थ्यसमीहितात्मा. २ ख. घ. ङ. च. ज.—ट. धनुषोस्यवीर्यं. ३ झ.—ठ. मतिश्रेष्ठ. ४ ङ. झ. ञ. ट. नानाशास्त्रेषु. ५ ख. च. छ. योद्धव्यं. ६ ङ. झ. ट. मतिस्त्वरेण.

ततस्तैः स्वगणैरिष्टैरिन्द्रजित्प्रतिकूजितः ॥ युद्धोद्धतः कृतोत्साहः संग्रामं प्रत्यपद्यत ॥ १७ ॥
श्रीमान्पद्मपलाशाक्षो राक्षसाधिपतेः सुतः ॥ निर्जगाम महातेजाः समुद्र इव पर्वसु ॥ १८ ॥
स पक्षिराजोपमतुल्यवेगैर्व्यालैश्चतुर्भिः सिततीक्ष्णदंष्ट्रैः ॥
रथं समायुक्तमसह्यवेगं समारुरोहेन्द्रजिदिन्द्रकल्पः ॥ १९ ॥
स रथी धन्विनां श्रेष्ठः शस्त्रज्ञोस्त्रविदां वरः ॥ रथेनाभिययौ क्षिप्रं हनूमान्यत्र सोभवत् ॥ २० ॥
स तस्य रथनिर्घोषं ज्यास्वनं कार्मुकस्य च ॥ निशम्य हरिवीरोसौ संप्रहृष्टतरोऽभवत् ॥ २१ ॥
सुमहच्चापमादाय शितशल्यांश्च सायकान् ॥ हनुमन्तमभिप्रेत्य जगाम रणपण्डितः ॥ २२ ॥
तस्मिंस्ततः संयति जातहर्षे रणाय निर्गच्छति बाणपाणौ ॥
दिशश्च सर्वाः कलुषा बभूवुर्मृगाश्च रौद्रा बहुधा विनेदुः ॥ २३ ॥
समागतास्तत्र तु नागयक्षा महर्षयश्चक्रचराश्च सिद्धाः ॥
नभः समावृत्य च पक्षिसङ्घा विनेदुरुच्चैः परमप्रहृष्टाः ॥ २४ ॥
आयान्तं सरथं दृष्ट्वा तूर्णमिन्द्रजितं कपिः ॥ विननाद महानादं व्यवर्धत च वेगवान् ॥ २५ ॥
इन्द्रजित्तु रथं दिव्यमास्थितश्चित्रकार्मुकः ॥ धनुर्विस्फारयामास तडिदूर्जितनिस्स्वनम् ॥ २६ ॥
ततः समेतावतितीक्ष्णवेगौ महाबलौ तौ रणनिर्विशङ्कौ ॥
कपिश्च रक्षोधिपतेश्च पुत्रः सुरासुरेन्द्राविव बद्धवैरौ ॥ २७ ॥
स तस्य वीरस्य महारथस्य धनुष्मतः संयति संमतस्य ॥
शरप्रवेगं व्यहनत्प्रवृद्धश्चचार मार्गे पितुरप्रमेये ॥ २८ ॥
ततः शरानाययतीक्ष्णशल्यान्सुपत्रिणः काञ्चनचित्रपुङ्खान् ॥
मुमोच वीरः परवीरहन्ता सुसन्नतान्वज्रनिपातवेगान् ॥ २९ ॥
ततस्तु तत्स्यन्दननिस्स्वनं च मृदङ्गभेरीपटहस्वनं च ॥
विकृष्यमाणस्य च कार्मुकस्य निशम्य घोषं पुनरुत्पपात ॥ ३० ॥

देवाः । तथोक्तं विष्णुपुराणे— "मनसा त्वेव भूतानि पूर्वं दक्षोसृजत्तथा । देवानृषीन्सगन्धर्वानुरगान्पक्षिणस्तथा" इति ॥ १६ ॥ युद्धोद्धतः कृतोत्साह इति पाठः ॥ १७–१८ ॥ पक्षिराजोपमतुल्यवेगैः पक्षिराजोपमैः अन्योन्यतुल्यवेगैश्च । व्यालैः हिंस्रपशुभिः । सिंहैरिति यावत् । सिंहाश्च रक्षसां वाहनानि भवन्ति । "सर्पहिंस्रपशू व्यालौ" इत्यमरः ॥ १९—२० ॥ ज्यास्वनमित्यत्र ज्या इति लुप्तषष्ठीविभक्तिकं पृथक्पदं । कार्मुकस्येत्यत्र स्वनमिति वा अध्याहारः ॥ २१—२२ ॥ संयति युद्धे । जातहर्षे जातोत्साहे ॥ २३ ॥ चक्रचराः सञ्चारिणः ॥ २४—२५ ॥ तडिदूर्जितनिस्स्वनं । अत्र तडिच्छब्देन तत्सङ्घातोशनिरुच्यते । विद्युत्सङ्घातनिस्स्वनमिति पूर्वमुक्तत्वात् । अशनिवद्दृढनिस्स्वनमित्यर्थः ॥ २६ ॥ सुरासुरेन्द्राविव समेतावित्यन्वयः ॥ २७ ॥ शरप्रवेगं व्यहनत् चचार चेत्यन्वयः ॥ २८—३० ॥

मानपराक्रमः । दक्षसुतानांनारदेननाशितत्वादेवमेवार्थोबोध्यः ॥ १६ ॥ स० इन्द्रकल्पः इन्द्रादपिसमर्थः ॥ १९ ॥ ति० तटिदूर्जितनिस्स्वनं तटिन्निभमूर्जितस्वनंच ॥ २६ ॥ रामानु० सुपत्रिणः पत्रिणः प्रशस्तपत्राः । शोभनाश्चतेपक्षिणश्चेतिविग्रहः

[पा०] १ ङ. झ. ट. विशालाक्षो. २ घ. ङ. झ. ट. पर्वणि. ३ क. ख. पक्षिराजानिलतुल्य. ४ ङ. झ. ट. सतुतीक्ष्ण. ५ ङ. च. झ. ट. मसह्यवेगः. ६ क. विशारदः. ७ ङ. झ. ट. इन्द्रजिच्चापमादाय. ८ ग. च. छ. ज. ञ. ट. मभिप्रेक्ष्य. ९ क. विविधाः. १० क. घ. स्तत्रस. ११ ङ. झ. ट. ननादच. घ. ननादसुमहावेगं. १२ ङ. झ. ट. माश्रितः. १३ ग. ङ. झ. ट. रप्रमेयः. १४ ग. ज. ञ. तीक्ष्णवेगान्. १५ क.—च. ज.—ट. सुसंततान्. १६ ङ.—ट. वज्रसमानवेगान्. १७ क. ख. घ. च. छ. ज. ञ. सतस्य. १८ क. सशङ्खभेरी.

शराणामन्तरेष्वाशु व्यवर्तत महाकपिः ॥ हरिस्तस्याभिलक्ष्यस्य मोघयँल्लक्ष्यसंग्रहम् ॥ ३१ ॥
शराणामग्रतस्तस्य पुनः समभिवर्तत ॥ प्रसार्य हस्तौ हनुमानुत्पपातानिलात्मजः ॥ ३२ ॥
तावुभौ वेगसंपन्नौ रणकर्मविशारदौ ॥ सर्वभूतमनोग्राहि चक्रतुर्युद्धमुत्तमम् ॥ ३३ ॥
हनूमतो वेद न राक्षसोन्तरं न मारुतिस्तस्य महात्मनोन्तरम् ॥
परस्परं निर्विषहौ बभूवतुः समेत्य तौ देवसमानविक्रमौ ॥ ३४ ॥
ततस्तु लक्ष्ये स विहन्यमाने शरेष्वमोघेषु च संपतत्सु ॥
जगाम चिन्तां महतीं महात्मा समाधिसंयोगसमाहितात्मा ॥ ३५ ॥
ततो मतिं राक्षसराजसूनुश्चकार तस्मिन्हरिवीरमुख्ये ॥
अवध्यतां तस्य कपेः समीक्ष्य कथं निगच्छेदिति निग्रहार्थम् ॥ ३६ ॥
ततः पैतामहं वीरः सोस्त्रमस्त्रविदां वरः ॥ संदधे सुमहातेजास्तं हरिप्रवरं प्रति ॥ ३७ ॥
अवध्योऽयमिति ज्ञात्वा तमस्त्रेणास्त्रतत्त्ववित् ॥ निजग्राह महाबाहुर्मारुतात्मजमिन्द्रजित् ॥ ३८ ॥
तेन बद्धस्ततोस्त्रेण राक्षसेन स वानरः ॥ अभवन्निर्विचेष्टश्च पपात च महीतले ॥ ३९ ॥
ततोथ बुद्ध्वा स तदस्त्रबन्धं प्रभोः प्रभावाद्विगतात्मवेगः ॥
पितामहानुग्रहमात्मनश्च विचिन्तयामास हरिप्रवीरः ॥ ४० ॥
ततः स्वयम्भुवैर्मन्त्रैर्ब्रह्मास्त्रमभिमन्त्रितम् ॥ हनूमांश्चिन्तयामास वरदानं पितामहात् ॥ ४१ ॥
नँ मेऽस्य बन्धस्य च शक्तिरस्ति विमोक्षणे लोकगुरोः प्रभावात् ॥
ईत्येव मत्वा विहितोस्त्रबन्धो मयाऽऽत्मयोनेरनुवर्तितव्यः ॥ ४२ ॥
स वीर्यमस्त्रस्य कपिर्विचार्य पितामहानुग्रहमात्मनश्च ॥
विमोक्षशक्तिं परिचिन्तयित्वा पितामहाज्ञामनुवर्तते स्म ॥ ४३ ॥
अस्त्रेणापि हि बद्धस्य भयं मम न जायते ॥ पितामहमहेन्द्राभ्यां रक्षितस्यानिलेन च ॥ ४४ ॥

अभिलक्ष्यस्य लक्ष्यवेधने प्रसिद्धस्य । लक्ष्यसंग्रहं लक्ष्यसंग्रहणं लक्ष्यविषयदृष्टिमिति यावत् । मोघयन् वितथयन् ॥३१॥ समभिवर्तत समभ्यवर्तत उत्पपात चेत्यन्वयः ॥ ३२ ॥ मनोग्राहि मनआकर्षकं ॥ ३३ ॥ अन्तरं छिद्रं ॥ ३४ ॥ अमोघेषु शरेषु संपतत्स्वपि लक्ष्ये लक्ष्यभूते हनुमति । विहन्यमाने स्वयं तेभ्यो विमुच्यमाने सति । हन्तेर्गत्यर्थात्कर्मकर्तरि लटश्शानजादेशः । समाधिसंयोगसमाहितात्मा सम्यगाधीयत इति समाधिः लक्ष्यं तस्मिन् संयोगे शरसंधाने समाहितात्मा अप्रमत्तचित्तः । स महात्मा इन्द्रजित् । महतीं चिन्तां जगाम ॥ ३५ ॥ अवध्यतां तस्य कपेस्समीक्ष्य निग्रहार्थं कथं निगच्छेत् नीचतां गच्छेदिति मतिं चकार ॥ ३६—३७ ॥ निजग्राह बबन्ध ॥ ३८—४० ॥ ब्रह्मास्त्रमभिमन्त्रितं । विज्ञायेति शेषः ॥ ४१ ॥ लोकगुरोः प्रभावात् अस्य बन्धस्य मोक्षणे मे शक्तिर्नास्तीत्येवं मत्वा एवं विहितः इन्द्रजिता अनेन प्रकारेण कृतः । आत्मयोनेरस्त्रबन्धः मया अनुवर्तितव्य इत्यन्वयः ॥ ४२ ॥ पितामहानुग्रहं विमोक्षहेतुभूतमनुग्रहं ॥ ४३ ॥ स्वस्यादित्यग्रासानन्तरं पितामहमहेन्द्राभ्यामनिलेन च रक्षितत्वान्न

॥ २९ ॥ शि० शरेषुसंपतत्सुसत्सु अतएव लक्ष्ये हनुमति । विहन्यमाने ताड्यमानेसत्येव ननुप्राणैर्विमुक्तेसतीत्यर्थः । महात्मा अतिप्रयत्नवान् । समाधिसंयोगेनअतिविचारकालप्राप्त्यासमाहितःएकाग्रीकृतः आत्मामनोयेनसः । हन्तेस्ताडनार्थकत्वंतु " मालाहतइवद्विपः " इत्यादौप्रसिद्धं । तुशब्दएवार्थे ॥ ३५ ॥ स० पितामहमहेन्द्राभ्यांरक्षितस्यममभयंनजायते । अत्रयद्यपि

[पा०] १ क. घ. ज. मन्तरेष्वेव. २ छ.—ञ. व्यावर्तत. ३ घ. ङ. छ. झ. ञ. ट. मोक्षयन्. ४ घ. मनोग्राहं. ५ क. ग. घ. मद्भुतं. ६ ख. विशारदः. ७ क.—घ. नमेस्त्रबन्धस्य. ख. घ. नमेस्त्रबद्धस्य. ८ ख. घ. ङ. च. ज.—ट. इत्येवमेवं. ३ ग. घ. ज. ममात्मयोनेः.

ग्रहणे चापि रक्षोभिर्महान्मे गुणदर्शनः ॥ राक्षसेन्द्रेण संवादस्तस्माद्धन्तु मां परे ॥ ४५ ॥
स निश्चितार्थः परवीरहन्ता समीक्ष्यकारी विनिवृत्तचेष्टः ॥
परैः प्रसह्याभिगतैर्निगृह्य नेनाद तैस्तैः परिभर्त्स्यमानः ॥ ४६ ॥
ततस्तं राक्षसा दृष्ट्वा निर्विचेष्टमरिन्दमम् ॥ बबन्धुः शणवल्कैश्च द्रुमचीरैश्च संहतैः ॥ ४७ ॥
स रोचयामास परैश्च बन्धं प्रसह्य वीरैरभिनिग्रहं च ॥
कौतूहलान्मां यदि राक्षसेन्द्रो द्रष्टुं व्यवस्येदिति निश्चितार्थः ॥ ४८ ॥
स बद्धस्तेन वल्केन विमुक्तोस्त्रेण वीर्यवान् ॥ अस्त्रबन्धः स चान्यं हि न बन्धमनुवर्तते ॥ ४९ ॥
अथेन्द्रजित्तु द्रुमचीरबद्धं विचार्य वीरः कपिसत्तमं तम् ॥
विमुक्तमस्त्रेण जगाम चिन्तां नान्येन बद्धो ह्यनुवर्ततेऽस्त्रम् ॥ ५० ॥
अहो महत्कर्म कृतं निरर्थकं न राक्षसैर्मन्त्रगतिर्विमृष्टा ॥
पुनश्च नास्त्रे विहतेऽस्त्रमन्यत्प्रवर्तते संशयिताः स्म सर्वे ॥ ५१ ॥
अस्त्रेण हनुमान्मुक्तो नात्मानमवबुध्यत ॥ कृष्यमाणस्तु रक्षोभिस्तैश्च बन्धैर्निपीडितः ॥ ५२ ॥
हन्यमानस्ततः क्रूरै राक्षसैः काष्ठमुष्टिभिः ॥ समीपं राक्षसेन्द्रस्य प्राकृष्यत स वानरः ॥ ५३ ॥
अथेन्द्रजित्तं प्रसमीक्ष्य मुक्तमस्त्रेण बद्धं द्रुमचीरसूत्रैः ॥
व्यदर्शयत्तत्र महाबलं तं हरिप्रवीरं सगणाय राज्ञे ॥ ५४ ॥
तं मत्तमिव मातङ्गं बद्धं कपिवरोत्तमम् ॥ राक्षसा राक्षसेन्द्राय रावणाय न्यवेदयन् ॥ ५५ ॥
कोऽयं कस्य कुतो वाऽत्र किं कार्यं को व्यपाश्रयः ॥ इति राक्षसवीराणां तत्र संजज्ञिरे कथाः ॥५६॥

मे भयमित्यर्थः ॥ ४४ ॥ गुणदर्शनः गुणपर्यवसायी । संवादः ॥ ४५—४६ ॥ शणवल्कैः शणत्वग्भिः । संहतैः सज्जीकृतैः । द्रुमचीरैः वल्कलैः ॥ ४७ ॥ राक्षसेन्द्रः कौतूहलात् मां द्रष्टुं व्यवस्येदिति निश्चितार्थस्सन् बन्धनादिकं रोचयामासेति संबन्धः ॥ ४८—४९ ॥ अन्येनशणवल्कलादिना । बद्धः अस्त्रं नानुवर्तते । नास्त्रेण बद्ध इव वर्ततइत्यर्थः ॥ ५० ॥ मन्त्रगतिः ब्रह्मास्त्रमन्त्रपद्धतिः । न विमृष्टा नपर्यालोचितेत्यर्थः । बन्धान्तरेण सहानवस्थानरूपं ब्रह्मास्त्रस्वभावमनालोच्य शणबन्धादिकं राक्षसैः कृतमिति भावः । अस्त्रेविहते ब्रह्मास्त्रे प्रतिहते । अन्यदस्त्रं नप्रवर्तते न प्रभवतीत्यर्थः । तदेव ब्रह्मास्त्रं प्रयुज्यतामित्याशङ्क्याह—पुनश्चेति । पुनर्नप्रवर्तते प्रयुक्तं ब्रह्मास्त्रं पुनर्न प्रभवतीत्यर्थः । सर्व इत्यनन्तरमितिकरणं बोध्यं । इति चिन्तां । जगामेति पूर्वेण संबन्धः ॥५१॥ नावबुध्यत नावधृतवान् ॥ ५२—

इन्द्रजितोभयं इन्द्ररक्षितस्यापिभवेत् । तथापि " इन्द्रोवृत्रंहत्वामहानास " इत्युक्त्यावृत्रहननलब्धमहत्त्वगुणविशिष्टेनेन्द्रेणरक्षितस्यवरदानेनलोकदृष्ट्यासंरक्षितस्यभयंनेत्युक्तिर्युक्तितिबोध्यं । आभ्यांसमुच्चिताभ्यामित्यर्थकरणे नचाशङ्कानचोत्तरं ॥ ४४ ॥ ति० इममर्थमिन्द्रजिदपिज्ञातवानित्याह—अथेति । अस्त्रेणविमुक्तं विचार्य ज्ञात्वा । अन्येनबद्धोपिहनुमानस्त्रमनुवर्तते अस्त्रेणबद्धइव वर्ततइत्यपिविचार्य चिन्तामाजगामेतिसंबन्धः । नान्येनबन्धोह्यनुवर्ततेऽस्त्रमितिपाठे चिन्तास्वरूपमिदं । राक्षसैःस्वकृतबन्धनवशात्खेदंजगामेत्यर्थः ॥५०॥ ति० चिन्तामाह—अहोइति । पाठान्तरेचिन्तान्तरमिदं । मयाकृतंमहत्कर्म निरर्थंकृतंराक्षसैः । यतस्तैर्मन्त्रगतिर्नविमृष्टा नविचारिता । अन्यबन्धेमन्त्रबन्धोनश्यतीतिनज्ञातमित्यर्थः । पुनरस्त्रंतदेवप्रयोज्यंतत्राह । अस्त्रेब्राह्मेविहते पुनरन्यदस्त्रं तदस्त्रप्रयोगान्तरं । नप्रवर्तते । अतःसर्ववयंसंशयिताः संशयितजयाएव । मुक्तोऽयंसर्वानपिहन्यादितिभावः ॥ ५१ ॥ ति० अवबुध्यतेरन्तर्भावितण्यर्थतयानावबोधयतिस्म अस्त्रमोक्षेनप्रकाशयतिस्मेत्यर्थः ॥ ५२ ॥ ती० अत्र रावणपुरे ।

[पा०] १ ग. ङ. च. झ. ञ. ट. महन्मेगुणदर्शनं. २ ग. निशाचरैस्तैः. ३ ङ. च. झ. ञ. ट. ततस्ते. ४ क.—घ. च. ज. ञ. बन्धनं. ५ ङ. झ. ञ. ट. रभिगर्हणंच. ६ ङ. च. छ. झ. ट. अथेन्द्रजित्तं. ७ ख. घ. ङ. झ. ट. चिन्तामन्येन. ८ ङ.—झ. ट. निरर्थं. ९ घ. ङ. झ. ट. मवबुध्यते. १० ङ. झ. ट. कालमुष्टिभिः. ११ ग. च. छ. ज. ञ. द्रुमचीरवल्कैः. १२ क.—ट. वापि. १३ ङ. ट. कोभ्युपाश्रयः. १४ ङ. झ. ट. दृष्ट्वासंजज्ञिरे.

हन्यतां दह्यतां वाऽपि भक्ष्यतामिति चापरे ॥ राक्षसास्तत्र संक्रुद्धाः परस्परमथाब्रुवन् ॥ ५७ ॥
अतीत्य मार्गं सहसा महात्मा स तत्र रक्षोधिपपादमूले ॥
ददर्श राज्ञः परिचारवृद्धान्गृहं महारत्नविभूषितं च ॥ ५८ ॥
स ददर्श महातेजा रावणः कपिसत्तमम् ॥ रक्षोभिर्विकृताकारैः कृष्यमाणमितस्ततः ॥ ५९ ॥
राक्षसाधिपतिं चापि ददर्श कपिसत्तमः ॥ तेजोबलसमायुक्तं तपन्तमिव भास्करम् ॥ ६० ॥
स रोषसंवर्तिताम्रदृष्टिर्दशाननस्तं कपिमन्ववेक्ष्य ॥
अथोपविष्टान्कुलशीलवृद्धान्समादिशत्तं प्रति मन्त्रिमुख्यान् ॥ ६१ ॥
यथाक्रमं तैः स कपिर्विपृष्टः कार्यार्थमर्थस्य च मूलमादौ ॥
निवेदयामास हरीश्वरस्य दूतः सकाशादहमागतोस्मि ॥ ६२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

एकोनपञ्चाशः सर्गः ॥ ४९ ॥

हनुमता रावणसमृद्धिनिरीक्षणेनाश्चर्यपरवशतया तस्यबलवदधर्माभावे सशङ्कसुरलोकशासनोत्प्रेक्षणम् ॥ १ ॥

ततः स कर्मणा तस्य विस्मितो भीमविक्रमः ॥ हनुमान्नोषताम्राक्षो रक्षोधिपमवैक्षत ॥ १ ॥
भ्राजमानं महार्हेण काञ्चनेन विराजता ॥ मुक्ताजालावृतेनाथ मुकुटेन महाद्युतिम् ॥ २ ॥
वज्रसंयोगसंयुक्तैर्महार्हमणिविग्रहैः ॥ हैमैराभरणैश्चित्रैर्भनसेव प्रकल्पितैः ॥ ३ ॥
महार्हक्षौमसंवीतं रक्तचन्दनरूषितम् ॥ स्वनुलिप्तं विचित्राभिर्विविधाभिश्च भक्तिभिः ॥ ४ ॥
विवृत्तैर्दर्शनीयैश्च रक्ताक्षैर्भीमदर्शनैः ॥ दीप्ततीक्ष्णमहादंष्ट्रैः प्रलंबदशनच्छदैः ॥ ५ ॥
शिरोभिर्दशभिर्वीरं भ्राजमानं महौजसम् ॥ नानाव्यालसमाकीर्णैः शिखरैरिव मन्दरम् ॥ ६ ॥

---

५७ ॥ परिचारवृद्धान् अमात्यवृद्धान् ॥ ५८—६१ ॥ कार्यार्थं कर्तव्यार्थं । अर्थस्य कर्तव्यार्थस्य । मूलं निमित्तं प्रेषयितारमित्यर्थः । अनयोर्विपृष्ट इत्यनेन संबन्धः । श्लोकान्त इतिकरणंबोध्यं । वक्ष्यमाणसंग्रहोयं ॥ ६२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

कर्मणा तस्य विस्मितः युद्धार्थं रावणेनागन्तव्यमिति मया यत्नः कृतः स तु नीतिज्ञ आसनस्थ एव इन्द्रजिन्मुखेन मां निबध्यानीतवानित्यानयनकर्मणा जातविस्मय इत्यर्थः ॥ १—२ ॥ वज्रसंयोगसंयुक्तैः वज्रकीलनेन संबद्धैः । अत्र भ्राजमानमित्यनुषज्यते ॥ ३ ॥ भक्तिभिः पङ्क्तिभिः । इत्थंभूतलक्षणे तृतीया । यथा पङ्क्तयो भवन्ति तथानुलिप्तं इत्यर्थः ॥ ४—६ ॥

कोव्यपाश्रयः कोवाश्रयः ॥ ५६ ॥ ति० मन्त्रीन् मन्त्रिणइत्यर्थः ॥ स० मन्त्रएषामस्तीतिमत्वर्थे तद्धिताइतिबहुवचनज्ञापितेकारप्रत्ययेसति मुख्यमन्त्रीन् ॥ ६१ ॥ ति० कार्यं कर्तव्यं । अर्थः तत्प्रयोजनंच । समाहारद्वन्द्वः । अर्थस्यमूलं उक्तप्रयोजनप्रवर्तकं । उत्तराशयस्तु दूत्यंकृत्यं प्रेरकःसुग्रीवइति ॥ ६२ ॥ इत्यष्टचत्वारिंशःसर्गः ॥ ४८ ॥

कतक० तस्य इन्द्रजितः । यत्तुरावणस्येति तन्न । तेन हनूमतिकस्यापिकर्मणोकृतत्वात् ॥ स० तस्य रावणस्य । कर्मणा स्वयंमहाराजइतिसाक्षादसंभाष्य मन्त्रिमुखेनवाचयामासेत्येवंरूपकर्मणेत्यर्थः ॥ १ ॥ ति० भक्तिभिः शैवत्रिपुण्ड्रवद्रचनाविशेषैः ॥ ४ ॥ ति० विचित्रं आश्चर्यभूतैः । दशनच्छदैः प्रलंबं लंबदशनच्छदं तं ॥ ५ ॥ स० शिरोभिर्दशभिरित्यनेन हनुमद्भीषणा-

[पा०] १ च. छ. ज. ञ. ज्वलन्तमिव. २ ङ.—ट. मुख्यमन्त्रीन्. ३ ङ. ञ. ट. कपिश्चपृष्टः. ४ ख. ङ. भूषितं. ५ ङ. ञ. ट. विचित्रंदर्शनीयैश्च. ६ ङ. ञ. ट. महादंष्ट्रंप्रलंबं.

नीलाञ्जनचयप्रख्यं हारेणोरसि राजता ॥ पूर्णचन्द्राभवक्त्रेण सबलाकमिवाम्बुदम् ॥ ७ ॥
बाहुभिर्बद्धकेयूरैश्चन्दनोत्तमरूषितैः ॥ भ्राजमानाङ्गदैः पीनैः पञ्चशीर्षैरिवोरगैः ॥ ८ ॥
महति स्फाटिके चित्रे रत्नसंयोगसंस्कृते ॥ उत्तमास्तरणास्तीर्णे सूपविष्टं वरासने ॥ ९ ॥
अलंकृताभिरत्यर्थं प्रमदाभिः समन्ततः ॥ वालव्यजनहस्ताभिरारात्समुपसेवितम् ॥ १० ॥
दुर्धरेण प्रहस्तेन महापार्श्वेन रक्षसा ॥ मन्त्रिभिर्मन्त्रतत्त्वज्ञैर्निकुम्भेन च मन्त्रिणा ॥ ११ ॥
सुखोपविष्टं रक्षोभिश्चतुर्भिर्बलदर्पितैः ॥ कृत्स्नं परिवृतं लोकं चतुर्भिरिव सागरैः ॥ १२ ॥
सचिवैर्मन्त्रतत्त्वज्ञैरन्यैश्च शुभबुद्धिभिः ॥ अन्वास्यमानं रक्षोभिः सुरैरिव सुरेश्वरम् ॥ १३ ॥
अपश्यद्राक्षसपतिं हनुमानतितेजसम् ॥ विष्ठितं मेरुशिखरे सतोयमिव तोयदम् ॥ १४ ॥
स तैः संपीड्यमानोपि रक्षोभिर्भीमविक्रमैः ॥ विस्मयं परमं गत्वा रक्षोधिपमवैक्षत ॥ १५ ॥
भ्राजमानं ततो दृष्ट्वा हनुमान्राक्षसेश्वरम् ॥ मनसा चिन्तयामास तेजसा तस्य मोहितः ॥ १६ ॥
अहो रूपमहो धैर्यमहो सत्त्वमहो द्युतिः ॥ अहो राक्षसराजस्य सर्वलक्षणयुक्तता ॥ १७ ॥
यद्यधर्मो न बलवान्स्यादयं राक्षसेश्वरः ॥ स्यादयं सुरलोकस्य सशक्रस्यापि रक्षिता ॥ १८ ॥
अस्य क्रूरैर्नृशंसैश्च कर्मभिर्लोककुत्सितैः ॥ तेन नैनं बिभ्यति खल्वस्माल्लोकाः सामरदानवाः ॥ १९ ॥
अयं ह्युत्सहते क्रुद्धः कर्तुमेकार्णवं जगत् ॥ इति चिन्तां बहुविधामकरोन्मतिमान्हरिः ॥
दृष्ट्वा राक्षसराजस्य प्रभावममितौजसः ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

पञ्चाशः सर्गः ॥ ५० ॥

प्रहस्तेन रावणप्रेरणयाहनुमन्तंप्रति तत्स्वरूपप्रश्नेनसह वनभञ्जनराक्षसहननप्रयोजनप्रश्नः ॥ १ ॥ हनुमता प्रहस्तस्याऽलक्ष्यीकरणेनरावणंप्रत्येव वनभञ्जनाक्षादिराक्षसक्षपणयोः क्रमेणतद्दर्शनात्मरक्षणार्थत्वोक्तिः ॥ २ ॥ तथातंप्रति रामदूतत्वादिनिजतत्त्वनिवेदनेनसह स्वस्यब्रह्मवरात्तदस्त्रावश्यत्वनिवेदनपूर्वकं तद्दर्शनार्थमस्यानुवर्तनोक्तिः ॥ ३ ॥

तमुद्वीक्ष्य महाबाहुः पिङ्गाक्षं पुरतः स्थितम् ॥ कोपेन महताऽऽविष्टो रावणो लोकरावणः ॥ १ ॥

पूर्णचन्द्राभवक्त्रेण पूर्णचन्द्रतुल्यनायकरत्नेन । वक्त्रं नायकरत्नं अभितोलम्बमुक्तामणिमण्डलं ॥ ७ ॥ केयूरं भुजोपरिधार्यमाणमाभरणं अङ्गदं बाहुमध्यस्थाभरणं ॥ ८—१० ॥ मन्त्रिभिः प्रशस्तमन्त्रैः । अतस्सचिवैरित्यपुनरुक्तिः ॥ ११—१७ ॥ अयं रावणकृतः अधर्मः बलवान्नस्याद्यदि । तदायं राक्षसेश्वरः सशक्रस्य सुरलोकस्यापि रक्षिता स्यात् ॥ १८ ॥ तेन कर्मभिः कृतेन पूर्वोक्तेनाधर्मेण हेतुना ॥१९–२०॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनपञ्चाशः सर्गः ॥ ४९ ॥

बाणः महाबलिसुतः । अनेन तेनापि किञ्चित्

थैर्युद्धकालइव रूपविशेषग्रहणमितिसूचयति ॥ ६ ॥ **ती०** मन्त्री बुद्धिसहायः ॥ ११ ॥ सचिवः कार्यसहायः ॥ १३ ॥ **ति०** सर्वैसंपत्तिमतोप्यधर्मवतोमहान्दोषइत्याह—यदीति । बलवान् एवंविधसमृद्धावप्युन्मूलनक्षमोऽधर्मोयद्यस्मिन्नस्यात्तदाऽयंराक्षसेश्वरः शक्रस्यसुरलोकस्यापि विष्णुवद्रक्षितास्यात् । यद्वा अधर्मइत्यर्शआद्यजन्तं । अयंबलवान्राक्षसेश्वरः यद्यधर्मवान्नस्यात् तदा शक्रस्येत्यादिप्राग्वत् ॥ १८ ॥ **ती०** क्रूरैः भीषणैः । नृशंसैः परद्रोहाचरणशीलैः । तेन पूर्वोक्तेनाधर्मेणच । **ति०** केनबिभ्यतीतिपाठे के न इतिपदच्छेदः ॥ १९ ॥ इत्येकोनपञ्चाशःसर्गः ॥ ४९ ॥

[पा०] १ ख. ङ. च. ज.—ट. सबलार्कमिवा. २ ख. घ. ङ. भूषितैः. ३ ङ.—ञ. ट. मानाङ्गदैर्भामैः. ४ ङ.—ट. चित्रिते. ५ घ.—ट. उपोपविष्टं. ६ ङ. ञ. ट. दर्पितं. ७ ङ.—ट. शुभदर्शिभिः. ख. ग. बहुबुद्धिभिः. क. हितबुद्धिभिः. ८ ङ. ञ. ट. आश्वास्यमानं. ९ ग. घ. नमितौजसं. १० ङ. ञ. ट. सर्वेबिभ्यति. ११ क. बहुविधांचकारमतिमान्. १२ क. च. छ. ज. समुद्वीक्ष्य. १३ क.—ट. रोषेण.

शङ्काहतात्मा दध्यौ स कपीन्द्रं तेजसा वृतम् ॥ किमेष भगवान्नन्दी भवेत्साक्षादिहागतः ॥ २ ॥
येन शप्तोऽसि कैलासे मया संचालिते पुरा ॥ सोयं वानरमूर्तिः स्यात्किंस्विद्बाणोपि वाऽसुरः ॥३॥
स राजा रोषताम्राक्षः प्रहस्तं मन्त्रिसत्तमम् ॥ कालयुक्तमुवाचेदं वचो विपुलमर्थवत् ॥ ४ ॥
दुरात्मा पृच्छ्यतामेष कुतः किं वाऽस्य कारणम् ॥ वनभङ्गे च कोस्यार्थो राक्षसीनां च तर्जने ॥५॥
मत्पुरीमप्रधृष्यां वाऽऽगमने किं प्रयोजनम् ॥ आयोधने वा किं कार्यं पृच्छ्यतामेष दुर्मतिः ॥६॥
रावणस्य वचः श्रुत्वा प्रहस्तो वाक्यमब्रवीत् ॥ समाश्वसिहि भद्रं ते न भीः कार्या त्वया कपे ॥७॥
यदि तावत्त्वमिन्द्रेण प्रेषितो रावणालयम् ॥ तत्त्वमाख्याहि मा भूत्ते भयं वानर मोक्ष्यसे ॥ ८ ॥
यदि वैश्रवणस्य त्वं यमस्य वरुणस्य च ॥ चाररूपमिदं कृत्वा प्रविष्टो नः पुरीमिमाम् ॥
विष्णुना प्रेषितो वाऽपि दूतो विजयकाङ्क्षिणा ॥ ९ ॥
न हि ते वानरं तेजो रूपमात्रं तु वानरम् ॥ तत्त्वतः कथयस्वाद्य ततो वानर मोक्ष्यसे ॥ १० ॥
अनृतं वदतश्चापि दुर्लभं तव जीवितम् ॥ अथवा यन्निमित्तं ते प्रवेशो रावणालये ॥ ११ ॥
एवमुक्तो हरिश्रेष्ठस्तदा रक्षोगणेश्वरम् ॥ अब्रवीन्नास्मि शक्रस्य यमस्य वरुणस्य वा ॥ १२ ॥
धनदेन न मे सख्यं विष्णुना नास्मि चोदितः ॥ जातिरेव मम त्वेषा वानरोऽहमिहागतः ॥ १३ ॥
दर्शने राक्षसेन्द्रस्य दुर्लभे तदिदं मया ॥ वनं राक्षसराजस्य दर्शनार्थे विनाशितम् ॥ १४ ॥
ततस्ते राक्षसाः प्राप्ता बलिनो युद्धकाङ्क्षिणः ॥ रक्षणार्थं तु देहस्य प्रतियुद्धा मया रणे ॥ १५ ॥
अस्त्रपाशैर्न शक्योऽहं बद्धुं देवासुरैरपि ॥ पितामहादेव वरो ममाप्येषोभ्युपागतः ॥ १६ ॥
राजानं द्रष्टुकामेन मयाऽस्त्रमनुवर्तितम् ॥ विमुक्तो ह्यहमस्त्रेण राक्षसैस्त्वभिपीडितः ॥ १७ ॥

शप्तमिति गम्यते । अत्रेतिकरणं द्रष्टव्यं ॥ ३—४ ॥ दुरात्मा पृच्छ्यतामिति । अस्य विवरणं कुत इत्यादि । कुतः कस्माद्देशादागतः । किं वास्य कारणं । अस्य कः प्रेरकः ॥ ५ ॥ मत्पुरीं प्रतीति शेषः । आयोधने युद्धे । किं कार्यं किं प्रयोजनं ॥ ६—७ ॥ यदि वैश्रवणस्येत्यादेः दूतो विजयकाङ्क्षिणेत्यन्तस्य तत्त्वमाख्याहीति पूर्वेण संबन्धः ॥ ८—९ ॥ यन्निमित्तं कृत्वा ते प्रवेशः तन्निमित्तं कथयस्वेति पूर्वेण संबन्धः ॥ १०—११ ॥ रक्षोगणेश्वरमित्यनेन प्रष्टारं प्रहस्तं पृष्टतः कृतवानिति गम्यते ॥ १२ ॥ एषा वानरता ॥ १३ ॥ राक्षसेन्द्रस्य तवेति शेषः ॥ १४ ॥ प्रतियुद्धाः प्रतिप्रहृताः ॥ १५ ॥ ममापीति तवेवेत्यर्थः ॥ १६ ॥ तर्हि कथं बद्धोसीत्याशङ्क्याह—राजानमिति । पीडितः बद्धस्सन् । अस्त्रेण विमुक्तः ।

ति० नन्दी वानरमुखएवप्रमथगणाधिपः । स० यद्यपिमारुतिरितिइन्द्रजितंप्रतिरावणेनोक्त्वान्नेयंशङ्कासंभवति । तथापि नन्दिबाणाभ्यांस्वस्यपराभूतत्वाद्भयेनतच्छङ्कायुक्तेतिज्ञेयं ॥२॥ ती० शप्तः मन्मुखसदृशमुखैस्तवनाशोभविष्यतीतिशप्तः ॥ ३ ॥ स० दुर्मतिः दुरित्यव्ययंदुःखवाचि । एवमस्मदीयदुःखेमतिर्यस्यसतथा ॥६॥ स० भद्रंतइत्युक्तिरुत्तरत्ररक्षःक्षयोनकार्यइतिसुमुखीकरणार्थं ॥ ७ ॥ ति० चाररूपं चाराणांप्रच्छन्नवेषत्वाच्छद्मकृतवानररूपं ॥ ९ ॥ ति० वानरमितीदमर्थेऽणन्तं ॥ १० ॥ ति० एषा वानराकृतिः । ममजातिरेव जन्मकृतैव । अतोवानरएवाहमिहागतः । राक्षसेन्द्रस्य तव दर्शनेदर्शननिमित्तं । इहागतइत्यर्थः । तदिदंतवदर्शनंदुर्लभं प्रकारान्तरेणाशक्यलाभंइतिज्ञात्वातवदर्शनार्थंवनंविनाशितं ॥ १३—१४ ॥ ति० इदानींयुद्धप्रयोजनमाह—रक्षणार्थमिति । प्रतियुद्धाः मयाप्रतिभटतयास्थित्वाकृतयुद्धाः । स० प्रति स्वयुद्धंप्रति युद्धं मयाकृतंयेषांतेतथा । १५ ॥ ति० नन्वेवं भाविबन्धायपर्यालोच्यकथंयुद्धंकृतंतत्राह—अस्त्रैरिति । अस्त्रैः ब्रह्मास्त्रान्तैः । पाशैः यमपाशान्तैः । वंचेतरपाशकथापिदरापास्तेत्युक्तं । देवासुरैः मिलितैरपीत्यर्थः ॥ १६ ॥ ती० ननुतवास्त्रबन्धाभावेकिमितिब्रह्मास्त्रेणबद्धोराक्षसैःपीड्यसइत्यतआह—राजानमिति । अस्त्रमुक्तोपि कार्यवशाद्बुद्धिपूर्वकमेवाहमेभिःपीड्ये । एतन्ममाकिञ्चित्करमितिभावः

[पा०] १ ङ. झ. ञ. ट. प्रहसिते. २ ङ. झ. ञ. ट. राक्षसानांच. ३ च. ज. ञ. कपिरूपमिदं. ४ क. ख. ङ. झ. ट. यन्निमित्तस्ते. ५ घ. ङ. झ. ट. देषवरोममापिहिसमागतः. ६ ङ. झ. ट. विमुक्तोप्यहमस्त्रेण. च. छ. ज. ञ. विमुक्तोस्म्यहमेस्त्रण. ७ घ. राक्षसैरति. ङ. झ. ट. राक्षसैस्त्वभिवेदितः. क. ख. ग. छ. ज. राक्षसैस्त्वतिपीडितः.

केनचिद्राजकार्येण संप्राप्तोसि तवान्तिकम् ॥ दूतोऽहमिति विज्ञेयो राघवस्यामितौजसः ॥ १८ ॥
श्रूयतां चापि वचनं मम पथ्यमिदं प्रभो ॥ १९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

एकपञ्चाशः सर्गः ॥ ५१ ॥

हनुमता रावणंप्रति रामवनागमनप्रभृतिस्वीयसीतादर्शनावधिसकलवृत्तान्तनिवेदनम् ॥ १ ॥ तथा राममहिमानुवर्णनपूर्वकं तस्यैसीतायाःप्रत्यर्पणानर्पणयोर्निजजीवितलाभतदभावकारणत्वोत्कीर्तनम् ॥ २ ॥

तं समीक्ष्य महासत्त्वं सत्त्ववान्हरिसत्तमः ॥ वाक्यमर्थवदव्यग्रस्तमुवाच दशाननम् ॥ १ ॥
अहं सुग्रीवसंदेशादिह प्राप्तस्तवालयम् ॥ राक्षसेन्द्र हरीशस्त्वां भ्राता कुशलमब्रवीत् ॥ २ ॥
भ्रातुः शृणु समादेशं सुग्रीवस्य महात्मनः ॥ धर्मार्थोपहितं वाक्यमिह चामुत्र च क्षमम् ॥ ३ ॥
राजा दशरथो नाम रथकुञ्जरवाजिमान् ॥ पितेव बन्धुर्लोकस्य सुरेश्वरसमद्युतिः ॥ ४ ॥
ज्येष्ठस्तस्य महाबाहुः पुत्रः प्रियकरः प्रभुः ॥ पितुर्निदेशान्निष्क्रान्तः प्रविष्टो दण्डकावनम् ॥ ५ ॥
लक्ष्मणेन सह भ्रात्रा सीतया चापि भार्यया ॥ रामो नाम महातेजा धर्म्यं पन्थानमाश्रितः ॥ ६ ॥
तस्य भार्या वने नष्टा सीता पतिमनुव्रता ॥ वैदेहस्य सुता राज्ञो जनकस्य महात्मनः ॥ ७ ॥

हिशब्दोवधारणे । ब्रह्मास्त्रस्य साधनान्तरासहत्वादिति भावः ॥ १७ ॥ अस्तु सर्वमेतन्मद्दर्शनार्थं मद्दर्शनं वा किमर्थं तत्राह—केनचिदिति ॥ १८—१९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

समीक्षणोक्तिक्रियाभेदात्तच्छब्दद्वयं ॥ १ ॥ अहमिति ॥ अहं रामदूत एव संदेशस्तु सुग्रीवस्येति भावः । सुग्रीवसंदेशात् सुग्रीवसंदेशाद्धेतोः । संदेशप्रापणार्थमित्यर्थः । "संदेशवाग्वाचिकं स्यात्" इत्यमरः । इह लङ्कायां । भ्राता भ्रातृवद्धितकरः । अब्रवीत् अप्राक्षीत् । यद्यपि सुग्रीवेण न संदिष्टं तथापि दूतोक्तं सर्वं स्वाम्युक्तमेवेत्याशयेनोक्तं ॥ २ ॥ समादेशं संदेशरूपमिति वाक्यविशेषणं । इह अस्मिल्लोके । अमुत्र परलोके । क्षमं अभ्युदयसाधनं ॥ ३—५ ॥ धर्म्यं धर्मादनपेतं । " धर्मपथ्यर्थन्यायादनपेते "

॥ १७ ॥ स० अमितौजसइत्यनेन अन्यथाराघवोघातयेदेवेतिसूचयति । ति० रामकार्येणेतिपाङ्क्तःपाठः । रामस्यतवचकःसंबन्धस्तत्राह—दूतइति ॥ १८ ॥ ति० ननुरामदूतेनापिसीतान्वेषणमेवकार्यं एवंप्रयासेनमद्दर्शनेकिंफलंतत्राह—श्रूयतामिति । वचनं सन्देशवचनं । पथ्यं तवक्षेमकरं । मद्दर्शने नपुण्यावाप्तिर्मम । किंतुतुभ्यंहितंवक्तव्यमितीयानायासइतिभावः ॥ १९ ॥ इतिपञ्चाशःसर्गः ॥ ५० ॥

ति० सुग्रीवसंदेशकथनव्याजेनसामदण्डान्यतरविषयत्वनिश्चयायन्यायानुसारीनवेतिजिज्ञासति—तमित्यादि ॥ स० अव्यग्रः निर्भीः ॥ १ ॥ ति० भ्रातेतिस्नेहप्रकाशिकालोकोक्तिः । स० हेराक्षसेभ राक्षसश्रेष्ठ । वालिरावणयोर्भ्रातृसौहार्दात्तत्प्रकाशिकामृदूक्तिर्भ्रातेति । हरीशः कुशलमब्रवीत् त्वत्कुशलमुद्दिश्य पृच्छेतिमामब्रवीत् । राक्षसेभहरीशः नष्टोषितेनोक्तंचेत्तवहननमनायासेनकृत्वासीतांनेष्यतीत्यान्तरङ्गिकोऽर्थः राक्षसेभस्य हरीशः महासिंहइत्येकपदतायांज्ञेयः । तथाभ्रातेत्यनेन त्वद्राज्यग्रहणेपियोग्यतातस्यास्तीतिसूचयति ॥ २ ॥ स० कपिभ्योऽवृतवरत्वबलेनवा रामरूपबलिष्ठाश्रयणेनवा समादेशमित्युक्तिः । रामानु० रावणहृदयपरिज्ञानार्थं तत्कालोदितप्रतिभयासुग्रीवसंदेशंकल्पयित्वावदति—भ्रातुरिति । समादेशं संदेशं । सुग्रीवसंदेशस्यरामप्रयोजनपरत्वात्संदेशोपयोगितयारामसुग्रीवयोःसख्यादिकं राजादशरथइत्यारभ्य भ्रमताचमयादृष्टागृहेतेजनकात्म-

[पा०] १ ङ.—ट. द्रामकार्येण. २ ङ. झ. ट. आगतोस्मि. ३ घ. राघवस्यमहात्मनः. ४ ङ. झ. ट. श्रूयतामेववचनं. ५ ख. घ. त्वान्तिकं. ङ. झ. ट. त्वान्तिके. क. त्वदन्तिकं. ६ झ. ञ. ट. राक्षसेश. ठ. राक्षसेभ. ७ ङ. झ. ट. धर्मार्थसहितं. ८ झ. ट. प्रियतरः. ९ ङ. झ. ट. सह. घ. चैव. १० ङ. झ. ट. जनस्थानेभ्रष्टासीतेतिविश्रुता.

स मार्गमाणस्तां देवीं राजपुत्रः सहानुजः ॥ ऋश्यमूकमनुप्राप्तः सुग्रीवेण समागतः ॥ ८ ॥
तस्य तेन प्रतिज्ञातं सीतायाः परिमार्गणम् ॥ सुग्रीवस्यापि रामेण हरिराज्यं निवेदितम् ॥ ९ ॥
ततस्तेन मृधे हत्वा राजपुत्रेण वालिनम् ॥ सुग्रीवः स्थापितो राज्ये हर्यृक्षाणां गणेश्वरः ॥ १० ॥
त्वया विज्ञातपूर्वश्च वाली वानरपुङ्गवः ॥ रामेण निहतः सङ्ख्ये शरेणैकेन वानरः ॥ ११ ॥
स सीतामार्गणे व्यग्रः सुग्रीवः सत्यसङ्गरः ॥ हरीन्संप्रेषयामास दिशः सर्वा हरीश्वरः ॥ १२ ॥
तां हरीणां सहस्राणि शतानि नियुतानि च ॥ दिक्षु सर्वासु मार्गन्ते ह्यधश्चोपरि चाम्बरे ॥ १३ ॥
वैनतेयसमाः केचित्केचित्तत्रानिलोपमाः ॥ असङ्गगतयः शीघ्रा हरिवीरा महाबलाः ॥ १४ ॥
अहं तु हनुमान्नाम मारुतस्यौरसः सुतः ॥ सीतायास्तु कृते तूर्णं शतयोजनमायतम् ॥ १५ ॥
समुद्रं लङ्घयित्वैव तां दिदृक्षुरिहागतः ॥ भ्रमता च मया दृष्टा गृहे ते जनकात्मजा ॥ १६ ॥
तद्भवान्दृष्टधर्मार्थस्तपःकृतपरिग्रहः ॥ परदारान्महाप्राज्ञ नोपरोद्धुं त्वमर्हसि ॥ १७ ॥
न हि धर्मविरुद्धेषु बह्वपायेषु कर्मसु ॥ मूलघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥ १८ ॥
कश्च लक्ष्मणमुक्तानां रामकोपानुवर्तिनाम् ॥ शराणामग्रतः स्थातुं शक्तो देवासुरेष्वपि ॥ १९ ॥
न चापि त्रिषु लोकेषु राजन्विद्येत कश्चन ॥ राघवस्य व्यलीकं यः कृत्वा सुखमवाप्नुयात् ॥ २० ॥
तत्त्रिकालहितं वाक्यं धर्म्यमर्थानुबन्धि च ॥ मन्यस्व नरदेवाय जानकी प्रतिदीयताम् ॥ २१ ॥
दृष्ट्वा हीयं मया देवी लब्धं यदिह दुर्लभम् ॥ उत्तरं कर्म यच्छेषं निमित्तं तत्र राघवः ॥ २२ ॥

इति यत्प्रत्ययः ॥ ६—७ ॥ सुग्रीवेण मयेतिशेषः । यद्वा लोके वक्तारः स्वात्मानमन्यमिव निर्दिशन्त्यौद्धत्यातिशयात् । यद्वा अत्रानुवादात् पूर्वंसुग्रीवेणैवं वक्तव्यमिति पठितं तथैव हनुमान्पठतीति समादेशप्राधान्यादन्यवाक्यमपि तथोच्यत इति केचित्प्राहुः । यद्वा सुग्रीवसंदेशस्य रामप्रयोजनपरत्वात्संदेशोपयोगितया रामसुग्रीवयोस्सख्यादिकं दर्शयति—राजा दशरथ इत्यादिना ॥ ८—११ ॥ सत्यसङ्गरः सत्यप्रतिज्ञः । " कर्बुरे च प्रतिज्ञाजिसंविदापत्सु सङ्गरः " इत्यमरः ॥ १२ ॥ अधश्चोपरि चाम्बरे पाताले भूमौ आकाशे चेत्यर्थः ॥ १३ ॥ असङ्गगतय इति शीघ्रत्वे हेतुः ॥ १४ ॥ औरसस्सुतः क्षेत्रजत्वव्यावृत्तये औरसपदं । सीतायास्तु कृते सीतालाभाय । तां दिदृक्षुरिति योज्यं ॥ १५—१६ ॥ एवं सुग्रीवसंबन्धं प्रतिपाद्य सुग्रीवसंदेशं वदति—तद्भवानित्यादिना ॥ दृष्टधर्मार्थः शास्त्रेण विदितधर्मार्थस्वरूपइत्यर्थः । तपःकृतपरिग्रहः तपसि विषये कृतस्वीकारः । यद्वा तपसा स्वयं कृतपरिग्रहः । स्वारसिकतपस्कइति यावत् । हेतुगर्भे विशेषणे ॥ १७ ॥ धर्मविरुद्धेषु धर्मशास्त्रविरुद्धेषु । धर्मविरुद्धत्वेपि यत्सौख्यावहं तत्कार्यमित्यत्राह—बह्वपायेष्वित्ति । बहुहानिकरेष्वित्यर्थः । अपायाः कथंचित्परिह्रियन्त इत्याशङ्क्याह—मूलघातिष्विति । स्वविनाशकरेष्वित्यर्थः । कर्मसु परदारापहारेषु । न सज्जन्ते नोद्युक्ता भवन्ति ॥ १८ ॥ रामकोपानुवर्तिनां रामकोपानुसारेण निर्गतानामित्यर्थः ॥ १९ ॥ व्यलीकं अप्रियं । " व्यलीकं त्वप्रियेऽनृते " इत्यमरः ॥ २० ॥ तत् तस्मात् अधर्मावहत्वाद्रामापराधस्य परिहर्तव्यत्वाच्च । त्रिकालहितं भूतभविष्यद्वर्तमानकालहितं । दारुणाधर्मस्य स्वपूर्वपुरुषविनाशकत्वेन तत्परिहारस्य भूतकालहितत्वं मन्यस्व । मत्वा प्रतिदीयतामिति योज्यं ॥ २१ ॥ जानकीहरणे किं मानं तत्राह—दृष्ट्वा हीति ॥ यत्सीतादर्शनं दुर्लभं इतरवानरालभ्यं । तल्लब्धं । तर्हि सा नीयतामित्यत्राह—उत्तरमिति । सीतादर्शनोत्तरं यच्छेषं कर्म

जेष्यन्तेनप्रतिपादयन्तद्भवानित्यादिनाकृत्वासुखमवाप्नुयादित्यन्तेनसुग्रीवसंदेशंवदति ॥ ३ ॥ ति० तांमार्गमाणःसरामः ऋश्यमूकं प्राप्तः सुग्रीवेणसंगतश्च । अनेनैवज्ञायते नेदंसुग्रीवसंदेशवाक्यं । तदाहिमयाचैवसुसंगतइतिवदेत् ॥ ८ ॥ ती० त्वयाविज्ञातपूर्वश्चवालीतिममोक्तिः सतेननिहतइतिरामोत्कर्षश्चप्रतिपादितइतिज्ञेयं ॥ ११ ॥ असङ्गगतयः आलंबरहितगतिविशिष्टाः ।

[पा०] १ क. ङ.—ट. सतेन. २ ङ. झ. ट. मर्थानुयायिच. क.—घ. मर्थानुपातिच.

लक्षितेयं मया सीता तथा शोकपरायणा ॥ गृह्य यां नाभिजानासि पश्यास्यामिव पन्नगीम् ॥ २३ ॥
नेयं जरयितुं शक्या सासुरैरमरैरपि ॥ विषसंसृष्टमत्यर्थं भुक्तमन्नमिवौजसा ॥ २४ ॥
तपस्संतापलब्धस्ते योऽयं धर्मपरिग्रहः ॥ न स नाशयितुं न्याय्यमात्मप्राणपरिग्रहः ॥ २५ ॥
अवध्यतां तपोभिर्यां भवान्समनुपश्यति ॥ आत्मनः सासुरैर्देवैर्हेतुस्तत्राप्ययं महान् ॥ २६ ॥
सुग्रीवो न हि देवोऽयं नासुरो न च राक्षसः ॥ न दानवो न गन्धर्वो न यक्षो न च पन्नगः ॥२७॥
[मानुषो राघवो राजन्सुग्रीवश्च हरीश्वरः ॥] तस्मात्प्राणपरित्राणं कथं राजन्करिष्यसि ॥ २८ ॥
न तु धर्मोपसंहारमधर्मफलसंहितम् ॥ तदेव फलमन्वेति धर्मश्चाधर्मनाशनः ॥ २९ ॥

सीतानयनं तत्र राघवो निमित्तं । आज्ञप्तस्यैव मया कर्तव्यत्वादितिभावः ॥ २२ ॥ दृष्ट्यापिमद्वशंवदया सीतया रामः किंकरिष्यतीत्याशङ्क्याह—लक्षितेयमिति ॥ तथेति वाचामगोचरत्वोक्तिः । नेयं तव वश्या प्रत्युत पन्नगीव तव प्राणहारिणीतिभावः ॥ २३ ॥ ओजसा अमरपक्षे प्रतापेन । अन्नपक्षे जाठराग्निना ॥ २४ ॥ तपःकृच्छ्रलब्धमिष्टं महज्जीवनं वृथामानाशयेत्याह—तप इति ॥ तपस्संतापः तपश्चर्या । ओदनपाकं पचतीतिवन्निर्देशः । तेन लब्धः । परिगृह्यत इति परिग्रहः फलं धर्मपरिग्रहः धर्मफलं । तादृशो योयमात्मप्राणपरिग्रहः आत्मनः प्राणानां च परिग्रहः स्वीकारः । जीवनमिति यावत् । स नाशयितुं न न्याय्यं न युक्तं । अव्ययमेतत् । तपःक्लेशलब्धं तद्व्यतिरिक्तधर्मफलभूतं च यज्जीवनमायुः तन्न विनाशयेत्यर्थः । चकाराभावादित्थमेव योजना ॥ २५ ॥ सर्वावध्यस्नेह मे कोयमायुर्विनाशक इत्याशङ्क्य परिहरति—अवध्यतामिति ॥ तपोभिरार्जितां सासुरैर्देवैर्यां आत्मनोऽवध्यतां भवान् समनुपश्यति । तत्रापि अवध्यतायां सत्यामपि । अयं वक्ष्यमाणः । हेतुः भवद्वधहेतुरस्ति । महान् अपरिहार्यः ॥ २६ ॥ तमेव हेतुमाह—सुग्रीव इति ॥ न च राक्षस इति पाठस्सम्यक् । न च मानुष इति पाठे प्रतिषेधप्रसक्तिरपि नास्तीत्युच्यते । " तृणभूता हि मे सर्वे प्राणिनो मानुषादयः " इत्युत्तरश्रीरामायणे मनुष्यादिभिरवध्यत्वस्याप्रार्थितत्वात् । नच तिर्यञ्च इति न प्रसज्य च प्रतिषिध्यतइतिभावः ॥ २७ ॥ तस्मात् सुग्रीवात् ॥ २८ ॥ ननु किमनेनोपदेशेन कृतानि मया पापानि तैश्चावश्यंफलप्रदैर्भवितव्यमित्याशङ्क्याह—न त्विति॥

आकाशगामिनइत्यर्थः ॥ १४ ॥ स० पश्चास्यामित्यनेन आस्यस्थानीयानि रामोलक्ष्मणोराजाऽहंचेतिचत्वारिस्वयंसीतेत्येकंचेति पञ्चआस्यानियस्यास्सा तां । विस्तृतमुखींवा ॥ २३ ॥ शि० जरयितुं गोपयितुमित्यर्थः ॥ २४ ॥ स० तपस्संतापेनलब्धोयोधर्मपरिग्रहः धर्मसंचयः । यद्वा धर्मंचार्थंचेतिधर्मसाधनीभूतःपरिग्रहोमन्दोदरी । सुभार्यायाःपुण्यलभ्यत्वात् । नाशयितुं पूर्वत्रः विफलीकर्तुं परत्रविधवीकर्तुं। आत्मप्राणपरिग्रहः बहुकालवर्तिप्राणपरिग्रहणवान् । अन्यथा स्वप्राणपरिग्रहः प्राणवियोजकइत्यर्थः ॥ २५ ॥ शि० अयंसुग्रीवोराघवश्चदेवादिर्न । किंतु सुग्रीवोहरीश्वरः राघवश्चमानुषः । एतेनाभ्यांतवाभयदानंनास्तीतिसूचितं ॥ २७ ॥ ती० ननुमहतापूर्वसंचितेनैवधर्मेणममत्राणंभविष्यतीत्याशंक्यरोगराज्यादिवद्धर्माधर्मफलयोःसंभूयानुभवसिद्धेरात्मत्राणसिद्धिः । उताधर्मवाधेनधर्मफलानुभवश्चेतिद्वैधाविकल्प्याद्यस्यासंभवमाह—नत्विति । धर्मोपसंहारं धर्मस्यफलविनाश्यत्वात् धर्म उपसंहियतइतिधर्मोपसंहारं धर्मफलंसुखंतत् अधर्मफलसंहितंनभवति । अधर्मेणसहभोग्यंनभवतीत्यर्थः । तीव्रतपःपरदारापहरणभवदीयधर्माधर्मफलयोर्वेध्यत्वावध्यत्वयोःजीवनतदभावयोःसहावस्थानविरोधात् । रोगराज्यादिवत्संभूयानुभवोनसंभवतीतिभावः । द्वितीयंदूषयति—तदेवेति । तत् धर्मफलमेवान्वेति धर्मफलंधर्मफलेनसहतिष्ठतीतियावत्। धर्मोनाधर्मनाशनः अधर्मबाधेनधर्मफलानुभवोनघटतइतिभावः । यद्वा ननुयेभ्योऽवध्यत्वंनप्रार्थितं तेभ्योपिपूर्वोपार्जितोमहासुकृतसंचयएवरक्षिष्यतीत्याशङ्क्यएवंचेत्तुल्यन्यायतयात्वत्कृतःअधर्मनिचयोपित्वांनाशयिष्यतीत्याह—नत्विति । धर्मोपसंहारंधर्मस्यफलविनाश्यत्वात्धर्मउपसंह्रियतेअनेनेति धर्मोपसंहारंधर्मफलंसुखं । तत् अधर्मसंहितं विरुद्धकारणकलादुःखसंहितंनभवतीत्यर्थः । किंतु तदेवफलमन्वेति सुखमेवफलत्वेनानुवर्तते । तुश्चार्थे । तेनाधर्मफलमपि धर्मफलसहितंनभवति अधर्मफलत्वेनानुवर्ततइतिलभ्यते । नत्वधर्मधर्मो नाशयिष्यतीत्याशङ्क्याह—धर्मश्चेति । अत्रनञनुवर्तते। धर्मः अधर्मनाशनोनभवति । पूर्वकृतोधर्मः इदानींकृताधर्मनाशनोनभवतीत्यर्थः । चकारादेवमधर्मोपि धर्मनाशनोनभवतीतिलभ्यते । धर्माधर्मावनुभवैकविनाश्याविति भावः ॥ ति० ननुतपोबलान्मे-

[पा०] १ ङ. झ. ट. गृहे. २ क. ग. घ. ङ. झ. ट. सोयं. ३ च. छ. ज. ञ. तपोवीर्याद्भवान्. ४ ङ. झ. ट. नयक्षो. ५ क.—घ. मानुषः. ६ क.—घ. नराक्षसो. ङ. झ. ट. पाठेष्विदमर्धनदृश्यते. ७ ङ.—ट. पाठेष्विदमर्धंदृश्यते. ८ घ. च. संयुतं.

प्राप्तं धर्मफलं तावद्भवता नात्र संशयः ॥ फलमस्याप्यधर्मस्य क्षिप्रमेव प्रपत्स्यसे ॥ ३० ॥
जनस्थानवधं बुद्ध्वा [1]बुद्ध्वा वालिवधं तथा ॥ रामसुग्रीवसख्यं च बुध्यस्व हितमात्मनः ॥ ३१ ॥
कामं खल्वहमप्येकः सवाजिरथकुञ्जराम् ॥ लङ्कां नाशयितुं शक्तस्त[2]स्यैष तु न निश्चयः ॥ ३२ ॥
रामेण हि प्रतिज्ञातं हर्यृक्षगणसन्निधौ ॥ उत्सादनममित्राणां सीता यैस्तु प्रधर्षिता ॥ ३३ ॥
अपकुर्वन्हि रामस्य साक्षादपि पुरन्दरः ॥ न सुखं प्राप्नुयादन्यः किं पुनस्त्वद्विधो जनः ॥ ३४ ॥
यां सीतेत्यभिजानासि येयं तिष्ठति ते [3]वशे ॥ कालरात्रीति तां विद्धि सर्वलङ्काविनाशिनीम् ॥३५॥
तदलं कालपाशेन सीताविग्रहरूपिणा ॥ स्वयं स्कन्धावसक्तेन [4]क्षेममात्मनि चिन्त्यताम् ॥ ३६ ॥
सीतायास्तेजसा दग्धां रामकोपप्रपीडिताम् ॥ दह्यमानामिमां पश्य पुरीं साट्टप्रतोलिकाम् ॥३७॥
स्वानि मित्राणि मन्त्रींश्च ज्ञातीन्भ्रातॄन्सुतान्हितान् ॥ भोगान्दारांश्च लङ्कां च मा विनाशमुपानय ॥३८॥

तुशब्द उक्तशङ्काव्यावर्तकः। धर्मः उपसंह्रियतेनेनेति धर्मोपसंहारं धर्मफलं। फलेन धर्मस्योपसंह्रियमाणत्वात्। क्लीबत्वमार्षं। तत् अधर्मफलसंहितं न भवति। कुत इत्यत्राह—तदेव फलमन्वेतीति। धर्मफलमेवानुवर्तते। नन्वधर्मे च विद्यमानेकथंतत्फलाननुवृत्तिस्तत्राह—धर्मश्चाधर्मनाशनइति। च उक्तशङ्कानिवृत्त्यर्थः। विरोधिनि धर्मे जाग्रति कथमधर्मवार्तापीत्यर्थः। "धर्मेण पापमपनुदति" इति श्रुतेः। यद्वा व्यत्ययो वा किं न स्यात्तत्राह—धर्मश्चेति। चोवधारणे। धर्म एवाधर्मनाशनः तथा श्रुतेः। न त्वधर्मः प्रमाणाभावादितिभावः। ननु यदिधर्मोधर्मनाशनः तार्हि प्राथमिक एवधर्मः आधुनिकानधर्मान्निवर्तयेदित्याशङ्क्याह—प्राप्तमिति ॥ तावच्छब्दः कात्स्न्यर्थवाची। कृत्स्नं धर्मफलं फलमस्येति। तथाच क्षिप्रं धर्ममाचर अन्यथा सद्यस्ते विनाशो भविष्यतीति भावः। अत्र कर्तव्यत्वेन विधीयमानो धर्मस्सीताप्रदानपूर्वकरामविषयशरणागतिरेव। शूरस्याशौर्यप्रवृत्त्या धर्मफलं सर्वं क्षीणमिति हनुमतावगतमिति मन्तव्यम् ॥ २९—३० ॥ मा भूद्धर्मापेक्षा कार्योपस्थितिरवेक्ष्यतामित्याह—जनस्थानेति ॥ रामसुग्रीवसख्यं चेति परोक्षनिर्देशस्य गतिःपूर्वमुक्ता ॥ ३१ ॥ कामं अत्यन्तं। अहं सुग्रीवः। तन्नाशनं। तस्य रामस्य। निश्चयः निश्चयविषयः ॥ ३२ ॥ कथमित्यत्राह—रामेणेति ॥ हर्यृक्षगणसन्निधौ वृद्धसभायांप्रतिज्ञातमनतिक्रमणीयमितिभावः ॥३२–३४॥ कालरात्रीति काचिच्छक्तिरिति वदन्ति। "समी च कालरात्रिश्च भैरवी गणनायिका" इत्यमरशेषः ॥ ३५ ॥ कालपाशेन यमपाशेन। अतस्सीतां रामाय देहीति हृदयं ॥ ३६ ॥ अट्टः अट्टालः। प्रतोलिका वीथिका ॥ ३७ ॥ मन्त्रीन् मन्त्रिणः। इकारान्तत्व-

---

सर्वतोजयोभविष्यतीत्यतआह—नलिति। यःपुमान् अधर्मफलसंहितबलवत्तयाफलोन्मुखाधर्मसंबद्धस्तंपुरुषं धर्मोपसंहारमपि धर्मोपसंमर्हवन्तमपि। नत्वन्वेति धर्मफलमितिशेषः। किंतु तदेवफलं फलोन्मुखाधर्ममेवान्वेति। ननुधर्मफलादधर्मनाशोभविष्यतीत्यत्राह—धर्मश्चेति। उत्कटोऽधर्मोत्तरभावीधर्मोऽधर्मस्यनाशनः। चादुत्कटाधर्मोधर्मनाशकः। एवंचास्याधर्मस्यस्वकृतसफलधर्मापेक्षयोत्कटत्वादुत्तरकालत्वाच्चायमेवत्वयाप्राक्संचितस्यसकलधर्मस्यनाशकइतिभावः ॥ **स०** अधर्मफलसंयुतः उत्कटोत्तरभावी योऽधर्मः परदारधर्षणादिरूपःतत्फलं आसन्ननाशादिकंतेनसंयुतःपुमान् धर्मोपसंहारं धर्मस्योपसंहारस्तिरोधानंयेनकार्यरूपेण। कार्यनिष्पत्त्यनन्तरंकारणनिवृत्तेःसर्वत्रदृष्टत्वात्। तादृशंतदेवफलं धर्मफलंनत्वन्वेति रक्षकत्वेननप्राप्नोति। उपसंहरति—**धर्मइति**। अतोधर्मः अधर्मनाशनोनभवतीत्यर्थः। तवतुसीताधर्षणरूपादत्युत्कटोत्तरकालभाविकर्मफलस्यनाशोनकेनापीतिनात्मरक्षायांस्वयमक्षमइतिभावः ॥ २९ ॥ **ती०** ननुमहतःपुण्यफलानुभवस्यसमाप्त्यनन्तरंअधर्मफलानुभवोभविष्यतीत्यत्राह—प्राप्तमिति। धर्मफलं तावत्साकल्येन। प्राप्तं भुक्तं। अस्याधर्मस्य सीताहरणरूपस्य ॥ ३० ॥ **ती०** एषः हनुमत्कर्तृकलङ्काविनशस्तु। तस्य रामस्य। ननिश्चयः नसंमतइत्यर्थः ॥ **ति०** नन्वेवंकटुवादिनस्तवकोरक्षकइतिचेत्तत्राह—काममिति। यथेष्टमित्यर्थः। तर्हि कुतस्तन्नाशंनकरोषीत्यत्राह—तस्य। यस्याहंदूतस्तस्यरामस्य एषः मत्कर्तृकलङ्कानाशविषयोनिश्चयोन। स्वाम्याज्ञांविना तदा

[पा०] १ ङ. च. ज.—ट. वालिनश्चवधं. २ च. स्तस्यैवतुविनिश्चयः. ग. स्तस्यैवतुनसंशयः. ३ क. ङ.—ट. हे. ४ ख. ग. ङ. च. झ. ट. क्षेमं. ५ ग. ङ. च. ज. झ. ट. प्रदीपितां.

सत्यं राक्षसराजेन्द्र शृणुष्व वचनं मम ॥ रामदासस्य दूतस्य वानरस्य विशेषतः ॥ ३९ ॥
सर्वाँल्लोकान्समुसंहृत्य सभूतान्सचराचरान् ॥ पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः ॥ ४० ॥
देवासुरनरेन्द्रेषु यक्षरक्षोगणेषु च ॥ विद्याधरेषु सर्वेषु गन्धर्वेषूरगेषु च ॥
सिद्धेषु किन्नरेन्द्रेषु पतत्रिषु च सर्वतः ॥ ४१ ॥
सर्वभूतेषु सर्वत्र सर्वकालेषु नास्ति सः ॥ यो रामं प्रतियुध्येत विष्णुतुल्यपराक्रमम् ॥ ४२ ॥
सर्वलोकेश्वरस्यैवं कृत्वा विप्रियमुत्तमम् ॥ रामस्य राजसिंहस्य दुर्लभं तव जीवितम् ॥ ४३ ॥

देवाश्च दैत्याश्च निशाचरेन्द्र गन्धर्वविद्याधरनागयक्षाः ॥
रामस्य लोकत्रयनायकस्य स्थातुं न शक्ताः समरेषु सर्वे ॥ ४४ ॥
ब्रह्मा स्वयंभूश्चतुराननो वा रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वा ॥
इन्द्रो महेन्द्रः सुरनायको वा त्रातुं न शक्ता युधि रामवध्यम् ॥ ४५ ॥

मार्षं ॥ ३८ ॥ रामदासस्येत्यनेन रामसामर्थ्यपरिज्ञानमुक्तं । दूतस्येत्यनेन हितोपदेशाधिकारः । वानरस्येति माध्यस्थ्यं ॥ ३९ ॥ लोकान् भूरादीन् । सभूतान् पृथिव्यप्तेजोवाय्वाकाशरूपपञ्चमहाभूतयुक्तान् । सचराचरान् चतुर्मुखद्वारा सृष्टजङ्गमयुक्तान् । संहृत्य प्रलयावसाने रुद्रद्वारा स्वयं च संहृत्य । पुनः कल्पादौ तथैव " धाता यथापूर्वमकल्पयत् " इति श्रुत्युक्तरीत्या स्रष्टुं समर्थः । तत्र प्रमाणमाह—महायशा इति । " न तस्येशे कश्चन तस्य नाम महद्यशः" इति हि श्रुतिः । श्रुतिस्मृतिषु तथाप्रसिद्धइत्यर्थः ॥ ४०—४४ ॥ मा भूवन् शक्तास्सामान्यदेवाः ईश्वराश्शक्ताः स्युरित्याशङ्क्याह—ब्रह्मेति ॥ अत्र विशेषणान्तरोपादानं तेषां सामर्थ्यविशेषद्योतनार्थं पतत्प्रकर्षत्वपरिहाराय व्युत्क्रमेण योजनीयं । इन्द्रः परमैश्वर्यवान् । " इदि परमैश्वर्ये " इत्यस्माद्धातोः " ऋज्रेन्द्राग्र—" इत्यादिना निपातनात्साधुत्वं । त्रैलोक्याधिपतिरपि त्रातुं न शक्त इत्यर्थः । तस्य त्रैलोक्याधिपतित्वेपि परनिरसनसामर्थ्याभावादशक्ततेत्यत्राह—महेन्द्रइति । वृत्रहननप्रसिद्धसामर्थ्योपि न शक्तः । "योवृत्रमवधीदिति तन्महेन्द्रस्य महेन्द्रत्वं" इति श्रौतनिर्वचनं । स्वयं चतुरोपि सहायसंपत्त्यभावान्न शक्त इत्यत्राह—सुरनायकइति । सकलत्रयत्रयस्त्रिंशत्कोटिसुरगणसहायोपि न शक्त इत्यर्थः । मा भूत्क्षुद्र इन्द्रश्शक्तः सर्वसंहारकोरुद्रस्तु शक्तस्स्यात्तत्राह—रुद्र इति । संहारकाले प्रजाः रोदयतीति रुद्रः । " रोदेर्णिलुक् च " इति रप्रत्ययः । कालवि-

---

नुष्ठानमशक्यमितिभावः । स० तस्यैवतुविनिश्चयइतिपाठे तदाज्ञायांसत्यामित्यर्थः ॥३२॥ ति० विशेषतः निष्कृष्योच्यमानंवचनमित्यर्थः । रामदासस्येत्यादिविशेषणत्रयेण राममहिमवेत्तृत्वं स्वस्यपरोक्तवाक्यानुवादपूर्वंहितोपदेशाधिकारः नररक्षोतिरिक्तजात्यन्तरत्वेनापक्षपाततोन्यायवक्तृत्वंचसूचितं ॥ ३९ ॥ ती० रुतंशब्दंवेदात्मानंब्रह्मणेकल्पादौरातीतिवा रुद्रः । यद्वा रुता नादेन सकलंजगदिदंद्रावयति रजयतीति नादात्मकत्वाद्रुद्रः । यद्वा रुता नादेनप्रणवरूपेणवेदरूपेणवा दापयति इष्टमर्थंगमयतीतिवा रुद्रः । यद्वा रुतंसंसारदुःखहेतुंवाद्रावयतीतिरुद्रः। तदुक्तं"मद्दुःखंदुःखहेतुंवातद्रावयतियःप्रभुः । रुद्रइत्युच्यतेतस्माच्छिवंपरमकारणं" इति । एवंव्युत्पत्तियुक्तरुद्रत्वशत्रुभस्मीकरणसमर्थकालकालोचनयुक्तत्वत्रिपुरान्तकत्वादिधर्मविशिष्टोमहेश्वरोवा । ति० ब्रह्मास्वयंभूरित्यनेन हिरण्यगर्भःसर्वादिरुक्तः । चतुराननः ततः प्राप्तसृष्टृत्वाधिकारः । त्रिनेत्रस्त्रिपुरान्तकोरुद्रोवेत्यनेन संहाराधिकारी । सुरनायकोमहेन्द्रः महैश्वर्यवानिन्द्रः । उपेन्द्रोविष्णुः पालनाधिकारी । एवंत्रिमूर्तिभिरपि रक्षानसिध्यति । रामस्यैवत्रिमूर्तित्वात् । स० ब्रह्मेत्यादिपादत्रयेपित्रिवारमुक्तिर्दार्ढ्याय भट्टिकाव्ये " जहिहिजहीहिजहाहिरामभार्यां " इतिवत् । यद्वा ब्रह्मा बृहस्पतिः । " ब्रह्मापितन्नजानाति " इतिगीताभाष्यप्रमेयदीपिकायांब्रह्मावृहस्पतिरितिव्याख्यानात् । अस्वयंभूः स्वयंभूभिन्नः । स्वयंभूसदृशोवायुः । चतुराननोविरिञ्चः । वाशब्दःसर्वत्रान्वेति । रुद्रः क्रूरोयमः । त्रिनेत्रोरुद्रः । त्रिपुरान्तेनरुद्रेणकंशिरोयस्यदक्षस्यविनायकस्यवा । इन्द्रः शचीपतिः । अमहेन्द्रः वृत्रहेतरः तत्सदृशः कामः । सुरनायकः सुरसेनानायकःषण्मुखः ॥ ४५ ॥ इत्येकपञ्चाशःसर्गः ॥ ५१ ॥

[पा०] १ क. घ.—ट. नागेषुगन्धर्वेषुमृगेषुच. २ घ. सिद्धेषुचमृगेन्द्रेषु. क. नागेन्द्रेषुचसर्वेषुकिन्नरेषुपतत्रिषु. ३ क. ख. ग. सर्वलोकेषु. ४ क. ग.—ट. लोकेश्वरस्येह. ५ क. ग. ङ.—ट. विप्रियमीदृशं.

स सौष्ठवोपेतमदीनवादिनः कपेर्निशम्याप्रतिमोऽप्रियं वचः ॥
दशाननः कोपविवृत्तलोचनः समादिशत्तस्य वधं महाकपेः ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

द्विपञ्चाशः सर्गः ॥ ५२ ॥

हनुमत्परुषभाषणश्रवणरुष्टेनरावणेन तस्यवधाज्ञापनेविभीषणेनदूतवधस्यशास्त्रनिन्दितत्वोक्त्यातत्प्रतिषेधनम् ॥ १ ॥

तस्य तद्वचनं श्रुत्वा वानरस्य महात्मनः ॥ आज्ञापयद्वधं तस्य रावणः क्रोधमूर्च्छितः ॥ १ ॥
वधे तस्य समाज्ञप्ते रावणेन दुरात्मना ॥ निवेदि[1]तवतो दौ[2]त्यं नानुमेने विभीषणः ॥ २ ॥
[3]तं रक्षोधिपतिं क्रुद्धं तच्च कार्यमुपस्थितम् ॥ विदित्वा चिन्तयामास [4]कार्यं कार्यविधौ स्थितः ॥३॥
निश्चितार्थस्ततः साम्नाऽऽपूज्य शत्रुजिदग्रजम् ॥ उवाच हितमत्यर्थं वाक्यं वाक्यविशारदः ॥ ४ ॥

शेषे संहारकोपीदानीमप्राप्तकालत्वादशक्त इत्यत्राह—त्रिनेत्र इति । निटिलनयनदहनज्वालाविलोपितमदनोपीत्यर्थः । काकतालीयत्वशङ्काव्युदासायाह—त्रिपुरान्तकइति । प्रबलतरमहासुरसंहारकोपीत्यर्थः । मा भूत्तस्य शक्तिः " ब्रह्मणः पुत्राय ज्येष्ठाय श्रेष्ठाय " इत्युक्तरीत्या रुद्रस्यापि पिता ब्रह्मा शक्तस्स्यात् तत्राह—ब्रह्मेति । बृंहतीति ब्रह्मा । " बृहेरम् नलोपश्च " इति मनिन् अमागमो नकारलोपश्च । रुद्रपिता स्वयं कर्मवश्यःकथं शक्नुयात्तत्राह—स्वयंभूरिति । कर्मवश्यत्वेपीतरसाधारण्येनानुत्पन्नः स्वयंभूः । स्वयंभूत्वेपि सहायसंपत्त्यभावात्कथंत्रायेतेत्यत्राह—चतुराननइति । युगपदेवसर्ववेदोच्चारणसंपादितातिशयोपि नशक्तः । प्रत्येकमशक्तत्वेपि किं संभूयागताश्शक्नवन्ति तत्राह—न शक्ता इति । बहुवचनेनायमर्थो लभ्यते । वधमर्हतीति वध्यः । दण्डादित्वाद्यः । रामस्य वध्यो रामवध्यः । तं त्रातुं न शक्ताः । स्थानविन्निग्रहस्य चेत्युचितवधार्हस्य त्राताकः । युधि युद्धे । न शक्ताः किन्तुशरणं गत्वा त्रातुं शक्ता इत्यर्थः अत्र " हिरण्यगर्भस्समवर्तताग्रे । न सन्नचासीच्छिव एव केवलः । इन्द्रो मायाभिः पुरुरूप ईयते " इति परदेवतात्वेन प्रसक्तात्रिकादधिकत्वमुक्तं । रामइत्यनेन वेदान्तोदितानां सद्ब्रह्मादिसामान्यशब्दानां हिरण्यगर्भशिवेन्द्रादिविशेषशब्दानां च व्यक्तिविशेषपरत्वं व्यञ्जितं । त्रातृत्वेन प्रसक्तप्रधानदेवतानिराकरणप्रकरणे विष्णोरनुपादानात्पारिशेष्याद्राम एव विष्णुरिति प्रतिपादितं । अस्माच्छ्लोकात्परं स सौष्ठवेति श्लोकः । तस्य तद्वचनमिति श्लोकस्तु उत्तरसर्गादिः । अत्र स प्रमादाल्लिखितः ॥ ४५—४६ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥

तस्य तद्वचनं श्रुत्वेति श्लोकस्सर्गस्य प्रथमः ॥ १ ॥ दौत्यं दूतकर्म । ब्राह्मणादेराकृतिगणत्वात् ष्यञ् । तन्निवेदितवतः उक्तवतः । नानुमेने वधमित्यनुवर्तनीयं । निवेदितमतौ दूत्यमिति पाठान्तरं । मन्यत इति मतिः कार्यं । निवेदितमतौ निवेदितकार्यांशे यथार्थवादित्वेनावध्ये हनुमति दूत्यं दूतसंबन्धितया रावणादिष्टं वधं । " दूतवणिग्भ्यां चेति वक्तव्यं " इति भावकर्मणोर्विहितो यप्रत्ययः अर्थानुगुण्यात्संबन्धमात्रे गमयितव्यः ॥ २ ॥ तच्च कार्यं दूतवधरूपकार्यं । कार्यं अनन्तरानुष्ठेयं । कार्यविधौ कार्यकरणे । स्थितः निश्चितार्थः । साध्वसाधुविवेकनिश्चितकार्य इत्यर्थः ॥ ३ ॥ आपूज्येति च्छेदः ॥ ४ ॥

तीo निवेदितमतौ मन्यतइतिमतिःकार्यं । निवेदितस्वागमनकार्येहनुमति । अनेनास्ययथादिष्टानुवादित्वेनापराधित्वादवध्य-

[पाo] १ च. छ. निवेदितमतौ. २ ख. ग. दौत्ये. ३ क. घ. सरक्षोधिपतिं. ४ क. कार्याकार्यविधौ.

क्षमस्व रोषं त्यज राक्षसेन्द्र प्रसीद मद्वाक्यमिदं शृणुष्व ॥
वधं न कुर्वन्ति परावरज्ञा दूतस्य सन्तो वसुधाधिपेन्द्राः ॥ ५ ॥
राजधर्मविरुद्धं च लोकवृत्तेश्च गर्हितम् ॥ तव चासदृशं वीर कपेरस्य प्रमापणम् ॥ ६ ॥
धर्मज्ञश्च कृतज्ञश्च राजधर्मविशारदः ॥ परावरज्ञो भूतानां त्वमेव परमार्थवित् ॥ ७ ॥
गृह्यन्ते यदि रोषेण त्वादृशोपि विपश्चितः ॥ ततः शास्त्रविपश्चित्त्वं श्रम एव हि केवलम् ॥ ८ ॥
तस्मात्प्रसीद शत्रुघ्न राक्षसेन्द्र दुरासद ॥ युक्तायुक्तं विनिश्चित्य दूतदण्डो विधीयताम् ॥ ९ ॥
विभीषणवचः श्रुत्वा रावणो राक्षसेश्वरः ॥ रोषेण महताऽऽविष्टो वाक्यमुत्तरमब्रवीत् ॥ १० ॥
न पापानां वधे पापं विद्यते शत्रुसूदन ॥ तस्मादेनं वधिष्यामि वानरं पापचारिणम् ॥ ११ ॥
अधर्ममूलं बहुदोषयुक्तमनार्यजुष्टं वचनं निशम्य ॥
उवाच वाक्यं परमार्थतत्त्वं विभीषणो बुद्धिमतांवरिष्ठः ॥ १२ ॥
प्रसीद लङ्केश्वर राक्षसेन्द्र धर्मार्थयुक्तं वचनं शृणुष्व ॥
दूता न वध्याः समयेषु राजन्सर्वेषु सर्वत्र वदन्ति सन्तः ॥ १३ ॥
असंशयं शत्रुरयं प्रवृद्धः कृतं ह्यनेनाप्रियमप्रमेयम् ॥
न दूतवध्यां प्रवदन्ति सन्तो दूतस्य दृष्टा बहवो हि दण्डाः ॥ १४ ॥
वैरूप्यमङ्गेषु कशाभिघातो मौढ्यं तथा लक्षणसन्निपातः ॥
एतान्हि दूते प्रवदन्ति दण्डान्वधस्तु दूतस्य न नः श्रुतोपि ॥ १५ ॥
कथं च धर्मार्थविनीतबुद्धिः परावरप्रत्ययनिश्चितार्थः ॥
भवद्विधः कोपवशे हि तिष्ठेत्कोपं नियच्छन्ति हि सत्त्ववन्तः ॥ १६ ॥
न धर्मवादे न च लोकवृत्ते न शास्त्रबुद्धिग्रहणेषु चापि ॥
विद्येत कश्चित्तव वीर तुल्यस्त्वं ह्युत्तमः सर्वसुरासुराणाम् ॥ १७ ॥

परावरज्ञाः त्याज्योपादेयविवेकयुक्ताः ॥ ५ ॥ प्रमापणं मारणं ॥ ६ ॥ भूतानामिति निर्धारणे षष्ठी । भूतानां मध्ये ॥ ७ ॥ शास्त्रविपश्चित्त्वं विविधं पश्यतीति विपश्चित् तस्य भावः विपश्चित्त्वं शास्त्रविषये विविधज्ञानोपेतत्वमितियावत् ॥ ८ ॥ दूतदण्डः दूतयोग्यदण्डः ॥ ९—१२ ॥ सर्वेषु सर्वत्र सर्वदेशेषु सर्वजातिष्वित्यर्थः ॥ १३ ॥ न केवलं दूतोयं अक्षादिवधेन शत्रुश्च तथाच हन्तव्य इत्याशङ्क्याह—असंशयमिति ॥ दूतवध्यां दूतवधं । स्त्रियां भावे क्यप् । हन्तेर्वधादेश आर्षः ॥१४॥ लक्षणसन्निपातः दूतयोग्याङ्कनसंबन्धः । नः अस्माभिः ॥१५॥ धर्मार्थविनीतबुद्धिः धर्मार्थयोरिशिक्षितबुद्धिः । परावरप्रत्ययनिश्चितार्थः उत्कृष्टापकृष्टपरिज्ञाननिश्चितार्थः । अस्मिन्विषये इदं कार्यं परं इदमवरमिति विवेकनिश्चितकार्यइत्यर्थः । नियच्छन्ति निगृह्णन्ति । सत्त्ववन्तः व्यवसायवन्तः ॥ १६ ॥ धर्मवादे धर्मशास्त्रे । लोकवृत्ते

लमुक्तं ॥ २ ॥ शि० तस्मात् मदुक्तहेतोः । प्रसीद प्रसादंकुरु ॥ ९ ॥ ति० मौण्डयं मुण्डनं । लक्षणसंनिपातः दूतयोग्याङ्कनसंबन्धइतितीर्थः । वैरूप्यादीनामेकैकंवा । तथालक्षणानांसंनिपातः सर्वानुष्ठानंवेत्यर्थइत्यन्ये । नोस्माकंश्रुतोपिनास्ति । दर्शनंतु। दूरापास्तमितिभावः ॥ शि० अङ्गेषुवैरूप्यं नासिकाच्छेदादिनाविरूपकरणं । कशाभिघातः कशयातोत्रेण अभिघातः ताडनं मौण्डयं भ्रुकुट्यादिमुण्डनं । लक्षणसंनिपातः ताम्रखण्डदाहादिनाललाटादौचिह्नकरणं । एतान्दण्डान्दूतेप्रवदन्ति ॥ स० मौढ्य-

[पा०] १ क. ङ. च, झ. ञ. ट. मेवाक्यं. २ ङ. झ. ट. विचक्षणाः. ३ च. ज.—ट. कोपेन. ४ झ. ट. तस्मादिमं. ५ क. छ.—ट. पापकारिणं. ६ क. ग. घ. च. छ. झ. ञ. ट. बहुदोषयुक्तं. ७ ग. घ. ङ. झ. ट. धर्मार्थतत्वं. ८ झ. ञ. ट. मौण्डयं. ९ ङ. झ. ट. श्रुतोस्ति. १० ग. प्रत्ययदर्शितार्थः. ११ क. घ. ङ. झ. ट. नगच्छन्ति. १२ क. घ. च. छ. ज. धर्मवादेषुच.

[पराक्रमोत्साहमनस्विनां च सुरासुराणामपि दुर्जयेन ॥
त्वयाऽप्रमेयेन सुरेन्द्रसंघा जिताश्च युद्धेष्वसकृन्नरेन्द्राः ॥ १८ ॥
इत्थंविधस्यामरदैत्यशत्रोः शूरस्य वीरस्य तवाजितस्य ॥
कुर्वन्ति वीरा मनसाऽप्यलीकं प्राणैर्विमुक्ता न तु भोः पुरा ते ॥ १९ ॥]
न चाप्यस्य कपेर्घाते कंचित्पश्याम्यहं गुणम् ॥ तेष्वयं पात्यतां दण्डो यैरयं प्रेषितः कपिः ॥२०॥
साधुर्वा यदि वाऽसाधुः परैरेष समर्पितः ॥ ब्रुवन्परार्थं परवान्न दूतो वधमर्हति ॥ २१ ॥
अपि चास्मिन्हते राजन्नान्यं पश्यामि खेचरम् ॥ इह यः पुनरागच्छेत्परं पारं महोदधेः ॥ २२ ॥
तस्मान्नास्य वधे यत्नः कार्यः परपुरञ्जय ॥ भवान्सेन्द्रेषु देवेषु यत्नमास्थातुमर्हति ॥ २३ ॥
अस्मिन्विनष्टे न हि दूतमन्यं पश्यामि यस्तौ नरराजपुत्रौ ॥
युद्धाय युद्धप्रिय दुर्विनीतावुद्योजयेद्दीर्घपथावरुद्धौ ॥ २४ ॥
[अस्मिन्हते वानरयूथमुख्ये सर्वापवादं प्रवदन्ति सन्तः ॥
न हि प्रपश्यामि गुणं यशो वा लोकापवादो भवति प्रसिद्धः ॥ २५ ॥
मूढैः प्रगल्भैरपि दुर्विनीतैर्यैर्वानरोऽयं पुरुषैर्विसृष्टः ॥
तेषां वधार्थं कुरु वीर यत्नं शीघ्रं विनाशाय निशाचरेन्द्र ॥ २६ ॥
कुरुष्व तावत्परमप्रयत्नं धर्मं समास्थाय सुरेन्द्रशत्रो ॥
देवेषु सर्वेषु सवासवेषु दैत्येषु सर्वेषु सदानवेषु ॥ २७ ॥
कृत्वा प्रयत्नं सुदृढं सुशीघ्रं मद्वाक्यमेवं मनसा प्रगृह्य ॥
तौ राजपुत्रौ विनिगृह्य वीरौ जयं परं प्राप्स्यसि राक्षसेन्द्र ॥ २८ ॥
पराक्रमोत्साहमनस्विनां च सुरासुराणामपि दुर्जयेन ॥
त्वया मनोनन्दन नैर्ऋतानां युद्धायतिर्नाशयितुं न युक्ता ॥ २९ ॥

लौकिकाचारे। शास्त्रबुद्धिग्रहणेषु शास्त्रशब्देन शास्त्रार्थ उच्यते । शास्त्रार्थज्ञानतद्धारणेष्वित्यर्थः ॥ १७–१९ ॥ न केवलं दूतस्य वधे शास्त्रविरोधः गुणमपि न कंचित्पश्यामि अतः एतत्प्रेषकेष्वेव वधरूपो दण्डः पात्यतामित्याह—न चेत्यादि ॥ २० ॥ साधुर्वेति । समर्पितः प्रेषितः ॥ २१ ॥ अस्मिन्हतेसति वृत्तान्तनिवेदकाभावाद्रामलक्ष्मणयोरिहागमनाभावेन तव शत्रुक्षयो न स्यात् । विमुक्तेस्मिन् एतन्निवेदितवृत्तान्तयोस्तयोरिहागमनादयत्नेन तव शत्रुनाशो भवेदित्यभिप्रेत्याह—अपि चेत्यादिना ॥ इह परं पारं इह विद्यमानं महोदधेः परं पारं इदं दक्षिणकूलमित्यर्थः ॥ २२—२३ ॥ दीर्घपथावरुद्धौ दूरमार्गेण निरुद्धगमनाविति अर्थः । एतच्छ्लोकानन्तरं पराक्रमोत्साहमनस्विनांचेति श्लोकः । ततो हिताश्चेति श्लोकः । अथ तदेकदेशेनेति श्लोकः । अथ निशाचराणामिति सर्गान्तश्लोकः । अयमेव पाठक्रमः समीचीनः । अन्ये

मितिपाठे धुत्तूरादिभोजनेनमुग्धताप्रापणं ॥ १५ ॥ ति० युद्धप्रियेतिसंबोधनेन रणपराक्रमविजयकीर्ती तवेष्टेकिल । तेऽभेअप्येतद्विनाशे नश्यतइत्याशयः । रावणस्यरजःप्रकृतित्वात्तत्प्रकृत्यनुसारेणयुद्धादिव्यापारेणप्रलोभनं । तत्प्रीत्यर्थमेवदुर्विनीतावित्याद्युक्तिः ॥ २४ ॥ ति० हेनैर्ऋतानांमनोनन्दन सुरासुराणामपिदुर्जयेनत्वया पराक्रमेयउत्साहस्तत्र प्रशस्तमनोवतांनैर्ऋतानांमनः युद्धायप्रवृत्तं निर्नाशयितुंनयुक्तं । नैर्ऋतानामित्यत्रमनइत्यत्रचतत्रं । यद्वा तादृशानांनैर्ऋतानांमनोनन्दन तादृशेनत्वया युद्धायतिः युद्धागमः । नाशयितुंनयुक्तमित्यर्थः ॥ शि० हेनन्दन राक्षसाभिरामदातः । युद्धाय समुत्सुकमितिशेषः । नैर्ऋतानांमनः निर्ना-

[पा०] १ इदंश्लोकद्वयं क. ट. पाठयोर्दृश्यते. २ क. च. ज. किंचित्. ३ घ. अस्मिन्हतेमहाराजनान्यं. ४ क. ख. घ.—ज. भूतमन्यं. ५ इमेचत्वारःश्लोकाः ग. पाठेदृश्यन्ते. ६ ग. शूरेणवीरेणनिशाचरेन्द्रसुरासुराणामपि. ७ ग. ङ. ट. युद्धायनिर्नाशयितुंनयुक्तं.

हिताश्च शूराश्च समाहिताश्च कुलेषु जाताश्च महागुणेषु ॥
मनस्विनः शस्त्रभृतां वरिष्ठाः कोट्यग्रतस्ते सुभृताश्च योधाः ॥ ३० ॥
तदेकदेशेन बलस्य तावत्केचित्तवादेशकृतोभियान्तु ॥
तौ राजपुत्रौ विनिगृह्य मूढौ परेषु ते भावयितुं प्रभावम् ॥ ३१ ॥
निशाचराणामधिपोनुजस्य विभीषणस्योत्तमवाक्यमिष्टम् ॥
जग्राह बुद्ध्या सुरलोकशत्रुर्महाबलो राक्षसराजमुख्यः ॥ ३२ ॥
[किं वा परं ब्रह्म परं त्वसह्यं सर्वस्य बीजं जगतोस्य विष्णोः ॥
यद्देवदेवस्य परं च तेजस्तदेव तेजः कपिरेष वीरः ॥ ३३ ॥
वधाय मे वैष्णवतेज एव निस्संशयोऽयं कपिरूपधारी ॥
इत्येवमेतद्बहुधा विचिन्त्य रक्षोधिपः क्रोधवशं जगाम ॥ ३४ ॥
क्रोधं च जातं हृदये निरुध्य विभीषणोक्तं वचनं सुपूज्य ॥
उवाच रक्षोधिपतिर्महात्मा विभीषणं शस्त्रभृतांवरिष्ठम् ॥ ३५ ॥]
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

त्रिपञ्चाशः सर्गः ॥ ५३ ॥

रावणाज्ञया राक्षसगणैर्हनुमद्बालस्य पटवेष्टनतैलसेचनपूर्वकमग्निज्वालया संदीपनेनसवाद्यघोषंलङ्कासंचारणम् ॥ १ ॥ राक्षसीभिस्तद्वृत्तान्तं निवेदितयासीतया सशपथमग्निप्रति हनुमददाहप्रार्थनम् ॥ २ ॥ [हनुमद्बालसंदीपनश्रवणखिन्नां सीतांप्रति विभीषणभार्ययासरमया हनुमत्कृतलङ्कादहननिवेदनेन समाश्वासनम् ॥ ३ ॥] हनुमता पुरद्वारारोहणेन पृथुतरनिजशरीरकृशीकरणाद्बालबन्धविश्लथनपूर्वकं पुनःशतीरपृथूकरणम् ॥ ४ ॥ तथा तत्रत्यपरिघेण तद्रक्षिणांरक्षसांक्षपणम् ॥ ५ ॥

तस्य तद्वचनं श्रुत्वा दशग्रीवो महाबलः ॥ देशकालहितं वाक्यं भ्रातुरुत्तरमब्रवीत् ॥ १ ॥
सम्यगुक्तं हि भवता दूतवध्या विगर्हिता ॥ अवश्यं तु वधादन्यः क्रियतामस्य निग्रहः ॥ २ ॥
कपीनां किल लाङ्गूलमिष्टं भवति भूषणम् ॥ तदस्य दीप्यतां शीघ्रं तेन दग्धेन गच्छतु ॥ ३ ॥
ततः पश्यन्त्विमं दीनमङ्गवैरूप्यकर्शितम् ॥ समित्रज्ञातयः सर्वे बान्धवाः ससुहृज्जनाः ॥ ४ ॥

प्यत्र सर्गे श्लोकाः कल्पिता दृश्यन्ते ॥ २४—३० ॥ तत् तस्मात्कारणात् । एकदेशेनेति सहयोगे तृतीया । बलस्य सैन्यस्य ॥ ३१—३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

देशकालहितं देशकालोचितमिति विभीषणवचनविशेषणं ॥ १ ॥ दूतवध्या दूतवधः ॥ २—३ ॥ समित्रेति । मित्राणि आप्ताः । समसुखदुःखा वा । सहाया वा । ज्ञातयः भ्रात्रादयः । बान्धवाः संबन्धिनः । सुहृज्जनाः स्निग्धजनाः ॥ ४ ॥

शयितुंत्वयानयुक्तं ॥ २९ ॥ **ती०** समाहिताः दानमानाभ्यांवशीकृताइत्यर्थः । सुभृताः सद्वृत्याः । योधाश्च वर्तन्तेखल्विति-शेषः ॥ ३० ॥ इतिद्विपञ्चाशः सर्गः ॥ ५२ ॥

[**पा०**] १ झ. ञ. कोपप्रशस्ताःसुभृताश्च. घ. कोट्यायुतास्तेसुहृदश्च. २ झ. ञ. ट. कृतोद्ययान्तु. क. ग. च. कृतोपयान्तु. ३ झ. ञ. ट. राजपुत्रावुपगृह्य. ४ घ. युद्धे. ५ घ. शत्रुर्दशाननो. ६ इदंश्लोकत्रयं ग. पाठेदृश्यते. ७ ङ. सतस्यवचनं. ८ ख.—ट. महात्मनः. ९ ग. घ. च. ज. ञ. दण्डेन. १० झ. ट. पश्यन्त्वमुं. ११ ङ. झ. ट. सुमित्रज्ञातयः. ख समित्राज्ञातयः. च. ज. मित्राणिज्ञातयः. घ. खमित्रज्ञातयः.

आज्ञापयद्राक्षसेन्द्रः पुरं सर्वं सचत्वरम् ॥ लाङ्गूलेन प्रदीप्तेन रक्षोभिः परिणीयताम् ॥ ५ ॥
तस्य तद्वचनं श्रुत्वा राक्षसाः कोपकर्शिताः ॥ वेष्टयन्ति स्म लाङ्गूलं जीर्णैः कार्पासकैः पटैः ॥ ६ ॥
संवेष्ट्यमाने लाङ्गूले व्यवर्धत महाकपिः ॥ शुष्कमिन्धनमासाद्य वनेष्विव हुताशनः ॥
तैलेन परिषिच्याथ तेऽग्निं तत्राभ्यपातयन् ॥ ७ ॥
लाङ्गूलेन प्रदीप्तेन राक्षसांस्तानपातयत् ॥ रोषामर्षपरीतात्मा बालसूर्यसमाननः ॥ ८ ॥
लाङ्गूलं संप्रदीप्तं तु दृष्ट्वा तस्य हनूमतः ॥ सहस्त्रीबालवृद्धाश्च जग्मुः प्रीता निशाचराः ॥ ९ ॥
स भूयः संगतैः क्रूरै राक्षसैर्हरिसत्तमः ॥ निबद्धः कृतवान्वीरस्तत्कालसदृशीं मतिम् ॥ १० ॥
कामं खलु न मे शक्ता निबद्धस्यापि राक्षसाः ॥ छित्त्वा पाशान्समुत्पत्य हन्यामहमिमान्पुनः ॥ ११ ॥
यदि भर्तृहितार्थाय चरन्तं भर्तृशासनात् ॥ बध्नन्त्येते दुरात्मानो न तु मे निष्कृतिः कृता ॥ १२ ॥
सर्वेषामेव पर्याप्तो राक्षसानामहं युधि ॥ किंतु रामस्य प्रीत्यर्थं विषहिष्येऽहमीदृशम् ॥ १३ ॥
लङ्का चारयितव्या वै पुनरेव भवेदिति ॥ रात्रौ न हि सुदृष्टा मे दुर्गकर्मविधानतः ॥ १४ ॥
अवश्यमेव द्रष्टव्या मया लङ्का निशाक्षये ॥ १५ ॥
कामं बद्धस्य मे भूयः पुच्छस्योद्दीपनेन च ॥ पीडां कुर्वन्तु रक्षांसि न मेऽस्ति मनसः श्रमः ॥ १६ ॥

प्रदीप्तेन लाङ्गूलेन युक्तो हनुमान् सचत्वरं सर्वं पुरं परिणीयतां परितो नीयतां । इत्याज्ञापयदित्यन्वयः ॥ ५—७ ॥ अपातयत् लाङ्गूलभ्रामणेन अद्रावयदित्यर्थः ॥ ८—१० ॥ न मे शक्ताः न मे पर्याप्ता इत्यर्थः । मम निग्रहे नसमर्थाइतियावत् ॥ ११ ॥ भर्तृहितार्थाय रामहितार्थाय । चरन्तं प्रवर्तमानं । मामितिशेषः । भर्तृशासनात् रावणशासनात् । यदि बध्नन्ति । तावता मे निष्कृतिः प्रतिक्रिया । नकृता । इदं बन्धनमकिञ्चित्करमिति भावः ॥ १२ ॥ रामस्यप्रीत्यर्थमिदंविषहिष्ये । रावणादिवधस्य स्वेनैवकर्तव्यत्वेनरामाभिमतत्वाद्राक्षसानामहमीदृशं बन्धनाकर्षणादिरूपंपरिभवंसहिष्यइतिभावः । रामस्यप्रीत्यर्थमित्यत्र च्छन्दोभङ्गआर्षः ॥ १३ ॥ लङ्का रात्रौ दुर्गकर्मविधानतः दुर्गकर्मविधानाद्धेतोः । नहिसुदृष्टा नैवसुदृष्टा । यद्वा दुर्गकर्मविधानतः नगरगुप्तिविशेषज्ञानपूर्वकमित्यर्थः । नदृष्टेतिहेतोर्मया लङ्का पुनश्चारयितव्याभवेत् । विचरित्वा द्रष्टव्या भवेदित्यर्थः । अयं च प्रातःकालः नतूषःकालः । प्रातःकालेपि तथाव्यवहारोपपत्तेः ॥ १४—१५ ॥ मनसः श्रमइ-

ति० आरण्यकायथाशुष्कमिन्धनमासाद्यहुताशनमुत्पादयन्ति तथा जीर्णपटवेष्टितलाङ्गूलंतैलेपरिषिच्य तत्रतेग्निमुपपादयन् उदपादयन्निल्यर्थइतिकतकः । हुताशनइतिपाठे वृद्धौदृष्टान्तोऽयं । उपपादयन्निल्यस्यसमयोजयन्निल्यर्थइत्यन्ये ॥ ७ ॥ तान् बध्वानेतॄन् ॥ ८ ॥ ति० यदितांवधरूपांचिकीर्षुस्तदासर्वान्हनिष्याम्येवेत्याह—**सर्वेषामिति** । यदिपर्याप्तस्तर्हिकियतांशत्रवधस्तत्राह—रामस्येति ॥ १३ ॥ ति० निशाक्षयइत्यनेन सीतासंभाषणार्थिकतिपयदिनवासोगम्यते । तथाहि— फाल्गुनेरावणेनसीतापहारः । आश्विनशुक्लसमाप्तौहनुमत्प्रेरणयापक्षावधिदानेनवानरान्प्रतिदूतप्रेषणं । ततःकार्तिकशुक्लप्रतिपद्यन्वेषणार्थंवानरप्रस्थानं । मार्गशुक्लदशम्यांसंपातिदर्शनं । तदासुग्रीवदत्तमासावधेर्गतत्वस्यवानरैरुक्तिः । अग्रएकादश्यांहनुमतोलङ्कागमनं । तद्रात्रित्रिशेषेसीतादर्शनं । ततोद्वादश्यांदिनेस्थिलारात्रौसीतायाःसम्यग्दर्शनं । तद्रात्रित्रिशेषेतत्रारावणागमनं । तत्ररावणेन " मासान्द्वादशभामिनि " इतिस्वदत्तावधौमासद्वयावशेषवचनेकतिपयदिनाधिक्यंतुमासलाभवच्छब्देनाल्पान्तरत्वान्नविवक्षितं । ततस्त्रयोदश्यांप्रातःसीतयासहकथालापः । तद्दिनएवाशोकवनिकाभङ्गादि । चतुर्दश्यामक्षान्तवधोलङ्कादाहश्चपूर्णिमायांवा । पूर्ववासन्तिकवृक्षाणांपुष्पितलोक्तिस्तु तद्वर्षेक्षयमासेनोपपादिता उत्पातेनच । लक्ष्मणस्यसुग्रीवनिकटेप्रेषणसमयेरामेणमासचतुष्टयरूपकृतावधेरपगमोक्तिस्तु

[पा०] १ क. ख. ग. ङ.—ट. कोपकर्कशाः. घ. क्रोधमूर्च्छिताः. २ क. ख. ग. ङ. ज्ञ. ट. वेष्टन्ततस्यलाङ्गूलं. ३ क. ङ. ज्ञ. ट. तत्रोपपादयन्. घ. तत्रावपातयन्. ख. तत्राप्यपातयन्. च. ज. तत्रप्रदीपयन्. ४ ख. सतुरोषपरीतात्मा. क. रोषामर्षपरीताक्षः. ५ ख. दृष्ट्वासर्वं. क. च. छ. ज. ञ. दृष्ट्वातस्यमहात्मनः. ६ क. छ.—ट. प्रीतिं. ७ क. संगतैर्वीरैः. ८ क. ख. घ. च. छ. ज. ञ. भर्तृहितार्थाय. ९ ङ. ज्ञ. ट. निबध्नन्ते. १० क. रामस्यकार्यार्थं. क. रामप्रियार्थंतु. ११ क. ख. ङ—ट. चारयितव्यामे. १२ क. ङ. ज्ञ. कुर्वन्ति.

ततस्ते संवृताकारं सत्त्ववन्तं महाकपिम् ॥ परिगृह्य ययुर्हृष्टा राक्षसाः कपिकुञ्जरम् ॥ १७ ॥
शङ्खभेरीनिनादैस्तं घोषयन्तः स्वकर्मभिः ॥ राक्षसाः क्रूरकर्माणश्चारयन्ति स्म तां पुरीम् ॥ १८ ॥
अन्वीयमानो रक्षोभिर्ययौ सुखमरिन्दमः ॥ हनुमांश्चारयामास राक्षसानां महापुरीम् ॥ १९ ॥
अथापश्यद्विमानानि विचित्राणि महाकपिः ॥ संवृतान्भूमिभागांश्च सुविभक्तांश्च चत्वरान् ॥२०॥
वीथीश्च गृहसंबाधाः कपिः शृङ्गाटकानि च ॥ तथा रथ्योपरथ्याश्च तथैव गृहकान्तरान् ॥
गृहांश्च मेघसंकाशान्ददर्श पवनात्मजः ॥ २१ ॥
चत्वरेषु चतुष्केषु राजमार्गे तथैव च ॥ घोषयन्ति कपिं सर्वे चारीक इति राक्षसाः ॥ २२ ॥
स्त्रीबालवृद्धा निर्जग्मुस्तत्र तत्र कुतूहलात् ॥ तं प्रदीपितलाङ्गूलं हनुमन्तं दिदृक्षवः ॥ २३ ॥
दीप्यमाने ततस्तस्य लाङ्गूलाग्रे हनूमतः ॥ राक्षस्यस्ता विरूपाक्ष्यः शंसुर्देव्यास्तदप्रियम् ॥ २४ ॥
यस्त्वया कृतसंवादः सीते ताम्रमुखः कपिः ॥ लाङ्गूलेन प्रदीप्तेन स एष परिणीयते ॥ २५ ॥
श्रुत्वा तद्वचनं क्रूरमात्मापहरणोपमम् ॥ वैदेही शोकसंतप्ता हुताशनमुपागमत् ॥ २६ ॥
मङ्गलाभिमुखी तस्य सा तदाऽऽसीन्महाकपेः ॥ उपतस्थे विशालाक्षी प्रयता हव्यवाहनम् ॥ २७ ॥
यद्यस्ति पतिशुश्रूषा यद्यस्ति चरितं तपः ॥ यदि चास्त्येकपत्नीत्वं शीतो भव हनूमतः ॥ २८ ॥
यदि किंचिदनुक्रोशस्तस्य मय्यस्ति धीमतः ॥ यदि वा भाग्यशेषो मे शीतो भव हनूमतः ॥२९॥
यदि मां वृत्तसंपन्नां तत्समागमलालसाम् ॥ स विजानाति धर्मात्मा शीतो भव हनूमतः ॥ ३० ॥
यदि मां तारयेदार्यः सुग्रीवः सत्यसङ्गरः ॥ अस्माद्दुःखाम्बुसंरोधाच्छीतो भव हनूमतः ॥ ३१ ॥
ततस्तीक्ष्णार्चिरव्यग्रः प्रदक्षिणशिखोनलः ॥ जज्वाल मृगशावाक्ष्याः शंसन्निव शिवं कपेः ॥ ३२ ॥

त्यनन्तरमितिकरणं बोध्यं ॥ १६ ॥ संवृताकारं गूढस्वभावं । महाकपिमिति बुद्ध्या महत्त्वं । कपिकुञ्जरमिति सजातीयश्रैष्ठ्यं ॥ १७ ॥ स्वकर्मभिः आस्फोटनसिंहनादैरित्यर्थः । तां पुरीं घोषयन्तः । अत्यन्तसंयोगे द्वितीया । चारयन्ति स्म तमिति शेषः ॥ १८ ॥ चारयामास शोधयामास ॥ १९ ॥ चत्वरान् गृहबहिरङ्गणानि ॥ २०॥ शृङ्गाटकानि चतुष्पथानि । रथ्याः महावीथीः । उपरथ्याः अवान्तरवीथीः । गृहकान्तरान् गृहकाणि क्षुद्रगृहाणि अन्तराणि प्रच्छन्नद्वाराणि । अन्तर्द्वाराणीत्यर्थः । " तोरणोऽस्त्री बहिर्द्वारं प्रच्छन्नद्वारमन्तरं " इति वैजयन्ती । अक्लीबत्वमार्षं ॥ २१ ॥ चत्वरेषु चतसृणां रथ्यानां संभेदेषु । चतुष्केषु चतुस्तम्भमण्डपेषु । चार एव चारीकः । स्वार्थे कप्रत्ययः । आर्षो दीर्घः ॥ २२—२३ ॥ शंसुः शशंसुः । आर्षो द्विर्वचनाभावः ॥ २४ ॥ परिणीयते परितो नीयते ॥२५॥ उपागमत् उपासितवती ॥ २६ ॥ तस्य हनुमतः । मङ्गलाभिमुखी अदाहपरा । प्रयता शुद्धिमती । " पवित्रः प्रयतः पूतः " इत्यमरः ॥ २७ ॥ पतिशुश्रूषादिपदं तत्फलपरं । शीतो भव तेनेति शेषः । एकपत्नीत्वं पातिव्रत्यं ॥ २८ ॥ किंचिदनुक्रोश इति समस्तंपदं । तस्य रामस्य । भाग्यशेषः । इदानीं निरन्तरदुःखानुभवात् भाग्यप्रसक्तिरेवनास्तीतिमन्यमानाया इदं वचनं ॥ २९ ॥ मम पातिव्रत्यं यदि हनुमान् जानाति तदा शीतो भवेत्याह—यदि मामिति ॥ ३० ॥ यदि मां तारयेदिति । मत्तारणे इदमेव ज्ञापकमिति भावः ॥ ३१ ॥ ततः सीतोपगमात् । कपेरनलः कपिवालाग्निः । मृगशावाक्ष्याः सीतायाः । शुभं शंसन्निव प्रदक्षिणशिखो जज्वालेत्यन्वयः ॥३२॥

प्रागुपपादितरहस्योतिदिक् । पुच्छस्योद्दीपनेनचेत्यस्योत्तरश्लोकेनान्वयः ॥ १५ ॥ ति० स्वकर्मभिः राजद्रोहिणोदुष्टस्यैवंदण्डइत्येवमादिभिः । घोषवन्तः । पूर्ववृत्तान्तस्यसर्वान्प्रतिप्रकटंप्रतिपादनंघोषणं ॥ १८ ॥ ति० एकपत्नीत्वं पातिव्रत्यं । शीतोभव हुता-

[पा०] १ क. ङ.—ट. रथ्याश्च. २ क. घ. पुरींसर्वे. ३ ङ. झ. ट. चारइत्येव. ४ क. घ. मुपासिता. ५ क. ग. घ. च. छ. कश्चिदनुक्रोशः, ६ क. ग. घ. च. छ. ज. अस्माद्दुःखान्महाबाहुश्शीतो.

हनुमज्जनकश्चापि पुच्छानलयुतोऽनिलः ॥ ववौ स्वास्थ्यकरो देव्याः प्रालेयानिलशीतलः ॥ ३३ ॥
[तां तदा परमोद्विग्नां सीतां शोकाभिकर्शिताम् ॥ हनूमति गृहीते तु रक्षोभिर्भीमविक्रमैः ॥
उवाच सरमा वाक्यं तामाश्वासयितुं तदा ॥ ३४ ॥
मा शुचो देवि वैदेहि हनूमन्तं महाकपिम् ॥ ३५ ॥
हत्वा तु रक्षिणः सर्वान्राक्षसांस्तत एव सः ॥ पुरीं लङ्कां दहति स साक्षादिव हुताशनः ॥
भवनाद्भवनं गच्छन्नसावत्यन्तवीर्यवान् ॥ ३६ ॥
प्रासादवरसंस्थाश्च गवाक्षस्थाश्च योषितः ॥ वह्निप्रदीप्तनयनास्तथा क्रन्दन्ति दुःखिताः ॥ ३७ ॥
एता वरविशालाक्ष्यो वह्निज्वालासमावृताः ॥ अपश्यन्त्यः क्वचित्स्थातुं सर्वतोऽग्निसमावृताः ॥
वह्नावभ्युत्पतन्त्याशु कर्तव्यं नैव जज्ञिरे ॥ ३८ ॥
अभिधावन्ति सहसा क्रोशन्त्यः सह बालकैः ॥ अवकुण्ठानि कृत्वा स्म वासोभिर्विष्ठितास्तदा ॥३९॥
स्तंभै राजतसौवर्णैः प्रवालमणिचारुभिः ॥ दृश्यन्तेऽग्निसमासक्ता वह्नौ वह्निरिवोद्यताः ॥
प्रासादमाला बहुधा अग्निदग्धाः पतन्ति हि ॥ ४० ॥
अर्चिषेव हिरण्यानां प्रभाभिः कृष्णवर्त्मनः ॥ दीप्यमाना इवाभाति लङ्केयं कालपर्यये ॥ ४१ ॥
क्वचिद्दग्धाः प्रदेशास्तु क्वचिद्दग्धा विनाशिताः ॥ बहुभौमा विभान्ति स्म गृहाणां भूमयः शुभाः ॥४२॥
कान्ताभिः सह वित्रस्ता दृश्यन्ते राक्षसास्तदा ॥ हाहेत्युच्चैर्वदन्ति स्म त्रातारं नाभिजज्ञिरे ॥ ४३ ॥
संप्रदीप्तां पुरीं लङ्कां हनुमद्वीर्यधर्षिताम् ॥ अन्तःपुराणि सर्वाणि दृष्ट्वा दुद्रुविरे तदा ॥ ४४ ॥
क्वचिन्कुङ्कुमवर्णाभाः क्वचित्किंशुकसंनिभाः ॥ क्वचिन्मलिनसंकाशाः शिखा वह्नेश्चकाशिरे ॥ ४५ ॥
धूमेन संवृताः केचिद्गृहोद्देशाः सुशोभनाः ॥ वर्षाकाले तु संप्राप्ते घनैरिव नभस्स्थलम् ॥ ४६ ॥
देवि व्यपैतु ते त्रासो हनूमन्तं प्रति प्रिये ॥ दग्ध्वैव लङ्कां सुमहान्व्योम्नि वीरः प्रकाशते ॥
दीप्तैर्घनांबुसंरोधैर्मुक्तचन्द्रइवामलः ॥ ४७ ॥
एतच्छ्रुत्वाऽभवत्प्रीता सीता शशिनिभानना ॥ निर्वृतिं परमां प्राप्ता बाला स्वस्थाऽभवत्तदा ॥४८॥]
दह्यमाने च लाङ्गूले चिन्तयामास वानरः ॥ प्रदीप्तोऽग्निरयं कस्मान्न मां दहति सर्वतः ॥ ४९ ॥
दृश्यते च महाज्वालः करोति न च मे रुजम् ॥ शिशिरस्येव संपातो लाङ्गूलाग्रे प्रतिष्ठितः ॥५०॥
अथवा तदिदं व्यक्तं यदृष्टं प्लवता मया ॥ रामप्रभावादाश्चर्यं पर्वतः सरितां पतौ ॥ ५१ ॥
यदि तावत्समुद्रस्य मैनाकस्य च धीमतः ॥ रामार्थं संभ्रमस्तादृक्किमग्निर्न करिष्यति ॥ ५२ ॥

अनिलश्च पुच्छानलयुतोपि प्रालेयानिलशीतलः हिममारुतवच्छीतलस्सन् । देव्याः सीतायाः । स्वास्थ्यकरः सुखकरः । ववौ । अस्मात्परं दह्यमाने च लाङ्गूल इति श्लोकः । अनयोः श्लोकयोर्मध्ये केचन श्लोकाः कतिपयकोशेषु दृश्यन्ते । बहुकोशेष्वदर्शनादर्थाधिक्याभावाच्च ते अनादरणीयाः ॥ ३३—४९ ॥ रुजं पीडां । शिशिरस्येव संपातः शिशिरस्य चन्द्रनोशीरादेः संपातः संघट्ट इव स्थितः । अत्यन्तशीतल इत्यर्थः । एतेन हेतुविशेषं न पश्यामीत्युक्तं ॥ ५० ॥ हेतुविशेषान्निश्चिनोति—अथवेत्यादिना ॥ प्लवता मया सरितां पतौ । आर्षं धिसंज्ञाकार्यं । समुद्रमध्ये । पर्वतः पर्वतरूपं यदाश्चर्यं अद्भुतरूपं वस्तु दृष्टं । तद्वदिदमग्नेः शैत्यं रामप्रभावात्संजातं व्यक्तं निश्चितं ॥ ५१ ॥ एतदेवोपपादयति—यदीति ॥ संभ्रमः

शनेतिशेषः । अस्याःसीताछायात्वेपिस्वस्मिन्सदभेदबुद्धिसत्त्वान्नैतदुत्तरसंगतिः ॥ २८ ॥ **रामानु०** हनुमज्जनकइति । अस्मात्परतोदह्यमानेचलाङ्गूलेइतिश्लोकः । अनयोःश्लोकयोर्मध्येसरमावाक्यभूताःकेचनश्लोकाःकतिपयकोशेषुदृश्यन्ते । बहुकोशेष्वदर्शनादर्थौचित्याभावाच्चतेअनादरणीयाः ॥ ३३ ॥ **ति०** ननुसमुद्रप्रेरणेनमैनाकोत्थानंयुज्यते अग्नेस्तुस्वभावविपरीतंकुतस्तत्राह-

[पा०] १ तांतदापरमोद्विग्नामित्यारभ्य बालास्वस्थाऽभवत्तदेत्यन्ताःश्लोकाः घ. पाठेदृश्यन्ते.

सीतायाश्चानृशंस्येन तेजसा राघवस्य च ॥ पितुश्च मम सख्येन न मां दहति पावकः ॥ ५३ ॥
भूयः स चिन्तयामास मुहूर्तं कपिकुञ्जरः ॥ [कथमग्निर्मया सेह बन्धनं राक्षसाधमैः ॥
प्रतिक्रियाऽस्य युक्ता स्यात्सति मय्यं पराक्रमे ॥ ५४ ॥
ततश्छित्त्वा च तान्पाशान्वेगवान्वै महाकपिः ॥] उत्पपाताथ वेगेन ननाद च महाकपिः ॥ ५५ ॥
पुरद्वारं ततः श्रीमाञ्शैलशृङ्गमिवोन्नतम् ॥ विभक्तरक्षःसंबाधमाससादानिलात्मजः ॥ ५६ ॥
स भूत्वा शैलसंकाशः क्षणेन पुनरात्मवान् ॥ ह्रस्वतां परमां प्राप्तो बन्धनान्यवशातयत् ॥ ५७ ॥
विमुक्तश्चाभवच्छ्रीमान्पुनः पर्वतसन्निभः ॥ वीक्षमाणश्च ददृशे परिघं तोरणाश्रितम् ॥ ५८ ॥
स तं गृह्य महाबाहुः कालायसपरिष्कृतम् ॥ रक्षिणस्तान्पुनः सर्वान्सूदयामास मारुतिः ॥ ५९ ॥
स तान्निहत्वा रणचण्डविक्रमः समीक्षमाणः पुनरेव लङ्काम् ॥
प्रदीप्तलाङ्गूलकृतार्चिमाली प्रकाशतादित्य इवार्चिमाली ॥ ६० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

हनुमता लङ्कादहनस्यकार्यशेषत्वनिर्धारणेन स्ववालानलेनविभीषणभवनर्जे समग्रलङ्कादहनम् ॥ १ ॥ देवगन्धर्वादिभिर्लङ्कादहकदर्शनेन सविस्मयंहर्षाधिगमः ॥ २ ॥

वीक्षमाणस्ततो लङ्कां कपिः कृतमनोरथः ॥ वर्धमानसमुत्साहः कार्यशेषमचिन्तयत् ॥ १ ॥
किं नु खल्ववशिष्टं मे कर्तव्यमिह साम्प्रतम् ॥ यदेषां रक्षसां भूयः संतापजननं भवेत् ॥ २ ॥
वनं तावत्प्रमथितं प्रकृष्टा राक्षसा हताः ॥ बलैकदेशः क्षपितः शेषं दुर्गविनाशनम् ॥ ३ ॥
दुर्गे विनाशिते कर्म भवेत्सुखपरिश्रमम् ॥ अल्पयत्नेन कार्येऽस्मिन्मम स्यात्सफलः श्रमः ॥ ४ ॥

त्वरा । किमग्निर्न करिष्यति संभ्रममिति शेषः । रामार्थं मैनाकस्य संभ्रमो यदि स्यादग्नेस्तादृशस्संभ्रमः कुतो न भविष्यतीत्यर्थः ॥ ५२ ॥ आनृशंस्येन दयया ॥ ५३ ॥ स चिन्तयामास अनन्तरकर्तव्यमितिशेषः ॥ ५४ ॥ चिन्नितमेवाह—उत्पपातेति ॥ ५५ ॥ विभक्तरक्षस्संबाधं निवृत्तरक्षस्संचारं ॥ ५६ ॥ अवशातयत् अवाशातयत अच्यावयदित्यर्थः ॥ ५७—५९ ॥ निहत्य निहत्य । ल्यबभावआर्षः । लाङ्गूलकृतार्चिमाली लाङ्गूले कृतज्वालामालः । अर्चिमाली तेजःपुञ्जवानादित्य इव । प्रकाशत प्राकाशत । अनित्यत्वादडभावः । अर्चीतीकारान्तत्वमार्षं ॥ ६० ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

कृतमनोरथः पर्याप्तमनोरथः ॥ १—२ ॥ बलैकदेशः सेनैकदेशः । क्षपितः नाशितः । दुर्गविनाशनं पुरविनाशनं । शेषं अवशिष्टं ॥ ३ ॥ कर्मपूर्वोक्तं वनभङ्गादिकं । समुद्रलङ्घनं दृत्यं वा । सुखपरिश्रमं सफलायासं । शक्यमेतदित्याह—अल्पयत्नेनेति । अस्मिन्कार्ये

यदीति ॥ तावदितिवाक्यालङ्कारे । रामार्थं रामोपकारार्थं । तादृक्संभ्रमोयदि आदरपूर्वंकंत्वरायदि । तदा रामेणनित्यमुपासितोऽग्निः रामोपकारार्थं कथमपिशैत्यंकिंनकरिष्यतीत्यर्थः ॥ ५२ ॥ **ति०** प्रतिक्रिया लङ्कादहनरूपा । मय्यं मम ॥ ५४ ॥ **शि०** उत्पपात ननादच । क्रियाभेदात्कपिरितिनपौनरुक्त्यं ॥ ५५ ॥ **स०** विभक्तरक्षस्संबाधं नानाधिकारनियुक्तराक्षसनिबिडं ॥ ५६ ॥ **स०** रक्षिणः तोरणरक्षिणः ॥ ५९ ॥ इतित्रिपञ्चाशःसर्गः ॥ ५३ ॥

स० कर्म समुद्रतरणादिरूपं । सुखपरिश्रमं सुखयतीतिसतथा श्रमोयस्यतत् । अल्पयत्नेन पावकसंपादनाद्यायासरहितयत्नेन । मम स्वामिनइतिशेषः । श्रमः मत्प्रेषणरूपः । सफलः कीर्तिरूपफलसहितइत्यर्थः ॥ **ति०** अस्मिन् सीतान्वेषणप्रवृत्तिरूपे । कार्ये-

[**पा०**] १ क. ख. ग. ङ. छ. ज. ञ. ट. संचिन्तयामास. २ इदमर्धत्रयं, ङ.—ट. पाठेषुदृश्यते.

यो ह्ययं मम लाङ्गूले दीप्यते हव्यवाहनः ॥ अस्य संतर्पणं न्याय्यं कर्तुमेभिर्गृहोत्तमैः ॥ ५ ॥
ततः प्रदीप्तलाङ्गूलः सविद्युदिव तोयदः ॥ भवनाग्रेषु लङ्काया विचचार महाकपिः ॥ ६ ॥
गृहाद्गृहं राक्षसानामुद्यानानि च वानरः ॥ वीक्षमाणो ह्यसंत्रस्तः प्रासादांश्च चचार सः ॥ ७ ॥
अवप्लुत्य महावेगः प्रहस्तस्य निवेशनम् ॥ अग्निं तत्र स निक्षिप्य श्वसनेन समो बली ॥ ८ ॥
ततोऽन्यत्पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान् ॥ मुमोच हनुमानग्निं कालानलशिखोपमम् ॥ ९ ॥
वज्रदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः ॥ शुकस्य च महातेजाः सारणस्य च धीमतः ॥
तथा चेन्द्रजितो वेश्म ददाह हरियूथपः ॥ १० ॥
जम्बुमालेः सुमालेश्च ददाह भवनं ततः ॥ ११ ॥
रश्मिकेतोश्च भवनं सूर्यशत्रोस्तथैव च ॥ ह्रस्वकर्णस्य दंष्ट्रस्य रोमशस्य च रक्षसः ॥ १२ ॥
युद्धोन्मत्तस्य मत्तस्य ध्वजग्रीवस्य रक्षसः ॥ विद्युज्जिह्वस्य घोरस्य तथा हस्तिमुखस्य च ॥ १३ ॥
करालस्य पिशाचस्य शोणिताक्षस्य चैव हि ॥ कुम्भकर्णस्य भवनं मकराक्षस्य चैव हि ॥ १४ ॥
यज्ञशत्रोश्च भवनं ब्रह्मशत्रोस्तथैव च ॥ नरान्तकस्य कुम्भस्य निकुम्भस्य दुरात्मनः ॥ १५ ॥
वर्जयित्वा महातेजा विभीषणगृहं प्रति ॥ क्रममाणः क्रमेणैव ददाह हरिपुङ्गवः ॥ १६ ॥
तेषुतेषु महार्हेषु भवनेषु महायशाः ॥ गृहेष्वृद्धिमतामृद्धिं ददाह स महाकपिः ॥ १७ ॥
सर्वेषां समतिक्रम्य राक्षसेन्द्रस्य वीर्यवान् ॥ आससादाथ लक्ष्मीवान्रावणस्य निवेशनम् ॥ १८ ॥
ततस्तस्मिन्गृहे मुख्ये नानारत्नविभूषिते ॥ मेरुमन्दरसंकाशे सर्वमङ्गलशोभिते ॥ १९ ॥
प्रदीप्तमग्निमुत्सृज्य लाङ्गूलाग्रे प्रतिष्ठितम् ॥ ननाद हनुमान्वीरो युगान्तजलदो यथा ॥ २० ॥
श्वसनेन च संयोगादतिवेगो महाबलः ॥ कालाग्निरिव जज्वाल प्रावर्धत हुताशनः ॥ २१ ॥
प्रदीप्तमग्निं पवनस्तेषु वेश्मस्वचारयत् ॥ अभूच्छ्वसनसंयोगादतिवेगो हुताशनः ॥ २२ ॥
तानि काञ्चनजालानि मुक्तामणिमयानि च ॥ भवनान्यवशीर्यन्त रत्नवन्ति महान्ति च ॥ २३ ॥
तानि भग्नविमानानि निपेतुर्वसुधातले ॥ भवनानीव सिद्धानामंबरात्पुण्यसंक्षये ॥ २४ ॥

कृते सतीति शेषः ॥ ४ ॥ केनोपायेनेदं सुकरमित्याशङ्क्य तमाह—योहीति ॥ यः अग्निः । अतिशीतलतया मम महोपकारं कृतवान् अस्य संतर्पणं न्याय्यमित्यर्थः ॥ ५ ॥ अत्र बन्धविस्रंसनाय पूर्वं तनुसंकोचे कृतेपि कार्यार्थमग्निवर्तिः स्थापितेति बोध्यं । सविद्युदिव तोयद इति सर्वतआवृत्यसञ्चारे दृष्टान्तः ॥ ६–९ ॥ वज्रदंष्ट्रस्येत्यादि सार्धश्लोकः ॥ १० ॥ जम्बुमालेरित्यर्धं ॥ ११ ॥ रश्मिकेतोरित्यादिपञ्चश्लोकी ॥ १२—१५ ॥ प्रतिवर्जयित्वेति संबन्धः ॥ १६ ॥ भवनेष्विति गृहविशेषणं समृद्धिमत्परं । ऋद्धिं मणिमुक्ताप्रवालादिकां ॥ १७—१८ ॥ सर्वमङ्गलशोभिते सर्वमङ्गलद्रव्ययुक्ते ॥ १९—२० ॥ श्वसनेनेति । पूर्वं रावणादिभीतावश्यनिलौ इदानीं राक्षसक्षयं देवबलोदयं च प्रत्यासन्नं विदित्वा निश्शङ्कावभूतामिति

योमयाकृतःश्रमः सत्वल्पेनयत्नेन स्वल्पयत्नेनसाध्येनकरिष्यमाणलङ्कादाहेन सफलोभविष्यति ॥ ४ ॥ ति० तोयदः सन्ध्यातोयदः । हनुमतोरक्तवर्णत्वात् ॥ ६ ॥ ति० प्रहस्तस्यप्रधानमन्त्रित्वादादौतद्गृहेग्निप्रक्षेपः । प्रथमंतत्संभावनस्यौचित्यात् ॥ ८ ॥ स० कालानलशिखोपमं हनुमल्लाङ्गूलसंसर्गमाहात्म्येनजलाद्यशाम्यज्ज्वालत्वेनैतदुपमता ॥ ९ ॥ स० प्रतिगृहंक्रमेणक्रममाणइत्यन्वयः । विभीषणगृहंवर्जयित्वा । अनेनविभीषणसाधुत्वमिवअन्योन्यसंलग्नतायामपिसद्मनांदाहतदभावयोर्हनुमदिच्छानुसारिप्रवृत्तिरग्नेश्चद्यो-

[पा०] १ क. ग. घ. सर्वशः. २ ङ. झ. ट. तत्रविनिक्षिप्य. क.—घ. च. छ. तत्रैव. ३ ग. ङ.—ट. विशालस्य. ४ क. ग. ङ.—ट. महात्मनः. ५ ग. महाबाहुः. ६ घ. राक्षसानांच. ७ ङ—झ. ट. नानामङ्गल. ८ क. संदीप्तःप्रावर्धत.

संजज्ञे तुमुलः शब्दो राक्षसानां प्रधावताम् ॥ स्वगृहस्य परित्राणे भग्नोत्साहगतश्रियाम् ॥
नूनमेषोऽग्निरायातः कपिरूपेण हा इति ॥ २५ ॥
क्रन्दन्त्यः सहसा पेतुस्तनन्धयधराः स्त्रियः ॥ काश्चिदग्निपरीतेभ्यो हर्म्येभ्यो मुक्तमूर्धजाः ॥ २६ ॥
पतन्त्यो रेजिरेऽभ्रेभ्यः सौदामिन्य इवाम्बरात् ॥ २७ ॥
वज्रविद्रुमवैदूर्यमुक्ताराजतसंहितान् ॥ विचित्रान्भवनान्धातून्स्यन्दमानान्ददर्श सः ॥ २८ ॥
नाग्निस्तृप्यति काष्ठानां तृणानां हरियूथपः ॥ नाग्नेर्नापि विशस्तानां राक्षसानां वसुन्धरा ॥ २९ ॥
क्वचित्किंशुकसंकाशाः क्वचिच्छालमलिसन्निभाः ॥ क्वचित्कुङ्कुमसंकाशाः शिखा वह्नेश्चकाशिरे ॥ ३० ॥
हनूमता वेगवता वानरेण महात्मना ॥ लङ्कापुरं प्रदग्धं तद्रुद्रेण त्रिपुरं यथा ॥ ३१ ॥

ततस्तु लङ्कापुरपर्वताग्रे समुत्थितो भीमपराक्रमोऽग्निः ॥
प्रसार्य चूडावलयं प्रदीप्तो हनूमता वेगवता विसृष्टः ॥ ३२ ॥
युगान्तकालानलतुल्यवेगः समारुतोऽग्निर्ववृधे दिविस्पृक् ॥
विधूमरश्मिर्भवनेषु सक्तो रक्षःशरीराज्यसमर्पितार्चिः ॥ ३३ ॥

भावः ॥ २१—२४ ॥ स्वगृहस्य परित्राणे भग्नोत्साहगतश्रियामिति पाठः । स्वगृहस्य परित्राणे भग्नोत्साहोर्जितश्रियामिति पाठे उत्साहश्च ऊर्जितश्रीश्च उत्साहोर्जितश्रियौ भग्ने उत्साहोर्जितश्रियौ येषामिति विग्रहः । स्वगृहस्य परित्राणे भग्नोत्साहानां श्रीमतां राक्षसानामिति वार्थः । हा इति " निपात एकाजनाङ् " इति प्रकृतिभावः ॥ २५ ॥ काश्चित् स्त्रियः हर्म्येभ्यः पेतुरिति संबन्धः । सुकेशवंश्यानां जननमात्रे रुद्रेण मातृतुल्यत्ववरप्रदानेपि तदितरेषु तदभावात् स्तनन्धयधरत्वं । अन्यजातीयाश्च राक्षसास्तत्र सन्त्येव ॥ २६ ॥ अम्बरात् पतन्त्यः अभ्रेभ्यो मेघेभ्यः पतन्त्यः सौदामिन्यः तडित इव रेजिरे ॥ २७ ॥ भवनानिति पुंल्लिङ्गत्वमार्षं । धातून् सुवर्णादीन् । " धातुस्तु गैरिके स्वर्णे " इति दर्पः । स्यन्दमानान् स्यन्दतः । अग्नितप्तत्वेन द्रवीभूतस्वर्णादीनित्यर्थः ॥ २८ ॥ काष्ठानां तृणानां चेति संबन्धसामान्ये षष्ठी । काष्ठैस्तृणैश्चेत्यर्थः । " पूरणगुण— " इत्यादिना षष्ठी वा । अग्निः काष्ठैस्तृणैश्च न तृप्यति । हरियूथपः अग्नेः न तृप्यति अग्निना न तृप्यति । अग्निप्रक्षेपणेन न तृप्यतीत्यर्थः । एवं वसुन्धराविशस्तानां राक्षसानां विशस्तैः राक्षसैः । न तृप्यतीति योज्यं । अनेन राक्षसशवाकीर्णा भूरभूदित्यर्थः ॥ २९ ॥ शिखाः ज्वालाः ॥ ३० ॥ ननु एतावत्पर्यन्तमल्पबलतयास्थितस्य हनुमतः कथमेतादृशी शक्तिरित्यत्राह—रुद्रेण त्रिपुरं यथेति । " विष्णुरात्मा भगवतो भवस्यामिततेजसः । तस्माद्वनुर्ज्यासंस्पर्शं स विषेहे महेश्वरः " इत्युक्तरीत्या विष्णवाप्यायिततेजसा रुद्रेण त्रिपुरं यथा दग्धं तथानेनेति भावः ॥ ३१ ॥ लङ्कापुरपर्वताग्रे लङ्कापुराधारत्रिकूटशिखरे । तद्वर्तित्वात्तस्यास्तथानिर्देशः । पर्वताग्रस्थलङ्कापुर इति परनिपातो वा । चूडावलयं ज्वालाजालमित्यर्थः । तत् प्रसार्य । विस्तार्य । प्रदीप्तः विसृष्टः । गृहेष्विति शेषः ॥ ३२ ॥ दिविस्पृक् अभ्रंलिहः " हनुभ्यां ङेरलुग्वक्तव्यः " इति सप्तम्या अलुक् । रक्षश्शरीराज्यसमर्पितार्चिः

लते ॥ १६ ॥ रामानु० नाग्निरिति । " तृणानांचयथातथा । हनुमान्राक्षसेन्द्राणांवधेकिंचिन्नतृप्यति । नहनूमद्विशस्तानांराक्षसानांवसुन्धरा " इतिपाठः ॥ स० यथाग्निर्नतृप्यति तथा हनुमान्राक्षसानांवह्निनावधेसतिकिंचिन्नतृप्यति स्वल्पंवानतृप्यति यद्वा एवंबहुवधेसत्यपिकिंचिदिदमितिनतृप्यति ॥ शि० यथाकाष्ठादीनां दाहेहेतिशेषः । अग्निःकिञ्चिन्नतृप्यति । तथा राक्षसेन्द्राणांवधेहनुमान्नतृप्यति । सकलराक्षसवधमिच्छतीत्यर्थः । तेनसीतादुःखदर्शनासहिष्णुत्वंव्यञ्जितं । हनूमद्विशस्तानांराक्षसानां धारणे इतिशेषः । वसुन्धराचनतृप्यति । निहतसर्वराक्षसधारणमाकाङ्क्षतीत्यर्थः । सेनपतिवियोगजनितस्वसुतादुःखहेतुकदुःखाक्रान्तत्वं

[पा०] १ ङ. च. ज.—ट, स्वेस्वेगृहपरित्राणे. २ क. च. झ. ञ. ट. भग्नोत्साहोज्झितश्रियां. ३ क. घ. ङ. झ. ट. परीताङ्गो. ४ घ. संनिभान्. ५ च.—ट. तृणानांचयथातथा. एतदनन्तरं क.—घ. च. झ. ट. पाठेषु हनूमान्राक्षसेन्द्राणां वधेकिंचिन्नतृप्यति. इत्यर्धमधिकंदृश्यते. ६ च.—ट, नहनूमद्विशस्तानां. ७ छ. झ. ट, वेगवतोपसृष्टः. ८ ङ.—ट. तुल्यरूपः. ९ घ. गंगनेषु.

[सं तामत्यर्थतो वह्निर्लङ्कां राक्षससंकुलाम् ॥ ज्वालामालापरिक्षेपैरदहन्मारुतात्मजः ॥ ३४ ॥
तेन शब्देन वित्रस्ता धर्षितास्तेन चाग्निना ॥ अभिपेतुस्तदा घोरा हनूमन्तं निशाचराः ॥ ३५ ॥
तं प्रदीप्तैश्च शूलाग्रैः प्रासैः खड्गैः परश्वधैः ॥ हनूमन्तं महावेगैरक्षिपन्नैर्ऋतर्षभाः ॥ ३६ ॥
ते राक्षसा भीमबला नानाप्रहरणान्विताः ॥ निहत्य च स तांस्तत्र दिवमेवोत्पपात ह ॥ ३७ ॥
स च विक्रम्य सहसा संक्रामंश्च गृहाद्गृहम् ॥ लङ्कामादीपयामास वायुपुत्रः प्रतापवान् ॥ ३८ ॥
स लाङ्गूलोपसक्ताग्निर्मुक्तो मृत्युगृहादिव ॥ लङ्कां पर्यदहत्कृत्स्नां खे ग्रहः संपतन्निव ॥ ३९ ॥
तोरणेषु गवाक्षेषु रम्येषु शिखरेषु च ॥ तिष्ठन्ति स्म प्रपश्यन्ति राक्षसाः प्लवगोत्तमम् ॥ ४० ॥

हुताशनज्वालसमावृता सा हतप्रवीरा हतसर्वशोभना ॥
हनूमतः क्रोधबलाभिभूता बभूव कालोपहतेव लङ्का ॥ ४१ ॥
ससंभ्रमत्रस्तविशस्तराक्षसां समुज्वलज्ज्वालहुताशनाङ्किताम् ॥
ददर्श लङ्कां हनुमान्महामनाः स्वयंभुवः कोपहतामिवावनिम् ॥ ४२ ॥
गृहाग्र्यशृङ्गाग्रतले विचित्रे प्रतिष्ठितो वानरराजसिंहः ॥
प्रदीप्तलाङ्गूलकृतार्चिमाली व्यराजतादित्य इवार्चिमाली ॥ ४३ ॥]
आदित्यकोटीसदृशः सुतेजा लङ्कां समाप्तां परिवार्य तिष्ठन् ॥
शब्दैरनेकैरशनिप्ररूढैर्भिन्दन्निवाण्डं प्रबभौ महाग्निः ॥ ४४ ॥
तत्राम्बरादग्निरतिप्रवृद्धो रूक्षप्रभः किंशुकपुष्पचूडः ॥
निर्वाणधूमाकुलराजयश्च नीलोत्पलाभाः प्रचकाशिरेऽभ्राः ॥ ४५ ॥
वज्री महेन्द्रस्त्रिदशेश्वरो वा साक्षाद्यमो वा वरुणानिलो वा ॥
रुद्रोऽग्निरर्को धनदश्च सोमो न वानरोयं स्वयमेव कालः ॥ ४६ ॥
किं ब्रह्मणः सर्वपितामहस्य सर्वस्य धातुश्चतुराननस्य ॥
इहागतो वानररूपधारी रक्षोपसंहारकरः प्रकोपः ॥ ४७ ॥

रक्षश्शरीराण्येवाज्यानि तैस्समर्पितार्चिः उत्थापितज्वालः ॥ ३३—४३ ॥ समाप्तां निःशेषां । अशनिप्ररूढैः अशनिवन्निष्ठुरैः । अण्डं ब्रह्माण्डं ॥ ४४ ॥ अम्बरात् अम्बरपर्यन्तं । किंशुकपुष्पचूडः तत्तुल्यशिखः । निर्वाणधूमाकुलराजयः पूर्वपूर्वदग्धभवनाग्निनिर्वाणसमयोत्थितधूमैर्व्याप्तपङ्क्तयः । अतएव नीलोत्पलाभाः निर्वाणधूमानां नीलवर्णत्वादितिभावः । अभ्राः मेघाः । पुँल्लिङ्गत्वमार्षं ॥४५॥ अथ रक्षोवचनं—वज्रीत्यादि ॥ महेन्द्रः । वज्रीत्यादिविशेषणं सामर्थ्यविशेषद्योतनार्थं । उत्तरत्राप्येवमेवगतिः । यमकालयोर्मूर्तिभेदान्नपुनरुक्तिः । रक्षोपसंहारकरइत्यत्र आर्षस्सलोपः । प्रकोपः प्रकोपकृतमूर्तिविशेषः ॥४६॥ किं वैष्णवमिति । अत्राद्यो वाशब्दोवधारणे । "वा स्याद्धिकल्पोपमयोरेवार्थे चसमुच्चये " इतिविश्वः । द्वितीयो वितर्के । अनन्तं त्रिविधपरिच्छेदरहितं । अव्यक्तं चक्षुराद्यगोचरं । अचिन्त्यं केवलमनसोप्यविषयं ।

तस्यास्सूचितं ॥ २९ ॥ **ती०** सतामिति । वह्निः ज्वालामालापरिक्षेपैः ज्वालासमूहानांप्रसारणैः । लङ्कामत्यर्थमदहदितिसंबन्धः ॥३४॥ **ती०** सः हनुमान् ॥३७॥ **ती०** सचेति । संक्रामन् गच्छन् ॥ ३८ ॥ **ती०** सइति । लाङ्गूलोपसक्ताग्निः लाङ्गूलोत्थितोग्निः । मृत्युगृहान्मुक्तइवतथाऽतिभीकरइत्यर्थः ॥ ३९ ॥ **ती०** हुताशनेति । कालोपहतेव प्रलयकालोपहतेव ॥ ४१ ॥ **शि०** गृहाग्र्यशृङ्गाग्रतले गृहाग्र्याणां गृहश्रेष्ठानां शृङ्गाग्र्यतले परप्रासादभूमौ । प्रतिष्ठितः अर्चिमालीआदित्यइव प्रदीप्तलाङ्गूलकृतार्चिमालीवानरराजसिंहः व्यराजत । अतएव निर्देशादर्चिशब्दोप्यस्तीतिप्रतीयते ॥ ४३ ॥

[पा०] १ सतामत्यर्थतोवह्निरित्यादयः व्यराजतादित्यइवार्चिमालीत्यन्ताःश्लोकाः च. छ. ज. पाठेदृश्यन्ते. २ क. घ. ङ, झ. ञ. ट. समस्तां. ३ ख. घ. रशनिप्रकाशैः. ४ ङ—ट. लोकस्यधातुः.

किं वैष्णवं वा कपिरूपमेत्य रक्षोविनाशाय परं सुतेजः ॥
अनन्तमव्यक्तमचिन्त्यमेकं स्वमायया सांप्रतमागतं वा ॥ ४८ ॥
इत्येवमूचुर्बहवो विशिष्टा रक्षोगणास्तत्र समेत्य सर्वे ॥
सप्राणिसङ्घां सगृहां सवृक्षां दग्धां पुरीं तां सहसा समीक्ष्य ॥ ४९ ॥
ततस्तु लङ्का सहसा प्रदग्धा सराक्षसा साश्वरथा सनागा ॥
सपक्षिसङ्घा समृगा सवृक्षा रुरोद दीना तुमुलं सशब्दम् ॥ ५० ॥
हा तात हा पुत्रक कान्त मित्र हा जीवितं भोगयुतं सुपुष्पम् ॥
रक्षोभिरेवं बहुधा ब्रुवद्भिः शब्दः कृतो घोरतरः सुभीमः ॥ ५१ ॥
हुताशनज्वालसमावृता सा हतप्रवीरा परिवृत्तयोधा ॥
हनूमतः क्रोधबलाभिभूता बभूव शापोपहतेव लङ्का ॥ ५२ ॥
स संभ्रमत्रस्तविषण्णराक्षसां समुज्ज्वलज्ज्वालहुताशनाङ्किताम् ॥
ददर्श लङ्कां हनुमान्महामनाः स्वयंभुकोपोपहतामिवावनिम् ॥ ५३ ॥
भङ्क्त्वा वनं पादपरत्नसंकुलं हत्वा तु रक्षांसि महान्ति संयुगे ॥
दग्ध्वा पुरीं तां गृहरत्नमालिनीं तस्थौ हनूमान्पवनात्मजः कपिः ॥ ५४ ॥
त्रिकूटशृङ्गाग्रतले विचित्रे प्रतिष्ठितो वानरराजसिंहः ॥
प्रदीप्तलाङ्गूलकृतार्चिमाली व्यराजतादित्य इवांशुमाली ॥ ५५ ॥
स राक्षसांस्तान्सुबहूंश्च हत्वा वनं च भङ्क्त्वा बहुपादपं तत् ॥
विसृज्य रक्षोभवनेषु चाग्निं जगाम रामं मनसा महात्मा ॥ ५६ ॥
ततो महात्मा हनुमान्मनस्वी निशाचराणां क्षतकृत्कृतार्थः ॥
रामस्य नाथस्य जगत्त्रयाणां श्रीपादमूलं मनसा जगाम ॥ ५७ ॥
ततस्तु तं वानरवीरमुख्यं महाबलं मारुततुल्यवेगम् ॥
महामतिं वायुसुतं वरिष्ठं प्रतुष्टुवुर्देवगणाश्च सर्वे ॥ ५८ ॥
भङ्क्त्वा वनं महातेजा हत्वा रक्षांसि संयुगे ॥ दग्ध्वा लङ्कापुरीं रम्यां रराज स महाकपिः ॥ ५९ ॥

एकं अद्वितीयं । यद्वैष्णवं सुतेजः पूज्यं धाम तदेव स्वमायया स्वासाधारणयाश्चर्यशक्त्या । कपिरूपमेत्य सांप्रतमागतं वा इतियोजना । वैष्णवमिति स्वार्थे अण् । विष्णुशरीरान्तर्वर्तीतिवार्थः ॥ ४७ ॥ विशिष्टाः ज्ञानाधिकाः ॥ ४८—५० ॥ युगपदेव शोके दूराह्वाने च हाशब्दो वर्तते । हा जीवितमित्यत्र संबुद्ध्यलोप आर्षः । हतमितिशेषइत्यन्ये । "अभितःपरितस्समयानिकषाहाप्रतियोगे" इति द्वितीया वा । दरिद्रैरशोच्यत्वाद्विशिनष्टि—भोगयुतं सुपुण्यमिति । सुखाढ्यं सुकृतैकफलं चेत्यर्थः । घोरतरः तीव्रतरः । अतएव सुभीमः भयङ्करः ॥ ५१ ॥ परिवृत्तयोधा परिवृत्तभटा ॥ ५२ ॥ हनुमान्महामना इतिपाठः । हनुमान्महासेति पाठे विषमवृत्तं वा । स्वयंभुकोपोपहतां प्रलये भगवता दग्धामित्यर्थः ॥ ५३ ॥ रत्नशब्दः श्रेष्ठवाची । तस्थौ संकल्पितकार्यस्य परिसमाप्तत्वादुपरतोद्योगो भूदित्यर्थः ॥ ५४—५५ ॥ जगाम रामं मनसेति । कृतकृत्यत्वाद्रामं गन्तुमियेषेत्यर्थः ॥ ५६—५७ ॥ वरिष्ठमिति । बलवतामिति शेषः

रामानु० रराजसमहाकपिरित्यतःपरमुत्तरसर्गादिभूतो " लङ्कांसमस्तांसंदीप्य " इत्यर्धश्लोकःकेषुचित्कोशेषुप्रमादाल्लिखितः ॥ ५९ ॥ इतिचतुःपञ्चाशः सर्गः ॥ ५४ ॥

[पा०] १ ख. सुभृशंसुशब्दं. २ ङ. ञ. जीवितेशाङ्गहतं. ३ ख. द्रवद्भिः. ४ ङ. ञ. रोषोपहतां. ५ ग. महाद्रि. ६ अर्धश्लोकः क. घ. पाठयोर्दृश्यते.

तत्र देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ दृष्ट्वा लङ्कां प्रदग्धां तां विस्मयं परमं गताः ॥ ६० ॥
तं दृष्ट्वा वानरश्रेष्ठं हनुमन्तं महाकपिम् ॥ कालाग्निरिति सञ्चिन्त्य सर्वभूतानि तत्रसुः ॥ ६१ ॥
देवाश्च सर्वे मुनिपुङ्गवाश्च गन्धर्वविद्याधरनागयक्षाः ॥
भूतानि सर्वाणि महान्ति तत्र जग्मुः परां प्रीतिमतुल्यरूपाम् ॥ ६२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुःपञ्चाशः सर्गः ॥ ५४ ॥

पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

लङ्कायानिःशेषभस्मीभावावलोकनेन सीतायाअपिदाहसंभावनयाऽऽत्मधिक्कारपूर्वकंसशोकंबहुधाचिन्तयताहनुमतासिद्धचारणभाषणश्रवणादिना तस्यादाहाभावनिर्धारणेन हर्षाधिगमः ॥ १ ॥

लङ्कां समस्तां संदीप्य लाङ्गूलाग्निं महाबलः ॥ निर्वापयामास तदा समुद्रे हरिसत्तमः ॥ १ ॥
संदीप्यमानां विध्वस्तां त्रस्तरक्षोगणां पुरीम् ॥ अवेक्ष्य हनुमाँल्लङ्कां चिन्तयामास वानरः ॥ २ ॥
तस्याभूत्सुमहांस्त्रासः कुत्सा चात्मन्यजायत ॥ लङ्कां प्रदहता कर्म किंस्वित्कृतमिदं मया ॥ ३ ॥
धन्यास्ते पुरुषश्रेष्ठा ये बुद्ध्या कोपमुत्थितम् ॥ निरुन्धन्ति महात्मानो दीप्तमग्निमिवाम्भसा ॥ ४ ॥
क्रुद्धः पापं न कुर्यात्कः क्रुद्धो हन्याद्गुरूनपि ॥ क्रुद्धः परुषया वाचा नरः साधूनधिक्षिपेत् ॥ ५ ॥
वाच्यावाच्यं प्रकुपितो न विजानाति कर्हिचित् ॥ नाकार्यमस्ति क्रुद्धस्य नावाच्यं विद्यते क्वचित् ॥६॥
यः समुत्पतितं क्रोधं क्षमयैव निरस्यति ॥ यथोरगस्त्वचं जीर्णां स वै पुरुष उच्यते ॥ ७ ॥
धिगस्तु मां सुदुर्बुद्धिं निर्लज्जं पापकृत्तमम् ॥ अचिन्तयित्वा तां सीतामग्निदं स्वामिघातकम् ॥ ८ ॥
यदि दग्धा त्वियं लङ्का नूनमार्यापि जानकी ॥ दग्धा तेन मया भर्तुर्हितं कार्यमजानता ॥ ९ ॥
यदर्थमयमारम्भस्तत्कार्यमवसादितम् ॥ मया हि दहता लङ्कां न सीता परिरक्षिता ॥ १० ॥
ईषत्कार्यमिदं कार्यं कृतमासीन्न संशयः ॥ तस्य क्रोधाभिभूतेन मया मूलक्षयः कृतः ॥ ११ ॥
विनष्टा जानकी नूनं न ह्यदग्धः प्रदृश्यते ॥ लङ्कायां कश्चिदुद्देशः सर्वा भस्मीकृता पुरी ॥ १२ ॥

॥ ५८—६१ ॥ परामित्यस्य विवरणं—अतुल्यरूपामिति । अस्मिन्सर्गे एकपञ्चाशच्छ्लोकाः । ततो महालेति श्लोकः स राक्षसानिति श्लोकोक्तार्थकतया बहुकोशेष्वदर्शनाच्च प्रक्षिप्तः । बहुकोशेष्वेतत्सर्गसमाप्तिविपर्ययः उत्तरसर्गारम्भविपर्ययश्च दृश्यते ॥६२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुःपञ्चाशः सर्गः ॥ ५४ ॥

लाङ्गूलाग्निं समुद्रे निर्वापयामासेत्यन्वयः ॥१—२॥ कुत्सा निन्दा ॥ ३—८ ॥ जानक्यपि यदि दग्धेत्यन्वयः ॥ ९—१० ॥ इदं कार्यं अन्वेषणपूर्वकरावणनिलयपरिज्ञानसीतादर्शनतन्निवेदनरूपं महत्कार्यं । ईषत्कार्यं ईषदवशिष्टकार्यं । असमग्रप्रायमेवकृतमासीत् । रामनिवेदनमात्रावशेषं कृतमासीदित्यर्थः । किंत्विदानीं क्रोधाभिभूतेन क्रोधान्धेन । मया तस्य कार्यस्य । मूलक्षयःकृतः न संशयः । विफलीकृतमित्यर्थः ॥ ११ ॥ सीतानाशे तत्तथैव सएव तु कुत

ति० उक्तकुत्सितकार्यमूलंकोपएवेतिनिश्चित्यतद्रहितान्स्तौति—धन्याइति । दुःखातिशयादेवमहात्मपदपौनरुक्त्यंनदोषाय ॥४॥ ति० क्रुद्धःपापंनकुर्याद्यइतिपाठे क्रुद्धोयःकश्चित्पापंकुर्यान्न । नचिकाकुः । अपितुकुर्यादेव । अकरणमशक्यमेवेत्यर्थः । तदेवदर्शयति—क्रुद्धोहन्यादिति ॥५॥ शि० सीतामचिन्तयित्वा विस्मृत्य अन्यत्रानीतेत्यर्थः । अग्निदं अग्नयेददाति अग्निददातिव-

[पा०] १ ङ. ञ. ञ. ट. कामं. २ ङ. छ.—ञ. धन्याःखलुमहात्मानो. ३ च. ञ. ञ. ट. लङ्कात्रियंसर्वा.

यदि तद्विहतं कार्यं मम प्रज्ञाविपर्ययात् ॥ इहैव प्राणसंन्यासो ममापि ह्यद्य रोचते ॥ १३ ॥
किमग्नौ निपताम्यद्य आहोस्विद्वडवामुखे ॥ शरीरमाहो सत्त्वानां दद्मि सागरवासिनाम् ॥ १४ ॥
कथं हि जीवता शक्यो मया द्रष्टुं हरीश्वरः ॥ तौ वा पुरुषशार्दूलौ कार्यसर्वस्वघातिना ॥ १५ ॥
मया खलु तदेवेदं रोषदोषात्प्रदर्शितम् ॥ प्रथितं त्रिषु लोकेषु कपित्वमनवस्थितम् ॥ १६ ॥
धिगस्तु राजसंभावमनीशमनवस्थितम् ॥ ईश्वरेणापि यद्रागान्मया सीता न रक्षिता ॥ १७ ॥
विनष्टायां तु सीतायां तावुभौ विनशिष्यतः ॥ तयोर्विनाशे सुग्रीवः सबन्धुर्विनशिष्यति ॥ १८॥
एतदेव वचः श्रुत्वा भरतो भ्रातृवत्सलः ॥ धर्मात्मा सहशत्रुघ्नः कथं शक्ष्यति जीवितुम् ॥ १९ ॥
इक्ष्वाकुवंशे धर्मिष्ठे गते नाशमसंशयम् ॥ भविष्यन्ति प्रजाः सर्वाः शोकसंतापपीडिताः ॥ २० ॥
तदहं भाग्यरहितो लुप्तधर्मार्थसंग्रहः ॥ रोषदोषपरीतात्मा व्यक्तं लोकविनाशनः ॥ २१ ॥
इति चिन्तयतस्तस्य निमित्तान्युपपेदिरे ॥ पूर्वमप्युपलब्धानि साक्षात्पुनरचिन्तयत् ॥ २२ ॥
अथवा चारुसर्वाङ्गी रक्षिता स्वेन तेजसा ॥ न वशिष्यति कल्याणी नाग्निरग्नौ प्रवर्तते ॥ २३ ॥
नहि धर्मात्मनस्तस्य भार्यामिततेजसः ॥ स्वचारित्राभिगुप्तां तां स्प्रष्टुमर्हति पावकः ॥ २४ ॥
नूनं रामप्रभावेन वैदेह्याः सुकृतेन च ॥ यन्मां दहनकर्माऽयं नादहद्धव्यवाहनः ॥ २५ ॥
त्रयाणां भरतादीनां भ्रातृणां देवता च या ॥ रामस्य च मनःकान्ता सा कथं विनशिष्यति ॥२६॥
यद्वा दहनकर्माऽयं सर्वत्र प्रभुरव्ययः ॥ न मे दहति लाङ्गूलं कथमार्यां प्रधक्ष्यति ॥ २७ ॥
पुनश्चाचिन्तयत्तत्र हनुमान्विस्मितस्तदा ॥ हिरण्यनाभस्य गिरेर्जलमध्ये प्रदर्शनम् ॥ २८ ॥
तपसा सत्यवाक्येन अनन्यत्वाच्च भर्तरि ॥ अपि सा निर्दहेदग्निं न तामग्निः प्रधक्ष्यति ॥ २९ ॥
स तथा चिन्तयंस्तत्र देव्या धर्मपरिग्रहम् ॥ शुश्राव हनुमान्वाक्यं चारणानां महात्मनाम् ॥ ३० ॥
अहो खलु कृतं कर्म दुष्करं हि हनूमता ॥ अग्निं विसृजताऽभीक्ष्णं भीमं राक्षसवेश्मनि ॥ ३१ ॥

इत्यत्राह—विनष्टेति ॥ १२ ॥ विहतं यदि सीतानाशाद्विनष्टं यदि । प्राणसंन्यासः प्राणत्यागः ॥ १३—१५ ॥ कपित्वं कापेयं । अनवस्थितं चापलात्मकमित्यर्थः ॥ १६ ॥ राजसंभावं रजोगुणनिबन्धनचेष्टाविशेषं । अनीशं नियामकरहितं । स्वतन्त्रमिति यावत् । अनवस्थितं कुर्वत्स्वभावं । ईश्वरेणापि रक्षणसमर्थेनापि । रागात् मात्सर्यात् । "रागोनुरागे मात्सर्ये रक्तवर्णे कुसुम्भके" इतियादवः । यद्वा रागात् रजोगुणात् । आग्रहादिति यावत् ॥१७—२१॥ निमित्तान्युपपेदिरे शुभशंसिनिमित्तानि प्रादुर्बभूवुरित्यर्थः ॥ २२ ॥ एवं लोकदृष्ट्याऽनर्थमाशङ्क्य तत्त्वदृष्ट्या समाधत्ते—अथवेत्यादिना ॥ नाग्निरग्नौ प्रवर्तते । अग्निरग्निं न दहतीत्यर्थः ॥ २३—२४ ॥ दहनकर्मा भस्मीकरणस्वभावः । यत्प्रभावादयं मां

स्तुमात्रेक्षिपतिवासतं ॥ ८ ॥ ति० वडवामुखेअग्नावित्यन्वयः । दद्मि ददामि ॥ स० अग्नौ मन्निहितलङ्काग्नौ । वडवामुखे समुद्रान्तर्गतेवाऽग्नौ । वडवामुखेऽग्नावित्यन्वयेनिरर्थकताऽऽहोस्वितः । यदिप्राचीनप्राणन्यासेन समुच्चयायतदित्युच्यतेतर्हिकिमित्यस्यपूर्वार्धेविकल्पसूचकत्वेनाहोस्विदित्यस्योत्तरार्धेऽन्वयस्यवक्तव्यतयाआहोइत्यस्यवैयर्थ्यस्यदुर्वारत्वापत्तेः ॥ १३ ॥ स० तदेव कपित्वं सीतयापूर्वोक्तं । अनवस्थितं अव्यवस्थितं ॥ १६ ॥ स० त्रयाणांभरतादीनां । भरतस्यराज्येऽधिकृतत्वात्प्रथमतउक्तिः । तज्ज्यैष्ठ्यपक्षे नानुपपत्तिः । देवता तद्वत्पूज्या ॥ २६ ॥ ती० देवीप्रभावात्सिन्धौमद्विश्रान्तिनिमित्तगिरिदर्शनहेतुनापिदेवीमग्निर्नदहतीत्याह—पुनश्चेति ॥ तत्र तस्मिन्समये । विस्मितोहनुमान् जलमध्ये सागरान्तर्देशे । हिरण्यनाभस्यगिरेःप्रदर्शनं पुनरचिन्तयत् । एतेन पर्वतादीनामपिसर्वेषांरामाज्ञावशवर्तित्वंसूचितं । तेन सीतायानाग्नेर्भीतिरितिसूचितं ॥ २८ ॥ स० सहनुमान् । धारकत्वाद्गोर्भगवान्रामः । तत्परिग्रहं भार्यां । चिन्तयन् देव्याविषयेचारणानां शुश्राव । वचइतिशेषः । धर्मपरिग्रहं रक्षकधर्मसंपत्तिंवा ॥ ३० ॥

[पा०] १ झ. ञ. शरीरमिह. २ ग. च. छ. झ. ञ. ट. मसंशयः. ३ ङ. झ. ञ. ट. असौविनिर्दहेत्. ग. अथसा. ४ झ. ञ. ट. हनुमांस्तत्र.

प्रपलायितरक्षस्त्रीबालवृद्धसमाकुला ॥ जनकोलाहलाध्माता क्रन्दन्तीवाद्रिकन्दरे ॥ ३२ ॥
दग्धेयं नगरी सर्वा साट्टप्राकारतोरणा ॥ जानकी न च दग्धेति विस्मयोऽद्भुत एव नः ॥ ३३ ॥
इति शुश्राव हनुमान्वाचं तामृतोपमाम् ॥ बभूव चास्य मनसो हर्षस्तत्कालसंभवः ॥ ३४ ॥
स निमित्तैश्च दृष्टार्थैः कारणैश्च महागुणैः ॥ ऋषिवाक्यैश्च हनुमानभवत्प्रीतमानसः ॥ ३५ ॥
ततः कपिः प्राप्तमनोरथार्थस्तामक्षतां राजसुतां विदित्वा ॥
प्रत्यक्षतस्तां पुनरेव दृष्ट्वा प्रतिप्रयाणाय मतिं चकार ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

षट्पञ्चाशः सर्गः ॥ ५६ ॥

हनुमता शिंशुपामूलमेत्य सीतांप्रत्यभिवादनसमाश्वासनसमापृच्छनपूर्वकं सागरोत्तरतीरगमनायारिष्टगिरिसमारोहणम् ॥ १ ॥ तथा स्वचरणनिपीडनात्तद्गिरिवरस्य रसातलप्रवेशनेनततस्समुत्पतनम् ॥ २ ॥

ततस्तु शिंशुपामूले जानकीं पर्यवस्थिताम् ॥ अभिवाद्याब्रवीद्दिष्ट्या पश्यामि त्वामिहाक्षताम् ॥ १ ॥
ततस्तं प्रस्थितं सीता वीक्षमाणा पुनः पुनः ॥ भर्तृस्नेहान्वितं वाक्यं हनुमन्तमभाषत ॥ २ ॥
[यदि त्वं मन्यसे तात वसैकाहमिहानघ ॥ क्वचित्सुसंवृते देशे विश्रान्तः श्वो गमिष्यसि ॥ ३ ॥
मम चैवाल्पभाग्यायाः सांनिध्यात्तव वानर ॥ शोकस्यास्यापमेयस्य मुहूर्तं स्यादपि क्षयः ॥ ४ ॥
गते हि हरिशार्दूल पुनः संप्राप्तये त्वयि ॥ प्राणेष्वपि न विश्वासो मम वानरपुङ्गव ॥ ५ ॥
अदर्शनं च ते वीर भूयो मां दारयिष्यति ॥ दुःखाद्दुःखतरं प्राप्तां दुर्मनश्शोककर्शिताम् ॥ ६ ॥
अयं च वीर संदेहस्तिष्ठतीव ममाग्रतः ॥ सुमहत्सु सहायेषु हर्यृक्षेषु महाबलः ॥ ७ ॥
कथं नु खलु दुष्पारं संतरिष्यन्ति सागरम् ॥ तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ॥ ८ ॥
त्रयाणामेव भूतानां सागरस्यातिलङ्घने ॥ शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ॥ ९ ॥
तदत्र कार्यनिर्बन्धे समुत्पन्ने दुरासदे ॥ किं पश्यसि समाधानं त्वं हि कार्यविशारदः] ॥ १० ॥
काममस्य त्वमेवैकः कार्यस्य परिसाधने ॥ पर्याप्तः परवीरघ्न यशस्स्ते बलोदयः ॥ ११ ॥

नादहत् स तामेव कथं दहतीत्यर्थः ॥ २५—३२ ॥ विस्मयोद्भुत एव न इति। अयं विस्मयः अद्भुत एव। अद्भुतमाश्चर्यं। कल्याणं चेत्युणादिवृत्तिः। यद्वा विस्मयः आश्चर्यं अद्भुतः अभूतपूर्वइत्यर्थः। अद्भुतः अद्भुतरसः। तस्य स्थायीभावोविस्मयः। तथाच अद्भुत एव अद्भुतरसतां प्राप्त एव। महानयं विस्मयः। न विस्मयमात्र इत्यर्थः ॥ ३३—३४ ॥ निमित्तैः दक्षिणाक्षिस्पन्दादिभिः। दृष्टार्थैः दृष्टफलसंवादैः। कारणैः सीतापातिव्रत्यरामप्रभावादिभिः। ऋषिवाक्यैः चारणवाक्यैः ॥ ३५ ॥ पूर्वं चारणवाक्यैर्विदित्वा पुनः प्रत्यक्षं दृष्ट्वा ततः प्रतिप्रयाणाय मतिं चकार। प्रतियास्यामीति संकल्पितवानित्यर्थः ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

प्रस्थितं प्रस्थानोद्युक्तं ॥ २—१० ॥ वनभङ्गाक्षवधादिना हनुमतश्शक्तिं विज्ञाय असौ रामाय निवेद्य स्वयमेव सकलराक्षससंहारपूर्वकं मम नेता मा भूदित्यभिप्रायेणाह—काममिति ॥ अस्य

स० प्राप्तमनोरथार्थः प्राप्तसीतादर्शनरूपमनोरथफलः ॥ ३६ ॥ इतिपञ्चपञ्चाशःसर्गः ॥ ५५ ॥

[पा०] १ ग. ङ. झ. ञ. ट. लङ्घा. २ घ. विस्मयोदात्तभाषिणां. ३ अयंश्लोकः ङ. च. छ. झ. ञ. ट. पाठेषुदृश्यते. ४ झ. स्नेहान्विता. ५ यदित्वंमन्यसेइत्यादयः त्वंहिकार्यविशारदइत्यन्ताःश्लोकाः छ. झ. ञ. ट. पाठेषुदृश्यन्ते.

शरैः सुसंकुलां कृत्वा लङ्कां परबलार्दनः ॥ मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥ १२ ॥
तद्यथा तस्य विक्रान्तमनुरूपं महात्मनः ॥ भवत्याहवशूरस्य तथा त्वमुपपादय ॥ १३ ॥
तदर्थोपहितं वाक्यं प्रश्रितं हेतुसंहितम् ॥ निशम्य हनुमांस्तस्या वाक्यमुत्तरमब्रवीत् ॥ १४ ॥
[[3]देवि हर्यृक्षसैन्यानामीश्वरः प्लवतांवरः ॥ सुग्रीवः सत्वसंपन्नस्तवार्थे कृतनिश्चयः ॥ १५ ॥
स वानरसहस्राणां कोटीभिरभिसंवृतः ॥ क्षिप्रमेष्यति वैदेहि सुग्रीवः प्लवगाधिपः ॥ १६ ॥
तौ च वीरौ नरवरौ सहितौ रामलक्ष्मणौ ॥ आगम्य नगरीं लङ्कां सायकैर्विधमिष्यतः ॥ १७ ॥
सगणं राक्षसं हत्वा नचिराद्रघुनन्दनः ॥ त्वामादाय वरारोहे स्वां पुरीं प्रतियास्यति ॥ १८ ॥
समाश्वसिहि भद्रं ते भव त्वं कालकाङ्क्षिणी ॥ क्षिप्रं द्रक्ष्यसि रामेण निहतं रावणं रणे ॥ १९ ॥
निहते राक्षसेन्द्रे च सपुत्रामात्यबान्धवे ॥ त्वं समेष्यसि रामेण शशाङ्केनेव रोहिणी] ॥ २० ॥
क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्रवरैर्वृतः ॥ यस्ते युधि [5]विजित्यारीञ्शोकं व्यपनयिष्यति ॥ २१ ॥
एवमाश्वास्य वैदेहीं हनुमान्मारुतात्मजः ॥ गमनाय मतिं कृत्वा वैदेहीमभ्यवादयत् ॥ २२ ॥
[[6]राक्षसान्प्रवरान्हत्वा नाम विश्राव्य चात्मनः ॥ समाश्वास्य च वैदेहीं दर्शयित्वा परं बलम् ॥२३॥
नगरीमाकुलां कृत्वा वञ्चयित्वा च रावणम् ॥ दर्शयित्वा बलं घोरं वैदेहीमभिवाद्य च ॥
प्रतिगन्तुं मनश्चक्रे पुनर्मध्येन सागरम् ॥ २४ ॥]
ततः स कपिशार्दूलः स्वामिसंदर्शनोत्सुकः ॥ आरुरोह गिरिश्रेष्ठमरिष्टमरिमर्दनः ॥ २५ ॥
तुङ्गपद्मकजुष्टाभिर्नीलाभिर्वनराजिभिः ॥ सोत्तरीयमिवाम्भोदैः शृङ्गान्तरविलम्बिभिः ॥ २६ ॥
बोध्यमानमिव प्रीत्या दिवाकरकरैः [7]शुभैः ॥ उन्मिषन्तमिवोद्भूतैर्लोचनैरिव धातुभिः ॥ २७ ॥
तोयौघनिस्स्वनैर्मन्द्रैः प्राधीतमिव [8]पर्वतम् ॥ प्रगीतमिव विस्पष्टैर्नानाप्रस्रवणस्वनैः ॥ २८ ॥
देवदारुभिरुत्युच्चैरूर्ध्वबाहुमिव स्थितम् ॥ प्रपातजलनिर्घोषैः [9]प्राकृष्टमिव सर्वतः ॥ २९ ॥

कार्यस्य सर्वराक्षसवधपूर्वकमत्प्रापणरूपकार्यस्य । बलोदयः सत्त्वप्रकर्षः । सैन्योत्थापनं वा । ते यशस्यः यशस्करः । नतु रामस्येति भावः ॥ ११ ॥ तर्हि रामस्य किं यशस्करमित्यत्राह—शौरैरिति । तत् स्वपराक्रमेण मन्नयनं । तस्य काकुत्स्थस्य । सदृशं । एतदेव ममाभिलषितं । अन्यथा मे कथं वीरपत्नीत्वमिति भावः ॥ १२ ॥ तच्च त्वदायत्तमेवेत्याह—तद्यथेति ॥ विक्रान्तं विक्रमणं ॥ १३–२४ ॥ अरिष्टं अरिष्टाख्यं ॥ २५ ॥ अथैनं गिरिं चतुर्दशधोत्प्रेक्षते—तुङ्गेत्यादिना ॥ पद्मकाः पद्मवर्णवृक्षाः । परिधानालेख्यस्थानीयतया विशेषणमिति बोध्यं । सपरिधानमिव स्थितमितिशेषः । उत्तरार्धे सोत्तरीयत्वोत्प्रेक्षणात् ॥ २६ ॥ शुभैः तरुणैः । करैः अंशुभिः हस्तैश्च । बोध्यमानमिव स्थितं । तत्र ज्ञापकमाह—उद्भूतैरिति । उद्भूतैः उद्गतैः । लोचनैरिव स्थितैः धातुभिः उन्मिषन्तं पश्यन्तमिव स्थितं ॥ २७ ॥ तोयौघनिःस्वनैः गिरिनदीघोषैः । मन्द्रैः गंभीरैः । प्राधीतमिव प्राध्येतुं प्रवृत्तमिव । आदिकर्मणि कर्तरि क्तः । अधीयानमिवेत्यर्थः । प्रस्रवणस्वनैः पर्वतमूलाद्वहिः प्रवहन्ति जलानि प्रस्रवणानि तेषां स्वनैः । प्रगीतमिव गातुं प्रवृत्तमिव गायन्तमिवेत्यर्थः । आदिकर्मणि कर्तरि क्तः ॥ २८ ॥ ऊर्ध्वबाहुमिवेति तपोविशेष उच्यते । प्रपातजलनिर्घोषैः प्रपाताः भृगवः । " प्रपातस्त्वतटो भृगुः " इत्यमरः । तेषां जलानि

ति० प्रपातजलनिर्घोषैः प्रपातेभ्यः भृगुदेशेभ्यः पतज्जलशब्दैः । प्राकृष्टमिव आरब्धाकोशमिव । सर्वत्रादिकर्मणिकर्तरिक्तः

[पा०] १ क. ग. तत्त्वमेवोपपादय. २ झ. ञ. ट. हनुमान्वीरो. ३ देविहर्यृक्षसैन्यानामित्यादयः शशाङ्केनेवरोहिणीत्यन्ताःश्लोकाः झ. ञ. ट. पाठेषुदृश्यन्ते. ४ च.—ठ. प्रवरैर्युतः. ५ ख. ग. घ. झ. ट. विनिर्जित्यशोकं. ६ राक्षसान्प्रवरानित्यार्धपञ्चकं झ. ञ. ट. पाठेषु दृश्यते. ७ ख. ग. घ. सुखैः. ८ क.—घ. च.—ट. सर्वतः. ९ क. ग. च. छ. झ, ञ, ट. विस्पष्टनाना. १० ग. घ. च. झ. ञ. ट. रुद्भूतैः. ११ घ. प्रघुष्टमिव.

वेपमानमिव श्यामैः कम्पमानैः शरद्धनैः ॥ वेणुभिर्मारुतोद्धूतैः कूजन्तमिव कीचकैः ॥ ३० ॥
निश्श्वसन्तमिवामर्षाद्घोरैराशीविषोत्तमैः ॥ नीहारकृतगम्भीरैर्ध्यायन्तमिव गह्वरैः ॥ ३१ ॥
मेघपादनिभैः पादैः प्रक्रान्तमिव सर्वतः ॥ जृम्भमाणमिवाकाशे शिखरैरभ्रमालिभिः ॥ ३२ ॥
कूटैश्च बहुधाकीर्णैः शोभितं बहुकन्दरैः ॥ सालतालाश्वकर्णैश्च वंशैश्च बहुभिर्वृतम् ॥ ३३ ॥
लतावितानैर्विततैः पुष्पवद्भिरलंकृतम् ॥ नानामृगगणाकीर्णं धातुनिष्यन्दभूषितम् ॥ ३४ ॥
बहुप्रस्रवणोपेतं शिलासंचयसंकटम् ॥ महर्षियक्षगन्धर्वकिन्नरोरगसेवितम् ॥ ३५ ॥
लतापादपसंघातं सिंहाध्युषितकन्दरम् ॥ व्याघ्रसङ्घसमाकीर्णं स्वादुमूलफलद्रुमम् ॥ ३६ ॥
तमारुरोह हनुमान्पर्वतं पवनात्मजः ॥ रामदर्शनशीघ्रेण प्रहर्षेणाभिचोदितः ॥ ३७ ॥
तेन पादतलाक्रान्ता रम्येषु गिरिसानुषु ॥ सघोषाः समशीर्यन्त शिलाश्चूर्णीकृतास्ततः ॥ ३८ ॥
स तमारुह्य शैलेन्द्रं व्यवर्धत महाकपिः ॥ दक्षिणादुत्तरं पारं प्रार्थयँल्लवणाम्भसः ॥ ३९ ॥
अधिरुह्य ततो वीरः पर्वतं पवनात्मजः ॥ ददर्श सागरं भीमं मीनोरगनिषेवितम् ॥ ४० ॥
स मारुत इवाकाशं मारुतस्यात्मसंभवः ॥ प्रपेदे हरिशार्दूलो दक्षिणादुत्तरां दिशम् ॥ ४१ ॥
स तदा पीडितस्तेन कपिना पर्वतोत्तमः ॥ ररास सह तैर्भूतैः प्रविशन्वसुधातलम् ॥
कम्पमानैश्च शिखरैः पतद्भिरपि च द्रुमैः ॥ ४२ ॥
तस्योरुवेगोन्मथिताः पादपाः पुष्पशालिनः ॥ निपेतुर्भूतले रुग्णाः शक्रायुधहता इव ॥ ४३ ॥
कन्दरान्तरसंस्थानां पीडितानां महौजसाम् ॥ सिंहानां निनदो भीमो नभो भिन्दन्स शुश्रुवे ॥ ४४ ॥

तेभ्यः पतन्तो निर्झरा इत्यर्थः । तेषां निर्घोषैः । प्राक्रुष्टमिव आक्रोशन्तमिव । पूर्ववत् क्तः ॥ २९ ॥ शरदि ये घना भवन्ति ते शरद्घनाः । शरत्कालपुष्पिणस्सप्तच्छदादयः तैः शुभ्रीभूतैः । जरया कम्पमानमिव स्थितमित्यर्थः । शरद्घनैरितिपाठे बहुवार्षिकवृक्षैरित्यर्थः । शरवणैरिति वार्थः । तकारान्तोप्यस्ति । शरवणे जातस्य कृपाचार्यस्य शारद्वत इति नामदर्शनात् । कीचकैः कीचकाख्यैर्वेणुभिः । तदाहामरः—" वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः " इति ॥ ३० ॥ आशीविषोत्तमैः निश्श्वसन्तमिव सर्पश्रेष्ठनिश्श्वासैर्निश्श्वसन्तमिव । अमर्षात् हनुमति क्रोधादित्यर्थः । नीहारकृतगम्भीरैः नीहारपूर्णैः गम्भीरैश्च । गह्वरैः गुहाभिः ध्याननिरुद्धेन्द्रियस्थानीयैः । ध्यायन्तमिव स्थितं । निरुद्धेन्द्रियद्वारा ध्यानारूढमिवस्थितमित्यर्थः ॥ ३१ ॥ मेघपादनिभैः मेघावरोहनिभैः । पादैः प्रत्यन्तपर्वतैः । प्रक्रान्तमिव गन्तुमुद्युक्तमिव । पूर्ववत् क्तः । जृम्भमाणमिव गात्रभङ्गं कुर्वाणमिव । अभ्रमालिभिः मेघमालावद्भिः ॥ ३२ ॥ बहुधाकीर्णैः हनुमत्पादस्पर्शेन शिथिलैरित्यर्थः ॥ ३३ ॥ धातुनिष्यन्दः धातुस्रावः ॥ ३४—३५ ॥ लतापादपानां संघातो यस्मिन्निति व्यधिकरणबहुव्रीहिः ॥ ३६ ॥ रामदर्शनशीघ्रेण रामदर्शनत्वरावता ॥ ३७ ॥ चूर्णीकृतास्समशीर्यन्त । यथा चूर्णीकृता भवन्ति तथा समशीर्यन्तेत्यर्थः ॥ ३८ ॥ दक्षिणात् दक्षिणपारात् । प्रार्थयन् गन्तुमिति शेषः ॥ ३९—४० ॥ स हरिशार्दूल इति संबन्धः । पितृतुल्यवेगवत्त्वं सूचयति—मारुतस्येति ॥ ४१ ॥ तैर्भूतैः तत्रत्यजन्तुभिः ॥ ४२ ॥ रुग्णाः शीर्णा इति यावत् । शक्रायुधहताः वज्रहताः ॥ ४३ ॥ नभो भिन्दन् भिन्दन्निव । महत्तायां तात्पर्यं ॥ ४४ ॥

इत्याहुः ॥ २९ ॥ शरद्घनैः सप्तपर्णादिशारदवृक्षसंघैः ॥ ३० ॥ ति० धातुनिष्यन्दैः धातुनिर्गमैर्भूषितं ॥ ३४ ॥ शिलासंचयेन शिलासमूहेन संकटं नीरन्ध्रं ॥ ३५ ॥

[पा०] १ घ. मेघजालनिभैः. २ झ. सालतालैश्चकर्णैश्च. ३ झ. ट. गणैःकीर्णं. ४ क. घ. च. ज.—ट. संबाधं. ५ च.—ट. सिंहाधिष्ठित. ६ च. छ. झ. ञ. ट. व्याघ्रादिभिस्समाकीर्णं. ७ ग. फलोदकं. ८ च.—ट. भीमोरग. ९ छ.—ट. विविधैर्भूतैः, ख. विहृतैः. १० क. घ. झ. ट. प्राविशद्वसुधातलं. ११ च.—ट. भग्नाः. १२ घ. च. झ. ञ. ट. कन्दरोदर.

व्यक्तव्याविद्धुमरागा व्याकुलीकृतभूषणाः ॥ विद्याधर्यः समुत्पेतुः सहसा धरणीधरात् ॥ ४५ ॥
अतिप्रमाणा बलिनो दीप्तजिह्वा महाविषाः ॥ निपीडितशिरोग्रीवा व्यवेष्टन्त महाहयः ॥ ४६ ॥
किन्नरोरगगन्धर्वयक्षविद्याधरास्तदा ॥ पीडितं तं नगवरं त्यक्त्वा गगनमास्थिताः ॥ ४७ ॥
स च भूमिधरः श्रीमान्बलिना तेन पीडितः ॥ सवृक्षशिखरोद्ग्रः प्रविवेश रसातलम् ॥ ४८ ॥
दशयोजनविस्तारस्त्रिंशद्योजनमुच्छ्रितः ॥ धरण्यां समतां यातः स बभूव धराधरः ॥ ४९ ॥
स लिलङ्घयिषुर्वीर्यं रावणं लक्ष्मणाग्रजम् ॥ कल्लोलास्फालवेलान्तमुत्पपात नभो हरिः ॥ ५० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अङ्गदादिभिरुत्प्लवनेन गन्तव्यमार्गनिवेदनपूर्वकमागच्छतो हनुमतो महेन्द्राचलावलोकनेन वानरान् प्रहर्षयति—प्लवगाधिपवाक्यानि ॥ १ ॥ जांबवता तद्वचनेन सत्त्वसमुचितवानरगणान्प्रति हर्षोद्दीपनहेतुना हनुमतः कृतकार्यत्वोक्तिः ॥ २ ॥ ततोमहेन्द्रशिखरमारुह्य हनुमता जांबवदादिवृद्धानिवादपूर्वकं सर्वान्प्रति संप्रहर्षेण सीतादर्शननिवेदनं ॥ ३ ॥ अङ्गदेन हनुमत्पराक्रमपूर्वकं विशेषेण सीतादर्शनवृत्तान्तानुभूत्या सर्वैः सह महेन्द्राचलविशालशिलातलेषूपवेशनम् ॥ ४ ॥

[आहुल्य च महाविगः पक्षवानिव पर्वतः ॥] सचन्द्रकुमुदं रम्यं सार्कवारण्डवं शुभम् ॥
तिष्यश्रवणकादम्बमभ्रशैवालशाद्वलम् ॥ १ ॥
पुनर्वसुमहाङ्गारं लोहिताङ्गमहाग्रहम् ॥ ऐरावतमहाद्वीपं स्वातीहंसविलोलितम् ॥ २ ॥
वातसंघातजातोर्मि चन्द्रांशुशिशिराम्बुमत् ॥ भुजङ्गयक्षगन्धर्वप्रबुद्धकमलोत्पलम् ॥ ३ ॥
हनुमान्मारुतगतिर्महानौरिव सागरम् ॥ अपारमपरिश्रान्तः प्लुप्लुवे गगनार्णवम् ॥ ४ ॥
असंगान इवाकाशं तारापथमिवोल्लिखन् ॥ हरन्निव सनक्षत्रं गगनं सार्कमण्डलम् ॥ ५ ॥

सक्तानि व्याविद्धानि च वसनानि यासां ताः व्यक्तव्याविद्धवसनाः ॥ ४५ ॥ निपीडितशिरोग्रीवाः शिथिलपतितशिलातलैरिति शेषः ॥ ४६—४७ ॥ सवृक्षशिखरोद्ग्रः सवृक्षैः शिखरैः उद्ग्रः श्रेष्ठः ॥ ४८—४९ ॥ कल्लोलास्फालवेलान्तं तरङ्गैरास्फालयमानतीरोपान्तं ॥ ५० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्पञ्चाशः सर्गः ॥ ५६ ॥

उत्पपात नभो हरिरित्युक्तं तल्लक्षणं रूपकेण चतुर्भिर्वर्णयति—सचन्द्रेत्यादिना ॥ कारण्डवः जलकुक्कुटः । कादम्बः कलहंसः "कादम्बः कलहंसस्यात्" इत्यमरः । अभ्रशैवालशाद्वलं मेघस्य शैवालत्वेन पर्यन्तस्थशाद्वलत्वेन च रूपणं ॥ १ ॥ लोहिताङ्गः अङ्गारकः स एव महाग्रहः महाग्राहः यस्य तं । ऐरावतस्याभ्रगातङ्गत्वेना भ्रगामित्वात्तत्र संभवः । विलोलितं अवगाढं ॥ २ ॥ वातसङ्घातजातोर्मय एव चन्द्रांशवः तैः शीतलजलवत् भुजङ्गादीनांकमलोत्पलत्वेनरूपणं तत्तद्वर्णभेदेन ॥ ३ ॥ अत्र गगनस्यार्णवत्वेन चन्द्रादीनां तदवयवकुमुदादित्वेन च रूपणात्सावयवरूपकं । तस्य नौरिवेत्युपमया तिलतण्डुलवत्संसृष्टिः ॥ ४ ॥ अथ तदेवोत्प्रेक्षया वर्णयति—

ति० व्यवेष्टन्त कुण्डलीकृतशरीरा अजायन्त । व्यवेष्टन्तेतिपाठे पीडयाऽलुठन्नित्यर्थः ॥ ४६ ॥ ति० कल्लोलैरास्फाल्यते रुद्यते तादृशवेलान्तःतीरप्रान्तोयस्यतं सागरंलिलङ्घयिषुः नभउत्पपातेतिसंबन्धः ॥ ५० ॥ इतिषट्पञ्चाशःसर्गः ॥ ५६ ॥

स० गगनार्णवमित्यत्रार्णवशब्दः । "असादीयंगुणार्णवं" इत्यनुव्याख्याने [illegible] । तदेवदर्शयन्नतामाश्रित्यानन्तरंपनाथाचेअर्णवमितित्रिभिःसाधुरित्युक्तेः । गगनार्णवःप्रसिद्धार्णवइव । नप्लवन्तं [illegible] अमयेददाति [illegible] अमिंददातिवत्प्लवनं ॥ ४ ॥

[पा०] १ घ. व्यावेष्टन्तमहोरगाः. च. छ. ज. ट. व्यचेष्टन्तमहोरगाः. [illegible]. ज. ट. लङ्घयिषुर्वी.. गिरेः. ४ इदमर्धं ट.—ट. पाठेपुदृश्यते. ५ श. ट. शिलारितं. ज. [illegible]

मारुतस्यात्मजः श्रीमान्कपिर्व्योमचरो महान् ॥ [अपारमपरिश्रान्तश्चाम्बुधिं समगाहत ॥]
हनुमान्मेघजालानि विकर्षन्निव गच्छति ॥ ६ ॥
पाण्डरारुणवर्णानि नीलमाञ्जिष्ठकानि च ॥ हरितारुणवर्णानि महाभ्राणि चकाशिरे ॥ ७ ॥
प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः ॥ अच्छन्नश्च प्रकाशश्च चन्द्रमा इव लक्ष्यते ॥ ८ ॥
विविधाभ्रघनापन्नगोचरो धवलाम्बरः ॥ दृश्यादृश्यतनुर्वीरस्तदा चन्द्रायतेम्बरे ॥ ९ ॥
तार्क्ष्यायमाणो गगने वैभ्राजे वायुनन्दनः ॥ दारयन्मेघवृन्दानि निष्पतंश्च पुनः पुनः ॥ १० ॥
नदन्नादेन महता मेघस्वनमहास्वनः ॥ प्रवरान्राक्षसान्हत्वा नाम विश्राव्य चात्मनः ॥ ११ ॥
आकुलां नगरीं कृत्वा व्यथयित्वा च रावणम् ॥ अर्दयित्वा बलं घोरं वैदेहीमभिवाद्य च ॥
आजगाम महातेजाः पुनर्मध्येन सागरम् ॥ १२ ॥
पर्वतेन्द्रं सुराष्ट्रं च समुपस्पृश्य वीर्यवान् ॥ ज्यामुक्त इव नाराचो महावेगोऽभ्युपागतः ॥ १३ ॥
स किंचिदनुसंप्राप्तः समालोक्य महागिरिम् ॥ महेन्द्रं मेघसंकाशं ननाद हरिपुङ्गवः ॥ १४ ॥
स पूरयामास कपिर्दिशो दश समन्ततः ॥ नदन्नादेन महता मेघस्वनमहास्वनः ॥ १५ ॥
स तं देशमनुप्राप्तः सुहृद्दर्शनलालसः ॥ ननाद हरिशार्दूलो लाङ्गूलं चाप्यकम्पयत् ॥ १६ ॥
तस्य नानद्यमानस्य सुपर्णचरिते पथि ॥ फलतीवास्य घोषेण गगनं साकमण्डलम् ॥ १७ ॥
ये तु तत्रोत्तरे तीरे समुद्रस्य महाबलाः ॥ पूर्वं संविष्ठिताः शूरा वायुपुत्रदिदृक्षवः ॥ १८ ॥
महतो वायुपुत्रस्य तोयदस्येव गर्जितम् ॥ शुश्रुवुस्ते तदा घोषमूरुवेगं हनूमतः ॥ १९ ॥
ते दीनमनसः सर्वे शुश्रुवुः काननौकसः ॥ वानरेन्द्रस्य निर्घोषं पर्जन्यनिनदोपमम् ॥ २० ॥
निशम्य नदतो नादं वानरास्ते समन्ततः ॥ बभूवुरुत्सुकाः सर्वे सुहृद्दर्शनकाङ्क्षिणः ॥ २१ ॥
जाम्बवान्सहरिश्रेष्ठः प्रीतिसंहृष्टमानसः ॥ उपामन्त्र्य हरीन्सर्वानिदं वचनमब्रवीत् ॥ २२ ॥
सर्वथा कृतकार्योसौ हनूमान्नात्र संशयः ॥ नह्यस्याकृतकार्यस्य नाद एवंविधो भवेत् ॥ २३ ॥
तस्य बाहूरुवेगं च निनादं च महात्मनः ॥ निशम्य हरयो हृष्टाः समुत्पेतुस्ततस्ततः ॥ २४ ॥

अस्मगान इवेत्यादिना ॥ ५—६ ॥ व्यक्ताव्यक्तवाचिलेन अरुणशब्दयोः कथंचिदपौनरुक्त्यमुन्नेयं । यद्वा "अरुणःकृष्णलोहितः" इत्यमरशेषः । महाभ्राणिचकाशिरे हनुमत्संपर्कादित्यर्थः । अन्यथा वाजपेयशरद्वर्णनवदभ्रवर्णनस्यासंगतत्वापातः । हनुमतस्तेजस्वीत्यनेन मेघानांनानावर्णत्वापत्तिः सूर्येन्दुसंपर्कवत् ॥ ७—८ ॥ विविधेष्वभ्रघनेषु मेघसंघातेषु । आपन्नगोचरः प्राप्तविषयः । लब्धमार्ग इति यावत् । धवलाम्बरः शुक्लवासाः । दृश्यादृश्यतनुः मेघान्तःप्रवेशनिष्क्रमणाभ्यामितिभावः । चन्द्रायते चन्द्रइवाचरति । तार्क्ष्यइवाचरन् तार्क्ष्यायमाणः । उभयत्र "उपमानादाचारे" "कर्तुः क्यङ् सलोपश्च" इति क्यङ् ॥ ९—१२ ॥ सुनाभं मैनाकं ॥ १३ ॥ किंचिदनुसंप्राप्तः मैनाकात्परं कंचित्प्रदेशं प्राप्तः ॥ १४—१५ ॥ लालसः साभिलाषः । तं देशं सुहृदावाससमीपप्रदेशं ॥ १६ ॥ नानद्यमानस्य पुनःपुनर्भृशं नदत इत्यर्थः । फलतीव दलतीव ॥ १७—१८ ॥ वातनुन्नस्य वातसंघट्टितस्य । घोषं ऊरुवेगमिति ऊरुवेगजन्यं घोषमित्यर्थः ॥ १९ ॥ ते दीनमनस इति । अनिष्टश्रवणशङ्कयेति भावः ॥ २०—२३ ॥ निशम्य ज्ञात्वेत्यर्थः । यद्वा दृष्ट्वेत्यध्याहार्यं । अन्यथा बाहूरुवेगपदानन्वयात् ॥ २४ ॥

रामानु० [पा०] १ ख. सुनाभंसुशब्दं. २ ग. च. निष्कामंश्च. ३ झ. ट. पाठयोर्दृश्यते. ४ झ. घ. ट. सर्वतो. ५ झ. ट. अर्दयित्वा ॥ ५९ ॥ इतिचतुःपञ्चाशत्तमं सर्गं कृत्वा. ६ च.—ट. वेगोऽभ्युपागमत्. ७ च.—ट. सकिंचिदारात्संप्राप्तः. ख. ग. शीघ्रंतदनुसंप्राप्तः. ६ अयंश्लोकः क. घ. पाठयोर्दृश्यते. —घ. दीनवदनाः. १५ ङ. च. छ. झ. ञ. समुत्पेतुर्ययुस्ततः. क. ख. घ.

ते नगाग्रान्नगाग्राणि शिखराच्छिखराणि च ॥ प्रहृष्टाः समपद्यन्त हनूमन्तं दिदृक्षवः ॥ २५ ॥
ते प्रीताः पादपाग्रेषु गृह्य शाखाः सुविष्ठिताः ॥ वासांसीव प्रशाखाश्च समाविध्यन्त वानराः ॥ २६ ॥
गिरिगह्वरसंलीनो यथा गर्जति मारुतः ॥ एवं जगर्ज बलवान्हनूमान्मारुतात्मजः ॥ २७ ॥
तमभ्रघनसंकाशमापतन्तं महाकपिम् ॥ दृष्ट्वा ते वानराः सर्वे तस्थुः प्राञ्जलयस्तदा ॥ २८ ॥
ततस्तु वेगवांस्तस्य गिरेर्गिरिनिभः कपिः ॥ निपपात महेन्द्रस्य शिखरे पादपाकुले ॥ २९ ॥
हर्षेणापूर्यमाणोसौ रम्ये पर्वतनिर्झरे ॥ छिन्नपक्ष इवाकाशात्पपात धरणीधरः ॥ ३० ॥
ततस्ते प्रीतमनसः सर्वे वानरपुङ्गवाः ॥ हनुमन्तं महात्मानं परिवार्योपतस्थिरे ॥ ३१ ॥
परिवार्य च ते सर्वे परां प्रीतिमुपागताः ॥ प्रहृष्टवदनाः सर्वे तमरोगमुपागतम् ॥ ३२ ॥
उपायनानि चादाय मूलानि च फलानि च ॥ प्रत्यर्चयन्हरिश्रेष्ठं हरयो मारुतात्मजम् ॥ ३३ ॥
[विनेदुर्मुदिताः केचित्केचित्किलिकिलास्तथा ॥ हृष्टाः पादपशाखाश्च आनिन्युर्वानरर्षभाः] ॥३४॥
हनुमांस्तु गुरून्वृद्धाञ्जाम्बवत्प्रमुखांस्तदा ॥ कुमारमङ्गदं चैव सोवन्दत महाकपिः ॥ ३५ ॥
स ताभ्यां पूजितः पूज्यः कपिभिश्च प्रसादितः ॥ दृष्ट्वा सीतेति विक्रान्तः संक्षेपेण न्यवेदयत् ॥ ३६ ॥
निषसाद च हस्तेन गृहीत्वा वालिनः सुतम् ॥ रमणीये वनोद्देशे महेन्द्रस्य गिरेस्तदा ॥
हनुमानब्रवीद्धृष्टस्तदा तान्वानरर्षभान् ॥ ३७ ॥
अशोकवनिकासंस्था दृष्टा सा जनकात्मजा ॥ रक्ष्यमाणा सुघोराभी राक्षसीभिरनिन्दिता ॥ ३८ ॥
एकवेणीधरा बाला रामदर्शनलालसा ॥ उपवासपरिश्रान्ता जटिला मलिना कृशा ॥ ३९ ॥
ततो दृष्टेति वचनं महार्थममृतोपमम् ॥ निशम्य मारुतेः सर्वे मुदिता वानरा भवन् ॥ ४० ॥

समुत्पेतुरित्युक्तं विवृणोति—ते नगाग्रादिति ॥ नगाग्रात् वृक्षाग्रात् समपद्यन्त संघीभूताः ॥ २५ ॥ प्रीता इति हेतुगर्भं विशेषणं । यथा मनुष्याः दूरस्थस्वकीयानयनाय वासांसि धून्वन्ति तथा वानराश्चान्योन्याह्वानाय पुष्पितशाखाः गृहीत्वा प्रशाखाः प्राग्रशाखाः । समाविध्यन्त पर्यभ्रामयन् ॥ २६—२७ ॥ अभ्रघनसंकाशं अभ्रसमूहतुल्यं ॥ २८ ॥ निपपात निर्भरमाक्रान्तवान् ॥ २९ ॥ पपातेति अच्छिन्नपक्षस्य पातासंभवाच्छिन्नपक्षइत्युक्तं ॥ ३० —३१ ॥ प्रहृष्टवदनाः प्रसन्नमुखाः । आसन्निति शेषः । अरोगं कुशलिनमित्यर्थः ॥ ३२ ॥ उपायनानि उपहारान् ॥ ३३—३४ ॥ कुमारमङ्गदं चेति । स्वामित्वादिति भावः ॥ ३५—३९ ॥ भवन् अभवन् ।

ति० अभ्रं मेघः । तदुपरियोमेघस्तत्संकाशं । अत्युन्नतमेघसमूहसदृशमित्यर्थमन्ये । स्वजीवनदातृत्वेन स्वपूज्यत्वात्प्राञ्जलयः ॥ २८ ॥ ति० ततोगिरेः अरिष्टाख्याद्गिरेः । सुतःकपिः तस्यमहेन्द्रस्यगिरेःशिखरेनिपपात । अनेनाविश्रममागमनंध्वनितं ॥ २९ ॥ ति० पर्वतनिर्झरे निर्झरप्रवर्तकेशिखरेइत्यर्थमेके । श्रमनिवृत्तये जलएवपतितइत्यन्ये ॥ स० छिन्नपक्षः धरणीधरः पर्वतइवपपात । अनेन मान्द्याभावःसूच्यते । छिदितिभावेसंपदादिक्विबन्तः । छित् छिदा न यस्यौछिन्नौ । नशब्दोनिषेधार्थकः । तस्यछिच्छब्दानन्तरत्वं जनइत्यादिवद्बोध्यं । ततश्च अच्छिन्नौपक्षौयस्यसः । एवंचेत् हर्षापूर्यमाणता विवक्षितस्थलाभोविजयेनागमनंचेतिबहुश्रुतलाभोभवतीतिबोध्यं ॥ ३० ॥ स० परां पूर्वप्रीतितोप्युत्कृष्टां । संतोषातिशयेनसर्वैरितिद्विरुक्तिः । सर्वे रुद्रे । लुप्तोपमेयं । तेदूताः त्रिपुरंहत्वाआयातेरुद्रेइतिवा । " सर्वोह्येषरुद्रः " इतिश्रुतेः । " सर्वःशर्वःकालजरःशिवः " इतिनामनिधानात् ॥ ३२ ॥ ति० शाखानयनं हनूमतआसनार्थं ॥ ३४ ॥ स० ताभ्यां जांबवदङ्गदाभ्यां । यद्यपिजांबवत्प्रमुखान्गुरून्वृद्धानित्युक्त्या तैरितिसुभाषं । तथापि कार्यनिविष्टताद्वयोरेवातिशयेनेताभ्यामित्युपपद्यते । देवीदृष्टेतिपौर्वापर्येदेवी-

[पा०] १ ङ. च. झ. ञ. ट. शाखामवस्थिताः. क. ख. घ. शाखास्सुपुष्पिताः. २ घ. ङ. झ. ञ. ट. वासांसिचप्रकाशानि. क. वासांसिचमहार्हाणिदुधुवुर्वानरर्षभाः. च. छ. ज. वासांसिचमहाप्रीत्या. ३ ङ. झ. ट. वेगवान्वीरो. ४ ङ. झ. ट. तमागतमुपागमन्. ५ ख. प्रत्यपयन्हरिश्रेष्ठं. ६ अर्धश्लोकः ङ. झ. ट. पाठेषुदृश्यते. ७ ग. घ. च.—ट. देवीति. ८ क. संग्रहेण. ९ ङ. झ. ट. नम्रवीत्पृष्टः. घ. नम्रवीद्धृष्टस्समेतान्वानरर्षभान्. १० ख. दीना. ११ क. ग. मारुतेर्वाक्यं

क्ष्वेलन्त्यन्ये नदन्त्यन्ये गर्जन्त्यन्ये महाबलाः ॥ चक्रुः किलिकिलामन्ये प्रतिगर्जन्ति चापरे ॥४१॥
केचिदुच्छ्रितलाङ्गूलाः प्रहृष्टाः कपिकुञ्जराः ॥ अञ्चितायतदीर्घाणि लाङ्गूलानि प्रविव्यधुः ॥ ४२ ॥
अपरे च हनूमन्तं वानरा वारणोपमम् ॥ आप्लुत्य गिरिशृङ्गेभ्यः संस्पृशन्ति स्म हर्षिताः ॥ ४३ ॥
उक्तवाक्यं हनूमन्तमङ्गदस्तमथाब्रवीत् ॥ सर्वेषां हरिवीराणां मध्ये वचनमुत्तमम् ॥ ४४ ॥
सत्त्वे वीर्ये न ते कश्चित्समो वानर विद्यते ॥ यदवप्लुत्य विस्तीर्णं सागरं पुनरागतः ॥ ४५ ॥
[जीवितस्य प्रदाता नस्त्वमेको वानरोत्तम ॥ त्वत्प्रसादात्समेष्यामस्सिद्धार्था राघवेण ह] ॥ ४६ ॥
अहो स्वामिनि ते भक्तिरहो वीर्यमहो धृतिः ॥ दिष्ट्या दृष्टा त्वया देवी रामपत्नी यशस्विनी ॥
दिष्ट्या त्यक्ष्यति काकुत्स्थः शोकं सीतावियोगजम् ॥ ४७ ॥
ततोऽङ्गदं हनूमन्तं जाम्बवन्तं च वानराः ॥ परिवार्य प्रमुदिता भेजिरे विपुलाः शिलाः ॥ ४८ ॥
[उपविष्टा गिरेस्तस्य शिलासु विपुलासु च ॥] श्रोतुकामाः समुद्रस्य लङ्घनं वानरोत्तमाः ॥ ४९ ॥
दर्शनं चापि लङ्कायाः सीताया रावणस्य च ॥ तस्थुः प्राञ्जलयः सर्वे हनुमद्वदनोन्मुखाः ॥ ५० ॥
तस्थौ तत्राङ्गदः श्रीमान्वानरैर्बहुभिर्वृतः ॥ उपास्यमानो विबुधैर्दिवि देवपतिर्यथा ॥ ५१ ॥

हनूमता कीर्तिमता यशस्विना तथाङ्गदेनाङ्गदबद्धबाहुना ॥
मुदा तदाध्यासितमुन्नतं महन्महीधराग्रं ज्वलितं श्रियाऽभवत् ॥ ५२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अष्टपञ्चाशः सर्गः ॥ ५८ ॥

महेन्द्रगिरौ सर्ववानरमध्ये जांबवत्पृष्टेन हनुमता वानरान्प्रति लङ्कागमनकाले मैनाकावलोकनादिस्वपुनरागमनान्तसकलवृत्तान्तनिवेदनम् ॥ १ ॥

ततस्तस्य गिरेः शृङ्गे महेन्द्रस्य महाबलाः ॥ हनुमत्प्रमुखाः प्रीतिं हरयो जग्मुरुत्तमाम् ॥ १ ॥

अनित्यत्वादडभावः ॥ ४० ॥ क्ष्वेलन्ति सिंहनादं कुर्वन्ति । नदन्ति अव्यक्तशब्दं कुर्वन्ति । गर्जन्ति वृषभनादं कुर्वन्ति । किलिकिलां स्वजात्युचितकिलिकिलाशब्दं ॥ ४१ ॥ अञ्चितायतदीर्घाणि अत्र दीर्घपदसन्निधानादायतपदं स्थूलपरं । प्रविव्यधुः लाङ्गूलान्युद्धृत्य भूमावताडयन्नित्यर्थः ॥ ४२ ॥ संस्पृशन्ति आलिङ्गन्तीत्यर्थः ॥ ४३—४४ ॥ अवप्लुत्यविस्तीर्णमित्यङ्गदेतरव्यावृत्तिः । पुनरागत इत्यङ्गदव्यावृत्तिः ॥ ४५—५१ ॥ कीर्तिमतेति हनुमद्विशेषणं । यशस्विनेत्यङ्गदविशेषणं । भृत्यकीर्त्या स्वामिनः कीर्तेः । अन्यथा पौनरुक्त्यात् । यद्वा बुद्धिमत्त्वजन्या कीर्तिः । शौर्यजन्यं यशः ॥ ५२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तपञ्चाशःसर्गः ॥ ५७ ॥

कार्यवृत्तान्तं कार्यविषयवृत्तान्तं सीतादर्शनविषय-

विलोकितानवेतिशङ्कास्यात् सा माहिभूदितिदृष्टेपिपूर्वमुक्तिरितिज्ञेयं ॥ ३६ ॥ ति० आयताञ्चितदीर्घाणि आयामोविस्तारः । स्थौल्यमित्यन्ये ॥ ४२ ॥ इतिसप्तपञ्चाशःसर्गः ॥ ५७ ॥

[पा०] १ ङ. ञ्ज्वेलन्त्यन्ये. २ च. ज. महास्वनाः. ३ च. छ. ज. वानराः. ४ ङ.—ट. आयताञ्चित. ५ ङ. ञ. ट. श्रीमन्तंवानरोत्तमं. च. छ. ज. वानराःप्रशंसिरे. ६ क. ग.—ट. वाचमनुत्तमां. ७ अयंश्लोकः ङ.—ट. पाठेषुदृश्यते. ८ इदमर्धं ङ.—ट. पाठेषुदृश्यते. ९ ख. हनूमद्वचनोन्मुखाः.

[1]प्रीतिमत्सूपविष्टेषु वानरेषु महात्मसु ॥ तं ततः [2]प्रीतिसंहृष्टः [3]प्रीतिमन्तं महाकपिम् ॥
जाम्बवान्कार्यवृत्तान्तमपृच्छदनिलात्मजम् ॥ २ ॥
कथं दृष्टा त्वया देवी कथं वा तत्र वर्तते ॥ तस्यां वा स कथंवृत्तः क्रूरकर्मा दशाननः ॥ ३ ॥
तत्त्वतः सर्वमेतन्नः प्रब्रूहि त्वं महाकपे ॥ [[4]संमार्गिता कथं देवी किंच सा प्रत्यभाषत ॥]
श्रुतार्थाश्चिन्तयिष्यामो भूयः कार्यविनिश्चयम् ॥ ४ ॥
यश्चार्थस्तत्र वक्तव्यो गतैरस्माभिरात्मवान् ॥ रक्षितव्यं च यत्तत्र तद्भवान्व्याकरोतु नः ॥ ५ ॥
स नियुक्तस्ततस्तेन संप्रहृष्टतनूरुहः ॥ प्रणम्य शिरसा देव्यै सीतायै प्रत्यभाषत ॥ ६ ॥
प्रत्यक्षमेव भवतां महेन्द्राग्रात्स्वमाप्लुतः ॥ उदधेर्दक्षिणं पारं काङ्क्षमाणः समाहितः ॥ ७ ॥
गच्छतश्च हि मे घोरं विघ्नरूपमिवाभवत् ॥ काञ्चनं शिखरं दिव्यं पश्यामि सुमनोहरम् ॥ ८ ॥
स्थितं पन्थानमावृत्य मेने विघ्नं च तं नगम् ॥ ९ ॥
उपसंगम्य तं दिव्यं काञ्चनं नगसत्तमम् ॥ कृता मे मनसा बुद्धिर्भेत्तव्योयं मयेति च ॥ १० ॥
प्रहृतं च मया तस्य लाङ्गूलेन महागिरेः ॥ शिखरं सूर्यसंकाशं व्यशीर्यत सहस्रधा ॥ ११ ॥
व्यवसायं च तं बुद्ध्वा स होवाच महागिरिः ॥ पुत्रेति मधुरां वाणीं मनः प्रह्लादयन्निव ॥ १२ ॥
पितृव्यं चापि मां विद्धि सखायं मातरिश्वनः ॥ मैनाक इति विख्यातं निवसन्तं महोदधौ ॥१३॥
पक्षवन्तः पुरा पुत्र बभूवुः पर्वतोत्तमाः ॥ छन्दतः पृथिवीं चेरुर्बाधमानाः समन्ततः ॥ १४ ॥
श्रुत्वा नगानां चरितं महेन्द्रः पाकशासनः ॥ चिच्छेद भगवान्पक्षान्वज्रेणैषां सहस्रशः ॥ १५ ॥
अहं तु [5]मोक्षितस्तस्मात्तव पित्रा महात्मना ॥ मारुतेन तदा वत्स [6]प्रक्षिप्तोस्मि महार्णवे ॥ १६ ॥
रामस्य च मया साह्ये वर्तितव्यमरिन्दम ॥ रामो धर्मभृतां श्रेष्ठो महेन्द्रसमविक्रमः ॥ १७ ॥
एतच्छ्रुत्वा वचस्तस्य मैनाकस्य महात्मनः ॥ कार्यमावेद्य तु गिरेरुद्यतं च मनो मम ॥ १८ ॥
तेन चाहमनुज्ञातो मैनाकेन महात्मना ॥ स चाप्यन्तर्हितः शैलो मानुषेण वपुष्मता ॥
शरीरेण महाशैलः शैलेन च महोदधौ ॥ १९ ॥

वृत्तान्तं ॥ २ ॥ कथं केन प्रकारेण । कथंवृत्तः कीदृग्व्यापारः ॥ ३ ॥ तत्त्वकथनस्य प्रयोजनमाह—श्रुतार्था इत्यादि ॥ ४ ॥ तत्र रामसन्निधौ । योऽर्थो वक्तव्यः वक्तुमर्हः । यच्च रक्षितव्यं गोप्तव्यं तत् । आत्मवान् बुद्धिमान् । भवान्व्याकरोतु ॥ ५—६ ॥ प्रत्यक्षमेवेति इदं न वक्तव्यमेवेति भावः । आप्लुतः आप्लुतोस्मि । पारं गन्तुमिति शेषः । समाहितः एकाग्रः । इत्येतद्भवतां प्रत्यक्षमेवेति संबन्धः ॥ ७ ॥ विघ्नरूपमिव । वस्तुतो न तथेतिभावः । पश्यामीत्यादौ व्यत्ययेन लट् । शिखरं विघ्नरूपमिवाभवत् तत् पश्यामीति योजना ॥ ८ ॥ मेने इति लिट्युत्तमपुरुषैकवचनं । परोक्षत्वाद्यभावेपि च्छान्दसं । अमनिषीत्यर्थः ॥ ९ ॥ गमनदशायामुरसा पातयामासेति सूचितं विवृणोति—भेत्तव्योयमित्यादिना ॥१०—१२॥ पितृव्यं चेति । पितृव्यत्वे हेतुमाह—सखायमिति । पितृसखत्वात् पितृव्यत्वव्यपदेश इत्यर्थः ॥ १३ ॥ छन्दतः यथेच्छं ॥ १४—१५ ॥ मोक्षणप्रकारमाह—प्रक्षिप्तोस्मि महार्णव इति ॥१६॥ साह्ये साहाय्ये । साहाय्यकरणे हेतुमाह—रामो धर्मभृतां श्रेष्ठ इति ॥१७॥ उद्यतं उद्युक्तं ॥ १८ ॥ अनुज्ञातः

ति० सशैलोमानुषेणवपुष्मता प्रशस्तेनशरीरेण । महाशैलोन्तर्हितः । शैलेनशिलारूपेणचमहोदधावन्तर्हितइत्यन्वयः ॥ स० शैलः मैनाकः । मानुषेणशरीरेणान्तर्हितोभूत् । ततश्चमहाशैलः वपुष्मतामानुषदेहान्तर्धानाधिकरणेन । शैलेन पर्वतरूपदेहेन

[पा०] १ इदमर्धं क.—ट. पाठेषुदृश्यते. २ ङ. छ. ज. झ. ट. प्रतिसंहृष्टः. ३ ङ. च. ज.—ट. प्रीतियुक्तं. ४ इदमर्धं ङ.—ट. पाठेषुदृश्यते. ५ ख. ङ. च.—ट. नमस्यञ्छिरसा. ६ ङ. झ. ट. [illegible]. ७ ङ.—ट. मोचितस्तस्मात्. ८ क. झ. ट. प्रक्षिप्तोवरुणालये. घ. प्रक्षिप्तोस्मिमहोदधौ. ९ क. ख. ग. ङ.—ट. [illegible]स्य. १० ङ. झ. ट. रुद्धतंवै.

उत्तमं जवमास्थाय [1]शेषं पन्थानमास्थितः ॥ ततोऽहं सुचिरं कालं वेगेनाभ्यगमं पथि ॥ २० ॥
ततः पश्याम्यहं देवीं सुरसां नागमातरम् ॥ समुद्रमध्ये सा देवी [2]वचनं मामभाषत ॥ २१ ॥
मम भक्षः प्रदिष्टस्त्वममरैर्हरिसत्तम ॥ [3]अतस्त्वां भक्षयिष्यामि विहितस्[4]त्वं चिरस्य मे ॥ २२ ॥
एवमुक्तः सुरसया प्राञ्जलिः प्रणतः स्थितः ॥ विवर्[5]णवदनो भूत्वा वाक्यं चेदमुदीरयन् ॥ २३ ॥
रामो दाशरथिः श्रीमान्प्रविष्टो दण्डकावनम् ॥ लक्ष्मणेन सह भ्रात्रा सीत[6]या च परन्तपः ॥ २४ ॥
तस्य सीता हृता भार्या रावणेन दुरात्मना ॥ तस्याः सकाशं दूतोऽहं गमिष्ये रामशासनात् ॥
कर्तुमर्हसि रामस्य साहाय्यं विषये सती ॥ २५ ॥
अथवा मैथिलीं दृष्ट्वा रामं चाक्लिष्टकारिणम् ॥ आगमिष्यामि ते वक्त्रं सत्यं प्रतिशृणोमि ते ॥ २६ ॥
एवमुक्ता मया सा तु सुरसा कामरूपिणी ॥ अब्रवीन्नातिवर्तेत कश्चिदेष वरो मम ॥ २७ ॥
एवमुक्तः सुरसया दशयोजनमायतः ॥ [7]तत[8]ोऽर्धगुणविस्तारो बभूवाहं क्षणेन तु ॥ २८ ॥
[9]मत्प्रमाणानुरूपं च व्यादितं तु मुखं तया ॥ तदृष्ट्वा व्यादितं चास्यं ह्रस्वं ह्यकरवं [10]वपुः ॥ २९ ॥
तस्मिन्मुहूर्ते च पुनर्बभूवाङ्गुष्ठ[11]मात्रकः ॥ अभिपत्याशु तद्वक्त्रं निर्गतोऽहं ततः क्षणात् ॥ ३० ॥
अब्रवीत्सुरसा देवी स्वेन रूपेण मां पुनः ॥ [12]अर्थसिद्ध्यै हरिश्रेष्ठ गच्छ सौम्य यथासुखम् ॥ ३१ ॥
समानय च वैदेहीं राघवेण महात्मना ॥ सुखी भव महाबाहो प्रीताऽस्मि तव वानर ॥ ३२ ॥
ततोऽहं साधु साध्वीति सर्वभूतैः प्रशंसितः ॥ ततोन्तरिक्षं विपुलं प्लुतोऽहं गरुडो यथा ॥ ३३ ॥
छाया मे निगृहीता च न च पश्यामि किंचन ॥ ३४ ॥
सोहं विगतवेगस्तु दिशो दश विलोकयन् ॥ न किंचित्तत्र पश्यामि येन मेऽर्थ[13]हृता गतिः ॥ ३५ ॥
ततो मे बुद्धिरुत्पन्ना किं नाम गगने मम ॥ ईदृशो विघ्न उत्पन्नो रूपं यत्र न दृश्यते ॥ ३६ ॥
अधोभागे न मे दृष्टिः शो[14]चता पातिता [15]मया ॥ ततोऽद्राक्षमहं भीमां राक्षसीं सलिलेशयाम् ॥ ३७ ॥
ग्रहस्य च महानादमुक्तोऽहं भीमया तया ॥ अवस्थितमसंभ्रान्तमिदं वाक्यमशोभनम् ॥ ३८ ॥
क्वासि गन्ता महाकाय क्षुधिताया ममेप्सितः ॥ भक्षः प्रीणय मे देहं चिरमाहारवर्जितम् ॥ ३९ ॥

अस्मीति शेषः । वपुष्मता पुष्कलवपुषा । मानुषेणशरीरेणान्तर्हितः । शैलेन तु शरीरेण महोदधौ सागरोपरि स्थित इति शेषः । "स वै दत्तवरः शैलोबभूवावस्थितस्तथा" इति प्रथमसर्गोक्तेः । प्रतिप्रयाणे च—"पर्वतेन्द्रं सुनाभं च समुपस्पृश्य वीर्यवान्" इत्युक्तं । "हिरण्यनाभं शैलेन्द्रं काञ्चनं पश्य मैथिलि" इति रामेण चोक्तं ॥ १९—२४ ॥ विषये सती स्वराज्ये वसन्ती ॥ २५–२७ ॥ अर्धगुणविस्तारः । अत्रार्धशब्दः एकदेशवाची । किंचिदधिकविस्तारोभवमित्यर्थः । एवमेवार्थः । प्रथमसर्गोक्तशतयोजनविस्तारस्तु विरुद्धः तद्ग्रन्थःकल्पितश्चेत्युक्तं ॥ २८ ॥ व्यादितं व्यात्तं ॥ २९ ॥ ह्रस्वत्वं विशेषयति—अङ्गुष्ठमात्रक इति ॥ ३०–३१ ॥ समानय संयोजय ॥ ३२ ॥ साधु साध्वीति दीर्घश्छान्दसः ॥ ३३–३६ ॥ सलिलेशयां सलिले स्थितां ॥ ३७ ॥ अवस्थितं दृढभूतं । असंभ्रान्तं अव्यग्रं ॥ ३८–३९ ॥

महोदधावन्तर्हितोऽभूत् ॥ १९ ॥ **ती०** ततोर्धगुणविस्तारः ततोदशयोजनात्अर्धस्यपञ्चयोजनस्यगुणः आवृत्तिः तद्विस्तारोदशयोजनविस्तारः । प्रथमसर्गेदशयोजनविस्तारोक्त्यानुगुण्येनैवंव्याख्यातं ॥ २८ ॥ **शि०** साध्वीतिदीर्घआर्षइतिभट्टाः । विस्मयार्थंकार-

[पा०] १ ङ. च. ज.—ट. शेषमध्वानं. २ ङ. झ. ट. वचनंचेदमब्रवीत्. ३ ग. ङ.—ट. ततस्त्वां. ४ ङ. झ. ट. स्त्वंहिमेसुरैः. ५ ग. घ. च. छ. ज. ञ. विषण्णवदनो. ६ ख. सीतयाचापिभार्यया. ७ ग. घ. च. छ. ज. ञ. ततोद्विगुण. ८ ङ.—ट. मत्प्रमाणाधिकंचैव. ९ ख. च.—ट. पुनः. १० ङ.—ट. संमितः. ११ घ. अथसाव्याहरच्छ्रेष्ठा. १२ ङ. च. ज.—ट. मेविहता. १३ ङ. झ. ञ. ट. शोचतः. १४ च, छ, ज. तदा.

बाढमित्येव तां वाणीं प्रत्यगृह्णामहं ततः ॥ आस्यप्रमाणादधिकं तस्याः कायमपूरयम् ॥ ४० ॥
तस्याश्चास्यं महद्भीमं वर्धते मम भक्षणे ॥ न च मां साधु बुबुधे मम वा निकृतं कृतम् ॥ ४१ ॥
ततोऽहं विपुलं रूपं संक्षिप्य निमिषान्तरात् ॥ तस्या हृदयमादाय प्रपतामि नभःस्थलम् ॥ ४२ ॥
सा विसृष्टभुजा भीमा पपात लवणाम्भसि ॥ मया पर्वतसंकाशा निकृत्तहृदया सती ॥ ४३ ॥
शृणोमि खेगतानां च सिद्धानां चारणैः सह ॥ राक्षसी सिंहिका भीमा क्षिप्रं हनुमता हता ॥४४॥
तां हत्वा पुनरेवाहं कृत्यमात्ययिकं स्मरन् ॥ गत्वा चाहं महाध्वानं पश्यामि नगमण्डितम् ॥४५॥
दक्षिणं तीरमुदधेर्लङ्का यत्र च सा पुरी ॥ अस्तं दिनकरे याते रक्षसां निलयं पुरम् ॥
प्रविष्टोऽहमविज्ञातो रक्षोभिर्भीमविक्रमैः ॥ ४६ ॥
तत्र प्रविशतश्चापि कल्पान्तघनसन्निभा ॥ अट्टहासं विमुञ्चन्ती नारी काऽप्युत्थिता पुरः ॥ ४७ ॥
जिघांसन्तीं ततस्तां तु ज्वलदग्निशिरोरुहाम् ॥ सव्यमुष्टिप्रहारेण पराजित्य सुभैरवाम् ॥
प्रदोषकाले प्रविशं भीतयाऽहं तयोदितः ॥ ४८ ॥
अहं लङ्कापुरी वीरैं निर्जिता विक्रमेण ते ॥ यस्मात्तस्माद्विजेतासि सर्वरक्षांस्यशेषतः ॥ ४९ ॥
तत्राहं सर्वरात्रं तु विचिन्वञ्जनकात्मजाम् ॥ रावणान्तःपुरगतो न चापश्यं सुमध्यमाम् ॥ ५० ॥
ततः सीतामपश्यंस्तु रावणस्य निवेशने ॥ शोकसागरमासाद्य न पारमुपलक्षये ॥ ५१ ॥
शोचता च मया दृष्टं प्राकारेण समावृतम् ॥ काञ्चनेन विकृष्टेन गृहोपवनमुत्तमम् ॥ ५२ ॥
स प्राकारमवप्लुत्य पश्यामि बहुपादपम् ॥ ५३ ॥
अशोकवनिकामध्ये शिंशुपापादपो महान् ॥ तमारुह्य च पश्यामि काञ्चनं कदलीवनम् ॥ ५४ ॥
अदूरे शिंशुपावृक्षात्पश्यामि वरवर्णिनीम् ॥ श्यामां कमलपत्राक्षीमुपवासकृशाननाम् ॥ ५५ ॥
तदेकवाससंवीतां रजोध्वस्तशिरोरुहाम् ॥ शोकसन्तापदीनाङ्गीं सीतां भर्तृहिते स्थिताम् ॥ ५६ ॥

तस्याः आस्यप्रमाणादधिकं यथा तथा कायं आत्मदेहं। अपूरयं अवर्धयं । मयि वृद्धे साप्यवर्धिष्टेत्यर्थः । अयं कामरूपीति मां । साधु सम्यक् । न बुबुधे न ज्ञातवती । मम कृतं निकृतं मया कृतां निकृतिं वा नबुबुधे ॥ ४०–४१ ॥ निकृतिमेव दर्शयति— ततोहमिति ॥ ४२ ॥ विसृष्टभुजा विसृष्टसन्धिकभुजा ॥ ४३ ॥ हतेत्यनन्तरमितिकरणंबोध्यं ॥४४॥ कृत्यमात्ययिकं स्मरन् प्राणान्तिकं तत्कर्म विचिन्तयन्नित्यर्थः ॥ ४७ ॥ भीतया तया नार्या । अशेषत इत्यनन्तरमितिकरणं द्रष्टव्यं ॥ ४८–४९ ॥ सर्वरात्रं सर्वां रात्रिं । " अहः सर्व—" इत्यादिना समासान्तोच् । अत्यन्तसंयोगे द्वितीया । तत्र लङ्कायां । विचिन्वन् अनन्तरं रावणान्तःपुरमपि गतःसन् सुमध्यमां नापश्यं ॥ ५०—५१ ॥ विकृष्टेन विप्रकृष्टेन । अतिदीर्घेणेति यावत् ॥ ५२ ॥ बहुपादपं अनेकपादपप्रमाणमिति प्राकारविशेषणं ॥ ५३ ॥ शिंशुपापादपः अस्तीतिशेषः ॥ ५४ ॥ शिंशुपावृक्षात् शिंशुपावृक्षस्य । श्यामां यौवनमध्यस्थां । तदेकवाससंवीतां येन वाससा हृता तेनैकवाससा संवीतां । यद्वा तेन तत्कालदृष्टेन पूर्वदृष्टेन एकेन वाससा संवीतां । वेषान्तरनिस्पृहामित्यर्थः । मानसिकत्वकायिकत्व-

---

प्रश्लेषेतुनार्षकल्पना ॥ स० साध्वी अहंप्रीतास्मीत्यन्वयोवा ॥३३॥ ती०तद्विकृतंकिमित्यतआह—ततोहमिति । हृदयमादाय हृदयंनिकृत्य ।प्रपतामि प्रापतं॥४२॥ति० आत्ययिकं जातकालविलंबं॥स० महद्ध्वानं महताकालेन गम्यमध्वानं ॥४५॥ति०सर्वरात्रं

[पा०] १ ख. वर्धितश्चास्मि सुमहांस्तस्याः. २ घ. ममापिविकृतं. क. मयाचविकृतं. ३ ङ. झ. ट. खगतानांचवाचः सौम्यामहात्मनां. ४ क. ख. घ. च.—ट. गत्वाचमहद्ध्वानं. ५ ङ. झ. ट. निलयंपुरीं. घ. प्राविशंपुरं. ६ ङ. च. ज. झ. घनसप्रभा. ७ ख. भीमा. ८ ग. तत्राहमर्धरात्रेतु. क. तत्राहमर्धरात्रंतु. ९ ग. ङ.—ट. प्राकारेणाभिसंवृतं. १० घ. च. विचित्रेण. ११ क.—ट. अदूराच्छिंशुपा,

राक्षसीभिर्विरूपाभिः क्रूराभिरभिसंवृताम् ॥ मांसशोणितभक्षाभिर्व्याघ्रीभिर्हरिणीमिव ॥ ५७ ॥
सा मया राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः ॥ एकवेणीधरा दीना भर्तृचिन्तापरायणा ॥ ५८ ॥
भूमिशय्या विवर्णाङ्गी पद्मिनीव हिमागमे ॥ रावणाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया ॥
कथंचिन्मृगशावाक्षी तूर्णमासादिता मया ॥ ५९ ॥
तां दृष्ट्वा तादृशीं नारीं रामपत्नीं यशस्विनीम् ॥ तत्रैव शिंशुपावृक्षे पश्यन्नहमवस्थितः ॥ ६० ॥
ततो हलहलाशब्दं काञ्चीनूपुरमिश्रितम् ॥ शृणोम्यधिकगम्भीरं रावणस्य निवेशने ॥ ६१ ॥
ततोऽहं परमोद्विग्नः स्वं रूपं प्रतिसंहरन् ॥ अहं तु शिंशुपावृक्षे पक्षीव गहने स्थितः ॥ ६२ ॥
ततो रावणदाराश्च रावणश्च महाबलः ॥ तं देशं समनुप्राप्ता यत्र सीताऽभवत्स्थिता ॥ ६३ ॥
तां दृष्ट्वाऽथ वरारोहा सीता राक्षोमहाबलम् ॥ संकुच्योरू स्तनौ पीनौ बाहुभ्यां परिरभ्य च ॥ ६४ ॥
वित्रस्तां परमोद्विग्नां वीक्षमाणां ततस्ततः ॥ त्राणं किंचिदपश्यन्तीं वेपमानां तपस्विनीम् ॥ ६५ ॥
तामुवाच दशग्रीवः सीतां परमदुःखिताम् ॥ अवाक्छिराः प्रपतितो बहुमन्यस्व मामिति ॥ ६६ ॥
यदि चेच्चं तु दर्पान्मां नाभिनन्दसि गर्विते ॥ द्वौ मासावन्तरं सीते पास्यामि रुधिरं तव ॥६७॥
एतच्छ्रुत्वा वचस्तस्य रावणस्य दुरात्मनः ॥ उवाच परमक्रुद्धा सीता वचनमुत्तमम् ॥ ६८ ॥
राक्षसाधम रामस्य भार्यामिततेजसः ॥ इक्ष्वाकुकुलनाथस्य स्नुषां दशरथस्य च ॥
अवाच्यं वदतो जिह्वा कथं न पतिता तव ॥ ६९ ॥
किंचिद्वीर्यं तवानार्य यो मां भर्तुरसंनिधौ ॥ अपहृत्यागतः पाप तेनादृष्टो महात्मना ॥ ७० ॥
न त्वं रामस्य सदृशो दास्येऽप्यस्य न युज्यसे ॥ यज्ञीयः सत्यवादी च रणश्लाघी च राघवः ॥७१॥
जानक्या परुषं वाक्यमेवमुक्तो दशाननः ॥ जज्वाल सहसा कोपाच्चितास्थ इव पावकः ॥ ७२ ॥
विवर्त्य नयने क्रूरे मुष्टिमुद्यम्य दक्षिणम् ॥ मैथिलीं हन्तुमारब्धः स्त्रीभिर्हा हा कृतं तदा ॥ ७३ ॥
स्त्रीणां मध्यात्समुत्पत्य तस्य भार्या दुरात्मनः ॥ वरा मण्डोदरीनाम तया स प्रतिषेधितः ॥ ७४ ॥

भेदेन शोकसंतापयोर्भेदः ॥ ५५—५७ ॥ सामयेति आमयः खेदः तेन सह वर्तत इति सामया । मर्तव्ये मरणे । " कृत्यल्युटो बहुलं " इति साधुः ॥ ५८—५९ ॥ पश्यन् परामृशन् ॥ ६०—६१ ॥ गहने पर्णगूढप्रदेशे । पर्णघने निलीन इत्यधस्तादप्युक्तेः ॥ ६२—६४ ॥ परमोद्विग्नां अतीवोद्भ्रान्तहृदयां । ततस्ततः वीक्षमाणां नानादिक्षु वीक्षमाणां । त्राणमित्यनुषज्यते ॥ ६५ ॥ अवाक्छिराः अवनतमूर्धा । प्रपतितः भूमाविति शेषः ॥ ६६ ॥ द्वौ मासौ अन्तरमवधिः । ततः पास्यामीति योज्यं ॥ ६७—६९ ॥ किंचिद्वीर्यं कुत इत्यत्राह—यो मामिति । भर्तुरसंनिधौ तेन भर्त्रा अदृष्टःसन् यो मामपहृत्यागतः तस्य तव किंचिद्वीर्यमिति योज्यं ॥ ७०—७१ ॥ घोरत्वसिद्धये चितास्थइत्युक्तं ॥ ७२ ॥ आरब्धः रावण इति शेषः । हा हा कृतं हा हेत्येतत्कृतं ॥ ७३ ॥ समुत्पत्य रावणसमीपं गतेति शेषः । मण्डोदरी मण्डनभूतोदरी । " मडि भूषायाम् " इत्यस्माद्धातोः पचाद्यच् । मन्दोदरी

सर्वारात्रौ । अल्पशेषायांरात्रावशोकवनिकायादर्शनादेवमुक्तिः ॥ ५० ॥ रामानु० परिरभ्य वितत्रासेतिशेषः ॥ ६४ ॥ ति० सादृश्यसंभावनापिदूरापास्तेत्याह—दास्येपीति। स० अस्यदास्ये दासत्वे । नयुज्यसे युक्तोनभवसि । अपिना मूलरूपेपि द्वार्बहिरवस्थानमेवनान्तर्दास्येयोग्यइतिसूचयति ॥ ७१ ॥ ति० चितास्थपावकत्वेनास्पृश्यतासूचिता ॥ ७२ ॥ ति० यद्वा

[पा०] १ क. ङ.—ट. हरिणींयथा. २ क.—घ. च. छ. ज. ञ. रामपत्नीमनिन्दितां. ३ ग. च. छ. ज. ञ. सहसोद्विग्नः. ४ ग. च.—ट. स्वरूपंप्रत्यसंहरं. ५ ख. देशमभिसंप्राप्ता. ६ क. ख. घ. ङ. च. ज.—ट. तंदृष्ट्वाथ. ७ क. ख. घ. ङ. च. ज.—ट. रक्षोगणेश्वरं. ८ क. ङ. ञ. ञ. ट. वीक्षमाणामितस्ततः. ९ ख. मनस्विनीं. १० ङ. ञ. ट. द्विमासानन्तरं. ११ ङ. ञ. ञ. ट. इक्ष्वाकुवंश. १२ घ.—ट. अजेयःसत्यवाञ्छूरो. ग. धार्मिकःसत्यवादीच.

उक्तश्च मधुरां वाणीं तया स मदनार्दितः ॥ सीतया तव किं कार्यं महेन्द्रसमविक्रम ॥
[[1]मया सह रमस्वाद्य मद्विशिष्टा न जानकी] ॥ ७५ ॥
देवगन्धर्वकन्याभिर्यक्षकन्याभिरेव च ॥ सार्धं प्रभो [2]रमस्वेह सीतया किं करिष्यसि ॥ ७६ ॥
ततस्ताभिः समेताभिर्नारीभिः स महाबलः ॥ [3]प्रसाद्य सहसा नीतो भवनं स्वं निशाचरः ॥७७॥
याते तस्मिन्दशग्रीवे राक्षस्यो विकृताननाः ॥ सीतां निर्भर्त्सयामासुर्वाक्यैः क्रूरैः सुदारुणैः ॥७८॥
तृणवद्धारितं तासां गणयामास जानकी ॥ गर्जितं च तदा तासां सीतां प्राप्य निरर्थकम् ॥७९॥
वृथागर्जितनिश्चेष्टा [4]राक्षस्यः पिशिताशनाः ॥ रावणाय शशंसुस्ताः सीता[5]ध्यवसितं महत् ॥ ८० ॥
ततस्ताः सहिताः सर्वा विहताशा निरुद्यमाः ॥ [6]परिक्षिप्य समन्तात्तां निद्रावशमुपागताः ॥ ८१ ॥
तासु चैव प्रसुप्तासु सीता भर्तृहिते रता ॥ विलप्य करुणं दीना [7]प्रशुशोच सुदुःखिता ॥ ८२ ॥
तासां मध्यात्समुत्थाय त्रिजटा वाक्यमब्रवीत् ॥ ८३ ॥
आत्मानं [8]खादत क्षिप्रं न सीतां [9]विनशिष्यति ॥ [10]जनकस्यात्मजा साध्वी स्नुषा दशरथस्य च ॥८४॥
स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः ॥ [11]राक्षसां च [12]विनाशाय भर्तुरस्या जयाय च ॥ ८५ ॥
[13]अलमस्मात्परित्रातुं राघवाद्राक्षसीगणम् ॥ अभियाचाम वैदेहीमेतद्धि मम रोचते ॥ ८६ ॥
[14]यस्या ह्येवंविधः स्वप्नो दुःखितायाः प्रदृश्यते ॥ सा दुःखैर्विविधैर्मुक्ता [15]सुखमाप्नोत्यनुत्तमम् ॥८७॥
प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा ॥ [[16]अलमेषा परित्रातुं राक्षस्यो महतो भयात्] ॥ ८८॥
ततः सा ह्रीमती बाला भर्तुर्विजयहर्षिता ॥ अवोचद्यदि तत्तथ्यं भवेयं शरणं हि वः ॥ ८९ ॥
तां चाहं तादृशीं दृष्ट्वा सीताया दारुणां दशाम् ॥ चिन्तयामास वि[17]क्रान्तो न च मे निर्वृतं मनः ॥९०॥

वा । दडयोरभेदः । दम्भो दाडिममित्यादिवत् । यद्वा मन्दत्वं चाल्पत्वं । " मूढाल्पापटुनिर्भाग्या मन्दा " इत्यमरः । सूक्ष्मोदरीत्यर्थः । मन्दा स्थूलपिपीलिकेत्याचक्षते । तस्या इव कृशमस्या उदरमित्यर्थः । ननु पूर्वं धान्यमालिन्या प्रतिषिद्ध इत्युक्तं । संप्रति मण्डोदर्येत्युच्यते । विप्रतिषिद्धमिदं । मैवं । उभाभ्यामपि प्रतिषिद्धत्वेनान्यतरोक्तावविरोधात् । मण्डोदर्यादिनामपरिज्ञानं च हनुमतस्तदीयव्यवहारात् ॥ ७४—७६ ॥ ताभिः देवकन्याभिः । अनेन मण्डोदर्यादिवदन्यासामपि निवारयितृत्वमुक्तं ॥ ७७ ॥ क्रूरैः क्रूरशब्दैः । सुदारुणैः अर्थतोपि क्रूरैः ॥ ७८ ॥ तृणवत् गणयामासेत्यन्वयः ॥७९॥ वृथागर्जितनिश्चेष्टाः वृथागर्जितेन निर्व्यापाराः ॥ ८० ॥ ततस्ताइति । तूष्णीं रक्षतेति रावणोक्ता इति शेषः । परिक्षिप्य परिवार्य ॥ ८१ ॥ सुदुःखिता प्रशुशोच । उत्तरोत्तरं दुःखितवतीत्यर्थः ॥ ८२—८५ ॥ अलं शक्ता । " अलं भूषणपर्याप्तिशक्तिवारणवाचकं " इत्यमरः । परित्रातुं एषेति शेषः ॥ ८६—८७ ॥ अपराधिजनप्राणत्राणे हेतुमाह—प्रणिपातेति ॥ ८८ ॥ ततः त्रिजटावाक्यानन्तरं । भर्तुर्विजयहर्षिता त्रिजटाकथितस्वप्नसूचितरामविजयहर्षिता । तत् त्रिजटास्वप्नवाक्यं । शरणं हि व इत्यत्रेतिकरणं द्रष्टव्यं ॥८९॥ नच

मन्दोदर्याएवनामान्तरंधान्यमालिनीत्युक्तं ॥ ७४ ॥ स० राक्षसीगणं राघवात्परित्रातुं अलं समर्था । प्रसादितासीतेति शेषः । तस्मादभियाचाम प्रार्थयाम ॥ ८६ ॥ शि० ननुस्वप्नस्यमिथ्यात्वात्किंतद्दर्शनेनसीताभर्तृविजयादीस्यतआह—यदीति । दुःखितायाएवंविधःस्वप्नोयदिदृश्यते तर्हि सादुःखिता दुःखैर्विमुक्तासतीसुखमाप्नोति । एतेन स्वप्नस्यमिथ्यात्वेपितद्दर्शनजनितफल·

[पा०] १ इदमर्धं ङ. च. ज.—ट. पाठेषुदृश्यते. २ क. ङ. झ. ट. रमस्वेति. ३ ङ. झ. ट. उत्थाप्य. ४ ङ. झ. ट. तथा. ५ घ. ट. राक्षस्योविकृताननाः. ६ क.—घ. ङ. झ. ट. सीताव्यवसितं. ७ ङ. च. ज.—ट. परिक्ष्विश्य. ८ ग. प्ररुरोद. घ. प्रचुक्रोश. ९ क. ख. खादतानार्यानसीतांभक्षयिष्यत. १० ङ. झ. ट. सीतामसितेक्षणां. ११ ङ. झ. ट. जनकस्यात्मजांसाध्वींस्नुषांदशरथस्यच. १२ क. राक्षसानांविनाशायराघवस्यजयायच. घ. राक्षसानामभावाय. १३ क. अलमेषापरित्रातुं. १४ ग. ङ.—ट. यदिह्येवंविधः. १५ घ. सुखंप्राप्नोत्यनुत्तमं. १६ इदमर्धं ङ.—ट. पाठेषुदृश्यते. १७ ङ. झ. ट. विश्रान्तो.

संभाषणार्थं च मया जानक्याश्चिन्तितो विधिः॥ इक्ष्वाकूणां हि वंशस्तु ततो मम पुरस्कृतः॥ ९१॥
श्रुत्वा तु गदितां वाचं राजर्षिगणपूजिताम्॥ प्रत्यभाषत मां देवी बाष्पैः पिहितलोचना॥ ९२॥
कस्त्वं केन कथं चेह प्राप्तो वानरपुङ्गव॥ का च रामेण ते प्रीतिस्तन्मे शंसितुमर्हसि॥ ९३॥
तस्यास्तद्वचनं श्रुत्वा ह्यहमप्यब्रवं वचः॥ ९४॥
देवि रामस्य भर्तुस्ते सहायो भीमविक्रमः॥ सुग्रीवो नाम विक्रान्तो वानरेन्द्रो महाबलः॥ ९५॥
तस्य मां विद्धि भृत्यं त्वं हनुमन्तमिहागतम्॥ भर्त्राहं प्रेषितस्तुभ्यं रामेणाक्लिष्टकर्मणा॥ ९६॥
इदं च पुरुषव्याघ्रः श्रीमान्दाशरथिः स्वयम्॥ अङ्गुलीयमभिज्ञानमदात्तुभ्यं यशस्विनि॥ ९७॥
तदिच्छामि त्वयाऽऽज्ञप्तं देवि किं करवाण्यहम्॥ रामलक्ष्मणयोः पार्श्वं नयामि त्वां किमुत्तरं॥९८॥
एतच्छ्रुत्वा विदित्वा च सीता जनकनन्दिनी॥ आह रावणमुत्साद्य राघवो मां नयत्विति॥९९॥
प्रणम्य शिरसा देवीमहमार्यामनिन्दिताम्॥ राघवस्य मनोह्लादमभिज्ञानमयाचिषम्॥ १००॥
अथ मामब्रवीत्सीता गृह्यतामयमुत्तमः॥ मणिर्वैन महाबाहू रामस्त्वां बहुमन्यते॥ १०१॥
इत्युक्त्वा तु वरारोहा मणिप्रवरमद्भुतम्॥ प्रायच्छत्परमोद्विग्ना वाचा मां संदिदेश ह॥ १०२॥
ततस्तस्यै प्रणम्याहं राजपुत्र्यै समाहितः॥ प्रदक्षिणं परिक्राममिहाभ्युद्गतमानसः॥ १०३॥
उत्तरं पुनरेवेदं निश्चित्य मनसा तया॥ [ज्ञात्वा संप्रस्थितं सीता मामुवाच तपस्विनी॥]
हनुमन्मम वृत्तान्तं वक्तुमर्हसि राघवे॥ १०४॥
यथा श्रुत्वैव नचिरात्तावुभौ रामलक्ष्मणौ॥ सुग्रीवसहितौ वीरावुपेयातां तथा कुरु॥ १०५॥
यद्यन्यथा भवेदेतद्द्वौ मासौ जीवितं मम॥ न मां द्रक्ष्यति काकुत्स्थो म्रिये साऽहमनाथवत्॥ १०६॥
तच्छ्रुत्वा करुणं वाक्यं क्रोधो मामभ्यवर्तत॥ उत्तरं च मया दृष्टं कार्यशेषमनन्तरम्॥ १०७॥
ततोऽवर्धत मे कायस्तदा पर्वतसन्निभः॥ युद्धकाङ्क्षी वनं तच्च विनाशयितुमारभे॥ १०८॥
तद्भग्नं वनषण्डं तु भ्रान्तत्रस्तमृगद्विजम्॥ प्रतिबुद्धा निरीक्षन्ते राक्षस्यो विकृताननाः॥ १०९॥
मां च दृष्ट्वा वने तस्मिन्समागम्य ततस्ततः॥ ताः समभ्यागताः क्षिप्रं रावणायाचचक्षिरे॥ ११०॥

मे निर्वृतं किन्तुदुःखितमित्यर्थः॥ ९०॥ विधिः उपायः॥ ९१—१०१॥ वाचा मां संदिदेशेति। स्वरामैकवेद्यं प्रागुक्तं काकासुरवृत्तान्तं तिलकनिर्माणादिकं च संदिष्टवतीत्यर्थः॥ १०२॥ परिक्रामं पर्यक्रामं। इहाभ्युद्गतमानसः इहाभ्युद्गते इहाभ्यागमने मानसं यस्य स तथा॥१०३—१०५॥ एतत् उपयानं। यद्यन्यथा भवेत् यदि नोपेयातामित्यर्थः। तदा द्वौ मासौ मम जीवितं। ततः परं जीवामीत्यर्थः। न मां द्रक्ष्यसि मासद्वयाभ्यन्तरे मां न द्रक्ष्यति चेत् तदा म्रिय इति योज्यं। मासशब्दोत्र पक्षपरः। "पक्षा वै मासाः" इति श्रुतेः॥ १०६॥ उत्तरं अनन्तरं। अनन्तरं अनन्तरकर्तव्यं उत्तरकार्यमित्यर्थः॥१०७—

स्यसत्यलंध्वनितं। मतान्तरेस्वप्नस्यापिसत्यत्वमित्यन्यदेतत्॥ ८७॥ स० सर्वैः पुरस्कृतः प्रधानीकृतः। इक्ष्वाकोर्यत्कुलंसंततिरूपंगृहं तस्यवंशः गृहाधारस्थूणावेणुस्थानीयोरामः मम मया स्तुतः॥ ९१॥ स० अभिज्ञानं स्मृतिजनकं॥ ९७॥ रामानु० त्वया आज्ञप्तमिच्छामि त्वत्कर्तृकमाज्ञापनमिच्छामीत्यर्थः। किंशब्दःक्षेपे। रामलक्ष्मणयोःपार्श्वंत्वांनयामि। उत्तरंकिं एवमेवंवदं-

[पा०] १ ग.—ट. इक्ष्वाकुकुलवंशस्तुतो. २ च. छ. ज. ञ. क्रच. ३ ख. ङ.—ट. अहमपि. ४ ङ.—ट. संग्रहितस्तुभ्यं. घ. संप्रेषितस्तुभ्यं. ५ छ. झ. ञ. ट. मुत्पाट्य. ६ क.—ट. मुत्तमं. ७ क. ग. घ. च. छ. ज. परिक्रम्यइहा. क. परिक्रम्यइहाभ्यागत. ८ ङ. छ. झ. ञ. ट. उत्तरंपुनरेवाह. ख. उक्तोहंपुनरेवेदं. ९ क. ग.—ट. तदा. १० इदमर्धं क. पाठेदृश्यते. ११ ग. ङ. च. छ. झ. ञ. ट. यदन्यथा. १२ च. छ. ज. ञ. मनुत्तमं. १३ क. ख. ततोहंवातवेगेनतदा. १४ ङ. झ. युद्धाकाङ्क्षी. १५ घ. ङ. झ. ट. तस्य. १६ क. भग्नपादपषण्डंतु. १७ घ. वनद्विजं. १८ ङ. च. झ. ञ. ट. प्रतिबुध्य. १९ घ. न्समागत्य. २० क. गत्वातास्त्वरिताः.

राजन्वनमिदं दुर्गं तव भग्नं दुरात्मना ॥ वानरेण ह्यविज्ञाय तव वीर्यं महाबल ॥ १११ ॥
दुर्बुद्धेस्तस्य राजेन्द्र तव विप्रियकारिणः ॥ वधमाज्ञापय क्षिप्रं यथाऽसौ विलयं व्रजेत् ॥ ११२ ॥
तच्छ्रुत्वा राक्षसेन्द्रेण विसृष्टा भृशदुर्जयाः ॥ राक्षसाः किंकरा नाम रावणस्य मनोनुगाः ॥ ११३ ॥
तेषामशीतिसाहस्रं शूलमुद्गरपाणिनाम् ॥ मया तस्मिन्वनोद्देशे परिघेण निषूदितम् ॥ ११४ ॥
तेषां तु हतशेषा ये ते गत्वा लघुविक्रमाः ॥ निहतं च महत्सैन्यं रावणायाचचक्षिरे ॥ ११५ ॥
ततो मे बुद्धिरुत्पन्ना चैत्यप्रासादमाक्रमम् ॥ तत्रस्थान्राक्षसान्हत्वा शतं स्तम्भेन वै पुनः ॥
ललामभूतो लङ्कायाः स वै विध्वंसितो मया ॥ ११६ ॥
ततः प्रहस्तस्य सुतं जम्बुमालिनमादिशत् ॥ राक्षसैर्बहुभिः सार्धं घोररूपैर्महायानकैः ॥ ११७ ॥
तमहं बलसंपन्नं राक्षसं रणकोविदम् ॥ परिघेणातिघोरेण सूदयामि सहानुगम् ॥ ११८ ॥
तच्छ्रुत्वा राक्षसेन्द्रस्तु मन्त्रिपुत्रान्महाबलान् ॥ पदातिबलसंपन्नान्प्रेषयामास रावणः ॥ ११९ ॥
परिघेणैव तान्सर्वान्नयामि यमसादनम् ॥ १२० ॥
मन्त्रिपुत्रान्हताञ्छ्रुत्वा समरे लघुविक्रमान् ॥ पञ्च सेनाग्रगाञ्छूरान्प्रेषयामास रावणः ॥ १२१ ॥
तानहं सहसैन्यान्वै सर्वानेवाभ्यसूदयम् ॥ १२२ ॥
ततः पुनर्दशग्रीवः पुत्रमक्षं महाबलम् ॥ बहुभी राक्षसैः सार्धं प्रेषयामास रावणः ॥ १२३ ॥
तं तु मन्दोदरीपुत्रं कुमारं रणपण्डितम् ॥ सहसा खं समुत्क्रान्तं पादयोश्च गृहीतवान् ॥
चर्मासिनं शतगुणं भ्रामयित्वा व्यपेषयम् ॥ १२४ ॥
तमक्षमागतं भग्नं निशम्य स दशाननः ॥ ततः इन्द्रजितं नाम द्वितीयं रावणः सुतम् ॥
व्यादिदेश सुसंक्रुद्धो बलिनं युद्धदुर्मदम् ॥ १२५ ॥
तच्चाप्यहं बलं सर्वं तं च राक्षसपुङ्गवम् ॥ नष्टौजसं रणे कृत्वा परं हर्षमुपागमम् ॥ १२६ ॥
महतापि महाबाहुः प्रत्ययेन महाबलः ॥ प्रेषितो रावणेनैव सह वीरैर्मदोत्कटैः ॥ १२७ ॥
सोविषह्यं हि मां बुद्ध्वा स्वबलं चावमर्दितम् ॥ ब्राह्मेनास्त्रेण स तु मां प्राबध्नाच्चातिवेगितः ॥ १२८ ॥
रज्जुभिश्चाभि बध्नन्ति ततो मां तत्र राक्षसाः ॥ रावणस्य समीपं च गृहीत्वा मामुपानयन् ॥ १२९ ॥
दृष्ट्वा संभाषितश्चाहं रावणेन दुरात्मना ॥ पृष्टश्च लङ्कागमनं राक्षसानां च तं वधम् ॥ १३० ॥
तत्सर्वं च मया तत्र सीतार्थमिति जल्पितम् ॥ १३१ ॥

११५ ॥ ततो मे बुद्धिरुत्पन्ना वक्ष्यमाणकार्यविषयेत्यर्थः । तादृशं बुद्धिकार्यमाह—चैत्येत्यादिना। चैत्यप्रासादं नगरमध्यस्थप्रासादं । ललामभूतः अलंकारभूतः ॥ ११६—११८ ॥ पदातिबलसंपन्नान् पदातिप्रभृत्याज्ञापनरूपमुत्तरंकिमित्यर्थः ॥ ति० उत्तरं समुद्रोत्तरकूलस्थं ॥ ९८ ॥ ति० तस्यदुर्बुद्धितेतिबहुव्रीहेस्तल् । नपुनर्व्रजेत् स्वदेशमितिशेषः ॥ ११२ ॥ रामानु० शूलमुद्गरपाणिनामित्यत्र दीर्घाभावआर्षः ॥ ११४ ॥ ति० चैत्यप्रासादं विनाशयितुमितिशेषः ॥ ११६ ॥ रामानु० चर्मासिनमित्यत्र इनन्तत्वमार्षं ॥ १२४ ॥ रामानु० द्वितीयं प्रेषितपुत्रापेक्षयाद्वितीयं ॥ १२५ ॥

[पा०] १ ङ. झ. ट. त्तस्यदुर्बुद्धितारांजस्तव. ग. तस्यदुर्बुद्धिनोराजंस्तव. २ ङ. झ. ट. नपुनर्व्रजेत्. ३ ङ. झ. ट. बहुदुर्जयाः. ४ ङ.—ट. हतशिष्टाये. ५ क. ग. ङ.—ट. मयासैन्यं. ६ ग. ङ.—ट. सुसमं. ७ ग. ङ.—झ. ट. लङ्काया मयाविध्वंसितोरुषा. ८ ग. भैयावहैः. ङ. दुरासदैः. ९ क. सबलंसाश्वं. १० क. ग. ङ.—ट. संयुगे. ११ ङ.—ट. समुद्यन्तं. १२ ङ. झ. ञ. तमासीनं. १३ ङ.—ट. ततश्चेन्द्रजितं. १४ क. रावणेनैषमहावीर्योमदोत्कटः. १५ ङ.—ट. मंदोद्धतैः. १६ क. ग.—ट. स्वसैन्यंच. १७ ग. रज्जुभिश्चबबन्धुस्ते. १८ ङ. छ. झ. ञ. ट. मामुपागमन्. १९ ग. घ. संभाषितस्तेन. २० क.—घ. तद्वधं. २१ क. ग. ङ.—ट. रणेतत्र. २२ ङ.—ट. सीतार्थमुप. घ. सीतार्थमभि.

[1]अस्याहं दर्शनाकाङ्क्षी प्राप्तस्त्वद्भवनं विभो ॥ मारुतस्यौरसः पुत्रो वानरो हनुमानहम् ॥ १३२ ॥
रामदूतं च मां विद्धि सुग्रीवसचिवं कपिम् ॥ सोहं [2]दौत्येन रामस्य [3]त्वत्सकाशमिहागतः ॥ १३३ ॥
[[4]शृणु चापि समादेशं यदहं ब्रवीमि ते ॥ राक्षसेश हरीशस्त्वां वाक्यमाह समाहितम् ॥१३४॥]
सुग्रीवश्च [5]महातेजाः स त्वां कुशलमब्रवीत् ॥ धर्मार्थकामसहितं हितं पथ्यमुवाच च ॥ १३५ ॥
वसतो ऋश्यमूके मे पर्वते विपुलद्रुमे ॥ राघवो रणविक्रान्तो मित्रत्वं समुपागतः ॥ १३६ ॥
तेन मे कथितं [6]राज्ञा भार्या मे रक्षसा हृता ॥ तत्र साहाय्यमस्माकं कार्यं सर्वात्मना त्वया ॥१३७॥
मया च कथितं तस्मै [7]वालिनश्च वधं प्रति ॥ तत्र साहाय्यहेतोर्मे समयं कर्तुमर्हसि ॥ १३८ ॥
वालिना हृतराज्येन सुग्रीवेण [8]महाप्रभुः ॥ [9]चक्रेग्निसाक्षिकं सख्यं राघवः सहलक्ष्मणः ॥ १३९ ॥
तेन [10]वालिनमुत्पाट्य शरेणैकेन संयुगे ॥ वानराणां महाराजः [11]कृतः स प्लवतां प्रभुः ॥ १४० ॥
[12]तस्य साहाय्यमस्माभिः कार्यं सर्वात्मना त्विह ॥ तेन प्रस्थापितस्तुभ्यं समीपमिह धर्मतः ॥१४१॥
क्षिप्रमानीयतां सीता दीयतां [13]राघवाय च ॥ यावन्न हरयो वीरा विधमन्ति [14]बलं तव ॥ १४२ ॥
वानराणां [15]प्रभावो हि न केन विदितः पुरा ॥ देवतानां सकाशं च ये गच्छन्ति निमन्त्रिताः ॥१४३॥
इति वानरराजस्त्वामाहेत्यभिहितो मया ॥ मामैक्षत [16]ततः क्रुद्धश्चक्षुषा प्रदहन्निव ॥ १४४ ॥
तेन वध्योऽहमाज्ञप्तो रक्षसा रौद्र[17]कर्मणा ॥ मत्प्रभावमविज्ञाय रावणेन दुरात्मना ॥ १४५ ॥
ततो विभीषणो नाम तस्य भ्राता [18]महामतिः ॥ तेन [19]राक्षसराजोसौ याचितो मम कारणात् ॥१४६॥
नैवं राक्षसशार्दूल त्यज्यतामेष निश्चयः ॥ राजशास्त्रव्यपेतो हि मार्गः [20]संसेव्यते त्वया ॥ १४७॥
दूतवध्या न दृष्टा हि राजशास्त्रेषु राक्षस ॥ दूतेन वेदितव्यं च [21]यथार्थं हितवादिना ॥ १४८ ॥
सुमहत्यपराधेपि दूतस्यातुलविक्रम ॥ विरूपकरणं दृष्टं न वधोस्तीति शास्त्रतः ॥ १४९ ॥
विभीषणेनैवमुक्तो रावणः संदिदेश तान् ॥ राक्षसानेतदेवास्य लाङ्गूलं दह्यतामिति ॥ १५० ॥
ततस्तस्य वचः श्रुत्वा मम पुच्छं समन्ततः ॥ वेष्टितं शणवल्कैश्च [22]जीर्णैः कार्पासकैः पटैः ॥१५१॥

तिसैन्यसंपन्नान् ॥ ११९—१३१ ॥ अस्याः सीतायाः । विसंधिरार्षः ॥ १३२—१३४ ॥ धर्मार्थकामसहितमिति तत्र धर्मसाहित्यात् हितं परत्र उपकारकं । अर्थसाहित्यात्पथ्यं । इहोपकारकं चेत्यर्थः ॥ १३५—१३८ ॥ सुग्रीवश्चेत्यादिना सुग्रीवोक्तं कियदनूद्य संप्रति शेषं स्वयं वक्ता सन्नाह—वालिनेति ॥ १३९—१४३ ॥ इदं वचस्सुग्रीवोक्तमेव मयोक्तमित्याह—इतीति ॥ १४४–१४६ ॥ नैवमिति । कर्तव्यमिति शेषः । राजशास्त्रं राजधर्मशास्त्रं ॥१४७॥ वेदितव्यं वक्तव्यमित्यर्थः ॥१४८—

रामानु० अहंप्राप्तः अहंहनुमान् इत्यहंशब्दस्यनिर्वाहः ॥ १३२ ॥ **स०** समोऽहितेनशत्रुणेतिसमाहितः । पूर्ववालिमुखतःसख्येपिइदानींरामसाहाय्येनशत्रुंत्रासमित्यर्थः ॥ १३४ ॥ **रामानु०** सुग्रीवेण मयेतिशेषः ॥ १३९ ॥ **रामानु०** वानराणांमहाराजःकृतः । अहमितिशेषः ॥ १४० ॥ **रामानु०** तेन साहाय्यस्यास्माभिःकर्तव्यत्वेन । प्रस्थापितः दूतइतिशेषः ॥ **शि०** तेन मया ॥ १४१ ॥ **रामानु०** विधमन्ति । " यावत्पुरानिपातयोर्लट् " इतिलृडर्थेलट् ॥ १४२ ॥ **रामानु०** येहिनिमन्त्रिताः युद्धसाहाय्यार्थमाहूताः । देवतानांसकाशंगच्छन्ति तेषांवानराणांप्रभावः पुराकेननविदितः । त्वयाविज्ञातएवेतिभावः ॥ **स०** निमन्त्रिताः आज्ञप्ताः । अनेनराजाज्ञाभावादेवनैतावत्कालपर्यन्तमत्रागताइतिध्वन्यते ॥ **ति०** वानराणामिति। राघवाणामितिपाठे

[पा०] १ ङ. झ. ट. तस्यास्तु. घ. अस्याःसंदर्शनाकाङ्क्षी. २ क. घ.—ट. दौत्येन. ३ क. ख. घ. त्वत्समीपमुपागतः. ४ अर्धश्लोकः ङ.—ट. पाठेपुदृश्यते. ५ ङ.—ट. महाभागसत्वांकौशलं. ६ क.—ट. राजन्भार्या. ७ ङ.—झ. ट. सहप्रभुः. घ. समंप्रभुः. ८ ग कृत्वाग्निसाक्षिकं. ९ क. तेनवालीविनिहतोराघवेणमहाजिरे। राज्यंचसुमहत्प्राप्तंसुग्रीवेणमहात्मना. १० ख. ग. घ. मुत्साद्य. ङ. च. ज.—ट. माहत्म्य. ११ क. घ. तत्र. १२ ग.—ट. राघवस्यच. १३ ङ. झ. ट. प्रभावोर्यं. १४ ख. ग. ङ.—ट. ततोरुष्टश्चक्षुषा. घ. रुषाविष्टश्चक्षुषा. १५ घ. क्रूरकर्मणा. १६ घ. महाद्युतिः. १७ ग. ङ. छ. झ. ञ. ट. राक्षसराजश्च. १८ ङ. झ. ञ. ट. संलक्ष्यते. १९ ग. ङ. झ. ट. यथाभिहितवादिना. २० ग.—ञ. पटैःकार्पासकैस्तथा.

राक्षसाः सिद्धसन्नाहास्ततस्ते चण्डविक्रमाः ॥ [1]तदाऽदह्यन्त मे पुच्छं निघ्नन्तः काष्ठमुष्टिभिः ॥१५२॥
बद्धस्य बहुभिः पाशैर्यत्रितस्य च राक्षसैः ॥ [[2]न मे पीडा भवेत्काचिदिदृक्षोर्नगरीं दिवा] ॥१५३॥
ततस्ते राक्षसाः शूरा बद्धं मामग्निसंवृतम् ॥ अघोषयन्राजमार्गे नगरद्वारमा[3]गताः ॥ १५४ ॥
ततोऽहं सुमहद्रूपं संक्षिप्य पुनरात्मनः ॥ विमोचयित्वा तं बन्धं प्रकृतिस्थः स्थितः पुनः ॥१५५॥
आयसं परिघं गृह्य तानि रक्षांस्यसूदयन् ॥ ततस्तन्नगरद्वारं वेगेनाप्लुतवा[4]हनम् ॥ १५६ ॥
पुच्छेन च प्रदीप्तेन तां पुरीं साट्टगोपुराम् ॥ दहाम्यहमसंभ्रान्तो युगान्ताग्निरिव प्रजाः ॥ १५७ ॥
[[5]ततो मे ह्यभवत्त्रासो लङ्कां दग्धां समीक्ष्य तु ॥] विनष्टा जानकी व्यक्तं न ह्यदग्धः प्रदृश्यते ॥
लङ्कायां कश्चिदुद्देशः सर्वा भस्मीकृता पुरी ॥ १५८ ॥
दहता च मया लङ्कां [6]दग्धा सीता न संशयः ॥ [7]रामस्य हि महत्कार्यं मयेदं वि[8]तथीकृतम् ॥ १५९ ॥
इति शोकसमाविष्टश्चिन्तामहमुपागतः ॥ १६० ॥
अथाहं वाचमश्रौषं चारणानां शुभाक्षराम् ॥ जानकी न च दग्धेति वि[9][10]स्मयोदन्तभाषिताम् ॥ १६१ ॥
ततो मे बुद्धिरुत्पन्ना श्रुत्वा तामद्भुतां गिरम् ॥ अदग्धा जानकीत्येवं निमित्तै[11]श्चोप[12]लक्षिता ॥ १६२ ॥
दीप्यमाने तु लाङ्गूले न मां दहति पावकः ॥ हृदयं च प्रहृष्टं मे वाताः सुरभिगन्धिनः ॥ १६३ ॥
तैर्निमित्तैश्च दृष्टार्थैः कारणैश्च महागुणैः ॥ ऋषिवाक्यैश्च सि[13]द्धार्थैरभवं हृष्टमानसः ॥ १६४ ॥
पुनर्दृष्ट्वा च वैदेहीं विसृष्टश्च तया पुनः ॥ १६५ ॥
ततः पर्वतमासाद्य तत्रारिष्टमहं पुनः ॥ प्रतिप्लवनमारेभे युष्मद्दर्शनकाङ्क्षया ॥ १६६ ॥
ततः [14]पवनचन्द्रार्कसिद्धगन्धर्वसेवितम् ॥ पन्थानमहमाक्रम्य भवतो दृ[15]ष्टवानिह ॥ १६७ ॥
राघवस्य प्रभावेन भवतां चैव तेजसा ॥ सुग्रीवस्य च कार्यार्थं मया सर्वमनुष्ठितम् ॥ १६८ ॥

---

१५२ ॥ यत्रितस्य आवृतस्य ॥ १५३ ॥ नगरद्वारमागतास्सन्तः राजमार्गे अघोषयन्निति योजना ॥ १५४—१५६ ॥ अट्टं बलभिः ॥ १५७—१६० ॥ विस्मयोदन्तभाषितां भाषितविस्मयोदन्तां । उक्ताद्भुतवार्तामित्यर्थः । विस्मयवृत्तान्तव्यवहृतामिति वा ॥ १६१ ॥ निमित्तैश्चोपलक्षिता शकुनादिभिश्च सीता न दग्धेति ज्ञातेत्यर्थः ॥ १६२ ॥ हृदयं प्रहृष्टं । आसीदितिशेषः । सुरभिगन्धिनः आसन्नितिशेषः ॥ १६३ ॥ दृष्टार्थैः दृष्टफलैः । निमित्तैः शकुनैः । कारणैः नेत्रस्फुरणादिभिः । महागुणैः फलव्याप्तैः । सिद्धार्थैः अबाधितार्थैः । तत्र हेतुत्वेन ऋषिपदोपादानं ॥ १६४ ॥ पुनरित्यर्धमेकं वाक्यं । विसृष्टः प्रेषितोस्मि ॥ १६५ ॥ तत्र लङ्कासमीपे । सामीप्ये सप्तमी । तत्र वर्तमानं अरिष्टं पर्वतं ॥ १६६ ॥ भवतो दृष्टवानिह । भवतः युष्मान् । इह समुद्रतीरे ॥ १६७ ॥ भवतां चैव तेजसा भवदनुग्रहेणेत्यर्थः । सुग्रीवस्य च कार्यार्थं स्वामिकार्यस्यावश्यकर्तव्यत्वादिति भावः । कार्यार्थं कार्यवस्तु । क्लीबत्वमार्षं । अस्यानुवादवाक्यविस्तरस्य प्रयोजनं

मनुष्योसमर्थइतिनमन्तव्यमितिभावः ॥ १४३ ॥ ति० उपलक्षितं तददहनमितिशेषः । निमित्तैः शुभसूचकैः ॥ १६२ ॥ स० गन्धएषामस्तीतिगन्धिनः । सुरभयश्चतेगन्धिनश्चेतिविग्रहः । सुरभिलंगन्धेसप्तघटिकाभोजनमित्यत्रेवार्थादन्वेति ॥ १६३ ॥ इत्यष्टपञ्चाशःसर्गः ॥ ५८ ॥

[पा०] १ क. ग. ङ. ञ. ट. तदाऽदीप्यन्त. २ इदमर्धं ङ.—ट. पाठेषुदृश्यते. ३ घ. माश्रिताः. ४ इदमर्धं क. ख. पाठयोर्दृश्यते. ५ क. ख. नसीतापरिरक्षिता. ६ च. छ. ज. ञ. रामस्येदंमयाकार्यंभूयोवा. ७ ङ. ञ. ट. विफलीकृतं. ८ ङ. ञ. ट. ततोहं. ९ घ. गगनेऽश्रौषं. १० क. ग. घ. विस्मयोदात्तभाषिणां. ११ ङ. ञ. ट. श्चोपलक्षितं. १२ ङ. ञ. ट. दृष्टार्थैरभवं. १३ ङ. ञ. ट. श्वसन. १४ च. छ. ज. दृष्टवानहं.

एतत्सर्वं मया तत्र यथावदुपपादितम् ॥ अत्र यन्न कृतं शेषं तत्सर्वं क्रियतामिति ॥ १६९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टपञ्चाशः सर्गः ॥ ५८ ॥

एकोनषष्टितमः सर्गः ॥ ५९ ॥

हनुमता वानरान्प्रति सीतादुरवस्थानिवेदनपूर्वकं तदसहिष्णुतया जांबवदादिपराक्रमप्रशंसनेन तत्साहाय्यात्कैमुत्येन स्वस्य रावणादिहननसामर्थ्यनिवेदनपूर्वकं सीतापुरस्करणेन रामदर्शनस्यौचित्योक्तिः ॥ १ ॥

एतदाख्याय तत्सर्वं हनुमान्मारुतात्मजः ॥ भूयः समुपचक्राम वचनं वक्तुमुत्तरम् ॥ १ ॥
सफलो राघवोद्योगः सुग्रीवस्य च संभ्रमः ॥ शीलमासाद्य सीताया मम च प्रवणं मनः ॥
[आर्यायाः सदृशं शीलं सीतायाः प्लवगर्षभाः] ॥ २ ॥
तपसा धारयेल्लोकान्क्रुद्धो वा निर्दहेदपि ॥ सर्वथाऽतिप्रवृद्धोसौ रावणो राक्षसाधिपः ॥
तस्य तां स्पृशतो गात्रं तपसा न विनाशितम् ॥ ३ ॥
न तदग्निशिखा कुर्यात्संस्पृष्टा पाणिना सती ॥ जनकस्यात्मजा कुर्याद्यत्क्रोधकलुषीकृता ॥ ४ ॥

वानराणां श्रवणकुतूहलातिशयप्रकाशनं ॥१६८-१६९
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टपञ्चाशः सर्गः ॥ ५८ ॥

तदेतदाख्याय उत्तरं वचनं वक्तुमुपचक्रामेत्यन्वयः ॥ १ ॥ अथ संप्रत्येव रावणं जित्वा सीतया सहैवास्माभिः प्रतियातव्यमिति हृदि निधायाह—सफल इति । संभ्रमः त्वरा । उत्साह इतियावत् । कुतस्साफल्यमित्याशङ्क्य सीतापातिव्रत्योपलम्भादित्याह—शीलमिति । शीलं वृत्तं । पातिव्रत्यमिति यावत् । अहं तु प्रागेव तदेकशरण इत्याह—मम चेति । प्रवणं प्रह्वं तत्परमिति यावत् । सीताचारित्रस्य न किंचिदसाध्यमस्तीति भावः ॥ २ ॥ तर्हि तं दुरात्मानं रावणं स्पृशन्तमेव किमिति नादहदित्याशङ्क्य तस्यापि तपःसंपत्तिसद्भावादित्याह—तपसेत्यादिना ॥ यद्वा रावणतपःकथनद्वारा सीतायाः पातिव्रत्यातिशयमाह—तपसेत्यादिना ॥ तपसा अतिप्रवृद्ध इत्यन्वयः । कोपप्रसादाभ्यां सर्वलोकनिग्रहानुग्रहसमर्थोसौ रावणस्सर्वथा महातपस्संपन्नः । अतएव सीतास्पर्शेप्यविनाशित इत्यर्थः ॥ ३ ॥ तर्हि सीताशीलं दुर्बलमस्माकं किमुपकरिष्यतीत्याशङ्क्य नेत्याह—न तदिति ॥ सीताशीलमेव बलीयस्त्वादुपकरिष्यतीत्यर्थः । क्रोधकलुषीकृतेतिवचनाद्भर्तृमुखेन वैरनिर्यातनं वीरपत्नीधर्मः । अन्यथा महालाघवं भर्तुरित्यद्यापि पारतन्त्र्यपालनाय तादृक्क्रोधाकरणाद्रावणो जीवतीति गम्यते । एतदेवोक्तं प्राक्—" असंदेशात्तु रामस्य तपसश्चानुपालनात् । न त्वां कुर्मि दशग्रीव भस्म भस्मार्ह

स० उत्तरं उत्तमं ॥ १ ॥ ति० संभ्रमः आदरः । उत्साह इत्यर्थः । ममनः प्रीणितं तुष्टं । प्रवणमितिपाठेपि प्रवणं संतोषप्रवणमित्यर्थः ॥ स० राघवोद्योगः सीतावृत्तान्तज्ञानोत्साहः । सुग्रीवस्यसंगमः सुग्रीवेणसहसख्यंच । सीतायाःशीलं पातिव्रत्यादिसद्वृत्तं । आसाद्य प्राप्य । दृष्ट्वासफलइतिज्ञातः । एतादृश्याःस्त्रियाअन्यस्याःक्वाप्यभावेनास्याविषयेबहुलायासोपियत्नःकर्तव्य एवेतिभावः । ति० सदृशं पतिव्रतानामरुन्धत्यादीनांसदृशमित्यर्थः । स० आर्यायाः पार्वत्याः । सदृशंशीलंसीतायाः । अथवा आर्यायाः सीतायाः । शीलं सीतायाएवसदृशमित्यनन्वयालङ्कारः ॥ २ ॥ ति० तर्हिरावणंकिमितिनादहदित्यतआह—सर्वथेति । अतिप्रकृष्टः महातपस्संपन्नइत्यर्थः ॥ स० सर्वथा सर्वप्रकारेण । तपोबलादिनातिप्रकृष्टः अभिवृद्धः । कथमेवंज्ञायतइत्यतआह—यस्येति । सर्वथा रावणतपोबलेनसीतायाःकोपातिशयानुदयात्तस्यजीवनमितिफलितार्थः ॥ ३ ॥ ति० नैतावतासीताशीलंदुर्बलमित्याशङ्क्यमित्याह—नेति । यत्कुद्धासीताकुर्यात् तत् स्पृष्टाऽग्निशिखापिनकुर्यात् । इयंतुभर्तुःपराक्रमकीर्तये नाद्यापिकुध्यतीति

[पा०] १ ग. ङ. झ. ट. तत्र. च. छ. ज. ञ. अतोयत्कर्मशेषंनः. क. मयायन्नकृतंकर्मतत्सर्वंकर्तुमर्हथ. २ ठ. संगमः. ३ ङ. झ. ट. प्रीणितं. ४ ङ.—ट. पाठेष्विदमर्धंदृश्यते. ५ ङ. च. झ. ट. न्कुद्धावा. ६ ङ. झ. ट. प्रकृष्टोसौ. ७ क. ग. घ. ङ. झ. ट. यस्य. च. छ. ज. ञ. यस्यसंस्पृशतो.

जाम्बवत्प्रमुखान्सर्वाननुज्ञाप्य महाहरीन् ॥ अस्मिन्नेवंगते कार्ये भवतां च निवेदिते ॥
न्याय्यं स्म सह वैदेह्या द्रष्टुं तौ पार्थिवात्मजौ ॥ ५ ॥
अहमेकोपि पर्याप्तः सराक्षसगणां पुरीम् ॥ तां लङ्कां तरसा हन्तुं रावणं च महाबलम् ॥ ६ ॥
किं पुनः सहितो वीरैर्बलवद्भिः कृतात्मभिः ॥ कृतास्त्रैः प्लवगैः शूरैर्भवद्भिर्विजयैषिभिः ॥ ७ ॥
अहं तु रावणं युद्धे ससैन्यं सपुरस्सरम् ॥ सहपुत्रं वधिष्यामि सहोदरयुतं युधि ॥ ८ ॥
ब्राह्ममैन्द्रं च रौद्रं च वायव्यं वारुणं तथा ॥ यदि शक्रजितोस्त्राणि दुर्निरीक्षाणि संयुगे ॥ ९ ॥
तान्यहं विधमिष्यामि निहनिष्यामि राक्षसान् ॥ भवतामभ्यनुज्ञातो विक्रमो मे रुणद्धि तम् ॥१०॥
मयाऽतुला विसृष्टा हि शैलवृष्टिर्निरन्तरा ॥ देवानपि रणे हन्यात्किं पुनस्तान्निशाचरान् ॥
[भवतामनुज्ञातो विक्रमो मे रुणद्धि माम्] ॥ ११ ॥
सागरोप्यतियाद्वेलां मन्दरः प्रचलेदपि ॥ न जाम्बवन्तं समरे कम्पयेदरिवाहिनी ॥ १२ ॥
सर्वराक्षससङ्घानां राक्षसा ये च पूर्वकाः ॥ अलमेको विनाशाय वीरो वालिसुतः कपिः ॥ १३ ॥
पनसस्योरुवेगेन नीलस्य च महात्मनः ॥ मन्दरोप्यवशीर्येत किं पुनर्युधि राक्षसाः ॥ १४ ॥
सदेवासुरयक्षेषु गन्धर्वोरगपक्षिषु ॥ मैन्दस्य प्रतियोद्धारं शंसत द्विविदस्य वा ॥ १५ ॥
अश्विपुत्रौ महाभागावेतौ प्लवगसत्तमौ ॥ एतयोः प्रतियोद्धारं न पश्यामि रणाजिरे ॥ १६ ॥
पितामहवरोत्सेकात्परमं दर्पमास्थितौ ॥ अमृतप्राशिनावेतौ सर्ववानरसत्तमौ ॥ १७ ॥
अश्विनोर्माननार्थं हि सर्वलोकपितामहः ॥ सर्वावध्यत्वमतुलमनयोर्दत्तवान्पुरा ॥ १८ ॥
वरोत्सेकेन मुक्तौ च प्रमथ्य महतीं चमूम् ॥ सुराणाममृतं वीरौ पीतवन्तौ प्लवङ्गमौ ॥ १९ ॥
एतावेव हि संक्रुद्धौ सवाजिरथकुञ्जराम् ॥ लङ्कां नाशयितुं शक्तौ सर्वे तिष्ठन्तु वानराः ॥ २० ॥
मयैव निहता लङ्का दग्धा भस्मीकृता पुनः ॥ राजमार्गेषु सर्वत्र नाम विश्रावितं मया ॥ २१ ॥
जयत्यतिबलो रामो लक्ष्मणश्च महाबलः ॥ राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ २२ ॥
अहं कोसलराजस्य दासः पवनसंभवः ॥ हनुमानिति सर्वत्र नाम विश्रावितं मया ॥ २३ ॥
अशोकवनिकामध्ये रावणस्य दुरात्मनः ॥ अधस्ताच्छिंशुपावृक्षे साध्वी करुणमास्थिता ॥ २४ ॥
राक्षसीभिः परिवृता शोकसंतापकर्शिता ॥ मेघलेखापरिवृता चन्द्रलेखेव निष्प्रभा ॥ २५ ॥
अचिन्तयन्ती वैदेही रावणं बलदर्पितम् ॥ पतिव्रता च सुश्रोणी अवष्टब्धा च जानकी ॥ २६ ॥

तेजसा " इति ॥ ४ ॥ एवं स्थिते युष्मदनुमत्या भृत्यविजयोपि स्वामिन एवेति कृत्वा सीतारामपदावलम्बादहमेव रावणं निर्जित्य सीतापुरस्कारेणैव राघवौ द्रक्ष्यामीत्याह—जाम्बवदिति ॥ ५ ॥ न चाशक्तिशङ्का कार्येति बहुधा प्रपञ्चयन्नाह—अहमित्यादिना ॥ ६—९ ॥ अभ्यनुज्ञातः अभ्यनुज्ञानात् । पञ्चम्यास्तसिः । मे विक्रमः तं रावणं रुणद्धि हन्तीत्यर्थः ॥ १०—११ ॥ अतियात् आर्ष ह्रस्वत्वं ॥ १२ ॥ पूर्वकाः तेषामितिशेषः ॥ १३—२० ॥ दग्धत्वेप्यङ्गारावस्था भवति सापि नास्तीत्याह—भस्मीकृतेति ॥ २१ ॥ नामविश्रावणमेवाह—जयतीति ॥ जयति सर्वोत्कर्षेण वर्तते । तदुक्तं हरिणा—" जयिर्जयाभिभवयोराद्येर्थेसावकर्मकः । उत्कर्षप्राप्तिराद्यार्थो द्वितीयेर्थे सकर्मकः " इति ॥ २२—२३ ॥ अथ सीतादुर्दशाविमर्शेपि संप्रत्यसौ समानेतव्येत्याशयेन तद्दशां दर्शयति—अशोकेत्यादिना ॥ २४—२६ ॥

भावः । अकुद्धायाअपिस्पर्शमात्रेणप्राप्तोनाशस्तु रावणतपसानिवारितइतिज्ञेयं ॥ ४ ॥ ति० कृतास्त्रैः देवांशत्वादस्त्रप्रयोगसमर्थैः ॥ ७ ॥ स० युद्धेरावणं युद्धेलोकरावणं ॥ ८ ॥

[पा०] १ क. ग. ङ. च. झ. ञ. ट. शक्तैः. २ ङ. झ. ट. पाठेष्विदमर्धदृश्यते. ३ क. तेषांवालिसुतः. ४ झ. ट. प्लवगस्योरुवेगेन. ५ ग. ङ. झ. ट. महावेगौ. च. छ. ज. ञ. महावीर्यौयौतौ. ६ क. मत्तौच. ग. मत्तौतौ. ७ ङ.—ट. पुरी.

अनुरक्ता हि वैदेही रामं सर्वात्मना शुभा ॥ अनन्यचित्ता रामे च पौलोमीव पुरन्दरे ॥ २७ ॥
तदेकवाससंवीता रजोध्वस्ता तथैव च ॥ शोकसंतापदीनाङ्गी सीता भर्तृहिते रता ॥ २८ ॥
सा मया राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः ॥ राक्षसीभिर्विरूपाभिर्दृष्टा हि प्रमदावने ॥ २९ ॥
एकवेणीधरा दीना भर्तृचिन्तापरायणा ॥ अधःशय्या विवर्णाङ्गी पद्मिनीव हिमागमे ॥ ३० ॥
रावणाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया ॥ कथंचिन्मृगशावाक्षी विश्वासमुपपादिता ॥ ३१ ॥
ततः संभाषिता चैव सर्वमर्थं च दर्शिता ॥ रामसुग्रीवसख्यं च श्रुत्वा प्रीतिमुपागता ॥ ३२ ॥
नियतः समुदाचारो भक्तिर्भर्तरि चोत्तमा ॥ यन्न हन्ति दशग्रीवं स महात्मा कृतागसम् ॥
निमित्तमात्रं रामस्तु वधे तस्य भविष्यति ॥ ३३ ॥
सा प्रकृत्यैव तन्वङ्गी तद्वियोगाच्च कर्शिता ॥ प्रतिपत्पाठशीलस्य विद्येव तनुतां गता ॥ ३४ ॥
एवमास्ते महाभागा सीता शोकपरायणा ॥ यदत्र प्रतिकर्तव्यं तत्सर्वमुपपद्यताम् ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनषष्टितमस्सर्गः ॥ ५९ ॥

षष्टितमः सर्गः ॥ ६० ॥

अङ्गदेनापि स्वस्वीयपराक्रमप्रशंसनेन रावणादिरक्षःक्षपणपूर्वकं सीतासमानयनस्य कर्तव्यत्वोक्तौ जांबवता सयुक्तयुपन्यासं तत्प्रतिषेधनं ॥ १ ॥

तस्य तद्वचनं श्रुत्वा वालिसूनुरभाषत ॥ १ ॥
[अहमेकोपि पर्याप्तः सराक्षसगणां पुरीम् ॥ तां लङ्कां तरसा हन्तुं रावणं च महाबलम् ॥ २ ॥

पौलोमीव पुरन्दर इति । नहुषनिर्बन्ध इतिभावः ॥ २७—२८ ॥ प्रमदावने अशोकवनिकायां ॥ २९—३०॥ विनिवृत्तार्था त्यक्तप्रयोजना । रावणप्रलोभनवाक्यैरवशीकृतेत्यर्थः ॥ ३१ ॥ सर्वमर्थं रामोद्योगादिकं । दर्शिता बोधिता ॥ ३२ ॥ नियत इति ॥ समुदाचारः चारित्रमिति यावत् । नन्वेवंमाहात्म्या सीता स्वयमेव रावणं किमिति न हन्तीत्याशङ्क्याह —यन्न हन्तीति ॥ दशग्रीवं न हन्तीतियत् तत्र कारणं स दशाननः महात्मा महानुभावः । शापनिबन्धनदुर्मरणाभावादिति भावः । अतस्तस्य वधे रामस्तु राम एव निमित्तमात्रं भविष्यति । तथा तस्योत्कर्षात् । सीता तु निमित्तकारणमिति शेषः । भर्त्रैव वैरनिर्यातनं वीरपत्नीधर्मः अन्यथा भर्तुर्महल्लाघवमिति मनीषया नस्वयं हन्ति नत्वसामर्थ्यादिति भावः॥ ३३—३४॥ फलितमुपसंहरति—एवमिति॥ उपपद्यतां अनुष्ठीयतां ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनषष्टितमः सर्गः ॥ ५९ ॥

तस्येत्यादि ॥ १—३ ॥ वानरा इति संबोधनं

ति० रामेण रामप्रीत्या ॥ २७ ॥ शि० प्रमदानामवनंअतिरक्षायस्मिन् । पुरुषागम्येत्यर्थः ॥ २९ ॥ स० दशग्रीवं नहन्तियस्मात्स महात्मा । अनेन सीता रामकीर्त्यैरावणवधमुदास्ते इत्युक्तंभवति ॥ ३३ ॥ इत्येकोनषष्टितमःसर्गः ॥ ५९ ॥

[पा०] १ झ. रामे. २ झ. अनन्यचिन्तारामेण. ३ ग. ङ. च. ज.—ट. हिमोदये. ४ ङ. झ. ट. प्रकाशिता. ग. चदर्शितं. च. ज. ञ. प्रदर्शिता. ५ ग. प्रमुदिताभृशं. ६ ङ. च. ज.—ट. मुपकल्पयतां. ७ ग. ततस्तद्वचनंश्रुत्वा. एतदर्धानन्तरं झ. पाठे. अश्विपुत्रौमहावेगौबलवन्तौबलवङ्गमौ । पितामहवरोत्सेकात्परमंदर्पमास्थितौ । अश्विनोर्माननार्थंहिसर्वंलोकपितामहः । सर्वावध्यत्वमतुलमनयोर्दत्तवान्पुरा । वरोत्सेकेनमत्तौचप्रमथ्यमहतींचमूम् । सुराणाममृतंवीरौपीतवन्तौमहाबलौ । एतावेवहिसंक्रुद्धौसवाजिरथकुञ्जराम् । लङ्कांनाशयितुंशक्तौसर्वेतिष्ठन्तुवानराः । इतिचत्वारःश्लोकाअधिकादृश्यन्ते । एतएवश्लोकाःअस्मदीयपुस्तकेएकोनषष्टितमेऽध्यायेहनुमद्वाक्ये षोडशश्लोकानन्तरंदृश्यमानत्वात् अत्रनास्माभिर्मुद्रिताः. ८ एतदर्धपञ्चकं झ. पाठेदृश्यते.

किंपुनः सहितैर्वीरैर्बलवद्भिः कृतात्मभिः ॥ कृतास्त्रैः प्लवगैः शक्तैर्भवद्भिर्विजयैषिभिः ॥
वायुसूनोर्बलेनैव दग्धा लङ्केति नः श्रुतम् ॥ ३ ॥]
अयुक्तं तु विना देवीं दृष्टवद्भिश्च वानराः ॥ समीपं गन्तुमस्माभी राघवस्य महात्मनः ॥ ४ ॥
दृष्टा देवी न चानीता इति तत्र निवेदनम् ॥ अयुक्तमिव पश्यामि भवद्भिः ख्यातविक्रमैः ॥ ५ ॥
न हि नः प्लवने कश्चिन्नापि कश्चित्पराक्रमे ॥ तुल्यः सामरदैत्येषु लोकेषु हरिसत्तमाः ॥ ६ ॥
[जित्वा लङ्कां सरक्षौघां हत्वा तं रावणं रणे ॥ सीतामादाय गच्छामः सिद्धार्था हृष्टमानसाः ॥७ ॥]
तेष्वेवं हतवीरेषु राक्षसेषु हनूमता ॥ किमन्यदत्र कर्तव्यं गृहीत्वा याम जानकीम् ॥ ८ ॥
[रामलक्ष्मणयोर्मध्ये न्यस्याम जनकात्मजाम् ॥ किं व्यलीकैस्तु तान्सर्वान्वानरान्वानरर्षभान् ॥९॥]
वयमेव हि गत्वा तान्हत्वा राक्षसपुङ्गवान् ॥ राघवं द्रष्टुमर्हामः सुग्रीवं सहलक्ष्मणम् ॥ १० ॥]
तमेवं कृतसंकल्पं जाम्बवान्हरिसत्तमः ॥ उवाच परमप्रीतो वाक्यमर्थवदर्थवित् ॥ ११ ॥
[नैषा बुद्धिर्महाबुद्धे यद्ब्रवीषि महाकपे ॥ विचेतुं वयमाज्ञप्ता दक्षिणां दिशमुत्तमाम् ॥ १२ ॥
नानेतुं कपिराजेन नैव रामेण धीमता ॥ कथंचिन्निर्जितां सीतामस्माभिर्नाभिरोचयेत् ॥ १३ ॥
राघवो नृपशार्दूलः कुलं व्यपदिशन्स्वकम् ॥ प्रतिज्ञाय स्वयं राजा सीताविजयमग्रतः ॥
सर्वेषां कपिमुख्यानां कथं मिथ्या करिष्यति ॥ १४ ॥
विफलं कर्म च कृतं भवेत्तुष्टिर्न तस्य च ॥ वृथा च दर्शितं वीर्यं भवेद्वानरपुङ्गवाः ॥ १५ ॥
तस्माद्गच्छाम वै सर्वे यत्र रामः सलक्ष्मणः ॥ सुग्रीवश्च महातेजाः कार्यस्यास्य निवेदने ॥ १६ ॥]
न तावदेषा मतिरक्षमा नो यथा भवान्पश्यति राजपुत्र ॥
यथा तु रामस्य मतिर्निविष्टा तथा भवान्पश्यतु कार्यसिद्धिम् ॥ १७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षष्टितमः सर्गः ॥ ६० ॥

एकषष्टितमः सर्गः ॥ ६१ ॥

महेन्द्रपर्वतात्किष्किन्धागमनाय गगनमुत्पतितैरङ्गदादिभिः मध्येमार्गं दधिमुखरक्षितेसुग्रीवस्यप्रियतमेमधुवनेऽवतरणम् ॥ १ ॥ सर्ववानरैरङ्गदानुज्ञया यथेच्छं मधुफलोपभोगे वृक्षक्षोभमधुफलविध्वंसनरुष्टेनदधिमुखेन बलात्प्रतिषेधने तैर्नखदशनादिभिस्तत्परिपीडनं ॥ २ ॥

ततो जाम्बवतो वाक्यमगृह्णन्त वनौकसः ॥ अङ्गदप्रमुखा वीरा हनूमांश्च महाकपिः ॥ १ ॥
प्रीतिमन्तस्ततः सर्वे वायुपुत्रपुरस्सराः ॥ महेन्द्राद्रिं परित्यज्य पुप्लुवुः प्लवगर्षभाः ॥ २ ॥

॥ ४–१६ ॥ अथ जाम्बवानङ्गदवाक्यं बहु मन्यमानस्सुहृद्भावेन प्रतिषेधति—नतावदिति ॥ अक्षमा अयुक्ता न किन्तु युक्तैवेत्यर्थः । यद्यपिसम्यगुक्तं समर्थैश्चापि रामाज्ञानुसारेण कर्तव्यं न स्वातन्त्र्येणेत्यर्थः ॥ १७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

सभाज्यमानं संपूज्यमानं । वहन्त इव दृष्टिभिरिति । प्रीतिपूर्वकानिमिषदर्शनादृष्टिष्वारोप्य नयन्त

ति० अगृह्णन्त युक्तियुक्तत्वेनामन्यन्त ॥ १ ॥ स० प्रीतिमन्तः हर्षयुक्ताः । नागमनकालइवचिन्तायुक्ताइत्यर्थः । पुप्लुवुः

[पा०] १ झ. निवेदितुं. २ झ. ख्यातपौरुषैः. ३ झ. वःप्लवने. ४ अयंश्लोकः झ. पाठेदृश्यते. ५ झ. हतशेषेषु. ६ इदंश्लोकद्वयं झ. पाठेदृश्यते. ७ एतेश्लोकाः झ. पाठेदृश्यन्ते. ८ ङ.—ट. महेन्द्राम्रात्समुत्पत्य.

मेरुमन्दरसंकाशा मत्ता इव महागजाः ॥ छादयन्त इवाकाशं महाकाया महाबलाः ॥ ३ ॥
सभाज्यमानं भूतैस्तमात्मवन्तं महाबलम् ॥ हनुमन्तं महावेगं वहन्त इव दृष्टिभिः ॥ ४ ॥
राघवे चार्थनिर्वृत्तिं कर्तुं च परमं यशः ॥ समाधाय समृद्धार्थाः कर्मसिद्धिभिरुन्नताः ॥ ५ ॥
प्रियाख्यानोन्मुखाः सर्वे सर्वे युद्धाभिनन्दिनः ॥ सर्वे रामप्रतीकारे निश्चितार्था मनस्विनः ॥ ६ ॥
प्लवमानाः खमाप्लुत्य ततस्ते काननौकसः ॥ नन्दनोपममासेदुर्वनं द्रुमलतायुतम् ॥ ७ ॥
यत्तन्मधुवनं नाम सुग्रीवस्याभिरक्षितम् ॥ अधृष्यं सर्वभूतानां सर्वभूतमनोहरम् ॥ ८ ॥
यद्रक्षति महावीर्यः सदा दधिमुखः कपिः ॥ मातुलः कपिमुख्यस्य सुग्रीवस्य महात्मनः ॥ ९ ॥
ते तद्वनमुपागम्य बभूवुः परमोत्कटाः ॥ वानरा वानरेन्द्रस्य मनःकान्ततमं महत् ॥ १० ॥
ततस्ते वानरा हृष्टा दृष्ट्वा मधुवनं महत् ॥ कुमारमभ्ययाचन्त मधूनि मधुपिङ्गलाः ॥ ११ ॥
ततः कुमारस्तान्वृद्धाञ्जाम्बवत्प्रमुखान्कपीन् ॥ अनुमान्य ददौ तेषां निसर्गं मधुभक्षणे ॥ १२ ॥
[ते निसृष्टाः कुमारेण धीमता वालिसूनुना ॥ हरयः समपद्यन्त द्रुमान्मधुकराकुलान् ॥ १३ ॥
भक्षयन्त सुगन्धीनि मूलानि च फलानि च ॥ जग्मुः प्रहर्षं ते सर्वे बभूवुश्च मदोत्कटाः ॥ १४ ॥]
ततश्चानुमताः सर्वे संप्रहृष्टा वनौकसः ॥ मुदिताः प्रेरिताश्चापि प्रनृत्यन्तोऽभवंस्ततः ॥ १५ ॥

गायन्ति केचित्प्रणमन्ति केचिन्नृत्यन्ति केचित्प्रहसन्ति केचित् ॥
पतन्ति केचिद्विचरन्ति केचित्प्लवन्ति केचित्प्रलपन्ति केचित् ॥ १६ ॥
परस्परं केचिदुपाश्रयन्ते परस्परं केचिदुपाक्रमन्ते ॥
परस्परं केचिदुपब्रुवन्ते परस्परं केचिदुपारमन्ते ॥ १७ ॥
द्रुमाद्द्रुमं केचिदभिद्रवन्ते क्षितौ नगाग्रान्निपतन्ति केचित् ॥
महीतलात्केचिदुदीर्णवेगा महाद्रुमाग्राण्यभिसंपतन्ति ॥
[धावन्ति केचित्सुपतन्ति केचिन्महाबला वानरयूथमुख्याः] ॥ १८ ॥
गायन्तमन्यः प्रहसन्नुपैति हसन्तमन्यः प्ररुदन्नुपैति ॥
रुदन्तमन्यः प्रणुदन्नुपैति नुदन्तमन्यः प्रणदन्नुपैति ॥ १९ ॥

इवेत्युत्प्रेक्षा ॥ ४ ॥ अर्थनिर्वृत्तिं अर्थसिद्धिं । समाधाय निश्चित्य संकल्प्य वा । समृद्धार्थाः सिद्धकार्याः । कर्मसिद्धिभिः कार्यसिद्धिभिः । उन्नताः इतरेभ्य उत्कृष्टाः ॥ ५ ॥ रामप्रतीकारे रामप्रत्युपकारे । पुप्लुवुरिति पूर्वेणसंबन्धः ॥६—९॥ परमोत्कटाः परमोत्सुकाः ॥१०॥ मधुपिङ्गलाः मधुवत्पिङ्गलवर्णाः वानराः ॥ ११ ॥ अनुमान्य अनुमतिं कारयित्वा । निसर्गं विसर्जनं । अनुमतिमिति यावत् ॥ १२—१४ ॥ पूर्वमेव सीतादर्शनात्प्रहृष्टाः ततः मधुवनभङ्गे अङ्गदेनानुमतास्सन्तस्ततो मुदिताः तत्प्रेरिताः प्रनृत्यन्तोऽभवन् ॥ १५ ॥ मधुवनभङ्गाभ्यनुज्ञानकृतं वानरहर्षविकारमेव वर्णयति सर्गशेषेण—गायन्ति केचित्प्रणमन्ति केचिन्नृत्यन्ति केचित्प्रहसन्ति केचित् । पतन्ति केचिद्विचरन्ति केचित्प्लवन्ति केचित्प्रलपन्ति केचित् । इति पाठः । प्रणमन्ति अवाक्छिरसः पतन्ति । पतन्ति ऊर्ध्वपादाः पृष्ठेन पतन्ति ॥१६—१९॥

वनंप्रतीतिशेषः ॥ २ ॥ ति० रामप्रतीकारे रामकर्तव्येरावणप्रतीकारे । निश्चितार्थाः अभूवन्निति शेषः ॥ ६ ॥ ति० हर्षमुदो बाह्यान्तरत्वकृतोभेदः ॥ १५ ॥ ति० तत्रबाह्यमानन्दसूचकमाह—गायन्तीति ॥ १६ ॥ स० परुषाणि क्रूराणि । उवाच ।

[पा०] १ क. घ. प्रियाख्यानपराः. २ ख. ग. घ. खमुत्पत्य. क. समुत्पत्य. ३ ग.—ट. द्रुमशतायुतं. ४ ख. ग. ङ. झ. ट. महावीरः. ५ ज. सोयं. ६ ङ. झ. ञ. ट. मनःकान्तंमहावनं. ग. च. छ. ज. मनःकान्तंमहद्वनम्. घ. मनःकान्ततरंमहत्. ७ ख. प्लवतांमधुभक्षणे. ८ इदंश्लोकद्वयं ङ.—ट. पाठेषुदृश्यते. ९ च.—ट. सुसंहृष्टाः. १० ग. मुदिताश्चतत केचित्प्रनृत्यन्तितथापरे. क. घ.—छ. झ. ञ. ट. मुदिताश्चततस्तेचप्रनृत्यन्तिततस्ततः. ११ इदमर्धं क. पाठेदृश्यते.

समाकुलं तत्कपिसैन्यमासीन्मधुप्रपानोत्कटसत्त्वचेष्टम् ॥
न चात्र कश्चिन्न बभूव मत्तो न चात्र कश्चिन्न बभूव तृप्तः ॥ २० ॥
ततो वनं तत्परिभक्ष्यमाणं द्रुमांश्च विध्वंसितपत्रपुष्पान् ॥
समीक्ष्य कोपाद्दधिवक्त्रनामा निवारयामास कपिः कपींस्तान् ॥ २१ ॥
स तैः प्रवृद्धैः परिभर्त्स्यमानो वनस्य गोप्ता हरिवीरवृद्धः ॥
चकार भूयो मतिमुग्रतेजा वनस्य रक्षां प्रति वानरेभ्यः ॥ २२ ॥
उवाच कांश्चित्परुषाणि धृष्टमसक्तमन्यांश्च तलैर्जघान ॥
समेत्य कैश्चित्कलहं चकार तथैव साम्नोपजगाम कांश्चित् ॥ २३ ॥
स तैर्मदात्संपरिवार्य वाक्यैर्बलाच्च तेन प्रतिवार्यमाणैः ॥
प्रधर्षितस्त्यक्तभयैः समेत्य प्रकृष्यते चाप्यनवेक्ष्य दोषम् ॥ २४ ॥
नखैस्तुदन्तो दशनैर्दशन्तस्तलैश्च पादैश्च समापयन्तः ॥
मदात्कपिं तं कपयः समग्रा महावनं निर्विषयं च चक्रुः ॥ २५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

द्विषष्टितमः सर्गः ॥ ६२ ॥

हनुमतादधिमुखप्रतिपिद्धवानरान्प्रति प्रतिषेधकप्रतिषेधनप्रतिज्ञानपूर्वकं निश्शङ्कमधुपाननियोगे पुनर्वानरैः सवनक्षोभं यथारुचि मधुपानादिषुप्रवर्तनम् ॥ १ ॥ वानरैर्मधुपानजमदपरवशतयोन्मत्तवत्कृत्तादिनानाचेष्टाविष्करणम् ॥ २ ॥ वानरैस्ताडनादिनापीडितैर्वनपालैर्दधिमुखे तन्निवेदने तेनतैस्सह वानरान्प्रत्यायोधनम् ॥ ३ ॥ अङ्गदेन दधिमुखस्य सताडनंभूमौ निष्पेषणं ॥ ४ ॥ दधिमुखेन वनपालैःसह सुग्रीवे मधुवनधर्षणादिनिवेदनाय किष्किन्धामेत्य रामादिसंनिधौ सुग्रीवचरणयोःप्रणामः ॥ ५ ॥

तानुवाच हरिश्रेष्ठो हनुमान्वानरर्षभः ॥ अव्यग्रमनसो यूयं मधु सेवत वानराः ॥
अहमावारयिष्यामि युष्माकं परिपन्थिनः ॥ १ ॥
श्रुत्वा हनुमतो वाक्यं हरीणां प्रवरोऽङ्गदः ॥ प्रत्युवाच प्रसन्नात्मा पिबन्तु हरयो मधु ॥ २ ॥
अवश्यं कृतकार्यस्य वाक्यं हनुमतो मया ॥ अकार्यमपि कर्तव्यं किमङ्ग पुनरीदृशम् ॥ ३ ॥
अङ्गदस्य मुखाच्छ्रुत्वा वचनं वानरर्षभाः ॥ साधु साध्विति संहृष्टा वानराः प्रत्यपूजयन् ॥ ४ ॥

मधुप्रपानोत्कटसत्त्वचेष्टं मत्तचित्तचेष्टं ॥२०—२४॥ निर्विषयं निर्गतमधुमूलादिभोग्यवस्तुकं । चक्रुरित्यर्थः ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकषष्टितमः सर्गः ॥ ६१ ॥

तान् दधिमुखकलहव्याकुलितान् । अन्ये तु तानुवाचेत्यादिना पूर्वसर्गोक्तं संक्षेपेणानूद्य उपरि गच्छतीत्याचक्षते । अपरे तु सर्गमुखे केचिच्छ्लोकाः पतिता इत्याहुः ॥ १—२ ॥ अङ्गेति संबोधने निपातः ॥ ३ ॥ अङ्गदस्य स्वामिनः मुखाद्वचनं

ततोप्यधमान्कांश्चित् तलैः करचरणतलैः । स्वसमैः कलहंचकार । स्वतःप्रबलानङ्गदादीन् साम्नाजगाम ॥ २३ ॥ ति० समापयन्तः मृतकल्पंकुर्वन्तः ॥ २५ ॥ इत्येकषष्टितमःसर्गः ॥ ६१ ॥

[पा०] १ क. घ. तैःपरिभक्ष्यमाणं. २ झ. ट. परुषाण्यभीतं. ३ घ. झ. ञ. ट. मैदादप्रतिवार्यवेगैः. क. च. छ. ज. मैदाच्चाप्रतिवार्यवेगैः. ४ झ. ट. तेकपयः. ५ झ. ट. समन्तान्महावनं. क. ग. घ. समग्राबलाद्वनं. ख. समग्रामधोर्वनं.

पूजयित्वाऽङ्गदं सर्वे वानरा वानरर्षभम् ॥ जग्मुर्मधुवनं यत्र नदीवेगा इव द्रुतम् ॥ ५ ॥
ते प्रविष्टा मधुवनं पालानाक्रम्य वीर्यतः ॥ अतिसर्गाच्च पटवो दृष्ट्वा श्रुत्वा च मैथिलीम् ॥
पपुः सर्वे मधु तदा रसवत्फलमाददुः ॥ ६ ॥
उत्पत्य च ततः सर्वे वनपालान्समागतान् ॥ ताडयन्ति स्म शतशः सक्तान्मधुवने तदा ॥ ७ ॥
मधूनि द्रोणमात्राणि बाहुभिः परिगृह्य ते ॥ पिबन्ति सहिताः सर्वे निघ्नन्ति स्म तथा परे ॥ ८ ॥
केचित्पीत्वाऽपविध्यन्ति मधूनि मधुपिङ्गलाः ॥ मधूच्छिष्टेन केचिच्च जघ्नुरन्योन्यमुत्कटाः ॥ ९ ॥
अपरे वृक्षमूले तु शाखां गृह्य व्यवस्थिताः ॥ अत्यर्थं च मदग्लानाः पर्णान्यास्तीर्य शेरते ॥ १० ॥
उन्मत्तभूताः प्लवगा मधुमत्ताश्च हृष्टवत् ॥ क्षिपन्ति च तदाऽन्योन्यं स्खलन्ति च तथापरे ॥ ११ ॥
केचित्क्ष्वेलां प्रकुर्वन्ति केचित्कूजन्ति हृष्टवत् ॥ हरयो मधुना मत्ताः केचित्सुप्ता महीतले ॥ १२ ॥
कृत्वा केचिद्धसन्त्यन्ये केचित्कुर्वन्ति चेतरत् ॥ कृत्वा केचिद्रदन्त्यन्ये केचिद्बुध्यन्ति चेतरत् ॥ १३ ॥
येऽप्यत्र मधुपालाः स्युः प्रेष्या दधिमुखस्य तु ॥ तेपि तैर्वानरैर्भीमैः प्रतिषिद्धा दिशो गताः ॥ १४ ॥
जानुभिस्तु प्रकृष्टाश्च देवमार्गं प्रदर्शिताः ॥ अब्रुवन्परमोद्विग्ना गत्वा दधिमुखं वचः ॥ १५ ॥
हनूमता दत्तवरैर्हतं मधुवनं बलात् ॥ वयं च जानुभिः कृष्टा देवमार्गं च दर्शिताः ॥ १६ ॥
ततो दधिमुखः क्रुद्धो वनपस्तत्र वानरः ॥ हतं मधुवनं श्रुत्वा सान्त्वयामास तान्हरीन् ॥ १७ ॥

हनुमदुक्तं श्रुत्वा ॥ ४ ॥ जग्मुर्मधुवनमिति प्रदेशभेदविवक्षया । यद्वा दधिमुखनिवारणेन भीतानां हनुमदङ्गदाभ्यां पुनरनुज्ञापनेन पुनर्जग्मुरित्यर्थः ॥ ५ ॥ वीर्यतः बलात् । अतिसर्गात् अङ्गदाभ्यनुज्ञानात् । दृष्ट्वा श्रुत्वा च मैथिलीं दर्शनश्रवणाभ्यां च हेतुना । वनपालानाक्रम्य आक्षिप्य ॥ ६ ॥ सक्तान् वनपालने रतान् ॥ ७ ॥ मधूनि मधुपटलानि । द्रोणमात्राणि द्रोणप्रमाणानि आढकप्रमाणानि । घ्नन्तिस्म पीतावशिष्टानि मधुपटलानि भिन्दन्तिस्म ॥ ८ ॥ अपविध्यन्ति अवक्षिपन्ति । मधूच्छिष्टेन सिक्थकेन । " मधूच्छिष्टं तु सिक्थकं" इत्यमरः । उत्कटाः मत्ताः ॥ ९-१० ॥ हृष्टवत् हर्षयुक्तमिति क्रियाविशेषणं । हृष्टार्हमितिवार्थः । क्षिपन्ति उत्क्षिप्य पातयन्ति । स्खलन्ति पादेन नुदन्तीत्यर्थः ॥ ११ ॥ क्ष्वेलां सिंहनादं । " क्ष्वेला तु सिंहनादः स्यात् " इत्यमरः । कूजन्ति पक्षिवच्छब्दायन्ते ॥ १२ ॥ अन्ये अवाच्यं किंचिद्ग्राम्यं कर्म कृत्वा हसन्ति । इतरत्तद्विलक्षणं ग्राम्यं कर्म केचित्कुर्वन्ति । केचिदन्यद्ग्राम्यं कर्म कृत्वा अस्माभिरिदं कृतमिति वदन्ति उच्चारयन्ति । केचिदितरद्बुध्यन्ति एवं करिष्यामीति संकल्पयन्तीत्यर्थः ॥ १३—१४ ॥ जानुभिःप्रकृष्टाः । जानून्यवलम्ब्य कृष्टा इत्यर्थः । देवमार्गं अपानद्वारं । देवशब्दो वायुवाची । उपनिषदि वायुलोके देवलोकशब्दप्रयोगात् । दर्शिताः दर्शनं कारिताः । दृशेरुपसंख्यानादणि कर्तुः कर्मत्वं । " ण्यन्तात्कर्तुश्च कर्मणः " इति तस्यैवाभिधेयत्वं च ॥ १५—१७ ॥

ति० अतिसर्गात् अङ्गदानुज्ञानात्मधु पपुः रसवत्फलंचाददुः भक्षणार्थमितिशेषः ॥ ६ ॥ स० मधूनिपीत्वा अपविध्यन्ति तत्करण्डमितिशेषः ॥ ९ ॥ स० इतरत् अप्रदर्शनीयावयवप्रदर्शनादि ॥ १३ ॥ ति० जानुभिःप्रघृष्टाः जानुषुगृहीत्वाआकृष्टाः । देवमार्गेदर्शिताः पादौगृहीत्वोर्ध्वंप्रक्षिप्ताइत्यर्थः । कर्णावञ्जलिभिर्धृत्वोर्ध्वीकृताइतिवार्थ इत्यन्ये ॥ स० जानुभिश्चप्रघृष्टाः पश्चात्ताडिताःसन्तोदेवमार्गसुरवर्त्मदर्शिताः पश्चाज्जानुसंताडनेमुखोर्ध्वीभवनेनाकाशावलोकनस्यजायमानत्वादेवमुक्तिः । पायुद्वारंवा । कपीनांहेलनसमयेयुदप्रदर्शनस्यभागवतदशमोत्तरार्धेबलरामद्विविदप्रस्तावेअन्यत्रापिबहुशोदृष्टत्वात् ॥ १५ ॥

[पा०] १ ख. ग. ङ. झ. नदीवेगइवद्रुमं. २ ङ. झ. ट. शक्तितः. ३ ज. अतिगर्वाच्च. ग. तेनिसर्गाच्च. घ. निसर्गाच्चापि. ख. निसर्गाच्चापिहरयो. ४ ग. ङ. झ. ट. तेताडयन्तःशतशः. ५ पिबन्तिसहिताइत्यर्धस्यस्थाने क.—ट. पाठेषु. पिबन्तिकपयःकेचित्संघशस्तत्रहृष्टवत् । घ्नन्तिस्मसहिताःसर्वेभक्षयन्तितथापरे । इत्येकःश्लोकोदृश्यते. ६ ग. घ. ङ. ज.—ट. मूलेषु. ७ ङ. च. ज.—ट. शाखागृह्य. ८ ङ. झ. ञ. ट. उन्मत्तवेगाः. ९ ख. हसन्तिच. १० झ. ञ. ट. धृष्टाःकेचित्. ११ ग. ङ. झ. ट. जानुभिश्चप्रघृष्टाश्च. १२ क. ग.—च. ज.—ट. देवमार्गंचदर्शिताः. १३ ङ. झ. ट. जानुभिर्घृष्टाः.

इहागच्छत गच्छामो वानरान्बलदर्पितान् ॥ बलेन वारयिष्यामो मधु भक्षयतो वयम् ॥ १८ ॥
श्रुत्वा दधिमुखस्येदं वचनं वानरर्षभाः ॥ पुनर्वीरा मधुवनं तेनैव सहसा ययुः ॥ १९ ॥
मध्ये चैषां दधिमुखः प्रगृह्य तरसा तरुम् ॥ समभ्यधावद्वेगेन ते च सर्वे प्लवङ्गमाः ॥ २० ॥
ते शिलाः पादपांश्चापि पर्वतांश्चापि वानराः ॥ गृहीत्वाभ्यगमन्क्रुद्धा यत्र ते कपिकुञ्जराः ॥ २१ ॥
ते स्वामिवचनं वीरा हृदयेष्ववसज्य तत् ॥ त्वरया ह्यभ्यधावन्त सालतालशिलायुधाः ॥ २२ ॥
वृक्षस्थांश्च तलस्थांश्च वानरान्बलदर्पितान् ॥ अभ्यक्रामंस्ततो वीराः पालास्तत्र सहस्रशः ॥ २३ ॥
[बलान्निवारयन्तश्च आसेदुर्हरयो हरीन् ॥ संदष्टोष्ठपुटक्रुद्धा भर्त्सयन्तो मुहुर्मुहुः ॥ २४ ॥]
अथ दृष्ट्वा दधिमुखं क्रुद्धं वानरपुङ्गवाः ॥ अभ्यधावन्त वेगेन हनुमत्प्रमुखास्तदा ॥ २५ ॥
तं सवृक्षं महाबाहुमापतन्तं महाबलम् ॥ आर्यकं प्राहरत्तत्र बाहुभ्यां कुपितोङ्गदः ॥ २६ ॥
मदान्धश्च न वेदैनमार्यकोयं ममेति सः ॥ अथैनं निष्पिपेषाशु वेगवद्वसुधातले ॥ २७ ॥
स भग्नबाहूरुभुजो विह्वलः शोणितोक्षितः ॥ मुमोह सहसा वीरो मुहूर्तं कपिकुञ्जरः ॥ २८ ॥
स समाश्वस्य सहसा संक्रुद्धो राजमातुलः ॥ वानरान्वारयामास दण्डेन मधुमोहितान् ॥ २९ ॥
स कथंचिद्विमुक्तस्तैर्वानरैर्वानरर्षभः ॥ उवाचैकान्तमाश्रित्य भृत्यान्स्वान्समुपागतान् ॥ ३० ॥
एते तिष्ठन्तु गच्छामो भर्ता नो यत्र वानरः ॥ सुग्रीवो विपुलग्रीवः सह रामेण तिष्ठति ॥ ३१ ॥
सर्वं चैवाङ्गदे दोषं श्रावयिष्यामि पार्थिवे ॥ अमर्षी वचनं श्रुत्वा घातयिष्यति वानरान् ॥ ३२ ॥
इष्टं मधुवनं ह्येतत्सुग्रीवस्य महात्मनः ॥ पितृपैतामहं दिव्यं देवैरपि दुरासदम् ॥ ३३ ॥
स वानरानिमान्सर्वान्मधुलुब्धान्गतायुषः ॥ घातयिष्यति दण्डेन सुग्रीवः ससुहृज्जनान् ॥ ३४ ॥
वध्या ह्येते दुरात्मानो नृपाज्ञापरिभाविनः ॥ अमर्षप्रभवो रोषः सफलो नो भविष्यति ॥ ३५ ॥
एवमुक्त्वा दधिमुखो वनपालान्महाबलः ॥ जगाम सहसोत्पत्य वनपालैः समन्वितः ॥ ३६ ॥
निमेषान्तरमात्रेण स हि प्राप्तो वनालयः ॥ सहस्रांशुसुतो धीमान्सुग्रीवो यत्र वानरः ॥ ३७ ॥
रामं च लक्ष्मणं चैव दृष्ट्वा सुग्रीवमेव च ॥ समप्रतिष्ठां जगतीमाकाशान्निपपात ह ॥ ३८ ॥
संनिपत्य महावीर्यैः सर्वैस्तैः परिवारितः ॥ हरिर्दधिमुखः पालैः पालानां परमेश्वरः ॥ ३९ ॥

गच्छाम इति तैः साहित्येन बहुवचनं । आत्मनि बहुवचनं वा ॥ १८—३३ ॥ गतायुष इत्यधिक्षेपवचनं ॥३४॥ अमर्षप्रभवः अक्षमाजन्यः । रोषस्य तज्जन्यत्वं च यो यस्मै न सहते तस्मै क्रुध्यतीति प्रसिद्धं ॥३५—३६ ॥ निमेषान्तरमात्रेण निमेषावकाशमात्रेण । वनालयः वानरः ॥ ३७ ॥ समप्रतिष्ठां समतलां ।

ति० एतागच्छतअग्रेइतिशेषः । गच्छामः । वयमप्यागच्छामइत्यर्थः ॥ १८ ॥ ति० आर्यकः सुग्रीवमातुलत्वात्पूज्यः ॥ २६ ॥

[पा०] १ ङ. झ. ट. एतागच्छत. २ ङ. ज.—ट. वानरानतिदर्पितान्. ३ ङ. झ. ट. प्रभुज्ञानान्मधूत्तमं. ४ ङ. च. झ. ञ. ट. सहिताः. ५ छ. ञ. सुमहातरुं. ६ ङ. झ. ट. पाषाणानपि. ७ अयंश्लोकः ङ. झ. ट. पाठेषुदृश्यते. ८ ख. ग. च. ज. संक्रुद्धाहनु. ९ ख. ग. च. ज. स्ततः. १० ङ. झ. ट. सवृक्षंतं. ११ ङ. झ. ट. वेगवन्तंविजग्राहबाहुभ्यां. १२ ङ. झ. ट. मदान्धोनकृपांचक्रेआर्यकोयं. १३ ङ. झ. ट. वेगेनवसुधातले. १४ ङ. झ. ट. सभग्नबाहूरुमुखो. ग. भग्नबाहुश्चविमुखो. ख. च. ज. ञ. सभग्नबाहुर्विमुखो. १५ ङ. झ. ट. प्रमुमोहमहावीरो. च. ज. मुमोहसमहावीर्यो. १६ ङ. झ. ट. मागत्य. ख. ज. ञ. मागम्य. १७ ग. झ. एतागच्छत. क. इहागच्छत. १८ घ. ङ. च. ज.—ट. परिपन्थिनः. १९ ख. सहसोपेत्य. २० ख. ग. सुतःश्रीमान्. २१ झ. ञ. संनिपत्य. २२ ख. ङ. झ. ट. महावीरः.

स दीनवदनो भूत्वा कृत्वा शिरसि चाञ्जलिम् ॥ सुग्रीवस्य शुभौ मूर्ध्ना चरणौ प्रत्यपीडयत् ॥४०॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

त्रिषष्टितमः सर्गः ॥ ६३ ॥

दधिमुखे सुग्रीवे मधुवनवृत्तान्तंनिवेदयति लक्ष्मणेन सुग्रीवंप्रति दधिमुखवचनार्थप्रश्नः ॥ १ ॥ सुग्रीवेणलक्ष्मणंप्रति तन्निवेदनपूर्वकं मधुवनधर्षणहेतुनासीतादर्शननिर्धारणोक्तिः ॥ २ ॥ तथा दधिमुखसमाश्वासनपूर्वकंतंप्रत्यङ्गदादीनांशीघ्रप्रेषणचोदना ॥ ३ ॥

ततो मूर्ध्ना निपतितं वानरं वानरर्षभः ॥ दृष्ट्वोद्विग्नहृदयो वाक्यमेतदुवाच ह ॥ १ ॥
उत्तिष्ठोत्तिष्ठ कस्मात्त्वं पादयोः पतितो मम ॥ अभयं ते भवेद्वीर सर्वमेवाभिधीयताम् ॥ २ ॥
[किं संभ्रमाद्धितं कृत्स्नं ब्रूहि यद्वक्तुमर्हसि ॥ कच्चिन्मधुवने स्वस्ति श्रोतुमिच्छामि वानर ॥ ३ ॥]
स तु विश्वासितस्तेन सुग्रीवेण महात्मना ॥ उत्थाय सुमहाप्राज्ञो वाक्यं दधिमुखोऽब्रवीत् ॥ ४ ॥
नैवर्क्षरजसा राजन्न त्वया नापि वालिना ॥ वनं निसृष्टपूर्वं हि भक्षितं तच्च वानरैः ॥ ५ ॥
[न्यवारयमहं सर्वान्सहैभिर्वनचारिभिः ॥ अचिन्तयित्वा मां हृष्टा भक्षयन्ति पिबन्ति च ॥ ६ ॥]
एभिः प्रधर्षिताश्चैव वानरा वनरक्षिभिः ॥ मधून्यचिन्तयित्वेमान्भक्षयन्ति पिबन्ति च ॥ ७ ॥
शिष्टमत्रापविध्यन्ति भक्षयन्ति तथा परे ॥ निवार्यमाणास्ते सर्वे भ्रुवौ वै दर्शयन्ति हि ॥ ८ ॥
इमे हि संरब्धतरास्तथा तैः संप्रधर्षिताः ॥ वारयन्तो वनात्तस्मात्क्रुद्धैर्वानरयूथपैः ॥ ९ ॥
ततस्तैर्बहुभिर्वीरैर्वानरैर्वानरर्षभ ॥ संरक्तनयनैः क्रोधाद्वयं प्रविचालिताः ॥ १० ॥

जगतीं भूमिं ॥ ३८—४० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्विषष्टितमः सर्गः ॥ ६२ ॥

उद्विग्नहृदयः भीतहृदयः । मातुलस्यापि पादपतनं स्वामित्वानुसारेण ॥ १—४ ॥ न निसृष्टपूर्वं यथेच्छभोगाय न दत्तपूर्वं । वानरैः अङ्गदप्रमुखैः । अन्यथा सुग्रीववाक्ये अङ्गदानुवादविरोधात् । भक्षितमिति वनैकदेशमधुपटलविषयं ॥ ५—६ ॥ अचिन्तयित्वा अगणयित्वा । मधूनीति फलानामुपलक्षणं । भक्षयन्ति पिबन्ति चेत्युक्तेः । यद्वा मधून्येव भक्षयन्ति भक्षवत्कुर्वन्तीत्यर्थः ॥ ७ ॥ शिष्टं अवशिष्टं मधुपटलं । अत्र मधुवने । अपविध्यन्ति ध्वंसयन्ति । भक्षयन्ति मधुपटलमित्यर्थः ॥ ८ ॥ हिशब्दः पादपू-

---

ति० तौ सर्ववानरपूज्यौ चरणावित्यन्वयः ॥ ४० ॥ इतिद्विषष्टितमःसर्गः ॥ ६२ ॥

स० अभयंप्रदास्यामि प्रमादादपराधेप्रसक्तेपीतिशेषः ॥ २ ॥ स० संभ्रमात्किं किंप्रयोजनं । यद्वक्तुमर्हसितद्ब्रूहि । कस्मात्संभ्रमः किंसंभ्रमस्तस्मात् । इदं पादयोःपतनं । यतस्त्वंअर्हसि योग्योसि । अर्ह्यतइत्यर्हः सइवाचरतीतिण्युत्पत्त्या पूज्योसीत्यर्थइतिवा ॥ ३ ॥ शि० समहाप्राज्ञः महाप्राज्ञासहितः । प्राज्ञाशब्दःस्वार्थिकाणन्तः । ङीबभावस्त्वजादित्वात् ॥ ४ ॥ ति० एभिः हनुमदाद्यैः प्रधर्षणायामारब्धायां वनपालकैर्वारितं । ममापि । अपिनाइतरान्पालकानचिन्तयन् अचिन्तयन्तः

[पा०] १ ख. ङ. झ. ट. सुग्रीवस्याशुतौ. २ ग. ङ. झ. ट. प्रदास्यामि. ३ ख.—ङ. ज. झ. ञ. सत्यमेवा. ४ अयंश्लोकः ङ. च. ज.—ट. पाठेषुदृश्यते. ५ ङ. झ. ट. ससमाश्वासितः. ६ घ. सहसाप्राज्ञो. क. ख. ङ. च. ज. झ. ट. समहाप्राज्ञो. ७ ख. ङ. च. ज. झ. ट. निसृष्टपूर्वंतेनाशितंतत्तु. क. निसृष्टपूर्वंहिमथितंतत्तु. ८ अयंश्लोकः घ. ङ. च. ज.—ट. पाठेषुदृश्यते. ९ झ. प्रधर्षणायांचवारितंवनपालकैः. ङ. च. ज. ञ. ट. प्रधृष्यमाणाश्चवारिताः. १० ङ. झ. मामप्यचिन्तयन्देवभक्षयन्तिवनौकसः. ट. मामप्यचिन्तयित्वाते. च. मधून्यचिन्तयित्वाते. ११ च. ज.—ट. भ्रुकुटिंदर्शयन्तिहि. १२ छ. ज. ञ. संरब्धनयनैःक्रूरैरस्मदीयाःप्रधर्षिताः. १३ झ. ट. संप्रधर्षिताः.

पाणिभिर्निहताः केचित्केचिज्जानुभिराहताः ॥ प्रकृष्टाश्च यथाकामं देवमार्गं च दर्शिताः ॥ ११ ॥
एवमेते हताः शूरास्त्वयि तिष्ठति भर्तरि ॥ कृत्स्नं मधुवनं चैव प्रकामं तैः प्रभक्ष्यते ॥ १२ ॥
एवं विज्ञाप्यमानं तं सुग्रीवं वानरर्षभम् ॥ अपृच्छत्तं महाप्राज्ञो लक्ष्मणः परवीरहा ॥ १३ ॥
किमयं वानरो राजन्वनपः प्रत्युपस्थितः ॥ कं चार्थमभिनिर्दिश्य दुःखितो वाक्यमब्रवीत् ॥ १४ ॥
एवमुक्तस्तु सुग्रीवो लक्ष्मणेन महात्मना ॥ लक्ष्मणं प्रत्युवाचेदं वाक्यं वाक्यविशारदः ॥ १५ ॥
आर्य लक्ष्मण संप्राह वीरो दधिमुखः कपिः ॥ अङ्गदप्रमुखैर्वीरैर्भक्षितं मधु वानरैः ॥
विचित्य दक्षिणामाशामागतैर्हरिपुङ्गवैः ॥ १६ ॥
नैषामकृतकृत्यानामीदृशः स्यादुपक्रमः ॥ आगतैश्च प्रमथितं यथा मधुवनं हि तैः ॥
धर्षितं च वनं कृत्स्नमुपयुक्तं च वानरैः ॥ १७ ॥
वनं यदाऽभिपन्नास्ते साधितं कर्म वानरैः ॥ १८ ॥
[वारयन्तो भृशं प्राप्ताः पाला जानुभिराहताः ॥ तथा न गणितश्चायं कपिर्दधिमुखो बली ॥
पतिर्मम वनस्यायमस्माभिः स्थापितः स्वयम् ॥ १९ ॥]
दृष्टा देवी न संदेहो न चान्येन हनूमता ॥ न ह्यन्यः साधने हेतुः कर्मणोस्य हनूमतः ॥ २० ॥
कार्यसिद्धिर्मतिश्चैव तस्मिन्वानरपुङ्गवे ॥ व्यवसायश्च वीर्यं च श्रुतं चापि प्रतिष्ठितम् ॥ २१ ॥
जाम्बवान्यत्र नेता स्यादङ्गदश्च महाबलः ॥ हनूमांश्चाप्यधिष्ठाता न तस्य गतिरन्यथा ॥ २२ ॥
अङ्गदप्रमुखैर्वीरैर्हतं मधुवनं किल ॥ वारयन्तश्च सहितास्तथा जानुभिराहताः ॥ २३ ॥
एतदर्थमयं प्राप्तो वक्तुं मधुरवागिह ॥ नाम्ना दधिमुखो नाम हरिः प्रख्यातविक्रमः ॥ २४ ॥
दृष्टा सीता महाबाहो सौमित्रे पश्य तत्त्वतः ॥ अभिगम्य तथा सर्वे पिबन्ति मधु वानराः ॥२५॥
न चाप्यदृष्ट्वा वैदेहीं विश्रुताः पुरुषर्षभ ॥ वनं दत्तवरं दिव्यं धर्षयेयुर्वनौकसः ॥ २६ ॥
ततः प्रहृष्टो धर्मात्मा लक्ष्मणः सहराघवः ॥ श्रुत्वा कर्णसुखां वाणीं सुग्रीववदनाच्युताम् ॥
प्राहृष्यत भृशं रामो लक्ष्मणश्च महाबलः ॥ २७ ॥

रणे । संप्रधर्षणचिह्नस्य दृश्यमानत्वाभिप्रायेण प्रसिद्धिपरो वा ॥ ९—१५ ॥ अङ्गदप्रमुखैरिति । अत्र विशिष्यानुवादाद्दधिमुखवाक्ये वानरपुङ्गवैरित्यत्रापि विशेषपरत्वं बोध्यं ॥ १६ ॥ वनं प्रमथितं भग्नं । धर्षितं आक्रान्तं । मधु च भक्षितं । यथा येन कारणेन । एषामकृतकृत्यानामीदृश उपक्रमो न स्यादिति मन्य इति योजना ॥ १७ ॥ कृतकृत्यत्वं विशेषयति—वनमित्यादिना ॥ १८—२५ ॥ वनमिति । मधुवनधर्षणमेव सीतादर्शने लिङ्गमिति भावः । दत्तवरं दिव्यमित्यनेन ऋक्षरजसे ब्रह्मणा दत्तमित्यवग-

---

॥ ७ ॥ शि० देवमार्गदर्शिताः प्रक्षेपेणप्रापिताः ॥ ११ ॥ ती० सहैववसतोलक्ष्मणस्यकंचनार्थमभिनिर्दिश्यदुःखितोवाक्यमब्रवीदितिप्रश्नकरणाद्दधिमुखेनवनभङ्गादिकंस्वजात्युचितभाषयोक्तमित्यवगन्तव्यं । उपांशूक्तमितिवाद्रष्टव्यं ॥ १३ ॥ ति० यत् यतः । वनमभिपन्नाः नाशयितुंप्रवृत्ताः ॥ १८ ॥ स० स्ववेदनावेदनवागपि रामकार्यसूचकत्वान्मधुरवाक् ॥ २४ ॥ इतित्रिषष्टितमःसर्गः ॥ ६३ ॥

[पा०] १ क. वनपोराजन्वानरः. २ ङ. झ. ट. मकृतकार्याणां. ३ ङ. झ. ट. स्याद्यतिक्रमः. ४ च. ज. आत्मेच्छातः प्रहृष्टैश्चहृतंमधुवनं. ५ झ. यदभिपन्नाः. ६ ङ. झ. ट. तद्भुवं. ७ इदमर्धत्रयं ख. ग. ङ. च. छ. झ. ञ. ट. पाठेषुदृश्यते. ८ ङ. झ. ट. कार्यसिद्धिर्हनुमति. ख. ग. घ. हनूमतःकार्यसिद्धिर्मतिश्चहरिपुङ्गवे. क. यदतःकार्यसंसिद्धिः. ९ क. च. छ. ज. ञ. वीर्यंचसूर्ये तेजइवध्रुवं. १० क. स्याद्युवराजस्तथाङ्गदः. ११ ङ.—ट. नंतत्र. क. ग. नह्यस्य. १२ ख. घ. च. छ. ज. वारितास्सहिताःपालास्तथा. ञ. पातिताःसहिताःपालास्तथा. क. वानरास्तुहताःपालास्तथा. ङ. झ. ट. पातितावनपालास्तेतथा. १३ क. ङ.—ट. यथा. १४ घ. विश्रान्ताः. क. विश्रुताःप्लवगर्षभाः. १५ घ. एतन्मधुवनंदिव्यं. १६ क. ख. घ. ङ. च. ज.—ट. महायशाः.

श्रुत्वा दधिमुखस्येदं सुग्रीवस्तु प्रहृष्य च ॥ वनपालं पुनर्वाक्यं सुग्रीवः प्रत्यभाषत ॥ २८ ॥
प्रीतोस्मि सोहं यद्दुक्तं वनं तैः कृतकर्मभिः ॥ मर्षितं मर्षणीयं च चेष्टितं कृतकर्मणाम् ॥ २९ ॥
[गच्छ शीघ्रं मधुवनं संरक्षस्व त्वमेव हि ॥ शीघ्रं प्रेषय सर्वांस्तान्हनुमत्प्रमुखान्कपीन् ॥ ३० ॥]
इच्छामि शीघ्रं हनुमत्प्रधानाञ्शाखामृगांस्तान्मृगराजदर्पान् ॥
द्रष्टुं कृतार्थान्सह राघवाभ्यां श्रोतुं च सीताधिगमे प्रयत्नम् ॥ ३१ ॥
प्रीतिस्फीताक्षौ संप्रहृष्टौ कुमारौ दृष्ट्वा सिद्धार्थौ वानराणां च राजा ॥
अङ्गैः संहृष्टैः कर्मसिद्धिं विदित्वा बाह्वोरासन्नां सोतिमात्रं ननन्द ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

चतुःषष्टितमः सर्गः ॥ ६४ ॥

दधिमुखेन सुग्रीवसमीपात्पुनर्मधुवनमेत्य अङ्गदक्षमापणपूर्वकं तंप्रति शीघ्रागमनविषयकसुग्रीवचोदनानिवेदनम् ॥ १ ॥ हनुमताऽङ्गदादिभिःसह सुग्रीवसमीपमेत्य श्रीरामंप्रति सप्रणामंसीताकुशलनिवेदनं ॥ २ ॥

सुग्रीवेणैवमुक्तस्तु हृष्टो दधिमुखः कपिः ॥ राघवं लक्ष्मणं चैव सुग्रीवं चाभ्यवादयत् ॥ १ ॥
स प्रणम्य च सुग्रीवं राघवौ च महाबलौ ॥ वानरैः सहितैः शूरैर्दिवमेवोत्पपात ह ॥ २ ॥
स यथैवागतः पूर्वं तथैव त्वरितं गतः ॥ निपत्य गगनाद्भूमौ तद्वनं प्रविवेश ह ॥ ३ ॥
स प्रविष्टो मधुवनं ददर्श हरियूथपान् ॥ विमदानुत्थितान्सर्वान्मेहमानान्मधूदकम् ॥ ४ ॥
स तानुपागमद्वीरो बद्ध्वा करपुटाञ्जलिम् ॥ उवाच वचनं श्लक्ष्णमिदं हृष्टवदङ्गदम् ॥ ५ ॥

म्यते ॥ २६—२७ ॥ द्वितीयसुग्रीवशब्दस्य शोभनग्रीव इत्यवयवार्थो विवक्षितः । क्रियाभेदेनापुनरुक्तिर्वा ॥ २८—३० ॥ हनुमत्प्रधानान् हनुमत्प्रमुखान् । कृतार्थान् कृतकृत्यान् । प्रयत्नं प्रयासं । तेभ्यः श्रोतुमिच्छामीत्यन्वयः ॥ ३१ ॥ अथ प्रत्युपकारार्थं सुग्रीवः स्वोद्योगसाफल्यदर्शनात् भृशं ननन्देत्याह—प्रीतिस्फीताक्षाविति । प्रीत्या संतोषेण । संप्रहृष्टौ रोमस्विति शेषः । हृषितरोमाणावित्यर्थः । " हृषेर्लोमसु " इति विकल्पादिडभावः । एवं अङ्गैः संहृष्टैरित्यत्रापि द्रष्टव्यं । कर्मसिद्धिं बाह्वोरासन्नां हस्तप्राप्तां । विदित्वा । निश्चित्येत्यर्थः । जागतं वैश्वदेवीवृत्तं । " पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ यौ " इति लक्षणात् ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रिषष्टितमस्सर्गः ॥ ६३ ॥

सहितैः स्नेहातिरेकेणान्योन्यं युक्तैः । वानरैः सहितैरिति पाठः ॥ १—३ ॥ विमदानित्यत्र हेतुमाह—मेहमानानिति । मेहमानान् मेहयतः । मूत्रयत इत्यर्थः । एतेन मूत्रणान्मधूनि जीर्णानीति गम्यते । अतएव विमदत्वं । मधूनि च उदकानि च । मधूदकमिति द्वन्द्वैकवद्भावः । उदकानि चात्र अनुपानत्वेन पीतानि । तदाह बाहटः—" अनुपानं हिमं वारि यवगोधूमयोर्हितं । दधि मद्ये बिसे क्षौद्रे कोष्णं पिष्टमयेषु च " इति ॥ ४ ॥ करपुटाञ्जलिं करतलयोरञ्जलिं । सम्यक्संयुक्तकरतलाञ्जलिमि-

ति० मधुपरिणामभूतमुदकं मधूदकं ॥ ४ ॥

[पा०] १ ङ. ञ. ट. धर्षितंमर्षणीयंच. ग. च. छ. ज. ञ. अमर्षणीयमेतेषां. ख. मर्षणीयंचमेतेषां. २ अयंश्लोकः ङ. ञ. ट. पाठेषुदृश्यते. ३ ख. ङ. ञ. प्रष्टुं. ४ क. प्रवृत्तिं. ५ क. ङ.—ठ. प्रहृष्टैःकार्यसिद्धिं. ६ ग. ङ. ञ. ट. रासन्नामतिमात्रं. ७ ङ.—ट. सहितः. ८ ख. ङ.—ट. नुद्धतान्.

सौम्य रोषो न कर्तव्यो [1]यदेभिरभिवारितः ॥ अज्ञानाद्रक्षिभिः क्रोधाद्भवन्तः प्रतिषेधिताः ॥
[[2]श्रान्तो दूरादनुप्राप्तो भक्षयस्व स्वकं मधु ॥ ६ ॥]
युवराजस्त्वमीशश्च वनस्यास्य महाबल ॥ मौर्ख्यात्पूर्वं कृतो दोष[3]स्तं भवान्क्षन्तुमर्हति ॥ ७ ॥
[[4]यथैव हि पिता तेऽभूत्पूर्वं हरिगणेश्वरः ॥ तथा त्वमपि सुग्रीवो नान्यस्तु हरिसत्तम ॥ ८ ॥]
आख्यातं हि मया गत्वा पितृव्यस्य तवानघ ॥ इहोपयातं सर्वेषामेतेषां वनचारिणाम् ॥ ९ ॥
[5]स त्वदागमनं श्रुत्वा सहैभिर्हरियूथपैः ॥ [6]प्रहृष्टो न तु रुष्टोसौ वनं श्रुत्वा प्रधर्षितम् ॥ १० ॥
[7]प्रहृष्टो मां पितृव्यस्ते सुग्रीवो वानरेश्वरः ॥ शीघ्रं प्रेषय सर्वांस्तानिति होवाच पार्थिवः ॥ ११ ॥
श्रुत्वा दधिमुख[8]स्येदं वचनं श्लक्ष्णमङ्गदः ॥ अब्रवीत्तान्हरिश्रेष्ठो वाक्यं वाक्यविशारदः ॥ १२ ॥
शङ्के श्रुतोऽयं वृत्तान्तो रामेण हरियूथपाः ॥ [[9]अयं च हर्षादाख्याति तेन जानामि हेतुना ॥]
तत्क्षणं नेह नः स्थातुं कृतेऽकार्ये परन्तपाः ॥ १३ ॥
पीत्वा मधु यथाकामं [10]विश्रान्ता वनचारिणः ॥ किं शेषं गमनं तत्र सुग्रीवो [11]यत्र मे गुरुः ॥ १४ ॥
सर्वे यथा मां वक्ष्यन्ति समेत्य हरियूथपाः ॥ तथाऽस्मि कर्ता कर्तव्ये भवद्भिः परवानहम् ॥ १५ ॥
नाज्ञापयितुमीशोऽहं युवराजोसि यद्यपि ॥ अयुक्तं कृतकर्माणो यूयं धर्षयितुं [12]मया ॥ १६ ॥
[13]श्रुवतश्चाङ्गदस्यैवं श्रुत्वा वचनमव्ययम् ॥ प्रहृष्टमनसो वाक्यमिदमूचुर्वनौकसः ॥ १७ ॥
एवं वक्ष्यति को राजन्प्रभुः सन्वानरर्षभ ॥ ऐश्वर्यमदमत्तो हि सर्वोऽहमिति मन्यते ॥ १८ ॥
तव चेदं सुसदृशं वाक्यं नान्यस्य कस्य चित् ॥ सन्नतिर्हि तवाख्याति भविष्यच्छुभयोग्यताम् ॥१९॥

त्यर्थः ॥ ५ ॥ एभिः वानरैः । अभिवारितः अभिवारितोऽसीति यत् अत्रार्थे रोषो न कर्तव्यः । भवन्त इति पूजायां बहुवचनं । नच हनुमदादिकमादाय बहुवचनं उत्तरश्लोकेपि युवराजस्त्वमित्युक्तेः । अज्ञानात्क्रोधात् । अज्ञानप्रयुक्तक्रोधादित्यर्थः । अभिवारितमिति पाठे लिङ्व्यत्यय आर्षः । केचित्तु अज्ञानात् क्रोधाच्च भवन्तः प्रतिषेधिता इत्येतत् परिवारितं परिवारणं प्रति । रोषो न कर्तव्य इति योजयन्ति ॥ ६ ॥ क्रोधाद्वारणे कृते कुतो रोषो न कर्तव्यस्यादित्याशङ्क्य क्रोधस्याज्ञानकृतत्वादित्याह—युवराज इति ॥ दोषः निवारणरूपापराधः ॥ ७—८ ॥ उपयातं आगमनं ॥ ९—१२ ॥ अयं वृत्तान्तः अस्मदागमनवृत्तान्तः ॥१३॥ किं शेषं न किंचिदपि शिष्टमित्यर्थः । किन्तु मे गुरुः सुग्रीवो यत्र वर्तते तत्र गमनमेवशेषमित्यर्थः । "किंशेषं गमनं तच्च सुग्रीवो यत्र मे गुरुः" इति पाठे अस्माकं गमनं किंशेषं किंचिच्छेषं । तच्च गमनशेषं च सुग्रीवो यत्र तत्र गमनमिति संबन्धः ॥ १४ ॥ विनयपूर्वकं सर्वसंमेलनं समर्थयते—सर्व इति ॥ तथास्मि कर्ता आह्वानं करिष्यामीत्यर्थः । कर्तव्ये कार्ये भवद्भिः अहं परवान् । भवद्भिर्यथा नियुक्तं तथा करिष्यामि । गन्तव्यमित्युक्ते गमिष्यामः स्थातव्यमित्युक्ते स्थास्याम इत्यर्थः ॥१५॥ युवराजत्वाद्भवानेव कर्तव्याकर्तव्यनियन्तेत्यत आह—नाज्ञापयितुमिति ॥ ईशः स्वतन्त्रः । कृतकर्माणः कृतोपकाराः । यूयं मया धर्षयितुं अनादर्तुं परतन्त्रीकर्तुमिति यावत् । अयुक्तं अयुक्ता इत्यर्थः । आर्षमव्ययमेतत् । शक्यमितिवत्सामान्योपक्रमान्नपुंसकैकत्वनिर्देश इत्यप्याहुः ॥१६—१७॥ अहमिति मन्यते गर्विष्ठो भवतीति यावत् ॥ १८ ॥ सन्नतिः

ति० तत्. तस्मात् । अकार्ये वनविध्वंसनरूपे । कृतेसति इहस्थातुं । नोस्माकं नक्षमं नयुक्तं ॥ १३ ॥

[पा०] १ ङ. झ. ट. यदेभिःपरिवारणं. ख. यदेभिर्नविचारितं. क. यदेभिरविचारितं. २ इदमर्धं ङ.—ट. पाठेषु दृश्यते. ३ ङ. झ. ट. रोषस्तद्भवान्. क. ख. घ. च. छ. ज. दोषस्तद्भवान्. ४ अयंश्लोकः ङ.—ट. पाठेषुदृश्यते. ५ क. ख. घ.—ट. यानं. ६ क. राजालामागतं. ङ. झ. ट. भवदागमनंश्रुत्वासहैभिर्वनचारिभिः. ७ क. संप्रहृष्टोनरुष्टस्तु. ८ क. मांचाब्रवीत्पितृव्यस्ते. ९ क. ख. ङ. झ. ट. स्यैतद्वचनं. १० इदमर्धं ख. ङ.—ट. पाठेषुदृश्यते. ११ ङ. झ. ट. विक्रान्ताः. १२ ङ. झ. ट. यत्रवानरः. १३ ङ. झ. ट. वलात्. च. छ. ज. रुषा. १४ ङ.—ट. मुत्तमं.

सर्वे वयमपि प्राप्तास्तत्र गन्तुं कृतक्षणाः ॥ स यत्र हरिवीराणां सुग्रीवः पतिरव्ययः ॥ २० ॥
त्वया ह्यनुक्तैर्हरिभिर्नैव शक्यं पदात्पदम् ॥ क्वचिद्गन्तुं हरिश्रेष्ठ ब्रूमः सत्यमिदं तु ते ॥ २१ ॥
एवं तु वदतां तेषामङ्गदः प्रत्यभाषत ॥ बाढं गच्छाम इत्युक्त्वा खमुत्पेतुर्महाबलाः ॥ २२ ॥
उत्पतन्तमनूत्पेतुः सर्वे ते हरियूथपाः ॥ कृत्वाऽऽकाशं निराकाशं यन्त्रोत्क्षिप्ता इवाचलाः ॥ २३ ॥
[अङ्गदं पुरतः कृत्वा हनूमन्तं च वानरम् ॥] तेऽम्बरं सहसोत्पत्य वेगवन्तः प्लवङ्गमाः ॥
विनदन्तो महानादं घना वातेरिता यथा ॥ २४ ॥
अङ्गदे समनुप्राप्ते सुग्रीवो वानराधिपः ॥ उवाच शोकोपहतं रामं कमललोचनम् ॥ २५ ॥
समाश्वसिहि भद्रं ते दृष्टा देवी न संशयः ॥ नागन्तुमिह शक्यं तैरृतीते समये हि नः ॥
[अङ्गदस्य प्रहर्षाच्च जानामि शुभदर्शन ॥ २६ ॥]
न मत्सकाशमागच्छेत्कृत्ये हि विनिपातिते ॥ युवराजो महाबाहुः प्लवतां प्रवरोऽङ्गदः ॥ २७ ॥
यद्यप्यकृतकृत्यानामीदृशः स्यादुपक्रमः ॥ भवेत्स दीनवदनो भ्रान्तविप्लुतमानसः ॥ २८ ॥
पितृपैतामहं चैतत्पूर्वकैरभिरक्षितम् ॥ न मे मधुवनं हन्याद्दृष्टः प्लवगेश्वरः ॥ २९ ॥
कौसल्या सुप्रजा राम समाश्वसिहि सुव्रत ॥ दृष्टा देवी न संदेहो न चान्येन हनूमता ॥ ३० ॥
न ह्यन्यः कर्मणो हेतुः साधनेस्य हनूमतः ॥ हनूमति हि सिद्धिश्च मतिश्च मतिसत्तम ॥
व्यवसायश्च वीर्यं च सूर्ये तेज इव ध्रुवम् ॥ ३१ ॥
जाम्बवान्यत्र नेता स्यादङ्गदश्च बलेश्वरः ॥ हनुमांश्चाप्यधिष्ठाता न तस्य गतिरन्यथा ॥ ३२ ॥

विनयः ॥ १९ ॥ कृतक्षणाः कृतावसराः । अवसरप्रतीक्षा इति यावत् ॥ २०—२१ ॥ बाढमित्यङ्गीकारे । इतिशब्दः काकाक्षिन्यायेन पूर्वापरयोरन्वेति । एवं तेषां वदतां तेषु वदत्सु । अङ्गदः बाढमिति प्रत्यभाषत । गच्छाम इत्युक्त्वापि उत्पपात ॥ २२ ॥ निराकाशं निरवकाशम् ॥ २३ ॥ तेम्बरमिति अत्र जग्मुरित्यध्याहार्यं ॥ २४—२६ ॥ विनिपातिते विनिहते ॥ २७ ॥ अकृतकृत्यानां अकृतकार्याणां । ईदृशः मधुवनभङ्गरूपः । उपक्रमः उद्योगः । यदि स्यात्तदाङ्गदो दीनवदनत्वादिविशिष्टो भवेत् ॥ २८ ॥ पिता चासौ पितामहश्च । पित्रा ब्रह्मणा ऋक्षरजसे दत्तं पितृपैतामहं । प्लवगेश्वरः अङ्गदः ॥ २९ ॥ हे राम कौसल्या सुप्रजाः सुप्रजावती । " नित्यमसिच् प्रजामेधयोः " इत्यसिच्प्रत्ययः । एवं देव्यवस्थानज्ञानेन भवतस्सत्तालाभादिदानीं कौसल्या सुप्रजावती अभूदिति शेषः ॥ ३०—३१ ॥ यत्र कार्ये ।

ती० ननुमधुवनधर्षणमात्रेणकथंकार्यसिद्धिः कापेयादिनापिसंभवादित्याशङ्क्यसत्यमन्येषांतादृशत्वेपि अङ्गदस्यनैतादृशइत्याशयेनाह—यद्यपीत्यादिश्लोकद्वयेन । अकृतकृत्यानामन्येषांवानराणां ईदृशउपक्रमः मधुवनभङ्गहर्षव्यापारोयद्यपिस्यात् । तथापि तत्राङ्गदस्तु दीनवदनो भ्रान्तविप्लुतमानसश्चभवेत् । कुतः पितृपैतामहं पितृपितामहपरंपरागतं । मेमधुवनं जनकात्मजामदृष्टानहन्यात् ॥ २८–२९ ॥ ती० हेराम कौसल्यासुप्रजाः । सीतायाःस्थितिपरिज्ञानेनभवतःसत्तालाभात् इदानींकौसल्यासुपुत्रवत्यभूदितिभावः ॥ ३० ॥ ति० अस्यकर्मणःसाधने तद्विधोहेतुरपरोनभवेत् नास्ति । इहहनूमति एतत्कार्यसाधिकासिद्धिः ब्रह्मवरजन्यामतिश्चास्ति । हि यतः । व्यवसायः उद्यमः ॥ ३१ ॥ ति० नेता प्रधानः । अधिष्ठाता कार्यकरणोद्योगवान् ॥ ३२ ॥

[पा०] १ ङ. झ. ट. साधुगच्छाम. २ च. छ. उत्पपातमहीतलात्. ख. घ. खमुत्पेतुर्महीतलात्. ३ ङ. ज.—ट. यन्त्रोत्क्षिप्ताइवोपलाः, क. ख. ग. छ. यन्त्रोत्क्षिप्ताइवानलाः. ४ इदमर्धं ङ. झ. ट. पाठेषुदृश्यते. ५ च. छ. ज. ञ. तेऽङ्गदं पुरतःकृत्वा. ६ ङ.—ट. शोकसंतप्तं. ७ ङ.—ट. रतीतसमयैरिह. ८ इदमर्धं ङ.—ट. पाठेषुदृश्यते. ९ क. ङ. झ. ट. भवेत्तुदीनवदनो. ख. ग. घ. भवेयुर्दीनवदनाभ्रान्तविप्लुतमानसाः. १० छ. ज. भ्रान्तविप्लुत. ११ ङ. झ. दद्यद्राजनकात्मजां. १२ क. घ.—ट. नह्यस्यकर्मणोहेतुस्साधनेतद्विधोभवेत्. ग. नह्यस्यसाधकोहेतुस्साधनेतद्विधोभवेत्. १३ क. च. छ. ज. ञ. हनूमतिमतिश्चैवकर्मसिद्धिश्चसत्तम. १४ क. रघुसत्तम. १५ क. ख. ग. ङ. छ.—ट. शौर्यंचश्रुतंचापिप्रतिष्ठितं. १६ ख.—ठ. हरीश्वरः. १७ ङ. च. छ. झ. ञ. ट. तत्र.

मा भूश्चिन्तासमायुक्तः संप्रत्यमितविक्रम ॥ ३३ ॥
[यदा हि दर्पितोदग्राः संगताः काननौकसः ॥ नैषामकृतकार्याणामीदृशः स्यादुपक्रमः ॥
वनभङ्गेन जानामि मधूनां भक्षणेन च ॥ ३४ ॥]
ततः किलकिलाशब्दं शुश्रावासन्नमम्बरे ॥ हनुमत्कर्मदृप्तानां नर्दतां काननौकसाम् ॥
किष्किन्धामुपयातानां सिद्धिं कथयतामिव ॥ ३५ ॥
ततः श्रुत्वा निनादं तं कपीनां कपिसत्तमः ॥ आयताश्चितलाङ्गूलः सोभवद्धृष्टमानसः ॥ ३६ ॥
आजग्मुस्तेऽपि हरयो रामदर्शनकाङ्क्षिणः ॥ अङ्गदं पुरतः कृत्वा हनूमन्तं च वानरम् ॥ ३७ ॥
तेऽङ्गदप्रमुखा वीराः प्रहृष्टाश्च मुदान्विताः ॥ निपेतुर्हरिराजस्य समीपे राघवस्य च ॥ ३८ ॥
हनुमांश्च महाबाहुः प्रणम्य शिरसा ततः ॥ नियतामक्षतां देवीं राघवाय न्यवेदयत् ॥ ३९ ॥
[दृष्टा देवीति हनुमद्वदनादमृतोपमम् ॥ आकर्ण्य वचनं रामो हर्षमाप सलक्ष्मणः ॥ ४० ॥]
निश्चितार्थस्ततस्तस्मिन्सुग्रीवः पवनात्मजे ॥ लक्ष्मणः प्रीतिमान्प्रीतं बहुमानादवैक्षत ॥ ४१ ॥
प्रीत्या च रममाणोथ राघवः परवीरहा ॥ बहुमानेन महता हनुमन्तमवैक्षत ॥ ४२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

पञ्चषष्टितमः सर्गः ॥ ६५ ॥

रामेण सीतावृत्तान्तंदृष्टेनहनुमता तंप्रति शिंशुपामूले राक्षसीमध्यस्थित्यादितद्वृत्तान्तकथनपूर्वकं तदुक्ताभिज्ञाननिवेदनेन सह तत्सन्देशकथनम् ॥ १ ॥

ततः प्रस्रवणं शैलं ते गत्वा चित्रकाननम् ॥ प्रणम्य शिरसा रामं लक्ष्मणं च महाबलम् ॥ १ ॥
युवराजं पुरस्कृत्य सुग्रीवमभिवाद्य च ॥ प्रवृत्तिमथ सीतायाः प्रवक्तुमुपचक्रमुः ॥ २ ॥
रावणान्तःपुरे रोधं राक्षसीभिश्च तर्जनम् ॥ रामे समनुरागं च यश्चायं समयः कृतः ॥
एतदाख्यान्ति ते सर्वे हरयो रामसन्निधौ ॥ ३ ॥

नतो मन्त्री । बलेश्वरः सेनापतिः । अधिष्ठाता संरक्षक इत्यर्थः । तस्य कार्यस्य । गतिः सिद्धिः । अन्यथा विपरीता । न भवेत् । संप्रति चिन्तासंयुक्तो मा भूः ॥ ३२—३४ ॥ सिद्धिं कथयतामिव । उत्साहेनेति शेषः ॥ ३५ ॥ आयताश्चितलाङ्गूलः आयतः दीर्घीकृतः अञ्चितः माल्यवच्छृङ्गे समास्थापितः ॥ ३६—३७ ॥ प्रहृष्टाः सञ्जातपुलकाः ॥३८॥ नियतामिति । अक्षतत्वेप्यनियतत्वे वैयर्थ्यं नियतत्वेपि क्षतत्वे च तथा । ततः आवश्यकमुभयं संग्रहेण दर्शयति ॥ अस्मिन्सर्गे सार्धैकोनचत्वारिंशच्छ्लोकाः ॥ ३९–४२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुष्षष्टितमः सर्गः ॥ ६४ ॥

प्रवृत्तिं वार्तां ॥ २ ॥ रोधं निरोधं । यश्चायं समयः कृतः । मासद्वयादूर्ध्वं हनिष्यामीति यः

ति० नियतां पातिव्रत्यसंपन्नां । अक्षतां शरीरेणकुशलिनीं ॥ ३९ ॥ शि० परमया लक्ष्म्यापि परयासीतयेत्यर्थः ॥ उपेतो मनसासंयुक्तः । राघवश्च महता प्रशंसनीयेन । बहुमानेनावैक्षत ॥ ४२ ॥ इतिचतुष्षष्टितमःसर्गः ॥ ६४ ॥

ति० रामसंनिधौ स्थिताइतिशेषः ॥ ३ ॥

[पा०] १ इदमर्धत्रयं ङ.—ट. पाठेषुदृश्यते. २ घ.—ट. नदतां. ३ ङ. झ. ट. मदान्विताः. ४ अयंश्लोकः ङ.—ट. पाठेषुदृश्यते. ५ क. घ.—ट. निश्चितार्थंततस्तस्मिन्सुग्रीवंपवनात्मजे । लक्ष्मणःप्रीतिमान्प्रीतो. ६ झ. ञ. ट. परमोपेतो. ७ ख. ङ. झ. मुपचक्रमे. ८ क. राक्षसीनांच. ९ ङ. झ. ट. यथाच. १० ङ. च. झ. एतदाख्यायते.

वैदेहीमक्षतां श्रुत्वा रामस्तूत्तरमब्रवीत् ॥ क्व सीता वर्तते देवी कथं च मयि वर्तते ॥
एतन्मे सर्वमाख्यात वैदेहीं प्रति वानराः ॥ ४ ॥
रामस्य गदितं श्रुत्वा हरयो रामसन्निधौ ॥ चोदयन्ति हनूमन्तं सीतावृत्तान्तकोविदम् ॥ ५ ॥
श्रुत्वा तु वचनं तेषां हनुमान्मारुतात्मजः ॥ प्रणम्य शिरसा देव्यै सीतायै तां दिशं प्रति ॥
उवाच वाक्यं वाक्यज्ञः सीताया दर्शनं यथा ॥ ६ ॥
[[1]तं मणिं काञ्चनं दिव्यं दीप्यमानं स्वतेजसा ॥ दत्त्वा रामाय हनुमांस्ततः प्राञ्जलिरब्रवीत् ॥७॥]
समुद्रं लङ्घयित्वाऽहं शतयोजनमायतम् ॥ अगच्छं जानकीं सीतां मार्गमाणो दिदृक्षया ॥ ८ ॥
तत्र लङ्केति नगरी रावणस्य दुरात्मनः ॥ दक्षिणस्य समुद्रस्य तीरे वसति दक्षिणे ॥ ९ ॥
तत्र दृष्टा मया सीता रावणान्तःपुरे सती ॥ संन्यस्य त्वयि जीवन्ती रामा राम मनोरथम् ॥ १० ॥
दृष्टा मे राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः ॥ राक्षसीभिर्विरूपाभी रक्षिता प्रमदावने ॥ ११ ॥
दुःख[2]मासाद्यते देवी [3]तथाऽदुःखोचिता सती ॥ १२ ॥
रावणान्तःपुरे रुद्धा राक्षसीभिः सुरक्षिता ॥ एकवेणीधरा दीना त्वं[4]यि चिन्तापरायणा ॥ १३ ॥
अधःशय्या विवर्णाङ्गी पद्मिनीव हिमागमे ॥ रावणाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया ॥
देवी कथंचित्काकुत्स्थ त्वन्मना मार्गिता मया ॥ १४ ॥
इक्ष्वाकुवंशविख्यातिं शनैः [5]कीर्तयताऽनघ ॥ [6]सा मया नरशार्दूल विश्वास[7]मुपपादिता ॥ १५ ॥
ततः संभाषिता देवी सर्वमर्थं च दर्शिता ॥ [8]रामसुग्रीवसख्यं च श्रुत्वा प्रीतिमुपागता ॥ १६ ॥
नियतः समुदाचारो भक्तिश्चास्यास्तथा त्वयि ॥ १७ ॥
एवं मया महाभागा दृष्टा जनकनन्दिनी ॥ उग्रेण तपसा युक्ता त्वद्भक्त्या पुरुषर्षभ ॥ १८ ॥
अभिज्ञानं च मे दत्तं यथा वृत्तं तवान्तिके ॥ चित्रकूटे महाप्राज्ञ वायसं प्रति राघव ॥ १९ ॥
विज्ञाप्यश्च नरव्याघ्रो रामो वायुसुत त्वया ॥ [9]अखिलेनेह यदृष्टमिति मामाह जानकी ॥ २० ॥

संकेतो रावणेन कृत इत्यर्थः । मासशब्दःपक्षपर इत्युक्तं प्राक् । तमिति शेषः ॥ ३—५ ॥ प्रणामश्च सीतायाः स्मरणकृत इति बोध्यं । सीताया दर्शनं यथेति । येन प्रकारेण सीतादर्शनं जातं तेन प्रकारेणोवाचेत्यन्वयः ॥ ६—७ ॥ दिदृक्षया ननु श्रोतुमिच्छया । मार्गमाण इत्यर्थः ॥ ८ ॥ तत्र लङ्कने कृते सति ॥ ९ ॥ हे राम रामा सीता । त्वयि मनोरथं स्वाभिलाषं । संन्यस्य जीवन्ती । त्वदभिलाषेण धृतजीवितेत्यर्थः ॥ १०—११ ॥ दुःखमित्यर्धं । आसाद्यते आसीदति । आर्षो यत् ॥१२॥ एकवेणीधरा त्रिधा विभागं विना बद्धः केशपाशः एकवेणीत्युच्यते ॥ १३ ॥ अधःशय्या स्थण्डिलशायिनी । मर्तव्ये मरणे कृतनिश्चया ॥ १४—१५ ॥ सर्वमर्थं च दर्शिता सुग्रीवसख्यप्रभृतिसर्वमर्थं च बोधिता ॥१६॥ समुदाचारः परपुरुषाचिन्तकत्वादिः । त्वयि भक्तिश्च । वर्तत इति शेषः ॥ १७ ॥ तपसा अनशनेन ॥१८॥ अभिज्ञानं चिह्नभूतं वाक्यं । तवान्तिके पूर्वं यथा येन प्रकारेण जातं तथा दत्तमित्यर्थः । तदेव दर्शयति—चित्रकूट इति । सदस्यवक्तव्यत्वात्सूचनोक्तिः ॥ १९ ॥ अखिलेनेति । रावणागमनादिकमित्यर्थः ॥

शि० सीताक्ववर्तते । मयिकथं केनभावेनवर्तते । वैदेहीं प्रति वैदेहीसंबन्धि । एतत्सर्वं यूयमाख्यात केनभावेनेत्युक्त्या भूतंखकर्तृकरावणवधाभावजनितसीतामर्षविषयकसंभावनासूचिता ॥ ४ ॥ ति० तीरे दक्षिणसमुद्रसंबन्धिद्वीपसंनद्धतीरे ॥ ९ ॥

[पा०] १ अर्धश्लोकः ङ.—ट. पाठेषुदृश्यते. २ क. ख. ङ. ज.—ट. मापद्यते. ३ ङ. झ. ञ. ट. त्वयावीरसुखोचिता. क. ख. घ. तवादुःखोचितासती. च. त्वयाऽदुःखोचिता. ४ क. त्वच्चित्तात्वत्परायणा. ५ ख. च. छ. ज. ञ. कीर्तयतामया. ६ ख. साचमेराजशार्दूल. ७ ङ. झ. शनैर्विश्वासितातदा. ८ ख. रामसुग्रीवयोःसख्यं. ९ ङ. झ. स्सदा. १० ङ. झ. ट. विज्ञाप्यःपुनरप्येपरामो. ११ ङ. च. झ. अखिलेनयथादृष्टमिति.

अयं चास्मै प्रदातव्यो यत्नात्सुपरिरक्षितः ॥ ब्रुवता वचनान्येवं सुग्रीवस्योपशृण्वतः ॥ २१ ॥
एष चूडामणिः श्रीमान्मया सुपरिरक्षितः ॥ मनःशिलायास्तिलको गण्डपार्श्वे निवेशितः ॥ २२ ॥
त्वया प्रनष्टे तिलके तं किल स्मर्तुमर्हसि ॥ एष निर्यातितः श्रीमान्मया ते वारिसंभवः ॥ २३ ॥
एतं दृष्ट्वा प्रमोदिष्ये व्यसने त्वामिवानघ ॥ जीवितं धारयिष्यामि मासं दशरथात्मज ॥
ऊर्ध्वं मासान्न जीवेयं रक्षसां वशमागता ॥ २४ ॥
इति मामब्रवीत्सीता कृशाङ्गी धर्मचारिणी ॥ रावणान्तःपुरे रुद्धा मृगीवोत्फुल्ललोचना ॥ २५ ॥
एतदेव मयाख्यातं सर्वं राघव यद्यथा ॥ सर्वथा सागरजले संतारः प्रविधीयताम् ॥ २६ ॥
तौ जाताश्वासौ राजपुत्रौ विदित्वा तच्चाभिज्ञानं राघवाय प्रदाय ॥
देव्या चाख्यातं सर्वमेवानुपूर्व्याद्वाचा संपूर्णं वायुपुत्रः शशंस ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ॥ ६६ ॥

रामेण सीताप्रेषितचूडामणेर्वीक्षणनिक्षेपेणसकरुणंबहुधाविलापपूर्वकं हनुमन्तंप्रति पुनः सीतावचननिवेदनचोदना ॥१॥

एवमुक्तो हनुमता रामो दशरथात्मजः ॥ तं मणिं हृदये कृत्वा प्ररुरोद सलक्ष्मणः ॥ १ ॥
तं तु दृष्ट्वा मणिश्रेष्ठं राघवः शोककर्शितः ॥ नेत्राभ्यामश्रुपूर्णाभ्यां सुग्रीवमिदमब्रवीत् ॥ २ ॥
यथैव धेनुः स्रवति स्नेहाद्वत्सस्य वत्सला ॥ तथा ममापि हृदयं मणिरत्नस्य दर्शनात् ॥ ३ ॥
मणिरत्नमिदं दत्तं वैदेह्याः श्वशुरेण मे ॥ वधूकाले यथा बद्धमधिकं मूर्ध्नि शोभते ॥ ४ ॥

॥ २० ॥ सुग्रीवस्योपशृण्वतः सुग्रीवे समीपे शृण्वति सति । एवं एष चूडामणिरित्यारभ्य रक्षसां वशमागतेत्यन्तवक्ष्यमाणप्रकारेण । वचनानि रामं प्रति मयोक्तवचनानि । ब्रुवता त्वया । अयं मणिरित्यर्थः । प्रदातव्यः ॥ २१—२४ ॥ मृगीवोत्फुल्ललोचना । त्रासातिशयादिति भावः ॥ २५ ॥ सन्तीर्यतेनेनेति संतारः सेतुः ॥ २६ ॥ ताविति । पूर्ववद्वैश्वदेवीवृत्तम् । समुद्रतरणे सुरसानिरसनादिकं अक्षवधलङ्कादहनादिकं सजातीयेभ्यः पूर्वमुक्तमपि प्रभुसंनिधावात्मश्लाघायां पर्यवस्येदिति नोक्तमिति ध्येयम् । *स्ववृत्तान्तं सर्वमाख्यातवानिति सामान्येनवक्तुंयुक्तत्वेप्यङ्गदसन्निधौ प्रपञ्चनं गोप्यविशेषगोपनार्थं । अत्र त्वप्रपञ्चनं अकथनीयाकथनार्थं चेति ज्ञेयं ॥२७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चषष्टितमःसर्गः ॥६५॥

यथा वत्सला वत्से स्नेहवती धेनुः । वत्सस्य स्नेहात् वत्सविषयकस्नेहात् । स्रवत्येव द्रवत्येव । तथा मणिरत्नस्य मणिश्रेष्ठस्य । दर्शनान्मम हृदयं द्रवति ॥१—३॥ मणेरागतिमाह—मणिरत्नमिति ॥ मे श्वशुरेण जनकेन । वधूकाले वधूप्रतिग्रहकाले । विवाहकाल इत्यर्थः । यथा शोभते तथा बद्धमित्यन्वयः ॥४॥

शि० एवंवचनानिउपशृण्वतःसुग्रीवस्यसमीपेब्रुवतात्वया यत्नात् स्वत्प्रयत्नंविज्ञाय । सुपरिरक्षितः स्वदेहइतिशेषः । अयंवृत्तान्तसमूहः त्वयाप्रदातव्यःवक्तव्यइत्यर्थः ॥ २१ ॥ स० स्मरस्व स्मर । स्व स्वतन्त्रेतिरामसंबोधनंवा ॥ २२ ॥ ति० मासात् वियमानाद्दशमासादूर्ध्वमित्यर्थः ॥२४॥ ति० संतारः सन्तारोपायः । प्रविधीयतां प्रविचार्यतां ॥२६॥ इतिपञ्चषष्टितमःसर्गः ॥६५॥

ति० वत्सस्नेहत्वात्रापिदर्शनादितिसंबध्यते । तथास्नेहात्स्रवतीत्यनुकर्षः ॥ ३ ॥ ति० वधूकाले वधूत्वसंपादकेकाले । सीतामातृहस्ताद्गृहीत्वादशरथहस्तेदत्तं । तच्चतस्मिन्काले यथाधिकंशोभते तथामूर्ध्निबद्धमित्यर्थः ॥ स० वधूकरणकालेवैदेह्यामूर्ध्निबद्धंयथाअधिकंअशोभत तथाइदानीमपिशोभते । कालतस्तत्प्रकाशतिरोधानंनास्तीतिमहत्त्वंरत्नस्यध्वन्यते ॥ ४ ॥

[पा०] १ घ. च. छ. ज. ञ. ट. इदंचास्मैप्रदातव्यमेतत्सुपरिरक्षितं. २ घ. च. छ. ज. ञ. मयातेपरिरक्षितः. ३ क. ख. घ.—ट. स्तिलकंतत्स्मरस्वेतिचाब्रवीत्. ४ क. घ. ङ. झ. ञ. ट. एतं दृष्ट्वा. ५ क. घ. एतदेवं. ६ च.—ट. रुरोदसहलक्ष्मणः. ७ ख. मणिवरं. ८ घ. च.—ट. मणिश्रेष्ठस्य.

[1]अयं हि जलसंभूतो मणिः [2]सज्जनपूजितः ॥ यज्ञे परमतुष्टेन [3]दत्तः शक्रेण धीमता ॥ ५ ॥
इमं दृष्ट्वा मणिश्रेष्ठं [4]यथा तातस्य दर्शनम् ॥ अद्यास्म्यवगतः सौम्य वैदेहस्य तथा विभोः ॥ ६ ॥
अयं हि शोभते तस्याः प्रियाया मूर्ध्नि मे मणिः ॥ अस्याद्य दर्शनेनाहं प्राप्तां तामिव चिन्तये ॥ ७ ॥
किमाह सीता वैदेही ब्रूहि सौम्य पुनःपुनः ॥ पिपासुमिव तोयेन [5]सिञ्चन्ती वाक्यवारिणा ॥ ८॥
इतस्तु किं दुःखतरं [6]यदिमं वारिसंभवम् ॥ मणिं पश्यामि सौमित्रे वैदेह्यामागतं विना ॥ ९ ॥
चिरं जीवति वैदेही यदि मासं धरिष्यति ॥ क्षणं सौम्य न जीवेयं विना तामसितेक्षणाम् ॥१०॥
नय मामपि तं देशं यत्र दृष्टा मम प्रिया ॥ न तिष्ठेयं क्षणमपि प्रवृत्तिमुपलभ्य च ॥ ११ ॥
कथं सा मम सुश्रोणी भीरुभीरुः सती [7]सदा ॥ भयावहानां घोराणां मध्ये तिष्ठति रक्षसाम् ॥१२॥
शारदस्तिमिरोन्मुक्तो नूनं चन्द्र इवाम्बुदैः ॥ [8]आवृतं वदनं तस्या न विराजति [9]राक्षसैः ॥ १३ ॥
किमाह सीता हनुमंस्तत्त्वतः [10]कथयाद्य मे ॥ एतेन खलु जीविष्ये भेषजेनातुरो यथा ॥ १४ ॥
मधुरा मधुरालापा किमाह मम भामिनी ॥ मद्विहीना वरारोहा हनुमन्कथयस्व मे ॥
[[11]दुःखाद्दुःखतरं प्राप्य कथं जीवति जानकी]॥ १५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

सप्तषष्टितमः सर्गः ॥ ६७ ॥

हनुमता रामचोदनया काकासुरवृत्तान्तादिप्रतिपादकसीतावचनानां विस्तरेणानुवादः ॥१॥ तथा तांप्रति स्वेनार्थरूपाभिज्ञानयाचने तयाचूडामणिरूपार्थाभिज्ञानदाननिवेदनपूर्वकं रामादिषु कुशलप्रश्ननिवेदनचोदनादिरूपतद्वचनानुवादः ॥ २ ॥

[12]एवमुक्तस्तु हनुमान्राघवेण महात्मना ॥ सीताया भाषितं सर्वं न्यवेदयत राघवे ॥ १ ॥

जनकेनापि कुतस्तल्लब्धं तत्राह—अयं हीति ॥ ५ ॥ "मणिं तु दृष्ट्वा रामो वै त्रयाणां संस्मरिष्यति" इति सीतयोक्तप्रकारेण स्मरति—इममिति । इमं दृष्ट्वा तातस्य दशरथस्य । वैदेहस्य जनकस्य । दर्शनमद्यावगतः प्राप्तोस्मि । तदा ताभ्यां तस्या मूर्ध्नि बद्धत्वादिति भावः । इह वैदेहग्रहणं सीताजनन्या अप्युपलक्षणं । सीतावाक्ये "वीरो जनन्या मम च" इत्युक्तेः । तत्र त्रयाणां संस्मरिष्यतीति त्रयग्रहणं बहुमात्रोपलक्षणं । इह वैदेहस्यापि स्मरणोक्तेः ॥ ६—८ ॥ आगतं मणिमित्यन्वयः ॥ ९—११ ॥ भीरुभीरुः अत्यन्तभीरुः ॥ १२–१३ ॥ तत्त्वतः संकोचेन न किंचिद्गोपनीयमिति भावः ॥१४॥ मधुरा सुन्दरी । मधुरालापा । येन तद्वचनानुवादेपि भवद्वचनं मधुरं भवतीत्यर्थः ॥ १५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥

पूर्वं संकुचितं विस्तृणीते—सुखेत्यादिना ॥

ति० परासुं मूर्च्छितमां ॥ ८ ॥ ति० यदिमासंधरिष्यति जीविष्यति । तदा चिरंजीवति जीविष्यतीत्यर्थः । तांविना यथाऽहंनजीवेयं तथामांविना सापिनजीविष्यतीत्यर्थः ॥ स० यदिवैदेहीचिरंजीवति तर्हि मासंधरिष्यति । यदिमासंधरिष्यति तर्ह्येव चिरंजीवतीतितज्जीवनंमज्जीवनव्याप्तं । व्यतिरेकेणाप्याह—क्षणमिति । तामसितेक्षणांविना क्षणमहंनजीवेयंयथा तथा इयंसीतापिमांविना नजीवा नविद्यतेजीवोयस्याःसेतियोजना । यद्वा वैदेहीयदिमासंधरिष्यतिप्राणान् तर्हि चिरंजीवति । वार्ताज्ञानानन्तरंमयातुतथाजीवितुमशक्यमित्याह—क्षणमिति ॥ १० ॥ स० प्रवृत्तिं वार्तां । निराहारत्वादिप्रवृत्तिंवा ॥ ११ ॥ इतिषट्षष्टितमःसर्गः ॥ ६६ ॥

[पा०] १ च. छ. ज. इदंहिजलसंभूतंमणिप्रवरमुत्तमं. २ ख. घ. झ. प्रवरपूजितः. ३ च. छ. ज. दत्तं. ४ क. ख. च. छ. झ. ञ. तथा. ५ ख. झ. ञ. ट. परासुमिव. ६ छ. स्रवन्ती. ७ झ. ञ. यमिमं. ८ ख. झ. वीर. ९ च.—झ. तदा. १० छ. झ. ञ. आवृतो. ११ झ. सांप्रतं. १२ क. छ. ज. झ. ट. कथयस्वमे. १३ इदमर्धं झ. ट. पाठयोर्नदृश्यते. १४ ख. राघवेणैवमुक्तस्तुहनूमान्मारुतात्मजः । वाक्यमुत्तरमव्यग्रस्तमुवाचप्रहृष्टधीः.

इदमुक्तवती देवी जानकी पुरुषर्षभ ॥ पूर्ववृत्तमभिज्ञानं चित्रकूटे यथातथम् ॥ २ ॥
सुखसुप्ता त्वया सार्धं जानकी पूर्वमुत्थिता ॥ वायसः सहसोत्पत्य विरराद स्तनान्तरे ॥ ३ ॥
पर्यायेण च सुप्तस्त्वं देव्यङ्के भरताग्रज ॥ पुनश्च किल पक्षी स देव्या जनयति व्यथाम् ॥ ४ ॥
पुनःपुनरुपागम्य विरराद भृशं किल ॥ ततस्त्वं बोधितस्तस्याः शोणितेन समुक्षितः ॥ ५ ॥
वायसेन च तेनैव सततं बाध्यमानया ॥ बोधितः किल देव्या त्वं सुखसुप्तः परन्तप ॥ ६ ॥
तां तु दृष्ट्वा महाबाहो दारितां च स्तनान्तरे ॥ आशीविष इव क्रुद्धो निःश्वसन्नभ्यभाषथाः ॥ ७ ॥
नखाग्रैः केन ते भीरु दारितं तु स्तनान्तरम् ॥ कः क्रीडति सरोषेण पञ्चवक्त्रेण भोगिना ॥ ८ ॥
निरीक्षमाणः सहसा वायसं समवैक्षथाः ॥ नखैः सरुधिरैस्तीक्ष्णैस्तामेवाभिमुखं स्थितम् ॥ ९ ॥
सुतः किल स शक्रस्य वायसः पततां वरः ॥ धरान्तरचरः शीघ्रं पवनस्य गतौ समः ॥ १० ॥
ततस्तस्मिन्महाबाहो कोपसंवर्तितेक्षणः ॥ वायसे त्वं कृथाः क्रूरां मतिं मतिमतां वर ॥ ११ ॥
सं दर्भं संस्तराद्गृह्य ब्रह्मास्त्रेण ह्ययोजयः ॥ स दीप्त इव कालाग्निर्जज्वालाभिमुखः खगम् ॥ १२ ॥
क्षिप्तवांस्त्वं प्रदीप्तं हि दर्भं तं वायसं प्रति ॥ ततस्तु वायसं दीप्तः स दर्भोऽनुजगाम ह ॥ १३ ॥
स पित्रा च परित्यक्तः सुरैश्च समहर्षिभिः ॥ त्रीँल्लोकान्संपरिक्रम्य त्रातारं नाधिगच्छति ॥ १४ ॥
पुनरेवागतस्त्रस्तस्त्वत्सकाशमरिन्दम ॥ स तं निपतितं भूमौ शरण्यः शरणागतम् ॥
वधार्हमपि काकुत्स्थ कृपया पर्यपालयः ॥ १५ ॥
मोघमस्त्रं न शक्यं तु कर्तुमित्येव राघव ॥ भवांस्तस्याक्षि काकस्य हिनस्ति स्म स दक्षिणम् ॥ १६ ॥
राम त्वां स नमस्कृत्य राज्ञे दशरथाय च ॥ विसृष्टस्तु तदा काकः प्रतिपेदे स्वमालयम् ॥ १७ ॥

उभावपि पर्यायेण सुप्ताविति त्वया सार्धमित्युक्तं ॥ ३—६ ॥ दारितां विदारितां ॥ ७—१८ ॥

शि० पक्षी वायसः । देव्याः व्यथां स्पर्शादिनाऽस्वास्थ्यं । पुनःपुनर्जनयति । पुनःपुनर्जनयतीत्यनेन अयंरावणवधयोग्योस्विनवेतिपरीक्षार्थमागतइतिव्यक्तं ॥ ४ ॥ **शि०** विददार विदारणानुकूलव्यापारंचकार । ततोनन्तरंशोणितेन रुधिरबिन्दुना । समुक्षितइवलं तस्याः तथा । बोधितः । शोणितोक्षितसादृश्यंचात्यरुणबिन्दुविशिष्टसीतापटविशेषाच्छादितत्वेन । समुक्षितशब्दः आचारक्विबन्तप्रकृतिककर्तृक्विन्तः । प्रातिभासिकंव्याख्यानंतुहेयमेव । अप्राकृताङ्गस्यरुधिरस्रावहेतुभूतविदारितत्वस्यासंभवात् । अतएव " योवेत्तिभौतिकंदेहंरामस्यपरमात्मनः । ससर्वेस्माद्बहिष्कार्यःश्रौतस्मार्तविधानतः " इत्यादिसंगच्छते । प्रमाणेरामस्येत्युपलक्षणंसीतायाः ॥ ५ ॥ **ति०** रादितं दारितमित्यर्थः ॥ **स०** पञ्चवक्त्रेण अङ्गुलिरूपपञ्चमुखेनहस्तेन । कःपुमान् । सरोषेणभोगिना तद्रूपयात्वयाक्रीडति । पञ्चवक्त्रेण विस्तृतमुखेनेतिवा ॥ ८ ॥ **स०** निरीक्षमाणः समन्तात्पश्यन् । नखैः पादनखैः ॥ ९ ॥ **स०** चिक्षेप चिक्षेपिथ । " त्वंदेव शक्त्यांगुणकर्मयोनौरेतस्त्वजायांकविरादधेऽजः " इत्यादाविवयुष्मच्छब्दप्रयोगेपि प्रथमपुरुषःसंभवति । " त्वमग्नेप्रथमोमातरिश्वन " इतिऋग्भाष्यटीकायामेतद्भागवतवाक्योदाहरणेनतथैवोक्तेः ॥ १३ ॥ **स०** भीतैः त्वत्तः । नाधिगच्छति नप्राप्तवान् ॥ १४ ॥ **स०** तत्र त्रायकशून्यकाले । धरण्यां क्षितौ अनाथतयानिपतितं । भूमौ " भूमिःक्षितौस्थानमात्रे " इत्यनुशासनात्स्थानमात्रंग्रहणार्थः । समभ्यर्थश्चोद्देश्यत्वं । स्वाश्रयार्थमितिभावः । शरणागतं शरणायस्वरक्षणायआगतं त्वामितिशेषः । **शि०** सीताङ्गस्पर्शमात्रेणतत्कल्याणप्रकटनमपहायकोपप्रकटनद्वाराकिमर्थंकृतमितितुनभ्रमितव्यं । प्रार्थनयैवपरमकल्याणंक्रियतइतिस्वाभाविकपरमात्मरीतेः । तथाहि "करुणावानपिव्यक्तंशक्तःस्वाम्यपिदेहिनां । अप्रार्थितोनगोपायेदितितत्प्रार्थनामतिः " इतिपुराणं ॥ १५ ॥ **स०** हिनस्तिस्म अहिनः ॥ १६ ॥

[**पा०**] १ झ. ट. विददारस्तनान्तरं. २ क. ख. च. छ. ज. प्रसुप्तस्त्वं. ३ क.—ट. ततःपुनः. ४ ग. झ. ञ. ट. विददार. ५ ख. घ. तद्व्रणंच. ६ झ. ट. ततोवाक्यंत्वमूचिवान्. ७ घ. छ.—झ. रादितंवैस्तनान्तरे. ख. दारितासिस्तनान्तरे. ८ क. च. छ. ज. समुदैक्षत. झ. ट. समुदैक्षथाः. ख. ग. समवैक्षथ. ९ ख. च. ज.—ट. सदर्भसंस्तराद्गृह्य. १० ज.—ट. न्ययोजयः. ११ ग. च.—ट. सत्वंप्रदीप्तंचिक्षेप. १२ क. च. ज. ञ. दर्भोंभिजगामतं. १३ ज. झ. ट. भीतैश्चसंपरित्यक्तः. १४ क. ख. ग. च.—ट. सुरैस्सर्वैश्चवायसः. १५ क. ख. ग. च. छ. ज. ञ. पुनरेवागतस्त्रत्वत्समीपं. १६ च.—ज. ञ. ततस्तंपतितं. क. ङ. घ. सत्वंनिपतितं. झ. ठ. त्वंतंनिपतितंभूमौधरण्यां. १७ क.—घ. च. ज.—ट. ततस्तस्याक्षि. १८ घ. रामतुभ्यं. क. च. छ. ज. ततोरामंनमस्कृत्य. झ. ञ. ट. वायसस्त्वांनमस्कृत्य. १९ क. ख. ग. च.—ट. राज्ञोदशरथस्यच.

एवमस्त्रविदांश्रेष्ठः सत्त्ववाञ्छीलवानपि ॥ किमर्थमस्त्रं रक्षस्सु न योजयति राघवः ॥ १८ ॥
न नागा नापि गन्धर्वा नासुरा न मरुद्गणाः ॥ न च सर्वे रणे शक्ता रामं प्रतिसमासितुम् ॥१९॥
तस्य वीर्यवतः कश्चिद्यद्यस्ति मयि संभ्रमः ॥ क्षिप्रं सुनिशितैर्बाणैर्हन्यतां युधि रावणः ॥ २० ॥
भ्रातुरादेशमाज्ञाय लक्ष्मणो वा परन्तपः ॥ स किमर्थं नरवरो न मां रक्षति राघवः ॥ २१ ॥
शक्तौ तौ पुरुषव्याघ्रौ वाय्वग्निसमतेजसौ ॥ सुराणामपि दुर्धर्षौ किमर्थं मामुपेक्षतः ॥ २२ ॥
ममैव दुष्कृतं किंचिन्महदस्ति न संशयः ॥ समर्थौ सहितौ यन्मां नावेक्षेते परंतपौ ॥ २३ ॥
वैदेह्या वचनं श्रुत्वा करुणं साधु भाषितम् ॥ पुनरप्यहमार्यां तामिदं वचनमब्रवम् ॥ २४ ॥
त्वच्छोकविमुखो रामो देवि सत्येन ते शपे ॥ रामे दुःखाभिभूते तु लक्ष्मणः परितप्यते ॥ २५ ॥
कथंचिद्भवती दृष्टा न कालः परिशोचितुम् ॥ इमं मुहूर्तं दुःखानामन्तं द्रक्ष्यसि भामिनि ॥२६॥
तावुभौ नरशार्दूलौ राजपुत्रावनिन्दितौ ॥ त्वद्दर्शनकृतोत्साहौ लङ्कां भस्मीकरिष्यतः ॥ २७ ॥
हत्वा च समरे रौद्रं रावणं सहबान्धवम् ॥ राघवस्त्वां वरारोहे स्वां पुरीं नयते ध्रुवम् ॥ २८ ॥
यत्तु रामो विजानीयादभिज्ञानमनिन्दिते ॥ प्रीतिसंजननं तस्य प्रदातुं त्वमिहार्हसि ॥ २९ ॥
साऽभिवीक्ष्य दिशः सर्वा वेण्युद्ग्रथनमुत्तमम् ॥ मुक्त्वा वस्त्राद्दौ मह्यं मणिमेतं महाबल ॥ ३० ॥
प्रतिगृह्य मणिं दिव्यं तव हेतो रघूद्वह ॥ शिरसा तां प्रणम्यार्यामहमागमने त्वरे ॥ ३१ ॥
गमने च कृतोत्साहमवेक्ष्य वरवर्णिनी ॥ विवर्धमानं च हि मामुवाच जनकात्मजा ॥ ३२ ॥
अश्रुपूर्णमुखी दीना बाष्पसंदिग्धभाषिणी ॥ ममोत्पतनसंभ्रान्ता शोकवेगसमाहता ॥ ३३ ॥
[मामुवाच ततः सीता सभाग्योसि महाकपे ॥ यद्द्रक्ष्यसि महाबाहुं रामं कमललोचनम् ॥
लक्ष्मणं च महाबाहुं देवरं मे यशस्विनम् ॥ ३४ ॥
सीतयाऽप्येवमुक्तोऽहमब्रवं मैथिलीं तथा ॥ पृष्ठमारोह मे देवि क्षिप्रं जनकनन्दिनि ॥ ३५ ॥
यावत्ते दर्शयाम्यद्य ससुग्रीवं सलक्ष्मणम् ॥ राघवं च महाभागे भर्तारमसितेक्षणे ॥ ३६ ॥
साऽब्रवीन्मां ततो देवी नैष धर्मो महाकपे ॥ यत्ते पृष्टं सिपेवेऽहं स्ववशा हरिपुङ्गव ॥ ३७ ॥
पुरा च यदहं वीर स्पृष्टा गात्रेषु रक्षसा ॥ तत्राहं किं करिष्यामि कालेनोपनिपीडिता ॥ ३८ ॥
गच्छ त्वं कपिशार्दूल यत्र तौ नृपतेः सुतौ ॥ इत्येवं सा समाभाष्य भूयः संदेष्टुमास्थिता] ॥३९॥

प्रतिसमासितुं प्रतिमुखं स्थातुं ॥ १९—२४ ॥ त्वच्छोकविमुखः त्वच्छोकेन कार्यान्तरविमुखः ॥ २५—२७ ॥ नयते नेष्यते । वर्तमानसामीप्ये वर्तमानवत्प्रयोगः ॥ २८—२९ ॥ साभिवीक्ष्य दिश इति । दिगवलोकनं राक्षस्यो दृष्ट्वा रावणाय वक्ष्यन्तीति भयेन । वेण्यामुद्ग्रथ्यत इति वेण्युद्ग्रथनं । वेणीधार्यमित्यर्थः । मुक्त्वा वस्त्रादिति वस्त्राञ्चलेन ग्रथितं मणिं मुक्त्वा ततः ददावित्यर्थः ॥ ३०—

ति० अतःपरेपरिशोचितुं नकालःतवयोग्यइतिशेषः । चिरंलङ्कायामासितुंनकालोयोग्यइतिपाठान्तरेऽर्थः ॥ ति० इदंमुहूर्तं अस्मित्रेवमुहूर्तेइत्यर्थः ॥ २६ ॥ इतिसप्तषष्टितमः सर्गः ॥ ६७ ॥

[पा०] १ क. च. छ. ज. ञ. सत्त्ववान्बलवानपि. २ क. ग. घ. च.—ट. योजयसि. ३ झ. ट. नदानवानगन्धर्वाः. ४ ख. घ. झ. ञ. ट. तवरामरणेशक्तास्तथाप्रतिसमासितुं. ५ ख. ग. च.—ट. तववीर्यवतः. ६ झ. ट. सुनियतैः. ७ ग. घ. मादाय. ८ घ. समर्थावपितौ. ९ झ. ट. यन्मांनरक्षेते. क. च. छ. ज. यन्मामुपेक्षेते. १० च.—ट. साधुभाषितं. ११ ख. घ. कालश्चिरमासितुं. १२ क. च.—ट. इदंमुहूर्तं. १३ च. छ. ज. ञ. पुत्रौमहाबलौ. झ. ट. पुत्रौपरंतपौ. १४ ग. विशालाक्षिस्वांपुरींप्रतिनेष्यति. ख. महाभागे. १५ झ. ट. स्वपुरीं. १६ क. ग. च.—ट. तत्त्वमर्हसि. १७ च. छ. ज. ञ. सासभीक्ष्य. १८ छ. झ. ट. दोर्भ्यांतव. क. ख. ग. च. ज. ञ. देव्यास्तव. १९ ग. घ. च. छ. झ. ञ. ट. संप्रणम्यैनां. २० झ. ट. बाष्पगद्गद. २१ मामुवाचेत्यादयः भूयःसंदेष्टुमास्थितेत्यन्ताःश्लोकाः झ. ञ. ट. पाठेषुदृश्यन्ते.

हनुमन्निसहसंकाशावुभौ तौ रामलक्ष्मणौ ॥ सुग्रीवं च सहामात्यं सर्वान्ब्रूया ह्यनामयम् ॥ ४० ॥
यथा च स महाबाहुर्मां तारयति राघवः ॥ असाद्दुःखाम्बुसंरोधात्त्वं समाधातुमर्हसि ॥ ४१ ॥
इमं च तीव्रं मम शोकवेगं रक्षोभिरेभिः परिभर्त्सनं च ॥
ब्रूयास्तु रामस्य गतः समीपं शिवश्च तेऽध्वास्तु हरिप्रवीर ॥ ४२ ॥
एतत्तवार्या नृपराजसिंह सीता वचः प्राह विषादपूर्वम् ॥
एतच्च बुद्ध्वा गदितं मया त्वं श्रद्धत्स्व सीतां कुशलां समग्राम् ॥ ४३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

अष्टषष्टितमः सर्गः ॥ ६८ ॥

हनुमता श्रीरामंप्रतिराघवयोर्वानराणांच दुस्तरसागरतरणेसीताशङ्कायां तन्निवर्तकस्ववचनाद्यनुवादपूर्वकं स्वकृतसीता-समाश्वासननिवेदनेनसह सीताकुशलनिवेदनम् ॥ १ ॥

अथाहमुत्तरं देव्या पुनरुक्तः ससंभ्रमः ॥ तव स्नेहान्नरव्याघ्र सौहार्दादनुमान्य वै ॥ १ ॥
एवं बहुविधं वाच्यो रामो दाशरथिस्त्वया ॥ यथा मामभ्युपाच्छीघ्रं हत्वा रावणमाहवे ॥ २ ॥
यदि वा मन्यसे वीर वसैकाहमरिन्दम ॥ कस्मिंश्चित्संवृते देशे विश्रान्तः श्वो गमिष्यसि ॥ ३ ॥
मम चाप्यल्पभाग्यायाः सान्निध्यात्तव वीर्यवन् ॥ अस्य शोकविपाकस्य मुहूर्तं स्याद्विमोक्षणम् ॥४॥
गते हि त्वयि विक्रान्ते पुनरागमनाय वै ॥ प्राणानामपि संदेहो मम स्यान्नात्र संशयः ॥ ५ ॥
तवादर्शनजः शोको भूयो मां परितापयेत् ॥ दुःखाद्दुःखपराभूतां दुर्गतां दुःखभागिनीम् ॥ ६ ॥
अयं च वीर संदेहस्तिष्ठतीव ममाग्रतः ॥ सुमहांस्त्वत्सहायेषु हर्यृक्षेषु हरीश्वर ॥ ७ ॥
कथं नु खलु दुष्पारं तरिष्यन्ति महोदधिम् ॥ तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ॥ ८ ॥
त्रयाणामेव भूतानां सागरस्यास्य लङ्घने ॥ शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ॥ ९ ॥
तदस्मिन्कार्यनिर्योगे वीरैवं दुरतिक्रमे ॥ किं पश्यसि समाधानं ब्रूहि कार्यविदां वर ॥ १० ॥
काममस्य त्वमेवैकः कार्यस्य परिसाधने ॥ पर्याप्तः परवीरघ्न यशस्यस्ते बलोदयः ॥ ११ ॥
बलैः समग्रैर्यदि मां हत्वा रावणमाहवे ॥ विजयी स्वां पुरीं रामो नयेत्तत्स्याद्यशस्करम् ॥ १२ ॥

४३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायण-भूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तषष्टितमः सर्गः ॥ ६७ ॥

हे नरव्याघ्र तव स्नेहात् । मयीति शेषः । सौहार्दात् सुहृद्भावात् । आप्तत्वादिति यावत् । अनुमान्य संमान्य । उत्तरं ततः परं । उत्तरं कार्यं वा । पुनर्देव्याहमुक्त इत्यन्वयः । ससंभ्रमः गमनत्वरान्वित इत्यर्थः ॥ १—३ ॥ शोकविपाकस्य शोकवृद्धेरित्यर्थः ॥ ४—९ ॥ कार्यनिर्योगे कार्यगतौ । दुरतिक्रमे

[पा०] १ झ. ञ. ट. संरोधात्तत्त्वमाख्यातुमर्हसि. क. च. ज. संरोधात्तत्समाधातुमर्हसि. २ ग. घ. झ. ञ. ट. इदंच. ३ झ. ञ. ट. नृपसंयतासा. ४ झ. ञ. ट. गदितोयथात्वं. क. च. छ. ज. गदितंप्रियायाः. ५ घ. झ. ट. ससंभ्रमं. ६ च. छ. ज. ञ. मांप्राप्नुयात्. ७ झ. ञ. ट. वानर. ८ झ. ट. तवादर्शनजंचापिभयंमां. ग. तवादर्शनतश्चापिशोकोमां. घ. तवादर्श-नजश्चापिशोकोमां. ९ ग. दुःखाद्दुःखाभिभूतांमांदुःखितां. ख. च. छ. दुःखाद्दुःखाभिभूतांचदुःखितां. घ. दुःखाद्दुःखतरंयातांदुः-खितांदुःखसागरे. १० ग. हर्यृक्षप्रवरेषुच. क. ख. च. छ. ज. ञ. हर्यृक्षेषुनसंशयः. झ. हर्यृक्षेषुअसंशयः. ११ झ. ञ. ट. सागरस्नेह. १२ घ. च. झ. ञ. ट. वायोर्वातवचानघ. १३ क. ग. त्वंहि. १४ झ. ट. वाक्यविदां. १५ झ. ट. स्वपुरीं. १६ च. छ. ज. नयेन्मांतद्यशस्करं.

यथाऽहं तस्य वीरस्य वनादुपधिना हृता ॥ रक्षसा तद्भयादेव तथा नार्हति राघवः ॥ १३ ॥
बलैस्तु संकुलां कृत्वा लङ्कां परबलार्दनः ॥ मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥ १४ ॥
तद्यथा तस्य विक्रान्तमनुरूपं महात्मनः ॥ भवत्याहवशूरस्य तथा त्वमुपपादय ॥ १५ ॥
तदर्थोपहितं वाक्यं प्रश्रितं हेतुसंहितम् ॥ निशम्याहं ततः शेषं वाक्यमुत्तरमब्रवम् ॥ १६ ॥
देवि हर्यृक्षसैन्यानामीश्वरः प्लवतांवरः ॥ सुग्रीवः सत्त्वसंपन्नस्तवार्थे कृतनिश्चयः ॥ १७ ॥
तस्य विक्रमसंपन्नाः सत्त्ववन्तो महाबलाः ॥ मनःसंकल्पसंपाता निदेशे हरयः स्थिताः ॥ १८ ॥
येषां नोपरि नाधस्तान्न तिर्यक्सज्जते गतिः ॥ न च कर्मसु सीदन्ति महत्स्वमिततेजसः ॥ १९ ॥
असकृत्तैर्महाभागैर्वानरैर्बलदर्पितैः ॥ प्रदक्षिणीकृता भूमिर्वायुमार्गानुसारिभिः ॥ २० ॥
मद्विशिष्टाश्च तुल्याश्च सन्ति तत्र वनौकसः ॥ मत्तः प्रत्यवरः कश्चिन्नास्ति सुग्रीवसन्निधौ ॥२१॥
अहं तावदिह प्राप्तः किं पुनस्ते महाबलाः ॥ न हि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे जनाः ॥२२॥
तदलं परितापेन देवि मन्युर्व्यपैतु ते ॥ एकोत्पातेन वै लङ्कामेष्यन्ति हरियूथपाः ॥ २३ ॥
मम पृष्ठगतौ तौ च चन्द्रसूर्याविवोदितौ ॥ त्वत्सकाशं महाभागे नृसिंहावागमिष्यतः ॥ २४ ॥
अरिघ्नं सिंहसंकाशं क्षिप्रं द्रक्ष्यसि राघवम् ॥ लक्ष्मणं च धनुष्पाणिं लङ्काद्वारमुपस्थितम् ॥ २५ ॥
नखदंष्ट्रायुधान्वीरान्सिंहशार्दूलविक्रमान् ॥ वानरान्वारणेन्द्राभान्क्षिप्रं द्रक्ष्यसि सङ्गतान् ॥ २६ ॥
शैलाम्बुदनिकाशानां लङ्कामलयसानुषु ॥ नर्दतां कपिमुख्यानामचिराच्छ्रोष्यसि स्वनम् ॥ २७ ॥
निवृत्तवनवासं च त्वया सार्धमरिन्दमम् ॥ अभिषिक्तमयोध्यायां क्षिप्रं द्रक्ष्यसि राघवम् ॥ २८ ॥

ततो मया वाग्भिरदीनभाषिणा शिवाभिरिष्टाभिरभिप्रसादिता ॥
जगाम शान्तिं मम मैथिलात्मजा तवापि शोकेन तदाऽभिपीडिता ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशत्सहस्रिकायां संहितायां सुन्दरकाण्डे अष्टषष्टितमः सर्गः ॥ ६८ ॥

॥ सुन्दरकाण्डः समाप्तः ॥

दुर्निर्वहे ॥ १०—२२ ॥ मन्युः दैन्यं । " मन्युर्दैन्ये क्रतौ क्रुधि " इत्यमरः ॥ २३—२८ ॥ तव शोकेनापि नैव दंशानित्यादिमदुक्त्या श्रुतेन । तदा मम पुरस्तादभिपीडिता । अदीनभाषिणा मया । शिवाभिः इष्टाभिः वाग्भिः । अभिप्रसादिता शान्तिं दुःखनिवृत्तिं जगाम ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टषष्टितमः सर्गः ॥ ६८ ॥

इत्थं कौशिकवंशमौक्तिकमणिर्गोविन्दराजाभिधो वात्स्यश्रीशठकोपदेशिकपदद्वन्द्वैकसेवारतः ॥ पूर्वाचार्यकृता विलोक्य विविधा व्याख्या मुहुर्जानकीकान्तस्याप्रतिमाज्ञयैव तिलकं सौन्दर्यकाण्डेऽधात् ॥ १ ॥

[पा०] १ च. छ. ज. ञ. शैरसु. २ ग. च. छ. झ. ञ. तत्त्वमेवोपपादय. ३ झ. ट. स्त्वदर्थे. ४ ख. झ. ट. सदृशाः. ५ ख. च. छ. ज. ञ. मैंहाभागैःससागरधराधरा. ६ घ. ङ. झ. ट. बलसंयुतैः. ७ घ. चन्द्रसूर्याविवांबरे. ८ च. छ. ज. ञ. त्वत्समीपं. ९ ङ.—ट. धनुष्मन्तं. १० घ.—ट. मुपागतं. ११ झ. ट.उवाह. १२ ख. वियोगशोकेनतथा.

इदं किष्किन्धाकाण्डं कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम्। शकाब्दाः १८३४ सन १९१३.

श्रीः

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यासमलंकृतम् ।

युद्धकाण्डम् ६

श्रीरामचन्द्राय नमः ॥

प्रथमः सर्गः ॥ १ ॥

हनुमन्मुखादवगतसीतावृत्तान्तेनश्रीरामेण हनुमन्तंप्रतिप्रशंसनपूर्वकं तत्कृतसीतान्वेषणाद्युपकारप्रत्युपकारतयासर्वस्वदानप्रतिनिधिभूतस्वात्मप्रदानरूपपरिष्वङ्गकरणम् ॥१॥ तथा सुग्रीवसंनिधौहनुमन्तंप्रति सागरस्यदुस्तरतयासीतान्वेषणादिप्रयासस्यनिष्फलत्वोक्त्या सागरतरणोपायानधिगमेनपरिचिन्तनम् ॥ २ ॥

श्रुत्वा हनुमतो वाक्यं यथावद्[1]भिभाषितम् ॥ रामः प्रीतिसमायुक्तो वाक्यमुत्तरमब्रवीत् ॥ १ ॥
कृतं हनुमता कार्यं सुमहद्भुवि [2]दुर्लभम् ॥ मनसाऽपि यदन्येन न शक्यं धरणीतले ॥ २ ॥
न हि तं परिपश्यामि यस्तरेत [3]महार्णवम् ॥ अन्यत्र गरुडाद्वायोरन्यत्र च हनूमतः ॥ ३ ॥

श्रीरामचन्द्राय नमः ॥ आचार्यं शठकोपदेशिकवरं प्राचार्यपारंपरीमप्यानम्य सनारदं कुशलवाचार्यं मुनीनां वरम् । पूर्वाचार्यकृता विलोक्य बहुधा व्याख्याः सतां प्रीतये कुर्वे संप्रति युद्धकाण्डविवृतिं श्रीमत्किरीटाभिधाम् ॥ उक्तं पुरुषकारभूताया लक्ष्म्याः कृत्यं सुन्दरकाण्डे । अथोपायकृत्यं वक्तुं षष्ठः काण्ड आरभ्यते । तत्र स्वामिना कृतकार्ये भृत्ये एवं वर्तितव्यमित्यमुमर्थमुपदेष्टुं सुग्रीवादीनामुत्साहं वर्धयन् समाहृतसीतावृत्तान्तं हनुमन्तं रामः सत्करोति प्रथमे सर्गे—श्रुत्वेति । अत्र गायत्र्यक्षरं मकारः । यथावत् यथावस्थितप्रकारेण । अभिभाषितं उक्तं । उत्तरं प्रियश्रवणोत्तरकालार्हं ॥ १ ॥ अथ " प्रत्यक्षे गुरवः स्तुत्याः परोक्षे मित्रबान्धवाः । कर्मान्ते दासभृत्याश्च न कदाचन पुत्रकाः " इति वचनात्कर्मान्ते दासं स्तौति—कृतमित्यादिना । अत्र महदित्यनेन सागरतरणमुच्यते । सुमहदित्यनेन लङ्काप्रवेशः । दुर्लभमित्यनेन लङ्काधर्षणं । मनसापि न शक्यमित्यनेन पुनर्निर्गमः । प्रथमं सागर एव न तर्तुं शक्यः । तीर्त्वापि तं लङ्कां न प्रवेष्टुं । प्रविश्यापि न धर्षयितुं । धर्षयित्वापि न ततो निर्गन्तुमिति भावः ॥ २ ॥ महत्त्वमुपपादयति—न हीति ॥ गरुडवायूमिलित्वा तरेतां । अयं त्वेक एवातरदित्यर्थः ॥ ३ ॥

श्रीरामाय नमः ॥ स० मारुतेरीरितंश्रुत्वाराघवःश्लाघापूर्वकमन्यत्तस्मैदातुमचक्षाणःस्वात्मानमेवददावित्याह—श्रुत्वेत्यादिना ॥ रामःहनुमतोयथावत्सम्यगभिभाषितं वचनं । अवाक्यं निश्शब्दंयथाभवतितथाश्रुत्वा उत्तरं प्रत्युत्तररूपं तत्कालोचिततयोत्तमं वाक्यमब्रवीत् ॥ १ ॥ स० सुमहतांमहात्मनांदेवानां या भूः स्वर्गादिरूपंस्थानं । तस्यामपिदुर्लभं असाध्यं । यत्कार्यं सीतासंदर्शनरूपं । तत् धरणीतलेहनुमताकृतं । अन्येन हनुमतोभिन्नेन । नशक्यं कर्तुमितिशेषः ॥ २ ॥ तरेत तरेत् । अन्यत्र अन्यं

[पा०] १ क.—घ. ज. दनुभाषितं. २ ख. घ. दुष्करं. ३ ङ. झ. ट. महोदधिं.

देवदानवयक्षाणां गन्धर्वोरगरक्षसाम् ॥ अप्रधृष्यां पुरीं लङ्कां रावणेन सुरक्षिताम् ॥ ४ ॥
[[1]यो वीर्यबलसंपन्नो द्विषद्भिरनिवारितः] ॥ प्रविष्टः सत्वमाश्रित्य [2]श्वसन्को नाम निष्क्रमेत् ॥ ५ ।
को विशेत्सुदुराधर्षां राक्षसैश्च सुरक्षिताम् ॥ यो वीर्यबलसंपन्नो न समः स्याद्धनूमतः ॥ ६ ॥
भृत्यकार्यं हनुमता सुग्रीवस्य कृतं महत् ॥ [3]स्वयं विधाय स्वबलं सदृशं विक्रमस्य च ॥ ७ ॥
यो हि भृत्यो नियुक्तः सन्भर्त्रा कर्मणि दुष्करे ॥ कुर्यात्तदनुरागेण तमाहुः पुरुषोत्तमम् ॥ ८ ॥
नियुक्तो यः परं कार्यं न कुर्यान्नृपतेः प्रियम् ॥ भृत्यो युक्तः समर्थश्च तमाहुर्मध्यमं नरम् ॥ ९ ॥
नियुक्तो नृपतेः कार्यं न कुर्याद्यः समाहितः ॥ भृत्यो युक्तः समर्थश्च तमाहुः पुरुषाधमम् ॥ १० ।
तन्नियोगे नियुक्तेन कृतं कृत्यं हनूमता ॥ न चात्मा लघुतां नीतः सुग्रीवश्चापि तोषितः ॥ ११ ।
अहं च रघुवंशश्च लक्ष्मणश्च महाबलः ॥ वैदेह्या दर्शनेनाद्य धर्मतः परिरक्षिताः ॥ १२ ॥

सुमहत् मनसापि न शक्यमित्येतद्दूयमप्युपपादयति —देवदानवेत्यादिना सार्धश्लोकेन ॥ सत्त्वं बलं । आश्रित्य श्वसन् जीवन् । निष्क्रमेत् निष्क्रामेत् । लङ्कां प्रविश्य स्वबलेन पुनर्निर्गच्छन् हनुमतोऽन्यःकोपि नास्तीत्यर्थः ॥ ४—५ ॥ दुर्लभत्वमुपपादयति—को विशेदिति ॥ ६ ॥ न केवलं स्वामिनियुक्तकार्यकरणेन भृत्यकार्यं निर्व्यूढमनेन किन्त्वनियुक्तप्रकृतकार्यानुकूलकार्यान्तरकरणेनापि महत्कार्यं संसाधितमित्याह—भृत्येति ॥ विक्रमः अतिशक्तिः । " विक्रमस्त्वतिशक्तिता " इत्यमरः । विक्रमस्य सदृशं स्वबलं अशोकवनिकाभङ्गादिकं पौरुषं । स्वयं आत्मना स्वामिनियोगं विना । विधाय सुग्रीवस्य भृत्यकार्यं भृत्येन कर्तव्यं । महत् अधिकं कृतमित्यर्थः ॥ ७ ॥ हनुमत उत्तमभृत्यत्वं दर्शयितुमुत्तममध्यमाधमभृत्यानां क्रमेण लक्षणमाह—यो हीत्यादिना ॥ यो भृत्यः भर्त्रा स्वामिना । दुष्करे कर्मणि नियुक्तः तत् कृत्वा । अनुरागेण स्वामिभक्त्यतिशयेन । तदपेक्षितमनियुक्तमपि कार्यं कुर्यात् । तं पुरुषोत्तमं उत्तमभृत्यं । आहुः ॥ ८ ॥ भर्त्रा नियुक्तः यो भृत्यः युक्तः उत्साहयुक्तः समर्थश्च । नृपतेः स्वामिनः । प्रियं परं कार्यं स्वामिनिर्दिष्टादधिकं कार्यं । न कुर्यात् । तं मध्यमं नरं मध्यमभृत्यं । आहुः । " भृत्यस्तु यः परं कार्यं न कुर्यान्नृपतेः प्रियम् । भृत्योऽभृत्यस्समर्थोपि तमाहुर्मध्यमं नरं " इति पाठान्तरं । तत्र त्वयमर्थः यस्तु भृत्यस्समर्थोपि परं कार्यं नकुर्यात् उक्तमात्रमेव कुर्यात्स भृत्योऽभृत्यः उक्तानुष्ठानात् भृत्यः अधिकाकरणादभृत्यः । ततस्तं मध्यममाहुरिति ॥ ९ ॥ समाहितः कार्यान्तराव्यग्रः । युक्तः समर्थश्च यो भृत्यो नियुक्तोपि नृपतेः कार्यं नृपतेः उक्तमात्रमपि कार्यं सम्यङ्न कुर्यात् तं पुरुषाधमं अधमभृत्यं । आहुः ॥ १० ॥ उक्तेषु त्रिविधभृत्येषूत्तमभृत्योयमित्याह—तदिति ॥ तत् उत्तमभृत्यलक्षणलक्षितत्वात् । नियुज्यतेस्मिन्निति नियोगः कार्यं तस्मिन्नियुक्तेन उत्तमभृत्येन कृत्यं कर्तव्यं कार्यं हनुमता कृतं । किंचात्मा स्वयं लघुतां न नीतः । राक्षसैरपराजितत्वात् सुग्रीवश्चापि तोषितः उक्तकार्यातिरिक्तकार्यकरणात् ॥ ११ ॥ न केवलं सुग्रीवतोषणं धर्मपरिरक्षणं चास्माकमासीदित्याह—अहमिति ॥ धर्मतः धर्मे सप्तम्यर्थे तसिः । धर्मतः परिरक्षिताः धर्मे स्थापिताः धर्मेस्थापनं चात्राधर्मान्मोचनं । यदि हनुमता सीता न दृश्येत तदाहं तावदात्मानं जह्यां । ततो लक्ष्मणादयश्च । तत आत्महानिरूपोऽधर्मस्सर्वेषां स्यादिति भावः । यद्वा वैदेहीदर्शनरूपेण धर्मेण उपकारेण सर्वे वयं परिरक्षिताः निरपवादाः कृताः स्मेति भाव

॥ ३ ॥ **स०** देवदानवयक्षाणामितिकर्तरिषष्ठी ॥ ४ ॥ **ती०** योवीर्यबलसंपन्नोपि हनुमतःसमोनस्यात् सकोवालङ्कांविशेदित्यन्वयः ॥ **स०** नकेवलंप्रविष्टस्यनिष्क्रमणंदुर्घटं प्रवेशोपिनशक्यइत्याह—कइति । यश्चवीर्यबलेनसंपन्नइतिप्रसिद्धोभवेत् सोपिहनुमतोनसमः । योहनूमान् नोस्माकं । वीर्यबलसंपद्रूपस्तस्यहनूमतइतिवा ॥ ६ ॥ **रामानु०** कुर्यात्तदनुरागेणेतिपाठः । धातूनामनेकार्थत्वादत्रानुरागशब्दोनुबन्धवचनः । तदनुबन्धेन प्रकृतकार्यानुबन्धेन । अनियुक्तमपिकार्यं यःकुर्यादित्यर्थः । "भृत्यस्तुयःपरंकार्यंकुर्यात्" इत्यधिककार्याकर्तुर्मध्यमभृत्यत्वाभिधानादेवंव्याख्यातं । तदनसूयुर्यइतिपाठेयच्छब्दोतिरिच्यते ॥८॥ **ति०** धर्मत

[**पा०**] १ इदमर्धं च. छ. पाठयोर्दृश्यते. २ क. ग.—ट. जीवन्कोनाम. ३ च. छ. एवं. ४ ख. तदनुसारेण.

इदं तु मम दीनस्य मनो भूयः प्रकर्षति ॥ यदिहास्य प्रियाख्यातुर्न कुर्मि सदृशं प्रियम् ॥ १३ ॥
एष सर्वस्वभूतस्तु परिष्वङ्गो हनूमतः ॥ मया कालमिमं प्राप्य दत्तस्तस्य महात्मनः ॥ १४ ॥
इत्युक्त्वा प्रीतिहृष्टाङ्गो रामस्तं परिषस्वजे ॥ हनूमन्तं महात्मानं कृतकार्यमुपागतम् ॥ १५ ॥
ध्यात्वा पुनरुवाचेदं वचनं रघुनन्दनः ॥ हरीणामीश्वरस्यैव सुग्रीवस्योपशृण्वतः ॥ १६ ॥
सर्वथा सुकृतं तावत्सीतायाः परिमार्गणम् ॥ सागरं तु समासाद्य पुनर्नष्टं मनो मम ॥ १७ ॥
कथं नाम समुद्रस्य दुष्पारस्य महांभसः ॥ हरयो दक्षिणं पारं गमिष्यन्ति समाहिताः ॥ १८ ॥

॥ १२ ॥ एवं निरतिशयानन्दकरं वचनं कथयतो हनुमतः तत्सदृशप्रत्युपकारालाभात् खिद्यते—इदं त्विति ॥ प्रकर्षति व्याकुलयति संतापयति वा । कुर्मि करोमि ॥ १३ ॥ स च संतापस्सर्वस्वदानरूपेण प्रत्युपकारेण विना न शाम्यति । तस्य सर्वस्वदानस्य मया क्रियमाणः परिष्वङ्गएव प्रतिनिधिर्भवत्वित्याह—एष इति । तुशब्दोवधारणे । इमं प्रत्युपकारार्हं कालं प्राप्य मया दत्तोयं परिष्वङ्ग एव सर्वस्वभूतोस्तु । सर्वस्वदानसदृशोस्त्विति संबन्धः । एषः स्वानुभवसिद्धः । इच्छागृहीताभिमतोरुदेहत्वेन स्वस्य निरवधिकभोग्यतया स्थितः । लोके स्वस्य रत्नं हि स्वामिमताय दिशतिसर्वस्वभूतः । एतद्व्यतिरिक्तप्रदाने इदं न दत्तमिति न्यूनता स्यात् । एतत्प्रदाने तु सर्वं दत्तं । एतद्विग्रहस्य सर्वाश्रयत्वात् परिष्वङ्गो हनूमतः । अमृताशिनो हि तृणकबलादिकं न देयं । स्नेहो मे परमो राजन्नित्येतद्विग्रहे प्रेमवतः स एव दातव्यः । मया कालमिमं प्राप्य दत्तः । अयं किञ्चिदपि मत्तोनपेक्षमाणो वर्तते । कदा मयाऽस्मै किंचिद्दत्तं स्यादिति सोत्कण्ठेन मया स्थितं । संप्रत्यप्रतिषेधसमयलाभाद्दत्तवानस्मि । तस्य महात्मनः महास्वभावस्य । महोदारस्येत्यर्थः । देहद्वयमुपकृतवतः किमेकदेहप्रदानमुचितमितिभावः । वेणुद्रुथनसमये सीतां संरक्ष्यदत्त्वा अवगाह्यार्णवं स्वप्स्य इति दशायां रामदेहं च सीतासंदेशवचनेनाजीवयद्धि । एवं देहद्वयंदत्तवतः किमेकदेहदानमुचितमितिभावः ॥१४॥ प्रीतिहृष्टाङ्गः प्रीत्या पुलकितगात्रः । महात्मानमित्यादिविशेषणानि परिष्वङ्गहेतवः ॥ १५ ॥ एवं हनुमन्तं स्तुत्वा सागरस्य दुस्तरत्वं विचार्य विषण्णस्सन् प्रयासकृतं सीतान्वेषणं निरर्थकमितिमन्वान आह—ध्यात्वेति ॥ एवकारो भिन्नक्रमः । ध्यात्वा दुस्तरं सागरं सर्ववानरवाहिनीसहितोहं कथं संतरिष्यामीति संचिन्त्य । सुग्रीवस्योपशृण्वतः सुग्रीवे उपशृण्वत्येव । व्यत्ययेन सप्तम्यर्थे षष्ठी ॥ १६ ॥ सर्वथा सर्वप्रकारेण समुद्रतरणान्तःपुरप्रवेशादिना । सुकृतंतावत् सुष्ठु कृतमेव । परिमार्गणं अन्वेषणं । किंतु सागरं समासाद्य सागरस्य दुस्तरत्वमालोच्य । पुनर्नष्टं मनो मम । सीतावृत्तान्तश्रवणेन हृष्टमपि मे मनः पुनर्नष्टं प्रकृतं विषादं पुनः प्राप्तमित्यर्थः ॥ १७ ॥ विषादमेव प्रकटयति—कथमिति ॥ दुष्पारस्य दुष्प्रापतीरस्य । " पार—तीर कर्मसमाप्तौ " इत्यस्माद्धातोः खच्

धर्मप्राप्येत्यर्थः । एतेन स्वाम्याज्ञापालनेनभृत्यस्यधर्मोपिसूचितः ॥ १२ ॥ **ति०** सर्वस्वभूतः भगवद्देहस्यशुद्धानन्दरूपत्वात्स्वालिङ्गनस्यसर्वस्वभूतत्वंबोध्यं । आनन्दएवहिभगवतःसर्वस्वं । " आनन्दएवहिमाययारामादिदेहत्वेनभासते " इतिगीताभाष्यविष्णुसहस्रनामभाष्ययोर्भगवत्पादैःस्पष्टमेवोक्तं । ब्रह्माण्डपुराणादिषुचैवंपरिष्वङ्गद्वाराब्रह्मानन्दार्पणमेवहनुमतेकृतमितिबोधितं । तस्यहनूमतः उत्तमभृत्यस्यहनूमतः ॥ **स०** एतत्कालोचितमिदमित्यालोच्यदत्तवान्वानरेन्द्रायराघवेन्द्रइत्याह—एषइत्यादिना । सर्वस्वभूतः सहभोगहेतुत्वात्कृतोपकारसमप्रफलरूपः । एषः परिष्वङ्गः अङ्गालिङ्गनरूपः । इमंकालं एतादृशंसमयं । प्राप्य । महात्मनः तस्यहनुमतोदत्तः । मयारमयामहात्मनोममचसर्वस्वभूतः एषोपि इमं अकालं सायुज्यसूचकस्यतस्येदानीमयोग्यत्वात्तत्कालभिन्नंकालंप्राप्यापि मयादत्तइतिवा । तुशब्दस्तुरमामाहृतयोर्विशेषद्योतकः । अनेनकृपापारवश्यंद्योत्यते ॥ **शि०** इमं दानयोग्यंकालंप्राप्यसर्वस्वभूतः ममसर्वधनलंप्राप्तः । एषपरिष्वङ्गः ममालिङ्गनं । महात्मनोहनूमतोदत्तोस्तु । एतेनपरिष्वङ्गातिरिक्तंहनुमदुपयोगिवस्त्वन्तरंनास्तीतिसूचितं । तेन रामपरिष्वङ्गप्राप्तेःपरमपुरुषार्थत्वंसूचितं ॥ १४ ॥ **ति०** समागताः मिलिताः ॥ १८ ॥

[पा०] १ च. छ. ज. दत्तश्चास्तु. क. ख. घ. दत्तश्चास्य. २ ङ. ञ. ट. कृतवाक्यं. ३ ख.—ट. रघुसत्तमः. ४ च. कथंचास्य. ५ ङ. च. छ. ञ. ट. समागताः.

यद्यप्येष तु वृत्तान्तो वैदेह्या गदितो मम ॥ समुद्रपारगमने हरीणां किमिवोत्तरम् ॥ १९ ॥
इत्युक्त्वा शोकसंभ्रान्तो रामः शत्रुनिबर्हणः ॥ हनुमन्तं महाबाहुस्ततो ध्यानमुपागमत् ॥ २० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे प्रथमः सर्गः ॥ १ ॥

द्वितीयः सर्गः ॥ २ ॥

सुग्रीवेणरामंप्रति समाश्वासनपूर्वकंमध्येसमुद्रं सेतुबन्धनिर्धारणपूर्वकंतदुपायचिन्तनप्रार्थना ॥ १ ॥ तथातंप्रति वानर-पराक्रमादिप्रशंसनपूर्वकं शुभशकुननिवेदनेनशत्रुजयनिर्धारणोक्तिः ॥ २ ॥

तं तु शोकपरिद्यूनं रामं दशरथात्मजम् ॥ उवाच वचनं श्रीमान्सुग्रीवः शोकनाशनम् ॥ १ ॥
किं त्वं संतप्यसे वीर यथाऽन्यः प्राकृतस्तथा ॥ मैवं भूस्त्यज संतापं कृतघ्न इव सौहृदम् ॥ २ ॥
संतापस्य च ते स्थानं न हि पश्यामि राघव ॥ प्रवृत्तावुपलब्धायां ज्ञाते च निलये रिपोः ॥ ३ ॥
मतिमाञ्छास्त्रवित्प्राज्ञः पण्डितश्चासि राघव ॥ त्यजेमां पापिकां बुद्धिं कृतात्मेवार्थदूषणीम् ॥ ४ ॥

प्रत्ययः । महाम्भसः अगाधजलस्य । समाहिताः संगताः ॥ १८ ॥ सर्वेथेति श्लोकोक्तं विवृणोति—यदीति ॥ वैदेह्या वृत्तान्तः गदितो यद्यपि गदित एव । हरीणां समुद्रपारगमने उत्तरं किं उत्तरकालोचितं साधकं किं । न किमपीत्यर्थः । इवशब्दो वाक्यालंकारे ॥ १९ ॥ ध्यानमुपागमत् सागरतरणोपायचिन्तामकरोदित्यर्थः । शत्रुनिबर्हणमहाबाहुपदाभ्यां सागरशोषणादिकमेवोपायमचिन्तयदिति द्योत्यते । २० । इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने प्रथमः सर्गः ॥ १ ॥

एवं शोकसंभ्रान्तं राममवलोक्य समदुःखतया तच्छोकमसहमानः सुग्रीवः " आपद्युन्मार्गगमने कार्यकालात्ययेषु च । अपृष्टोपि हितान्वेषी ब्रूयात्कल्याणभाषितं" इति नीतिशास्त्रमनुस्मरन् शोकनिवारकंवचनमुवाचेत्याह—तंत्विति ॥ तुशब्दः पूर्वस्माद्वैलक्षण्यपरः । तंतुशोकपरिद्यूनं रामःप्रीतिसमायुक्तइति प्रीतियुक्तत्वदशायामेव शोकपरिद्यूनं शोकपरितप्तं । दशरथात्मजं महाराजपुत्रत्वेनशोकलेशानर्हं । रामं । श्रीमान् " शुचिता त्यागिता शौर्यं समानसुखदुःखता । अनुरागश्च दाक्षिण्यं सत्यता च सुहृद्गुणाः" इति कामन्दकोक्तरीत्या मित्रगुणसंपन्न इत्यर्थः । शोकनाशनं रामहृदयान्तर्गतशोकनिवर्तनक्षमं । वचनमुवाच ॥ १ ॥ प्राकृतः क्षुद्रः । मैवं भूः प्राकृत इव मा भूः ॥ २ ॥ निमित्ताभावमुपपादयति—संतापस्यचेति ॥ चोवधारणे । संतापस्य स्थानमेव निमित्तमेव । नपश्यामि । एतावत्पर्यन्तं सीतानुपलम्भनरूपं निमित्तमासीत् इदानीं तु नास्तीत्यर्थः । स्थानं अवकाशः । " अवकाशे स्थितौ स्थानं " इत्यमरः । प्रवृत्तौ सीतावृत्तान्ते । " वार्ता प्रवृत्तिर्वृत्तान्तः " इत्यमरः ॥ ३ ॥ त्वद्दुणपर्यालोचनायामपि न शोकावकाश इत्याह—मतिमानित्यादिना ॥ मतिमान् आगामिगोचरज्ञानवान् । शास्त्रवित् नीतिशास्त्रज्ञः । प्रज्ञास्यास्तीति प्राज्ञः । " प्रज्ञादिभ्यश्च " इत्यण्प्रत्ययः । ऊहापोहज्ञ इत्यर्थः । पण्डा निर्णयात्मकं ज्ञानं सास्य संजातेति पण्डितः । परिच्छेत्तेत्यर्थः । पापिकां पापयुक्तां । अनुत्साहकारिणीमितियावत् । इमां बुद्धिं त्यज । कृतात्मा योगी । अर्थदूषणीं मोक्षरूपपुरुषार्थनिवर्तिकां बुद्धिमिव

शि० अशोकसंभ्रान्तः वास्तवशोकसंभ्रान्तिरहितः । रामः हनूमन्तमित्युक्त्वा ध्यानं सीताप्राप्त्युपायविषयकचिन्तां । उपागमत् प्राप्नोत् ॥ २० ॥ इतिप्रथमःसर्गः ॥ १ ॥

ती० अर्थदूषणीं अपवर्गदूषणीं । बुद्धिमिव विषयेषूपादेयत्वबुद्धिमिव । यद्वा अर्थदूषणीं प्रयोजनहानिकरीं । पापिकां अशुभात्मिकां कलुषितांबुद्धिंत्यजेत्यर्थः ॥ ति० पण्डितः विचारपूर्वंसिद्धान्तप्रतिष्ठापनसमर्थः ॥ स० प्राज्ञः प्रकृष्टा कार्यकारित्वात् ।

[पा०] १ ङ. ञ. ट. त्वयातप्यसे, २ ख. नाथ. ३ ङ. ञ. ट. प्राकृतां.

समुद्रं लङ्घयित्वा तु महानक्रसमाकुलम् ॥ लङ्कामारोहयिष्यामो हनिष्यामश्च [1]ते रिपुम् ॥ ५ ॥
निरुत्साहस्य दीनस्य शोकपर्याकुलात्मनः ॥ सर्वार्था व्यवसीदन्ति व्यसनं चाधिगच्छति ॥ ६ ॥
इमे शूराः समर्थाश्च [2]सर्वे नो हरियूथपाः ॥ त्वत्प्रियार्थं कृतोत्साहाः प्रवेष्टुमपि पावकम् ॥ ७ ॥
एषां हर्षेण जानामि तर्कश्चास्मिन्दृढो मम ॥ ८ ॥
विक्रमेण समानेष्ये सीतां हत्वा यथा रिपुम् ॥ रावणं पापकर्माणं तथा त्वं कर्तुमर्हसि ॥ ९ ॥
[3]सेतुरत्र यथा बध्येद्यथा पश्येम तां पुरीम् ॥ तस्य राक्षसराजस्य तथा त्वं कुरु राघव ॥ १० ॥
दृष्ट्वा तां तु पुरीं लङ्कां त्रिकूटशिखरे स्थिताम् ॥ हतं च रावणं युद्धे दर्शनादु[4]पधारय ॥ ११ ॥
अबद्ध्वा सागरे सेतुं घोरे तु वरुणालये ॥ लङ्का नै[5] र्मर्दितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ १२ ॥
सेतुर्बद्धः समुद्रे च यावल्लङ्कासमीपतः ॥ सर्वं तीर्णं च [6]वै सैन्यं जितमित्युपधारय ॥ १३ ॥
[7]ईमे हि समरे शूरा हरयः कामरूपिणः ॥ शक्ता लङ्कां समानेतुं समुत्पाट्य सराक्षसाम् ॥ १४ ॥
तदलं विक्लबा बुद्धी राजन्[8]सर्वार्थनाशिनी ॥ पुरुषस्य हि लोकेस्मिञ्शोकः शौर्यापकर्षणः ॥ १५ ॥

॥ ४ ॥ नापि सागरदुस्तरत्वं संतापनिमित्तमित्याह —समुद्रमिति ॥ न क्रमन्त इति नक्राः गजग्राहिमत्स्याः । महानक्रसमाकीर्णमपि समुद्रं लङ्घयित्वा लङ्कामारोहयिष्यामः । सेनामिति शेषः । ते रिपुं रावणं । हनिष्यामश्च । समुद्रलङ्घनलङ्कारोहणशत्रुवधार्थं न संतापः कार्य इत्यर्थः ॥ ५ ॥ एवं कारणाभावाच्छोकस्य नावकाश इत्युक्तं । सत्यपि कारणे स त्याज्य इत्याह—निरुत्साहस्येति ॥ शोकपर्याकुलात्मनः शोकव्याकुलमनसः । अतएव निरुत्साहस्य । सर्वार्थाः सर्वप्रयोजनानि । व्यवसीदन्ति नश्यन्ति । सः शोकं व्यसनं चाप्नोति । शोकादनुत्साहः । अनुत्साहादैन्यं । दैन्यादर्थनाशः । अर्थनाशाच्चापत्प्राप्यत इत्यर्थः । तस्माच्छोकस्त्याज्य इति भावः ॥ ६ ॥ नापि सहायानुपपत्तिश्शोकनिमित्तमित्याह—इम इति ॥ शूराः पराक्रमशालिनः । समर्थाः उपायकुशलाः । नः अस्माकं संबन्धिनः । सर्वे इमे हरियूथपाः त्वत्प्रियार्थं पावकमपि प्रवेष्टुं कृतोत्साहाः । किमुतान्यत्कर्तुमिति भावः ॥ ७ ॥ कुत एषामुत्साहस्त्वयावगत इत्याह—एषामिति अर्धमेकं वाक्यं ॥ एषां यूथपानां । हर्षेण मुखप्रसादानुमानेन जानामि । एषां उत्साहमितिशेषः । अस्मिन् उत्साहे । मम दृढः अप्रशिथिलः । तर्कश्चास्ति ॥ ८ ॥ फलितमाह—विक्रमेणेति ॥ पापकर्माणं सीताहरणरूपपापकर्मयुक्तं । ते रिपुं रावणं हत्वा सीतां विक्रमेण यथा समानेष्ये तथा त्वमुत्साहं कर्तुमर्हसि ॥ ९ ॥ तथा त्वं कर्तुमर्हसीत्युक्तं विशिनष्टि—सेतुरिति ॥ अत्र समुद्रे । सेतुर्यथा बध्येत यथा तां पुरीं पश्येम तथा त्वं कुरु । तथोपायं चिन्तयेत्यर्थः ॥ १० ॥ दर्शनमात्रेण किं सेत्स्यति तत्राह—दृष्ट्वेति ॥ तां पुरीं दृष्ट्वा दर्शनादेव हेतोः रावणं हतमवधारय ॥ ११ ॥ सेतुर्बध्य इति कोयं निर्बन्ध इत्याशङ्क्या(वश्यकत्व)न्यथा अशक्यत्वमन्वयव्यतिरेकाभ्यामाह—अबद्ध्वेत्यादिश्लोकद्वयेन ॥ अबद्ध्वा सागर इत्यादि स्पष्टं । लङ्कासमीपतः लङ्कासमीपे । यावत् यावत्काले । सेतुर्बद्धो भवति तावत्काले । सर्वं सैन्यं तीर्णं जितं चेत्युपधारय । कर्तरि निष्ठा ॥ १२—१३ ॥ तरणमात्रेण जयित्वे हेतुमाह—इमे हीति ॥१४॥ उपसंहरति—तदिति ॥ तत् उक्तरीत्या शोकनिमित्तासंभवात् । विक्लबा शोक-

आज्ञा यस्यसतथा । पण्डितः आगमज्ञानोवा ॥४॥ **रामानु०** शोकाक्रान्तस्यतवदर्शनेनममाप्युत्तरकर्तव्यंनस्फुरति । तस्माच्छोकं परित्यज । यथाममोत्साहोभवेत्तथायत्नंकुर्वितिभावः ॥ **स०** यथारिपुंहत्वासीतां विक्रमेण पराक्रमेण । वेर्गरुडस्यक्रमइवक्रमस्तने समानेष्ये । तथेत्युत्साहंकर्तुमर्हसि । यथाऽहंसमानेष्ये तथात्वमुत्साहंममप्रोत्साहनंकर्तुमर्हसीतिवा ॥ ९ ॥ **ती०** तीर्णंजितमिति कर्तरिनिष्ठा । अत्रावधारणचकाराभ्यांराक्षससैन्यकृतविघ्नबाहुल्येसत्यपिअप्रतिहतंतरिष्यतिजेष्यतिचेत्युक्तंभवति ॥ १३ ॥ **ति०** तत्

[पा०] १ क. ग. रावणं. २ ङ. झ. ट. सर्वतो. ख. छ. ज. सर्वेते. ३ घ. सेतुमत्रयथाबद्धा. ४ ङ. च. छ. झ. ट. दवधारय. ५ क. च. ञ. नासादितुं. ६ ङ. झ. ट. मेसैन्यं. ७ ख. ग. छ. धार्यतां. ८ झ. ट. तथाहिसमरेवीराः. ९ झ. ञ. तदलंविक्लबांबुद्धिं ञान्सर्वार्थनाशनीं. १० ख. ग. च. छ. ज. न्सर्वविनाशिनी.

यत्तु कार्यं मनुष्येण शौण्डीर्यमवलंबता ॥ [तदलंकरणायैव कर्तुर्भवति सत्वरम् ॥]
अस्मिन्काले महाप्राज्ञ सत्त्वमातिष्ठ तेजसा ॥ १६ ॥
शूराणां हि मनुष्याणां त्वद्विधानां महात्मनाम् ॥ विनष्टे वा प्रनष्टे वा शोकः सर्वार्थनाशनः ॥१७॥
त्वं तु बुद्धिमतां श्रेष्ठः सर्वशास्त्रार्थकोविदः ॥ मद्विधैः सचिवैः सार्धमरिं जेतुमिहार्हसि ॥ १८ ॥
न हि पश्याम्यहं कंचिन्त्रिषु लोकेषु राघव ॥ गृहीतधनुषो यस्ते तिष्ठेदभिमुखो रणे ॥ १९ ॥
वानरेषु समासक्तं न ते कार्यं विपत्स्यते ॥ अचिराद्रक्ष्यसे सीतां तीर्त्वा सागरमक्षयम् ॥ २० ॥
तदलं शोकमालम्ब्य क्रोधमालम्ब भूपते ॥ निश्चेष्टाः क्षत्रिया मन्दाः सर्वे चण्डस्य बिभ्यति ॥२१॥
लङ्घनार्थं च घोरस्य समुद्रस्य नदीपतेः ॥ सहास्माभिरिहोपेतः सूक्ष्मबुद्धिर्विचारय ॥ २२ ॥
[लङ्घिते तत्र तैः सैन्यैर्जितमित्येव निश्चिनु ॥] सर्वं तीर्णं च मे सैन्यं जितमित्युपधारय ॥२३॥
इमे हि हरयः शूराः समरे कामरूपिणः ॥ तानरीन्विधमिष्यन्ति शिलापादपवृष्टिभिः ॥ २४ ॥
कथंचित्संतरिष्यामस्ते वयं वरुणालयम् ॥ हतमित्येव तं मन्ये युद्धे संमितिनन्दन ॥ २५ ॥

परवशा । अतएव सर्वार्थनाशिनी बुद्धिः अलं मा भूत् । " अलं भूषणपर्याप्तिशक्तिवारणवाचकं " इत्यमरः । तत्र हेतुमाह—पुरुषस्येति । शौर्यापकर्षणः शौर्यनाशनः ॥ १५ ॥ न केवलं शोकत्यागः स्वत्वावलम्बनं च कार्यमित्याह—यत्त्विति ॥ शौण्डीर्यं शौर्यं । "शौण्डी गर्वे " इति धातोरौणादिके ईरन्प्रत्यये शौण्डीरश्शूरः अस्य भावश्शौण्डीर्यं तत् । अवलम्बता अवलम्बमानेन । शौर्यप्रधानेनेत्यर्थः । मनुष्येण पुरुषेण । यत्कार्यं संपाद्यं तत्सत्त्वं धैर्यं बलं वा । तेजसा पराक्रमेण सह अस्मिन्काले आतिष्ठ अवलम्बस्व ॥ १६ ॥ ननु नायं शोकस्सागरतरणादिनिमित्तकः किंतु सीतानवलोकनादिनिमित्त इत्यत्राह—शूराणामिति ॥ विनष्टे अन्तर्हिते । "णश अदर्शने " इति धातोर्निष्ठा ॥ १७ ॥ पुनश्च रामं प्रोत्साहयति—त्वमिति ॥ इह इदानीं ॥ १८ ॥ न हि तिष्ठेत् स्थातुं नशक्नुयात् ॥ १९ ॥ वानरेषु समासक्तं वानरमूलमित्यर्थः । न विपत्स्यते न विनङ्क्ष्यति ॥२०॥ उपसंहरति—तदिति ॥ आलम्ब्यालं । नालम्बस्वेत्यर्थः । " अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा " इति क्त्वाप्रत्ययः । क्रोधस्यालम्ब्यत्वे हेतुमाह—निश्चेष्टा इति । निश्चेष्टाः निरुद्योगाः । क्षत्रियाः मन्दाः मन्दभाग्याः । चण्डस्य चण्डात् । " चण्डस्त्वत्यन्तकोपनः " इत्यमरः ॥ २१ ॥ एवं सेतुबन्धेन सर्वार्थसिद्धेः शोको न कार्य इत्युक्त्वा सेतुबन्धोपायो विचार्यतामित्याह—लङ्घनार्थमिति ॥ लङ्घनार्थं लङ्घनहेतुं । " अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने । व्यवहारे धनुश्शास्त्रे वस्तुहेतुनिवृत्तिषु " इति वैजयन्ती ॥ २२ ॥ सेतुबन्धोपाये निर्णीते ततः परं सुकरमित्याह—सर्वमिति ॥ २३ ॥ उक्तेर्थे पूर्वोक्तं हेतुमनुवदति—इमे हीति ॥ विधमिष्यन्ति धक्ष्यन्ति ॥ २४ ॥ मा भूत्सेतुबन्धः प्रकारान्तरेणापि समुद्रं तीर्त्वा शत्रून् हनिष्यामीत्याह—कथंचिदिति ॥ कथंचित् केनाप्युपायेन । नन्दतीति नन्दनः । नन्द्यादित्वात् ल्युः । समित्यां युद्धे नन्दन युद्धोत्सुकेतियातस्मात् विक्लवां सर्वार्थनाशिनीं बुद्धिमवलंब्यालं । हि यतः शौर्यापकर्षणः तन्नाशकः ॥ १५ ॥ ति० मन्दाः शत्रुविषयक्रोधहीनाः ॥ २१ ॥ ती० सर्वमित्यर्धमेकंवाक्यं । अत्रयावत्तावच्छब्दावध्याहार्यौ । जितमितिभावेनिष्ठा । मेसैन्यंयावत्तीर्णतावत्तेनजितमित्युपधारय । लङ्घितेतस्यतैस्तैन्यमितिक्वचित्पाठः । तस्यार्थः । समुद्रेलङ्घितेतैर्वानरैस्तस्यरावणस्यसैन्यंजितमित्युपधारयेत्यर्थः ॥ २३ ॥ इतिद्वितीयःसर्गः ॥ २ ॥

[पा०] १ झ. शौटीर्यमवलंब्यतां. २ इदमर्धं ङ. झ. ट. पाठेषुदृश्यते. ३ ङ. झ. ट. तत्त्वं. ४ ङ. च. छ. जेतुंत्वमर्हसि. झ. ट. जेतुंसमर्हसि. ५ ख. च. छ. ञ. आनयिष्यामितेसीतां. ६ इदमर्धं क. ङ. च. छ. झ. ञ. ट. पाठेषुदृश्यते. ७ ख. ग. झ. ञवधार्यतां. च. छ. त्युपधार्यतां. ८ घ. शूराविक्रान्ताः. ९ ङ. झ. ट. कथंचित्परिपश्यामिलङ्घितं. क.—घ. कथंचित्परिपश्यामस्तंवयं. १० ङ. झ. ट. शत्रुनिबर्हण.

किमुक्त्वा बहुधा चापि सर्वथा विजयी भवान् ॥ निमित्तानि च पश्यामि मनो मे संप्रहृष्यति ॥२६॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्वितीयः सर्गः ॥ २ ॥

तृतीयः सर्गः ॥ ३ ॥

श्रीरामेणहनुमन्तंप्रति स्वस्यसेतुबन्धाद्यन्यतमोपायेनवानराणांसागरतारणसामर्थ्योक्तिपूर्वकं लङ्कायादुर्गादिभिःपरिरक्षण-प्रकारप्रश्नः ॥१॥ हनुमता तंप्रति विस्तरेणतत्प्रकारनिवेदनेनसहस्वकृतसंक्रमादिविध्वंसननिवेदनपूर्वकं स्वस्याङ्गदादिकतिपय-वीरसाहित्येन बाहुप्लवनेनैव लङ्कागमनपूर्वकं सर्वराक्षसविध्वंसनशक्तिनिवेदनेन तदर्थमाज्ञाप्रार्थनम् ॥ २ ॥

सुग्रीवस्य वचः श्रुत्वा हेतुमत्परमार्थवित् ॥ प्रतिजग्राह काकुत्स्थो हनुमन्तमथाब्रवीत् ॥ १ ॥
तपसा सेतुबन्धेन सागरोच्छोषणेन वा ॥ सर्वथा सुसमर्थोऽसि सागरस्यास्य लङ्घने ॥ २ ॥
कति दुर्गाणि दुर्गाया लङ्कायाः ब्रूहि तानि मे ॥ ज्ञातुमिच्छामि तत्सर्वं दर्शनादिव वानर ॥ ३ ॥
बलस्य परिमाणं च द्वारदुर्गक्रियामपि ॥ गुप्तिकर्म च लङ्कायाः रक्षसां सदनानि च ॥ ४ ॥
यथासुखं यथावच्च लङ्कायामसि दृष्टवान् ॥ सर्वमाचक्ष्व तत्त्वेन सर्वथा कुशलो ह्यसि ॥ ५ ॥
श्रुत्वा रामस्य वचनं हनूमान्मारुतात्मजः ॥ [प्रणम्य शिरसा रामं प्राञ्जलिः सुसमाहितः ॥]
वाक्यं वाक्यविदांश्रेष्ठो रामं पुनरथाब्रवीत् ॥ ६ ॥
श्रूयतां सर्वमाख्यास्ये दुर्गकर्म विधानतः ॥ गुप्ता पुरी यथा लङ्का रक्षिता च यथा बलैः ॥ ७ ॥

वत् ॥ २५ ॥ निमित्तानुसारेणापि भवतो जयसिद्धिरित्याह—किमुक्त्वेति ॥ सर्वथा सेतुं बद्ध्वा अबद्ध्वा वा । निमित्तानि नेत्रस्फुरणादीनि । मनो मे संप्रहृष्यतीति मनःसंप्रहर्षश्च कार्यसिद्धिनिमित्तमिति भावः ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्वितीयः सर्गः ॥ २ ॥

एवं मानुषभावनानुसारेण समुद्रस्य दुस्तरत्वेन शोकापन्नोपि सुहृदुपदेशेन प्रतिष्ठापितधैर्यो रामः नीतिशास्त्रानुसारेण संहार्यशत्रुदुर्गस्वरूपशोधनाय पृच्छति—सुग्रीवस्येत्यादिना ॥ सारग्राहित्वमाह—परमार्थविदिति । हेतुमत् युक्तियुक्तं । वचः श्रुत्वा प्रतिजग्राह ॥ १ ॥ तपसा तपःप्रभावेन । तरसेति पाठे तरसा वेगेन । लङ्घने तरणे ॥ २ ॥ एवमुपायचिन्तनेन समुद्रस्य दुस्तरत्वमविगणय्य दुर्गस्वरूपं पृच्छति—कतीति ॥ दुर्गायाः दुष्प्रापायाः । लङ्कायाः कति दुर्गाणि कति दुर्गप्राकारः । सन्तीत्यर्थः । जलगिरिस्थलात्मकानि दुर्गाणि । तत् दुर्गविशेषवत्त्वं । मे ब्रूहि । पूर्वमेवोक्तमित्यत्राह—ज्ञातुमिति । तत्पूर्वं श्रुतं सर्वं । दर्शनादिव प्रत्यक्षत इव । विशदं ज्ञातुमिच्छामि । बलस्य सेनायाः । परिमाणं इयत्तां । द्वारदुर्गक्रियां द्वारेषु दुर्गक्रियां कीलखननजलौघप्लवनकरणादिभिः दुर्गमत्वकरणं । गुप्तिकर्म प्राकारपरिघादिनिर्माणं । सदनानि गृहाणि । ज्ञातुमिच्छामीति पूर्वेणान्वयः ॥ ३–४ ॥ यथासुखं निश्शङ्कं । यथावत् तत्त्वेन । लङ्कायां पूर्वोक्तं सर्वं दृष्टवानसि । तत्त्वेन दृष्टप्रकारेणैव । आचक्ष्व व्यक्तं वद । सर्वथा द्रष्टुं वक्तुं च ॥ ५ ॥ अथाब्रवीत् कात्स्न्र्येनाब्रवीत् । "मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथोऽथ" इत्यमरः ॥ ६ ॥ दुर्गकर्मविधानतः दुर्गकर्म प्राकारपरिखाखननादि । तद्विधानतः तन्निर्माणेन गुप्तेति संबन्धः । राक्षसाः स्निग्धाः स्वामिनि भक्ताः तेजसासंपादितामितिशेषः । विभागं तत्र तत्र

स० परमार्थः अवतारमुख्यार्थः रावणमारणादिः तद्वत् । तद्घटकमितियावत् ॥ १ ॥ ति० तपसा तपःकार्यसंकल्पसिद्ध्या । अतएवसकलस्वपुरवर्तिप्राणिनांब्रह्मलोकनयनंवक्ष्यमाणंसंगच्छते । सेतुबन्धेन गङ्गायांगाङ्गेयेनशरैरिव । सागरोच्छोषणेन दिव्या-

[पा०] १ ख. संप्रसीदति. २ ख. इतितस्यवचः. च. छ. तस्यतद्वचनं. ३ ङ. झ. ट. लङ्कायास्तद्रक्षीष्वमे. क. ख. ग. च. छ. ज. ञ. लङ्कायास्तद्रक्षीहिमे. ४ च. छ. ञ. श्रोतुमिच्छामि. ५ ग. ङ. च. ज. लङ्कायां. ६ इदमर्धं क. ख. पाठयोर्दृश्यते.

राक्षसाश्च यथा स्निग्धा रावणस्य च तेजसा ॥ परां समृद्धिं लङ्कायाः सागरस्य च भीमताम् ॥
विभागं च बलौघस्य निर्देशं वाहनस्य च ॥ ८ ॥
एवमुक्त्वा कपिश्रेष्ठः कथयामास तत्त्वतः ॥ ९ ॥
हृष्टप्रमुदिता लङ्का मत्तद्विपसमाकुला ॥ महती रथसंपूर्णा रक्षोगणसमाकुला ॥
वाजिभिश्च सुसंपूर्णा सा पुरी दुर्गमा परैः ॥ १० ॥
दृढबद्धकवाटानि महापरिघवन्ति च ॥ द्वाराणि विपुलान्यस्याश्चत्वारि सुमहान्ति च ॥ ११ ॥
तत्रेषूपलयत्राणि बलवन्ति महान्ति च ॥ आगतं परसैन्यं तु तत्र तैः प्रतिहन्यते ॥ १२ ॥
द्वारेषु संस्कृता भीमाः कालायसमयाः शिताः ॥ शतशो रचिता वीरैः शतघ्नो रक्षसां गणैः ॥१३॥
सौवर्णश्च महांस्तस्याः प्राकारो दुष्प्रधर्षणः ॥ मणिविद्रुमवैडूर्यमुक्ताविरचितान्तरः ॥ १४ ॥
सर्वतश्च महाभीमाः शीततोयवहाः शुभाः ॥ अगाधा ग्राहवत्यश्च परिखा मीनसेविताः ॥ १५ ॥
द्वारेषु तासां चत्वारः संक्रमाः परमायताः ॥ यन्त्रैरुपेता बहुभिर्महद्भिर्गृहपङ्क्तिभिः ॥ १६ ॥
त्रायन्ते संक्रमास्तत्र परसैन्यागमे सति ॥ यन्त्रैस्तैरवकीर्यन्ते परिखासु समन्ततः ॥ १७ ॥

विभज्य स्थापनं । बलौघस्य चतुरङ्गबलसमूहस्य । निर्दिश्यते इयत्तया परिच्छिद्यतेऽनेनेति निर्देशः संख्या तं ॥ ७–८ ॥ एवमित्यर्धं ॥ एवमुक्त्वा उक्तरीत्या वक्ष्यमाणं संग्रहेण प्रतिज्ञाय ॥ ९ ॥ हृष्टप्रमुदिता अत्यन्तहृष्टजना ॥ १० ॥ दृढेति आयसकीलादिभिर्दृढघटितकवाटानि । महापरिघवन्ति महार्गलवन्ति । “ अर्गले काचके वंशे योगे प्राकारगोपुरे । अस्त्रे घटे मुद्गरे च परिघः परिपठ्यते ” इतिनिघण्टुः । सुमहान्ति उन्नतानि ॥ ११ ॥ तत्र तेषु द्वारेषु । इषूपलयत्राणि शरशिलाक्षेपकयत्राणि । बलवन्ति दृढानि महान्ति विपुलानि सन्तीति शेषः । तैः यन्त्रैः । तत्र द्वारेषु । प्रतिहन्यते प्रतिबध्यते ॥ १२ ॥ संस्कृताः सज्जीकृताः । शिताः तीक्ष्णाः । कालायसमयाः अयस्सारमयाः । ङीबभाव आर्षः । “ अनोश्मायस्सरसां जातिसंज्ञयोः ” इति समासान्तः । शतं घ्नन्तीति शतघ्नयः मुद्गरविशेषाः । “ अमनुष्यकर्तृके च ” इति ठक् । शतशः बहुशः । रचिताः स्थापिताः ॥ १३ ॥ तस्याः प्राकारो दुष्प्रधर्षणः दुरारोह इत्यर्थः । मणयः पद्मरागाः ॥ १४ ॥ सर्वतः प्राकारमभितः परिखाः सन्तीति शेषः । शीततोयत्वेन दुष्प्रवेशत्वमुक्तं ॥ १५ ॥ द्वारेषु द्वारसमीपप्रदेशेषु । सामीप्ये सप्तमी । तासां परिखानां संबन्धिनः । परिखोपरिक्ष्मा इत्यर्थः । संक्रमाः दारुफलकनिर्मितसंचारमार्गाः । “ संक्रमः क्रमणे सम्यग्द्वारसंचारयन्त्रके ” इति विश्वः । परमायताः अतिविपुलाः । यन्त्रैः संक्रमावकीर्यकैः । महद्भिरिति यन्त्रविशेषणं । गृहपङ्क्तिभिः रक्षिजनावासस्थानपङ्क्तिभिः । उपेताः सन्तीतिशेषः ॥१६॥ संक्रमाणामुपयोगमाह—त्रायन्त इति ॥ तत्र द्वारप्रदेशेषु । परसैन्यागमेसति संक्रमाः त्रायन्ते पुरीमिति शेषः । कथमित्यत्राह—यन्त्रैरिति । यन्त्रैः संक्रमफलकविक्षेपयन्त्रैः । परिखासु परिखोपरि । समन्ततः अवकीर्यन्ते क्षिप्यन्ते । सर्वथा परिखाजलोपरि फलका निक्षिप्यन्ते । शत्रुसैन्यागमेतु ता उत्क्षिप्यन्ते । तेन दुर्गपरिखाजलेन प्राकारसमीपगमनं न शक्यत इति श्लोकतात्पर्यं ॥ १७ ॥

स्त्रबलतइतिशेषः ॥ सर्वथा सर्वप्रकारस्यलङ्घनोपायस्यविद्यमानत्वादित्याशयः ॥ २ ॥ स० स्निग्धाः रावणेपरस्परंचस्नेहवन्तः । तथाश्रृणु । स्निग्धाइत्यनेन भेदनोपायासाध्यत्वंसूचयति ॥ ८ ॥ ती० शतघ्नोनाम सकृत्प्रयोगाच्छतमारिकाःचतुर्वितस्तिप्रमाणा मुद्गरविशेषाः ॥ “ शतघ्नीचचतुर्हस्तागदितालोहकण्टकी ” इतिवैजयन्ती ॥ १३ ॥ स० परसैन्यागमेसति । अनेनगमनमेवदुर्घटमितिसूचयति ॥ १७ ॥

[पा०] १ ङ. झ. ट. तत्त्ववित्. २ ङ. च. छ. झ. ञ. ट. गणनिषेविता. ३ ख. ग. ङ. ज.—ट. प्रतिसैन्यंतैस्तत्रप्रतिनिवार्यते. क. घ. च. छ. परसैन्यंतैस्तत्रप्रतिनिवार्यते. ४ ट. सौवर्णस्तुमहान्. झ. सौवर्णस्तुमहान्. घ. ससौवर्णमयस्तस्याः. ५ ङ. च. छ. झ. ञ. ट. शीततोयामहाशुभाः. ६ घ. मीनसंकुलाः.

एकस्त्वकम्प्यो बलवान्संक्रमः सुमहादृढः ॥ काञ्चनैर्बहुभिः स्तम्भैर्वेदिकाभिश्च शोभितः ॥ १८ ॥
स्वयं प्रकृतिसंपन्नो युयुत्सू राम रावणः ॥ उत्थितश्चाप्रमत्तश्च बलानामनुदर्शने ॥ १९ ॥
लङ्का पुनर्निरालम्बा देवदुर्गा भयावहा ॥ नादेयं पार्वतं वान्यं कृत्रिमं च चतुर्विधम् ॥ २० ॥
स्थिता पारे समुद्रस्य दूरपारस्य राघव ॥ नौपथोपि च नास्त्यत्र निरादेशश्च सर्वतः ॥ २१ ॥
शैलाग्रे रचिता दुर्गा सा पूर्देवपुरोपमा ॥ वाजिवारणसंपूर्णा लङ्का परमदुर्जया ॥ २२ ॥
परिखाश्च शतघ्नयश्च यन्त्राणि विविधानि च ॥ शोभयन्ति पुरीं लङ्कां रावणस्य दुरात्मनः ॥ २३ ॥
अयुतं रक्षसामत्र पूर्वद्वारं समाश्रितम् ॥ शूलहस्ता दुराधर्षाः सर्वे खड्गाग्रयोधिनः ॥ २४ ॥
नियुतं रक्षसामत्र दक्षिणद्वारमाश्रितम् ॥ चतुरङ्गेण सैन्येन योधास्तत्राप्यनुत्तमाः ॥ २५ ॥
प्रयुतं रक्षसामत्र पश्चिमद्वारमाश्रितम् ॥ चर्मखड्गधराः सर्वे तथा सर्वास्त्रकोविदाः ॥ २६ ॥
न्यर्बुदं रक्षसामत्र उत्तरद्वारमाश्रितम् ॥ रथिनश्चाश्ववाहाश्च कुलपुत्राः सुपूजिताः ॥ २७ ॥
शतशोथ सहस्राणि मध्यमं स्कन्धमाश्रिताः ॥ यातुधाना दुराधर्षाः सैाग्रकोटिश्च रक्षसाम् ॥२८॥

तेषु संक्रमेषु। एकः उत्तरद्वारस्थः। बलवान् स्थौल्यवान्। सुमहादृढः अत्यन्तवृद्धसंघटनः । अतएवाकम्प्यः । स्तम्भैः संक्रमाधारार्थं परिखासु स्थापितैः स्तम्भैः । वेदिकाभिः रक्षिजनाधारार्थाभिर्वितर्दिकाभिः ॥१८॥ प्रकृतिसंपन्नः द्यूतादिव्यसनरूपविचाररहितः । अप्रमत्तः सावधानः । बलानां सैन्यानां । अनुदर्शने प्रतिदिनमवलोकननिमित्तं । उत्थितः जागरूकः । स्वयं युयुत्सुः सर्वदा युद्धोद्यतः । तिष्ठतीतिशेषः ॥ १९ ॥ लङ्का पुनः लङ्का तु । निरालम्बा टङ्कच्छेदमसृणीकृतत्रिकूटशिखरस्थितत्वादारोहणालम्बनरहिता । देवदुर्गा देवैरपि दुष्प्रापा । लङ्का नादेयादिरूपेण चतुर्विधदुर्गं च चतुर्विधदुर्गप्राकारवतीत्यर्थः । नादेयं नद्यां भवं । जलदुर्गमित्यर्थः । पार्वतं पर्वतस्थं । वनानां समूहो वन्या तत्संबन्धि वान्यं । कृत्रिमं क्रियया निर्वृत्तं । प्राकारपरिखादिमत् स्थलमित्यक्षरार्थः ॥ २० ॥ दूरे पारं यस्य सः दूरपारः तस्य । विशालस्येत्यर्थः । पारे दक्षिणतीरे स्थिता । अत्र समुद्रे । नौपथः नौसंचारश्च नास्ति । अतएव सर्वतः निरादेशश्च । आदेशो वार्तासंचारः तद्रहितः अयं देश इत्यर्थः ॥ २१ ॥ वनगिरिदुर्गवत्त्वमाह—शैलाग्र इति ॥२२॥ कृत्रिमदुर्गवत्त्वमाह—परिखा इति ॥ २३ ॥ विभागं च बलौघस्येति रामप्रश्नस्योत्तरमाह—अयुतमिति ॥ अत्र लङ्कायां । सर्वे पूर्वद्वारस्थाः । अयुतं दशसहस्रं । अग्रे सेनाग्रे युध्यन्त इत्यग्रयोधिनः । खड्गैरग्रयोधिनः सर्वे अयुतसंख्याकाः सर्वेपितथाविधा इत्यर्थः ॥ २४ ॥ अत्र लङ्कायां । चतुरङ्गेण सैन्येन सह रक्षसां नियुतं दक्षिणद्वारमाश्रितं । तत्र चतुरङ्गबलेषु । योधाः पदातयः । अनुत्तमाः अत्यन्तशूराः । भवन्तीत्यर्थः ॥ २५ ॥ सर्वे पश्चिमद्वारवासिनः । सर्वास्त्रकोविदाः समस्तास्त्रज्ञाः ॥ २६ ॥ अश्ववाहाश्चेति चकारेण गजवाहास्समुच्चीयन्ते । कुलपुत्राः सत्कुलप्रसूताः । विश्वसनीया इति यावत्। सुपूजिताः रावणेन बहुमताः । किंकरा इति शेषः ॥ २७ ॥ अथेति कात्स्न्र्ये । शतशः सहस्राणि अनेकसहस्राणि । दुराधर्षाः यातुधानाः राक्षसाः । मध्यमं स्कन्धं नगरमध्यमस्थानं । आश्रिताः ।

शि० बलवान् बहुसेनाविशिष्टः । सुमहादृढः शैथिल्यसंसर्गरहितइत्यर्थः । अतएवाकंप्यः परैःकंपयितुमशक्यः । काञ्चनैः स्तंभैर्वेदिकाभिश्चशोभितः एकःसंक्रमोस्तीतिशेषः । एतेन तेनैवरावणोनिर्गच्छतिप्रविशतिचेतिसूचितं ॥ १८ ॥ शि० प्रकृतिं स्वभावं । आपन्नः मद्यपानादावपिस्वभावपरिणामरहितइत्यर्थः ॥ १९ ॥ स० निरालंबा अंबरलंबिनीतिनिरालंबैव निरालंबा नितरां दृढाइतियावत् । आलंबः पर्वतशिखरादिरूपआश्रयोयस्यास्सा । देवदुर्गा देवानामपिदुस्साधगमना । निरालंबादेव प्रतीयमानाश्रयाभावादेव दुर्गेतिवा । दुर्गा दुष्टांगतिमापन्नोदुःखंप्राप्तोवातस्याभयावहेतिवा ॥ २० ॥ स० निरुद्देशः वृथाभूमिः । निरादेशइतिपाठे आज्ञांविनागम्यप्रदेशः । नास्तीत्युभयत्रान्वेति ॥ २१ ॥

[पा०] १ झ. ञ. ट. प्रकृतिमापन्नो. २ क. ख. च. छ. ज. ञ. लङ्कापुरीनिरा. ३ क. ग.—ट. नौपथश्चापि. ४ ङ. झ. ट. निरुद्देशश्च. ५ घ. शतकोटिश्च.

ते मया संक्रमा भग्नाः परिखाश्चावपूरिताः ॥ दग्धा च नगरी लङ्का प्राकाराश्चावसादिताः ॥ २९ ॥
बलैकदेशः क्षपितो राक्षसानां महात्मनाम् ॥ ३० ॥
येन केन च मार्गेण तराम वरुणालयम् ॥ हतेति नगरी लङ्का वानरैरवधार्यताम् ॥ ३१ ॥
अङ्गदो द्विविदो मैन्दो जाम्बवान्पनसो नलः ॥ नीलः सेनापतिश्चैव बलशेषेण किं तव ॥ ३२ ॥
प्लवमाना हि गत्वा तां रावणस्य महापुरीम् ॥ सपर्वतवनां भित्त्वा सखातां सप्रतोरणाम् ॥
सप्राकारां सभवनामानयिष्यन्ति राघव ॥ ३३ ॥
एवमाज्ञापय क्षिप्रं बलानां सर्वसंग्रहम् ॥ मुहूर्तेन तु युक्तेन प्रस्थानमभिरोचय ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः ॥ ४ ॥

सुग्रीवेणरामचोदनयातदुक्तप्रकारेणवानरसैन्यानांसुमुहूर्तेलङ्कांप्रतिप्रस्थानायाज्ञापनम् ॥ १ ॥ सुग्रीवादिभिर्हनुमदङ्गदारूढाभ्यांरामलक्ष्मणाभ्यांसहरामोक्तप्रकारेणसर्वतःसेनारक्षणपूर्वकंलङ्कांप्रतिप्रस्थानम् ॥ २ ॥ प्रयाणसमयेलक्ष्मणेनरामंप्रति स्वपरजयापजयसूचकशुभाशुभशकुनप्रदर्शनपूर्वकंसमाश्वासनम् ॥ ३ ॥ रामेणसुग्रीवादिभिःसह क्रमेणमलयाद्यतिक्रमेण महेन्द्रगिरिमेत्यतच्छिखरारोहणेनसागरावलोकनम् ॥ ४ ॥ हनुमदंसादवतीर्यसमुद्रवेलावनमुपगतेनरामेणसुग्रीवंप्रतिसेनासंनिवेशननियोजनपूर्वकंसागरतरणोपायनिर्धारणायमन्त्रचोदना ॥ ५ ॥

श्रुत्वा हनुमतो वाक्यं यथावदनुपूर्वशः ॥ ततोऽब्रवीन्महातेजा रामः सत्यपराक्रमः ॥ १ ॥
यां निवेदयसे लङ्कां पुरीं भीमस्य रक्षसः ॥ क्षिप्रमेनां मथिष्यामि सत्यमेतद्ब्रवीमि ते ॥ २ ॥

सर्वसंख्यामाह—साग्रेति । रक्षसां साग्रकोटिः पूर्णकोटिः । अत्र लङ्कायां अस्तीति शेषः ॥ २८ ॥ एवं दुर्गप्राकारवर्णनेन लघूनां भीतिर्मा भूदिति स्वकृतं दर्शयति—ते मयेति ॥ परिखा इत्यादावपि तच्छब्दोनुसंधेयः ॥२९॥ बलैकदेश इत्यर्धमेकान्वयं ॥ बलैकदेशः सेनाचतुर्थांश इत्यर्थः । महात्मनां महाकायानां ॥ ३० ॥ तपसा सेतुबन्धेनेत्येवं रामोक्तमेव सम्यगित्याह–येनेति ॥ मार्गेण उपायेन । तराम तरिष्यामः । व्यत्ययेन लोट् । वरुणालयं समुद्रं ॥ ३१॥ पक्षान्तरमाह–अङ्गद इत्यादिसार्धश्लोकद्वयेन ॥ अङ्गदादयः प्लवमानाः समुद्रं लङ्घितवन्तः । सखातां सपरिखां । सप्रतोरणां सबहिर्द्वारां आनयिष्यन्ति । बलशेषेण किं । उक्ताङ्गदादिव्यतिरिक्तबलशेषेण किं प्रयोजनमिति योजना ॥ ३२—३३ ॥ सर्वसंग्रहं । संगृह्यत इति संग्रहः बलानां मध्ये सर्वसारभूतं बलं अङ्गदादिकं आज्ञापय । एवं प्लवमाना इत्याद्युक्तरीत्या आज्ञापयेत्यर्थः । युक्तेन यात्रायोग्येन ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने तृतीयः सर्गः ॥ ३ ॥

एवं लङ्काया दुर्गकर्मबलपरिमाणादौ हनुमता कथिते रामः कियन्मात्रमिदमिति न्यक्कृत्य तदानीमेव दण्डयात्रामाज्ञापयति—श्रुत्वेति ॥ महातेजाः महाबलः । सत्यपराक्रमः अमोघविक्रमः । आभ्यां निर्भयत्वे हेतुरुक्तः । अब्रवीत् सुग्रीवमिति शेषः ॥ १ ॥ निवेदयसे हनुमन्मुखेन निवेदयसि । मथिष्यामि

ति० परिखाश्चावपूरिताः शिलेष्टकादिभिरितिशेषः ॥ चेनबलैकदेशक्षयोपिकृतइत्यर्थः ॥ २९ ॥ ति० एवमिति । एवं प्रधानैरेवकार्यसाधनमिष्टंचेत्क्षिप्रमिदानीमेवानयतेत्याज्ञापय । यदि बलानांसर्वसंग्रहं बलसंमेलनमुद्दिश्य बलानामपिपारनयनमिष्टं तदा युक्तेन यात्रोचितेनमुहूर्तेनप्रस्थानं स्वयात्रामभिरोचय ॥ ३४ ॥ इतितृतीयःसर्गः ॥ ३ ॥

स० "किंतस्यशत्रुहननेकपयःसहायाः" इत्याद्युक्तप्रकारेणस्वमतमावेदयति—**यदिति** । यदित्यव्ययं यामित्यर्थे । यांलङ्काम-

[पा०] १ क. घ. दुरात्मनां. २ ख. लङ्कांवैसप्र. ङ. झ. ट. सखातांचसतोरणां. क. सपताकांसतोरणां. ज. सखातां सप्रतोलिकां. ३ घ. ज. मैथिलीं. ४ क. ख. दनुभाषितं. ५ ङ. झ. ट. यन्निवेदयसे. ६ ङ. झ. ट. ठ. वधिष्यामि.

अस्मिन्मुहूर्ते सुग्रीव प्रयाणमभिरोचये ॥ युक्तो मुहूर्तो विजयः प्राप्तो मध्यं दिवाकरः ॥ ३ ॥
अस्मिन्मुहूर्ते विजये प्राप्ते मध्यं दिवाकरे ॥ सीतां हृत्वा तु मे जातु क्वाऽसौ यास्यति यास्यतः ॥४॥
सीता श्रुत्वाऽभियानं मे आशामेष्यति जीविते ॥ जीवितान्तेऽमृतं स्पृष्ट्वा पीत्वा विषमिवातुरः ॥५॥
उत्तराफल्गुनी ह्यद्य श्वस्तु हस्तेन योक्ष्यते ॥ अभिप्रयाम सुग्रीव सर्वानीकसमावृताः ॥ ६ ॥
[मुहूर्तेन च युक्तेन प्रस्थानमभिरोचय ॥] निमित्तानि च धन्यानि यानि प्रादुर्भवन्ति च ॥
निहत्य रावणं सीतामानयिष्यामि जानकीम् ॥ ७ ॥
उपरिष्टाद्धि नयनं स्फुरमाणमिदं मम ॥ विजयं समनुप्राप्तं शंसतीव मनोरथम् ॥ ८ ॥

शरैर्ध्वंसयिष्यामि ॥ २ ॥ कुत इत्यत्राह—युक्त इति । युक्तः यात्रार्हः । तत्र हेतुः । विजयः विजयावहः । विजयावहत्वे हेतुमाह—दिवाकरः । मध्यं दिने मध्यं प्राप्तः । अभिजिन्मुहूर्त इत्यर्थः । तदुक्तं विद्यामाधवीये—" आर्द्रोरगमित्रमखावसुजलविश्वाभिजिद्विरिञ्चेन्द्राः । ऐन्द्राग्निमूलवरुणार्यमभगतारा दिवा मुहूर्ताः स्युः " इति ॥ नन्वभिजिन्मुहूर्ता दक्षिणयात्रासु निषिद्धाः । यथा ज्यौतिष्करत्नाकरे—" भुक्तौ दक्षिणयात्रायां प्रतिष्ठायां द्विजन्मनि । आधाने च ध्वजारोहे मृत्युदः स्यात्सदाभिजित् " इति ॥ उच्यते । लङ्का हि दक्षिणपूर्वस्यां किष्किन्धायाः । अतो नेयं दक्षिणयात्रेति नोक्तदोषः ॥ ३ ॥ मुहूर्तविशेषे प्रयाणस्य फलं दर्शयति—अस्मिन्निति ॥ दिवाकरे मध्यं प्राप्ते विजयाख्ये अस्मिन्मुहूर्ते यास्यतो मे यास्यति मयि । असौ रावणः । सीतां हृत्वा जातु कदाचित् क्व यास्यति । यत्र कुत्रापि यान्तं तं हनिष्यामीत्यर्थः । सीतां हृत्वा तु मे यात्विति पाठे यातु राक्षसः । " नैर्ऋतो यातुरक्षसी " इत्यमरः । यद्वा यातु गच्छतु । क्व यास्यतीत्यन्वयः ॥ ४ ॥ अद्यैव सागरतरणोपायचिन्तां विना निर्गमस्य फलमाह—सीतेति ॥ मे अभियानं प्रस्थानं । सीता श्रुत्वा जीविते आशामेष्यति । श्रवणं च त्रिजटादिभ्य इति ज्ञेयं । निर्गमं विना केवलं विचाराकुलेष्वस्मासु जीविते सा निराशा स्यादिति भावः । कथमिव । विषं पीत्वा आतुरः पीडितः । पुरुषः जीवितान्ते प्राणात्यये प्राप्ते । अमृतं स्पृष्ट्वेव ॥ ५ ॥ तर्हि कदाऽस्माभिः प्रस्थाप्यं तत्राह—उत्तरेति ॥ अद्य दिने उत्तराफल्गुनीनक्षत्रं वर्तते । श्वः उत्तरदिने । हस्तेन योक्ष्यते । चन्द्र इति शेषः । हस्तो रामस्य निधनतारा । उत्तराफल्गुनी तु साधनतारा । अतोऽद्यैव सर्वानीकसमावृताः सन्तः अभिप्रयाम गच्छेम । अत्रोत्तराफल्गुनीत्यनेन स दिवसः फाल्गुनपौर्णमासीत्यवगम्यते । इदमुत्तरत्र प्रतिपादयिष्यते ॥ ६ ॥ यानि निमित्तानि धन्यानि तानि प्रादुर्भवन्ति । अतो रावणं निहत्य सीतामानयिष्यामि । जानकीमिति विशेषणेन जनकप्रीत्यर्थं चावश्यं सा आनेतव्येति व्यज्यते ॥ ७ ॥ उपरिष्टात् उपरि । स्फुरमाणमिदं मम नयनं । मनोरथं मनोरथविषयभूतं जयं । समनुप्राप्तं सम्यक्समीपे प्राप्तं । शंसतीव । स्पष्टं बोधयतीत्यर्थः । तथोक्तं ज्योतिश्शास्त्रे—" नेत्रस्याधस्स्फुरणमसकृत्सङ्गरे भङ्गहेतुर्नेत्रोपान्ते

तिवुर्गमांनिवेदयसे कथयसि । तामेतांक्षिप्रमेववधिष्यामि । प्रकृत्यन्तरस्येदंरूपं । वधिष्यामीत्यनेन लङ्कानाशेऽन्यनैरपेक्ष्यंसूचयति ॥ तेतुभ्यमितिहनुमन्तंप्रत्युक्तिः ॥ २ ॥ **ति०** सुग्रीवप्रयाणमितिषष्ठीतत्पुरुषः ॥ **स०** राजत्वात्सुग्रीवंकटाक्षीकृत्याह—अस्मिन्निति । अस्मिन् अभिजिन्नामकेमुहूर्ते प्रयाणमितोस्मन्निर्गममभिरोचये । अभिरोचयेतिपाठे अनुमोदस्वेत्यर्थः । सुग्रीवप्रयाणमित्यैकपद्येनहनुमदाभिमुख्येनवचनमित्यङ्गीकारे " अभिप्रयामसुग्रीवसर्वानीकसमावृताः " इत्यग्रिमग्रन्थानानुगुण्यंस्फुटं ॥ मध्यं नभोमध्यं । दिवाकरोयतःप्राप्तः तस्मात् विजये विजयप्रदेमुहूर्ते । युक्तः निर्गमइतिशेषः । युक्तोमुहूर्तोविजयइतिप्रथमान्तपाठःस्फुटार्थः ॥ ३ ॥ **ति०** आतुरः जीवितान्ते जीवितनाशप्राप्तौ । अमृतं अमृतत्वसाधनंदिव्यौषधं । स्पृष्ट्वा द्रवरूपममृतंपीत्वाच यथाजीविताशामेति तद्वत् ॥ ५ ॥ **ति०** ममतारावलम्बीत्याह—उत्तरेति । पुनर्वसुजातस्यहस्तोवधतारा। उत्तराचसीतायाजन्मतारा । बद्धजन्मतारायांतन्मोचनार्थयात्रायामवश्यंतन्मुक्तिरितिभावः । अद्यामान्तमानेनमार्गशीर्षकृष्णाष्ट-

[पा०] १ क. च.—ट. मभिरोचय. २ ङ. ट. प्राप्तोमध्यंदिवाकरः. ३ ङ. झ. ट. हृत्वातुतद्यातु. ४ ख.—ङ. झ. ञ. ट. जीवितः. ग. च. छ. वेगितः. ५ ङ. झ. पीत्वाऽमृतं. ६ इदमर्धं ख. च. छ. पाठेषुदृश्यते. ७ ङ. झ. ट. पश्यामि. क. ख. सौम्यानि. ८ क. ख. छ. ञ. प्रादुर्भवन्तिमे. ९ ख. च. छ. ञ. संख्येह्यानयिष्यामि.

ततो वानरराजेन लक्ष्मणेन च पूजितः ॥ उवाच रामो धर्मात्मा पुनरप्यर्थकोविदः ॥ ९ ॥
अग्रे यातु बलस्यास्य नीलो मार्गमवेक्षितुम् ॥ वृतः शतसहस्रेण वानराणां तरस्विनाम् ॥ १० ॥
फलमूलवता नील शीतकाननवारिणा ॥ पथा मधुमता चाशु सेनां सेनापते नय ॥ ११ ॥
दूषयेयुर्दुरात्मानः पथि मूलफलोदकम् ॥ राक्षसाः परिरक्षेथास्तेभ्यस्त्वं नित्यमुद्यतः ॥ १२ ॥
निम्नेषु वनदुर्गेषु वनेषु च वनौकसः ॥ अभिप्लुत्याभिपश्येयुः परेषां निहितं बलम् ॥ १३ ॥
यच्च फल्गु बलं किंचित्तदत्रैवोपयुज्यताम् ॥ एतद्धि कृत्यं घोरं नो विक्रमेण प्रयुध्यताम् ॥ १४ ॥
सागरौघनिभं भीममग्रानीकं महाबलाः ॥ कपिसिंहाः प्रकर्षन्तु शतशोथ सहस्रशः ॥ १५ ॥
गजश्च गिरिसंकाशो गवयश्च महाबलः ॥ गवाक्षश्चाग्रतो यान्तु गवां दृप्ता इवर्षभाः ॥ १६ ॥
यातु वानरवाहिन्या वानरः प्लवतां वरः ॥ पालयन्दक्षिणं पार्श्वमृषभो वानरर्षभः ॥ १७ ॥
गन्धहस्तीव दुर्धर्षस्तरस्वी गन्धमादनः ॥ यातु वानरवाहिन्याः सव्यं पार्श्वमधिष्ठितः ॥ १८ ॥
यास्यामि बलमध्येऽहं बलौघमभिहर्षयन् ॥ अधिरुह्य हनूमन्तमैरावतमिवेश्वरः ॥ १९ ॥
अङ्गदेनैष संयातु लक्ष्मणश्चान्तकोपमः ॥ सार्वभौमेन भूतेशो द्रविणाधिपतिर्यथा ॥ २० ॥

हरति नयनं नेत्रमूले च मृत्युः । नेत्रस्योर्ध्वं हरति सकलं मानसं दुःखजातं वामे चैवं फलमविकलं दक्षिणे वैपरीत्यं " इति ॥ एवं वचने विद्यमाने दक्षिणनयनमिति व्याख्यानं चिन्त्यं ॥ ८ ॥ पूजितः युक्तमिति श्लाघितः । अर्थकोविदः नीतिशास्त्रनिपुणः ॥ ९ ॥ नीतिशास्त्रमनुस्मरन् सेनासंविधानं दर्शयति—अग्र इति ॥ १० ॥ मार्गमवेक्षितुं यात्विति सुग्रीवं प्रत्युक्तमात्रेण सन्निहितं नीलं प्रत्याह—फलेति ॥ ११ ॥ मार्गशोधनप्रकारमाह— दूषयेयुरिति । विषादिनेति शेषः । परिरक्षेथा इत्यात्मनेपदमार्षं । उद्यतः सावधान इत्यर्थः ॥ १२ ॥ शोधनान्तरमाह —निम्नेष्विति ॥ निम्नेषु गर्तप्रदेशेषु वनदुर्गेषु वनैःजलैः दुर्गेषु दुर्गमप्रदेशेषु । " जीवनं भुवनं वनं " इत्यमरः । वनेषु काननेषु च । निहितं रन्ध्रे प्रहारार्थं स्थापितं । बलं परसैन्यं । वनौकसः वानराः । अभिप्लुत्य अभित उत्प्लुत्य । पश्येयुः ॥ १३ ॥ शोधनान्तरमाह—यदिति ॥ यत्किंचिद्बलं फल्गु असारं । तत् अत्रैव किष्किन्धायामेव । उपयुज्यतां स्थाप्यतां । किंचिदित्यनेन तादृशं बलमत्र दुर्लभमिति सूचितं । अत्र युक्तिवक्ति—एतदिति । एतत् घोरं कृत्यं विक्रमेण प्रयुध्यतां । आर्षः शतृप्रत्ययः । विक्रमेण शक्त्या । ये युध्यन्ते तेषामेव नान्येषामित्यर्थः । विक्रमेणोपयुज्यतामिति पाठे विक्रमेणोपयुज्यमानानां । विक्रमयुक्तानामित्यर्थः । क्रियापदत्वे संप्रधारणायां लोड्वेदितव्यः ॥ १४ ॥ अथ " यतश्च बलमाशङ्की ततो विस्तारयेद्बलं " इत्युक्तरीत्या बहवो बलिनोग्रे सेनां कर्षन्तित्याह—सागरेति ॥ सागरौघनिभं सागरस्य प्रवाहो यदि भवेत्तत्तुल्यमित्यर्थः । शतशोथ सहस्रशः । शतशः सहस्रशश्च संघीभूयेत्यर्थः ॥ १५ ॥ " अथ सेनाबलाध्यक्षौ सर्वदिक्षु निवेशयेत् " इत्युक्तरीत्या निवेशयति—गज इति ॥ गवामग्रे दृप्ताः वृषभा इवेति संबन्धः ॥ १६ ॥ दक्षिणं पश्चिमपार्श्वमित्यर्थः । " यतश्च भयमाशङ्कि तां प्राचीं परिकल्पयेत् " इति कामन्दकोक्तेः । प्लवतां वानराणां ॥ १७ ॥ गन्धहस्ती मत्तगजः । तरस्वी बलवान् । सव्यं प्राचीभागं । अधिष्ठितः अधिष्ठाता । कर्तरि क्तः ॥ १८ ॥ मध्यगमनप्रयोजनमाह—अभिहर्षयन्निति । "प्रहर्षयेद्बलं व्यूह्य " इत्युक्तेः । ईश्वरः इन्द्रः । तथैवौचित्यात् । गवां पतिमिवेश्वर इति वा पाठः ॥ १९ ॥ अङ्गदेन संयातु अङ्गदमारुह्य संयात्वित्यर्थः । सार्वभौ-

म्यांकृष्णसप्तम्यांवा । मार्गशीर्षपूर्णिमोत्तरंतदन्यतरस्मिन्नुत्तराऽलाभात् । अभिप्रयामेतिप्रश्नेलोट् ॥ ६ ॥ **ति०** यच्चफल्गु निस्सारंबलं बालवृद्धादिलक्षणंयुद्धानर्हंतदत्रैवोपपद्यतांतिष्ठतु । हियस्मात्एतन्नःकृत्यं युद्धरूपं घोरं । अतोविक्रमेणविक्रमोपपन्नबलेन प्रयुज्यतां । यात्रेतिशेषः ॥ १४ ॥ **ती०** यस्यमदगन्धादितरेहस्तिनोद्रवन्ति सगन्धहस्ती ॥ १८ ॥

[पा०] १ ङ. ट. झ. ट. सुपूजितः. २ घ. उवाचवचनरामो. ३ ङ. झ. ट. पथिरक्षेथाः. ४ क. ख. ग. ङ. छ. झ. ञ. ट. प्रयुज्यतां. ५ झ. ट. पतिः.

जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः ॥ ऋक्षराजो महासत्त्वः कुक्षिं रक्षन्तु ते त्रयः ॥ २१ ॥
[पैशार्धमिव लोकस्य प्रचेतास्तेजसा वृतः ॥ जघनं कपिसेनायाः कपिराजोऽभिरक्षतु] ॥ २२ ॥
राघवस्य वचः श्रुत्वा सुग्रीवो वाहिनीपतिः ॥ व्यादिदेश महावीर्यान्वानरान्वानरर्षभः ॥ २३ ॥
ते वानरगणाः सर्वे समुत्पत्य युयुत्सवः ॥ गुहाभ्यः शिखरेभ्यश्च आशु पुप्लुविरे तदा ॥ २४ ॥
ततो वानरराजेन लक्ष्मणेन च पूजितः ॥ जगाम रामो धर्मात्मा ससैन्यो दक्षिणां दिशम् ॥ २५ ॥
शतैः शतसहस्रैश्च कोटीभिरयुतैरपि ॥ वारणाभैश्च हरिभिर्ययौ परिवृतस्तदा ॥
तं यान्तमनुयाति स्म महती हरिवाहिनी ॥ २६ ॥
दृप्ताः प्रमुदिताः सर्वे सुग्रीवेणाभिपालिताः ॥ आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवंगमाः ॥
क्ष्वेलन्तो निनदन्तस्ते जग्मुर्वै दक्षिणां दिशम् ॥ २७ ॥
भक्षयन्तः सुगन्धीनि मधूनि च फलानि च ॥ उद्वहन्तो महावृक्षान्मञ्जरीपुञ्जधारिणः ॥ २८ ॥
अन्योन्यं सहसा दृप्ता निर्वहन्ति क्षिपन्ति च ॥ पततश्चाक्षिपन्त्यन्ये पातयन्त्यपरे परान् ॥ २९ ॥
रावणो नो निहन्तव्यः सर्वे च रजनीचराः ॥ इति गर्जन्ति हरयो राघवस्य समीपतः ॥ ३० ॥
पुरस्तादृषभो वीरो नीलः कुमुद एव च ॥ पन्थानं शोधयन्ति स्म वानरैर्बहुभिः सह ॥ ३१ ॥
मध्ये तु राजा सुग्रीवो रामो लक्ष्मण एव च ॥ बहुभिर्बलिभिर्भीमैर्वृताः शत्रुनिबर्हणाः ॥ ३२ ॥
हरिः शतबलिर्वीरः कोटीभिर्दशभिर्वृतः ॥ सर्वामेको ह्यवष्टभ्य ररक्ष हरिवाहिनीम् ॥ ३३ ॥
कोटीशतपरीवारः केसरी पनसो गजः ॥ अर्कश्चातिबलः पार्श्वमेकं तस्याभिरक्षति ॥ ३४ ॥

मेन उत्तरदिग्गजेन । भूतेशः यक्षेशः । द्रविणाधिपतिः धनाधिपतिः । अत्र त्वं च शिविकामारुह्य आवाभ्यामागच्छेति सिद्धम् ॥ २० ॥ ऋक्षराजः जाम्बवद्भ्राता । कुक्षिं पश्चाद्भागं । जाम्बवान् सुषेणः वेगदर्शी चेति त्रयः महासत्त्वः ऋक्षराजश्च कुक्षिं रक्षन्त्वित्यन्वयः ॥ २१—२२ ॥ व्यादिदेश रामोक्तं सर्वं कुरुतेत्याज्ञापयामास ॥ २३ ॥ पुप्लुविरे प्लुतगतिं चक्रिरे ॥ २४ ॥ पूजितः पुरस्कृत इत्यर्थः । धर्मात्मा नीतिरूपधर्मज्ञ इत्यर्थः ॥ २५ ॥ ययौ राम इतिशेषः । हरिवाहिनी पूर्वोक्तबलवानरभिन्ना ॥ २६ ॥ गच्छन्नामवस्थाविशेषान् दर्शयति—दृप्ता इत्यादिना ॥ दृप्ताः गर्विताः । आप्लवन्तः मण्डलाकारं भ्रमन्त इत्यर्थः । गर्जन्तः मेघध्वनिं कुर्वन्तः । घनगर्जितमिति प्रसिद्धिः । क्ष्वेलन्तः सिंहनादं कुर्वन्तः । " क्ष्वेला तु सिंहनादः स्यात् " इत्यमरः । निनदन्तः अव्यक्तं शब्दायमानाः । " णद अव्यक्ते शब्दे " इति धातुः । भक्षयन्तः पिबन्तः । उद्वहन्तः विलासार्थं हस्ते धारयन्तः ॥ २७—२८ ॥ सहसा । तरसा । निर्वहन्ति उद्वहन्ति । क्षिपन्ति पातयन्ति । अन्ये पतन्तः सन्तः । परान् पातयितॄन् । आक्षिपन्ति । प्रतीकारकरणासामर्थ्येन परिभाषणं कुर्वन्तीत्यर्थः । अपरे शक्ताः । परान् पातयितॄन् । पातयन्ति ॥ २९ ॥ नः अस्माभिरित्यर्थः ॥ ३० ॥ अत्र पूर्वं रामेण मार्गरक्षणाय ये नीलादयो नियुक्ताः ततोन्ये कुमुदादयस्तु रामभक्त्युत्साहेन स्वयमेव प्रवृत्ता इति ज्ञेयं । ऋषभोदक्षिणपार्श्वरक्षणाय नियुक्तो भक्त्या पराक्रमातिशयेन च अत्रापि रक्षणं कृतवानिति ज्ञेयं ॥ ३१ ॥ मध्ये त्विति । जग्मुरिति शेषः ॥ ३२ ॥ अवष्टभ्य अधिष्ठाय ॥ ३३ ॥ गजस्याग्रभागनियुक्तस्यापि पार्श्वरक्षणं भक्त्यतिशयात् । अत्र कार्यकरणा-

ति० अयमृषभोदक्षिणपार्श्वविनियुक्तादन्योनीलसहकारी ॥ ३१ ॥ ति० सर्वावाहिनीमवष्टभ्यैकोररक्ष । समन्ततोभ्रमन्सरक्षतिस्मेत्यर्थः ॥ ३३ ॥ ति० केसरिणां नृसिंहोद्भवतस्यबलस्यदक्षिणंवामंचैकैकंपार्श्वमभिरक्षतइत्यर्थइतिकतकः । एषगजः

[पा०] १ ङ.—ट. महाबाहु . २ अयंश्लोकः क. ख. च. छ. पाठेषुदृश्यते. ३ ग. ङ. च. छ. झ. ञ. ट. महावीर्यो वानरान्. ४ ङ. च. छ. ञ. ट. महौजसः. ५ क.—ट. हृष्टाः. ६ क. ख. च. छ. ज. सुषेणपरिपालिताः. ७ ङ. च. झ. ञ. ट. निनदन्तश्च. क.—घ. ज. विनदन्तस्ते. ८ क.—ट. पतन्तश्चोत्पतन्त्यन्ये. ९ घ. ङ. ट. पातयन्तःपरे. १० ङ. ज. झ. ट. अर्कश्चबहुभिःपार्श्वं. ग. ऋक्षश्चातिबलः.

सुषेणो जाम्बवांश्चैव [1]ऋक्षैश्च बहुभिर्वृतौ ॥ सुग्रीवं पुरतः कृत्वा जघनं संररक्षतुः ॥ ३५ ॥
तेषां सेनापतिर्वीरो नीलो वानरपुङ्गवः ॥ [2]संपतन्पततां श्रेष्ठस्तद्बलं पर्यपालयत् ॥ ३६ ॥
[3]दरीमुखः प्रजङ्घश्च रम्भोऽथ [4]रभसः कपिः ॥ सर्वतश्च ययुर्वीरास्त्वरयन्तः प्लवङ्गमान् ॥ ३७ ॥
एवं ते हरिशार्दूला [5]गच्छन्तो बलदर्पिताः ॥ [6]अपश्यंस्ते गिरिश्रेष्ठं सह्यं द्रुमलतायुतम् ॥
सरांसि च सुफुल्लानि तटाकानि [7]वनानि च ॥ ३८ ॥
रामस्य शासनं ज्ञात्वा भीमकोपस्य भीतवत् ॥ वर्जयन्नगराभ्याशांस्तथा जनपदानपि ॥ ३९ ॥
सागरौघनिभं भीमं तद्वानरबलं महत् ॥ [9]उत्ससर्प महाघोषं भीमघोष इवार्णवः ॥ ४० ॥
तस्य दाशरथेः पार्श्वे शूरास्ते कपिकुञ्जराः ॥ तूर्णमापुप्लुवुः सर्वे सदश्वा इव चोदिताः ॥ ४१ ॥
कपिभ्यामूह्यमानौ तौ शुशुभाते नरोत्तमौ ॥ महद्भ्यामिव संस्पृष्टौ ग्रहाभ्यां चन्द्रभास्करौ ॥ ४२ ॥
ततो वानरराजेन लक्ष्मणेन च पूजितः ॥ जगाम रामो धर्मात्मा ससैन्यो दक्षिणां दिशम् ॥४३॥
तमङ्गदगतो रामं लक्ष्मणः शुभया गिरा ॥ [10]उवाच परिपूर्णार्थः [11]स्मृतिमान्प्रतिभानवान् ॥४४॥
हृतामवाप्य वैदेहीं क्षिप्रं हत्वा च रावणम् ॥ समृद्धार्थः समृद्धार्थामयोध्यां प्रति यास्यसि ॥ ४५ ॥
महान्ति च निमित्तानि दिवि भूमौ च राघव ॥ शुभानि तव पश्यामि सर्वाण्येवार्थसिद्धये ॥ ४६ ॥

त्केसर्यादयश्च पूर्वं नियुक्ता एवेत्याहुः । अत्र पूर्वनियुक्तानां गन्धमादनादीनामप्युपलक्षणं । एकं पार्श्वं सव्यं पार्श्वं । अभिरक्षतीत्यस्य प्रत्येकमभिसंबन्धः । व्यत्ययेनलट् ॥ ३४ ॥ ऋक्षैरावृतत्वं जाम्बवत एव । तत्संबन्धात् सुषेणस्यापि । जघनं पश्चाद्भागम् ॥३५॥ संपतन् । मार्गशोधनाय पुरो गच्छन्नपि पर्यपालयत् । सेनापतित्वात्सर्वतो ररक्षेत्यर्थः ॥ ३६—३७ ॥ अपश्यन् दूरादिति शेषः । सुफुल्लानि सुफुल्लपद्मकह्लाराणि ॥ ३८ ॥ भीतवत् भीतं । कर्तरि क्तप्रत्ययः । वर्जयत् दूरतः परिहरत् । उत्ससर्प जगामेति संबन्धः । सागरौघनिभमिति विपुलतायां साम्यं । भीमघोष इवार्णव इति घोषे ॥ ३९—४० ॥ दाशरथेः पार्श्व इति । तन्मुखोल्लासायेति भावः ॥ ४१ ॥ हनुमदङ्गदाभ्यामूह्यमानौ रामलक्ष्मणौ । महाग्रहाभ्यां शुक्रबृहस्पतिभ्यां । संस्पृष्टौ संयुक्तौ । चन्द्रसूर्याविव शुशुभाते । अत्र उपमाने चतुर्ग्रहसंयोगस्य बहुजनविनाशहेतुत्वात् हनुमदङ्गदाभ्यां रामलक्ष्मणयोगस्य महासेनाविनाशकत्वं गम्यत इत्यलंकारेण वस्तुध्वनिः । संस्पृष्टपदेन हनुमदङ्गदयोर्लाघवातिशयकथनात् पदगतवस्तुना वस्तुध्वनिः ॥ ४२ ॥ पुनः सुदूरगमनसूचनायाह—तत इति ॥ ४३ ॥ परिपूर्णार्थः परिपूर्णमनोरथः । स्मृतिमान् निमित्तशास्त्रार्थस्मरणवान् । प्रतिभानवान् तात्कालिकबुद्धिमान् ॥ ४४ ॥ वक्ष्यमाणनिमित्तश्रवणे श्रद्धामुत्पादयितुं प्रथमं तत्फलं दर्शयति—हृतामिति ॥ रावणं हत्वा वैदेहीमवाप्यसीतिक्रमः ॥ ४५ ॥ कुतोयं निश्चय इत्यत्राह—महान्तीति ॥ महान्ति दुर्लभानि । दिवि भूमौ च यानि शुभानि निमित्तानि सर्वाणि तवार्थसिद्धये पश्यामि । अर्थसिद्धिकराणि पश्यामीत्यर्थः ॥ ४६ ॥

पूर्वभागनियुक्तादन्यइतितीर्थः ॥ ३४ ॥ ति० महद्भ्यां ग्रहाभ्यां । संस्पृष्टौ अर्धभागेस्पृष्टौचन्द्रभास्करविव । महद्भ्यामर्धसंस्पृष्टाविति पाठान्तरं । स० ग्रहाभ्यां शुक्रबृहस्पतिभ्यां । " कविकाव्ययुतज्योत्स्नाकान्तवत्सव्यरोचत " इत्युक्तेः । लक्ष्मणपक्षेचन्द्रोनिदर्शनं । रामपक्षेभास्करः । ततश्चकविकाव्याभ्यांसकान्तिश्चन्द्रइव वाहनसाहित्येनसकान्तिर्लक्ष्मणः । सूर्यप्रकाशाभिभूतप्रकाशस्तयोरिवरामप्रकाशाभिभवोवाहनरुचोरितिनिदर्शनविवेकोद्रष्टव्यः ॥ ४२ ॥

[पा०] १ क. ख. घ. ऋक्षैर्बहुभिरावृतः. २ ङ. झ. ट. संयतश्चरतां. क. च छ. समन्तात्पततां. ३ घ. ङ. झ. ट. वलीमुखः. ४ घ. ङ. झ. ट. जंभोथ. ५ ख. शरभः. ६ क. ख. ग. ङ.—ट. गच्छन्ति. ७ घ. मददर्पिताः. ८ ङ. झ. ट. अपश्यन्त. ९ ङ. झ. ट. गिरिशतायुतं. क. ख. ग. च. छ. ञ. द्रुमशतायुतं. घ. द्रुमशतावृतं. १० क. ग. ङ. झ. ट. वराणिच. ख. घ. च. छ. ञ. महान्तिच. ज. सरांसिच. ११ क. ख. ग. च.—झ. ट. निस्ससर्प. १२ क. च. उवाच चमहाप्राज्ञः. १३ ग. वचनंप्रतिभानवान्.

अनुवाति शुभो वायुः सेनां मृदुहितः सुखः ॥ पूर्णवल्गुस्वराश्चेमे प्रवदन्ति मृगद्विजाः ॥ ४७ ॥
प्रसन्नाश्च दिशः सर्वा विमलश्च दिवाकरः ॥ उशनाश्च प्रसन्नार्चिरनु त्वां भार्गवो गतः ॥ ४८ ॥
ब्रह्मराशिर्विशुद्धश्च शुद्धाश्च परमर्षयः ॥ अर्चिष्मन्तः प्रकाशन्ते ध्रुवं सर्वे प्रदक्षिणम् ॥ ४९ ॥

सुखःसुखकरः । शीत इत्यर्थः । मृदुहितः मृदुः मार्दवयुक्तः । हितः अनुकूल इत्यर्थः । शुभः भाविशुभसूचकः वायुः सेनां अनुवाति अनुसृत्य वाति । पूर्णवल्गुस्वराः अन्यूनापरुषस्वराःसन्तः प्रवदन्ति ॥ ४७ ॥ भौमनिमित्तान्युक्त्वा दिव्यनिमित्तान्याह—त्वामनुगतः । तवानुकूलदिशि स्थित इत्यर्थः । यद्वा अनुगतः पश्चाद्भागं गतः । पुरः शुक्रस्य यात्रासु प्रतिषेधादिति भावः । तथोक्तं ज्यौतिषे—" प्रतिशुक्रं प्रतिबुधं प्रतिभौमं गतो नृपः । अपि शक्रेण सदृशो हतसैन्यो निवर्तते " इति ॥ उशनाश्च प्रसन्नार्चिरनु त्वां भार्गवो गत इत्यनेनावतारकाले जातकफलसूचनवद्रामस्यानुकूलं गोचारफलं दर्शयति विपरीतफलं राक्षसानां च । तथाहि किष्किन्धातः आग्नेयदिग्वर्तिनीं लङ्कां प्रति गच्छतो रामस्यानुकूलः शुक्र इत्युच्यते । सूर्यस्थराशेः पुरोराशिस्थो हि भवति शुक्रः । सूर्यश्च तदानीं मीनस्थः । उत्तराफल्गुनी ह्यद्येति प्रयाणदिनकथनात् । फाल्गुनपौर्णमास्यां हि रामस्य दण्डयात्रेति पूर्वमुक्तं । तदाच शुक्रो मेषस्थः । अतो रामस्य कर्कटराशेर्मेषो हि दशमोनुकूलः । पूर्वोक्तदिग्वर्तिनीं लङ्कां प्रति गच्छतो रामस्य पश्चात्स्थितत्वाच्च शुक्रोऽनुकूल एव । शुक्रानुकूल्योक्तिर्बृहस्पत्याद्यानुकूल्योपलक्षणं । सह्यवतारकाले कर्कटकस्थः । तदपेक्षयाष्टत्रिंशद्वर्षयुद्धयात्राकालः । तथाच त्रिरावृत्त्या षट्त्रिंशद्वर्षेषु गतेषु रामस्याष्टत्रिंशद्वर्षे युद्धारम्भे गुरोः सिंहस्थितिः सिद्धा । गुरुद्वितीयता रामस्यानुकूला । शनिश्चावतारकाले तुलावर्गोत्तमस्थः । द्वितीयावृत्तौ तुलावृश्चिकयोः पञ्चवर्षेण गतयोः सार्धवर्षद्वयेनातीतेन धनुरतीत्य तदानीं मकरस्थितियोग्योपि कथंचिद्धनुर्वर्गोत्तमस्थ एव शनिः । राहुस्तु अवतारकाले सिंहस्थः । ततोष्टत्रिंशद्वर्षेस्मिन्कटकस्थितियोग्योप्यतिचारादिभिर्मिथुनस्थः । तत्सप्तमे धनुषि केतुः । उक्तं चात्रापि—" मूलो मूलवता स्पृष्टो धूप्यते धूमकेतुना " इति । धूमाकारः केतुर्धूमकेतुः । तथाच धनुषि शनिकेतू रामस्य षष्ठस्थावनुकूलौ । अङ्गारकस्तु रामरावणयुद्धप्रसङ्गे, " आक्रम्याङ्गारकस्तस्थौ विशाखे अपि चाम्बरं " इत्युक्त्या विशाखाचतुर्थपादे वृश्चिकराशौ तिष्ठति । रामस्य पञ्चमाङ्गारकत्वफलमिदं । यदेतद्ब्रह्मास्त्रबन्धरुधिरमोहादि, बुधस्य प्रतिमासं रोहिणीस्थत्वयोगेपि रामरावणयुद्धप्रसङ्गे, " प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियाम् । समाक्रम्य बुधस्तस्थौ प्रजानामशुभावहः " इत्युक्तं प्रजानामशुभावहत्वमतिचारवशादेव । स च रामस्य दशमस्थोऽनुकूलः । चन्द्रश्च उत्तराफल्गुनीस्थत्वात्कन्यास्थः । अतस्तृतीयचन्द्रो रामस्यानुकूलः । सूर्यो नवमस्थो रामस्यानुकूलः । राहुस्तु मिथुनस्थत्वाद्द्वादशस्थ इति किंचिद्बाधकः । राक्षसानामिदं सर्वं विपरीतं । तथाहि—राक्षसानां हि नक्षत्रं मूलं । तथाच धनू राशिः । तदपेक्षया पञ्चमस्थः शुक्रः प्रतिकूलः । जन्मराशिस्थौ शनिकेतू च प्रतिकूलौ । राहुस्तु सप्तमस्थः किंचिदनुकूलः । द्वादशस्थाङ्गारकश्च प्रतिकूलः । गुरुस्तु नवमस्थोनुकूलः । चतुर्थस्थः सूर्यः पञ्चमस्थो बुधश्च नानुकूलौ । दशमस्थश्चन्द्रः किंचिदनुकूलः । एवं प्रायेण ग्रहगोचारफलं राक्षसानां विपरीतमेवेति ॥ ४८ ॥ ब्रह्मराशिः अधीतसर्ववेद इत्यर्थः । विशुद्धः पापग्रहासंयुक्तः । इदं द्वयमपि भार्गवविशेषणं । परमर्षयः सप्तर्षयः । दक्षिणां दिशं प्रति गताः । प्रदक्षिणं तिष्ठद्ध्रुवप्रभृतित्वात्साधुः । आवर्तमाना इति शेषः

ती० मृदुहितसुखपदैःक्रमेणमान्द्यशैत्यसौरभ्याण्युच्यन्ते ॥ ४७ ॥ ती० ब्रह्मराशिरित्यस्यपादस्यपूर्वशेषंविहायान्योर्थउच्यते । ब्रह्मराशिरित्यत्रब्रह्मराशिशब्देन " तत्रासतेमहात्मानऋषयोयेऽग्निहोत्रिणः । भूतारंभकृतंब्रह्मशंसन्तोऽत्रित्विगुद्यताः । प्रारभन्ते लोककामास्तेषांपन्थाःसदक्षिणः " इतिश्रीविष्णुपुराणोक्तेःपितृयाणमार्गस्थालोकाभिवृद्धिकामामहर्षयउच्यन्ते । तेषांराशिः संघः । विशुद्धः प्रसन्नः । परमर्षयः सप्तर्षयः । ध्रुवं औत्तानपादिं प्रदक्षिणंयथातथा आवर्तमानाइतिशेषः । प्रकाशन्तइतिसंबन्धः । सप्तर्षिसंनिवेशप्रकारस्तु—" पूर्वभागेतुभगवान्मरीचिरुपरिस्थितः । वसिष्ठश्चसभार्योस्मात्पुरस्तादङ्गिरामुनिः । ततोत्रि-

[पा०] १ क. च. ञ. खराश्वामी.

त्रिशङ्कुर्विमलो भाति राजर्षिः सपुरोहितः ॥ पितामहवरोस्माकमिक्ष्वाकूणां महात्मनाम् ॥ ५० ॥
विमले च प्रकाशेते विशाखे निरुपद्रवे ॥ नक्षत्रवरमस्माकमिक्ष्वाकूणां महात्मनाम् ॥ ५१ ॥
नैर्ऋतं नैर्ऋतानां च नक्षत्रमभिपीड्यते ॥ मूलो मूलवता स्पृष्टो धूप्यते धूमकेतुना ॥ ५२ ॥
सर्वं चैतद्विनाशाय राक्षसानामुपस्थितम् ॥ काले कालगृहीतानां नक्षत्रं ग्रहपीडितम् ॥ ५३ ॥
प्रसन्नाः सुरसाश्चापो वनानि फलवन्ति च ॥ ग्रैवान्त्यभ्यधिकं गन्धान्यथर्तुकुसुमा द्रुमाः ॥ ५४ ॥
व्यूढानि कपिसैन्यानि प्रकाशन्तेऽधिकं प्रभो ॥ देवानामिव सैन्यानि सङ्ग्रामे तारकामये ॥ ५५ ॥
एवमार्य समीक्ष्यैतान्प्रीतो भवितुमर्हसि ॥ इति भ्रातरमाश्वास्य हृष्टः सौमित्रिरब्रवीत् ॥ ५६ ॥
अथावृत्य महीं कृत्स्नां जगाम महती चमूः ॥ ऋक्षवानरशार्दूलैर्नखदंष्ट्रायुधैर्वृता ॥ ५७ ॥
कराग्रैश्चरणाग्रैश्च वानरैरुत्थितं रजः ॥ भीममन्तर्दधे लोकं निवार्य सवितुः प्रभाम् ॥ ५८ ॥
सपर्वतवनाकाशां दक्षिणां हरिवाहिनी ॥ छादयन्ती ययौ भीमा द्यामिवाम्बुदसंततिः ॥ ५९ ॥

॥ ४९ ॥ पुरोहितः विश्वामित्रः । " सृजन्दक्षिणमार्गस्थान्सप्तर्षीनपरान्पुनः " इति बालकाण्डोक्तरीत्या विश्वामित्रसृष्टसप्तर्ष्यन्तर्गतवसिष्ठो वा । पितामहवरः पितामहेषु कूटस्थेषु श्रेष्ठः । इक्ष्वाकूणां प्रधानकूटस्थ इत्यर्थः ॥ ५० ॥ निरुपद्रवे क्रूरग्रहानाक्रान्ते । विशाखे इति द्विवचनं नक्षत्रद्वयात्मकत्वात् । विशाख्यं नक्षत्रवरमित्यर्थः । विशाखाया इक्ष्वाकुनक्षत्रत्वंज्यौतिषदर्पणे दर्शितं—" अश्विन्यां यदि केतुः " इत्यारभ्य "इक्ष्वाकुकुलनाथस्तु ह्यन्यतो यदि भवेद्विशाखास्थस्तु " इति ॥ ५१ ॥ स्वानुकूल्यमुक्त्वा परप्रातिकूल्यमाह—नैर्ऋतमिति ॥ नैर्ऋतं नैर्ऋतदैवतं । नैर्ऋतानां राक्षसानाम् । किं तन्नैर्ऋतं तस्य पीडा केनेत्याकाङ्क्षायामाह—मूल इति । मूलवता अन्तिकवता । " मूलं वशीकृतौ स्वीये शीर्षे तारान्तिकादिषु " इति वैजयन्ती । तेन धूमकेतुना स्पृष्टो मूलः मूलनक्षत्रं । धूप्यते संताप्यते । " धूप संतापे " इति धातुः ॥ ५२ ॥ ततः किमित्यत्राह—सर्वमिति ॥ एतन्नक्षत्रपीडनमेव राक्षसानां विनाशाय सर्वं अशुभसूचकनिमित्तजातं । समुपस्थितमित्यर्थः । तदेवोपपादयति—काल इति । कालगृहीतानां मृत्युगृहीतानां नक्षत्रं । काले अन्तकाले । ग्रहपीडितं भवति ॥५३॥ पुनरपि विजयसूचकान्याह—प्रसन्ना इत्यादिना ॥ द्रुमाः यथर्तुकुसुमाः ऋतुमनतिक्रम्य जातानि कुसुमानि येषां ते तथोक्ताः । अकालकुसुमोत्पत्तिर्ह्युत्पातः । स इदानीं नास्तीत्यर्थः । तथोक्तं वराहमिहिरेण—" शीतोष्णानां विपर्यासः फलपुष्पमकालजम् । अशोष्याणां विशोषश्च फलं षाण्मासिकं भवेत् " इति ॥ ५४ ॥ व्यूढानि कृतव्यूहानि । तारकस्य तारकासुरस्य आमयो वधो यस्मिन् सः तारकामयः तस्मिन् । यद्वा तारकायाः बृहस्पतिपत्न्याः आमयो मनोव्याधिः यस्मिन् । तादृशसंग्रामसंज्ञेयं । तथोक्तं श्रीविष्णुपुराणे—एवंच तयोरतीवोग्रः संग्रामस्तारकानिमित्तस्तारकामयो नामाभवदिति ॥ ५५ ॥ आश्वास्याब्रवीत् आश्वासनपूर्वकमब्रवीत् । अनेन प्रथमसर्गान्तोक्तः श्लोकोनुवृत्त इति ज्ञायते ॥ ५६ ॥ पुनरपि सेनायाः दूरगमनमाह—अथेति ॥ ऋक्षवानरशार्दूलैः ऋक्षशार्दूलैः वानरशार्दूलैश्च । शार्दूलशब्दः श्रेष्ठवाची ॥ ५७ ॥ अन्तर्दधे आच्छादयामास ॥ ५८ ॥ हरिवाहिनी दक्षिणां महीं अम्बुदसंततिर्द्यामिव छादयन्ती ययाविति संबन्धः ॥ ५९ ॥

स्तस्य वासन्नःपुलस्त्यःपुलहःक्रतुः " इति ॥ ४९ ॥ ति० सपुरोहितः भगवद्विश्वामित्रसृष्टस्वर्गसमीपवर्तिसप्तर्षिमण्डलमध्यवर्तिवसिष्ठसहितइत्यर्थः ॥ ईदृशस्त्रिशङ्करस्माकंपितामहोस्माकंपुरोभाति । तस्यदक्षिणदिक्स्थत्वात् । पितामहःपुरोस्माकमितिपाङ्क्तः पाठः इतिकतकः ॥ ५० ॥ स० मूलवता सीताहरणजन्यपापरूपकारणवता ॥ ५२ ॥ ति० गन्धाः अजन्तः । गन्धवन्तो वायवोऽधिकानप्रवान्ति मन्दंवान्तीत्यर्थः ॥ ५४ ॥

[पा०] १ च. छ. नक्षत्रमपि. क. ङ. झ. ञ. ट. नक्षत्रमति. २ ङ. झ. ट. प्रवान्तिनाधिकागन्धाः. ३ ङ. च. छ. झ. ट. हरिवाहिनी. ४ क. ख. च. छ. ञ. वानरगोपुच्छैः. ५ ङ. च. छ. झ. ट. दंष्ट्रायुधैरपि. ६ क. ख. महासेना. ग. ययौभूमिं. च. छ. ञ. महींभीमां.

[1]उत्तरन्त्यां च सेनायां संततं बहुयोजनम् ॥ नदीस्रोतांसि सर्वाणि सस्यन्दुर्विपरीतवत् ॥ ६० ॥
सरांसि विमलाम्भांसि द्रुमाकीर्णांश्च पर्वतान् ॥ समान्भूमिप्रदेशांश्च वनानि फलवन्ति च ॥
मध्येन च समन्ताच्च तिर्यक्चाधश्च साऽविशत् ॥ ६१ ॥
समावृत्य महीं कृत्स्नां जगाम महती चमूः ॥ ६२ ॥
ते [3]हृष्टमनसः सर्वे जग्मुर्मारुतरंहसः ॥ हरयो राघवस्यार्थे समारोपितविक्रमाः ॥ ६३ ॥
[4]हर्षवीर्यबलोद्रेकान्दर्शयन्तः परस्परम् ॥ यौवनोत्सेकजान्दर्पान्विविधांश्चक्रुरध्वनि ॥ ६४ ॥
तत्र केचिद्द्रुतं जग्मुरुत्पेतुश्च तथाऽपरे ॥ केचित्किलकिलां चक्रुर्वानरा [5]वनगोचराः ॥ ६५ ॥
प्रास्फोटयंश्च पुच्छानि सन्निजघ्नुः पदान्यपि ॥ [6]भुजान्विक्षिप्य [7]शैलांश्च द्रुमानन्ये बभञ्जिरे ॥ ६६ ॥
आरोहन्तश्च शृङ्गाणि गिरीणां गिरिगोचराः ॥ महानादान्विमुञ्चन्ति [8]क्ष्वेलामन्ये प्रचक्रिरे ॥ ६७ ॥
ऊरुवेगैश्च ममृदुर्लताजालान्यनेकशः ॥ जृम्भमाणाश्च विक्रान्ता विचिक्रीडुः शिलाद्रुमैः ॥ ६८ ॥
[9]शतैः शतसहस्रैश्च कोटीभिश्च सहस्रशः ॥ वानराणां तु घोराणां [10]श्रीमत्परिवृता मही ॥ ६९ ॥
सा स्म याति दिवारात्रं [11]महती हरिवाहिनी ॥ [12]हृष्टा प्रमुदिता सेना सुग्रीवेणाभि[13]रक्षिता ॥ ७० ॥
वानरास्त्वरितं यान्ति सर्वे युद्धाभिनन्दिनः ॥ [14]प्रमोक्षयिषवः सीतां मुहूर्तं [15]कापि नासत ॥ ७१ ॥

संततं निरन्तरं यथा भवति तथा उत्तरन्त्यां । विपरीतवत् वैपरीत्यवत् । भावप्रधानो निर्देशः । बहुयोजनं च यथा भवति तथा सस्यन्दुः ॥ ६० ॥ सरांसीत्यादिसार्धश्लोक एकान्वयः ॥ यथायोग्यं च संबन्धः । सरांसि शीतलसलिलतया मध्येनाविशत् । पर्वतान् द्रुमाकीर्णतया तिर्यगाविशत् । समान् भूमिप्रदेशान् समन्तादाविशत् । वनानि फलवत्तया अध आविशत् ॥ ६१ ॥ समावृत्येत्यर्धं ॥ ६२ ॥ मारुतरंहसः वायुवेगाः । समारोपितविक्रमाः अभिवृद्धविक्रमा इत्यर्थः । उद्रेकशब्दोतिशयवाची । दर्पान् दर्पजव्यापारान् ॥ ६३—६४ ॥ तान्विवृणोति—तत्रेत्यादिना ॥ किलकिलेति वानरशब्दानुकरणं ॥ ६५ ॥ प्रास्फोटयन् भूमावन स्फालयन् । सन्निजघ्नुः । भूमाविति शेषः । भुजान् विक्षिप्य प्रसार्य । द्रुमान् शैलांश्च बभञ्जिरे ॥ ६६ ॥ गिरिगोचराः गिरिचराः । क्ष्वेलां सिंहनादं ॥ ६७ ॥ ममृदुः मर्दनं चक्रुः ॥ ६८ ॥ श्रीमद्यथा भवति तथा परिवृता आसीदिति संबन्धः ॥ ६९ ॥ सेना इनेन स्वामिना सहिता ॥ ७० ॥ प्रमोक्षयिषवः मोचयितुमिच्छवः । सनि द्विर्वचनाभाव आर्षः । " मोक्ष निरसने " इत्यस्माद्धातोः सन्

ति० सर्वाणिनदीस्रोतांसि विपरीतवत् वैपरीत्येन । सस्यन्दुः । यथाऽग्रेषुधावत्सुचन्द्रोधावतीव तद्वत्सेनागतिर्नदीप्रवाहेषुभ्रान्त्याभातिस्मेत्यर्थइतिकतकः । वस्तुतोनदीषुवानराणांप्रवाह्याभिमुखंतरणेतैराहतानिजलानिविपरीतवहनानीत्यर्थः ॥ ६० ॥ ति० साविशत् अयंद्वितीयोवासइतिप्रतीयते ॥ ६१ ॥ स० समारोपितविक्रमाः स्वदपेक्षयाममबलमधिकमितिपरस्परमारोपितपराक्रमाः । उत्साहविशेषवन्तइतियावत् ॥ ६३ ॥ ति० श्रीमत् लुप्ततृतीयान्तं । श्रीमद्भिरित्यर्थः ॥ अयंतृतीयोवासः । स० श्रीमत्परिवृता श्रीमद्भिः सुघोराणांवानराणांमध्ये श्रीमद्भिःपरिवृता । श्रीमत्परिवृता श्रियंराक्षससंपदंमभ्रन्तीतिश्रीमथः । तैः परिवृतेति सुघोराणांवानराणांमहीजातेतिवा ॥ ६९ ॥ ति० दिवारात्रं मध्यरात्रएवयाममात्रंवासइत्याशयः ॥ स० दिवारात्रं अहोरात्रं । याममात्रवासइत्याशयः । उत्तरत्रदिवेतिशेषइतिचनागोजिभट्टः । अखण्डाहोरात्रमित्यर्थःस्वरसः । " मुहूर्तंकापिनावसन् " इत्युत्तरग्रन्थस्वारस्यात् । शेषंविनान्वयसंभवाच्च ॥ ७० ॥ ति० प्रमोक्षयिषवः मोक्षशब्दात्तत्करोतीतिणौसनि आर्षेअभ्यासलोपेऽप्रत्ययेचरूपं । प्रमोचयितुमिच्छावन्तइत्यर्थः ॥ नावसन् दिवेतिशेषः ॥ ७१ ॥

[पा०] १ ग. ङ. झ. उत्तरन्त्याश्चसेनायाः. २ ङ. च. झ. ञ. ट. हृष्टवदनाः. ३ झ. हर्षवीर्यबलोद्रेकान्. ४ क. ख. ग. वारणोपमाः. ५ क. ख. भुजैरुत्क्षिप्य. ६ ख. शैलेन्द्रान्. ७ ङ. झ. ट. नादान्प्रमुञ्चन्ति. ख. नादान्विमुञ्चन्तः. च. ञ. नादान्प्रमुञ्चन्तः. ८ ङ. झ. ट. ततःशत. ९ क. ख. ग. ङ. च. झ. ञ. ट. सुघोराणां. १० क. ख. ज. ञ. यूथैःपरिवृता. ११ ख. ग. ङ. झ. ट. प्रहृष्टमुदिताःसर्वेसुग्रीवेणाभिपालिताः. १२ क. घ. च. छ. पालिता. १३ क.—ट. स्त्वरिताः. १४ क. ख. ग. च. छ. ज. ञ. मुमोक्षयिषवः. १५ ङ. झ. ट. नावसन्. ख. नासते.

ततः पादपसंबाधं [1]नानामृगसमायुतम् ॥ [2]सह्यपर्वतमासेदुर्मलयं च महीधरम् ॥ ७२ ॥
काननानि विचित्राणि नदीप्रस्रवणानि च ॥ [3]पश्यन्नतियया रामः सह्यस्य मलयस्य च ॥ ७३ ॥
[4]बकुलांस्तिलकांश्चूतानशोकान्सिन्धुवारकान् ॥ करवीरांश्च तिमिशान्भञ्जन्ति स्म प्लवङ्गमाः ॥ ७४ ॥
[5]अङ्कोलांश्च करञ्जांश्च प्लक्षन्[6]यग्रोधतिन्दुकान् ॥ [7]जम्बूकामलकान्नीपान्भञ्जन्ति स्म प्लवङ्गमाः ॥ ७५ ॥
प्रस्तरेषु च रम्येषु विविधाः काननद्रुमाः ॥ [8]वायुवेगप्रचलिताः पुष्पैरवकिरन्ति तान् ॥ ७६ ॥
मारुतः सुखसंस्पर्शो वाति चन्दनशीतलः ॥ षट्पदैरनुकूजद्भिर्वनेषु मधुगन्धिषु ॥ ७७ ॥
अधिकं शैलराजस्तु [9]धातुभिः सुविभूषितः ॥ ७८ ॥
धातुभ्यः प्रसृतो रेणुर्वायुवेगै[10]र्विघट्टितः ॥ सुमहद्वानरानीकं छादयामास सर्वतः ॥ ७९ ॥
गिरिप्रस्थेषु रम्येषु सर्वतः संप्रपुष्पिताः ॥ केतक्यः सिन्धुवाराश्च वासन्त्यश्च मनोरमाः ॥ ८० ॥
माधव्यो गन्धपूर्णाश्च [12]कुन्दगुल्माश्च पुष्पिताः ॥ चिरिबिल्वा मधूकाश्च बकुलाः प्रियकास्तथा ॥ ८१ ॥
[13]स्फूर्जकास्तिलकाश्चैव नागवृक्षाश्च पुष्पिताः ॥ चूताः [14]पाटलयश्चैव कोविदाराश्च पुष्पिताः ॥ ८२ ॥
मुचुलिन्दार्जुनाश्चैव शिंशुपाः कुटजास्तथा ॥ धवाः शाल्मलयश्चैव रक्ताः कुरवकास्तथा ॥ ८३ ॥
हिन्तालास्तिमिशाश्चैव चूर्णका नीपकास्तथा ॥ नीलाशोकाश्च [15]वरणा अङ्कोलाः पद्मकास्तथा ॥
[16]प्लवमानैः प्लवङ्गैस्तु सर्वे पर्याकुलीकृताः ॥ ८४ ॥

॥ ७१ ॥ ततः दिवारात्रान्ते ॥ ७२ ॥ सह्यस्य मलयस्य च काननानीत्यन्वयः । सह्यमलयौ नाम मार्गवर्तिनौ कौचित्पर्वतौ ॥७३॥ बकुलान् केशरवृक्षान् । तिलकान् क्षुरकवृक्षान् । चूताः प्रसिद्धाः अशोकाश्च । सिन्धुवारकान् निर्गुण्डीवृक्षान् । करवीराः प्रसिद्धाः । तिमिशान् नेमिवृक्षान् ॥ ७४ ॥ अङ्कोलान् निकोचकवृक्षान् । करञ्जान् नक्तमालवृक्षान् । प्लक्षान् जटीवृक्षान् । न्यग्रोधान् वटान् । तिन्दुकान् स्फूर्जकवृक्षान् । जम्बूकामलकाः प्रसिद्धाः । नीपाः कदम्बाः ॥ ७५ ॥ प्रस्तरेषु शिलासु । स्थिता इति शेषः । वायुवेगः वानरसेनावेगजवायुवेगः ॥ ७६—७७ ॥ वानराणां धातुरेणुरूषितत्वं वक्तुं पर्वतस्य धातुमत्तामाह— अधिकमिति ॥ अर्धमेकं वाक्यं । शैलराजः सह्यः ॥ ७८ ॥ विघट्टितः उत्थापितः ॥ ७९ ॥ गिरिप्रस्थेत्यादिसार्धपञ्चश्लोक्येकान्वया ॥ पुष्पिता इत्येतत्सर्वविशेषणं । अतस्तस्य बहुशः प्रयोगः । वसन्ते पुष्प्यन्तीति वासन्त्यः । इदं माधवीविशेषणं । " कालात्साधुपुष्प्यत्पच्यमानेषु " इत्यण् । गन्धैः पूर्णाः गन्धपूर्णाः । कुन्दाः । चिरिबिल्वाः नक्तमालाः । मधूकाः गुडपुष्पाः । वञ्जुलाः वानीराः । प्रियकाः बन्धूकाः ॥ ८०—८१ ॥ स्फूर्जकाः तिन्दुकवृक्षाः । नागवृक्षाः नागकेसराः । पाटलयः पाटलाः । कोविदाराः चमरकाः ॥ ८२ ॥ मुचुलिन्दाः खर्जूरविशेषाः । अर्जुनाः ककुभाः । शिंशुपाः पिच्छिलाः । कुटजाः जयवृक्षाः । धवाः धुन्धुरवृक्षाः । शाल्मलयः मोचाः । " पिच्छिला पूरणी मोचा चिरायुः शाल्मलिर्द्वयोः " इत्यमरः ॥ ८३ ॥ हिन्तालाः तालविशेषाः । चूर्णकाः आमलकविशेषाः । नीपकाः कदम्बाः । वरणाः वारुणाः । पद्मकाः सुगन्धिपुष्पा वृक्षविशेषाः । एवंभूतावृक्षाः प्लवमानैः प्लवंगैः पर्याकुलीकृता इत्यन्वयः ॥ ८४ ॥

ति० प्रीयमाणैः उक्तपुष्पदर्शनेनेतिशेषः ॥ ८४ ॥

[पा०] १ ख. ग. ज. झ. ट. नानावनसमायुतं. ङ. नानावनसमन्वितं. २ ख. ग. ङ. झ. ट. सह्यपर्वतमासाद्यवानरास्तं समारुहान्. ३ ङ. च. झ. ट. पश्यन्नपि. क. छ. ञ. पश्यन्नमि. ४ क. ख. ग. ङ. ज. झ. ट. चंपकांस्तिल. ५ ङ. झ. ट. अशोकांश्च. ६ झ. ट. न्यग्रोधपादपान्. ७ क.—छ. ञ. जंबुकामलकान्नागान्. ट. जंबुकामलपुन्नागान्. ८ क. ख. च. ऊरुवेगैः. ९ घ. च. ज. गां. १० ग. झ. धातुभिस्तु. ११ झ. ट. वेगेनघट्टितः. १२ क. ख. च. छ. ञ. स्फूर्जाःकुन्दाश्च. १३ ख. ङ. झ. ञ. ट. रंजकास्तिलकाः. १४ झ. ञ. ट. पाटलिकाश्चैव. १५ ख. ङ. झ. ट. सरलाअङ्कोलाः. १६ ङ. झ. ट. प्रीयमाणैः.

वाप्यस्तस्मिन्गिरौ शीताः पल्वलानि तथैव च ॥ चक्रवाकानुचरिताः कारण्डवनिषेविताः ॥
प्लवैः क्रौञ्चैश्च संकीर्णा वराहमृगसेविताः ॥ ८५ ॥
ऋक्षैस्तरक्षुभिः सिंहैः शार्दूलैश्च भयावहैः ॥ व्यालैश्च बहुभिर्भीमैः सेव्यमानाः समन्ततः ॥ ८६ ॥
पद्मैः सौगन्धिकैः फुल्लैः कुमुदैश्चोत्पलैस्तथा ॥ वारिजैर्विविधैः पुष्पै रम्यास्तत्र जलाशयाः ॥८७ ॥
तस्य सानुषु कूजन्ति नानाद्विजगणास्तथा ॥ ८८ ॥
स्नात्वा पीत्वोदकान्यत्र जले क्रीडन्ति वानराः ॥ अन्योन्यं प्लावयन्ति स्म शैलमारुह्य वानराः ॥८९॥
फलान्यमृतगन्धीनि मूलानि कुसुमानि च ॥ बुभुजुर्वानरास्तत्र पादपानां मदोत्कटाः ॥ ९० ॥
द्रोणमात्रप्रमाणानि लम्बमानानि वानराः ॥ ययुः पिबन्तो हृष्टास्ते मधूनि मधुपिङ्गलाः ॥ ९१ ॥
पादपानवभञ्जन्तो विकर्षन्तस्तथा लताः ॥ विधमन्तो गिरिवरान्प्रययुः प्लवगर्षभाः ॥ ९२ ॥
वृक्षेभ्योऽन्ये तु कपयो नर्दन्तो मधुदर्पिताः ॥ अन्ये वृक्षान्प्रपद्यन्ते प्रपतन्त्यपि चापरे ॥ ९३ ॥
बभूव वसुधा तैस्तु संपूर्णा हरियूथपैः ॥ यथा कमलकेदारैः पक्वैरिव वसुन्धरा ॥ ९४ ॥
महेन्द्रमथ संप्राप्य रामो राजीवलोचनः ॥ अध्यारोहन्महाबाहुः शिखरं द्रुमभूषितम् ॥ ९५ ॥
ततः शिखरमारुह्य रामो दशरथात्मजः ॥ कूर्ममीनसमाकीर्णमपश्यत्सलिलाकरम् ॥ ९६ ॥
ते सह्यं समतिक्रम्य मलयं च महागिरिम् ॥ आसेदुरानुपूर्व्येण समुद्रं भीमनिस्स्वनम् ॥ ९७ ॥
अवरुह्य जगामाशु वेलावनमनुत्तमम् ॥ रामो रमयतां श्रेष्ठः सुग्रीवः सलक्ष्मणः ॥ ९८ ॥
अथ धौतोपलतलां तोयौघैः सहसोत्थितैः ॥ वेलामासाद्य विपुलां रामो वचनमब्रवीत् ॥ ९९ ॥

वाप्य इत्यादि जलाशया इत्यन्तमेकं वाक्यं ॥ जलाशयाः जलपूर्णा इति वापीविशेषणं । अत्रापि पर्याकुलीकृता इत्यनुषज्यते । कारण्डवाः जलकुक्कुटाः । प्लवैः जलकाकैः । क्रौञ्चैः प्रसिद्धैः । तीरवनमृगानाह —वराहेत्यादिना । तरक्षुभिः मृगादनैः । व्यालैः दुष्टगजैः । सौगन्धिकैः कह्लारैः । वारिजैरिति । एवमिति शेषः ॥ ८५—८७ ॥ तस्य सानुष्वित्यर्धमेकं वाक्यं ॥ कूजन्ति चुक्कूजुः । तत्सैन्यदर्शनादिति भावः ॥ ८८ ॥ अत्र जले वापीजले । प्लावयन्ति सिञ्चन्ति ॥ ८९ ॥ शैलमारुह्येत्युत्तरशेषः । अमृतगन्धीनि अमृतस्वादूनि । मदोत्कटाः मदमत्ताः ॥९०॥ द्रोणमात्रप्रमाणानि द्रोणं शिवद्वयं तत्प्रमाणमधुपूर्णानि । मधूनि मधुपटलानि । मधुपिङ्गलाः मधुवत्पिङ्गलवर्णाः ॥ ९१ ॥ विधमन्तः दहन्तः । " ध्मा शब्दाग्निसंयोगयोः " इति धातुः ॥ ९२ ॥ अन्ये वृक्षेभ्यः वृक्षेभ्योन्यत्र । अत्रापि ययुरित्यनुषज्यते ॥ ९३ ॥ इवशब्दो वाक्यालंकारे । अन्ये तु । तत्र तदानीं पक्वैः कलमकेदारैः पक्वशालिक्षेत्रैः । संपूर्णा वसुन्धरेव यथा भवेत् तथा तैर्हरिपुङ्गवैः संपूर्णा वसुधा बभूवेति योजयन्ति । अपरेतु कलमकेदारैर्यथा कलमकेदारसदृशैः हरिपुङ्गवैः संपूर्णा वसुधा वसुन्धरेव कलमकेदारभूरिव बभूवेत्याहुः । उपमानद्वित्वं व्यञ्जयितुमुपमावाचकद्वयं प्रयुञ्जते कवयः । यथा " उद्धृत्य मेघैस्तत एव तोयमर्थं मुनीन्द्रैरिव संप्रणीताः । आलोकयामास हरिः पतन्तीर्नदीः स्मृतीर्वेदमिवाम्बुराशिं " इति ॥ ९४ ॥ अथ सह्यमलयातिक्रमणानन्तरं । राजीवलोचन इति समुद्रदर्शनाय महेन्द्रशिखरारोहणकुतूहलित्वमुक्तं ॥ ९५—९७ ॥ वेलावनस्योन्नतत्वादवरुह्येत्युक्तं । रमयतां श्रेष्ठ इत्यनेन समुद्रसंभ्रमप्रदर्शनेन लक्ष्मणादिरञ्जकत्वं व्यञ्जितं

ति० तत्रानुक्तमपिवासत्रयमन्यद्वोध्यं । आग्निवेश्योक्तेः । तेसर्वेवानराः आनुपूर्व्येण सेनासंनिवेशक्रमेण ॥ ९७ ॥

[पा०] १ झ. ट. रम्याः. २ क. ख. पीतोदकास्तत्र. ३ क. ख. घ. ङ. च. ज.—ट. बभञ्जुर्वानराः. ४ झ. ट. पिबन्तःखस्थास्ते. ५ ग. ज. झ. ट. नदन्तो. ६ ख. ट. प्रपिबन्त्यपि. ७ च. झ. ट. आरुरोहमहाबाहुः. ८ क. ख. ग. च. ज. ञ. सलिलाशयं. झ. ट. सलिलाकुलं.

एते वयमनुप्राप्ताः सुग्रीव वरुणालयम् ॥ इहेदानीं विचिन्ता सा या नः पूर्वं समुत्थिता ॥ १०० ॥
अतः परमतीरोऽयं सागरः सरितां पतिः ॥ न चायमनुपायेन शक्यस्तरितुमर्णवः ॥ १०१ ॥
तदिहैव निवेशोस्तु मन्त्रः प्रस्तूयतामिति ॥ यथेदं वानरबलं परं पारमवाप्नुयात् ॥ १०२ ॥
इतीव स महाबाहुः सीताहरणकर्शितः ॥ रामः सागरमासाद्य वासमाज्ञापयत्तदा ॥ १०३ ॥
सर्वाः सेना निवेश्यन्तां वेलायां हरिपुङ्गव ॥ संप्राप्तो मन्त्रकालो नः सागरस्यास्य लङ्घने ॥ १०४ ॥
स्वांस्वां सेनां समुत्सृज्य मा च कश्चित्कुतो व्रजेत् ॥ गच्छन्तु वानराः शूरा ज्ञेयं छन्नं बलं च नः ॥१०५॥
रामस्य वचनं श्रुत्वा सुग्रीवः सहलक्ष्मणः ॥ सेनां न्यवेशयत्तीरे सागरस्य द्रुमायुते ॥ १०६ ॥
विरराज समीपस्थं सागरस्य च तद्बलम् ॥ मधुपाण्डुजलः श्रीमान्द्वितीय इव सागरः ॥ १०७ ॥
वेलावनमुपागम्य ततस्ते हरिपुङ्गवाः ॥ विनिविष्टाः परं पारं काङ्क्षमाणा महोदधेः ॥ १०८ ॥
तेषां निविशमानानां सैन्यसन्नाहनिस्स्वनः ॥ अन्तर्धाय महानादमर्णवस्य प्रशुश्रुवे ॥ १०९ ॥
सा वानराणां ध्वजिनी सुग्रीवेणाभिपालिता ॥ त्रिधा निविष्टा महती रामस्यार्थपराऽभवत् ॥११०॥
सा महार्णवमासाद्य हृष्टा वानरवाहिनी ॥ वायुवेगसमाधूतं पश्यमाना महार्णवम् ॥ १११ ॥
दूरपारमसंबाधं रक्षोगणनिषेवितम् ॥ पश्यन्तो वरुणावासं निषेदुर्हरियूथपाः ॥ ११२ ॥
चण्डनक्रग्रहं घोरं क्षपादौ दिवसक्षये ॥ हसन्तमिव फेनौघैर्नृत्यन्तमिव चोर्मिभिः ॥ ११३ ॥
चन्द्रोदयसमुद्भूतं प्रतिचन्द्रसमाकुलम् ॥ चण्डानिलमहाग्राहैः कीर्णं तिमितिमिङ्गिलैः ॥ ११४ ॥

॥ ९८—९९ ॥ चिन्ता समुद्रतरणोपायचिन्ता ॥ १०० ॥ अतीरः अविद्यमानतीरः । जलप्राय इतियावत् । अनुपायेन उपायं विनेत्यर्थः । प्रसज्यप्रतिषेधे नञ्समासः ॥ १०१ ॥ मन्त्रः कार्यविचारः । प्रस्तूयतां आरभ्यतां । इति वक्ष्यमाणप्रकारेण ॥ १०२ ॥ इतिवेत्यनेन सेनानिवेशनियोगे सागरतरणोपायविचारः अहृदयो हेतुः । वस्तुतस्तु सीताहरणक्लेश एव हेतुरिति व्यज्यते ॥ १०३—१०४ ॥ कुतः कुतश्चिद्धेतोः । शूराः वानराः गच्छन्तु सर्वतः सञ्चरन्तु । किमर्थमित्यत्राह—ज्ञेयमिति । नः अस्माकं । भयं भयनिमित्तं । छन्नं ज्ञेयं तत्र तत्र निलीनैः शत्रुभिः प्रायशः प्रहारसंभवादिति भावः ॥ १०५ ॥ द्रुमायुते द्रुमैर्युक्ते । मिश्रणार्थाद्यौतेर्निष्ठा ॥ १०६ ॥ सागरस्य समीपस्थं तद्बलं मधुपाण्डुजलः मधुवत्पिङ्गलजलः । द्वितीयः सागर इव विरराजेत्युत्प्रेक्षा ॥ १०७—१०८ ॥ अन्तर्धाय स्थित इति शेषः ॥ १०९ ॥ त्रेधा त्रिप्रकारैः वलयत्रयाकारेणेति यावत् । वानरगोपुच्छभल्लूकभेदेन त्रेधेति वा ॥ ११० ॥ पश्यमाना पश्यन्ती सती । हृष्टा अभूदिति शेषः ॥ १११ ॥ दूरं पारं यस्य दूरपारं विशालमित्यर्थः । असंबाधं संबाधरहितं । अक्षोभ्यमित्यर्थः । रक्षोगणनिषेवितं समुद्रे रक्षांसि वसन्तीति प्रसिद्धिः ॥ ११२ ॥ चण्डनक्रैः करणैः ग्रहः ग्रहणं यस्य स तथोक्तः तं । " सूर्यादौ ग्रहणे युद्धे पूतनादावनुग्रहे । उपरागे च निर्बन्धे स्वर्भानौ च ग्रहः स्मृतः " इति निघण्टुः ॥ दिवसक्षये क्षपादौ सन्ध्यायामित्यर्थः । घोरं वर्धमानत्वाद्भयङ्करं ॥११३॥ समुद्भूतं उल्लसितं । प्रतिवीचि प्रतिबिम्बितचन्द्रत्वात् प्रतिचन्द्रैः समाकुलं । चण्डानिलमहाग्राहैः चण्डानिलसदृशवेगमहाग्राहैरित्यर्थः । तिमयः शतयोजनायता महामत्स्याः । तानपि भक्षयितुं क्षमास्तिमिङ्गिलाः । तिमीन्निगिरतीति व्युत्पत्तेः । " गृ निग-

ती० वासमाज्ञापयदित्यस्यैवनिवेशोस्त्वित्युक्तनिवेशनप्रकारविशेषविधानार्थत्वान्नपुनरुक्तिः ॥ १०३ ॥ ती० वानराणांध्वजिनी ऋक्षगोलाङ्गूलानामपिवानरावान्तरजातीयत्वात्सर्वेषामपिवानरत्वोक्तिः ॥ ११० ॥ स० क्षपादौ क्षपायाआदिर्मुख्यः अधिपतिरितियावत् । तस्मिंश्चन्द्रमसिसति ॥ ११३ ॥

[पा०] १ ग—च. झ. ञ. ट. सागरस्येह. २ ग. नचकश्चित्कुतश्चन. क. ख. नचकश्चिदितो. ३ क.—ङ. ज. झ. ञ. भयंचनः. ४ ङ. ज. झ. ट. निविष्टाश्च. क. ख. निविष्टाःपरमंपारं. च. निविष्टास्ते. ५ झ. ट. चण्डनक्रग्राहघोरं. घ. क्षपनक्रमहं. ६ ख. घ.—ज. समाधूतं.

दीप्तभोगैरिवाकीर्णं भुजङ्गैर्वरुणालयम् ॥ अवगाढं महासत्त्वैर्नानाशैलसमाकुलम् ॥
सुदुर्गं दुर्गमार्गं तमगाधमसुरालयम् ॥ ११५ ॥
मकरैर्नागभोगैश्च विगाढा वातलोलिताः ॥ उत्पेतुश्च निपेतुश्च प्रवृद्धा जलराशयः ॥ ११६ ॥
अग्निचूर्णमिवाविद्धं भास्वराम्बु महोरगम् ॥ सुरारिविषयं घोरं पातालविषमं सदा ॥ ११७ ॥
सागरं चाम्बरप्रख्यमम्बरं सागरोपमम् ॥ सागरं चाम्बरं चेति निर्विशेषमदृश्यत ॥ ११८ ॥
संपृक्तं नभसाऽप्यम्भः संपृक्तं च नभोम्भसा ॥ तादृरूपे स्म दृश्येते तारारत्नसमाकुले ॥ ११९ ॥
समुत्पतितमेघस्य वीचिमालाकुलस्य च ॥ विशेषो न द्वयोरासीत्सागरस्याम्बरस्य च ॥ १२० ॥
अन्योन्यमाहताः सक्ताः सस्वनुर्भीमनिस्स्वनाः ॥ ऊर्मयः सिन्धुराजस्य महाभेर्य इवाहवे ॥१२१॥
रत्नौघजलसन्नादं विषक्तमिव वायुना ॥ उत्पतन्तमिव क्रुद्धं यादोगणसमाकुलम् ॥ १२२ ॥
ददृशुस्ते महोत्साहा वाताहतजलाशयम् ॥ अनिलोद्धूतमाकाशे प्रवल्गन्तमिवोर्मिभिः ॥ १२३ ॥

रणे " इति धातुः । ग्रोचि इति लत्वं । तदुक्तं पुराणे —" अस्ति मत्स्यस्तिमिर्नाम शतयोजनमायतः । तिमिङ्गिलगिलोप्यस्ति तद्गिलोप्यस्ति सागरे " इति ॥ ११४ ॥ दीप्तभोगैः शिरोरत्नकान्त्या प्रकाशितफणैरिव स्थितैः । महासत्त्वैः जलगजशिंशुमारादिभिः । सुदुर्गं यादोभिः । दुर्गमार्गं दुर्गमं । नौपथसञ्चारायोग्यमित्यर्थः । योगरूढिभ्यां वरुणावासवरुणालयपदद्वयनिर्वाहः ॥ ११५ ॥ तदानीं सागरमुत्प्रेक्षते—मकरैरिति ॥ नागभोगैः सर्पकायैः । विगाढाः प्रविष्टाः । वातलोलिताः वायुचलिताः । अतएव प्रवृद्धाः जलराशयः तरङ्गाः । उत्पेतुश्च निपेतुश्च । उत्पत्य निपेतुरिति भावः ॥ ११६ ॥ अथ सागराम्बरयोः सर्वथा साम्यं वर्णयति—अग्निचूर्णमित्यादिना ॥ रात्रौ सागरस्य सलिलशीकराः अग्निचूर्णा इव दृश्यन्त इति प्रसिद्धिः । अतो भास्वराण्यम्बूनि शीकररूपाणि यस्य तथोक्तं । अतएवाविद्धं आकीर्णं । अग्निचूर्णमिव सागरे दृश्यते । अम्बरं च कीर्णैर्नक्षत्रैस्तथा दृश्यते । भास्वराम्बु विमलतुहिनं च । महान्त उरगा यस्मिन् तन्महोरगं । इदमप्युभयत्रापि समानं । आकाशे गन्धर्वादीनामिव नागानामपि सञ्चारसम्भवात् । राह्वादिरूपोरगसंभवाद्वा । सुरारयः असुरा राक्षसाश्च तेषां विषयं आवासभूतं । इदमप्युभयत्र तुल्यं । पातालविषमं पातालवत् गम्भीरं । इदमप्युभयत्र तुल्यं । घोरं भयङ्करं । इदमप्युभयत्र तुल्यं । एवमुक्तविशेषणविशिष्टं सागरं सागरः । अम्बरप्रख्यं अम्बराभं । उक्तविशेषणविशिष्टमम्बरं च सागरोपममदृश्यतेत्याकृष्य योजना । न केवलं साम्यं सर्वथा साम्यं चेत्याह—सागरमिति ॥ क्लीबत्वमार्षं ॥ ११७—११८ ॥ प्रकारान्तरेणापि उक्तं साम्यं दर्शयति—संपृक्तमिति ॥ संपृक्तं संसृष्टं । तुल्यवर्णमितियावत् । हिशब्दो हेतौ । तादृरूपे अन्योन्यतुल्यरूपे । तारारत्नसमाकुले सागराम्बरे दृश्येते स्म ॥ ११९ ॥ समुत्पतितेति । मेघवीचिमालयोर्बिम्बप्रतिबिम्बभावेनोपमानत्वं ॥ १२०॥ प्रथमं सक्ताः अथ आहता इत्यन्वयः ॥१२१॥ रत्नौघेत्यादिश्लोकद्वयं ॥ रत्नौघजलयोः सन्नादो यस्मिन् । अनेन वेगवद्वायुजनितक्षोभातिशयादन्तर्गतरत्नानामुद्गमनमवगम्यते । वायुना विषक्तमिव वायुना एकीभूतमिव । यादोगणसमाकुलं यादांसि जलजन्तवः तेषां गणेन समाकुलं । वाताहतजलाशयं जलाशयः समुद्रः वाताहतश्चासौ जलाशयश्चेति कर्मधारयः तं ऊर्मिभिः आकाशे वल्गन्तमिव स्थितं । एतन्निरूपणार्थमेव अनिलोद्धतमिति पुनरुक्तिः ॥१२२

स० तारारत्नसमाकुले एकंनभस्तारासमाकुलं । अपरं रत्नसमाकुलमितिते । तारारत्नैः नक्षत्रश्रेष्ठैः तथा तारारत्नैः मुक्ताश्रेष्ठैरितिनागोजिभट्टः । तत्पक्षे " तारःशुद्धमौक्तिके " इतिविश्वोक्तेःस्त्रीलिङ्गस्ताराशब्दस्तद्वाचीमृग्यः । तारेषुमुक्तासुआरत्नैः अतिश्रेष्ठैरितितद्विनेयैःक्लिष्टकल्पनयासमाधेयं ॥ १२० ॥ इतिचतुर्थःसर्गः ॥ ४ ॥

[पा०] १ ख. भुजगैर्भुजगालयं. २ ङ. झ. ट. प्रहृष्टाः. ३ ख. ग. ङ. च. ज.—ट. विषयं. ४ ख. ग. ङ. च. ज.—ट. अन्योन्यैराहताः. ५ ख. सस्वरंभीमविक्रमाः. ६ ङ. छ. झ. ट. इवांबरे. ७ क. ख. ग. ङ.—ट. महात्मानो. ८ ङ. झ. ट. प्रलपन्तमिवो.

ततो विस्मयमापन्ना ददृशुर्हरयस्तदा ॥ भ्रान्तोर्मिजलसन्नादं प्रलोलमिव सागरम् ॥ १२४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्थः सर्गः ॥ ४ ॥

पञ्चमः सर्गः ॥ ५ ॥

समुद्रवेलावलोकनाद्युद्दीपकसमुद्दीपितविरहशोकेनरामेण लक्ष्मणंप्रति सीतामुद्दिश्यसपरिशोचनंबहुधाविलापः ॥ १ ॥ तथा लक्ष्मणसमाश्वासितेनतेन सायंसन्ध्योपासनम् ॥ २ ॥

सा तु नीलेन विधिवत्स्वारक्षा सुसमाहिता ॥ सागरस्योत्तरे तीरे साधु सेना निवेशिता ॥ १ ॥
मैन्दश्च द्विविदश्चोभौ तत्र वानरपुङ्गवौ ॥ विचेरतुश्च तां सेनां रक्षार्थं सर्वतो दिशम् ॥ २ ॥
निविष्टायां तु सेनायां तीरे नदनदीपतेः ॥ पार्श्वस्थं लक्ष्मणं दृष्ट्वा रामो वचनमब्रवीत् ॥ ३ ॥
शोकश्च किल कालेन गच्छता ह्यपगच्छति ॥ मम चापश्यतः कान्तामहन्यहनि वर्धते ॥ ४ ॥
न मे दुःखं प्रिया दूरे न मे दुःखं हृतेति वा ॥ एतदेवानुशोचामि वयोस्या ह्यतिवर्तते ॥ ५ ॥
वाहि वात यतः कान्ता तां स्पृष्ट्वा मामपि स्पृश ॥ त्वयि मे गात्रसंस्पर्शश्चन्द्रे दृष्टिसमागमः ॥६॥

—१२३॥ ततइति विशेषाभिधानार्थत्वान्न पुनरुक्तिः । भ्रान्तोर्मिजलसन्नादमिति । घूर्णिततरङ्गजलसन्नादो यस्मिन् तं प्रलोलमिव उद्भ्रान्तमिव ॥ १२४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्थः सर्गः ॥ ४ ॥

एवं कृतज्ञत्वमित्रानुरोधित्वपरीक्ष्यकारित्वमहोत्साहत्वादयःशरण्यत्वौपयिका रामगुणा दर्शिताः । अथ रामस्य कारुण्यरूपं प्रधानगुणं दर्शयितुं सर्गान्तरमारभते—सा त्विति ॥स्वारक्षा आसमन्ताद्रक्षन्तीत्यारक्षाः शोभनाः आरक्षाः यस्याः सातथोक्ता । विधिवत् नीतिशास्त्रोक्तरीत्या । सुसमाहिता निराकुला । निवेशिता ॥ १ ॥ दिशमिति जात्येकवचनं । दिश इत्यर्थः । " उभसर्वतसोः—" इत्यादिना द्वितीया । सर्वत इति सप्तम्यर्थे तसिः । दिशां सर्वेषु प्रदेशेष्वित्यर्थः ॥ २—३ ॥ समुद्रवेलावनाद्युद्दीपकदर्शनादुद्भूतं विरहशोकं सोढुमशक्नुवन् सौमित्रिं प्रत्याह—शोकश्चेत्यादिना ॥ प्रथमश्चकारोऽवधारणे । द्वितीयस्त्वर्थः । शोकः इष्टवस्त्वन्तरवियोगजनितः शोकः । गच्छता कालेन अपगच्छति । किलेत्यैतिह्ये । गच्छत्येवेति प्रसिद्धमिति लौकिका वदन्ति । कान्तामपश्यतो मम तु शोकः । अहन्यहनि वर्धते । लौकिकशोकविलक्षणोमम शोक इतिभावः ॥ ४ ॥ ननु शत्रुहृताया दूरे स्थितायास्तस्याः प्रत्याहरणसमर्थस्य तव किं शोकेनेत्याशङ्क्य न तद्विषयोयं शोकः किंतूपभोगयोग्यस्य प्रियावयसो वैफल्यानुस्मरणादित्याह—न म इति ॥ प्रिया दूरे स्थितेति मे न दुःखं । सुग्रीवेण प्रस्थानेन तस्य निवर्त्यत्वात् । प्रबलरक्षसा हृतेति मे दुःखं नास्ति । तस्य तच्छिरःकृन्तनापनोद्यत्वात् । एतदेवानुशोचामि । इदमेकमेव शोकनिमित्तं । वयोस्या ह्यतिवर्तते गतं यौवनं न प्रत्याहर्तुं शक्यमितिभावः । अत्र यौवनमतिवर्तत इति नार्थः । नित्ययौवनत्वात्तस्याः । किंतु वयोतिवर्तते । व्यर्थतयैवयातीतिभावः । मानुषभावानुसारेण चेदं वचनं ॥ ५ ॥ प्रियास्पृष्टद्रव्यस्पर्शस्य विनोदहेतुत्वात्तत्संपादनार्थं वायुं प्रार्थयते—वाहीति ॥ हे वात मेकान्ता यतः यत्र वसति तत्र वाहि गच्छ । तत्रगत्वाकिंकरणीयमित्यत्राह—तामिति । न चैतदन्यतः सेत्स्यतीति सदृष्टान्तं दर्शयति—दृष्टिसमागमः चन्द्रे यथा चन्द्राधीनः । तथा मे तद्गात्रसंस्पर्शोपि । त्वयि त्वदधीनः । तथा तदवलोकितं चन्द्रं पश्यन्

स० सासेनात्रित्यन्वयः । असाधुषा असाधूनां सा हिंसाययेति । तदर्थस्तुरिपुनाशिका ॥ १ ॥ ति० नन्वचिरात्प्रत्याहरिष्यामःकिंशोकेनेत्यत्रतत्रैवविघ्नशङ्क्यादुःखमित्याह—नमेइति । प्रियादूरेस्थितेतिमेदुःखंनास्ति । स्त्रीधर्मदिवसवत् । तथाहृतेत्यपि नदुःखं । प्रबलदुष्कर्मवशंप्राप्तत्वात् । अपिचस्यावयः प्राणावस्थितिकालः । अतिवर्तते । मासद्वयमात्रंजीवनमित्युक्तेः । तत्रापि

[पा०] १ ह्म. ञ. ट. जाल. २ क. ख. प्रालोलमिव. ३ ग. च. विधिनास्वारक्षा. ख. विधिवत्सुरक्षा.

तन्मे दहति गात्राणि विषं पीतमिवाशये ॥ हा नाथेति प्रिया सा मां ह्रियमाणा यदब्रवीत् ॥७॥
तद्वियोगेन्धनवता तच्चिन्ताविपुलार्चिषा ॥ रात्रिंदिवं शरीरं मे दह्यते मदनाग्निना ॥ ८ ॥
अवगाह्यार्णवं स्वप्स्ये सौमित्रे भवता विना ॥ कथंचित्प्रज्वलन्कामः स मा सुप्तं जले दहेत् ॥ ९ ॥
बह्वेतत्कामयानस्य शक्यमेतेन जीवितुम् ॥ यदहं सा च वामोरूरेकां धरणिमाश्रितौ ॥ १० ॥
केदारस्येव केदारः सोदकस्य निरूदकः ॥ उपस्नेहेन जीवामि जीवन्तीं यच्छृणोमि ताम् ॥ ११ ॥
कदा नु खलु सुश्रोणीं शतपत्रायतेक्षणाम् ॥ विजित्य शत्रून्द्रक्ष्यामि सीतां स्फीतामिव श्रियम्॥१२॥
कदा नु चारुबिम्बोष्ठीं तस्याः पद्ममिवाननम् ॥ ईषदुन्नम्य पास्यामि रसायनमिवातुरः ॥ १३ ॥
तस्यास्तु संहतौ पीनौ स्तनौ तालफलोपमौ ॥ कदा नु खलु सोत्कम्पौ श्लेष्यन्त्या मां भजिष्यतः १४

तत्प्रणालिकया तां दृष्टवानस्मि । तद्वत् तदङ्गस्पृष्टं त्वां स्पृशन् तामेव स्पृष्टवान्भवेयमित्यर्थः ॥ ६ ॥ न केवलं वयोतिवर्तनस्मरणमेव व्यथाहेतुः किंतु कारणान्तरमप्यस्तीत्याह—तदिति ॥ तद्वचनं मे आशये हृदये । स्थितं सत् । सदा स्मर्यमाणंसदित्यर्थः । पीतं विषमिव गात्राणि प्रत्यवयवं । दहति । किं तद्वचनं तत्राह—हा नाथेति । सा सर्वान्भोगान्परित्यज्य मया सहागता । ह्रियमाणा सती रावणेन हरणसमये "न त्वां कुर्मि दशग्रीव भस्म भस्मार्ह तेजसा" इत्युक्तरीत्या पातिव्रत्याग्निना भस्मीकर्तुं समर्थापि "तत्तस्य सदृशं भवेत्" इत्युक्तरीत्या हा नाथेति मन्नाथत्वमेव पुरस्कृत्य मां यदब्रवीत् तन्मे गात्राणि दहति । एतेन रामशोकः सीताविषयकारुण्यमित्यवगम्यते । परदुःखदुःखित्वं हि कारुण्यं ॥ ७ ॥ अथ संतापो जलप्रवेशं विना न शाम्यतीति वक्तुं तस्याग्नित्वं सावयवं रूपयति—तद्वियोगेति ॥ मदनाग्निवर्धकत्वेन वियोगस्येन्धनरूपत्वं । संततत्वेन चिन्ताया ज्वालात्वरूपणं । रात्रिंदिवमिति । "अचतुर—" इत्यादिना सूत्रेण साधुत्वं । शीतलाशीतलकालाविशेषेण दह्यत इत्यर्थः ॥ ८ ॥ सौमित्रे कान्तास्मारकेण भवता विना अर्णवमवगाह्य स्वप्स्ये । अनेन लक्ष्मणस्य शेषावतारत्वमुक्तं । अर्णवशयनं हि शेषिणैव किं प्रयोजनमित्यत्राह—कथंचिदिति । इदानीं प्रज्वलन् स कामः जले सुप्तं मां कथंचिद्दहेत् कृच्छ्राद्दहेत् मन्दीभवेदित्यर्थः ॥ ९ ॥ एवं दुःसहदुःखाक्रान्तस्यापि मम जीवनधारणशक्तिस्तया सह एकधरण्याश्रयणात्तज्जीवनप्रवृत्त्युपलम्भाच्च जायत इत्याह—बह्वित्यादिना श्लोकद्वयेन ॥ अहं सा वामोरूश्च एकां धरणिमाश्रितावेति यत् एतद्बहु भूरि जीवनसाधनं । अतः एतेन कामयानस्य विरहिणो मम जीवितुं शक्यं । एकशय्याश्रयणन्यायेन कामिनोरेकधरण्याश्रयणमपि जीवनसाधनं भवतीत्यभिप्रायः ॥ जीवन्तीं तां शृणोमीति यत् तेन । निरूदकः निरुदकः । केदारः वप्रं । सोदकस्य केदारस्य उपस्नेहेन उपक्लेदेनेव जीवामि ॥ १०—१२ ॥ रसायनं शरीरसिद्धिकरमौषधविशेषं । आतुरः रोगी । "आतुरोभ्यमितोभ्यान्तः" इत्यमरः ॥ १३ ॥ संहतौ श्लिष्टौ ॥१४—

बहुदिवसात्यया ॥ शि० एतदेवानुशोचामि । एतेनप्रबलेनैतदुःखेनपूर्वदुःखंतिरोहितमितिसूचितं ॥ ५ ॥ शि० त्वयि सीतास्पर्शविशिष्टे । मेगात्रसंस्पर्शः चन्द्रेदृष्टिसमागमः चक्षुस्संयोगः । यथाचन्द्रेदृष्टिसमागमस्तापशामकः तथा सीतास्पर्शवतित्वयि ममस्पर्शोपितापशामकइत्यर्थः ॥ ती० यद्वा यतोयत्र कान्तावर्तते तत्र वाहि संचर । त्वात्मानंस्पृशन्तंवायुंप्रत्येवमुक्तं । मद्गात्रसंस्पर्शस्तस्याःसिध्येदितिभावः ॥ ६ ॥ ती० "कथंचित्प्रज्वलन्कामःसमासुप्तेजनेदहेत्" इतिपाठे जने सुप्तेसति कथंचित्प्रज्वलन्कामः । समादहेत् । सः कामः । तंजनं नबाधेतेत्यर्थः । तस्माद्भवताविना त्वांविहाय । अर्णवमवगाह्यस्वप्स्ये इतिसंबन्धः ॥ ति० सौमित्रे भवताविनाऽहमेकएकार्णवमवगाह्यस्वप्स्ये । एवंसतिप्रज्वलन्कामः जलेसुप्तंनदहेत् । जलस्याग्निविरोधित्वात् । मनोमूलकामस्यसुप्तौ मनउपरमेणोपरमाच्चेतिभावः । भवताविनेत्युक्तिरेकाकित्वेननिद्राप्राप्त्यै ॥ शि० भवताविनेत्युक्त्या जाग्रदेवलंतिष्ठेतिसूचितं । तेनत्वद्विश्लेषनिकटेनागच्छलितिहेतुःसूचितः । तेनसीतातिरिक्तविषये तदानींदिदृक्षाभावः सूचितः । स० भवताविना तवशीतबाधाभवेदित्यर्थः ॥ ९ ॥

[पा०] १ झ. ट. एवंचप्रज्वलन्. २ ङ. च. झ. ट. नमांसुप्तं. ३ ङ. झ. ट. सुचारु. ४ ग. च. छ. झ. ट. तौतस्याः सहितौ. क. ख. ज. तौतस्याःसंहितौ. ५ क—ट. हसन्त्या.

सा नूनमसितापाङ्गी रक्षोमध्यगता सती ॥ मन्नाथा नाथहीनेव त्रातारं नाधिगच्छति ॥ १५ ॥
कथं जनकराजस्य दुहिता सा मम प्रिया ॥ राक्षसीमध्यगा शेते क्षुषा दशरथस्य च ॥ १६ ॥
कदाऽविक्षोभ्यरक्षांसि सा विधूयोत्पतिष्यति ॥ विधूय जलदान्नीलाञ्शशिरेखा शरत्स्विव ॥ १७ ॥
स्वभावतनुका नूनं शोकेनानशनेन च ॥ भूयस्तनुतरा सीता देशकालविपर्ययात् ॥ १८ ॥
कदा नु राक्षसेन्द्रस्य निधायोरसि सायकान् ॥ सीतां प्रत्याहरिष्यामि शोकमुत्सृज्य मानसम् ॥ १९ ॥
कदा नु खलु मां साध्वी सीता सुरसुतोपमा ॥ सोत्कण्ठा कण्ठमालम्ब्य मोक्ष्यत्यानन्दजं पयः ॥ २० ॥
कदा शोकमिमं घोरं मैथिली विप्रयोगजम् ॥ सहसा विप्रमोक्ष्यामि वासः शुक्लेतरं यथा ॥ २१ ॥
एवं विलपतस्तस्य तत्र रामस्य धीमतः ॥ दिनक्षयान्मन्दरुचिर्भास्करोस्तमुपागमत् ॥ २२ ॥
आश्वासितो लक्ष्मणेन रामः संध्यामुपासत ॥ स्मरन्कमलपत्राक्षीं सीतां शोकाकुलीकृतः ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चमः सर्गः ॥ ५ ॥

षष्ठः सर्गः ॥ ६ ॥

रावणेन मन्त्रिणः प्रति हनुमत्कृतलङ्कादहनादिदुष्करकर्मानुवादपूर्वकं सैन्यैस्सहरामागमनसंभावनया तत्प्रतीकाराय मन्त्रिनियोजनम् ॥ १ ॥

लङ्कायां तु कृतं कर्म घोरं दृष्ट्वा भयावहम् ॥ राक्षसेन्द्रो हनुमता शक्रेणेव महात्मना ॥
अब्रवीद्राक्षसान्सर्वान्ह्रिया किंचिदवाङ्मुखः ॥ १ ॥
धर्षिता च प्रविष्टा च लङ्का दुष्प्रसहा पुरी ॥ तेन वानरमात्रेण दृष्टा सीता च जानकी ॥ २ ॥
प्रासादो धर्षितश्चैत्यः प्रवरा राक्षसा हताः ॥ आविला च पुरी लङ्का सर्वा हनुमता कृता ॥ ३ ॥

१६ ॥ अविक्षोभ्यरक्षांसीत्येकं पदं । अविक्षोभ्याणि दुराधर्षाणि रक्षांसि ॥ १७ ॥ देशकालविपर्ययात् देशकालयोर्व्यत्यासात् । सुखावहयोर्देशकालयोरपगमात्तद्विरुद्धयोरुपगमाच्चेत्यर्थः ॥ १८ ॥ सीतां प्रत्याहरिष्यामि शोकमुत्सृज्य मानसमिति । सीतां प्रत्याहृत्य कदा नु शोकमुत्सक्ष्यामीत्यर्थः । आस्यं व्यादाय स्वपितीतिवत्साधुः ॥ १९—२० ॥ शुक्लेतरं मलिनं ॥ २१—२२ ॥ उपासत उपास्त । भ्रातुरपि लक्ष्मणस्य पुरतो रघुनाथस्यैवंविधवचनप्रयोगस्तस्य सर्वविधसेवकत्वात् । अतो नानौचित्यं ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चमः सर्गः ॥ ५ ॥

एवं रामवृत्तान्तमुक्त्वा हनुमन्निर्गमकालानन्तरकालिकं रावणवृत्तान्तं वक्तुमुपक्रमते—लङ्कायामिति ॥ घोरं दुर्दर्शम् । शक्रेणेव शक्रतुल्येन । " इवेन सह नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम् " इति विभक्तेरलोपः ॥ १ ॥ वानरमात्रेण वानरजातीयेन । वानरेष्वल्पेनेति यावत् ॥ २ ॥ चैत्यः प्रासादः नगरप्रधानभूतः प्रासादः ।

स० दिनक्षयात् अहःक्षयात् । मन्दवपुः मन्दरश्मिः ॥ २२ ॥ रामानु० उपासत उपास्त । वचनव्यत्ययआर्षः । उपागमदिति वापाठः ॥ ती० स्मरन्निति हेतौशतृप्रत्ययः । सीतास्मरणाद्धेतोः शोकाकुलीकृतः ॥ २३ ॥ इतिपञ्चमःसर्गः ॥ ५ ॥

स० महात्मनाशक्रेणेवेत्यनेन हनुमत्कृतकर्मणः " इन्द्रोवृत्रंहत्वामहानास " इत्युक्तरीत्यामहेन्द्रकृतिसाध्यत्वेपिरावणसुतजितेन्द्रप्रयत्नाविषयत्वंसूचयति ॥ १ ॥ ति० वानरमात्रेण एकेननिरायुधेनचेत्यर्थः ॥ २ ॥ शि० चैत्यः देवविशेषाविष्टःप्रासादः ॥ ३ ॥

[पा०] १ क. ग. ङ. च. ज.—ट. ममचप्रिया. ख. परमप्रिया. २ ङ. झ. ट. अविक्षोभ्यानिरक्षांसि. ३ ङ. ज. झ. ट. लेखा. क. ख. च. छ. ञ. लेखेवशारदी. ४ ङ. झ. ट. मेसाध्वी. ख. सासाध्वी. ५ क.—च. झ. ञ. ट. न्मन्दवपुः. ६ क. ग. ङ. च. झ. ञ. ट. मुपागतः. ७ क. ख. ग. मुपाविशत्. ८ ख. सर्वं. ९ ख. च. छ. आकुलाच.

किं करिष्यामि भद्रं वः किं वा युक्तमनन्तरम् ॥ उच्यतां नः समर्थं यत्कृतं च सुकृतं भवेत् ॥४॥
मन्त्रमूलं हि विजयं प्राहुरार्या मनस्विनः ॥ तस्माद्वै रोचये मन्त्रं रामं प्रति महाबलाः ॥ ५ ॥
त्रिविधाः पुरुषा लोके उत्तमाधममध्यमाः ॥ तेषां तु समवेतानां गुणदोषौ वदाम्यहम् ॥ ६ ॥
मन्त्रिभिर्हितसंयुक्तैः समर्थैर्मन्त्रनिर्णये ॥ मित्रैर्वापि समानार्थैर्बान्धवैरपि वा हितैः ॥ ७ ॥
सहितो मन्त्रयित्वा यः कर्मारम्भान्प्रवर्तयेत् ॥ दैवे च कुरुते यत्नं तमाहुः पुरुषोत्तमम् ॥ ८ ॥
एकोर्थं विमृशेदेको धर्मे प्रकुरुते मनः ॥ एकः कार्याणि कुरुते तमाहुर्मध्यमं नरम् ॥ ९ ॥
गुणदोषावनिश्चित्य त्यक्त्वा धर्मव्यपाश्रयम् ॥ करिष्यामीति यः कार्यमुपेक्षेत्स नराधमः ॥ १० ॥
यथेमे पुरुषा नित्यमुत्तमाधममध्यमाः ॥ एवं मन्त्रा हि विज्ञेया उत्तमाधममध्यमाः ॥ ११ ॥
ऐकमत्यमुपागम्य शास्त्रदृष्टेन चक्षुषा ॥ मन्त्रिणो यत्र निरतास्तमाहुर्मन्त्रमुत्तमम् ॥ १२ ॥
बह्व्योपि मतयो भूत्वा मन्त्रिणामर्थनिर्णये ॥ पुनर्यत्रैकतां प्राप्ताः स मन्त्रो मध्यमः स्मृतः ॥ १३ ॥
अन्योन्यं मतिमास्थाय यत्र संप्रतिभाष्यते ॥ न चैकमत्ये श्रेयोस्ति मन्त्रः सोधम उच्यते ॥ १४ ॥
तस्मात्सुमन्त्रितं साधु भवन्तो मतिमत्तमाः ॥ कार्यं संप्रतिपद्यन्तामेतत्कृत्यं मतं मम ॥ १५ ॥
वानराणां हि वीराणां सहस्रैः परिवारितः ॥ रामोऽभ्येति पुरीं लङ्कामस्माकमुपरोधकः ॥ १६ ॥

आविला दाहेन आकुला ॥ ३ ॥ अनन्तरं किं वा युक्तं यन्नः समर्थं हितं । " समर्थस्त्रिषु शक्तिस्थे संबन्धार्थे हितेपि च " इत्यमरः । यत्कृतं अनुष्ठितं । सुकृतं स्वनुष्ठितं । भवेत् फलवद्भवेत् । तादृशं किं उच्यतां करिष्यामि । वो भद्रमस्त्वित्यन्वयः ॥ ४ ॥ बलवतस्तव किं मन्त्रेणेत्याशङ्क्य सर्वेषामपि विजयस्य मन्त्रमूलत्वान्मयापि मन्त्रः करणीय इत्याह—मन्त्रमूलमिति ॥ ५ ॥ मन्त्रस्य करणीयत्वेपि स्वयमेव संमन्त्र्यतां किं बहुभिरित्याशङ्क्य बहुभिः सह मन्त्रयितुरेवोत्तमत्वं वक्तुं प्रतिज्ञापूर्वकं क्रमेण मन्त्रयितृभेदानाह—त्रिविधा इत्यादिना ॥ समवेतानां संकीर्णस्वरूपाणां । लक्षणज्ञानं विना विवेक्तुमशक्यानामित्यर्थः । गुणदोषौ उत्तमलक्षणं गुणं अधमलक्षणं दोषं । मध्यमलक्षणं मिश्रणं ॥ ६ ॥ हितसंयुक्तैः हितपरैः । समानार्थैः समानसुखदुःखैः । कर्मारम्भान् आरम्भणीयकर्माणि । दैवे दैवसमाश्रयणे । कुरुते ॥ ७—८ ॥ धर्मे पूर्वोक्तदैवसमाश्रयणे । मनः मनःपूर्वं यत्नं ॥९॥ गुणदोषौ हिताहिते । अनिश्चित्य दैवव्यपाश्रयं त्यक्त्वा करिष्यामीत्युपक्रम्ययः कार्यमुपेक्षेत् उपेक्षेत न समाप्नुयात् ॥ १०—११ ॥ उक्तत्रैविध्यं मन्त्रेप्यतिदिशति—ऐकमत्यमिति ॥ ऐकमत्यं एकां मतिं उपागम्य । शास्त्रदृष्टेन स्वभ्यस्तशास्त्रेण । राजदन्तादित्वात्परनिपातः । तद्रूपेण चक्षुषा उपलक्षिताःमन्त्रिणः यत्र मन्त्रे निरताः तं उत्तममन्त्रमाहुः ॥ १२ ॥ यत्र मन्त्रे । मन्त्रिणां मतयः बह्व्यः बहुधा भूत्वापि । अर्थनिर्णये अर्थनिर्णयरूपफलविषये । एकतां प्राप्ता भवन्ति स मन्त्रो मध्यमः स्मृतः । नीतिज्ञैरितिशेषः ॥ १३ ॥ यत्र मन्त्रे । मन्त्रिभिः अन्योन्यं मतिं स्वां स्वां बुद्धिं । आस्थाय प्रधानीकृत्य । संप्रतिभाष्यते व्यवह्रियते । अनेनोत्तममन्त्रव्यावृत्तिरुक्ता । मध्यममन्त्रव्यावृत्त्यर्थमाह—न चेति । ऐकमत्ये तेषां मन्त्रिणां श्रेयश्च प्रीतिश्च नास्ति स मन्त्रोधम उच्यते ॥ १४ ॥ सुमन्त्रितं सुनिश्चितं । साधु समीचीनं । कार्यं संप्रतिपद्यन्तां ऐकमत्येन जानन्तु । एतत् ऐकमत्येन सुनिश्चितं कार्यं । मम कृत्यं अतिशयेन कर्तव्यं ॥ १५ ॥ गतं तु गतमेव किं मन्त्र-

[पा०] १ ङ. च. छ. झ. ञ. ट. प्रवदन्तिमनस्विनः. २ क.—घ. च. छ. ज. गुणंदोषं. ३ ङ. झ. मन्त्रस्त्रिभिर्हि संयुक्तः. ४ क. च. ञ. ट. बान्धवैर्वासमाहितैः. ५ ख. ङ.—ट. दैवव्यपाश्रयं. ६ क. ख. ङ. च. झ. ञ. ट. मन्त्रोपिविज्ञेयउत्तमाधममध्यमः. ७ ङ. झ. ट. बह्वीरपिमतीर्गत्वामन्त्रिणामर्थनिर्णयः । पुनर्यत्रैकतांप्राप्तः. ८ ख. च. छ. मन्त्रिणो मन्त्रनिर्णये. ९ क. ख. ग. च. छ. ञ. मन्त्रिसत्तमाः. ङ. ज. झ. ट. मतिसत्तमाः. १० कार्यसंप्रतिपद्यतामित्यर्धस्यस्थाने क. च. छ. पाठेषु. इतीमंमन्त्रयन्राजाकार्यंतत्प्रतिपद्यते । तस्मात्संमन्त्र्यतांसर्वैरेतत्कृत्यंमतंमम ॥ इतिश्लोकोदृश्यते. ११ च. छ. सवानराणां. १२ ङ. झ. ट. धीराणां.

तरिष्यति च सुव्यक्तं राघवः सागरं सुखम् ॥ तरसा युक्तरूपेण सानुजः सबलानुगः ॥
समुद्रमुच्छोषयति वीर्येणान्यत्करोति वा ॥ १७ ॥
[खरो येन हतः संख्ये तस्य वीर्येण लक्ष्यते ॥ १८ ॥]
अस्मिन्नेवंगते कार्ये विरुद्धे वानरैः सह ॥ हितं पुरे च सैन्ये च सर्वं संमन्त्र्यतां मम ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षष्ठः सर्गः ॥ ६ ॥

सप्तमः सर्गः ॥ ७ ॥

राक्षसैरावणंप्रति कुबेरविजयादितदपादानप्रशंसनपूर्वकं रामस्यततोप्यल्पबलत्वोक्त्या कैमुत्येनतत्पराजयस्यसुकरत्वोक्तिः ॥ १ ॥ तथेन्द्रजिदपादानप्रशंसनपूर्वकं रामविजयायतन्नियोजनोक्त्या समाश्वासनम् ॥ २ ॥

इत्युक्ता राक्षसेन्द्रेण राक्षसास्ते महाबलाः ॥ ऊचुः प्राञ्जलयः सर्वे रावणं राक्षसेश्वरम् ॥
द्विषत्पक्षमविज्ञाय नीतिबाह्यास्त्वबुद्धयः ॥ १ ॥
राजन्परिघशक्त्यृष्टिशूलपट्टिशसंकुलम् ॥ सुमहन्नो बलं कस्माद्विषादं भजते भवान् ॥ २ ॥
त्वया भोगवतीं गत्वा निर्जिताः पन्नगा युधि ॥ कैलासशिखरावासी यक्षैर्बहुभिरावृतः ॥
सुमहत्कदनं कृत्वा वश्यस्ते धनदः कृतः ॥ ३ ॥
स महेश्वरसख्येन श्लाघमानस्त्वया विभो ॥ निर्जितः समरे रोषाल्लोकपालो महाबलः ॥ ४ ॥

करणे इतःकिं नद्विछन्नमित्यत आह—वानराणामिति॥ अभ्येति अभ्येष्यति । " वर्तमानसामीप्ये वर्तमानवद्वा " इति वर्तमाननिर्देशः । उपरोधकः उपरोद्धुं । क्रियार्थायां क्रियायां ण्वुल् ॥१६॥ सागरे विद्यमाने कथमस्मानुपरोत्स्यति तत्राह—तरिष्यतीति सार्धश्लोकः ॥ उच्छोषयति उच्छोषयिष्यति । अन्यत्सेतुबन्धादिकं वा । करोति करिष्यति ॥ १७—१८ ॥ अस्मिन् लङ्कानिरोधनरूपे कार्ये । एवंगते उक्तरीत्या प्रवृत्ते । वानरैः सह विरुद्धे विरोधे च प्राप्ते । भावे निष्ठा । पुरादिषु हितं यत्तत्सर्वं संमन्त्र्यतामित्यर्थः ॥ १९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षष्ठः सर्गः ॥ ६ ॥

एवं रावणवचनमाकर्ण्य अविदितरघुनाथप्रभावा मदोद्धता राक्षसास्तद्बलवर्णनपूर्वकं रावणं प्रशंसन्ति—इत्युक्ता इत्यादिना । सार्धश्लोक एकान्वयः । द्विषत्पक्षं द्विषद्बलं । " पक्षो मासार्धके पार्श्वे गृहे सूर्यविरोधयोः । केशादेः परितो वृन्दे बले सखिसहाययोः " इति विश्वः ॥ १ ॥ परिघः परितो हननक्षमो गदाविशेषः । " परिघः परिघातनः " इत्यमरः । शक्तिः दीर्घयष्टिः । ऋष्टिः असिः । " खड्गे तु निस्त्रिंशचन्द्रहासासिऋष्टयः " इत्यमरः । शूलं प्रसिद्धं । पट्टिशः खड्गविशेषः । तैः संकुलं व्याप्तं । बलमस्ति समग्रबले एवं विद्यमाने कस्माद्धेतोः भवान् विषादं भजत इति योजना । अत्र सुमहन्नो बलमित्यत्र बलं नास्तीति प्रामादिका भाव्यनर्थसूचिकाखिलोक्तिः ॥ २ ॥ तिष्ठतु सैन्यं त्वमेक एव समस्तशत्रुविद्रावणक्षम इत्याशयेनाह—त्वयेत्यादिना ॥ सार्धश्लोक एकान्वयः । भोगवतीं सर्पराजनगरीं । कदनं

ति० प्रथमान्तपाठे सगरस्यगोत्रापत्यंसागरइति रामविशेषणं ॥ तदा सागरमितिद्वितीयान्तमन्यत्पदमध्याहार्यं ॥ १७ ॥ इतिषष्ठःसर्गः ॥ ६ ॥

ति० तत्रादौदुर्मन्त्रिणांदुर्मन्त्रमाह—**इत्युक्ताइति** । यतोनीतिबाह्याः अतएवाबुद्धयः तेराक्षसाः द्विषत्पक्षस्यरामसुग्रीवादेर्बलमविज्ञाय ज्ञात्वापिमोहाद्विगणय्यवा प्राञ्जलयस्सन्तोरावणमूचुः॥ १॥**ति०** तदेवप्रपञ्च्यते—**सइति** । सः धनदः । महेश्वरसख्येन हेतुना स्वयंश्लाघमानोपि लोकपालोपि त्वयासमरेरोषान्निर्जितः ॥ **स०** श्लाघमानः अहंत्र्यंबकसखः मत्सदृशोऽन्योनास्तीत्यात्मा-

[पा०] १ इदमर्धं घ. पाठेदृश्यते. २ क. ग. ङ. च. तस्मिन्नेवंगते. झ. ट. तस्मिन्नेवंविधे. ३ घ. निरुद्धे. ४ क. ग. संमन्त्र्यतामिति. ५ घ. अविज्ञायात्मनःपक्षं. ६ ङ. झ. कुन्तलं.

[1]विनिहत्य च यक्षौघान्विक्षोभ्य च विगृह्य च ॥ त्वया कैलासशिखराद्विमानमिदमाहृतम् ॥ ५ ॥
मयेन दानवेन्द्रेण त्वद्भयात्सख्यमिच्छता ॥ दुहिता तव भार्यार्थे दत्ता राक्षसपुङ्गव ॥ ६ ॥
दानवेन्द्रो मधुर्नाम वीर्योत्सिक्तो दुरासदः ॥ विगृह्य वशमानीतः कुम्भीनस्याः सुखावहः ॥ ७ ॥
निर्जितास्ते महाबाहो नागा गत्वा रसातलम् ॥ वासुकिस्तक्षकः शङ्खो जटी च वशमाहृताः ॥ ८ ॥
अक्षया बलवन्तश्च शूरा लब्धवराः पुनः ॥ त्वया संवत्सरं युद्ध्वा समरे दानवा विभो ॥ ९ ॥
स्वबलं समुपाश्रित्य नीता वशमरिन्दम ॥ मायाश्चाधिगतास्तत्र बहवो रक्षसाधिप ॥ १० ॥
[निर्जिताः समरे रोषाल्लोकपाला महाबलाः ॥ देवलोकमितो गत्वा शक्रश्चापि विनिर्जितः ॥] ॥ ११ ॥
शूराश्च बलवन्तश्च वरुणस्य सुता रणे ॥ निर्जितास्ते महाबाहो चतुर्विधबलानुगाः ॥ १२ ॥
मृत्युदण्डमहाग्राहं शाल्मलिद्रुममण्डितम् ॥ कालपाशमहावीचिं यमकिङ्करपन्नगम् ॥ १३ ॥
[महाज्वरेण दुर्धर्षं यमलोकमहार्णवम् ॥] अवगाह्य त्वया राजन्यमस्य बलसागरम् ॥
जयश्च विपुलः प्राप्तो मृत्युश्च प्रतिषेधितः ॥ १४ ॥
सुयुद्धेन च ते सर्वे लोकास्तत्र विलोलिताः ॥ १५ ॥
क्षत्रियैर्बहुभिर्वीरैः शक्रतुल्यपराक्रमैः ॥ आसीद्वसुमती पूर्णा महद्भिरिव पादपैः ॥ १६ ॥
तेषां वीर्यगुणोत्साहैर्न समो राघवो रणे ॥ प्रसह्य ते त्वया राजन्हताः परमदुर्जयाः ॥ १७ ॥
तिष्ठ वा किं महाराज श्रमेण तव वानरान् ॥ अयमेको महाबाहुरिन्द्रजित्क्षपयिष्यति ॥ १८ ॥
अनेन हि महाराज माहेश्वरमनुत्तमम् ॥ इष्ट्वा यज्ञं वरो लब्धो लोके परमदुर्लभः ॥ १९ ॥
शक्तितोमरमीनं च विनिकीर्णान्त्रशैवलम् ॥ गजकच्छपसंबाधमश्वमण्डूकसंकुलम् ॥ २० ॥

युद्धं ॥ ३—४ ॥ विमानं पुष्पकं ॥ ५ ॥ दुहिता मन्दोदरी । यद्यपि मयेनाभिजात्यभ्रमाद्दत्तेत्युत्तरे वक्ष्यति तथाप्यत्र प्रशंसायां भयाद्दत्तेत्युक्तं ॥ ६ ॥ दानवेन्द्रः मधुः । कुम्भीनसी रावणभगिनी । सुखमावहतीति सुखावहः भर्ता ॥ ७ ॥ जटी सर्पविशेषस्य नाम । त्वया भोगवतीमित्यत्र तक्षकादिभिन्नकर्कोटकादिजयोक्तिरिति न पौनरुक्त्यं ॥ ८ ॥ अक्षया इत्यादिश्लोकद्वयमेकान्वयं ॥ लब्धवराः ब्रह्मणेति शेषः । अक्षयाः चूर्णीकरणेपि पुनरुत्पत्तिमत्त्वेन क्षयरहिता इत्यर्थः । दानवाः कालकेयाः । तत्र कालकेयसकाशात् । बहवः बह्वयः । " वोतो गुणवचनात् " इति पक्षे ङीषभावः ॥ ९—११ ॥ चतुर्विधबलानुगाः रथगजतुरगपदातिभेदेन चतुर्विधानि बलानि पृष्ठगानि येषां ते तथा ॥ १२ ॥ मृत्युदण्डेत्यादिश्लोकद्वयमेकान्वयं ॥ मृत्युदण्डः यमदण्डः स एव महाग्राहः महानक्रः यस्मिन् । शाल्मलयः कण्टकशाल्मलिवृक्षाकारायुधविशेषाः त एव द्रुमाः तैर्मण्डितं । मृत्युः यमः । प्रतिषेधितः युद्धादपक्रामितः ॥ १३—१४ ॥ सुयुद्धेनेत्यर्धं ॥ सुयुद्धेन स्वल्पयुद्धेनेत्यर्थः । विलोलिताः द्राविताः ॥ १५ ॥ क्षत्रियैः अनरण्यप्रभृतिभिः ॥ १६ ॥ न समो राघव इति । तेभ्योपि निहीनबलः सुखेन निग्राह्य इति भावः ॥ १७—१८ ॥ माहेश्वरं महेश्वरप्रीतिकरं ॥ १९ ॥ शक्तितोमरेत्यादिश्लोकत्रयमेकान्वयं ॥ २०—

नंश्लाघमानः ॥ ४ ॥ ति० नजयमात्रं अपितुसर्वंखापहारोपीत्याह—**विनिपात्येति** । इदंविमानं पुष्पकं ॥ ५ ॥ ति० शाल्मलिद्रुमैः यातनावृक्षैः मण्डितं । सागरोपिद्वीपेषुवृक्षमण्डितोभवति ॥ १३ ॥ ति० एवंदिव्यंजयमुक्त्वाभौमंजयमाहुः—**क्षत्रियैरिति** ॥ १६ ॥

[पा०] १ क. ख. ग. ङ. च. ज—ट. विनिपात्यच. २ क. ख. ग. ङ. ज. झ. ट. महाबाहोवीर्यो. ३ घ. महाबलः. ४ घ. युध्वाविभोरत्नाकरेतदा. ५ च. छ. झ. ट. बह्वयोवैराक्षसाधिप. ६ अयंश्लोकःप्राचीनकोशेषुनदृश्यते. ७ क. ग. महाभागाश्चतुर्विध. ख. च. ञ. महाराज. ङ. झ. ट. महाभाग. ८ इदमर्धं ङ—ट. पाठेषुदृश्यते. ९ क. ख. घ.—ट. सुतोषिताः. १० क. ग. गुणोत्सेकैः. ११ ङ. च. छ. झ. ञ. ट. समरदुर्जयाः. १२ क. ख. ङ.—ट. महाराजइन्द्रजित्.

रुद्रादित्यमहाग्राहं मरुद्वसुमहोरगम् ॥ रथाश्वगजतोयौघं पदातिपुलिनं महत् ॥ २१ ॥
अनेन हि समासाद्य देवानां बलसागरम् ॥ गृहीतो दैवतपतिर्लङ्कां चापि प्रवेशितः ॥ २२ ॥
पितामहनियोगाच्च मुक्तः शम्बरवृत्रहा ॥ गतस्त्रिविष्टपं राजन्सर्वदेवनमस्कृतः ॥ २३ ॥
तमेव त्वं महाराज विसृजेन्द्रजितं सुतम् ॥ यावद्वानरसेनां तां सरामां नयति क्षयम् ॥ २४ ॥
राजन्नापदयुक्तेयमागता प्राकृताज्ञनात् ॥ हृदि नैव त्वया कार्या त्वं वधिष्यसि राघवम् ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तमः सर्गः ॥ ७ ॥

अष्टमः सर्गः ॥ ८ ॥

प्रहस्तादिभीरावणंप्रत्यात्मश्लाघनपूर्वकं रामादिवधप्रतिज्ञानेन समाश्वासनम् ॥ १ ॥

ततो नीलाम्बुदनिभः प्रहस्तो नाम राक्षसः ॥ अब्रवीत्प्राञ्जलिर्वाक्यं शूरः सेनापतिस्तदा ॥ १ ॥
देवदानवगन्धर्वाः पिशाचपतगोरगाः ॥ न त्वां धर्षयितुं शक्ताः किं पुनर्वानरा रणे ॥ २ ॥
सर्वे प्रमत्ता विश्वस्ता वञ्चिताः स्म हनूमता ॥ न हि मे जीवतो गच्छेज्जीवन्स वनगोचरः ॥ ३ ॥
सर्वां सागरपर्यन्तां सशैलवनकाननाम् ॥ करोम्यवानरां भूमिमाज्ञापयतु मा भवान् ॥ ४ ॥
रक्षां चैव विधास्यामि वानराद्रजनीचर ॥ नागमिष्यति ते दुःखं किंचिदात्मापराधजम् ॥ ५ ॥
अब्रवीत्तु सुसंक्रुद्धो दुर्मुखो नाम राक्षसः ॥ इदं न क्षमणीयं हि सर्वेषां नः प्रधर्षणम् ॥ ६ ॥
अयं परिभवो भूयः पुरस्यान्तःपुरस्य च ॥ श्रीमतो राक्षसेन्द्रस्य वानरेण प्रधर्षणम् ॥ ७ ॥
अस्मिन्मुहूर्ते हत्वैको निवर्तिष्यामि वानरान् ॥ प्रविष्टान्सागरं भीममम्बरं वा रसातलम् ॥ ८ ॥

॥ २१ ॥ दैवतपतिः इन्द्रः ॥ २२—२३ ॥ विसृज प्रेषय । यावन्नयति नेष्यति ॥ २४ ॥ अयुक्ता असंभाविता । प्राकृतात् क्षुद्रात् हनुमतः ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तमः सर्गः ॥ ७ ॥

एवं मन्त्रिभिः सहसंमन्त्र्य भूयोभिहिते सकलसचिवप्रधानः प्रहस्तः स्वाभिमतमर्थं राज्ञे निवेदयति—तत इति ॥ १—२ ॥ हनुमतः पौरुषं प्रत्यक्षतो दृष्ट्वा कथमेवमुच्यत इत्यत्राह—सर्व इति ॥ विश्वस्ताः परिभवितुमस्मान् कोपि न शक्त इति विश्वस्ताः विस्रब्धाः । प्रासादिकशत्रुपरिभवो न न्यूनतामापादयतीतिभावः ॥ ३—४ ॥ आत्मापराधः सीताहरणरूपो व्यतिक्रमः ॥ ५ ॥ हि यस्माद्वानरेण कृतमिदं कर्म सर्वेषां नः प्रधर्षणरूपं । भूयः तदुपरि पुरस्यान्तःपुरस्य च परिभवरूपं । अथच राक्षसेन्द्रस्य प्रधर्षणरूपं । अतो न क्षमणीयमित्यर्थः ॥ ६—७ ॥ ततः किं करिष्यसीत्यत आह—अस्मिन्निति ॥ ८—९ ॥

स० दैवतपतिः इन्द्रः । लङ्कायां तत्रापिकारागृहइतिशेषः । सागरमित्यर्धर्चादिः । अतोमहदितिपूर्वश्लोकस्थविशेषणंयुक्तं । " दीप्तानलार्कद्युतिमप्रमेयं " इत्यत्रप्रमेयदीपिकायामप्रमेयत्वस्यद्युताविवमहदित्यस्यबहुव्रीहिघटकपुलिनपदार्थेवान्वयः । अतो नपुंसकत्वोपपत्तिः । महान्तमितिलिङ्गविपर्यासोवा । दैवतशब्दग्रहणेनतेषांनपुंसकत्वंध्वन्यते ॥ २२ ॥ ति० पितामहस्य चतुर्मुखस्यरुद्रस्य । यदिज्यातोलब्धवरः तन्नियोगात् तदाज्ञया । सर्वस्यजगतःप्रजापतिःपिता । भगवांश्चतुर्मुखरुद्रःपितामहः । भगवान्हिरण्यगर्भःप्रपितामहः । अतएवादित्यरुद्रवसुप्रधानाःसर्वश्राद्धदेवताःसर्वयज्ञदेवताः । ससुरासुरसर्वप्रजोपास्यस्यसर्वस्वभूताश्चेतिकतकः । शंबरंवृत्रंहन्ति सः ॥ स० सर्वदेवनमस्कृतइत्युपहासः ॥ २३ ॥ इतिसप्तमःसर्गः ॥ ७ ॥

रामानु० जीवतइत्यनादरेषष्ठी ॥ ३ ॥ रामानु० करोमि अचिरादेवकरिष्यामि । " वर्तमानसामीप्येवर्तमानवद्वा " इतिभविष्यदर्थेलट् ॥ स० करोमीत्यनेनलट्प्रयोगेण विलंबासहत्वंसूचयति ॥ ४ ॥ स० शौर्यमदेनरजनीचरेत्युक्तिः ॥ ५ ॥ ति० भूयः पुनः । पुरस्य अन्तःपुरस्यचार्यपरिभवोदाहरूपोनक्षमणीयइत्यनुषङ्गः । वानरेन्द्रप्रधर्षणं तज्जंराक्षसेन्द्रस्यदुःखं । अह-

[पा०] १ ग. घ. च. छ. ज. ञ. लंङ्कायांच. २ ङ. छ. झ. ञ. ट. नीलांबुदप्रख्यः. ३ झ ट. पुनर्मानवौ. ४ घ. वीरांश्चरजनीचरान्. ५ ङ. झ. ट. वानरेन्द्रप्रधर्षणं. ६ ङ. झ. ट. गत्वैको.

ततोऽब्रवीत्सुसंक्रुद्धो वज्रदंष्ट्रो महाबलः ॥ प्रगृह्य परिघं घोरं मांसशोणितरूषितम् ॥ ९ ॥
किं वो हनुमता कार्यं कृपणेन तपस्विना ॥ रामे तिष्ठति दुर्धर्षे ससुग्रीवे सलक्ष्मणे ॥ १० ॥
अद्य रामं ससुग्रीवं परिघेण सलक्ष्मणम् ॥ आगमिष्यामि हत्वैको विक्षोभ्य हरिवाहिनीम् ॥ ११ ॥
इदं ममापरं वाक्यं शृणु राजन्यदीच्छसि ॥ उपायकुशलो ह्येव जयेच्छत्रूनतन्द्रितः ॥ १२ ॥
कामरूपधराः शूराः सुभीमा भीमदर्शनाः ॥ राक्षसा वा सहस्राणि राक्षसाधिप निश्चिताः ॥ १३ ॥
काकुत्स्थमुपसंगम्य बिभ्रतो मानुषं वपुः ॥ सर्वे ह्यसंभ्रमा भूत्वा ब्रुवन्तु रघुसत्तमम् ॥ १४ ॥
प्रेषिता भरतेन स्म भ्रात्रा तव यवीयसा ॥ [तवागमनमुद्दिश्य कृत्यमात्ययिकं त्विति ॥]
स हि सेनां समुत्थाप्य क्षिप्रमेवोपयास्यति ॥ १५ ॥
ततो वयमितस्तूर्णं शूलशक्तिगदाधराः ॥ चापबाणासिहस्ताश्च त्वरितास्तत्र याम ह ॥ १६ ॥
आकाशे गणशः स्थित्वा हत्वा तां हरिवाहिनीम् ॥ अश्मशस्त्रमहावृष्ट्या प्रापयाम यमक्षयम् ॥ १७ ॥
एवं चेदुपसर्पेतामनयं रामलक्ष्मणौ ॥ अवश्यमपनीतेन जहतामेव जीवितम् ॥ १८ ॥
कौम्भकर्णिस्ततो वीरो निकुम्भो नाम वीर्यवान् ॥ अब्रवीत्परमक्रुद्धो रावणं लोकरावणम् ॥ १९ ॥
सर्वे भवन्तस्तिष्ठन्तु महाराजेन सङ्गताः ॥ अहमेको हनिष्यामि राघवं सहलक्ष्मणम् ॥
सुग्रीवं च हनूमन्तं सर्वानेव च वानरान् ॥ २० ॥
ततो वज्रहनुर्नाम राक्षसः पर्वतोपमः ॥ क्रुद्धः परिलिहन्वक्त्रं जिह्वया वाक्यमब्रवीत् ॥ २१ ॥
स्वैरं कुर्वन्तु कार्याणि भवन्तो विगतज्वराः ॥ एकोऽहं भक्षयिष्यामि तान्सर्वान्हरियूथपान् ॥ २२ ॥
स्वैःस्थाः क्रीडन्तु निश्चिन्ताः पिबन्तो मधुवारुणीम् ॥ २३ ॥

कृपणेन गूढसंचारप्रकटितभयेन । तपस्विना शोच्येन ॥ १०—११ ॥ तद्वाक्यं किमित्याकाङ्क्षायामुपायप्रतिपादकं वाक्यं वक्तुमादावुपायं प्रशंसति—उपायेति ॥ १२ ॥ विवक्षितमुपायमेवाह—कामरूपेत्यादिना ॥ निश्चिताः निश्चितवन्तः । राक्षसा वा सहस्राणीति । सहस्रशब्दस्य संख्येयपरत्वेपि शब्दस्वाभाव्यान्नपुंसकत्वं । किमिति ब्रूयुस्तत्राह—प्रेषिता इति ॥ अस्यान्ते इतिकरणं द्रष्टव्यं ॥ १३—१५ ॥ ते वयं तत्र समीपे याम । यामेति लोटि रूपं ॥ १६—१७ ॥ एवं कृते किं स्यादित्यत्राह—एवं चेदिति ॥ रामलक्ष्मणौ अनयं अस्मत्कृतकैतवापरिज्ञानेन विश्वासं यद्युपसर्पेतां ततस्तेन अपनीतेन अपनयेन । जीवितं जहतामेव । जह्यातामेवेत्यर्थः ॥ १८—१९ ॥ सर्व इत्यादि सार्धश्लोकमेकं वाक्यं ॥ २० ॥ तत इत्यादिसार्धश्लोकत्रयमेकान्वयं ॥ २१—२२ ॥ मधुवारुणीं मधुरूपां वारुणीं । रणकुञ्जरं रणाप्रधृष्यं । स्वःस्था इत्यमङ्गलोक्तिः

मेकएवगत्वाभीत्यासागरादीनपिप्रविष्टान्वानरान्हत्वा निवर्तयिष्यामि प्रधर्षणदुःखंनिवर्तयिष्यामि ॥ ७—८ ॥ रामानु० निवर्तिष्यामि निवर्तिष्ये ॥ ८ ॥ रामानु० तपस्विना तपस्व्याहारभूतफलाशिनेत्यर्थः ॥ ती० कृपणेन दीनेन । प्रकाशसंचारेभयाद्रात्रौकृतकार्येणवा । तपस्विना शोच्येन । हनुमताकिं । अलक्ष्यस्यतस्यहननेन नप्रयोजनमितिभावः । कृपणादिशब्दानांपारुष्यमात्रेतात्पर्यं । नत्वर्थे । मातृगाम्यादिगालिदानवत् । तर्हिकोहन्तव्यस्तत्राह—रामेतिष्ठति अहतेतिष्ठतिसतिकिमनेनहतेनेत्यर्थः ॥ १० ॥ ती० अथरामस्यवास्तवार्थस्तु लक्ष्मणंरामंविनेतिशेषः । सुग्रीवंहत्वा आगमिष्यामीतिसंबन्धः ॥ ११ ॥ ती० विवृतं स्पष्टं । वपुः धृत्वेतिशेषः ॥ १४ ॥ ति० सूक्तां ओष्ठप्रान्तं ॥ २१ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. दूषितं. २ ङ—ट. किंनो. ३ ङ. झ. ट. सुग्रीवेपि. ४ क. ज. रक्षसांवै. घ. च. छ. झ. ञ. ट. राक्षसानां. ५ झ. ञ. ट. विवृतं. ६ च. छ. ञ. ट. भरतेनैव. ७ इदमर्धप्राचीनकोशेषुनदृश्यते. ८ छ. ञ. ट. यामते. ९ क. ङ. छ—ट. सुग्रीवंसहनूमन्तंसर्वांश्चैवात्र. १० ङ. झ. ट. परिलिहन्सूक्तां. ११ क. ङ. झ. ट. तांसर्वांहरिवाहिनीं. १२ स्वस्थाःक्रीडन्त्वित्यर्धात्पूर्वं क. छ. पाठयोः ततोमहोदरःक्रुद्धोरावणंवाक्यमब्रवीत् इत्यर्धमधिकंदृश्यते. १३ क.—घ. छ.—ट. पिबन्तु. १४ ङ. झ. ट. मधुवारुणं.

अहमेको वधिष्यामि सुग्रीवं सहलक्ष्मणम् ॥ अङ्गदं च हनूमन्तं रामं च रणकुञ्जरम् ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः ॥ ९ ॥

विभीषणेनरावणंप्रति रामवधप्रतिज्ञानेनसायुधग्रहणंसरभससमुत्थितनिकुंभादिनिवारणपूर्वकं रामपराक्रमप्रशंसनेन तस्मिन्दण्डस्यदुष्करत्वोक्त्या वैपरीत्येऽनर्थप्राप्तिकथनपूर्वकं रामायसीताप्रत्यर्पणचोदना ॥ १ ॥ ततःसायंरावणेन विभीषणादिसर्वजनविसर्जनपूर्वकंस्वगृहंप्रतिगमनम् ॥ २ ॥

ततो निकुम्भो रभसः सूर्यशत्रुर्महाबलः ॥ सुप्तघ्नो यज्ञहा रक्षो महापार्श्वो महोदरः ॥ १ ॥
अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः ॥ इन्द्रजिच्च महातेजा बलवान्रावणात्मजः ॥ २ ॥
प्रहस्तोथ विरूपाक्षो वज्रदंष्ट्रो महाबलः ॥ धूम्राक्षश्चातिकायश्च दुर्मुखश्चैव राक्षसः ॥ ३ ॥
परिघान्पट्टिशान्प्रासाञ्शक्तिशूलपरश्वधान् ॥ चापानि च सबाणानि खड्गांश्च विपुलाञ्शितान् ॥ ४ ॥
प्रगृह्य परमक्रुद्धाः समुत्पत्य च राक्षसाः ॥ अब्रुवन्रावणं सर्वे प्रदीप्ता इव तेजसा ॥ ५ ॥
अद्य रामं वधिष्यामः सुग्रीवं च सलक्ष्मणम् ॥ कृपणं च हनूमन्तं लङ्का येन प्रधर्षिता ॥ ६ ॥
तान्गृहीतायुधान्सर्वान्वारयित्वा विभीषणः ॥ अब्रवीत्प्राञ्जलिर्वाक्यं पुनः प्रत्युपवेश्य तान् ॥ ७ ॥
अप्युपायैस्त्रिभिस्तात योर्थः प्राप्तुं न शक्यते ॥ तस्य विक्रमकालांस्तान्युक्तानाहुर्मनीषिणः ॥ ८ ॥
प्रमत्तेष्वभियुक्तेषु दैवेन प्रहृतेषु च ॥ विक्रमास्तात सिध्यन्ति परीक्ष्य विधिना कृताः ॥ ९ ॥

॥ २३–२४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टमः सर्गः ॥ ८ ॥

अथ निकुम्भमतमेवानुसरन्तः सर्वेपि प्रधाना अहमहमिकया समुत्थाय शत्रुवधोद्युक्ताः । तमुद्योगं नीतिशास्त्रज्ञो विभीषणः प्रतिषिद्धवानित्याह । तत इत्यादि श्लोकषट्कमेकं वाक्यं ॥ आदौ निकुम्भोपादानं निकुम्भमतानुसरणसूचनार्थं ॥ १–४ ॥ समुत्पत्य आसनेभ्यः समुत्थाय ॥ ५ ॥ प्रधर्षितेत्यनन्तरमितिकरणं द्रष्टव्यं ॥ ६ ॥ क्रियाभेदात्तानित्यस्य न पुनरुक्तिः ॥ ७ ॥ प्रहस्तादीनां प्रधानानां संनिहितत्वाद्रावणिं वा रावणं वा प्रत्युक्तिः । मध्ये क्वचित्सचिवान्प्रति वोक्तिः । विक्रमस्य नायमवसर इति दर्शयितुं सामान्येन विक्रमकालानाह—अप्युपायैरिति ॥ तातेत्यभिमुखीकरणाय संबोधनं । त्रिभिः सामदानभेदरूपैः । उपायैरपि योर्थः लब्धुं न शक्यते तस्य सिद्धये । तान् नीतिशास्त्रप्रसिद्धान् । विक्रमकालान् युक्तानाहुः । तदुक्तं कामन्दकेन—" सामादीनामुपायानां त्रयाणां विफले नये । विनयेन्नयसंपन्नो दण्डं दण्ड्येषु दण्डभृत् " इति ॥ तथाच नायं दण्डस्य काल इत्युक्तं ॥ ८ ॥ न केवलं दण्डस्याकालिकत्वं दण्ड्यत्वं च ते शत्रोर्नास्तीत्यभिप्रायेणाह—प्रमत्तेष्विति ॥ प्रमत्तेषु अनवधानेषु । विषयासक्तेष्वित्यर्थः । अभियुक्तेषु ज्ञानिषु । विरक्तेष्विति यावत् । यद्वा सामन्तैराक्रान्तेषु । दैवेन भाग्येन । प्रहृतेषु क्षीयमाणसंपत्स्वित्य-

ति० कतकरीत्यात्रसर्गाविच्छेदः ॥ २४ ॥ इत्यष्टमः सर्गः ॥ ८ ॥

ति० कौंभकर्णिरेवायंनिकुंभः परैःसहितस्तंपुनराह ॥ शि० निकुंभादिनामत्वेनबहूनांसत्त्वान्नपौनरुक्त्यं ॥ १ ॥ ति० विपुलांबुभान् निर्मलजलकान्तीन् ॥ स० विपुलांबुभान् घनजलप्रकाशान् ॥ ४ ॥ स० अभियुक्तेषु आप्रहवत्सु । प्रमत्तेष्वभियुक्तेष्वितिपदमेकंवा । प्रमत्तानां परप्रतिभटानां इषुभिरभियुक्तेषु । दैवेनप्रहृतेषु अदृष्टशून्येषु । सिध्यन्ति फलोपलंभकाभवन्ति ॥ ९ ॥

[पा०] १ क.—ट. साङ्गदंच. २ ङ. झ. ट. सर्वांश्चैवात्रवानरान्. घ रामंचखरसूदनं. ३ ङ.—ट. यज्ञकोपश्च. ४ घ—छ. झ. ञ. ट. महापार्श्वमहोदरौ. ५ ख. ङ. च. झ. ञ. ट. धूम्राक्षोथनिकुंभश्च. ६ क. ख. ग. विपुलाञ्शुभान्, ङ. झ. ञ. ट. विपुलांबुभान्, ७ ठ. प्रहृतेषु.

अप्रमत्तं कथं तं तु विजिगीषुं बले स्थितम् ॥ जितरोषं दुराधर्षं प्रधर्षयितुमिच्छथ ॥ १० ॥
समुद्रं लङ्घयित्वा तु घोरं नदनदीपतिम् ॥ कृतं हनुमता कर्म दुष्करं तर्कयेत वा ॥ ११ ॥
बलान्यपरिमेयानि वीर्याणि च निशाचराः ॥ परेषां सहसाऽवज्ञा न कर्तव्या कथंचन ॥ १२ ॥
किं च राक्षसराजस्य रामेणापकृतं पुरा ॥ आजहार जनस्थानाद्यस्य भार्यां यशस्विनः ॥ १३ ॥
खरो यद्यतिवृत्तस्तु रामेण निहतो रणे ॥ अवश्यं प्राणिनां प्राणा रक्षितव्या यथाबलम् ॥ १४ ॥
अयशस्यमनायुष्यं परदाराभिमर्शनम् ॥ अर्थक्षयकरं घोरं पापस्य च पुनर्भवम् ॥ १५ ॥
एतन्निमित्तं वैदेही भयं नः सुमहद्भवेत् ॥ आहृता सा परित्याज्या कलहार्थे कृतेन किम् ॥ १६ ॥
न नः क्षमं वीर्यवता तेन धर्मानुवर्तिना ॥ वैरं निरर्थकं कर्तुं दीयतामस्य मैथिली ॥ १७ ॥
यावन्न सगजां साश्वां बहुरत्नसमाकुलाम् ॥ पुरीं दारयते बाणैर्दीयतामस्य मैथिली ॥ १८ ॥
यावत्सुघोरा महती दुर्धर्षा हरिवाहिनी ॥ नावस्कन्दति नो लङ्कां तावत्सीता प्रदीयताम् ॥ १९ ॥

र्थः । चकाराद्बालवृद्धादिषु । विधिना नीतिशास्त्रोक्तरीत्या । परीक्ष्य मन्त्रिभिर्विचार्य । कृताःविक्रमाः विग्रहाः सिध्यन्ति । नान्यत्रेत्यर्थः । यथाह कामन्दकः— "बालो वृद्धो दीर्घरोगी तथा ज्ञातिबहिष्कृतः । भीरुको भीरुकजनो लुब्धो लुब्धजनस्तथा ॥ विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिमान् । अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः ॥ दैवोपहतकश्चैव दैवचिन्तक एव च । दुर्भिक्षव्यसनोपेतो बलव्यसनसंयुतः ॥ अदेशस्थो बहुरिपुर्युक्तोऽकालेन यश्च सः । सत्यधर्मव्यपेतश्च विंशतिः पुरुषा अमी ॥ एतैः सन्धिं न कुर्वीत विगृह्णीयात्तु केवलं " इति ॥ ९ ॥ रामस्तु न तादृश इत्याह—अप्रमत्तमिति ॥ अप्रमत्तं सावधानं । तुशब्दोऽवधारणे । बले स्थितं स्थिरबलमित्यर्थः । जितरोषं अकाले रोषरहितमित्यर्थः । इच्छथेति । पूर्वं रावणंप्रतिवचनं । अत्र सर्वान्प्रतीति बहुवचनं ॥ १० ॥ राम इदानीं दैवानुपहत इत्यत्र उदाहरणमाह—समुद्रमिति ॥ ११ ॥ परेषां रामादीनां ॥ १२ ॥ अनपराधिनि निष्कारणवैरकरणमप्यपरमनुचितमित्याह—किं चेत्यादि ॥ खरवध एव प्रथमापराध इत्याशङ्क्याह—खर इति ॥ दुर्वृत्ततया स्ववधप्रवृत्तखरवधे रामस्य नापकारगन्धोपीति भावः । निहतो यदि तत्र को दोष इति शेषः । दोषाभावमाह—अवश्यमिति ॥ १३—१४ ॥ प्रथमं रामेणापकृतत्वेप्यनेकदोषमूलं सीतापहरणं न कार्यमित्याह—अयशस्यमिति ॥ पुनर्भवं जन्मान्तरं । मूर्त्यन्तरमितियावत् ॥ १५ ॥ एवं सामान्यतः परदाराभिमर्शनस्यानर्थहेतुत्वमुक्त्वा प्रकृते तद्दर्शयति—एतदिति ॥ एतस्मान्निमित्तादित्यर्थः । " निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम् " इति पञ्चम्यर्थे प्रथमा । अयशस्त्वादिहेतोर्वैदेह्याः सकाशात्सुमहद्भयं भवेत् । तर्हि किमिदानीं कर्तव्यं तत्राह—आहृतेति ॥ उत्तमं वस्तु कथं त्यक्तव्यं तत्राह—कलहार्थे कृतेन किमिति । कलहार्थे विषये कृतेन कर्मणा किमित्यर्थः । " अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने । व्यवहारे धने शास्त्रवस्तुहेतुनिवृत्तिषु " इति वैजयन्ती ॥ १६ ॥ बहुदोषप्रदर्शनपूर्वकं सीताप्रदानस्यावश्यकर्तव्यतामाह—न नः क्षममित्यादिना ॥ १७ ॥ यावद्दारयते दारयिष्यति । " यावत्पुरानिपातयोर्लट् " इतिभविष्यदर्थे लट् । राम इति शेषः ॥ १८ ॥ यावत् यदा । तावत्

जितरोषमित्यनेन पापाभावादैवोपहतत्वाभावउक्तः । इतरविशेषणत्रयेणान्योपरुद्धत्वाभावः । राक्षसाभिमुख्येनेच्छतेत्युक्तिः । अतएवोपरिनिशाचराइतिसंबोधनं ॥ ति० प्रकृतोविक्रमानर्हएवकालइत्याह—अप्रमत्तमिति । विजिगीषुं अनेनशश्वन्तरागहित्यं । बले दैवबले स्थितं । जितरोषमित्यनेन मौर्ख्यराहित्यं । दुराधर्षत्वेन दिव्यास्त्रसंपदुक्ता ॥ १० ॥ ती० यस्मात्तस्मादित्यध्याहार्यं । यस्मादवश्यंप्राणिनांप्राणारक्षितव्याः तस्मादितिव्यक्तं । स्वयमेवरामंहन्तुंप्रवृत्तःखरस्तुनिहतोयदि । एतेन पुराराक्षसराजस्यकिमपकृतं नापकृतमित्यर्थः ॥ १४ ॥ ती० पुनस्तदुपरिपापस्यच भवं उत्पत्तिस्थानं ॥ १५ ॥ ति० एतन्निमित्तं एतस्मा-

[पा०] १ क. ङ. च. छ. ञ. ट. गतिंहनुमतोलोकेकोविद्यात्तर्कयेतवा. २ ङ. ञ. सरामेणहतो. ३ क. ख. च. छ. ज. ञ. वैदेह्याभयं. ४ क. च. छ. ञ. पुनस्त्याज्या. ५ ङ. ञ. ट. नतुक्षमं. ६ घ. रामोदीयतां.

विनश्येद्धि पुरी लङ्का शूराः सर्वे च राक्षसाः ॥ रामस्य दयिता पत्नी स्वयं न यदि दीयते ॥ २० ॥
प्रसादये त्वां बन्धुत्वात्कुरुष्व वचनं मम ॥ हितं पथ्यमहं ब्रूमि दीयतामस्य मैथिली ॥ २१ ॥
पुरा शरत्सूर्यमरीचिसन्निभान्नवाग्रपुङ्खान्सुदृढान्नृपात्मजः ॥
सृजत्यमोघान्विशिखान्वधाय ते प्रदीयतां दाशरथाय मैथिली ॥ २२ ॥
त्यजस्व कोपं सुखधर्मनाशनं भजस्व धर्मं रतिकीर्तिवर्धनम् ॥
प्रसीद जीवेम सपुत्रबान्धवाः प्रदीयतां दाशरथाय मैथिली ॥ २३ ॥
विभीषणवचः श्रुत्वा रावणो राक्षसेश्वरः ॥ विसर्जयित्वा तान्सर्वान्प्रविवेश स्वकं गृहम् ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे नवमः सर्गः ॥ ९ ॥

दशमः सर्गः ॥ १० ॥

विभीषणेन रावणगृहमेत्यतंप्रति सीतानयनकालप्रभृतिलङ्कायामनर्थसूचकदुर्निमित्तप्रादुर्भावनिवेदनपूर्वकं तत्प्रायश्चित्तत्वेन रामायसीताप्रत्यर्पणचोदना ॥ १ ॥ रावणेन विभीषणंप्रति रामस्यालक्ष्यत्वोक्त्या तद्वचनानादरणेनगृहंप्रति तद्विसर्जनम् ॥ २ ॥

ततः प्रत्युषसि प्राप्ते प्राप्तधर्मार्थनिश्चयः ॥ राक्षसाधिपतेर्वेश्म भीमकर्मा विभीषणः ॥ १ ॥
शैलाग्रचयसंकाशं शैलशृङ्गमिवोन्नतम् ॥ सुविभक्तमहाकक्ष्यं महाजनपरिग्रहम् ॥ २ ॥

तदा । नावस्कन्दति न रुणद्धि ॥ १९ ॥ शूरा इति । विनश्येयुरिति व्यत्ययेन योजनीयं । स्वयं न यदि दीयत इति पाठः ॥ २० ॥ ब्रूमि ब्रवीमि । अस्य अस्मै ॥ २१ ॥ अग्रं शल्यं पुङ्खं शरमूलं नवे अग्रपुङ्खे यषां ते । अतएव सुदृढान् पुरा सृजति स्रक्ष्यति । दृशरथस्यायं दाशरथः । " तस्येदम् " इति संबन्धार्थे अण् । संबन्धश्चात्र पुत्रत्वं । दाशरथाय दाशरथये ॥ २२ ॥ रतिः सुखं ॥ २३ ॥ विभीषणेति । सर्वे प्रातरालोचयिष्याम इति विभीषणप्रमुखान् विसृज्येत्यर्थः ॥ २४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने नवमः सर्गः ॥ ९ ॥

अथ हितपरो विभीषणः सत्त्वोत्तरकाले रावणस्योपदेष्टुं तद्गृहं गत इत्याह—तत इत्यादि ॥ प्रविवेश महाद्युतिरित्यन्तमेकं वाक्यं । ततः प्रत्युषसीत्यनेन लङ्कादाहानन्तरमेकमहो गतमित्यवगम्यते । प्राप्तधर्मार्थनिश्चयः सीताप्रदानमेवास्माकं धर्मोर्थश्चेति कृतनिश्चयः । भीमकर्मा । परमार्थतो रावणस्य हितत्वेप्यनभिमतार्थविज्ञापनरूपसाहसकरणात् भीमकर्मेत्युक्तिः । राक्षसाधिपतेः अग्रजस्य । आलयं निवासभूतं । वेश्म प्रविवेशेति संबन्धः । शैलाग्रचयसंकाशं गिरिशिखरचयसदृशं । अनेकशृङ्गयुक्तत्वादितिभावः । शैलशृङ्गमिवोन्नतमित्यौन्नत्ये दृष्टान्तः । सुविभक्तमहाकक्ष्यं सुष्ठु विभक्तमहाप्रकोष्ठं । " कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने " इत्यमरः । महा-

रकारणात् ॥ १६ ॥ शि० यदिस्वयंरामस्यपत्नीनदीयते तर्हि लङ्काविनश्येत् । अतोदीयतां ॥ २० ॥ इतिनवमःसर्गः ॥ ९ ॥

ती० " राक्षसाधिपतेर्वेश्मप्रविवेशविभीषणः " इतिपाठेतु उत्तरषट्कस्यैतत्प्रपञ्चार्थत्वात् " अग्रजस्यालयंवीरःप्रविवेशमहाद्युतिः " इत्यनेनापौनरुक्त्यं । " राक्षसाधिपतेर्वेश्मभीमकर्माविभीषणः " इतिपाठे राक्षसाधिपतेरग्रजस्यालयं निवासभूतं वेश्मेत्यन्वयः । अस्मिन्पाठेतु वेश्मालययोरपौनरुक्त्यं । " आकेशग्रहणान्मित्रमहितेभ्योनिवारयेत् " इतिन्यायेनसर्वात्मनाहितमेववक्तव्यमित्यभिप्रेत्यरावणानभिमतहितोपदेशप्रवृत्तत्वाद्भीमकर्मेत्युक्तिः ॥ स० भीमकर्मा वैरिणां । भीमंरावणंप्रति कर्म

[पा०] १ ङ. ज.—ट. दीयतांपत्नी. २ क. ख. ग. ङ. झ. ट. तथ्यंत्वहं. च. छ. ज. ञ. तथ्यमहं. घ. तथ्यंत्वहंब्रूयां- ३ ख. ङ. च. छ. ञ. ट. शरान्सूर्य. ४ ज. पुङ्खान्विशिखान्. ख. पुङ्खान्सुशितान्. ५ ख. ङ. च. छ. ञ ट. त्यमोघान्नि. शितान्. ६ झ. ट. त्यजाशुकोपं. ७ घ. गृहंशुभं. ८ ख. घ. प्रविवेश.

मतिमद्भिर्महामात्रैरनुरक्तैरधिष्ठितम् ॥ राक्षसैश्चाप्तपर्याप्तैः सर्वतः परिरक्षितम् ॥ ३ ॥
मत्तमातङ्गनिश्वासैर्व्याकुलीकृतमारुतम् ॥ शङ्खघोषमहाघोषं तूर्यनादानुनादितम् ॥ ४ ॥
प्रमदाजनसंबाधं प्रजल्पितमहापथम् ॥ तप्तकाञ्चननिर्यूहं भूषणोत्तमभूषितम् ॥ ५ ॥
गन्धर्वाणामिवावासमालयं मरुतामिव ॥ रत्नसञ्चयसंबाधं भवनं भोगिनामिव ॥ ६ ॥
तं महाभ्रमिवादित्यस्तेजोविस्तृतरश्मिवान् ॥ अग्रजस्यालयं वीरः प्रविवेश महाद्युतिः ॥ ७ ॥
पुण्यान्पुण्याहघोषांश्च वेदविद्भिरुदाहृतान् ॥ शुश्राव सुमहातेजा भ्रातुर्विजयसंश्रितान् ॥ ८ ॥
पूजितान्दधिपात्रैश्च सर्पिर्भिः सुमनोक्षतैः ॥ मन्त्रवेदविदो विप्रान्ददर्श सुमहाबलः ॥ ९ ॥
स पूज्यमानो रक्षोभिर्दीप्यमानः स्वतेजसा ॥ आसनस्थं महाबाहुर्ववन्दे धनदानुजम् ॥ १० ॥
स राजदृष्टिसंपन्नमासनं हेमभूषितम् ॥ जगाम समुदाचारं प्रयुज्याचारकोविदः ॥ ११ ॥
स रावणं महात्मानं विजने मन्त्रिसन्निधौ ॥ उवाच हितमत्यर्थं वचनं हेतुनिश्चितम् ॥ १२ ॥
प्रसाद्य भ्रातरं ज्येष्ठं सान्त्वेनोपस्थितक्रमः ॥ देशकालार्थसंवादी दृष्टलोकपरावरः ॥ १३ ॥

जनैः विद्वद्भिः परिगृह्यत इति महाजनपरिग्रहं । तदधिष्ठितमित्यर्थः । महामात्रैः प्रधानैः । " महामात्राः प्रधानाः स्युः" इत्यमरः । आप्तपर्याप्तैः कार्यकरणदक्षैरिति महामात्रविशेषणं । व्याकुलीकृतमारुतं चक्रवातीकृतवायुं । शङ्खघोषमहाघोषं शङ्खघोषेण महान् घोषो यस्य तथोक्तं । तूर्यनादानुनादितं तूर्यनादेन सञ्जातप्रतिध्वनिं । प्रजल्पितमहापथं सञ्जातमहाकलकलमहामार्गं । तप्तकाञ्चननिर्यूहं द्रुतकनकमयमत्तवारणं । "निर्यूहो मत्तवारणः" इत्यमरः । भूषणोत्तमैः तोरणवितानप्रभृतिभिर्भूषितं । गन्धर्वाणामिवावासं । तौर्यत्रिकमुखरितत्वादितिभावः । मरुतां देवानां । आलयमिव । निरवधिकैश्वर्यसंपन्नत्वादितिभावः। रत्नसंचयैः संबाधं संपूर्णम् । अतएव भोगिनां सर्पाणां । भवनमिव स्थितं । तेजोविस्तृतरश्मिवान् तेजः शरीरकान्तिस्तदेव विस्तृतरश्मिरस्यास्तीति तथा । महाद्युतिः महाप्रभः । अभ्रमिवेत्युपमया तद्भवनं विभीषणस्य तेजोपहारकमितिव्यज्यते । एवं गृहोत्कर्षवर्णनं रावणस्यानीत्या सर्वमेकपदे नष्टमिति ज्ञापनाय ॥ १—७ ॥ पुण्यान् पुण्यकरान् । पुण्याहघोषान् पुण्याहमन्त्रघोषान् । विजयसंश्रितान् विजयफलकानित्यर्थः । उदाहृतान् उच्चारितान् ॥ ८ ॥ दधिपात्रैः दधियुक्तपात्रैः । मन्त्रवेदविदः मन्त्रब्राह्मणविदः । मन्त्राः कर्मसु विनियुक्ता इषेत्वेत्यादयः । कर्मचोदना ब्राह्मणानि ॥ ९ ॥ पूज्यमानः श्लाघ्यमानः ॥ १० ॥ दृष्टिसंपन्नं दृष्ट्या निवेदितमित्यर्थः । समुदाचारं जयशब्दप्रयोगादिसमुदाचारं । जगाम आरुरोह ॥ ११ ॥ विजने मन्त्रिव्यतिरिक्तजनरहिते । हेतुनिश्चितं हेतुभिर्युक्तिभिर्निश्चितं ॥ १२ ॥ प्रसाद्य स्तुतिवचनेन प्रसन्नं कृत्वा । सान्त्वेनोवाचेत्यन्वयः । उपस्थितक्रमः ज्ञातवचनक्रमः । देशकालार्थसंवादी देशकालप्रयोजनानुसारी । दृष्टलोकपरावरः लोके ये परावरे उत्कृष्टापकृष्टे ते दृष्टे ज्ञाते येन तथोक्तः । रामस्य धार्मिकत्वं रावणस्याधार्मिकत्वं च जानातीत्यर्थः

हितबोधनरूपंयस्येतिवा ॥ १ ॥ स० मत्तमातङ्गनिश्वासैरित्यनेन गजानांबाहुल्येनतच्छ्वासप्रादुर्भावेणतिरोगच्छतिवायुरितिभावः ॥ १४ ॥ ती० निर्यूहो द्वारं " निर्यूहःशिखरेद्वारे " इतिविश्वः । ति० प्रजल्पितमहापथं । आदिकर्मणिक्तः । प्रातःकालत्वारब्धजल्पमहामार्गं ॥५॥ ती० गन्धर्वाणामिवालयं तौर्यत्रिकमुखरितत्वात् । आलयंमरुतामिवऐश्वर्यातिशयात् । भवनंभोगिनामिव परैःप्रवेष्टुमशक्यत्वात् । आलयापेक्षयातमित्युक्तिः ॥ ६ ॥ ती० तेजोविस्तृतरश्मिवान् तेजः स्वशरीरस्थं तेनविस्तृताः विसृता विश्रुतावा रश्मयोयस्य । अनेनपाठत्रयंसूचितं । ति० तेजोविस्तृतरश्मिवान् तेजोभिर्विस्तृतारश्मयोयेषांसन्ति । तादृशमणिमानित्यर्थः । स० तेजोविस्तृतरश्मिमान् तेजः विस्तृतंयेषुतेरश्मयोऽस्यसन्तीतितथा । रश्मिमान् रश्मिवान् ॥ ७ ॥

[पा०] १ घ. मैहामात्यैः. २ ङ. ञ. ट. राक्षसैराप्त. घ. राक्षसैश्चापि. ३ क—ङ. ञ. ट. तूर्यसंबाधनादितं. ज. तूर्यसंघानुनादितं. च. छ. ञ. तूर्यसन्नाद. ४ क. संजल्पित. ५ क. बहुरत्नसमाकीर्णं. ६ क. पूजितान्घृतपात्रैश्चसुगन्धैः. च. छ. पूजितांस्तिलपात्रैश्च. ७ क. घ. संपूज्यमानः. ८ ङ. ञ. ट. दीप्यमानं. ९ ख. आस्थानस्थं. १० क. महाबाहुंववन्दे.

यदाप्रभृति वैदेही [1]संप्राप्तेमां पुरीं तव ॥ तदाप्रभृति दृश्यन्ते निमित्तान्यशुभानि नः ॥ १४ ॥
सस्फुलिङ्गः सधूमार्चिः सधूमकलुषोदयः ॥ मन्त्रै[2]संधुक्षितोप्यग्निर्न सम्यगभिवर्धते ॥ १५ ॥
अग्निष्ठेष्वग्निशालासु तथा ब्रह्मस्थलीषु च ॥ [3]सरीसृपाणि दृश्यन्ते हव्येषु च पिपीलिकाः ॥ १६ ॥
गवां पयांसि स्कन्नानि विमदा वीर[4]कुञ्जराः ॥ दीनमश्वाः प्रहेषन्ते [5]न च ग्रासाभिनन्दिनः ॥ १७ ॥
खरोष्ट्राश्वतरा राजन्भिन्नरोमाः स्रवन्ति नः ॥ न स्वभावेऽवतिष्ठन्ते विधानैरपि चिन्तिताः ॥ १८ ॥
वायसाः सङ्घशः क्रूरा व्याहरन्ति समन्ततः ॥ समवेताश्च दृश्यन्ते विमानाग्रेषु सङ्घशः ॥ १९ ॥
गृध्राश्च परिलीयन्ते पुरीमुपरि पिण्डि[6]ताः ॥ उपपन्नाश्च सन्ध्ये द्वे व्याहरन्त्यशिवं शिवाः ॥ २० ॥
क्रव्यादानां मृगाणां च पु[7]रुरद्वारेषु [8]सङ्घशः ॥ श्रूयन्ते वि[9]पुला घोषाः सं[10]विस्फूर्जथुनिःस्वनाः ॥ २१ ॥
तदेवं [11]प्रस्तुते कार्ये प्रायश्चित्तमिदं क्षमम् ॥ रो[12]चते यदि वैदेही राघवाय प्रदीयताम् ॥ २२ ॥
इदं च यदि वा मोहाल्लोभाद्वा व्याहृतं मया ॥ तत्रापि च महाराज न [13]दोषं कर्तुमर्हसि ॥ २३ ॥

॥ १३ ॥ प्रथमं रावणसंवादाय दुर्निमित्तानि दर्शयति—यदेति ॥ यदाप्रभृति यत्कालमारभ्य । क्रियाविशेषणमिदं । एवं तदाप्रभृतीत्यपि । अशुभानि निमित्तानि अशुभसूचकनिमित्तानि ॥ १४ ॥ सस्फुलिङ्गः अग्निकणसहितः । सधूमार्चिः धूमाकुलज्वालासहितः । सधूमकलुषोदयः धूमेन कलुषः उदयः आविर्भावो धूमकलुषोदयः तेन सहितः सधूमकलुषोदयः । शान्तः शान्तो ज्वलन्नित्यर्थः । मन्त्रसन्धुक्षितः मन्त्रवद्भिर्हविर्भिर्योजितः ॥ १५ ॥ अग्नयस्तिष्ठन्त्यत्रेत्यग्निष्ठाः महानसाः तेषु । अग्निशालासु अग्निहोत्रशालासु । ब्रह्मस्थलीषु वेदाध्ययनस्थानेषु । सरीसृपाणि सर्पाः । लिङ्गव्यत्यय आर्षः । हविष्येषु देवताभ्यो देयेषु आज्यपुरोडाशादिषु ॥ १६ ॥ स्कन्नानि शुष्काणि " स्कन्दिर्गतिशोषणयोः " इति धातोर्निष्ठा । " रदाभ्यां निष्ठातो नः पूर्वस्य च दः " इति नत्वं । वीरकुञ्जराः मत्तगजाः । प्रहेषन्ते हेषारवं कुर्वन्ति । हेषा अश्वशब्दः ॥ १७ ॥ अश्वतराः महाखराः । भिन्नरोमाः स्वस्थानात् भिन्नरोमाणः गलितरोमाणः ऊर्ध्वरोमाणो वा । अकारान्तत्वमार्षं । स्रवन्ति अश्रूणि मुञ्चन्ति । विधानैः चिकित्साभिः । चिन्तिताः अनुसंहिताः । चिकित्सिता अपीत्यर्थः । स्वभावे प्रकृतौ । नावतिष्ठन्ते प्रकृतिस्था न भवन्तीत्यर्थः ॥ १८ ॥ संघशो व्याहरन्ति संघशः समवेता इति च संबन्धः ॥ १९ ॥ पुरीमुपरि उपर्युपरिगृहेष्वित्यर्थः । पिण्डिताः मण्डलीभूताः सन्तः । परिलीयन्ते श्लिष्यन्ति । सन्ध्ये द्वे, अत्यन्तसंयोगे द्वितीया । शिवाः जम्बुकाः । उपपन्नाः नगरसमीपं प्राप्ताः ॥ २० ॥ क्रव्यादानां मांसभक्षकाणां । मृगाणां श्वादीनामित्यर्थः । सविस्फूर्जथुनिःस्वनाः विस्फूर्जथुः अशनिघोषः तद्रूपस्वनसहिताः ॥ २१ ॥ एवमुपस्थितदुर्निमित्तजातस्य प्रायश्चित्तं सीताप्रदानमेवेत्याह—तदेवमिति ॥ तत् दुर्निमित्तदर्शनात् । तत्सूच्ये कार्ये पराजये । एवं लङ्कादहनादिरूपेण प्रस्तुते प्रसक्ते सति । क्षमं अशुभनिवारणसमर्थं । इदं प्रायश्चित्तम् । इदंशब्दार्थमाह—वैदेहीति ॥ २२ ॥ एवमनभिमतभाषणेन राजा कुप्यतीति समाधत्ते—इदमिति ॥ मोहात् कार्यतत्त्वापरिज्ञानात् । लोभात् जीवनलोभाद्वापि । यदि व्याहृतं । तत्रापि तथापि । मयि

ति० अग्निर्मथनादिनोत्पत्तिकाले सधूमकलुषोदयः धूमकलुषोयउदयस्तत्सहितः । उत्पत्त्यनन्तरंप्रणयनकालेसस्फुलिङ्गःसधूमार्चिः । स० मन्त्रसंधहुतः विहितमन्त्रसमूहहुतोप्यग्निः सधूमार्चिः सस्फुलिङ्गः सधूमकलुषोदयः । मन्त्रसङ्कहुतइत्यनेन कर्त्रादिवैगुण्यनिमित्तोनाग्नेरयंभावः । किंतु नोऽनर्थसूचकइतिसूचयति ॥ १५ ॥ ति० नवग्रासाभिनन्दिनः । अनेनकृतभोजनाअपिबुभुक्षिताइति सूच्यते ॥ १७ ॥ स० वायसाःसमन्ततोव्याहरन्ति । तेचसाधारणाःकेचनेत्याह—क्रूराःसङ्घशइति । नकेवलंव्याहरन्ति । किंतु संघशः विमानाग्रेषुसमवेताश्चदृश्यन्ते । रामरामास्पर्शमात्रमाहात्म्येनास्मन्नेत्रशातनंजातं लंचजागृहीतिसूचयितुमदानेचभा-

[पा०] १ क.—घ. च.—ट. संप्राप्तेह. २ ङ. ञ. ट. मन्त्रसंधहुतो. ३ छ. सरीसृपाश्च. ४ ङ. छ. झ. ञ. ट. वरकुञ्जराः. ५ झ. नवग्रासाभि. ६ ङ. ज. झ. ञ. पीडिताः. घ. विष्ठिताः. ७ ग. ङ. ज. झ. पुरीद्वारेषु. ८ क. घ. छ. ञ. सर्वशः. ९ क. घ. तुमुलाघोषाः. १० क. ख. ग. ङ. झ. ट. सविस्फूर्जित. घ. तत्रस्फूर्जित. ११ गं. निश्चिते. १२ क. ख. ञ. रोचतेवीर. ग. ङ. झ. ट. रोचयेवीर. १३ क. दोषंगन्तुं.

अयं च दोषः सर्वस्य जनस्यास्योपलक्ष्यते ॥ रक्षसां राक्षसीनां च पुरस्यान्तःपुरस्य च ॥ २४ ॥
श्रावणे चास्य मन्त्रस्य निवृत्ताः सर्वमन्त्रिणः ॥ अवश्यं च मया वाच्यं यदृष्टमपि वा श्रुतम् ॥ २५ ॥
संप्रधार्य यथान्यायं तद्भवान्कर्तुमर्हति ॥ २६ ॥
इति स मन्त्रिणां मध्ये भ्राता भ्रातरमूचिवान् ॥ रावणं राक्षसश्रेष्ठं पथ्यमेतद्विभीषणः ॥ २७ ॥
हितं महार्थं मृदु हेतुसंहितं व्यतीतकालायतिसंप्रतिक्षमम् ॥
निशम्य तद्वाक्यमुपस्थितज्वरः प्रसङ्गवानुत्तरमेतदब्रवीत् ॥ २८ ॥
भयं न पश्यामि कुतश्चिदप्यहं न राघवः प्राप्स्यति जातु मैथिलीम् ॥
सुरैः सहेन्द्रैरपि सङ्गतः कथं ममाग्रतः स्थास्यति लक्ष्मणाग्रजः ॥ २९ ॥
इतीदमुक्त्वा सुरसैन्यनाशनो महाबलः संयति चण्डविक्रमः ॥
दशाननो भ्रातरमाप्तवादिनं विसर्जयामास तदा विभीषणम् ॥ ३० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे दशमः सर्गः ॥ १० ॥

एकादशः सर्गः ॥ ११ ॥

रावणेन मन्त्रकरणायसभाप्रवेशः ॥ १ ॥ रावणाज्ञयादूताहूतैराक्षसैर्नानायानैरावणसभाप्रवेशः ॥ २ ॥ रथारोहणेनसभागतेनविभीषणेन रावणप्रणामपूर्वकं तन्नियोगेनपरमासने समुपवेशनम् ॥ ३ ॥

स बभूव कृशो राजा मैथिलीकाममोहितः ॥ असंमानाच्च सुहृदां पापः पापेन कर्मणा ॥ १ ॥

दोषं अपराधं । कर्तुं नार्हसि ॥ २३ ॥ अयं दोषः पूर्वोक्तदुर्निमित्तसूचितोऽनर्थः । सर्वस्योपलक्ष्यते । संबन्धसामान्ये षष्ठी । सर्वेणापि लक्ष्यत इत्यर्थः ॥ २४ ॥ ग्रहस्तादिषु विद्यमानेषु भवतैव किमुच्यते तत्राह—श्रावणे चेति ॥ तेषां त्वच्चित्तमात्रानुसारित्वादितिभावः । श्रावणे त्वां प्रति विज्ञापने च । त्वं पुनः कथं वक्तुं प्रगल्भसे तत्राह—अवश्यमिति ॥ भ्रातृत्वादिति भावः ॥ २५ ॥ संप्रधार्येत्यर्धं ॥ यथान्यायं यथायोग्यं । संप्रधार्य मनस्येव निश्चित्य । तत् संप्रधारितं कार्यं ॥ २६ ॥ इत्येतदूचिवानित्यन्वयः । ऊचिवान् उक्तवान् । "क्वसुश्च" इति लिटः क्वसादेशः ॥ २७ ॥ महार्थं प्रयोजनव्याप्तं । मृदु सान्त्वपूर्वं । हेतुसंहितं युक्तियुक्तं । व्यतीतकालायतिसंप्रतिक्षमं व्यतीतकालः भूतकालः । आयतिः भविष्यत्कालः । संप्रति वर्तमानकालः । तत्र क्षमं । अकीर्तिनाशकत्वेन सीतापहरणप्रायश्चित्तत्वेनवाप्यतीतकालक्षमं । सुखवर्धकत्वेन वर्तमानकालक्षमं । धर्मावहत्वेनायतिक्षमं । उपस्थितज्वरः प्राप्तक्रोध इत्यर्थः । प्रसङ्गवान् परिगृहीतार्थेभिनिवेशवान् ॥ २८ ॥ भयं भयजनकं पुरुषं । रामो युद्धेन सीतां प्राप्स्यतीति पूर्वं विभीषणोक्तस्य परिहारमाह—सुरैरिति । कथं तिष्ठति स्थास्यति । स्थातुमेव न शक्तः कुतो योत्स्यति कुतस्तरां सीतां प्राप्स्यतीति भावः ॥ २९ ॥ राघवं तृणीकृत्य कथमेवमाहेत्याशङ्क्य तन्निदानं दर्शयति—इतीति ॥ नाशनः हिंसकः । चण्डविक्रमः उग्रविक्रमः । आप्तवादिनं युक्तवादिनं ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने दशमः सर्गः ॥ १० ॥

अथ परेद्युर्विभीषणाद्युपदेशेतिचिन्ताव्याकुलस्य

व्यनर्थसूचयितुंचैवमितिभावः ॥ १९ ॥ शि० ननुत्वदुक्तमसंमतंअस्यारंभेसर्वेषांनिवृत्तत्वात् सज्जनहिंसावत् । इदमयुक्तंसर्वासंमतत्वाद्विषभक्षणवदित्यतआह—प्रापणइति । अस्यमन्त्रस्य प्रापणे बोधने । सर्वेमन्त्रिणोनिवृत्ताः त्वद्भयादपगताः । एतेन निवृत्तानामपिमदुक्तंसंमतमेवेतिसूचितं । तेनोहितानुमानयोर्बाधस्वरूपासिद्ध्यादिप्रस्तत्वंध्वनितं । ननुत्वासंमतंबुद्ध्वैवगताःनतुमद्भयादित्यतआह—यत्दृष्टंस्वतोज्ञातं अथवाश्रुतं अन्यतोज्ञातं । तन्मयावाच्यं भवत्संनिधौनिवेदनीयं ॥ २५ ॥ इतिदशमःसर्गः ॥ १० ॥

[पा०] १ ख. घ. ङ. झ. ट. प्रापणे. २ ङ. च. झ. ञ. ट. इत्येवमुक्त्वा.



[[1]अतीव कामसंपन्नो वैदेहीमनुचिन्तयन् ॥] अतीतसमये काले तस्मिन्वै युधि रावणः ॥
अमात्यैश्च सुहृद्भिश्च [2]मन्त्रकालममन्यत ॥ २ ॥
स हेमजालविततं मणिविद्रुमभूषितम् ॥ उपगम्य विनीताश्वमारुरोह महारथम् ॥ ३ ॥
तमास्थाय रथश्रेष्ठं महामेघसमस्वनम् ॥ प्रययौ राक्षसश्रेष्ठो दशग्रीवः सभां प्रति ॥ ४ ॥
असिचर्मधरा योधाः सर्वायुधधरास्तथा ॥ राक्षसा राक्षसेन्द्रस्य पुरतः संप्रतस्थिरे ॥ ५ ॥
नानाविकृतवेषाश्च नानाभूषणभूषिताः ॥ पार्श्वतः पृष्ठतश्चैनं परिवार्य ययुस्ततः ॥ ६ ॥
रथैश्चातिरथाः शीघ्रं मत्तैश्च वरवारणैः ॥ अनूत्पेतुर्दशग्रीवमाक्रीडद्भिश्च वाजिभिः ॥ ७ ॥
गदापरिघहस्ताश्च शक्तितोमरपाणयः ॥ परश्वधधराश्चान्ये तथाऽन्ये शूलपाणयः ॥ ८ ॥
ततस्तूर्यसहस्राणां संजज्ञे निस्वनो महान् ॥ तुमुलः शङ्खशब्दश्च सभां गच्छति रावणे ॥ ९ ॥
स नेमिघोषेण [3]महान्सहसाऽभिविनादयन् ॥ राजमार्गं श्रिया जुष्टं प्रतिपेदे महारथः ॥ १० ॥
विमलं [4]चातपत्राणं प्रगृहीतमशोभत ॥ पाण्डरं राक्षसेन्द्रस्य पूर्णस्ताराधिपो यथा ॥ ११ ॥
[5]हेममञ्जरिगर्भे च शुद्धस्फटिकविग्रहे ॥ चामरव्यजने [6]चास्य रेजतुः सव्यदक्षिणे ॥ १२ ॥
ते कृताञ्जलयः सर्वे रथस्थं पृथिवीस्थिताः ॥ राक्षसा राक्षसश्रेष्ठं शिरोभिस्तं ववन्दिरे ॥ १३ ॥
राक्षसैः स्तूयमानः [7]सञ्जयाशीर्भिररिन्दमः ॥ आससाद महातेजाः सभां [8]सुविहितां [9]शुभाम् ॥ १४ ॥

रावणस्य निर्णयहेतुमन्त्रकरणाय सभाप्राप्तिं दर्शयति —स बभूवेत्यादि ॥ पापः पापी । " गुणवचनेभ्यो मतुपो लुगिष्टः " इति मतुपो लुक् । असंमानात् अनादरात् । सुहृदां विभीषणादीनां । कर्तरि षष्ठी । विभीषणोक्ते तूष्णींस्थितत्वेन प्रहस्तादीनामप्यनादरः सिद्ध एव । पापेन कुत्सितेन सीतापहरणरूपेण कर्मणा । हेतौ तृतीया । मैथिलीकाममोहितइति हेतुगर्भविशेषणं । तथाच मैथिलीविषयकाममोहात् सुहृदनादरात् पापहेतुसीताहरणाच्च कृशः । चिन्ताकुलो बभूवेत्यर्थः ॥ १ ॥ तस्मिन्काले मन्त्रयोग्यकाले । अतीतसमये अतीतावसरे सति । युधि च सत्यां युद्धे च प्राप्ते सति । अमात्यैश्च सुहृद्भिश्च मन्त्रस्य प्राप्तकालममन्यत । मुनिहृदयं तु कालेऽतीतसमये रावणायुःकालेऽतीते सति । युधि अमात्यादिभिः सहात्मानं । प्राप्तकालं प्राप्तमृत्युं । अमन्यतेति । वैप्रसिद्धौ ॥ २ ॥ हेमजालविततं स्वर्णमयगवाक्षव्याप्तं । स्वर्णसमूहनिर्मितमिति वा । विनीताश्वं शिक्षिताश्वयुक्तं । उपगम्य प्रदक्षिणीकृत्य ॥ ३ ॥ सभां मन्त्रशालां ॥ ४ ॥ चर्म खेटः ॥ ५ ॥ ततः रावणालयात् । नानाविकृतवेषाः नानाविधतया विशिष्य कृतालंकाराः । राक्षसा इति शेषः ॥ ६ ॥ आक्रीडद्भिः धारामण्डलगमनादिकं कुर्वद्भिः ॥ ७ ॥ अत्र प्रतिपदमन्य इत्यनुषञ्जनीयं । अनूत्पेतुरिति च ॥८॥ ततः स्वालयात् ॥ ९ ॥ नेमिः रथचक्रधारा ॥ १० ॥ विमलमिति । भासा विमलमित्यर्थः ॥ ११ ॥ हेममञ्जरिगर्भे हेमसूत्रगर्भे । इकारान्तत्वमार्षं । शुद्धस्फटिकविग्रहे शुद्धस्फटिकसदृशाकारे । चामरव्यजने चामररूपव्यजने । सव्यदक्षिणे सव्यदक्षिणयोः । " सर्वो द्वन्द्वो विभाषयैकवद्भवति " इत्येकवद्भावः ॥ १२-१३ ॥ सुविहितां सुष्ठुनिर्मितां ॥ १४ ॥

स० अतीतसमये अतीतोभवतिसमयःद्वादशमासात्मकःसीताप्राप्तौसंकेतरूपोयस्मिंस्तस्मिन्काले । अनुचिन्तयन् तत्प्राप्तिमितिशेषः । युधि युद्धविषये । अमात्यादिभिःसहप्राप्तकालंयोग्यमालोचनमित्यमन्यत । युधि युद्धे । अतीतसमये विभीषणोक्तदिशाप्रतिबद्धेसतिकाले । तत्कालेमन्त्रणं प्राप्तकालं योग्यमित्यमन्यतेतिवा । ती० वास्तवार्थेसबभूवेत्यादिश्लोकद्वयमेकंवाक्यं । अतीव कामसंपन्नः अतएवपापेनकर्मणा अथापिमैथिलीमनुचिन्तयन् । स्वेष्टदेवतात्वेनेतिशेषः । अतएव मैथिलीकाममोहितः मैथिलीभूत्योभविष्यामीतिचसंबन्धः ॥ भयमोहितः सुहृदामसंमानाच्चकृशोबभूव । मन्त्रकालंचामन्यतेतियोजना ॥ २ ॥ स० विनीताश्वं

[पा०] १ इदमर्धं क. ङ.—ट. पाठेषुदृश्यते. २ ग. ङ. ज.—ट. प्राप्तकालं. ३ घ. महान्दिशोदशविलोकयन्. ४ ङ—ट. निनादयन्. ५ ख. ङ. झ. ट. चातपत्रंच. ६ घ. हेमरत्नविचित्रेच. ७ क. ख. ग. ङ. च. झ. ञ. ट. तस्य. ८ घ. स्तूयमानोसौजया. ९ क. ख. च. ज. ञ. विरचितां. १० ङ. छ. झ. ट. तदा.

सुवर्णरजतस्थूणां[1] विशुद्धस्फटिकान्तराम् ॥ विराजमानो वपुषा रुक्मपट्टोत्तरच्छदाम् ॥ १५ ॥
तां पिशाचशतैः षड्भिरभिगुप्तां[2] सदा शुभाम् ॥ प्रविवेश महातेजाः सुकृतां विश्वकर्मणा ॥ १६ ॥
तस्यां[3] तु वैडूर्यमयं प्रियकाजिनसंवृतम् ॥ महत्सोपाश्रयं[4] भेजे रावणः परमासनम् ॥ १७ ॥
ततः शशासेश्वरव[5]त्ताँल्लघुपराक्रमान् ॥ समानयत मे क्षिप्रमिहैतान्राक्षसानिति ॥ १८ ॥
कृत्यमस्ति महज्जातं[6] समर्थ्यमिह नो महत् ॥ १९ ॥
राक्षसास्तद्वचः श्रुत्वा लङ्कायां परिचक्रमुः[7] ॥ अनुगेहमवस्थाय विहारशयनेषु च ॥
उद्यानेषु च रक्षांसि चोदयन्तो ह्यभीतवत् ॥ २० ॥
ते रथान्तु[8]चिरानेके दृप्तानेके पृथग्घयान् ॥ नागानन्येऽधिरुरुहुर्जग्मुश्चैके पदातयः ॥ २१ ॥
सा पुरी परमाकीर्णा रथकुञ्जरवाजिभिः ॥ संपतद्भिर्विरुरुचे गरुत्मद्भिरिवाम्बरम् ॥ २२ ॥
ते वाहनान्यवस्थाप्य यानानि विविधानि च ॥ सभां पद्भिः प्रविविशुः सिंहा गिरिगुहामिव ॥ २३ ॥
राज्ञः पादौ गृहीत्वा तु राज्ञा ते प्रतिपूजिताः ॥ पीठेष्वन्ये वृसीष्वन्ये भूमौ केचिदुपाविशन् ॥ २४ ॥
ते समेत्य सभायां वै राक्षसा राजशासनात् ॥ यथार्हमुपतस्थुस्ते रावणं राक्षसाधिपम् ॥ २५ ॥
मन्त्रिणश्च यथा[9] मुख्या निश्चयार्थेषु पण्डिताः ॥ अमात्याश्च गुणोपेताः सर्वज्ञा बुद्धिदर्शनाः ॥
समेयु[10]स्तत्र शतशः शूराश्च बहवस्तदा ॥ २६ ॥

सुवर्णेत्यादिश्लोकद्वयमेकान्वयं ॥ विशुद्धस्फटिकान्तरां निर्मलस्फटिकनिर्मितमध्यप्रदेशां । रुक्मपट्टोत्तरच्छदां कनकमयपट्टवस्त्रास्तरणां ॥ १५—१६ ॥ वैडूर्यमयं वैडूर्यप्रचुरं । प्रियकाजिनसंवृतं प्रियकमृगस्याजिनेन संवृतं । "प्रियको लोमभिर्युक्तो मृदूच्चमसृणैर्घनैः" इति वैजयन्ती । सोपाश्रयं सावष्टम्भं । सोपधानमिति यावत् ॥ १७ ॥ ईश्वरवत् राजार्हं । इह सभायां । एतान् एतन्नगरस्थान् । इति शशासेत्यन्वयः । तमेव प्रकारमाह—कृत्यमित्यर्धेन ॥ महद्यथा तथा समर्थ्यं यत्नेन निर्वाह्यं । जातं प्राप्तं । महत्कृत्यमस्तीति शशास । महद्भ्यो रामादिभ्यो जातमिति वा । महदित्यनेन तदानीं चारमुखेन रामादेः समुद्रतीरगमनं रावणो ज्ञातवानितिगम्यते ॥ १८—१९ ॥ राक्षसा इत्यादि सार्धश्लोकः । विहरमाणानीति शेषः । विहारो विहारस्थलं । विहारादिषु आस्थाय विहरमाणानि रक्षांसि । अभीतवत् अभीताः । चोदयन्तः चोदनार्थं लङ्कायामनुगेहं परिचक्रमुरित्यन्वयः ॥ २०—२१ ॥ गरुत्मद्भिः पक्षिभिः ॥ २२ ॥ वाहनानि शिबिकादीनि । यानानि अश्वादीनि । अवस्थाप्य बहिर्निक्षिप्य ॥ २३ ॥ अन्ये पुरोहितादयः । पीठेषु सुवर्णादिकृतासनेषु । अन्ये श्रोत्रियाः । वृसीषु दर्भमयासनेषु । केचित्पुत्रादयः । भूमौ सामान्यास्तरणमात्रयुक्तायां भूमौ ॥ २४ ॥ क्रियाभेदात्तच्छब्दद्वयं । उपतस्थुः समीपे तस्थुः । यथार्हं यथाक्रमम् ॥ २५ ॥ मन्त्रिणश्चेत्यादिसपादश्लोकः ॥ यथा यथाक्रमं । यथामुख्या इत्येकंपदं वा । मुख्याननतिक्रम्य

विनीताअश्वायस्थं ॥ ३ ॥ **रामानु०** ईश्वरवत् ईशानवत् । **स०** लघुपराक्रमान् शीघ्रपराक्रमान् । यद्वा परानुद्दिश्य आसम्यक् क्रमःपादविक्षेपःपराक्रमः । लघुःपराक्रमोयेषांतान् । जङ्गालानित्यर्थः ॥ १८ ॥ **रामानु०** कृत्यमिति । एकोमहच्छब्दः क्रियाविशेषणं । इहमहज्जातंकृत्यमस्ति । तत् महत् भूरियथातथा समर्थ्यं समर्थनीयं । कर्मणिघञ् । समर्थ्यमिहनोभवेदितिवा पाठः । पूर्वश्लोकान्तरस्थमितिकरणमत्रद्रष्टव्यं । इतिशशांसेतिसंबन्धः ॥ १९ ॥ **रामानु०** रथान्तचराः रथमध्यस्थिताः । जग्मुरित्यर्थः । ह्यानित्यत्राप्यधिरुरुहुरितिसंबध्यते । जग्मुरेकेपदातयः केचित्पदातयस्सन्तोजग्मुरितिसंबन्धः ॥ २१ ॥ **ति०** वृसी वृत्तासनं ॥ २४ ॥ **ति०** निश्चितार्थेषु । भावेनिष्ठा । आहिताग्न्यादिः । अर्थनिश्चयेष्वित्यर्थः । अमात्याः उपमन्त्रिणः

[**पा०**] १ घ. ङ. झ. ट. रजतास्तीर्णां. च. छ. ञ. रजताकीर्णां. २ ङ. झ. ञ. ट. सदाप्रभां. ३ ङ. झ. ञ. ट. तस्यास्स. क. ग. छ. तस्यांस. ख. तस्यांवैडूर्यरचितं. ४ झ. ट. महज्जानेकर्तव्यमितिशत्रुभिः. ५ क. ग. छ. ज. भवेत्. ६ ज. राक्षसावचनंश्रुत्वा. ७ ङ. झ. ट. रथान्तचराएकेदृप्तानेकेदृढान्हयान्. ८ क. ग. ङ.—ट. नागानेके. ९ घ. महामुख्याः १० घ. समेतास्तत्र.

सभायां हेमवर्णायां सर्वार्थस्य सुखाय वै ॥ रम्यायां राक्षसेन्द्रस्य समेयुस्तत्र सङ्घशः ॥
[राक्षसा राक्षसश्रेष्ठं परिवार्योपतस्थिरे] ॥ २७ ॥

ततो महात्मा विपुलं सुयुग्यं वरं रथं हेमविचित्रिताङ्गम् ॥
शुभं समास्थाय ययौ यशस्वी विभीषणः संसदमग्रजस्य ॥ २८ ॥
स पूर्वजायावरजः शशंस नामाथ पश्चाच्चरणौ ववन्दे ॥
शुकः प्रहस्तश्च तथैव तेभ्यो ददौ यथार्हं पृथगासनानि ॥ २९ ॥
सुवर्णनानामणिभूषणानां सुवाससां संसदि राक्षसानाम् ॥
तेषां परार्ध्यागरुचन्दनानां स्रजश्च गन्धाश्च ववुः समन्तात् ॥ ३० ॥
न चुक्रुशुर्नानृतमाह कश्चित्सभासदो नैव जजल्पुरुच्चैः ॥
संसिद्धार्थाः सर्व एवोग्रवीर्या भर्तुः सर्वे ददृशुश्चाननं ते ॥ ३१ ॥
स रावणः शस्त्रभृतां मनस्विनां महाबलानां समितौ मनस्वी ॥
तस्यां सभायां प्रभया चकाशे मध्ये वसूनामिव वज्रहस्तः ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकादशः सर्गः ॥ ११ ॥

द्वादशः सर्गः ॥ १२ ॥

कुंभकर्णादिषुसभामागतेषु रावणेनप्रहस्तंप्रति विशेषतोनगररक्षाचोदना ॥ १ ॥ तथा स्वकृतसीतानयनाद्यनुवादेनसह रामस्यसेनाभिःसहसागरतीरागमननिवेदनपूर्वकं तद्बधोचितमन्त्रकरणचोदना ॥ २ ॥ कुंभकर्णेन सक्रोधंरावणंप्रति सुहृद्भिः सहमन्त्रपूर्वकंसीताहरणस्यकर्तव्यत्वोक्त्या तद्विपरीत्यस्यानौचित्योक्तिपूर्वकं दर्पोद्रामवधप्रतिज्ञानेनसमाश्वासनम् ॥ ३ ॥

स तां परिषदं कृत्स्नां समीक्ष्य समितिंजयः ॥ प्रचोदयामास तदा प्रहस्तं वाहिनीपतिम् ॥ १ ॥

स्थिताः । अनव्ययत्वमार्षं । निश्चयार्थेषु अर्थनिश्चयेषु । अमात्याः कर्मणि सहायाः । मन्त्रिणः बुद्धिसहायाः । यद्वा अमा सह तिष्ठन्तीत्यमात्याः । "अव्ययात्त्यप्" । आप्ता इत्यर्थः । बुद्धिदर्शनाः । बुद्धिचक्षुषः शूरा इत्युत्तरशेषः । अन्यथा क्रियापदपौनरुक्त्यं ॥ २६ ॥ सुखाय क्षेमाय । क्षेमं विचारयितुं । " क्रियार्थोपपदस्य " इत्यादिना चतुर्थी ॥ २७ ॥ युग्याः अश्वाः । युगं वहन्तीति " तद्वहति रथयुगप्रासङ्गम् " इति यत् ॥ २८ ॥ नाम शशंस । अभिवादनमकरोदित्यर्थः । शुकः प्रहस्तश्चेति । ववन्दाते इत्यर्थः ॥२९॥ स्रजश्च गन्धाः स्रजां गन्धाः ॥ ३० ॥ न चुक्रुशुः न घोषं चक्रुः । न जजल्पुः नाक्रमोक्तीश्चक्रुः । सभासदः सभागताः । संसिद्धेत्यर्धे वृत्तभेदश्चिन्त्यः ॥३१॥ समितौ सङ्घे " सङ्घे सभायां समितिः " इत्यमरः । सभायां आस्थानमण्डपे ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकादशः सर्गः ॥ ११ ॥

अथ सर्वमेलनानन्तरं नगररक्षाविधानपूर्वकं स्वाभिमतानुसारेण रावणो मन्त्रमर्थयते—स तामित्यादि ॥ समितौ युद्धे जयतीति समितिंजयः । "संज्ञायां भृतृवृजि—" इत्यादिना खचि मुमागमः । तां पूर्वो-

---

॥ २६ ॥ ति० नामग्रहणपूर्वकंनमस्कारःकार्यइतिसदाचारः । व्यग्रचित्ततयाराज्ञःस्वागमनज्ञापनायवा ॥ स० ददौ रावणः । दृष्ट्वासूचयामासेतिभावः ॥ २९ ॥ स० संसिद्धार्थाः पूर्णमनोरथाः । भेदनोपायाविषयाइतिभावः ॥ ३१ ॥ स० प्रभया देहकान्त्या ॥ ३२ ॥ इत्येकादशःसर्गः ॥ ११ ॥

[पा०] १ इदमर्धं प्राचीनकोशेषुनदृश्यते. २ च. छ. ञ. वराहैर्जांबूनदचित्रितांगं. क. वराहैर्मेकंसुविचित्रितांगं. ३ क. घ. च. छ. ञ. रथं. ४ क. ङ. च. छ. झ. ञ. ट. स्रजांच. ५ ङ. झ. ट. प्रबोधयामास.

सेनापते यथा ते स्युः कृतविद्याश्चतुर्विधाः ॥ [1]योधानधिकरक्षायां तथा व्यादेष्टुमर्हसि ॥ २ ॥
स प्रहस्तः प्रणीतात्मा चिकीर्षन्राजशासनम् ॥ [2]विनिक्षिपद्बलं सर्वं बहिरन्तश्च मन्दिरे ॥ ३ ॥
ततो विनिक्षिप्य बलं [3]पृथङ्नगरगुप्तये ॥ प्रहस्तः प्रमुखे राज्ञो निषसाद जगाद च ॥ ४ ॥
[4]निहितं बहिरन्तश्च बलं बलवतस्तव ॥ कुरुष्वाविमनाः क्षिप्रं यदभिप्रेतमस्तु ते ॥ ५ ॥
[5]प्रहस्तस्य वचः श्रुत्वा राजा राज्यहिते रतः ॥ सुखेप्सुः सुहृदां मध्ये व्याजहार स रावणः ॥ ६ ॥
प्रियाप्रिये सुखं दुःखं लाभालाभौ हिताहिते ॥ धर्मकामार्थकृच्छ्रेषु यूयमर्हथ वेदितुम् ॥ ७ ॥
सर्वकृत्यानि युष्माभिः समारब्धानि सर्वदा ॥ मन्त्रकर्मनियुक्तानि न जातु विफलानि मे ॥ ८ ॥
स सोमग्रहनक्षत्रैर्मरुद्भिरिव वासवः ॥ भवद्भिरहमत्यर्थं वृतः श्रियमवाप्नुयाम् ॥ ९ ॥
अहं तु खलु सर्वान्वः समर्थयितुमुद्यतः ॥ कुम्भकर्णस्य तु स्वप्नान्नेममर्थमचोदयम् ॥ १० ॥
अयं हि सुप्तः षण्मासान्कुम्भकर्णो महाबलः ॥ सर्वशस्त्रभृतां मुख्यः स इदानीं समुत्थितः ॥११॥
इयं च दण्डकारण्याद्रामस्य महिषी प्रिया ॥ रक्षोभिश्चरितादेशादानीता जनकात्मजा ॥ १२ ॥
सा मे न शय्यामारोढुमिच्छत्यलसगामिनी ॥ त्रिषु लोकेषु चान्या मे न सीतासदृशी मता ॥१३॥
तनुमध्या पृथुश्रोणी शारदेन्दुनिभानना ॥ हेमबिम्बनिभा सौम्या मायेव मयनिर्मिता ॥ १४ ॥

क्तां । कृतविद्याः अभ्यस्तधनुर्विद्याः । चतुर्विधाः रथिकहस्तिपकसादिपदातिरूपेण चतुर्विधाः । अधिकरक्षायां पूर्वापेक्षया सावधानरक्षायां । यथा स्युः यथा जागरूकाः स्युः । तथा व्यादेष्टुमर्हसि । अत्र इतिकरणं बोध्यं ॥ २ ॥ सः सर्वेषु विद्यमानेष्वपि रावणविस्रम्भपात्रभूतः । प्रणीतात्मा निश्चितबुद्धिः । मन्दिरे रावणगृहे । विनिक्षिपत् विन्यक्षिपत् व्यधात् ॥ ३ ॥ प्रमुखे अग्रे ॥ ४ ॥ अविमनः स्वस्थहृदयः यदभिप्रेतं तत्कुरुष्व । तत् अभीष्टं ते अस्तु सिध्यतु ॥ ५ ॥ सुखेप्सुः कामपुरुषार्थेच्छुः । न विजयेच्छुः ॥ ६ ॥ मन्त्रणीयं वक्तुमनास्तेषामाभिमुख्यं संपादयितुं प्रथमं तान् प्रशंसति—प्रियाप्रिये इति ॥ धर्मकामार्थकृच्छ्रेषु धर्मकामार्थसङ्कटेषु विषये । धर्मादिष्विदानीं को वा सेव्य इति संदेहे तदनुष्ठानफलभूते । प्रियाप्रिये सुखदुःखसाधने वस्तुनी । सुखं दुःखं लाभालाभौ । लाभ इष्टप्राप्तिः अलाभः तन्नाशः तौ च । हिताहिते । हितं उत्तरकालफलवत् । अहितं तदितरत् ते च । वेदितुमर्हथ । प्रियाप्रियादिफलस्वरूपनिर्धारणाय धर्मादिसंदेहं निराकर्तुं समर्था इत्यर्थः ॥ ७ ॥ कथमर्हाम इत्यपेक्षायांतत्कार्यमुखेन दर्शयति—सर्वेति ॥ ८ ॥ इदानीमपि तथैवास्त्वित्याह—स सोमेति ॥ ग्रहाः सोमभिन्नाः सूर्यादयः । मरुद्भिः सोमादिभिन्नैर्देवैः ॥ ९ ॥ पूर्वोक्तस्यैवार्थस्य पुनरपि वक्ष्यमाणत्वात्तत्र पुनः कथने हेतुं दर्शयति—अहमिति ॥ तुरवधारणे । सर्वान् वः समर्थयितुं ज्ञापयितुं । उद्यतएव पूर्वमेवोद्यतः । किंतु कुम्भकर्णस्य स्वप्नाद्धेतोः इममर्थं नाचोदयं तस्य नावेदयं । अतः कथ्यत इत्यर्थः ॥ १० ॥ कुम्भकर्णस्य स्वप्नादित्युक्तमेव स्पष्टयति—अयमिति ॥ षण्मासानित्यत्यन्तसंयोगे द्वितीया । इदानीं समुत्थितः । अतः पूर्वं नावेदयमित्यर्थः ॥ ११ ॥ उत्तरत्र सीताप्रत्यर्पणं विना रामजयो विचार्यतामिति वक्तुकामस्तस्या दुस्त्यजत्वं दर्शयितुं तामेव स्तौति—इयमित्यादिना ॥ रक्षोभिश्चरितादेशात् जनस्थानादित्यर्थः । सा मयाऽनीतेत्युक्तिरजानन्तं कुम्भकर्णं प्रति ॥ १२ ॥ अलसगामिनी मन्दगामिनी । त्यज तामनिच्छन्तीं परिगृह्णेतरामित्यत्राह—त्रिष्विति ॥ १३ ॥ असदृशत्वमुपपादयति—तनुमध्येत्यादिना ॥ हेमबिम्बनिभा स्वर्णप्रतिमातुल्या ।

स० मन्दिरे गृहरूपनगरे । यद्वा मन्दिररक्षणानन्तरंपुररक्षणमितिपूर्वमन्दिरइत्युक्तिः । एतेनागच्छद्वयवैपुल्यंद्योत्यते ॥ ३ ॥ ति० राजहितैषिणः प्रहस्तस्येत्यन्वयः ॥ ६ ॥ स० षण्मासान् । विशेषणसमासः । षडितिभिन्नंवापदं । " कालाध्वनोः—"

[पा०] १ ङ.—ट. योधानगररक्षायां. क. योधान्नगररक्षार्थं. ख. योधान्नगररक्षार्थे. २ ग. ङ. छ.—ट. विनिक्षिप्यबलं. ३ ङ. झ. ट. सर्वंनगर. ४ क. विहितंचमयासर्वंबलवन्बलतस्तव. ५ क. ख. च—ट. मरुतो. ६ ज. प्रहस्तवचनं. ७ क. ङ—ट. राज्यहितैषिणः. ८ क. ग. ङ—ञ. सुखेदुःखेलाभालाभे. ९ ख. ग. ङ. ज—ट. श्चरितोद्देशात्. १० ङ. झ. ञ. ट. तथा.

सुलोहिततलौ श्लक्ष्णौ चरणौ सुप्रतिष्ठितौ ॥ दृष्ट्वा ताम्रनखौ तस्या दीप्यते मे शरीरजः ॥ १५ ॥
हुताग्नेरर्चिसंकाशामेनां सौरीमिव प्रभाम् ॥[दृष्ट्वा सीतां विशालाक्षीं कामस्य वशमेयिवान्] ॥१६॥
उन्नसं वदनं वल्गु विपुलं चारु लोचनम् ॥ पश्यंस्तदाऽवशस्तस्याः कामस्य वशमेयिवान् ॥ १७॥
क्रोधहर्षसमानेन दुर्वर्णकरणेन च ॥ शोकसंतापनित्येन कामेन कलुषीकृतः ॥ १८ ॥
सा तु संवत्सरं कालं मामयाचत भामिनी ॥ प्रतीक्षमाणा भर्तारं राममायतलोचना ॥ १९ ॥
तन्मया चारुनेत्रायाः प्रतिज्ञातं वचः शुभम् ॥ श्रान्तोऽहं सततं कामाद्यातो हय इवाध्वनि ॥ २० ॥
कथं सागरमक्षोभ्यमुत्तरन्ति वनौकसः ॥ बहुसत्त्वझषाकीर्णं तौ वा दशरथात्मजौ ॥ २१ ॥
अथवा कपिनैकेन कृतं नः कदनं महत् ॥ दुर्ज्ञेयाः कार्यगतयो ब्रूत यस्य यथामतिः ॥ २२ ॥
मानुषान्मे भयं नास्ति तथाऽपि तु विमृश्यताम् ॥ तदा देवासुरे युद्धे युष्माभिः सहितोऽजयम् ॥

सौम्या रम्या मायेव प्रतिक्षणमपूर्ववदाश्चर्यावहवस्तुवत् स्थिता ॥ १४ ॥ क्रमेणारोक्ष्यतीत्याशङ्क्य मन्मथो विलम्बं नसहत इत्याह—सुलोहिततेति ॥ सुप्रतिष्ठितौ समतलौ दृष्ट्वा । स्थितस्येति शेषः । शरीरजः कामः ॥ १५ ॥ सोपि निगृह्यतामित्याशङ्क्याह—हुतेत्यादि ॥ अर्धमेकं वाक्यं । अर्चिश्शब्दस्य इकारान्तत्वमार्षं । सौरीमिवप्रभामित्यस्य दृष्ट्वेत्यादिशेषपूरणेन संबन्धः ॥ १६ ॥ उन्नसं उन्नतनासिकं । "उपसर्गाच्च" इति नसादेशः । अवशः विवशः तदधीनः कथं निगृह्णीयामिति भावः । वल्गु सुन्दरं ॥ १७ ॥ कामवश्यत्वमेव विवृणोति—क्रोधेति ॥ क्रोधहर्षयोः समानेन क्रोधे हर्षे चैकरूपेण । दुर्वर्णकरणेन वैवर्ण्यकारिणा । शोकसंतापनित्येन शोके मनोव्यथायां संतापे शरीरपीडायां च नित्येन अनपायेन कामेन । कलुषीकृतः व्याकुलचित्तोस्मि ॥ १८ ॥ यद्येवं सा प्रसह्यापि शय्यामारोप्यतां तत्राह—सा त्विति ॥ संवत्सरं कालं संवत्सररूपं कालं । संवत्सराभ्यन्तरे रामो यदि नागतः तदा तथा करिष्यामीत्ययाचतेत्यर्थः । इदं चारोप्योक्तं । वस्तुतो रावणेनैव तथा प्रतिज्ञानादिति भावः ॥ १९ ॥ चारुनेत्राया इति प्रतिश्रवणहेतुः । नयनसौन्दर्यपारवश्येन तद्वचनमङ्गीकृतवानस्मीतिभावः । अध्वनि दीर्घमार्गे ॥ २० ॥ कथमेनामुपलप्स्यसे तामुपनेतुमुपागते सपरिकरेदाशरथावित्यत आह—कथमिति ॥ उत्तरन्ति उत्तरिष्यन्ति । सत्त्वानि झषव्यतिरिक्तजन्तवः ॥ २१ ॥ तर्हि किमिदानीं विचार्यं तत्राह—अथवेति ॥ यस्य यथा मतिः तथा ब्रूतेत्यर्थः ॥ २२ ॥ विभीषणमतव्यावृत्त्यर्थं स्वमतमाह—मानुषादिति ॥ सपादश्लो-

इतिद्वितीया ॥ ११ ॥ **शि०** ननुतर्हिकिमर्थंसंरोध्यतइत्यतआह—हुतेति । सौरीप्रभामिव एनांसीतां लब्ध्वेतिशेषः । तस्याःसीतायावदनंपश्यन् अवशःस्वतन्त्रोपियोरामः कामस्य तत्प्राप्तिविषयकोत्कटेच्छायाः । वशमेयिवान् सरामःक्रोधंकोपंहर्षयतिवर्धयति तेनसीतानिरोधेन समानंजीवनंयस्यतेन । दुर्वर्णस्य रामशरीरवैवर्ण्यस्य करणंयस्मिंस्तेन । शोकसंतापयोःनित्यंनियमेनस्थितिर्येनतेनकामेन कलुषीकृतः व्याप्तः । एतेन रामदुःखप्राप्तयेएवसीतानिरोधइतिध्वनितं । सार्धश्लोकद्वयमेकान्वयि ॥ **ति०** अवशोस्वाधीनएव तस्यावदनंपश्यन्नेयिवान् प्राप्तवान् । यत्किंचिद्विषयनिमित्तककोधहर्षकालयोरपिसमानेन तावप्यभिभूयान्तःप्रवृत्तेन । दुर्वर्णकरणेन कान्तिनाशकेन । तदप्राप्तिजयोःशोकसंतापयोः नित्येन नित्यप्रवर्तकेन ॥ १६—१८ ॥ ननुस्वनगरेस्थितायांतस्यांकिमित्येवंदुःखभोगोतआह—सात्विति । सातु संवत्सरंकालं तत्समाप्तिपर्यन्तं । रामंप्रतीक्षमाणा ममास्पर्शमयाचत । मयापि तथास्वीकृतिप्रतिज्ञातं । बलात्कारेशापान्मरणभियास्वेनैवकृतंसमयंतयाचितत्वेनब्रूतइत्यत्रवस्तुतत्वं । नहिसीतैवंयाचितुमर्हतीति । अतएव पूर्वं "सामेनशय्यामारोढुमिच्छत्यलसगामिनी" इतिसामान्येनैवोक्तं ॥ **शि०** ननुभर्तारंविनासाकथंजीवतीत्यतआह—सेति । भर्तारंप्रतीक्षमाणासा सीता संवत्सरं वर्षपर्यन्तं । कालं स्वजीवनसमयं मामयाचत अवदत् । **ती०** तर्ह्योदितआरभ्यप्रतिकूलयासीतयाकिंप्रयोजनंसात्यज्यतामित्याशंक्य "सामेनशय्यामारोढुमिच्छत्यलसगामिनी" इत्यवशादागतसत्यवचनसूचितंतदनुरागाभावंसंगोप्यस्वकृतस्यावधेस्तत्प्रार्थनापूर्वकत्वमारोप्याह—सात्वित्यादि । कालं अवधित्वेनायाचत ॥ १९ ॥ **स०** कामात् स्वप्रतिज्ञापरिपालननिमितसीतास्पर्शाभावजनितात् अहंश्रान्तः सततमध्वनियातो हयइव । रंभापुञ्जकस्थलीशापनिमित्तमरणभयात्तदस्पर्शइतिगूढोभिप्रायः ॥ २० ॥ **ति०** अतःकार्यगतयोदुर्ज्ञेयाः । तस्माद्यस्ययथामति यद्भाति तद्ब्रूत ॥ २२ ॥

[**पा०**] १ इदमर्धं क.—ट. पाठेषुनदृश्यते. २ क. ख. ग. ङ. झ. ञ. ट. स्तदवशः. घ. स्तद्वदनंतस्याः. ३ क. ङ—ट. मक्षोभ्यंतरिष्यन्ति. ४ झ. ञ. यथामति. ५ ङ. झ. ट. मानुषान्नो. ६ क. तथादेवासुरांश्चापियुष्माभिः.

ते मे भवन्तश्च तथा सुग्रीवप्रमुखान्हरीन् ॥ २३ ॥
परे पारे समुद्रस्य पुरस्कृत्य नृपात्मजौ ॥ सीतायाः पदवीं प्राप्तौ संप्राप्तौ वरुणालयम् ॥ २४ ॥
अदेया च यथा सीता वध्यौ दशरथात्मजौ ॥ भवद्भिर्मन्त्र्यतां मन्त्रः सुनीतं चाभिधीयताम् ॥२५॥
न हि शक्तिं प्रपश्यामि जगत्यन्यस्य कस्यचित् ॥ सागरं वानरैस्तीर्त्वा निश्चयेन जयो मम ॥ २६ ॥
तस्य कामपरीतस्य निशम्य परिदेवितम् ॥ कुम्भकर्णः प्रचुक्रोध वचनं चेदमब्रवीत् ॥ २७ ॥
[संप्रधार्यैव तत्कार्यं करणीयं त्वया विभो ॥ संप्रधार्य सहामात्यैः पूर्वमेव यथातथम्] ॥ २८ ॥
यदा तु रामस्य सलक्ष्मणस्य प्रसह्य सीता खलु सा इहाहृता ॥
सकृत्समीक्ष्यैव सुनिश्चितं तदा भजेत चित्तं यमुनेव यामुनम् ॥ २९ ॥
सर्वमेतन्महाराज कृतमप्रतिमं तव ॥ विधीयेत सहास्माभिरादावेवास्य कर्मणः ॥ ३० ॥
न्यायेन राजकार्याणि यः करोति दशानन ॥ न स संतप्यते पश्चान्निश्चितार्थमतिर्नृपः ॥ ३१ ॥
अनुपायेन कर्माणि विपरीतानि यानि च ॥ क्रियमाणानि दुष्यन्ति हवींष्यप्रयतेष्विव ॥ ३२ ॥
यः पश्चात्पूर्वकार्याणि कर्माण्यभिचिकीर्षति ॥ पूर्वं चापरकार्याणि न स वेद नयानयौ ॥ ३३ ॥

कमेकं वाक्यं । मानुषात् भयाभावे हेतुमाह—तदेति । अजयमिति च्छेदः । लङुत्तमैकवचनं । इन्द्रं जितवतो मे मनुष्यः कियानितिभावः । ते मे भवन्तश्च तथा । ते देवासुरे युद्धे जेतारो भवन्तः । तथा सहायभूताः । वर्तन्त इत्यर्थः । सुग्रीवप्रमुखान्हरीनित्युत्तरशेषः ॥ २३ ॥ प्राप्तौ ज्ञातवन्तौ । वरुणालयं समुद्रं संप्राप्तौ । प्राप्तुतां नाम का नः क्षतिरितिभावः ॥ २४ ॥ विमृश्यतामित्युक्तं विमर्शप्रकारं दर्शयति—अदेयेति ॥ मन्त्रो मन्त्र्यतां मन्त्रः क्रियतामित्यर्थः । सुनीतं सुनिश्चितं ॥ २५ ॥ मा भूद्रामस्य समुद्रतरणे तव जये वा शक्तिः तत्सहायस्यान्यस्य कस्यचित्स्यात्तत्राह—नहीति ॥ वानरैः सह सागरं तीर्त्वा । आगन्तुमिति शेषः । रामादन्यस्य शक्तिं न पश्यामि । अतो मम निश्चयेन जय इत्यन्वयः ॥२६॥ कामपरीतस्य कामेन विपरीतस्य । कामातुरतया विपरीतबुद्धेरित्यर्थः । परिदेवितं परिदेवनं । तद्वदसंगतभाषणमित्यर्थः ॥२७—२८॥ "मन्त्रिभिर्हितसंयुक्तैः समर्थैर्मन्त्रनिर्णये । सहितो मन्त्रयित्वा यः कर्मारम्भान्प्रवर्तयेत् " इत्युक्तोत्तममन्त्रयितृभावे " एकोर्थं विमृशन्नेको धर्मे प्रकुरुते मनः । एकः कार्याणि कुरुते तमाहुर्मध्यमं नरं" इत्युक्तमध्यममन्त्रयितृभावेपि नावस्थितोसीत्याह—यदेति ॥ यदा सकृत्समीक्ष्यैव स्वयमेव विचार्य । रामस्य सीता इहाहृता तदैव चित्तं कर्तृ यमुना यामुनं पर्वतमिव सुनिश्चितं सुनिश्चयम् भजेत खलु । स एवास्माभिः सह विचारकालः । इदानीं विचारणं गते जले सेतुबन्धनमिति भावः॥२९॥ तदा कृते किं स्यादित्यत्राह—सर्वमिति ॥ कृतमिति कर्मणि निष्ठा । एतत्कृतं सर्वं मन्त्रकर्म । अस्य कर्मणः सीताहरणरूपस्य । आदावेव यदि विधीयेत तदा अप्रतिमं समञ्जसं स्यादित्यर्थः ॥ ३० ॥ आदौ विचार्य कृतस्य साफल्यप्रदर्शनपुरःसरमविचार्यकृतस्य फलवैपरीत्यं दर्शयति श्लोकद्वयेन—न्यायेनेति ॥ न्यायेन विचारणेन ॥ ३१ ॥ अनुपायेन क्रियमाणानि कर्माणि विपरीतानि विपर्यस्तानि यानि तानि च दुष्यन्ति दोषवन्ति च भवन्ति । न केवलं निष्फलानि प्रत्युतानर्थकराण्यपिभवन्तीत्यर्थः । अप्रयतेषु अशुचिषु अपात्रेषु । दीयमानानीति शेषः ॥ ३२ ॥ अकालकृतं मन्त्रकरणमनुचितमित्याह—य इति ॥ पूर्वकार्याणि पूर्वं कर्तव्यानि मन्त्रकर्माणि । अपरकार्याणि उत्तरकालकर्तव्यकर्मारम्भान् । पूर्वं मन्त्रवि-

ती० नहिशक्तिमित्यस्यवास्त्वर्थस्तु । अन्यस्यशक्तिंनपश्यामि । रामंविनेतिशेषः । एवंनिश्चयेसतिममजयोनेत्यन्वयः ॥ २६ ॥
ति० यदा सलक्ष्मणस्यरामस्यसीतासकृत्समीक्ष्यैव तात्कालिकापातविचारंकृत्वैवप्रसह्यहृता । तदैव तेचित्तं यमुना यामुनंह्रदमिव सुनिश्चितंभजेत निश्चयभजनार्हं । यथायमुनापृथिव्यामवतारसमयएव स्वह्रदंपूरयति कालान्तरेतुसमुद्रंगतत्वात्तज्जलस्यतत्पूरणासंभवः । एवमस्माभिःसहविचारस्यसएवकालः । इदानींत्वनर्थनिश्चयोजातएवेतिविचारोनिष्फलइतिक्रोधजाव्यङ्ग्योक्तिः ॥ २९ ॥

[पा०] १ घ. स्तर्तुं. २ अयंश्लोकः. घ. पाठेदृश्यते. ३ घ. पश्चात्सुखीहिभवतिप्रभो.

चपलस्य तु कृत्येषु प्रसमीक्ष्याधिकं बलम् ॥ क्षिप्रमन्ये प्रपद्यन्ते क्रौञ्चस्य खमिव द्विजाः ॥ ३४ ॥
त्वयेदं महदारब्धं कार्यमप्रतिचिन्तितम् ॥ दिष्ट्या त्वां नावधीद्रामो विषमिश्रमिवामिषम् ॥ ३५ ॥
तस्मात्त्वया समारब्धं कर्म ह्यप्रतिमं परैः ॥ अहं समीकरिष्यामि हत्वा शत्रूंस्तवानघ ॥ ३६ ॥
अहमुत्सादयिष्यामि शत्रूंस्तव विशांपते ॥ यदि शक्रविवस्वन्तौ यदि पावकमारुतौ ॥
तावहं योधयिष्यामि कुबेरवरुणावपि ॥ ३७ ॥
गिरिमात्रशरीरस्य महापरिघयोधिनः ॥ नर्दतस्तीक्ष्णदंष्ट्रस्य बिभियाद्वै पुरन्दरः ॥ ३८ ॥
पुनर्मां स द्वितीयेन शरेण निहनिष्यति ॥ ततोऽहं तस्य पास्यामि रुधिरं काममाश्वस ॥ ३९ ॥
वधेन वै दाशरथेः सुखावहं जयं तवाहर्तुमहं यतिष्ये ॥
हत्वा च रामं सह लक्ष्मणेन खादामि सर्वान्हरियूथमुख्यान् ॥ ४० ॥
रमस्व कामं पिब चाम्यवारुणीं कुरुष्व कार्याणि हितानि विज्वरः ॥
मया तु रामे गमिते यमक्षयं चिराय सीता वशगा भविष्यति ॥ ४१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्वादशः सर्गः ॥ १२ ॥

चारात्पूर्वं ॥ ३३ ॥ इदानीमसमीक्ष्यकारिणो बलमपि निरर्थकमित्याह—चपलस्येति ॥ यद्वा प्राप्तामप्यनीतिं बलेन समीकरिष्यामीत्यत्राह—चपलस्येति ॥ कृत्येषु क्षिप्रं चपलस्य असमीक्ष्यकारिणः । बलमधिकमाभिमुख्येन जेतुमशक्यम् । समीक्ष्य विचार्य । अन्ये शत्रवः । खं रन्ध्रम् प्रपद्यन्ते । असमीक्ष्यकरणरूपावसरं लब्ध्वा अभिभवन्तीत्यर्थः । द्विजाः हंसाः । अलङ्घ्यस्यक्रौञ्चस्य क्रौञ्चाख्यपर्वतस्य । लङ्घनाय खं रन्ध्रंयथाप्रपद्यन्ते तद्वदित्यर्थः । क्रौञ्चस्यौन्नत्येनालङ्घ्यत्वात् । सुब्रह्मण्यशक्तिविदारणकृतरन्ध्रेण हंसास्तमतिक्रम्य गच्छन्तीति प्रसिद्धिः ॥ ३४ ॥ सापायं च त्वत्कृतं कर्मेत्याह—त्वयेति ॥ महत् दुष्करं । सापायमित्यर्थः । अप्रतिचिन्तितं अनालोचितं । इदं सीताहरणरूपंकार्यं । सापायत्वमेवाह—दिष्ट्येति ॥ ३५ ॥ सर्वमेतन्महाराजेत्युपक्रम्योक्तमुपसंहरति—तस्मादिति ॥ तर्हि का गतिरित्यपेक्षायां मयि जीवति कस्ते भार इत्याह—अहमिति । अनघेति । त्वं तु निर्व्यसनोभवेत्यर्थः । समीकरिष्यामि नीत्यनीती तुल्ये करिष्यामीत्यर्थः ॥ ३६ ॥ तदेवाह—अहमिति सार्धश्लोकः ॥ विशांपते प्रजानां पते । अतिमानुषवैभवौ तौ कथं जय्यौ तत्राह—यदीति । तौ दशरथात्मजौ । शक्रविवस्वन्तौ यदि स्यातां तथापीत्यर्थः ॥ ३७ ॥ स्वस्य योधनसामर्थ्यविशेषं दर्शयति—गिरीति ॥ गिरिमात्रशरीरस्य गिरिप्रमाणदेहस्य । "प्रमाणे द्वयसचूदघ्नञ्मात्रचः" इति मात्रच्प्रत्ययः । पञ्चम्यर्थे षष्ठी ॥ ३८ ॥ शरवर्षिणो रामस्य पुरतः कथं स्थातुं शक्तस्तत्राह—पुनरिति ॥ सः रामः । पुनर्मां प्रथममेकेन शरेण निहत्य पुनरपि द्वितीयेन शरेण मां हनिष्यति । ततः तावदेवेत्यर्थः । अत्राश्लीलमपि ध्वन्यते । मां द्वितीयेन शरेणावश्यंनिहनिष्यति । तस्य रामस्य । ततः तस्माद्धननात् । कर्तरिषष्ठी । रुधिरं स्वरुधिरं । पास्यामि । कामं अत्यर्थं । आश्वस निश्चसेति ॥ ३९ ॥ आत्मानमरक्षन्परघातीवीरो न श्लाघ्य इति न्यायेन परवत्स्वस्यापि वधे न कोप्यतिशय इत्यत्राह—वधेनेति ॥ अत्राप्यर्थान्तरं । वधेन स्वविनाशेन । दाशरथेः सुखावहं जयं तव सकाशादाहर्तुं यतिष्ये । रामं हत्वा रामं गत्वा । " हन हिंसागत्योः " इति धातुः । खादामि किं जीवामि किमिति काकुरनुसन्धेया ॥ ४० ॥ रमस्वेति । अत्राप्यर्थान्तरं । मया रामे विषये अक्षयं यथा भवति तथा गमिता प्रापिता सीता रामस्य वशगा भविष्यति । रमस्वेत्यादौ काकुः ॥ ४१ ॥ इति श्रीगो-

तीo पुनरित्यादिश्लोकत्रयस्यवास्तवार्थस्तु । रणमूर्धनिस्खकर्तव्यंविज्ञापयति । पुनरितिशेषः । सः रामः । मामेकेनशरेणप्रहृत्य पुनर्द्वितीयेनशरेणनिहनिष्यति । ततः ततःप्रागेव तस्य रामस्यसंबन्धिवानराणामितिशेषः । रुधिरंपास्यामिकाममाश्वस ॥ ३९ ॥ तीo मयारामेविषये यमक्षयंगमितेसति सीता अवशं अस्य विष्णुरूपरामस्यवशमागमिष्यतीतिसंबन्धः ॥४१॥ इतिद्वादशःसर्गः ॥१२॥

[पाo] १ ङ. ञ. ट. छिद्रमन्ये. २ छ. ञ. मुत्पाटयिष्यामि. ३ क. च. छ. ञ. शितशूलधरस्यच.

त्रयोदशः सर्गः ॥ १३ ॥

महापार्श्वेन कुंभकर्णवचनाकर्णनकुपितरावणप्रहर्षणाय सदृष्टान्तोपन्यासं बलात्कारेणसीतोपभोगचोदना ॥ १ ॥ रावणेन सम्भावंतंप्रति स्वकृतपुञ्जकस्थलीहठोपभोगलब्धब्रह्मशापस्यहठोपभोगप्रतिबन्धकत्वनिवेदनपूर्वकं रामजयेकुंभकर्णादियोजनसूचकतद्वचनोत्तरतयास्वपराक्रमवर्णनपूर्वकमितरनैरपेक्ष्येण स्वस्यरामादिपराजयसामर्थ्योक्तिः ॥ २ ॥

रावणं क्रुद्धमाज्ञाय महापार्श्वो महाबलः ॥ मुहूर्तमनुसंचिन्त्य प्राञ्जलिर्वाक्यमब्रवीत् ॥ १ ॥
यः खल्वपि वनं प्राप्य मृगव्यालसमाकुलम् ॥ न पिबेन्मधु संप्राप्तं स नरो बालिशो भवेत् ॥ २ ॥
ईश्वरस्येश्वरः कोस्ति तव शत्रुनिबर्हण ॥ रमस्व सह वैदेह्या शत्रूनाक्रम्य मूर्धसु ॥ ३ ॥
बलात्कुक्कुटवृत्तेन वर्तस्व सुमहाबल ॥ आक्रम्याक्रम्य सीतां वै तथा भुङ्क्ष्व रमस्व च ॥ ४ ॥
लब्धकामस्य ते पश्चादागमिष्यति यद्भयम् ॥ प्राप्तमप्राप्तकालं वा सर्वं प्रतिसहिष्यसि ॥ ५ ॥

विन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्वादशः सर्गः ॥ १२ ॥

अथ रावणस्य दुर्मन्त्रिमतानुसारित्वमाह—रावणमित्यादि ॥ क्रुद्धं कुम्भकर्णोक्तनयापरिज्ञानवचनेनेत्यर्थः । मुहूर्तमनुसंचिन्त्य रावणक्रोधनिवारणोपायं विचार्येत्यर्थः ॥ १ ॥ खलुर्वाक्यालंकारे । दुष्करं सीताहरणं श्रमेण कृत्वा तत्संभोगमकुर्वाणस्त्वं क्षौद्राकाङ्क्षयाऽतिगहनं वनं प्रविश्य तदपिवञ्चनइवमूढोसीतिभावः ॥ २ ॥ शत्रुषु विद्यमानेष्वधर्मावहमिदंकथं कुर्यामित्यत्राह—ईश्वरस्येति ॥ सर्वनियन्तुस्तव को वा नियन्तास्ति । अतो धर्मान्न भेतव्यमितिभावः । शत्रून् मूर्धस्वाक्रम्य तांस्तृणीकृत्येत्यर्थः । अर्थान्तरं तु रामस्येश्वरः कोस्ति । स निग्रहीतुं न शक्य इत्यर्थः । शत्रून् रामं । पूजायां बहुवचनं । दशस्वपि मूर्धस्वाक्रम्य शिरसाप्रणम्येत्यर्थः । वैदेह्या सह रमस्व वैदेह्यां यथा स्वभर्ता रमते तथा त्वमपि स्वदारेषु रमस्व । वैदेह्या सह रामं प्रणम्येति वा योजना ॥ ३ ॥ किं करोमि सा हि न मामभिलषतीत्यत्राह—बलादिति ॥ कुक्कुटवृत्तेन कुक्कुटवृत्त्या । भावे क्तः । कुक्कुटो वञ्चनामार्गेण स्वदयितामाक्रमते । तथा त्वमपीत्यर्थः । कुक्कुटानां कामुककुक्कुटसङ्गे कोपो जातिधर्मः । तथा सीतामनुभव । यथा कुक्कुटाःसुखिनः तद्वदित्यर्थः । यथाह वात्स्यायनः—" कुक्कुटाक्रम्य भोगस्तु कौक्कुटः सोपि सौख्यदः " इति । भुङ्क्ष्व भोगं भज । रमस्व निर्विचारो भवेत्यर्थः । मुनिहृदयं तु कुक्कुटवृत्तेनान्यत्र वर्तस्व सीतां तु बलात् भुङ्क्ष्व रक्ष । " भुज परिपालनाभ्यवहारयोः " इति धातुः । आत्मनेपदमार्षं ॥ ४ ॥ एतन्निमित्तमागामि भयमनिवार्य कथमेवं क्रियतामित्यत्राह—लब्धेति ॥ एवं लब्धकामस्य ते पश्चात् कामलाभानन्तरं । यत् भयमागमिष्यति । प्राप्तं तदानी-

---

स० मुहूर्तमनुसंचिन्त्य अप्रियोक्तौममविप्रियं तत्प्रियोक्तौसर्वैप्रियहानिः । कथंकर्तव्यमितिध्यात्वा ॥ १ ॥ स० प्रथमतः सीतानयनंनकर्तव्यं । कृतंचेत्सीतानुभवोभवतोनयोग्यइतिप्रोत्साहयति—**यद्इति** ॥२॥ स० "सार्किनरम्यासचकिंनरन्तागरीयसीकेवलमीश्वरेच्छा " इत्यादिवदीश्वरेच्छानुसारिताचेतरस्य नतवेत्याह—ईश्वरस्येति ॥ ३ ॥ शि० ननुमांप्रत्यतिकुपितायाः सीतायाःकथंप्रसादोभविष्यतीत्यतआह—बलादिति । कुक्कुटानांतच्छब्दानांवृत्तंवर्तनंयस्मिंस्तेन । उषःकालेइत्यर्थः । बलात् हठात् । आक्रम्याक्रम्य तच्चरणौगृहीत्वागृहीत्वा। सीतांप्रवर्तस्व स्वापराधक्षमापणेनियोजयस्व । अतएतांलङ्कासंपत्तिं भुङ्क्ष्व रमस्वच ॥ती० अनङ्गीकारेकथमनुभवइत्यत्राह—बलादिति । रमस्वसहवैदेह्येत्यादिसार्धश्लोकस्यवास्तवार्थस्तु—कुक्कुटवृत्तेनेत्यत्र कुक्कुटवृत्ते न इतिच्छेदः। हेमहाबल रावण वैदेह्याकिं । अतआक्रम्याक्रम्यवा प्रकारान्तरेणवा तांवैदेहीं नभुङ्क्ष्व नरमस्वच । कुक्कटवृत्ते कुक्कुटव्यापारे । चापल्येइतियावत् । नवर्तस्व किंतु बलाच्छत्रून्मूर्धस्वाक्रम्यरमस्वेतिसंबन्धः ॥ ४ ॥ शि० ननुसीतासमर्पणेपिरामप्रसादेसंशयएवेत्यतआह—लब्धेति । पश्चात् सीताप्राप्त्यनन्तरकाले लब्धःकामः इच्छाविषयीभूतस्वदारप्राप्तिः येनतस्य रामस्य रामात् । भयंतुभ्यंकिं किमर्थं । आगमिष्यति प्राप्स्यति नप्राप्स्यतीत्यर्थः । अतः अप्राप्तकालं अप्राप्तःनिवृत्तइत्यर्थः । कालःकोप.

[पा०] १ क. ख. ग. ङ.—ट. व्यालनिषेवितं. २ ग.—छ. झ. ञ. ट. संप्राप्य. ३ घ. त्कुक्कटवद्वृत्तिवर्तयस्वमहाबल- ४ ङ. झ. ट. प्रवर्तस्वमहाबल. ५ क. ख. आक्रम्यसीतांवैदेहींलंभुङ्क्ष्वचरमस्वच. ६ ङ. छ. ज. झ. ट. तांभुंक्ष्वचरमस्वच. ७ क. ख. ङ.—ट. किंभयं. ८ ङ. झ. प्रतिविधास्यसे.

कुम्भकर्णः सहास्माभिरिन्द्रजिच्च महाबलः ॥ प्रतिषेधयितुं शक्तौ सवज्रमपि वज्रिणम् ॥ ६ ॥
उपप्रदानं सान्त्वं वा भेदं वा कुशलैः कृतम् ॥ समतिक्रम्य दण्डेन सिद्धिमर्थेषु रोचय ॥ ७ ॥
इह प्राप्तान्वयं सर्वाञ्शत्रूंस्तव महाबल ॥ वशे शस्त्रप्रतापेन करिष्यामो न संशयः ॥ ८ ॥
एवमुक्तस्तदा राजा महापार्श्वेन रावणः ॥ तस्य संपूजयन्वाक्यमिदं वचनमब्रवीत् ॥ ९ ॥
महापार्श्व निबोध त्वं रहस्यं किंचिदात्मनः ॥ चिरवृत्तं तदाख्यास्ये यदवाप्तं मया पुरा ॥ १० ॥
पितामहस्य भवनं गच्छन्तीं पुञ्जिकस्थलाम् ॥ चञ्चूर्यमाणामद्राक्षमाकाशेऽग्निशिखामिव ॥ ११ ॥

मागतं । अप्राप्तकालं प्राप्तकालमित्यस्य " प्राप्तापन्ने च द्वितीयया " इति समासः । तथा न भवतीत्यप्राप्तकालं । आगामीतियावत् । प्रतिसहिष्यसि अभिभविष्यसीत्यर्थः ॥ ५ ॥ तिष्ठतु भवान् त्वद्भ्रातृपुत्रावेव प्रतिपक्षप्रतिषेधे शक्तावित्याह—कुम्भकर्ण इति ॥ ६ ॥ विभीषणमतं खण्डयति—उपप्रदानमिति ॥ अकुशलैः युद्धासमर्थैः । कृतं दानादिकं । अतिक्रम्य त्यक्त्वा । दण्डेन बलात्कारेण । अर्थेषु प्रयोजनेषु । सिद्धिं रोचय ॥ ७ ॥ रामादयो यत्र वर्तन्ते तत्र गत्वा योद्धव्यमित्युक्तं निकुम्भादिमतं दूषयन्नाह—इहेति ॥ इह लङ्कापरिसरे । शस्त्रप्रतापेन शस्त्रबलेन । वशे करिष्यामः । निग्रहिष्याम इत्यर्थः ॥ ८ ॥ संपूजयन् स्वचित्तानुगुणमुक्तमिति श्लाघयन्नित्यर्थः ॥ ९ ॥ महापार्श्वेति संबोधनं ॥ प्रमुदितोऽस्मीति शेषः । चिरवृत्तं रहस्यं किंचित् । अस्तीति शेषः । यत्पुरा मयावाप्तं तदाख्यास्य इति योजना ॥ १० ॥ गच्छन्तीं । पितामहवन्दनायेति शेषः । पुञ्जिकस्थला नाम काचिदप्सराः । चञ्चूर्यमाणां भीत्या निलीय गच्छन्तीं । " लुपसदचर— " इत्यादिना भावगर्हायां यङ् । संचरणात्मकस्य भावस्य गर्हा निलयनं । " चरफलोश्च " इति नुक् । " उत्परस्यातः " इत्युकारः । अग्निशिखामिवेति तेजोविशेषोक्तिः । यद्वा द्रावकत्वोक्तिः । अत एवोक्तं—" अङ्गारसदृशी नारी घृतकुम्भसमः पुमान् " इति । संचार्यमाणामिति

समयोयस्यतं । प्राप्तरामं सर्वं स्वापराधजातं प्रतिसहिष्यसि साहयिष्यसि ॥ ५ ॥ शि० ननुप्रसादनेपियदितत्कोपशान्तिर्नभवेत् तदा किंकर्तव्यमित्यतआह—कुंभकर्णइत्यादिभिः । कुंभकर्णइन्द्रजिच्च सवज्रं वज्रसहितं वज्रिणं वज्रस्वामिनमिन्द्रमपि । प्रतिषेधयितुंशक्तौ । एतेन तवापराधसत्त्वेकुंभकार्णदीनांबलमकिञ्चित्करंभविष्यतीतिध्वनितं ॥ ६ ॥ शि० तवशत्रून् बलं तत्सैन्यंच शस्त्रप्रपातेन करिष्यामः हनिष्यामः ॥ ८ ॥ स० ननूत्तरकाण्डेरंभानिमित्तंनलकूबरशापःपरदाराणांबलात्सङ्गेश्रूयते । यथोक्तं—" एतस्मिन्नन्तरेतत्रदिव्याभरणभूषिता । सर्वाप्सरोवररंभापूर्णचन्द्रनिभानना " इत्यारभ्य—" नलकूबरमासाद्य—" इत्याद्युक्त्वा " उत्ससर्जतदाशापंराक्षसेन्द्रायदारुणं । अकामातेनयस्मात्त्वंबलाद्धर्षिप्रधर्षिता । तस्मात्सयुवतीमन्यांनाकामामुपयास्यति " इत्यादि । तथाभारतेवनपर्वणिरामोपाख्यानेसीतांप्रतित्रिजटावाक्यं—" नलकूबरशापेनरक्षितात्मसिनन्दिनि । शापोह्येषपुरापापोवधूंरंभांपरामृशन् "इति। तथाचकथमत्रपुञ्जकस्थलीनिमित्तंब्रह्मशापोत्कीर्तनं। नचपूर्वंरंभानिमित्तशापः अनन्तरंपुञ्जकस्थलीकृतःशापइत्येकस्यैवशापद्वयाङ्गीकारेबाधकाभावइतिवाच्यं । तथात्वे नलकूबरशापेनतदनन्तरभाविपुञ्जकस्थलीधर्षणकालेतच्छिरस्स्फोटापत्तेः । ब्रह्मशापानन्तरंरंभासंभोगेतुसुतरां । तस्यदुर्निवारत्वात् । तस्मात्कथमत्रेतिचेदुच्यते । कल्पेकल्पेअवान्तरवैचित्र्यस्यबहुलमुपलंभात्कल्पान्तरवृत्तांब्रह्मशापकथांसमाधौसमीक्ष्यकविरवादीदिति । अथवा नलकूबरशापस्यपतिव्रताधर्षणविषयत्वेन स्वैरिणीविषयत्वाभावेननपुञ्जकस्थलीसंगात्तच्छिरसःसहस्रधाभेदः । यथोक्तत्रैवोत्तररामायणे—" तेननिस्सीमतांप्रीतिमापुःसर्वाः पतिव्रताः । " इति । अन्यथापतिव्रताइतिनस्यात् स्याच्चस्त्रियइति । यद्वा रंभानिमित्तशापस्यकामनारहितस्त्रीबलात्कारविषयत्वं । पुञ्जकस्थल्याअन्तःकामोवर्ततइतिज्ञायते । अतोनतन्मरणमभूत् । यथोक्तंतत्रैव—" नाकामामुपयास्यसि " इति । अत्रचञ्चूर्यमाणां रावणलज्जयास्वाङ्गेनिलीयमानामिवेति । प्रसह्येत्युक्तिस्तु स्त्रीस्वभावेनलज्जयाऽनङ्गीकारप्रदर्शनादितिज्ञेयं । यत्तुनागोजिभट्टेन क्वचिदेवमेवकुबेरपुत्रनलकूबरशापोपिरंभानिबन्धनःश्रूयते । तत्रोपपत्तिश्चिन्त्या । अस्यप्रथमत्वेतस्यांबलात्कारासंभवात् । तस्यप्रथमत्वे अस्यांबलात्कारासंभवादितिकेचित् । नलकूबरशापस्यतपोबलेनाकिंचित्करत्वादयमेवशापोब्रह्मास्त्रवदप्रतिक्रियःपाश्चात्यइत्यन्येइत्युक्तं । तत्रनलकूबरशापेनेत्युक्तभारतवचनेतस्यैवपुरस्करणं । " तस्मिन्नुदाहृतेशापेज्वलितानिसमप्रभे । देवदुन्दुभयोनेदुः पुष्पवृष्टिश्चखाच्युता । पितामहमुखाश्चैवसर्वेदेवाःप्रहर्षिताः । ज्ञात्वालोकगतिंसर्वे " इत्यत्रैवोत्तरकाण्डेब्रह्मादत्तमल्याशापस्यदुष्परिहारतेव " श्रुत्वातुसदशग्रीवस्तंशापंरोमहर्षणं । नारीषुमिथुनीभावंनाकामास्वभ्यरोचयत् " इत्यनेनशापेनैवाकामकामिनीसंभोग-

[पा०] १ ङ. ज. झ. ट. रोचये. २ ट. बलंशस्त्र. ३ ख. ङ. झ.ट. प्रवदतोरहस्यं.

सा प्रसह्य मया भुक्ता कृता विवसना ततः ॥ स्वयंभूभवनं प्राप्ता लोलिता नलिनी यथा ॥ १२ ॥
तस्य तच्च तदा मन्ये ज्ञातमासीन्महात्मनः ॥ अथ संकुपितो [1]देवो मामिदं वाक्यमब्रवीत् ॥ १३ ॥
अद्यप्रभृति यामन्यां बलान्नारीं गमिष्यसि ॥ तदा ते शतधा मूर्धा फलिष्यति न संशयः ॥ १४ ॥
इत्यहं तस्य शापस्य भीतः प्रसभमेव ताम् ॥ [3]नारोपये बलात्सीतां [4]वैदेहीं शयने शुभे ॥ १५ ॥
सागरस्येव मे वेगो मारुतस्येव मे गतिः ॥ नैतद्दाशरथिर्वेद ह्यासादयति तेन माम् ॥ १६ ॥
[5]अस्तु सिंहमिवासीनं सुप्तं गिरिगुहाशये ॥ क्रुद्धं मृत्युमिवासीनं [6]प्रबोधयितुमिच्छति ॥ १७ ॥
न मत्तो [7]निशितान्बाणान्द्विजिह्वानिव पन्नगान् ॥ रामः पश्यति संग्रामे तेन मामभिगच्छति ॥ १८ ॥
क्षिप्रं वज्रोपमैर्बाणैः शतधा कार्मुकच्युतैः ॥ राममादीपयिष्यामि उल्काभिरिव कुञ्जरम् ॥ १९ ॥
तच्चास्य बलमादास्ये बलेन महता वृतः ॥ [8]उदयन्सविता काले नक्षत्राणामिव प्रभाम् ॥ २० ॥
न वासवेनापि सहस्रचक्षुषा युधाऽस्मि शक्यो वरुणेन वा पुनः ॥

पाठे परिचारिकादर्शितमार्गामित्यर्थः ॥ ११ ॥ विवसना कृता सा मया भुक्तेत्यन्वयः ॥ १२ ॥ तत् धर्षणं । मन्य इत्यनेन शापमात्रं मया श्रुतं । धर्षणश्रवणं तु मया ऊहितमिति गम्यते ॥ १३ ॥ अद्यप्रभृति एतत्क्षणमारभ्य । क्रियाविशेषणमेतत् । तदा गमनकाले एव फलिष्यति विशीर्णो भविष्यति । इति एवंप्रकारस्य शापस्य शापादित्यर्थः । प्रसभं नारोप इत्यन्वयोन बलादित्यनेन पौनरुक्त्यात् । किंतु प्रसभं शापस्येत्यन्वयः । वैदेहीमित्यनेन महाकुलप्रसूततया तच्छापादपि भीतोऽस्मीत्यवगम्यते ॥ १४—१५ ॥ एवं न युक्ता बलात्कर्तुं सीतेत्युक्त्वा अस्माभिः सह कुम्भकर्णेन्द्रजितौ योत्स्यत इति महापार्श्ववचनस्यासहायशूरे मयि विद्यमाने किमन्येनेति परिहारमाह—सागरस्येति ॥ एतत् वेगगतिमत्त्वं । आसादयति सेनामिति शेषः । स्वार्थण्यन्तो वा । तेन अवेदनेन ॥ १६ ॥ स्वप्रभावावेदनेनाहितमाह—यस्त्विति ॥ सुप्तं सिंहमिवासीनं सिंहमिव स्थितमित्यर्थः । मृत्युमित्यत्रापि सुप्तमित्यनुषज्यते । अन्यथा प्रबोधयितुमिच्छतीत्यनेनानन्वयः । क्रुद्धं क्रोधार्हं । यथा सुप्तं सिंहं मृत्युं वा प्रबोधयितुमिच्छन् पुरुषोऽनभिज्ञ एव । तद्वत् तूष्णीं स्थितं मां प्रकोपयन्नामोपीति भावः ॥ १७ ॥ रामो मत्पराक्रमं न वेत्त्येव तत्तिष्ठतु मद्बाणवेगं वा जानाति नैवेत्याह—नेति ॥ लेलिहानतादृशां द्योतयितुं द्विजिह्वानित्युक्तं ॥ १८ ॥ आदीपयिष्यामि सन्तापयिष्यामि । उल्काभिः निर्गतज्वालकाष्ठैः । कुञ्जरपलायनार्थमुल्काः प्रदर्शयन्तीति प्रसिद्धिः ॥ १९ ॥ एवं रामं पलाययित्वा तस्य सेनां हनिष्यामीत्याह—तच्चेति ॥ आदास्ये खण्डयिष्ये । " दो अवखण्डने " इति धातुः ॥ २० ॥ देवानामप्यजय्योस्मि कथं मनुष्यादीनां जय्यो भविष्यामीत्याशयेनाह—न वासवेनेति ॥ सहस्रचक्षुषेति तस्याभिमानातिशयोक्तिः । युधा

विरुचिताचकथंसंगच्छतइतिविचार्यं । अतएवतेनकेचिदन्येचेत्युक्तमितिमन्तव्यं ॥ ११ ॥ **शि०** अभुक्ता एकादश्याद्युपवासयुक्ता सा पुञ्जकस्थली मया विवसना दूरगमनदर्शनजनितकोपादुत्तरीयरहिताकृता ॥ १२ ॥ **ति०** तच्च ममचरितं । महात्मनस्तस्य मन्ये निश्चितं । ज्ञातमासीत् । मन्यइतितिङन्तप्रतिरूपकमव्ययं । " मन्येशङ्केध्रुवंप्रायोनिश्चयार्थाअमीमताः " इतिकतकः ॥ १३ ॥ **रामानु०** अथेत्यादि । " तदातेशतधामूर्धाफलिष्यतिनसंशयः " इत्यनेनरावणविषयेरंभानिबन्धननलकूबरशापेविद्यमानेपितस्यप्राकृतदेवत्वात्तत्पुत्रत्वाच्चतच्छापमनादृत्यपुञ्जिकस्थलायामपिप्रवृत्तंरावणंपश्चात्पितामहःशप्तवान् । अतएव रावणोप्यनुच्छन्ननीयंपितामहवाक्यमेवोक्त्वानित्यवगम्यते । शापस्यभीतः शापाद्भीतः ॥ १४—१५ ॥ **शि०** अन्यांनारीं तत्समीपं । बलात् हठात् । यदिगमिष्यसि । इतीति । इतिहेतोः तस्यशापस्य शापाद्भीतः हठप्रार्थनायामियमपिशापंदास्यतीतिभयंप्राप्तोहं शुभेशयने तद्योग्यपर्यङ्केबलान्नारोपये भूमावेवसातिष्ठतीत्यर्थः । नन्वेवंचेद्रामायसमर्पयेत्यतआह—सागरस्येति । एतेन रामायदानेमेदौर्बल्यप्रख्यातिर्भविष्यतीत्यतोनदास्यामीतिसूचितं ॥ १६ ॥ इतित्रयोदशःसर्गः ॥ १३ ॥

[पा०] १ ङ. झ. ट. वेधाः. २ ङ.—ट. नारोहये. ३ ख. ग. ङ.—ट. कोहि. ४ क. ख. ङ. ट. संबोधयितुं. ५ क.—ल. निर्गतान्. ६ ङ. झ. ट. उदितः.

मया त्विदं बाहुबलेन निर्जिता पुरी पुरा वैश्रवणेन पालिता ॥ २१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रयोदशस्सर्गः ॥ १३ ॥

चतुर्दशः सर्गः ॥ १४ ॥

विभीषणेन रावणंप्रति कुंभकर्णादीनांयुधिरामाग्रेऽवस्थानस्यापिदुश्शकत्वोक्तिपूर्वकं रामायसीताप्रत्यर्पणचोदना ॥ १ ॥

निशाचरेन्द्रस्य निशम्य वाक्यं स कुम्भकर्णस्य च गर्जितानि ॥
विभीषणो राक्षसराजमुख्यमुवाच वाक्यं हितमर्थयुक्तम् ॥ १ ॥
वृतो हि बाह्वन्तरभोगराशिश्चिन्ताविषः सुस्मिततीक्ष्णदंष्ट्रः ॥
पञ्चाङ्गुलीपञ्चशिरोतिकायः सीतामहाहिस्तव केन राजन् ॥ २ ॥
यावन्न लङ्कां समभिद्रवन्ति वलीमुखाः पर्वतकूटमात्राः ॥
दंष्ट्रायुधाश्चैव नखायुधाश्च प्रदीयतां दाशरथाय मैथिली ॥ ३ ॥
यावन्न गृह्णन्ति शिरांसि बाणा रामेरिता राक्षसपुङ्गवानाम् ॥
वज्रोपमा वायुसमानवेगाः प्रदीयतां दाशरथाय मैथिली ॥ ४ ॥
भित्त्वा न तावत्प्रविशन्ति कायं प्राणान्तिकास्तेऽशनितुल्यवेगाः ॥
शिताः शरा राघवविप्रमुक्ताः प्रहस्त तेनैव विकत्थसे त्वम् ॥ ५ ॥

युद्धेन न शक्योस्मि । जेतुमिति शेषः । उत्तरार्धेन कुबेरेणापि न जेतुं शक्य इति सिद्धं । अत्र वंशस्थवृत्तं ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रयोदशः सर्गः ॥ १३ ॥

एवं दुर्मन्त्रिभिः प्रभुचित्तानुसारेण कथिते तदसहमानो विभीषणः परमार्थं हितमुपदिशति–निशेति ॥ स कुम्भकर्णस्येत्यत्र स इति च्छेदः । गर्जितानि निरर्थकवचनानि । अर्थयुक्तं कर्तव्यार्थबोधयुक्तं ॥ १ ॥ अदेया न यथा सीतेति रावणवचनं प्रति वक्तुं सीतामहित्वेन रूपयति—वृत इति ॥ बाह्वन्तरं वक्षः तदेव भोगराशिः फणापरिणाहो यस्य स तथा । यद्वा बाह्वन्तरे वक्षसि भोगराशिः सौख्यसंपत् सैव बाह्वन्तरभोगराशिः तिर्यक्प्रसारितयोर्बाह्वोर्यदन्तरं तत्प्रमाणो भोगराशिः शरीरपरिणाहो यस्येत्यावृत्त्या रूपकनिर्वाहः । चिन्तैव विषं विरोधिप्राणहरत्वात् । तत् यस्य सः चिन्ताविषः । सुस्मितं स्वाभाविकमन्दस्मितं । तदेव शुभ्रत्वेन कामुकहृदयहारित्वेन च तीक्ष्णा दंष्ट्रा यस्य सः सुस्मिततीक्ष्णदंष्ट्रः । चिन्तावशेन वदनोपधानीकृतपाणेः पञ्चाङ्गुल्य एव पञ्चशिरोरूपातिकायो यस्य सः पञ्चाङ्गुलीपञ्चशिरोतिकायः । सीतामहाहिः स्पर्शमात्रेण मारकाहिः । तव त्वया । केन हेतुना वृतः । सर्वथा त्यक्तव्य एवेति भावः । राजन्निति सान्त्वोक्तिः ॥ २ ॥ न केवलं तवैवानर्थहेतुः सीता किंतु तावकीनस्य सर्वस्येत्याह–यावदिति ॥ " यावत्पुरानिपातयोर्लट् " । इति लट् । तावदिति शेषः ॥ ३—४ ॥ तावच्छब्दो वाक्यालंकारे । प्राणान्ते भवाः प्राणान्तिकाः प्राणहारिण इत्यर्थः । साक्षाद्राजानं प्रत्युक्तेरयुक्तत्वात्प्रहस्तं प्रति प्राणहरत्वोक्तिः । विकत्थसे आत्मानं श्लाघसे । "कत्थ श्लाघायां " इति धातुः ॥ ५ ॥

स० अर्थयुक्तं सदभिप्रायगर्भं ॥ १ ॥ ति० सुस्मितं अनुचितकृत्यदर्शनादिजंस्मितं । केनवृतः बद्धः । कण्ठेइतिशेषः । स० सुस्मितं रामवार्ताज्ञानानन्तरंवृत्तं । पञ्चाङ्गुलीरूपपञ्चशिरोविशिष्टश्चासौ अतिकायश्चेतिसतथा । "निचकर्तशिरान्द्रौणिः" इत्यादिप्रयोगादकारान्तोपिशिरशब्दोवर्ततइतिपक्षेपञ्चशिरइत्यन्तंभित्त्रंसदहिविशेषणं ॥ २ ॥ रामानु० यावन्नगृह्णन्तिशिरांसिबाणाइत्यतःपरंकेषुचित्कोशेषुदृश्यमानः भित्त्वानतावत्प्रविशन्तिकायमितिश्लोकः प्रहस्तोद्देशेनप्रवृत्तस्यतीक्ष्णानतायत्तवेत्यस्यानन्तरंद्रष्टव्यः ।

न कुम्भकर्णेन्द्रजितौ न राजा तथा महापार्श्वमहोदरौ वा ॥
निकुम्भकुम्भौ च तथातिकायः स्थातुं न शक्ता युधि राघवस्य ॥ ६ ॥
जीवंस्तु रामस्य न मोक्ष्यसे त्वं गुप्तः सवित्राऽप्यथवा मरुद्भिः ॥
न वासवस्याङ्कगतो न मृत्योर्नभो न पातालमनुप्रविष्टः ॥ ७ ॥
निशम्य वाक्यं तु विभीषणस्य ततः प्रहस्तो वचनं बभाषे ॥
न नो भयं विद्म न दैवतेभ्यो न दानवेभ्यो ह्यथवा कुतश्चित् ॥ ८ ॥
न यक्षगन्धर्वमहोरगेभ्यो भयं न संख्ये पतगोत्तमेभ्यः ॥
कथं नु रामाद्भविता भयं नो नरेन्द्रपुत्रात्समरे कदाचित् ॥ ९ ॥
प्रहस्तवाक्यं त्वहितं निशम्य विभीषणो राजहितानुकाङ्क्षी ॥
ततो महात्मा वचनं बभाषे धर्मार्थकामेषु निविष्टबुद्धिः ॥ १० ॥
प्रहस्त राजा च महोदरश्च त्वं कुम्भकर्णश्च यथाऽर्थजातम् ॥
ब्रवीथ रामं प्रति तन्न शक्यं यथा गतिः स्वर्गमधर्मबुद्धेः ॥ ११ ॥
वधस्तु रामस्य मया त्वया वा प्रहस्त सर्वैरपि राक्षसैर्वा ॥
कथं भवेदर्थविशारदस्य महार्णवं तर्तुमिवाप्लवस्य ॥ १२ ॥
धर्मप्रधानस्य महारथस्य इक्ष्वाकुवंशप्रभवस्य राज्ञः ॥
प्रहस्त देवाश्च तथाविधस्य कृत्येषु शक्तस्य भवन्ति मूढाः ॥ १३ ॥

तर्हि कुम्भकर्णादयो रामं वारयिष्यन्तीत्यत्राह—न कुम्भकर्णेति ॥ इदमपि प्रहस्तं प्रति वचनं ॥ ६ ॥ राज्ञः असामर्थ्यं विशिष्य दर्शयति—जीवन्निति ॥ रामस्य रामात्। विभक्तिव्यत्ययः। जीवन्न विमोक्ष्यसे प्राणपर्यन्तं न त्वां रामो विमोक्ष्यतीति भावः। अङ्कगतोपि पुत्रभावेनाङ्कस्थितोपीत्यर्थः। मृत्योरित्यत्रापि अङ्कगत इत्यनुषज्यते । नभः पातालं वाऽनुप्रविष्टः न मोक्ष्यस इति योजना ॥ ७ ॥ अस्माकं कुतश्चित् भयं न विद्म । विसर्गलोपश्छान्दसः । एवं सामान्येनोक्त्वा विशिष्य दर्शयति—न दैवतेभ्य इत्यादिना । भयं न विद्म इति सर्वत्रान्वेति ॥ ८ ॥ पतगोत्तमेभ्यः गरुडेभ्यः । नरेन्द्रपुत्रात् मानुषबालादित्यर्थः । कथं नो भवितेत्यपि ध्वन्यते ॥ ९ ॥ महात्मा महाबुद्धिः । धर्मार्थकामेषु । स्वामिन इति शेषः ॥ १० ॥ महोदरोक्तत्वेन पूर्वमनुक्तमप्यनेनावगम्यते पूर्वमुक्तमिति । अर्थजातं यथा ब्रवीथ तथा रामं प्रति तत्कार्यजातं न शक्यं । कर्तुमिति शेषः । अधर्मबुद्धेः स्वर्गं प्रति गतिर्यथा न शक्या तथैवेत्यर्थः ॥ ११ ॥ अशक्यत्वमेव विशदयति—वधस्त्विति ॥ अर्थविशारदस्य कार्यदक्षस्य । रामस्य वधः । अप्लवस्य नौरहितस्य । महार्णवं तर्तुं तरितुं । शक्तिरिति शेषः। शक्तिरिव कथं भवेत् न कथंचिदपि संभवतीत्यर्थः । एतेन वध्यौ दशरथात्मजाविति युक्तस्योत्तरमुक्तं ॥ १२ ॥ उक्तमर्थं कैमुतिकन्यायेन द्रढयति—धर्मेति ॥ धर्मप्रधानस्य । "अप्यहं जीवितं जह्यां" इत्युक्तरीत्या धर्मविरोधे तृणीकृतसकलेतरपुरुषार्थस्य महारथस्य रणे आत्मानं सारथिं च रक्षन् शत्रुसंहारक्षमो महारथः तस्य। "आत्मानं सारथिं चाश्वान्रक्षन्युध्येत यो नरः । स महारथसंज्ञः स्यादित्याहुर्नीतिकोविदाः" इत्युक्तेः ॥ इक्ष्वाकुवंशप्रभवस्य जन्मसिद्धनिरतिशयपराक्रमस्य। राज्ञः सकलप्रकृतिमण्डलरञ्जकस्य । तथाविधस्य विराधकबन्धवालिप्रभृतिव-

अन्यथाप्रकरणविरोधःस्यात् ॥ ५ ॥ स० युधि तदाबद्धननावसरे । राघवस्य पुरतइतिशेषः । राघवकर्तृकयुधीतिवा ॥ ६ ॥ स० तर्तुं तरितुं । धात्वन्तरस्यवैतद्रूपं । आगमशासनस्यानित्यत्वाद्वा " आर्धधातुकस्य—" इतिनेट् । तेनतर्तुमितिसाधु ॥१२॥

[पा०] १ क. ङ. ज. झ. ञ. राजंस्तथा. २ क. ख. ग. ङ. झ. ञ. समर्थायुधि. ३ क.—ङ. ज. ञ. कदाचित्, ४ क. ख. ग. ङ. ज. झ. ञ. महार्थे. ५ ख. ङ. ज. झ. ब्रवीत. घ. प्रब्रूत. ६ ङ. झ. पुरोस्यदेवाश्च.

तीक्ष्णा नता यत्तव कङ्कपत्रा दुरासदा राघवविप्रमुक्ताः ॥
भित्त्वा शरीरं प्रविशन्ति बाणाः प्रहस्त तेनैव विकत्थसे त्वम् ॥ १४ ॥
न रावणो नातिबलस्त्रिशीर्षो न कुम्भकर्णोस्य सुतो निकुम्भः ॥
न चेन्द्रजिद्दाशरथिं प्रसोढुं त्वं वा रणे शक्रसमं समर्थाः ॥ १५ ॥
देवान्तको वाऽपि नरान्तको वा तथाऽतिकायोतिरथो महात्मा ॥
अकम्पनश्चाद्रिसमानसारः स्थातुं न शक्ता युधि राघवस्य ॥ १६ ॥
अयं हि राजा व्यसनाभिभूतो मित्रैरमित्रप्रतिमैर्भवद्भिः ॥
अन्वास्यते राक्षसनाशनार्थे तीक्ष्णः प्रकृत्या ह्यसमीक्ष्यकारी ॥ १७ ॥
अनन्तभोगेन सहस्रमूर्ध्ना नागेन भीमेन महाबलेन ॥
बलात्परिक्षिप्तमिमं भवन्तो राजानमुत्क्षिप्य विमोचयन्तु ॥ १८ ॥
यावद्भि केशग्रहणात्सुहृद्भिः समेत्य सर्वैः परिपूर्णकामैः ॥
निगृह्य राजा परिरक्षितव्यो भूतैर्यथा भीमबलैर्गृहीतः ॥ १९ ॥
संहारिणा राघवसागरेण प्रच्छाद्यमानस्तरसा भवद्भिः ॥

धविदितवैभवस्य । शक्तस्य कार्यदक्षस्य । रामस्य कृत्येषु रणव्यापारेषु विषये । देवाश्च मूढा भवन्ति । अविदिततदीयव्यापारा भवन्तीत्यर्थः । किं पुनर्भवादृशा इति भावः ॥ १३ ॥ तीक्ष्णाः तीक्ष्णाग्राः । झटितिभेदनक्षमा इत्यर्थः । नताः नतपर्वाणः ऋजव इत्यर्थः । सपदि भित्त्वा निर्गन्तुं क्षमा इतिभावः । कङ्कपत्राः कङ्कानां पत्राण्येव पत्राणि येषां ते तथोक्ताः । कङ्कपक्षनिबद्धत्वेन महावेगा इत्यर्थः । अतएव दुरासदाः ॥ १४ ॥ न रावण इति । रावणादयः सर्वेपि न समर्था इति योज्यं ॥ १५ ॥ अतिरथः अतिशयितरथः । महात्मा महाशरीरः । अद्रिसमानसारः गिरितुल्यबलः । " सारो बले स्थिरांशे च " इत्यमरः । देवान्तकादयो रावणपुत्राश्च राघवस्य युधि स्थातुं न शक्ताः ॥ १६ ॥ अमित्रप्रतिमैः कार्यतो रिपुतुल्यैः । नाम्ना मित्रैः भवद्भिः त्वत्प्रमुखैः । व्यसनाभिभूतः सप्तव्यसनैराक्रान्तः । प्रकृत्या तीक्ष्णः उग्रः । असमीक्ष्यकारी अविमृश्यकारी । अयं राजा राक्षसनाशनार्थं अन्वास्यते अनुस्थियते । अस्य राजत्वासमीक्ष्यकारित्वव्यसनाभिभूतत्वान्यपुरस्कृत्य तीक्ष्णत्वमेव पुरस्कुर्वन्तो भवन्तोभिभवन्ति । सर्वराक्षसविनाशं न जानन्तीति भावः । सप्तव्यसनस्वरूपमुक्तं कामन्दकेन—" वाग्दण्डयोस्तु पारुष्यमर्थदूषणमेव च । पानं स्त्री मृगया द्यूतं व्यसनं सप्तधा प्रभोः " इति ॥ १७ ॥ एवं प्रहस्तप्रमुखान्मन्त्रिमुख्यान्निर्भर्त्स्य संप्रति कर्तव्यमुपदिशति—अनन्तेति ॥ अनन्तभोगेन अपरिच्छिन्नकायेन । सहस्रमूर्ध्ना अतएव भीमेन । न केवलं भीमत्वमात्रं महाबलेन नागेन । शेषेणेत्यर्थः । परिक्षिप्तं परिवेष्टितं । रामद्वेषो महासर्पवेष्टनतुल्य इति भावः ॥ १८ ॥ ननु समयोतीतः किं कुर्म इत्यत्राह—यावदिति ॥ परिपूर्णकामैः । अवाप्तसर्वाभीष्टैरित्यर्थः । राजतो लब्धकामैः राजकार्येऽवश्यं यतितव्यमिति भावः । सर्वैः सुहृद्भिः समेत्य ऐकमत्यं प्राप्येति यावत् । राजा भीमबलैः भूतैः गृहीतः पुरुष इव निगृह्य बलात्कृत्य । यावत्केशग्रहणात् शत्रुभिः केशग्रहणपर्यन्तं । परिरक्षितव्यः । आकेशग्रहणान्मित्रमकृत्येभ्यो निवर्तयेदिति प्रसिद्धिं दर्शयति हिशब्दः । यद्वा आकेशग्रहणान्निगृह्य परिरक्षितव्यः । अकार्यप्रवृत्तोऽयं राजा केशेष्वाकृष्यापि निवारणीय इत्यर्थः ॥ १९ ॥ संहारिणा विनाशकेन । राघवसागरेण लक्ष्मणसमुद्रेण । प्रच्छाद्यमानः । ततः काकुत्स्थपातालमुखे रामबडबा-

ति० यावत्तेकार्यमित्त्वाबाणाःपुनस्तदिषुधिनप्रविशन्ति तेनैवहेतुनातावत्हेप्रहस्त त्वंविकत्थसेवृथात्मश्लाघांकरोषि । रावणस्यपुरस्तादितिशेषः ॥ १४ ॥ ति० सुवारिणा सुचरित्ररूपवारिमता । राघवसागरेण ॥ शि० सुवारिणा वियोगजनितदुःखरूपजलवता ॥ २० ॥ इतिचतुर्दशःसर्गः ॥ १४ ॥

[पा०] १ क. ग. ङ. ञ. ञ. सुवारिणा.

युक्तस्त्वयं तारयितुं समेत्य काकुत्स्थपातालमुखे पतन्सः ॥ २० ॥
इदं पुरस्तास्य सराक्षसस्य राज्ञश्च पथ्यं समुदीरयन्त्याः ॥
सम्यग्घि वाक्यं स्वमतं ब्रवीमि नरेन्द्रपुत्राय ददाम पत्नीम् ॥ २१ ॥
परस्य वीर्यं स्वबलं च बुद्ध्वा स्थानं क्षयं चैव तथैव वृद्धिम् ॥
तथा स्वपक्षेष्यनुमृश्य बुद्ध्या वदेत्क्षमं स्वामिहितं च मन्त्री ॥ २२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

पञ्चदशः सर्गः ॥ १५ ॥

इन्द्रजिता विभीषणभाषणाधिक्षेपेणस्वात्मश्लाघनपूर्वकं कैमुत्येनरामपराजयस्य सुशकत्वोक्तिः ॥१॥ विभीषणेन तद्गर्हणपूर्वकं रामायसोपायनंसीताप्रत्यर्पणेन तत्प्रसादसंपादनचोदना ॥ २ ॥

बृहस्पतेस्तुल्यमतेर्वचस्तन्निशम्य यत्नेन विभीषणस्य ॥
ततो महात्मा वचनं बभाषे तत्रेन्द्रजिन्नैर्ऋतयोधमुख्यः ॥ १ ॥
किं नाम ते तात कनिष्ठवाक्यमनर्थकं चैव सुभीतवच्च ॥
अस्मिन्कुले योपि भवेन्न जातः सोपीदृशं नैव वदेन्न कुर्यात् ॥ २ ॥

ग्निमुखे । " पातालं बडबाग्नौ च " इति नानार्थरत्नमाला । पतन् सोयं राजा तरसा आरम्भकाल एव । तारयितुं भवद्भिर्हस्तप्रदानेनोत्तारयितुं युक्तः अर्हः । अत्र प्रच्छाद्यमानः पतन्निति प्रयोगौ वर्तमानसामीप्यात् । लक्ष्मणः प्रथमं ग्रहीष्यति ततो रामः अतो न जीवितुं शक्यं । अतः प्रथममेव राजा निवर्तनीय इतिभावः । सुवारिणेति पाठान्तरं । तत्र सागरपक्षे सुजलेनेत्यर्थः । राघवपक्षे वारः स्यन्दनः । शोभनो वारः सुवारः सोस्यास्तीति सुवारी तेन । " सूर्यादिदिवसे वृन्दे कुन्दवृक्षे परिक्रमे । मद्यपात्रे स्यन्दने च वारो वरुणसेनयोः " इति निघण्टुः ॥ २० ॥ मा दिशतु रामाय राजा वैदेहीं वयमेव बलाद्धि ददामः यदि हितमाकाङ्क्षितमित्याह—इदमिति ॥ स्वमतं स्वस्य सिद्धान्तभूतं । इदंशब्दार्थमाह—नरेन्द्रेति ॥ २१ ॥ वयमपि सम्यगेव ब्रूमः शत्रुर्हन्तव्य इति तत्राह—परस्येति ॥ मन्त्री परस्य शत्रोः । वीर्यं स्वबलं स्वराजबलं च बुद्ध्वा स्वराजपरराजयोर्बलं परीक्ष्येत्यर्थः । तथैव बलाबलपरीक्षावत् । परस्य स्थानं संपदां साम्यं क्षयं वृद्धिं च बुद्ध्वा । तथा परस्येव स्वपक्षेपि बुद्ध्या सूक्ष्मदृष्टया । स्थानक्षयवृद्धीः अनुमृश्य आलोच्य । क्षमं युक्तं । स्वामिहितं च वदेत् । परस्य क्षये स्ववृद्धौ यानं परस्यवृद्धौ स्वस्य क्षये संधिं परस्य स्वस्य च साम्ये आसनंच स्वामिने कथयेदित्यर्थः । अत्र प्रकृते परस्य वृद्धेः रावणस्य नगरदहनतनयनाशादिना क्षयस्य दर्शनाच्च सीताप्रदानेन सन्धिरेव साधुरिति मन्त्रिभिर्भवत्स्वामिने निवेदनीयमितिभावः ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्दशः सर्गः ॥ १४ ॥

अथेन्द्रजितो दुर्बुद्धिमुपन्यस्य दूषयति—बृहस्पतेरिति ॥ ततो विभीषणवचनानन्तरं । तत्र राक्षसेषु । यत्नेन निशम्य । असह्यतयेति भावः ॥ १ ॥ हे तात ते कनिष्ठवाक्यं । अनर्थकं प्रयोजनशून्यं । अनुष्ठातुरभावादिति भावः। सुभीतवत् सुभीतिमत् । किंनाम कीदृशं जुगुप्सितमित्यर्थः । नामशब्दः कुत्सनद्योतकः " नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने " इतिवैजयन्ती । तदेवोपपादयति—अस्मिन्निति । आद्योऽपिशब्दः प्रश्ने । अपि ननु । अस्मिन् कुले पौलस्त्यवंशे । यो जातो न भवेत् । अन्यस्मिन् कुले

स० नचकुर्यात्चिन्तामितिवा बलाद्गृहीतस्तुदानमितिवाशेषः ॥ २ ॥

[पा०] १ ङ. ञ. ञ. ददातुमैथिलीं. २ ङ. ञ. यूथमुख्यः.

सत्त्वेन वीर्येण पराक्रमेण शौर्येण धैर्येण च तेजसा च ॥
एकः कुलेस्मिन्पुरुषो विमुक्तो विभीषणस्तात कनिष्ठ एषः ॥ ३ ॥
किं नाम तौ राक्षस राजपुत्रावस्माकमेकेन हि राक्षसेन ॥
सुप्राकृतेनापि मतौ निहन्तुं शक्यौ कुतो भीषयसे स्म भीरो ॥ ४ ॥
त्रिलोकनाथो ननु देवराजः शक्रो मया भूमितले निविष्टः ॥
भयार्दिताश्चापि दिशः प्रपन्नाः सर्वे तथा देवगणाः समग्राः ॥ ५ ॥
ऐरावतो विस्वरमुन्नदन्स निपातितो भूमितले मया तु ॥
विकृष्य दन्तौ तु मया प्रसह्य वित्रासिता देवगणाः समग्राः ॥ ६ ॥
सोहं सुराणामपि दर्पहन्ता दैत्योत्तमानामपि शोकदाता ॥
कथं नरेन्द्रात्मजयोर्न शक्तो मनुष्ययोः प्राकृतयोः सुवीर्यः ॥ ७ ॥
अथेन्द्रकल्पस्य दुरासदस्य महौजसस्तद्वचनं निशम्य ॥
ततो महार्थं वचनं बभाषे विभीषणः शस्त्रभृतां वरिष्ठः ॥ ८ ॥
न तात मन्त्रे तव निश्चयोस्ति बालस्त्वमद्याप्यविपक्वबुद्धिः ॥
तस्मात्त्वया ह्यात्मविनाशनाय वचोर्थहीनं बहु विप्रलप्तम् ॥ ९ ॥

यो जातः सोपि ईदृशं न वदेत् । न कुर्यात् ईदृग्वचनार्थं नानुतिष्ठेत् । ईदृग्वचनं वक्तृश्रोत्रोरुभयोरपि निन्दनीयं । यद्वा हे तात कनिष्ठ । ते वाक्यं किं नाम । जुगुप्सितमित्यर्थः । जुगुप्सितत्वमेवाह—अस्मिन्निति । न कुर्यात् नचिन्तयेत् । अत्र करोतिश्चिन्ताक्रियायां वर्तते मुख्यस्य करणार्थस्यासंभवात् सर्वधात्वर्थेषु करोत्यर्थस्य संभवाच्च ॥ २ ॥ एतद्वाक्यमेतत्स्वभावस्य सदृशमित्याह—सत्त्वेनेति ॥ सत्त्वेन बलेन । वीर्येण प्रभावेन । " वीर्यं बले प्रभावे च " इत्यमरः । पराक्रमेण उद्योगेन । "शौर्योद्योगौ पराक्रमौ" इत्यमरः । शौर्येण साहसिकत्वेन । धैर्येण स्थैर्येण । तेजसा गर्वेण । पराभिभवासहनेनेतियावत् ॥ ३ ॥ एवं रावणं प्रत्युक्त्वा विभीषणं निर्भर्त्सयति—किंनामेत्यादिना ॥ राक्षसेति हीनसंबोधनमाग्रहकृतं । तौ राजपुत्रौ किं नाम न किंचिदपि । अतिदुर्बलावित्यर्थः । कुत इत्यत्राह—अस्माकमेकेनेति । अस्माकं मध्ये सुप्राकृतेन अतिक्षुद्रेणापि । एकेन राक्षसेन एतौ निहन्तुं शक्यौ हि । अतः भीरो कुतोस्मान् भीषयसे स्वयंभीतोऽस्मान् भीषयसे । नास्माकंकिंचिद्भयमितिभावः ॥ ४ ॥ भयाभावे पूर्ववृत्तं संवादयति—त्रिलोकेति ॥ नन्वित्यामन्त्रणे । त्रिलोकनाथ इत्यैश्वर्यमुक्तं । देवराजइति सैन्यसामग्री दर्शिता । मया हेतुना । भूमितले निविष्टः स्थितः । निवेशितइत्यर्थइत्यन्ये ॥ ५ ॥ उन्नदन् उद्घुष्यन् । विकृष्य उत्पाट्य । ताभ्यां सर्वे देवगणाः वित्रासिताः हेतुभेदेन देवानां भयान्तरमत्रोक्तमिति न पुनरुक्तिः ॥ ६ ॥ स्ववृत्तप्रदर्शनफलमाह—सोहमिति ॥ मनुष्ययोरिति देवासुरव्यावृत्तिः । प्राकृतयोरिति इन्द्रव्यावृत्तिः । नरेन्द्रात्मजयोरिति बाल्योक्तिः । कथं न शक्तोस्मि अतः कुतो भीषयसे इति पूर्वेणान्वयः ॥ ७ ॥ इन्द्रकल्पस्येत्यादिविशेषणत्रयेण पूर्वोक्तस्य यथार्थत्वमुक्तं । शस्त्रभृतां वरिष्ठ इत्यनेनाभीरुत्वमुक्तं । महार्थमित्यनेन वक्ष्यमाणार्थस्येन्द्रजिता दुर्ज्ञेयत्वमुक्तं ॥ ८ ॥ न तातेति अनेन निकृष्टवयस्त्वमुक्तं । बालत्वेपि कस्यचित्सुमतिः संभवति सापि

स० कुतइतिद्वितीयान्ताकुशब्दात्ततिः । कुं लङ्काभूमिं । एतौ प्राप्तौ तौमानुषराजपुत्रौनिहन्तुंशक्यौ । किंनाम भीषयसेस्मकुतो भीषयसे । एतौकिंनाम किंपदार्थौ । अलक्ष्यतयैवमुक्तिः ॥ ४ ॥ ति० भूमितलेनिविष्टः स्वर्गात्प्रच्याव्यभूमौबन्दीकृत्यस्थापितः ॥ स० त्रिलोकनाथइति । विशेषणसमासोऽयं । लोकानांनाथोलोकनाथः । त्रयाणांलोकनाथस्त्रिलोकनाथः । सप्तघटिकाभोजनमितिवद्वा । भयार्पिताः भयमर्पितंयेषुते भयार्पिताइतिवा । सर्वाङ्गीणभयाइतिवा । दिशःप्रपन्नाः । यदेदृशीदशास्त्रिदशेश्वरस्त्रिदशानां काकथारघुनाथपोतयोरितिभावः ॥ ५ ॥ स० माययेन्द्रजयेपि वास्तवतत्सामर्थ्याभावादिन्द्रकल्पस्येत्युक्तिः ॥ ८ ॥

[पा०] १ ङ. ञ. मानुषराजपुत्रौ. २ ञ.—ट. भयार्पिताः. ३ ङ. ञ. ट. निस्वनं. ४ ग. ङ. ञ. शोककर्ता.

पुत्रप्रवादेन तु रावणस्य त्वमिन्द्रजिन्मित्रमुखोसि शत्रुः ॥
यस्येदृशं राघवतो विनाशं निशम्य मोहादनुमन्यसे त्वम् ॥ १० ॥
त्वमेव वध्यश्च सुदुर्मतिश्च स चापि वध्यो य इहानयत्त्वाम् ॥
बालं दृढं साहसिकं च योऽद्य प्रावेशयन्मन्त्रकृतां समीपम् ॥ ११ ॥
मूढः प्रगल्भोऽविनयोपपन्नस्तीक्ष्णस्वभावोऽल्पमतिर्दुरात्मा ॥
मूर्खस्त्वमत्यन्तसुदुर्मतिश्च त्वमिन्द्रजिद्बालतया ब्रवीषि ॥ १२ ॥
को ब्रह्मदण्डप्रतिमप्रकाशानर्चिष्मतः कालनिकाशरूपान् ॥
सहेत बाणान्यमदण्डकल्पान्समक्षमुक्तान्युधि राघवेण ॥ १३ ॥
धनानि रत्नानि विभूषणानि वासांसि दिव्यानि मणींश्च चित्रान् ॥
सीतां च रामाय निवेद्य देवीं वसेम राजन्निह वीतशोकाः ॥ १४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

नास्तीत्याह—अद्यापीति । अविपक्वबुद्धिः अपरिणतबुद्धिः । निश्चयाभावं दर्शयति—तस्मादिति । विप्रलपं विप्रलपितं ॥ ९ ॥ न केवलं स्वाज्ञानस्य स्वविनाश एव फलं किंतु पितृविनाशोपीत्याह—पुत्रेति ॥ हे इन्द्रजित् त्वं पुत्रप्रवादेन पुत्रप्रसिद्ध्या । इत्थंभावे तृतीया । मित्रस्य मुखमिव मुखं यस्य सः तथोक्तः । मित्रवद्भासमान इत्यर्थः । शत्रुरसि । शत्रुत्वमेवोपपादयति—यस्येति । त्वं यस्य रावणस्य ईदृशं पुत्रमित्रविनाशपर्यन्तं । राघवतो रामात् । विनाशं निशम्य मन्मुखाच्छ्रुत्वा । मोहादनुमन्यसे तस्य रावणस्य त्वं शत्रुरसीत्यर्थः । मोहादित्यनेन मित्रमुखत्वमुपपादितं । अनुमन्यस इत्यनेन शत्रुत्वं ॥ १० ॥ एवमनुमोदनस्य दण्डमाह—त्वमेवेति ॥ त्वमेव वध्यः दण्ड्यः किमित्यर्थः । किंतु यस्त्वां इह सभायां । आनयत् प्रावेशयच्च । स एव वध्यः ॥ ११ ॥ सुदुर्मतिश्चेति चशब्ददर्शितान् दोषानाह—मूढः इति ॥ मूढः कृत्याकृत्यविवेकशून्यः । प्रगल्भः धृष्टः । पण्डितंमन्य इति यावत् । अविनयोपपन्नः अशिक्षित इत्यर्थः । तीक्ष्णस्वभावः क्रूरप्रकृतिः । दुरात्मा दुष्टान्तःकरणः । मूर्खः अविमृश्यकारी । अत्यन्तसुदुर्मतिः । प्रहस्तो दुर्मतिः महापार्श्वादिः सुदुर्मतिः त्वमत्यन्तसुदुर्मतिरित्यर्थः । त्वमेवंभूतोसि अतस्त्वं बालतया ब्रवीषि इति संबन्धः ॥ १२ ॥ दुर्मतित्वे हेतुमाह—क इति ॥ ब्रह्मदण्डप्रतिमप्रकाशान् ब्रह्मदण्डसदृशप्रभान् । ब्रह्मदण्डो नाम युगान्तसमुत्थितोग्निवर्णो धूमकेतुरित्येके । ब्रह्मशाप इत्यन्ये । अर्चिष्मतः ज्वालावतः । "अर्चिर्हेतिः शिखा स्त्रियां" इत्यमरः । कालनिकाशरूपान् अन्तकसदृशरूपान् । समक्षमुक्तान् समीपे मुक्तान् ॥ १३ ॥ कृतस्याकृत्यस्य प्रायश्चित्तं राजानं प्रत्याह—धनानीति ॥ रत्नानि श्रेष्ठवस्तूनि । "रत्नं स्वजातिश्रेष्ठेपि" इत्यमरः । धनानि द्रव्याणि ॥ १४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चदशः सर्गः ॥ १५ ॥

स० ब्रह्मदण्डप्रतिमः ब्राह्मणशापसदृशःप्रकाशस्तेजोयेषांते तान् । कालः कालाभिमानीयमभृत्यः । नितरांकाशतइतिनिकाशोऽग्निः । तद्वद्रूपंयेषांतान् । समीक्ष्य लक्षीकृत्य ॥ १३ ॥ स० रत्नानिधनानि श्रेष्ठधनानि । " रत्नंश्रेष्ठमणावपि " इतिविश्वः मणीन् हीरादीन् ॥ १४ ॥ इतिपञ्चदशःसर्गः ॥ १५ ॥

[पा०] १ ज. मन्यार्थसुदुर्मतिश्च. २ ख.—ङ. ञ. सुभूषणानि.

षोडशः सर्गः ॥ १६ ॥

रावणेनविभीषणंप्रतिसगर्हणंभ्रातृत्वाभावेवधार्हत्वोक्तिः ॥ १ ॥ विभीषणेनतदसहिष्णुतयागदापाणिनासतासचिवचतुष्टयेनसहगगनोत्पतनेनरावणंप्रतिशोचनपूर्वंकंरामसमीपगमनम् ॥ २ ॥

सुनिविष्टं हितं वाक्यमुक्तवन्तं विभीषणम् ॥ अब्रवीत्परुषं वाक्यं रावणः कालचोदितः ॥ १ ॥
वसेत्सह सपत्नेन क्रुद्धेनाशीविषेण वा ॥ न तु मित्रप्रवादेन संवसेच्छत्रुसेविना ॥ २ ॥
जानामि शीलं ज्ञातीनां सर्वलोकेषु राक्षस ॥ हृष्यन्ति व्यसनेष्वेते ज्ञातीनां ज्ञातयः सदा ॥ ३
प्रधानं साधनं वैद्यं धर्मशीलं च राक्षस ॥ ज्ञातयो ह्यवमन्यन्ते शूरं परिभवन्ति च ॥ ४ ॥
नित्यमन्योन्यसंहृष्टा व्यसनेष्वाततायिनः ॥ प्रच्छन्नहृदया घोरा ज्ञातयस्तु भयावहाः ॥ ५ ॥
श्रूयन्ते हस्तिभिर्गीताः श्लोकाः पद्मवने क्वचित् ॥ पाशहस्तान्नरान्दृष्ट्वा शृणु तान्गदतो मम ॥ ६ ॥

इत्थं हितमुक्तवन्तं विभीषणं प्रति रावणस्य परुषभाषणं षोडशे—सुनिविष्टमिति ॥ सुसन्निवेशं अर्थानुसंधानविरहेपि श्रवणमात्रेणात्यन्तप्रीतिजनकं । तेनार्थस्याननुकूलत्वेपि श्रवणस्यापरित्याज्यत्वमुक्तं । सुनिविष्टं उक्तवन्तमिति क्रियाविशेषणं वा । तेन मनस्यलग्नं चेदनादरणीयं वा स्यात् । मनसि सम्यग्लग्नं यथा भवति तथा उक्तवन्तं । हितं न केवलं श्रवणप्रियं । अतिदुर्दशानिस्तरणोपायतया पथ्यं । श्रवणकटुत्वेपि पथ्यत्वपर्यालोचनया अपरित्याज्यं । वाक्यं यावद्वक्तव्यार्थपूर्णं । उक्तवन्तं । "नासंवत्सरवासिने ब्रूयात्" इत्युक्तरीत्या गुरूपसदनयुक्तस्य पादयोः पतितस्य वक्तव्यस्य दुरवस्थां दृष्ट्वोक्तवन्तं विभीषणं । अन्येन चेदुक्तं परित्याज्यं । साक्षादनुजतया प्रत्यासन्नेनोक्तं कथं त्याज्यं । परुषं वाक्यमब्रवीत् । श्रवणसमनन्तरं स्थितोस्मि गतसंदेह इति वा वक्तव्यं । त्वया महोपकारः कृत इति स्तोत्रं वा कर्तव्यं । सदृशप्रत्युपकाराभावेनानुतापो वा कर्तव्यः । तद्विहाय शत्रून्प्रति वक्तव्यमुक्तवान् । अब्रवीदित्यनेन यथा सुनिविष्टमुक्तं तथा मनसि सुलग्नं यथा भवति तथा व्यक्तमुक्तवान् । एवमुक्तवन्तं प्रत्यपि परुषोक्तौ हेतुद्वयमाह—रावण इत्यादि । रावयति रोदयतीति रावणः परहिंसायां जगद्विदितः । रौतीति रवणः स एव रावणः । स्वार्थेणप्रत्ययः । अस्थाने पदं दत्त्वा स्वयमप्याक्रन्दन्नित्यर्थः । कालचोदितः । भ्राता रामं शरणं गच्छेत्युक्तवान् कालस्तन्न कर्तव्यमिति स्वयं द्विधा भज्येयमिति । अतः स्वप्रकृत्यनुगुणं कालमनुसृतवानितिभावः ॥ १ ॥ परुषमेवाह—वसेदिति ॥ सपत्नेन बाह्यशत्रुणा । मित्रप्रवादेन मित्रवदवभासमानेनेत्यर्थः । शत्रुसेविना शत्रुपक्षपातिना । सहजशत्रुणेत्यर्थः । शत्रुसर्पसहवासादपि सहजशत्रुसहवासः सुदूरं परिहर्तव्य इति भावः । अतस्त्वया अस्मान्नगरात् सद्यो गन्तव्यमितिद्योत्यते ॥ २ ॥ अत्र शत्रुसेवित्वे हेतूंस्त्रिभिर्दर्शयति—जानामीत्यादिभिः । सर्वलोकेषु सर्वजनेषु मध्ये । शीलं स्वभावं । शीलमेवाह—हृष्यन्तीति । अस्मद्व्यसनेन लब्धहर्षस्त्वमेवं गर्जसीति भावः ॥ ३ ॥ ज्ञातयः । प्रधानं स्वजातिश्रेष्ठं । साधनं कार्यसाधकं । वैद्यं विद्वांसं । प्राधान्यादिष्वेकैकगुणयोगेपि ज्ञातयोवमन्यन्ते । न बहु मन्यन्ते अवसरे परिभवन्ति चेत्यर्थः ॥ ४ ॥ एवं ज्ञातीनां ज्ञातिषु व्यसने हर्षः उत्कर्षेऽसूया चेति शीलद्वयमुक्तं । अथ भयावहत्वरूपं शीलान्तरमाह—नित्यमिति ॥ प्रतिच्छन्नहृदयाः गूढाभिप्रायाः । अतएव नित्यमन्योन्यसंहृष्टाः बहिःस्नेहवन्त इवस्थिताः । घोराः क्रूरकर्माणः । अतएव व्यसनेषु सत्सु आततायिनः द्रोहकारिणः । अतस्त्वमस्मासु व्यसने प्रहर्तुमिच्छसीतिभावः ॥ ५ ॥ उक्तं ज्ञातीनां भयावहत्वं हस्ति-

ती० सुनिविष्टं सुष्ठुविनीतिनिष्ठमितियावत् ॥ १ ॥ ति० सपत्नेनापिसहवसेत् । नतुमित्रप्रवादेन मित्रपदव्यवहार्येण । शत्रुसेविना शत्रुपक्षपातिना । वसेत् । सपत्नेचित्तस्यद्वेषकोव्यैवप्रतिष्ठा । मित्रप्रवादेतु द्वेष्यत्वेनस्निग्धत्वेनचेतिपरमदुःखमितितत्सहवासनिषेधः । शत्रुसेविनेत्यनेनास्यभगवद्भक्तत्वंसूचितं ॥ २ ॥ ति० ज्ञातयः ज्ञातिरूपाः । आततायिनः "अग्निदोगरदश्चैव

[पा०] १ ङ. ज.—ट. साधकं. घ. सुकृतं. २ ङ. ञ. ञ. ट. ज्ञातयोप्यव. ३ ङ. ञ. पुरा. ४ ङ. छ. ञ. ञ. ट. शृणुष्वगदतो.

नाग्निर्नान्यानि शस्त्राणि न नः पाशा भयावहाः॥ घोराः स्वार्थप्रयुक्तास्तु ज्ञातयो नो भयावहाः॥७॥
उपायमेते वक्ष्यन्ति ग्रहणे नात्र संशयः ॥ कृत्स्नाद्भयाज्ज्ञातिभयं सुकष्टं विदितं च नः ॥ ८ ॥
विद्यते गोषु संपन्नं विद्यते ब्राह्मणे दमः ॥ विद्यते स्त्रीषु चापल्यं विद्यते ज्ञातितो भयम् ॥ ९ ॥
ततो नेष्टमिदं सौम्य यदहं लोकसत्कृतः ॥ ऐश्वर्यमभिजातश्च ज्ञातीनां मूर्ध्न्यवस्थितः ॥ १० ॥
यथा पुष्करपर्णेषु पतितास्तोयविन्दवः ॥ न श्लेषमुपगच्छन्ति तथाऽनार्येषु संगतम् ॥ ११ ॥
यथा मधुकरस्तर्षाद्रसं विन्दन्न विंदते ॥ तथा त्वमपि तत्रैव तथाऽनार्येषु सौहृदम् ॥ १२ ॥
[यथा मधुकरस्तर्षात्काशपुष्पं पिबन्नपि ॥ रसमत्र न विन्देत तथाऽनार्येषु सौहृदम्] ॥ १३ ॥
यथा पूर्वं गजः स्नात्वा गृह्य हस्तेन वै रजः ॥ दूषयत्यात्मनो देहं तथाऽनार्येषु सौहृदम् ॥ १४ ॥
यथा शरदि मेघानां सिञ्चतामपि गर्जताम् ॥ न भवत्यम्बुसंक्लेदस्तथाऽनार्येषु सौहृदम् ॥ १५ ॥

गीतेन संवादयति—श्रूयन्त इत्यादिना ॥ कचित्पद्मवने । पाशहस्तान् पाशाः गजग्रहणरज्जवः ते हस्तेषु येषां ते तथोक्तान् । स्वबन्धनोद्युक्तानिति यावत् । नरान् ज्ञातिगजगोप्तॄन् गजग्राहिपुरुषान् दृष्ट्वा हस्तिभिः गीताः पठिताः । श्लोकाः श्रूयन्ते । वक्तृपरम्परया तान् श्लोकान् । गदतः वदतः । मम मत्तः । शृणु ॥ ६ ॥ तानेव त्रीञ्श्लोकानुपादत्ते—नाग्निरित्यादिना ॥ नः अस्माकं । अग्निः आश्रयाशोपि न भयावहः । अन्यानि लोकविलक्षणानि अग्नितोपि क्षणान्नाशकराणि । शस्त्राणि आयुधानि च । न भयावहानि । पाशाः मरणादप्यतिदुस्सहपारवश्यक्लेशकराश्च न भयावहाः । किंतु घोराः निर्दयाः । स्वार्थप्रयुक्ताः स्वप्रयोजनपराः । ज्ञातयः भयावहाः । अग्न्यादिभ्योप्यधिकं ज्ञातिभ्यो भयमित्यर्थः ॥ ७ ॥ उक्तं ज्ञातिभयातिरेकं सयुक्तिकमुपपादयति—उपायमिति ॥ अस्माकं ग्रहणे एते ज्ञातिरूपा हस्तिनः । उपायं वक्ष्यन्ति । अत्रोपायकथने संशयो नास्ति । अतः कृत्स्नादग्न्यादिभयात् ज्ञातिभयं सुकष्टं । प्रकृष्टं भयमित्यर्थः । इदमस्माभिः विदितं ज्ञातं च ॥ ८ ॥ स्निग्धेषु ज्ञातिषु कुतो भयसंभावनेत्याशङ्क्याह—विद्यत इति ॥ गोसंपत्त्याद्युपादानं दृष्टान्तार्थं । गोषु संपन्नं संपत्तिः । तद्धेतुत्वमित्यर्थः । विद्यते अस्ति । "विद सत्तायां" इति धातुः । दमः इन्द्रियनिग्रहः । चापल्यं चञ्चलत्वं । ज्ञातितः ज्ञातिषु । भयं भयकरत्वं ॥ ९ ॥ प्रधानं साधनमिति श्लोकोक्तं निदर्शयति—तत इति ॥ अहं लोकसत्कृतः ऐश्वर्यं अभिजातः प्राप्तः । रिपूणां मूर्ध्न्यवस्थितश्चेतियत् इदं ततः ज्ञातीनामसहिष्णुत्वात् तव नेष्टं ॥ १० ॥ चिरं सह वसति विभीषणे कथमकार्यमाशङ्कस इत्यपेक्षायामनार्यस्य चिरसंवासोऽप्रयोजक इत्याह—यथेति ॥ पुष्करपर्णेषु पद्मपत्रेषु पतितास्तोयबिन्दवः यथा श्लेषं ऐक्यं । नोपगच्छन्ति तथा अनार्येषु दुष्टेषु विषये । संगतं संबन्धः । श्लेषं स्नेहबन्धं । नोपयातीत्यर्थः ॥ ११ ॥ त्वदुपजीविनस्त्वयि कथं स्नेहबन्धाभाव इत्यत्राह—यथेति ॥ यथा मधुकरः तर्षात् अभिलाषात् । रसं मकरन्दं । विन्दन् पिबन् । तत्र रसाधारे पुष्पे । न विद्यते न तिष्ठति । रसप्रदानोपकारंजानन् तत्र न स्निह्यतीत्यर्थः । त्वमपि तथा मधुकरइव । अनार्येषु दुर्जनेषु । सौहृदं तथा हि । उपजीव्यविषये न जायतइत्यर्थान्तरन्यासः ॥ १२—१३ ॥ तथापि कृतस्नेहः कुतोपलप्यते तत्राह—यथेति ॥ अनार्येषु सौहृदं गजस्नानवत्तैरेव दुष्यत इत्यर्थः ॥ १४ ॥ दृष्टोपि स्नेहो न फलपर्यव-

---

शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैवषडेतेआततायिनः " ॥ ५ ॥ **रामानु०** सौम्येत्याक्षेपोक्तिः ॥ १० ॥ **ति०** काशपुष्पंपिबतोपिरसालाभः तथाऽनार्येषुसौहृदंकुर्वतःफलालाभइतिभावः ॥ १३ ॥ **ति०** यथागर्जतांसिञ्चतामपिमेघानांसंबन्धे पृथिव्याअंबुसंक्लेदः अंबुव्याप्तता । नभवति तथा अनार्येषुसौहृदं निष्फलमितिभावः । यद्वा वर्षासुगर्जतांसिञ्चतामपिमेघानांशरदिनांबुसंक्लेदः तथाऽनार्येषुसौहृदं अल्पकालस्थायीत्यर्थः ॥ **ती०** शरदिसिञ्चतां जललवान्मुञ्चतांमेघानांयथार्द्रीभावोनभवति । मेघाइवानार्याः

[**पा०**] १ क.—ङ. छ.—ञ. रिपूणांमूर्धनिस्थितः. २ ङ. झ. ट. मभिगच्छन्ति. ३ क.—ङ. छ.—ञ. सौहृदं. ४ ङ. छ. झ. तिष्ठति. घ. ज. सज्जते. ५ अयंश्लोकः क. ग. ङ. छ. झ. ञ. ट. पाठेषुदृश्यते. ६ ख. शारदमेघानां.

अन्यस्त्वेवंविधं ब्रूयाद्वाक्यमेतन्निशाचर ॥ अस्मिन्मुहूर्ते नभवेत्त्वां तु धिक्कुलपांसनम् ॥ १६ ॥
इत्युक्तः परुषं वाक्यं न्यायवादी विभीषणः ॥ उत्पपात गदापाणिश्चतुर्भिः सह राक्षसैः ॥ १७ ॥
अब्रवीच्च तदा वाक्यं जातक्रोधो विभीषणः ॥ अन्तरिक्षगतः श्रीमान्भ्रातरं राक्षसाधिपम् ॥ १८ ॥
स त्वं भ्राताऽसि मे राजन्ब्रूहि मां यद्यदिच्छसि ॥ १९ ॥
ज्येष्ठो मान्यः पितृसमो न च धर्मपथे स्थितः ॥ इदं तु परुषं वाक्यं न क्षमाम्यनृतं तव ॥ २० ॥
सुनीतं हितकामेन वाक्यमुक्तं दशानन ॥ न गृह्णन्त्यकृतात्मानः कालस्य वशमागताः ॥ २१ ॥
सुलभाः पुरुषा राजन्सततं प्रियवादिनः ॥ अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ २२ ॥
बद्धं कालस्य पाशेन सर्वभूतापहारिणा ॥ न नश्यन्तमुपेक्षेयं प्रदीप्तं शरणं यथा ॥ २३ ॥
दीप्तपावकसंकाशैः शितैः काञ्चनभूषणैः ॥ न त्वामिच्छाम्यहं द्रष्टुं रामेण निहतं शरैः ॥ २४ ॥
शूराश्च बलवन्तश्च कृतास्त्राश्च रणाजिरे ॥ कालाभिपन्नाः सीदन्ति यथा वालुकसेतवः ॥ २५ ॥
तन्मर्षयतु यच्चोक्तं गुरुत्वाद्धितमिच्छता ॥ आत्मानं सर्वथा रक्ष पुरीं चेमां सराक्षसाम् ॥ २६ ॥

सायीत्याह—यथेति ॥ शरदि सिञ्चतां वर्षतां । मेघानां संबन्धी अम्बुसंक्लेदः अम्बुसेचनं । यथा न भवति तथानार्येषु सौहृदं । शरन्मेघवर्षणवदनार्येषु सौहृदमनुपकारकमित्यर्थः ॥ १५ ॥ एवं सामान्येन विनिन्द्य साक्षादपि निन्दति—अन्य इति ॥ अन्यः अनुजादन्यः । एवंविधं अतिपरुषं । एतत् पूर्वोक्तं । वाक्यं ब्रूयात् वदेच्चेत् । अस्मिन्मुहूर्तेस्मिन्क्षणएव । नभवेत् विनश्येत् । नाशयेयमितियावत् । त्वां तु भ्रात्राभासं । धिक् त्यक्ष्यामीत्यर्थः । कुलपांसनं राक्षसकुलावद्यकरं ॥ १६ ॥ न्यायवाद्यपि इति पूर्वोक्तरीत्या । परुषमुक्तस्सन् उत्पपात संतप्तसिकतामयभूमिस्थितइव उद्गतः ॥ १७ ॥ एवमाकाशे उत्पतन्नपि पुनस्तस्मिन्ननुतापेनापिनामसमुद्भवेत्समीची मतिरिति हितोपदेशे प्रावर्ततेत्याह—अब्रवीदिति ॥ अन्तरिक्षगतः श्रीमान् । "परित्यक्ता मया लङ्का मित्राणि च धनानि च" इति समुत्थितस्य का नाम श्रीः । उच्यते । प्रतिकूलनिवृत्तिपूर्वकानुकूलरामविषयाभिमुख्यश्रीसमेत इत्यर्थः ॥ १८ ॥ स त्वमित्यर्धमेकं वाक्यं ॥ स त्वं परुषवादी त्वं । भ्रातासि प्रतिवक्तुमनर्होसि । अतो यद्यदिच्छसि तद्वद ॥१९॥ तर्हि किमर्थमुद्वतोसि प्रतिवचनाभावात् क्षमापि क्रियतां तत्राह—ज्येष्ठ इति ॥ ज्येष्ठस्त्वं पितृसमः मान्यः । किंतु धर्मपथे न स्थितोसि । अतस्त्वदुक्तमनृतं परुषं न क्षमामि न क्षमे ॥ २० ॥ स्ववाक्याश्रवणे निमित्तं सामान्यतो दर्शयति—सुनीतमिति ॥ २१ ॥ प्रियवादिन इत्युपलक्षणं प्रियश्रोतारश्च ॥ २२ ॥ तर्ह्यश्रोतारं प्रति किमर्थं वदसि तत्राह—बद्धमिति ॥ सर्वभूतापहारिणा निर्दयेनेत्यर्थः । नोपेक्षेयं नोपेक्षेय । शरणं गृहं ॥ २३—२४ ॥ शौर्यबलास्त्रशालिनो मे कुतो विपदाशङ्केत्यत्राह—शूरा इति ॥ कालाभिपन्नाः मृत्युगृहीताः । सीदन्ति शीर्यन्ति । वालुकाः सिकताः ॥ २५ ॥ मर्षयतु । भवानितिशेषः ॥ २६ ॥

आपाततउपकुर्वन्तइवप्रतीयमानाअपिवस्तुतोनोपकुर्वन्तीत्यर्थः ॥ १५ ॥ **ति०** परुषंवाक्यं पूर्वोक्तं । लङ्कावस्थानेप्येतैस्सहनाशस्य दुर्वारत्वात्ज्येष्ठोप्यसौ "उत्पथंप्रतिपन्नस्यकार्याकार्यमजानतः । गुरोरप्यवलिप्तस्यपरित्यागोविधीयते" इतिशास्त्रबलात्सर्वथापरित्याज्यएवेत्यालोच्यतत्सभांहित्वाखमुत्पपातचतुर्भिर्मन्त्रिभिः ॥ १७ ॥ **रामानु०** अत्रश्रीशब्देनसोपाधिकप्रतिकूलसंबन्धपरित्यागंपूर्वकनिरुपाधिकस्वामिसंबन्धावलंबनरूपाश्रीरुच्यते ॥ १८ ॥ **ति०** अथसभासदांज्येष्ठत्वागेनाधमोयमितिशङ्कानिवृत्त्यर्थमाह—सलंभ्रातेइत्यादि । ज्येष्ठत्वादिगुणकोपिनधर्मपथेस्थितः परदारापहरणादिरूपानेकाधर्मशालित्वात् । "पतितैःसहसंव्यवहारोनविद्यते" इतिस्मृतेः । "पतितमाचार्यज्ञातिंवाद्रष्टुंनगच्छेत् । नचास्मादुपयुञ्जीत । यदृच्छासंनिपातेउपसंगृह्यतूष्णींव्रजेत्" इतिस्मृतेश्चाग्रजस्यापितेइदंपरुषंवाक्यंनक्षमामि । अतःपरमिहस्थित्वेतिशेषः ॥ १९—२० ॥ **ति०** यदुक्तमप्रियमिवहितं तद्भवान्मर्षयतु क्षमतां । मयाविनासुखीभवेतिव्यङ्ग्योक्तिः ॥ २६ ॥

[**पा०**] १ घ. ङ. छ. झ. ञ. ट. योनस्त्वेवं. क. योन्यश्चैवं. २ ख. ङ. झ. ट. पांसन. ३ ङ. छ. झ. ञ. क्षमाम्यग्रजस्यते. क. क्षमाम्यग्रतस्तव. ४ ङ. झ. मुपेक्षेयां. ५ क. ख. सैकतमंभसि.

स्वस्ति तेऽस्तु गमिष्यामि सुखी भव मया विना ॥ २७ ॥
[नूनं न ते रावण कश्चिदस्ति रक्षोनिकायेषु सुहृत्सखा वा ॥
हितोपदेशस्य स मन्त्रवक्ता यो वारयेत्त्वां स्वयमेव पापात् ॥ २८ ॥]
निवार्यमाणस्य मया हितैषिणा न रोचते ते वचनं निशाचर ॥
परीतकाला हि गतायुषो नरा हितं न गृह्णन्ति सुहृद्धिरीरितम् ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षोडशः सर्गः ॥ १६ ॥

सप्तदशः सर्गः ॥ १७ ॥

मन्त्रिचतुष्टयेनसहगगनेऽभ्यागच्छन्तंगदापाणिंविभीषणंदृष्टवतासुग्रीवेण हनुमदादीन्प्रति तत्प्रदर्शनपूर्वकं तदागमनस्यरा-
मादिहननेच्छामूलकत्वोक्तिः ॥१॥ सागरोत्तरतीरमागतवताविभीषणेन सुग्रीवादीन्प्रति स्ववृत्तान्तनिवेदनेनसहस्वागमननिदा
ननिवेदनपूर्वकं श्रीरामेतन्निवेदनप्रार्थना ॥ २ ॥ सुग्रीवेणरामंप्रति तन्निवेदनपूर्वकंविभीषणेदोषनिर्धारणेन तस्यवधार्हत्वो-
क्तिः ॥ ३ ॥ रामेणविभीषणस्वीकरणे स्वस्वाभिप्रायनिवेदनंचोदितैरङ्गदादिभिर्विभीषणेदोषसंभावनया परीक्षामन्तराग्रहण-
निषेधे हनुमताऽङ्गदादिपक्षप्रतिक्षेपपूर्वकं तस्यनिर्दोषत्वनिर्धारणेनग्राह्यत्वोक्तिः ॥ ४ ॥

इत्युक्त्वा परुषं वाक्यं रावणं रावणानुजः ॥ आजगाम मुहूर्तेन यत्र रामः सलक्ष्मणः ॥ १ ॥

स्वस्तीत्यर्धं ॥ २७—२९ ॥ इति श्रीगोविन्दराज-विरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्ध-काण्डव्याख्याने षोडशः सर्गः ॥ १६ ॥

एवमष्टभिः सर्गैः—" आनुकूल्यस्य संकल्पः प्रा-तिकूल्यस्य वर्जनम् । रक्षिष्यतीति विश्वासो गोप्तृत्व-वरणं तथा ॥ आत्मनिक्षेपकार्पण्ये षड्विधा शरणाग-तिः " इत्युक्तेषु शरणागत्यङ्गेषु प्रपित्सोर्विभीषणस्या-नुकूल्यसंकल्पप्रातिकूल्यवर्जने दर्शिते । पुनः पुनरुप-देशादिना महाविश्वासो दर्शितः । अथ कार्पण्यप्रद-र्शनपूर्वकं शरणागतिस्वरूपं दर्शयितुमुपक्रमते—इत्यु-क्त्वेत्यादिना ॥ तत्र रावणेन तिरस्कारे सत्यस्य देश एवास्माभिस्त्याज्यः । परमधार्मिकश्रीरामाश्रयस्तु कर्त-व्य इति धार्मिकस्य विभीषणस्य धर्मे मतिरासीदित्यृ-षिः प्रस्तौति—इतीति ॥ इत्युक्त्वा " प्रदीयतां दाशरथाय मैथिली " इति कर्तव्यसौकर्यं " यावन्न गृह्णन्ति शिरांसि बाणाः " इत्यकरणे प्रत्यवायं चो-क्त्वा । परुषं स्त्रीकजनसुखावहस्य मलयमारुतस्य विरहिणि दुःखकरत्ववद्विभीषणोदितं हितं । आश्रय-दोषेण परुषं । वाक्यं हितपरिपूर्णं । उक्त्वा हितज्ञो भ्राता भ्रातरमापन्नं परित्यजेत्यपयशो यावता शक्यं परिमार्ष्टुं तावत्पर्यन्तमुक्त्वा । परुषत्वे हेतुः रावणमिति । प्रबलदुर्बलविचारमन्तरेण सर्वरावकस्य शत्रुबलोपवर्णने परुषं भवत्येव । रावणानुजः रावणा-नुजत्वेपि सत्वोत्तरतया कथनीयं हितमुक्तवानित्यृषिः स्तौति । हितकथने ज्येष्ठभावोप्यप्रयोजकः । अत एवोक्तं मनुना—"पितृनध्यापयामास शिशुराङ्गिरसः कविः । पुत्रका इति होवाच ज्ञानेन परिगृह्य तान् ॥ अज्ञं हि बालमित्याहुः पितेत्येव च मन्त्रदं " इति । आजगाम रावणगोष्ठ्यां स्वस्य संबन्धाभावेन राम-गोष्ठ्याः स्वगृहत्वेनाजगामेत्युक्तं नतुजगामेति । मुहूर्तेन " वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः । न शौरिचिन्ताविमुखजनसंवासवैशसं " इति न्याये-नाङ्गारनिकरपरिक्षिप्तेवर्त्मनिपदन्यासवत् रावणस-दनावस्थित्यनर्हत्वं विगलितबन्धनरज्जोर्वत्सस्य मातु-रूधःस्पर्शमन्तरेण मध्यदेशादर्शनवदतिवेगागमनं चो-क्तं । यत्रराम: । रामापेक्षया तद्देशसंबन्धस्य प्राप्य-त्वमुक्तं । " सुभगश्चित्रकूटोसौ गिरिराजोपमो गि-रिः । यस्मिन्वसति काकुत्स्थः कुबेर इव नन्दने " इतिवत् रामस्य लक्ष्मणो व्यावर्तकइति सलक्ष्मण

रामानु० परीतकालाः परीतः प्रत्यासन्नः कालोमृत्युर्येषांतेतथोक्ताः । **ती०** यद्वा परीतः परिवृतः कालः मृत्युरिवअहिः तेनग तान्यायूंषियेषांतेतथोक्ताः ॥ २९ ॥ इतिषोडशःसर्गः ॥ १६ ॥

[**पा०**] १ ङ. ञ. ट. परान्तकालेहि. ज. परेतकल्पाहि.

इत्युक्तं । यद्वा पुरुषकारसान्निध्यमनेनोच्यते । अनेन श्लोकेन भगवद्विमुखानां देशस्य त्याज्यत्वं तत्संबन्धिदेशस्य परमप्राप्यत्वं चोक्तं । यद्वा " सा काशीति न चाकशीति " इत्याद्युक्तरीत्या भगवद्देशस्यापि भागवताभिमानाभावे परित्याज्यत्वाल्लक्ष्मणसान्निध्यमुक्तं । ननु विश्रवःपितामहवरप्रदानविभवविदितनिखिलधर्मवृन्देन " विभीषणस्तु धर्मात्मा न तु राक्षसचेष्टितः " इति तत्र तत्र धार्मिकतया प्रशंसितेन विभीषणेन " ज्येष्ठो भ्राता पितृसमः " इति पितृवदनुवर्तनीयो ज्येष्ठभ्राता बाल्यात्प्रभृति परिपोषकश्च सन्नावणः सपदि सन्निहिते शत्रौ क्षुद्रबुद्धिनेव दूरं कथं परित्यक्तः । त्यजतु नाम कथंचित् । अथापि न युक्तमभिगन्तुं तस्य प्रहर्तारं । अभिगच्छतु नाम नोचितमस्यस्थानमभिलषितुं । अभिलषतु नाम नौपयिकमस्यवधोपायंनिर्देष्टुं । अत्र केचित् । रावणस्य निरवधिकदोषदूषितत्वात् "गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथं प्रतिपन्नस्य परित्यागो विधीयते" इति स्मरणाद्विभीषणेन त्यक्तो रावण इत्याहुः । त्रय्यन्तगुरवस्तु–' पितामहवरप्रसादेन लब्धविज्ञानत्वाद्रामं सर्ववेदान्तवेद्यं सर्वलोकेश्वरभूतं सर्वलोकशरण्यं मुक्तप्राप्यं नारायणाख्यं परं ब्रह्म लोकानुजिघृक्षयावतीर्णमिति निर्विचिकित्समवगच्छति । यथा मन्दोदरीप्रभृतयः । एवं तत्त्वज्ञानसंपन्नस्य विशेषसामान्यधर्मप्राबल्यदौर्बल्यविवेकेन सामान्यधर्मपरित्यागो विशेषधर्मपरिग्रहश्चोपपद्यते । ज्येष्ठभ्रात्रनुवर्तनंहि त्रैवर्गिकफलसाधनतयाज्येष्ठानुवर्तनद्वारा परमात्माराधने पर्यवसानस्य वक्तव्यत्वात् मोक्षपर्यवसानेपि परमात्मोपासनाङ्गत्वाच्च सामान्यधर्मः । रामानुवर्तनं तु साक्षात्परमात्मसमाराधनत्वात् यज्ञादिधर्मसाध्यत्वेन प्रधानत्वाच्च विशेषधर्मः । उभयोश्चाप्यविरोधे सत्युभयमप्यनुवर्तनीयं । विरोधेतुसामान्यधर्मं परित्यज्य विशेषधर्मोनुवर्तनीयः । अतो विभीषणोपि इयन्तं कालं कृतं रावणानुवर्तनमपरित्यज्यैव मम रामानुवर्तनमपि किं सिद्ध्येदित्याशया तस्मै हितं पुनःपुनरुपदिदेश । एवमपि तस्यासुरप्रकृतितयाऽनपनोद्यं रामवैरमितिनिश्चित्यातःपरं एतदनुवर्तने स्वात्मविनाशकं रामविषयकं वैरं मय्यपि स्यादिति भीतःसन् " वरं हुतवहज्वाला " इत्यादिन्यायेनात्यन्तदुःसहां तत्संगतिं तत्याज । विशेषधर्मं रामानुवर्तनं चाङ्गीचकारेत्यतोयं परो धर्म एवेति कृतघ्नशङ्का दूरोत्सारिता । नाप्ययं राज्यकाङ्क्षया रामंशरणमुपजगाम तदपेक्षाया अदर्शनात् । तथाहि शरणागतिसमये " त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः " इत्यन्यविषयवैराग्यस्य तेन कण्ठरवेणोक्तत्वात् । पश्चाद्रामाय विज्ञापने क्रियमाणे " परित्यक्ता मया लङ्का मित्राणि च धनानि च । भवद्गतं मे राज्यं च जीवितं च सुखानि च " इति सर्वविधपुरुषार्थत्वेन त्वामेवाहमुपेयिवानितिकथनाच्च । " अहं हत्वा दशग्रीवं सप्रहस्तं सबान्धवं । राजानं त्वां करिष्यामि सत्यमेतद्ब्रवीमि ते " इत्यनाकाङ्क्षितराजत्वकरणोक्तिः कूलंकषरामप्रीतिसागरपरीवाहरूपानुषङ्गिकभोगप्रदानपरा । यथाहुः—" आयुरारोग्यमर्थांश्च भोगांश्चैवानुषङ्गिकान् । ददाति ध्यायतां नित्यमपवर्गप्रदो हरिः " इति ॥ अतो यदुक्तं हनुमता " राज्यं प्रार्थयमानस्तु बुद्धिपूर्वमिहागतः " इति । यच्च रामेणोक्तं " राज्यकाङ्क्षी विभीषणः " इति तत्सर्वं रामभक्त्याविलाशयस्य सुग्रीवस्य व्यामोहप्रशमनाय नीतिशास्त्रोक्तराजवृत्तान्तप्रदर्शनमात्रपरमिति मन्तव्यम् । हनुमद्रामवाक्यस्य विभीषणवाक्यस्य चान्योन्यविरोधप्रसङ्गे " अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीयः " इतिन्यायेन विभीषणवाक्यस्य प्राबल्यात् । अतएव " राजानं त्वां करिष्यामि " इति ब्रुवतो रामस्य प्रतिवचनमनुक्त्वा परिचरणमात्रमेव विभीषणः प्रार्थयामास " राक्षसानां वधे साह्यं लङ्कायाश्च प्रधर्षणे । करिष्यामि यथाप्राणं प्रवेक्ष्यामि च वाहिनीम् " इति । तस्यानुमत्यभावेपि बलाद्राज्यस्वीकार उत्तरकाण्ड उक्तः—" यावत्प्रजा धरिष्यन्ति तावत्त्वं वै विभीषण । राक्षसेन्द्र महावीर्य लङ्कास्थस्त्वं धरिष्यसि ॥ शाश्वतस्त्वं सखित्वेन कार्यं ते मम शासनम् । प्रजाः संरक्ष धर्मेण नोत्तरं वक्तुमर्हसि " इति । इत्थमनन्यप्रयोजनत्वादेवास्मै रामः कुलधनं श्रीरङ्गनाथं ददौ । धर्मसंस्थापनार्थमेवावतीर्णस्य रामस्य नियोगेनावशिष्टां राक्षसजातिं सन्मार्गे प्रवर्तयितुं तस्य राज्याङ्गीकरणं । इदमप्याज्ञानुविधायित्वात् कैङ्कर्यकोटावन्तर्भूतमिति विभीषणतात्पर्यं । अतो यथावद्विदितधर्मो लक्ष्मणोपि " अहं तावन्महाराजे पितृत्वं नोपलक्षये । भ्राता भर्ता च बन्धुश्च पिता च मम राघवः " इति सोपाधिकपितरं दशरथं परित्यज्य निरुपाधिकसकलविधबन्धुं



तं मेरुशिखराकारं दीप्तामिव शतह्रदाम् ॥ गगनस्थं महीस्थास्ते ददृशुर्वानराधिपाः ॥ २ ॥
[स हि मेघाचलप्रख्यो महेन्द्रसमविक्रमः ॥ सर्वायुधधरो वीरो दिव्याभरणभूषितः ॥ ३ ॥
ये चाप्यनुचरास्तस्य चत्वारो भीमविक्रमाः ॥ तेऽपि सर्वायुधोपेता भूषणैश्चापि भूषिताः] ॥ ४ ॥
तमात्मपञ्चमं दृष्ट्वा सुग्रीवो वानराधिपः ॥ वानरैः सह दुर्धर्षश्चिन्तयामास बुद्धिमान् ॥ ५ ॥
चिन्तयित्वा मुहूर्तं तु वानरांस्तानुवाच ह ॥ हनुमत्प्रमुखान्सर्वानिदं वचनमुत्तमम् ॥ ६ ॥

राममेव "अग्रतस्ते गमिष्यामि पन्थानमकुतोभयम्। अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते" इति रामपरिचरणमेव फलं प्रार्थयामास। "स भ्रातुश्चरणौ गाढं निपीड्य रघुनन्दनः" इति राघवं शरणमुपागतश्च । तथा विभीषणोपि सोपाधिकबन्धुं भ्रातरं परित्यज्य कैङ्कर्यापेक्षयैव सर्वविधसहजबन्धुं रामं शरणं गत इति बोध्यम् । अतएव रामप्राप्त्यपेक्षया रावणपरित्यागवेलायामन्तरिक्षगतः श्रीमानिति प्रशंसितः । स तु नागवरः श्रीमान् लक्ष्मणो लक्ष्मसंपन्न इतिवत्। तस्मान्नाधर्मशङ्का विभीषणे । ननु यद्येवं तर्हि "ययोर्वीर्यमुपाश्रित्य प्रतिष्ठा काङ्क्षिता मया । तावुभौ मम नाशाय प्रसुप्तौ पुरुषर्षभौ ॥ जीवन्नपि विपन्नोस्मि नष्टराज्यमनोरथः । प्राप्तप्रतिज्ञश्च रिपुः सकामो रावणःकृतः" इति नागपाशबन्धनसमये स्वस्य राज्यनाशकृतनिर्वेदः कथमुपपद्यत इति चेन्न । तत्रापि प्रतिष्ठाशब्दस्य रामकैङ्कर्यपरत्वात् । नष्टराज्यमनोरथ इत्यत्रापि राज्यशब्दो "भवद्गतं मे राज्यं च" इत्युक्तकैङ्कर्यसाम्राज्यपरः । एतेन "राज्यं प्राप्स्यसि धर्मज्ञ लङ्कायां नात्र संशयः" इति सुग्रीववचनं तु तदाशयाज्ञानकृतमिति न कश्चिद्दोष' इति प्राहुः । अतएव चतुरशीतौ वक्ष्यति विभीषणः—"यदाज्ञप्तं महाबाहो त्वया गुल्मनिवेशनम् । तत्तथाऽनुष्ठितं वीर त्वद्वाक्यसमनन्तरम्" इति ॥ १ ॥ रावणसमीपादुत्पतनसमय एव सुग्रीवादयो विभीषणमपश्यन्नित्याह—तमिति ॥ तं दवाग्निर्निर्गत्य शीतलह्रदे पतितुमिवागच्छन्तं मेरुशिखराकारं उन्नत पीवरत्वरत्नबहुलत्वादिभिर्मेरुशिखरतुल्यं । किंच प्रतिपक्षत्यागलाभेन स्थिरतया स्थितत्वं प्रकाशमानत्वं पारतन्त्र्यज्ञापकत्वं । तेन रामस्य शृङ्गलाभः रावणस्य शृङ्गभङ्गश्चोच्यते । दीप्तामिव शतह्रदां । तेजिष्ठत्वगगनसंचाराभ्यां विद्युद्दृष्टान्तः । रामभक्तावानरा नास्मान्प्रवेशयिष्यन्तीतिकम्पः, अप्रवेशे जीवनं न सिध्यतीति त्वरा चेत्येतद्भयं तेन गम्यते । गगनस्थमिति दूरत एव ददृशुरिति भावः ॥ २-४ ॥ अथ सुग्रीवो लङ्कापुरीदेशादागमनमायुधसन्नाहं च दृष्ट्वा प्रहर्तुमेवागच्छतीति विचार्य तमर्थं वानरैः सह चिन्तयामासेत्याह—तमिति ॥ तं अत्यन्ताभिनिवेशेन शीघ्रमागतं । आत्मपञ्चमं आत्मना पञ्चत्वसङ्ख्यापूरकमित्यर्थः । अनलशरभसंपातिप्रघसनामभिश्चतुर्भी राक्षसैर्युक्तमिति यावत् । अनलादिगतसङ्ख्यापूरण एव विभीषणस्य प्राधान्यमुक्तं । रामविषयप्रेमास्पदत्वं तु समानं । सुग्रीवः गगनस्थदर्शनार्थं शीघ्रं शिर उन्नम्य दर्शनेन तात्कालिकग्रीवासौन्दर्यमृषिःस्तौति । वानराधिपः । शीघ्रमुत्थाय दर्शनं वानरसेनायाअपि स्वस्यैव रक्षकत्वेन रामविषयप्रीतेश्च राघवार्थे पराक्रान्ता इत्युक्तेभ्यो वानरेभ्योपि स्वस्यैव निरवधिकप्रीतिमत्ताज्ञापकत्वेन च । दुर्धर्षः शरणागतस्यापि पश्चादाकृष्टपादत्वापादकत्वेन अनभिभवनीयः स्थितः । बुद्धिमान्वानरैः सह चिन्तयामास । स्वयं समर्थत्वेपि तानप्यनुसृत्य चिन्तनं कार्यगौरवात् । चारो वा शत्रुर्वेति चिन्तयामास । आगमनमुखविकासादिना निर्दुष्टत्वनिश्चयेपि रामविषयप्रेमपारवश्येन चिन्तितवानितिबुद्धेः प्राशस्त्यं ॥५॥ विभीषणे सपरिकरे सविधस्थे मन्त्रविलम्बो न युक्त

तनि० गगनस्थं रावणगोष्ठीतोनिर्गमनसमयएवददृशुः । महीस्थाः भूमौपरितोरक्षणनियुक्ताः । आकाशस्थमपिदद्दशुरितिजागरूकत्वातिरेकः । यद्वा महीस्थाः तत्रतत्रवृक्षादिषुस्थितास्सर्वे तदात्वएवगगनस्थंदृष्ट्वारामंपर्यवारयन् । वानराधिपाः । अत्यन्तंसावधानतयाविद्यमानत्वाद्वानरानपिकृपिःस्तौति—**वानराधिपाइति** । ददृशुः एकोदृष्टाऽन्यस्सैनदर्शितवान् । किंतुयुगपदेवसर्वेददृशुः । अनेननकेवलंप्रतिकूलसमूहान्निर्गमनमेवविभीषणस्यप्रयोजनं किंत्वनुकूलकटाक्षविषयत्वंलब्धमित्युक्तं ॥ २ ॥ **तनि०** मुहूर्तं

[पा०] १ क. ख. च. छ. प्रदीप्तमिवतेजसा. घ. दीप्यमानमिवश्रिया. २ इदंश्लोकद्वयं क. ख. घ. च.—ट. पाठेषु दृश्यते. ३ क. च. छ. झ. ञ. ट. वज्रायुधसमप्रभः. घ. महेन्द्राचलविक्रमः. ४ क. ख. घ. च. छ. ञ. ट. वरायुधधरो. ५ ख. च. छ. ञ. ट. भूषणोत्तमभूषिताः. ६ ख. च. छ. वचनमब्रवीत्.

एष सर्वायुधोपेतश्चतुर्भिः सह राक्षसैः ॥ राक्षसोभ्येति पश्यध्वमस्मान्हन्तुं न संशयः ॥ ७ ॥
सुग्रीवस्य वचः श्रुत्वा सर्वे ते वानरोत्तमाः ॥ सालानुद्यम्य शैलांश्च इदं वचनमब्रुवन् ॥ ८ ॥
शीघ्रं व्यादिश नो राजन्वधायैषां दुरात्मनाम् ॥ निपतन्तु हताश्चैते धरण्यामल्पतेजसः ॥ ९ ॥
तेषां संभाषमाणानामन्योन्यं स विभीषणः ॥ उत्तरं तीरमासाद्य खस्थ एव व्यतिष्ठत ॥ १० ॥
उवाच च महाप्राज्ञः स्वरेण महता महान् ॥ सुग्रीवं तांश्च संप्रेक्ष्य सर्वान्वानरयूथपान् ॥ ११ ॥

इति झटिति मनसा निश्चित्य सचिवादीन्प्रति निर्णीतमाह—चिन्तयित्वेति ॥ चिन्ताया निर्णयान्तत्वादत्र चिन्तयित्वेतिनिर्णयवाची । नायं चारो नापि दूतः अपितु बाधक एवेति निश्चित्य ॥ ६ ॥ स्वनिर्णीतार्थमाह—एष इति ॥ एषः बाधकतैकान्तक्रौर्यसंपन्नः । सर्वायुधोपेतः । मनःस्थितक्रौर्यानुकूलहिंसापरिकरसंपूर्णः । अनुकूलस्य प्रतिकूलतानिश्चयवत् रामविषयप्रेमान्धतया एकायुधस्य बहुत्वनिश्चयः । एकायुधग्रहणचातुर्यदर्शनेन सर्वायुधग्रहणेष्वपि नैपुण्यं ज्ञायत इति वा तथोक्तं । स्वामिपीडने ब्रह्मास्त्रसदृशशरणागतिरेतस्य हस्ते विद्यत इतिवा । उत्पपात गदापाणिरित्यत्र सर्वायुधोपलक्षणमित्यन्ये । राक्षसः सर्पजातिरितिवत् क्रौर्यातिशयोक्तिः । पश्यध्वं पश्यत । अस्मान्हन्तुं । अस्मासु कस्यचिद्धनने हि शेषं जीविष्यति मूलभूतरामहनने सर्वविनाश इति बहुवचनार्थः ॥७॥ वानराश्च सुग्रीववाक्यानुसारेणोद्योगं चक्रुरित्याह—सुग्रीवस्येत्यादिश्लोकद्वयेन ॥ अल्पतेजस इति । अस्मद्बलस्य गजकबलप्राया इत्यर्थः ॥८—९॥ तेषामिति । अनादरे चेयं षष्ठी । वदन्तु नामैते वानरा यत्किंचित् । सर्वज्ञः परमकारुणिकः सर्वलोकशरण्यो रामो मामवश्यं रक्षिष्यत्येवेति महाविश्वासेन तेषामन्योन्यभाषणमनादृत्य प्रहरणोद्यतानामपि तेषामाभिमुख्येनाजगाम । आगत्यापि निर्विशङ्कः सन् सर्वेषामात्मानं प्रकाशयन्नाकाशे एव स्थितवानित्यर्थः । अत्र खस्थो व्यतिष्ठतेति द्विःप्रयोगो निर्भयत्वेन निष्कम्पावस्थानसूचनार्थः ॥ १० ॥ अथ पुरुषकारलेशमनपेक्ष्य सर्वानपि प्रतिबन्धिनो निवार्य मां रक्षिष्यतीति महाविश्वासशाल्यपि विभीषणः सहसा रामं शरणं नोपजगाम । किंतु दूरत एवस्थितः प्रातिकूल्यप्रवृत्तानेव सुग्रीवादीन्पुरुषकारभूतान्कृत्वोवाचेत्याह—उवाचचेति ॥ उवाच च चकारेण स्वीकारे स्वागमनमेव पर्याप्तं वचनमप्युक्तवान् । पश्यामभिगमाच्चेत्यागमनमपि भारायेति मन्यमानस्य तदुपरि वाक्यं क्षते क्षारवत् । महाप्राज्ञ इत्यनेनान्तरङ्गपुरुषकारेणैव कृपालुरपि राजा शरणमुपगन्तव्य इतिपरिज्ञानं वानराणां मत्प्रतिकूलसंरम्भोपि नमद्वेषकृतः किंतु रामभक्तिप्रकर्षकारितः । अतोगुणएवायमिति जानन्यदि रामपरिचारका एते नाङ्गीकुर्युः किं रामाङ्गीकारेण। अतो रामाङ्गीकारादप्येतदन्तर्भाव एव ममपुरुषार्थ इति ज्ञानं च विवक्षितं । स्वरेण महतेति । पुरुषकारभूतानां सर्वेषां सर्वलोकशरण्यस्य च स्वार्तरवश्रवणाय महास्वरप्रयोगः । रामविषये चैवंविधार्तरवोच्चारणं भाग्याधिकस्यैवेति विव-

अल्पकालेन रावणः उत्तरकूलेअनावृतेस्थितंरामंशीघ्रहत्वा आगन्तव्यमितिप्रेषितवान् मन्त्रेणविलंबेकृतेअयमतिशेतइतिझटितिनिश्चितवान् । तुशब्दोनिश्चयानन्तरंपूर्वावस्थापेक्षयावैलक्षण्यंद्योतयति । तानुवाच प्रेमपरवशानुवाचह । स्वामिपरिकरसमवायप्रकारआश्चर्यकरइतिऋषिरभिनन्दतिहेति । हनुमत्प्रमुखान् गौरवकालेजांबवत्प्रमुखानितिवक्तव्यं । मन्त्रविचारकालेतु बुद्धिमत्त्वप्राधान्याद्धनुमत्प्रमुखानित्युक्तिः । सर्वान् रामविषयप्रेमातिशयःसर्वेषामविशेषइतिसर्वानित्युक्तिः । इदंवचनं । अर्थमन्तरेणापिवचनसंनिवेशस्यश्रुतिप्रियत्वमभिनन्दतिऋषिः । उत्तमं सर्वोत्तमं ॥ ६ ॥ **तनि०** सुग्रीवस्य साहसकृत्यनिर्वाहकस्य । वचःश्रुत्वा अनुमतिंलब्ध्वा । सालानुद्यम्यशैलांश्च शैलवृक्षतारतम्यानादरेणसहसाहस्तमुलभान्स्वीकृत्य । आदरातिशयेनप्रत्येकमुभयपरिकरत्वमुक्तं । रामकैंकर्यानुकूलवृत्तेर्लक्ष्मणस्ययुगपच्छत्रचामरग्रहणवत् राक्षसहननंहिरामकैङ्कर्यं । इदंवचनं स्वशेषत्वसिद्धयेसुग्रीवानुमतिमप्यनवेक्ष्यतेषांवधनिश्चयोपपादकंवचनमब्रुवन् । गुणप्रधानभावमौचित्यंवाऽनपेक्ष्यसर्वेऽब्रुवन् । अस्खलत्प्राणामनुमतिर्विलंबे स्खलंत्रप्रहारेचपारतन्त्र्यहानिःस्यात् । सायथानभवतितथाशीघ्रमाज्ञापय । नः वधोद्युक्तानस्मान् । वधोद्युक्तायूयं किंममानुमत्येत्यत्राह—राजन्निति । राजाज्ञाखल्वनुवर्तनीयेतिभावः । वधायगृहीत्वाबद्धाश्चेदत्रस्थित्वाकथंचिदनर्थंकुर्युः । अतोवधायैवानुमतिर्देया । एषांदुरात्मनामाकारेणैवदौरात्म्यंदृश्यतेखलु । निपतन्तुहताः सर्वेहताःपतन्तु यथापुनराकाशंनोत्पतन्ति तथाभूमावेवनिपातयिष्यामइतिभावः । युद्धेजयाजयौपाक्षिकावित्यतआह—अल्पतेजसः । अल्पबलाः । अस्मद्बलस्यगजकबलप्रायाइतिभावः

[पा०] १ ख. ग. घ. निपतन्तिहतायावत्. २ झ. ट. मल्पचेतनाः. ३ क. ख. घ. च.—ट. खस्थएवविभीषणः.

रावणो नाम दुर्वृत्तो राक्षसो राक्षसेश्वरः ॥ तस्याहमनुजो भ्राता विभीषण इति श्रुतः ॥ १२ ॥
तेन सीता जनस्थानाद्धृता हत्वा जटायुषम् ॥ रुद्धा च विवशा दीना राक्षसीभिः सुरक्षिता ॥१३॥
तमहं हेतुभिर्वाक्यैर्विविधैश्च न्यदर्शयम् ॥ साधु निर्यात्यतां सीता रामायेति पुनः पुनः ॥ १४ ॥
स च न प्रतिजग्राह रावणः कालचोदितः ॥ उच्यमानं हितं वाक्यं विपरीत इवौषधम् ॥ १५ ॥
सोऽहं परुषितस्तेन दासवच्चावमानितः ॥ त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः ॥ १६ ॥
सर्वलोकशरण्याय राघवाय महात्मने ॥ निवेदयत मां क्षिप्रं विभीषणमुपस्थितम् ॥ १७ ॥

क्षया महानित्युक्तिः । यथोक्तं लक्ष्मीतन्त्रे—"आकिञ्चन्यैकशरणाः केचिद्भाग्याधिकाः पुनः । मामेव शरणं प्राप्य मामेवान्ते समश्नुते" इति ॥ ११ ॥ अत्र प्रथमं स्वदोषान्पुरस्करोति—रावण इति ॥ "रावणंलोकरावणं" इति न्यायेन रावयतीति व्युत्पत्तिसंभवान्नामैव क्रूरमित्यर्थः । न केवलं नामैव क्रूरं व्यापारोपि नृशंस इत्याह—दुर्वृत्त इति । जातिरपि तथाविधेत्याह—राक्षसइति । केवलं स्वयमेवक्रूरः क्रूरानेकपरिकरसमवेतश्चेत्याह—राक्षसेश्वर इति । रावणस्यैवंविधत्वे तव किमायातमित्यत्राह—तस्याहमिति । यद्यहमग्रजः स्यां तर्हितदाज्ञानुवर्तित्वेन धनदवत्तद्दोषैर्न लिप्येयं । अनुजत्वेन तन्मनीषिताः सर्वे दोषास्तदाज्ञया मया कृता इतिभावः ॥ १२ ॥ राघवस्य तु प्रियापहारनिरोधादिभिः समाश्रितहननाच्च विशेषतस्तेनापकृतमित्याह—तेनेति ॥१३॥ अस्त्वेवं ततः किमित्यत्राह—तमिति ॥ हेतुभिर्वाक्यैः हेतुप्रतिपादकैर्वाक्यैः । न्यदर्शयं अबोधयं । बोधितमेवार्थमाह—साध्विति । निर्यात्यतां प्रत्यर्प्यतां ॥ १४ ॥ विपरीतः मुमूर्षुः ॥ १५ ॥ एवमीश्वरस्य निर्हेतुककरुणाकृतेन रावणावमानेन प्रयोजनान्तरवैमुख्यं जातं । ततश्च परमपुरुषार्थभूतरामप्राप्त्यर्थं राममेव शरणमुपगतोस्मीत्याह—सोहमिति ॥ अत्र पुत्रान्दारानिति, "परित्यक्ता मया लङ्का मित्राणि च धनानि च" इति वक्ष्यमाणानां लङ्काराज्यादीनामुपलक्षणं । अत्र फलान्तरानिर्देशाद्राक्षसानां वधे साध्यमित्यादिवचनस्य स्वेनैव वक्ष्यमाणत्वाच्च रामपरिचरणस्यैव फलत्वपक्षो युक्तः ॥ १६ ॥ एवं शरण्यस्य विज्ञाप्यमर्थमुक्त्वा तद्विज्ञापनाय पुरुषकारभूतान्प्रार्थयते—सर्वलोकशर-

॥ ८—९ ॥ **ती०** राक्षसेश्वरइत्यनेन भृत्यसंबन्धप्रयुक्तदोषवत्त्वमुच्यते । तस्याहमनुजोभ्रातेत्यनेन स्वस्यरावणसंबन्धनिबन्धनदोषवत्त्वमुक्तंभवति । अनेन " उपायेनैवसिध्यन्तिह्यपायाविविधास्तथा " इतिगर्वहानिस्तद्दैन्यंकार्पण्यमुच्यतइत्युक्तगर्वहानिलक्षणंकार्पण्यरूपमङ्गंप्रदर्शितं ॥ १२ ॥ **तनि०** पूर्वोक्तदोषाःप्रायश्चित्तनिवर्त्याः । नक्षमामीत्युक्तभागवतापचारोप्यस्तीत्याह—तेनेति । तेन उक्तसकलदोषवता । हृता " अनन्याराघवेणाहं " " जलान्मत्स्याविवोद्धृतौ " इत्याद्युक्तरीत्यारामविश्लेषानर्हा । हृता सीतागर्भवासादिक्लेशाभावेनपरमपदादजहत्स्वभावतयाऽत्यन्तसौकुमार्या । जनस्थानात् पुष्पापचयादिभोगानामेकान्तस्थानतया अयोध्यातउत्कृष्टत्वेनसंमतात् । जटायुषंहत्वा । " ममप्राणाहि " इत्युक्तरीत्याऽत्यन्ताभिमतंजटायुषमवधीत् । यदिसीतयासह जटायुषमपिकारागारेनिवेशितवान् तदामोचनंस्यात् । तथानकृतं । स्वस्यसपरिवारस्यविनाशार्थमेवंकृतवान् । रुद्धाच प्रमादाद्धरणेपिपश्चात्तापेनपुनर्नेत्युक्ता । किंतूच्छ्वासनिश्वासासंचारस्थलेरुद्धा । विवशा न्यस्तपाणिपादाचलनेनरामविश्लेषदुःखेन आश्वासकान्तराभावेनचस्वबलहानिंप्रकाशयन्तीस्थिता । रामभोगपरंपरयाहृष्टामेतादृशावस्थांकृतवान् । राक्षसीभिःसुरक्षिता विकृतभयङ्करवेषवचोभिःएकाक्ष्येककर्णीप्रभृतिभिः आश्वासकनवव्याकरणपण्डितस्यापियथानप्रवेशस्तथारक्षिता ॥ १३ ॥ **तनि०** सीताहरणसमकालमेवागमनंममोचितं । तथाऽकृत्वातस्यहितंवक्तुंविलंबितोऽहमेवपापीयानित्याह—अहमिति । तं उक्तद्रोहयुक्तं । अहं पापिष्ठंज्ञात्वापि हितवक्ता । विविधैः सामादिभिर्वाक्यैःपूर्णार्थैः । हेतुभिः खरवधादिभिर्लिङ्गैः । अबोधयं सुप्तमिवप्रबोधयं । बोधितमर्थमाह—साधुनिर्यात्यतांसीतेति । निर्यातनं प्रतिदानं । साधु अनुतापाकिञ्चन्यादिप्रदर्शनेन । सीतारामाय तदीयएववस्तुनिस्मैदत्तेपिस्वकीयंदत्तमितिमन्वानाय । पुनःपुनः तस्येच्छाभावेपिमद्वचःकुर्याद्वेतिप्रत्याशयाप्रलपितं ॥ **ती०** निर्यात्यतां प्रत्यर्प्यतां। अनेन " चराचराणिभूतानिसर्वाणिभगवद्वपुः । ततस्तदानुकूल्यमेकर्तव्यमितिनिश्चयः " इत्युक्तमानुकूल्यसंकल्परूपमङ्गंप्रदर्शितं ॥ १४ ॥ **ती०** दासवच्चावमानितः अनेनईश्वरस्यनिर्हेतुककरुणापरिपाकभूतेनैवरावणावमानेनप्रयोजनान्तरवैमुख्यंजातं । ततश्च परमपुरुषार्थरूपरामप्राप्त्यर्थंराममेवशरणमुपगतोस्मीत्याह—त्यक्त्वेति । त्यक्त्वापुत्रांश्चदारांश्चेत्यनेन प्रातिकूल्यवर्जनरूपमङ्गंप्रदर्शितं । राघवंशरणंगतइत्यनेनात्मनिक्षेपरूपमङ्गंप्रदर्शितं ॥ १६ ॥ **ती०** सर्वलोकशरण्याय अधिकारिभेदमन्तरेणसुरनरवानरतिर्य-

[**पा०**] १ ख. वाक्यैर्बहुभिर्वा.

एतत्तु वचनं श्रुत्वा सुग्रीवो लघुविक्रमः ॥ लक्ष्मणस्याग्रतो रामं संरब्धमिदमब्रवीत् ॥ १८ ॥
रावणस्यानुजो भ्राता विभीषण इति श्रुतः ॥ चतुर्भिः सह रक्षोभिर्भवन्तं शरणं गतः ॥ १९ ॥
मन्त्रे व्यूहे नये चारे युक्तो भवितुमर्हसि ॥ वानराणां च भद्रं ते परेषां च परंतप ॥ २० ॥
अन्तर्धानगता ह्येते राक्षसाः कामरूपिणः ॥ शूराश्च निकृतिज्ञाश्च तेषु जातु न विश्वसेत् ॥ २१ ॥
प्रणिधी राक्षसेन्द्रस्य रावणस्य भवेदयम् ॥ अनुप्रविश्य सोस्मासु भेदं कुर्यान्न संशयः ॥ २२ ॥

ण्यायेति ॥ शरणे रक्षणे साधुः शरण्यः । "तत्र साधुः" इति यत्प्रत्ययः । शरणं भवितुमर्हः शरण्य इतिनिरुक्तिः । अनालोचितकुलविद्यावृत्तादिविशेषाशेषलोकशरण्यायेत्यर्थः । अतः संचितविविधापराधस्य रावणस्यापि युष्माकमिवात्रांशोस्ति किमुत तत्संबन्धिनः । परंतु रूच्यभावादेव स स्वांशं न लब्धवान् । मम त्वाभिमुख्येनागतस्य दुरपनोदोंशलाभ इतिभावः । अत्र शरण्याङ्गभूतं सुलभत्वपरत्वरूपं गुणद्वयं प्राधान्येन दर्शयति—राघवाय महात्मन इति । सुलभत्वेप्यनिष्टानां लोष्टानां उत्कर्षेप्यसुलभानां मेरुप्रभृतीनां चानुपादेयत्वादुभयमप्यपेक्षितं । "यत्तदनिर्देश्यं" इत्यादिवेदान्तगोचरस्य परब्रह्मणःसकलमनुजतिर्यक्त्वयनसाक्षात्कारक्षममनुजावतारात् कोयमन्या सौलभ्यकाष्ठेतिभावः । महात्मने । एवमवतारेप्यजहत्स्वभावतया निखिलहेयप्रत्यनीकत्वे सति ज्ञानशक्त्याद्यनन्तकल्याणगुणैकतानाय निवेदयत । अत्र प्रत्यक्षस्य स्वागमनस्य निवेदने प्रयोजनाभावात् स्वापराधपरिपूर्तिः इहामुत्रफलभोगविरागः शरणागतिलक्षणनिरपायोपायपरिग्रहः रामकैङ्कर्याभिलाषः तत्परिचारकान्तर्भावश्चेत्येतेऽर्था विज्ञापनीया इत्यर्थः । क्षिप्रमित्यनेन यावच्छरण्यः स्वयमेव परिग्रहिष्यति ततः पूर्वमेव विज्ञापनेन युष्माभिः सुहृत्कार्यमाचरणीयमितिभावः । विभीषणं । रावणवन्नाहं प्रतिकूलः किंतु विभीषणस्तु धर्मालेत्यनुकूल एव । उपस्थितं अतिहीनस्याप्युपगमनमेव हि रामाङ्गीकारे बीजमितिभावः ॥ १७ ॥ अथ सुग्रीवो रामप्रेमातिशयजनिताद्यामोहात् । "अतिस्नेहः पापशङ्की" इति न्यायेन तस्य सर्वशक्तित्वमपि विस्मृत्य शरणागतवत्सलो रामः शरणागतिशब्दश्रवणमात्रेण गूढहृदयमेनं परिगृह्णीयात् । ततः क्रूरहृदयोयं रामे किमिव पापमाचरेदित्यस्थानभयशङ्काव्याकुलितः शीघ्रं रामसमीपं गत्वा स्वसमानहृदयं लक्ष्मणमपि सहायीकृत्य विभीषणो निग्राह्य इति विज्ञापयामासेत्याह—एतदिति ॥ तुशब्देन पूर्वोक्त विशेष उच्यते । लघुविक्रमः शीघ्रगमनः । संरब्धं प्रेमभरात्त्वरितोदिताक्षरं ॥ १८–१९ ॥ मन्त्रः कार्याकार्यविचारः । व्यूहः सेनास्कन्दनिवेशः । नयः विचार्य निश्चितानामुपायानां स्वस्वविषयेप्रयोगः । चारः गूढप्रेषणं । वानराणां परेषां राक्षसानां च मन्त्रादिषु विषये युक्तः अवहितः । भवितुमर्हसि । वानराणां मन्त्रादीन्प्रयोजय । शत्रूणां मन्त्रादींस्तु सम्यग्जानीहि । एवं सति तव भद्रं भविष्यतीत्यर्थः ॥ २० ॥ अस्त्वेवं ततः किमित्याशङ्क्य प्रकृतं विज्ञापयति—अन्तर्धानेति ॥ अन्तर्धानगताः अदृश्यचारिणः । निकृतिज्ञाः कपटोपायवेदिनः ॥ २१ ॥ विश्वासे वा

कस्थावरान्तानांसर्वेषांसमाश्रयणीयाय । राघवाय "अन्येपिसन्त्येवनृपाःपृथिव्यांमांधातुरेतेतनयाःप्रसूताः । किंत्वर्थिनामर्थितदानदीक्षाकृतव्रतश्लाघ्यमिदंकुलंतत्" इत्यादिवचनैःप्रसिद्धवैभवेरघुवंशेऽवतीर्णाय । अनेनार्थिनांप्रार्थनावैफल्यंनास्तीतिद्योतितं । महात्मने परमात्मने । मां राममेवसर्वविधबन्धुत्वेनाश्रितं । क्षिप्रं । क्षिप्रमित्यनेन शीतलसुरभिसलिलंपद्माकरंदृष्टवतस्तृषितस्येव विलंबासहत्वंद्योत्यते । निवेदयत विज्ञापयत । "वाचाधर्ममवाप्नुहि" इतिन्यायेनाक्लेशेनभवतांमहानुपकारःसेत्स्यतीतिभावः । सर्वलोकशरण्यायेत्यनेनश्लोकेन "अप्रार्थितोनगोपायेदितितत्प्रार्थनामतिः । गोपायिताभवत्येवंगोमृत्ववरणंस्मृतं" इत्युक्तंगोमृत्ववरणरूपमङ्गंप्रदर्शितं । उपस्थितं समीपंप्राप्यस्थितं । अनेन "रक्षिष्यत्यनुकूलान्नइत्येवंसुदृढामतिः । सविश्वासोभवेच्चात्रसर्वंदुष्कृतिनाशनः" इत्युक्तंविश्वासरूपमङ्गंप्रदर्शितं । ननुइक्ष्वाकुवंशस्यराज्ञोरामभद्रस्यसर्वलोकशरण्यत्वंपरत्वंचविभीषणेनकथमुक्तमितिचेदुच्यते । "परमापद्गतस्यापिधर्मेममममतिर्भवेत् । ययामेजायतेबुद्धिर्येषुयेष्वाश्रमेषुच । सासाभवतुधर्मिष्ठातंतंधर्मंचपालयेत्" इतिप्रार्थितेनब्रह्मणा "धर्मिष्ठत्वंतथावत्सतथाचैतद्भविष्यति" इतिदत्तवरत्वेनरामंसकलजगद्रक्षणार्थमिक्ष्वाकुवंशेऽवतीर्णंपरमधर्म-

[पा०] १ क. संरब्धतरं. संरब्धमिदमब्रवीदित्यनन्तरं. प्रविष्टःशत्रुसैन्यंहीतिश्लोकः ग. ङ. च. ज. झ. ट. पाठेषुदृश्यते. अयंश्लोकःअस्मिन्नेवसर्गेराक्षसोजिह्मयावुध्येतिश्लोकानन्तरंविद्यतइतिनात्रमुद्रितः. २ अयंश्लोकः ग. ङ. च. ज. झ. ट. पाठेषु. प्रकृत्याराक्षसेन्द्रस्येतिश्लोकानन्तरंदृश्यते. ३ ङ. झ. तेषां.

अथवा स्वयमेवैष च्छिद्रमासाद्य बुद्धिमान् ॥ अनुप्रविश्य विश्वस्ते कदाचित्प्रहरेदपि ॥ २३ ॥
मित्राटवीबलं चैव मौलं भृत्यबलं तथा ॥ सर्वमेतद्बलं ग्राह्यं वर्जयित्वा द्विषद्बलम् ॥ २४ ॥
प्रकृत्या राक्षसेन्द्रस्य भ्राताऽमित्रस्य ते प्रभो ॥ आगतश्च रिपोः पक्षात्कथमस्मिन्हि विश्वसेत् ॥२५॥
रावणेन प्रणिहितं तमवेहि विभीषणम् ॥ तस्याहं निग्रहं मन्ये क्षमं क्षमवतां वर ॥ २६ ॥
राक्षसो जिह्मया बुद्ध्या संदिष्टोऽयमुपागतः ॥ प्रहर्तुं मायया च्छन्नो विश्वस्ते त्वयि राघव ॥२७॥
प्रविष्टः शत्रुसैन्यं हि प्राज्ञः शत्रुरतर्कितः ॥ निहन्यादन्तरं लब्ध्वा उलूक इव वायसान् ॥ २८ ॥
वध्यतामेष दण्डेन तीव्रेण सचिवैः सह ॥ रावणस्य नृशंसस्य भ्राता ह्येष विभीषणः ॥ २९ ॥
एवमुक्त्वा तु तं रामं संरब्धो वाहिनीपतिः ॥ वाक्यज्ञो वाक्यकुशलं ततो मौनमुपागमत् ॥ ३० ॥
सुग्रीवस्य तु तद्वाक्यं श्रुत्वा रामो महायशाः ॥ समीपस्थानुवाचेदं हनुमत्प्रमुखान्हरीन् ॥ ३१ ॥

किमयंकरिष्यतीत्याशङ्क्य भेदं दण्डं वा करिष्यतीत्याह —प्रणिधिरिति ॥ प्रणिधिः चारः । " यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः । चारश्च गूढपुरुषः " इत्यमरः । भेदं मित्रभेदं ॥ २२ ॥ अपिः संभावनायां ॥ २३ ॥ शत्रुसकाशादागतस्यास्य परिग्रहे शत्रोर्बलक्षयः अस्माकं बलवृद्धिश्च स्यादित्याशङ्क्य द्विषद्बलव्यतिरिक्तमेव बलं ग्राह्यमित्याह—मित्रेति ॥ मित्रबलं मित्रसंबन्धिबलं । अटवीबलं आटविकजनरूपं बलं । मौलं परंपरागतं सैन्यं । भृत्यबलं तादात्विकभृतिप्रदानोपजीवि बलं ॥ २४ ॥ न केवलं द्विषद्बलत्वमात्रं अन्येष्वपरिग्राह्यताहेतवः सन्तीत्याह—प्रकृत्येति ॥ प्रकृत्या जात्येत्यर्थः ॥ २५ ॥ नन्वयं शरणागतः कथं परित्याज्य इत्याशङ्क्य शरणागतिलक्षणमायोपायेन विश्वासमुत्पाद्य त्वयि प्रहर्तुं प्रवृत्तत्वान्नास्यापरिग्राह्यत्वमात्रं किंतु सहायैः सह वध्यत्वमित्याह—रावणेनेत्यादिश्लोकद्वयमेकं वाक्यं । प्रणिहितं प्रणिधिकर्मणा नियुक्तं । अस्य शरणागतिर्विप्रलम्भकृतेति भावः । क्षमवतां युक्तव्यापारवतां । क्षमं हितं । " क्षमं शक्ते हिते त्रिषु " इत्यमरः ॥ २६ ॥ प्रणिधिरप्येष नः किं करष्यतीत्यत्राह—राक्षस इति ॥ संदिष्टः रावणेनेति शेषः । प्रहर्तुं संदिष्ट इति संबन्धः ॥ २७ ॥ यदा शाठ्यं दृश्यते तदाऽसौ हन्यतां तत्राह—प्रविष्ट इति ॥ प्राज्ञ इति हेतुगर्भं विशेषणं । प्राज्ञत्वादतर्कितः अस्मज्जिघांसयाऽयमागत इति तैरविचारितः । अतएव तेषां सैन्यं प्रविष्टः सन् । कदाचित् अन्तरं छिद्रं लब्ध्वा हन्यादित्यर्थः । प्रविष्टोप्येकाकी कथं बहून्हनिष्यतीत्याशङ्क्य छिद्रसहितस्य युज्यत इति दृष्टान्तमुखेन प्रकटयति—उलूक इति ॥ २८ ॥ तर्हि किं कर्तव्यं तत्राह—वध्यतामिति ॥ वध्यतां केवलनिरसने कृते मारीचवदनर्थकारी स्यादिति भावः । तीव्रेण दण्डेन । वालिवदेकेन बाणेन न हन्तव्यः । किंतु शिरसि वर्तिं कृत्वा दीपारोपण कार्यं । सचिवैः सह प्रथमं तेषां शिरांसि छित्त्वा विभीषणहस्ते दत्त्वा ततोयं वध्यतां । तत्र हेतुमाह—रावणस्येत्यादि ॥ २९ ॥ एवं सुग्रीवो विभीषणविषयवक्तव्यमुक्त्वा अतः परमनेन यत्किंचिदुक्तं चेदुत्तरं वक्ष्याम इति तूष्णींस्थित इत्याह—एवमुक्त्वेति ॥ ३० ॥ अथ शरणागतवत्सलो रामः सुग्रीवस्य संरम्भप्रतिक्षेपाय यत्किंचिद्व्याजमपेक्षमाणो विभीषणस्य विश्वासातिरेकेण किंचिद्विलम्बेपि भावं निवेदयतेति वदतस्तस्य तदन्तर्भावापेक्षां च सम्यगालोच्य प्रतिक्षेपकमुखेनैव तदानयनं कर्तुकामो हनुमदादीनुवाचेत्याह—सुग्रीव-

रूपंपरमपुरुषंनारायणंज्ञात्वातथोक्तवानितिसर्वंसमञ्जसम् ॥ १७ ॥ **ति०** मित्रेणाटविकेन आरण्यकेन प्रेषितंबलंमित्राटविबलं । मौलं आप्तबन्धुप्रहितंबलं । " मूलंवशीकृतौस्त्रीये " इतिकोशः ॥ २४ ॥ **स०** तस्यबलिष्टस्यकथंनिग्रहइत्यतआह—**क्षमवतांवरेति** । क्षमाःशक्ताएषांसन्तीति क्षमवन्तः तेषुवर । एतेन त्वत्सेनानायकैरस्माभिरपितन्निग्रहःसुसाध्यः किमुवयेतिसूचयति । " क्षमंयुक्तेक्षमान्विते । वाच्यवच्छक्तहितयोःक्षमाभूमितितिक्षयोः " इतिविश्वः । एतेन तितिक्षार्थंक्षमशब्दमङ्गीकृत्य हखलः स्यार्षत्वंवर्णनंपरास्तं । सतिगत्यन्तरेतस्मायुक्तत्वात्क्षमाकथनस्यकथाऽसंगतत्वाच्च ॥ २६ ॥ **शि०** संरब्धः ईषत्कोपविशिष्ट-

[**पा०**] १ च. छ. ज. वीर्यवान्. २ क. ख. ग. च. छ. मित्राटपिबलं. झ. मित्राटविबलं. ३ ङ. झ. ञ. मौलभृत्यबलं. ४ क. घ.—ट. राक्षसोह्येष. ५ क. पार्श्वात्कथं. ङ. च. झ. साक्षात्कथं. ६ ङ. च. झ. ञ. ट. मिहागतः. क.—घ. मुपस्थितः. ७ क. ख. ग. ङ.—ट. लयिचानघ. घ. लयिमानद. ८ क.—घ. च. ज. ञ. प्राप्तः.

यदुक्तं कपिराजेन रावणावरजं प्रति ॥ वाक्यं हेतुमदर्थ्यं च भवद्भिरपि तच्छ्रुतम् ॥ ३२ ॥
सुहृदा ह्यर्थकृच्छ्रेषु युक्तं बुद्धिमता सता ॥ समर्थेनापि संदेष्टुं शाश्वतीं भूतिमिच्छता ॥ ३३ ॥
इत्येवं परिपृष्टास्ते स्वं स्वं मतमतन्द्रिताः ॥ सोपचारं तदा राममूचुर्हितचिकीर्षवः ॥ ३४ ॥
अज्ञातं नास्ति ते किंचित्रिषु लोकेषु राघव ॥ आत्मानं सूचयज्ञानन्पृच्छस्यस्मान्सुहृत्तया ॥ ३५ ॥
त्वं हि सत्यव्रतः शूरो धार्मिको दृढविक्रमः ॥ परीक्ष्यकारी स्मृतिमान्निसृष्टात्मा सुहृत्सु च ॥३६॥
तस्मादेकैकशस्तावद्ब्रुवन्तु सचिवास्तव ॥ हेततो मतिसंपन्नाः समर्थाश्च पुनः पुनः ॥ ३७ ॥
इत्युक्ते राघवायाथ मतिमानङ्गदोऽग्रतः ॥ विभीषणपरीक्षार्थमुवाच वचनं हरिः ॥ ३८ ॥
शत्रोः सकाशात्संप्राप्तः सर्वथा शङ्क्य एव हि ॥ विश्वासयोग्यः सहसा न कर्तव्यो विभीषणः ॥३९॥
छादयित्वाऽऽत्मभावं हि चरन्ति शठबुद्धयः ॥ प्रहरन्ति च रन्ध्रेषु सोनर्थः सुमहान्भवेत् ॥ ४० ॥
अर्थानर्थौ विनिश्चित्य व्यवसायं भजेत ह ॥ गुणतः संग्रहं कुर्याद्दोषतस्तु विवर्जयेत् ॥ ४१ ॥

स्येति ॥ ३१ ॥ रामः सुग्रीववचनोपलालनपूर्वकमन्यानपि सचिवान् स्वं स्वं मतं पृच्छति—यदुक्तमित्यादिश्लोकद्वयेन ॥ हेतुमत् युक्तियुक्तं । अर्थ्यं अर्थः प्रयोजनं तस्मादनपेतं ॥ ३२ ॥ न ह्येकेन सुहृदोपदिष्टे सत्यन्यैस्तूष्णीं स्थातव्यं । अपि तु बुद्धिमता समर्थेन । शाश्वतीं भूतिमिच्छता श्रेयस्कामेन । सुहृदा सुहृदन्तरेणापि । अर्थकृच्छ्रेषु कार्यसङ्कटेषु । उपदेष्टुं युक्तमेव । अतो यूयमपि वदतेत्यर्थः ॥ ३३—३४ ॥ सोपचारप्रशंसावाक्यमेवाह—अज्ञातमिति ॥ अत्र सर्वज्ञ इत्युक्ते प्रायिकत्वशङ्का स्यादिति तन्निवृत्त्यर्थं व्यतिरेकोक्तिः । त्रिषु लोकेषु कृतकमकृतकं कृताकृतकमित्युक्तेषु । आत्मानं सुहृत्तया सूचयन्नस्मान् पृच्छसीत्यन्वयः । अयं वानराणां सुहृदितीमां कीर्तिं लोके ख्यापयितुं तवायं प्रश्न इत्यर्थः । पूजयन्निति पाठे तु अस्मान् प्रत्येकं मानयन्नस्मान् पृच्छसीत्यर्थः । प्रत्येकं माननाभिप्रायेणैवात्मानमित्येकवचनप्रयोगः । यद्वा आत्मानं आत्मस्वभावं । जानन् राजनीतिमिति यावत् । पूजयन् पालयन् । यद्वा । सुहृत्तया शोभनहृदयतया हेतुना । आत्मानं स्वं । पूजयन् । कार्यविचारेषु अस्मदपेक्षया स्वयमेव शोभनहृदय इति स्वप्रभावमभिव्यञ्जयितुमितिभावः । अस्मन्मतानि पूर्वपक्षीकृत्य स्वमतमेवसिद्धान्तयितुमितिभावः ॥ ३५ ॥ स्वपूजनार्थमस्मान्पृच्छसीत्यत्र हेतुमाह—त्वमिति ॥ सत्यव्रतः शरणागतरक्षणव्रतस्य सापराधरावणादिष्वपि विफलीकर्तुमशक्यत्वात् । परीक्ष्यकारी सर्वज्ञः सन्नपि सम्यग्धेतुभिर्विमृश्याचरणशीलः । सुहृत्सु निसृष्टात्मा सुहृत्परतन्त्रीकृतात्मस्वरूपः । पूर्वश्लोके सुहृत्त्वमात्रमुक्तं । अत्र तु सुहृत्परतन्त्रत्वमितिभेदः ॥ ३६ ॥ तस्मात् भवत उक्तगुणत्वात् । तावत् क्रमेण । हेततः युक्तिभिः । ब्रुवन्तु ॥ ३७ ॥ सुग्रीवानन्तरमङ्गदस्य युवराजतयाप्रधानत्वात् प्रथममङ्गदोजगादेत्याह—इत्युक्तइति ॥ विभीषणपरीक्षार्थं तदुपायप्रतिपादकमितिशेषः ॥ ३८ ॥ असौ शरणागतोपि शत्रोः सकाशात्प्राप्तत्वादनुकूलो नेति शङ्क्य एव । अतः सहसा परीक्षामन्तरेण विश्वासयोग्यो न कर्तव्यः किंतु परीक्ष्य प्रवेष्टव्य इति सुग्रीववचनाद्विशेषः ॥ ३९ ॥ विश्वासकरणे अनिष्टमाह—छादयित्वेति ॥ शठबुद्धयः कुटिलबुद्धयः । आत्मभावं स्वाभिप्रायं । छादयित्वा स्वाभिप्रायसूचकेङ्गितादिकमपि स्वगयित्वेत्यर्थः । चरन्ति यावद्रन्ध्रलाभं स्वैरसंचारं कुर्वन्ति । रन्ध्रेषु अनवधानेषु सत्सु । प्रहरन्ति हिंसन्ति ॥ ४० ॥ त्यागोपादानोपयुक्तं परीक्षाप्रकारमाह—अर्थानर्थाविति ॥ अर्थानर्थौ गुणदोषौ । विनिश्चित्य कस्मिंश्चित्कर्मणि नियोगेन निश्चित्य । व्यवसायं त्यागसंग्रहोचिताध्यवसायं । भजेत । तत्र गुणतः गुणनिश्चयेन । संग्रहं अङ्गीकारं कुर्यात् ।

॥ ३० ॥ ति० तर्क्यएव शङ्क्यएव । विश्वासनीयः विश्वासप्रयुक्तव्यवहारार्हः । सहसानकर्तव्यः । अपितु शनैरित्यर्थः ॥ ३९ ॥

[पा०] १ ङ. ञ. सुहृदामर्थ. क. सुहृदाह्यति. च. छ. ज. सुहृदांह्यर्थ. २ ङ. ञ. ट. समर्थेनोप. ३ च. ञ. सोपचार. मिदंवाक्यं. ४ ङ. ञ. ब. ट. मूचुःप्रिय. ५ क.—ट. पूजयन्नाम. ६ ख. घ. ङ. च. ञ. ब. ट. पुनस्तथा. ७ क. महत्. ८ क. ख. घ.—ट. तर्क्यएव. ग. त्याज्यएव. ९ च. ञ. ब. ट. विश्वासनीयः. १० क. सोनर्थस्तत्कृतोभवेत. ११ क. घ. च. ब. ट. भजेदिह. १२ क. ख. घ.—ट. विसर्जयेत्.

यदि दोषो महांस्तस्मिंस्त्यज्यतामविशङ्कितम् ॥ [1]गुणान्वाऽपि बहून्ज्ञात्वा संग्रहः क्रियतां नृप ॥४२॥
शरभस्त्वथ निश्चित्य [2]साध्यं वचनमब्रवीत् ॥ क्षिप्रमस्मिन्नरव्याघ्र चारः प्रतिविधीयताम् ॥ ४३ ॥
प्रणिधाय हि चारेण यथावत्सूक्ष्मबुद्धिना ॥ परीक्ष्य च ततः कार्यो यथान्याय्यं परिग्रहः ॥ ४४ ॥
जाम्बवांस्त्वथ संप्रेक्ष्य शास्त्रबुद्ध्या विचक्षणः ॥ वाक्यं विज्ञापयामास गुणवद्दोषवर्जितम् ॥ ४५ ॥
बद्धवैराच्च पापाच्च राक्षसेन्द्राद्विभीषणः ॥ अदेशकाले संप्राप्तः सर्वथा शङ्क्यतामयम् ॥ ४६ ॥
ततो मैन्दस्तु संप्रेक्ष्य नयापनयकोविदः ॥ वाक्यं वचनसंपन्नो बभाषे हेतुमत्तरम् ॥ ४७ ॥
[3]वचनं नाम तस्यैष रावणस्य विभीषणः ॥ पृच्छ्यतां मधुरेणायं शनैर्नरवरेश्वर ॥ ४८ ॥
भावमस्य तु विज्ञाय ततस्त्वं करिष्यसि ॥ यदि दुष्टो न दुष्टो वा बुद्धिपूर्वं नरर्षभ ॥ ४९ ॥
अथ संस्कारसंपन्नो हनूमान्सचिवोत्तमः ॥ उवाच वचनं श्लक्ष्णमर्थवन्मधुरं लघु ॥ ५० ॥
न भवन्तं मतिश्रेष्ठं समर्थं वदतां वरम् ॥ अतिशाययितुं शक्तो बृहस्पतिरपि ब्रुवन् ॥ ५१ ॥
न वादान्नापि सङ्घर्षान्नाधिक्यान्न च कामतः ॥ वक्ष्यामि वचनं राजन्यथार्थं रामगौरवात् ॥ ५२ ॥

दोषतः दोषनिश्चयेन तु विसर्जयेत् ॥ ४१ ॥ ननु सर्वात्मना गुणी दोषी वा दुर्लभः अतः कथं संग्रहत्यागव्यवस्थितिरित्यत्राह—यदीति ॥ तस्मिन विभीषणे । महान्दोषो यदि स्यात् तदा असौ अविशङ्कितं अविशङ्कं त्यज्यतां । बहून्गुणान् ज्ञात्वा संग्रहः क्रियतां वा । स्वल्पदोषवत्त्वेपि बहुगुणो ग्राह्यः । स्वल्पगुणवत्त्वेपि बहुदोषस्त्याज्य इति भावः ॥ ४२ ॥ विनियोगं विना गुणदोषपरिज्ञानं न संभवति सहसा विनियोगे च मन्त्रहानिः स्यादिति पूर्वास्वरसाच्छरभ आह—शरभस्त्विति ॥ तुशब्दः पूर्वस्माद्वैलक्षण्यपरः । साध्यं साध्यार्थकं । अनेनाङ्गदपक्षस्यासाध्यार्थत्वं द्योतितं । अस्मिन् विभीषणविषये । प्रतिविधीयतां प्रेष्यतां ॥ ४३ ॥ प्रणिधाय चारंप्रेषयित्वा । सूक्ष्मबुद्धिनाचारेण यथावन्नीतिशास्त्रोक्तरीत्या परीक्ष्य ततो यथान्याय्यं न्यायादनपेतं न्याय्यं । निर्णीतार्थमनतिक्रम्य । परिग्रहः विभीषणपरिग्रहः । कार्यः ॥४४॥ नियोगेन चारेण वा नायं परीक्ष्यः अविस्रम्भहेतूनां बहूनां संभवादिति जाम्बवान्पक्षान्तरमुपक्षिपति—जाम्बवानिति ॥ गुणवत् युक्तिमत् । दोषवर्जितं अनपायमितिपूर्वोक्तमतद्वयव्यावृत्तिः ॥ ४५ ॥ बद्धवैरात् दृढवैरात् । पापात् पापकर्मणः । अदेशे दूरतयासांप्रतिकभयाभावेन आगमनप्रयोजनरहिते । अकाले स्वामिपरित्यागानर्हकाले ॥ ४६ ॥ सर्वथा शङ्क्यत्वेपि सुकरोपायेन गुणदोषपरीक्षया अकरणे सुखोपनतमित्रहानिः स्यादिति मैन्दो मतान्तरमाह—तत इति ॥ हेतुमत्तरं अतिशयेन हेतुयुक्तं ॥ ४७ ॥ मधुरेण वचसा रावणस्य वचनमयं विभीषणः शनैः पृच्छ्यतामिति संबन्धः । पृच्छ्यतामित्यत्र अज्ञातपुरुषमुखेनेति शेषः । उत्तरत्र तथैव हनुमताऽनुवादात् ॥ ४८ ॥ भावमिति । एवंविधपरीक्षणेनास्य तत्त्वतो भावं विज्ञाय यदि दुष्टः तदा तदनुरूपं अदुष्टश्चेत्तदनुरूपं च बुद्धिपूर्वं परीक्षापूर्वकं करिष्यसीत्यर्थः ॥४९॥ एवं सुग्रीवेणेदानीं वध्यत्वं प्रतिपादितं । अङ्गदादिभिस्तु गुणदोषपरीक्षापूर्वकं परिग्रहपरित्यागौ सिद्धान्तितौ । अथ सचिवोत्तमो हनुमान् सुग्रीवमतं राजमतत्वादत्यन्ताविचारमूलत्वाच्चोपेक्ष्य अङ्गदादिमतमेकैकानुवादपूर्वकं दूषयित्वा इदानीमेव दोषाभावस्य निर्णेतुं शक्यत्वात् सहसैव परिग्राह्य इति सिद्धान्तयति सर्गशेषेण—अथेति ॥ संस्कारसंपन्नः शास्त्राभ्यासदृढतरसंस्कारयुक्तः । लघु अविस्तृतं ॥ ५० ॥ भवत उपदेशार्थं न मम प्रवृत्तिः भवतः सर्वप्रकारोत्कृष्टत्वात् केनाप्याकारेणातिशयितस्य कस्यचिदभावादित्याह—न भवन्तमिति ॥ ५१ ॥ वादात् तर्ककौशलात् । संघर्षात् सचिवेषु स्पर्धावशात् । आधिक्यात् अहं

ति० अदेशकाले स्वामिसंदेशंविहायरिपुदेशआगमनेनानुचितदेशप्राप्तत्वं । स्वामिनःसंकटकाले तत्प्रहाणानौचित्यादनुचितकालप्राप्तः । अतः शङ्क्यतां । सर्वथाशङ्काविषयत्वेनत्यागार्हएवायमितिभावः । ती० अदेशे शत्रुसमीपदेशे । अकाले रात्रौ । यद्वा अकाले स्वामिपरित्यागानर्हकाले ॥ ४६ ॥

[पा०] १ च. छ. ज. सुगुणान्दुर्गुणान्. २ ग. वीरोवचनं. क. ख. ङ. झ. ट. सार्थवचनं. ३ ङ. झ. ट. अनुजोनामतस्यैष.

अर्थानर्थनिमित्तं हि यदुक्तं सचिवैस्तव ॥ तत्र दोषं प्रपश्यामि क्रिया न ह्युपपद्यते ॥ ५३ ॥
ऋते नियोगात्सामर्थ्यमवबोद्धुं न शक्यते ॥ सहसा विनियोगो हि दोषवान्प्रतिभाति मा ॥५४॥
चारप्रणिहितं युक्तं यदुक्तं सचिवैस्तव ॥ अर्थस्यासंभवात्तत्र कारणं नोपपद्यते ॥ ५५ ॥
अदेशकाले संप्राप्त इत्ययं यद्विभीषणः ॥ विवक्षा तत्र मेऽस्तीयं तां निबोध यथामति ॥
स एष देशः कालश्च भवतीति यथातथा ॥ ५६ ॥
पुरुषात्पुरुषं प्राप्य तथा दोषगुणावपि ॥ दौरात्म्यं रावणे दृष्ट्वा विक्रमं च तथा त्वयि ॥
युक्तमागमनं तस्य सदृशं तस्य बुद्धितः ॥ ५७ ॥
अज्ञातरूपैः पुरुषैः स राजन्पृच्छ्यतामिति ॥ यदुक्तमत्र मे प्रेक्षा काचिदस्ति समीक्षिता ॥ ५८ ॥
पृच्छ्यमानो विशङ्केत सहसा बुद्धिमान्वचः ॥ तत्र मिश्रं प्रदुष्येत मिथ्या पृष्टं सुखागतम् ॥ ५९ ॥

मतिमान् वाग्मीचेत्याधिक्याभिमानात् । कामतः स्वैरभाषणेच्छातः । विभीषणपक्षपाताद्वा । तर्हि किमर्थं प्रवृत्तिस्तत्राह—गौरवादिति । मयि त्वत्कृतात्संमानात् ॥ ५२ ॥ पूर्वोक्तेषु चतुर्षु मतेषु प्रथममङ्गदमतं दूषयति—अर्थानर्थेति ॥ अर्थानर्थयोर्निमित्तं निर्णयोपायः । सचिवैः अङ्गदेन तादात्विकसंरम्भपरिहाराय नामानुक्तिर्बहुवचनं च । यदुक्तं तत्र दोषं प्रपश्यामि । कुतः क्रिया एवंप्रकारेण क्रिया । नोपपद्यतेहि ॥५३॥ अनुपपत्तिमेव दर्शयति—ऋत इति ॥ नियोगात् राजकार्येषु नियोगात् । ऋते विना । "अन्यारादितरर्ते—" इत्यादिना पञ्चमी । सामर्थ्यं साधुत्वं । सहसा विनियोगः गुणदोषपरीक्षामन्तरेण कुत्रचिन्महति राजकार्ये विनियोजनं । मा मां प्रति । दोषवान् भाति । तथाच सत्यां गुणदोषपरीक्षायां नियोगः । नियोगे सति गुणदोषपरीक्षणमित्यन्योन्याश्रयः । अतोनुपपन्नमङ्गदमतमितिभावः ॥ ५४ ॥ अथ शरभमतं प्रयोजनाभावेन खण्डयति—चारेति ॥ अत्रेतिशब्दोध्याहर्तव्यः । चारप्रणिहितं चारप्रणिधानं । युक्तमिति तव सचिवैर्यदुक्तं शरभेण यदुक्तमित्यर्थः । तत्र तस्मिन्मते । अर्थस्य चारप्रयोजनस्य । दूरतिरोहितदर्शनादेरसंभवात् चारप्रणिधानलक्षणं । कारणं उपायः । न युज्यत इत्यर्थः । अत्यासन्ने स्वचक्षुर्विषये सम्यक्परिदृश्यमाने व्यवधानरहिते नभस्थलावस्थायिनि चास्मिन् पररन्ध्रादितत्त्वदर्शनलक्षणचारप्रयोजनाभावादयमुपायो न युज्यत इतिभावः । चारणं नोपपद्यत इतिपाठेतु चारयितव्यस्यान्तःपुरसमाजतीर्थादिरूपस्य विषयस्याभावाच्चारसंचारणं न घटतइत्यर्थः ॥ ५५ ॥ अदेशकाले संप्राप्त इत्यस्य जाम्बवन्मतस्यासारत्वात्तन्निराकरणेन सर्वं निराकृतप्रायमिति तत्स्वरूपासिद्ध्या दूषयति—अदेशेति सार्धश्लोकएकान्वयः । अयं विभीषणः । अदेशकाले संप्राप्तइति यत् । तत्र तद्विषये । यथातथा याथातथ्येन । स एष देशः कालश्च भवतीति मे यथामति इयं विवक्षास्ति तां निबोधेत्यन्वयः ॥५६॥ विवक्षितमेव सोपपत्तिकं विशदयति—पुरुषादित्यादिसार्धश्लोकेन ॥ पुरुषात् अधमपुरुषाद्रावणात् । पुरुषं उत्तमपुरुषं भवन्तं । प्राप्य मनसा विमृश्य । तथा दोषगुणावपि युवयोर्विमृश्य । तथा । रावणे दौरात्म्यं राक्षसकुलविनाशहेतुभूतसीतापहरणतत्प्रत्यर्पणानपेक्षित्वादिकं । त्वयि विक्रमं खरदूषणप्रमुखराक्षसवधादिकं वालिवधपूर्वकसुग्रीवराज्यप्रदानं अतिदुस्तरसमुद्रतरणोद्योगं च । दृष्ट्वा । तस्य बुद्धितः बुद्धेः सदृशं तस्य आगमनं युक्तमिति संबन्धः । यदा प्रतिकूले दोषदर्शनमनुकूले गुणज्ञानं च स एव देशः कालश्चभवति । इदं तथ्यमिति भावः ॥ ५७ ॥ मैन्दमतं प्रतिक्षिपतिश्लोकत्रयेण—अज्ञातेति ॥ अज्ञातरूपैः अपरिचितस्वरूपस्वभावैः । समीक्षिता सम्यक्परीक्षिता । प्रेक्षा युक्तिरूपा बुद्धिः ॥ ५८ ॥ क्वचिद्गुणवत्यपि मित्रे दोषदृष्टिहेतुत्वेनानैकान्तोयं गुणदोषनिर्णयोपाय इत्याह—पृच्छ्यमान इति ॥ बुद्धिमानपि पुमान् अपरिचितैः पृच्छ्यमानः सन् अविश्वासादेवैते पृच्छन्ति कस्मिन्वचस्युक्ते को वानर्थः समापद्यत इति प्रतिवचनरूपंवच-

---

[पा०] १ क. सचिवैस्सह. २ क. ङ. छ. झ. ट. भातिमे. ३ ङ. झ. ट. एषदेशश्चकालश्च. ४ ख. घ. दोषगुणावुभौ. ५ घ. च. छ. युक्तमागतमस्यापिविमृशान्तस्यबुद्धितः. ६ ङ. झ. ट. ह्यत्र. ञ. चात्र. ७ ग. च. बुद्धिमान्नरः.

अशक्यः सहसा राजन्भावो वेत्तुं परस्य वै ॥ अन्तःस्वभावैर्गीतैस्तैर्नैपुण्यं पश्यता भृशम् ॥ ६० ॥
न त्वस्य ब्रुवतो जातु लक्ष्यते दुष्टभावता ॥ प्रसन्नं वदनं चापि तस्मान्मे नास्ति संशयः ॥ ६१ ॥
अशङ्कितमतिः स्वस्थो न शठः परिसर्पति ॥ न चास्य दुष्टा वाक्यापि तस्मान्नास्तीह संशयः ॥ ६२ ॥
आकारश्छाद्यमानोपि न शक्यो विनिगूहितुम् ॥ बलाद्धि विवृणोत्येव भावमन्तर्गतं नृणाम् ॥ ६३ ॥
देशकालोपपन्नं च कार्यं कार्यविदां वर ॥ स्वफलं कुरुते क्षिप्रं प्रयोगेणाभिसंहितम् ॥ ६४ ॥
उद्योगं तव संप्रेक्ष्य मिथ्यावृत्तं च रावणम् ॥ वालिनश्च वधं श्रुत्वा सुग्रीवं चाभिषेचितम् ॥
राज्यं प्रार्थयमानश्च बुद्धिपूर्वमिहागतः ॥ ६५ ॥
एतावत्तु पुरस्कृत्य युज्यते तत्र संग्रहः ॥ यथाशक्ति मयोक्तं तु राक्षसस्यार्जवं प्रति ॥
त्वं प्रमाणं तु शेषस्य श्रुत्वा बुद्धिमतां वर ॥ ६६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तदशः सर्गः ॥ १७ ॥

उद्दिश्य । सहसा विविधां शङ्कां प्राप्नुयात् । तथासति सुखागतं स्वस्मिन्दोषराहित्येन विश्वासोपगतमपि मित्रं मिथ्या पृष्टं सत् तेन प्रश्नेन हेतुना । प्रदुष्येत । दुष्टं भवेदित्यर्थः ॥ ५९ ॥ क्वचिन्निष्प्रयोजनश्चायमुपाय इत्याह—अशक्य इति ॥ भृशं अत्यर्थं । स्वस्मिन्नैपुण्यं पश्यतापि मिथ्या प्रष्ट्रा अन्तःस्वभावैः अन्तर्हितस्वाभिप्रायैः । परस्य गीतैः भाषितैः । पराभिप्रायः सहसा ज्ञातुमशक्य इत्यर्थः । छद्मना प्रष्टुर्गूढमभिप्रायं ज्ञात्वा । "अहृदयवाचामहृदया एव प्रतिवाचो भवन्ति" इति न्यायेन परेणापि स्वाभिप्रायानाविष्करणादितिभावः ॥ ६० ॥ एवं पूर्वोक्तेषु पक्षेषु दोषानुद्भाव्य संप्रत्यालना परीक्ष्य कक्षीकृतं पक्षमुपक्षिपति—न त्वित्यादिना ॥ ब्रुवतः बहुव्याहरतोस्य ॥ ६१ ॥ एवमस्येङ्गिताकाराभ्यामदुष्टत्वमुक्त्वा चेष्टाभाषणाभ्यां च तद्दर्शयति—अशङ्कितेति ॥ शठः गूढविप्रियकारी ॥ ६२ ॥ ननु परमवञ्चकःपुरुषो भावं निगूहयति कथंतेनविश्वासइत्यत्राह—आकारइति ॥ आकारः मुखविकारः ॥ ६३ ॥ एवं दोषाभावमुक्त्वा गुणमुचितज्ञत्वरूपंदर्शयितुं नीतिमर्यादां दर्शयति—देशेति ॥ देशकालोपपन्नं देशकालाभ्यां युक्तं । प्रयोगेण उचितपुरुषप्रयोगेण । अभिसंहितं युक्तं । उचितेषु देशकालपुरुषेषु प्रयुक्तमित्यर्थः । कार्यं क्रिया । स्वफलं स्वोचितफलं । क्षिप्रं अप्रतिबन्धं । कुरुते कर्तरीति शेषः ॥ ६४ ॥ एतेनाप्येवमेवकार्यं प्रयुक्तमित्याशयेनाह—उद्योगमितिसार्धश्लोक एकान्वयः ॥ ६५ ॥ फलितमाह—एतावदिति सार्धश्लोकेन ॥ स्ववचनं निगमयति—यथाशक्तीति । यथाशक्ति बुद्धिशक्तिमनतिक्रम्य । आर्जवं निर्दोषत्वं । मद्वाक्यं श्रुत्वा यत्कर्तव्यमकर्तव्यं वा तस्य सर्वस्य त्वं तु त्वमेव । प्रमाणं प्रमातेत्यर्थः ॥ ६६ ॥ इति श्रीगोविन्द-

---

ति० किंचतस्यशत्रुत्वेतदभिप्रायश्चारैरपिदुर्ज्ञेयइत्याह—अशक्यमिति । परस्यशत्रोर्भावश्चारेण सहसा द्राक् । प्रश्नमात्रेणवेत्तुं ज्ञातुं । अशक्यएव । अज्ञातेनपृष्टउत्तरस्यैवादानात् । शत्रुप्रहितत्वेनज्ञातेप्रत्युतदण्डस्यापिप्रसङ्गात् ॥ नन्वेवंजगतिचारप्रेषणनैष्फल्यप्रसङ्गइतिचेन्न । बहुकालंतत्रस्थितौतद्वचनैस्तद्व्यवहारैस्तत्प्रसङ्गेहर्षामर्षादिभिश्चतस्यशत्रुमित्रत्वज्ञानायतत्प्रेषणसंभवात् । यदेव मतःअन्तरेणेति । "अन्तरेणस्वरैर्भिन्नैर्नैपुण्यंपश्यतांभृशं" इतिप्राचीनःपाठः ॥ अन्तरेण व्यवहारमध्ये । भिन्नैस्स्वरैः विलक्षणस्वरैः कण्ठध्वनिभिः नैपुण्यं । सदसदन्यतरत्वनिश्चयं । पश्यतां कुरुतां । भवानितिशेषः । तत्रबाष्पकण्ठत्वेभीत्यापूर्वापरासंगतकथनेचासन् अन्यथासन्नितिनिश्चीयतामित्याशयः ॥ ६० ॥ **ति०** ननुत्वयैवप्रथमंपरीक्ष्यतामितिचेन्मयापरीक्षितएवेत्याह—नत्वस्येति । दुष्टभावता वचनचेष्टादिभिर्दुष्टान्तःकरणता । नलक्ष्यते । प्रसन्नवदनताचदृश्यते ॥ ६१ ॥ **स०** प्रयोगेण प्रकृष्टयोगेनोपायेनदैवरूपेणाभिसंहितं संबद्धं । यद्वा प्रयोगोनुष्ठानं । स्वात्मानमेवसफलंकुरुतइतिवा । क्षिप्रंप्रयोगेणाभिसंहितं अदीर्घसमीक्षयाकृतंकर्तारं सफलं सविशरणं । नष्टमितियावत् । देशकालोपपन्नंचकार्यंसफलंकुरुते विभीषणकार्यंचदेशकालोपपन्नमितिसफलमेवेतिभावः ॥ ६४ ॥ **स०** तवोद्योगं रावणमारणविषयं । मिथ्यावृत्तं असदाचारं । वालिनः रावणादपिबलिनः ।

[**पा०**] १ ङ. झ. ट. अन्तरेणस्वरैर्भिन्नैर्नैपुण्यंपश्यतां. २ क. प्रसन्नमदनश्चापि. ३ ख. ग. ङ. झ. ञ. ट. दुष्टवागस्ति. ४ झ.—ठ. सफलं. ५ क.—ङ. झ. ञ. ट. वालिनंचहतं. ६ घ. ङ. छ. झ. ट, विद्यतेतस्य. ७ ग. च. ञ. तस्य. क. ख. ज. त्वस्य.

अष्टादशः सर्गः ॥ १८ ॥

रामेणसुग्रीवंप्रति विभीषणस्यमित्रभावेनप्राप्तत्वरूपहेतुना त्यागानर्हत्वोक्तौ सुग्रीवेणतंप्रतिसप्रणामंतस्मिन्दोषोज्ञापनेन तन्निग्रहप्रार्थना ॥ १ ॥ रामेणतंप्रति विभीषणस्यनिर्दोषत्वसमर्थनपूर्वकं शरणागतरक्षणस्यावश्यंकर्तव्यत्वे कपोतोपाख्यान-स्यदृष्टान्तीकरणेनसह कण्डुमुनिवचनस्यप्रमाणीकरणेन शत्रुत्वेपिशरणागतरक्षणस्यस्वव्रतत्वोक्त्या तस्माअभयप्रदानोक्तिपूर्वकं तदानयनचोदना ॥ २ ॥

अथ रामः प्रसन्नात्मा श्रुत्वा वायुसुतस्य ह ॥ प्रत्यभाषत दुर्धर्षः श्रुतवानात्मनि स्थितम् ॥ १ ॥
ममापि तु विवक्षाऽस्ति काचित्प्रति विभीषणम् ॥ श्रोतुमिच्छामि तत्सर्वं भवद्भिः श्रेयसि स्थितैः ॥२॥
मित्रभावेन संप्राप्तं न त्यजेयं कथंचन ॥ दोषो यद्यपि तस्य स्यात्सतामेतदगर्हितम् ॥ ३ ॥

राजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तदशः सर्गः ॥ १७ ॥

एवं सुग्रीवादिभिः स्वस्वमते प्रतिपादिते स्वाभिमतमपि रामो वक्तुं प्रारभते—अथेति ॥ वायुसुतस्य वचनमिति शेषः । प्रसन्नात्मा सुग्रीवादिवाक्यैः कलुषीकृते मनसि सति हनुमद्वाक्येन प्रसन्नमनाः । दुर्धर्षः पूर्वपक्षैरक्षोभ्यः । तत्रहेतुमाह—श्रुतवानिति । वसिष्ठादिभ्यः श्रुतकपोतकण्डूपाख्यानादिमान् । आत्मनिस्थितं चित्तावस्थितं ॥ १ ॥ सर्वमतप्रतिक्षेपरूपेण स्ववाक्येन किमेते व्याकुलितमनसो भवेयुरिति शङ्कया रामःसचिवानुपच्छन्दयति—ममापीति ॥ तुशब्दः पक्षान्तरवद्धनुमत्पक्षमपि व्यावर्तयति । ममापि विभीषणंप्रति काचिद्युष्मत्पक्षैः सह परिगणनायोग्या विवक्षा अस्ति । अतः तत्सर्वं मद्विवक्षितं वा तु साध्यरूपं सर्वमर्थजातं । श्रेयसि स्थितैः अस्मच्छ्रेयोनिरतैः । भवद्भिः युष्माभिः । श्रोतुमिच्छामि । भवद्भिः श्रुत्वा परीक्षणं कार्यमितिममेच्छास्तीत्यर्थः ॥ २ ॥ एवं सचिवाननुगुणीकृत्य स्वस्वभावकथनव्याजेन स्वविवक्षितुं सहेतुकं दर्शयति—मित्रभावेनेति ॥ मतान्तरेषु सदोषत्वान्न परिग्राह्य इति हेतुसाध्ये अपि दुष्टे । मारुतिमतेतु परिग्राह्यत्वरूपे साध्येसमीचीनेपि निर्दोषत्वादिति हेतुरसमीचीनः । किंतु शरणागतोहमितिवाक्यप्रयोक्तृत्वमेव तत्र मुख्यहेतुरित्यभिप्रायेण मित्रभावेनेति हेतुनिर्देशः । मित्रभावेन वास्तवमित्रत्वाभावेपि मित्रत्वाभिनयमात्रेणापीत्यर्थः । मित्रभावः शरणागतत्वं । राघवं शरणं गतः शरण्यं शरणं गत इति पूर्वोत्तरत्र च तस्यैव कथनात् । अन्यत्रापि—"विदितः स हि धर्मज्ञः शरणागतवत्सलः" इति शरणागतिशब्देनोपक्रम्य "तेन मैत्री भवतु ते यदि जीवितुमिच्छसि" इति मैत्रीशब्देन परिसमापनात् । यद्वा । मित्रशब्दः स्वाभिप्रायेण शरणागते गौरवारोपाद्युज्यते । न त्यजेयं त्यक्तुं न शक्नोमि । सर्वशक्तेरपि मम शरणागतशब्दश्राविणःपरित्यागे शक्तिसंभावनामपिन पश्यामीत्यर्थः । कथंचन दृष्टादृष्टानर्थशतानुबन्धित्वे तत्परिग्रहस्य सुहृदामनभिमतत्वे मत्प्राणपरित्यागे प्रस्तुतेपीत्यर्थः । दोषो यद्यपि तस्य स्यात् । यद्यपि सुग्रीवादिभिरुक्ता दोषा नास्मिन्सन्ति । सन्तु वाततोपि भूयांसः । अथाप्यशक्यमहं कथं करोमीत्यर्थः । स्याच्छब्दः दुष्टोपि शरणागतशब्दप्रयोक्ता मया परिगृहीत इति मम महद्यशो भवेदित्येवमर्थे । अदुष्टपरिग्रहे गुणो मन्दः । दुष्टपरिग्रहे तु मम शरणागतरक्षणधर्म उत्तेजितोभवतीतिभावः । करुणयादुष्टपरिग्रहे शिष्टगर्हास्यादित्यत्राह—सतामेतदिति । एतद्दुष्टस्यापि शरणागतस्यसंग्रहणं । सतां शिष्टानां । अगर्हितं गर्हितादन्यत् । पूजितमित्यर्थः । पूजितत्वं च कपोतोपाख्यानादिभिः प्रपञ्चयिष्यते । एवंच शास्त्रेषु दोषाणां परित्यागहेतुत्वोक्तिः शरणागतव्यतिरिक्तविषयेति विषयव्यवस्थाऽभिप्रेता । अतएव

निष्कंपप्रवृत्तावयंहेतुः । राज्यं रावणसाम्राज्यं । ज्येष्ठमारणकनिष्ठाभिषेचनयोःसुग्रीवनिदर्शनेननिश्चितरावणमारणस्वस्थापनार्थमयमायातइतिनाचातुरीतस्येतिभावः ॥ ६५ ॥ इतिसप्तदशःसर्गः ॥ १७ ॥

स० अयंहनुमदुक्तप्रकारेणनिर्दोषएवयद्यपि । यदितस्यदोषः त्यागहेतुःस्यात् तर्हि तस्यैवदोषःवधरूपःस्यात् नास्माकंकश्चन ।

[पा०] १ ङ. ञ. ट. ममापिच. २ ग. घ. मेतद्विगर्हितं.

दोषाधिक्येनवधार्हस्यापि शरणागतस्यरक्षणमेवकार्यमितिश्रुतिराह—तस्मादपिवध्यं प्रपन्नं न प्रतिप्रयच्छन्तीति । आचार्ययोजना । मित्रस्य स्नेहिनो भावो मित्रत्वं । तेन आशालेशमात्रेण । अद्वेषमात्रेणाभिमुख्यमात्रंवाऽस्मदङ्गीकारे प्रयोजकं न तु पूर्णभक्तिरिति भावः । तथोक्तं—"त्वामामनन्ति कवयः करुणामृताब्धे ज्ञानक्रियाभजनलभ्यमलभ्यमन्यैः । एतेषु केन वरदोत्तरकोसलस्थाः पूर्वं सदूर्वमभजन्त हि जन्तवस्त्वां" इति ॥ यद्वा मित्रभावेन मित्रक्रियया । "भावो लीलास्वभावयोः । जन्त्वभिप्रायचेष्टासु भूतौ विद्वत्पदार्थयोः । क्रियायामात्मनि" इति नानार्थरत्नमाला । मित्रभावनयेतियावत् । अहृदयशरणोक्तयेत्यर्थः । तदप्युक्तं—" शरणवरणवागियं योदिता न भवति वत सापि धीपूर्विका " इति । शरणागतभावेनेति वक्तव्ये मित्रभावेनेत्युक्तिः स्वाश्रयणाय कतिचित्पदानि कुर्वत्यपि स्वसदृशबुद्धिकारिणोभगवतोभिप्रायेण । देव्यापि शरणागतिमभिदधत्या "तेन मैत्री भवतु ते यदि जीवितुमिच्छसि" इत्युक्तं । यद्वा मित्रभावेन मित्रत्वेन हेतुना । "सुहृदं सर्वभूतानां" इत्युक्तरीत्या अस्मदीयसहजसौहार्दपुरस्कृत्येत्यर्थः । यद्वा मित्रभावेन आनुकूल्यसंकल्पादिपूर्वकमित्यर्थः । यद्वा मितात्रायतइति मित्रं । ईश्वरोपकारं परिच्छिद्य तत्सदृशोपकारप्रवृत्तस्य भावेनेत्यर्थः । यद्वा विश्वसनीयस्थलं मित्रं । "तन्मित्रं यत्र विश्वासः" इत्युक्तत्वात् । विश्वासिनो भावेनेत्यर्थः । संप्राप्तं "तस्याशालेशमात्रेण ह्रीरेषाहिममातुला" इत्युक्तरीत्या मम तन्निवासगमने प्राप्तेपि स्वयमेव प्राप्तं कथं त्यजेयं । संप्राप्तं सम्यक्प्राप्तं । पादुके द्वारि विन्यस्य देववन्दनकारिन्यायेनान्यत्रचित्तप्राप्तिमन्तरेण "परित्यक्तम मया लङ्का मित्राणि च धनानि च" इति विरोधिनिवृत्तिपूर्वकं प्राप्तमित्यर्थः । यद्वा संप्राप्तं माता पिता भ्राता निवासः शरणं सुहृद्गतिर्नारायण इति न्यायेन मयि त्यक्तसकलविधबन्धुभावमाचरन्तं । यद्वा मदन्तरङ्गानुचरपुरस्कारेण प्राप्तं । यद्वा संप्राप्तं लङ्कायां स्थित्वा राघवं शरणं गतोस्मीत्युक्तंचेत् अतन्द्रितचमूपतीत्याद्युक्तन्यायेन मम तत्र गन्तव्यतायामपि तस्यागमनेन पङ्गोरुपरि गङ्गानिपतनवदस्मत्प्रयोजनमेवकृतं । संप्राप्तं प्राप्तिरेवास्माकमपेक्षिता । न तु स्तुत्यर्चनध्यानप्रणामादिः । समित्यनेन मानसवाचिककायिकरूपपूर्णप्रपदनमुच्यते । न त्यजेयं त्यक्तुं न शक्नोमि । सर्वशक्तेरपि मम शरणागतशब्दश्राविणः परित्यागे शक्तिसंभावनामपि न पश्यामीत्यर्थः । संप्राप्तं न त्यजेयं, " शरणागतस्यमालिनीयं वृषशैलेशकृषीवलं धिनोति " इत्युक्तरीत्या रक्षापेक्षां प्रतीक्षमाणोहं कथं संप्राप्तं त्यजेयं । न त्यजेयं तत्संबन्धेन रावणविषयाकारापेक्षी कथं तमेव त्यजेयं । अतएवहि घण्टाकर्णपक्षपातेन तदनुजस्यापि मुक्तिं ददौ । अतएव च मालाकारविषयपक्षपातेन । " युष्मत्सन्ततिजातानां दीर्घमायुर्भविष्यति " इत्युक्तवान् । न त्यजेयं । आगमनमात्रेण श्लाघनीये त्यागसंभावना कुतः । संभावनायां लिङ् । त्यागसंभावनायां खलु साधनोद्योगः । तस्य त्यागे स्वसत्ताचेत् साधनोद्योगः स्यात् । सैव न निर्वहति कथमुद्योगः तत्स्वीकाराभावे स्वसत्ता न सिद्ध्यति चेत् तत्स्वीकारेऽस्मत्सत्ता न सिद्ध्यतीत्यस्मत्त्यागः स्यात् स कथमुपपद्यत इति चेत्तत्राह—कथंचन । " अप्यहं जीवितं जह्यां " इत्युक्तरीत्या नवप्रसववात्सल्येन वत्सला गौः पूर्ववत्सानिव युष्मानपि त्यक्ष्यामि न त्वाश्रितं । यद्वा कथंचन सर्वदेशसर्वकालसर्वावस्थास्वपीत्यर्थः । यद्वा कथंचन शरणागतस्य गुणाभावेपि दोषप्राचुर्येपि तत्परिग्रहस्य सर्वानभिमतत्वेपि दृष्टादृष्टानिष्टशतानुबन्धित्वेपि मत्प्राणपरित्यागे प्रस्तुतेपीत्यर्थः । किंच दोषो यद्यपि तस्य स्यात् । अस्मदभिप्रायेण दोषो नास्त्येव अस्थानभयशङ्कितो भवतोभिप्रायेण तस्य दोषोस्ति चेत्स्यात् । अङ्गीकारेऽव्ययमिदं । दोषभोग्यत्वरूपवात्सल्यैकस्वभावस्य मे आश्रितदोषो ह्युपादेयइतिभावः । सुकुमारस्य राजकुमारस्य सुगन्धिमूलमृल्लेशवदस्य दोषभोग्यत्वं । यद्वा दोषो यद्यपि स्यात् । तस्य शरणागतस्य नदोषः । " यथैषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते " इत्युक्तरीत्या दोषो न श्लिष्येदित्याशयः । यद्वा दोषो यद्यपि स्यात् । स तस्य हि शरणागतिरूपनिरतिशयगुणशालिनो दोषो न त्याज्यकोटिमाटीकते । सुगन्धिमूलमृल्लेशवत् । यद्वा दोषो यद्यपि तस्य दोषोस्ति चेत्तत्संबन्धी खलु दोषः । स तस्मादपि श्लाघ्यः स्यात् । प्रार्थनायां लिङ् । अस्माभिः प्रार्थितःखलु । गुणवात्रक्षितश्चेत् गुणवत्तापत्तिकरः । दोषवात्रक्षितश्चेदतिशयोस्माकमिति भावः ।

सुग्रीवस्त्वथ तद्वाक्यमाभाष्य च विमृश्य च ॥ ततः शुभतरं वाक्यमुवाच हरिपुङ्गवः ॥ ४ ॥
सुदुष्टो वाऽप्यदुष्टो वा किमेष रजनीचरः ॥ ५ ॥
ईदृशं व्यसनं प्राप्तं भ्रातरं यः परित्यजेत् ॥ को नाम स भवेत्तस्य यमेष न परित्यजेत् ॥ ६ ॥
वानराधिपतेर्वाक्यं श्रुत्वा सर्वानुदीक्ष्य च ॥ ईषदुत्स्मयमानस्तु लक्ष्मणं पुण्यलक्षणम् ॥
इति होवाच काकुत्स्थो वाक्यं सत्यपराक्रमः ॥ ७ ॥
अनधीत्य च शास्त्राणि वृद्धाननुपसेव्य च ॥ न शक्यमीदृशं वक्तुं यदुवाच हरीश्वरः ॥ ८ ॥
अस्ति सूक्ष्मतरं किंचिद्यदत्र प्रतिभाति मे ॥ प्रत्यक्षं लौकिकं वाऽपि विद्यते सर्वराजसु ॥ ९ ॥

यद्वा दोषो यद्यपि अस्मद्बधापेक्षया तस्य स्यात् तस्यापेक्षितफलसिद्धिः स्यात् । कपोतोपाख्यानानुगुणेयं योजनेति श्रीवत्साङ्कमिश्रा आहुः । कथं तर्ह्येतन्महामन्त्रिणो निन्दन्तीत्यत्राह—सतामेतदगर्हितं । एतत् आश्रितदोषाङ्गीकरणं । सतां अगर्हितं अनिन्दितं । अस्मत्पक्षपातिनामस्थानभयशङ्किनां निन्दितत्वेपि परमार्थदर्शिनां कपोतादीनांच न निन्दितमिति भावः । यद्वा एवं दुष्टापरित्यागे प्रत्यवायपरिहारो वा पुरुषार्थसिद्धिर्वा पापक्षयो वेति चेन्नैतदित्याह—सतामिति । सद्रोष्टीष्वस्मद्गर्हापरिहारएव फलं स्वमारणोद्योगवतामपि रक्षकाः कपोतादयः तेषामगर्हितं । यद्वा दुष्टजनपरिग्रहस्य शिष्टगर्हितत्वाच्छास्त्रनिन्दितत्वाच्चायुक्तमित्याशङ्क्य सत्यमेतदुष्टजनत्याज्यत्ववचनं सामान्यविषयं । तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्तीत्येवमादिशरणागतापरित्यागविषयविशेषशास्त्रस्य सद्भावात् । दुष्टस्यापि शरणागतस्य संरक्षणे शिष्टगर्हणा नास्ति प्रत्युत श्रेय एवेत्याह—सतामेतदगर्हितमिति । एतत् दुष्टशरणागतपरिग्रहणं । सतां सामान्यविशेषशास्त्रविदां । अगर्हितं गर्हितादन्यत् । पूजनीयमित्यर्थः । सर्वशक्तेः काचिदशक्तिः । सर्वज्ञस्य किंचिदज्ञानं च मित्रभावेनेति श्लोकेन दर्शितमिति गोविन्दयतिनः प्रत्यवदन् ॥ ३ ॥ अथ सुग्रीवो रामप्रकृतिमाकर्ण्य अतिसाहसमेतदित्यन्तं भीतभीतः प्राह—सुग्रीव इति ॥ आभाष्य अनूद्य । शुभतरं नीतिशास्त्ररहस्यमूलत्वात्स्वामिविषयप्रेमातिशयनिबन्धनत्वाच्च शुभतरं । वाक्यमुवाच । अत्र लक्ष्मणमित्युक्त्वादुपसंहारे सहलक्ष्मण इत्युक्तत्वाच्चोभयोरपि वचनमुभावपिप्रति प्रतिवचनं च बोध्यम् ॥ ४ ॥ सुदुष्ट इत्यर्धमेकं वाक्यं ॥ अस्माभिः पूर्वमुक्तैश्छिद्रान्वेषित्वादिदोषैर्युक्तो भवतु वा मा वा कृतघ्नः स एष रजनीचरः । किं किमर्थं । परित्याज्यएवेत्यर्थः ॥ ५ ॥ कृतघ्नतामेवाह—ईदृशमिति ॥ यं बन्धुं । एष व्यसने प्राप्ते न परित्यजेत्स कस्तस्य भवेत् नकोपीत्यर्थः । भ्रातरं परित्यजन् सर्वानपि परित्यजेदेवेति भावः । ईदृशं व्यसनं । लङ्कादहनपुत्रवधादिकमारभ्य समुद्रतीरनिवेशपर्यन्तं व्यसनमित्यर्थः ॥ ६ ॥ अथ सूक्ष्मधर्मानभिज्ञस्य सुग्रीवस्य नीतिमर्यादयैवोत्तरं वक्तुमारभते—वानराधिपतेरिति सार्धश्लोकः ॥ ईषदुत्स्मयमानः धर्मरहस्यमिदं मम परमशक्तिं शरणागतसंरक्षणव्रतं च सम्यगपरिज्ञाय यत्किंचिद्वदत्ययमिति मन्दस्मयंकुर्वन् ॥ ७ ॥ प्रथमं तद्वचनमुपलालयति—अनधीत्येति ॥ ८ ॥ सूक्ष्मतरं किंचित् अर्थस्वरूपमितिशेषः । तदेवार्थस्वरूपं विशिनष्टि—प्रत्यक्षमिति । प्रत्यक्षं दृष्टं । लौकिकं लोकसिद्धं । यत्सर्वेष्वपि राजसु विद्यते मे प्रतिभाति च तत्सूक्ष्मतरं किंचिद्धर्मस्वरूपमस्तीतिसंबन्धः ॥ ९ ॥

यद्यपितस्यदोषःस्यात् तथापि नत्यजेयमितिवा ॥ ३ ॥ **रामानु०** दुष्टत्वादुष्टत्वयोर्मध्येयमितिवदन्तंरामंप्रत्युभयथापित्याज्यइतिसोपपत्तिकमाह—सुदुष्टइत्यादिना । सुदुष्टोवाप्यदुष्टोवा एषरजनीचरः । किं किमर्थं । अनेनसाध्यंप्रयोजनंकिमपिनास्तीत्यर्थः ॥ ५ ॥ **ती०** यद्वा योविभीषणः ईदृशंव्यसनंप्राप्तंभ्रातरंपरित्यजेत् त्यक्तवान् । सएषः यं कमित्यर्थः । सएषविभीषणः कंनपरित्यजेत् । तस्यकोनामभवेत् । एवंविधमेनंकोवापरिगृह्णीयादित्यर्थः । **ति०** तस्मात्यकोनामसभवेत् । यमेष संकटेनपरित्यजेत् । तस्मादस्मानपिसंकटेत्यक्ष्यत्येव । विश्वासघातिकृतघ्नत्वादित्यर्थः ॥ ६ ॥ **ति०** सर्वानुदीक्ष्यसुग्रीवस्योत्तरकक्ष्याचालनसामर्थ्यंसर्वेहरीननुभाव्य तथालक्ष्मणमुदीक्ष्येषदुत्स्मयमानोवालत्वेनमदृत्तापरिज्ञानात्तवाप्येतदेवसंमतमितीषद्धासंकुर्वन्नि-

[**पा०**] १ ग. ङ. झ. ट. उदीक्ष्यतु. २ ग. ङ. झ. ट. यथाचप्रतिभातिमा. ३ क. ङ. झ. ञ. ट. चापि. ४ ङ. झ. ट. वर्तते.

अमित्रास्तत्कुलीनाश्च प्रातिदेश्याश्च कीर्तिताः ॥ व्यसनेषु प्रहर्तारस्तस्मादयमिहागतः ॥ १० ॥
अपापास्तत्कुलीनाश्च मानयन्ति स्वकान्हितान् ॥ एष प्रायो नरेन्द्राणां शङ्कनीयस्तु शोभनः ॥ ११ ॥
यस्तु दोषस्त्वया प्रोक्तो ह्यादानेऽरिबलस्य च ॥ तत्र ते कीर्तयिष्यामि यथाशास्त्रमिदं शृणु ॥
न वयं तत्कुलीनाश्च राज्यकाङ्क्षी च राक्षसः ॥ १२ ॥
पण्डिता हि भविष्यन्ति तस्माद्ग्राह्यो विभीषणः ॥ १३ ॥
अव्यग्राश्च प्रहृष्टाश्च न भविष्यन्ति संगताः ॥ प्रणादश्च महानेष ततोस्य भयमागतम् ॥
इति भेदं गमिष्यन्ति तस्माद्ग्राह्यो विभीषणः ॥ १४ ॥

तदेवार्थस्वरूपमाह—अमित्रा इति ॥ तत्कुलीनाः ज्ञातयः । प्रातिदेश्याः समनन्तरदेशाधिपाश्च । व्यसनेषु समुपस्थितेषु प्रहर्तारः अमित्राः शत्रवः कीर्तिताः । तस्माद्व्यसनप्रहर्तृज्ञातित्वात् ॥१०॥ व्यसनिनं रावणं परित्यज्यागमने कारणान्तरमस्तीत्याह—अपापा इति ॥ अपापास्तत्कुलीना नरेन्द्राः । हितान् हितपरान् । स्वकान् ज्ञातीन् मानयन्त्येव । तेषामपि नरेन्द्राणां शोभनो गुणवानेष ज्ञातिः प्रायः शङ्कनीयः । लोके पापभूयिष्ठतया शोभनोपि प्रायेण शङ्कनीयः । पापिनस्तु नरेन्द्रस्य तादृशो ज्ञातिः शङ्कनीय इति किमु वक्तव्यम् । अतोयं रावणेन शङ्कितस्तेन सह विरुध्यैवागत इत्यर्थः ॥ ११ ॥ एवं रावणपरित्यागे हेतुमुक्त्वा स्वापरित्यागे हेतुं वक्तुं प्रतिजानीते—यस्त्विति ॥ अरिबलस्य विभीषणस्य । दोषः को नाम स भवेत्तस्येत्यादिनोक्तः । तत्र विषये । यथाशास्त्रं नीतिशास्त्रमनतिक्रम्य । इदमुत्तरं—न वयमिति । न वयं तत्कुलीनाः राक्षसराज्यानर्हाः । अस्माकं तद्राज्ये आकाङ्क्षाभावात् । मम रावणस्येव तस्मिन्नरित्वशङ्काप्रसक्तिर्नास्ति । अतो नास्मांस्त्यक्ष्यतीति भावः । किंच राक्षसो विभीषणस्तु राज्यकाङ्क्षी अस्मन्मुखेन रावणं घातयति । अतः स्वकार्यविघातभयादपिनास्माकमपकारं करोतीत्यर्थः ॥ १२ ॥ ननु मूर्खा राक्षसाः कथमेवं विमृश्यकारिण इत्याशङ्क्य नायं नियम इत्याह—पण्डिता इति ॥ अर्धमेकं वाक्यं । राक्षसा अपीत्यर्थः ॥ १३ ॥ पुनरप्यस्य रावणेन विरुध्यागमनमेव प्रतिपादयन् परिग्राह्यत्वं निगमयति—अव्यग्रा इति सार्धश्लोकेन ॥ ते ज्ञातयः अव्यग्राः प्रहृष्टाश्च सन्तः कदाचिदप्यन्योन्यसंगताः न भविष्यन्ति न भवन्तीति । अनेनैव हेतुना ज्ञातयोवसरे भेदं गमिष्यन्ति गच्छन्ति । अस्य च भीतस्यैव महान् प्रणादः श्रूयते । अतो बलीयसो रावणात् अस्य भयमागतं तेन च भयेनात्मत्राणार्थमागत इति

तिह्येवाच ॥ ७ ॥ **ति०** तदर्थरूपंप्रतिपादयितुंतदुपयुक्तांलोकस्थितिमाह—**अमित्राइति** । राज्ञांअमित्राः शत्रवः । द्विधाकीर्तिताः । तत्कुलीनाज्ञातयः प्रातिदेश्याः आसन्नदेशवासिनश्चेति । तेद्विविधाअपि स्वावरोधिज्ञातेःस्वविरोधिनः आसन्नदेशवर्तिनश्च । व्यसनेषु आध्यात्मिकादित्रिप्रकारकष्टेषु । तस्यप्रहर्तारोभवन्तीतिप्रसिद्धं । अस्तुकिंततइत्यत्राह—तस्मादिति । नानाप्रकारस्वपीडाप्रवृत्तज्ञातिभयात्स्वत्राणार्थंमिहागतः । यद्वा तस्मात् व्यसनप्रहर्तृज्ञातित्वात् । व्यसनिनंरावणंप्रहर्तुमयंविभीषणइहागतइत्यर्थः ॥ **शि०** तत्कुलीनाः स्वकुलप्रसूताः । प्रातिदेश्याः तत्समीपदेशवासिनश्च । अमित्राः समयविशेषेशत्रवःकीर्तिताः । अतएव व्यसनेषु दुःखसमयेषु । प्रहर्तारोभवन्ति । तस्मात् ज्ञातिरूपरिपुभयात् अयमिहागतः । एतेनभ्रातृनिष्ठप्रीतिविषयत्वेयद्ययमिहागच्छेत् तदास्मिन्कृतघ्नत्वादिदोषसंभावनासंभवेत् । अयंतुपापाचरणशीलः स्वबन्धुनास्वविपरीताचरणवत्तयाऽयंनिस्सारित इतिनदोषवानितिसूचितं ॥ १० ॥ **ती०** प्रवादश्चमहानेषइतिपाठेतु ज्ञातिभ्योभयागमनेअपवादश्च " घोराःस्वार्थप्रयुक्ताश्चज्ञातयोनोभयावहाः " इतिहस्तिगीतादिरूपोलोकप्रवादोस्तीत्यर्थः ॥ **ति०** उक्तहेत्वनुवादपूर्वंग्राह्यत्वमुपसंहरति—अव्यग्राइतिसार्धेन । तेज्ञातयः अव्यग्राः अनाकुलाः । निश्चयवन्तइतियावत् । प्रहृष्टाः अन्योन्यंसंतुष्टाश्च । सौभ्रात्रात्संगताः परस्परंमिलिताभविष्यन्तीतिसर्वलोकप्रसिद्धं । तेभ्योन्येतूक्तविपरीताइतिप्रागुक्तरीत्यापापमूलराज्यलोभादिनाभेदंगमिष्यन्ति । ततोऽनन्तरं अस्य ज्ञातिवर्गस्य । एषः लोकप्रसिद्धः । प्रणादः युद्धरूपकोलाहलः । भवति । अन्योन्यस्यान्योन्यतोभयंचागतंभवतीतिलोकस्थितिर्यतः तस्मादयमेतावत्कालमनपगतसौभ्रात्रोपिकेनचिन्निमित्तेनाद्यप्राप्तवैरःशरणमागतोग्राह्यएवेतिकतकव्याख्या । तीर्थंतु नैषततोस्येतिपठित्वा अस्य भीतस्येव एषमहान्प्रणादःश्रूयते । अतस्ततोबलवतोरावणादस्यविभीषणस्यभयमागतमित्यात्मत्राणार्थंमागतःपरिग्राह्यएवेत्यर्थः ।

[**पा०**] १ क. ग. घ. प्रतुष्टास्तेन. ङ. झ. ट. प्रहृष्टाश्चते.

न सर्वे भ्रातरस्तात भवन्ति भरतोपमाः ॥ मद्विधा वा पितुः पुत्राः सुहृदो वा भवद्विधाः ॥ १५ ॥
एवमुक्तस्तु रामेण सुग्रीवः सहलक्ष्मणः ॥ उत्थायेदं महाप्राज्ञः प्रणतो वाक्यमब्रवीत् ॥ १६ ॥
रावणेन प्रणिहितं तमवेमि विभीषणम् ॥ तस्माहं निग्रहं मन्ये क्षमं क्षमवतां वर ॥ १७ ॥
राक्षसो जिह्मया बुद्ध्या संदिष्टोऽयमिहागतः ॥ ग्रहर्तुं त्वयि विश्वस्ते प्रच्छन्नो मयि वाऽनघ ॥१८॥
लक्ष्मणे वा महाबाहो स वध्यः सचिवैः सह ॥ रावणस्य नृशंसस्य भ्राता ह्येष विभीषणः ॥ १९ ॥
एवमुक्त्वा रघुश्रेष्ठं सुग्रीवो वाहिनीपतिः ॥ वाक्यज्ञो वाक्यकुशलं ततो मौनमुपागमत् ॥ २० ॥
सुग्रीवस्य तु तद्वाक्यं रामः श्रुत्वा विमृश्य च ॥ ततः शुभतरं वाक्यमुवाच हरिपुङ्गवम् ॥ २१ ॥

परिग्राह्योयमित्यर्थः ॥ १४ ॥ ननु दुष्टोपि ज्येष्ठोनुवर्तनीय एवेत्याशङ्क्य यद्यप्ययं धर्मः तथापि न सर्वत्र संभवतीत्याह—न सर्व इति ॥ " मद्विधा वा पितुः पुत्राः " इति भूतार्थकथनत्वान्नात्मप्रशंसादोषः । यथा " कृपावानविकत्थनः " इत्युक्तलक्षणेन धीरोदात्तेन दुष्यन्तेन " सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः " इत्युक्तं । यथा च हनुमता " पन्नगाशनमाकाशे पतन्तं पक्षिसेविते । वैनतेयमहं शक्तः परिगन्तुं सहस्रधा" इति ॥ दण्डिना च काव्यादर्शे प्रथमपरिच्छेदे । " स्वगुणाविष्क्रियादोषो नात्र भूतार्थशंसिनः । अपि त्वनियमो दृष्टस्तथा त्वन्यैरुदीरणात् " इति ॥ यद्वा पूर्वश्लोकार्थस्य भरतेति प्रसङ्गं परिहरति—सर्व इति । तातेति सान्त्वोक्तिः । सर्वे भ्रातरः भरतोपमा न भवन्ति । कैकेयीवरप्राप्तं पित्रा दत्तमपि राज्यं परित्यज्य वनं गतं मामनुसृत्य तवैव राज्यं त्वमेव गृहाण । अहं त्वदास्यं करिष्यामीति वदन्भरतादन्यः कश्चिदस्ति किमिति भावः । एवंविधप्रसक्त्यभावाल्लक्ष्मणस्यानुपादानं । अत्र दृष्टान्तमाह—मद्विधा इत्यादिना । मद्विरहमात्रेण लोकान्तरं गतः पिता । तत्तुल्यपितृमानस्मत्सदृशः कश्चिदस्ति किमित्यर्थः। यद्वा मद्विधाः पितुः पुत्राः सन्तुवा मा वा भरतसमा भ्रातरस्त्वत्समाः सुहृदश्च न सन्तीत्यर्थः । सुहृदो वा भवद्विधाः । वर्षरात्रसमये स्थितेन मयाऽत्यन्तकुपितेन लक्ष्मणेन चात्यन्तं परुषमुक्तेपि अस्मासु प्रेमातिशयमेव प्रकटयन् त्वत्समः कोवास्तीति भावः। यद्वा मद्विधा वा पितुः पुत्रा न भवन्ति । निरतिशयपितृवात्सल्यभूतोस्मत्तुल्यो नास्तीत्यर्थः ॥१५॥ अथ सुग्रीवो नीतिमुखेन विभीषणस्य त्याज्यतां प्रतिपादयितुमशक्तः परिग्रहे चाविदितभावोयं रामे कमनर्थमुत्पादयिष्यतीति प्रेमवशेन व्याकुलो विभीषणशरणागतेरेकस्याः सलक्ष्मणेन स्वेन क्रियमाणं शरणागतिद्वयं प्रबलमभिमन्यमानः शरणागतिपूर्वकं विभीषणनिग्रहं प्रार्थयते—एवमित्यादिचतुःश्लोकैः ॥ १६—१७ ॥ राक्षस इत्यादि ॥ अत्र मयि लक्ष्मण इति स्वस्य लक्ष्मणस्य चानर्थकथनं स्वव्यसनादपि स्वाश्रितव्यसनं रामस्यात्यन्तारुन्तुदमिति तत्प्रदर्शनेन विभीषणापरिग्रहसमर्थनार्थं ॥ १८—१९ ॥ मौनमुपागमत् । प्रणयरोषादितिभावः ॥ २० ॥ अथ रामः स्वस्य सर्वशक्तित्वप्रदर्शनेन सुग्रीवस्यातिशङ्कां-

इतरत्तुप्राग्वदेवव्याख्येयमित्याह ॥ १४ ॥ **ति०** ननुभरतादिष्वेतद्दोषादर्शनाद्भ्रातृणामीदृशभेदासंभवोतआह—नसर्वइति । राज्यादीच्छयाप्राप्तसौभ्रात्रत्यागस्याभावोभरतादन्येपरमदुष्करः । तेनपितृदत्तराज्यत्यागात् । लक्ष्मणादेस्तुतदप्रसक्त्यानतदुक्तिः । मद्विधावापुत्राः सुखलिप्सयापितृवाक्यलङ्घनरहिताः । सुहृदोवाभवद्विधाः । त्यक्त्वापिसर्वसौख्यंसर्वाकारेणसर्वबलेनसर्वयत्नेनच मित्रकार्यसाधकःसुहृत्परमदुर्लभइतिभावः । अत्रभूतार्थकथनरूपत्वान्नात्मप्रशंसादोषोभगवतः । " स्वगुणाविष्क्रियादोषोनास्तिभूतार्थशंसने " इतिदण्ड्युक्तेः ॥ **स०** भ्रातृषुसौभ्रात्रंदुर्मिलमितिनवक्तुंयुक्तं । भरतेभक्तिभरितता त्वयि त्वदनुभूतैववर्ततइत्यतः क्वाचित्कएवैवंभावोभ्रात्रादिष्वित्याह—नेति । सर्वेभ्रातरोभरतोपमानभवन्ति । स लोकविलक्षणइतिभावः । लक्ष्मणस्यच स्वसमखेदमोदत्वेनसहैवावस्थानाद्राज्यप्राप्तेरहन्ताहेतोरभावेनचानुक्तिर्नतुसौहार्दावमर्देनेतिहृदयं । भ्रातृप्रस्तावे पितापुत्राचारोक्तिः प्रसङ्गसङ्गत्या । सर्वेभ्रातरोभरतोपमानेत्यनेन मारिततारारमणस्यममौत्कीर्तनंमन्यमानस्तंसुमुखीकर्तुंसुहृदइत्याद्युक्तिश्चेतिज्ञेयं ॥१५॥ **स०** विश्वस्तेत्वयिवा तथा विश्वस्तेमयिवा । त्वयिविश्वस्तेमयिवा मयिविश्वस्तेत्वयिवा । एतेन मन्त्राशस्तवेवतवनाशोममसंतापकरइतिस्वाम्यर्थस्वार्थचायंनसंग्राह्यइतिभावः ॥ १८ ॥ **स०** लक्ष्मणेवाप्रहर्तुमागतः । त्वयिराजत्वान्मयिधूर्वोदृत्वात्प्रहरणंन दुस्सहं । लक्ष्मणप्रहरणंतुतवेवममापिदुस्सहमितिभावः । सचिवैः चतुर्भिः ॥ १९ ॥ **ति०** मौनमुपागमत् त्रिवाचोक्तं । अतोधिकंप्रभौनवक्तुंयुक्तमित्याशयेनेतिशेषः ॥ २० ॥ **ती०** सुग्रीवस्यवाक्यंश्रुत्वा तद्विमृश्य । अस्यायमर्थः प्रथमतःकृतविभीषण-

[पा०] १ ख.—ट. निशाचरं. २ ङ. झ. ट. विश्वस्तेमयि. ३ ङ. झ. ञ. ट. ससुग्रीवस्य.

सुदुष्टो वाऽप्यदुष्टो वा किमेष रजनीचरः ॥ सूक्ष्ममप्यहितं कर्तुं ममाशक्तः कथंचन ॥ २२ ॥
पिशाचान्दानवान्यक्षान्पृथिव्यां चैव राक्षसान् ॥ अङ्गुल्यग्रेण तान्हन्यामिच्छन्हरिगणेश्वर ॥ २३ ॥
श्रूयते हि कपोतेन शत्रुः शरणमागतः ॥ अर्चितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः ॥ २४ ॥
स हि तं प्रतिजग्राह भार्याहर्तारमागतम् ॥ कपोतो वानरश्रेष्ठ किं पुनर्मद्विधो जनः ॥ २५ ॥

निवार्य शरणागतरक्षणरूपस्य स्वव्रतस्य । धर्मशास्त्रसिद्धत्वात्तस्यापरित्याज्यतां प्रतिपादयति—सुग्रीवस्य त्वित्यादिना ॥ विमृश्य मयि प्रेमातिशयेनैवमुक्तमिति विचार्य ॥ २१ ॥ सुग्रीवस्य भयं निवर्तयति—सुदुष्ट इति ॥ स एष रजनीचरः सुदुष्टो वा अदुष्टो वा भवतु किं करिष्यति । तदेव विवृणोति—सूक्ष्ममिति । सूक्ष्ममपीत्यनेन साक्षान्मयि मदाश्रितेषु मत्संबन्धिसंबन्धिष्वपि न शक्त इति भावः ॥ २२ ॥ कथं न शक्त इत्याकाङ्क्षायां स्वशक्तिं दर्शयति–पिशाचानिति ॥ पृथिव्यां विद्यमानानितिशेषः । त्वं तावत्सकलैः स्वबलैः सह तिष्ठ अहमेक एव पर्याप्तइत्यभिप्रायेणाह—हरिगणेश्वरेति । अङ्गुल्यग्रेण शस्त्रास्त्रादिप्रसङ्गशून्येनअङ्गुल्यन्तरनिरपेक्षेण एकस्यामप्यङ्गुल्यामंशान्तरव्यापारवर्जितेन । तत्रापि हस्तपादादिविशेषविवक्षाशून्येन अग्रमात्रेण । हन्यां हन्तुंशक्तः । नकेवलं लङ्कामात्रनिवासिनो राक्षसान् किन्तु स्थानान्तरनिवासिनोपीतिविवक्षया पृथिव्यांचैवेति निर्देशः । न केवलमेकजातीयानामेव लक्ष्यत्वं किन्तु सर्वेषामपीत्यभिप्रायेणाह—तानिति । तर्हि लङ्कामात्रनिवासिनो राक्षासान्किमिति न हंसीत्यत्राह—इच्छन्निति । इच्छाभावादेव तद्वधाभावः । न त्वशक्त्येतिभावः ॥ २३ ॥ एवमस्मादपकारशङ्का नास्तीत्युक्त्वा भवतुवाऽयमपकारी तस्मादेवापकारान्मम प्राणा गच्छन्तु वा । अथापि नायंनिग्राह्यः नापिपरित्याज्यः । किन्त्ववश्यं रक्ष्यएवेति कपोतोपाख्यानेन प्रतिपादयति—श्रूयतेहीति ॥ हीतिप्रसिद्धेयमाख्यायिकेत्यर्थः । कपोतेन धर्माधिकारशून्येन तिर्यङ्मात्रेण । एतेनाप्यनुष्ठितत्वे किमु वक्तव्यमस्माकं । कपोतेन एकेनासहायेन कृतं किमुत ससहायैरस्माभिः । शत्रुः कपोतस्य मृगयुः स्वयं भार्यापहारी वैरी । विभीषणस्त्वस्माकं नतथा । तथाप्यरक्षणे किमस्मत्पौरुषेण । शरणमागतः कपोताध्युषितद्रुमस्थलं यदृच्छयाप्राप्तः । " सोञ्जलिं शिरसा बद्ध्वा वाक्यमाह वनस्पतिम् । शरणं हि गतोस्म्यद्य देवतामिहवासिनीं " इति ॥ स्वावासवनस्पतिदेवतां प्रत्युक्तवान् नतुकपोतं । विभीषणस्तु राघवं शरणं गत इति अस्मत्कूटस्थरघुराक्षससंवादोक्तशरणागतराक्षसरक्षणं पुरस्कृत्य मांप्राप्तः । यद्वा शरणं । " शाखिनः पक्षिणां गृहं " इत्युक्तरीत्या वनस्पतिरूपं गृहं प्राप्तः । न तु शरणागतिं चक्रे । " शरणं गृहरक्षित्रोः " इत्यमरः । अर्चितश्च लुब्धकत्वात्सहजशत्रुत्वात् भार्यापहर्तृत्वाच्चापन्नोप्यसावित्युपेक्षणस्य तद्वधोपायान्वेषणस्य च कर्तव्यत्वे प्राप्तेप्यतिथिदेवत्वेनमत्वा शीतनिवारणायाग्निमानीय पूजितः । वयंतु " वध्यतामेष तीव्रेण दण्डेन सचिवैः सह " इत्यनुबन्धिपर्यन्तं सम्यगर्चयामः । यथान्यायं । यावत्क्षुन्निवृत्ति सन्मित्रागम इव समप्रादरेणान्तर्विषादलेशं विना आदृतः । यद्वा प्रियवचनादिभिः वञ्चनांविनेत्यर्थः । स्वैश्च मांसैर्निमन्त्रितः । बहिः कतिचिदाहारानानीय स्वकीयद्रव्यान्तराणि कतिपयानि शरीरैकदेशान्वा दत्त्वा नोपचचार । किन्त्वज्ञैरात्मत्वेनाभिमन्यमानैः प्राज्ञैरप्याद्यं धर्मसाधनमित्यादरणीयैः शरीरमांसैः शरभङ्ग इव । " इदमेकं महत्तपः " इति मत्वा वह्नावह्नाय पतति स्म । निमन्त्रितः भोजनार्थंनियोजितः ॥ २४ ॥ उक्तमे-

शरणागत्यपेक्षयापश्चात्कृतसुग्रीवलक्ष्मणशरणागतेर्दौर्बल्यंच "तस्मादपिवध्यंप्रपन्नंनप्रतिप्रयच्छन्ति" इतिश्रुत्यर्थानुसारिशरणागतरक्षणरूपस्वधर्मचपर्यालोच्येत्यर्थः ॥ २१ ॥ ति० ममसूक्ष्ममप्यहितंकर्तुंकथंचन कथमपिशक्तःकिं नकथमपिशक्तइत्यर्थः ॥ २२ ॥ यद्येवमस्मदादिसंग्रहोव्यर्थस्तत्राह—इच्छन्निति । स्वस्यनिरतिशयमहिमानंतालिकंब्रह्मभावंप्रकटीकर्तुमिच्छन्यदिस्यां तदा तथैव कुर्यां । संप्रतितुदेवभावोपेतनिजविलासैरशेषैरवध्यत्वमस्यमयैवदत्तमितितत्परिपालनायस्वदिव्यभावंस्वशक्त्यैवान्तर्धाय मानुषमर्यादायांस्थित्यातद्भावप्रकटनायैवसीताविरहयोगप्रयुक्तरोदनवद्भवादृशसहायमेलनं । वस्तुतोनस्वातिरिक्तसहायान्तरापेक्षामम । मनुष्याणांसंसारमर्यादाज्ञापनंतद्व्यवहारफलमितिभावः ॥ २३ ॥ स० सहि सोपि । अनेनापकृतोपीत्यर्थः । प्रतिजग्राह प्रतिहतभार्यावचनश्रवणानन्तरमपिप्रीतिपूर्वंकंजग्राहेतिसूचयन्ती । सहितं हितेनसहितंयथाभवतितथेतिवा । तिर्यक्समाधानंतिर्यङ्निदर्शने-

[पा०] १ ङ. च. झ. ट. सदुष्टो. २ क. ङ. च. झ. ञ. ट. ममशक्तः. ३ ख. स्वैर्मांसैरभितर्पितः.

ऋषेः कण्वस्य पुत्रेण कण्डुना परमर्षिणा ॥ शृणु गाथां पुरा गीतां धर्मिष्ठां सत्यवादिनीम् ॥ २६ ॥

वार्थं दृढीकुर्वन् स्वस्य कैमुत्यमाह—स हि तमिति ॥ सः कपोतः । वयमिव धर्मानुष्ठानयोग्यजातौ शरण्यवंशे वा नोत्पन्नः । तं जात्या स्वभावेन च क्षुद्रसमाचारं पक्षिणां कालसंमित इत्यखिलपक्षिजातिविरोधिनं । तस्य कपोतस्यान्तिकंप्रति यदृच्छयाभ्येत्य पतितं उपायान्तरशून्यं विपरीतानुष्ठानैकनिरतं अनुतापलेशेन वा अनुकूलवादप्रसङ्गेन वाऽनन्वितं प्रतिजग्राह । स्वात्मत्यागेनाङ्गीकृत्यावति स्म । पूर्वश्लोके शत्रुरिति सामान्येनोक्तमर्थं तद्वृत्तिप्रदर्शनेन विशिनष्टि—भार्याहर्तारमिति । एवमेव रावण आगतश्चेदस्माभिः कार्य इत्यभिप्रायः । आगतं अस्याङ्गीकाराय कृतमुपायानुष्ठानं कपोतावासद्रुमस्थलं प्रत्यागमनमात्रमेव । तद्विना वनस्पतिदेवतां प्रत्युक्तं शरणशब्दं कपोतोनाशृणोत् । अत्र स हीत्यनेनैव कपोतानुवादे लब्धेपि पुनः कपोतग्रहणं श्येनकपोतोपाख्यानइव नायं परिगृहीतकपोतशरीरो देवो मुनिर्वा । किन्तु प्राकृतः कपोत इति ज्ञापनार्थं । अयं कपोतः प्राक्तनधर्मविशेषैर्गजेन्द्रादिवत्तिर्यक्त्वेप्येवंधर्मानुष्ठानयोग्यो बभूव। कपोत इत्यनेन तिर्यक्त्वं शास्त्रानधिकारित्वं बुद्धिमान्द्यं च सूचितं । वानरश्रेष्ठ पुनरप्येकस्तिर्यक् शत्रुं किरातं ररक्षेत्येनां कथां शृणु। वानरः कश्चिद्व्याघ्रीतं स्वावासद्रुममागतं किरातं ररक्ष । तदानीं वृक्षमूलस्थो व्याघ्रस्तस्मिन्वानरे सुप्ते निषादं समीक्ष्य त्वां रक्षामि वानरं पातयेत्युवाच । ततः पापैकनिरतः किरातः स्वरक्षणकारिणं वानरं पातयामास । अनन्तरं वानरं पतितं गृहीत्वा व्याघ्रः त्वां जह्यां स्वोपकारिद्रोहिणं निषादं जहीति मनुष्यमांसलुब्धत्वादुवाच । ततो धर्मवित्स वानरः प्राणात्ययदशात्वादहृदयं तत्त्यागमङ्गीकृत्य व्याघ्रमुक्तस्तरुमारुह्य स्वस्यापकर्तारं किरातं पश्चादपि गत्यन्तराभावान्निजवासद्रुमस्थितिहेतुना शरणागत इत्यरक्षत् । भवान्वा- नराधिपत्ये स्थितः सन् स्वजातिधर्म इति शरणागतरक्षणं किंनावलम्बते । किं पुनर्मद्विधो जनः । कपोतचरितं पश्यतां मादृशां किं वक्तव्यं । मद्विधः शरणागतरक्षणाय समुच्छ्रितध्वजे रघुवंशे जातः । " षष्टिर्वर्षसहस्राणि लोकस्य चरता हितम् । पाण्डुरस्यातपत्रस्य छायायां जरितं मया " इत्युक्तरीत्या लोकरक्षणदीक्षितस्य दशरथस्य पुत्रः । वसिष्ठविश्वामित्रादिशिष्यः महायोगिना जनकेन कृतसंबन्धः " रामो विग्रहवान्धर्मः " इति प्रसिद्धः । " मर्यादानां च लोकस्य कर्ता कारयिता च सः " इति सर्वलोकानुकृतधर्मानुष्ठानः अहं संप्रति शरणागतहिंसां कुर्यां चेल्लोकः कीदृग्विधः स्यात् । मद्विधः मम वृत्तं पश्चाद्वक्ष्यते । सामान्येन धर्मसेतुर्नृपाणामिति मादृशानां संमतत्वेन स्थितः । मद्विधः मादृशः शरणागतत्यागं न करोति । अवध्यवधोन्मुखानां रावणादीनां खल्वीदृशं कार्यं रोचते । जनः शरणागतत्यागकृत्कीदृशोत्पत्तिमान्स्यात् ॥ २५ ॥ ननु शास्त्रानधिकारिणस्तिरश्चोनुष्ठानमनुपादेयं न च चोदनामन्तरेण प्रकृतिमात्रेण धर्मत्वं सिध्यतीत्याशङ्क्य कण्डुमुनिगाथया विधानं दर्शयति—ऋषेरिति ॥ कण्वस्य पुत्रेणेत्यनेन महाकुलप्रसूतत्वं परमर्षिणेति यथार्थदर्शित्वं सत्यवादिनेति यथादृष्टार्थवादित्वं चोच्यते। तेन परमाप्तत्वं दर्शितं। वेदवचनादिसिद्धं। पुरा गीतां। कण्डुकल्पितेयमिति न मन्तव्यं । ऋच एव सामत्वात्पुरा विद्यमानामेवेदानीं गीयमानां गीतां एतत्कृतत्वेपि सामध्वनिवत्समस्तपापापनोदनक्षमां । धर्मिष्ठां वेदोक्तधर्मोपमेयस्मृत्युक्तप्रतिपादिकां। अनेन परमप्रयोजनत्वमुक्तं । सत्यवादिनीमितिपाठे अबाधितार्थप्रतिपादिनीं गाथां । अनेकार्थोचितसुलभाभ्यसनीयत्वाय संकुचितशब्दां शृणु । इतः पूर्वमेतद्राधानाकर्णनेन खलु त्वमेवमाविलात्मासि एना-

---

नशीघ्रंभवतीतिवा भार्यापहर्तृभ्रातृग्रहणेभार्यापहर्तृसत्कारकर्तृनिदर्शनमुचितमितिवादौकपोतेतिहासोबोधितोरामेणेतिज्ञेयं । "मुनिरुवाच । धर्मनिश्चयसंयुक्तांकामार्थसहितांकथां । शृणुष्वावहितोराजन्गदतोमेमहाभुज " इत्यारभ्य पञ्चाध्याय्या शान्तिपर्वण्यापद्धर्मोक्ताकपोतव्याधकथात्रानुसन्धेया ॥ २५ ॥ **स०** पिपीलिकालिपिवद्याद्दच्छिकलाभतच्चेष्टाधर्मेप्रमाणीस्यादित्यतोमहर्षिगीतां गाथांकथयति—ऋषेरिति । रामोक्तेस्तिर्यगतिर्यगादिविषयत्वादेवमादिनिदर्शनंयुक्तमितिभावः । "नहिपितुः पाण्डित्येनपुत्रःपण्डितोभवति " इतिन्यायेनातत्सदृशपुत्रगीतेत्यतस्तंविशिनष्टि—**परमर्षिणेति** । पितुःऋषित्वं एतस्यपरमर्षित्वमितितद्गीताकथा-

[पा०] १ ङ. ञ. गाथापुरागीताधर्मिष्ठासत्यवादिना.

बद्धाञ्जलिपुटं दीनं याचन्तं शरणागतम् ॥ न हन्यादानृशंस्यार्थमपि शत्रुं परंतप ॥ २७ ॥
आर्तो वा यदि वा दृप्तः परेषां शरणागतः ॥ अरिः प्राणान्परित्यज्य रक्षितव्यः कृतात्मना ॥२८॥
स चेद्भयाद्वा मोहाद्वा कामाद्वाऽपि न रक्षति ॥ स्वया शक्त्या यथासत्त्वं तत्पापं लोकगर्हितम् ॥२९॥
विनष्टः पश्यतस्तस्यारक्षिणः शरणागतः ॥ आदाय सुकृतं तस्य सर्वं गच्छेदरक्षितः ॥ ३० ॥

मवहितमनाः शृणु ॥ २६ ॥ अथ कण्डुगाथायां चतुःश्लोक्यामाद्यश्लोकेन पूर्णप्रपत्त्यसिद्धावपि गत्यन्तरशून्यतयाऽऽत्मनिक्षेपाभिप्रायव्यञ्जकशरणागतिशकलतुल्याञ्जलिबन्धादिमात्रविधानमपि हानिं नन्येत् तत्करणमनुग्रहावहमित्याह—बद्धाञ्जलिपुटमिति ॥ अनुकूलबुद्धिवाग्वृत्त्यभावेऽप्यञ्जलिमात्रमेवालं। "अञ्जलिः परमा मुद्रा क्षिप्रं देवप्रसादिनी" इति स्वतन्त्रस्याप्याशु दयाजननी मुद्रा खल्वियं । दीनं एवमञ्जलिबन्धमात्रं विनापि कार्पण्यद्योतनावस्थानमेवालं । याचन्तं अञ्जल्याद्यभावेपि कार्पण्यद्योतनेप्यहृदयप्रार्थनैवालं । शरणागतं । अञ्जलिबन्धादित्रयेप्यविद्यमाने रक्षकनिवासस्थलाभिगमनमेवालं । पूर्वं स्वरक्षाभरनिक्षेपरूपशरणागतिशकलान्युक्त्वा शरणागतमिति पूर्णप्रपत्तिरुक्तेतिवा स्यात् । अपि शत्रुं साक्षाच्छत्रुमपि । न हन्यात् । अयं शास्त्रार्थ ऐहिकाभ्युदयार्थो वा परलोकार्थो वा प्रत्यवायपरिहारार्थो वेत्युक्ते सति तेभ्यः प्राक्प्रयोजनान्तरमाह—आनृशंस्यार्थमिति । अघातुकत्वसिद्ध्यर्थमित्यर्थः । नृशंसोयमिति लोकापवादपरिहारार्थमितियावत् । यद्वा आनृशंस्यं सकलधर्मसारभूतो दयागुणः तद्रक्षणार्थवा । यथोक्तं सीतया—" आनृशंस्यं परो धर्मस्त्वत्त एव मया श्रुतः " इति । परंतपेति कण्डुरपि कंचिद्राजानं प्रत्युक्तवानितिगम्यते । परंतप । शरणागते किं पौरुषप्रकटनेन प्रत्यर्थिषु खलु तत्कर्तव्यमितिभावः ॥२७॥ पूर्वं न हन्यादिति स्वेन क्रियमाणं हननमात्रं प्रतिषिद्धं । अत्र स्वेतरक्रियमाणशरणागतपीडायामपि शरणागते आर्तत्वदृप्तत्वविभागानालोचनेन प्राणान्हित्वा तद्रक्षणं कार्यमित्याह—आर्तो वेति ॥ आर्तः स्वाभिमतसंभवे विलम्बाक्षमतीव्रसंवेगवान्वा । शरणागमनवेलायामपि स्वापराधनिमित्तभयादिमान्वेत्यर्थः । दृप्तस्तु विलम्बाविलम्बावनादृत्य फलसिद्धिमात्रसक्तः । अस्यां वेलायां विनयस्वापराधभयशून्यो वा । मुमुक्षुपक्षे संसारजुगुप्सानुसंधानेन सद्य एव देहनिवृत्तिकाम आर्तः । दृप्तः शरीरावसाने मुक्तिकामः । यद्वा आकिंचन्यानन्यगतित्वपुरस्सरं प्रपन्न आर्तः । स्तोभहेलनादिरूपेण शरणागतोस्मीति ब्रुवन् दृप्तः । परेषां शरणागतः स्वव्यतिरिक्तशरणागतः । यद्वा परेषामिति निर्धारणे षष्ठी । परेषां मध्ये शरणागतोरिः वैरे हृदि विद्यमानेपि शरणागतिशब्दमात्रमभिदधानः पुरुषः कृतात्मना निश्चितमनस्केन । धर्मशास्त्रविश्वासशालिनेत्यर्थः । प्राणान्परित्यज्य रक्षितव्यः । अस्थिरान्प्राणान्परित्यज्य स्थिरं शरणागतरक्षणं कर्तव्यं । कृतात्मनेति विशेषणेन विदुषोतिक्रमे दण्डभूयस्त्वमुक्तं । शरणागतरक्षणशास्त्रस्य निरवकाशत्वात् । सर्वथैवात्मानं गोपायेदिति शास्त्रस्य सावकाशत्वात्तद्व्यतिरिक्तविषयेप्यवस्थाप्यमितिभावः ॥ २८ ॥ एवं शरणागतरक्षणधर्मे चोदनामभिधाय तदरक्षणे प्रत्यवायमाह—सचेदिति ॥ भयात् तद्रक्षणे तच्छत्रुसकाशात् तस्माद्वा । किरातन्यायेन स्वस्यापि भयमुत्प्रेक्ष्य ततोहेतोः । मोहात् शास्त्रार्थापरिज्ञानात् । कामात् स्वच्छन्दवृत्तिस्वाभाव्यात् तच्छत्रुसकाशात्किंचिल्लाभापेक्षणाद्वा । स्वयाशक्त्या स्वकीयेन केनचित्सामर्थ्यप्रकारेण । स्वसहायसंपादनस्वकीयद्रव्यदानादिना शरीरत्यागपर्यन्तेनोपायकलापेनेत्यर्थः । यथासत्त्वं सत्त्वमनतिक्रम्य । शक्तौ सत्यामपि येन केनचिच्छलेन शक्तिवञ्चनामकृत्वा । तत् अरक्षणं । पापप्रत्यवायहेतुः । अनेन निरयहेतुत्वमुक्तं । न केवलं परलोकबाधकं । इह लोकेपि सर्वजनगर्हितमित्याह—लोकगर्हितमिति ॥ २९ ॥ न केवलमैहिकानर्थहेतुत्वमात्रं पूर्वसंचितसकलसुकृत-

ऽऽदर्तव्येत्यनेनसूचयति ॥ २६ ॥ शि० शत्रुमपि आनृशंस्यार्थं अतिक्रूरत्वनिवृत्त्यर्थमपिनहन्यात् । "मशकार्थोधूमः" इत्यादिवार्थशब्दस्यनिवृत्त्यर्थकत्वंप्रसिद्धं । अतएवास्यार्थस्यप्रतिषेधोवक्तव्यइतिवार्तिकेअर्थशब्दस्यतथात्वंकैयटादिभिर्व्याख्यातं ॥ किंच आनृशंस्यार्थं खस्मिन्क्रूरतासंसर्गाभावार्थमित्यर्थः ॥ २७ ॥ ति० यःशरणागतोऽरक्षितोविनष्टःस्यात् सपश्यतस्तस्यरक्षिणः रक्षा-

[पा०] १ ङ. झ. ट. शरणंगतः. २ ग. च. तस्यरक्षितुः. क. ङ. छ. झ. ञ. तस्यरक्षिणः.

एवं दोषो महानत्र प्रपन्नानामरक्षणे ॥ ३१ ॥
अस्वर्ग्यं चायशस्यं च बलवीर्यविनाशनम् ॥ करिष्यामि यथार्थं तु कण्डोर्वचनमुत्तमम् ॥
धर्मिष्ठं च यशस्यं च स्वर्ग्यं स्यात्तु फलोदये ॥ ३२ ॥
सकृदेव प्रपन्नाय तवास्मीति च याचते ॥ अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥ ३३ ॥

विनाशकमपीत्याह—विनष्ट इति ॥ यः कश्चिद्यं कंचिच्छरणमागतः । तमरक्षिणस्तस्य पश्यतः रक्षकत्वेन वृते समर्थे च तस्मिन्पश्यति । तेनारक्षणेनैव स्वशत्रुसकाशाद्विनष्टश्चेत् तस्य अरक्षकस्यसंबन्धि अनादिकालसंचितं सर्वं सुकृतमादाय गच्छति । अस्यारक्षकस्य समार्जितसकलसुकृतक्षयोभवतीत्यर्थः ॥ ३० ॥ कण्डुवचनचतुःश्लोकीतात्पर्यं संग्रहेणाह—एवं दोषो महानत्र प्रपन्नानामरक्षण इत्यर्धेन ॥ ३१ ॥ विस्तरेणाह—अस्वर्ग्यमित्यादिना ॥ अस्वर्ग्यं स्वर्गविरुद्धं । नरकहेतुभूतमित्यर्थः । अयशस्यं अकीर्तिकरं । बलवीर्यविनाशनं । ययोः शारीरबलवीर्ययोः सतोरेव शरणागतो न रक्षितः तयोर्विनाशकमित्यर्थः । अत्र अरक्षणमिति विशेष्यमनुषज्यते । एवं शरणागतरक्षणे कण्डुवचनं प्रमाणयित्वा धर्मसंस्थापनप्रवृत्तस्य ममैतदवश्यंपालनीयमित्याह—करिष्यामीति ॥ उत्तमं लोकादृतं । न केवलमकरणे प्रत्यवायबाहुल्यं करणे दृष्टादृष्टाभ्युदया बहवः सन्तीत्यपि कण्डुवचनतात्पर्यमिति रामः स्वयमाह—धर्मिष्ठमिति ॥ पापनिवर्तकधर्मोपेतत्वं विवक्षितं । फलहेतुर्धर्मोपेतत्वस्य स्वर्ग्यमित्यनेनैव सिद्धत्वात् । फलोदये फलप्रदानकालेसमुपस्थिते । स्वर्ग्यं । स्वर्गहेतुरित्यर्थः । अत्र प्रतिपाद्यगतं धर्मिष्ठत्वादिकं प्रतिपादकवचने समुपचर्यते ॥ ३२ ॥ एवं " श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः । सम्यक्संकल्पजः कामोधर्ममूलमिदं स्मृतं " इति याज्ञवल्क्योक्तधर्मप्रमाणेषु श्रूयत इत्यनेन, तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्तीत्यादिना श्रुतिः । कण्डुगाथामुखेन स्मृतिः । कपोतादिना शिष्टाचारः । प्रतिपक्षनिरसनपूर्वकबलवदुपपादनेन स्वप्रियत्वं चेत्येवं चतुर्षु प्रमाणेषु प्रपन्नरक्षणरूपपरमधर्मविषयेषु दर्शितेषु संप्रति तत्र प्रमाणं पञ्चमं दर्शयति—सकृदेवेति ॥ सकृदेव एकवारमेव । उपायान्तरेष्वावृत्तिः शास्त्रार्थः प्रपत्तौ त्वनावृत्तिः " सकृदेव हि शास्त्रार्थः कृतोयं तारयेन्नरं " इत्युक्तेः । प्रपन्नाय गत्यर्था ज्ञानार्था इति न्यायेनात्र मानसप्रपत्तिरुच्यते । तवास्मीति तु वाचिकी । उभयोरन्यतरेण युक्तायापीत्यर्थः । यद्वा प्रपन्नायेत्युपायः कथ्यते । तवास्मीति च याचत इति तच्छेषवृत्तिलक्षणफलविशेषप्रार्थना । एवंभूतायाधिकारिणे । सर्वभूतेभ्य इति " भीत्रार्थानां भयहेतुः " इत्यपादानत्वं । भयहेतुतया शङ्कितेभ्यः सर्वभूतेभ्यः । अभयं भयाभावं । ददामि । अभयमेव मोक्षो नाम । " अथ सोभयं गतो भवति आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति" इति ब्रह्मविद्याफलत्वेन श्रवणात् । एतत् तवास्मीति फलविशेषयाच्ञेति पक्षस्यानुकूलं । पक्षान्तरे त्रैवर्गिकफलानामप्येतदुपलक्षणं । स्वस्य सकलफलप्रदत्वात् । एतद्व्रतं मम व्रतवदिदं कस्यांचिदपिदशायां परित्यागायोग्यमित्यर्थः । अत्र सर्वभूतेभ्य इत्यपि चतुर्थी । प्रपन्नसंबन्धिभ्योपि सर्वभूतेभ्योभयं

र्थंवृतस्य समक्षमेवतस्यरक्षिणःसर्वंसुकृतमादायगच्छेत् ॥ स० तस्यस्वरक्षणसमर्थस्याप्यरक्षितुःसुकृतं । उपलक्षणमेतत् । स्वापांतस्मैदत्वेत्यपिग्राह्यं ॥ ३० ॥ ति० एतदन्ताःकण्डुगाथाः । अथरामवाक्यं—एवमिति ॥ ३१ ॥ ति० अस्वर्ग्यं स्वर्गप्रतिबन्धकं ॥ स० अस्वर्ग्यं अस्वर्गप्रापकं ॥ ३२ ॥ ति० अत्रवर्तमानप्रयोगेणनित्यसत्सहजधर्मत्वमभयदानस्योक्तं । तदेवाह—एतन्ममव्रतमिति । नित्यपरिगृहीतःनित्यनिजप्रतिष्ठितोस्मद्धर्मइत्यर्थः । अत्रतात्कालिकमात्यन्तिकंचेत्युभयविधमप्यभयदानंप्रतिज्ञायते । तत्रात्यन्तिकंसंसारभयोपरतिरूपं । द्वितीयंतुरावणादितउत्थितमृत्युभयनिवृत्तिरूपं । इदंचोरारिग्रहनिमित्तकाभयदानस्याप्युपलक्षणं । नन्वेवंसर्वेश्वरस्यापितवनिमित्ताभयदातृत्वेवैषम्यनैर्घृण्यादिदोषप्रसङ्गस्तत्राह—सकृदिति । अनेनोभयविधाभयदानस्यसाधनमुपदिश्यते । सकृदेकयैववृत्त्याप्रपन्नाय । पदिर्गत्यर्थः । प्रकृष्टप्रतिपत्तिमते । प्रतिपत्तौप्रकर्षश्चनिरन्तरत्वं । साच तत्त्वमस्यादिवाक्यजन्याभगवतःस्वात्मत्वेनप्रतिपत्तिः । अयंच " ज्ञानीत्वात्मैवमेमतः " इतिगीतोक्तः । अयमेवात्यन्तिकाभयदानपात्रं । द्वितीयाभयदानसाधनमाह " तवास्मीतिचयाचते " इति । औपाधिकभेदमवलंब्यतवाहंशेषकस्त्वंमेस्वामी अहंशिष्यस्त्वंगुरुः अहंरक्ष्यस्त्वंरक्षकइत्येवमुपासनांकुर्वेतः " द्वितीयाद्धिभयंभवति " इतिन्यायेनावश्यंप्राप्तभयस्यसर्वभूतेभ्योयथाभयं नभवतितथायतामीतिमेव्रतमित्यर्थः । अतथाभूतेभ्यस्तुनयच्छामीतिननैर्घृण्यादिदोषप्रसङ्गइतिभावः । स० सकृत् एकवारं प्र-

आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया ॥ विभीषणो वा सुग्रीव यदि वा रावणः स्वयम् ॥ ३४ ॥
रामस्य तु वचः श्रुत्वा सुग्रीवः प्लवगेश्वरः ॥ प्रत्यभाषत काकुत्स्थं सौहार्देन[1] प्रचोदितः ॥ ३५ ॥
किमत्र चित्रं धर्मज्ञ लोकनाथ[2] सुखावह ॥ यत्त्वमार्यं प्रभाषेथाः सत्त्ववान्सत्पथे स्थितः ॥ ३६ ॥
मम चाप्यन्तरात्माऽयं शुद्धं वेत्ति विभीषणम् ॥ अनुमानाच्च भावाच्च सर्वतः सुपरीक्षितः ॥ ३७ ॥

ददामि । " पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदं " इत्युक्तेः ॥३३॥ एवमुक्ते सत्यसंभवदुत्तरं प्रशान्तप्रेमान्ध्यंतया प्रसन्नमुखं विभीषणाभिमुखं सुग्रीवमालोक्य तमेव तदानयने नियुङ्क्ते—आनयैनमिति ॥ निवेदयतेति सपरिवारान्युष्मान् । पुरुषकारतया वृतवन्तमेनं यूयमेवानयत । तथा सत्येतावत्पर्यन्तमस्वीकारकृतदुःखमस्य निवर्तेत । हरिश्रेष्ठ तस्य दुःखनिवृत्तये त्वमेव गत्वानयसि चेन्मयि स्नेहवद्भ्यो हरिभ्यः श्रेष्ठं भवन्तमतिक्रम्य किमहं स्वीकरोमि । दत्तमस्याभयं मया । अस्य स्वबन्धुत्यागपूर्वकं स्वनिकर्षकीर्तनपुरःसरं चागतस्य मया मित्रभावेनैवालमिति मन्यमानेन अभयं दत्तं । शरणशब्दश्रवणकाल एवेति शेषः । कथमानयेयमित्याकुलितं समाधत्ते—विभीषणो वेत्यादिना । विभीषणो वा । " विभीषणस्तु धर्मात्मा " इति विभीषणस्वीकारो धर्मवत्स्वीकारतया नोत्कर्षाय । रावणस्य नृशंसस्येति रावणस्वीकारएवोत्कर्षःस्यादिति । विभीषणस्वीकारे तत्परिकराश्चत्वार एवरक्षिताःस्युः । रावणस्वीकारेतु लङ्कास्थाः सर्वेपि रक्षिताःस्युरितिमहाँल्लाभः । सुग्रीव । अस्माकमागतोतिशयो युष्माकं तुल्यः खलु । "एकं दुःखं सुखं च नौ " इत्युक्तेः । यदि वा रावणः स्वयं यत्संबन्धेन विभीषणेप्यतिशङ्का स एवास्तु स्वयं । सीतामपुरस्कृत्य स्वयमागतो रावणो वास्तु । यद्वा स्वयं अयं यदि विभीषणो न भवति किंतु कामरूपी रावण एव विभीषणभूमिकां परिगृह्य यद्यागतः तथाप्यस्याभयं मया दत्तं । त्वमपि रावणोयं न तु विभीषण इति विज्ञापनायापि पुनर्नागच्छेः । किंत्वानयैवेत्यर्थः ॥ ३४ ॥ अथ सुग्रीवः कचिदप्यसंभावितं रामस्य शरणागते स्वस्मिंश्च सौहार्दातिशयमालोच्य विस्मयपरवश आह—रामस्येति ॥ सौहार्देन प्रचोदितः । सर्वानपि दोषाननालोच्य विपरीतप्रवृत्तान् पूर्वसुहृदो नानाप्रकारैरनुनीय यदि वा रावणः स्वयमिति वदतो रामचन्द्रस्य कोयं सौहार्दातिशय इति विस्मयेन प्रेरित इत्यर्थः ॥ ३५ ॥ एवं विस्मयातिशयाद्वक्तुमुपक्रान्तो रामस्य स्वाभाविकानवकल्याणगुणौघानालोच्य सहजधर्मत्वादेतद्रामे नाश्चर्यकरमित्याह—किमिति ॥ धर्मज्ञ । धर्मसूक्ष्मतत्त्वज्ञस्य तव धर्मानुष्ठानं किमाश्चर्यं । लोकनाथ । भृत्यवर्गसंरक्षणं स्वामिनः किं चित्रं । सुखावह । स्वयमवाप्तसमस्तकामत्वेन परप्रयोजनैकपरायणस्य सर्वसुखकारिणस्तव शरणागतेषु समाश्रितेष्वस्मासु सुखकारित्वे कोवा विस्मयः । आर्यं समीचीनं । सत्त्ववान् प्रशस्ताध्यवसायवान् । " द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु " इत्यमरः । दृढव्रतस्य व्रतपरिपालनंकिमद्भुतं । यद्वा सत्त्वं बलं सर्वशक्तेस्तव समाश्रितभयनिवारणं किमाश्चर्यं । सत्पथे स्थितः । धर्मसंस्थापनार्थमेवावतीर्णस्य शरणागतरक्षणरूपविशेषधर्मानुष्ठानं नाश्चर्यमित्यर्थः । प्रपन्नसंरक्षणे धर्मज्ञत्वादिष्वन्यतम एव गुणः पर्याप्तः । किमुत सर्वेपि समुदिता इतिभावः ॥ ३६ ॥ किमस्मत्प्रशंसनेन त्वन्मनःप्रवृत्तौ खलु विभीषणो ग्राह्यः स्यात्तत्राह—ममेति ॥ मम । " वध्यतामेष तीव्रेण दण्डेन " इत्युक्तवतोपि । न केवलमस्मिन्नर्थे मदन्तःकरणप्रवृत्तिरेकमेव प्रमाणं । प्रमाणान्तराण्यपि सन्तीत्याह—अनुमानादिति । अनुमानात् त्वया हनुमता चोक्तयुक्तिकदम्बात् । भावात् भावबोधकान्मुखप्रसादादिलिङ्गात् । सर्वतः सर्वत्र । अन्तर्बहिश्चेत्यर्थः । यद्वा अनुमानात् हृदयप्रकाशकमुखविकासादिलिङ्गात् । भावात् आर्तध्वनिप्रकाशितमृदुस्वभावात् । चशब्देन वध्यतामपीत्युक्तावस्थायां न त्यजेयमिति कालेप्येकरूपत्वं समुच्चीयते । सुपरीक्षितः संशयविपर्ययराहित्येन परीक्षितः । अन्तरात्मा अन्तःकरणं । चापीति

त्राय शरणंगताय । तेननतत्रपरीक्षापेक्षेतिसूचयति ॥ ३३ ॥ **ति०** लोकनाथानांराज्ञांशिखामणे ॥ ३६ ॥

[**पा०**] १ झ. सौहार्देनाभिपूरितः. २ ङ. च. झ. ट. नाथशिखामणे.

तस्मात्क्षिप्रं सहास्माभिस्तुल्यो भवतु राघव ॥ विभीषणो महाप्राज्ञः सखित्वं चाभ्युपैतु नः ॥ ३८॥
ततस्तु सुग्रीववचो निशम्य तद्धरीश्वरेणाभिहितं नरेश्वरः ॥
विभीषणेनाशु जगाम संगमं पतत्रिराजेन यथा पुरंदरः ॥ ३९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टादशः सर्गः ॥ १८ ॥

एकोनविंशः सर्गः ॥ १९ ॥

विभीषणेन मन्त्रिभिःसहगगनादवतीर्य श्रीरामचरणप्रणामपूर्वकं तंप्रति स्ववृत्तान्तनिवेदनेनसहस्वशरणागतिनिवेदनम् ॥ १ ॥ विभीषणेन रामचोदनयातंप्रतिरावणकुंभकर्णादिपराक्रमनिवेदनपूर्वकं यथाशक्तियुद्धसाहाय्यकरणप्रतिज्ञानम् ॥ २ ॥ रामेण विभीषणपरिष्वङ्गपूर्वकंतस्य लक्ष्मणकरेणलङ्काराज्येऽभिषेचनम् ॥ ३ ॥ हनुमत्सुग्रीवाभ्यांसागरतरणोपायंपृष्टेनविभीषणेन तौप्रति रामेणसमुद्रंप्रतिशरणागतिकरणोक्तिः ॥ ४ ॥ रामेण लक्ष्मणसुग्रीवाद्यनुमत्यासमुद्रोपासनाय तत्तीरेसमास्तृतकुशोपरिशयनम् ॥ ५ ॥

राघवेणाभये दत्ते सन्नतो रावणानुजः ॥ विभीषणो महाप्राज्ञो भूमिं समवलोकयन् ॥
खात्पपातावनीं हृष्टो भक्तैरनुचरैः सह ॥ १ ॥

रामान्तःकरणसमुच्चयार्थः ॥ ३७ ॥ पूर्वमानयैनमिति नियुक्तमनुतिष्ठति—तस्मादिति ॥ क्षिप्रं पूर्वमज्ञानवशान्मया पापमाचरितं । तत्त्वविचारे त्वयं क्षणमात्रं विलम्बानर्ह इतिभावः । तुल्यो भवतु । निवेदयत मामिति पुरुषकारकरणायाभ्यर्थितानां नृशंसानामस्माकं पुरुषकारत्वं संपादयितुमेव तवायं प्रयासश्च सिद्धः । इतःपरमस्माभिः पुरुषकारव्यापारः क्रियत इत्यर्थः । एवं विभीषणस्य पुरुषार्थमर्थयित्वा तत्सख्यरूपं स्वेषां पुरुषार्थमर्थयते—विभीषण इति । महाप्राज्ञः फलसाधनोपयोगिज्ञानवान् । न केवलं ममैव सर्वेषामिदं फलं समानमिति दर्शयितुं नः सखित्वमित्युक्तं ॥ ३८ ॥ एवं सुहृत्तरसुग्रीवाभ्यनुज्ञानानन्तरं शरण्यस्य शरणागतसंगमविशेषं दर्शयति—तत इति ॥ सुग्रीववचो निशम्य ततो हरीश्वरेणाभिहितं विभीषणेन संगमं जगामेत्यन्वयः । अभिहितं हे विभीषण राघवस्त्वाभयं दत्तवान् राघवमुपयाहीत्येवं सुग्रीवोक्तं । नरेश्वरः संगमं जगामेति संगमोपि कर्तुरीप्सिततमत्वकथनेन रामस्यायं लाभ इति गम्यते । न त्यजेयं कथंचनेत्यादिभिः सुग्रीवादिवाक्यरूपविरोधिनिरसनपूर्वकं श्रीविभीषणस्वीकारं प्रतिश्रुत्य कथंचित्सुग्रीवादिवाक्यजनितं विलम्बमविषह्य त्वरया रक्षितुं स्वयमेव तेन संगत इत्याह—विभीषणेनाशु जगाम संगममिति । आशु त्वरितं । आश्रितसंश्लेषे स्वयं त्वरातिशयवानितिभावः । पुरंदरो यथा पतत्रिराजेन संगमं स्वलाभममन्यत तथाऽयमपीति दृष्टान्ताभिप्रायः । यद्वा सुग्रीवस्य बुद्धिः पुनर्विपरीता चेत्कार्यहानिरिति शीघ्रं जगाम ॥ ३९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टादशः सर्गः ॥ १८ ॥

एवं शरणस्य शरणागतसंगमरूपफलमुक्त्वा शरणागतस्य शरण्यसेवाख्यपुरुषार्थलाभमाह—राघवेणेत्यादि सार्धश्लोक एकान्वयः ॥ अभये स्वापेक्षिते सर्वभूताभये दत्ते । सन्नतः । "गुणैर्दास्यमुपागतः" इति न्यायेन पूर्वश्रुतेभ्योप्यधिकानां रामकल्याणगुणानां साक्षात्कारेण सम्यक्प्रह्वीभूताङ्गः । महाप्राज्ञः । निरुपायोपायपरिग्रहेण परमपुरुषार्थलाभाद्वेदशास्त्राभ्या-

स० तुल्यः दास्येनेतिशेषः । यद्वा भ्रातृहननमुखेनराज्यप्राप्त्यासमोभवतु । "आत्मनिगुरावेकेषां" इत्यादेर्बहुवचनं ॥३८॥ स० हरीश्वरेणहनुमताभिहितंविभीषणेनसंगमंसख्यंजगाम मनसेतिशेषः । पतत्रिराजेन गरुडेन । पुरंदरोयथाअमृतहरणकाले सख्यंजगामतद्वत् ॥ ३९ ॥ इत्यष्टादशःसर्गः ॥ १८ ॥

स० सन्नतः प्रवणः । सत्स्वभावत्वात्सत्सुनतइतिवा । भूमिंसमवलोकयत् । अवतरणायेतिभावः ॥ १ ॥ स० हृष्टः महा-

[पा०] १ ङ. ञ. समवलोकयत्.

स तु रामस्य धर्मात्मा निपपात विभीषणः ॥ पादयोः शरणान्वेषी चतुर्भिः सह राक्षसैः ॥ २ ॥
अब्रवीच्च तदा रामं वाक्यं तत्र विभीषणः ॥ धर्मयुक्तं च युक्तं च सांप्रतं संप्रहर्षणम् ॥ ३ ॥
अनुजो रावणस्याहं तेन चाप्यवमानितः ॥ भवन्तं सर्वभूतानां शरण्यं शरणागतः ॥ ४ ॥
परित्यक्ता मया लङ्का मित्राणि च धनानि वै ॥ भवद्गतं मे राज्यं च जीवितं च सुखानि च ॥५॥

सातिशयजनितप्रज्ञातिशयस्य फलमिदानींनिर्वृत्तमिति भावः । भूमिं समवलोकयन् । अन्तरङ्गसचिवसमूहसंमर्दनिरवकाशेपि रामपुरोदेशे सचिवैरेव सयूथ्यतामापन्नस्य विभीषणस्य स्वपरिषन्मध्ये दत्तं भूतलावकाशं सम्यक्पश्यन् । खादवनीं पपातेति प्राथमिकोदूरप्रणाम उच्यते । प्रणामाद्ययोग्यस्थानमाकाशं परित्यज्य पाणिपादशिरःप्रभृतिभिरष्टाङ्गैर्भूमिं प्राप्तवानित्यर्थः । नन्वपेक्षितमभयं दत्तमेव पुनः किमर्थं प्रणनामेत्यत्राह—हृष्ट इति । रामस्य स्वरूपरूपगुणानुभवजनितहर्षविवशीकृतशरीर एव प्रणतः । ननु किमपि प्रयोजनमुद्दिश्येत्यर्थः । भक्तैरनुचरैः सहेति । " राघवं शरणं गतः । निवेदयत मां"इति विभीषणस्यैकस्यैवोपायानुष्ठानश्रवणेपि तदनुबन्धिनां तद्भक्तिवशादेव रामपरिचरणं समानमित्युच्यते । उक्तं हि " पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदं" इति ॥ १ ॥ पूर्वं वाचिका प्रपत्तिः कृता संप्रति कायिकशरणागतिं प्रयुङ्क्ते—स त्विति ॥ स तु पूर्वस्माद्विलक्षणः । संशयविपर्ययनिवृत्त्या अनुकूलत्वनिर्णयविषय इत्यर्थः । धर्मात्मा सर्वावस्थास्वप्यप्रच्युतशरणागतिधर्मनिष्ठावान् । "वध्यतामिति । शङ्क्यतामिति । न त्यजेयमिति । आनयैनमिति अस्माभिस्तुल्यो भवत्वि"ति चोक्तासु सर्वावस्थास्वप्यविचारेणैकरूपचित्त इत्यर्थः । अनेन विभीषणस्य महाविश्वास उक्तः । शरणान्वेषी कृतशरणवरणः । विभीषणः रामस्य स्वस्मिन्पक्षपातातिशयद्योतकाभिरामाकारस्य पादयोः स्तनन्धयस्य मातृस्तनवत् श्रीपादावेव स्वस्य भोग्यभूताविति पपात । अन्यैरागत्य प्रशिथिलानवयवान् सम्यग्योजयित्वा यथोत्थाप्येत तथा पपात । चतुर्भिः सह राक्षसैः । करचरणाद्यवयववत्तत्परतन्त्रैरित्यर्थः । तत्रानुकूल्यसंकल्पप्रातिकूल्यवर्जनवत्त्वमुक्तं । धर्मात्मेति महाविश्वासः शरणान्वेषीति गोप्तृत्ववरणं पपातेत्यात्मनिक्षेप इति साङ्गशरणागतिः कृता भवति ॥ २ ॥ एवं कायिकी शरणागतिरुक्ता । अथ वाचिकीं दर्शयति—अब्रवीदिति ॥ तदा पादपतनसमये । तत्र सुग्रीवादीनां सर्वेषामेकमत्यवति सदसि । रामं पूर्वं सुग्रीवादिपुरुषकारभूतान् प्रति संप्रति शरण्यमेव धर्मयुक्तं शरणागत्यङ्गानुकूलसङ्कल्पादिधर्मयुक्तं । युक्तं समर्थकारुणिकशरण्यविषयतया योग्यं । सांप्रतं संप्रहर्षणं । पूर्वं राघवं शरणं गत इत्युक्तिदशायां सुग्रीवादीनां श्रुतिकटुकं जातं । इदानीं सर्वसंप्रहर्षणं ॥ ३ ॥ अनुज इति पूर्वं निवेदयतेत्यत्र पुरुषकारभूतान्प्रत्युक्तं । इदानीं साक्षाच्छरण्यं प्रतीति नपुनरुक्तिः । पूर्वार्धेन स्वदोषख्यापनादाकिंचन्यमुक्तं । सर्वभूतानां शरण्यं रावणस्यापि शरणं भवामीति कृतसङ्कल्पं । भवन्तंज्ञानशक्त्यादिपरिपूर्णं ॥ ४ ॥ अनन्तरं प्राप्यान्तरनिरसनपूर्वकं त्वमेव प्राप्यइत्याह—परित्यक्तेति ॥ लङ्का

लाभोजातइतिप्रीतमनाः रामस्यपादयोः । अनेन नकेवलमयमंबरचरऐहिकफलावलंबी । किंतुमोक्षज्ञानानन्दाद्यर्थीचेतिसूचयति । यथोक्तंवृहदारण्यकोपनिषद्भाष्ययोः । " सुवरितिप्रतिष्ठे द्वेएतेप्रतिष्ठे द्वेएतेअक्षरे । " " खिल्यानन्दःसमुद्दिष्टो वरिति ज्ञानमुच्यते । मोक्षदानेन तद्दानात्सुवरस्य पदद्वयम् । दक्षिणश्चेति सव्यश्च " इति । अथ अवतरणानन्तरं । चतुर्भिःसचिवैःसह सहितः । यः निपपाता नितरांपान्ति जगदिति निपाः ब्रह्माद्याः । तान्पातिस्वभावेन नफलाशयेति निपपाता । तंरामंप्रति विभीषणोऽब्रवीदिति श्लोकद्वयस्यैकान्वयः । अथवा स्वयंपादयोर्निपपात । स्वामित्वात्स्वस्यप्रथमतःप्रणामः अथ अनन्तरं । सविभीषणः चतुर्भिःसचिवैःसहनिपपात । अथवा स्वात्पपातेतिपूर्वं । अनन्तरं रामस्यसमीपतइतिशेषः । अथ तदनन्तरंचतुर्भीराक्षसैःसहरामस्यपादयोर्निपपात । एतंविशेषं तुशब्दउद्बोधयति ॥ अथ विभीषणस्यरामपादनिपतनानन्तरं । सरावणः चतुर्भीराक्षसैः कुंभकर्णमहापार्श्वेन्द्रजित्प्रहस्तैःसहनिपपातेतिमध्ये एष्यन्नयेनकविवचनंवा । चतुर्भिरभिहितैःसहेतरराक्षसैर्वारामप्रणिपातस्तन्निपातहेतुरितिभावः ॥ १—२ ॥ **स०** भवन्तं सर्वभूतानांशरण्यं । अनेनाप्रजस्यमहाद्रोहेणसहवासायोग्यता स्वस्यश्रीरामे भगवदवतारतामतिंचसूचयति ॥ ४ ॥ **स०** मित्राणि पूर्वंमित्रवदनुकृतानि । परित्यक्तानीतिलिङ्गवचनव्यत्यासेनवा यस्यांमित्राणि

[पा०] १ ङ. ञ. ठ. पादयोर्निपपाताथ. २ ख.ग.ङ.च.ज.—ट. चास्म्यवमानितः. ३ ङ. ञ. ट. भवद्गतंहिमेराज्यं.

स तु रामस्य धर्मात्मा निपपात विभीषणः ॥ पादयोः शरणान्वेषी चतुर्भिः सह राक्षसैः ॥ २ ॥
अब्रवीच्च तदा रामं वाक्यं तत्र विभीषणः ॥ धर्मयुक्तं च युक्तं च सांप्रतं संप्रहर्षणम् ॥ ३ ॥
अनुजो रावणस्याहं तेन चाप्यवमानितः ॥ भवन्तं सर्वभूतानां शरण्यं शरणागतः ॥ ४ ॥
परित्यक्ता मया लङ्का मित्राणि च धनानि वै ॥ भवद्गतं मे राज्यं च जीवितं च सुखानि च ॥५॥

सातिशयजनितप्रज्ञातिशयस्य फलमिदानींनिर्वृत्तमिति भावः । भूमिं समवलोकयन् । अन्तरङ्गसचिवसमूहसंमर्दनिरवकाशेपि रामपुरोदेशे सचिवैरेव सयूथ्यतामापन्नस्य विभीषणस्य स्वपरिषन्मध्ये दत्तं भूतलावकाशं सम्यक्पश्यन् । खादवनीं पपातेति प्राथमिकोदूरप्रणाम उच्यते । प्रणामाद्ययोग्यस्थानमाकाशं परित्यज्य पाणिपादशिरःप्रभृतिभिरष्टाङ्गैर्भूमिं प्राप्तवानित्यर्थः । नन्वपेक्षितमभयं दत्तमेव पुनः किमर्थं प्रणनामेत्यत्राह—हृष्ट इति । रामस्य स्वरूपरूपगुणानुभवजनितहर्षविवशीकृतशरीर एव प्रणतः । नतु किमपि प्रयोजनमुद्दिश्येत्यर्थः । भक्तैरनुचरैः सहेति । " राघवं शरणं गतः । निवेदयत मां"इति विभीषणस्यैकस्यैवोपायानुष्ठानश्रवणेपि तदनुबन्धिनां तद्भक्तिवशादेव रामपरिचरणं समानमित्युच्यते । उक्तं हि " पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदं" इति ॥ १ ॥ पूर्वं वाचिका प्रपत्तिः कृता संप्रति कायिकशरणागतिं प्रयुङ्क्ते—स त्विति ॥ स तु पूर्वस्माद्विलक्षणः । संशयविपर्ययनिवृत्त्या अनुकूलत्वनिर्णयविषय इत्यर्थः । धर्मात्मा सर्वावस्थास्वप्यप्रच्युतशरणागतिधर्मनिष्ठावान् । "वध्यतामिति । शङ्क्यतामिति । न त्यजेयमिति । आनयैनमिति अस्माभिस्तुल्यो भवत्वि"ति चोक्तासु सर्वावस्थास्वप्यविचारेणैकरूपचित्त इत्यर्थः । अनेन विभीषणस्य महाविश्वास उक्तः । शरणान्वेषी कृतशरणवरणः । विभीषणः रामस्य स्वस्मिन्पक्षपातातिशयद्योतकाभिरामाकारस्य पादयोः स्तनन्धयस्य मातृस्तनवत् श्रीपादावेव स्वस्य भोग्यभूताविति पपात । अन्यैरागत्य प्रशिथिलानवयवान् सम्यग्योजयित्वा यथोत्थाप्येत तथा पपात । चतुर्भिः सह राक्षसैः । करचरणाद्यवयववत्तत्परतन्त्रैरित्यर्थः । तत्रानुकूल्यसंकल्पप्रातिकूल्यवर्जनवत्त्वमुक्तं । धर्मात्मेति महाविश्वासः शरणान्वेषीति गोप्तृत्ववरणं पपातेत्यात्मनिक्षेप इति साङ्गशरणागतिः कृता भवति ॥ २ ॥ एवं कायिकी शरणागतिरुक्ता । अथ वाचिकीं दर्शयति—अब्रवीदिति ॥ तदा पादपतनसमये । तत्र सुग्रीवादीनां सर्वेषामैकमत्यवति सदसि । रामं पूर्वं सुग्रीवादिपुरुषकारभूतान् प्रति संप्रति शरण्यमेव धर्मयुक्तं शरणागत्यङ्गानुकूलसङ्कल्पादिधर्मयुक्तं । युक्तं समर्थकारुणिकशरण्यविषयतया योग्यं । सांप्रतं संप्रहर्षणं । पूर्वं राघवं शरणं गत इत्युक्तिदशायां सुग्रीवादीनां श्रुतिकटुकं जातं । इदानीं सर्वसंप्रहर्षणं ॥ ३ ॥ अनुज इति पूर्वं निवेदयतेत्यत्र पुरुषकारभूतान्प्रत्युक्तं । इदानीं साक्षाच्छरण्यं प्रतीति नपुनरुक्तिः । पूर्वार्धेन स्वदोषख्यापनादाकिंचन्यमुक्तं । सर्वभूतानां शरण्यं रावणस्यापि शरणं भवामीति कृतसङ्कल्पं । भवन्तंज्ञानशक्त्यादिपरिपूर्णं ॥ ४ ॥ अनन्तरं प्राप्यान्तरनिरसनपूर्वकं त्वमेव प्राप्यइत्याह—परित्यक्तेति ॥ लङ्का

लाभोजातइतिप्रीतमनाः रामस्यपादयोः । अनेन नकेवलमयमंबरचरऐहिकफलावलंबी । किंतुमोक्षज्ञानानन्दाद्यर्थीचेतिसूचयति । यथोक्तंबृहदारण्यकोपनिषद्भाष्ययोः । " सुवरितिप्रतिष्ठे द्वेएतेप्रतिष्ठे द्वेएतेअक्षरे । " " स्खित्यानन्दःसमुद्दिष्टो वरिति ज्ञानमुच्यते । मोक्षदानेन तद्दानात्सुवरस्य पदद्वयम् । दक्षिणश्चेति सव्यश्च " इति । अथ अवतरणानन्तरं । चतुर्भिःसचिवैःसह सहितः । यः निपपाता नितरांपान्ति जगदिति निपाः ब्रह्माद्याः । तान्पातिस्वभावेन नफलाशयेति निपपाता । तंरामंप्रति विभीषणोऽब्रवीदिति श्लोकद्वयस्यैकान्वयः । अथवा स्वयंपादयोर्निपपात । स्वामिन्स्वस्यप्रथमतःप्रणामः अथ अनन्तरं । सविभीषणः चतुर्भिःसचिवैःसहनिपपात । अथवा खात्पपातेतिपूर्वं । अनन्तरं रामस्यसमीपतइतिशेषः । अथ तदनन्तरंचतुर्भीराक्षसैःसहरामस्यपादयोर्निपपात । एतंविशेषं तुशब्दउद्बोधयति ॥ अथ विभीषणस्यरामपादनिपतनानन्तरं । सरावणः चतुर्भीराक्षसैः कुंभकर्णमहापार्श्वेन्द्रजित्प्रहस्तैःसहनिपपातेतिमध्ये एष्यन्नयेनकविवचनंवा । चतुर्भिरभिहितैःसहेतररक्षसैर्वारामप्रणिपातस्तन्निपातहेतुरितिभावः ॥ १—२ ॥ स० भवन्तं सर्वभूतानांशरण्यं । अनेनाप्रजस्यमहाद्वेहेणसहवासायोग्यता स्वस्यश्रीरामे भगवदवतारतामतिंचसूचयति ॥ ४ ॥ स० मित्राणि पूर्वंमित्रवदनुकृतानि । परित्यक्तानीतिलिङ्गवचनव्यत्यासेनवा यस्यांमित्राणि

[पा०] १ ङ. ञ. ठ. पादयोर्निपपाताथ. २ ख.ग.ङ.च.ज.—ट. चास्म्यवमानितः. ३ ङ. ञ. ट. भवद्गतंहिमेराज्यं.

तस्य तद्वचनं श्रुत्वा रामो वचनमब्रवीत् ॥ वचसा सान्त्वयित्वैनं लोचनाभ्यां पिबन्निव ॥ ६ ॥
आख्याहि मम तत्त्वेन राक्षसानां बलाबलम् ॥ ७ ॥
एवमुक्तं तदा रक्षो रामेणाक्लिष्टकर्मणा ॥ रावणस्य बलं सर्वमाख्यातुमुपचक्रमे ॥ ८ ॥
अवध्यः सर्वभूतानां गन्धर्वासुररक्षसाम् ॥ राजपुत्र दशग्रीवो वरदानात्स्वयंभुवः ॥ ९ ॥
रावणानन्तरो भ्राता मम ज्येष्ठश्च वीर्यवान् ॥ कुम्भकर्णो महातेजाः शक्रप्रतिबलो युधि ॥ १० ॥
राम सेनापतिस्तस्य प्रहस्तो यदि वा श्रुतः ॥ कैलासे येन संग्रामे माणिभद्रः पराजितः ॥ ११ ॥
बद्धगोधाङ्गुलित्राणस्त्ववध्यकवचो युधि ॥ धनुरादाय यस्तिष्ठन्नदृश्यो भवतीन्द्रजित् ॥ १२ ॥
संग्रामसमयव्यूहे तर्पयित्वा हुताशनम् ॥ अन्तर्धानगतः शत्रूनिन्द्रजिद्धन्ति राघव ॥ १३ ॥
महोदरमहापार्श्वौ राक्षसश्राप्यकम्पनः ॥ अनीकस्थास्तु तस्यैते लोकपालसमा युधि ॥ १४ ॥
दशकोटिसहस्राणि रक्षसां कामरूपिणाम् ॥ मांसशोणितभक्षाणां लङ्कापुरनिवासिनाम् ॥ १५ ॥
स तैस्तु सहितो राजा लोकपालानयोधयत् ॥ १६ ॥
सह दैवैस्तु ते भग्ना रावणेन महात्मना ॥ १७ ॥

वासस्थानं । मित्राणि सुहृदः । धनानि तद्द्वारा समागतानि सोपाधिकानि वस्तूनि प्राप्यान्तराणि त्यक्तानीत्यर्थः । भवद्व्रतं त्वदधीनं । राज्यमिति सर्वपरिग्रहोपलक्षणं । जीवितमिति धारकपोषकभोग्योपलक्षणं । सुखानि ऐहिकामुष्मिकरूपाणि । इदं सर्वं भवद्व्रतं भवत्कैङ्कर्यान्तर्गतं भवत्कैङ्कर्यविना अन्यन्नाहमभ्यर्थयामीत्यर्थः ॥ ५ ॥ तस्य सर्वपरिग्रहत्यागपूर्वकं रामेन्यस्तभरस्य । तद्वचनं रामकैङ्कर्यमेव सकलभोग्यजातमिति वाक्यं । सान्त्वयित्वा शरणं गत इत्युक्तिसमय एव स्वीकार्योसि एतावत्पर्यन्तं विलम्बः क्षन्तव्य इति सान्त्ववचनान्युक्त्वा । लोचनाभ्यां पिबन्निव सान्त्ववचनेन तस्य हृदयमार्द्रं कृत्वा अत्यादरेण विलोकयन्नित्यर्थः ॥ ६ ॥ एवं विभीषणेन कायिककैङ्कर्ये प्रार्थिते कायिककैङ्कर्यं पश्चाद्भविष्यतीति संप्रति वाचिककैङ्कर्यं कुर्विति दर्शयति—आख्याहीति ॥ अत्र भवदीयानामित्यनुक्त्वा राक्षसानामित्युक्तेरयं राक्षसजातिर्न भवति किन्त्विक्ष्वाकुवंश्य इति रामो मेने इतिगम्यते । भ्रमरकीटन्यायेन सद्यः स्वसाम्यप्रदंहि भगवदाश्रयणवैभवं ॥ ७—८ ॥ सर्वभूतानामित्येतत् गन्धर्वादिव्यतिरिक्तपरं । राजपुत्रेति संबुद्ध्या मानुषवध्यत्वं द्योतयति ॥ ९ ॥ प्रतिबल समानबलः ॥ १० ॥ कैलासे वर्तमान इति शेषः माणिभद्रः कुबेरसेनापतिः यदिवा श्रुत इति । हनुमत इति शेषः ॥ ११ ॥ बद्धेति । अङ्गुलीत्राणायत इत्यङ्गुलित्राणं अङ्गुलिकवचं । "गोधा तलं ज्याघातवारणे" इत्यमरः । अनेन निरन्तरशरसन्धायीति गम्यते । अवध्यकवचः अभेद्यकवचः । युधि अदृश्यो भवतीत्यन्वयः । हनुमद्ग्राहकत्वेन प्रसिद्धत्वात्तस्य रावणपुत्रत्वानुक्तिः ॥ ११ ॥ कुतोस्यादृश्यत्वशक्तिः अदृश्यश्च किं करोतीत्याह—संग्रामेति ॥ संग्रामसमयकृतव्यूहे । तर्पयित्वा होमैःप्रीणयित्वा ॥ १३ ॥ महोदर इत्यादि श्लोकद्वयं ॥ अनीकस्थाः सेनापतयः एते महोदरादयः दशकोटिसहस्राणि सन्तीति शेषः ॥ १४—१५ ॥ स तैरित्यर्धं ॥ १६ ॥ न केवलं योधनं पराजिताश्च ते लोकपाला इत्याह—सह दैवैरित्यर्धमेकं वाक्यं ॥ दैवैः लोकपालभिन्नैः । तं

धनानिच सालङ्कारपरित्यक्तेतिवाऽन्वयः । मेराज्यं । जीवितं जीवनं । सुखानि ऐहलौकिकानि । पारलौकिकानिच । भवद्व्रतानि पूर्वस्मात्परित्यक्तामयालङ्क्ष्यावृत्तं सद्भवद्व्रतेतिविपरिणतेनान्वेति । परित्यक्तः आमयोरोगरूपी प्राकारायङ्गभङ्गकारित्वाद्रावणः यस्य सालङ्का । भवद्व्रता । एतेन एकांमूलनगरींस्थापयित्वावा स्वस्मास्थितिरामेणगृहीत्वाराज्यप्रदानंनाभिप्रेतं विभीषणेनरामवदान्यत्वेनेतिभावः ॥ ५ ॥ ति० दशकोटिसहस्राणि । इदंच प्रधानराक्षसविवक्षया ॥ १५ ॥

[पा०] १ ङ. ञ. ट. गन्धर्वोरगपक्षिणां. २ ञ. ञ. यदिते. ३ ङ. ञ. ट. समरे. ४ ख. घ.—ट. संग्रामेसुमहद्व्यूहे ५ ङ. ञ. ट. श्रीमानिन्द्र. ६ ङ. ञ. अनीकपास्तु. ग. अतिकायास्तु. ७ क. घ.—ट. दुरात्मना.

विभीषणवचः श्रुत्वा रामो दृढपराक्रमः ॥ अन्वीक्ष्य मनसा सर्वमिदं वचनमब्रवीत् ॥ १८ ॥
यानि कर्मापदानानि रावणस्य विभीषण ॥ आख्यातानि च तत्त्वेन ह्यवगच्छामि तान्यहम् ॥ १९ ॥
अहं हत्वा दशग्रीवं सप्रहस्तं सबान्धवम् ॥ राजानं त्वां करिष्यामि सत्यमेतद्ब्रवीमि ते ॥ २० ॥
रसातलं वा प्रविशेत्पातालं वाऽपि रावणः ॥ पितामहसकाशं वा न मे जीवन्विमोक्ष्यते ॥ २१ ॥
अहत्वा रावणं संख्ये सपुत्रबलबान्धवम् ॥ अयोध्यां न प्रवेक्ष्यामि त्रिभिस्तैर्भ्रातृभिः शपे ॥ २२ ॥
श्रुत्वा तु वचनं तस्य रामस्याक्लिष्टकर्मणः ॥ शिरसाऽऽवन्द्य धर्मात्मा वक्तुमेवोपचक्रमे ॥ २३ ॥
राक्षसानां वधे साह्यं लङ्कायाश्च प्रधर्षणम् ॥ करिष्यामि यथाप्राणं प्रवेक्ष्यामि च वाहिनीम् ॥ २४ ॥
इति ब्रुवाणं रामस्तु परिष्वज्य विभीषणम् ॥ अब्रवील्लक्ष्मणं प्रीतः समुद्राज्जलमानय ॥ २५ ॥
तेन चेमं महाप्राज्ञमभिषिञ्च विभीषणम् ॥ राजानं रक्षसां क्षिप्रं प्रसन्ने मयि मानद ॥ २६ ॥
एवमुक्तस्तु सौमित्रिरभ्यषिञ्चद्विभीषणम् ॥ मध्ये वानरमुख्यानां राजानं राजशासनात् ॥ २७ ॥
तं प्रसादं तु रामस्य दृष्ट्वा सद्यः प्लवङ्गमाः ॥ प्रचुक्रुशुर्महात्मानं साधुसाध्विति चाब्रुवन् ॥ २८ ॥
अब्रवीच्च हनूमांश्च सुग्रीवश्च विभीषणम् ॥ २९ ॥

लोकपालाः । महात्मना महाधैर्येण ॥ १७ ॥ अन्वीक्ष्य आलोच्य । सर्वं कर्तव्याकर्तव्यं ॥ १८ ॥ कर्मापदानानि । "अपदानं कर्मवृत्तं" इत्यमरः । करिकलभ इत्यत्रेव कर्मशब्दप्रयोगः । शौर्यकृतव्यापारा इत्यर्थः । अवगच्छामि अवधारयामीत्यर्थः ॥ १९ ॥ आलोचितमर्थमाह—अहमित्यादिना ॥ २० ॥ रसातलं भूविवरं । पातालं अधोलोकं । पितामहसकाशं स्ववरप्रदसमीपं । उपरितनलोकावधिभूतं सत्यलोकं वा । मे मत्तः ॥ २१ ॥ उक्तमर्थं व्यतिरेकमुखेन द्रढयन् सत्यमेतद्ब्रवीमि त इत्युक्तं विवृणोति—अहत्वेति ॥ सङ्ख्ये युद्धे । तैः प्रसिद्धैः । भ्रातृभिरिति हेतुविक्षया तृतीया ॥ २२ ॥ स्वानभिमतराज्यप्रदानप्रतिज्ञानात् वन्दनपूर्वकं स्वाभिमतं कैङ्कर्यमेव प्रयोजनान्तरनिवृत्तयेर्थयते—श्रुत्वेत्यादिना ॥ आवन्द्येति च्छेदः ॥ २३ ॥ साह्यं साहाय्यं । सहशब्दः सहायवाची । यथाप्राणं यथाबलं ॥ २४ ॥ एवं कैङ्कर्यव्यतिरिक्तफलमनाकाङ्क्षमाणं विभीषणं परिष्वङ्गेन वशीकृत्यानुषङ्गिकमपि फलं मत्प्रदत्तमङ्गीकर्तव्यमित्यभिप्रायेण लक्ष्मणमादिशति—इतीति ॥ २५ ॥ तेन समुद्रजलेन । महाप्राज्ञं कैङ्कर्यपर्यन्तस्वशेषत्वस्वरूपज्ञं । मयि प्रसन्ने सतीत्यनेन अभिषेको विभीषणेनानाकाङ्क्षित इति गम्यते । मानद बहुमानप्रद । मत्प्रसादे सति फलप्रदस्त्वमिति भावः ॥ २६ ॥ मध्ये वानरमुख्यानामित्यनेन महत्समाजे कृतमलङ्घनीयमिति द्योत्यते । राजशासनादित्यनेनालङ्घनीयं राजशासनमिति विभीषणोनुमेन इति भाव्यते ॥ २७ ॥ प्रचुक्रुशुः हर्षनादं चक्रुः । महात्मानं रामं । अब्रुवन् प्राशंसन्नित्यर्थः ॥ २८ ॥ अथ समयान्तरे कुत्रचिदेकान्ते प्रदेशे हनुमत्सुग्रीवौ स्थलज्ञं विभीषणं वानरसेनातरणोपायमपृच्छतामित्याह—अब्रवीच्चेति ॥

ति० कर्मापदानानि युधिकर्मनिर्वर्तितशौर्याणि । तान्यहमवगच्छाम्येव । ननुतानिमयिप्रभविष्यन्तीतिभावः ॥ स० कर्मापदानानि अपदानानि अतिवृत्तानि अमर्यादयाकृतानि । कर्माणिचतान्यपदानानिच तानि । यद्वा कर्मणि युद्धादिरूपेअपदानानिअतिवृत्तानिवैरिकर्मखण्डकानीतिवा । " अपदानमतीवृत्तकर्मखण्डनयोर्मतं " इतिविश्वः ॥ १९ ॥ स० रामप्रतिज्ञांश्रुत्वाविभीषणोपिप्रतिश्रृणोतीत्याह—वक्तुमेवेति । एवकारेण सर्वस्वामिनोरामस्यसाहाय्यकरणवचनमुपहास्यं । तथापि लौकिकरीत्यनुपालनार्थमिदमितिसूचयति ॥ २३ ॥ स० राजानं लङ्कायाः । राजशासनात् रामाज्ञायाः । रावणावरजस्यस्वावरजेनाभिषेचनंयुक्तमितिवा इदानींरावणमारणदीक्षाबन्धाद्व्यापारान्तरस्याकरणीयतयावा साक्षात्पितामहएवाभिषेकयोग्योनान्यइतिवालक्ष्मणेनाभिषेचनमितिमन्तव्यं ॥ राजशासनात् राजारावणः तच्छासनं शिक्षांतृणीकृत्येतिवा । ल्यब्लोपनिमित्तापञ्चमी ॥ २७ ॥

[पा०] १ क. ख. ग. ङ.—ट. विभीषणस्यतुवचस्तच्छ्रुत्वारघुसत्तमः. २ ङ. च. छ. झ. ञ. ट. सहात्मजं. ग. सहानुजं. ३ ङ. झ. मेतच्छ्रूणोतुमे. ४ क. ख. घ.—ट. जनबान्धवं. ५ ङ. च. झ. ञ. ट. वक्तुमेवप्रचक्रमे. ६ क. ग.—ट. प्रधर्षणे. ७ क. ग. घ. च. छ. ज. रामशासनात्.

कथं सागरमक्षोभ्यं तराम वरुणालयम् ॥ सैन्यैः परिवृताः सर्वे वानराणां महौजसाम् ॥ ३० ॥
उपायं नाधिगच्छामो यथा नदनदीपतिम् ॥ तराम तरसा सर्वे ससैन्या वरुणालयम् ॥
एवमुक्तस्तु धर्मज्ञः प्रत्युवाच विभीषणः ॥ ३१ ॥
समुद्रं राघवो राजा शरणं गन्तुमर्हति ॥ ३२ ॥
खानितः सगरेणायमप्रमेयो महोदधिः ॥ कर्तुमर्हति रामस्य ज्ञात्वा कार्यं महामतिः ॥ ३३ ॥
एवं विभीषणेनोक्तो राक्षसेन विपश्चिता ॥ आजगामाथ सुग्रीवो यत्र रामः सलक्ष्मणः ॥ ३४ ॥
ततश्चाख्यातुमारेभे विभीषणवचः शुभम् ॥ सुग्रीवो विपुलग्रीवः सागरस्योपवेशनम् ॥ ३५ ॥
प्रकृत्या धर्मशीलस्य राघवस्याप्यरोचत ॥ ३६ ॥
स लक्ष्मणं महातेजाः सुग्रीवं च हरीश्वरम् ॥ सत्क्रियार्थं क्रियादक्षः स्मितपूर्वमुवाच ह ॥ ३७ ॥
विभीषणस्य मन्त्रोऽयं मम लक्ष्मण रोचते ॥ ब्रूहि त्वं सहसुग्रीवस्तवापि यदि रोचते ॥ ३८ ॥
सुग्रीवः पण्डितो नित्यं भवान्मन्त्रविचक्षणः ॥ उभाभ्यां संप्रधार्यार्थं रोचते यत्तदुच्यताम् ॥ ३९ ॥
एवमुक्तौ तु तौ वीरावुभौ सुग्रीवलक्ष्मणौ ॥ समुदाचारसंयुक्तमिदं वचनमूचतुः ॥ ४० ॥
किमर्थं नौ नरव्याघ्र न रोचिष्यति राघव ॥ विभीषणेन यच्चोक्तमस्मिन्काले सुखावहम् ॥ ४१ ॥
अबद्ध्वा सागरे सेतुं घोरेऽस्मिन्वरुणालये ॥ लङ्का नासादितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ ४२ ॥

इदमर्धमेकं वाक्यं ॥ २९ ॥ दुस्तरत्वे हेतुः अक्षोभ्यमिति तत्रापि हेतुर्वरुणालयमिति ॥ ३० ॥ बुद्धिमन्तो भवन्त एव विचारयन्तीत्यत्राह—उपायं नाधिगच्छाम इति ॥ सर्वे । वयमेतिशेषः ॥ ३१ ॥ समुद्रमित्यर्धं ॥ लक्ष्मणव्यावृत्तये राजेत्युक्तिः ॥ ३२ ॥ शरणवरणं व्याजीकृत्य समुद्रः प्रत्यासक्त्यतिशयात्सद्य उपायं दिशेदित्यभिप्रायेणाह—खानितइति ॥ खानितः स्वपुत्रैरिति शेषः । न केवलमुत्पत्तिमात्रं तन्मूलं किं त्वतिशयोपि तदधीन इत्याह—अप्रमेयो महोदधिरिति । सगरेण रामकूटस्थेन । महामतिः उपकारज्ञ इत्यर्थः ॥ ३३ ॥ राक्षसेनेति स्थलज्ञतोक्ता । विपश्चितेति तात्कालिकबुद्धिमत्ता । आजगामेत्यनेन कालान्तरे देशान्तरे सुग्रीवादिप्रश्न इति गम्यते ॥ ३४ ॥ विपुलग्रीव इत्यनेन कुतूहलित्वमुक्तं । आरेभइत्यनेन आरम्भमात्र एव सूक्ष्मज्ञतया रामेण सहसा सुग्रीवविवक्षितं ज्ञातमित्युच्यते । उपवेशनं उपासनं ॥ ३५ ॥ प्रकृत्येत्यर्धमेकं वाक्यं ॥ अरोचत तदुपवेशनमित्यनुषङ्गः ॥ ३६ ॥ महातेजाः तात्कालिकहर्षप्रकाशकदेहकान्तिमान् । अन्यान्विहाय सुग्रीवं प्रति वचने हेतुःहरीश्वरमिति । सत्क्रियार्थं विभीषणमन्त्रबहुमानार्थं । क्रियादक्षः स्वयं कार्यकरणसमर्थोपि ॥ ३७—३८ ॥ पण्डितः मन्त्रसमर्थः । उभाभ्यामिति चतुर्थी । अर्थं प्रयोजनं संप्रधार्य निश्चित्य । यत्कार्यमुभाभ्यां रोचते तदुच्यतामितिसंबन्धः ॥ ३९ ॥ समुदाचारः अञ्जलिबन्धाद्युपचारः तत्संयुक्तमिति क्रियाविशेषणं ॥४०॥ अस्मिन्काले उपायमन्तरा दर्शनकाले । सुखावहं अयत्नेन कार्यसाधकं । नौआवयोः ॥ ४१ ॥ रामशरणागतेः फलं सेतुबन्धनमित्याशयेनाह—अबद्ध्वेति ॥ घोरे तिमितिमिङ्गिलादिसत्त्वाधिष्ठितत्वेन दुस्तरे । सेन्द्रैरिति । किं पुनरस्माभिरिति भावः ॥ ४२ ॥

ति० ससैन्यावरुणालयंयथातराम तथाकैरुपायैर्नदनदीपतिमभिगच्छाम । मार्गप्राप्तये तद्वदेतिशेषः ॥ ३१ ॥ ति० एवं विभीषणोक्तंश्रुत्वा यत्ररामोवर्तते तंदेशंसलक्ष्मणःसुग्रीवआजगामेतिसंबन्धः ॥ ३४ ॥

[पा० १ ख. ग. ङ. झ. ट. उपायैरभिगच्छामः. च. छ. ञ. उपायैरधि. २ ङ. च. झ. ञ. धर्मात्मा. ३ ग. ङ.—ट. ज्ञातेःकार्यं. ४ ख. ग. ङ. च. छ. झ. ञ. ट. विभीषणेनोक्तं. ज. विभीषणेनोक्ते. ५ ङ. झ. रामस्यास्याप्यरोचत. ६ ख. ग. ङ. च. झ. ञ. ट. यत्तूक्तं.

विभीषणस्य शूरस्य यथार्थं क्रियतां वचः ॥ अलं कालात्ययं कृत्वा समुद्रोऽयं नियुज्यताम् ॥
यथा सैन्येन गच्छामः पुरीं रावणपालिताम् ॥ ४३ ॥
एवमुक्तः कुशास्तीर्णे तीरे नदनदीपतेः ॥ संविवेश तदा रामो वेद्यामिव हुताशनः ॥ ४४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

विंशः सर्गः ॥ २० ॥

रावणचोदनयासागरोत्तरतीरमेत्य रामादिवृत्तान्तावगमनपूर्वकं लङ्कांपुनरागतेनशार्दूलनाम्नाचारेणरावणे रामवृत्तान्तनिवेदनम् ॥ १ ॥ रावणप्रेषितेनपक्षिरूपधारिणाशुकनाम्नाराक्षसदूतेनान्तरिक्षस्थेनैवसता सुग्रीवे रावणसंदेशनिवेदनम् ॥ २ ॥ गगनमुद्गतैर्वानरैर्भूयापणपूर्वकंपीडितेनशुकेन स्वप्रार्थितरामनियोगात्तैर्विमोक्षणे पुनरन्तरिक्षमेत्यसुग्रीवंप्रति संदेशप्रार्थनम् ॥ ३ ॥ शुकंप्रतिसुग्रीवेणरावणे रामापराधात्पुत्रमित्रादिभिस्सहमारणप्रतिज्ञानरूपप्रतिसंदेशनिवेदनचोदना ॥ ४ ॥ अङ्गदेन शुकेदूतत्वनिषेधेनचारत्वसमर्थने वानरैःपुनर्ग्रहणेनबन्धनपूर्वकं तत्पीडनम् ॥५॥ शुकप्रार्थितेनरामेण तेभ्यस्तन्निवारणम् ॥६॥

ततो निविष्टां ध्वजिनीं सुग्रीवेणाभिपालिताम् ॥ ददर्श राक्षसोऽभ्येत्य शार्दूलो नाम वीर्यवान् ॥१॥
चारो राक्षसराजस्य रावणस्य दुरात्मनः ॥ तां दृष्ट्वा सर्वतो व्यग्रं प्रतिगम्य स राक्षसः ॥
प्रविश्य लङ्कां वेगेन रावणं वाक्यमब्रवीत् ॥ २ ॥
एष वानरऋक्षौघो लङ्कां समभिवर्तते ॥ अगाधश्चाप्रमेयश्च द्वितीय इव सागरः ॥ ३ ॥
पुत्रौ दशरथस्येमौ भ्रातरौ रामलक्ष्मणौ ॥ उत्तमायुधसंपन्नौ सीतायाः पदमागतौ ॥ ४ ॥
एतौ सागरमासाद्य सन्निविष्टौ महाद्युती ॥ ५ ॥
बलमाकाशमावृत्य सर्वतो दशयोजनम् ॥ तत्त्वभूतं महाराज क्षिप्रं वेदितुमर्हसि ॥
तव दूता महाराज क्षिप्रमर्हन्त्यवेक्षितुम् ॥ ६ ॥
उपप्रदानं सान्त्वं वा भेदो वात्र प्रयुज्यताम् ॥ ७ ॥

शूरस्य मन्त्रशूरस्य । यथार्थं परमाप्तोक्तत्वादिति भावः । नियुज्यतां प्रार्थ्यतां । यथेति । तथा नियुज्यतामिति पूर्वेणान्वयः ॥ ४३ ॥ संविवेश संवेशनमकरोत् । वेद्यामिव हुताशन इत्यनेन ज्वलिष्यमाणत्वं व्यज्यते ॥ ४४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनविंशःसर्गः ॥ १९ ॥

अथ विभीषणनिर्गमनानन्तरं लङ्कावृत्तान्तं प्रस्तौति —तत इत्यादिना ॥ निविष्टां समुद्रतीरस्थां । ध्वजिनीं सेनां । वीर्यवानिति दर्शनसामर्थ्योक्तिः ॥ १ ॥ चार इत्यादि सार्धश्लोकः ॥ दुरात्मनः दुर्बुद्धेः । अकाले चारप्रेषितुरित्यर्थः ॥ २ ॥ अगाधः सेनापक्षे दुष्प्रवेश इत्यर्थः । अप्रमेयः अपरिच्छेद्यः ॥ ३ ॥ पदं स्थानं प्रति । आगतौ ॥ ४ ॥ एतावित्यर्धमेकं ॥ ५ ॥ बलमिति ॥ पूर्वं सेनासन्निवेशमात्रमुक्तं । अत्र तद्विस्तार उच्यते । आकाशं अवकाशं । सर्वतः चतुःपार्श्वेषु । दशयोजनपरिमितमवकाशमावृत्य स्थितं तत्त्वभूतमिति मया सामान्यतो ज्ञातं यथार्थभूतं यथा भवति तथाज्ञातुमर्हसीत्यर्थः ॥ ६ ॥ उपप्रदान-

---

ति० सागराय सागरप्रार्थनार्थं । नियुज्यतां । स्वात्मेतिशेषः ॥ ४३ ॥ इत्येकोनविंशःसर्गः ॥ १९ ॥

स० सीतायाःपदं त्राणमुद्दिश्य अत्रवर्ततइतिचिह्नंज्ञात्वावा शब्दंहनुमद्बोधितंश्रुत्वावा । " पदंव्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु " इत्यमरः ॥ ४ ॥ स० उपप्रदानं सीतायारामसमीपंगत्वादानं । सान्त्वं सीतादानंविनाऽमूल्यरत्नादिदानेनसमाधानं ।

[पा०] १ ङ. झ. सागराय. २ ङ. च. झ. सर्वतोऽभ्यग्रां. ३ क. ग. ङ.—ट. आविश्य. ४ क. ट. राजानमिदमब्रवीत्. ५ ग. ङ. झ. ट. एषवैवानरक्षौघो. ६ ङ. झ. ट. उत्तमौरूपसंपन्नौ. ७ ख.—च. झ. ञ. ट. बलंचाकाश. ८ क. च. छ. ज. तत्त्वमेतन्महाराज. घ. तथाभूतं. ९ घ. ङ. च. झ. ञ. ट. महंन्तिवेदितुं.

शार्दूलस्य वचः श्रुत्वा रावणो राक्षसेश्वरः ॥ उवाच सहसा व्यग्रः संप्रधार्यार्थमात्मनः ॥
शुकं नाम तदा रक्षो वाक्यमर्थविदां वरम् ॥ ८ ॥
सुग्रीवं ब्रूहि गत्वा त्वं राजानं वचनान्मम ॥ यथासंदेशमक्लीबं श्लक्ष्णया परया गिरा ॥ ९ ॥
त्वं वै महाराज कुलप्रसूतो महाबलश्चर्क्षरजस्सुतश्च ॥
न कश्चिदर्थस्तव नास्त्यनर्थस्तथा हि मे भ्रातृसमो हरीश ॥ १० ॥
अहं यद्यहरं भार्यां राजपुत्रस्य धीमतः ॥ किं तत्र तव सुग्रीव किष्किन्धां प्रतिगम्यताम् ॥ ११
न हीयं हरिभिर्लङ्का शक्या प्राप्तुं कथंचन ॥ देवैरपि सगन्धर्वैः किं पुनर्नरवानरैः ॥ १२ ॥
स तथा राक्षसेन्द्रेण संदिष्टो रजनीचरः ॥ शुको विहङ्गमो भूत्वा तूर्णमाप्लुत्य चाम्बरम् ॥ १३ ॥
स गत्वा दूरमध्वानमुपर्युपरिसागरम् ॥ संस्थितो ह्यम्बरे वाक्यं सुग्रीवमिदमब्रवीत् ॥
सर्वमुक्तं यथादिष्टं रावणेन दुरात्मना ॥ १४ ॥
तं प्रापयन्तं वचनं तूर्णमाप्लुत्य वानराः ॥ प्रापद्यन्त दिवं क्षिप्रं लोप्तुं हन्तुं च मुष्टिभिः ॥ १५ ॥
स तैः प्लवङ्गैः प्रसभं निगृहीतो निशाचरः ॥ गगनाद्भूतले चाशु परिगृह्य निपातितः ॥ १६ ॥
वानरैः पीड्यमानस्तु शुको वचनमब्रवीत् ॥ न दूतान्घ्नन्ति काकुत्स्थ वार्यन्तां साधु वानराः ॥ १७
यस्तु हित्वा मतं भर्तुः स्वमतं संप्रभाषते ॥ अनुक्तवादी दूतः सन्स दूतो वधमर्हति ॥ १८ ॥

मित्यर्धमेकं वाक्यं ॥ दण्डस्य त्ववकाश एव नास्तीति भावः । अत्र रामविषये ॥ ७ ॥ शार्दूलस्येत्यर्धत्रयमेकान्वयं ॥ अर्थः कर्तव्यार्थः ॥ ८ ॥ भेदप्रयोगमुपदर्शयति—सुग्रीवमिति ॥ मम वचनाद्ब्रूहि मयोक्तमिति ब्रूहि । अक्लीबं सधाष्टर्यमित्यर्थः । श्लक्ष्णयापारुष्यरहितया । परया श्राव्यया ॥ ९ ॥ वचनमेवाह—त्वमिति ॥ वचनगाम्भीर्यव्यञ्जनाय गुरुवृत्तारम्भः । हे महाराज त्वं कुलप्रसूतः । सूर्यपुत्रत्वादिति भावः । तेन निष्कारणवैरं त्वया कर्तुमनुचितमिति व्यज्यते । महाबलः अल्पबलं राममवलम्बितुं नार्हसीत्यर्थः । ऋक्षरजस्सुतः ब्रह्मपौत्रत्वेन मम बन्धुभूतोसीत्यर्थः । तव रामावलम्बने कश्चिदर्थो नास्ति । अनवलम्बने अनर्थश्च नास्ति । अफलं वैरं तव नोचितमिति भावः । वालिसंबन्धेन भ्रातृसमत्वान्मयैव प्रणयं कुर्वित्यभिप्रायेणाह—तथा हीति ॥ १० ॥ सीतापहरणमेव त्वत्कृतो महाननर्थ इत्याह—अहमिति ॥ राजपुत्रस्य तवेति पदाभ्यनरवानरयोः कः संबन्ध इत्युक्तं । धीमत इसुग्रीवविशेषणं । तत्र हरणविषये । किं का हानिरित्यर्थः ॥ ११ ॥ आरब्धस्यान्तगमनमिति न्याये प्रक्रान्तं कार्यं कथं त्यज्यतामित्यत्राह—नहीति उक्तमर्थं कैमुतिकन्यायेन द्रढयति—देवैरिति अत्र नरग्रहणात् पूर्वार्धे हरिपदं नरोपलक्षकं बोध्यं त्वमेवामुमर्थमालोचयेतिभावः । इयं लङ्का प्राप्तुं शक्येत्युत्तरार्धेनुषज्यते ॥ १२ ॥ अम्बरमाप्लुआजगामेति शेषः ॥ १३ ॥ उपर्युपरिसागरं सारस्याव्यवहितोपरि प्रदेशे " उपर्यध्यधसः सामीप्ये इति द्विर्वचनं।आम्रेडितान्तत्वात् "उभसर्वतसोः" इति द्वितीया ॥१४॥ प्रापयन्तं श्रावयन्तं । प्रापद्यन्त पर्यवारयन् ॥ १५ ॥ निगृहीतः बद्धः ॥ १६—१७ दूतोप्ययुक्तकारी वध्य एवेत्याशङ्क्य नाहं तथा अ

भेदः मित्रभेदः । चतुर्थोपायभूतोदण्डस्तु रामसेनावलोकनानन्तरं अयमशक्यइति शार्दूलेननोपन्यस्तः ॥ ७ ॥ स० त्वंमेभ्रातसमः वालिरावणयोःसख्यान्मदनुजसमइत्युक्तिः ॥ एवंदैवान्निस्सृतयावाण्या वालिनइवरावणस्यवधोपि रामाद्भविष्यतीतिसूच्य ॥ १० ॥ स० सगन्धर्वैः हरिभिः बहुवचनमाद्यर्थे । इन्द्रादिभिः नारायणादिभिर्वा । देवैः । "हरिर्वातार्कचन्द्रेन्द्रोपेन्द्र"—इत्य दिविश्वः ॥ १२ ॥ ती० लोप्तुं पक्षावितिशेषः ॥ १५ ॥ स० अवतारितः रामाज्ञांविनाहनने भूपकोपास्पदतास्यादिति मन्त्र

[पा०] १ ङ. झ. ट. शुकंसाधु. २ क. ङ. च. झ. ट. गत्वाशु. ३ ङ. च. छ. झ. ट. कश्चनार्थः. ४ घ. राक्षस ५ क. ग. यथोद्दिष्टं. ६ ग. ङ. झ. प्रापयन्ततदा. क. च. छ. प्रारभन्ततदा. ७ क. ग. छ. ट. परिगृह्यावतारितः. ङ. च. झ. प्रतिगृह्यावतारितः. ८ ङ. झ. ट. संप्रधारयेत.

शुकस्य वचनं श्रुत्वा रामस्तु परिदेवितम् ॥ उवाच मा वधिष्टेति हतः शाखामृगर्षभान् ॥ १९ ॥
स च पत्रलघुर्भूत्वा हरिभिर्दर्शिते भये ॥ अन्तरिक्षस्थितो भूत्वा पुनर्वचनमब्रवीत् ॥ २० ॥
सुग्रीव सत्त्वसंपन्न महाबलपराक्रम ॥ किं मया खलु वक्तव्यो रावणो लोकरावणः ॥ २१ ॥

स एवमुक्तः प्लवगाधिपस्तदा प्लवङ्गमानामृषभो महाबलः ॥
उवाच वाक्यं रजनीचरस्य चारं शुकं तूर्णमदीनसत्त्वः ॥ २२ ॥
न मेऽसि मित्रं न तथाऽनुकम्प्यो न चोपकर्ताऽसि न मे प्रियोसि ॥
अरिश्च रामस्य सहानुबन्धः स मेसि वालीव वधार्हो वध्यः ॥ २३ ॥
निहन्म्यहं त्वां ससुतं सबन्धुं सज्ञातिवर्गं रजनीचरेश ॥
लङ्कां च सर्वां महता बलेन क्षिप्रं करिष्यामि समेत्य भस्म ॥ २४ ॥
न मोक्ष्यसे रावण राघवस्य सुरैः सहेन्द्रैरपि मूढ गुप्तः ॥
अन्तर्हितः सूर्यपथं गतो वा तथैव पातालमनुप्रविष्टः ॥
[गिरीशपादांबुजसंगतो वा हतोसि रामेण सहानुजस्त्वम् ॥] २५ ॥

क्तकारीत्याशयेनाह—यस्त्विति ॥ १८ ॥ परिदेवितं परिदेवनरूपं वचनं । मा वधिष्टेति प्रत्येकोक्त्यभिप्रायेणैकवचनं । वधिष्टेतीत्यत्र आर्षः सन्धिः ॥ १९ ॥ पत्रलघुः लघुपत्रः । वानरैः प्रायेण लूनपक्ष इत्यर्थः । भये दर्शिते दर्शितेपि ॥ २० ॥ स्ववाक्यश्रवणाय सुग्रीवं प्रशंसति—सुग्रीवेति॥लोकरावण इत्येनेन प्रतिवचनानादाने मां हनिष्यतीति भावः ॥ २१ ॥ स एवमिति। लोके कश्चिदधिपतिरपि तज्जातीयो न भवति। तद्व्यावर्तनाय प्लवङ्गमानामृषभ इत्युक्तं । महाबलः तृणीकृतरावणइत्यर्थः । अदीनसत्त्वः अदीनमनस्कः । अत्र वंशस्थोपेन्द्रवज्रेन्द्रवज्रायोगादुपजातिवृत्तभेदः ॥ २२ ॥ भ्रातृसमोसीत्यस्योत्तरमाह—न मेसीति ॥ मे मित्रं नासीत्यर्थः । अनुकम्प्यः दयनीयश्च नासि । मे उपकर्ता च नासि । मे प्रियोपि नासि । अतः कथं भ्रातृसमोसीति भावः । प्रत्युत मित्रशत्रुत्वाच्छत्रुरेवासीत्याह—अरिश्चेति । ननु नोपकर्तृत्वादिना मित्रं किन्तु सख्युर्वालिनो भ्रातृत्वादित्यत आह—स मेसीति । नः अरिभूतस्त्वमपि वालीव मे वध्योसि । अरिमित्रस्याप्यरित्वादिति भावः । इदमेव मनसि कृत्वोक्तं वधार्हेति । अनेन अहं यद्यहरं भार्यामित्येतदुत्तरं ॥ २३ ॥ न हीयं हरिभिर्लङ्केत्यस्योत्तरमाह—निहन्मीति ॥ ज्ञातिवर्गः कुम्भकर्णादिः । विभीषणस्तु न ज्ञातिरिति भावः । सुतादयः किमर्थं हन्तव्या इत्यपेक्षायां राजापराधादित्याह—रजनीचरेशेति । बलेन सेनया ॥ २४ ॥ मयि लङ्कास्थे खल्वेवं करिष्यसि । स्थलान्तरं गमिष्यामीति शङ्कायामाह—न मोक्ष्यस इति ॥ राघवस्य राघवात् । पञ्चम्यर्थे षष्ठी । मूढेति संबुद्धिः । सूर्यपथं सूर्यद्वारं । गतः सन्

भुवमवतारितः ॥ १६ ॥ **ती०** पक्षलघुः पक्षैर्लघुः लूनपक्षइतियावत् ॥ **स०** पक्षलघुः कपिभिर्लुप्तात्पपक्षः पूर्वंभूत्वा अनन्तरं रामाज्ञयाहरिभिरभयेदर्शिते दत्तेसति पक्षैः छिन्नप्ररूढैः लघुः शीघ्रगामीभूत्वेत्यर्थोवा । यत्तु लूनपक्षत्वे अन्तरिक्षगमनासंभवः । रामाज्ञाननुष्ठानप्रसङ्गश्चेति कैश्चिदभिहितं तत्तु शुकरूपस्यमायिकत्वेन पक्षच्छेदेपि मायया पुनःप्ररोहणस्यसंभवादन्तरिक्षगमनसंभवेन रामाज्ञातः पूर्वमेव कतिपयतल्लोपनेन तदाज्ञाभङ्गस्याप्यभावेनचायुक्तमितिज्ञेयम् ॥ २० ॥ **स०** प्लवगाधिपः एवमुक्तोऽभूत् । एवमुक्तः प्लवङ्गमानामृषभःसुग्रीवः। रजनीचरस्य रावणस्य। चारं दूतं । दीनंशुकंप्रत्युवाच । प्लवगान् आधितः मनोव्यथातःपातीतिवा तथा । प्लवङ्गेषुमानः चित्तोन्नतिर्यस्यसः प्लवङ्गमानः । सचासौनविद्यते मृषा मिथ्यावचनं येषांते अमृषाः तेषांभइवभः इन्द्रइतियावत् । " भःस्यान्मयूखेशकेच " इति " मानश्चित्तोन्नतौ " इतिचविश्वः ॥ अदीनसत्त्वः अदीनान्तःकरणः ॥ २२ ॥ **ति०** त्वां मन्मित्ररामारिं । सर्वैःसमेत्येत्यन्वयः ॥ २४ ॥ **शि०** अतः अन्तर्हितत्वादिकंप्राप्तोपिसहानुजस्त्वं रामेणहतः ।

[**पा०**] १ च. छ. ठ. पक्षलघुः. २ ख.—ट. अन्तरिक्षेस्थितो. ज. अन्तरिक्षेस्थिरो. क. अन्तरिक्षगतो. ३ च. ञ. शुकोवचनं. क. भूयोवचनं. ४ ङ. च. झ. ट. शुद्धमदीन. ५ ग. ङ. झ. ट. ततोसि. घ. त्वमेव. ६ ङ. झ. ञ. सर्वैः करिष्यामि. ७ ज. भग्नां. ८ ङ.—ट. सर्वैः. ९ इदमर्धं ङ. झ. ञ. ट. पाठेषुदृश्यते.

तस्य ते त्रिषु लोकेषु न पिशाचं न राक्षसम् ॥ त्रातारमनुपश्यामि न गन्धर्वं न चासुरम् ॥ २६ ॥
अवधीर्यज्जरावृद्धमक्षमं किं जटायुषम् ॥ २७ ॥
किं नु ते रामसान्निध्ये सकाशे लक्ष्मणस्य वा ॥ हृता सीता विशालाक्षी यां त्वं गृह्य न बुध्यसे ॥२८॥
महाबलं महात्मानं दुर्धर्षममरैरपि ॥ न बुध्यसे रघुश्रेष्ठं यस्ते प्राणान्हरिष्यति ॥ २९ ॥
ततोऽब्रवीद्वालिसुतस्त्वङ्गदो हरिसत्तमः ॥ नायं दूतो महाराज चारिकः प्रतिभाति मे ॥ ३० ॥
तुलितं हि बलं सर्वमनेनात्रैव तिष्ठता ॥ गृह्यतां मा गमल्लङ्कामेतद्धि मम रोचते ॥ ३१ ॥
ततो राज्ञा समादिष्टाः समुत्प्लुत्य वलीमुखाः ॥ जगृहुश्च बबन्धुश्च विलपन्तमनाथवत् ॥ ३२ ॥
शुकस्तु वानरैश्चण्डैस्तत्र तैः संप्रपीडितः ॥ व्याक्रोशत महात्मानं रामं दशरथात्मजम् ॥
लुप्येते मे बलात्पक्षौ भिद्येते च तथाऽक्षिणी ॥ ३३ ॥
यां च रात्रिं मरिष्यामि जाये रात्रिं च यामहम् ॥ एतस्मिन्नन्तरे काले यन्मया ह्यशुभं कृतम् ॥
सर्वं तदुपपद्येथा जह्यां चेद्यदि जीवितम् ॥ ३४ ॥
नाघातयत्तदा रामः श्रुत्वा तत्परिदेवनम् ॥ वानरानब्रवीद्रामो मुच्यतां दूत आगतः ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे विंशः सर्गः ॥ २० ॥

अन्तर्हितोपि न मोक्ष्यसे ॥ २५ ॥ त्रिदशेश्वरेपि त्रातुमनीश्वरे का वार्ता क्षुद्राणामित्याह—तस्येति ॥ तस्य रामशरविद्धस्य ॥ २६ ॥ यदि रामसहाये स्थितोसि तर्हि ते जटायुषोवस्था स्यादित्यत्राह—अवधीरिति अर्धमेकं वाक्यं । जरया वृद्धं अत एवाक्षमं असमर्थं । जटायुषमवधीरिति यत्तत्र ते किं वीर्यमिति शेषः । नाहं तादृश इति भावः ॥ २७ ॥ भार्याहरणकाले किमप्यकुर्वन्रामः किमिदानीं करिष्यतीत्यत्राह—किंन्विति ॥ ते त्वया । सन्निधिरेव सान्निध्यं । विशालाक्षीत्यनेन सीताहरणं रामस्यात्यन्तासह्यमित्युच्यते । गृह्य गृहीत्वा । न बुध्यसे भाव्यनर्थमिति शेषः ॥ २८ ॥ न बुध्यस इत्युक्तं विवृणोति—महाबलमिति ॥ महात्मानं महाबुद्धिं ॥ २९ ॥ हरिसत्तमः इङ्गितप्रेक्षणादिज्ञ इति यावत् । चारिकः चारः । स्वार्थे ठक् । दूतो हि न वध्यः चारस्तु वध्य एवेति भावः ॥ ३० ॥ तुलितं तुलया मितं । परिच्छिद्य ज्ञातमिति यावत् । ॥ ३१ ॥ राज्ञा सुग्रीवेण ॥ ३२ ॥ शुकस्त्वित्यादि सार्धश्लोक एकान्वयः ॥ चण्डैः अत्यन्तकोपनैः । पितृसंबन्धकीर्तने दया भवेदिति दशरथात्मजमित्युक्तं । पक्षौ पूर्वलुप्तशेषौ ॥ ३३ ॥ यामित्यादिसार्धश्लोक एकान्वयः ॥ रात्रिशब्दोऽहोरात्रवचनः । यां च रात्रिं यस्मिंश्च दिवसे । मरिष्यामि । यस्मिंश्च जाये अजाये "अनित्यमागमशासनं" इत्यडभावः । जातोस्मि । एतस्मिन्नन्तरे जननमरणयोर्मध्यकाले मया यदशुभं कृतं तत्सर्वं निरपराधस्य मे घातयिता त्वं उपपद्येथाः प्राप्नुहि । चेदिति प्रसिद्ध्यर्थमव्ययं ॥ ३४ ॥ नाघातयत् वधाय्यवर्तयत् । मुच्यतां बन्धनान्मुच्यतां । निर्यापणं तु दक्षिणकूले ॥ ३५ ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने विंशः सर्गः॥२०॥

निहतप्रायोसि ॥ सार्धश्लोकएकान्वयी ॥ २५ ॥ **ति०** पिशाचादीनामेकैकंसमुदितंचत्रातारंनपश्यामि । अतएवनञ्पञ्चकंचरितार्थं ॥ २६ ॥ **रामानु०** चारश्चरणं । तदस्यास्तीतिचारीकः । " अतइनिठनौ " इतिठन् ॥ ३० ॥ तुलितं इयत्तयापरिच्छिन्नं ॥ ३१ ॥ इतिविंशःसर्गः ॥ २० ॥

[**पा०**] १ क. ग. ङ. छ.—ट. त्रातारंनानुपश्यामि. च. त्रातारंनाधिगच्छामि. २ ङ.—ट. अवधीस्त्वंजरावृद्धंगृध्रराजं जटायुषं. क.—घ. अवधीस्त्वंजरावृद्धंगृध्रराजमपक्षकं. ३ ङ. च. झ. ञ. ट. दुराधर्षंसुरैरपि. ४ ङ. झ. ञ. ट. महाप्राज्ञचारकः. ५ ङ. च. झ. ञ. ट. मनेनतवतिष्ठता. ६ ङ. च. झ. ञ. ट. व्याचुक्रोश.

एकविंशः सर्गः ॥ २१ ॥

रामेण समुद्रप्रसादनायतत्तीरेसमास्तृतदर्भेषु निजभुजोपधानेननियमाच्छयनम् ॥१॥ रामे दिवसत्रयमनवारतंकुशशयनेशयानेपि समुद्रेस्वशरीरमदर्शयति कोपाद्रामेण लक्ष्मणकराद्धनुरानयनेनकतिपयशरप्रक्षेपेण जलधिजलविक्षोभपूर्वकंजलधिजिघांसया शरान्तरसन्धानायधनुराकर्षणे लक्ष्मणेन सप्रतिषेधनंधनुरालंबनम् ॥ २ ॥

ततः सागरवेलायां दर्भानास्तीर्य राघवः ॥ अञ्जलिं प्राङ्मुखः कृत्वा प्रतिशिश्ये महोदधेः ॥
बाहुं भुजगभोगाभमुपधायारिसूदनः ॥ १ ॥
जातरूपमयैश्चैव भूषणैर्भूषितं पुरा ॥ २ ॥
वरकाञ्चनकेयूरमुक्ताप्रवरभूषणैः ॥ भुजैः परमनारीणामभिमृष्टमनेकधा ॥ ३ ॥
चन्दनागरुभिश्चैव पुरस्तादधिवासितम् ॥ बालसूर्यप्रतीकाशैश्चन्दनैरुपशोभितम् ॥ ४ ॥

एवं प्रासङ्गिकं परिसमाप्य एकान्तरितपूर्वसर्गान्तोदितकथाशेषमुपक्षिपति—तत इत्यादि सार्धश्लोक एकान्वयः ॥ ततः शुकमोक्षणानन्तरं । सागरवेलायां शर्कराप्रचुरायां । दर्भान् शिताग्रकुशान् । आस्तीर्य । राघवः सर्वशरण्यकुलप्रसूतः । महोदधेः अञ्जलिं कृत्वा । भुजगभोगाभं अहिकायवदतिमृदुलं बाहुं । उपधाय उपधानीकृत्य । प्राङ्मुखः सन् प्रतिशिश्ये । प्रतीत्यनेन तदानीं सागराभिमुखमपरः सागर इव स्थित इत्यवगम्यते । अरिसूदन इत्यनेन तादृशदशायामपि शत्रूणामधृष्यतया स्थित इत्युच्यते । अत्र विशेषणमहिम्ना अतिसुकुमारस्य कथमतिकठिनावनितलशयनं अखिलरक्षकस्य कथमन्यतो रक्षापेक्षेति वाल्मीकेः खेदो द्योत्यते ॥ १ ॥ अमुमेवार्थं प्रपञ्चयति—सार्धसप्तश्लोकैः । जातरूपमयैरित्यादि ॥ जातरूपमयैः चकाराद्रत्नमयैः । एवकारोऽयोगव्यवच्छेदार्थः । पुरा अयोध्यावासकाले । अवतारात्पूर्वं वा ॥ २ ॥ वरकाञ्चनेति परमनारीभुजविशेषणं । भुजैः हस्तैः । तदेकदेशलक्षणा । परमनारीणां सैरन्ध्रिकाणां । अनेकधा स्नानालङ्करणादिषु चन्दनागरुकुङ्कुमप्रभृतिभिः बहुप्रकारेण । अभिमृष्टं संमृष्टं ॥ ३ ॥ अधिवासितं सञ्जातगन्धं । बालसूर्येति विशेषणात् द्वितीयचन्दनशब्दो रक्तचन्दनपरः । तच्च कुङ्कुम । " कुङ्कुमं घुसृणं प्रोक्तं लोहितं रक्तचन्दनं " इतिहलायुधः । आदौ चन्दनागरुभ्यां चर्चितं अथ कुङ्कुमैरिति बोध्यं । कश्चिदाह । परमनारीणामित्यनेन सीताव्यतिरिक्ताश्च भार्याः सन्तीति तन्न । नहि बालकाण्डे कुत्रचिद्रामस्य दारान्तरोद्वाहः प्रतिपाद्यते । प्रत्युत " रामस्तु सीतया सार्धं विजहार बहूनृतून् । मनस्वी तद्गतस्तस्या नित्यं हृदि समर्पितः " इति सीतया सह निरन्तरभोग एवोच्यते । अतएव सीताप्याह " समा द्वादश तत्राहं राघवस्य निवेशने । भुञ्जाना मानुषान्भोगान्सर्वकामसमृद्धिनी " इत्यत्यन्तसंयोगे द्वितीयया निरन्तरभोगं । तत्कुतोस्य दारान्तरावकाशः । ननु रामस्य दयिता भार्येति विशेषणाद्रोहिणी यथेति ताराणामन्यतमया रोहिण्या दृष्टान्तीकरणाच्च भार्यान्तरं तस्य व्यज्यत इति चेन्न । दयितो भ्रातुरितिवदनुगमनानर्हत्वाय तथा विशेषितत्वात् किं भरतो रामस्य न दयितः । " तामेवेक्ष्वाकुनाथस्य भरतस्य कथां कुरु । न सर्वे भ्रातरस्तात भवन्ति भरतोपमाः " इत्यादिविरोधात् । रामवाल-

स० सागरवेलायां समुद्रतीरे । महोदधेःअञ्जलिंकृत्वा बद्ध्वा । प्राङ्मुखःसन्प्रातांशिश्ये । शयनप्रातांनधिकृतवान् ॥ प्रतिना निर्दोषस्यरामस्यस्वाभाविकीनिद्रानवक्तुंशक्येतितत्प्रतिनिधिभूतंचक्षुर्निमीलनमात्रमितिसूचयति ॥ १ ॥ स० परमनारीणां कौसल्यादीनां । परमाश्चते अरयोनभवन्तीतिनारयोब्रह्माद्याभक्ताः तेषां । अथवा खदत्तपारम्योवरुणस्तस्यनार्योगङ्गाद्याः तासांबाहुभिस्तरङ्गैः । स्वेष्ववतारेषु रमायाअप्यवतारबाहुविश्येन नारीणामितिबहुवचनबोधितबहुविधता संभवतीति नैककामिनीव्रततोपहतिरितिज्ञेयं ॥ शि० परमनारीणां समवेतजनकराजवेश्मस्थाङ्गनानां । भुजैः अनेकधा बहुवारं । पुरस्तात् विवाहसमये । अभिमृष्टं श्रमापनयनहेतुकनिपीडनादौस्पृष्टं । किंच नारीभुजयोःपूज्यत्वाद्बहुवचनमिति नारीशब्देनसीतैवग्राह्या । किंच अनारीणां नारीसंसर्गरहितानांनैष्ठिकानांहनुमदादीनामित्यर्थः । भुजैरभिमृष्टं । सख्यभावनयास्पृष्टं । अतएवपरमं तेषांतृप्तिकारकं । किंच यत् अरीणांभुजैर्नाभिमृष्टं तत् परं अत्युत्कृष्टं अपालकं अज्ञातअनधातुप्रकृतिकक्विबन्तप्रकृतिकामन्तंसामान्येनपुंसकं । दीर्घाभ-

[पा०] १ ङ. च. छ. झ. ञ. ट. मणिकाञ्चन. २ ङ. झ. ट. दभिसेवितं. ३ ङ. छ.—ट. प्रकाशैश्च.

शयने चोत्तमाङ्गेन सीतायाः शोभितं पुरा ॥ तक्षकस्येव संभोगं गङ्गाजलनिषेवितम् ॥ ५ ॥
संयुगे युगसंकाशं शत्रूणां शोकवर्धनम् ॥ सुहृदानन्दनं[1] दीर्घं सागरान्तव्यपाश्रयम् ॥ ६ ॥
अस्यता च पुनः सव्यं ज्याघातविगतत्वचम् ॥ दक्षिणो दक्षिणं बाहुं महापरिघसन्निभम् ॥ ७ ॥

भ्यातिशयेन सौकुमार्यातिशयेन च राजगृह एवावस्थाय दिव्यसुखानुभवयोग्यावपि सीतालक्ष्मणौ रामनुगताविति हि तत्र मुनिहृदयं । रोहिणी चेयमन्या प्रसिद्धाया नित्यानुगमनासंभवात् । ननु च "हृष्टाः खलु भविष्यन्ति रामस्य परमाः स्त्रियः । अप्रहृष्टा भविष्यन्ति स्नुषास्ते भरतक्षये" इति स्नुषासाहचर्याद्रामस्य स्त्रियः पत्न्यो बह्वयः सन्तीति गम्यते । सुन्दरकाण्डेपि "स्त्रीभिस्तु मन्ये विपुलेक्षणाभिस्त्वं रंस्यसे वीतभयः कृतार्थः" इति सीतया चोच्यते । अत्रापि भुजैः परमनारीणामभिमृष्टमनेकधेत्युक्तं । तस्माद्बह्वयः पत्न्यो रामस्य सन्तीत्यवगम्यते । मैवं । रामस्य परमाः स्त्रिय इति रामसंबन्धिन्यः कौसल्यासीतातद्दासीप्रभृतय उच्यन्ते । पूजायां बहुवचनेन सीतैवोच्यते । ते स्नुषा इतिवत् । न हि भरतस्यानेकाः स्त्रियः सन्तीत्यत्र प्रमाणमस्ति । त्वं रंस्यस इत्यत्रापि लौकिकरीतिमनुसृत्य सीतोक्तवती । परमनारीणामित्यत्रापि अलंकर्त्रीणामित्यर्थ उक्तः । यद्वा अभिमृष्टं अभिमर्शनार्हं । आशंसायां क्तः । परमनार्यः श्रीभूमिनीलाः । आत्मानं मानुषं राम एव हि मन्यते ऋषिस्तु रामस्य विष्णुत्वं व्यक्तीकरोत्येव । जज्ञे विष्णुः सनातन इत्याह । ननु राजसूयाश्वमेधाद्यनुष्ठानान्यथानुपपत्त्या रामस्यानेकपत्न्यः कल्प्यन्ते । कामं कल्प्यन्तां न ता इह संबध्यन्ते । तासां केवलं धर्मार्थं वृत्तानां परिग्रष्टुं रन्तुं चायोग्यत्वात् । वस्तुतो न ताः कल्प्याः सीतयैव प्रतिमया यज्ञे पत्नीकार्यनिर्वाहस्योत्तरकाण्डे दर्शितत्वात् । न च पत्नीप्रतिनिधिभावो न भट्टाचार्येण कथ्यत इति वाच्यं । "न हि वचनविरोधे न्यायः प्रभवति" इति न्यायात् । वचनं च हेमाद्रिस्मृतिनिबन्धने दर्शितं "यदि दुष्टभार्यो दूरभार्यो वा स्यात्तदा दर्भपुञ्जीलं तत्स्थाने निधायाग्निमाधाय कुर्यात्" इति । धर्मसंस्थापनार्थं प्रवृत्तस्य रामस्याचारादपरं किं नाम मानमपेक्षणीयं । वस्तुत आचार एव प्रथमं प्रमाणं श्रुत्या पूर्वाचारं प्रदर्श्यैव कर्मविधानात् । आपस्तम्बोप्यतएव धर्मज्ञसमयः प्रमाणं वेदाश्चेत्याचारमेव प्रथमं प्रमाणमाह । अतएव स्मरन्ति च स्मर्तारः "श्रुतिर्विभिन्ना स्मृतयो विभिन्ना न चानृषेर्दर्शनमस्ति किंचित् । धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः" इति ॥ तस्मात् "चातुर्वर्ण्यं च लोकेस्मिन्स्वे स्वे धर्मे नियोक्ष्यति" इत्युक्तरामाचार एव समीचीनं प्रमाणं तद्विरुद्धाश्च न्याया न प्रभवन्ति । यद्यपि राजसूयाश्वमेधानां महिषीवद्वावातापरिवृत्तिभ्यामपि भवितव्यं । तथापि तल्लोपे तत्कार्याननुष्ठानमेव । तस्य कर्मवैकल्याहेतुत्वात् । यथा पङ्ग्वन्धादेर्यज्ञे विष्णुक्रमाज्यावेक्षणादिलोपेन न यज्ञलोपः । तत्तन्मन्त्रोच्चारणस्यैव कार्यत्वात् । तस्मात्केवलन्यायसञ्चारेणापन्यायमार्गो नानुसरणीयः । किंतु सर्वाचारप्रवर्तकसर्वकर्मधुरन्धरभगवदवताररामचन्द्राचार एव विवेकिभिरनुवर्तनीयइति सर्वमवदातं ॥ ४ ॥ शयने हंसतूलिकामये तल्पे । गङ्गानिषेवितं गङ्गाजले वर्तमानं । तक्षकस्य संभोगं कायमिव स्थितं । सीताया उत्तमाङ्गेन शोभितं चेति योजना ॥ ५ ॥ संयुगे युद्धे । युगसंकाशं गोपुरार्गलवत्प्रतिभटनिवारकं अतएव शत्रूणां शोकवर्धनं । सागरोन्ते यस्यासौ सागरान्तः भूमण्डलं । तस्य व्यपाश्रयं आलम्बनभूतं ॥ ६ ॥ सव्यं अप्रदक्षिणं यथाभवति तथा अस्यता इषून् क्षिपता । स्वेनैव हेतुना ज्याघातेन करणेन विगतत्वचं ज्याकिणाङ्कितमित्यर्थः । महापरिघसन्निभं । उत्तमपरिघाख्यायुधवत् दृढं । गोसहस्रप्रदातारं करणे कर्तृत्वोपचारः । महद्भुजं भुजोत्तमं तथैव प्रायशः पाठः । आत्वाभाव आर्षः । एवंभूत

वस्तु संज्ञापूर्वकविधेरनित्यत्वात् । पुरस्तात् पूर्वचन्दनादिभिरभिसेवितं ॥ ३—४ ॥ स० अत्रबाहुंभुजगभोगाभमित्युपक्रम्यगोसहस्रप्रदातारमित्येतच्छ्लोकपर्यन्तंप्रतिश्लोकंविशेष्येणबाह्वादिशब्देनभवितव्यमितिदर्शयितुं बाहुंभुजगभोगाभं दक्षिणंबाहुं भुजोत्तम

[पा०] १ घ. ङ. च. झ. ञ. ट. सुहृदांनन्दनं.

गोसहस्रप्रदातारमुपधाय महद्भुजम् ॥ अद्य मे मरणं वाऽथ तरणं सागरस्य वा ॥ ८ ॥
इति रामो मतिं कृत्वा महाबाहुर्महोदधिम् ॥ अधिशिश्ये स विधिवत्प्रयतो नियतो मुनिः ॥ ९ ॥
तस्य रामस्य सुप्तस्य कुशास्तीर्णे महीतले ॥ नियमादप्रमत्तस्य निशास्तिस्रोतिचक्रमुः ॥ १० ॥
स त्रिरात्रोषितस्तत्र नयज्ञो धर्मवत्सलः ॥ उपासत तदा रामः सागरं सरितां पतिम् ॥ ११ ॥
न च दर्शयते मन्दस्तदा रामस्य सागरः ॥ प्रयतेनापि रामेण यथार्हमभिपूजितः ॥ १२ ॥
समुद्रस्य ततः क्रुद्धो रामो रक्तान्तलोचनः ॥ समीपस्थमुवाचेदं लक्ष्मणं शुभलक्षणम् ॥ १३ ॥
अवलेपः समुद्रस्य न दर्शयति यत्स्वयम् ॥ १४ ॥
प्रशमश्च क्षमा चैव आर्जवं प्रियवादिता ॥ असामर्थ्यं फलन्त्येते निर्गुणेषु सतां गुणाः ॥ १५ ॥
आत्मप्रशंसिनं दुष्टं धृष्टं विपरिधावकम् ॥ सर्वत्रोत्सृष्टदण्डं च लोकः सत्कुरुते नरम् ॥ १६ ॥
न साम्ना शक्यते कीर्तिर्न साम्ना शक्यते यशः ॥ प्राप्तुं लक्ष्मण लोकेऽस्मिञ्जयो वा रणमूर्धनि ॥१७॥
अद्य मद्बाणनिर्भिन्नैर्मकरैर्मकरालयम् ॥ निरुद्धतोऽयं सौमित्रे प्लवद्भिः पश्य सर्वतः ॥ १८ ॥
महाभोगानि मत्स्यानां करिणां च करानिह ॥ भोगिनां पश्य नागानां मया छिन्नानि लक्ष्मण ॥१९॥

दक्षिणं बाहुमुपधाय दक्षिणः दाक्षिण्यवान् ॥७–८॥ महाबाहुः सर्वाभयप्रदः । रामः अद्य मे तरणं वा सागरस्य मरणं वा भवत्विति मतिं कृत्वा । विधिवत् शास्त्रोक्तरीत्या । प्रयतः कायिकनियमयुक्तः । नियतः वाचिकनियमवान् । मुनिः मानसनियमोपेतश्चसन् । महोदधिमुद्दिश्याधिशिश्ये इति योजना॥९॥ सुप्तस्य शयानस्य । नियमादप्रमत्तस्य अतएवाप्रच्युतनियमस्येत्यर्थः । तिस्रो निशाः त्रीण्यहानि ॥ १० ॥ तिसृष्वपि रात्रिषूपासनमविच्छिन्नमित्याह–स इति ॥ त्रिरात्रोषितः त्रिरात्रं शयानः । तत्र समुद्रतीरे । सर्वशक्तेःकुत एवं निर्बन्ध इत्याशङ्क्य धर्मप्रवर्तनार्थमित्याशयेनाह—नयज्ञो धर्मवत्सल इति । शरणागतधर्मे प्रीतिमान् । सरितां पतिं स्वगोष्ठ्यां कान्तापुरुषकारमुखेन समाश्रयणदर्शनात्स्वयमपि तथैवाचरदिति भावः ॥ ११ ॥ नच दर्शयते आत्मानमिति शेषः । मन्दः अज्ञः । ननु रामेण सम्यक्कृता शरणागतिः कुतो नफलिता । उच्यते । अनधिकारिणा कृतत्वात् ब्राह्मणकृतराजसूयवत् । न च शरणागतावधिकारी रामः । अकिंचनो हि तत्राधिकारी ॥ १२ ॥ समुद्रस्य समुद्रविषये । संबन्धसामान्ये षष्ठी । रक्तान्ते लोचने यस्य सः रक्तान्तलोचनः । अनेन मन्दकोपत्वमुक्तं । शुभलक्षणं स्वस्य हृदयकोपमवगम्य कृतमन्दहासं ॥ १३ ॥ स्वयं न दर्शयतीति यत् अयं समुद्रस्यावलेप इत्यन्वयः ॥ १४ ॥ प्रशमः अक्रोधता । क्षमा अपराधसहिष्णुता । आर्जवं परचित्तानुसारित्वं । अकौटिल्यं वा । प्रियभाषिता प्रियवादित्वमित्येते गुणाः निर्गुणेषु असामर्थ्यं फलन्ति । असमर्थत्वबुद्धिं जनयन्तीत्यर्थः ॥१५॥ कं पुनः समर्थं निर्गुणो मन्यते तत्राह—आत्मेति ॥ आत्मप्रशंसिनं आत्मस्तुतिपरं । दुष्टं वञ्चकं । धृष्टं निर्दयमित्यर्थः । विपरिधावकं सर्वपलायनकरं । सर्वत्र सगुणेषु निर्गुणेषु च । उत्सृष्टदण्डं क्षिप्तदण्डं । लोकः अज्ञो जनः ॥ १६ ॥ बलकृता प्रथा यशः । पराक्रमकृता कीर्तिः । जयो वेत्यत्रापि न साम्ना प्राप्तुं शक्यत इत्यनुषञ्जनीयं ॥ १७ ॥ मद्बाणनिर्भिन्नैः अतएव जलोपरि प्लवद्भिः मकरैः । निरुद्धतोयं व्याप्ततोयं ॥ १८ ॥ भोगिनां महाकायानां । भूम्नि मतुप् । " भोगः सुखे रूयादिभृतावहेश्च फणकाययोः " इत्यमरः । नागानां सर्पाणां । महाभोगानि महाशरीराणि । क्लीबत्वमार्षं । करिणां मत्स्यानां

मितित्रिवारमुक्तिः ॥ ७ ॥ ति० अत्रत्रिदिनमुपासनयाप्रसन्नस्यसागरस्यप्रसादेनमेससैन्यस्यतरणंवापिस्यात् । ततःपरमुपेक्षणे सागरस्यमत्तोमरणमेवस्यादितिधृतिंकृत्वा निश्चिन्वेतियोजना ॥ ९ ॥ ति० अभिजग्मतुः अभिजग्मुः ॥ १० ॥

[पा०] १ च. छ. ज. ञ. भुजोत्तमं. २ ग. घ. ङ. झ. ट. धृतिं. ३ क. ग. घ. ङ. ञ.—ट. शिश्येच. ४ ङ. झ. ट. प्रयतोत्रस्थितो. ५ ङ. झ. स्तिस्रोभिजग्मतुः. ६ ङ. च. झ. ञ. ट. दर्शयतेरूपंमन्दो. च. दर्शयतेत्मानंतदा. छ. दर्शयतेरूपंतदा. ७ क. ङ. च. छ. झ. ञ. ट. असामर्थ्यफलाह्येते. ८ ङ. च. छ. झ. ञ. निर्भग्नैः.

सशङ्खशुक्तिकाजालं समीनमकरं शरैः ॥ अद्य युद्धेन महता समुद्रं परिशोषये ॥ २० ॥
क्षमया हि समायुक्तं मामयं मकरालयः ॥ असमर्थं विजानाति धिक् क्षमामीदृशे जने ॥ २१ ॥
न दर्शयति साम्ना मे सागरो रूपमात्मनः ॥ २२ ॥
चापमानय सौमित्रे शरांश्चाशीविषोपमान् ॥ सागरं शोषयिष्यामि पन्द्यां यान्तु प्लवङ्गमाः ॥२३॥
अद्याक्षोभ्यमपि क्रुद्धः क्षोभयिष्यामि सागरम् ॥ २४ ॥
वेलासु कृतमर्यादं सहसोर्मिसमाकुलम् ॥ निर्मर्यादं करिष्यामि सायकैर्वरुणालयम् ॥ २५ ॥
महार्णवं क्षोभयिष्ये महादानवसंकुलम् ॥ २६ ॥
एवमुक्त्वा धनुष्पाणिः क्रोधविस्फारितेक्षणः ॥ बभूव रामो दुर्धर्षो युगान्ताग्निरिव ज्वलन् ॥२७॥
संपीड्य च धनुर्घोरं कम्पयित्वा शरैर्जगत् ॥ मुमोच विशिखानुग्रान्वज्रानिव शतक्रतुः ॥ २८ ॥

गजाकारमत्स्यानां । छिन्नानीति लिङ्गव्यत्ययेनानुषङ्गः । करान् शुण्डादण्डान् । "मत्स्यविशेषो मकरः करिमकरो भवति तद्विशेषश्च" इति हलायुधः ॥ १९—२० ॥ क्षमैकसाराणां भवतामीदृशी फणितिरनुचितेत्याशङ्क्याह—क्षमयेति ॥ सागरशोषणेप्रवृत्तोप्येतावत्पर्यन्तं क्षमया गृहीतचरणोस्मि । "सुप्तप्रमत्तकुपितानां भावज्ञानं दृष्टं" इति न्यायेन स्वरूपं प्रकटयंति—मामिति । मां इतरनैरपेक्ष्येण स्थितं । असमर्थं विजानाति कार्यकरणाक्षमं मन्यते । विजानाति मकरालयः । अयोध्याधिपतिः कोसलाधिपतिरिवस्वमात्मानं मन्यते । कतिपयमीनग्रहणगर्त इति न जानाति । धिक् क्षमां इतःपरं क्षमां नाङ्गीकुर्मः । विनियोगकाले हि क्षमा स्वीकार्या । अद्य क्रोध एवाङ्गीकर्तव्यः । इक्ष्वाकूणां कदाचिदपि क्षमा किं त्याज्येत्यत्राह—ईदृशे जन इति ॥ ईदृशे जने प्राप्तरक्षस्सहवासदोषे ॥ २१ ॥ न दर्शयतीत्यर्धमेकं वाक्यं ॥ २२ ॥ अपि कदाचिदात्मानं दर्शयेदिति करुणया समुद्रं वाचा निर्भर्त्स्य कर्मणापि निर्भर्त्सयितुमुपक्रमते—चापमानयेति ॥ एव विलम्ब्य करणं क्रमेण निर्भर्त्स्य कार्यं कारयितुं । अन्यथा सद्य एव शोषयेत् । चापमानय निर्गुणं वशीकर्तुं सगुणमानयेत्याशयः । चापमानय अस्यानम्रत्वं निवर्तयितुं नम्रं चापमानय । समुद्रस्य शेषशय्यात्वेन तस्मिन्किंचित्सौहार्दवता लक्ष्मणेन क्षणं विलम्बः कृतः । अत आह—सौमित्र इति । सुमित्रावचनमेव कर्तव्यं ज्येष्ठवचनं तु न कर्तव्यमिति नियमोस्ति । यद्वा सौमित्रे रामे प्रमादं माकार्षीरिति मात्रोपदिष्टं मा विस्मार्षीः । अथ चापमात्रमानीतं तदाह—शरांश्चेति । लीलाप्रयोगार्हेषु केषुचिदानीतेष्वाह—आशीविषोपमानिति । दृष्टिविषाः सर्पा आशीविषा इत्युच्यन्ते । किमर्थं शरानयनमिति विलम्ब्य सौमित्रिणा पृष्ट आह—सागरमिति । एकेनैव दग्धुं सामर्थ्येपि शरानित्युक्तिस्तत्संबन्धेन सप्तसागरानपि शोषयितुमिच्छया । कोपातिशयेन स्वबलमज्ञात्वा वा तादृशोक्तिः । शोषयिष्यामीति वदतः किं शरेणेति न शङ्कनीयं । छिन्नं भिन्नं शरैर्दग्धमिति रामशराणां दाहकत्वसंभवात् । अन्तरेणापि चतुर्थभूतजगन्निर्वाहं करिष्यामीति भावः । सागरं । यद्ययं ज्ञातिविरोधमाचरति तर्हि वयमपि ज्ञातिकृत्यं कुर्म इतिभावः । सागरं शोषयिष्यामि अनेकसहस्रखातमेक एव हरिष्यामि । किं तत इत्यत्राह—पद्भ्यामिति । एकैकस्य पदद्वयं गमनसाधनमिति द्विवचनं । वानराणां हि द्वावेव पादौ द्वौ हस्तौ ग्रहणभक्षणादीनां ताभ्यामेव दर्शनात् । अनेन कृतस्य कार्यविच्छेदस्यानुरूपममुं वानरपादाभ्यामेव दर्शयिष्यामीतिभावः ॥ २३ ॥ पक्षान्तरमाह—अद्येति ॥ अर्धमेकं वाक्यं ॥ २४ ॥ पुनः पक्षान्तरमेवाह—वेलास्विति ॥ वेलासु चतुर्षु तीरेषु । कृतमर्यादं कृतव्यवस्थं । कदाचिदपि वेलामनतिवर्तमानमित्यर्थः । निर्मर्यादं करिष्यामि अव्यवस्थं करिष्यामि । भूतले प्लावयिष्यामीत्यर्थः ॥ २५ ॥ समुद्रेण चिरपरिपोषिता दानवादय एतं रक्षिष्यन्तीत्यत्राह—महार्णवमिति ॥ दानवैः सह क्षोभयिष्यामीत्यर्थः ॥२६॥ विस्फारितेक्षणः विवार्ततनयनः ॥ २७ ॥ संपीड्य दृढमुष्टिना मध्यमवलम्ब्य । कम्पयित्वा भयकम्पितं

[पा०] १ ङ. ञ. तथा.

ते ज्वलन्तो महावेगास्तेजसा सायकोत्तमाः ॥ प्रविशन्ति समुद्रस्य सलिलं त्रस्तपन्नगम् ॥ २९ ॥
तोयवेगः समुद्रस्य सनक्रमकरो महान् ॥ संबभूव महाघोरः समारुतरवस्तदा ॥ ३० ॥
महोर्मिमालाविततः शङ्खशुक्तिसमावृतः ॥ सधूमपरिवृत्तोर्मिः सहसाऽऽसीन्महोदधिः ॥ ३१ ॥
व्यथिताः पन्नगाश्चासन्दीप्तास्या दीप्तलोचनाः ॥ दानवाश्च महावीर्याः पातालतलवासिनः ॥ ३२ ॥
ऊर्मयः सिन्धुराजस्य सनक्रमकरास्तदा ॥ विन्ध्यमन्दरसंकाशाः समुत्पेतुः सहस्रशः ॥ ३३ ॥
आघूर्णिततरङ्गौघः संभ्रान्तोरगराक्षसः ॥ उद्वर्तितमहाग्राहः संवृत्तः सलिलाशयः ॥ ३४ ॥

ततस्तु तं राघवमुग्रवेगं प्रकर्षमाणं धनुरप्रमेयम् ॥
सौमित्रिरुत्पत्य समुच्छ्वसन्तं मामेति चोक्त्वा धनुरालालम्बे ॥ ३५ ॥
[एतद्विनापि ह्युदधेस्तवाद्य संपत्स्यते वीरतमस्य कार्यम् ॥
भवद्विधाः क्रोधवशं न यान्ति दीर्घं भवान्पश्यतु साधुवृत्तम् ॥ ३६ ॥
अन्तर्हितैश्चापि तथाऽन्तरिक्षे ब्रह्मर्षिभिश्चैव सुरर्षिभिश्च ॥
शब्दः कृतः कष्टमिति ब्रुवद्भिर्मामेति चोक्त्वा महता स्वरेण ॥ ३७ ॥]

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकविंशः सर्गः ॥ २१ ॥

कृत्वा । जगत् जगत्स्थजन्तून् । वज्रानित्यभूतोपमा ॥ २८ ॥ तेजसा ज्वलन्त इत्यन्वयः । प्रविशन्ति प्राविशन् । त्रस्तपन्नगमिति क्रियाविशेषणं ॥ २९ ॥ तोयवेगः तरङ्गविततिः । मारुतरवः वातजन्यरवः । समारुतरवः वातसंघट्टनजन्यरवसहित इत्यर्थः ॥ ३० ॥ तीरे महोर्मिमालाविततः । अन्तस्तरङ्गजालाकृष्टशङ्ख-शुक्तिसमावृतः । सज्वालशरप्रवेशेन सधूमः । मध्ये शराग्निशोषणेन परिवृत्तोर्मिश्चासीदित्यन्वयः ॥ ३१ ॥ व्यथिता इति । आपातालं शराः प्रविष्टा इति भावः ॥ ३२ ॥ तात्कालिकतरङ्गौन्नत्यं वर्णयति—ऊर्मय इति ॥ ३३ ॥ उक्तानुवादेन विशेषान्तरमाह—आघूर्णीतेति ॥ आघूर्णीतसंभ्रान्तोद्वर्तितपदान्येकार्थानि ॥ ३४ ॥ ततस्त्विति । तुशब्देन पूर्वसंधानाद्वैषम्यमुक्तं । अप्रमेयं अपरिच्छेद्यवैभवं । प्रकर्षमाणं । अमोघशरसन्धानायेति भावः । समुच्छ्वसन्तं कोपेनेति शेषः । तं राघवं । उत्पत्य झटित्यागत्य । मामेत्युक्त्वा एतादृशं धनुराकर्षणं मा कुर्वित्युक्त्वा । भयातिशयाद्वीप्सा । अनिवर्तमाने तस्मिन् धनुरालालम्बे ॥ ३५—३७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकविंशः सर्गः ॥ २१ ॥

शि० उदधेः एतत् विनाशनंविनापि । वीरतमस्यतव कार्यं सन्तरणं । संपत्स्यते सेत्स्यति । ननु प्राप्तक्रोधस्यकथंनिष्फलत्वमित्यतआह—भवद्विधाः भवत्सदृशाः । क्रोधवशंनयान्ति । अतः दीर्घं सार्वकालिकं । साधुवृत्तं क्रोधादिरहिततयास्वस्थितिं । भवान्पश्यतु संस्मरतु ॥ ३६ ॥ शि० निवारणेस्वस्यातच्चयंनिवारयन्नाह—**अन्तरिति** । अन्तरिक्षे अन्तर्हितैः तिरोहिततयासंस्थितैः । महतास्वरेण कष्टमितिब्रुवद्भिर्ब्रह्मर्षिप्रभृतिः मामा एवंमाभूदित्यर्थः । इत्युक्त्वा शब्दःकृतः । किंच एको माशब्दः अस्मच्छब्दप्रकृतिकद्वितीयान्तः । एतेन तद्बोधनायैवमयानिवार्यसइतिसूचितं । तेन लक्ष्मणस्यापिकिंचिद्रयंव्यक्तम् ॥ ३७ ॥ इत्येकविंशः सर्गः ॥ २१ ॥

[पा०] १ क. घ. ज. दृप्तपन्नगं. २ ङ. च. छ. झ. समीनमकरो. ३ ङ. झ. महोर्मिजालचलितः. ४ क. ग. घ. ङ. झ. शङ्खजालसमावृतः. ५ क. घ. च. ञ. समन्ततः. ६ ङ. च. झ. ञ. सघोषोवरुणालयः. ७ ङ. च. झ. ञ. ट. विनिश्वसन्तं. ८ इदंश्लोकद्वयं ङ. च. झ. ट. पाठेषुदृश्यते

द्वाविंशः सर्गः ॥ २२ ॥

रामेण सप्रतिज्ञानंसागरशोषणायब्रह्मास्त्राभिमन्त्रितशरसन्धानपूर्वकंधनुराकर्षणे घोरतरोत्पातप्रादुर्भावेभीतेनसागरेण गङ्गादिभिःसह नानाभूषणभूषितनिजरूपप्रकटनपूर्वकंसमुद्रमध्यादुद्गमनेनश्रीराममेत्य साञ्जलिबन्धंक्षमापणम् ॥ १ ॥ रामेण धनुस्संहितनिजशरस्यामोघत्वोक्त्यालक्ष्यप्रदर्शनंचोदितेनसागरेण स्वान्तर्वर्तिमरुकान्तारवासिपापतराभीरेषुशरमोक्षणचोदने शराग्निनातद्वधपूर्वकंतत्प्रदेशस्यमरुत्वदोषनिरसनम् ॥ २ ॥ सागरेणरामंप्रति कपिकुलमध्यवर्तिनलगुणप्रशंसनपूर्वकं तत्करेणसेतुरचनाचोदनेनपुनरन्तर्धानम् ॥ ३ ॥ नलेनरामचोदनया कपिगणाहृतनानागिरितरुभिरद्भुतसेतुरचना ॥ ४ ॥ हनुमदङ्गदांससमारूढाभ्यांराघवाभ्यां सुग्रीवादिभिस्सहसेतुमार्गेण परपारमेत्यतत्रसेनासंनिवेशनम् ॥ ५ ॥

अथोवाच रघुश्रेष्ठः सागरं दारुणं वचः ॥ [1]अद्य त्वां शोषयिष्यामि सपातालं महार्णव ॥ १ ॥
शरनिर्[2]दग्धतोयस्य परिशुष्कस्य सागर ॥ मया शो[3]षितसत्त्वस्य पांसुरुत्पद्यते महान् ॥ २ ॥
मत्कार्मुकविसृष्टेन शरवर्षेण सागर ॥ [4]पारं तेऽद्य गमिष्यन्ति पद्भिरेव प्लवङ्गमाः ॥ ३ ॥
विचिन्वन्नाभिजानासि पौरुषं वाऽपि विक्रमम् ॥ दानवालय संतापं मत्तो [5]नाधिगमिष्यसि ॥ ४ ॥
ब्राह्मेणास्त्रेण संयोज्य ब्रह्मदण्डनिभं शरम् ॥ संयोज्य धनुषि श्रेष्ठे विचकर्ष महाबलः ॥ ५ ॥
तस्मिन्विकृष्टे सहसा राघवेण शरासने ॥ रोदसी संपफालेव पर्वताश्च चकम्पिरे ॥ ६ ॥

प्रथमं वानरसेनातरणाय सागरं शरणं गत्वा तस्मिन्ननागते चापमानयेति वाचा भीषयित्वा तथाप्यनाविष्कृतनिजरूपं तं शरैः प्रक्षोभ्य तावताप्यनागतस्य तस्य भीतिमुत्पादयितुं ब्रह्मास्त्रसन्धानायोपक्रमत इत्याह—अथेत्यादिना ॥ सपातालं पातालपर्यन्तमित्यर्थः ॥ १ ॥ शरनिर्दग्धतोयस्य निर्जलस्येत्यर्थः । परिशुष्कस्य भूम्यन्तर्गतजलशून्यस्य । शोषितसत्त्वस्य दग्धसत्त्वस्येत्यर्थः । ते महान् पांसुः अतिसूक्ष्मो रेणुः । उत्पद्यते । वर्तमानसामीप्ये वर्तमानप्रयोगः । महावर्षेपि पुनर्यथा जललवोपि न तिष्ठति तथा करिष्यामीतिभावः ॥ २ ॥ ननु सकलजलशोषणेन पातालमात्रपरिशोषात्तत्र गमनासंभवादाकाशेन गन्तव्यं ततो वरमिदानीं तथागमनं किं कोपेनेत्यत्राह—मत्कार्मुकेति ॥ शरवर्षेण शरजालेन सेतुस्थानीयेन । सेतुबन्धादिक्लेशो मे न भवतीतिभावः ॥ ३ ॥ पौरुषं बलं । विक्रमं पराक्रमं च । विचिन्वन् विशेषेण पर्यालोचयितुं । नाभिजानासि । "लक्षणहेत्वोः—" इति शतृप्रत्ययः । इदमज्ञानं सहवासकृतमित्याशयेन दानवालयेति संबोधनं । मत्तो भाविनं संतापं च नाधिगमिष्यसि न ज्ञास्यसि । मत्पराक्रममजानन् मत्तो भाविब्रह्मास्त्रपीडामपि न ज्ञास्यस्येवेतिभावः ॥ ४ ॥ ब्रह्मदण्डः ब्रह्मशापः । तद्वद्मोघमित्यर्थः । यद्वा ब्रह्मदण्डः केतुविशेषः । तथोक्तं नारदसंहितायां—"पितामहात्सजःक्रूरस्त्रिवर्णः शिखरान्वितः । ब्रह्मदण्डाह्वयः केतुः सर्वभूतविनाशनः" इति ॥ ब्राह्मेणास्त्रेण ब्रह्मास्त्रमन्त्रेण । संयोज्य अभिमन्त्र्य । तद्धनुर्विचकर्ष ॥ ५ ॥ अथास्त्रसन्धानस्य मरुकान्तारवर्तिनां युगपद्विनाशहेतुत्वात्तत्काले तदुचितंमहोत्पातान् दर्शयति—तस्मिन्नित्यादिना ॥ शरसन्धानकालिकं लोकस्यभयं दर्शयतीत्यप्याहुः । रोदसी द्यावापृथिव्यौ । संपफालेव भिन्ने इव । एकवचनमार्षं । "द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च

तो० विक्रमं जलोपरिशरसेतुबन्धनजलस्तंभनतच्छोषणादिशक्तिरूपं । विचिन्वन् विशेषेणपर्यालोचयन् । नाभिजानासि । पौरुषं शास्त्रवश्यत्वसौजन्यनिबन्धनंशरणवरणरूपंपुरुषकृत्यं । नाभिजानासि मत्तोभाविनंसन्तापंनावगमिष्यसि नज्ञास्यसि । सर्वशक्तेरपि धर्मशीलतयाशरणागतस्यमे फलप्रदानाभावे महाननर्थोभविष्यतीत्यमुमर्थंनजानासीत्यर्थः ॥ ४ ॥ स० रोदसी द्यावापृथिव्यौ । संपफाल विशीर्णं । एकवचनमार्षमितिनागोजिभट्टादयः । वस्तुतस्तु "रोदश्चरोदसीचापि दिविभूम्नोपृथक्पृथक् । सहप्रयोगेप्यनयोरोदःस्यादपिरोदसी" इतिविश्वोक्तेःरोदसी तन्नन्यायेनद्यौःपृथिवीच । पकाल विशीर्णेत्यर्थः । रोदसीत्यव्ययमप्यस्तीतिभानुदी-

[पा०] १ ङ. छ. झ. ट. अद्याहं. २ च. छ. निर्दग्धसत्वस्य. ३ ङ. झ. ञ. ट. निहतसत्वस्य. च. छ. शोषिततोयस्य. ४ ङ. झ. ट. परंतीरं. ५ क.—ट. नापिविक्रमं. ६ क.—घ. ङ. झ. ट. नामगमिष्यसि. च. छ. ञ. नावगमिष्यसि.

तमश्च लोकमावव्रे दिशश्च न चकाशिरे ॥ परिचुक्षुभिरे चाशु सरांसि सरितस्तथा ॥ ७ ॥
तिर्यक्च सह नक्षत्रैः संगतौ चन्द्रभास्करौ ॥ भास्करांशुभिरादीप्तं तमसा च समावृतम् ॥ ८ ॥
प्रचकाशे तदाकाशमुल्काशतविदीपितम् ॥ अन्तरिक्षाच्च निर्घाता निर्जग्मुरतुलस्वनाः ॥ ९ ॥
पुस्फुरुश्च घना दिव्या दिवि मारुतपङ्क्तयः ॥ १० ॥
बभञ्ज च तदा वृक्षाञ्जलदानुद्वहन्नपि ॥ अरुजंश्चैव शैलाग्राञ्शिखराणि प्रभञ्जनः ॥ ११ ॥
दिविस्पृशो महामेघाः संगताः समहास्वनाः ॥ मुमुचुर्वैद्युतानग्नींस्ते महाशनयस्तदा ॥ १२ ॥
यानि भूतानि दृश्यानि चुक्रुशुश्चाशनेः समम् ॥ अदृश्यानि च भूतानि मुमुचुर्भैरवस्वनम् ॥ १३ ॥
शिश्यिरे चापि भूतानि संत्रस्तान्युद्विजन्ति च ॥ संप्रविव्यथिरे चापि न च पस्पन्दिरे भयात् ॥१४॥
सह भूतैः सतोयोर्मिः सनागः सहराक्षसः ॥ सहसाऽभूत्ततो वेगाद्भीमवेगो महोदधिः ॥ १५ ॥
योजनं व्यतिचक्राम वेलामन्यत्र संप्लवात् ॥ तं तदा समतिक्रान्तं नातिचक्राम राघवः ॥
समुद्धतमभित्रघ्नो रामो नदनदीपतिम् ॥ १६ ॥

रोदसी " इत्यमरः ॥ ६—७ ॥ तिर्यक्केति श्लोकद्वयमेकान्वयं ॥ चन्द्रभास्करौ नक्षत्रैः सह तिर्यग्वक्रं यथा भवति तथा सङ्गतौ तिर्यग्जग्मतुः । भयादिति भावः । आदीप्तं ईषद्दीप्तं । मन्दरश्मित्वात्तमसावृतत्वाच्च सूर्यस्येतिभावः । समावृतं सम्यगावृतं । उल्काशतविदीपितं । उल्कालक्षणमुक्तं वराहमिहिरेण " उल्का शिरसि विशाला निपतन्ती वर्धते च तनुपुच्छा " इति । निर्घातलक्षणं तेनैवोक्तं—" पवनः पवनाभिहतो गगनादवनौ यदा समापतति । भवति तथा निर्घातः स च पापो दीर्घखगविरुतः " इति ॥ ८—९ ॥ पुस्फुरुः चेरुः । मारुतपङ्क्तयः आवहोद्वहादिवातस्कन्धाः । दिव्याः श्लाघ्याः ॥ १० ॥ उद्वहन् ऊर्ध्वनयन् । शैलाग्रान् पर्वताग्रप्रदेशान् । शिखराणि खण्डपर्वतान् । अरुजन् अपीडयत् । बहुवचनमार्षं ॥ ११ ॥ ते वैद्युताग्नयः । तदा महाशनयोभवन् । अशनिस्वरूपं मिहिरेणोक्तं—" अशनिः स्वनेन महता युक्ता नृगजाश्वतरुपशुमुखेषु । निपतति विदारयन्ती धरातलं चक्रसंस्थाना " इति ॥ १२ ॥ यानीत्यादि श्लोकद्वयमेकं वाक्यं ॥ यानि भूतानि दृश्यानि मनुष्यादीनि । अदृश्यानि पिशाचादीनि । तानि सर्वाणि भूतानि संत्रस्तानि । अतएवोद्विजन्ति कम्पमानानि सन्ति । अशनेः समं अशनिस्वरसमं यथा तथा चुक्रुशुः तथा । भैरवस्वनं मुमुचुः । ततः शिश्यिरे सुप्तानि । सुप्तवद्भूमौ पतितानीत्यर्थः । तत्रापि संप्रविव्यथिरे चिन्तया दुःखितानि । भयान्न पस्पन्दिरे न चलितानि ॥ १३—१४ ॥ अथ समुद्रराजस्योत्थानं सूचयति—सहभूतैरित्यादिना ॥ ततो वेगात् पूर्वसर्गान्तोक्ताद्रामवेगात् । सहसा शरसन्धानसमय एव । भीमवेगोऽभूत् भीमप्रवाहवेगोऽभूत् । केवलशरमोक्षकृतात्क्षोभात् ब्रह्मास्त्रमोक्षारम्भे महान्क्षोभोऽभूदित्यर्थः ॥ १५ ॥ वेगफलं दर्शयति—योजनमित्यादिना ॥ सार्धश्लोक एकान्वयः । संप्लवात् वारिपूरेण । वेलामन्यत्र वेलां विनेत्यर्थः । अथवा संप्लवादन्यत्र प्रलयं विना । वेलां योजनं योजन-

क्षितः ॥ ६ ॥ ति० नक्षत्रैःसहतिर्यक्संगतौ यथाप्राप्तपूर्वापरमार्गप्रतिरोधादक्षिणोत्तरमार्गगामिनावभूतामित्यर्थः । भास्करांशुभिरादीप्तमपितमसासंवृतं । आकाशमासीदितिशेषः । अनेनविरुद्धयोस्तेजस्तिमिरयोःसामानाधिकरण्यरूपोत्पातःसूचितः ॥ ७ ॥ वि० प्रास्फुटन् प्रचेलुः । बभञ्जचेति मारुतपङ्क्तिरितिशेषः । उद्वहन् मारुतसमूहइतिशेषः । अग्रेप्येषएवकर्ता । शैलाग्रान् पर्वतप्रदेशान् । आरुजन् अपीडयन् । बहुवचनमार्षं । शिखराणि खण्डपर्वतान् बभञ्जचेत्यन्वयः ॥ १०—११ ॥ स० तथाशब्द उपमायां । तंतथा चोरमिवस्थितं । चोरंस्वगृहेस्थापयितायथाचोरसदृशोभवति । तथा स्वदारचोरस्यरावणस्यस्वगर्भेस्थापनात्समुद्रश्चोरसदृशस्तं । द्वितीयेन तमित्यनेन समुद्रपरामर्शः । " तकारःकीर्तितश्चोरे " इतिविश्वः । एतेननपौनरुक्त्यं । समतिक्रान्तं अतिक्रान्तवेलं । अतएवोद्धतं उत्कृष्टमपितंनदनदीपतिं । रामः नातिचक्राम नावधीत् । भीषणार्थमेवास्त्रसंयोजननवस्तुतः । सत्य-

[पा०] १ ख. ग. घ. छ. झ. ट. प्रतिचुक्षुभिरे. २ च. छ. ज. ञ. प्रास्फुटंश्चपुनर्दिव्याः. ङ. झ. ट. वपुःप्रकर्षेणवर्तुर्दिव्यमारुतपङ्क्तयः. ३ क. घ. विमानवरपङ्क्तयः. ४ ङ. च. छ. झ. ञ. ट. नुद्वहन्मुहुः. क. नुद्ववाहच. ख. नुद्वहन्तिच. ५ झ. ञ. ट. बभञ्जच. ६ ग.—छ. झ. ञ. ट. दिविचस्र. ७ ङ. च. छ. झ. ञ. ट. तथा. ८ क. ग. च. झ. तमुद्धतं.

ततो मध्यात्समुद्रस्य सागरः स्वयमुत्थितः ॥ उदयन्हि महाशैलान्मेरोरिव दिवाकरः ॥ १७ ॥
पन्नगैः सह दीप्तास्यैः समुद्रः प्रत्यदृश्यत ॥ स्निग्धवैडूर्यसंकाशो जाम्बूनदविभूषितः ॥ १८ ॥
रक्तमाल्याम्बरधरः पद्मपत्रनिभेक्षणः ॥ सर्वपुष्पमयीं दिव्यां शिरसा धारयन्स्रजम् ॥ १९ ॥
जातरूपमयैश्चैव तपनीयविभूषितैः ॥ आत्मजानां च रत्नानां भूषितो भूषणोत्तमैः ॥ २० ॥
धातुभिर्मण्डितः शैलो विविधैर्हिमवानिव ॥ एकावलीमध्यगतं तरलं पाण्डरप्रभम् ॥ २१ ॥
विपुलेनोरसा बिभ्रत्कौस्तुभस्य सहोदरम् ॥ आघूर्णिततरङ्गौघः कालिकानिलसंकुलः ॥ २२ ॥
[देवतानां सुरूपाणां नानारूपाभिरीश्वरः ॥ गङ्गासिन्धुप्रधानाभिरापगाभिः समावृतः ॥ २३ ॥]
उद्वर्तितमहाग्राहः संभ्रान्तोरगराक्षसः ॥ सागरः समुपक्रम्य पूर्वमामन्त्र्य वीर्यवान् ॥
अब्रवीत्प्राञ्जलिर्वाक्यं राघवं शरपाणिनम् ॥ २४ ॥
पृथिवी वायुराकाशमापो ज्योतिश्च राघव ॥ स्वभावे सौम्य तिष्ठन्ति शाश्वतं मार्गमाश्रिताः ॥२५॥

पर्यन्तं । व्यतिचक्राम अतिक्रान्तवान् । योजनमन्तर्जीर्णोऽभूदित्यप्याहुः । तं समतिक्रान्तं पलायमानं नातिचक्राम । पलायमानं प्रति शस्त्रप्रयोगरूपातिक्रमं न चकार ॥ १६ ॥ समुद्रस्य मध्यात् उन्नतात् । स्वयं सागरः समुद्राभिमानिदेवता । दिवाकर इव बभावितिशेषः ॥ १७ ॥ जाम्बूनदं जम्बूनदीप्रभवं स्वर्णं ॥ १८ ॥ रक्तमाल्यं रक्तवैकक्ष्यमाला ॥ १९ ॥ जातरूपमयैः आकरजसुवर्णप्रचुरैः । तपनीयविभूषितैः रत्नकीलनार्हद्रुतकनकविभूषितैः । रत्नानां संबन्धिभिर्भूषणोत्तमैः ॥ २० ॥ एकावली मुक्तावली । तरलं नायकरत्नं ॥ २१ ॥ आघूर्णितः चलितः । कालिका मेघपङ्क्तिः । " मेघजालेपि कालिका " इत्यमरः । तयाऽनिलेन च संकुलः क्षुभितः । मेघानिलौ समुद्रस्य सहचराविति प्रसिद्धिः ॥ २२–२३ ॥ उद्वर्तितेत्यादि सार्धश्लोक एकान्वयः ॥ उद्वर्तितः उद्भ्रामितः । समुपक्रम्य समुपागम्य । स्वसौजन्यं पुरस्कर्तुं पूर्वं आमन्त्र्य आहूय । प्रकृष्टो मूर्ध्नि कृतोञ्जलिः यस्यासौ प्राञ्जलिः । शरपाणिनमिति नकारान्तत्वमार्षं । स्वविरोधिनो मरुवासिनो रामेण घातयितुं स्वयं रावणभीतत्वेन तत्संहारक्षममस्य पराक्रमं परीक्षितुं च समुद्र एतावत्पर्यन्तं विलम्बितवानिति बोध्यम् ॥ २४ ॥ किं विभोस्तव मया कर्तव्यं किं गाधत्वं उत जलस्तम्भनं आहोस्वित्सेतुबन्धनानुकूल्यमित्याशङ्क्य न तावदाद्यः पक्ष इत्याह श्लोकद्व-

---

संकल्पलात् । नातिचक्राम स्वधैर्यान्नचचालेतिवा । अत्रपक्षेदृष्टेतिशेषः ॥ १६ ॥ स० सागरः वरुणः । मेरोरिवविद्यमानात उदयाद्रेर्महाशैलात् शृङ्गात् दिवाकरइव । मेरोःधनुषोभयादुत्थितइतिवा । " मेरुर्भूधरधन्वनोः " इतिविश्वः ॥ १७ ॥ स० सर्वपुष्पमयीं यावत्पुष्पयुक्तां । शिरसिधारयन्नित्यनेन रामसत्कारार्थमितिज्ञायते । ऐकैकस्यदेवस्यएकैकंपुष्पंयुक्तंअयुक्तंचैकंश्रीनारायणरूपिणोरामस्य । समस्तकुसुमयुक्तायुक्तामाला । यथोक्तंभागवतेनवमे । रुक्मिणीशविजयेचप्रमाणान्तरोक्तार्थसंग्राहके । "सिन्धुः शिरस्यर्हणंप्रतिगृह्यरूपीति " " यावैचंपकसंपदाऽब्जवसतेर्दूर्वाश्रियास्वात्मनःकेतक्याविभवेनकृत्तिवसनस्यांभोजकान्त्याविधोः । सन्नीलोत्पलशोभयादिनमणेःश्रीमत्तुलस्याऽमताहेरंबस्य हरेःपरंसमुचितासामालिकाशोभते " इति । यद्वा वरुणाभरणप्रस्तावात्तत्स्रग्वा ॥ १९ ॥ स० समुपक्रम्य पादाभ्यामागत्य । पूर्वमामन्त्र्य अहं भोरामांभोनिधिर्देवंवन्देत्वामितिसंबोध्य । शरपाणिनं बाणपाणिं । पणोग्लहः । सएवपाणःप्रज्ञादिः । शरैःपाणः रिपुप्राणरूपःसोस्यास्तीतिसतथावा तं । नचभारतेवनपर्वणि " सागरस्तुततःस्वप्नेदर्शयामासराघवं" इतिस्वप्नेरामस्यसागरआत्मानंदर्शयामासेत्युक्त्या अत्रचसमुत्थितः प्राञ्जलिरितिवचःपूर्वं अत्रच— " सागरःसमुपक्रम्यपूर्वमामन्त्र्यवीर्यवान् । अब्रवीत्प्राञ्जलिर्वाक्यं " इतिवाक्यंविरुद्धमितिवाच्यं । भागवतेनवमे " सिन्धुःशिरस्यर्हणंप्रतिगृह्यरूपीपादारविन्दमुपगम्यबभाषएतत् " इत्युक्तेः प्रत्यक्षतएवजाग्रद्दशायामेवदर्शनं । भागवतस्योत्तरत्वेनैतदनुरोधेनप्रतिशिश्यइतिपूर्वोदीरितेस्वप्नेऽपेक्षतेसतिनदनदीभर्तारावंस्वंदर्शयामासेतिभारतश्लोकार्थोपपत्तेः । अत्रैवयादोगणैर्वृतइत्युक्तिस्वारस्याच्च । स्वप्नेचेदेकमात्रदर्शनेनभाविकार्यसिद्धेस्तत्संवृततयागमनमनुपयुक्तं । प्रत्यक्षतस्तत्सहनयनंत्वद्रोषोष्मणायादसांदशेद-

[पा०] १ ङ. च. छ. झ. ञ. ट. उदयाद्रिमहाशैलात्. २ क. संकाशस्तप्तकाञ्चनकुण्डलः. ङ. च. छ. झ. ञ. ट. संकाशोजांबूनदविभूषणः. ३ क. ख. चं. छ. पाटलप्रभं. ४ अयंश्लोकः क. ख. ग. च. छ. पाठेषुदृश्यते. ५ क. ख. सरूपाभिः.- ६ च. छ. प्रधानाभिस्त्रोयधाराभिरंबुराट्. ग. प्रधानाभिर्नानारूपाभिरंबुराट्. घ. प्रधानाभिर्नानारूपाभिरावृतः.

तत्स्वभावो ममाप्येष [1]यदगाधोऽहमप्लवः ॥ विकारस्तु भवेद्राघ एतत्ते प्रवदाम्यहम् ॥ २६ ॥
न कामान्न च लोभाद्वा न भयात्पार्थिवात्मज ॥ [2]ग्राहनक्राकुलजलं स्तम्भयेयं कथंचन ॥ २७ ॥
[3]विधास्ये राम येनापि विषहिष्ये ह्यहं तथा ॥ ग्राहा न प्रहरिष्यन्ति यावत्सेना तरिष्यति ॥
हरीणां तरणे राम करिष्यामि यथा स्थलम् ॥ २८ ॥
[4]तमब्रवीत्तदा [5]राम उद्यतो हि नदीपते ॥ अमोघोऽयं महाबाणः कस्मिन्देशे निपात्यताम् ॥ २९ ॥
रामस्य वचनं श्रुत्वा तं च दृष्ट्वा महाशरम् ॥ महोदधिर्महातेजा राघवं वाक्यमब्रवीत् ॥ ३० ॥
उत्तरेणावकाशोस्ति [6]कश्चित्पुण्यतमो मम ॥ द्रुमकुल्य इति ख्यातो लोके ख्यातो यथा भवान् ॥३१॥
उग्रदर्शनकर्माणो बहवस्तत्र दस्यवः ॥ आभीरप्रमुखाः पापाः पिबन्ति सलिलं मम ॥ ३२ ॥

येन—पृथिवीति ॥ सौम्य प्रसन्न । अनेनाञ्जलिकरणानन्तरमेव रामः प्रसन्न इति गम्यते । पृथिव्यादयः पञ्चपदार्थाः । शाश्वतं नित्यं । मार्गं मर्यादां । आश्रिताः सन्तः स्वभावे काठिन्यतिर्यग्गमनावकाशप्रदानागाधत्वोर्ध्वज्वलनादिस्वस्वभावे तिष्ठन्ति । स्वस्वभावं नातिक्रामन्तीत्यर्थः ॥ २५ ॥ एषु कस्ते स्वभाव इत्यत आह—तदिति ॥ तत् तस्मात् । सर्वेषां पृथिव्यादीनां स्वस्वभावानतिलङ्घित्वात् । अहं अगाधः अप्लवः अलङ्घ्यश्चेति यत् एषः ममापि स्वभावः । तस्मादेवमेव मया स्थातव्यं । गाधःप्लवविषयोहमिति यत् एषः मम विकारः अन्यथाभावः । तथा मया न स्थातुं युक्तं । एतत् उक्तस्वरूपं ते प्रवदामि प्रावदं । प्रददामीति पाठेप्ययमेवार्थः । धातूनामनेकार्थत्वात् ॥ २६ ॥ द्वितीयपक्षोप्यनुपपन्न इत्याह—न कामादिति ॥ कामात् अर्थेच्छया । लोभात् लब्धवस्तुत्यागासहिष्णुतया । भयात् दण्डभयात् । पार्थिवात्मजेत्यनेन सर्वमर्यादास्थापकोसीति द्योतयति । न स्तम्भयेयं पीडाकरत्वादिति भावः ॥ २७ ॥ तृतीयं तु पक्षं कक्षीकरोमीत्याह—विधास्य इत्यादिसार्धश्लोकेन ॥ येन यथाहं विषहिष्ये शक्ष्यामि । तथा विधास्ये । किं तच्छक्यमित्यपेक्षायामाह—ग्राहेत्यादि ॥ यावत्सेना तरिष्यति तावत् ग्राहा न प्रहरिष्यन्ति । जलेपि हि केचिद्गमिष्यन्ति । हरीणां तरणे विषये । यथा स्थलं भवति यथा सेतुमार्गो भवति । तथा करिष्यामि । सेतुबन्धद्रव्यापकर्षणादिविघ्नं न करिष्यामीत्यर्थः ॥ २८ ॥ उद्यतः कृतसंधानः ॥ २९ ॥ महातेजाः स्वाभिमतलाभेन जनितकान्तिः ॥ ३० ॥ उत्तरेण समीपवर्तिन्युत्तरभागे । "एनबन्यतरस्यामदूरेऽपञ्चम्याः" इत्येनप् । ममावकाशः मध्यप्रदेशइत्यर्थः । पुण्यतमः चारुतमः । "पुण्यं तु चार्वपि" इत्यमरः । द्रुमेषु कुल्या यस्यासौ द्रुमकुल्यः । "कुल्याल्पा कृत्रिमा सरित्" इत्यमरः ॥ ३१ ॥ उग्रे दर्शनकर्मणी येषां ते उग्रदर्शनकर्माणः । दस्यवः शत्रवः । "दस्युशात्रवशत्रवः" इत्यमरः । दस्यवः चोरा वा । आभीराः

शीतिप्रदर्शनेन देवदयोदयहेतुरितिसहनयनंयुक्तं ॥ २४ ॥ **ती०** हेपार्थिवात्मजेत्यनेन दशरथेऽवतीर्णेश्वरेत्युक्तंभवति । ईश्वरत्वादेव भयात् लद्भयात् रागात् त्वयिभक्त्याच वानररूपान्तरङ्गभक्तसहितत्वात्पादारविन्दरजोवहनभाग्यमयालब्धमितिभक्त्याजलंस्तंभयेयमित्यर्थः ॥ २७ ॥ **स०** हेवरुणालय वरुणश्चासावालयोयादसामितिसतथा । तस्यसंबुद्धिः । हेवरुण । अलय मत्तोनाशरहित । अतएवामोघोबाणः कस्मिन्देशेनिपात्यतामितिप्रश्नःसंभवति । महाबाणः ब्रह्मास्त्राभिमन्त्रितः इतिशेषः । एतेन पूर्वंविसृष्टानांकेवलबाणत्वाद्वा समुद्रशोषणेच्छयानत्यक्तइत्यतोवा नतत्संहारइतिबोध्यं ॥ २९ ॥ **स०** उत्तरेण तृतीयासप्तम्यर्थे । एनबन्तमव्ययंवा । ऊर्ध्वत्वेनोपलक्षितोऽवकाशोस्तीति । पुरतोविलोकने ऊर्ध्वंकिञ्चित्प्रवाहादूर्ध्वंअवकाशोस्तीतिसंबन्धः । नामाह—द्रुमकुल्यइतीति । पुण्यतमइतिलोकेख्यातोयथाभवान् तथाऽयंदेशोपिपुण्यतरइतिख्यातः । यथा भवानेतत्स्थलमङ्गलीकरणेन लोके ख्यातः दस्यून्निरस्यस्वच्छंकृतवान्सुकृतवान्रामइतिख्यातोभवेत् पुण्यतरश्चभवेत्तथोत्तरेणावकाशोस्तीतिवा ॥ ३१ ॥ **ती०** उग्रदर्श-

[पा०] १ घ. यदगाधोमहाप्लवः. २ ङ. झ. ट. रागान्नक्राकुल. घ. नगनक्राकुल. ञ. एतन्नक्राकुल. ३ क. ख. ङ.—ट. विधास्येयेनगन्तासि. ४ ज. प्रसन्नस्तुतदारामश्चाब्रवीत्तंनदीपतिं. ५ ङ. च. छ. झ. ञ. ट. रामःशृणुमेवरुणालय. ६ ङ. च. छ. झ. कश्चित्पुण्यतरो. क. कश्चित्ख्यातोमरुर्मम.

तैस्तु संस्पर्शनं प्राप्तैर्न सहे पापकर्मभिः ॥ अमोघः क्रियतां राम तत्र तेषु शरोत्तमः ॥ ३३ ॥
तस्य तद्वचनं श्रुत्वा सागरस्य स राघवः ॥ मुमोच तं शरं दीप्तं वीरः सागरदर्शनात् ॥ ३४ ॥
तेन तं मरुकान्तारं पृथिव्यां खलु विश्रुतम् ॥ निपातितः शरो यत्र दीप्ताशनिसमप्रभः ॥ ३५ ।
ननाद च तदा तत्र वसुधा शल्यपीडिता ॥ तस्माद्व्रणमुखात्तोयमुत्पपात रसातलात् ॥ ३६ ॥
स बभूव तदा कूपो व्रण इत्यभिविश्रुतः ॥ सततं चोत्थितं तोयं समुद्रस्येव दृश्यते ॥
अवदारणशब्दश्च दारुणः समपद्यत ॥ ३७ ॥
तस्मात्तद्बाणपातेन त्वपः कुक्षिष्वशोषयत् ॥ ३८ ॥
विख्यातं त्रिषु लोकेषु मरुकान्तारमेव तत् ॥ शोषयित्वा ततः कुक्षिं रामो दशरथात्मजः ॥
वरं तस्मै ददौ विद्वान्मरवेऽमरविक्रमः ॥ ३९ ॥
पशव्यश्चाल्परोगश्च फलमूलरसायुतः ॥ बहुस्नेहो बहुक्षीरसुगन्धिर्विविधौषधः ॥ ४० ॥
एवमेतैर्गुणैर्युक्तो बहुभिः सततं मरुः ॥ रामस्य वरदानाच्च शिवः पन्था बभूव ह ॥ ४१ ॥
तस्मिन्दग्धे तदा कुक्षौ समुद्रः सरितां पतिः ॥ राघवं सर्वशास्त्रज्ञमिदं वचनमब्रवीत् ॥ ४२ ॥
अयं सौम्य नलो नाम तनुजो विश्वकर्मणः ॥ पित्रा दत्तवरः श्रीमान्प्रतिमो विश्वकर्मणा ॥ ४३ ।

महाशूद्राः ॥ ३२ ॥ तत्र द्रुमकुल्ये । तेषु आभीरप्रमुखेषु ॥ ३३ ॥ सागरदर्शनात् सागरमतेन । यद्वा अङ्गुल्या निर्दिश्य सागरेण प्रदर्शनात् ॥ ३४ ॥ तेन शरमोक्षणेन ॥ ३५ ॥ ननाद जलनिर्गमेनेति भावः । व्रणमुखात् व्रणमुखद्वारेण ॥ ३६ ॥ सः व्रणमुखं । व्रणकूप इत्यभिविश्रुतो बभूव । सततमिति । तस्येति शेषः । अवदारणशब्दः बाणस्येति शेषः ॥ ३७ ॥ तस्मादित्यर्धं ॥ तद्बाणपातेन तस्य बाणस्य पातेन । कुक्षिषु अवटेषु । स्थिता अपः पूर्वं पापस्पृष्टानि जलानि । तस्मात् द्रुमकुल्यात् । अशोषयत् न्यवारयदित्यर्थः ॥ ३८ ॥ पूर्वं रामबाणपातेन पृथिव्यां विश्रुतत्वमुक्तं संप्रति विरोधिनिरसनात् त्रिषु लोकेषु विख्यातत्वमाह—विख्यातमिति ॥ मरुकान्तारमेव मरुकान्तारनामैव । विख्यातं प्रसिद्धमभूदित्यर्थः कुक्षिं समुद्रमध्यप्रदेशं । मरुकान्तारं शोषयित्वा दग्ध्वा कथं मनुष्यत्वं भावयतो वरदानमित्यत्राह—अमर विक्रम इति । "सत्येन लोकाञ्जयति" इति न्यायेन वशीकृतसर्वलोकइत्यर्थः ॥ ३९ ॥ वरं सिद्धिमुखेन दर्शयति श्लोकद्वयेन—पशव्य इत्यादि ॥ पशव्य पशुभ्यो हितः पशूपभोग्यबालतृणादिसमृद्ध इत्यर्थः अल्परोगः आरम्भ एव विनष्टरोगः । रसः मधु आयुतः समन्ताद्युक्तः । स्नेहः घृतं । औषधं ओषधि समूहः । एवमेतैः एवंप्रकारैः । गुणैः भोग्यैः । युक्त संयुतः । शिवः पन्थाः शोभनप्रदेश इत्यर्थः ॥ ४०-४२ ॥ एवं सेतुनिर्माणानुकूलं स्थास्यामीत्युक्तवान संप्रति वरदानसन्तुष्टो वाक्सहायमाचरति—अय

नकर्माणः उप्रे दर्शनकर्मणी येषांतेतथा ॥ ३२ ॥ स० व्रणमुखात् बाणकृतच्छिद्रादित्यर्थः ॥ ३६ ॥ स० अमरविक्रमः देववि क्रमः अप्रतिहतपराक्रमोवा ॥ ३९ ॥ स० अल्परोगः तुच्छीकृतरोगः ॥ ४० ॥ ति० पित्रादत्तवरः सर्ववस्तुनिर्माणसामर्थ्ये दत्तवरः । विश्वकर्मणस्तव प्रीतिमान् त्वद्विषयप्रीतिमान् । तेनत्वन्नामस्मरणंपूर्वकरोत्वित्यर्थः । संसारसागरेगाधतासंपादकस्यत्वन्ना

[पा०] १ ङ. तैर्नाहंस्पर्शनंपापंसहेयं. ख. ग. ञ. ट. तैर्नसंस्पर्शनंपापंसहेयं. क. घ. तैर्नसंस्पर्शनंरामसहेयं. झ. तैर्न तत्स्पर्शनंपापंसहेयं. ज. तैस्तुसंस्पर्शनंपापंसदाक्लेशकरंमहत्. २ ग. ङ. च. छ. झ. ञ. ट. रामअयंतत्रशरोत्तमः. ज. रामशि तस्तत्रशरोत्तमः. क. राममरौतत्रशरोत्तमः. ३ ङ. झ. महात्मनः. ४ ख. ग. ङ. ज. झ. ट. परंसागर. ५ ख.—ट. तन्मरु ६ झ. ट. किल. ७ ख. निपपातशरो. ८ ङ. च. छ. झ. ञ. ट. वज्राशनि. ९ ङ. च. छ. झ. ञ. ट. इत्येवविश्रुतः. १० ख अवदारणजःशब्दो. ११ ज. तस्मिन्बाणस्यपातेन. १२ क. झ. ट. अपःकुक्षिषु. ग. घ. अपःकुक्षिमशोषयत्. १३ क ग.—ट. शोषयित्वातुतंकुक्षिं. ख. सशोषयित्वातंकुक्षिं. १४ क. घ. च. छ. ञ. पश्चान्मरवे. १५ क. ख. ज. श्चाप्यरोगश्च १६ च. झ. ञ. ट. विविधौषधिः. १७ ग. ङ.—ट. एवमेतैश्चसंयुक्तो. १८ ङ. च. छ. झ. ञ. ट. संयुतो. १९ क. ङ. च छ. झ. ञ. ट. तनयो. २० ग. च. छ. झं. ञ. ट. प्रीतिमान्विश्वकर्मणः. क. घ. धृतिमान्विश्वकर्मणः.

एष सेतुं महोत्साहः करोतु मयि वानरः ॥ तमहं धारयिष्यामि तथा ह्येष यथा पिता ॥ ४४ ॥
एवमुक्त्वोदधिर्नष्टः समुत्थाय नलस्तदा ॥ अब्रवीद्वानरश्रेष्ठो वाक्यं रामं महाबलः ॥ ४५ ॥
अहं सेतुं करिष्यामि विस्तीर्णे वरुणालये ॥ पितुः सामर्थ्यमास्थाय तत्त्वमाह महोदधिः ॥ ४६ ॥
दण्ड एव वरो लोके पुरुषस्येति मे मतिः ॥ धिक्क्षमामकृतज्ञेषु सान्त्वं दानमथापि वा ॥ ४७ ॥
अयं हि सागरो भीमः सेतुकर्मदिदृक्षया ॥ ददौ दण्डभयाद्गाधं राघवाय महोदधिः ॥ ४८ ॥
मम मातुर्वरो दत्तो मन्दरे विश्वकर्मणा ॥ [मया तु सदृशः पुत्रस्तव देवि भविष्यति ॥]
औरसस्तस्य पुत्रोऽहं सदृशो विश्वकर्मणा ॥ ४९ ॥
स्मारितोस्म्यहमेतेन तत्त्वमाह महोदधिः ॥ न चाप्यहमनुक्तो वै ब्रूयामात्मनो गुणान् ॥ ५० ॥
समर्थश्चाप्यहं सेतुं कर्तुं वै वरुणालये ॥ काममद्यैव बध्नन्तु सेतुं वानरपुङ्गवाः ॥ ५१ ॥
ततोतिसृष्टा रामेण सर्वतो हरियूथपाः ॥ अभिपेतुर्महारण्यं हृष्टाः शतसहस्रशः ॥ ५२ ॥
ते नगान्नगसंकाशाः शाखामृगगणर्षभाः ॥ बभञ्जुर्वानरास्तत्र प्रचकर्षुश्च सागरम् ॥ ५३ ॥
ते सालैश्चाश्वकर्णैश्च धवैर्वंशैश्च वानराः ॥ कुटजैरर्जुनैस्तालैस्तिलकैस्तिमिशैरपि ॥ ५४ ॥

मिति ॥ दत्तवरः मत्तुल्यः पुत्रस्ते भविष्यतीति मात्रे दत्तवरः ॥ ४३ ॥ तं सेतुं । तथा ह्येष यथा पितेति । पिता यथा यादृशशक्तिमान् तादृशोयमित्यर्थः ॥४४॥ उदधिः नष्टः अन्तर्हितः ॥ ४५ ॥ पितुः सामर्थ्यं पित्रा दत्तं सामर्थ्यं ॥ ४६ ॥ अथ वानरान्प्रत्याह—दण्ड इत्यादि श्लोकद्वयेन ॥ अतो राघवायेति परोक्षनिर्देशः । हिमवान्मन्दरो मेरुरित्यादिवत् । मध्ये कविवाक्यं वा । दण्ड एव परःसमीचीनोपायः । क्षमां सान्त्वं साम दानं वा धिक् । क्षमादयो नोपाया इत्यर्थः ॥ ४७ ॥ उक्तेर्थे हेतुमाह—अयं हीति ॥ हि यस्मात्सागरः सगरखानितः । प्रत्युपकारानभिज्ञ इत्यर्थः । दण्डभयात् सेतुकर्मदिदृक्षया गाधं ददावित्यन्वयः । सेतुकर्मदिदृक्षा च दण्डभयादेवास्य जातेत्यर्थः ॥ ४८ ॥ पूर्वोक्तस्वपितृतुल्यसामर्थ्यलाभस्य हेतुं दर्शयति—ममेति ॥ मया सदृशः पुत्रस्तव भविष्यतीत्येवंरूपो वरः । अयं चार्थः "औरसस्तस्य पुत्रोहं सदृशो विश्वकर्मण" इत्यनुवादात्सिद्धः ॥४९॥ तर्ह्येतावत्पर्यन्तं किमर्थं नोक्तवानसीत्यत्राह—स्मारित इति ॥ एतेन समुद्रेण । अनुक्तौ निमित्तान्तरमप्याह—नचेति । अनुक्तः अन्येनानुक्तः । स्वेनैवोक्तौ महाकर्मारम्भे विश्वासो न भवेदिति भावः ॥ ५० ॥ न केवलमुक्तिमात्रं समर्थश्चापीत्याह—समर्थश्चेति ॥ बध्नन्तु बन्धनाय शिलादिकमानयन्त्वित्यर्थः ॥५१॥ अतिसृष्टाः नियुक्ताः ॥ ५२ ॥ नगान् वृक्षान् । नगसंकाशाः गिरिसंकाशाः । वानराधिपतित्वेपि मनुष्यत्वं संभवति निषादस्थपत्यधिकरणपूर्वपक्षन्यायादत आह—वानरा इति । तत्र तदानीं । प्रचकर्षुः आनयन्ति स्म ॥ ५३ ॥ सेतुबन्धनसाह्यकृतां वृक्षाणां कृतार्थतां

श्रीमद्गाधतासंपादनमीषत्करमितिभावः ॥ स० विश्वकर्मणः तन्नामदेवतक्षाध्यक्षस्य । विश्वकर्मणः विश्वंचतत्कर्मच । तस्मात् प्रीतिमान् पितुरितिविपरिणतंसदावर्तते । पितुः यथाकर्मसुकौशलंवर्तते तथासर्वकर्मसुकुशलत्वात्तत्प्रीतिपात्रमितिभावः ॥ ४३ ॥ स० धारयिष्यामि विना धरासंपर्कमुपर्येवधारयिष्यामि । यथोक्तंवनपर्वणि—" नलेनसृज्यमानास्तेगण्डशैलाःसपर्वताः । तेरुर्वारांनिधौतस्मिंस्तूलंसूक्ष्ममयंयथा " इति ॥ ४४ ॥ स० अयंसागरः सगरपुत्रखानितः रामज्ञातिर्महोदधिः । दिदृक्षया स्वदिदृक्षया कृतोयोदण्डस्तद्भयात् गाधं श्लाघ्यंसेतुकर्मोद्दिश्यददौ मार्गमितिशेषः । " गाधःश्लाघ्येपिलिप्सायां " इतिविश्वः । " गायन्तिदिग्विजयिनोयमुपेत्यभूपाः " इत्यादेः ॥ ननु हनुमतियद्दूतआगतेसमुद्रोमैनाकं " अङ्गमाननीयोहिमादृशैः " इत्याद्युक्त्वा सेवार्थंप्रबोधयामासयस्स स्वयंरामउपयाते नोपयातइत्यत्यद्भुतमितिचेत्सत्यं । स्वमध्यवर्तिदुर्वृत्तिमद्रामेतरामारणदितिसुतवधोनक्रोधोदयेनविनाभवतीतिविलंबमवललंबेइतिशीघ्रंनायातोयादोभिःसहेतितात्पर्यमवधेयं ॥४८॥ स० उत्पेततुः उत्पेतुः । उत्पेतुश्चेतिक-

[पा०] १ ज. मुक्त्वोदधिर्यातः. २ क. च.—ट. महाबलं. ३ झ. ट. मकरालये. ४ ग.—ट. मासाद्य. ५ घ. सेतुबन्ध. ६ च. छ. राघवस्य. ७ इदमर्धं क. ख. ङ.—ट. पाठेषुदृश्यते. ८ क. ख. स्मारितोद्याहं. ९ ङ. झ. ट. तस्मादद्यैव. १० ङ.—ट. ततोविसृष्टा. ११ ङ. छ. झ. ञ. ट. उत्पेततुर्महा. च. उत्पेतुस्ते. १२ ख. ङ.—ट. बभञ्जुःपादपांस्तत्र. १३ क. चिक्षिपुश्चहि. घ. चिक्षिपुःसागरंप्रति.

विल्वैश्च सप्तपर्णैश्च कर्णिकारैश्च पुष्पितैः ॥ चूतैश्चाशोकवृक्षैश्च सागरं समपूरयन् ॥ ५५ ॥
समूलांश्च विमूलांश्च पादपान्हरिसत्तमाः ॥ इन्द्रकेतूनिवोद्यम्य प्रजह्रुर्हरयस्तरून् ॥ ५६ ॥
तालान्दाडिमगुल्मांश्च नारिकेलान्विभीतकान् ॥ बकुलान्खदिरान्निम्बान्समाजहुः समन्ततः ॥५७
हस्तिमात्रान्महाकायाः पाषाणांश्च महाबलाः ॥ पर्वतांश्च समुत्पाट्य यन्त्रैः परिवहन्ति च ॥ ५८
प्रक्षिप्यमाणैरचलैः सहसा जलमुद्धतम् ॥ समुत्पतितमाकाशमुपासर्पत्ततस्ततः ॥ ५९ ॥
समुद्रं क्षोभयामासुर्वानराश्च समन्ततः ॥ [आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः ॥]
सूत्राण्यन्ये प्रगृह्णन्ति व्यायतं शतयोजनम् ॥ ६० ॥
नलश्चक्रे महासेतुं मध्ये नदनदीपतेः ॥ स तथा क्रियते सेतुर्वानरैर्घोरकर्मभिः ॥ ६१ ॥
दण्डानन्ये प्रगृह्णन्ति विचिन्वन्ति तथा परे ॥ ६२ ॥
वानराः शतशस्तत्र रामस्याज्ञापुरस्सराः ॥ मेघाभैः पर्वताग्रैश्च तृणैः काष्ठैर्बबन्धिरे ॥ ६३ ॥
पुष्पिताग्रैश्च तरुभिः सेतुं बध्नन्ति वानराः ॥ ६४ ॥
पाषाणांश्च गिरिप्रख्यान्गिरीणां शिखराणि च ॥ दृश्यन्ते परिधावन्तो गृह्य वारणसन्निभाः ॥६५
शिलानां क्षिप्यमाणानां शैलानां च निपात्यताम् ॥ बभूव तुमुलः शब्दस्तदा तस्मिन्महोदधौ ॥६६
[सहेलं हनुमाञ्शैलं यंयं विपुलमाक्षिपत् ॥ तंतं करेण वामेन सलीलं जगृहे नलः ॥ ६७ ॥]

व्यञ्जयितुं तान् परिगणयति—श्लोकद्वयेन ते सालैरित्यादिना ॥ ५४—५५ ॥ अथैषामानयनशैघ्र्यमाह—समूलानिति ॥ हरयस्तरूनित्युत्तरशेषः ॥ ५६ ॥ वृक्षेषून्मूलितेषु गुल्मादीनाजह्रुरित्याह—तालानिति ॥ तालान् क्षुद्रतालान् । खदिरान् अरिमेदकान् ॥ ५७ ॥ भूरुहेषु लुप्तेषु पाषाणपर्वतादीनाजह्रुरित्याह—हस्तीति ॥ हस्तिमात्रान् गजप्रमाणान् । " प्रमाणे द्वयसच्दघ्नञ्मात्रचः " इति मात्रच्प्रत्ययः । यन्त्रैः शकटादिभिः ॥ ५८ ॥ उद्धतं उत्पतितं । आसीत् । समुत्पतितं सत् आकाशं ततस्ततः तत्र तत्र । उपासर्पत् प्रससार ॥ ५९ ॥ सूत्राणि शतयोजनं व्यायतं आकृष्टं यथा भवा तथा । प्रगृह्णन्ति प्रागृह्णन् । आर्जवार्थं व्यत्यये लकारः ॥ ६० ॥ घोरकर्मभिः युगपदनेकपर्वतान यनकर्मभिः । तथा नलक्रियानुसारेण ॥ ६१ दण्डान् सूत्रबद्धदण्डान् । वानरत्वराकरणदण्डान्वा विचिन्वन्ति विशेषेण चयनं कुर्वन्ति । नलबद्धसे तोरुपरि शिलाश्चितवन्त इत्यर्थः ॥ ६२ ॥ बबन्धि सेतुप्रदेशानिति शेषः ॥ ६३ ॥ पुष्पिताग्रैरिति मार्दवार्थमुपरि बबन्धुरित्यर्थः ॥ ६४ ॥ अथ वानराण पर्वतानयनं वर्णयति—पाषाणांश्चेति ॥ गृह्य गृहीत ॥ ६५ ॥ निपात्यतां आर्षं परस्मैपदं । तुमुलः संकुल

चित्पाठः ॥५२॥ **स०** यन्त्रैः अनायासाहरणकरणैश्चकादिभिः । समर्थैःकौशलप्रदर्शनार्थं असमर्थैःशरीररक्षणार्थंयन्त्रादिकरणमितिवेकः ॥५८॥ **ती०** शतयोजनंव्यायतंसूत्राणिप्रगृह्णन्ति शतयोजनपर्यन्तव्यायामस्यन्यूनातिरिक्तत्वपरिहारार्थंसूत्राण्यगृह्णन्नित्यर्थः **स०** शतयोजनमायतंदीर्घंसेतुंकर्तुं ॥ ६० ॥ **शि०** नलोमहासेतुंचक्रे । ससेतुःवानरैरितरैरपिक्रियते । एतेनपाषाणादिसङ्घट्टनंनलयत्तं । सामग्रीसंपादनमितरायत्तमितिसूचितं ॥ ६१ ॥ **स०** दण्डान् मानार्थं । विचिन्वन्ति छिद्रादिकंयथानस्यात्तथामार्गयन्ति **ति०** विचिन्वन्ति आहरणीयवृक्षादिकं ॥ **ती०** दण्डान् प्रत्येकंबन्धनीयसेतुविभागंमानदण्डान्गृह्णन्ति । विचिन्वन्ति समविभागंपरीक्षन्ते । यद्वा सेतुबन्धनार्थं पर्वताद्यानेतॄन्वानरांस्त्वरयितुं दण्डान् दीर्घयष्टीः । प्रगृह्णन्ति । विचिन्वन्ति श्रमात्तत्रतच्छायासुविलीनान्वानरानन्वेषयन्ति ॥ ६२ ॥ **स०** आज्ञैवपुरस्सरीयेषांते तैः । आज्ञायाःपुरस्सराः अहमहमिकयातैर्वा

[**पा०**] १ ख. घ.—ञ. ट. बिल्वकैः. २ ङ. ञ. ट. करीरान्बकुलान्निंबान्. घ. खादिरान्पाटलान्निंबान्. ३ ङ.—ट समुत्सर्पत्चाकाशमवासर्पत्ततःपुनः. ४ घ. च. छ. ञ. ञ. निंपतन्तःसमन्ततः. ५ इदमर्धं क. पाठेदृश्यते. ६ ख. ग. ङ्यायतं. ७ ङ. च. छ. ञ. ञ. तदा. ८ क. ख. ङ.—ट. वानरैः. ९ क.—ट. पुरस्सरैः. १० क.—ट. पर्वताभैश्च. ११ घ. ङ. ञ. दानवसंनिभाः. १२ क. ख. ग. ङ.—ट. तत्रपात्यतां. १३ अयंश्लोकः ख. च. छ. ञ. पाठेषुदृश्यते.

कृतानि प्रथमेनाह्ना योजनानि चतुर्दश ॥ प्रहृष्टैर्गजसंकाशैस्त्वरमाणैः प्लवङ्गमैः ॥ ६८ ॥
द्वितीयेन तथा चाह्ना योजनानि तु विंशतिः ॥ कृतानि प्लवगैस्तूर्णं भीमकायैर्महाबलैः ॥ ६९ ॥
अह्ना तृतीयेन तथा योजनानि कृतानि तु ॥ त्वरमाणैर्महाकायैरेकविंशतिरेव च ॥ ७० ॥
चतुर्थेन तथा चाह्ना द्वाविंशतिरथापि च ॥ योजनानि महावेगैः कृतानि त्वरितैस्तु तैः ॥ ७१ ॥
पञ्चमेन तथा चाह्ना प्लवगैः क्षिप्रकारिभिः ॥ योजनानि त्रयोविंशत्सुवेलमधिकृत्य वै ॥
[प्रहृष्टैर्गिरिसंकाशैस्त्वरमाणैः प्लवङ्गमैः ॥ ७२ ॥]
स वानरवरः श्रीमान्विश्वकर्मात्मजो बली ॥ बबन्ध सागरे सेतुं यथा चास्य पिता तथा ॥ ७३ ॥
स नलेन कृतः सेतुः सागरे मकरालये ॥ शुशुभे सुभगः श्रीमान्स्वातीपथ इवाम्बरे ॥ ७४ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ आगम्य गगने तस्थुर्द्रष्टुकामास्तदद्भुतम् ॥ ७५ ॥
दशयोजनविस्तीर्णं शतयोजनमायतम् ॥ ददृशुर्देवगन्धर्वा नलसेतुं सुदुष्करम् ॥ ७६ ॥
आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः ॥ ७७ ॥
तदचिन्त्यमसह्यं च अद्भुतं रोमहर्षणम् ॥ ददृशुः सर्वभूतानि सागरे सेतुबन्धनम् ॥ ७८ ॥

॥ ६६—६७ ॥ कृतानीति । चतुर्दशयोजनपरिमितः सेतुर्बद्ध इत्यर्थः । एवमुत्तरेष्वपि योज्यं ॥ ६८ ॥ द्वितीयेनेति । प्रतिदिनं योजनाधिक्यमुत्साहातिरेकात् ॥ ६९—७१ ॥ त्रयोविंशत् त्रयोविंशतिः । आर्षो व्यत्ययः । अधिकृत्य अवधिं कृत्वा ॥ ७२ ॥ अस्य पिता यथा यादृशशक्तिविशिष्टः । तथा तादृशशक्तिविशिष्ट इत्यर्थः ॥ ७३ ॥ सुभगः शोभनमाहात्म्यवान् । स्वातीपथः छायापथः । स्वातीवीथिर्वा । सा चाकाशे सूर्यादीनां मध्यमार्गे मध्यमावीथिः । तदुक्तं वायुपुराणे—" सूर्यादीनां त्रयो मार्गा दक्षिणोत्तरमध्यमाः " इति प्रक्रम्य " तथा द्वे चापि फल्गुन्या मघा चैवार्षभी मता । हस्तश्चित्रा तथा स्वाती मध्यवीथ्यभिविश्रुता ॥ ज्येष्ठा विशाखानूराधा वीथीराजगवी मता । एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते " इति ॥७४—७५॥ नलसंबन्धी सेतुर्नलसेतुः तं ॥ ७६ ॥ निर्विघ्नसेतुबन्धेन जातं वानरहर्षं दर्शयति—आप्लवन्त इति ॥ अर्धमेकं वाक्यं । आप्लवन्तः आभिमुख्येन प्लवन्तः दूरं प्लवन्तः । आसन्निति शेषः ॥ ७७ ॥ अचिन्त्यं इतःपूर्वं मनसापि चिन्तयितुमनर्हं । असह्यं कस्यापि यत्नाविषयं । अद्भुतं आश्चर्यं-

शि०शतशोवानरैः तृणादिभिः बबन्धिरे सेतुप्रदेशाइतिशेषः ॥६३॥ ति० सुवेलं सामीप्येसुशब्दस्याव्ययीभावः। वेलासमीपं परपारसमीपमधिकृत्येत्यर्थः ॥ स० सुवेलं सुशोभनाप्राप्यावान्तरवेलायस्मिन्कर्मणितद्यथाभवतितथा । अधिकृत्येतिकेचित् । वस्तुतस्तु सुवेलंतन्नामकंपर्वतं । यद्वक्ष्यति " तेसुवेलस्यशैलस्य " इति ॥ ननुवनपर्वणि " दशयोजनविस्तारंत्रिंशद्योजनमायतं । बबन्धुर्वानराः सेतुंप्रथमेदिवसेतदा । सन्ध्यामर्वाग्द्वितीयेतुत्रिंशद्योजनविस्तरः । एवंत्रिभिर्दिनैर्वीरैःसेतुर्नवतियोजनं । चतुर्थेतुदिनेसार्धेयामेतेचवलीमुखाः । दृष्टालङ्केतिरामायशशंसुः " इतिचतुर्थेदिनेदशयोजनानील्याहत्यशतयोजनोभवतिसेतुर्दशयोजनविस्तारश्चेतिदिनचतुष्टयेसेतुसमाप्त्युक्तेः । तथापद्मपुराणेपुष्करखण्डेत्रिंशेऽध्याये " एषसेतुर्मयाबद्धःसमुद्रेवरुणालये । त्रिभिर्दिनैःसमाप्तिमेनीतोवानरसत्तमैः । " इतित्रिभिर्दिनैःसेतुसमाप्त्युक्तेश्च भारतेचतुर्दिन्युक्तिश्चकथं । कथंचात्रपञ्चदिन्युक्तिरितिचेन्न । हिरण्याक्षवधस्यभागवतेतृतीयस्कन्धेकर्णमूलताडनेन तथापुनस्तत्रैवदंष्ट्रयेतिकथनंयथाकल्पभेदेनेतिव्यवस्था श्रीतात्पर्येणकृता कृताच वामाङ्गुष्ठनखनिर्भिन्नेतिभागवतस्यदक्षिणाङ्गुष्ठनखनिर्भिन्नेतिपुराणान्तरस्यचवाराहादिकल्पभेदेनेति तथा भारतरामायणयोरपिविरोधसमाधिरवधेयः । अवधेयश्चपद्मपुराणाविरोधः । तथाचोक्तंस्कान्दे—उमासंहिताद्वादशाध्याये " कदाचिद्धनुषासेतुःकदाचिद्विशिखेनच । दार्वादिनाकदाचिच्चकल्पेकल्पेव्यवस्थितिः" इति । एवंदिनेष्वपिकल्पभेदेनसमाधानंज्ञेयं । अथवापञ्चषासुपुस्तकसंपुटीषुनैतेश्लोकाःसन्ति सन्तिचकचिदेवेत्येतेप्रक्षिप्ताइतिज्ञेयं ॥ ७४ ॥

[पा०] १ च.—झ. ट. तथैवाह्ना. २ ङ. च. छ. झ. ट. योजनानितुसागरे. ३ ङ. च. झ. ञ. ट. त्वरितैस्ततः. ग. प्लवगैस्तुतैः. ४ इदमर्धं ग. पाठेदृश्यते. ५ ददृशुरित्यर्धस्यस्थानेख. पाठे. ददृशुर्देवगन्धर्वाःसिद्धाश्चपरमर्षयः । विस्मिताश्चतदाहृष्टा नलसेतुंसुदुष्करं इत्येकःश्लोकोदृश्यते. ६ घ. दुष्करं.

तानि कोटिसहस्राणि वानराणां महौजसाम् ॥ बध्नन्तः सागरे सेतुं जग्मुः पारं महोदधेः ॥ ७९ ॥
विशालः सुकृतः श्रीमान्सुभूमिः सुसमाहितः ॥ अशोभत महासेतुः सीमन्त इव सागरे ॥ ८० ॥
ततः पारे समुद्रस्य गदापाणिर्विभीषणः ॥ परेषामभिघातार्थमतिष्ठत्सचिवैः सह ॥ ८१ ॥
सुग्रीवस्तु ततः प्राह रामं सत्यपराक्रमम् ॥ हनुमन्तं त्वमारोह अङ्गदं चापि लक्ष्मणः ॥ ८२ ॥
अयं हि विपुलो वीर सागरो मकरालयः ॥ वैहायसौ युवामेतौ वानरौ तारयिष्यतः ॥ ८३ ॥
अग्रतस्तस्य सैन्यस्य श्रीमान्रामः सलक्ष्मणः ॥ जगाम धन्वी धर्मात्मा सुग्रीवेण समन्वितः ॥ ८४ ॥
अन्ये मध्येन गच्छन्ति पार्श्वतोन्ये प्लवङ्गमाः ॥ सलिले प्रपतन्त्यन्ये मार्गमन्ये न लेभिरे ॥ ८५ ॥
केचिद्वैहायसगताः सुपर्णा इव पुप्लुवुः ॥ ८६ ॥
घोषेण महता तस्य सिन्धोर्घोषं समुच्छ्रितम् ॥ भीममन्तर्दधे भीमा तरन्ती हरिवाहिनी ॥ ८७ ॥
वानराणां हि सा तीर्णा वाहिनी नलसेतुना ॥ तीरे निविविशे राज्ञो बहुमूलफलोदके ॥ ८८ ॥

तदद्भुतं राघवकर्म दुष्करं समीक्ष्य देवाः सह सिद्धचारणैः ॥
उपेत्य रामं सहसा महर्षिभिः समभ्यषिञ्चन्सुशुभैर्जलैः पृथक् ॥ ८९ ॥
जय स्वशत्रून्नरदेव मेदिनीं ससागरां पालय शाश्वतीः समाः ॥
इतीव रामं नरदेवसत्कृतं शुभैर्वचोभिर्विविधैरपूजयन् ॥ ९० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

करं । रोमहर्षणं पुलकावहं ॥ ७८ ॥ सेतुं बध्नन्तः सेतुबन्धनसहकारिणः ॥ ७९ ॥ सुकृतः दृढतया कृतः सुकृतकरो वा । श्रीमान् ऋजुत्वेन कान्तिमान् । सुभूमिः निम्नोन्नतत्वरहितः । सुसमाहितः निर्विवरः ॥ ८० ॥ पारे दक्षिणतीरे ॥ ८१ ॥ लक्ष्मण इत्यत्र आरोहस्विति पुरुषविपरिणामः कर्तव्यः ॥ ८२ ॥ आरोहणहेतुमाह—अयमिति ॥ विपुलः शतयोजनसंपन्त्वां गमने बहुकालविलम्बो भविष्यतीति भावः । वैहायसौ अपादचारिणौ । इति सुग्रीवः प्राहेति पूर्वेणान्वयः ॥ ८३—८४ ॥ न लेभिरे मार्गालाभात्तीर एव कंचित्कालं स्थिता इत्यर्थः ॥ ८५ ॥ केचिदित्यर्धमेकं वाक्यं ॥ वैहायसं विहायःसंबन्धि गतं गमनं येषां ते तथोक्ताः । सुपर्णाः गरुडाः ॥ ८६ ॥ अन्तर्दधे तिरश्चकार ॥ ८७ ॥ वानराणां राज्ञो वाहिनीत्यन्वयः । राज्ञेति पाठे राज्ञा सुग्रीवेण सहेत्यर्थः । तीरे दक्षिणतीरे ॥ ८८ ॥ इत्थमकुण्ठदशकण्ठकण्ठाटवीत्रुटननिदर्शनभूतं सेतुनिर्माणनैपुण्यमालोक्य समुपजातमानन्दसन्दोहमा रावणनिबर्हणादनुद्घाटनीयमप्यन्तर्नियन्तुमशक्नुवन्तस्तादृशहर्षप्रकर्षबलात्कारेण देवा यथोचितं राममपूजयन्नित्याह—तदित्यादिना श्लोकद्वयेन ॥ दुष्करं रामादन्यैर्मनसापि कर्तुमशक्यं पृथक्प्रत्येकं समभ्यषिञ्चन् ॥ ८९ ॥ जयेति च्छेदः । स्वशत्रून् आश्रितशत्रूणामेवास्य शत्रुत्वादिति भावः । नरदेवसत्कृतं नरैश्च देवैश्च सत्कृतं । अपूजयन् अस्तुवन् । स्तुतिर्हि वाचिका पूजा ॥ ९० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

रामानु० सुग्रीवेणसमन्वितोजगामेत्यनेन सुग्रीवस्यापिविहायसागमनंद्योत्यते ॥ ८४ ॥ ति० नरदेवाः ब्राह्मणाः ॥ ९० ॥ इतिद्वाविंशः सर्गः ॥ २२ ॥

[पा०] १ घ. ज. झ. ट. सलिलं. २ क.—घ. च.—ट. महताघोषंसागरस्य. ३ घ. हन्त. ४ घ. सिन्धोर्बहुमूल. क. ग. ङ.—ट. राज्ञाबहुमूल.

त्रयोविंशः सर्गः ॥ २३ ॥

तीर्णार्णवेनरामेण लक्ष्मणंप्रति घोरतरसमरसूचकोत्पातप्रदर्शनपूर्वकमुत्साहेन सेनयाविभीषणसुग्रीवादिभिस्सहलङ्कांप्रति प्रस्थानम् ॥ १ ॥

निमित्तानि निमित्तज्ञो दृष्ट्वा लक्ष्मणपूर्वजः ॥ सौमित्रं संपरिष्वज्य इदं वचनमब्रवीत् ॥ १ ॥
परिगृह्योदकं शीतं वनानि फलवन्ति च ॥ बलौघं संविभज्येमं व्यूह्य तिष्ठेम लक्ष्मण ॥ २ ॥
लोकक्षयकरं भीमं भयं पश्याम्युपस्थितम् ॥ निर्बर्हणं प्रवीराणामृक्षवानररक्षसाम् ॥ ३ ॥
वाताश्च कलुषा वान्ति कम्पते च वसुन्धरा ॥ पर्वताग्राणि वेपन्ते पतन्ति च महीरुहाः ॥ ४ ॥
मेघाः क्रव्यादसंकाशाः परुषाः पुरुषस्वनाः ॥ क्रूराः क्रूरं प्रवर्षन्ति मिश्रं शोणितबिन्दुभिः ॥ ५ ॥
रक्तचन्दनसंकाशा सन्ध्या परमदारुणा ॥ ज्वलतः प्रपतत्येतदादित्यादग्निमण्डलम् ॥ ६ ॥
दीना दीनस्वराः क्रूराः सर्वतो मृगपक्षिणः ॥ प्रत्यादित्यं विनर्दन्ति जनयन्तो महद्भयम् ॥ ७ ॥
रजन्यामप्रकाशस्तु संतापयति चन्द्रमाः ॥ ८ ॥
कृष्णरक्तांशुपर्यन्तो लोकक्षय इवोदितः ॥ ह्रस्वो रूक्षोऽप्रशस्तश्च परिवेषः सुलोहितः ॥ ९ ॥

एवं रामो नलसेतुना तीर्णमहार्णवो महासमरसूचकान्महोत्पातान्दृष्ट्वा चिरप्रार्थिताभीष्टसिद्धिर्भविष्यतीति सन्तुष्टो दृष्टानि निमित्तानि निमित्तज्ञाय लक्ष्मणाय दर्शयति—निमित्तानीति ॥ निमित्तज्ञत्वे लक्ष्मणादप्याधिक्यं दर्शयितुं लक्ष्मणपूर्वज इत्युक्तं । संपरिष्वङ्गश्चिरप्रार्थितसमरस्यासन्नत्वात् । निमित्तापेक्षणस्यावश्यकत्वमुक्तं कामन्दके—" निमित्तान्येव शंसन्ति शुभाशुभफलोदयम् । तस्मादेतानि शास्त्रज्ञो राजा समुपलक्षयेत् " इति ॥ १ ॥ शीतमुदकं शीतोदकवत्प्रदेशं । वनानि जलसमीपस्थानि । परिगृह्य वासार्थं स्वीकृत्य । व्यूह्य गरुडरूपेण सन्निवेश्य । तथा व्यक्तीभविष्यति ॥ २ ॥ लोकक्षयकरं । क्षुद्रजनक्षयकरं । विशिष्य प्रवीराणां निबर्हणं विनाशकं । भयमिति युद्धमुच्यते ॥ ३ ॥ भयदर्शने लिङ्गान्याह—वाता इत्यादि ॥ महीरुहाः पतन्ति अकस्मादितिभावः । अत्रात्यन्तानिष्टकरो भूकम्पः संध्याकालिक इति ज्ञेयं । तथोक्तं वसिष्ठेन—" यामत्रयाच्च भूकम्पो द्विजातीनामरिष्टदः । अरिष्टदः क्षितीशानां संध्ययोरुभयोरपि " इति ॥ ४ ॥ क्रव्यादसंकाशाः वृकवर्णाः श्येनादिसंस्थाना इति वा । परुषाः दुर्दर्शाः । रूक्षा इति यावत् । परुषस्वनाः श्रुतिकटुस्वनाः । अतएव क्रूराः भयंकराः । मिश्रं उदकमिति शेषः । क्रूरमिति क्रियाविशेषणं । अत्र मिहिरः—" दिव्युल्कापतनं चैव दिवा नक्षत्रदर्शनम् । दिवाऽशनिस्तथा काष्ठतृणरक्तप्रवर्षणं " ॥ ५ ॥ रक्तचन्दनं कुङ्कुमं । रक्तचन्दनतुल्यमेघवतीत्यर्थः । परमदारुणा भवतीति शेषः । अग्निमण्डलं अग्निपिण्डः ॥ ६ ॥ दीनाः दीनाकृतयः । जनयन्तः सूचयन्तः ॥ ७ ॥ रजन्यामिति अर्धमेकं वाक्यं । अप्रकाशः निष्प्रभः । संतापयति । शीतस्य संतापकरणं ह्युत्पात इति भावः ॥ ८ ॥ कृष्णा रक्ताश्चांशवः पर्यन्ते यस्य सः तथोक्तः । सर्वान्ते कृष्णमण्डलः तदनन्तरं रक्तमण्डल इत्यर्थः । सुलोहितः मध्ये अत्यन्तरक्तवर्णः । लोकक्षये प्रलये उदितः परिवेष इव स्थितः । रूक्षः क्रूरः । अप्रशस्तः अप्रसिद्धः । इतः पूर्वमदृष्ट इत्यर्थः । परिवेषः दृश्यत इति शेषः । अत्र वर्णत्रयकथनेन मण्डलत्रयकथनात्सायंकालिकत्वाच्च परिवेषस्य नृपक्षयकरत्वं सूच्यते । तथाहकाश्यपः—" द्विमण्डलश्चमूपन्नो नृपन्नो यस्त्रिमण्डलः " इति । " दिनकरपरिवेषः पूर्वयामे तु पीडा दिनकरपरिवेषो वृष्टियुद्धं द्वितीये । दिनकरपरिवेषं क्षेममाहुस्तृतीये

स० भयं तत्साधनं । निबर्हणं नाशश्च । योग्यतयाभयं ऋक्षवानराणां । रक्षसांचनिबर्हणमित्यन्वेतव्यं । अन्यथा सर्वज्ञस्य रामस्यैनिमित्तोपन्यासोनिर्मरणवानरऋक्षविषयेमोघःस्यात् । अथवा " तारापिता तान्निरुजश्चकार " इतितद्ग्रन्थमादनानिलोज्जीविताःब्रह्मवराच्चजीविताश्चेत्येतत्पूर्वतनींमूर्तिंविवक्षित्वा प्रबर्हणवचनमर्हतिऋक्षवानरपक्षेपि ॥ ३ ॥ स० परुषस्वराः प्रखरस्वराः ।

[पा०] १ ङ. ञ. प्रबर्हणं. २ ठ. परुषस्वराः.

आदित्ये विमले नीलं लक्ष्म लक्ष्मण दृश्यते ॥ १० ॥
रजसा महता चापि नक्षत्राणि हतानि च ॥ युगान्तमिव लोकानां पश्य शंसन्ति लक्ष्मण ॥११॥
काकाः श्येनास्तथा गृध्रा नीचैः परिपतन्ति च ॥ शिवाश्चाप्यशिवान्नादान्नदन्ति सुमहाभयान् ॥ १२ ॥
शैलैः शूलैश्च खड्गैश्च विसृष्टैः कपिराक्षसैः ॥ भविष्यत्यावृता भूमिर्मांसशोणितकर्दमा ॥ १३ ॥
क्षिप्रमद्यैव दुर्धर्षां पुरीं रावणपालिताम् ॥ अभियाम जवेनैव सर्वतो हरिभिर्वृताः ॥ १४ ॥
इत्येवमुक्त्वा धर्मात्मा धन्वी संग्रामहर्षणः ॥ प्रतस्थे पुरतो रामो लङ्कामभिमुखो विभुः ॥ १५ ॥
सविभीषणसुग्रीवास्ततस्ते वानरर्षभाः ॥ प्रतस्थिरे विनर्दन्तो निश्चिता द्विषतां वधे ॥ १६ ॥
राघवस्य प्रियार्थं तु धृतानां वीर्यशालिनाम् ॥ हरीणां कर्मचेष्टाभिस्तुतोष रघुनन्दनः ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

दिनकरपरिवेषः सर्वनाशश्चतुर्थे " इति ॥ ९ ॥ नीलं लक्ष्म छिद्ररूपं । तदाह वराहः—" अपर्वणि तथा राहुग्रहणं चन्द्रसूर्ययोः । चन्द्रार्कमण्डलच्छिद्रं दृष्ट्वा जनपदक्षयः " इति ॥ यद्वा नीलं लक्ष्म चन्द्र इव कलङ्को दृश्यते । एतदेवौत्पातिकं नैत्यमधिकृत्य यदादित्यस्य रोहितं रूपमित्यारभ्य यत् कृष्णं तदन्नस्येत्युच्यते ॥ १० ॥ रजसा मालिन्येन । युगान्तं प्रलयं ॥ ११ ॥ नीचैः दुर्बलैः । अधिकबलानां दुर्बलैः परिभवोऽप्युत्पात इति । शिवाः गोमायवः । " स्त्रियां शिवा भूरिमायगोमायुः " इत्यमरः । नादान् नदन्ति नादान्कुर्वन्तीत्यर्थः ॥ १२ ॥ उक्तोत्पातफलमाह—शैलैरिति ॥ मांसशोणितकर्दमा मांसशोणितरूपकर्दमवती ॥ १३ ॥ क्षिप्रं सत्वरं । जवेन वेगेन ॥ १४ ॥ पुरतः प्रतस्थ इति उत्साहातिशयोक्तिः । विभुः समर्थः ॥ १५ ॥ निश्चिताः निश्चयवन्तः । अत्र प्रस्थानं शीतोदकफलवद्वनपरिग्रहार्थं परिगृह्योदकमित्यादिना प्रथमं तस्य कर्तव्यतया अभिहितत्वात् ॥ १६ ॥ धृतानां धैर्यवतां । कर्मचेष्टाभिः युद्धकर्मादिविषयचेष्टाभिः लाङ्गूलोत्थापनादिभिः । तुतोषेत्यनेन इदं दुर्गप्रदेशं दृष्ट्वा वानरा निरुत्साहा भवेयुरिति पूर्वं राममनसि स्थितमित्यवगम्यते ॥ १७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥

अतएवपरुषाः श्रोत्रोल्बणाः। क्रूराः मनउद्वेजकाः ॥५॥ **शि०** क्षिप्रमभियाम। एतेन स्वविजयसूचकसुशकुनोपिरामेणावलोकितइति व्यञ्जितं ॥ १४ ॥ **ति०** रामः जनरमणः रामइत्यन्वयः ॥ **स०** अरामः पुत्रत्वेनतत्सदृशःतद्भिन्नोलक्ष्मणः । पुरतोरामः । अपुरतः तत्पश्चाल्लक्ष्मणः ॥ सरैः मुक्ताहारादिभिर्नविद्यतेमाशोभाइदानींयस्येतिवा सरामः इदानींदृरितभार्यत्वेनारामः सर्वाभिरामोपिरिपूर्णाममनोहरइतिवा अरामः । धर्मात्मेतिक्वचित्पाठोव्याख्यातृसाहसासहः ॥१५॥ **ति०** धृतानां निश्चितबुद्धीनां ॥१६॥ **स०** राघवस्य स्वस्यप्रियार्थं भार्यार्थं । यत्कर्म अन्वेषणरूपं तदनुरूपाभिश्चेष्टाभिः । रघुनन्दनोरामस्तुतोष । राघवशब्देन मुखतोगृहीतस्यपुनारघुनन्दनपदेनग्रहणं " अनुग्रहार्थसकृषेरवापसलक्ष्मणोस्त्रमुनितोहिकेवलं " इत्यादिवत्संभवति । राघवस्य लक्ष्मणस्य । प्रियार्थं प्रीत्यावहप्रयोजनमुद्दिश्य । यत्कर्म तदनुरूपचेष्टाभिः रघुनन्दनोरामः । राघवस्य रामस्य । रघुनन्दनोलक्ष्मणइतिवा ॥ **ति०** कर्मचेष्टाभिः कर्मणा धैर्येणपरंप्रतिप्रस्थानलक्षणेन । चेष्टाभिः कायव्यापारैश्च तुतोषेत्यन्वयः ॥ १७ ॥ इतित्रयोविंशः सर्गः ॥ २३ ॥

[पा०] १ क. ख. च. छ. नक्षत्राण्यावृतानिच. २ च.—झ. ट. विमुक्तैः. ३ क. च. छ. अभियामो. ४ च. छ. झ. ञ. ट. सर्वैर्हरिभिरावृताः. ५ झ. ञ. ट. ठ. धन्वीसरामःसंग्रामधर्षणः. ६ ङ.—ञ. सुग्रीवास्सवेंते. ७ ङ. झ. ञ. ट. धृतानांद्विषतां. ८ क. ख. रावणस्यवधार्थंतुगच्छतांवीर्यशालिनां. ९ ङ. झ. ञ. ट. सुतरांवीर्य.

- DONATED BY -
Lt. PADMASHREE
Prof. V. VENKATACHALAM
VARANASI

चतुर्विंशः सर्गः ॥ २४ ॥

लङ्कासमीपंगतैरन्तर्गतराक्षससेनाक्रोशमसहमानैर्वानरैरुच्चैरुद्घोषणम् ॥ १ ॥ रामेणलक्ष्मणंप्रति लङ्कावर्णनम् ॥ २ ॥ तथा सुरक्षितंसेनासंनिवेशनपूर्वकं वानरेभ्योबन्धाच्छुकराक्षसमोक्षणम् ॥ ३ ॥ शुकेन रावणमेत्यतंप्रति वानरकृतस्वबन्धादिनिवेदनपूर्वकं रामपराक्रमप्रशंसनेन तस्मैसीताप्रत्यर्पणस्य रणस्यवा करणचोदना ॥ ४ ॥ तेन शुकंप्रत्यात्मश्लाघनपूर्वकं रामेणस्वस्याजय्यत्वादिप्रलपनम् ॥ ५ ॥

सा वीरसमिती राज्ञा विरराज व्यवस्थिता ॥ शशिना शुभनक्षत्रा पौर्णमासीव शारदी ॥ १ ॥
प्रचचाल च वेगेन त्रस्ता चैव वसुन्धरा ॥ पीड्यमाना बलौघेन तेन सागरवर्चसा ॥ २ ॥
ततः शुश्रुवुराक्रुष्टं लङ्कायां काननौकसः ॥ भेरीमृदङ्गसंघुष्टं तुमुलं रोमहर्षणम् ॥ ३ ॥
बभूवुस्तेन घोषेण संहृष्टा हरियूथपाः ॥ अमृष्यमाणास्तं घोषं विनेदुर्घोषवत्तरम् ॥ ४ ॥
[1]राक्षसास्तु प्लवङ्गानां [2]शुश्रुवुश्चापि गर्जितम् ॥ नर्दतामिव दृप्तानां मेघानामम्बरे स्वनम् ॥ ५ ॥
दृष्ट्वा दाशरथिर्लङ्कां चित्रध्वजपताकिनीम् ॥ जगाम मनसा सीतां दूयमानेन चेतसा ॥ ६ ॥
अत्र सा मृगशावाक्षी रावणेनोपरुध्यते ॥ अभिभूता ग्रहेणेव लोहिताङ्गेन रोहिणी ॥ ७ ॥
दीर्घमुष्णं च निश्वस्य समुद्वीक्ष्य च लक्ष्मणम् ॥ उवाच वचनं वीरस्तत्कालहितमात्मनः ॥ ८ ॥
आलिखन्तीमिवाकाशमुत्थितां पश्य लक्ष्मण ॥ मनसेव कृतां लङ्कां नगाग्रे विश्वकर्मणा ॥ ९ ॥

अथ रावणस्य वानरसेनागमनश्रवणं—सेत्यादि ॥ राज्ञा रामेण । व्यवस्थिता शीतोदकादिकं परिगृह्य स्थिता । वीरसमितिः वीरसङ्घः । " सङ्घे सभायां समितिः " इत्यमरः । शशिना व्यवस्थिता कृतमर्यादा ॥ १ ॥ सागरवर्चसा सागरवदपरिच्छिन्नेनेत्यर्थः ॥ २ ॥ ततः सेनानिवेशानन्तरं । निष्कोलाहले सतीत्यर्थः । आक्रुष्टं सेनाक्रोशं । भावे क्तः । भेरीमृदङ्गसंघुष्टमिति समुच्चयः ॥ ३ ॥ घोषवत्तरं राक्षसघोषादधिकघोषवत् । क्रियाविशेषणं ॥ ४ ॥ दृप्तानां पूर्णानां । आकाशस्यैव शब्दाश्रयत्वादम्बर इत्युक्तं । यद्वा " प्लवगसैन्यमुलूकजिताजितं " इतिवदम्बरशब्दस्तत्पर्यायं नभश्शब्दं लक्षयित्वा श्रावणमासमाह ॥ ५ ॥ चिह्नयुक्तो ध्वजः । केवलचेला पताकेति भिदा । चेतसा उपलक्षितः मनसा जगाम । सस्मारेत्यर्थः ॥ ६ ॥ स्मरणप्रकारमाह—अत्रेति ॥ एतच्छ्लोकान्ते प्रकारवचनमितिकरणं द्रष्टव्यं । सा साकेते सकलभोगार्हा । मृगशावाक्षी । मृगानुसरणसमये यद्धरिणदर्शनकुतूहलेन मृगशिशुवत्तरलतरं विलोचनयुगलं तदेवाद्यापि मनसि परिवर्तते । तदाह । यद्वा मृगशावे मारीचमये अक्षिणी यस्या इति विग्रहः ॥ ७ ॥ अद्य युद्धयात्रासमये कान्तास्मरणव्यसनमनुचितमिति तन्नियमितवानिति सूचयति दीर्घमुष्णं च निश्वस्येत्यनेन । तत्कालहितं युद्धयात्रासमये हितं । शोकविस्मारकनगरशोभावर्णनरूपं वचनं । यद्वा अङ्गदः सह नीलेनेत्यादि वाक्यं तत्कालहितं । तत्साहचर्यादाढ्यं नगरमितिवत् आलिखन्तीमित्यादिकं सर्वं वाक्यजातं तत्कालहितमित्युक्तं ॥ ८ ॥ आलिखन्तीं स्पृशन्तीं । उत्थितां उन्नतां । नगाग्रे

शि० सागरवर्चसा सागरस्यसगरवंशोद्भवस्यरामस्यवर्चस्तेजोयस्मिन् । किंचसागरात् सागरतरणात् लब्धंवर्चोयेनतेन । वेगेनोपलक्षितेनबलौघेन । त्रस्तत्वादिविशिष्टावसुंधरा प्रचचाल ॥ स० सागरस्यवर्चोयेनसः । तेनबलौघेन सेनासङ्घेन । वसुंधरा वेगेनपीड्यमानात्रस्तेवप्रचचाल ॥ २ ॥ स० दूयमानेनेति मनःपदेनचेतःपदेनाप्यन्वेति । ततश्च दूयमानेनचेतसासहितांसीतां दूयमानेनमनसाजगामेत्यन्वयःकृतोज्ञेयः । "वृद्धोयूना—" इत्यादिवत्सहेतिलाभः । दूयमानेनमनसाविशिष्टां । वैशिष्ट्यंतृतीयार्थ इतिवा ॥ ६ ॥ ति० आत्मनस्तत्कालहितं लङ्कादर्शनकालेआत्मनःप्रीतिकरं । दिव्यपुरीदर्शनजसंतोषद्योतकमितियावत् ॥ ८ ॥

[पा०] १ क. ख. ग. ङ. च. झ. ट. राक्षसास्तत्प्लवंगानां. २ ख. ग. ङ. झ. ञ. ट. शुश्रुवुस्तेपि.

विमानैर्बहुभिर्लङ्का संकीर्णा भुवि राजते ॥ विष्णोः पदमिवाकाशं छादितं पाण्डुरैर्घनैः ॥ १० ॥
पुष्पितैः शोभिता लङ्का वनैश्चैत्ररथोपमैः ॥ नानापतङ्गसंघुष्टैः फलपुष्पोपगैः शुभैः ॥ ११ ॥
पश्य मत्तविहंगानि प्रलीनभ्रमराणि च ॥ कोकिलाकुलषण्डानि दोधवीति शिवोऽनिलः ॥ १२ ॥
इति दाशरथी रामो लक्ष्मणं समभाषत ॥ १३ ॥
बलं च तद्वै विभजञ्शास्त्रदृष्टेन कर्मणा ॥ शशास कपिसेनाया बलमादाय वीर्यवान् ॥ १४ ॥
अङ्गदः सह नीलेन तिष्ठेदुरसि दुर्जयः ॥ १५ ॥
तिष्ठेद्वानरवाहिन्या वानरौघसमावृतः ॥ आश्रित्य दक्षिणं पार्श्वमृषभो वानरर्षभः ॥ १६ ॥
गन्धहस्तीव दुर्धर्षस्तरस्वी गन्धमादनः ॥ तिष्ठेद्वानरवाहिन्याः सव्यं पार्श्वं समाश्रितः ॥ १७ ॥
मूर्ध्नि स्थास्याम्यहं युक्तो लक्ष्मणेन समन्वितः ॥ १८ ॥
जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः ॥ ऋक्षमुख्या महात्मानः कुक्षिं रक्षन्तु ते त्रयः ॥ १९ ॥
जघनं कपिसेनायाः कपिराजोऽभिरक्षतु ॥ पश्चार्धमिव लोकस्य प्रचेतास्तेजसा वृतः ॥ २० ॥
सुविभक्तमहाव्यूहा महावानररक्षिता ॥ अनीकिनी सा विबभौ यथा द्यौः साभ्रसंप्लवा ॥ २१ ॥
प्रगृह्य गिरिशृङ्गाणि महतश्च महीरुहान् ॥ आसेदुर्वानरा लङ्कां विमर्दयिषवो रणे ॥ २२ ॥

त्रिकूटशिखरे ॥ ९ ॥ विष्णोः आदित्यस्य । पदं स्थानं । आकाशमध्यमिति भावः । विमानं अनेकतलप्रासादः ॥ १० ॥ फलभूतानि पुष्पाणि यासां ताः फलपुष्पाः मल्लिकादयः ताभिरुपगम्यन्त इति तथा । अतो न पुष्पितैरित्यनेन पौनरुक्त्यं । सङ्घुष्टं सङ्घोषः । भावे क्तः । नानाविधानि पतङ्गसङ्घुष्टानि येषां तैः ॥११॥ मत्तविहंगानि । विहंगशब्दोत्र कोकिलपरः । अनेन सदा फलवत्त्वमुक्तं । प्रलीनभ्रमराणि मधुपानपरवशतया निष्पन्दभ्रमराणि । अनेन सदा पुष्पवत्त्वमुक्तं । कोकिलाकुलं षण्डं पुष्पसमूहो येषां तानि कोकिलाकुलषण्डानि । अनेन सदा पल्लवितत्वमुक्तं । कोकिलानां पल्लवप्रियत्वात् । वनानीत्यनुषञ्जनीयं । दोधवीति पुनः पुनः कम्पयति । " धूञ् कम्पने " इत्यस्माद्यङ्लुक् ॥ १२ ॥ इतीत्यर्धमेकं वाक्यं ॥१३॥ शास्त्रदृष्टेन नीतिशास्त्रज्ञानेन । कर्मणा प्रयोगेण । बलं सेनां । विभजन् व्यूहयन् । व्यूहहेतोः शशास । कपिसेनाया इत्याद्युत्तरशेषः॥१४॥ शासनप्रकारमाह—कपिसेनाया इत्यादि ॥ अङ्गदो नीलेन सह स्वबलमादाय कपिसेनायाः उरसि उरःस्थाने । तिष्ठेदित्यन्वयः ॥ १५ ॥ वानरौघसमावृतः कपिसमूहसहितः ॥ १६ ॥ गन्धहस्ती मत्तगजः ॥ १७ ॥ मूर्ध्नीत्यर्धमेकं वाक्यं ॥ युक्तः सावधानः ॥ १८ ॥ वानरइति वेगदर्शिविशेषणं । ऋक्षमुख्यपदं वानराणामप्युपलक्षणं । महात्मानः महाबुद्धयः । कुक्षिं कुक्षिस्थानं ॥ १९ ॥ जघनं चरमभागं पुच्छमिति यावत् । कपिराजः सुग्रीवः । पश्चार्धमिति । " अपरस्यार्धे पश्चभावो वक्तव्यः " इत्यपरशब्दस्य पश्चादेशः । अर्धशब्दोंशवाची । पश्चिमां दिशमित्यर्थः ॥ २० ॥ सुविभक्तमहाव्यूहा सुष्ठु कृतगरुडव्यूहा । उत्तरत्र शार्दूलवचने " गारुडं व्यूहमाश्रित्य " इति वक्ष्यमाणत्वात् । साभ्रसंप्लवा समेघसंचारा ॥ २१ ॥ आसेदुः आसादितुमुद्युक्ताः । विमर्दयिषवः मर्दयि-

---

रामानु० विष्णोःपदं विष्णुपादभूतं ॥ **ति०** विष्णोः व्यापनशीलस्यवायुमयस्यब्रह्मणः । पदं प्रचारस्थानमाकाशमिव ॥ **स०** आकाशं पूर्वप्रकाशमानं । विष्णोः पदं आकाशं । पाण्डुभिर्घनैर्मेघैः छादितमिव ॥ १० ॥ **स०** पुष्पितैःशोभिता एकत्र । नानापतगसंघुष्टफलपुष्पोपगैर्वनैरपत्र ॥ ११ ॥ **ति०** विभजत् व्यभजत् ॥ १४ ॥ **ति०** नीलेनसहउरसि उच्यमानपुरुषव्यूहस्योरसि ॥ १५ ॥ **ति०** जांबवदादयस्त्रयोपिऋक्षाः ॥ १९ ॥ **ति०** जघनं पश्चार्धं । लोकस्य भूलोकस्य । पश्चार्धं पश्चिमदिशं । तेजसा

[पा०] १ ङ. झ. ञ. ट. संकीर्णारचितापुरा. क.—घ. च. छ. संकीर्णाहिविराजते. २ ङ. झ. ट. नानापतगसंघुष्ट. फलपुष्पोपगैः. ३ क. वनान्युपवनानिच. ४ ख. ङ. च. छ. झ. ट. तत्रविभजच्छास्त्र. घ. तद्विभक्तंवैशास्त्र. ५ क. ख. ङ.—ट. कपिसेनांतांबलादादाय. ६ क.—छ. झ. ञ. ट. आश्रितो. ज. आस्थितो. ७ ङ.—ट. मृषभोनामवानरः. ८ क. ख. घ. च. छ. ज. ञ. पार्श्वमधिष्ठितः. ङ. झ. ट. पक्षमधिष्ठितः. ९ क. ग. ङ.—ट. यत्तो.

शिखरैर्विकिरामैनां लङ्कां मुष्टिभिरेव वा ॥ इति स्म दधिरे सर्वे मनांसि हरिसत्तमाः ॥ २३ ॥
ततो रामो महातेजाः सुग्रीवमिदमब्रवीत् ॥ सुविभक्तानि सैन्यानि शुक एष विमुच्यताम् ॥ २४ ॥
रामस्य वचनं श्रुत्वा वानरेन्द्रो महाबलः ॥ मोचयामास तं दूतं शुकं रामस्य शासनात् ॥ २५ ॥
मोचितो रामवाक्येन वानरैश्चाभिपीडितः ॥ शुकः परमसंत्रस्तो रक्षोधिपमुपागमत् ॥ २६ ॥
रावणः प्रहसन्नेव शुकं वाक्यमभाषत ॥ किमिमौ ते सितौ पक्षौ लूनपक्षश्च दृश्यसे ॥
कच्चिन्नानेकचित्तानां तेषां त्वं वशमागतः ॥ २७ ॥
ततः स भयसंविग्नस्तथा राज्ञाऽभिचोदितः ॥ वचनं प्रत्युवाचेदं राक्षसाधिपमुत्तमम् ॥ २८ ॥
सागरस्योत्तरे तीरे सुवेलस्ते वचनं तथा ॥ यथासंदेशमक्लिष्टं सान्त्वयं श्लक्ष्णया गिरा ॥ २९ ॥
क्रुद्धैस्तैरहमुत्प्लुत्य दृष्टमात्रैः प्लवङ्गमैः ॥ गृहीतोस्म्यपि चारब्धो हन्तुं लोप्तुं च मुष्टिभिः ॥ ३० ॥
नैवं संभाषितुं शक्याः संप्रश्नोत्र न लभ्यते ॥ प्रकृत्या कोपनास्तीक्ष्णा वानरा राक्षसाधिप ॥३१॥
स च हन्ता विराधस्य कबन्धस्य खरस्य च ॥ सुग्रीवसहितो रामः सीतायाः पदमागतः ॥ ३२ ॥
स कृत्वा सागरे सेतुं तीर्त्वा च लवणोदधिम् ॥ एष रक्षांसि निर्धूय धन्वी तिष्ठति राघवः ॥ ३३ ॥
ऋक्षवानरसङ्घानामनीकानि सहस्रशः ॥ गिरिमेघनिकाशानां छादयन्ति वसुंधराम् ॥ ३४ ॥
राक्षसानां बलौघस्य वानरेन्द्रबलस्य च ॥ नैतयोर्विद्यते सन्धिर्देवदानवयोरिव ॥ ३५ ॥
पुरा प्राकारमायान्ति क्षिप्रमेकतरं कुरु ॥ सीतां वाऽस्मै प्रयच्छाशु सुयुद्धं वा प्रदीयताम् ॥ ३६ ॥

तुमिच्छवः । सनि द्वित्वाभाव आर्षः ॥ २२ ॥ शिखरैः साधनैः । विकिराम चूर्णयाम । मनांसि दधिरे निश्चयं चक्रुरित्यर्थः ॥ २३—२६ ॥ सितौ बद्धौ । " षिञ् बन्धने " इत्यस्माद्धातोर्निष्ठा । तत्र हेतुमाह—लूनपक्षश्च दृश्यस इति । चो हेत्वर्थः । यस्माल्लूनपक्षो दृश्यसे तस्मात् सिताविति संबन्धः । अनेकचित्तानां चञ्चलचित्तानामित्यर्थः । अनेन पुनः पुनर्बन्धविसर्जने ध्वन्येते । तेषां वानराणां वशमागतो न कच्चिदित्यन्वयः ॥ २७ ॥ संविग्नः संभ्रान्तः । तथापि चोदितः मत्संदेशस्य किमुत्तरं सुग्रीवेण दत्तं वदेति चोदित इत्यर्थः ॥ २८ ॥ सान्त्वयं असान्त्वयं । सुग्रीवमितिशेषः ॥ २९ ॥ लोप्तुं विनाशयितुं ॥ ३० ॥ अत्र वानरेषु । विषये सप्तमी । तीक्ष्णाः क्रूराः । उक्तेरेवावकाशो नास्ति । प्रत्युक्तेः का कथेति भावः । रावणप्रसादार्थं मध्ये राक्षसाधिपेतिसंबुद्धिः । त्वत्तोप्येतेऽतिशयिता इति ज्ञापनार्थं वा ॥ ३१ ॥ वक्ष्यमाणयोः सीताप्रदानयुद्धयोर्मध्ये सीताप्रदानस्य साधिष्ठत्वं दर्शयितुं रामपराक्रमं वर्णयति—स चेति ॥ तदव्याहतपराक्रमस्य भूयः संदर्शनादस्मानवश्यं हनिष्यत्येवेति भावः ॥ ३२ ॥ निर्धूय तृणीकृत्य । एष इत्यतिसन्निहितत्वमुच्यते ॥ ३३ ॥ सङ्घानामनीकानीत्यनेन सङ्घारब्धत्वोक्त्या महानीकत्वं सूचितं ॥ ३४ ॥ इदानीं तव वचनावकाशाभावेपि पुनः प्रकारान्तरेण गच्छेत्याशङ्क्याह—राक्षसानामिति ॥ संधिः योगमात्रं ॥ ३५ ॥ संप्रति कर्तव्यमुपदिशति—पुरेति ॥ पुरा आयान्ति आयास्यन्ति । " यावत्पुरानिपातयोर्लट् " इति भविष्यदर्थे लट् । एकतर-

धृतः प्रचेताइव ॥ २० ॥ स० विमुच्यतां बन्धनात् । पूर्वंविमुच्यतामित्युक्तिस्ताडनादिवमोचनविषयिणी । इयंतुलङ्कांप्रतिगन्तुं मुच्यतामित्येतत्परेतिमुक्त्युक्तिर्विवेकः ॥ २४ ॥ स० निपीडितः प्राक् । परमसंत्रस्तः पुरस्सरकपयस्ताडयेयुरितिवा इयदालस्यं कृतइतिरावणः क्रुद्धोहनिष्येदितिवातथा । अतएव पुनर्मोचयालूनपक्षलमुच्यमानंयुज्यते ॥ इतः परं रामाज्ञानन्तरं असत्रस्तः कपिप्रीडनभयरहितः ॥२६॥ ति० प्रहसन्नेव लूनपक्षलादिविकृताकारंदृष्ट्वाप्रहासः । स० कपिपीडाईदृशी अहोहतिहासः ॥२७॥ ति० सागरस्योत्तरेतीरेस्थिला श्लक्ष्णयागिरा वानरान्सान्त्वयन् अक्लिष्टंतेवचनं यथासंदेशंतथाऽब्रुवं ॥ २९ ॥ ति० विराधादि-

[पा०] १ घ. शुकमत्रविसर्जय. २ ङ. च. छ. झ. ञ. ट. रामस्यतुवचः. ३ ख.—ट. वानरैश्चनिपीडितः. ४ क. ख. ग. ङ.—ट. वाक्यमुवाचह. ५ ङ. च. छ. झ. ट. स्तेनराज्ञा. ६ घ. रावणंराक्षसाधिपं. ७ झ. तीरेऽब्रवंते. ८ झ. सान्त्वयन्. ९ ङ. झ. ञ. ट. दृष्टमात्रः. १० ङ. झ. नते. ११ ङ. झ. ट. युद्धंवापिप्रदीयतां.

शुकस्य वचनं श्रुत्वा रावणो वाक्यमब्रवीत् ॥ रोषसंरक्तनयनो निर्दहन्निव चक्षुषा ॥ ३७ ॥
यदि मां प्रति युद्ध्येरन्देवगन्धर्वदानवाः ॥ नैव सीतां प्रयच्छामि सर्वलोकभयादपि ॥ ३८ ॥
कदा नामाभिधावन्ति राघवं मामकाः शराः ॥ वसन्ते पुष्पितं मत्ता भ्रमरा इव पादपम् ॥ ३९ ॥
कदा तूणीशयैर्दीप्तैर्गणशः कार्मुकच्युतैः ॥ शरैरादीपयाम्येनमुल्काभिरिव कुञ्जरम् ॥ ४० ॥
तच्चास्य बलमादास्ये बलेन महता वृतः ॥ ज्योतिषामिव सर्वेषां प्रभामुद्यन्दिवाकरः ॥ ४१ ॥
सागरस्येव मे वेगो मारुतस्येव मे गतिः ॥ न हि दाशरथिर्वेद तेन मां योद्धुमिच्छति ॥ ४२ ॥
न मे तूणीशयान्बाणान्सविषानिव पन्नगान् ॥ रामः पश्यति संग्रामे तेन मां योद्धुमिच्छति ॥४३॥
न जानाति पुरा वीर्यं मम युद्धे स राघवः ॥ ४४ ॥
मम चापमयीं वीणां शरकोणैः प्रवादिताम् ॥ ज्याशब्दतुमुलां घोरामार्तभीतमहास्वनाम् ॥ ४५ ॥
नाराचतलसन्नादां तां ममाहितवाहिनीम् ॥ अवगाह्य महारङ्गं वादयिष्याम्यहं रणे ॥ ४६ ॥

न वासवेनापि सहस्रचक्षुषा यथाऽस्मि शक्यो वरुणेन वा स्वयम् ॥
यमेन वा धर्षयितुं शराग्निना महाहवे वैश्रवणेन वा पुनः ॥ ४७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

मित्युक्तंविशदयति—सीतामिति ॥ ३६—३७ ॥ सर्वलोकभयात् सर्वलोकेभ्यो भयात् ॥ ३८ ॥ स्वमनोरथं दर्शयति—कदेत्यादिना ॥ ३९ ॥ तूणीशयैः चिरात्समराभावेन केवलतूणीरस्थैः । गणशः सङ्घशः । उल्काभिः निर्गतज्वालाकाष्ठैः । ताभिः कुञ्जरमभिद्रावयन्तीति प्रसिद्धिः ॥ ४० ॥ तत् बलं "स च हन्ता विराधस्य" इत्यादिना भवदुक्तबलं । आदास्ये तिरस्करोमीत्यर्थः ॥ ४१—४३ ॥ न जानातीत्यर्धं ॥ पुरा न जानाति इतःपरं ज्ञास्यतीत्यर्थः ॥ ४४ ॥ अथ रूपकव्याजेन युद्धस्यात्मनो विनोदनकरत्वमाह—ममेत्यादिना ॥ ममाहितवाहिनीमेव महारङ्गं विपुलनृत्तशालां । अवगाह्य प्रविश्य । शरैरेव कोणैः वीणावादनदण्डैः । प्रवादितां शब्दितां । ज्याशब्द एव तुमुलः तुमुलस्वनो यस्यास्तां । आर्तभीतमहास्वनां आर्तभीतशब्देन तत्स्वनो लक्ष्यते । एवं नाराचतलशब्देनापि तत्स्वनः । आर्तभीतानां स्वन एव महास्वनो यस्यास्तां । नाराचतलस्वन एव सन्नादो यस्यास्तां । घोरां अन्यैर्वादयितुमशक्यां । मम चापमयीं वीणामिति व्यस्तरूपकं । रणे रणस्थजने । शृण्वतीति शेषः । वीणाया मन्द्रमध्यतारभेदेन स्वरत्रयसंभवादत्रापि स्वरत्रयमुक्तं ॥ ४५—४६ ॥ न वासवेनेति सहस्रचक्षुष्ट्वं गर्वहेतुत्वेनोक्तं । दिग्विजये वरुणपुत्रैरेव युद्धकरणात् स्वयमित्युक्तं । वासवादिभिः शराग्निना यथा धर्षयितुं न शक्योस्मीति योजना ॥ ४७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्विंशः सर्गः ॥ २४ ॥

हन्तेत्यनेन तवापिहन्तेतिसूचितं पदं स्थानं । अन्विष्यागतः ॥ ३२ ॥ **स०** चक्षुषेत्येकवचनेन अल्पबलेशुकेकोपेनसमग्रचक्षुषां विनियोगे भवेद्रक्षीभूतःसइतितजीवनेच्छारावणस्याधुनास्तीतिद्योत्यते ॥ ३७ ॥ **स०** सर्वलोकः सर्वज्ञः हरोवाहरिर्वाहिरण्यगर्भोवा । तस्माद्भयादपि नैवप्रदास्यामीत्यन्वयः । सर्वलोकभयात् पुत्रादिलोकनाशभयादपीतिवा ॥ ३८ ॥ **रामानु०** सागरस्य जगदाप्लवनोद्यतस्य ॥ ४२ ॥ इतिचतुर्विंशःसर्गः ॥ २४ ॥

[पा०] १ क. ख. ग. ङ. च. झ. ञ. प्रदास्यामि. २ ङ. झ. ट. नदीमहित. ३ घ. नवैश्रवेणापिमृधेस्वयंभुवा. ४ क. च. छ. ज. वास्वयं.

पञ्चविंशः सर्गः ॥ २५ ॥

विभीषणेन रावणप्रेरणया रामसेनागणनाद्यर्थंप्रहितयोः कपिरूपधारणेनकपिसेनाप्रविष्टयोः शुकसारणनाम्नो राक्षसयोर्ग्रहणेन रामेप्रत्यर्पणम् ॥ १ ॥ स्वप्रार्थनया रावणे संदेशनिवेदनचोदनपूर्वकं राममोचिताभ्यांशुकसारणाभ्यां रावणमेत्य तंप्रति विभीषणकृतस्वग्रहणादिनिवेदनम् ॥ २ ॥ तथा वानरसेनाया अपरिच्छेद्यत्वनिवेदनपूर्वकं रामप्रभाववर्णनेनसीताप्रदानपूर्वकं तेनसन्धिविधानम् ॥ ३ ॥

सबले सागरं तीर्णे रामे दशरथात्मजे ॥ अमात्यौ रावणः श्रीमानब्रवीच्छुकसारणौ ॥ १ ॥
समग्रं सागरं तीर्णं दुस्तरं वानरं बलम् ॥ अभूतपूर्वं रामेण सागरे सेतुबन्धनम् ॥ २ ॥
सागरे सेतुबन्धं तु न श्रद्दध्यां कथंचन ॥ अवश्यं चापि संख्येयं तन्मया वानरं बलम् ॥ ३ ॥
भवन्तौ वानरं सैन्यं प्रविश्यानुपलक्षितौ ॥ परिमाणं च वीर्यं च ये च मुख्याः प्लवङ्गमाः ॥ ४ ॥
मन्त्रिणो ये च रामस्य सुग्रीवस्य च संमताः ॥ ये पूर्वमभिवर्तन्ते ये च शूराः प्लवङ्गमाः ॥ ५ ॥
स च सेतुर्यथा बद्धः सागरे सलिलार्णवे ॥ निवेशं यद्यथा तेषां वानराणां महात्मनाम् ॥ ६ ॥
रामस्य व्यवसायं च वीर्यं प्रहरणानि च ॥ लक्ष्मणस्य च वीर्यं च तत्त्वतो ज्ञातुमर्हथः ॥ ७ ॥
कश्च सेनापतिस्तेषां वानराणां महौजसाम् ॥ एतज्ज्ञात्वा यथातत्त्वं शीघ्रमागन्तुमर्हथः ॥ ८ ॥
इति प्रतिसमादिष्टौ राक्षसौ शुकसारणौ ॥ हरिरूपधरौ वीरौ प्रविष्टौ वानरं बलम् ॥ ९ ॥
ततस्तद्वानरं सैन्यमचिन्त्यं रोमहर्षणम् ॥ संख्यातुं नाध्यगच्छेतां तदा तौ शुकसारणौ ॥ १० ॥

अथ शुकसारणप्रेषणं पञ्चविंशे—सबल इत्यादि ॥ दशरथात्मजइति मनुष्यत्वोक्तिः । श्रीमानिति मदातिशयोक्तिः । शुकः पूर्वस्मादन्यः । सारणसाहित्यात् ॥ १ ॥ समग्रं विशालं । दुस्तरं तरितुमशक्यं । सागरं कर्म । वानरं वानरसंबन्धि बलं कर्तृ । तीर्णं अतरत् । कर्तरि क्तः । सेतुबन्धनं रामेण कृतमिति शेषः ॥ २ ॥ सेतुबन्धनं रामेण कृतं । कथंचन आप्तपुरुषोदितत्वेपि । अपिच तथापि । संख्येयं ज्ञातव्यं ॥ ३ ॥ भवन्तावित्यादि चतुःश्लोक्येकान्वया ॥ तस्माद्भवन्तौ अनुपलक्षितौ परैरविज्ञातौ सन्तौ । वानरं सैन्यं प्रविश्य । परिमाणं वानराणामियत्तां । तेषां वीर्यं बलपरिच्छेदं । ये प्लवङ्गमाःमुख्याः प्रधानभूताः तान् । ये रामस्य सुग्रीवस्य च संमता मन्त्रिणः । ये नासीरभटाः पूर्वमभिवर्तन्ते । ये च प्लवङ्गमाः वस्तुतः शूराः तान्सर्वान् । सागरे सगरखानिते । सलिलार्णवे लवणजलसमुद्रे । स सेतुः वानरतरणार्थसेतुश्च । यथा येन प्रकारेण बद्धः तं प्रकारं । तेषां निवेशं निवासं । उत्पत्तिस्थानं वा । क्लीबत्वमार्षं । यद्यथा यादृशप्रकारः । रामस्य व्यवसायं कर्तव्यविषयनिश्चयं । वीर्यं बलं । प्रहरणानि आयुधानि । लक्ष्मणस्य व्यवसायं बलं च । तत्त्वतः पारमार्थ्येन । ज्ञातुमर्हथ इत्यन्वयः ॥ ४—९ ॥ नाध्य-

ति० अमात्यत्वेनविशेषणादयंशुकोऽन्यः । पूर्वप्रेषितशुकोक्तवृत्तान्तज्ञानपूर्वकंप्रेषणाच्चेतिकतकादयः ॥ स० चारात्प्राचीनादयमन्योऽमात्यत्वेनोक्तेः । अथवाऽयंसएव । परिचितसैन्यकलात् । अमात्यस्यात्याप्तत्वेन प्रथमप्रतिपत्त्यर्थंप्रेषणस्यौचित्यात् । अतएव पक्षीभूयप्रतिपक्षिसेनाप्रवेशोपिसंभवति । नचचारः इत्युक्त्याऽयमन्यइतिवाच्यं । चतुर्दशश्लोके "राक्षसेन्द्रस्यमन्त्रिणौ । लङ्कायाः समनुप्राप्तौचारौ" इत्युक्तेर्मन्त्रिणोपिचारतासंभवात् । छत्रिन्यायेनवाऽमात्यत्वोक्तिरिति भवतुचारएवायं । "अवश्यंचापिसंख्येयं" इत्युत्तरत्रसेनासंख्यारूपादिविशेषविवित्सानुज्ञानात्सामान्यतस्तज्ज्ञानिनासहान्यप्रेषणस्यन्याय्यत्वात् ॥ १ ॥ ति० सागरे सेतुबन्धनंनश्रद्दध्यां । समुद्रस्यविराड्वदरत्वेनजीवत्रातैरशक्यबन्धनत्वाज्जीवविशेषत्वाच्चरामस्येत्याशयः । रामोपिविराडेवनान्यइति बुद्धिस्तु रजस्तमःप्रधानत्वान्नतस्येतिदिक् ॥ ३ ॥ स० सागरे सगरपुत्रखातत्वात्तत्संबन्धिनि । अर्णवशब्दोरूढः समुद्रइत्येतन्मात्रार्थकः । सलिलार्णवे जलसमुद्रेइत्यर्थः । "सल गतौ" इलजन्तः । तथाचसलिलानि गच्छन्ति अर्णांसिसन्त्यत्रेतिसवा ।

[पा०] १ ख. ङ. च. छ. झ. ञ. ट. सेतुबन्धंतं. २ ज. कदाचन. ३ ङ. ज. झ. ट. संगताः. ४ ख. च. छ. मुख्याः. ५ ङ. झ. ट. निवेशंचयथा. घ. प्रवेशश्चयथा. ज. निवेशश्चयथा. ६ ग. ङ. च. छ. झ. ञ. ट. वीरस्य. ७ ङ. झ. महात्मनां. ८ ङ. झ. तच्चज्ञात्वा.

[1]संस्थितं पर्वताग्रेषु निर्दरेषु गुहासु च ॥ समुद्रस्य च तीरेषु वनेषूपवनेषु च ॥ ११ ॥
तरमाणं च तीर्णं च तर्तुकामं च सर्वशः ॥ निविष्टं निविशचैव भीमनादं महाबलम् ॥
तद्बलार्णवमक्षोभ्यं ददृशाते निशाचरौ ॥ १२ ॥
तौ ददर्श महातेजाः प्रेच्छन्नौ च विभीषणः ॥ आचचक्षेऽथ रामाय गृहीत्वा शुकसारणौ ॥ १३ ॥
[3]तस्येमौ राक्षसेन्द्रस्य मन्त्रिणौ शुकसारणौ ॥ लङ्कायाः समनुप्राप्तौ चारौ परपुरंजय ॥ १४ ॥
तौ दृष्ट्वा व्यथितौ रामं निराशौ जीविते तदा ॥ कृताञ्जलिपुटौ भीतौ वचनं चेदमूचतुः ॥ १५ ॥
आवामिहागतौ सौम्य रावणप्रहितावुभौ ॥ परिज्ञातुं बलं कृत्स्नं तवेदं रघुनन्दन ॥ १६ ॥
तयोस्तद्वचनं श्रुत्वा रामो दशरथात्मजः ॥ अब्रवीत्प्रहसन्वाक्यं सर्वभूतहिते रतः ॥ १७ ॥
यदि दृष्टं बलं कृत्स्नं वयं वा सुपरीक्षिताः ॥ यथोक्तं वा कृतं कार्यं छन्दतः प्रतिगम्यताम् ॥१८॥
अथ किंचिददृष्टं वा भूयस्तद्द्रष्टुमर्हथः ॥ विभीषणो वा कात्स्न्र्येन भूयः संदर्शयिष्यति ॥ १९ ॥
न चेदं ग्रहणं प्राप्य भेतव्यं जीवितं प्रति ॥ न्यस्तशस्त्रौ गृहीतौ वा न दूतौ वधमर्हथः ॥ २० ॥
पृच्छमानौ विमुञ्चैतौ चारौ रात्रिंचरावुभौ ॥ शत्रुपक्षस्य सततं विभीषण विकर्षणौ ॥ २१ ॥
प्रविश्य नगरीं लङ्कां भवद्भ्यां धनदानुजः ॥ वक्तव्यो रक्षसां राजा यथोक्तं वचनं मम ॥ २२ ॥
यद्बलं च समाश्रित्य सीतां मे हृतवानसि ॥ तद्दर्शय यथाकामं ससैन्यः सहबान्धवः ॥ २३ ॥
श्वः काल्ये नगरीं लङ्कां सप्राकारां सतोरणाम् ॥ राक्षसं च बलं पश्य शरैर्विध्वंसितं मया ॥२४॥
क्रोधं भीममहं मोक्ष्ये ससैन्ये त्वयि रावण ॥ श्वः काल्ये वज्रवान्वज्रं दानवेष्विव वासवः ॥२५॥

गच्छेतां नाज्ञासिष्टां ॥ १० ॥ अज्ञानहेतुमाह सार्धश्लोकद्वयेन—संस्थितमिति ॥ निर्दरेषु दलितपर्वतप्रदेशेषु। उपवनेषु आरामेषु। "आरामः स्यादुपवनं" इत्यमरः ॥ ११—१२ ॥ अथ विभीषणः ददर्श आचचक्षे चेत्यन्वयः ॥ १३ ॥ लङ्काया इति पञ्चमी। परपुरं जयतीति परपुरंजयः। " संज्ञायां भृतृवृजिधारिसहितपिदमः " इति खच् ॥ १४—१६ ॥ दशरथात्मजः महापुरुषप्रसूतत्वेन सहजकारुण्यः। प्रहसन् रावणबुद्धिमान्द्यस्मरणात् प्रहासः। सर्वभूतहिते रतः रिपूणामपि वत्सलः ॥ १७ ॥ यथोक्तं रावणेन यथोक्तं। छन्दतः यथेच्छातः ॥ १८ ॥ अथेति पक्षान्तरे। भूयः अतिशयेन ॥ १९ ॥ दूतौ युवामितिशेषः ॥ २० ॥ विभीषणं प्रत्याह—पृच्छमानाविति ॥ सततं पृच्छमानत्वदशायामपि शत्रुपक्षस्य विकर्षणौ बाधकाविति यावत् ॥ २१ ॥ पुनर्दूतौ प्रत्याह—प्रविश्येति ॥ २२ ॥ यथाकामं यथेच्छं। शरणं वाऽऽगच्छेति भावः ॥ २३ ॥ श्वः काल्ये परेद्युः प्रातःकाले ॥ २४ ॥ क्रोधं मोक्ष्ये क्रोधकार्यं

तस्मिन् ॥ ६ ॥ स० बलार्णवं अर्णवशब्दस्यनपुंसकतातुपूर्वव्युत्पादितानुसंधेया ॥ १२ ॥ ति० प्रहसन् सेतुबन्धनेनजनस्थाने निरपेक्षंखरादिवधेनचनमद्बलज्ञानंवृत्तमितिप्रहासः ॥ १७ ॥ ति० वयमितिरामेणनिर्देशः सुग्रीवादिसहितस्यस्वस्य । सुसमाहिताः ज्ञातबलाः ॥ स० सुसमीक्षिताः अतिसम्यगवलोकिताः। वयंवासुसमाहिताइतिपाठे सुसमाहिताः स्वस्थचित्ताः प्रतिभटभीतिरहिताइतियावत्। दृष्टमितिविपरिणतंसदृष्टाइत्यन्वेति। " अस्मदोद्वयोश्च " इतिवयमितिसंभवति। ननुनसंभवतिसविशेषणत्वादितिचेन्न। " नचविदितवेद्याअपिवयं " " शैवावयंनखलुतत्रविचारणीयंपञ्चाक्षरीजपपरानितरां " इत्यादिवद्विधेयविशेषणत्वाददोषः। असुसमाहिताः रावणंसगणंतृणीकृत्यानवधानेनैवस्थिताइतिवा। प्रतिगम्यतां स्वस्मिंसंनिधिं ॥ १८ ॥ ति० न्यस्तशस्त्रत्वादेकैकमप्यवधेहेतुःकिमुसमुदितमितिभावः ॥ २० ॥ ती० सततंपृच्छमानौ अभयंपृच्छन्तौ ॥ २१ ॥

[पा०] १ ङ.—ट. तस्थितं. २ ख. ग.—ट. प्रतिच्छन्नौ. ३ ङ. ट. तस्यैतौ. ४ ङ. झ. सर्वतदिदं. ५ क. ग. ङ. झ. ट. सर्वं. ६ क. ग. च. छ. ञ. ट. ठ. वयंवासुसमीक्षिताः. ङ. झ. वयंवासुसमाहिताः. घ. वयंसाधुसमीक्षिताः. ७ ङ. झ. ट. पुनः. ८ च. छ. ञ. नचात्मग्रहणं. क. ख. नचात्र. ९ ङ. झ. ञ. ट. प्रच्छन्नौच. १० च. छ. ञ. वचनान्मम. ११ ख. राक्षसंस्वबलं. ग. राक्षसंस्वजनं. क. घ. ङ. झ. ट. रक्षसांचबलं. च. छ. रक्षसांस्वबलं. १२ क.—घ. च. ज. ञ. घोरंरोषमहं. १३ ग. बलंधारयरावण.

इति प्रतिसमादिष्टौ राक्षसौ शुकसारणौ ॥ जयेति प्रतिनन्द्यैतौ राघवं धर्मवत्सलम् ॥
आगम्य नगरीं लङ्कामब्रूतां राक्षसाधिपम् ॥ २६ ॥
विभीषणगृहीतौ तु वधार्हौ राक्षसेश्वर ॥ दृष्ट्वा धर्मात्मना मुक्तौ रामेणामिततेजसा ॥ २७ ॥
एकस्थानगता यत्र चत्वारः पुरुषर्षभाः ॥ लोकपालोपमाः शूराः कृतास्त्रा दृढविक्रमाः ॥ २८ ॥
रामो दाशरथिः श्रीमाँल्लक्ष्मणश्च विभीषणः ॥ सुग्रीवश्च महातेजा महेन्द्रसमविक्रमः ॥ २९ ॥
एते शक्ताः पुरीं लङ्कां सप्राकारां सतोरणाम् ॥ उत्पाट्य संक्रामयितुं सर्वे तिष्ठन्तु वानराः ॥ ३० ॥
यादृशं तस्य रामस्य रूपं प्रहरणानि च ॥ वधिष्यति पुरीं लङ्कामेकस्तिष्ठन्तु ते त्रयः ॥ ३१ ॥
रामलक्ष्मणगुप्ता सा सुग्रीवेण च वाहिनी ॥ बभूव दुर्धर्षतरा सेन्द्रैरपि सुरासुरैः ॥ ३२ ॥
[युक्तः सेतुस्तथा बद्धो दशयोजनविस्तृतः ॥ शतयोजनमायामस्तीर्णा सेना च सागरम् ॥ ३३ ॥
निविष्टो दक्षिणे तीरे रामः स च नदीपतेः ॥ तीर्णस्य तरमाणस्य बलस्यान्तो न विद्यते ॥ ३४ ॥]
प्रहृष्टरूपा ध्वजिनी वनौकसां महात्मनां संप्रति योद्धुमिच्छताम् ॥
अलं विरोधेन शमो विधीयतां प्रदीयतां दाशरथाय मैथिली ॥ ३५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

करिष्य इत्यर्थः । वज्रवान् अभ्यस्तवज्र इत्यर्थः ॥ २५ ॥ इतीत्यादि सार्धश्लोक एकान्वयः ॥ प्रतिनन्द्य अभिष्टुत्य ॥ २६ ॥ मुक्तौ आवामिति शेषः । धर्मात्मना दूतवधमनिच्छतेत्यर्थः । अमिततेजसेत्यनेन अस्मत्त्यागे भीतिहेतुता न शङ्क्येत्यर्थः ॥ २७ ॥ एकस्थानेत्यादि श्लोकत्रयमेकान्वयं ॥ यत्र एकस्थानं ऐकमत्यं । एकप्रदेशं वा गताः एते शक्ताः । पुरीं लङ्कामित्याद्यन्वयः । कृतास्त्राः शिक्षितास्त्राः । छत्रिणो गच्छन्तीतिवदयं निर्देशः । सुग्रीवस्याकृतास्त्रत्वात् । उत्पाट्य उद्धृत्य । संक्रामयितुं अन्यत्र क्षेप्तुं । सर्वे एतच्चतुष्टयमिन्नाः ॥ २८—३० ॥ यादृशमिति । प्रहरणादिकं यादृशं तदवलोकने राम एको वधिष्यतीति मन्यावहे इत्यर्थः ॥ ३१ ॥ नन्वसहायशूरोपि रामः सेनाहननादनुत्साहः स्यात् तत्क्रियतामित्यत्राह—रामलक्ष्मणेति ॥ सुग्रीवेण च अङ्गदादिना च सहिता सा अपरिच्छिन्ना । हरिवाहिनी चपलकपिसेना । रामलक्ष्मणगुप्ता रामेण रामस्य दक्षिणो बाहुरिति रामदक्षिणबाहुभूतेन लक्ष्मणेन च गुप्ता सती । सुग्रीवस्य रक्ष्यकोटावेवान्वयः न तु रक्षककोटौ । तन्मन्त्रिणा हनुमतैव—" जयत्यतिबलो रामो लक्ष्मणश्च महाबलः । राजा जयति सुग्रीवो राघवेणाभिपालितः " इत्युक्तेः । दुर्धर्षतरा बभूव । तरसा मनसापि धर्षयितुमशक्येत्यवगम्यते । न केवलं मनुष्यादिभिः किन्तु सुरैरपि । न केवलं सुरैरेव किन्तु सुरासुरैः विरोधं विहाय कृतसौहार्दैरपि । न केवलमनायकैस्तैः किन्तु सेन्द्रैरपि । स्वस्वातन्त्र्यं विहाय नायकाज्ञानुवर्तिभिरित्यर्थः ॥ ३२—३४ ॥ महात्मनां दृढमनस्कानां । संप्रति सद्य एव । योद्धुमिच्छतां । प्रहृष्टरूपा हर्षद्योतकाकारयुक्ता । भवतीति शेषः । अतस्तद्विरोधेनालं । शमः क्रोधनिवृत्तिः । विधीयतां क्रियतां । मैथिली प्रदीयतां च ॥ ३५ ॥ इति श्रीगो-

---

विभीषणगृहीतावित्यनेन तत्त्यागस्तवमहतेऽनर्थायेतिसूचितं ॥ स० ननु "वधंनकुर्वन्तिपरावरज्ञादूतस्य" इत्यारभ्य "युक्तायुक्तं विनिश्चित्यदूतदण्डोविधीयताम् । विभीषणवचःश्रुत्वा" इत्यन्तेनग्रन्थेनविभीषणकृतदूतघातप्रतिषेधबोधनावगतेःअत्रपुनः "विभीषणगृहीतौतुवधार्हौ" इत्युक्तिःकथमितिचेत्सत्यं । शङ्केरंस्तत्त्यागेकपयोमयीतितथाऽऽत्मानंदर्शयामासेतियुक्ततोक्तेर्ज्ञेया । मरिष्यन्नयनस्यपरिश्रमन्नरएवयमदूतइतिनीतेरभावादारभव्याऽतथाकार्यपितथेतिवा ॥ २७ ॥ स० तेत्रयइति । रावणज्ञातपराक्रमत्वाद्धनुमदनुक्तिः ॥ ३१ ॥ रामानु० प्रहृष्टरूपा अत्यन्तंप्रहृष्टा । प्रशंसायांरूपप् ॥ ३५ ॥ इतिपञ्चविंशःसर्गः ॥ २५ ॥

[पा०] १ क. ङ. च. छ. झ. ट. प्रतिनन्द्यैनं. ख. चप्रणम्यैनं. २ ङ. झ. वधार्थ. ३ ङ. झ. ञ. लोकपालसमाः. ४ ङ. झ. ट. तद्धि. ५ क.—ट. सर्वैरपि. ६ इदंश्लोकद्वयं औत्तराहपाठएवदृश्यते. ७ क. ख. ग. ङ. च. छ. झ. ञ. ट. प्रहृष्टयोधा. ८ ख. महात्मनासंप्रतियोद्धुमिच्छता.

षड्विंशः सर्गः ॥ २६ ॥

वानरबलावलोकनाय शुकसारणाभ्यांसहोच्चप्रासादमारूढंरावणंप्रति सारणेन पृथक्पृथङ्नामनिर्देशेनतत्तद्बलपराक्रमवर्णनपूर्वकं नीलाङ्गदादिप्रधानयूथनाथप्रदर्शनम् ॥ १ ॥

तद्वचः पथ्यमक्लीबं सारणेनाभिभाषितम् ॥ निशम्य रावणो राजा प्रत्यभाषत सारणम् ॥ १ ॥
यदि मामभियुञ्जीरन्देवगन्धर्वदानवाः ॥ नैव सीतां प्रदास्यामि सर्वलोकभयादपि ॥ २ ॥
त्वं तु सौम्य परित्रस्तो हरिभिर्निर्जितो भृशम् ॥ प्रतिप्रदानमद्यैव सीतायाः साधु मन्यसे ॥
को हि नाम सपत्नो मां समरे जेतुमर्हति ॥ ३ ॥
इत्युक्त्वा परुषं वाक्यं रावणो राक्षसाधिपः ॥ आरुरोह ततः श्रीमान्प्रासादं हिमपाण्डरम् ॥
बहुतालसमुत्सेधं रावणोथ दिदृक्षया ॥ ४ ॥
ताभ्यां चराभ्यां सहितो रावणः क्रोधमूर्च्छितः ॥ पश्यमानः समुद्रं च पर्वतांश्च वनानि च ॥
ददर्श पृथिवीदेशं सुसंपूर्णं प्लवङ्गमैः ॥ ५ ॥
तदपारमसङ्ख्येयं वानराणां महद्बलम् ॥ आलोक्य रावणो राजा परिपप्रच्छ सारणम् ॥ ६ ॥
एषां वानरमुख्यानां के शूराः के महाबलाः ॥ के पूर्वमभिवर्तन्ते महोत्साहाः समन्ततः ॥ ७ ॥
केषां शृणोति सुग्रीवः के वा यूथपयूथपाः ॥ सारणाचक्ष्व तत्त्वेन के प्रधानाः प्लवङ्गमाः ॥ ८ ॥
सारणो राक्षसेन्द्रस्य वचनं परिपृच्छतः ॥ आचचक्षेऽथ मुख्यज्ञो मुख्यांस्तांस्तु वनौकसः ॥ ९ ॥
एष गोभिमुखो लङ्कां नर्दंस्तिष्ठति वानरः ॥ यूथपानां सहस्राणां शतेन परिवारितः ॥ १० ॥
यस्य घोषेण महता सप्राकारा सतोरणा ॥ लङ्का प्रत्रेपते सर्वा सशैलवनकानना ॥ ११ ॥

विन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

अथ रावणाय सारणेन वानरयूथपतीनां वीर्यादिकथनपूर्वकं तत्प्रदर्शनं षड्विंशे—तदिति ॥ अक्लीबं अकातरं । प्रत्यभाषत अनिन्ददित्यर्थः ॥ १ ॥ अभियुञ्जीरन् युद्ध्येरन् । सर्वलोकभयात् सर्वलोकेभ्यो भयात् ॥ २ ॥ त्वमित्यादिसार्धश्लोकः ॥ सपत्नः शत्रुः ॥ ३ ॥ इत्युक्त्वेत्यादिसार्धश्लोकः ॥ ततः तस्मात्पूर्वस्थानात् । बहुतालसमुत्सेधं अनेकतालवृक्षतुल्यौन्नत्यं । यद्वा विततार्ङुष्ठमध्यमामितस्तालः । तदाह सज्जनः—" प्रादेशतालगोकर्णवितस्त्यश्च यथाक्रमम् । भवन्ति विततार्ङुष्ठप्रदेशिन्यादिभिः सह " इति ॥ अत्र द्वितीयो रावणशब्दो रावयतीति व्युत्पत्त्या क्रियानिमित्तकः । दिदृक्षया वानरबलदिदृक्षया ॥ ४ ॥ चराभ्यां चाराभ्यां । क्रोधमूर्च्छितः क्रोधेन व्याप्तः । पृथिवीदेशं त्रिकूटाधःप्रदेशं ॥ ५ ॥ अपारं उत्तरावधिरहितं ॥ ६ ॥ एषामिति । इयं निर्धारणेषष्ठी ॥ ७ ॥ केषामिति । वचनमिति शेषः । प्रधानाः सेनापतयः ॥ ८ ॥ वचनं निशम्येति शेषः ॥ ९ ॥ त्रिभिर्नीलं वर्णयति—एष इत्यादि ॥ य एष इत्यन्वयः ।

शि० हरिभिर्भृशंपीडितः अतएवपरित्रस्तस्त्वंसीतायाःप्रतिप्रदानं साधुमन्यसे । एतेन रामबलवर्णनंभीतिहेतुकमितिसूचितं ॥ ३ ॥ ति० सहस्रेणशतेन लक्षेणेत्यर्थः ॥ १० ॥

[पा०] १ ङ. झ. ट. सत्यमक्लीबं. २ क. ख. ग. ङ. च. छ. झ. पर्यभाषत. ३ क. ख. ग. ङ. च. छ. झ. ञ. ट. सीतामहंदद्याः. ४ क. ङ. च. छ. झ. ञ. ट. हरिभिःपीडितो. ग. हरिभिर्निहतो. ख. हरिभिस्तर्जितो. ५ ङ. झ. समुद्रंतं. ६ ङ. च. झ. ञ. ट. मसह्यंच. घ. मसंबाधं. ७ ङ. झ. महाबलं. ८ घ.—छ. झ. ञ. ट. केवानरामुख्याःके. ९ ख. ग. ङ. छ. झ. ट. मेसर्वांकिंप्रभावाःप्लवङ्गमाः. क. घ. च. ञ. मेसर्वे. १० ङ. च. छ. झ. ञ. ट. आवभाषेथ. ११ क. ख. ग. ङ. च. झ. ञ. ट. मुख्यांस्तत्र. घ. मुख्यांस्तत्रप्लवङ्गमान्. १२ क. ख. ङ. च. छ. झ. ञ. ट. सहस्रेणशतेन. १३ ङ. झ. ट. प्रतिहता.

सर्वशाखामृगेन्द्रस्य सुग्रीवस्य महात्मनः ॥ बलाग्रे तिष्ठते वीरो नीलो [1]नामैष यूथपः ॥ १२ ॥
बाहू प्रगृह्य यः पद्भ्यां महीं गच्छति वीर्यवान् ॥ लङ्कामभिमुखः क्रोधादभीक्ष्णं च विजृम्भते ॥१३॥
गिरिशृङ्गप्रतीकाशः पद्मकिञ्जल्कसन्निभः ॥ स्फोटयत्यं[2]भिसंरब्धो लाङ्गूलं च पुनः पुनः ॥
यस्य लाङ्गूलशब्देन [3]स्तनन्ति प्रदिशो दश ॥ १४ ॥
एष वानरराजेन सुग्रीवेणाभिषेचितः ॥ [4]यौवराज्येऽङ्गदो नाम त्वामाह्वयति संयुगे ॥ १५ ॥
वालिनः सदृशः पुत्रः [5]सुग्रीवस्य सदा प्रियः ॥ राघवार्थे पराक्रान्तः शक्रार्थे वरुणो यथा ॥ १६ ॥
एतस्य सा मतिः सर्वा यदृष्टा जनकात्मजा ॥ हनूमता वेगवता राघवस्य हितैषिणा ॥ १७ ॥
बहू[6]नि वानरेन्द्राणामेष यूथानि वीर्यवान् ॥ परिगृह्याभियाति त्वां [7]स्वेनानीकेन दुर्जयः ॥ १८ ॥
अनु वालिसुतस्यापि बलेन महता वृतः ॥ वीरस्तिष्ठति संग्रामे सेतुहेतुरयं नलः ॥ १९ ॥
ये तु विष्टभ्य गात्राणि क्ष्वेलयन्ति नदन्ति च ॥ [8]उत्थाय च विजृम्भन्ते [9]क्रोधेन हरिपुङ्गवाः ॥२०॥
एते दुष्प्रसहा [10]घोराश्चण्डाश्चण्डपराक्रमाः ॥ अष्टौ शतसहस्राणि दशकोटिशतानि च ॥ २१ ॥
य एनमनुगच्छन्ति वीरा[11]श्चन्दनवासिनः ॥ एषैवाशंसते लङ्कां [12]स्वेनानीकेन मर्दितुम् ॥ २२ ॥
श्वेतो रजतसंकाशश्चपलो भीमविक्रमः ॥ बुद्धिमान्[13]वानरो वीरस्त्रिषु लोकेषु विश्रुतः ॥ २३ ॥
तूर्णं सुग्रीवमागम्य पुनर्गच्छति [14]सत्वरः ॥ विभजन्वानरीं सेनामनीकानि प्रहर्षयन् ॥ २४ ॥

तिष्ठते तिष्ठति ॥ १०—१२ ॥ अथाङ्गदं वर्णयति—बाहू इत्यादिना स्वेनानीकेन दुर्जय इत्यन्तेन ॥ बाहू प्रगृह्य उत्क्षिप्य । अभि उद्दिश्य मुखं यस्यासावभिमुखः । विजृम्भते जृम्भणं करोति ॥ १३ ॥ पद्मकिञ्जल्कसन्निभः पद्मकेसरवत्पीतवर्ण इत्यर्थः । स्फोटयति भूमौ ताडयति । अभिसंरब्धः कुपितः । प्रस्वनन्तीत्यन्वयः ॥ १४ ॥ अभिषेचितः अभिषिक्तः । आह्वयति आह्वयते । स्पर्धाविषयेऽप्यात्मनेपदाभाव आर्षः ॥ १५ ॥ पराक्रान्तः पराक्रमितुमुद्यतः ॥१६॥ एतस्येति ॥ हनूमता सीता दृष्टेति यत्सा मतिः एतस्य अङ्गदस्य । एतद्बुद्धिमूलं हनुमतः सीतादर्शनमितिभावः । अङ्गदपुरस्कारेण हनुमतः समागमात् ॥१७॥ स्वेनानीकेनेति दुर्जयत्वकारणोक्तिः । अतो न पुनरुक्तिः ॥ १८ ॥ अनु वालीति । एतस्योत्तरार्धं वीरस्तिष्ठति संग्राम इति । वालिसुतस्य अनु पश्चात् । सेतुहेतुः सेतुकर्ता । संग्रामे संग्रामनिमित्तं ॥ १९ ॥ नलपरिवारानाह—ये त्वित्यादिना मर्दितुमित्यन्तेन ॥ श्लोकत्रयमेकान्वयं । विष्टभ्य उन्नम्य । क्ष्वेलयन्ति सिंहनादं कुर्वन्ति । नदन्ति गर्जन्ति । उत्थाय आसनादिति शेषः । विजृम्भन्ते कोपेन गात्रविनामं कुर्वन्ति । य एवंविधा वानराः ये च चन्दनवासिनः चन्दनवनवासिनः । एते एनं नलमनुगच्छन्तीति संबन्धः । चन्दनवानरा इति पाठे मध्यमपदलोपिसमासः । चन्दनवासिनो वानरा इति । एषैवेति सन्धिरार्षः । आशंसते प्रार्थयते ॥२०—२२॥ अथ द्वाभ्यां श्वेताख्यं वानरं वर्णयति—श्वेत इत्यादि ॥ अन्वर्थनामेत्याह—रजतेति । चपलः युद्धचपलः । अनीकानि पुनर्गच्छतीत्यन्वयः । विभजन् निबिडां सेनां भित्त्वा गच्छन्नित्यर्थः । अत्र चपल इत्यनेन अद्यैव लङ्कां ध्वंसयामीति निवेदनार्थं गत्वा तेन सान्त्वितः

स० चन्दनवासिनः तन्नामकगिरिविशेषवासिनः । अथवा चन्दनभूयिष्ठत्वान्मलयः । तत्रवासिनोवा । एषैव एषएव । संधिरार्षः । एषा याप्रसिद्धालदावासभूता तांलङ्कां मर्दितुमितिवा ॥२२॥ शि० श्वेतंवर्णयति—**श्वेतइति** । वानरीसेनांविभजन्सन् योवानरः सुग्रीवमागम्यतूर्णंपुनर्गच्छति । सवानरः त्रिषुलोकेषुविश्रुतः । श्वेतः तदभिधः । यत्तच्छब्दाध्याहारस्तु अन्यतरवानरशब्दसार्थक्याय । यदितु वानं रचनाविशेषं राति बोधयतीत्यर्थः इतिव्युत्पाद्यते तदानाध्याहृतिः । अर्धचतुष्टयमेकान्वयं ॥ २३-२४ ॥

[पा०] १ घ. नाममहाबलः. २ ग. ङ. च. छ. झ. ञ. ट. त्यतिसंरब्धो. ३ ख. घ. च छ. ज. ट. स्वन-तीवदिशोदश. ४ ग. ङ. झ. ट. युवराजोऽङ्गदो. ५ घ. सुग्रीवस्यचसंमतः. ६ ख. बहूनां. ७ ङ. झ. ट. मर्दितुं. ८ च. ञ. आस्थाय. ९ ख. क्रोधेनमहतावृताः. १० क. ख.घोरावानराश्चण्डविक्रमाः. ११ ग. ज. चण्डाश्चन्दन. ख. धीराश्चन्दन. १२ क. ग. घ. ङ. झ. ट. न्वानरःशूरः. ख. च. छ. ज. न्वानरश्रेष्ठः. ज. न्वानरवरः. १३ ख. ग. ङ. च. झ. ञ. ट. वानरः.

यः पुरा गोमतीतीरे रम्यं पर्येति पर्वतम् ॥ नाम्ना संकोचनो[1] नाम नानानगयुतो गिरिः ॥ २५ ॥
तत्र राज्यं प्रशास्त्येष कुमुदो नाम यूथपः ॥ योसौ शतसहस्राणां[2] सहस्रं परिकर्षति ॥ २६ ॥
यस्य वाला बहुव्यामा दीर्घा लाङ्गूलमाश्रिताः ॥ ताम्राः पीताः सिताः श्वेताः प्रकीर्णा घोरकर्मणः[3] ॥ २७ ॥
अदीनो रोषणश्चण्डः संग्राममभिकाङ्क्षति ॥ एषोप्याशंसते[4] लङ्कां स्वेनानीकेन मर्दितुम् ॥ २८ ॥
यस्त्वेष सिंहसंकाशः कपिलो दीर्घलोचनः[5] ॥ निभृतः प्रेक्षते लङ्कां दिधक्षन्निव चक्षुषा ॥ २९ ॥
विन्ध्यं कृष्णगिरिं सह्यं पर्वतं च सुदर्शनम् ॥ राजन्सततमध्यास्ते रम्भो नामैष यूथपः[6] ॥ ३० ॥
शतं शतसहस्राणां त्रिंशच्च हरिपुङ्गवाः ॥ यमेते[7] वानराः शूराश्चण्डाश्चण्डपराक्रमाः ॥
परिवार्यानुगच्छन्ति लङ्कां मर्दितुमोजसा ॥ ३१ ॥
यस्तु कर्णौ विवृणुते जृम्भते च पुनःपुनः ॥ न च संविजते मृत्योर्न च युद्धाद्विधावति ॥ ३२ ॥
प्रकंपते च रोषेण तिर्यक्पुनरीक्षते ॥ पर्श्यल्लाङ्गूलमपि च क्ष्वेलते[8] च महाबलः ॥ ३३ ॥
महाजवो[9] वीतभयो रम्यं साल्वेयपर्वतम् ॥ राजन्सततमध्यास्ते शरभो नाम यूथपः ॥ ३४ ॥
एतस्य बलिनः सर्वे विहारा नाम यूथपाः ॥ राजञ्शतसहस्राणि चत्वारिंशत्तथैव च ॥ ३५ ॥
यस्तु मेघ इवाकाशं महानावृत्य तिष्ठति ॥ मध्ये वानरवीराणां सुराणामिव वासवः ॥ ३६ ॥
भेरीणामिव सन्नादो यस्यैष श्रूयते महान् ॥ घोषः शाखामृगेन्द्राणां संग्राममभिकाङ्क्षताम् ॥ ३७ ॥
एष पर्वतमध्यास्ते पारियात्रमनुत्तमम् ॥ युद्धे दुष्प्रसहो नित्यं पनसो नाम यूथपः ॥ ३८ ॥
एनं शतसहस्राणां शतार्धं पर्युपासते ॥ यूथपा यूथपश्रेष्ठं येषां यूथानि भागशः ॥ ३९ ॥
यस्तु भीमां प्रवल्गन्तीं चमूं तिष्ठति शोभयन् ॥ स्थितां[10] तीरे समुद्रस्य द्वितीय इव सागरः ॥ ४० ॥
एष दर्दर[11]संकाशो विनतो नाम यूथपः ॥ पिबंश्चरति पर्णासां[12] नदीनामुत्तमां नदीम् ॥ ४१ ॥

पुनर्गच्छतीत्यवगम्यते ॥ २३—२४ ॥ चतुर्भिः कुमुदं वर्णयति—यः पुरेत्यादि ॥ पुरेत्यनेनाद्य सुग्रीवसमीप एव वसतीति गम्यते । पर्येति परितः संचरति । नाम्ना संकोचनो नाम यः प्रसिद्धः तं पर्वतमित्यन्वयः ॥ २५ ॥ तत्र गोमतीतीरे । परिकर्षति आनयति ॥ २६ ॥ घोरकर्मणो यस्य लाङ्गूलमाश्रिताः वालाः रोमाणि । दैर्घ्यस्यावधिमाह—बहुव्यामा इति । " व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरं " इत्यमरः ॥ २७ ॥ अदीन इत्यत्र य इत्युपस्कार्यं ॥ २८ ॥ अथ सार्धैस्त्रिभी रम्भं वर्णयति—यस्त्वेष इत्यादि ॥ २९—३१ ॥ अथ शरभं वर्णयति—यस्तु कर्णावित्यादि ॥ संविजते बिभेति ॥ ३२—३५ ॥ अथ पनसं वर्णयति—यस्तु मेघ इत्यादिना ॥ ३६—३८ ॥ एनं पनसं । येषां यूथपानां यूथानि च भागशः स्वस्वांशासङ्करेण । एनं पर्युपासत इति संबन्धः ॥ ३९ ॥ विनतं वर्णयति—यस्त्वित्यादि ॥ प्रवल्गन्तीं उत्साहेन प्लवमानां । समुद्रस्य पारे स्थितां । अतएव द्वितीयः सागर इव स्थितामिति शेषः । विनतविशेषणं वा । दर्दरो नाम गङ्गासमीपस्थः पर्वतः । पर्णासां पर्णासाख्यां नदीं ।

[पा०] १ ङ. च. झ. ञ. ट. संरोचनो. २ ङ. झ. ट. शतसहस्राणिसहर्षं. ज. शतसहस्रंचवानरान्परि ३ ङ. च. झ. ञ. ट. घोरदर्शनाः. ४ ङ.—ट. वानरश्चण्डः. ५ क.—ट. एषैवाशंसते. ६ क.—ट. दीर्घकेसरः. ७ ग. ङ. झ. ट. संरंभो नामयूथपः. ८ ङ. झ. ट. यंयान्तंवानराघोराः. ९ ङ. च. झ. ट. नंचसेनांप्रधावति. क. ख. ग. ज. नंचयूथाद्विधावति. १० झ. ञ. ट. पश्यलाङ्गूलविक्षेपंक्ष्वेडत्येष. ङ. च. पश्यलाङ्गूलविक्षेपैःक्ष्वेडत्येष. ११ घ. च. ज. महाबलो. ङ. झ. ट. महौजसावीत. १२ ख. घ. च. ञ. स्थितस्तीरे. १३ ग. पर्वतसंकाशो. घ. मन्दरसंकाशो. १४ ङ. झ. ट. योवेणां. ग. वेणांयो.

षष्टिः शतसहस्राणि [1]बलमस्य प्लवङ्गमाः ॥ ४२ ॥
त्वामाह्वयति युद्धाय [2]क्रोधनो नाम यूथपः ॥ विक्रान्ता बलवन्तश्च [3]यथा यूथानि भागशः ॥ ४३ ॥
यस्तु गैरिकवर्णाभं वपुः पुष्यति वानरः ॥ अवमत्य सदा सर्वान्वानरान्बलदर्पितान् ॥ ४४ ॥
गवयो नाम तेजस्वी त्वां क्रोधादभिवर्तते ॥ एनं शतसहस्राणि सप्ततिः पर्युपासते ॥
[5]एषैवाशंसते लङ्कां सेनानीकेन मर्दितुम् ॥ ४५ ॥
एते दुष्प्रसहा घोरा बलिनः कामरूपिणः ॥ यूथपा यूथपश्रेष्ठा एषां यूथानि भागशः ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षड्विंशः सर्गः ॥ २६ ॥

सप्तविंशः सर्गः ॥ २७ ॥

रावणप्रतिसारणेनपृथक्पृथङ्नामनिर्देशेनतत्तत्पराक्रमादिप्रशंसनपूर्वकमृक्षवानरादियूथाध्यक्षप्रदर्शनम् ॥ १ ॥

तांस्तु [6]तेहं प्रवक्ष्यामि प्रेक्षमाणस्य यूथपान् ॥ राघवार्थे पराक्रान्ता ये न रक्षन्ति जीवितम् ॥ १ ॥
स्निग्धा यस्य बहुव्यामा [7]बाला लाङ्गूलमाश्रिताः ॥ ताम्राः पीताः सिताः श्वेताः प्रकीर्णा घोरकर्मणः ॥ २ ॥
प्रगृहीताः प्रकाशन्ते सूर्यस्येव मरीचयः ॥ पृथिव्यां चानुकृष्यन्ते [9]हरो नामैष [10]यूथपः ॥ ३ ॥

॥४०—४१॥ विनतसेनासङ्ख्यामाह—षष्टिरिति ॥ षष्टिः शतसहस्राणि प्लवङ्गमाः अस्य विनतस्य बलं सेनेत्यर्थः ॥ ४२ ॥ एकेन क्रोधनमाह—त्वामिति ॥ उत्तरार्धे अस्येत्यध्याहार्यं । यथायूथानि यथायूथं । अमभावश्छान्दसः । भागशः भागत्वेन स्थिता वानराः विक्रान्ता बलवन्तश्चेति योजना ॥ ४३ ॥ शेषेण गवयं वर्णयति—यस्त्वित्यादिना ॥ गैरिकं रक्तवर्णधातुविशेषः । " धातुर्मनश्शिलाद्यद्रेर्गैरिकं तु विशेषतः " इत्यमरः । तद्वर्ण इवाभा यस्येति विग्रहः । गैरिकवर्ण इवाभातीति गैरिकवर्णाभमिति वा । पुष्यति युद्धहर्षादभिवर्धयतीत्यर्थः ॥ ४४—४५ ॥ उपसंहरति—एत इति ॥ यूथपाः अङ्गदादयः । यूथपश्रेष्ठाः सुग्रीवादयः । एषां यूथपानां यूथानि भागशः पृथक् । विद्यन्त इति शेषः ॥ ४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षड्विंशः सर्गः ॥२६॥

पुनरुक्तेभ्योप्युत्कृष्टान्प्रधानयूथपतीन्वक्तुं प्रतिजानीते—तांस्त्वित्यादि ॥ ये राघवार्थे पराक्रान्ताः सन्तः जीवितं न रक्षन्ति तान् यूथपान् ते तुभ्यं प्रवक्ष्यामीत्यन्वयः ॥ १ ॥ द्वाभ्यां हरं वर्णयति—बाला इति ॥ बालाः रोमाणि । बहुव्यामाः बहुव्यामप्रमाणाः । व्यामो नाम प्रसारितबाहुद्वयप्रमाणं । प्रगृहीताः उत्क्षिप्ताः । प्रकीर्णाः विरलाः । सूर्यस्य मरीचय इव मेघेषु शक्रचापादिरूपेण प्रसृता रश्मय इव । प्रकाशन्ते । कदाचित् पृथिव्यामनुकृष्यन्ते । एष यूथपो

कतक० अत्रसर्गच्छेदोपाङ्गः । वृत्तभेदाभावादेकप्रकरणत्वाच्च ॥४६॥ इतिषड्विंशःसर्गः ॥ २६ ॥
ति० स्निग्धाइत्यादिहरवर्णनमितिकतकः । तारस्येत्यन्ये ॥ २ ॥

[**पा०**] १ ख. ग. च. वानरास्तेमहाबलाः. घ. यूथपास्तुप्लवङ्गमाः. २ ङ. ज. झ. क्रथनोनाम. ३ ग. एषांयूथानि. घ० यस्ययूथानि क. च. छ. ज. यथायूथविभागशः. ४ क. ख. ङ. च. झ. ञ. ट. न्बलदर्पितः. ५ ख. दनुवर्तते. ६ ज. एषलाशङ्कते. ७ ङ. च. छ. झ. ञ. ट. वीरायेषांसङ्ख्यानविद्यते. ८ क. ङ. झ. ञ. ट. श्रेष्ठास्तेषां. ९ ङ. छ. झ. ञ. ट. तेसंप्रवक्ष्यामि. १० ङ. झ. ट. दीर्घलाङ्गूलमाश्रिताः. ११ क. च. ञ. तारोनाम. १२ ङ. झ. ट. वानरः.

यं पृष्ठतोऽनुगच्छन्ति शतशोथ सहस्रशः ॥ द्रुमानुद्यम्य सहसा लङ्कारोहणतत्पराः ॥
यूथपा हरिराजस्य किङ्कराः समुपस्थिताः ॥ ४ ॥
[1]एष कोटिसहस्रेण वानराणां महौजसाम् ॥ आकाङ्क्षते त्वां संग्रामे जेतुं परपुरंजय ॥ ५ ॥
नीलानिव महामेघांस्तिष्ठतो यांस्तु पश्यसि ॥ असिताञ्जनसंकाशान्युद्धे सत्यपराक्रमान् ॥
असंख्येयाननिर्देश्यान्परं पारमिवोदधेः ॥ ६ ॥
पर्वतेषु च ये केचिद्विषमेषु[2] नदीषु च ॥ एते त्वामभिवर्तन्ते राजन्नृक्षाः सुदारुणाः ॥ ७ ॥
एषां मध्ये स्थितो [3]राजन्भीमाक्षो भीमदर्शनः ॥ पर्जन्य इव जीमूतैः समन्तात्परिवारितः ॥ ८ ॥
ऋक्षवन्तं गिरिश्रेष्ठमध्यास्ते नर्मदां पिबन् ॥ सर्वर्क्षाणामधिपतिर्धूम्रो नामैष यूथपः ॥ ९ ॥
यवीयानस्य तु [4]भ्राता पश्यैनं पर्वतोपमम् ॥ भ्रात्रा समानो रूपेण विशिष्टस्तु [5]पराक्रमैः ॥ १० ॥
स एष जाम्बवान्नाम महायूथपयूथपः ॥ [6]प्रक्रान्तो गुरुवर्ती[7] च संप्रहारेष्वमर्षणः ॥ ११ ॥
एतेन साह्यं सुमहत्कृतं शक्रस्य धीमता ॥ दैवासुरे जाम्बवता लब्धाश्च बहवो वराः ॥ १२ ॥
आरुह्य पर्वताग्रेभ्यो महाभ्रविपुलाः शिलाः ॥ मुञ्चन्ति [8]विपुलाकारा न मृत्योरुद्विजन्ति च ॥ १३ ॥
राक्षसानां च सदृशाः पिशाचानां च लोमशाः ॥ एतस्य सैन्या बहवो विचरन्त्यग्नितेजसः ॥ १४ ॥
यं त्वेनमभिसंरब्धं प्लवमानमिव स्थितम् ॥ प्रेक्षन्ते वानराः सर्वे स्थिता यूथपयूथपम् ॥ १५ ॥
एष राजन्सहस्राक्षं पर्युपास्ते हरीश्वरः ॥ बलेन [9]बलसंपन्नो [10]दंभो नामैष यूथपः ॥ १६ ॥
[11]यः स्थितं योजने शैलं गच्छन्पार्श्वेन सेवते ॥ ऊर्ध्वं तथैव कायेन गतः प्राप्नोति योजनम् ॥ १७ ॥

हरो नाम ॥ २—३ ॥ यमित्यादि सार्धश्लोक एकान्वयः ॥ यं हरं। हरस्य हरिराजकिङ्करत्वेन तदीया अपि यूथपा हरिराजकिंकरा एवेति न विरोधः ॥ ४—५ ॥ ऋक्षसेना वर्णयति—नीलानित्यादि ॥ अनिर्देश्यान् प्रत्येकं निर्देष्टुमशक्यान्। परं पारमिवोदधेः समुद्रस्यापरं तीरमिव स्थितमित्यर्थः ॥ ६ ॥ विषमेषु निम्नोन्नतप्रदेशेषु ॥ ७ ॥ पर्जन्यः वर्षदेवता ॥ ८—९ ॥ यवीयान् कनिष्ठः। अयमिति शेषः। विशिष्टः अधिकः ॥ १० ॥ गुरुवर्ती गुरुशुश्रूषकः ॥ ११ ॥ दैवासुरे देवासुरयुद्धे ॥ १२ ॥ जाम्बवतः सैनिकान्वर्णयति द्वाभ्यां—आरुह्येत्यादि ॥ पर्वताग्राणीत्यर्थात्सिद्धं। मुञ्चन्ति च्यावयन्ति। नोद्विजन्ति न बिभ्यति। राक्षसानां पिशाचानां च सदृशा इत्यन्वयः ॥ १३—१४ ॥ द्वाभ्यां दम्भं वर्णयति—यं त्विति ॥ अभिसंरब्धं कुपितं। प्लवमानमिव सदा प्लवमानमिव स्थितं प्रेक्षन्ते। आश्चर्येणेति शेषः। बलेन पर्युपास्ते बलेन प्रीणयतीत्यर्थः ॥ १५—१६ ॥ त्रिभिः सन्नादनं वर्णयति—यः स्थितमिति ॥ यो गच्छन् योजने योजनदूरे। स्थितं शैलं पार्श्वेन गच्छति। अस्य गमनकाले एकपदप्रक्षेपदशायां एकयोजनपरिमितः पर्वतः पार्श्वस्थो भवति। योजनायतशरीर इत्यर्थः। कायेनोर्ध्वं गतः सन् योजनं प्राप्नोति। योजनोन्नतकायइत्यर्थः। अतएव चतुष्पादेषु यस्मात् परमं परं रूपं शरीरं। न विद्यते।

शि० जीमूतैः कृष्णमेघैः। समन्तात्परिवारितः पर्जन्यः इन्द्रइव यःस्थितः ॥ ८ ॥ स० अस्य धूम्रस्य। यवीयान् कनिष्ठः। रूपेण ऋक्षाकारेण। विशिष्टः उत्तमः। एतेन जांबवतइव धूम्रस्यापिब्रह्मजातत्वंज्ञायते। बालकाण्डेअंशावतरणप्रस्तावेगुणज्येष्ठत्वाज्जांबवतएवोक्तिः। सौहार्दाद्भ्रातेवेवा ॥ १० ॥ रामानु० संप्रहारेषु युद्धेषु। "संप्रहाराभिसंपातकलिसंस्फोटसंयुगाः" इत्यमरः ॥ ति० गुरुवर्ती सद्गुरूपासकः। अनेन सर्वसिद्धिमत्त्वमुक्तं। स० गुरुवर्ती ज्येष्ठानुवर्ती। अमर्षणः परपराभवासहिष्णुः ॥ ११ ॥

[पा०] १ अयंश्लोकःप्राचीनकोशेषुनदृश्यते. औत्तराहपाठएवदृश्यते. २ ङ. झ. ट. द्विषयेषु. ३ घ. ङ. झ. ट. राजाभीमाक्षो. ४ ख. च. छ. ज. ञ. बलीपश्यैनं. ५ ख. ङ. च. छ. झ. ञ. ट. पराक्रमे. ६ क.—ट. प्रशान्तो. ७ ख. च. छ. विपुलान्नादान्न. घ. विविधाकारान. ८ ङ. झ. ट. न्यूमितौजसः. ९ क. च. यूथपयूथपाः. १० ङ. झ. बलसंयुक्तो. ११ ज. ऋषभोनामयूथपः. घ. ङ. झ. ञ. रंभोनामैष. १२ घ. संस्थितं.

यस्मान्न परमं रूपं चतुष्पादेषु विद्यते ॥ श्रुतः सन्नादनो नाम वानराणां पितामहः ॥ १८ ॥
येन युद्धं पुरा दत्तं रणे शक्रस्य धीमता ॥ पराजयश्च न प्राप्तः सोऽयं यूथपयूथपः ॥ १९ ॥
यस्य विक्रममाणस्य शक्रस्येव पराक्रमः ॥ एष गन्धर्वकन्यायामुत्पन्नः कृष्णवर्त्मनः ॥ २० ॥
तदा दैवासुरे युद्धे साह्यार्थं त्रिदिवौकसाम् ॥ २१ ॥
यस्य वैश्रवणो राजा जम्बूमुपनिषेवते ॥ यो राजा पर्वतेन्द्राणां बहुकिन्नरसेविनाम् ॥ २२ ॥
विहारसुखदो नित्यं भ्रातुस्ते राक्षसाधिप ॥ तत्रैष वसति श्रीमान्बलवान्वानरर्षभः ॥ २३ ॥
युद्धेष्वकत्थनो नित्यं क्रथनो नाम यूथपः ॥ वृतः कोटिसहस्रेण हरीणां समुपस्थितः ॥
एषैवाशंसते लङ्कां सेनानीकेन मर्दितुम् ॥ २४ ॥
यो गङ्गामनु पर्येति त्रासयन्हस्तियूथपान् ॥ हस्तिनां वानराणां च पूर्ववैरमनुस्मरन् ॥ २५ ॥
एष यूथपतिर्नेता गच्छन्गिरिगुहाशयः ॥ गजान्योधयते वन्यान्गिरींश्चैव महीरुहान् ॥ २६ ॥
हरीणां वाहिनीमुख्यो नदीं हैमवतीमनु ॥ उशीरबीजमाश्रित्य पर्वतं मन्दरोपमम् ॥
रमते वानरश्रेष्ठो दिवि शक्र इव स्वयम् ॥ २७ ॥
एनं शतसहस्राणां सहस्रमनुवर्तते ॥ वीर्यविक्रमदृप्तानां नर्दतां बलशालिनाम् ॥ २८ ॥
स एष नेता चैतेषां वानराणां महात्मनाम् ॥ २९ ॥
स एष दुर्धरो राजन्प्रमाथी नाम यूथपः ॥ वातेनेवोद्धतं मेघं यमेनमनुपश्यसि ॥ ३० ॥

शक्रस्य रणे शक्रस्यासुरैः सह युद्धे । येनासुरेभ्यो युद्धं दत्तं तदा पराजयश्चासुरेभ्यो न प्राप्तः सोयं सन्नादन इति श्रुतो नाम ॥ १७—१९ ॥ कस्यायं पुत्र इत्यत्राह—यस्येति ॥ विक्रममाणस्य पराक्रमं कुर्वतः । यस्य पराक्रमः शक्रस्येव । तत्पराक्रमसदृशपराक्रम इत्यर्थः ॥ २० ॥ किमर्थमुत्पादित इत्यत्राह—तदेत्यर्धं ॥ तदा प्रसिद्धे ॥ २१ ॥ क्रथनं वर्णयति सार्धैस्त्रिभिः—यस्येत्यादिना । यस्य गिरेः वैश्रवणः कुबेरो राजा । योगिरिः जम्बूं जम्बूवृक्षं । उपनिषेवते । जम्बूयुक्त इत्यर्थः । यः ते भ्रातुः कुबेरस्य विहारसुखदः । तत्र पर्वते । युद्धेष्वकत्थनः क्रथनो नामैषः यूथपो वसतीति संबन्धः ॥ २२—२४ ॥ यो गङ्गामित्यादि सार्धश्लोकसप्तकं प्रमाथिविषयं । हस्तिनां वानराणां च अन्योन्यं पूर्ववैरमनुस्मरन् यः गङ्गामनु गङ्गासमीपे । "कर्मप्रवचनीययुक्ते द्वितीया" इति द्वितीया । हस्तियूथपान् त्रासयन् पर्येति परितश्चरति । अत्रेयं पौराणिकी कथा—पुरा किल शम्बसादनो नामासुरो गजरूपेण मुनीन् बाधमानस्तैर्मुनिभिश्चोदितेन केसरिणा हनुमत्पित्रा हतः । तत्संतुष्टैर्मुनिभिर्महापराक्रमो हनूमान् पुत्रस्ते भविष्यतीति केसरिणे वरो दत्तः । ततःप्रभृति हस्तिनां वानराणां च परस्परं वैरमभूदिति ॥ २५ ॥ गच्छन्नेव गमनकाल एव । रिपूणां नाशयिता । गिरिगुहायां शेते वर्तत इति गिरिगुहाशयः । गजानिति । गजैर्वृक्षान् वृक्षैर्गजांश्च हन्तीत्यर्थः ॥ २६ ॥ हैमवतीमनु गङ्गासमीपे । स्थितं उशीरबीजाख्यं पर्वतमाश्रित्य रमत इतियोजना । हरिवाहिनीमुख्यत्वेपि भिन्नजातीयत्वभ्रमव्युदासार्थं वानरश्रेष्ठ इत्युक्तं ॥ २७ ॥ वीरस्य भावो वीर्यं । उत्साह इत्यर्थः । विक्रमः परान्प्रत्यभिभवः । बलशालिनां वानराणामित्यर्थसिद्धं । शतसहस्राणां सहस्रं सहस्रलक्षमित्यर्थः ॥ २८ ॥ नेता नायकः ॥ २९ ॥ प्रमाथिनं वर्णयति—स एष इति ॥ दुर्धरः दुर्धर्षः । प्रमाथी नाम प्रमाथिनामकः । वातेनोद्धतं मेघमिव यमेनमनुप-

रामानु० यस्यविक्रममाणस्येत्यारभ्यस्वेनानीकेनमर्दितुमित्यन्तंकथनाख्यवानरविषयं ॥ २० ॥

[पा०] १ ङ. झ. ट. यस्मात्तुपरमंरूपंचतुष्पात्सुनविद्यते. छ. ञ. यस्मान्नभैरवं. २ घ. ङ. ज. झ. ट. तदा. ३ ङ. झ. ट. रमते. ४ घ. ङ. च. झ. ट. न्गजयूथपान्. ५ ङ. झ. ट. गजान्योधयते. ज. गर्जन्योधयते. ६ ख. ङ. च. छ. झ. ट. वन्यानारुजंश्च. ग. घ. वन्यानुरूंश्चैव. ७ क.—ट. मभिवर्तते. ८ क. घ. ङ. च. झ. ट. बाहुशालिनां. ९ घ. एषदुर्मर्षणोराजन्.

अनीकमपि संरब्धं वानराणां तरस्विनाम् ॥ उद्धूतमरुणाभासं पवनेन समन्ततः ॥
विवर्तमानं बहुधा पश्यैतद्बहुलं रजः ॥ ३१ ॥
एतेऽसितमुखा घोरा गोलाङ्गूला महाबलाः ॥ शतं शतसहस्राणि दृष्ट्वा वै सेतुबन्धनम् ॥ ३२ ॥
गोलाङ्गूलं महावेगं गवाक्षं नाम यूथपम् ॥ परिवार्याभिवर्तन्ते लङ्कां मर्दितुमोजसा ॥ ३३ ॥
भ्रमराचरिता यत्र सर्वकामफलद्रुमाः ॥ यं सूर्यस्तुल्यवर्णाभमनु पर्येति पर्वतम् ॥ ३४ ॥
यस्य भासा सदा भान्ति तद्वर्णा मृगपक्षिणः ॥ यस्य प्रस्थं महात्मानो न त्यजन्ति महर्षयः ॥३५॥
सर्वकामफला वृक्षाः सदा फलसमन्विताः ॥ मधूनि च महार्हाणि यस्मिन्पर्वतसत्तमे ॥ ३६ ॥
तत्रैष रमते राजन्रम्ये काञ्चनपर्वते ॥ मुख्यो वानरमुख्यानां केसरी नाम यूथपः ॥ ३७ ॥
षष्टिर्गिरिसहस्राणां रम्याः काञ्चनपर्वताः ॥ तेषां मध्ये गिरिवरस्त्वमिवानघ रक्षसाम् ॥ ३८ ॥
तत्रैते कपिलाः श्वेतास्ताम्रास्या मधुपिङ्गलाः ॥ निवसन्त्युत्तमगिरौ तीक्ष्णदंष्ट्रा नखायुधाः ॥३९॥
सिंहा इव चतुर्दंष्ट्रा व्याघ्रा इव दुरासदाः ॥ सर्वे वैश्वानरसमा ज्वलिताशीविषोपमाः ॥ ४० ॥
सुदीर्घाञ्चितलाङ्गूला मत्तमातङ्गसन्निभाः ॥ महापर्वतसंकाशा महाजीमूतनिस्वनाः ॥ ४१ ॥

ष्यसि एष भ्रमाधीति संबन्धः ॥ ३० ॥ यत्र अनीके । समन्ततः पवनेनोद्धूतं अरुणाभासं अरुणकान्तिबहुलमेतद्रजः । बहुधा विवर्तमानं भवति । संरब्धं तत् तरस्विनां वानराणामनीकमपि पश्यसि । तदप्यस्य भ्रमाथिनइत्यर्थः ॥ ३१ ॥ गवाक्षमाह श्लोकद्वयेन—एत इति ॥ असितमुखाः गोलाङ्गूलाः सेतुबन्धनं दृष्ट्वा उत्साहेन शतं शतसहस्राणि च सन्तः गवाक्षं नाम स्वयूथपतिं परिवार्य लङ्कां ओजसा स्वतेजसा । मर्दितुमभिवर्तन्ते । अत्र यूथपत्यपेक्षया यूथानां बलोत्साहाधिक्यं व्यज्यते ॥ ३२—३३ ॥ अथ चतुर्भिः केसरिणं वर्णयति—भ्रमरेति ॥ यत्र पर्वते । सर्वकामफलाः सर्वैः काम्यन्त इति सर्वकामाः सर्वाभीष्टार्थाः तान् फलन्तीति सर्वकामफलाः ते च ते द्रुमाश्च सर्वकामफलद्रुमाः । भ्रमरैः आचरिताःव्याप्ताः भवन्ति । अनेन वृक्षाणां सर्वापेक्षितप्रदत्वं सदा पुष्पितत्वं चोक्तं । यं पर्वतं सूर्यः तुल्यवर्णाभं तुल्यप्रकारकान्तिकं यथा तथा । अनु समीपे । पर्येति संचरति । दृश्यते हि सूर्यस्तत्सन्निधाने काञ्चनवर्णः । यस्मिन्पर्वतसत्तमे सर्वकामफलाः सर्वैः काम्यमानफलाः । अनेन स्वादुफलत्वमुक्तं । सदा फलसमन्विताः सर्वकालं फलयुक्ता इत्यर्थः । काञ्चनपर्वते मेरौ ॥ ३४—३७ ॥ अथ शतबलिवानरसेनाश्लाघनपूर्वकं वर्णयति—षष्टिरित्यारभ्य हरिरित्यन्तेन ॥ गिरिसहस्राणां षष्टिरस्ति । ते रम्याः काञ्चनपर्वता भवन्ति । गिरिवरः मेरुः । अस्ति ह्यस्तगिरेः पूर्वताश्चापरो मेरुः ॥ ३८—३९ ॥ वैश्वानरसमाः । वैश्वानरः अग्निः तद्वदुग्रा इत्यर्थः । ज्वलिताशीविषाः कुपितसर्पाः । आशिषि दंष्ट्रायां विषं येषां ते आशीविषाः । "आशीरुरगदंष्ट्रायां प्रियवाक्याभिलाषयोः" इत्यमरः । पृषोदरादित्वात् सलोपः । तद्वत्कोपना इत्यर्थः ॥४०॥ अञ्चितलाङ्गूलाः उदञ्चितलाङ्गूलाः । मत्तेत्यादिना महाकायत्वमुक्तं । पर्वतसंकाशाइत्यनेन

स० गवाक्षक्षमतामाह—एतइति । गोलाङ्गूलाः असितमुखाइतिपृथग्विद्यमानत्वात्सामान्यतःकपयः । अन्यतरस्ययौगिकत्वेनविशेषणत्वंवा । खेषांलङ्काप्राप्तिसाधनंसेतुबन्धनंदृष्ट्वाहृष्टास्सन्तोगोलाङ्गूलंस्वजातिगवाक्षं परिवार्य लङ्कांमर्दितुमभिवर्तन्ते ॥३२—३३ ॥ ती० यंकाञ्चनपर्वतं । यस्यकाञ्चनपर्वतस्य । यस्मिन् काञ्चनपर्वते । अस्माद्दिसमीपवर्तिनि सावर्णिनिवासमेरौ ॥ ३४ ॥

[पा०] १ क. घ.—छ. झ. ञ. ट. बहुशो. २ ख. येनैतत्. ३ ङ. झ. ट. महाराज. ४ झ. सर्वकालफल. ५ च. छ. सूर्यःशतवर्णाभं. ६ ङ. झ. ट. सर्वे. ७ ख. च. छ. ञ. पुष्पसमन्विताः. ८ ख. घ. ङ. च. झ. ट. गिरिसहस्राणि. ९ झ. ट. निवसन्त्यन्तिमगिरौ. घ. च. छ. ञ. निवसन्त्युत्तरगिरौ. १० ग. ङ. च. छ. झ. ञ. ट. ज्वलदाशीविषोपमाः.

वृत्तपिङ्गलरक्ताक्षा भीमभीमगतिस्वराः ॥ मर्दयन्तीव ते सर्वे तस्थुर्लङ्कां समीक्ष्य ते ॥ ४२ ॥
एष चैषामधिपतिर्मध्ये तिष्ठति वीर्यवान् ॥ जयार्थी नित्यमादित्यमुपतिष्ठति बुद्धिमान् ॥ ४३ ॥
नाम्ना पृथिव्यां विख्यातो राजञ्शतबलीति यः ॥ एषैवाशंसते लङ्कां स्वेनानीकेन मर्दितुम् ॥४४॥
विक्रान्तो बलवाञ्शूरः पौरुषे स्वे व्यवस्थितः ॥ रामप्रियार्थं प्राणानां दयां न कुरुते हरिः ॥४५॥
गजो गवाक्षो गवयो नलो नीलश्च वानरः ॥ एकैक एव यूथानां कोटीभिर्दशभिर्वृतः ॥ ४६ ॥
तथाऽन्ये वानरश्रेष्ठा विन्ध्यपर्वतवासिनः ॥ न शक्यन्ते बहुत्वात्तु संख्यातुं लघुविक्रमाः ॥ ४७ ॥
सर्वे महाराज महाप्रभावाः सर्वे महाशैलनिकाशकायाः ॥
सर्वे समर्थाः पृथिवीं क्षणेन कर्तुं प्रविध्वस्तविकीर्णशैलाम् ॥ ४८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

अष्टाविंशः सर्गः ॥ २८ ॥

शुकेनरावणंप्रति सारणानुक्तानांहनुमदादिवानरवीराणां रामलक्ष्मणादीनांच प्रभावादिप्रशंसनपूर्वकं पृथङ्नामनिर्देशेन प्रदर्शनम् ॥ १ ॥ तथा लक्षकोट्यादिसर्वसंख्यालक्षणकथनपूर्वकं वानरसेनासु तावत्संख्यापर्याप्तिनिवेदनम् ॥ २ ॥

सारणस्य वचः श्रुत्वा रावणं राक्षसाधिपम् ॥ बलमादिश्य तत्सर्वं शुको वाक्यमथाब्रवीत् ॥ १ ॥
स्थितान्पश्यसि यानेतान्मत्तानिव महाद्विपान् ॥ न्यग्रोधानिव गाङ्गेयान्सालान्हैमवतानिव ॥ २ ॥
एते दुष्प्रसहा राजन्बलिनः कामरूपिणः ॥ दैत्यदानवसंकाशा युद्धे देवपराक्रमाः ॥ ३ ॥
एषां कोटिसहस्राणि नव पञ्च च सप्त च ॥ तथा शङ्खसहस्राणि तथा बृन्दशतानि च ॥ ४ ॥

दार्ढ्यमुक्तं ॥ ४१ ॥ भीमभीमाः भीमप्रकाराः । प्रकारः सादृश्यं । भीमसदृशाः ईषद्भीमा इत्यर्थः । " प्रकारे गुणवचनस्य " इति द्विर्भावः । तादृशगमनस्वराः ते वानराः । ते तव । लङ्कां समीक्ष्य मर्दयन्तीव तस्थुः मर्दयन्तीव तिष्ठन्ति । आर्षो लिङ्गव्यत्ययः ॥ ४२ ॥ उपतिष्ठति उपतिष्ठते ॥ ४३ ॥ एषैवेति संधिरार्षः ॥ ४४ ॥ पौरुषे पराक्रमे । प्राणानां प्राणेषु ॥ ४५–४७ ॥ प्रविध्वस्तविकीर्णशैलां प्रविध्वस्ताः चूर्णिताः विकीर्णा विक्षिप्ताः शैलाः यस्याः सा तां तथा ॥ ४८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तविंशः सर्गः ॥ २७ ॥

एवं सारणेनोक्तं श्रुत्वाशुकस्तेन कात्स्न्र्येनानुक्तेः स्वयं तत्सर्वं दर्शयत्यष्टाविंशे सर्गे—सारणस्येति ॥ शुकः सारणस्य वचः श्रुत्वा तेन कात्स्न्र्येनानुक्तेः स्वयं तत्सर्वं बलं आदिश्य अङ्गुल्या निर्दिश्य । रावणं । अथ कात्स्न्र्येन । अब्रवीत् । " मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ " इत्यमरः । सचिनयोक्तिद्योतनाय राक्षसाधिपमित्युक्तं ॥ १ ॥ न्यग्रोधान् वटान् । गाङ्गेयान् गङ्गातटरुहान् । हैमवतान् हिमवत्पर्वतोद्भवान् ॥ २ ॥ दैत्यदानवसंकाशाः दैत्यदानवतुल्यबलाः ॥ ३ ॥ शङ्खबृन्दादिस्वरूपमुत्तरत्र स्वयमेव वक्ष्यति । बृन्दशतादिसंख्याः सन्तीति शेषः

ति० तेवानराः । ते तव । लङ्कांसमीक्ष्य मर्दयन्तीव मर्दयन्तइवतिष्ठन्ति ॥ शि० एके प्रधानाः । सर्वेयेनिवसन्ति तेसर्वे लङ्कांमर्दयन्तीव । अतएव समीक्ष्यतस्थुः । एतेनलिङ्गव्यत्ययआर्षः इत्युक्तिश्चिन्त्या ॥ ४२ ॥ इतिसप्तविंशःसर्गः ॥ २७ ॥

स० बलं रामबलं रामसेनां । तत्सर्वं स्वेनतेनापिज्ञातंसर्वमादिश्य । रामेणोक्तंवचश्चादिश्य विज्ञाप्य । स्थितस्यसारणस्यवचः श्रुत्वा स्थितंरावणंप्रति शुकोऽथवाक्यमब्रवीत् ॥ १ ॥ ति० गाङ्गेयान् गङ्गातटोत्पन्नान् । अनपत्येपिढगार्षः ॥ २ ॥ ति० एषां

[पा०] १ ङ. च. झ. ञ. ट. वृत्तपिङ्गलने त्राहिमहाभीमगतिस्वनाः. २ घ. भीमतरस्वनाः. ३ क. ग. ज. मिमर्दयिषवोलङ्कांसर्वेतिष्ठन्त्युदीक्ष्यते. ४ ङ. छ. झ. ञ. वीर्यवान्. ५ घ. पर्यवस्थितः. ६ क. ग. च. छ. ज. ञ. स्फीतान्. ७ ङ.—ट. शङ्खसहस्राणि.

एते सुग्रीवसचिवाः किष्किन्धानिलयाः सदा ॥ हरयो देवगन्धर्वैरुत्पन्नाः कामरूपिणः ॥ ५ ॥
यौ तौ पश्यसि तिष्ठन्तौ कुमारौ देवरूपिणौ ॥ मैन्दश्च द्विविदश्चोभौ ताभ्यां नास्ति समो युधि ॥६॥
ब्रह्मणा समनुज्ञातावमृतप्राशिनावुभौ ॥ आशंसेते युधा लङ्कामेतौ मर्दितुमोजसा ॥ ७ ॥
[यावेतावेतयोः पार्श्वे स्थितौ पर्वतसन्निभौ ॥ सुमुखोसुमुखश्चैव मृत्युपुत्रौ पितुःसमौ ॥
प्रेक्षन्तौ नगरीं लङ्कां कोटिभिर्दशभिर्वृतौ ॥ ८ ॥]
यं तु पश्यसि तिष्ठन्तं प्रभिन्नमिव कुञ्जरम् ॥ यो बलात्क्षोभयेत्क्रुद्धः समुद्रमपि वानरः ॥ ९ ॥
एषोभिगन्ता लङ्काया वैदेह्यास्तव च प्रभो ॥ एनं पश्य पुरा दृष्टं वानरं पुनरागतम् ॥ १० ॥
ज्येष्ठः केसरिणः पुत्रो वातात्मज इति श्रुतः ॥ हनुमानिति विख्यातो लङ्घितो येन सागरः ॥११॥
कामरूपी हरिश्रेष्ठो बलरूपसमन्वितः ॥ अनिवार्यगतिश्चैव यथा सततगः प्रभुः ॥ १२ ॥
उद्यन्तं भास्करं दृष्ट्वा बालः किल पिपासितः ॥ त्रियोजनसहस्रं तु अध्वानमवतीर्य हि ॥ १३ ॥
आदित्यमाहरिष्यामि न मे क्षुत्प्रतियास्यति ॥ इति संचिन्त्य मनसा पुरैष बलदर्पितः ॥ १४ ॥
अनाधृष्यतमं देवमपि देवर्षिदानवैः ॥ अनासाद्यैव पतितो भास्करोदयने गिरौ ॥ १५ ॥

॥ ४ ॥ सुग्रीवसचिवाः सुग्रीवसहायाः । " मन्त्री सहायः सचिवः " इत्यमरः । देवगन्धर्वैः देवेभ्योगन्धर्वेभ्यश्चेत्यर्थः । उत्पन्नाः कामरूपिणइति कामरूपित्वेनोत्पन्ना इत्यर्थः । पूर्वं कामरूपित्वमुक्तं तस्येदानीमौत्पत्तिकत्वमुच्यत इति न पुनरुक्तिः ॥ ५ ॥ कुमारौ युवानौ । देवेति रावणंप्रति संबुद्धिः । रूपिणौ प्रशस्तरूपौ । प्रशंसायां मत्वर्थीय इनिप्रत्ययः । यौ पश्यसि तौ मैन्दश्च द्विविदश्चेत्युच्येते इत्यर्थः ॥ ६ ॥ युधि ताभ्यां समो नास्तीत्यत्र हेतुं दर्शयति— ब्रह्मणेति ॥ समनुज्ञातौ सन्तौ अमृतप्राशिनावित्यर्थः ॥ ७—८ ॥ हनुमन्तं वर्णयति—यं त्वित्यादिना ॥ प्रभिन्नं मत्तं । " प्रभिन्नो गर्जितो मत्तः " इत्यमरः ॥ ९ ॥ अभिगन्तेति । वैदेहीपक्षे अभिगमनं अन्वेषणं । रावणपक्षे दर्शनं ॥ १० ॥ ज्येष्ठ इति । अत्र एष इत्यध्याहार्यं । केसरिणः पुत्रः तस्य क्षेत्रजः पुत्रः ॥ ११ ॥ बलरूपसमन्वितः प्रशस्तबलसमन्वितः । प्रशंसायां रूपप् प्रत्ययः । यथा सततगः । सततग इव । सततगः वायुः ॥ १२ ॥ बालः बाल्यावस्थः । किलेत्यैतिह्ये । पिपासितः स्तन्यापेक्षः । क्षुधित इति यावत् । त्रियोजनसहस्रं त्रियोजनसहस्रपरिमाणं । " द्विगोर्नित्यं " इति प्रमाणप्रत्ययस्य लुक् । हनुमत्पितुः केसरिणः कनकाचलवासित्वात्तस्य चात्युन्नतत्वादादित्यस्य तच्छिखरस्य च मध्यमाद्वा त्रिसहस्रयोजनपरिमित इत्युक्तं । अतएव अवतीर्येत्युक्तं नतूत्पत्येति । यद्वा आदित्यस्य भूमेरुपरि लक्षयोजनान्तरत्वात् त्रियोजनसहस्रमित्येतदनेकसहस्रोपलक्षणं ॥ १३ ॥ आहरिष्यामि भक्षयिष्यामि । " इति संचिन्त्य मनसा पुरैष बलदर्पितः " इत्यनन्तरं त्रियोजनसहस्रमित्यर्धं योज्यं ॥ १४ ॥ देवं सूर्यं । भास्कर उदयतेऽस्मिन्निति भास्करोदयनः तस्मिन्गिरौ । हनुः तालुप्रदेशः । अनासाद्येत्यत्र तत्तेजसेत्युपस्कार्यं । तेजसा तस्य निर्धूत इति किष्किकोटीतिसुग्रीवसचिवसंख्या । सर्वबलसंख्यांतुसर्गान्तेवक्ष्यति ॥ ४ ॥ **ति०** समनुज्ञाताइत्यत्र "लोपःशाकल्यस्य" इतिलोपः ॥ **स०** यथा सम्यक् । " निवृत्तिमार्गःकथितआदौभगवतायथा " इतिभागवतश्लोकमुदाहृत्य " यथायोग्याखिलज्ञता " इत्यनुव्याख्यासुधायां " यथेतिभिन्नंपदंसम्यग्वाचि " इत्युक्तेः ॥ ७ ॥ **स०** ज्येष्ठइत्यनेनान्येप्यवरजाःसन्तीतिज्ञायते ॥ वातात्मजः वातस्यवायोः आत्मजः औरसः ॥ ११ ॥ **स०** बुभुक्षितः भक्षणेच्छावानित्यर्थः । त्रियोजनसहस्रं । उपलक्षणमेतत् । अवतीर्य मातुरुत्सङ्गात् मे मम । क्षुत् नप्रतियास्यति भूमिस्थफलादिभिरिशेषः । तस्मादादित्यमाहरिष्यामीतिनिश्चित्यपुप्लुवे ॥१३—१४॥ **स०** अनासाद्यपतितः इन्द्रवज्रादितिशेषः ॥ १५ ॥

[**पा०**] १ ङ. ञ. ट. समानौ. २ ङ. ञ. ट. द्विविदश्चैव. च. छ. झ. द्विविदश्चेति. ३ ञ. समनुज्ञाताअमृत. ४ ङ.—ट. यथालङ्कां. ५ अयंश्लोकःप्राचीनकोशेषुनदृश्यतेऔत्तराहपाठएवदृश्यते. ६ ग.—ट. लङ्कायां. ७ ङ. छ. ञ. ट. कामरूपो. ८ च. ग. बलवीर्य. ९ ख. च. छ. बाल्येकिल. १० घ. ङ. ञ. ञ. बुभुक्षितः. ११ घ. मधिरुह्यच. १२ क. घ.—छ. ञ. ञ. ट. निश्चित्य. १३ ङ. ञ. पुप्लुवेबल. १४ ङ.—ट. देवर्षिराक्षसैः.

पतितस्य कपेरस्य हनुरेका शिलातले ॥ किंचिद्भिन्ना दृढहनोर्हनुमानेष तेन वै ॥ १६ ॥
सत्यमागमयोगेन ममैष विदितो हरिः ॥ नास्य शक्यं बलं रूपं प्रभावो वाऽपि भाषितुम् ॥ १७ ॥
एष आशंसते लङ्कामेको मर्दितुमोजसा ॥ [येन जाज्वल्यतेऽसौ वै धूमकेतुस्तवाद्य वै ॥
लङ्कायां निहितश्चापि कथं विस्मरसे कपिम् ॥ १८ ॥]
यश्चैषोनन्तरः शूरः श्यामः पद्मनिभेक्षणः ॥ इक्ष्वाकूणामतिरथो लोके विख्यातपौरुषः ॥ १९ ॥
यस्मिन्न चलते धर्मो यो धर्मं नातिवर्तते ॥ यो ब्राह्ममस्त्रं वेदांश्च वेद वेदविदां वरः ॥ २० ॥
यो भिन्द्याद्गगनं बाणैः पर्वतानपि दारयेत् ॥ यस्य मृत्योरिव क्रोधः शक्रस्येव पराक्रमः ॥ २१ ॥
यस्य भार्या जनस्थानात्सीता चापहृता त्वया ॥ स एष रामस्त्वां योद्धुं राजन्समभिवर्तते ॥ २२ ॥
यस्यैष दक्षिणे पार्श्वे शुद्धजाम्बूनदप्रभः ॥ विशालवक्षास्ताम्राक्षो नीलकुञ्चितमूर्धजः ॥ २३ ॥
एषोस्य लक्ष्मणो नाम भ्राता प्राणसमः प्रियः ॥ नये युद्धे च कुशलः सर्वशास्त्रविशारदः ॥ २४ ॥
अमर्षी दुर्जयो जेता विक्रान्तो बुद्धिमान्बली ॥ रामस्य दक्षिणो बाहुर्नित्यं प्राणो बहिश्चरः ॥ २५ ॥

न्धाकाण्डोक्तेः । यद्यप्युत्तरकाण्डे इन्द्रवज्रेण पतनमुक्तं । तथापि तदपि हेत्वन्तरमिति ज्ञेयं ॥ १५–१६ ॥ कथमियं कथा त्वया विदितेत्यत्राह—सत्यमिति ॥ आगमः आप्तवाक्यं तदेव योग उपायः तेन । यद्वा आप्तवाक्यश्रवणेन मम मया रूपं वपुः भाषितुं न शक्यं । कामरूपदर्शनादितिभावः ॥ १७—१८ ॥ अथ रामं वर्णयति—यश्चैष इत्यादिना ॥ अनन्तरः अन्तरं अवकाशः तद्रहितः । स्कन्धारूढत्वेन पूर्वोक्तहनुमतोत्यन्तसन्निहितइत्यर्थः । शूरः हनुमदारूढत्वेन प्रकटितशौर्यः । श्यामः कनकमयशिखरारूढकालाम्बुदकमनीयविग्रहः । पद्मनिभेक्षणः दिव्यविग्रहमहातटाकस्थविकसितकमललोभनीयविलोचनः । अनरण्यादिवदयं न मन्तव्यः । किंत्विक्ष्वाकूणां मध्ये अतिरथः अतिशयितरथः । अपराजितरथइत्यर्थः । अत्र न वयमेव प्रमाणं । लोके विख्यातपौरुषः खरवधादिना ख्यातं भवद्वैरिवालिवधेन विशेषेण ख्यातं पौरुषं यस्य तथोक्तः ॥ १९ ॥ न केवलं पौरुषं धर्मोप्यस्यैव स्वमित्याह—यस्मिन्निति ॥ यस्मिन्धर्मो न चलति जाबालिप्रभृतिभिराकुलितोप्यप्रकम्पितः यो धर्मं नातिवर्तते भरतसीतादिभिः कृतेपि प्रतिबन्धे पितृवचनमुनिप्रतिज्ञाधर्मं नातिवर्तते । खरयुद्धेऽपसर्पणं बाणपातावकाशलाभार्थं । छद्मना वालिवधस्त्वन्यथानुपपत्त्यावश्यमाश्रितविषयप्रतिज्ञाया निर्वोढव्यतया च । न केवलं पौरुषधर्मौ अस्त्रबलं चास्यैवेत्याह—य इति । ब्राह्ममस्त्रं ब्रह्मास्त्रमस्त्रं । वेदांश्च वेद जानाति । ब्रह्मास्त्रमन्त्रस्य वेदान्तर्गतत्वेपि प्राधान्यात्पृथगुक्तिः । वेदविदां वेदार्थविदां वरः उपदेष्टृभ्यो वसिष्ठादिभ्योप्युत्कृष्टः ॥ २० ॥ उक्तं पौरुषमेव प्रपञ्चयति—यो भिन्द्यादित्यादि ॥ गगनं गगनस्थविमानादि । आदिशब्देन पातालादिकमुच्यते ॥ २१ ॥ संप्रति कोपोद्भवे मूलमाह—यस्य भार्येति ॥ २२ ॥ अथ लक्ष्मणं वर्णयति—यस्यैष इत्यादिना ॥ दक्षिणे रामस्येति शेषः । शुद्धजाम्बूनदप्रभः स्वर्णवर्णः । ताम्राक्षः त्वद्विषयकोपेनेति भावः ॥ २३ ॥ सर्वेति । शास्त्रशब्दो नीतिशास्त्रव्यतिरिक्तपरः ॥ २४ ॥ प्राणो बहिश्चर इत्यनेन प्राणसंरक्षकत्वमुच्यते

स० वज्रशिलातलताडनाद्बहुनाभङ्गेनभाव्यं । तथापि किञ्चिद्भेतिहनोर्दृढिमेतिदृढहनोरित्युक्तं ॥ तेननिमित्तेन हनुमानिति गीयतइतिशेषः ॥ मतुबर्थश्चप्राशस्त्यं । तदेवदार्ढ्यमितिभावः ॥ १६ ॥ ति० धूमकेतुरग्निः । येनजाज्वल्यते प्रज्वलितःकृतः । लत्तेजोरुद्धोपि यत्पुच्छंप्राप्य प्रज्वलितः ॥ १८ ॥ ति० यस्य दर्शितस्यहनुमतोऽनन्तरः समीपवर्ती ॥ १९ ॥ ति० गगनं बाणैर्भिन्द्यात् सर्वदुष्करमपितस्यसुकरमितितात्पर्यं ॥ २१ ॥

[पा०] १ क. ग. ङ.—ट. वानु. २ ङ. झ. ट. मथितुं. ३ अयंश्लोकः क. ख. ङ.—ट. पाठेषुदृश्यते. ४ ङ. ज. झ. ट. यस्यैषो. ५ ख. ङ.—ट. विश्रुतपौरुषः. ६ ज. भिन्द्यान्मेदिनीं. ७ ङ. च. झ. ञ. ट. मेदिनींवापि. ८ घ. नीलजीमूतमूर्धजः. ९ ङ. छ.—ट. एषोहिलक्ष्मणोनामभ्रातुःप्रियहितेरतः. ख. सएष. १० ख. प्रभुः. क. सखा. ११ ङ. छ. झ. ट. शस्त्रभृतांवरः. १२ घ. विक्रान्तोबलवान्वशी. ङ. झ. ट. विक्रान्तश्चजयीबली. ख. च. छ. ज. विक्रान्तोबलसंयुतः.

न ह्येष राघवस्यार्थे जीवितं परिरक्षति ॥ एषैवाशंसते युद्धे निहन्तुं सर्वराक्षसान् ॥ २६ ॥
[1]यस्तु सव्यमसौ पक्षं रामस्याश्रित्य तिष्ठति ॥ रक्षोगणपरिक्षिप्तो राजा ह्येष विभीषणः ॥ २७ ॥
श्रीमता राजराजेन लङ्कायामभिषेचितः ॥ [2]त्वामेव प्रतिसंरब्धो युद्धायैषोभि[3]वर्तते ॥ २८ ॥
यं तु पश्यसि तिष्ठन्तं मध्ये गिरिमिवाचलम् ॥ सर्वशाखामृगेन्द्राणां भर्तार[4]मपराजितम् ॥ २९ ॥
तेजसा यशसा बुद्ध्या ज्ञानेनाभिजनेन च ॥ यः कपीनतिबभ्राज हिमवानिव पर्वतान् ॥ ३० ॥
किष्किन्धां यः समध्यास्ते गुहां सगहनद्रुमाम् ॥ दुर्गां पर्व[6]तदुर्गस्थां प्रधानैः सह यूथपैः ॥ ३१ ॥
यस्यैषा काञ्चनी माला शोभते शतपुष्करा ॥ कान्ता देवमनुष्याणां यस्यां लक्ष्मीः प्रतिष्ठिता ॥३२॥
एतां च मालां तारां च कपिराज्यं च शाश्वतम् ॥ सुग्रीवो वालिनं हत्वा रामेण प्रतिपादितः ॥३३॥
शतं शतसहस्राणां कोटिमाहुर्मनीषिणः ॥ शतं कोटिसहस्राणां शङ्ख[8] इत्यभिधीयते ॥ ३४ ॥
शतं शङ्खसहस्राणां महाशङ्ख[10] इति स्मृतः ॥ महाशङ्खसहस्राणां शतं बृन्द[11]मिति स्मृतम् ॥ ३५ ॥
शतं बृन्दसहस्राणां महाबृन्दमिति स्मृतम् ॥ महापद्मसहस्राणां शतं पद्म[12]मिति स्मृतम् ॥ ३६ ॥
शतं पद्मसहस्राणां महापद्ममिति स्मृतम् ॥ महापद्मसहस्राणां शतं खर्वमिहोच्यते ॥ ३७ ॥
शतं खर्वसहस्राणां महाखर्व[13]मिति स्मृतम् ॥ महाखर्वसहस्राणां समुद्रमभिधीयते ॥ ३८ ॥
शतं समुद्रसाहस्रमोघ इत्यभिधीयते ॥ शतमोघसहस्राणां महौघ इति विश्रुतः[14] ॥ ३९ ॥
एवं कोटिसहस्रेण शङ्खा[15]नां च शतेन च ॥ महाशङ्ख[16]सहस्रेण तथा बृन्दशतेन च ॥ ४० ॥

॥ २५—२६ ॥ पक्षं पार्श्वं । रक्षोगणेति । चतुर्णामेव रक्षसां गणतुल्यविक्रमत्वात्तथोक्तं । राजा त्वद्राज्यस्येतिशेषः । अत्र हीति गायत्र्याः षोडशाक्षरं ॥ २७ ॥ राजत्वं कुत इत्यत्राह—श्रीमतेति ॥ श्रीमता अवाप्तसमस्तकामत्वेनलङ्काराज्यानभिलाषिणेत्यर्थः । राजराजेन विभीषणादिराजत्वानिर्वाहे स्वस्य राजराजत्वं न निर्वहेदिति मन्वानेन । लङ्कायां निमित्ते । लङ्कायां राजेतिवान्वयः ॥ २८ ॥ अथ सुग्रीवं वर्णयति—मध्ये रामविभीषणयोर्मध्ये । अचलं निश्चलं ॥ २९ ॥ बुद्ध्या ऊहापोहरूपज्ञानेन । ज्ञानेन शास्त्रजन्यज्ञानेन । अभिजनेन कुलेन । अतिबभ्राज अतिशय्य बभ्राज ॥ ३० ॥ गहनं वनं । दुर्गां प्राकारादिना दुर्गमां । पर्वतदुर्गस्थां पर्वतरूपदुर्गे स्थितां ॥ ३१ ॥ शतपुष्करा शतपद्मा । कान्ता काम्यमाना । लक्ष्मीः वीरलक्ष्मीः । तद्धारणे कदाचिदपि पराजयो न भवतीति सदा वाली तां वहतिस्मेति प्रसिद्धिः । तद्धारणादेव हि रामस्तदनभिमुख एव वालिनं हतवान् ॥ ३२ ॥ प्रतिपादितः प्रापितः ॥ ३३ ॥ उक्तानुक्तसकलवानरसंख्यां वक्तुं प्रथमतः संख्यामेव दर्शयति—शतमित्यादिना ॥ शतपर्यन्तसंख्यायाः स्फुटत्वात्तदूर्ध्वसंख्या अत्र संकीर्त्यन्ते । शतसहस्राणां लक्षाणां शतं कोटिरित्याहुः ॥ ३४—॥ ३९ ॥ एवं कोटिसहस्रेणेत्याद्यवान्तरसंख्याभेद-

स० रक्षोगणपरिक्षिप्तः रक्षसांगणाःयस्यासौतथा । तेनत्वयापरिक्षिप्तः बहिर्निष्कासितः । रक्षोगणैर्वर्जितइतिवा । राजराजेन राजश्रेष्ठेन । लङ्कायांराजा सन्नभिषेचितइत्यन्वयः । एतेन तत्रतस्तेन त्वं तुच्छीकृतइत्यवेहीतिसूचयति ॥ ति० यस्य प्राग्वर्णितस्यरामस्यसव्यंपक्षमाश्रित्यतिष्ठतीत्यन्वयः ॥ शि० रक्षोगणैःपरिक्षिप्तः त्यक्तः । एषविभीषणः अतएव एषः लङ्काराज्यविषयकेच्छावान् असौविभीषणः त्वांप्रतियुद्धाय संरब्धोभिवर्तते ॥ २७—२८ ॥ स० प्रतिसंरब्धः प्रतिना मनःपूर्वकतांसौहार्दत्यागपूर्वकतांवासंरंभस्यद्योतयति ॥ २८ ॥ इत्यष्टाविंशःसर्गः ॥ २८ ॥

[पा०] १ ग. ङ. झ. ट. यस्य. २ ङ.—ट. त्वामसौ. ३ घ. तिष्ठते. ४ ङ.—ट. ममितौजसं. ५ ख. घ. ङ. ज. झ. ट. बलेनाभि. ६ ङ. झ. ट. दुर्गम्यां. ७ ख.—ङ. झ. ञ. ट. शङ्करित्यभिधीयते. ८ क.—ट. शङ्कसहस्राणां. ९ ख. ङ.—ट. महाशङ्क. १० क.—ट. महाशङ्क. ११ ख.—ट. वृन्दमिहोच्यते. १२ ङ. च. झ. ञ. ट. पद्ममिहोच्यते. १३ क. च. ञ. महाखर्वमिहोच्यते. १४ झ. ट. विश्रुतं. १५ ङ. च. झ. ञ. ट. शङ्खानांच. १६ क.—च. झ. ञ. ट. महाशङ्क.

महावृन्दसहस्रेण तथा पद्मशतेन च ॥ महापद्मसहस्रेण तथा खर्वशतेन च ॥ ४१ ॥
समुद्रेण शतेनैव महौघेन तथैव च ॥ एष कोटिमहौघेन समुद्रसदृशेन च ॥ ४२ ॥
विभीषणेन सचिवैः राक्षसैः परिवारितः ॥ सुग्रीवो वानरेन्द्रस्त्वां युद्धार्थमभिवर्तते ॥
महाबलवृतो नित्यं महाबलपराक्रमः ॥ ४३ ॥
इमां महाराज समीक्ष्य वाहिनीमुपस्थितां प्रज्वलितग्रहोपमाम् ॥
ततः प्रयत्नः परमो विधीयतां यथा जयः स्यान्न परैः पराजयः ॥ ४४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥

एकोनत्रिंशः सर्गः ॥ २९ ॥

शुकसारणकृतशत्रुपक्षप्रशंसनमसहमानेनरावणेन सभर्त्सनं तद्विसर्जनपूर्वकं यथावच्छयनासनादिरामाचरणावगमाय शार्दूलादिचारवरप्रेषणम् ॥ १ ॥ वेषान्तरधारणेनवानरसेनामध्यप्रविष्टैर्विभीषणदृष्टनिवेदितैर्वानरमुष्टिपिष्टैः कृपयारामविमोचितैः शार्दूलादिभिः पुनारावणसमीपगमनम् ॥ २ ॥

शुकेन तु समाख्यातांस्तान्दृष्ट्वा हरियूथपान् ॥ समीपस्थं च रामस्य भ्रातरं खं विभीषणम् ॥ १ ॥
लक्ष्मणं च महावीर्यं भुजं रामस्य दक्षिणम् ॥ सर्ववानरराजं च सुग्रीवं भीमविक्रमम् ॥ २ ॥
[गजं गवाक्षं गवयं मैन्दं द्विविदमेव च ॥ अङ्गदं चैव बलिनं वज्रहस्तात्मजात्मजम् ॥ ३ ॥
हनूमन्तं च विक्रान्तं जाम्बवन्तं च दुर्जयम् ॥ सुषेणं कुमुदं नीलं नलं च प्लवगर्षभम् ॥ ४ ॥]
किंचिदाविग्नहृदयो जातक्रोधश्च रावणः ॥ भर्त्सयामास तौ वीरौ कथान्ते शुकसारणौ ॥ ५ ॥
अधोमुखौ तौ प्रणतावब्रवीच्छुकसारणौ ॥ रोषगद्गदया वाचा संरब्धः परुषं वचः ॥ ६ ॥
न तावत्सदृशं नाम सचिवैरुपजीविभिः ॥ विप्रियं नृपतेर्वक्तुं निग्रहप्रग्रहे प्रभोः ॥ ७ ॥
रिपूणां प्रतिकूलानां युद्धार्थमभिवर्तताम् ॥ उभाभ्यां सदृशं नाम वक्तुमप्रस्तवे स्तवम् ॥ ८ ॥

कीर्तनंअवान्तरसेनापतिभेदात् ॥४०—४१॥ समुद्रसदृशेन सागरसदृशेन ॥४२॥ सचिवैः राक्षसैरुपलक्षितेन विभीषणेन परिवारितः सुग्रीवः त्वामभि त्वांप्रति । युद्धार्थं वर्तते ॥४३॥ ज्वलितग्रहोपमां क्रूरग्रहोपमां । यथा ते जयो न स्यात् प्रत्युत परैः पराजय एव स्यात् तथा यत्नः क्रियतामिति ध्वन्यते ॥ ४४ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टाविंशः सर्गः ॥ २८ ॥

अथ रावणेन चारप्रेषणादिप्रतिपाद्यत एकोनत्रिंशे—शुकेनेत्यादिश्लोकत्रयं ॥ सर्ववानरराजंचेत्यत्र चकारो हनुमदादिसमुच्चयार्थः । आविग्नहृदयः भीतहृदयः । तथापि जातक्रोधः परस्तवाकर्णनेन कुपित इत्यर्थः । कथान्ते वचनान्ते ॥ १—५ ॥ रोषगद्गदया कोपस्खलितया । संरब्धः कुपितः ॥६॥ तावत् प्रथमतः । निग्रहप्रग्रहे निग्रहानुग्रहयोः । प्रभोः शक्तस्य । नृपतेः विप्रियं वक्तुं न सदृशं नाम । नामेति नीतिशास्त्रप्रसिद्धिः ॥ ७ ॥ विप्रियपदोक्तं विशदयति—रिपूणामिति ॥ अभिवर्ततां अभिवर्तमानानां । अप्र-

---

ति० भर्त्सयामास स्वकीयभीताकारगोपनार्थोयंव्यापारः ॥५॥ स० रिपूणां शत्रूणां । ननु "रिपोरपिगुणावाच्याः" इत्याद्युक्तेस्तत्स्तुतिर्युक्तेत्यतोवक्ति—प्रतिकूलानामिति । विरुद्धाचरणवतामित्यर्थः । स्तुतिस्तु अप्रतिकूलशत्रुजातीयविषयेतिभावः । तत्प्राह—युद्धार्थमिति । अप्रस्तवे तद्विषयकप्रश्नाभावे । स्तवं गुणकीर्तनं । वक्तुंसदृशंनामसदृशंकिल काकुः । यद्वा उभाभ्यामेवाप्रस्तवे

[पा०] १ क. ख. च. छ. ट. एवंकोटि. २ ङ.—ट. वीरेणसचिवैःपरि. ३ ङ. झ. ट. मनुवर्तते. ४ ङ. च. छ. झ. ञ. ट. पराभवः. ५ ङ. झ. ञ. ट. समादिष्टान्दृष्ट्वा. ६ इदंश्लोकद्वयं क. ख. च. छ. ञ. पाठेषुदृश्यते. क, ख. च. छ. ञ. नीलं. सेनापतिंचैवनलंगवयमेवच. ७ ङ. घ. च. छ. ञ. जातामर्षश्च. ८ च. ञ. नृपतेःकर्तुं.

[1]आचार्या गुरवो वृद्धा वृथा वां पर्युपासिताः ॥ सारं यद्राजशास्त्राणामनुजीव्यं न गृह्यते ॥
गृहीतो वा न विज्ञातो भारो ज्ञानस्य वोह्यते[2] ॥ ९ ॥
ईदृशैः सचिवैर्युक्तो मूर्खैर्दिष्ट्या धराम्यहम् ॥ १० ॥
किंनु मृत्योर्भयं नास्ति वक्तुं मां परुषं वचः ॥ यस्य मे शासतो जिह्वा प्रयच्छति शुभाशुभम् ॥ ११ ॥
अप्येव दहनं स्पृष्ट्वा वने तिष्ठन्ति पादपाः ॥ [3]राजदोषपरामृष्टास्तिष्ठन्ते नापराधिनः ॥ १२ ॥
हन्यामहं त्विमौ पापौ शत्रुपक्षप्रशंसकौ ॥ यदि पूर्वोपकारैस्तु न क्रोधो मृदुतां व्रजेत् ॥ १३ ॥
अपध्वंसत गच्छध्वं सन्निकर्षादितो मम ॥ न हि वां हन्तुमिच्छामि स्वराम्युपकृतानि वाम् ॥ १४ ॥
हताविव कृतघ्नौ तौ मयि स्नेहपराङ्मुखौ ॥ १५ ॥
एवमुक्तौ तु सव्रीडौ तावुभौ शुकसारणौ ॥ रावणं जयशब्देन प्रतिनन्द्याभिनिस्सृतौ ॥ १६ ॥
[4]अब्रवीत्तु दशग्रीवः समीपस्थं महोदरम् ॥ उपस्थापय मे शीघ्रं चारान्नीतिविशारदान् ॥
महोदरस्तथोक्तस्तु शीघ्रमाज्ञापयच्चरान् ॥ १७ ॥

स्तवे अनवसरे । स्तवं वक्तुं सदृशं नाम सदृशं किमु । युद्धारम्भसमयो हि परस्तुत्यनर्ह इति भावः ॥ ८ ॥ यद्यस्मात् राजशास्त्राणां सारं प्रतिपाद्यसारभूतं । अनुजीव्यं अनुजीविकृत्यं । न गृह्यते न ज्ञायते । अतः वां युवाभ्यां गुरवः महान्तः । वृद्धाः ज्ञानवयश्शीलसंपन्नाः । आचार्याः नीतिशास्त्रोपदेष्टारः । वृथा पर्युपासिताः । तदुपासनफलादर्शनान्निरर्थकमाराधिताइत्यर्थः । ननु चिरोपासितगुरोरज्ञानं नसाम्प्रतं तत्राह—गृहीतो वेति । गृहीतोवार्थः । न विज्ञातः न विशेषेण ज्ञातः । विस्मृत इत्यर्थः । तर्हि कथं ज्ञातृत्वप्रवाद इत्यत्राह—भार इति । ज्ञानस्य भारः ऊह्यते वा । जातमपि ज्ञानं नानुष्ठानपर्यवसायीत्यर्थः । यद्वा ज्ञानस्य भार ऊह्यते । ज्ञानभारभरणाभिमान एव क्रियते न तु तत्कार्यमित्यर्थः ॥ ९ ॥ आवयोरज्ञत्वे कथमेतावत्पर्यन्तमस्मन्मत्यनुसारेण तव राज्यभरणं तत्राह—ईदृशैरिति ॥ ईदृशैः एवं नीतिशास्त्रलेशानभिज्ञैरित्यर्थः । धरामि राज्यमिति शेषः । "धृञ् धारणे" इति भौवादिको धातुः । धरामि जीवामीति वा ॥ १० ॥ मां परुषं वचो वक्तुं युवयोर्मृत्योःसकाशात् भयं नास्ति किंनु । वक्तुं उद्यतयोर्युवयोरिति शेष इत्यप्याहुः । परुषोक्तिमात्रे कुतो मृत्युरित्यत्राह—यस्येति । शासतो मे जिह्वैव शुभाशुभं प्रयच्छति । शासने प्रवृत्तस्य मे जिह्वाचलनमेव मृत्युं श्रेयो वा प्रयच्छतीत्यर्थः ॥ ११ ॥ राजदोषः राजकोपः । दहनस्पृष्टवनपादपस्थितिसंभवादप्यसंभाविता राजदोषस्पृष्टजनस्थितिरिति भावः । तिष्ठन्ते तिष्ठन्ति ॥ १२ ॥ स्वमनः प्रत्याह—हन्यामिति ॥ १३ ॥ अपध्वंसत स्थानात्प्रच्यवध्वं । परस्मैपदं बहुवचनं चार्षं । गच्छध्वं गच्छत । सन्निकर्षात् दृष्टिविषयात् ॥ १४ ॥ हतावित्यर्धं ॥ कृतघ्नत्वस्नेहपराङ्मुखत्वे एव तयोर्वधइति भावः ॥ १५ ॥ प्रतिनन्द्य प्रशस्य । अभिनिस्सृतौ निर्गतौ ॥ १६ ॥ चारा-

स्तवंवक्तुंसदृशंनाम नान्येषामितिवा । स्तवशब्दार्थीभूतगुणकीर्तनस्यनपुंसकताविवक्षया "अजानतामहिमानंतवेदं" "उदीचामातः स्थानेयकपूर्वायाः" "मातुरुत्संख्यासंभद्रपूर्वायाः" इत्यादिवच्चस्तवमित्युक्तिःसंभवतीतिमन्तव्यमितिकेचित् । वस्तुतस्तु "संबन्धमनुवर्तिष्यते" इतिभाष्याल्लिङ्गानामतन्त्रत्वाद्वा ॥ ८ ॥ **ती०** आचार्याः उपनयनपूर्वकंसाङ्गवेदाध्यापकाः । गुरवः पित्रादयः । वृद्धाज्ञानवयोवृद्धाः । **स०** गुरुर्निषेककृन्मुख्यः । तद्भ्रात्राद्याअमुख्याअपिगुरवइतिगुरवइत्युक्तिः ॥ वां युवाभ्यां । वृथापर्युपासिताः । तयोर्गुरुमुखतोऽभ्यसनं स्वसाक्षिसिद्धमित्येवमुक्तिः । वांयुवाभ्यांसारंन्यायः । अनुजीव्यं ग्राह्यं नगृह्यते नगृहीतं । 'न्यायेचनीरेचघनेचसारं'इतिविश्वः ॥ ९ ॥ **स०** अपध्वंसत गच्छध्वं इतिबहुवचनंतु एवमन्येचेत्परुषंवदिष्यन्ति तर्हि तेषामप्ययमेवदण्डइतिसूचनाय । उभयत्रपदव्यत्यासोरावणपदव्यत्यासाय ॥ १४ ॥ **ति०** प्रतिनन्द्याभिनिस्सृतौ अयमेवतयोःराक्षसत्वप्रापकशापस्यान्तइत्यन्यत्रस्पष्टं ॥ १६ ॥

[**पा०**] १ ग. ङ. झ. ट. आचार्यो. २ ङ. च. झ. ञ. ट. वाह्यते. ३ ङ. झ. ञ. ट. राजदण्डपरामृष्टाः. ४ क. ख. घ. च. छ. ज. ट. अब्रवीत्स. ५ क.—ङ. छ. झ. ञ. ट. चारानितिनिशाचरः.

ततश्चाराः संत्वरिताः प्राप्ताः पार्थिवशासनात् ॥ उपस्थिताः प्राञ्जलयो वर्धयित्वा जयाशिषा ॥१८॥
तानब्रवीत्ततो वाक्यं रावणो राक्षसाधिपः ॥ चारान्प्रत्यायिताञ्शूरान्भक्तान्विगतसाध्वसान् ॥१९॥
इतो गच्छत रामस्य व्यवसायं परीक्षथ ॥ मन्त्रिष्वभ्यन्तरा येऽस्य प्रीत्या तेन समागताः ॥ २० ॥
कथं स्वपिति जागर्ति किंमन्यच्च करिष्यति ॥ विज्ञाय निपुणं सर्वमागन्तव्यमशेषतः ॥ २१ ॥
चारेण विदितः शत्रुः पण्डितैर्वसुधाधिपैः ॥ युद्धे स्वल्पेन यत्नेन समासाद्य निरस्यते ॥ २२ ॥
चारास्तु ते तथेत्युक्त्वा प्रहृष्टा राक्षसेश्वरम् ॥ शार्दूलमग्रतः कृत्वा ततश्चक्रुः प्रदक्षिणम् ॥ २३ ॥
ततस्ते तं महात्मानं चारा राक्षससत्तमम् ॥ कृत्वा प्रदक्षिणं जग्मुर्यत्र रामः सलक्ष्मणः ॥ २४ ॥
ते सुवेलस्य शैलस्य समीपे रामलक्ष्मणौ ॥ प्रच्छन्ना ददृशुर्गत्वा ससुग्रीवविभीषणौ ॥ २५ ॥
प्रेक्षमाणाश्चमूं तां च बभूवुर्भयविक्लवाः ॥ ते तु धर्मात्मना दृष्टा राक्षसेन्द्रेण राक्षसाः ॥ २६ ॥
विभीषणेन तत्रस्था निगृहीता यदृच्छया ॥ शार्दूलो ग्राहितस्त्वेकः पापोऽयमिति राक्षसः ॥ २७ ॥
मोचितः सोपि रामेण वध्यमानः प्लवङ्गमैः ॥ आनृशंस्येन रामस्य मोचिता राक्षसाः परे ॥ २८ ॥
वानरैरर्दितास्ते तु विक्रान्तैर्लघुविक्रमैः ॥ पुनर्लङ्कामनुप्राप्ताः श्वसन्तो नष्टचेतसः ॥ २९ ॥

ततो दशग्रीवमुपस्थितास्तु ते चारा बहिर्नित्यचरा निशाचराः ॥
गिरेः सुवेलस्य समीपवासिनं न्यवेदयन्भीमबलं महाबलाः ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

नुपस्थापयेत्यब्रवीदित्यन्वयः ॥ १७—१८ ॥ प्रत्यय एव प्रत्यायः तं प्राप्ताः प्रत्यायिताः तान् । विश्वसनीयानित्यर्थः । विगतसाध्वसान् विगतशत्रुभयान् ॥ १९ ॥ व्यवसायं कर्तव्यनिश्चयं । परीक्षथ परीक्षध्वं । शिथिलव्यवसायश्चेदमुं भीषयाम इति भावः । अस्य रामस्य मन्त्रिषु ये अभ्यन्तराः । अन्तरङ्गभूता इत्यर्थः । तेन रामेण प्रीत्या सङ्गताः । मित्रभूता इत्यर्थः । तानपि परीक्षध्वं । तच्छैथिल्ये तान् भेत्स्याम इत्याशयः ॥ २० ॥ कथं स्वपिति किमेकः स्वपिति उत जाग्रद्भिरनेकैरावृतः स्वपिति । आद्ये सुप्ते युद्धं प्रवर्तयिष्याम इति हृदयं । कथंजागर्ति किं चिन्ताकुलः उतानाकुल इत्यर्थः । आद्ये व्याक्षिप्तं प्रहरिष्यामीत्याकूतं । किमन्यच्च करिष्यति । किं कंचित्कालंविलम्ब्य नगरमुपरोत्स्यति उत सद्य इति। आद्ये क्रमेण वञ्चयिष्यामीति तात्पर्यं । निपुणं प्रच्छन्नमिति यावत् । क्रियाविशेषणमिदं । सर्वं उक्तं स्वापादिकं । अशेषतः सर्वप्रकारेण विज्ञायागन्तव्यं । अशेषतः अशेषैश्चारैरिति वार्थः । अशेषत इत्युत्तरशेषो वा ॥२१॥ उक्तमाशयं विवृणोति—चारेणेति ॥ पण्डितैः निपुणैः । वसुधाधिपैः । चारेण चारद्वारेण । अशेषतो विदितः शत्रुः युद्धे स्वल्पेन यत्नेन समासाद्य निरस्यते ॥ २२ ॥ चाराः शार्दूलमग्रतः कृत्वा प्रधानीकृत्य । राक्षसेश्वरं रावणं । प्रदक्षिणं चक्रुः ॥ २३ ॥ कृत्वा प्रदक्षिणमित्यनुवादो मध्ये विलम्बाभावद्योतनार्थं ॥ २४ ॥ प्रच्छन्नाः वेषान्तरधारिणः ॥२५॥ भयविक्लवाः भयेन दीनाः । धर्मात्मना राक्षसेन्द्रेण विभीषणेनेत्यर्थः ॥२६॥ निगृहीताः तर्जिताइत्यर्थः । ग्राहितः ग्रहणं प्रापितः ॥ २७ ॥ मोचितः प्रहारादितिशेषः ॥ २८ ॥ अर्दिताः पीडिताः । विक्रान्तैरित्यत्र विक्रममात्रोक्तैर्लघुविक्रमैरित्यत्र जवमात्रं विक्रमस्य विशेष्यते ॥ २९ ॥ बहिर्नित्यचराः परराष्ट्रेषु वृत्तान्तज्ञानाय सदा संचारशीलाः । समी-

---

स० अस्य रामस्य । मन्त्रेषु आलोचनेषु अभ्यन्तराः अन्तरङ्गाः ये केइत्यर्थः । यच्छब्दः " यतश्चोदेतिसूर्यः " इतिवत्प्रश्नार्थः । समागताः साहाय्यार्थमिलिताः ॥ २० ॥ स० शार्दूलातिरिक्तारक्षसाविभीषणेनदृष्टाअपि यदृच्छया विभीषणाज्ञांविनैवगृहीताः शार्दूलस्तु अयमत्यन्तपापइतिकपिभिर्ग्राहितः ॥ २७ ॥ स० भीमबलं भीमंभयंकरं बलं शारीरंसैन्यंवा यस्यतंरामं ।

[पा०] १ ङ. झ. ञ. ट. न्धीरान्विगत. छ. ञ्शक्तान्विगत. २ ङ. झ. ट. परीक्षितुं. ३ झ. ञ. ट. ठ. मन्त्रेष्वभ्यन्तराः. ४ क. ङ. च. झ. ट. किमद्यच. ५ ङ.—ट. मोक्षितः. ६ ङ. झ. ट. रामेणमोक्षिताः.

त्रिंशः सर्गः ॥ ३० ॥

शार्दूलेनरावणंप्रति निजबलेगरुडव्यूहरचनयारामस्यसुवेलाचलसमीपेऽवस्थाननिवेदनपूर्वकंप्रविष्टमात्रस्यस्वस्यविभीषणेन निवेदनेवानरैर्बलाद्ग्रहणेनसर्वतःसंचारणपूर्वकं रामसमीपप्रापणादिनिवेदनम् ॥ १ ॥ तथारावणचोदनया सुग्रीवस्य जांबवदादियूथनाथानांचपृथक्पितृनामादिनिवेदनम् ॥ २ ॥

ततस्तमक्षोभ्यबलं लङ्काधिपतये चराः ॥ सुवेले राघवं शैले निविष्टं प्रत्यवेदयन् ॥ १ ॥
चाराणां रावणः श्रुत्वा प्राप्तं रामं महाबलम् ॥ जातोद्वेगोऽभवत्किंचिच्छार्दूलं वाक्यमब्रवीत् ॥२॥
अयथावच्च ते वर्णो दीनश्चासि निशाचर ॥ नासि कच्चिदमित्राणां क्रुद्धानां वशमागतः ॥ ३ ॥
इति तेनानुशिष्टस्तु वाचं मन्दमुदीरयत् ॥ तदा राक्षसशार्दूलं शार्दूलो भयविह्वलः ॥ ४ ॥
न ते चारयितुं शक्या राजन्वानरपुङ्गवाः ॥ ५ ॥
विक्रान्ता बलवन्तश्च राघवेण च रक्षिताः ॥ नापि संभाषितुं शक्याः संप्रश्नोत्र न लभ्यते ॥ ६ ॥
सर्वतो रक्ष्यते पन्था वानरैः पर्वतोपमैः ॥ प्रविष्टमात्रे ज्ञातोऽहं बले तस्मिन्नचारिते ॥ ७ ॥
बलाद्गृहीतो रक्षोभिर्बहुधाऽस्मि विचालितः ॥ जानुभिर्मुष्टिभिर्दन्तैस्तलैश्चाभिहतो भृशम् ॥ ८ ॥
परिणीतोस्मि हरिभिर्बलवद्भिरमर्षणैः ॥ परिणीय च सर्वत्र नीतोऽहं रामसंसदम् ॥ ९ ॥
रुधिरादिग्धसर्वाङ्गो विह्वलश्चलितेन्द्रियः ॥ हरिभिर्वध्यमानश्च याचमानः कृताञ्जलिः ॥ १० ॥
राघवेण परित्रातो जीवामीति यदृच्छया ॥ ११ ॥
एष शैलैः शिलाभिश्च पूरयित्वा महार्णवम् ॥ द्वारमाश्रित्य लङ्काया रामस्तिष्ठति सायुधः ॥ १२ ॥

पवासिनमिति पुंस्त्वमार्षं ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनत्रिंशः सर्गः ॥ २९ ॥

अथ शार्दूलादिचारवचनं त्रिंशे—तत इति ॥ सुवेले सुवेलसमीपे । सामीप्ये सप्तमी । सुवेलस्य समीप इति पूर्वमुक्तत्वात् ॥ १ ॥ चाराणां चारेभ्यः ॥ २ ॥ अयथेति । शत्रुगृहीतत्वेन तेषां स्वरूपं किं न ज्ञातमिति भावः ॥ ३ ॥ अनुशिष्टः पृष्टः । उदीरयत् अडभाव आर्षः ॥ ४ ॥ चारयितुं चारविषयीकर्तुं । न शक्याः चारसंचारविषया न भवन्तीत्यर्थः ॥ ५ ॥ संप्रश्नः परीक्षणं । अत्र वानरेषु ॥ ६ ॥ प्रविष्टमात्रे प्रविष्ट एव । अचारिते चाराविषयीकृते ॥ ७ ॥ रक्षोभिः विभीषणसचिवैः । विचालितः भुवि परिवर्तितः ॥ ८ ॥ परिणीतः परितो नीतः । सर्वतः परिणीय सर्वेषां निकटे चारोयमिति घोषणपूर्वकं परिणीयेत्यर्थः । रामसंसदं रामसभां । विह्वलः मूर्च्छितः । मूर्च्छानिवृत्तावपि चलितेन्द्रियः ॥ ९ ॥ याचमानः त्राणमिति शेषः । परित्रात इत्यनुवादात् ॥ १० ॥ राघवेणेत्यर्धं ॥ जीवामीति यदृच्छया । इदानीं जीवनं यादृच्छिकमित्यर्थः । यद्वा इतीति स्वशरीरप्रदर्शनं । अयथावच्च ते वर्णो दीनश्चासि निशाचरेति ह्युक्तं ॥ ११ ॥ द्वारमाश्रित्य तिष्ठतीति

न्यवेदयन् । वानरैरुपद्रुताअपिजीवन्तीतिमहाबलाइत्युक्तं ॥ ३० ॥ इत्येकोनत्रिंशः सर्गः ॥ २९ ॥

शि० शार्दूलंकिंचिदब्रवीच्च । किंचिदिति जातोद्वेगइत्यत्रान्वयिवा ॥ २ ॥ **स०** भयविह्वलः कपिभयविह्वलः शुकसारणवत्किमुक्तौ किंभविष्यतीति भयविह्वलोवा ॥ ४ ॥ **स०** संप्रश्नः पर्यनुयोगः ॥ ६ ॥ **स०** विचारिते विचारणे प्रक्रान्तेसतीति शेषः ॥ ७ ॥ **ति०** विचारितः बहुप्रकारगत्याचालितः ॥ **स०** रक्षोभिः विभीषणसंबन्धिभिः । रक्षोभिः सहागतैस्सहेतिवा ।

[**पा०**] १ घ. ज. ततस्तदक्षोभ्य. २ ख. ग. राघवेणसुरक्षिताः. घ. राघवेणाभिरक्षिताः. ३ क. ख. ङ. च. झ. ञ. तस्मिन्विचारिते. ज. तस्मिन्निवासिते. ग. तस्मिन्नवारिते. ४ झ. ञ. विचारितः. ५ च.—ट. रुधिरस्रावदीनाङ्गो. ६ ङ. झ. ट. मामेतिच. ७ ङ. झ. ञ. ट. शैलशिलाभिस्तु.

गरुडव्यूहमास्थाय सर्वतो हरिभिर्वृतः ॥ मां विसृज्य महातेजा लङ्कामेवाभिवर्तते ॥ १३ ॥
पुरा प्राकारमायाति क्षिप्रमेकतरं कुरु ॥ सीतां वाऽस्मै प्रयच्छाशु [1]युद्धं वा प्रदीयताम् ॥ १४ ॥
मनसा [3]तं तदा प्रेक्ष्य तच्छ्रुत्वा राक्षसाधिपः ॥ शार्दूलं सुमहद्वाक्यमथोवाच स रावणः ॥ १५ ॥
यदि मां प्रति [4]युध्येरन्देवगन्धर्वदानवाः ॥ नैव सीतां प्रदास्यामि सर्वलोकभयादपि ॥ १६ ॥
एवमुक्त्वा महातेजा रावणः पुनरब्रवीत् ॥ [5]चारिता भवता सेना केऽत्र शूराः प्लवङ्गमाः ॥ १७ ॥
कीदृशाः किंप्रभाः सौम्य वानरा ये दुरासदाः ॥ कस्य पुत्राश्च पौत्राश्च तत्त्वमाख्याहि [6]राक्षस ॥१८॥
तथाऽत्र प्रतिपत्स्यामि ज्ञात्वा तेषां बलाबलम् ॥ अवश्यं [7]बलसंख्यानं कर्तव्यं युद्धमिच्छताम् ॥ १९॥
तथैवमुक्तः शार्दूलो रावणेनोत्तमश्वरः ॥ इदं वचनमारेभे वक्तुं रावणसन्निधौ ॥ २० ॥
अथर्क्षरजसः पुत्रो युधि [8]राजा सुदुर्जयः ॥ गद्गदस्याथ पुत्रोऽत्र जाम्बवानिति विश्रुतः ॥ २१ ॥
गद्गदस्यैव पुत्रोऽन्यो गुरुपुत्रः शतक्रतोः ॥ कदनं यस्य पुत्रेण कृतमेकेन रक्षसाम् ॥ २२ ॥
सुषेणश्चापि धर्मात्मा पुत्रो धर्मस्य वीर्यवान् ॥ सौम्यः सोमात्मजश्चात्र राजन्दधिमुखः कपिः ॥२३॥

वर्तमानसामीप्ये वर्तमानवत्प्रयोगः ॥ १२—१३ ॥ पुराप्राकारमायाति आयास्यतीत्यर्थः । " यावत्पुरानिपातयोर्लट् " । एकतरं द्वयोरेकं । " एकाच प्राचां " इति तरप् । एकतरमित्युक्तं विवृणोति—सीतामिति ॥ १४ ॥ मनसा प्रेक्ष्य आलोच्य । तं शार्दूलमुवाचेत्यन्वयः ॥ १५ ॥ सीतास्मैप्रदीयतामित्यस्योत्तरमाह—यदीति ॥ युध्येरन् तथापि सीतां न प्रदास्यामि । सर्वलोकेभ्यो भयादपि न प्रदास्यामीतियोजना ॥ १६ ॥ एवं प्रथमपक्षस्यानुपपत्त्या द्वितीयपक्षंकरिष्यमाणः तत्र ज्ञातव्यविशेषं पृच्छति—एवमित्यादि श्लोकत्रयं ॥ भवता सेना चारिता चारविषयीकृता । सम्यग्दृष्टेत्यर्थः । अत्र सेनायां । के शूराः ॥ १७ ॥ ये दुरासदाः ते कीदृशाः कीदृशाकाराः । किंप्रभाः किंप्रभावाः । कस्य पुत्राः कस्य पौत्राश्च । तत्त्वं तेषां वानराणां भावं । आख्याहि ॥ १८ ॥ कथने किं प्रयोजनमित्यत्राह—तथेति ॥ तथा एवमाख्याते सति । तेषां बलाबलं ज्ञात्वा अत्र वानरेषु । प्रतिपत्स्यामि प्रतिपत्स्ये । कर्तव्यं ज्ञास्यामीत्यर्थः ॥ १९—२० ॥ अथेत्युत्तरवचनारम्भे ; द्वितीयोथशब्दः पादपूरणे । राजा सुग्रीवः । पाञ्चालीन्यायेन गद्गदेन पोषितत्वात्तत्पुत्रो जाम्बवान् । तस्य ब्रह्मणो जृम्भारम्भसंभूतत्वात् ॥ २१ ॥ अन्यः पुत्रः धूम्रः । जाम्बवान् धूम्रश्चेति गद्गदस्य द्वौ पुत्रावित्यर्थः । यस्य पुत्रेणैकेन महता रक्षसां अक्षादीनां कदनं हननं । कृतं । स केसरी शतक्रतोर्गुरुः बृहस्पतिः तस्य पुत्रः । सापेक्षत्वेपि गमकत्वात्समासः ॥ २२ ॥ धर्मस्य देवतायाः । ननु, " वरुणो जनयामास सुषेणं नाम वानरं " इति बालकाण्डोक्तं । सत्यमुक्तं । स एवात्र धर्मशब्देनोच्यते । शार्दूलो वा भयाकुलोन्यथा श्रुतवान् । अन्योयं सुषेण इत्यप्याहुः ।

वानरैरितिशेषः ॥ ८ ॥ स० गरुडव्यूहमास्थाय प्रस्थानसमयत्वात् । साक्षाद्गरुडारोहेज्ञातभगवत्त्वोरावणःप्रपन्नश्चेदवतारव्यापारानिष्पादनंस्यादिति व्यूहमिषेणतंविरचय्य तत्रस्थितइतिध्वनिः ॥ १३ ॥ स० सुव्रतेत्यनेन अनृतभाषणेप्रत्यवेयामितिपरिज्ञानमस्तीतिसूच्यते ॥ १८ ॥ स० गद्गदस्य द्वितीयजन्मनि । नचैवंवचनेकिंकल्पकमितिवाच्यं । देवानामुत्पत्तेर्नानाविधायाभारतभागवतादौप्रोक्तिरेवेत्यवेहि । अत्रापि "जांबवाञ्जृंभमाणस्यममवक्त्रादजायत" इत्येकत्रनिर्भ्रातृकस्यैकस्यब्रह्मजलजल्पनं अन्यत्रधूम्रानुजत्वेनगद्गदपुत्रत्वजल्पनंचकल्पयिष्यतोऽमुमर्थमितिज्ञेयं । " गद्गदोजांबवतःक्षेत्रद्वारापिता । यद्यपि " जांबवाञ्जृंभमाणस्यममवक्त्रादजायत " इतिभगवन्मुखादस्योत्पत्तिःश्रुता । तथापिजृंभणसमयेउद्गतायाभगवच्छक्तेर्गद्गदक्षेत्रमाविश्यतेनरूपेणपरिणामादोषः ' इतिनागोजिभट्टकल्पनमल्पीकरोतिशक्तिक्षेत्रापेक्षयेतिमन्तव्यं । हनुमतःकेसरिक्षेत्रजलवचनवत्काप्यवचनाच्च ॥ २१ ॥

[पा०] १ ङ. झ. ञ. ट. वापि. च. छ. चापि. २ ङ. छ. झ. ञ. ट. युद्धंवापि. ३ ङ. झ. ञ. ट. तत्तदा. ४ ग. ङ. झ. ट. युध्यन्तेदेव. ५ ख. ङ. छ.—ट. चरिता. ६ ङ. छ. झ. ट. सुव्रत. ७ ङ. झ. ट. खलुसंख्यानं. ८ ङ. छ. झ. ट. राजन्सु.

सुमुखो दुर्मुखश्चात्र वेगदर्शी च वानरः ॥ मृत्युर्वानररूपेण नूनं सृष्टः स्वयंभुवा ॥ २४ ॥
पुत्रो हुतवहस्याथ नीलः सेनापतिः स्वयम् ॥ अनिलस्य च पुत्रोत्र हनुमानिति विश्रुतः ॥ २५ ॥
नप्ता शक्रस्य दुर्धर्षो बलवानङ्गदो युवा ॥ मैन्दश्च द्विविदश्चोभौ बलिनावश्विसंभवौ ॥ २६ ॥
पुत्रा वैवस्वतस्यात्र पञ्च कालान्तकोपमाः ॥ गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ २७ ॥
दश वानर कोट्यश्च शूराणां युद्धकाङ्क्षिणाम् ॥ श्रीमतां देवपुत्राणां शेषं नाख्यातुमुत्सहे ॥ २८ ॥
पुत्रो दशरथस्यैष सिंहसंहननो युवा ॥ दूषणो निहतो येन खरश्च त्रिशिरास्तथा ॥ २९ ॥
नास्ति रामस्य सदृशो विक्रमे भुवि कश्चन ॥ विराधो निहतो येन कबन्धश्चान्तकोपमः ॥ ३० ॥
वक्तुं न शक्तो रामस्य नरः कश्चिद्गुणान्क्षितौ ॥ जनस्थानगता येन यावन्तो राक्षसा हताः ॥ ३१ ॥
लक्ष्मणश्चात्र धर्मात्मा मातङ्गानामिवर्षभः ॥ यस्य बाणपथं प्राप्य न जीवेदपि वासवः ॥ ३२ ॥
श्वेतो ज्योतिर्मुखश्चात्र भास्करस्यात्मसंभवौ ॥ वरुणस्य च पुत्रोऽन्यो हेमकूटः प्लवङ्गमः ॥ ३३ ॥
विश्वकर्मसुतो वीरो नलः प्लवगसत्तमः ॥ विक्रान्तो बलवानत्र वसुपुत्रः सुदुर्धरः ॥ ३४ ॥
राक्षसानां वरिष्ठश्च तव भ्राता विभीषणः ॥ परिगृह्य पुरीं लङ्कां राघवस्य हिते रतः ॥ ३५ ॥
इति सर्वं समाख्यातं तवेदं वानरं बलम् ॥ सुवेलेऽधिष्ठितं शैले शेषकार्ये भवान्गतिः ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिंशः सर्गः ॥ ३० ॥

एवमन्यत्रापि ज्ञेयं ॥ २३ ॥ मृत्युरेव स्वयंभुवा सुमुखादिवानररूपेण सृष्टः । सुमुखादयो मृत्युतुल्या इत्यर्थः । यद्वा सुमुखादयो मृत्युपुत्रा इत्यर्थः ॥ २४ ॥ अनिलस्य पुत्रः औरसः । एवं तत्र तत्र पितृद्वयनिर्देशो बीजित्वक्षेत्रित्वाभ्यामिति मन्तव्यं ॥ २५ ॥ नप्तेति । अत्र नप्तृशब्दोर्थसामर्थ्यात्पौत्रे वर्तते ॥ २६—२७ ॥ वानरकोट्य इत्यत्र वानरेत्यविभक्तिकनिर्देशः । " सुपां सुलुक्—" इत्यादिना षष्ठ्या लुक् । वानराणामित्यर्थः । शेषं जन्मस्थानादि । नोत्सहे न शक्नोमि ॥ २८ ॥ सिंहसंहननः रमणीयावयवसन्निवेशवान् । " वराङ्गरूपोपेतो यः सिंहसंहननो हि सः " इत्यमरः ॥ २९—३० ॥ ये जनस्थानगताः ते यावन्तः ते सर्वेपि हता इत्यर्थः । " यावत्तावच्च साकल्ये " इत्यमरः ॥ ३१ ॥ चशब्देन दशरथस्य पुत्र इत्याकृष्यते । मातङ्गानामिवर्षभः गजश्रेष्ठ इव स्थितः ॥ ३२—३३ ॥ सुदुर्धरः सुदुर्धरनामा ॥ ३४ ॥ लङ्कां रामात् परिगृह्य तस्य हिते रतो विभीषणस्तव भ्रातेत्यन्वयः ॥ ३५ ॥ गतिः प्रमाणं । अत्र वानरजन्मोक्ते प्रायशो बालकाण्डोक्तविरोधादेतत्सर्गं विनापि पूर्वोत्तरकथासंघट्टनाच्च सर्गोयं कल्पित इत्याहुः ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिंशस्सर्गः ॥ ३० ॥

ती० नन्वत्रसर्गेधर्मस्यपुत्रःसुषेणः वैवस्वतपुत्रौशरभगन्धमादनावित्युच्यते । बालकाण्डेतु " वरुणोजनयामाससुषेणंनामवानरम् । शरभंजनयामासपर्जन्यस्तुमहाबलम् । धनदस्यसुतःश्रीमान्वानरोगन्धमादनः " इतित्रयाणामन्यतउत्पत्तिरुक्ता । सत्यं । सुषेणादिसंज्ञावतामनेकेषामपिसत्त्वान्नविरोधः ॥ ३६ ॥ इतित्रिंशःसर्गः ॥ ३० ॥

[पा०] १ क. ख. घ.—छ. झ. ञ. ट. तावन्तो. २ घ. ङ. छ. झ. ट. वेगवानत्र.

एकत्रिंशः सर्गः ॥ ३१ ॥

रावणेनमन्त्रिमुखात्ससैन्यरामस्यसुवेलाचलागमनश्रवणान्मन्त्रिभिस्सहालोच्यकर्तव्यनिर्धारणेन तद्विसर्जनम् ॥ १ ॥ तथा स्वचोदनयाविद्युज्जिह्वेनमायानिर्मितरामशिरश्शरासनसदृशशिरश्शरासनप्रदर्शनेन सीताविमोहनम् ॥ २ ॥

ततस्तमक्षोभ्यबलं लङ्काधिपतये चराः ॥ सुवेले राघवं शैले निविष्टं प्रत्यवेदयन् ॥ १ ॥
चाराणां रावणः श्रुत्वा प्राप्तं रामं महाबलम् ॥ जातोद्वेगोऽभवत्किंचित्सचिवानिदमब्रवीत् ॥ २ ॥
मन्त्रिणः शीघ्रमायान्तु सर्वे वै सुसमाहिताः ॥ अयं नो मन्त्रकालो हि संप्राप्त इति राक्षसाः ॥ ३ ॥
तस्य तच्छासनं श्रुत्वा मन्त्रिणोऽभ्यागमन्द्रुतम् ॥ ततः स मन्त्रयामास सचिवैः राक्षसैः सह ॥ ४ ॥
मन्त्रयित्वा स दुर्धर्षः क्षमं यत्समनन्तरम् ॥ विसर्जयित्वा सचिवान्प्रविवेश स्वमालयम् ॥ ५ ॥
ततो राक्षसमाहूय विद्युज्जिह्वं महाबलम् ॥ मायाविदं महामायः प्राविशद्यत्र मैथिली ॥ ६ ॥
विद्युज्जिह्वं च मायाज्ञमब्रवीद्राक्षसाधिपः ॥ मोहयिष्यावहे सीतां मायया जनकात्मजाम् ॥ ७ ॥
शिरो मायामयं गृह्य राघवस्य निशाचर ॥ त्वं मां समुपतिष्ठस्व महच्च सशरं धनुः ॥ ८ ॥
एवमुक्तस्तथेत्याह विद्युज्जिह्वो निशाचरः ॥ [दर्शयामास तां मायां सुप्रयुक्तां स रावणे ॥]
तस्य तुष्टोऽभवद्राजा प्रददौ च विभूषणम् ॥ ९ ॥
अशोकवनिकायां तु सीतादर्शनलालसः ॥ नैर्ऋतानामधिपतिः संविवेश महाबलः ॥ १० ॥
ततो दीनामदैन्यार्हां ददर्श धनदानुजः ॥ अधोमुखीं शोकपरामुपविष्टां महीतले ॥ ११ ॥
भर्तारमेव ध्यायन्तीमशोकवनिकां गताम् ॥ उपास्यमानां घोराभी राक्षसीभिरितस्ततः ॥ १२ ॥
[राक्षसीभिर्वृतां सीतां पूर्णचन्द्रनिभाननाम् ॥ उत्पातमेघजालाभिश्चन्द्ररेखामिवावृताम् ॥ १३ ॥
भूषणैरुत्तमैः कैश्चिन्मङ्गलार्थमलंकृताम् ॥ चरन्तीं मारुतोद्धूतां क्षिप्तां पुष्पलतामिव ॥ १४ ॥
हर्षशोकान्तरे मग्नां विषादस्य विलक्षणाम् ॥ स्तिमितामिव गाम्भीर्यान्नदीं भागीरथीमिव ॥ १५ ॥]
उपसृत्य ततः सीतां प्रहर्षं नाम कीर्तयन् ॥ इदं च वचनं धृष्टमुवाच जनकात्मजाम् ॥ १६ ॥

अथ सीतामोहनमेकत्रिंशे । कथासंघटनाय पूर्वसर्गोक्तमनुवदति—तत इति ॥ स्पष्टः ॥ १ ॥ चाराणां चारेभ्यः । जातोद्वेगः जातसंभ्रमः । सचिवान् मन्त्रिणः समीपस्थान् ॥ २ ॥ हे राक्षसाः अयं नो मन्त्रकालः संप्राप्तः इति हेतोः मन्त्रिणः समायान्त्विति इदं वाक्यमब्रवीदिति पूर्वेण संबन्धः । यद्वा इदमब्रवीदित्यस्य वाक्यान्तस्थेनेतिशब्देन संबन्धः । राक्षसा इत्युत्तरशेषः । अथवा हे मन्त्रिणः भवन्तः आयान्तु समीपमिति सचिवानब्रवीत् । राक्षसा इति मन्त्रिविशेषणं । सचिवै राक्षसैरित्यनुवादात् । सुसमाहिताः नीतिकुशला इत्यर्थः ॥ ३—४ ॥ समनन्तरं रामस्य समीपागमनानन्तरं । यत् क्षमं कर्तुमुचितं तन्मन्त्रयित्वेति योजना ॥ ५—७ ॥ गृह्य गृहीत्वा ॥ ८ ॥ तस्य तस्मिन् ॥ ९ ॥ लालसः साभिलाषः ॥ १०—११ ॥ उपास्यमानां अनुव्रतां ॥ १२—१५ ॥ प्रहर्षं नाम कीर्तयन् प्रहर्षवार्तां कीर्तयन्निव । नामे-

रामानु० ततस्तमक्षोभ्यबलमित्यनुवादःपूर्वसर्गादौचकृतः । 'पूर्वमेवमयासृष्टोजांबवान्नृक्षपुङ्गवः । जृंभमाणस्यसहसाममवक्त्रादजायत " इतिजृंभमाणपितामहवक्त्रादुत्पन्नत्वेनप्रसिद्धस्यजांबवतःपूर्वसर्गेगद्गदपुत्रत्वेनाभिधानाद्विरोधःस्फुरति । पूर्वसर्गमन्तरेणापिकथासंगच्छते । तथापि स्थितस्यगतिश्चिन्तनीयेतिन्यायेन पूर्वसर्गोव्याख्यातः ॥ **शि०** शार्दूलवचनश्रवणानन्तरकालिकंरावणंप्रतिचारान्तराणांवचनमाह—**ततइति** । नृपतेः रावणस्य । चराः चाराः ॥ १ ॥ **ती०** प्रहर्षंनामकीर्तयन् हेसीतेइतिसंबोधयन् ॥ **स०** प्रहर्षं रामपराजयजं । नाम नाम्ना । अर्थतत्परमार्थं । प्रहर्षन् प्रहर्षयन् । नाम सीतायाः हेसीतेइति ।

[**पा०**] १ ख. ग. च. छ. ञ. ट. लङ्कायांनृपतेश्चराः. २ ग. रामबलंमहत्. ३ क. ग. ङ.—ट. मन्त्रयित्वातु. ४ इदमर्धं घ.—ट. पाठेषुदृश्यते. ५ ख. च. छ. ञ. प्रददौवरभूषणं. ६ घ. प्रविवेश. ७ ङ.—ट. मदीनार्हां. ८ क. ग.—ञ. राक्षसीभिरदूरतः. ९ इदंश्लोकत्रयं प्राचीनकोशेषुनदृश्यते । औत्तराहपाठएवदृश्यते.

सान्त्व्यमाना मया भद्रे यमुपाश्रित्य वल्गसे ॥ खरहन्ता स ते भर्ता राघवः समरे हतः ॥ १७ ॥
छिन्नं ते सर्वतो मूलं दर्पस्ते विहतो मया ॥ व्यसनेनात्मनः सीते मम भार्या भविष्यसि ॥ १८ ॥
विसृजैमां मतिं मूढे किं मृतेन करिष्यसि ॥ भवस्व भद्रे भार्याणां सर्वासामीश्वरी मम ॥ १९ ॥
अल्पपुण्ये विवृत्तार्थे मूढे पण्डितमानिनि ॥ शृणु भर्तृवधं सीते घोरं वृत्रवधं यथा ॥ २० ॥
समायातः समुद्रान्तं मां हन्तुं किल राघवः ॥ वानरेन्द्रप्रणीतेन महता बलेन वृतः ॥ २१ ॥
स निविष्टः समुद्रस्य पीड्य तीरमथोत्तरम् ॥ बलेन महता रामो व्रजत्यस्तं दिवाकरे ॥ २२ ॥
अथाध्वनि परिश्रान्तमर्धरात्रे स्थितं बलम् ॥ सुखसंसुप्तमासाद्य चारितं प्रथमं चरैः ॥ २३ ॥
तत्प्रहस्तप्रणीतेन बलेन महता मम ॥ बलमस्य हतं रात्रौ यत्र रामः सलक्ष्मणः ॥ २४ ॥
पट्टिशान्परिघांश्चैव चक्रान्दण्डान्खड्गान्महायसान् ॥ बाणजालानि शूलानि भास्वरान्कूटमुद्गरान् ॥२५॥
यष्टीश्च तोमराञ्शक्तीश्चक्राणि मुसलानि च ॥ उद्यम्योद्यम्य रक्षोभिर्वानरेषु निपातिताः ॥ २६ ॥
अथ सुप्तस्य रामस्य प्रहस्तेन प्रमाथिना ॥ असक्तं कृतहस्तेन शिरश्छिन्नं महासिना ॥ २७ ॥
विभीषणः समुत्पत्य निगृहीतो यदृच्छया ॥ दिशः प्रव्राजितः सर्वैर्लक्ष्मणः प्लवगैः सह ॥ २८ ॥

त्यपरमार्थे ॥ १६ ॥ वल्गसे जल्पसि। मां निष्ठुरमवद इत्यर्थः ॥ १७ ॥ मूलं आधारभूतं। सर्वतः कात्स्न्र्येन व्यसनेन निमित्तेन। प्रार्थनां विनेत्यर्थः ॥१८॥ मृतेन रामेण। भवस्वेत्यात्मनेपदमार्षं ॥१९॥ निवृत्तार्थे एतावत्पर्यन्तं निवृत्तपुरुषार्थे। पण्डितमानिनि। "क्यङ्मानिनोश्च" इति ह्रस्वत्वं ॥ २० ॥ समुद्रान्तं समुद्रतीरं। प्रणीतेन आनीतेन ॥ २१ ॥ स रामः समुद्रस्योत्तरं तीरं महता बलेन पीड्य पीडयित्वा। दिवाकरे अस्तं प्रयाति सति निविष्टः ॥२२॥ कात्स्न्र्येऽथशब्दः। अध्वनि परिश्रान्तं अतएव स्थितं। अर्धरात्रे सुखसंसुप्तं बलं प्रथममासाद्य चारैश्चारितमभूत् ॥ २३ ॥ यत्र बले। रामः सलक्ष्मणोवस्थितः। तदस्य बलं प्रहस्तप्रणीतेन महता बलेन हतं ॥ २४ ॥ पट्टिशानित्यादिश्लोकद्वयं ॥ पट्टिशान् असिविशेषान्। परिघान् अर्गलानि। चक्रान् क्षुद्रचक्राणि। महायसान् महायसनिर्मितान्। दण्डविशेषणमेतत्। कूटमुद्गरान् अयःकीलकीलितगदाः। यष्टीः केवलदण्डान्। तोमरान् स्थूलाग्रगदाः। प्रासान् क्षेपणीः। चक्राणि महाचक्राणि। पट्टिशादीनुद्यम्योद्यम्य वानरेषु निपातिताः। त इति शेषः ॥ २५—२६ ॥ प्रमथ्नाति प्रहरतीति प्रमाथिः तेन। कृतहस्तेन शिक्षितहस्तेन कर्त्रा। महासिना करणेन। असक्तं अविलम्बितंयथा भवति तथा। छिन्नमित्यन्वयः ॥ २७ ॥ विभीषणः समुत्पत्य गतोपि निगृहीत इत्यर्थः। प्रव्राजितः पलाय-

---

अहंरावणइतिस्वनामवा कीर्तयन् ॥ १६ ॥ शि० ननुतवोक्तस्यसत्यत्वे अहंतल्लोकमेवगमिष्यामीत्यतआह—व्यसनेनेति मूढे हेप्राप्तनिरोधे। आत्मनोव्यसनेन पतिवियोगदुःखेनोपलक्षितालं एनां तल्लोकगमनविषयां। मतिंविसृज। मृतेन लोकान्तरं गतेनपत्या लंकिंकरिष्यसि। तत्प्राप्तिर्नभविष्यतीत्यर्थः। अतोममभार्याः स्त्रियः। भविष्यसि प्राप्स्यसि। तासांसेव्यासतीतत्रैव निवत्स्यसीत्यर्थः ॥ तदेवभङ्ग्यन्तरेणाह—भवस्वेति। हेभद्रे। अल्पपुण्ये अल्पानांक्षुद्राणामपिपुण्यंपवित्रत्वंयया यन्नामस्मरणादिनाक्षुद्राअपिपूताभवन्तीत्यर्थः। तत्संबोधनं। ननिवृत्तोर्थोयस्याः। सर्वार्थसंपन्नेत्यर्थः। तत्संबोधनं। मूढे प्राप्तनिरोधे। पण्डितान्मन्यतेसत्करोतितच्छीला। तत्संबोधनं। ममभार्याणां ईश्वरी पूज्या त्वंभवस्व ॥ १८—२० ॥ स० चक्राणि अस्त्राणि। "चक्रंसेनारथाङ्गयोः। राष्ट्रास्त्रयोरपि" इतिविश्वः ॥ स० नपुंसकशेषे निपातितानीतिवस्तुतोवक्तव्यं। सर्वस्यैतस्यावास्तविकतांकविरवगमयांबभूवैवंनिर्देशेनेतिमन्तव्यम् ॥ निपातनस्यप्रधानकर्मत्वादुद्यमनस्यावान्तरकर्मत्वादेतत्कर्मकर्मीभूतपरिघादिपदोत्तरंप्रथमयाभवितव्यमितित्यदादिष्वनियमादित्येतइतिशेषः ॥ उक्तंचमनोरमायां "उक्तंचहरिणा। प्रधानेतरयोर्यत्रद्रव्यस्यक्रिययोः पृथक्। शक्तिर्गुणाश्रयातत्रप्रधानमनुरुध्यते। प्रधानविषयाशक्तिःप्रत्ययेनाभिधीयते। यदागुणेतदातद्वदनुक्तापिप्रतीयते" इतीति ॥ २६ ॥ स० कृतहस्तेन शिक्षितकरेण। असक्तं यथामहासिनाशिरश्छिन्नं ॥ यथानिद्राभङ्गोभवेद्भवेच्छिरश्छेदः तथा-

[पा०] १ ङ. झ. ट. यमाश्रित्यविमन्यसे. क. घ. यमुपाश्रित्यवर्तसे. २ ख. ङ. झ. ट. दर्पश्चनिहतो. क. ग. घ. च. छ. ज. ञ. दर्पस्तेनिहतो. ३ क. ग. ङ. झ. ट. विसृजैतां. ख. घ. च. छ. ञ. विसृजैनां. ४ झ. संनिविष्टः. ५ ङ. झ. ट. श्चक्रानृष्टीन्दण्डान्महायुधान्. ६ घ. ङ. झ.—ट. दिशं. ७ ङ. झ. सैन्यैर्लक्ष्मणः. ख. च. छ. ञ. सैन्यैर्लक्ष्मणश्चप्लवङ्गमैः.

सुग्रीवो ग्रीवया सीते भग्नया प्लवगाधिपः ॥ निरस्तहनुकः शेते हनुमान्राक्षसैर्हतः ॥ २९ ॥
जाम्बवानथ जानुभ्यामुत्पतन्निहतो युधि ॥ पट्टिशैर्बहुभिश्छिन्नो निकृत्तः पादपो यथा ॥ ३० ॥
मैन्दश्च द्विविदश्चोभौ निहतौ वानरर्षभौ ॥ निश्वसन्तौ रुदन्तौ च रुधिरेण परिप्लुतौ ॥
असिना व्यायतौ छिन्नौ मध्ये हरिनिषूदनौ ॥ ३१ ॥
अनुतिष्ठति मेदिन्यां पनसः पनसो यथा ॥ ३२ ॥
नाराचैर्बहुभिश्छिन्नः शेते दर्यां दरीमुखः ॥ कुमुदस्तु महातेजा निष्कूजः सायकैः कृतः ॥ ३३ ॥
अङ्गदो बहुभिश्छिन्नः शरैरासाद्य राक्षसैः ॥ पतितो रुधिरोद्गारी क्षितौ निपतिताङ्गदः ॥ ३४ ॥
हरयो मथिता नागै रथजातैस्तथाऽपरे ॥ शायिता मृदिताश्चाश्वैर्वायुवेगैरिवाम्बुदाः ॥ ३५ ॥
प्रहृताश्चापरे त्रस्ता हन्यमाना जघन्यतः ॥ अभिद्रुतास्तु रक्षोभिः सिंहैरिव महाद्विपाः ॥ ३६ ॥
सागरे पतिताः केचित्केचिद्गगनमाश्रिताः ॥ ऋक्षा वृक्षानुपारूढा वानरीं वृत्तिमाश्रिताः ॥ ३७ ॥
सागरस्य च तीरेषु शैलेषु जवनेषु च ॥ पिङ्गलास्ते विरूपाक्षैर्बहुभिर्बहवो हताः ॥ ३८ ॥
एवं तव हतो भर्ता ससैन्यो मम सेनया ॥ क्षतजार्द्रं रजोध्वस्तमिदं चास्याहृतं शिरः ॥ ३९ ॥
ततः परमदुर्धर्षो रावणो राक्षसाधिपः ॥ सीतायामुपशृण्वन्त्यां राक्षसीमिदमब्रवीत् ॥ ४० ॥
राक्षसं क्रूरकर्माणं विद्युज्जिह्वं त्वमानय ॥ येन तद्राघवशिरः संग्रामात्स्वयमाहृतम् ॥ ४१ ॥
विद्युज्जिह्वस्ततो गृह्य शिरस्तत्सशरासनम् ॥ प्रणामं शिरसा कृत्वा रावणस्याग्रतः स्थितः ॥ ४२ ॥
तमब्रवीत्ततो राजा रावणो राक्षसं स्थितम् ॥ विद्युज्जिह्वं महाजिह्वं समीपपरिवर्तिनम् ॥ ४३ ॥
अग्रतः कुरु सीतायाः शिघ्रं दाशरथेः शिरः ॥ अवस्थां पश्चिमां भर्तुः कृपणा साधु पश्यतु ॥४४॥
एवमुक्तं तु तद्रक्षः शिरस्तत्प्रियदर्शनम् ॥ उप निक्षिप्य सीतायाः क्षिप्रमन्तरधीयत ॥ ४५ ॥
रावणश्चापि चिक्षेप भास्वरं कार्मुकं महत् ॥ त्रिषु लोकेषु विख्यातं सीतामिदमुवाच च ॥ ४६ ॥

यितः ॥ २८ ॥ ग्रीवया उपलक्षित इति शेषः ॥२९॥ जानुभ्यां जानुनोः । निहतः । अथ पट्टिशैश्छिन्नः जाम्बवान् निकृत्तः पादपश्चाभूत् ॥ ३० ॥ व्यायतौ दीर्घशरीरौ । मध्ये कटिस्थाने ॥ ३१ ॥ अनुतिष्ठति शेते । पनसः पनसफलं । तथा खण्डित इत्यर्थः ॥ ३२ ॥ निष्कूजः निश्शब्दः ॥ ३३ ॥ राक्षसैरासाद्य शरैश्छिन्नः निपतिताङ्गदोङ्गदः क्षितौ पतितः ॥ ३४ ॥ शायिताः शयानाः । अपरे हरयः वायुवेगैरम्बुदा इव नागै रथजातैश्च मृदिताः ॥ ३५ ॥ त्रस्ताः अत एवाभिद्रुताः । जघन्यतः पृष्ठतः । हन्यमानाः अपरे हरयः सिंहैः द्विपा इव प्रहृताः ॥ ३६—॥ ३७ ॥ पिङ्गलाः वानराः । विरूपाक्षैः वानरैः ॥ ३८—३९ ॥ राक्षसीं समीपवर्तिनीं कांचित् ॥ ४०—४१ ॥ ततः राक्षसीं प्रत्याज्ञापनवचनश्रवणानन्तरमेव ॥ ४२—४३ ॥ पश्चिमामवस्थां । मरणमित्यर्थः ॥ ४४ ॥ उप समीपे । अन्तरधीयत अपागच्छत् ॥ ४५ ॥ चिक्षेप आचकर्ष । विद्युज्जिह्वहस्तादित्यर्थः । त्रिषु लोकेषु विख्यातं । वैष्णवत्वादि-

---

सक्तताहेतुर्हस्तइवासिरितिकृतत्वंमहत्त्वंचोभयोर्युज्यते ॥ **शि०** कृतहस्तेन हस्तेकृतेनमहासिना ॥ २७ ॥ **शि०** पनसः विदीर्णपक्वपनसफलमिव पनसोनुश्वसिति ॥ ३२ ॥ **शि०** अङ्गदः अङ्गदविशिष्टः । अङ्गदः शरैश्छिन्नः ॥ ३४ ॥ **शि०** वानरैः व्यतिमिश्रिताः विभक्ताः । ऋक्षाः वृक्षानुपारूढाः ॥ ३७ ॥ **ति०** अन्तरधीयत अपागच्छत् । स्त्रीगोछ्यांस्थातुमयुक्तत्वधियेति भावः ॥ **शि०** अन्तरधीयतेत्यनेन सीतादर्शनमात्रेणतस्यदयोत्पन्नेतिसूचितं ॥ **स०** अन्तरधीयत । अन्तर्धानंतु पतिव्रता-

[**पा०**] १ ख. ङ. झ. ट. परीवृतौ. ज. समुक्षितौ. २ ङ.—ट. अनुश्वसिति. ३ ख. निष्प्राणश्चमहामतिः. ४ क. ख. घ.—ट. निपतितोऽङ्गदः. ५ ग.—ट. नागैरथजालैः. ख. नागैःशरजालैः. च. नागैरस्त्रजालैः. ६ क.—ट. शयानामृदिताः. ७ क.—घ. च. छ. ज. प्रसृताश्चापरे. ङ. झ. प्रसृताश्चपरे. ८ ङ. झ. ट. वानरैर्व्यतिमिश्रिताः. ९ ङ. झ. ट. विरूपाक्षैराक्षसैर्बहवो. १० ग. ङ. झ. ट. विख्यातंरामस्यैतदितिब्रुवन्. ख. घ. विख्यातंरामस्येदमितिब्रुवन्.

इदं तत्तव रामस्य कार्मुकं ज्यासमायुतम् ॥ इह प्रहस्तेनानीतं हत्वा तं निशि मानुषम् ॥ ४७ ॥
स विद्युज्जिह्वेन सहैव तच्छिरो धनुश्च भूमौ [2]विनिकीर्य रावणः ॥
विदेहराजस्य सुतां यशस्विनीं ततोऽब्रवीत्तां भव मे वशानुगा ॥ ४८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

द्वात्रिंशः सर्गः ॥ ३२ ॥

सीतया मायानिर्मितशिरसिसादृश्याद्रामशिरस्त्वप्रत्यभिज्ञानेन शोकाद्बहुधाविलापः ॥ १ ॥ अत्रान्तरे प्रहस्तप्रहितदूताह्वानेन रावणापयाने मायाशिरसोऽन्तर्धानम् ॥ २ ॥ राक्षसैरावणप्रेरणया रणभेरीवादनेनसेनासंनाहनम् ॥ ३ ॥

सा सीता तच्छिरो दृष्ट्वा तच्च कार्मुकमुत्तमम् ॥ [3]सुग्रीवप्रतिसंसर्गमाख्यातं च हनूमता ॥ १ ॥
नयने मुखवर्णं च भर्तुस्तत्सदृशं मुखम् ॥ केशान्केशान्तदेशं च तं च चूडामणिं शुभम् ॥ २ ॥

तिभावः ॥ ४६—४७ ॥ विद्युज्जिह्वेत्यत्र तलोप आर्षः । सहैव युगपदेव । विनिकीर्य शिरोधनुश्च युगपत्सीतायाःपुरतः स्थापयित्वेत्यर्थः । विद्युज्जिह्वः शिरः प्रक्षिप्तवान् स्वयं धनुरिति ज्ञेयं । वशानुगेत्यनन्तरमितिकरणं द्रष्टव्यं ॥ ४८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकत्रिंशः सर्गः ॥ ३१ ॥

अथ सीताप्रलापो द्वात्रिंशे—सा सीतेत्यादिश्लोकत्रयमेकं वाक्यं ॥ हनुमता पूर्वं कथितं । सुग्रीवप्रतिसंसर्गं रामस्य सुग्रीवप्रतिसंबन्धं । रावणमुखाच्छ्रुत्वेतिशेषः । यद्वा दृष्ट्वा ज्ञात्वेत्यर्थः । ज्ञानं च सुग्रीवप्रतिसंबन्धस्य स्मरणं । अन्यत्र साक्षात्कारः ॥ १ ॥ नयने इति द्वितीया । भर्तुः सदृशं । भर्तुर्मुखसदृशमित्यर्थः । इदं नयनादावप्यन्वेति । केशान्तदेशं

शापभीत्या ॥ ४५ ॥ स० विद्युज्जिह्वेन । विद्युज्जिह्वस्यैवेदंनामान्तरंवा । "अपिमार्षमर्षंकुर्याच्छन्दोभङ्गंनकारयेत्" इतिवाद्युकारलाघवमवगन्तव्यं ॥ ती० "उपसृत्यततःसीतां" इत्यारभ्यसर्गसमाप्तिपर्यन्तस्यवास्तवार्थस्तु—रावणोदेवींस्पष्टंदेवतात्वेनज्ञात्वापिरामहस्ताद्वधेच्छुरपिरावणोरामेणसहवैरंसंपाद्यमृतइतीतरराक्षसवञ्चनायदेवीमोहनार्थमिवश्रीराममायाशिरआदिकंप्रदर्श्य रामवधशङ्कयामोहितांदेवींरहसिप्रियवचनैःसमाश्वासयति—उपसृत्यततःसीतामित्यारभ्यसर्गसमाप्तिपर्यन्तेन । उपसृत्य समीपंप्राप्य । प्रहर्षन् प्रहर्षयन् । दुष्टंवचनं इतरराक्षसदृष्ट्यादुष्टमित्यर्थः ॥ सान्त्व्यमानेति । रामस्यकापिहानिर्नास्तीतिमयासान्त्व्यमानापि यंराममाश्रितंउद्दिश्यवरलसे दुःखेनधावसीत्यर्थः । खरहन्तासतेभर्ता समरेहतोथकिं । नहतएवेत्यर्थः । अतोदुःखंमाप्रापुहीतिशेषः । ममदुःखेनतवकाहानिरित्याशङ्क्याह—छिन्नमिति । हेसीते आत्मनस्तवव्यसनेनहेतुनातेत्वयातेममत्वदीयभूत्यस्यममेत्यर्थः । दर्पमयालक्ष्म्यासहसर्वतः सर्वप्रकारेणनिहतः । मूलंचलक्ष्म्यागमननिमित्तमपिछिन्नं । अतः भार्या भर्तव्याभविष्यसि । रामेणैवेतिशेषः । अतोदुःखंमाप्रापुहीत्यर्थः । विसृज्येत्यादिसार्धश्लोकएकंवाक्यं । हेभद्रे हेअमूढे सर्वज्ञे । एतां मिथ्याकल्पितरामविपद्विषयिणीं । मतिं विसृज्य ममप्रभ्रार्यांचईश्वराभव । अल्पपुण्ये निवृत्तार्थे नष्टपुरुषार्थेपण्डितमानिनिमूढेमृते मृतकल्पे । एतादृशविशेषणविशिष्टेमयि कृपयेतिशेषः । किंत्यर्थे । एवंनकरिष्यसियदि दुःखंनत्यजसीत्यर्थः । तर्ह्यहंसद्योमरिष्यामीतिशेषः । नन्वेताराक्षस्यःकिमितिरामविपत्तिंकथयन्तीत्याशङ्क्य तदसहमानःकुपितआह—शृण्विति । भर्तृवधं भर्तृवधविषयवचनमित्यर्थः । लंशृणु । अहंत्वेतादृशमिथ्यावचनंश्रोतुंनसहइतिशेषः । रामवधविषयराक्षस्युक्तिरसंगतेतिदर्शयितुंराक्षस्युक्तिक्षयमनुवदति । " समायातःसमुद्रान्तंमांहन्तुंकिलराघवः " इत्यारभ्य " क्षतजार्द्रंरजोध्वस्तमिदंचास्याहृतंशिरः " इत्यन्तेन "मांत्रातुंकिलराघवइत्यत्रकिलशब्दो " वानरेन्द्रप्रणीतेनेत्यारभ्य " एवंतवहतोभर्तासैन्योममसेनया " इत्यन्तंसर्वत्रयोज्यः । तर्हिराक्षस्युक्तिः सर्वात्मनामिथ्याकिमित्याशङ्क्य नहि त्वन्मोहनार्थंराक्षसैर्मायेयारामशिरआदिकंकल्पितमित्याशयेनाह—क्षतजार्द्रमिति । देव्यास्तच्छिरोदिदृक्षायां तदानेतुंराक्षसस्याह्वाने राक्षसींनियोजयतिततःपरमदुर्धर्षइत्यादिना । अग्रतःकुर्वित । " अवस्थांपश्चिमांभर्तुः " इत्याद्युक्तिः इतरराक्षसवंचनायज्ञातव्या । सविद्युज्जिह्वेनेत्यस्यवास्तवार्थस्तु मेवशानुगेत्यत्रावशानुगेतिच्छेदः । हेमे लक्ष्मीः । अवशानुगा अस्य विष्णोःरामस्य वशमनुगच्छतीत्यवशानुगाभवेति ॥ ४८ ॥ इत्येकत्रिंशःसर्गः ॥ ३१ ॥

ति० हनुमताख्यातंसुग्रीवप्रतिसंसर्गं सुग्रीवरामसंबन्धं रावणकल्पितवानरवधस्योपपादकं । स्मृत्वेतिशेषः ॥ १ ॥

[पा०] १ ग. ज. ज्यासमन्वितं. ङ. च. छ. झ. ञ. ट. ज्यासमावृतं. २ घ. ङ. ज. विनिकीर्यमाणः. ३ ग. सुग्रीवप्रीतिसंसर्गं.

एतैः सर्वैरभिज्ञानैरभिज्ञाय सुदुःखिता ॥ विजगर्हेऽत्र कैकेयीं क्रोशन्ती कुररी यथा ॥ ३ ॥
सकामा भव कैकेयि हतोऽयं कुलनन्दनः ॥ कुलमुत्सादितं सर्वं त्वया कलहशीलया ॥ ४ ॥
आर्येण [1]किं ते कैकेयि कृतं रामेण विप्रियम् ॥ यन्[2]मया चीरवसनस्त्वया प्रस्थापितो वनम् ॥
[[3]इदानीं स हि धर्मात्मा राक्षसैश्च कथं हतः ॥ ५ ॥]
एवमुक्त्वा तु वैदेही वेपमाना तपस्विनी ॥ जगाम जगतीं बाला छिन्ना तु कदली यथा ॥ ६ ॥
सा मुहूर्तात्[4]समाश्वास्य प्रतिलभ्य च चेतनाम् ॥ तच्छिरः समुपाघ्राय विललापायतेक्षणा ॥ ७ ॥
हा हताऽस्मि महाबाहो वीरव्रतमनुव्रत ॥ इमां ते पश्चिमावस्थां गताऽस्मि [5]विधवा कृता ॥ ८ ॥
प्रथमं मरणं नार्या भर्तुर्वैगुण्यमुच्यते ॥ सुवृत्त साधुवृत्तायाः संवृत्तस्त्वं ममाग्रतः ॥ ९ ॥
[6]दुःखाद्दुःखं प्रपन्नाया मग्नायाः शोकसागरे ॥ यो हि मामुद्यतस्त्रातुं सोपि त्वं विनिपातितः ॥१०॥
सा श्वश्रूर्मम कौसल्या त्वया पुत्रेण राघव ॥ वत्सेनेव यथा धेनुर्विवत्सा वत्सला [7]कृता ॥ ११ ॥

ललाटं ॥ २ ॥ अभिज्ञानैः चिह्नैः । " प्रज्ञानं चाप्यभिज्ञानं" इत्यमरः । अभिज्ञाय तदेव शिर इति प्रत्यभिज्ञायेत्यर्थः । अत्र रामविषये ॥ ३ ॥ हे कैकेयि सकामा भव । संपूर्णकामाभवेत्यर्थः । कः काम इत्यत्राह—हत इति । कलहशीलया कलहस्वभावया । कलहप्रयोजनयेतियावत् । त्वया सर्वं कुलं रघुवंशः । उत्सादितं भवति । तथा कुलनन्दनोयं रामो हतः । प्रव्राजनव्याजेन रामहननमेव त्वया संकल्पितं तदिदानीं विपरीतफलं ते जातं । कुलतन्तुभूतरामहननेन तदेकपराः सर्वे भरतादयो हता एव । कलह एव ते प्रयोजनं फलितमितिभावः ॥ ४ ॥ हेत्वन्तराभावादिदमेव रामवनप्रव्राजने हेतुरित्याह—आर्येणेति ॥ आर्येण सर्वप्रियकारिणेत्यर्थः । यत् येन कारणेन । मया सह चीरवसनो रामः प्रस्थापितः तादृशं विप्रियं किं कृतं ॥ ५ ॥ तपस्विनी शोचनीया । जगतीं भूमिं । जगाम । मूर्च्छितेत्यर्थः । बाला मृदुबुद्धिरित्यर्थः ॥ ६ ॥ समाश्वास्य उच्छ्वासं प्राप्य । चेतनांज्ञानं । आयतेक्षणा अश्रुमिश्रत्वेन शिरोवलोकनार्थं विस्तृतविलोचनेत्यर्थः ॥ ७ ॥ वीरव्रतं शत्रुमहत्वा न निवर्तिष्य इति संकल्पं । अनुव्रत अनुप्राप्त । गतास्मि दृष्टवत्यस्मि । " गत्यर्था ज्ञानार्थाः " इति न्यायात् । अतो विधवा कृता ॥ ८ ॥ प्रथमं भर्तुर्मरणं भार्यादोषनिमित्तकं भवति तत्त्वत्र न पश्यामीत्याह—प्रथममिति ॥ प्रथमं भर्तुर्मरणं नार्या वैगुण्यं वैगुण्यहेतुकं । सुवृत्तस्त्वं साधुवृत्ताया ममाग्रतः संवृत्तः मृतः । कथमिदं संगच्छत इति भावः । अस्मिन्पक्षे न सुवृत्तपदस्वारस्यं । यद्वा भवन्मरणस्य महोष एव हेतुरित्याह—प्रथममिति ॥ विगुण एव वैगुण्यं । स्वार्थे ष्यञ् । प्रथमं भर्तृमरणं भार्यादोषनिमित्तकमिति सुप्रसिद्धं । अतो हे सुवृत्त साधुवृत्त । साधुवृत्तायाः सम्यग्जीवनवत्याः । ममाग्रतस्त्वं मृतोसि । मद्वैगुण्यहेतुकं त्वन्मरणमितिभावः । सुवृत्तेत्यनेन त्वद्वैगुण्यहेतुकं न भवतीति ज्ञापितं ॥ ९ ॥ स्वस्य वैगुण्यसद्भावे निदर्शनमाह—दुःखादिति ॥ दुःखाद्दुःखं अत्यन्तदुःखं । प्रपन्नायाः वनप्रस्थानं प्रथमं दुःखं तस्मादपिदुःखं रावणेनापहरणं तत् प्राप्तायाइत्यर्थः । संप्रति भर्तृमरणेन शोकसागरे निमग्नायाः । इयं च षष्ठी " यस्य च भावेन भावलक्षणम् " इत्यस्मिन्नर्थे । शोकसागरे मग्नायाः शोकसागरे मग्नायां मयि । दुःखाद्दुःखं प्रपन्नायाः प्रपन्नायां सत्यां । यो मां त्रातुमुद्यतः स त्वमपि विनिपातित इति संबन्धः ॥ १० ॥ न केवलं ममैवदुःखं

ती० प्रथमंभर्तृमरणं नार्यावैगुण्यं दुश्चरित्रहेतुकमुच्यते । तथासति साधुवृत्तायाममाग्रतःसंवृत्तःममापचारंविनैवकथंमृतोसीत्यर्थः ॥ **ति०** नार्याभर्तुर्मरणं प्रथमंवैगुण्यं मुख्योऽनर्थः । यत्तु भर्तुःप्रथममरणंनार्यावैगुण्यं दुश्चरित्रमूलमित्यर्थइति तन्न । एवंहिसर्वविधवानामसतीत्वापत्तेः ॥ ९ ॥ **रामानु०** वत्सेनेवत्वया धेनुर्यथा धेनुरिव सेति यथेवशब्दयोर्निर्वाहः ॥ ११ ॥

[**पा०**] १ क. ख. ग. ङ. ज.—ट. किंनुकैकेय्याः. २ ख. घ. यद्गृहाच्चीरवसनस्त्वयाप्रव्राजितो. ङ.—ञ. यन्मयाचीरवसनंदत्त्वाप्रव्राजितो. ३ इदमर्धं. क. ख. च. छ. पाठेषुदृश्यते. ४ क. ग. ङ. झ. ञ. समाश्वस्य. ५ घ. विधिनाकृता. ६ ङ. झ. ट. महद्दुःखं. ७ क. ग. ङ. झ. ट. वत्सलातेयथाधेनुः.

आदिष्टं दीर्घमायुस्ते यैरचिन्त्यपराक्रम ॥ अनृतं वचनं तेषामल्पायुरसि राघव ॥ १२ ॥
अथवा नश्यति प्रज्ञा प्राज्ञस्यापि सतस्तव ॥ पचत्येनं यथा कालो भूतानां प्रभवो ह्ययम् ॥ १३ ॥
अदृष्टं मृत्युमापन्नः कस्मात्त्वं नयशास्त्रवित् ॥ व्यसनानामुपायज्ञः कुशलो ह्यसि वर्जने ॥ १४ ॥
तथा त्वं संपरिष्वज्य रौद्रयाऽतिनृशंसया ॥ कालरात्र्या ममाच्छिद्य हृतः कमललोचन ॥ १५ ॥
उपशेषे महाबाहो मां विहाय तपस्विनीम् ॥ प्रियामिव समाश्लिष्य पृथिवीं पुरुषर्षभ ॥ १६ ॥
अर्चितं सततं यत्तद्गन्धमाल्यैर्मया तव ॥ इदं ते मत्प्रियं वीर धनुः काञ्चनभूषणम् ॥ १७ ॥
पित्रा दशरथेन त्वं श्वशुरेण ममानघ ॥ सर्वैश्च पितृभिः सार्धं नूनं स्वर्गे समागतः ॥ १८ ॥

मातुश्चेत्याह—सेति ॥ सा मम श्वश्रूः कौसल्या वत्सला धेनुर्यथा धेनुरिव । त्वया हतेन पुत्रेण वत्सेनेव विवत्सा कृता ॥ ११ ॥ यैः ब्राह्मणैः । दीर्घमायुरित्यादिष्टं उपदिष्टं । तेषां वचनमनृतमासीत् । अनृतत्वे हेतुमाह—अल्पायुरसीति । अचिन्त्यपराक्रमेत्यनेन ते पराक्रमं दृष्ट्वा तैरुक्तं नतु शास्त्रं दृष्ट्वेति गम्यते ॥ १२ ॥ अथवा तेषामनृतवादित्वं नास्त्येव किंतु तवैवभाग्यविपर्यासात्तेषामपिप्रज्ञानष्टेति पक्षान्तरमवलम्बते—अथवेति ॥ प्रभवत्यस्मादिति प्रभवः । भूतानां कारणभूतः । अयं कालः परमात्मा । यथा येन प्रकारेण । एनं पचनविषयभूतं । पचति पक्वकर्माणं करोति । तथा प्राज्ञस्य भविष्यदर्थवेदिनोपि । सतः सत्पुरुषस्य । प्रज्ञा । तव त्वयि विषये । नश्यति नष्टेत्यर्थः । यद्वा पूर्वमचिन्त्यपराक्रमेति तव कथं विपत्तिरित्यभिप्रायेण संबोधितं । तत्र पक्षान्तरमाह—अथवेति ॥ एनं रामं । येन प्रकारेण कालः पचति । तथास्य प्राज्ञस्यापि प्रज्ञा नश्यति । अतो विपत्तिरियमिति भावः ॥ १३ ॥ हि यस्माद्व्यसनानां वर्जने प्रतिरोधे । कुशलोसि । अतः अदृष्टं अचिन्तितं सौम्निकत्वेनादृष्टं वा मृत्युं । कस्मादापन्नः कथमापन्नोसीत्यर्थः ॥ १४ ॥ रौद्रया क्रूरया । कालरात्र्या यस्यां रात्रौ समुद्रतीरे निविष्टोसि तया रात्र्या । संपरिष्वज्य । मम मत्तः । आच्छिद्य अपहृत्य । तथा हृतोसीति संबन्धः । यद्वा मयेति पाठः । रौद्रया अतिनृशंसया । अत्यन्तनिर्दयया कालरात्र्या कर्त्र्या । मया करणभूतया । संपरिष्वज्य आच्छिद्य बलात्कृत्य । तथा हृत इति । कालरात्रिर्नाम सर्वभूतापहारिणी काचन शक्तिः । यद्वा मया कालरात्र्येति व्यस्तरूपकं । संपरिष्वज्य त्वमाच्छिद्य बलाद्धृतोसीति । घोरवैधव्यलक्षणयुक्तत्वेन क्रूराया मे परिष्वङ्ग एव तेऽन्तहेतुरासीदित्यर्थः । शिरश्छेदादेरश्लीलत्वेन तथेत्युक्तं । कमललोचनेति हेतुगर्भं । कमललोचनत्वात् त्वं कालरात्र्या हृतोसि । परिकरानुप्राणितरूपकालङ्कारः ॥ १५ ॥ तपस्विनीं शोचनीयां । प्रियां मत्तः प्रियां । पुरुषर्षभेत्यनेन दक्षिणस्य शठत्वमनुचितमिति द्योत्यते ॥ १६ ॥ मया सह । तव त्वया । यदर्चितं तत्ते धनुः इदं एतादृशं जातमित्यर्थः ॥ १७ ॥ सर्वैः पितृभिः सार्धं स्थितेन दशरथेन । समा-

स० प्राज्ञस्यापिसतस्तव बुद्धिमत्त्वेनसंप्रतिपन्नस्यापितवप्रज्ञा नश्यत्यथवा नष्टाकिमित्यर्थः । अव्ययानामनेकार्थत्वादथवेतिकिमर्थः । एतादृशस्यापिबुद्धिभ्रंशईशायत्तइत्याह—पचतीति ॥ हियतःभूतानांकालःप्रभवः उत्पादकः । भूतानांकालः संहारकश्च । ततएनं भूतसङ्घं । पचति पाचयति । तत्तत्कर्मानुरोधेनबुद्धिभ्रंशंवा सद्बुद्धिंवा दत्वातत्तत्फलंभोजयति । अथवा अथवेतिश्लोकः पूर्वोक्तपक्षएवपक्षान्तरमाश्रित्यप्रवृत्तः । प्राज्ञस्यापिसतःदैवज्ञसङ्गस्यतवविषये प्रज्ञा नश्यति नष्टा । अतस्तद्वचनानृतीभवनमुचितं । तन्नाशेनिमित्तमाह—पचतीति । एनंदैवज्ञं भूतानांप्रभवःकालः प्रभवोस्यास्तीत्यच् प्रभवत्यस्मिन्निति वा उत्पत्तिकालः । तथा यथावचनमनृतंभवेत्तथा पचति परिपाकंनयति । तस्यातिसूक्ष्मत्वादितिभावः । पूर्वंदैवज्ञैरितिबहुवचनं अत्रप्राज्ञस्येत्येकवचनंच वक्तारोबहुलाः प्रज्ञातुल्यदेकोच्छ्रायविषयेतिसंभवतः ॥ १३ ॥ स० प्रियामिव मदपेक्षया । पृथिवींनारीं तद्रूपांरमणीं । आलिङ्ग्येतिशेषः । यद्वा प्रियां तपस्विनीं नारींभार्यामामिव पृथिवीं पितृपितामहादिपालितामपिविहाय । इह रक्षोरक्षितक्षितौ शेषइत्यर्थः ॥ १६ ॥ स० सर्वैःपितृभिः पितामहादिभिःसार्धं । स्थितेन त्वदपेक्षयापूर्वंगतत्वात् । पित्रा श्वशुरेणदशरथेन

[पा०] १ ङ. झ. ट. उद्दिष्टं. २ ङ.—ट. दैवज्ञैरपिराघव. ३ ख. मयालं. ४ ग.—छ. झ. ञ. ट. मयाच्छिद्य. ५ क.—ट. कमललोचनः. ६ ख. च. छ. ञ्चशेषे. ङ. झ. ट. इहशेषे. ७ क.—घ. च. छ. ज. ञ. शुभांनारीं. ङ. झ. ट. यथानारीं. ८ क.—ङ. ज.—ट. यत्नाद्गन्ध. च. छ. पत्न्यागन्ध. ९ ङ. झ. ट. भूषितं.

दिवि नक्षत्रभूतस्त्वं महत्कर्मकृतां प्रियम् ॥ पुण्यं राजर्षिवंशं त्वमात्मनः समवेक्षसे ॥ १९ ॥
किं मां न प्रेक्षसे राजन्किं मां न प्रतिभाषसे ॥ बालां बाल्येन संप्राप्तां भार्यां मां सहचारिणीम् ॥२०॥
संश्रुतं गृह्णता पाणिं चरिष्यामीति यत्त्वया ॥ स्मर तन्मम काकुत्स्थ नय मामपि दुःखिताम् ॥२१॥
कस्मान्मामपहाय त्वं गतो गतिमतां वर ॥ अस्माल्लोकादमुं लोकं त्यक्त्वा मामपि दुःखिताम् ॥२२॥
कल्याणैरुचितं यत्तत्परिष्वक्तं मयैव तु ॥ क्रव्यादैस्तच्छरीरं ते नूनं विपरिकृष्यते ॥ २३ ॥
अग्निष्टोमादिभिर्यज्ञैरिष्टवानाप्तदक्षिणैः ॥ अग्निहोत्रेण संस्कारं केन त्वं तु न लप्स्यसे ॥ २४ ॥
प्रव्रज्यामुपपन्नानां त्रयाणामेकमागतम् ॥ परिप्रक्ष्यति कौसल्या लक्ष्मणं शोकलालसा ॥ २५ ॥

गत इति संबन्धः ॥१८॥ महत्कर्मकृतां महाकर्मकृतां। आत्वाभाव आर्षः । प्रियं कर्मफलत्वेन काङ्क्षणीयं । पुण्यं आत्मनो राजर्षिवंशं इक्ष्वाकुप्रमुखं । दिवि नक्षत्रभूतः विमानस्थः सन् समवेक्षसे पश्यसि ॥ १९ ॥ बालां बाल्येन संप्राप्तां । बाल्य एव त्वयोढामित्यर्थः । भार्यां सदा भर्तुं योग्यां । मां एतादृशावस्थामापन्नां सहचारिणीं । मां किं न प्रेक्षसे किं न प्रतिभाषस इति संबन्धः ॥ २० ॥ मम पाणिं गृह्णता त्वया चरिष्यामि सहचरिष्यामीति यत् संश्रुतं प्रतिज्ञातं । तत् स्मर । स्मृत्वा मामपि त्वत्समीपं नय ॥ २१ ॥ त्यक्त्वा त्वां विहाय । दुःखितां मामपि प्रेयसीमपि मां । अपहाय अस्माल्लोकात् अमुं लोकं परलोकं । कस्माद्धेतोः गतोसि ॥ २२ ॥ यदित्यर्थे यत्तदित्यपि प्रयुज्यते । कल्याणैः मङ्गलैः । शुभैश्चन्दनादिभिर्वा सुवर्णाभरणैर्वा । उचितं अभ्यस्तं। यत्तच्छरीरं मयैव परिष्वक्तं नान्यया । एतदद्य क्रव्यादैः श्येनादिभिः । विपरिकृष्यते । अत्र मयैवेत्यनेन रामस्य दारान्तरं नास्तीति गम्यते ॥ २३ ॥ वनवासनिवृत्त्यनन्तरं त्वं । आप्तदक्षिणैः पर्याप्तदक्षिणैः । अग्निष्टोमादिभिर्यज्ञैः । इष्टवान् कृतदेवपूजनो भूत्वा । अग्निहोत्रेण यज्ञीयवह्निना । संस्कारं केन हेतुना न लप्स्यसे । अत्र वनवासात्पूर्वमभ्याधानाद्यभावात्तन्निवृत्त्यनन्तरमाधानाग्निष्टोमादिकमनुष्ठाय पश्चात्क्रमप्राप्तायुरवसाने यज्ञीयाग्निभिः संस्कारं प्राप्तुं योग्यस्त्वं कथमेवं मध्ये मरणंप्राप्तोसीतिभावः । अनेन वनवासात्पूर्वं रामेण यज्ञादिकं नानुष्ठितमिति सूच्यते । अयमर्थोऽयोध्याकाण्डे सम्यक्प्रतिपादितः ॥ २४ ॥ प्रव्रज्यां प्रवासं । "व्रजयजोर्भावे क्यप्" इति क्यप् । उपपन्नानां प्राप्तानां । त्रयाणां रामादीनां मध्ये एकं लक्ष्मणमागतं । शोकलालसा शोकमन्दा । कौसल्या परिप्र-

स्वर्गेसमागतः मिलितः । "पितामहाद्याश्चपितरोनामकीर्तिताः" इत्यैतरेयभाष्योक्तेःपितामहादीनांपितृशब्दवाच्यतासंभवति ॥ अनघेत्यनेनपुण्यलभ्यस्वर्गगतियोग्यतांसूचयति ॥ १८ ॥ स० दिविनक्षत्रभूतस्त्वं महत्कर्मकृतं महतांकर्म महत्कर्म तत्कृतं महात्मनांपुण्यकर्मफलत्वेनप्राप्यं राजर्षिवंशं इक्ष्वाकुवंशं । किमुपेक्षसे । बहुकर्मकृत्वाऽस्माकमिक्ष्वाकुवंशसंभवःस्यादितिकाङ्क्षितं वंशं किमुपेक्षसे । उपेक्ष्यगतइतियावत् । दिविनक्षत्रभूतं प्रकाशमानमितियावत् । महत्कर्मकृतंपुण्यं राजर्षिवंशं पित्रादिकंयथा राम ईक्षसे पश्यसि । तत्रगतः । तथापुण्यं आत्मनोममराजर्षिवंशं जनकवंशं । किमुपेक्षसे मदनयनेनेतिवा ॥ यत्तु—नागोजिभट्टेन—दिविनक्षत्रभूतं त्रिशङ्कोस्तथालाच्छत्रिन्यायेनवंशस्यतथात्वं । महता पितृवचनपरिपालनरूपेणकर्मणा कृतं तथापुण्यमासाद्यात्मनःप्रियंपुण्यं राजर्षिवंशं उपेक्षसे त्यक्त्वागच्छसि । एतदन्याय्यमित्यर्थइतिव्याख्यातं । तत्तु—स्वर्गगमनौचितीसाधकमेवभवतीतिप्रकृतानुपयुक्तं । यन्महत्कर्मकृतं भुवितद्वंशस्थातिरिक्तक्षत्रभूतं क्षत्रजात्युत्पन्नसंबद्धं क्षत्रभूसंबद्धं नेतिकिंवक्तव्यं । दिव्यपितादृशं तत्राप्येतत्सदक्षःक्षत्रियोनास्ति तन्नक्षत्रभूतं क्षत्रभूयिष्ठंनेतिवा । दशरथादिभिरिन्द्रादिसाहितीकरणादितिभावः । एतादृशंपुण्यंराजर्षिवंशमुपेक्षसे । तेपियुष्मद्बलमाश्रिताइतिनातिशेते तत्रत्यइतिनन्याय्यंतत्रगमनमितिभावइतिवा ॥ १९ ॥ स०लामपहाय अगतिमतां अगतिरितिमतां गतिरहितेतिसंमतां । मां रमारूपिणीं मां । दुःखितां तद्वद्वियमानां । कस्मात्त्यक्त्वा गतइत्यन्वयः । दुःखातिशयाद्वा पुनरुक्तिः । "परिहासेप्रलापेचवागनर्थापिदृश्यते" अनर्था निरर्था । चरितार्थत्वेनानधिकार्येतिदीपिकाव्याख्यानात् ॥ २२ ॥ स० त्रयाणां त्वमहंलक्ष्मणश्चेत्येषांमध्ये । एकमागतंलक्ष्मणं जीवन्तं कौसल्यापरिप्रक्ष्यति

[पा०] १ क. ङ. झ. ट. नक्षत्रभूतंचमहत्कर्मकृतंतथा. २ क. ङ. झ. ट. समुपेक्षसे. ३ घ.—ट. वालेन. ४ ङ. झ. तन्नाम. ५ ज. कस्मान्ममविहाय. ६ ट. मामिव. क. मामिह. ७ ङ. झ. ट. रुचिरंगात्रंपरिष्वक्तं. च. छ. ज. रुचिरंयत्तत्. ८ ङ. च. झ. ट. परिप्रेक्षति.

स तस्याः परिपृच्छन्त्या वधं मित्रबलस्य ते ॥ तव चाख्यास्यते नूनं निशायां राक्षसैर्वधम् ॥ २६ ॥
सा त्वां सुप्तं हतं श्रुत्वा मां च रक्षोगृहं गताम् ॥ हृदयेनावदीर्णेन नभविष्यति राघव ॥ २७ ॥
मम हेतोरनार्यायाः ह्यनर्हः पार्थिवात्मजः ॥ रामः सागरमुत्तीर्य सत्त्ववान्गोष्पदे हतः ॥ २८ ॥
अहं दाशरथेनोढा मोहात्स्वकुलपांसनी ॥ आर्यपुत्रस्य रामस्य भार्या मृत्युरजायत ॥ २९ ॥
नूनमन्यां मया जातिं वारितं दानमुत्तमम् ॥ याऽहमद्येह शोचामि भार्या सर्वातिथेरपि ॥ ३० ॥
साधु पातय मां क्षिप्रं रामस्योपरि रावण ॥ समानय पतिं पत्न्या कुरु कल्याणमुत्तमम् ॥ ३१ ॥
शिरसा मे शिरश्चास्य कायं कायेन योजय ॥ रावणानुगमिष्यामि गतिं भर्तुर्महात्मनः ॥ ३२ ॥
[मुहूर्तमपि नेच्छामि जीवितुं पापजीविता ॥ श्रुतं मया वेदविदां ब्राह्मणानां पितुर्गृहे ॥
यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः ॥ ३३ ॥
क्षमा यस्मिन्दमस्त्यागः सत्यं धर्मः कृतज्ञता ॥ अहिंसा चैव भूतानां तमृते का गतिर्मम] ॥३४॥
इति सा दुःखसंतप्ता विललापायतेक्षणा ॥ भर्तुः शिरो धनुस्तत्र समीक्ष्य च पुनः पुनः ॥ ३५ ॥
एवं लालप्यमानायां सीतायां तत्र राक्षसः ॥ अभिचक्राम भर्तारमनीकस्थः कृताञ्जलिः ॥ ३६ ॥
विजयस्वार्यपुत्रेति सोभिवाद्य प्रसाद्य च ॥ न्यवेदयदनुप्राप्तं प्रहस्तं वाहिनीपतिम् ॥ ३७ ॥
अमात्यैः सहितैः सर्वैः प्रहस्तः समुपस्थितः ॥ तेन दर्शनकामेन वयं प्रस्थापिताः प्रभो ॥ ३८ ॥
नूनमस्ति महाराज राजभावात्क्षमान्वितम् ॥ किंचिदात्ययिकं कार्यं तेषां त्वं दर्शनं कुरु ॥ ३९ ॥

क्ष्यति ॥ २५ ॥ सः लक्ष्मणः । परिपृच्छन्त्यास्तस्याः ते मित्रबलस्य वधं तववधं चाख्यास्यते ॥ २६ ॥ सुप्तं हतं सुप्तत्वदशायां हतमित्यर्थः । अवदीर्णेन भिन्नेन । हृदयेनोपलक्षिता सा नभविष्यति न जीविष्यति ॥ २७ ॥ अनार्यायाः दुश्शीलायाः । मम हेतोः मन्निमित्तं । अनर्हः एतादृशसौप्तिकवधानर्हः । सागरमुत्तीर्य गोष्पदे हतः खरतरखरादीन्हत्वा क्षुद्रेण प्रहस्तेन हत इत्यर्थः ॥ २८ ॥ स्वकुलपांसनी स्वकुलदूषणी । अहं मोहात् अज्ञानात् । दाशरथेनोढास्मि । अतो रामस्य भार्यैव मृत्युरजायत ॥२९॥ मया अन्यां जातिं प्राप्य । यद्वा अन्यां जातिं अन्यस्मिञ्जन्मनि । उत्तमं दानं वारितं । कन्यादानं वारितमित्यर्थः । तत्र हेतुमाह—येति । सर्वे अतिथयो यस्य तस्य सर्वातिथेः । सर्वरक्षितुरित्यर्थः । सर्वातिथिपूजकस्येति वाऽर्थः । भार्यापि याहं इह जन्मनि अद्य भोगकाल एव शोचामि ॥ ३० ॥ समानय योजय । उत्तमं कल्याणं पतिसंयोगरूपं ॥ ३१—३४ ॥ शिरः धनुश्च । तत्र पुरोदेशे ॥ ३५ ॥ लालप्यमानायां प्रलपन्त्यां । भर्तारं रावणं । अनीकस्थः द्वाररक्षः । ननु लौकिकीषु काचिदिव सीता भर्तृशिरस्साक्षात्कारेपि चिरं रुदित्वा विलप्य कथं जीवितं धारयति स्म । उच्यते । अनयोर्दिव्यदम्पत्योः परस्परसत्त्वैव जीवितधारणे निमित्तं नतु ज्ञानाज्ञाने । अतो भर्तुर्जीवितवैकल्याभावात्सा जीवति स्म ॥ ३६ ॥ अनुप्राप्तं द्वारीति शेषः ॥ ३७ ॥ वयमितिभयेन बहुवचनं बहूनामन्तःपुरे समागमासंभवात् ॥ ३८ ॥ प्रहस्तेन प्रेषितोपि

प्रश्नंकरिष्यति । " दिशंप्रव्राजितःसर्वैर्लक्ष्मणःप्लवगैःसह " इतिलक्ष्मणस्यजीवत्वोक्तेरियमुक्तिर्युक्ता ॥ परिप्रेक्षति द्रक्ष्यतीत्यर्थइतिनागोजिभट्टः । तत्रपरस्मैपदितेक्षधातोर्निर्वाह्या । एवं "सतस्याःपरिपृच्छन्त्याः" इत्यनुक्तानुवादास्वारस्यंचपरिहार्यं ॥ २५ ॥ ति० आर्यपुत्रशब्दोयद्यपिस्त्रीभिर्भर्तरिप्रयुज्यतेप्रायेण । तथापि पूजामात्रेसामान्यतःप्रयोगोपिबोध्यः ॥ स० अर्यपुत्र स्वामिपुत्र । " स्यादर्यःस्वामिवैश्ययोः " इत्यमरः । अरयः अपुत्रायेनेतिवा । तेनआर्यपुत्रेति पतिंप्रतिभार्यासंबोधनस्यैवसर्वत्रसत्त्वेनकथमेव-

[पा०] १ ङ. ज. झ. ट. अनघः. २ क.—ट. वीर्यवान्. ३ क. ग. घ. ज. नूनंमन्येमयाजाते. ४ ख.—ट. मद्यैव. ५ ख.—ट. सर्वातिथेरिह. ६ ख. ङ.—ट. घातयमां. ७ इदंश्लोकद्वयंप्राचीनकोशेषुनदृश्यते. औत्तराहपाठएवदृश्यते. ८ ङ. च. छ. झ. ट. इतीवदुःख. ञ. इतिदुःखेनसंतप्ता. ९ ख. ग. घ. विललापाकुलेन्द्रिया. १० ग. ङ.—ट. धनुश्चैवददर्श जनकात्मजा. क. ख. घ. धनुस्तत्रसमीक्ष्यजनकात्मजा. ११ घ. ङ. झ. ञ. ट. सहितः. १२ ङ. झ. प्रहस्तस्त्वामुपस्थितः. १३.—ट. अहंप्रस्थापितःप्रभो. घ. स्वयंप्रस्थापितःप्रभो.

एतच्छ्रुत्वा दशग्रीवो राक्षसप्रतिवेदितम् ॥ अशोकवनिकां त्यक्त्वा मन्त्रिणां दर्शनं ययौ ॥ ४० ॥
सोऽथ सर्वं समर्थ्यैव मन्त्रिभिः कृत्यमात्मनः ॥ सभां प्रविश्य विदधे विदित्वा रामविक्रमम् ॥४१॥
अन्तर्धानं तु तच्छीर्षं तच्च कार्मुकमुत्तमम् ॥ जगाम रावणस्यैव निर्याणसमनन्तरम् ॥ ४२ ॥
राक्षसेन्द्रस्तु तैः सार्धं मन्त्रिभिर्भीमविक्रमैः ॥ समर्थयामास तदा रामकार्यविनिश्चयम् ॥ ४३ ॥
अविदूरस्थितान्सर्वान्बलाध्यक्षान्हितैषिणः ॥ अब्रवीत्कालसदृशो रावणो राक्षसाधिपः ॥ ४४ ॥
शीघ्रं भेरीनिनादेन स्फुटकोणाहतेन मे ॥ समानयध्वं सैन्यानि वक्तव्यं च न कारणम् ॥ ४५ ॥
ततस्तथेति प्रतिगृह्य तद्वचो बलाधिपास्ते महदात्मनो बलम् ॥
समानयंश्चैव समागमं च ते न्यवेदयन्भर्तरि युद्धकाङ्क्षिणि ॥ ४६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

मायाकल्पितशिरोदर्शनेनदूयमानांसीतांप्रति विभीषणभार्ययासरमया हेतूपन्यासेनसमाश्वासनम् ॥ १ ॥

सीतां तु मोहितां दृष्ट्वा सरमा नाम राक्षसी ॥ आससादाथ वैदेहीं प्रियां प्रणयिनीं सखीम् ॥ १ ॥
मोहितां राक्षसेन्द्रेण सीतां परमदुःखिताम् ॥ आश्वासयामास तदा सरमा मृदुभाषिणी ॥ २ ॥
सा हि तत्र कृता मित्रं सीतया रक्ष्यमाणया ॥ रक्षन्ती रावणादिष्टा सानुक्रोशा दृढव्रता ॥ ३ ॥

कथमनवसरे समागतोसीत्याशङ्क्याह—नूनमिति ॥ राजभावात् राजत्वाद्धेतोः । क्षमान्वितं तदानीमेव कर्तव्यत्वेपि तव राजभावात् क्षमया त्वदाज्ञाप्रतीक्षणेनान्वितं । आत्ययिकं आतिपातिकं किंचित्कार्यमस्ति नूनं । तत्तस्मात्तेषां प्रहस्तादीनां दर्शनं कुर्वित्यन्वयः ॥ ३९—४० ॥ सः रावणः । रामविक्रमं विदित्वा सभां प्रविश्य आत्मनः सर्वं कृत्यं मन्त्रिभिः सह समर्थ्य निश्चित्य । विदधे । प्रकृतकार्यमिति शेषः ॥ ४१ ॥ निर्याणं निर्गमनं ॥ ४२ ॥ समर्थ्येत्युक्तं विवृणोति—राक्षसेन्द्र इति ॥ रामकार्यविनिश्चयं रामविषये स्वकृत्यनिश्चयं ॥ ४३—४४ ॥ स्फुटकोणाहतेन उल्बणवादनदण्डाहतिजनितेन । कार्ये कारणोपचारः । वक्तव्यं च न कारणमिति । युद्धार्थं निर्यातेति पुरे प्रवदन्ति चेद्बलाध्यक्षाः तदानीं देव्याः सन्निधौ कथितं स्वकीयं रामसैन्यवधवृत्तान्तवाक्यमसत्यमिति तस्याः विदितं स्यादिति भावः ॥४५॥ आत्मनः आत्मनां । भर्तरि विषये ॥ ४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्वात्रिंशः सर्गः ॥३२॥

अथ सरमा सीतां समाश्वासयति त्रयस्त्रिंशे—सीतामिति ॥ मोहितां रामविषयविपरीतज्ञानवतीं । सरमा विभीषणभार्या । प्रणयिनीं स्नेहवतीं ॥ १—२ ॥ ननु राक्षस्यास्तस्याः कथं सख्यमाश्वासनं

मित्यशङ्कानवकाशः ॥ ३७ ॥ **ती०** स्फुटकोणाहतेन उल्बणवादनदण्डहतेन । नचवक्तव्यंकारणंदेव्याःपुरतः । स्वोक्तंरामहननविषयवाक्यमसत्यमितिसीताज्ञास्यतीतिशङ्क्या वक्तव्यंचनकारणमित्युक्तं । " सासीतातच्छिरोदृष्ट्वातच्चकार्मुकमुत्तमम् " इत्यारभ्य " इतिसादुःखसंतप्ताविललापायतेक्षणा " इत्यन्तानांसीताप्रलापवाक्यानांवास्तवार्थेऽयमाशयः । सीतापिरामशिरआदिकंमायाकल्पितमितिज्ञात्वापितत्सत्यमितिमत्वेवमिथ्याप्रलापादिनाराक्षसान्वञ्चयितुंबहुविधंप्रलपति ॥ ४५ ॥ द्वात्रिंशःसर्गः ॥ ३२ ॥

ति० सीतांत्विति । विभीषणपत्नीयंसरमा । सातुसीतायांभक्तिमती । साहिरावणेनज्ञातसात्विकभावाऽतिभर्त्सनेननाशमाशङ्क्य सीताश्वासनार्थंसंदिष्टेतिबोध्यं । प्रणयिनी स्नेहवती । सखीसरमेत्यन्वयः ॥ १ ॥ **रामानु०** साहीति । विभीषणभार्यायाःसर

[**पा०**] १ घ. सतुपूर्वंसमामन्त्र्य. २ ख. ग. घ. च. छ. ञ. संमन्त्रयामास. ३ ङ. झ. ञ. ट. स्फुटं. ४ ङ. च. छ झ. ञ. ट. तद्वचस्तदैवदूताःसहसामहद्बलं. ५ ख. ग. ङ. च. छ. झ. ट. समागतंच. ६ क. च. छ. ञ. आससादाशु. ७ च. छ. प्रियांप्रियकरीं. ज. प्राणप्रणयिनीं. ङ. झ. ञ. ट. प्रियांप्रणयिनीसखी. ८ ख. कमललोचनां. ९ ज. हिता.

सा ददर्श ततः सीतां सरमा नष्टचेतनाम् ॥ उपावृत्योत्थितां ध्वस्तां बडबामिव पांसुलाम् ॥ ४ ॥
तां समाश्वासयामास सखीस्नेहेन सुव्रता ॥ ५ ॥
समाश्वसिहि वैदेहि माभूत्ते मनसो व्यथा ॥ उक्ता यद्रावणेन त्वं प्रत्युक्तं च स्वयं त्वया ॥
सखीस्नेहेन तद्धीरु मया सर्वं प्रतिश्रुतम् ॥ ६ ॥
लीनया गगने शून्ये भयमुत्सृज्य रावणात् ॥ तव हेतोर्विशालाक्षि न हि मे जीवितं प्रियम् ॥ ७ ॥
स संभ्रान्तश्च निष्क्रान्तो यत्कृते राक्षसाधिपः ॥ तँच्च मे विदितं सर्वमभिनिष्क्रम्य मैथिलि ॥ ८ ॥
न शक्यं सौप्तिकं कर्तुं रामस्य विदितात्मनः ॥ वधश्च पुरुषव्याघ्रे तस्मिन्नैवोपपद्यते ॥ ९ ॥

वेत्यत्राह—सा हीति ॥ हि यस्माद्रावणादिष्टा रक्षन्ती सा आत्मना रक्ष्यमाणया मित्रं सखी कृता । अत इत्यर्थः । रक्षन्ती । तत्रतत्रावसरे सीताया योगक्षेमविधानं कुर्वतीत्यर्थः । रावणादिष्टा योगक्षेमे रावणेनादिष्टा । सानुक्रोशा सदया । अनेन सख्यकरणे हेतुरुक्तः । दृढव्रता दृढप्रतिज्ञा । अनेन सख्यस्याप्रच्युतिर्दर्शिता ॥ ३ ॥ आसादनानन्तरं तदवस्थादर्शनमाह—सेति ॥ नष्टचेतनां विपरीतज्ञानवतीं । उपावृत्य लुठित्वा । ध्वस्तां धूल्युपहतां । बडबां अश्वस्त्रियं । पांसुलां पांसुमतीं ॥ ४ ॥ तामिति पूर्वं करस्पर्शादिना समाश्वासनमुक्तं । इदानीं रावणवृत्तान्तप्रदर्शनेनेति ज्ञेयं ॥ ५ ॥ स्वयं साक्षात् । प्रत्युक्तं प्रलापरूपं । सखीस्नेहेन सखीविषयस्नेहेन । प्रतिश्रुतं । प्रतिरुपसर्गमात्रं ॥ ६ ॥ तदानीमसन्निहितया त्वया कथं श्रुतमित्यत्राह—लीनयेति ॥ लीनया छन्नया । गगने कुत्रचित्तरुरन्ध्रे । गहन इति पाठे आवृत इत्यर्थः । शून्ये निर्जने । कथं घोराद्रावणाद्भयं त्यक्तं तत्राह—तवेति । तव हेतोः त्वन्निमित्तं । मे जीवितमपि न प्रियं । तत्र हेतुर्विशालाक्षीति । तव नयनसौन्दर्यं पश्यन्त्या मे कथं त्वत्पीडा सोढव्येति भावः । ननुविभीषणभार्या कथं सीतारक्षणे रावणेन नियोगार्हा । नियोगे वा कथं तस्याः रावणभयाद्गूढावस्थानं । उच्यते । विभीषणावस्थानकाले सीतायोगक्षेमपरामर्शायान्तरङ्गभूता सरमा नियुक्ता । तन्निर्गमनादिदानीमन्तरङ्गवार्ताश्रवणे भीतासीदिति न विरोधः । नियोगश्च दासीमुखेन । अदर्शनं च स्नुषात्वादिति बोध्यं । अन्येयं सरमेत्येके ॥ ७ ॥ मे मया । यत्कृते यन्निमित्तं । अभिनिष्क्रम्य बहिर्निर्गम्य ॥ ८ ॥ मा भूदस्मदवगमः उपपत्तिश्च तत्र नास्तीत्याह—न शक्यमिति ॥ सौप्तिकं सुप्तौ मरणं । न केवलमशक्यत्वं रामस्य पुरुषधौरेय-

---

मायाः " रक्षन्तीरावणादिष्टा" इतिसीतारक्षणेरावणनियोगःप्रतीयते । उपरि "सखीस्नेहेनतद्धीरुमयासर्वंप्रतिश्रुतम् । लीनयागहने शून्येभयमुत्सृज्यरावणात्" इतिरावणभयाद्गूढावस्थानेनरावणोक्तवाक्यश्रवणंचप्रतीयते । विभीषणभार्यायारावणेननियोगोनुचितइवप्रतिभाति । रावणनियुक्तत्वेतद्भयाद्गूढावस्थानमनुपपन्नमितिप्रतीयते । अत्रपरिहारोविद्वद्भिश्चिन्तनीयः ॥ **ती०** ननुविभीषणभार्यायाःसरमायाःकथंसख्यमाश्वासनंवातत्राह—साहीति । हियस्माद्रावणादिष्टा सीतांरक्षन्तीसा आत्मनारक्ष्यमाणयासीतया मित्रं सखीकृता । " ज्येष्ठाकन्याऽनलानामविभीषणसुताकपे । तयामेदमाख्यातंमात्राप्रहितयास्वयं " इतिसुन्दरकाण्डेसीतयोक्तत्वादत्रापिसानुक्रोशेत्युक्तत्वाच्चविभीषणभार्यायाःसरमायाःसीतायाःसखीत्वंतत्समाश्वासनंचयुक्तमितिभावः ॥ ३ ॥ **स०** ननु विभीषणभार्यात्वेनत्वंतत्त्वतस्तेननविश्वसनीयेति कथंसंकथनंश्रुतंभवत्येत्यतआह—लीनयेति । शून्ये जनैः । गहने इतरापरिज्ञातस्थाने । रावणाद्भयमुत्सृज्य क्रूरोपिरावणोरमणरिपुरपियोषितःकिंकरोतीतिभीतिंत्यक्त्वा । निलायनंतुभावत्वाद्रावणस्यलज्जयेति भावः । रावणादिष्टेतिपूर्वोक्तस्वारस्यंचेत्थंचेद्भविष्यति ॥ **ति०** ननुविभीषणस्यविरुद्धकोटौगतत्वात्तत्पत्न्यात्वयारावणसंनिधौस्थित्वा कथंश्रुतंतत्राह—लीनयेति । गहने अशोकवनमध्ये । पूर्वंमस्यमायाकृतवृत्तान्तंश्रुतवत्या त्वद्रक्षणरूपकार्यार्थमागत्यलीनया गुप्तंस्थितया । रावणाद्भयमुत्सृज्यस्थितया सर्वंश्रुतं । नहिमेरावणाद्भयं तेनैवतवरक्षणेनियुक्तत्वात्तज्जातित्वाच्च । ततोऽन्यैवैषासरमेत्यन्ये ॥ ७ ॥ **स०** ससंघातः ससमूहः । निष्क्रान्तः प्रहस्ताहूतः । यत्कृते यदर्थं । तत्सर्वं अभिनिष्क्रम्य बहिर्गत्वा । मे मयाविदितं ॥८॥ **ति०** सौप्तिकं सुप्तिकालयुद्धं । तत्रहेतुः—विदितात्मनः । जितनिद्रालस्यादिदोषचित्तस्येत्यर्थः । पुरुषव्याघ्रे सर्वातिशायिशौर्यवति । अतएवतस्मिन्वधोनोपपद्यते ॥ **स०** अल्पनावश्यकत्वादनन्तरंवदिष्यामीत्यादौधववार्तांजीवातुंसीतायावदिष्यन्तीततोप्यादौमोहमपहन्तीत्याह—नशक्यमिति । सौप्तिकं स्वापसमयव्यापारः । तत्रनिमित्तमाह—**विजितेति** । विजितात्मनः जित-

[पा०] १ ङ. च. छ. झ. ञ. ट. सखीसीतां. ख. सखींसीतां. २ ख.—ट. पांसुषु. ३ ङ. झ. ट. सुव्रतां. ४ झ.—ठ. गहने. ५ ङ. झ. ट. मेरावणाद्भयं. ६ क. सुसंभ्रान्तश्च. ठ. ससंघातश्च. ७ ङ. झ. ट. तत्रमे. ८ झ. ठ. विजितात्मनः.

नं त्वेव वानरा हन्तुं शक्याः पादपयोधिनः ॥ सुरा देवर्षभेणेव रामेण हि सुरक्षिताः ॥ १० ॥
दीर्घवृत्तभुजः श्रीमान्महोरस्कः प्रतापवान् ॥ धन्वी संहननोपेतो धर्मात्मा भुवि विश्रुतः ॥ ११ ॥
विक्रान्तो रक्षिता नित्यमात्मनश्च परस्य च ॥ लक्ष्मणेन सह भ्रात्रा कुलीनो नयशास्त्रवित् ॥ १२ ॥
हन्ता परबलौघानामचिन्त्यबलपौरुषः ॥ न हतो राघवः श्रीमान्सीते शत्रुनिबर्हणः ॥ १३ ॥
अयुक्तबुद्धिकृत्येन सर्वभूतविरोधिना ॥ इयं प्रयुक्ता रौद्रेण माया मायाविदा त्वयि ॥ १४ ॥
शोकस्ते विगतः सर्वः कल्याणं त्वामुपस्थितम् ॥ ध्रुवं त्वां भजते लक्ष्मीः प्रियं प्रीतिकरं शृणु ॥१५॥
उत्तीर्य सागरं रामः सह वानरसेनया ॥ सन्निविष्टः समुद्रस्य तीरमासाद्य दक्षिणम् ॥ १६ ॥
दृष्टो मे परिपूर्णार्थः काकुत्स्थः सहलक्ष्मणः ॥ स हि तैः सागरान्तस्थैर्बलैस्तिष्ठति रक्षितः ॥ १७ ॥
अनेन प्रेषिता ये च राक्षसा लघुविक्रमाः ॥ राघवस्तीर्ण इत्येव प्रवृत्तिस्तैरिहाहृता ॥ १८ ॥
सं तां श्रुत्वा विशालाक्षि प्रवृत्तिं राक्षसाधिपः ॥ एष मन्त्रयते सर्वैः सचिवैः सह रावणः ॥ १९ ॥
इति ब्रुवाणा सरमा राक्षसी सीतया सह ॥ सर्वोद्योगेन सैन्यानां शब्दं शुश्राव भैरवम् ॥ २० ॥
दण्डनिर्घातवादिन्याः श्रुत्वा भेर्या महास्वनम् ॥ उवाच सरमा सीतामिदं मधुरभाषिणी ॥ २१ ॥
सन्नाहजननी ह्येषा भैरवा भीरु भेरिका ॥ भेरीनादं च गम्भीरं शृणु तोयदनिस्वनम् ॥ २२ ॥
कल्प्यन्ते मत्तमातङ्गा युज्यन्ते रथवाजिनः ॥ हृष्यन्ते तुरगारूढाः प्रासहस्ताः सहस्रशः ॥ २३ ॥

तया वधयोग्यतापि नास्तीत्याह—वधश्चेति ॥ ९ ॥ एवं वानरवधोप्यनुपपन्न इत्याह—न त्विति ॥ स्वबलाद्रामबलाच्च न वानरा हन्तुं शक्या इत्यर्थः ॥१०॥ न केवलं बलादिना सौभाग्यलक्षणादिभिरप्यतदर्हो राम इत्याह श्लोकत्रयेण—दीर्घेत्यादिना ॥ श्रीमान् कान्तिमान् । प्रतापवान् तेजिष्ठः । संहननोपेतः शोभनावयवसंस्थानः । लक्ष्मणेन सह रक्षितेत्यन्वयः ॥ ११—१२ ॥ श्रीमान् विजयश्रीमान् ॥ १३ ॥ कथं तर्हि शिरःप्रभृतिप्रापणं तत्राह—अयुक्तेति ॥ अयुक्तबुद्धिकृत्येन अनर्हबुद्धिव्यापारेण । मायाशिरोदर्शनबुद्धेस्तत्कृत्यस्य चात्मलाघवहेतुत्वादितिभावः ॥ १४ ॥ भजते भविष्यत्सामीप्ये लट्प्रयोगः । प्रियं प्रियवचनं ॥ १५ ॥ सन्निविष्टः स्थितः ॥ १६ ॥ सागरान्तस्थैः सागरतीरस्थैः ॥ १७ ॥ तीर्णः तीर्णवान् । प्रवृत्तिर्वार्ता ॥ १८ ॥ एष मन्त्रयत इति सान्निध्यद्योतनाय ॥ १९ ॥ सीतया सह शुश्रावेत्यन्वयः । सर्वोद्योगेन सर्वप्रयत्नेन । जनितमिति शेषः । शब्दं सिंहनादं ॥२०॥ दण्डनिर्घातवादिन्याः दण्डाहत्या शब्दायमानायाः ॥ २१ ॥ भेरिका ताड्यत इति शेषः । तोयदनिस्वनं तोयदनिस्वनतुल्यं ॥ २२ ॥ कल्प्यन्ते आकल्प्यन्ते । अलङ्क्रियन्त इत्यर्थः । युज्यन्ते रथवाजिनः । रथेषु वाजिनो युज्यन्त इत्यर्थः । रथेत्यविभक्तिकनिर्देशो वा । हृष्यन्ते हर्षव्यापारं कुर्वन्ति

मनस्कस्य । विदितात्मनइतिपाठे विदितः अयंफलिष्यतीतिज्ञातः आत्मा यत्नोयेनसतथेत्यर्थः । पुरुषव्याघ्रे जाग्रति वधश्च स्वप्नो वा जाग्रत्कालिकोवानोपपद्यते ॥ ९ ॥ स० देवर्षभेन नारायणेनसुराइव वानराःरामेण हि यतःसुरक्षिताः अतोनहन्तुंशक्याइत्यन्वयः ॥ १० ॥ स० प्रियं प्रियवचनं । तेलांभजते । सर्वेपिप्रियवक्तारोभविष्यन्तीतिभावः ॥ ते तवविषये । प्रियंममवचनंशृणु । त्वांध्रुवंभजते धवइतिशेषः । लक्ष्मीश्चभजते ॥ हेभवति तेप्रियवचनमितिनागोजिभट्टव्याख्यानंमूलकोशेषुपश्चषेषुभवतिपाठादर्शनात् । " श्रुवःशृच " इतिश्रादेशे शृणुशब्दोलघ्वादिरितिभवतीकारगौरवानापादकइतिचासमञ्जसम् ॥ १५ ॥ ति० दृष्टोमे मयादृष्टइत्यर्थः । स्वगृहवत्यूर्ध्वंगृहमारुह्येतिशेषः । खेचरीलाद्बहिर्निर्गत्येतिशेषोवा । सागरान्तस्थैः सागरतीरस्थैः । स्वमहिम्नारक्षितस्तिष्ठति ॥ स० परिपूर्णार्थः अलक्ष्यीकृतरक्षोध्यक्षत्वात् । सहितैः मिलितैः सक्षेमैर्वा । तिष्ठतियः सदृष्टः ॥ १७ ॥ स० यदर्थंरावणःप्रहस्ताहूतोगतः तन्मेविदितमित्युक्तं तदिदानीमावेदयति—अनेनेति । प्रवृत्तिः वार्ता ॥ १८ ॥

[पा०] १ घ. नहितेवानराः. २ क.—घ. च. छ. ञ. कुशलीनय. ३ ग. ङ.—ञ. मायाविना. ४ ङ. च. झ. ञ. ट. प्रियंतेभवतिशृणु. ५ ख. उत्तीर्यराघवःश्रीमान्सागरंसहसेनया. ६ ख. घोराराक्षसाः. ७ घ. बलविक्रमाः. ८ घ. एतांश्रुत्वा. ९ घ. भीमनादिनी.

तत्रतत्र च सन्नद्धाः संपतन्ति पदातयः ॥ आपूर्यन्ते राजमार्गाः सैन्यैरद्भुतदर्शनैः ॥
वेगवद्भिर्नदद्भिश्च तोयौघैरिव सागरः ॥ २४ ॥
शस्त्राणां च प्रसन्नानां चर्मणां वर्मणां तथा ॥ रथवाजिगजानां च भूषितानां च रक्षसाम् ॥ २५ ॥
[संभ्रमो रक्षसामेष हृषितानां तरस्विनाम् ॥] प्रभां विसृजतां पश्य नानावर्णां समुत्थिताम् ॥
वनं निर्दहतो घर्मे यथा रूपं विभावसोः ॥ २६ ॥
घण्टानां शृणु निर्घोषं रथानां शृणु निःस्वनम् ॥ हयानां हेषमाणानां शृणु तूर्यध्वनिं यथा ॥२७॥
उद्यतायुधहस्तानां राक्षसेन्द्रानुयायिनाम् ॥ संभ्रमो रक्षसामेष तुमुलो रोमहर्षणः ॥ २८ ॥
श्रीस्त्वां भजति शोकघ्नी रक्षसां भयमागतम् ॥ २९ ॥
रामः कमलपत्राक्षोऽदैत्यानामिव वासवः ॥ विनिर्जित्य जितक्रोधस्त्वामचिन्त्यपराक्रमः ॥
रावणं समरे हत्वा भर्ता त्वाधिगमिष्यति ॥ ३० ॥
विक्रमिष्यति रक्षस्सु भर्ता ते सहलक्ष्मणः ॥ यथा शत्रुषु शत्रुघ्नो विष्णुना सह वासवः ॥ ३१ ॥
आगतस्य हि रामस्य क्षिप्रमङ्कगतां सतीम् ॥ अहं द्रक्ष्यामि सिद्धार्थां त्वां शत्रौ विनिपातिते ॥३२॥
अश्रूण्यानन्दजानि त्वं वर्तयिष्यसि शोभने ॥ समागम्य परिष्वज्य तस्योरसि महोरसः ॥ ३३ ॥

॥ २३ ॥ तत्रतत्रेति सार्धश्लोकः ॥ संपतन्ति सङ्घीभवन्ति । सैन्यैः सेनासमवेतरथगजतुरगपदातिभिः । अद्भुतदर्शनैः अलंकारविशेषैरिति शेषः । वेगवद्भिर्नदद्भिश्चेति पाठः ॥ २४ ॥ शस्त्राणामित्यादिश्लोकद्वयं ॥ प्रसन्नानां निर्मलानां । चर्मणां फलकानां । भूषितानां अतएव प्रभां विसृजतां उत्पादयतां । उत्थितां ऊर्ध्वं प्रसृतां । रूपं तेजः । नानौषधीवनदाहेन नानावर्णत्वं सिद्धं । पश्येत्यत्रापि प्रभैव कर्म । यद्वा विसृज तामिति च्छेदः । तां प्रसिद्धां प्रभां पश्य । विसृज शोकमिति शेषः ॥२५–२६॥ घण्टानां गजघण्टानां । रथानां निस्स्वनं । नेमिसंघट्टनजं । हेषं आणानामिति च्छेदः । आङ्पूर्वात् " अण शब्दे " इत्यस्माद्धातोः पचाद्यच् । आणानां शब्दायमानानां । हेषं शब्दं । स्त्रीलिङ्गाभावः आर्षः । निस्वनमिति वा अनुवर्त्यते । तूर्यध्वनिंयथा तूर्यध्वनिमिव ॥ २७ ॥ संभ्रमः सन्नाहः । तुमुलः सान्द्रः । दृश्यत इति शेषः ॥२८॥ ध्रुवं त्वां भजते लक्ष्मीरित्युपक्रान्तमुपसंहरति—श्रीरिति ॥ शोकघ्नी श्रीः विजयलक्ष्मीः भजति । भविष्यत्सामीप्ये लट्प्रयोगः॥२९॥राम इत्यादिसार्धश्लोक एकान्वयः । कमलपत्राक्षः । "श्रीर्न त्यजति रक्ताक्षं" इति सामुद्रिकोक्तरीत्याऽवश्यं श्रीरुपतिष्ठति । तत्रापि श्रेष्ठे तत्रापि चक्षुषी इति नयनसौभाग्यलक्षणमन्यभिचारीति भावः । न केवलं सौभाग्यलक्षणेन श्रीः प्रभावादपीत्याह—अदैत्यानामिति।अदैत्यानां देवानां मध्ये। वासव इव स्थितः । सर्वश्रेष्ठ इत्यर्थः । अचिन्त्यपराक्रमः एकेन शरेण मरुकान्तारवासिसकलदस्युवारणादप्रमेयपराक्रमः । तर्हि तादृशः किमिदानीं विलम्बत इत्यत्राह—जितक्रोध इति । रावणस्याभिमुखमनागमनात् क्रोधावकाशमलभमानास्तिष्ठतीति भावः। दैत्यानामिति द्वितीयार्थे षष्ठी वा । दैत्यान् वासव इव रावणं समरे हत्वा विनिर्जित्य शत्रुगृहादपनीय । त्वामभिगमिष्यतीति योजना ॥ ३० ॥ विष्णुना उपेन्द्रेण ॥ ३१ ॥ एवं शंसन्त्यास्ते किं फलं तत्राह—आगतस्येति ॥ चिरप्रवासादागतस्य दयितादर्शने कोपि विकासो भवेत्स मया द्रष्टव्य इति भावः ॥ ३२ ॥ महोरस इत्यत्र समासान्तविधेरनित्यत्वात्

ति० " वनंनिर्दहतोधर्मे " इत्यादि " राक्षसेन्द्रानुयायिनां " इत्यन्तंश्लोकद्वयंप्रक्षिप्तमितिकतकः ॥ २६ ॥ रामानु० दैत्यानामित्यत्रापि समरशब्दोयोजनीयः ॥ ३० ॥

[पा०] १ क. ग. ङ. च. छ. झ. ञ. सहस्रशः. २ ज. चर्मिणांवर्मिणां. ३ च. छ. हृषितानांच. ङ. झ. ञ. ट. राक्षसेन्द्रानुयायिनां. ४ इदमर्धं ङ.—ट. पाठेषुदृश्यते. ५ घ. च. छ. प्रभामिव. ६ ङ. च. ट. नेमिनिस्स्वनं. ७ ङ. च. छ. झ. ट. तुमुलंरोमहर्षणं. ८ ख. वैदेहि. ९ ख. घ. ङ. च.—झ. ञ. ट. अवजित्य. १० क.—ट. स्तमचिन्त्य. ११ ख. हन्ता. १२ ङ. च. छ. ञ. अश्राण्यानन्द. १३ ख. ग. ङ.—ट. जानकि. १४ क.—ट. परिष्वक्ता.

अचिरान्मोक्ष्यते सीते देवि ते जघनं गताम् ॥ धृतामेतां बहून्मासान्वेणीं रामो महाबलः ॥ ३४ ॥
तस्य दृष्ट्वा मुखं देवि पूर्णचन्द्रमिवोदितम् ॥ मोक्ष्यसे शोकजं वारि निर्मोकमिव पन्नगी ॥ ३५ ॥
रावणं समरे हत्वा नचिरादेव मैथिलि ॥ त्वया समग्रः प्रियया सुखार्हो लप्स्यते सुखम् ॥ ३६ ॥
समागता त्वं वीर्येण मोदिष्यसि महात्मना ॥ सुवर्षेण समायुक्ता यथा सस्येन मेदिनी ॥ ३७ ॥
गिरिवरमभितोऽनुवर्तमानो हय इव मण्डलमाशु यः करोति ॥
तमिह शरणमभ्युपेहि देवं दिवसकरं प्रभवो ह्ययं प्रजानाम् ॥ ३८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

चतुस्त्रिंशः सर्गः ॥ ३४ ॥

सरमयासीतांप्रति रामे स्वेनसंदेशप्रापणप्रार्थने सीतयातस्यानौचित्यबुद्ध्या स्वविषयेरावणाध्यवसायावगतयेतत्प्रेषणं ॥ १ ॥ रावणाध्यवसायाधिगमेनपुनरागतयासरमया सीतांप्रति रावणमात्राऽविन्ध्यनाम्नामस्त्रिणाचतंप्रतिबहुधारामायसीताप्रत्यर्पणचोदनेपि तस्यतदनर्पणेदृढाध्यवसायनिवेदनम् ॥ २ ॥ तथा रामेण रावणहननपूर्वकमयोध्यांप्रतितदानयननिवेदने तत्रोपश्रुतितयावानरसेनासंनाहभेरीशङ्खरवप्रादुर्भावः ॥ ३ ॥

अथ तां जातसंतापां तेन वाक्येन मोहिताम् ॥ सरमा ह्लादयामास पृथिवीं द्यौरिवाम्भसा ॥ १ ॥
ततस्तस्या हितं सख्याश्चिकीर्षन्ती सखीवचः ॥ उवाच काले कालज्ञा स्मितपूर्वाभिभाषिणी ॥ २ ॥
उत्सहेयमहं गत्वा त्वद्वाक्यमसितेक्षणे ॥ निवेद्य कुशलं रामे प्रतिच्छन्ना निवर्तितुम् ॥ ३ ॥

कबभावः । समागम्य परिष्वज्य स्थितस्य तस्योरसि अश्रूणि वर्तयिष्यसीति योजना ॥ ३३ ॥ जघनं गतां नितम्बावलम्बिनीं । बहून्मासान् धृतां बहुमासैर्धृतां । अत्यन्तसंयोगेद्वितीया । रामवियोगात्प्रभृति बद्धामेतां वेणीं । मोक्ष्यते मोक्षयिष्यति । आर्षमात्मनेपदं ॥ ३४ ॥ निर्मोकं त्वचं । निर्मोकदृष्टान्तेन शोकाश्रुणो निःशेषनिवृत्तिरुच्यते । अश्रुमूलं शोकं त्यक्ष्यसीति भावः ॥ ३५ ॥ समग्रः संपूर्णमनोरथः ॥ ३६ ॥ सस्येन समायुक्ता मेदिनी सुवर्षेण यथा तथा महात्मना रामेण समायुक्ता त्वं वीर्येण तच्छौर्येण । मोदिष्यसि ॥ ३७ ॥ अथानिष्टनिवारणाय इष्टप्राप्तये च सूर्यनमस्कारं विदधाति—गिरिवरमिति ॥ यः देवः । गिरिवरं मेरुं । अभितः परितः । "अभितः परितः—" इत्यादिना द्वितीया । अनुवर्तमानः आनुकूल्येन चरन् । प्रादक्षिण्येन चरन्नित्यर्थः । हयोश्च इव मण्डलं मण्डलगतिं आशु त्रिंशन्मुहूर्तेनैव करोति । देवं द्योतमानं । दिवसकरं शरणं रक्षणं । अभ्युपेहि गच्छ । वरणीयत्वे हेतुमाह—प्रभव इति । अयं दिवसकरः । प्रजानां देवतिर्यङ्मनुष्यस्थावराणां । प्रभवः कारणं । हिः प्रसिद्धौ । वर्षादिद्वारा जगदाप्यायक इत्यर्थः । " अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" इत्युक्तेः ॥ न पुनरत्र जगत्कारणत्वोक्तिः । अश्वोपमानेन स्वातिरिक्तपुरुषप्रेर्यत्वाभिधानात् । " भीषास्माद्वातः पवते, भीषोदेति सूर्यः " इति श्रुतेः ॥ ३८ ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

अथ सरमया रावणाशयपरिज्ञानं चतुस्त्रिंशे—अथ तामित्यादि ॥ अथेति प्रथमश्लोकेन पूर्वसर्गोक्तानुवादः । तेन वाक्येन ह्लादयामासेत्यन्वयः । यद्वा तेन वाक्येन रावणवाक्येन ॥ १ ॥ सख्याः सीतायाः । सखी सरमा ॥ २ ॥ कुशलं कुशलप्रतिपादकं । त्वद्वा-

ति० कुलदैवतं शरणमभ्युपेहि । हि यतः । अयंप्रजानां सुखदुःखहान्योरितिशेषः । प्रभवः ॥३८॥ इतित्रयस्त्रिंशःसर्गः ॥३३॥

[पा०] १ ङ.—ट. धृतामेकां. क. धृतामेवं. २ ङ. च. छ. झ. ञ. ट. सभाजितालंरामेण. ३ क. ख. ङ. झ.—ट. मभितोविवर्तमानो. ४ क. ग. ङ.—ट. देवि. ५ क. घ. ङ. झ. ट. महींदग्धामिवांभसा.

न हि मे क्रममाणाया निरालम्बे विहायसि ॥ समर्थो गतिमन्वेतुं पवनो गरुडोपि वा ॥ ४ ॥
एवं ब्रुवाणां तां सीता सरमां पुनरब्रवीत् ॥ मधुरं श्लक्ष्णया वाचा पूर्वं शोकाभिपन्नया ॥ ५ ॥
समर्था गगनं गन्तुमपि वा त्वं रसातलम् ॥ अवगच्छाम्यकर्तव्यं कर्तव्यं ते मदन्तरे ॥ ६ ॥
मत्प्रियं यदि कर्तव्यं यदि बुद्धिः स्थिरा तव ॥ ज्ञातुमिच्छामि तं गत्वा किं करोतीति रावणः ॥७॥
स हि मायाबलः क्रूरो रावणः शत्रुरावणः ॥ मां मोहयति दुष्टात्मा पीतमात्रेव वारुणी ॥ ८ ॥
तर्जापयति मां नित्यं भर्त्सापयति चासकृत् ॥ राक्षसीभिः सुघोराभिर्या मां रक्षन्ति नित्यशः ॥९॥
उद्विग्ना शङ्किता चास्मि न स्वस्थं च मनो मम ॥ तद्भयाच्चाहमुद्विग्ना अशोकवनिकां गता ॥ १० ॥
यदि नाम कथा तस्य निश्चितं वाऽपि यद्भवेत् ॥ निवेदयेथाः सर्वं तत्परो मे स्यादनुग्रहः ॥ ११ ॥
सा त्वेवं ब्रुवतीं सीतां सरमा वल्गुभाषिणी ॥ उवाच वदनं तस्याः स्पृशन्ती बाष्पविक्लबम् ॥१२॥

क्यमित्यन्वयः । निवर्तितुमुत्सहेयं समर्थेत्यर्थः ॥ ३॥ बहुदूरं कथं गन्तुमर्हसीत्यत्राह—न हीति ॥ क्रममाणायाः गच्छन्त्याः ॥ ४ ॥ मधुरं मधुरार्थकं । श्लक्ष्णयेति वाङ्माधुर्योक्तिः । पूर्वं शोकाभिपन्नया संप्रति हृष्टयेत्यर्थः ॥ ५ ॥ संदेशमाहरिष्यामीति वदन्तीं सरमां प्रति न गन्तव्यमित्युक्ते सख्यहानिः, रामं प्रति प्रेषणं तत्तस्य सदृशं भवेदिति स्थितायाः सीताया न युक्तं अतो व्याजेन निपुणं परिहरति—समर्थेति ॥ मदन्तरे मद्विषये । अन्यैरकर्तव्यं कर्तुमशक्यं कार्यं त्वया कर्तव्यं कर्तुं शक्यमित्यवगच्छामि । यद्वा मद्विषये ते कर्तव्यं अवश्यकरणीयं जानामीत्यर्थः ॥ ६ ॥ रावणं गत्वा स किं करोतीति ज्ञातुमिच्छामि । त्वत्कर्तृकं रावणज्ञानमिच्छामीत्यर्थः ॥७॥ तस्य ज्ञानस्य किं प्रयोजनमित्यत्राह—स हीति ॥ पीतमात्रा सद्यः पीता । वारुणी मद्यं ॥ ८ ॥ तर्जापयति तर्जनंकारयति । भर्त्सापयति भर्त्सनं कारयति । आत्वपुगागमावार्षौ । या राक्षस्यो मां रक्षन्ति ताभिस्तर्जापयतीति संबन्धः । नासाग्रे अङ्गुलिन्यासनयनभ्रामणदन्तदर्शनप्रभृतिमुखचेष्टाभिर्भीजननं तर्जनं । हनिष्यति दहिष्यतीत्यादि वाचा भीजननं भर्त्सनं ॥ ९ ॥ कुत उद्विग्नेत्यत्राह—तद्भयाच्चेति । कुतः शङ्कितेत्यत्राह—अशोकवनिकां गतेति ॥ १० ॥ तस्य रावणस्य । यदि नाम कथा यदि वार्तास्ति । यच्च तस्य निश्चितं अध्यवसाय इति यावत् । तत्सर्वं निवेदयेथाः । ततश्च मे परोनुग्रहः उपकारः । कृतःस्यात् । याहिनामेतिपाठः सम्यक् ॥ ११ ॥ वल्गु सुन्दरं यथा तथा भाषितुं शीलमस्या अस्तीति वल्गुभाषिणी । बाष्पविक्लवं बाष्पव्याकुलं ।

ति० पूर्वशोकाभिपन्नया आश्वासनात्पूर्वजातेनशोकेनेषद्युक्तया ॥५॥ ति० अथसीताशूर्पणखायाइवास्याअपिरामसमीपगमनमनुचितमितिविचार्यतत्सामर्थ्यश्लाघापूर्वतामुचितकृत्येनियोजयति—**समर्थेति** । स० हेमदन्तरे मयिअन्तरंअन्तरात्मा मनः प्राणोवायस्याः सातत्संबुद्धिः ॥ ६ ॥ स० यच्चासकृत् आसः उपवेशनं तंकरोतीतिकृत् । सदामत्समीपवर्ति रक्षः । राक्षसीभिः मध्येमध्येस्वप्रेषिताभिः । भर्त्सापयति एतावत्कालेनापिसीतानमद्वशंप्रापितात्वच्छिक्षयावाअनुनयेनवेतिपरुषभाषणेनतर्जयति । तत्रापिसुघोराभीराक्षसीभिः साक्षान्मामपितर्जापयति भर्त्सयति । योमांरक्षति वनावनौस्थापयित्वारक्षति सरावणःकिंकरोति । यद्वा योमामसकृद्रक्षति तंजनंतर्जापयति । पूर्ववदुवैरितं । अवाचिकीभीषिकातर्जनं वाचिकीतुसाभर्त्सनमितिनागोजिभट्टः । तत्र तद्बुद्धिरेवशरणं । "भर्त्सतर्ज संतर्जने" इत्यमरव्याख्यानेभानुदीक्षितः । तर्हिदुर्जनतर्जनेनेवानशनेनपीडितायास्तवकिमाधारेणजीवधारणमित्यतोवाह—नित्यशइति । सदासुखोयस्त्वदुक्तः सरामएवमांरक्षतीतिवा । पुगागमस्तु " बहुलमेतन्निदर्शनं " अदन्तधातुनिदर्शनमित्यर्थः । बाहुलकादन्येपिबोध्याः । तद्यथा अपपर्णत् । विष्कदर्शनेइत्यादि इतिकौमुद्युक्तेःशाकटायनरीत्यासंभवति ॥ ९ ॥ स० याऽहंप्राक्नोद्विग्ना नशङ्किताच कस्माच्चिदपि । ममनः स्वस्थं । तादृश्यप्यहं तद्भयात् रावणकर्तृकभीतिहेतोः । अशोकवनिकांगता प्राप्ता । अतश्चोद्विग्नेत्यन्वयः । यद्वा त्वत्सान्त्वनतःपूर्वंतद्भयादशोकवनिकांगतोद्विग्ना । रामक्षेमश्रवणसमनन्तरंतु इतरत्पूर्ववत् । तथापि सकपटीतिपुनर्वार्ताश्रवणेच्छेतिभावः ॥ १० ॥ स० तस्य रावणस्य । कथा युद्धसंनाहकथा । मद्विषयनिग्रहानुग्रहकथावा । तस्यनिश्चितंवापियद्भवेत्तत्सर्वंनिवेदयेथाः ज्ञात्वा मामावेदयेथाः । तन्निवेदनंमेमदुपरिवरोनु-

[पा०] १ क. ङ.—ट. सरमामिदमब्रवीत्. २ झ. पूर्वशोक. ३ घ. गन्तुमसि. ४ ङ. झ. अवगच्छाद्य. ५ घ. मिच्छाम्यहं. ६ झ. ञ. ठ. योमांरक्षति. ७ ङ. ज.—ट. साप्येवं. ८ ङ. च. छ. झ. ञ. ट. मृदुभाषिणी.



एष ते यद्यभिप्रायस्तदा गच्छामि जानकि ॥ गृह्य शत्रोरभिप्रायमुपावृत्तां च पश्य माम् ॥ १३ ॥
एवमुक्त्वा ततो गत्वा समीपं तस्य रक्षसः ॥ शुश्राव कथितं तस्य रावणस्य समन्त्रिणः ॥ १४ ॥
सा श्रुत्वा निश्चयं तस्य निश्चयज्ञा दुरात्मनः ॥ पुनरेवागमत्क्षिप्रमशोकवनिकां तदा ॥ १५ ॥
सा प्रविष्टा पुनस्तत्र ददर्श जनकात्मजाम् ॥ प्रतीक्षमाणां स्वामेव भ्रष्टपद्मामिव श्रियम् ॥ १६ ॥
तां तु सीता पुनः प्राप्तां सरमां वेल्गुभाषिणीम् ॥ परिष्वज्य च सुस्निग्धं ददौ च स्वयमासनम् ॥१७॥
इहासीना सुखं सर्वमाख्याहि मम तत्त्वतः ॥ क्रूरस्य निश्चयं तस्य रावणस्य दुरात्मनः ॥ १८ ॥
एवमुक्ता तु सरमा सीतया वेपमानया ॥ कथितं सर्वमाचष्ट रावणस्य समन्त्रिणः ॥ १९ ॥
जनन्या राक्षसेन्द्रो वै त्वन्मोक्षार्थं बृहद्वचः ॥ अविद्धेन च वैदेहि मन्त्रिवृद्धेन बोधितः ॥ २० ॥
दीयतामभिसत्कृत्य मनुजेन्द्राय मैथिली ॥ निदर्शनं ते पर्याप्तं जनस्थाने यदद्भुतम् ॥ २१ ॥
लङ्घनं च समुद्रस्य दर्शनं च हनूमतः ॥ वधं च रक्षसां युद्धे कः कुर्यान्मानुषो भुवि ॥ २२ ॥
एवं स मन्त्रिवृद्धैश्चाविद्धेन बहु भाषितः ॥ न त्वामुत्सहते मोक्तुमर्थमर्थपरो यथा ॥ २३ ॥
नोत्सहत्यमृतो मोक्तुं युद्धे त्वामिति मैथिलि ॥ सामात्यस्य नृशंसस्य निश्चयो ह्येष वर्तते ॥ २४ ॥

वदनं स्पृशन्ती परिमृजन्ती ॥ १२ ॥ तदा गच्छामीतिपाठः । गृह्य ज्ञात्वा । उपावृत्तां च पुनरागतामेव । पश्य तत्र सन्देहो नास्तीत्यर्थः ॥ १३—१५ ॥ स्वामेव आत्मानमेव । सरमामित्यर्थः । आत्मवाचिनः स्वशब्दस्य आबन्तत्वमार्षं । भ्रष्टपद्मां पद्मासनहीनामित्यर्थः ॥ १६ ॥ सुस्निग्धं स्नेहयुक्तं यथा तथा ॥ १७ ॥ सुखमासीनेत्यन्वयः ॥ १८ ॥ वेपमानया किंवा भयं वक्ष्यतीति कम्पमानया ॥ १९ ॥ जनन्या कैकसीनाम्न्या । अविद्धेन अविद्धाख्येन मन्त्रिवृद्धेनच । राक्षसेन्द्रस्त्वन्मोक्षार्थं बृहद्वचनं बोधितः ॥ २० ॥ तदेव वचनं दर्शयति—दीयतामिति ॥ जनस्थाने यदद्भुतं खरवधादिकं कृतं तदेव पर्याप्तं प्रमाणान्तरनिरपेक्षं । निदर्शनं दृष्टान्तः । करिष्यमाणस्य रामपराक्रमस्येति शेषः ॥ २१ ॥ तिष्ठतु रामः तद्भृत्यो हनुमानेव सर्वान्राक्षसाञ्जेतुं समर्थ इत्याशयेन तत्पराक्रमं वर्णयति—लङ्घनमिति ॥ दर्शनं सीतादर्शनं । मानुषः मनुष्यसंबन्धी पुरुषः । कः कुर्यात् । " तस्येदं " इत्यण् । स्वदूतमुखेनानेककार्यकारी रामो देव एवेतिभावः ॥ २२ ॥ अविद्धेन तन्नाम्ना । मन्त्रिवृद्धैरिति पूजायां बहुवचनं । बह्विति क्रियाविशेषणं ॥ २३ ॥ हि यस्मात्सामात्यस्य एष निश्चयो वर्तते इति तस्मात् युद्धे अमृतः सन् त्वां मोक्तुं नोत्सहतीति । इतिहेतौ इति निश्चय इत्यन्वय इत्येके । इति मन्य इत्यपरे । इह मैथिलीति केषुचित्पाठः

ग्रहःस्यादितिशेषः ॥ ११ ॥ ति० उपावर्तामि परावृत्त्याऽऽगच्छामि ॥ १३ ॥ स० स्वामेव आत्मीयामागतिं । " आत्मीयायामिति । आत्मज्ञातिधनेषुतुस्त्रीत्वमेवनास्तीतिभावइति " मनोरमोक्तेरात्मवाचकत्वेस्वशब्दस्यस्त्रीलिङ्गत्वासंभवात् । स्वकायामित्यादिश्रीहर्षादिप्रयोगाणामात्मीयत्वसंज्ञात्वादिनानिर्वाहस्यतत्रैवोक्तेश्च । " अर्थान्तरेतुनस्त्री " इतिकौमुदीवाक्यंधृत्वाआत्मज्ञातिधनेष्वित्यर्थइतितत्त्वसुबोधिन्यभिधानाच्च । भ्रष्टपद्मां कमलंकन्दुकीकृत्यखेलनसमयेहस्तविच्युतलतादिलीननालीकां । श्रियं लक्ष्मीमिव ॥ १६ ॥ ति० वृहद्वचः सर्वथाहितत्वाद्वचसोबृहत्त्वं । तदुक्त्वा चोदितोबोधितः ॥ २० ॥ स० पूर्वंमन्त्रिवृद्धेनेत्येकवचनमुपलक्षकमपरमन्त्रिवृद्धानामितिज्ञापयितुमत्रमन्त्रिवृद्धैरितिबहुवचनं । तत्रैकवचनेन एकएवाविन्ध्यउपपादनप्रकारभेदादितिःपाशानित्यादिवद्बहुवचनमितिवा । तत्रमान्यत्वान्मातुःपुरस्करणं । तस्याआलोचनकार्यानियुक्तत्वेनात्रवृद्धमन्त्रिपुरस्करणमितिविवेकः ॥ २३ ॥ स० नोत्सहति । चुरादिरयमार्षीयःपरस्मैपदेवर्तते । " सएवायंनागःसहतिकलभेभ्यःपरिभवं " इत्यादिप्रयोगात् । सामात्यस्य अविन्ध्यादिव्यतिरिक्तमन्त्रिसहितस्य ॥ २४ ॥

[पा०] १ क.—ट. स्तस्माद्गच्छामि. २ ङ. झ. ट. मुपावर्तामिमैथिलि. ३ ग. कथितंतस्य. ४ ख. घ. च. छ. तामेव. ५ ङ. झ. ञ. ट. प्रियभाषिणीं. घ. प्रियवादिनीं. ६ ङ. झ. अतिस्निग्धेन. ७ ङ. झ. युधि. ८ ङ. च. छ. झ. ञ. ट. मन्त्रिवृद्धैश्चमात्राचबहुबोधितः.

तदेषा निश्चिता बुद्धिर्मृत्युलोभादुपस्थिता ॥ भयान्न शक्तस्त्वां मोक्तुमनिरस्तस्तु संयुगे ॥
राक्षसानां च सर्वेषामात्मनश्च वधेन हि ॥ २५ ॥
निहत्य रावणं संख्ये सर्वथा निशितैः शरैः ॥ प्रतिनेष्यति रामस्त्वामयोध्यामसितेक्षणे ॥ २६ ॥
एतस्मिन्नन्तरे शब्दो भेरीशङ्खसमाकुलः ॥ श्रुतो वानरसैन्यानां कम्पयन्धरणीतलम् ॥ २७ ॥
श्रुत्वा तु तद्वानरसैन्यशब्दं लङ्कागता राक्षसराजभृत्याः ॥
नष्टौजसो दैन्यपरीतचेष्टाः श्रेयो न पश्यन्ति नृपस्य दोषे ॥ २८ ॥
इत्यार्षे श्रीमद्रामायणभूषणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

पञ्चत्रिंशः सर्गः ॥ ३५ ॥

रामसेनारणभेरीशङ्खरवश्रवणखिन्नेनरावणेन सभायांमन्त्रिणःप्रति तदानीमपितेषामौदासीन्यस्यानौचित्योक्त्यागर्हणम् ॥ १ ॥ माल्यवतारावणंप्रति शास्त्रोदितनीतिप्रदर्शनपूर्वकं विपरसूचकापशकुननिवेदनेन रामेणसंधानविधानम् ॥ २ ॥

तेन शङ्खविमिश्रेण भेरीशब्देन राघवः ॥ उपयाति महाबाहू रामः परपुरंजयः ॥ १ ॥
तं निनादं निशम्याथ रावणो राक्षसेश्वरः ॥ मुहूर्तं ध्यानमास्थाय संचिवानभ्युदैक्षत ॥ २ ॥
अथ तान्सचिवांस्तत्र सर्वानाभाष्य रावणः ॥ सभां सन्नादयन्सर्वामित्युवाच महाबलः ॥
जगत्संतापनः क्रूरो गर्हयन्राक्षसेश्वरः ॥ ३ ॥

॥ २४ ॥ एतादृशाध्यवसायस्य किं निमित्तमित्यपेक्षायां मरणलोभ एवेत्याह—तदेषेत्यादिसार्धश्लोकः ॥ तत् तस्येत्यर्थः । राक्षसानामात्मनश्च वधेन अनिरस्तः अनिराकृतः । केवलभयात्त्वां मोक्तुं न शक्तः । नोत्सहत इत्यर्थः ॥ २५ ॥ कथं तर्हि मे निर्गमनमित्यत आह—निहत्येति ॥ एतत्सर्वं तव नेत्रसौभाग्यलक्षणादित्यभिप्रायेणाह—असितेक्षण इति ॥ २६ ॥ सरमोक्तस्योपश्रुतिनिमित्तं दर्शयन्नेव कथाशेषं दर्शयति—एतस्मिन्निति ॥ अत्र भेर्यादिशब्दो भेर्यादिशब्दपरः । वानरसैन्यानामपि भेर्यादिकमस्तीति किष्किन्धाकाण्डे दर्शितं ॥ २७ ॥ श्रुत्वेति ॥ श्रेयो न पश्यन्ति नृपस्य दोष इति । रावणस्य दोषे निमित्तभूते जीवनभूतमात्मनः श्रेयो न पश्यन्ति ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुस्त्रिंशः सर्गः ॥ ३४ ॥

अथ माल्यवदुपदेशः पञ्चत्रिंशे—तेनेति ॥ शङ्खविमिश्रेण शङ्खशब्दविमिश्रेण । उपयाति उपाययौ ॥ १ ॥ ध्यानमास्थाय किं मयेदानीं कर्तव्यमिति ध्यानं कृत्वेत्यर्थः ॥ २ ॥ आभाष्य संबोध्य । सभां आस्थानमण्डपं । उद्दीक्षणाशयमुद्घाटयति—गर्हयन्निति । गर्हयन्नुवाच गर्हात्मिकांवाचमुवाचेत्यर्थः

स० मृत्युलोभात् मृत्युदेव्याएषुविद्यमानाद्वार्ध्यात् ॥ २५ ॥ इतिचतुस्त्रिंशःसर्गः ॥ ३४ ॥

स० नादिना प्रतिध्वनिमता । नादिना नविद्यन्तेआदिनोराक्षसायेनतादृशेन । "आदिनोराक्षसाःप्रोक्ताः" इतिभागवतदशमस्कन्धतात्पर्यात् । परपुरं वैरिनगरं । महाबाहूरामउपयाति । जयश्च तमुपयाति । पुरमितिशेषोवा । एतत्पक्षे परपुरञ्जयइतिसमस्तं ॥ १ ॥ ति० अगर्हयन्नितिच्छेदः ॥ ३ ॥ स० अस्यरामस्य । सागरस्यतरणविक्रमं बलेनसहितंपौरुषंचेतियदुक्तवन्तः तच्छ्रुत-

[पा०] १ घ. ङ. ञ. तदेषांमुस्थिरा. क. ख. च. छ. ज. ञ. तदेषामुस्थिरा. २ ग. ट. दवस्थिता. ३ घ. ङ. ञ. ट. वैसर्वसैन्यानां. ४ ख.—ङ. ञ. ण. ट. तंवानरसैन्यनादं. ५ ङ. च. छ. ञ. ण. ट. हतौजसो. क. ख. घ. भ्रष्टौजसो. ६ घ. परीतचित्ताः. ७ ख. च. छ. ज. दोषैः. ग. ङ. ञ. ण. दोषात्. ८ ङ. ञ. ट. नादिना. ९ च. ण. सचिवानिदमब्रवीत्. १० क. ख. च. ण. गर्हयन्हितवादिनः.

तरणं [1]सागरस्यापि विक्रमं [2]बलसंचयम् ॥ यदुक्तवन्तो रामस्य भवन्तस्तन्मया श्रुतम् ॥ ४ ॥
भवतश्चाप्यहं वेद्मि युद्धे सत्यपराक्रमान् ॥ तूष्णीकानीक्षतोऽन्योन्यं विदित्वा रामविक्रमम् ॥ ५ ॥
ततस्तु सुमहाप्राज्ञो माल्यवान्नाम राक्षसः ॥ रावणस्य वचः श्रुत्वा [3]मातुः पैतामहोऽब्रवीत् ॥ ६ ॥
विद्यास्वभिविनीतो यो राजा राजन्नयानुगः ॥ स शास्ति चिरमैश्वर्यमरींश्च कुरुते वशे ॥ ७ ॥
संदधानो हि कालेन विगृह्णंश्चारिभिः सह ॥ [4]स्वपक्षवर्धनं कुर्वन्महदैश्वर्यमश्नुते ॥ ८ ॥
हीयमानेन कर्तव्यो राज्ञा संधिः समेन च ॥ न शत्रुमवमन्येत ज्यायान्कुर्वीत विग्रहम् ॥ ९ ॥
तन्मह्यं रोचते संधिः [5]सह रामेण रावण ॥ यदर्थमभियुक्ताः [6]स्म सीता तस्मै प्रदीयताम् ॥ १० ॥
यैस्य देवर्षयः सर्वे गन्धर्वाश्च जयैषिणः ॥ विरोधं मा गमस्तेन संधिस्ते तेन रोचताम् ॥ ११ ॥
असृजद्भगवान्पक्षौ द्वावेव हि पितामहः ॥ सुराणामसुराणां च धर्माधर्मौ तदाश्रयौ ॥ १२ ॥

॥ ३ ॥ गर्हाप्रकारमाह श्लोकद्वयेन—तरणमिति ॥ तूष्णीकान् तूष्णींशीलान् । " शीले को मलोपश्च " इति कप्रत्ययोमलोपश्च । " तूष्णींशीलस्तु तूष्णीकः" इत्यमरः । निरुत्साहानित्यर्थः ॥ ४—५ ॥ पितामहस्य पुत्रः पैतामहः पितृव्य इत्यर्थः । कैकसी सुमालिपुत्रीत्युत्तररामायणेभिधानान्माल्यवतस्तद्भ्रातृत्वाच्च पितामहशब्दस्य नियतसापेक्षत्वान्नासामर्थ्यदोषः । पितेत्यर्थइत्येके । वृद्धो मातामहोऽब्रवीदिति क्वचित्पाठः ॥ ६ ॥ नीतिमार्गपर्यालोचनायां बलवता रामेण संधिः करणीय इत्यभिप्रायेण प्रथमं नयस्य श्रेयोहेतुत्वं दर्शयति—विद्येति ॥ विद्यासु आन्वीक्षिकीत्रयीवार्तादण्डनीत्याख्यासु चतसृषु विद्यासु । अभिविनीतः अभितः शिक्षितः । अतएव नयानुगः नीतिशास्त्रानुसारी योराजा सः चिरं ऐश्वर्यं ईश्वरत्वं । शास्ति अधितिष्ठति । तमिममर्थं विशदमुक्तवान्कामन्दकः—" आन्वीक्षिकीं त्रयीं वार्तां दण्डनीतिं च पार्थिवः । तद्विद्धिस्तत्क्रियोपेतैश्चिन्तयेद्विनयान्वितः ॥ आन्वीक्षिक्यात्मविज्ञानं धर्माधर्मौ त्रयीस्थितौ । अर्थानर्थौ तु वार्तायां दण्डनीत्यां नयानयौ ॥ विद्याश्चतस्र एवैता योगक्षेमाय देहिनाम् । विद्याविनीतो नृपतिर्न कृच्छ्रेष्ववसीदति " इति ॥ ७ ॥ नयानुग इत्युक्तं तत्र नयस्वरूपमाह—संदधान इति ॥ कालेन स्वबलक्षयकालेन । संदधानः संधानं कुर्वन् । स्वबलवृद्धिकालेन विगृह्णन् । विग्रहं कुर्वन् । ऐश्वर्येच्छुना कालानुरूपं संधिविग्रहौ कार्यावित्यर्थः । एवं कुर्वतः फलमाह—स्वपक्षेति ॥ ८ ॥ संधेर्विग्रहस्य च कालं विविच्य दर्शयति—हीयमानेनेति ॥ हीयमानेन हीयमानबलेन । समेन समबलेन च राज्ञा स्वशत्रुणा सह संधिः कर्तव्यः । ज्यायान् अधिकबलस्तु । शत्रुं नावमन्येत नोपेक्षेत । किंतु तेन सह विग्रहं कुर्वीत । हीयमानः समः संधिं कुर्यात् । अधिको विग्रहं कुर्यादित्यर्थः ॥ ९ ॥ अस्त्वेवं प्रस्तुते किमुपन्यस्तं तत्राह—तदिति ॥ तत् तस्मात् । एवं नीतिशास्त्रस्थितेः हीयमानस्य तव बलवता रामेण संधिर्मह्यं रोचत इत्यर्थः । बलवता संधिर्दानेन विना न फलति । तच्च सीताप्रत्यर्पणादेव सेत्स्यतीत्याह—यदर्थमिति । यदर्थं अभियुक्ताः स्म विरुद्धाः स्म । सा सीता तस्मै रामाय प्रदीयतां ॥ १० ॥ कथं रामस्य बलवत्त्वं तत्राह—यस्येति ॥ देवाश्च ऋषयश्च देवर्षयः । ते तुभ्यं । रामस्य देवबलवत्त्वात् बलवत्त्वमित्यर्थः ॥ ११ ॥ देवादीनां रामजयकाङ्क्षित्वे को हेतुरित्याशङ्क्य देवादीनां धर्मपक्षपातित्वाद्धर्मस्य रामाश्रयत्वादित्यभिप्रेत्याह—असृजदित्यादिना ॥ भगवान् सर्वज्ञः पितामहः । हि यस्मात् । सुराणां असुराणां च । पक्षौ अवलम्बभूतौ । द्वावेव धर्माधर्मौ । असृजत् । अतः धर्माधर्मौ तदाश्रयौ सुरासुराश्रयौ । असुरशब्देनात्रासुरप्रकृतयो राक्षसादयश्च

मितिगर्हयन् । गर्हणंचोक्तस्याप्यनुक्तप्रायीकरणं ॥ ४ ॥ स० अद्य आरामविक्रमं रामविषयेवनेमयाकृतंभार्याहरणविक्रमं । विदित्वा ज्ञात्वापि । तूष्णीकान् तूष्णींस्थितान् निरुत्साहानितियावत् । अन्योन्यंईक्षतः ईक्षमाणान् । वेद्मि । इदंकिमितिशेषः । रामविक्रमं रामस्यविक्रमं लङ्काभूमिकापादविक्षेपं तन्मात्रमितियावत् । युद्धसुखमनवलोक्यैवंभावोनक्काप्यवलोकितइतिभावः ॥५॥

[पा०] १ ङ. च. झ. ट. सागरस्यास्य. २ ङ. च. छ. झ. ञ. ट. बलपौरुषं. ३ ग. ङ. झ. ट. इतिमातामहोऽब्रवीत्. ४ ङ. छ. झ. ञ. स्वपक्षेवर्धनं. ५ च. छ. ञ. सन्धिस्तवरामेण. ६ ङ. झ. ट. मभियुक्तोसि. ७ क.—ट. तस्य.

धर्मो हि श्रूयते पक्षो ह्यमराणां महात्मनाम् ॥ अधर्मो रक्षसां पक्षो ह्यसुराणां च रावण ॥ १३ ॥
धर्मो वै ग्रसतेऽधर्मं ततः कृतमभूद्युगम् ॥ अधर्मो ग्रसते धर्मं ततस्तिष्यः प्रवर्तते ॥ १४ ॥
तत्त्वया चरता लोकान्धर्मो विनिहतो महान् ॥ अधर्मः प्रगृहीतश्च तेनास्मद्बलिनः परे ॥ १५ ॥
स प्रमादाद्विवृद्धस्तेऽधर्मोभिग्रसते हि नः ॥ विवर्धयति पक्षं च सुराणां सुरभावनः ॥ १६ ॥
विषयेषु प्रसक्तेन यत्किंचित्कारिणा त्वया ॥ ऋषीणामग्निकल्पानामुद्वेगो जनितो महान् ॥ १७ ॥
तेषां प्रभावो दुर्धर्षः प्रदीप्त इव पावकः ॥ तपसा भावितात्मानो धर्मस्यानुग्रहे रताः ॥ १८ ॥

विवक्षिताः ॥ १२ ॥ अनयोः कतरः केषां पक्ष इत्यत्राह—धर्मो हीति ॥ महात्मनामिति हेतुगर्भविशेषणं । महास्वभावानामित्यर्थः । समीचीनप्रकृतीनामितियावत् । अमहात्मनामित्यसुरादिविशेषणं चार्थसिद्धं । तथाच धर्मस्य देवपक्षत्वाद्रामस्य तदाश्रयत्वादेवादयो रामपक्षपातिन इतिभावः ॥ १३ ॥ एवं देवादिपक्षपाताद्रामस्य बलीयस्त्वमुपपाद्य धर्मस्य प्राबल्यादपि तदाह—धर्म इति । अत्र यदेतिशेषः । धर्मः अधर्मं यदा ग्रसते अभिभवति । तदा कृतं युगं अभूत् भवति । पुरुषेषु प्रवर्तते । आर्षः कालव्यत्ययः । अधर्मो यदा धर्मं ग्रसते तदा तिष्यः कलिः । प्रवर्तते । " तिष्यः कलौ च पुष्ये च " इत्यमरः ॥ १४ ॥ ततः किमित्यपेक्षायां त्वय्यधर्मेण कलेः प्रवेशात्कृतापेक्षया कलेर्दुर्बलत्वादस्मदपेक्षया रामो बलवानित्याह—तदिति ॥ लोकान् चरता दिग्विजयार्थमिति शेषः । विनिहतः । परदारपरिग्रहार्थमिति शेषः । अस्मदिति पञ्चमीबहुवचनं । परे शत्रवो रामादयो धार्मिकाः । यद्वा कृतं युगमिति शब्दसमुदायेन शुभं लक्ष्यते । तिष्य इत्यनेनाशुभं । यदा धर्मः अधर्मं ग्रसते तदा शुभं भवति । यदा अधर्मो धर्मं ग्रसते तदा अशुभं भवतीत्यर्थः । एवं भवतु मया किं कृतमित्यत्राह—तदिति ॥ तत् धर्माधर्मयोरेवंरूपत्वात् । त्वया शुभहेतुर्धर्मो विनिहतः अशुभहेतुरधर्मश्च परिगृहीतः । तेन पराजयरूपाशुभहेत्वधर्मकृद्ध्योस्मत्जयरूपशुभहेतुधर्मपराः परे बलिन इत्यर्थः ॥ १५ ॥ अधर्मं स्वीकृत्य धर्मे निहते तेषां सुराणां बलवत्त्वं कथमित्याशङ्क्याधर्मस्याश्रयनाशकत्वादित्यभिप्रायेणाह—स इति ॥ सः अधर्मः । ते प्रमादात् अविमृश्यकरणात् । विवृद्धः । नः अस्मान् । ग्रसते नाशयति । सुरभावनः सुरानुकूलः सन् सुराणां पक्षं विवर्धयति ॥ १६ ॥ स्वकृतस्याधर्मस्य सुरपक्षवृद्धिहेतुत्वं कथमित्याशङ्क्य ऋषीणामुद्वेगजननद्वाराऽधर्मप्रवर्तकत्वादित्याह—विषयेष्विति ॥ विषयेषु प्रसक्तेन अतएव यत्किञ्चित्कारिणा देवर्षिप्रमुखानां कन्यापत्नीहरणादिकं कुर्वता । ऋषीणामुद्वेगः मनस्तापः । जनितः कृतः ॥ १७ ॥ अग्निकल्पत्वमुपपादयति—तेषामिति । उद्वेगात्किं कृतवन्तस्तत्राह—तपसेति ॥ भावितात्मानः पूता-

ति० राक्षसाः राजसाः असुरास्तामसाइतिभेदः ॥ १३ ॥ **रामानु०** ततस्तिष्यःप्रवर्ततइतिपाठः । अत्रयदेत्यध्याहार्यं । यदा कृतंयुगमभूत् " तपःशौचंदयासत्यं " इतिश्रीभागवतोक्तप्रकारेणधर्मपादचतुष्टयविशिष्टंकृतयुगंभवति । धर्मवृद्धिर्भवतीत्यर्थः । तदा धर्मः अधर्मंग्रसते । अनेनधर्मपक्षपातिनांवृद्धिरधर्मपक्षपातिनांहानिश्चसूचिता । यदातिष्यःप्रवर्तते अधर्मंगौरित्यादिनाश्रीभागवतोक्तसङ्गमदानृताद्यधर्मपादचतुष्टयविशिष्टंकलियुगंप्रवर्तते । अधर्मवृद्धिर्भवतीत्यर्थः । ततः तदा अधर्मः अभिवृद्धाधर्मः । धर्मं ग्रसते । अनेनाधर्मपक्षपातिनांवृद्धिर्धर्मपक्षपातिनांहानिश्चसूचिता ॥ **ति०** अथतयोःकालविशेषेणाभिभवानभिवौदर्शयति—**धर्मो वैइत्यादिना** । यदाकृतंयुगमभूत्तदा तस्मादेवकालाद्धेतोःप्रवृद्धोधर्मः अधर्मंग्रसते अभिभवति । वैप्रसिद्धं । यदातिष्यः कलिः । प्रवर्तते तदा ततएवहेतोः । अधर्मोधर्मंग्रसते । कलौपादेनधर्मस्थितेः । तथाहि । सर्वदासुखसाधनंधर्मएकरूपएव । अधर्मस्त्रिधा । धर्मान्यस्तद्विरोधीतदभावश्चेति । तत्राद्यः शाक्तादिधर्ममार्गेदृष्टोधर्माभासः । द्वितीयोहत्यादिलक्षणः । अन्त्यः स्वस्वविहितनित्यधर्मलोपात्मा । कृते त्रिविधाधर्माभावएव । त्रेतादौ क्रमादेकद्वित्रिभिरधर्मैःसंवलनंधर्मस्य । एवंच कलावधर्माभिभूतपादत्रयलादेकपादेनधर्मस्यवृत्तिरक्षता । एवंच धर्मतोदेवत्वमधर्मतोराक्षसत्वादीतिसूचितं । नन्वधर्मस्यरक्षोसुरधर्मत्वे रक्षोसुराणां धर्मफलैश्वर्यजयादिकथमितिचेच्छृणु । देवाः केवलधर्मपराः । रक्षोसुराः काम्यराजसतामसधर्ममात्रपराः । तादृशधर्ममनुतिष्ठतोपितानुक्तत्रिप्रकाराधर्मोनमुच्यत्येव । रजस्तमःप्रकृतित्वात् । अतोधर्मकरणेनसुखिनोपितेकाम्यत्वेनसान्ततयाधर्म-

[**पा०**] १ ङ. च. झ. ट. तदातिष्यः २ क. ख. घ. ङ. च. झ. ञ. ट. धर्मोपि. ३ क. ख. ग. ङ.—ट. त्प्रवृद्धस्ते. ४ ध. प्रतापो.

मुख्यैर्यज्ञैर्यजन्त्येते नित्यं तैस्तैर्द्विजातयः ॥ जुह्वत्यग्नींश्च विधिवद्वेदांश्चोच्चैरधीयते ॥ १९ ॥
अभिभूय च रक्षांसि ब्रह्मघोषानुदैरयन् ॥ दिशोपि विद्रुताः सर्वाः स्तनयित्नुरिवोष्णगे ॥ २० ॥
ऋषीणामग्निकल्पानामग्निहोत्रसमुत्थितः ॥ आदत्ते रक्षसां तेजो धूमो व्याप्य दिशो दश ॥ २१ ॥
तेषु तेषु च देशेषु पुण्येष्वेव दृढव्रतैः ॥ चर्यमाणं तपस्तीव्रं संतापयति राक्षसान् ॥ २२ ॥
देवदानवयक्षेभ्यो गृहीतश्च वरस्त्वया ॥ २३ ॥
मानुषा वानरा ऋक्षा गोलाङ्गूला महाबलाः ॥ बलवन्त इहागम्य गर्जन्ति दृढविक्रमाः ॥ २४ ॥
उत्पातान्विविधान्दृष्ट्वा घोरान्बहुविधांस्तथा ॥ विनाशमनुपश्यामि सर्वेषां रक्षसामहम् ॥ २५ ॥
खराभिस्तनिता घोरा मेघाः प्रतिभयंकराः ॥ शोणितेनाभिवर्षन्ति लङ्कामुष्णेन सर्वतः ॥ २६ ॥
रुदतां वाहनानां च प्रपतन्त्यस्रबिन्दवः ॥ ध्वजा ध्वस्ता विवर्णाश्च न प्रभान्ति यथा पुरा ॥२७॥
व्याला गोमायवो गृध्रा वाश्यन्ति च सुभैरवम् ॥ प्रविश्य लङ्कामनिशं समवायांश्च कुर्वते ॥ २८ ॥
कालिकाः पाण्डुरैर्दन्तैः प्रहसन्त्यग्रतः स्थिताः ॥ स्त्रियः स्वप्नेषु मुष्णन्त्यो गृहाणि प्रतिभाष्य च २९
गृहाणां बलिकर्माणि श्वानः पर्युपभुञ्जते ॥ खरा गोषु प्रजायन्ते मूषिका नकुलैः सह ॥ ३० ॥

श्वानः । धर्मस्यानुग्रहे संवर्धने । रताः ॥ १८ ॥ मुख्यैः श्रेष्ठैः । तैस्तैः अग्निष्टोममारभ्य विश्वसृजामयनपर्यन्तैः । अग्नीनुद्दिश्य जुह्वति होमं कुर्वन्ति । देवतोद्देशेन द्रव्यत्यागो यागः । त्यक्तस्याग्नौ प्रक्षेपो होम इत्यनयोर्भेदः ॥ १९ ॥ अभिभूय अगणयित्वा । ब्रह्मघोषान् उदैरयन् । उच्चारयन्ति स्म । वेदांश्चोच्चैरधीयत इत्यस्य विवरणमिदं । तपःप्रभृतिकर्मणः फलमाह—दिश इत्यादिना ॥ सर्वा दिशःप्रतिविद्रुताः । राक्षसा इतिशेषः । उष्णगे ग्रीष्मे । स्तनयित्नुरिव मेघ इव । जातावेकवचनं ॥ २०—२२ ॥ बलिनोपि देवाः ब्रह्मदत्तवरमहिम्ना न ग्रहर्तुं शक्नुयुरिति चेत्तत्राह—देवदानवेत्यादिना ॥ देवदानवयक्षेभ्य एवावध्यत्ववरो गृहीतः । न तु मानुषादिभ्य इति भावः ॥ २३ ॥ तर्हि किमायातमित्यत्राह—मानुषा इति ॥ द्वयोरपि बहुवचनं पूजायां । महाबला महासैन्याः । इह लङ्कायां ॥ २४ ॥ न केवलं परागमनेन किं त्वशुभनिमित्तदर्शनेनापि भयमुत्प्रेक्ष्यमित्याह—उत्पातानिति ॥ उत्पातान् विविधान् दिव्यान्तरिक्षभौमभेदभिन्नान् । बहुविधान् भौमादिषुप्रत्येकंविविधान् । अनुपश्यामि तर्कयामि ॥२५॥ खराभिस्तनिताः परुषगर्जिताः । घोराः विरूपाः । प्रतिभयंकराः । प्रतीत्युपसर्गमात्रं । भयंकरा इत्यर्थः ॥ २६ ॥ ध्वस्ताः धूसराः । अतएव विवर्णाः विगतवर्णाः ॥ २७ ॥ व्यालाः दुष्टाः । वाश्यन्ति वाशितं कुर्वन्ति । कुत्सितरुतं कुर्वन्तीत्यर्थः । समवायान् सङ्घान् ॥ २८ ॥ कालिकाः नीलवर्णाः स्त्रियः । पूतनाप्रमुखा इति यावत् । शक्तय इत्येके । पाण्डुरैर्दन्तैरुपलक्षिताः सत्यः । प्रतिभाष्य प्रतिकूलमाभाष्य । गृहाणि गृहस्थितवस्तूनि । मुष्णन्त्यः हसन्ति । एवं दृश्यन्त इत्यर्थः ॥ २९ ॥ बलिकर्माणि बलिकर्मसाधनानि हवींषि । नकुलैः सह । वर्तन्तइतिशेषः

फलान्तेऽधर्मफलभोगभाजइतिनदोषः ॥ १४ ॥ स० उष्णगे ग्रीष्मर्तुगतेसूर्येस्तनयित्नुर्बलाहकइवविप्रद्रुताःविप्रद्रुतानिरक्षांसि । पलायनएवपुरुषकारइतिपुंशक्तिप्रयुक्तःपुल्लिङ्गनिर्देशः । रक्षांसीतिप्रकृतत्वात् । राक्षसाइतिशेषोवा ॥२०॥ ति० धूमः उत्तिष्ठतीतिशेषः ॥ २१ ॥ स० कालिकाः ग्रामस्थाः महाकालीभद्रकालीत्यादयः । प्रतिभाष्य श्रोतृभयदायिभाषांकृत्वा । पाण्डुरैर्दन्तैः अग्रतःस्थिताःसत्यःप्रहसन्ति । दन्तानांपाण्डुरत्वोक्त्या उक्त्याचविरुद्धभाषणमोषणहसनादीनां निश्चितंमरणं । किञ्चिद्व्यवधानेनभविष्यतीतिसूचयति ॥ २९ ॥ स० श्वानः सारमेयाः । उपसेवते उपसेवन्ते नवायसाः । " पुनःश्वानोभविष्यति " " श्वानसूकरमार्जार—" इत्यादिप्रयोगादकारान्तोवाश्वानशब्दः ॥ श्वा नः अस्माकमिदमितिपर्युपसेवते । नः बलिकर्माणि श्वा उपसेवते

[पा०] १ ङ. ञ. यजन्तेतैस्तैर्यत्तेद्विजातयः. २ क. ख. ग. ङ.—ट. दिशोविप्रद्रुताः. ३ ङ. ञ. आवृत्य. ४ ङ.—ट. बहुविधान्बहून्. ५ ङ.—ट. रजोध्वस्ताः. ६ क. ङ. ञ. ञ. यथापुरं. ७ ङ. ञ. ट. लङ्कामारामे. ८ ङ.—ठ. पर्युपसेवते. ९ ख. ङ. च. छ. ञ. ट. नकुलेषुच.

मार्जारा द्वीपिभिः सार्धं सूकराः शुनकैः सह ॥ किन्नरा राक्षसैश्चापि समीयुर्मानुषैः सह ॥ ३१ ॥
पाण्डुरा रक्तपादाश्च विहङ्गाः कालचोदिताः ॥ राक्षसानां विनाशाय कपोता विचरन्ति च ॥ ३२ ॥
[1]वीचीकूचीति वाश्यन्त्यः शारिका वेश्मसु स्थिताः ॥ ३३ ॥
पतन्ति ग्रथिताश्चापि निर्जिताः कलै[2]हैषिणः ॥ पक्षिणश्च मृगाः सर्वे प्रत्यादित्यं रु[3]दन्ति च ॥ ३४ ॥
करालो विकटो मुण्डः परुषः कृष्णपिङ्गलः ॥ कालो गृहाणि सर्वेषां कालेकालेऽन्ववेक्षते ॥ ३५ ॥
[[4]अहं त्वेतत्प्रपश्यामि युध्यतां तु दिनेदिने ॥ क्रव्यादा भक्षयिष्यन्ति मांसानि गजवाजिनाम् ॥
सर्वं नष्टप्रभं मन्ये सैन्यं त्वद्गेहमाश्रितम् ॥ ३६ ॥]
एतान्यन्यानि दुष्टानि निमित्तान्युत्पतन्ति च ॥ ज्ञात्वा[5] प्रधार्य कार्याणि क्रियतामायतिक्षमम् ॥ ३७ ॥
[विष्णुं मन्यामहे रामं मानुषं रूपमास्थितम् ॥ न हि मानुषमात्रोसौ राघवो दृढविक्रमः ॥ ३८ ॥
येन बद्धः [6]समुद्रस्य स सेतुः परमाद्भुतः ॥ कुरुष्व नरराजेन [7]संधिं रामेण रावण ॥ ३९ ॥]
[[8]अद्य प्रतिनिविष्टेन हितमुक्तं निशाचर ॥ सीतार्थे ते महाप्राज्ञ महद्भयमुपस्थितम् ॥
तथेमान्यनिमित्तानि लक्षये राक्षसेश्वर ॥ ४० ॥]

इदं वचस्[9]तत्र निशम्य माल्यवान्[10]परीक्ष्य रक्षोधिपतेर्मनः पुनः ॥
अनुत्तमेषूत्तमपौरुषो बली बभूव तूष्णीं समवेक्ष्य रावणम् ॥ ४१ ॥

॥ ३० ॥ समीयुः संयन्ति । द्वीपिभिः व्याघ्रैः । मानुषैः । राक्षसा इति शेषः । मानुषाश्चात्रोत्पातजनिता एव ॥ ३१ ॥ कालचोदिताः दैवप्रेरिताः । विनाशाय विनाशसूचनायेत्यर्थः । " वाताय कपिला विद्युत्—" इत्यादिवत् । कपोताः कपोताख्या विहङ्गा इत्यन्वयः ॥ ३२ ॥ वेश्मसु मधुरसंलापार्थं पोषिताः शारिकाः । मधुरभाषणानि विहाय वीचीकूचीति क्रूरं वाश्यन्तीत्यर्थः ॥ ३३ ॥ पक्षिणः काकादयः । मृगाश्च पूर्वं निर्जिता अपि पुनः कलहैषिणः सन्तः । ग्रथिताः पुञ्जीभूताः । पतन्ति धावन्ति । प्रत्यादित्यं रुदन्ति चेत्यन्वयः ॥ ३४ ॥ करालः भयंकरः । विकटः विकटाङ्गः । विकल इति पाठे हीनाङ्ग इत्यर्थः । परुषः परुषवर्णः । कालः मृत्युः । कालेकाले सायं प्रातश्च । गृहाण्यन्ववेक्षते । अन्वीक्षमाण इव दृश्यत इत्यर्थः ॥ ३५—३६ ॥ एतानि ज्ञात्वा कर्माणि कर्तव्यानि । प्रधार्य निर्धार्य । यत् आयतिक्षमं उत्तरकालार्हं । तत्क्रियतां । कर्माणि च सीताप्रदानादीनि ॥ ३७—४० ॥ अनुत्तमेषु मन्त्रिश्रेष्ठेषु । उत्तमपौरुषो माल्यवान् । इदं वचः। तत्र सभायां । निशम्य श्रावयित्वा । अन्तर्भावितण्यर्थोयं । रावणं रावणाकारं । समवेक्ष्य इङ्गितादिदर्शनपुरःसरं दृष्ट्वा । रक्षोधिपतेर्मनः परीक्ष्य

इतिवा ॥ रामानु० बलिकर्माणि बलिद्रव्याणि ॥ ३० ॥ किंनराइत्यर्धकेषुचित्कोशेषुनदृश्यते । तस्मिन्विरोधोस्ति लङ्कायांमानुषाभावात् ॥ ३१ ॥ ति० चीचीकूकीतिशब्दानुकारः । स० शारिकाः शुकवध्वः ॥ ३३ ॥ कलहैषिभिः पक्ष्यन्तरैः । निर्जिताः ग्रथिताः । पतन्ति परस्परमाबध्यपतन्ति ॥ ३४ ॥ कतक० "विष्णुंमन्यामहेरामं" इत्यादि " संधिंरामेणरावण " इत्यन्तं श्लोकद्वयंप्रक्षिप्तमितिप्राचीनैर्नव्याख्यातं ॥ शि० मानुषंरूपमास्थितं रामंविष्णुं खप्रतापद्वारासर्वत्रपूर्णमन्यामहे । अतःअयंराघवःमानुषमात्रः अस्मज्ज्ञानविषयीभूतमनुष्यशरीरवान्न । प्राकृतविलक्षणःपरपुरुषइत्यर्थः ॥ ३८ ॥ स० सः चारैः कथितः । येनबद्धः तेनरामेणसंधिंकुरुष्व ॥ ३९ ॥ स० इदंवचः रावणंप्रतिनिगद्य तस्यरक्षोधिपतेर्मनःपुनःपुनःपरीक्ष्य अनिवर्तनंज्ञात्वा । रावणं समवेक्ष्य तूष्णींबभूवेत्यन्वयः। "अर्थनिबन्धनेयंसंज्ञा" इत्युक्तेः वचोरावणंनिगद्येतिद्विकर्मकता । अनुत्तमेषु असदृशेषुराक्षसेषु । यद्वा अनुत्तमेषु नीचेषुरक्षोधिपतेर्मनःपरीक्ष्यस्वयमुत्तमपौरुषइतितूष्णींबभूव ॥ ४१ ॥ इतिपञ्चत्रिंशःसर्गः ॥ ३५ ॥

[पा०] १ झ. चीचीकूचीति. २ ङ. च. झ. ञ. ट. कलहैषिभिः. घ. कलहप्रियाः. ३ क. ख. ग. ङ.—ट. रुदन्तिते. घ. रुवन्ति. ४ ङ. झ. विकलो. ५ इदमर्धत्रयं घ. पाठेदृश्यते. ६ क. ख. ग. ङ. च. छ. झ. ञ. ट. ज्ञालाऽवधार्य. ७ इदं श्लोकद्वयं ख. ङ. च. ञ. ट. पाठेषुदृश्यते. ८ क. घ.—छ. ञ. समुद्रेच. ९ घ. सन्धिमार्येण. १० इदमर्धत्रयं घ. पाठेदृष्यते. ११ ग. ङ. च. छ. झ. ञ. ट. खस्यनिगद्य. क. ख. स्तन्निगद्य. १२ घ. न्समीक्ष्यरक्षोधिपतेस्तदप्रियं.

[स तद्वचो माल्यवता प्रभाषितं दशाननो न प्रतिशुश्रुवे तदा ॥
भृशं जगर्ह च सुदुष्टमानसो मुमूर्षुरत्युच्चवचांस्युदीरयन् ॥ ४२ ॥]
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

षट्त्रिंशः सर्गः ॥ ३६ ॥

रावणेनात्मश्लाघनेनरामवधप्रतिज्ञानपूर्वकं सोपालंभंमाल्यवद्विसर्जनम् ॥ १ ॥ तथा मन्त्रिभिस्सहमन्त्रपूर्वकं प्राच्यादिदिक्षु पुररक्षणायसैन्यैःसहप्रहस्तादिप्रेषणेनान्तःपुरप्रवेशः ॥ २ ॥

तत्तु माल्यवतो वाक्यं हितमुक्तं[1] दशाननः ॥ न मर्षयति[2] दुष्टात्मा कालस्य वशमागतः[3] ॥ १ ॥
स बद्ध्वा भ्रुकुटिं वक्त्रे क्रोधस्य[4] वशमागतः ॥ अमर्षात्परिवृत्ताक्षो माल्यवन्तमथाब्रवीत्[5] ॥ २ ॥
हितबुद्ध्या यदहितं वचः परुषमुच्यते ॥ परपक्षं प्रविश्यैव नैतच्छ्रोत्रं[6] गतं मम ॥ ३ ॥
मानुषं कृपणं राममेकं शाखामृगाश्रयम् ॥ समर्थं मन्यसे केन त्यक्तं पित्रा वनालयम्[7] ॥ ४ ॥
रक्षसामीश्वरं मां च देवतानां भयंकरम् ॥ हीनं मां मन्यसे केन ह्यहीनं सर्वविक्रमैः[8] ॥ ५ ॥
वीरद्वेषेण वा शङ्के पक्षपातेन वा रिपोः ॥ त्वयाऽहं परुषाण्युक्तः परप्रोत्साहनेन[9] वा ॥ ६ ॥
प्रभवन्तं पदस्थं हि परुषं कोऽभिधास्यति[10] ॥ पण्डितः शास्त्रतत्त्वज्ञो विना प्रोत्साहनाद्रिपोः ॥ ७ ॥
आनीय च वनात्सीतां पद्महीनामिव श्रियम् ॥ किमर्थं प्रतिदास्यामि राघवस्य भयादहम् ॥ ८ ॥

अनिवर्त्यं ज्ञात्वा तूष्णीं बभूव । उपदेशाद्विररामेत्यर्थः ॥ ४१—४२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥ ३५ ॥

अथ लङ्कागुप्तिकरणं षटत्रिंशे—तत्त्विति ॥ हितमुक्तं हितं यथा भवति तथा उक्तं । न मर्षयति नामर्षयत् ॥ १ ॥ परिवृत्ताक्षः घूर्णिताक्षः ॥ २ ॥ परपक्षं प्रविश्यैव शत्रुषु स्नेहमनुसृत्यैव । हितबुद्ध्या हितमित्ययं ज्ञास्यतीति बुद्ध्या । अहितं परुषं च । यद्वच उक्तं । एतत् मम श्रोत्रं न गतमित्यन्वयः ॥ ३ ॥ भवतः परपक्षानुसारश्च न युक्त इत्याह—मानुषमिति ॥ मानुषं जात्या हीनबलं । कृपणं प्रकृत्या हीनं । एकं असहायं । शाखामृगाश्रयं क्षुद्रसहायं । पित्रा त्यक्तं निर्धनं । वनालयं राज्यहीनं । रामं केन कथंप्रकारेण । समर्थं प्रबलं । मन्यसे ॥ ४ ॥ स्वस्मिन् तद्वैपरीत्यमाह—रक्षसामिति ॥ हीनं दुर्बलं ॥ ५ ॥ एवं परप्राबल्यस्वदौर्बल्ययोरभावेपि परुषोक्तौ हेतुमाशङ्कते—वीरद्वेषेणेति ॥ वीरद्वेषेण सजातीयवीरद्वेषेण । रिपोः पक्षपातेन शत्रौ पक्षपातेन ॥ ६ ॥ परप्रोत्साहनेनेत्येतदुपपादयति—प्रभवन्तमिति ॥ प्रभवन्तं प्रभावयुक्तं । पदस्थं परिपक्वबुद्धिं । परप्रोत्साहनाभावे पण्डितस्य पदस्थविषयकपरुषवचनं नोपपद्यत इत्यर्थः ॥ ७ ॥ अस्तु त्वदुक्तं परमार्थः तथापि दुर्लभवस्तुविशेषः कथं त्याज्य इत्याह—आनीयेति ॥ किमर्थं

ती० वस्तुतस्तु—वनालयं वनंजलमुदधिः आलयः शयनस्थानंयस्यतं । वटपत्रशायिनं नारायणमित्यर्थः । अतएव पित्रा त्यक्तं जन्मादिरहितमित्यर्थः । ईश्वरस्यजन्माद्यभावादेवपित्राद्यभावः । अतएव एकं अद्वितीयं । अतएव शाखामृगाश्रयं शाखाभिर्वेदशाखाभिःमृग्यतइतिशाखामृगोवेदवेद्यः सर्वेश्वरः । सचासावाश्रयश्चेतितं । तथापि केनापिहेतुना मानुषं मनुष्यरूपेणावतीर्णं । अतएव कृपणं कृपालुं । रामंसमर्थंमन्यसेकिल । तद्युक्तमेव । केनहेतुना रक्षसामीश्वरं सर्वैपराक्रमैर्हीनं मां अहीनंमन्यसेइत्यर्थः ॥ ४-५ ॥ स० सर्वैविक्रमैः देवानांभयङ्करं तदहीनंचमांमन्यसे । रामविषयेतु मां हीनंकेनमन्यसइत्यन्वयः । तेन नासच्छब्दद्वयवैयर्थ्यं ॥५॥ ती० आनीयेति । रामहस्ताद्वधेच्छयैव वनात्सीतामानीयराघवस्यभयात्किमर्थंप्रतिदास्यामीत्यर्थः ।

[पा०] १ अयंश्लोकः घ. पाठेदृश्यते. २ घ. वशमेयिवान्. ३ घ. क्रोधेनकलुषीकृतः. ४ क. वचनंपुनरुच्यते. ५ क. ग. ङ. च. झ. ञ. ट. च्छ्रोत्रगतं. ६ झ. ममप्रोत्साहनेनवा. ७ ङ. झ. ञ. ट. कोऽभिभाषते. च. कोऽभिभाषितुं. ८ क. ङ. छ.—ञ. प्रोत्साहनेनवा.

वृतं वानरकोटीभिः ससुग्रीवं सलक्ष्मणम् ॥ पश्य कैश्चिदहोभिस्त्वं राघवं निहतं मया ॥ ९ ॥
द्वन्द्वे यस्य न तिष्ठन्ति दैवतान्यपि संयुगे ॥ स कस्माद्रावणो युद्धे भयमाहारयिष्यति ॥ १० ॥
द्विधा भज्येयमप्येवं न नमेयं तु कस्यचित् ॥ एष मे सहजो दोषः स्वभावो दुरतिक्रमः ॥ ११ ॥
यदि तावत्समुद्रे तु सेतुर्बद्धो यदृच्छया ॥ रामेण विस्मयः कोत्र येन ते भयमागतम् ॥ १२ ॥
स तु तीर्त्वार्णवं रामः सह वानरसेनया ॥ प्रतिजानामि ते सत्यं न जीवन्प्रतियास्यति ॥ १३ ॥
एवं ब्रुवाणं संरब्धं रुष्टं विज्ञाय रावणम् ॥ व्रीडितो माल्यवान्वाक्यं नोत्तरं प्रत्यपद्यत ॥ १४ ॥
जयाशिषा च राजानं वर्धयित्वा यथोचितम् ॥ माल्यवानभ्यनुज्ञातो जगाम स्वं निवेशनम् ॥१५॥
रावणस्तु सहामात्यो मन्त्रयित्वा विमृश्य च ॥ लङ्कायामतुलां गुप्तिं कारयामास राक्षसः ॥ १६ ॥
स व्यादिदेश पूर्वस्यां प्रहस्तं द्वारि राक्षसम् ॥ दक्षिणस्यां महावीर्यौ महापार्श्वमहोदरौ ॥ १७ ॥
पश्चिमायामथो द्वारि पुत्रमिन्द्रजितं तथा ॥ व्यादिदेश महामायं बहुभी राक्षसैर्वृतम् ॥ १८ ॥
उत्तरस्यां पुरद्वारि व्यादिश्य शुकसारणौ ॥ स्वयं चात्र भविष्यामि मन्त्रिणस्तानुवाच ह ॥ १९ ॥
राक्षसं तु विरूपाक्षं महावीर्यपराक्रमम् ॥ मध्यमेऽस्थापयद्गुल्मे बहुभिः सह राक्षसैः ॥ २० ॥
एवं विधानं लङ्कायाः कृत्वा राक्षसपुङ्गवः ॥ कृतकृत्यमिवात्मानं मन्यते कालचोदितः ॥ २१ ॥

विसर्जयामास ततः स मन्त्रिणो विधानमाज्ञाप्य पुरस्य पुष्कलम् ॥
जयाशिषा मन्त्रिगणेन पूजितो विवेश चान्तःपुरमृद्धिमन्महत् ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षट्त्रिंशस्सर्गः ॥ ३६ ॥

केन हेतुना । राघवस्य राघवात् ॥ ८-९ ॥ द्वन्द्वे द्वन्द्वयुद्धे । युद्धे रामयुद्धे ॥ १० ॥ अत्यन्तहितपरं वृद्धं मातामहं कथमेवं परुषमुक्तवानस्मीत्यनुतापेनाह—द्विधेति ॥ राम आगत्य भयं जनयिष्यतीति त्वयोक्तं । न केवलं भयमात्रं । द्विधा भज्येयं शिरश्छेदं प्राप्नुयां । एवमपि न नमेयं । कस्यचित् । न केवलं रामस्य ततोपि शतगुणबलवतोपि द्विधा भङ्गादपि कस्यचिन्नमनमत्यन्तदुःसहमित्यर्थः । तर्हि हीयमानेनसन्धिःकार्य इति नीतिशास्त्रविरोधः स्यात्तत्राह—एष मे सहजो दोष इति । यदि दोषत्वमनुमतं तर्हि स त्याज्य एवेत्याशङ्क्याह—स्वभाव इति । नहि तिक्तो निम्बो मधुरायत इति भावः ॥ ११ ॥ अथ सेतुबन्धेन विस्मयसे चेत् तदपिकाकतालीयं । अतोमाभूत्ते भयमित्याह—यदीति ॥ तावत्समुद्रे स्वल्पसमुद्र इत्यर्थः ॥ १२ ॥ अर्णवं तीर्त्वा स्थितो राम इत्यर्थः ॥ १३ ॥ संरब्धं अहंकारयुक्तं । व्रीडित इति । स्वोपदेशवैफल्यादितिभावः ॥ १४ ॥ यथोचितमिति । प्रत्युत्थानादिनेति भावः ॥ १५ ॥ मन्त्रयित्वा कर्तव्यं विचार्य । विमृश्य निश्चित्य ॥ १६ ॥ व्यादिदेश रक्षणायेति शेषः ॥ १७—१८ ॥ भविष्यामीत्यनन्तरमितिकरणं द्रष्टव्यं ॥ १९ ॥ मध्यमे गुल्म इति गुल्मो नाम नगरमध्यचैत्यस्थानं ॥ २० ॥ विधानं रक्षणसंविधानं ॥ २१ ॥ पुष्कलं समग्रं ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षट्त्रिंशः सर्गः ॥३६॥

स० पद्महीनामिति । केवलंपद्मेनैवएतस्यास्तस्याश्चभेदइतिभावः ॥ ८ ॥ स० द्वन्द्वे संयुगे । दैवतानीत्यनेन तेषांसामर्थ्यराहित्यंसूचयति । तत्रदार्ढ्यसूचनायपरोक्षनिर्देशः ॥ १० ॥ ती० वास्तवार्थस्तु—रामःवानरसेनयासहार्णवंतीर्त्वाजीवन्प्रतियास्यतीति तेसत्यंप्रतिजानामि । नसंदेहः । अथापि मेस्वभावोदुरतिक्रमइतिपूर्वेणसंबन्धः ॥ १३ ॥ इतिषट्त्रिंशःसर्गः ॥ ३६ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. लङ्कायास्तुतदागुप्तिं. २ क.—च. झ. ञ. ट. व्यादिदेशच. ३ ङ. च. छ. झ. ञ. ट. गमिष्यामि. ४ ख. घ.—छ. झ. ट. लङ्कायां. ५ क.—ट. सोन्तःपुरं.

सप्तत्रिंशः सर्गः ॥ ३७ ॥

सुग्रीवादिभिःसहमन्त्रयमाणंश्रीरामंप्रति विभीषणेन लङ्कामेत्यरावणवृत्तान्तावगमेनपुनरागतनिजामात्यनिवेदितरावणकृतलङ्कारक्षणसंविधानप्रकारनिवेदनम् ॥ १ ॥ रामेण लङ्कायाः प्रागादिद्वारत्रये क्रमेणयुद्धाय नीलाङ्गदहनुमन्नियोजनपूर्वकं स्वेनरावणाधिष्ठितोत्तरभागेलक्ष्मणेनसहावस्थाननिर्धारणेन सेनयासहलङ्काभियानम् ॥ २ ॥

नरवानरराजौ तौ स च वायुसुतः कपिः ॥ जाम्बवानृक्षराजश्च राक्षसश्च विभीषणः ॥ १ ॥
अङ्गदो वालिपुत्रश्च सौमित्रिः शरभः कपिः ॥ सुषेणः सहदायादो मैन्दो द्विविद एव च ॥ २ ॥
गजो गवाक्षः कुमुदो नलोथ पनसस्तथा ॥ अमित्रविषयं प्राप्ताः समवेताः समर्थयन् ॥ ३ ॥
इयं सा लक्ष्यते लङ्का पुरी रावणपालिता ॥ सासुरोरगगन्धर्वैरमरैरपि दुर्जया ॥ ४ ॥
कार्यसिद्धिं पुरस्कृत्य मन्त्रयध्वं विनिर्णये ॥ नित्यं सन्निहितो ह्यत्र रावणो राक्षसाधिपः ॥ ५ ॥
तथा तेषु ब्रुवाणेषु रावणावरजोऽब्रवीत् ॥ वाक्यमग्राम्यपदवत्पुष्कलार्थं विभीषणः ॥ ६ ॥
अनलः शरभश्चैव संपातिः प्रघसस्तथा ॥ गत्वा लङ्कां महामात्याः पुरीं पुनरिहागताः ॥ ७ ॥
भूत्वा शकुनयः सर्वे प्रविष्टाश्च रिपोर्बलम् ॥ विधानं विहितं यच्च तदृष्ट्वा समुपस्थिताः ॥ ८ ॥
संविधानं यदाहुस्ते रावणस्य दुरात्मनः ॥ राम तद्ब्रुवतः सर्वं यथा तत्त्वेन मे शृणु ॥ ९ ॥
पूर्वं प्रहस्तः सबलो द्वारमासाद्य तिष्ठति ॥ दक्षिणं च महावीर्यौ महापार्श्वमहोदरौ ॥ १० ॥
इन्द्रजित्पश्चिमद्वारं राक्षसैर्बहुभिर्वृतः ॥ पट्टिशासिधनुष्मद्भिः शूलमुद्गरपाणिभिः ॥
नानाप्रहरणैः शूरैरावृतो रावणात्मजः ॥ ११ ॥
राक्षसानां सहस्रैस्तु बहुभिः शस्त्रपाणिभिः ॥ युक्तः परमसंविग्नो राक्षसैर्बहुभिर्वृतः ॥
उत्तरं नगरद्वारं रावणः स्वयमास्थितः ॥ १२ ॥
विरूपाक्षस्तु महता शूलखड्गधनुष्मता ॥ बलेन राक्षसैः सार्धं मध्यमं गुल्ममास्थितः ॥ १३ ॥

अथ रामस्य सेनागुप्तिविधानं सप्तत्रिंशे—नरवानरेत्यादिश्लोकत्रयमेकान्वयं ॥ सहदायादः सबान्धवः । "दायादौ सुतबान्धवौ" इत्यमरः । इदं विशेषणं सर्वत्र यथार्हमन्वेति । अमित्रविषयं शत्रुदेशं । समर्थयन् अमन्त्रयन् ॥ १—३ ॥ अथविचारप्रकारमेवाह—इयमित्यादिना ॥ सा हनुमता पूर्वमुक्ता ॥४॥ कार्यसिद्धिं विजयसिद्धिं । पुरस्कृत्य प्रधानीकृत्य । विनिर्णये निमित्ते मन्त्रयध्वं । विजयसाधककार्यनिर्णयाय मन्त्रः प्रवर्त्यतामित्यर्थः ॥ ५ ॥ अग्राम्यपदवत् संस्कृतपदवत् सर्वेषां स्फुटप्रतिपत्तये स्वदेशभाषापदरहितमुक्तवानित्यर्थः ॥ ६ ॥ अनल इत्यादिश्लोकत्रयं । विधानं नगररक्षणसंविधानं । ते दुरात्मनो रावणस्य यत्संविधानमाहुः तद्यथातत्त्वेन याथार्थ्येन । ब्रुवतः मे मत्तः । शृणु ॥ ७—१० ॥ पट्टिशासिधनुष्मद्भिः शूलमुद्गरपाणिभिः । बहुभी राक्षसैः प्रधानराक्षसैर्वृतः । नानाप्रहरणैः शूरैरावृतः । रावणात्मजः इन्द्रजित्पश्चिमद्वारं आसाद्य तिष्ठतीत्यनुकृष्यते ॥ ११ ॥ असंविग्नः अकम्पितहृदयः । राक्षसैः प्रधानभूतैः ॥ १२ ॥ बलेन

ति० नरेति । रामसुग्रीवौ । टजभावश्चार्षः ॥ १ ॥ स० परमसंविग्नः परंयथाभवतितथा असंविग्नः विभीः । तिष्ठतीत्यन्वयः । शुकसारणावेदितमहाबलस्मरणादन्तःकरणेभीतइतिव्याख्या स्तुतिप्रस्तावाननुगुणा । यदिवक्तव्याभीतिस्तार्हि हनुमतैकलेन

[पा०] १ ङ. च. झ. ञ. ट. नरवानरराजानौसतु. २ घ. समवेतास्तमन्त्रयन्. ३ ङ. च. झ. ञ. ट. गन्धर्वैस्सर्वैरपि. ४ ख. ङ. च. छ. झ. ञ. अथ. ५ ज. अनलश्चानिलश्चैवहरस्संपातिरेवच. ६ ङ. झ. ट. पनसश्चैव. ७ ङ. झ. ट. संपातिः प्रमतिस्त्री. ख. च. छ. ञ. संपातिर्विहगस्तथा. घ. संपातिःपनसस्तथा. ८ घ. ङ. झ. ट. राक्षसैस्सहमन्त्रयित्. ९ ङ. झ. ट. माश्रितः.

एतानेवंविधान्गुल्माँल्लङ्कायां समुदीक्ष्य ते ॥ मामकाः सचिवाः सर्वे पुनः शीघ्रमिहागताः ॥१४॥
गजानां च सहस्रं च रथानामयुतं पुरे ॥ हयानामयुते द्वे च साग्रकोटिश्च रक्षसाम् ॥ १५ ॥
विक्रान्ता बलवन्तश्च संयुगेष्वाततायिनः ॥ इष्टा राक्षसराजस्य नित्यमेते निशाचराः ॥ १६ ॥
एकैकस्यात्र युद्धार्थे राक्षसस्य विशांपते ॥ परिवारः सहस्राणां सहस्रमुपतिष्ठते ॥ १७ ॥
एतां प्रवृत्तिं लङ्कायां मन्त्रिप्रोक्तां विभीषणः ॥ एवमुक्त्वा महाबाहू राक्षसांस्तानदर्शयत् ॥
लङ्कायां सचिवैः सर्वां रामाय प्रत्यवेदयत् ॥ १८ ॥
रामं कमलपत्राक्षमिदमुत्तरमब्रवीत् ॥ रावणावरजः श्रीमान्रामप्रियचिकीर्षया ॥ १९ ॥
कुबेरं तु यदा राम रावणः प्रत्ययुध्यत ॥ षष्टिः शतसहस्राणि तदा निर्यान्ति राक्षसाः ॥ २० ॥
पराक्रमेण वीर्येण तेजसा सत्त्वगौरवात् ॥ सदृशा येऽत्र दर्पेण रावणस्य दुरात्मनः ॥ २१ ॥
अत्र मन्युर्न कर्तव्यो रोषये त्वां न भीषये ॥ समर्थो ह्यसि वीर्येण सुराणामपि निग्रहे ॥ २२ ॥
तद्भवांश्चतुरङ्गेण बलेन महता वृतः ॥ व्यूह्येदं वानरानीकं निर्मथिष्यसि रावणम् ॥ २३ ॥
रावणावरजे वाक्यमेवं ब्रुवति राघवः ॥ शत्रूणां प्रतिघातार्थमिदं वचनमब्रवीत् ॥ २४ ॥

सेनया । राक्षसैः मुख्यैः ॥ १३ ॥ गुल्मान् सेनाः । " गुल्मो रुक्स्तंबसेनासु " इत्यमरः ॥ १४ ॥ गजानां गजयोधिनां । रथानां हयानामित्यत्राप्येवं द्रष्टव्यं । हयानां साग्रकोटिः द्वे अयुते चेत्यन्वयः । एते एतावन्तः । यद्वा गजानामित्यादिशब्दाः गजादिपराः । एवमुत्तरोत्तराधिकसङ्ख्योच्यते । हयानां द्वे अयुते । रक्षसां साग्रकोटिः पूर्णा कोटिः । एते रावणस्येष्टा अन्तरङ्गाः । स्वसेविन इत्यर्थः । आततायिनः क्रूरा इत्यर्थः ॥ १५—१६ ॥ अत्र राक्षसेषु । एकैकस्य राक्षसस्य । सहस्राणां सहस्रं दशलक्षसङ्ख्याविशिष्टः परिवारः । इदानीं । युद्धार्थे युद्धनिमित्तं । उपतिष्ठत इत्यन्वयः ॥ १७ ॥ एतामिति सार्धश्लोकः ॥ तान् मन्त्रिभूतान् । दर्शनानन्तरं सचिवैः प्रयोज्यकर्तृभिः । लङ्कायां सर्वां प्रवृत्तिमित्यनुषज्यते । रामाय प्रत्यवेदयत् । सचिवैरपि तं वृत्तान्तमावेदयदित्यर्थः ॥ १८ ॥ राममित्यादिश्लोकत्रयं ॥ उत्तरं अनन्तरवक्तव्यं ॥ १९ ॥ दिग्विजयकालिकबलादाधुनिकबलमधिकमिति कथयितुं पूर्वबलं परिगणयति—कुबेरमिति । निर्यान्ति निर्ययुः ॥ २० ॥ पराक्रमेण पराभिभवसामर्थ्येन । वीर्येण युद्धे स्वयमविकृतत्वेन । तेजसा प्रतापेन । सत्त्वगौरवात् धैर्यातिशयेनेत्यर्थः । दर्पेण च । रावणस्य अत्र ये सदृशास्तादृशा राक्षसा इति पूर्वेणान्वयः ॥ २१ ॥ स्वामिसन्निधौ शत्रुबलवर्णनमयुक्तमित्याशङ्क्य परिहरति—अत्रेति ॥ अत्र बलवर्णने सति । मन्युः क्रोधः । न कर्तव्यः । रोषये शत्रुनिरसनाय रोषमुत्पादये । न भीषये शत्रुबलवर्णनेन न भीतिमुत्पादये । रोषोत्पादनस्य फलमाह—समर्थोहीति ॥ २२ ॥ तत् राक्षसबलस्य व्यूढत्वात् । महता बलेन वृतो भवानपि । चतुरङ्गेण रावणसेनावच्चतुरवयवेन । व्यूह्य विभज्य । निर्मथिष्यसि । मध्यमपुरुषत्वमार्ष । चतुरङ्गकार्यकरत्वाच्चतुरङ्गत्वमित्यन्ये ॥ २३ ॥ प्रतिघातार्थं प्रतिक्रियार्थं ॥ २४ ॥

कृतस्यकर्मणोदृष्टत्वेनवक्तव्या । श्रवणापेक्षयास्वसाक्षिणःप्राबल्यात् ॥ १२ ॥ स० आततायिनः स्वयमेवसीतोपरोधापराधंकृत्वा शस्त्रपाणयइत्याततायिनः । यद्वा संयुगेयुद्धे इषवः आत्यन्ते सदासम्यक्क्षिप्यन्तेयेन तदिष्वातं धनुः । तेनतायन्तेपालयन्तिजनानिति संयुगेष्वाततायिनः । "तायृ सन्तानपालनयोः" इतिधातोः । यद्वा परदारापहर्तृसंबन्धिलाद्याततायिनः । "क्षेत्रदारापहर्ता च" इत्युक्तेः । निशाचराः यूथपाः ॥ १६ ॥ ति० सर्वलङ्कायायद्वृत्तं तत्प्रत्यवेदयत् ॥ १८ ॥ ति० यस्मात्तेन तत्तद्वारेषुसर्वा सेनाविभज्यस्थापिता । तत् तस्मात् । भवानपि इदंवानरानीकंतद्वदेवविभागेनव्यूह्य व्यूहितेनचतुरङ्गेणबलेनवृतंरावणं निर्मथि-

---

[पा०] १ ड. झ. ञ. ल्लङ्कायाः. २ ड. च. झ. ट. मामकामश्विनः. ३ च. ञ. ष्वपराजिताः. ४ ड. झ. मुपतिष्ठति. ५ ङ. ड. च. झ. ञ. ट. सर्वं. ६ झ. प्रतियुध्यति. ७ ड. झ. ट. सदृशास्यत्र. घ. सदृशास्तेतु. ग. सदृशास्तस्य. ८ ड. च. झ. ट. कोपये. ९ ख. ड. झ. ञ. ट. वृतं.

Printed in the United States of America

पूर्वद्वारे तु लङ्कायाः नीलो वानरपुङ्गवः ॥ प्रहस्तप्रतियोद्धा स्याद्वानरैर्बहुभिर्वृतः ॥ २५ ॥
अङ्गदो वालिपुत्रस्तु बलेन महता वृतः ॥ दक्षिणे बाधतां द्वारे महापार्श्वमहोदरौ ॥ २६ ॥
हनुमान्पश्चिमद्वारं निपीड्य पवनात्मजः ॥ प्रविशत्वप्रमेयात्मा बहुभिः कपिभिर्वृतः ॥ २७ ॥
दैत्यदानवसङ्घानामृषीणां च महात्मनाम् ॥ विप्रकारप्रियः क्षुद्रो वरदानबलान्वितः ॥ २८ ॥
परिक्रामति यः सर्वाँल्लोकान्संतापयन्प्रजाः ॥ तस्याहं राक्षसेन्द्रस्य स्वयमेव वधे धृतः ॥ २९ ॥
उत्तरं नगरद्वारमहं सौमित्रिणा सह ॥ निपीड्याभिप्रवेक्ष्यामि सबलो यत्र रावणः ॥ ३० ॥
वानरेन्द्रश्च बलवानृक्षराजश्च वीर्यवान् ॥ राक्षसेन्द्रानुजश्चैव गुल्मो भवतु मध्यमः ॥ ३१ ॥
न चैव मानुषं रूपं कार्यं हरिभिराहवे ॥ एषा भवतु संज्ञा नो युद्धेऽस्मिन्वानरे बले ॥ ३२ ॥
वानरा एव नश्चिह्नं स्वजनेऽस्मिन्भविष्यति ॥ ३३ ॥
वयं तु मानुषेणैव सप्त योत्स्यामहे परान् ॥ अहमेष सह भ्रात्रा लक्ष्मणेन महौजसा ॥
आत्मना पञ्चमश्चायं सखा मम विभीषणः ॥ ३४ ॥
स रामः कृत्यसिद्ध्यर्थमेवमुक्त्वा विभीषणम् ॥ सुवेलारोहणे बुद्धिश्चकार मतिमान्मतिम् ॥
रमणीयतरं दृष्ट्वा सुवेलस्य गिरेस्तटम् ॥ ३५ ॥

पूर्वद्वारेस्थित्वेति शेषः ॥ २५—२६ ॥ अप्रमेयात्मेति मायाविन इन्द्रजितोयमेवार्ह इति भावः ॥२७॥ स्वस्यचोत्तरद्वारनिरोधहेतुमाह—दैत्यदानवेत्यादिश्लोकत्रयं ॥ विप्रकारप्रियः प्रियविप्रकारः । "वा प्रियस्य" इति पूर्वनिपातः । विप्रकारः पीडा । क्षुद्रः क्षुद्रबुद्धिः । प्रजाः संतापयन् लोकान् परिक्रामतीत्यन्वयः । तस्याहमिति श्लोके यत्तच्छब्दाध्याहारेणाहंशब्दद्वयनिर्वाहः । योहं धृतः निश्चितः । सोहं प्रवेक्ष्यामीत्यन्वयः । स्वयमेव अद्वारेण । यद्वा तस्याहमित्यर्धान्तमेकं वाक्यं । उत्तरमित्यादि भिन्नं वाक्यं ॥ २८—३० ॥ गुल्मो भवतु मध्यमः । मध्यमसेना भवत्वित्यर्थः । बलवङ्ग्यां रावणेन्द्रजिङ्ग्यामधिष्ठितयोरुत्तरपश्चिमयोः मध्यमगुल्मो भवत्वित्यर्थः ॥ ३१ ॥ संज्ञा संकेतः । अस्य प्रयोजनमाह—वानरा इति ॥ नः अस्माकं । वानरा एवास्मिन् स्वजने चिह्नं भविष्यतीति । अस्माकं वानरत्वमेवात्मीयत्वज्ञापकंभविष्यतीत्यर्थः । यदि वानराअपि कामरूपधारणेन युद्ध्येयुः । राक्षसानामपि तादृशत्वादालपरविवेको न स्यात् । वानरत्वंतु जघन्यतया न ते भजिष्यन्तीति भावः । इदानीं मानुषरूपपरिग्रहप्रतिषेधसामर्थ्यादितःपूर्वं मानुषरूपं परिगृह्य स्थिता इति गम्यते ॥ ३२—३३ ॥ मानुषेण मनुष्यसंबन्धिना । रूपेणेति शेषः । विभीषणादीनामपि मानुषरूपसंस्थानसादृश्यादेवमुच्यते ॥ ३४ ॥ स राम इत्यादिसार्धश्लोक एकान्वयः ॥ कृत्यसिद्ध्यर्थं कार्यसिद्ध्यर्थं । सुवेलारोहणे विषये । बुद्धिः बुद्धिमान् । मतुब्लोप आर्षः । मतिं इच्छां । सुवेलारोहणे बुद्धिं चकार मतिमान्मतिमिति च पाठः । सुवेलारोहणबुद्धिमेव मतिं चकार । नान्यामित्यर्थः । आरोहणेच्छाहेतुमाह—रमणीयतरमिति । सौन्दर्यावलोकनमेव तदारोहणहेतुः । नतु लङ्काप्राप्तिः । अतएव लङ्कोपरोधायावरोहणं वक्ष्यति—ततस्त्विति ॥ पृथिवीं सुवेलकटकभूमिं । महात्मा महाबुद्धिः । प्रहृष्टरूपः अतिशयेन प्रहृष्टः । "प्रशंसायां रूपप्" । लङ्कां लङ्कैकदेशसुवेलं । महात्मा महाधृतिरिति द्विती-

ष्यसि ॥ २३ ॥ ति० प्रहस्तंप्रतियोद्धा प्रहस्तस्यसेनापतेःप्रतियोद्धा ॥ २५ ॥ स० स्वजने स्वजनत्वेनज्ञाने ॥ ३३ ॥ ति० सुवेलारोहणेबुद्धिंचकार । तस्यदुर्गत्वाद्रात्रौतत्रावस्थानस्यसुखत्वाच्च । मतिमान्मतिमितिपाठे मतिं अर्थनिर्धारणात्मिकांबुद्धिमित्यर्थः । ती० सुवेलारोहणे प्रवृत्ताबुद्धिर्यस्यसः सुवेलारोहणेबुद्धिः । अलुक्त्वमार्षं । मतिमान् आगामिगोचरबुद्धिमान् । मतिंचकार सुवेलारोहणेच्छांचकारेत्यर्थः । बुद्धिमितिद्वितीयान्तपाठेतु सुवेलारोहणे मतिं मननात्मिकांबुद्धिं निश्चयात्मिकांचकारेत्यर्थः । यद्वा बुद्धिं तात्कालिकरूपांमतिंचकार अर्थनिर्धारणरूपांचकारेत्यर्थः । अर्थनिर्धारणंमतिरितितज्ज्ञाः ॥ ३५ ॥

[पा०] १ च. छ. ज. लङ्कायां. २ घ. ङ. ज. झ. ट. प्रहस्तंप्रति. ३ घ. सह. ४ क. घ.—ट. गुल्मेभवतुमध्यमे. ५ क. ख. ग. ङ. झ. ट. वश्चिह्नं. ६ घ.—ट. अहमेव. ७ क. ग.—च. झ. ट. बुद्धिंचकार. ८ ङ. झ. ञ. ट. मतिमान्प्रभुः.

ततस्तु रामो महता बलेन प्रच्छाद्य सर्वां पृथिवीं महात्मा ॥
प्रहृष्टरूपोभिजगाम लङ्कां कृत्वा मतिं सोरिवधे महात्मा ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

अष्टत्रिंशः सर्गः ॥ ३८ ॥

सूर्येणास्ताचलारोहणे रामेण सुग्रीवादिभिः सह लङ्कावलोकनाय सुवेलाचलारोहणम् ॥ १ ॥

स तु कृत्वा सुवेलस्य मतिमारोहणं प्रति ॥ लक्ष्मणानुगतो रामः सुग्रीवमिदमब्रवीत् ॥ १ ॥
विभीषणं च धर्मज्ञमनुरक्तं निशाचरम् ॥ मन्त्रज्ञं च विधिज्ञं च श्लक्ष्णया परया गिरा ॥ २ ॥
सुवेलं साधुशैलेन्द्रमिमं धातुशतैश्चितम् ॥ अध्यारोहामहे सर्वे वत्स्यामोत्र निशामिमाम् ॥ ३ ॥
लङ्कां चालोकयिष्यामो निलयं तस्य रक्षसः ॥ येन मे मरणान्ताय हृता भार्या दुरात्मना ॥ ४ ॥
येन धर्मो न विज्ञातो नै तद्वृत्तं कुलं तथा ॥ राक्षस्या नीचया बुद्ध्या येन तद्गर्हितं कृतम् ॥ ५ ॥
तस्मिन्मे वर्तते रोषः कीर्तिते राक्षसाधमे ॥ यस्यापराधान्नीचस्य वधं द्रक्ष्यामि रक्षसाम् ॥ ६ ॥
एको हि कुरुते पापं कालपाशवशं गतः ॥ नीचेनात्मापचारेण कुलं तेन विनश्यति ॥ ७ ॥
एवं संमन्त्रयन्नेव सक्रोधो रावणं प्रति ॥ रामः सुवेलं वासाय चित्रसानुमुपारुहत् ॥ ८ ॥
पृष्ठतो लक्ष्मणश्चैनमन्वगच्छत्समाहितः ॥ सशरं चापमुद्यम्य सुमहद्विक्रमे रतः ॥
तमन्वरोहत्सुग्रीवः सामात्यः सविभीषणः ॥ ९ ॥

यमहालशब्दार्थः । अभिजगाम । आरोहणायेति भावः ॥ ३५—३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तत्रिंशः सर्गः ॥ ३७ ॥

अथ लङ्कादर्शनार्थं सुवेलारोहणमष्टत्रिंशे—स त्वित्यादिश्लोकद्वयमेकान्वयं ॥ धर्मज्ञत्वादि सुग्रीवस्यापि विशेषणं । सुवेलो नाम लङ्कासमतुङ्गताको गिरिविशेषः । विधिज्ञं कार्यज्ञं ॥ १—२ ॥ चितं व्याप्तं । अध्यारोहामहे आरोक्ष्यामः । अयंच समुद्रतरणदिवसवृत्तान्तः पूर्वं संग्रहेणोक्तः । अद्य सविशेषमुच्यते ॥ ३ ॥ लङ्कामित्यादिश्लोकद्वयमेकान्वयं ॥ लङ्कालोकने निमित्तमाह—निलयमिति । मे भार्येति संबन्धः । मरणान्ताय मरणरूपफलाय । तत् प्रसिद्धं । वृत्तं धर्मशास्त्रविहितस्वकुलाचारः । कुलं स्वकुलातिशयः । एतत्सर्वं भार्यापहरणनिवृत्तिहेतुः तन्नासीदित्यर्थः । तर्हि केन हेतुना कृतमित्यत्राह—राक्षस्येति । तत् भार्यापहरणं ॥ ४—५ ॥ एतादृशस्य निलयदर्शने किं फलं तत्राह—तस्मिन्निति ॥ वर्तते उत्पद्यते । तर्हि तन्मात्रवधे यत्नः क्रियतामित्यत्राह—यस्येति ॥ ६ ॥ अन्यस्य दोषेणान्यवधः किमर्थंक्रियत इत्यत्राह—एक इति ॥ एकः पापं कुरुते नीचेन तेन कर्त्रा आत्मापचारेण तद्दोषेण कारणेन कुलं तत्संबन्धिनः सर्वे विनश्यन्ति ॥ ७ ॥ संमन्त्रयन् वदन् । उपारुहत् उपारुक्षत् ॥ ८ ॥ पृष्ठत इत्यादि सार्धश्लोकः ॥ समा-

कतक० एतदग्रे ततस्तुरामइतिपद्यंपठन्ति । तत्रवक्ष्यमाणसंग्रहो नाप्युक्तानुवादो नाप्यत्रप्रकरणविच्छेदइतीमंश्लोकं वृथाप्रक्षिप्यात्रसर्गच्छेदंकुर्वन्तिभ्रान्ताः ॥ ३६ ॥ इतिसप्तत्रिंशःसर्गः ॥ ३७ ॥

स० मरणान्ताय मरणेन रक्षःकुलसहितोतो नाशःस्वस्य तस्मै ॥४॥ स० वृत्तं सदाचारः असद्वलिष्ठतावार्तावा । राक्षस्या राक्षससंबन्धिन्या । तत्रापिनीचया । विभीषणं सुसुखीकर्तुमियमुक्तिः ॥ ५ ॥

[पा०] १ घ. मन्त्रज्ञंचहनूमन्तं. २ ख.—च. झ. ञ. ट. नवृत्तंनकुलंतथा. ३ घ. च. छ. नात्मापराधेन. ४ ङ. झ. ञ. ट. सुवेलमासाद्य. ५ ग. व्रजन्तंलक्ष्मणः.

हनुमानङ्गदो नीलो मैन्दो द्विविद एव च ॥ गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ १० ॥
पनसः कुमुदश्चैव हरो रम्भश्च यूथपः ॥ जाम्बवांश्च सुषेणश्च ऋषभश्च महामतिः ॥ ११ ॥
दुर्मुखश्च महातेजास्तथा शतबलिः कपिः ॥ एते चान्ये च बहवो वानराः शीघ्रगामिनः ॥ १२ ॥
ते वायुवेगप्रवणास्तं गिरिं गिरिचारिणः ॥ अध्यारोहन्त शतशः सुवेलं यत्र राघवः ॥ १३ ॥
[ततः सुवेलमारुह्य रामस्तैस्सह वानरैः ॥ निषसाद गिरेस्तस्य शृङ्गे समतले शुभे ॥ १४ ॥
ततः कपिगणास्सर्वे समावृत्य द्वियोजनम् ॥ सुवेलमध्यारोहंस्ते प्लवन्तो दक्षिणामुखाः ॥ १५ ॥]
ते त्वदीर्घेण कालेन गिरिमारुह्य सर्वतः ॥ ददृशुः शिखरे तस्य विषक्तामिव खे पुरीम् ॥ १६ ॥
तां शुभां प्रवरद्वारां प्राकारपरिशोभिताम् ॥ लङ्कां राक्षससंपूर्णां ददृशुर्हरियूथपाः ॥ १७ ॥
प्राकारचयसंस्थैश्च तदा नीलैर्निशाचरैः ॥ ददृशुस्ते हरिश्रेष्ठाः प्राकारमपरं कृतम् ॥ १८ ॥
ते दृष्ट्वा वानराः सर्वे राक्षसान्युद्धकाङ्क्षिणः ॥ मुमुचुर्विविधान्नादांस्तत्र रामस्य पश्यतः ॥ १९ ॥
ततोस्तमगमत्सूर्यः संध्यया प्रतिरञ्जितः ॥ पूर्णचन्द्रप्रदीप्ता च क्षपा समभिवर्तते ॥ २० ॥

ततः स रामो हरिवाहिनीपतिर्विभीषणेन प्रतिनन्द्य सत्कृतः ॥
सलक्ष्मणो यूथपयूथसंवृतः सुवेलपृष्ठे न्यवसद्यथासुखम् ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टत्रिंशः सर्गः ॥ ३८ ॥

एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

रात्रौसुग्रीवादिभिःसहसुवेलेसुखोषितेनरामेण प्रातर्लङ्कावलोकनम् ॥ १ ॥

तां रात्रिमुषितास्तत्र सुवेले हरिपुङ्गवाः ॥ लङ्कायां ददृशुर्वीर वनान्युपवनानि च ॥ १ ॥

हितः सावधानः ॥ ९ ॥ सामात्य इत्युक्तं विवृणोति—हनुमानित्यादिचतुःश्लोकी ॥ हनुमानिति पृथगुक्त्या रामलक्ष्मणौ पङ्क्त्यामेवारूढाविति गम्यते । ते प्रसिद्धाः । एते चान्ये च । वायुवेगप्रवणाः वायुवेगेन गच्छन्तः । "प्लुङ् गतौ" इति धातोर्बहुलग्रहणात्कर्तरि ल्युट् । अतएव शीघ्रगामिनः सन्तः अध्यारोहन्त ॥ १०—१५ ॥ ते रामादयः । तस्य प्रसिद्धस्य त्रिकूटस्य । खे विषक्तां आकाशे लम्बमानामिव स्थितां । पुरीं लङ्कां । सर्वतो ददृशुः ॥ १६ ॥ वानराश्च ददृशुरित्याह—तामिति ॥ स्पष्टः ॥ १७ ॥ प्राकारस्य चयः वप्रं तत्र स्थितैः । "स्याच्चयो वप्रमस्त्रियां" इत्यमरः ॥१८—१९॥ प्रतिरञ्जितः रक्तवर्णीकृतः । पूर्णचन्द्रप्रदीप्तेति । अनेन पौर्णमास्यां सुवेलारोहणमित्युक्तं । प्रथमायां युद्धारम्भ इत्याहुः । यद्वा पूर्णचन्द्रतुल्यप्रदीपवतीति वाऽर्थः । संभवन्ति हि वानरसेनायामपि प्रकाशार्थमारोपिता दीपाः ॥ २० ॥ वाहिनीपतिः वानरसेनानिर्वाहकः ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टत्रिंशः सर्गः ॥३८॥

अथ लङ्कादर्शनमेकोनचत्वारिंशे—तामिति ॥ तां रात्रिमित्यत्यन्तसंयोगे द्वितीया । ददृशुः प्रातरिति

स० वायुवद्वेगप्रवणः वेगायतिर्येषांतेतथा । वायोरिववेगविस्तारवन्तइत्यर्थः । "प्रवणःक्रमनिम्नोर्व्यामायतौच" इतिविश्वः ॥१३॥ स० खे०आकाशेविषक्तां अंबरचुंबिनीमितियावत् ॥ १६ ॥ ति० प्रतिरञ्जितः प्रतिप्रापितरागः । पूर्णचन्द्रप्रदीप्तारात्रेत्यनेन पौषशुक्लचतुर्दश्यांपूर्णिमायांवा सुवेलारोहणमितिबोध्यं । "चतुर्दश्यांसुवेलाग्रेरामःसैन्यंन्यवेशयत्" इत्यभिवेश्योक्तेः । अत्रपूर्णचन्द्रलोक्तिःपूर्णकल्पत्वादिति ॥ २० ॥ इत्यष्टत्रिंशःसर्गः ॥ ३८ ॥

[पा०] १ ख. ग. घ. करंभश्चमहाद्युतिः. २ इदंश्लोकद्वयं क. घ. च. छ. पाठेषुदृश्यते. ३ घ. ङ. ञ. ट. प्राकारवर. ४ ङ. ञ. ट. तंदृष्ट्वा. ५ ङ. च. छ. ञ. ट. यूथसंयुतः.

समसौम्यानि रम्याणि विशालान्यायतानि च ॥ दृष्टिरम्याणि ते दृष्ट्वा बभूवुर्जातविस्मयाः ॥ २ ॥
चम्पकाशोकपुंनागसालतालसमाकुला ॥ तमालवनसंछन्ना नागमालासमावृता ॥ ३ ॥
हिन्तालैरर्जुनैर्नीपैः सप्तपर्णैश्च पुष्पितैः ॥ तिलकैः कर्णिकारैश्च पाटलैश्च समन्ततः ॥ ४ ॥
शुशुभे पुष्पिताग्रैश्च लतापरिगतैर्द्रुमैः ॥ लङ्का बहुविधैर्दिव्यैर्यथेन्द्रस्यामरावती ॥ ५ ॥
विचित्रकुसुमोपेतै रक्तकोमलपल्लवैः ॥ शाद्वलैश्च तथा नीलैश्चित्राभिर्वनराजिभिः ॥ ६ ॥
गन्धाढ्यान्यंभिरम्याणि पुष्पाणि च फलानि च ॥ धारयन्त्यगमास्तत्र भूषणानीव मानवाः ॥ ७ ॥
तच्चैत्ररथसंकाशं मनोज्ञं नन्दनोपमम् ॥ वनं सर्वर्तुकं रम्यं शुशुभे पट्पदायुतम् ॥ ८ ॥
नत्यूहकोयष्टिभकैर्नृत्यमानैश्च बर्हिभिः ॥ रुतं परभृतानां च शुश्रुवुर्वननिर्झरे ॥ ९ ॥
नित्यमत्तविहङ्गानि भ्रमराचरितानि च ॥ कोकिलाकुलषण्डानि विहगाभिरुतानि च ॥ १० ॥
भृङ्गराजाभिगीतानि भ्रमरैः सेवितानि च ॥ कोणालकविघुष्टानि सारसाभिरुतानि च ॥ ११ ॥
विविशुस्ते ततस्तानि वनान्युपवनानि च ॥ हृष्टाः प्रमुदिता वीरा हरयः कामरूपिणः ॥ १२ ॥
तेषां प्रविशतां तत्र वानराणां महौजसाम् ॥ पुष्पसंसर्गसुरभिर्ववौ घ्राणसुखोऽनिलः ॥ १३ ॥
अन्ये तु हरिवीराणां यूथान्निष्क्रम्य यूथपाः ॥ सुग्रीवेणाभ्यनुज्ञाता लङ्कां जग्मुः पताकिनीम् ॥१४॥
वित्रासयन्तो विहगांस्त्रासयन्तो मृगद्विपान् ॥ कम्पयन्तश्च तां लङ्कां नादैस्ते नदतां वराः ॥
कुर्वन्तस्ते महावेगा महीं चरणपीडिताम् ॥ १५ ॥

सिद्धं । वनानि अकृत्रिमाणि । उपवनानि कृत्रिमाणि ॥ १ ॥ समानि च तानि सौम्यानि च समसौम्यानि निम्नोन्नतत्वरहितानि स्निग्धानि चेत्यर्थः । अत एव रम्याणि रमणीयानि । विशालानि विपुलानि । आयतानि दीर्घाणि । दृष्टिरम्याणि नयनाकर्षणानि । वनान्युपवनानि चेत्याकृष्यान्वयः ॥ २ ॥ चम्पकेत्यादि श्लोकचतुष्टयमेकान्वयं ॥ नागमाला नागकेसरमाला । हिन्तालैरित्यादि । उपलक्षितेतिशेषः । दिव्यैः पारिजातादिभिः । अत्राप्युपलक्षितेतिशेषः । बिचित्रेत्यादि पदद्वयमपि दिव्यद्रुमविशेषणं । शाद्वलैरित्यादावप्युपलक्षणे तृतीया । लङ्काशब्दश्चात्र सुवेलपरः । उत्तरत्र वानरप्रवेशोक्तेः । शुशुभे शोभमाना दृश्यत इत्यन्वयः ॥ ३—६ ॥ तत्र वनेषु । धारयन्ति अधारयन् । अगमाः वृक्षाः ॥ ७ ॥ सर्वे ऋतवो यस्मिन् तत्सर्वर्तुकं । " शेषाद्विभाषा " इति कप्प्रत्ययः । षट्पदायुतं षट्पदैरासमन्ताद्युतं ॥ ८ ॥ वननिर्झरे नत्यूहैः कोयष्टिभकैः जलकुक्कुटविशेषैः । नृत्यमानैः नृत्यद्भिः । बर्हिणैश्च सहितानां परभृतानां रुतं शुश्रुवुरिति योजना ॥ ९ ॥ वनरामणीयकाकृष्टास्तत्रविविशुरित्याह—नित्येत्यादिना कामरूपिण इत्यन्तेन श्लोकत्रयेण ॥ विहङ्गाः वक्ष्यमाणकोकिलादिव्यतिरिक्ताः । षण्डाः वृक्षसमूहाः । विहङ्गभृङ्गसंचारस्य तन्नादस्य च वनशोभाहेतुत्वात्तत्संचारमुक्त्वा तन्नादमाह—विहगेत्यादिना । विहगानामभिरुतं येषु तानि विहगाभिरुतानि । एवमुत्तरत्रापि विग्रहः । कोणालकः खञ्जनः । सारसाभिरुतानीत्यनेन वनादीनां सरःसमीपवर्तित्वमुक्तं । हृष्टाः पुलकिताः । प्रमुदिताः सन्तुष्टाः । वीराः शत्रुवनप्रवेशेपि निर्भयाः । कामरूपिणः सूक्ष्मविपुलप्रवेशानुगुणस्थूलसूक्ष्मशरीरवन्तः ॥ १०—१३ ॥ अन्येत्वित्यादिसार्धश्लोकद्वयमेकान्वयं ॥ १४—१५ ॥

ति० समसौम्यानि आयामविस्ताराभ्यांसमानि समभूतलानिच । दुष्टमृगाद्युपद्रवराहित्येनसौम्यानि । अतएवक्रीडादौरम्याणीत्यर्थइतितीर्थः । समसाम्यानीतिपाठः । समप्रदेशे साम्यसंस्थानानि । रम्याणि मृगाद्युपद्रवराहित्यादितिकतकः ॥ २ ॥ ति० वननिर्झरे निर्झरयुतेवने । राजदन्तादिः ॥९॥ ति०प्राणसमत्वेनमन्दता ॥१३॥ ति० अन्येतु वनोपवनप्रवेष्टव्यतिरिक्ताः ।

[पा०] १ ङ. च. छ. झ. ञ. ट. बकुलसाल. २ ङ. ज. झ. ट. न्यतिरम्याणि. ३ क. ख. घ. ङ. च. झ. ञ. ट. बर्हिणैः. ४ ङ. झ. राजाधिगीतानि. ५ क. ख. च. छ. ञ. कुररैः. ङ. झ. ट. कुररखनितानिच. ६ च. ञ. ट. कोयष्टिकविघुष्टानि. क. छ. कोयष्टिकविपुष्टानि. ७ ङ. च. छ. झ. ञ. ट. प्राणसमोऽनिलः. ८ ङ. झ. ट. विहगान्ग्लापयन्तो.

रजश्च सहसैवोर्ध्वं जगाम चरणोत्थितम् ॥ १६ ॥
ऋक्षाः सिंहा वराहाश्च महिषा वारणा मृगाः ॥ तेन शब्देन वित्रस्ता जग्मुर्भीता दिशो दश ॥१७॥
शिखरं तत्त्रिकूटस्य प्रांशु चैकं दिविस्पृशम् ॥ समन्तात्पुष्पसंछन्नं महारजतसन्निभम् ॥ १८ ॥
शतयोजनविस्तीर्णं विमलं चारुदर्शनम् ॥ श्लक्ष्णं श्रीमन्महच्चैव दुष्प्रापं शकुनैरपि ॥
मनसाऽपि दुरारोहं किं पुनः कर्मणा जनैः ॥ १९ ॥
निविष्टा तत्र शिखरे लङ्का रावणपालिता ॥ शतयोजनविस्तीर्णा त्रिंशद्योजनमायता ॥ २० ॥
सा पुरी गोपुरैरुच्चैः पाण्डुराम्बुदसन्निभैः ॥ काञ्चनेन च सालेन राजतेन च शोभिता ॥ २१ ॥
प्रासादैश्च विमानैश्च लङ्का परमभूषिता ॥ घनैरिवातपापाये मध्यमं वैष्णवं पदम् ॥ २२ ॥
यस्यां स्तम्भसहस्रेण प्रासादः समलङ्कृतः ॥ कैलासशिखराकारो दृश्यते खमिवोल्लिखन् ॥ २३ ॥
चैत्यः स राक्षसेन्द्रस्य बभूव पुरभूषणम् ॥ बलेन रक्षसां नित्यं यः समग्रेण रक्ष्यते ॥ २४ ॥
मनोज्ञां काननवतीं पर्वतैरुपशोभिताम् ॥ नानाधातुविचित्रैश्च उद्यानैरुपशोभिताम् ॥ २५ ॥
नानाविहगसंघुष्टां नानामृगनिषेविताम् ॥ नानाकाननसंतानां नानाराक्षससेविताम् ॥ २६ ॥
तां समृद्धां समृद्धार्थो लक्ष्मीवाँल्लक्ष्मणाग्रजः ॥ रावणस्य पुरीं रामो ददर्श सह वानरैः ॥ २७ ॥

रजश्चेत्यर्धमेकं वाक्यं ॥ चरणोत्थितं वानरपादाहतिजनितं । रजः ऊर्ध्वं जगाम । उत्थितमित्यर्थः ॥१६॥ अत्र ऋक्षादयो लङ्कावनवासिनः । भीताः दर्शनादेव भीताः । तेन शब्देन वित्रस्ताः विशेषेण त्रस्ताः । दश दिशो जग्मुः । यथायथं जग्मुरित्यर्थः ॥ १७ ॥ एवं त्रिकूटस्य प्रथमशिखरं सुवेलाख्यमुक्त्वा मध्यमशिखरं वर्णयति—शिखरं तदित्यादिना ॥ सार्धश्लोकद्वयमेकान्वयं । तत् प्रसिद्धं । प्रांशु पार्श्ववर्तिशिखरद्वयापेक्षया उन्नतं । एकं अद्वितीयं । मध्यममित्यर्थः । स्पृशतीति स्पृशं । इगुपधलक्षणः कप्रत्ययः । समन्तात्पुष्पसंछन्नं अतएव महारजतसन्निभं पृथुरजतसन्निभं । यद्वा सुवर्णसन्निभमिति स्वरूपोक्तिः । चारुदर्शनं सुन्दरदर्शनं । एवंभूतं शिखरं अदृश्यतेत्यध्याहारः ॥ १८—१९ ॥ निविष्टेत्यादिश्लोकपञ्चकमेकान्वयं ॥ २० ॥ सालेन प्राकारेण ॥ २१ ॥ प्रासादैरिति । प्रासादादिलक्षणं प्रागेव लिखितं । आतपापाये वर्षारम्भसमये । मध्यमं वैष्णवं पदमिति । त्रिविक्रमावतारे त्रिभिः पदैः सर्वलोकक्रमणे मध्यमपदेनान्तरिक्षं क्रान्तमिति आकाशं मध्यमं वैष्णवं पदमिति उच्यते ॥ २२ ॥ उल्लिखन् व्याप्नुवन् नगरमध्यचतुष्पथं चैत्यं तत्र भवश्चैत्यः राक्षसेन्द्रस्य पुरभूषणमित्यन्वयः । यः समग्रेण रक्षसां शतेन नित्यं रक्ष्यते । यश्च राक्षसेन्द्रस्य पुरभूषणं बभूव । स्तम्भसहस्रेण समलंकृतः कैलासशिखराकारः खमुल्लिखन्निव स्थितः चैत्यः स प्रासादः यस्यां दृश्यते तादृशी रावणपालितत्वादिविशेषणविशिष्टा तत्र शिखरे निविष्टा लङ्का अदृश्यतेत्यध्याहारेणान्वयः ॥२३–२४॥ एवं वानराणामग्रगतानां लङ्कादर्शनमुक्त्वा रामस्यापि तद्दर्शनमाह—मनोज्ञामित्यादिश्लोकत्रयमेकान्वयं ॥ पर्वतैः क्रीडाशैलैः । नानाधातुविचित्रैरिति पर्वतविशेषणं । उद्यानैः कृत्रिमवनैः ॥ २५ ॥ नानाकाननेति पूर्वं काननवत्त्वमुक्तं अत्र तन्नानात्वमितिभिदा ॥ २६ ॥ समृद्धां उन्नतां । समृद्धार्थो समृद्धद्रव्यां । लक्ष्मीवान् नगरदर्शनजप्रीतिविकसितकान्तिः ॥२७॥

यूथान्निष्क्रम्यलङ्कांजग्मुः ॥ १४ ॥ ति० दशयोजनेति । इदंचलङ्कारूपमहादुर्गान्तर्वर्तिरावणवासस्थानभूतान्तर्दुर्गपरं । 'शतयोजनविस्तीर्णांत्रिंशद्योजनमायता' इत्यत्रैवान्यत्रस्थलेऽउक्तेः ॥ २० ॥ काञ्चनेन राजतेन । सालेन प्राकारेण ॥ २१ ॥ इत्येकोनचत्वारिंशः सर्गः ॥ ३९ ॥

[पा०] १ क. ख. ग. ङ.—ट. तस्य. २ क.—ट. दशयोजन. ३ गं. घ. च. छ. ज. तथाद्विगुणमायता. ङ. झ. ट. विंशद्योजनमायता. ४ क. ख. ग. ङ.—ट. शोभते. ५ क.—ट. शतेन. ६ ङ. झ. ञ. ट. काञ्चनवतीं. ७ ज. नानागृहसमाकीर्णां. ८ ख. ग. घ. च. छ. समृद्धार्थो.

तां महागृहसंबाधां दृष्ट्वा लक्ष्मणपूर्वजः ॥ [1]नगरीममरप्रख्यो विस्मयं प्राप वीर्यवान् ॥ २८ ॥
तां रत्नपूर्णां बहुसंविधानां प्रासादमालाभिरलङ्कृतां च ॥
पुरीं महायन्त्रकवाटमुख्यां ददर्श रामो महता बलेन ॥ २९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

चत्वारिंशः सर्गः ॥ ४० ॥

सुवेलाचलस्थित्यालङ्कामवलोकमानेरामे पार्श्वस्थेनसुग्रीवेण लङ्कागोपुरशृङ्गेराजोपचारै रामाभिमुखावस्थितरावणावलोकनम् ॥ १ ॥ तथाकोपादुत्प्लवेनरावणनिकटमेत्य तत्किरीटपातनपूर्वकं तेनसहचिरंनियुद्धकरणम् ॥ २ ॥ तथा श्रान्तेनतेन मायोपक्रमे लाघवात्पुनारामपार्श्वागमनम् ॥ ३ ॥

ततो रामः सुवेलाग्रं योजनद्वयमण्डलम् ॥ [2]आरुरोह ससुग्रीवो हरियूथपसंवृतः ॥ १ ॥
स्थित्वा मुहूर्तं तत्रैव दिशो दश विलोकयन् ॥ त्रिकूटशिखरे रम्ये निर्मितां विश्वकर्मणा ॥
ददर्श लङ्कां सुन्यस्तां रम्यकाननशोभिताम् ॥ २ ॥
[3]तस्यां गोपुरशृङ्गस्थं राक्षसेन्द्रं दुरासदम् ॥ ३ ॥
श्वेतचामरपर्यन्तं विजयच्छत्रशोभितम् ॥ रक्तचन्दनसंलिप्तं [4]रत्नाभरणभूषितम् ॥ ४ ॥
नीलजीमूतसंकाशं हेमसंछादिताम्बरम् ॥ ऐरावतविषाणाग्रैरुत्कृष्टकिणवक्षसम् ॥ ५ ॥
शशलोहितरागेण संवीतं रक्तवाससा ॥ सन्ध्यातपेन [5]संवीतं मेघराशिमिवाम्बरे ॥ ६ ॥
पश्यतां वानरेन्द्राणां राघवस्यापि पश्यतः ॥ दर्शनाद्राक्षसेन्द्रस्य सुग्रीवः सहसोत्थितः ॥ ७ ॥
क्रोधवेगेन संयुक्तः सत्त्वेन च बलेन च ॥ अचलाग्रादथोत्थाय पुप्लुवे गोपुरस्थले ॥ ८ ॥

अमरप्रख्यः देवसदृशः ॥ २८ ॥ पुनःसंग्रहेणाह—तामिति ॥ रत्नानि श्रेष्ठवस्तूनि । संविधानं रक्षणं ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

अथ सुग्रीवरावणयोर्द्वन्द्वयुद्धकथनं चत्वारिंशे । अत्र प्रथमश्लोकः पूर्वोक्तानुवादः—तत इति ॥ योजनद्वयमण्डलं योजनद्वयविस्तारमण्डलं ॥ १ ॥ सुन्यस्तां सुष्ठु निवेशितां ॥ २ ॥ तस्यामित्यादि सार्धश्लोकत्रयमेकान्वयं ॥ अत्र ददर्शेत्यनुषज्यते । श्वेते चामरे पर्यन्ते पार्श्वद्वये यस्य स श्वेतचामरपर्यन्तः । उभयतो वीज्यमानचामर इत्यर्थः । विजयच्छत्रं विजयसूचकछत्रं । रत्नाभरणं पद्मरागाभरणं । हेमसंछादिताम्बरं तत्र तत्र सुवर्णचित्राम्बरं । सुवर्णसूत्रिताम्बरमिति वार्थः । उत्कृष्टकिणवक्षसं उपपादितकिणवक्षसं । उत्कृष्टस्य उल्लिखितस्य किणः वक्षसि यस्य स तथेति वार्थः । शशलोहितरागेण शशरुधिरसमानरागेण । रक्तशब्दविवरणमिदं । रक्तवाससा उत्तरीयेण । संवीतं परिवीतं ॥ ३—६ ॥ " हतं च रावणं संख्ये दर्शनादवधारय " इति रामसन्निधौ पूर्वं प्रतिज्ञातमर्थं साधयितुमुत्थितः सुग्रीवइत्याह—पश्यतामित्यादिना ॥ पश्यतामित्यनादरे षष्ठी । अत्रानादरणमनुक्त्वा गमनं । सप्तम्यर्थेषष्ठीवा । दर्शनात् दर्शनमात्रात् । क्रोधवेगेन कथं मत्स्वामिनोग्रे स्वयं राजोपचारेण तिष्ठति दुरात्मेति कोपातिशयेनेत्यर्थः । सत्त्वेन मनोबलेन । बलेन कायबलेन । पुप्लुवे गोपुरमुद्दिश्येति शेषः ॥ गोपुरस्थले स्थित्येत्य-

---

स० रक्तवाससा स्नेहविषयेणवस्त्रेण ॥ ६ ॥

[पा०] १ ङ. ञ. ट. नगरीत्रिदिवप्रख्यां. २ ङ. ञ. ट. उपारोहत्ससुग्रीवोहरियूथैःसमन्वितः. ३ ङ. ञ. तस्य. ४ ग. ङ. च. ञ. ञ. ट. रक्ताभरणभूषितं. ५ क. ग. ङ.—ट. संछन्नं. ६ क. ख. ग. च. ञ. संतप्तः.

स्थित्वा मुहूर्तं संप्रेक्ष्य निर्भयेनान्तरात्मना ॥ तृणीकृत्य च तद्रक्षः सोब्रवीत्परुषं वचः ॥ ९ ॥
लोकनाथस्य रामस्य सखा दासोस्मि राक्षस ॥ न मया मोक्ष्यसेऽद्य त्वं पार्थिवेन्द्रस्य तेजसा ॥१०॥
इत्युक्त्वा सहसोत्पत्य पुप्लुवे तस्य चोपरि ॥ आकृष्य मुकुटं चित्रं पातयित्वाऽपतद्भुवि ॥ ११ ॥
समीक्ष्य तूर्णमायान्तमाबभाषे निशाचरः ॥ सुग्रीवस्त्वं परोक्षं मे हीनग्रीवो भविष्यसि ॥ १२ ॥
इत्युक्त्वोत्थाय तं क्षिप्रं बाहुभ्यामाक्षिपत्तले ॥ कन्तुवत्तं समुत्थाय बाहुभ्यामाक्षिपद्धरिः ॥ १३ ॥

परस्परं स्वेदविदिग्धगात्रौ परस्परं शोणितदिग्धदेहौ ॥
परस्परं श्लिष्टनिरुद्धचेष्टौ परस्परं शाल्मलिकिंशुकौ यथा ॥ १४ ॥
मुष्टिप्रहारैश्च तलप्रहारैररत्निघातैश्च कराग्रघातैः ॥
तौ चक्रतुर्युद्धमसह्यरूपं महाबलौ वानरराक्षसेन्द्रौ ॥ १५ ॥
कृत्वा नियुद्धं भृशमुग्रवेगौ कालं चिरं गोपुरवेदिमध्ये ॥
उत्क्षिप्य चाक्षिप्य विनम्य देहौ पादक्रमाद्गोपुरवेदिलग्नौ ॥
अन्योन्यमाविध्य विलग्नदेहौ तौ पेततुः सालनिखातमध्ये ॥ १६ ॥
उत्पेततुर्भूतलमस्पृशन्तौ स्थित्वा मुहूर्तं त्वभिनिश्वसन्तौ ॥
आलिङ्ग्य चावल्ग्य च बाहुयोक्त्रैः संयोजयामासतुराहवे तौ ॥ १७ ॥
संरम्भशिक्षाबलसंप्रयुक्तौ संचेरतुः संप्रति युद्धमार्गैः ॥
शार्दूलसिंहाविव जातदर्पौ गजेन्द्रपोताविव संप्रयुक्तौ ॥ १८ ॥

न्वयः । अन्तरात्मना मनसा ॥ ७—९ ॥ रामाभिप्रायेण सखा वस्तुतो दासोस्मीति भावः । मया मत्तः । औद्धत्यं परिहरति—पार्थिवेन्द्रस्य तेजसेति ॥ १०—११ ॥ आयान्तं सुग्रीवमितिशेषः । परोक्षं ममासन्निधाने । त्वं सुग्रीवः शोभनग्रीवः । प्रत्यक्षं तु हीनग्रीवो भविष्यसीत्यर्थः ॥ १२ ॥ तले गोपुरतले । आक्षिपत् अपातयत् । कन्तुवत्समुत्थाय कन्तुकवज्झटित्युत्पत्येत्यर्थः ॥ १३ ॥ परस्परमित्यादि श्लोकद्वयमेकान्वयं ॥ आरम्भे दृढपरीरम्भेण स्वेदसिक्तगात्रौ । ततः खरतरनखक्षतेन शोणितलिप्तशरीरौ । ततो दृढाश्लिष्टतया निरुद्धचेष्टौ निष्पन्दौ । ततः परस्परत्यागे कुसुमितशाल्मलीकिंशुकाविव स्थितौ । तौ वानरराक्षसेन्द्रौ । मुष्टिप्रहारैः । मुष्टीनां व्यथायां तलप्रहारैः । तत्पीडायां अरत्निघातैः निष्कनिष्ठमुष्टियुक्तप्रकोष्ठप्रहारैः । " अरत्निस्तु निष्कनिष्ठेन मुष्टिना " इत्यमरः । तद्बाधायां कराग्रघातैः । असह्यरूपं अत्यन्तासह्यं । प्रशंसायां रूपप्प्रत्ययः । युद्धं चक्रतुः ॥ १४—१५ ॥ कृत्वेत्यादिसार्धश्लोकएकान्वयः ॥ नियुद्धं मल्लयुद्धं बाहुयुद्धं वा । " नियुद्धं बाहुयुद्धं स्यात् " इत्यमरः । गोपुरवेदिमध्ये चिरं कालं नियुद्धं कृत्वा । तत उत्क्षिप्य परस्परमूर्ध्वं क्षिप्त्वा । आक्षिप्य आकृष्य । परस्परंदेहौ विनम्य विनाम्य । पादक्रमात् पादविन्यासविशेषात् । गोपुरवेदिलग्नौ पदात्पदं पश्चाच्चलित्वा पुनर्युद्धार्थमवसरप्रतीक्षतया गोपुरवेदिकायां निश्चलंस्थितावित्यर्थः । आविध्य बाहुभ्यां संवेष्ट्य । विलग्नदेहौ श्लिष्टदेहौ सन्तौ । सालनिखातयोः प्राकारपरिखयोर्मध्ये पेततुः ॥ १६ ॥ लाघवातिशयेन भूतलमस्पृष्ट्वैव उत्पेततुः । ततो मुहूर्तं तूष्णीं स्थित्वा श्रमवशादभिनिश्वसन्तौ पुनरालिङ्ग्य स्वयमेव स्वशरीरमालिङ्ग्य । आवल्ग्य आप्लुत्य । बाहुयोक्त्रैः बाहुपाशैः संयोजयामासतुः । देहाविति शेषः । निबिडं बबन्धतुरित्यर्थः ॥ १७ ॥ संरम्भेति । संरम्भः अभिनिवेशः । शिक्षा अभ्यासः । बलं शक्तिः । एतैः संप्रयुक्तौ संयुक्तौ सन्तौ संप्रति युद्धमार्गैः चातुर्येण परस्परग्रहणानुकूलक्रमैरित्यर्थः । संप्रति तदानीमित्यर्थ इत्येके । शार्दूलसिंहौ शार्दूलश्रेष्ठौ । संप्रयुक्तौ

[पा०] १ घ.—ट. पातयामासतद्भुवि. २ ङ. च. छ. झ. ञ. ट. किंशुकाविव. ३ क. ग. ङ.—ट. मापीड्य. ४ च. छ. ज. ट. चापीड्य. क. ग. घ. चाबध्य.

संहत्य चापीड्य च तावुरोभ्यां निपेततुर्वै युगपद्धरण्याम् ॥
उद्यम्य चान्योन्यमधिक्षिपन्तौ संचक्रमाते बहुयुद्धमार्गैः ॥ १९ ॥
व्यायामशिक्षाबलसंप्रयुक्तौ क्लमं न तौ जग्मतुराशु वीरौ ॥
बाहूत्तमैर्वारणवारणाभैर्निवारयन्तौ वरवारणाभौ ॥ २० ॥
चिरेण कालेन तु संप्रयुक्तौ संचेरतुर्मण्डलमार्गमाशु ॥ २१ ॥
तौ परस्परमासाद्य यत्तावन्योन्यसूदने ॥ मार्जाराविव भक्षार्थे वितस्थाते मुहुर्मुहुः ॥ २२ ॥
मण्डलानि विचित्राणि स्थानानि विविधानि च ॥ गोमूत्रिकाणि चित्राणि गतप्रत्यागतानि च ॥२३॥
तिरश्चीनगतान्येव तथा वक्रगतानि च ॥ परिमोक्षं प्रहाराणां वर्जनं परिधावनम् ॥ २४ ॥

सन्तौ गजेन्द्रपोतौ कलभौ। संहत्य संयोज्य। उरोभ्यामन्योन्यमापीड्य धरण्यां युगपन्निपेततुः। अथ उद्यम्य उद्धृत्य। अधिक्षिपन्तौ पातयन्तौ। एवं बहुयुद्धमार्गैः बहुयुद्धप्रकारैः। संचक्रमाते संचेरतुः ॥१८—१९॥ खुरल्यां श्रमजयाय कृतोभ्यासो व्यायामः तद्रूपा या शिक्षा तद्बलेन तदतिशयेन संप्रयुक्तौ संयुक्तौ। वार्यन्ते एभिरिति वारणाः आलानस्तम्भाः। वारणवारणाभैः बाहूत्तमैः अन्योन्यमाशु निवारयन्तावपि क्लमं श्रमं। न जग्मतुः ॥२०॥ चिरेणेत्यर्धं॥ चिरेणकालेन बहुकालेन। संप्रयुक्तौ युध्यमानौ तौ। मण्डलमार्गं चक्राकारमार्गं। चेरतुः चक्रतुरित्यर्थः। अयं च वक्ष्यमाणमार्गान्तराणामप्युपलक्षणं ॥ २१ ॥ तदेव प्रपञ्चयति—तावित्यादिना ॥ परस्परमासाद्य अन्योन्यसूदने अन्योन्यहिंसने। यत्तौ यत्नवन्तौ। भक्ष्यत इति भक्षः भक्ष्यद्रव्यं। तदर्थे तन्निमित्तं। मार्जाराविव वितस्थाते विशेषेण तस्थतुः। "समवप्रविभ्यःस्थः" इत्यात्मनेपदं। भक्षग्रहणदत्तावधानौ मार्जाराविव निश्चलं तस्थतुरित्यर्थः। मुहुर्मुहुरित्यनेन मध्येमध्ये मण्डलादिसंचारो व्यज्यते ॥२२॥ मण्डलानीत्यादि चतुःश्लोक्येकान्वया ॥ मण्डलानि परिभ्रमणविशेषान्। यथाहभरतः—"एकपादप्रचारो यः स चारीत्यभिधीयते। द्विपादक्रमणं यत्तु करणं नाम तद्भवेत् ॥ करणानां समायोगात्खण्डमित्यभिधीयते। खण्डैस्त्रिभिश्चतुर्भिर्वा संयुक्तं मण्डलं भवेत्" इति। विचित्राणि सव्यमपसव्यं सव्यापसव्यमर्धभ्रमणमित्यादिभेदाद्भिन्नानि। स्थानानि व्याघ्रसिंहादितुल्यावस्थानानिवैष्णवादिस्थानानि। पादयोः पूर्वापरतिर्यग्विक्षेपादिका विन्यासविशेषा इतियावत्। तदाहभरतः—"वैष्णवं समपादं च वैशाखं मण्डलं तथा। प्रत्यालीढमथालीढं स्थानान्येतानि षण्नृणां" इति पञ्चेति धनुर्वेदे। एषां लक्षणादिकथने ग्रन्थगौरवं स्यादिति तन्नाद्रियते। गोमूत्रिकाणि गोमूत्रसरणिसदृशानि गमनानि। गोमूत्रशब्दात्तदाकारगमनवाचकान्मत्वर्थे ठन्प्रत्ययः। गोमूत्रिकाणां चित्रत्वं गमनागमनादिभेदात्। गतप्रत्यागतानि उपसर्पणापसर्पणानि। एते उभयगतिप्रचारभेदाः। तिरश्चीनगतानि तिर्यग्गमनानि। वक्रगतानि सव्यापसव्यसंचरणानि। परिमोक्षं स्थानचालनेन प्रहाराणां मोघकरणं। वर्जनं प्रतिप्रयोगेण परिहरणं। परिधावनं एकस्य तिष्ठतः समन्तादन्यस्य गमनागमनं। अभिद्रवणं आभिमुख्येन शीघ्रं गमनं। आप्लावं अल्पाङ्गत्वानल्पाङ्गत्वादिभिर्विनम्य गमनं। ईषद्गमनं वा। मण्डूकवद्गमनमित्यर्थः। आस्थानं च सविग्रहं विग्रहसहितमास्थानं। विगृह्य केवलासनं प्रगृह्य निर्भयावस्थानमिति वार्थः। परावृत्तं पराङ्मुखगमनं। अपावृत्तं स्थित्वैव पश्चाच्चलनं। अवद्रुतं जिघृक्षया शरीरं संकुच्यावनम्य गमनं। अवप्लुतं प्रतियोधिनं पादेन प्रहर्तुमधोमुखेन प्लवनं। उपन्यस्तं प्रतियोधिबाहुग्रहणार्थं स्वबाहुप्रसारणं। अपन्यस्तं प्रतियोधिग्रहणवञ्चनार्थं स्वबाह्वोरपक्षेपणं। एवं खड्गविद्यामल्लशास्त्रादिषूपदिश्यते। तत्तन्निदर्शने नितान्तं ग्रन्थगौरवं स्यात्। अतस्तदुपेक्ष्यते ॥ २३—

ति० संवेदनं प्रेरणं ॥१९॥ स० वारयन्त्येभिःप्रतिगजानितिवारणानि कराः। वारणानांगजानां तानि तदाभैः। परवारणः मुत्तमातङ्गः ॥ २० ॥ इतिचत्वारिंशःसर्गः ॥ ४० ॥

[पा०] १ ङ.—ट. संहत्यसंवेद्य चतौकराभ्यांतौपेततुर्वैयुगपद्धरायां. २ ख. ङ. च. झ. ञ. ट. मार्गे. ३ झ. ञ. ठ. परवारणाभौ. ४ ग. ङ. च. छ. झ. ट. कालेनभृशंप्रयुद्धौ. क. घ. ज. ट. कालेनभृशंप्रयुक्तौ. ५ ङ. झ. ञ. ट. भक्षार्थेऽवतस्थाते.

अभिद्रवणमाप्लावमास्थानं च सविग्रहम् ॥ परावृत्तमपावृत्तमवद्रुतमवप्लुतम् ॥ २५ ॥
उपन्यस्तमपन्यस्तं युद्धमार्गविशारदौ ॥ तौ संचेरतुरन्योन्यं वानरेन्द्रश्च रावणः ॥ २६ ॥
एतस्मिन्नन्तरे रक्षो मायाबलमथात्मनः ॥ आरब्धुमुपसंपेदे ज्ञात्वा तं वानराधिपः ॥ २७ ॥
उत्पपात तदाकाशं जितकाशी जितक्रमः ॥ रावणः स्थित एवात्र हरिराजेन वञ्चितः ॥ २८ ॥
अथ हरिवरनाथः प्राप्य संग्रामकीर्तिं निशिचरपतिमाजौ योजयित्वा श्रमेण ॥
गगनमतिविशालं लङ्घयित्वाऽर्कसूनुर्हरिवरगणमध्ये रामपार्श्वं जगाम ॥ २९ ॥
इति स सवितृसूनुस्तत्र तत्कर्म कृत्वा पवनगतिरनीकं प्राविशत्संप्रहृष्टः ॥
रघुवरनृपसूनोर्वर्धयन्युद्धहर्षं तरुमृगगणमुख्यैः पूज्यमानो हरीन्द्रः ॥ ३० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

एकचत्वारिंशः सर्गः ॥ ४१ ॥

रामेण रावणैकरग्रहणविमोचनेनपुनरागतंसुग्रीवंप्रत्यालिङ्गनपूर्वकं पुनरपितादृशसाहसकरणप्रतिषेधनम् ॥ १ ॥ तथा लक्ष्मणंप्रति युद्धादिसूचकदुर्निमित्तप्रदर्शनपूर्वकं सुवेलादवतरणेनसुग्रीवेणसह रणायसेनासंनाहपूर्वकं लङ्कांप्रत्यभियानम् ॥ २ ॥ लङ्कांगतेनरामेण नीलाङ्गदहनुमतां क्रमेण प्रागादिद्वारनिरोधनचोदनपूर्वकं स्वयंलक्ष्मणेनसहरावणाधिष्ठितोत्तरद्वारनिरोधनम् ॥ ३ ॥ तथा राजनीत्यनुसारेणसंदेशनिवेदनाय रावणंप्रत्यङ्गदप्रेषणम् ॥ ४ ॥ अङ्गदेनरावणमेत्यरामसंदेशनिवेदने तन्नियोगेन राक्षसैरङ्गदग्रहणम् ॥५॥ तदुद्वहनेनैवगगनमुल्लङ्घनेनाङ्गदेन स्वाङ्गविधूननेनरक्षसामधःपातनपूर्वकं पादाभिघातात्प्रासादभञ्जनेन पुनारामपार्श्वागमनम् ॥ ६ ॥

अथ तस्मिन्निमित्तानि दृष्ट्वा लक्ष्मणपूर्वजः ॥ सुग्रीवं संपरिष्वज्य तदा वचनमब्रवीत् ॥ १ ॥

२६ ॥ एतस्मिन्नित्यादिश्लोकद्वयमेकान्वयं ॥ अन्तरे अवकाशे । मायाबलं परितोनेकरावणप्रदर्शनं । आरब्धुमुपसंपेदे कर्तुमुपचक्रमे । तं मायोपक्रमं । जितेन जयेन काशते प्रकाशत इति जितकाशी । रावणस्य मायाबलोपक्रम एव निर्मायं युध्यमानस्य सुग्रीवस्य जय इति ज्ञेय । जितक्रमः जितश्रमः । बलिना चिरं मल्लयुद्धकरणादिति भावः । अत्र प्रासादे स्थित एव रावणो वञ्चितः पुनरागमने प्रतारितः ॥ २७—२८ ॥ हरिवरनाथः क्षणेन रावणहरणार्हपरिकरनियन्ता । रामभक्तिरेव स्वयंगमनहेतुरिति भावः । प्राप्य संग्रामकीर्तिं । रामस्य युद्धादागतां कीर्तिं स्वयमाजहारेति भावः । निशिचरपतिं । तत्सदृशेष्वनेकेषु विद्यमानेष्वपि तांस्तृणीकृत्य तेनैव युद्धं कृतवानितिभावः । आजौ । रावणवन्न च्छद्मना युद्धकृत् किन्तु मर्यादयेति भावः । योजयित्वा श्रमेण इतः पूर्वं तदज्ञातेन श्रमेण योजयित्वा । योजनं हि पूर्वमसंभावितस्यैव रावणस्य श्रमफलं । आत्मनस्तु कीर्तिरितिभावः । गगनमतिविशालं लङ्घयित्वाऽर्कसूनुः स्वस्यादित्यपुत्रत्वज्ञापनायाकाशमयत्नेनालङ्घयत् । अर्कसूनुः अज्ञातगमनवेगः । हरिवरगणमध्ये विनयेन स्वातिशयमप्रकाशयन् वानरेष्वन्यतमइति स्थितः । रामपार्श्वं जगाम रावणशिरोऽनादायागतोहं कथमस्याग्रे तिष्ठेयमिति पार्श्वे स्थितः । निशिचरपतिं श्रमेण योजयित्वा जगामेत्यनेन रामस्य प्रतिज्ञाहानिर्मा प्रसांक्षीदिति रावणमहत्त्वैवागत इति सूचितम् । मायाप्रयोगारम्भे समागमनं स्वेनापि मायाप्रयोगे रामस्य कोपः स्यादित्याशयात् ॥ २९ ॥ रघुवरनृपसूनोः रामस्य । तरुमृगगणमुख्यैः वानरगणमुख्यैः ॥ ३० ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चत्वारिंशः सर्गः ॥ ४० ॥

अथ लङ्कावरोध एकचत्वारिंशे—अथेति ॥ तस्मिन्

[पा०] १ ङ. झ. ञ. मवस्थानंसविग्रहं. २ ङ. झ. ञ. विचेरतुः. ३ ख. घ.—छ. झ. ञ. प्राप्तसंग्रामकीर्तिः. च. प्राप्यकीर्तिंमहात्मा. ४ क.—ङ. झ. ट. हरिगणबलमध्ये, ५ ख. ङ. च. छ. झ. ट. रामोवचनं. क. घ. च. इदंवचनं.

असंमन्त्र्य मया सार्धं तदिदं साहसं कृतम् ॥ एवं साहसकर्माणि न कुर्वन्ति जनेश्वराः ॥ २ ॥
संशये स्थाप्य मां चेदं बलं च सविभीषणम् ॥ कष्टं कृतमिदं वीर साहसं साहसप्रिय ॥ ३ ॥
इदानीं मा कृथा वीर एवंविधमचिन्तितम् ॥ त्वयि किंचित्समापन्ने किं कार्यं सीतया मम ॥४॥
भरतेन महाबाहो लक्ष्मणेन यवीयसा ॥ शत्रुघ्नेन च शत्रुघ्न स्वशरीरेण वा पुनः ॥ ५ ॥
त्वयि चानागते पूर्वमिति मे निश्चिता मतिः ॥ जानतश्चापि ते वीर्यं महेन्द्रवरुणोपम ॥ ६ ॥
हत्वाऽहं रावणं युद्धे सपुत्रबलवाहनम् ॥ अभिषिच्य च लङ्कायां विभीषणमथापि च ॥
भरते राज्यमावेश्य त्यक्ष्ये देहं महाबल ॥ ७ ॥
तमेवंवादिनं रामं सुग्रीवः प्रत्यभाषत ॥ तव भार्यापहर्तारं दृष्ट्वा राघव रावणम् ॥
मर्षयामि कथं वीर जानन्पौरुषमात्मनः ॥ ८ ॥
इत्येवंवादिनं वीरमभिनन्द्य स राघवः ॥ लक्ष्मणं लक्ष्मिसंपन्नमिदं वचनमब्रवीत् ॥ ९ ॥
परिगृह्योदकं शीतं वनानि फलवन्ति च ॥ बलौघं संविभज्येमं व्यूह्य तिष्ठेमं लक्ष्मण ॥ १० ॥
लोकक्षयकरं भीमं भयं पश्याम्युपस्थितम् ॥ निबर्हणं प्रवीराणामृक्षवानररक्षसाम् ॥ ११ ॥

सुग्रीवे । निमित्तानि युद्धचिह्नानि । " निमित्तं हेतुलक्ष्मणोः " इत्यमरः ॥ १ ॥ जनेश्वराः राजानः । न कुर्वन्ति अस्मादृशपरिजने विद्यमाने न कुर्वन्तीत्यादरोक्तिः ॥ २ ॥ संशये संशयपदे । त्वत्साहसेऽस्मदादीनां जीवनं दुर्लभमिति भावः ॥ ३ ॥ इदानीमित्यादि श्लोकद्वयं ॥ इदानीं अद्यप्रभृति । अचिन्तितं अविचारितं । एवंविधं साहसं मा कृथाः । कुत इत्यत्राह—त्वयीति । त्वयि किञ्चित्समापन्ने । वानरेति संबोधनं । प्राप्ते मम सीतया किं कार्यं किं प्रयोजनं । अभिनववत्सवात्सल्येन पूर्ववत्समनभिलषन्त्या वत्सलाया गोरिव नित्यानपायिनीमपि सीतामनादृत्य तदानीमाश्रिते वानरमात्रेऽत्यभिनिवेशं कुर्वतो रामस्य वात्सल्यातिशय उच्यते । सीतया । " अर्धो वा एष आत्मनो यत्पत्नी " इत्यर्धशरीरभूतया न मे किञ्चित्कार्यं । भरतेन यवीयसेति कनिष्ठत्वमुच्यते । " भ्राता स्वा मूर्तिरात्मनः " इत्युक्तभरतादिनापि न मे किञ्चित्प्रयोजनं । स्वशरीरेण वा, " आत्मानं सर्वथा रक्षेद्दारैरपि धनैरपि " इत्युक्तशरीरेण वा किं क्रियते ॥ ४—५ ॥ एतदेव प्रपञ्चयति—त्वयीत्यादिना ॥ पूर्वं त्वय्यनागते सति । इति वक्ष्यमाणप्रकारेण मे मतिः निश्चितासीत् । जानतश्चापीति विशेषणेन अस्थाने भयशङ्कित्वोक्त्या वात्सल्यातिशय उक्तः । इतिशब्दार्थमाह—हत्वेति ॥ प्रतिज्ञानिर्वाहार्थमिति भावः । अभिषिच्येति । अन्यथा शरणागतिवैफल्यादिति भावः । भरत इति । अन्यथा कुलधर्मोच्छेदादिति भावः । महाबलेत्यनन्तरमितिकरणस्यान्वयः ॥ ६—७ ॥ तमेवमित्यादिसार्धश्लोकः ॥ पौरुषं त्वद्दास्यरूपं पुरुषधर्ममित्यर्थः । अतएवहि पूर्वं रावणान्तिके दासोस्मीत्युक्तवान् । जानन्नित्यनेन दासस्य कर्मैवेदं नतु साहसमित्युच्यते ॥ ८ ॥ अथ रामस्योत्साहविशेषं दर्शयति—इत्येवमिति ॥ लक्ष्मिसंपन्नमित्यत्र " इको ह्रस्वोऽङ्यो गालवस्य " इति ह्रस्वः । लक्ष्मीरत्र निमित्तदर्शनजः सन्तोषः ॥ ९ ॥ संविभज्य तत्तद्यूथपाधीनं कृत्वा । व्यूह्य गरुडादिरूपेण स्थापयित्वा ॥ १० ॥ लोकक्षयकरं लोकक्षयसूचकं । भीमं भयंकरं । भयं भयनि-

ति० त्वयिकिंचित्समापन्ने दैवात्तवापमानादिप्राप्तावित्यर्थः । "नाश्लीलंकीर्तयेत्" इत्युक्तेरेवंवादः । स० इदानीं इतःपरं । अचिन्तितं अनालोचितं । किंचिदितिसुकुमारोक्तिः । मरणमित्यर्थः । आपन्ने प्राप्ते । किंचिदित्यस्य तदर्थतानङ्गीकारेसीतयेत्याद्युत्तरग्रन्थास्वारस्यापत्तेः । "नाश्लीलंकीर्तयेत्" इत्युक्तेस्तथोक्तिः ॥ ४ ॥ ति० भगवन्कथमेवंमयितवप्राकृतइवशङ्कित्यत्राह—जानतश्चापीति । "अतिस्नेहः पापशङ्की" इतिन्यायादितिभावः ॥ ६ ॥

[पा०] १ क.—ट. साहसयुक्तानि. २ ङ. झ. ट. बलंचेमंविभीषणं. ३ ङ. झ. ट. मरिंदम. ४ ङ. झ. ट. मारोप्य. ५ घ. ङ. च. झ. ट. जानन्विक्रमं. ६ ख. ङ. झ. ञ. ट. तिष्ठाम.

वाताश्च परुषा वान्ति कम्पते च वसुन्धरा ॥ पर्वताग्राणि वेपन्ते पतन्ति धरणीरुहाः ॥ १२ ॥
मेघाः क्रव्यादसंकाशाः परुषाः परुषस्वनाः ॥ क्रूराः क्रूरं प्रवर्षन्ति मिश्रं शोणितबिन्दुभिः ॥१३॥
रक्तचन्दनसंकाशा सन्ध्या परमदारुणा ॥ ज्वलच्च निपतत्येतदादित्यादग्निमण्डलम् ॥ १४ ॥
आदित्यमभिवाश्यन्ति जनयन्तो महद्भयम् ॥ दीना दीनस्वरा घोरा अप्रशस्ता मृगद्विजाः ॥१५॥
रजन्यामप्रकाशश्च संतापयति चन्द्रमाः ॥ कृष्णरक्तांशुपर्यन्तो यथा लोकस्य संक्षये ॥
ह्रस्वो रूक्षोप्रशस्तश्च परिवेषः सुलोहितः ॥ १६ ॥
आदित्यमण्डले नीलं लक्ष्म लक्ष्मण दृश्यते ॥ दृश्यन्ते न यथावच्च नक्षत्राण्यभिवर्तते ॥
युगान्तमिव लोकस्य पश्य लक्ष्मण शंसति ॥ १७ ॥
काकाः श्येनास्तथा गृध्रा नीचैः परिपतन्ति च ॥ शिवाश्चाप्यशिवा वाचः प्रवदन्ति महास्वनाः॥१८॥
[शैलैः शूलैश्च खड्गैश्च विमुक्तैः कपिराक्षसैः ॥ भविष्यत्यावृता भूमिर्मांसशोणितकर्दमा ॥ १९ ॥]
क्षिप्रमद्य दुराधर्षां लङ्कां रावणपालिताम् ॥ अभियाम जवेनैव सर्वतो हरिभिर्वृताः ॥ २० ॥
इत्येवं संवदन्वीरो लक्ष्मणं लक्ष्मणाग्रजः ॥ तस्मादवातरच्छीघ्रं पर्वताग्रान्महाबलः ॥ २१ ॥
अवतीर्य च धर्मात्मा तस्माच्छैलात्स राघवः ॥ परैः परमदुर्धर्षं ददर्श बलमात्मनः ॥ २२ ॥
सन्नह्य तु स सुग्रीवः कपिराजबलं महत् ॥ कालज्ञो राघवः काले संयुगायाभ्यचोदयत् ॥ २३ ॥
ततः काले महाबाहुर्बलेन महता वृतः ॥ प्रस्थितः पुरतो धन्वी लङ्कामभिमुखः पुरीम् ॥ २४ ॥
तं विभीषणसुग्रीवौ हनुमाञ्जाम्बवान्नलः ॥ ऋक्षराजस्तथा नीलो लक्ष्मणश्चान्वयुस्तदा ॥ २५ ॥

मित्तं । न केवलं लोकस्य प्रवीराणां चेत्याह—निबर्हणमिति । विनाशसूचकमित्यर्थः ॥ ११ ॥ तदेव भयनिमित्तं प्रपञ्चयति—वाता इति ॥ पतन्ति अनिमित्तमिति शेषः ॥ १२ ॥ क्रव्यादसंकाशाः श्येनादिसदृशसंस्थानाः। परुषाः क्रूरवेषाः। क्रूराः लोकक्षयसूचकाः । मिश्रं जलमिति शेषः ॥ १३—१४ ॥ आदित्यमभि आदित्याभिमुखं । दीनाः दीनवेषाः । दीनस्वराः दैन्यसूचकस्वरवन्तः । अतएव घोराः भयंकराः । अप्रशस्ताः हीनाः शिवादयः ॥ १५ ॥ कृष्णरक्तान्तपर्यन्तः कृष्णान्तो रक्तपर्यन्तश्चेत्यर्थः । ह्रस्वः व्याममात्रः । रूक्षः भयंकरः । अप्रशस्तः अशुभकरः । सुलोहितः रक्तमध्यः । परिवेषः लोकस्य संक्षये यथा तथा । दृश्यत इति शेषः ॥ १६ ॥ आदित्येत्यादिसार्धश्लोकः ॥ लक्ष्म चन्द्रकलङ्क इवेत्यर्थः । तथैव छान्दोग्ये—"यदादित्यस्य कृष्णं रूपं" इत्यत्र उत्पातकाले तथा दृश्यत इति व्याख्यातं । नक्षत्राणि यथावत् यथाप्रकारेण न दृश्यन्ते । मलिनानि दृश्यन्त इत्यर्थः । उक्तं निमित्तजातं लोकस्य युगान्तं शंसतीवाभिवर्तत इतियोजना ॥ १७ ॥ नीचैः ह्रस्वं वेदिकास्थानं । परिपतन्ति प्राप्नुवन्ति । शिवा इति । अप्रशस्तमृगजात्युक्तावपि पुनरुक्तिरशुभाधिक्यात् ॥ १८—१९ ॥ अभियामेति वर्तमानकाले लोट् ॥ २०—२१ ॥ तस्मात् सुवेलात् । बलमित्यनेन सर्वं बलं न सुवेलमारुहदिति गम्यते ॥२२॥ राघवः ससुग्रीवः सन् । कपिराजबलं कपिश्रेष्ठानां बलं । सन्नह्य प्रोत्साह्य । काले युद्धकाले । संयुगाय युद्धाय । अभ्यचोदयत् ॥ २३ ॥ काले प्रातःकाले

स० अग्निमण्डलं अग्निसमूहः ॥ १४ ॥ स० ऋक्षराजो धूम्रः ॥ २५ ॥

[पा०] १ ङ. झ. ट. वाताहिपरुषं. ख. च. छ. ञ. वाताहिकलुषाः. २ क. घ. ङ. झ. ट. नदन्तिधरणीधराः. ख. च. पतन्तिचमहीरुहाः. ३ ङ. झ. प्रवर्षन्ते. ४ ख. ङ. झ. मप्रशस्तश्च. ५ च. छ. लोकक्षयइवोदितः. ६ ख. घ. ङ. च. झ. ञ. ट. प्यशुभाः. ७ अर्धश्लोकः क. ख. ङ. च. छ. झ. ञ. ट. पाठेषुदृश्यते. ८ ख.—ट. पुरीं. ९ च. ञ. प्रवदन्वीरो. १० ख.—छ. झ. ञ. ट. तौविभीषण.

ततः पश्चात्सुमहती पृतनर्क्षवनौकसाम् ॥ प्रच्छाद्य महतीं भूमिमनुयाति स्म राघवम् ॥ २६ ॥
शैलशृङ्गाणि शतशः प्रवृद्धांश्च महीरुहान् ॥ जगृहुः कुञ्जरप्रख्या वानराः परवारणाः ॥ २७ ॥
तौ तु दीर्घेण कालेन भ्रातरौ रामलक्ष्मणौ ॥ रावणस्य पुरीं लङ्कामासेदतुररिन्दमौ ॥ २८ ॥
पताकमालिनीं रम्यामुद्यानवनशोभिताम् ॥ चित्रवप्रां सुदुष्प्रापामुच्चैः प्राकारतोरणाम् ॥ २९ ॥
तां सुरैरपि दुर्धर्षां रामवाक्यप्रचोदिताः ॥ यथानिवेशं संपीड्य न्यविशन्त वनौकसः ॥ ३० ॥
लङ्कायास्तूत्तरद्वारं शैलशृङ्गमिवोन्नतम् ॥ रामः सहानुजो धन्वी जुगोप च रुरोध च ॥ ३१ ॥
लङ्कामुपनिविष्टश्च रामो दशरथात्मजः ॥ लक्ष्मणानुचरो वीरः पुरीं रावणपालिताम् ॥
उत्तरद्वारमासाद्य यत्र तिष्ठति रावणः ॥ ३२ ॥
नान्यो रामाद्धि तद्द्वारं समर्थः परिरक्षितुम् ॥ रावणाधिष्ठितं भीमं वरुणेनेव सागरम् ॥ ३३ ॥
सायुधैः राक्षसैर्भीमैरभिगुप्तं समन्ततः ॥ लघूनां त्रासजननं पातालमिव दानवैः ॥ ३४ ॥
विन्यस्तानि च योधानां बहूनि विविधानि च ॥ ददर्शायुधजालानि तत्रैव कवचानि च ॥ ३५ ॥
पूर्वं तु द्वारमासाद्य नीलो हरिचमूपतिः ॥ अतिष्ठत्सह मैन्देन द्विविदेन च वीर्यवान् ॥ ३६ ॥
अङ्गदो दक्षिणद्वारं जग्राह सुमहाबलः ॥ ऋषभेण गवाक्षेण गजेन गवयेन च ॥ ३७ ॥
हनुमान्पश्चिमद्वारं ररक्ष बलवान्कपिः ॥ प्रमाथिप्रघसाभ्यां च वीरैरन्यैश्च संगतः ॥ ३८ ॥
मध्यमे च स्वयं गुल्मे सुग्रीवः समतिष्ठत ॥ सह सर्वैर्हरिश्रेष्ठैः सुपर्णश्वसनोपमैः ॥ ३९ ॥
वानराणां तु षट्त्रिंशत्कोट्यः प्रख्यातयूथपाः ॥ निपीड्योपनिविष्टाश्च सुग्रीवो यत्र वानरः ॥४०॥
शासनेन तु रामस्य लक्ष्मणः सविभीषणः ॥ द्वारेद्वारे हरीणां तु कोटिंकोटिं न्यवेशयत् ॥ ४१ ॥
पश्चिमेन तु रामस्य सुग्रीवः सहजाम्बवान् ॥ अदूरान्मध्यमे गुल्मे तस्थौ बहुबलानुगः ॥ ४२ ॥
ते तु वानरशार्दूलाः शार्दूला इव दंष्ट्रिणः ॥ गृहीत्वा द्रुमशैलाग्रान्हृष्टा युद्धाय तस्थिरे ॥ ४३ ॥

॥ २४—२५ ॥ पृतना सेना ॥ २६ ॥ कुञ्जरप्रख्याः गजतुल्याः । परवारणाः शत्रुवारकाः ॥ २७—२८ ॥ पताकेत्यादिश्लोकद्वयं पताकमालिनीमित्यत्र "ङ्यापोः संज्ञाछन्दसोर्बहुलं" इति ह्रस्वः । उद्यानं कृत्रिमवनं । चित्रवप्रां चित्रचयां । यथानिवेशं यथास्थानं । रामवचोऽन्यूनं स्वं स्वं स्थानमनतिक्रम्येत्यर्थः । संपीड्य उपरुध्य ॥ २९—३० ॥ जुगोप परपरिभवादात्मीयं बलं ररक्षेत्यर्थः । रुरोधेत्यनेन " शिखरं तत्त्रिकूटस्य प्रांशु चैकं दिविस्पृशं " इत्युक्तत्रिकूटशिखरारोहणमर्थसिद्धं ॥ ३१ ॥ लङ्कामित्यादिसार्धश्लोक एकान्वयः ॥ लक्ष्मणानुचरो वीर इति पाठः । रावणो यत्र तिष्ठति तदुत्तरद्वारमासाद्य लङ्कामुपनिविष्ट इत्यन्वयः ॥ ३२ ॥ रामेणैव निरोद्धव्यत्वे हेतुमाह— नान्य इत्यादिश्लोकद्वयेन ॥ लघूनां अल्पसाराणां ॥ ३३—३४ ॥ विन्यस्तानि द्वारोपान्तवेदिकाविष्वितिशेषः ॥ ३५ ॥ मैन्देन द्विविदेन चेत्यादिना प्रतिद्वारमधिकयूथपतिगमनस्यात्रोक्तत्वात्पूर्वं रामेण ते नियुक्ता इति ज्ञेयं ॥ ३६—३८ ॥ मध्यम इति । दुर्जयरावणेन्द्रजिदधिष्ठितयोरुत्तरपश्चिमद्वारयोर्मध्ये तदुभयद्वारनिरोधकानां काकाक्षिन्यायेन साहाय्यं कर्तुं सुग्रीवः स्वयमतिष्ठदिति ज्ञेयम् । " पश्चिमेन तु रामस्य सुग्रीवः सहजाम्बवान् । अदूरान्मध्यमे गुल्मे तस्थौ बहुबलानुगः " इति वक्ष्यमाणत्वात् । सुपर्णो गरुडः ॥ ३९—४२ ॥ वानरशार्दूलाः वानरश्रेष्ठाः ।

स० उत्तरं द्वारं रावणास्थितं । जुगोप आत्मबलं । रुरोधच लङ्कां । जुगोप अन्तस्थितरावणाद्यन्तस्थितेनरूपेणजुगोप बहीरामरूपेणरुरोधचेतिवा । अन्तरेणरामप्रेरणांरावणःकिमपिकर्तुमक्षमइत्यनेन सूच्यते ॥ ३१ ॥ रामानु० लक्ष्मणानुचरो रामइतिपाठे रमयतीतिव्युत्पत्त्यारामविशेषणं ॥ ३२ ॥ स० तत् द्वारं । परिरक्षितुं रावणादयोयथानबहिरागच्छेयुस्तथा

[पा०] १ क.—ट. तौ त्वदीर्घेण. २ क. ग. घ. च.—ट. यथानिदेशं. ३ क. ख. ङ.—ट. तथैव. ४ [illegible] सुपेणस्सह.

सर्वे विकृतलाङ्गूलाः सर्वे दंष्ट्रानखायुधाः ॥ सर्वे विकृतचित्राङ्गाः सर्वे च विकृताननाः ॥ ४४ ॥
दशनागबलाः केचित्केचिद्दशगुणोत्तराः ॥ केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः ॥ ४५ ॥
सन्ति चौघबलाः केचित्केचिच्छतगुणोत्तराः ॥ अप्रमेयबलाश्चान्ये तत्रासन्हरियूथपाः ॥ ४६ ॥
अद्भुतश्च विचित्रश्च तेषामासीत्समागमः ॥ तत्र वानरसैन्यानां शलभानामिवोद्यमः ॥ ४७ ॥
परिपूर्णमिवाकाशं संछन्नेव च मेदिनी ॥ लङ्कामुपनिविष्टैश्च संपतद्भिश्च वानरैः ॥ ४८ ॥
शतं शतसहस्राणां पृथगृक्षवनौकसाम् ॥ लङ्काद्वाराण्युपाजग्मुरन्ये योद्धुं समन्ततः ॥ ४९ ॥
आवृतः स गिरिः सर्वैस्तैः समन्तात्प्लवङ्गमैः ॥ ५० ॥
अयुतानां सहस्रं च पुरीं तामभ्यवर्तत ॥ ५१ ॥
वानरैर्बलवद्भिश्च बभूव द्रुमपाणिभिः ॥ संवृता सर्वतो लङ्का दुष्प्रवेशापि वायुना ॥ ५२ ॥
राक्षसा विस्मयं जग्मुः सहसाऽभिनिपीडिताः ॥ वानरैर्मेघसंकाशैः शक्रतुल्यपराक्रमैः ॥ ५३ ॥
महाञ्शब्दोऽभवत्तत्र बलौघस्याभिवर्ततः ॥ सागरस्येव भिन्नस्य यथा स्यात्सलिलस्वनः ॥ ५४ ॥
तेन शब्देन महता सप्राकारा सतोरणा ॥ लङ्का प्रचलिता सर्वा सशैलवनकानना ॥ ५५ ॥
रामलक्ष्मणगुप्ता सा सुग्रीवेण च वाहिनी ॥ बभूव दुर्धर्षतरा सर्वैरपि सुरासुरैः ॥ ५६ ॥
राघवः सन्निवेश्यैव सैन्यं स्वं रक्षसां वधे ॥ संमन्त्र्य मन्त्रिभिः सार्धं निश्चित्य च पुनः पुनः ॥
आनन्तर्यमभिप्रेप्सुः क्रमयोगार्थतत्त्ववित् ॥ ५७ ॥

शैलाग्रानिति पुंस्त्वमार्षं ॥ ४३ ॥ विकृतलाङ्गूलाः ऊर्ध्वं प्रसारितपुच्छाः । विकृतचित्राङ्गा इत्यत्र विकृतत्वं कोपरक्तमुखनेत्रत्वं । अतएव चित्रं चित्रवर्णं अङ्गं येषां ते तथोक्ता इति विग्रहः । विकृताननाः राक्षसविडम्बनाय कुटिलितमुखाः ॥ ४४ ॥ दशगुणोत्तराः शतनागबला इत्यर्थः ॥ ४५ ॥ ओघबलाः ओघसङ्ख्याकनागबलाः । शतगुणोत्तराः ओघसङ्ख्याकनागबलेभ्यः शतगुणेन उत्तराः श्रेष्ठा इत्यर्थः । अप्रमेयबलाः अपरिच्छेद्यबलाः ॥ ४६ ॥ अद्भुतः आश्चर्यभूतः । विचित्रः वानरगोपुच्छभल्लूकजुष्टतया नानावर्णः । तत्र लङ्कायां तेषां वानरसैन्यानां । समागमः आगमनं । शलभानां शरभाणां अष्टापदमृगाणां । उद्यमः समागम इव आसीत् । तथा भयंकरोऽभूदित्यर्थः । यद्वा यथा शलभानां समागमो युगपद्भवति तथेति युगपत्पतने दृष्टान्तः ॥ ४७ ॥ परिपूर्णमिति अत्र इवशब्दद्वयमपि वाक्यालङ्कारे । उपनिविष्टैः पृथिवी पूर्णा । संपतद्भिः आगच्छद्भिस्तु । आकाशं पूर्णं । भूमाववकाशाभावादिति भावः ॥ ४८ ॥ शतसहस्राणां । ऋक्षवनौकसां शतं पूर्वनियुक्तेभ्योतिरिक्तं लङ्काद्वाराण्युपाजगाम । अन्ये वानराः समन्ततः युद्धार्थमुपाजग्मुरित्यन्वयः ॥४९॥ आवृत इत्यर्धमेकं वाक्यं ॥ स गिरिः त्रिकूटः ॥५०॥ अयुतानामित्यर्धं ॥ अयुतानां सहस्रं च तां पुरीमभ्यवर्ततेत्यनेन पूर्वोक्तस्य द्वारावरणस्यानन्तरं अयुतानां सहस्रं च पुरीं तां पर्यवारयदित्युच्यते ॥ ५१ ॥ दुष्प्रवेशा बभूवेत्यन्वयः ॥ ५२ ॥ अभिनिपीडिताः उपरुद्धाः । राक्षसाः । विस्मयं आश्चर्यं जग्मुः ॥५३॥ तत्र त्रिकूटशिखरे । भिन्नस्य भिन्नमर्यादस्य । सागरस्येव अभिवर्ततः अभिवर्तमानस्य बलौघस्य । सलिलस्वनो यथा स्यात् तथा महाञ्छब्दो बभूवेति योजना । अतो न यथाशब्दवैयर्थ्यं ॥ ५४ ॥ सशैलवनकाननेत्यत्र वनं उद्यानं ॥ ५५ ॥ सुग्रीवेणेति रक्ष्यसाहित्यमुच्यते ॥ ५६ ॥ राघव इत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ वधे विषये । आनन्तर्यं

तुमित्यर्थः ॥ ३३ ॥ स० नचराक्षसादीनामिवमायिकइत्याह—विचित्रइति । विगतमायइत्यर्थः । "चित्राखुपर्णीगोर्डुबासुभद्रादन्तिकासुच । मायायां" इतिभानुदीक्षितोदाहृताभिधानात् । विचित्रः अगगनगइतिवा । " लेख्यतिलकेषुविहायसि " इतिविश्वः ॥ ४७ ॥ ति० ऋक्षवनौकसांशतसहस्राणां । शतकोटिरित्यर्थः । "एवंचकोटिसंख्याःपृतनाः लङ्काद्वाराण्युपाजग्मुः । पृतनाःऋक्षेत्यत्रसंधिरार्षः ॥ ४९ ॥ स० रक्षसांवधे । एतेन लोकानुकूल्याएवराजनीत्यनुसरणं । नश्यतोतिरावणोतोमारणमेवनि-

[पा०] १ ख. ग. शैलानामिवसंगमः. ङ. च. छ. झ. ञ. ट. शलभानामिवोद्गमः. २ ङ. झ. ट. पृतनार्क्षवनौकसां.

विभीषणस्यानुमते राजधर्ममनुस्मरन् ॥ अङ्गदं वालितनयं समाहूयेदमब्रवीत् ॥ ५८ ॥
गत्वा सौम्य दशग्रीवं ब्रूहि मद्वचनात्कपे ॥ लङ्घयित्वा पुरीं लङ्कां भयं त्यक्त्वा गतव्यथः ॥५९॥
भ्रष्टश्रीक गतैश्वर्य मुमूर्षो नष्टचेतन ॥ ऋषीणां देवतानां च गन्धर्वाप्सरसां तथा ॥ ६० ॥
नागानामथ यक्षाणां राज्ञां च रजनीचर ॥ यच्च पापं कृतं मोहादवलिप्तेन राक्षस ॥
[तस्य पापस्य संप्राप्ता व्युष्टिरद्य दुरासदा ॥ ६१ ॥]
नूनमद्य गतो दर्पः स्वयंभूवरदानजः ॥ यस्य दण्डधरस्तेऽहं दाराहरणकर्शितः ॥
दण्डं धारयमाणस्तु लङ्काद्वारे व्यवस्थितः ॥ ६२ ॥
पदवीं देवतानां च महर्षीणां च राक्षस ॥ राजर्षीणां च सर्वेषां गमिष्यसि मया हतः ॥ ६३ ॥
बलेन येन वै सीतां मायया राक्षसाधम ॥ मामतिक्रामयित्वा त्वं हृतवांस्तन्निदर्शय ॥ ६४ ॥
अराक्षसमिदं लोकं कर्ताऽस्मि निशितैः शरैः ॥ न चेच्छरणमभ्येषि मामुपादाय मैथिलीम् ॥६५॥

अनन्तरकर्तव्यं । अभिप्रेप्सुः प्राप्तुमिच्छुः । संमन्त्र्य दूतः प्रेषणीय इति विचार्य । निश्चित्य अङ्गद एव प्रेषणीय इति निर्धार्य । क्रमयोगार्थतत्त्ववित् क्रमयुक्ता योगाः सामाद्युपायाः तेषामर्थः फलं तस्य तत्त्वं याथार्थ्यं वेत्तीति तथोक्तः । राजधर्ममनुस्मरन् युयुत्सया शत्रुपुरं प्रत्यागता राजानः युद्धार्थं दूतमुखेन प्रथममाह्वयन्तीत्येवं रूपं राजधर्ममनुस्मरन् । विभीषणस्यानुमते अनुमतौ सत्यां । अङ्गदं समाहूयेदमब्रवीदिति संबन्धः ॥ ५७—५८ ॥ हे सौम्य गतव्यथः गतश्रमः सन् । लङ्कां पुरीं तत्प्राकारं लङ्घयित्वा भयं त्यक्त्वा दशग्रीवं मद्वचनात् ब्रूहि मयोक्तमितिब्रूहीत्यर्थः । कपे इत्यनेन लङ्घनसामर्थ्यं द्योतयति ॥ ५९ ॥ भ्रष्टश्रीक भ्रष्टप्रायद्रविण । गतैश्वर्य गतप्रायनियन्तृत्व । संपदि भ्रष्टायामपि लोके नियन्तृत्वं संभवति । तदपिनास्तीत्यर्थः । तदुभयाभावेपि जीवनाशा संभवति सापिनास्तीत्याह—मुमूर्षो इति । तदानीमपि ज्ञानं संभवति तदपि नास्तीत्याह—नष्टचेतनेति ॥ ६० ॥ नागानां सर्पाणां । अवलिप्तेन गर्वितेन त्वया । ऋषिप्रमुखानां यत्पापं कृतं यो द्रोहः कृतः । तस्य कारणभूतः स्वयंभूवरदानजो दर्पो गतः गतप्राय इत्यन्वयः । तत्र हेतुमाह—यस्येति । दण्डधरः नियन्ता । अहं यस्य ते दण्डं धारयमाणः करिष्यमाण इत्यर्थः ॥ ६१—६२ ॥ एवंविधस्य नियमने तव किं भविष्यतीत्यत्राह—पदवीमिति ॥ पदवीं तेषुकृतं परिभवं तमपि गमिष्यसीत्यर्थः । यद्वा पदवीं लोकं । युद्धे स्थितः सन् तेषां लोकं गमिष्यसि । युद्धे स्थित्वा सर्वपापविशुद्धः सन् गतिं गमिष्यसि । ततस्तूर्णमागच्छेति भावः ॥ ६३ ॥ मायया मारीचमायया । मां अतिक्रामयित्वा अपवाह्य । त्यबभाव आर्षः । येन बलेन यद्बलमवलम्ब्य । सीतां हृतवानसि तद्बलं निदर्शयेत्यन्वयः ॥ ६४ ॥ मैथिलीमुपादाय समर्प्य मां शरणं नाभ्येषि चेदिमं लोकमराक्षसं कर्तास्मि । शरणागतौ तु सर्वं क्षमिष्य इति भावः । मैथिलीमुपादायेत्यनेन स्वर्णस्तेये स्वर्णप्रत्यर्पणमन्तरेण प्रायश्चित्तानधिकारवत्सीताप्रत्यर्पणाभावे शरणागतौ तु नाधिकार इत्युक्तं । रावणेन शरणागतौ कृतायां विभीषणाय कोसलराज्यं दास्यामीत्यभिप्रायः ॥६५॥

श्चितमितिसूचयति ॥ ५७ ॥ **ती०** राजधर्ममनुस्मरन्नितिपाठे राजदन्तादिलाद्धर्मशब्दस्यपूर्वनिपातः । **ति०** राजधर्ममनुस्मरन् सामादिरुपायसाध्येऽर्थेदण्डोनमोक्तव्यःप्रजानाशहेतुरित्येवंरूपंराजधर्ममनुचिन्तयन् । **स०** विभीषणस्यानुमतइति विभीषणस्याराज्याभिषेको जातइतिसन्धौ चनतदभिसन्धिसिद्धिरितितत्संमतीकरणमुचितमितिभावः । सर्वज्ञत्वंरामस्यविराजतइतिनदुश्चित्ततविभीषणस्येतिपरमार्थः ॥ ५८ ॥ **ती०** एवंविधस्यममनियमनेतवकिंभविष्यतीत्यत्राह—पदवीमिति । युद्धेस्थितः सन् दैवतादीनांपदवींपुण्यलोकंगमिष्यसीतिसंबन्धः । "राजभिर्धृतदण्डास्तुकृत्वापापानिमानवाः । निर्मलाःस्वर्गमायान्तिसन्तःसुकृतिनोयथा । राजत्वशासन्पापस्यतदवाप्नोतिकिल्बिषं" इतिवचनादुभयोरपिपापनिवृत्तिरूपंफलंभविष्यतीतिभावः ॥ ६३ ॥

[पा०] १ ङ. ञ. ञ. भ्रष्टश्रीकंगतैश्वर्यमुमूर्षुनष्टचेतनं. २ इदमर्धं क. ख. घ. च. छ. ञ. पाठेषुदृश्यते.

धर्मात्मा रक्षसां श्रेष्ठः संप्राप्तोयं विभीषणः ॥ लङ्कैश्वर्यं ध्रुवं श्रीमानयं प्राप्नोत्यकण्टकम् ॥ ६६ ॥
न हि राज्यमधर्मेण भोक्तुं क्षणमपि त्वया ॥ शक्यं मूर्खसहायेन पापेनाविदितात्मना ॥ ६७ ॥
युध्यस्व वा धृतिं कृत्वा शौर्यमालम्ब्य राक्षस ॥ मच्छरैस्त्वं रणे शान्तस्ततः पूतो भविष्यसि ॥६८॥
यद्वा विशसि लोकांस्त्रीन्पक्षिभूतो मनोजवः ॥ मम चक्षुष्पथं प्राप्य न जीवन्प्रतियास्यसि ॥ ६९ ॥
ब्रवीमि त्वां हितं वाक्यं क्रियतामौर्ध्वदैहिकम् ॥ सुदृष्टा क्रियतां लङ्का जीवितं ते मयि स्थितम् ॥७०॥
इत्युक्तः स तु तारेयो रामेणाक्लिष्टकर्मणा ॥ जगामाकाशमाविश्य मूर्तिमानिव हव्यवाट् ॥ ७१ ॥
सोर्तिपत्य मुहूर्तेन श्रीमान्रावणमन्दिरम् ॥ ददर्शासीनमव्यग्रं रावणं सचिवैः सह ॥ ७२ ॥
ततस्तस्याविदूरे स निपत्य हरिपुङ्गवः ॥ दीप्ताग्निसदृशस्तस्थावङ्गदः कनकाङ्गदः ॥ ७३ ॥
तद्रामवचनं सर्वमन्यूनाधिकमुत्तमम् ॥ सामात्यं श्रावयामास निवेद्यात्मानमात्मना ॥ ७४ ॥
दूतोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः ॥ वालिपुत्रोङ्गदो नाम यदि ते श्रोत्रमागतः ॥ ७५ ॥

शरणागत्यकरणे स्वकर्तव्यमाह—धर्मात्मेति ॥ यद्वा शरणागतौ प्राणत्राणं करिष्यामि न तु राज्यं दास्यामीत्यभिप्रायेणाह—धर्मात्मेति ॥ धर्मात्मा धर्मबुद्धिः । रक्षसां श्रेष्ठः राक्षसनायक इत्यर्थः । अयं विभीषणः । संप्राप्तः मां प्रपन्नः । तस्माल्लङ्कैश्वर्यमयं प्राप्नोति उत्तरक्षणे प्राप्स्यतीत्यर्थः । श्रीमान् तदनुगुणानुकूल्यवान् । एवं क्रियाभेदादयंशब्दद्वयोपपत्तिः ॥ ६६ ॥ एवं विभीषणस्य राज्ययोग्यतामुक्त्वा रावणस्य तदभावमाह—न हीति ॥ अधर्मेण धर्मरहितेन । अतएव पापेन पापिष्ठेन । अतएवाविदितात्मना अस्वाधीनमनस्केन । मूर्खसहायेन त्वया न शक्यमित्यन्वयः ॥ ६७ ॥ सीतामादाय शरणमागतोसि चेद्विभीषणाय राज्यं दत्त्वा त्वत्प्राणान् रक्षामि अन्यथा युध्यस्वेत्याह—युध्यस्वेति ॥ शान्तः मृतः । पूत इति । युद्धे अपरावृत्त्या मृतेः सर्वपापप्रायश्चित्तत्वादिति भावः ॥ ६८—६९ ॥ क्रियतामौर्ध्वदैहिकमिति अराक्षसकरणेन श्राद्धकर्त्रभावात्स्वयमेव जीवच्छ्राद्धं कुर्वित्यर्थः । सुदृष्टेति । म्रियमाणा हि चापलेन पुत्रकलत्रादिमुखदर्शनं कुर्वन्ति तद्वदिति भावः । मयि स्थितं मदायत्तं । अवश्यं त्वां नाशयामीत्यर्थः ॥ ७० ॥ मूर्तिमान् करचरणादिसंस्थानवान् । हव्यवाट् अग्निः ॥ ७१ ॥ अतिपत्य प्राप्य । अव्यग्रं ददर्शेत्यन्वयः । श्रीमानित्यनेन हर्षवत्त्वमुच्यते ॥ ७२—७३ ॥ उत्तमं पथ्यं । सामात्यं रावणमिति शेषः । आत्मना स्वयं । आत्मानं निवेद्य । आत्मनो वालिपुत्रत्वादिनिवेदनपूर्वकं रामवचनं कथयामासेत्यर्थः ॥ ७४ ॥ यदि ते श्रोत्रमा-

ति० शरणागतिं विनाजीवनंराज्यंचसुतरांदुर्लभमित्याह—धर्मात्मेत्यादि । इहागत्यमांशरणंप्राप्तोविभीषणइदंलङ्कैश्वर्यंअकण्टकंलब्धुंप्रकण्टकरहितं । ध्रुवंप्राप्नोति । तत्प्राप्तियोग्यतांधर्मात्मेत्यादिविशेषणैर्दर्शयति । धर्मात्मा धर्मप्रधानः । नित्यंधर्मचित्तश्च । इदमैश्वर्यस्यसाक्षान्निदानं । राक्षसश्रेष्ठेत्यनेन त्वदनन्तरंन्यायप्राप्तं तस्यराज्यमितिदर्शितं । श्रीमानित्यनेन तदैश्वर्यप्रापकाशेषलक्षणवत्त्वं । मांप्राप्येत्यनेन तत्प्रापकसमग्रसामग्रीसंपत्प्रदर्शिता ॥ ६६ ॥ स० मूर्खसहायेन अनेन । महान्तोनसन्तिवक्तारस्तवसमीपइतिसूच्यते । एतावत्कालपर्यन्तंराज्यभोजकादृष्टेन भुक्तंनक्तञ्चरराज्यं । इतःपरमधर्मशासकेमय्युपायातेतद्भोगयोगस्तवकथंस्यादितिभावः ॥ ६७ ॥ ति० शरणव्रजनेतुजीवितमेकांशेनराज्यंचतवापिदास्यामि । तदभावेतुदण्डाधिकारिणामयासर्वथावध्यस्त्वं । युद्धवधश्चपरमंहितंतवेतिपरमदयालुर्भगवांस्तदेवोपदिशति—युध्यस्वेति । मा मां धृतिंकृत्वा युध्यस्व । मच्छरैः पापशोधनाधिकृतस्य ममशरैः । रणेशान्तः समाप्तः । ततएवहेतोःशान्तः आजन्मकृतात्पापात्पूतोभविष्यसि दर्शननामस्मरणैःपापशोधनफलकएवायमवतारस्तत्रेनज्ञायते । तथाज्ञानाभावेपिमत्तोमरणेकिंचित्कालोत्तरमुत्तमक्षत्रियकुलेजन्मप्राप्तिरितिभावः ॥ ६८ ॥ स० और्ध्वदैहिकं मृत्यनन्तरंलोकान्तरेसुखप्रापकंदानादिकं । क्रियतां । अनुशतिकादित्वादुभयपदवृद्धिः । अनेन पुत्राअप्यसन्तइतिसर्वनाशेकर्ताकोपिनजीविष्यतीतिद्योत्यते । "प्रियैर्दत्तंप्रियंभवेत्" इतिदशरथोक्तेर्विभीषणेनकृतंसदपितवसंमतंनभवेदित्येवमुक्तिः ॥७०॥

[पा०] १ ख. ग. ङ. च. झ. ञ. ट. राक्षसश्रेष्ठः. २ ङ. झ. ट. लङ्कैश्वर्यमिदंश्रीमान्ध्रुवं. ३ क. च. छ. प्राप्नोत्यकण्टकं. ४ झ. माधृतिं. ५ ङ. झ. ट. शान्तोभविष्यसि. ६ क. ग.—ट. यद्याविशसि. ७ च. झ. ञ. ट. पक्षीभूतोनिशाचर. ङ. पक्षीभूत्वानिशाचर. ८ च. सोभिप्लुत्य. ९ क. ख. ग. ङ. झ. ट. स्तस्याविदूरेण.

आह त्वां राघवो रामः कौसल्यानन्दवर्धनः ॥ निष्पत्य प्रतियुध्यस्व नृशंस पुरुषो भव ॥ ७६ ॥
हन्तास्मि त्वां सहामात्यं सपुत्रज्ञातिबान्धवम् ॥ निरुद्विग्नास्त्वयो लोका भविष्यन्ति हते त्वयि ॥७७॥
देवदानवयक्षाणां गन्धर्वोरगरक्षसाम् ॥ शत्रुमद्योद्धरिष्यामि त्वामृषीणां च कण्टकम् ॥ ७८ ॥
विभीषणस्य चैश्वर्यं भविष्यति हते त्वयि ॥ न चेत्सत्कृत्य वैदेहीं प्रणिपत्य प्रदास्यसि ॥ ७९ ॥
इत्येवं परुषं वाक्यं ब्रुवाणे हरिपुङ्गवे ॥ अमर्षवशमापन्नो निशाचरगणेश्वरः ॥ ८० ॥
ततः स रोषताम्राक्षः शशास सचिवांस्तदा ॥ गृह्यतामेष दुर्मेधा वध्यतामिति चासकृत् ॥ ८१ ॥
रावणस्य वचः श्रुत्वा दीप्ताग्निसमतेजसः ॥ जगृहुस्तं ततो घोराश्चत्वारो रजनीचराः ॥ ८२ ॥
ग्राहयामास तारेयः स्वयमात्मानमात्मवान् ॥ बलं दर्शयितुं वीरो यातुधानगणे तदा ॥ ८३ ॥
स तान्बाहुद्वये सक्तानादाय पतगानिव ॥ प्रासादं शैलसंकाशमुत्पपाताङ्गदस्तदा ॥ ८४ ॥
तेऽन्तरिक्षाद्विनिर्धूतास्तस्य वेगेन राक्षसाः ॥ भूमौ निपतिताः सर्वे राक्षसेन्द्रस्य पश्यतः ॥ ८५ ॥
ततः प्रासादशिखरं शैलशृङ्गमिवोन्नतम् ॥ ददर्श राक्षसेन्द्रस्य वालिपुत्रः प्रतापवान् ॥ ८६ ॥
तत्पफाल पदाक्रान्तं दशग्रीवस्य पश्यतः ॥ पुरा हिमवतः शृङ्गं वज्रिणेव विदारितम् ॥ ८७ ॥
भङ्क्त्वा प्रासादशिखरं नाम विश्राव्य चात्मनः ॥ विनद्य सुमहानादमुत्पपात विहायसम् ॥८८॥
व्यथयन्राक्षसान्सर्वान्हर्षयंश्चापि वानरान् ॥ स वानराणां मध्ये तु रामपार्श्वमुपागतः ॥ ८९ ॥
रावणस्तु परं चक्रे क्रोधं प्रासादधर्षणात् ॥ विनाशं चात्मनः पश्यन्निश्वासपरमोऽभवत् ॥ ९० ॥
रामस्तु बहुभिर्हृष्टैर्निनदद्भिः प्लवङ्गमैः ॥ वृतो रिपुवधाकाङ्क्षी युद्धायैवाभ्यवर्तत ॥ ९१ ॥
सुषेणस्तु महावीर्यो गिरिकूटोपमो हरिः ॥ बहुभिः संवृतस्तत्र वानरैः कामरूपिभिः ॥ ९२ ॥
चतुर्द्वाराणि सर्वाणि सुग्रीववचनात्कपिः ॥ पर्यक्रामत दुर्धर्षो नक्षत्राणीव चन्द्रमाः ॥ ९३ ॥

गतः । मां श्रुतवानसि किमित्यर्थः ॥ ७५ ॥ राघव इत्यादिना छद्मना न योत्स्यत इत्युक्तं । कौसल्यानन्दवर्धन इत्यनेन बहुतपःप्रभावजनिततया धार्मिकत्वमुक्तं । निष्पत्य पुरान्निर्गत्य । पुरुषो भव शूरो भवेत्यर्थः । पुरुषाधमेति पाठे पुरोपरोधेष्यनिर्गमने नूनं पुरुषाधम एवासीति भावः ॥ ७६ ॥ हन्तेति अहमिति शेषः । निरुद्विग्नाः निर्भयाः ॥ ७७ ॥ उद्धरिष्यामि उन्मूलयिष्यामि । कण्टकं बाधकमित्यर्थः ॥ ७८—७९ ॥ आपन्नः प्राप्तः । बभूव ॥८०॥ दुर्मेधाः दुर्बुद्धिः । न दूतो वध्य इति शास्त्रानभिज्ञ इत्यर्थः । असकृच्छशासेत्यन्वयः । यद्वा दुर्मेधा इत्यङ्गदमेवाह ॥ ८१—८२ ॥ यातुधानगणे विषये स्वबलं दर्शयितुं । आत्मवान् धृतिमान् । स्वयं आत्मानं ग्राहयामास ग्रहीतुमनुमेने ॥ ८३—८६ ॥ पफाल व्यशीर्यत ॥ ८७ ॥ विश्राव्य विशेषेण श्रावयित्वा ॥ ८८—८९ ॥ प्रासादधर्षणात् प्रासादभञ्जनात् । पश्यन् तर्कयन् । निश्वासपरमः अधिकनिश्वासः ॥ ९० ॥ राम इति अङ्गदागमनं दृष्ट्वेति शेषः ॥ ९१ ॥ संवृतः बभूवेति शेषः । उत्तरश्लोकेनैकवाक्यत्वे हरिकपिशब्दयोःपौनरुक्त्यं स्यात् ॥ ९२ ॥ न्यूनताव्यावृ-

---

स० वनपर्वणिमार्कण्डेयोपाख्याने "इङ्गितज्ञास्ततोभर्तुश्चत्वारोरजनीचराः । चतुर्ष्वङ्गेषुजगृहुःशार्दूलमिवपक्षिणः" इत्युक्तेः 'गृह्यतांबध्यतामितिशशास' अङ्गचेष्टाभिःसूचयामास ॥ ८१ ॥ सत्य० राक्षसाः वचःश्रुत्वेवजगृहुः । चतुर्ष्वङ्गेषु स्कन्धभुजेषु पार्श्वद्वयवर्तिष्वितिसंभवत्यैककण्ठ्यं ॥ ८२ ॥ ति० युद्धायैवाभिवर्तत अभ्यवर्तत ॥ ९१ ॥

[पा०] १ क.—घ. च. ज. पुरुषाधम. २ ङ. झ. ट. रोषमापन्नः. ३ क. ख. ङ.—ट. गृह्यतामिति. ४ झ. ञ. ट. दीप्ताग्निमिवतेजसा. ५ क.—ङ. झ. ञ. ट. बाहुद्वयासक्तान्. ६ च. छ. ञ. हरिपुङ्गवः. ७ घ. शैलशृङ्गाभं. ८ ङ.—ट. तस्योत्पतनवेगेननिर्धूतास्तत्रराक्षसाः. ९ क.—ङ. मिवोच्छ्रितं. १० च. बभञ्ज. ङ. झ. ञ. ट. चकाम. ११ ङ. झ. ट. पफालचतदाक्रान्तं. ग. घ. तत्पफालतदाक्रान्तं. १२ ख.—ट. वज्रेणेव. १३ ख. ङ. झ. ट. विहायसा. १४ ङ. झ. ञ. ट. वाभिवर्तत. १५ ङ. झ. ट. सतुद्वाराणिसंयम्य.

तेषामक्षौहिणिशतं समवेक्ष्य व नौकसाम् ॥ लङ्कामुपनिविष्टानां सागरं चाभिवर्तताम् ॥ ९४ ॥
राक्षसा विस्मयं जग्मुस्त्रासं जग्मुस्तथा परे ॥ अपरे समरोद्धर्षाद्धर्षमेवं प्रपेदिरे ॥ ९५ ॥
कृत्स्नं हि कपिभिर्व्याप्तं प्राकारपरिखान्तरम् ॥ ददृशू राक्षसा दीनाः प्राकारं वानरीकृतम् ॥९६ ॥
हाहाकारं प्रकुर्वन्ति राक्षसा भयमोहिताः ॥ ९७ ॥

तस्मिन्महाभीषणके प्रवृत्ते कोलाहले राक्षसराजधान्याम् ॥
प्रगृह्य रक्षांसि महायुधानि युगान्तवाता इव संविचेरुः ॥ ९८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

द्विचत्वारिंशः सर्गः ॥ ४२ ॥

राक्षसैर्वानरसेनाकृतलङ्काद्वारनिरोधननिवेदितेनरावणेन प्रासादारोहणेन तत्सेनावलोकनम् ॥ १ ॥ उच्चप्रदेशारोहणेन लङ्कामवलोकयतारामेण सीतास्मरणेनशोचनपूर्वकं वानरान्प्रतियुद्धचोदना ॥ २ ॥ ततोरावणचोदितराक्षसानां वानराणांच युद्धारंभः ॥ ३ ॥

ततस्ते राक्षसास्तत्र गत्वा रावणमन्दिरम् ॥ न्यवेदयन्पुरीं रुद्धां रामेण सह वानरैः ॥ १ ॥
रुद्धां तु नगरीं श्रुत्वा जातक्रोधो निशाचरः ॥ विधानं द्विगुणं कृत्वा प्रासादं सोध्यरोहत ॥ २ ॥
स ददर्शावृतां लङ्कां सशैलवनकाननाम् ॥ असंख्येयैर्हरिगणैः सर्वतो युद्धकाङ्क्षिभिः ॥ ३ ॥
स दृष्ट्वा वानरैः सर्वां वसुधां कबलीकृताम् ॥ कथं क्षपयितव्याः स्युरिति चिन्तापरोऽभवत् ॥ ४ ॥
स चिन्तयित्वा सुचिरं धैर्यमालम्ब्य रावणः ॥ राघवं हरियूथांश्च ददर्शायतलोचनः ॥ ५ ॥
राघवः सह सैन्येन मुदितो नाम पुप्लुवे ॥ लङ्कां ददर्श गुप्तां वै सर्वतो राक्षसैर्वृताम् ॥ ६ ॥

त्यर्थं सर्वाणीत्युक्तं । कपिः सुषेणः । पर्यक्रामत परितश्चचार । नक्षत्राणि नक्षत्रनिरूपितराशीनित्यर्थः ॥ ९३ ॥ अक्षौहिणिशतमित्यत्र " ङ्यापोः संज्ञाछन्दसोर्बहुलं " इति ह्रस्वः । अनेकाक्षौहिणीमित्यर्थः । सागरंचाभिवर्ततां सागरसमीपे वर्तमानानामित्यर्थः । राक्षसाः धीरा इति शेषः । अपरे अधीरा इत्यर्थः । उद्धर्षात् गर्वात् ॥ ९४—९५ ॥ हरिभिर्व्याप्तं प्राकारपरिखान्तरं प्राकारपरिखयोरन्तरालं । वानरीकृतं वानरप्रचुरतया कृतं । अपरमिव प्राकारं ददृशुरित्यर्थः ॥ ९६ ॥ हाहेत्यर्थे ॥ ९७—९८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकचत्वारिंशः सर्गः ॥ ४१ ॥

अथ युद्धारम्भो द्विचत्वारिंशे—तत इति ॥ तत्र तस्मिन्काले ॥ १ ॥ विधानं रक्षणविधिं । द्विगुणं पूर्वस्मादधिकं ॥ २ ॥ स इति । सर्वत आवृतामित्यन्वयः ॥ ३ ॥ कबलीकृतां आच्छादितां । कपिलीकृतामितिपाठे वानरवर्णेन कपिलीकृतां । क्षपयितव्याः नाशयितव्याः । एत इति शेषः ॥ ४ ॥ आयतलोचन इत्यनेन विस्मयातिशय उच्यते ॥ ५ ॥ पुप्लुवे

ति० शतशब्दोनन्तवाची । सागरंचाभिवर्ततां सागरपर्यन्तमभिव्याप्यवर्तमानानामित्यर्थः ॥ ९४ ॥ शि० अपरेराक्षसास्त्रासंजग्मुः । अपरे अन्ये । समरेहर्षात् अन्यसमरहर्षस्मरणात् । हर्षमेवोपपेदिरे । श्लोकद्वयमेकान्वयि ॥ ९४—९५ ॥ इत्येकचत्वारिंशःसर्गः ॥ ४१ ॥

ति० मुदितःपुप्लुवे । नामशब्दोवाक्यालङ्कारे । प्राकारसमीपमितिशेषः । रामाधिरूढवानरप्लवनंरामेऽपचर्यते ॥ ६ ॥

[पा०] १ क. ख. ङ.—ट. मेवोपेपेदिरे. २ छ. वानरैःकृतं. ज. वानरैर्वृतं. ३ क.—ट. हाहाकारमकुर्वन्त. ४ ङ.—ट. भयमागताः. ५ ङ. च. झ. ट. सर्ववसुधां.

दृष्ट्वा दाशरथिर्लङ्कां चित्रध्वजपताकिनीम् ॥ जगाम सहसा सीतां दूयमानेन चेतसा ॥ ७ ॥
अत्र सा मृगशाबाक्षी मत्कृते जनकात्मजा ॥ पीड्यते शोकसन्तप्ता कृशा स्थण्डिलशायिनी ॥८॥
पीड्यमानां स धर्मात्मा वैदेहीमनुचिन्तयन् ॥ क्षिप्रमाज्ञापयामास वानरान्द्विषतां वधे ॥ ९ ॥
एवमुक्ते तु वचने रामेणाक्लिष्टकर्मणा ॥ संघर्षमाणाः प्लवगाः सिंहनादैरनादयन् ॥ १० ॥
शिखरैर्विकिरामैनां लङ्कां मुष्टिभिरेव वा ॥ इति स्म दधिरे सर्वे मनांसि हरियूथपाः ॥ ११ ॥
उद्यम्य गिरिशृङ्गाणि शिखराणि महान्ति च ॥ तरूंश्चोत्पाट्य विविधांस्तिष्ठन्ति हरियूथपाः ॥१२॥
प्रेक्षतो राक्षसेन्द्रस्य तान्यनीकानि भागशः ॥ राघवप्रियकामार्थं लङ्कामारुरुहुस्तदा ॥ १३ ॥
ते ताम्रवक्त्रा हेमाभा रामार्थे त्यक्तजीविताः ॥ लङ्कामेवाभ्यवर्तन्त साँलतालशिलायुधाः ॥ १४ ॥
ते द्रुमैः पर्वताग्रैश्च मुष्टिभिश्च प्लवङ्गमाः ॥ प्राकाराग्राण्यरण्यानि ममन्थुस्तोरणानि च ॥ १५ ॥
परिखाः पूरयन्ति स्म प्रसन्नसलिलायुताः ॥ पांसुभिः पर्वताग्रैश्च तृणैः काष्ठैश्च वानराः ॥ १६ ॥
ततः सहस्रयूथाश्च कोटियूथाश्च वानराः ॥ कोटीशतयुताश्चान्ये लङ्कामारुरुहुस्तदा ॥ १७॥
काञ्चनानि प्रमृद्नन्तस्तोरणानि प्लवङ्गमाः ॥ कैलासशिखराभाणि गोपुराणि प्रमथ्य च ॥ १८ ॥
आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः ॥ लङ्कां तामभिधावन्ति महावारणसन्निभाः ॥ १९ ॥
जयत्यतिबलो रामो लक्ष्मणश्च महाबलः ॥ राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ २० ॥
इत्येवं घोषयन्तश्च गर्जन्तश्च प्लवङ्गमाः ॥ अभ्यधावन्त लङ्कायाः प्राकारं कामरूपिणः ॥ २१ ॥

नाम पूर्वस्थानात् प्राकारसन्निकृष्टं प्रदेशं प्राप्त इत्यर्थः ॥ ६ ॥ दूयमानेनेति । सीतां स्मृत्वा दुःखितोभूदित्यर्थः ॥ ७ ॥ मृगशाबाक्षीत्यनेन शोकानर्हत्वमुच्यते । स्थण्डिलशायिनी भूतलशायिनी ॥ ८ ॥ पीड्यमानां राक्षसीभिरिति शेषः । धर्मात्मेत्यनेन दयालुत्वमुच्यते ॥ ९ ॥ वचने आज्ञापनरूपे । सङ्घर्षमाणाः स्पर्धमानाः । अनादयन् लङ्कामितिशेषः ॥ १० ॥ विकिराम चूर्णयाम । मनांसि दधिरे निश्चयं चक्रुरित्यर्थः ॥ ११ ॥ शिखराणि पर्वतखण्डान् । शिखरं शैलखण्डमिति संग्रहकारः । तिष्ठन्ति अतिष्ठन् ॥ १२ ॥ प्रेक्षतः प्रेक्षमाणमनादृत्य । तान्यनीकानि वानरानीकानि । भागशः स्वस्वनियुक्तप्रदेशे । लङ्कां लङ्काप्राकारं । राघवप्रियकामार्थं रामप्रीतिसिद्ध्यर्थमित्यर्थः ॥ १३ ॥ त्यक्तजीविताः "आशंसायां भूतवच्च" इति क्तः ॥ १४ ॥ अरण्यानि उद्यानानि । तोरणानि बहिर्द्वाराणि । ममन्थुः बभञ्जुरित्यर्थः ॥ १५–१६ ॥ कोटीशतयुताः कोटीशतयूथयुताः ॥ १७ ॥ काञ्चनानीत्यादिश्लोकद्वयं । काञ्चनानि काञ्चनकृतानि । प्रमृद्नन्तः चूर्णयन्तः । आप्लवन्तः प्लवन्तश्च गमनागमने कुर्वन्तः ॥ १८—२० ॥ घोषयन्तः घुष्यन्तः ।

तीo दूयमानेन संतप्यमानेन । चेतसा उपलक्षितः । मनसाजगाम सस्मारेत्यर्थः ॥ ७ ॥ **तिo** मत्कृते मन्निमित्तं । शोकसंतप्तापिपीड्यते मदर्थंरामस्यैवंमहाक्लेशोऽजायतेतिखिन्नाभवतीत्यर्थः ॥ ८ ॥ **तीo** राघवप्रियकामार्थं प्रियविषयःकामोमनोरथः तत्सिद्ध्यर्थं राघवस्यप्रियविषयमनोरथसिद्धयेइत्यर्थः ॥ १३ ॥ **सo** त्यक्तजीविताः तावत्पर्यन्तंधैर्ययुक्ताइत्यर्थः । **विo** त्यक्तजीविताः त्यक्तव्यजीविताः ॥१४॥ **तिo** परिखानितिपुंस्त्वमार्षं । **सo** पांशुभिः पांसुभिरितिपाठद्वयमेकार्थं । "तालव्याश्चैवदन्त्याश्चशंवशूकरपांशवः' इत्युक्तेः ॥ १६ ॥ **तिo** कैलासशिखराभाणि तद्वदुच्चावचानि गोपुराणि ॥ १८ ॥ **सo** कामरूपिणः वानराकारमध्यएवदीर्घाणुवैपुल्यादिस्वेच्छानुसारिरूपाः । अन्यथाप्राचीनसंकेतवैपरीत्यापत्तेः ॥ २१ ॥

[**पाo**] १ ख. ङ.—ट. मनसा. २ ङ. च. छ. झ. ट. निपीड्यमानां. ३ घ. ङ. झ. ट. माज्ञापयद्रामो. ४ ङ. च. झ. ट. वचसि. ५ ङ. च. झ. ञ. ट. रपूरयन्. ६ ङ. झ. ञ. ट. मैतां. ७ ङ. झ. ट. सालभूधरयोधिनः. ८ ग. ङ. च. ज.—ट. प्रासादाग्राण्यसंख्यानि. ९ ख. ङ. झ. ञ. ट. परिखान्पूरयन्तश्चप्रसन्नसलिलाशयान्. १० ङ च. झ. ञ. ट. कोटीयूथशताश्चान्ये. ११ क. छ. ज. प्रमृघ्नतः. १२ ङ.—ट. शिखराग्राणि.

वीरबाहुः सुबाहुश्च नलश्च [1]वनगोचरः ॥ निपीड्योपनिविष्टास्ते प्राकारं हरियूथपाः ॥
एतस्मिन्नन्तरे चक्रुः स्कन्धावारनिवेशनम् ॥ २२ ॥
पूर्वद्वारं तु कुमुदः कोटीभिर्दशभिर्वृतः ॥ आवृत्य बलवांस्तस्थौ हरिभिर्जितकाशिभिः ॥ २३ ॥
[2]साहाय्यार्थं तु तस्यैव निविष्टः प्रघसो हरिः ॥ पनसश्च महाबाहु[3]र्वानरैर्बहुभिर्वृतः ॥ २४ ॥
[4]दक्षिणं द्वारमागम्य वीरः शतबलिः कपिः ॥ आवृत्य बलवांस्तस्थौ विंशत्या कोटिभिर्वृतः ॥२५॥
सुषेणः पश्चिमद्वारं [5]गतस्तारापिता हरिः ॥ आवृत्य बलवांस्तस्थौ [6]षष्टिकोटिभिरावृतः ॥ २६ ॥
उत्तरं द्वार[7]मासाद्य रामः सौमित्रिणा सह ॥ आवृत्य बलवांस्तस्थौ सुग्रीवश्च हरीश्वरः ॥ २७ ॥
गोलाङ्गूलो महाकायो गवाक्षो भीमदर्शनः ॥ वृतः कोट्या महावीर्यस्तस्थौ रामस्य पार्श्वतः ॥२८॥
ऋक्षाणां भीमवेगानां धूम्रः शत्रुनिबर्हणः ॥ वृतः कोट्या महावीर्यस्तस्थौ रामस्य पार्श्वतः ॥ २९ ॥
सन्नद्धस्तु महावीर्यो गदापाणिर्विभीषणः ॥ वृतो यत्तैस्तु सचिवैस्तस्थौ तत्र महाबलः ॥ ३० ॥
गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ समन्तात्परिधावन्तो ररक्षुर्हरिवाहिनीम् ॥ ३१ ॥
ततः कोपपरीतात्मा रावणो राक्षसेश्वरः ॥ निर्याणं सर्वसैन्यानां द्रुतमाज्ञापयत्तदा ॥ ३२ ॥
एतच्छ्रुत्वा [8]ततो वाक्यं रावणस्य [9]मुखोद्गतम् ॥ सहसा भीमनिर्घोषमुद्घुष्टं रजनीचरैः ॥ ३३ ॥
ततः प्रचोदिता भेर्यश्चन्द्रपाण्डुरपुष्कराः ॥ हेमकोणाहता भीमा राक्षसानां समन्ततः ॥ ३४ ॥
विनेदुश्च महाघोषाः शङ्खाः शतसहस्रशः ॥ राक्षसानां सुघोराणां मुखमारुतपूरिताः ॥ ३५ ॥
ते बभुः [10]शुभनीलाङ्गाः सशङ्खा रजनीचराः ॥ विद्युन्मण्डलसन्नद्धाः सबलाका इवाम्बुदाः ॥ ३६ ॥

गर्जन्तः सिंहनादं कुर्वन्तः ॥२१॥ वीरबाहुरित्यादिसार्धश्लोक एकान्वयः ॥ एतस्मिन्नन्तरे प्रसिद्धाः वीरबाह्वादयः प्राकारं निपीड्योपनिविष्टाः सन्तः । स्कन्धावारस्य शिबिरस्य । निवेशनं निर्माणं । चक्रुः । युद्धेन्तरान्तरा विश्रमार्थं वासस्थानं स्कन्धावारः । यद्वा व्यूहीभावेन सेनास्थापनं स्कन्धावारः ॥ २२ ॥ निवेशनप्रकारमेवाह—पूर्वद्वारमित्यादिना ॥ कुमुदः पूर्वद्वारमावृत्य तस्थौ । ईशानकोणे स्थित्वा पूर्वद्वारमाक्रम्य स्थितवानित्यर्थः ॥ २३—२४ ॥ शतबलिः दक्षिणद्वारमावृत्य तस्थौ । आग्नेयकोणे स्थित्वा दक्षिणद्वारमाक्रम्य स्थितवानित्यर्थः ॥ २५ ॥ सुषेणः पश्चिमद्वारं गतः आवृत्य तस्थौ । नैर्ऋतकोणे स्थित्वा पश्चिमद्वारमाक्रम्य स्थितवानित्यर्थः ॥ २६ ॥ सुग्रीवश्चोत्तरं द्वारमावृत्य तस्थौ । " पश्चिमेन तु रामस्य सुग्रीवः सहजाम्बवान् । अदूरान्मध्यमे गुल्मे तस्थौ बहुबलानुगः " इत्युक्तप्रकारेण वायव्यकोणे स्थितस्य सुग्रीवस्य उत्तरद्वारनिरोधकत्वाभिधानादेतदनुसारेण कुमुदादीनां तत्तत्कोणावस्थितत्वेन तत्तद्वारनिरोधकत्वमिति व्याख्यातं ॥ २७—३० ॥ गजो गवाक्ष इति ॥ रामपार्श्वस्थात् गवाक्षादन्यो ज्ञेयः ॥३१॥ ततः वानरसेनासन्निवेशाद्धेतोः । तदा तस्मिन्सन्निवेशकाले ॥३२॥ भीमनिर्घोषं यथा भवतितथा उद्घुष्टं । उच्चैः सिंहनादःकृत इत्यर्थः ॥३३॥ प्रचोदिताः सेनाग्रे प्रेरिताः । चन्द्रपाण्डुरपुष्कराः चन्द्रशुभ्रमुखाः । संमार्जनसंस्कारविशेषेण तासां शुभ्रत्वं । " पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले " इत्यमरः । कोणो वाद्यताडनदण्डः । विनेदुरित्यनुकर्षः । अथवा प्रचोदिताः सस्वनुरित्यर्थः ॥ ३४—३५ ॥ शुभनीलाङ्गाः आभरणप्रभाभिः शोभमानानि नीलानि चाङ्गानि येषां ते । अतएव विद्युन्मण्डलसन्नद्धा इति नाधिकोपमा । विद्युन्मण्डलसन्नद्धा इत्युपमानविशेषणेनोपमेयेषु राक्षसेषु सभूषणत्वं गम्यत इत्यप्याहुः ॥३६॥

[पा०] १ ङ.—ट. पनसस्तथा. २ घ. च.—ट. सहायार्थंतु. ३ ख. ङ.—ट. वानरैरभिसंवृतः. ४ ख. ङ.—ट. दक्षिणद्वारमासाद्य. ५ ङ. झ. ञ. ट. गत्वातारापितावली. ६ च. झ. कोटिकोटिभिः. ७ ग. च. झ. ञ. ट. मागम्य. ८ ङ. झ. ञ. ट. भीमकोपानां. ९ ङ. छ. झ. ट. यत्र. १० ङ. च. झ. ट. तदा. ११ क.—घ. च. झ. ट. मुखेरितं. १२ ग. ङ.—ट. शुकनीलाङ्गाः. घ. शुकनीलाभाः.

निष्पतन्ति ततः सैन्या हृष्टा रावणचोदिताः ॥ समये[1] पूर्यमाणस्य वेगा इव महोदधेः ॥ ३७ ॥
ततो वानरसैन्येन मुक्तो नादः समन्ततः ॥ मलयैः[2] पूरितो येन ससानुप्रस्थकन्दरः ॥ ३८ ॥
शङ्खदुन्दुभिसंघुष्टः[3] सिंहनादस्तरस्विनाम् ॥ पृथिवीं चान्तरिक्षं च सागरं चैव नादयन् ॥ ३९ ॥
गजानां बृंहितैः[4] सार्धं हयानां हेषितैरपि ॥ रथानां नेमिघोषैश्च[5] रक्षसां वदनस्वनैः[6] ॥ ४० ॥
एतस्मिन्नन्तरे घोरः संग्रामः समवर्तत ॥ रक्षसां वानराणां च यथा देवासुरे पुरा ॥ ४१ ॥
ते गदाभिः प्रदीप्ताभिः शक्तिशूलपरश्वधैः ॥ निजघ्नुर्वानरान्घोराः कथयन्तः स्वविक्रमान् ॥४२॥
राजा[7] जयति सुग्रीव इति शब्दो महानभूत् ॥ ४३ ॥
राजञ्जयजयेत्युक्त्वा स्वस्वनामकथान्ततः ॥ तथा वृक्षैर्महाकायाः पर्वताग्रैश्च वानराः ॥
निजघ्नुस्तानि रक्षांसि नखैर्दन्तैश्च वेगिताः ॥ ४४ ॥
राक्षसास्त्वपरे भीमाः प्राकारस्था महीगतान् ॥ भिण्डिपालैश्च[11] खड्गैश्च शूलैश्चैव व्यदारयन् ॥४५॥
वानराश्चापि संक्रुद्धाः प्राकारस्थान्महीगताः ॥ राक्षसान्पातयामासुः समाप्लुत्य[12] प्लवङ्गमाः ॥ ४६ ॥
स संप्रहारस्तुमुलो मांसशोणितकर्दमः ॥ रक्षसां वानराणां च संबभूवाद्भुतोपमः ॥ ४७ ॥
[वनौकसां[13] तत्र भृशं निनादो लङ्कागतानां च निशाचराणाम् ॥
प्रक्ष्वेडितास्फोटितसिंहनादैर्द्वाभ्यां गताभ्यामिव सागराभ्याम् ॥ ४८ ॥]
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

सैन्याः सेनायां समवेता जनाः । " सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते " इत्यमरः । समये प्रलये । चन्द्रोदये वा । वेगाः पूराः ॥ ३७ ॥ मलयः त्रिकूटः । सः प्रसिद्धः । सानुप्रस्थकन्दरः अनुप्रस्थं प्रस्थे प्रस्थे स्थिताः याः कन्दरास्ताभिः सह वर्तत इति विग्रहः । यद्वा सानुः वप्रः प्रस्थः तटः कन्दरा गुहेत्यर्थः । सानुः महाप्रस्थः प्रस्थः क्षुद्रतटः कन्दरः दरी तैः सह वर्तत इति ससानुप्रस्थकन्दर इत्यप्याहुः ॥ ३८ ॥ शङ्खदुन्दुभीत्यादिश्लोकद्वयं ॥ शङ्खदुन्दुभिसंघुष्टः शङ्खदुन्दुभिसंघोषयुक्तः । तरस्विनां बलवतां । सिंहनादः गजबृंहितादिभिः सह पृथिव्यादिकं नादयन् अनादयत् ॥ ३९—४० ॥ देवासुरे यथा देवासुरविरोधे देवानामसुराणामिवेत्यर्थः । यद्वा षष्ठीबहुवचनस्य " सुपां सुलुक्—" इत्यादिना शेआदेशः ॥ ४१—४२ ॥ राजेत्यर्धं ॥ स्पष्टं ॥ ४३ ॥ राजन्नित्यादिसार्धश्लोकः ॥ स्वस्वनामकथान्तत इति । नामकथां चोक्त्वा ततो निजघ्नुरित्युत्तरत्रान्वयः । नामकथानां अन्ततः अन्ते इति वा योजना । वेगिताः सञ्जातवेगाः । वेपिता इति पाठे कोपेन कम्पमाना इत्यर्थः ॥ ४४ ॥ भिन्दिपालैः गदाभेदैः ॥ ४५ ॥ समाप्लुत्य प्राकाराग्रपर्यन्तमुत्पत्य । प्लवनं प्लुतगतिं गच्छन्तीति प्लवङ्गमाः । असंज्ञायामपि खशार्षः । अनेन प्लुतगतिमत्त्वमुक्तं । अतो न वानरशब्देन पुनरुक्तिः ॥४६॥ संप्रहारः युद्धं । तुमुलः परस्परसंकुलः । मांसशोणि-

---

ति० समये प्रलयकाले । पूर्यमाणस्य । महामेघैरितिशेषः । वेगास्तरङ्गाः ॥ ३७ ॥ ति० येनातिदूरवर्तीमलयोपिपूरितः स्यात्तादृशोनादोमुक्तः ॥ ३८ ॥ स० गजानांबृंहितैः बृंहितशब्दोत्रध्वनिमात्रपरः । एवमुत्तरत्रापि ॥ ४० ॥ स० 'राजाजयतिसुग्रीव'इतिकप्युक्तिः । 'राजञ्जयजय'इतिराक्षसोक्तिः ॥ ४३—४४ ॥ अत्र 'राक्षसास्त्वपरे' इत्यर्धंप्रक्षिप्तमितिकतकः ॥ ४५ ॥ स० सेनाप्रत्यवहारोत्रानुक्तोपि "ततःप्रत्यवहारोभूत्सैन्यानांराघवाज्ञया । ततोनिविशमानांस्तान्सैनिकान्रावणानुगाः । अभि-

[पा०] १ घ. शशिनापूर्ये. २ घ. च. ज. सुवेलः. ३ ङ. च. झ. ञ. ट. दुन्दुभिनिर्घोषः. ४ ख. ग. ङ. च. झ. ञ. ट. चाभ्यनादयत्. घ. चव्यनादयत्. ५ ङ. —ट. नेमिनिर्घोषैः. ६ ग. घ. च. झ. ञ. ट. पदनिस्स्वनैः. क. ख. ज. पादनिस्स्वनैः. ७ ख. च. छ. ञ. सघः. ८ क. ख. घ.—ट. समपद्यत. ९ च. झ. ञ. ट. वानरान्सर्वान्कथय. १० " राजाजयतिसुग्रीवः " " तथावृक्षैर्महाकायाः " इत्येतयोःश्लोकयोः झ. ञ. ट. ठ. पुस्तकेषुव्युत्क्रमोदृश्यते. ११ घ.—ट. वानरान्भिण्डिपालैश्चशूलैश्चैव. १२ झ. ट. खमाप्लुत्यबाहुभिः. १३ अर्धश्लोकः ज. पाठेदृश्यते.

त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

वानरराक्षसानांद्वन्द्वयुद्धम् ॥ १ ॥

युध्यतां तु ततस्तेषां वानराणां महात्मनाम् ॥ रक्षसां संबभूवाथ बलकोपः सुदारुणः ॥ १ ॥
ते हयैः काञ्चनापीडैर्ध्वजैश्चाग्निशिखोपमैः ॥ रथैश्चादित्यसंकाशैः कवचैश्च मनोरमैः ॥ २ ॥
निर्ययू राक्षसव्याघ्रा नादयन्तो दिशो दश ॥ राक्षसा भीमकर्माणो रावणस्य जयैषिणः ॥ ३ ॥
वानराणामपि चमूर्बृहती जयमिच्छताम् ॥ अभ्यधावत तां सेनां रक्षसां कामरूपिणाम् ॥ ४ ॥
एतस्मिन्नन्तरे तेषामन्योन्यमभिधावताम् ॥ रक्षसां वानराणां च द्वन्द्वयुद्धमवर्तत ॥ ५ ॥
अङ्गदेनेन्द्रजित्सार्धं वालिपुत्रेण राक्षसः ॥ अयुध्यत महातेजारुरुयम्बकेण यथाऽन्तकः ॥ ६ ॥
प्रजङ्घेन च संपातिर्नित्यं दुर्मर्षणो रणे ॥ जम्बुमालिनमारब्धो हनुमानपि वानरः ॥ ७ ॥
संगतः सुमहाँक्रोधो राक्षसो रावणानुजः ॥ समरे तीक्ष्णवेगेन मित्रघ्नेन विभीषणः ॥ ८ ॥
तपनेन गजः सार्धं राक्षसेन महाबलः ॥ निकुम्भेन महातेजा नीलोपि समयुध्यत ॥ ९ ॥
वानरेन्द्रस्तु सुग्रीवः प्रघसेन समागतः ॥ संगतः समरे श्रीमान्विरूपाक्षेण लक्ष्मणः ॥ १० ॥
अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः ॥ सुप्तघ्नो यज्ञकोपश्च रामेण सह संगताः ॥ ११ ॥
वज्रमुष्टिस्तु मैन्देन द्विविदेनाशनिप्रभः ॥ राक्षसाभ्यां सुघोराभ्यां कपिमुख्यौ समागतौ ॥ १२ ॥
वीरः प्रतपनो घोरो राक्षसो रणदुर्धरः ॥ समरे तीक्ष्णवेगेन नलेन समयुध्यत ॥ १३ ॥
धर्मस्य पुत्रो बलवान्सुषेण इति विश्रुतः ॥ स विद्युन्मालिना सार्धमयुध्यत महाकपिः ॥ १४ ॥
वानराश्चापरे भीमा राक्षसैरपरैः सह ॥ द्वन्द्वं समीयुर्बहुधा युद्धाय बहुभिः सह ॥ १५ ॥
तत्रासीत्सुमहद्युद्धं तुमुलं रोमहर्षणम् ॥ रक्षसां वानराणां च वीराणां जयमिच्छताम् ॥ १६ ॥

तान्येव कर्दमो यस्मिन् स मांसशोणितकर्दमः । अद्भुतोपमः दुर्लभोपम इति यावत् ॥ ४७—४८ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्विचत्वारिंशः सर्गः ॥ ४२ ॥

अथ द्वन्द्वयुद्धं वर्णयति त्रिचत्वारिंशे—युध्यतां त्यादि ॥ वानराणां युध्यतां वानरेषु युध्यमानेषु । बलकोपः सेनायाः कोपः । बलेत्यविभक्तिकनिर्देशः ॥ १ ॥ ते हयैरित्यादिश्लोकद्वयमेकान्वयं ॥ काञ्चनापीडैः स्वर्णमयशेखरैः । हयैरित्याद्युपलक्षणे तृतीया । राक्षसव्याघ्राः राक्षसश्रेष्ठाः । राक्षसश्रेष्ठत्वेपि जात्यन्तरत्वं संभवतीति राक्षसा इत्युक्तं ॥ २—६ ॥ दुर्मर्षणः दुःसहः । प्रजङ्घो राक्षसः । संपातिः विभीषणसचिवः । आरब्धः हन्तुमिति शेषः ॥ ७—१० ॥ अग्निकेतुरिति । सुप्तघ्नयज्ञकोपौ चेति वापाठः ॥ ११ ॥ राक्षसाभ्यां वज्रमुष्टयशनिप्रभाभ्यां कपिमुख्यौ मैन्दद्विविदौ । अनेन परस्परसंगतिरुक्ता ॥ १२ ॥ रणदुर्धरः रणे दुर्निग्रहः ॥ १३—१४ ॥ द्वन्द्वं द्वन्द्वत्वं । बहुधा युद्धाय शस्त्रास्त्रबाहुचरणप्रभृतिभिर्युद्धाय । बहुभिरितिराक्षसविशेषणाद्वानराश्चेत्यत्रापि बहव इति विशेषणं विज्ञेयं ॥ १५ ॥ तुमुलं

जग्मुर्गणाएकेपिशाचक्षुद्ररक्षसाम् । ततोभिपततांतेषामदृश्यानांदुरात्मनाम् । अन्तर्धानवधंतज्ज्ञश्चकारसविभीषणः ।" इतिभारतवनपर्वोक्तोनुसन्धेयः ॥ ४८ ॥ इतिद्विचत्वारिंशःसर्गः ॥ ४२ ॥

ति० बलरोषः परस्परबलदर्शनजोरोषः । एतावद्दिनयुद्धेपिबहवएवतिष्ठन्तीत्येवंरोषइतिभावः ॥ १ ॥ ति० निर्ययुरिति । अनेनवाल्मीकिनापिप्रत्यवहारोध्वनितः ॥ ३ ॥ ति० शत्रुघ्नेन तदाख्यरक्षसा । मित्रघ्नेनेतिक्वचित्पाठः ॥ ८ ॥

[पा०] १ ङ. झ. ट. बलरोषः. २ ङ. झ. ट. पीडैर्गजैश्चा. ३ ख. ङ.—ट. राक्षसावीराः. ४ च. अभ्यधावत्ततस्सेनां. ५ ङ.—ट. घोरकर्मणां. ६ घ. ङ. ज. झ. ट. संगतस्तु. ७ च. छ. ञ. क्रोधाद्राक्षसो. ८ ङ. झ. ट. शत्रुघ्नेन. ९ क. ख. ग. मित्रघ्नोयज्ञकेतुश्च. ङ. झ. ट. मित्रघ्नो. १० ख, ङ. छ. झ. ञ. ट. घोराः. ११ ङ.—ट. समीयुस्सहसायुद्धाच.

हरिराक्षसदेहेभ्यः प्रभूताः केशशाद्वलाः ॥ शरीरसंघाटवहाः प्रसस्रुः शोणितापगाः ॥ १७ ॥
आजघानेन्द्रजित्क्रुद्धो वज्रेणेव शतक्रतुः ॥ अङ्गदं गदया वीरं शत्रुसैन्यविदारणम् ॥ १८ ॥
तस्य काञ्चनचित्राङ्गं रथं साश्वं ससारथिम् ॥ जघान समरे श्रीमानङ्गदो वेगवान्कपिः ॥ १९ ॥
संपातिस्तु त्रिभिर्बाणैः प्रजङ्घेन समाहतः ॥ निजघानाश्वकर्णेन प्रजङ्घं रणमूर्धनि ॥ २० ॥
जम्बुमाली रथस्थस्तु रथशक्त्या महाबलः ॥ बिभेद समरे क्रुद्धो हनूमन्तं स्तनान्तरे ॥ २१ ॥
तस्य तं रथमास्थाय हनूमान्मारुतात्मजः ॥ प्रममाथ तलेनाशु सह तेनैव रक्षसा ॥ २२ ॥
नदन्प्रतपनो घोरो नलं सोप्यन्वधावत ॥ २३ ॥
नलः प्रतपनस्याशु पातयामास चक्षुषी ॥ भिन्नगात्रः शरैस्तीक्ष्णैः क्षिप्रहस्तेन रक्षसा ॥ २४ ॥
ग्रसन्तमिव सैन्यानि प्रघसं वानराधिपः ॥ सुग्रीवः सप्तपर्णेन निर्बिभेद जघान च ॥ २५ ॥
[प्रपीड्य शरवर्षेण राक्षसं भीमदर्शनम् ॥ निजघान विरूपाक्षं शरेणैकेन लक्ष्मणः ॥ २६ ॥]
अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः ॥ सुप्तघ्नो यज्ञकोपश्च रामं निर्बिभिदुः शरैः ॥ २७ ॥
तेषां चतुर्णां रामस्तु शिरांसि निशितैः शरैः ॥ क्रुद्धश्चतुर्भिश्चिच्छेद घोररग्निशिखोपमैः ॥ २८ ॥
वज्रमुष्टिस्तु मैन्देन मुष्टिना निहतो रणे ॥ पपात सरथः साश्वः पुराट्ट इव भूतले ॥ २९ ॥
निकुम्भस्तु रणे नीलं नीलाञ्जनचयप्रभम् ॥ निर्बिभेद शरैस्तीक्ष्णैः करैर्मेघमिवांशुमान् ॥ ३० ॥
पुनः शरशतेनाथ क्षिप्रहस्तो निशाचरः ॥ बिभेद समरे नीलं निकुम्भः प्रजहास च ॥ ३१ ॥
तस्यैव रथचक्रेण नीलो विष्णुरिवाहवे ॥ शिरश्चिच्छेद समरे निकुम्भस्य च सारथेः ॥ ३२ ॥
वज्राशनिसमस्पर्शो द्विविदोप्यशनिप्रभम् ॥ जघान गिरिशृङ्गेण मिषतां सर्वरक्षसाम् ॥ ३३ ॥
द्विविदं वानरेन्द्रं तु नगयोधिनमाहवे ॥ शरैरशनिसंकाशैः स विव्याधाशनिप्रभः ॥ ३४ ॥
स शरैरतिविद्धाङ्गो द्विविदः क्रोधमूर्च्छितः ॥ सालेन सरथं साश्वं निजघानाशनिप्रभम् ॥ ३५ ॥
विद्युन्माली रथस्थस्तु शरैः काञ्चनभूषणैः ॥ सुषेणं ताडयामास ननाद च मुहुर्मुहुः ॥ ३६ ॥
तं रथस्थमथो दृष्ट्वा सुषेणो वानरोत्तमः ॥ गिरिशृङ्गेण महता रथमाशु न्यपातयत् ॥ ३७ ॥
लाघवेन तु संयुक्तो विद्युन्माली निशाचरः ॥ अपक्रम्य रथात्तूर्णं गदापाणिः क्षितौ स्थितः ॥३८॥
ततः क्रोधसमाविष्टः सुषेणो हरिपुङ्गवः ॥ शिलां सुमहतीं गृह्य निशाचरमभिद्रवत् ॥ ३९ ॥
तमापतन्तं गदया विद्युन्माली निशाचरः ॥ वक्षस्यभिजघानाशु सुषेणं हरिसत्तमम् ॥ ४० ॥

व्याकुलं ॥ १६ ॥ केशशाद्वलाः केशैः शाद्वलवत्यः । संघाटः काष्ठसंचयः ॥ १७ ॥ आजघान ताडयामास ॥ १८—२० ॥ रथशक्त्या रथ एव सदा वर्तमानया शक्त्या ॥ २१ ॥ आस्थाय आरुह्य ॥ २२ ॥ नदन्नित्यर्धमेकं वाक्यं ॥२३॥ रक्षसा प्रतपनेन । भिन्नगात्र इत्यस्य पूर्वेणान्वयः ॥ २४ ॥ सप्तपर्णेन सप्तपर्णवृक्षेण ॥ २५—२७ ॥ अग्निशिखोपमैः अग्निज्वालोपमैः ॥ २८ ॥ पुराट्टः पुरवलभिः ॥ २९—३० ॥ क्षिप्रहस्तः क्षिप्रकारिहस्तः । निकुम्भः प्रजहास चेति पाठः सम्यक् ॥ ३१ ॥ शिरश्चिच्छेद सारथेरित्यनन्तरं वज्राशनिसमस्पर्श इति श्लोकः । ततो द्विविदं वानरेन्द्रं त्विति श्लोकः ॥ ३२—३७ ॥ अपक्रम्य अवप्लुत्य ॥ ३८ ॥ अभिद्रवत् अभ्यद्रवत् ॥ ३९–४० ॥

ति० अट्टः क्षौममितिकतकः । विमानमित्यन्ये । स० सुराट्टः देवदत्तोदैतेयविमानः ॥ २९ ॥ स० आहवेचक्रेणविष्णुरिव समरे निकुंभस्यसारथेः शिरश्चिच्छेदेत्यन्वयः ॥ ३२ ॥

[पा०] १ क. ग. ङ. च. झ. ञ. ट. प्रसृताः. २ ङ. झ. ट. गदयाश्रीमान्. ३ ङ. छ. झ. ञ. ट. निजघानजवेनच. ४ अयंश्लोकः ङ.—ट. पाठेषुदृश्यते. ५ ख. ग. ङ. ज. झ. मित्रघ्नो. ६ ङ. झ. ट. राममादीपयच्छरैः. ७ ङ. च. झ. ञ. समरेशरैः. ८ झ. ञ. सुराट्टइव. ९ ङ. छ. झ. रभिविद्धाङ्गो.

गदाप्रहारं तं घोरमचिन्त्य प्लवगोत्तमः ॥ तां शिलां पातयामास तस्योरसि महामृधे ॥ ४१ ॥
शिलाप्रहाराभिहतो विद्युन्माली निशाचरः ॥ निष्पिष्टहृदयो भूमौ गतासुर्निपपात ह ॥ ४२ ॥
एवं तैर्वानरैः शूरैः शूरास्ते रजनीचराः ॥ द्वन्द्वे विमृदितास्तत्र दैत्या इव दिवौकसैः ॥ ४३ ॥
भग्नैः खड्गैर्गदाभिश्च शक्तितोमरपट्टिशैः ॥ अपविद्धैश्च भिन्नैश्च रथैः सांग्रामिकैर्हयैः ॥ ४४ ॥
निर्हतैः कुञ्जरैर्मत्तैस्तथा वानरराक्षसैः ॥ चक्राक्षयुगदण्डैश्च भग्नैर्धरणिसंश्रितैः ॥
बभूवायोधनं घोरं गोमायुगणसंकुलम् ॥ ४५ ॥
कबन्धानि समुत्पेतुर्दिक्षु वानररक्षसाम् ॥ विमर्दे तुमुले तस्मिन्देवासुररणोपमे ॥ ४६ ॥
विदार्यमाणा हरिपुङ्गवैस्तदा निशाचराः शोणितदिग्धगात्राः ॥
पुनः सुयुद्धं तरसा समास्थिता दिवाकरस्यास्तमयाभिकाङ्क्षिणः ॥ ४७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

रात्रियुद्धं ॥ १ ॥ द्वन्द्वयुद्धे अङ्गदनिहतहयसारथिनेन्द्रजिता रथत्यागेनमायया ऽन्तरिक्षेऽन्तर्हितेनसता रामलक्ष्मणावयवेषु नागमयशरवर्षणम् ॥ २ ॥

युध्यतामेव तेषां तु तदा वानररक्षसाम् ॥ रविरस्तं गतो रात्रिः प्रवृत्ता प्राणहारिणी ॥ १ ॥
अन्योन्यं बद्धवैराणां घोराणां जयमिच्छताम् ॥ संप्रवृत्तं निशायुद्धं तदा वानररक्षसाम् ॥ २ ॥
राक्षसोसीति हरयो हरिश्चासीति राक्षसाः ॥ अन्योन्यं समरे जघ्नुस्तस्मिंस्तमसि दारुणे ॥ ३ ॥
जहि दारय चैहीति कथं विद्रवसीति च ॥ एवं सुतुमुलः शब्दस्तस्मिंस्तमसि शुश्रुवे ॥ ४ ॥

अचिन्त्य अचिन्तयित्वा ॥ ४१—४२ ॥ दिवौकसैरित्यकारान्तत्वमार्षं ॥ ४३ ॥ भग्नैरित्यादि सार्धश्लोकद्वयमेकान्वयं ॥ अपविद्धैरिति रथविशेषणं । भिन्नैरिति हयविशेषणं । सांग्रामिकैः संग्रामे साधुभिः । अक्षं चक्ररन्ध्रं । युगदण्डः अश्वबन्धनदण्डः ॥ ४४–४५ ॥ कबन्धानि शिरोहीनशरीराणि । विमर्दे युद्धे ॥ ४६ ॥ दिवाकरस्येति । रात्रौ राक्षसानां बलाधिक्यादितिभावः ॥ ४७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

अथ रात्रियुद्धप्रवृत्तिश्चतुश्चत्वारिंशे—युध्यतामेवेत्यादि ॥ युध्यतां युध्यमानेषु । प्राणहारिणी वानराणामिति शेषः ॥ १—२ ॥ हरिश्चासीति राक्षसा इति । दारुणतमस्कत्वेन रक्षसामपि मोहोभूदितिभावः

स० दिवौकसैः ओकएवौकसं । प्रज्ञाद्यण्स्वार्थे । दिवंऔकसंयेषांतेतैः ॥ ४३ ॥ शि० आयोधनं संग्रामभूमिः । गोमायुगणैः सेवितंबभूव ॥ ४५ ॥ इतित्रिचत्वारिंशःसर्गः ॥ ४३ ॥

स० प्राणहारिणी "पौषपौर्णमास्यांसुवेलारोहः । समग्रपौषातिक्रमणंसेनाविभागकरणं । प्रतिपदिमध्याह्नेयुद्धप्रारंभः । बहुदिनंयुद्धकरणं । तदुपरिनिशायुद्धमितिसांधकारतयापरस्परादर्शनात् "ततोजज्ञेमहायुद्धंसंकुलंकपिरक्षसाम् । मध्याह्नेप्रथमंयुद्धं प्रारब्धंप्रतिपद्यभूत्" इतिपाद्मोक्तेः । अत्रतत्लंवक्ष्यामः" इतिनागोजिभट्टः । पद्मपुराणेपञ्चषेषुपुस्तकेषुएतत्पद्यादर्शनेन "अत्रयुद्धं महद्वृत्तंचैत्रशुक्लचतुर्दशीम् । अष्टचत्वारिंशद्दिनंयत्रासौरावणोहतः" इत्यन्यथादर्शनेनच तच्चिन्त्यं । चैत्रशुक्लचतुर्दशीतःप्राक्सप्तचत्वारिंशद्दिनीप्राह्या । चतुर्दश्यासहाष्टचत्वारिंशद्दिनीभवति भवतिफाल्गुनकृष्णेरात्रियुद्धमित्यन्ये ॥ १ ॥ ति० हत इदंहन्तेर्लो-

[पा०] १ ङ. ञ. ञ. तांतूष्णीं. २ ग. ङ. च. ज्ञ. ञ. ट. भल्लैश्चान्यैर्गदा. ३ घ. च. तोमरसायकैः. ४ ग. कुञ्जरैर्मन्दरप्रख्यैस्तथा. ५ ङ. ज्ञ. ट. गणसेवितं. ६ ख. ङ.—ट. निहन्यमानाहरि. घ. निवार्यमाणाहरि. ७ क. घ. ङ. ज्ञ. ट. शोणितगन्धमूर्च्छिताः. ८ ङ. ज्ञ. ञ. ट. हतदारय. ९ ङ. च. छ. ज्ञ. ञ. ट. तस्मिन्सैन्येतु. क.—घ. ज. तस्मिन्सैन्येविशुश्रुवे.

कालाः काञ्चनसन्नाहास्तस्मिंस्तमसि राक्षसाः ॥ संप्रादृश्यन्त शैलेन्द्रा दीप्तौषधिवना इव ॥ ५ ॥
तस्मिंस्तमसि दुष्पारे राक्षसाः क्रोधमूर्च्छिताः ॥ परिपेतुर्महावेगा भक्षयन्तः प्लवङ्गमान् ॥ ६ ॥
ते हयान्काञ्चनापीडान्ध्वजांश्चाग्निशिखोपमान् ॥ आप्लुत्य दशनैस्तीक्ष्णैर्भीमकोपा व्यदारयन् ॥७॥
वानरा बलिनो युद्धेऽक्षोभयन्राक्षसीं चमूम् ॥ कुञ्जरान्कुञ्जरारोहान्पताकाध्वजिनो रथान् ॥
चकर्षुश्च ददंशुश्च दशनैः क्रोधमूर्च्छिताः ॥ ८ ॥
लक्ष्मणश्चापि रामश्च शरैराशीविषोपमैः ॥ दृश्यादृश्यानि रक्षांसि प्रवराणि निजघ्नतुः ॥ ९ ॥
तुरङ्गखुरविध्वस्तं रथनेमिसमुत्थितम् ॥ रुरोध कर्णनेत्राणि युध्यतां धरणीरजः ॥ १० ॥
वर्तमाने महाघोरे संग्रामे रोमहर्षणे ॥ रुधिरोदा महाघोरा नद्यस्तत्र प्रसुस्रुवुः ॥ ११ ॥
ततो भेरीमृदङ्गानां पणवानां च निस्वनः ॥ शङ्खवेणुस्वनोन्मिश्रः संबभूवाद्भुतोपमः ॥
[विमर्दे तुमुले तस्मिन्देवासुररणोपमे ॥ १२ ॥
हतानां स्तनमानानां राक्षसानां च निस्वनः ॥ शस्तानां वानराणां च संबभूवातिदारुणः ॥१३॥
हतैर्वानरवीरैश्च शक्तिशूलपरश्वधैः ॥ निहतैः पर्वताग्रैश्च राक्षसैः कामरूपिभिः ॥ १४ ॥
शस्त्रपुष्पोपहारा च तत्रासीद्युद्धमेदिनी ॥ दुर्ज्ञेया दुर्निवेशा च शोणितास्रावकर्दमा ॥ १५ ॥
सा बभूव निशा घोरा हरिराक्षसहारिणी ॥ कालरात्रीव भूतानां सर्वेषां दुरतिक्रमा ॥ १६ ॥
ततस्ते राक्षसास्तत्र तस्मिंस्तमसि दारुणे ॥ राममेवाभ्यवर्तन्त संसृष्टाः शरवृष्टिभिः ॥ १७ ॥
तेषामापततां शब्दः क्रुद्धानामभिगर्जताम् ॥ उद्वर्त इव सप्तानां समुद्राणां प्रशुश्रुवे ॥ १८ ॥
तेषां रामः शरैरष्टौ षट् जघान निशाचरान् ॥ निमेषान्तरमात्रेण शितैरग्निशिखोपमैः ॥ १९ ॥
यमशत्रुश्च दुर्धर्षो महापार्श्वमहोदरौ ॥ वज्रदंष्ट्रो महाकायस्तौ चोभौ शुकसारणौ ॥ २० ॥

॥ ३—४ ॥ कालाः नीलाः । काञ्चनसन्नाहाः काञ्चनकवचाः । दीप्तौषधिवनाः दीप्ततृणज्योतिर्वनाः ॥ ५ ॥ परिपेतुः संचेरुः ॥ ६ ॥ ते वानराः । काञ्चनापीडान् सुवर्णशेखरान् ॥ ७ ॥ वानरा इत्यादिसार्धश्लोकः ॥ युद्धेक्षोभयन्नित्यत्र अक्षोभयन्निति पदच्छेदः ॥ ८ ॥ दृश्यादृश्यानि ईषद्दृश्यानीत्यर्थः ॥ ९ ॥ विध्वस्तं चूर्णितं ॥ १० ॥ रुधिरोदाः । असंज्ञायामप्युदकशब्दस्योदादेश आर्षः ॥ ११—१२ ॥ स्तनमानानां स्तनतां । शस्तानां हिंसितानां ॥ १३ ॥ हतैरित्यादिश्लोकद्वयमेकान्वयं ॥ निहतैरिति राक्षसविशेषणं । पर्वताग्रैः वानरप्रेरितैः । उपलक्षणेतृतीया । शस्त्राण्येव पुष्पोपहाराः पुष्पबलयो यस्यां सा । तत्र तदा । दुर्ज्ञेया कृच्छ्रज्ञेया । प्रतियोधिनः दुर्निवेशा दुष्प्रवेशा ॥ १४—१५ ॥ कालरात्रिः भीमरथिरात्रिः । " रात्रिर्भीमरथिर्नाम सर्वप्राणिभयावहा " इत्युक्तेः । शक्तिर्वा । " सती च कालरात्रिश्च भैरवी गणनायिका " इत्युक्तेः ॥ १६ ॥ संसृष्टाः संमिलिताः ॥ १७ ॥ उद्वर्ते अभिवृद्धौ । प्रलये वा ॥ १८ ॥ तेषां राक्षसानां मध्ये । षट् निशाचरान् । अग्निशिखोपमैः शितैः शरैः जघान ॥ १९ ॥ के ते षडित्यपेक्षायामाह—यमेति ॥ दुर्धर्षः धर्षितुमशक्यः । यमशत्रुः । महोदरमहापार्श्वौ । महाकायः वज्रदंष्ट्रः । तौ उत्तर-

टिमध्यमपुरुषबहुवचनं । हननंकुरुतेत्यर्थः ॥ ४ ॥ ति० इमौशुकसारणौचारव्लेनप्रेषिताभ्यामन्यावेवेतिबहवः । ताविति पदस्वार-

[पा०] १ ङ. झ. ट. ध्वजानाशीविषोपमान्. ग. च. छ. ञ. न्यजांश्चशिखरोपमान्. २ क. ख. शरैरग्निशिखोपमैः. ३ क. घ. ङ. च झ. ञ. तथाघोरे. ख. तदारौद्रे. ४ ङ. झ. ट. शङ्खनेमिस्वनोन्मिश्रः. ख. ट. शङ्खनेमिस्वनैर्मिश्रः. क. च. छ. ञ. शङ्खवेणुस्वनैर्मिश्रः. ५ इदमर्धं क. ख. च. छ. ञ. पाठेषुदृश्यते. ६ ङ. झ. ट. हयानां. ७ ख. ङ.—ट. संबभूवात्र. क. ग. घ. संबभौतत्र. ८ क.—ट. वीनरमुख्यैश्च. ९ ख. ङ.—ट. पर्वताकारैः. १० छ. ज. पुष्पोपहारैश्च. घ. पुष्पोपहारासा. ११ घ. दुर्धर्षादुर्विभागाच. क. ख. ग. च. ज. दुर्ज्ञेयादुर्निवेशाच. १२ छ. शोणितोद्गारकर्दमा. घ. मांसशोणितकर्दमा. १३ घ. मेवाभ्यधावन्त. १४ झ. ट. संहृष्टाः. ख. संवृष्टाः. १५ क. ख. ग. ङ.—ट. समुद्राणामभूत्स्वनः. घ. समुद्राणामिवस्वनः. १६ ट. घोरैरग्नि. १७ ख. ङ.—ट. यज्ञशत्रुश्च.

ते तु रामेण बाणौघैः सर्वे मर्मसु ताडिताः ॥ युद्धादपसृतास्तत्र सावशेषायुषोऽभवन् ॥ २१ ॥
तत्र काञ्चनचित्राङ्गैः शरैरग्निशिखोपमैः ॥ दिशश्चकार विमलाः प्रदिशश्च महाबलः ॥
[रामनामाङ्कितैर्बाणैर्व्याप्तं तद्रणमण्डलम्] ॥ २२ ॥
ये त्वन्ये राक्षसा भीमा रामस्याभिमुखे स्थिताः ॥ तेऽपि नष्टाः समासाद्य पतङ्गा इव पावकम् ॥२३॥
सुवर्णपुङ्खैर्विशिखैः संपतद्भिः सहस्रशः ॥ बभूव रजनी चित्रा खद्योतैरिव शारदी ॥ २४ ॥
राक्षसानां च निनदैर्हरीणां चापि निस्वनैः ॥ सा बभूव निशा घोरा भूयो घोरतरा तदा ॥२५॥
तेन शब्देन महता प्रवृद्धेन समन्ततः ॥ त्रिकूटः कन्दराकीर्णः प्रव्याहरदिवाचलः ॥ २६ ॥
गोलाङ्गूला महाकायास्तमसा तुल्यवर्चसः ॥ संपरिष्वज्य बाहुभ्यां भक्षयन्रजनीचरान् ॥ २७ ॥
अङ्गदस्तु रणे शत्रुं निहन्तुं समुपस्थितः ॥ रावणिं निजघानाशु सारथिं च हयानपि ॥ २८ ॥
वर्तमाने तदा घोरे संग्रामे भृशदारुणे ॥ इन्द्रजित्तु रथं त्यक्त्वा हताश्वो हतसारथिः ॥
अङ्गदेन महाकायस्तत्रैवान्तरधीयत ॥ २९ ॥
तत्कर्म वालिपुत्रस्य सर्वे देवाः सहर्षिभिः ॥ तुष्टुवुः पूजनार्हस्य तौ चोभौ रामलक्ष्मणौ ॥ ३० ॥
प्रभावं सर्वभूतानि विदुरिन्द्रजितो युधि ॥ [अदृश्यः सर्वभूतानां योऽभवद्युधि दुर्जयः ॥]
तेन ते तं महात्मानं तुष्टा दृष्ट्वा प्रधर्षितम् ॥ ३१ ॥
ततः प्रहृष्टाः कपयः ससुग्रीवविभीषणाः ॥ साधुसाध्विति नेदुश्च दृष्ट्वा शत्रुं प्रधर्षितम् ॥ ३२ ॥
इन्द्रजित्तु तदा तेन निर्जितो भीमकर्मणा ॥ संयुगे वालिपुत्रेण क्रोधं चक्रे सुदारुणम् ॥ ३३ ॥
एतस्मिन्नन्तरे रामो वानरान्वाक्यमब्रवीत् ॥ ३४ ॥
सर्वे भवन्तस्तिष्ठन्तु कपिराजेन संगताः ॥ ३५ ॥
स ब्रह्मणा दत्तवरस्त्रैलोक्यं बाधते भृशम् ॥ भवतामर्थसिद्ध्यर्थं कालेन स समागतः ॥
अद्यैव क्षमितव्यं मे भवन्तो विगतज्वराः ॥ ३६ ॥

द्वाररक्षकत्वेन पूर्वोक्तौ । उभौ शुकसारणौ चेति षट् । अत्र महाकाय इति वज्रदंष्ट्रविशेषणं । अपसृताः पलायिताः । सावशेषायुषः आयुःशेषयुक्ता इति जीवने हेतुः ॥ २०—२१ ॥ महाबलः रामः ॥ २२ ॥ पावकं समासाद्येत्यन्वयः ॥ २३—२४ ॥ पूर्वमेव घोरा सा भूयः विशिष्य घोरतरा बभूव ॥ २५ ॥ प्रव्याहरदिव प्रतिव्याहरदिवेत्यर्थः ॥ २६ ॥ भक्षयन् अभक्षयन् ॥ २७ ॥ पूर्वप्रसक्तस्याङ्गदेन्द्रजितोर्द्वन्द्वयुद्धस्य शेषं वक्तुमुपक्रमते—अङ्गदस्त्वित्यादिना ॥ २८ ॥ तत्रैव तस्मिन्देश एव ॥ २९ ॥ पूजनार्हस्य स्तुत्यर्हस्य ॥ ३० ॥ ते तानि । लिङ्गव्यत्यय आर्षः । महात्मानं महाधैर्यं । तेन अङ्गदेन । प्रधर्षितं पराजितं । दृष्ट्वा तुष्टाः ॥ ३१—३३ ॥ एतस्मिन्नित्यर्धं ॥ ३४ ॥ सर्वे इत्यर्धं ॥ ३५—३६ ॥

स्वाचारत्वेनप्रेषितावेवैतौ । राज्ञाधिकृतावपिराजसंनिधिंपरित्यज्ययुद्धेमृतावित्यन्ये ॥ २० ॥ शि० गोलाङ्गूलाः रजनीचरान्संपरिष्वज्य परिष्वङ्गेननिहत्य । भक्षयन् अभक्षयन् श्वादिभिरखादयन् ॥ २७ ॥ ती० सः इन्द्रजित् । ब्रह्मणादत्तवरस्सन् त्रैलोक्यंबाधते । किंच कालेन कालबलेन । भवतामर्थसिद्ध्यर्थंसमागतः कालबलेनभवतोजेतुंसमागतइत्यर्थः । अद्यैवमेमयाक्षमितव्यं ब्रह्मणोमान्यत्वादितिभावः । भवन्तोविगतज्वरास्तिष्ठन्त्वितिपूर्वेणसंबन्धः । स० तत्रहेतुमाह—सइति । सः इन्द्रजिदित्यर्थः । भवतां भवत्संबन्धीयोऽर्थःस्वस्यजयः तत्सिद्ध्यर्थं । कालेन ब्रह्मवरोज्जृंभकेन समागतः । पृथक्क्रियान्वयान्नतच्छब्दद्वयवैयर्थ्यं ।

[पा०] १ झ. ट. सर्वमर्मसु. २ च. ञ. दपसृतास्त्रस्ताः. ३ ख. च. झ. ञ. ट. निमेषान्तरमात्रेणघोरैरग्निशिखोपमैः. ४ च. झ. ञ. ट. महारथः. ५ ग.—ट. वीराः. ६ ख. ङ. च. झ. ञ. ट. समंततः. ७ ङ. झ. ट. घोरतराऽभवत्. ८ ख. प्रचचालाचलेश्वरः. ९ क. ख. इ. च. छ. झ. ट. महामायः. १० इदमर्धंप्राचीनकोशेषुनदृश्यते. ११ ङ. च. झ. ञ. ट. पराजितं.

सोन्तर्धानगतः पापो रावणी रणकर्कशः ॥ [[1]ब्रह्मदत्तवरो वीरो रावणिः क्रोधमूर्च्छितः ॥]
अदृश्यो निशितान्बाणान्मुमोचाशनिवर्चसः [2]॥ ३७ ॥
स रामं लक्ष्मणं चैव घोरैर्नागमयैः शरैः ॥ बिभेद समरे क्रुद्धः सर्वगात्रेषु [3]राक्षसः ॥ ३८ ॥
मायया संवृतस्तत्र मोहयन्राघवौ युधि ॥ अदृश्यः सर्वभूतानां कूटयोधी निशाचरः ॥
बबन्ध शरबन्धेन भ्रातरौ रामलक्ष्मणौ ॥ ३९ ॥
तौ तेन पुरुषव्याघ्रौ क्रुद्धेनाशीविषैः शरैः ॥ [4]सहसा निहतौ वीरौ तदा प्रेक्षन्त वानराः ॥ ४० ॥
प्रकाशरूपस्तु यदा न शक्तस्तौ बाधितुं राक्षसराजपुत्रः ॥
मायां प्रयोक्तुं समुपाजगाम बबन्ध तौ राजसुतौ [5]महात्मा ॥ ४१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

रामेणान्तरिक्षेऽन्तर्हितेन्द्रजिदन्वेषणायाङ्गदादिवानरदशकनियोजनम् ॥ १ ॥ इन्द्रजिता वृक्षोत्क्षेपेणान्तरिक्षप्रविष्टानामङ्गदादीनामङ्गेषु शरवर्षणेनतन्निवारणम् ॥ २ ॥ तथा नागास्त्रेण रामलक्ष्मणयोर्बन्धनम् ॥ ३ ॥ अस्त्रबन्धेन भुविशयानौराघवौपरिवार्य हनुमदादिभिः शोकेनावस्थानम् ॥ ४ ॥

स तस्य गतिमन्विच्छन्राजपुत्रः प्रतापवान् ॥ दिदेशातिबलो रामो दश वानरयूथपान् ॥ १ ॥
द्वौ सुषेणस्य दायादौ नीलं च [6]प्लवगर्षभम् ॥ अङ्गदं वालिपुत्रं च शरभं च तरस्विनम् ॥ २ ॥
विनतं [7]जाम्बवन्तं च सानुप्रस्थं महाबलम् ॥ ऋषभं चर्षभस्कन्धमादिदेश परंतपः ॥ ३ ॥
ते संप्रहृष्टा हरयो भीमानुद्यम्य पादपान् ॥ आकाशं विविशुः सर्वे मार्गमाणा दिशो दश ॥ ४ ॥
तेषां वेगवतां वेगमिषुभिर्वेगवत्तरैः ॥ अस्त्रवित्परमास्त्रैस्तु वारयामास रावणिः [8]॥ ५ ॥

अन्तर्धानगतः अन्तर्धानविद्यां प्राप्तः ॥ ३७ ॥ सर्वगात्रेषु सर्वावयवेषु ॥ ३८ ॥ मायया संवृतः मायया युक्तः । अतएव अदृश्यः । कूटयोधी कपटयोधी । राघवौ रघुकुलोद्भवौ रामलक्ष्मणौ । शरबन्धेन शररूपबन्धकेन । बबन्ध । वेष्टनदंशनादिना नागमयत्वं । वेदनादिना शरमयत्वं ॥ ३९—४० ॥ मायाप्रयोगः किमर्थस्तत्राह—प्रकाशेति ॥ समुपाजगाम उपचक्रमे । बबन्ध च । महात्मा महाबुद्धिः ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

अथ नागपाशबन्धः पञ्चचत्वारिंशे—स तस्येत्यादि ॥ गम्यत इति गतिः स्थानं ॥ १ ॥ तानेव दश यूथपान्दर्शयति—द्वावित्यादिना ॥ दायादौ पुत्रौ । "दायादौ सुतबान्धवौ" इत्यमरः ॥ २-३ ॥ मार्गमाणाः मार्गितुमित्यर्थः ॥ ४ ॥ परमास्त्रैरिषुभिः

समागतेन समागमेनसहवर्ततइतिससमागतइतिवाक्यियसतिकाचिन्तास्माकमित्यतआह—अयेति । क्षमितव्यः ब्रह्मवरोमाननीयः । पित्रापुत्रएकदावालालनीयइतिभावः ॥ ३६ ॥ ति० शरबन्धेन शरपरिणतनागपाशबन्धेन । अयंशरबन्धोभाद्रकृष्णान्त्यदिनेष्वित्यग्रेनिरूपयिष्यामः ॥ ३९ ॥ ति० उक्तानुवादःप्रकाशेत्यादि । समुपाजगाम उपचक्रमे । भूभङ्गमात्रेणसर्वजगत्संहर्तुरपिभगवतोनागपाशबन्धनसहनंस्वकृतमर्यादारूपब्रह्मवरदानपालनार्थं । विरोधेनापिनित्यमात्मानंस्मरतोरावणस्यरावणेश्वरमभक्तयाकीर्तेर्लोकेषुवृद्ध्यर्थंचेतितत्वं ॥ ४१ ॥ इतिचतुश्चत्वारिंशःसर्गः ॥ ४४ ॥

[पा०] १ इदमर्धं क. ख. ङ. च. झ. ञ. ट. पाठेषुदृश्यते. २ ञ. ट. चाशनिसंनिभः. ३ ख. ङ. झ. ट. राघवौ. ४ ख. ङ. झ. ञ. ट. सहसाऽभिहतौ. ५ ख. च. झ. ञ. ट. दुरात्मा. ६ ङ.—ट. प्लवगाधिपं. ७ ख.—ङ. झ. ट. द्विविदंचहनूमन्तं. ८ क.—ट. परमास्त्रेण.

तं भीमवेगा हरयो नाराचैः क्षतविग्रहाः ॥ अन्धकारे न ददृशुर्मेघैः सूर्यमिवावृतम् ॥ ६ ॥
रामलक्ष्मणयोरेव सर्वदेहभिदः शरान् ॥ भृशमावेशयामास रावणिः समितिंजयः ॥ ७ ॥
निरन्तरशरीरौ तौ भ्रातरौ रामलक्ष्मणौ ॥ क्रुद्धेनेन्द्रजिता वीरौ पन्नगैः शरतां गतैः ॥ ८ ॥
तयोः क्षतजमार्गेण सुस्राव रुधिरं बहु ॥ तावुभौ च प्रकाशेते पुष्पिताविव किंशुकौ ॥ ९ ॥
ततः पर्यन्तरक्ताक्षो भिन्नाञ्जनचयोपमः ॥ रावणिर्भ्रातरौ वाक्यमन्तर्धानगतोऽब्रवीत् ॥ १० ॥
युध्यमानमनालक्ष्यं शक्रोपि त्रिदशेश्वरः ॥ द्रष्टुमासादितुं वाऽपि न शक्तः किं पुनर्युवाम् ॥११॥
आवृताविषुजालेन राघवौ कङ्कपत्रिणा ॥ एष रोषपरीतात्मा नयामि यमसादनम् ॥ १२ ॥
एवमुक्त्वा तु धर्मज्ञौ भ्रातरौ रामलक्ष्मणौ ॥ निर्बिभेद शितैर्बाणैः प्रजहर्ष ननाद च ॥ १३ ॥
भिन्नाञ्जनचयश्यामो विस्फार्य विपुलं धनुः ॥ भूयो भूयः शरान्घोरान्विससर्ज महामृधे ॥ १४ ॥
ततो मर्मसु मर्मज्ञो मज्जयन्निशिताञ्शरान् ॥ रामलक्ष्मणयोर्वीरो ननाद च मुहुर्मुहुः ॥ १५ ॥
बद्धौ तु शरबन्धेन तावुभौ रणमूर्धनि ॥ निमेषान्तरमात्रेण न शेकतुरुदीक्षितुम् ॥ १६ ॥
ततो विभिन्नसर्वाङ्गौ शरशल्याचितावुभौ ॥ ध्वजाविव महेन्द्रस्य रज्जुमुक्तौ प्रकम्पितौ ॥ १७ ॥
तौ संप्रचलितौ वीरौ मर्मभेदेन कर्शितौ ॥ निपेततुर्महेष्वासौ जगत्यां जगतीपती ॥ १८ ॥

परमास्त्ररूपैरिषुभिः ॥ ५—६ ॥ भृशं सर्वदेहभिदः शरान् रामलक्ष्मणयोरेवाधिकरणयोरावेशयामास ॥ ७ ॥ निरन्तरशरीरौ कृताविति शेषः । शरतां गतैः शरकार्यं भेदनादिकं कुर्वद्भिरित्यर्थः ॥ ८ ॥ क्षतेन जातो मार्गः क्षतजमार्गः । ननु, "न भूतसङ्घसंस्थानो देहोस्य परमात्मनः । न तस्य प्राकृता मूर्तिर्मांसमेदोस्थिसंभवा" इत्यादिभिः रामलक्ष्मणयोर्दिव्यविग्रहस्याप्राकृतत्वस्मरणात्कथं रुधिरोद्गमइति चेदत्राहुः । वस्तुतोऽनयो रुधिराभावेपि मनुष्यभावनानुरोधेन नट इव रुधिराणि दर्शयतः स्म । नन्वेवं निर्बन्धेन मनुष्यभावं भावयतः किं प्रयोजनं । शृणु । सर्वात्मना मनुष्यभावनाननुरोधे जन एवं मन्येत । नायं मर्त्यः किं तु देवः तेन तद्वदस्माकं न शक्यमनुष्ठातुं धर्मानिति । सर्वथामनुष्यभावनायांतुमहाजनानुष्ठानदर्शनेन स्वयमनुष्ठास्यतिलोक इतिरहस्यं । रावणस्य मनुष्यैकवध्यत्वेन तद्भावनेत्यप्याहुः । नागपाशबद्धतयावस्थानंतु धर्मनिरतानामपिकदाचिदापदुपतिष्ठति निवर्ततेचझटितीति लोकानां प्रदर्शनायेति । एवं मोहादिष्वपिद्रष्टव्यं ॥ ९ ॥ पर्यन्तरक्ताक्ष इत्यनेन ईषत्कोपवत्त्वं लक्ष्यते ॥ १० ॥ अनालक्ष्यं यथा भवति तथा युध्यमानं मां शक्रस्त्रिदशेश्वरोपि द्रष्टुं मायया बलान्तरेण आसादितुंवापि नशक्तः । किं पुनर्युवां मानुषावित्यर्थः ॥ ११ ॥ राघवाविति संबोधनं । अत्रापि युवामिति द्वितीयान्ततया विपरिणम्यानुषञ्जनीयम् । कङ्कपत्रिणा कङ्कपत्रवता । एष इत्यव्यवधानद्योतनाय ॥१२॥ धर्मज्ञाविति । शब्दवेधप्रयोगासहिष्णू इत्यर्थः ॥ १३ ॥ अञ्जनोपरिप्रदेशस्य धूसरत्वसंभवात् भिन्नेत्युक्तं ॥१४—१५॥ निमेषान्तरमात्रेण निमेषावकाशमात्रेण क्षणमात्रेणेत्यर्थः ॥ १६ ॥ शरशल्याचितौ शराग्रप्रोतौ कृतौ । रज्जुमुक्तौ मुक्तरज्जू । अतएव प्रकम्पितौ महेन्द्रस्य ध्वजाविव कृतौ । जगत्यां भूमौ । जगतीपती भूपती ॥ १७—१८ ॥

रामानु० पन्नगैःशरतांगतैः । शरकार्यभेदनं । पन्नगकायसंवेष्टनंचकुर्वद्भिरित्यर्थः ॥ ८ ॥ **शि०** क्षतजमार्गेण रुधिरविषयकविचारेण । रामलक्ष्मणशरीरेभीतिजनकरुधिरप्रदर्शनायेत्यर्थः । तयोः रामलक्ष्मणयोरुपरिबहुरुधिरंसुस्राव माययास्रावयामास । अन्तर्भावितण्यिजर्थःस्रवतिः ॥ ९ ॥ **ति०** प्रापितौ बन्धनमितिशेषः ॥ १२ ॥

[**पा०**] १ ख. च. ञ. वारितास्तु. २ ग. ङ—ट. तक्षविक्षताः. ३ क. ख. घं.—ट. तावुभौराम. ४ च. छ. ञ. अथराक्षसवीरोसौ. ख. अथराक्षसवर्योसौ. ५ झ. प्रापितविषु. घ. प्रावृताविषु. ख. आविद्धाविषु. ६ घ. ङ. शरैस्तीक्ष्णैः. ख. च. छ. ञ. शितैर्बाणैःप्रतोत्रैरिवकुञ्जरौ. ७ घ. विजयंधनुः. ८ घ. झ. ट. भूयएवशरान्. ९ घ. चमूमुखे. १० च. घोरं. ११ घ. शरजालाचितावुभौ. छ. शरशल्यान्वितौकृतौ. ग. ङ. च. झ. ञ. ट. शरशल्याचितौकृतौ.

तौ वीरशयने वीरौ शयानौ रुधिरोक्षितौ ॥ शरवेष्टितसर्वाङ्गावार्तौ परमपीडितौ ॥ १९ ॥
न ह्यविद्धं तयोर्गात्रे बभूवाङ्गुलमन्तरम् ॥ नानिर्भिन्नं न चास्तब्धमाकराग्रादजिह्मगैः ॥ २० ॥
तौ तु क्रूरेण निहतौ रक्षसा कामरूपिणा ॥ असृक्सुस्रुवतुस्तीव्रं जलं प्रस्रवणाविव ॥ २१ ॥
पपात प्रथमं रामो विद्धो मर्मसु मार्गणैः ॥ क्रोधादिन्द्रजिता येन पुरा शक्रो विनिर्जितः ॥ २२ ॥
रुक्मपुङ्खैः प्रसन्नाग्रैरधोगतिभिराशुगैः ॥ नाराचैरर्धनाराचैर्भल्लैरञ्जलिकैरपि ॥
विव्याध वत्सदन्तैश्च सिंहदंष्ट्रैः क्षुरैस्तथा ॥ २३ ॥
स वीरशयने शिश्ये विज्यमादाय कार्मुकम् ॥ भिन्नमुष्टिपरीणाहं त्रिणतं रत्नभूषितम् ॥ २४ ॥
बाणपातान्तरे रामं पतितं पुरुषर्षभम् ॥ स तत्र लक्ष्मणो दृष्ट्वा निराशो जीवितेऽभवत् ॥ २५ ॥
रामं कमलपत्राक्षं शरबन्धपरिक्षतम् ॥ शुशोच भ्रातरं दृष्ट्वा पतितं धरणीतले ॥ २६ ॥
हरयश्चापि तं दृष्ट्वा सन्तापं परमं गताः ॥ [शोकार्ताश्चुक्रुशुर्घोरमश्रुपूरितलोचनाः] ॥ २७ ॥

बद्धौ तु वीरौ पतितौ शयानौ तौ वानराः संपरिवार्य तस्थुः ॥
समागता वायुसुतप्रमुख्या विषादमार्ताः परमं च जग्मुः ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

वीराः शेरतेऽस्मिन्निति वीरशयनं रणभूमिः । शरतल्पं वा । शरवेष्टितसर्वाङ्गौ शरभूतसर्पवेष्टितसर्वाङ्गौ । आर्तौ मनःपीडावन्तौ । परमपीडितौ शारीरकपीडावन्तौ । अभूतामिति शेषः ॥१९॥ अङ्गुलं अङ्गुलिप्रमाणं । अथवा "अङ्गुलिरङ्गुलं" इति त्रिकाण्डीस्मरणात् । अङ्गुलिप्रमाणवाच्यङ्गुलशब्दोकारान्तोप्यस्ति । तयोर्गात्रमङ्गुलमात्रेप्यवकाशे अविद्धं नाभूदिति भावः । यद्वा तयोर्गात्रं आङ्गुलं अङ्गुलसंबन्ध्यप्यन्तरमवकाशः । आकराग्रात्कराग्रपर्यन्तं । अजिह्मगैः सर्परूपशरैः । अविद्धं न बभूव । अस्तब्धं अनिश्चलं च न बभूव । अनिर्भिन्नं च न बभूव ॥ २० ॥ तीव्रं अत्यन्तं । प्रस्रवणौ गिरिविशेषौ ॥ २१ ॥ इन्द्रजित्त्वं निर्वक्ति—येनेति ॥ २२ ॥ नागास्त्रप्रयोगानन्तरं केवलशरैरपि विव्याधेत्याह—रुक्मपुङ्खैरित्यादिना ॥ प्रसन्नाग्रैः उन्मृष्टाग्रैरित्यर्थः । प्रहर्तुराकाशस्थत्वेनाधोगतिभिः । आशुगैः वक्ष्यमाणविशेषभिन्नैः । नाराचैः ऋजुवृत्ताग्रैः । अर्धनाराचैः मध्ये भिन्ननाराचतुल्यैः । भल्लैः परश्वधाग्रैः । अञ्जलिकैः अञ्जलिसदृशाग्रैः । वत्सदन्तैः वत्सदन्तसदृशाग्रैः । सिंहदंष्ट्रैः सिंहदंष्ट्रासदृशाग्रैः । क्षुरैः क्षुरागैः । अत्रेन्द्रजिदित्यध्याहार्यं ॥ २३ ॥ भिन्नमुष्टिपरीणाहं शिथिलमुष्टिबन्धं । तृणतन्त्रिषु स्थानेषु पार्श्वयोर्मध्ये च नतं । रुक्मभूषितं रुक्मपट्टबन्धं । विज्यं शरसंधानप्रसङ्गाभावाद्विगतज्यं । कार्मुकं धनुः । आदाय अवलम्ब्य । वीरशयने रणभूमौ । शिश्ये ॥ २४ ॥ बाणपातान्तरे शरतल्पे ॥ २५ ॥ शरबन्धपरिक्षतं । बन्धः क्षतश्चेति द्वयमत्र शरकार्यमुच्यते ॥ २६—२७ ॥ बद्धाविति । आदौ नागपाशबद्धौ । अथ शयानौ तु तौ वीरौ संपरिवार्य वायुसुतादयो वानरास्तस्थुः । विषादं दुःखं । जग्मुश्चेत्यन्वयः ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे युद्धकाण्डव्याख्याने रत्नकिरीटाख्याने पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

ति० आकराग्रात् कराग्रमभिव्याप्य । अध्वस्तं अक्षोभितं । स० आङ्गुलं अङ्गुलिप्रमाणं ॥ २० ॥ ति० रजोगतिभिः वायुनाविस्तीर्यमाणरजोवन्तीरन्ध्रसंपतद्भिः ॥ २३ ॥ शि० जीविते लोकपालनेनिराशोऽभवत् ॥ २५ ॥ इतिपञ्चचत्वारिंशःसर्गः ॥ ४५ ॥

[पा०] १ क. ख. ग. च. छ. ज. ट. गात्रंबभूवाङ्गुलमात्रकं. घ. गात्रेबभूवान्तरमण्वपि. २ घ. क्रूरकर्मणा. ३ झ. रजोगतिभिः. ४ ङ. छ. झ. ट. माविध्य. ५ क. ख. घ.—ट. रुक्मभूषितं. ६ ख. ग. च. ज. शरण्यंरणतोषितं. ङ. झ. ट. शरण्यंरणतोषिणं. ७ इदमर्धं क. ङ.—ट. पाठेषुदृश्यते.

षट्चत्वारिंशः सर्गः ॥ ४६ ॥

ससुग्रीवेणविभीषणेन इन्द्रजिन्नागपाशनिबद्धमुग्धरामलक्ष्मणसमीपंप्रत्यागमनम् ॥ १ ॥ विभीषणेन राघवावस्थानावलोकनेनशोचतस्सुग्रीवस्य समाश्वासनपूर्वकं कार्यान्तराय गमनम् ॥ २ ॥ राक्षसप्रहर्षणपूर्वकं लङ्कांप्रविष्टेनेन्द्रजिता रावणंप्रतिसप्रणामं स्वेनरामलक्ष्मणमारणकथनम् ॥ ३ ॥

ततो द्यां पृथिवीं चैव वीक्षमाणा वनौकसः ॥ ददृशुः संततौ बाणैर्भ्रातरौ रामलक्ष्मणौ ॥ १ ॥
वृष्ट्वेवोपरते देवे कृतकर्मणि राक्षसे ॥ आजगामाथ तं देशं ससुग्रीवो विभीषणः ॥ २ ॥
नीलद्विविदमैन्दाश्च सुषेणकुमुदाङ्गदाः ॥ तूर्णं हनुमता सार्धमन्वशोचन्त राघवौ ॥ ३ ॥
अचेष्टौ मन्दनिश्वासौ शोणितौघपरिप्लुतौ ॥ शरजालाचितौ स्तब्धौ शयानौ शरतल्पयोः ॥ ४ ॥
निश्वसन्तौ यथा सर्पौ निश्चेष्टौ मन्दविक्रमौ ॥ रुधिरस्रावदिग्धाङ्गौ तापनीयाविव ध्वजौ ॥ ५ ॥
तौ वीरशयने वीरौ शयानौ मन्दचेष्टितौ ॥ यूथपैस्तैः परिवृतौ बाष्पव्याकुललोचनैः ॥ ६ ॥
राघवौ पतितौ दृष्ट्वा शरजालसमावृतौ ॥ बभूवुर्व्यथिताः सर्वे वानराः सविभीषणाः ॥ ७ ॥
अन्तरिक्षं निरीक्षन्तो दिशः सर्वाश्च वानराः ॥ न चैनं मायया च्छन्नं ददृशू रावणिं रणे ॥ ८ ॥
तं तु मायाप्रतिच्छन्नं माययैव विभीषणः ॥ वीक्षमाणो ददर्शाथ भ्रातुः पुत्रमवस्थितम् ॥ ९ ॥
तमप्रतिमकर्माणमप्रतिद्वन्द्वमाहवे ॥ ददर्शान्तर्हितं वीरं वरदानाद्विभीषणः ॥ १० ॥
तेजसा यशसा चैव विक्रमेण च संयुतम् ॥ ११ ॥
इन्द्रजित्त्वात्मनः कर्म तौ शयानौ समीक्ष्य च ॥ उवाच परमप्रीतो हर्षयन्सर्वनैर्ऋतान् ॥ १२ ॥
दूषणस्य च हन्तारौ खरस्य च महाबलौ ॥ सादितौ मामकैर्बाणैर्भ्रातरौ रामलक्ष्मणौ ॥ १३ ॥
नेमौ मोक्षयितुं शक्यावेतस्मादिषुबन्धनात् ॥ सर्वैरपि समागम्य सर्षिसङ्घैः सुरासुरैः ॥ १४ ॥
यत्कृते चिन्तयानस्य शोकार्तस्य पितुर्मम ॥ अस्पृष्ट्वा शयनं गात्रैस्त्रियामा याति शर्वरी ॥ १५ ॥
कृत्स्नेयं यत्कृते लङ्का नदी वर्षास्विवाकुला ॥ सोयं मूलहरोऽनर्थः सर्वेषां निर्हतो मया ॥ १६ ॥

अथ पूर्वसर्गोक्तमनुवदति—तत इत्यादि ॥ द्यां आकाशं । सन्ततौ व्याप्तौ ॥ १ ॥ वृष्ट्वा उपरते देव इव स्थिते राक्षसे । कृतकर्मणि कृतशरवर्षरूपकर्मणि सति । तं देशं रामस्थानं ॥ २ ॥ नीलेति नीलादयः सुग्रीवात्पूर्वमेवागताः ॥ ३ ॥ अचेष्टाविति आदिचतुःश्लोक्येकान्वयाः ॥ अचेष्टौ अतएव स्तब्धौ निश्चलौ । मध्ये मध्ये मन्दनिश्वासौ मध्ये मध्ये निश्चेष्टौ । कदाचित्सर्पाविव निश्वसन्तौ कदाचिन्मन्दचेष्टितौ च । अत्र पुनरुक्तयो दुःखातिरेकात् । यद्वा अचेष्टाविति श्लोकः पूर्वश्लोकेनान्वितः ॥ ४—८ ॥ मायायैवेति । अन्तर्हितस्तुदर्शनहेतुभूतया विद्ययेत्यर्थः ॥ ९ ॥ अप्रतिद्वन्द्वं निःसमं । वरदानादन्तर्हितमित्यन्वयः । तेजसेत्यर्धं पूर्वेणान्वेति ॥ १०—११ ॥ आत्मनः कर्म नागास्त्रबन्धरूपं । शयानौ तौ च वीक्ष्येत्यन्वयः ॥ १२ ॥ सादितौ पश्यतेति शेषः ॥ १३ ॥ समागम्य सङ्घीभूय ॥ १४ ॥ यत्कृते यन्निमित्तं गात्रैः शयनमस्पृष्ट्वा चिन्तयानस्यैव मम पितुः त्रियामा याति । यत्पौरुषभयान्मम पिता शर्वर्यामेकस्मिन्नपि यामे न निद्रातीत्यर्थः ॥ १५ ॥ लङ्का लङ्कास्थजनः । आकुला नदीपक्षे आविलेत्यर्थः । लङ्कापक्षे व्यग्रे-

स० दूषणस्यचहन्तारावित्याद्युक्तिश्छत्रिन्यायेन । रामस्यैवतद्धन्तृत्वात् ॥ १३ ॥ स० यत्कृते यस्यरामस्यनिमित्तं शोकार्तस्य । स्त्रिया मन्दोदर्या अमा सह शयनंशय्यां गात्रैरस्पृष्ट्वैवचिन्तयानस्यममपितुः शर्वरीयाति । शार्वरीत्यपिक्वचित्पाठः । 'प्रज्ञाद्यणिशार्वर्यपि "शार्वरीशर्वरीशर्या" इतिशब्दार्णवः' इत्यमरव्याख्यायांभानुदीक्षितः । 'अमासहार्थान्तिकयोः' इतिविश्वः

[पा०] १ च. ञ. झ. ट. नीलश्चद्विविदोमैन्दः. २ क. ग. ज. सुमुखाङ्गदाः. ३ ग. च.—ट. शोणितेनपरिप्लुतौ. ४ ङ. छ. झ. ञ. ट. शरतल्पगौ. ५ क. ग. च.—ट. दीनविक्रमौ. ६ ङ. छ. झ. ञ. ट. यूथपैस्त्वैः. ७ ङ. छ. झ. ञ. ट. समन्वितौ. च. समाचितौ. ८ ङ.—ट. ददर्शाग्रे. ९ क. ख. घ. छ. झ. ञ. ट. न्सर्वराक्षसान्. १० ख. ङ.—ट. शमितो.

रामस्य लक्ष्मणस्यापि सर्वेषां च वनौकसाम् ॥ विक्रमा निष्फलाः सर्वे यथा शरदि तोयदाः ॥१७॥
एवमुक्त्वा तु तान्सर्वान्राक्षसान्परिपार्श्वतः ॥ यूथपानपि तान्सर्वांस्ताडयामास रावणिः ॥ १८ ॥
नीलं नवभिराहत्य मैन्दं च द्विविदं तथा ॥ त्रिभिस्त्रिभिरमित्रघ्नस्ताप प्रवरेषुभिः ॥ १९ ॥
जाम्बवन्तं महेष्वासो विद्ध्वा बाणेन वक्षसि ॥ हनूमतो वेगवतो विससर्ज शरान्दश ॥ २० ॥
गवाक्षं शरभं चैव द्वौवप्यमिततेजसौ ॥ द्वाभ्यां द्वाभ्यां महावेगो विव्याध युधि रावणिः ॥ २१ ॥
गोलाङ्गूलेश्वरं चैव वालिपुत्रमथाङ्गदम् ॥ विव्याध बहुभिर्बाणैस्त्वरमाणोथ रावणिः ॥ २२ ॥
तान्वानरवरान्भित्त्वा शरैरग्निशिखोपमैः ॥ ननाद बलवांस्तत्र महासत्त्वः स रावणिः ॥ २३ ॥
तानर्दयित्वा बाणौघैस्त्रासयित्वा च वानरान् ॥ प्रजहास महाबाहुर्वचनं चेदमब्रवीत् ॥ २४ ॥
शरबन्धेन घोरेण मया बद्धौ चमूमुखे ॥ सहितौ भ्रातरावेतौ निशामयत राक्षसाः ॥ २५ ॥
एवमुक्तास्तु ते सर्वे राक्षसाः कूटयोधिनः ॥ परं विस्मयमाजग्मुः कर्मणा तेन हर्षिताः ॥ २६ ॥
विनेदुश्च महानादान्सर्वतो जलदोपमाः ॥ हतौ राम इति ज्ञात्वा रावणिं समपूजयन् ॥ २७ ॥
निष्पन्दौ तु तदा दृष्ट्वा तावुभौ रामलक्ष्मणौ ॥ वसुधायां निरुच्छ्वासौ हतावित्यन्वमन्यत ॥२८॥
हर्षेण तु समाविष्ट इन्द्रजित्समितिंजयः ॥ प्रविवेश पुरीं लङ्कां हर्षयन्सर्वराक्षसान् ॥ २९ ॥
रामलक्ष्मणयोर्दृष्ट्वा शरीरे सायकैश्चिते ॥ सर्वाणि चाङ्गोपाङ्गानि सुग्रीवं भयमाविशत् ॥ ३० ॥
तमुवाच परित्रस्तं वानरेन्द्रं विभीषणः ॥ सबाष्पवदनं दीनं शोकैर्व्याकुललोचनम् ॥ ३१ ॥
अलं त्रासेन सुग्रीव बाष्पवेगो निगृह्यताम् ॥ एवंप्रायाणि युद्धानि विजयो नास्ति नैष्ठिकः ॥३२॥
सशेषभाग्यताऽस्माकं यदि वीर भविष्यति ॥ मोहमेतौ प्रहास्येते महात्मानौ महाबलौ ॥ ३३ ॥
पर्यवस्थापयात्मानमनाथं मां च वानर ॥ सत्यधर्माभिरक्तानां नास्ति मृत्युकृतं भयम् ॥ ३४ ॥
एवमुक्त्वा ततस्तस्य जलक्लिन्नेन पाणिना ॥ सुग्रीवस्य शुभे नेत्रे प्रममार्ज विभीषणः ॥ ३५ ॥
ततः सलिलमादाय विद्यया परिजप्य च ॥ सुग्रीवनेत्रे धर्मात्मा स ममार्ज विभीषणः ॥ ३६ ॥

त्यर्थः । सर्वेषामस्माकं मूलहरः अनर्थः अनर्थकरो रामः ॥ १६ ॥ विक्रमाः सेतुबन्धनादयः ॥ १७ ॥ परिपार्श्वतः समीपतः ॥ १८—१९ ॥ हनूमतः हनूमदर्थमित्यर्थः । संबन्धसामान्ये षष्ठी ॥ २०–२१ ॥ गोलाङ्गूलेश्वरं गवाक्षं ॥ २२—२४ ॥ निशामयत पश्यत ॥ २५ ॥ कूटयोधिनः कपटयोधिनः ॥ २६–२९ ॥ शरीरे इति प्रत्येकापेक्षया द्विवचनं । अङ्गानि करादीनि । उपाङ्गानि अङ्गुल्यादीनि । अत्रापि शरैश्चितानीति योज्यं । दृष्ट्वा स्थित इति सुग्रीवो विशेषणीयः ॥३०—३१॥ एवंप्रायाणि एवंविधानि । " प्रायश्चानशने मृत्यौ तुल्यबाहुल्ययोरपि " इति विश्वः । नैष्ठिकः नियतः ॥ ३२ ॥ सशेषभाग्यतेति । अस्माकं भाग्यशेषं यद्यस्तीत्यर्थः ॥ ३३ ॥ पर्यवस्थापयात्मानं मनो निश्चलं कुरु । स्वात्मपर्यवस्थापनेन मां च पर्यवस्थापय । धैर्यं कारयेत्यर्थः । पर्यवस्थापने हेतुमाह—सत्येति । मृत्युकृतं अपमृत्युकृतं॥३४॥ जलक्लिन्नेन जलसिक्तेन ॥ ३५ ॥ एवममाङ्गल्यनिवृत्त्यर्थं श्रान्तिनिवृत्त्यर्थं वा नेत्रे प्रमृज्य राक्षसमाया-

॥ १५ ॥ स० अनाथमित्यनेन पलायितस्यतवराज्यमस्तिनतथाममेतिसूचयति ॥ २४ ॥ ति० ततः सामान्यतःप्रमार्जनानन्तरं विद्यया तिरस्करणीविद्यातिरस्कारकविद्यया परिजप्य । परिवीक्ष्येतिपाठेप्ययमेवार्थः । राक्षसमायापरिज्ञानेनधैर्यसंपादनंचैतत्प्रमार्जनस्यफलं । वस्तुतः ततस्सलिलमितिश्लोकोबहुपुस्तकेषुनास्तीतिप्रायेणप्रक्षिप्तोयं । तेनेन्द्रजितंददर्शेतितत्कार्यप्रकाशकोत्तरवाक्याभावात् ॥ ३६ ॥

[पा०] १ क. ग. झ. ञ. ट. लक्ष्मणस्यैव. २ ग.—च. झ. ञ. ट. तावप्यमितविक्रमौ. ३ ग. घ. च. ञ. भ्रातरौराम. ४ क. ख. घ. च. ट. न्सर्वनैर्कृतान्. ५ क.—ट. क्रोधव्याकुल. ६ च. छ. सशेषभाग्यमस्माकं. क. ङ. झ. ञ. ट. सभाग्यशेषतास्माकं. ७ घ. प्रहास्येतेभ्रातरौरामलक्ष्मणौ.

प्रमृज्य[1] वदनं तस्य कपिराजस्य धीमतः ॥ अब्रवीत्कालसंप्राप्तं[2] समसंभ्रममिदं वचः ॥ ३७ ॥
न कालः कपिराजेन्द्र वैक्लव्यमनुवर्तितुम्[3] ॥ अतिस्नेहोप्यकालेऽस्मिन्मरणायोपकल्पते[4] ॥ ३८ ॥
तस्मादुत्सृज्य वैक्लव्यं सर्वकार्यविनाशनम् ॥ हितं रामपुरोगाणां[5] सैन्यानामनुचिन्त्यताम्[6] ॥ ३९ ॥
अथवा रक्ष्यतां रामो यावत्संज्ञाविपर्ययः[7] ॥ लब्धसंज्ञौ हि काकुत्स्थौ भयं नो व्यपनेष्यतः ॥४०॥
नैतत्किंचन रामस्य न च रामो मुमूर्षति ॥ न ह्येनं हास्यते लक्ष्मीर्दुर्लभा या गतायुषाम्[8] ॥ ४१ ॥
तस्मादाश्वासयात्मानं बलं चाश्वासय स्वकम् ॥ यावत्कार्याणि सर्वाणि पुनः संस्थापयाम्यहम्[9] ॥४२॥
एते हि फुल्लनयनास्त्रासादागतसाध्वसाः ॥ कर्णे कर्णे प्रकथिता हरयो हरिसत्तम ॥ ४३ ॥
मां तु दृष्ट्वा प्रधावन्तमनीकं संप्रहर्षितुम्[10] ॥ त्यजन्तु हरयस्त्रासं भुक्तपूर्वामिव स्रजम् ॥ ४४ ॥
समाश्वास्य तु सुग्रीवं राक्षसेन्द्रो विभीषणः ॥ विद्रुतं वानरानीकं तत्समाश्वासयत्पुनः ॥ ४५ ॥
इन्द्रजित्तु महामायः सर्वसैन्यसमावृतः ॥ विवेश नगरीं लङ्कां पितरं चाभ्युपागमत् ॥ ४६ ॥
तत्र रावणमासीनमभिवाद्य[11] कृताञ्जलिः ॥ आचचक्षे प्रियं पित्रे निहतौ रामलक्ष्मणौ ॥ ४७ ॥
उत्पपात ततो हृष्टः पुत्रं च परिषस्वजे ॥ रावणो रक्षसां मध्ये श्रुत्वा शत्रू निपातितौ ॥
उपाघ्राय[12] स मूर्ध्नेनं पप्रच्छ प्रीतमानसः ॥ ४८ ॥

परिज्ञानेनाप्यस्य धैर्यसंपादनाभिप्रायेण विद्याभिमन्त्रितजलेनापि ममार्जेत्याह—तत इति ॥ विद्यया राक्षसमायादर्शनहेतुमन्त्रेण । परिजप्य अभिमन्त्र्य ॥ ३६ ॥ कालसंप्राप्तं तत्कालोचितं । असंभ्रमं अव्याकुलमिति क्रियाविशेषणं ॥ ३७ ॥ वैक्लव्यं अधैर्यं । किं करोमि अतिस्नेह एवं बाधत इत्यत्राह—अतिस्नेहोपीति ॥ ३८ ॥ एवं त्यक्तव्यमुक्त्वा कर्तव्यमुपदिशति—तस्मादिति ॥ वैक्लव्यमिति स्नेहस्याप्युपलक्षणं । रामपुरोगाणां रामप्रभृतीनां । रामशरण्यानामित्यर्थः ॥ ३९ ॥ संज्ञाविपर्ययः मूर्च्छा । यावदनुवर्तते तावद्रक्ष्यतामित्यर्थः ॥ ४० ॥ एवंभूतयोः कथं संज्ञाप्राप्तिस्तत्राह—नैतदिति ॥ एतत् शस्त्रबन्धनं । रामस्य न किंचन । इदमसत्प्रायं बाधकं न भवतीत्यर्थः । अतो न मुमूर्षति । मरिष्यतीति शङ्का न कर्तव्येत्यर्थः । " आशङ्कायामुपसंख्यानं " इति म्रियतेः सन् । एतच्च जीवनलिङ्गशरीरसौभाग्येन निश्चीयत इत्याह—नहीति । गतायुषां मृतानां । या लक्ष्मीः मुखकान्तिः । दुर्लभा । सा च एनं न हास्यते । न जहातीत्यर्थः । जीवनानुकूला लक्ष्मीर्दृश्यत इत्यर्थः ॥ ४१ ॥ यावत् यावत्पर्यन्तं । सर्वाणि कार्याणि कर्तव्यानि पुनः संस्थापयामि । तावत्पर्यन्तमाश्वासयेत्यन्वयः । केचित्तु यावत्कार्याणि यावन्ति कर्तव्यानि । तानि सर्वाणीत्याहुः ॥ ४२ ॥ पर्यवस्थापनं किमर्थमित्यत्राह—एते हीति ॥ आगतसाध्वसाः प्राप्तभयविकाराः । ते च विकाराः पुलकादयः । प्रकथिताः पलायनार्थं प्रवृत्तकथा इत्यर्थः । संप्रहर्षितुमित्यनन्तरं अर्हसीत्यध्याहार्यं । प्रधावन्तं इन्द्रजिद्भ्रमेणेति भावः । इदमनीकविशेषणं । गच्छामीति वाध्याहार्यं । संप्रहर्षितुं भयान्निवर्तयितुमिति यावत् । तदेवाह—त्यजन्त्विति ॥ ४३—४४ ॥ समाश्वासयत् नाहमिन्द्रजित्किंतु विभीषण इति समाश्वासयदित्यर्थः ॥ ४५ ॥ कथासंघट्टनाय पूर्वोक्तमनुवदति—इन्द्रजित्त्विति ॥ ४६ ॥ रामलक्ष्मणावित्यनन्तरमितिकरणं ज्ञेयं ॥ ४७ ॥ उत्पपात आसनादिति शेषः ॥ ४८ ॥

स० बलं प्राणं । सर्वाणिसैन्यानीत्युत्तरत्रोक्तेः ॥ ४२ ॥ स० त्रासात् तवोत्पन्नाद्भयात् आगतसाध्वसाःसन्तः कर्णेकर्णे प्रकथिताः भवन्ति ॥ ४३ ॥ ति० अनीकप्रत्याश्वासनार्थमांधावन्तंदृष्ट्वातुसंप्रहर्षितंप्राप्तहर्षमनीकं तद्रूपाहरयोभुक्तपूर्वांस्रजमिवत्रासंत्यजन्तु ॥ ४४ ॥

[पा०] १ क. च. ज. ट. विमृज्य. २ क. ख. ग. ङ. झ. ञ. ट. संप्राप्तसमसंभ्रान्तं. घ. संप्राप्तंसमभ्रार्थं. ३ घ.—छ. झ. ञ. ट. मवलंबितुं. ४ च. छ. ज. स्नेहस्यकाले. ५ क.—घ. प्रपद्यते. ६ ङ.—ट. मनुचिन्तय. ७ ख. ङ. झ. ञ. ट. यावत्सैन्यानि. ८ घ. दृष्ट्वानुधावन्तं. ९ क. ख. संप्रधर्षितं. ङ. छ.—ट. संप्रहर्षितं. १० क.—ट. मासाद्यअभिवाद्य. ११ क. घ.—ट. उपाघ्रायचतंमूर्ध्नि.

पृच्छते च यथावृत्तं [1]पित्रे सर्वं न्यवेदयत् ॥ यथा तौ शरबन्धेन निश्चेष्टौ निष्प्रभौ कृतौ ॥ ४९ ॥
स हर्षवेगानुगतान्तरात्मा श्रुत्वा वचस्तस्य महारथस्य ॥
जहौ ज्वरं दाशरथेः [2]समुत्थितं प्रहृष्य वाचाऽभिननन्द पुत्रम् ॥ ५० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

रावणाज्ञया राक्षसीभिस्त्रिजटया सहसीतायाः पुष्पकारोपणपूर्वकं रणाङ्गणप्रापणेनरामलक्ष्मणदुरवस्थाप्रदर्शनम् ॥ १ ॥ राक्षसभटैरावणनियोगेन लङ्कायांरामलक्ष्मणनियोगोद्घोषणम् ॥ २ ॥

[3]प्रतिप्रविष्टे लङ्कां तु कृतार्थे रावणात्मजे ॥ राघवं [4]परिवार्यार्ता ररक्षुर्वानरर्षभाः ॥ १ ॥
हनुमानङ्गदो नीलः सुषेणः कुमुदो नलः ॥ गजो गवा[5]क्षो गवयः शरभो गन्धमादनः ॥
[6]जाम्बवानृषभः स्कन्धो [7]रम्भः शतबलिः पृथुः ॥ २ ॥
व्यूढानीकाश्च यत्ताश्च द्रुमानादाय सर्वतः ॥ वीक्षमाणा दिशः सर्वास्तिर्यगूर्ध्वं च वानराः ॥
तृणेष्वपि च चेष्टत्सु राक्षसा इति मेनिरे ॥ ३ ॥
रावणश्चापि संहृष्टो विसृज्येन्द्रजितं सुतम् ॥ आजुहाव ततः सीतारक्षिणी राक्षसीस्तदा ॥ ४ ॥
राक्षस्स्त्रिजटा चैव [8]शासनात्समुपस्थिताः ॥ ता उवाच ततो हृष्टो राक्षसी राक्षसाधिपः ॥ ५ ॥
हताविन्द्रजिताऽऽख्यात वैदेह्या रामलक्ष्मणौ ॥ [9]पुष्पकं च समारोप्य दर्शयध्वं [10]हतौ रणे ॥ ६ ॥
यदाश्रयादवष्टब्धा नेयं मामुपतिष्ठति ॥ सोस्या भर्ता सह भ्रात्रा [11]निरस्तो रणमूर्धनि ॥ ७ ॥
निर्विशङ्का निरुद्विग्ना निरपेक्षा च मैथिली ॥ मामुपस्थास्यते सीता सर्वाभरणभूषिता ॥ ८ ॥

यथावृत्तं वृत्तमनतिक्रम्य । इदमेव विवृणोति—यथा ताविति ॥ ४९ ॥ हर्षवेगः हर्षातिशयः तेनानुगतो व्याप्तः अन्तरात्मा मनो यस्य स तथोक्तः । दाशरथेः निमित्तात् । ज्वरं चिन्तासंतापं । अनया राज्ञ्या प्रतिपद्यतेत्यूचुः ॥ ५० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षट्चत्वारिंशःसर्गः ॥ ४६ ॥

अथ सीतायै वीरशयनस्थरामलक्ष्मणप्रदर्शनं सप्तचत्वारिंशे—प्रतिप्रविष्ट इत्यादि ॥ १ ॥ ये ररक्षुस्तानाह—हनुमानित्यादिना ॥ २ ॥ अन्यान्वानरानाह—व्यूढानीकाश्चेति ॥ व्यूढानीकाः कृतव्यूहसेनावन्तः । चेष्टत्सु चेष्टमानेषु ॥ ३—५ ॥ आख्यात कथयत ॥ ६ ॥ अवष्टब्धा गर्विता । निर्विशङ्का निर्विचारा । निरुद्विग्ना निःशोका । भावे निष्ठा । निरपेक्षा रामः

ती० वस्तुतस्तुसरावणः हर्षवेगानुगतान्तरात्मायः दाशरथेःसमुत्थितंज्वरंजहौ तस्यवचःश्रुत्वा तंपुत्रं इन्द्रजितं । प्रहृष्य वाचाभिनन्द्य पुत्रप्रीत्यैकेवलंतंवाङ्मात्रेणननन्द नतुपरमार्थतः । "कालज्ञोराघवःकालेसंयुगायाभ्यचोदयत्" इत्यारभ्य "इन्द्रजित्तुमहामायःसर्वसैन्यसमावृतः । विवेशनगरींलङ्कां" इत्यन्तेनवानररक्षसांप्रतिपत्प्रवृत्तंयुद्धमुक्तं ॥५०॥ इतिषट्चत्वारिंशःसर्गः ॥४६॥

ती० व्यूढानीकाः व्यूढानि गरुडादिव्यूहाकाराणि अनीकानियेषांते ॥ ३ ॥ **स०** राक्षस्यः इतराः । त्रिजटेति ताभ्यःपृथक्त्योक्तिः उत्तरत्रसामान्यतोराक्षसीरित्युक्तिश्च त्रिजटा सीतापक्षेवर्ततइतिरावणमनसिसंदेहंसूचयतः ॥ ५ ॥ **शि०** मैथिली सर्वाभरणभूषितासती मां लङ्कासंपत्तिं । उपस्थास्यते अत्रैवनिवत्स्यतीत्यर्थः ॥ ८ ॥

[**पा०**] १ घ. पुत्रस्तस्मै. २ ग. ङ.—ट. समुत्थंप्रहृष्टवाचा. ३ ङ.—ट. तस्मिन्प्रविष्टेलङ्कायां. घ. प्रतिप्रविष्टेलङ्कायां. ४ ङ.—ट. परिवार्याथ. ५ छ. झ. ञ. ट. गवाक्षःपनसःसानुप्रस्थोमहाहरिः. ६ घ. जांबवानृक्षराजश्चरंभः. ७ क. ख. ङ. च. झ. ञ. ट. सुन्दोरंभः. ८ क. घ.—ट. शासनात्तमुपस्थिताः. ९ ग. ङ. च. झ. ञ. ट. पुष्पकंतत्समारोप्य. १० घ. गतायुधि. ११ ङ. —ट. निहतो.

अद्य कालवशं प्राप्तं रणे रामं सलक्ष्मणम् ॥ अवेक्ष्य विनिवृत्ताशा चान्यां गतिमपश्यती ॥
निरपेक्षा विशालाक्षी मामुपस्थास्यते स्वयम् ॥ ९ ॥
तस्य तद्वचनं श्रुत्वा रावणस्य दुरात्मनः ॥ राक्षस्यस्तास्तथेत्युक्त्वा जग्मुर्वै यत्र पुष्पकम् ॥ १० ॥
ततः पुष्पकमादाय राक्षस्यो रावणाज्ञया ॥ अशोकवनिकास्थां तां मैथिलीं समुपानयन् ॥ ११ ॥
तामादाय तु राक्षस्यो भर्तृशोकपराजिताम् ॥ सीतामारोपयामासुर्विमानं पुष्पकं तदा ॥ १२ ॥
ततः पुष्पकमारोप्य सीतां त्रिजटया सह ॥ जग्मुर्दर्शयितुं तस्यै राक्षस्यो रामलक्ष्मणौ ॥ १३ ॥
रावणोकारयल्लङ्कां पताकाध्वजमालिनीम् ॥ प्राघोषयत हृष्टश्च लङ्कायां राक्षसेश्वरः ॥
राघवो लक्ष्मणश्चैव हतावेन्द्रजिता रणे ॥ १४ ॥
विमानेनापि सीता तु गत्वा त्रिजटया सह ॥ ददर्श वानराणां तु सर्वं सैन्यं निपातितम् ॥ १५ ॥
प्रहृष्टमनसश्चापि ददर्श पिशिताशनान् ॥ वानरांश्चापि दुःखार्तान्रामलक्ष्मणपार्श्वतः ॥ १६ ॥
ततः सीता ददर्शोभौ शयानौ शरतल्पयोः ॥ लक्ष्मणं चापि रामं च विसंज्ञौ शरपीडितौ ॥ १७ ॥
विध्वस्तकवचौ वीरौ विप्रविद्धशरासनौ ॥ सायकैश्छिन्नसर्वाङ्गौ शरस्तम्बमयौ क्षितौ ॥ १८ ॥
तौ दृष्ट्वा भ्रातरौ तत्र वीरौ सा पुरुषर्षभौ ॥ शयानौ पुण्डरीकाक्षौ कुमाराविव पावकी ॥ १९ ॥
शरतल्पगतौ वीरौ तथाभूतौ नरर्षभौ ॥ दुःखार्ता सुभृशं सीता सुचिरं विललाप ह ॥ २० ॥

समेष्यतीत्याशारहिता ॥ ७—८ ॥ अद्येत्यादिसार्धश्लोक एकान्वयः ॥ अन्यां गतिं चापश्यती । आगमशासनस्यानित्यत्वान्नुमभावः । अन्यां मत्तोन्यां । गम्यत इति गतिः प्राप्यं । विनिवृत्ताशा रामाद्विनिवृत्तभावा ॥ ९—१२ ॥ त्रिजटया सह सीतामारोप्य । उभयोरेव विमानारोहणमनुज्ञायेत्यर्थः । पुत्रीत्वान्निपुणतया च त्रिजटाया विमानारोहणानुज्ञा ॥ १३ ॥ इन्द्रजिता रण इत्यनन्तरमितिकरणं बोध्यं ॥ १४—१६ ॥ ततः सीतेत्यादिश्लोकद्वयं ॥ विप्रविद्धशरासनौ भ्रष्टचापौ । सायकैश्छिन्नसर्वाङ्गौ अतएव शरस्तम्बमयौ शरगुल्ममयौ । स्तम्बः समूह इत्येके । क्षितौ शरतल्पयोः शयानाविति संबन्धः ॥ १७—१८ ॥ तावित्यादिश्लोकद्वयं ॥ पावकी पावकपुत्रौ स्कन्दविशाखौ । अत्रोत्तरो वीरशब्दः कुमाराविवस्य

ती० अन्यांगतिंनापश्यती अन्यां मत्तोन्यां । गम्यतइतिगतिः प्राप्यं । रामरूपंप्रियंपश्यतीतियावत् । राममवेक्ष्यविनिवृत्ताशा सास्वयंमामुपस्थास्यतइतिसंबन्धः । 'ताउवाचततोहृष्टाराक्षसीः' इत्यारभ्य'अनपेक्षाविशालाक्षीमामुपस्थास्यतेस्वयं' इत्यन्तस्यवास्तवार्थस्तु वैदेह्यारामलक्ष्मणवृत्तान्तजिज्ञासायां तद्वृत्तान्तंतस्यैकथयतेतिरावणोराक्षसीर्नियोजयति—ताउवाचेत्यारभ्यअनपेक्षाविशालाक्षीत्यन्तेन । रणेरामलक्ष्मणौ इन्द्रजितासह । युद्धायेतिशेषः । हतौ आगतावित्यर्थः । हनहिंसागत्योरितिधातोरेवमर्थः । वैदेह्या आख्यात तस्यास्तद्दर्शनेच्छायांसत्यांपुष्पकंसमारोप्यहतौ आगतौ तौ दर्शयध्वंचेत्यर्थः । तस्यैपतिदर्शनेनकिं भविष्यतितत्राह—यदाश्रयादित्यादिश्लोकद्वयेन । हे अवष्टब्धाः गर्विताःराक्षस्यः । इयंयदाश्रयात् यस्यरामस्याश्रयाद्धेतोः । मां लक्ष्मीं मदीयामितिशेषः । नोपतिष्ठति नानुभवतीत्यर्थः । अस्माभतांरणमूर्धनिभ्रात्रासहनिहतः आगतःखलु । तंदृष्ट्वा इतःपरंनिर्विशङ्का निरुद्विग्ना एतावत्पर्यन्तंनिरपेक्षापिमैथिली सर्वाभरणभूषितासती मां मदीयांलक्ष्मींनिवेदितांलक्ष्मीमित्यर्थः । उपस्थास्यते अनुभविष्यतीत्यर्थः । ननुकथंतत्समागमंविनातस्यदर्शनमात्रेणसीतात्वदर्पितैश्वर्यमनुभविष्यतीत्यत्राह—अद्येत्यादिसार्धश्लोकेन । कालवशं कालोवशोयस्यतं लक्ष्मणंरणेप्राप्तंराममपेक्ष्य नान्यांगतिंपश्यती रामव्यतिरिक्तप्राप्यंनपश्यतीसती परमपतिव्रतेत्यर्थः । अतएवानपेक्षा अतएवविनिवृत्ताशा । एतादृश्यपि सर्ववाक्यंसावधारणमितिन्यायात् अद्यैवस्वयमेवमां मदर्पितांलक्ष्मीं उपस्थास्यतीत्यर्थः । स० उपस्थास्यते संगतंकरोति मित्रीकरिष्यतीतिवा तेनात्मनेपदोपपत्तिः ॥ ९ ॥ स० रामं लक्ष्मणमितिवक्तव्ये यल्लक्ष्मणंचैवरामंचेतिवचनंनागपाशेननतदीशस्यबन्धनंसुतरांतच्छाथिनइतिद्योतयितुं ॥ १७ ॥ ती० विप्रविद्धशरासनौ भ्रष्टधनुष्कौ । शरस्तंबमयौ शरस्तंबःशरसमूहः तन्मयौ ॥ १८ ॥ इतिसप्तचत्वारिंशःसर्गः ॥ ४७ ॥

[पा०] १ क. ग.—ट. अनपेक्षा. २ घ. तामानाय्यतु. ३ घ. परायणां. ग. परिप्लुतां. ४ ङ. झ. ञ. ट. रावणश्चारयामास. च. छ. रावणःकारयामास. ५ ख. प्रविध्वस्तशरासनौ. ६ च. झ. ञ. ट. करुणं.

भर्तारमनवद्याङ्गी लक्ष्मणं चासितेक्षणा ॥ प्रेक्ष्य पांसुषु वेष्टन्तौ रुरोद जनकात्मजा ॥ २१ ॥
सा बाष्पशोकाभिहता समीक्ष्य तौ भ्रातरौ देवसमप्रभावौ ॥
वितर्कयन्ती निधनं तयोः सा दुःखान्विता वाक्यमिदं जगाद ॥ २२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

रामलक्ष्मणयोर्निधननिर्धारणेन सकरुणं बहुधाविलपन्तीसीतांप्रति त्रिजटया हेतूपन्यासाद्राघवयोर्जीवनप्रत्यायनेन समाश्वासनम् ॥ १ ॥ राक्षसीभिस्त्रिजटयासहसीतायाः पुनरशोकवनप्रापणम् ॥ २ ॥

भर्तारं निहतं दृष्ट्वा लक्ष्मणं च महाबलम् ॥ विललाप भृशं सीता करुणं शोककर्शिता ॥ १ ॥
ऊचुर्लक्षणिनो ये मां पुत्रिण्यविधवेति च ॥ तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ २ ॥
यज्वनो महिषीं ये मामूचुः पत्नीं च सत्रिणः ॥ तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ ३ ॥
ऊचुः संश्रवणे ये मां द्विजाः कार्तान्तिकाः शुभाम् ॥ तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥४॥
वीरपार्थिवपत्नी त्वं ये धन्येति च मां विदुः ॥ तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ ५ ॥
इमानि खलु पद्मानि पादयोर्यैः किल स्त्रियः ॥ आधिराज्येऽभिषिच्यन्ते नरेन्द्रैः पतिभिः सह ॥ ६ ॥

विशेषणं ॥ १९—२१ ॥ सेति अत्र वीक्षणगदनरूपक्रियाभेदात्तच्छब्दद्वयं ॥२२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

अथ सीताप्रलापोष्टचत्वारिंशे—भर्तारमिति ॥ करुणं यथा तथा विललाप ॥ १ ॥ लक्षणिन इति । लक्षणशब्देनात्र लक्षणज्ञानं लक्ष्यते तदेषामस्तीति लक्षणिनः । षडुत्तरषष्टिलक्षणसामुद्रिकशास्त्रज्ञा इत्यर्थः । " षष्टिष्षडुत्तरा योषिदङ्गलक्षणमीरितं " इत्युक्तेः । अतएवाविधवा विधवालक्षणरहिता । " निर्लोम हृदयं यस्याः समनिम्नत्ववर्जितम् । ऐश्वर्यं चाप्यवैधव्यं प्रियप्रेम च सा लभेत् " इत्युक्तलक्षणेत्यर्थः । पुत्रिणी पुत्रलाभलक्षणवती । " दीर्घाङ्गुलिश्च या नारी दीर्घकेशी च या भवेत् । दीर्घमायुरवाप्नोति पुत्रैश्च सह वर्तते " इत्युक्तलक्षणवतीत्यर्थः । ज्ञानिनो लक्षणज्ञानवन्तः । अनृतवादिनः आसन्निति शेषः ॥ २ ॥ यज्वनः कृताश्वमेधादिकस्य । " यज्वा तु विधिनेष्टवान् " इत्यमरः । बहुयजमानकानि गवामयनप्रभृतीनि सत्राणि तत्कर्तासत्री तस्य महिषीं कृताभिषेकां । " कृताभिषेका महिषी " इत्यमरः । पत्नीं यज्ञसंयोगवतीं । " पत्युर्नो यज्ञसंयोगे " इति पतिशब्दस्य नकारान्तादेशः । ततो " ऋन्नेभ्यो ङीप् " इति ङीप् ॥ ३ ॥ संश्रवणे मम सम्यक् श्रवणे । मयि शृण्वन्त्यामित्यर्थः । यद्वा सम्यक्-श्रवणमस्मिन्निति संश्रवणः सन्निधिः । मत्सन्निधावित्यर्थः । मात्रादिसमीप इति शेषः । कृतान्तः कालः तद्विदः कार्तान्तिकाः । " स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि " इत्यमरः । शुभां नित्यमङ्गलां । " स्मितं प्रशस्तं सुदृशामनिमीलितलोचनम् । समवृत्तपुटा नासा लघुच्छिद्रा शुभावहा " इत्याद्युक्तलक्षणैरिति शेषः ॥ ४ ॥ त्वं वीरपार्थिवपत्नी धन्या चेति ये विदुः । विदित्वा ऊचुरित्यर्थः । तेऽप्यनृतवादिन इति पूर्वेणान्वयः ॥ ५ ॥ यैः पद्मैरुपलक्षिताः स्त्रियः

ती० भर्तारंनिहतमित्यादिसीताप्रलापवाक्यानांवास्तवार्थेऽयमाशयः । सर्वेश्वरीसर्वज्ञादेवीरामलक्ष्मणयोःकापिहानिर्नास्तीति ज्ञात्वापि राक्षसान्वञ्चयितुंबहुविधंप्रलपतीति । निहतं निहतमिवस्थितमित्यर्थः । 'तेद्यसर्वेहतेरामे' इत्यादिसर्वस्थलेषु रामेहते हतइवस्थितेइत्यर्थः ॥ १ ॥ ति० वीरपार्थिवपत्नीनां पूजनीयामितिशेषः । भर्तृपूजितां सुमङ्गलीं येप्राहुः ॥ ५ ॥

[पा०] १ ख. ग. ङ.—ट. देवसुतप्रभावौ. २ ख. ग. घ. महारथं. ३ घ. ङ. झ. ट. लक्षणिकाः. ४ ऊचुस्संश्रवणे. वीरपार्थिवपत्नी. इत्यनयोःश्लोकयोःपौर्वापर्यं झ. पाठेदृश्यते. ५ झ. ट. वीरपार्थिवपत्नीनांयेविदुर्भर्तृपूजितां. ६ क. ख. ज. पादयोर्यैःकुलस्त्रियः. ङ. च. छ. झ. ञ. ट. पादयोर्वैकुलस्त्रियः.

वैधव्यं यान्ति यैर्नार्यो लक्षणैर्भाग्यदुर्लभाः ॥ नात्मनस्तानि पश्यामि पश्यन्ती हतलक्षणा ॥ ७ ॥
सत्यनामानि पद्मानि स्त्रीणामुक्तानि लक्षणैः ॥ तान्यद्य निहते रामे वितथानि भवन्ति मे ॥ ८ ॥
केशाः सूक्ष्माः समा नीला भ्रुवौ चासंगते मम ॥ वृत्ते चारोमशे जङ्घे दन्ताश्चाविरला मम ॥ ९ ॥
शङ्खे नेत्रे करौ पादौ गुल्फावूरू च मे चितौ ॥ अनुवृत्तनखाः स्निग्धाः समाश्चाङ्गुलयो मम ॥ १० ॥
स्तनौ चाविरलौ पीनौ ममैमौ मग्नचूचुकौ ॥ मग्ना चोत्सङ्गिनी नाभिः पार्श्वोरस्काश्च मे चिताः ॥ ११ ॥
मम वर्णो मणिनिभो मृदून्यङ्गरुहाणि च ॥ प्रतिष्ठितां द्वादशभिर्मामूचुः शुभलक्षणाम् ॥ १२ ॥
समग्रयवमच्छिद्रं पाणिपादं च वर्णवत् ॥ मन्दस्मितेत्येव च मां कन्यालक्षणिनो द्विजाः ॥ १३ ॥
आधिराज्येऽभिषेको मे ब्राह्मणैः पतिना सह ॥ कृतान्तकुशलैरुक्तं तत्सर्वं वितथीकृतम् ॥ १४ ॥

आधिराज्येभिषिच्यन्ते किलेत्यैतिह्ये । तानीमानि पद्मानि रेखारूपाणि दृश्यन्त इति शेषः । खल्विति प्रसिद्धौ । स्पष्टं दृश्यन्त इत्यर्थः । कथमेषां निष्फलत्वमितिभावः ॥ ६ ॥ भाग्यदुर्लभाः दुर्लभभाग्या नार्यः । यैर्लक्षणैर्वैधव्यं यान्ति तानि लक्षणानि पश्यन्ती विमृशन्ती । नपश्यामि । कुत्रापिवैधव्यहेतुर्लक्षणं न पश्यामीत्यर्थः । किंतु केवलं हतलक्षणा निष्फललक्षणास्मीत्यर्थः । तादृशलक्षणानि च सामुद्रिकोक्तानि । " परस्परं समारूढाः पादाङ्गुल्यो भवन्ति चेत् । हत्वा बहूनपि पतीन्परप्रेष्या तथा भवेत् ॥ यस्याः कनिष्ठिका भूमिं नगच्छन्त्याः परिस्पृशेत् । पतिद्वयं निहन्त्याद्या द्वितीया च पतित्रयम् ॥ एकरोमा राजपत्नी द्विरोमातिसुखान्विता । त्रिरोमा रोमकूपेषु भवेद्वैधव्यदुःखभाक् " इत्यादिना ॥ ७ ॥ पदि पदे मा श्रीर्येषां तानि पद्मानीत्येवं सत्यनामानि । पदश्रीकराणीत्यर्थः । यद्वा पद्मावत्त्वात् पद्मशब्दवाच्यानि । रेखारूपाणि यानि पद्मानि । सत्यनामानि अन्वर्थनामानि । पद्माशब्दादर्शआद्यचि कृते रूपं । केचित्सत्यनामानि अमोघफलानीत्याहुः । लक्षणैः ध्वजादिलक्षणैः सह यानि सत्यनामानि पद्मान्युक्तानि तानि मे वितथानि निष्फलानि भवन्तीतियोजना ॥ ८ ॥ केशा इत्यादिचतुःश्लोक्येकान्वया ॥ अहं सूक्ष्मकेशत्वादिलक्षणलक्षितास्मि । अतो मां शुभलक्षणामूचुरित्यन्वयः । समाः न्यूनाधिक्यरहिताः । असंगते परस्परमसंयुक्ते । अरोमशे रोमरहिते । वृत्ते वर्तुले । अत्र स्कान्दं—" रोमहीने शुभे स्निग्धे यज्जङ्घे क्रमवर्तुले । सा राजपत्नी भवति विशिरे सुमनोहरा " इति ॥ शङ्खे नेत्रोपान्तभूतललाटपार्श्वे । चितौ उपचितौ । एतच्छङ्खे नेत्रे इत्यत्र लिङ्गव्यत्ययेन योजनीयं । अनुवृत्तनखाः वृत्तनखाः । अङ्गुलयः पादहस्ताङ्गुलयः । तदुक्तं स्कान्दे—" स्निग्धाः समुन्नतास्तत्र वृत्ताः पादनखाः शुभाः " इति । समाः हस्तपरिमाणसदृशाः । नातिदीर्घा नातिह्रस्वा इत्यर्थः । यद्वा एकहस्तवद्धस्तान्तरेपि तुल्यपरिमाणा इत्यर्थः । अन्यूनाधिकसंख्याका इति वार्थः । अविरलौ निरन्तरौ । मग्नचूचुकौ ईषन्मग्नाग्रौ । मग्ना गम्भीरा । उत्सङ्गिनी उन्नतपर्यन्तप्रदेशः । पार्श्वोरस्काः पार्श्वे च उरस्कं च । आर्षो लिङ्गव्यत्ययः । चिताः उचिताः । मणिनिभः मणिवत्स्निग्धवर्णः । प्रतिष्ठितां द्वादशभिः दशभिः पादाङ्गुलिभिः द्वाभ्यां पादतलाभ्यां च भूमौ सुप्रतिष्ठितां ॥ ९—१२ ॥ समग्रयवं संपूर्णयवाकाररेखं । अच्छिद्रं श्लिष्टाङ्गुल्यन्तरालं । वर्णवत् अरुणवर्णं । मामूचुरित्यनुषञ्जनीयं । मन्दस्मितेत्येवेत्येवकारः अयोगव्यवच्छेदार्थः । नित्यमन्दस्मितेत्यर्थः ॥ १३ ॥ कृतान्तकुशलैः ज्यौतिषिकसिद्धान्तनिपुणैः । अत्र इतिकरणं द्रष्टव्यं । अभिषेक इत्युक्तमित्यन्वयः ।

स० लक्षणैः लक्षयन्तिजनानितिततज्ज्ञैःकर्तृभिः । लक्षणैः करणैर्वा । उक्तानि प्रोक्तानि । द्वितीयेतज्ज्ञैरितिशेषः ॥ ७—८ ॥ **शि०** नार्यःयैर्लक्षणैर्वैधव्यंयान्ति तानिलक्षणानिपश्यन्तीअन्वेषयन्ती । तलक्षणा तलयोःपाणिपादतलयोः क्षणं उत्सवप्रदचिह्नं यस्याः सा अहं आत्मनोनैवपश्यामि । एतेन रामनिधनंनसंभवतीतिसूचितं । हएवार्थे ॥ ७ ॥ **ति०** पार्श्वेचउरस्कंच । स्वार्थेकः । तत्पार्श्वोरस्कं ॥ ११ ॥ **स०** वर्णवत् रूपवत् । "वर्णःस्तुतौरूपे" इतिविश्वः ॥ १३ ॥ **स०** पतिनापत्या । पतिरित्याख्यातः पतिरितिलाक्षणिकः । नप्रतिपदोक्तोतःपतिसूत्रायगृहीतइतिपतिनेति 'पतितेपतौ' 'कृष्णस्यसखिरर्जुनः' इत्यादिवत्संभवतीतिवाङ्नेयं

[पा०] १ घ. दुर्लभैः. २ ङ. झ. ट. चासंहतेमम. ३ ङ. झ. ट. मामकौ. ४ ङ. झ. ट. पार्श्वोरस्कंचमेचितं. ५ ङ. च. छ. झ. ञ. ट. कन्यालाक्षणिकाविदुः. ग. घ. कन्यालक्षणिनोविदुः.

शोधयित्वा जनस्थानं प्रवृत्तिमुपलभ्य च ॥ तीर्त्वा सागरमक्षोभ्यं भ्रातरौ गोष्पदे हतौ ॥ १५ ॥
ननु वारुणमाग्नेयमैन्द्रं वायव्यमेव च ॥ अस्त्रं ब्रह्मशिरश्चैव राघवौ प्रेत्यपद्यताम् ॥ १६ ॥
अदृश्यमानेन रणे मायया वासवोपमौ ॥ मम नाथावनाथाया निहतौ रामलक्ष्मणौ ॥ १७ ॥
न हि दृष्टिपथं प्राप्य राघवस्य रणे रिपुः ॥ जीवन्प्रति निवर्तेत यद्यपि स्यान्मनोजवः ॥ १८ ॥
न कालस्यातिभारोस्ति कृतान्तश्च सुदुर्जयः ॥ यत्र रामः सह भ्रात्रा शेते युधि निपातितः ॥१९॥
न शोचामि तथा रामं लक्ष्मणं च महाबलम् ॥ नात्मानं जननीं वाऽपि यथा श्वश्रूं तपस्विनीम्॥२०॥
साऽनुचिन्तयते नित्यं समाप्तव्रतमागतम् ॥ कदा द्रक्ष्यामि सीतां च लक्ष्मणं च सराघवम् ॥२१॥
परिदेवयमानां तां राक्षसी त्रिजटाऽब्रवीत् ॥ २२ ॥
मा विषादं कृथा देवि भर्ताऽयं तव जीवति ॥ २३ ॥
कारणानि च वक्ष्यामि महान्ति सदृशानि च ॥ यथेमौ जीवतो देवि भ्रातरौ रामलक्ष्मणौ ॥२४॥
न हि कोपपरीतानि हर्षपर्युत्सुकानि च ॥ भवन्ति युधि योधानां मुखानि निहते पतौ ॥ २५ ॥
इदं विमानं वैदेहि पुष्पकं नाम नामतः ॥ दिव्यं त्वां धारयेन्नैवं यद्येतौ गतजीवितौ ॥ २६ ॥
हतवीरप्रधाना हि हतोत्साहा निरुद्यमा ॥ सेना भ्रमति संख्येषु हतकर्णेव नौर्जले ॥ २७ ॥
इयं पुनरसंभ्रान्ता निरुद्विग्ना तरस्विनी ॥ सेना रक्षति काकुत्स्थौ मया प्रीत्या निवेदितौ ॥ २८ ॥

" चक्रवार्तिस्त्रियः पाणौ नन्द्यावर्तः प्रदक्षिणः " इत्याद्युक्तनन्द्यावर्तादिलक्षणैरिति भावः । सर्वं वितथीकृतमित्यतः परं यज्वनो महिषीं ये मामित्यधस्तनश्लोकः केषुचित्कोशेषु दृश्यते । स तु लेखकप्रमादकृतः ॥ १४ ॥ शोधयित्वा अन्विष्य । प्रवृत्तिं वृत्तान्तं । गोष्पदे इन्द्रजिन्मायामात्र इति भावः ॥ १५ ॥ ब्रह्मशिरः अस्त्रविशेषः । प्रत्यपद्यतां नन्वित्यन्वयः । परस्मैपदमार्षं । नन्विति प्रसिद्धौ । आमन्त्रणे वा । " प्रभावधारणानुज्ञानुनयामन्त्रणे ननु " इत्यमरः । प्रलापे निर्निमित्तमामन्त्रणं संभवति ॥ १६—१७ ॥ दृश्यमानत्वे नैवं हन्तुं शक्नुयादित्याह—न हीति ॥ १८ ॥ नेति । शुभाशुभप्रापकस्य कालस्यातिभारो नास्ति । अशक्यार्थोनास्तीत्यर्थः । कृतान्तः दैवं । यत्र यतः । रामः अतिबलपराक्रमशाल्यपीति भावः ॥ १९ ॥ जननीं मन्मातरम् ॥ २० ॥ उक्तार्थे हेतुमाह—सेति ॥ समाप्तव्रतं अथ आगतं सराघवं लक्ष्मणं सीतां च कदा द्रक्ष्यामीति अनुचिन्तयत इत्यन्वयः ॥ २१ ॥ परिदेवयमानां विलपन्तीं ॥२२॥ मा विषादमित्यर्धं ॥ २३ ॥ इमौ रामलक्ष्मणौ जीवत इति यथा ज्ञातुं शक्यते तथा । महान्ति स्फुटानि । सदृशानि पूर्वानुभूततुल्यानि । दृष्टसंवादानीति यावत् । कारणानि हेतून् । वक्ष्यामीत्यन्वयः ॥२४॥ तान्येव कारणानि व्यतिरेकमुखेनाह—न हीति ॥ हर्षेण पर्युत्सुकानि । प्रसन्नानीतियावत् ॥२५—२६॥ हतकर्णा हतकर्णधारा ॥ २७ ॥ निवेदितौ निवेदित-

॥ १४ ॥ **ति०** गोष्पदे अल्पावशिष्टसैन्ये । हताविति यर्थः । अनेन बहुदिनयुद्धोत्तरमल्पावशिष्टैसैन्येकतिपययूथपरूपेऽयंशरबन्धइतिलभ्यते ॥ १५ ॥ **स०** राघवौ रामलक्ष्मणौ प्रत्यपद्यत प्रत्यपद्येतां । विश्वामित्रादितिशेषः । राघवश्चराघवश्चेत्येतद्विग्रहवाक्यैकवचनापेक्षयापृथक्पृथगन्वयोवा । विश्वामित्रोवसिष्ठोवाराघवौप्रत्यपद्यत प्रत्यपादयत् आहयामासेतिवा । ननुना सर्वएतदादिविस्मृतंवामायाप्रबलेतिवाकल्पनांसूचयति ॥ १६ ॥ **स०** नाथौ एकोमुख्यतयारक्षकत्वेनामुख्यतयाचैकइतिनाथौ । छत्रिन्यायेनवा ॥ १७ ॥ **शि०** यत्र यदानिपातितोरामःशेते तदा कृतान्तःकालःसुदुर्जयः कैश्चिदपिजेतुंअशक्यः । अतएव कालस्यातिभार अतिभीतिर्नास्ति । रावणमेवाश्रित्यसर्वेनिर्भयाभविष्यन्तीतिसूचितं ॥ १९ ॥ **स०** जननीं जनकभार्यां । जनकोप्युपलक्ष्यते । वार्धकाद्गतपतित्वादेकपुत्रत्वात्तामेवशोचामीतिभावः ॥ २० ॥ **शि०** नामतःपुष्पकमिदंविमानं यदितौगतजीवितौ तर्हि त्वांनधारयेत् । विधवांनधारयतीत्यर्थः । एतेन धारणरूपंहेत्वन्तरंसूचितं ॥ २६ ॥ इत्यष्टचत्वारिंशःसर्गः ॥ ४८ ॥

[**पा०**] १ क.—घ. च. ञ. मुपलभ्यमे. २ झ. ञ. ट. प्रत्यपद्यत. ३ झ. सातु. ४ क. ग. ङ.—ट. धारयन्नेदं. ५ ङ.—ट. गतोत्साहा. ६ ख. ग. ङ.—ट. तपस्विनि.

सा त्वं भव सुविस्रब्धा अनुमानैः सुखोदयैः ॥ अहतौ पश्य काकुत्स्थौ स्नेहादेतब्रवीमि ते ॥२९॥
अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन ॥ चारित्रसुखशीलत्वात्प्रविष्टासि मनो मम ॥ ३० ॥
नेमौ शक्यौ रणे जेतुं सेन्द्रैरपि सुरासुरैः ॥ तादृशं दर्शनं दृष्ट्वा मया चैवेदितं तव ॥
इदं च सुमहच्चिह्नं शनैः पश्यस्व मैथिलि ॥ ३१ ॥
निःसंज्ञावप्युभावेतौ नैव लक्ष्मीर्विमुञ्चति ॥ प्रायेण गतसत्त्वानां पुरुषाणां गतायुषाम् ॥
दृश्यमानेषु वक्त्रेषु परं भवति वैकृतम् ॥ ३२॥
त्यज शोकं च मोहं च दुःखं च जनकात्मजे ॥ रामलक्ष्मणयोरर्थे नाद्य शक्यमजीवितुम् ॥ ३३ ॥
श्रुत्वा तु वचनं तस्याः सीता सुरसुतोपमा ॥ कृताञ्जलिरुवाचेदमेवमस्त्विति मैथिली ॥ ३४ ॥
विमानं पुष्पकं तत्तु सन्निवर्त्य मनोजवम् ॥ दीना त्रिजटया सीता लङ्कामेव प्रवेशिता ॥ ३५ ॥
ततस्त्रिजटया सार्धं पुष्पकादवरुह्य सा ॥ अशोकवनिकामेव राक्षसीभिः प्रवेशिता ॥ ३६ ॥
प्रविश्य सीता बहुवृक्षषण्डां तां राक्षसेन्द्रस्य विहारभूमिम् ॥
संप्रेक्ष्य संचिन्त्य च राजपुत्रौ परं विषादं समुपाजगाम ॥ ३७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

एकोनपञ्चाशः सर्गः ॥ ४९ ॥

नागपाशबद्धेनापिदिष्ट्याप्रबुद्धेनरामेण लक्ष्मणदुरवस्थावलोकनेनतस्य चरमावस्थाशङ्कया तंप्रतिशोचनपूर्वकंबहुधा विलापः ॥ १ ॥

घोरेण शरबन्धेन बद्धौ दशरथात्मजौ ॥ निश्वसन्तौ यथा नागौ शयानौ रुधिरोक्षितौ ॥ १ ॥
सर्वे ते वानरश्रेष्ठाः ससुग्रीवा महाबलाः ॥ परिवार्य महात्मानौ तस्थुः शोकपरिप्लुताः ॥ २ ॥

जीवितौ ॥२८॥ अनुमानैः चिह्नैः । सुखोदयैः सुखज्ञैरित्यर्थः । चारित्रसुखशीलत्वात् । चरित्रमेव चारित्रं पातिव्रत्यं तदेव सुखं प्रियं शीलं स्वभावः यस्याः सा तस्याः भावश्चारित्रसुखशीलत्वं तस्मात् । यद्वा चारित्रेणाह्लादकस्वभावत्वादित्यर्थः । प्रविष्टासि मनो मम । त्वयि मम स्नेहो वर्तत इत्यर्थः ॥ २९–३० ॥ तादृशं तादृग्विधं । जीवनव्यञ्जकमिति यावत् । दृश्यते ज्ञायतेनेनेति दर्शनं सैन्यमुखप्रसादादिकं । पूर्वदृष्टं स्वप्नमिति वार्थः । शनैः पश्यस्व सावधानेन पश्येत्यर्थः ॥ ३१ ॥ न विमुञ्चति न जहाति । गतायुषां अतएव गतसत्त्वानां गतप्राणानां । " द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु " इत्यमरः । वैकृतं विकृतिः ॥ ३२ ॥ रामलक्ष्मणयोरर्थे शोकं शोककृतं मुखविकारं । मोहं विपरीतबुद्धिं । दुःखं मनोव्यथां च त्यज । अजीवितुं न शक्यं जीवितुं शक्यमेवेत्यर्थः ॥ ३३ ॥ कृताञ्जलिरित्यनेन भगवद्विषयोपदेष्टा योपि कोप्यादरणीय इत्युक्तं । इदंशब्दविवरणं एवमस्त्विति ॥ ३४ ॥ विमानमिति । सन्निवर्तने प्रवेशने च त्रिजटैव कर्त्री ॥ ३५ ॥ राक्षसीभिरित्यनेन त्रिजटादर्शनायानीतेति गम्यते ॥ ३६ ॥ विहारभूमिं प्रमदावनं । संप्रेक्ष्य संचिन्त्य । प्रेक्षितप्रकारेण संचिन्त्येत्यर्थः । यद्वा भावनाप्रकर्षात्पुरःस्थितौ संप्रेक्ष्येत्यर्थः ॥ ३७ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

अथ रामप्रबोधनमेकोनपञ्चाशे—घोरेणेत्यादिश्लोकद्वयमेकान्वयं ॥ नागौ यथा नागाविव निश्वस-

[पा०] १ क.—ट. वक्ष्यामिमैथिलि. २ ग. झ. ट. चोदीरितं. ३ ङ. झ. ट. इदंतुसुमहच्चित्रं. ४ ग. घ. पश्याद्यमैथिलि. ५ ङ. झ. ट. विसंज्ञौपतितावेतौनैवलक्ष्मीर्विमुञ्चति. ६ ख. ग. ङ. झ. ट. रुवाचेमामेवं. ७ ग. ज. शोकपरिप्लुतौ.

एतस्मिन्नन्तरे रामः प्रत्यबुध्यत वीर्यवान् ॥ स्थिरत्वात्सत्त्वयोगाच्च शरैः संदानितोपि सन् ॥ ३ ॥
ततो दृष्ट्वा सरुधिरं विषण्णं गाढमर्पितम् ॥ भ्रातरं दीनवदनं पर्यदेवयदातुरः ॥ ४ ॥
किंनु मे सीतया कार्यं किं कार्यं जीवितेन वा ॥ शयानं योऽद्य पश्यामि भ्रातरं युधि निर्जितम् ॥५॥
शक्त्या सीतासमा नारी मर्त्यलोके विचिन्वता ॥ न लक्ष्मणसमो भ्राता सचिवः सांपरायिकः ॥६॥
परित्यक्ष्याम्यहं प्राणं वानराणां तु पश्यताम् ॥ यदि पञ्चत्वमापन्नः सुमित्रानन्दवर्धनः ॥ ७ ॥
किंनु वक्ष्यामि कौसल्यां मातरं किंनु कैकयीम् ॥ कथमम्बां सुमित्रां च पुत्रदर्शनलालसाम् ॥८॥
विवत्सां वेपमानां च क्रोशन्तीं कुररीमिव ॥ कथमाश्वासयिष्यामि यदा यास्यामि तं विना ॥ ९ ॥
कथं वक्ष्यामि शत्रुघ्नं भरतं च यशस्विनम् ॥ १० ॥
मया सह वनं यातो विना तेन गतः पुनः ॥ उपालम्भं न शक्ष्यामि सोढुं बत सुमित्रया ॥ ११ ॥
इहैव देहं त्यक्ष्यामि न हि जीवितुमुत्सहे ॥ १२ ॥
धिङ्मां दुष्कृतकर्माणमनार्यं यत्कृते ह्यसौ ॥ लक्ष्मणः पतितः शेते शरतल्पे गतासुवत् ॥ १३ ॥
त्वं नित्यं स विषण्णं मामाश्वासयसि लक्ष्मण ॥ गतासुर्नाद्य शक्नोषि मामार्तमभिभाषितुम् ॥१४॥
येनाद्य निहता युद्धे राक्षसा विनिपातिताः ॥ तस्यामेव क्षितौ वीरः स शेते निहतः परैः ॥ १५ ॥
शयानः शरतल्पेऽस्मिन्स्वशोणितपरिप्लुतः ॥ शरजालैश्चितो भाति भास्करोस्तमिव व्रजन् ॥ १६ ॥
बाणाभिहतमर्मत्वान्न शक्नोत्यभिभाषितुम् ॥ रुजा चाब्रुवतोप्यस्य दृष्टिरागेण सूच्यते ॥ १७ ॥
यथैव मां वनं यान्तमनुयातो महाद्युतिः ॥ अहमप्यनुयास्यामि तथैवैनं यमक्षयम् ॥ १८ ॥
इष्टबन्धुजनो नित्यं मां च नित्यमनुव्रतः ॥ इमामद्य गतोऽवस्थां ममानार्यस्य दुर्नयैः ॥ १९ ॥

न्तावित्यन्वयः । शोकपरिप्लुताः शोकपूर्णाः ॥१–२॥ स्थिरत्वात् धीरत्वात् । सत्त्वयोगात् बलयोगात् । संदानितोपि बद्धोपि । " बद्धे संदानितं मूतं " इत्यमरः ॥ ३ ॥ अर्पितं शरैरिति शेषः ॥ ४ ॥ किं त्वित्यादिश्लोकद्वयं ॥ विचिन्वता मयेति शेषः । सचिवः सहायः । साम्परायिकः युद्धे साधुः । " युद्धायत्योः सम्परायः " इत्यमरः ॥ ५—६ ॥ पञ्चत्वं मृतिं ॥ ७ ॥ किं न्वित्यादिश्लोकद्वयमेकान्वयं ॥ अहं तं लक्ष्मणं विना अयोध्यां यदा यास्यामि तदा कौसल्यां कैकयीं च किं वक्ष्यामि । सुमित्रां कथमाश्वासयिष्यामि ॥ ८—९ ॥ कथमित्यर्धं ॥ यशस्विनमित्यनेन तद्यशो मया न लब्धमिति खिद्यति ॥ १० ॥ यो मया सह वनं यातः तेन विनाऽयोध्यां गतोहं सुमित्रया कृतमुपालम्भं उक्तप्रकारं सोढुं कथं शक्ष्यामि ॥ ११ ॥ इहैवेत्यर्धं ॥ १२ ॥ दुष्कृतकर्माणं । लक्ष्मणवनानयनमेव दुष्कृतं कर्म ॥१३॥ स त्वमित्यन्वयः ॥ १४—१५ ॥ शयान इति । अयमिति शेषः । अत्र शरतल्पस्थानीयोस्तगिरिः । शरस्थाने किरणाः । शोणितस्थाने रक्तवर्णत्वं ॥ १६ ॥ रुजा व्यथा । दृष्टिरागेण वीक्षणप्रेम्णा ॥ १७ ॥ तथैव तेन प्रकारेण । मात्रादिस्नेहमविचार्येत्यर्थः । यमक्षयमित्यत्रापि यान्तमित्यनुषज्यते ॥ १८—१९ ॥

स० प्रत्यबुध्यत । तत्रनिमित्तमाह । स्थिरत्वात् प्रलयादावप्येकस्यैवस्थैर्यात् । नित्यनित्यत्वादितियावत् । सत्त्वयोगात् बलोपायात् । संदानितोबद्धःसन् । एतेनासुरमोहनायरामःस्वेच्छयैवसंदानितइतिज्ञायते ॥ ३ ॥ **स०** कौसल्यां किंनुवक्ष्यामि एतेनकौसल्यायारामइवलक्ष्मणेपिप्रेमेतिसूच्यते ॥ ८ ॥ **स०** वेपन्तीं वेपमानां कुररीमिववेपमानामित्यन्वयः ॥ ९ ॥ **ति०** शरभूतः शरैर्व्याप्तशरीरत्वाच्छररूपंप्राप्तः । तत्तद्रन्ध्रनिस्सरद्रुधिरव्याप्तशराःकिरणस्थानीयाः ॥ १६ ॥

[**पा०**] १ क. पतितं. २ ख. च. छ. ञ. लक्ष्मणंभ्रातरंदीनं. क. घ. लक्ष्मणंभ्रातरंरामः. ३ क. ख. घ.—ट. कार्यलब्धया. ग. कार्यलङ्कया. ४ क.—ट. प्राणान्वा. ५ च. झ. ञ. ट. वेपन्तीं. ६ क. ख. ग. च.—ट. यदि. ७ ङ.—ट. मत्कृते. ८ ङ. झ. पातितः. ९ ङ.—ट. बहवोयुद्धेनिहताराक्षसाःक्षितौ । तस्यामेवायशूरस्त्वंशेषेविनिहतःशरैः. १० झ. सशोणितपरिप्लुतः. ११ ङ. च. झ. ञ. ट. शरभूतस्ततोभासि. १२ ङ.—ट. चाब्रुवतोयस्य.

सुरुष्टेनापि वीरेण लक्ष्मणेन न संस्मरे ॥ परुषं विप्रियं वाऽपि श्रावितं तु कदाचन ॥ २० ॥
विससर्जैकवेगेन पञ्चबाणशतानि यः ॥ इष्वस्त्रेष्वधिकस्तस्मात्कार्तवीर्याच्च लक्ष्मणः ॥ २१ ॥
अस्त्रैरस्त्राणि यो हन्याच्छक्रस्यापि महात्मनः ॥ सोऽयमुर्व्यां हतः शेते महार्हशयनोचितः ॥ २२ ॥
यन्मया न कृतो राजा राक्षसानां विभीषणः ॥ तच्च मिथ्या प्रलप्तं मां प्रधक्ष्यति न संशयः ॥ २३ ॥
अस्मिन्मुहूर्ते सुग्रीव प्रतियातुमितोऽर्हसि ॥ मत्वा हीनं मया राजन्रावणोऽभिद्रवेद्बली ॥ २४ ॥
अङ्गदं तु पुरस्कृत्य ससैन्यः ससुहृज्जनः ॥ सागरं तर सुग्रीव नीलेन च नलेन च ॥ २५ ॥
कृतं हनुमता कार्यं यदन्यैर्दुष्करं रणे ॥ ऋक्षराजेन तुष्यामि गोलाङ्गूलाधिपेन च ॥ २६ ॥
अङ्गदेन कृतं कर्म मैन्देन द्विविदेन च ॥ युद्धं केसरिणा संख्ये घोरं संपातिना कृतम् ॥ २७ ॥
गवयेन गवाक्षेण शरभेण गजेन च ॥ अन्यैश्च हरिभिर्युद्धं मदर्थे त्यक्तजीवितैः ॥
न चातिक्रमितुं शक्यं दैवं सुग्रीव मानुषैः ॥ २८ ॥
यत्तु शक्यं वयस्येन सुहृदा च परंतप ॥ कृतं सुग्रीव तत्सर्वं भवता धर्मभीरुणा ॥ २९ ॥
मित्रकार्यं कृतमिदं भवद्भिर्वानरर्षभाः ॥ अनुज्ञाता मया सर्वे यथेष्टं गन्तुमर्हथ ॥ ३० ॥
शुश्रुवुस्तस्य ते सर्वे वानराः परिदेवनम् ॥ वर्तयाञ्चक्रुरश्रूणि नेत्रैः कृष्णेतरेक्षणाः ॥ ३१ ॥
ततः सर्वाण्यनीकानि स्थापयित्वा विभीषणः ॥ आजगाम गदापाणिस्त्वरितो यत्र राघवः ॥ ३२ ॥
तं दृष्ट्वा त्वरितं यान्तं नीलाञ्जनचयोपमम् ॥ वानरा दुद्रुवुः सर्वे मन्यमानास्तु रावणिम् ॥ ३३ ॥
[निश्चेष्टौ विगतज्ञानौ रणरेणुसमुक्षितौ ॥ शयानौ शरतल्पस्थौ द्रष्टुमायाद्विभीषणः ॥ ३४ ॥
तं राक्षसेन्द्रात्मजशङ्कया ते निपातितौ राजसुतौ च दृष्ट्वा ॥
विभीषणं विव्यधिरे च दृष्ट्वा मेघा यथा वायुहताः प्लवङ्गमाः ॥ ३५ ॥]

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

विप्रियं अहितं । सुरुष्टेनापि लक्ष्मणेन श्रावितं विप्रियं परुषं वाक्यं न स्मरामीत्यर्थः ॥ २० ॥ यः कार्तवीर्यः सहस्रबाहुः एकेन वेगेन एकप्रयत्नेन । यावता कालेन पञ्चबाणशतानि विससर्ज प्रायुङ्क्त । द्विभुजोप्ययं लक्ष्मणः तावतैव कालेन तावतो बाणान् विसृजन् । इष्वस्त्रेषु विषये तस्मात्कार्तवीर्यादधिक इत्यर्थः ॥ २१ ॥ हन्यात् हन्तुं शक्तः । शकि लिङ् ॥ २२ ॥ यत् यस्मात् विभीषणो राक्षसानां राजा न कृतः । तस्मात् मिथ्याप्रलप्तं राजानं त्वां करिष्यामीति मिथ्या प्रलपितं मां प्रधक्ष्यति । दहतीत्यर्थः । आश्रुतकार्यनिर्वाहाभावेन मिथ्येत्युच्यते । आश्रुतं प्रतिज्ञातं ॥ २३ ॥ प्रतियातुं किष्किन्धामिति शेषः । हीनं त्वामिति शेषः ॥ २४–२५ ॥ कृतमित्यादिसार्धश्लोकत्रयं ॥ संपातिना वानरेण ॥ २६—२८ ॥ वयस्येन मित्रेण । सुहृदा च शोभनहृदयेन वा । चशब्दो वाशब्दार्थकः । धर्मभीरुणा धर्मो नश्यतीति भीरुणेत्यर्थः । अधर्मभीरुणेति वा पदच्छेदः ॥ २९—३० ॥ वर्तयांचक्रुः प्रवर्तयांचक्रुः । कृष्णेतरेक्षणाः रक्तेक्षणा इत्यर्थः ॥ ३१ ॥ तत इत्यादिश्लोकद्वयं ॥ ३२—३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनपञ्चाशस्सर्गः ॥ ४९ ॥

स० सुरुष्टेनापि येनकेनचित् । परुषं निष्ठुरं । अप्रियं । कदाचन उक्तमितिशेषः । नसंस्मरे नसंस्मरामीत्येवश्रावितं । अन्यथापरुषाप्रियश्रावणापेक्षयाऽन्तर्निगूढस्यरोषस्याल्पताप्रतीयेत । तच्चवैदिकलौकिकाननुकूलमित्येवमेवान्वयःसमञ्जसः ॥ २० ॥ इत्येकोनपञ्चाशःसर्गः ॥ ४९ ॥

[पा०] १ घ. कार्तवीर्यार्जुनादपि. २ ङ. छ. ट. सत्वहीनं. ञ. सतुहीनं. ३ ङ.—ट. त्रावणोभिभविष्यति. ४ ङ.—ट. परंमम. ५ क. ङ.—ट. येसर्वे. ६ क. ग.—ट. परिदेवितं. ७ ङ. झ. ञ. ट. वर्तयाञ्चक्रिरेश्रूणि. ८ ङ. झ. ट. त्वरितंयत्र. ९ घ. दुद्रुवुःशीघ्रं. १० इदंश्लोकद्वयं प्राचीनकोशेपुनर्दृश्यते.

पञ्चाशः सर्गः ॥ ५० ॥

सुग्रीवचोदितेनजांबवता रामसमीपमागच्छतिगदापाणौविभीषणे इन्द्रजिद्भ्रमेणविद्रवतांवानराणां तस्यविभीषणत्वभाषणेनसमाश्वासनपूर्वकं प्रतिनिवर्तनम् ॥ १ ॥ रामलक्ष्मणसमीपमेत्य सलिलेनतन्नयनपरिमार्जनपूर्वकंविलपतोविभीषणस्य सुग्रीवेणसमाश्वासनम् ॥ २ ॥ सुग्रीवेण स्वयंरावणवधप्रतिज्ञानपूर्वकं राघवयोः किष्किन्धाप्रापणंचोदितेनसुषेणेन तंप्रति संजीवकरण्यादिमहौषधिसमानयनाय क्षीरोदंप्रतिहनुमच्चोदनचोदना ॥ ३ ॥ अत्रान्तरेस्वयमेव सत्वरसमागतेन गरुडेन रामलक्ष्मणयोर्नागपाशविध्वंसनपूर्वकं परिष्वङ्गः ॥ ४ ॥ रामप्रश्नेननिजस्वरूपनिवेदनपूर्वकं सप्रदक्षिणंगतेगरुडे वानरैर्हर्षादुच्चैरुद्घोषणम् ॥ ५ ॥

अथोवाच महातेजा हरिराजो महाबलः ॥ किमियं व्यथिता सेना मूढवातेव नौर्जले ॥ १ ॥
सुग्रीवस्य वचः श्रुत्वा वालिपुत्रोऽङ्गदोऽब्रवीत् ॥ २ ॥
न त्वं पश्यसि रामं च लक्ष्मणं च महाबलम् ॥ शरजालाचितौ वीरावुभौ दशरथात्मजौ ॥
शरतल्पे महात्मानौ शयानौ रुधिरोक्षितौ ॥ ३ ॥
अथाब्रवीद्वानरेन्द्रः सुग्रीवः पुत्रमङ्गदम् ॥ नानिमित्तमिदं मन्ये भवितव्यं भयेन तु ॥ ४ ॥
विषण्णवदना ह्येते त्यक्तप्रहरणा दिशः ॥ प्रपलायन्ति हरयस्त्रासादुत्फुल्ललोचनाः ॥ ५ ॥
अन्योन्यस्य न लज्जन्ते न निरीक्षन्ति पृष्ठतः ॥ विप्रकर्षन्ति चान्योन्यं पतितं लङ्घयन्ति च ॥ ६ ॥
एतस्मिन्नन्तरे वीरो गदापाणिर्विभीषणः ॥ सुग्रीवं वर्धयामास राघवं च निरैक्षत ॥ ७ ॥
विभीषणं तं सुग्रीवो दृष्ट्वा वानरभीषणम् ॥ ऋक्षराजं समीपस्थं जाम्बवन्तमुवाच ह ॥ ८ ॥
विभीषणोऽयं संप्राप्तो यं दृष्ट्वा वानरर्षभाः ॥ विद्रवन्ति परित्रस्ता रावणात्मजशङ्कया ॥ ९ ॥
शीघ्रमेतान्सुसंत्रस्तान्बहुधा विप्रधावितान् ॥ पर्यवस्थापयाख्याहि विभीषणमुपस्थितम् ॥ १० ॥
सुग्रीवेणैवमुक्तस्तु जाम्बवानृक्षपार्थिवः ॥ वानरान्सान्त्वयामास संनिरुध्य प्रधावतः ॥ ११ ॥
ते निवृत्ताः पुनः सर्वे वानरास्त्यक्तसंभ्रमाः ॥ ऋक्षराजवचः श्रुत्वा तं च दृष्ट्वा विभीषणम् ॥ १२ ॥
विभीषणस्तु रामस्य दृष्ट्वा गात्रं शरैश्चितम् ॥ लक्ष्मणस्य च धर्मात्मा बभूव व्यथितेन्द्रियः ॥ १३ ॥
जलक्लिन्नेन हस्तेन तयोर्नेत्रे प्रमृज्य च ॥ शोकसंपीडितमना रुरोद विललाप च ॥ १४ ॥
इमौ तौ सत्त्वसंपन्नौ विक्रान्तौ प्रियसंयुगौ ॥ इमामवस्थां गमितौ राक्षसैः कूटयोधिभिः ॥ १५ ॥

अथ रामस्य नागपाशविमोचनं पञ्चाशे—अथोवाचेत्यादि ॥ तादात्विकसेनापलायननिमित्तमजानानः पृच्छति—किमिति । किं किमर्थं । उवाच वानरानिति शेषः । मूढः मूर्च्छितः । विरुद्धदिग्वाय्वन्तराभिहत इत्यर्थः । वात्याहतेति यावत् ॥ १ ॥ सुग्रीवस्येत्यर्धं ॥ २ ॥ रामव्यथां विना किमन्यन्निमित्तमित्युत्तरयति—न त्वमिति ॥ अत्र काकुः । त्वं न पश्यसि किमित्यर्थः । रामं लक्ष्मणं चेत्युभावित्यन्वयः ॥ ३ ॥ स्वयमुद्घाटयति—अथेत्यादिना ॥ इदं रघुसिंहयोः शरतल्पशयनं । अनिमित्तं न भवतीति मन्ये । अन्येन भयनिमित्तेन भवितव्यमित्यर्थः । तत्र हेतुमाह—विषण्णेत्यादिना ॥ त्यक्तप्रहरणाः त्यक्तशिलाद्यायुधाः । अन्योन्यस्य अन्योन्यं । विप्रकर्षन्ति द्रुतगमनार्थमाकर्षन्ति ॥ ४–९ ॥ विप्रधावि-

---

स० इदं कपिपलायनं अनिमित्तं अकारणकंनमन्ये । पलायनप्रयोजकेनभयेन त्वदुक्तेतरेणभवितव्यमित्यङ्गदमब्रवीत् ॥ ४ ॥ स० त्रासात् नूतनभीतेः ॥ ५ ॥ स० वानरभीषणं इन्द्रजिद्भ्रमजनकतया ॥ ८ ॥

[पा०] १ ख. प्रौढवातेव. २ ख. किंनुपश्यसि. ३ ख. ङ.—ट. पलायन्तेत्रहरयः. ४ छ. जल्पन्ति. ५ ङ. झ. ञ. ट. राघवंचजयाशिषा. ६ क. ख. घ.—ट. द्रवन्त्यागतसंत्रासारावणात्मजशङ्कया. ७ क. वानरान्वारयामासनिवर्त्यप्रतिधावतः. ८ ख. ङ.—ट. संनिवर्त्य. ९ ङ. वानरामुक्तसाध्वसाः. च. छ. झ. ञ. ट. वानरास्त्यक्तसाध्वसाः. १० घ.—ट. व्यथितस्तदा. ११ ङ.—ट. विमृज्यच.

भ्रातुः पुत्रेण मे तेन दुष्पुत्रेण दुरात्मना ॥ राक्षसा जिह्मया बुद्ध्या चालितावृजुविक्रमौ ॥ १६ ॥
शरैरिमावलं विद्धौ रुधिरेण समुक्षितौ ॥ वसुधायामिमौ सुप्तौ दृश्येते शल्यकाविव ॥ १७ ॥
ययोर्वीर्यमुपाश्रित्य प्रतिष्ठा काङ्क्षिता मया ॥ तावुभौ देहनाशाय प्रसुप्तौ पुरुषर्षभौ ॥ १८ ॥
जीवन्नद्य विपन्नोसि नष्टराज्यमनोरथः ॥ प्राप्तप्रतिज्ञश्च रिपुः सकामो रावणः कृतः ॥ १९ ॥
एवं विलपमानं तं परिष्वज्य विभीषणम् ॥ सुग्रीवः सत्त्वसंपन्नो हरिराजोऽब्रवीदिदम् ॥ २० ॥
राज्यं प्राप्स्यसि धर्मज्ञ लङ्कायां नात्र संशयः ॥ रावणः सह पुत्रेण स कामं नेह लप्स्यते ॥ २१ ॥
न रुजापीडितावेतावुभौ राघवलक्ष्मणौ ॥ त्यक्त्वा मोहं वधिष्येते सगणं रावणं रणे ॥ २२ ॥
तमेनं सान्त्वयित्वा तु समाश्वास्य च राक्षसम् ॥ सुषेणं श्वशुरं पार्श्वे सुग्रीवस्तमुवाच ह ॥ २३ ॥
सह शूरैर्हरिगणैर्लब्धसंज्ञावरिन्दमौ ॥ गच्छ त्वं भ्रातरौ गृह्य किष्किन्धां रामलक्ष्मणौ ॥ २४ ॥
अहं तु रावणं हत्वा सपुत्रं सहबान्धवम् ॥ मैथिलीमानयिष्यामि शक्रो नष्टामिव श्रियम् ॥ २५ ॥
श्रुत्वैतद्वानरेन्द्रस्य सुषेणो वाक्यमब्रवीत् ॥ दैवासुरं महद्युद्धमनुभूतं सुदारुणम् ॥ २६ ॥
तदा स्म दानवा देवांश्शरसंस्पर्शकोविदाः ॥ निजघ्नुः शस्त्रविदुषश्छादयन्तो मुहुर्मुहुः ॥ २७ ॥
तानार्तान्नष्टसंज्ञांश्च परासूंश्च बृहस्पतिः ॥ विद्याभिर्मन्त्रयुक्ताभिरोषधीभिश्चिकित्सति ॥ २८ ॥

तान् पलायमानान् ॥ १०—१५ ॥ दुष्पुत्रेण कपटयुद्धेन पितुरवध्यावहेन । चालितौ वञ्चितौ । ऋजुविक्रमौ अकपटविक्रमौ ॥ १६ ॥ सुप्तौ सुप्तसदृशौ । शल्यकौ कण्टकिवराहौ ॥ १७ ॥ ययोरित्यादिचतुःश्लोकी ॥ अत्र वक्तव्यं सर्वमभयप्रदाने दर्शितं ॥ १८—२१ ॥ न रुजापीडितौ इयं रुजा अनयोरात्यन्तिकहानिकरी न भवति । किंतु मोहमात्रकारिणीत्यर्थः ॥ २२—२५ ॥ अनुभूतं मया ज्ञातं । शरसंस्पर्शकोविदाः शरप्रयोगसमर्थाः । स्पर्शो दानमिति पर्यायः ॥ २६–२७ ॥ मन्त्रयुक्ताभिः मन्त्रप्रचुराभिः ।

स० भ्रातुः रावणस्य पुत्रेण । नोभयोः पितापुत्रयोरैवैताद्दूटयोधिलं किंतु परंपरैवेदशीत्याह—दुष्पुत्रेणेति । दुर्दुष्टःपुत्रो यस्यासौतथा ॥ १६ ॥ स० इमौ अलंविद्धौइमौसुप्तावित्यन्वयः पृथक्पृथगितिनान्यतरवैयर्थ्यं । यद्वा इःकामः तस्यापिमाशोभायाभ्यांतौ । एवमपिशोभागतानेतिभावः । छन्दिन्यायेनेमाविति वा कामात्कामपालस्योत्तमत्वात्तत्त्वाल्लक्ष्मणस्यवा इमाविति संभवति । 'इःकामदेवेलनव्ययम्' इतिविश्वः ॥ १७ ॥ स० देहनाशाय स्वदेहनाशाय । यद्वा मद्देहनाशाय । एतयोरियाननर्थो यदितर्हि ममराज्याशैकत्रतिष्ठतु रावणोपितुप्राक्तनकोपेन मारयेदितिद्योतयत्नेनेतिज्ञेयम् ॥ १८ ॥ स० प्रतिज्ञायतइतिप्रतिज्ञा प्रतिज्ञातोर्थःसीतापरित्यागाभावरूपः प्राप्तोयेनसतथा । सकामः मन्नाशेननिष्कण्टकराज्यप्राप्त्या । कृतः । अनयोरेवंस्थापेनेतिशेषः ॥ १९ ॥ स० विलपमानं विलपन्तं । पदव्यत्यासेनविलापफलकस्यविभीषणोत्प्रेक्षितस्यव्यत्यासंकविरवगमयामासेतिज्ञेयं ॥ २० ॥ स० गरुडाधिष्ठितौ गरुडेअधिष्ठितोगरुडवाहनोरामश्च । अधिष्ठानमधिष्ठितं गरुडस्येवाधिष्ठानंयस्येतिचान्यश्चेति गरुडाधिष्ठितौरामलक्ष्मणौ । मोहं नागपाशासादनजं । अयमेवपाठोन्याय्यः । गरुडागमनेननागपाशवियोगस्यात्रोत्तरत्रेवबहुपुराणेषुश्रवणात् । तानिचस्वावसरेवक्ष्यामः । 'नरुजापीडितावितिपठित्वा' इतितीर्थपाठस्यतदुत्प्रेक्षितत्वंसूचयन्नागोजिभट्टः स्वयंपाठं 'गरुडाधिष्ठितौ' इतिपठित्वा 'गरुडोपासकतयाविदितौ' इतिनिर्मूलमर्थवदंस्तादृशएवेतिसंतोष्टव्यं ॥ २२ ॥ स० उत्तरश्लोकद्वयमेकान्वयि । राक्षसं विभीषणं । सान्त्वयित्वा सुषेणंचसमाश्वास्यच गच्छेत्यब्रवीदितिसंबन्धः । एतेनान्यतरातिरेकशङ्कया-'सान्त्वयित्वेत्यस्यैवार्थकथनं समाश्वास्यत्विति' इतिवदतोनागोजिभट्टस्य बहुस्थलेषु द्वित्रादीनांश्लोकानामेकान्वयंब्रुवतोऽन्वयज्ञानदारिद्र्यंद्योत्यते । 'सान्त्वयित्वा गरुडानुग्रहसंभावनयेत्यर्थः । अनेनसुग्रीववाक्येनरामविषयेस्वस्यभगवदवतारत्वज्ञानंसूचितं' इतितद्वचनं 'गरुडोपासकतयाविदितौ' इति 'गरुडानुग्रहसंभावनया' इतिस्ववचनव्याहतमित्युपेक्ष्यं । तेनाभगवदवतारत्वहेतोरुपासकत्वस्यतदनुग्रहपात्रत्वस्यैवचप्रतीतेः ॥ २३—२४ ॥ शि० राक्षसंतंविभीषणमेवमाश्वास्य बोधयित्वा सान्त्वयित्वा तापं निरस्य सुषेणमुवाच ॥ २३ ॥ ति० यावल्लब्धसंज्ञौभविष्यतः तावदनयोरक्षार्थं एतौगृहीत्वाशूरैर्हरिगणैःसहकिष्किन्धांगच्छ ॥ २४ ॥ स० आगमनप्रयोजनस्यानिष्पत्तेःकथं कथय गन्तव्यमित्यतआह—अहंलिति । नष्टां बल्यादिभिरदर्शनंप्रापितां श्रियं

[पा०] १ ङ. च. झ. ञ. ट. भ्रातृपुत्रेणचैतेन. २ क. ख. च. छ. ट. चालितौप्राज्यविक्रमौ. ग. ङ. झ. वञ्चितावृजुविक्रमौ. ३ ङ.—ट. तावेमौ. ४ ट. सत्त्वमापन्नः. ५ ङ. च. झ. ञ. ट. नेह. ६ ङ. झ. ट. गरुडाधिष्ठितावेतौ. ७ क. ख. ग. च.—ट. तमेवं, ८ क. घ. विभीषणं. ९ घ.—ट. पुरातनं. १० ग. घ. ङ. झ. ञ. ट. संस्पर्शकोविदान्.

तान्यौषधान्यानयितुं क्षीरोदं यान्तु सागरम् ॥ जवेन वानराः शीघ्रं संपातिपनसादयः ॥
हरयस्तु विजानन्ति [1]पार्वतीस्ता महौषधीः ॥ २९ ॥
संजीवकरणीं दिव्यां विशल्यां देवनिर्मिताम् ॥ ३० ॥
चन्द्रश्च [2]नाम द्रोणश्च क्षीरोदे सागरोत्तमे ॥ अमृतं यत्र मथितं तत्र ते परमौषधी ॥
[3]ते तत्र निहिते देवैः [4]पर्वते परमौषधी ॥ ३१ ॥
अयं वायुसुतो राजन्हनुमांस्तत्र गच्छतु ॥ ३२ ॥
एतस्मिन्नन्तरे वायुर्मेघांश्चापि सविद्युतः ॥ [5]पर्यस्यन्सागरे तोयं कम्पयन्निव [6]मेदिनीम् ॥ ३३ ॥
महता पक्षवातेन सर्वद्वीपमहाद्रुमाः ॥ [7]निपेतुर्भिन्नविटपाः [8]समूला लवणाम्भसि ॥ ३४ ॥
अभवन्पन्नगास्त्रस्ता भोगिनस्तत्रवासिनः ॥ शीघ्रं सर्वाणि यादांसि जग्मुश्च लवणार्णवम् ॥ ३५ ॥
ततो मुहूर्ताद्गरुडं वैनतेयं महाबलम् ॥ वानरा ददृशुः सर्वे ज्वलन्तमिव पावकम् ॥ ३६ ॥
[9]तमागतमभिप्रेक्ष्य नागास्ते विप्रदुद्रुवुः ॥ [10]यैस्तौ सत्पुरुषौ बद्धौ शरभूतैर्महाबलौ ॥ ३७ ॥
ततः सुपर्णः काकुत्स्थौ दृष्ट्वा प्रत्यभिनन्दितः ॥ विममर्श च पाणिभ्यां मुखे चन्द्रसमप्रभे ॥ ३८ ॥
वैनतेयेन संस्पृष्टास्तयोः संरुरुहुर्व्रणाः ॥ सुवर्णे च तनू स्निग्धे तयोराशु बभूवतुः ॥ ३९ ॥
तेजो वीर्यं बलं चौज उत्साहश्च महागुणः ॥ प्रदर्शनं च बुद्धिश्च स्मृतिश्च [11]द्विर्गुणं तयोः ॥ ४० ॥

विद्याभिः मृतसंजीविनीप्रभृतिभिः । चिकित्सति अचिकित्सत् ॥ २८ ॥ तान्यौषधानीत्यादिसार्धश्लोकः ॥ २९ ॥ संजीवकरणीमित्यर्धमेकं वाक्यं ॥ अत्रानयितुं यान्त्वित्यनुषज्यते । पूर्वोक्तक्षीरोदमध्ये संजीवकरणीं विशल्यां चानयितुं यान्त्वित्यर्थः । तयोरेवात्रोपयोगादिति भावः ॥ ३० ॥ ते कुत्र विद्येते इत्यत्राह—चन्द्रश्चेत्यादिना ॥ सागरोत्तमे क्षीरोदे । यत्र प्रदेशे अमृतं मथितं तत्र चन्द्रद्रोणाख्यौ पर्वतौ स्तः तयोस्ते महौषधी स्त इत्यर्थः । तत्रावस्थाने हेतुमाह—ते तत्रेति । पर्वते पर्वतयोः । जात्येकवचनं ॥ ३१ ॥ अयमित्यर्धं ॥ औषध्यन्तरानयने पनसादयो गच्छन्तु । संजीवविशल्यानयने तु हनुमान् गच्छत्विति विज्ञेयं ॥ ३२ ॥ मेघान् सागरतोयं च पर्यस्यन् पर्वतान्कम्पयन्निव गरुडपक्षवायुरुदभूदिति शेषः । सर्वद्वीपमहाद्रुमाः । सर्वपदं द्रुमविशेषणं । द्वीपं च लङ्का । लवणाम्भसि लवणसमुद्रे ॥ ३३—३४ ॥ भोगिनः प्रशस्तकायाः । तत्रवासिनः लङ्काद्वीपवासिनः । यादांसि जलजन्तवश्च । लवणार्णवं लवणार्णवमध्यं । भयादन्तर्मग्ना इत्यर्थः ॥ ३५—३८ ॥ व्रणाः क्षतानि । संरुरुहुः संरूढाः । अज्ञातस्वरूपा बभूवुरित्यर्थः ॥ ३९ ॥ तेजः पराभिभवनसामर्थ्यं । पराधिक्षेपासहनं वा । वीर्यं पराक्रमः । बलं शारीरं । ओजः कान्तिः । उत्साहः लोकोत्तरकार्येषु स्थिरतरप्रयत्नः । प्रदर्शनं सूक्ष्मार्थपरिज्ञानं । बुद्धिः विवेकः । स्मृतिः अनुभूतार्थाविस्मरणं । एतत् सर्वं द्विगुणं वैनतेयसंस्पर्शवशात् पूर्वतोप्यधिकं जातमित्यर्थः । अत्र धीरिति गायत्र्याः सप्तदशाक्षरं ।

संपदमिव ॥ २५ ॥ **ति०** पार्वतीपर्वतप्रतिष्ठिते । ते ओषधी । विजानन्ति । पार्वती इतिद्विवचनमार्ष ॥ ३० ॥ **ति०** यद्यपिपनसादयोजानन्ति । तथापि शीघ्रमागमनार्थंवायुसुतोयातु ॥ ३२ ॥ **ति०** एतस्मिन्नन्तरे ओषध्यानयनवार्ताकाले । सागरे तोयंपर्यस्य अतिलहरीयोगिकृत्वा पर्वतान्कंपयन्पक्षवायुरभूत् । सविद्युतोमेघाश्चासन् ॥ ३३ ॥ **स०** चन्द्रसमप्रभेइत्यनेन लोकानुकरणार्थमेवपातः आयातःसेवार्थंगरुडइतिध्वन्यते । अन्यथा मुखविकारापत्तेः ॥ ३८ ॥ **ति०** प्रदर्शनं शब्दानुमानाभ्यांपरोक्षार्थनिश्चयः । बुद्धिरपरोक्षनिश्चयः । द्विगुणा वैनतेयस्पर्शात्पूर्वतोप्यधिका । अत्रान्यैर्देवैरवतीर्यभगवतोरामस्यमूलमूर्तेराज्ञयोपकारःसंपादितः । गरुडेनतु स्वरूपतएवेतिबोध्यं ॥ ४० ॥

[**पा०**] १ ङ. ञ. ट. पार्वतीतेमहौषधी. क. पर्वतस्थाः. २ क. ख. च. ञ. नाम्ना. ३ ग. घ. ङ. ञ. ट. तौतत्रविहितौदेवैःपर्वतौतौमहोदधौ. ४ च. छ. ज. पर्वतेतुमहौषधी. ५ ङ.—ट. पर्यस्य. ६ क. ग.—ट. पर्वतान्. ७ क. घ.—ट. निपेतुर्भग्न. ८ ङ. ञ. ट. सलिले. ९ ख. ग. समागतं. १० ङ.—ट. यैस्तुतौपुरुषौबद्धौ. ग. यौतौ. ११ ञ. ट. द्विगुणातयोः.

तावुत्थाप्य महावीर्यौ गरुडो वासवोपमौ ॥ उभौ तौ सस्वजे हृष्टो रामश्चैनमुवाच ह ॥ ४१ ॥
भवत्प्रसादाद्व्यसनं रावणिप्रभवं महत् ॥ आवामिह व्यतिक्रान्तौ पूर्ववद्बलिनौ कृतौ ॥ ४२ ॥
यथा तातं दशरथं यथाऽजं च पितामहम् ॥ तथा भवन्तमासाद्य हृदयं मे प्रसीदति ॥ ४३ ॥
को भवान्नूपसंपन्नो दिव्यस्रगनुलेपनः ॥ वसानो विरजे वस्त्रे दिव्याभरणभूषितः ॥ ४४ ॥
तमुवाच महातेजा वैनतेयो महाबलः ॥ पतत्रिराजः प्रीतात्मा हर्षपर्याकुलेक्षणः ॥ ४५ ॥
अहं सखा ते काकुत्स्थ प्रियः प्राणो बहिश्चरः ॥ गरुत्मानिह संप्राप्तो युवाभ्यां साह्यकारणात् ॥४६॥
असुरा वा महावीर्या दानवा वा महाबलाः ॥ सुराश्चापि सगन्धर्वाः पुरस्कृत्य शतक्रतुम् ॥ ४७ ॥
नेमं मोक्षयितुं शक्ताः शरबन्धं सुदारुणम् ॥ मायाबलादिन्द्रजिता निर्मितं क्रूरकर्मणा ॥ ४८ ॥
एते नागाः काद्रवेयास्तीक्ष्णदंष्ट्रा विषोल्बणाः ॥ रक्षोमायाप्रभावेण शरा भूत्वा त्वदाश्रिताः ॥४९॥
सभाग्यश्चासि धर्मज्ञ राम सत्यपराक्रम ॥ लक्ष्मणेन सह भ्रात्रा समरे रिपुघातिना ॥ ५० ॥
इमं श्रुत्वा तु वृत्तान्तं त्वरमाणोऽहमागतः ॥ सहसा युवयोः स्नेहात्सखित्वमनुपालयन् ॥ ५१ ॥
मोक्षितौ च महाघोरादस्मात्सायकबन्धनात् ॥ अप्रमादश्च कर्तव्यो युवाभ्यां नित्यमेव हि ॥ ५२ ॥

षोडशसहस्रश्लोका गताः ॥ ४० ॥ ताविति । क्रियाभेदात्तच्छब्दद्वयं ॥ ४१ ॥ व्यतिक्रान्तौ लङ्घितवन्तौ । गत्यर्थत्वात्कर्तरि क्तः ॥ ४२—४३ ॥ विरजे निर्मले ॥ ४४–४५ ॥ सखा वाहनत्वेन सहाय इति गूढोक्तिः । युवाभ्यां युवयोः । षष्ठ्यर्थे तृतीया । साह्यकारणात् साहाय्यार्थं ॥ ४६—४८ ॥ काद्रवेयाः कद्रपुत्राः । मायाबलात् आश्चर्यशक्तिरूपबलात् ॥ ४९—५० ॥ युवयोः । षष्ठ्यर्थे तृतीया । साह्यकारणात् सहायत्वेन ॥ ५१ ॥ अप्रमादश्चकर्तव्य इति ।

ति० यथातातंदशरथं स्वावतारोचितं कश्यपप्रजापत्यंशं । अजंचपितामहं चतुर्मुखब्रह्मांशं । मे हिरण्यगर्भात्मनस्तदंशस्य । स० यथादशरथंतातं पितामहं अजं आसाद्यमेहृदयंप्रसन्नंतथाभवन्तमासाद्य हृदयंप्रसीदति । प्राप्तस्वमूलरूपपितृपितामहनिदर्शनं मूलरूपेणागतगरुडानुरूपमितिबहिः । यथातातंतवपितरंकश्यपं तवपितामहंमरीचिं अजंचब्रह्माणंप्रपितामहं । आसाद्य प्राप्य आभवं सम्यङ्मङ्गलवन्तं अभवं संसाररहितं दशरथं दशसुदिक्षुरथःकायोयस्यसतं व्याप्तं । तं मे मामासाद्यतथाहृदयंप्रसीदति प्रसन्नमभूत् । सेवयाजन्मसाफल्यात् । यथातातंपितामहंचासाद्यस्थितंभवन्तमुद्दिश्यतेषांहृदयंप्रसन्नं तथाभवन्तमुद्दिश्यमेहृदयंप्रसीदतीतिवा हृदयमितिहृदयपदेनासूचयत्कविरितिज्ञेयं । 'रथःस्यात्स्यन्दनेकाये' इतिविश्वः । शि० यथादशरथं यथा अजंचासाद्यमे हृदयंप्रसीदति तथाभवन्तमासाद्यप्रसीदति । एतेनगरुडस्यवृद्धत्वंसूचितं ॥ ४३ ॥ ति० कोभवानिति । अयंप्रश्नोपिमनुष्यशरीरोचितव्यवहारएवतत्सत्यत्वप्रख्यापनार्थः । अत्ररामसमीपागमनपर्यन्तंपक्ष्याकारेणैवागत्यसंनिधिमात्रेणनागबन्धनंचनिरस्यराघवस्पर्शनाद्यर्थंपुरुषाकारेणव्यवहृतवानितिबोध्यम् । तदाह—**रूपसंपन्नइति** । दिव्यरूपसंपन्नइत्यर्थः । स० भवान्कइतिमनुष्यत्वस्थेन्न । सोप्यसुरमोहायेतिज्ञेयं । रूपसंपन्नः सुरूपः नःप्रसादादेवरूपसंपत् । भवान् नएव अस्मदीयएव । कइवकः वायुवद्वेगवान्वासूर्यइव प्रकाशमानोवेति कइति मानसिकोभिप्रायः । विरजे शुद्धे 'अर्थाःपादरजोपमाः' इत्युक्तेःरजश्शब्दपर्यायोऽयंरजशब्दः ॥ ४४ ॥ स० तं तेइतिपूर्वमुक्तवतोगरुडस्य सेवकस्यतइत्युक्तौजिह्वाजिह्वेतीतिसूचयतियुवयोरित्युक्त्या । एवंसति सतिचच्छत्रिन्यायावकाशे नप्रत्ययेवाद्वैनतेय इतिभावोपिकवेर्ज्ञातव्यः । सखित्वंत्रोत्तरत्रैव "विष्णुनाचतदाकाशेवैनतेयःसमेयिवान् । तस्यनारायणस्तुष्टस्तेनालौल्येनकर्मणा । तमुवाचाव्ययोदेववरदोस्मीतिखेचरम् । सवव्रेतवतिष्ठेयमुपरीत्यन्तरिक्षगः । उवाचचैनंभूयोपिनारायणमिदंवचः । अजरश्चामरश्चस्याममृतेनविनाप्यहम् । एवमस्त्वितितंविष्णुरुवाचविनतासुतम् । प्रतिगृह्यवरौतौतुगरुडोविष्णुमब्रवीत् । भगवतेपिवरंदद्मिवृणोतुभगवानपि । तंवव्रेवाहनंविष्णुर्गरुत्मन्तंमहाबलम् । ध्वजंचचक्रेभगवानुपरिस्थास्यसीतितम् । एवमस्त्विति तंदेवमुक्त्वानारायणंखगः । वव्राज" इतिभारतादिपर्वसौपर्णाख्यानेचोक्तमनुसंधेयम् । इदंसर्वंभक्तभक्तिपारवश्येनेतिमन्तव्यम् । ति० अहंसखेति । सखित्वात्सुग्रीवादिवद्देवसाह्यकरणार्थमागतइतिभावः ॥ ४६ ॥ स० श्रुत्वा देवचारमुखादितिशेषः ॥ ५१ ॥

[पा०] १ ङ. झ. ट. महातेजागरुडो. २ ङ. झ. ट. उपायेनव्यतिक्रान्तौशीघ्रंचबलिनौ. ३ क.—घ. च. छ. ञ. शीघ्रंचबलिनौ. ४ ङ. छ. झ. ञ. ट. युवयोः. ग. भवद्भ्यां. घ. तवसौभाग्यकारणात्. ५ ङ. झ. ट. वानरावा. ६ ङ. झ. ट. शरभूतास्त्वदाश्रयाः. ख. च. ञ. शरभूतास्त्वदाश्रिताः. ७ झ. विक्रान्तस्त्वरमाणो. ८ ङ. च. झ. ट. सहसैवावयोः.

प्रकृत्या राक्षसाः सर्वे संग्रामे कूटयोधिनः ॥ शूराणां शुद्धभावानां भवतामार्जवं बलम् ॥ ५३ ॥
तन्न विश्वसितव्यं वो राक्षसानां रणाजिरे ॥ एतेनैवोपमानेन नित्यं जिह्मा हि राक्षसाः ॥ ५४ ॥
एवमुक्त्वा ततो रामं सुपर्णः सुमहाबलः ॥ परिष्वज्य सुहृत्स्निग्धमाप्रष्टुमुपचक्रमे ॥ ५५ ॥
सखे राघव धर्मज्ञ रिपूणामपि वत्सल ॥ अभ्यनुज्ञातुमिच्छामि गमिष्यामि यथागतम् ॥ ५६ ॥
न च कौतूहलं कार्यं सखित्वं प्रति राघव ॥ कृतकर्मा रणे वीर सखित्वमनुवेत्स्यसि ॥ ५७ ॥
बालवृद्धावशेषां तु लङ्कां कृत्वा शरोर्मिभिः ॥ रावणं च रिपुं हत्वा सीतां समुपलप्स्यसे ॥ ५८ ॥
इत्येवमुक्त्वा वचनं सुपर्णः शीघ्रविक्रमः ॥ रामं च विरुजं कृत्वा मध्ये तेषां वनौकसाम् ॥ ५९ ॥
प्रदक्षिणं ततः कृत्वा परिष्वज्य च वीर्यवान् ॥ जगामाकाशमाविश्य सुपर्णः पवनो यथा ॥ ६० ॥
निरुजौ राघवौ दृष्ट्वा ततो वानरयूथपाः ॥ सिंहनादांस्तदा नेदुर्लाङ्गूलान्दुधुवुस्तदा ॥ ६१ ॥
ततो भेरीः समाजघ्नुर्मृदङ्गांश्चाप्यनादयन् ॥ दध्मुः शङ्खान्संप्रहृष्टाः क्ष्वेलन्त्यपि यथापुरम् ॥ ६२ ॥
आस्फोट्यास्फोट्य विक्रान्ता वानरा नगयोधिनः ॥ द्रुमानुत्पाट्य विविधांस्तस्थुः शतसहस्रशः ॥६३॥
विसृजन्तो महानादांस्त्रासयन्तो निशाचरान् ॥ लङ्काद्वाराण्युपाजग्मुर्योद्धुकामाः प्लवङ्गमाः ॥ ६४ ॥
ततस्तु भीमस्तुमुलो निनादो बभूव शाखामृगयूथपानाम् ॥

तत्तदस्त्रानुगुणप्रत्यस्त्रप्रयोगेषु सावधानाभ्यां भवितव्यमित्यर्थः ॥ ५२ ॥ प्रकृत्येत्यादिश्लोकद्वयं ॥ एतेनैवोपमानेनेति । अनेन दृष्टान्तेन राक्षसा जिह्मा ज्ञेया इत्यर्थः ॥ ५३—५५ ॥ रिपूणामपि वत्सलेत्यनेन इन्द्रजिद्वधोपायो ज्ञात इति द्योत्यते ॥ ५६ ॥ अहं सखा ते काकुत्स्थेत्यादिनोक्तं सखित्वं कथमिति रामाशयमाशङ्क्य रहस्यत्वादिदानीं तद्विषयप्रश्नो न कर्तव्यः रावणवधानन्तरं स्वयमेव ज्ञास्यसीत्याह—न चेति ॥ सखित्वं प्रति सखित्वप्रश्नं प्रतीत्यर्थः ॥ ५७ ॥ रामस्योत्साहवर्धनाय भाविनमर्थं कथयति—बालेत्यादिना ॥ शरोर्मिभिः शरपरंपराभिः ॥ ५८ ॥ शीघ्रविक्रमः शीघ्रगतिः । क्रियाभेदेन सुपर्णपदद्वयान्वयः ॥ ५९—६० ॥ सिंहनादं नेदुः सिंहनादं चक्रुरित्यर्थः । दुधुवुः अकम्पयन् ॥ ६१ ॥ यथापुरं यथापूर्वं । ननु " पिशाचान्दानवान्यक्षान्पृथिव्यां चैव राक्षसान् । अङ्गुल्यग्रेण तान्हन्यां " इत्युक्तनिरवधिकशक्तिसंपन्नः सर्वज्ञो रामः कथमज्ञ इवाशक्त इवेन्द्रजिता हतो लोहितांक्तो भूमौ स्थित इवाभावयत् । उच्यते । लोके समाचारप्रवर्तनायैवं स्थितः । इन्द्रजित्पराजयेन ह्ययमर्थोवगम्यते । शुचीनां शुद्धभावानामृजूनां प्राणसन्देहदायिविपद्यपि न विनाशः । विपरीतानां पापिष्ठानां तु करतलगतापि कार्यसिद्धिर्विगलति । अतः शुचित्वार्जवादिगुणयुक्तैः पुम्भिर्भवितव्यमिति सतां धर्मनिश्चयप्रतिपत्तिर्जायते । ननु रावणवधार्थं दैवतैरर्थितो हि विष्णू रामत्वेनावतीर्णः । सत्यं, दुष्कृद्विनाशवद्धर्मसंस्थापनमपि ह्यवतारप्रयोजनं । रावणवधमात्रस्य प्रयोजनत्वे ह्येतावान्प्रयासो व्यर्थः स्यात् । अतएवोक्तं—"चातुर्वर्ण्यं च लोकेस्मिन्स्वे स्वे धर्मे नियोक्ष्यति " इति । नच धर्मोपदेशमात्रेण तत्सिद्धिः । तादृशोपदेशस्य श्रुतिस्मृतिभिरेव कृतत्वात् । स्वाचारमुखेन धर्मप्रवचनाय हि मानुषभावना च कृता । अतः स्वाचारमुखेन धर्मप्रवर्तन-

स० रिपूणामपिवत्सलरिपवोपियदिशरणंगताः तर्हितेष्वपिवत्सल ॥ ५६ ॥ ति० प्रदक्षिणंकृत्वेत्यनेनदिव्यदेवतावतारोरामइतिसर्वान्प्राकृतकपीन्प्रत्यपिबोधितं ॥ ६० ॥ ति० निशीथेयथाघनानां नादस्तथावानराणां नादइत्यर्थः । अत्रस्थानेदिनद्वयं युद्धावहारइत्याभिवेद्यः ॥ ६५ ॥ इतिपञ्चाशःसर्गः ॥ ५० ॥

[पा०] १ ङ. छ. झ. ट. विश्वसनीयंवो. २ ङ. झ. ट. तदारामं. ३ ख. झ. ट. यथासुखं. ४ ङ. च. झ. ञ. ट. त्वमुपलप्स्यसे. ५ ख. ङ. छ. झ. ट. निरुजौ. ६ क. ङ. च. झ. ञ. ट. सिंहनादंतदानेदुर्लाङ्गूलंदुधुवुश्चते. ७ झ. ट. प्यवादयन्. ८ ख. ग. ङ.—ट. अपरेस्फोट्य. ९ ङ.—ट. जग्मुर्युद्धकामाः. १० ख. ङ. झ. ट. तेषांसुभीमस्तुमुलो.

क्षये निदाघस्य यथा घनानां नादः सुभीमो नदतां निशीथे ॥ ६५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

एकपञ्चाशः सर्गः ॥ ५१ ॥

वानराणांविषादसमये तदीयहर्षोद्घोषश्रवणविषण्णेनरावणेन राक्षसान्प्रति तद्धर्षकारणावगमचोदना ॥ १ ॥ राक्षसै रणाङ्गणमेत्यतदवगमेन रावणंप्रति राघवयोर्नागास्त्रविमोक्षणस्य तत्कारणत्वनिवेदनम् ॥ २ ॥ धूम्राक्षेण रावणचोदनया राक्षसैस्सहपश्चिमद्वारगमनम् ॥ ३ ॥

तेषां सुतुमुलं शब्दं वानराणां तरस्विनाम् ॥ नर्दतां राक्षसैः सार्धं तदा शुश्राव रावणः ॥ १ ॥
स्निग्धगम्भीरनिर्घोषं श्रुत्वा स निनदं भृशम् ॥ सचिवानां ततस्तेषां मध्ये वचनमब्रवीत् ॥ २ ॥
यथाऽसौ संप्रहृष्टानां वानराणां समुत्थितः ॥ बहूनां सुमहानादो मेघानामिव गर्जताम् ॥
व्यक्तं सुमहती प्रीतिरेतेषां नात्र संशयः ॥ ३ ॥
तथा हि विपुलैर्नादैश्चुक्षुभे वरुणालयः ॥ ४ ॥
तौ तु बद्धौ शरैस्तीक्ष्णैर्भ्रातरौ रामलक्ष्मणौ ॥ अयं च सुमहान्नादः शङ्कां जनयतीव मे ॥ ५ ॥
एतत्तु वचनं चोक्त्वा मन्त्रिणो राक्षसेश्वरः ॥ उवाच नैर्ऋतांस्तत्र समीपपरिवर्तिनः ॥ ६ ॥
ज्ञायतां तूर्णमेतेषां सर्वेषां वनचारिणाम् ॥ शोककाले समुत्पन्ने हर्षकारणमुत्थितम् ॥ ७ ॥
तथोक्तास्तेन संभ्रान्ताः प्राकारमधिरुह्य ते ॥ ददृशुः पालितां सेनां सुग्रीवेण महात्मना ॥ ८ ॥
तौ च मुक्तौ सुघोरेण शरबन्धेन राघवौ ॥ समुत्थितौ महावेगौ विषेदुः प्रेक्ष्य राक्षसाः ॥ ९ ॥
संत्रस्तहृदयाः सर्वे प्राकारादवरुह्य ते ॥ विपण्णवदना घोरा राक्षसेन्द्रमुपस्थिताः ॥ १० ॥
तदप्रियं दीनमुखा रावणस्य निशाचराः ॥ कृत्स्नं निवेदयामासुर्यथावद्वाक्यकोविदाः ॥ ११ ॥
यौ तावेन्द्रजिता युद्धे भ्रातरौ रामलक्ष्मणौ ॥ निबद्धौ शरबन्धेन निष्प्रकम्पभुजौ कृतौ ॥ १२ ॥
विमुक्तौ शरबन्धेन तौ दृश्येते रणाजिरे ॥ पाशानिव गजौ छित्त्वा गजेन्द्रसमविक्रमौ ॥ १३ ॥

मित्यादिप्रबन्धादावेवोक्तं ॥ ६२–६५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

अथ धूम्राक्षनिर्गम एकपञ्चाशे—तेषामित्यादि ॥ राक्षसैः सह शुश्रावेत्यन्वयः ॥ १ ॥ निर्घोषः ध्वनिः ॥ २ ॥ यथासावित्यादिसार्धश्लोक एकान्वयः ॥ यथा येन कारणेन । सुमहानादः समुत्थितः ततः एतेषां सुमहती प्रीतिः । अस्तीतिशेषः ॥ ३ ॥ तथा हीत्यर्धं ॥ तथा प्रसिद्धप्रकारः ॥ ४ ॥ तौ त्विति । तुशब्दश्चार्थः । तौ च बद्धौ नादश्च श्रूयते । स च प्रकृतविरुद्धो नादः । शङ्कां राजपुत्रयोः शरबन्धापगमशङ्कां । जनयतीव । इवशब्दः संभावनायां ॥५–६॥ उत्थितं हर्षकारणं ज्ञायतामित्यन्वयः॥७—९॥उपस्थिताःप्राप्ताः॥१०—११॥यौ तौ । यावित्यर्थः॥१२॥ पाशानिति । पाशान् छित्त्वा स्थितौ गजाविव भास-

---

ति० राक्षसैः विभीषणादिभिः ॥ १ ॥ स० स्निग्धगंभीरनिर्घोषं एतेनसीतापतिपतनकालिकदुःखशब्दोव्यावर्त्यते । निनदं निरस्तोनदोऽर्णवोयेनतं । तदपेक्षयागंभीरमितियावत् ॥ २ ॥ स० विपुलैर्नादैः लवणार्णवः चुक्षुभे फूत्कारेणोदककंपदर्शनाच्चलितोऽभूत् ॥ ४ ॥ ती० शङ्कांजनयतीव जनयत्येवेत्यर्थः ॥ ५ ॥ ति० प्राकारमधिरुह्येति । अनेनात्रावहारःसूचितः ॥ ८ ॥

[पा०] १ ङ. च. छ. झ. ट. महौजसां. २ ख. च. ङ. झ. ट. नर्दतां. ३ ङ. छ. झ. ट. वानराणामुपस्थितः. ४ ग. ङ. झ. ट. सुमहान्नादो. ५ ङ. झ. ट. लवणार्णवः. ६ ङ. झ. ट. एवंच. ७ ङ. च. झ. ज. ट. चवनौकसां ८ क. ख. ग. ङ. ज.—ट. महाभागौ.



तच्छ्रुत्वा वचनं तेषां राक्षसेन्द्रो महाबलः ॥ चिन्ताशोकसमाक्रान्तो विषण्णवदनोऽब्रवीत् ॥१४॥
घोरैर्दत्तवरैर्बद्धौ शरैराशीविषोपमैः ॥ अमोघैः सूर्यसंकाशैः प्रमथ्येन्द्रजिता युधि ॥ १५ ॥
तदस्त्रबन्धमासाद्य यदि मुक्तौ रिपू मम ॥ संशयस्थमिदं सर्वमनुपश्याम्यहं बलम् ॥ १६ ॥
निष्फलाः खलु संवृत्ताः शरा वासुकितेजसः ॥ आदत्तं यैः सुसंग्रामे रिपूणां मम जीवितम् ॥ १७ ॥
एवमुक्त्वा तु संक्रुद्धो निःश्वसन्नुरगो यथा ॥ अब्रवीद्राक्षसां मध्ये धूम्राक्षं नाम राक्षसम् ॥ १८ ॥
बलेन महता युक्तो रक्षसां भीमविक्रम ॥ त्वं वधायाभिनिर्याहि रामस्य सह वानरैः ॥ १९ ॥
एवमुक्तस्तु धूम्राक्षो राक्षसेन्द्रेण धीमता ॥ कृत्वा प्रणामं संहृष्टो निर्जगाम नृपालयात् ॥ २० ॥
अभिनिष्क्रम्य तद्द्वारं बलाध्यक्षमुवाच ह ॥ त्वरयस्व बलं तूर्णं किं चिरेण युयुत्सतः ॥ २१ ॥
धूम्राक्षवचनं श्रुत्वा बलाध्यक्षो बलानुगः ॥ बलमुद्योजयामास रावणस्याज्ञया द्रुतम् ॥ २२ ॥
ते बद्धघण्टा बलिनो घोररूपा निशाचराः ॥ विगर्जमानाः संहृष्टा धूम्राक्षं पर्यवारयन् ॥
विविधायुधहस्ताश्च शूलमुद्गरपाणयः ॥ २३ ॥
गदाभिः पट्टिशैर्दण्डैरायसैर्मुसलैर्भृशम् ॥ परिघैर्भिन्दिपालैश्च भल्लैः प्रासैः परश्वधैः ॥
निर्ययू राक्षसा दिग्भ्यो नर्दन्तो जलदा यथा ॥ २४ ॥
रथैः कवचिनस्त्वन्ये ध्वजैश्च समलङ्कृतैः ॥ सुवर्णजालविहितैः खरैश्च विविधाननैः ॥ २५ ॥
हयैः परमशीघ्रैश्च गजेन्द्रैश्च मदोत्कटैः ॥ निर्ययू राक्षसव्याघ्रा व्याघ्रा इव दुरासदाः ॥ २६ ॥
वृकसिंहमुखैर्युक्तं खरैः कनकभूषणैः ॥ आरुरोह रथं दिव्यं धूम्राक्षः खरनिःस्वनः ॥ २७ ॥
स निर्यातो महावीर्यो धूम्राक्षो राक्षसैर्वृतः ॥ प्रहसन्पश्चिमद्वारं हनूमान्यत्र यूथपः ॥
रथप्रवरमास्थाय खरयुक्तं खरस्वनम् ॥ २८ ॥
प्रयान्तं तु महाघोरं राक्षसं भीमविक्रमम् ॥ अन्तरिक्षगता घोराः शकुनाः प्रत्यवारयन् ॥ २९ ॥
रथशीर्षे महान्भीमो गृध्रश्च निपपात ह ॥ ध्वजाग्रे ग्रथिताश्चैव निपेतुः कुणपाशनाः ॥ ३० ॥

मानावित्यर्थः ॥ १३—१४ ॥ दत्तवरैः वरदत्तैः । प्रमथ्य बलात्कृत्य । बद्धौ अभूतामिति शेषः ॥ १५ ॥ संशयस्थं प्राणसंशयस्थं ॥ १६ ॥ आदत्तं आत्तं ॥ १७—१८ ॥ त्वं वधायाभिनिर्याहीत्यमङ्गलसूचकं वचः ॥ १९-२० ॥ द्वारमभिनिष्क्रम्य द्वारान्निष्क्रम्य । युयुत्सतः ममेतिशेषः । किं चिरेण किं विलम्बेन ॥ २१ ॥ रावणस्याज्ञया रावणाज्ञाकृतं धूम्राक्षवचनं श्रुत्वेत्यर्थः ॥ २२ ॥ बद्धघण्टाः शूरत्वज्ञापनाय कटि-बद्धघण्टा इत्यर्थः । ते पूर्वोक्तसेनास्थाः । विविधेति । आयुधानि शूलादिभिन्नानि । अस्यार्धस्य पूर्वेणान्वयः ॥ २३ ॥ गदाभिरित्यादि । गदा प्रसिद्धा । पट्टिशः दण्डविशेषः । परिघः भिन्दिपालः । भल्लः अयोमयः शरः । प्रासैः परश्वधैः । दिग्भ्यो जलदा इवेत्यन्वयः ॥ २४ ॥ अन्ये कवचिनः । ध्वजैः विविधाननैः खरैश्च समलङ्कृतै रथैर्निर्ययुः । अन्ये हयैः अन्ये गजैश्च निर्ययुरित्यन्वयः ॥ २५—२८ ॥ शकुनाः निमित्तसूचकाः पक्षिणः ॥२९॥ कुणपाशनाः गृध्राः ।

स० जीवितमादत्तं युद्धान्तरे ॥ १७ ॥ ती० बलेनेत्यस्यप्रकृतार्थःस्पष्टः । वस्तुतस्तुबलेनयुक्तस्सन् । रक्षसांच तवचेत्यध्याहार्य एकदैवरामस्यवानरैः रामसंबन्धिवानरैःवधायत्वमभिनिर्याहीतिसंबन्धः ॥ १९ ॥

[पा०] १ ङ. ञ. ट. चिन्तारोष. २ ख. ङ. च. ञ. ञ. विवर्णवदनोभवत्. ३ ङ. ञ. शराःपावकतेजसः. ४ ञ. राक्षसैर्भीमविक्रमः. ङ. राक्षसैर्भीमविक्रमैः. ५ ङ.—ट. परिक्रम्यततःशीघ्रंनिर्जगाम. ६ ङ. ञ. ट. भृशं. ७ ङ. र्लगुडैरपि. ८ ङ.—ट. घोरानर्दन्तो. ९ च. जालरचितैः. १० ङ.—ट. कनकभूषितैः. ११ ङ. ञ. ट. हसन्वैपश्चिमद्वाराद्धनूमान्यत्र-तिष्ठति. च. प्रययौपश्चिमद्वारात्. १२ क. ख. ग. ङ. छ. ञ. ञ. ट. भीमदर्शनं. १३ ङ.—ट. प्रत्यषेधयन्.

रुधिरार्द्रो महाञ्श्वेतः कबन्धः पतितो भुवि ॥ विस्वरं चोत्सृजन्नादं धूम्राक्षस्य समीपतः ॥ ३१ ॥
ववर्ष रुधिरं देवः संचचाल च मेदिनी ॥ प्रतिलोमं ववौ वायुर्निर्घातसमनिःस्वनः ॥ ३२ ॥
तिमिरौघावृतास्तत्र दिशश्च न चकाशिरे ॥ ३३ ॥
स तूत्पातांस्तदा दृष्ट्वा राक्षसानां भयावहान् ॥ प्रादुर्भूतान्सुघोरांश्च धूम्राक्षो व्यथितोऽभवत् ॥३४॥
मुमुहू राक्षसाः सर्वे धूम्राक्षस्य पुरःसराः ॥ ३५ ॥

ततः सुभीमो बहुभिर्निशाचरैर्वृतोभिनिष्क्रम्य रणोत्सुको बली ॥
ददर्श तां राघववाहुपालितां महौघकल्पां बहुवानरीं चमूम् ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

द्विपञ्चाशः सर्गः ॥ ५२ ॥

धूम्राक्षसेनाभिस्सह वानराणांमहायुद्धम् ॥ १ ॥ हनुमता गिरिशृङ्गेणधूम्राक्षहननम् ॥ २ ॥

धूम्राक्षं प्रेक्ष्य निर्यान्तं राक्षसं भीमविक्रमम् ॥ विनेदुर्वानराः सर्वे प्रहृष्टा युद्धकाङ्क्षिणः ॥ १ ॥
तेषां सुतुमुलं युद्धं संजज्ञे हरिरक्षसाम् ॥ अन्योन्यं पादपैर्घोरं निघ्नतां शूलमुद्गरैः ॥ २ ॥
घोरैश्च परिघैश्चित्रैस्त्रिशूलैश्चापि संहतैः ॥ राक्षसैर्वानरा घोरैर्विनिकृत्ताः समन्ततः ॥ ३ ॥
वानरै राक्षसाश्चापि द्रुमैर्भूमौ समीकृताः ॥ राक्षसाश्चापि संक्रुद्धा वानरान्निशितैः शरैः ॥
विव्यधुर्घोरसंकाशैः कङ्कपत्रैरजिह्मगैः ॥ ४ ॥
ते गदाभिश्च भीमाभिः पट्टिशैः कूटमुद्गरैः ॥ विदार्यमाणा रक्षोभिर्वानरास्ते महाबलाः ॥
अमर्षाज्जनितोद्वर्षाश्चक्रुः कर्माण्यभीतवत् ॥ ५ ॥
शरनिर्भिन्नगात्रास्ते शूलनिर्भिन्नदेहिनः ॥ जगृहुस्ते द्रुमांस्तत्र शिलाश्च हरियूथपाः ॥ ६ ॥
ते भीमवेगा हरयो नर्दमानास्ततस्ततः ॥ ममन्थू राक्षसान्भीमान्नामानि च बभाषिरे ॥ ७ ॥
तद्बभूवाद्भुतं घोरं युद्धं वानररक्षसाम् ॥ शिलाभिर्विविधाभिश्च बहुभिश्चैव पादपैः ॥ ८ ॥

ग्रथिताः मिलिताः ॥ ३० ॥ विस्वरमिति क्रियाविशेषणं ॥ ३१ ॥ देवः पर्जन्यः । प्रतिलोमं प्रतिकूलं ॥ ३२—३४ ॥ मुमुहुरित्यर्धं ॥ पुरःसराः अग्रगाः ॥३५॥ अभिनिष्क्रम्य पुरादिति शेषः । महौघकल्पां महानोघो अस्मिन्निति महौघः सागरः तत्कल्पां । बहुवानरीं जीवत्वार्षः । द्वितीयायां प्रातर्धूम्राक्षनिर्गमः ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥

अथ धूम्राक्षवधो द्विपञ्चाशे—धूम्राक्षमित्यादि ॥ १—२ ॥ संहतैः संगतैः । राक्षसविशेषणमेतत् ॥ ३ ॥ समीकृताः पातिताः । घोरसंकाशैः घोरकालाग्न्यादितुल्यैः । अजिह्मगैः अवक्रगैः । कङ्कपत्रैः कङ्कपत्राण्येव पत्राणि येषां ते कङ्कपत्राः तैः ॥४॥ जनितोद्वर्षाः जनितोत्साहाः ॥५॥ शूलनिर्भिन्नदेहिनः । कर्मधारयादिनिरार्षः ॥ ६ ॥ नामानि स्वनामानि

स० वानराणांसंहतिर्वानरी । " तस्यसमूहः " इत्यण् । बह्वीचसावानरीच बहुवानरी । तां तद्रूपांचमूं । " अनुदात्तादेः " इत्यञ्वाप्रत्ययः । तेन न—'वृद्धाच्छः' इत्यनेनछप्रत्ययः ॥ ३६ ॥ इत्येकपञ्चाशःसर्गः ॥ ५१ ॥

[पा०] १ ङ. झ. ट. न्नादान्धूम्राक्षस्यनिपातितः. २ ख. च. छ. समुद्रकल्पां. ३ क. ज. भुविवानरीं. ४ ग. संशितैः. ५ झ. भूमिसमीकृताः. ६ क. ग. च.—ट. राक्षसास्त्वभि. ७ ख. च. छ. ञ. नर्दमानास्समन्ततः. ८ ङ. छ. झ. ञ. ट. न्वीरान्नामानि. ९ ङ.—ञ. बहुशाखैश्च.

राक्षसा मथिताः केचिद्वानरैर्जितकाशिभिः ॥ [1]ववमू रुधिरं केचिन्मुखै रुधिरभोजनाः ॥ ९ ॥
पार्श्वेषु दारिताः केचित्केचिद्राशीकृता द्रुमैः ॥ शिलाभिश्चूर्णिताः केचित्केचिद्दन्तैर्विदारिताः ॥१०॥
ध्वजैर्विमथितैर्भग्नैः [2]खैरश्च विनिपातितैः ॥ [3]रथैर्विध्वंसितैश्चापि पतितै रजनीचरैः ॥ ११ ॥
गजेन्द्रैः पर्वताकारैः पर्वताग्रैर्वनौकसाम् ॥ मथितैर्वाजिभिः कीर्णं सारोहैर्वसुधातलम् ॥ १२ ॥
वानरैर्भीमविक्रान्तैराप्लुत्याप्लुत्य वेगितैः ॥ राक्षसाः करजैस्तीक्ष्णैर्मुखेषु विनिकर्तिताः ॥ १३ ॥
विवर्णवदना भूयो विप्रकीर्णशिरोरुहाः ॥ मूढाः शोणितगन्धेन निपेतुर्धरणीतले ॥ १४ ॥
अन्ये परमसंक्रुद्धा राक्षसा भीमनिःस्वनाः ॥ तलैरेवाभिधावन्ति वज्रस्पर्शसमैर्हरीन् ॥ १५ ॥
वानरैरापतन्तस्ते वेगिता वेगवत्तरैः ॥ मुष्टिभिश्चरणैर्दन्तैः पादपैश्चावपोथिताः ॥
वानरैर्हन्यमानास्ते राक्षसा विप्रदुद्रुवुः ॥ १६ ॥
सैन्यं तु विद्रुतं दृष्ट्वा धूम्राक्षो राक्षसर्षभः ॥ [4]क्रोधेन कदनं चक्रे वानराणां युयुत्सताम् ॥ १७ ॥
प्रासैः प्रमथिताः केचिद्वानराः शोणितस्रवाः ॥ मुद्गरैराहताः केचित्पतिता धरणीतले ॥ १८ ॥
परिघैर्मथिताः केचिद्भिन्दिपालैर्विदारिताः ॥ पट्टिशैराहताः केचिद्विह्वलन्तो गतासवः ॥ १९ ॥
केचिद्विनिहताः शूलै रुधिरार्द्रा वनौकसः ॥ केचिद्विद्राविता नष्टाः सबलै राक्षसैर्युधि ॥ २० ॥
विभिन्नहृदयाः केचिदेकपार्श्वेन दारिताः ॥ विदारितास्त्रिशूलैश्च केचिदान्त्रैर्विनिस्सृताः ॥ २१ ॥
तत्सुभीमं महायुद्धं हरिराक्षससंकुलम् ॥ प्रबभौ शब्दबहुलं शिलापादपसंकुलम् ॥ २२ ॥
धनुर्ज्यातन्त्रिमधुरं हिक्कातालसमन्वितम् ॥ मन्दस्तनितसंगीतं युद्धगान्धर्वमाबभौ ॥ २३ ॥
धूम्राक्षस्तु धनुष्पाणिर्वानरान्रणमूर्धनि ॥ हसन्विद्रावयामास दिशस्तु शरवृष्टिभिः ॥ २४ ॥
धूम्राक्षेणार्दितं सैन्यं व्यथितं दृश्य मारुतिः ॥ अभ्यवर्तत संक्रुद्धः प्रगृह्य विपुलां शिलाम् ॥२५॥
क्रोधाद्विगुणताम्राक्षः पितृतुल्यपराक्रमः ॥ शिलां तां पातयामास धूम्राक्षस्य रथं प्रति ॥ २६ ॥

॥७–११॥ वनौकसां पर्वताग्रैः वानरप्रेरितपर्वताग्रैः । तैर्मथितैः गजेन्द्रैः । सारोहैः साधिष्ठातृभिः । वसुधातलं कीर्णमभूत् ॥ १२ ॥ भीमविक्रान्तैः भीमविक्रमैः । वेगितैः संजातवेगैः । वानरैः कर्तृभिः । करजैः नखैः करणैः । आक्रम्याक्रम्य मुखेषु विनिकर्तिताः खण्डिताः । मूढाः मूर्च्छिताः ॥ १३–१४ ॥ तलैरेवाभिधावन्ति । हस्ततलान्येवायुधस्थाने कृत्वा अभ्यधावन्नित्यर्थः ॥ १५ ॥ अवपोथिताः हिंसिताः । "व्यथ हिंसायां" इति धातुः ॥१६॥ कदनं हिंसनं ॥१७॥ प्रासैरित्यादिचतुःश्लोकी॥ विह्वलन्तः विवशाः। गतासवः अभवन्निति शेषः । आन्त्रैर्विनिःसृताः विनिःसृतान्त्रा इत्यर्थः॥ १८—२२ ॥ तन्त्री वीणा । आर्षो ह्रस्वः । तया मधुरं रम्यं । हिक्का । विरम्य विरम्य कण्ठात्पवनोद्गमः । मन्दस्तनितं अशक्त्या मन्दभाषणं । तदेव संगीतं सम्यग्गानं यस्मिन् तत् तथोक्तं । युद्धगान्धर्वं युद्धसंगीतं । संगीतं नृत्तगीतवाद्यं ॥२३॥ दिशः दिशः प्रति ॥ २४ ॥ व्यथितं दुःखितं । दृश्य दृष्ट्वा । मारुतिः हनुमान् ॥ २५ ॥ पिता वायुः

ति० द्रुमैः राशीकृताः द्रुमप्रहारैर्हत्वाराशीकृताइत्यर्थः । स० द्रुमैःराशीकृताः हत्वाहत्वासंमार्जनकार्यविनियुक्तैर्द्रुमैः ॥ १० ॥
कतक० आन्त्राणि पुरीततः ॥ २१ ॥ स० धनुर्ज्या धनुर्गुणः सैवतन्त्रिः तन्त्री वीणा । संज्ञात्वात् 'ङ्याप्नोःसंज्ञा—'इति ह्रस्वः । हिक्का हेषा तद्रूपतालयुक्तमितिनागोजिभट्टः । हिक्का ऊर्ध्ववातप्रवर्तितशब्दविशेषः । 'सारिकाहिक्के'त्यमरव्याख्यायां 'हिक्कअव्यक्तेशब्दे' 'गुरोश्चे'त्यकारप्रत्ययः । ऊर्ध्ववातप्रयुक्तशब्दविशेषइत्युक्तेः । मन्दस्तनितगीतं मन्दाः गजविशेषाः । तत्स्तनितरूपगीतं । "मन्दःखरगजजातिप्रभेदयोः" इतिविश्वः॥ २३ ॥

[पा०] १ ङ. छ. झ. ञ. ट. प्रवेमूरुधिरं. ग. ववर्षूरुधिरं. २ ङ.—ट. खड्गैश्च. ३ क. ख. ङ.—ञ. विध्वंसिताः केचिद्व्यथितारजनीचराः. ४ च. छ. झ. ञ. विनिदारिताः. ५ ग. ङ.—ट. भीमविक्रमाः. ६ ङ. च. छ. झ. ट. रोषेण. क. कोपेन. ७ क. च. झ. ञ. हताभूमौ.

आपतन्तीं शिलां दृष्ट्वा गदामुद्यम्य संभ्रमात् ॥ रथादाप्लुत्य वेगेन वसुधायां व्यतिष्ठत ॥ २७ ॥
सा प्रमथ्य रथं तस्य निपपात शिला भुवि ॥ सचक्रकूबरं साश्वं सध्वजं सशरासनम् ॥ २८ ॥
स भङ्क्त्वा तु रथं तस्य हनुमान्मारुतात्मजः ॥ रक्षसां कदनं चक्रे सस्कन्धविटपैर्द्रुमैः ॥ २९ ॥
विभिन्नशिरसो भूत्वा राक्षसाः शोणितोक्षिताः ॥ द्रुमैः प्रव्यथिताश्चान्ये निपेतुर्धरणीतले ॥ ३० ॥
विद्राव्य राक्षसं सैन्यं हनुमान्मारुतात्मजः ॥ गिरेः शिखरमादाय धूम्राक्षमभिदुद्रुवे ॥ ३१ ॥
तमापतन्तं धूम्राक्षो गदामुद्यम्य वीर्यवान् ॥ विनर्दमानः सहसा हनुमन्तमभिद्रवत् ॥ ३२ ॥
ततः क्रुद्धस्तु वेगेन गदां तां बहुकण्टकाम् ॥ पातयामास धूम्राक्षो मस्तके तु हनूमतः ॥ ३३ ॥
ताडितः स तया तत्र गदया भीमरूपया ॥ ३४ ॥
स कपिर्मारुतबलस्तं प्रहारमचिन्तयन् ॥ धूम्राक्षस्य शिरोमध्ये गिरिशृङ्गमपातयत् ॥ ३५ ॥
स विह्वलितसर्वाङ्गो गिरिशृङ्गेण ताडितः ॥ पपात सहसा भूमौ विकीर्ण इव पर्वतः ॥ ३६ ॥
धूम्राक्षं निहतं दृष्ट्वा हतशेषा निशाचराः ॥ त्रस्ताः प्रविविशुर्लङ्कां वध्यमानाः प्लवङ्गमैः ॥ ३७ ॥
स तु पवनसुतो निहत्य शत्रुं क्षतजवहाः सरितश्च संनिकीर्य ॥
रिपुवधजनितश्रमो महात्मा मुदमगमत्कपिभिश्च पूज्यमानः ॥ ३८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

त्रिपञ्चाशः सर्गः ॥ ५३ ॥

रावणाज्ञया ससैन्येनवज्रदंष्ट्रेण रणायाङ्गदाधिष्ठितदक्षिणद्वारगमनम् ॥ १ ॥ अङ्गदवज्रदंष्ट्रयो राक्षसवानरसेनाभ्यां सैन्ययोः परस्परंच युद्धम् ॥ २ ॥

धूम्राक्षं निहतं श्रुत्वा रावणो राक्षसेश्वरः ॥ क्रोधेन महताऽऽविष्टो निश्वसन्नुरगो यथा ॥ १ ॥
दीर्घमुष्णं विनिश्वस्य क्रोधेन कलुषीकृतः ॥ अब्रवीद्राक्षसं शूरं वज्रदंष्ट्रं महाबलम् ॥ २ ॥
गच्छ त्वं वीर निर्याहि राक्षसैः परिवारितः ॥ जहि दाशरथिं रामं सुग्रीवं वानरैः सह ॥ ३ ॥

॥ २६—२७ ॥ कूबरः युगंधरः । " कूबरस्तु युगंधरः " इत्यमरः ॥ २८—३१ ॥ अभिद्रवत् अभ्यद्रवत् । आगमशासनस्यानित्यत्वादडभावः ॥ ३२ ॥ बहुकण्टकां बहुकीलां ॥ ३३ ॥ ताडितः आसीदिति शेषः ॥ ३४—३५ ॥ विह्वलितानि विवशीकृतानि ॥ ३६—३७ ॥ वहन्तीति वहाः क्षतजस्यवहाः क्षतजवहाः । सन्निकीर्य उत्सार्येत्यर्थः । द्वितीयायां धूम्राक्षवधः ॥ ३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

अथ वज्रदंष्ट्रयुद्धं त्रिपञ्चाशे—धूम्राक्षमित्यादि ॥ आविष्टः अभूदिति शेषः ॥ १—२ ॥ गच्छ त्वं वीर निर्याहीति ॥ इतो गच्छ पुरान्निर्याहीत्यर्थः ॥ ३ ॥

ति० धूम्रक्षवधोभाद्रशुक्लद्वितीयायामित्याहुः । स० रिपुवधजनितश्रमः वधश्च जनितश्रमश्च तौ । रिपूणांवधजनितश्रमौयेन सतथा । स्थितानांवधः । विद्रुतानांचश्रमइतिविवेकः ॥ ३८ ॥ द्विपञ्चाशःसर्गः ॥ ५२ ॥

ति० गच्छनिर्याहीत्याभ्यांसर्वथागन्तव्यमितिबोध्यते ॥ ३ ॥

[पा०] १ ङ. ञ. ट. सचक्रकूबरमुखंसध्वजं. २ ङ. च. झ. ञ. ट. तस्यक्रुद्धस्यरोषेण. ३ ङ. च. झ. ञ. ट. विस्फारित. ४ क. ख. ग. ङ.—ट. शत्रून्क्षतज. ५ घ. संनिपत्य. ६ क. ख. घ. ङ. च. झ. ञ. ट. कपिभिस्सुपूज्य. ७ क. ग. राक्षसेन्द्रोनिशाचरः. ८ ङ. च. झ. ञ. ट. क्रूरं.

तथेत्युक्त्वा द्रुततरं मायावी राक्षसेश्वरः ॥ निर्जगाम बलैः सार्धं बहुभिः परिवारितः ॥ ४ ॥
नागैरश्वैः खरैरुष्ट्रैः संयुक्तः सुसमाहितः ॥ पताकाध्वजचित्रैश्च रथैश्च समलङ्कृतः ॥ ५ ॥
ततो विचित्रकेयूरमुकुटैश्च विभूषितः ॥ तनुत्राणि च संरुध्य सधनुर्निर्ययौ द्रुतम् ॥ ६ ॥
पताकालङ्कृतं दीप्तं तप्तकाञ्चनभूषणम् ॥ रथं प्रदक्षिणं कृत्वा समारोहच्चमूपतिः ॥ ७ ॥
यष्टिभिस्तोमरैश्चित्रैः शूलैश्च मुसलैरपि ॥ भिन्दिपालैश्च पाशैश्च शक्तिभिः पट्टिशैरपि ॥ ८ ॥
खड्गैश्चक्रैर्गदाभिश्च निशितैश्च परश्वधैः ॥ पदातयश्च निर्यान्ति विविधाः शस्त्रपाणयः ॥
विचित्रवाससः सर्वे दीप्ता राक्षसपुङ्गवाः ॥ ९ ॥
गजा मदोत्कटाः शूराश्चलन्त इव पर्वताः ॥ ते युद्धकुशलै रूढास्तोमराङ्कुशपाणिभिः ॥ १० ॥
अन्ये लक्षणसंयुक्ताः शूरा रूढा महाबलाः ॥ [अश्वाः परिपतन्तिस्म राक्षसैश्च प्रचोदिताः ॥११॥]
तद्राक्षसबलं घोरं विप्रस्थितमशोभत ॥ प्रावृट्काले यथा मेघा नर्दमानाः सविद्युतः ॥ १२ ॥
निःसृता दक्षिणद्वारादङ्गदो यत्र यूथपः ॥ तेषां निष्क्रममाणानामशुभं समजायत ॥ १३ ॥
आकाशाद्विघनात्तीव्रा उल्काश्चाभ्यपतंस्तदा ॥ वमन्त्यः पावकज्वालाः शिवा घोरं ववाशिरे ॥१४॥
व्याहरन्ति मृगा घोरा रक्षसां निधनं तदा ॥ समापतन्तो योधास्तु प्रास्खलन्भयमोहिताः ॥ १५ ॥
एतानौत्पातिकान्दृष्ट्वा वज्रदंष्ट्रो महाबलः ॥ धैर्यमालम्ब्य तेजस्वी निर्जगाम रणोत्सुकः ॥ १६ ॥
तांस्तु निष्क्रमतो दृष्ट्वा वानरा जितकाशिनः ॥ प्रणेदुः सुमहानादान्पूरयंश्च दिशो दश ॥ १७ ॥
ततः प्रवृत्तं तुमुलं हरीणां राक्षसैः सह ॥ घोराणां भीमरूपाणामन्योन्यवधकाङ्क्षिणाम् ॥ १८ ॥
निष्पतन्तो महोत्साहा भिन्नदेहशिरोधराः ॥ रुधिरोक्षितसर्वाङ्गा न्यपतञ्जगतीतले ॥ १९ ॥
केचिदन्योन्यमासाद्य शूराः परिघपाणयः ॥ चिक्षिपुर्विविधं शस्त्रं समरेष्वनिवर्तिनः ॥ २० ॥
द्रुमाणां च शिलानां च शस्त्राणां चापि निस्स्वनः ॥ श्रूयते सुमहांस्तत्र घोरो हृदयभेदनः ॥२१॥
रथनेमिस्वनस्तत्र धनुषश्चापि निस्स्वनः ॥ शङ्खभेरीमृदङ्गानां बभूव तुमुलः स्वनः ॥ २२ ॥
केचिदस्त्राणि संसृज्य बाहुयुद्धमकुर्वत ॥ २३ ॥
तलैश्च चरणैश्चापि मुष्टिभिश्च द्रुमैरपि ॥ जानुभिश्च हताः केचिद्भिन्नदेहाश्च राक्षसाः ॥
शिलाभिश्चूर्णिताः केचिद्वानरैर्युद्धदुर्मदैः ॥ २४ ॥

बहुभिः बलाध्यक्षैरिति शेषः ॥४॥ रथैरित्यस्य संयुक्त इत्यनेनान्वयः । समलंकृतः चन्दनकुसुमादिभिरलङ्कृतः । तनुत्राणि कवचतलत्रकण्ठत्रशिरस्त्राणानि । संरुध्य संबध्य धृत्वेत्यर्थः ॥५—७॥ यष्टिभिरित्यादिसार्धश्लोकद्वयं ॥ ८—९ ॥ गजा इति । अत्र निर्यान्तीत्यनुषज्यते । गजानेव विशिनष्टि—ते युद्धेत्यादिना । तोमराङ्कुशपाणिभिः यन्तृभिः । रूढाः आरूढा इत्यर्थः ॥ १० ॥ अन्ये लक्षणसंयुक्ता इति ॥ अत्रापि गजा निर्यान्तीत्यनुषङ्गः ॥ ११—१३ ॥ विघनात् घनशून्यात् ॥ १४—१५ ॥ औत्पातिकान् अशुभसूचकान् ॥ १६ ॥ पूरयन् अपूरयंश्चेत्यर्थः । केचित्तु पूरयन् पूरयन्त इत्यर्थः, वचनव्यत्यय आर्ष इत्याहुः ॥ १७ ॥ तुमुलं रणसङ्कुलं । " तुमुलं रणसङ्कुले " इत्यमरः ॥ १८—२२ ॥ अस्त्राणि संसृज्य सर्वाण्यस्त्राणि प्रयुज्य । तदनन्तरमस्त्राभावात् बाहु-

[पा०] १ ङ.—ट. बहुभिःसमलंकृतः. २ क. ख. घ.—ट. चापैश्च. ३ क.—ट. कुशलारूढाः. ४ ख. लक्षणसंश्लिष्टाः. ५ क. ग. महाजवाः. ६ इदमर्धं च. पाटेदृश्यते. ७ ङ. झ. सर्वे. ८ च. छ. समन्ततः. ९ ग. झ. ञ. ट. त्तीव्रादुडुमुकान्यपतंस्तदा. १० च.—ट. घोरावाशिरे. ११ ख.—ट. प्रास्खलंस्तत्रदारुणं. १२ ङ. झ. ट. विद्रवतो. १३ ङ. झ. ट. विविधाञ्शस्त्रान्. १४ च. ञ. ट. स्तत्रसागरस्वचघोषवत्. ङ. झ. स्तत्रधनुषश्चापिघोषवत्. १५ ङ. झ. ट. संसृज्य. १६ ङ.—ट. द्भग्नदेहाश्च.

वज्रदंष्ट्रो भृशं बाणै रणे वित्रासयन्हरीन् ॥ चचार लोकसंहारे पाशहस्त इवान्तकः ॥ २५ ॥
बलवन्तोऽस्त्रविदुषो नानाप्रहरणा रणे ॥ जघ्नुर्वानरसैन्यानि राक्षसाः क्रोधमूर्च्छिताः ॥ २६ ॥
निघ्नतो राक्षसान्दृष्ट्वा सर्वान्वालिसुतो रणे ॥ क्रोधेन द्विगुणाविष्टः संवर्तक इवानलः ॥ २७ ॥
तान्राक्षसगणान्सर्वान्वृक्षमुद्यम्य वीर्यवान् ॥ अङ्गदः क्रोधताम्राक्षः सिंहः क्षुद्रमृगानिव ॥
चकार कदनं घोरं शक्रतुल्यपराक्रमः ॥ २८ ॥
अङ्गदाभिहतास्तत्र राक्षसा भीमविक्रमाः ॥ विभिन्नशिरसः पेतुर्विकृत्ता इव पादपाः ॥ २९ ॥
रथैरश्वैर्ध्वजैश्छत्रैः शरीरैर्हरिरक्षसाम् ॥ रुधिरेण च संछन्ना भूमिर्भयकरी तदा ॥ ३० ॥
हारकेयूरवस्त्रैश्च शस्त्रैश्च समलङ्कृता ॥ भूमिर्भाति रणे तत्र शारदीव यथा निशा ॥ ३१ ॥
अङ्गदस्य च वेगेन तद्राक्षसबलं महत् ॥ प्राकम्पत तदा तत्र पवनेनाम्बुदो यथा ॥ ३२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुःपञ्चाशः सर्गः ॥ ५४ ॥

अङ्गदेनवज्रदंष्ट्रवधः ॥ १ ॥

बलस्य च निघातेन अङ्गदस्य जयेन च ॥ राक्षसः क्रोधमाविष्टो वज्रदंष्ट्रो महाबलः ॥ १ ॥
स विस्फार्य धनुर्घोरं शक्राशनिसमस्वनम् ॥ वानराणामनीकानि प्राकिरच्छरवृष्टिभिः ॥ २ ॥
राक्षसाश्चापि मुख्यास्ते रथेषु समवस्थिताः ॥ नानाप्रहरणाः शूराः प्रायुध्यन्त तदा रणे ॥ ३ ॥
वानराणां तु शूरा ये सर्वे ते प्लवगर्षभाः ॥ आयुध्यन्त शिलाहस्ताः समवेताः समन्ततः ॥ ४ ॥
तत्रायुधसहस्राणि तस्मिन्नायोधने भृशम् ॥ राक्षसाः कपिमुख्येषु पातयांचक्रिरे तदा ॥ ५ ॥
वानराश्चापि रक्षस्सु गिरीन्वृक्षान्महाशिलाः ॥ प्रवीराः पातयामासुर्मत्तवारणसन्निभाः ॥ ६ ॥
शूराणां युध्यमानानां समरेष्वनिवर्तिनाम् ॥ तद्राक्षसगणानां च सुयुद्धं समवर्तत ॥ ७ ॥

युद्धमकुर्वतेत्यर्थः ॥ २३—२५ ॥ अस्त्रविदुषः अस्त्रविद्वांसः । प्रथमार्थे द्वितीया ॥ २६ ॥ निघ्नत इत्यादिश्लोकद्वयमेकान्वयं ॥ संवर्तके प्रलयकाले । तान्राक्षसगणानित्यत्र निजघानेति विपरिणामः ॥ २७—३० ॥ शारदीव यथा निशेत्यत्र इव शब्दयथाशब्दावेकार्थकौ अपिचेतिवत् । इवशब्दः पादपूरण इत्येके ॥ ३१—३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

अथ वज्रदंष्ट्रवधश्चतुःपञ्चाशे—बलस्य चेत्यादिश्लोकद्वयमेकान्वयं ॥ १—३ ॥ वानराणामिति । निर्धारणे षष्ठी ॥ ४ ॥ तत्र कपिमुख्येष्वित्यन्वयः । आयोधने युद्धे ॥ ५—६ ॥ तद्राक्षसगणानां चेति ।

ति० वज्रदंष्ट्रोऽथतंदृष्ट्वा स्वसेनाविनाशमित्यर्थः । स० लोकसंहारे लोकसंहारार्थं । "चर्मणिद्वीपिनंहन्ति" इतिवत् ॥ २५ ॥ स० द्विगुणंयथातथाआविष्टः द्विगुणाविष्टः । क्रोधेनद्विगुणाविष्टः द्विगुणक्रोधाविष्टइतिफलितोर्थः ॥ २७ ॥ ति० पवनेनांबुदो यथेत्युत्तरसर्गच्छेदः । क्वचित्कोयुक्तोवृत्तभेदप्रकरणभेदाद्यभावादितिकतकः ॥ ३२ ॥ इतित्रिपञ्चाशःसर्गः ॥ ५३ ॥

स० वानराणांमध्येऽवगर्षभाः प्लवेनगच्छन्तिये तेतथा । तेषुश्रेष्ठाः । द्रुतगतिमच्छ्रेष्ठाइतियावत् ॥ ४ ॥

[पा०] १ ब. वज्रदंष्ट्रोमहावीरोरणे. ङ. झ. वज्रदंष्ट्रोथतंदृष्ट्वा. घ. च. छ. वज्रदंष्ट्रोमहावाणैः. २ ङ. च. झ. जघ्नेतान्राक्षसान्सर्वान्वृष्टोवायुसुतोरणे. ३ घ. सराक्षस. ४ ख. घ. मुत्पाद्य. ५ च. छ. ञ. वेगवान्. ६ क. ख. ग. ङ.—ट. पेतुर्निकृत्ताइव. ७ ङ. झ. ट. रुधिरौघेण. ८ च. संपन्ना. ९ ङ. झ. ट. छत्रैश्च. १० खबलस्यचघातेन. ज. खबलस्यनिघातेन. ११ च. झ. ञ. ट. बलेनच. १२ क. ङ.—ट. समप्रभं. १३ क. ग.—ट. रथैश्च. १४ छ. समुपास्थिताः.

[1]प्रभिन्नशिरसः केचिद्भिन्नैः पादैश्च बाहुभिः ॥ शस्त्रैरर्पितदेहास्तु रुधिरेण समुक्षिताः ॥ ८ ॥
[2]हरयो राक्षसाश्चैव [3]शेरते गां समाश्रिताः ॥ कङ्कगृध्रबलैराढ्या गोमायुगणसंकुलाः ॥ ९ ॥
कबन्धानि समुत्पेतुर्भीरूणां भीषणानि वै ॥ १० ॥
भुजपाणिशिरश्छिन्नाश्छिन्नकायाश्च भूतले ॥ वानरा राक्षसाश्चापि निपेतुस्तत्र वै रणे ॥ ११ ॥
ततो वानरसैन्येन हन्यमानं निशाचरम् ॥ प्राभज्यत बलं सर्वं वज्रदंष्ट्रस्य पश्यतः ॥ १२ ॥
राक्षसान्भयवित्रस्तान्हन्यमानान्प्लवङ्गमैः ॥ दृष्ट्वा स रोषताम्राक्षो वज्रदंष्ट्रः प्रतापवान् ॥ १३ ॥
प्रविवेश धनुष्पाणिस्त्रासयन्हरिवाहिनीम् ॥ शरैर्विदारयामास कङ्कपत्रैरजिह्मगैः ॥ १४ ॥
विभेद वानरांस्तत्र सप्ताष्टौ नव पञ्च च ॥ विव्याध परमक्रुद्धो वज्रदंष्ट्रः प्रतापवान् ॥ १५ ॥
त्रस्ताः सर्वे हरिगणाः शरैः [4]संकृत्तकन्धराः ॥ अङ्गदं संप्रधावन्ति प्रजापतिमिव प्रजाः ॥ १६ ॥
ततो हरिगणान्भग्नान्दृष्ट्वा वालिसुतस्तदा ॥ क्रोधेन वज्रदंष्ट्रं तमुदीक्षन्तमुदैक्षत ॥ १७ ॥
वज्रदंष्ट्रोऽङ्गदश्चोभौ संगतौ हरिराक्षसौ ॥ चेरतुः परमक्रुद्धौ हरिमत्तगजाविव ॥ १८ ॥
ततः शरसहस्रेण वालिपुत्रं महाबलः ॥ जघान मर्मदेशेषु मातङ्गमिव तोमरैः ॥ १९ ॥
रुधिरोक्षितसर्वाङ्गो वालिसूनुर्महाबलः ॥ चिक्षेप वज्रदंष्ट्राय वृक्षं भीमपराक्रमः ॥ २० ॥
दृष्ट्वा पतन्तं तं वृक्षमसंभ्रान्तश्च राक्षसः ॥ चिच्छेद [5]बहुधा सोपि निकृत्तः [6]पतितो भुवि ॥ २१ ॥
तं दृष्ट्वा वज्रदंष्ट्रस्य विक्रमं प्लवगर्षभः ॥ प्रगृह्य विपुलं शैलं चिक्षेप च ननाद च ॥ २२ ॥
समापतन्तं तं दृष्ट्वा रथादाप्लुत्य वीर्यवान् ॥ गदापाणिरसंभ्रान्तः पृथिव्यां समतिष्ठत ॥ २३ ॥
[7]साङ्गदेन [8]गदाऽऽक्षिप्ता गत्वा तु रणमूर्धनि ॥ स चक्रकूबरं साश्वं प्रममाथ रथं तदा ॥ २४ ॥
ततोऽन्यं गिरिमाक्षिप्य विपुलं द्रुमभूषितम् ॥ वज्रदंष्ट्रस्य शिरसि पातयामास सोङ्गदः ॥ २५ ॥
अभवच्छोणितोद्गारी वज्रदंष्ट्रः स मूर्च्छितः ॥ मुहूर्तमभवन्मूढो गदामालिङ्ग्य निःश्वसन् ॥ २६ ॥

ते च राक्षसगणाश्च तद्राक्षसगणाः तेषां । तच्छब्देन वानरा उच्यन्ते । युध्यमानानां सुयुद्धं समवर्ततेत्यनेन उत्तरोत्तरयुद्धाधिक्यमुच्यते ॥ ७ ॥ पादैश्च बाहुभिरित्युपलक्षणे तृतीया । अर्पितदेहाः आरोपितदेहाः । गां भूमिं । कङ्कः अवटः स च श्येनविशेषः । गृध्रः दूरदर्शी । बलः श्येनविशेषः काकश्च तैराढ्याः व्याप्ताः ॥ ८—९ ॥ कबन्धानीत्यर्धं ॥१०॥ पुनः केषांचित्पतनमाह—भुजेति ॥ भुजपाणिशिरस्सु छिन्नाः छिन्नकायाः छिन्नमध्यकायाः ॥ ११ ॥ निशाचरं निशाचरसंबन्धि । अण्वृद्ध्यभाव आर्षः । यद्वा निशायां चरतीति योगमात्रविवक्षा ॥ १२ ॥ भयवित्रस्तान भयहेतुभ्यो वित्रस्तान् ॥ १३—१४ ॥ सप्ताष्टौ नव पञ्च चेति एकैकप्रयोगेणेति शेषः ॥ १५—१६ ॥ हरिमत्तगजौ सिंहमत्तगजौ ॥ १८—२३ ॥ सा वज्रदंष्ट्रधृता गदा । आक्षिप्ता अपहृता सः अङ्गदक्षिप्तशैलः ॥ २४—२५ ॥ शोणितोद्गारी रक्तोद्गारी ।

स० बलाः काकाः । "बलोबलिनिवायसे" इतिविश्वः ॥ ९ ॥ **शि०** तत्प्रकारमाह—बिभेदेति । तत्र एकैकबाणप्रक्षेपंसप्ताद्यन्यतमान् एकोनविंशत्संख्याकान्बाबिभेद । अर्धं पृथक् ॥ १५ ॥ **रामानु०** उदीक्षन्तं उदीक्षमाणं ॥ १७ ॥ **कतक०** हरिमत्तगजाविव । हरिरिहशार्दूलः । सिंहेनगजस्ययुद्धासंभवात् । स्वप्नेपिसिंहदर्शनेनगजानांमरणात् । **स०** योयुध्येते पुनः पुनर्युद्धमकुरुतां । हरिः सिंहः । अभूतोपमेयं । हरिःसिंहशावः । मत्तइति गजस्यतेनसहयोधनेअङ्गविस्मृतिःसूच्यतइतिवा । यद्वा 'यद्गन्धमात्राद्धरयोगजेन्द्राः' इतिभागवतोक्तेःविलक्षणगजानांहरिभिर्युद्धंसंभावितमित्युक्तिःसंभवति । हरिःशार्दूलइतिव्याख्यायां कोशःशोध्यः ॥ १८ ॥ **स०** समतिष्ठत । "समवप्रविभ्यःस्थः" इत्यात्मनेपदता ॥ २३ ॥

[**पा०**] १ ङ. ञ. अभग्नशिरसः. २ ग. ङ. ञ. ट. सुघोराराक्षसाश्चैव. ३ ङ. ट. शरवेगंसमा. ४ क. ग. ङ.—ट. गृध्रबलाढ्याश्च. ५ घ.—ट. कुलसंकुलाः. ग. वृकसंकुलाः. ६ क.—ट. संकृत्तदेहिनः. ७ ञ. ट. श्वोभौयौयुध्येतेपरस्परं ८ ख.—ट. महाबलं. ९ क.—ट. शरैरग्निशिखोपमैः. १० ग. शतधा. ११ ङ. छ. ञ. ट. मथितःप्रापतद्भुवि. क. ख. ग. च. ज. ञ. मथितःपतितो. १२ ङ. ञ. ट. अङ्गदेन. १३ ख. च.—ट. शिलाक्षिप्ता.

स लब्धसंज्ञो गदया वालिपुत्रमवस्थितम् ॥ जघान परमक्रुद्धो वक्षोदेशे निशाचरः ॥ २७ ॥
गदां त्यक्त्वा ततस्तत्र मुष्टियुद्धमवर्तत ॥ अन्योन्यं जघ्नतुस्तत्र तावुभौ हरिराक्षसौ ॥ २८ ॥
रुधिरोद्गारिणौ तौ तु प्रहारैर्जनितश्रमौ ॥ बभूवतुः सुविक्रान्तावङ्गारकबुधाविव ॥ २९ ॥
ततः परमतेजस्वी अङ्गदः कपिकुञ्जरः ॥ उत्पाट्य वृक्षं स्थितवान्बहुपुष्पफलाञ्चितम् ॥ ३० ॥
जग्राह चार्षभं चर्म खड्गं च विपुलं शुभम् ॥ किङ्किणीजालसंछन्नं चर्मणा च परिष्कृतम् ॥
[वज्रदंष्ट्रोथ जग्राह सोङ्गदोप्यसिचर्मणी ॥ ३१ ॥]
विचित्रांश्चेरतुर्मार्गान्ऋषितौ कपिराक्षसौ ॥ जघ्नतुश्च तदाऽन्योन्यं निर्दयं जयकाङ्क्षिणौ ॥ ३२ ॥
व्रणैः सास्रैरशोभेतां पुष्पिताविव किंशुकौ ॥ युध्यमानौ परिश्रान्तौ जानुभ्यामवनीं गतौ ॥ ३३ ॥
निमेषान्तरमात्रेण अङ्गदः कपिकुञ्जरः ॥ उदतिष्ठत दीप्ताक्षो दण्डाहत इवोरगः ॥ ३४ ॥
निर्मलेन सुधौतेन खड्गेनास्य महच्छिरः ॥ जघान वज्रदंष्ट्रस्य वालिसूनुर्महाबलः ॥ ३५ ॥
रुधिरोक्षितगात्रस्य बभूव पतितं द्विधा ॥ सं रोषपरिवृत्ताक्षं शुभं खड्गहतं शिरः ॥ ३६ ॥
वज्रदंष्ट्रं हतं दृष्ट्वा राक्षसा भयमोहिताः ॥ त्रस्ताः प्रत्यपतँल्लङ्कां वध्यमानाः प्लवङ्गमैः ॥
विषण्णवदना दीना ह्रिया किंचिदवाङ्मुखाः ॥ ३७ ॥

निहत्य तं वज्रधरप्रभावः स वालिसूनुः करिसैन्यमध्ये ॥
जगाम हर्षं महितो महाबलः सहस्रनेत्रस्त्रिदशैरिवावृतः ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुःपञ्चाशः सर्गः ॥ ५४ ॥

गदां अन्यां । यद्वा, जघान परमक्रुद्धो वक्षोदेशे निशाचर इत्यस्यानन्तरं, साङ्गदेन गदाक्षिप्ता गत्वा तु रणमूर्धनीत्यर्धं योज्यं ॥ २६—२७ ॥ अवर्तत अवर्तयत् ॥ २८—२९ ॥ ततः परमतेजस्वीत्यादिश्लोकद्वयमेकान्वयं ॥ वृक्षोत्पाटनार्षभचर्मखण्डग्रहणादिकमङ्गदस्योच्यमानमितरस्याप्युपलक्षणं । विचित्रांश्चेरतुर्मार्गानिति वक्ष्यमाणयुद्धस्य उभयोरविशेषेण वर्णनात् । अङ्गदेन वृक्षे गृहीते राक्षसोपि वृक्षं जग्राह । अङ्गदेन खड्गादौगृहीतेराक्षसोपि खड्गादिकं जग्राहेति भावः । आर्षभं चर्म ऋषभचर्मणिनद्धं फलकं । चर्मणा खड्गकोशेन ॥ ३०—३१ ॥ मार्गान् पूर्वोक्तमण्डलादिमार्गान् । निर्दयं जघ्नतुरित्यन्वयः ॥ ३२ ॥ सास्रैः सरुधिरैः । "असृगस्रमश्रुणि शोणिते" इत्यमरः । अवनीं गतौ अभूतामिति शेषः ॥ ३३ ॥ निमेषान्तरमात्रेण निमेषावकाशमात्रेण ॥ ३४ ॥ सुधौतेन शाणोल्लिखितेन । अतएव निर्मलेन । अस्य वज्रदंष्ट्रस्येत्यन्वयः । केचित्तु स जग्राहार्षभं चर्मेति पठित्वा सः वज्रदंष्ट्रः खड्गं जग्राह अङ्गदो वृक्षं जग्राहेति व्याख्याय, खड्गेनास्य महच्छिर इत्यत्र वृक्षे प्रतिहतेङ्गदोपि चर्मासी जग्राहेति अनेनावगम्यत इत्यपि वर्णयन्ति ॥ ३५—३६ ॥ विषण्णवदनाः शुष्कवदनाः ॥ तृतीयायां वज्रदंष्ट्रवधः ॥ ३७—

स० अङ्गारकोमङ्गलः ॥२९॥ ति० पुष्पफलैः हस्तधृतवृक्षीयैस्तैर्युतआसीत् ॥३०॥ ति० व्रणैः समुत्थैः तत्समुत्थितैःरुधिरैरित्यर्थः ॥ ३३ ॥ ति० खड्गेन आच्छिद्यगृहीतेनवज्रदंष्ट्रीयेण । शि० सुधौतेन शाणसंस्कृतेन । अतएव निर्मलेन ॥ ३५ ॥ स० शुभं प्राक् ॥ ३६ ॥ स० ह्रिया जीवनाशयाप्रत्यावर्तनाज्जातया लज्जया ॥ ३७ ॥ ति० तत्तृतीयायांवज्रदंष्ट्रवधः ॥ ३८ ॥ इतिचतुःपञ्चाशःसर्गः ॥ ५४ ॥

[पा०] १ ग. ङ.—ट. मकुर्वत. २ झ. ञ. ट. प्लवगर्षभः. ३ ङ. झ. ञ. ट. स्थितवानासीत्पुष्पफलैर्युतः. ४ इदमर्धं क. ख. घ. च. छ. पाठेषु दृश्यते. ५ ट. विचित्रान्तुधिरान्मार्गांश्चेरतुः. ङ. झ. चित्रांश्चरुचिरान्मार्गांश्चेरतुः. ६ ङ. झ. ट. नर्दन्तौ. ७ ग. समृद्धैःशोभेते. च. छ. समभ्रैःशोभेतां. ङ. झ. ञ. ट. समुत्थैःशोभेतां. ८ ङ. झ. ट. तच्चतस्यपरीताक्षं. ९ च.—ट. त्रस्ताश्चभ्यद्रवँल्लङ्कां. क. ख. घ. त्रस्ताःप्रविविशुर्लङ्कां. १० ङ. च. झ. ञ. ट. वज्रधरप्रतापवान्.

पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

रावणप्रेरणयाऽकंपनेनरणायनिर्याणम् ॥ १ ॥ वानरराक्षससेनयोर्महायुद्धम् ॥ २ ॥

वज्रदंष्ट्रं हतं श्रुत्वा वालिपुत्रेण रावणः ॥ बलाध्यक्षमुवाचेदं कृताञ्जलिमवस्थितम् ॥ १ ॥
शीघ्रं निर्यान्तु दुर्धर्षा राक्षसा भीमविक्रमाः ॥ अकम्पनं पुरस्कृत्य सर्वशस्त्रप्रकोविदम् ॥ २ ॥
एष शास्ता च गोप्ता च नेता च युधि संमतः ॥ भूतिकामश्च मे नित्यं नित्यं च समरप्रियः ॥३॥
एष जेष्यति काकुत्स्थौ सुग्रीवं च महाबलम् ॥ वानरांश्चापरान्घोरान्हनिष्यति परंतपः ॥ ४ ॥
परिगृह्य स तामाज्ञां रावणस्य महाबलः ॥ बलं संत्वरयामास तदा लघुपराक्रमः ॥ ५ ॥
ततो नानाप्रहरणा भीमाक्षा भीमदर्शनाः ॥ निष्पेतू रक्षसां मुख्या बलाध्यक्षप्रचोदिताः ॥ ६ ॥
रथमास्थाय विपुलं तप्तकाञ्चनकुण्डलः ॥ मेघाभो मेघवर्णश्च मेघस्वनमहास्वनः ॥
राक्षसैः संवृतो भीमैस्तदा निर्याल्यकम्पनः ॥ ७ ॥
न हि कम्पयितुं शक्यः सुरैरपि महामृधे ॥ अकम्पनस्ततस्तेषामादित्य इव तेजसा ॥ ८ ॥
तस्य निर्धावमानस्य संरब्धस्य युयुत्सया ॥ अकस्मादैन्यमागच्छद्वयानां रथवाहिनाम् ॥ ९ ॥
व्यस्फुरन्नयनं चास्य सव्यं युद्धाभिनन्दिनः ॥ विवर्णो मुखवर्णश्च गद्गदश्चाभवत्स्वनः ॥ १० ॥
अभवत्सुदिने चापि दुर्दिनं रूक्षमारुतम् ॥ ऊचुः खगा मृगाः सर्वे वाचः क्रूरा भयावहाः ॥११॥
स सिंहोपचितस्कन्धः शार्दूलसमविक्रमः ॥ तानुत्पातानचिन्त्यैव निर्जगाम रणाजिरम् ॥ १२ ॥
तदा निर्गच्छतस्तस्य रक्षसः सह राक्षसैः ॥ बभूव सुमहान्नादः क्षोभयन्निव सागरम् ॥ १३ ॥
तेन शब्देन वित्रस्ता वानराणां महाचमूः ॥ द्रुमशैलप्रहरणा योद्धुं समवतिष्ठत ॥ १४ ॥
तेषां युद्धं महारौद्रं संजज्ञे हरिरक्षसाम् ॥ रामरावणयोरर्थे समभित्यक्तजीविनाम् ॥ १५ ॥

---

३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुःपञ्चाशःसर्गः ॥ ५४ ॥

अथाकम्पनयुद्धं पञ्चपञ्चाशे—वज्रदंष्ट्रमित्यादि ॥ बलाध्यक्षं प्रहस्तं ॥१—२॥ शास्ता परसैन्यनिग्राहकः। गोप्ता स्वबलरक्षकः । नेता नायकः । सेनापतिरित्यर्थः । संमतः प्रसिद्धः ॥ ३—४ ॥ परिगृह्येति बलचोदनेन स्वचोदनमर्थसिद्धं मत्वेत्यर्थः ॥ ५ ॥ निष्पेतुः पुरान्निर्ययुः ॥ ६ ॥ मेघाभः मेघवत् स्थूलः । मेघस्वनमहास्वनः । सप्तम्युपमानपूर्वपदस्येत्यादिना उत्तरपदलोपस्य वैकल्पिकत्वे प्रथमस्वनपदश्रवणं ॥ ७ ॥ प्रसङ्गादाह—न हीति ॥ हि यस्मात् महामृधे महायुद्धेपि । कम्पयितुं न शक्यते अतो हेतोरकम्पनः अकम्पनशब्दवाच्यः । तेषां रक्षसां मध्ये तेजसा आदित्य इव स्थित इत्यर्थः ॥ ८—९ ॥ विवर्णः विपरीतवर्णः ॥ १० ॥ दुर्दिनं मेघच्छन्नदिनं । " मेघच्छन्नेह्नि दुर्दिनं " इत्यमरः ॥ ११ ॥ सिंहोपचितस्कन्धः सिंहस्येवोन्नतस्कन्धवान् ॥ १२—१४ ॥ समभित्यक्तजीविनां तृणीकृतशरीराणामित्यर्थः

शि० प्रोत्साहनार्थमकंपनस्यगुणानाह—एषइति ॥ ३ ॥ स० मुखवर्णः मुखकान्तिः । विवर्णः विगतस्तुतिः निन्द्यइतियावत् । 'वर्णःस्तुतौ' इतिविश्वः ॥ १० ॥ स० क्रूरभयावहाः क्रूराणामपिभयावहाः ॥ ११ ॥ ति० समभित्यक्ताः देहिनः आत्मानोयैस्ते । आत्मरक्षानिरपेक्षाइतियावत् । स० समभित्यक्तदेहिनः देहिनःप्राणाः समभित्यक्ताः त्यक्तुंसिद्धीकृताः यैस्तेतथा

[पा०] १ ग. च. झ. ञ. ट. शस्त्रास्त्रकोविदं. २ ङ. झ. ञ. ट. नसंशयः. ३ ङ. झ. ट. संप्रेरयामास. ४ ख. च. ञ. काञ्चनमण्डितं. ङ. झ. ट. काञ्चनभूषणं. ५ ख. ग. घ. अकंपनस्ततश्श्रीमानादित्यइव. क. च. छ. ञ. अकंपनस्सनाम्नाभूदादित्यइव. ६ ग. प्रास्फुरन्नयनं. ख. ङ. छ. झ. विस्फुरन्नयनं. ७ घ. ङ. झ. ट. कालेदुर्दिनं. ८ ठ. क्रूरभयावहाः. ९ ङ. झ. त्यक्तदेहिनः. छ. ट. त्यक्तदेहिनां.

सर्वे ह्यतिबलाः शूराः सर्वे पर्वतसन्निभाः ॥ हरयो राक्षसाश्चैव परस्परजिघांसवः[1] ॥ १६ ॥
तेषां विनर्दतां[2] शब्दः संयुगेऽतितरस्विनाम् ॥ शुश्रुवे सुमहान्क्रोधादन्योन्यमभिगर्जताम्[3] ॥ १७ ॥
रजश्चारुणवर्णाभं सुभीममभवद्भृशम् ॥ उद्भूतं हरिरक्षोभिः संरुरोध दिशो दश ॥ १८ ॥
अन्योन्यं रजसा तेन कौशेयोद्भूतपाण्डुना[4] ॥ संवृतानि च भूतानि ददृशुर्न रणाजिरे ॥ १९ ॥
न ध्वजा न पताका वा चर्म[5] वा तुरगोपि वा ॥ आयुधं स्यन्दनं[6] वाऽपि ददृशे तेन रेणुना ॥२०॥
शब्दश्च सुमहांस्तेषां नर्दतामभिधावताम्[7] ॥ श्रूयते तुमुले युद्धे न रूपाणि चकाशिरे ॥ २१ ॥
हरीनेव सुसंक्रुद्धा हरयो जघ्नुराहवे ॥ राक्षसाश्चापि रक्षांसि निजघ्नुस्तिमिरे[8] तदा ॥ २२ ॥
परांश्चैव[9] विनिघ्नन्तः स्वांश्च वानरराक्षसाः ॥ रुधिरार्द्रां तदा चक्रुर्महीं पङ्कानुलेपनाम्[10] ॥ २३ ॥
ततस्तु रुधिरौघेण सिक्तं व्यपगतं[11] रजः ॥ शरीरशवसंकीर्णा[12] बभूव च वसुंधरा ॥ २४ ॥
द्रुमशक्तिशिलाप्रासैर्गदापरिघतोमरैः ॥ हरयो राक्षसाश्चैव जघ्नुरन्योन्यमोजसा ॥ २५ ॥
बाहुभिः परिघाकारैर्युध्यन्तः पर्वतोपमाः ॥ हरयो[13] भीमकर्माणो राक्षसाञ्जघ्नुराहवे ॥ २६ ॥
राक्षसास्त्वपि संक्रुद्धाः प्रासतोमरपाणयः ॥ कपीन्निजघ्निरे तत्र शस्त्रैः परमदारुणैः ॥ २७ ॥
अकम्पनः सुसंक्रुद्धो राक्षसानां चमूपतिः ॥ संहर्षयति तान्सर्वान्राक्षसान्भीमविक्रमान् ॥ २८ ॥
हरयस्त्वपि रक्षांसि महाद्रुममहाश्मभिः ॥ विदारयन्त्यभिक्रम्य[14] शस्त्राण्याच्छिद्य वीर्यतः ॥ २९ ॥
एतस्मिन्नन्तरे वीरा हरयः कुमुदो नलः ॥ मैन्दश्च द्विविदः[15] क्रुद्धाश्चक्रुर्वेगमनुत्तमम् ॥ ३० ॥
ते तु वृक्षैर्महावेगा[16] राक्षसानां चमूमुखे ॥ कदनं सुमहच्चक्रुर्लीलया हरियूथपाः[17] ॥

॥ १५ ॥ परस्परजिघांसवः आसन्निति शेषः ॥१६॥ विनर्दतां सिंहनादं कुर्वतां । अभिगर्जतां आभिमुख्येन गर्जनं कुर्वतां ॥ १७ ॥ अरुणवर्णेन रक्तिम्ना आभातीत्यरुणवर्णाभं ॥ १८ ॥ कौशेयोद्भूतपाण्डुना उद्भूतकौशेयपाण्डुना । आहिताग्न्यादित्वात् परनिपातः । रजसो रक्तत्वपाण्डुत्वे भूमेदादिति ज्ञेयं । संवृतानि छन्नानि । भूतानि वस्तूनि । न ददृशुः । वानरा राक्षसाश्चेति शेषः ॥ १९ ॥ उक्तं विवृणोति—न ध्वजा इति ॥ वर्मादिष्वपि नञनुवर्तनीयः ॥ २० ॥ परस्परादर्शनादिजन्यं शब्दान्तरमाह—शब्दश्चेति ॥ रूपाणि पदार्थान्तराणि ॥ २१ ॥ अदर्शनफलमाह—हरीनिति ॥ २२ ॥ प्रथमं रक्तार्द्रां अथच रणक्षोदेन पङ्किलामित्यर्थः । पङ्कानुलेपनां पङ्कानुलिप्तां । कर्मणि ल्युट् ॥ २३ ॥ शरीरशवसंकीर्णा शवभूतशरीरसंकीर्णा ॥ २४ ॥ द्रुमशैला वानरीयाः । शक्त्यादयो राक्षसीयाः ॥ २५ ॥ बाहुभिः परिघाकारैरित्यस्योत्तरार्धः, हरयो भीमकर्माणो राक्षसाञ्जघ्नुराहव इति ॥ २६ ॥ राक्षसास्त्वपीति ॥ शस्त्रैः उक्तप्रासादिभिः ॥ २७ ॥ संहर्षयति उत्साहयति ॥ २८ ॥ अभिक्रम्य अभिमुखीभूय । आच्छिद्य अपहृत्य ॥ २९—३० ॥ ते त्वित्यादिसार्ध-

॥ १५ ॥ **रामानु०** संहर्षयति समहर्षयत् । संभावयामासेत्यर्थः । तान् कपीन्निघ्नतः ॥ २८ ॥ **कतक०** नानाप्रहरणैर्भृशमित्यत्रसर्गविच्छेदःप्रमादात् ॥ ३१ ॥ इतिपञ्चपञ्चाशः सर्गः ॥ ५५ ॥

[पा०] १ घ. ङ. ञ. जिघांसया. २ ङ. ञ. ट. सुमहान्कोपात्. ३ ग. मभिधावतां. ४ क. ख. घ. ङ. ञ. ट. कौशेयोद्धत. ५ ङ. ञ. ञ. ट. ध्वजो. घ. च. ध्वजावा. ६ क. ख. च. छ. ञ. गजोवातुरगो. ङ. ञ. ट. चर्मवातुरगो. ७ ख. घ. ङ. छ. ञ. ञ. ट. स्यन्दनोपिवा. ८ ग. गर्जतां. ९ ख. ङ. च. ञ. ञ. ट. राक्षसाराक्षसांश्चापि. १० क. निजघ्नुरितरेतरं. ११ च. छ. ञ. तेपरांश्चैवनिघ्नन्तः. ख. घ. ङ. ञ. ट. तेपरांश्चविनिघ्नन्तः. १२ ख. ङ. ञ. ट. ह्यपगतं. १३ ग. शतसंकीर्णा. १४ ग. घ. हरीनेव सुसंकुद्धाहरयोजघ्नुराहवे. १५ ग. दारयन्त्यभिनिष्क्रम्य. १६ ख. ग. ङ. ञ. ञ. ट. परमक्रुद्धाः. १७ ङ. च. ञ. ञ. ट. महावीराः. १८ ञ. हरिपुङ्गवाः.

[1]ममन्थू राक्षसान्सर्वे वानरा गणशो भृशम् ॥ ३१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

षट्पञ्चाशः सर्गः ॥ ५६ ॥

हनुमताऽकंपनवधः ॥ १ ॥ तेनरामादिभिर्हनुमच्छ्लाघनम् ॥ २ ॥

तद्दृष्ट्वा सुमहत्कर्म कृतं वानरसत्तमैः ॥ क्रोधमाहारयामास युधि तीव्रमकम्पनः ॥ १ ॥
क्रोधमूर्च्छितरूपस्तु धून्वन्परमकार्मुकम् ॥ दृष्ट्वा तु कर्म शत्रूणां सारथिं वाक्यमब्रवीत् ॥ २ ॥
[2]तत्रैव तावच्चरितं रथं प्रापय सारथे ॥ [3]यत्रैते बहवो घ्नन्ति सुबहून्राक्षसान्रणे ॥ ३ ॥
[4]एतेऽत्र बलवन्तो हि भीम[5]कायाश्च वानराः ॥ द्रुमशैलप्रहरणास्तिष्ठन्ति प्रमुखे मम ॥ ४ ॥
एतान्निहन्तुमिच्छामि समरश्लाघिनो ह्यहम् ॥ [6]एतैः प्रमथितं सर्वं दृश्यते राक्षसं बलम् ॥ ५ ॥
ततः [7]प्रजवनाश्वेन रथेन रथिनांवरः ॥ हरीनभ्यहनत्क्रोधाच्छरजालैरकम्पनः ॥ ६ ॥
न स्थातुं वानराः शेकुः किं पुनर्योद्धुमाहवे ॥ अकम्पनशरैर्भग्नाः सर्व एव विदुद्रुवुः ॥ ७ ॥
तान्मृत्युवशमापन्नानकम्पनवशं गतान् ॥ समीक्ष्य हनुमाञ्ज्ञातीनुपतस्थे महाबलः ॥ ८ ॥
तं महाप्लवगं दृष्ट्वा सर्वे प्लवगयूथपाः ॥ समेत्य समरे वीराः संहृष्टाः पर्यवारयन् ॥ ९ ॥
[8]अवस्थितं हनूमन्तं [9]ते दृष्ट्वा हरियूथपाः ॥ बभूवुर्बलवन्तो हि [10]बलवन्तं समाश्रिताः ॥ १० ॥
अकम्पनस्तु शैलाभं हनूमन्त[11]मवस्थितम् ॥ महेन्द्र इव धाराभिः शरैरभिववर्ष ह ॥ ११ ॥
अचिन्तयित्वा बाणौघाञ्शरीरे [12]पतिताञ्शितान् ॥ अकम्पनवधार्थाय मनो दध्रे महाबलः ॥१२॥
स प्रसह्य महातेजा हनूमान्मारुतात्मजः ॥ अभिदुद्राव तद्रक्षः कम्पयन्निव मेदिनीम् ॥ १३ ॥
तस्याभिनर्दमानस्य दीप्यमानस्य तेजसा ॥ बभूव रूपं दुर्धर्षं दीप्तस्येव विभावसोः ॥ १४ ॥
[13]आत्मानमप्रहरणं ज्ञात्वा क्रोधसमन्वितः ॥ शैलमुत्पाटयामास वेगेन हरिपुङ्गवः ॥ १५ ॥
[14]तं गृहीत्वा महाशैलं पाणिनैकेन मारुतिः ॥ स विनद्य महानादं भ्रामयामास वीर्यवान् ॥ १६॥

श्लोकः ॥ लीलया अनायासेन ॥३१॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥५५॥

अथाकम्पनवधः षट्पञ्चाशे—तद्दृष्ट्वेत्यादि ॥ १–३ ॥ प्रमुखे अग्रे ॥ ४–५ ॥ प्रजवनाश्वेन वेगवद्भिरश्वैः ॥ ६–७ ॥ उपतस्थे अकम्पनसमीपमाजगाम ॥ ८–११ ॥ अकम्पनवधार्थाय अकम्पनवधरूपप्रयोजनाय ॥ १२–१३ ॥ तस्य हनुमतः ॥ १४ ॥ अप्रहरणं अनायुधं ॥ १५ ॥ महानादं विनद्य महानादं

ति० बलवन्तोवा वाशब्दोवैशब्दस्यार्थे ॥ ४ ॥ ति० एतान्निहन्तुमिच्छामि प्रथमतःस्वसेनारक्षणार्थं। ततःपरबलंहनिष्यामीतिशेषः। तदेवाह—**एतैरिति** ॥ ५ ॥

[पा०] १ ममन्थूराक्षसानित्यर्धस्यस्थाने क. ख. घ. च. छ. ज. पाठेषु अकंपनसमादिष्टाविविधायुधयोधिनः। ममन्थू राक्षसास्तत्रवानरान्गणशोभृशं इत्येकश्लोकः पाठभेदेनदृश्यते. २ ङ. झ. ट. न्सर्वेनानाप्रहरणैर्भृशं. ३ ग. ट. तथैवत्वरितंयोद्धुं. ४ च. झ. ञ. ट. एतेचबलिनोघ्नन्ति. क. घ. यत्रैतेहरयोघ्नन्ति. ५ ङ. झ. एतेचबलवन्तोवा. ६ ङ. छ. झ. ट. भीमकोपाश्च. ७ क. ख. ग. च. ञ. एतत्प्रमथितं. ८ ङ. च. झ. ञ. ट. प्रचलिताश्वेन. ९ क. ख. छ. नकंपनशरातुरान्. च. झ. ट. नकंपनशरानुगान्. १० क. ग. ङ. झ. ट. व्यवस्थितं. ११ घ. च. छ. तंदृष्ट्वा. १२ क. ख. घ.—छ. झ ट. बलवन्तमुपाश्रिताः. १३ क. ख. ग. च. मुपस्थितं. १४ ङ. झ. ट. पातितान्कपिः. १५ क. ङ.—ट. आत्मानंत्वप्रहरणं. ख. ग. घ. आत्मानंचाप्रहरणं. १६ ङ. छ. झ. ट. गृहीत्वासुमहाशैलं.

ततस्तमभिदुद्राव राक्षसेन्द्रमकम्पनम् ॥ [1]पुरा हि नमुचिं संख्ये वज्रेणेव पुरंदरः ॥ १७ ॥
अकम्पनस्तु तद्दृष्ट्वा गिरिशृङ्गं समुद्यतम् ॥ दूरादेव महाबाणैरर्धचन्द्रैर्व्यदारयत् ॥ १८ ॥
[2]तत्पर्वताग्रमाकाशे रक्षोबाणविदारितम् ॥ विशीर्णं पतितं दृष्ट्वा हनुमान्क्रोधमूर्च्छितः ॥ १९ ॥
सोश्वकर्णं [3]समासाद्य रोषदर्पान्वितो हरिः ॥ तूर्णमुत्पाटयामास महागिरिमिवोच्छ्रितम् ॥ २० ॥
तं गृहीत्वा महास्कन्धं सोश्वकर्णं महाद्युतिः ॥ [4]ग्रहस्य परया प्रीत्या भ्रामयामास संयुगे ॥ २१ ॥
प्रधावन्वेगवद्वेगेन प्रभञ्जंस्तरसा द्रुमान् ॥ हनुमान्परमक्रुद्धश्चरणैर्दारयत्क्षितिम् ॥ २२ ॥
गजांश्च सगजारोहान्सरथान्रथिनस्तथा ॥ जघान हनुमान्धीमान्राक्षसांश्च पदातिगान् ॥ २३ ॥
तमन्तकमिव क्रुद्धं [5]समरे प्राणहारिणम् ॥ हनुमन्तमभिप्रेक्ष्य राक्षसा विप्रदुद्रुवुः ॥ २४ ॥
तमापतन्तं संक्रुद्धं [6]राक्षसानां भयावहम् ॥ ददर्शाकम्पनो वीरश्चुक्रोध च ननाद च ॥ २५ ॥
स चतुर्दशभिर्बाणैः शितैर्देहविदारणैः ॥ निर्बिभेद हनूमन्तं महावीर्यमकम्पनः ॥ २६ ॥
स तैंदा प्रतिविद्धस्तु बहुभिः शरवृष्टिभिः ॥ हनुमान्ददृशे वीरः प्ररूढ इव सानुमान् ॥ २७ ॥
विरराज महाकायो महावीर्यो महामनाः ॥ पुष्पिताशोकसंकाशो विधूम इव पावकः ॥ २८ ॥
ततोऽन्यं वृक्षमुत्पाट्य कृत्वा वेगमनुत्तमम् ॥ शिरस्यभिजघानाशु राक्षसेन्द्रमकम्पनम् ॥ २९ ॥
स वृक्षेण हतस्तेन सक्रोधेन महात्मना ॥ राक्षसो वानरेन्द्रेण पपात च ममार च ॥ ३० ॥
तं दृष्ट्वा निहतं भूमौ राक्षसेन्द्रमकम्पनम् ॥ व्यथिता राक्षसाः सर्वे क्षितिकम्प इव द्रुमाः ॥ ३१ ॥
त्यक्तप्रहरणाः सर्वे राक्षसास्ते पराजिताः ॥ लङ्कामभिययुस्त्रस्ता वानरैस्तैरभिद्रुताः ॥ ३२ ॥
ते मुक्तकेशाः संभ्रान्ता भग्नमानाः पराजिताः ॥ [7]स्रवच्छ्लमजलैरङ्गैः श्वसन्तो विप्रदुद्रुवुः ॥ ३३ ॥
[8]अन्योन्यं प्रममन्थुस्ते विविशुर्नगरं भयात् ॥ पृष्ठतस्ते सुसंमूढाः प्रेक्षमाणा मुहुर्मुहुः ॥ ३४ ॥
तेषु लङ्कां प्रविष्टेषु राक्षसेषु महाबलाः ॥ समेत्य हरयः सर्वे हनुमन्तमपूजयन् ॥ ३५ ॥
सोपि [9]ग्रहृष्टस्तान्सर्वान्हरीन्प्रत्यभ्यपूजयत् ॥ हनुमान्सत्त्वसंपन्नो यथार्हमनुकूलतः ॥ ३६ ॥
विनेदुश्च यथाप्राणं हरयो जितकाशिनः ॥ चकर्षुश्च पुनस्तत्र सप्राणानपि राक्षसान् ॥ ३७ ॥

स वीरशोभामभजन्महाकपिः समेत्य रक्षांसि निहत्य मारुतिः ॥
महासुरं भीममभित्रनाशनं [10]यथैव [11]विष्णुर्बलिनं [12]चमूमुखे ॥ ३८ ॥

कृत्वेत्यर्थः ॥ १६ ॥ तत इति । तत्र सः शैलेनेत्यध्याहार्यं । सहनुमान् अकम्पनं पुरन्दरो नमुचिं यथा तथा शैलेन वज्रेणेवाभिदुद्राव ॥ १७—१८ ॥ क्रोधमूर्च्छितः अभूदितिशेषः ॥ १९—२१ ॥ चरणैः चरणन्यासैः । दारयत् अदारयत् ॥ २२ ॥ पदातितया गच्छन्तीति पदातिगाः तान् ॥ २३—२६ ॥ प्ररूढः प्ररूढवृक्षः ॥ २७—२९ ॥ वानरेन्द्रेण कर्त्रा । तेन वृक्षेणहत इत्यन्वयः ॥३० ॥ क्षितिकम्पे भूकम्पे ॥ ३१—३५ ॥ प्रत्यभ्यपूजयत् भवत्साहाय्येनैव मया जितमित्येवमिति भावः ॥ ३६—

स० प्रीत्या समयेनसमीचीनायुधमुपलब्धमितिहर्षेण ॥ २१ ॥ ति० प्ररूढःसानुमानिव बहुशराचितशरीरत्वात्प्ररूढबहुवृक्षो गिरिरिवजनैर्ददृशइत्यर्थः ॥ २७ ॥ ति० सोपियथार्हमनुकूलतोऽनुकूलदर्शनवचनालिङ्गनैः संप्रत्यपूजयत् ॥ ३६ ॥ इतिषट्पञ्चाशःसर्गः ॥ ५६ ॥

[पा०] १ क.—घ. च. छ. ट. यथाहिनमुचिं. २ क. ख. तंशिलोच्चयमाकाशे. ३ क. ख. ग. समादाय. ४ झ. प्रगृह्यपरया. ५ ङ. झ. ट. सद्रुमंप्राण. ६ ख. संप्रेक्ष्य. ७ ङ. झ. ट. तथाविप्रकीर्णस्तुनाराचैःशितशक्तिभिः. क. तथाप्रतिविद्धाङ्गोभूरिभिःशरवृष्टिभिः. ८ ङ. झ. ट. महाबलः. ९ क.—घ. झ. भयाच्छ्लमजलैरङ्गैःप्रस्रवद्भिर्विदुद्रुवुः. ङ. भयाच्चस्रजलैरङ्गैःप्रस्रवद्भिर्विदुद्रुवुः. १० झ. ञ. ट. अन्योन्यंतेप्रमथ्नन्तो. घ. अन्योन्यंप्रेमबद्धास्ते. ११ ङ.—झ. प्रवृद्धांस्तान्सर्वान्. १२ ङ. झ. ट. विष्णुर्यथैवोरुबलं. १३ च. छ. महाहवे.

अपूजयन्देवगणास्तदा कपिं स्वयं च रामोतिबलश्च लक्ष्मणः ॥
तथैव सुग्रीवमुखाः प्लवङ्गमा विभीषणश्चैव महाबलस्तथा ॥ ३९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षट्पञ्चाशस्सर्गः ॥ ५६ ॥

सप्तपञ्चाशः सर्गः ॥ ५७ ॥

रावणचोदनयाप्रहस्तेन नरान्तकादिसचिवचतुष्टयसाहित्येन पूर्वद्वाराद्रणायनिर्याणम् ॥ १ ॥

अकम्पनवधं श्रुत्वा क्रुद्धो वै राक्षसेश्वरः ॥ किंचिद्दीनमुखश्चापि सचिवांस्तानुदैक्षत ॥ १ ॥
स तु ध्यात्वा मुहूर्तं तु मन्त्रिभिः संविचार्य च ॥ ततस्तु रावणः पूर्वदिवसे राक्षसाधिपः ॥
पुरीं परियियौ लङ्कां सर्वान्गुल्मानवेक्षितुम् ॥ २ ॥
तां राक्षसगणैर्गुप्तां गुल्मैर्बहुभिरावृताम् ॥ ददर्श नगरीं लङ्कां पताकाध्वजमालिनीम् ॥ ३ ॥
रुद्धां तु नगरीं दृष्ट्वा रावणो राक्षसेश्वरः ॥ उवाचामर्षतः काले प्रहस्तं युद्धकोविदम् ॥ ४ ॥
पुरस्योपनिविष्टस्य सहसा पीडितस्य वा ॥ नान्यं युद्धात्प्रपश्यामि मोक्षं युद्धविशारद ॥ ५ ॥
अहं वा कुम्भकर्णो वा त्वं वा सेनापतिर्मम ॥ इन्द्रजिद्वा निकुम्भो वा वहेयुर्भारमीदृशम् ॥ ६ ॥
स त्वं बलमतः शीघ्रमादाय परिगृह्य च ॥ विजयायाभिनिर्याहि यत्र सर्वे वनौकसः ॥ ७ ॥
निर्याणादेव ते नूनं चपला हरिवाहिनी ॥ नर्दतां राक्षसेन्द्राणां श्रुत्वा नादं द्रविष्यति ॥ ८ ॥
चपला ह्यविनीताश्च चलचित्ताश्च वानराः ॥ न सहिष्यन्ति ते नादं सिंहनादमिव द्विपाः ॥ ९ ॥
विद्रुते च बले तस्मिन्रामः सौमित्रिणा सह ॥ अवशस्ते निरालम्बः प्रहस्त वशमेष्यति ॥ १० ॥
आपत्संशयिता श्रेयो न तु निस्संशयीकृता ॥ प्रतिलोमानुलोमं वा यद्वा नो मन्यसे हितम् ॥ ११ ॥

---

३९ ॥ चतुर्थ्यामकम्पनवधः ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षट्पञ्चाशः सर्गः ॥ ५६ ॥

अथ युद्धाय प्रहस्तनिर्याणं सप्तपञ्चाशे—अकम्पनवधमित्यादि ॥ १ ॥ स त्वित्यादिसार्धश्लोक एकान्वयः ॥ ततः स रावणः पुरीं परिययौ। पूर्वदिवसे दिवसस्य पूर्वभागे। पूर्वाह्ण इत्यर्थः। गुल्मान् सेनाव्यूहान् ॥ २–३ ॥ काले निदेशार्हसमये ॥ ४ ॥ उप समीपे निविष्टं परसेनानिवेशो यस्य तस्य उपरुद्धस्येत्यर्थः। अतएव वाशब्दश्चार्थे। पीडितस्य च मोक्षं मोक्षोपायं ॥ ५ ॥ वहेयुरिति शकि लिङ् ॥ ६ ॥ शीघ्रमादाय। परिगृह्य स्वाधीनं कृत्वा। यत्र वनौकसो वर्तन्ते तत्र इतो निर्याहीत्यन्वयः ॥ ७ ॥ चपला धैर्यरहिता ॥ ८–९ ॥ अवशः प्रभुत्वरहितः। "वशमिच्छाप्रभुत्वयोः" इति विश्वः। हे प्रहस्त। ते तव वशमेष्यतीत्यन्वयः ॥ १० ॥ ननु युद्धे सत्यात्महानेरपि संभवात्तदकरणमेव श्रेय इत्याशङ्क्य तथात्वे शत्रुकृ-

ति० उपनिविष्टस्य अतिसमीपनिविष्टशत्रुबलस्येत्यर्थः। अतएवसहसाबलात्कारेणपीडितस्य। अन्ययुद्धात् अन्यकर्तृकयुद्धाद्धेतोः। मोक्षं उपरोधमोक्षं। न प्रपश्यामि ॥ ५ ॥ ति० ननुयुद्धेमज्जीवनपिसंदेहात्कथंनिरालंबोवशमेष्यतीत्युच्यतेतत्राह—आपदिति। युद्धे आपत् मृतिः। संशयिता संदेहविषया। श्रेयः विजयस्तु। तवनसंशयितः नसंदेहविषयः। तवातिबलत्वाद्बहुशोदृष्टविजयत्वाच्च इन्द्रजिद्वच्छ्रेयःप्राप्तिरेवोत्कटकोटिका। किंच श्रेयोनसंदिग्धं। युद्धेजीवनेमरणेचश्रेयस्सत्त्वात्। जीवनेराज्यं। मृतावुत्तमलोकः। अतोत्रयुद्धेप्रवृत्तिरेवनिस्संशयीकृता। 'यत्रायुद्धेध्रुवोमृत्युर्युद्धेजीवितसंशयः। तमेवकालंयुद्धस्यप्रवदन्तिमनीषिणः" इत्यादिशास्त्रादितिभावः। ममलघ्वयुद्धमेवहितंप्रतिभाति। प्रकारान्तरमस्तिचेद्दृहीत्याह—प्रतिलोमेत्यादि। मनोनुकूलंवा

[पा०] १ ख. प्रतियियौ. २ ङ. च. छ. झ. ट. नगरींराजा. घ. महतींलङ्कां. ३ ग. ङ. झ. ट. उवाचात्महितंकाले. ४ झ. नान्ययुद्धात्. ५ च. हेतुं. ६ क. ख. घ. च. छ. ज. मादायरथमास्थितः. ७ ङ. झ. ज. ट. चलिता. घ. चलिष्यत्यरिवाहिनी. ८ क. ग.—छ. झ. ज. ट. नात्र. ९ ङ. झ. ट. यत्तनो.

रावणेनैवमुक्तस्तु प्रहस्तो वाहिनीपतिः ॥ राक्षसेन्द्रमुवाचेदमसुरेन्द्रमिवोशना ॥ १२ ॥
राजन्मन्त्रितपूर्वं नः कुशलैः सह मन्त्रिभिः ॥ विवादश्चापि नो वृत्तः समवेक्ष्य परस्परम् ॥ १३ ॥
प्रदानेन तु सीतायाः श्रेयो व्यवसितं मया ॥ अप्रदाने पुनर्युद्धं दृष्टमेतत्तथैव नः ॥ १४ ॥
सोहं दानैश्च मानैश्च सततं पूजितस्त्वया ॥ सान्त्वैश्च विविधैः काले किं न कुर्यां प्रियं तव ॥ १५ ॥
न हि मे जीवितं रक्ष्यं पुत्रदारधनानि वा ॥ त्वं पश्य मां जुहूषन्तं त्वदर्थे जीवितं युधि ॥ १६ ॥
एवमुक्त्वा तु भर्तारं रावणं वाहिनीपतिः ॥ उवाचेदं बलाध्यक्षान्प्रहस्तः पुरतः स्थितान् ॥ १७ ॥
समानयत मे शीघ्रं राक्षसानां महद्बलम् ॥ १८ ॥
मद्बाणशतवेगेन हतानां च रणाजिरे ॥ अद्य तृप्यन्तु मांसादाः पक्षिणः काननौकसाम् ॥ १९ ॥
इत्युक्तास्ते प्रहस्तेन बलाध्यक्षाः कृतत्वराः ॥ बलमुद्योजयामासुस्तस्मिन्राक्षसमन्दिरे ॥ २० ॥
सा बभूव मुहूर्तेन तिर्यग्मनाविधायुधैः ॥ लङ्का राक्षसवीरैस्तैर्गजैरिव समाकुला ॥ २१ ॥

ताया हानेर्निश्चितत्वात् युद्धकरणे तस्याः संदेहात् । "यत्रायुद्धे ध्रुवो मृत्युर्युद्धे जीवितसंशयः । तमेव कालं युद्धस्य प्रवदन्ति मनीषिणः" इत्युक्तरीत्या इदानीं युद्धमेव श्रेय इत्याह—आपदिति ॥ संशयिता वितर्किता । आपत् मृतिः । श्रेयः । युद्धे मृतिः श्रेयस्करीत्यर्थः । जयापजययोरव्यवस्थितत्वेन पाक्षिकजयस्यापि संभवादिति भावः । पक्षान्तरं प्रतिक्षिपति—नत्विति । निस्संशयीकृता निश्चिता । मृतिस्तु युद्धं विना शत्रुभिर्मरणं तु न श्रेयः एतन्मम मतं । त्वन्मतं तु किमित्याह—प्रतिलोमेति । प्रतिलोमं मदुक्तप्रकारविपरीतप्रकारं । अनुलोमं वा नोस्माकं यद्धितं मन्यसे तद्वदेति शेषः । वेति पक्षान्तरे । अहं तदेव श्रेयो मन्ये । त्वमन्यच्च यदि मन्यसे तद्वद । तदेवास्माकं हितमित्यर्थः ॥ ११—१२ ॥ मन्त्रसमये मया यथा निर्धारितं तत्तथा प्रवृत्तमित्याह—राजन्नित्यादिना ॥ कुशलैर्मन्त्रिभिः विभीषणादिभिः सह । नः अस्माभिः । इदं वक्ष्यमाणं मन्त्रितपूर्वं । तर्हि मन्त्रितत्वे तथा किमिति नानुष्ठितं तत्राह—विवाद इति । परस्परं समवेक्ष्य बहुमतितया आलोच्य । नः अस्माकं विवादश्चापि वृत्तः । येन विभीषणो निरगच्छदिति भावः ॥ १३ ॥ मन्त्रितमर्थमाह—प्रदानेन त्विति ॥ सीतायाः प्रदानेन तु श्रेयः । अप्रदाने तु युद्धमिति च मम व्यवसितमित्यर्थः । सर्वमरणं युद्धशब्देनोपचर्यते । यथैव व्यवसितं तथैव नः अस्माभिः । दृष्टं च ॥ १४ ॥ एवं स्वमतमुक्त्वा संप्रति त्वन्मतानुसारेण युद्धमेव करिष्यामीत्याह—सोहमित्यादिना ॥ दानैः भूषणादिप्रदानैः । मानैः त्वदधीनं जीवितमित्यादिप्रियभाषणैः । पूजितः उत्कर्षमापादितः । काले आपत्काले । किंन कुर्यां जीवितत्यागमपि कुर्यामित्यर्थः ॥ १५ ॥ उक्तमेव विशदयति—न हीति ॥ जुहूषन्तं होतुमिच्छन्तं । जुहोतेः सन्प्रत्ययः । अनेन जीवितस्य हविष्ट्वं युद्धस्याग्निरूपत्वं च गम्यते । तेन चात्महविःप्रदानस्य महाफलत्वं युद्धसङ्गतिमात्रेण स्वविनाशश्च द्योत्यते । गतानुगतिकास्तु जुहूषन्तं त्यक्तुमिच्छन्तमित्यर्थः । जुहोतेर्दानार्थत्वादित्याहुः ॥ १६—१८ ॥ हतानां काननौकसां तृप्यन्त्वित्यन्वयः । "पूरणगुण—" इत्यादिना समासप्रतिषेधेन सुहितार्थयोगे ज्ञापिता षष्ठी ॥१९—

भवतुप्रतिकूलंवा । यत्तुनोहितंमन्यसे तद्वदेतिशेषः । स० आपत् मृतिः परिभवभवंदुःखंवा । संशयिता । नचनिस्संशयीकृता भविष्यत्येवेति ननिश्चिता । तथापि तवशक्तितोमयुक्तितश्च श्रेयः जयः निश्चितं । 'श्रेयः अमृतेऐहिकं मृते पारत्रिक'मिति प्रकृतानुपयुक्तंव्याख्यानं । प्रोत्साहनसमयत्वात् । ती० अत्र मदुक्तार्थविषये प्रतिलोमानुलोमंवा प्रतिलोमंवा अनुलोमंवा । अनयोर्यद्धितंमन्यसे तद्वदेतिशेषः । यद्वा प्रतिलोमंप्रतिकूलमितियन्मन्यसे अनुलोमं अनुकूलमितियन्मन्यसे अन्यद्वा एतद्व्यतिरिक्तं । यद्वा इतरन्मन्यसे तद्वदेतिशेषः । प्रतिलोमेत्यविभक्तिकोनिर्देशः ॥ ११ ॥ ती० जिहीर्षन्तं त्यक्तुमिच्छन्तं ॥ १६ ॥

[पा०] १ ग. घ. च. छ. ज. जिहीर्षन्तं. २ च. छ. ञ. प्रमुखेस्थितान्. ३ क.—घ. च. छ. ज. मद्बाणाशनिवेगेन. ४ घ. ज. मांसेनपक्षिणः. ५ ख. घ. ङ. झ. ट. काननौकसः. ६ च.—ट. तस्यतद्वचनंश्रुत्वाबलाध्यक्षाः. ७ ङ. झ. ट. महाबलाः. ८ झ. ट. भीमैर्नानाविधा. ९ क. ख. स्तैरिंसहैरिव.

हुताशनं तर्पयतां ब्राह्मणांश्च नमस्यताम् ॥ आज्यगन्धप्रतिवहः सुरभिर्मारुतो ववौ ॥ २२ ॥
स्रजश्च विविधाकारा जगृहुस्त्वभिमन्त्रिताः ॥ संग्रामसज्जाः संहृष्टा धारयन्राक्षसास्तदा ॥ २३ ॥
सधनुष्काः कवचिनो वेगादाप्लुत्य राक्षसाः ॥ रावणं प्रेक्ष्य राजानं प्रहस्तं पर्यवारयन् ॥ २४ ॥
अथामन्त्र्य च राजानं भेरीमाहत्य भैरवाम् ॥ आरुरोह रथं दिव्यं प्रहस्तः सज्जकल्पितम् ॥ २५ ॥
हयैर्महाजवैर्युक्तं सम्यक्सूतसुसंयतम् ॥ महाजलदनिर्घोषं साक्षाच्चन्द्रार्कभास्वरम् ॥ २६ ॥
उरगध्वजदुर्धर्षं सुवरूथं स्वपस्करम् ॥ सुवर्णजालसंयुक्तं प्रहसन्तमिव श्रिया ॥ २७ ॥
ततस्तं रथमास्थाय रावणार्पितशासनः ॥ लङ्कायां निर्ययौ तूर्णं बलेन महताऽऽवृतः ॥ २८ ॥
ततो दुन्दुभिनिर्घोषः पर्जन्यनिनदोपमः ॥ वादित्राणां च निनदः पूरयन्निव सागरम् ॥
शुश्रुवे शङ्खशब्दश्च प्रयाते वाहिनीपतौ ॥ २९ ॥
निनदन्तः स्वरान्घोरान्राक्षसा जग्मुरग्रतः ॥ भीमरूपा महाकायाः प्रहस्तस्य पुरस्सराः ॥ ३० ॥
नरान्तकः कुम्भहनुर्महानादः समुन्नतः ॥ प्रहस्तसचिवा ह्येते निर्ययुः परिवार्य तम् ॥ ३१ ॥
व्यूढेनैव सुघोरेण पूर्वद्वारात्स निर्ययौ ॥ गजयूथनिकाशेन बलेन महता वृतः ॥ ३२ ॥
सागरप्रतिमौघेन वृतस्तेन बलेन सः ॥ प्रहस्तो निर्ययौ तूर्णं कालान्तकयमोपमः ॥ ३३ ॥
तस्य निर्याणघोषेण राक्षसानां च नर्दताम् ॥ लङ्कायां सर्वभूतानि विनेदुर्विकृतैः स्वरैः ॥ ३४ ॥
व्यभ्रमाकाशमाविश्य मांसशोणितभोजनाः ॥ मण्डलान्यपसव्यानि खगाश्चक्रू रथं प्रति ॥ ३५ ॥

---

२१ ॥ हुताशनं तर्पयतां अग्नौ बहुधा शान्तिहोमानाचरतां । ब्राह्मणांश्च नमस्यतां गन्धपुष्पादिभिरर्चयतां संबन्धी आज्यगन्धप्रतिवहः ब्राह्मणार्चनकुसुमादिना सुरभिर्मारुतो ववौ ॥ २२ ॥ संग्रामसज्जाः संग्रामायोद्युक्ताः । राक्षसाः अभिमन्त्रिताः विजयमन्त्रेणाभिमन्त्रिताः । स्रजः जगृहुः । धारयन् अधारयंश्च ॥ २३ ॥ रावणं प्रेक्ष्य स्वामितया प्रधानं रावणमभिवन्द्येत्यर्थः ॥ २४ ॥ अथेत्यादिश्लोकत्रयं ॥ सज्जकल्पितं सज्जमुद्युक्तं सर्वायुधादिसमवेतत्वेन कल्पितमित्यर्थः । सुसंयतं नियमितं । साक्षाच्चन्द्रार्कभास्वरं चन्द्रार्कतुल्यं भास्वरं च । " साक्षात्प्रत्यक्षतुल्ययोः " इत्यमरः । आह्लादकत्वेन चन्द्रसाम्यं । तेजसाऽर्कसाम्यं । सुवरूथं शोभनरथगुप्तिकं । " रथगुप्तिर्वरूथोना " इत्यमरः । स्वपस्करं शोभनरथाङ्गं । " अपस्करो रथाङ्गं " इति निपातनात् सुडागमः । जालं गवाक्षं । प्रहसन्तमिव श्रिया स्वकान्त्या सर्वकान्तिमद्वस्तु परिहसन्तमिव स्थितं ॥ २५—२७ ॥ ततः आरोहणानन्तरं ॥ २८ ॥ तत इत्यादिसार्धश्लोक एकान्वयः ॥ पर्जन्यः मेघविशेषः ॥ २९ ॥ पुरस्सराः अग्रगाः ॥ ३०—३१ ॥ व्यूढेन सन्नद्धकङ्कटेन । " व्यूढः सन्नद्धकङ्कटः " इत्यमरशेषे ॥ ३२ ॥ कालान्तकयमोपमः काले प्रलयकाले अन्तको विनाशको यो यमस्तदुपमः ॥३३॥ तस्य प्रहस्तस्य । निर्याणघोषेण निर्गमकालिकसिंहनादेन । राक्षसानां निर्याणघोषेण च प्रयोजनेन । सर्वभूतानि विकृतैः सर्वैरुपलक्षितानि सन्ति विनेदुरिति संबन्धः ॥ ३४ ॥ अपसव्यानि अप्रदक्षिणानि । व्यभ्रमित्यनेन मण्डलकरणस्याकालिकत्वमुक्तं । साभ्रकाले हि पक्षिणो मण्डलान्याचरन्ति । यद्वाऽत्र खगाः गरुडाः । अपसव्यं प्रदक्षिणं ।

स० धनुषासहिताः सधनुष्काः । उत्सृज्य वाजिनइतिशेषः । पादत्रादिकंवा । पुत्रदारादिकंप्रतियुद्धार्थंगच्छामइत्युक्तिंवा ॥२४॥ शि० सागरप्रतिमानां दुरवगाहत्वेनसागरसदृशानांराक्षसानां ओघःसमूहोयस्मिंस्तेनबलेनवृतः अतएव कालान्तकयमोपमः प्रहस्तोनिर्ययौ । तत्रकालोमहाप्रलयः । अन्तकोमरणसमयः । यमःसंयमिनीपतिरितिविवेकः ॥ ३३ ॥ ति० अपसव्यानिमण्डलानि अपगतासव्यभागेविभ्रान्तिर्येषुमण्डलेषुभ्रामणेषुतान्यपसव्यानि प्रदक्षिणानि । गृध्रादीनांप्रदक्षिणमपिदुर्निमित्तमितिकतकः ॥३५॥

[पा०] १ ङ. ञ. ट. वेगादुत्सृज्य. २ ग. सूतकल्पितं. ३ ज. क्सूतेनसंयुतं ख. ग. छ. क्सूतंससायकं. ४ घ. ५ क.—ट. मेदिनीं. ६ ङ. ञ. ट. क्रुद्धःकालान्तक. क. ग. घ. च. छ. ज. तूर्णंक्रुद्धःकालान्तकोपमः. ख. तूर्णंयोकोपमः.

वमन्त्यः[1] पावकज्वालाः शिवा घोरं[2] ववाशिरे ॥ अन्तरिक्षात्पपातोल्का वायुश्च परुषो ववौ ॥३६॥
अन्योन्यमभिसंरब्धा ग्रहाश्च न चकाशिरे ॥ ३७ ॥
मेघाश्च खरनिर्घोषा रथस्योपरि रक्षसः ॥ ववृषू रुधिरं चास्य सिषिचुश्च पुरस्सरान् ॥ ३८ ॥
केतुमूर्धनि गृध्रोस्य निलीनो दक्षिणामुखः ॥ तुदन्नुभयतः[3] पार्श्वं समग्रामहरत्प्रभाम्[4] ॥ ३९ ॥
सारथेर्बहुशश्चास्य संग्राममवगाहतः ॥ प्रतोदो न्यपतद्धस्तात्सूतस्य हयसादिनः ॥ ४० ॥
निर्याणश्रीश्च यास्यासीद्भास्वरा वसुदुर्लभा ॥ सा ननाश मुहूर्तेन समे च स्खलिता हयाः ॥ ४१ ॥
प्रहस्तं त्वभिनिर्यान्तं प्रख्यातबलपौरुषम् ॥ युधि नानाप्रहरणा कपिसेनाऽभ्यवर्तत ॥ ४२ ॥
अथ घोषः सुतुमुलो हरीणां समजायत ॥ वृक्षानारुजतां चैव गुर्वीरागृह्णतां शिलाः ॥ ४३ ॥
नदतां राक्षसानां च वानराणां च गर्जताम् ॥ उभे प्रमुदिते सैन्ये रक्षोगणवनौकसाम् ॥ ४४ ॥
वेगितानां समर्थानामन्योन्यवधकाङ्क्षिणाम् ॥ परस्परं चाह्वयतां निनादः श्रूयते महान् ॥ ४५ ॥
ततः प्रहस्तः कपिराजवाहिनीमभिप्रतस्थे विजयाय दुर्मतिः ॥
विवृद्धवेगां च विवेश तां चमूं यथा मुमूर्षुः शलभो विभावसुम् ॥ ४६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अष्टपञ्चाशः सर्गः ॥ ५८ ॥

विभीषणेनरामंप्रति तत्प्रश्नेनरणायाभ्यागच्छतः प्रहस्तस्य यथात्म्यनिवेदनम् ॥ १ ॥ द्विविददुर्मुखजांबवत्तारैः क्रमेण नरान्तकसमुन्नतमहानादकुंभहनुनाम्नां प्रहस्तसचिवानांचतुर्णां हननम् ॥ २ ॥ नीलेन महतायुद्धेन प्रहस्तवधः ॥ ३ ॥

ततः प्रहस्तं निर्यान्तं दृष्ट्वा भीमपराक्रमम्[5] ॥ उवाच सस्मितं रामो विभीषणमरिन्दमः[6] ॥ १ ॥

"अपसव्यंतु दक्षिणं" इत्यमरः। गरुडानां ह्यप्रदक्षिणं शोभनं । ग्रहाः चन्द्रसूर्यादयः । तत्काले ग्रहयुद्धमासीदित्यर्थः ॥ ३५—३८ ॥ तुदन्नुभयतः पार्श्वं । उभौ पक्षौ मुखेन कण्डूयमानः समग्रामहरत् प्रभां प्रहस्तस्येति शेषः । ध्वजाग्रारूढगृध्रदर्शनेन प्रहस्तमुखं विवर्णमासीदित्यर्थः ॥ ३९ ॥ सूतस्य सूतजातस्य । हयसादिनः हयप्रस्थापकस्य । प्रतोदः तोत्रं । यद्वा सूतस्य सूतकुलोत्पन्नस्य । अभ्यस्तप्रतोदधारणस्यापीत्यर्थः । हयसादिनः अश्वगतिशिक्षकस्य ॥ ४० ॥ वसुदुर्लभा अष्टवसुदुर्लभा । भास्वरा वसुदुर्लभेति पाठः । निर्याणश्रीः निर्गमकालिकश्रीः । निरुत्साहः प्रहस्तोभूदित्यर्थः । स्खलिताः चस्खलुः । कर्तरि क्तः ॥ ४१ ॥ नानाप्रहरणा शिलावृक्षादिनानाप्रहरणा ॥ ४२ ॥ आरुजतां उन्मूलयतां । आगृह्णतां आसमन्तात् गृह्णतां ॥ ४३ ॥ नदतामिति त्रिपादश्लोकः ॥ रक्षोगणवनौकसामित्युत्तरशेषः ॥ ४४—४५ ॥ कपिराजवाहिनीमभिप्रतस्थे तां चमूं विवेश च ॥४६॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अथ प्रहस्तवधोष्टपञ्चाशे—ततः प्रहस्तमित्यादि ॥

स० सूतस्यतद्वंश्यस्य । हयसादिनः हयानश्वान्सादयतिगमयतियथेष्टमितिसतथा । तादृशस्यापिसारथेः हस्तात् प्रतोदः तोत्रं । न्यपतत् पपात । र्थं अत्रमस्यास्तीतिमत्वर्थेइकारः । 'अत्रंथ'मितिहिश्रुतिः । सारेण अरसहितेनचक्रेण थिः सारथिः । तस्येतिवा । हयैरेवानुबन्धनिमित्तैःआदिभिःराक्षसैःसहितःसतथा । तस्यसूतस्यसारथेः । "आदिनोराक्षसाःप्रोक्ताः" इतिभागवततात्पर्यात् । सूतः सुष्ठुऊतः प्रतोदोयस्यतस्येतिवा । सुदुर्लभा उत्तरत्रानेवमागमनात् ॥ ४० ॥ स० रक्षोगणवनौकसामित्यनेन रक्षोगणस्यैकैकोवनौकाःप्रर्यासइतिध्वन्यते ॥ ४४ ॥ स० विजयायदुर्मतिः अपशकुनैरिवगतमृतैःखीयैर्दृष्टैःश्रुतैरपिविजयभ्रमोस्यास्तीतिदुर्मतिरितिमन्तव्यम् ॥ ४६ ॥ इतिसप्तपञ्चाशःसर्गः ॥ ५७ ॥

[पा०] १ च. झ. ञ. ट. वमन्तिपावक. २ क.—ट. घोरावववाशिरे. ३ घ. ज. झ. ट. नदन्नुभयतः. ४ ङ. झ. ट. समग्रांश्रियमाहरत्. ५ झ. ट. रणकृतोद्यमं. ६ क. ख. ज. मरिंदमं.

क एष सुमहाकायो बलेन महता वृतः ॥ [[1]आगच्छति महावेगः किंरूपबलपौरुषः ॥]
आचक्ष्व मे महाबाहो वीर्यवन्तं निशाचरम् ॥ २ ॥
राघवस्य वचः श्रुत्वा प्रत्युवाच विभीषणः ॥ ३ ॥
एष सेनापतिस्तस्य प्रहस्तो नाम राक्षसः ॥ लङ्कायां राक्षसेन्द्रस्य त्रिभागबलसंवृतः ॥
वीर्यवानस्त्रविच्छूरः [[2]]ख्यातश्च पराक्रमे ॥ ४ ॥
ततः प्रहस्तं निर्यान्तं भीमं भीमपराक्रमम् ॥ गर्जन्तं सुमहाकायं राक्षसैरभिसंवृतम् ॥ ५ ॥
ददर्श महती सेना वानराणां बलीयसाम् ॥ अतिसंजातरोषाणां प्रहस्तमभिगर्जताम् ॥ ६ ॥
खड्गशक्त्यृष्टिबाणाश्च शूलानि मुसलानि च ॥ गदाश्च परिघाः प्रासा विविधाश्च परश्वधाः ॥ ७ ॥
धनूंषि च विचित्राणि राक्षसानां जयैषिणाम् ॥ प्रगृहीतान्यशोभन्त वानरानभिधावताम् ॥ ८ ॥
जगृहुः पादपांश्चापि [[3]पुष्पितान्वानरर्षभाः ॥ शिलाश्च विपुला दीर्घा योद्धुकामाः प्लवङ्गमाः ॥ ९ ॥
तेषामन्योन्यमासाद्य संग्रामः सुमहानभूत् ॥ बहूनामश्मवृष्टिं च शरवृष्टिं च वर्षताम् ॥ १० ॥
बहवो राक्षसा युद्धे बहून्वानरयूथपान् ॥ वानरा राक्षसांश्चापि निजघ्नुर्बहवो बहून् ॥ ११ ॥
शूलैः प्रमथिताः केचित्केचिच्च परमायुधैः ॥ परिघैराहताः केचित्केचिच्छिन्नाः परश्वधैः ॥ १२ ॥
निरुच्छ्वासाः कृताः केचित्पतिता धरणीतले ॥ विभिन्नहृदयाः केचिदिषुसंधानसंदिताः ॥ १३ ॥
केचिद्द्विधा कृताः खड्गैः स्फुरन्तः पतिता भुवि ॥ वानरा राक्षसैः शूलैः पार्श्वतश्चावदारिताः ॥१४॥
वानरैश्चापि संक्रुद्धै राक्षसौघाः समन्ततः ॥ पादपैर्गिरिशृङ्गैश्च संपिष्टा वसुधातले ॥ १५ ॥
वज्रस्पर्शतलैर्हस्तैर्मुष्टिभिश्च हता भृशम् ॥ वेमुः[[4]] शोणितमास्येभ्यो विशीर्णदशनेक्षणाः[[5]] ॥ १६ ॥

सस्मितमिति । बलवच्छत्रुदर्शनहर्षेणेतिभावः । तदेव व्यञ्जयति—अरिन्दम इति ॥ १ ॥ क एष इति । ननु प्रहस्तः पूर्वद्वारान्निर्गतः, रामस्तु उत्तरद्वारि तिष्ठति स्म, कथमस्यानेकयोजनस्थसाक्षात्कारः । उच्यते । आप्तवचनेन प्रत्यक्षतुल्येन महाकायः कश्चन गच्छतीति विदित्वा एष इत्याह । आचक्ष्व तमिति शेषः ॥ २—३ ॥ एष इत्यादिसार्धश्लोक एकान्वयः ॥ तस्य रावणस्य । असह्यतया नामाग्रहणं । संवृतशब्दोऽन्तर्भावितण्यर्थः । रावणेन लङ्कायां स्वबलस्य तृतीयभागेन संवारित इत्यर्थः । लङ्कायां राक्षसेन्द्रस्य त्रिभागबलसंवृत इति पाठः । रावणस्य सैन्येषु भागत्रयमस्याधीनमिति भावः । वीर्यवान् बलवान् । "वीर्यं बले प्रभावे च" इत्यमरः । शूरः रणेष्वपरावृत्तः । पराक्रमे परपरिभवने । अत्रेतिकरणं बोध्यं ॥ ४ ॥ तत इत्यादिश्लोकद्वयं ॥ भीमं भयंकरवेषं ॥ ५—६ ॥ खड्गेत्यादिश्लोकद्वयं ॥ राक्षसानामिति तृतीयार्थे षष्ठी । राक्षसैरित्यर्थः ॥७—८॥ वानरश्रेष्ठत्वेप्यवानरत्ववारणाय प्लवङ्गमा इत्युक्तं । यद्वा प्लवङ्गमाः युद्धोत्साहेन प्लवगत्या गच्छन्तः । असंज्ञायां खशार्षः ॥ ९—११ ॥ परमायुधैः चक्रैः । "चक्रं तु परमायुधं" इति निघण्टुः ॥ १२ ॥ शूलपातादिकार्यं दर्शयति—निरुच्छ्वासा इत्यादि ॥ निरुच्छ्वासाः कृताः । इषुसन्धानसंदिताः इषव एव संधानानि बन्धनरज्जवः तैः संदिताः संस्यूताः । स्फुरन्तः लुठन्तः । अवदारिताः भिन्नाः ॥१३–१४॥ संपिष्टाः चूर्णिताः । वेमुः वमनं चक्रुः ॥ १५—

स० त्रिभागबलसंवृतः रावणबलमध्येतृतीयभागबलेनयुक्तः । त्रिशब्दस्यतृतीयवाचकत्वंतुत्रिदशेत्येतद्व्याख्यावसरेभानुदीक्षितेनोक्तं ॥ ४ ॥ ति० इषूणांसंधानं सम्यग्विसर्जनं तेनसादिताः खण्डिताः ॥ १३ ॥ ति० वमन् । अवमन् । वेमुरितिपाठान्तरं

[पा०] १ इदमर्धं ङ. ञ. ट. पाठेषुदृश्यते. २ ङ. ञ. ट. सुप्रख्यातपराक्रमः. ३ ङ. ञ. ट. पुष्पितांश्चगिरींस्तथा. ४ ङ. ञ. ट. संधानसादिताः. ख. च. छ. ज. संधानसंधिताः. ५ घ. ङ. ञ. ट. वमञ्शोणित. ६ ख. मांसानि. ७ ङ. ञ. ट. वदनेक्षणाः.

आर्तस्वनं च स्वनतां सिंहनादं च नर्दताम् ॥ बभूव तुमुलः शब्दो हरीणां रक्षसां युधि ॥ १७ ॥
वानरा राक्षसाः क्रुद्धा वीरमार्गमनुव्रताः ॥ विवृत्तनयनाः क्रूराश्चक्रुः कर्माण्यभीतवत् ॥ १८ ॥
नरान्तकः कुम्भहनुर्महानादः समुन्नतः ॥ एते प्रहस्तसचिवाः सर्वे जघ्नुर्वनौकसः ॥ १९ ॥
तेषामापततां शीघ्रं निघ्नतां चापि वानरान् ॥ द्विविदो गिरिशृङ्गेण जघानैकं नरान्तकम् ॥ २० ॥
दुर्मुखः पुनरुत्थाय कपिः स विपुलद्रुमम् ॥ राक्षसं क्षिप्रहस्तस्तु समुन्नतमपोथयत् ॥ २१ ॥
जाम्बवांस्तु सुसंक्रुद्धः प्रगृह्य महतीं शिलाम् ॥ पातयामास तेजस्वी महानादस्य वक्षसि ॥ २२ ॥
अथ कुम्भहनुस्तत्र तारेणासाद्य वीर्यवान् ॥ वृक्षेणाभिहतो मूर्ध्नि प्राणान्संत्याजयद्रणे ॥ २३ ॥
अमृष्यमाणस्तत्कर्म प्रहस्तो रथमास्थितः ॥ चकार कदनं घोरं धनुष्पाणिर्वनौकसाम् ॥ २४ ॥
आवर्त इव संजज्ञे उभयोः सेनयोस्तदा ॥ क्षुभितस्याप्रमेयस्य सागरस्येव निस्स्वनः ॥ २५ ॥
महता हि शरौघेण प्रहस्तो युद्धकोविदः ॥ अर्दयामास संक्रुद्धो वानरान्परमाहवे ॥ २६ ॥
वानराणां शरीरैश्च राक्षसानां च मेदिनी ॥ बभूव निचिता घोरा पतितैरिव पर्वतैः ॥ २७ ॥
सा मही रुधिरौघेण प्रच्छन्ना संप्रकाशते ॥ संछन्ना माधवे मासि पलाशैरिव पुष्पितैः ॥ २८ ॥
हतवीरौघवप्रां तु भग्नायुधमहाद्रुमाम् ॥ शोणितौघमहातोयां यमसागरगामिनीम् ॥ २९ ॥
यकृत्प्लीहमहापङ्कां विनिकीर्णान्त्रशैवलाम् ॥ भिन्नकायशिरोमीनामङ्गावयवशाद्वलाम् ॥ ३० ॥
गृध्रहंसगणाकीर्णां कङ्कसारससेविताम् ॥ मेदःफेनसमाकीर्णामार्तस्तनितनिस्स्वनाम् ॥
तां कापुरुषदुस्तारां युद्धभूमिमयीं नदीम् ॥ ३१ ॥

१६ ॥ स्वनतां नर्दतामित्यत्र कुर्वतामित्यर्थः । तुमुलः निबिडितः । रक्षसां वानराणां च ॥ १७ ॥ वीरमार्गं युद्धकौशलं । विवृत्तनयनाः भ्रान्तनेत्राः । कर्माणि युद्धकर्माणि । अभीतवत् भयरहितं यथा भवति तथा ॥ १८—१९ ॥ तेषामिति । इयं निर्धारणे षष्ठी । एकं मुख्यं ॥ २० ॥ उत्थाय उद्धत्य । समुन्नताख्यं राक्षसं अपोथयत् अमारयत् । "पुथ हिंसायां" इति धातुः ॥ २१—२२ ॥ तत्र प्रहस्तसचिवेषु । सन्त्याजयत् संतत्याज । स्वार्थिको णिच्प्रत्ययः ॥ २३—२४ ॥ आवर्ते संवर्ते । प्रलय इव स्थिते तस्मिन् युद्धे क्षुभितस्य सागरस्य निस्स्वन इव सेनाया निस्वनः संजज्ञे ॥ २५ ॥ तेषु प्रहस्तप्रकर्ष प्रतिपादयितुं पुनराह—महतेत्यादि ॥ २६ ॥ निचिता व्याप्ता ॥ २७—२८ ॥ अपरिच्छिन्नवानरवधो वृत्त इति द्योतयितुं युद्धभूमिं नदीत्वेन वर्णयति—हतेत्यादिना ॥ उभयसेनाग्रयोर्हतवीराणामोघः समूह एव वप्रं तटं यस्यास्तां । भग्नायुधान्येव महाद्रुमाः भग्नाः तीरमहाद्रुमा यस्यास्तां । शोणितौघा एव महातोयानि कलुषजलानि यस्यास्तां । यमसागरगामिनीं युद्धभूमौ यमो जीवग्रहणाय सन्निधत्त इति प्रसिद्धिः । तद्रूपसागरगामिनीम् । यकृत्प्लीहशब्दौ हृदयस्य दक्षिणवामभागस्थमांसविशेषपरौ । अन्त्राणां शैवलत्वनिरूपणं स्तम्बमयत्वात् । भिन्नकायशिरसोर्मीनत्वनिरूपणं स्फुरितवत्त्वात् । अङ्गावयवाः करचरणाद्यङ्गानामवयवाः । अङ्गुलय इत्यर्थः । त एव शाद्वलानि शाद्वलभूजन्यतृणानि यस्यास्तां । कङ्कः धवलवर्णः श्येनः । सारसो हंसविशेषः । मेदः रुधिरमण्डलं । आर्तानां स्तनितः शब्द इति यावत् । तदेव निम्नोन्नतपतनजनितस्वनो यस्यास्तां । यद्यपि रुधिरप्रवाहस्यापि स्वत एव घोषोस्ति तथापि रूपकत्वायैवमुक्तं । कापुरुषाः भीरवः तैः दुस्तारां । वृद्धिरार्षी । युद्धभूमिमयीमिति स्वार्थे मयट् । व्यस्तरूपकं । प्रावर्तयन्नित्यध्याहार्यं । यद्वा तेरुरिति वक्ष्यमाणमत्राप्यनुषज्यते । अत्र सावयवरूपकालंकारः ॥ २९—

॥ १६ ॥ स० वृक्षेणकरणेन प्राणान् संत्याजयत् तत्याज । पूर्वार्धेयुयुधइतिसतारइत्युत्तरार्धेऽध्याहार्यं । संत्याजयत् अत्याजयदिति वा ॥ २३ ॥ ति० तत्कर्म क्षणादेवसचिवचतुष्टयमारणकर्म ॥ २४ ॥

[पा०] १ क. ख. ग. च. छ. वृक्षेणमहतातस्य. ङ. झ. ञ. ट. वृक्षेणमहतासद्यः. २ ज. प्राणांस्तत्याजराक्षसः.

नदीमिव घनापाये हंससारससेविताम् ॥ राक्षसाः कपिमुख्याश्च तेरुस्तां दुस्तरां नदीम् ॥ ३२ ॥
यथा पद्मरजोध्वस्तां नलिनीं गजयूथपाः ॥ ३३ ॥
ततः सृजन्तं बाणौघान्प्रहस्तं स्यन्दने स्थितम् ॥ ददर्श तरसा नीलो विनिघ्नन्तं प्लवङ्गमान् ॥ ३४ ॥
उद्धूत इव वायुः खे महदभ्रबलं बलात् ॥ समीक्ष्याभिद्रुतं युद्धे प्रहस्तो वाहिनीपतिः ॥
रथेनादित्यवर्णेन नीलमेवाभिदुद्रुवे ॥ ३५ ॥
स धनुर्धन्विनां श्रेष्ठो विकृष्य परमाहवे ॥ नीलाय व्यसृजद्बाणान्प्रहस्तो वाहिनीपतिः ॥ ३६ ॥
ते प्राप्य विशिखा नीलं विनिर्भिद्य समाहिताः ॥ महीं जग्मुर्महावेगा रुषिता इव पन्नगाः ॥३७॥
नीलः शरैरभिहतो निशितैर्ज्वलनोपमैः ॥ स तं परमदुर्धर्षमापतन्तं महाकपिः ॥
प्रहस्तं ताडयामास वृक्षमुत्पाट्य वीर्यवान् ॥ ३८ ॥
स तेनाभिहतः क्रुद्धो नदन्राक्षसपुङ्गवः ॥ ववर्ष शरवर्षाणि प्लवङ्गानां चमूपतौ ॥ ३९ ॥
तस्य बाणगणान्घोरान्राक्षसस्य महाबलः ॥ अपारयन्वारयितुं प्रत्यगृह्णान्निमीलितः ॥ ४० ॥
यथैव गोवृषो वर्षं शारदं शीघ्रमागतम् ॥ एवमेव प्रहस्तस्य शरवर्षं दुरासदम् ॥
निमीलिताक्षः सहसा नीलः सेहे सुदारुणम् ॥ ४१ ॥
रोषितः शरवर्षेण सालेन महता महान् ॥ प्रजघान हयान्नीलः प्रहस्तस्य मनोजवान् ॥ ४२ ॥
ततः स चापमुद्यम्य प्रहस्तस्य महाबलः ॥ बभञ्ज तरसा नीलो ननाद च पुनः पुनः ॥ ४३ ॥
विधनुस्तु कृतस्तेन प्रहस्तो वाहिनीपतिः ॥ प्रगृह्य मुसलं घोरं स्यन्दनादवपुप्लुवे ॥ ४४ ॥
तावुभौ वाहिनीमुख्यौ जातवैरौ तरस्विनौ ॥ स्थितौ क्षतजदिग्धाङ्गौ प्रभिन्नाविव कुञ्जरौ ॥ ४५ ॥
उल्लिखन्तौ सुतीक्ष्णाभिर्दंष्ट्राभिरितरेतरम् ॥ सिंहशार्दूलसदृशौ सिंहशार्दूलचेष्टितौ ॥ ४६ ॥
विक्रान्तविजयौ वीरौ समरेष्वनिवर्तिनौ ॥ काङ्क्षमाणौ यशः प्राप्तुं वृत्रवासवयोः समौ ॥ ४७ ॥
आजघान तदा नीलं ललाटे मुसलेन सः ॥ प्रहस्तः परमायत्तस्तस्य सुस्राव शोणितम् ॥ ४८ ॥

३१ ॥ उपमानमुखेनापि तत्तरणं दर्शयति—नदीमिति ॥ घनापाये वर्षान्ते । तां पूर्वत्र रूपकेण दर्शितां । केचित्तु अत्रोत्तरश्लोकस्थनदीपदवैयर्थ्यभयेन युद्धभूमिमयीं नदीं प्रवर्तयित्वेत्यध्याहरन्ति ॥ ३२ ॥ उक्तानां रक्षोवानराणामुपमामाह—यथेति ॥ पद्मरजोभिः ध्वस्तां वर्णान्तरं प्राप्तां । नलिनीं सरसीं यथा गजयूथपास्तरन्ति । तीर्त्वा रक्ततनवो भवन्तीति यावत् । तथा अरुणशरीरा उत्तेरुरित्यर्थः ॥ ३३ ॥ स्यन्दने रथे । स्थितं । बाणौघान् सृजन्तं मुञ्चन्तं । तरसा वेगेन । प्लवङ्गमान् विनिघ्नन्तं प्रहस्तं ददर्श ॥ ३४ ॥ उद्धूत इत्यादिसार्धश्लोकमेकं वाक्यं ॥ खे स्वदेशभूते । उद्धूतः उत्लवणः । वायुः अभ्रबलं अभ्रजालमिव । युद्धे बलादभिद्रुतं आभिमुख्येनायान्तं नीलं समीक्ष्य रथेन नीलमेवाभिदुद्रुवे इति योजना ॥ ३५—३६ ॥ रुषिताः पन्नगा इव स्थिताः समाहिताः ऋजवः नीलं विनिर्भिद्य महीं जग्मुः विविशुरित्यर्थः ॥ ३७ ॥ नील इत्यादि सार्धश्लोकः ॥ ३८—॥ ३९ ॥ अपारयन् अशक्नुवन् ॥ ४० ॥ यथैवेत्यादिसार्धश्लोकः ॥ यथैवेत्यत्र एवकारोत्यन्तायोगव्यवच्छेदार्थकः । शारदमित्यनेन शरपातस्य क्षयित्वं व्यनक्ति ॥ ४१—४४ ॥ तावुभावित्यादिश्लोकत्रयमेकं वाक्यं ॥ प्रभिन्नौ मत्तौ । सिंहशार्दूलसदृशाविति बले साम्यं । विक्रान्तविजयौ सर्वत्र प्राप्तविजयौ । काङ्क्षमाणौ अभूतामिति शेषः ॥ ४५—४७ ॥ परमायत्तः

ति० अपारयन् वारयितुमशक्तस्सन् ॥ ४० ॥ ति० शारदंवर्षं गोवृषस्यशरत्कालेप्राबल्यंकालस्वभावात् । वर्षंस्यलन्यथा । ततएव तेननातिक्लेशकरस्तस्यशरवर्षइतिसूचितं ॥ ४१ ॥

[पा०] १ घ. प्राहिणोद्बाणान्. २ ग. ङ. च. झ. ट. नर्दन्राक्षस. ३ ङ. झ. ट. गणानेवराक्षसस्यदुरात्मनः. ४ क. ख. ग. च. छ. ञ. महात्मनः. घ. दुरात्मनः. ५ ङ. झ. ट. शरवर्षान्दुरासदान्. ६ ङ. झ. ट. ततोरोषपरीतात्माधनुस्तस्यदुरात्मनः.

ततः शोणितदिग्धाङ्गः प्रगृह्य सुमहातरुम् ॥ प्रहस्तस्योरसि क्रुद्धो विससर्ज महाकपिः ॥ ४९ ॥
तमचिन्त्य प्रहारं स प्रगृह्य मुसलं महत् ॥ अभिदुद्राव बलिनं बलान्नीलं प्लवङ्गमम् ॥ ५० ॥
तमुग्रवेगं संरब्धमापतन्तं महाकपिः ॥ ततः संप्रेक्ष्य जग्राह महावेगो महाशिलाम् ॥ ५१ ॥
तस्य युद्धाभिकामस्य मृधे मुसलयोधिनः ॥ प्रहस्तस्य शिलां नीलो मूर्ध्नि तूर्णमपातयत् ॥ ५२ ॥
सा तेन कपिमुख्येन विमुक्ता महती शिला ॥ बिभेद बहुधा घोरा प्रहस्तस्य शिरस्तदा ॥ ५३ ॥
स गतासुर्गतश्रीको गतसत्त्वो गतेन्द्रियः ॥ पपात सहसा भूमौ छिन्नमूल इव द्रुमः ॥ ५४ ॥
प्रभिन्नशिरसस्तस्य बहु सुस्राव शोणितम् ॥ शरीरादपि सुस्राव गिरेः प्रस्रवणं यथा ॥ ५५ ॥
हते प्रहस्ते नीलेन तदकम्प्यं महद्बलम् ॥ रक्षसामप्रहृष्टानां लङ्कामभिजगाम ह ॥ ५६ ॥
न शेकुः समरे स्थातुं निहते वाहिनीपतौ ॥ सेतुबन्धं समासाद्य विकीर्णं सलिलं यथा ॥ ५७ ॥
हते तस्मिंश्चमूमुख्ये राक्षसास्ते निरुद्यमाः ॥ रक्षःपतिगृहं गत्वा ध्यानमूकत्वमाश्रिताः ॥
प्राप्ताः शोकार्णवं तीव्रं निःसंज्ञा इव तेऽभवन् ॥ ५८ ॥

ततस्तु नीलो विजयी महाबलः प्रशस्यमानः स्वकृतेन कर्मणा ॥
समेत्य रामेण सलक्ष्मणेन च प्रहृष्टरूपस्तु बभूव यूथपः ॥ ५९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टपञ्चाशः सर्गः ॥ ५८ ॥

प्रक्षिप्तसर्गः ॥ १ ॥

प्रहस्तवधश्रवणविषण्णेनरावणेनस्वस्यैवरणायनियोगनिर्धारणम् ॥ १ ॥ तच्छ्रावणेनमन्दोदर्या सभामेत्यरावणंप्रतिश्रीरामप्रभावप्रशंसनपूर्वकं तेनसहसंधिकरणप्रार्थना ॥ २ ॥

[प्रहस्तस्य वधं श्रुत्वा रावणो भ्रान्तमानसः ॥ राक्षसानादिदेशाथ राक्षसेन्द्रो महाबलः ॥ १ ॥
कार्या शत्रुषु नावज्ञा यैरिन्द्रबलसूदनः ॥ सूदितः सैन्यपालो मे सानुयात्रः सकुञ्जरः ॥ २ ॥
सोहं रिपुविनाशाय विजयस्याभिवृद्धये ॥ स्वयमेवाभियास्यामि रणशीर्षमभित्वरन् ॥ ३ ॥
अद्य तद्वानरानीकं सरामं सहलक्ष्मणम् ॥ प्रधक्ष्याम्येव बाणौघैः शुष्केन्धनमिवानलः ॥ ४ ॥
अद्य संतर्पयिष्यामि पृथिवीं कपिशोणितैः ॥ रामं च लक्ष्मणं चैव प्रेषयिष्ये यमक्षयम् ॥ ५ ॥

परमोद्युक्तः ॥ ४८–४९ ॥ अचिन्त्य अचिन्तयित्वा ॥ ५०–५४ ॥ प्रभिन्नशिरसः प्रभिन्नाच्छिरसः । शरीरादपीति समुच्चयः । प्रस्रवणं निर्झरः ॥५५–५६॥ विकीर्णं भग्नं ॥ ५७ ॥ हत इत्यादि सार्धश्लोकः ॥ ध्यानमूकत्वं ध्यानेन वाग्व्यापारशून्यत्वं । तीव्रं घोरं । शोकार्णवं प्राप्ताः शोकार्णवे मग्ना इत्यर्थः ॥ ५८ ॥

स्वकृतेन कर्मणा रिपुवधेन प्रहृष्टरूपः अतिशयेन प्रहृष्टः । प्रशंसायां रूपप् । पञ्चम्यां प्रहस्तवधः ॥५९॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टपञ्चाशः सर्गः ॥ ५८ ॥

ति० ध्यानमूकत्वं ध्यानेनदेवताध्यानेनयेमूकाःमौनिनस्तेषांभावस्तत्त्वं । भयदुःखमोहैःकिमपिवक्तुंनाशक्नुवन्नित्यर्थः । तदेवाह— प्राप्ताइति । स० ध्यानमूकत्वं परावृत्यागमनेरावणशिक्षा । तत्रावस्थानेमरणमितिकिंकर्तव्यमितिचिन्तयामूकत्वंप्राप्ताः ॥ ५८ ॥ इत्यष्टपञ्चाशःसर्गः ॥ ५८ ॥

[पा०] १ क. ख. ग. च. बलीनीलं. २ ग. तूर्णनिपातयत्. ३ क.—च. ज. ट. विभिन्नशिरसः. ४ क. ख. ग. ङ.—ट. मागताः. ५ अत्राधिकत्वेनमुद्रितंसर्गद्वयं ज. पुस्तकएवदृश्यते.

एवमुक्त्वा महातेजा रावणो लोकरावणः ॥ आगच्छत्सहसा क्रुद्धः सर्वसैन्येन संवृतः ॥ ६ ॥
संग्राममभिकाङ्क्षन्तं रावणं श्रुत्य भामिनी ॥ तदोत्थाय ययौ देवी नाम्ना मन्दोदरीति सा ॥ ७ ॥
माल्यवन्तं करे धृत्वा यूपाक्षसहिता तु सा ॥ मन्त्रिभिर्मन्त्रतत्त्वज्ञैस्तथान्यैर्मन्त्रिसत्तमैः ॥ ८ ॥
राक्षसैरावृता सर्वैर्वेत्रजर्झरपाणिभिः ॥ योषिद्भिश्चैव वृद्धाभिस्तथा कन्याभिरावृता ॥ ९ ॥
आयुधव्यग्रहस्तैश्च राक्षसैश्च समन्ततः ॥ सभां तु प्रस्थिता देवी यत्रास्ते राक्षसाधिपः ॥ १० ॥
छत्रेण ध्रियमाणेन अतिकायपुरस्सरा ॥ चामरैर्वररामाभिर्वीज्यमाना स्वलङ्कृता ॥ ११ ॥
शतार्धमार्गं विपुलं ध्वजमालोपशोभितम् ॥ उत्सारणं प्रकुर्वद्भिर्वेत्रजर्झरपाणिभिः ॥ १२ ॥
प्रविवेश सभां दिव्यां प्रभया द्योतमानया ॥ द्रष्टुं वै रावणं सा तु मयस्य दुहिता तु सा ॥ १३ ॥
प्राप्तां देवीं तदा राजा प्रियां मन्दोदरीं तदा ॥ दृष्ट्वा स संभ्रमात्तूर्णं परिष्वज्य दशाननः ॥ १४ ॥
मन्त्रिणां तु ततस्तेषामासनान्यादिदेश ह ॥ सौवर्णसुविचित्राणि सोपधानानि सर्वशः ॥ १५ ॥
तेष्वासनोपविष्टेषु सुखासीनेषु मन्त्रिषु ॥ पर्यङ्के चोपविष्टा तु देवी मन्दोदरी सुखम् ॥ १६ ॥
अतिकायो महाबाहुः पितरं चाभिवाद्य तम् ॥ मातरं चाभिवाद्याथ तदाऽऽसनगतोऽभवत् ॥ १७ ॥
प्रहस्तवधसंतप्तो महाकायवधार्दितः ॥ लङ्कायाश्चाभिमर्देन कषायीकृतलोचनः ॥ १८ ॥
संग्राममभिकाङ्क्षन्स आकुलेनान्तरात्मना ॥ अब्रवीद्वचनं सोथ महागंभीरनिस्स्वनम् ॥ १९ ॥
किमागमनकार्यं ते देवि शीघ्रं तदुच्यताम् ॥ तूर्णं मम समीपं वै किमर्थं त्वमिहाऽऽगता ॥
मन्त्रिभिः सहिता चैव ब्रूहि सर्वं यथातथम् ॥ २० ॥
एवमुक्ते तु वचने देवी रावणमब्रवीत् ॥ विज्ञाप्यं शृणु राजेन्द्र याचे यत्त्वां कृताञ्जलिः ॥ २१ ॥
न हि रोषश्च कर्तव्यो वदन्त्या मम मानद ॥ शृणुष्वैकमना मह्यं वचनं वाक्यकोविद ॥ २२ ॥
श्रुता मे नगरी रुद्धा श्रुता मे राक्षसा हताः ॥ धूम्राक्षप्रमुखा वीराः प्रहस्तेन सहैव तु ॥ २३ ॥
भवन्तं युद्धकामं च गमने कृतनिश्चयम् ॥ इति संचिन्त्य राजेन्द्र ममागमनकारणम् ॥ २४ ॥
न युक्तं प्रमुखे स्थातुं युद्धे तस्य महात्मनः ॥ रामस्य च महेन्द्रेण यस्य भार्या त्वया हृता ॥
लक्ष्मणस्य च राजेन्द्र यस्य नास्ति समो युधि ॥ २५ ॥
न च मानुषमात्रोसौ रामो दशरथात्मजः ॥ एकेन येन वै पूर्वं बहवो राक्षसा हताः ॥
चतुर्दशसहस्राणि जनस्थाननिवासिनाम् ॥ २६ ॥
खरश्च निहतः सङ्ख्ये दूषणश्च महाबलः ॥ त्रिशिराश्च महाबाहुर्हतो राक्षसपुङ्गवः ॥ २७ ॥
कबन्धश्च महातेजा विराधो दण्डके तथा ॥ शरेणैकेन वाली च वानरेन्द्रो निपातितः ॥
शङ्के चैवं महाराज मारीचस्य वधादहम् ॥ २८ ॥
पितुश्च वचनाद्रामो दण्डकारण्यमाश्रितः ॥ ब्रह्मचर्यव्रते युक्तः सह भ्रात्रा वनेचरः ॥ २९ ॥
तस्य भार्या जनस्थानात्त्वयाऽऽनीताऽविजानता ॥ अकारणं कृतं तत्ते दोषाय समुपस्थितम् ॥३० ॥
पतिव्रतावरोधस्तु दोषमावहते सदा ॥ न मह्यं रोचते बुद्ध्या एतेषां मन्त्रिणां तथा ॥ ३१ ॥
रामभार्या सती सा तु रामाय प्रतिदीयताम् ॥ विभीषणेन चैवोक्तं पूर्वमेव महात्मना ॥ ३२ ॥
स गतस्तत्र वै राजन्नसत्कार्यं करिष्यति ॥ वस्त्राणि चैव रत्नानि प्रेषयाद्य रघूत्तमे ॥ ३३ ॥
सीतां चैव महाराज सुवर्णं वाहनानि च ॥ मणिमुक्ताप्रवालं च तथा रजतमेव च ॥ ३४ ॥
माल्यवान्गृह्य संयातु यूपाक्षश्च तथैवच ॥ अतिकायस्तथा चायं कार्याकार्यविशारदः ॥ ३५ ॥

विभीषणो गतः पूर्वमेभिस्तत्र गतैर्ध्रुवम् ॥ संधिं करिष्यति व्यक्तं राघवं प्रणिपत्य ह ॥
संमान्य मैथिलीं चासौ प्रदास्यति विभीषणः ॥ ३६ ॥
माल्यवांश्च महामायो राक्षसानां हिते रतः ॥ राघवं याच्य शिरसा संधिं कुर्वन्तु रावण ॥ ३७ ॥
सान्त्वं भेदं तथा दानं राज्ञामेतत्त्रयं शुभम् ॥ अशुभं तु स्म वै युद्धं तस्माद्युद्धं विसर्जयेत् ॥
त्रिभिर्नयैर्जितं मन्ये सहितं विक्रमेण तु ॥ ३८ ॥
स्वजनस्य वधं कृत्वा पुत्रभ्रातृवधं तथा ॥ संशयं चात्मनः कृत्वा किं जयेन करिष्यसि ॥ ३९ ॥
चञ्चला युद्धसिद्धिस्तु हन्यते तेजसापि वा ॥ तस्माद्युद्धं न रोचेत संधिं कुरु दशानन ॥ ४० ॥
प्रणिपत्य महाबाहो राघवं प्रतिनन्दनम् ॥ दीयतामद्य सा सीता संधिस्ते तेन रोचताम् ॥ ४१ ॥
सांप्रतं संशयो राजन्पुरस्य सह बान्धवैः ॥ आत्मनो राक्षसश्रेष्ठ वर्तते नात्र संशयः ॥ ४२ ॥
तस्माद्राजन्ब्रवीम्येवं पुरस्याथ कुलस्य च ॥ रक्षणीयस्त्वयात्मा च सर्वमात्मन्यधिष्ठितम् ॥ ४३ ॥
क्षमाशीलस्तथा रामः सत्यवादी च राघवः ॥ धर्मनित्यो महाराजः शरणागतवत्सलः ॥ ४४ ॥
कुरु तेनादितः[1] सन्धिं रामे दशरथात्मजे ॥ लक्ष्मणश्च महाबाहो नित्यं भ्रातृहिते रतः ॥ ४५ ॥
प्रहस्तेन कृतं किं नु युध्यता रक्षसा बले ॥ धूम्राक्षेण च राजेन्द्रे नित्यं समरगृद्धिना ॥ ४६ ॥
महाकायेन च तथा महामायेन रक्षसा ॥ अकंपनेन वीरेण युध्यता राक्षसेश्वर ॥ ४७ ॥
तथान्यैर्युध्यमानैश्च किं कृतं राक्षसे बले ॥ न हतो यूथपः कश्चिद्बलोद्देशोपि रावण ॥ ४८ ॥
तेषां वीर्याद्विभेतीन्द्रः कुबेरवरुणावपि ॥ यमो वैवस्वतो येषां तथाऽन्ये देवदानवाः ॥ ४९ ॥
येषां नास्ति समो वीर्ये ते हता वानरैर्युधि ॥ न चापि वानराः शक्या हन्तुं पादपयोधिनः ॥५०॥
रक्ष्यमाणास्तु रामेण सुग्रीवेण च पालिताः ॥ तत्र ते रोचतां सन्धिः सह रामेण रावण ॥ ५१ ॥
योग्यश्च राघवो मित्रं कार्तवीर्यार्जुनो यथा ॥ मा कृथा मोघमानित्वं मा कृथाः कुलसंक्षयम् ॥५२॥
मा कृथाः पुरनाशं तु मा कृथाः पुत्रसंक्षयम् ॥ हितं सर्वं ब्रवीम्येषां कुरुष्व वचनं मम ॥ ५३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे प्रक्षिप्तः सर्गः प्रथमः ॥ १ ॥

प्रक्षिप्तसर्गः ॥ २ ॥

रावणेनमन्दोदरींप्रति स्वपराक्रमप्रशंसनपूर्वकं रामादिवधप्रतिज्ञानेनसपरिष्वङ्गंतस्या अन्तःपुरंप्रतिप्रेषणम् ॥ १ ॥ तथा-भटान्प्रतियुद्धायरथादिसज्जीकरणचोदना ॥ २ ॥

तस्यास्तद्वचनं श्रुत्वा प्रियाया राक्षसेश्वरः ॥ उष्णं दीर्घं विनिश्श्वस्य निरीक्ष्य च सभासदः ॥
हस्ते मन्दोदरीं गृह्य वाक्यमेतदुवाच ह ॥ १ ॥
त्वया न युद्धकाङ्क्षिण्या वचो यद्धहु भाषितम् ॥ न तन्मनसि मे देवि प्रविवेशाप्रियं प्रिये ॥ २ ॥
देवाञ्जित्वा रणे पूर्वं ससुरासुरमानुषान् ॥ प्रणमे मानुषं रामं वानरान्यः समाश्रितः ॥ ३ ॥
प्रणम्य रामं काकुत्स्थं किं वक्ष्ये सर्वदेवताः ॥ कीदृशं वा भवेन्मह्यं जीवितं हततेजसः ॥ ४ ॥
हृत्वा तस्य पुरा भार्यां मानं कृत्वा सुदारुणम् ॥ राक्षसान्मारयित्वा तु लङ्कां संपीड्य सर्वतः ॥
राघवं प्रणमे कस्माद्धीनवीर्य इवापरः ॥ ५ ॥
राघवं प्रणिपत्याहं कथं जीवितुमुत्सहे ॥ एष मे सहजो भावो नित्यं मनसि वर्तते ॥ ६ ॥

---

१ तेन कारणेन । आदितः प्रथमं रामेसंधिंकुर्वित्यन्वयः ॥ ४५ ॥ प्रणमे कथमितिशेषः ॥ ३ ॥

अविभज्य तदा देवि न नमेयं तु कस्यचित् ॥ त्रैलोक्ये स पुमान्नास्ति यो मया न जितो रणे ॥७॥
देवतानां बलं हत्वा देवराजो मया जितः ॥ राघवं प्रणमे कस्मान्मूर्ध्नि स्थित्वा च देहिनाम् ॥८॥
मा कृथा हृदि संतापं शमयिष्ये शुचिस्मिते ॥ हनिष्ये राघवं चैव लक्ष्मणं वानरांश्च तान् ॥ ९ ॥
सुग्रीवं च हनिष्यामि हनूमन्तं च वानरम् ॥ न तु संधिं करिष्यामि राघवेण सहैव तु ॥ १० ॥
वैदेहीं नार्पयिष्यामि राघवस्य भयादहम् ॥ सांप्रतं न च संधिं तु करिष्यति स राघवः ॥ ११ ॥
सागरं सुमहद्धत्वा लङ्कामेत्य सकाननाम् ॥ राक्षसप्रवरान्हत्वा संधिं कुर्यात्कथं प्रिये ॥ १२ ॥
न त्वहं संधिमिच्छामि कदाचिदपि भामिनि ॥ गच्छ त्वं भव विस्रब्धा सर्वमेतत्सुखोदयम् ॥१३॥
मा कृथा हृदि संतापमहं यास्ये रणाजिरम् ॥ अद्य सर्वान्वधिष्यामि शत्रून्समरमूर्धनि ॥ १४ ॥
पुत्राश्च ते महावीर्या मेघनादपुरस्सराः ॥ न तेषां मुच्यते कश्चिदपि मृत्युर्वरानने ॥ १५ ॥
अन्तःपुराय गच्छ त्वं सुखिनी भव सस्नुषा ॥ एवमुक्त्वा परिष्वज्य[1] भार्यां प्रियमना इव ॥ १६ ॥
प्रविवेश तदा देवी स्वयं च भवनं शुभम् ॥ चिन्तयामास तं घोरं विग्रहं समुपस्थितम् ॥ १७ ॥
रावणस्तु तदा वाक्यं राक्षसानिदमब्रवीत् ॥ १८ ॥
कल्प्यतां मे रथः शीघ्रं क्षिप्रमानीयतां धनुः ॥ अद्य क्रोधं विमोक्ष्यामि गूढं सुहृदयेशयम् ॥ १९ ॥
[2]देवाहवे यथा पूर्वं रुद्रेण निहतोऽन्धकः ॥ चिरकालेप्सितं ह्येतद्युद्धं मे राघवेण ह ॥ २० ॥
अद्य तूणीशया बाणा विमुक्ता इव पन्नगाः ॥ रामं समभिधावन्तु विषाग्निप्रतिमाः शिताः ॥ २१ ॥
सुतेजसै रुक्मपुङ्खैर्जलधौतैर्हिरण्मयैः ॥ शरैरादीपयाम्येनमुल्काभिरिव कुञ्जरम् ॥ २२ ॥
वानरान्सुबहून्गृह्य राघवात्संप्रचोदितान् ॥ यमं नयामि विक्रान्तान्मम पार्श्वमुपागतान् ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे प्रक्षिप्तः सर्गो द्वितीयः ॥ २ ॥

एकोनषष्टितमः सर्गः ॥ ५९ ॥

प्रहस्तनिधनश्रवणविहस्तेनरावणेन स्वयमेव महत्यासेनयासह रणायनिर्यांणं ॥ १ ॥ विभीषणेनरामंप्रतिरावणानुयायिनांप्रधानरक्षसां तदीयचिह्नप्रदर्शनपूर्वकंतत्तन्नामनिर्देशः ॥ २ ॥ रावणेन स्वानुयायिनां नगररक्षणनियोजनेनविसर्जनपूर्वकं शरनिकरैः सुग्रीवादिविदारणं ॥ ३ ॥ रामेसमरोद्योगिनिसति लक्ष्मणेन प्रार्थनयातदनुज्ञासंपादनेन रावणाभियानं ॥ ४ ॥ अत्रान्तरे हनुमता रावणनिरोधनं ॥ ५ ॥ रावणकरतलाभिहतेनहनुमता स्वकरतलेन तदुरसिताडनं ॥ ६ ॥ तेन सश्लाघं मुष्टया हनुमत्ताडनं ॥ ७ ॥ तेन किञ्चिद्विह्वलेसतिहनुमति रावणेन नीलंप्रत्यभियानं ॥ ८ ॥ नीले रावणशिरश्शरासनादिषु लाघवेनचपलतरंसंचरमाणे रावणेचालब्धलक्ष्ये हसत्सुकपिषुरुष्टेनतेनाग्नेयास्त्रेण नीलनिपातनपूर्वकं लक्ष्मणाभिगमनं ॥ ९ ॥ लक्ष्मणेनचापच्छेदनपूर्वकंशरताडितेनरावणेनब्रह्मदत्तयाशक्त्यालक्ष्मणवक्षस्ताडनं ॥ १० ॥ रावणेपतितमूर्छितलक्ष्मणोद्धरणेप्रयतनेनाप्यशक्नुवतिलक्ष्मणशरीराकर्षणरुष्टेनहनुमतारावणोरसिमुष्टिघातनं ॥ ११ ॥ तेनसरुधिरोद्गारंमूर्छितेरावणेहनुमतालक्ष्मणस्य रामसमीपप्रापणं ॥ १२ ॥ लब्धसंज्ञेरावणेऽभ्यागच्छतिहनुमत्प्रार्थनयातमारूढेनरामेणतदभियानं ॥ १३ ॥ रामेणशरनिकरैः रावणस्यविरथीकरणपूर्वकंविह्वलताप्रापणेनतत्किरीटकूटच्छेदनं ॥ १४ ॥ रामेणरथादिसामग्रीसाहित्येनपुरागमनचोदनपूर्वकंगृहगमनायाभ्यनुज्ञातेनरावणेनलज्जयालङ्कागमनं ॥ १५ ॥

तस्मिन्हते राक्षससैन्यपाले प्लवङ्गमानामृषभेण युद्धे ॥
भीमायुधं सागरतुल्यवेगं विदुद्रुवे राक्षसराजसैन्यम् ॥ १ ॥

अथ रावणमुकुटभङ्ग एकोनषष्टितमे—तस्मिन्हत | इत्यादि ॥ १ ॥ पावकसूनुशस्तं पावकसूनुना नीलेन

टि० १ परिष्वज्य विससर्जेतिशेषः ॥ १६ ॥ २ तथारामोमयाद्यहन्यतइतिशेषः ॥ २० ॥

[पा०] १ ख. ग. च. ज. प्रदुद्रुवे.

गत्वाऽथ रक्षोधिपतेः शशंसुः सेनापतिं पावकसूनुशस्तम् ॥
तच्चापि तेषां वचनं निशम्य रक्षोधिपः क्रोधवशं जगाम ॥ २ ॥
[1]संख्ये प्रहस्तं निहतं निशम्य शोकार्दितः क्रोधपरीतचेताः ॥
उवाच तान्रक्षतयोधमुख्यानिन्द्रो यथा [2]चामरयोधमुख्यान् ॥ ३ ॥
नावज्ञा रिपवे कार्या यैरिन्द्रबलसूदनः ॥ सूदितः सैन्यपालो मे सानुयात्रः [3]सकुञ्जरः ॥ ४ ॥
सोहं रिपुविनाशाय विजयायाविचारयन् ॥ स्वयमेव गमिष्यामि रणशीर्षं तदद्भुतम् ॥ ५ ॥
अद्य तद्वानरानीकं रामं च सहलक्ष्मणम् ॥ निर्दहिष्यामि बाणौघैर्वनं दीप्तैरिवाग्निभिः ॥ ६ ॥
[[4]अद्य संतर्पयिष्यामि पृथिवीं कपिशोणितैः ॥ रामं च लक्ष्मणं चैव प्रेषयिष्ये यमक्षयम् ॥ ७ ॥]
स एवमुक्त्वा ज्वलनप्रकाशं रथं तुरङ्गोत्तमराजयुक्तम् ॥
प्रकाशमानं वपुषा ज्वलन्तं समारुरोहामरराजशत्रुः ॥ ८ ॥
स शङ्खभेरीपणवप्रणादैरास्फोटितक्ष्वेलितसिंहनादैः ॥
पुण्यैः स्तवैश्चाप्यभिपूज्यमानस्तदा ययौ राक्षसराजमुख्यः ॥ ९ ॥
स शैलजीमूतनिकाशरूपैर्मांसादनैः पावकदीप्तनेत्रैः ॥
बभौ वृतो राक्षसराजमुख्यो भूतैर्वृतो रुद्र [5]इवासुरेशः ॥ १० ॥
ततो नगर्याः सहसा महौजा निष्क्रम्य तद्वानरसैन्यमुग्रम् ॥
महार्णवाभ्रस्तनितं ददर्श समुद्यतं पादपशैलहस्तम् ॥ ११ ॥
तद्राक्षसानीकमतिप्रचण्डमालोक्य रामो भुजगेन्द्रबाहुः ॥
विभीषणं शस्त्रभृतां वरिष्ठमुवाच सेनानुगतः पृथुश्रीः ॥ १२ ॥

शस्तं हतं । तच्चापीत्यनेन रावणेन स्वप्नेपि न तच्चिन्तितमिति सूच्यते । यद्वा शत्रोरुपचये समाश्रयः कार्यइतिनीतिः । तथापि रावणः कालचोदिततया समाश्रयणं विहाय अस्थाने क्रोधवशं गत इत्यपिशब्देन सूच्यते ॥ २—३ ॥ रिपवे रामाय । नावज्ञा कार्या उपेक्षा न कर्तव्या । क्रियाग्रहणं कर्तव्यमिति चतुर्थी । यैश्च वानरैर्हेतुभिः । मम सैन्यपालः प्रहस्तः । सानुयात्रः सानुचरः । सकुञ्जरश्च सूदितः । तेभ्योपि नावज्ञाकार्येत्यर्थः । केचित्तु रिपवे रिपुभ्यः । अवज्ञा एते कपयः किं करिष्यन्तीत्येवंरूपा । न कार्या । कुत इत्यत्राह—यैरित्यादीत्याहुः ॥ ४ ॥ अद्भुतं दुर्बलैः प्रबलविनाशनादाश्चर्यं ॥ ५–७ ॥ तुरङ्गोत्तमराजैः तुरङ्गश्रेष्ठतमैः युक्तं । प्रकाशमानं अलङ्कारैर्भासमानं । वपुषा ज्वलन्तं स्वरूपत एव प्रकाशमानं ॥८॥ आस्फोटितक्ष्वेलितसिंहनादैः आस्फोटितं भुजास्फालनं । क्ष्वेलितशब्दःशब्दमात्रपरः । आस्फोटितजनितशब्दैः सिंहनादैश्चेत्यर्थः । पुण्यैः चारुभिः ॥९॥ स इति । काठिन्यसिद्धये शैलौपम्यं । संकोचविकासार्हत्वसिद्ध्यै मेघौपम्यं । रूपं शरीरं । रुद्रस्यासुरेश्वरत्वं तामसप्रकृतित्वात् । तदुक्तं मैत्रायणीयानामुपनिषदि—" यो ह वा अस्य तामसोंशः सोसौ रुद्रः " इति ॥ १० ॥ महार्णवाभ्रस्तनितं महार्णवाभ्रयोरिव स्तनितं घोषो यस्येति तथा ॥ ११ ॥ अतिप्रचण्डं अत्यन्तकोपनं । भुजगेन्द्रबाहुः युद्धौत्सुक्येन प्रवर्धमानबाहुरित्यर्थः । पृथुश्रीः युद्धहर्षेण संजातलक्ष्मीकः । सेनानुगतः स्वामिसंरक्षणाय सर्वतः समवेतसेनापरिवृतः । शस्त्रभृतां वरिष्ठं वीरभटतारतम्यज्ञमिति

स० अनु यात्रा रणाजिरगमनंयस्यतदनुयात्रं सैन्यं । तेनसहितः सानुयात्रः ॥ ४ ॥ ती० वस्तुतस्तु—सहलक्ष्मणंरामं विनेतिशेषः । बाणौघैः वानरानीकंनिर्दहिष्यामीतिसंबन्धः ॥ ६ ॥ शि० रावणोभूतैर्वृतः अमरेशोरुद्रइवबभौ ॥ १० ॥

[पा०] १ ज. सभ्रातरंनीलहतंनिशम्यशोकार्दितःक्रोशवशाभिभूतः. २ झ. निर्जरयूथमुख्यान्. ३ ङ. झ. ट. रिन्द्रबलसादनः. ४ क. सवाहनः. ५ अयंश्लोकः ज. पुस्तकेदृश्यते. ६ झ. ञ. ट. इवामरेशः.

असौ च जीमूतनिकाशरूपः कुम्भः पृथुव्यूढसुजातवक्षाः ॥
समाहितः पन्नगराजकेतुर्विस्फारयन्भाति धनुर्विधून्वन् ॥ २१ ॥
यश्चैष जाम्बूनदवज्रजुष्टं दीप्तं सधूमं परिघं प्रगृह्य ॥
आयाति रक्षोबलकेतुभूतस्त्वसौ निकुम्भोद्भुतघोरकर्मा ॥ २२ ॥
यश्चैष चापासिशरौघजुष्टं पताकिनं पावकदीप्तरूपम् ॥
रथं समास्थाय विभात्युदग्रो नरान्तकोसौ नगशृङ्गयोधी ॥ २३ ॥
यश्चैष नानाविधघोररूपैर्व्याघ्रोष्ट्रनागेन्द्रमृगाश्ववक्त्रैः ॥
भूतैर्वृतो भाति विवृत्तनेत्रैः सोसौ सुराणामपि दर्पहन्ता ॥ २४ ॥
यत्रैतदिन्दुप्रतिमं विभाति च्छत्रं सितं सूक्ष्मशलाकमग्र्यम् ॥
अत्रैष रक्षोधिपतिर्महात्मा भूतैर्वृतो रुद्र इवावभाति ॥ २५ ॥
असौ किरीटी चलकुण्डलास्यो नगेन्द्रविन्ध्योपममीमकायः ॥
महेन्द्रवैवस्वतदर्पहन्ता रक्षोधिपः सूर्य इवावभाति ॥ २६ ॥

प्रत्युवाच ततो रामो विभीषणमरिन्दमम् ॥ अहो दीप्तो महातेजा रावणो राक्षसेश्वरः ॥ २७ ॥
आदित्य इव दुष्प्रेक्षो रश्मिभिर्भाति रावणः ॥ सुव्यक्तं लक्षये ह्यस्य रूपं तेजःसमावृतम् ॥ २८ ॥
देवदानववीराणां वपुर्नैवंविधं भवेत् ॥ यादृशं राक्षसेन्द्रस्य वपुरेतत्प्रकाशते ॥ २९ ॥
सर्वे पर्वतसंकाशाः सर्वे पर्वतयोधिनः ॥ सर्वे दीप्तायुधधरा योधाश्चास्य महौजसः ॥ ३० ॥
भाति राक्षसराजोसौ प्रदीप्तैर्भीमविक्रमैः ॥ भूतैः परिवृतस्तीक्ष्णैर्देहवद्भिरिवान्तकः ॥ ३१ ॥
दिष्ट्याऽद्यमद्य पापात्मा मम दृष्टिपथं गतः ॥ अद्य क्रोधं विमोक्ष्यामि सीताहरणसंभवम् ॥ ३२ ॥
एवमुक्त्वा ततो रामो धनुरादाय वीर्यवान् ॥ लक्ष्मणानुचरस्तस्थौ समुद्यृत्य शरोत्तमम् ॥ ३३ ॥

त्रिशिरा इत्यपि पठन्ति ॥ २० ॥ पृथुव्यूढसुजातवक्षाः पृथु पीनं व्यूढं विशालं सुजातं सुन्दरं च वक्षो यस्य स तथोक्तः । समाहितः सन्नद्धः । धनुर्विस्फारयन् ज्यामवलम्ब्य कर्षन् । पुनर्लीलया विधून्वन् असौ कुम्भो भाति । अत्र यच्छब्दाप्रयोगः सन्निहितत्वादिति भाव्यं ॥ २१ ॥ जाम्बूनदवज्राभ्यामन्योन्यमिलिताभ्यां जुष्टं अतएव दीप्तं ज्वालायुक्तं । सधूमं सधूममिव स्थितं । अभेदनिर्देशः । सर्वथा सादृश्यप्रतिपत्तये । रक्षोबलकेतुभूतः रक्षोबलप्रधानभूतइत्यर्थः ॥ २२ ॥ उदग्रः उन्नतः । नगशृङ्गैः साधनैः युध्यत इति नगशृङ्गयोधी । प्रतियोद्भ्रभावात् भुजकण्डूनिवृत्त्यर्थं नगैः सह युध्यत इति वार्थः ॥ २३ ॥ अथ त्रिभिः रावणं दर्शयति—यश्चेति ॥ विवृत्तनेत्रैः घूर्णितनेत्रैः ॥ २४—२५ ॥ नगेन्द्रः हिमवान् ॥ २६ ॥ दीप्तः कान्तिमान् । महातेजाः महाप्रतापः ॥ २७ ॥ आदित्य इव रश्मिभिः दुष्प्रेक्षः प्रेक्षितुमशक्यः । अनयोरर्थयोर्भिन्नवाक्यत्वान्न पुनरुक्तिशङ्का ॥ २८ ॥ देवेत्यर्धद्वयमेकं वाक्यं ॥ २९–३० ॥ देहवद्भिः प्रशस्तदेहैः ॥ ३१ ॥ क्रोधं विमोक्ष्यामि क्रोधं कार्यकरं करिष्यामीत्यर्थः । मम

पूर्वहतादन्यइतिबोध्यं ॥ १५ ॥ स० इन्दुप्रतिमं चन्द्रसदृशं । चन्द्रसादृश्येकिञ्चित्कलङ्कितात्राश्वास्यात् तांपरिहर्तुसितमित्युक्तं ॥ २५ ॥ ति० नव्यक्तंलक्षयेइत्यत्रहेतुः तेजस्समावृतमिति । रूपं सूक्ष्मावयवसंस्थानं ॥ २८ ॥ स० इदमोशब्दश्चाहनीत्यर्थेतिभवति । एतद्दिनेदृष्टिपथंगतः । अद्यक्रोधंविमोक्ष्यामि त्यक्ष्यामि । दिनेपि "लृदृशेषे" इत्युक्तेः दृष्टिमार्गगमनकालतउत्तरसि-

---

[पा०] १ ङ. झ. ट. विस्फारयन्याति. २ ख. ग. घ. च. छ. ज. केतुभूतस्सोसौ. ङ. झ. ट. केतुभूतोयोसौनिकुंद्भुतवीरकर्मा. ३ ग. ङ. झ. ट. विवृत्तनेत्रैर्योसौ. ४ घ. च. छ. झ. ट. नव्यक्तंलक्षये. ५ ख. च. छ. दानवयक्षाणां. च. छ. ज. वपुर्नैतादृशं. ७ क. ख. ग. च. छ. ज. ञ. ट. लक्ष्मणानुगतः.

ततः स रक्षोधिपतिर्महात्मा रक्षांसि तान्याह महाबलानि ॥
द्वारेषु चर्यागृहगोपुरेषु सुनिर्वृतास्तिष्ठत निर्विशङ्काः ॥ ३४ ॥
इहागतं मां सहितं भवद्भिर्वनौकसश्छिद्रमिदं विदित्वा ॥
शून्यां पुरीं दुष्प्रसहां प्रमथ्य प्रधर्षयेयुः सहसा समेताः ॥ ३५ ॥
विसर्जयित्वा [1]सहितांस्ततस्तान्मतेषु रक्षस्सु यथानियोगम् ॥
व्यदारयद्वानरसागरौघं महाझषः पूर्णमिवार्णवौघम् ॥ ३६ ॥
तमापतन्तं सहसा समीक्ष्य दीप्तेषुचापं युधि राक्षसेन्द्रम् ॥
महत्समुत्पाट्य महीधराग्रं दुद्राव रक्षोधिपतिं हरीशः ॥ ३७ ॥
तच्छैलशृङ्गं बहुवृक्षसानुं प्रगृह्य चिक्षेप निशाचराय ॥
तमापतन्तं सहसा समीक्ष्य बिभेद बाणैस्तपनीयपुङ्खैः ॥ ३८ ॥
तस्मिन्प्रवृद्धोत्तमसानुवृक्षे शृङ्गे विकीर्णे पतिते पृथिव्याम् ॥
महाहिकल्पं शरमन्तकाभं समाददे राक्षसलोकनाथः ॥ ३९ ॥
स तं गृहीत्वाऽनिलतुल्यवेगं सविस्फुलिङ्गज्वलनप्रकाशम् ॥
बाणं महेन्द्राशनितुल्यवेगं चिक्षेप सुग्रीववधाय रुष्टः ॥ ४० ॥
स सायको रावणबाहुमुक्तः शक्राशनिप्रख्यवपुः शिताग्रः ॥
सुग्रीवमासाद्य बिभेद वेगाद्रुहेरिता क्रौञ्चमिवोग्रशक्तिः ॥ ४१ ॥
स सायकार्तो विपरीतचेताः क्रूजन्पृथिव्यां निपपात वीरः ॥
[2]तं प्रेक्ष्य भूमौ पतितं विसंज्ञं नेदुः प्रहृष्टा युधि यातुधानाः ॥ ४२ ॥
ततो गवाक्षो गवयः [3]सुदंष्ट्रस्तथर्षभो ज्योतिमुखो [4]नभश्च ॥
शैलान्समुद्यम्य विवृद्धकायाः प्रदुद्रुवुस्तं [5]प्रति राक्षसेन्द्रम् ॥ ४३ ॥

दृष्टिपथं गत इति पाठः ॥ ३२–३३ ॥ द्वारेषु अन्तर्द्वारेषु । चर्यायुक्ताः पुरद्वारेषु गोपुरपार्श्वयोः भटनिवासार्थं निर्मिता विशङ्कटा गृहाः चर्यागृहाः । सुनिर्वृताः अतिसुखिताः ॥ ३४ ॥ इहागतं मां विदित्वा इदं छिद्रं विदित्वेत्यन्वयः । प्रमथ्य ध्वंसित्वा । प्रधर्षयेयुः अभिभवेयुः ॥३५॥ सहितान् संमिलितान् । महाझषः महामत्स्यः ॥ ३६ ॥ दीप्ते इषुचापे यस्य स तथोक्तः । युधि संयुगनिमित्तं । सहसा आपतन्तं राक्षसेन्द्रं समीक्ष्य । महीधराग्रं पर्वतशृङ्गं । समुत्पाट्य हरीशः सुग्रीवः । रक्षोधिपतिं दुद्राव ॥ ३७ ॥ बहुवृक्षसानुं बहुतरुयुततटं । तपनीयं स्वर्णं ॥ ३८—३९ ॥ महेन्द्राशनिः वज्रं । औत्पातिकाशनिव्यावृत्तये महेन्द्रपदं । यद्वा महेन्द्रसंबन्धोक्तिः अभ्यासवता मुक्तत्वेनातिवेगद्योतनाय ॥ ४० ॥ शक्राशनिप्रख्यं शक्राशनितुल्यं वपुः यस्य । गुहः स्कन्दः ॥ ४१ ॥ विपरीतचेताः भ्रान्तचित्तः ॥ ४२ ॥ ज्योतिमुखः ज्योति-

---

न्कालेकोपत्यागः । सोपितन्मारणात्माज्ञेयः ॥ ३२ ॥ स० तच्छैलशृङ्गं सचासौशैलश्च तस्यशृङ्गंयस्मिंस्तथा । बहुवृक्षैरुपेतश्चासौसानुः स्तुः । "स्तुःप्रस्थःसानुरस्त्रियां" इत्यमरः । "शृङ्गार्घनिदाघोद्यमशल्यदृढाः" इति पुंनपुंसकाधिकारलिङ्गानुशासनाच्चप्रवृद्धोत्तमसानुवृक्षेशृङ्गे इतिद्वितीयव्याख्यानेसुलभं । प्रथमव्याख्यानेसंबन्धस्यद्विनिष्ठत्वात्सानोःशृङ्गसाहित्यवच्छृङ्गस्यतत्साहित्यमपि संभवतीतिपदंलभ्यं । 'शृङ्गशब्दोऽर्धचादिरितिपुंल्लिङ्गतोपपत्तिरितिनागोजिभट्टोक्तिस्तु एतदनिभालनमूलेति प्रपञ्चार्थतैतस्येतिवा ज्ञेयं ॥ ३८—३९ ॥ स० बाणं सुग्रीववधायेतिचिक्षेप ॥ ४० ॥

[पा०] १ ख. ङ. च. छ. झ. सचिवांस्ततः. २ ङ. झ. ट. विदीर्णे. ३ ङ. झ. ट. शक्राशनिस्पर्शवपुः प्रकाशं. ४ ङ. झ. तंवीक्ष्य. ५ ङ. झ. ट. सुषेण स्त्वथर्षभो. ६ क.—ट. नलश्च. ७ घ. युधिराक्षसेन्द्रं.

तेषां प्रहारान्स चकार मोघान्रक्षोधिपो बाणगणैः शिताग्रैः ॥
तान्वानरेन्द्रानपि बाणजालैर्बिभेद जाम्बूनदचित्रपुङ्खैः ॥ ४४ ॥
ते वानरेन्द्रास्त्रिदशारिबाणैर्भिन्ना निपेतुर्भुवि भीमकायाः ॥
ततस्तु तद्वानरसैन्यमुग्रं प्रच्छादयामास स बाणजालैः ॥ ४५ ॥
ते वध्यमानाः पतिताः प्रवीरा नानद्यमाना भयशल्यविद्धाः ॥
शाखामृगा रावणसायकार्ता जग्मुः शरण्यं शरणं स्म रामम् ॥ ४६ ॥
ततो महात्मा स धनुर्धनुष्मानादाय रामः सहसा जगाम ॥
तं लक्ष्मणः प्राञ्जलिरभ्युपेत्य उवाच वाक्यं परमार्थयुक्तम् ॥ ४७ ॥
काममार्य सुपर्याप्तो वधायास्य दुरात्मनः ॥ विधमिष्याम्यहं नीचमनुजानीहि मां प्रभो ॥ ४८ ॥
तमब्रवीन्महातेजा रामः सत्यपराक्रमः ॥ ४९ ॥
गच्छ यत्नपरश्चापि भव लक्ष्मण संयुगे ॥ रावणो हि महावीर्यो रणेऽद्भुतपराक्रमः ॥
त्रैलोक्येनापि संक्रुद्धो दुष्प्रसह्यो न संशयः ॥ ५० ॥

र्मुखः ॥ ४३—४५ ॥ ते प्रसिद्धा वानरेन्द्राः नतु क्षुद्राः । वध्यमानाः प्रथमं हिंस्यमानाः । ततः पतिताः रावणवेगेन भूमौ पतिताः । तदानीं रक्षकान्तरादर्शनान्नानद्यमानाः अतिशयेन नदन्तः । नदतेर्यङि "सन्यङोः" इत्यभ्यासदीर्घादिः । भयशल्यविद्धाः तादृशहेतुना भयरूपशल्येन विद्धाः । शाखामृगाः वनचारित्वेनैतादृशभयानभिज्ञाः । उक्तप्रकारेण सायकार्ताःसन्तः शरण्यं सर्वलोकशरणार्हं । रामं शरणं जग्मुः । एतेनार्तिरेव शरणागतिप्रयोजिका नतुदेशकालाधिकारिफलनियमा इत्युक्तं ॥ ४६ ॥ शरणागतकृत्यमुक्त्वा शरण्यकृत्यमाह—तत इति ॥ अत्र प्रपत्तेरार्तप्रपत्तिरूपतया तस्याः सद्यः फलद्योतनाय तत इत्युक्तं । प्रपत्त्युत्तरक्षण इत्यर्थः । महात्मा शरणागतितारतम्यज्ञः । धनुष्मान् प्रशस्तधनुष्कः । धनुर्युद्धसमर्थ इत्यर्थः । सहसेत्यनेन लक्ष्मणः स्वयं गमिष्यामीति तत्पूर्वमेवाश्रितत्राणत्वरया सधनुः सन् जगामेत्युक्तं । तथैव घट्टकुट्यां प्रभातमित्याह—तमिति । तं आर्तत्राणत्वरया व्रजन्तं । लक्ष्मणः रामकैङ्कर्यलक्ष्मीसंपन्नः । अनतिक्रमणाय नाथं निगलयति—प्राञ्जलिरिति । अभ्युपेत्य अभितः उपेत्य । अनेन लक्ष्मणागमनमजानन्निव नानापार्श्वेषु रामोनेकधा जगामेत्यवगम्यते । परमार्थयुक्तं न तूपचारयुक्तं । यद्वा परमार्थयुक्तं परमप्रयोजनयुक्तं । विषये कैङ्कर्यस्य शेषभूतं प्रति परमप्रयोजन ॥ ४७ ॥ हे आर्य, अस्य दुरात्मनः परदारापहरण विषयदुर्बुद्धेः । कामं प्रकामं । वधाय सुपर्याप्तः सुशक्तोसि । तथापि नीचं भवता योद्धुमनर्हं । अहं वधिष्यामि । महाबलेन भवता नीचोयं न योद्धुमर्ह इति भावः । यद्वा अस्य वधायाहं पर्याप्तोस्मीत्यर्थः । तर्हि स्वयमेव गम्यतामित्यत्राह—अनुजानीहीति । प्रभो शेषिन् । त्वं मां शेषभूतमनुजानीहि । भवदनुज्ञामन्तरेण मे कार्यकरणं स्वरूपहानिकरमितिभावः ॥४८॥ तं विनयेनोक्तवन्तं । महातेजाः तादात्विकहर्षप्रकर्षावेदकसुषमाविशेषशाली । सति कस्मिंश्चिद्विधेयेसति । अपराक्रमः निवृत्तपराक्रमः । अब्रवीत् ॥ ४९ ॥ नीचपदसूचितमनादरं वारयति—यत्नपर इति । युद्धे यत्नपरश्चापि भव यथा युद्धपरोसि एवं यत्नपरो भव । यत्नस्यावश्यकर्तव्यत्वे हेतुमाह—रावण इति । अद्भुतपराक्रमः एवमस्त्रमाददान इवापरं संधत्ते तत्संदधान इवापरं मोक्षयतीत्यर्थः । त्रिलोक्येव त्रैलोक्यं तेन । युगपद्युद्धप्रवृत्तेनेत्यर्थः । यत्नपरत्वंदर्शयति—तस्येति ॥ चक्षुषा तस्य रावणस्य । छिद्राणि अनवधानादीनि । यत्नान्मार्गस्व अन्वेषयस्व । स्वच्छिद्राणि लक्षय काकान्पश्येतिवत् स्वस्य छिद्राणि यथा न भवन्ति

टी० सधनुरित्यत्र सइतिच्छेदः ॥ ४७ ॥

[पा०] १ ङ. च. झ. ट. बाणशतैः. २ क. ख. ज. पतिताभ्यवीराः. घ. प्रथिताभ्यवीराः. ३ ग. शरशल्यविद्धाः. क. ख. घ. हयतुल्यवेगाः. ४ झ. ट. रामंपरमार्थ.

तस्य च्छिद्राणि मार्गस्व स्वच्छिद्राणि च लक्षय ॥ चक्षुषा धनुषा यत्नाद्रक्षात्मानं समाहितः ॥५१॥
राघवस्य वचः श्रुत्वा परिष्वज्याभिपूज्य च ॥ अभिवाद्य ततो रामं ययौ सौमित्रिराहवम् ॥ ५२ ॥
स रावणं वारणहस्तबाहुर्ददर्श दीप्तोद्यतभीमचापम् ॥
प्रच्छादयन्तं शरवृष्टिजालैस्तान्वानरान्भिन्नविकीर्णदेहान् ॥ ५३ ॥
तमालोक्य महातेजा हनुमान्मारुतात्मजः ॥ निवार्य शरजालानि प्रदुद्राव स रावणम् ॥ ५४ ॥
रथं तस्य समासाद्य भुजमुद्यम्य दक्षिणम् ॥ त्रासयन्रावणं धीमान्हनुमान्वाक्यमब्रवीत् ॥ ५५ ॥
देवदानवगन्धर्वैर्यक्षैश्च सह राक्षसैः ॥ अवध्यत्वं त्वया प्राप्तं वानरेभ्यस्तु ते भयम् ॥ ५६ ॥
एष मे दक्षिणो बाहुः पञ्चशाखः समुद्यतः ॥ विधमिष्यति ते देहाद्भूतात्मानं चिरोषितम् ॥ ५७ ॥
श्रुत्वा हनुमतो वाक्यं रावणो भीमविक्रमः ॥ संरक्तनयनः क्रोधादिदं वचनमब्रवीत् ॥ ५८ ॥
क्षिप्रं प्रहर निश्शङ्कं स्थिरां कीर्तिमवाप्नुहि ॥ ततस्त्वां ज्ञातविक्रान्तं नाशयिष्यामि वानर ॥ ५९ ॥
रावणस्य वचः श्रुत्वा वायुसूनुर्वचोऽब्रवीत् ॥ प्रहृतं हि मया पूर्वमक्षं स्मर सुतं तव ॥ ६० ॥
एवमुक्तो महातेजा रावणो राक्षसेश्वरः ॥ आजघानानिलसुतं तलेनोरसि वीर्यवान् ॥ ६१ ॥
स तलाभिहतस्तेन चचाल च मुहुर्मुहुः ॥ स्थित्वा मुहूर्तं तेजस्वी स्थैर्यं कृत्वा महामतिः ॥
आजघानाभिसंक्रुद्धस्तलेनैवामरद्विषम् ॥ ६२ ॥
ततस्तलेनाभिहतो वानरेण महात्मना ॥ दशग्रीवः समाधूतो यथा भूमिचलेऽचलः ॥ ६३ ॥
संग्रामे तं तथा दृष्ट्वा रावणं तलताडितम् ॥ ऋषयो वानराः सिद्धा नेदुर्देवाः सहासुरैः ॥ ६४ ॥
अथाश्वास्य महातेजा रावणो वाक्यमब्रवीत् ॥ साधु वानर वीर्येण श्लाघनीयोसि मे रिपुः ॥ ६५ ॥

तथा पश्येत्यर्थः । यद्वा लक्षय लक्षित्वा प्रच्छादयेत्यर्थः । एवं समाहितः सावधानः सन् । धनुषा आत्मानं रक्ष ॥ ५०—५१ ॥ अभिपूज्य प्रदक्षिणीकृत्येत्यर्थः ॥ ५२—५३ ॥ तमालोक्येति भूत्वे मयि विद्यमाने कथमसौ समासीदतीति जगामेत्यर्थः ॥ ५४—५५ ॥ भयं प्राप्तमिति शेषः ॥ ५६ ॥ पञ्चशाखः पञ्चाङ्गुलिकः । भूतात्मानं विधमिष्यति निष्क्रामयिष्यति । धातूनामनेकार्थत्वात् ॥५७—५८॥ स्थिरां कीर्तिमवाप्नुहीति सोपालम्भोक्तिः । हनुमान् रावणमुपसृत्य प्रहृतवानित्येतादृशीं कीर्तिमवाप्स्यसीत्यर्थः । ज्ञातविक्रान्तं ज्ञातविक्रमं । भावे क्तः ॥५९॥ रावणवचनं ज्ञात्वा तदुचितमुत्तरमाह—प्रहृतं हीति ॥ ६० ॥ एवमुक्तइति । मर्मोद्घाटनेन संजातरोष इत्यर्थः ॥ ६१ ॥ तलेनेति । रावणेन तलेन प्रहरणात् स्वयमपि तलेनैवप्राहरदितिभावः ॥ ६२ ॥ समाधूतः कम्पितः । अभूत् । भूमिचले भूकम्पेसति । अचलः

स० छिद्राणि मर्माणि मार्गस्व परीक्षस्व । स्वच्छिद्राणि गोपय रक्ष । चक्षुषातं लक्षय । स्वसमाहितः स्वैनैवसमाहितः । समसमरेवक्तानान्योस्तीतिभावः । एतावत्युक्तिःकुतइत्यतोवाह—स्वसमाहितः सु अत्यन्तं असमोविषमः अहितो वैरीयस्यसतथा त्वमित्यर्थः ॥ ५१ ॥ **स०** वानरेभ्यःकपिभ्यः । तेभ्योऽवृतत्वाद्वरस्येतिभावः । नरेभ्यइत्यपि कपिसाम्याद्वक्तव्यं । तथापि स्वस्यैवपुरःस्थितेः स्वजातेर्ग्रहणमित्यवगन्तव्यं । वानरेभ्यइत्यत्राऽऽवृत्त्यातत्रापिपदच्छेदेन वानरेभ्योवातेभ्यइवनरेभ्योपिभयमित्यन्वयकरणेनतदुक्तिर्ज्ञेयेति अस्मत्तः कपिभ्यइत्यनुक्त्वा उक्त्वाचवानरेभ्यइतिकविर्ध्वनयाञ्चक्रे ॥ ५६ ॥ **स०** यतो येन । मुत् संतोषः । सतेबाहुः अदक्षिणः ताडनाकुशलः असमर्थइतियावत् । एषमेपंचशाखोहस्तः तेदेहेचिरोषितंभूतात्मानंप्राणं विधमिष्यति बहिर्निस्सारयति । अभूतात्मानं मुख्यप्राणमितिवा ॥ ५७ ॥ **रामानु०** ज्ञातविक्रान्तमितिवचनं सोष्ठुण्ठनं । ज्ञात्वातदुचितमुत्तरमाह—**प्रहृतमिति** ॥ ६० ॥ **स०** देवाः राजानः सुरासुरैःसहनेदुः । "देवःसुरेवनेराज्ञि" इतिविश्वः ॥ ६४ ॥

[**पा०**] १ क.—ज. गोपय. २ ङ. झ. ट. धनुषात्मानंगोपायस्वसमाहितः. ३ क. ख. घ.—ट. संपरिष्वज्यपूज्यच. ४ क. ग. घ. ङ. झ. ट. अभिवाद्यचरामाय. ५ ङ. झ. ट. राहवे. ६ क. झ. वारणहस्तबाहुं. ७ ग. मुष्टिमुद्यम्य. ८ क.—घ. च. छ. ञ. देवदानवगन्धर्वायक्षाश्चसहराक्षसाः । अवश्यंभवताभग्नावानरेभ्यस्तुतेभयं. ९ घ. ङ. झ. ट. देहेभूतात्मानं. १० ङ. झ. ट. सुरासुरैः. क.—घ. सहासुराः.

रावणेनैवमुक्तस्तु मारुतिर्वाक्यमब्रवीत् ॥ धिगस्तु मम वीर्येण यस्त्वं जीवसि रावण ॥ ६६ ॥
सकृत्तु प्रहरेदानीं दुर्बुद्धे किं विकत्थसे ॥ ततस्त्वां मामिका मुष्टिर्नयिष्यति यमक्षयम् ॥ ६७ ॥
ततो मारुतिवाक्येन क्रोधस्तस्य तदाऽज्वलत् ॥ संरक्तनयनो यत्नान्मुष्टिमुद्यम्य दक्षिणम् ॥
पातयामास वेगेन वानरोरसि वीर्यवान् ॥ ६८ ॥
हनुमान्वक्षसि व्यूढे संचचाल हतः पुनः ॥ ६९ ॥
विह्वलं तु तदा दृष्ट्वा हनुमन्तं महाबलम् ॥ रथेनातिरथः शीघ्रं नीलं प्रति समभ्यगात् ॥ ७० ॥
राक्षसानामधिपतिर्दशग्रीवः प्रतापवान् ॥ पन्नगप्रतिमैर्भीमैः परमर्मातिभेदिभिः ॥
शरैरादीपयामास नीलं हरिचमूपतिम् ॥ ७१ ॥
स शरौघसमायस्तो नीलः कपिचमूपतिः ॥ करेणैकेन शैलाग्रं रक्षोधिपतयेऽसृजत् ॥ ७२ ॥
हनुमानपि तेजस्वी समाश्वस्तो महामनाः ॥ विप्रेक्षमाणो युद्धेप्सुः सरोषमिदमब्रवीत् ॥ ७३ ॥
नीलेन सह संयुक्तं रावणं राक्षसेश्वरम् ॥ अन्येन युध्यमानस्य न युक्तमभिधावनम् ॥ ७४ ॥
रावणोपि महातेजास्तच्छृङ्गं सप्तभिः शरैः ॥ आजघान सुतीक्ष्णाग्रैस्तद्विकीर्णं पपात ह ॥ ७५ ॥
तद्विकीर्णं गिरेः शृङ्गं दृष्ट्वा हरिचमूपतिः ॥ कालाग्निरिव जज्वाल क्रोधेन परवीरहा ॥ ७६ ॥
सोश्वकर्णान्धवान्सालांश्चूतांश्चापि सुपुष्पितान् ॥ अन्यांश्च विविधान्वृक्षान्नीलश्चिक्षेप संयुगे ॥७७॥
स तान्वृक्षान्समासाद्य प्रतिचिच्छेद रावणः ॥ अभ्यवर्षत्सुघोरेण शरवर्षेण पावकिम् ॥ ७८ ॥
अभिवृष्टः शरौघेण मेघेनेव महाचलः ॥ दृश्यं कृत्वा तदा रूपं ध्वजाग्रे निपपात ह ॥ ७९ ॥
पावकात्मजमालोक्य ध्वजाग्रे समुपस्थितम् ॥ जज्वाल रावणः क्रोधात्ततो नीलो ननाद च ॥८०॥
ध्वजाग्रे धनुषश्चाग्रे किरीटाग्रे च तं हरिम् ॥ लक्ष्मणोथ हनूमांश्च दृष्ट्वा रामश्च विस्मिताः ॥ ८१ ॥
रावणोपि महातेजाः कपिलाघवविस्मितः ॥ अस्त्रमाहारयामास दीप्तमाग्नेयमद्भुतम् ॥ ८२ ॥

गिरिर्यथा ॥ ६३—६५ ॥ वीर्येणेति द्वितीयाभाव आर्षः । यस्त्वं जीवसि । मया प्रहृतोपीति शेषः ॥ ६६ ॥ सकृत्तु प्रहर । शत्रुणा प्रहृते पुनरात्मनः प्रहारो विक्रमपरिपाटीमाटीकत इति हनुमतो हृदयं । इदानीमिति । पूर्वं मदनवधानाज्जीवसीतिभावः । दुर्बुद्धे प्रहारतारतम्यानभिज्ञ । किं किमर्थं । विकत्थसे श्लाघसे । " कत्थ श्लाघायां " इति धातुः । यमक्षयं यमनिलयं । " निलयापचयौक्षयौ " इत्यमरः ॥ ६७ ॥ ततः तेनेत्यर्थः । अन्यथा तदाशब्दोतिरिच्येत । अज्वलत् ववृध इत्यर्थः । वीर्यवान् बलवान् । " वीर्यं बले च " इत्यमरः ॥ ६८ ॥ हनुमानित्यर्धं ॥ व्यूढे विशाले ॥ ६९ ॥ विह्वलं मूर्च्छितं । महाबलं तदानीमपि परैरनभिभवनीयं ॥ ७० ॥ आदीपयामास आसमन्ताज्ज्वालयामास ॥ ७१ ॥ समायस्तः आयासवान् । एकेनेत्यनेन इतरेण शरवारणं गम्यते ॥ ७२ ॥ रावणं अब्रवीदिति संबन्धः । अभिधावनं । अन्येन युध्यमानं प्रत्यभिधावनमित्यर्थः । अत्रेतिकरणं द्रष्टव्यं ॥ ७३—७७ ॥ समासाद्य समीपंप्राप्य । पावकिं पावकपुत्रं ॥७८–७९॥ जज्वाल चुक्रोधेत्यर्थः ॥ ८०—८१ ॥ आहारयामास

रामानु० ध्वजाग्रइति । हनुमांश्चविस्मितः "नमारुतेरस्तिगतिप्रमाणं" इतिप्रसिद्धगतिलाघवोहनुमानपिसंजातविस्मयोऽभूदित्यर्थः ॥ ८१ ॥

[**पा०**] १ ङ. च. झ. ञ. ट. ममवीर्यस्य. ख. घ. ममवीर्यंतवस्त्वं. २ क. च. झ. ञ. मामकोमुष्टिः. ३ घ. रोषान्मुष्टिमावृत्य. झ. ट. यत्नान्मुष्टिमावृत्य. ख. च. छ. ञ. क्रोधान्मुष्टिमावृत्य. ४ घ. ताडितोवक्षसि. ५ क.—ट. विह्वलंतं. ६ ख. घ. समभ्ययात्. ७ ङ. झ. ट. परममर्माभिभेदनैः. ८ ख. शरौघैःसमाविद्धः. ९ ङ. झ. ट. तद्विशीर्णं. १० ङ. झ. ट. कर्णद्रुमान्सालान्. ११ क. ख. च. तदात्मानं. ङ. झ. ट. ततोरूपं.

ततस्ते चुक्रुशुर्हृष्टा लब्धलक्षाः प्लवङ्गमाः ॥ नीललाघवसंभ्रान्तं दृष्ट्वा रावणमाहवे ॥ ८३ ॥
वानराणां च नादेन संरब्धो रावणस्तदा ॥ संभ्रमाविष्टहृदयो न किंचित्प्रत्यपद्यत ॥ ८४ ॥
आग्नेयेनाथ संयुक्तं गृहीत्वा रावणः शरम् ॥ ध्वजशीर्षस्थितं नीलमुदैक्षत निशाचरः ॥
ततोऽब्रवीन्महातेजा रावणो राक्षसेश्वरः ॥ ८५ ॥
कपे लाघवयुक्तोसि मायया परयाऽनया ॥ जीवितं खलु रक्षस्व यदि शक्तोसि वानर ॥ ८६ ॥
तानितान्यात्मरूपाणि सृजसि त्वमनेकशः ॥ तथापि त्वां मया युक्तः सायकोस्त्रप्रयोजितः ॥
जीवितं परिरक्षन्तं जीविताद्भ्रंशयिष्यति ॥ ८७ ॥
एवमुक्त्वा महाबाहू रावणो राक्षसेश्वरः ॥ संधाय बाणमस्त्रेण चमूपतिमताडयत् ॥ ८८ ॥
सोस्त्रयुक्तेन बाणेन नीलो वक्षसि ताडितः ॥ निर्दह्यमानः सहसा निपपात महीतले ॥ ८९ ॥
पितृमाहात्म्यसंयोगादात्मनश्चापि तेजसा ॥ जानुभ्यामपतद्भूमौ न च प्राणैर्व्ययुज्यत ॥ ९० ॥
विसंज्ञं वानरं दृष्ट्वा दशग्रीवो रणोत्सुकः ॥ रथेनाम्बुदनादेन सौमित्रिमभिदुद्रुवे ॥ ९१ ॥
आसाद्य रणमध्ये तु वारयित्वा स्थितो ज्वलन् ॥ धनुर्विस्फारयामास कम्पयन्निव मेदिनीम् ॥९२॥

तमाह सौमित्रिरदीनसत्त्वो विस्फारयन्तं धनुरप्रमेयम् ॥
अभ्येहि मामेव निशाचरेन्द्र न वानरांस्त्वं प्रतियोद्धुमर्हः ॥ ९३ ॥
स तस्य वाक्यं प्रतिपूर्णघोषं ज्याशब्दमुग्रं च निशम्य राजा ॥
आसाद्य सौमित्रिमवस्थितं तं कोपान्वितो वाक्यमुवाच रक्षः ॥ ९४ ॥
दिष्ट्यासि मे राघव दृष्टिमार्गं प्राप्तोन्तगामी विपरीतबुद्धिः ॥
अस्मिन्क्षणे यास्यसि मृत्युदेशं संसाद्यमानो मम बाणजालैः ॥ ९५ ॥

आददे ॥ ८२ ॥ लब्धलक्षाः लब्धहर्षविषयाः । नीलमेव पश्यन्त इति वार्थः ॥ ८३ ॥ वानराणां चेति चशब्देन नीललाघवं समुच्चीयते । संभ्रमः व्यग्रता । प्रत्यपद्यत अजानात् । आग्नेयेन आग्नेयमस्त्रेण । संयुक्तं अभिमन्त्रितं ॥ ८४–८५ ॥ कपे चञ्चलप्रकृते इत्यर्थः । अतो न वानरपदेन पौनरुक्त्यं ॥ ८६ ॥ तानि तान्यात्मरूपाणि सृजसि त्वमनेकश इति । लाघवातिशयेन सृजसीव दृश्यस इत्यर्थः । ननु तानि तानीत्यनेन रावणो नीलं नानातनुपरिग्रहयुक्तं मन्यत इत्यवगम्यत इति चेन्न । कपे लाघवयुक्तोसीति पूर्वोक्तिविरोधात् । युक्तः प्रयुक्तः । अस्त्रप्रयोजितः अस्त्रमन्त्रेणाभिमन्त्रितः । जीवितं परिरक्षन्तं त्वां जीवितात् भ्रंशयिष्यतीत्यन्वयः ॥ ८७—८९ ॥ पितृमाहात्म्येति । पितृमाहात्म्यं अग्नेः पुत्रतया दयालुत्ववैभवं ॥ ९०—९१ ॥ सौमित्रिमासाद्य । वारयित्वा सुग्रीवादीन्वारयित्वा । रणमध्ये ज्वलन् स्थितः धनुर्विस्फारयामासेत्यन्वयः ॥ ९२—९३ ॥ रक्षः रक्षोरूपः । राजेत्यन्वयः ॥ ९४ ॥ अन्तगामी विनाशेच्छुः । अतएव विपरीतबुद्धिः त्वं दिष्ट्या यदृच्छया दृष्टिमार्गं प्राप्तोसि । संसाद्यमानः पीड्यमानः

रामानु० तानितान्यात्मरूपाणिसृजसित्वमनेकशइत्यभिधानात् ध्वजकिरीटादिषुनीलस्यवेगातिशयकृतमवस्थानंयुगपदनेकशरीरपरिग्रहकृतमितिरावणोभ्रान्तवानित्यवगम्यते ॥ ८७ ॥ **ति०** अवेहिपश्य ॥ ९३ ॥ **ती०** सतस्यवाक्यमित्यारभ्यकिंमोघविकत्थनेनेत्येतदन्तस्यप्रातीतिकार्थःस्पष्टः । वस्तुतस्तु लक्ष्मणस्यरावणेनकिमुत्तरंदत्तमतआह—सतस्येत्यादिश्लोकद्वयेन । रक्षः राजा । सतुलक्ष्मणस्यवाक्यंउग्रंज्याशब्दंचनिशम्यकोपान्वितोपिविपरीतबुद्धिरपिअन्तगाम्यपि । अवस्थितंतंसौमित्रिमासाद्य हेराघव मेपापिष्ठस्यापिमम दिष्ट्या भाग्यवशेन दृष्टिमार्गंप्राप्तोसीतिवाक्यमुवाचेतिसंबन्धः ॥ ९४ ॥ **शि०** अन्तगामी परलोकगमन शीलः । अतएवविपरीता अयोद्धव्येयोधनविषयाबुद्धिर्यस्यसः ॥ ९५ ॥

[पा०] १ क.—घ. च. छ. ञ. परयाऽनघ. ङ. झ. ट. परयासह. २ क. ख. ग. च.—ट. मुक्तः. ३ झ. मुक्तेन. ४ क. ख. च. छ. ञ. पतितंदृष्ट्वा. ५ क. ख. ङ.—ट. विस्फारयामासराक्षसेन्द्रःप्रतापवान्. ६ ख. ग. च. छ. ज. ञ. अन्वेहि. क. ङ. झ. ट. अवेहि. ७ क. ख. घ. च.—ञ. योद्धुमर्हसि.

तमाह सौमित्रिरविस्मयानो गर्जन्तमुद्वृत्तशिताग्रदंष्ट्रम् ॥
राजन्न गर्जन्ति महाप्रभावा विकत्थसे पापकृतां वरिष्ठ ॥ ९६ ॥
जानामि वीर्यं तव राक्षसेन्द्र बलं प्रतापं च पराक्रमं च ॥
अवस्थितोऽहं शरचापपाणिरागच्छ किं मोघविकत्थनेन ॥ ९७ ॥
स एवमुक्तः कुपितः ससर्ज रक्षोधिपः सप्त शरान्सुपुङ्खान् ॥
ताँल्लक्ष्मणः काञ्चनचित्रपुङ्खैश्चिच्छेद बाणैर्निशिताग्रधारैः ॥ ९८ ॥
तान्प्रेक्षमाणः सहसा निकृत्तान्निकृत्तभोगानिव पन्नगेन्द्रान् ॥
लङ्केश्वरः क्रोधवशं जगाम ससर्ज चान्यान्निशितान्पृषत्कान् ॥ ९९ ॥
स बाणवर्षं तु ववर्ष तीव्रं रामानुजः कार्मुकसंप्रयुक्तम् ॥
क्षुरार्धचन्द्रोत्तमकर्णिभल्लैः शरांश्च चिच्छेद न चुक्षुभे च ॥ १०० ॥
स बाणजालान्यथ तानि तानि मोघानि पश्यंस्त्रिदशारिराजः ॥
विसिष्मिये लक्ष्मणलाघवेन पुनश्च बाणान्निशितान्मुमोच ॥ १०१ ॥
स लक्ष्मणश्चाशु शराञ्शिताग्रान्महेन्द्रवज्राशनितुल्यवेगान् ॥
संधाय चापे ज्वलनप्रकाशान्ससर्ज रक्षोधिपतेर्वधाय ॥ १०२ ॥
स तान्प्रचिच्छेद हि राक्षसेन्द्रश्छित्त्वा च ताँल्लक्ष्मणमाजघान ॥
शरेण कालाग्निसमप्रभेण स्वयम्भुदत्तेन ललाटदेशे ॥ १०३ ॥
स लक्ष्मणो रावणसायकार्तश्चचाल चापं शिथिलं प्रगृह्य ॥
पुनश्च संज्ञां प्रतिलभ्य कृच्छ्राच्चिच्छेद चापं त्रिदशेन्द्रशत्रोः ॥ १०४ ॥
निकृत्तचापं त्रिभिराजघान बाणैस्तदा दाशरथिः शिताग्रैः ॥
स सायकार्तो विचचाल राजा कृच्छ्राच्च संज्ञां पुनराससाद ॥ १०५ ॥
स कृत्तचापः शरताडितश्च मेदार्द्रगात्रो रुधिरावसिक्तः ॥
जग्राह शक्तिं समुदग्रशक्तिः स्वयम्भुदत्तां युधि देवशत्रुः ॥ १०६ ॥

॥ ९५ ॥ अविस्मयानः तृणीकुर्वन्नित्यर्थः । उद्वृत्तसिताग्रदंष्ट्रं उन्नतधवलाग्रदंष्ट्रं । न गर्जन्ति नात्मश्लाघां कुर्वन्तीत्यर्थः । पापकृतां वरिष्ठेति हेतुगर्भितविशेषणं । पापकृद्वरिष्ठत्वाद्विकत्थस इत्यर्थः ॥ ९६ ॥ जानामीति सोपहासोक्तिः । तव विजने यतिवेषेण सीतामपहृतवतः । प्रतापं शत्रुभीषणत्वं । पराक्रमं शौर्यं । " शौर्योद्योगौपराक्रमौ " इत्यमरः । मोघविकत्थनेन निष्फलश्लाघनेन ॥ ९७ ॥ निशिते अग्रधारे अग्रपार्श्वे येषां तैः ॥ ९८ ॥ पृषत्कान् बाणान् ॥ ९९ ॥ कार्मुकसंप्रयुक्तं चापसंहितं । क्षुरेति । क्षुरैः नापितशस्त्राकारैः । अर्धचन्द्रैः अर्धचन्द्राकारमुखैः । उत्तमैः कर्णिभिः कर्णिशरैः । भल्लैः उभयपार्श्वधारैः । शरान् रावणशरान् । चिच्छेद । तथापि न चुक्षुभे न कलुषितहृदयोभूत् ॥ १०० ॥ स इति ॥ त्रिदशारिराजः राक्षसराजः ॥ १०१ ॥ महेन्द्रवज्राशनितुल्यवेगान् महेन्द्रवज्रस्याशनेश्च तुल्यवेगान् ॥ १०२—१०३ ॥ शिथिलं यथा भवति तथा प्रगृह्य ॥ १०४–१०५ ॥ मेदेत्यकारान्तत्वमार्षं । समुदग्रशक्तिः समधिकसामर्थ्यः

ति० मेदार्द्रगात्रइतिसंधिरार्षः । अथरावणः प्राणान्तापदंप्राप्तः प्रकारान्तरेणजीवननिर्वाहमसंभाव्यब्रह्मदत्तामोघांशक्तिंजग्राहेत्याह—**जग्राहेति** ॥ १०६ ॥

[**पा०**] १ घ. युधिस्थितोहं. २ क. ख. ङ. झ. ञ. ट. स्वयमुग्रशक्तिः.

स तां विधूमानलसन्निकाशां वित्रासिनीं वानरवाहिनीनाम् ॥
चिक्षेप शक्तिं तरसा ज्वलन्तीं सौमित्रये राक्षसराष्ट्रनाथः ॥ १०७ ॥
तामापतन्तीं भरतानुजोग्रैर्जघान बाणैश्च हुताग्निकल्पैः ॥
तथापि सा तस्य विवेश शक्तिर्बाह्वन्तरं दाशरथेर्विशालम् ॥ १०८ ॥
स शक्तिमाञ्शक्तिसमाहतः सन्मुहुः प्रजज्वाल रघुप्रवीरः ॥
तं विह्वलन्तं सहसाऽभ्युपेत्य जग्राह राजा तरसा भुजाभ्याम् ॥ १०९ ॥
हिमवान्मन्दरो मेरुस्त्रैलोक्यं वा सहामरैः ॥ शक्यं भुजाभ्यामुद्धर्तुं न संख्ये भरतानुजः ॥ ११० ॥
शक्त्या ब्राह्मयाऽपि सौमित्रिस्ताडितस्तु स्तनान्तरे ॥ विष्णोरचिन्त्यं स्वं भागमात्मानं प्रत्यनुस्मरत् ॥ १११ ॥

॥१०६॥ राक्षसराष्ट्रनाथः राक्षससमूहनाथः ॥१०७॥ बाह्वन्तरंवक्षः ॥ १०८॥ विह्वलन्तं मुह्यन्तं ॥ १०९॥ लक्ष्मणं भुजाभ्यामुद्धर्तुमुद्युक्तं रावणमृषिः परिहसति—हिमवानिति ॥ शक्यमित्यव्ययं । हिमवान् धैर्येण हिमवानिवेति । समस्तधीरोपमानभूतो हिमवानपि रावणस्य भुजाभ्यामुद्धर्तुं शक्यं । तदेकदेशस्य कैलासस्य पुराचालितत्वात् । मन्दरः सकलसागरप्रधानगभीरतरक्षीरोदक्षोभणक्षमोपि मन्दरो वा भुजाभ्यामुद्धर्तुं शक्यं । स्वनिर्जितैरेव निर्जरैरमृतमथने जर्झरितत्वात् । मेरुः सकलकुलाचलवलयललामभूतोपि मेरुस्तथा कर्तुं शक्यं । वायुनैव तच्छिखरस्य लङ्कायां अकूपारकुक्षौ निक्षिप्तत्वात् । त्रैलोक्यं पञ्चाशत्कोटिविस्तीर्णमुत्तीर्णपरिमाणान्तरं त्रैलोक्यमपि तथा कर्तुशक्यं । तदेकदेशधरण्या हिरण्याक्षेण कक्षीकृतत्वात् । सहामरैः त्रैलोक्यनिर्वाहकगीर्वाणैः सहितमपि तथा कर्तुं शक्यं । तदधिपतेर्निजतनुजेनैव निगृहीतत्वात् । भरतानुजः रामानुजानुजः । रामचतुर्थभागइत्यर्थः । रामचतुर्थभागोद्धरणेप्यशक्तः कथं रामेण योद्धुं शक्नोतीति भावः । अयोध्याकाण्डे पञ्चपञ्चाशे—"सीतामादाय गच्छ त्वमग्रतो भरताग्रज" इति वचनं बहुव्रीह्योक्तं । भुजाभ्यामित्यनेन हिमवदादयो द्वाभ्यामेवोद्धर्तुं शक्यं । अयं तु विंशतिभुजैरपि न शक्यत इति सूच्यते । रिपूणामप्रकम्प्योपीत्यनुवादात् सपरिकरेणापि रावणेन न शक्यमित्यपि सिद्धं । कथं तर्हि हनुमतोद्धृत इत्यत्राह—संख्य इति । दुर्हृदयैर्नोद्धर्तुं शक्य इत्यर्थः । अतएव वक्ष्यति—वायुसूनोः सुहृत्त्वेनेति । अनेन हिमवदादिभ्योपि संख्ये पतितस्य लक्ष्मणशरीरस्य गरीयस्त्वोक्ता ॥ ११० ॥ कुतोस्येतादृशी गरीयस्त्वेत्यत्राह—शक्त्येति ॥ ब्राह्मया ब्रह्मसंबन्धिन्या । शक्त्या । स्तनान्तरे वक्षसि सौमि-

ति० विह्वलन्तं विकलंभवन्तं । राजा रावणः । तरसा बलेन । लक्ष्मणंभुजाभ्यांजग्राह । इन्द्रजिद्बद्धयोरपिपुनरुत्थानदर्शनादिदानीमपिपुनरुज्जीवनभयेनगृहीत्वासमुद्रेप्रक्षेपणीयः । तत्रगतेरामोसहायोनङ्क्ष्यत्येवेत्याशयेनायमारंभः । शि० शक्तिमानपिसमाहत इत्यनेन तस्यमर्यादापालकत्वंध्वनितं ॥ १०९ ॥ स० भुजाभ्यां एकैकपार्श्ववृत्तिदशकैकत्वविवक्षयाभुजाभ्यामित्युक्तिः । अन्यथाद्वाभ्यामुद्धरणाशक्तस्तनुयादेवसमग्रैर्भुजैर्यत्नमितितेपिवक्तव्याभवेयुः । तदव्यापारणेचनतस्याशाविच्छेदःस्यात् । यथोक्तमन्यत्र 'स्वबाहुभिर्नेतुमसुंसमैच्छत्' 'बलात्स्वदोर्भिःपरिगृह्यचाखिलैः' इतिच ॥ ११० ॥ ति० कुतस्त्राह—शक्त्येति । अमोघया ब्रह्मदत्तया स्तनान्तरे आहतःसौमित्रिः विष्णोरमीमांस्यं निस्संशयविष्णुभागत्ववन्तं इयत्तयाचिन्तयितुमशक्यंवा । विष्णोर्भागमात्मानं प्रत्यनुस्मरत् अन्वस्मरत् । नहिस्वीयंस्वंहिनस्तीत्याशयेनब्रह्मशक्तिमूलापत्राणार्थंभगवत्तेजोंशएवाहमस्मीतिध्यातवान् । नटवदङ्गीकृतमनुष्यत्वस्येतरेषांदृढप्रतीत्यर्थं । परंनसर्वदातथाध्यानं । एवंचब्रह्मभावनयालक्ष्मणेनस्वशरीरस्यगरीयस्त्वमापादितमित्युक्तंभवति । ती० ब्राह्मया ब्रह्मदत्तया । ताडनानन्तरं स्वं आत्मानं । विष्णोः सर्वव्यापकस्य । अचिन्त्यं इयत्तयाचिन्तितुमशक्यं । भागमंशं प्रत्यनुस्मरत । तद्विपत्परिहारार्थंभगवन्तंस्वमूलकारणंविष्णुमस्मरदित्यर्थः । अन्यथासर्वदैतादृशस्मरणेविद्यमानेसतिसर्वदाऽनुवर्तमानामनुष्यबुद्धिर्बाध्येत । तस्यांचबाधितायांतयासाध्यंरावणसंहारादिरूपंकार्यं नशक्येतेत्यभिप्रायः । एतेन स्वकीयांशस्मरणेन हेतुनालक्ष्मणेन स्वशरीरस्यगरीयस्त्वमुपात्तमित्युक्तंभवति । स० विष्णोः श्रीनारायणस्य अमीमांस्यौ साकल्ये-

[पा०] १ ग. ज. वानरराक्षसानां. ख. घ.—छ. झ. ञ. ट. संयतिवानराणां. २ क.—ङ. छ. झ. ञ. ट. शक्तिर्भुजान्तरं. ३ च. छ. ञ. सन्पपातभूमौसरघु. ङ. झ. ट. सज्जज्वालभूमौसरघु. ४ च. ज. सुरासुरैः. ५ झ. नशक्यो. ६ झ. ट. समीमांस्यभागं. ङ. भागममीमांस्यं.

ततो दानवदर्पघ्नं सौमित्रिं देवकण्टकः ॥ तं पीडयित्वा बाहुभ्यामप्रभुर्लङ्घनेऽभवत् ॥
[1]अथैवं वैष्णवं भागं मानुषं देहमास्थितम् ॥ ११२ ॥
[2]अथ वायुसुतः क्रुद्धो रावणं समभिद्रवत् ॥ आजघानोरसि क्रुद्धो वज्रकल्पेन मुष्टिना ॥ ११३ ॥
तेन मुष्टिप्रहारेण रावणो राक्षसेश्वरः ॥ जानुभ्यामपतद्भूमौ चचाल च पपात च ॥
आस्यैः सनेत्रै[3]श्रवणैर्ववाम रुधिरं बहु ॥ ११४ ॥
विघूर्णमानो निश्चेष्टो रथोपस्थ उपाविशत् ॥ विसंज्ञो मूर्च्छितश्चासीन्न च स्थानं समालभत् ॥११५॥
विसंज्ञं रावणं दृष्ट्वा समरे भीमविक्रमम् ॥ ऋषयो वा[4]नराः सर्वे नेदुर्देवाः सवासवाः ॥ ११६ ॥
हनुमानपि तेजस्वी लक्ष्मणं रावणार्दितम् ॥ अनयद्राघवाभ्याशं बाहुभ्यां परिगृह्य तम् ॥ ११७ ॥
वायुसूनोः सुहृत्त्वेन भक्त्या परमया च सः ॥ शत्रूणामप्रकम्प्योपि लघुत्वमगमत्कपेः ॥ ११८ ॥

त्रिस्ताडितः सन् विष्णोर्भागं अंशभूतं अचिन्त्यं ईदृक्तया इयत्तया च चिन्तयितुमशक्यं । स्वमात्मानं स्वस्वरूपं, " स्वात्माप्येनं विगर्हते " इति तथा प्रयोगात् । स्वात्मांश इति गुरुव्यवहाराच्च । प्रत्यनुस्मरत् स्मृतवान् । स्वस्वरूपस्मरणातिरिक्तव्यापाराकरणोक्त्या स्वाभाविकमेवास्येदं गुरुत्वमित्युक्तं । यत्तु स्वकीयांशस्मरणेन हेतुना लक्ष्मणेन स्वशरीरस्य गरीयस्त्वं संपादितमित्यनेनोक्तमिति । तन्न । अपदार्थत्वादवाक्यार्थत्वाच्च । स्वरूपस्मरणस्य गरीयस्त्वं प्रति कारणताग्राहकप्रमाणाभावाच्च । यदपि विपत्परिहारार्थं भगवन्तं स्वमूलकारणं विष्णुमस्मरदित्यर्थ इति तदपि न । स्वस्यैव विष्णुरूपत्वेन विपत्परिहारान्तराभावात् । ननु मनुष्यभावना क्रियमाणा विरुध्येत यदि स्वतोगौरवं भजेत, अतो विष्णुस्मरणमिति चेन्न । मानसभावनाया अपि लौकिकैरज्ञातत्वेन एवमपि मनुष्यभावनाया अनुपायात् । अतः अपर्यनुयोज्यवस्तुस्वभावेनैव भक्ताभक्तेषु गरीयस्तागरीयस्ते । अतएवाऽचिन्त्यमित्युक्तं ॥ १११ ॥ वस्तुस्वरूपस्यैवंविधत्वात्तोलयितुमशक्तोभवदित्युपसंहरति—तत इत्यादिसार्धश्लोकएकान्वयः ॥ यतः स्वाभाविकमेव गरीयस्त्वं ततो हेतोः । लङ्घने उद्धरणे । अप्रभुः असमर्थः । अथ रणे पतनानन्तरं देवकण्टकः रावणः । मानुषंदेहमास्थितं दानवदर्पघ्नं वैष्णवं भागं सौमित्रिं । भुजाभ्यां पीडयित्वा । ततः वैष्णवभागरूपत्वाद्धेतोः लङ्घने अप्रभुरभवदित्यन्वयः । अत्रापि विशेषणसामर्थ्याद्वस्तुस्वरूपकृतमेवाकम्प्यत्वमित्युक्तं । ननु च कथमंशसंभवः विष्णुस्वरूपस्य निरवयवत्वात् । सत्यं । स्वरूपेण नांशत्वमुच्यते, किंतु गुणाविर्भावतारतम्यात् । "गुणैः षड्भिस्त्वेतैः प्रथमतरमूर्तिस्तव बभौ ततस्तिस्रस्तेषां त्रियुगयुगलैर्हे त्रिभिरभूत् । व्यवस्थायां चैषां ननु वरद साविष्कृतिवशाद्भवान्सर्वत्रैव त्वगणितमहामङ्गलगुणः" इत्यभियुक्तैरुक्तत्वात् । मानुषरूपत्वं चास्य मानुषसमानाकृतिकत्वं ॥ ११२–११३ ॥ जानुभ्य रथभूमावपतत् । अथ चचाल । ततः पपात अशयिष्ट । दशभिरास्यै रुधिरं ववाम । सनेत्रश्रवणैरित्यनेन नेत्रेभ्यः श्रवणेभ्यश्च रुधिरं ववामेत्युच्यते ॥ ११४ ॥ किंचित्कालं विघूर्णमानः भ्रमन् । पुनर्निश्चेष्टः सन् रथोपस्थे रथमध्ये । उपाविशत् स्थितः । ततो मूर्च्छितः अतएव विसंज्ञः संज्ञाशून्यश्चासीत् । पुनः संज्ञां लब्ध्वापि स्थानं स्थितिं । नालभन् नालभत । चचालेत्यर्थः ॥ ११५ ॥ नेदुः हर्षेणेति शेषः ॥ ११६ ॥ अभ्याशं समीपं ॥ ११७ ॥ ननु पूर्वं

नचिन्तयितुमशक्यौभागौ सव्यापसव्यभागौयस्मिन्सतं । आत्मानंमूलरूपंशेषं । प्रत्यनुस्मरत् अस्मरत् । यथोक्तमन्यत्र "सस्मारूपंनिजमेवलक्ष्मणः" इतिस्वस्मरणमात्रस्येयत्कार्यपर्याप्तत्वादितरव्याख्यानममूलत्वादुपेक्ष्यं ॥ १११ ॥ स० ततःक्रुद्धः लक्ष्मणाकर्षणतोतिक्रुद्धः । क्रुद्धः पूर्वमारभ्यकोपी ॥ ११३ ॥ ति० नेदुः संतोषादितिशेषः । सासुराः रावणस्यदेववदसुरेष्वपि क्लेशकरत्वेनतेषामपिवैरित्वात् ॥ ११६ ॥ ति० राघवाभ्याशमानयदित्युक्तं कथमेवंसुग्रहत्वंलक्ष्मणस्येत्यत्राह—वायुसूनोरिति । सुहृत्त्वेन सखित्वेन परमभक्त्याचलक्ष्मणःशत्रूणामप्रकंप्येपि वायुसूनोर्लघुत्वमगमत् । शत्रूण मित्यनेन लक्ष्मणोद्धरणसमयेरावणस्यानुचरैःसाहाय्यंकृतमितिगम्यते । इदंचभक्तमात्रसुग्रहत्वंभगवतोभगवदवताराणांचस्वभावसि द्धमेवेतिबोध्यं । एवंच रामलक्ष्मणयो-

[पा०] १ इदमर्धं झ. पुस्तकादिषुनदृश्यते. २ झ. ञ. ट. ततःक्रुद्धोवायुसुतः. ३ ङ. झ. ट. श्रवणैःपतात. ४ ख. च. ज. वानरास्सिद्धाः. ५ झ. ञ. ट. श्चसासुराः.

तं समुत्सृज्य सा शक्तिः सौमित्रिं युधि दुर्जयम् ॥ रावणस्य रथे तस्मिन्स्थानं पुनरुपागता ॥११९॥
आश्वस्तश्च विशल्यश्च लक्ष्मणः शत्रुसूदनः ॥ विष्णोर्भागममीमांस्यमात्मानं प्रत्यनुस्मरन् ॥ १२० ॥
रावणोपि महातेजाः प्राप्य संज्ञां महाहवे ॥ आददे निशितान्बाणाञ्जग्राह च महद्धनुः ॥ १२१ ॥
निपातितमहावीरां द्रवन्तीं वानरीं चमूम् ॥ राघवस्तु रणे दृष्ट्वा रावणं समभिद्रवत् ॥ १२२ ॥
अथैनमुपसंगम्य हनुमान्वाक्यमब्रवीत् ॥ मम पृष्ठं समारुह्य राक्षसं शास्तुमर्हसि ॥ १२३ ॥
विष्णुर्यथा गरुत्मन्तं बलवन्तं समाहितः ॥ तच्छ्रुत्वा राघवो वाक्यं वायुपुत्रेण भाषितम् ॥
आरुरोह महाशूरो बलवन्तं महाकपिम् ॥ १२४ ॥
रथस्थं रावणं संख्ये ददर्श मनुजाधिपः ॥ १२५ ॥
तमालोक्य महातेजाः प्रदुद्राव स राघवः ॥ वैरोचनमिव क्रुद्धो विष्णुरभ्युद्यतायुधः ॥ १२६ ॥
ज्याशब्दमकरोत्तीव्रं वज्रनिष्पेषनिस्स्वनम् ॥ गिरा गम्भीरया रामो राक्षसेन्द्रमुवाच ह ॥ १२७ ॥
तिष्ठतिष्ठ मम त्वं हि कृत्वा विप्रियमीदृशम् ॥ क्व नु राक्षसशार्दूल गतो मोक्षमवाप्स्यसि ॥१२८॥
यदीन्द्रवैवस्वतभास्करान्वा स्वयम्भुवैश्वानरशंकरान्वा ॥
गमिष्यसि त्वं दश वा दिशोऽथवा तथापि मे नाद्य गतो विमोक्ष्यसे ॥ १२९ ॥

हिमवानित्यादिना लक्ष्मणस्याकम्प्यत्वमुक्तं तादृशस्य कपिना रामसमीपप्रापणं कथमित्याशङ्क्य विरोधं परिहरति—वायुसूनोरिति ॥ सुहृत्त्वेन शोभनहृदयत्वेन । अनुकूलहृदयत्वेनेत्यर्थः । हृदयानुकूल्यमेवालं भक्तिस्त्वधिकेत्याह—भक्त्या परमया चेति । चशब्दोन्वाचये । सः लक्ष्मणः । शत्रूणां रावणस्य तत्परिकराणां चेत्यर्थः । अप्रकम्प्योपि कम्पितुमशक्योपि । कपेः कपेरपि । हनुमत एकस्य लघुत्वमगमत् लघुत्वमकरोत् । अनेन लघुत्वस्य बुद्धिपूर्वकत्वमुक्तं । शत्रुमित्रयोर्दुष्प्रापत्वसुप्रापत्वे स्वरूपप्रयुक्ते अस्येति भावः । मूर्च्छितस्यापि लक्ष्मणस्य ज्ञानशक्तिप्रतिपादनेन तत्र तत्र राघवयोरज्ञानाशक्तिप्रत्यायकानि वचनानि मानुषवेषनिर्वहणपराणीति मन्तव्यानि ॥ ११८ ॥ दुर्जयमिति हेतुगर्भं । तस्य दुर्जयस्वरूपत्वाच्छक्तिस्तं त्यक्त्वा गतेति भावः । एतच्छ्लोकानन्तरमाश्वस्त इति श्लोकः । ततो रावणोपीति श्लोकः पठनीयः ॥११९॥ आश्वस्तः लब्धसंज्ञः । विशल्यः प्ररूढव्रणमुखः । अभवदिति शेषः । अकाण्डे शक्तिनिर्गमाश्वासनविशल्यत्वेषु को हेतुरत आह—विष्णोरिति । विरोधिप्रत्यनीकस्वभावत्वादिति भावः । अमीमांस्यं अचिन्त्यं । अनुस्मरन्नित्यनेन साधनानुष्ठानं किमपि न कृतवानित्युक्तं ॥ १२०—१२१ ॥ द्रवन्तीमिति । रावणस्य बाणसंधानदर्शनादिति भावः ॥ १२२ ॥ अर्हसीत्यनन्तरमितिकरणं द्रष्टव्यं ॥ १२३ ॥ विष्णुर्यथेति सार्धश्लोक एकान्वयः ॥ वायुपुत्रेण भाषितं तद्वाक्यं श्रुत्वा समाहितः सन् विष्णुर्गरुत्मन्तं यथा तथा महाकपिं हनुमन्तमारुरोहेति योजना ॥१२४॥ रथस्थमित्यर्धमेकं वाक्यं ॥ १२५ ॥ तमालोक्येत्यनुवादः अव्यवहितपूर्वकालद्योतनार्थः । अभ्युद्यतायुधः क्रुद्धो राघवः विष्णुर्वैरोचनं बलिमिव । प्रदुद्राव । साग्रहगमनमात्रे दृष्टान्तः ॥ १२६ ॥ वज्रनिष्पेषः स्फूर्जथुः । "स्फूर्जथुर्वज्रनिष्पेषः" इत्यमरः ॥१२७॥ ईदृशं लक्ष्मणप्रहाररूपं सीताहरणरूपं वा । मोक्षं मत्त इति शेषः ॥ १२८ ॥ इन्द्रादीन्वा स्वयंभ्वादी-

रज्ञानाशक्तिमत्त्वतात्पर्यतयाभासमानानिवचनानिमानुषवेषनिर्वहणमात्रपराणीतिबोध्यं । तदुक्तंभागवते—"मर्त्यावतारस्त्विहमर्त्यशिक्षणंरक्षोवधायैवनकेवलंविभोः । कुतोन्यथास्यूरमतःस्वआत्मन्सीताकृतानिव्यसनानीश्वरस्य"इति । मर्त्यशिक्षणं तत्फलकमित्यर्थः । आत्मनीश्वरस्येत्यनेन लाघवगौरवप्राप्त्योरविरोधउक्तः । **स०** वायुसूनोःसुहृत्त्वेन अनिमित्तोपकर्तृत्वेनकपेः हनुमद्विषयिण्यापरमयाभक्त्याच ॥ ११८ ॥ **ति०** पुनर्विष्णोर्भागमात्मानंस्मरन् आश्वस्तः प्राप्ताश्वासेन्द्रियग्रामः । विशल्योनीरुक्सर्वगात्रः ।

[**पा०**] १ झ. निर्जितं. २ क.—ट. वानराणांमहाचमूं. ३ ख.—च. झ. रावणं. ४ क. ख. ङ.—ट. गरुत्मन्तमारुह्यामरवैरिणं. ५ क. वायुपुत्रप्रभाषितं. ६ ङ. झ. ट. अथारुरोहसहसाहनूमन्तंमहाकपिं. ग. घ. ज. आरोहत्सहसाशूरो. ७ ग. ङ. झ. ट. सरावणं. ८ क. ख. ङ.—ट. निर्भरं. ९ ध. गतोमत्तोविमोक्ष्यसे. ङ. झ. ट. गत्वामोक्षं.

यश्चैव शक्त्याऽभिहतस्त्वयाऽद्य इच्छन्विषादं सहसाऽभ्युपेतः ॥
स एव रक्षोगणराज मृत्युः सपुत्रदारस्य तवाद्य युद्धे ॥ १३० ॥
एतेन चात्यद्भुतदर्शनानि शरैर्जनस्थानकृतालयानि ॥
चतुर्दशान्यात्तवरायुधानि रक्षस्सहस्राणि निषूदितानि ॥ १३१ ॥
राघवस्य वचः श्रुत्वा राक्षसेन्द्रो महाकपिम् ॥ वायुपुत्रं महावीर्यं वहन्तं राघवं रणे ॥
[रोषेण महताऽऽविष्टः पूर्ववैरमनुस्मरन्] ॥ आजघान शरैस्तीक्ष्णैः कालानलशिखोपमैः ॥ १३२ ॥
राक्षसेनाहवे तस्य ताडितस्यापि सायकैः ॥ स्वभावतेजोयुक्तस्य भूयस्तेजोऽभ्यवर्धत ॥ १३३ ॥
ततो रामो महातेजा रावणेन कृतव्रणम् ॥ दृष्ट्वा प्लवगशार्दूलं कोपस्य वशमेयिवान् ॥ १३४ ॥
तस्याभिचक्रम्य रथं सचक्रं साश्वध्वजच्छत्रमहापताकम् ॥
ससारथिं साशनिशूलखड्गं रामः प्रचिच्छेद शरैः सुपुङ्खैः ॥ १३५ ॥
अथेन्द्रशत्रुं तरसा जघान बाणेन वज्राशनिसन्निभेन ॥
भुजान्तरे व्यूढसुजातरूपे वज्रेण मेरुं भगवानिवेन्द्रः ॥ १३६ ॥
यो वज्रपाताशनिसन्निपातान्न चुक्षुभे नापि चचाल राजा ॥
स रामबाणाभिहतो भृशार्तश्चचाल चापं च मुमोच वीरः ॥ १३७ ॥

न्वा यदि गमिष्यसि यद्यपि गमिष्यसि । तथापि अद्य मत्समीपं गतस्त्वं । मे मत्तः । न विमोक्ष्यसे । दश वा दिशो वेत्यत्र एको वाकारश्चार्थः ॥ १२९ ॥ अद्य य एष त्वया शक्त्याभिहतः स एषः तव विषादमिच्छन्सन् सपुत्रदारस्य तव मृत्युः सन् सहसा अभ्युपेतः अभ्युपागतप्रायः । अचिरादागमिष्यतीत्यर्थः । यद्वा अभेदेनोच्यते । यः शक्त्याभिहतः स एवाहमागतवानस्मि । लक्ष्मणं प्राहरमिति मा गा गर्वमिति भावः ॥ १३० ॥ लक्ष्मणेनाप्रहृतः कथं त्वया प्रहृतः स्यामित्याशङ्क्य स्वपराक्रमविशेषं दर्शयति—एतेनेति ॥ एतच्छब्दः सन्निहितपरः एषोरमीत्यादिप्रयोगात् अयं जन इति प्रयोगाच्च । मयेत्यर्थः । मृत्युशब्दापेक्षया वा एतेनेत्युक्तिः । चतुर्दशानि । चतुर्दशशब्दादर्शआद्यचि टिलोपे कृते जसि रूपं । यद्वा एतेनेति स्वाभेदेन लक्ष्मणो निर्दिश्यते ॥ १३१ ॥ राघवस्येत्याद्यर्धत्रयमेकं वाक्यं । वहन्तमिति । आत्मानं प्रहृत्य पुनरपि रामं वहतीति क्रोधादिति भावः ॥ १३२ ॥ स्वभावतेजः स्वाभाविकतेजः ॥ १३३ ॥ एयिवान् प्राप्तः ॥ १३४ ॥ अभिचक्रम्य पौनःपुन्येन समीपं गत्वा ॥ १३५ ॥ वज्राशनिसन्निभेनेति । बाणस्य वज्रसाम्यमुच्यते । वज्रेण मेरुं भगवानिवेन्द्र इति प्रहर्तृ रामस्येन्द्रसाम्यमित्यपुनरुक्तिः । भगवान् वीर्यवान् । " भगः श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु " इत्यमरः ॥ १३६ ॥ यः पुरा । वज्रपातयुक्ताशनिसन्निपातादिति मध्यमपदलोपिसमासः । वज्रं इन्द्रायुधं । अशनिः औत्पातिकः । न चुक्षुभे नार्तिं प्राप्तः । नापि चचाल नार्तिनिमित्तं चलनं प्राप्तः । राजा अन्यूनराजभावश्च स्थितः । सः रामबाणाभिहतः । भृशार्त-

आसीदितिशेषः । स० विष्णोर्भागमिति । व्याख्यातमिदं ॥ १२० ॥ ति० एवंपरमकोपेहेतुमाह—यइति । अद्यत्वयायुद्धंगच्छन्नसौलक्ष्मणःत्वयाशक्त्यानिहतःताडितःसन्सहसाविषादंगतः । अतोऽभ्युपेत्यप्रतिज्ञाय । सएषोहंतदुःखशान्तयेसपुत्रपौत्रस्यतेसंप्रत्ये मृत्युर्भविष्यामीतिशेषः । स० एषलक्ष्मणः । सः सीतापहारः । एषः लक्ष्मणविषादः । हेरक्षोगणराज सपुत्रपौत्रस्यतवअद्यमृत्युः भविष्यति ॥ १३० ॥ स० पूर्ववैरं अक्षक्षपणस्वताडनादिजनितं ॥ १३२ ॥ स० स्वभावतेजोयुक्तस्येत्यनेन वराद्युक्तिर्लोकानुसारेणेतिसूच्यते ॥ १३३ ॥ शि० कृतव्रणं व्रणायकृतःप्रयत्नोयस्मिंस्तं प्लवगशार्दूलंदृष्ट्वा क्रोधस्यप्रातीतिककोपस्यवशमिव एयिवान् । वशशब्दआचारक्विबन्तप्रकृतिककर्तृक्विबन्तः । किंच क्रोधस्य क्रोधवतः वशंकान्ति एयिवान् कोपवत्सदृशकान्तिमानभवदित्यर्थः

[पा०] १ झ. ञ. ट. यश्चैष. २ क. घ. ङ. च. झ. ञ. ट. गच्छन्विषादं. ३ ख. ग. घ. च. झ. ञ. ट. सएष. ४ ङ. झ. ञ. ट. सपुत्रपौत्रस्य. ५ ङ. झ. ट. महाबलः. ६ इदमर्धं क. ख. ङ.—ट. पाठेषुदृश्यते. ७ क.—घ. च.—झ. ट. संकम्य. ८ ङ. झ. शितैःशराग्रैः.

तं विह्वलन्तं प्रसमीक्ष्य रामः समाददे दीप्तमथार्धचन्द्रम् ॥
तेनार्कवर्णं सहसा किरीटं चिच्छेद रक्षोधिपतेर्महात्मा ॥ १३८ ॥
तं निर्विषाशीविषसन्निकाशं शान्तार्चिषं सूर्यमिवाप्रकाशम् ॥
गतश्रियं कृत्तकिरीटकूटमुवाच रामो युधि राक्षसेन्द्रम् ॥ १३९ ॥
कृतं त्वया कर्म महत्सुभीमं हतप्रवीरश्च कृतस्त्वयाहम् ॥
तस्मात्परिश्रान्त इव व्यवस्य न त्वां शरैर्मृत्युवशं नयामि ॥ १४० ॥
गच्छानुजानामि रणार्दितस्त्वं प्रविश्य रात्रिंचरराज लङ्काम् ॥
आश्वास्य निर्याहि रथी च धन्वी तदा बलं द्रक्ष्यसि मे रथस्थः ॥ १४१ ॥
स एवमुक्तो हतदर्पहर्षो निकृत्तचापः स हताश्वसूतः ॥
शरार्दितः कृत्तमहाकिरीटो विवेश लङ्कां सहसा स राजा ॥ १४२ ॥
तस्मिन्प्रविष्टे रजनीचरेन्द्रे महाबले दानवदेवशत्रौ ॥
हरीन्विशल्यान्सह लक्ष्मणेन चकार रामः परमाहवाग्रे ॥ १४३ ॥

भृशमार्तः क्षुब्धः । चचाल । वीरोपि चापं मुमोच । स्वस्य स्वरक्ष्यत्वान्वयं त्यक्तवान् रामैकरक्ष्यत्वद्योतनाय ॥ १३७ ॥ विह्वलन्तं मूर्च्छितं । प्रसमीक्ष्य तस्यानन्यशरण्यत्वमवलोक्य । अर्धचन्द्रं अर्धचन्द्राकाराग्रं बाणं । आददे । तेन मुकुटं चिच्छेद । मानभङ्गमकरोदित्यर्थः । महात्मा महामनाः । दयालुरित्यर्थः । आभ्यांश्लोकाभ्यां भगवद्रक्षणे निमित्तं स्वयत्ननिवृत्तिरेवेत्युक्तं ॥ १३८ ॥ तं त्यक्तचापं । अतएव निर्विषाशीविषसन्निकाशं निर्विषसर्पतुल्यं । अप्रकाशं निस्तेजस्कं । अतएव शान्तार्चिषं शान्तकिरणं सूर्यमिव स्थितं । कृत्तकिरीटकूटं छिन्नकिरीटसमूहं । "मायानिश्चलयत्रेषु कैतवानृतराशिषु । अयोघने शैलशृङ्गे सीराङ्गे कूटमस्त्रियां" इत्यमरः । अतएव गतश्रियं निष्प्रभं । उवाच ॥ १३९ ॥ महत् अनितरदुष्करं । सुभीमं कर्म युद्धं कृतं । किं चाहं हतलक्ष्मणादिप्रवीरश्च कृतोस्मि । तस्मात् अनेकवीरपतनावधिकरणकरणात् । त्वं परिश्रान्तः आयुधधारणेपि श्रान्त इति व्यवस्य निश्चित्य । त्वां मृत्युवशं मृत्योरधीनतां । नयामि । चिररणपरिश्रान्तकृन्तनकृतापवादापनोदाय संप्रति भवतः प्राणापहरणकर्मणो विरमामीत्यर्थः ॥ १४० ॥ रिपौ पुरो विलसति कथं गच्छेयमित्यत्राह—अनुजानामीति । रणार्दितः युद्धे श्रान्तः । रात्रिंचरराजकूटयोधिन्निति सापहासोक्तिः । आश्वास्य विश्रम्य । रथी धन्वी च सन्निर्याहि । स त्वं तदा तादृशं मे बलं रथस्थ इत्युपलक्षणं, धानुष्कश्च सन् द्रक्ष्यसीत्यन्वयः ॥ १४१ ॥ स इति । अत्र क्रियाभेदात्तच्छब्दत्रयमिति न तद्वैयर्थ्यं । सहसा मुकुटभङ्गकृतलज्जयेति भावः ॥ १४२ ॥ प्रविष्टे लङ्कामिति शेषः । दानवदेवशत्रावित्यनेन रावणनिर्गमो देवदानवहर्षहेतुरिति सूच्यते । सह लक्ष्मणेनेति । लक्ष्मणस्य पूर्वमेव विशल्यत्वेप्यादरात्पुनःकरणं । परमाहवाग्र इत्यनेन विशल्यकरणं विना सुग्रीवादीनां हरीणामन्यत्रा-

॥ १३४ ॥ स० सुभीमंकर्मसमरेत्वयाकृतं । अहंहतप्रवीरः हताः हतप्रायाःप्रवीराः नीलाद्यायस्यसतथाकृतः । यद्वा त्वयानिमित्तभूतेन अहं–हताःप्रवीरास्तावकाःयेनसतथाकृतइतिवा । एतेनैकलापराधेनबहूनांघातोजातइतिसूच्यते । सुभीमकर्मकर्तृत्वात्प्रहस्तादीनांसहायभूतानामभावाच्चपरिश्रान्तइतिव्यवस्य निश्चित्य त्वांनमृत्युवशंनयामि । किरीटत्रोटनेनत्वयापिशिरःकर्तनसामर्थ्यंममास्तीतिज्ञातमेवेतिभावः ॥ १४० ॥ स० इतोरणात् रणमण्डलात् । प्रयाहि । जानामि अनुजानामि । उपसर्गाश्चधातुलीनार्थद्योतकाइत्युपपद्यते अनुजानामीति । रथी सहायातानेकरथवान् । सधन्वीत्यप्येवमेव । सत्वं धन्वीतिवा । प्रेक्ष्यसि प्रेक्षिष्यसि

[पा०] १ ट. झ. ट. प्रयाहिजानामि. २ झ. ब. ट. सधन्वी. ३ क. घ.—ट. प्रेक्ष्यसि. ४ ग. रणार्दितः.

तस्मिन्प्रभिन्ने त्रिदशेन्द्रशत्रौ सुरासुरा भूतगणा दिशश्च ॥
ससागराः सर्षिमहोरगाश्च तथैव भूम्यम्बुचराश्च हृष्टाः ॥ १४४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

षष्टितमः सर्गः ॥ ६० ॥

श्रीरामपराभूतभीतेनरावणेन सभायांमन्त्रिमध्ये स्वस्यनानाशापप्राप्तिनिवेदनेनशोचनपूर्वकं राक्षसान्प्रति कुंभकर्णप्रबोधननियोजनम् ॥ १ ॥ राक्षसैर्महताप्रयासेन कुंभकर्णप्रबोधनम् ॥ २ ॥ राक्षसैर्विनिवेदितनिखिलवृत्तान्तेनतेन रावणाज्ञयातद्दर्शनायातिविपुलनिजशरीरावलोकनजभयविद्रुतकपिकुलेनसता राजमार्गेनिर्गमनम् ॥ ३ ॥

स प्रविश्य पुरीं लङ्कां रामबाणभयार्दितः ॥ भग्नदर्पस्तदा राजा बभूव व्यथितेन्द्रियः ॥ १ ॥
मातङ्ग इव सिंहेन गरुडेनेव पन्नगः ॥ अभिभूतोऽभवद्राजा राघवेण महात्मना ॥ २ ॥
ब्रह्मदण्डप्रकाशानां विद्युत्सदृशवर्चसाम् ॥ सरत्नाघवबाणानां विव्यथे राक्षसेश्वरः ॥ ३ ॥
स काञ्चनमयं दिव्यमाश्रित्य परमासनम् ॥ विप्रेक्षमाणो रक्षांसि रावणो वाक्यमब्रवीत् ॥ ४ ॥
सर्वं तत्खलु मे मोघं यत्तप्तं परमं तपः ॥ यत्समानो महेन्द्रेण मानुषेणास्मि निर्जितः ॥ ५ ॥
इदं तद्ब्रह्मणो घोरं वाक्यं मामभ्युपस्थितम् ॥ मानुषेभ्यो विजानीहि भयं त्वमिति तत्तथा ॥ ६ ॥
देवदानवगन्धर्वैर्यक्षराक्षसपन्नगैः ॥ अवध्यत्वं मया प्राप्तं मानुषेभ्यो न याचितम् ॥ ७ ॥
विदितं मानुषं मन्ये रामं दशरथात्मजम् ॥ इक्ष्वाकुकुलनाथेन अनरण्येन यत्पुरा ॥ ८ ॥

नयनासंभवः सूच्यते ॥ १४३ ॥ पूर्वसूचितं देवादिहर्षं प्रपञ्चयति—तस्मिन्निति ॥ प्रभिन्ने पराजिते । दिशः दिक्पालाः । सागराः सागरवासिनः । अम्बुचराः सागरभिन्नाम्बुचराः । हृष्टाः बभूवुरितिशेषः । षष्ठ्यां रावणमुकुटभङ्गः ॥ १४४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनषष्टितमः सर्गः ॥ ५९ ॥

अथ कुम्भकर्णप्रबोधनं षष्टौ—स प्रविश्येत्यादि ॥ रामबाणभयार्दितः किमिदानीमपि रामबाणाः पतेयुरिति भयपीडितः । व्यथितेन्द्रियः दुःखितमनस्कः ॥ १ ॥ मनोव्यथामुपपादयितुं तद्धेतुं सदृष्टान्तमनुवदति—मातङ्ग इवेति ॥ महात्मना महास्वभावेन । बलवतेत्यर्थः ॥ २ ॥ ब्रह्मदण्डेति । ब्रह्मदण्डः ब्रह्मशापः । सर्वनिग्रहणक्षमो वसिष्ठदण्डो वा ब्रह्मास्त्रं वा । युगान्तकालसमुत्थितोग्रिवर्णो धूमकेतुरित्येके । तत्प्रकाशानां बाणानामिति "अधीगर्थदयेशां कर्मणि" इति षष्ठी ॥ ३-४ ॥ मे मया । यत्तप्तस्तप्तं तत् सर्वं मोघं जातमिति शेषः ॥ ५ ॥ ब्रह्मवाक्यं तु फलितमित्याह—इदमिति ॥ त्वं मानुषेभ्यो भयं विजानीहीति यत् ब्रह्मणो घोरं वाक्यं तदिदं मामभि मां प्रति । उपस्थितं मयि फलितमित्यर्थः । यतस्तत् ब्रह्मवाक्यं । तथा । नतु मोघं भविष्यतीत्यर्थः ॥ ६ ॥ प्राप्तं याचित्वा प्राप्तं । मानुषेभ्योऽवध्यत्वं नैव याचितमित्यर्थः ॥ ७ ॥ विदितमित्यादिसार्धश्लोकद्वयमेकान्वयं । यस्त्वामित्यत्र तु आमिति छेदः । आमित्यङ्गीकारे । यस्तु पुरुषस्त्वां संग्रामे निहनिष्यति सः मद्वंशे उत्पत्स्यते । आं निश्चितं । इत्येवंप्रकारेण इक्ष्वाकुकुलनाथेन अनरण्येन यत् यस्मात् । पुरा विदितं प्रतिज्ञातं । "विदितौ ज्ञातविश्रुतौ" इति

॥ १४१ ॥ ति० अयंरावणपराभवः तन्मासीयशुक्लषष्ठ्यांसायंकाले । स० भूम्यंबुचराः भूमिचराः अंबुचराः मनुष्यादयोयादांसिच । हृष्टाः । सर्वोपद्रवकर्तृपराभवस्यसर्वापेक्षितत्वादितिभावः ॥ १४४ ॥ इत्येकोनषष्टितमःसर्गः ॥ ५९ ॥

स० महेन्द्रेणसमानः मानसहितः तेनाविमानितइत्यर्थकरणेऽर्थविशेषोलभ्यते ॥ ५ ॥ स० अनरण्येन तन्नामकेनराज्ञा ।

[पा०] १ घ. ङ. छ. झ. ञ. ट. प्रभग्ने. २ ग. रणार्दितः. ३ घ. ङ. झ. ट. सर्वमहोरगाश्च. ४ ङ. झ. ट. ब्रह्मदण्डप्रतीकानांवियच्चलितवर्चसां. ५ ङ. झ. मानुषेणविनिर्जितः. ६ ग. राक्षसकिंनरैः. ७ ङ.—ट. कुलजातेन.

उत्पत्स्यते हि मद्वंशे पुरुषो राक्षसाधम ॥ यस्त्वां सपुत्रं सामात्यं सबलं साश्वसारथिम् ॥
निहनिष्यति संग्रामे त्वां कुलाधम दुर्मते ॥ ९ ॥
शप्तोऽहं वेदवत्या च यदा सा धर्षिता पुरा ॥ सेयं सीता महाभागा जाता जनकनन्दिनी ॥ १० ॥
उमा नन्दीश्वरश्चापि रम्भा वरुणकन्यका ॥ यथोक्तास्तपसा प्राप्तं न मिथ्या ऋषिभाषितम् ॥ ११ ॥
एतदेवाभ्युपागम्य यत्नं कर्तुमिहार्हथ ॥ राक्षसाश्चापि तिष्ठन्तु चर्यागोपुरमूर्धसु ॥ १२ ॥
स चाप्रतिमगम्भीरो देवदानवदर्पहा ॥ ब्रह्मशापाभिभूतस्तु कुम्भकर्णो विबोध्यताम् ॥ १३ ॥
स पराजितमात्मानं प्रहस्तं च निषूदितम् ॥ ज्ञात्वा रक्षोबलं भीममादिदेश महाबलः ॥ १४ ॥
द्वारेषु यत्नः क्रियतां प्राकारश्चाधिरुह्यताम् ॥ निद्रावशसमाविष्टः कुम्भकर्णो विबोध्यताम् ॥ १५ ॥
सुखं स्वपिति निश्चिन्तः कालोपहतचेतनः ॥ नव षट् सप्त चाष्टौ च मासान्स्वपिति राक्षसः ॥ १६ ॥

नानार्थरत्नमाला । तस्मात् मानुषं रामं दशरथात्मजं दशरथपुत्रत्वेन जातं । मन्ये । राक्षसाधम कुलाधमेति जातितः कुलतश्च नीचत्वमुच्यते । दुःखातिरेकादनरण्योक्तपरुषानुवादः । अन्येतु त्वामिति द्विरुक्तिरनुस्मरणार्थेत्याहुः । अपरे त्वाग्रहातिशयेन द्विरुक्तिरिति । त्वां प्रत्युत्पत्स्यत इति द्वितीयत्वांशब्दान्वय इत्येके ॥ ८—९ ॥ किं चाहं पुरा वेदवत्या शप्तोस्मि । मत्कृते तव विनाशो भविष्यतीति । कदेत्यत्राह—यदेति । सा वेदवती । यदा धर्षिता बलात्कृता । तदा । अद्य तया किं क्रियते सीता ह्येतदुपद्रवमूलमित्यत्राह—सेयमिति । सा वेदवती स्वशापनिर्वाहार्थं सीता जाता ॥ १० ॥ उमादयश्चत्वारः तपसा तपःप्रभावेन । यथोक्ताः यथोक्तवन्तः । तथा प्राप्तं सिद्धं । ऋषिभाषितं न मिथ्या भवति हि । नन्दीश्वररम्भाशापावुत्तररामायणे प्रोक्तौ । उमावरुणकन्यकाशापौ चानेनैव सिद्धौ ॥ ११ ॥ एतत् शापस्वरूपं । अभ्युपागम्य ज्ञात्वा । इह प्रकृते शत्रुविजये कार्ये । यत्नं अवधानं । कर्तुमर्हथ । चर्याः गोपुरपार्श्वस्थभटसंचारप्रदेशाः ॥ १२ ॥ ब्रह्मशापाभिभूतः ब्रह्मशापकृतनिद्रापरवश इत्यर्थः ॥ १३ ॥ किमर्थं कुम्भकर्णो विबोध्यत इत्याशङ्क्य कविराह—स पराजितमिति ॥ आदिदेश कुम्भकर्णविबोधनार्थमिति शेषः ॥ १४ ॥ द्वारेषु अवान्तरद्वारेषु । यत्नः क्रियतां, प्राकारश्चाधिरुह्यतां । वानरानारोहार्थमिति भावः । निद्रावशसमाविष्टः निद्रावशेन शयानः । सद्यः कर्तव्यत्वाय पुनरुक्तिः ॥ १५ ॥ सुखमिति । दुःखिते चिन्ताकुले अनवाप्तकामे मयि जाग्रति सतीति शेषः । न केवलमिदानीमेव सर्वदाप्येवमेवेत्याह—नवेति ।

यत् यः प्रोक्तइतिशेषः ॥ ८ ॥ स० सबलं शारीरबलसहितं । त्वां अन्यांसेनांच । "खलइतिद्वावप्यदन्तावन्यपर्यायौ" इतिकौमुद्यादुक्तेः । आक्रोशाद्वा द्विरुक्तिः ॥ ९ ॥ स० यथा यतः सावेदवत्येवेयंसीता । तस्याःसीतात्वेनोत्पत्तेः रामायणएवस्पष्टमुक्तेः ॥१०॥ ती० उमाशापस्तु कैलासगिरिचलनवेलायां रावणतेस्त्रीनिमित्तंवधइत्येवंरूपइतिज्ञेयं । स० रंभानिमित्तोनलकूबरशापः । वरुणकन्यका पुञ्जकस्थली तन्निमित्तोब्रह्मशापः । यथोक्ताः कर्मणोवैवक्षिकादिलमभ्युपेत्य "आदिकर्मणि—" इतिक्तः । भावेक्तप्रत्ययान्तेनबहुव्रीहिर्वा । तत्तद्वचनानुगुणंफलंप्राप्तं । ऋषयोज्ञानिनः ॥ ११ ॥ स० ब्रह्मशापाभिभूतः ब्रह्मणा इन्द्रवाक्यश्रवणानन्तरंकुंभकर्णायशापोदत्तइतितेनाभिभूतः । "तस्मात्त्वमद्यप्रभृतिमृतकल्पःशयिष्यसे" इत्यत्रैवाग्रेव्यक्तं । नचतस्यवरादेव स्वापसिद्धेः शापोव्यर्थइतिवाच्यं । सरस्वत्यानुकूलंवाचयित्वाब्रह्मणिगतेसति देवैरहंवञ्चितइतिज्ञात्वा स्वच्छन्दत्वात्स्वापस्यनाहं तथाकरोमीतिनिश्चित्यपुनश्चकुंभकर्णेनप्रजाबाधेसतिकथितशापसार्थक्यसंभवात् । अभिभूतः तिरस्कृतः । यथोक्तमुत्तरकाण्डे "वरव्याजेनमोहोऽसौदीयतामितिप्रभ" इति ॥ १३ ॥ स० रक्षः कुंभकर्णाख्यं ॥ १४ ॥ शि० ननुसुप्तोजनोजागर्त्यवेतिस्वयं जागरिष्यतीत्यतआह—नवेति । नवचसप्तच षोडशेत्यर्थः । तेषांयेदश तेषामष्टौ निगरणे निस्सारणेसतीत्यर्थः । मासान् अवशिष्टषण्मासानित्यर्थः । राक्षसः कुंभकर्णः । मन्त्रंकृत्वास्वपिति अस्वपत् । अतःप्रसुप्तोऽयं इतोनवमेऽहनि जागरितेतिशेषः । तद्दिनएवस्वापावधिपूर्तिर्भवितेतितात्पर्यम् । अष्टिशब्दोभक्षणार्थकाशधातुप्रकृतिकक्तिन्नन्तः । "वर्तमानसामीप्ये" इतिभूतेलट् । अतएव "शयिताद्येषषण्मासानेकाहंजागरिष्यति" इतिषण्मासमात्रशयनप्रतिपादकवरदानवाक्येननविरोधः । वस्तुतस्तु नवाद्यन्य-

[पा०] १ ङ. झ. ट. यथोक्तास्तन्मयाप्राप्तं. २ ङ.—ट. एतदेवसमागम्य. ३ क.—ख. च.—झ. चाप्रतिमगांभीर्यो. ४ ग. झ. समरेजितमात्मानं. ५ क. ख. झ. ढ. कामोपहतचेतनः. ६ ट. नवसप्तदशाष्टौच.

कदाचिन्नवमासान् कदाचित् षण्मासान् कदाचित्सप्तमासान् कदाचिदष्टमासांश्चानियमेन स्वपितीत्यर्थः । अतएवोत्तरकाण्डे अविशेषेण वरप्रार्थना कुम्भकर्णेन क्रियते—" स्वप्तुं वर्षाण्यनेकानि देवदेव ममेप्सितं" इति । उत्तरत्र रामंप्रति विभीषणवचने—"शयिता ह्येष षण्मासानेकाहं जागरिष्यति " इति वचनं तु पक्षान्तराणामप्युपलक्षकं । अन्यूनाभिप्रायं वा । सप्तमासादिस्वापासंभवेपि षण्मासस्वापः संभवत्येव । "यद्वा, नवसप्तदशाष्टौ च मासान्स्वपिति राक्षसः " इति पाठः । दशाष्टौ दशमासहानौ सत्यां नवसप्तमासान् षण्मासानित्यर्थः । अष्टिरशनं नाश इति यावत् । नवसप्तमासाः षोडशमासाः तेषु दशमासलोपे हि षण्मासा एवावशिष्यन्ते । अथवा षडहैर्मासान्तसंपाद्याहरुत्सृजन्ति षडहैर्हि मासान्तसंपश्यन्त्यर्धमासैर्मासान्तसंपाद्याहरुत्सृजन्त्यर्धमासैर्हि मासान्तसंपश्यन्त्यमावास्यया मासान्संपाद्याहरुत्सृजन्त्यमावास्यया हि मासान्संपश्यन्ति पौर्णमास्या मासान्तसंपाद्याहरुत्सृजन्ति पौर्णमास्या हि मासान्तसंपश्यन्तीत्युक्तमासविकल्पेषु षडहानामपि मासत्वश्रवणात्तत्प्रकारेण नवषडित्युक्तत्रिंशन्मासा अपि अशीत्युत्तरशतदिनतया अमावास्यया पौर्णमास्या वा परिगणनेन षण्मासा एव संपद्यन्त इति न कश्चिद्विरोधः । तथाहि अस्ति किंचित् उत्सर्गिणामयनं नाम सत्रं गवामयनस्य विकृतिः । तत्र प्रकृतौ द्वादशमासेष्वनुष्ठेयानां सोमयागविशेषाणां त्रिंशतोनुष्ठेयत्वान्न किंचिदहरुत्सृष्टुं शक्यते । तद्विकृतावत्र प्रतिमासमेकस्मिन्नहनि सोमयागपरित्यागो विधीयते । तत्र कतममहस्त्यज्यतामित्यपेक्षायामुच्यते—अमावास्यया मासान्तसंपाद्याहरुत्सृजन्त्यमावास्यया हि मासान्तसंपश्यन्ति पौर्णमास्या मासान्तसंपाद्याहरुत्सृजन्ति पौर्णमास्या हि मासान्तसंपश्यन्तीति । अस्यार्थः अमावास्यायामनुष्ठेयेन यागेन पूर्वमासं परिसमाप्य उत्तरस्यादिभूतमहस्त्यज्यतामिति। पौर्णमास्यामनुष्ठेयेन यागेन पूर्वमासं परिसमाप्य उत्तरस्यादिभूतमहस्त्यज्यतामिति च । अस्मिन्विधाने अर्थवादे प्रसिद्धिवाचिना हिशब्देन अमावास्याया मासान्तत्वं । उत्तरवाक्ये पौर्णमास्या मासान्तत्वं च श्रुतं । एवं अर्धमासैर्मासान्तसंपाद्याहरुत्सृजन्त्यर्धमासैर्हि-मासान्संपश्यन्ति षडहैर्मासान्संपाद्याहरुत्सृजन्ति षडहैर्हि मासान्तसंपश्यन्तीत्यत्रापि पक्षात्मकः षडहात्मकोपि मासोस्तीति हिशब्देन दर्शितं । ननु च षडहैरिति बहुवचननिर्देशात् पञ्चभिः षडहैरिति व्याख्यानेन त्रिंशद्दिनात्मको मास एवात्र कथ्यत इति चेन्न । अर्धमासैरित्यत्रापि तथात्वापत्तेः । तदानीं बह्वर्धमासानां मासत्वस्वीकारे पक्षत्रयस्यापि मासत्वप्रसङ्गः । तत्र पक्षा वै मासा इत्युक्तरीत्या एकैकस्य पक्षस्य मासत्वस्वीकारे अत्राप्येकैकस्यैव षडहस्य मासत्वस्वीकारो युक्तः । पूर्वकल्पेष्विवात्रापि प्रसिद्धिवाचकहिशब्दप्रयोगात् । अन्यथा उत्तरानुवाके षडहैर्मासान्तसंपाद्य यत्सप्तममहस्तस्मिन्नुत्सृजेयुरिति वाक्यविरोधः स्यात् । सप्तमत्वं ह्यत्र विशिष्यते । षडहैर्मा-

---

तमान्मासान्स्वपितीत्यर्थः । वरदानवाक्येनतुनविरोधः । तस्यषण्मासाभ्यन्तरमात्रेप्रबोधाभावपरत्वात् । तदुत्तरंस्वाभाविकनिद्रायानिषेधाभावाच्च । एवमेकाहंजागरिष्यतीतिवाक्यस्यापिस्वापानन्तरकालिकैकदिनेनिश्शेषस्वापाभावपरत्वात् । तदुत्तरदिनेस्वाभाविकजागरणस्यननिषेधः । यद्दिनादारभ्यस्वपितितद्दिनादारभ्यषण्मासान्नजागर्ति । यद्दिनेजागर्ति तदुत्तरदिनेनस्वपितीतितात्पर्यम् । अतएव "स्वप्तुंवर्षाण्यनेकानिदेवदेवममेप्सितं" इतिवक्ष्यमाणोत्तरकाण्डीयतद्वरप्रार्थनस्यननैरर्थक्यं । अतएव "तत्रनिद्रांसमाविष्टःकुंभकर्णोमहाबलः । बहून्यब्दसहस्राणिशयनान्नचबुध्यते" इतिरामंप्रत्यगस्त्यवचनंसंगच्छते । स० तत्स्वापप्रकारमाह—नवेत्यादिना । अत्रेदंबोध्यं । कुंभकर्णः षट्सप्ताष्टनवमासान्स्वपिति । उपलक्षणमेतत् । अनेकाब्दसहस्राण्यपिकदाचित्स्वपितीतिग्राह्यं । प्रबोधस्तुषण्मासादर्वाक्नैवभवति । तदूर्ध्वंभवंश्चननियतः । कदाचित्सप्तमासानन्तरंकदाचिदष्टमासानन्तरमित्येवमादितोबोध्यं । कदाप्रबोधेपिजागरणमेकस्मिन्नेवदिनेद्वितीयदिनेपुनश्चस्वापइति । एतेनैतानिवचनानिसमाहितानि । तथाहि । "शयिताह्येषषण्मासानेकाहंजागरिष्यति" इत्यत्रैवब्रह्मवाक्यं । "स्वप्तुंवर्षाण्यनेकानिदेवदेवममेप्सितं" इतिवरप्रार्थनावाक्यं । तत्रैवोत्तरेऽगस्त्यवचनं "तत्रनिद्रांसमाविष्टःकुंभकर्णोमहाबलः । बहून्यब्दसहस्राणिशयानोनचबुध्यते" इति । मन्त्रं रामेणसह युद्धकरणेआलोचनां । इतः रामस्यलङ्कानिरोधदिवसात्पूर्वनवमेऽहनिसुप्तः । कुंभकर्णस्यापदिनएवविभीषणस्यरामंप्रतिगमनं । ततस्त्रिदिनंसमुद्रप्रार्थना । पञ्चदिनंसेतुबन्धः । पञ्चमेसायंकालेपरपारप्राप्तिः । नवमेलङ्कासमीपगमनमितिविवेकः । यत्तुनागोजिभट्टेन एतदुत्तरं 'मन्त्रंकृत्वाप्रसुप्तोयमितस्तुनवमेऽहनि' इत्यर्धपठ्यते तत्, यच्च तस्य इतः युद्धप्रारंभदिनात्प्राक्तनेनवमेऽहनीतिव्याख्यानं तदसंगतमेव । "अयंतेसुमहान्कालःशयानस्यमहाबल" इत्यनेनषण्मासादधिकस्यसांप्रतनिद्रायांप्रतीतेः अहश्शब्दोलक्षणयामासपरोवा' इतिभाषितं तत्रमन्त्रकालेइदानींसमुत्थितः "कुंभकर्णःप्रचुक्रोधवचनंचेदमब्रवीत्" इत्यादिनाकुंभकर्णस्यजाग्रत्त्ववा. रा. २०७.

मन्त्रयित्वा प्रसुप्तोऽयमितस्तु नवमेऽहनि ॥ तं तु बोधयत क्षिप्रं कुम्भकर्णं महाबलम् ॥ १७ ॥

सानित्यत्र मासशब्दस्य मासैकदेशलक्षणाङ्गीकारे सएव दोषः । तस्मात् षडहात्मकोपि मासोस्तीति सिद्धम् । तमिमं श्रौतं षडहमासत्वपक्षमनुस्मरन्तः षण्मासानेव वदन्ति " नव षट् सप्त चाष्टौ च मासान्स्वपिति राक्षसः " इति ॥ १६ ॥ ननु सुप्तः कथं बोधयितुं शक्य इत्याशङ्क्य इदानीमेव स्वापारम्भात्सुप्रबोधोयमित्याशयेनाह—मन्त्रयित्वेति ॥ अत्र केचित् एकाहं जागरिष्यतीति कुम्भकर्णस्य स्वापोत्सर्जनानन्तरमेकस्मिन्दिन एव प्रबोधनियमस्योक्तत्वान्मन्त्रकरणदिनसमनन्तरदिन एव कुम्भकर्णस्य स्वापारम्भः । आजगाममुहूर्तेनेत्यनेन विभीषणागमनमपि मन्त्रदिनएव, " विभीषणेनाशु जगाम संगमं " इत्यनेन तदागमनानन्तरमेव तस्य स्वीकारः । तद्दिवसप्रभृति दिवसप्रत्यये समुद्रप्रार्थनार्थं रामस्य दर्भशयनं । तदनन्तरं पञ्चदिनेषु सेतुबन्धः । सेतुबन्धपूर्तिदिवस एव सायंकाले सुवेलारोहणं । तस्यामेव रात्रौ सुग्रीवरावणयोर्द्वन्द्वयुद्धं । समनन्तरदिने तुमुलयुद्धं । तत्रैव रात्रौ नागपाशबन्धमोक्षौ । धूम्राक्षवज्रदंष्ट्राकम्पनवधश्च । अनन्तरदिने प्रहस्तवधः रावणमुकुटभङ्गश्च । एवं दिवसगणनोपपत्तिरिति वदन्ति । तच्चिन्त्यं । सुवेलारोहणरात्रौ पूर्णचन्द्रोदयवर्णनेन सुवेलारोहणदिनं पौर्णमासीति सिद्धं । रावणमरणदिनं चामावास्येति स्फुटं । एवंच त्वदुक्तरीत्या द्वितीयायामेव मुकुटभङ्गे रावणस्य दर्शपर्यन्तं विलम्ब्य युद्धकरणं चिन्त्यं । वस्तुतस्तु इतः प्रसक्ताद्युद्धारम्भदिनादित्यर्थः । तदिनमपहाय तत्पूर्वदिनापेक्षया नवमेऽहनि तत्पूर्वदिनकृतमन्त्रः प्रसुप्तः । तथाच पौर्णमास्यां सुवेलारोहणं प्रथमायां युद्धारम्भः । तत्पूर्वं नवमदिनं सप्तमी । तस्यां कुम्भकर्णःसुप्तः । रामस्य दर्भशयनारम्भश्च । षष्ठ्यां कुम्भकर्णादिभिर्मन्त्रविचारः । तस्यामेव विभीषणनिर्गम इति । इत्थं चाहुः । सीताहरणात्पूर्वं त्रयोदशसंवत्सरा गताः । चतुर्दशवर्षारम्भे सीता हृता पम्पातीरे वसन्तवर्णनात् । आषाढे वालिवधः । तदनन्तरं वर्षर्तुवर्णनात् । आश्वयुजे सीतान्वेषणसमुत्साहनमिति स्फुटं । स्वयंप्रभाबिले बहुकालो गतः । फाल्गुनशुद्धत्रयोदश्यां हनुमतो लङ्काप्रवेशः । " पुष्पिताग्रान्वसन्तादौ ददर्श विविधान्द्रुमान् " इति वसन्तादिभूतफाल्गुनमासतासूचकवृक्षाग्रपुष्पितत्वोक्त्या तथाप्रतीतेः । " स्थितः ककुद्मानिव तीक्ष्णशृङ्गः " इति श्लोके प्रतिपूर्णशृङ्ग इति पदेन प्रतिपूर्णशृङ्गवच्चन्द्रवर्णनस्य तस्यामेवसंभवात् । यस्मिन्दिने रात्रौ लङ्कायां सीतान्वेषणं तदनन्तरदिन एव प्रातर्लङ्कादाहः । " अवश्यमेव द्रष्टव्या मया लङ्का निशाक्षये " इत्युक्तत्वात् । अनन्तरं तस्मिन्नेव दिने अविलम्बेन प्रत्यागमनं । " यदि वा मन्यसे वीर वसैकाहमरिन्दम " इति सीतया पृष्टे, " एवमाश्वास्य वैदेहीं हनुमान्मारुतात्मजः । गमनाय मतिं चक्रे " इत्युक्तेः । उषसि लङ्कादाहानन्तरं तस्मिन्नेव दिने मध्याह्नात्पूर्वमेवाङ्गदादिभिर्मधुवनविधमनपूर्वकं रामप्राप्तिः । अरिष्टपर्वतारोहणे तद्वर्णनव्याजेन " बोध्यमानमिवप्रीत्यादिवाकरकरैःसुखैः " इति सूर्योदयसमयमुक्त्वा अनन्तरमस्तमयानुक्तेः । तस्मिन्नेव दिवसे चतुर्दशीशेषयुक्तपौर्णमासीयुते मध्याह्ने युद्धयात्रा । " अस्मिन्मुहूर्तेसुग्रीव प्रयाणमभिरोचये । युक्तो मुहूर्तो विजयः प्राप्तो मध्यं दिवाकरः " इत्युक्तेः । यस्मिन्दिनेभिजिति प्रस्थानं तत्परेद्युरेव समुद्रतीरे सेनानिवेशः । " सा स्म याति दिवारात्रं महती हरिवाहिनी " इत्यारभ्य, मुहूर्तं कापि नासतेत्युक्तेः । यत्र दिने लङ्कादाहस्तत्रैव दिवसे सभायां मन्त्रिभिः सह किंचिद्विचारमुक्त्वा, " विसर्जयित्वा तान्सर्वान्प्रविवेश स्वकं गृहं " इत्यन्तेन लङ्कादाहदिनवृत्तान्तं परिसमाप्य, " ततः प्रत्युषसि प्राप्ते " इत्यादिना अनन्तरदिने उषःकाले विभीषणोपदेशं द्वितीयमुक्त्वा ततो मन्त्रविचाराय रावणे कुम्भकर्णविभीषणादिभिः

स्यप्रतीतेः साप्रतनिद्रायाःषण्मासादधिक्त्ववर्णनं मूलविरुद्धमिव तन्मूलस्वव्याख्यानविरुद्धं ॥ उक्तरीत्यानवदिनीसंभवात् । लक्षणयाऽहश्शब्दोमासपरः । इतिनिरर्थकलक्षणाश्रयणं । नच "अद्यतेसुमहान्कालःशयानस्य" इत्यग्रिमग्रन्थविरोधादित्यमास्थीयतइतिवाच्यं । दुःखसमयत्वेनात्पकालस्यापिबाहुल्योक्तिःप्रथमस्कन्धेभीमंप्रति "गताःसमाधुनामासाः" इति धर्मवचनव्याख्यातात्पर्येमासशब्देनाहान्युच्यन्ते । "अहस्सुमासशब्दोक्तेयत्रचिन्तायुतंव्रजेत् । एवंसंवत्सराद्यंचविपरीतेविपर्ययः" इतिनाममहोदधावित्युक्तेः । अथवाल्पदिन्यावेदनेपुनःस्वापमुपेयात्कुंभकर्णइतिभियाभ्राता महान्कालइत्युदाजहारेतिसंभवात् ॥ १६—१७ ॥

[पा०] १ मन्त्रकृत्वा.

सभां प्रविष्टे विभीषणस्य तृतीयमुपदेशमुक्त्वा, "इत्युक्त्वा परुषं वाक्यं रावणं रावणानुजः । आजगाम मुहूर्तेन यत्र रामः सलक्ष्मणः" इत्यविच्छेदेन लङ्कादाहदिनानन्तरदिन एव समुद्रतीरे रामसकाशागमवर्णनेन च द्वितीयदिने रामेण समुद्रतीरं प्राप्तमित्यवगम्यते । समुद्रतीरप्राप्तिदिनं च शिष्टफाल्गुनपौर्णमासी । अतएव, "उत्तराफल्गुनी ह्यद्ये"ति चतुर्थसर्गश्लोके प्रस्थानदिनस्य पौर्णमासीयुक्तत्ववचनमप्यविरुद्धं । समुद्रतीरप्राप्तिदिनस्य पौर्णमासीयुक्तत्वं च, "चण्डनक्रग्रहं घोरं क्षपादौ दिवसक्षये । चन्द्रोदयसमुद्भूतं प्रतिचन्द्रसमाकुलं" इति, संध्यासमय एव चन्द्रोदयप्रतिपादनात्सिद्धं । सेनानिवेशवृत्तान्तो विभीषणागमनवृत्तान्तश्च एकदिनभाव्यपि वाचः क्रमवर्तित्वात्क्रमेणोक्तः । प्रथमायां रामस्य दर्भशयनारम्भः कुम्भकर्णस्वापारम्भश्च । चतुर्थीपञ्चमीषष्ठीसप्तम्यष्टमीषु सेतुबन्धः । अष्टम्यां रात्रौ सुवेलारोहणं । यत्तु सुवेले, "पूर्णचन्द्रप्रदीपा च निशा समभिवर्तत" इति वचनं तत्पूर्णचन्द्र इव प्रदीपा यस्यां निशायामित्येवमर्थकं व्याख्येयं । सुग्रीवसेनायां भेर्यादीनामिव प्रदीपादीनामपि संभवात् । सुवेलारोहणानन्तरदिने दिवा लङ्कानिरोधः । "तां रात्रिमुषितास्तत्र सुवेले हरिपुङ्गवाः । लङ्कायां ददृशुर्वीरा वनान्युपवनानि च" इत्युपक्रम्य युद्धवर्णनात् । तत्रैव प्रथमदिनयुद्धे रात्रौ नागास्त्रबन्धतद्विमोक्षादि । "युध्यतामेव तेषां तु तथा वानररक्षसाम् । रविरस्तं गतो रात्रिः प्रवृत्ता प्राणहारिणी" इत्यारभ्य, "सा बभूव निशा घोरा हरिराक्षसहारिणी । ततस्ते राक्षसास्तत्र तस्मिंस्तमसि दारुणे ॥ राममेवाभ्यवर्तन्त" । "तं भीमवेगा हरयो नाराचैः क्षतविग्रहाः । अन्धकारे न ददृशुः"इत्यादिभिस्तामेव रात्रिं प्रत्यभिज्ञाप्य, "निरन्तरशरीरौ तौ भ्रातरौ रामलक्ष्मणौ । क्रुद्धेनेन्द्रजिता वीरौ पन्नगैः शरतां गतैः" इत्यादिप्रतिपादनात् । तत्रैव निशीथे वानरहर्षनादकुपितेन रावणेन प्रेषितयोर्धूम्राक्षवज्रदंष्ट्रयोर्युद्धं तद्वधश्च । तयोर्युद्धे दिवा ज्ञापकाभावात् वानरहर्षनन्तर्यश्रवणाच्च । रात्रिशेषेण तयोर्वधानन्तरं द्वितीयदिने अकम्पनयुद्धं । तन्निर्गमनवेलायां—"अभवत्सुदिने चापि दुर्दिनं रूक्षमारुतं" इति दिवा ज्ञापकसत्त्वात् । अकम्पनवधानन्तरमेव रावणस्य पूर्वाह्ण एव पुरीपर्यटनं । अकम्पनवधानन्तरं प्रहस्तयुद्धमविलम्बेन तस्मिन्नेव दिने मध्याह्ने । ननु, "अन्योन्यमभिसंरब्धा ग्रहाश्च न चकाशिरे" इति ग्रहाणां प्रकाशप्रतिषेधेन ग्रहस्तयुद्धं रात्राविति चेन्न । उत्तरत्र दिवायुद्धेषु दिवादर्शनायोग्यानामप्यर्थानां प्रतिपादनात् । यथा, रावणयुद्धे । "प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियाम् । समाक्रम्य बुधस्तस्थौ प्रजानामशुभावहः" इत्यादि । नच सर्वरात्रमवर्ततेति पाठानुरोधाद्रात्रावेव तत्प्रतिपादनमिति वक्तुं शक्यं । तदपपाठत्वस्यान्ते वक्ष्यमाणत्वात् । तस्मिन्नेव द्वितीयदिने रावणपराजयकुम्भकर्णप्रबोधनकुम्भकर्णयुद्धानि । कालविशेषमसंकीर्त्यानन्तरमविच्छेदेन तदुक्तिपूर्वकमग्रिमकृत्ये ब्रह्मास्त्रबन्धनतद्विमोक्षरूपे कालविशेषकीर्तनात् । दृश्यते हि "सप्तषष्टिर्हताः कोट्यो वानराणां तरस्विनाम् । अहः पञ्चमशेषेण बलेन स्वयंभुवः" इति ॥ अत्र अहः पञ्चमशेषोनाम सायंकाल एव । "प्रातःसंगवमध्याह्नापराह्णाः सायमित्यमी । एकस्याहः पञ्च भागा विहिताः कालचिन्तकैः" इति वचनात् ॥ तस्यामेव द्वितीयायां रात्रौ ब्रह्मास्त्रविमोक्षानन्तरं पुनर्लङ्कानिरोधतद्दाहकुम्भनिकुम्भयूपाक्षशोणिताक्षप्रजंघाकम्पनमकराक्षवधाः । "ततोस्तंगत आदित्ये रात्रौ तस्मिन्निशामुखे । लङ्कामभिमुखाःसोल्का जग्मुस्ते प्लवगर्षभाः" इत्युक्तेः ॥ एवं परिपूर्णदिनद्वयेन मूलबलेन्द्रजिद्रावणव्यतिरिक्तेषु व्यपदिष्टराक्षसेषु हतेषु तृतीयदिनमारभ्य दिनत्रयेणेन्द्रजिद्युद्धं । "अहोरात्रैस्त्रिभिर्वीरः कथंचिद्विनिपातितः" इत्युक्तत्वात् । अथ षष्ठदिने मूलबलवधः । तस्मिन्दिने सायंकालमारभ्य दिवारात्रं रावणयुद्धं । सप्तमदिने रावणवधः । अथवा सप्तमदिने रावणयुद्धं । अष्टमदिने प्रातःकाले रावणवधः । "अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्दशीम् । कृत्वा निर्याह्यमावास्यां विजयाय बलैर्वृतः" इत्यादिसंदर्भस्योभयथापि योजयितुं शक्यत्वात् । पुच्छामावास्यायां रावणवध इति कृत्वा अमावास्यायां रावणवध इति प्रवादः । एवंसति "रामरावणयोर्युद्धं सप्तरात्रमवर्तत" इत्यादिपाठोपि सेनासहितरावणयुद्धापेक्षया संगच्छते । "मन्त्रयित्वा प्रसुप्तोयमितस्तु नवमेहनि"इति सकलकोशस्थितवचनं च संगच्छते । इतः अस्मादिनात् मम मुकुटभङ्गदिनादित्यर्थः । नवमेहनि एतद्दिनमपहाय एतत्पूर्वदिनापेक्षया नवमेहनि । मन्त्रयित्वा प्रसुप्तः । तत्पूर्वदिने

स तु संख्ये महाबाहुः ककुदः[1] सर्वरक्षसाम् ॥ वानराजपुत्रौ च क्षिप्रमेव वधिष्यति ॥ १८ ॥
एष केतुः परः संख्ये गुरुर्यो वै सर्वरक्षसाम् ॥ कुम्भकर्णः सदा शेते मूढो ग्राम्यसुखे रतः ॥ १९ ॥
रामेण हि निरस्तस्य संग्रामेष्विन्सुदारुणे ॥ भविष्यति न मे शोकः कुम्भकर्णे विबोधिते ॥ २० ॥
किं करिष्याम्यहं तेन शक्रतुल्यबलेन हि ॥ ईदृशे[2] व्यसने प्राप्ते यो न साह्याय कल्पते ॥ २१ ॥
ते तु तद्वचनं श्रुत्वा राक्षसेन्द्रस्य राक्षसाः ॥ जग्मुः परमसंभ्रान्ताः कुम्भकर्णनिवेशनम् ॥ २२ ॥
ते रावणसमादिष्टा मांसशोणितभोजनाः ॥ गन्धमाल्यांस्तथा भक्ष्यानादाय सहसा ययुः ॥ २३ ॥
तां प्रविश्य महाद्वारां सर्वतो योजनायताम् ॥ कुम्भकर्णगुहां रम्यां सर्वगन्धप्रवाहिनीम्[3] ॥ २४ ॥
कुम्भकर्णस्य निःश्वासादवधूता महाबलाः ॥ प्रतिष्ठमानाः कृच्छ्रेण यत्नात्प्रविविशुर्गुहाम् ॥२५॥
तां प्रविश्य गुहां रम्यां शुभां काञ्चनकुट्टिमाम्[4] ॥ ददृशुर्नैर्ऋतव्याघ्रं शयानं भीमदर्शनम्[5] ॥ २६ ॥
ते तु तं विकृतं सुप्तं विकीर्णमिव पर्वतम् ॥ कुम्भकर्णं महानिद्रं सहिताः प्रत्यबोधयन् ॥ २७ ॥
ऊर्ध्वरोमाञ्चिततनुं श्वसन्तमिव पन्नगम् ॥ त्रासयन्तं महाश्वासैः[6] शयानं भीमदर्शनम् ॥ २८ ॥

मन्त्रं कृत्वा तस्मिन् दिने प्रसुप्त इत्यर्थः । ननु हनुमतो लङ्काप्रवेशकालो दशममास इत्यवगम्यते । तथाहि सीतांप्रति रावणवचनं " द्वौ मासौ रक्षितव्यौ मे योऽवधिस्ते मया कृतः " इति । हनुमन्तं प्रति सीतावचनं च " द्वौ मासौ तेन मे कालोजीवितानुग्रहः कृतः । वर्तते दशमो मासो द्वौ तु शेषौ प्लवङ्गम " इत्यादि । अतः कथमुक्तप्रक्रियासंगतिरिति चेन् । मैवं "ऊर्ध्वं मासान्न जीवेयं" " मासादूर्ध्वं न जीविष्ये त्वया हीना नृपात्मज " इत्यादिवचनविरोधेन तादृशवचनस्य रावणाभिप्रायविषयत्वात् । रावणो हि सीतासान्त्वनाय तथोक्तवान् । सीता तु वर्तमानमासमात्रेण चतुर्दशवर्षपूर्तिं जानन्ती, मासादूर्ध्वं न जीविष्य इति संदिदेशेति सर्वं सुस्थम् ॥ १७ ॥ स तु अहमिव न शापग्रस्त इत्यर्थः । ककुदः प्रधानं । "प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोस्त्रियां " इत्यमरः ॥ १८—२० ॥ अकाले तत्प्रबोधनमनुचितमित्याह—किं करिष्यामीति ॥ साह्याय साहाय्याय ॥ २१ ॥ परमसंभ्रान्ताः कथमेनमकाले प्रबोधयिष्याम इति व्याकुलाः ॥ २२ ॥ त इति । प्रबोधशक्तिविवृद्ध्यर्थं मांसादिकं भुक्त्वा कुम्भकर्णस्य प्रबोधकालिकक्षुत्तापादिशान्तये गन्धमाल्यादिकं गृहीत्वा ययुरित्यर्थः ॥ २३ ॥ तामित्यादिश्लोकद्वयमेकान्वयं ॥ सर्वतः चतसृषु दिक्षु । सर्वगन्धप्रवाहिनीं कुम्भकर्णानुलिप्तचन्दनादिगन्धप्रवाहवतीं । कुम्भकर्णगुहां प्रविश्य निःश्वासादवधूताः सन्तः कृच्छ्रेण प्रतिष्ठमानाः अभिमुखं गच्छन्तः यत्नात्तां गुहां विविशुरिति योजना ॥ २४—२५ ॥ काञ्चनकुट्टिमां स्वर्णमयनिबद्धभूमिं ॥ २६ ॥ विकृतं निद्राकालिकविकारयुक्तं । विकीर्णं शिथिलं ॥ २७ ॥ ऊर्ध्वेत्यादिश्लोकत्रयमेकान्वयं ॥ ऊर्ध्वरोमाञ्चिततनुं ऊर्ध्वभूतरोम-

ति० निलयनपुंसककंककुदमिति ॥ १८ ॥ स० एवंखवचनंश्रुत्वाप्यतदुद्बोधनयत्नान्यातुधानान्किञ्चित्कुटिलकटाक्षःपारोक्ष्येणाह । तेन रामेण । घोरे इतरापरिहार्ये । व्यसनेप्राप्तेपि यःकोपिमेसाह्याय कुंभकर्णप्रबोधरूपकर्मणे नकल्पते तंकिंकरिष्यामि । ममतादृशेननप्रयोजनमितिभावः । निद्रान्तरायस्यनिषिद्धत्वात्त्यजोद्बोधनमित्यतोवाह—**किंकरिष्यामीति** । यः कोपितदितरः साह्यायनकल्पते अतःकिंकरिष्यामि । कुटुंबनाशेसंभावितेतद्रक्षणार्थं "अप्यकार्यशतंकृत्वा" इतिमानमनुसृत्यसुप्तमप्युद्बोधयिष्यामीतिभावः । यः स्वयमेवालोचनकालेसन्नपिसाह्यायनकल्पते तेनोत्तरत्रसर्वनाशेकिंकरिष्यामीतिवा ॥ २१ ॥ स० परमसंभ्रान्ताः अत्रावस्थानेरावणोननुकूलान्घातयति । तत्रगमनेचोत्थापनमेवदुश्शकं । कथंचित्तस्मिञ्जातेऽस्मज्जीवनमतिदुर्घटमितिभीतियुताः ॥ २२ ॥ ति० कुंभकर्णगुहां पातालवद्दैवनिर्मितंभूबिलमित्यर्थः । स० "योजनानांत्रिलक्षंहिकुंभकर्णोऽभ्यवर्धत । पूर्वं पश्चात्संचुकोचलङ्कायामुषितुंस्वयम्" इत्युक्तेरल्पेपिस्थलेवरतपोबलेननिवासस्त्रिलक्षयोजनीमितस्यापिकुंभकर्णस्येतिसर्वतोयोजनायतामितिनविरुद्धमितिज्ञेयम् ॥ २४ ॥

[पा०] १ झ. ककुदं. २ क.—घ. ईदृशेसंभ्रमेघोरे. ङ. च. झ. ट. ईदृशेव्यसनेघोरे. ३ च. छ. झ. ञ. ट. पुष्पगन्ध. घ. सर्वगन्धाधिवासितां. ४ ङ. ज. झ. ट. रत्नकाञ्चन. ५ ङ. च. झ. ञ, ट. भीमविक्रमं. ६ च. छ. ञ. महाकार्यशयानं. ङ. झ. ट. विनिश्वासैः.

भीमनासापुटं तं तु पातालविपुलाननम् ॥ [1]शय्यायां न्यस्तसर्वाङ्गं मेदोरुधिरगन्धिनम् ॥ २९ ॥
काञ्चनाङ्गदनद्धाङ्गं [2]किरीटिनमरिन्दमम् ॥ ददृशुर्नैर्ऋतव्याघ्रं कुम्भकर्णं महाबलम् ॥ ३० ॥
ततश्चक्रुर्महात्मानः [3]कुम्भकर्णाग्रतस्तदा ॥ [4]मांसानां मेरुसंकाशं राशिं परमतर्पणम् ॥ ३१ ॥
मृगाणां महिषाणां च वराहाणां च संचयान् ॥ चक्रुर्नैर्ऋतशार्दूला राशिमग्रस्य चाद्भुतम् ॥ ३२ ॥
ततः शोणितकुम्भांश्च [5]मद्यानि विविधानि च ॥ पुरस्तात्कुम्भकर्णस्य चक्रुस्त्रिदशशत्रवः ॥ ३३ ॥
लिलिपुश्च [6]परार्ध्येन चन्दनेन परंतपम् ॥ दिव्यैराच्छादयामासुर्माल्यैर्गन्धैः सुगन्धिभिः ॥ ३४ ॥
धूपं सुगन्धं ससृजुस्तुष्टुवुश्च परन्तपम् ॥ जलदा इव चोन्नेदुर्यातुधानास्ततस्ततः ॥ ३५ ॥
[7]शङ्खानापूरयामासुः शशाङ्कसदृशप्रभान् ॥ तुमुलं युगपच्चापि विनेदुश्चाप्यमर्षिताः ॥ ३६ ॥
नेदुरास्फोटयामासुश्चिक्षिपुस्ते निशाचराः ॥ कुम्भकर्णविबोधार्थं चक्रुस्ते विपुलं स्वनम् ॥ ३७ ॥

सशङ्खभेरीपणवप्रणादमास्फोटितक्ष्वेलितसिंहनादम् ॥
दिशो द्रवन्तस्त्रिदिवं किरन्तः श्रुत्वा विहङ्गाः सहसा निपेतुः ॥ ३८ ॥
यदा भृशार्तैर्निनदैर्महात्मा न कुम्भकर्णो बुबुधे प्रसुप्तः ॥
ततो मुसुण्ठीर्मुसलानि सर्वे रक्षोगणास्ते जगृहुर्गदाश्च ॥ ३९ ॥
तं शैलशृङ्गैर्मुसलैर्गदाभिर्[8]वृक्षैस्तलैर्मुद्गरमुष्टिभिश्च ॥
सुखप्रसुप्तं भुवि कुम्भकर्णं रक्षांस्युदग्राणि तदा निजघ्नुः ॥ ४० ॥

तस्य निश्श्वासवातेन कुम्भकर्णस्य रक्षसः ॥ [9]राक्षसा बलवन्तोपि स्थातुं नाशक्नुवन्पुरः ॥ ४१ ॥
[10]ततः परिहिता गाढं राक्षसा भीमविक्रमाः ॥ ४२ ॥
मृदङ्गपणवान्भेरीः शङ्खकुम्भगणांस्तदा ॥ दशराक्षससाहस्रा युगपत्पर्य वादयन् ॥ ४३ ॥

व्याप्ततनुं । भीमनासापुटं भयंकरनासारन्ध्रं । मेदोरुधिरेति । पीतावशिष्टेति शेषः ॥ २८–३० ॥ अग्र तश्चक्रुः पुरतश्चिक्षिपुरित्यर्थः । परमतर्पणं अत्यन्ततृप्तिकरं ॥ ३१ ॥ राशिं चक्रुः अग्रतो राशिं चक्रुरित्यर्थः ॥ ३२ ॥ मद्यानि मद्यकुम्भानित्यर्थः ॥ ३३ ॥ लिलिपुः लेपनं चक्रुः । परार्ध्येन श्लाघ्यगन्धेन । माल्यगन्धैः माल्यचन्दनैः ॥ ३४ ॥ ततस्ततः पुनःपुनरित्यर्थः ॥ ३५ ॥ तुमुलं निरन्तरं यथातथा । युगपद्विनेदुः अमर्षिताः महता प्रयत्नेनाप्यनुत्थानाज्जातक्रोधाः सन्तः । नेदुः ॥ ३६ ॥ आस्फोटयामासुः ताडयामासुः । चिक्षिपुः शरीरं कम्पयामासुः । कुम्भेति । इत्थं कुम्भकर्णविबोधार्थं विपुलं स्वनं चक्रुरिति संग्रहः ॥ ३७ ॥ आस्फोटितं बाहुताडनजन्यशब्दः । क्ष्वेलितशब्देन गर्जितमात्रमुच्यते । सिंहनादमित्येकवद्भावः । तद्विहङ्गाः श्रुत्वा भयेन सर्वा दिशो द्रवन्तः गच्छन्तः । तत्रापि भयनिवृत्त्यदर्शनात् त्रिदिवं आकाशं । किरन्तः विशन्तः । तत्रापि भयशान्तिमलभमानाः सहसा निपेतुः भूमौ निपतन्ति स्म ॥ ३८ ॥ भृशार्तैः अत्यन्तार्तिपूर्वकैः उच्चावचैरित्यर्थः । भृशं तैरिति पाठान्तरं । महात्मा महाशरीरः ततः तदा । मुसुण्ठी मुद्गरविशेषः ॥ ३९ ॥ गृहीत्वा प्रजघ्नुश्चेत्याह—तमिति ॥ ४० ॥ रक्षस इति विशेषणं निश्श्वासातिशयद्योतनाय ॥ ४१ ॥ तत इत्यर्धमेकं वाक्यं ॥ परिहिताः दृढीकृतपरिधानाः । आसन् । वक्ष्यमाणकार्ये सावधाना आसन्नित्यर्थः ॥ ४२ ॥ शङ्खकुम्भगणान् शङ्खकुम्भवाद्यगणान् । दशराक्षससाहस्राः दश राक्षससहस्राणि परिवारभूतानि येषां

स० त्रिदिवशत्रवः स्वर्गद्विषः नरकतमआदिगामिनः पापिनइतियावत् । तत्स्थदेवद्वेषिणइतिवा ॥ ३३ ॥

[पा०] १ ख. ङ. च. झ. शयनेन्यस्त. २ ङ. झ. ट. किरीटेनार्कवर्चसं. ३ झ. कुंभकर्णस्यचाग्रतः. ४ झ. ट. भूतानां. ५ झ. ट. मांसानि. ६ ठ. त्रिदिवशत्रवः. ७ ग. ससहस्रशः. ८ ख. झ. ट. शङ्खांश्चपूरयामासुः. ९ घ. च. छ. ञ. ट. भृशंतैः. १० झ. ट. गदाभिर्वृक्षस्थलेमुद्गर. ११ झ. राक्षसाःकुंभकर्णस्यस्थातुंशेकुर्नचाग्रतः. १२ ग. घ. ततोस्यपुरतोगाढं

नीलाञ्जनचयाकारास्ते तु तं प्रत्यबोधयन् ॥ अभिघ्नन्तो नदन्तश्च नैवं संविविदे तु सः ॥ ४४ ॥
यदा चैनं न शेकुस्ते प्रतिबोधयितुं तदा ॥ ततो गुरुतरं यत्नं दारुणं समुपाक्रमन् ॥ ४५ ॥
अश्वानुष्ट्रान्खरान्नागाञ्जघ्नुर्दण्डकशाङ्कुशैः ॥ भेरीशङ्खमृदङ्गांश्च सर्वप्राणैरवादयन् ॥ ४६ ॥
निजघ्नुश्चास्य गात्राणि महाकाष्ठकटङ्करैः ॥ मुद्गरैर्मुसलैश्चैव सर्वप्राणसमुद्यतैः ॥ ४७ ॥
तेन शब्देन महता लङ्का समभिपूरिता ॥ सपर्वतवना सर्वा सोपि नैव प्रबुध्यते ॥ ४८ ॥
ततः सहस्रं भेरीणां युगपत्समहन्यत ॥ मृष्टकाञ्चनकोणानामासक्तानां समन्ततः ॥ ४९ ॥
एवमप्यतिनिद्रस्तु यदा नैव प्रबुध्यते ॥ शापस्य वशमापन्नस्ततः क्रुद्धा निशाचराः ॥ ५० ॥
महाक्रोधसमाविष्टाः सर्वे भीमपराक्रमाः ॥ तद्रक्षो बोधयिष्यन्तश्चक्रुरन्ये पराक्रमम् ॥ ५१ ॥
अन्ये भेरीः समाजघ्नुरन्ये चक्रुर्महास्वनम् ॥ केशानन्ये प्रलुलुपुः कर्णावन्ये दशन्ति च ॥ ५२ ॥
उदकुम्भशतान्यन्ये समसिञ्चन्त कर्णयोः ॥ न कुम्भकर्णः पस्पन्दे महानिद्रावशं गतः ॥ ५३ ॥
अन्ये च बलिनस्तस्य कूटमुद्गरपाणयः ॥ मूर्ध्नि वक्षसि गात्रेषु पातयन्कूटमुद्गरान् ॥ ५४ ॥
रज्जुबन्धनबद्धाभिः शतघ्नीभिश्च सर्वतः ॥ वध्यमानो महाकायो न प्राबुध्यत राक्षसः ॥ ५५ ॥
वारणानां सहस्रं तु शरीरेऽस्य प्रधावितम् ॥ कुम्भकर्णस्ततो बुद्धः स्पर्शं परमबुध्यत ॥ ५६ ॥

स पात्यमानैर्गिरिशृङ्गवृक्षैरचिन्तयंस्तान्विपुलान्प्रहारान् ॥
निद्राक्षयात्क्षुद्भयपीडितश्च विजृम्भमाणः सहसोत्पपात ॥ ५७ ॥

ते तथोक्ताः ॥४३॥ ते राक्षसाः । अभिघ्नन्तो नदन्तश्च सन्तः तं प्रत्यबोधयन्नित्यनुवादः । प्रतिबोधनेपि स न संविविदे न बुबुधे । नीलाञ्जनचयाकारा इति परितः संचारित्वद्योतनायोक्तं ॥ ४४ ॥ गुरुतरं यत्नमुपाक्रमन् प्रबलं बोधनोपायमारेभिर इत्यर्थः ॥४५॥ तमेव यत्नं दर्शयति—अश्वानिति ॥ तस्योपरिधावनायेतिभावः । सर्वप्राणैः सर्वबलैः ॥ ४६ ॥ महाकाष्ठकटङ्करैः महाकाष्ठाग्रस्तंबैः । काष्ठाग्रस्थकशाभिरित्यर्थः । कटङ्करः स्तम्भभेद इति केचित् । सर्वप्राणसमुद्यतैः सर्वबलेन समुद्यतैः ॥४७॥ प्रबुध्यते प्राबुध्यत ॥ ४८ ॥ मृष्टकाञ्चनकोणानां मृष्टकाञ्चनं शोधितकाञ्चनं तन्निर्मिताः कोणाः वादनदण्डाः यासां ताः तथोक्ताः । आसक्तानां संहतानां ॥४९॥ शापस्य ब्रह्मशापस्य । क्रुद्धाः पूर्वमेव कुपिताः ॥ ५० ॥ पुनरपि महाक्रोधसमाविष्टाः अभवन् । पराक्रमं मुष्टिप्रहारादिकं ॥५१॥ महास्वनं महागर्जितं । प्रलुलुपुः लुप्तवन्तः । दशन्ति अदशन् ॥ ५२ ॥ उदकुम्भशतानि आदायेति शेषः ॥ ५३ ॥ कूटमुद्गरपाणयइत्यनेन तत्प्रहारपरिचयोलक्ष्यते । पातयन् अपातयन् ॥ ५४ ॥ बध्यन्ते एभिरिति बन्धनानि चर्मादीनि । रज्जवश्च बन्धनानि च तैर्बद्धाभिः । रज्जुबन्धनादिना दृढीकृताभिरित्यर्थः । शतघ्नीभिः गदाविशेषैः । वध्यमानः पीड्यमानः ॥ ५५ ॥ स्पर्शं परमबुध्यत वारणप्रधावनं केवलस्पर्शमबुध्यत । कीटादिस्पर्शोयमिति मन्यते स्म । बुद्धः विरतनिद्रः ॥ ५६ ॥ पात्यमानैः प्रबोधेप्युत्थानाय पुनः क्षिप्यमाणैः । क्षुद्भयपीडितः क्षुद्भयाभ्यां पीडितः । भयमत्राकालबोधनकृतं । क्षुद्रूपभयपीडित इति वा । विजृम्भमाणः गात्रभङ्गंकुर्वाणः । उत्पपात उदतिष्ठत्

स० प्रत्यबोधयन् प्रतिबोधयितुंयत्नंकृतवन्तः ॥ ४४ ॥ **स०** जघ्नुः अन्तर्णीतण्यर्थः । एतान्कुंभकर्णोपरिगमयामासुः । तंचदण्डादिभिर्जघ्नुः ॥ ४६॥ **ति०** महाकाष्ठानां स्थूणादीनां कटङ्करैः समूहैः । कटङ्कैरितिपाठः । कटङ्कटः स्तंभभेद इतितीर्थः ॥ ४७ ॥ **ती०** आसक्तानां राक्षसगृहीतानां । **स०** आसक्तानां केनापिपदार्थेनासंबद्धानां । तथाचेदेव नादविशेषः ॥ ४९ ॥

[पा०] १ क. च. झ. ट. कारंतुते. २ झ. ट. नचसंबुबुधेतदा. ३ ज. महाकाष्ठोत्कटैःकरैः. ४ ङ. च. छ. झ. ट. ततोभेरीसहस्रंतु. ५ ठ. मसक्तानां. ६ झ. ट. प्रबुध्यत. ७ ङ. च. झ. ट. ततःकोप. ८ ख. सिञ्चन्तस्तस्यकर्णयोः.

स नागभोगाचलशृङ्गकल्पौ विक्षिप्य बाहू गिरिशृङ्गसारौ ॥
विवृत्य वक्त्रं बडबामुखाभं निशाचरोसौ विकृतं जजृम्भे ॥ ५८ ॥
तस्य जाजृम्भमाणस्य वक्त्रं पातालसन्निभम् ॥ ददृशे मेरुशृङ्गाग्रे दिवाकर इवोदितः ॥ ५९ ॥
स जृम्भमाणोतिबलः प्रतिबुद्धो निशाचरः ॥ निश्वासश्वास्य संजज्ञे पर्वतादिव मारुतः ॥ ६० ॥
रूपमुत्तिष्ठतस्तस्य कुम्भकर्णस्य तद्बभौ ॥ तपान्ते सबलाकस्य मेघस्येव विवर्षतः ॥ ६१ ॥
तस्य दीप्ताग्निसदृशे विद्युत्सदृशवर्चसी ॥ ददृशाते महानेत्रे दीप्ताविव महाग्रहौ ॥ ६२ ॥
ततस्त्वदर्शयन्सर्वान्भक्ष्यांश्च विविधान्बहून् ॥ वराहान्महिषांश्चैव स बभक्ष महाबलः ॥ ६३ ॥
अर्दन्बुभुक्षितो मांसं शोणितं तृषितः पिबन् ॥ मेदःकुम्भांश्च मद्यं च पपौ शक्ररिपुस्तदा ॥ ६४ ॥
ततस्तृप्त इति ज्ञात्वा समुत्पेतुर्निशाचराः ॥ शिरोभिश्च प्रणम्यैनं सर्वतः पर्यवारयन् ॥ ६५ ॥
निद्राविशदनेत्रस्तु कलुषीकृतलोचनः ॥ चारयन्सर्वतो दृष्टिं तान्ददर्श निशाचरान् ॥ ६६ ॥
स सर्वान्सान्त्वयामास नैर्ऋतान्नैर्ऋतर्षभः ॥ बोधनाद्विस्मितश्चापि राक्षसानिदमब्रवीत् ॥ ६७ ॥
किमर्थमहमादृत्य भवद्भिः प्रतिबोधितः ॥ कच्चित्सुकुशलं राज्ञो भयवानेष वा न किम् ॥ ६८ ॥
अथवा ध्रुवमन्येभ्यो भयं परमुपस्थितम् ॥ यदर्थमेवं त्वरितैर्भवद्भिः प्रतिबोधितः ॥ ६९ ॥
अद्य राक्षसराजस्य भयमुत्पाटयाम्यहम् ॥ पातयिष्ये महेन्द्रं वा शातयिष्ये तथाऽनलम् ॥ ७० ॥

॥ ५७ ॥ विजृम्भमाणइत्युक्तं विवृणोति—स इति ॥ दैर्घ्ये नागभोगदृष्टान्तः । काठिन्ये अचलशृङ्गदृष्टान्तः । यद्वा पीनत्वे दृष्टान्तः । गिरिशृङ्गसारौ गिरिशृङ्गबलौ । " सारो बले स्थिरांशे च " इत्यमरः । विवृत्य व्यादाय । बडबा समुद्रमध्यवर्तिन्यश्वस्त्री । विकृतं भयंकरं यथा भवति तथा ॥ ५८ ॥ जाजृम्भमाणस्य । यङ्लुक्यात्मनेपदरुगागमाभावावार्षौ । मेरुशृङ्गाग्रे । मेरुरत्र सावर्णिमेरुः तदग्रस्यैव सूर्यसंबन्धसंभवात् । अत्र दिवाकरस्योदितत्वं महामेरोरुत्तरभागस्थपुर्यपेक्षया । यद्वा उदितः दृष्ट इत्यर्थः । गत्यर्थानां बुद्ध्यर्थत्वात् ॥ ५९ ॥ प्रतिबुद्धः अभूदिति शेषः । सम्यक् प्रबोधोत्र विवक्षितः ॥ ६० ॥ तस्य साभरणस्येत्यर्थः । अतः सबलाकस्येति नाधिकोपमा । विवर्षत इति नीलरूपातिशयोक्तिः ॥ ६१ ॥ विद्युत्सदृशवर्चसीइति निद्राविरामकालिकचाञ्चल्योक्तिः । महाग्रहौ शन्यङ्गारकाविति परपीडकत्वोक्तिः । दीप्ताग्निसदृशे इति क्रौर्यातिशयोक्तिः ॥ ६२ ॥ अदर्शयन् राक्षसा इति शेषः । सर्वान् सर्वविधान् । तदवान्तरभेदतो विविधान् । बहून्विपुलान् । वराहान् वराहविकारान् । बभक्ष भक्षयामास । बुभुक्षितो मांसमदन् बुभुक्षाशान्त्यर्थं मांसमदन्नित्यर्थः । तृषितः शोणितं पिबन् तृष्णाशान्त्यर्थं शोणितं पिबन्नित्यर्थः । पुनराप्यायनार्थं मेदःकुम्भान् मद्यं च पपौ । कुम्भपरिमितमेदांसीत्यर्थः ॥ ६३–६४ ॥ समुत्पेतुरितिपूर्वं कुम्भकर्णभयादन्तर्धायस्थिताः । इदानीं तृप्तत्वेन शान्तक्रोधत्वात् प्रकाशमाजग्मुरित्यर्थः ॥ ६५ ॥ निद्रया अविशदे अप्रसन्ने ईषदुन्मीलिते नेत्रे यस्य स तथोक्तः ॥ ६६ ॥ बोधनात् अप्रबोध्यबोधनात् ॥ ६७ ॥ राज्ञः रावणस्य सुकुशलं कच्चित् । एष राजा च भयवान्न किं भययुक्तो न भवति हि ॥ ६८ ॥ एवं संशय्य पुनर्निश्चिनोति—अथवेति ॥ तत्र हेतुमाह—यदर्थमिति । यदर्थं यद्भयनिवृत्त्यर्थं ॥ ६९ ॥ शातयिष्ये शातयिष्यामि छेत्स्यामीत्यर्थः । " शॢ शातने " इति धातोर्णिचि " शदेरगतौ तः " इति तादेशः ।

[पा०] १ ख. ङ. छ. झ. ञ. ट. जितवज्रसारौ. २ ङ. झ. ट. प्रबुद्धस्तु. ३ ङ.—ट. युगान्तेसर्वभूतानिकालस्येवदिधक्षतः. ४ ख. सहस्रकुंभसंपूर्णशोणितंतृषितःपिबन् । मदकुंगान्मयकुंभान्कुंभकर्णस्तदाऽपिबत्. ५ क. ख. ङ. च. छ. झ. ञ. ट. भयंवानेहकिंचन. ज. भयंवानेहविद्यते. ६ घ. महद्भयमुपस्थितं. ७ ङ. झ. ट. दारयिष्ये. ८ ङ. झ. ट. शीतयिष्ये. ख. शोषयिष्येऽथवा.

न ह्यल्पकारणे सुप्तं बोधयिष्यति मां गुरुः ॥ तदाख्यातार्थतत्त्वेन मत्प्रबोधनकारणम् ॥ ७१ ॥
एवं ब्रुवाणं संरब्धं कुम्भकर्णं महाबलम् ॥ यूपाक्षः सचिवो राज्ञः कृताञ्जलिरुवाच ह ॥ ७२ ॥
न नो दैवकृतं किंचिद्भयमस्ति कदाचन ॥ मानुषान्नो भयं राजंस्तुमुलं संप्रबाधते ॥ ७३ ॥
न दैत्यदानवेभ्यो वा भयमस्ति हि तादृशम् ॥ यादृशं मानुषं राजन्भयमस्मानुपस्थितम् ॥ ७४ ॥
वानरैः पर्वताकारैर्लङ्केयं परिवारिता ॥ सीताहरणसंतप्ताद्रामान्नस्तुमुलं भयम् ॥ ७५ ॥
एकेन वानरेणेयं पूर्वं दग्धा महापुरी ॥ कुमारो निहतश्चाक्षः सानुयात्रः सकुञ्जरः ॥ ७६ ॥
स्वयं रक्षोधिपश्चापि पौलस्त्यो देवकण्टकः ॥ मृतेति संयुगे मुक्तो रामेणादित्यतेजसा ॥ ७७ ॥
यन्न देवैः कृतो राजा नापि दैत्यैर्न दानवैः ॥ कृतः स इह रामेण विमुक्तः प्राणसंशयात् ॥ ७८ ॥
स यूपाक्षवचः श्रुत्वा भ्रातुर्युधि पराजयम् ॥ कुम्भकर्णो विवृत्ताक्षो यूपाक्षमिदमब्रवीत् ॥ ७९ ॥
सर्वमद्यैव यूपाक्ष हरिसैन्यं सलक्ष्मणम् ॥ राघवं च रणे हत्वा पश्चाद्द्रक्ष्यामि रावणम् ॥ ८० ॥
राक्षसांस्तर्पयिष्यामि हरीणां मांसशोणितैः ॥ रामलक्ष्मणयोश्चापि स्वयं पास्यामि शोणितम् ॥ ८१ ॥

तत्तस्य वाक्यं ब्रुवतो निशम्य सगर्वितं रोषविवृद्धदोषम् ॥
महोदरो नैर्ऋतयोधमुख्यः कृताञ्जलिर्वाक्यमिदं बभाषे ॥ ८२ ॥

रावणस्य वचः श्रुत्वा गुणदोषौ विमृश्य च ॥ पश्चादपि महाबाहो शत्रून्युधि विजेष्यसि ॥ ८३ ॥
महोदरवचः श्रुत्वा राक्षसैः परिवारितः ॥ कुम्भकर्णो महातेजाः संप्रतस्थे महाबलः ॥ ८४ ॥
तं समुत्थाप्य भीमाक्षं भीमरूपपराक्रमम् ॥ राक्षसास्त्वरिता जग्मुर्दशग्रीवनिवेशनम् ॥ ८५ ॥

॥ ७० ॥ अल्पकारणे अल्पकार्यनिमित्तं । गुरुः अग्रजः । आख्यात कथयत । अर्थतत्त्वेन तत्त्वार्थेन याथार्थ्येनेति यावत् ॥ ७१—७२ ॥ दैवकृतं इन्द्रादिकृतं । नः अस्मान् । मानुषाज्जातं तुमुलं भयं संप्रबाधत इत्यन्वयः ॥ ७३ ॥ वाशब्दार्थोनुक्तसमुच्चयार्थः । देवेभ्यश्चेत्यर्थः । मानुषं मनुष्यादागतं ॥ ७४—७५ ॥ इन्द्रादिभिरपि दुष्पीडमिदं नगरं कथं वानरैः पीड्यत इत्यत्राह—एकेनेत्यादि ॥ सानुयात्रः सानुगः । एकेनैव महती पीडा कृता । किं पुनरनेकैरिहागतैरिति भावः ॥ ७६ ॥ मृतेति । हे मृतेत्युक्त्वा । वस्तुतस्तु मृतेत्यविभक्तिकनिर्देशः । मृत इति कृत्वेत्यर्थः । मृतप्राय इति मत्वेत्यर्थ इत्यप्याहुः ॥ ७७ ॥ यत् य इत्यर्थः । प्राणसंशयादिति ल्यब्लोपे पञ्चमी । यो राजा देवादिभिरपि प्राणसंशयं नीत्वा मुक्तो न कृतः स रावणो रामेण प्राणसंशयं नीत्वा अद्य विमुक्तः कृत इत्यर्थः । यद्वा राजा देवादिभिरपि यत् न कृतः न प्रापितः । तत् रामेण कृतः प्राणसंशयाद्विमुक्तश्चेत्यर्थः ॥ ७८ ॥ पराजयं पराजयबोधकं ॥ ७९—८१ ॥ सगर्वितं सगर्वं । रोषविवृद्धदोषं क्रोधविवृद्धदुर्नयं । कुम्भकर्णमिति शेषः ॥ ८२—८३ ॥ संप्रतस्थे प्रस्थातुमुपचक्रमे । "शयनादुत्पपात हे" त्युत्तरत्र वक्ष्यमाणत्वात् ॥ ८४—

ति० संयुगेमुक्तः जीवन्मृतइत्युक्त्वेतिशेषः ॥ ७७ ॥ ति० यत्नकृतः यामवस्थांनप्रापितः सरामेणकृतः तामवस्थांप्रापितः । प्राणसंशयात् तयावस्थयाप्राप्तोविमुक्तश्च ॥ ७८ ॥ ती० सलक्ष्मणंराघवंहरिसैन्यंचहत्वा । वस्तुतस्तु सलक्ष्मणंराघवंविनेतिशेषः । हरिसैन्यंहत्वारावणंद्रक्ष्यामीतिसंबन्धः ॥ ८० ॥ ती० वस्तुतस्तु रामलक्ष्मणयोरितिसंबन्धार्थेषष्ठी । रामलक्ष्मणसंबन्धिहरीणांमांसशोणितैः राक्षसांस्तर्पयिष्यामि स्वयमपिहरीणांशोणितंपास्यामीतिसंबन्धः ॥ ८१ ॥ स० रोषविवृद्धदोषं रोषेण रामात्पराजयजन्यकोपेनविवृद्धः दोषः आत्मश्लाघनरूपोयस्यतं ॥ ८२ ॥

[पा०] १ घ. ङ. झ. ट. मादृशं. क. ग. मांदृशं. छ. ज. ञ. मांप्रभुः. २ क. ख. ङ. ट.—कुंभकर्णमरिन्दमं. ३ घ. ङ. झ. ट. भयमस्तिननःक्वचित्. ख. ग. भयमस्तिहिनक्वचित्. ४ ग. ङ.—व्रजेति. ५ ङ.—ट. वर्चसा. ६ ङ. च. झ. ञ. ट. जित्वाततोद्रक्ष्यामि. ७ ङ. झ. ट. सुप्तमुत्थाप्य.

ततो गत्वा दशग्रीवमासीनं परमासने ॥ ऊचुर्बद्धाञ्जलिपुटाः सर्व एव निशाचराः ॥ ८६ ॥
प्रबुद्धः कुम्भकर्णोयं भ्राता ते राक्षसर्षभ ॥ कथं तत्रैव निर्यातु द्रक्ष्यस्येनमिहागतम् ॥ ८७ ॥
रावणस्त्वब्रवीद्धृष्टो राक्षसांस्तानुपस्थितान् ॥ द्रष्टुमेनमिहेच्छामि यथान्यायं च पूज्यताम् ॥ ८८ ॥
तथेत्युक्त्वा तु ते सर्वे पुनरागम्य राक्षसाः ॥ कुम्भकर्णमिदं वाक्यमूचू रावणचोदिताः ॥ ८९ ॥
द्रष्टुं त्वां काङ्क्षते राजा सर्वराक्षसपुङ्गवः ॥ गमने क्रियतां बुद्धिर्भ्रातरं संप्रहर्षय ॥ ९० ॥
कुम्भकर्णस्तु दुर्धर्षो भ्रातुराज्ञाय शासनम् ॥ तथेत्युक्त्वा महाबाहुः शयनादुत्पपात ह ॥ ९१ ॥
प्रक्षाल्य वदनं हृष्टः स्नातः परमभूषितः ॥ पिपासुस्त्वरयामास पानं बलसमीरणम् ॥ ९२ ॥
ततस्ते त्वरितास्तस्य राक्षसा रावणाज्ञया ॥ मद्यकुम्भांश्च विविधान्क्षिप्रमेवोपहारयन् ॥ ९३ ॥
पीत्वा घटसहस्रे द्वे गमनायोपचक्रमे ॥ ईषत्समुत्कटो मत्तस्तेजोबलसमन्वितः ॥
कुम्भकर्णो बभौ हृष्टः कालान्तकयमोपमः ॥ ९४ ॥
भ्रातुः स भवनं गच्छन्रक्षोगणसमन्वितः ॥ कुम्भकर्णः पदन्यासैरकम्पयत मेदिनीम् ॥ ९५ ॥
स राजमार्गं वपुषा प्रकाशयन्सहस्ररश्मिर्धरणीमिवांशुभिः ॥
जगाम तत्राञ्जलिमालया वृतः शतक्रतुर्गेहमिव स्वयंभुवः ॥ ९६ ॥
तं राजमार्गस्थममित्रघातिनं वनौकसस्ते सहसा बहिः स्थिताः ॥
दृष्ट्वाप्रमेयं गिरिशृङ्गकल्पं वितत्रसुस्ते हरियूथपालाः ॥ ९७ ॥
केचिच्छरण्यं शरणं स्म रामं व्रजन्ति केचिद्व्यथिताः पतन्ति ॥
केचिद्दिशः स्म व्यथिताः प्रयान्ति केचिद्भयार्ता भुवि शेरते स्म ॥ ९८ ॥
तमद्रिशृङ्गप्रतिमं किरीटिनं स्पृशन्तमादित्यमिवात्मतेजसा ॥
वनौकसः प्रेक्ष्य विवृद्धमद्भुतं भयार्दिता दुद्रुविरे ततस्ततः ॥ ९९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षष्टितमः सर्गः ॥ ६० ॥

॥ ८५ ॥ गत्वा रावणनिवेशनं गत्वा । तत ऊचुरित्यन्वयः ॥ ८६ ॥ तत्रैव निर्यातु वा इहागतमेनं द्रक्ष्यसि वा । कथं, कथं करोत्विति संबन्धः ॥ ८७ ॥ पूज्यतां एष इति शेषः ॥ ८८—९१ ॥ बलसमीरणं बलवर्धनं ॥ ९२ ॥ रावणाज्ञया त्वरितास्ते क्षिप्रं उपहारयन् उपाहारयन्निति संबन्धः ॥ ९३ ॥ ईषत्समुत्कटः पानेन ईषन्मदोत्कटः । मत्तः स्वभावेनोन्मत्तश्चेत्यर्थः । कालान्तकयमोपमः काले प्रलयकाले योन्तकः संहारको यमस्तत्सदृश इत्यर्थः ॥ ९४ ॥ रक्षोबलं राक्षससेना ॥ ९५ ॥ तत्र राजमार्गे । अञ्जलिमालया पौरजनकृतयेति शेषः ॥ ९६ ॥ यूथपाला इत्यत्र चकारो द्रष्टव्यः । अन्यथा तच्छब्दोतिरिच्येत ॥ ९७—९८ ॥ आत्मतेजसा शरीरकान्त्या ॥ ९९ ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

ति० आत्मतेजसाऽऽदित्यंस्पृशन्तमिवतत्सदृशमितियावत् । प्रायोदिनद्वयेनास्यजागरः ॥ ९९ ॥ इतिषष्टितमःसर्गः ॥ ६० ॥

[पा०] १ ङ. च. छ. झ. ञ.ट. तेऽभिगम्य. २ ग. ङ.—ट. द्रक्ष्यसेतमिहागतं. ३ ग. छ. ज. झ. ट. परमर्षितः. ४ घ. तेगत्वा. ५ ङ. ट. त्वरितास्तत्र. ६ ग.—ट. मद्यंभक्ष्यांश्च. ७ झ. ट. सहयूथपालैः. ८ ङ. छ. झ. ट. पतन्ति.

एकषष्टितमः सर्गः ॥ ६१ ॥

लङ्कायांराजमार्गेगच्छन्तंकुंभकर्णमवलोकयतारामेण विभीषणंप्रति तत्स्वरूपप्रश्नः ॥ १ ॥ विभीषणेन रामंप्रति कुंभकर्णस्वरूपनिरूपणम् ॥ २ ॥ रामेणनीलंप्रति रणायसेनासज्जीकरणनियोजनम् ॥ ३ ॥

ततो रामो महातेजा धनुरादाय वीर्यवान् ॥ किरीटिनं महाकायं कुम्भकर्णं ददर्श ह ॥ १ ॥
तं दृष्ट्वा राक्षसश्रेष्ठं पर्वताकारदर्शनम् ॥ क्रममाणमिवाकाशं पुरा नारायणं प्रभुम् ॥
सतोयाम्बुदसंकाशं काञ्चनाङ्गदभूषणम् ॥ २ ॥
दृष्ट्वा पुनः प्रदुद्राव वानराणां महाचमूः ॥ ३ ॥
विद्युतां वाहिनीं दृष्ट्वा वर्धमानं च राक्षसम् ॥ सविस्मयमिदं रामो विभीषणमुवाच ह ॥ ४ ॥
कोसौ पर्वतसंकाशः किरीटी हरिलोचनः ॥ लङ्कायां दृश्यते वीर सविद्युदिव तोयदः ॥ ५ ॥
पृथिव्याः केतुभूतोसौ महानेकोत्र दृश्यते ॥ यं दृष्ट्वा वानराः सर्वे विद्रवन्ति ततस्ततः ॥ ६ ॥
आचक्ष्व मे महान्कोसौ रक्षो वा यदि वाऽसुरः ॥ न मयैवंविधं भूतं दृष्टपूर्वं कदाचन ॥ ७ ॥
स पृष्टो राजपुत्रेण रामेणाक्लिष्टकर्मणा ॥ विभीषणो महाप्राज्ञः काकुत्स्थमिदमब्रवीत् ॥ ८ ॥
येन वैवस्वतो युद्धे वासवश्च पराजितः ॥ सैष विश्रवसः पुत्रः कुम्भकर्णः प्रतापवान् ॥
अस्य प्रमाणात्सदृशो राक्षसोन्यो न विद्यते ॥ ९ ॥
एतेन देवा युधि दानवाश्च यक्षा भुजङ्गा पिशिताशनाश्च ॥
गन्धर्वविद्याधरकिन्नराश्च सहस्रशो राघव संप्रभग्नाः ॥ १० ॥
शूलपाणिं विरूपाक्षं कुम्भकर्णं महाबलम् ॥ हन्तुं न शेकुस्त्रिदशाः कालोऽयमिति मोहिताः ॥ ११ ॥
प्रकृत्या ह्येष तेजस्वी कुम्भकर्णो महाबलः ॥ अन्येषां राक्षसेन्द्राणां वरदानकृतं बलम् ॥ १२ ॥
एतेन जातमात्रेण क्षुधार्तेन महात्मना ॥ भक्षितानि सहस्राणि सत्त्वानां सुबहून्यपि ॥ १३ ॥
तेषु संभक्ष्यमाणेषु प्रजा भयनिपीडिताः ॥ यान्तिस्म शरणं शक्रं तमप्यर्थं न्यवेदयन् ॥ १४ ॥

अथ रामेण कुम्भकर्णस्वरूपप्रश्नः विभीषणेन तदुत्तरं च क्रियत एकषष्टितमे—तत इत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ तं दृष्ट्वा धनुरादाय पुनर्विशेषेण ददर्शेति योजना । महाकायं उन्नतकायं । पर्वताकारदर्शनं । दृश्यत इति दर्शनं शरीरं । पर्वतवत्स्थूलशरीरमित्यर्थः । काञ्चनाङ्गदभूषणं काञ्चनमयाङ्गदभूषणं । अतएव सतोयाम्बुदः वर्षुकमेघः तत्सदृशं ॥ १—॥ २ ॥ दृष्ट्वेत्यर्धं ॥ कुम्भकर्णमिति शेषः ॥ ३ ॥ सविस्मयमिति क्रियाविशेषणं । वर्धमानमिति । कामरूपत्वादिति भावः ॥ ४ ॥ हरिलोचनः कपिलेक्षणः । " हरिर्ना कपिले त्रिषु " इत्यमरः ॥ ५—८ ॥ सैष इत्यत्र " सोचि लोपे चेत्पादपूरणं " इति सुलोपः । प्रमाणं स्थौल्यौन्नत्ये ॥ ९ ॥ संप्रभग्नाः अभज्यन्त ॥ १० ॥ विरूपाक्षं विकटाक्षं । मोहिताः भ्रान्ताः ॥ ११ ॥ प्रकृत्या तेजस्वी स्वप्रभावेन बलवान् । न तु वरप्रदानेनेत्यर्थः । अन्येषां रावणादीनां भवतीति शेषः ॥ १२ ॥ प्रकृत्या तेजस्वित्वमुपपादयति—एते-

---

ती० रामः पुरा आकाशंक्रममाणंनारायणमिव पर्वताकारदर्शनंतंराक्षसश्रेष्ठंदृष्ट्वा धनुरादाय किरीटिनंमहाकायंकुंभकर्णंददर्शेतियोजना । यद्वा तंदृष्ट्वेतिश्लोकोभिन्नंवाक्यं । आकाशंक्रममाणंप्रभुंनारायणमिवपर्वताकारदर्शनंतंराक्षसश्रेष्ठंदृष्ट्वारामोयत्तोबभूवेति शेषः ॥ १—२ ॥ **स०** हरिलोचनः सूर्यसदृशरक्तलोचनोवा । **शि०** किंच हरिलोचनः रिपुस्त्रास्थापहारकनेत्रविशिष्टः ॥ ५ ॥ **स०** शूलपाणिंविरूपाक्षं विरूपेविकृतेअक्षिणीयस्यसतथातं । विरूपाक्षं शूलपाणिंरुद्रमिवेतिवा ॥ ११ ॥

[पा०] १ ग. ङ. झ. ट. नारायणंयथा. २ झ. ट. सविस्मितमिदं. ३ ङ. झ. ट. पृथिव्यां. ४ ङ. झ. ट. सुमहान्. ५ ङ. छ. झ. ट. बालेन.

स कुंभकर्णं कुपितो महेन्द्रो जघान वज्रेण शितेन वज्री ॥
स शक्रवज्राभिहतो महात्मा चचाल कोपाच्च भृशं ननाद ॥ १५ ॥
तस्य नानद्यमानस्य कुंभकर्णस्य धीमतः ॥ श्रुत्वाऽतिनादं वित्रस्ता भूयो भूमिर्वितत्रसे ॥ १६ ॥
तत्र कोपान्महेन्द्रस्य कुंभकर्णो महाबलः ॥ विकृष्यैरावताद्दन्तं जघानोरसि वासवम् ॥ १७ ॥
कुंभकर्णप्रहारार्तो विजज्वाल स वासवः ॥ ततो विषेदुः सहसा देवब्रह्मर्षिदानवाः ॥ १८ ॥
प्रजाभिः सह शक्रश्च ययौ स्थानं स्वयंभुवः ॥ कुंभकर्णस्य दौरात्म्यं शशंसुस्ते प्रजापतेः ॥ १९ ॥
प्रजानां भक्षणं चापि देवानां चापि धर्षणम् ॥ आश्रमध्वंसनं चापि परस्त्रीहरणं भृशम् ॥ २० ॥
एवं प्रजा यदि त्वेष भक्षयिष्यति नित्यशः ॥ अचिरेणैव कालेन शून्यो लोको भविष्यति ॥ २१ ॥
वासवस्य वचः श्रुत्वा सर्वलोकपितामहः ॥ रक्षांस्यावाहयामास कुंभकर्णं ददर्श ह ॥ २२ ॥
कुंभकर्णं समीक्ष्यैव वितत्रास प्रजापतिः ॥ दृष्ट्वा विश्वास्य चैवेदं स्वयंभूरिदमब्रवीत् ॥ २३ ॥
ध्रुवं लोकविनाशाय पौलस्त्येनासि निर्मितः ॥ तस्मात्त्वमद्यप्रभृति मृतकल्पः शयिष्यसे ॥ २४ ॥
ब्रह्मशापाभिभूतोथ निपपाताग्रतः प्रभोः ॥ ततः परमसंभ्रान्तो रावणो वाक्यमब्रवीत् ॥ २५ ॥
विवृद्धः काञ्चनो वृक्षः फलकाले निकृत्यते ॥ न नप्तारं स्वकं न्याय्यं शप्तुमेवं प्रजापते ॥ २६ ॥
न मिथ्यावचनश्च त्वं स्वप्स्यत्येष न संशयः ॥ कालस्तु क्रियतामस्य शयने जागरे तथा ॥ २७ ॥
रावणस्य वचः श्रुत्वा स्वयंभूरिदमब्रवीत् ॥ २८ ॥
शयिता ह्येष षण्मासानेकाहं जागरिष्यति ॥ एकेनाह्ना त्वसौ वीरश्चरन्भूमिं बुभुक्षितः ॥
व्यात्तास्यो भक्षयेल्लोकान्संक्रुद्ध इव पावकः ॥ २९ ॥

नेत्यादिना ॥ १३—१५ ॥ नानद्यमानस्य अतिशयेन नदतः । वित्रस्ता भूमिः भूयो वितत्रसे उत्तरोत्तरं भीताऽभूत् ॥ १६ ॥ तत्र तदानीं । विकृष्य उत्पाट्य ॥ १७ ॥ विजज्वाल चुकोपेति यावत् ॥ १८ ॥ ते शक्रादयः । प्रजापतेः प्रजापतये ॥ १९ ॥ दौरात्म्यं प्रपञ्चयति—प्रजानामित्यादि ॥ २० ॥ एवं इदानींक्रियमाणप्रकारेण । यदि भक्षयिष्यतीत्यन्वयः ॥ २१ ॥ प्राधान्याद्वासवग्रहणं । कुम्भकर्णं तेष्विति शेषः ॥ २२ ॥ इदं रक्षः इदं वक्ष्यमाणमिति इदंशब्दद्वयनिर्वाहः । विश्वास्य प्रलोभ्य । सान्त्वपूर्वकं समीपमानीयेत्यर्थः ॥ २३ ॥ पौलस्त्येन विश्रवसा । तस्मात्त्वमद्यप्रभृति मृतकल्पः शयिष्यसे इत्ययंशापः "स्वप्तुं वर्षाण्यनेकानि देवदेव ममेप्सितम् । एवमस्विति तञ्चोक्त्वा प्रहृष्टास्ते दिवौकसः" इति तपश्चर्यानन्तरप्रार्थनालब्धबहुवार्षिकनिद्रासमनन्तरकालभावीत्यवगन्तव्यं । अन्यथा मृतकल्पः शयिष्यस इति शप्तस्य तपश्चर्याद्यसंभवात् ॥ २४ ॥ प्रभोः रावणस्य ॥ २५ ॥ काञ्चनः काञ्चनवत् स्पृहणीयः । चम्पकवृक्षो वा । विवृद्धः वर्धितः । फलकाले पुष्पकाले निकृत्यते छिद्यते । नप्तारं पौत्रं ॥२६॥ कालः कालनियमः ॥२७—२८॥ षण्मासानित्येतदर्वाङ्निषेधपरं । अन्यथा नव षट् सप्त चाष्टौ च मासानिति पूर्वोक्त-

---

स० आवाहयामास आकर्षणमन्त्रेणाजुहाव ॥ २२ ॥ स० काञ्चनोवृक्षः उदुंबरादिः । फलकाले यद्यपिनीरसं जन्त्वादिदूषितं चफलं । तथापि वृद्धः वर्धितःननिकृत्यतेयथातन्निकर्तनमन्याय्यं । तथा स्वकंनप्तारं पौत्रं । एवंशप्तुमन्याय्यं न्यायादपेतं । "काञ्चनः काञ्चनारेस्याच्चंपकेनागकेसरे । उदुंबरेचपुन्नागे" इतिविश्वः । "विषवृक्षोपिसंवर्ध्यस्वयंछेत्तुमसांप्रतं" इत्यादेस्तादृशोपिनच्छेद्यः । अयंतुकाञ्चनमयोवृक्षः फलकाले फलद्वाराकाञ्चनदानकालइतिवा ॥ २६ ॥ ति० जाग्रणे जागरणे । गुणाभावआर्षः । कालः कालनियमः ॥ २७ ॥ स० षण्मासान् विशेषणसमासः । तन्मध्ये नजागरणं । निद्रायांदिनाधिक्यंतुनानिष्टं । विस्तरः प्रागुपपादितोऽनुसंधेयः । षट् मासानितिभिन्नंवापदं । ति० जागरणंत्वेकाहमेव । सत्यत्राहितेकार्येइतिशेषः । अतएवेन्द्रलो.

[पा०] १ ङ. च. छ. झ. ञ. ट. रक्षसः. २ ङ. झ. ट. वित्रस्ताःप्रजाभूयोवितत्रसुः. ३ झ. शशंसुस्तेदिवौकसां. ङ. टधर्षणंचदिवौकसां. ४ ङ. झ. ट. तथा. ५ क. ङ. च. झ. ञ. ट. कुंभकर्णमथाश्वस्तःस्वयंभूः. ६ ग. ङ. झ. ट. जाग्रणे. ७ ङ. झ. ट. संवृद्धइव.

सोसौ व्यसनमापन्नः कुंभकर्णमबोधयत् ॥ त्वत्पराक्रमभीतश्च राजा संप्रति रावणः ॥ ३० ॥
स एष निर्गतो वीरः शिबिराद्भीमविक्रमः ॥ वानरान्भृशसंक्रुद्धो भक्षयन्परिधावति ॥ ३१ ॥
कुंभकर्णं समीक्ष्यैव हरयोद्य प्रविद्रुताः ॥ कथमेनं रणे क्रुद्धं वारयिष्यन्ति वानराः ॥ ३२ ॥
उच्यन्तां वानराः सर्वे यन्त्रमेतत्समुच्छ्रितम् ॥ इति विज्ञाय हरयो भविष्यन्तीह निर्भयाः ॥ ३३ ॥
विभीषणवचः श्रुत्वा हेतुमत्सुमुखेरितम् ॥ उवाच राघवो वाक्यं नीलं सेनापतिं तदा ॥ ३४ ॥
गच्छ सैन्यानि सर्वाणि व्यूह्य तिष्ठस्व पावके ॥ द्वाराण्यादाय लङ्कायाश्चर्याश्चाप्यथ संक्रमान् ॥३५॥
शैलशृङ्गाणि वृक्षांश्च शिलाश्चाप्युपसंहर ॥ तिष्ठन्तु वानराः सर्वे सायुधाः शैलपाणयः ॥ ३६ ॥
राघवेण समादिष्टो नीलो हरिचमूपतिः ॥ शशास वानरानीकं यथावत्कपिकुञ्जरः ॥ ३७ ॥
ततो गवाक्षः शरभो हनुमानङ्गदस्तथा ॥ शैलशृङ्गाणि शैलाभा गृहीत्वा द्वारमभ्ययुः ॥ ३८ ॥
रामवाक्यमुपश्रुत्य हरयो जितकाशिनः ॥ पादपैरर्दयन्वीरा वानराः परवाहिनीम् ॥ ३९ ॥

ततो हरीणां तदनीकमुग्रं रराज शैलोद्यतदीप्तहस्तम् ॥
गिरेः समीपानुगतं यथैव महन्महाम्भोधरजालमुग्रम् ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

विरोधात् ॥ २९ ॥ सोसौ रावणः ॥ ३० ॥ शिबिरात् स्वनिलयात् । भक्षयन् परिधावति भक्षणहेतोः परिधाविष्यति । "लक्षणहेत्वोः क्रियायाः" इति शतृप्रत्ययः । वर्तमानसामीप्यादिना भविष्यदर्थे लट् ॥ ३१—३२ ॥ यन्त्रं विभीषिका । समुच्छ्रितं उन्नतं ॥ ३३ ॥ सुमुखेरितं सुमुखं यथा भवति तथा ईरितं उक्तं ॥ ३४ ॥ गच्छेत्यादिश्लोकद्वयं ॥ आदाय स्वीकृत्य । आवृत्येति यावत् । उपसंहर राशीकुरु । युद्धसाधनशिलादिकामिदानीमेव संपादयेत्यर्थः । तिष्ठन्तु वानराः सर्वे सायुधाः शैलपाणय इति पाठः । सायुधाः खड्गाद्यायुधवन्तः ॥ ३५—३८ ॥ परवाहिनीं नगररक्षार्थं वहिश्चरन्तीं । यद्वा कुम्भकर्णं दृष्ट्वा पलायमानान्वानरान्प्रत्यनुद्रुतां परवाहिनीमित्यर्थः ॥ ३९ ॥ शैलोद्यतदीप्तहस्तं शैलोद्यताः उद्यतशैलाः । महन्महाम्भोधरजालं । महत् गुरु महाम्भोधरजालं मेघजालमित्यर्थः ॥ ४० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकषष्टितमः सर्गः ॥ ६१ ॥

कजयारावणस्यकुंभकर्णेनसहगमनेप्रथमदिनेमधुपुरेवासउक्तः । द्वितीयदिनेकैलासे । यत्ररंभायांबलाद्रावणस्यप्रवृत्तिः । तदनन्तरं " कुंभकर्णस्तुदुष्टात्मानानाप्रहरणोद्यतः" इत्यादिनातृतीयदिवसादिषुयुद्धमुक्तं । तेनयुद्धप्रसङ्गेअनेकदिनमपिजागरणंप्रतीयते । **स०** अनल्पन्तसमाहितमानसंरावणमेकस्मिन्नेवदिनेबहुकार्यकारीभविष्यतीतिवदन्सुमुखीकरोतीत्याह—एकेनेति ॥ २९ ॥ **ति०** पुनारामःपृच्छति—**कथमेनमिति** ॥ ३२ ॥ **ति०** विभीषणउत्तरमाह—उच्यन्तामिति । समुच्छ्रितं रावणेनमाययाविभीषिकार्थंनिर्मितंकिंचिद्यन्त्रमात्रं अतोनकिंचिदेतदित्येववानराउच्यन्तां मयास्वामिभिश्च । नतुरावणानुजलादिकमित्यर्थः । एवंचकार्यसिद्धिरित्याह—इतीति । इह एतस्मिन्विषये । **शि०** ननुवानरस्वास्थ्यार्थंकिंकर्तव्यमित्यतआह—उच्यन्तामिति । समुच्छ्रितं अतिप्रवृद्धं । एतत् प्रदृश्यमानंरक्षः यन्त्रं मत्समीपेसंकुचिततेजोभविष्यतीतिशेषः । इति सर्वेवानराउच्यन्तां । इतिभवदुक्तंहरयोविज्ञायनिर्भयाः भविष्यन्ति ॥ ३३ ॥ **ति०** यथापूर्वंद्वारनिरोधेनियुङ्क्ते—गच्छेति । अनेनरावणपलायनोत्तरंमध्येऽवहारःसूचितः ॥ ३५ ॥ **ति०** शैलशृङ्गादीन्युपसंहरन् उपसंहरन्तः संचिन्वन्तः । भवन्तस्तिष्ठन्त्विति शेषः ॥ ३६ ॥ एकषष्टितमःसर्गः ॥ ६१ ॥

[**पा०**] १ ङ. झ. ट. प्रतीक्ष्यैव. २ ङ. च. छ. झ. ट. प्रदुद्रुवुः. ३ क. ख. ग. ङ. च. ज.—ट. त्सुमुखोद्गतं. ४ ग. ङ. छ. झ. ञ. ट. श्चाप्युपसंहरन्. ५ ङ. छ. ज. झ. ट. शैलोद्यतवृक्षहस्तं. ख. शैलोद्यतदीर्घहस्तं. ग. दीप्तोद्यतशैलहस्तं.

द्विषष्टितमः सर्गः ॥ ६२ ॥

कुंभकर्णेन रावणगृहमेत्यतच्चरणप्रणामपूर्वकं सपरिष्वङ्गंतदुत्तवरासने समुपवेशनम् ॥ १ ॥ रावणेनतंप्रति प्रकृतनिखिलवृत्तान्तनिवेदनपूर्वकं रामादिविजयेननिजरक्षणप्रार्थना ॥ २ ॥

स तु राक्षसशार्दूलो निद्रामदसमाकुलः ॥ राजमार्गं श्रिया जुष्टं ययौ विपुलविक्रमः ॥ १ ॥
राक्षसानां सहस्रैश्च वृतः परमदुर्जयः ॥ गृहेभ्यः पुष्पवर्षेण कीर्यमाणस्तदा ययौ ॥ २ ॥
स हेमजालविततं भानुभास्वरदर्शनम् ॥ ददर्श विपुलं रम्यं राक्षसेन्द्रनिवेशनम् ॥ ३ ॥
स तत्तदा सूर्य इवाभ्रजालं प्रविश्य रक्षोऽधिपतेर्निवेशम् ॥
ददर्श दूरेग्रजमासनस्थं स्वयंभुवं शक्र इवासनस्थम् ॥ ४ ॥
भ्रातुः स भवनं गच्छन्रक्षोगणसमन्वितम् ॥ कुंभकर्णः पदन्यासैरकम्पयत मेदिनीम् ॥ ५ ॥
सोभिगम्य गृहं भ्रातुः कक्ष्यामभिविगाह्य च ॥ ददर्शोद्विग्नमासीनं विमाने पुष्पके गुरुम् ॥ ६ ॥
अथ दृष्ट्वा दशग्रीवः कुंभकर्णमुपस्थितम् ॥ तूर्णमुत्थाय संहृष्टः सन्निकर्षमुपानयत् ॥ ७ ॥
अथासीनस्य पर्यङ्के कुंभकर्णो महाबलः ॥ भ्रातुर्ववन्दे चरणौ किं कृत्यमिति चाब्रवीत् ॥ ८ ॥
उत्पत्य चैनं मुदितो रावणः परिषस्वजे ॥ स भ्रात्रा संपरिष्वक्तो यथावच्चाभिनन्दितः ॥ ९ ॥
कुंभकर्णः शुभं दिव्यं प्रतिपेदे वरासनम् ॥ स तदासनमाश्रित्य कुंभकर्णो महाबलः ॥
संरक्तनयनः कोपाद्रावणं वाक्यमब्रवीत् ॥ १० ॥
किमर्थमहमादृत्य त्वया राजन्विबोधितः ॥ शंस कस्माद्भयं तेऽस्ति कोऽद्य प्रेतो भविष्यति ॥११॥
भ्रातरं रावणः क्रुद्धं कुंभकर्णमवस्थितम् ॥ ईषत्तु परिवृत्ताभ्यां नेत्राभ्यां वाक्यमब्रवीत् ॥ १२ ॥
अद्य ते सुमहान्कालः शयानस्य महाबल ॥ सुखितस्त्वं न जानीषे मम रामकृतं भयम् ॥ १३ ॥

अथ कुम्भकर्णं प्रति रावणस्य सान्त्ववचनं द्विषष्टितमे–स त्वित्यादि ॥ निद्रामदसमाकुलः निद्रया अकालोत्थितत्वेनानुवर्तमानया मदेन मद्यपानकृतेन च समाकुलः । गृहेभ्यः । निर्गतेनेति शेषः ॥१—२॥ हेमजालविततं स्वर्णमयगवाक्षवितनं । भानुभास्वरदर्शनं दृश्यत इति दर्शनं रूपं । भानुवत्प्रकाशमानमित्यर्थः॥३॥ दूरे कक्ष्यान्तरप्रदेशे । ददर्श । उन्नतपुष्पकवत्त्वादितिभावः ॥४—६॥ सन्निकर्षं समीपं ॥ ७ ॥ कृत्यं मया कर्तव्यं ॥ ८—१० ॥ आदृत्य स्थितेनेति शेषः । शंसेति । तमिति शेषः । प्रेतो भविष्यति मृतो भविष्यति ॥ ११ ॥ ईषत्परिवृत्ताभ्यामित्यनेन ईषत्कोपो लक्ष्यते ॥ १२ ॥ ईषत्त्वमेव विवृणोति–

स० गृहेभ्यः तत्स्थितस्त्रीकरेभ्यः यद्वा गृहेभ्यःपरभार्याभ्यः । "गृहिणीगृहमुच्यते" इतिवचनात् । राक्षसानांगृहेभ्यइत्यप्यन्वयोवा ॥ २ ॥ **स०** अभ्रजालं जलसत्तादशायामिन्द्रनीलखचनात् तदभावदशायांवज्रैश्चतन्निदर्शनतोचितेतिनभानुभास्वरेतिविरोधः । अथवा अग्रजं रावणं अभ्रजालमिवददर्शेत्यन्वयः ॥ ४ ॥ **स०** समुदितोरावणः उत्पत्य आसनादुत्थायेत्यर्थः । संधिरार्षः इतिनागोजिभट्टः । समुदितंयथाभवतितथाउत्पत्य । सुप्सुपेतिसमासऐकपद्यंज्ञेयं । मुदितः । अत् पत्येतिच्छेदः । अत् आश्चर्ययथाभवतितथा पतित्वाऽत्पत्य । व्याख्यातंचाद्भुतपदव्याख्यावसरे अदित्याश्चर्यार्थकमव्ययमितीतिवा ॥ ९ ॥ **स०** रोषेणपरिवृत्ताभ्यां नेत्राभ्यामुपलक्षितं कुद्धंभ्रातरंकुंभकर्णंरावणोऽब्रवीदितिनागोजिभट्टः । रोषेणपरिवृत्ताभ्यां नेत्राभ्यां पार्श्वद्वयवर्तिनेत्रत्वेनद्विवचनंपूर्वंभुजाभ्यामितिवत् । तदुपलक्षितोवानरोवाक्यमुवाचेत्यन्वयोवा । अस्मिन्पक्षेक्रुद्धपदंनाधिकं ॥ १२ ॥ **स०** सुमहान्कालः । प्रागस्माभिर्व्याख्यातरूपः । यत्तुनागोजिभट्टेन 'सुमहानित्यनेन ब्रह्मकृतावधिभूतषण्मासादप्यधिकःकालोगतइतिसूच्यते । " शयिताह्येषषण्मासानेकाहंजागरिष्यते " इतितुषण्मासादर्वाग्जागरणाभावपरं " मन्त्रंकृत्वाप्रसुप्तोऽयमितस्तुनवमेऽहनि " इतिपद्यंतुप्रक्षिप्तंतत्राहःपदंमासपरंवेत्युक्तं । अन्यथा षण्मासादर्वाक्कदापिजागरणाभावेनतावत्कालस्यत-

[पा०] १ ख. ततस्तदा. २ ग. घ. ङ. झ. गत्वारक्षोगण. ३ क. ग.—ञ. समन्वितः. ४ ङ. च. छ. झ. ञ. ट. पुनस्समुदितोत्पत्यरावणः. ५ ङ. च. झ. ञ. ट. रोषेणपरि. ६ ङ. झ. ट. अयंते. ७ ङ. झ. ट. सुषुप्तस्त्वं.

एष दाशरथी रामः सुग्रीवसहितो बली ॥ समुद्रं सबलस्तीर्त्वा मूलं नः परिकृन्तति ॥ १४ ॥
हन्त पश्यस्व लङ्कायां वनान्युपवनानि च ॥ सेतुना सुखमागम्य वानरैः कार्णवीकृतम् ॥ १५ ॥
ये रक्षसां मुख्यतमा हतास्ते वानरैर्युधि ॥ वानराणां क्षयं युद्धे न पश्यामि कदाचन ॥ १६ ॥
न चापि वानरा युद्धे जितपूर्वाः कदाचन ॥ १७ ॥
तदेतद्भयमुत्पन्नं त्रायस्वेमां महाबल ॥ नाशय त्वमिमानद्य तदर्थं बोधितो भवान् ॥ १८ ॥
सर्वक्षपितकोशं च स त्वमभ्यवपद्य माम् ॥ त्रायस्वेमां पुरीं लङ्कां बालवृद्धावशेषिताम् ॥ १९ ॥
आतुरार्थं महाबाहो कुरु कर्म सुदुष्करम् ॥ मयैवं नोक्तपूर्वो हि कश्चिद्भ्रातः परंतप ॥ २० ॥
त्वय्यस्ति तु मम स्नेहः परा संभावना च मे ॥ दैवासुरेषु युद्धेषु बहुशो राक्षसर्षभ ॥
त्वया देवाः प्रतिव्यूह्य निर्जिताश्चासुरा युधि ॥ २१ ॥
तदेतत्सर्वमातिष्ठ वीर्यं भीमपराक्रम ॥ न हि ते सर्वभूतेषु दृश्यते सदृशो बली ॥ २२ ॥
कुरुष्व मे प्रियहितमेतदुत्तमं यथाप्रियं प्रियरण बान्धवप्रिय ॥

अद्येत्यादिना ॥ सुमहान्कालः नवदिनपरिमितः । गत इति शेषः ॥ १३ ॥ मूलं मूलबलं । परिकृन्तति बाधतइत्यर्थः ॥ १४ ॥ मूलकृन्तनमुपपादयति–हन्तेति ॥ लङ्कायां वनान्युपवनानि च सर्वं । सेतुना सुखमागम्य स्वनिर्मितसेतुमात्रेण सुखमागम्य । रामेण । वानरैःकार्णवीकृतं वानररूपैःकार्णवीकृतं । पश्यस्व । आत्मनेपदमार्षं । यद्वा स्वलङ्कायामिति च्छेदः । आत्मीयलङ्काद्वीपइत्यर्थः ॥ १५—१७ ॥ तदेतत् एतादृशं । भयमुत्पन्नं । अस्माद्भयादिमां पुरीं त्रायस्व । इमान् वानरान् नाशय । तदर्थं नाशनार्थं ॥ १८ ॥ सर्वक्षपितकोशं क्षपितसर्वैश्वर्यं । "कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः" इत्यमरः । अभ्यवपद्य जानीहीत्यर्थः । बालवृद्धावशेषितामित्यतिशयोक्तिः । मूलबलाद्युत्सादनस्य वक्ष्यमाणत्वात् ॥ १९ ॥ कश्चिदिति प्रश्ने । कदाचिदपि नोक्तपूर्वोसीत्यर्थः । कश्चिदिति पाठे त्वदन्यः कश्चिदपि नैवमुक्तपूर्वइत्यर्थः ॥ २० ॥ संभावना आदरः । दैवासुरेषु देवासुरसंबन्धिषु । प्रतिव्यूह्य विभज्य । असुराः असुराअपीत्यर्थः ॥ २१ ॥ आतिष्ठ अवलम्बस्व ॥ २२ ॥ यथाप्रियं यथास्नेहं ।

त्स्वापेनियतत्वात्ततोऽर्वाङ्मासद्वयादिमध्येएतत्प्रवृत्तौसुमहानित्युक्तेरसंगत्यापत्तेः । अनेनमन्त्रंकृत्वासुप्तस्याष्टनवमासरूपः कालोगतइतिगम्यते । अनेनापियुद्धस्यषण्मासाधिककालव्यापितासूचिताभवतीतिज्ञायते इति उत्तरत्रवक्ष्यमाणमित्युक्तमुक्तं तदसंगतं । सुमहान्कालइत्यस्यगतेश्चिन्तितत्वात् । मन्त्रकालेविनायासंस्कृतएवजागरणदिनएवकुंभकर्णागमनरामागमनानन्तरंनवमेऽहनिप्रयत्न उत्थानंचसंभवतः । युद्धस्यषण्मासादधिककालकल्पनंचास्मदुक्तक्रमेणातन्त्रमूलकं । षण्मासादर्वाक्कदापिजागरणाभाववादस्तु स्वयमेवजागरणाभावपरः । प्रयत्नेतुजागरणस्यषण्मासानन्तरमियतआयासस्यासंभावितत्वरूपसंभवयुक्तिकत्वात् । सीतायाः स्वजीवनस्यमासद्वयावधित्वकथनरूपस्फुटतरबाधकाच्च । अन्यथारामागमनानन्तरमपियुद्धस्यबहुकालावधिकत्वेनमध्येत्वदुक्तःसमयोतिक्रान्तोतोमांभजेतिमध्येमध्येकथयाभाव्यत्वाच्च । क्वापियुद्धदिनेयत्तायाअनुक्तत्वान्मदुक्तप्रकारएवकिंनस्यादितितुदुराशामात्रं यावन्नपद्मपुराणीयपुष्करखण्डगताष्टत्रिंशाध्यायस्थः "अत्रयुद्धंमहद्वृत्तंचैत्रशुक्लत्रयोदशीम् । अष्टचत्वारिंशतिदिनंयत्रासौरावणोहतः" इतिश्लोकोनावलोकितस्तावदितिचतुरस्रं ॥ १३ ॥ स० वानराएवएकः अखण्डः अर्णवःसमुद्रोयेनतत् । कृतं कर्मपश्येत्यन्वयः । वनानि महान्ति । उपवनानि अणूनि कृतानि । विटपोत्पाटात् । रामेणवानरैःकार्णवंकृतं । 'अस्मदीयंगुणार्णवं' इत्यनुव्याख्यानसुधायांअर्णवइवाचरतीत्यर्णवमिति कृते अर्णवतेःपचाद्यचिकृतेअर्णवशब्दस्त्रिलिङ्गः साधुरित्युक्तेः साधु । कृतंवानरैःकार्णवंपश्येत्यन्वयेतुनक्लेशः ॥ १५ ॥ स० बालवृद्धावशेषितां । बालाः स्तनंधयाः । वृद्धाः युद्धानर्हाः । बहूनांयूनांसत्त्वेपीयमुक्तिः कुंभकर्णस्यकारुण्याच्छीघ्रंसमरधरणीप्रवेशार्थं ॥ १९ ॥ इतिद्विषष्टितमःसर्गः ॥ ६२ ॥

[पा०] १ ङ. झ. ट. दाशरथिःश्रीमान्सुग्रीव. २ झ. ट. समुद्रंलङ्घयित्वातुकुलंनः. ३ क. ङ. झ. ट. मागत्य. ४ क. ख ग. ङ. छ.—ट. रैकार्णवंकृतं. ५ क. ग. ङ. झ. ट. कथंचन. ६ ङ. झ. ट. त्रायस्वेह. घ. त्रायस्वलं ७ ख. च. छ. ज. यदर्थं. ८ ङ. झ. ट. मभ्युपपद्य. ९ झ. ज. ट. कश्चित्. १० ङ. झ. ट. श्रामरायुधि. ११ च. छ. विपुलविक्रम.

स्वतेजसा विधम सपत्नवाहिनीं शरद्घनं पवन इवोद्यतो महान् ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

त्रिषष्टितमः सर्गः ॥ ६३ ॥

कुंभकर्णेन रावणंप्रति नीतिशास्त्रार्थानुवादपूर्वकंप्रकृतापत्प्राप्तेस्तदनालोचनहेतुकत्वोक्तिः ॥ १ ॥ रावणेनकुंभकर्णंप्रति सकोपंगतार्थानुशोचनस्यानौचित्योक्तिपूर्वकं विपन्नार्थसमीकरणस्यसुहृल्लक्षणत्वोक्त्या शत्रुजयायनिजपराक्रमोपयोजननियोजनम् ॥ २ ॥ कुंभकर्णेन रावणंप्रति ससान्त्वनंयुद्धेरामादिवधप्रतिज्ञानम् ॥ ३ ॥

तस्य राक्षसराजस्य निशम्य परिदेवितम् ॥ कुंभकर्णो बभाषेदं वचनं प्रजहास च ॥ १ ॥
दृष्टो दोषो हि योस्माभिः पुरा मन्त्रविनिर्णये ॥ हितेष्वनभिरक्तेन सोयमासादितस्त्वया ॥ २ ॥
शीघ्रं खल्वभ्युपेतं त्वां फलं पापस्य कर्मणः ॥ निरयेष्वेव पतनं यथा दुष्कृतकर्मणः ॥ ३ ॥
प्रथमं वै महाराज कृत्यमेतदचिन्तितम् ॥ केवलं वीर्यदर्पेण नानुबन्धो विचारितः ॥ ४ ॥
यः पश्चात्पूर्वकार्याणि कुर्यादैश्वर्यमास्थितः ॥ पूर्वं चापरकार्याणि न स वेद नयानयौ ॥ ५ ॥
देशकालविहीनानि कर्माणि विपरीतवत् ॥ क्रियमाणानि दुष्यन्ति हवींष्यप्रयतेष्विव ॥ ६ ॥
त्रयाणां पञ्चधा योगं कर्मणां यः प्रपश्यति ॥ सचिवैः समयं कृत्वा स सभ्ये वर्तते पथि ॥ ७ ॥

आवयोः प्रीत्यनुरूपमित्यर्थः ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्विषष्टितमःसर्गः ॥ ६२ ॥

अथ कुम्भकर्णबुद्धिस्त्रिषष्टितमे–तस्येत्यादि ॥ परिदेवितं पूर्वोक्तवचनानां परिदेवनतुल्यत्वात् परिदेवितत्वं । कुम्भकर्णो वचनं बभाषे जहास चेत्यत्र व्यत्ययः कार्यः । उक्त्वा जहासेति वार्थः ॥ १ ॥ पुरा मन्त्रनिर्णये क्रियमाणे । अस्माभिः यो दोषो दृष्टः शत्रुभिस्तवापद्भविष्यतीति निश्चितः । हितेषु हितपरेषु । अनभिरक्तेन असक्तेन । हितपरवचनमशृण्वतेत्यर्थः । त्वया सोयं दोष आसादितः । पूर्वमेव चिन्तिता विपत् प्राप्तेत्यर्थः ॥ २ ॥ पापस्य सीताहरणरूपस्य कर्मणः । फलं त्वां शीघ्रं अभ्युपेतं प्राप्तं । "अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते" इति न्यायात् । अत्रोदाहरणमाह–निरयेष्विति । दुष्कृतकर्मणः महापातकिनः पुरुषान् । निरयेष्वेव पतनं यथा प्राप्नोति तद्वत् । एवकारेणापरिहार्यत्वमुच्यते ॥ ३ ॥ हे महाराज । केवलं वीर्यदर्पेण एतत्कृत्यं सीताहरणरूपं कार्यं वै । प्रथमं सीताहरणात्पूर्वं । न चिन्तितं साध्वसाधु वेति त्वया न विचारितं । अनुबन्धातीत्यनुबन्धः दोषोत्पादः । "दोषोत्पादेऽनुबन्धः स्यात्" इत्यमरः ॥ ४ ॥ प्रथमं विचार्य पश्चात् कर्म कर्तव्यमिति प्रेक्षावतां कृत्यं, त्वया तु तद्विपरीतं कृतमित्याह–य इति ॥ ऐश्वर्यं आस्थितः प्राप्तः । यः पुमान् पूर्वकार्याणि कार्यारम्भात्पूर्वं कर्तव्यानि मन्त्रणादीनि कुर्यात् । अपरकार्याणि उत्तरकाले विचार्याणि च पूर्वं कुर्यात् । सः नयानयौ नीत्यनीती न वेद ॥ ५ ॥ एवं देशकालानुरोधेन कर्म कर्तव्यमित्युक्तं, तदननुरोधे दोषमाह–देशेति ॥ देशकालविहीनानि क्रियमाणानि । अदेशे अकाले च कृतानि कर्माणि। विपरीतवत् देशकालवैकल्याद्विपरीतकर्माणीव । अप्रयतेषु मन्त्रानध्ययनादिना अपूतेषु अपात्रेषु हवींषीव दुष्यन्ति विफलानि भवन्तीत्यर्थः ॥ ६ ॥ देशकालानुरोधस्य फलमाह–त्रयाणामिति ॥ सचिवैः मन्त्रिभिः सह । समयं निश्चयरूपं सिद्धान्तं कृत्वा । "समयाः शपथाचारकालसिद्धान्तसंविदः" इत्यमरः । त्रयाणां

स० दं दातारंरावणंप्रति बभाषेजहासच । विभीषणमाल्यवदाद्युक्तंनश्रुतमतइयंदशेतिदशाननंनिरीक्ष्यहासइतिभावः । "दंदा नेछेदेचदातरि" इतिविश्वः । बभाषेऽथेत्यपिक्वचित्पाठः ॥ १ ॥ शि० अनुबन्धः सीतारामयोः परस्परंप्रीतिः । नविचारितः । तत्फलमेवेदमुपस्थितमितिभावः ॥ ४ ॥ ती० हवींषिचपुरोडाशादीनि । अप्रयतेष्विव असावधानजनेष्विव अरुचिजनेष्वितियावत् ॥ ति० अप्रयतेषु असावधानेषु असंस्कृतेष्वग्निषुचहवींषीव ॥ ६ ॥

[पा०] १ ग. ङ. झ. ट. व्यथय. २ ख. घ.—छ. झ. ञ. ट. ध्वनभियुक्तेन. ३ क. ख. घ.—ट. चोत्तरकार्याणि. ४ ख. ङ. च. छ. झ. ञ. ट. प्रपद्यते. ५ क. ङ. झ. ट. सम्यग्वर्तते.

यथागमं च यो राजा समयं विचिकीर्षति ॥ बुध्यते सचिवान्बुद्ध्या सुहृदश्चानुपश्यति ॥ ८ ॥
धर्ममर्थं च कामं च सर्वान्वा रक्षसां पते ॥ भजेत पुरुषः काले त्रीणि द्वन्द्वानि वा पुनः ॥ ९ ॥
त्रिषु चैतेषु यच्छ्रेष्ठं श्रुत्वा तन्नावबुध्यते ॥ राजा वा राजमात्रो वा व्यर्थं तस्य बहुश्रुतम् ॥ १० ॥
उपप्रदानं सान्त्वं वा भेदं काले च विक्रमम् ॥ योगं च रक्षसांश्रेष्ठ तावुभौ च नयानयौ ॥ ११ ॥
काले धर्मार्थकामान्यः संमन्त्र्य सचिवैः सह ॥ निषेवेतात्मवाँल्लोके न स व्यसनमाप्नुयात् ॥ १२ ॥
हितानुबन्धमालोच्य कार्याकार्यमिहात्मनः ॥ राजा सहार्थतत्त्वज्ञैः सचिवैः स हि जीवति ॥ १३ ॥
अनभिज्ञाय शास्त्रार्थान्पुरुषाः पशुबुद्धयः ॥ प्रागल्भ्याद्वक्तुमिच्छन्ति मन्त्रेष्वभ्यन्तरीकृताः ॥ १४ ॥

उत्तममध्यमाधमकर्मणां । तत्र आत्मोदयपरज्यानिसंभवसमये क्रियमाणं दण्डोपयोगि यानमुत्तमं कर्म । आत्मपरयोः बलसाम्ये क्रियमाणं संधानं मध्यमं कर्म । परोदयात्मज्यानिसमये क्रियमाणं दानपूर्वसमाश्रयणमधमं कर्म । तेषां पञ्चधा योगं । कर्मणामारम्भोपायः । पुरुषद्रव्यसंपत् । देशकालविभागः । विनिपातप्रतीकारः । कार्यसिद्धिश्चेत्युक्तैः पञ्चभिर्योगं । यद्वा त्रयाणां उत्तममध्यमाधमभावेन त्रिविधानां कर्मणां । पञ्चधा योगं देशकालात्मद्रव्यप्रयोजनसंबन्धवशात् पञ्चविधं संबन्धं । यः पश्यति सः सभ्ये साधौ । "सभ्यः सामाजिके साधौ"इति रत्नमाला । पथि नीतिमार्गे वर्तते । सम्यङ्नीतिफलं प्राप्नोतीत्यर्थः ॥ ७ ॥ यथागमं नीतिशास्त्रमनतिक्रम्य । यो राजा । समयं कार्यनिर्णयं । चिकीर्षति । सचिवांश्च बुध्यते सचिवैः सहालोचयतीति यावत् । सुहृदश्चानुपश्यति सुहृद्भिः सह विचारयतीति यावत् । स सभ्ये पथि वर्तत इति पूर्वेणान्वयः ॥ ८ ॥ धर्ममर्थं कामं च प्रत्येकं वा । त्रीणि द्वन्द्वानि वा । धर्मार्थौ अर्थधर्मौ कामार्थौ वा । सर्वान्वा । कालेषु विहितेषु प्रातर्मध्याह्नसायाह्नेषु भजेत । अकाले न सेवेतेति भावः । एतदुक्तं भवति । प्रातःकाले धर्मो विहितः, तं तदा सेवेत । मध्याह्ने अर्थो विहितः, तं तदा सेवेत । सायंकाले कामो विहितः, तं तदा सेवेतेति । यद्वा प्रातःकाले स्वकालविहितं धर्मं मध्याह्ने विहितमर्थं च सेवेत । मध्याह्ने स्वकालविहितमर्थं प्रातर्विहितं धर्मं च सेवेत । सायंकाले स्वकालविहितं कामं मध्याह्नविहितमर्थं च सेवेत । अथवा सायंकाले स्वविहितं कामं प्रातर्मध्याह्नयोर्विहितौ धर्मार्थौ च सेवेतेति । केवलकामं सर्वकालेष्वपि सेवमानः पुरुषाधम एवेत्यभिसंधिः ॥ ९ ॥ एवं कर्तव्यमुक्त्वा तदकर्तारं निन्दति—त्रिष्विति ॥ एतेषु पूर्वोक्तेषु त्रिषु भजनेषु धर्मार्थकामेषु वा । यच्छ्रेष्ठं प्रत्येकभजनं धर्मो वा । तच्छ्रुत्वा । यो राजा वा राजमात्रो वा राजसदृशो वा । न बुध्यते आचरितुं न जानाति । तस्य बहुश्रुतं शास्त्रश्रवणं व्यर्थं । अनुष्ठानपर्यवसानाभावादिति भावः । एवं सामान्यरूपया अप्रस्तुतप्रशंसया त्रिवर्गेषु श्रेष्ठं धर्मं परित्यज्य जघन्यं काममेवाश्रितस्य ते शास्त्रश्रवणं समुद्रघोषमात्रमासीदिति प्रस्तुतोऽर्थोऽवगम्यते ॥ १० ॥ अकाले काम इवाकाले विक्रमोपि त्याज्य इत्याह—उपप्रदानमित्यादिश्लोकद्वयेन ॥ काले तत्तदुचितकाले । उपप्रदानं प्रतिपक्षिणः समीपं गत्वाद्रविणादिप्रदानं । सान्त्वं समीचीनभाषणं । भेदं मित्रादिवर्गस्य द्वैधीकरणं । विक्रमं दण्डं च । प्रत्येकं तेषां योगं समवायं च । तौ पूर्वोक्तौ नयानयौ । तेषां निर्वाहप्रकारान् धर्मार्थकामांश्च सचिवैः संमन्त्र्य । काले पूर्वोक्तकाले । आत्मवान् वशीकृतमनस्कः । यो निषेवेत स लोके व्यसनं नाप्नुयान् ॥ ११—१२ ॥ हितेति ॥ अत्र कार्यमित्यध्याहारः । निषेवेतेत्यनुषङ्गः । यो राजा अर्थतत्त्वज्ञैः सचिवैः सह । हितानुबन्धं हितोदर्कं । आत्मनः कार्याकार्यं कर्तव्याकर्तव्यं । आलोच्य निश्चित्य । कार्यमेव निषेवेत सः इह लोके जीवतीत्यर्थः । हीत्यनेनायमर्थो लोकप्रसिद्ध इत्यवगम्यते । हितानुबन्धकार्याकार्यानालोचनात्तवेदं व्यसनमापन्नमिति भावः ॥ १३ ॥ एवं सामान्येन राजानमधिक्षिप्य मन्त्रिणोप्यधिक्षिपति—अनभिज्ञायेति ॥ शास्त्रार्थान् नीतिशास्त्रार्थान् । अनभि-

[पा०] १ ङ. ज. झ. ट. सचिवैर्बुध्या. २ क.—ट. भजते. ३ ख. च. छ. ञ. तात्मवान्राजानस. ४ ख. ङ. झ. ट. मालोक्यकुर्यात्कार्यं. ५ ङ. च. ञ. सर्वार्थतत्त्वज्ञैः. ६ घ. ङ. च. झ. ञ. ट. सचिवैर्बुद्धिजीविभिः.

अशास्त्रविदुषां तेषां न कार्यमहितं वचः ॥ अर्थशास्त्रानभिज्ञानां विपुलां श्रियमिच्छताम् ॥ १५ ॥
अहितं च हिताकारं धाष्ट्र्याज्जल्पन्ति ये नराः ॥ [1]अवेक्ष्य मन्त्रबाह्यास्ते कर्तव्याः [2]कृत्यदूषणाः॥१६॥
विनाशयन्तो भर्तारं सहिताः शत्रुभिर्बुधैः ॥ विपरीतानि कृत्यानि कारयन्तीह मन्त्रिणः ॥ १७ ॥
तान्भर्ता मित्रसंकाशानमित्रान्मन्त्रनिर्णये ॥ व्यवहारेण जानीयात्सचिवानुपसंहितान् ॥ १८ ॥
चपलस्येह कृत्यानि सहसाऽनुप्रधावतः ॥ [3]छिद्रमन्ये प्रपद्यन्ते क्रौञ्चस्य खमिव द्विजाः ॥ १९ ॥
यो हि शत्रुमभिज्ञाय नात्मानमभिरक्षति ॥ अवाप्नोति हि सोनर्थान्स्थानाच्च व्यवरोप्यते ॥ २० ॥
यदुक्तमिह ते पूर्वं [4]क्रियतामनुजेन च ॥ तदेव नो हितं [5]कार्यं यदिच्छसि च तत्कुरु ॥ २१ ॥
तत्तु [6]श्रुत्वा दशग्रीवः कुंभकर्णस्य भाषितम् ॥ भ्रुकुटिं चैव संचक्रे क्रुद्धश्चैनमभाषत ॥ २२ ॥

ज्ञाय गुरुमुखादश्रुत्वा । वेषेण पुरुषाः पशुबुद्धयः आहारनिद्रादिमात्राभिज्ञाः । भ्रान्तेन राज्ञा । मन्त्रेषु राजकार्यविचारेषु । अभ्यन्तरीकृताः मन्त्रयितृत्वेन वृताः सन्तः । प्रागल्भ्यात् ऊहापोहौ विना केवलधाष्ट्र्यात् । वक्तुमिच्छन्ति । ननु सम्यक् संगतं निश्चित्य वदन्तीत्यर्थः ॥ १४ ॥ अशास्त्रेति । शास्त्रानभिज्ञानां तेषां मन्त्रिणां । अहितं वचः अर्थशास्त्रानभिज्ञानां । अथापि विपुलां श्रियमिच्छतां राज्ञां न कार्यं । राजभिस्तदुक्तप्रकारो नानुष्ठेय इत्यर्थः ॥१५॥ न केवलं तद्वचनाश्रवणं, मन्त्रेषु बहिष्कार्याश्च त इत्याह—अहितमिति ॥ वस्तुतः अहितं हिताकारं हितमिवापाततः प्रतीयमानमर्थं । धाष्ट्र्यात् शास्त्रज्ञानं विना केवलप्रागल्भ्यात् । ये जल्पन्ति अक्रमेण वदन्ति । कृत्यदूषणाः कार्यदूषकास्ते । अवेक्ष्य पूर्वमेव परीक्ष्य । मन्त्रबाह्याः मन्त्रबहिर्भूताः कर्तव्याः ॥ १६ ॥ न केवलमहितवचनं, विपरीतं च कुर्वन्तीत्याह—विनाशयन्त इत्यादि ॥ मन्त्रिणः दुर्मन्त्रिणः । बुधैः उपायज्ञैः । शत्रुभिः सहिताः प्रेरिताः । विनाशयन्तः विनाशार्थं । इह प्रयोजनविषये । विपरीतानि विपरीतफलकानि कृत्यानि । भर्तारं कारयन्ति ॥१७॥ दुर्मन्त्रित्वनिर्णयोपायमाह—तानिति ॥ उपसंहितान् उपजापितान् । उत्कोचप्रदानादिना शत्रुभिर्भेदं प्रापितान् । मित्रसंकाशान् मित्रवद्भावयतः कार्यतोऽमित्रान्सचिवान् । व्यवहारेण व्याभिश्रभाषणेन । जानीयात् ॥ १८ ॥ स्वयमसमर्था विपरीतबुद्धयो मन्त्रिणः किं करिष्यन्तीत्यत्राह—चपलस्येति ॥ इह प्रस्तुते कार्ये विषये । कृत्यानि उपसंहितमन्त्रिप्रेरितानि कार्याणि । सहसा अचिरेण । अनुप्रधावतः दुर्मन्त्रिषु मन्त्रित्वमनुसरतः । चपलस्य झटिति कार्ये प्रवर्तमानस्य राज्ञः । छिद्रं रन्ध्रं । अन्ये शत्रवः । क्षिप्रं प्रपद्यन्ते स्वीकुर्वन्ति । कथमिव । द्विजाः पक्षिणः । " दन्तविप्राण्डजा द्विजाः " इत्यमरः । क्रौञ्चस्य स्कन्दशक्तिविदारितस्य क्रौञ्चाख्यपर्वतस्य । खमिव रन्ध्रमिव पण्डिताः शत्रवः उत्कोचप्रदानादिना वशीकृतैर्मन्त्रिभिः कुत्रचिच्चापलकार्ये राजानं प्रापय्य तदेव रन्ध्रमासाद्य अन्तः प्रविशन्तीतिभावः ॥ १९ ॥ एवं कपटवृत्तेः शत्रोः स्वरूपापरिज्ञाने राजा विपद्यत इत्याह—यो हीति ॥ यो हि राजा । शत्रुं वञ्चनपरं । अविज्ञाय मन्त्रव्यवहारादिना अविज्ञाय । आत्मानं च नाभिरक्षति दुर्मन्त्रिनिरासादिना नात्मानं प्रकृतौ स्थापयति । सोऽर्थानवाप्नोति । स्थानात् राजासनात् । व्यवरोप्यते प्रच्याव्यते । इयता ग्रन्थेन तव कामव्यसनात् कुमन्त्रिवचनाच्चेयमापदिति दर्शितं ॥ २०—२१ ॥ क्रुद्धः सन् भ्रुकुटिं ऊर्ध्वीकृ-

स० अधुनापिवर्जनीयानेवाह— **विनाशयन्तइति** । शताहेतौ । भर्तारं स्वस्वामिनं । बुधैः अविज्ञमन्त्रिकलज्ञानैः शत्रुभिः स्वराजविद्वेषिभिः । विपरीतानि राजमरणराज्यहरणादिकारणानिकृत्यानिकारयन्ति । तेमन्त्रिणो निन्दितमन्त्रिणः मन्त्रबाह्याःकर्तव्याइत्यन्वयः ॥ " भूमनिन्दाप्रशंसासु " इत्युक्तेर्निन्दायामयमिनिः । ' केचित्सुमन्त्रिण' इत्यादिनागोजिभट्टव्याख्यानं बुधमन्त्रिमुखशब्दयोजनाज्ञानदारिद्र्येणेतिज्ञेयं । तथास्वरक्षणंकुर्वन्तीतिशेषइतिविशेषोपितन्मूलकएव । प्रकरणानुकूलताचबालानामपिभासतइत्यनादरणीयंतदितिदिक् ॥ **ति०** केचनदुर्मन्त्रिणः । भर्तारंस्वांनाशयंतः । हेतौशता ।

[पा०] १ ङ. झ. ट. अवश्यंमन्त्र. २ ङ. ज.—ट. कृत्यदूषकाः. ३ ङ. झ. ञ. ट. क्षिप्रमन्ये. ४ घ. ङ. झ. ट. पूर्वंप्रिययामेऽनुजेनच. च. पूर्वंप्रिययाद्यनुजेनच. ज. पूर्वंक्रियतांमेऽनुजेनच. ५ ङ. च. झ. ञ. ट. हितंवाक्यं. क. ख. घ. हितंराजन्. ६ ख. एतच्छ्रुत्वा.

मान्यो गुरुरिवाचार्यः किं मां त्वमनुशाससि ॥ किमेवं वाक्यं कृत्वा काले युक्तं विधीयताम् ॥२३॥
विभ्रमाच्चित्तमोहाद्वा बलवीर्याश्रयेण वा ॥ नाभिपन्नमिदानीं यद्व्यर्थास्तस्य पुनः कथाः ॥ २४ ॥
अस्मिन्काले तु यद्युक्तं तदिदानीं विधीयताम् ॥ गतं तु नानुशोचन्ति गतं तु गतमेव हि ॥२५॥
ममापनयजं दोषं विक्रमेण समीकुरु ॥ यदि खल्वस्ति मे स्नेहो विक्रमं वावगच्छसि ॥
यदि वा कार्यमेतत्ते हृदि कार्यतमं मतम् ॥ २६ ॥
स सुहृद्यो विपन्नार्थं दीनमभ्यवपद्यते ॥ स बन्धुर्योपनीतेषु साहाय्यायोपकल्पते ॥ २७ ॥
तमथैवं ब्रुवाणं तु वचनं धीरदारुणम् ॥ रुष्टोऽयमिति विज्ञाय शनैः श्लक्ष्णमुवाच ह ॥ २८ ॥
अतीव हि समालक्ष्य भ्रातरं क्षुभितेन्द्रियम् ॥ कुंभकर्णः शनैर्वाक्यं बभाषे परिसान्त्वयन् ॥
[शृणु राजन्नवहितो मम वाक्यमरिंदम] ॥ २९ ॥
अलं राक्षसराजेन्द्र संतापमुपपद्य ते ॥ रोषं च संपरित्यज्य स्वस्थो भवितुमर्हसि ॥ ३० ॥
नैतन्मनसि कर्तव्यं मयि जीवति पार्थिव ॥ तमहं नाशयिष्यामि यत्कृते परितप्यसे ॥ ३१ ॥

तभ्रुवं चक्रे । एनमभाषत चेत्यन्वयः ॥ २२ ॥ हे कुम्भकर्ण । त्वं मान्यः बहुमानार्हः । आचार्यः आचारप्रवर्तकः गुरुरिव मां मान्यमाचार्यं गुरुं । अनुशाससि शिक्षसे । आर्षः शप् । वैपरीत्यमेवाचरसीत्यर्थः । एवं वचनं तवायुक्तमिति भावः । अफलं चेदं वचनमित्याह—किमेवमिति । एवं उक्तप्रकारेण । वाक्छ्रमं कृत्वा । प्रयासैकफलां वाचमुक्त्वेत्यर्थः । किं फलं । किमपि प्रयोजनं नास्तीत्यर्थः । नीतिकालस्यातीतत्वादिति भावः । काले नयमार्गातीतकाले । यद्युक्तं पराक्रमरूपं । तत् विधीयतां क्रियतां ॥२३॥ पूर्वमनालोच्य कृतस्य निमित्तमाह—विभ्रमादिति ॥ विभ्रमात् अनीतौ नीतिबुद्ध्या । चित्तमोहात् ज्ञानानुदयात् । बलवीर्याश्रयेण । बलवीर्ययोराश्रयणेन । गर्वेणेति यावत् । यत्कार्यं नाभिपन्नं न कृतं । तस्य पुनः कथाः पुनः पुनः कथनानि । इदानीं अतीतकाले । व्यर्थाः ॥ २४ ॥ इदानीं सद्यः । गतंतु गतमेव । न तत्पुनरायास्यतीति भावः ॥ २५ ॥ ममेत्यादिसार्धश्लोक एकान्वयः ॥ दोषं वैषम्यं । शत्रुभिराक्रमणमितियावत् । समीकुरु समतयाकुरु । वैषम्यसमता नाम वैषम्यनाश एव । खलु वाक्यालङ्कारे । मे मयि यदि स्नेहोऽस्ति स्वकीयं विक्रमं यदि वा अवगच्छसि । स्वपराक्रममज्ञात्वैव नीत्युपन्यासस्त्वया कृत इति भावः । एतत् युद्धरूपं कार्यं । ते हृदि कार्यतमं अवश्यकर्तव्यं । मतं इष्टं । अवश्यकर्तव्यत्वेन मन्यसे चेदित्यर्थः । तदा समीकुर्वित्यन्वयः ॥ २६ ॥ इदानीं साहाय्याकरणे तव बन्धुत्वमेव भज्येतेति सदृष्टान्तमाह—स इति ॥ विपन्नार्थं विपन्नः शङ्कितापायः अर्थः प्रयोजनं यस्य तं । दीनं मलिनमनस्कं पुरुषं । यः सुहृत् अभ्यवपद्यते अभितः प्राप्नोति । सदा सन्निधत्त इत्यर्थः । स एव सुहृत् । यो बन्धुः अपनीतेषु विषमितनीतिषु पुरुषेषु । साहाय्यायोपकल्पते साहाय्याय प्रभवति । स एव बन्धुः । सर्वं वाक्यं सावधारणमिति न्यायात् ॥ २७ ॥ धीरदारुणं यदि वा कार्यमित्युक्त्या धीरं सुहृदित्याद्युक्त्या दारुणं निष्ठुरं । रुष्टोयमिति विज्ञाय । भ्रुकुटिबन्धनेनानुमायेत्यर्थः ॥ २८ ॥ उक्तमेवार्थं प्रपञ्चयन्नाह—अतीवेति । अतीव क्षुभितेन्द्रियमित्यनेन रुष्टपदं व्याख्यातं । परिसान्त्वयन्नित्यनेन श्लक्ष्णपदं ॥ २९ ॥ ते त्वया । संतापं । उपपद्य प्राप्य । अलं । संतापो न कर्तव्य इत्यर्थः । " अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा " इति क्त्वाप्रत्ययः । स्वस्थो भव । स्वर्गस्थो भवेत्यर्थान्तरं ॥ ३० ॥ नैतन्मनसि कर्तव्यं विभ्रमाच्चित्तमोहाद्वेत्युक्तं मनसि न कर्तव्यमित्यर्थः ।

तवनाशनिमित्तं विपरीतानिकृत्यानिकारयन्ति । केचित्सुमन्त्रिणः दुर्मन्त्रफलं तवनाशंपश्यन्तोबुधैः सर्वज्ञैस्तवशत्रुभिःसहिताः स्वरक्षणंकुर्वन्तीतिशेषः ॥१७॥ **ति०** प्रियया मन्दोदर्या । मेऽनुजोविभीषणः । समानार्थेचतयोर्वाक्येइतिमन्दोदरीवाक्यं नपृथगुक्तं । स्वमतिसदृशमतित्वान्मेऽनुजइत्युक्तं ॥२५॥ **स०** धीरदारुणं । धीरं अधुनापि । दारुणं वचनाकरणेक्रूरं । एवंवचनं ब्रुवाणं रावणं । धीरदारुणमितिवचनविशेषणंवा । धीरेषुदारुणमितिवा । श्लक्ष्णं रावणमनसःश्लक्ष्णत्वेनभविष्यद्यथातथा उवाच ॥ २८ ॥

[पा०] १ ङ. ञ. ट. यद्युक्तंतद्विधीयतां. २ ङ. ञ. ट. विचिन्त्यतां ३ ङ. ञ. ट. दुःखं. ४ ख. ङ. च. ज.—ट, मभ्युपपद्यते. ५ इदमर्धं ङ. ञ. ट. पाठेषुदृश्यते.

अवश्यं तु हितं वाच्यं सर्वावस्थं मया तव ॥ बन्धुभावादभिहितं भ्रातृस्नेहाच्च पार्थिव ॥ ३२ ॥
सदृशं यत्तु कालेऽस्मिन्कर्तुं स्निग्धेन बन्धुना ॥ शत्रूणां कदनं पश्य क्रियमाणं मया रणे ॥ ३३ ॥
अद्य पश्य महाबाहो मया समरमूर्धनि ॥ हते रामे सह भ्रात्रा द्रवन्तीं परवाहिनीम् ॥ ३४ ॥
अद्य रामस्य तद्दृष्ट्वा मयाऽऽनीतं रणाच्छिरः ॥ सुखी भव महाबाहो सीता भवतु दुःखिता ॥३५॥
अद्य रामस्य पश्यन्तु निधनं सुमहत्प्रियम् ॥ लङ्कायां राक्षसाः सर्वे ये ते निहतबान्धवाः ॥ ३६ ॥
अद्य शोकपरीतानां स्वबन्धुवधकारणात् ॥ शत्रोर्युधि विनाशेन करोम्यास्रप्रमार्जनम् ॥ ३७ ॥
अद्य पर्वतसंकाशं ससूर्यमिव तोयदम् ॥ विकीर्णं पश्य समरे सुग्रीवं प्लवगोत्तमम् ॥ ३८ ॥
कथं त्वं राक्षसैरेभिर्मया च परिरक्षितः ॥ जिघांसुभिर्दाशरथिं वध्यसे त्वमिहानघ ॥ ३९ ॥
अथ पूर्वं हते तेन मयि त्वां हन्ति राघवः ॥ नाहमात्मनि संतापं गच्छेयं राक्षसाधिप ॥ ४० ॥

यत्कृते यस्य रामस्य कृते । अर्थान्तरं तु मयि जीवति सति एतन्मनसि न कर्तव्यं । यद्यहं जीविष्यामि तदा एवं न कर्तव्यं । अहमेव न जीविष्यामीत्यर्थः । यत्कृते यस्य मम कृते । परितप्यसे अयं सुखेन जीवन् मत्कार्यं न करोतीति परितप्तोसि । तं मां रामेण नाशयिष्यामीति ॥ ३१ ॥ तर्हि किमर्थमेवमुक्तमित्यत्राह—अवश्यमित्यादि ॥ बन्धुभावात् सामान्यस्नेहात् विशेषतोभ्रातृस्नेहाच्च । सर्वावस्थं रोषहर्षादिसर्वावस्थावस्थितमित्यर्थः । अवश्यं वाच्यं ते हितं मयाऽभिहितं ॥ ३२ ॥ अस्मिन्काले आपत्काले । स्निग्धेन बन्धुना यत्कर्तुं सदृशं युक्तं । तादृशं कदनं मया क्रियमाणं पश्य । अत्र शत्रुकर्तृकं कदनमित्यर्थान्तरं ॥ ३३ ॥ अद्येति । अर्थान्तरं । हे पर ज्येष्ठ, मया सह समरमूर्धनि हते भग्ने सति रामे रामनिमित्तं । द्रवन्तीं आगच्छन्तीं वाहिनीं पश्येति॥३४॥ अद्य रामस्येति । अर्थान्तरं । मया सह रामस्य रणाद्धेतोः । आनीतं दूरे क्षिप्तं । शिरः मच्छिरः । दृष्ट्वा सुखी भव । तदानीं मयि रोषत्यागादिति भावः । सीता दुःखिता भवतु । सर्वलोकमातृत्वादितिभावः ॥ ३५ ॥ अद्य रामस्य पश्यन्त्विति । अर्थान्तरं । रामस्येति कर्तरि षष्ठी । रामकर्तृकं मन्निधनं ये निहतबान्धवाः ते राक्षसाः पश्यन्तु । " न दुःखं पञ्चभिःसह " इति न्यायादिति भावः । उत्तरश्लोकेप्येवमेव योजना ॥ ३६–३७ ॥ ससूर्यमिव तोयदमिति । रुधिराक्ततया ससूर्यप्रकाशं मेघमिव स्थितमित्यर्थः ॥ ३८ ॥ ससैन्यं दाशरथिं जिघांसुभिः एभिः राक्षसैः मया च परिरक्षितस्त्वं कथं रामेण वध्यस इति योजना । अर्थान्तरं । जिघांसुभिः हननेच्छामात्रवद्भिः । पराक्रमासमर्थैरित्यर्थः । कथं परिरक्षितः । प्रत्युत वध्यस इति । अत्र विभीषणः क्व गत इति कुम्भकर्णस्य प्रश्नः मया धिक्कृतो गत इति रावणस्योत्तरं च क्वचित् कोशे दृश्यते तत्पूर्वापरविरुद्धं ॥३९॥ अत्र अथशब्दः प्रक्रमान्तरे । मयि हते सति हि पश्चात्त्वां रामो हन्ति हनिष्यति । अहं च आत्मनि स्वस्मिन् । संतापं शत्रुपरिभवजं । न कदाचिदपि गच्छेयं । न केनचिद्धन्तुं शक्य इत्यर्थः । अतः कुतस्ते भयमिति भावः । अर्थान्तरं । अहमात्मनि विषये संतापं न गच्छेयं न गच्छामि । " व्यत्ययो बहुलं " इति लकारव्यत्ययः । मन्निधनं नानुशोचामीत्यर्थः । किं तु मयि हते सति । अथ राघवस्त्वां हन्ति हनिष्य-

ति० सर्वावस्थां सुखदुःखादिसर्वावस्थांगतं प्राप्तं । लांप्रतीतिशेषः । "विष्णोरभक्तिकावस्थासर्वावस्थेतिगीयते " इत्यन्ये ॥ ३२ ॥
ती० "अद्यपश्यमहाबाहोमयासमरमूर्धनि" इत्यारभ्यश्रीराममुद्दिश्यकुंभकर्णोक्तपरुषवाक्यानांप्रातीतिकार्थःस्पष्टः । वस्तुतस्तुयद्यपिकुंभकर्णोरावणप्रीतयेपिवाश्रीरामनिष्ठुरभाषणेप्रीतयेपिवाप्रवृत्तः । तथापिकुंभकर्णवाणीप्रकारान्तरेणनिस्सरति । 'अद्यपश्यमहाबाहोमयेत्यादिना 'शत्रूणांकदनंपश्यक्रियमाणंमया'इत्युक्तंत्वया तदयुक्तं । किंतुसीतादुःखसंपादकरामहननेनास्मदादीन्विशोकान्कुर्वितिरावणशङ्कायांतन्नशक्यमितिव्यङ्ग्योक्त्यापरिहरति—अद्यपश्येतिसार्धश्लोकचतुष्टयेन । व्यङ्ग्योक्त्यर्थएषुश्लोकेषुविद्यमानक्रियापदा-

[पा०] १ च. छ. ञ. ट. सर्वावस्थासुतेमया. ङ. झ. सर्वावस्थांगतंमया. २ क. ग.—च. ज.—ट. हरिवाहिनीं. ३ ग. ङ. झ. वधशोचिनां. ४ ञ. शोणितोक्षितं. ५ ङ. झ. परिसान्त्वितः. ६ ख. घ.—ट. व्यथसेत्वंसदाऽनघ. क. व्यथसेराक्षसेश्वर. ७ क. ख. ग. च. छ. ज. अद्यपूर्वं. ध. अद्यपूर्वगतेतेन. ङ. झ. ञ. ट. मांनिहत्यकिलत्वांहिनिहनिष्यतिमिराघवः.

कामं त्विदानीमपि मां व्यादिश त्वं परंतप ॥ न परः प्रेषणीयस्ते युद्धायातुलविक्रम ॥ ४१ ॥
अहमुत्सादयिष्यामि शत्रूंस्तव महाबल ॥ ४२ ॥
यदि शक्रो यदि यमो यदि पावकमारुतौ ॥ तानहं योधयिष्यामि कुबेरवरुणावपि ॥ ४३ ॥
गिरिमात्रशरीरस्य शितशूलधरस्य मे ॥ नर्दतस्तीक्ष्णदंष्ट्रस्य बिभीयाच्च पुरंदरः ॥ ४४ ॥
अथ वा त्यक्तशस्त्रस्य मृद्वतस्तरसा रिपून् ॥ न मे प्रतिमुखे स्थातुं कश्चिच्छक्तो जिजीविषुः ॥ ४५ ॥
नैव शक्त्या न गदया नासिना निशितैः शरैः ॥ हस्ताभ्यामेव संरब्धो हनिष्याम्यपि वज्रिणम् ॥ ४६ ॥
यदि मे मुष्टिवेगं स राघवोऽद्य सहिष्यते ॥ ततः पास्यन्ति बाणौघा रुधिरं राघवस्य तु ॥ ४७ ॥
[अचिन्तयित्वा बाणौघान्रुधिरं राघवस्य च ॥ लक्ष्मणस्य च पास्यामि चिरकालं पिपासितः ॥ ४८ ॥
चिन्तया बाध्यसे राजन्किमर्थं मयि तिष्ठति ॥ सोहं शत्रुविनाशाय तव निर्यातुमुद्यतः ॥ ४९ ॥
मुञ्च रामाद्भयं राजन्हनिष्यामीह संयुगे ॥ राघवं लक्ष्मणं चैव सुग्रीवं च महाबलम् ॥
हनुमन्तं च रक्षोघ्नं लङ्का येन प्रदीपिता ॥ ५० ॥
हरींश्चापि हनिष्यामि संयुगे समवस्थितान् ॥ असाधारणमिच्छामि तव दातुं महद्यशः ॥ ५१ ॥
यदि चेन्द्राद्भयं राजन्यदि वाऽपि स्वयंभुवः ॥ ५२ ॥
अपि देवाः शयिष्यन्ते क्रुद्धे मयि महीतले ॥ यमं च शमयिष्यामि भक्षयिष्यामि पावकम् ॥
आदित्यं पातयिष्यामि सनक्षत्रं महीतले ॥ ५३ ॥
शतक्रतुं वधिष्यामि पास्यामि वरुणालयम् ॥ पर्वतांश्चूर्णयिष्यामि दारयिष्यामि मेदिनीम् ॥ ५४ ॥
दीर्घकालं प्रसुप्तस्य कुंभकर्णस्य विक्रमम् ॥ अद्य पश्यन्तु भूतानि भक्ष्यमाणानि सर्वशः ॥ ५५ ॥
नन्विदं त्रिदिवं सर्वमाहारस्य न पूर्यते ॥ ५६ ॥
वधेन ते दाशरथेः सुखार्हं सुखं समाहर्तुमहं व्रजामि ॥

तीति संतापं गच्छामीति ॥ ४० ॥ इदानीमपि इदानीमेव । युद्धाय व्यादिश । ते त्वया । परः अन्यः । न प्रेषणीयः ॥ ४१ ॥ अहमित्यर्धमेकं वाक्यं ॥ ४२ ॥ उक्तं विवृणोति यदीति ॥ ४३—४४ ॥ मृद्वतः प्रहरतः । प्रतिमुखे अग्रे ॥ ४५—४६ ॥ यदीति । रामः प्रथमं मे मुष्टिप्रहारमेव न सहिष्यते । कुतो मां प्रहरिष्यतीति भावः ॥ ४७—४८ ॥ उद्यतः अस्मीति शेषः ॥ ४९ ॥ मुञ्चेत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ अर्थान्तरं । रामात् भयं अस्तीति शेषः । हनिष्यामीत्येतन्मुञ्चेति । दातुं खण्डितुमित्यर्थान्तरं ॥ ५०—५१ ॥ यदि चेत्यर्धं ॥ इन्द्रात् स्वयंभुवश्च । भयं यद्यस्ति तदपि मोचयिष्यामीत्युपस्कार्यं ॥ ५२—५५ ॥ त्रिदिवं त्रिलोकी । आहारस्य न पूर्यते आहाराय न पूर्यते । न पर्याप्तमित्यर्थः ॥ ५६ ॥ सुखार्हं उत्तरो-

नांवीप्साऽनुसंधेया । तदित्थंयोजना । रामेहतेसतिद्रवन्तींहरिवाहिनींअद्यपश्यपश्य रणादानीतंरामस्यशिरोदृष्ट्वालंसुखीभव सुखीभव । सीतादुःखिताभवतुभवतु । शत्रुपक्षेहतेसतितेशोकोनभविष्यतिनभविष्यति । लङ्कायांयेहतबान्धवाराक्षसाः तेरामनिधनंपश्यन्तु । शोकपरीतानामस्रप्रमार्जनंकरोमिकरोमि । अतोहेभ्रातःरावण एतत्सर्वंनसंगतमितिभावः । किंचायंदुष्टराक्षससमागमः लङ्कधायभविष्यतीत्याशयेनाह—**कथमिति** । कथं कथंचिदित्यर्थः । मयारक्षितोपिलंदाशरथिंजिघांसुभिः राक्षसैर्वध्यसएवेतिसंबन्धः ॥ कथमिति । दाशरथिंजिघांसुभिःराक्षसैःपरिरक्षितःकथंपद्यसइतिसंबन्धः । अद्यपूर्वमिति । अहमात्मनिविषयेसंतापंनगच्छामि । किंतु तेनमयिपूर्वंहतेसति । अद्यैवराघवस्त्वांहन्ति हनिष्यतीतिसंतापंगच्छामीत्यर्थः ॥ ३४—४६ ॥ **रामानु०** राघवोमुष्टिवेगंयदिसहिष्यति ततः राघवस्यबाणौघाः मेरुधिरंपास्यन्ति । राघवोमुष्टिवेगंनस-

[पा०] १ ङ. झ. ट. महाबलान्. २ च. छ. ञ. नेषुभिःशितैः. ३ ङ. झ. ञ. संरब्ध्य. ४ अर्धश्लोकः क. ख. घ. च. छ. ञ. पाठेषुदृश्यते ५ ङ. च. झ. ञ. ट. तप्यसे. ६ ङ.—ट. घोरंनिहनिष्यामि. ७ ङ.—ट. हरींश्चभक्षयिष्यामि. ८ क. ख. ङ. च. ज. झ. ट. नत्विदंत्रिदिवंसर्वमाहारोममपूर्यते. ९ ङ.—ट. सुखावहंसुखं. १० ख. यतिष्ये.

निहत्य रामं सह लक्ष्मणेन खादामि सर्वान्हरियूथमुख्यान् ॥ ५७ ॥
रमस्व कामं पिब चाग्र्यवारुणीं कुरुष्व कृत्यानि विनीयतां ज्वरः ॥
मयाऽद्य रामे गमितेयमक्षयं चिराय सीता वशगा भविष्यति ॥ ५८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

चतुःषष्टितमः सर्गः ॥ ६४ ॥

महोदरेणकुंभकर्णप्रति व्यभिचारप्रदर्शनेनसुकृतदुष्कृतयोःसुखदुःखहेतुत्वनियमनिरसनेन मन्त्रिभिःसहालोचनपूर्वकत्वोक्तयाचसीताहरणस्य न्याय्यत्वसमर्थनम् ॥ १ ॥ तथा रामस्ययुद्धेनदुर्जयत्वसमर्थनेन रावणंप्रति स्वबुद्धिपरिकल्पितकपटोपायप्रदर्शनपूर्वकं तेनैवसीतावशीकरणस्यसुकरत्वोक्तिः ॥ २ ॥

तदुक्तमतिकायस्य बलिनो बाहुशालिनः ॥ कुंभकर्णस्य वचनं श्रुत्वोवाच महोदरः ॥ १ ॥
कुंभकर्ण कुले जातो धृष्टः प्राकृतदर्शनः ॥ अवलिप्तो न शक्नोषि कृत्यं सर्वत्र वेदितुम् ॥ २ ॥
न हि राजा न जानीते कुंभकर्ण नयानयौ ॥ त्वं तु कैशोरकाद्धृष्टः केवलं वक्तुमिच्छसि ॥ ३ ॥
स्थानं वृद्धिं च हानिं च देशकालविभागवित् ॥ आत्मनश्च परेषां च बुध्यते राक्षसर्षभः ॥ ४ ॥
यच्चशक्यं बलवता कर्तुं प्राकृतबुद्धिना ॥ अनुपासितवृद्धेन कः कुर्यात्तादृशं बुधः ॥ ५ ॥

त्तरसुखावहं । ते वधेन दाशरथेः सुखावहमित्यर्थान्तरं ॥ ५७ ॥ मया निमित्तेन रमस्वेत्यादौ काकुः । इयमक्षयमिति च्छेदः । रामे विषये गमिता इयं सीता चिराय वशगा भविष्यतीत्यर्थान्तरं ॥ ५८ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिषष्टितमः सर्गः ॥ ६३ ॥

अथ मन्त्रिकृतानयमसहमानो महोदरः कुम्भकर्णं निर्भर्त्सयति—तदुक्तमित्यादिना ॥ उक्तं सूचनं विना कण्ठरवेण दर्शितं । अतिकायस्य महाशरीरस्य । प्रतिवचनानर्हत्वद्योतनाय विशेषणानि ॥ १ ॥ मन्त्रिभिः सहाविचार्यैव रावणेनाकार्यं कृतमिति अहमसहाय एव रामादिभिर्योत्स्यामीतिच यदुक्तं कुम्भकर्णेन तदुभयं दूषयितुमाह—कुम्भकर्णेत्यादिना ॥ कुले जातोपि प्राकृतदर्शनः क्षुद्रबुद्धिः । केवलं धृष्टः न तु शास्त्रज्ञ इत्यर्थः । अवलिप्तः गर्वितः । त्वं सर्वत्र कार्ये । कृत्यं मन्त्ररूपं । तद्वेदितुं न शक्नोषि ॥ २ ॥ 'केवलं वीर्यदर्पेण नानुबन्धो विचारितः, । न सवेद नयानया''वित्यादिना रावणोद्देशेन कुम्भकर्णोक्तं दूषयति—न हीत्यादिना ॥ राजा नयानयौ न जानीत इति न । जानीत एवेयर्थः । किशोरः बालः तस्य भावः कैशोरकं तस्मात् बाल्यात् । केवलं धृष्टः न तु शास्त्रज्ञानेनेति भावः ॥ ३ ॥ देशकालविभागवित् विविक्तादिमन्त्रोचिततद्भिन्नयोः देशयोः तथा मन्त्रोचितानुचितयोश्च कालयोर्विभागं वेत्तीति तथोक्तः । राक्षसर्षभः रावणः । आत्मनः शत्रूणां च वृद्धिं हानिं स्थानं समतां च बुध्यते । रावणो देशकालविभागाद्यनभिज्ञ इति त्वयोक्तं न युक्तमिति भावः ॥ ४ ॥ लोके कापुरुषेणापि यत्कर्तुमनर्हं तादृशं कर्म विवेकी रावणः कथं कुर्यादित्यभिप्रेत्याह—यत्त्विति ॥ बलवता केवलशौर्यावलम्बिना । प्राकृतबुद्धिना यत्कर्तुं शक्यं तादृशं

ष्यिष्यतइतिभावः ॥ ४७ ॥ इतित्रिषष्टितमःसर्गः ॥ ६३ ॥

स० बलवता बलवानहमित्यभिमानवता । प्राकृतबुद्धिनापियत्कर्तुमशक्यंअयोग्यं । हेअनुपासितवृद्ध कुंभकर्ण । इनकः इन एवेनकः अस्मत्स्वामी । बुधः ज्ञानी तादृशंप्राकृतबुद्धिभिरननुष्ठीयमानंस्वयोग्यंकुर्यात् । शक्यमितिपाठे तादृशेनापिकर्तुंशक्यंबुधः कस्तादृशंकुर्यादित्यर्थः । अनुपासितवृद्धश्चासाविनश्च तत्संबुद्धिः । स्वाम्यनुजस्वान्मध्येकोपेनस्वध्वंससाध्वसाद्वा तमभिमुखीकर्तुमेव-

[पा०] १ ङ. झ. ट. राजन्पिबचाग्र्यवारुणीं. २ ङ.—ट. कृत्यानिविनीयदुःखं. क. ख. घ. कृत्यान्यपनीयतां. ३ झ. ज. ट. विधानवित्. ४ ङ. झ. ट. नरः.

यांस्तु धर्मार्थकामांस्त्वं ब्रवीषि पृथगाश्रयान् ॥ अनुबोद्धुं स्वभावे तान्नहि लक्षणमस्ति ते ॥ ६ ॥
कर्म चैव हि सर्वेषां कारणानां प्रयोजकम् ॥ श्रेयः पापीयसां चात्र फलं भवति कर्मणाम् ॥ ७ ॥
निःश्रेयसफलावेव धर्मार्थावितरावपि ॥ अधर्मानर्थयोः प्राप्तिः फलं च प्रत्यवायिकम् ॥ ८ ॥
ऐहलौकिकपारत्रं कर्म पुंभिर्निषेव्यते ॥ कर्माण्यपि तु कल्यानि लभते काममास्थितः ॥ ९ ॥

कर्म बुधः कः कुर्यात् न कोपि कुर्यात् । किमुत रावण इति भावः ॥ ५ ॥ धर्माधर्मयोर्हिताहितसाधनत्वं निश्चित्य, "शीघ्रं खल्वभ्युपेतं त्वां फलं पापस्य कर्मणः" इत्यादिना सीताहरणरूपात्पापात्तवायमनर्थः प्राप्त इति यदुक्तं कुम्भकर्णेन तदपि धर्माधर्मयोर्हिताहितफलनियमाभावान्न संगच्छत इति प्रतिपादयितुमाह—यांस्त्वित्यादिना ॥ पृथगाश्रयान् पृथक्कारणान् भिन्नफलान् । धर्मार्थकामान् ब्रवीषि । तान् स्वभावे अनुबोद्धुं स्वरूपतो ज्ञातुं । लक्षणं लक्ष्यतेनेनेति लक्षणं प्रमाणं । तव नास्तीत्यर्थः । सुखफलदयागादिधर्मानुष्ठानदशायां तात्कालिकशरीरायासजनितदुःखदर्शनात् दुःखजनकपरद्रव्यापहरणाद्यधर्माचरणसमयेतात्कालिकसुखदर्शनाच्च । अर्थकामयोरप्येवंदर्शनाच्च कर्मणामनियतफलकत्वान्नियतफलकत्वे न किंचित्प्रमाणमुपलभ्यत इत्यर्थः ॥ ६ ॥ तदेव प्रदर्शयति—कर्म चेत्यादिना ॥ सर्वेषां कारणानां स्वर्गनरकरूपाणां फलानां कर्मैव प्रयोजकं साधकं । जात्येकवचनं । किंतु अत्र कर्मजाते पापीयसामपि कर्मणां श्रेयः फलं भवति ॥ ७ ॥ उक्तमेवार्थं विशदयति—निःश्रेयसेति ॥ धर्मार्थौ धर्मार्थसाधनभूते कर्मणी । इतरौ अधर्मानर्थसाधनभूते कर्मणी च । निःश्रेयसफलौ एतानि चतुर्विधानि निःश्रेयसकराण्येव । किंतु कदाचिदधर्मानर्थयोः प्रत्यवायिकं । अश्रेयइति यावत् । प्रत्यवायोस्मिन् कारणतयास्तीति प्रत्यवायिकं । "अत इनिठनौ" इति ठन् । प्राप्यत इति प्राप्तिः फलं । कर्मणि क्तिन्प्रत्ययः । एतेनाधर्मानर्थयोः श्रेयस्तदितरच्चोभयं फलं भवतीत्युक्तं ॥ ८ ॥ एवं धर्माधर्मयोरव्यवस्थितफलत्वमुक्त्वा कामस्यापि तदाह—ऐहलौकिकेति ॥ ऐहलौकिकं इहलोकोपयोगि । पारत्रं परलोकोपयोगि च कर्म पुंभिर्निषेव्यते । तत्फलं चानुभूयते । तथैव

मुक्तिः । अनुपासितवृद्धेन अतएवप्राकृतबुद्धिनेति तीर्थोनागोजिभट्टश्च ॥ ५ ॥ ति० सर्वेषांकारणानां सुखसाधनानां त्रिवर्गलक्षणानां । कर्मैव प्रयोजनं प्रयोजकमुत्पादकं । नह्यक्रियस्यकश्चनपुरुषार्थोधर्मादिः ॥ ७ ॥ ति० तत्रपुरुषप्रयत्नसाध्येष्वप्येषु धर्मार्थयोःकामात्कश्चिद्विशेषोस्तीत्याह—निःश्रेयसेति । धर्मार्थौ निःश्रेयसफलावेवसन्तौ कामनाविशेषेणेतरावपि स्वर्गाभ्युदयफलावपिभवतः । अत्रधर्मशब्देनार्थनिरपेक्षोजपध्यानादिः । अर्थशब्देनचार्थसाध्योयागदानादिः । " यज्ञोदानंतपश्चैवपावनानिमनीषिणाम् " इतिभगवद्वचनात् । तेषांचित्तशुद्धिद्वारामोक्षसाधनत्वमस्ति । कामस्तुनकदापिनिःश्रेयसफलइतिभावः । तयोरपरमपिकामाद्विशेषमाह—अधर्मानर्थयोरिति । जपादिरूपेक्रियामयेवा नित्यधर्मेलेसत्यधर्मानर्थौप्राप्तौभवतः । तयोश्चसतोः प्रात्यवायिकंविहिताकरणप्रयुक्तप्रत्यवायजन्यंफलंपुंसःप्राप्तंभवति । नतुकाम्याकरणेप्रत्यवायइतिभावः ॥ स० अर्थः तद्व्ययसाध्ययागादिः । तौ निष्कामनयानुष्ठितौ निःश्रेयसफलौ मोक्षप्रापकौ । तावेव इतरौ कामनयानुष्ठितौ इतरौ स्वर्गैहिकसंपदादिप्रापकौ भवतः । तथाविरुद्धकामनया कर्तव्यलोपादिनाऽधर्मघटनेवघटनानर्थस्यापिभवेत् । तयोरधर्मानर्थयोःसतोः प्रात्यवायिकं प्रत्यवायजन्यं । फलं अनिष्टं प्राप्तंभवति । यथाविहिताकरणेप्रत्यवायस्तथाकाम्याकरणे नप्रत्यवायइतितदपेक्षयातौविशिष्टाविति । भगवत्सेवादिकामनाप्यकामनैवेति सा धर्ममध्यएवगणनीयेति नहठवादीयभीमकामप्रशंसाविरोधइतिबोध्यं ॥ ८ ॥ ति० कीदृशंतत्फलंतत्राह—ऐहलौकिकेति । इहलोकेपरत्रचभवंकर्म कर्मफलं । इहऋणदारिद्र्यादिरूपं । परत्रनरकयातनादिरूपं । निषेव्यते अनुभूयते एवंधर्मफलमपि । अथकामस्यधर्मार्थाभ्यांवैलक्षण्यमाह—कर्माणीति । कामं तत्पुरुषार्थसिद्धिमुद्दिश्यकर्माणियत्नेनस्थितोनुतिष्ठन्नपिकल्यानिशुभानितुविशिष्यात्रापिसाक्षाल्लभतेनतुधर्मार्थवत्कालान्तरे लोकान्तरेवा । एवंचधर्मार्थकामाएकेनैवसेव्याः । धर्मविरुद्धोयदिकामस्तदासस्वतपोविक्रमादिनासमाधेयः । "नहिभिक्षुकाःसन्तीतिस्थाल्योनाधिश्रियन्ते " इतिन्यायादितिभावः । स० पुंभिः पुरुषैः । रावणस्यप्रस्तुतत्वात्पुंभिरित्युक्तिः । सर्वैःस्त्रीपुंसैरित्यर्थः । ऐहलौकिकं इहलोकेभवं । अनुशतिकादित्वादुभयपदवृद्धिः । कर्म तत्फलं अङ्गचित्तवैकल्यादिकं । पारक्यं परशब्दात् " तद्धितः " इतिबहुवचनज्ञापितः क्यप् । किलाद्यौचपारक्यमितिभवति । यातनादिरूपं निषेव्यते । ऐहलौकिकंपारक्यंशुभमप्येवं । कामोधर्मार्थाभ्यांविलक्षणफलकइत्यालपति—कर्मा-

[पा०] १ ङ. ञ. ट. अवबोद्धुं. २ ङ.—ट. स्वभावेननहि. ३ ङ. ञ. ञ. ट. मस्तितान्. ४ ग: ङ.—ट. प्रयोजनं. ५ क. ख. ङ. ञ. ट. ठ. पारक्यं.

तत्र कृत्यमिदं राज्ञा हृदि कार्यं मतं च नः ॥ शत्रौ हि साहसं यत्स्यात्किमिवात्रापनीयताम् ॥ १० ॥
एकस्यैवाभियाने तु हेतुर्यः प्रकृतस्त्वया ॥ तत्राप्यनुपपन्नं ते वक्ष्यामि यदसाधु च ॥ ११ ॥

कामम्मास्थितः यथेच्छाचारोपि कल्यानि कर्माणि कल्याणानि कर्मफलानि लभते । अतो विहितमेव शुभप्रदं, निषिद्धं तु तथा न भवतीति नियमो नास्तीत्यर्थः ॥ ९ ॥ धर्मादीनां फलनियमो नास्ति, सर्वं सर्वस्य फलमित्यस्मिन्पक्षे स्थित्वा रावणेन सीताहरणं कृतमस्माभिश्चानुमतमित्याह—तत्र कृत्यमिति ॥ तत्र राज्ञा कामसेव्यपि सुखानि लभत इति मते स्थितेन राज्ञा । इदं कार्यं सीताहरणरूपं कार्यं । हृदि कृत्यं हृदि चिन्तितं । नः अस्माकमपि । मतं संमतं । शत्रौ शत्रुविषये यत् साहसं स्यात् । अत्र अस्मिन्साहसकर्मणि किमिवापनीयते । न किंचित्क्रियते इत्यर्थः ॥ १० ॥ एवं रावणस्याविमृश्यकारित्वपक्षं प्रतिक्षिप्य कुम्भकर्णस्यैकस्यैवाभियानपक्षं निरस्यति—एकस्येत्यादिना ॥ एकस्यासहायस्य । अभियाने युद्धाय निर्गमे ।

ण्यपीति । कामंपुरुषार्थमुद्दिश्य कर्माणि आस्थितः अनुतिष्ठन् कल्यानि फलप्रापणसमर्थानि । तत्फलानीतियावत् । लभ ते प्राप्नोति । धर्मादिविरुद्धइतिनत्याज्यः कामोपितुमध्येनुष्ठिततपसावलेनवा धर्मविरुद्धीकर्तुमुसंपादः । " नहिमृगाआयान्तीतिबीजानिनोप्यन्ते " इतिनीतेरितिभावः ॥ ९ ॥ **ति०** यत्तुतीर्थैनोक्तं धर्माधर्मयोर्हिताहितसाधनलंनिश्चित्यपरदाराहरणरूपाधर्माद्राज्ञो दुःखमित्युक्तं तद्धर्माधर्मयोर्हिताहितफलनियमाभावादसंगतमित्याह—यांस्तुधर्मार्थेति । पृथगाश्रयान् पृथक्फलजनकान्वदसि । तान्स्वभावेनाववोद्धुं स्वरूपतोज्ञातुं । लक्ष्यतेऽनेनेतिलक्षणंकारणंच नास्ति । सुखफलकयागादिधर्मानुष्ठानेपितात्कालिकशरीरायासदर्शनात् दुःखजनकपरदारगमनादावपितात्कालिकसुखदर्शनाच्चेतिभावः । तदेवप्रदर्शयति—**कर्मचेति** । सर्वेषांकारणानांसुखानामित्यर्थः । कर्म कर्ममात्रं प्रयोजनं प्रयोजकं । साधकमित्यर्थः । अत्र अस्मिन्पुण्यकर्मणि । फलं भवति अश्रेयोपीतिशेषः । पापीयसांकर्मणांश्रेयःसुखंचफलंभवति । एतदेवविशदयति—**निश्श्रेयसेति** । धर्मार्थौ तत्साधनीभूतेकर्मणी । इतरौ अधर्मानर्थौ । तत्साधनीभूतेकर्मणीइतियावत् । निश्श्रेयसफलावेव । चतुर्विधकर्माण्यपिश्रेयस्करान्येवेत्यर्थः । किंतु कदाचिदधर्मानर्थयोःप्रात्यवायिकंप्रत्यवायकारणकंदुःखं फलंसुखंच । प्राप्यतइतिप्राप्तिः । कर्मण्यिक्तिन् । प्राप्यंभवतीत्यर्थः । एतेनाधर्मानर्थयोःसुखदुःखोभयफलत्वमुक्तं । धर्मार्थयोरव्यवस्थितफलत्वमुक्त्वाकामस्याप्याह—ऐहलौकिकेति । इहलोकपरलोकोपयोगिकर्मधर्मार्थरूपंनिषेव्यते तत्फलं चानुभूयते । तथाकाममास्थितोपि यथेच्छाचारोपि । कल्यानि शुभानि । कर्माणि कर्मफलानि । लभते । एवंचविहितमेवशुभदंनिषिद्धमशुभदमितिनियमोनेतिभावः । एतत्पक्षानुसारेणैवसीताहरणंरावणेनकृतमस्माभिश्चानुमतमित्याह—**तत्रेति** । तथासतीदंकार्यंसीताहरणरूपंराज्ञाहृदिनिश्चितमस्माभिरनुमतंच । किंचशत्रुविषयेरावणेनयत्साहसंकृतं तत्किमिव नकिमपीत्यर्थः । अत्र साहसविषये । अपनीयतां पृथक्कृत्यप्रदर्श्यतां । अत्रपक्षेरावणेनाविचार्यकृतंकिमपिदर्शयितुंनशक्यमित्यर्थइतिपद्यश्लोकीव्याख्यानं तन्न । धर्माद्दुःखस्याधर्मात्सुखस्यसर्वासंमतत्वात् । यदप्युक्तंयागादौ नान्तरीयकंदुःखमिति तन्नतस्यधर्मस्यफलं । किंतु प्राकृतकर्मान्तरस्यैव । एवमधर्मविषयेपि । अनयारीत्यासर्वंपलालप्रायतयादूष्यतांमतिमद्भिरित्यलम् ॥ **स०** अनभिज्ञायशास्त्रार्थमित्यादिना दुर्मन्त्रिणस्त्याज्याइतियदुक्तंतत्परिहरति—**तत्रेति** । धर्मार्थकामानामेकानुष्ठेयत्वेत्वन्मुखबन्धेननिश्चितेराज्ञैकेनापिकामार्थावाप्तौप्रयत्नोनुष्ठेयइति । इदं कार्यं सीताहरणादिकंकामार्थरूपमितिराज्ञाहृदिकृत्यं कर्तव्यत्वेनमनःपूर्वंकंकृत्यंनिश्चितं । मन्त्रिणामस्माकंचमतं । अतोराजनीवयुवराजेष्वपिनाचातुरी । साहसंकृतमित्युक्तंदोषंदूरीकरोति—शत्राविति । शत्रौ शत्रुविषये । यत्साहसं हि कर्तव्यत्वेनप्रसिद्धं । अत्र एतदवस्थायांनकिमिवापनीयते अनयीक्रियते । तस्यशत्रुत्वात्तत्रसाहसंसंभावितानुष्ठेयत्वमेवेति नकोप्यनयोनेनानुष्ठितइतिभावः । यत्तु " नागोजिभट्टेन यत्तुतीर्थैनोक्तमितिपद्यश्लोकीव्याख्यानमनूद्य तत्र धर्माद्दुःखस्याधर्मात्सुखस्यसर्वासंमतत्वात् । यदप्युक्तंयागादौनान्तरीयकंदुःखमितितन्नतस्यधर्मस्यफलं । किंतुप्राकृतकर्मान्तरस्यैव । एवमधर्मविषये । अनयारीत्यासर्वंपलालप्रायतयादूष्यतांमतिमद्भिरित्यलमित्यालपितं तत्तत्तात्पर्यापर्यालोचनयेतिज्ञेयं । तथाहि । अधर्मात्सुखस्य धर्माद्दुःखस्यसर्वासंमतत्वादित्याद्योनानवद्यः । तेननसुखंवादुःखंवापारत्रिकं तत्रापिमुख्यंमौक्तसदसन्मुक्तिगंविवक्षितं । किंतूभयमप्यैहिकं पुनरावृत्तिलोकगंच । धर्मस्यदुःखहेतुत्वं यथार्थवचनंधर्मइतिजानद्भिर्निलीनज्ञातचोरबोधनेनमहानर्थऐहिकोनुभूतइति ज्ञातस्थितिचोरावचनदीपादितैलपानादिलोकमूषकाद्यनुष्ठिताधर्मस्यपुरुषार्थप्रापकेत्येवमादिरर्थोबहुपुराणादिदृष्टइतिस्वव्यतिरिक्तनैकमात्रसंमतमिदंप्रमेयमिति क्वसर्वासंमतिः । एवमसांमत्येचास्तिककामुकादयोनामशास्त्रकृदुदाहताअधिकारिणोनसन्तीत्यभ्युपगन्तव्यंस्यात् । यागादौ नान्तरीयकंदुःखमिति तन्नतस्यधर्मस्यफलंकिंतुप्राकृतकर्मान्तरस्यैवेत्यादिकं भगवद्भक्तिरहितकृतक्रतुविवक्षया । " धर्मोभवत्यधर्मोपियोनभक्तैःकृतोहरे । पापंभवतिधर्मोपिकृतोभक्तैस्तवाच्युत " इत्यादिमानमनुसृत्यतीर्थऊचिवानितितुच्छीकृतंवेदितव्यमितिदिक् ॥ १० ॥ **ति०** प्राहृतः उक्तः ॥ ११ ॥

[**पा०**] १ ङ. झ. ट. यत्तत्किमिवा. २ ङ. झ. ट. प्राहृतस्त्वया.

येन पूर्वं जनस्थाने बहवोऽतिबला हताः ॥ राक्षसा राघवं तं त्वं कथमेको जयिष्यसि ॥ १२ ॥
ये पुरा निर्जितास्तेन जनस्थाने महौजसः ॥ राक्षसांस्तान्पुरे सर्वान्भीतानद्यापि पश्यसि ॥ १३ ॥
तं सिंहमिव संक्रुद्धं रामं दशरथात्मजम् ॥ सर्पं सुप्तमिवाबुध्य प्रबोधयितुमिच्छसि ॥ १४ ॥
ज्वलन्तं तेजसा नित्यं क्रोधेन च दुरासदम् ॥ कस्तं मृत्युमिवासह्यमासादयितुमर्हति ॥ १५ ॥
संशयस्थमिदं सर्वं शत्रोः प्रतिसमासने ॥ एकस्य गमनं तत्र न हि मे रोचते भृशम् ॥ १६ ॥
हीनार्थः सुसमृद्धार्थं को रिपुं प्राकृतं यथा ॥ निश्चित्य जीवितत्यागे वशमानेतुमिच्छति ॥ १७ ॥
यस्य नास्ति मनुष्येषु सदृशो राक्षसोत्तम ॥ कथमाशंससे योद्धुं तुल्येनेन्द्रविवस्वतोः ॥ १८ ॥
एवमुक्त्वा तु संरब्धः कुंभकर्णं महोदरः ॥ उवाच रक्षसां मध्ये रावणं लोकरावणम् ॥ १९ ॥
लब्ध्वा पुनस्त्वं वैदेहीं किमर्थं संप्रजल्पसि ॥ यदीच्छसि तदा सीता वशगा ते भविष्यति ॥२०॥
दृष्टः कश्चिदुपायो मे सीतोपस्थानकारकः ॥ रुचिरश्चेत्स्वया बुद्ध्या राक्षसेश्वर तं शृणु ॥ २१ ॥
अहं द्विजिह्वः संह्रादी कुंभकर्णो वितर्दनः ॥ पञ्च रामवधायैते निर्यान्तीत्यवघोषय ॥ २२ ॥
ततो गत्वा वयं युद्धं दास्यामस्तस्य यत्नतः ॥ जेष्यामो यदि ते शत्रून्नोपायैः कृत्यमस्ति नः ॥२३॥
अथ जीवति नः शत्रुर्वयं च कृतसंयुगाः ॥ तंतस्तदभिपत्स्यामो मनसा यत्समीक्षितम् ॥ २४ ॥
वयं युद्धादिहेष्यामो रुधिरेण समुक्षिताः ॥ विदार्य स्वतनुं बाणै रामनामाङ्कितैः शितैः ॥ २५ ॥

यो हेतुः बलपराक्रमरूपः । त्वयाप्रकृतः प्रस्तावितः । तत्रापीत्यपिशब्देन पूर्वं निराकृतः पक्षः समुच्चीयते । यदनुपपन्नं अयुक्तं । असाधु अहितं च । तद्वक्ष्यामि ॥ ११ ॥ अनुपपत्तिमुपपादयति—येनेति ॥१२॥ असाधुत्वं दर्शयति—ये पुरेति ॥ तान् तज्जातीयानित्यर्थः ॥ १३ ॥ संक्रुद्धं सिंहमिव संक्रुद्धसिंहसदृशं तमबुध्य अबुध्वा । सुप्तं सर्पमिव प्रबोधयितुमिच्छसीत्यन्वयः ॥ १४ ॥ असह्यं सोढुमशक्यं । अपरिहार्यपराक्रममित्यर्थः । आसादयितुं आसादितुं ॥ १५ ॥ यत्र शत्रोः प्रतिसमासने प्रतिमुखस्थितौ इदं सर्वं बलं संशयस्थं भवति । तत्र एकस्य तव गमनं न रोचते ॥ १६ ॥ हीनार्थः हीयमानबलः । कः पुमान् जीवितत्यागे विषये । निश्चित्य निश्चयं कृत्वा । समृद्धार्थं वर्धमानबलं रिपुं प्राकृतं यथा क्षुद्रपुरुषमिव । वशमानेतुमिच्छतीत्यन्वयः । जीवितत्यागे निश्चयोस्ति चेत्तंप्रति युद्धाय याहीत्यर्थः ॥ १७ ॥ यस्य मनुष्येषु सदृशो नास्ति । किंतु देवयोः इन्द्रविवस्वतोः इन्द्रसूर्ययोस्तुल्येन तेन रामेणेति शेषः । योद्धुं कथमाशंससे । वक्तुमेव न शक्यं किमुत कर्तुमिति शेषः॥१८—॥ १९ ॥ लब्ध्वेत्यादिश्लोकद्वयमेकान्वयं ॥ संप्रजल्पसि बहुविधं भाषसे । अद्येति शेषः । यदीच्छसि । वक्ष्यमाणोपायमिति शेषः । तदा तदैव । मे मया । उपस्थानं स्वयमेव समीपागमनं । रुचिरः प्रियः । स्वया बुद्ध्या शृणु । ननु परबुद्धिमनुसरेत्यर्थः ॥ २०—२२ ॥ उपायैः सीताहरणोपायैः । कृत्यं साध्यं । नास्ति । सिद्धे साधनायोगादिति भावः ॥ २३ ॥ अथ जीवति यदि जीवतीत्यर्थः । ततः तदा । समीक्षितं आलोचितं । यत् तत् अभिपत्स्यामः । करिष्याम इति यावत् ॥ २४ ॥ तत्किमित्यत्राह—वयमित्यादि ॥ वयं बाणैः स्वतनुं विदार्य रामेण विदारितां कारयित्वा । रुधिरेण समुक्षिताः रामनामाङ्कितैः शरैः सह युद्धादिहेष्याम इति योजना ।

स० इन्द्रविवस्वतोः एकदेहमाश्रितयोरित्यभूतोपमेयं । अन्यथेन्द्रादीनामेतदादिपराभवस्यबहुवारमनुभवान्ननिदर्शनार्हतेतिबोध्यं ॥ १८ ॥ शि० शरैः विघातकैः ॥ स० वयंयुद्धात्स्वतनुंबाणैः स्वयमेवविदार्य रामनामाङ्कितैःशरैः रुधिरेणसमुक्षिताइव इहैष्यामः ॥ बाणैःशरैरितिपुनरुक्तिकृत्यमनालोचयतातीर्थेनेवनागोजिभट्टेनापि रामनामाङ्कितशरताडितानांमहोदरादीनांजीवतां

[पा०] १ ङ. झ. ट. बलास्तदा । राक्षसाराघवंध्वस्ताः. २ च. झ. ञ. ट. पूर्वं. ३ ङ. झ. ञ. ट. सुप्तमहोबुध्वा. ४ ख. ङ. झ. ट. निश्चितं. ५ क. ख. च छ. त्रिलोकेषु. ६ क. ङ. झ. ट. संरब्धं. ७ ग. ङ. छ. झ. ञ. ट. पुरस्ताद्वैदेहीं. ख. ज. पुनस्त्वांवैदेहीं. ८ ङ. झ. ट. किमर्थंत्वंविलंबसे. च. छ. ञ. किमर्थंपरितप्यसे. ग. घ. किमर्थंत्वंप्रजल्पसि. ९ ङ. च. झ. ञ. ट. राक्षसेन्द्रततःशृणु. १० क. ग.—ट. ततस्समभि. ११ क. ख. ग. ङ.—ट. शरैः.

भक्षितो राघवोऽस्माभिर्लक्ष्मणश्चेति वादिनः ॥ तव पादौ ग्रहीष्यामस्त्वं नः कामं प्रपूरय ॥ २६ ॥
ततोऽवधोषय पुरे गजस्कन्धेन पार्थिव ॥ हतो रामः सह भ्रात्रा ससैन्य इति सर्वतः ॥ २७ ॥
प्रीतो नाम ततो भूत्वा भृत्यानां त्वमरिंदम ॥ भोगांश्च परिवारांश्च कामांश्च वसु दापय ॥ २८ ॥
ततो माल्यानि वासांसि वीराणामनुलेपनम् ॥ [1]पेयं च बहु योधेभ्यः स्वयं च मुदितः पिब ॥२९॥
ततोऽस्मिन्बहुलीभूते कौलीने सर्वतो गते ॥ भक्षितः ससुहृद्रामो राक्षसैरिति विश्रुते ॥ ३० ॥
प्रविश्याश्वास्य चापि त्वं सीतां रहसि सान्त्वय ॥ धनधान्यैश्च कामैश्च रत्नैश्चैनां प्रलोभय ॥ ३१ ॥
अनयोपधया राजन्[2]भयशोकानुबन्धया ॥ अकामा त्वद्वशं सीता नष्टनाथा गमिष्यति ॥ ३२ ॥
[3]रञ्जनीयं हि भर्तारं विनष्टमवगम्य सा ॥ नैराश्यात्स्त्रीलघुत्वाच्च त्वद्वशं प्रतिपत्स्यते ॥ ३३ ॥
सा पुरा सुखसंवृद्धा सुखार्हा दुःखकर्शिता ॥ त्वय्यधीनं सुखं ज्ञात्वा सर्वथोपगमिष्यति ॥ ३४ ॥

एतत्सुनीतं मम दर्शनेन रामं हि दृष्ट्वैव भवेदनर्थः ॥
इहैव ते सेत्स्यति मोत्सुको भूर्महानयुद्धेन सुखस्य लाभः ॥ ३५ ॥
[4]अदृष्टसैन्यो ह्यनवाप्तसंशयो रिपुं[5]नयुद्धेन जयन्नराधिपः ॥
यशश्च पुण्यं च महन्महीपते श्रियं[6] च कीर्तिं च चिरं[7] समश्नुते ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

इदं च रामयुद्धं कृतमिति सीतासमाश्वासाय ॥२५॥ ततः आगमनानन्तरं । रामो लक्ष्मणश्च रिपुः निःशेषं भक्षित इति तव पादौ ग्रहीष्यामः । त्वं संतोषातिशयव्यञ्जनार्थं नः कामं प्रपूरय । अभीष्टं पारितोषिकं देहीत्यर्थः ॥ २६ ॥ गजस्कन्धेन गजस्कन्धगतपुरुषेण ॥ २७ ॥ नामेत्यलीके । परिवारान् दासदासीः गजाश्वादीन्परिच्छदान्वा । " स्याज्जङ्घे परीवारः " इत्यमरः । कामान् काम्यमानानभीष्टान् । वसु सुवर्णं ॥ २८—२९ ॥ तत इत्यादिश्लोकद्वयं ॥ कौलीने लोकवादे । " स्यात्कौलीनं लोकवादे " इत्यमरः । कौलीनमेव विशदयति—भक्षित इति । प्रविश्य । समीपं गत्वेत्यर्थः । आश्वास्य रामात्ययजं शोकं निवार्य । सान्त्वय मयि प्रीतिं कुर्वित्येवं सान्त्ववादं कथयेत्यर्थः । धनैः सुवर्णैः ॥ ३०—३१ ॥ उपधया कपटोपायेन । भयशोकानुबन्धया संपादितसीताभयशोकेनेत्यर्थः । अकामा पूर्वं त्वदनभिलाषिणी ॥ ३२ ॥ स्त्रीलघुत्वात् स्त्रीचापलात् ॥ ३३ ॥ त्वय्यधीनं त्वयि विषये अधीनं परतन्त्रं । उपगमिष्यति । त्वामिति शेषः ॥ ३४ ॥ उक्तमर्थं निगमयति—एतदिति ॥ एतत् मम दर्शनेन बुद्ध्या । सुनीतं निर्णीतं । रामं दृष्ट्वा स्थितस्य तव अनर्थो भवेत् । मोत्सुको भूः मा रणोत्सुको भूः । अयुद्धेन युद्धव्यतिरिक्तासनबलेन । प्रसज्यप्रतिषेधेपि समासस्येष्टत्वात्साधुः ॥ ३५ ॥ तदेवायुद्धं स्तौति—अदृष्टेति ॥ अदृष्टसैन्यः अदृष्टशत्रुसैन्यः । अतएवानवाप्तसंशयः अप्राप्तप्राणसंदेहः । अयुद्धेन

प्रत्यावृत्तौत्सुक्यसंपादितपुण्यमेवनिमित्तमित्यभिप्रेतं । " रामंहिदृष्ट्वैवभवेदनर्थ" इतिसर्गोपान्त्यश्लोकीयानर्थोवधइतिस्वव्याख्यानंपूर्वोत्तराविमर्शमूलंचेतिमतिमद्भिःसंतोष्टव्यं ॥ २५ ॥ **ति०** बहुदेयं देहीतिशेषः । मुदितःपिब मुदितइवपिब मैरेयमितिशेषः ॥२९॥ **ती०** अनयोपधया अनेनकपटोपायेन । भयशोकानुबन्धया संपादितभयशोकयेत्यर्थः । अनयोपधयेत्यादिश्लोकत्रयस्यवास्तवार्थं महोदरवाणी प्रकारान्तरेणनिस्सरति—**अनयेति** । नष्टनाथागमिष्यतीत्यत्र नष्ट न अथ आगमिष्यतीतिच्छेदः । अथेत्यप्यर्थे । हेनष्ट रावण । अकामा विष्णुकामासीता । अनयोपधयापि त्वद्वशंनागमिष्यतीत्यर्थः ॥ ३२ ॥ **स०** अयुद्धेन विनायुद्धं । एतेन सीतालाभानन्तरंकृतकार्यःशरणंव्रजेतिसूच्यतइतिज्ञेयं ॥ ३५ ॥ इतिचतुःषष्टितमःसर्गः ॥ ६४ ॥

[**पा०**] १ ङ. ञ. ञ. ट. देयंचबहु. ग. देयंचबहुधातेभ्यः. २ ङ.—ट. भूयश्शोकानु. ३ च. छ. झ. ट. रमणीयंहि. ४ ग. ङ. च. ज.—ट. अनष्टसैन्यो. ५ ङ. च. झ. ट. रिपुंत्वयुद्धेनजयञ्जनाधिप. ६ छ. ज. ञ. नरांधिप. ७ क. ख. च. छ. ञ. सौख्यंचमहान्महीपतिः. ८ ख. च. छ. ञ. श्रियंसमृद्धांच. ८ ग. सुखं.

Copyright © 2014 by Pearson Education, Inc.
All rights reserved.
Printed in the United States of America.
This publication is protected by copyright, and permission should be obtained from the publisher prior to any prohibited reproduction, storage in a retrieval system, or transmission in any form or by any means, electronic, mechanical, photocopying, recording, or likewise. For information regarding permissions, request forms and the appropriate contacts within the Pearson Education Global Rights & Permissions department, please visit www.pearsoned.com/permissions/.

पञ्चषष्टितमः सर्गः ॥ ६५ ॥

कुंभकर्णेन महोदरभर्त्सनपूर्वकंरावणंप्रतिरामवधप्रतिज्ञानेन रणायनिर्याणोक्तिः ॥ १ ॥ रावणेन कुंभकर्णस्यनानाभरणैरलङ्कारपूर्वकं रणायप्रेषणम् ॥ २ ॥ कुंभकर्णेन स्वप्रस्थानसमयप्रादुर्भूतदुर्निमित्तालक्षीकारेणैव रणायनिर्याणम् ॥ ३ ॥

[1]स तथोक्तस्तु निर्भर्त्स्य कुंभकर्णो महोदरम् ॥ अब्रवीद्राक्षसश्रेष्ठं भ्रातरं रावणं ततः ॥ १ ॥
सोहं तव भयं घोरं वधात्तस्य दुरात्मनः ॥ रामस्याद्य प्रमार्जामि [2]निर्वैरो हि सुखी भव ॥ २ ॥
गर्जन्ति न वृथा शूरा निर्जला इव तोयदाः ॥ पश्य संपाद्यमानं तु गर्जितं युधि कर्मणा ॥ ३ ॥
न मर्षयति चात्मानं [3]संभावयति नात्मना ॥ अदर्शयित्वा [4]शूरास्तु कर्म कुर्वन्ति दुष्करम् ॥ ४ ॥
विक्लबानामबुद्धीनां राज्ञा पण्डितमानिनाम् ॥ [5]शृण्वता सादितमिदं त्वद्विधानां महोदर ॥ ५ ॥
युद्धे कापुरुषैर्नित्यं भवद्भिः प्रियवादिभिः ॥ राजानमनुगच्छद्भिः [6]कृत्यमेतद्धि सादितम् ॥ ६ ॥
राजशेषा कृता लङ्का क्षीणः कोशो बलं हतम् ॥ राजानमिममासाद्य सुहृच्चिह्नममित्रकम् ॥ ७ ॥
एष निर्याम्यहं युद्धमुद्यतः शत्रुनिर्जये ॥ दुर्नयं भवतामद्य समीकर्तुमिहाहवे [7]॥ ८ ॥

जयन् युद्धव्यतिरिक्तोपायेन जयन्नित्यर्थः । महत् पुण्यं पुण्यफलं सुखं । श्रियं श्रीमत्प्रियालाभेन जनितां संपदं । कीर्तिं प्रसादं । विस्तारं वा । "कीर्तिः प्रसादे यशसि कर्दमे विस्तृतावपि" इति रत्नमाला । महीपते इति संबोधनं । सीतानुरागाभावेन नैराश्याद्रामः स्वयं विनश्यतीति महोदरहृदयम् ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुःषष्टितमः सर्गः॥६४॥

अथ युद्धाय कुम्भकर्णनिर्याणं पञ्चषष्टितमे—स तथोक्तस्त्वित्यादि ॥ निर्भर्त्स्य गर्जन्तीत्यादिवक्ष्यमाणप्रकारेणेति शेषः ॥ १ ॥ प्रमार्जामि । निवर्तयिष्यामीत्यर्थः । वर्तमानसामीप्ये वर्तमानवत्प्रयोगः ॥ २ ॥ वृथा कर्मणा विना । मया तु कर्मणा संपाद्यमानं गर्जितं पश्य । गर्जितानुसारेण कर्म करोमीत्यर्थः ॥ ३ ॥ शूराः परकृतामवमानोक्तिं । न मर्षयति न मर्षयन्ति न सहन्ते । आत्मना स्वयं । आत्मानं न संभावयति न संभावयन्ति न बहुमन्यन्ते । उभयत्रापि व्यत्ययेनैकवचनं । किंतु अदर्शयित्वा अप्रकाश्य । आत्मपौरुषमनुक्त्वेत्यर्थः । दुष्करमपि कर्म कुर्वन्ति ॥ ४ ॥ विक्लबानामिति । अत्र पञ्चम्यर्थे षष्ठी । सादितमिति भावे निष्ठा । विक्लबेभ्यः कातरेभ्यः । अबुद्धिभ्यः पण्डितमानिभ्यः त्वद्विधेभ्यः । शृण्वता राज्ञा । इदमीदृशं । सादितं प्राप्तंभवति ॥ ५ ॥ इदंशब्दनिर्दिष्टं दर्शयति—युद्ध इति ॥ युद्धे कापुरुषैः युद्धभीरुभिरित्यर्थः । राजानमनुगच्छद्भिः राजेच्छानुसारिभिरित्यर्थः । एतत् प्रकृतयुद्धपर्यवसायि सीताहरणकृत्यं । सादितं संपादितं ॥ ६ ॥ राजशेषेति । अत्राप्यनुगच्छद्भिः भवद्भिरित्यनुषञ्जनीयं । सुहृच्चिह्नं सुहृद्व्यपदेश्यं । अमित्रकं भवतामित्रभूतं । इमं राजानमासाद्य अनुगच्छद्भिः भवद्भिः लङ्का राजशेषा कृता । अकार्यप्रवृत्तो राजा यैर्न निवार्यते स तेषामित्र इत्यभिप्रायेण अमित्रकमित्युक्तं ॥ ७ ॥ दुर्नयं समीकर्तुं शत्रुनिर्जये । तद्विनाश इत्यर्थः । उद्यतः उद्युक्तः सन् । युद्धं युद्धभूमिं प्रति । एष निर्याभि ।

ती० सोहमित्यस्यवास्तवार्थस्तु दुरात्मनः दुष्टेष्वप्यात्मबुद्धिः असुग्रहरूपायस्यरामस्याहं रामदासोहंस्यवपि । तथापि तस्यप्रसिद्धस्य प्रहस्तमुखराक्षससमूहस्येत्यर्थः । वधात्तव घोरंभयमुपस्थितमितिशेषः । तत्प्रमार्जामि अपनयामि । सत्वं निर्वैरःसन् सुखीभवेतिसंबन्धः ॥२॥ ति० आत्मनाआत्मानंसंभावयितुं श्लाघयितुंनमर्षयन्ति नसहन्ते । नेच्छन्तीतियावत् ॥ ४ ॥ ति० अशूरस्वरूपवैक्लब्यादिगुणानां त्वद्वचः युद्धनिवृत्तिपरं रोचते नतुवीराणामित्यर्थः । शृण्वतांसादितमिदंत्वद्विधानामितिपाठे विक्लबत्वादिगु-

[पा०] १ ख. ञ. एवमुक्तस्तु. २ ख. च. ज. ञ. निर्वैरस्त्वं. ३ झ. ञ. ट. संभावयितुमात्मना. ४ क. शूरस्तुकुरुते कर्मदुष्करं. ५ क. ख. घ.—ट. राज्ञां. ६ ख. ङ. च. झ. ञ. ट. रोचतेत्वद्वचोनित्यंकथ्यमानंमहोदर. ७ ङ. झ. ट. सर्वे कृत्यंविनाशितं. क.—घ. कृत्यमेतद्विघातितं. च. ञ. कृत्यमेतद्विनाशितं. ८ क. ख. ज.—ट. कर्तुंमहाहवे.

एवमुक्तवतो वाक्यं कुंभकर्णस्य धीमतः ॥ प्रत्युवाच ततो वाक्यं प्रहसन्राक्षसाधिपः ॥ ९ ॥
महोदरोयं रामात्तु परित्रस्तो न संशयः ॥ न हि रोचयते तात युद्धं युद्धविशारद ॥ १० ॥
कश्चिन्मे त्वत्समो नास्ति सौहृदेन बलेन च ॥ गच्छ शत्रुवधाय त्वं कुंभकर्ण जयाय च ॥ ११ ॥
तस्मात्तु भयनाशार्थं भवान्संबोधितो मया ॥ अयं हि कालः सुहृदां राक्षसानामरिंदम ॥ १२ ॥
तद्गच्छ शूलमादाय पाशहस्त इवान्तकः ॥ वानरान्राजपुत्रौ च भक्षयादित्यतेजसौ ॥ १३ ॥
समालोक्य तु ते रूपं विद्रविष्यन्ति वानराः ॥ रामलक्ष्मणयोश्चापि हृदये प्रस्फुटिष्यतः ॥ १४ ॥
एवमुक्त्वा महाराजः कुंभकर्णं महाबलम् ॥ पुनर्जातमिवात्मानं मेने राक्षसपुङ्गवः ॥ १५ ॥
कुंभकर्णबलाभिज्ञो जानंस्तस्य पराक्रमम् ॥ बभूव मुदितो राजा शशाङ्क इव निर्मलः ॥ १६ ॥
इत्येवमुक्तः संहृष्टो निर्जगाम महाबलः ॥ १७ ॥
राज्ञस्तु वचनं श्रुत्वा कुम्भकर्णः समुद्यतः ॥ आददे निशितं शूलं वेगाच्छत्रुनिबर्हणम् ॥ १८ ॥
सर्वकालायसं दीप्तं तप्तकाञ्चनभूषणम् ॥ इन्द्राशनिसमं भीमं वज्रप्रतिमगौरवम् ॥ १९ ॥
देवदानवगन्धर्वयक्षकिन्नरसूदनम् ॥ रक्तमाल्यं महाधाम स्वतश्चोद्गतपावकम् ॥ २० ॥
आदाय निशितं शूलं शत्रुशोणितरञ्जितम् ॥ कुंभकर्णो महातेजा रावणं वाक्यमब्रवीत् ॥ २१ ॥
गमिष्याम्यहमेकाकी तिष्ठत्विह बलं मम ॥ अद्य तान्क्षुभितान्क्रुद्धो भक्षयिष्यामि वानरान् ॥
कुंभकर्णवचः श्रुत्वा रावणो वाक्यमब्रवीत् ॥ २२ ॥
सैन्यैः परिवृतो गच्छ शूलमुद्गरपाणिभिः ॥ वानरा हि महात्मानः शीघ्राः सुव्यवसायिनः ॥२३॥
एकाकिनं प्रमत्तं वा नयेयुर्दशनैः क्षयम् ॥ तस्मात्परमदुर्धर्षैः सैन्यैः परिवृतो व्रज ॥
राक्षसामहितं सर्वं शत्रुपक्षं निषूदय ॥ २४ ॥
अथासनात्समुत्पत्य स्रजं मणिकृतान्तराम् ॥ आबबन्ध महातेजाः कुंभकर्णस्य रावणः ॥ २५ ॥
अङ्गदान्यङ्गुलीवेष्टान्वराण्याभरणानि च ॥ हारं च शशिसंकाशमाबबन्ध महात्मनः ॥ २६ ॥
दिव्यानि च सुगन्धीनि माल्यदामानि रावणः ॥ श्रोत्रे चासंजयामास श्रीमती चास्य कुण्डले ॥२७॥

अद्यैव निर्यास्यामीत्यर्थः ॥ ८–११ ॥ तस्मात् भवतो निःसमत्वात् । संबोधितः प्रबोधितः । अयं हि कालः । युद्धायेतिशेषः ॥ १२–१४ ॥ पुनर्जातमिव मेने । जेष्यत्ययमिति विश्वासादितिभावः ॥ १५—१६ ॥ इत्येवमित्यर्धं ॥ निर्जगाम निर्गन्तुमुद्युक्तः ॥ १७—॥ १८ ॥ सर्वकालायसं बहुकाष्णायसमयमित्यर्थः ॥ १९ ॥ महाधाम महातेजः । स्वतश्चोद्गतपावकं क्रौर्यात्स्वत एवोत्पन्नाग्निकणं ॥ २०—२२ ॥ महामानः महाबुद्धयः । शीघ्राः वेगवन्तः । सुव्यवसायिनः दृढनिश्चयाः ॥ २३—२४ ॥ स्रजं काञ्चनमालां । कुम्भकर्णस्य आबबन्ध कुम्भकर्णे आबबन्धेत्यर्थः ॥ २५ ॥ अङ्गुलीवेष्टान् अङ्गुलीयकानि ॥२६॥ आसञ्जयामास । बबन्धेत्यर्थः । अत्र केयूरादीनामप्युपलक्षणं । काञ्चनाङ्गदकेयूरेत्यनुवादात् ॥ २७ ॥

णानांलद्विधानांवचःश्रण्वतां इदंसादितं ईदृशंदुःखंप्राप्तंभवतीत्यर्थइतितीर्थः ॥ ५ ॥ **ती०** समालोक्येत्यस्यवास्तवार्थस्तु तेरूपंसमालोक्य रामलक्ष्मणयोःसंबन्धिनोवानराः विद्रविष्यन्ति । प्रस्फुटिष्यतः द्यावापृथिव्याविति शेषः । अतोहृदयेयुद्धगमनायमतिंकुर्वित्यर्थः ॥ १४ ॥ **स०** मणयःकृताः अन्तरेयस्याःसा तां । स्रजं मालां ॥ २५ ॥ **स०** माल्यदामानि पुष्पमालाः । "माल्यं

[पा०] १ ख. ङ.—ट. शयानःशत्रुनाशार्थं. २ झ. संगच्छ. क. ख. घ. ङ. च. ट. त्वंगच्छ. ३ क. खं. ङ. च. झ. ट. महातेजाः. ४ ङ. झ. ट. श्रुत्वायोद्धुमुपक्रमांस्तदा. ५ क. ग.—झ. निबर्हणः. ६ ङ. झ. ट. सर्वकालायसं. ७ ङ. च. छ. झ. ट. इन्द्रनीलसमप्रख्यं. ८ क. च. छ. महत्. ९ क. ङ. च. छ. झ. ञ. ट. तान्क्षुधितः. १० ङ. झ. ट. शूराः. ११ ख. च. छ. ञ. रक्षखरक्षसांपक्षं. १२ ग. ङ. च. झ. ट. गात्रेषुसज्जयामासश्रोत्रयोश्चास. ख. छ. अङ्गेष्वासज्जयामास.

काञ्चनाङ्गदकेयूरनिष्काभरणभूषितः ॥ कुंभकर्णो बृहत्कर्णः सुहुतोऽग्निरिवाबभौ ॥ २८ ॥
श्रोणीसूत्रेण महता मेचकेन व्यराजत ॥ अमृतोत्पादने नद्धो भुजङ्गेनेव मन्दरः ॥ २९ ॥
स काञ्चनं भारसहं निवातं विद्युत्प्रभं दीप्तमिवात्मभासा ॥
आबध्यमानः कवचं रराज संध्याभ्रसंवीत इवाद्रिराजः ॥ ३० ॥
सर्वाभरणसर्वाङ्गः शूलपाणिः स राक्षसः ॥ त्रिविक्रमकृतोत्साहो नारायण इवाबभौ ॥ ३१ ॥
भ्रातरं संपरिष्वज्य कृत्वा चाभिप्रदक्षिणम् ॥ प्रणम्य शिरसा तस्मै संप्रतस्थे महाबलः ॥ ३२ ॥
निष्पतन्तं महाकायं महानादं महाबलम् ॥ तमाशीर्भिः प्रशस्ताभिः प्रेषयामास रावणः ॥ ३३ ॥
शङ्खदुन्दुभिनिर्घोषैः सैन्यैश्चापि वरायुधैः ॥ तं गजैश्च तुरङ्गैश्च स्यन्दनैश्चाम्बुदस्वनैः ॥ ३४ ॥
अनुजग्मुर्महात्मानं रथिनो रथिनां वरम् ॥ ३५ ॥
सर्पैरुष्ट्रैः खरैरश्वैः सिंहद्विपमृगद्विजैः ॥ अनुजग्मुश्च तं घोरं कुंभकर्णं महाबलम् ॥ ३६ ॥
स पुष्पवर्षैरवकीर्यमाणो धृतातपत्रः शितशूलपाणिः ॥
मदोत्कटः शोणितगन्धमत्तो विनिर्ययौ दानवदेवशत्रुः ॥ ३७ ॥
पदातयश्च बहवो महानादा महाबलाः ॥ अन्वयू राक्षसा भीमा भीमाक्षाः शस्त्रपाणयः ॥ ३८ ॥
रक्ताक्षाः सुमहाकाया नीलाञ्जनचयोपमाः ॥ शूलानुद्यम्य खड्गांश्च निशितांश्च परश्वधान् ॥ ३९ ॥
बहुव्यामांश्च परिघान्गदाश्च मुसलानि च ॥ तालस्कन्धांश्च विपुलान्क्षेपणीयान्दुरासदान् ॥ ४० ॥
अथान्यद्वपुरादाय दारुणं रोमहर्षणम् ॥ निष्पपात महातेजाः कुंभकर्णो महाबलः ॥ ४१ ॥
धनुःशतपरीणाहः स षट्छतसमुच्छ्रितः ॥ रौद्रः शकटचक्राक्षो महापर्वतसन्निभः ॥ ४२ ॥
संनिपत्य च रक्षांसि दग्धशैलोपमो महान् ॥ कुंभकर्णो महावक्त्रः प्रहसन्निदमब्रवीत् ॥ ४३ ॥
अद्य वानरमुख्यानां तानि यूथानि भागशः ॥ निर्दहिष्यामि संक्रुद्धः शैलभानिव पावकः ॥ ४४ ॥
नापराध्यन्ति मे कामं वानरा वनचारिणः ॥ जातिरस्मद्विधानां सा पुरोद्यानविभूषणम् ॥ ४५ ॥
पुररोधस्य मूलं तु राघवः सहलक्ष्मणः ॥ हते तस्मिन्हतं सर्वं तं वधिष्यामि संयुगे ॥ ४६ ॥
एवं तस्य ब्रुवाणस्य कुम्भकर्णस्य राक्षसाः ॥ नादं चक्रुर्महाघोरं कम्पयन्त इवार्णवम् ॥ ४७ ॥

—२८ ॥ अमृतोत्पादने नद्ध इति निमित्तसप्तमी। भुजङ्गेन वासुकिना ॥ २९ ॥ भारसहं आयुधादिभिः प्रहारेष्यशिथिलमित्यर्थः। दृढमिति वार्थः। यद्वा उपनीतायां तुलायां स्थाप्यमानान्बहून्भारान् सहत इति भारसहः। अनेकभारपरिमाण इत्यर्थः। निवातं वातप्रवेशनिवारकं। निरन्तरमिति यावत्। आत्मभासा कवचकान्त्या। यद्वा निवातं शस्त्राभेद्यं। "निवातावाश्रयावातौ शस्त्राभेद्यं च वर्म यत्" इत्यमरः। आबध्यमानः आबध्नन्। आर्षविकरणव्यत्ययेन श्यन्प्रत्ययः ॥३०॥ सर्वाभरणसर्वाङ्गः सर्वाभरणयुक्तसर्वाङ्गः। त्रिविक्रमकृतोत्साहः त्रिषु विक्रमेषु पदन्यासेषु कृतोत्साहः ॥३१–३५॥ सर्पैरिति। सर्पादीनां महाशरीराणां वाहनत्वं संभवतीति बोध्यं। द्विपाः गजाः। द्विजाः हंसादयः ॥३६॥ मदोत्कटः स्वाभाविकमदेन मत्तः। "मत्ते शौण्डोत्कटक्षीबाः" इत्यमरः ॥ ३७–३९ ॥ बहुव्यामान् अनेकव्यामप्रमाणान्। "व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरं" इत्यमरः। तालस्कन्धान् तालकाण्डान् ॥४०–४१॥ धनुःशतपरीणाहः धनुःशतविशालः। षट्छतसमुच्छ्रितः षट्छतधनुरुच्छ्रायः। संनिपत्य स्वानुगमनायोद्युक्तानां राक्षसानां समीपं गत्वेत्यर्थः ॥ ४२—४४ ॥ सा जातिः वानरजातिः। अस्मद्विधानां क्रीडापराणां ॥ ४५—४७ ॥

[पा०] १ ङ. ञ. ट. भिन्दिपालांश्चपरिघान्. २ घ. विपुलान्प्रासान्. ३ क. ख. ग. ङ. च. ञ. ञ. ट. घोरदर्शनं. ४ ङ. च. छ. ञ. महायूथानि. ख. नानायूथानि. ५ ङ. ञ. ट. पतङ्गानिव. ६ ख. च. छ. ञ. वधिष्याम्यतोयुधि. ७ ग. महाघोराः. ख. च. ञ. महायोधाः.

तस्य निष्पततस्तूर्णं कुम्भकर्णस्य धीमतः ॥ बभूवुर्घोररूपाणि निमित्तानि समन्ततः ॥ ४८ ॥
उल्काशनियुता मेघा बभूवुर्गर्दभारुणाः ॥ ससागरवना चैव वसुधा समकम्पत ॥ ४९ ॥
घोररूपाः शिवा नेदुः सज्वालकबलैर्मुखैः ॥ मण्डलान्यपसव्यानि बबन्धुश्च विहङ्गमाः ॥ ५० ॥
निष्पपात च मालेव गृध्रोस्य पथि गच्छतः ॥ प्रास्फुरन्नयनं चास्य सव्यो बाहुश्च कम्पते ॥ ५१ ॥
निपपात तदा चोल्का ज्वलन्ती भीमनिस्स्वना ॥ आदित्यो निष्प्रभश्चासीन्न प्रवाति सुखोऽनिलः ॥५२॥
अचिन्तयन्महोत्पातानुत्थितान्रोमहर्षणान् ॥ निर्ययौ कुम्भकर्णस्तु कृतान्तबलचोदितः ॥ ५३ ॥
स लङ्घयित्वा प्राकारं पद्भ्यां पर्वतसन्निभः ॥ ददर्शाभ्रघनप्रख्यं वानरानीकमद्भुतम् ॥ ५४ ॥
ते दृष्ट्वा राक्षसश्रेष्ठं वानराः पर्वतोपमम् ॥ वायुनुन्ना इव घना ययुः सर्वा दिशस्तदा ॥ ५५ ॥

तद्वानरानीकमतिप्रचण्डं दिशो द्रवद्भिन्नमिवाभ्रजालम् ॥
स कुम्भकर्णः समवेक्ष्य हर्षान्ननाद भूयो घनवद्घनाभः ॥ ५६ ॥
ते तस्य घोरं निनदं निशम्य यथा निनादं दिवि वारिदस्य ॥
पेतुर्धरण्यां बहवः प्लवङ्गा निकृत्तमूला इव सालवृक्षाः ॥ ५७ ॥
विपुलपरिघबान्स कुम्भकर्णो रिपुनिधनाय विनिस्सृतो महात्मा ॥
कपिगणभयमाददत्सुभीमं प्रभुरिव किङ्करदण्डवान्युगान्ते ॥ ५८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ॥ ६६ ॥

लङ्काप्राकारोल्लङ्घनेनरणायाभ्यागच्छतःकुंभकर्णस्य गिरिसदृशपृथुतरशरीरावलोकनमात्रेण नीलनलादिभिर्भयात्पलायनम् ॥ १ ॥ अङ्गदेन नानाप्रकारैःपरिसान्त्वितैस्तैः पुनःप्रत्यावर्तनेन तरुशिलादिपरिग्रहणेन कुंभकर्णप्रत्यभियानम् ॥ २ ॥

स लङ्घयित्वा प्राकारं गिरिकूटोपमो महान् ॥ निर्ययौ नगराच्तूर्णं कुम्भकर्णो महाबलः ॥ १ ॥

घोररूपाणि अत्यन्तघोराणि ॥ ४८ ॥ गर्दभारुणाः गर्दभवदव्यक्तरागाः । " अव्यक्तरागस्त्वरुणः " इत्यमरः ॥ ४९—५० ॥ गच्छतोस्य उपरिप्रदेशे गृध्रो मालेव निष्पपातेत्यन्वयः । गृध्र इति जात्येकवचनं । सव्यशब्दो लिङ्गव्यत्ययेन नयनशब्देनापि संबध्यते । कम्पते अकम्पत ॥ ५१॥ उल्का मेघनिर्गतज्वालाविशेषः ॥ ५२—५३ ॥ अभ्रघनः अभ्रसंघातः ॥ ५४—५७ ॥ प्रभुः अन्तकः । किंकरदण्डवान किंकरोमीत्यवस्थायी सचेतनो दण्डः तद्वान् ॥ ५८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चषष्टितमः सर्गः ॥ ६५ ॥

अथ कुम्भकर्णयुद्धप्रवृत्तिः—स इत्यादि ॥ १ ॥

मालाप्रसूनयोः " इत्यभिधानात् ॥ २७ ॥ **ति०** विपुलपरिघवानिति । शूलवदिदमप्यस्यायुधं । किङ्करदण्डवान् किङ्कराः संहारपरिकराःकालदण्डाअस्यसन्तितथा । युगान्तेप्रभुःकालाग्निरुद्रइवविनिस्सृतः ॥ **स०** विपुलपरिघवान् विपुलंपरिघादपीतिविपुलपरिघं शूलं तद्वान् । परिघोरोषः । " रोषेचपरिघोमतः " इतिविश्वः । तद्वानितिवा । इदमप्यस्यायुधमितिनागोजिभट्टव्याकरणं तथा प्रभुविशेषणमितितीर्थव्याख्यानंचानुक्तानुवादलेन दण्डस्यनियतायुधस्यपृथग्ग्रहणान्नैरर्थक्याच्चक्रमादुपेक्ष्ये । दण्डोस्यास्तीति दण्डवान् । करोदण्डवान्यस्येतिबहुव्रीहिः । प्रभुः संहारसमर्थोयमः । किं इति कपिगणभयंआददिव सुभीमं द्रष्टृणामपियथाभवतितथानिस्सृतइतिसंबन्धः । " किंकराः संहारपरिकराः कालदण्डाअस्यसन्तीतिकिंकरदण्डवान्" । "किंकरोमीत्युपस्थितदण्डोस्यास्तीति" तिकमान्नागोजिभट्टतीर्थौ बिन्दुसन्दोहविचार्यव्याख्यावक्तारावित्यलम् ॥ ५८ ॥ इतिपञ्चषष्टितमःसर्गः ॥ ६५ ॥

[**पा०**] १ क. ख. च. ज. उल्काशनिमुचो. २ ज. बभूवुर्भृशदारुणाः. ग. घ. च. छ. झ. विनेदुर्गर्दभा. ३ ख. च. छ. ज. ञ. गृध्रोस्यशूलाग्रेपथि. घ. ङ. झ. ट. गृध्रोस्यशूलेवैपथि. ४ क. ग.—ट. बाहुरकंपत. ५ ङ. झ. सददर्शघनप्रख्यं. ६ ख. च. छ. ज. तंदृष्ट्वावानरश्रेष्ठाराक्षसं. ७ क. ग. घ. पर्वतोपमाः. ८ क. ख. च. छ. ज. विनिर्गतो. ९ घ. मादिशन्सुभीमः.

स ननाद महानादं समुद्रमभिनादयन् ॥ [1]जनयन्निव [2]निर्घातान्विधमन्निव पर्वतान् ॥ २ ॥
तमवध्यं मघवता यमेन वरुणेन वा ॥ प्रेक्ष्य भीमाक्षमायान्तं वानरा विप्रदुद्रुवुः ॥ ३ ॥
[3]तांस्तु विप्रद्रुतान्दृष्ट्वा [4]वालिपुत्रोऽङ्गदोऽब्रवीत् ॥ नलं नीलं गवाक्षं च कुमुदं [5]च महाबलम् ॥ ४ ॥
[6]आत्मानमत्र विस्मृत्य वीर्याण्यभिजनानि च ॥ क्व गच्छत भयत्रस्ताः प्राकृता हरयो यथा ॥ ५ ॥
साधु सौम्या निवर्तध्वं किं प्राणान्परिरक्षथ ॥ नालं युद्धाय वै रक्षो महतीयं विभीषिका ॥ ६ ॥
महतीमुत्थितामेनां राक्षसानां [7]विभीषिकाम् ॥ विक्रमाद्विधमिष्यामो निवर्तध्वं प्लवङ्गमाः ॥ ७ ॥
कृच्छ्रेण तु समाश्वस्य संगम्य च ततस्ततः ॥ [8]वृक्षाद्रिहस्ता हरयः [9]संप्रतस्थू रणाजिरम् ॥ ८ ॥
ते निवृत्य तु [10]संक्रुद्धाः कुम्भकर्णं वनौकसः ॥ निजघ्नुः परमक्रुद्धाः समदा इव कुञ्जराः ॥ ९ ॥
प्रांशुभिर्गिरिशृङ्गैश्च शिलाभिश्च महाबलः ॥ पादपैः पुष्पिताग्रैश्च हन्यमानो न [11]कम्पते ॥ १० ॥
[12]तस्य गात्रेषु पतिता भिद्यन्ते [13]शतशः शिलाः ॥ पादपाः पुष्पिताग्राश्च भग्नाः पेतुर्महीतले ॥ ११ ॥
सोपि सैन्यानि संक्रुद्धो वानराणां महौजसाम् ॥ ममन्थ परमायत्तो वनान्यग्निरिवोत्थितः ॥ १२ ॥
लोहितार्द्रास्तु बहवः शेरते वानरर्षभाः ॥ निरस्ताः पतिता भूमौ ताम्रपुष्पा इव द्रुमाः ॥ १३ ॥
लङ्घ्यन्तः प्रधावन्तो वानरा नावलोकयन् ॥ १४ ॥
केचित्समुद्रे पतिताः [14]केचिद्गगनमाश्रिताः ॥ वध्यमानास्तु ते वीरा राक्षसेन बलीयसा ॥ १५ ॥
सागरं येन ते तीर्णाः पथा तेन प्रदुद्रुवुः ॥ १६ ॥
ते स्थलानि तथा निम्नं विषण्णवदना भयात् ॥ ऋक्षा [15]वृक्षान्समारूढाः [16]केचित्पर्वतमाश्रिताः ॥१७॥
ममज्जुरर्णवे केचिद्दुहाः केचित्समाश्रिताः ॥ [17]निषेदुः प्लवगाः केचित्केचिन्नैवावतस्थिरे ॥ १८ ॥
[केचिद्भूमौ निपतिताः केचित्सुप्ता मृता इव] ॥ तान्समीक्ष्याङ्गदो भग्नान्वानरानिदमब्रवीत् ॥१९॥
अवतिष्ठत युध्यामो निवर्तध्वं प्लवङ्गमाः ॥ भग्नानां वो न पश्यामि [18]परिगम्य महीमिमाम् ॥
स्थानं सर्वे निवर्तध्वं किं प्राणान्परिरक्षथ ॥ २० ॥

विधमन् दहन् ॥२—४॥ अभिजनानि प्रशस्तकुलानि ॥ ५ ॥ विभीषिका भयजनकः कृत्रिमपुरुषवेषः ॥ ६—८ ॥ परमक्रुद्धा इति कुञ्जरविशेषणं ॥ ९ ॥ प्रांशुभिः उन्नतैः । महाबलः कुम्भकर्णः ॥ १०—११ ॥ ममन्थ । ददाहेत्यर्थः ॥ १२ ॥ निरस्ताः उत्क्षिप्ताः ॥ १३ ॥ लङ्घ्यन्त इत्यर्धं ॥ नावलोकयन् नावालोकयन् । पृष्ठदेशमित्यर्थः ॥ १४ ॥ केचित्ते वानरा इति योजना ॥ १५ ॥ सागरमित्यर्धं ॥ ते वानराः ॥ १६ ॥ स्थलानि अतिधावनयोग्यान्देशान् उन्नतप्रदेशान्वा । आश्रिता इत्यन्वयः ॥ १७ ॥ निषेदुः भूमौ पतिता इव तस्थुः ॥ १८—१९ ॥ परिगम्य प्रदक्षिणीकृत्येत्यर्थः । स्थानं न पश्यामीत्यन्वयः

स० विजयन् विजयमानः । जयतीतिजयन् । विशिष्टश्चासौजयंश्चेतिसतथेतिवा । ति० निर्घातान् अशनिघोषान् ॥ २ ॥ स० हेसौम्याः क्रौर्यप्रदर्शनकालेपितदप्रकाशकाइतीर्ष्ययासंबोधनं । प्राणान् किंपरिरक्षथ स्वामिकामिताकरणेनजीवनंधिगिति भावः । इदंरक्षः अस्माभिःसहयुद्धंकर्तुनालं नसमर्थं । महतीविभीषिका महद्भिभीषणं । भावेण्वुल् ॥ ६ ॥ स० बहवःशिलाः "ओतोगुणवचनात्" इत्युकारान्तस्त्रीलिङ्गोबहुशब्दः ॥ ११ ॥ स० इमांमहींपरिक्रम्यापिस्थितानां स्थानं निर्भयस्थलं । नप-

[पा०] १ ङ. ञ. ट. विजयन्निव. २ क. ग. घ. च. छ. ज. निर्घोषान्. ३ च. छ. ज. तान्वीरःप्रद्रुतान्दृष्ट्वा. क. ग. घ. ज. तांस्तुविद्रवतोदृष्ट्वा. ४ क. ग. घ. ङ. ञ. ट. राजपुत्रोऽङ्गदो. ५ क. कुमुदंगन्धमादनं. ६ ख. ङ. च. ञ. ट. आत्मनस्तानिविस्मृत्य. ग. आत्मानमथविस्मृत्य. ७ ङ. ञ. ट. वृक्षान्गृहीत्वाहरयः. ८ क.—ङ. ञ. ट. संप्रतस्थूरणाजिरे. च. छ. युद्धार्थंसंप्रतस्थिरे. ९ ख. ग. ङ.—ट. संरब्धाः. १० च. छ. ज. बुध्यते. ११ छ. अस्य. १२ ञ. बहवः. १३ ग. केचित्सुप्ता मृताइव. १४ क. ख. वृक्षानुपारूढाः. १५ च. छ. ज. गोपुच्छास्त्वाश्रितागुहाः. १६ क. ख. घ. निपेतुःकेचिदवटेकेचित्. १७ ञ.—ट. परिक्रम्य.

निरायुधानां द्रवतामसङ्गगतिपौरुषाः ॥ दारा ह्युपहसिष्यन्ति स वै घातस्तु जीविनाम् ॥ २१ ॥
कुलेषु जाताः सर्वे स्म विस्तीर्णेषु महत्सु च ॥ क्व गच्छथ भयत्रस्ता हरयः प्राकृता यथा ॥ २२ ॥
अनार्याः खलु यद्भीतास्त्यक्त्वा वीर्यं प्रधावत ॥ २३ ॥
विकत्थनानि वो यानि तदा वै जनसंसदि ॥ तानि वः क्व नु यातानि सोदग्राणि महान्ति च ॥२४॥
भीरुप्रवादाः श्रूयन्ते यस्तु जीवति धिक्कृतः ॥ मार्गः सत्पुरुषैर्जुष्टः सेव्यतां त्यज्यतां भयम् ॥२५॥
शयामहेऽथ निहताः पृथिव्यामल्पजीविताः ॥ दुष्प्रापं ब्रह्मलोकं वा प्राप्नुमो युधि सूदिताः ॥२६॥
संप्राप्नुयामः कीर्तिं वा निर्हत्वा शत्रुमाहवे ॥ जीवितं वीरलोकस्य मोक्ष्यामो वसु वानराः ॥२७॥
न कुम्भकर्णः काकुत्स्थं दृष्ट्वा जीवन्गमिष्यति ॥ दीप्यमानमिवासाद्य पतङ्गो ज्वलनं यथा ॥ २८ ॥
पलायनेन चोद्दिष्टाः प्राणान्रक्षामहे वयम् ॥ एकेन बहवो भग्ना यशो नाशं गमिष्यति ॥ २९ ॥

॥ २० ॥ असङ्गगतिपौरुषाः अप्रतिबद्धपराक्रमा इति वानरसंबोधनं । निरायुधानां द्रवतां निरायुधेषु द्रवत्सु । यद्वा निरायुधानां द्रवतां दारास्तान् अपहसिष्यन्तीति । सः अपहासः घातः मृतिः ॥ २१ ॥ सर्वे । वयमिति शेषः । विस्तीर्णेषु ज्ञातिपरम्परया विततेषु । महत्सु प्रशस्तेषु ॥ २२ ॥ अनार्या इत्यर्धं । यद्यस्मात् भीताः प्रधावत पलायथ । तस्मादनार्याः खलु ॥ २३ ॥ सोदग्राणि उदग्रतायुक्तानि । महान्ति भूयांसीत्यर्थः ॥२४॥ यस्तु धिक्कृतो जीवति तद्विषये भीरुप्रवादाः । भीरुत्वापवादाः । श्रूयन्ते । सत्पुरुषैः शूरैः । जुष्टः सेवितः ॥ २५ ॥ सत्पुरुषजुष्टो मार्गः क इत्यपेक्षायामाह—शयामह इत्यादि ॥ युद्धमरणं हि सत्पुरुषजुष्टो मार्ग इत्यर्थः । समरान्निवृत्य पलायितानामपि मरणस्यावश्यंभावित्वप्रदर्शनार्थमल्पजीविता इत्युक्तं । समरानिवर्तिनां वीराणां तु मरणजीवनयोरुभयोरपि श्रेयस्करत्वं प्रतिपादयति—दुष्प्रापमिति । निहत्वा निहत्य । जीवितमिति । वीरलोकस्य वीराणं लोको ब्रह्मलोकः तस्य वसु मूल्यभूतं जीवितं मोक्ष्यामः ॥ २६—२७ ॥ दीप्यमानं ज्वलनमिव राममासाद्य कुम्भकर्णः पतङ्गो यथेति यथेवशब्दयोर्निर्वाहः ॥ २८ ॥ उद्दिष्टाः व्यपदिष्टाः । बहवो वयमनेन कुम्भकर्णेन भग्नाः पलायनेन प्राणान् रक्षामहे

श्यामि । राज्ञआज्ञातादृशीत्यत्रावस्थानेकुंभकर्णतोमरणं । गतवतांसुग्रीवतइतिनानिवर्तनेनिर्वृतिर्भवतामितिभावः ॥ २० ॥ **स०** निरायुधानां रिपुमुक्तायुधानङ्कितानां । क्रमतां गृहंप्रतिद्रवतां । सुजीवतां सज्जीवनवतां ॥ २१ ॥ **ति०** " हतोवाप्राप्स्यसिस्वर्गं जित्वावाभोक्ष्यसेमहीम् " इत्याशयवानाह—**शयामहइतिश्लोकद्वयेन** । यदिदैवगत्यानिहताःशयामहे तदाकुयोधिभिर्दुष्प्रापंब्रह्मलोकंप्राप्नुयामः । वाशब्दोव्यवस्थितविकल्पे । शत्रुमाहवेनिहत्वा निहत्य । कीर्तिं वाप्राप्नुयामः । उक्तमर्थंदार्ढ्यायपुनराह—**निहताइति** । निहताश्चेद्वीरलोकस्य वीरैःसूर्यद्वाराप्राप्यस्यब्रह्मलोकस्यवसु धनं हिरण्यगर्भभूमानन्दं । भोक्ष्यामः अनुभविष्यामः । "जीवितंवीरलोकस्यभोक्ष्याम" इतिपाठोपाङ्कः । नापितत्रार्थसामञ्जस्यं । तत्रहिब्रह्मलोकस्य वसु मूल्यभूतंजीवितंमोक्ष्यामइत्यर्थतीर्थ-आह । **स०** ब्रह्मलोकं वीरस्वर्गसंज्ञं । एतेन "हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीं" इतिगीताचैतदुक्तमेवार्थंवदतीतिसूचितं । शत्रुमितिजातावेकवचनं । मुख्यदशमुखविवक्षयैकवचनंवा । आहवइत्युभयान्वयि । तैर्निहताः वीरलोकस्य वीरप्राप्यस्वर्गस्य । वसु तत्रभोग्यंधनादि तेनाधिकमानन्दंभोक्ष्यामः । पूर्वमव्यवहितकपिवरान्प्रतिवचनं । इदंतदपेक्षयादूरवर्तिनउपागतान्प्रतिवचनमित्यधिकारिभेदान्नपुनर्वचनदोषः । यत्परिहारार्थंदार्ढ्यार्थमित्युक्तिरप्यपेक्षितास्यादितिमन्तव्यं ॥ २६—२७ ॥ **ति०** ननुकथमपिजयप्रत्याशाभावेनस्थित्यानप्रयोजनमतआह—नकुंभकर्णइति ॥ **स०** नकुंभकर्णइत्येकदापदंयथाकुंभकर्णंभिन्नस्तत्सदृशःप्रहस्तादिः तथा पतङ्गोज्वलनमिवकुंभकर्णःकाकुत्स्थंदृष्ट्वाजीवन्नगमिष्यति ॥ २८ ॥ **स०** उद्दिष्टाः अत्रायंतिष्ठत्रायंतिष्ठत्रितिनामाङ्कितायदिवयंप्राणान्रक्षामहे रक्षामः । तर्हि एकेनबहवोभग्नाइतियशः प्राक्संपादिताकीर्तिः नाशंगमिष्यति ॥ **ति०** उद्दिष्टाः महावीरेषुगणिताः । बहवोवयमेकेनभग्नाः पलायनेनयदिप्राणान्रक्षामहे तदायशोनाशंगमिष्यति । यद्वा उद्दिष्टाः एतेपलायिताइतिजनैर्निर्दिष्टाइत्यर्थः ॥ २९ ॥ इतिषट्षष्टितमःसर्गः ॥ ६६ ॥

[**पा०**] १ ठ. क्रमतां. २ ङ. झ. ट. ह्युपहसिष्यन्ति. क. परिहसिष्यन्ति. ३ झ. ठ. घातस्त्वजीवतां. ४ ग. गच्छध्वं. ५ घ. मोघानियुध्यतांजनसंसदि. ङ. झ. ट. भवद्भिर्जनसंसदि. ६ ङ. झ. हतानिच. ७ झ. भीरोःप्रवादाः. ख. घ. भीरुप्रवादाञ्श्रुत्वाचयोजीवतिधिगस्तुतं. ८ ङ. झ. ट. प्राप्नुयामोब्रह्मलोकंदुष्प्रापंचकुयोधिभिः. ९ ङ.—ट. अवाप्नुयामः. १० घ. तंहत्वा. ११ ग. ङ. च. झ. ञ. ट. निहतावीरलोकस्यभोक्ष्यामो. १२ च. छ. ञ. पतङ्गश्चपावकं.

एवं ब्रुवाणं तं शूरमङ्गदं कनकाङ्गदम् ॥ द्रवमाणास्ततो वाक्यमूचुः शूरविगर्हितम् ॥ ३० ॥
कृतं नः कदनं घोरं कुम्भकर्णेन रक्षसा ॥ न स्थानकालो गच्छामो दयितं जीवितं हि नः ॥ ३१ ॥
एतावदुक्त्वा वचनं सर्वे ते भेजिरे दिशः ॥ भीमं भीमाक्षमायान्तं दृष्ट्वा वानरयूथपाः ॥ ३२ ॥
द्रवमाणास्तु ते वीरा अङ्गदेन वलीमुखाः ॥ सान्त्वैश्चैवानुमानैश्च ततः सर्वे निवर्तिताः ॥ ३३ ॥
प्रहर्षमुपनीताश्च वालिपुत्रेण धीमता ॥ आज्ञाप्रतीक्षास्तस्थुश्च सर्वे वानरयूथपाः ॥ ३४ ॥

ऋषभशरभमैन्दधूम्रनीलाः कुमुदसुषेणगवाक्षरम्भतारा: ॥
द्विविदपनसवायुपुत्रमुख्यास्त्वरिततराभिमुखं रणं प्रयाताः ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

सप्तषष्टितमः सर्गः ॥ ६७ ॥

कुंभकर्णे वानरसेनामध्येकेषांचिद्भक्षणेनकेषांचित्पाणितलाभिघातेन विक्षोभपूर्वकंसंचरमाणे हनुमता शैलशृङ्गेणतत्ताडनम् ॥ १ ॥ तत्प्रहारक्षुभितेनकुंभकर्णेन हनुमतोवक्षसि शूलाभिघातेनविह्वलताप्रापणपूर्वकं नीलादिभिरायोधनम् ॥ २ ॥ तेषु कुंभकर्णपीडामसहमानेष्वङ्गदेन गिरिशिखरेणकुंभकर्णशिरस्ताडनम् ॥ ३ ॥ तेन मुष्टिघातेनाङ्गदस्यमोहप्रापणपूर्वकं सुग्रीवंप्रत्यभियानम् ॥ ४ ॥ सुग्रीवेण शैलशृङ्गताडितेनकुंभकर्णेन तद्वधायशूलेसमुत्सृष्टे हनुमता तच्छूलस्यनिजजानुसमारोपणेनभञ्जनम् ॥ ५ ॥ कुंभकर्णेन स्वपातितशैलशृङ्गप्रहारेणपतितमूर्च्छितस्यसुग्रीवस्यग्रहणेन लङ्काप्रवेशः ॥ ६ ॥ लङ्काजनैः कुंभकर्णोपरिहर्षेणपुष्पगन्धोदादिवर्षणे तत्सेकेनप्रबुद्धाप्यायितेनसुग्रीवेण स्वरनखरकराग्रैर्दन्तैश्च कुंभकर्णकर्णनासच्छेदनपूर्वकं वियतिसमुत्पतनेन रामपार्श्वागमनम् ॥ ७ ॥ ततःक्रोधात्परावृत्यरणाङ्गणमागतेनकुंभकर्णेन मध्येस्वेनसहयोधितवतोलक्ष्मणस्यश्लाघनेन रामंप्रत्यभियानम् ॥ ८ ॥ रामकुंभकर्णयोर्वीरवादपूर्वकंमहायुद्धम् ॥ ९ ॥ रामेण बाणचतुष्टयेनकुंभकर्णस्यबाहुपादच्छेदपूर्वकं शरान्तरेणशिरश्छेदनम् ॥ १० ॥ कुंभकर्णवधानन्तरं देवर्ष्यादिभिस्सहवानरैः सहर्षं श्रीरामपूजनम् ॥ ११ ॥

ते निवृत्ता महाकायाः श्रुत्वाऽङ्गदवचस्तदा ॥ नैष्ठिकीं बुद्धिमासाद्य सर्वे संग्रामकाङ्क्षिणः ॥ १ ॥
समुदीरितवीर्याश्च समारोपितविक्रमाः ॥ पर्यवस्थापिता वाक्यैरङ्गदेन वलीमुखाः ॥ २ ॥
प्रयाताश्च गता हर्षं मरणे कृतनिश्चयाः ॥ चक्रुः सुतुमुलं युद्धं वानरास्त्यक्तजीविताः ॥ ३ ॥
अथ वृक्षान्महाकायाः सानूनि सुमहान्ति च ॥ वानरास्तूर्णमुद्यम्य कुम्भकर्णमभिद्रुताः ॥ ४ ॥

यदि ततो यशो नाशं गमिष्यतीति योजना ॥ २९ ॥ शूरं पराक्रमवन्तं । कनकाङ्गदं उत्साहातिशयेन प्रकाशितस्वर्णाङ्गदं ॥ ३० ॥ कदनं मर्दनं । दयितमिष्टं ॥ ३१—३२ ॥ अनुमानैः सालगिरिभेदनादिदृष्टान्तपुरस्कृतैर्युक्तिविशेषैः ॥ ३३ ॥ आज्ञाप्रतीक्षाः सुग्रीवाद्याज्ञाप्रतीक्षाः ॥ ३४ ॥ त्वरिततराभिमुखं त्वरिततरं अभिमुखं चेति क्रियाविशेषणं । अत्र वायुपुत्रस्तु न पलाय्य निवृत्तः । किंतु ऋषभादिभिर्मिलित्वा कुम्भकर्णेन सह युद्धार्थं निवृत्त इति ज्ञेयं ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥

ते निवृत्ता इत्यादि, वानरास्त्यक्तजीविता इत्यन्तमेकं वाक्यं ॥ नैष्ठिकीं निष्ठा नाशः तत्संबन्धिनीं । मरणव्यवसायिनीमित्यर्थः । समुदीरितवीर्याः कथितात्मपराक्रमाः । समारोपितविक्रमाः समवलम्बितपराक्रमाः । मरणनिश्चयहेतुमाह—त्यक्तजीविता इति ।

कतक० अत्रसर्गविच्छेदोऽसांप्रदायिकः । एकप्रकरणत्वाद्वृत्तभेदाभावाच्च ॥ १ ॥ **स०** समारोपितविक्रमाः समारोपितः

[**पा०**] १ ङ. च. झ. ञ. ट. सान्त्वनैश्चानुमानैश्च. घ. सान्त्वनैरनुमानैश्च. २ क. ख. ग. ङ.—ट. मास्थाय. ३ क. ग.—ट. वीर्यास्ते. ४ ङ. झ. ट. बलीयसा. ५ ख. ग. घ. छ.—ट. मभिद्रवन्.

स कुम्भकर्णः संक्रुद्धो गदामुद्यम्य वीर्यवान् ॥ अर्दयन्सुमहाकायः समन्ताद्व्याक्षिपद्रिपून् ॥ ५ ॥
शतानि सप्त चाष्टौ च सहस्राणि च वानराः ॥ प्रकीर्णाः शेरते भूमौ कुम्भकर्णेन पोथिताः ॥ ६ ॥
षोडशाष्टौ च दश च विंशत्रिंशत्तथैव च ॥ परिक्षिप्य च बाहुभ्यां खादन्विपरिधावति ॥
भक्षयन्भृशसंक्रुद्धो गरुडः पन्नगानिव ॥ ७ ॥
कृच्छ्रेण च समाश्वस्ताः संगम्य च ततस्ततः ॥ वृक्षाद्रिहस्ता हरयस्तस्थुः संग्राममूर्धनि ॥ ८ ॥
ततः पर्वतमुत्पाट्य द्विविदः प्लवगर्षभः ॥ दुद्राव गिरिशृङ्गाभं विलम्ब इव तोयदः ॥ ९ ॥
तं समुत्पत्य चिक्षेप कुम्भकर्णस्य वानरः ॥ तमप्राप्तो महाकायं तस्य सैन्येऽपतत्तदा ॥ १० ॥
ममर्दाश्वान्गजांश्चापि रथांश्चैव नगोत्तमः ॥ तानि चान्यानि रक्षांसि पुनश्चान्यद्विरेः शिरः ॥ ११ ॥
तच्छैलशृङ्गाभिहतं हताश्वं हतसारथि ॥ रक्षसां रुधिरक्लिन्नं बभूवायोधनं महत् ॥ १२ ॥
रथिनो वानरेन्द्राणां शरैः कालान्तकोपमैः ॥ शिरांसि नदतां जह्रुः सहसा भीमनिस्स्वनाः ॥ १३ ॥
वानराश्च महात्मानः समुत्पाट्य महाद्रुमान् ॥ रथानश्वान्गजानुष्ट्रान्राक्षसानभ्यसूदयन् ॥ १४ ॥
हनुमाञ्शैलशृङ्गाणि वृक्षांश्च विविधान्बहून् ॥ ववर्ष कुम्भकर्णस्य शिरस्यम्बरमास्थितः ॥ १५ ॥
तानि पर्वतशृङ्गाणि शूलेन स बिभेद ह ॥ बभञ्ज वृक्षवर्षं च कुम्भकर्णो महाबलः ॥ १६ ॥

ततो हरीणां तदनीकमुग्रं दुद्राव शूलं निशितं प्रगृह्य ॥
तस्थौ ततोस्थापततः पुरस्तान्महीधराग्रं हनुमान्प्रगृह्य ॥ १७ ॥
स कुम्मकर्ण कुपितो जघान वेगेन शैलोत्तमभीमकायम् ॥
स चुक्षुभे तेन तदाऽभिभूतो मेदार्द्रगात्रो रुधिरावसिक्तः ॥ १८ ॥
स शूलमाविध्य तडित्प्रकाशं गिरिं यथा प्रज्वलिताग्रशृङ्गम् ॥
बाह्वन्तरे मारुतिमाजघान गुहोचलं क्रौञ्चमिवोग्रशक्त्या ॥ १९ ॥
स शूलनिर्भिन्नमहाभुजान्तरः प्रविह्वलः शोणितमुद्वमन्मुखात् ॥
ननाद भीमं हनुमान्महाहवे युगान्तमेघस्तनितस्वनोपमम् ॥ २० ॥

जीवनाशारहिता इत्यर्थः ॥ १—४ ॥ व्याक्षिपत् अपातयत् ॥ ५ ॥ प्रकीर्णाः शिथिलावयवाः । पोथिताः हिंसिताः । कुम्भकर्णस्यैकेन व्यापारेण शतादिसंघरूपेण पतिता इत्यर्थः ॥ ६ ॥ परिक्षिप्य परिगृह्य । खादन् भक्षयन् । पन्नगान् भक्षयन्निवेति गरुडविशेषणं ॥ ७ ॥ हरयः बलवन्त इति शेषः । संगम्य संभूय ॥ ८ ॥ विशेषेण लम्बत इति विलम्बः । पचाद्यच् । गिरिशृङ्गाभं गिरिशृङ्गवदुन्नतं ॥ ९ ॥ तं कुम्भकर्णं । समुत्पत्य समीपमागत्य । कुम्भकर्णस्य कुम्भकर्णाय ॥ १० ॥ ममर्देत्यादि त्रिपादश्लोकः ॥ तानि प्रसिद्धानि । रक्षांसि ममर्देति पूर्वेणान्वयः । पुनश्चेति पादश्लोकः । अन्यत् गिरेःशृङ्गं चिक्षेपेति योज्यं ॥ ११ ॥ तच्छैलशृङ्गाभिहतं अनन्तरप्रयुक्तशैलशृङ्गाभिहतसैन्यं । आयोधनं युद्धं ॥ १२ ॥ कालान्तकः प्रलयकालरुद्रः ॥ १३ ॥ अभ्यसूदयन् अघ्नन् ॥ १४—१६ ॥ दुद्राव द्रावयामास ॥ १७ ॥ मेदार्द्रेत्यत्र संधिरार्षः ॥ १८ ॥ आविध्य भ्रामयित्वा । गुहः स्कन्दः ॥ १९ ॥ प्रविह्वलः प्रमुह्यन् । युगान्तेति ।

भीत्यागतःपुनरङ्गदोज्जीवितः विक्रमोयेषांते ॥ २ ॥ स० गदां माययासृष्टां । माययागदात्वेनदर्शनाद्गदापदेनशूलंवाग्राह्यं । पूर्वोत्तरवाक्संवादात् ॥ ५ ॥ स० आयोधनं युद्धमण्डलं ॥ १२ ॥ स० मेघस्तनितस्वनोपमं । अत्रस्तनितशब्दोध्वनिमात्रपरः । नवि-

[पा०] १ ङ. च. झ. ट. धर्षयन्समहा. २ ङ. झ. ट. ताडिताः. च. छ. योधिताः. ३ घ. शैलेन्द्रमिव. ४ घ. समासाद्य. ग. ङ. झ. समुत्पाट्य. क. च. छ. ञ. ट. समुत्क्षिप्य. ५ क. ग. घ. ङ. झ. ञ. ट. कुंभकर्णाय. ६ क. ख. घ. च. महाशैलस्तस्य. ७ ङ. झ. गजोत्तमान्. ८ ङ. झ. ट. मुद्वमन्मुखा.

ततो विनेदुः सहसा प्रहृष्टा रक्षोगणास्तं व्यथितं समीक्ष्य ॥
प्लवङ्गमास्तु व्यथिता भयार्ताः प्रदुद्रुवुः संयति कुम्भकर्णात् ॥ २१ ॥
ततस्तु नीलो बलवान्पर्यवस्थापयन्बलम् ॥ प्रविचिक्षेप शैलाग्रं कुम्भकर्णाय धीमते ॥ २२ ॥
तमापतन्तं संप्रेक्ष्य मुष्टिनाऽभिजघान ह ॥ मुष्टिप्रहाराभिहतं तच्छैलाग्रं व्यशीर्यत ॥ २३ ॥
सविस्फुलिङ्गं सज्वालं निपपात महीतले ॥ २४ ॥
ऋषभः शरभो नीलो गवाक्षो गन्धमादनः ॥ पञ्च वानरशार्दूलाः कुम्भकर्णमुपाद्रवन् ॥ २५ ॥
शैलैर्वृक्षैस्तलैः पादैर्मुष्टिभिश्च महाबलाः ॥ कुम्भकर्णं महाकायं सर्वतोऽभिप्रदुद्रुवुः ॥ २६ ॥
स्पर्शानिव प्रहारांस्तान्वेदयानो न विव्यथे ॥ ऋषभं तु महावेगं बाहुभ्यां परिषस्वजे ॥ २७ ॥
कुम्भकर्णभुजाभ्यां तु पीडितो वानरर्षभः ॥ निपपातर्षभो भीमः प्रमुखाद्वान्तशोणितः ॥ २८ ॥
मुष्टिना शरभं हत्वा जानुना नीलमाहवे ॥ आजघान गवाक्षं तु तलेनेन्द्ररिपुस्तदा ॥ २९ ॥
पादेनाभ्यहनत्क्रुद्धस्तरसा गन्धमादनम् ॥ दत्तप्रहारव्यथिता मुमुहुः शोणितोक्षिताः ॥ ३० ॥
निपेतुस्ते तु मेदिन्यां निकृत्ता इव किंशुकाः ॥ तेषु वानरमुख्येषु पतितेषु महात्मसु ॥
वानराणां सहस्राणि कुम्भकर्णं प्रदुद्रुवुः ॥ ३१ ॥
तं शैलमिव शैलाभाः सर्वे ते प्लवगर्षभाः ॥ समारुह्य समुत्पत्य ददंशुश्च महाबलाः ॥ ३२ ॥
तं नखैर्दशनैश्चापि मुष्टिभिर्जानुभिस्तथा ॥ कुम्भकर्णं महाकायं ते जघ्नुः प्लवगर्षभाः ॥ ३३ ॥
स वानरसहस्रैस्तैराचितः पर्वतोपमः ॥ रराज राक्षसव्याघ्रो गिरिरात्मरुहैरिव ॥ ३४ ॥
बाहुभ्यां वानरान्सर्वान्प्रगृह्य सुमहाबलः ॥ भक्षयामास संक्रुद्धो गरुडः पन्नगानिव ॥ ३५ ॥
प्रक्षिप्ताः कुम्भकर्णेन वक्त्रे पातालसन्निभे ॥ नासापुटाभ्यां निर्जग्मुः कर्णाभ्यां चैव वानराः ॥३६॥
भक्षयन्भृशसंक्रुद्धो हरीन्पर्वतसन्निभः ॥ बभञ्ज वानरान्सर्वान्संक्रुद्धो राक्षसोत्तमः ॥ ३७ ॥
मांसशोणितसंक्लेदां भूमिं कुर्वन्स राक्षसः ॥ चचार हरिसैन्येषु कालाग्निरिव मूर्च्छितः ॥ ३८ ॥
वज्रहस्तो यथा शक्रः पाशहस्त इवान्तकः ॥ शूलहस्तो बभौ सङ्ख्ये कुम्भकर्णो महाबलः ॥ ३९ ॥
यथा शुष्कान्यरण्यानि ग्रीष्मे दहति पावकः ॥ तथा वानरसैन्यानि कुम्भकर्णो विनिर्दहत् ॥ ४० ॥

युगान्तमेघस्य स्तनितरूपो यः स्वनः तत्तुल्यमिति क्रियाविशेषणं ॥ २० ॥ कुम्भकर्णात् भयार्ता इत्यन्वयः । संयति युद्धे ॥ २१ ॥ पर्यवस्थापयन्बलमिति । पलायमानान् सन्निवर्तयन्नित्यर्थः ॥ २२ ॥ व्यशीर्यत शीर्णमभूत् ॥ २३—२५ ॥ पादैः प्रहारोद्यतैः । सर्वत्रोपलक्षणे तृतीया ॥ २६ ॥ स्पर्शानिव सुखस्पर्शानिव । सुखमर्दनमिव जानन्नित्यर्थः ॥ २७ ॥ प्रेति छेदः । मुखात् वान्तशोणितः प्रणिपपातेत्यन्वयः । "व्यवहिताश्च" इत्युपसर्गस्य व्यवहितप्रयोगः । वान्तशोणितः उद्गीर्णरक्तः ॥ २८—३१ ॥ समारुह्य समुत्पत्य । समुत्पत्य समारुह्येति क्रमः ॥३२—३३॥ आचितः व्याप्तः । आत्मरुहैः वृक्षैः ॥ ३४—३६ ॥ भक्षयन् बभञ्ज । भक्षणार्थं बभञ्जेत्यर्थः ॥ ३७ ॥ मांसशोणितसंक्लेदां मांसशोणितसंसिक्तामित्यर्थः ॥ ३८—३९ ॥ विनिर्दहत् विनिरदहत् ॥ ४० ॥

यतेऽपमायस्यतश्रोपमं । मेघस्तनितंस्वनेनोपमंयस्मिन्कर्मणितद्यथाभवतितथा । मेघध्वन्यपेक्षयाऽधिक्यंयथाभवतितथाननाद ॥२०॥ स० स्पर्शानिव कुसुममालादिस्पर्शानिव । वेदयानः स्वार्थेणिच् । जानन् । तदेवाह—नविव्यथइति ॥ २७ ॥ स० प्रमु-

[पा०] १ क. ग. घ. च. छ. ञ. नीलश्चिक्षेप. २ ख. च. छ. ञ. मुष्टिभिर्जानुभिस्तदा. ३ ङ. ञ. ट. महाकायं निजघ्नुस्सर्वतोयुधि. ज. महाकायंसर्वतोऽभिनिजघ्निरे. ४ क. ख. ग. ङ.—ट. प्रमुखागतशोणितः. ५ ङ. ञ. ट. ददंशुः प्लवगर्षभाः. ६ च. छ. ञ. ट. महाबाहुं.

ततस्ते वध्यमानास्तु हतयूथा विनायकाः ॥ वानरा भयसंविग्ना विनेदुर्विस्वरं भृशम् ॥ ४१ ॥
अनेकशो वध्यमानाः कुम्भकर्णेन वानराः ॥ राघवं शरणं जग्मुर्व्यथिताः खिन्नचेतसः ॥ ४२ ॥
प्रभग्नान्वानरान्दृष्ट्वा वज्रहस्तसुतात्मजः ॥ अभ्यधावत वेगेन कुम्भकर्ण महाहवे ॥ ४३ ॥
शैलशृङ्गं महद्गृह्य विनदंश्च मुहुर्मुहुः ॥ त्रासयन्राक्षसान्सर्वान्कुम्भकर्णपदानुगान् ॥ ४४ ॥
चिक्षेप शैलशिखरं कुम्भकर्णस्य मूर्धनि ॥ ४५ ॥
स तेनाभिहतोत्यर्थं गिरिशृङ्गेण मूर्धनि ॥ कुम्भकर्णः प्रजज्वाल कोपेन महता तदा ॥ ४६ ॥
सोभ्यधावत वेगेन वालिपुत्रममर्षणः ॥ कुम्भकर्णो महानादस्त्रासयन्सर्ववानरान् ॥
शूलं ससर्ज वै रोषादङ्गदे स महाबलः ॥ ४७ ॥
तमापतन्तं बुद्ध्वा तु युद्धमार्गविशारदः ॥ लाघवान्मोचयामास बलवान्वानरर्षभः ॥ ४८ ॥
उत्पत्य चैनं सहसा तलेनोरस्यताडयत् ॥ स तेनाभिहतः कोपात्प्रमुमोहाचलोपमः ॥ ४९ ॥
स लब्धसंज्ञो बलवान्मुष्टिमावर्त्य राक्षसः ॥ अपहासेन चिक्षेप विसंज्ञः स पपात ह ॥ ५० ॥
तस्मिन्प्लवगशार्दूले विसंज्ञे पतिते भुवि ॥ तच्छूलं समुपादाय सुग्रीवमभिदुद्रुवे ॥ ५१ ॥
तमापतन्तं संप्रेक्ष्य कुम्भकर्णं महाबलम् ॥ उत्पपात तदा वीरः सुग्रीवो वानराधिपः ॥ ५२ ॥
पर्वताग्रं समुत्क्षिप्य समाविध्य महाकपिः ॥ अभिदुद्राव वेगेन कुम्भकर्णं महाबलम् ॥ ५३ ॥
तमापतन्तं संप्रेक्ष्य कुम्भकर्णः प्लवङ्गमम् ॥ तस्थौ विकृतसर्वाङ्गो वानरेन्द्रसमुन्मुखः ॥ ५४ ॥
कपिशोणितदिग्धाङ्गं भक्षयन्तं प्लवङ्गमान् ॥ कुम्भकर्णं स्थितं दृष्ट्वा सुग्रीवो वाक्यमब्रवीत् ॥ ५५ ॥
पातिताश्च त्वया वीराः कृतं कर्म सुदुष्करम् ॥ भक्षितानि च सैन्यानि प्राप्तं ते परमं यशः ॥ ५६ ॥
त्यज तद्वानरानीकं प्राकृतैः किं करिष्यसि ॥ सहस्वैकनिपातं मे पर्वतस्यास्य राक्षस ॥ ५७ ॥
तद्वाक्यं हरिराजस्य सत्त्वधैर्यसमन्वितम् ॥ श्रुत्वा राक्षसशार्दूलः कुम्भकर्णोऽब्रवीद्वचः ॥ ५८ ॥
प्रजापतेस्तु पौत्रस्त्वं तथैवर्क्षरजःसुतः ॥ श्रुतपौरुषसंपन्नः कस्माद्वर्जसि वानर ॥ ५९ ॥

विनायकाः विगतनायकाः ॥ ४१–५३ ॥ समुन्मुखः अभिमुखः ॥ ५४—५८ ॥ प्रजापतेरिति । इदमत्रैतिह्यमनुसंधेयं । पुरा किल ब्रह्मणो जृम्भमाणस्य वदनादृक्षरजा नाम वानरो जातः । स कदाचित्पर्यटन् ब्रह्मलोकेप्सरोरूपकारिणि कस्मिंश्चित्सरसि निमज्याप्सरोरूपमभजत् । तां दृष्ट्वा काममोहितावित्यादित्यौ हस्तेन युगपदगृह्णीतां । तत्रान्तरे तयोः क्षुभितं रेतोऽपतत् । तत्र द्वौकुमारावभवतां । वाले पतनाद्वाली ग्रीवायां पतनात्सुग्रीवः । तं दृष्ट्वा प्रहस्य ब्रह्मा अप्सरोरूपधारिणमृक्षरजसं यथापूर्वरूपप्राप्तये कुमारौ गृहीत्वा अन्यस्मिन्वानररूपकारिणि सरसि निमज्जेत्यभ्यधात् । सोपि तथा कृत्वा कुमाराभ्यां सह वानररूपमभजदृक्षरजाः । तत्पुत्रौ वालिसुग्रीवाविति । तदनेन प्रकारेण सुग्रीवः प्रजापतेः पौत्रः ऋक्षरजसः पुत्रश्च । काश्यपात्प्रजापतेर्विवस्वान्

खागतशोणितः कुंभकर्णप्रमुखतएवागतंशोणितंयस्यसः । एतेनाप्रतिष्ठाप्रतिमतासूच्यते ॥ २८ ॥ स० वानराभयसंविग्नाइति पदमेकं । वानराणांसंघोवानरं । तस्ययदभयं भयाभावः क्षेमइतियावत् । तदर्थंसंविग्नाः । कोवाकथंवारक्षतीतिचिन्तातान्ताः । नराभयेति वेतिपदं । हेनराभय मनुष्यमध्येऽभय रामेति इतयूथावाविनेदुरितिवा ॥ ४१ ॥ स० वज्रहस्तात्मजात्मजः इन्द्रपुत्रवालिपुत्रोञ्जदः ॥ ४३ ॥ ति० तदा पतन्तं । पुंस्त्वमार्ष ॥ स० तमापतन्तंशूलं दुष्टवधार्थप्रयुक्तकीलवाञ्छूलस्तं ॥ " शूलोदुष्टवधार्थायकीलवान् " इतिविश्वः । पुंस्त्वमतःसंभवि । लाघवादापतन्तमात्मानंततस्माच्छूलात्मोचयामासमुक्तमकरो-

[पा०] १ ङ. झ. ञ. ट. हतयूथाःप्लवङ्गमाः. २ ङ. झ. ट. विनेदुर्विकृतैःस्वरैः. ३ झ.—ठ. वज्रहस्तात्मजात्मजः. ४ क. च. झ. हतोमूर्ध्निशैलेनेन्द्रारिपुस्तदा. ५ क. ख. घ.—ट. ममर्षणं. ६ क. घ.—ट. लब्धसंज्ञोतिबलोमुष्टिंसंगृह्य. ७ च. छ. झ. ट. विवृतसर्वाङ्गः. ८ घ. त्यज्यतांवानरानीकं.

स कुम्भकर्णस्य वचो निशम्य व्याविध्य शैलं सहसा मुमोच ॥
तेनाजघानोरसि कुम्भकर्ण शैलेन वज्राशनिसन्निभेन ॥ ६० ॥
तच्छैलशृङ्गं सहसा विशीर्णं भुजान्तरे तस्य तदा विशाले ॥
ततो विषेदुः सहसा प्लवङ्गा रक्षोगणाश्चापि मुदा विनेदुः ॥ ६१ ॥
स शैलशृङ्गाभिहतश्चुकोप ननाद कोपाच्च विवृत्य वक्त्रम् ॥
व्याविध्य शूलं च तडित्प्रकाशं चिक्षेप हर्यृक्षपतेर्वधाय ॥ ६२ ॥
तत्कुम्भकर्णस्य भुजप्रविद्धं शूलं शितं काञ्चनधामजुष्टम् ॥
क्षिप्रं समुत्पत्य निगृह्य दोर्भ्यां बभञ्ज वेगेन सुतोऽनिलस्य ॥ ६३ ॥
कृतं भारसहस्रस्य शूलं कालायसं महत् ॥ बभञ्ज जानुन्यारोप्य प्रहृष्टः प्लवगर्षभः ॥ ६४ ॥
शूलं भग्नं हनुमता दृष्ट्वा वानरवाहिनी ॥ हृष्टा ननाद बहुशः सर्वतश्चापि दुद्रुवे ॥
[बभूवाथ परित्रस्तो राक्षसो विमुखोऽभवत् ॥ ६५ ॥]
सिंहनादं च ते चक्रुः प्रहृष्टा वनगोचराः ॥ मारुतिं पूजायांचक्रुर्दृष्ट्वा शूलं तथागतम् ॥ ६६ ॥
स तत्तदा भग्नमवेक्ष्य शूलं चुकोप रक्षोधिपतिर्महात्मा ॥
उत्पाट्य लङ्कामलयात्स शृङ्गं जघान सुग्रीवमुपेत्य तेन ॥ ६७ ॥
स शैलशृङ्गाभिहतो विसंज्ञः पपात भूमौ युधि वानरेन्द्रः ॥
तं प्रेक्ष्य भूमौ पतितं विसंज्ञं नेदुः प्रहृष्टास्त्वथ यातुधानाः ॥ ६८ ॥
तमभ्युपेत्याद्भुतघोरवीर्यं स कुम्भकर्णो युधि वानरेन्द्रम् ॥
जहार सुग्रीवमभिप्रगृह्य यथाऽनिलो मेघमतिप्रचण्डः ॥ ६९ ॥
स तं महामेघनिकाशरूपमुत्पाट्य गच्छन्युधि कुम्भकर्णः ॥
रराज मेरुप्रतिमानरूपो मेरुर्यथाभ्युच्छ्रितघोरशृङ्गः ॥ ७० ॥

विवस्वतः सुग्रीव इत्यन्ये ॥ ५९ ॥ व्याविध्य तोलयित्वा ॥ ६०—६३ ॥ भारसहस्रस्य भारसहस्रेण कृतं जानुन्यारोप्य बभञ्जेत्यन्वयः ॥ ६४ ॥ सर्वतः सर्वस्मात्प्रदेशात् । दुद्रुवे आजगाम ॥ ६५—६६ ॥ सुग्रीवमुपेत्य तेन शृङ्गेण जघान । त्रिकूटशिखरस्थलद्वारे स्थित्वा युध्यतः कुम्भकर्णस्य प्रदेशान्तरस्थलङ्कामलयशृङ्गोत्पाटनं कथमुपपद्यत इति चेत् तदनुगुणप्रमाणशरीरत्वान्न दोषः । लङ्कामलयशब्देन त्रिकूटं वोपचर्यते ॥ ६७-६९ ॥ अभ्युच्छ्रितं उन्नतं । स्वाकारसादृश्याय प्रथमं मेरूपादानं । द्वितीयं तु

दितिवा । बलवान्यःशूलस्तमापतन्तं । बलवानङ्गदः ॥ ४८ ॥ स० जानु मा आरोप्य तत् आहृष्टः इतिच्छेदः । तत् शूलं । जानु आरोप्य जानुनिधाय । तत् सुग्रीवोपरिपतनं मा इतिबभञ्ज । प्लवङ्गमोहनुमान् आहृष्टः अतिहृष्टः ॥ बहुपुराणादिष्वियं कथा सुग्रीवग्रहणानन्तरं कक्ष्यानिक्षिप्तकपिपतिर्यदालङ्कानिलयास्त्रीपुंसजनैस्तुहिनसलिलमाल्यैःसेचितः तस्मान्मोचितःसुग्रीवकरोत्कृत्तगृहीतघोणाकर्णउत्पपात तदामक्षिकोपमः पाक्षिकनीतिर्लौकिकीमनुसृत्यानुसृत्यचतंगतोहनुमांस्तदातन्मुक्तंसुग्रीवाशक्यपरिहारंशूलंबभञ्जेतिश्रूयते । अत्रव्यत्ययस्यकथनंलेखकप्रमादतः । श्लोकाश्चैतेऽनन्तरंपठनीयाइतिवा " कुर्युःक्वचिच्चव्यत्ययं " इतिकविकृतएवार्यंहनुमत्पराक्रमक्रमवर्णनपरायत्तचित्ततयाव्यत्ययसहितवाज्ञेयम् । ननुभारतेवनपर्वणि " हृत्वाकर्णोच्छ्रनासिकं " इत्युक्तेरत्रकर्णनासिकोक्तिःकथमितिचेन्न । नासिकोत्कर्तनकालएवौष्ठद्वयस्यतयासहागमनंज्ञातुंसुशकमित्यत्रानुक्तिः स्पष्टप्रतिपत्त्य-

[पा०] १ झ. भुजप्रणुन्नं. २ क. ङ. च. छ. झ. ञ. ट. जानुमारोप्यतदाहृष्टःप्लवङ्गमः. ३ ज. सर्वतश्चमहास्वनं. ४ इदमर्धं ङ. झ. ट. पाठेषुदृश्यते. ५ ख. ग. प्रहृष्टवदनास्तदा. ६ ख. च. छ. ञ. पूजयामासुः. ७ ख.—ट. प्रहृष्टायुधि. ८ घ.—छ. झ. ञ. ट. समभ्युपेत्य. ९ ङ. च. छ. झ. ञ. ट. मेघमिव.



[1]ततस्तमुत्पाट्य जगाम वीरः संस्तूयमानो युधि [2]राक्षसेन्द्रैः ॥
शृण्वन्निनादं त्रिदशालयानां प्लवङ्गराजग्रहविस्मितानाम् ॥ ७१॥
ततस्तमादाय तदा स मेने हरीन्द्रमिन्द्रोपममिन्द्रवीर्यः ॥
अस्मिन्हृते सर्वमिदं हृतं स्यात्सराघवं सैन्यमितीन्द्रशत्रुः ॥ ७२ ॥
विद्रुतां वाहिनीं दृष्ट्वा वानराणां ततस्ततः ॥ कुम्भकर्णेन सुग्रीवं गृहीतं चापि वानरम् ॥ ७३ ॥
हनुमांश्चिन्तयामास मतिमान्मारुतात्मजः ॥ एवं गृहीते सुग्रीवे किं कर्तव्यं मया भवेत् ॥ ७४ ॥
यद्वै न्याय्यं मया कर्तुं [3]तत्करिष्यामि सर्वथा ॥ भूत्वा पर्वतसंकाशो नाशयिष्यामि राक्षसम् ॥ ७५॥
मया हते संयति कुम्भकर्णे महाबले मुष्टिविकीर्णदेहे ॥
विमोचिते वानरपार्थिवे च भवन्तु हृष्टाः प्लवगाः समस्ताः ॥ ७६ ॥
अथवा स्वयमप्येष मोक्षं प्राप्स्यति [4]पार्थिवः ॥ गृहीतोऽयं [5]यदि भवेत्त्रिदशैः सासुरोरगैः ॥ ७७ ॥
मन्ये न तावदात्मानं बुध्यते वानराधिपः ॥ शैलप्रहाराभिहतः कुम्भकर्णेन संयुगे ॥ ७८ ॥
अयं मुहूर्तात्सुग्रीवो लब्धसंज्ञो महाहवे ॥ आत्मनो वानराणां च यत्पथ्यं तत्करिष्यति ॥ ७९ ॥
मया तु मोक्षितस्यास्य सुग्रीवस्य महात्मनः ॥ अप्रीतिश्च भवेत्कष्टा कीर्तिनाशश्च शाश्वतः ॥ ८० ॥
तस्मान्मुहूर्तं काङ्क्षिष्ये विक्रमं [6]पार्थिवस्य तु ॥ भिन्नं च वानरानीकं तावदाश्वासयाम्यहम् ॥ ८१ ॥
इत्येवं चिन्तयित्वा तु हनुमान्मारुतात्मजः ॥ भूयः संस्तम्भयामास वानराणां महाचमूम् ॥ ८२ ॥
स कुम्भकर्णोऽथ विवेश लङ्कां स्फुरन्तमादाय महाकपिं तम् ॥
विमानचर्यागृहगोपुरस्थैः [7]पुष्पाभ्यवर्षैरवकीर्यमाणः ॥ ८३ ॥
लाजगन्धोदवर्षैस्तु सिच्यमानः शनैः शनैः ॥ राजमार्गस्य शीतत्वात्संज्ञामाप महाबलः ॥ ८४ ॥
ततः स संज्ञामुपलभ्य कृच्छ्राद्बलीयसस्तस्य भुजान्तरस्थः ॥
अवेक्षमाणः पुरराजमार्गं विचिन्तयामास मुहुर्महात्मा ॥ ८५ ॥
एवं गृहीतेन कथं नु नाम शक्यं मया संप्रतिकर्तुमद्य ॥
तथा करिष्यामि यथा हरीणां भविष्यतीष्टं च हितं च कार्यम् ॥ ८६ ॥

सुग्रीवधारणकालिकसादृश्याय ॥ ७० ॥ उत्पाट्य उद्धृत्य । त्रिदशालयानां स्वर्गिणां ॥ ७१ ॥ बलवान्कुंभकर्णो युद्धे पतितं सुग्रीवं किमर्थं हृतवानित्यत्राह—ततस्तमादायेति ॥ ७२—७६ ॥ सासुरोरगैः सुरैः गृहीतोप्ययं मोक्षं प्राप्तुं शक्नोति । किं पुनरनेन राक्षसापसदेनेति भावः ॥ ७७ ॥ तर्हि मोचयित्वात्मानं किमिति न निवर्तत इत्यत्राह—मन्य इत्यादिना ॥ तावदित्यवधारणे । आत्मानमेव न बुध्यतइत्यर्थः । पथ्यं हितं ॥ ७८—७९ ॥ कृच्छ्रगतः स्वामी भृत्येनावश्यं मोचनीय एवेत्याशङ्क्याह—मया त्विति ॥ ८० ॥ तावत् सुग्रीवागमनपर्यन्तं ॥ ८१ ॥ संस्तम्भयामास गमनान्निवर्तयामास ॥ ८२ ॥ पुष्पाभ्यवर्षैः श्लाघ्यपुष्पवृष्टिभिः ॥ ८३—८५ ॥ संप्रतिकर्तुं सम्यक् प्रतिकर्तुं ।

र्यंतत्रोक्तिरितिसंभवात् ॥ ६४ ॥ **ति०** लाजगन्धोदवर्षैःसिच्यमानः दैवगत्यामोहनिवृत्तये । सुग्रीवइतिशेषः ॥ **स०** लाजगन्धोदवर्षैः लाजमन्त्रोशीरं । गन्धसाहचर्यात् । सिच्यमानइतिखारस्याच्च । " उशीरेलाजमुद्दिष्टं " इतिविश्वः ॥ ८४ ॥ **स०** पुरा-

[**पा०**] १ ङ. झ. ञ. ट. ततस्तमादाय. २ ग. घ. ङ. झ. ट. राक्षसेन्द्रः. ३ ङ. छ. झ. ट. करिष्याम्यसंशयं. ४ ङ. झ. ट. वानरः. ५ ज. युधिभवेत्. ६ ङ. झ. ट. मोक्षितस्यतु. क. ख. घ. च. छ. ञ. पार्थिवस्यनः. ७ ख. सलाजपुष्पैः. ८ ङ. छ. झ. ट. रभिपूज्यमानः.

ततः कराग्रैः सहसा समेत्य राजा हरीणाममरेन्द्रशत्रुम् ॥
खरैश्च कर्णौ दशनैश्च नासां ददंश पार्श्वेषु च कुम्भकर्णम् ॥ ८७ ॥
स कुम्भकर्णो हृतकर्णनासो विदारितस्तेन विमर्दितश्च ॥
रोषाभिभूतः क्षतजार्द्रगात्रः सुग्रीवमाविध्य पिपेष भूमौ ॥ ८८ ॥
स भूतले भीमबलाभिपिष्टः सुरारिभिस्तैरभिहन्यमानः ॥
जगाम खं वेगवदभ्युपेत्य पुनश्च रामेण समाजगाम ॥ ८९ ॥
कर्णनासाविहीनस्तु कुम्भकर्णो महाबलः ॥ रराज शोणितैः सिक्तो गिरिः प्रस्रवणैरिव ॥ ९० ॥
शोणितार्द्रो महाकायो राक्षसो भीमविक्रमः ॥ युद्धायाभिमुखो भूयो मनश्चक्रे महाबलः ॥ ९१ ॥
अमर्षाच्छोणितोद्गारी शुशुभे रावणानुजः ॥ नीलाञ्जनचयप्रख्यः ससंध्य इव तोयदः ॥ ९२ ॥
गते तु तस्मिन्सुरराजशत्रुः क्रोधात्प्रदुद्राव रणाय भूयः ॥
अनायुधोऽसीति विचिन्त्य रौद्रो घोरं तदा मुद्गरमाससाद ॥ ९३ ॥
ततः स पुर्याः सहसा महौजा निष्क्रम्य तद्वानरसैन्यमुग्रम् ॥
[तेनैव रूपेण बभञ्ज रुष्टः प्रहारमुष्ट्या च पदेन सद्यः ॥]
बभक्ष रक्षो युधि कुम्भकर्णः प्रजा युगान्ताग्निरिव प्रदीप्तः ॥ ९४ ॥
बुभुक्षितः शोणितमांसगृध्नुः प्रविश्य तद्वानरसैन्यमुग्रम् ॥
चखाद रक्षांसि हरीन्पिशाचान्ऋक्षांश्च मोहाद्युधि कुम्भकर्णः ॥ ९५ ॥
यथैव मृत्युर्हरते युगान्ते स भक्षयामास हरींश्च मुख्यान् ॥ ९६ ॥
एकं द्वे त्रीन्बहून्क्रुद्धो वानरान्सह राक्षसैः ॥ समादायैकहस्तेन प्रचिक्षेप त्वरन्मुखे ॥ ९७ ॥
संप्रस्रवंस्तदा मेदः शोणितं च महाबलः ॥ वध्यमानो नगेन्द्राग्रैर्भक्षयामास वानरान् ॥ ९८ ॥
ते भक्ष्यमाणा हरयो रामं जग्मुस्तदा गतिम् ॥ ९९ ॥
कुम्भकर्णो भृशं क्रुद्धः कपीन्खादन्प्रधावति ॥ १०० ॥
शतानि सप्त चाष्टौ च विंशत्त्रिंशत्तथैव च ॥ संपरिष्वज्य बाहुभ्यां खादन्विपरिधावति ॥ १०१ ॥

अन्यथा अद्येति पुनरुक्तिः स्यात् ॥८६॥ खरैः तीक्ष्णैः । कराग्रैः कर्णौ समेत्य संहृत्य दशनैः नासांचददंश । पार्श्वेषु कपोलयोरंसयोरुदरान्तरयोश्च पादाभ्यां विददारेति शेषः ॥ ८७ ॥ विमर्दितः संपीडितः ॥ ८८—८९ ॥ प्रस्रवणैः निर्दरैः ॥ ९० ॥ अभिमुखः सन् युद्धाय मनश्चक्र इति संबन्धः ॥ ९१—॥ ९५ ॥ शोणितमांसगृध्नुः शोणितमांसलोलुपः ॥ ९६–९७ ॥ संप्रस्रवन् तालुभ्यामुद्गमन् । शोणितं मेदश्च भक्षितवानरसंबन्धि ॥ ९८ ॥ त इत्यर्धं ॥ गतिं शरणं ॥ ९९ ॥ कुम्भकर्ण इत्यर्धं ॥ प्रधावति

जमार्गमवेक्षमाणः अनेनानेनाहमानीतइतिमतिर्जातेतिसूच्यते ॥ ८५ ॥ ति० नीलाञ्जनेत्यनेन निध्यञ्जनादिव्यावृत्तिः ॥ ९२ ॥ ति० रक्षआदेरपिखादनेहेतुः—मोहादिति । मद्यादिनेवरक्तपानजमदवैवश्यादितिभावः ॥ ९५ ॥ स० संप्रस्रवदित्युभयान्वयि । ताडितवानरदेहात् । भक्षयामास अपिबत् । अम्भक्षोवायुभक्षइतियथा । वानरांश्चचखादेत्यर्थः । 'संप्रस्रवत् । अडभावआर्षः । भक्षितवानरसंबन्धिशोणितादि' इतितीर्थनागोजिभट्टौ ॥९८॥ स० गतिं गम्यस्थानं । शरणमितियावत् ॥ ९९ ॥

[पा०] १ ङ. ञ. ट. शत्रोः. २ घ. चिच्छेदकर्णौ. ३ ङ. छ. ञ. ट. ददंशपादैर्विददारपार्श्वौ. ४ ङ. च. छ. ञ. ट. रदैर्नखैश्च. ५ ख. ङ.—ट. कन्दुकवज्जवेन. ६ क. ख. ग. ङ—ट. महात्मा. ७ इदमर्धं क. ख. घ. च. छ. ज. पाठेषुदृश्यते. ८ ञ.—ठ. संप्रस्रवत्तदा.

[मेदोवसाशोणितदिग्धगात्रः कर्णावसक्तग्रथितान्त्रमालः ॥
ववर्ष शूलानि सुतीक्ष्णदंष्ट्रः कालो युगान्तस्य इव प्रवृद्धः] ॥ १०२ ॥
तस्मिन्काले सुमित्रायाः पुत्रः परबलार्दनः ॥ चकार लक्ष्मणः क्रुद्धो युद्धं परपुरंजयः ॥ १०३ ॥
स कुम्भकर्णस्य शराञ्शरीरे सप्त वीर्यवान् ॥ निचखानाददे बाणान्विससर्ज च लक्ष्मणः ॥१०४॥
[पीड्यमानस्तदस्त्रं तु विशेषं तस्य राक्षसः ॥ ततश्चुकोप बलवान्सुमित्रानन्दवर्धनः ॥ १०५ ॥
अथास्य कवचं शुभ्रं जांबूनदमयं शुभम् ॥ प्रच्छादयामास शरैः संध्याभ्रमिव मारुतः ॥ १०६ ॥
नीलाञ्जनचयप्रख्यः शरैः काञ्चनभूषणैः ॥ आपीड्यमानः शुशुभे मेघैस्सूर्य इवांशुमान् ॥ १०७ ॥
ततः स राक्षसो भीमः सुमित्रानन्दवर्धनम् ॥ सावज्ञमेव प्रोवाच वाक्यं मेघौघनिस्स्वनः ॥१०८॥
अन्तकस्याप्यकष्टेन युधि जेतारमाहवे ॥ युध्यता मामभीतेन ख्यापिता वीरता त्वया ॥ १०९ ॥
अगृहीतायुधस्येह मृत्योरिव महामृधे ॥ तिष्ठन्नप्यग्रतः पूज्यः किमु युद्धप्रदायकः ॥ ११० ॥
ऐरावतं समारूढो वृतः सर्वामरैः प्रभुः ॥ नैव शक्रोपि समरे स्थितपूर्वः कदाचन ॥ १११ ॥
अद्य त्वयाऽहं सौमित्रे बालेनापि पराक्रमैः ॥ तोषितो गन्तुमिच्छामि त्वामनुज्ञाप्य राघवम्॥११२॥
यत्तु वीर्यबलोत्साहैस्तोषितोऽहं रणे त्वया ॥ राममेवैकमिच्छामि हन्तुं यस्मिन्हते हतम् ॥ ११३ ॥
रामे मयाऽत्र निहते येऽन्ये स्थास्यन्ति संयुगे ॥ तानहं योधयिष्यामि स्वबलेन प्रमाथिना ॥११४॥
इत्युक्तवाक्यं तद्रक्षः प्रोवाच स्तुतिसंहितम् ॥ मृधे घोरतरं वाक्यं सौमित्रिः प्रहसन्निव ॥ ११५ ॥
यस्त्वं शक्रादिभिर्देवैरसह्यः प्राप्य पौरुषम् ॥ तत्सत्यं नान्यथा वीर दृष्टस्तेऽद्य पराक्रमः ॥ ११६ ॥
एष दाशरथी रामस्तिष्ठत्यद्रिरिवाचलः ॥ इति श्रुत्वा ह्यनादृत्य लक्ष्मणं स निशाचरः] ॥ ११७ ॥
अतिक्रम्य च सौमित्रिं कुम्भकर्णो महाबलः ॥ राममेवाभिदुद्राव दारयन्निव मेदिनीम् ॥ ११८ ॥
अथ दाशरथी रामो रौद्रमस्त्रं प्रयोजयन् ॥ कुम्भकर्णस्य हृदये ससर्ज निशिताञ्शरान् ॥ ११९ ॥
तस्य रामेण विद्धस्य सहसाऽभिप्रधावतः ॥ अङ्गारमित्राः क्रुद्धस्य मुखान्निश्चेरुरर्चिषः ॥ १२० ॥
रामास्त्रविद्धो घोरं वै नदन्राक्षसपुङ्गवः ॥ अभ्यधावत संक्रुद्धो हरीन्विद्रावयन्रणे ॥ १२१ ॥
तस्योरसि निमग्नाश्च शरा बर्हिणवाससः ॥ [रेजुर्नीलाद्रिकटके नृत्यन्त इव बर्हिणः] ॥ १२२ ॥
हस्ताच्चापि परिभ्रष्टा पपातोर्व्यां महागदा ॥ आयुधानि च सर्वाणि विप्राकीर्यन्त भूतले ॥ १२३ ॥

प्राधावत् । उत्तरश्लोकेप्येवमेव ॥ १००—११९ ॥ अर्चिषः ज्वालाः ॥ १२०—१२१ ॥ बर्हिणवाससः | बर्हिणं बर्हिपत्रं वासो वासःस्थानं येषां ते तथोक्ताः । ॥ १२२ ॥ आयुधानि खड्गादीनि ॥ १२३ ॥

ति० कर्णावसक्तेत्यनेनाधोभागएवकर्णलुञ्छनंसुग्रीवेणकृतमितिगम्यते । कर्णावसक्ताः ग्रथिताः परस्परसंलग्नाः अन्त्रमालाः यस्यसः ॥ स० अवसक्ताः वानरशरीरान्मोचिताः ग्रथिताः स्वयमेवग्रन्थीभूयस्थिताः अन्त्रमालाः गलेयस्यसः । कर्णः श्रवणालुः इतरद्दूरोदीरितश्रवणपटुः । "कर्णःश्रवणालौ"इतिविश्वः । शूलानि मायासृष्टानि । निरायुधत्वमुद्ररायुधत्वमात्रोक्तेः । चलचारुकुण्डलः कुण्डलालङ्कृतंशिरइतिवक्ष्यमाणग्रन्थविरोधपरिहारै तद्व्याख्यावसरेकरिष्यामः ॥ १०२ ॥ ति० पीड्यमानःसराक्षसः तदस्त्रं विशेषं अस्त्रान्तरेणविगतशैषंचकारेत्यर्थः ॥ १०५ ॥ स० यद्यपि 'नीलाञ्जनचयप्रख्यः शरैः काञ्चनभूषणैः' इतिदार्ष्टान्तिकानुसारेण दृष्टान्तेपि मेघःसूर्यैरिवेतिवक्तव्यं । तथापि कवयितुर्मेलनमात्रेतात्पर्यं नसर्वसाम्यइतिज्ञेयं ॥ १०७ ॥ ति० अभ्यधावत । तंरामंविसंज्येतिशेषः ॥ १२१ ॥ स० कटके अद्रिनितंबे । बर्हिणोमयूराः नृत्यन्तीवरेजुः ॥ १२२ ॥ स० गदा मायामयीवा आयुधसामान्यवाचित्वाद्गदापदस्य तेनमुद्गरग्रहणंवेति । "आयुधेगदा"इतिविश्वः । आयुधान्यपिमायामयानि ॥ १२३ ॥

[पा०] १ अयंश्लोकः क. ख. ङ.—ट. पाठेषुदृश्यते. २ ख. ग. ङ. च. छ. झ. ट. चान्यान्विससर्ज. ३ पीड्यमानस्तदस्त्रन्त्विल्यादयःलक्ष्मणंसनिशाचरइत्यन्ताःश्लोकाः क. घ.—ट. पाठेषुअधिकादृश्यन्ते. ४ क. ग.—ट. अङ्गारमिश्राः. ५ इदमर्धं क. घ. च. छ. पाठेषुदृश्यते. ६ ख. ङ. झ. ञ. ट. गदाचोर्व्यांपपातह.

स निरायुधमात्मानं यदा मेने महाबलः ॥ मुष्टिभ्यां [1]चरणाभ्यां च चकार कदनं महत् ॥ १२४ ॥
स बाणैरतिविद्धाङ्गः क्षतजेन समुक्षितः ॥ रुधिरं प्रतिसुस्राव गिरिः प्रस्रवणं यथा ॥ १२५ ॥
स तीव्रेण च कोपेन रुधिरेण च मूर्च्छितः ॥ वानरान्राक्षसान्ऋक्षान्खादन्विपरिधावति ॥ १२६ ॥
अथ शृङ्गं समाविध्य भीमं भीमपराक्रमः ॥ चिक्षेप राममुद्दिश्य बलवानन्तकोपमः ॥ १२७ ॥
अप्राप्तमन्तरा रामः सप्तभिस्तैरजिह्मगैः ॥ शरैः काञ्चनचित्राङ्गैश्चिच्छेद [2]पुरुषर्षभः ॥ १२८ ॥
तन्मेरुशिखराकारं द्योतमानमिव श्रिया ॥ द्वे शते वानरेन्द्राणां पतमानमपातयत् ॥ १२९ ॥
तस्मिन्काले स धर्मात्मा लक्ष्मणो [3]वाक्यमब्रवीत् ॥ कुम्भकर्णवधे युक्तो योगान्परिमृशन्बहून् ॥१३०॥
नैवायं वानरान्राजन्नापि जानाति राक्षसान् ॥ मत्तः शोणितगन्धेन स्वान्परांश्चैव खादति ॥ १३१ ॥
साध्वेनमधिरोहन्तु सर्वे ते वानरर्षभाः ॥ यूथपाश्च यथा मुख्यास्तिष्ठन्त्वस्य समन्ततः ॥ १३२ ॥
अप्ययं दुर्मतिः काले गुरुभारप्रपीडितः ॥ प्रपतन्[4]राक्षसो भूमौ नान्यान्हन्यात्प्लवङ्गमान् ॥ १३३ ॥
तस्य तद्वचनं श्रुत्वा राजपुत्रस्य धीमतः ॥ ते समारुरुहुर्हृष्टाः कुम्भकर्णं प्लवङ्गमाः ॥ १३४ ॥
कुम्भकर्णस्तु संक्रुद्धः [5]समारूढः प्लवङ्गमैः ॥ व्यधूनयत्तान्वेगेन दुष्टहस्तीव हस्तिपान् ॥ १३५ ॥
तान्दृष्ट्वा निर्धुतान्रामो दुष्टोऽयमिति राक्षसः ॥ समुत्पपात वेगेन धनुरुत्तममाददे ॥ १३६ ॥
क्रोधताम्रेक्षणो वीरो निर्दहन्निव चक्षुषा ॥ राघवो राक्षसं रोषादभिदुद्राव वेगितः ॥
यूथपान्हर्षयन्सर्वान्कुम्भकर्णभयार्दितान् ॥ १३७ ॥

स चापमादाय भुजङ्गकल्पं दृढज्यमुग्रं तपनीयचित्रम् ॥
हरीन्समाश्वास्य समुत्पपात रामो निबद्धोत्तमतूणबाणः ॥ १३८ ॥

स वानरगणैस्तैस्तु वृतः परमदुर्जयः ॥ लक्ष्मणानुचरो रामः संप्रतस्थे महाबलः ॥ १३९ ॥
स ददर्श महात्मानं किरीटिनमरिंदमम् ॥ [7]शोणितापुतसर्वाङ्गं कुम्भकर्णं महाबलम् ॥ १४० ॥
सर्वान्समभिधावन्तं यथा रुष्टं दिशागजम् ॥ मार्गमाणं हरीन्क्रुद्धं राक्षसैः परिवारितम् ॥ १४१ ॥
विन्ध्यमन्दरसंकाशं काञ्चनाङ्गदभूषणम् ॥ स्रवन्तं रुधिरं वक्त्राद्गर्षमेघमिवोत्थितम् ॥ १४२ ॥
जिह्वया परिलिह्यन्तं शोणितं शोणितेक्षणम् ॥ मृद्नन्तं वानरानीकं कालान्तकयमोपमम् ॥ १४३ ॥
तं दृष्ट्वा राक्षसश्रेष्ठं प्रदीप्तानलवर्चसम् ॥ विस्फारयामास तदा कार्मुकं पुरुषर्षभः ॥ १४४ ॥

कदनं वानराणामिति शेषः ॥१२४–१२५॥ मूर्च्छितः व्याप्तः ॥ १२६—१२८ ॥ द्वे शते उद्दिश्य पतमानं गच्छन्तं । अपातयत् । शरैरिति शेषः ॥ १२९ ॥ योगान् परिमृशन् उपायान् विचारयन् ॥ १३०—१३१ ॥ यथा यथायोग्यं ॥ १३२ ॥ भारः वानरारोहणरूपः ॥ १३३—१३५॥ निर्धुतानिति ह्रस्व आर्षः ॥ १३६ ॥ क्रोधताम्रेत्यादिसार्धश्लोकमेकं वाक्यं ॥ १३७ ॥ निबद्धोत्तमतूणबाणः निबद्धोत्तमबाणतूण इत्यर्थः ॥ १३८—१३९ ॥ स ददर्शेत्यादिचतुःश्लोक्येकान्वया ॥ १४०—१४२ ॥ कालान्तकयमोपमं । रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वेतिवदेकस्यैवावस्थाभेदात्कालादिनामभेदः । यद्वा काले युगान्तकाले अन्तको नाशको यमः उपमा यस्य स तथोक्तः

स० निरायुधंमेने भागवत्स्नेच्छयैवमायासृष्टिरिन्द्रजिदादौ । तथात्रेच्छाभावादेवनैरायुध्यमितिमन्तव्यं ॥ १२४ ॥ ति० योगान् उपायान् । अनेनवधकालेलक्ष्मणसाहित्यंरामस्यगम्यते ॥ १३० ॥ ति० लक्ष्मणानुचरः । बहुव्रीहिः । लक्ष्मणसहितः ॥१३९॥

[पा०] १ ग. ङ.—ठ. कराभ्यांच. २ ङ. छ. झ. ट. भरताग्रजः. ३ क.—घ. च.—ट. राममब्रवीत्. ४ ख. च. सर्वेतेहरयोऽद्भुतं. ५ ङ. झ. ट. अथायं. ६ ङ. झ. ट. प्रचरन्राक्षसो. ७ झ. समारूढैः. ८ क.—च. झ. ट. बलार्दितान्. ९ क. ङ. झ. ट. दुर्जयैः. १० ख.—ट. शोणितावृतरक्ताक्षं.

स तस्य चापनिर्घोषात्कुपितो राक्षसर्षभः ॥ अमृष्यमाणस्तं घोषमभिदुद्राव राघवम् ॥ १४५ ॥
ततस्तु वातोद्धतमेघकल्पं भुजङ्गराजोत्तमभोगबाहुम् ॥
तमापतन्तं धरणीधराभमुवाच रामो युधि कुम्भकर्णम् ॥ १४६ ॥
आगच्छ रक्षोधिप मा विषादमवस्थितोऽहं प्रगृहीतचापः ॥
अवेहि मां शक्रसपत्न रामं मया मुहूर्ताद्भविता विचेताः ॥ १४७ ॥
रामोऽयमिति विज्ञाय जहास विकृतस्वनम् ॥ अभ्यधावत संक्रुद्धो हरीन्विद्रावयन्रणे ॥
पातयन्निव सर्वेषां हृदयानि वनौकसाम् ॥ १४८ ॥
प्रहस्य विकृतं भीमं स मेघस्तनितोपमम् ॥ कुम्भकर्णो महातेजा राघवं वाक्यमब्रवीत् ॥ १४९ ॥
नाहं विराधो विज्ञेयो न कबन्धः खरो न च ॥ न वाली न च मारीचः कुम्भकर्णोऽहमागतः ॥१५०॥
पश्य मे मुद्गरं घोरं सर्वकालायसं महत् ॥ अनेन निर्जिता देवा दानवाश्च पुरा मया ॥ १५१ ॥
विकर्णनास इति मां नावज्ञातुं त्वमर्हसि ॥ स्वल्पाऽपि हि न मे पीडा कर्णनासाविनाशनात् ॥१५२॥
दर्शयेक्ष्वाकुशार्दूल वीर्यं गात्रेषु मे लघु ॥ ततस्त्वां भक्षयिष्यामि दृष्टपौरुषविक्रमम् ॥ १५३ ॥
स कुम्भकर्णस्य वचो निशम्य रामः सुपुङ्खान्विससर्ज बाणान् ॥
तैराहतो वज्रसमग्रवेगैर्न चुक्षुभे न व्यथते सुरारिः ॥ १५४ ॥
यैः सायकैः सालवरा निकृत्ता वाली हतो वानरपुङ्गवश्च ॥
ते कुम्भकर्णस्य तदा शरीरे वज्रोपमा न व्यथयां प्रचक्रुः ॥ १५५ ॥
स वारिधारा इव सायकांस्तान्पिबञ्शरीरेण महेन्द्रशत्रुः ॥
जघान रामस्य शरप्रवेगं व्याविध्य तं मुद्गरमुग्रवेगम् ॥ १५६ ॥
ततस्तु रक्षः क्षतजानुलिप्तं वित्रासनं देवमहाचमूनाम् ॥
विव्याध तं मुद्गरमुग्रवेगं विद्रावयामास चमूं हरीणाम् ॥ १५७ ॥
वायव्यमादाय ततो वरास्त्रं रामः प्रचिक्षेप निशाचराय ॥
समुद्गरं तेन जघान बाहुं स कृत्तबाहुस्तुमुलं ननाद ॥ १५८ ॥
स तस्य बाहुर्गिरिशृङ्गकल्पः समुद्गरो राघवबाणकृत्तः ॥
पपात तस्मिन्हरिराजसैन्ये जघान तां वानरवाहिनीं च ॥ १५९ ॥

॥ १४३—१४६ ॥ मा मां । अविषादं आगच्छेत्यन्वयः । यद्वा विषादं मा गच्छ । मरणेन शरीरभरणक्लेशं त्यजेत्यर्थः । आङ् उपसर्गमात्रं ॥१४७–१४८॥ विकृतमित्यादिविशेषणत्रयं क्रियाविशेषणं ॥ १४९—१५० ॥ पश्य मे मुद्गरमिति । यद्यपि निरायुधत्वं पूर्वमुक्तं तथाप्यद्य मुद्गरं गृहीतवानिति ज्ञेयं । सर्वकालायसं बहुलायसमयमित्यर्थः॥१५१—१५२॥लघु क्षिप्रं । दृष्टपौरुषविक्रमं दृष्टबलपराक्रमम् ॥ १५३ ॥ चुक्षुभ इति । क्षोभोत्र मानसः ॥ १५४ ॥ यैः सायकैरिति । सालभेदकस्य वालिविनाशकस्य च बाणस्यैकत्वेपि बहुवचनं तद्वर्ग्याणामनेकत्वादुपपद्यते ॥१५५॥ शरीरेण पिबन् । शरीरनिमग्नबाण इत्यर्थः । जघान मोघीचकार ॥ १५६ ॥ विव्याध अचालयत्

ति० भुजङ्गराजस्यशेषस्योत्तमोभोगः तद्वद्बाहुर्यस्यसः ॥ १४६ ॥ ति० रामोयमितिविज्ञाय रामवचसेतिशेषः ॥ १४८ ॥ स० यद्यपि 'एकेषुणा—भित्वाचतान्स'इत्यादिष्वेकएवसप्ततालपाटकोविपाठउक्तः तथापिकुंभकर्णमहत्त्ववर्णनंराममाहात्म्योपयोगीति यैरित्याद्युक्तिः । तदवयवबाहुल्याद्वा "अदितिःपाशान्" इत्यादिवद्वा बहुवचनं । नव्यथयांप्रचक्रुः । आर्षोऽयमामन्तव्यवहि-

[पा०] १ झ. धारोद्धत. २ ङ. छ. झ. ट. राक्षसवंशनाशनंयस्त्वंमुहूर्तात्. ३ क. च. भवान्मुहूर्ताद्भविता. ४ ग. विजिताः. ५ ङ. छ. झ. ट. मेऽनघ. ६ ग. ङ. छ. झ. शरीरंवज्रोपमानंव्यथयां. ७ क. ग.—ट. व्याविध्यतं.

ते वानरा भग्नहतावशेषाः पर्यन्तमाश्रित्य तदा विषण्णाः ॥
प्रवेपिताङ्गं ददृशुः सुघोरं नरेन्द्ररक्षोधिपसन्निपातम् ॥ १६० ॥
स कुम्भकर्णोस्त्रनिकृत्तबाहुर्महान्निकृत्ताग्र इवाचलेन्द्रः ॥
उत्पाटयामास करेण वृक्षं ततोऽभिदुद्राव रणे नरेन्द्रम् ॥ १६१ ॥
स तस्य बाहुं सहसालवृक्षं समुद्यतं पन्नगभोगकल्पम् ॥
ऐन्द्रास्त्रयुक्तेन जघान रामो बाणेन जाम्बूनदचित्रितेन ॥ १६२ ॥
स कुम्भकर्णस्य भुजो निकृत्तः पपात भूमौ गिरिसन्निकाशः ॥
विवेष्टमानोऽभिजघान वृक्षाञ्शैलाञ्शिला वानरराक्षसांश्च ॥ १६३ ॥
तं छिन्नबाहुं समवेक्ष्य रामः समापतन्तं सहसा नदन्तम् ॥
द्वावर्धचन्द्रौ निशितौ प्रगृह्य चिच्छेद पादौ युधि राक्षसस्य ॥ १६४ ॥
तौ तस्य पादौ प्रदिशो दिशश्च गिरीन्गुहाश्चैव महार्णवं च ॥
लङ्कां च सेनां कपिराक्षसानां विनादयन्तौ विनिपेततुश्च ॥ १६५ ॥
निकृत्तबाहुर्विनिकृत्तपादो विदार्य वक्त्रं वडवामुखाभम् ॥
दुद्राव रामं सहसाऽभिगर्जन्राहुर्यथा चन्द्रमिवान्तरिक्षे ॥ १६६ ॥
अपूरयत्तस्य मुखं शिताग्रै रामः शरैर्हेमपिनद्धपुङ्खैः ॥
स पूर्णवक्त्रो न शशाक वक्तुं चुक्रोज कृच्छ्रेण मुमोह चापि ॥ १६७ ॥
अथाददे सूर्यमरीचिकल्पं स ब्रह्मदण्डान्तककालकल्पम् ॥
अरिष्टमैन्द्रं निशितं सुपुङ्खं रामः शरं मारुततुल्यवेगम् ॥ १६८ ॥
तं वज्रजाम्बूनदचारुपुङ्खं प्रदीप्तसूर्यज्वलनप्रकाशम् ॥
महेन्द्रवज्राशनितुल्यवेगं रामः प्रचिक्षेप निशाचराय ॥ १६९ ॥
स सायको राघवबाहुचोदितो दिशः स्वभासा दश संप्रकाशयन् ॥
सधूमवैश्वानरदीप्तदर्शनो जगाम शक्राशनिवीर्यविक्रमः ॥ १७० ॥
स तन्महापर्वतकूटसन्निभं विवृत्तदंष्ट्रं चलचारुकुण्डलम् ॥

॥ १५७—१५९ ॥ सन्निपातं द्वन्द्वयुद्धं ॥ १६०—१६१ ॥ ऐन्द्रास्त्रयुक्तेन ऐन्द्रास्त्रमन्त्राभिमन्त्रितेन ॥ १६२ ॥ विवेष्टमानः विवर्तमानः ॥ १६३ ॥ प्रगृह्य युगपत्संधाय ॥ १६४ ॥ विनाशयन्तौ दिगादीन् प्रतिध्वनयन्तौ ॥ १६५ ॥ दुद्राव राममिति । ऊरुशेषाभ्यामिदं । अन्यथेदं गमनं वक्ष्यमाणं पतनं च न संभवतः । राहुर्यथेति । चन्द्रमिव स्थितं रामं राहुर्यथा तथा कुम्भकर्ण इत्यर्थः ॥ १६६—१६७ ॥ अरिष्टं रिपूणामशुभप्रदं । " अरिष्टे तु शुभाशुभे " इत्यमरः ॥ १६८–१६९ ॥ वैश्वानरः अग्निः ॥ १७०–१७१ ॥

तत्प्रयोगः ॥ १५५ ॥ ति० करेण कृत्तेतरेण ॥ १६१ ॥ ति० चुक्रोज अवर्णेनशब्देनेतिशेषः ॥ १६७ ॥ ति० शक्राशन्योरिव शक्राशनेरिववाभीमोविक्रमोयस्यतंकुंभकर्णंजगाम ॥ १७० ॥ ति० चले गते चारुणी रमणीयेकुण्डलेयस्मात्तच्चलचारुकुण्डलं ॥

[पा०] १ क. ग. ङ. च. छ. झ. ट. तंतस्य. २ ङ. च. झ. ट. गिरेर्गुहाश्चैव. ३ ङ. झ. मुमूर्च्छचापि. ४ क. ङ. च. छ. झ. ञ. ट. विधूमवैश्वानरभीमदर्शनो. ५ ङ. झ. ट. भीमविक्रमं. ६ दिव्यंमघवतादत्तंज्वलन्तमिवतेजसा । अवारणीयंविशिखंगिरीणामिवचारणम् ॥ १ ॥ भयङ्करममित्राणांज्ञातीनांनन्दिवर्धनम् । सुपर्वाणंसुपर्वाग्रंशत्रूणांभयवर्धनम् ॥ २ ॥ तंसायकंमुपादायविकृष्यचमहाबलः । ससर्जकुंभकर्णस्यवधायशरमुत्तमम् ॥ ३ ॥ सविसृष्टोबलवतारामेणनिशितःशरः । कुंभकर्णस्यहृदयंभित्त्वाधरणिमाविशत् ॥ ४ ॥ ससायकःइति १७० श्लोकानन्तरमेतेचत्वारःश्लोकाः क. ख. पुस्तकयोरधिकादृश्यन्ते. ७ ख. घ. ङ. च. छ. झ. ट. सुवृत्तदंष्ट्रं.

चकर्त रक्षोधिपतेः शिरस्तथा यथैव वृत्रस्य पुरा पुरंदरः ॥ १७१ ॥
कुम्भकर्णशिरो भाति कुण्डलालङ्कृतं महत् ॥ आदित्येऽभ्युदिते रात्रौ मध्यस्थ इव चन्द्रमाः ॥१७२॥
तद्रामबाणाभिहतं पपात रक्षःशिरः पर्वतसन्निकाशम् ॥
बभञ्ज चर्यागृहगोपुराणि प्राकारमुच्चं तमपातयच्च ॥ १७३ ॥
न्यपतत्कुम्भकर्णोथ स्वकायेन निपातयन् ॥ प्लवङ्गमानां कोट्यश्च परितः संप्रधावताम् ॥ १७४ ॥
तच्चातिकायं हिमवत्प्रकाशं रक्षस्ततस्तोयनिधौ पपात ॥
ग्राहान्वरान्मीनवरान्भुजङ्गान्ममर्द भूमिं च तदा विवेश ॥ १७५ ॥
तस्मिन्हते ब्राह्मणदेवशत्रौ महाबले संयति कुम्भकर्णे ॥
चचाल भूर्भूमिधराश्च सर्वे हर्षाच्च देवास्तुमुलं प्रणेदुः ॥ १७६ ॥
ततस्तु देवर्षिमहर्षिपन्नगाः सुराश्च भूतानि सुपर्णगुह्यकाः ॥
सयक्षगन्धर्वगणा नभोगताः प्रहर्षिता रामपराक्रमेण ॥ १७७ ॥

कुंभकर्णेति । कर्तनवेगादुद्गतं गगने स्थितं । रात्रौ आदित्ये अदितिदेवताके पुनर्वसुनक्षत्रे तारकाद्वयात्मके । अभ्युदिते तन्मध्यगतश्चन्द्रमा इव बभावित्यर्थः ॥ १७२ ॥ चर्याः प्राकारोपान्तकृत्रभटसंचाराईप्रदेशाः ॥ १७३ ॥ कोट्यः कोटीः ॥ १७४ ॥ रक्षः कबन्धरूपं । भूमिं तदा विवेश । भूमिमस्पृश-

---

स० वृत्रस्य त्वष्टृपुत्रस्य चलचारुकुण्डलंशिरः पुरापुरन्दरइव सः रामः रक्षोधिपतेःशिरश्चकर्तेत्यन्वयः ॥ १७१ ॥ ति० कुण्डलाभ्यामलङ्कृतं विनाकृतं । " अलंभूषणपर्याप्तिशक्तिवारणवाचकं " इत्यमरः । कुंभकर्णस्यशिरः अरात्रौ प्रातःकाले । आदित्ये उदिते गगनमध्यस्थचन्द्रमाइवनिष्प्रभंभातीत्यर्थः ॥ अयंश्लोकःप्रक्षिप्तइतिबहवः ॥ स० भातिकुण्डलालङ्कृतं भयाकान्त्या कुण्डलालङ्कृतंयदन्यच्छिरः तदतिक्रम्यवर्ततेतत्तथा । सद्यःपातात्कान्तिर्नगतेतिभावः । " अतिलङ्घनेऽपिच " इतिविश्वः । यद्वा कुण्डलालं कुण्डइतिकुण्डेआस्यपिठरेलालायस्यतत् । पातालसंनिभमितिपूर्वमुक्तेः । " कुण्डंपिठरे " इतिविश्वः । कृतं कालविशेषेण । अतएवाप्रकाशोयुज्यते । कुण्डलाभ्यां विनाकृतमितिद्वावपि । यत् रात्रौमध्यस्थः योग्यतयागगनमध्यस्थः । चन्द्रमाइवाभात् । तदिदानीं आदित्येसूर्येऽभ्युदितेमध्यस्थोऽधमः कान्त्या चन्द्रमाइवभाति । मध्यस्थे न्यायमार्गस्थे । आदित्यइवादित्येरामरूपेवा । तद्वंशसंभूतत्वात्तस्मिन्रामेऽभ्युदितेसतिचन्द्रमाइवभातीतिशेषः । कुण्डलवत्सर्पवदलङ्कृतंभाति । यथाऽहिःकुण्डलीकुण्डलंचेतिवचनात् । कर्णशून्यत्वेनोचितंतदौपम्यं । आदित्ये अदितिदेवताकेपुनर्वसुनक्षत्रेरात्रावभ्युदितेसतितन्मध्यस्थश्चन्द्रमाइवभातीति तथाअरात्रौदिवेतितीर्थनागोजिव्याख्यानेप्रक्रमानानुगुण्यात् एवंद्वितीयमपि आदित्योदयानन्तरं अरात्रावहनीत्यवक्तव्यत्वादुपेक्षणीये ॥ १७२ ॥ ति० उच्चंप्राकारं लङ्कायाइतिशेषः । शिरः कर्तनवेगोत्थितंलङ्कायांपपात । देहस्तुकर्तनवेगविलुठन्समुद्रेपपात । यद्यपि " तंब्रह्मास्त्रेणसौमित्रिर्ददाराद्रिवरोपमम् । सपपातमहावीरोदिव्यास्त्राभिहतोरणे । तंदृष्ट्वावृत्रसंकाशंकुंभकर्णंतरस्विनम् । गतासुंपतितंभूमौराक्षसाःप्राद्रवन्भयात् । " इतिमहाभारतोक्तयालक्ष्मणतःकुंभकर्णवधःप्रतीयते । तथापिनविरोधः । रामलक्ष्मणाभ्यांमिलित्वातद्वधकरणात् । अतएव पूर्वलक्ष्मणानुचरइत्यत्रलक्ष्मणसहितइतिव्याख्यातं । प्राधान्यात्त्वत्ररामस्यैवतद्धन्तृत्वोक्तिः । लक्ष्मणसाहित्येनहननात्तु व्यासोलक्ष्मणस्यहन्तृत्वमुक्तवान् ॥ स० " ब्राह्मेणास्त्रेणसौमित्रिर्ददाराद्रिवरोपमम् " इति भारतेवनपर्वणिमार्कण्डेयोपाख्यानेलक्ष्मणात्कुंभकर्णवधउक्तोत्रतुरामादतोविरोधइतिचेत्सत्यं । सुमित्रायाअपत्यंहिसौमित्रिः । तस्याश्चलक्ष्मणादपिप्रेमपदंरामइतितदपत्यत्वेनोक्तोव्यासेनदाशरथिरितिवा भाषान्तरयेणोक्तंभारतइवान्यत्राभावाद्बुद्ध्यभाषयारामभाबोधयदितिवा पुंव्यत्यासोपि " शतंदुर्योधनादींस्तेधनञ्जयशरैर्हतान् । दर्शयिष्यामि " इतिकृष्णेनकृष्णांप्रत्युदीरितेवचसिभीमसेनशरैर्हतानितिवक्तव्येधनञ्जयेत्युक्तिवद्वाज्ञेयः । " मयैववध्यौ भवतं त्रिजन्मसु " इतिभगवतोक्तत्वात् हिरण्याक्षहिरण्यकशिप्वोः शिशुपालदन्तवक्रयोश्च नृसिंहश्वदुसिंहाभ्यांहतत्वदर्शनाच्च " रामलक्ष्मणाभ्यांमिलित्वातद्वधकरणात् " इत्यादिनागोजिभट्टविरोधसमाधिकथनंकथमितिचिन्त्यम् ॥ १७३ ॥ स० तोयनिधौपपात । खण्डशःखण्डनेनतोयनिधौप्रक्षेपोपि हर्यृक्षासुसाधः । प्रक्षेप्यश्चोत्तरकार्यंदृष्ट्वेतिस्वयमेवपतन्देहो महात्मनामरयोपिसहायकारिणइतिनीतिसूचितवानितिमन्तव्यम् ॥ १७५ ॥ स० भूश्चचाल भूमिधराश्चचेलुः ॥ १७६ ॥ भूतानि आकाशादीनि । स्वकार्यप्रतिबन्धकत्वात्तद्वधेनतेषांतोषः । सोप्यभिमानिविवक्षयाभूभूधरादि-

[पा०] १ ख. च. छ. पर्वतकूटकल्पं. २ क,—ट. रक्षस्तदापयोनिधौ.

ततस्तु ते तस्य वधेन भूरिणा मनस्विनो नैर्ऋतराजबान्धवाः ॥
विनेदुरुच्चैर्व्यथिता रघूत्तमं हरिं समीक्ष्यैव यथा सुरार्दिताः ॥ १७८ ॥
स देवलोकस्य तमो निहत्य सूर्यो यथा राहुमुखाद्विमुक्तः ॥
तथा व्यभासीद्भुवि वानरौघे निहत्य रामो युधि कुम्भकर्णम् ॥ १७९ ॥
प्रहर्षमीयुर्बहवस्तु वानराः प्रबुद्धपद्मप्रतिमैरिवाननैः ॥
अपूजयन्राघवमिष्टभागिनं हते रिपौ भीमबले दुरासदे ॥ १८० ॥
स कुम्भकर्णं सुरसङ्घमर्दनं महत्सु युद्धेषु पराजितश्रमम् ॥
ननन्द हत्वा भरताग्रजो रणे महासुरं वृत्रमिवामराधिपः ॥ १८१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

अष्टषष्टितमः सर्गः ॥ ६८ ॥

कुंभकर्णश्रवणमात्रेण पतितमूर्च्छितेन रावणेन संज्ञाधिगमानन्तरं तंप्रतिशोचनपूर्वकं बहुधाविलापः ॥ १ ॥

कुम्भकर्णं हतं दृष्ट्वा राघवेण महात्मना ॥ राक्षसा राक्षसेन्द्राय रावणाय न्यवेदयन् ॥ १ ॥
राजन्स कालसंकाशः संयुक्तः कालकर्मणा ॥ विद्राव्य वानरीं सेनां भक्षयित्वा च वानरान् ॥ २ ॥
प्रतपित्वा मुहूर्तं च प्रशान्तो रामतेजसा ॥ कायेनार्धप्रविष्टेन समुद्रं भीमदर्शनम् ॥ ३ ॥
निकृत्तकण्ठोरुभुजो विक्षरन्रुधिरं बहु ॥ रुद्ध्वा द्वारं शरीरेण लङ्कायाः पर्वतोपमः ॥ ४ ॥
कुम्भकर्णस्तव भ्राता काकुत्स्थशरपीडितः ॥ लगण्डभूतो विकृतो दावदग्ध इव द्रुमः ॥ ५ ॥

दित्यर्थः ॥ १७५—१७८ ॥ वानरौघे वानरौघमध्ये ॥ १७९ ॥ प्रबुद्धपद्मप्रतिमैरिति । प्रतिमाशब्दोत्र रूपवचनः नतु सदृशवचनः इवशब्दप्रयोगात् । इष्टभागिनं जयरूपेष्टभाजं ॥ १८० ॥ पराजितश्रमं त्यक्तश्रमं । अत्र सर्गे अधिकाः केचन श्लोकाः क्वापि क्वापि दृश्यन्ते ते न व्याख्याताः । अस्मिन्सर्गे सार्धषट्षष्ट्युत्तरशतश्लोकाः ॥ १८१ ॥ इति श्रीगोविन्दराज विरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तषष्टितमः सर्गः ॥ ६७ ॥

कुम्भकर्णवधश्रवणेन रावणस्य प्रलापः—कुम्भकर्णमित्यादि ॥ अत्र रावणायेत्यत्र यकारो गायत्र्या अष्टादशाक्षरं । सप्तदशसहस्रश्लोका गताः ॥ १ ॥ कालकर्मणा कालस्य मृत्योः कर्मणा । मरणरूपक्रियेति यावत् । यद्वा काले कर्मणा कालकर्मणा । परिपक्वकर्मणेत्यर्थः ॥ २ ॥ प्रतपित्वा पराक्रम्य, एतदारभ्य श्लोकत्रयमेकान्वयं ॥ अर्धप्रविष्टेन अर्धेन कबन्धमात्रेण प्रविष्टेन । कायेन समुद्रं रुद्ध्वा । शरीरेण उत्तमाङ्गेन । द्वारं रुद्ध्वा । लगण्डभूतः पिण्डीभूतः । " लगण्डोऽजगर" इत्येके । विकृतः विकृतशरीरः ।

वत् ॥ १७७ ॥ **स०** भूरिणा महता वधेन । वधस्यमहत्त्वंतु कुंभकर्णपराक्रमानङ्गीकरणेन । भूरिणा अच्युतेन तत्कृतेनेतियावत् । " भूरिर्ब्रह्माच्युतेशेषु " इतिविश्वः । अमनस्विनः खिन्नमानसाः । हरिं सिंहं । यथामतङ्गजाःगजाःसमीक्ष्यव्यथितानदन्ति तथामेदुः ॥ १७८ ॥ **ति०** देवलोकस्य आकाशस्य । मध्येइतिशेषः । व्यभासीत् विशेषेणभातिस्म ॥ **स०** सत् एव लोकस्य इतिविभागः । लोकस्य उत्तराधरलोकस्य सत् तमः तत्रत्यमितिभावः । निहत्यैवसूर्योयथा । किंच यथाराहुमुखाद्विमुक्तःसूर्यो भाति तथाव्यभासीत् ॥ १७९ ॥ **ति०** अत्रदिनद्वयेनकुंभकर्णोत्थानं ततः सप्तमवासरेवधइति भाद्रपदपूर्णिमायामेतद्वधइतिपाद्मसंमतिपूर्वकमग्रे स्फुटीभविष्यति ॥ १८१ ॥ इतिसप्तषष्टितमःसर्गः ॥ ६७ ॥

ति० अगण्डभूतः " अशिरःपाणिपादस्तुकबन्धोऽगण्डउच्यते " ॥ **स०** अगण्डभूतः कुंभकर्णचिह्नरहितीभूतः । " गण्डःप्र-

[**पा०**] १ झ. मतंगजाः. ख. पुरासुराः. २ ङ.—ट. व्यभासीद्धरिसैन्यमध्ये. ३ ङ. झ. ट. बलेनृपात्मजं. ४ ख. ङ. झ. ञ. ट. सुरसैन्यमर्दनं. ५ ङ. झ. ट. निकृत्तनासाकर्णेनविक्षरद्रुधिरेणच. ६ ङ.—ट. अगण्डभूतोविवृतो.

तं श्रुत्वा निहतं सङ्ख्ये कुम्भकर्णं महाबलम् ॥ रावणः शोकसंतप्तो मुमोह च पपात च ॥ ६ ॥
पितृव्यं निहतं दृष्ट्वा देवान्तकनरान्तकौ ॥ त्रिशिराश्चातिकायश्च रुरुदुः शोकपीडिताः ॥ ७ ॥
भ्रातरं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा ॥ महोदरमहापार्श्वौ शोकाक्रान्तौ बभूवतुः ॥ ८ ॥
ततः कृच्छ्रात्समासाद्य संज्ञां राक्षसपुङ्गवः ॥ कुम्भकर्णवधादीनो विललाप[2] स रावणः ॥ ९ ॥
हा वीर रिपुदर्पघ्न कुम्भकर्ण महाबल ॥ त्वं मां विहाय वै दैवाद्यातोसि यमसादनम् ॥ १० ॥
मम शल्यमनुद्धृत्य बान्धवानां महाबल ॥ शत्रुसैन्यं प्रताप्यैकस्त्वं मां संत्यज्य गच्छसि ॥ ११ ॥
इदानीं खल्वहं नास्मि यस्य मे दक्षिणो भुजः ॥ पतितो यं समाश्रित्य न बिभेमि सुरासुरात् ॥१२॥
कथमेवंविधो वीरो देवदानवदर्पहा ॥ कालाग्निरुद्रप्रतिमो रणे रामेण वै हतः ॥ १३ ॥
यस्य ते वज्रनिष्पेषो न कुर्याद्व्यसनं सदा ॥ स कथं रामबाणार्तः प्रसुप्तोसि महीतले ॥ १४ ॥
एते देवगणाः सार्धमृषिभिर्गगने स्थिताः ॥ निहतं त्वां रणे दृष्ट्वा निनदन्ति प्रहर्षिताः ॥ १५ ॥
ध्रुवमद्यैव संहृष्टा लब्धलक्षाः प्लवङ्गमाः ॥ आरोक्ष्यन्ति हि दुर्गाणि लङ्काद्वाराणि सर्वशः ॥ १६ ॥
राज्येन नास्ति मे कार्यं किं करिष्यामि सीतया ॥ कुम्भकर्णविहीनस्य जीविते नास्ति मे रति[3]ः ॥१७॥
यद्यहं भ्रातृहन्तारं न हन्मि युधि राघवम् ॥ ननु मे मरणं श्रेयो न चेदं व्यर्थजीवितम् ॥ १८ ॥
अद्यैव तं गमिष्यामि देशं यत्रानुजो मम ॥ न हि भ्रातॄन्समुत्सृज्य क्षणं जीवितुमुत्सहे ॥ १९ ॥
देवा हि मां हसिष्यन्ति दृष्ट्वा पूर्वापकारिणम् ॥ कथमिन्द्रं जयिष्यामि कुम्भकर्णे हते त्वयि ॥२०॥
तदिदं मामनुप्राप्तं विभीषणवचः शुभम् ॥ यदज्ञानान्मया तस्य न गृहीतं महात्मनः ॥ २१ ॥
विभीषणवचो यावत्कुम्भकर्णप्रहस्तयोः ॥ विनाशोऽयं समुत्पन्नो मां व्रीडयति दारुणः ॥ २२ ॥
तस्यायं कर्मणः प्राप्तो विपाको मम शोकदः ॥ यन्मया धार्मिकः श्रीमान्स निरस्तो विभीषणः ॥२३॥

रामतेजसा प्रशान्त इत्यन्वयः ॥ ३—१० ॥ मम बान्धवानां च शल्यं शोकमित्यर्थः ॥ ११ ॥ सुरासुरात् सुरासुरेभ्यः ॥ १२—१५ ॥ लब्धलक्षाः लब्धावसराः ॥ १६—१७ ॥ भ्रातृहन्तारं न हन्मि यदि तदा इदं व्यर्थजीवितं श्रेयःनच । नैवेत्यर्थः । किंतु मरणमेव श्रेयो नन्विति संबन्धः ॥ १८ ॥ भ्रातॄनिति बहुवचनं पूजार्थं ॥ १९—२१ ॥ कुम्भकर्णप्रहस्तयोरयं दारुणो विनाशः यावत् यदा समुत्पन्नः ततआरभ्य विभीषणवचो मां व्रीडयतिपीडयतीत्यर्थः

वीणेचिहेस्यात् " इतिविश्वः । अतएवविकृतः । विधृतइतिपाठे रक्षोभिरपरिवृतइतिवा विभिः काकगृध्रादिभिर्वृतइतिवार्थः ॥५॥ ति० देवान्तकादयोरावणपुत्राः ॥ ७ ॥ ति० महोदरमहापार्श्वौ विमातृजौभ्रातरौतस्य ॥ ८ ॥ स० ममशल्यं रामरूपं । बान्धवानांमध्येमहाबल । " बान्धवानांचशल्यमनुद्धृत्येत्यन्वयइतिनागोजिभट्टव्याख्यायामश्रुतचशब्दाध्याहारइव ममशल्यमित्यनेनमुख्यरावणशल्येनसशल्यानाममुख्यानांपृथग्ग्रहणायोगश्चेतिदोषौप्रादुष्यातामितिज्ञेयं ॥ ११ ॥ स० अहंना पुमान्नास्मि । नपुंसकप्रायइत्यर्थः । सुरासुरात् सुराश्चासुराश्चसुरासुरं । तस्मात् । " येषांचविरोधःशाश्वतिकः " इत्येकवद्भावः । समाहारोवा । नेत्यावर्तते । नबिभेमि । नास्मि मृतप्रायइतिवा ॥ १२ ॥ स० दर्पहा दर्पहन्ति हनिष्यतिवादर्पहा । " नियमेभूतइत्याश्रयणाद्वर्तमानेभविष्यतिवाकालेचोपपदान्तरेपिभवत्येव पुरुषंहन्तिहनिष्यतिवा " इतितत्त्वबोधिन्युक्तेः । प्रकृतिनियमपक्षेअदेवदानवदर्पनविद्यतेदेवदानवानांदर्पोयेनतत्संबुद्धिः अदेवदानवदर्पहा शोकप्रकाशकःशब्दः ॥ १३ ॥ स० भ्रातॄनिति । एकस्यमुख्यस्यभ्रातुर्गमनेनानेकप्रकारेणस्वदौर्बल्यमायातमितिद्योतयतिबहुवचनेन । खरादीन्मृतान्स्मृत्वावा विभीषणकुबेराभ्यांबहिष्कृताभ्यांसहमृतमेकंसंस्मृत्यवाबहुवचनं । उत्सृज्यपदस्वारस्यादिवोत्तरत्र " सनिरस्तोविभीषणः " इतितदनुतापस्वारस्याच्च ॥ १९ ॥ इत्यष्टषष्टितमःसर्गः ॥ ६८ ॥

[पा०] १ ख.—च. ङ. ञ. श्रुत्वा. २ ङ. ञ. ट. विललापाकुलेन्द्रियः. ३ घ. ङ. ञ. ठ. मतिः.

इति बहुविधमाकुलान्तरात्मा कृपणमतीव विलप्य कुम्भकर्णम् ॥
न्यपतदथ दशाननो भृशार्तस्तमनुजमिन्द्ररिपुं हतं विदित्वा ॥ २४ ॥
[[3]ततस्तु संदीपितकोपवह्निर्निशाचराणां च महाबलश्च ॥
तदाऽपतद्भ्रातृविनाशनार्तो मुहुर्मुहुश्चैव विनिश्वसन्बली ॥ २५ ॥]
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टषष्टितमः सर्गः ॥ ६८ ॥

एकोनसप्ततितमः सर्गः ॥ ६९ ॥

कुंभकर्णनिधनाकर्णनेनविषीदन्तंरावणंप्रति त्रिशिरोनाम्नातत्सुतेन रामादिवधप्रतिज्ञानेनसमाश्वासनपूर्वकमतिकायादिभिर्भ्रातृभिःसह रणायनिर्याणम् ॥ १ ॥ वानरकृतराक्षसक्षपणरुष्टेन तुरगाधिष्ठितेननरान्तकेन वानरवाहिनीविध्वंसने सुग्रीवनियोगादङ्गदेन सतुरगनरान्तकहननम् ॥ २ ॥

एवं विलपमानस्य रावणस्य दुरात्मनः ॥ [1]श्रुत्वा शोकाभितप्तस्य त्रिशिरा वाक्यमब्रवीत् ॥ १ ॥
एवमेव महावीर्यो हतो नस्तातमध्यमः ॥ न तु सत्पुरुषा राजन्विलपन्ति यथा भवान् ॥ २ ॥
नूनं त्रिभुवनस्यापि पर्याप्तस्त्वमसि प्रभो ॥ स कस्मात्प्राकृत इव शोचस्यात्मानमीदृशम् ॥ ३ ॥
ब्रह्मदत्ताऽस्ति ते शक्तिः कवचः सायको धनुः ॥ सहस्रखरसंयुक्तो रथो मेघस्वनो महान् ॥ ४ ॥
त्वयाऽसकृद्विशस्त्रेण विशस्ता देवदानवाः ॥ स सर्वायुधसंपन्नो राघवं शास्तुमर्हसि ॥ ५ ॥
कामं तिष्ठ महाराज निर्गमिष्याम्यहं रणम् ॥ उद्धरिष्यामि ते शत्रून्गरुडः पन्नगानिव ॥ ६ ॥
शम्बरो देवराजेन नरको विष्णुना यथा ॥ तथाऽद्य शयिता रामो मया युधि निपातितः ॥ ७ ॥
श्रुत्वा त्रिशिरसो वाक्यं रावणो राक्षसाधिपः ॥ पुनर्जातमिवात्मानं [3]मन्यते कालचोदितः ॥ ८ ॥
श्रुत्वा त्रिशिरसो वाक्यं देवान्तकनरान्तकौ ॥ अतिकायश्च तेजस्वी बभूवुर्युद्धहर्षिताः ॥ ९ ॥
ततोऽहमहमित्येव गर्जन्तो नैर्ऋतर्षभाः ॥ रावणस्य सुता वीराः शक्रतुल्यपराक्रमाः ॥ १० ॥

॥ २२—२५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टषष्टितमः सर्गः ॥ ६८ ॥

अथातिकायनिर्गमः—एवमित्यादि ॥ १ ॥ तातमध्यमः तातेषु मध्यमः मध्यमपितेत्यर्थः । एवमेव महावीर्यः त्वदुक्तप्रकारेणैव महावीर्यः । हतः । दैवादिति शेषः ॥ २ ॥ ईदृशमिति शोकक्रियाविशेषणं । आत्मानं उद्दिश्येति शेषः ॥ ३ ॥ ब्रह्मदत्तेत्यादिश्लोकद्वयमेकान्वयं ॥ विशस्त्रेण निरायुधेन ॥ ४—६ ॥ नरकोत्र सिंहिकायां विप्रचित्तेर्जातेषु वातापिप्रमुखेष्वन्यतमः । " वातापिर्नमुचिश्चैव इल्वलः स्मरस्तथा । अन्धको नरकश्चैव कालनाभस्तथैव च " इत्युक्तेः ॥ ननु कृष्णहतो भूसुतो नरकासुरः । तस्य वाल्मीकिप्रबन्धनिर्माणकाले असंजातत्वात् ॥ ७—८ ॥ श्रुत्वा त्रिशिरस इत्यादि ॥ त्रिशिरसो वचनं स्वेषामपि तुल्यत्वादेवान्तकादयोपि युद्धोद्युक्ता बभूवुरित्यर्थः ॥ ९—१० ॥ अन्तरिक्षे गतं गमनं येषां तेऽन्तरिक्षगताः

ति० विलपमानस्य विलपतः । श्रुत्वा विलापमितिशेषः ॥ १ ॥ स० शंवरोयमन्यःकामशत्रोः ॥ ७ ॥ ति० ननुकुंभकर्णासाध्येऽर्थेकथंरावणस्यतत्साज्जयप्रत्याशायासंतोषस्तत्राह—कालचोदितइति । तन्नाशप्रवृत्तकालात्मकभगवत्प्रेरणयापुनस्तस्ययुद्धबु-

[पा०] १ अयंश्लोकः ज. पाठेदृश्यते. २ घ. गिरंश्रुत्वाभितप्तस्य. ङ. झ. श्रुत्वाशोकाभिभूतस्य. ३ क. ख. ग. च. छ. ज. ट. मन्यतेरावणस्तदा.

अन्तरिक्षगताः सर्वे सर्वे मायाविशारदाः ॥ सर्वे त्रिदशदर्पघ्नाः सर्वे च रणदुर्जयाः ॥ ११ ॥
सर्वे सुबलसंपन्नाः सर्वे विस्तीर्णकीर्तयः ॥ सर्वे समरमासाद्य न श्रूयन्ते पराजिताः ॥
देवैरपि सगन्धर्वैः सकिन्नरमहोरगैः ॥ १२ ॥
सर्वे च विदुषो वीराः सर्वे युद्धविशारदाः ॥ सर्वे प्रवरविज्ञानाः सर्वे लब्धवरास्तथा ॥ १३ ॥
स तैस्तदा भास्करतुल्यवर्चसैः सुतैर्वृतः शत्रुबलप्रमर्दनैः ॥
रराज राजा मघवान्यथाऽमरैर्वृतो महादानवदर्पनाशनैः ॥ १४ ॥
स पुत्रान्संपरिष्वज्य भूषयित्वा च भूषणैः ॥ आशीर्भिश्च प्रशस्ताभिः प्रेषयामास संयुगे ॥ १५ ॥
युद्धोन्मत्तं च मत्तं च भ्रातरौ चापि रावणः ॥ [महापार्श्वं प्रमत्तं वा भ्रातरं च महोदरम् ॥]
रक्षणार्थं कुमाराणां प्रेषयामास संयुगे ॥ १६ ॥
तेऽभिवाद्य महात्मानं रावणं रिपुरावणम् ॥ कृत्वा प्रदक्षिणं चैव महाकायाः प्रतस्थिरे ॥ १७ ॥
सर्वौषधीभिर्गन्धैश्च समालभ्य महाबलाः ॥ निर्जग्मुर्नैर्ऋतश्रेष्ठाः षडेते युद्धकाङ्क्षिणः ॥ १८ ॥
त्रिशिराश्चातिकायश्च देवान्तकनरान्तकौ ॥ महोदरमहापार्श्वौ निर्जग्मुः कालचोदिताः ॥ १९ ॥
ततः सुदर्शनं नाम नीलजीमूतसन्निभम् ॥ ऐरावतकुले जातमारुरोह महोदरः ॥ २० ॥
सर्वायुधसमायुक्तं तूणीभिश्च स्वलंकृतम् ॥ रराज गजमास्थाय सवितेवास्तमूर्धनि ॥ २१ ॥
हयोत्तमसमायुक्तं सर्वायुधसमाकुलम् ॥ आरुरोह रथश्रेष्ठं त्रिशिरा रावणात्मजः ॥ २२ ॥
त्रिशिरा रथमास्थाय विरराज धनुर्धरः ॥ सविद्युदुल्कः शैलाग्रे सेन्द्रचाप इवाम्बुदः ॥ २३ ॥
त्रिभिः किरीटैः शुशुभे त्रिशिराः स रथोत्तमे ॥ हिमवानिव शैलेन्द्रस्त्रिभिः काञ्चनपर्वतैः ॥ २४ ॥
अतिकायोपि तेजस्वी राक्षसेन्द्रसुतस्तदा ॥ [हयोत्तमसमायुक्तं सर्वायुधसमन्वितम् ॥]
आरुरोह रथश्रेष्ठं श्रेष्ठः सर्वधनुष्मताम् ॥ २५ ॥
सुचक्राक्षं सुसंयुक्तं स्वनुकर्षं सुकूबरम् ॥ तूणीबाणासनैर्दीप्तं प्रासासिपरिघाकुलम् ॥ २६ ॥
स काञ्चनविचित्रेण मुकुटेन विराजता ॥ भूषणैश्च बभौ मेरुः किरणैरिव भासयन् ॥ २७ ॥

॥ ११ ॥ देवादिभिः सह समरमासाद्य पराजिता न श्रूयन्त इत्यन्वयः ॥ १२ ॥ विदुषः विद्यावन्तः । प्रवरविज्ञानाः उत्कृष्टशास्त्रज्ञानाः ॥१३॥ तुल्यवर्चसैरित्यत्र समासान्त आर्षः ॥ १४ ॥ आशीर्भिः सहेति शेषः ॥ १५ ॥ युद्धोन्मत्तं च मत्तं च भ्रातरौ चापि रावण इति ॥ अत्र युद्धोन्मत्तौ महोदरमहापार्श्वपर्यायनामानौ रावणभ्रातरौ । एतौ परत्र प्रकाशयिष्येते ॥ १६ ॥ रिपून् रावयतीति रिपुरावणः ॥ १७ ॥ सर्वौषधीभिः । " कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचन्दने । वचाचम्पकमुस्ताश्च सर्वौषध्यो दश स्मृताः" इत्युक्ताभिः आयुधप्रहारनिवर्तिकाभिः ओषधीभिरित्याहुः । समालभ्य समालिप्य ॥ १८–२० ॥ अस्तमूर्धनीत्येतदुत्तरक्षणे विनाशसूचनाय ॥ २१–२३ ॥ त्रिभिः काञ्चनपर्वतैः शिखरभूतैर्हिमवानिवेत्यर्थः ॥ २४ ॥ अतिकाय इत्यादिश्लोकद्वयमेकान्वयं ॥ सुसंयुक्तं सुदृढं । स्वनुकर्षं । " अनुकर्षो दार्ववस्थं" इत्यमरः । सुकूबरं शोभनयुगंधरं । " कूबरस्तु युगंधरः " इत्यमरः ॥ २५—२६ ॥ किरणैः भासयन्

ज्यनुपरमः ॥ ८ ॥ ति० शत्रूणांबलस्यश्रीणांचार्दनैरित्यर्थेश्रियार्दनैरित्यार्षं ॥ १४ ॥ स० युद्धोन्मत्तंचमत्तंच तदपरपर्यायवाच्यौमहापार्श्वमहोदरौ । ' षडेते ' इति वक्ष्यमाणत्वात् । एतौचप्रसिद्धमहापार्श्वमहोदराभ्यांभिन्नौज्ञेयौ । तद्युद्धस्यपुनर्वक्ष्यमाण-

[पा०] १ ख.—छ. झ. ट. सर्वेसमरदुर्मदाः. २ झ. ञ. ट. श्रियार्दनैः. ३ इदमर्धं घ. ज. पाठयोर्दृश्यते. ४ क. ख. ग. ङ.—ट. सुदर्शनंनागं. ५ ख. ग. ङ. झ. ञ. ट. समायुक्तस्तूणीभिश्चाप्यलंकृतः. ६ क. ग. ङ.—ट. सज्वालस्सेन्द्रचापः. ७ इदमर्धं क. ख. पाठयोर्दृश्यते. ८ क. ख. घ.—ट. प्रभाभिरिवभासयन्.

स रराज रथे तस्मिन्राजसूनुर्महाबलः ॥ वृतो नैर्ऋतशार्दूलैर्वज्रपाणिरिवामरैः ॥ २८ ॥
हयमुच्चैःश्रवःप्रख्यं श्वेतं कनकभूषणम् ॥ मनोजवं महाकायमारुरोह नरान्तकः ॥ २९ ॥
गृहीत्वा प्रासमुल्काभं विरराज नरान्तकः ॥ शक्तिमादाय तेजस्वी गुहः शिखिगतो यथा ॥ ३० ॥
देवान्तकः समादाय परिघं वज्रभूषणम् ॥ परिगृह्य गिरिं दोर्भ्यां वपुर्विष्णोर्विडम्बयन् ॥ ३१ ॥
महापार्श्वो महाकायो गदामादाय वीर्यवान् ॥ विरराज गदापाणिः कुबेर इव संयुगे ॥ ३२ ॥
प्रतस्थिरे महात्मानो बलैरप्रतिमैर्वृताः ॥ सुरा इवामरावत्या बलैरप्रतिमैर्वृताः ॥ ३३ ॥
तान्गजैश्च तुरङ्गैश्च रथैश्चाम्बुदनिस्वनैः ॥ अनुजग्मुर्महात्मानो राक्षसाः प्रवरायुधाः ॥ ३४ ॥
ते विरेजुर्महात्मानः कुमाराः सूर्यवर्चसः ॥ किरीटिनः श्रिया जुष्टा ग्रहा दीप्ता इवाम्बरे ॥ ३५ ॥
प्रगृहीता बभौ तेषां शस्त्राणामावलिः सिता ॥ शारदाभ्रप्रतीकाशा हंसावलिरिवाम्बरे ॥ ३६ ॥
मरणं वापि निश्चित्य शत्रूणां वा पराजयम् ॥ ३७ ॥
इति कृत्वा मतिं वीरा निर्जग्मुः संयुगार्थिनः ॥ ३८ ॥
जगर्जुश्च प्रणेदुश्च चिक्षिपुश्चापि सायकान् ॥ जगृहुश्चापि ते वीरा निर्यान्तो युद्धदुर्मदाः ॥ ३९ ॥
ष्वेलितास्फोटनिनदैश्चाल च वसुंधरा ॥ रक्षसां सिंहनादैश्च पुस्फोटेव तदाऽम्बरम् ॥ ४० ॥
तेऽभिनिष्क्रम्य मुदिता राक्षसेन्द्रा महाबलाः ॥ ददृशुर्वानरानीकं समुद्यतशिलानगम् ॥ ४१ ॥
हरयोपि महात्मानो ददृशुर्नैर्ऋतं बलम् ॥ हस्त्यश्वरथसंबाधं किङ्किणीशतनादितम् ॥ ४२ ॥
नीलजीमूतसंकाशं समुद्यतमहायुधम् ॥ दीप्तानलरविप्रख्यैः सर्वतो नैर्ऋतैर्वृतम् ॥ ४३ ॥
तदृष्ट्वा बलमायातं लब्धलक्षाः प्लवङ्गमाः ॥ समुद्यतमहाशैलाः संप्रणेदुर्महाबलाः ॥
अमृष्यमाणा रक्षांसि प्रतिनर्दन्ति वानराः ॥ ४४ ॥

ततः समुद्धुष्टरवं निशम्य रक्षोगणा वानरयूथपानाम् ॥
अमृष्यमाणाः परहर्षमुग्रं महाबला भीमतरं विनेदुः ॥ ४५ ॥

ते राक्षसबलं घोरं प्रविश्य हरियूथपाः ॥ विचेरुरुद्यतैः शैलैर्नगाः शिखरिणो यथा ॥ ४६ ॥
केचिदाकाशमाविश्य केचिदुर्व्यां प्लवङ्गमाः ॥ रक्षस्सैन्येषु संक्रुद्धाश्चेरुर्द्रुमशिलायुधाः ॥
द्रुमांश्च विपुलस्कन्धान्गृह्य वानरपुङ्गवाः ॥ ४७ ॥

भासमानः । मेरुरिव बभावित्यन्वयः ॥ २७–३० ॥ देवान्तक इति ॥ अत्रापि विरराजेति संबध्यते । देवान्तकः परिघमादाय समुद्रमथने गिरिं मन्दरगिरिं । परिगृह्य तिष्ठतो विष्णोर्वपुर्विडम्बयन् विरराज ॥ ३१—३६ ॥ मरणं वेत्यर्धे निर्जग्मुरित्युपस्कार्यं ॥ ३७ ॥ इति कृत्वेत्यर्धं ॥ इत्थं कर्तव्यमित्येवंरूपां मतिं कृत्वेत्यर्थः ॥ ३८ ॥ जगर्जुः मेघध्वनिं चक्रुः । प्रणेदुः सिंहनादंचक्रुः । चिक्षिपुः क्षेपवचनान्यूचुः । सायकान् जगृहुरित्यन्वयः ॥ ३९—४३ ॥ लब्धलक्षाः लब्धपराक्रमविषयाः ॥ ४४—४६ ॥ संचारप्र-

---

लात् ॥ १६ ॥ ति० सुसंयुक्तं सुसंयुक्ताश्वं ॥ २६ ॥ ति० निश्चित्य निश्चयेन मरणंशत्रुपराजयंवा । करिष्यामइतिशेषः ॥ स० शत्रूणांपराजयंनिश्चित्य शत्रूणांमरणंवाभवेदितिमतिंकृत्वासंयुगार्थिनःसन्तःनिर्जग्मुः ॥ ३७—३८ ॥ ति० चिक्षिपुः शत्रुविषयाक्षेपवचनान्यूचुः ॥ ३९ ॥ ति० ष्वेलितास्फोटितानांच तैरित्यर्थः ॥ ४० ॥ ती० रक्षस्सैन्येषुविषयेसंक्रुद्धाःकेचित्प्लवङ्गमाः द्रुमशिलायुधाःसन्तः आकाशमाविश्यचेरुः । केचिद्वानरपुङ्गवाः विपुलस्कन्धान्द्रुमान् गृह्य गृहीत्वा । उर्व्यांचेरुरितियोजना

[पा०] १ ङ. झ. हेमभूषणं. २ क. ग. घ. ङ. ट. तेप्रतस्थुर्महा. ३ घ. ङ. झ. अनुपेतुः. ४ क. घ. च. छ. ञ. ट. र्महाकायाराक्षसाः. ५ ङ. झ. वस्त्राणामावलिःशिवा. ६ ग. ङ. झ. ट. जगृहुश्चमहात्मानोनिर्याताः. ७ ङ. झ. ष्वेलितास्फोटितानांचसंचचालेवमेदिनी. ८ ङ. झ. ञ. ट. संस्फोटितमिवांबरं. ९ क. ख. ज. ञ. ट. शिलायुधं. १० घ.—छ. झ. ञ. ट. संप्रणेदुर्मुहुर्महुः. ११ ङ.—झ. ट. प्रणेदुः. १२ ङ. झ. ञ. ट. संक्रुद्धाःकेचिद्द्रुम.

तद्युद्धमभवद्घोरं रक्षोवानरसंकुलम् ॥ ४८ ॥
ते पादपशिलाशैलैश्चक्रुर्वृष्टिमनूपमाम् ॥ बाणौघैर्वार्यमाणाश्च हरयो भीमविक्रमाः ॥ ४९ ॥
सिंहनादान्विनेदुश्च रणे वानरराक्षसाः ॥ शिलाभिश्चूर्णयामासुर्यातुधानान्प्लवङ्गमाः ॥ ५० ॥
निजघ्नुः संयुगे क्रुद्धाः कवचाभरणावृतान् ॥ केचिद्रथगतान्वीरान्गजवाजिगतानपि ॥ ५१ ॥
निजघ्नुः सहसाप्लुत्य यातुधानान्प्लवङ्गमाः ॥ शैलशृङ्गाचिताङ्गाश्च मुष्टिभिर्वान्तलोचनाः ॥ ५२ ॥
चेरुः पेतुश्च नेदुश्च तत्र राक्षसपुङ्गवाः ॥ राक्षसाश्च शरैस्तीक्ष्णैर्बिभिदुः कपिकुञ्जरान् ॥ ५३ ॥
शूलमुद्गरखड्गैश्च जघ्नुः प्रासैश्च शक्तिभिः ॥ अन्योन्यं पातयामासुः परस्परजयैषिणः ॥ ५४ ॥
रिपुशोणितदिग्धाङ्गास्तत्र वानरराक्षसाः ॥ ततः शैलैश्च खड्गैश्च विसृष्टैर्हरिराक्षसैः ॥ ५५ ॥
मुहूर्तेनावृता भूमिरभवच्छोणिताप्लुता ॥ विकीर्णपर्वताकारै रक्षोभिररिमर्दनैः ॥
आसीद्वसुमती पूर्णा तदा युद्धमदान्वितैः ॥ ५६ ॥
आक्षिप्ताः क्षिप्यमाणाश्च भग्नशूलाश्च वानरैः ॥ पुनरङ्गैस्तथा चक्रुरासन्ना युद्धमद्भुतम् ॥ ५७ ॥
वानरान्वानरैरेव जघ्नुस्ते रजनीचराः ॥ राक्षसान्राक्षसैरेव जघ्नुस्ते वानरा अपि ॥ ५८ ॥
आक्षिप्य च शिलास्तेषां निजघ्नू राक्षसा हरीन् ॥ तेषां चाच्छिद्य शस्त्राणि जघ्नू रक्षांसि वानराः ॥५९॥
निजघ्नुः शैलशूलास्त्रैर्बिभिदुश्च परस्परम् ॥ सिंहनादान्विनेदुश्च रणे वानरराक्षसाः ॥ ६० ॥
छिन्नवर्मतनुत्राणा राक्षसा वानरैर्हताः ॥ रुधिरं प्रस्रुतास्तत्र रससारमिव द्रुमाः ॥ ६१ ॥
रथेन च रथं चापि वारणेनैव वारणम् ॥ ६२ ॥
हयेन च हयं केचिन्निजघ्नुर्वानरा रणे ॥ प्रहृष्टमनसः सर्वे प्रगृहीतमनःशिलाः ॥ ६३ ॥
हरयो राक्षसाञ्जघ्नुर्द्रुमैश्च बहुशाखिभिः ॥ तद्युद्धमभवद्घोरं रक्षोवानरसंकुलम् ॥ ६४ ॥
क्षुरप्रैरर्धचन्द्रैश्च भल्लैश्च निशितैः शरैः ॥ राक्षसा वानरेन्द्राणां चिच्छिदुः पादपाञ्शिलाः ॥ ६५ ॥
विकीर्णैः पर्वताग्रैश्च द्रुमैश्छिन्नैश्च संयुगे ॥ हतैश्च कपिरक्षोभिर्दुर्गमा वसुधाऽभवत् ॥ ६६ ॥

ते वानरा गर्वितहृष्टचेष्टाः संग्राममासाद्य भयं विमुच्य ॥
युद्धं तु सर्वे सह राक्षसैस्तैर्नानायुधाश्चक्रुरदीनसत्त्वाः ॥ ६७ ॥

कारमेवाह—केचिदित्यादिसार्धश्लोक एकान्वयः ॥ द्रुमशिलायुधा इति स्वभावोक्तिः ॥४७—४८॥ अनूपमां अनुपमां ॥४९—५६॥ आक्षिप्ताःक्षिप्यमाणाश्चेति नियुद्धप्रकारकथनं । अङ्गैः हस्तपादादिभिः ॥ ५७ —६०॥ छिन्नवर्मतनुत्राणाः छिन्नवर्मरूपतनुत्राणाः। रुधिरं प्रस्रुताः स्रुतवन्तः । मुमुचुरिति यावत् । रससारं निर्यासं ॥ ६१—६४ ॥ शिलाः शिलाश्चेत्यर्थः ॥ ६५—६६ ॥ गर्वितं हृष्टं च यथा भवति तथा ॥ ४७ ॥ **ती०** शैलशृङ्गाचिताङ्गाः गिरिशिखरैर्व्याप्तदेहाः । मुष्टिभिः मुष्टिप्रहारैः । वान्तलोचनाः बहिर्निर्गतलोचनाः ॥ ५२ ॥ **स०** छिन्नवर्मतनुत्राणाः छिन्नानि वर्मचतनुश्चत्राणंशरणंचेत्येतानियेषांते । 'त्राणंरक्षितेशरणेपिच' इतिविश्वः ॥ ६१ ॥ **ति०** पर्वतास्तैः निरस्तपर्वतैः द्रुमच्छिन्नैः छिन्नद्रुमैः । विकीर्णा व्याप्ता ॥ ६६ ॥

[पा०] १ क. ख. मनुत्तमां. २ ग. शैलशृङ्गनिपातैश्चमुष्टिभिश्चतलेनच. ३ ग. ङ. च. ज.—ट. च्छोणितोक्षिता. ४ ङ. ञ. ट. भग्नशैलैश्च. च. ट. भग्नशैलाश्चवानराः. घ. भग्नशूलाश्चराक्षसाः. ५ ङ. ञ. शैलशृङ्गैश्चबिभिदुश्च. क. ख. ञ. शैलशूलास्त्रैश्चिच्छिदुश्च. ६ क. ख. ग. ङ. ज. ट. प्रगृहीतमहाशिलाः. ७ ङ. ज. ञ. ट. बिभिदुः. ८ ङ. ज. ञ. ञ. विकीर्णाः पर्वतास्तैश्चद्रुमच्छिन्नैश्च. ९ ग. युधिराक्षसैस्तैः.

तस्मिन्प्रवृत्ते तुमुले विमर्दे प्रहृष्यमाणेषु वलीमुखेषु ॥
निपात्यमानेषु च राक्षसेषु महर्षयो देवगणाश्च नेदुः ॥ ६८ ॥
ततो हयं मारुततुल्यवेगमारुह्य शक्तिं निशितां प्रगृह्य ॥
नरान्तको वानरराजसैन्यं महार्णवं मीन इवाविवेश ॥ ६९ ॥
स वानरान्सप्त शतानि वीरः प्रासेन दीप्तेन विनिर्बिभेद ॥
एकक्षणेनेन्द्ररिपुर्महात्मा जघान सैन्यं हरिपुङ्गवानाम् ॥ ७० ॥
ददृशुश्च महात्मानं हयपृष्ठे प्रतिष्ठितम् ॥ चरन्तं हरिसैन्येषु विद्याधरमहर्षयः ॥ ७१ ॥
स तस्य ददृशे मार्गो मांसशोणितकर्दमः ॥ पतितैः पर्वताकारैर्वानरैरभिसंवृतः ॥ ७२ ॥
यावद्विक्रमितुं बुद्धिं चक्रुः प्लवगपुङ्गवाः ॥ तावदेतानतिक्रम्य निर्बिभेद नरान्तकः ॥ ७३ ॥
ज्वलन्तं प्रासमुद्यम्य संग्रामाग्रे नरान्तकः ॥ ददाह हरिसैन्यानि वनानीव विभावसुः ॥ ७४ ॥
यावदुत्पाटयामासुर्वृक्षाञ्शैलान्वनौकसः ॥ तावत्प्रासहताः पेतुर्वज्रकृत्ता इवाचलाः ॥ ७५ ॥
दिक्षु सर्वासु बलवान्विचचार नरान्तकः ॥ प्रमृद्नन्सर्वतो युद्धे प्रावृट्काले यथाऽनिलः ॥ ७६ ॥
न शेकुर्धावितुं वीरा न स्थातुं स्पन्दितुं भयात् ॥ उत्पतन्तं स्थितं यान्तं सर्वान्विव्याध वीर्यवान् ॥७७॥
एकेनान्तककल्पेन प्रासेनादित्यतेजसा ॥ भिन्नानि हरिसैन्यानि निपेतुर्धरणीतले ॥ ७८ ॥
वज्रनिष्पेषसदृशं प्रासस्याभिनिपातनम् ॥ न शेकुर्वानराः सोढुं ते विनेदुर्महास्वनम् ॥ ७९ ॥
पततां हरिवीराणां रूपाणि प्रचकाशिरे ॥ वज्राभिन्नाग्रकूटानां शैलानां पततामिव ॥ ८० ॥
ये तु पूर्वं महात्मानः कुम्भकर्णेन पातिताः ॥ ते स्वस्था वानरश्रेष्ठाः सुग्रीवमुपतस्थिरे ॥ ८१ ॥
विप्रेक्षमाणः सुग्रीवो ददर्श हरिवाहिनीम् ॥ नरान्तकभयत्रस्तां विद्रवन्तीमितस्ततः ॥ ८२ ॥
विद्रुतां वाहिनीं दृष्ट्वा स ददर्श नरान्तकम् ॥ गृहीतप्रासमायान्तं हयपृष्ठे प्रतिष्ठितम् ॥ ८३ ॥
अथोवाच महातेजाः सुग्रीवो वानराधिपः ॥ कुमारमङ्गदं वीरं शक्रतुल्यपराक्रमम् ॥ ८४ ॥
गच्छ त्वं राक्षसं वीरो योसौ तुरगमास्थितः ॥ क्षोभयन्तं हरिबलं क्षिप्रं प्राणैर्वियोजय ॥ ८५ ॥
स भर्तुर्वचनं श्रुत्वा निष्पपाताङ्गदस्ततः ॥ अनीकान्मेघसंकाशान्मेघानीकादिवांशुमान् ॥ ८६ ॥
शैलसंघातसंकाशो हरीणामुत्तमोऽङ्गदः ॥ रराजाङ्गदसन्नद्धः सधातुरिव पर्वतः ॥ ८७ ॥
निरायुधो महातेजाः केवलं नखदंष्ट्रवान् ॥ नरान्तकमभिक्रम्य वालिपुत्रोऽब्रवीद्वचः ॥ ८८ ॥
तिष्ठ किं प्राकृतैरेभिर्हरिभिस्त्वं करिष्यसि ॥ अस्मिन्वज्रसमस्पर्शं प्रासं क्षिप ममोरसि ॥ ८९ ॥

चेष्टन्त इति गर्वितहृष्टचेष्टाः । नानायुधाः गृहीतराक्षसायुधा इत्यर्थः ॥ ६७ ॥ विमर्दे युद्धे ॥ ६८–६९ ॥ जघानेति । इत्थमिति शेषः ॥ ७०–७३ ॥ ज्वलन्तं ज्वलन्तमिव स्थितं । विभावसुः वह्निः ॥ ७४–७५ ॥ प्रमृद्नन् मर्दयन् ॥ ७६ ॥ न शेकुरिति । यतो हेतोरुत्पतन्तं स्थितं यान्तं च विव्याध अतः स्पन्दनादौ न शेकुरित्यर्थः ॥ ७७–८० ॥ कुम्भकर्णेन पातितानां नीलादीनामुत्तरत्र पौरुषकथनसांगत्यायैषां लब्धसंज्ञत्वमाह—ये त्विति ॥ ८१—८५ ॥ मेघसंकाशादिति निबिडत्वलक्षणसमानधर्मप्रयुक्तेयमुपमा । मेघानीकादित्यत्र तु निष्क्रमणापादानत्वधर्मप्रयुक्तेत्युपमाद्वयस्य निर्वाहः ॥ ८६ ॥ संघातः निबिडसंवेशः ।

ती० तस्यमार्गः तेनयुद्धार्थंगतोमार्गइत्यर्थः । पतितैर्वानरैरभिसंवृतःसन् । मांसशोणितकर्दमःसन् ददृशइतिसंबन्धः ॥ ७२ ॥
स० नखदंष्ट्रं प्राण्यङ्गत्वादेकवद्भावः । तद्वान् ॥ ८८ ॥

[पा०] १ ङ. झ. ट. भाषितुं. ख. च. ञ. द्रवितुं. २ ङ. च. झ. ञ. ट. भग्नानि. ३ क.—ट. दृष्ट्वोवाच. ४ घ. ङ. झ. ञ. ट. गच्छैनं. ५ क. ख. घ. वालिपुत्रोऽङ्गदोब्रवीत्. ६ क. ख. च. ञ. ट. तिष्ठत्वं. ७ क. ख. च. ञ. ट. हरिभिःकिं.

अङ्गदस्य वचः श्रुत्वा प्रचुक्रोध नरान्तकः ॥ संदश्य दशनैरोष्ठं विनिश्वस्य भुजङ्गवत् ॥ ९० ॥
अभिगम्याङ्गदं क्रुद्धो वालिपुत्रं नरान्तकः ॥ ९१ ॥

प्रासं समाविध्य तदाऽङ्गदाय समुज्वलन्तं सहसोत्ससर्ज ॥
स वालिपुत्रोरसि वज्रकल्पे बभूव भग्नो न्यपतच्च भूमौ ॥ ९२ ॥
तं प्रासमालोक्य तदा विभग्नं सुपर्णकृत्तोरगभोगकल्पम् ॥
तलं समुद्यम्य स वालिपुत्रस्तुरङ्गमं तस्य जघान मूर्ध्नि ॥ ९३ ॥
निमग्नतालुः स्फुटिताक्षितारो निष्क्रान्तजिह्वोचलसन्निकाशः ॥
स तस्य वाजी निपपात भूमौ तलप्रहारेण विशीर्णमूर्धा ॥ ९४ ॥
नरान्तकः क्रोधवशं जगाम हतं तुरङ्गं पतितं निरीक्ष्य ॥
स मुष्टिमुद्यम्य महाप्रभावो जघान शीर्षे युधि वालिपुत्रम् ॥ ९५ ॥
अथाङ्गदो मुष्टिविभिन्नमूर्धा सुस्राव तीव्रं रुधिरं भृशोष्णम् ॥
मुहुर्विजज्वाल मुमोह चापि संज्ञां समासाद्य विसिष्मिये च ॥ ९६ ॥
अथाङ्गदो वज्रसमानवेगं संवर्त्य मुष्टिं गिरिशृङ्गकल्पम् ॥
निपातयामास तदा महात्मा नरान्तकस्योरसि वालिपुत्रः ॥ ९७ ॥
स मुष्टिनिष्पिष्टविभिन्नवक्षा ज्वालावमच्छोणितदिग्धगात्रः ॥
नरान्तको भूमितले पपात यथाऽचलो वज्रनिपातभग्नः ॥ ९८ ॥
अथान्तरिक्षे त्रिदशोत्तमानां वनौकसां चैव महाप्रणादः ॥
बभूव तस्मिन्निहतेऽप्यवीरे नरान्तके वालिसुतेन सङ्ख्ये ॥ ९९ ॥
अथाङ्गदो राममनःप्रहर्षणं सुदुष्करं तत्कृतवान्हि विक्रमम् ॥
विसिष्मिये सोऽपि च तीव्रविक्रमः पुनश्च युद्धे स बभूव हर्षितः ॥ १०० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥

अङ्गदसन्नद्धः सन्नद्धाङ्गदः ॥ ८७–९० ॥ अभिगम्येति । अयमुत्तरशेषः ॥ ९१—९७ ॥ ज्वालारूपेण वमता उद्गच्छता शोणितेन दिग्धगात्रः ॥ ९८–९९ ॥ तत्कृतवानित्यत्र तदित्यव्ययं पदं । तस्मादित्यर्थः । अङ्गदः हि यस्मात् । सुदुष्करं अतएव राममनःप्रहर्षणं विक्रमं कृतवान् । तस्मादित्यर्थः । विसिष्मिये । सोपीत्यत्र तच्छब्देन राममनःप्रहर्षणमित्यत्र गुणीभूतो रामशब्दः परामृश्यते । हर्षितः विस्मितेन रामेण श्लाघया तोषितः । स च अङ्गदश्च पुनः युद्धे बभूव । युद्धविषये सन्नद्धो बभूवेत्यर्थः ॥ १०० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनसप्ततितमः सर्गः ॥ ६९ ॥

कतक० अत्रसर्गविच्छेदोबहुषुपुस्तकेषुनदृश्यतइत्यस्माभिरपिनकृतः । पूर्वोत्तरवाक्ययोरेककर्तृकयुद्धवर्णनात् ॥ १०० ॥ इत्येकोनसप्ततितमःसर्गः ॥ ६९ ॥

[पा०] १ ङ. झ. वीर्यकल्पं. २ ङ. झ. ट. मुष्टिविशीर्णमूर्धा. ३ ङ. झ. ट. मृत्युसमान. ४ ङ.—झ. निर्भिन्ननिर्मग्नवक्षाः. ५ क. ख. ग. त्रिहतेऽतिवीर्ये. ६ क. ख. ग. ङ. झ. ञ. ट. तंकृतवान्हि. ७ ङ. च. झ. ञ. ट. सोप्यथ भौमकर्मा.

सप्ततितमः सर्गः ॥ ७० ॥

हनुमन्नीलाभ्यांक्रमेणदेवान्तकयुद्धोन्मत्तयोर्वधः ॥ १ ॥ त्रिशिरसामुष्ट्यभिहतेनहनुमतातदीयखड्गाक्षेपेणतच्छिरश्छेदनकर्तनम् ॥ २ ॥ ऋषभनाम्नावानरवरेणमत्तनाम्नोराक्षसस्यवधः ॥ ३ ॥

नरान्तकं हतं दृष्ट्वा चुक्रुशुर्नैर्ऋतर्षभाः ॥ देवान्तकस्त्रिमूर्धा च पौलस्त्यश्च महोदरः ॥ १ ॥
आरूढो मेघसंकाशं वारणेन्द्रं महोदरः ॥ वालिपुत्रं महावीर्यमभिदुद्राव वीर्यवान् ॥ २ ॥
भ्रातृव्यसनसंतप्तस्तथा देवान्तको बली ॥ आदाय परिघं दीप्तमङ्गदं समभिद्रवत् ॥ ३ ॥
रथमादित्यसंकाशं युक्तं परमवाजिभिः ॥ आस्थाय त्रिशिरा वीरो वालिपुत्रमथाभ्ययात् ॥ ४ ॥
स त्रिभिर्देवदर्पघ्नैर्नैर्ऋतेन्द्रैरभिद्रुतः ॥ वृक्षमुत्पाटयामास महाविटपमङ्गदः ॥ ५ ॥
देवान्तकाय तं वीरश्चिक्षेप सहसाऽङ्गदः ॥ महावृक्षं महाशाखं शक्रो दीप्तमिवाशनिम् ॥ ६ ॥
त्रिशिरास्तं प्रचिच्छेद शरैराशीविषोपमैः ॥ स वृक्षं कृत्तमालोक्य उत्पपात तदाऽङ्गदः ॥ ७ ॥
स ववर्ष ततो वृक्षाञ्शैलांश्च कपिकुञ्जरः ॥ तान्प्रचिच्छेद संक्रुद्धस्त्रिशिरा निशितैः शरैः ॥ ८ ॥
परिघाग्रेण तान्वृक्षान्बभञ्ज च सुरान्तकः ॥ त्रिशिराश्चाङ्गदं वीरमभिदुद्राव सायकैः ॥ ९ ॥
गजेन समभिद्रुत्य वालिपुत्रं महोदरः ॥ जघानोरसि संक्रुद्धस्तोमरैर्वज्रसन्निभैः ॥ १० ॥
देवान्तकश्च संक्रुद्धः परिघेण तदाऽङ्गदम् ॥ उपगम्याभिहत्याशु व्यपचक्राम वेगवान् ॥ ११ ॥
स त्रिभिर्नैर्ऋतश्रेष्ठैर्युगपत्समभिद्रुतः ॥ न विव्यथे महातेजा वालिपुत्रः प्रतापवान् ॥ १२ ॥
स वेगवान्महावेगं कृत्वा परमदुर्जयः ॥ तलेन भृशमुत्पत्य जघानास्य महागजम् ॥ १३ ॥
तस्य तेन प्रहारेण नागराजस्य संयुगे ॥ पेततुर्लोचने तस्य विननाद स वारणः ॥ १४ ॥
विषाणं चास्य निष्कृष्य वालिपुत्रो महाबलः ॥ देवान्तकमभिप्लुत्य ताडयामास संयुगे ॥ १५ ॥
स विह्वलितसर्वाङ्गो वातोद्धूत इव द्रुमः ॥ लाक्षारससवर्णं च सुस्राव रुधिरं मुखात् ॥ १६ ॥
अथाश्वास्य महातेजाः कृच्छ्राद्देवान्तको बली ॥ आविध्य परिघं घोरमाजघान तदाऽङ्गदम् ॥ १७ ॥
परिघाभिहतश्चापि वानरेन्द्रात्मजस्तदा ॥ जानुभ्यां पतितो भूमौ पुनरेवोत्पपात ह ॥ १८ ॥
तमुत्पतन्तं त्रिशिरास्त्रिभिर्बाणैरजिह्मगैः ॥ घोरैर्हरिपतेः पुत्रं ललाटेऽभिजघान ह ॥ १९ ॥
ततोऽङ्गदं परिक्षिप्तं त्रिभिर्नैर्ऋतपुङ्गवैः ॥ हनुमानपि विज्ञाय नीलश्चापि प्रतस्थतुः ॥ २० ॥
ततश्चिक्षेप शैलाग्रं नीलस्त्रिशिरसे तदा ॥ तद्रावणसुतो धीमान्बिभेद निशितैः शरैः ॥ २१ ॥
तद्बाणशतनिर्भिन्नं विदारितशिलातलम् ॥ सविस्फुलिङ्गं सज्वालं निपपात गिरेः शिरः ॥ २२ ॥
ततो जृम्भितमालोक्य हर्षाद्देवान्तकस्तदा ॥ परिघेणाभिदुद्राव मारुतात्मजमाहवे ॥ २३ ॥

पौलस्त्य इति त्रिमूर्धविशेषणं । न तु महोदरस्य । देवान्तकादयस्त्रयश्चुक्रुशुरिति संबन्धः ॥ १—२ ॥ समभिद्रवत् समभ्यद्रवत् ॥ ३–१० ॥ व्यपचक्राम पश्चादाजगाम ॥११—१२॥ अस्य महोदरस्य ॥१३॥ तस्य अङ्गदस्य । तस्य नागराजस्येति द्वितीयतच्छब्दान्वयः ॥ १४ ॥ महाबलः वालिपुत्रः अस्य महोदरवाहनस्य गजस्य विषाणं निष्कृष्य अभिप्लुत्य वेगेन सन्निपत्य । देवान्तकं ताडयामासेति संबन्धः ॥ १५–२२ ॥ जृम्भितं भग्नमिति यावत् । जृम्भितं तद्ब-

---

[पा०] १ ङ. ज.—ट. समभिद्रुत्य. २ क. ख. ङ. झ. ट. मभिद्रुत्य. ३ ङ. झ. ञ. ट. गहत्. ४ क. च.—ट. वेगादाजघान. ५ ङ. च. झ. ञ. ट. सविजृंभित. ६ क.—च. झ. ञ. ट. देवान्तकोबली.

तमापतन्तमुत्प्लुत्य हनुमान्मारुतात्मजः ॥ आजघान तदा मूर्ध्नि वज्रकल्पेन मुष्टिना ॥ २४ ॥
शिरसि प्रहरन्वीरस्तदा वायुसुतो बली ॥ नादेनाकम्पयच्चैव राक्षसान्स महाकपिः ॥ २५ ॥
स मुष्टिनिष्पिष्टविकीर्णमूर्धा निर्वान्तदन्ताक्षिविलम्बिजिह्वः ॥
देवान्तको राक्षसराजसूनुर्गतासुरुर्व्यां सहसा पपात ॥ २६ ॥
तस्मिन्हते राक्षसयोधमुख्ये महाबले संयति देवशत्रौ ॥
क्रुद्धस्त्रिमूर्धा निशिताग्रमुग्रं ववर्ष नीलोरसि बाणवर्षम् ॥ २७ ॥
महोदरस्तु संक्रुद्धः कुञ्जरं पर्वतोपमम् ॥ भूयः समधिरुह्याशु मन्दरं रश्मिवानिव ॥ २८ ॥
ततो बाणमयं वर्ष नीलस्योरस्यपातयत् ॥ गिरौ वर्ष तडिच्चक्रचापवानिव तोयदः ॥ २९ ॥
ततः शरौघैरभिवर्ष्यमाणो विभिन्नगात्रः कपिसैन्यपालः ॥
नीलो बभूवाथ निसृष्टगात्रो विष्टम्भितस्तेन महाबलेन ॥ ३० ॥
ततस्तु नीलः प्रतिलभ्य संज्ञां शैलं समुत्पाट्य सवृक्षषण्डम् ॥
ततः समुत्पत्य भृशोग्रवेगो महोदरं तेन जघान मूर्ध्नि ॥ ३१ ॥
ततः स शैलेन्द्रनिपातभग्नो महोदरस्तेन महाद्विपेन ॥
विपोथितो भूमितले गतासुः पपात वज्राभिहतो यथाऽद्रिः ॥ ३२ ॥
पितृव्यं निहतं दृष्ट्वा त्रिशिराश्चापमाददे ॥ हनुमन्तं च संक्रुद्धो विव्याध निशितैः शरैः ॥ ३३ ॥
स वायुसूनुः कुपितश्चिक्षेप शिखरं गिरेः ॥ त्रिशिरास्तच्छरैस्तीक्ष्णैर्बिभेद बहुधा बली ॥ ३४ ॥
तच्छ्यर्थं शिखरं दृष्ट्वा द्रुमवर्षं महाकपिः ॥ विससर्ज रणे तस्मिन्रावणस्य सुतं प्रति ॥ ३५ ॥
तमापतन्तमाकाशे द्रुमवर्षं प्रतापवान् ॥ त्रिशिरा निशितैर्बाणैश्चिच्छेद च ननाद च ॥ ३६ ॥
ततो हनूमानुत्प्लुत्य हयांस्त्रिशिरसस्तदा ॥ विददार नखैः क्रुद्धो गजेन्द्रं मृगराडिव ॥ ३७ ॥
अथ शक्तिं समादाय कालरात्रिमिवान्तकः ॥ चिक्षेपानिलपुत्राय त्रिशिरा रावणात्मजः ॥ ३८ ॥
दिवः क्षिप्तामिवोल्कां तां शक्तिं क्षिप्तामसंगताम् ॥ गृहीत्वा हरिशार्दूलो बभञ्ज च ननाद च ॥ ३९ ॥
तां दृष्ट्वा घोरसंकाशां शक्तिं भग्नां हनूमता ॥ प्रहृष्टा वानरगणा विनेदुर्जलदा इव ॥ ४० ॥
ततः खड्गं समुद्यम्य त्रिशिरा राक्षसोत्तमः ॥ निजघान तदा व्यूढे वायुपुत्रस्य वक्षसि ॥ ४१ ॥
खड्गप्रहाराभिहतो हनूमान्मारुतात्मजः ॥ आजघान त्रिशिरसं तलेनोरसि वीर्यवान् ॥ ४२ ॥
स तलाभिहतस्तेन स्रस्तहस्तायुधो भुवि ॥ निपपात महातेजास्त्रिशिरास्त्यक्तचेतनः ॥ ४३ ॥
स तस्य पततः खड्गं समाच्छिद्य महाकपिः ॥ ननाद गिरिसंकाशस्त्रासयन्सर्वनैर्ऋतान् ॥ ४४ ॥

नुर्दष्ट्वेत्यादिवत् ॥ २३—२९ ॥ निसृष्टगात्रः शिथिलगात्रः । विष्टम्भितः स्तब्धीकृतः । एतन्निसृष्टत्वे हेतुः ॥ ३०—३१ ॥ विपोथितः हिंसितः ॥ ३२—३९ ॥ घोरसंकाशां भयंकरप्रकाशां ॥ ४० ॥ व्यूढे विशाले ॥ ४१—४२ ॥ त्यक्तचेतनः मूर्च्छित

ती० निर्वान्तदन्ताक्षिविलंबिजिह्वः दन्ताक्षीणिचविलंबिजिह्वाचतथा । निर्वान्ताः बहिर्निर्गताःदन्तादयोयस्येतितथा ॥ २६ ॥ ति० भूयःसमधिरुह्येति । युद्धागमनवेलायामारूढगजस्याङ्गदेनहतत्वादितिभावः ॥ २८ ॥ ति० तटिच्चक्रंचापमिन्द्रधनुश्चयस्यास्तिसः ॥ स० तटितांविद्युतांचक्रंसमूहोयस्मिंस्तत् ॥ २९ ॥ ती० असंगतां अनिवारितां ॥ स० असंगतां खसमीपमप्राप्तां

[पा०] १ ङ. ञ. ठ. तडिच्चक्रंसगर्जन्निवतोयदः. २ घ.—ञ. शैलाभिनिपात. ३ ङ. च. झ. ञ. ट. तदाकपिः. ४ ङ. च. झ. ञ. ट. समासाद्य. ५ घ. ङ. झ. निचखानतदाखड्गंवानरेन्द्रस्यवक्षसि. ख. च. ञ. ट. निजघानचखड्गेन. ग. निजघानतदावेगाद्वानरेन्द्रस्य. ६ क.—ङ. ज.—ट. स्रस्तहस्तांबरो.

अमृष्यमाणस्तं घोषमुत्पपात निशाचरः ॥ उत्पत्य च हनूमन्तं ताडयामास मुष्टिना ॥ ४५ ॥
तेन मुष्टिप्रहारेण संचुकोप महाकपिः ॥ कुपितश्च निजग्राह किरीटे राक्षसर्षभम् ॥
[हनुमान्रोषताम्राक्षो राक्षसं परवीरहा] ॥ ४६ ॥

स तस्य शीर्षाण्यसिना शितेन किरीटजुष्टानि सकुण्डलानि ॥
क्रुद्धः प्रचिच्छेद सुतोऽनिलस्य त्वष्टुः सुतस्येव शिरांसि शक्रः ॥ ४७ ॥
तान्यायताक्षाण्यगसन्निभानि प्रदीप्तवैश्वानरलोचनानि ॥
पेतुः शिरांसीन्द्ररिपोर्धरण्यां ज्योतींषि मुक्तानि यथाऽर्कमार्गात् ॥ ४८ ॥
तस्मिन्हते देवरिपौ त्रिशीर्षे हनूमता शक्रपराक्रमेण ॥
नेदुः प्लवङ्गाः प्रचचाल भूमी रक्षांस्यथो दुद्रुविरे समन्तात् ॥ ४९ ॥

हतं त्रिशिरसं दृष्ट्वा तथैव च महोदरम् ॥ हतौ प्रेक्ष्य दुराधर्षौ देवान्तकनरान्तकौ ॥ ५० ॥
चुकोप परमामर्षी मत्तो राक्षसपुङ्गवः ॥ जग्राहार्चिष्मतीं घोरां गदां सर्वायसीं शुभाम् ॥ ५१ ॥
हेमपट्टपरिक्षिप्तां मांसशोणितफेनिलाम् ॥ विराजमानां वपुषा शत्रुशोणितरञ्जिताम् ॥ ५२ ॥
तेजसा संप्रदीप्ताग्रां रक्तमाल्यविभूषिताम् ॥ ऐरावतमहापद्मसार्वभौमभयावहाम् ॥ ५३ ॥
गदामादाय संक्रुद्धो मत्तो राक्षसपुङ्गवः ॥ हरीन्समभिदुद्राव युगान्ताग्निरिव ज्वलन् ॥ ५४ ॥
अथर्षभः समुत्पत्य वानरो रावणानुजम् ॥ मत्तानीकमुपागम्य तस्थौ तस्याग्रतो बली ॥ ५५ ॥
तं पुरस्तात्स्थितं दृष्ट्वा वानरं पर्वतोपमम् ॥ आजघानोरसि क्रुद्धो गदया वज्रकल्पया ॥ ५६ ॥
स तयाऽभिहतस्तेन गदया वानरर्षभः ॥ भिन्नवक्षाः समाधूतः सुस्राव रुधिरं बहु ॥ ५७ ॥
स संप्राप्य चिरात्संज्ञामृषभो वानरर्षभः ॥ [क्रुद्धो विस्फुरमाणोष्ठो महापार्श्वमुदैक्षत ॥ ५८ ॥

स वेगवान्वेगवदभ्युपेत्य तं राक्षसं वानरवीरमुख्यः ॥
संवर्त्य मुष्टिं सहसा जघान बाह्वन्तरे शैलनिकाशरूपः ॥ ५९ ॥
स कृत्तमूलः सहसेव वृक्षः क्षितौ पपात क्षतजोक्षिताङ्गः ॥
तां चास्य घोरां यमदण्डकल्पां गदां प्रगृह्याशु तदा ननाद ॥ ६० ॥

इत्यर्थः ॥४३—४६॥ त्वष्टुः सुतः विश्वरूपः । "विश्वरूपो वै त्वाष्ट्रः पुरोहितः" इत्यादि श्रुतिप्रसिद्धः ॥ ४७ ॥ मुक्तानि अनुभूतपुण्यफलानि । अर्कमार्गात् आकाशात् ॥ ४८—४९ ॥ हतं त्रिशिरसमित्यादि चतुश्श्लोक्येकान्वया । मत्तः महापार्श्वः । मत्त इति महापार्श्वस्य नामान्तरं । मांसशोणितफेनिलामिति युद्धकालिकरूपं । शत्रुशोणितरञ्जितामिति पूर्वकालिकरूपं । महापद्मः पुण्डरीकाह्वयदिग्गजः ॥ ५०—५४ ॥ मत्तानीकं मत्तानीक इति च महापार्श्वस्य नामान्तरं ॥ ५५—५६ ॥ समाधूतः कम्पितः

॥ ३९ ॥ शि० भूमिश्चचाल हर्षेणचकंपे ॥ ४९ ॥ ति० युद्धोन्मत्तंमहोदरं तथैवच हतमितिशेषः । एतद्बोधनूमताकृतइत्यनुवादबलाद्दृष्टव्यं ॥ ५० ॥ इतिसप्ततितमःसर्गः ॥ ७० ॥

[पा०] १ इदमर्धं. क.—घ. च. पाठेषुदृश्यते. २ ङ. झ. दृष्ट्वायुद्धोन्मत्तंतथैवच. क. ग. च. छ. ज. ञ. ट. दृष्ट्वामहोदरमथापिच. घ. महापार्श्वंतथैवच. ३ क. ग. च. ज. ञ. ट. महापार्श्वोनिशाचरः. ४ क. च. छ. ज. ञ. ट. शोणितलेपनां. घ. शोणितलेपितां. ५ ग. घ. ङ. ज. झ. ट. विपुलां. ६ क. घ. ङ. च. झ. ट. शोणिततर्पितां. ख. शोणितरूषितां. ज. पक्षभयंकरां. ७ क. च. ज. ञ. ट. महापार्श्वोनिशाचरः. ८ क. ख. च. ञ. ट. वरुणात्मजः. ९ क. च. ज. ञ. महापार्श्वमुपा. १० झ. वानरेश्वरः. ११ क्रुद्धोविस्फुरमाणोष्ठइत्यादयःधात्वंभइवाद्रिराजइत्यन्ताःश्लोकाः क. ख. ङ. च. झ. ञ. ट. पाठेषु अधिकादृश्यन्ते.

मुहूर्तमासीत्स गतासुकल्पः प्रत्यागतात्मा सहसा सुरारिः ।
उत्पत्य संध्याभ्रसमानवर्णस्तं वारिराजात्मजमाजघान ॥ ६१ ॥
स मूर्च्छितो भूमितले पपात मुहूर्तमुत्पत्य पुनः ससंज्ञः ।
तामेव तस्याद्रिवराद्रिकल्पां गदां समाविध्य जघान संख्ये ॥ ६२ ॥
सा तस्य रौद्रा समुपेत्य देहं रौद्रस्य देवाध्वरविप्रशत्रोः ॥
बिभेद वक्षः क्षतजं च भूरि सुस्राव धात्वंभ इवाद्रिराजः] ॥ ६३ ॥
[1]अभिदुद्राव वेगेन गदां तस्य महात्मनः ॥ ६४ ॥
गृहीत्वा तां गदां भीमामाविध्य च पुनः पुनः ॥ [2]मत्तानीकं महात्मानं जघान रणमूर्धनि ॥६५॥
स स्वया गदया भग्नो विशीर्णदशनेक्षणः ॥ निपपात ततो मत्तो वज्राहत इवाचलः ॥ ६६ ॥
विशीर्णन[3]यने भूमौ गतसत्त्वे गतायुषि ॥ पतिते राक्षसे तस्मिन्विद्रुतं राक्षसं बलम् ॥ ६७ ॥
[[4]उन्मत्तस्तु तदा दृष्ट्वा गतासुं भ्रातरं रणे ॥ चुकोप परमक्रुद्धः प्रलयाग्निसमद्युतिः ॥ ६८ ॥
ततः समादाय गदां स वीरो वित्रासयन्वानरसैन्यमुग्रम् ॥
दुद्राव वेगेन तु सैन्यमध्ये दहन्यथा वह्निरतिप्रचण्डः ॥ ६९ ॥
आपतन्तं तदा दृष्ट्वा राक्षसं भीमविक्रमम् ॥ शैलमादाय दुद्राव गवाक्षः पर्वतोपमः ॥ ७० ॥
जिघांसू राक्षसं भीमं तं शैलेन महाबलः ॥ आपतन्तं तदा दृष्ट्वा उन्मत्तोपि महागिरिम् ॥ ७१ ॥
चिच्छेद गदया वीरः शतधा तत्र संयुगे ॥ चूर्णीकृतं गिरिं दृष्ट्वा रक्षसा कपिकुञ्जरः ॥ ७२ ॥
विस्मितोऽभून्महाबाहुर्जगर्ज च मुहुर्मुहुः ॥ उन्मत्तस्तु सुसंक्रुद्धो ज्वलन्तीं राक्षसोत्तमः ॥ ७३ ॥
गदामादाय वेगेन कपेर्वक्षस्यताडयत् ॥ स तया गदया वीरस्ताडितः कपिकुञ्जरः ॥ ७४ ॥
पपात भूमौ निस्संज्ञः सुस्राव रुधिरं बहु ॥ पुनः संज्ञामथास्थाय वानरः स समुत्थितः ॥ ७५ ॥
तलेन ताडयामास ततस्तस्य शिरः कपिः ॥ तेन प्रताडितो वीरो राक्षसः पर्वतोपमः ॥ ७६ ॥
विस्रस्तदन्तनयनो निपपात महीतले ॥ सुस्राव रुधिरं सोष्णं गतासुश्च ततोऽभवत्] ॥ ७७ ॥
तस्मिन्हते भ्रातरि रावणस्य तन्नैर्[5]कृतानां बलमर्णवाभम् ॥
त्यक्तायुधं केवलजीवितार्थं दुद्राव भिन्नार्णवसन्निकाशम् ॥ ७८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

॥५७—६३॥ गदामभिदुद्राव गदां ग्रहीतुं दुद्रावेत्यर्थः ॥ ६४—७७ ॥ केवलजीवितार्थं यशोरहितजीवनार्थं । भिन्नार्णवसन्निकाशमिति क्रियाविशेषणं ॥७८॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्ततितमः सर्गः ॥ ७० ॥

[पा०] १ ञ. सोभिदुद्राव. क. अभिजग्राह. २ च. ज. ञ. महापार्श्वमहानादौ. ङ. झ. ट. मत्तानीकंमहात्मास. ३ क. ङ. झ. ट. विशीर्णनयनोभूमौगतसत्त्वोगतायुषः. ४ उन्मत्तस्त्वित्यादयः गतासुश्चततोऽभवत्. इत्यन्ताःश्लोकाःक.—ट. पाठेषुन दृश्यन्ते. औत्तराहपाठएवोपलभ्यन्ते. ५ ग. केवलजीविताशं.

एकसप्ततितमः सर्गः ॥ ७१ ॥

भ्रातृनिधनरुष्टे अतिकायेसेनामध्यप्रविष्टे तस्मिन्कुंभकर्णत्वभ्रमेण वानरेषुभयाद्विद्रवमाणेषु रामेण तद्रथायुधादिवर्णन-पूर्वकंविभीषणंप्रति तत्स्वरूपप्रश्नः ॥ १ ॥ विभीषणेनरामंप्रति विस्तरेणतत्पराक्रमादिनिवेदनम् ॥ २ ॥ अतिकायेनरामंप्रति गर्वोक्त्यायुद्धप्रार्थने लक्ष्मणेन तत्प्रतिरोधनम् ॥ ३ ॥ ततस्तयोर्वीरवादपुरस्सरंसमारंभः ॥ ४ ॥ लक्ष्मणेनास्त्रप्रत्यस्त्रप्रयोग-पूर्वकं निशिततरशरगणप्रयोगेपि ब्रह्मवरादभेद्यकवचएवसत्यतिकाये अन्तरिक्षेऽन्तर्हितवायुवचनाद्ब्रह्मास्त्रेण तच्छिरश्छे-दनम् ॥ ५ ॥

स्वबलं व्यथितं दृष्ट्वा तुमुलं रोमहर्षणम् ॥ भ्रातृंश्च निहतान्दृष्ट्वा शक्रतुल्यपराक्रमान् ॥ १ ॥
पितृव्यौ चापि संदृश्य समरे सन्निषूदितौ ॥ युद्धोन्मत्तं च मत्तं च भ्रातरौ राक्षसर्षभौ ॥ २ ॥
चुकोप च महातेजा ब्रह्मदत्तवरो युधि ॥ अतिकायोद्रिसंकाशो देवदानवदर्पहा ॥ ३ ॥
स भास्करसहस्रस्य संघातमिव भास्वरम् ॥ रथमास्थाय शक्रारिरभिदुद्राव वानरान् ॥ ४ ॥
स विस्फार्य महच्चापं किरीटी मृष्टकुण्डलः ॥ नाम विश्रावयामास ननाद च महास्वनम् ॥ ५ ॥
तेन सिंहप्रणादेन नामविश्रावणेन च ॥ ज्याशब्देन च भीमेन त्रासयामास वानरान् ॥ ६ ॥
ते दृष्ट्वा देहमाहात्म्यं कुम्भकर्णोऽयमुत्थितः ॥ भयार्ता वानराः सर्वे संश्रयन्ते परस्परम् ॥ ७ ॥
ते तस्य रूपमालोक्य यथा विष्णोस्त्रिविक्रमे ॥ भयाद्वानरयूथास्ते विद्रवन्ति ततस्ततः ॥ ८ ॥
तेऽतिकायं समासाद्य वानरा मूढचेतसः ॥ शरण्यं शरणं जग्मुर्लक्ष्मणाग्रजमाहवे ॥ ९ ॥
ततोतिकायं काकुत्स्थो रथस्थं पर्वतोपमम् ॥ ददर्श धन्विनं दूराद्गर्जन्तं कालमेघवत् ॥ १० ॥
स तं दृष्ट्वा महात्मानं राघवस्तु विसिष्मिये ॥ वानरान्सान्त्वयित्वाऽथ विभीषणमुवाच ह ॥ ११ ॥
कोसौ पर्वतसंकाशो धनुष्मान्हरिलोचनः ॥ युक्ते हयसहस्रेण विशाले स्यन्दने स्थितः ॥ १२ ॥
य एष निशितैः शूलैः सुतीक्ष्णैः प्रासतोमरैः ॥ अर्चिष्मद्भिर्वृतो भाति भूतैरिव महेश्वरः ॥ १३ ॥
कालजिह्वाप्रकाशाभिर्य एषोतिविराजते ॥ आवृतो रथशक्तीभिर्विद्युद्भिरिव तोयदः ॥ १४ ॥
धनूंषि चास्य सज्यानि हेमपृष्ठानि सर्वशः ॥ शोभयन्ति रथश्रेष्ठं शक्रचाप इवाम्बरम् ॥ १५ ॥

स्वबलमित्यादि । भ्रातरौ अन्योन्यं भ्रातरौ ॥१–४॥ मृष्टकुण्डलः शुद्धकुण्डलः ॥ ५–६ ॥ माहात्म्यं महत्त्वं । उत्थित इत्यनन्तरमितिकरणं द्रष्टव्यं ॥७–११॥ हरिलोचनः सिंहदृष्टिः ॥ १२–१३ ॥ रथशक्तीभिः

ति० भ्रातरौ अन्योन्यंभ्रातरौ ॥ एतदुक्तिःपरस्परसौहार्दातिशयप्रदर्शनाय ॥ २ ॥ ति० परस्परंसंश्रयन्ते । रक्षणार्थमिति शेषः ॥ ७ ॥ ती० तेतस्यरूपमालोक्यतेविद्रवन्तीतितच्छब्दद्वयान्वयः ॥ ति० तेरूपमालोक्य तेइव वानराइव विद्रवन्तीतित-च्छब्दद्वयनिर्वाहः । इवेतिशेषः ॥ स० तेवानराः विद्रवन्ति व्यद्रवन् । वानरयोधास्ते वानरयोधाअस्तायस्मिंस्तस्मिन्त्रणमण्डले । अस्तं भावेक्तः । वानरयोधानामसनेसतित्रायकाभावात्ततस्ततोव्यद्रवन्निति भावः । येयेतस्यरूपमालोक्यस्थितास्तेतेसर्वेततस्ततोवि-द्रवन्तीत्यन्वयेन तेद्वयंसार्थकमितिवा । नचभिन्नार्थगतयोस्तेशब्दयोःकथमैकस्थल्यसंपादनेनवीप्सालमितिवाच्यं । ' येयजत्रायई-ज्याः ' इत्यादिवदन्वयमुखेनैकस्थल्योपपत्तेः । ' ते रूपमालोक्य तइव वानराइवविद्रवन्तीतितच्छब्दद्वयनिर्वाहः । इवेतिशेषः ' इतिनागोजिभट्टः । तेतस्यरूपमालोक्य ते विद्रवन्तीतितच्छब्दद्वयस्यनिर्वाहइतितीर्थश्च । द्वयोर्भावोबिन्दुविभावनीयः ॥ ८ ॥ स० हरिलोचनः सिंहदृष्टिर्मर्कटदृष्टिर्वा हरिष्वेवलोचनंयस्येतिवा ॥ १२ ॥ स० यः कइत्यर्थः । ' यतश्चोदेतिसूर्यः ' इत्यादिव-

[पा०] १ ङ. ञ. संनिपातितौ. २ ङ. च. ज. झ. ञ. मारुह्य. ३ घ. ङ. ञ. महाकायं. ४ क. ख. ङ. ञ. ज. ट. राघवस्तुबुविस्मितः. घ. राघवस्तस्यविस्मितः. ५ ख. घ. एषभुविराजते.



क एष रक्षःशार्दूलो रणभूमिं विराजयन् ॥ अभ्येति रथिनां श्रेष्ठो रथेनादित्यतेजासा ॥ १६ ॥
ध्वजशृङ्गप्रतिष्ठेन राहुणाभिविराजते ॥ सूर्यरश्मिनिभैर्बाणैर्दिशो दश विराजयन् ॥ १७ ॥
त्रिणतं मेघनिर्ह्रादं हेमपृष्ठमलङ्कृतम् ॥ शतक्रतुधनुःप्रख्यं धनुश्चास्य विराजते ॥ १८ ॥
सध्वजः सपताकश्च सानुकर्षो महारथः ॥ चतुःसादिसमायुक्तो मेघस्तनितनिस्वनः ॥ १९ ॥
विंशतिर्दश चाष्टौ च तूण्योस्य रथमास्थिताः ॥ कार्मुकानि च भीमानि ज्याश्च काञ्चनपिङ्गलाः ॥ २० ॥
द्वौ च खड्गौ रथगतौ पार्श्वस्थौ पार्श्वशोभितौ ॥ चतुर्हस्तत्सरुयुतौ व्यक्तहस्तदशायतौ ॥ २१ ॥
रक्तकण्ठगुणो धीरो महापर्वतसन्निभः ॥ कालः कालमहावक्त्रो मेघस्थ इव भास्करः ॥ २२ ॥
काञ्चनाङ्गदनद्धाभ्यां भुजाभ्यामेष शोभते ॥ शृङ्गाभ्यामिव तुङ्गाभ्यां हिमवान्पर्वतोत्तमः ॥ २३ ॥
कुण्डलाभ्यां तु यस्यैतद्भाति वक्त्रं शुभेक्षणम् ॥ पुनर्वस्वन्तरगतं पूर्णं बिम्बमिवेन्दवम् ॥ २४ ॥
आचक्ष्व मे महाबाहो त्वमेनं राक्षसोत्तमम् ॥ यं दृष्ट्वा वानराः सर्वे भयार्ता विद्रुता दिशः ॥२५॥
स पृष्टो राजपुत्रेण रामेणामिततेजसा ॥ आचचक्षे महातेजा राघवाय विभीषणः ॥ २६ ॥
दशग्रीवो महातेजा राजा वैश्रवणानुजः ॥ भीमकर्मा महोत्साहो रावणो राक्षसाधिपः ॥ २७ ॥
तस्यासीद्वीर्यवान्पुत्रो रावणप्रतिमो रणे ॥ वृद्धसेवी श्रुतिधरः सर्वास्त्रविदुषां वरः ॥ २८ ॥
अश्वपृष्ठे रथे नागे खड्गे धनुषि कर्षणे ॥ भेदे सान्त्वे च दाने च नये मन्त्रे च संमतः ॥ २९ ॥
यस्य बाहू समाश्रित्य लङ्का वसति निर्भया ॥ तनयं धान्यमालिन्या अतिकायमिमं विदुः ॥ ३० ॥
एतेनाराधितो ब्रह्मा तपसा भावितात्मना ॥ अस्त्राणि चाप्यवाप्तानि रिपवश्च पराजिताः ॥ ३१ ॥
सुरासुरैरवध्यत्वं दत्तमस्मै स्वयंभुवा ॥ एतच्च कवचं दिव्यं रथश्चैषोर्कभास्वरः ॥ ३२ ॥
एतेन शतशो देवा दानवाश्च पराजिताः ॥ रक्षितानि च रक्षांसि यक्षाश्चापि निषूदिताः ॥ ३३ ॥
वज्रं विष्टम्भितं येन बाणैरिन्द्रस्य धीमतः ॥ पाशः सलिलराजस्य रणे प्रतिहतस्तथा ॥ ३४ ॥
एषोतिकायो बलवान्राक्षसानामथर्षभः ॥ रावणस्य सुतो धीमान्देवदानवदर्पहा ॥ ३५ ॥
तदस्मिन्क्रियतां यत्नः क्षिप्रं पुरुषपुङ्गव ॥ पुरा वानरसैन्यानि क्षयं नयति सायकैः ॥ ३६ ॥

रथस्थितामिः शक्तिभिः ॥ १४–१६॥ ध्वजशृङ्गप्रतिष्ठेनेति ॥ अनेन राहुध्वजोयमित्युक्तं ॥ १७ ॥ त्रिणतं त्रिषुआद्यन्तयोर्मध्ये च नतं । मेघनिर्ह्रादं मेघतुल्यज्यास्वनं । हेमपृष्ठं हेमलिप्तपार्श्वमित्यर्थः । धनुः रथस्थेभ्यः अन्यत् करधृतमिदं ॥ १८ ॥ ध्वजः असाधारणकेतनं । पताका साधारणी । अनुकर्षः रथाधःस्थदारु । चतुःसादिसमायुक्तः चतुःसारथियुक्तः ॥ १९ ॥ कार्मुकाणि धनुर्भेदा इति न पौनरुक्त्यं ॥ २० ॥ पार्श्वशोभितौ पार्श्वाभ्यां शोभितौ । चतुर्हस्तत्सरुयुतौ चतुर्हस्तप्रमाणत्सरुयुक्तौ । " त्सरुः खड्गादिमुष्टौ स्यात् " इत्यमरः । व्यक्तहस्तदशायतौ व्यक्तौ च तौ हस्तदशायतौ चेति तथा ॥ २१ ॥ रक्तकण्ठगुणः रक्तकण्ठमाल्यः । कालमहावक्त्रः कालस्येव महावक्त्रं यस्य स तथोक्तः । काल इव महावक्त्र इति वा ॥ २२—२७ ॥ तस्येत्यादिश्लोकद्वयं ॥ नये युक्तौ । मन्त्रे विचारे ॥ २८–३३ ॥ वज्रमित्यादिश्लोकद्वयं ॥ विष्टम्भितं निश्चलीकृतं । राक्षसानामथर्षभ इत्यत्राथशब्दः कात्स्न्र्ये ॥ ३४—३५ ॥ पुरा नयति

द्यच्छब्दःकिमर्थे ॥ १३ ॥ स० उभाभ्यांकुण्डलाभ्यां एकैकस्मिन्कर्णेउभाभ्यां । अतोनोभाभ्यामधिकं ॥ २४ ॥ ती० अश्वरथगजस्थानांक्रमेणप्रतिनियतायुधान्याह—खड्गेधनुषिकर्षणइति । कृष्यतेऽनेनेतिकर्षणःपाशादिः । तोमरभेदोवा ॥ २९ ॥

[पा०] १ ड. च. झ. ट. खड्गौचपार्श्वस्थौप्रदीप्तौपार्श्वशोभितौ. २ क.—च. झ. ञ. ट. त्सरुचितौ. ३ ङ. झ. कुण्डलाभ्यामुभाभ्यांचभातिवक्त्रंसुभीषणं. ४ ग. च. झ. ञ. ट. गतःपरिपूर्णोनिशाकरः. क. ख. घ. ङ. गतःप्रतिपूर्णोनिशाकरः. ५ ङ. च. झ. ञ. ट. महात्माहि. ग. महेष्वासो. ६ ग.—ट. बले. ७ झ. ञ. ट. नागपृष्ठे. ८ ङ. ट. कर्मणि. ९ ङ. च. झ. ञ. ट. भवति. १० ग. ङ. झ. ञ. ट. धीमता.

ततोतिकायो बलवान्प्रविश्य हरिवाहिनीम् ॥ विस्फारयामास धनुर्ननाद च पुनः पुनः ॥ ३७ ॥
तं भीमवपुषं दृष्ट्वा रथस्थं रथिनां वरम् ॥ अभिपेतुर्महात्मानो ये प्रधाना वनौकसः ॥ ३८ ॥
कुमुदो द्विविदो मैन्दो नीलः शरभ एव च ॥ पादपैर्गिरिशृङ्गैश्च युगपत्समभिद्रवन् ॥ ३९ ॥
तेषां वृक्षांश्च शैलांश्च शरैः काञ्चनभूषणैः ॥ अतिकायो महातेजाश्चिच्छेदास्त्रविदां वरः ॥ ४० ॥
तांश्चैव सर्वान्स हरीञ्शरैः सर्वायसैर्बली ॥ विव्याधाभिमुखः सङ्ख्ये भीमकायो निशाचरः ॥ ४१ ॥
तेऽर्दिता बाणवर्षेण भग्नगात्राः प्लवङ्गमाः ॥ न शेकुरतिकायस्य प्रतिकर्तुं महारणे ॥ ४२ ॥
तत्सैन्यं हरिवीराणां त्रासयामास राक्षसः ॥ मृगयूथमिव क्रुद्धो हरिर्यौवनदर्पितः ॥ ४३ ॥

स राक्षसेन्द्रो हरिसैन्यमध्ये नायुध्यमानं निजघान कंचित् ॥
उपेत्य रामं सधनुः कलापी सगर्वितं वाक्यमिदं बभाषे ॥ ४४ ॥
रथे स्थितोऽहं शरचापपाणिर्न प्राकृतं कंचन योधयामि ॥
यश्चास्ति कश्चिद्व्यवसाययुक्तो ददातु मे क्षिप्रमिहाद्य युद्धम् ॥ ४५ ॥
तत्तस्य वाक्यं ब्रुवतो निशम्य चुकोप सौमित्रिरमित्रहन्ता ॥
अमृष्यमाणश्च समुत्पपात जग्राह चापं च ततः स्मयित्वा ॥ ४६ ॥

क्रुद्धः सौमित्रिरुत्पत्य तूणादाक्षिप्य सायकम् ॥ पुरस्तादतिकायस्य विचकर्ष महद्धनुः ॥ ४७ ॥
पूरयन्स महीं शैलानाकाशं सागरं दिशः ॥ ज्याशब्दो लक्ष्मणस्योग्रस्त्रासयन्त्रजनीचरान् ॥ ४८ ॥
सौमित्रेश्चापनिर्घोषं श्रुत्वा प्रतिभयं तदा ॥ विस्मिष्मिये महातेजा राक्षसेन्द्रात्मजो बली ॥ ४९ ॥
अथातिकायः कुपितो दृष्ट्वा लक्ष्मणमुत्थितम् ॥ आदाय निशितं बाणमिदं वचनमब्रवीत् ॥ ५० ॥
बालस्त्वमसि सौमित्रे विक्रमेष्वविचक्षणः ॥ गच्छ किं कालसदृशं मां योधयितुमिच्छसि ॥ ५१ ॥
न हि मद्बाहुसृष्टानामस्त्राणां हिमवानपि ॥ सोढुमुत्सहते वेगमन्तरिक्षमथो मही ॥ ५२ ॥
सुखप्रसुप्तं कालाग्निं निबोधयितुमिच्छसि ॥ न्यस्य चापं निवर्तस्व मा प्राणाञ्जहि मद्गतः ॥ ५३ ॥
अथ वा त्वं प्रतिष्टब्धो न निवर्तितुमिच्छसि ॥ तिष्ठ प्राणान्परित्यज्य गमिष्यसि यमक्षयम् ॥५४॥
पश्य मे निशितान्बाणानरिदर्पनिषूदनान् ॥ ईश्वरायुधसंकाशांस्तप्तकाञ्चनभूषणान् ॥ ५५ ॥
एष ते सर्पसंकाशो बाणः पास्यति शोणितम् ॥ मृगराज इव क्रुद्धो नागराजस्य शोणितम् ॥
इत्येवमुक्त्वा संक्रुद्धः शरं धनुषि संदधे ॥ ५६ ॥

नेष्यतीत्यर्थः ॥ ३६–३८ ॥ समभिद्रवन् । आगमशासनस्यानित्यत्वादडभावः ॥ ३९—४० ॥ अभिमुखः स्थित इति शेषः ॥ ४१—४२ ॥ हरिः सिंहः ॥ ४३ ॥ कलापी तूणीरवान् । "कलापो भूषणे बर्हे तूणीरे संहतावपि" इत्यमरः । सगर्वितं सगर्वं ॥ ४४ ॥ व्यवसायः उत्साहः ॥ ४५ ॥ स्मयित्वा अनादृत्य । "ष्मिङ् अनादरे" इति धातुः ॥ ४६—४७ ॥ त्रासयन् अभूदिति शेषः ॥ ४८ ॥ प्रतिभयं । "भयंकरं प्रतिभयं" इत्यमरः ॥ ४९–५२ ॥ निबोधयितुं ज्वलयितुं । मा जहि मा हिंसीः । "हन्तेर्जः" इति जादेशः । मद्गतः मां प्राप्तः ॥५३॥ प्रतिष्टब्धः प्रतिमुखं स्थितः ॥ ५४ ॥ ईश्वरायुधं

स० यौवनदर्पितइतिराक्षसविशेषणं । नमृगयूथमथनेसिंहस्यतारुण्यमपेक्षितं । स्वप्नेपिवा चित्रितस्यवासिंहस्यदर्शनमात्रेणगजादिमारकस्यकियान्मृगवधस्तस्येतित्रतस्यासंभवदन्वयलात् । "सिंहीगर्भविनिस्सृतंततुपरिक्रोधात्पतन्तंशिशुं" इत्यादिकवितापि नानुकूलानागोजिभट्टस्यास्माकमिवेतिदिक् ॥ ४३ ॥ **स०** अयुध्यमानंकंचननजघान । एतेनश्रुतधरइत्यादिनासूचितंधर्मिष्ठत्वं ध्वनितं ॥ ४४ ॥ **ति०** यस्यशक्तिरस्ति व्यवसाययुक्तश्चयः सयुद्धंददातु ॥ ४५ ॥

[**पा०**] १ क. ख. घ. ङ. ज. झ. ट. मुखान्सङ्घये. २ क. ङ.—ट. विशारदः. ३ क. ख. घ. ङ. झ. ञ. ट. यस्यास्तिशक्तिर्व्यवसाय. ४ ङ. झ. ञ. ट. महींसर्वामाकाशं.

श्रुत्वाऽतिकायस्य वचः सरोषं सगर्वितं संयति राजपुत्रः ॥
स संचुकोपातिबलो बृहच्छ्रीरुवाच वाक्यं च ततो महार्थम् ॥ ५७ ॥
न वाक्यमात्रेण भवान्प्रधानो न कत्थनात्सत्पुरुषा भवन्ति ॥
मयि स्थिते धन्विनि बाणपाणौ निदर्शय स्वात्मबलं दुरात्मन् ॥ ५८ ॥
कर्मणा सूचयात्मानं न विकत्थितुमर्हसि ॥ पौरुषेण तु यो युक्तः स तु शूर इति स्मृतः ॥ ५९ ॥
सर्वायुधसमायुक्तो धन्वी त्वं रथमास्थितः ॥ शरैर्वा यदि वाऽप्यस्त्रैर्दर्शयस्व पराक्रमम् ॥ ६० ॥
ततः शिरस्ते निशितैः पातयिष्याम्यहं शरैः ॥ मारुतः कालसंपक्वं वृन्तात्तालफलं यथा ॥ ६१ ॥
अद्य ते मामका बाणास्तप्तकाञ्चनभूषणाः ॥ पास्यन्ति रुधिरं गात्राद्बाणशल्यान्तरोत्थितम् ॥ ६२ ॥
बालोऽयमिति विज्ञाय न माऽवज्ञातुमर्हसि ॥ ६३ ॥
बालो वा यदि वा वृद्धो मृत्युं जानीहि संयुगे ॥ बालेन विष्णुना लोकास्त्रयः क्रान्तास्त्रिभिः क्रमैः ॥६४॥
लक्ष्मणस्य वचः श्रुत्वा हेतुमत्परमार्थवत् ॥ अतिकायः प्रचुक्रोध बाणं चोत्तममाददे ॥ ६५ ॥
ततो विद्याधरा भूता देवा दैत्या महर्षयः ॥ गुह्यकाश्च महात्मानस्तद्युद्धं द्रष्टुमागमन् ॥ ६६ ॥
ततोतिकायः कुपितश्चापमारोप्य सायकम् ॥ लक्ष्मणाय प्रचिक्षेप संक्षिपन्निव चाम्बरम् ॥ ६७ ॥
तमापतन्तं निशितं शरमाशीविषोपमम् ॥ अर्धचन्द्रेण चिच्छेदं लक्ष्मणः परवीरहा ॥ ६८ ॥
तं निकृत्तं शरं दृष्ट्वा कृत्तभोगमिवोरगम् ॥॥ अतिकायो भृशं क्रुद्धः पञ्च बाणान्समाददे ॥ ६९ ॥
ताञ्शरान्संप्रचिक्षेप लक्ष्मणाय निशाचरः ॥ तानप्राप्ताञ्शरैस्तीक्ष्णैश्चिच्छेद भरतानुजः ॥ ७० ॥
[पञ्चभिः पञ्च चिच्छेद पावकार्कसमप्रभैः ॥]
स ताञ्छित्त्वा शरैस्तीक्ष्णैर्लक्ष्मणः परवीरहा ॥ आददे निशितं बाणं ज्वलन्तमिव तेजसा ॥ ७१ ॥
तमादाय धनुःश्रेष्ठे योजयामास लक्ष्मणः ॥ विचकर्ष च वेगेन विससर्ज च वीर्यवान् ॥ ७२ ॥
पूर्णायतविसृष्टेन शरेण नतपर्वणा ॥ ललाटे राक्षसश्रेष्ठमाजघान स वीर्यवान् ॥ ७३ ॥
स ललाटे शरो मग्नस्तस्य भीमस्य रक्षसः ॥ ददृशे शोणितेनाक्तः पन्नगेन्द्र इवाचले ॥ ७४ ॥
राक्षसः प्रचकम्पे च लक्ष्मणेषुप्रपीडितः ॥ रुद्रबाणहतं घोरं यथा त्रिपुरगोपुरम् ॥ ७५ ॥
चिन्तयामास चाश्वास्य विमृश्य च महाबलः ॥ साधु बाणनिपातेन श्लाघनीयोसि मे रिपुः ॥७६॥

त्रिशूलं ॥ ५५—५७ ॥ कत्थनात् आत्मश्लाघनात् । सत्पुरुषाः शूरपुरुषाः ॥५८—६०॥ वृन्तात् प्रसवबन्धनात् । " वृन्तं प्रसवबन्धनं " इत्यमरः ॥ ६१ ॥ बाणशल्यान्तरोत्थितमिति । बाणशल्यान्तराणि बाणशल्यकृतान्यन्तराणि ॥ ६२—६३ ॥ मृत्युं जानीहि । मामिति शेषः ॥ ६४—६६ ॥ सायकं चापमारोप्य बाणं धनुषि संधायेत्यर्थः । संक्षिपन्निव बाणवेगेनान्तरावस्थितमाकाशं ग्रसन्निवेत्यर्थः ॥ ६७—७२ ॥ पूर्णायतेन पूर्णाकृष्टेन । विसृष्टेन क्षिप्तेन । नतपर्वणा निलीनपर्वणा । ऋजुनेति यावत् ॥ ७३ ॥ अक्तः लिप्तः ॥ ७४ ॥ त्रिपुरगोपुरं त्रिपुरद्वारं ॥ ७५ ॥ चिन्तयामासेत्यादिश्लोकद्वयमेकान्वयं ॥ विमृश्य करणीयं निर्धार्य । बाणनिपातेन मे साधु श्लाघनीयो रिपुरसीति । एवं लक्ष्मणं विधाय अभिधाय । आस्यं

स० बृहच्छ्रीः महाकान्तिः । मनस्वी प्रशस्तमनाः । द्वाभ्यामप्यभीततांद्योतयति ॥ ५७ ॥ स० शूरस्तुसएव ॥ ५९ ॥ स० रथमास्थितइत्यनेन प्रतियोद्यपेक्षयामहासाहितीसहिततांद्योतयति ॥ ६० ॥ स० कालसंयुक्तं पक्वतादशापन्नं । अन्यत्रमृत्युकालसंयुक्तं ॥ ६१ ॥ ति० बालेनेति । वामनेनेत्यर्थः ॥ ६४ ॥

[पा०] १ ङ. झ. ट. मनस्वीउवाच. २ ङ. झ. ट. बृहच्छ्रीः. क. महात्मा. ३ ङ.—ट. कालसंयुक्तं. ४ क. ग. ङ. च. झ. ञ. ट. ददृशुस्तदा. ५ इदमर्धं ख. च. छ. पाठेषुदृश्यते. ६ क. घ. ङ. झ. ञ. ट. विससर्जचसायकं. ७ ग. विश्रम्यच.

विधायैवं विनम्याशं नियम्य च भुजावुभौ ॥ स रथोपस्थमास्थाय रथे च प्रचचार ह ॥ ७७ ॥
एकं त्रीन्पञ्च सप्तेति सायकान्राक्षसर्षभः ॥ आददे संदधे चापि विचकर्षोत्ससर्ज च ॥ ७८ ॥
ते बाणाः कालसंकाशा राक्षसेन्द्रधनुश्च्युताः ॥ हेमपुङ्खा रविप्रख्याश्चकुर्दीप्तमिवाम्बरम् ॥ ७९ ॥
ततस्तान्राक्षसोत्सृष्टाञ्शरौघान्राघवानुजः ॥ असंभ्रान्तः प्रचिच्छेद निशितैर्बहुभिः शरैः ॥ ८० ॥
ताञ्शरान्युधि संप्रेक्ष्य निकृत्तान्रावणात्मजः ॥ चुकोप त्रिदशेन्द्रारिर्जग्राह निशितं शरम् ॥ ८१ ॥
स संधाय महातेजास्तं बाणं सहसोत्सृजत् ॥ ततः सौमित्रिमायान्तमाजघान स्तनान्तरे ॥ ८२ ॥
अतिकायेन सौमित्रिस्ताडितो युधि वक्षसि ॥ सुस्राव रुधिरं तीव्रं मदं मत्त इव द्विपः ॥ ८३ ॥
स चकार तदाऽऽत्मानं विशल्यं सहसा विभुः ॥ जग्राह च शरं तीक्ष्णमस्त्रेणापि च संदधे ॥८४॥
आग्नेयेन तदाऽऽस्त्रेण योजयामास सायकम् ॥ स जज्वाल तदा बाणो धनुष्यस्य महात्मनः ॥८५॥
अतिकायोपि तेजस्वी सौरमस्त्रं समादधे ॥ तेन बाणं भुजङ्गाभं हेमपुङ्खमयोजयत् ॥ ८६ ॥
तदस्त्रं ज्वलितं घोरं लक्ष्मणः शरमाहितम् ॥ अतिकायाय चिक्षेप कालदण्डमिवान्तकः ॥ ८७ ॥
आग्नेयेनाभिसंयुक्तं दृष्ट्वा बाणं निशाचरः ॥ उत्ससर्ज तदा बाणं दीप्तं सूर्यास्त्रयोजितम् ॥ ८८ ॥
तावुभावम्बरे बाणावन्योन्यमभिजघ्नतुः ॥ तेजसा संप्रदीप्ताग्रौ क्रुद्धाविव भुजङ्गमौ ॥ ८९ ॥
तावन्योन्यं विनिर्दह्य पेततुः पृथिवीतले ॥ निरर्चिषौ भस्मकृतौ न भ्राजेते शरोत्तमौ ॥
[तावुभौ दीप्यमानौ स्म नभ्राजेते महीतले] ॥ ९० ॥
ततोतिकायः संक्रुद्धस्त्वस्त्रमैषीकमुत्सृजत् ॥ तत्प्रचिच्छेद सौमित्रिरस्त्रेणैन्द्रेण वीर्यवान् ॥ ९१ ॥
ऐषीकं निहतं दृष्ट्वा रुषितो रावणात्मजः ॥ याम्येनास्त्रेण संक्रुद्धो योजयामास सायकम् ॥ ९२ ॥
ततस्तदस्त्रं चिक्षेप लक्ष्मणाय निशाचरः ॥ वायव्येन तदस्त्रेण निजघान स लक्ष्मणः ॥ ९३ ॥
अथैनं शरधाराभिर्धाराभिरिव तोयदः ॥ अभ्यवर्षत्सुसंक्रुद्धो लक्ष्मणो रावणात्मजम् ॥ ९४ ॥
तेऽतिकायं समासाद्य कवचे वज्रभूषिते ॥ भग्नाग्रशल्याः सहसा पेतुर्बाणा महीतले ॥ ९५ ॥
तान्मोघानभिसंप्रेक्ष्य लक्ष्मणः परवीरहा ॥ अभ्यवर्षन्महेष्वासां सहस्रेण महायशाः ॥ ९६ ॥
स वृष्यमाणो बाणौघैरतिकायो महाबलः ॥ अवध्यकवचः सङ्ख्ये राक्षसो नैव विव्यथे ॥ ९७ ॥
[शरं चाशीविषाकारं लक्ष्मणाय व्यपासृजत् ॥ स तेन विद्धः सौमित्रिर्मर्मदेशे शरेण ह ॥
मुहूर्तमात्रं निस्संज्ञो ह्यभवच्छत्रुतापनः ॥ ९८ ॥

विनम्य भुजौ नियम्य वशे स्थापयित्वा । रथोपस्थमास्थाय रथेन प्रचचार हेति संबन्धः ॥ ७६—७७ ॥ इति उक्तप्रकारेण ॥ ७८–८३ ॥ अस्त्रेण अस्त्रमन्त्रेण । संदधे योजयामास ॥ ८४ ॥ आग्नेयेनेत्यादि । पूर्वोक्तस्यैव विवरणं ॥ ८५ ॥ समादधे अनुसंदधे ॥८६॥ आहितं संहितं ॥ ८७—८९ ॥ भस्मकृतौ भस्मतया

ति० आत्मानंविशल्यंचकारेत्यत्रहेतुः विभुरिति । विष्वंशल्यानुसंधानवानित्यर्थः ॥ स० विशल्यं तद्बाधारहितं । तत्रहेतुर्विभुरिति ॥ ८४ ॥ ति० दीप्यमानौ तादृशावपि परस्पराभिघातान्नभ्राजेते ॥ स० निरर्चिषौ निष्प्रभौ । भस्मकृतौ भस्मकुर्वातेइतितथा । पृथिवीतलेपतितौ नभ्राजेते । महीतलेविद्यमानौतौमोक्तारौलक्ष्मणातिकायावपि दीप्यमानौ प्राक् हतोऽयमितिपरस्परंजयप्रकाशौनभ्राजेतेस्म मोघीभूतबाणाविद्यभ्राजनंयुक्तमितिभावः । अतोनपुनरुक्तिः । महाहवेइत्यपिक्वचित्पाठः ॥ ९० ॥ ति० त्वाष्ट्रंत्वष्टृदेवताकमैषीकाख्यं ॥ ९१ ॥

[पा०] १ ङ. झ. ट. विदार्यास्यंविनम्यचमहाभुजौ. २ ख.—ट. तेनसौमित्रिं. ३ ङ. च. झ. ञ. ट. रौद्रमस्त्रं. ४ इदमर्धं ग. घ. ङ. झ. ञ. ट. पाठेषुदृश्यते. ५ क. ख. च. महाहवे. ६ झ. ञ. ट. त्वाष्ट्र. ७ क. ग. घ. ङ. झ. ट. कुमारो. ८ ग. हेमभूषिते. ९ क. ग.—च. झ. अभ्यवर्षतबाणानां. १० शरंचाशीविषाकारमित्यादयः तस्यरक्षसइत्यन्ताः श्लोकाःऔत्तराहपाठएवदृश्यन्तेनतुप्राचीनकोशेषु.

ततः संज्ञामुपालभ्य चतुर्भिः सायकोत्तमैः ॥ निजघान हयान्सङ्ख्ये सारथिं च महाबलः ॥ ९९ ॥
ध्वजस्योन्मथनं कृत्वा शरवर्षैररिंदमः ॥ असंभ्रान्तः स सौमित्रिस्ताञ्शरानभिलक्षितान् ॥
मुमोच लक्ष्मणो बाणान्वधार्थं तस्य रक्षसः] ॥ १०० ॥
न शशाक रुजं कर्तुं युधि तस्य शिरोत्तमः ॥ १०१ ॥
अथैनमभ्युपागम्य वायुर्वाक्यमुवाच ह ॥ ब्रह्मदत्तवरो ह्येष अवध्यकवचावृतः ॥ १०२ ॥
ब्राह्मेणास्त्रेण भिन्ध्येनमेष वध्यो हि नान्यथा ॥ अवध्य एष ह्यन्येषामस्त्राणां कवची बली ॥१०३॥

ततस्तु वायोर्वचनं निशम्य सौमित्रिरिन्द्रप्रतिमानवीर्यः ॥
समाददे बाणममोघवेगं तद्ब्राह्ममस्त्रं सहसा नियोज्य ॥ १०४ ॥
तस्मिन्महास्त्रे तु नियुज्यमाने सौमित्रिणा बाणवरे शिताग्रे ॥
दिशश्च चन्द्रार्कमहाग्रहाश्च नभश्च तत्रास चचाल चोर्वी ॥ १०५ ॥
तं ब्रह्मणोस्त्रेण नियोज्य चापे शरं सुपुङ्खं यमदूतकल्पम् ॥
सौमित्रिरिन्द्रारिसुतस्य तस्य ससर्ज बाणं युधि वज्रकल्पम् ॥ १०६ ॥
तं लक्ष्मणोत्सृष्टममोघवेगं समापतन्तं ज्वलनप्रकाशम् ॥
सुवर्णवज्रोत्तमचित्रपुङ्खं तदातिकायः समरे ददर्श ॥ १०७ ॥
तं प्रेक्षमाणः सहसाऽतिकायो जघान बाणैर्निशितैरनेकैः ॥
स सायकस्तस्य सुपर्णवेगस्तदाऽऽतिकायस्य जगाम पार्श्वम् ॥ १०८ ॥
तमागतं प्रेक्ष्य तदाऽऽतिकायो बाणं प्रदीप्तान्तककालकल्पम् ॥
जघान शक्तिर्ऋष्टिगदाकुठारैः शूलैर्हुलैश्चात्यविपन्नचेताः ॥ १०९ ॥
तान्यायुधान्यद्भुतविग्रहाणि मोघानि कृत्वा स शरोऽग्निदीप्तः ॥
प्रगृह्य तस्यैव किरीटजुष्टं ततोतिकायस्य शिरो जहार ॥ ११० ॥
तच्छिरः सशिरस्त्राणं लक्ष्मणेषुप्रपीडितम् ॥ पपात सहसा भूमौ शृङ्गं हिमवतो यथा ॥ १११ ॥
तं तु भूमौ निपतितं दृष्ट्वा विक्षिप्तभूषणम् ॥ बभूवुर्व्यथिताः सर्वे हतशेषा निशाचराः ॥ ११२ ॥
ते विषण्णमुखा दीनाः प्रहारजनितश्रमाः ॥ विनेदुरुच्चैर्बहवः सहसा विस्वरैः स्वरैः ॥ ११३ ॥
ततस्ते त्वरितं याता निरपेक्षा निशाचराः ॥ पुरीमभिमुखा भीता द्रवन्तो नायके हते ॥ ११४ ॥

प्रहर्षयुक्ता बहवस्तु वानराः प्रबुद्धपद्मप्रतिमाननास्तदा ॥
अपूजयँल्लक्ष्मणमिष्टभागिनं हते रिपौ भीमबले दुरासदे ॥ ११५ ॥

कृतौ ॥ ९०—१०३ ॥ ब्राह्ममस्त्रं ब्रह्मास्त्रमस्त्रं । नियोज्य जपित्वेति यावत् ॥ १०४ ॥ दिशश्चेत्यादौ तत्रसुरिति विपरिणम्यानुषज्यते ॥ १०५ ॥ नियोज्य जपित्वा । तस्य यमदूतकल्पमित्यन्वयः ॥ १०६—१०८ ॥ हुलैः द्विफलपत्राग्रायुधविशैषैः । " हुलं द्विफलपत्राग्रं " इति वैजयन्ती ॥ १०९—११२ ॥ विस्वरैः विस्वररूपैः ॥ ११३ ॥ निरपेक्षाः युद्धानपेक्षाः ॥ ११४ ॥ प्रबुद्धेत्यत्र प्रसन्नत्वे तात्पर्यं । इष्टस्य

स० सशिरस्त्राणं समुकुटं । अयमेवभारतोक्तकुंभकर्णाभिधोलक्ष्मणहतः । ' वृहत्तनुःकुंभवदेवकर्णावस्येत्यतोनामचकुंभकर्णः ' इत्यारभ्य 'तेनातिकायःप्रवरोस्त्रवित्सु' इत्यन्तेनतात्पर्यमाचार्यवर्याःप्रत्यपीपदन्नितितथैवभारतार्थोनुसंधेयः । प्रपञ्चितश्चायमर्थो-

[पा०] १ क. ग.—ट. नरोत्तमः. २ क. च. ञ. सतस्यवायोः. ३ क. ङ. च. ज.—ट. रासचोर्वी. ४ ङ. च. झ. ञ. ट. विवृद्धवेगं. ५ ग. घ. ङ. ज. झ. ट. स्तथातिवेगेनजगाम. ६ ज. शूलैश्चितैः. घ. ङ. झ. ट. शूलैःशरैः. ७ ङ. छ. झ. ञ. ट. श्चाप्यविपन्नचेष्टः. ८ घ. ङ. झ. ञ. ट. ततस्तत्परितोयाताः. ख. घ. ततस्तत्त्वरितंयान्ति.

[अतिबलमतिकायमभ्रकल्पं युधि विनिपात्य स लक्ष्मणः प्रहृष्टः ॥
त्वरितमथ तदा स रामपार्श्वं कपिनिवहैश्च सुपूजितो जगाम] ॥ ११६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥

द्विसप्ततितमः सर्गः ॥ ७२ ॥

अतिकायनिधनश्रवणविषण्णेनरावणेन धूम्राक्षप्रभृतिबन्धुजनस्मरणेनतच्छोचनपूर्वकं राक्षसान्प्रतिविशेषतो नगरादिरक्षणनियोजनपूर्वकं भवनप्रवेशः ॥ १ ॥

अतिकायं हतं श्रुत्वा लक्ष्मणेन महौजसा ॥ उद्वेगमगमद्राजा वचनं चेदमब्रवीत् ॥ १ ॥
धूम्राक्षः परमामर्षी धन्वी शस्त्रभृतां वरः ॥ अकम्पनः प्रहस्तश्च कुम्भकर्णस्तथैव च ॥ २ ॥
एते महाबला वीरा राक्षसा युद्धकाङ्क्षिणः ॥ जेतारः परसैन्यानां परैर्नित्यापराजिताः ॥ ३ ॥
निहतास्ते महावीर्या रामेणाक्लिष्टकर्मणा ॥ राक्षसाः सुमहाकाया नानाशस्त्रविशारदाः ॥
अन्ये च बहवः शूरा महात्मानो निपातिताः ॥ ४ ॥
प्रख्यातबलवीर्येण पुत्रेणेन्द्रजिता मम ॥ यौ हि तौ भ्रातरौ वीरौ बद्धौ दत्तवरैः शरैः ॥ ५ ॥
यन्न शक्यं सुरैः सर्वैरसुरैर्वा महाबलैः ॥ मोक्तुं तद्बन्धनं घोरं यक्षगन्धर्वकिन्नरैः ॥ ६ ॥
तन्न जाने प्रभावैर्वा मायया मोहनेन वा ॥ शरबन्धाद्विमुक्तौ तौ भ्रातरौ रामलक्ष्मणौ ॥ ७ ॥
ये योधा निर्गताः शूरा राक्षसा मम शासनात् ॥ ते सर्वे निहता युद्धे वानरैः सुमहाबलैः ॥ ८ ॥
तं न पश्याम्यहं युद्धे योऽद्य रामं सलक्ष्मणम् ॥ शासयेत्सबलं वीरं ससुग्रीवविभीषणम् ॥ ९ ॥
अहो नु बलवान्रामो महदस्त्रबलं च वै ॥ यस्य विक्रममासाद्य राक्षसा निधनं गताः ॥ १० ॥
तं मन्ये राघवं वीरं नारायणमनामयम् ॥ तद्भयाद्धि पुरी लङ्का पिहितद्वारतोरणा ॥ ११ ॥

जयस्य भागः प्राप्तिः सोऽस्यास्तीतीष्टभागी तं ॥ ११५–११६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकसप्ततितमः सर्गः ॥ ७१ ॥

अथ रावणचिन्ता—अतिकायमित्यादि ॥ १–४ ॥ प्रख्यातेत्यादिश्लोकत्रयमेकं वाक्यं ॥ वीरौ यौ भ्रातरौ खरदूषणादिवधेन प्रसिद्धौ तावपि बद्धौ । तदेव बन्धनं वर्णयति—यदिति ॥ यद्बन्धनं सुरादिभिः मोक्तुं मोचयितुं । अशक्यं तद्बन्धनं घोरं । भ्रातरौ तौ शरबन्धाद्विमुक्ताविति यत् तत्प्रभावादिषु केन वा जातं न जान इत्यन्वयः । प्रभावः सामर्थ्यं । माया व्यामोहकारिणी विद्या । मोहनं औषधादिकं ॥ ५–९ ॥ अहो न्वित्यादिश्लोकद्वयमेकान्वयं ॥ पिहितद्वारतोरणा द्वारं अन्तर्द्वारं तोरणंबहिर्द्वारं ॥ १०–११ ॥

स्वाभिःप्राक्ततोनुसंधेयः ॥ १११ ॥ ति० त्रिशिरोतिकायदेवान्तकनरान्तकमहोदरमहापार्श्वनांषड्भिर्दिनैर्भाद्राश्विनकृष्णषष्ठ्यन्तेनवधइत्यग्रेस्पष्टम् ॥ ११६ ॥ इत्येकसप्ततितमःसर्गः ॥ ७१ ॥

ती० प्रख्यातबलवीर्येणेत्यादिश्लोकत्रयमेकंवाक्यं । यौखरदूषणादिनिरासकौतौभ्रातरौ इन्द्रजिता दत्तवरैःशरैर्बद्धौ । यद्बन्धनं सुरासुरादिभिःप्रत्येकंमोक्तुंमोचयितुंनशक्यं । तद्बन्धनं घोरैः प्रचण्डैः सर्वैःसमुदितैरपिमोक्तुंनशक्यं । तौरामलक्ष्मणौ प्रभावैः । सहजसामर्थ्यैः मायया विचित्रशक्त्या मोहनेन बन्धकनागपाशमोहनेनवा । शरबन्धाद्विमुक्तौ तन्नजानइतियोजना ॥ ५–७ ॥ स० अनामयं कार्यवाचकपदेनकारणंदोषोगृह्यते । निर्दोषं नारायणं ॥ ११ ॥ इतिद्विसप्ततितमःसर्गः ॥ ७२ ॥

[पा०] १ ख. ङ. च. झ. ञ. ट. महात्मना. २ ङ. झ. ञ. ट. सर्वशस्त्रभृतां. ३ ङ झ. ट. ससैन्यास्तेहतावीरारामेण. ग. घ. ससैन्यास्तेमहावीर्यारामेण. ख. ससैन्यास्तेमहाकायारामेण. ४ छ. ञ. घोरंसर्वैःसमुदितैरपि. ङ. झ. ट. घोरंयक्षगन्धर्वपन्नगैः. ५ ङ. झ. ट. नाशयेत्सबलं. ६ क. ग. घ. ङ. झ, ञ. ट, सुबलवान्.

अप्रमत्तैश्च सर्वत्र गुप्तै रक्ष्या पुरी त्वियम् ॥ १२ ॥
अशोकवनिकायां च यत्र सीताऽभिरक्ष्यते ॥ निष्क्रामो वा प्रवेशो वा ज्ञातव्यः सर्वथैव नः ॥ १३ ॥
यत्र यत्र भवेद्गुल्मस्तत्र तत्र पुनः पुनः ॥ सर्वतश्चापि तिष्ठध्वं स्वैः स्वैः परिवृता बलैः ॥ १४ ॥
द्रष्टव्यं च पदं तेषां वानराणां निशाचराः ॥ प्रदोषे वाऽर्धरात्रे वा प्रत्यूषे वाऽपि सर्वतः ॥ १५ ॥
नावज्ञा तत्र कर्तव्या वानरेषु कदाचन ॥ द्विषतां बलमुद्युक्तमापतत्किंस्थितं सदा ॥ १६ ॥
ततस्ते राक्षसाः सर्वे श्रुत्वा लङ्काधिपस्य तत् ॥ वचनं सर्वमातिष्ठन्यथावत्तु महाबलाः ॥ १७ ॥
स तान्सर्वान्समादिश्य रावणो राक्षसाधिपः ॥ मन्युशल्यं वहन्दीनः प्रविवेश स्वमालयम् ॥ १८ ॥

ततः स संदीपितकोपवह्निर्निशाचराणामधिपो महाबलः ॥
तदैव पुत्रव्यसनं विचिन्तयन्मुहुर्मुहुश्चैव तदा व्यनिश्वसत् ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

त्रिसप्ततितमः सर्गः ॥ ७३ ॥

देवान्तकादिवधश्रवणेनविषीदतिदशानने तंप्रतीन्द्रजिता रामादिवधप्रतिज्ञानेनसमाश्वासनपूर्वकं रथारोहणेनरणायनिर्याणम्॥१॥ तथा रणाङ्गणेहुतवहेहवनपूर्वकं रथारोहणेनान्तरिक्षेऽन्तर्हितेनसता नानाप्रहरणगणैः कपिकुलशकलीकरणपूर्वकं ब्रह्मास्त्रप्रयोगेण सकलवानरवाहिन्यासहरामलक्ष्मणयोर्मोहप्रापणम् ॥ २ ॥

ततो हतान्राक्षसपुङ्गवांस्तान्देवान्तकादित्रिशिरोतिकायान् ॥
रक्षोगणास्तत्र हतावशिष्टास्ते रावणाय त्वरितं शशंसुः ॥ १ ॥
ततो हतांस्तान्सहसा निशम्य राजा मुमोहाश्रुपरिप्लुताक्षः ॥
पुत्रक्षयं भ्रातृवधं च घोरं विचिन्त्य राजा विपुलं प्रदध्यौ ॥ २ ॥
ततस्तु राजानमुदीक्ष्य दीनं शोकार्णवे संपरिप्लुवानम् ॥
रथर्षभो राक्षसराजसूनुस्तमिन्द्रजिद्वाक्यमिदं बभाषे ॥ ३ ॥

एवं रामप्रभावं सप्रपञ्चमुक्त्वा सैन्यं प्रति पुरीरक्षणं नियमयति—अप्रमत्तैरित्यादिना ॥ गुप्तैः स्वयं कृतरक्षणैः । गुल्मैरिति वा पाठः ॥ १२ ॥ यत्र सीता अभिरक्ष्यते तत्र अशोकवनिकायां । निष्क्रामः निर्गमः प्रवेशो वा । नः अस्माभिः । ज्ञातव्यः । मदनुज्ञां विना न कोपि जनो निर्गमयितव्यो नापि प्रवेष्टव्य इत्यर्थः ॥ १३ ॥ गुल्मः सेनासन्निवेशः ॥ १४ ॥ द्रष्टव्यमित्यादिश्लोकद्वयमेकान्वयं ॥ पदं व्यवसितं । दर्शनप्रकारमाह—द्विषतामिति । द्विषतां बलं स्थितं किं । उद्युक्तं उद्यतं किं । आपतन्तं । लिङ्गादिव्यत्ययआर्षः । आपतत् किमिति सदा द्रष्टव्यमित्यर्थः । आपतत्किमिति पाठः सुशोभनः ॥ १५—१९ ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्विसप्ततितमः सर्गः ॥ ७२ ॥

अथ ब्रह्मास्त्रबन्धस्त्रिसप्ततितमे—तत इत्यादि ॥ १ ॥ पूर्वं कुम्भकर्णादिवधः सामान्येन श्रुतः संप्रत्याप्तैः सविशेषं श्रुत इत्याह—तत इति ॥ पूर्वोक्तसर्वानुवादो वा ॥ २ ॥ संपरिपुप्लुवानं । लटः

रामानु० अत्रदेवान्तकादित्रिशिरोतिकायान् हतांस्तरितंशशंसुः घोरंपुत्रक्षयंभ्रातृवधंचविचिन्त्यविपुलंप्रदध्यावितिचाभि-

[पा०] १ ङ. ञ. ञ. ट. सैन्यैःपरिवृता. २ ख. च. ञ. ट. वहन्दीनंप्रविवेशनिवेशनं. ग. घ. वहंस्तीव्रंप्रविवेश. ३ ख. न्मुहुर्मुहुर्निश्वसितिस्मदीर्घं. ४ क. ग. ङ. ञ. ट. विनिश्वसन्. ५ ख. ङ. ञ. ञ. ट. त्वरिताः.

न तात मोहं प्रतिगन्तुमर्हसि यत्रेन्द्रजिज्जीवति राक्षसेन्द्र ॥
[तद्बाणनिर्भिन्नविकीर्णदेहाः प्राणैर्विमुक्ताः समरे पतन्ति ॥]
नेन्द्रारिबाणाभिहतो हि कश्चित्प्राणान्समर्थः समरेऽभिपातुम् ॥ ४ ॥
पश्याद्य रामं सह लक्ष्मणेन मद्बाणनिर्भिन्नविकीर्णदेहम् ॥
गतायुषं भूमितले शयानं शितैः शरैराचितसर्वगात्रम् ॥ ५ ॥
इमां प्रतिज्ञां शृणु शक्रशत्रोः सुनिश्चितां पौरुषदैवयुक्ताम् ॥
अद्यैव रामं सह लक्ष्मणेन सन्तर्पयिष्यामि शरैरमोघैः ॥ ६ ॥
अद्येन्द्रवैवस्वतविष्णुमित्रसाध्याश्विवैश्वानरचन्द्रसूर्याः ॥
द्रक्ष्यन्तु मे विक्रममप्रमेयं विष्णोरिवोग्रं बलियज्ञवाटे ॥ ७ ॥
स एवमुक्त्वा त्रिदशेन्द्रशत्रुरापृच्छ्य राजानमदीनसत्त्वः ॥
समारुरोहानिलतुल्यवेगं रथं खरश्रेष्ठसमाधियुक्तम् ॥ ८ ॥
तँमास्थाय महातेजा रथं हरिरथोपमम् ॥ जगाम सहसा तत्र यत्र युद्धमरिन्दमः ॥ ९ ॥
तं प्रस्थितं महात्मानमनुजग्मुर्महाबलाः ॥ संहर्षमाणा बहवो धनुःप्रवरपाणयः ॥ १० ॥
गजस्कन्धगताः केचित्केचित्प्रवरवाजिभिः ॥ [व्याघ्रवृश्चिकमार्जारैः खरोष्ट्रैश्च भुजङ्गमैः ॥ ११ ॥
वराहश्वापदैः सिंहैर्जम्बुकैः पर्वतोपमैः ॥ शरभैः समयूरैश्च राक्षसा भीमविक्रमाः] ॥ १२ ॥
प्रासमुद्गरनिस्त्रिंशपरश्वधगदाधरः ॥ [भुशुण्डिमुद्गरायष्टिशतघ्नीपरिघायुधः] ॥ १३ ॥
स शङ्खनिनदैः पूर्णैर्भेरीणां चापि निस्वनैः ॥ जगाम त्रिदशेन्द्रारिः स्तूयमानो निशाचरैः ॥ १४ ॥
स शङ्खशशिवर्णेन छत्रेण रिपुसूदनः ॥ रराज प्रीतिपूर्णेन नभश्चन्द्रमसा यथा ॥ १५ ॥
अवीज्यत ततो वीरो हैमैर्हेमविभूषितैः ॥ चारुचामरमुख्यैश्च मुख्यः सर्वधनुष्मताम् ॥ १६ ॥
[स तु दृष्ट्वा विनिर्यान्तं बलेन महता वृतम् ॥ राक्षसाधिपतिः श्रीमान्रावणः पुत्रमब्रवीत्] ॥१७॥
त्वमप्रतिरथः पुत्र त्वया वै वासवो जितः ॥ किं पुनर्मानुषं धृष्यं निहनिष्यसि राघवम् ॥
तथोक्तो राक्षसेन्द्रेण प्रत्यगृह्णान्महाशिषः] ॥ १८ ॥
ततस्त्विन्द्रजिता लङ्का सूर्यप्रतिमतेजसा ॥ रराजाप्रतिवीरेण द्यौरिवार्केण भास्वता ॥ १९ ॥
स संप्राप्य महातेजा युद्धभूमिमरिन्दमः ॥ स्थापयामास रक्षांसि रथं प्रति समन्ततः ॥ २० ॥

शानजादेशः ॥ ३ ॥ यत्र यदा । इन्द्रारिः इन्द्रजित् ॥४–५॥पौरुषदैवयुक्तां पुरुषबलदैवबलयुक्तां । सन्तर्पयिष्यामि पूरयिष्यामि ॥६–७॥ खरश्रेष्ठसमाधियुक्तं खरश्रेष्ठसंबन्धयुक्तं । खरश्रेष्ठैः समाधिना समाधानेन च युक्तमिति वा ॥ ८॥ हरिरथः सूर्यरथः । "यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु" इत्यमरः । युद्धमिति । कर्तव्यमिति शेषः ॥ ९ ॥ तं प्रस्थितमित्यादिश्लोकद्वयमेकान्वयं ॥ १०—१५॥ हैमैः हेमदण्डैः । हेमविभूषितैः हेमशलाकायुक्तैः ॥१६—१९॥ रथं प्रति

धानात् पूर्वरावणेनातिकायवधएवश्रुतइत्यवगम्यते । यद्वा पूर्वोक्तानुवादः ॥१॥ ति० पौरुषदैवयुक्तां पौरुषेण सहजशौर्यबलेन । दैवबलेन भगवद्ब्रह्मबलेनच युक्तांक्रियमाणां । आदिकर्मणिक्तः ॥६॥ ति० युद्धभूमिं युद्धजयसंपादकहोमसाधनभूमिं निकुंभिला-

[पा०] १ इदमर्धं घ. पाठेदृश्यते. २ ख. ङ. झ. ञ. ट. विष्णुरुद्र. ३ क.—ट. समास्थाय. ४ ग. च. छ. ञ. युद्धभूमिमरिंदमः. ख. यत्रयुद्धंप्रवर्तते. ५ ङ.—ट. त्वरमवाजिभिः. ६ इदमर्धत्रयं. ङ.—ट. पाठेषुदृश्यते. ७ ङ.—ट. काकहंसमयूरैश्च. ८ इदमर्धं च. ञ. पाठयोर्दृश्यते. ९ ग. घ. ङ. झ. ट. त्रिदशेन्द्रारिराजिवेगेनवीर्यवान्. ख. छ. ज. त्रिदशेन्द्रारिर्महासैन्येनवीर्यवान्. १० [illegible] च. छ. ज. ञ. निशिपूर्णेन. ११ इदंश्लोकद्वयं औत्तराहपाठएवदृश्यतेनतुदाक्षिणात्यप्राचीनकोशेषु.

ततस्तु हुतभोक्तारं हुतभुक्सदृशप्रभः ॥ [1]जुहाव राक्षसश्रेष्ठो [2]मन्त्रवद्विधिवत्तदा ॥ २१ ॥
स हविर्लाजसंस्कारैर्[3]माल्यगन्धपुरस्कृतैः ॥ जुहुवे पावकं तत्र राक्षसेन्द्रः प्रतापवान् ॥ २२ ॥
शस्त्राणि शरपत्राणि समिधोथ विभीतकाः ॥ लोहितानि च वासांसि स्रुवं काष्णायसं तथा ॥२३॥
स तत्राग्निं समास्तीर्य शरपत्रैः सतोमरैः ॥ छागस्य [4]कृष्णवर्णस्य गलं जग्राह जीवतः ॥ २४ ॥
सकृदेव समिद्धस्य विधूमस्य महार्चिषः ॥ बभूवुस्तानि लिङ्गानि विजयं यान्यदर्शयन् ॥ २५ ॥
प्रदक्षिणावर्तशिखस्तप्तका[5]ञ्चनभूषणः ॥ हविस्तत्प्रतिजग्राह पावकः [6]स्वयमास्थितः ॥ २६ ॥
सोस्रमाहारयामास ब्राह्ममिन्द्रारिपुस्तदा ॥ धनुश्चात्मरथं चैव [7]सर्वं तत्राभ्यमन्त्रयत् ॥ २७ ॥
तस्मिन्नाहूयमानेऽस्त्रे हूयमाने च पावके ॥ [8]सार्धं ग्रहेन्दुनक्षत्रैर्[9]वितत्रास नभस्थलम् ॥ २८ ॥

स पावकं पावकदीप्ततेजा हुत्वा महेन्द्रप्रतिमप्रभावः ॥
सचापबाणासिरथाश्वसूतः [10]खेऽन्तर्दधेत्मानमचिन्त्यरूपः [12]॥ २९ ॥

ततो हयरथाकीर्णं पताकाध्वजशोभितम् ॥ निर्ययौ राक्षसबलं नर्दमानं युयुत्सया ॥
[[13]अशोभत बलं घोरं किङ्किणीशतनादितम् ॥ ३० ॥
ते शरैर्बहुभिश्चित्रैस्तीक्ष्णवेगैरलंकृतैः ॥ तोमरैरङ्कुशैश्चापि वानराञ्जघ्नुराहवे ॥ ३१ ॥
रावणिस्तु ततः क्रुद्धस्तान्निरीक्ष्य निशाचरान् ॥ हृष्टा भवन्तो युध्यन्तु वानराणां जिघांसया ॥३२॥
ततस्ते राक्षसाः सर्वे [14]नर्दन्तो जयकाङ्क्षिणः ॥ अभ्यवर्षंस्ततो घोरान्वानराञ्शरवृष्टिभिः ॥ ३३ ॥
स तु नालीकनाराचैर्गदाभिर्मुसलैरपि ॥ रक्षोभिः संवृतः सङ्ख्ये वानरान्[15]विचकर्त ह ॥ ३४ ॥

रथसिद्धिमुद्दिश्य ॥ २० ॥ विधिवत् क्रमवत् ॥२१॥ हविर्लाजसंस्कारैः संस्कृतहविर्लाजैः ॥ २२ ॥ शस्त्राणि आयुधानि । शरपत्राणि काशपत्रस्थानीयानि । तानि परिस्तरणान्यासन्नित्यर्थः । शरमयं बर्हिस्तृणातीत्यभिचारे काशश्रोदितः । अत्र त्वभिचारविशेषे तत्स्थाने शस्त्राणि कृतानीति बोध्यं । विभीतकाः कलिद्रुमविकाराः । " वैभीतक इध्मः " इति श्रुतेः । वासांसि स्वधार्याणि । यद्वा शस्त्राणि तोमरादीनि शरपत्राणि च । बर्हीष्यासन्निति शेषः । शरपत्रैः सतोमरैरित्यनुवादात् । काष्णायसं स्रुवं । कृतमिति शेषः ॥ २३ ॥ तत्र युद्धभूमौ । आस्तीर्य परिस्तीर्य ॥ २४ ॥ सकृत्समिद्धस्य एकदा समिद्धिर्ज्वलितस्य । लिङ्गानि उक्तसकृत्समिद्धत्वविधूमत्वमहार्चिष्ट्वानि । विजयं यान्यदर्शयन् । पूर्वमिति शेषः ॥ २५ ॥ प्रदक्षिणेति । प्रदक्षिण आवर्तो भ्रमिर्यासां ताः शिखा यस्येति विग्रहः । स्वयमास्थितः स्वयमास्थावान् । स्वयमुत्थित इति पाठे पुरुषरूपेणोत्थित इत्यर्थः ॥ २६ ॥ आहारयामास आजुहाव । अभ्यमन्त्रयत अभिमन्त्रितवान् ॥ २७ ॥ वितत्रास चचाल ॥२८॥ आत्मानं अन्तर्दधे अन्तर्धापयामास । अन्तर्भावितण्यर्थोयं । खेऽन्तर्दधेत्मानमित्यत्र आर्षं पूर्वरूपत्वं । अचिन्त्यरूपः अचिन्त्यमन्त्रशक्तिः ॥ २९—३१ ॥ रावणिस्त्विति ॥ उवाचेति शेषः ॥ ३२ ॥ ततः तस्माद्रावणिवचनात् । द्वितीयस्ततःशब्दः पश्चाच्छब्दार्थः ॥ ३३ ॥ नालीकः विशालाग्रशरः । रक्षोभिः संवृतः रक्षोगणमध्यत उपरिस्थित इत्यर्थः । अन्यथा

स्थानमित्यर्थः ॥ २० ॥ ति० हुतभोक्तारं अग्निं । विधिः तत्कल्पोक्तप्रकारः ॥ २१ ॥ ति० तस्मिन्नस्त्रे आहूयमाने तदस्त्रमन्त्रदेवतेत्रिमूर्तिरहस्यलक्षणेक्रियमाणावाहनेतदुद्देशेनतन्मन्त्रेणपावकेहूयमानेचसतिसार्कादिकंनभस्थलंतत्रासेतिनायमर्थवादः ॥ २८ ॥ ति० ततइति यागसमाप्त्यनन्तरं । तद्यागभूमेरित्यर्थः ॥ ३० ॥

[पा०] १ ङ. ञ. ट. जुहुवे. २ ङ. ञ. ट. विधिवन्मन्त्रसत्तमैः. ३ ख. ङ.—ठ. लाजसत्कारैः. ४ ख. च. छ. ज. ञ. ट. पावकंदीप्तं. ५ ख. ग. घ. च. ज. ञ. सर्वकृष्णस्य. ६ क. ग. ङ. छ. ञ. ट. काञ्चनसंनिभः. ७ क.—ट. स्वयमुत्थितः. ८ क. ग. ङ.—ट. ब्राह्ममस्त्रविशारदः. ९ च. छ. ञ. ट. कवचंचाभ्यमन्त्रयत्. १० क.—च. ञ. ट. सार्कंग्रहेन्दुनक्षत्रं. ११ ख. ग. छ. खेऽन्तर्दधेराक्षसराजसूनुः. १२ ङ. ञ. ट. मचिन्त्यवीर्यः. १३ इदमर्धं क. ख. ग. पाठेषुदृश्यते. १४ ङ. ञ. ट. गर्जन्तो. १५ ग. ङ. ज. ञ. ट. न्विचकर्षह.

ते वध्यमानाः समरे वानराः पादपायुधाः ॥ अभ्यद्रवन्त सहिता रावणिं रणकर्कशम् ॥ ३५ ॥
इन्द्रजित्तु ततः क्रुद्धो महातेजा महाबलः ॥ वानराणां शरीराणि व्यधमद्रावणात्मजः ॥ ३६ ॥
शरेणैकेन च हरीन्नव पञ्च च सप्त च ॥ चिच्छेद समरे क्रुद्धो राक्षसान्संप्रहर्षयन् ॥ ३७ ॥
स शरैः सूर्यसंकाशैः शातकुम्भविभूषितैः ॥ वानरान्समरे वीरः प्रममाथ सुदुर्जयः ॥ ३८ ॥
ते भिन्नगात्राः समरे वानराः शरपीडिताः ॥ पेतुर्मथितसङ्कल्पाः सुरैरिव महासुराः ॥ ३९ ॥
तं तपन्तमिवादित्यं घोरैर्बाणगभस्तिभिः ॥ अभ्यधावन्त संक्रुद्धाः संयुगे वानरर्षभाः ॥ ४० ॥
ततस्तु वानराः सर्वे भिन्नदेहा विचेतसः ॥ व्यथिता विद्रवन्ति स्म रुधिरेण समुक्षिताः ॥ ४१ ॥
रामस्यार्थे पराक्रम्य वानरास्त्यक्तजीविताः ॥ नर्दन्तस्तेऽभिवृत्तास्तु समरे सशिलायुधाः ॥ ४२ ॥
ते द्रुमैः पर्वताग्रैश्च शिलाभिश्च प्लवङ्गमाः ॥ अभ्यवर्षन्त समरे रावणिं पर्यवस्थिताः ॥ ४३ ॥
तद्द्रुमाणां शिलानां च वर्षं प्राणहरं महत् ॥ व्यपोहत महातेजा रावणिः समितिञ्जयः ॥ ४४ ॥
ततः पावकसंकाशैः शरैराशीविषोपमैः ॥ वानराणामनीकानि बिभेद समरे प्रभुः ॥ ४५ ॥
अष्टादशशरैस्तीक्ष्णैः स विद्ध्वा गन्धमादनम् ॥ विव्याध नवभिश्चैव नलं दूरादवस्थितम् ॥ ४६ ॥
सप्तभिस्तु महावीर्यो मैन्दं मर्मविदारणैः ॥ पञ्चभिर्विंशिखैश्चैव गजं विव्याध संयुगे ॥ ४७ ॥
जाम्बवन्तं तु दशभिर्नीलं त्रिंशद्भिरेव च ॥ सुग्रीवमृषभं चैव सोङ्गदं द्विविदं तथा ॥
घोरैर्दत्तवरैस्तीक्ष्णैर्निष्प्राणानकरोत्तदा ॥ ४८ ॥
अन्यानपि तदा मुख्यान्वानरान्बहुभिः शरैः ॥ अर्दयामास संक्रुद्धः कालाग्निरिव मूर्च्छितः ॥ ४९ ॥
स शरैः सूर्यसंकाशैः सुमुक्तैः शीघ्रगामिभिः ॥ वानराणामनीकानि निर्ममन्थ महारणे ॥ ५० ॥
आकुलां वानरीं सेनां शरजालेन मोहिताम् ॥ हृष्टः स परया प्रीत्या ददर्श क्षतजोक्षिताम् ॥ ५१ ॥
पुनरेव महातेजा राक्षसेन्द्रात्मजो बली ॥ संसृज्य बाणवर्षं च शस्त्रवर्षं च दारुणम् ॥
ममर्द वानरानीकमिन्द्रजित्त्वरितो बली ॥ ५२ ॥

स्वसैन्यमुत्सृज्य समेत्य तूर्णं महारणे वानरवाहिनीषु ॥
अदृश्यमानः शरजालमुग्रं ववर्ष नीलाम्बुधरो यथाऽम्बु ॥ ५३ ॥
ते शक्रजिद्बाणविशीर्णदेहा मायाहता विस्वरमुन्नदन्तः ॥
रणे निपेतुर्हरयोद्रिकल्पा यथेन्द्रवज्राभिहता नगेन्द्राः ॥ ५४ ॥

खेन्तर्दध इति पूर्वोक्तं विरुध्येत । विचकर्त हिंसितवान् ॥ ३४ ॥ रावणिं रावणिमुक्तायुधागमनप्रदेशं ॥ ३५—३८ ॥ मथितसंकल्पाः नाशितमनोरथाः ॥ ३९—४१ ॥ त्यक्तजीविताः त्यक्तजीवितेच्छाः । अभिवृत्ताः अभिमुखं प्रवृत्ताः । तुरवधारणे ॥ ४२—४३ ॥ व्यपोहत वारयामास ॥ ४४—४५ ॥ अष्टादशेत्यादिसार्धश्लोकत्रयमेकान्वयं ॥ दत्तवरैः वरदत्तैः ॥ ४६—४८ ॥ अन्यानिति ॥ मूर्च्छितः प्रवृद्धः ॥ ४९—५० ॥ परया प्रीत्या हृष्टः उद्धतः ॥ ५१ ॥ पुनरेवेत्यादिसार्धश्लोकमेकं वाक्यं ॥ खड्गादीनि शस्त्राणि । अत्र द्वितीयबलिशब्दो वरदानबलवत्तावाचकः । प्रथमो वीर्यवत्तावाचकः ॥ ५२ ॥ स्वसैन्यं

रामानु० रावणिं रावणिमुक्तायुधागमनप्रदेशं । खेन्तर्दधेइत्यभिधानात् ॥ स० अथवापरीक्षाकृतेमन्त्राणांतदान्तर्धानं । यथायथंस्वेच्छानुसारेणप्रत्यक्षीभवनमप्रत्यक्षीभवनंचसंभवीतिरावणिमित्याद्युक्तिःसंभवतीतिवाङ्मेयं ॥ ३५ ॥ शि० निवृत्ताः इहलोकसुखेच्छारहिताः ॥ ४२ ॥ ती० रावणिमभ्यवर्षन्त रावणिसंचारप्रदेशमभ्यवर्षन्तेत्यर्थः । तस्यादर्शनात् ॥ ४३ ॥

[पा०] १ ङ. ञ. ञ. ट. अभ्यवर्षन्तसहसारावणिंशैलपादपैः. २ क. ङ. ञ. ञ. ट. बिभेद. ३ ङ. ञ. ट. तेपतन्तमिवा. म. प्रपतन्तमिवा. ४ ट. स्तेनिवृत्तास्तु. ५ ख. ग. प्रहरतांमहत्. ६ ङ. ञ. ञ. ट. पीडितां.

ते केवलं संददृशुः शिताग्रान्बाणान्रणे वानरवाहिनीषु ॥
मायानिगूढं तु सुरेन्द्रशत्रुं न चावृतं राक्षसमभ्यपश्यन् ॥ ५५ ॥
ततः स रक्षोधिपतिर्महात्मा सर्वा दिशो बाणगणैः शिताग्रैः ॥
प्रच्छादयामास रविप्रकाशैर्विषादयामास च वानरेन्द्रान् ॥ ५६ ॥
स शूलनिस्त्रिंशपरश्वधानि व्याविध्य दीप्तानलसन्निभानि ॥
सविस्फुलिङ्गोज्वलपावकानि ववर्ष तीव्रं प्लवगेन्द्रसैन्ये ॥
[गदाश्च शक्तीः परिघं शतघ्नीर्ववर्ष तीव्रं प्लवगेन्द्रसैन्ये] ॥ ५७ ॥
ततो ज्वलनसंकाशैः शरैर्वानरयूथपाः ॥ ताडिताः शक्रजिद्बाणैः प्रफुल्ला इव किंशुकाः ॥ ५८ ॥
तेऽन्योन्यमभिसर्पन्तो निनदन्तश्च विस्वरम् ॥ राक्षसेन्द्रास्त्रनिर्भिन्ना निपेतुर्वानरर्षभाः ॥ ५९ ॥
उदीक्षमाणा गगनं केचिन्नेत्रेषु ताडिताः ॥ शरैर्विविशुरन्योन्यं पेतुश्च जगतीतले ॥ ६० ॥
हनुमन्तं च सुग्रीवमङ्गदं गन्धमादनम् ॥ जाम्बवन्तं सुषेणं च वेगदर्शिनमेव च ॥ ६१ ॥
मैन्दं च द्विविदं नीलं गवाक्षं गजगोमुखौ ॥ केसरिं हरिलोमानं विद्युद्दंष्ट्रं च वानरम् ॥ ६२ ॥
सूर्याननं ज्योतिर्मुखं तथा दधिमुखं हरिम् ॥ पावकाक्षं नलं चैव कुमुदं चैव वानरम् ॥ ६३ ॥
प्रासैः शूलैः शितैर्बाणैरिन्द्रजिन्मन्त्रसंहितैः ॥ विव्याध हरिशार्दूलान्सर्वांस्तान्राक्षसोत्तमः ॥ ६४ ॥
स वै गदाभिर्हरियूथमुख्यान्निर्भिद्य बाणैस्तपनीयपुङ्खैः ॥
ववर्ष रामं शरवृष्टिजालैः सलक्ष्मणं भास्कररश्मिकल्पैः ॥ ६५ ॥
स बाणवर्षैरभिवर्ष्यमाणो धारानिपातानिव तानचिन्त्य ॥
समीक्षमाणः परमाद्भुतश्री रामस्तदा लक्ष्मणमित्युवाच ॥ ६६ ॥
असौ पुनर्लक्ष्मण राक्षसेन्द्रो ब्रह्मास्त्रमाश्रित्य सुरेन्द्रशत्रुः ॥
निपातयित्वा हरिसैन्यमुग्रमस्माञ्शरैरर्दयति प्रसक्तः ॥ ६७ ॥
स्वयम्भुवा दत्तवरो महात्मा खमास्थितोन्तर्हितभीमकायः ॥
कथं नु शक्यो युधि नष्टदेहो निहन्तुमद्येन्द्रजिदुद्यतास्त्रः ॥ ६८ ॥

स्वसैन्योपरिभागं ॥ ५३—५४ ॥ मायानिगूढं अत एव आवृतं अप्रकाशं ॥ ५५—५७ ॥ ततो ज्वलनेत्यादिश्लोकद्वयमेकान्वयं ॥ शरैः तीक्ष्णैरित्यर्थः ॥ ५८—५९ ॥ विविशुरन्योन्यं अन्योन्योपर्यालम्बनार्थं पेतुरित्यर्थः ॥ ६० ॥ हनुमन्तमित्यादिचतुःश्लोक्येकान्वया ॥ ६१ ॥ केसरिमित्यार्षं ॥ ६२—६४ ॥ गदाभिरित्येतत् पूर्वोक्तप्रासादीनामुपलक्षणं ॥६५॥ बाणवर्षैः बाणनिरन्तरपातैः । अभिवर्ष्यमाणः अभितः पात्यमानः स रामः । तान् बाणवर्षान् । धारानिपातानिव लघूनचिन्त्य । बाणवर्षं तृणीकृत्येत्यर्थः । अत्र हेतुमाह—परमेति । अत्यन्ताश्चर्यकरधैर्यसमृद्धिः सन् लक्ष्मणं समीक्षमाणः स्वस्वभावावलम्बनेन ब्रह्मास्त्रप्रतिक्रियां कर्तुमुद्युक्तमिङ्गितैरभिवीक्षमाणः सन्नित्युवाच ॥ ६६ ॥ असौ ब्रह्मास्त्रं ब्रह्मास्त्रमन्त्रं । आश्रित्य । प्रहरन्निति शेषः ॥ ६७ ॥ नष्टदेहः अदृष्टदेहः । तत्र हेतुः—अन्तर्हितभीमकाय इति ॥ ६८ ॥

[पा०] १ ख. घ.—ठ. नचात्रतंराक्षस. क. ग. नराक्षसेन्द्रात्मजमभ्यपश्यन्. २ ख. घ. ङ. छ.—ट. विंदारयामासच. ३ इदमर्धं क. पाठेअधिकंदृश्यते. ४ क. ख. ग. च. ज. शितैर्वानर. ५ ग.—छ. झ. ञ. ट. शनैर्विविशुः. ६ ङ. छ. झ. ढ. गवाक्षंगवयंतथा. ७ ङ. झ. ट. हरिसैन्यमस्माञ्शतैःशरैरर्दयतिप्रसक्तं.

मन्ये स्वयम्भूर्भगवानचिन्त्यो यस्यैतदस्त्रं प्रभवश्च योऽस्य ॥
बाणावपातांस्त्वमिहाद्य धीमन्मया सहाव्यग्रमनाः सहस्व ॥ ६९ ॥
प्रच्छादयत्येष हि राक्षसेन्द्रः सर्वा दिशः सायकवृष्टिजालैः ॥
एतच्च सर्वं पतिताग्र्यशूरं न भ्राजते वानरराजसैन्यम् ॥ ७० ॥
आवां तु दृष्ट्वा पतितौ विसंज्ञौ निवृत्तयुद्धौ गतरोषहर्षौ ॥
ध्रुवं प्रवेक्ष्यत्यमरारिवासमसौ समादाय रणाग्रलक्ष्मीम् ॥ ७१ ॥
ततस्तु तावेन्द्रजिदस्त्रजालैर्बभूवतुस्तत्र तथा विशस्तौ ॥
स चापि तौ तत्र विदर्शयित्वा ननाद हर्षाद्युधि राक्षसेन्द्रः ॥ ७२ ॥
स तत्तदा वानरसैन्यमेवं रामं च सङ्ख्ये सह लक्ष्मणेन ॥
विषादयित्वा सहसा विवेश पुरीं दशग्रीवभुजाभिगुप्ताम् ॥ ७३ ॥
[संस्तूयमानः स तु यातुधानैः पित्रे च सर्वं हृषितोऽभ्युवाच ॥] ७४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

चतुःसप्ततितमः सर्गः ॥ ७४ ॥

विभीषणेनेन्द्रजिदस्त्रबद्धमुग्धसेनासमाश्वासनपूर्वकं हनुमतासहोल्कापाणिनासता सेनामध्येऽन्वेषणेनजांबवदन्तिकोपसर्पणम् ॥१॥ विभीषणेनकुशलंपृष्टेनजांबवता तंप्रति मन्दस्वरेणहनुमत्कुशलप्रश्ने हनुमताजांबवन्तंप्रति सप्रणाममात्मनोऽभिमतकरणेनियोजनप्रार्थना ॥ २ ॥ तेन तंप्रति सराघवहरिसेनासमुज्जीवनाय हिमवद्गिरिसंनिकृष्टमहौषधिपर्वतान्मृतसंजीवन्यादिदिव्यौषधिसमानयनचोदना ॥ ३ ॥ हनुमताहिमवन्तमेत्य तत्रनानापुण्यस्थानावलोकनपूर्वकमोषधिगिरिमेत्य तदोषधिगवेषणम् ॥ ४ ॥ हनुमता स्वावलोकनेनौषधिभिस्तिरोधाने क्रोधादोषधिगिरेरेवसमुत्पाटनेन वेगाल्लङ्कांप्रत्यागमनम् ॥५॥ पर्वतपाणौहनुमति संनिकृष्टमात्रेणदिव्यौषधिगन्धाघ्राणनमात्रेणराघवाभ्यांसहविगतमोहैर्विशल्यैश्च वानरगणैस्तदोषधिगन्धमारुतसंस्पर्शमात्रेणसमुज्जीवितैर्हतपूर्ववानरैःसह हर्षात्समुद्घोषणम् ॥ ६ ॥ हनुमता पुनरोषधिगिरेर्हिमवद्गिरिंप्रति प्रापणम् ॥ ७ ॥

तयोस्तदा सादितयो रणाग्रे मुमोह सैन्यं हरिपुङ्गवानाम् ॥
सुग्रीवनीलाङ्गदजाम्बवन्तो न चापि किंचित्प्रतिपेदिरे ते ॥ १ ॥

तर्हि तत्र प्रतिक्रिया कर्तव्येत्यत्राह—मन्य इति ॥ स्वयम्भूः अचिन्त्यः अचिन्त्यप्रभाव इति मन्ये । तत्र हेतुमाह—यस्येति । एतदस्त्रं यस्य यद्देवताकं । यः अस्यास्त्रस्य प्रभवः उत्पत्तिकारणं । सोचिन्त्यः । तर्ह्यावाभ्यां किं कर्तव्यमित्यत्राह—बाणेति । धीमन् आपत्सु न चलितव्यमिति ज्ञानिन् ॥ ६९–७० ॥ गतरोषहर्षौ मूर्च्छताविति यावत् । अमरारिवासं लङ्कां । रणाग्रलक्ष्मीं विजयलक्ष्मीं । अग्रपदेन रणमूललक्ष्मीर्न ग्रहीतुं शक्येत्युच्यते । एतेन मूलघातः कर्तुं न शक्यत इत्युच्यते ॥ ७१ ॥ विशस्तौ पीडितौ । तौ पतितौ विदर्शयित्वा दृष्ट्वा ननाद ॥ ७२–७४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिसप्ततितमः सर्गः ॥ ७३ ॥

अथ ब्रह्मास्त्रबन्धविमुक्तिश्चतुःसप्ततौ—तयोरित्यादि

ति० नन्वदृष्टदेहस्यापिसंहारसाधनैः शब्दवेध्यादिदिव्यास्त्रैर्हननंकार्यमितिचेन्न । भगवतोब्रह्मणआज्ञायामारुतिनेवास्माभिरपिपालनौचित्येनैतत्सहनस्यैवौचित्यादित्याशयेनाह—मन्यइति ॥ स० मयासहसहस्व एतेनतत्सहनेममसामर्थ्यमदनुग्रहात्तवसहनमितिध्वन्यते ॥ ६९ ॥ इतित्रिसप्ततितमःसर्गः ॥ ७३ ॥

[पा०] १ ङ. ञ. ट. समासाद्य. २ क. ख. ङ.—ट. विषादयित्वा. ३ ङ. ञ. ट. निषूदयित्वा. ४ इदमर्धं ङ. ञ. ट. पाठेषुदृश्यते.

ततो विषण्णं समवेक्ष्य सैन्यं विभीषणो बुद्धिमतां वरिष्ठः ॥
उवाच शाखामृगराजवीरानाश्वासयन्प्रतिमैर्वचोभिः ॥ २ ॥
मा भैष्ट नास्त्यत्र विषादकालो यदार्यपुत्रौ ह्यवशौ विषण्णौ ॥
स्वयम्भुवो वाक्यमथोद्वहन्तौ यत्सादिताविन्द्रजिदस्त्रजालैः ॥ ३ ॥
[विभीषणस्तत्र वराद्विधातुरसादितोस्त्रेण निरीक्षमाणः ॥
सेनां हरीणां द्रुहिणास्त्रदूनां स्वस्थं हनूमन्तमुवाच दृष्ट्वा]॥ ४ ॥
तस्मै तु दत्तं परमास्त्रमेतत्स्वयम्भुवा ब्राह्मममोघवेगम् ॥
तन्मानयन्तौ युधि राजपुत्रौ निपातितौ कोत्र विषादकालः ॥ ५ ॥

ब्राह्ममस्त्रं ततो धीमान्मानयित्वा तु मारुतिः ॥ विभीषणवचः श्रुत्वा हनुमांस्तमथाब्रवीत् ॥ ६ ॥
एतस्मिन्निहते सैन्ये वानराणां तरस्विनाम् ॥ यो यो धारयते प्राणांस्तं तमाश्वासयावहै ॥ ७ ॥
तावुभौ युगपद्वीरौ हनुमद्राक्षसोत्तमौ ॥ उल्काहस्तौ तदा रात्रौ रणशीर्षे विचेरतुः ॥ ८ ॥
भिन्नलाङ्गूलहस्तोरुपादाङ्गुलिशिरोधरैः ॥ स्रवद्भिः क्षतजं गात्रैः प्रस्रवद्भिस्ततस्ततः ॥ ९ ॥
पतितैः पर्वताकारैर्वानरैरभिसङ्कुलाम् ॥ शस्त्रैश्च पतितैर्दीप्तैर्ददृशाते वसुन्धराम् ॥ १० ॥
सुग्रीवमङ्गदं नीलं शरभं गन्धमादनम् ॥ गवाक्षं च सुषेणं च वेगदर्शिनमाहुकम् ॥ ११ ॥
मैन्दं नलं ज्योतिमुखं द्विविदं पनसं तथा ॥ एतांश्चान्यांस्ततो वीरौ ददृशाते हतान्रणे ॥ १२ ॥
सप्तषष्टिर्हताः कोट्यो वानराणां तरस्विनाम् ॥ अह्नः पञ्चमशेषेण वल्लभेन स्वयम्भुवः ॥ १३ ॥

सादितयोः अवसादितयोः । किंचिन्न प्रतिपेदिरे । मूढा बभूवुरित्यर्थः ॥ १—२ ॥ आर्यपुत्रौ अवशौ विषण्णाविति यत् । अत्र विषादकालो नास्ति विषादहेतुकालो नास्ति । कुतः । स्वयम्भुवो वाक्यम् उद्वहन्तौ मानयन्तौ इन्द्रजिदस्त्रजालैः सादितौ सादिताविव वर्तमानाविति यत् । ततः । मा भैष्टेत्यर्थः ॥३—४॥ उक्तमेवार्थं विशदयति—तस्मा इति ॥ ५ ॥ मानयित्वा मुहूर्तमात्रं ब्रह्मास्त्रपरवशः स्थित्वा ॥ ६—८ ॥ भिन्नलाङ्गूलेत्यादिश्लोकद्वयमेकान्वयम् ॥ स्रवद्भिः मूत्रयद्भिः॥ ९—१० ॥ सुग्रीवमित्यादिश्लोकद्वयमेकान्वयं ॥ आहुक इति कश्चिद्यूथपः । गवाक्षं च सुषेणं च वेगदर्शिनमाहुकमिति पाठः । हतान् हतप्रायान् । प्रहृतानिति वा ॥ ११—१२ ॥ वानराणां यूथपवानराणामित्यर्थः । सुग्रीवाङ्गदादिभिः सह पाठात् ॥ अह्नः पञ्चमशेषेण पञ्चमभागेन । प्रातःसङ्गवमध्याह्नापराह्णसायाह्नसंज्ञाः षण्णाडिकालंकाः अहः पञ्च भागाः सन्ति । तेषु पञ्चमेन सायाह्नसंज्ञेन नाडीषट्केनेत्यर्थः । स्वयम्भुवो वल्लभेन इन्द्र

स० शाखामृगराजाश्चतेवीराश्च तान् । शाखामृगराजेषुवीराश्चेतिवा । ' सप्तमीशौण्डैः ' इतियोगविभागात्समासः । तेन नपूर्वापरेतिवीरशब्दस्यपूर्वनिपातः । आद्यपक्षेतुएकवीरइतिवद्बाहुलकात्परनिपातः ॥ २ ॥ ति० अत्र अस्यामवस्थायां । विषादकालः विषादावसरोनास्ति । कुतस्तत्राह—यदिति । यद्यस्मात्स्वयंभुवोवाक्यमुद्वहन्तौ तदाज्ञांपरिपालयन्तौ । अतएवविवशौ अस्त्रप्रयोगप्रवृत्तिरहितौ । अथानन्तरं तस्मादेवेन्द्रजितासादितावितियत् तस्माद्विषण्णावेव नतुप्राणपीडावन्तौ । अतोमाभैष्ट । यद्वा एतावशौ विषण्णाविति यत् तत्रविषयेमाभैष्ट । एतयोर्विषण्णयोरस्मान्कोवारक्षिष्यतीतिशत्रुभ्योभयंमाभूत् । अत्रएतद्विषयेविषादकालोनास्ति । यद्यस्मात्स्वयंभुवोवाक्यं मन्त्ररूपं उद्वहन्तौ मानयन्तौ इन्द्रजिदस्त्रजालैःसादितौ सादिताविव यतोब्रह्मसंमाननार्थंस्वयमेवपतितावितिमाभैष्टेत्यर्थः ॥ ३ ॥ ति० तदारात्रावित्यनेन सप्तम्यांरात्रावयमस्त्रप्रयोगइतिसूचितं ॥ ८ ॥ ति० सप्तषष्टिकोटिवानरहननेसामर्थ्यमाह—वल्लभेनेति । स्वयंभूवल्लभेनब्रह्मास्त्रेण अपरिमितप्राणिहननसमर्थेन हतमितिभगवद्वैभव—

[पा०] १ अयंश्लोकः क. ख. पाठयोरधिकोदृश्यते. २ ङ.—ट. ममोघवीर्यं. ३ क. ग.—ट. हनूमानिदमब्रवीत्. ४ ङ. ञ. ट. अस्मिन्नस्त्रहते. घ. एतस्मिन्नन्तरे. ५ क.—ङ. ज. ञ. प्रस्रवद्भिःसमन्ततः. ख. च. छ. ट. प्रस्रवद्भिरिवाचलैः. ६ क. ख. घ.—म. जांबवन्तंसुषेणं च. ७ क. घ. ङ. ञ. ट. द्विविदंचापिवानरं. ८ क. ग.—ट. विभीषणोहनूमांश्चददृशाते.

सागरौघनिभं भीमं दृष्ट्वा बाणार्दितं बलम् ॥ मार्गते जाम्बवन्तं स हनुमान्सविभीषणः ॥ १४ ॥
स्वभावजरया युक्तं वृद्धं शरशतैश्चितम् ॥ प्रजापतिसुतं वीरं शाम्यन्तमिव पावकम् ॥ १५ ॥
दृष्ट्वा तमुपसंगम्य पौलस्त्यो वाक्यमब्रवीत् ॥ कच्चिदार्य शरैस्तीक्ष्णैः प्राणा न ध्वंसितास्तव ॥१६॥
विभीषणवचः श्रुत्वा जाम्बवानृक्षपुङ्गवः ॥ कृच्छ्रादभ्युद्गिरन्वाक्यमिदं वचनमब्रवीत् ॥ १७ ॥
नैर्ऋतेन्द्र महावीर्य स्वरेण त्वाऽभिलक्षये ॥ पीड्यमानः शितैर्बाणैर्न त्वां पश्यामि चक्षुषा ॥ १८ ॥
अञ्जना सुप्रजा येन मातरिश्वा च नैर्ऋत ॥ हनुमान्वानरश्रेष्ठः प्राणान्धारयते क्वचित् ॥ १९ ॥
श्रुत्वा जाम्बवतो वाक्यमुवाचेदं विभीषणः ॥ आर्यपुत्रावतिक्रम्य कस्मात्पृच्छसि मारुतिम् ॥२०॥
नैव राजनि सुग्रीवे नाङ्गदे नापि राघवे ॥ आर्य संदर्शितः स्नेहो यथा वायुसुते परः ॥ २१ ॥
विभीषणवचः श्रुत्वा जाम्बवान्वाक्यमब्रवीत् ॥ शृणु नैर्ऋतशार्दूल यस्मात्पृच्छामि मारुतिम् ॥२२॥
तस्मिञ्जीवति वीरे तु हतमप्यहतं बलम् ॥ हनुमत्युज्जितप्राणे जीवन्तोपि वयं हताः ॥ २३ ॥
धरते मारुतिस्तात मारुतप्रतिमो यदि ॥ वैश्वानरसमो वीर्ये जीविताशा ततो भवेत् ॥ २४ ॥
ततो वृद्धमुपागम्य नियमेनाभ्यवादयत् ॥ गृह्य जाम्बवतः पादौ हनुमान्मारुतात्मजः ॥
[अहमस्मि हरिश्रेष्ठः शाधि मां यच्चिकीर्षितम्] ॥ २५ ॥
श्रुत्वा हनुमतो वाक्यं तथापि व्यथितेन्द्रियः ॥ पुनर्जातमिवात्मानं मन्यते स्म ऋक्षपुङ्गवः ॥ २६ ॥
ततोऽब्रवीन्महातेजा हनुमन्तं स जाम्बवान् ॥ आगच्छ हरिशार्दूल वानरांस्त्रातुमर्हसि ॥ २७ ॥
नान्यो विक्रमपर्याप्तस्त्वमेषां परमः सखा ॥ त्वत्पराक्रमकालोयं नान्यं पश्यामि कंचन ॥ २८ ॥
ऋक्षवानरवीराणामनीकानि प्रहर्षय ॥ विशल्यौ कुरु चाप्येतौ सादितौ रामलक्ष्मणौ ॥ २९ ॥
गत्वा परममध्वानमुपर्युपरि सागरम् ॥ हिमवन्तं नगश्रेष्ठं हनुमन्गन्तुमर्हसि ॥ ३० ॥
ततः काञ्चनमत्युच्चमृषभं पर्वतोत्तमम् ॥ कैलासशिखरं चापि द्रक्ष्यस्यरिनिषूदन ॥ ३१ ॥
तयोः शिखरयोर्मध्ये प्रदीप्तमतुलप्रभम् ॥ सर्वौषधियुतं वीर द्रक्ष्यस्योषधिपर्वतम् ॥ ३२ ॥
तस्य वानरशार्दूल चतस्रो मूर्ध्नि संभवाः ॥ द्रक्ष्यस्योषधयो दीप्ता दीपयन्त्यो दिशो दश ॥ ३३ ॥

जिता । ब्रह्मास्त्रेण वा ॥ १३—१६ ॥ वाक्यं वाक्योपयोगि स्वरं ॥ १७—१८ ॥ धारयत इत्यत्र काकुः । किं धारयत इत्यर्थः ॥ १९ ॥ श्रुतेत्यादिश्लोकद्वयमेकं वाक्यं ॥ २०—२४ ॥ मारुतात्मजः हनुमान् वृद्धं जाम्बवन्तं उपागम्य । नियमेन श्रोत्रहस्तसंस्पर्शव्यत्यस्तहस्तत्वादिरूपेण सह । जाम्बवतः पादौ गृह्य गृहीत्वा अभ्यवादयत् । स्वनामोच्चारणपूर्वकं युगपत्पादावगृह्णादित्यर्थः ॥ २५ ॥ वाक्यं हनुमानहमस्मीत्यभिवादनवाक्यं । तथा व्यथितेन्द्रियोपि हनुमतो वाक्यं श्रुत्वा ऋक्षपुङ्गवः जाम्बवान् आत्मानं पुनर्जातं मन्यते स्मेति संबन्धः ॥२६—२७॥ विक्रमपर्याप्तः पर्याप्तविक्रमः । विक्रमपूर्ण इति यावत् अन्यं पराक्रमितारं ॥ २८—२९ ॥ परमं दीर्घं । उपर्युपरिसागरं सागरस्य समीपोपरि प्रदेशे । " उपर्यध्यधसः सामीप्ये" इति सामीप्ये द्विर्वचनं । "धिगुपर्यादिषु त्रिषु द्वितीया" इति द्वितीया ॥ ३० ॥ ऋषभं ऋषभाख्यं । पर्वतोत्तमं शिखरमित्यर्थः ॥ ३१—३२॥ तस्येत्यादिश्लोकत्रयमेकान्वयं ॥ ओषधयः ओषधीः । दीपयन्त्यः दीपयन्तीः । व्यत्ययेन द्वितीयार्थे प्रथमा । मृतं सञ्जीवयतीति मृतसञ्जीवनी । जीवनानन्तरं संचारक्षमतायै विशल्यं करोतीति विशल्यकरणी । विशल्ये कृते त्वचः सन्धानं करोतीति स-

---

मेवैतदितिभावः ॥ १३ ॥ ति० मार्गते विशिष्येत्यर्थः । तस्यबहुज्ञत्वादुपायप्रश्नार्थमितिभावः ॥ १४ ॥ स० अवश्यंस्नेहेनपार्णिंसंगृह्याह—नेति । हेआर्य तथाकिंनदर्शितः । पूर्वलक्ष्मणेनसहरामस्यनिर्देशादेकसत्त्वेपिद्वयंनास्तीतिप्रतीत्यारामानतिक्रमणेपि

[पा०] १ ङ. ञ. ट. विद्धगात्रः. २ ङ. ञ. ट. सुव्रत. ३ ङ. ञ. ट. मृतावयं. ४ इदमर्धं ज. पाठेदृश्यते.

मृतसञ्जीवनीं चैव विशल्यकरणीमपि ॥ सावर्ण्यकरणीं चैव सन्धानकरणीं तथा ॥ ३४ ॥
ताः सर्वा हनुमन्गृह्य क्षिप्रमागन्तुमर्हसि ॥ आश्वासय हरीन्प्राणैर्योज्य गन्धवहात्मज ॥ ३५ ॥
श्रुत्वा जाम्बवतो वाक्यं हनुमान्हरिपुङ्गवः ॥ आपूर्यत बलोद्धर्षैस्तोयवेगैरिवार्णवः ॥ ३६ ॥
स पर्वततटाग्रस्थः पीडयन्पर्वतोत्तमम् ॥ हनुमान्दृश्यते वीरो द्वितीय इव पर्वतः ॥ ३७ ॥
हरिपादविनिर्भग्नो निषसाद स पर्वतः ॥ न शशाक तदाऽऽत्मानं सोढुं भृशनिपीडितः ॥ ३८ ॥
तस्य पेतुर्नगा भूमौ हरिवेगाच्च जज्वलुः ॥ शृङ्गाणि च व्यशीर्यन्त पीडितस्य हनूमता ॥ ३९ ॥
तस्मिन्संपीड्यमाने तु भग्नद्रुमशिलातले ॥ न शेकुर्वानराः स्थातुं घूर्णमाने नगोत्तमे ॥ ४० ॥
सा घूर्णितमहाद्वारा प्रभग्नगृहगोपुरा ॥ लङ्का त्रासाकुला रात्रौ प्रनृत्तेवाभवत्तदा ॥ ४१ ॥
पृथिवीधरसंकाशो निपीड्य धरणीधरम् ॥ पृथिवीं क्षोभयामास सार्णवां मारुतात्मजः ॥ ४२ ॥
आरुरोह तदा तस्माद्गिरिं मलयपर्वतम् ॥ मेरुमन्दरसंकाशं नानाप्रस्रवणाकुलम् ॥ ४३ ॥
नानाद्रुमलताकीर्णं विकासिकमलोत्पलम् ॥ सेवितं देवगन्धर्वैः षष्टियोजनमुच्छ्रितम् ॥ ४४ ॥
विद्याधरैर्मुनिगणैरप्सरोभिर्निषेवितम् ॥ नानामृगगणाकीर्णं बहुकन्दरशोभितम् ॥ ४५ ॥
सर्वानाकुलयंस्तत्र यक्षगन्धर्वकिन्नरान् ॥ हनुमान्मेघसंकाशो ववृधे मारुतात्मजः ॥ ४६ ॥
पद्भ्यां तु शैलमापीड्य बडवामुखवन्मुखम् ॥ विवृत्योग्रं ननादोच्चैस्त्रासयन्निव राक्षसान् ॥ ४७ ॥
तस्य नानद्यमानस्य श्रुत्वा निनदमद्भुतम् ॥ लङ्कास्था राक्षसाः सर्वे न शेकुः स्पन्दितुं भयात् ॥४८॥
नमस्कृत्वाऽथ रामाय मारुतिर्भीमविक्रमः ॥ राघवार्थे परं कर्म समीहत परन्तपः ॥ ४९ ॥

स पुच्छमुद्यम्य भुजङ्गकल्पं विनम्य पृष्ठं श्रवणे निकुञ्च्य ॥
विवृत्य वक्त्रं बडवामुखाभमापुप्लुवे व्योमनि चण्डवेगः ॥ ५० ॥
स वृक्षषण्डांस्तरसाऽऽजहार शैलाञ्शिलाः प्राकृतवानरांश्च ॥
बाहूरुवेगोद्धतसंप्रणुन्नास्ते क्षीणवेगाः सलिले निपेतुः ॥ ५१ ॥

न्धानकरणी । ततो व्रणकृतवैवर्ण्यं विहाय प्रदेशान्तरसावर्ण्यं करोतीति सावर्ण्यकरणी ॥ ३३—३५ ॥ बलोद्धर्षैः बलोत्कर्षैः । आपूर्यत पूर्णोभूत् ॥ ३६ ॥ पर्वततटाग्रस्थः त्रिकूटशिखरस्थः । पर्वतोत्तमं त्रिकूटं ॥ ३७ ॥ हरीति । हरिः हनुमान् ॥ ३८ ॥ तस्य त्रिकूटस्य । नगाः वृक्षाः । हरिवेगात् हनुमतो हिमवदुत्तरप्रदेशस्थौषधिपर्वतपर्यन्तगमनोचितशक्त्यास्थानवेगात् । जज्वलुश्च । वेगोद्धर्षजवह्निनेत्यर्थः पीडितस्य पर्वतस्येति शेषः ॥३९॥ न शेकुरिति । त्रिकूटतटस्य युद्धरङ्गत्वात् । घूर्णमाने कम्पमाने॥४०॥ प्रनृत्तेवाभवत् त्रिकूटाग्रनिर्मितत्वात्तस्याः ॥ ४१—४२॥ आरुरोहेत्यादिश्लोकत्रयमेकान्वयं ॥ मलयपर्वतमित्यत्र लङ्कामलय उच्यते ॥४३—४६॥ त्रासयन् त्रासनार्थं ननाद । "लक्षणहेत्वोः—" इति शतृप्रत्ययः । स्वागमनपर्यन्तं राक्षसनिर्गमनं मा भूदिति तेषां त्रासनार्थं ननादेति भावः । इवशब्दो वाक्यालंकारे ॥ ४७—४८ ॥ नमस्कृत्वाथ रामायेति अयं प्रारीप्सितकर्मसमाप्तये सम्यगिष्टदेवतानमस्कारः ॥ ४९ ॥ स पुच्छमिति पुच्छोद्यमनेनोत्साहातिरेक उक्तः । पृष्ठविनमनेनाकाशगमनानुकूलप्राणवायुनिरोध उक्तः। श्रवणनिकुञ्चनेन बलोद्दीपनं । मुखव्यादानेनाभिनिवेशः ॥५०॥ प्राकृतवानरान् त्रिकूटवननित्यवासिनः । आजहार उज्जहार । अस्यैवानुवादो बाहूरुवेगोद्धतसंप्रणुन्नाः बाहूर्वोर्वेगेन उद्धताः उन्मूलिताः

तदतिक्रमणमितिशङ्कांवारयितुंराघवइतिपृथगुक्तिः ॥ २१ ॥ ति० सुवर्णकरणीं स्वर्णसमानवर्णस्यदेहादेःकरणीं ॥ ३४ ॥

[पा०] १ ग. ङ. ञ. ट. सुवर्णकरणीचैवसंधानींचमहौषधीं. क. ख. घ. च. छ. झ. सवर्णकरणीचैवसंधानींचमहौषधीं. २ ख. झ. प्रतिगन्तुंत्वमर्हसि. ३ ङ. ञ. बलोद्धर्षैर्वायुवेगैरिवा. ४ क. श्रीमान्हरिः. ५ क. न्मेरुसंकाशो. ६ ङ. ञ. ट. शैलमाविध्य. ७ क. ग. ङ. ञ. ट. राक्षसव्याघ्रानशेकुः.

स तौ प्रसार्योरगभोगकल्पौ भुजौ भुजङ्गारिनिकाशवीर्यः ॥
जगाम मेरुं नगराजमग्र्यं दिशः प्रकर्षन्निव वायुसूनुः ॥ ५२ ॥
स सागरं घूर्णितवीचिमालं तदा भृशं भ्रामितसर्वसत्त्वम् ॥
समीक्षमाणः सहसा जगाम चक्रं यथा विष्णुकराग्रमुक्तम् ॥ ५३ ॥
स पर्वतान्वृक्षगणान्सरांसि नदीस्तटाकानि पुरोत्तमानि ॥
स्फीताञ्जनान्तानपि संप्रवीक्ष्य जगाम वेगात्पितृतुल्यवेगः ॥ ५४ ॥
आदित्यपथमाश्रित्य जगाम स गतक्लमः ॥ हनुमांस्त्वरितो वीरः पितृतुल्यपराक्रमः ॥ ५५ ॥
जवेन महता युक्तो मारुतिर्मारुतो यथा ॥ जगाम हरिशार्दूलो दिशः शब्देन पूरयन् ॥ ५६ ॥
स्मरञ्जाम्बवतो वाक्यं मारुतिर्वातरंहसा ॥ ददर्श सहसा चापि हिमवन्तं महाकपिः ॥ ५७ ॥
नानाप्रस्रवणोपेतं बहुकन्दरनिर्झरम् ॥ श्वेताभ्रचयसंकाशैः शिखरैश्चारुदर्शनैः ॥
शोभितं विविधैर्वृक्षैरगमत्पर्वतोत्तमम् ॥ ५८ ॥
स तं समासाद्य महानगेन्द्रमतिप्रवृद्धोत्तमघोरशृङ्गम् ॥
ददर्श पुण्यानि महाश्रमाणि सुरर्षिसङ्घोत्तमसेवितानि ॥ ५९ ॥
स ब्रह्मकोशं रजतालयं च शक्रालयं रुद्रशरप्रमोक्षम् ॥
हयाननं ब्रह्मशिरश्च दीप्तं ददर्श वैवस्वतकिङ्करांश्च ॥ ६० ॥
वज्रालयं वैश्रवणालयं च सूर्यप्रभं सूर्यनिबन्धनं च ॥
ब्रह्मासनं शङ्करकार्मुकं च ददर्श नाभिं च वसुन्धरायाः ॥ ६१ ॥
[विघ्नेश्वरं तत्र सनन्दिकेशं स्कन्दं वृतं देवगणैर्ददर्श ॥
उमां सुदुर्गामथ कन्यकाभिर्विलासयन्तीं ददृशेऽग्र्यवीर्यः] ॥ ६२ ॥

संप्रणुन्नाः । दूरं प्रेरिताः । क्षीणवेगाः क्रमेण क्षीणवेगाः सन्तः ॥५१॥ मेरुं कैलासपार्श्ववर्तिनं । अस्ति ह्यन्यो हिमवदन्तर्वर्ती मेरुः । यद्वा मेरुं मेरूपलक्षितदिशि स्थितं नगराजं हिमवन्तं । यद्वा मेरुमुद्दिश्य जगाम । उत्तरांदिशमुद्दिश्य जगामेत्यर्थः । यद्वा मेरुं मेरुसदृशं । प्रकर्षन् कम्पयन् ॥ ५२—५३ ॥ जनान्तान् जनपदान् ॥ ५४ ॥ पूर्वमुपर्युपरिसागरमित्युक्त्वा आदित्यपथं आकाशं ॥ ५५—५६ ॥ स्मरन् जाम्बवत इति जाम्बवद्वाक्यस्मरणं औषधिपर्वतमतीत्य वेगातिशयेनान्यत्र गमननिवृत्त्यर्थं । वातरंहसा । उपलक्षित इति शेषः ॥ ५७—५९ ॥ दृष्टानामाश्रमाणां नामान्यनुक्रामति—स ब्रह्मकोशमित्यादिना ॥ ब्रह्मणश्चतुर्मुखस्य कोशो गृहं । " कोशोऽस्त्री कुड्मलेऽर्थौघे गुह्यदेशेऽण्डशीर्षयोः । गृहे देहे पुस्तकोघपेट्यामसिपिधानके" इति रत्नमाला । रजतालयं कैलासं । शक्रस्य इन्द्रस्य । स्थानं आश्रमस्थानं । रुद्रशराः प्रमोक्ष्यन्ते लीलार्थं यस्मिन् तद्रुद्रशरप्रमोक्षं स्थानं । हयाननं हयग्रीवाराधनस्थानं । ब्रह्मशिरः रुद्रनिकृत्तब्रह्मशिरःप्रक्षेपस्थानं । वैवस्वतकिङ्करान् विवस्वत्संबन्धिकिङ्करान् । ग्रामण्यादीन् मासान्तपरिचारकान् विश्रमार्थमत्र स्थितान् ॥ ६० ॥ वज्रालयमिति । इन्द्राय ब्रह्मणा वज्रप्रदानस्थानं । सूर्यप्रभमिति वैश्रवणालयविशेषणं । सूर्यनिबन्धनं छायादेवीप्रीतये विश्वकर्मणा शाणारोपणाय सूर्यनिबन्धनस्थानं । ब्रह्मासनं देवगणसंदर्शनाय कृतं ब्रह्मणः सिंहासनं । ब्रह्मणामृषीणामासनं स्थानं वा । शङ्कर-

ति० रजतालयं हिरण्यगर्भापरमूर्तेरजतनाभेःस्थानं । ब्रह्मशिरः ब्रह्मास्त्रदेवता । तत्स्थानं ॥६०॥ ति० सूर्यनिबन्धनं सूर्याणांयत्रस्थानेनिबन्धनंसमावेशः तत्स्थानं । अतएवतत्सूर्यप्रभं । ब्रह्मालयं चतुर्मुखब्रह्मस्थानं ॥ ६१ ॥

[पा०] १ क. ङ. ञ. ट. न्पक्षिगणान्. २ ङ. ञ. मारुतिर्वातरंहसा. ३ क. ख. ग. ङ.—ट. नादयन्. ४ ङ. ञ. म. ट. मारुतिर्भीमविक्रमः. ५ ख. ङ. छ. ञ. ण. ट. हेमशृङ्गं. ६ घ. म. ब्रह्मलोकं. ७ ङ. ञ. ठ. वह्नयालयं. ८ ङ. ञ. ट. ब्रह्मालयं. ९ अयंश्लोकः क. ख. च. छ. पाठेषुदृश्यते.

कैलासमभ्यं हिमवच्छिलां च तथर्षभं काञ्चनशैलमभ्यम् ॥
संदीप्तसर्वौषधिसंप्रदीप्तं ददर्श सर्वौषधिपर्वतेन्द्रम् ॥ ६३ ॥
स तं समीक्ष्यानलरश्मिदीप्तं विसिष्मिये वासवदूतसूनुः ॥
आवृत्य तं चौषधिपर्वतेन्द्रं तत्रौषधीनां विचयं चकार ॥ ६४ ॥
स योजनसहस्राणि समतीत्य महाकपिः ॥ दिव्यौषधिधरं शैलं व्यचरन्मारुतात्मजः ॥ ६५ ॥
महौषध्यस्ततः सर्वास्तस्मिन्पर्वतसत्तमे ॥ विज्ञायार्थिनमायान्तं ततो जग्मुरदर्शनम् ॥ ६६ ॥
स ता महात्मा हनुमानपश्यंश्चुकोप कोपाच्च भृशं ननाद ॥
अमृष्यमाणोऽग्निनिकाशचक्षुर्महीधरेन्द्रं तमुवाच वाक्यम् ॥ ६७ ॥
किमेतदेवं सुविनिश्चितं ते यद्राघवे नासि कृतानुकम्पः ॥
पश्याद्य मद्बाहुबलाभिभूतो विकीर्णमात्मानमथो नगेन्द्र ॥ ६८ ॥
स तस्य शृङ्गं सनगं सनागं सकाञ्चनं धातुसहस्रजुष्टम् ॥
विकीर्णकूटज्वलिताग्रसानुं प्रगृह्य वेगात्सहसोन्ममाथ ॥ ६९ ॥
स तं समुत्पाट्य खमुत्पपात वित्रास्य लोकान्ससुरासुरेन्द्रान् ॥
संस्तूयमानः खचरैरनेकैर्जगाम वेगाद्गरुडोग्रवेगः ॥ ७० ॥
स भास्कराध्वानमनुप्रपन्नस्तं भास्कराभं शिखरं प्रगृह्य ॥
बभौ तदा भास्करसन्निकाशो रवेः समीपे प्रतिभास्कराभः ॥ ७१ ॥
स तेन शैलेन भृशं रराज शैलोपमो गन्धवहात्मजस्तु ॥
सहस्रधारेण सपावकेन चक्रेण खे विष्णुरिवार्पितेन ॥ ७२ ॥

कार्मुकं तत्स्थानमित्यर्थः । नाभिं पातालप्रवेशरन्ध्रं ॥ ६१—६२ ॥ ब्रह्मादिस्थानेषु रजतालयमिति परिगणितमपि जाम्बवदुपदिष्टप्रकारेण दर्शनाय पुनराह—कैलासमिति ॥ हिमवच्छिला नाम कैलासपार्श्वे कश्चिच्छिलाविशेषः । ऋषभं ऋषभाख्यमौषधिपर्वतं । काञ्चनशैलं पूर्वं मेरुमित्युक्तं । संदीप्तसर्वौषधिसंप्रदीप्तं संदीप्ताभिः रात्रौ ज्वलन्तीभिः सर्वाभिः ओषधीभिः तृणज्योतिर्भिः संप्रदीप्तं सम्यक्प्रकाशमानं । सर्वौषधिपर्वतेन्द्रं मृतसञ्जीवन्यादिसर्वौषधियुक्तपर्वतेन्द्रं । ददर्श ॥ ६३ ॥ वासवदूतः वायुः वासवादेशेन मेघप्रेरकत्वात् । अतएवाभिषेकसमये इन्द्रेण प्रेरितो हारं रामायोपाहरत् । विचयं अन्वेषणं ॥ ६४ ॥ अतीत्य अतीत्यापीत्यर्थः । अनेन श्रमरहितत्वमुक्तं ॥ ६५ ॥ ततः तस्य हनुमतः । अदर्शनं ॥ ६६ ॥ ताः ओषधीः ॥ ६७ ॥ राघवे कृतानुकम्पो नासीति यत् एतत् एवं सुविनिश्चितं यदि तर्हि आज्ञानमथो विकीर्णं पश्येति संबन्धः ॥ एतच्छ्लोकानन्तरमित्युक्त्वेत्यध्याहार्यं ॥ ६८ ॥ सनागं सगजं । उन्ममाथ उत्पाटयामास ॥ ६९—७० ॥ भास्काराध्वानं अन्तरिक्षं । भास्कराभशिखरग्रहणात् स्वयं भास्करसन्निकाशत्वाच्च सूर्यसमीपस्थः प्रतिसूर्य इव बभावित्यर्थः ॥ ७१ ॥ सहस्रधारेण । अर्पितेन

ति० हिमवच्छिलां भगवतोरुद्रस्यतपस्समाधिपीठं ॥ ६३ ॥ ति० वासवस्यमेघस्वरूपिणोदेवराजस्यदूतः प्रेरकः वायुरित्यर्थः ॥ स० वासवोदूतःप्रोक्तकारीयस्यसतस्य । सूनुः ॥६४॥ ति० योजनसहस्राणि सहस्रशब्दोऽनेकोपलक्षणं ॥ स० योजनसहस्राणि पञ्चाशत्सहस्रयोजनानि ॥ ६५ ॥ ति० रवेःसमीपइत्यनेन सूर्योदयोत्तरमेतदानयनमितिलभ्यते ॥ सं० रवेस्समीपेबभौ । अनेनसूर्योदयोत्तरंगमनानयनेइतिलभ्यते ॥ ७१ ॥ स० खे हृत्तात्मकेइन्द्रिये । अर्पितेन । खेआकाशेयथातथाबभावितिवा ॥७२॥

[पा०] १ क. विष्णुरिवोद्धतेन.

तं वानराः प्रेक्ष्य विनेदुरुच्चैः स तानपि प्रेक्ष्य मुदा ननाद ॥
तेषां समुद्धुष्टरवं निशम्य लङ्कालया भीमतरं विनेदुः ॥ ७३ ॥
ततो महात्मा निपपात तस्मिञ्शैलोत्तमे वानरसैन्यमध्ये ॥
हर्युत्तमेभ्यः शिरसाऽभिवाद्य विभीषणं तत्र स सस्वजे च ॥ ७४ ॥
तावप्युभौ मानुषराजपुत्रौ तं गन्धमाघ्राय महौषधीनाम् ॥
बभूवतुस्तत्र तदा विशल्यावुत्तस्थुरन्ये च हरिप्रवीराः ॥ ७५ ॥
सर्वे विशल्या विरुजः क्षणेन हरिप्रवीरा निहताश्च ये स्युः ॥
गन्धेन तासां प्रवरौषधीनां सुप्ता निशान्तेष्विव संप्रबुद्धाः ॥ ७६ ॥
यदाप्रभृति लङ्कायां युध्यन्ते कपिराक्षसाः ॥ तदाप्रभृति मानार्थमाज्ञया रावणस्य च ॥ ७७ ॥
ये हन्यन्ते रणे तत्र राक्षसाः कपिकुञ्जरैः ॥ हताहतास्तु क्षिप्यन्ते सर्व एव तु सागरे ॥ ७८ ॥
ततो हरिर्गन्धवहात्मजस्तु तमोषधीशैलमुदग्रवीर्यः ॥
निनाय वेगाद्धिमवन्तमेव पुनश्च रामेण समाजगाम ॥ ७९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुःसप्ततितमः सर्गः ॥ ७४ ॥

हस्तार्पितेन । सपावकेन अग्निज्वालावता । चक्रेण विष्णुरिव रराज ॥ ७२ ॥ तं वानरा इत्यनेन दूरादेव गन्धाघ्राणेन सर्वे जीविता इति गम्यते ॥ ७३ ॥ शैलोत्तमे त्रिकूटशिखरे ॥ ७४—७५ ॥ विशल्यकरण्या विशल्याः । सन्धानकरण्या विरुजः । ये पूर्वं निहतास्तेपि सुप्ता निशान्तेष्विव संप्रबुद्धाः । अनेन सावर्ण्यसिद्धिरप्युक्ता ॥ ७६ ॥ तर्हि निहता राक्षसाः किं न प्रबुद्धा इत्यत्राह—यदाप्रभृतीति ॥ मानार्थं हतानां राक्षसानां इयत्तया अपरिज्ञानार्थं । मृतशरीरसंख्याप्रतिपत्त्यर्थंवा । पूर्वयोजनायामर्थशब्दो निवृत्तिपरः । "अर्थोभिधेयरैवस्तुप्रयोजननिवृत्तिषु" इत्यमरः । परैः परिच्छिद्य ज्ञानं मा भूदित्येवमर्थमिति भावः । हताहताः मुमूर्षावस्थाः । किं पुनर्मृता इति भावः । "क्तेन नञ्विशिष्टेनानञ्" इति कर्मधारयः । यद्वा यदा यदा ये ये हताः तदा तदा ते ते क्षिप्ता इत्यर्थः ॥ ७७—७९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुःसप्ततितमःसर्गः ॥ ७४ ॥

स० विनेदुः । अनेन वातमात्रस्पर्शेनगात्रस्मृतिररोगताचकपीनांजातेइतिध्वन्यते । तेषां सच तेच ते । तेषां हनुमद्वानराणां ॥ ७३ ॥ ति० मानार्थं अर्थशब्दोनिवृत्तिवाची । शत्रूणांहतराक्षसेयत्ताज्ञानाभावार्थमित्यर्थः । तत्परिज्ञानेत्ववशिष्टबलस्याल्पीयस्त्वं ज्ञात्वावानरालङ्कांप्रविशेयुः । तेमाप्रवेक्ष्यन्निल्येतदर्थोऽयंरावणस्येश्वरेच्छयाविचारः ॥ ७७ ॥ स० सागरोपरिगिरिशिखरंपरिगृह्योत्प्लवनेतदन्तस्थानांरक्षसामनुज्जीवनंचनगन्धस्यान्तःप्रवेशासामर्थ्यात् । किंनामयादोभीरक्षसांभक्षितत्वात् । निलयनमात्रेणहनुमत्कृतपर्वतोत्पाटनतःएतदनिष्टकार्यसाधनेऽयमुत्तरत्रकिंकुर्यादितिभीतेर्वा । "भीषास्माद्वातःपवते" इत्यादेःरामविरुद्धकार्यकरणभीतेरिवात्मजप्रीतेर्वावायुर्ननिनायनीरनायकमध्येगन्धमितिवेतिज्ञेयम् । ओषधीनामर्थिनंज्ञात्वाऽदर्शनंगताइत्यनेनज्ञानिलोक्तेरनुसंधानादिकंसंभवतीतिसुघटोऽयमर्थः ॥ ७८ ॥ ति० ओषधीशैलमितिदीर्घआर्षः ॥ आश्विनकृष्णाष्टम्यामिदं ॥ स० ओषधीशैलः तद्वत्पर्वतः । तं । तत्रत्यएववेगात् हिमवन्तंस्वस्थानं । तं उत्कृत्तशैलभागं । निनाय प्रापयामास । "संस्थितएवतत्र" इत्यन्यत्रोक्तेः । पुनः प्रक्षेपानन्तरं रामेणसमाजगामसंगतोभूत् । प्रथमेन्द्रजिद्युद्धएवादृष्टतदृष्ट्यै 'इदमंभोगृहीत्वातु' इत्यारभ्य 'चकारनेत्रयोःशौचं' इतिगर्भीकृत्य "क्षणेनातीन्द्रियाण्येषांचक्षूंषि" इत्यनेन वनपर्वोक्ता 'अनेनदृष्टोऽहमितिस्मदुष्टः' इत्यन्यत्रारीत्यन्तरेणोक्ताचकथाऽनुक्तिर्नदोषायेतिनीतेरविरुद्धेतिचसंप्राह्येतिज्ञेयं । ओषधीतिदीर्घार्षंतालेखनंनिर्बीजं । अत्रैवबहुस्थलेषु ओषध्यइतिपूर्वमुक्तेः । लेखनंयदिकर्तव्यंतर्हितत्रैवकर्तव्यं । ईकारान्तत्वेनसमाधानंतत्रेवात्रापिसममितिनखरसम् ॥ ७९ ॥ इतिचतुस्सप्ततितमःसर्गः ॥ ७४ ॥

पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

सुग्रीवनियोगेन वानरैरात्रौलङ्कादहनम् ॥ १ ॥ ततोरावणाज्ञयाकुंभकर्णात्मजाभ्यांकुंभनिकुंभाभ्यां यूपाक्षादिभिः सेनयाचसह वानरान्प्रतिरणायनिर्याणम् ॥ २ ॥ वानरराक्षससैन्ययोर्महायुद्धम् ॥ ३ ॥

ततोऽब्रवीन्महातेजाः सुग्रीवो वानराधिपः ॥ अर्थ्यं विज्ञापयंश्चापि हनुमन्तमिदं वचः ॥ १ ॥
यतो हतः कुम्भकर्णः कुमाराश्च निषूदिताः ॥ नेदानीमुपनिर्हारं रावणो दातुमर्हति ॥ २ ॥
ये ये महाबलाः सन्ति लघवश्च प्लवङ्गमाः ॥ लङ्कामभ्युत्पतन्त्वाशु गृह्योल्काः प्लवगर्षभाः ॥
[हरयो हरिसंकाशाः प्रदग्धुं रावणालयम् ॥ ३ ॥]
ततोस्तंगत आदित्ये रौद्रे तस्मिन्निशामुखे ॥ लङ्कामभिमुखाः सोल्का जग्मुस्ते प्लवगर्षभाः ॥ ४ ॥
उल्काहस्तैर्हरिगणैः सर्वतः समभिद्रुताः ॥ आरक्षस्था विरूपाक्षाः सहसा विप्रदुद्रुवुः ॥ ५ ॥
गोपुराट्टप्रतोलीषु चर्यासु विविधासु च ॥
प्रासादेषु च संहृष्टाः ससृजुस्ते हुताशनम् ॥ तेषां गृहसहस्राणि ददाह हुतभुक्तदा ॥ ६ ॥
प्रासादाः पर्वताकाराः पतन्ति धरणीतले ॥ अगरुर्दह्यते तत्र वरं च हरिचन्दनम् ॥ ७ ॥
मौक्तिका मणयः स्निग्धा वज्रं चापि प्रवालकम् ॥
क्षौमं च दह्यते तत्र कौशेयं चापि शोभनम् ॥ ८ ॥

एवं हनुमदानीतौषधिपर्वतगन्धमात्रेण समागतप्राणेषु सर्वेषु विशल्येषु समुत्थितेषु सुग्रीवः स्वातिसन्धानजनितकोपातिरेकेण सद्यो निःशेषं लङ्कानिर्दहनं हनुमते नियमयति—तत इत्यादि ॥ अर्थ्यं अर्थादनपेतं । प्रयोजननियतं वाक्यं विज्ञापयन् । रामायेति शेषः । ततो हनुमन्तमब्रवीदिति योजना । यद्वा अर्थ्यं विज्ञापयन् विशेषेण ज्ञापयन् ॥ १ ॥ इदानींलङ्कादाहोपदेशे निमित्तमाह—यत इति ॥ उपनिर्हारं उपनिष्क्रमणं । युद्धाय निर्गमनमिति यावत् । हतपुत्रादित्वेनानुत्साहाद्रावणो न निर्गमिष्यतीति भावः । अत्र आग्रहेण प्रेतनिर्यापनरूढनिर्हारपदप्रयोगः । दातुं कर्तुमिति यावत् । धातूनामनेकार्थत्वात् । उपनिर्हारशब्दः उपनिष्क्रम्य युद्धपरो वा ॥ २ ॥ लघवः वेगवन्तः । उत्पतन्तु प्राकारमुत्प्लुत्य गच्छन्तु ॥ ३ ॥ ततइति । ननु पूर्वमुल्काहस्तौ तदा रात्रावित्युक्तं । अत्र आदित्यास्तमयसमय इति गम्यते अतो विरुद्धमिति चेन्नविरोधः । आदित्येस्तं गत इति प्रकाशाभावोक्तिः । निशामुख इति रात्रेः प्रथमयाम उच्यते । रौद्र इति विशेषणात् यामान्तत्वेन गाढान्धकारत्वमुच्यते । हनुमांश्च महाद्भुतवेगशालितया मुहूर्तमात्रेण प्रस्थायौषधिपर्वतमानीय तं पुनस्तत्र निक्षिप्यागतवानिति तस्य वेगातिशयश्च प्रतिपादितो भवति ॥ ४ ॥ आरक्षस्थाः गुल्मस्थाः नगररक्षिणो वा । आरक्षो दुर्गरक्षिणां स्थानं । तत्रस्था वा । " त्रिष्वारक्षस्तु रक्षणे " इति रत्नमाला । विरूपाक्षाः राक्षसाः ॥ ५ ॥ गोपुरं पुरद्वारं । अट्टन्ति हिंसन्ति योधा एषु स्थित्वेत्यट्टाः प्राकाराग्रस्थितगृहाणि । " स्यादट्टः क्षौममस्त्रियां " इत्यमरः । प्रतोल्यः वीथ्यः । चर्याः अवान्तरवीथ्यः । ते वानराः । ससृजुः क्षिप्तवन्तः । तेषां वानराणां संबन्धी हुतभुगित्यन्वयः ॥ ६ ॥ दहनकार्यं प्रपञ्चयति—प्रासादा इत्यादि ॥ तत्र प्रासादेषु । दह्यते अदह्यत । व्यत्ययेन भूतार्थे लट् । वरं सुगन्धं ॥ ७ ॥ मौक्तिका इत्यादिचतुःश्लोक्येकान्वया ॥ सर्वत्र अदह्यतेत्यस्य

कतक० तस्मादिदानीं उपनिर्हारं पुररक्षां । दातुं संपादयितुं । नार्हति ॥ **ति०** उपनिर्हारं युद्धावहारं । अस्माकंदातुंनार्हतीत्यर्थः । अनेनान्यदायुद्धावहारोजातइतिज्ञायतेइत्यन्ये ॥ **शि०** किंच उपनिर्हारं मृतपुत्रायुद्देश्यकजलं । दातुंनार्हति अवकाशोनदातव्यइतितात्पर्यम् ॥ २ ॥ **ति०** ततोस्तमिति । पूर्वदिवसापररात्रिशेषेउल्काहस्ताभ्यांहनुमद्विभीषणाभ्यांजांबवदन्वेषणं । ततस्तन्नियोगतउषसिपर्वताहरणायगमनं । अथाहरणं । पुनश्चतत्प्रापणंपुनरागमनमितित्रिंशद्घटिकामध्येसर्वं । ततःपुनःप्रदोषे हनुमदादीनांलङ्कादाहगमनमितिकतकादयः ॥४॥ **स०** आरक्षं रक्षणीयंद्वारादि । तत्रतिष्ठन्तीत्यारक्षस्थाः । "आरक्षंरक्षणीयेस्यात्" इतिविश्वः ॥ ५ ॥ **ति०** अट्टः गृहोपरितनंगृहं ॥ ६ ॥

आविकं विविधं चौर्णं काञ्चनं भाण्डमायुधम् ॥ नानाविकृतसंस्थानं वाजिभाण्डपरिच्छदौ ॥ ९ ॥
गजग्रैवेयकक्ष्याश्च रथभाण्डाश्च संस्कृताः ॥ तनुत्राणि च योधानां हस्त्यश्वानां च वर्म च ॥ १० ॥
खड्गा धनूंषि ज्या बाणास्तोमराङ्कुशशक्तयः ॥ रोमजं वालजं चर्म व्याघ्रजं चाण्डजं बहु ॥ ११ ॥
मुक्तामणिविचित्रांश्च प्रासादांश्च समन्ततः ॥ विविधानस्त्रसंयोगानग्निर्दहति तत्र वै ॥ १२ ॥
नानाविधान्गृहच्छन्दान्ददाह हुतभुक्तदा ॥ आवासान्राक्षसानां च सर्वेषां गृहगर्धिनाम् ॥ १३ ॥
हेमचित्रतनुत्राणां स्रग्दामाम्बरधारिणाम् ॥ शीधुपानचलाक्षाणां मदविह्वलगामिनाम् ॥ १४ ॥
कान्तालम्बितवस्त्राणां शत्रुसंजातमन्युनाम् ॥ गदाशूलासिहस्तानां खादतां पिबतामपि ॥ १५ ॥
शयनेषु महार्हेषु प्रसुप्तानां प्रियैः सह ॥ त्रस्तानां गच्छतां तूर्णं पुत्रानादाय सर्वतः ॥ १६ ॥
तेषां शतसहस्राणि तदा लङ्कानिवासिनाम् ॥ अदहत्पावकस्तत्र जज्वाल च पुनः पुनः ॥ १७ ॥

यथायथं विपरिणामेनान्वयः । मणयः उपात्तमौक्तिकादिव्यतिरिक्ताः । क्षौमकौशेययोरुपादानभेदात् भेदः । ' वाल्कं क्षौमादि । कौशेयं कृमिकोशोत्थं ' इत्युभयत्राप्यमरः । शोभनं शोभमानं । आविकं अविरोमनिर्मितं कम्बलं । और्णं मेषादिरोमनिर्मितं कम्बलं " ऊर्णा मेषादिलोम्नि स्यात् " इत्यमरः । भाण्डं उपकरणं । आभरणादि वा । " भाण्डं तु भूषायां नादे पात्राश्वभूषयोः । मार्जने कलशादौ च वणिङ्मूलधनेपि च " इति रत्नमाला । नानाविकृतसंस्थानं नानाविधविकारवद्विचित्रसन्निवेशमिति भूषणादिसर्वविशेषणं । वाजिभाण्डपरिच्छदौ अश्वालंकारपल्ययनादिपरिवहौ । भाण्डशब्देनैवाश्वाभरणसिद्धावपि कर्णावतंसादिवत् साहित्यबोधनार्थं वाजिपदं । गजानां ग्रैवेयकानि कण्ठभूषणानि । कक्ष्याः इभबन्धिन्यः । "ग्रैवेयकं कण्ठभूषा" । "कक्ष्या प्रकोष्ठे हर्म्यादेः काक्ष्यां मध्येभबन्धने " इत्युभयत्राप्यमरः । संस्कृताः उत्तेजिताः । योधानां तनुत्राणि वर्माणि । हस्त्यश्वानां वर्म अयःकांस्यादिनिर्मितं । रोमजं अविमेषादिरोमभिन्नरोमनिर्मितं कम्बलादि । वालजं चामरादि । चर्मसंस्तरणं खेटकं वा । व्याघ्रजं वैयाघ्रं नखवालादि । अण्डजं कस्तूरिकादिद्रव्यं ॥ ८–११ ॥ प्रासादाः पर्वताकारा इत्यत्र केवलप्रासादाः । अत्र मुक्तादिखचिताः । अस्त्रसंयोगान् संयुज्यन्त इति संयोगाः सङ्घाताः तान् । तत्र लङ्कायां ॥ १२ ॥ गृहच्छन्दान् स्वस्तिकादिगृहविन्यासान् । गृहगर्धिनां गृहस्थानां ॥ १३ ॥ हठोपनतत्वेन खेदातिशयं व्यञ्जयितुं तेषां व्यासङ्गं दर्शयति—हेमेत्यादिना ॥ हेमचित्रतनुत्राणां हेममयाद्भुतवर्मणां । " आलेख्याश्चर्ययोश्चित्रं " इत्यमरः । वर्मग्रहणव्यासक्तानामित्यर्थः । स्रग्दामानि पुष्पमालाः । दामशब्दो हारपरः । स्रग्दामशब्देनानेकसरनिर्मितपुष्पमालोच्यत इत्याचार्याः । अत्र सर्वत्रापि व्यासङ्ग एव तात्पर्यं । शीधुपानचलाक्षाणां मद्यपानलोलदृष्टीनां । अतएव मदविह्वलगामिनां मदेन मन्दगामिनां । कान्तालम्बितवस्त्राणां आलम्बितवस्त्रकान्तानां । रतिपराणामिति यावत् । शत्रुषु संजातमन्युनां संजातक्रोधानां । दीर्घाभाव आर्षः । खादतां मांसादिकं भक्षयतां । पिबतां मद्यपानं कुर्वतां । शीधुपानेत्यत्र मद्यपानकार्यमुक्तं । क्षीरादिकं पिबतामिति वा । महार्हेष्विति विशेषणेन सुप्यतिशयहेतुरुक्तः । प्रियैः दारैरिति विशेष्यं । तेषां एवं व्यासक्तानां । शतसहस्राणीति संख्यासंख्येययोरभेदेन निर्देशः । अनेकशतसहस्रराक्षसानित्यर्थः । पुनः पुनरित्यनेन तदुधि-

स० "भाण्डशब्दोलङ्कारमात्रवाची रथभाण्डेत्युक्तेः । अतएववाजिभाण्डेत्यत्र वाजिग्रहणंचरितार्थं । अश्वालङ्कारवाचित्वेतुतद्वैयर्थ्यं स्पष्टमेव । तत्त्वेपिकर्णावतंसादिवत्साहित्यबोधनार्थतत्रसः । रथभाण्डेत्यत्रतुलाक्षणिकइत्यन्ये " इतिनागोजिभट्टव्याख्यायाभिन्नानुपूर्वीमत्याञ्चपिवस्तुतोर्थेनैकतावत्यास्तीर्थव्याख्यायाञ्चपि " भाण्डंभूषणमात्रेपि—नादेपात्रेतुरङ्गाणांभूषणे " इतिविश्वः खानवलोकननिमित्ततांस्पष्टमाचष्टइतिननआयासोपेक्षितः ॥ १० ॥ स० प्रियैः प्रियाश्चप्रियाणिचप्रियाणि कान्तापत्यानि तैः । " नपुंसकमनपुंसकेन " इत्येकशेषः । पुत्रानादायगच्छतां निरग्निकस्थलंप्रति ॥ १६ ॥ लङ्कानिवासिनांशतसहस्राणिगृहाण्यदहत्

[पा०] १ क.—ट. भाण्डपरिच्छदं. २ ख. घ. ङ. झ. ट. नस्त्रसंघातान्. ३ ङ. झ. ट. गृहांश्चित्रान्.

सारवन्ति महार्हाणि गम्भीरगुणवन्ति च ॥ हेमचन्द्रार्धचन्द्राणि चन्द्रशालोन्नतानि च ॥ १८ ॥
रत्नचित्रगवाक्षाणि साधिष्ठानानि सर्वशः ॥ मणिविद्रुमचित्राणि स्पृशन्तीव दिवाकरम् ॥ १९ ॥
क्रौञ्चबर्हिणवीणानां भूषणानां च निस्वनैः ॥ नादितान्यचलाभानि वेश्मान्यग्निर्ददाह सः ॥ २० ॥
ज्वलनेन परीतानि तोरणानि चकाशिरे ॥ विद्युद्भिरिव नद्धानि मेघजालानि घर्मगे ॥ २१ ॥
ज्वलनेन [1]परीतानि निपेतुर्भवनान्यथ ॥ [2]वज्रिवज्रहतानीव शिखराणि महागिरेः ॥ २२ ॥
विमानेषु प्रसुप्ताश्च दह्यमाना वराङ्गनाः ॥ त्यक्ताभरणसर्वाङ्गा हा हेत्युच्चैर्विचुक्रुशुः ॥ २३ ॥
तानि निर्दह्यमानानि दूरतः प्रचकाशिरे ॥ हिमवच्छिखराणीव दीप्तौषधिवनानि च ॥ २४ ॥
हर्म्याग्रैर्दह्यमानैश्च ज्वालाप्रज्वलितैरपि ॥ रात्रौ सा दृश्यते लङ्का पुष्पितैरिव किंशुकैः ॥ २५ ॥
हस्त्यध्यक्षैर्गजैर्मुक्तैर्मुक्तैश्च तुरगैरपि ॥ बभूव लङ्का लोकान्ते भ्रान्तग्राह इवार्णवः ॥ २६ ॥
अश्वं मुक्तं गजो दृष्ट्वा क्वचिद्भीतोपसर्पति ॥ भीतो भीतं गजं दृष्ट्वा क्वचिदश्वो निवर्तते ॥ २७ ॥
लङ्कायां दह्यमानायां शुशुभे स महार्णवः ॥ छायासंसक्तसलिलो लोहितोद इवार्णवः ॥ २८ ॥
सा बभूव मुहूर्तेन हरिभिर्दीपिता पुरी ॥ लोकस्यास्य क्षये घोरे प्रदीप्तेव वसुन्धरा ॥ २९ ॥
नारीजनस्य धूमेन व्याप्तस्योच्चैर्विनेदुषः ॥ स्वनो ज्वलनतप्तस्य शुश्रुवे दशयोजनम् ॥ ३० ॥
प्रदग्धकायानपरान्[3]राक्षसान्निर्गतान्बहिः ॥ सहसाऽभ्युत्पतन्ति स्म हरयोथ युयुत्सवः ॥ ३१ ॥
उद्जुष्टं वानराणां च राक्षसानां च निस्वनः ॥ दिशो दश समुद्रं च पृथिवीं चान्वनादयत् ॥ ३२ ॥

रवसाल्नेहेनाधिकज्वालोच्यते ॥ १४—१७ ॥ रावणस्य पुनर्धननाशं व्यञ्जयितुमुत्तमगृहदहनं दर्शयति—सारवन्तीत्यादिना ॥ सारवन्ति श्रेष्ठधनवन्ति । " सारो बले स्थिरांशेर्थे पुमान्न्याये वरे त्रिषु " इति रत्नमाला । गम्भीराणि महातल्पवन्ति । गुणवन्ति सौन्दर्यवन्ति । हेमचन्द्रार्धचन्द्राणि हेमकृतानि चन्द्राकाराण्यर्धचन्द्राकाराणि चेत्यर्थः । चन्द्रशालाभिः शिरोगृहैः उन्नतानि । " चन्द्रशाला शिरोगृहं " इत्यमरः । साधिष्ठानानि शय्यासनादिसहितानि । स्पृशन्तीव दिवाकरं । सूर्यपथपर्यन्तोन्नतानीत्यर्थः । क्रौञ्चादयो लीलार्थं गृहेषु संवर्धिताः ॥ १८–२० ॥ घर्मोस्माद्गच्छतीति घर्मगः वर्षाकाल इत्यर्थः । घर्मगे निदाघे गच्छतीति शेष इत्यप्याहुः । घर्मशब्देन घर्मान्तो लक्ष्यते । तं गच्छति प्राप्नोतीति घर्मगः वर्षादिरित्यपरे । वस्तुतो घर्मगे ग्रीष्म इत्यर्थः । लङ्कायां दह्यमानायां सन्तापे च समन्ततः प्रसरति दह्यमानतोरणादीनि निदाघप्ररूढसविद्युन्मेघतुल्यानीत्यर्थः ॥ २१ ॥ ज्वलनेन परीतानि निपेतुरित्यस्य वज्रिवज्रहतानीवेत्युत्तरार्धं ॥ २२ ॥ त्यक्ताभरणसर्वाङ्गाः सर्वाङ्गाभरणान्यपि त्यक्त्वेत्यर्थः ॥ २३ ॥ तानि पूर्वश्लोके प्रस्तुतापाधिकरणतयोपात्तानि विमानानि । दीप्तौषधिवनानि प्रकाशिततृणज्योतिर्वनानि ॥ २४ ॥ ज्वालाप्रज्वलितैः ज्वालाविशिष्टैरित्यर्थः ॥ २५ ॥ हस्त्यध्यक्षैः हस्तिपकैः । मुक्तैः निगलान्मोचितैः । मुक्तैश्च तुरगैरपीत्यत्राप्यश्वाध्यक्षैरित्यध्याहार्यं । लोकान्ते प्रलये ॥ २६—२७ ॥ छायासंसक्तसलिलः प्रतिबिम्बसंक्रान्तजलः । लोहितोदकः । उदादेश आर्षः ॥ २८—२९ ॥ नारीति । नारीजनस्यातिसाहसिकत्वादशयोजनस्वनश्रवणं ॥ ३०—३१ ॥ उद्जुष्टं उद्घोषः । भावे क्तः ॥ ३२ ॥

॥ १७ ॥ स० गंभीरगुणवन्ति । गंभीरेतिभावप्रधाननिर्देशः । गांभीर्यमेवगुणस्तद्वन्ति ॥ १८ ॥ स० दिवाकरंस्पृशन्तीव अत्युच्चानीतियावत् । एतेनरात्रावपिदग्धसज्वालोपरिभागोगभस्तिमानिव । तदधःप्रदेशस्तत्स्पर्शीवेतिस्पृशन्तीत्युक्तिरितिवा ॥ १९ ॥ ति० विमानं सप्तभूमिप्रासादः ॥ २३ ॥ स० लोहितोदः लोहितंरक्तवर्णं उदंयस्यसः । उदकशब्दपर्यायोऽयमुदशब्दः । तेनासंज्ञात्वात्कथमुदादेशइतिशङ्कानवकाशः ॥ २८ ॥

[पा०] १ ङ. छ. झ. ञ. ट. परीतानिगृहाणिप्रचकाशिरे. २ ङ. छ. झ. ञ. दावाग्निदीप्तानियथाशिखराणि. ३ ख. प्रतप्तकायान्. छ. ज. विदग्धकायान्.

विशल्यौ तु महात्मानौ तावुभौ रामलक्ष्मणौ ॥ असंभ्रान्तौ जगृहतुस्तदोभे धनुषी वरे ॥ ३३ ॥
ततो विष्फारयानस्य रामस्य धनुरुत्तमम् ॥ बभूव तुमुलः शब्दो राक्षसानां भयावहः ॥ ३४ ॥
अशोभत तदा रामो धनुर्विष्फारयन्महत् ॥ भगवानिव संक्रुद्धो भवो वेदमयं धनुः ॥ ३५ ॥
उद्धुष्टं वानराणां च राक्षसानां च निस्स्वनम्॥ ज्याशब्दस्तावुभौ शब्दावति रामस्य शुश्रुवे ॥३६॥
वानरोद्धुष्टघोषश्च राक्षसानां च निस्स्वनः ॥ ज्याशब्दश्चापि रामस्य त्रयं व्याप दिशो दश ॥ ३७॥
तस्य कार्मुकमुक्तैश्च शरैस्तत्पुरगोपुरम् ॥ कैलासशृङ्गप्रतिमं विकीर्णमपतद्भुवि ॥ ३८ ॥
ततो रामशरान्दृष्ट्वा विमानेषु गृहेषु च ॥ सन्नाहो राक्षसेन्द्राणां तुमुलः समपद्यत ॥ ३९ ॥
तेषां सन्नह्यमानानां सिंहनादं च कुर्वताम् ॥ शर्वरी राक्षसेन्द्राणां रौद्रीव समपद्यत ॥ ४० ॥
आदिष्टा वानरेन्द्रास्तु सुग्रीवेण महात्मना ॥ आसन्नद्वारमासाद्य युध्यध्वं प्लवगर्षभाः ॥ ४१ ॥
यश्च वो वितथं कुर्यात्तत्रतत्र ह्युपस्थितः ॥ स हन्तव्यो हि संप्लुत्य राजशासनदूषकः ॥ ४२ ॥
तेषु वानरमुख्येषु दीप्तोल्कोज्ज्वलपाणिषु ॥ स्थितेषु द्वारमासाद्य रावणं मन्युराविशत् ॥ ४३ ॥
तस्य जृम्भितविक्षेपाद्व्यामिश्रा वै दिशो दश ॥ रूपवानिव रुद्रस्य मन्युर्गात्रेष्वदृश्यत ॥ ४४ ॥
स निकुम्भं च कुम्भं च कुम्भकर्णात्मजावुभौ ॥ प्रेषयामास संक्रुद्धो राक्षसैर्बहुभिः सह ॥ ४५ ॥
यूपाक्षः शोणिताक्षश्च प्रजङ्घः कम्पनस्तथा ॥ निर्ययुः कौम्भकर्णिभ्यां सह रावणशासनात् ॥ ४६ ॥
शशास चैव तान्सर्वान्राक्षसान्सुमहाबलान् ॥ नादयन्गच्छताऽत्रैव जयध्वं शीघ्रमेव च ॥ ४७ ॥
ततस्तु चोदितास्तेन राक्षसा ज्वलितायुधाः ॥ लङ्कायां निर्ययुर्वीराः प्रणदन्तः पुनः पुनः ॥ ४८ ॥
रक्षसां भूषणस्थाभिर्भाभिः स्वाभिश्च सर्वशः ॥ चक्रुस्ते सप्रभं व्योम हरयश्चाग्निभिः सह ॥ ४९ ॥

विशल्यौ निर्गलितशरीरनिमग्नशरफलकौ । तदोभे धनुषी वरे इति पाठः ॥ ३३ ॥ विष्फारयानस्य ध्वनयतः । " विष्फारो धनुषः स्वानः " इत्यमरः । " स्फुरतिस्फुलत्योर्निर्निविभ्यः " इति षत्वं । मुगभाव आर्षः ॥ ३४ ॥ वेदमयं धनुः वेदोक्तलक्षणं धनुः । " कृत्तिवासाः पिनाकी " इति श्रुत्या प्रतिपादितमहिमेति वाऽर्थः ॥ ३५ ॥ रामस्य ज्याशब्दः वानराणामुद्धुष्टं राक्षसानां निस्स्वनं च तावुभावतीत्य शुश्रुवे ॥ ३६ ॥ वानरोद्धुष्टघोषः वानरोत्पादितघोषः ॥ ३७—३८ ॥ तुमुलः अधिकः ॥ ३९ ॥ सन्नह्यमानानां कक्ष्याबन्धनादियुद्धसन्नाहं कुर्वतां । रौद्री प्रलयरात्रिः ॥ ४० ॥ आदिष्टा इत्यादिश्लोकद्वयमेकान्वयं ॥ अन्ते इतिकरणं बोध्यं । व इति निर्धारणे षष्ठी । वितथं कुर्यात् । मच्छासनमितिशेषः । आसन्नद्वारं रावणान्तःपुरासन्नमध्यकक्ष्याद्वारं । तत्रतत्र युद्धभूमौ उपस्थितः ॥ ४१—४३ ॥ जृम्भितविक्षेपात् गात्रविनामविस्तारात् । व्यामिश्राः व्याकुलाः । अभवन्निति शेषः । दिशः दिक्स्थिताः । रुद्रस्य कालाग्निरुद्रस्य गात्रे योरूपवान् मन्युः स इव रावणोऽलक्ष्यत ॥ ४४—४६ ॥ अत्रैव अस्मिन्गृह एवारभ्य । सिंहनादं नादयन् नादयन्तः कुर्वन्तः । गच्छत । नादयन्नित्यत्र " व्यत्ययो बहुलं " इति बहुवचनविषये एकवचनं ॥ ४७ ॥ ज्वलितेति । आयुधानां ज्वलितत्वं युद्धयात्रासु शिक्षाविशेषप्रदर्शनात् । लङ्कायां इति पञ्चमी ॥ ४८ ॥ स्वाभिः स्वासाधारणीभिः । रक्षसां भूषणस्थाभिः भाभिश्च ।

स० वेदमयं वेदात्मकं तदभिमान्यभिमानिकं । भारतेकर्णपर्वान्तर्गतशल्यदुर्योधनसंवादे " संवत्सरोधनुस्तद्वै " " तस्यसंवत्सरोधनुः " इत्युक्तिस्त्वेकस्यानेकेऽभिमानिनोभवन्तीतिनविरुणद्धि ॥ ३५ ॥ स० वानरोद्धुष्टशब्दः वानरकृतशब्दजशब्दः । राक्षसानांचनिस्स्वनः रामस्यज्याशब्दश्चेत्येतत्त्रितयं दशदिशोव्याप व्यापत् । एतच्छब्दद्वयाधरीकरणंचद्वयोस्तस्यचसमव्यापनाभावेऽसंभावितं । सतितस्मिन्नौत्कट्यानौत्कट्येविदितेभवतइत्यतिक्रमणव्यापनेसंभवतइतिनपूर्वोत्तरविरोधः ॥ ३७ ॥

[पा०] १ ठ. वानरोद्धुष्टशब्दश्च. २ क. ख. ङ. ज.—ट. राक्षसागच्छतावैवसिंहनादंचनादयन्.

तत्र ताराधिपस्याभा ताराणां च तथैव च ॥ तयोराभरणस्था च बलयोर्द्यामभासयन् ॥ ५० ॥
चन्द्राभा भूषणाभा च गृहाणां ज्वलतां च भा ॥ हरिराक्षससैन्यानि भ्राजयामास सर्वतः ॥ ५१ ॥
तत्र चोर्ध्वं प्रदीप्तानां गृहाणां सागरः पुनः ॥ भाभिः संसक्तपातालश्चलोर्मिः शुशुभेऽधिकम् ॥५२॥
पताकाध्वजसंसक्तमुत्तमासिपरश्वधम् ॥ भीमाश्वरथमातङ्गं नानापत्तिसमाकुलम् ॥ ५३ ॥
दीप्तशूलगदाखड्गप्रासतोमरकार्मुकम् ॥ तद्राक्षसबलं घोरं भीमविक्रमपौरुषम् ॥ ५४ ॥
ददृशे ज्वलितप्रासं किङ्किणीशतनादितम् ॥ हेमजालाचितभुजं व्यामिश्रितपरश्वधम् ॥ ५५ ॥
व्याघूर्णितमहाशस्त्रं बाणसंसक्तकार्मुकम् ॥ गन्धमाल्यमधूत्सेकसंमोदितमहानिलम् ॥
घोरं शूरजनाकीर्णं महाम्बुधरनिस्स्वनम् ॥ ५६ ॥
तदृष्ट्वा बलमायान्तं राक्षसानां सुदारुणम् ॥ संचचाल प्लवङ्गानां बलमुच्चैर्ननाद च ॥ ५७ ॥
जवेनाप्लुत्य च पुनस्तद्बलं रक्षसां महत् ॥ अभ्ययात्प्रत्यरिबलं पतङ्गा इव पावकम् ॥ ५८ ॥
तेषां भुजपरामर्शव्यामृष्टपरिघाशनि ॥ राक्षसानां बलं श्रेष्ठं भूयस्तरमशोभत ॥ ५९ ॥
तत्रोन्मत्ता इवोत्पेतुर्हरयोथ युयुत्सवः ॥ तरुशैलैरभिघ्नन्तो मुष्टिभिश्च निशाचरान् ॥ ६० ॥
तथैवापततां तेषां कपीनामसिभिः शितैः ॥ शिरांसि सहसा जह्रू राक्षसा भीमदर्शनाः ॥ ६१ ॥
दशनैर्हृतकर्णाश्च मुष्टिनिष्कीर्णमस्तकाः ॥ शिलाप्रहारभग्नाङ्गा विचेरुस्तत्र राक्षसाः ॥ ६२ ॥
तथैवाप्यपरे तेषां कपीनामभिलक्षिताः ॥ प्रवीरानभितो जघ्नू राक्षसानां तरस्विनाम् ॥ ६३ ॥
[अभिपेतुर्महाकायाः प्रतियुक्ता महाबलाः ॥ राक्षसा वानरान्रोषादसिबाणगदाधराः ॥ ६४ ॥

व्योम सेनामध्याकाशं ॥ ४९ ॥ तदानीं चन्द्रोदयात्पुनः प्रकाशातिशयमाह—तत्रेति ॥ तत्र तदानीं । ताराधिपस्याभा ताराणां चाभा तयोर्बलयोराभरणस्था भा च द्यां आकाशं । अभासयन् ॥ ५० ॥ दह्यमानलङ्कागृहप्रकाशैः पुनरपि स प्रकाशोवर्धतेत्याह—चन्द्रेति ॥ ५१ ॥ संसक्तपातालः पातालपर्यन्तं संसक्तः ॥ ५२ ॥ पताकेत्यादिसार्धचतुःश्लोक्येकान्वया ॥ चलत्पटा पताका । मत्स्यादिचिह्नितं ध्वजं । उत्तमासिपरश्वधं । परश्वधोसिरूपः कुठाररूपश्चास्ति । तत्रासिरूपपरश्वधोसिपरश्वधः । तेन वक्ष्यमाणयोः खड्गपरश्वधयोर्नपौनरुक्त्यं । ज्वलितप्रासमित्यत्र प्रासशब्दः क्षेप्नव्ये ह्रस्वकुन्ते वर्तते । तेन तस्यापि न पौनरुक्त्यं । पत्तयः पदातयः । तेषां नानात्वं वेषायुधादिभेदात् । प्रासस्य ज्वलितत्वं युद्धागमनसमये शिक्षाविशेषप्रदर्शकक्रियासंबन्धात् । किङ्किणीशतनादितं रथगजादिकिङ्किणीशतनादितं । हेमजालाचितभुजं हेमाभरणजालाबद्धभुजं । व्यावेष्टितपरश्वधं मदेन चालितपरश्वधं । शस्त्रं उक्तव्यतिरिक्तायुधं । बाणसंसक्तकार्मुकमिति । दीप्तशूलगदाखड्गप्रासतोमरकार्मुकमित्यत्र यत्पूर्वोक्तं कार्मुकं तद्भङ्गे पुनरादातुं पृष्ठे बद्धमपरमिदं कार्मुकमिति ज्ञेयम् । गन्धेति । गन्धः चन्दनादिः गन्धमाल्याभ्यां मधूत्सेकेन वीरपाणरूपमधुसेवनेन च संमोदितमहानिलं वासितमहावातं ॥ ५३—५६ ॥ आयान्तमिति पुंल्लिङ्गमार्षं । संचचाल अभिमुखं जगाम ॥ ५७—५८ ॥ तेषामिति ॥ भुजपरामर्शव्यामृष्टपरिघाशनि सन्ततभुजस्पर्शेन उत्तेजितपरिघवज्रं ॥ ५९–६२ ॥ कपीनां अभिलक्षिताः प्रसिद्धाः । कपिप्रवरा इत्यर्थः ॥ ६३–६४ ॥ कपीनां

स० ग्रहाणां नवानां । " उक्तश्लोकस्यैवव्याख्यानंचन्द्राभेत्यादि " इति नागोजिभट्टव्याख्यानं पूर्वश्लोकेतारधिपतारातद्बलद्वयभाकर्तृकाकाशकर्मकभासनोक्तेः अत्रचन्द्रभूषणग्रहभाकर्तृकहरिराक्षससैन्यकर्मकभासनोक्तेरसंगतम् ॥ ५१ ॥ इतिपञ्चसप्ततितमः सर्गः ॥ ७५ ॥

[पा०] १ झ. ञ. ट. ग्रहाणां. २ घ. तत्रचन्द्रप्रदीप्तानां. ज. त्रिकूटोर्ध्वंप्रदीप्तानां. ङ. झ. ञ. ट. तत्रचार्धप्रदीप्तानां. ३ ङ. झ. ट. संसक्तसलिलः. ४ क. ख. ङ. छ. झ. ञ. ट. भूयःपरमशोभत. ५ झ. ञ. ट. भीमविक्रमाः. ६ ख. ङ. छ. झ. ञ. ट. मुष्टिभिर्भिन्नमस्तकाः. ७ अयंश्लोकः क. ख. पाठयोर्दृश्यते.

तथैवाप्यपरे तेषां कपीनामसिभिः शितैः ॥ हरिवीरान्निजघ्नुश्च घोररूपा निशाचराः ॥ ६५ ॥
घ्नन्तमन्यं जघानान्यः पातयन्तमपातयत् ॥ गर्हमाणं जगर्हेऽन्यो दशन्तमपरोऽदशत् ॥ ६६ ॥
देहीत्यन्यो ददात्यन्यो ददामीत्यपरः पुनः ॥ किं क्लेशयसि तिष्ठेति तत्रान्योन्यं बभाषिरे ॥ ६७ ॥
विप्रलम्बितवस्त्रं च विमुक्तकवचायुधम् ॥ समुद्यतमहाप्रासं यष्टिशूलासिसंकुलम् ॥
प्रावर्तत महारौद्रं युद्धं वानररक्षसाम् ॥ ६८ ॥
वानरान्दश सप्तेति राक्षसा जघ्नुराहवे ॥ राक्षसान्दश सप्तेति वानराश्चाभ्यपातयन् ॥ ६९ ॥
विस्रस्तकेशवसनं विध्वस्तकवचध्वजम् ॥ बलं राक्षसमालम्ब्य वानराः पर्यवारयन् ॥ ७० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

षट्सप्ततितमः सर्गः ॥ ७६ ॥

अङ्गदेन कंपनप्रजङ्घयोर्वधः ॥ १ ॥ मैन्दद्विविदाभ्यां यूपाक्षशोणिताक्षयोर्वधः ॥ २ ॥ सुग्रीवेणकुंभवधः ॥ ३ ॥

प्रवृत्ते संकुले तस्मिन्घोरे वीरजनक्षये ॥ अङ्गदः कम्पनं वीरमाससाद रणोत्सुकः ॥ १ ॥
आहूय सोऽङ्गदं कोपात्ताडयामास वेगितः ॥ गदया कम्पनः पूर्वं स चचाल भृशाहतः ॥ २ ॥
स संज्ञां प्राप्य तेजस्वी चिक्षेप शिखरं गिरेः ॥ अर्दितश्च प्रहारेण कम्पनः पतितो भुवि ॥ ३ ॥
ततस्तु कम्पनं दृष्ट्वा शोणिताक्षो हतं रणे ॥ रथेनाभ्यपतत्क्षिप्रं तत्राङ्गदमभीतवत् ॥ ४ ॥
सोऽङ्गदं निशितैर्बाणैस्तदा विव्याध वेगितः ॥ शरीरदारणैस्तीक्ष्णैः कालाग्निसमविग्रहैः ॥ ५ ॥
क्षुरक्षुरप्रैर्नाराचैर्वत्सदन्तैः शिलीमुखैः ॥ कर्णिशल्यविपाठैश्च बहुभिर्निशितैः शरैः ॥ ६ ॥
अङ्गदः प्रतिविद्धाङ्गो वालिपुत्रः प्रतापवान् ॥ धनुरग्र्यं रथं बाणान्ममर्द तरसा बली ॥ ७ ॥

मध्ये हरिवीरान् वीरहरीन् । निजघ्नुः ॥ ६५–६६ ॥ देहीति । अन्यो वीरः प्रहरणमत्र देहीति बभाषे । अन्यो ददातीति बभाषे । अपरः पुनः ददामीति बभाषे । आत्मानं आयासेन किं क्लेशयसि तिष्ठेत्यन्यो बभाषे । तत्रैवमन्योन्यं बभाषिरे ॥ ६७ ॥ विप्रलम्बितवस्त्रमित्यादि सर्वं क्रियाविशेषणं ॥ ६८ ॥ वानरान् दश सप्तेति । राक्षसाः दश सप्तेत्यनेन प्रकारेण वानरान् जघ्नुः । वानराश्च दश सप्तेत्यनेन प्रकारेण राक्षसानभ्यपातयन्निति संबन्धः ॥ ६९ ॥ आलम्ब्य वेगेन धावमानं प्रतिष्टभ्य । ततः परितोऽवारयन् ॥ ७० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

अथ कुम्भवधः षट्सप्ततितमे—प्रवृत्त इत्यादि ॥ संकुले निरन्तरे ॥ १ ॥ आहूय स्पर्धयित्वा । "ह्वेञ् स्पर्धायां शब्दे च" इति धातोर्ल्यप् । वेगितः संजातवेगः । तारकादित्वादितच् । सः अङ्गदः ॥ २ ॥ चिक्षेप कम्पनोरसीति शेषः ॥ ३ ॥ कम्पनं हतमित्यन्वयः । तत्र कम्पनयुद्धस्थाने । अभीतवत् । अभीतमिति क्रियाविशेषणं ॥ ४ ॥ कालाग्निसमविग्रहैः कालाग्नितुल्याकारैरित्यर्थः ॥ ५ ॥ क्षुरेत्यादि । क्षुरः नापितशस्त्राकारमुखः । क्षुरप्रः अर्धचन्द्राकृतिः । नाराचः शल्यकः । वत्सदन्तैः वत्सदन्ताकारमुखैः । शिलीमुखैः कङ्कपत्राकारमुखैः । उभयपार्श्वकृतकर्णः कर्णी । अर्धनाराचः शल्यः । विपाठः करवीरपत्राग्र-

---

ति० अभीतवत् अभीताई ॥ ४ ॥

[पा०] १ झ. विप्रलंभितशस्त्रंच. २ क. घ. ङ. छ. झ. ञ. ट. मुष्टिशूलासिकुन्तलं. ३ झ. विप्रलंभितवस्त्रंच. ४ ख. ज. युद्धेतस्मिन्वीर. ५ ख. रथेनाभ्यद्रवत्. ६ क. ग.—ञ. धनुरुग्रं.

शोणिताक्षस्ततः क्षिप्रमसिचर्म समाददे ॥ उत्पपात दिवं[1] क्रुद्धो वेगवानविचारयन् ॥ ८ ॥
तं क्षिप्रतरमाप्लुत्य परामृश्याङ्गदो बली ॥ करेण तस्य तं खड्गं समाच्छिद्य ननाद च ॥ ९ ॥
तस्यांसफलके खड्गं निजघान ततोऽङ्गदः ॥ यज्ञोपवीतवच्चैनं चिच्छेद कपिकुञ्जरः ॥ १० ॥
तं प्रगृह्य महाखड्गं विनद्य च पुनः पुनः ॥ वालिपुत्रोऽभिदुद्राव रणशीर्षे[2]ऽपरानरीन् ॥ ११ ॥
आयसीं[3] तु गदां वीरः प्रगृह्य कनकाङ्गदः ॥ शोणिताक्षः समाविध्य तमेवानु पपात ह ॥ १२ ॥
प्रजङ्घसहितो वीरो यूपाक्षस्तु ततो बली ॥ रथेनाभियया[4]वौ क्रुद्धो वालिपुत्रं महाबलम् ॥ १३ ॥
[प्रजङ्घस्तु महावीरो यूपाक्षसहितो बली ॥ गदयाऽभिययौ क्रुद्धो वालिपुत्रं महाबलम्] ॥ १४ ॥
तयोर्मध्ये कपिश्रेष्ठः शोणिताक्षप्रजङ्घयोः ॥ विशाखयोर्मध्यगतः पूर्णचन्द्र इवाभवत् ॥ १५ ॥
अङ्गदं परिरक्षन्तौ मैन्दो द्विविद एव च ॥ तस्य तस्थतुरभ्याशे परस्परदिदृक्षया[7] ॥ १६ ॥
अभिपेतुर्महाकायाः प्रतियत्ता[8] महाबलाः ॥ राक्षसा वानरान्रोषादसिचर्मगदाधराः ॥ १७ ॥
त्रयाणां वानरेन्द्राणां त्रिभी राक्षसपुङ्गवैः ॥ संसक्तानां महद्युद्धमभवद्रोमहर्षणम् ॥ १८ ॥
ते तु वृक्षान्समादाय संप्रचिक्षिपुराहवे ॥ खड्गेन प्रतिचिच्छेद तान्प्रजङ्घो महाबलः ॥ १९ ॥
रथांनश्वान्द्रुमै[10]ः शैलैस्ते प्रचिक्षिपुराहवे ॥ शरौघैः प्रतिचिच्छेद तान्यूपाक्षो निशा[11]चरः ॥ २० ॥
सृष्टान्द्विविदमैन्दाभ्यां द्रुमानुत्पाट्य वीर्यवान् ॥ बभञ्ज गदया मध्ये शोणिताक्षः प्रतापवान् ॥ २१ ॥
उद्यम्य विपुलं खड्गं परमर्म[12]निकृन्तनम् ॥ प्रजङ्घो वालिपुत्राय अभिदुद्राव वेगितः ॥ २२ ॥
तमभ्याशगतं दृष्ट्वा वानरेन्द्रो महाबलः ॥ आजघानाश्वकर्णेन द्रुमेणातिबलस्तदा ॥ २३ ॥
बाहुं चास्य सनिस्त्रिंशमाजघान स मुष्टिना ॥ वालिपुत्रस्य घातेन स पपात क्षितावसिः ॥ २४ ॥
तं दृष्ट्वा पतितं भूमौ खड्ग[13]मुत्पलसन्निभम् ॥ मुष्टिं संवर्तयामास वज्रकल्पं महाबलः ॥ २५ ॥
ललाटे स महावीर्यमङ्गदं वानरर्षभम् ॥ आजघान महातेजाः स मुहूर्तं चचाल ह ॥ २६ ॥
स संज्ञां प्राप्य तेजस्वी वालिपुत्रः प्रतापवान् ॥ प्रजङ्घस्य शिरः काया[14]त्खड्गेनापातयत्क्षितौ ॥ २७ ॥
स यूपाक्षोश्रुपूर्णाक्षः पितृव्ये निहते रणे ॥ अवरुह्य रथात्क्षिप्रं क्षीणेषुः खड्गमाददे ॥ २८ ॥

सदृशः ॥ ६—७ ॥ असिश्चर्म चेत्यसिचर्म । एकवद्भावः । उत्पपात । रथादिति शेषः ॥ ८ ॥ परामृश्य प्रगृह्य ॥ ९ ॥ चिच्छेद । छिन्नस्तु न मृतः ॥ १० ॥ अपरान् प्रजङ्घादीन् ॥ ११ ॥ तमेव अङ्गदमेव ॥ १२—१४ ॥ तयोरिति । यूपाक्षस्य दूरस्थत्वादनुक्तिः ॥ १५ ॥ परिरक्षन्तौ । मातुलत्वादिति भावः । परस्परदिदृक्षया । स्वानुरूपप्रतिभटराक्षसजिज्ञासयेत्यर्थः ॥ १६ ॥ प्रतियत्ताः प्रतियत्नवन्तः । गुणाधानं प्रतियत्नः । आरोपितवीर्या इत्यर्थः ॥ १७—१९ ॥ रथानश्वान् । प्रतीति शेषः ॥ २० ॥ उत्पाट्य सृष्टानित्यन्वयः ॥ २१ ॥ वालिपुत्राय वालिपुत्रं हन्तुं । " क्रियार्थोपपदस्य च कर्मणि स्थानिनः " इति चतुर्थी ॥ २२ ॥ वानरेन्द्रः अङ्गदः ॥ २३ ॥ सनिस्त्रिंशं सखड्गं ॥ २४ ॥ उत्पलसन्निभं । नीलो-

[पा०] १ ङ. ञ. ट. तदाक्रुद्धो. क. ग. छ. ज. दिवंक्षिप्रं. घ. ततःक्षिप्रं. २ ञ. रणशीर्षे. ३ आयसींतुगदांवीरः, प्रजङ्घसहितोवीरो, इत्यनयोःश्लोकयोःपौर्वापर्ये ङ. च. छ. ञ. ञ. ट. पाठेषुदृश्यते. ४ क. घ. ङ. ज.—ट. समाश्वस्य. ५ अयंश्लोकः ञ. पाठेदृश्यते. ६ ङ. ज. ञ. ट. इवाबभौ. ७ क. ग. परस्परजिगीषया. ख. घ. परस्परजिघृक्षया. ८ क. घ. वानरेन्द्रांस्तानसि. ९ ग. ङ. च. ञ. ञ. ट. बाणगदाधराः. १० ङ. ञ. ट. रथान्सर्वान्द्रुमाञ्शैलांस्ते. ११ ख.—च. ञ. ट. महाबलः. १२ ख. घ. ङ. च. ञ. ञ. ट. मर्मविदारणं. क. ग. ज. मर्मविकर्तनं. १३ क.—ट. खड्गंमुसलसंनिभं. १४ ख. कोपाद्दारयामासवीर्यवान्. च. छ. ञ. कायाद्दारयामासवीर्यवान्. ग. घ. कायात्पातयामासवीर्यवान्. ङ. ञ. ट. कायात्पातयामासमुष्टिना. क. कायात्ताम्रश्मश्रुजहारह.

तमापतन्तं संप्रेक्ष्य यूपाक्षं द्विविदस्त्वरन् ॥ आजघानोरसि क्रुद्धो जग्राह[1] च बलाद्बली ॥ २९ ॥
गृहीतं भ्रातरं दृष्ट्वा शोणिताक्षो महाबलः ॥ आजघान गदाग्रेण वक्षसि द्विविदं ततः ॥ ३० ॥
स गदाभिहतस्तेन चचाल च महाबलः ॥ उद्यतां च पुनस्तस्य जहार द्विविदो गदाम् ॥
[तया च गदया क्षिप्रं तयोरुरसि ताडयत्][2] ॥ ३१ ॥
एतस्मिन्नन्तरे वीरो मैन्दो वानरयूथपः ॥ यूपाक्षं ताडयामास तलेनोरसि वीर्यवान् ॥ ३२ ॥
[एतस्मिन्नन्तरे मैन्दो द्विविदाभ्याशमागमत् ॥][3] तौ शोणिताक्षयूपाक्षौ प्लवङ्गाभ्यां तरस्विनौ ॥
चक्रतुः समरे तीव्रमाकर्षोत्पाटनं भृशम् ॥ ३३ ॥
द्विविदः शोणिताक्षं तु विददार नखैर्मुखे ॥ निष्पिपेष च वेगेन क्षितावाविध्य वीर्यवान् ॥ ३४ ॥
यूपाक्षमपि संक्रुद्धो मैन्दो वानरयूथपः ॥ पीडयामास बाहुभ्यां स पपात हतः क्षितौ ॥ ३५ ॥
हतप्रवीरा व्यथिता राक्षसेन्द्रचमूस्तदा ॥ जगामाभिमुखी सा तु कुम्भकर्णसुतो यतः ॥ ३६ ॥
आपतन्तीं[4] च वेगेन कुम्भस्तां सान्त्वयच्चमूम् ॥ ३७ ॥
अथोत्कृष्टं[5] महावीर्यैर्लब्धलक्षैः प्लवङ्गमैः ॥ निपातितमहावीरां दृष्ट्वा रक्षश्चमूं ततः ॥
कुम्भः प्रचक्रे तेजस्वी रणे कर्म सुदुष्करम् ॥ ३८ ॥
स धनुर्धन्विनां श्रेष्ठः प्रगृह्य सुसमाहितः ॥ मुमोचाशीविषप्रख्याञ्शरान्देहविदारणान् ॥ ३९ ॥
तस्य तच्छुशुभे भूयः सशरं धनुरुत्तमम् ॥ विद्युदैरावतार्चिष्मद्वितीयेन्द्रधनुर्यथा ॥ ४० ॥
आकर्णाकृष्टमुक्तेन जघान द्विविदं तदा ॥ तेन हाटकपुङ्खेन पत्त्रिणा पत्त्रवाससा ॥ ४१ ॥
सहसाऽभिहतस्तेन विप्रमुक्तपदः स्फुरन् ॥ निपपाताद्रिकूटाभो विह्वलः प्लवगोत्तमः ॥ ४२ ॥
मैन्दस्तु भ्रातरं दृष्ट्वा भग्नं तत्र महाहवे ॥ अभिदुद्राव वेगेन प्रगृह्य महतीं शिलाम् ॥ ४३ ॥
तां शिलां तु प्रचिक्षेप राक्षसाय महाबलः ॥ विभेद तां शिलां कुम्भः प्रसन्नैः पञ्चभिः शरैः ॥४४॥
सन्धाय चान्यं सुमुखं शरमाशीविषोपमम् ॥ आजघान महातेजा वक्षसि द्विविदाग्रजम् ॥ ४५ ॥
स तु तेन प्रहारेण मैन्दो वानरयूथपः ॥ मर्मण्यभिहतस्तेन पपात भुवि मूर्छितः ॥ ४६ ॥
अङ्गदो मातुलौ दृष्ट्वा पतितौ[6] तु महाबलौ ॥ अभिदुद्राव वेगेन कुम्भमुद्यतकार्मुकम् ॥ ४७ ॥

त्पलसमानकान्तिमित्यर्थः । महाबलः प्रजङ्घः ॥२५—३२ ॥ प्लवङ्गाभ्यां मैन्दद्विविदाभ्यां । आकर्षोत्पाटनं आकर्षणताडने । अन्योन्यमिति शेषः ॥ ३३—३६ ॥ आपतन्तीमित्यर्धं ॥ सान्त्वयत् असान्त्वयत् ॥ ३७ ॥ अथेत्यादिसार्धश्लोक एकान्वयः ॥ लब्धलक्षैः अप्रतिद्वन्द्विभिः ॥ ३८—३९ ॥ विद्युदैरावताभ्यां अर्चिष्मत् । ज्यास्थानीया विद्युत् । बाणस्थानीयमैरावतं । ऐरावतं नाम दीर्घेन्द्रधनुः । " इन्द्रायुधंशक्रधनुस्तद्दीर्घमृजुरोहितं । ऐरावतं च " इति वैजयन्ती । एवंभूतं द्वितीयमिन्द्रधनुरिव स्थितं । ऐरावतादिसंयोग उत्पातकाले भवति । अभूतोपमावा ॥ ४० ॥ हाटकं स्वर्णं । पत्त्रिणा बाणेन । पत्त्रवाससा वासःस्थानीयकङ्कपत्त्रेण ॥ ४१ ॥ विप्रमुक्तपदः शिथिलपदविन्यासः । स्फुरन् चलन् । विह्वलः

ती० उत्कृष्टंरक्षः कुंभः । महावीर्यैः तेजस्विभिः । लब्धलक्षैरप्रतिद्वन्द्वैः । प्लवङ्गमैर्निपातितमहावीरांचमूंदृष्ट्वा रणेदुष्करंकर्मचकइति संबन्धः ॥ ३८ ॥ ति० तस्य कुंभस्य । तत्सशरंधनुः विद्युदैरावतसंबन्धतोर्चिष्मत् भासमानं द्वितीयेन्द्रधनुर्यथा परमिन्द्रधनुरिव भूयःशुशुभे । विद्युच्छरस्थानीया । ऐरावतोऽभ्रमातङ्गः । तस्येन्द्रधनुषासंबन्धात् ॥ ४० ॥

[पा०] १ ग. जग्राहबलवान्बली. २ इदमर्धं क. ख. च. छ. पाठेषुदृश्यते. ३ अयंश्लोकः ङ. झ. ट. पाठेषुनदृश्यते. ४ इदमर्धं ङ. झ. ट. पाठेषुदृश्यते. ५ ख. विद्रुतान्राक्षसान्दृष्ट्वाकुंभः. ६ ग. ङ. झ. ट. मथितौतु. ख. छ. ञ. व्यथितौतुमहाहवे.

तमापतन्तं विव्याध कुम्भः पञ्चभिरायसैः ॥ त्रिभिश्चान्यैः शितैर्बाणैर्मातङ्गमिव तोमरैः ॥ ४८ ॥
सोऽङ्गदं विविधैर्बाणैः कुम्भो विव्याध वीर्यवान् ॥ अकुण्ठधारैर्निशितैस्तीक्ष्णैः कनकभूषणैः ॥ ४९ ॥
अङ्गदः प्रतिविद्धाङ्गो वालिपुत्रो न कम्पते ॥ शिलापादपवर्षाणि तस्य मूर्ध्नि ववर्ष ह ॥ ५० ॥
स प्रचिच्छेद तान्सर्वान्बिभेद च पुनः शिलाः ॥ कुम्भकर्णात्मजः श्रीमान्वालिपुत्रसमीरितान् ॥५१॥
आपतन्तं च संप्रेक्ष्य कुम्भो वानरयूथपम् ॥ भ्रुवोर्विव्याध बाणाभ्यामुल्काभ्यामिव कुञ्जरम् ॥
तस्य सुस्राव रुधिरं पिहिते चास्य लोचने ॥ ५२ ॥
अङ्गदः पाणिना नेत्रे पिधाय रुधिरोक्षिते ॥ सालमासन्नमेकेन परिजग्राह पाणिना ॥ ५३ ॥
संपीड्य चोरसि स्कन्धं करेणाभिनिवेश्य च ॥ किंचिदभ्यवनम्यैनमुन्ममाथ यथा गजः ॥ ५४ ॥
तमिन्द्रकेतुप्रतिमं वृक्षं मन्दरसन्निभम् ॥ समुत्सृजन्तं वेगेन पश्यतां सर्वरक्षसाम् ॥
स बिभेद शितैर्बाणैः सप्तभिः कायभेदनैः ॥ ५५ ॥
अङ्गदो विव्यथेऽभीक्ष्णं ससाद च मुमोह च ॥ ५६ ॥
अङ्गदं व्यथितं दृष्ट्वा सीदन्तमिव सागरे ॥ दुरासदं हरिश्रेष्ठं रामायान्ये न्यवेदयन् ॥ ५७ ॥
रामस्तु व्यथितं श्रुत्वा वालिपुत्रं रणाजिरे ॥ व्यादिदेश हरिश्रेष्ठाञ्जाम्बवत्प्रमुखांस्ततः ॥ ५८ ॥
ते तु वानरशार्दूलाः श्रुत्वा रामस्य शासनम् ॥ अभिपेतुः सुसंक्रुद्धाः कुम्भमुद्यतकार्मुकम् ॥ ५९ ॥
ततो द्रुमशिलाहस्ताः कोपसंरक्तलोचनाः ॥ रिरक्षिषन्तोऽभ्यपतन्नङ्गदं वानरर्षभाः ॥ ६० ॥
जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः ॥ कुम्भकर्णात्मजं वीरं क्रुद्धाः समभिदुद्रुवुः ॥ ६१ ॥
समीक्ष्यापततस्तांस्तु वानरेन्द्रान्महाबलान् ॥ आववार शरौघेण नगेनेव जलाशयम् ॥ ६२ ॥
तस्य बाणपथं प्राप्य न शेकुरतिवर्तितुम् ॥ वानरेन्द्रा महात्मानो वेलामिव महोदधिः ॥ ६३ ॥
तांस्तु दृष्ट्वा हरिगणाञ्शरवृष्टिभिरर्दितान् ॥ अङ्गदं पृष्ठतः कृत्वा भ्रातृजं प्लवगेश्वरः ॥ ६४ ॥
अभिदुद्राव वेगेन सुग्रीवः कुम्भमाहवे ॥ शैलसानुचरं नागं वेगवानिव केसरी ॥ ६५ ॥
उत्पाट्य च महाशैलानश्वकर्णान्धवान्बहून् ॥ अन्यांश्च विविधान्वृक्षांश्चिक्षेप च महाबलः ॥ ६६ ॥
तां छादयन्तीमाकाशं वृक्षवृष्टिं दुरासदाम् ॥ कुम्भकर्णात्मजः शीघ्रं चिच्छेद निशितैः शरैः ॥ ६७ ॥

विवशः सन् ॥ ४२–४७ ॥ तोमरैः अङ्कुशैः ॥४८॥ अकुण्ठधारैः अभग्नाग्रैः । निशितैः उत्कृष्टैः । तीक्ष्णैः अयोमयैः । " तीक्ष्णं गरे मृधे लोहे " इति रत्नमाला ॥ ४९ ॥ न कम्पते नाकम्पत ॥ ५० ॥ तान् वृक्षान् प्रचिच्छेद शिलाः विभेदेत्यन्वयः ॥ ५१—५३ ॥ संपीड्येति । एकहस्तस्य नेत्रपिधानव्यापृतत्वादेकहस्तेनोत्पाटनासम्भवादुरसि संपीड्येत्युक्तं । अभिनिवेश्य । अभिगृह्येत्यर्थः ॥ ५४—५९॥ रिरक्षिषन्तः रक्षितुमिच्छन्तः ॥ ६०—६१ ॥ जलाशयं जलप्रवाहं । नगेनेव वृक्षेणेव । वृक्षौघपरोर्यशब्दः ॥ ६२ ॥ अतिवर्तितुं अतिक्रम्याभिमुख्येन गन्तुं ॥ ६३ ॥ तांस्त्वित्यादिश्लोकद्वयमेकान्वयं ॥ अङ्गदं पृष्ठतः कृत्वा । अन्यथा हन्यादिति भावः । शैलसानुचरं शैलसानुचरत्वेनातिबलं । " गिरिचर इव नागः प्राणसारं बिभर्ति " इति कालिदासोक्तेः

ति० भ्रातृजं भ्रातृपुत्रं । प्लवगेश्वरः सुग्रीवः । एतदन्तमष्टमीरात्रौयुद्धं । अतःपरंनवमीदिनयुद्धं ॥ ६४ ॥

[पा०] १ ख. आकर्णमुक्तैर्निशितैः. क. च. छ. ज. ट. अकुण्ठधारैर्विशिखैस्तीक्ष्णैः. २ ङ. ञ. ट. मुन्ममाथमहारणे. ३ घ. विव्यथेतीक्ष्णंपपातस. ङ. ञ. ट. विव्यथेऽभीक्ष्णंसपपात. ४ ङ. ञ. ट. हरिश्रेष्ठाराघवाय. ५ ग. घ. छ. ज. दृष्ट्वा. ६ क. ख. ग. राक्षसेन्द्रोमहाबलान्. च. ज. राक्षसेन्द्रोमहाबलः. ७ क. वेलयेवजलाशयं. ८ क. ग. घ. बाणरयं. ९ ञ. शेकुरपिवीक्षितुं. १० ङ. ञ. अभिदुद्रावसुग्रीवः. कुंभकर्णात्मजंरणे. च. छ. ज. ट. अभिदुद्राववेगेनकुंभकर्णात्मजंरणे. ११ क. महावेगःसोश्वकर्णान्.

अभिलक्षेण तीव्रेण कुम्भेन निशितैः शरैः ॥ आचितास्ते द्रुमा रेजुर्यथा घोराः शतघ्नयः ॥ ६८ ॥
द्रुमवर्षं तु तच्छिन्नं दृष्ट्वा कुम्भेन वीर्यवान् ॥ वानराधिपतिः श्रीमान्महासत्त्वो न विव्यथे ॥ ६९ ॥
निर्भिद्यमानः सहसा सहमानश्च ताञ्शरान् ॥ कुम्भस्य धनुराक्षिप्य बभञ्जेन्द्रधनुष्प्रभम् ॥ ७० ॥
अवप्लुत्य ततः शीघ्रं कृत्वा कर्म सुदुष्करम् ॥ अब्रवीत्कुपितः कुम्भं भग्नशृङ्गमिव द्विपम् ॥ ७१ ॥
निकुम्भाग्रज वीर्यं ते बाणवेगवदद्भुतम् ॥ सन्नतिश्च प्रभावश्च तव वा रावणस्य वा ॥ ७२ ॥
प्रह्लादबलिवृत्रघ्नकुबेरवरुणोपम ॥ एकस्त्वमनुजातोसि पितरं बलवृत्ततः ॥ ७३ ॥
त्वामेवैकं महाबाहुं चापहस्तमरिंदमम् ॥ त्रिदशा नातिवर्तन्ते जितेन्द्रियमिवाधयः ॥ ७४ ॥
विक्रमस्व महाबुद्धे कर्माणि मम पश्यतः ॥ ७५ ॥
वरदानात्पितृव्यस्ते सहते देवदानवान् ॥ कुम्भकर्णस्तु वीर्येण सहते च सुरासुरान् ॥ ७६ ॥
धनुषीन्द्रजितस्तुल्यः प्रतापे रावणस्य च ॥ त्वमद्य रक्षसां लोके श्रेष्ठोसि बलवीर्यतः ॥ ७७ ॥
महाविमर्दं समरे मया सह तवाद्भुतम् ॥ अद्य भूतानि पश्यन्तु शक्रशम्बरयोरिव ॥ ७८ ॥
कृतमप्रतिमं कर्म दर्शितं चास्त्रकौशलम् ॥ पातिता हरिवीराश्च त्वया वै भीमविक्रमाः ॥ ७९ ॥
उपालम्भभयाच्चापि नासि वीर मया हतः ॥ कृतकर्मा परिश्रान्तो विश्रान्तः पश्य मे बलम् ॥८०॥
तेन सुग्रीववाक्येन सावमानेन मानितः ॥ अग्नेराज्याहुतस्येव तेजस्तस्याभ्यवर्धत ॥
ततः कुम्भस्तु सुग्रीवं बाहुभ्यां जगृहे तदा ॥ ८१ ॥
गजाविवाहितमदौ निश्वसन्तौ मुहुर्मुहुः ॥ अन्योन्यगात्रग्रथितौ कर्षन्तावितरेतरम् ॥
सधूमां मुखतो ज्वालां विसृजन्तौ परिश्रमात् ॥ ८२ ॥
तयोः पादाभिघाताच्च निमग्ना चाभवन्मही ॥ व्याधूर्णिततरङ्गश्च चुक्षुभे वरुणालयः ॥८३ ॥

॥ ६४—६७ ॥ अभिलक्षेण अभिगतलक्ष्येण । आचिताः सर्वतो नीरन्ध्रतया व्याप्ताः । शतघ्नयः शतघ्न्यः । शङ्कुचिता आयुधविशेषाः ॥ ६८—७१ ॥ निकुम्भाग्रजेति । वीर्यस्य बाणवेगवत्त्वं तद्धेतुत्वात् । सन्नतिः राक्षसेषु विनयः राक्षसप्रावण्यं वा । कम्पनप्रजङ्घयूपाक्षशोणिताक्षमारकाणामङ्गदमैन्दद्विविदानां निराकरणाद्राक्षसप्रावण्योक्तिः । तव वा रावणस्य वा । रावणतुल्या तव सन्नतिरित्यर्थः ॥ ७२ ॥ पितरमनुजातोसि पित्रा सदृशोसीत्यर्थः । बलवृत्ततः बलव्यापारेण ॥ ७३ ॥ नातिवर्तन्ते न धर्षयन्तीत्यर्थः ॥ ७४ ॥ विक्रमस्वेत्यर्धं ॥ कर्माणि युद्धकर्माणि प्रति । विक्रमस्व पराक्रमं कुरु । युद्धकर्मसिद्ध्यर्थं पराक्रमं कुर्वित्यर्थः ॥ ७५ ॥ पितृव्यः रावणः । वरदानात् देवदानवान् सहते । कुम्भकर्णस्तु वीर्येण शारीरबलेन । सुरासुरान् सहते । रोद्धुं शक्नोतीत्यर्थः । त्वं तु ताभ्यामुभाभ्यां तान् सहस इति भावः ॥ ७६—७७ ॥ महाविमर्दं महाप्रहारं ॥ ७८—७९ ॥ उपालम्भभयात् बहुभिः सह युद्धेन श्रान्तो हत इत्यपवादभयात् ॥ ८० ॥ सावमानेन मानितः । बहुमानेन व्याजेनावमानित इत्यर्थः । तस्य तथावमानितस्य कुम्भस्य ॥ ८१ ॥ गजावित्यादिसार्धश्लोक एकान्वयः ॥ आहितमदौ आहितमदचेष्टौ । अन्योन्यगात्रग्रथितौ अन्योन्यसंश्लिष्टगात्रौ । परिश्रमात् युद्धजनितश्रमात् । मुखतः सधूमां ज्वालां विसृ-

ति० संनतिः स्वजनप्रावण्यं ॥ ७२ ॥ स० पित्रपेक्षयाकीर्तिरधिकेतिवक्तुं पितामहपौत्रयोःप्रह्लादबल्योर्ग्रहणं । वैरिसंहारेवृत्रघ्नोपमा । धनिकत्वाप्रधृष्यत्वयोःकुबेरवरुणोपमतेतिज्ञेयम् ॥ ७३ ॥ स० उपालंभभयात् बहुभिर्युध्वाश्रान्तमेकलमवधीदश्रान्तइत्यपवादभयात् ॥ ८० ॥ स० सावमानेन अन्तरवमानगर्भेण बहिःस्तुतिरूपेणवाक्येनमानितः ॥ ८१ ॥

[पा०] १ ङ. च. छ. ञ. ट. अर्दितास्ते. २ ङ. ञ. सविध्यमानः. ३ ङ. च. छ. ञ. ञ. ट. बलवत्तरं. क. बलवीर्यतः. ४ क. ख. ग. ङ.—ट. शूलहस्तं. ५ क. ग. ञ. महायुद्धे. ६ ङ. ञ. ट. पश्यच. ७ ङ. संहत्यमया. ८ ख.—च. ञ. ञ. ट. लयैते. ९ ङ. छ. ञ. ञ. राज्यहुतस्येव. १० ञ. धर्षन्तावितरे.

ततः कुम्भं समुत्क्षिप्य सुग्रीवो लवणाम्भसि ॥ पातयामास वेगेन दर्शयन्नुदधेस्तलम् ॥ ८४ ॥
ततः कुम्भनिपातेन जलराशिः समुत्थितः ॥ विन्ध्यमन्दरसंकाशो विससर्प समन्ततः ॥ ८५ ॥
ततः कुम्भः समुत्पत्य सुग्रीवमभिपत्य च ॥ आजघानोरसि क्रुद्धो वज्रवेगेन मुष्टिना ॥ ८६ ॥
तस्य चर्म च पुस्फोट बहु सुस्राव शोणितम् ॥ स च मुष्टिर्महावेगः प्रतिजघ्नेऽस्थिमण्डले ॥ ८७ ॥
तदा वेगेन तत्रासीत्तेजः प्रज्वलितं मुहुः ॥ वज्रनिष्पेषसञ्जाता ज्वाला मेरौ यथा गिरौ ॥
[मुष्टिना तेन संजज्ञे ज्वाला विद्युदिवोत्थिता ॥ ८८ ॥
स तत्राभिहतस्तेन सुग्रीवो वानरर्षभः ॥ मुष्टिं संवर्तयामास वज्रकल्पं महाबलः ॥ ८९ ॥
अर्चिः सहस्रविकचं रविमण्डलसप्रभम् ॥ स मुष्टिं पातयामास कुम्भस्योरसि वीर्यवान् ॥ ९० ॥
स तु तेन प्रहारेण विह्वलो भृशताडितः ॥ निपपात तदा कुम्भो गतार्चिरिव पावकः ॥ ९१ ॥
मुष्टिनाऽभिहतस्तेन निपपाताशु राक्षसः ॥ लोहिताङ्ग इवाकाशाद्दीप्तरश्मिर्यदृच्छया ॥ ९२ ॥
कुम्भस्य पततो रूपं भग्नस्योरसि मुष्टिना ॥ बभौ रुद्राभिपन्नस्य यथा रूपं गवां पतेः ॥ ९३ ॥

तस्मिन्हते भीमपराक्रमेण प्लवङ्गमानामृषभेण युद्धे ॥
मही सशैला सवना चचाल भयं च रक्षांस्यधिकं विवेश ॥ ९४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

सप्तसप्ततितमः सर्गः ॥ ७७ ॥

हनुमता निकुंभहननम् ॥ १ ॥

निकुम्भो भ्रातरं दृष्ट्वा सुग्रीवेण निपातितम् ॥ प्रदहन्निव कोपेन वानरेन्द्रमवैक्षत ॥ १ ॥
ततः स्रग्दामसन्नद्धं दत्तपञ्चाङ्गुलं शुभम् ॥ आददे परिघं वीरो नगेन्द्रशिखरोपमम् ॥ २ ॥

जन्तौ । बभूवतुरिति शेषः ॥ ८२—८३ ॥ दर्शयन्नुदधेस्तलं । कुम्भो यथा उदधितलं पश्येत्तथा वेगेन पातयामासेत्यर्थः ॥ ८४ ॥ विससर्प अभ्यवर्धत ॥ ८५—८६ ॥ पुस्फोट विभिन्नं । सः मुष्टिः । सुग्रीवस्यास्थिमण्डले । प्रतिजघ्ने प्रतिहतः । मोघो बभूवेत्यर्थः । स च मुष्टिर्महावेग इति पाठः ॥ ८७ ॥ वेगेन कुम्भवेगेन । तत्र सुग्रीववक्षसि । तेजः संघट्टजं । प्रज्वलितमासीत् । वज्रनिष्पेषसञ्जाता इन्द्रेण पक्षच्छेदकाले वज्रसंघट्टजन्येत्यर्थः ॥ ८८ ॥ संवर्तयामास चकारेत्यर्थः ॥ ८९ ॥ अर्चिःसहस्रविकचं अर्चिःसहस्रावृतमित्यर्थः । अतएव रविमण्डलसप्रभं ॥ ९०—९२ ॥ गवां पतेः सूर्यस्य ॥ ९३—९४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षट्सप्ततितमः सर्गः ॥ ७६ ॥

अथ निकुम्भवधः सप्तसप्ततितमे—निकुम्भ इत्यादि ॥ १ ॥ तत इत्यादिश्लोकद्वयमेकान्वयं ॥

रामानु० शतयोजनविस्तीर्णत्रिकूटशिखरमध्येयुध्यन्सुग्रीवः कुंभंलङ्काद्वीपतलेलवणांभसिपातयामासेत्यभिधानात्सुग्रीवस्यापरिमेयबलवत्तायोत्यते ॥ ८४ ॥ **स०** समुत्थितः ऊर्ध्वमुत्थितः । विन्ध्यमन्दरसंकाशः तत्सदृशतरङ्गवान् । समन्ततोविससर्प ॥ ' विन्ध्यमन्दरसंकाशःकुंभः ततोजलात्समुत्पत्येत्यन्वयइतिनागोजिभट्टव्याख्यात्वर्थाप्रतिपत्त्या ॥ ८५ ॥ **स०** रुद्राभिपन्नस्य स्ववरतःसूर्यमनुविमानेनगच्छतोसुरस्ययाने तेनासहमानेनपातितेसतिसतीपतिस्तंपातयामासेतिपौराणिक्याकथयारुद्राभिपन्नताज्ञेया ॥ ९३ ॥ इतिषट्सप्ततितमः सर्गः ॥ ७६ ॥

[पा०] १ घ. ङ. ज.—ट. संजज्ञेचापिशोणितं. क. ख. ग. च. संजज्ञेचास्य. २ ग.—च. झ. ञ. ट. तस्यवेगेन. ३ इदमर्धं क. ख. च. छ. पाठेषुदृश्यते. ४ क. सतथाऽभिहतः. ५ ङ. छ. ज. झ. ट. भृशपीडितः. ६ घ. तदाभूमौ.

हेमपट्टपरिक्षिप्तं वज्रविद्रुमभूषितम् ॥ यमदण्डोपमं भीमं रक्षसां भयनाशनम् ॥ ३ ॥
तमाविध्य महातेजाः शक्रध्वजसमं तदा ॥ विननाद विवृत्तास्यो निकुम्भो भीमविक्रमः ॥ ४ ॥
उरोगतेन निष्केण भुजस्थैरङ्गदैरपि ॥ कुण्डलाभ्यां च चित्राभ्यां मालया च विचित्रया ॥ ५ ॥
निकुम्भो भूषणैर्भाति तेन स्म परिघेण च ॥ यथेन्द्रधनुषा मेघः सविद्युत्स्तनयित्नुमान् ॥ ६ ॥
परिघाग्रेण पुरस्फोट वातग्रन्थिर्महात्मनः ॥ प्रजज्वाल सघोषश्च विधूम इव पावकः ॥ ७ ॥
नगर्या विटपावत्या गन्धर्वभवनोत्तमैः ॥ सह चैवामरावत्या सर्वैश्च भवनैः सह ॥ ८ ॥
सतारग्रहनक्षत्रं सचन्द्रं समहाग्रहम् ॥ निकुम्भपरिघाघूर्णं भ्रमतीव नभःस्थलम् ॥ ९ ॥
दुरासदश्च संजज्ञे परिघाभरणप्रभः ॥ कपीनां स निकुम्भाग्निर्युगान्ताग्निरिवोत्थितः ॥ १० ॥
राक्षसा वानराश्चापि न शेकुः स्पन्दितुं भयात् ॥ हनुमांस्तु विवृत्योरस्तस्थौ प्रमुखतो बली ॥ ११ ॥
परिघोपमबाहुस्तु परिघं भास्करप्रभम् ॥ बली बलवतस्तस्य पातयामास वक्षसि ॥ १२ ॥
स्थिरे तस्योरसि व्यूढे परिघः शतधा कृतः ॥ विशीर्यमाणः सहसा उल्काशतमिवाम्बरे ॥ १३ ॥
स तु तेन प्रहारेण विचचाल महाकपिः ॥ परिघेण समाधूतो यथा भूमिचलेऽचलः ॥ १४ ॥
स तदाऽभिहतस्तेन हनुमान्प्लवगोत्तमः ॥ मुष्टिं संवर्तयामास बलेनातिमहाबलः ॥ १५ ॥
तमुद्यम्य महातेजा निकुम्भोरसि वीर्यवान् ॥ अभिचिक्षेप वेगेन वेगवान्वायुविक्रमः ॥ १६ ॥
ततः पुरस्फोट चर्मास्य प्रसुस्राव च शोणितम् ॥ मुष्टिना तेन संजज्ञे ज्वाला विद्युदिवोत्थिता ॥ १७ ॥
स तु तेन प्रहारेण निकुम्भो विचचाल ह ॥ स्वस्थश्चापि निजग्राह हनुमन्तं महाबलम् ॥ १८ ॥
विचुक्रुशुस्तदा संरब्धे भीमं लङ्कानिवासिनः ॥ निकुम्भेनोद्यतं दृष्ट्वा हनुमन्तं महाबलम् ॥ १९ ॥
स तदा ह्रियमाणोऽपि कुम्भकर्णात्मजेन ह ॥ आजघानानिलसुतो वज्रकल्पेन मुष्टिना ॥ २० ॥

स्रग्दामसन्नद्धं स्रक्समूहनिबद्धं। दत्तपञ्चाङ्गुलं चन्दनकुङ्कुमादिनार्पितपञ्चाङ्गुलमुद्रामुद्रितं। अथवा क्रियाविशेषणमेतत्। दत्तपञ्चाङ्गुलं यथा तथा आददे। परिक्षिप्तं परिणद्धं ॥ २—४ ॥ उरोगतेनेत्यादिश्लोकद्वयमेकान्वयं ॥ निष्कः पदकं। भूषणैः हारादिभिः। भाति स्म। "लट् स्मे" इति भूते लट्। स्तनयित्नुमान् गर्जितवान्। "स्तनयित्नुस्तु गर्जिते मेघे" इति रत्नमाला। इन्द्रधनुःस्थाने परिघः। विद्युत्स्थाने भूषणानि। विननादेति पूर्वश्लोकोक्तो विनादः स्तनयित्नुस्थान इति नोपमेयन्यूनता ॥ ५—६ ॥ वातग्रन्थिः आवहादिसप्तवातस्कन्धः। सघोषः सासिंहनाद इति निकुम्भविशेषणं परिघविशेषणं वा ॥ ७ ॥ नगर्येत्यादिश्लोकद्वयमेकान्वयं॥ विटपावत्या अलकया॥ अत्रापि सहेति शेषः। भवनैः अमरभवनैः। ताराः अश्विन्यादयः। ग्रहाः बुधादयः। नक्षत्राणि अश्विन्यादिभिन्नानि। महाग्रहाः शुक्रादयः। अत्र रात्रित्वात्सूर्यो नोक्तः। निकुम्भपरिघाघूर्णं। अत्र परिघशब्देन तद्वात उपलक्ष्यते। इवशब्दो वाक्यालंकारे ॥ ८—९ ॥ परिघेणाभरणैश्च प्रभातीति परिघाभरणप्रभः। यद्वा परिघाभरणान्येव प्रभा यस्य स तथा। कपीनां दुरासदो जज्ञ इति संबन्धः ॥ १० ॥ राक्षसा इति। प्रबलेषु प्रजङ्घादिषु हतेषु दुर्बलैर्भवद्भिः किमर्थं युद्धाय प्रयत्नः कृत इति निकुम्भः कुप्येदिति राक्षसानां भयं वेदितव्यं। विवृत्य विस्तार्य। प्रमुखतः अग्रे ॥ ११ ॥ परिघोपमबाहुः निकुम्भः ॥ १२ ॥ व्यूढे विशाले। उल्काशतमिव बभाविति ॥ १३ ॥ भूमिचले भूकम्पे ॥ १४ ॥ संवर्तयामास। चकारेत्यर्थः ॥ १५—१८ ॥ भीमं विचुक्रुशुः। हनुमद्ग्रहणहर्षादिति भावः। उद्यतं

तीo परिघान्तरणप्रभः परिघान्तकृतरणरक्तप्रभइत्यर्थः ॥ १० ॥

[पाo] १ ख. घ. ङ. च. ट. शक्रध्वजसमौजसं. २ च. छ. परिघान्तरणप्रभः. ३ ग. ङ. झ. ट. क्रोधेन्धनोनिकुंभाग्निः. ४ ङ. झ. ञ. ट. नचचाल. ५ क. ख. घ. ङ. छ. झ. ञ. ट. तत्रपुरस्फोट. ६ ख. ग. ङ. च. झ. ट. मेघेविद्युदिवो. ७ घ. सर्वेभीमं क. हृष्टाभीमं. ८ क. ज. ञ. निकुंभेनोद्धतं. घ. निकुंभेनार्दितं.

आत्मानं मोचयित्वाऽथ क्षितावभ्यवपद्यत ॥ हनुमानुन्मथ्याशु निकुम्भं मारुतात्मजः ॥ २१ ॥
निक्षिप्य परमायत्तो निकुम्भं निष्पिपेष ह ॥ उत्पत्य चास्य वेगेन पपातोरसि वीर्यवान् ॥ २२ ॥
परिगृह्य च बाहुभ्यां परिवृत्य शिरोधराम् ॥ उत्पाटयामास शिरो भैरवं नदतो महत् ॥ २३ ॥
[अथ देवास्सगन्धर्वा विद्याधरमहोरगाः ॥ आकाशचारिणस्सर्वे अप्सरोभिः सहामराः ॥ २४ ॥
हनूमन्तं महाबाहुं वायुपुत्रमरिंदमम् ॥ प्रशंसन्तः परैर्वाक्यैः प्रसूनैरभ्यपूजयन्] ॥ २५ ॥

अथ विनदति सादिते निकुम्भे पवनसुतेन रणे बभूव युद्धम् ॥
दशरथसुतराक्षसेन्द्रसून्वोर्भृशतरमागतरोषयोः सुभीमम् ॥ २६ ॥
व्यपेते तु जीवे निकुम्भस्य हृष्टा विनेदुः प्लवङ्गा दिशः सस्वनुश्च ॥
चचालेव चोर्वी पफालेव च द्यौर्भयं राक्षसानां बलं चाविवेश ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तसप्ततितमः सर्गः ॥ ७७ ॥

अष्टसप्ततितमः सर्गः ॥ ७८ ॥

रावणप्रेरणया समरायनिस्सरतिमकराक्षे राक्षसैस्तत्समयसमुद्भूतदुर्निमित्तनिरीक्षणेपि तदलक्षीकरणेनरणाय तदनुसरणम् ॥ १ ॥

निकुम्भं च हतं श्रुत्वा कुम्भं च विनिपातितम् ॥ रावणः परमामर्षी प्रजज्वालानलो यथा ॥ १ ॥
नैर्ऋतः क्रोधशोकाभ्यां द्वाभ्यां तु परिमूर्छितः ॥ खरपुत्रं विशालाक्षं मकराक्षमचोदयत् ॥ २ ॥
गच्छ पुत्र मयाऽऽज्ञप्तो बलेनाभिसमन्वितः ॥ राघवं लक्ष्मणं चैव जहि तांश्च वनौकसः ॥ ३ ॥

गृहीतं ॥ १९—२० ॥ क्षितावभ्यवपद्यत स्थितः ॥ २१ ॥ निक्षिप्य भूमौ पातयित्वा । परमायत्तः अतिप्रयासयुक्तः । उत्पत्य ऊर्ध्वमुद्गत्य । उरसि वेगेन पपात ॥ २२ ॥ बाहुभ्यां शिरोधरां परिगृह्य परिवर्त्य। शिर उत्पाटयामास ॥ २३—२५ ॥ उत्तरसर्गद्वयार्थं संग्रहेण दर्शयति—अथेति ॥ विनदति निकुम्भे पवनसुतेन सादिते सति । दशरथसुतराक्षसेन्द्रसून्वोः । राममकराक्षयोः । युद्धं बभूव । पुष्पिताग्रावृत्तं । उत्तरत्र भुजङ्गप्रयातं ॥ २६ ॥ दिशः सस्वनुः प्रतिध्वनिं चक्रुः । पफालेव पुस्फोटेव । बलं कर्म । भयं कर्तृ ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तसप्ततितमः सर्गः ॥ ७७ ॥

अथ मकराक्षनिर्गमोष्टसप्ततितमे, प्रथमपक्षे अयं दशम्यां प्रातः, द्वितीयपक्षे तु दशम्यां प्रातरारभ्य कम्पनवधप्रहस्तवधरावणमुकुटभङ्गकुम्भकर्णप्रबोधतद्वधाः, अथापराह्णे ब्रह्मास्त्रबन्धः, रात्रौ तन्मोक्षलङ्कादहनकुम्भनिकुम्भयूपाक्षशोणिताक्षप्रजङ्घकम्पनमकराक्षवधाः—निकुम्भं चेत्यादि ॥ १ ॥ परिमूर्छितः

स० निनदति नानाप्रकारेणकथयतिनिकुंभे दशरथसुतराक्षसेन्द्रसून्वोः दशसुदिक्षुरथोगमनंअप्रतिहतंयस्य तस्यवायोः । " रथः स्यात्स्यन्दनेकायेचरणेच " इतिविश्वः । सुतोहनुमान् । राक्षसेन्द्रसूनुर्निकुंभः । तयोःभृशतरमागतरोषयोः यद्युद्धंबभूव तस्मिन्रणे पवनसुतेनसादितेसति राक्षसानांबलं भयमाविवेशेत्याकर्षः । " अनेनवक्ष्यमाणकथोपक्षेपः " इत्युभौ । तत्र " व्यपेतेतुजीवे " इत्यादिकमसंगतमिवदृश्यते । अस्मत्पक्षेदशरथशब्दएकएवगौणार्थइतिमन्तव्यं । दशरथसुतोस्यास्तीतिदशरथसुतइतिवा । पवनसुतेनरणेनिकुंभेसादितेसति युद्धं नञ्मात्राध्याहारः । नबभूव । परपक्षेरणकर्तुरभावादितिवा ॥ २६ ॥ स० सामान्यतोभयमित्युक्तं । तत्रविशेषमाह—व्यपेतइति । जीवेव्यपेते शरीरादपगते ॥ ति० एतदन्तंनवमीदिनयुद्धं ॥२७॥ इतिसप्तसप्ततितमःसर्गः ॥७७॥

[पा०] १ इदंश्लोकद्वयं क. च. छ. पाठेषुदृश्यते. २ ङ. ञ. ञ. ट. निनदति. ३ ग. ङ. चहतंदृष्ट्वा. क. ख. घ. च. छ. ञ. निहतंश्रुत्वा. ञ. ट. निहतंदृष्ट्वा. ४ क. ग.—ट. तौसवनौकसौ.

रावणस्य वचः श्रुत्वा शूरमानी खरात्मजः ॥ बाढमित्यब्रवीद्धृष्टो मकराक्षो निशाचरः ॥ ४ ॥
सोभिवाद्य दशग्रीवं कृत्वा चापि प्रदक्षिणम् ॥ निर्जगाम गृहाच्छुभ्राद्रावणस्याज्ञया बली ॥ ५ ॥
समीपस्थं बलाध्यक्षं खरपुत्रोऽब्रवीदिदम् ॥ रथैश्चानीयतां शीघ्रं सैन्यं चाहूयतां त्वरात् ॥ ६ ॥
तस्य तद्वचनं श्रुत्वा बलाध्यक्षो निशाचरः ॥ स्यन्दनं च बलं चैव समीपं प्रत्यपादयत् ॥ ७ ॥
प्रदक्षिणं रथं कृत्वा आरुरोह निशाचरः ॥ सूतं संचोदयामास शीघ्रं मे रथमावह ॥ ८ ॥
अथ ताञ्राक्षसान्सर्वान्मकराक्षोऽब्रवीदिदम् ॥ यूयं सर्वे प्रयुध्यध्वं पुरस्तान्मम राक्षसाः ॥ ९ ॥
अहं राक्षसराजेन रावणेन महात्मना ॥ आज्ञप्तः समरे हन्तुं तावुभौ रामलक्ष्मणौ ॥ १० ॥
अद्य रामं वधिष्यामि लक्ष्मणं च निशाचराः ॥ शाखामृगं च सुग्रीवं वानरांश्च शरोत्तमैः ॥ ११ ॥
अद्य शूलनिपातैश्च वानराणां महाचमूम् ॥ प्रदहिष्यामि संग्रामः शुष्केन्धनमिवानलः ॥ १२ ॥
मकराक्षस्य तच्छ्रुत्वा वचनं ते निशाचराः ॥ सर्वे नानायुधोपेता बलवन्तः समागताः ॥ १३ ॥
ते कामरूपिणः सर्वे दंष्ट्रिणः पिङ्गलेक्षणाः ॥ मातङ्गा इव नर्दन्तो ध्वस्तकेशा भयानकाः ॥ १४ ॥
परिवार्य महाकाया महाकार्यं खरात्मजम् ॥ अभिजग्मुस्ततो हृष्टाश्चालयन्तो वसुन्धराम् ॥ १५ ॥
शङ्खभेरीसहस्राणामाहतानां समन्ततः ॥ क्ष्वेलितास्फोटितानां च ततः शब्दो महानभूत् ॥ १६ ॥
प्रभ्रष्टोथ करात्तस्य प्रतोदः सारथेस्तदा ॥ पपात सहसा चैव ध्वजस्तस्य च रक्षसः ॥ १७ ॥
तस्य ते रथयुक्ताश्च हया विक्रमवर्जिताः ॥ चरणैराकुलैर्गत्वा दीनाः सास्रमुखा ययुः ॥ १८ ॥
प्रवाति पवनस्तस्मिन्सपांसुः खरदारुणः ॥ निर्याणे तस्य रौद्रस्य मकराक्षस्य दुर्मतेः ॥ १९ ॥
तानि दृष्ट्वा निमित्तानि राक्षसा वीर्यवत्तमाः ॥ अचिन्त्य निर्गताः सर्वे यत्र तौ रामलक्ष्मणौ ॥ २० ॥

घनगजमहिषाङ्गतुल्यवर्णाः समरमुखेष्वसकृद्गदासिभिन्नाः ॥
अहमहमिति युद्धकौशलास्ते रजनिचराः परितः समुन्नदन्तः ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टसप्ततितमः सर्गः ॥ ७८ ॥

व्याप्तः ॥ २—५ ॥ त्वरात्त्वरया ॥६॥ प्रत्यपादयत् प्रापयत् ॥ ७ ॥ आवह चोदय । अत्रेतिकरणं द्रष्टव्यं ॥ ८ ॥ अथतानित्यादिचतुःश्लोक्येकान्वया ॥ ९—॥१२॥ समागताः समाजग्मुः ॥१३॥ ते कामरूपिण इत्यादिश्लोकद्वयमेकान्वयं ॥ १४—१६ ॥ करात्तस्य आत्तकरस्य वशीकृतकरस्य । लघुहस्तस्येति यावत् ॥१७॥ विक्रमवर्जिताः विविधपदन्यासविरहिताः । प्रथममाकुलैश्चरणैर्गत्वा पश्चाद्ययुरित्यर्थः ॥१८॥ सपांसुः अतएव खरदारुणः खरः परुषः दारुणो भयंकरश्च ॥१९॥ तानीत्यादिश्लोकद्वयमेकान्वयं । असकृद्गदासिभिन्ना इत्यनेन शौर्यातिशयः सूचितः । युद्धकौशलाः युद्धकुशलाः । स्वार्थेण् । अहमहमिति वदन्तः । अचिन्त्य निर्गता इति पूर्वेण संबन्धः ॥२०—२१॥ इति श्रीगो-

---

स० यद्यपिकुंभवधःप्रागितिकुंभंनिकुंभंचेतिवक्तव्यं । तथापिनिकुंभोतिबलवानितिवाऽल्यव्यवहितोनिकुंभवधइतिवानिकुंभग्रहणं प्रागितिमन्तव्यं ॥ १ ॥ स० त्वरात् त्वरया । त्वरयाअततीति त्वरात् । तत्संबुद्धिरितिवा ॥ ६ ॥ स० खराणांक्रूराणामपि दारुणः ॥ १९ ॥ इत्यष्टसप्ततितमःसर्गः ॥ ७८ ॥

[पा०] १ झ. पुत्रोब्रवीद्वचः. २ ख. ङ. च. छ. झ. ञ. ट. रथआनीयतांशीघ्रंसैन्यंत्वानीयतां. ३ क. ख. तद्बलंचोदयामाससस्यन्दनेनसहद्रुतं. ४ ख.—ट. शीघ्रंवै. ५ ङ. ग. झ. संप्राप्तां. ६ ङ झ. क्रूरादंष्ट्रिणः. क. ख. ग. च. छ. ज. ञ. ट. शूरादंष्ट्रिणः. ७ ङ. झ. चालयन्तोनभस्थलं. ८ घ. ङ. छ. झ. ञ. ट. तत्रशब्दो. ९ ख. ङ. च. छ. ञ. ट. सहसाभूमौ. १० ग. झ. तस्मिन्पांसुभिः. ११ झ. परिबभ्रमुर्मुहुस्ते. क. ख. ग. च. ञ. ट. परिबभ्रमुर्नदन्तः. ज. परितस्थुरुन्नदन्तः.

एकोनाशीतितमः सर्गः ॥ ७९ ॥

राममकराक्षयोर्वीरवादपुरस्सरंसमरारंभः ॥ १ ॥ रामेणमकराक्षक्षपणम् ॥ २ ॥

निर्गतं मकराक्षं ते दृष्ट्वा वानरयूथपाः ॥ आप्लुत्य सहसा सर्वे योद्धुकामा व्यवस्थिताः ॥ १ ॥
ततः प्रवृत्तं सुमहत्तद्युद्धं रोमहर्षणम् ॥ निशाचरैः प्लवङ्गानां देवानां दानवैरिव ॥ २ ॥
वृक्षशूलनिपातैश्च शिलापरिघपातनैः ॥ अन्योन्यं मर्दयन्ति स्म तदा कपिनिशाचराः ॥ ३ ॥
शक्तिखड्गगदाकुन्तस्तोमरैश्च निशाचराः ॥ पट्टिशैर्भिन्दिपालैश्च बाणपातैः समन्ततः ॥ ४ ॥
पाशमुद्गरदण्डैश्च निखातैश्चापरे तदा ॥ कदनं कपिवीराणां चक्रुस्ते रजनीचराः ॥ ५ ॥
बाणौघैरर्दिताश्चापि स्वरपुत्रेण वानराः ॥ संभ्रान्तमनसः सर्वे दुद्रुवुर्भयपीडिताः ॥ ६ ॥
तान्दृष्ट्वा राक्षसाः सर्वे द्रवमाणान्वलीमुखान् ॥ नेदुस्ते सिंहवद्धृष्टा राक्षसा जितकाशिनः ॥ ७ ॥
विद्रवत्सु तदा तेषु वानरेषु समन्ततः ॥ रामस्तान्वारयामास शरवर्षेण राक्षसान् ॥ ८ ॥
वारितान्राक्षसान्दृष्ट्वा मकराक्षो निशाचरः ॥ क्रोधानलसमाविष्टो वचनं चेदमब्रवीत् ॥ ९ ॥
तिष्ठ राम मया सार्धं द्वन्द्वयुद्धं ददामि ते ॥ त्याजयिष्यामि ते प्राणान्धनुर्मुक्तैः शितैः शरैः ॥१०॥
यत्तदा दण्डकारण्ये पितरं हतवान्मम ॥ मदग्रतः स्वकर्मस्थं दृष्ट्वा रोषोभिवर्धते ॥ ११ ॥
दह्यन्ते भृशमङ्गानि दुरात्मन्मम राघव ॥ यन्मयासि न दृष्टस्त्वं तस्मिन्काले महावने ॥ १२ ॥
दिष्ट्याऽसि दर्शनं राम मम त्वं प्राप्तवानिह ॥ काङ्क्षितोसि क्षुधार्तस्य सिंहस्येवेतरो मृगः ॥ १३ ॥
अद्य मद्बाणवेगेन प्रेतराड्विषयं गतः ॥ ये त्वया निहता वीराः सह तैश्च समेष्यसि ॥ १४ ॥
बहुनाऽत्र किमुक्तेन शृणु राम वचो मम ॥ पश्यन्तु सकला लोकास्त्वां मां चैव रणाजिरे ॥१५॥
अस्त्रैर्वा गदया वाऽपि बाहुभ्यां वा महाहवे ॥ अभ्यस्तं येन वा राम तेनैव युधि वर्तताम् ॥ १६ ॥

विन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टसप्ततितमःसर्गः॥७८॥

अथ मकराक्षवध एकोनाशीतौ—निर्गतमिति ॥ १—३ ॥ शक्तीत्यादिश्लोकद्वयमेकान्वयं ॥ निखातैः आयुधविशेषैः । निर्घातैरिति पाठे अशनिभिरित्यर्थः । केचिन्निशाचराः शक्तिखड्गादिभिः अपरे रजनीचराः पाशमुद्गरादिभिश्च कदनं चक्रुरिति योजना ॥ ४—६ ॥ राक्षसा जितकाशन इति भिन्नं वाक्यं । जितं जयः तेन काशन्त इति तथोक्ता जितकाशिनः । बभूवुरिति शेषः । अन्यथा द्वितीयराक्षसपदवैयर्थ्यं स्यात् ॥ ७—१० ॥ स्वकर्मस्थं वधकर्मस्थं । यथा पिता हतस्तथा वध्यमित्यर्थः । यद्वा क्षात्रधर्मकर्मानुतिष्ठन्तमित्यर्थः । स्वकर्मस्थमिति सुतरामकृत्यनिरतमिति वार्थः ॥ ११ ॥ तस्मिन्काले महावने यद्यस्मान्न दृष्टोसि तस्मान्ममाङ्गानि दह्यन्ते । तदानीमेव दृष्टश्चेत्प्रतीकारेण तापः शाम्येदित्यर्थः ॥ १२–१५ ॥ महाहवे निमित्ते । येन वा अन्येनायुधेनाभ्यस्तं

शि० निशाचराः निशायामेवभोजनशीलाः । रजनीचराः राक्षसाः ॥ ४ ॥ शि० स्वकर्मस्थं स्वकर्मनिरतं । राक्षसवधपरायणमित्यर्थः ॥ स० स्वकर्मस्थं राक्षसधर्मनिरतं । सु सम्यक् अकर्मस्थंतन्निरतमितिरामविशेषणंवा ॥ ति० मदग्रतःस्वकर्मस्थं दृष्टेतिपाठे मदग्रतस्तिष्ठन्तमितिशेषः ॥ ११ ॥

[पा०] १ ङ. झ. ट. गदापरिघपातनैः. २ क. शक्तिशूलगदाखड्गैः. ३ च. छ. ञ. ट. निर्घातैश्चवरायुधैः. ख. शूलैश्चान्यैर्वरायुधैः. ४ झ. कपिसिंहानां. ख. ङ. कपिसैन्यानां. घ. कपिमुख्यानां. ५ क. ख. घ.—छ. झ. ञ. द्रवमाणान्वनौकसः. ६ झ. द्वन्द्वयुद्धंभविष्यति. घ. द्वन्द्वयुद्धंतुदेहिमे. ७ घ. ङ. झ. तदग्रतः. ख. त्वामग्रतः. ८ ख. ममचाङ्गानि. ९ ख. महाहवे. १० ग.—ट. निहताःशूराः. ११ च.—ञ. रणाजिरे.

मकराक्षवचः श्रुत्वा रामो दशरथात्मजः ॥ अब्रवीत्प्रहसन्वाक्यमुत्तरोत्तरवादिनम् ॥ १७ ॥
कत्थसे किं वृथा रक्षो बहून्यसदृशानि तु ॥ न रणे शक्यते जेतुं विना युद्धेन वाग्बलात् ॥ १८ ॥
चतुर्दशसहस्राणि रक्षसां त्वत्पिता च यः ॥ त्रिशिरा दूषणश्चैव दण्डके निहता मया ॥ १९ ॥
स्वाशितास्तव मांसेन गृध्रगोमायुवायसाः ॥ भविष्यन्त्यद्य वै पाप तीक्ष्णतुण्डनखाङ्कुराः ॥ २० ॥
[रुधिरार्द्रमुखा हृष्टा रक्तपक्षाण्डजाश्च ये ॥ खे गता वसुधायां च भ्रमिष्यन्ति समन्ततः] ॥ २१ ॥
राघवेणैवमुक्तस्तु खरपुत्रो निशाचरः ॥ बाणौघानमुचत्तस्मै राघवाय रणाजिरे ॥ २२ ॥
ताञ्शराञ्शरवर्षेण रामश्चिच्छेद नैकधा ॥ निपेतुर्भुवि ते च्छिन्ना रुक्मपुङ्खाः सहस्रशः ॥ २३ ॥
तद्युद्धमभवत्तत्र समेत्यान्योन्यमोजसा ॥ रक्षसः खरपुत्रस्य सूनोर्दशरथस्य च ॥ २४ ॥
जीमूतयोरिवाकाशे शब्दो ज्यातलयोस्तदा ॥ धनुर्मुक्तः स्वनोत्कृष्टः श्रूयते च रणाजिरे ॥ २५ ॥
देवदानवगन्धर्वाः किन्नराश्च महोरगाः ॥ अन्तरिक्षगताः सर्वे द्रष्टुकामास्तदद्भुतम् ॥ २६ ॥
विद्धमन्योन्यगात्रेषु द्विगुणं वर्धते परम् ॥ कृतप्रतिकृतान्योन्यं कुरुतां तौ रणाजिरे ॥ २७ ॥
राममुक्तांस्तु बाणौघान्राक्षसस्त्वच्छिनद्रणे ॥ रक्षोमुक्तांस्तु रामो वै नैकधा प्राच्छिनच्छरैः ॥२८॥
बाणौघैर्विततः सर्वा दिशश्च प्रदिशस्तथा ॥ संछन्ना वसुधा चैव समन्तान्न प्रकाशते ॥ २९ ॥
ततः क्रुद्धो महाबाहुर्धनुश्चिच्छेद राक्षसः ॥ अष्टाभिरथ नाराचैः सूतं विव्याध राघवः ॥ ३० ॥
भित्त्वा शरै रथं रामो रथाश्वान्समपातयत् ॥ विरथो वसुधां तिष्ठन्मकराक्षो निशाचरः ॥ ३१ ॥
तत्तिष्ठद्वसुधां रक्षः शूलं जग्राह पाणिना ॥ त्रासनं सर्वभूतानां युगान्ताग्निसमप्रभम् ॥ ३२ ॥
[दुरवापं महच्छूलं रुद्रदत्तं भयंकरम् ॥ जाज्वल्यमानमाकाशे संहारास्त्रमिवापरम् ॥
यं दृष्ट्वा देवताः सर्वा भयार्ता विद्रुता दिशः] ॥ ३३ ॥
विभ्राम्य तु महच्छूलं प्रज्वलत्तं निशाचरः ॥ स क्रोधात्प्राहिणोत्तस्मै राघवाय महाहवे ॥ ३४ ॥
तमापतन्तं ज्वलितं खरपुत्रकराच्युतम् ॥ बाणैस्तु त्रिभिराकाशे शूलं चिच्छेद राघवः ॥ ३५ ॥
स च्छिन्नो नैकधा शूलो दिव्यहाटकमण्डितः ॥ व्यशीर्यत महोल्केव रामबाणार्दितो भुवि ॥ ३६ ॥
तच्छूलं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा ॥ साधु साध्विति भूतानि व्याहरन्ति नभोगता ॥ ३७ ॥

तेनैव युधि वर्ततां । भवानिति शेषः ॥ १६ ॥ उत्तरोत्तरवादिनं । बहुप्रलापिनमित्यर्थः ॥ १७ ॥ युद्धेन विना प्रहारेण विना ॥ १८–१९ ॥ स्वाशिताः सुष्ठु आशितवन्तः ॥ २०–२४ ॥ ज्यातलयोः शब्दः ज्यातलयोः संघर्षजः शब्दः । स्वनोत्कृष्टः स्वनेषूत्कृष्टः ॥ २५—२६ ॥ विद्धं वेधनं । वर्धते अवर्धत । कृतप्रतिकृतान्योन्यं कृतस्य प्रतिकृतं ययोस्तौ तादृशावन्योन्यं यस्मिन्युद्धकर्मणि तत्तथोक्तं । कुरुतां अकुरुतां । युद्धमिति शेषः ॥ २७—३० ॥ वसुधां तिष्ठत् वसुधायामतिष्ठत् ॥ ३१ ॥ वसुधां वसुधायां ॥ ३२—३६ ॥ तच्छूलमिति । नभोगता नभोगतानि । "सुपां सुलुक्—" दिना आकारादेशः

ति० भित्वारथं भङ्क्त्वेत्यर्थः । हत्वाअश्वानित्यसंधिपाठः । वसुधास्थः अभूदितिशेषः ॥ ३१ ॥ ति० शूलोऽर्धचंद्रादिः ॥ ३४ ॥

[पा०] १ ख. घ. ज. राक्षसास्त्वत्पिताच. २ क. ख. ङ.—ञ. नखाङ्कुशाः. ३ अयंश्लोकः क. ख. च. छ. ञ. पाठेषुदृश्यते. ४ क. ग. एवमुक्तस्तुरामेण. ५ ख. घ.—छ. झ. ञ. मकराक्षोमहाबलः. ६ ख. नसृजत्तस्मै. ७ क.—छ. झ. ञ. विच्छिन्नाः. ज. तेभिन्नाः. ८ च. छ. ज. ट. बलं. ९ ग. च. ज. कुर्वातांतौ. १० क.—घ. च. छ. विदिशस्तथा. ११ क. ग. घ. ङ. झ. संयुगे. १२ झ. भित्त्वारथंशरैरामोहत्वाअश्वानपातयत्. १३ घ. ङ. ज. ञ. ट. रथादश्वानपातयत्. च. रथानश्वानपातयत्. १४ ग. ञ. ट. वसुधास्थस्समकराक्षो. १५ क. उत्तिष्ठत्. १६ इदमर्धत्रयं क. ङ. च. छ. झ. ञ. ट. पाठेषुदृश्यते. १७ क. ग. घ. ङ. झ. ञ. ट. महात्मने. १८ घ.—छ. झ. ञ. ट. बाणैश्चतुर्भिराकाशे. १९ ङ. झ. भिन्नो. क. छिन्नस्त्रिधा.

तं दृष्ट्वा निहतं शूलं मकराक्षो निशाचरः ॥ मुष्टिमुद्यम्य काकुत्स्थं तिष्ठ तिष्ठेति चाब्रवीत् ॥ ३८ ॥
स तं दृष्ट्वा पतन्तं वै प्रहस्य रघुनन्दनः ॥ पावकास्त्रं ततो रामः सन्दधे तु शरासने ॥ ३९ ॥
तेनास्त्रेण हतं रक्षः काकुत्स्थेन तदा रणे ॥ संछिन्नहृदयं तत्र पपात च ममार च ॥ ४० ॥
दृष्ट्वा ते राक्षसाः सर्वे मकराक्षस्य पातनम् ॥ लङ्कामेवाभ्यधावन्त रामबाणार्दितास्तदा ॥ ४१ ॥
दशरथनृपपुत्रबाणवेगै रजनिचरं निहतं खरात्मजं तम् ॥
ददृशुरथ सुरा भृशं प्रहृष्टा गिरिमिव वज्रहतं यथा विकीर्णम् ॥ ४२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनाशीतितमः सर्गः ॥ ७९ ॥

अशीतितमः सर्गः ॥ ८० ॥

मकराक्षक्षयश्रवणविषण्णरावणचोदितेनेन्द्रजिता हुतभुजिहवनपूर्वकं सायुधरथारोहणेनान्तरिक्षेऽन्तर्हितेनसता रामादिपुशरवर्षणम् ॥ १ ॥ लक्ष्मणेन रामंप्रति ब्रह्मास्त्रप्रयोगेणसकलरक्षःकुलक्षपणप्रतिज्ञानपूर्वकमभ्यनुज्ञानयाचने रामेण सान्त्वनेनतंप्रतिषेधनपूर्वकं यत्रकुत्रगतस्यापितस्यवधप्रतिज्ञानपूर्वकमुपायपर्यालोचनम् ॥ २ ॥

मकराक्षं हतं श्रुत्वा रावणः समितिंजयः ॥ क्रोधेन महताऽऽविष्टो दन्तान्कटकटापयन् ॥ १ ॥
कुपितश्च तदा तत्र किं कार्यमिति चिन्तयन् ॥ आदिदेशाथ संक्रुद्धो रणायेन्द्रजितं सुतम् ॥ २ ॥
जहि वीर महावीर्यौ भ्रातरौ रामलक्ष्मणौ ॥ अदृश्यो दृश्यमानो वा सर्वथा त्वं बलाधिकः ॥ ३ ॥
त्वमप्रतिमकर्माणमिन्द्रं जयसि संयुगे ॥ किं पुनर्मानुषौ दृष्ट्वा न वधिष्यसि संयुगे ॥ ४ ॥
तथोक्तो राक्षसेन्द्रेण प्रतिगृह्य पितुर्वचः ॥ यज्ञभूमौ स विधिवत्पावकं जुहवेन्द्रजित् ॥ ५ ॥
जुह्वतश्चापि तत्राग्निं रक्तोष्णीषधराः स्त्रियः ॥ आजग्मुस्तत्र संभ्रान्ता राक्षस्यो यत्र रावणिः ॥ ६ ॥
शस्त्राणि शरपत्राणि समिधोथ विभीतकाः ॥ लोहितानि च वासांसि स्रुवं काष्णायसं तथा ॥ ७ ॥
सर्वतोग्निं समास्तीर्य शरपत्रैः सतोमरैः ॥ छागस्य कृष्णवर्णस्य गलं जग्राह जीवतः ॥ ८ ॥

॥ ३७—४१ ॥ गिरिमिव वज्रहतं यथेति । द्वे अप्यव्ययपदे संभूयैकार्थमेवाचक्षाते । पक्षद्वयेपि मकराक्षवधेन दशममहः समाप्तं ॥ ४२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनाशीतितमः सर्गः ॥ ७९ ॥

अथेन्द्रजिन्निर्गमोशीतितमे—मकराक्षमित्यादि । आविष्टः अभूदिति शेषः ॥ १—३ ॥ जयसि अजैषीः । पुनःशब्दस्त्वर्थे । मानुषौ पुनः मानुषौ तु । संयुगे दृष्ट्वापि न वधिष्यसि किं दर्शनमात्रेण वधिष्यस्येवेत्यर्थः ॥ ४ ॥ जुहव जुहाव । वृद्ध्यभाव आर्षः ॥ ५ ॥ जुह्वतइति भावलक्षणे षष्ठी । रक्तोष्णीषधराः । ऋत्विग्धारणार्थं रक्तोष्णीषाण्यानयन्त्य इत्यर्थः । "लोहितोष्णीषा ऋत्विजः प्रचरन्ति" इति श्रुतेः । संभ्रान्ताः त्वरावत्यः । समयातिक्रमो मा भूदिति त्वरया उष्णीषाण्यानिन्युरित्यर्थः ॥ ६ ॥ शस्त्राणि अभवन्निति शेषः । शरपत्राणि गुन्द्रपत्राणि । गुन्द्रश्च काशजातीयः । "गुन्द्रस्तेजनकः शरः" इत्यमरः । शस्त्राणि तोमराणि । सतोमरैरित्यनुवादात् । शस्त्राणि शरपत्राणि च परिस्तरणान्यभवन् । विभीतकाः समिधः इध्मानि अभवन् । वासांसि ऋत्विगुष्णीषवासांसि लोहितान्यभवन् । काष्णायसं स्रुव-

ति० प्रधावन्त प्राधावन्त ॥ नवम्यांपूर्वरात्रेऽस्यवधः ॥ ४१ ॥ इत्येकोनाशीतितमःसर्गः ॥ ७९ ॥

[पा०] १ ख. ग. ङ. च. छ. झ. ञ. ट. लङ्कामेव प्रधावन्त रामबाणभयार्दिताः. ज. लङ्कामेवाभिधावंस्ते.

सकृदेव समिद्धस्य विधूमस्य महार्चिषः ॥ बभूवुस्तानि लिङ्गानि विजयं दर्शयन्ति च ॥ ९ ॥
प्रदक्षिणावर्तशिखस्तप्तहाटकसन्निभः ॥ हविस्तत्प्रतिजग्राह पावकः स्वयमुत्थितः ॥ १० ॥
हुत्वाऽग्निं तर्पयित्वा च देवदानवराक्षसान् ॥ आरुरोह रथश्रेष्ठमन्तर्धानगतं शुभम् ॥ ११ ॥
स वाजिभिश्चतुर्भिश्च बाणैश्च निशितैर्युतः ॥ आरोपितमहाचापः शुशुभे स्यन्दनोत्तमः ॥ १२ ॥
जाज्वल्यमानो वपुषा तपनीयपरिच्छदः ॥ मृगैश्चन्द्रार्धचन्द्रैश्च सरथः समलङ्कृतः ॥ १३ ॥
जाम्बूनदमहाकम्बुर्दीप्तपावकसन्निभः ॥ बभूवेन्द्रजितः केतुर्वैडूर्यसमलङ्कृतः ॥ १४ ॥
तेन चादित्यकल्पेन ब्रह्मास्त्रेण च पालितः ॥ स बभूव दुराधर्षो रावणिः सुमहाबलः ॥ १५ ॥
सोभिनिर्याय नगरादिन्द्रजित्समितिंजयः ॥ हुत्वाऽग्निं राक्षसैर्मन्त्रैरन्तर्धानगतोऽब्रवीत् ॥ १६ ॥
अद्य हत्वा रणे यौ तौ मिथ्या प्रव्राजितौ वने ॥ जयं पित्रे प्रदास्यामि रावणाय रणार्जितम् ॥१७॥
अद्य निर्वानरामुर्वीं हत्वा रामं सलक्ष्मणम् ॥ करिष्ये परमप्रीतिमित्युक्त्वाऽन्तरधीयत ॥ १८ ॥
आपपाताथ संक्रुद्धो दशग्रीवेण चोदितः ॥ तीक्ष्णकार्मुकनाराचैस्तीक्ष्णस्त्वेन्द्ररिपू रणे ॥ १९ ॥
स ददर्श महात्मानौ नागौ त्रिशिरसाविव ॥ सृजन्ताविषुजालानि वीरौ वानरमध्यगौ ॥ २० ॥
इमौ तावितिसंचिन्त्य सज्यं कृत्वा च कार्मुकम् ॥ सन्ततानेषुधाराभिः पर्जन्य इव वृष्टिमान् ॥२१॥
सं तु वैहायसं प्राप्य सरथो रामलक्ष्मणौ ॥ अचक्षुर्विषये तिष्ठन्विव्याध निशितैः शरैः ॥ २२ ॥
तौ तस्य शरवेगेन परीतौ रामलक्ष्मणौ ॥ धनुषी सशरे कृत्वा दिव्यमस्त्रं प्रचक्रतुः ॥ २३ ॥
प्रच्छादयन्तौ गगनं शरजालैर्महाबलौ ॥ तमस्त्रैः सूर्यसंकाशैर्नैव पस्पृशतुः शरैः ॥ २४ ॥
स हि धूमान्धकारं च चक्रे प्रच्छादयन्नभः ॥ दिशश्चान्तर्दधे श्रीमान्नीहारतमसा वृताः ॥ २५ ॥
नैव ज्यातलनिर्घोषो न च नेमिखुरस्वनः ॥ शुश्रुवे चरतस्तस्य न च रूपं प्रकाशते ॥ २६ ॥

मासीत् ॥ ७—८ ॥ विजयं दर्शयन्ति विजयसूचकानि ॥ ९—१० ॥ अन्तर्धानगतं अन्तर्धानशक्तियुक्तं ॥ ११—१२ ॥ मृगैः मृगाकारप्रतिमाभिः । चन्द्रैः चन्द्राकारैः । अर्धचन्द्रैः रचनाविशेषैः ॥१३॥ जाम्बूनदमहाकम्बुः सौवर्णमहावलययुक्तः । "कम्बुर्नो वलये शङ्खे" इत्यमरः ॥ १४—१५ ॥ राक्षसैः निर्ऋतिदेवताकैः । अन्तर्धानगतः अन्तर्धानशक्तिं प्राप्तः । अतः इत्युक्त्वान्तरधीयतेत्यनेन न विरोधः ॥ १६ ॥ अद्य हत्वेत्यादिश्लोकद्वयमेकान्वयं । अद्य निर्वानरामिति । पितुरित्यध्याहारः । पितुः परमप्रीतिं परमप्रीतिं प्रति । पितुः प्रीतिमुद्दिश्येत्यर्थः । अद्य सलक्ष्मणं रामं हत्वा उर्वीं निर्वानरां करिष्य इति संबन्धः ॥ १७—१९ ॥ नागौ त्रिशिरसाविवेति दृष्टान्तेन रामलक्ष्मणयोर्महापुरुषलक्षणपृथुलोन्नतभुजशिरस्कत्वं द्योत्यते । सृजन्तौ सृक्ष्यन्तौ । सकलराक्षसक्षयकारिणाविवार्थः ॥ २० ॥ सन्ततान ववर्ष ॥ २१ ॥ वैहायसं विहायसा गमनं ॥ २२—२४ ॥ नभः प्रच्छादयन् । हेतौ शतृप्रत्ययः । अन्तर्धापयामासेत्यर्थः । धूमान्धकारमिति नीहारतमसावृता इति च पूर्वमेवोत्पातकलुषत्वमुच्यते । घनान्धकारे घनका-

---

ति० राक्षसांस्तर्पयित्वा । अभिचारयागीयानितिशेषः ॥११॥ शि० मिथ्या निरर्थयौवनेप्रव्राजितौ आगतौ ॥ स० मिथ्याप्रव्राजितौ कपटविरक्ताचारौ ॥ १७ ॥ ति० यत्त्वेवमादिवचसांरामस्तुतिपरतयाक्लेशेनव्याख्यनंतदृथैव । कवेःकविनिबद्धवक्तुश्चतथातात्पर्याभावादिति । एतत्सजातीयवालिवाक्यावसरेनिरूपितं ॥ १८ ॥ स० त्रिशिरसौ एकत्रतूणी अपरत्रचापकोटिः मध्ये शिरश्चेतित्रिशिरसाविव्यर्थः । नागौ सर्पौ । तोयंसृजन्तौनागौ मेघौत्रिशिरसौचेत्ताविवसृजन्ताविवेतिवा । "नागःकूराचारेषुतोयदे" इतिविश्वः ॥ २० ॥ ति० वैहायसरथः आकाशगामीरथोयस्यसः । अचक्षुर्विषयेतिष्ठन् । इदंयुद्धंतद्रात्रावेवमध्यरात्रे ॥ २२ ॥ रामानु० घनान्धकारे घनयुक्तान्धकारवन्निबिडे ॥ ती० घनान्धकारे सान्द्रतिमिरे । शरवर्षमिव उदकवर्षमिव ॥

[पा०] १ क.—च. झ. ञ. ट. शरहोमसमिद्धस्य. ज. चरुहोमसमिद्धस्य. २ क. च. ज. ञ. यान्यदर्शयन्. ३ च. ज. झ. रणेऽधिकं. ४ क. ख. कृत्वानिर्वानरां. ५ ख. नागौनिदृश्यसितावित्र. ६ ङ. झ. ञ. सतुवैहायसरथोयुधितौ. ७ ख. विरथौ.

घनान्धकारे तिमिरे शरवर्षमिवाद्भुतम् ॥ स ववर्ष महाबाहुर्नाराचशरवृष्टिभिः ॥ २७ ॥
स रामं सूर्यसंकाशैः शरैर्दत्तवरो भृशम् ॥ विव्याध समरे क्रुद्धः सर्वगात्रेषु रावणिः ॥ २८ ॥
तौ हन्यमानौ नाराचैर्धाराभिरिव पर्वतौ ॥ हेमपुङ्खान्नरव्याघ्रौ तिग्मान्मुमुचतुः शरान् ॥ २९ ॥
अन्तरिक्षे समासाद्य रावणिं कङ्कपत्रिणः ॥ निकृत्य पतगा भूमौ पेतुस्ते शोणितोक्षिताः ॥ ३० ॥
अतिमात्रं शरौघेण पीड्यमानौ नरोत्तमौ ॥ तानिषून्पततो भल्लैरनेकैर्निचकृन्ततुः ॥ ३१ ॥
यतो हि दृश्यते तौ शरान्निपततः शितान् ॥ ततस्तु तौ दाशरथी ससृजातेऽस्त्रमुत्तमम् ॥ ३२ ॥
रावणिस्तु दिशः सर्वा रथेनातिरथः पतन् ॥ विव्याध तौ दाशरथी लघ्वस्त्रो निशितैः शरैः ॥३३॥
तेनातिविद्धौ तौ वीरौ रुक्मपुङ्खैः सुसंहितैः ॥ बभूवतुर्दाशरथी पुष्पिताविव किंशुकौ ॥ ३४ ॥
नास्य वेद गतिं कश्चिन्न च रूपं धनुः शरान् ॥ न चान्यद्विदितं किंचित्सूर्यस्येवाभ्रसंप्लवे ॥ ३५ ॥
तेन विद्धाश्च हरयो निहताश्च गतासवः ॥ बभूवुः शतशस्तत्र पतिता धरणीतले ॥ ३६ ॥
लक्ष्मणस्तु सुसंक्रुद्धो भ्रातरं वाक्यमब्रवीत् ॥ ब्राह्ममस्त्रं प्रयोक्ष्यामि वधार्थं सर्वरक्षसाम् ॥ ३७ ॥
तमुवाच ततो रामो लक्ष्मणं शुभलक्षणम् ॥ ३८ ॥
नैकस्य हेतो रक्षांसि पृथिव्यां हन्तुमर्हसि ॥ अयुध्यमानं प्रच्छन्नं प्राञ्जलिं शरणागतम् ॥
पलायन्तं प्रमत्तं वा न त्वं हन्तुमिहार्हसि ॥ ३९ ॥
अस्यैव तु वधे यत्नं करिष्यावो महाबल ॥ आदेक्ष्यावो महावेगानस्त्रानाशीविषोपमान् ॥ ४० ॥
तमेनं मायिनं क्षुद्रमन्तर्हितरथं बलात् ॥ राक्षसं निहनिष्यन्ति दृष्ट्वा वानरयूथपाः ॥ ४१ ॥
यद्येष भूमिं विशते दिवं वा रसातलं वाऽपि नभःस्थलं वा ॥
एवं निगूढोपि ममास्त्रदग्धः पतिष्यते भूमितले गतासुः ॥ ४२ ॥
इत्येवमुक्त्वा वचनं महात्मा रघुप्रवीरः प्लवगर्षभैर्वृतः ॥
वधाय रौद्रस्य नृशंसकर्मणस्तदा महात्मा त्वरितं निरीक्षते ॥ ४३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अशीतितमः सर्गः ॥ ८० ॥

लिमवति ॥ २५—२९ ॥ पतगाः पक्षिणो भूत्वा । तथा वेगवन्त इत्यर्थः ॥ ३०—३३ ॥ सुसंहितैः सुष्ठु निर्मितैः ॥ ३४ ॥ अभ्रसंप्लवे मेघावरणे ॥ ३५—३८ ॥ प्रच्छन्नं युद्धभीत्या प्रच्छन्नं । पलायन्तं पलायमानं ॥ ३९ ॥ आदेक्ष्यावः प्रयोक्ष्यावः । अस्त्रान् अस्त्राणि । लिङ्गव्यत्यय आर्षः ॥४०—४१॥ भूमिं भूविवरं । विशते । आत्मनेपदमार्षं । दिवं स्वर्गं ॥ ४२ ॥ प्लवगर्षभैः वृतः निरीक्षते । उपायं

शि० घने निबिडे अन्धकारे दृष्टयुपघातके । तिमिरे तमसि ॥ २७ ॥ ति० दत्तवरैः वरदत्तैः ॥ २८ ॥ स० " रक्षतीत्येव विश्वासस्तदीयोहमितिस्मृतिः । शरणागतिरेषास्यात् " इत्यायुक्तशरणागतिमान् ॥ ति० अयुध्यमानत्वादिषट्प्रकाराणामपि सर्वरक्षउद्देशेनब्रह्मास्त्रसंधानेवधोभवति । नतुतद्युज्यतइत्यर्थः । अन्ततोविभीषणस्यापिनाशप्रसङ्गइत्याशयः ॥ ३९ ॥ ति० मायय्यान्तर्हितमेनमेवहन्तुंधोरानाशीविषोपमानस्त्राण्यादेक्ष्यावः । अदृष्टवधोस्मदेकसाध्यः । दृष्टस्यतुवधईषत्करोवानराणामपीत्याह—राक्षसमिति । यदिदर्शनंस्यात्तदादृष्ट्वा दर्शनमात्रेणहनुमदादयः एनंराक्षसंनिहनिष्यन्ति । दृष्ट्वावानरयूथपाइत्यत्र तद्दर्शनोपायोभारतेउक्तः ' इदमंभोगृहीत्वातुराजराजस्यशासनात् । गुह्यकोऽभ्यागतःकश्चित्त्वत्सकाशमरिंदम । इदमंभःकुबेरस्तेमहाराजः प्रयच्छति । अन्तर्हितानांभूतानांदर्शनार्थंपरंतप । अनेनमृष्टनयनोभूतान्यन्तर्हितान्युत । भवान्द्रक्ष्यतियस्मैचप्रदास्यतिनरःसच " इतिविभीषणवाक्येन ॥ ४१ ॥ रामानु० भूमिं भूविवरं । विशते । आत्मनेपदमार्षं । दिवं स्वर्गं । एतत् उपरितनलोकानामुपलक्षणं । रसातलं एतदधस्तनलोकानामुपलक्षणं ॥ ४२ ॥ इत्यशीतितमःसर्गः ॥ ८० ॥

पा०] १ क. ख. घ. ङ. ज.—ट. शिलावर्षमिवा. २ ख. ग. ङ. छ. झ. ञ. ट. दत्तवरैः. ३ ङ. छ. झ. ञ. ट. शोणिताप्लुताः. ४ ङ. छ. झ. ञ. ट. दीप्यमानौ.

एकाशीतितमः सर्गः ॥ ८१ ॥

इन्द्रजिताऽन्तर्हितस्यापि स्वस्यवधनिर्धारणरूपरामभावविज्ञानेन भयाल्लङ्काप्रवेशः ॥ १ ॥ तथा शत्रुवधाययजननिर्धारणेन तदन्तरायपरिहृतये रामन्यामोहनायस्वनिर्मितमायासीतायारथारोपणपूर्वकं पश्चिमद्वारान्निर्गतेन हनुमदग्रे खड्गेनमायासीताच्छेदनम् ॥ २ ॥

विज्ञाय तु मनस्तस्य राघवस्य महात्मनः ॥ सन्निवृत्याहवात्तस्मात्संविवेश पुरं ततः ॥ १ ॥
सोनुस्मृत्य वधं तेषां राक्षसानां तरस्विनाम् ॥ क्रोधताम्रेक्षणः शूरो निर्जगाम महाद्युतिः ॥ २ ॥
स पश्चिमेन द्वारेण निर्ययौ राक्षसैर्वृतः ॥ इन्द्रजित्तु महावीर्यः पौलस्त्यो देवकण्टकः ॥ ३ ॥
इन्द्रजित्तु ततो दृष्ट्वा भ्रातरौ रामलक्ष्मणौ ॥ रणायाभ्युद्यतौ वीरौ मायां प्रादुष्करोत्तदा ॥ ४ ॥
इन्द्रजित्तु रथे स्थाप्य सीतां मायामयीं ततः ॥ बलेन महताऽऽवृत्य तस्या वधमरोचयत् ॥ ५ ॥
मोहनार्थं तु सर्वेषां बुद्धिं कृत्वा सुदुर्मतिः ॥ हन्तुं सीतां व्यवसितो वानराभिमुखो ययौ ॥ ६ ॥
तं दृष्ट्वा त्वभिनिर्यान्तं नगर्याः काननौकसः ॥ उत्पेतुरभिसंक्रुद्धाः शिलाहस्ता युयुत्सवः ॥ ७ ॥
हनुमान्पुरतस्तेषां जगाम कपिकुञ्जरः ॥ प्रगृह्य सुमहच्छृङ्गं पर्वतस्य दुरासदम् ॥ ८ ॥
स ददर्श हतानन्दां सीतामिन्द्रजितो रथे ॥ एकवेणीधरां दीनामुपवासकृशाननाम् ॥ ९ ॥
परिक्लिष्टैकवसनामसृजां राघवप्रियाम् ॥ रजोमलाभ्यामालिप्तैः सर्वगात्रैर्वरस्त्रियम् ॥ १० ॥
तां निरीक्ष्य मुहूर्तं तु मैथिलीत्यध्यवस्य तु ॥ बभूवाचिरदृष्टा हि तेन सा जनकात्मजा ॥ ११ ॥
तां दीनां मलदिग्धाङ्गीं रथस्थां दृश्य मैथिलीम् ॥ बाष्पपर्याकुलमुखो हनुमान्व्यथितोऽभवत् ॥१२॥

चिन्तयति स्मेत्यर्थः ॥ ४३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अशीतितमः सर्गः ॥ ८० ॥

अथ मायासीतावध एकाशीतितमे—विज्ञाय त्वित्यादि । अत्र तृतीयाक्षरभूतो यकारो गायत्र्या एकोनविंशतितमाक्षरं । अष्टादशसहस्रश्लोकागताः ॥ १ ॥ तेषां कुम्भकर्णादीनां ॥ २ ॥ निकुम्भिलायां दुर्जयास्त्रबललाभाय होतुकामस्तावत्पर्यन्तं रामलक्ष्मणयोर्युद्धोद्योगं मन्दीकर्तुं मायामारिप्समाणो रामलक्ष्मणयोः कुपितत्वेन दुरासदत्वात् सीतास्वरूपाभिज्ञस्यान्यस्याभावाद्धनुमते मायां दर्शयितुं पश्चिमद्वारेण निर्गत इत्याह—स पश्चिमेनेत्यादिना ॥ ३ ॥ दृष्ट्वा विचिन्त्य । पश्चिमद्वारनिष्क्रान्तस्य रामलक्ष्मणदर्शनासंभवात् । मायां परव्यामोहकरीं शक्तिं । प्रादुष्करोत् प्रादुर्भावयामास ॥ ४ ॥ आवृत्य स्थितेन बलेन । युक्त इति शेषः । युक्ते रथे सीतां स्थाप्य ततस्तस्या वधमरोचयदिति संबन्धः ॥ ५—८ ॥ स ददर्शेत्यादिश्लोकद्वयमेकान्वयं । अमृजां अनुद्वर्तनां । अनलंकारामिति वा । "मृजू शौचालंकारयोः" इति धातोर्भिदादित्वादङ् । सर्वगात्रैः उपलक्षितां ॥ ९—१० ॥ अध्यवस्य निश्चित्य । विषण्ण इति शेषः । निश्चये हेतुमाह—बभूवेति ॥ ११ ॥ दृश्य दृष्ट्वा

ति० मायां परव्यामोहकरींशक्तिं । प्रादुष्करोत् प्रादुर्भावयामास । निकुंभिलांगन्तुकामःपश्चिमेनद्वारेणनिर्गच्छन् स्वगमनविघातकंरामलक्ष्मणयोर्युद्धोद्योगंदृष्ट्वातन्निवारणार्थंमायांप्रकटितवानित्याशयः ॥ स० तुशब्दोन्तर्गच्छन्निति विशेषार्थः ॥ ४ ॥ ति० इन्द्रजित्त्विति । इदंरात्रिशेषे परदिनेदशम्यांवेतिबोध्यं ॥ ५ ॥ स० यापूर्वंआचिरदृष्टा बहुतिथमवलोकिता । साजनकात्मजा वानेतिमुहूर्तं निरीक्ष्य आलोच्य तामध्यवस्य सैवेतिनिश्चित्य । अहिते दुःखे बभूव दुःखितोऽभूदितियावत् । अचिरदृष्टा अल्पकालव्यवधानेनदृष्टेतिवा ॥ ११ ॥

[पा०] १ क. ङ. ज. त्तस्मात्प्रविवेशपुरीं. ख. ग. घ. झ. ट. त्तस्मात्प्रविवेशपुरं. २ घ.—छ. झ. ञ. ट. निर्जगामाथरावणिः. ३ ङ. च. छ. झ. ञ. ट. सर्वेतेकाननौकसः.

अब्रवीत्तां तु शोकार्तां निरानन्दां तपस्विनीम् ॥ सीतां रथस्थितां दृष्ट्वा राक्षसेन्द्रसुताश्रिताम् ॥
किं समर्थितमस्येति चिन्तयन्स महाकपिः ॥ १३ ॥
सह तैर्वानरश्रेष्ठैरभ्यधावत रावणिम् ॥ १४ ॥
तद्वानरबलं दृष्ट्वा रावणिः क्रोधमूर्च्छितः ॥ कृत्वा विकोशं निस्त्रिंशं मूर्ध्नि सीतां परामृशत् ॥ १५ ॥
तां स्त्रियं पश्यतां तेषां ताडयामास रावणिः ॥ क्रोशन्तीं राम रामेति मायया योजितां रथे ॥१६॥
गृहीतमूर्धजां दृष्ट्वा हनुमान्दैन्यमागतः ॥ शोकजं वारि नेत्राभ्यामसृजन्मारुतात्मजः ॥ १७ ॥
तां दृष्ट्वा चारुसर्वाङ्गीं रामस्य महिषीं प्रियाम् ॥ अब्रवीत्परुषं वाक्यं क्रोधाद्रक्षोधिपात्मजम् ॥ १८ ॥
दुरात्मन्नात्मनाशाय केशपक्षे परामृशः ॥ ब्रह्मर्षीणां कुले जातो राक्षसीं योनिमाश्रितः ॥ १९ ॥
धिक्त्वां पापसमाचारं यस्य ते मतिरीदृशी ॥ नृशंसानार्य दुर्वृत्त क्षुद्र पापपराक्रम ॥
अनार्यस्येदृशं कर्म घृणा ते नास्ति निर्घृण ॥ २० ॥
च्युता गृहाच्च राज्याच्च रामहस्ताच्च मैथिली ॥ किं तवैषापराद्धा हि यदेनां हन्तुमिच्छसि ॥ २१ ॥
सीतां च हत्वा न चिरं जीविष्यसि कथंचन ॥ वधार्हकर्मणाऽनेन मम हस्तगतो ह्यसि ॥ २२ ॥
ये च स्त्रीघातिनां लोका लोकवध्येषु कुत्सिताः ॥ इह जीवितमुत्सृज्य प्रेत्य तान्प्रतिपत्स्यसे ॥२३॥
इति ब्रुवाणो हनुमान्सायुधैर्हरिभिर्वृतः ॥ अभ्यधावत संक्रुद्धो राक्षसेन्द्रसुतं प्रति ॥ २४ ॥
आपतन्तं महावीर्यं तदनीकं वनौकसाम् ॥ रक्षसां भीमवेगानामनीकं तु न्यवारयत् ॥ २५ ॥
स तां बाणसहस्रेण विक्षोभ्य हरिवाहिनीम् ॥ हरिश्रेष्ठं हनूमन्तमिन्द्रजित्प्रत्युवाच ह ॥ २६ ॥
सुग्रीवस्त्वं च रामश्च यन्निमित्तमिहागताः ॥ तां हनिष्यामि वैदेहीमद्यैव तव पश्यतः ॥ २७ ॥

॥ १२ ॥ अब्रवीदित्याद्यर्धत्रयमेकान्वयं । सीतां रथे स्थापितवतोस्य किं समर्थितं को वाभिप्राय इति चिन्तयन्नब्रवीत् । इतिर्वचनचिन्तनयोः साधारणः ॥ १३ ॥ सह तैरित्यर्धं । हनुमानिति शेषः ॥ १४ ॥ मूर्च्छितः व्याप्तः ॥ १५ ॥ पश्यतां तेषां । अनादरे षष्ठी । मायया परमोहनशक्त्या ॥ १६—१८ ॥ केशपक्षे केशसमूहे । "पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे" इत्यमरः । परामृशः अस्पृशः ॥ १९ ॥ धिगित्यादिसार्धश्लोक एकान्वयः । ईदृशी । जुगुप्सितेत्यर्थः । नृशंस निर्दय । अनार्य असज्जन । दुर्वृत्त दुराचार । क्षुद्र अल्पबुद्धे । पापः अधर्म्यः पराक्रमो यस्य स पापपराक्रमः । उक्तमनार्यत्वं कार्यतो दर्शयति—अनार्यस्येति । ईदृशं जुगुप्सितं कर्म अनार्यस्यैव भवति । हे निर्घृण निर्दय, ते घृणा जुगुप्सा नास्ति । "जुगुप्सा करुणा घृणा" इत्यमरः ॥ २० ॥ अपराधिषु घृणा न कर्तव्या । अत एव एनं हन्मीत्याशङ्क्यापराधलेशोप्यस्यां नास्तीत्याह—च्युतेति । गृहात् स्वसदनात् । चकारात् परिचारकेभ्यश्च । अनेन बन्धुमुखादपराधकरणं नास्तीत्युक्तं । राज्यात् राज्योपकरणाच्च । अनेन सेनामुखेन नापराध इत्युक्तं । रामहस्तात् रक्षकहस्ताच्च । तन्मुखादप्यपराधप्रसक्तिर्नास्तीत्युक्तं । मैथिली आचारप्रधानकुले जाता । अनेनापराधस्वरूपमेव न जानातीत्युक्तं । यत् येनापराधकार्येण । एनां हन्तुमिच्छसि तादृशं किं प्रयोजनमुद्दिश्य । अपराद्धा अपराधं कृतवती । कर्तरि क्तः ॥ २१—२२ ॥ हे लोकवध्य, एषु चतुर्दशलोकेषु । स्त्रीघातिनां ये कुत्सिता लोकाः तान् इह जीवितमुत्सृज्य प्रेत्य यातनाशरीरं प्राप्य । प्रतिपत्स्यसे । प्राप्स्यसीत्यर्थः ॥ २३ ॥ सायुधैः सहननसाधनैः ॥ २४ ॥ अनीकं अनीकं च ॥२५—

ति० मूर्ध्नि तत्स्थेकेशपाशे । स्पृष्ट्वेतिशेषः ॥ १५ ॥ ति० येलोकवध्यैः चोरादिभिरपिकुत्सिताः अतिदुःखितयापरिहृताः ॥२३॥ ति० आपतन्तमितिलिङ्व्यत्ययआर्षः ॥ ती० रक्षसामनीकंकर्तृ ॥ २५ ॥

[पा०] १ ग. घ. सीतांप्रधर्षयत्. क. सीतांप्रकर्षयत्. ङ. च. छ. झ. ञ. ट. सीतामकर्षयत्. २ झ. ञ. लोकवध्यैश्च.

इमां हत्वा ततो रामं लक्ष्मणं त्वां च वानर ॥
सुग्रीवं च वधिष्यामि तं चानार्यं विभीषणम् ॥ २८ ॥
न हन्तव्याः स्त्रियश्चेति यद्भवीषि प्लवङ्गम ॥ पीडाकरममित्राणां यत्स्यात्कर्तव्यमेव तत् ॥ २९ ॥
[ताटकाया वधं रामः किमर्थं कृतवान्पुरा ॥ तदहं हन्मि रामस्य महिषीं जनकात्मजाम्] ॥ ३० ॥
तमेवमुक्त्वा रुदतीं सीतां मायामयीं तदा ॥ शितधारेण खड्गेन निजघानेन्द्रजित्स्वयम् ॥ ३१ ॥
यज्ञोपवीतमार्गेण भिन्ना तेन तपस्विनी ॥ सा पृथिव्यां पृथुश्रोणी पपात प्रियदर्शना ॥
तामिन्द्रजित्स्वयं हत्वा हनुमन्तमुवाच ह ॥ ३२ ॥
मया रामस्य पश्येमां कोपेन च निषूदिताम् ॥ एषा विशस्ता वैदेही विफलो वः परिश्रमः ॥ ३३ ॥
ततः खड्गेन महता हत्वा तामिन्द्रजित्स्वयम् ॥ हृष्टः स रथमास्थाय विननाद महास्वनम् ॥ ३४ ॥
वानराः शुश्रुवुः शब्दमदूरे प्रत्यवस्थिताः ॥ व्यादितास्यस्य नदतस्तदुर्गे संश्रितस्य च ॥ ३५ ॥
तथा तु सीतां विनिहत्य दुर्मतिः प्रहृष्टचेताः स बभूव रावणिः ॥
तं हृष्टरूपं समुदीक्ष्य वानरा विषण्णरूपाः सहसा प्रदुद्रुवुः ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकाशीतितमः सर्गः ॥ ८१ ॥

द्व्यशीतितमः सर्गः ॥ ८२ ॥

इन्द्रजिता मायासीताच्छेदनानन्तरं हनुमतावानरान्प्रति सीतानिधनाद्युद्धस्यवैफल्योक्त्या प्रतिनिवर्तनपूर्वकं तैस्सह रामसमीपगमनम् ॥ १ ॥ अत्रान्तरेलब्धावकाशेनेन्द्रजिता निकुंभिलामेत्ययागारंभः ॥ २ ॥

श्रुत्वा तु भीमनिर्ह्रादं शक्राशनिसमस्वनम् ॥ वीक्षमाणा दिशः सर्वा दुद्रुवुर्वानरर्षभाः ॥ १ ॥
तानुवाच ततः सर्वान्हनुमान्मारुतात्मजः ॥ विषण्णवदनान्दीनांस्त्रस्तान्विद्रवतः पृथक् ॥ २ ॥
कस्माद्विषण्णवदना विद्रवध्वे प्लवङ्गमाः ॥ त्यक्तयुद्धसमुत्साहाः शूरत्वं क्वनु वो गतम् ॥ ३ ॥
पृष्ठतोऽनुव्रजध्वं मामग्रतो यान्तमाहवे ॥ शूरैरभिजनोपेतैरयुक्तं हि निवर्तितुम् ॥ ४ ॥

---

२८ ॥ न हन्तव्या इति यत् ब्रवीषि तत्रोत्तरं शृण्विति वाक्यशेषः ॥ २९—३१ ॥ यज्ञोपवीतमार्गेण भिन्ना । मार्गशब्दः प्रकारवचनः । यज्ञोपवीतधारणप्रकारेण भिन्नेत्यर्थः । यज्ञोपवीतमादाय भिन्नेति पाठान्तरं । पूर्वं मूर्धजेषु गृहीतामादाय । यज्ञोपवीतभिन्ना यज्ञोपवीतं यथा भवति तथा भिन्ना । यज्ञोपवीतप्रकारेण भिन्नेत्यर्थः ॥ ३२—३४ ॥ व्यादितास्यस्य व्याक्तास्यस्य । तदुर्गे व्यूहीकृतराक्षसपरिवेष्टनरूपं ॥ ३५ ॥ हृष्टरूपं अत्यन्तहृष्टं । विषण्णरूपाः अत्यन्तं विषण्णाः ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकाशीतितमः सर्गः ॥ ८१ ॥

अथेन्द्रजितो निकुम्भिलायां होमारम्भः—श्रुत्वेत्यादि ॥ शक्राशनिसमस्वनं शक्राशनिस्वनसममित्यर्थः ॥ १—२ ॥ विद्रवध्वे विद्रवथ । आत्मनेपदमार्षं ॥ ३ ॥ अनुव्रजध्वं अनुव्रजत । पदव्यत्ययआर्षः

रामानु० रामस्येमां रामसंबन्धिनीं । राममहिषीमितियावत् ॥ ३३ ॥ ति० तदुर्गे खेचररथरूपंदुर्गे ॥ ३५ ॥ इत्येकाशीतितमः सर्गः ॥ ८१ ॥

[पा०] १ अयंश्लोकः क. ख. ग. च. छ. ञ. पाठेषुदृश्यते. २ ङ. छ. झ. ञ. ट. पश्येमांप्रियांशस्त्रनिषूदितां. ख. पश्येमांसीतांकोपेनसूदितां. ३ ख. तद्युद्धं. ४ ख. छ. ञ. ट. समभिप्रदुद्रुवुः.

एवमुक्ताः सुसंहृष्टा वायुपुत्रेण वानराः ॥ शैलशृङ्गाण्यगांश्चैव जगृहुर्हृष्टमानसाः ॥ ५ ॥
अभिपेतुश्च गर्जन्तो राक्षसान्वानरर्षभाः ॥ परिवार्य हनूमन्तमन्वयुश्च महाहवे ॥ ६ ॥
स तैर्वानरमुख्यैश्च हनुमान्सर्वतो वृतः ॥ हुताशन इवार्चिष्मानदहच्छत्रुवाहिनीम् ॥ ७ ॥
स राक्षसानां कदनं चकार सुमहाकपिः ॥ वृतो वानरसैन्येन कालान्तकयमोपमः ॥ ८ ॥
स तु कोपेन चाविष्टः शोकेन च महाकपिः ॥ हनुमान्रावणिरथेऽपातयन्महतीं शिलाम् ॥ ९ ॥
तामापतन्तीं दृष्ट्वैव रथः सारथिना तदा ॥ विधेयाश्वसमायुक्तः सुपूरमपवाहितः ॥ १० ॥
तमिन्द्रजितमप्राप्य रथस्थं सहसारथिम् ॥ विवेश धरणीं भित्त्वा सा शिला व्यर्थमुद्यता ॥ ११ ॥
पातितायां शिलायां तु रक्षसां व्यथिता चमूः ॥ निपतन्त्या च शिलया राक्षसा मथिता भृशम् ॥१२॥
तमभ्यधावञ्छतशो नदन्तः काननौकसः ॥ १३ ॥
ते द्रुमांश्च महावीर्या गिरिशृङ्गाणि चोद्यताः ॥ क्षिपन्तीन्द्रजितः संख्ये वानरा भीमविक्रमाः ॥१४॥
वृक्षशैलमहावर्षं विसृजन्तः प्लवङ्गमाः ॥ शत्रूणां कदनं चक्रुर्नेदुश्च विविधैः स्वरैः ॥ १५ ॥
वानरैस्तैर्महावीर्यैर्घोररूपा निशाचराः ॥ वीर्यादभिहता वृक्षैर्व्यवेष्टन्त रणाजिरे ॥ १६ ॥
स्वसैन्यमभिवीक्ष्याथ वानरार्दितमिन्द्रजित् ॥ प्रगृहीतायुधः क्रुद्धः परानभिमुखो ययौ ॥ १७ ॥
स शरौघानवसृजन्स्वसैन्येनाभिसंवृतः ॥ जघान कपिशार्दूलान्स बहून्दृष्टविक्रमः ॥ १८ ॥
शूलैरशनिभिः खड्गैः पट्टिशैः कूटमुद्गरैः ॥ ते चाप्यनुचरास्तस्य वानराञ्जघ्नुरोजसा ॥ १९ ॥
सस्कन्धविटपैः सालैः शिलाभिश्च महाबलः ॥ हनुमान्कदनं चक्रे रक्षसां भीमकर्मणाम् ॥ २० ॥
स निवार्य परानीकमब्रवीत्तान्वनौकसः ॥ हनुमान्सन्निवर्तध्वं न नः साध्यमिदं बलम् ॥ २१ ॥
त्यक्त्वा प्राणान्विवेष्टन्तो रामप्रियचिकीर्षवः ॥ यन्निमित्तं हि युध्यामो हता सा जनकात्मजा ॥२२॥
इममर्थं हि विज्ञाप्य रामं सुग्रीवमेव च ॥ तौ यत्प्रतिविधास्येते तत्करिष्यामहे वयम् ॥ २३ ॥
इत्युक्त्वा वानरश्रेष्ठो वारयन्सर्ववानरान् ॥ शनैः शनैरसंत्रस्तः सबलः सव्यवर्तत ॥ २४ ॥
ततः प्रेक्ष्य हनूमन्तं व्रजन्तं यत्र राघवः ॥ स होतुकामो दुष्टात्मा गतश्चैत्यनिकुम्भिलाम् ॥ २५ ॥
निकुम्भिलामधिष्ठाय पावकं जुहवेन्द्रजित् ॥ २६ ॥
यज्ञभूम्यां तु विधिवत्पावकस्तेन रक्षसा ॥ हूयमानः प्रजज्वाल मांसशोणितभुक्तदा ॥ २७ ॥
सोर्चिःपिनद्धो ददृशे होमशोणिततर्पितः ॥ सन्ध्यागत इवादित्यः सुतीव्रोऽग्निः समुत्थितः ॥२८॥

॥ ४—१० ॥ व्यर्थमुद्यता व्यर्थं प्रयुक्ता ॥११–१३॥ इन्द्रजितः इन्द्रजितं प्रति ॥ १४—१८ ॥ शूलैरशनिभिरिति अशनेरायुधत्वं शक्तिविशेषात् ॥१९–२०॥ न साध्यं साधयितुमयोग्यं । प्रयोजनाभावादिति-भावः । तदेवाह—त्यक्त्वेति ॥ २१—२४ ॥ चैत्यनिकुम्भिलां चैत्ये विद्यमानं निकुम्भिलाख्यदेवतायतनमित्यर्थः ॥ २५ ॥ निकुम्भिलामित्यर्थे । जुहव जुहाव ॥ २६—२७ ॥ होमशोणितं शोणितहोमः

स० धरणीं भित्त्वा व्यर्थं इन्द्रजिद्धननरूपार्थरहितंयथाभवतितथा । तामेव याविवेश साशिला पुनरुद्यता उपर्यायाता । एवं शिलायांपातितायांसत्यां रक्षसांचमूःसेनाव्यथिता अन्तर्गताचोत्थितापुनःकिंकरोतीतिव्यथांप्राप्ता । भृशंनिपतन्त्यातयाशिलयाच राक्षसाभृशंमथिताइत्यन्वयः । एकेतु व्यर्थमुद्यतासाशिलाऽभूत् धरणींचाविवेश । हनुमताशिलायांपातितायांरक्षसांचमूर्व्यथिता । तयाचनिपतन्त्याशिलयाराक्षसामथिताइत्यन्वयंमन्वते ॥११॥ स० नः इदंबलं साध्यं विनियोज्यंन । साध्यंफलमस्मास्वीतितद्वा ॥ २१ ॥ इदमर्थं पदमेकं । अयंचासावर्थश्चेदमर्थस्तं ॥२३॥ ति० दशम्यांपूर्वाह्णेनिकुंभिलागमनं । निकुंभिलां चैत्यंतदाख्यदेवालयंवटवृक्षंवा ॥ २५ ॥ ति० होमशोणितभुक् होमार्थमाहुतित्वेनप्रक्षिप्तशोणितभुक् ॥ २७ ॥ इतिद्व्यशीतितमःसर्गः ॥ ८२ ॥

[पा०] १ ठ. इदमर्थं. २ क. ख. ङ. च. छ. झ. ञ. ट. राघवौ. ३ ङ. झ. ट. ततोगत्वापावकः. ४ ग. ङ. छ. झ. ञ. ट. होमशोणित.

अथेन्द्रजिद्राक्षसभूतये तु जुहाव हव्यं विधिना विधानवित् ॥
दृष्ट्वा व्यतिष्ठन्त च राक्षसास्ते महासमूहेषु नयानयज्ञाः ॥ २९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे व्यशीतितमः ॥ ८२ ॥

व्यशीतितमः सर्गः ॥ ८३ ॥

हनुमन्मुखादिन्द्रजित्कृतमायासीतामारणश्रवणजशोकेनपतितमूर्च्छितंसुरभिसलिलसेकसमुद्बोधितंरामंप्रति लक्ष्मणेन नास्तिक्यवादाश्रयणेन धर्मादिनिरसनेनपौरुषप्रशंसनपूर्वकं पुनः क्षमापणेनरिपुवधप्रतिज्ञानेन समाश्वासनम् ॥ १ ॥

राघवश्चापि विपुलं तं राक्षसवनौकसाम् ॥ श्रुत्वा सङ्ग्रामनिर्घोषं जाम्बवन्तमुवाच ह ॥ १ ॥
सौम्य नूनं हनुमता क्रियते कर्म दुष्करम् ॥ श्रूयते हि यथा भीमः सुमहानायुधस्वनः ॥ २ ॥
तद्गच्छ कुरु साहाय्यं स्वबलेनाभिसंवृतः ॥ क्षिप्रमृक्षपते तस्य कपिश्रेष्ठस्य युध्यतः ॥ ३ ॥
ऋक्षराजस्तथोक्तस्तु स्वेनानीकेन संवृतः ॥ आगच्छत्पश्चिमं द्वारं हनुमान्यत्र वानरः ॥ ४ ॥
अथायान्तं हनूमन्तं ददर्शर्क्षपतिः पथि ॥ वानरैः कृतसङ्ग्रामैः श्वसद्भिरभिसंवृतम् ॥ ५ ॥
दृष्ट्वा पथि हनूमांश्च तदृक्षबलमुद्यतम् ॥ नीलमेघनिभं भीमं सन्निवार्य न्यवर्तत ॥ ६ ॥
स तेन हरिसैन्येन सन्निकर्षे महायशाः ॥ शीघ्रमागम्य रामाय दुःखितो वाक्यमब्रवीत् ॥ ७ ॥
समरे युध्यमानानामस्माकं प्रेक्षतां पुरः ॥ जघान रुदतीं सीतामिन्द्रजिद्रावणात्मजः ॥ ८ ॥
उद्भ्रान्तचित्तस्तां दृष्ट्वा विषण्णोऽहमरिन्दम ॥ तदहं भवतो वृत्तं विज्ञापयितुमागतः ॥ ९ ॥
तस्य तद्वचनं श्रुत्वा राघवः शोकमूर्च्छितः ॥ निपपात तदा भूमौ छिन्नमूल इव द्रुमः ॥ १० ॥
तं भूमौ देवसंकाशं पतितं प्रेक्ष्य राघवम् ॥ अभिपेतुः समुत्पत्य सर्वतः कपिसत्तमाः ॥ ११ ॥
असिञ्चन्सलिलैश्चैनं पद्मोत्पलसुगन्धिभिः ॥ प्रदहन्तमनासाद्य सहसाऽग्निमिवोच्छिखम् ॥ १२ ॥
तं लक्ष्मणोथ बाहुभ्यां परिष्वज्य सुदुःखितः ॥ उवाच राममस्वस्थं वाक्यं हेत्वर्थसंयुतम् ॥ १३ ॥
शुभे वर्त्मनि तिष्ठन्तं त्वामार्य विजितेन्द्रियम् ॥ अनर्थेभ्यो न शक्नोति त्रातुं धर्मो निरर्थकः ॥१४॥

॥ २८ ॥ नयानयज्ञाः शास्त्रीयाशास्त्रीयविदः ॥२९॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने व्यशीतितमः सर्गः ॥ ८२ ॥

अथ मायासीतावधमूर्च्छितरामसान्त्वनं व्यशीतितमे—राघवश्चापीत्यादि ॥ जाम्बवन्तं यदृच्छया सन्निहितं ॥ १ ॥ यथा यतः ॥ २—६ ॥ हरिसैन्येन सह । सन्निकर्षे । रामस्येति शेषः ॥ ७—११॥ उच्छिखं उद्गतज्वालं । "अर्चिर्हेतिः शिखा स्त्रियां" इत्यमरः ॥ १२ ॥ हेत्वर्थसंयुतं हेतुरुपपत्तिः । अर्थः प्रयोजनं । हेतुरूपोर्थोभिधेयो हेत्वर्थ इति वा ॥१३॥ एवं सीताहननश्रवणजनितमनवधिकमधैर्यमाश्रयन्तं राममाश्वासयितुं लक्ष्मणोन्वारुह्यवादेन धर्माधर्मयोः

शि० देवसंकाशं देवानामपिप्रकाशकंराघवं ॥ ११ ॥ ति० शुभइति । " तदयविपुलंवीरदुःखमिन्द्रजिताकृतम् । कर्मणा व्यपनेष्यामितस्मादुत्तिष्ठराघव " इतियुद्धायपौरुषावलंबनेनप्रोत्साहयिष्यन् केवलधर्मावलंबनमप्रयोजकमितिप्रतिपादयत्यनेनवाक्यसमूहेन ॥ स० शुभेवेदविहितेवर्त्मनिमार्गेतिष्ठन्तंत्वां अनर्थेभ्यः दुःखेभ्यः । त्रातुंधर्मोयस्मान्नशक्नोति तस्मान्निरर्थकइतियोजना ॥ आर्यविजितेन्द्रियमितिपदमेकंवा । आर्यार्थपित्रर्थविजितेन्द्रियं राज्यादिविषयस्पृहारहितत्वाद्विजितमनस्कं "नाहमर्थपरो-

[पा०] १ घ. राघवेन्द्रोपि. २ क. ग. घ. ङ. झ. ट. कृतंकर्मसुदुष्करं. ३ घ. महाभीमः. ४ ज. स्तथाकर्तुं. ख. ङ. च. छ. झ. ञ. ट. स्तथेत्युक्त्वा. ५ घ. न्यत्रतिष्ठति. ६ च. संनिवार्याभ्यवर्तत. ७ ङ. झ प्रेक्षतांचसः. ८ ग. घ. मसह्यंच. ९ ख. ङ.—ट. मिवोत्थितं.

भूतानां स्थावराणां च जङ्गमानां च दर्शनम् ॥ यथास्ति न तथा धर्मस्तेन नास्तीति मे मतिः ॥१५॥
यथैव स्थावरं व्यक्तं जङ्गमं च तथाविधम् ॥ नायमर्थस्तथा युक्तस्त्वद्विधो न विपद्यते ॥ १६ ॥

स्वरूपं खण्डयन्नीतिशास्त्रानुसारेण बलमेव प्रधानतयालम्ब्यतामित्याह—शुभइत्यादिना सर्गशेषेण ॥ पितृवाक्यपरिपालनादिरूपे शुभे वर्त्मनि तिष्ठन्तं । स्थिरतया तदनुतिष्ठन्तमित्यर्थः । विजितेन्द्रियं हस्तप्राप्तराज्यपरित्याजकयोः कैकेयीदशरथयोरुपर्यपि मनःकालुष्याभावेन विजितेन्द्रियं त्वां । निरर्थकः अवस्तुभूतः । अप्रामाणिक इति यावत् । शशविषाणवत् केवलव्यवहारमात्रावलम्बनो धर्मः अनर्थेभ्यः व्यसनेभ्यः । त्रातुं व्यसनानि निवारयितुं । न शक्नोति । "सति धर्मिणि धर्माश्चिन्त्यन्ते" इति न्यायादिति भावः । निरर्थकमेव त्वया पितृवचनपरिपालनमारब्धं । आदावेव मयोक्तमिति भावः । धर्म इत्युपलक्षणं । अधर्मोपि निरर्थकः सन् रावणमर्थेभ्यो न निवारयितुं शक्नोतीत्यर्थः ॥ १४ ॥ ननु कथमनयोरप्रामाणिकत्वमित्यपेक्षायां तत्र किं प्रत्यक्षं प्रमाणं उतानुमानं अथ शब्दो वा, नाद्य इत्याह—भूतानामिति ॥ स्थावराणां जङ्गमानां च भूतानां पदार्थानां । यथा दर्शनं प्रत्यक्षत उपलम्भनं अस्ति । तथा धर्माधर्मयोः दर्शनं न अस्तीत्यनुषङ्गः । तेन अदर्शनेन । धर्मोऽधर्मश्च नास्तीति मे मतिः निर्णयः ॥ १५ ॥ उक्तमेवार्थं प्रत्यक्षानुग्राहकेण तर्केण द्रढयति—यथेति ॥ यथैव स्थावरं व्यक्तं प्रत्यक्षत उपलब्धं । जङ्गमं च तथाविधं व्यक्तं भवति । अयं धर्माधर्मरूपोर्थः तथा युक्तो न भवति, तथा प्रत्यक्षो न भवतीत्यर्थः । यदि कश्चिद्धर्मोऽधर्मो वार्थः प्रत्यक्षसिद्धः स्यात् तर्हि स जङ्गमतया वा स्थावरतया दृश्येत । नच दृश्यते । तस्मान्नासौ प्रत्यक्ष इति भावः । किंच त्वद्विधो न विपद्यते । धर्मस्य प्रत्यक्ष-

देविलोकमावसुमुत्सहे । विद्धिमामृषिभिस्तुल्यंकेवलंधर्ममास्थितम् " इत्युक्तेःकेवलंधर्मावलंबिनंत्वां सधर्मः । उर्वीरितंपूर्ववत् । इदानींधर्मएवंविधोपिस्वसमयेरक्षतीतिसकर्तव्यएवेत्यान्तरङ्गिकभावपक्षेप्यन्वेतुंशक्यतेश्लोकः । तथाहि । अनर्थेभ्यः एवंविधेभ्यः । धर्मस्त्वांत्रातुंशक्नोति । यतःस ननिरर्थकइति ॥१४॥ **ति०** ननुप्रामाणिकस्यधर्मस्यकथमनुपादेयत्वमित्याशङ्क्यतत्सद्भावेकिमनुमानं प्रमाणमुतप्रत्यक्षमितिद्वेधाविकल्प्य धर्मोस्ति फलदर्शनादित्यनुमानपक्षं फलादर्शनान्नास्तीतिपूर्वश्लोकेनिराकृत्येदानींप्रत्यक्षंनिराकर्तुमाह—भूतानामिति । भूतत्वं सत्यत्वं । भूतानां सत्यानामित्यर्थः । स्थावराणांजङ्गमानांचदर्शनंप्रत्यक्षंयथास्ति तथाधर्मस्यदर्शनंनास्तियतः तेनकारणेनधर्मोनास्तीतिमेमतिरितिसंबन्धः ॥ **ति०** एवंधर्मपदार्थमङ्गीकृत्य तस्यार्थत्वंनास्तीत्यनुभवात्प्रदर्श्य इदानींधर्मपदार्थएवनास्ति । फलानुमेयताहितस्योक्ता । फलंचसुखं । प्रकृतेचसुखान्वयव्यतिरेकयोर्धर्मेऽभावेननतेनतदनुमानमित्याह—भूतानामिति । स्थावराणांजङ्गमानांचपश्वादिरूपाणांभूतानांदर्शनं सुखापरोक्षदर्शनंयथास्तितथाधर्मोनास्ति असामर्थ्यादनधिकाराच्च । तस्माद्धर्मःसुखसाधनत्वव्याप्तोनेतिमेमतिः । जन्मान्तरादिकंनास्त्येवेतिबौद्धमतेनेयमुक्तिः । नहितंविनाजायमानस्यापि तत्करणकत्वमितिभावः । यत्तु यथास्थावरादीनांदर्शनात्तत्सत्तातथाधर्मस्यदर्शनाभावाद्धर्मोनास्तीतिव्याचक्षते । तन्न । योग्यानुपलंभस्यैवाभावसाधकत्वात् । धर्मस्यचपिशाचादिवदयोग्यत्वात् ॥ **स०** धर्मोवर्ततइतिप्रवादमात्रतस्तंसिद्धवत्कृत्यवैफल्यमात्रंतस्योक्त्वावस्तुतस्तु यतःसफलानुमेयस्तदेवनास्तीतिसएवनास्त्याह—भूतानामिति । स्थावराणां महीरुहादीनां । जङ्गमानां प्राणिनां । एतदादीनांभूतानां । यथाप्रत्यक्षतोदर्शनंयथास्तीतिसन्तः । एतेन तथाधर्मःप्रात्यक्षिकइतिसनास्त्येवेतिचार्वाकमतंप्रसञ्जयतोमेमतिः । यत्तुखयंसुखापरोक्षदर्शनंयथास्तीतिव्याख्याय यत्तु " यथास्थावरादीनांदर्शनात्तथाधर्मस्यदर्शनाभावाद्धर्मोनास्तीतिव्याचक्षते " तन्न । योग्यानुपलंभस्यैवाभावसाधकत्वाद्धर्मस्यपिशाचादिवदयोग्यत्वादितिनागोजिभट्टेनव्याख्यातंततुचार्वाकमतावलंबेनपूर्वपक्षप्रसञ्जनमेवतीर्थाभिप्रेतमितिनसमञ्जसमिवाश्रुतसुखशब्दाध्याहारेणाध्याहृतस्यापिस्थावरपदार्थान्वयायोग्यत्वेनमौलदर्शनपदास्वारस्याच्चाप्ययुक्तं । नतथादर्शनमित्येतावताधर्मस्तेत्वद्विषये न नास्तीतिमेमतिः । तेनपिशितलोचनानवगमेनधर्मोनास्तीतिमेमतिः । पूर्वपक्षमात्रंप्रसञ्जितं । वस्तुतस्तु कालसहायेव्यक्तोभवतिधर्मइतिभावः ॥१५॥ **ति०** उक्तमेवार्थंसतर्कंविशदयति—**यथैवेति** । स्थावरंयथैवव्यक्तं प्रत्यक्षतउपलब्धं जङ्गमंचतथाविधंव्यक्तंभवति । अयंधर्मरूपोर्थः तथायुक्तोनभवति । प्रत्यक्षोनभवतीत्यर्थः । तेननास्तीतिमेमतिरित्यनुषङ्गः । नन्वप्रत्यक्षत्वमात्रेणधर्मनिरासोनोपपद्यते । अतीन्द्रियस्यापिवस्तुनःसद्भावादित्याशङ्क्यबाधकतर्कंणनिराकरोति—**त्वद्विधइति** । अतीन्द्रियोपिधर्मोयदिस्यात् तर्हित्वद्विधः नविपद्यते नविपद्येत । नचैवं तस्मान्नास्ति धर्मइत्यर्थः ॥ **ति०** यथा यस्मात् स्थावरंव्यक्तं धर्मप्रवक्तिरहितमपिसुखीतिव्यक्तंतथाविधं स्थावरवद्धर्मानधिकृतंजङ्गमंपश्वाद्यपि सुखीतिव्यक्तं । एतेनव्यतिरेकःखण्डितः । अन्वयमपिखण्डयति । नतथायुक्तः अयमर्थःसुखरूपोन । सर्वात्मनाधर्मयुक्तस्त्वद्विधो धर्मस्यसुखान्वये नविपद्यते नविपन्नःस्यात् । दृश्यतेचविपत्तिरित्यन्वयोपिनास्ति । अनेनतदंशेजन्मान्तरीयधर्मकल्पनापिपरास्ता ।

यद्यधर्मो भवेद्भूतो रावणो नरकं व्रजेत् ॥ भवांश्च धर्मयुक्तो वै नैवं व्यसनमाप्नुयात् ॥ १७ ॥
तस्य च व्यसनाभावाद्व्यसनं च गते त्वयि ॥ धर्मो भवत्यधर्मश्च परस्परविरोधिनौ ॥ १८ ॥
धर्मेणोपलभेद्धर्ममधर्मं चाप्यधर्मतः ॥ यद्यधर्मेण युज्येयुर्येष्वधर्मः प्रतिष्ठितः ॥ १९ ॥
यदि धर्मेण युज्येरन्नाधर्मरुचयो जनाः ॥ धर्मेण चरतां धर्मस्तथा चैषां फलं भवेत् ॥ २० ॥
यस्मादर्था विवर्धन्ते येष्वधर्मः प्रतिष्ठितः ॥ क्लिश्यन्तेऽधर्मशीलाश्च तस्मादेतौ निरर्थकौ ॥ २१ ॥
वध्यन्ते पापकर्माणो यद्यधर्मेण राघव ॥ वधकर्महतो धर्मः स हतः कं वधिष्यति ॥ २२ ॥
अथवा विहितेनायं हन्यते हन्ति वा परम् ॥ विधिरालिप्यते तेन न स पापेन कर्मणा ॥ २३ ॥

सिद्धतया सद्भावे त्वद्विधः धार्मिकः विपत्तिं नाप्नुयात् । रावणश्चार्थं न प्राप्नुयादित्यपि द्रष्टव्यं ॥ १६ ॥ नाप्यनुमानं धर्माधर्मयोः प्रमाणमित्याह—यदीति ॥ यद्यधर्मो भूतो भवेत् तदा अधर्मयुक्तो रावणः नरकं व्रजेत् व्यसनं गच्छेत् । यदि धर्मो भूतो भवेत् तदा धर्मयुक्तो भवांश्च एवं व्यसनं नाप्नुयात् । व्यसनाव्यसनरूपकार्याभ्यां हि धर्माधर्मावनुमेयौ । न तथा संभवति । धार्मिकतयाऽभिमते त्वयि व्यसनदर्शनात् । अधार्मिकतयाभिमते रावणे व्यसनादर्शनाच्च । साध्यवति पक्षे हेत्वभावात् स्वरूपासिद्धो हेतुरित्यर्थः ॥ १७ ॥ विरुद्धत्वाच्च सुखदुःखयोः कार्ययोर्न धर्माधर्मानुमापकत्वमित्याह—तस्य चेति ॥ तस्य चाधर्मिष्ठस्य रावणस्य व्यसनाभावात् । व्यसनाभावशब्देन सुखं लक्ष्यते । सुखसद्भावादित्यर्थः । त्वयि च परमधार्मिके व्यसनं दुःखं । गते सति धर्मः अधर्मो भवति अधर्मफलप्रदो भवति । चकारादधर्मोऽपि धर्मफलाभ्युदयप्रदो भवतीति लभ्यते । अतएव परस्परविरोधिनौ स्वाभावव्याप्तहेतुकावित्यर्थः ॥ १८ ॥ व्यभिचाराद्व्याप्यत्वासिद्धत्वाद्वा न ताभ्यां तदनुमानमित्याह—धर्मेणेत्यादिना निरर्थकावित्यन्तेन ॥ उपलभेदित्यत्र काकुः । धर्मेण धर्मानुष्ठानेन धर्मं धर्मफलं सुखं । उपलभेत् । अधर्मतः अधर्मानुष्ठानेन । अधर्मफलं दुःखं उपलभेत् । उपलभेतेति मन्यसे किमित्यर्थः । एवमनूद्य तत्र दूषणमाह—यदीति । येष्वधर्मः प्रतिष्ठितः । ये अधार्मिका इति यावत् । ते अधर्मेण अधर्मफलेन । यदि युज्येयुः युज्येरन् । नाधर्मरुचयो जनाः । धर्मरुचय इति यावत् । "द्वौ नञौ प्रकृतमर्थं गमयतः" इति न्यायात् । ते धर्मेण धर्मफलेन । यदि युज्येरन्, तदा धर्मेण चरतामेषां जनानां । धर्मः धर्मफलं सुखं । भवेत् । चकारात् अधर्मेण चरतां दुःखं भवेदिति सिद्धम् । न चैवमित्याह—यस्मादिति । अनेन च हिताहितप्राप्तिलक्षणकार्ययोरनियतत्वेन व्याप्यभावान्न ताभ्यां धर्माधर्मावनुमातुं शक्याविति व्याप्यत्वासिद्धिर्व्यभिचारो वा दर्शितः ॥ १९—२१ ॥ शब्दोपि न धर्माधर्मयोः प्रमाणमित्याह—वध्यन्त इति ॥ हे राघव । पापकर्माणः पापिनः । अधर्मेण कर्मरूपेण । वध्यन्ते यदि बाध्यन्ते चेत् । वधकर्म वधकर्मरूपोऽधर्मः । धर्मस्याप्युपलक्षणं । हतः त्रिक्षणावस्थायित्वेन ध्वस्तो भवति । शब्दबुद्धिकर्मणां त्रिक्षणावस्थायित्वात् । हतः सः कं वधिष्यति । कं श्रेयसि नियोक्ष्यतीत्यपि द्रष्टव्यं । धर्माधर्मयोः क्रियारूपयोः क्षणिकत्वेन कालान्तरभाविफलजनकत्वासंभवात् बाधितविषयो वेदो ग्रावप्लवनादिवाक्यवदुपचरितार्थक इतिभावः ॥ २२ ॥ कर्मणः क्षणध्वंसित्वेपि तदाराधिता देवतैव फलप्रदेत्यत्राह—अथ वेति ॥ विहितेन विधिना । देवतयेत्यर्थः । अयं जनः । हन्यते बाध्यते । परं अन्यं । हन्ति वा बाधते वा । एवं यदि तेन पापेन कर्मणा पापफलभूतदुःखेन । विधिरेव आलिप्यते संबध्यते । सः प्रयोज्यकर्ता

साधनत्वसिद्धावेवतत्कल्पनावसरात् । अतोऽयमर्थोधर्मरूपेन नास्त्येव ॥ १६ ॥ **ति०** इदानींधर्मादिस्वरूपमेवदुर्निरूपमितिवक्तुं किंव्यापाररूपौवातज्जन्यातिशयरूपौवेतिविकल्पे नाद्यइत्याह—वध्यन्तइति । पापकर्माणःपुरुषाः यद्यधर्मेणक्रियाशरीरेणवध्यन्ते तदाक्रियायास्त्रिक्षणावस्थायित्वाच्चतुर्थक्षणेखतएववधकर्मणा नाशक्रिययाहतोनष्टोऽधर्मःस्वयंहृतः असन्भूत्वाकंहन्तव्यंवधिष्यति । यद्वा वधकर्मरूपोधर्मः चतुर्थक्षणेहतः नष्टः । स्वयमसन्सन्कंवधिष्यति । वधकर्मेत्युपलक्षणं ॥ २२ ॥ **ति०** द्वितीयंदूषयति **अथवेति** । विहितेन विहितश्येनाद्यनुष्ठानजातिशयेनान्यदीयेन । अयंपुरुषोहन्यते । स्वीयेनवाऽन्यंहन्ति । एवंसतिविधिः

[पा०] १ ङ. ञ. ट. धर्मसंयुक्तोनैव. २ क. ङ. ञ. ट. चागते.

अदृष्टप्रतिकारेण त्वव्यक्तेनासता सता ॥ कथं शक्यं परं प्राप्तुं धर्मेणारिविकर्शन ॥ २४ ॥
यदि सत्स्यात्सतां मुख्य नासत्स्यात्तव किंचन ॥ त्वया यदीदृशं प्राप्तं तस्मात्सन्नोपपद्यते ॥ २५ ॥
अथवा दुर्बलः क्लीबो बलं धर्मोऽनुवर्तते ॥ दुर्बलो हृतमर्यादो न सेव्य इति मे मतिः ॥ २६ ॥
बलस्य यदि चेद्धर्मो गुणभूतः पराक्रमे ॥ धर्ममुत्सृज्य वर्तस्व यथा धर्मे तथा बले ॥ २७ ॥

नालिप्यते । अस्य न्यायस्य पुण्यकर्मण्यपि तुल्यत्वात् सुखेनापि प्रयोज्यो न संबध्यते । यदि हि सत्कर्माराधितः असत्कर्माप्रीतो वा ईश्वरः धर्माधर्मशब्दवाच्यः स्यात्, तर्हि स एव सुखदुःखभागी कारयिता स्यात् । न तु प्रयोज्य इति भावः ॥ २३ ॥ ननु यथा स्वतन्त्रो राजा लीलार्थं कामपि मर्यादां प्रवर्त्य तदनुवर्तिनमनुगृह्णाति तदतिलङ्घिनं निगृह्णाति च । तथेश्वरोपि स्वाज्ञारूपकर्मानुष्ठायिनमनुगृह्णाति तदननुष्ठायिनं विपरीतानुष्ठायिनं च निगृह्णातीति चेन्न । स हि किं स्वार्थमनुगृह्णाति उत परार्थं । नाद्यः । अवाप्तसमस्तकामस्यावाप्तव्याभावात् । न द्वितीयः । कंचन विरिंचनं कंचनाकिंचनं च वितन्वतस्तस्य पक्षपातनैर्घृण्यापत्तेः । तत्तत्कर्मानुगुणतया सृष्टेर्न पक्षपातादिप्रसक्तिरिति चेन्न । समीचीने कर्मण्यप्रवर्तयतस्तस्य सर्वज्ञस्य निर्दयत्वापत्तेः । अनादिकर्मप्रवाहकृतपूर्वपूर्वकर्मानुगुण्येन पुनः पुनः सदसतोः कर्मणोः पुरुषं प्रवर्तयतीति चेत्, तर्हि कस्यचिन्नियमेन दुःखं कस्यचिन्नियमेन सुखं च स्यात् । नच तथा दृश्यते, अनियमदर्शनात् । तर्हि कर्मजन्योऽपूर्वरूपोतिशयः फलप्रदो धर्म इत्याशङ्क्याह—अदृष्टेति ॥ हे अरिविकर्शन । प्रतिक्रियते परप्रतिपत्तिर्जन्यत इति प्रतिकारो लिङ्गं । अदृष्टप्रतिकारेण अदृष्टलिङ्गेन अनुमानागम्येनेत्यर्थः । अव्यक्तेन अप्रत्यक्षेण । असता सता असद्भूतेन अग्नीन्द्रादिवदर्थवादवाक्येनागम्येन । धर्मेण अपूर्वाख्येन परं श्रेयः कथं प्राप्तुं शक्यं । न शक्यमित्यर्थः ॥ २४ ॥ उक्तमेवार्थं पुनस्तर्केण दृढीकरोति—यदीति ॥ हे सतां मुख्य । यदि सत् स्यात् । धर्माख्यं वस्त्विति शेषः । धार्मिकस्य तव असत् अनिष्टं । किंचन न स्यात् । तर्कस्य विपर्यये पर्यवसानमाह—त्वयेति । यत् यस्मात्कारणात्, त्वया ईदृशं दुःसहं व्यसनं प्राप्तं । तस्मात्सन्नोपपद्यते । असदेवभवतीत्यर्थः । कार्यानुपलम्भादपूर्वाख्यधर्मो न कल्प्यइत्यर्थः ॥ २५ ॥ ननु न कार्यानुपलम्भमात्रादर्थस्याभावो निश्चेतुं शक्यः, अतीन्द्रियोच्छेदापत्तेः । किंतु सहकारिसंपत्तौ सत्यां कार्यानुपलम्भः कारणत्वाभावं साधयति । सहकारि च पौरुषं । अतस्तदभावात्फलानुदय इत्यत आह—अथवेति । दुर्बलः बलरहितः निरपेक्षतया कार्याक्षमः । अतएव क्लीबः कातरः स्वतःकार्यकरणासमर्थः । धर्मः बलमनुवर्तते । कार्योत्पादनेपौरुषमपेक्षत इत्यर्थः । एवंचेद्दुर्बलो हृतमर्यादः स्वातन्त्र्येण फलप्रदत्वमर्यादाहीनो धर्मः प्राधान्येन न सेव्य इति मे मतिः ॥ २६ ॥ प्रधानभूतं बलमेवाश्रयणीयमित्याह—बलस्येति ॥ पराक्रमे कार्यसाधनेविषये, बलस्य धर्मः गुणभूतो यदि चेत् उपसर्जनभूतो यदि स्यात्, तदा यथेदानीं धर्मे वर्तसे तथा

विहितानुष्ठानजातिशयएव तेनपापेनकर्मणाहत्यारूपेणलिप्यते । नसकर्मानुष्ठातापुरुषः । हत्यायास्तदकर्तृकत्वात् । नहिखोत्पादितपुत्रकृतहत्यापितरंस्पृशति । एवंतस्यकर्मजातिशयस्यातत्रयमभ्युपेत्यात्मालेपउक्तः । एतेन कर्मकरणसंतुष्टस्येश्वरस्यफलदत्वमित्यपास्तं । तस्यैवलेपप्रसङ्गात् । अत्रपक्षेविहितेनेत्यस्यविहितकर्मसंतुष्टेनेश्वरेणेत्यर्थः ॥ २३ ॥ ति० एवमतिशयस्यघातकत्वमङ्गीकृत्यात्मालेपउक्तः । इदानींघातकत्वमेवनास्तीत्याह—अदृष्टेति । अदृष्टप्रतिकारेण अचेतनतयाज्ञातस्वकर्तव्यशत्रुप्रतीकारेण । अथस्वाश्रयचेतनद्वारातज्ज्ञानमितिचेत्तत्राह—अव्यक्तेन स्वाश्रयभूतात्मनोप्रत्यक्षतयाप्रत्यक्षरूपाव्यक्तेन । अतएव असता असत्कल्पेनसतावर्तमानेनापिधर्मेणकर्मजन्यातिशयेनकथंपरंवध्यस्वरूपंप्राप्तुंशक्यं । अप्राप्यपरंहन्तीतिचेदसंबन्धाविशेषात्सर्वहननप्रसङ्गः । अयंहन्तृकृतकर्मजातिशयोवध्यनिष्ठएवेतिचेदन्यधर्मेणान्यस्याधार्मिकत्वप्रसङ्गः । कर्तृनिष्ठत्वेतूक्तदोषइतिभावः ॥ शि० नदृष्टः अचेतनत्वादज्ञातःप्रतिकारः विधातनंयेन । अतएवाव्यक्तेन अप्रकाशमानेन । अतएवासता असत्सदृशेन । सता विद्यमानेनापि धर्मेण कर्मजन्यातिशयरूपविशिष्टेनपरंवध्यादिस्वरूपंप्राप्तुंज्ञातुमित्यर्थः । कथंशक्यं नशक्यमित्यर्थः ॥ २४ ॥ ति० तुल्यन्यायाच्छुभकर्मजातिशयोप्यसभ्येवेतिध्वनितमर्थंतर्केणदृढीकरोति—यदीति । हेसतांमुख्य सत्पुरुषश्रेष्ठ यदिसत्कर्मजन्यमदृष्टंसत्स्यात् तदा तव किञ्चन किंचिदपि । असत् अशुभं दुःखंस्यात् । उक्तस्यतर्कस्यविपर्ययपर्यवसानमाह । त्वयाचेदृशंदुःखंप्राप्तं । तस्मात्तत् सदि-

[पा०] १ च. धर्मेणरिपुकर्शन.

अथ चेत्सत्यवचनं धर्मः किल परंतप ॥ अनृतस्त्वय्यकरुणः किं न बद्धस्त्वया पिता ॥ २८ ॥
यदि धर्मो भवेद्भूतो अधर्मो वा परन्तप ॥ न स्म हत्वा मुनिं वज्री कुर्यादिज्यां शतक्रतुः ॥ २९ ॥
अधर्मसंश्रितो धर्मो विनाशयति राघव ॥ सर्वमेतद्यथाकामं काकुत्स्थ कुरुते नरः ॥ ३० ॥
मम चेदं मतं तात धर्मोऽयमिति राघव ॥ धर्ममूलं त्वया छिन्नं राज्यमुत्सृजता तदा ॥ ३१ ॥

धर्ममुत्सृज्य धर्मप्राधान्यमुत्सृज्य । धर्म इव बलेपि वर्तस्व ॥ २७ ॥ एवं सामान्येन धर्मे दूषितेपि सत्यवचनरूपधर्मविशेषस्य रामेण प्राधान्येनानुरोधात्तत्पृथग्दूषयति—अथेति ॥ हे परंतप । सत्यवचनं धर्मः किल अथ चेदेवं चेत्, अनृतः त्वामभिषेक्ष्यामीत्युक्त्वा तदकरणेन सत्यत्वरहितः । अनृतमिति पाठे वदन्निति शेषः । त्वयि सकलकल्याणगुणाश्रये ज्येष्ठपुत्रे । अकरुणः राज्याद्वनंप्रति निष्कासनान्निर्दयः । अतो बन्धयोग्यः पिता त्वया पितृवचनं करिष्यामीति कृतप्रतिज्ञेनत्वया । किंन बद्धः किं न नियमितः । सर्वप्रजासन्निधौ राममभिषेक्ष्यामीत्युक्तं प्राथमिकं पितृवचनं परित्यज्य पाश्चात्यं वनगमनविषयं पितृवचनं करिष्यामीति कृतप्रतिज्ञेन त्वया पालयता सत्यवचनमपि सम्यक् पालितमितिभावः ॥ २८ ॥ धर्माधर्मयोः सद्भावेपि राज्ञा धर्मोऽधर्मो वा नियमेन नानुष्ठातव्यः । किंतु तत्तत्कालप्रयोजनानुगुण्येनोभावपि कर्तव्यावित्यत्र शिष्टाचारं प्रमाणयति—यदीति ॥ भूतो अधर्मो वेत्यत्र वृत्तानुरोधाय सन्ध्यभावः । यदि धर्मो भवेद्भूतः । यदि केवलं धर्म एवानुष्ठेयत्वेन प्राप्तो भवेत् । तदा वज्री शतक्रतुः मुनिं विश्वरूपं हत्वा इज्यां न कुर्यात्, किन्त्विज्यामेव कुर्यात् । अधर्मो वा । केवलमधर्मो वा । यद्यनुष्ठेयः स्यात्, तदा शतक्रतुः वज्री मुनिं हत्वा इज्यां न कुर्यात्, किंतु हननमेव कुर्यात् । क्षत्रधर्मनिष्ठेनेन्द्रेण धर्माधर्मयोरनुष्ठितत्वाद्राज्ञा यथाकालमुभयमपि कर्तव्यमिति भावः । यान्येतानि देवक्षत्राणीन्द्रो वरुणः पर्जन्यो यम ईशान इतीन्द्रस्य क्षत्रियत्वं श्रूयते ॥ २९ ॥ इदानीमभ्युपगमवादेनैकान्ततो धर्माधर्मयोरेकस्याश्रयणमनर्थपर्यवसायीत्याह—अधर्मेति ॥ अधर्मसंश्रितो धर्मः अधर्मसहितो धर्मः । धर्मश्चाधर्मश्चेत्यर्थः । विनाशयति कर्तारमिति शेषः । नियमेन पृथक् पृथगनुष्ठीयमानौ धर्माधर्मौ कर्तारं विनाशयतः । अत एवैतत्सर्वं धर्माधर्मात्मकं सर्वं कर्मजातं यथाकामं तत्तत्कालोचितं । अनियमेन नरः कुरुते । कुर्यादित्यर्थः ॥ ३० ॥ अस्मिन्नर्थे न मे संदेह इत्याह—ममेति ॥ हे तात अनुकम्प्य । "तातोनुकम्प्ये पितरि" इति रत्नमाला । इदं याथाकाम्येनाचरणं यदस्ति । अयं धर्म इति मम

तिनोपपद्यते ॥ २५ ॥ **ति०** किंच सत्यस्यापिधर्मत्वाद्धर्मपक्षपातिनाभवतासत्यधर्मएवादौकिमितिसम्यङ्नानुष्ठितः । येनैवमनर्थोनवृत्तःस्यादित्याह—अथचेदिति । अथ पक्षान्तरे । हेपरंतप त्वयासत्यवचनं पितृवचनाङ्गीकाररूपसत्यपरिपालनंधर्मोनुष्ठीयतइति चेत्तदात्वयिज्येष्ठेउक्तस्याभिषेकवचनस्याकरणेयदनृतंराज्ञःप्राप्तं तेनानृतेनराजात्वयाविनाभूतः । मृतइतिशेषः । अतस्तेनराज्ञोऽभिषेककरणरूपसत्येनलंबद्धःकिंन भवेरितिशेषः । प्रथमोक्तराज्ञोभिषेकवचनरूपंसत्यंनपरिपालितं । तत्परिपालनेत्वयाविनाभूतत्वात्संभवेनपितृमरणंनस्यात् । एवमाद्यनर्थश्चनवृत्तःस्यादितिभावः । " अनृतंत्वय्यकरणेकिंनबद्धस्त्वयाविना " इतिसर्वत्रपाङ्क्तःपाठइतिकतकः । तीर्थस्तु " अनृतंत्वय्यकरुणःकिंनबद्धस्त्वयापिता " इतिपठित्वासत्यस्यधर्मत्वेत्वय्यभिषेकविषयमनृतंवदन्राज्यान्निष्कासनादकरुणःपितात्वयाकिंनबद्धइतिव्याचष्टे । तदयुक्तं । पितृबन्धनस्यसत्यवचनपरिपालनरूपत्वाभावात् ॥ **स०** अथखलुचेदिति निपातसमुदायोयद्यर्थे । हेपरंतप सत्यवचनंयदिधर्मस्तर्हिअनृतः नवियतेऽतंसत्यवचनंयस्यसतथा । सभायांत्वामभिषेक्ष्यामीतिवचनंदत्त्वावनंप्रतिप्रेषितवानित्यसत्यवचनः । सुकुमारशरीरःसीतयासहकथंप्रवेक्ष्यतीतित्वयित्वद्विषये अकरुणःपितादशरथः सत्यवाक्यत्वेनकर्तुंकिंनबद्धः । तत्प्रतिज्ञायाएवप्रथमत्वात् । यत्तुनागोजिभट्टेन "अनृतंत्वय्यकरणेकिंनबद्धस्त्वयाविना" इतिपाठान्तरंधरतातीर्थस्तु " अनृतस्त्वय्यकरुणःकिंनबद्धःपितात्वया " इतिपठित्वेत्यादिनासर्वमनूद्य तदयुक्तं पितृबन्धनस्यसत्यवचनपरिपालनरूपत्वाभावादितिदूषणं तदसंगतं । तस्यपितृबन्धनएवतात्पर्याभावात् । किंनबद्धः किमर्थंननियमितइतितेनोक्तत्वेनासदनुवादत्वात् ॥ २८ ॥ **ति०** यदिदमुक्तंयथोचितकालदेशमुभयमनुष्ठेयमितिममतं । नन्वेवंधर्मस्यतवापिसंमतत्वेकिमितिमेदुःखमतआह—धर्ममूलमिति । अर्थमूलंराज्यमुत्सृजतात्वया धर्मस्यमूलं अर्थरूपंछिन्नं । अतस्त्वंक्लेशवानितिभावः । यत्तुतीर्थेन ' अधर्मःसंश्रितोधर्मःकर्तारंविनाशयति । तस्माद्यथाकामंतत्कालौचित्येनोभयमप्यनुष्ठेयमिदमेव । यथाकाम्येनोभयाचरणमेवधर्मइतिममतं ।

[पा०] १ ङ. ञ. ट. अनृतंत्वय्यकरणे. २ च. ञ. ट. तदाछिन्नं. घ. त्वयालुप्तं. ख. तथाच्छिन्नं.

अर्थेभ्यो हि विवृद्धेभ्यः संवृत्तेभ्यस्ततस्ततः ॥ क्रियाः सर्वाः प्रवर्तन्ते पर्वतेभ्य इवापगाः ॥ ३२ ॥
अर्थेन हि वियुक्तस्य पुरुषस्याल्पतेजसः ॥ व्युच्छिद्यन्ते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा ॥ ३३ ॥
सोयमर्थं परित्यज्य सुखकामः सुखैधितः ॥ पापमारभते कर्तुं ततो दोषः प्रवर्तते ॥ ३४ ॥
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ॥
यस्यार्थाः स पुमाँल्लोके यस्यार्थाः स च पण्डितः ॥ ३५ ॥
यस्यार्थाः स च विक्रान्तो यस्यार्थाः स च बुद्धिमान् ॥
यस्यार्थाः स महाभागो यस्यार्थाः सं महागुणः ॥ ३६ ॥
अर्थस्यैते परित्यागे दोषाः प्रव्याहृता मया ॥ राज्यमुत्सृजता वीर येन बुद्धिस्त्वया कृता ॥ ३७ ॥
यस्यार्था धर्मकामार्थास्तस्य सर्वं प्रदक्षिणम् ॥ अधनेनार्थकामेन नार्थः शक्यो विचिन्वता ॥ ३८ ॥
हर्षः कामश्च दर्पश्च धर्मः क्रोधः शमो दमः ॥ अर्थादेतानि सर्वाणि प्रवर्तन्ते नराधिप ॥ ३९ ॥
येषां नश्यत्ययं लोकश्चरतां धर्मचारिणाम् ॥ तेऽर्थास्त्वयि न दृश्यन्ते दुर्दिनेषु यथा ग्रहाः ॥ ४० ॥

मतं सिद्धान्त इत्यर्थः । एवं प्रथमं धर्म एवाप्रामाणिक इत्युक्तं । पश्चात्कथंचित्प्रामाणिकत्वसंभवेपि न तस्य प्राधान्यमित्युक्तं । इदानीमप्राधान्येनापि धर्मस्तव न संभवति, मूलाभावादित्याह—धर्ममूलमित्यादिना । धर्मस्य मूलं कारणं अर्थरूपं, तदा प्राप्तकाले, राज्यमुत्सृजता त्वया छिन्नं । मूलच्छेदात्तव कथं धर्म इत्यर्थः ॥ ३१ ॥ तदेव धर्ममूलत्वमर्थस्य प्रतिपादयति—अर्थेभ्य इति ॥ ततस्ततः प्रजापालनाय प्रदेयषड्भागकरप्रदानादिकारणात् । संवृत्तेभ्यः प्राप्तेभ्यः । क्रमाद्विवृद्धेभ्योऽर्थेभ्यः सर्वाः क्रियाः यज्ञदानादिक्रियाः । प्रवर्तन्ते । पर्वतेभ्य इत्युपमानेन मूलधनव्ययमकृत्वैवार्थमूलतया दानादिक्रियाः कार्या इत्युक्तं ॥ ३२ ॥ व्यतिरेकमुखेनापि तदेव प्रतिपादयति—अर्थेनेत्यादिना ॥ कुसरितः अल्पसरितः ॥ ३३ ॥ न केवलमर्थपरित्यागेन धर्मासंभवः किंतु दोषप्राप्तिरपीत्याह—सोयमिति ॥ सुखैधितः पूर्वं सुखेन संवर्धितः । सोयं अर्थपरित्यागी अर्थं प्राप्तं परित्यज्य सुखकामः सन्, पापं अन्यायेनार्थार्जनं सुखसाधनभूतधनसंपादनार्थं स्तेयादिपापं आरभते । ततः तेन कर्मणा । दोषः प्रवर्तत इत्यर्थः ॥ ३४ ॥ यस्यार्थास्तस्य मित्राणीत्यादिश्लोकद्वयं क्वचित्पठ्यते ॥ पुमान् पुंस्त्ववान् । अन्यः स्त्रीप्रायइत्यर्थः । महाभागः महाभाग्यः । महागुणः शीलादिगुणवान् ॥ ३५—३६ ॥ अर्थस्य परित्यागे एते पूर्वोक्तगुणप्रतियोगिनो निर्मित्रत्वादयो दोषाः, प्रव्याहृताः स्पष्टमुक्ताः । राज्यमुत्सृजता त्वया येनगुणेन बुद्धिः अर्थपरित्यागविषया कृता तं गुणं जान इत्यर्थः । यद्वा राज्यमुत्सृजता त्वया । येन कारणेनार्थपरित्यागे बुद्धिः कृता तेन कारणेन एते दोषाः मया प्रव्याहृता इत्यर्थः ॥ ३७ ॥ धर्मकामार्थाः धर्मकामप्रयोजनानि । प्रदक्षिणं अनुकूलं । प्रतिष्ठितमिति वा पाठः । व्यतिरेकमुखेनाप्याह—अधनेनेति । अधनेन धनं विना अर्थकामेनापि । विचिन्वता अर्थार्जनव्यापारं कुर्वता पुरुषेण । अर्थः श्रेयः । न शक्यं न साधयितुं शक्यं । अव्ययमेतत् । " शक्यमरविन्दसुरभिः " इति प्रयोगात् ॥ ३८ ॥ न केवलमर्थकामावेव धनमूलौ, अन्येपि तथेत्याह—हर्ष इति ॥ प्रवर्तन्ते प्रकृष्टा निवर्तन्ते । शोभन्तइत्यर्थः । असतो निर्धनस्य शमदमौ हि धनलाभे निवर्तेते ॥ ३९ ॥ न केवलमामुष्मिकश्रेयःसाधनभूतोर्थः, किंतु ऐहिकश्रेयःसाधनं

इतिव्याख्यातं । तत्तूपहसनीयमेवव्युत्पन्नैरित्यलम् ॥ ३१ ॥ **ति०** अथार्थस्यधर्ममूलत्वमेवप्रतिपादयति । अर्थेभ्यइति । ततस्ततःसंवृत्तेभ्यः नानादेशादाहृतेभ्यः । अतएवप्रवृत्तेभ्योर्थेभ्यःसर्वाःक्रियाः योगप्रधानाः भोगप्रधानाश्चप्रवर्तन्ते । निष्कामतयाकृतायोगप्रधानाभवन्ति । सकामतयाकृताभोगप्रधानाइत्यर्थः ॥ ३२ ॥ **स०** चरतां " चर गतिभक्षणयोः" । गत्यर्थानांज्ञानार्थत्वाज्ज्ञानिनां । धर्मचारिणामपितेषामृष्यादिजनानांयेषामर्थानामभावादयंलोकः ऐहिकसुखं । नश्यति । तेऽर्थास्त्वय्यपिनदृश्यन्ते । चरतां भक्षयतांराक्षसानां । अयंलोकोजनः धर्मचारिणांतेषांयेभ्योनश्यति तेऽर्थास्त्वयिनदृश्यन्तइतिवा । दुर्दिनं मेघच्छन्नदिनं

[पा०] १ ङ. च. झ. ट. विमुक्तस्य. २ ख. सगुणान्वितः. ङ. च. छ. झ. ञ. ट. सगुणाधिकः. ३ क. ख. प्रतिष्ठितं.

त्वयि प्रव्राजिते वीर गुरोश्च वचने स्थिते ॥ रक्षसाऽपहृता भार्या प्राणैः प्रियतरा तव ॥ ४१ ॥
तदद्य विपुलं वीर दुःखमिन्द्रजिता कृतम् ॥ कर्मणा व्यपनेष्यामि तस्मादुत्तिष्ठ राघव ॥ ४२ ॥
उत्तिष्ठ नरशार्दूल दीर्घबाहो दृढव्रत ॥ किमात्मानं महात्मानमात्मानं नावबुध्यसे ॥ ४३ ॥
अयमनघ तवोदितः प्रियार्थं जनकसुतानिधनं निरीक्ष्य रुष्टः ॥
सहयगजरथां सराक्षसेन्द्रां भृशमिषुभिर्विनिपातयामि लङ्काम् ॥ ४४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्र्यशीतितमः सर्गः ॥ ८३ ॥

चतुरशीतितमः सर्गः ॥ ८४ ॥

रामसमीपमुपागतवता लक्ष्मणमुखाद्रामशोककारणमवगतवताविभीषणेन रामंप्रति इन्द्रजिन्निहतसीतायामायामयत्वोक्त्या समाश्वासनम् ॥ १ ॥ तथेन्द्रजितानिकुंभिलायांहोमारंभस्य होमसमाप्तौतस्यदुर्जयत्वस्यच निवेदनेन तद्वधाय लक्ष्मणप्रेषणप्रार्थना ॥ २ ॥

रामं[1] आश्वासयाने तु लक्ष्मणे भ्रातृवत्सले ॥ निक्षिप्य गुल्मान्स्वस्थाने तत्रागच्छद्विभीषणः ॥ १ ॥

चेति व्यतिरेकमुखेन प्रतिपादयन् तादृशोर्थस्त्वयि नास्तीत्याह—येषामिति ॥ येषां चरतामित्यनादरे षष्ठी । येषां चरतां यांश्चरतो विद्यमानानर्थाननादृत्य धर्मचारिणां केवलं धर्ममाचरतां । अयं लोको नश्यति । ऐहिकसुखं नास्तीत्यर्थः । ते तादृशाः सुखसाधनभूताः अर्थाः दुर्दिनेषु मेघच्छन्नदिनेषु । " मेघच्छन्नेऽह्नि दुर्दिनं " इत्यमरः । सूर्यादयो ग्रहाः यथा न दृश्यन्ते, तथा त्वयि न दृश्यन्ते । सकलश्रेयःसाधनभूता अर्थास्त्वया नादृताइत्यर्थः ॥ ४० ॥ अर्थहेतुभूतराज्यपरित्यागेन पितृवचनपरिपालनरूपकेवलधर्मावलम्बनेन च प्राप्तं दोषमाह—त्वयीति ॥ प्राणैः प्राणेभ्यः । प्राणैस्तुल्यं प्रियतरेति वाऽर्थः ॥ ४१ ॥ एवं गते किं करणीयमित्यत्राह—तदद्येति ॥ भवत्कर्मणाप्राप्तंदुःखं मत्कर्मणा व्यपनेष्यामीत्यर्थः । कृतप्रतिक्रियया तद्दुःखं निवारयिष्यामीति भावः ॥ ४२ ॥ एवं भक्तिवादानुक्त्वा क्षमापणं विदधाति—उत्तिष्ठेति ॥ आत्मानं स्वं । महात्मानं महाबुद्धिं । आत्मानं परमात्मानं । किं नावबुध्यसे । तस्मात् भवतः शोककारणं नास्तीति हृदयम् ॥ ४३ ॥ अयं अहं तव विधेयत्वेन सन्निहितः, तव प्रियार्थं उदितः उद्युक्तः उत्पन्नो वा । अनेन दुःखं व्यपनेष्यामीत्येतद्विवृतं ॥ ४४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्र्यशीतितमः सर्गः ॥ ८३ ॥

अथेन्द्रजिद्वधोपायदर्शनं—राममाश्वासयान इत्यादि ॥ आश्वासयाने आश्वासयमाने । आगमशासनस्यानित्यत्वान्मुगभावः । अनेन पूर्वोक्तवादा भ्रातृवात्सल्यात्तदाश्वासनार्था नतु परमार्था इत्युक्तं । पूर्वोक्तयुक्तिपरिहारस्तु, " हैतुकान्बकवृत्तींश्च वाङ्मात्रेणापि

॥ ४० ॥ स० राज्यत्यागाचातुर्यमूलमेतदित्याह—त्वयीति ॥ ४१ ॥ ति० अतःपरमेतावदेवकर्तव्यंकिमतीतार्थानुशोचनेनेत्याह—तदद्येति । कर्मणापौरुषेणअहमेवव्यपनेष्यामि । तस्मान्मत्प्रोत्साहनार्थमुत्तिष्ठ ॥ ४२ ॥ शि० हेमहात्मन् महात्मानं सर्वप्रवर्तकं । आत्मानं स्वस्वरूपं । कुतोनावबुध्यसे । एतेनतवैवेच्छयासर्वजातमितिसूचितं ॥ ४३ ॥ ती० सीतानिधनश्रवणजनितदुःखार्दितोहमितःपरंकिमपिकर्तुनशक्नोमीत्याशङ्क्यतर्ह्यहमेवकरिष्यामिमांनियोजयेत्याशयेनाह—अयमिति । अयमहंतव प्रियार्थमुद्यतःत्वन्नियोजितसेवांकर्तुमेवाहमुत्पन्नइत्यर्थः । अतःजनकसुतानिधननिरीक्ष्यरुष्टःसन् लङ्कांविनिपातयामीत्यर्थः । यद्वा सकलशास्त्रार्थतत्वज्ञस्त्वंकिमर्थमेवंधर्माधर्मखण्डनंकरोषि । शक्तश्चेच्छौर्यप्रदर्शयेत्यतआह—अयमिति । जनकसुतानिधनंनिरीक्ष्य रुष्टःसन् अयमहंधर्माधर्मखण्डनरूपमर्थं उदितः उक्तवानस्मि । इतःपरंतवप्रियार्थं तवप्रिया या सीता तदर्थं सीतानिधनप्रतिकारार्थंलङ्कांविनिपातयामीत्यर्थः ॥ ४४ ॥ इतित्र्यशीतितमःसर्गः ॥ ८३ ॥

[पा०] १ ट. महात्मानंमहात्मन्नावबुध्यसे. २ क. ख. ग. ट. अहमनघ. च. अयमहमद्य. ३ ङ. च. झ. ञ. ट. माश्वासमानेतु.

नानाप्रहरणैर्वीरैश्चतुर्भिः सचिवैर्वृतः ॥ नीलाञ्जनचयाकारैर्मातङ्गैरिव यूथपः ॥ २ ॥
सोभिगम्य महात्मानं राघवं शोकलालसम् ॥ वानरांश्चैव ददृशे बाष्पपर्याकुलेक्षणान् ॥ ३ ॥
राघवं च महात्मानमिक्ष्वाकुकुलनन्दनम् ॥ ददर्श मोहमापन्नं लक्ष्मणस्याङ्कमाश्रितम् ॥ ४ ॥
व्रीडितं शोकसंतप्तं दृष्ट्वा रामं विभीषणः ॥ अन्तर्दुःखेन दीनात्मा किमेतदिति सोब्रवीत् ॥ ५ ॥
विभीषणमुखं दृष्ट्वा सुग्रीवं तांश्च वानरान् ॥ लक्ष्मणोवाच मन्दार्थमिदं बाष्पपरिप्लुतः ॥ ६ ॥
हतामिन्द्रजिता सीतामिह श्रुत्वैव राघवः ॥ हनुमद्वचनात्सौम्य ततो मोहमुपागतः ॥ ७ ॥
कथयन्तं तु सौमित्रिं सन्निवार्य विभीषणः ॥ [पुष्कलार्थमिदं वाक्यं विसंज्ञं राममब्रवीत् ॥ ८ ॥]
मनुजेन्द्रार्तरूपेण यदुक्तं च हनूमता ॥ तदयुक्तमहं मन्ये सागरस्येव शोषणम् ॥ ९ ॥
अभिप्रायं तु जानामि रावणस्य दुरात्मनः ॥ सीतां प्रति महाबाहो न च घातं करिष्यति ॥ १० ॥
याच्यमानस्तु बहुशो मया हितचिकीर्षुणा ॥ वैदेहीमुत्सृजस्वेति न च तत्कृतवान्वचः ॥ ११ ॥
नैव साम्ना न दानेन न भेदेन कुतो युधा ॥ सा द्रष्टुमपि शक्येत नैव चान्येन केनचित् ॥ १२ ॥
[मायामयीं महाबाहो तां विद्धि जनकात्मजाम् ॥] वानरान्मोहयित्वा तु प्रतियातः स राक्षसः ॥
चैत्यं निकुम्भिलां नाम यत्र होमं करिष्यति ॥ १३ ॥

नार्चयेत् " इति मनूक्तरीत्या प्रेक्षणीयः । गुल्मान् सेनासन्निवेशान् । स्वस्थाने स्वकार्यकरणार्थं ॥ १—२ ॥ सोभिगम्येति । अत्र राघवपदं लक्ष्मणपरं । उत्तरश्लोके रामदर्शनस्य वक्ष्यमाणत्वात् । ददृशे ददर्श ॥ ३-४ ॥ सः विभीषणः रामं दृष्ट्वा दीनात्मा दीनमनस्कःसन् । अन्तर्दुःखेन अबहिःप्रकटितदुःखविकारेण उपलक्षितःसन् अब्रवीत् ॥ ५ ॥ लक्ष्मणोवाचेत्यत्र छान्दसः सुलोपः । मन्दार्थं अल्पार्थं । संगृहीतार्थमित्यर्थः ॥ ६—७ ॥ कथयन्तमित्यर्धं ॥ मध्ये निवारणोक्तिः सर्वस्य वृत्तान्तस्य स्वेनावगतत्वात् । विभीषणः उवाचेति शेषः ॥ ८—९ ॥ करिष्यति । रावण इति शेषः ॥ १० ॥ तत्र हेतुमाह—याच्यमान इत्यादिना ॥ ११ ॥ सा साम्ना द्रष्टुमपि नैव शक्येत । दानेनापि द्रष्टुं न शक्येत । भेदेनापि द्रष्टुं न शक्येत । युधा दण्डेन कुतो द्रष्टुमपि शक्येत । अन्येन सामोपायेन केनचिद्द्रष्टुमपि नैव शक्येत॥१२॥ कथं तर्हीन्द्रजिता हतेत्याशङ्क्य मायेयमित्याह—वानरानित्यादिना ॥ मोहयित्वा । लङ्कायां स्वव्यतिरिक्तस्य योद्धुरभावात् स्वस्मिन्कर्मव्याकुले वानराः प्रहरेयुः यज्ञश्च विच्छिद्येत । विच्छिन्ने च तस्मिन् ब्रह्मवरानुसारेण स्वस्य विनाशो भविष्यतीति

स० आर्तरूपेण दीनसदृशेन । सागरस्यशोषणं अगस्त्यादिसमावेशाभावदशायांयथाऽयुक्तं तथेदमयुक्तंमन्ये ॥ शि० सागरस्यशोषणमिति । एतेन तत्कालेऽगस्त्यकर्तृकसागरशोषणंनप्रसिद्धमितिध्वनितं ॥ ९ ॥ ति० कथमयुक्तंतत्राह—अभिप्रायं लिति । सीतांप्रति सीतामुद्दिश्यवर्तमानंतदभिप्रायं सर्वनाशेपिसीतानत्याज्येत्येवंरूपंजानामिच । अतोघातंनकरिष्यति । सीतायाइतिशेषः ॥ स० हतालीतेत्यभिहितंश्रुतवतोदुःखंकथयकथमयुक्तमित्यतोवक्ति—अभिप्रायमिति । सीतांप्रति तामुद्दिश्यदुरात्मनोपिरावणस्याभिप्रायंजानामि । कोसावभिप्रायइत्यतआह—नचेति । सीतायाइतिशेषः । सीतांप्रतिसीतायाघातंनचकरिष्यतीतिदुरात्मनोरावणस्याभिप्रायंजानामि । अद्यवाश्वोवाऽहमपिहतःस्यांनत्यजेथंजानकीपाक्षिक्यादुराशयापिदुराशयोननाशयतीतितदभिप्रायंजानामीतिभावः ॥ १० ॥ स० हेख स्वकीय भ्रातरितियावत् । सीतामुत्सृजेतियाच्यमानः नचतत् मद्याचितप्रमेयकंवचःकृतवान् ॥ ११ ॥ स० सातुखनिमित्तमशेषनर्कवरनाशोभावीत्येवरावणकरग्रहंप्राप्ताकुपिताचेत्सद्योनाशयेदितिवक्तुंतद्घुणानाह—नैवेति । युधा युद्धेन । क्षिवन्तः । अन्येनकेनापिवञ्चनाद्युपायेन । किंचसीताऽन्येनकेनापिकेनाप्युपायेनद्रष्टुमेवाशक्या कुतस्तस्याहरणपूर्वंकंवधइत्याहेतिपद्यमवतारयतानागोजिभट्टेन समग्रंरामायणंद्वादशवारंश्रुतवतःसीतायारामस्यचकोनुबन्धइतिप्रश्न-

---

[पा०] १ क.—ट. श्चतुर्भिरभिसंवृतः. २ ङ. झ. ट. यूथपैः. ३ क. ख. सोभिवाद्य. ४ ज. व्रीडितःशोकसंतप्तो. ५ ख. धर्मात्मा. ६ ङ. च. झ. ञ. ट. सुपाश्रितः. ७ इदमर्धं क. ख. घ.—ट. पाठेषुदृश्यते. ८ क—ट. यदुक्तस्तं. ९ इदमर्धं ङ. झ. ट. पाठेषुदृश्यते. १० ङ. झ. ट. निकुंभिलामद्यप्राप्य.

हुतवानुपयातो हि देवैरपि सवासवैः ॥ दुराधर्षो भवत्येव सङ्गामे रावणात्मजः ॥ १४ ॥
तेन मोहयता नूनमेषा माया प्रयोजिता ॥ विघ्नमन्विच्छता तत्र वानराणां पराक्रमे ॥ १५ ॥
ससैन्यास्तत्र गच्छामो यावत्तन्न समाप्यते ॥ त्यजेमं नरशार्दूल मिथ्या सन्तापमागतम् ॥
सीदते हि बलं सर्वं दृष्ट्वा त्वां शोककर्शितम् ॥ १६ ॥
इह त्वं स्वस्थहृदयस्तिष्ठ सत्वसमुच्छ्रितः ॥ लक्ष्मणं प्रेषयास्माभिः सह सैन्यानुकर्षिभिः ॥ १७ ॥
एष तं नरशार्दूलो रावणिं निशितैः शरैः ॥ त्याजयिष्यति तत्कर्म ततो वध्यो भविष्यति ॥ १८ ॥
तस्यैते निशितास्तीक्ष्णाः पैत्रिपत्राङ्गवाजिनः ॥ पतत्रिण इवासौम्याः शराः पास्यन्ति शोणितम् ॥ १९ ॥
तं सन्दिश महाबाहो लक्ष्मणं शुभलक्षणम् ॥ राक्षसस्य विनाशाय वज्रं वज्रधरो यथा ॥ २० ॥
मनुजवर न कालविप्रकर्षो रिपुनिधनं प्रति यत्क्षमोऽद्य कर्तुम् ॥
त्वमतिसृज रिपोर्वधाय वाणीममररिपोर्मथने यथा महेन्द्रः ॥ २१ ॥
समाप्तकर्मा हि स राक्षसाधिपो भवत्यदृश्यः समरे सुरासुरैः ॥
युयुत्सता तेन समाप्तकर्मणा भवेत्सुराणामपि संशयो महान् ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुरशीतितमः सर्गः ॥ ८४ ॥

पञ्चाशीतितमः सर्गः ॥ ८५ ॥

सीताशोकाकुलतयाविभीषणभाषितमनवधारितवतोरामस्यचोदनया पुनर्विभीषणेन तंप्रति इन्द्रजितं प्रतिनिकुंभिलायां होमसमाप्तौ सर्वदुर्जयत्वरूपब्रह्मवरदानप्रकारस्य ब्रह्मणैवोक्तस्यहोमापरिसमाप्तेस्तद्वधहेतुत्वस्यच निवेदनेन तद्वधायानुजनियोजनप्रार्थना ॥ १ ॥ रामचोदनया लक्ष्मणेनेन्द्रजिद्वधायविभीषणादिभिःसह निकुंभिलांप्रतिप्रस्थानम् ॥ २ ॥

तस्य तद्वचनं श्रुत्वा राघवः शोककर्शितः ॥ नोपधारयते व्यक्तं यदुक्तं तेन रक्षसा ॥ १ ॥

मत्वा वध्वचनमितिभावः ॥ १३—१४ ॥ अन्विच्छता चिन्तयता ॥ १५ ॥ तत् होमरूपं कर्म ॥ १६ ॥ सैन्यानुकर्षिभिः सैन्यपालैः ॥ १७ ॥ तत्कर्म होमकर्म । णिजन्तत्वाद्विकर्मकत्वं ॥ १८ ॥ एते लक्ष्मणीयाः । पत्रिपत्राणि पक्षिपक्षाः, तेषामङ्गानि बर्हाणि, तैः वाजिनः वेगवन्तः ॥ १९—२० ॥ यद्यस्मात्कारणात् रिपुनिधनं प्रति कालविप्रकर्षः कालविलम्बः । अद्य कर्तुं न क्षमः । तत्तस्मात् । त्वं रिपुवधाय वाणीमतिसृज । आज्ञापयेत्यर्थः । यथा महेन्द्र इत्यापन्मात्रेदृष्टान्तः ॥ २१—२२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुरशीतितमः सर्गः ॥ ८४ ॥

अथेन्द्रजिद्वधाय लक्ष्मणनिर्गमनं—तस्य तद्वचन-

नीतिरुपार्जितेतिसंतोष्टव्यं ॥ १२ ॥ शि० एषलक्ष्मणः रावणिं तत् मायाजनकहुवनरूपंकर्म । त्याजयिष्यति । ततः तस्माद्धेतोः । वध्योभविष्यति । इन्द्रजिदितिशेषः । रावणेःकर्मत्वंतुकृतपूर्वीकटमित्यत्रेव पूर्वंकटरूपकर्माविवक्षयाऽकर्मकत्वेनाविवक्षितकर्माणोपियथाऽकर्मकत्वेनगृह्यन्ते तथाऽकर्मकत्वेनशब्देन्दुशेखरादौनिरूपितं ॥ १८ ॥ ति० तस्मात्त्वंरिपोर्वधायलक्ष्मणमतिसृज्ज प्रेषय । यथादिविजरिपुमथनेअमरेन्द्रोवज्रमतिसृजतितथेत्यर्थः ॥ २१ ॥ स० प्रेष्यप्रेषणावश्यंभावितासूचनायपुनरुक्तीकरोति—**समाप्तकर्मेति** । सुराणामपिसंशयः प्राणसंशयः । पूर्वंसुरासुरैरितिप्रकृतत्वात्सुरासुराणांसंशयइतिवाच्यं । तथापिकेचिदेवदेवपक्षिणोसुराएतद्वेष्याः । इतरेत्वेतत्कूटघटिताएवेतिसुराणामित्येवोक्तमितिमन्तव्यं ॥ २२ ॥ इतिचतुरशीतितमःसर्गः ॥ ८४ ॥

[पा०] १ ख. ङ. च. झ. ट. भवत्येष. २ ङ. झ. ट. त्यजैनं. ३ च. ज. कङ्कपत्राङ्ग. ४ क. घ. ङ. ज.—ट. तत्संदिश. ५ ङ. झ. वैधायवज्रंदिविजरिपोर्मथने. क. ज. वैधायवाणीमसुरपुरोन्मथने. ञ. वैधायवज्रममर.

ततो धैर्यमवष्टभ्य रामः परपुरञ्जयः ॥ विभीषणमुपासीनमुवाच कपिसन्निधौ ॥ २ ॥
नैर्ऋताधिपते वाक्यं यदुक्तं ते विभीषण ॥ भूयस्तच्छ्रोतुमिच्छामि ब्रूहि यत्ते विवक्षितम् ॥ ३ ॥
राघवस्य वचः श्रुत्वा वाक्यं वाक्यविशारदः ॥ यत्तत्पुनरिदं वाक्यं बभाषे स विभीषणः ॥ ४ ॥
यथाज्ञप्तं महाबाहो त्वया गुल्मनिवेशनम् ॥ तत्तथाऽनुष्ठितं वीर त्वद्वाक्यसमनन्तरम् ॥ ५ ॥
तान्यनीकानि सर्वाणि विभक्तानि समन्ततः ॥ विन्यस्ता यूथपाश्चैव यथान्यायं विभागशः ॥ ६ ॥
भूयस्तु मम विज्ञाप्यं तच्छृणुष्व महायशः ॥ ७ ॥
त्वय्यकारणसन्तप्ते सन्तप्तहृदया वयम् ॥ त्यज राजन्निमं शोकं मिथ्या सन्तापमागतम् ॥ ८ ॥
तदियं त्यज्यतां चिन्ता शत्रुहर्षविवर्धनी ॥ उद्यमः क्रियतां वीर हर्षः समुपसेव्यताम् ॥ ९ ॥
प्राप्तव्या यदि ते सीता हन्तव्याश्च निशाचराः ॥ रघुनन्दन वक्ष्यामि श्रूयतां मे हितं वचः ॥१०॥
साध्वयं यातु सौमित्रिर्बलेन महता वृतः ॥ निकुम्भिलायां संप्राप्य हन्तुं रावणिमाहवे ॥ ११ ॥
धनुर्मण्डलनिर्मुक्तैराशीविषविषोपमैः ॥ शरैरर्हन्तुं महेष्वासो रावणिं समितिंजयः ॥ १२ ॥
तेन वीर्येण तपसा वरदानात्स्वयंभुवः ॥ अस्त्रं ब्रह्मशिरः प्राप्तं कामगाश्च तुरङ्गमाः ॥ १३ ॥
स एष सह सैन्येन प्राप्तः किल निकुम्भिलाम् ॥ यद्युत्तिष्ठेत्कृतं कर्म हतान्सर्वांश्च विद्धि नः ॥ १४ ॥
निकुम्भिलामसंप्राप्तमहुताग्निं च यो रिपुः ॥ त्वामाततायिनं हन्यादिन्द्रशत्रोः स ते वधः ॥
वरो दत्तो महाबाहो सर्वलोकेश्वरेण वै ॥ १५ ॥
इत्येवं विहितो राजन्वधस्तस्यैष धीमतः ॥ वधायेन्द्रजितो राम संदिशस्व महाबल ॥
हते तस्मिन्हतं विद्धि रावणं ससुहृज्जनम् ॥ १६ ॥

मित्यादि ॥ व्यक्तं नोपधारयते । हृदि सम्यङ्निधातुं नाशकदित्यर्थः ॥ १—२ ॥ ते त्वया ॥ ३ ॥ यत्तत्पुनरिति । यद्वाक्यं पूर्वमुक्तवान् तदिदं पुनर्बभाष इत्यन्वयः ॥ ४ ॥ यथाज्ञप्तमित्याद्युक्तिः रामस्य व्याकुलत्वनिवारणाय ॥५—७॥ सन्तापं सन्तापं च। मिथ्येति शोकसन्तापयोर्विशेषणं । सन्तापः शोककार्यमिति तयोर्भिदा ॥८॥ उद्यमः उत्साहः॥९—१२॥ ब्रह्मशिरः ब्रह्मशिरःसंज्ञकमस्त्रं । तुरङ्गमशब्दो रथस्याप्युपलक्षणं । प्राप्तं । होमद्वारेति शेषः ॥१३॥ यदीति । यदि च निकुम्भिलाया उत्तिष्ठेत्, यदि कर्म कृतं स्यात् । तदा हतान् विद्धीत्यन्वयः ॥ १४ ॥ तर्हि कथं स वध्य इत्यत्राह—निकुम्भिलामित्यादिसार्धश्लोक एकान्वयः । यो रिपुः । अहुताग्निं असमाप्तहोमं । निकुम्भिलामसंप्राप्तं निकुम्भिलाख्यन्यग्रोधमूलस्थानमसंप्राप्तं च । तमप्रविष्टन्यग्रोधमित्युत्तरसर्गे वक्ष्यति । आततायिनं शस्त्रपाणिं रिपुवधोद्यतं च त्वां यो हन्यात् हिंस्यात्, सः इन्द्रशत्रोस्ते वधो मारक इति सर्वलोकेश्वरेण ब्रह्मणा वरो दत्त इति योजना । " वध हतौ " इति धातोः पचाद्यचि वध इति रूपं । यद्यप्येतच्छापवचनमिव प्रतिभाति । तथापि निकुम्भिलाप्राप्तिहोमयोर्विघ्नाभावे अवध्य इति पर्यवसानाद्वररूपत्वं द्रष्टव्यं ॥ १५ ॥ इत्येवमित्यादिसार्धश्लोक एकान्वयः ॥ इत्येवंप्रकारेण । एषः होमविघ्नकारी तस्य इन्द्रजितः वधः मारकः । विहितः

स० उपासीनं समीपस्थकपिसंनिधौ सीतावार्ताकथकहनुमत्संनिहितकपिसंनिधाने । वक्तृवक्त्रदर्शनंपुनःपुनःखेदोद्बोधकमिति सूच्यतेऽनेन ॥ २ ॥ स० शोकपरायत्ततया श्रुतमश्रुतप्रायमितिविवक्षितंब्रूहीत्यवादीदितिभावः ॥ ३ ॥ स० अकारणसंतप्ते मिथ्यावार्तोत्थितेत्यकारणंसंतप्तेसति । वयंसंतप्तहृदयाः । ' अस्मदोद्वयोश्च ' इतिवयमितिबहुवचनं । अस्मदादयइत्याद्यर्थोवा । मिथ्येतिभिन्नंपदं । संतापं सं अत्यन्तं तापयतिपार्श्वस्थानस्मानितिसतथातं । मिथ्या मिथ्याभूतसीतावधश्रवणजत्वान्मिथ्याभूतं । आगतंशोकंत्यज ॥ ८ ॥ स० यद्यस्मात् शत्रुहर्षविवर्धनी तस्मादियंचिन्तात्यज्यतामित्यन्वयः ॥ ९ ॥ स० यदिसीताप्राप्तव्या । निशाचराश्चयदिहन्तव्यास्तर्हि हेवीरउद्यमःक्रियतां । त्वया हर्षःसमुपसेव्यताम् ॥ १० ॥ स० यदिकृतंकर्मनिमित्तीकृत्योत्तिष्ठेत्

[पा०] १ झ. ञ. ट. यदियं. २ ग. ङ. च. झ. ट. संप्राप्तं. ३ क. ख. घ. ज. निर्मुक्तैःशरैराशीविषोपमैः. ४ घ. हुतंहन्तुं. ५ ङ. झ. ट. मकृताग्निंच. ६ घ. संदिशास्य. ७ ङ. ज.—ट. महाबलं. ८ ख. ङ. झ. ञ. ट. समुहृद्गणं.

विभीषणवचः श्रुत्वा राघवो वाक्यमब्रवीत् ॥ १७ ॥
जानामि तस्य रौद्रस्य मायां सत्यपराक्रम ॥ स हि ब्रह्मास्त्रवित्प्राज्ञो महामायो महाबलः ॥
करोत्यसंज्ञान्सङ्ग्रामे देवान्सवरुणानपि ॥ १८ ॥
तस्यान्तरिक्षे चरतो रथस्थस्य महायशः ॥ न गतिर्ज्ञायते तस्य सूर्यस्येवाभ्रसंप्लवे ॥ १९ ॥
राघवस्तु रिपोर्ज्ञात्वा मायावीर्यं दुरात्मनः ॥ लक्ष्मणं कीर्तिसंपन्नमिदं वचनमब्रवीत् ॥ २० ॥
यद्वानरेन्द्रस्य बलं तेन सर्वेण संवृतः ॥ हनुमत्प्रमुखैश्चैव यूथपैः सह लक्ष्मण ॥ २१ ॥
जाम्बवेनर्क्षपतिना सहसैन्येन संवृतः ॥ जहि तं राक्षससुतं मायाबलविशारदम् ॥ २२ ॥
अयं त्वां सचिवैः सार्धं महात्मा रजनीचरः ॥ अभिज्ञस्तस्य देशस्य पृष्ठतोऽनुगमिष्यति ॥ २३ ॥
राघवस्य वचः श्रुत्वा लक्ष्मणः सविभीषणः ॥ जग्राह कार्मुकश्रेष्ठमैन्द्रमद्भुतपराक्रमः ॥ २४ ॥
सन्नद्धः कवची खड्गी सशरो हेमचापधृत् ॥ राघवपादावुपस्पृश्य हृष्टः सौमित्रिरब्रवीत् ॥ २५ ॥
अद्य मत्कार्मुकोन्मुक्ताः शरा निर्भिद्य रावणिम् ॥ लङ्कामभिपतिष्यन्ति हंसाः पुष्करिणीमिव ॥ २६ ॥
अद्यैव तस्य रौद्रस्य शरीरं मामकाः शराः ॥ विधमिष्यन्ति भित्त्वा तं महाचापगुणच्युताः ॥ २७ ॥
स एवमुक्त्वा द्युतिमान्वचनं भ्रातुरग्रतः ॥ स रावणिवधाकाङ्क्षी लक्ष्मणस्त्वरितो ययौ ॥ २८ ॥
सोभिवाद्य गुरोः पादौ कृत्वा चापि प्रदक्षिणम् ॥ निकुम्भिलामभिययौ चैत्यं रावणिपालितम् ॥ २९ ॥
विभीषणेन सहितो राजपुत्रः प्रतापवान् ॥ कृतस्वस्त्ययनो भ्रात्रा लक्ष्मणस्त्वरितो ययौ ॥ ३० ॥
वानराणां सहस्रैस्तु हनुमान्बहुभिर्वृतः ॥ विभीषणश्च सामात्यस्तदा लक्ष्मणमन्वगात् ॥ ३१ ॥
महता हरिसैन्येन सवेगमभिसंवृतः ॥ ऋक्षराजबलं चैव ददर्श पथि विष्ठितम् ॥ ३२ ॥
स गत्वा दूरमध्वानं सौमित्रिर्मित्रनन्दनः ॥ राक्षसेन्द्रबलं दूरादपश्यद्व्यूहमास्थितम् ॥ ३३ ॥
स तं प्राप्य धनुष्पाणिर्मायायोगमरिन्दमः ॥ तस्थौ ब्रह्मविधानेन विजेतुं रघुनन्दनः ॥ ३४ ॥

ब्रह्मणा कृप्तः । तस्मात् तस्य इन्द्रजितो वधाय संदिशस्व । अस्मासु कंचिदिति शेषः ॥ १६—१८ ॥ तस्य प्रसिद्धस्येति सूर्यविशेषणं द्वितीयं तस्येति पदं । अभ्रसंप्लवे मेघावरणे ॥ १९–२० ॥ यद्वानरेन्द्रस्येत्यादिश्लोकत्रयमेकान्वयं ॥ जाम्बवेन जाम्बवता । सहसैन्येन सैन्यसहितेन । " वोपसर्जनस्य " इति विकल्पेन सभावाभावः । संवृतः । त्वमिति शेषः ॥ २१–२७ ॥ असत्यपि कर्तृभेदे क्रियाभेदमाश्रित्य स इति द्विरुक्तिः। स एवमुक्त्वा स ययाविति निर्वाहः । वस्तुतस्तु स लक्ष्मणः । सः तादृशवीरवेषविशिष्ट एवेत्यर्थः । यद्वा सरावणिवधाकाङ्क्षीत्येकं पदं । रावणिना सहवर्तन्त इति सरावणयः निकुम्भिलास्था राक्षसाः । तेषां वधाकाङ्क्षीत्यर्थः ॥ २८—३३ ॥ स तं प्राप्येत्यादिश्लोकद्वयमेकान्वयं ॥ ब्रह्मविधानेन निकुम्भिलामसंप्राप्तमित्यादिनोक्तब्रह्मवरदानप्रकारेण । मायायोगं मायारूपोपायं । तं इन्द्रजितं विजेतुं प्राप्य तस्थौ । मायायागमिति पाठे मायायागं जेतुं नाश-

---

तदा नःसर्वान्हतान्विद्धि ॥ १४ ॥ **ति०** मायानामभिज्ञातस्य तद्विषयज्ञानवतः । अभिज्ञस्येतिपाठेप्ययमेवार्थः ॥ **शि०** अभिज्ञेतिपाठे तृतीयान्तत्वात्सहितइत्यध्याहार्यं ॥ २३ ॥ **ति०** वामचापभृत् वामहस्तेनचापभृत् ॥ २५ ॥ **ति०** ब्रह्मविधानेन " निकुंभिलामसंप्राप्तः " इत्यायुक्तब्रह्मवरदानप्रकारेणतंविजेतुंतस्थौ ॥ **कतक०** ब्रह्मविमानेनेतिपाठान्तरं । ब्रह्मविमानेन ब्रह्मणोभगवतस्तेजोंशोऽहमस्मीतिविशिष्यजायमानेनध्यानेनशत्रुंजेतुंतस्थौ । संकटकालेतादृशध्यानस्यतस्यनिसर्गसिद्धत्वात् ॥ ३४ ॥ इतिपञ्चाशीतितमःसर्गः ॥ ८५ ॥

[**पा०**] १ ख. ङ. च. झ. ञ. ट. ज्ञायतेवीर. २ ङ. झ. अभिज्ञातस्यमायानां. ट. अभिज्ञस्तस्यमायानां. ३ क. घ. ङ. ज.—ट. मन्यद्भीमपराक्रमः. ख. मन्यद्घोरपराक्रमः. ४ झ. ञ. ट. वामचापभृत. ५ ङ. च. झ. ञ. ट. सामात्योलक्ष्मणंत्वरितंययौ. ६ क.—ङ. ज.—ट. सर्वसंप्राप्य.

विभीषणेन सहितो राजपुत्रः प्रतापवान् ॥ अङ्गदेन च वीरेण तथाऽनिलसुतेन च ॥ ३५ ॥
विविधममलशस्त्रभास्वरं तद्वृजगहनं विपुलं महारथैश्च ॥
प्रतिभयतममप्रमेयवेगं तिमिरमिव द्विषतां बलं विवेश ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चाशीतितमः सर्गः ॥ ८५ ॥

षडशीतितमः सर्गः ॥ ८६ ॥

निकुंभिलासमीपगमनावसरेलक्ष्मणंप्रतिविभीषणेन समीपस्थराक्षससैन्यप्रदर्शनपूर्वकं वानरैस्सहतद्विक्षोभे यागापरिसमाप्तावेवेन्द्रजिन्निर्गमनोक्तिः ॥ १ ॥ लक्ष्मणेन वानरैस्सह राक्षससेनाविक्षोभारंभे कुपितेनेन्द्रजिता यागापरिसमाप्तावे. वनिकुंभिलातोनिर्गमनेन वानरैस्सहयुद्धारंभः ॥ २ ॥ हनुमता विशेषतोराक्षससेनाविध्वंसने क्रोधादिन्द्रजितातदभिद्रवणम् ॥ ३ ॥

अथ तस्यामवस्थायां लक्ष्मणं रावणानुजः ॥ परेषामहितं वाक्यमर्थसाधकमब्रवीत् ॥ १ ॥
यदेतद्राक्षसानीकं मेघश्यामं विलोक्यते ॥ एतदायोध्यतां शीघ्रं कपिभिः पादपायुधैः ॥ २ ॥
अस्यानीकस्य महतो भेदने यत लक्ष्मण ॥ राक्षसेन्द्रसुतोप्यत्र भिन्ने दृश्यो भविष्यति ॥ ३ ॥
स त्वमिन्द्राशनिप्रख्यैः शरैरेवकिरन्परान् ॥ अभिद्रवाशु यावद्वै नैतत्कर्म समाप्यते ॥ ४ ॥
जहि वीर दुरात्मानं मायापरमधार्मिकम् ॥ रावणिं क्रूरकर्माणं सर्वलोकभयावहम् ॥ ५ ॥
विभीषणवचः श्रुत्वा लक्ष्मणः शुभलक्षणः ॥ ववर्ष शरवर्षाणि राक्षसेन्द्रसुतं प्रति ॥ ६ ॥
ऋक्षाः शाखामृगाश्चापि द्रुमाद्रिनखयोधिनः ॥ अभ्यधावन्त सहितास्तदनीकमवस्थितम् ॥ ७ ॥
राक्षसाश्च शितैर्बाणैरसिभिः शक्तितोमरैः ॥ उद्यतैः समवर्तन्त कपिसैन्यजिघांसवः ॥ ८ ॥
स संप्रहारस्तुमुलः संजज्ञे कपिरक्षसाम् ॥ शब्देन महता लङ्कां नादयन्वै समन्ततः ॥ ९ ॥
शस्त्रैश्च बहुधाकारैः शितैर्बाणैश्च पादपैः ॥ उद्यतैर्गिरिशृङ्गैश्च घोररैराकाशमावृतम् ॥ १० ॥
ते राक्षसा वानरेषु विकृताननबाहवः ॥ निवेशयन्तः शस्त्राणि चक्रुस्ते सुमहद्भयम् ॥ ११ ॥
तथैव सकलैर्वृक्षैर्गिरिशृङ्गैश्च वानराः ॥ अभिजघ्नुर्निजघ्नुश्च समरे राक्षसर्षभान् ॥ १२ ॥
ऋक्षवानरमुख्यैश्च महाकायैर्महाबलैः ॥ रक्षसां वध्यमानानां महद्भयमजायत ॥ १३ ॥

यितुं । तं देशं प्राप्य तस्थावित्यन्वयः ॥ ३४–३५ ॥ प्रतिभयतमं अतिशयेन भयंकरं ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चाशीतितमःसर्गः ८५॥

अथेन्द्रजिद्युद्धारम्भः—अथ तस्यामित्यादि ॥ तस्यामवस्थायां निकुम्भिलासमीपगमनावसरे । अर्थसाधकं । स्वानामिति शेषः॥१॥ आयोध्यतां हन्यतां । शीघ्रमिति । विलम्बे यागः समाप्येतेति भावः॥२॥ यत यतस्व । अत्र राक्षसानीके ॥३—५॥ शुभलक्षणः सुहृद्वचनसारग्राहित्वलक्षणयुक्तः ॥ ६—७ ॥ कपिसैन्यजिघांसवः कपिसैन्यं हन्तुमिच्छवः ॥ ८ ॥ संप्रहारः युद्धं ॥ ९–१० ॥ शस्त्रनिवेशनविकृताननबाहुत्वरूपक्रियाभेदात् तच्छब्दद्वयनिर्वाहः ॥ ११—

ती० मायापरमधार्मिकं परमधार्मिकवत्प्रतीयमानं ॥ स० मायापरमधार्मिकं माययापरमधनुर्धारिणंवा । मायापरं अधार्मिकमितिवा ॥ ५ ॥

[पा०] १ ङ. झ. ट. गहनंमहारथैश्च. २ ङ. झ. ञ. ट. कपिभिश्चशिलायुधैः. ३ ङ. झ. ट. तस्यानीकस्य. ४ ख रक्षकिरस्वह. ५ क. ख. च. मायाधरं. ६ ङ. झ. ञ. शरवर्षेण. ७ झ. ञ. ट. अभ्यवर्तन्तसमरेकपिसैन्य. ८ ङ. च. झ. ञ. ट. सर्वराक्षसान्. ९ ङ. च. झ. ट. युध्यमानानां.

स्वमनीकं विषण्णं तु श्रुत्वा शत्रुभिरर्दितम् ॥ उदतिष्ठत दुर्धर्षस्तत्कर्मण्यननुष्ठिते ॥ १४ ॥
वृक्षान्धकारान्निर्गत्य जातक्रोधः स रावणिः ॥ आरुरोह रथं सज्जं पूर्वयुक्तं स राक्षसः ॥ १५ ॥
स भीमकार्मुकधरः कालमेघसमप्रभः ॥ रक्ताक्षनयनः क्रुद्धो बभौ मृत्युरिवान्तकः ॥ १६ ॥
दृष्ट्वैव तु रथस्थं तं पर्यवर्तत तद्बलम् ॥ रक्षसां भीमवेगानां लक्ष्मणेन युयुत्सताम् ॥ १७ ॥
तस्मिन्काले तु हनुमानुद्यम्य सुदुरासदम् ॥ धरणीधरसंकाशो महावृक्षमरिन्दमः ॥ १८ ॥
स राक्षसानां तत्सैन्यं कालाग्निरिव निर्दहन् ॥ चकार बहुभिर्वृक्षैर्निस्संज्ञं युधि वानरः ॥ १९ ॥
विध्वंसयन्तं तरसा दृष्ट्वैव पवनात्मजम् ॥ राक्षसानां सहस्राणि हनुमन्तमवाकिरन् ॥ २० ॥
शितशूलधराः शूलैरसिभिश्चासिपाणयः ॥ शक्तिभिः शक्तिहस्ताश्च पट्टिशैः पट्टिशायुधाः ॥ २१ ॥
परिघैश्च गदाभिश्च चक्रैश्च शुभदर्शनैः ॥ शतशश्च शतघ्नीभिरायसैरपि मुद्गरैः ॥ २२ ॥
घोरैः परश्वधैश्चैव भिन्दिपालैश्च राक्षसाः ॥ मुष्टिभिर्वज्रकल्पैश्च तलैरशनिसन्निभैः ॥
अभिजघ्नुः समासाद्य समन्तात्पर्वतोपमम् ॥ २३ ॥
तेषामपि च संक्रुद्धश्चकार कदनं महत् ॥ २४ ॥
स ददर्श कपिश्रेष्ठमचलोपममिन्द्रजित् ॥ सूदयन्तममित्रघ्नममित्रान्पवनात्मजम् ॥ २५ ॥
स सारथिमुवाचेदं याहि यत्रैष वानरः ॥ क्षयमेष हि नः कुर्याद्राक्षसानामुपेक्षितः ॥ २६ ॥
इत्युक्तः सारथिस्तेन ययौ यत्र स मारुतिः ॥ वहन्परमदुर्धर्षं स्थितमिन्द्रजितं रथे ॥ २७ ॥
सोभ्युपेत्य शरान्खड्गान्पट्टिशांश्च परश्वधान् ॥ अभ्यवर्षत दुर्धर्षः कपिमूर्ध्नि स राक्षसः ॥ २८ ॥
तानि शस्त्राणि घोराणि प्रतिगृह्य स मारुतिः ॥ रोषेण महताऽऽविष्टो वाक्यं चेदमुवाच ह ॥२९॥
युध्यस्व यदि शूरोसि रावणात्मज दुर्मते ॥ वायुपुत्रं समासाद्य जीवन्न प्रतियास्यसि ॥ ३० ॥
बाहुभ्यां प्रतियुध्यस्व यदि मे द्वन्द्वमाहवे ॥ वेगं सहस्व दुर्बुद्धे ततस्त्वं रक्षसां वरः ॥ ३१ ॥
हनुमन्तं जिघांसन्तं समुद्यतशरासनम् ॥ रावणात्मजमाचष्टे लक्ष्मणाय विभीषणः ॥ ३२ ॥

---

१३ ॥ तत्कर्मणि तस्मिन्होमकर्मणि ॥ १४ ॥ वृक्षान्धकारात् नीरन्ध्रवृक्षषण्डादित्यर्थः । सज्जं आयुधादिभिः । पूर्वयुक्तं पूर्वमेव युक्ताश्वं । सराक्षसः राक्षससहितः ॥ १५ ॥ अन्तकः अन्तकरः ॥ १६ ॥ पर्यवर्तत परितोतिष्ठत् ॥ १७ ॥ तस्मिन्नित्यादि ॥ आदावेकं वृक्षमुद्यम्य निर्दहन्सन् पश्चात् बहुभिर्वृक्षैस्तद्रक्षोबलं निःसंज्ञं चकारेत्यन्वयः ॥ १८—२० ॥ अवाकिरन्नित्युक्तं प्रपञ्चयति—शितेत्यादि ॥ शितशूलधरा इत्यादिविशेषणेन येषां येष्वस्त्रेष्वत्यन्तपाटवमस्ति तैस्ते अवाकिरन्निति गम्यते । परिघैरित्यादौ परिघपाणयइत्याद्यूह्यं । शुभदर्शनैरित्यनेन तैक्ष्ण्यमुपलक्ष्यते । पर्वतोपमं हनुमन्तमिति शेषः ॥ २१—२३ ॥ तेषामित्यर्धं ॥ संक्रुद्धः । हनुमानिति शेषः ॥२४—२५॥ हि यस्मात्कारणात् । उपेक्षितः एषः नः अस्माकं संबन्धिनां राक्षसानां क्षयं कुर्यात् । अतः एष वानरो यत्र । वर्तत इति शेषः । तत्र याहीतीदं वचः सारथिमुवाचेत्यन्वयः ॥ २६ ॥ वहन् प्रापयन् ॥ २७ ॥ सोभ्युपेत्येति । अत्रापि क्रियाभेदात् तच्छब्दस्य द्विःप्रयोगः ॥ २८—३० ॥ द्वन्द्वं द्वन्द्वयुद्धं । ददासीति शेषः । यदि ददासि तर्हि शस्त्राणि त्यक्त्वा बाहुभ्यां प्रतियुध्यस्वेत्यन्वयः । ततः तदानीं द्वन्द्वयुद्धकाले

ति० वृक्षान्धकारात् निकुंभिलाक्षेत्रीयात् । इदंनिस्सरणंदशम्यांसायाह्ने ॥ १५ ॥ इतिषडशीतितमः सर्गः ॥ ८६ ॥

[पा०] १ ङ. ञ. ट. स्सकर्मण्यननु. २ ङ. ञ. ट. सुसंयतं. ३ क. ख. घ. ङ. च. ज.—ट. कार्मुकशरः. ४ क. ख. ग. ङ. च. ज. ञ. ट. कृष्णाञ्जनचयोपमः. ५ ज. युयुत्सया. ६ ङ. च. ञ. कुन्तैश्च. ७ ग. घ. च. ज. ञ. ट. वैज्रवेगैश्च. ८ क. ख. सूदयानमसंत्रस्तं. घ. च. ज. ट. सूदयानममित्रघ्नं. ९ क.—च. ञ. ञ. पट्टिशासिपरश्वधान्. १० घ. रावणिंदुष्टमाचष्टे.

Introduction 1

Chapter 1: Getting Started 5

Chapter 2: Basic Concepts 12

Chapter 3: Advanced Techniques 28

Chapter 4: Troubleshooting 45

Appendix A: Glossary 60

Appendix B: References 72

यः स वासवनिर्जेता रावणस्यात्मसंभवः ॥ स एष रथमास्थाय हनुमन्तं जिघांसति ॥ ३३ ॥
तमप्रतिमसंस्थानैः शरैः शत्रुविदारणैः ॥ जीवितान्तकरैर्घोरैः सौमित्रे रावणिं जहि ॥ ३४ ॥
इत्येवमुक्तस्तु तदा महात्मा विभीषणेनारिविभीषणेन ॥
ददर्श तं पर्वतसन्निकाशं रणे स्थितं भीमबलं नदन्तम् ॥ ३५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षडशीतितमः सर्गः ॥ ८६ ॥

सप्ताशीतितमः सर्गः ॥ ८७ ॥

विभीषणेनलक्ष्मणंप्रतिनिकुंभिलायांन्यग्रोधतरुप्रदर्शनपूर्वकंतत्रहोमसमाप्तावेन्द्रजितोदुर्जयत्वोक्त्यान्यग्रोधतलप्रवेशात्प्रागेवतद्वधचोदना ॥ १ ॥ लक्ष्मणेनरणायसमाहूतेनेन्द्रजितातत्पार्श्वस्थंविभीषणंप्रतिभ्रातृपक्षपरित्यागेनपरपक्षसमाश्रयणादिदोषोत्कीर्तनपूर्वकं गर्हणम् ॥ २ ॥ विभीषणेनतंप्रतिरावणदोषोद्घाटनपूर्वकं तत्त्यागस्यन्याय्यत्वोक्त्यातद्गर्हणम् ॥ ३ ॥

एवमुक्त्वा तु सौमित्रिं जातहर्षो विभीषणः ॥ धनुष्पाणिनमादाय त्वरमाणो जगाम ह ॥ १ ॥
अविदूरं ततो गत्वा प्रविश्य च महद्वनम् ॥ दर्शयामास तत्कर्म लक्ष्मणाय विभीषणः ॥ २ ॥
नीलजीमूतसंकाशं न्यग्रोधं भीमदर्शनम् ॥ तेजस्वी रावणभ्राता लक्ष्मणाय न्यवेदयत् ॥ ३ ॥
इहोपहारं भूतानां बलवान्रावणात्मजः ॥ उपहृत्य ततः पश्चात्सङ्गाममभिवर्तते ॥ ४ ॥
अदृश्यः सर्वभूतानां ततो भवति राक्षसः ॥ निहन्ति समरे शत्रून्बध्नाति च शरोत्तमैः ॥ ५ ॥
तमप्रविष्टन्यग्रोधं बलिनं रावणात्मजम् ॥ विध्वंसय शरैस्तीक्ष्णैः सरथं साश्वसारथिम् ॥ ६ ॥
तथेत्युक्त्वा महातेजाः सौमित्रिर्मित्रनन्दनः ॥ बभूवावस्थितस्तत्र चित्रं विस्फारयन्धनुः ॥ ७ ॥
स रथेनाग्निवर्णेन बलवान्रावणात्मजः ॥ इन्द्रजित्कवची धन्वी सध्वजः प्रत्यदृश्यत ॥ ८ ॥
तमुवाच महातेजाः पौलस्त्यमपराजितम् ॥ समाह्वये त्वां समरे सम्यग्युद्धं प्रयच्छ मे ॥ ९ ॥
एवमुक्तो महातेजा मनस्वी रावणात्मजः ॥ अब्रवीत्परुषं वाक्यं तत्र दृष्ट्वा विभीषणम् ॥ १० ॥
इह त्वं जातसंवृद्धः साक्षाद्भ्राता पितुर्मम ॥ कथं द्रुह्यसि पुत्रस्य पितृव्यो मम राक्षस ॥ ११ ॥

॥ ३१—३२ ॥ यः सः । प्रसिद्धो य इत्यर्थः ॥३३॥ अप्रतिमसंस्थानैः अनुपमसन्निवेशैः करवीरपत्राद्याकारैरित्यर्थः ॥ ३४ ॥ अरिविभीषणेन शत्रुभयंकरेण ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षडशीतितमः सर्गः ॥ ८६ ॥

अथेन्द्रजिद्विभीषणसंवादः—एवमुक्त्वेत्यादि ॥ धनुष्पाणिनमिति नकारान्तत्वमार्षम् ॥ १ ॥ अविदूरमिति ॥ तत्कर्म होमकर्मस्थानम् ॥ २—३ ॥ उपहारं बलिं । उपहृत्य कृत्वा । ओदनपाकं पचतीतिवत् । ततः तस्माद्देशात् ॥ ४—५ ॥ अप्रविष्टन्यग्रोधं रावणात्मजं विध्वंसय । पुनः प्रवेशात्पूर्वमेव विध्वंसयेत्यर्थः ॥ ६—८ ॥ महातेजा इति लक्ष्मणो विशेष्यः । सम्यग्युद्धं अमायायुद्धं ॥ ९ ॥ मनस्वी दृढमनस्कः ॥ १० ॥ इह लङ्कायां । जातसंवृद्धः । " पूर्वकाल—" इत्यादिना पूर्वकालार्थवाचिनो जातशब्दस्य उत्तरकालार्थवाचिना संवृद्धशब्देन सह समासः । पुत्रस्य पुत्राय । " क्रुधद्रुह—" इत्यादिना चतुर्थीनियमात् । राक्षसेत्यनेन साजात्यमपि न दृष्ट-

[पा०] १ ख. ग. घ. ज. ञ. रथेस्थितं. ङ. च. झ. ट. रथस्थितं. २ घ. जातरोषो. ३ क.—च. ज. झ. ट. जगामसः. ४ ङ. च. झ. ट. अदर्शयत. ५ ङ. झ. शरैर्दीप्तैः. ६ ङ. झ. खड्गी.

न ज्ञातित्वं न सौहार्दं न जातिस्तव दुर्मते ॥ प्रमाणं न च सौदर्यं न धर्मो धर्मदूषण ॥ १२ ॥
शोच्यस्त्वमसि दुर्बुद्धे निन्दनीयश्च साधुभिः ॥ यस्त्वं स्वजनमुत्सृज्य परभृत्यत्वमागतः ॥ १३ ॥
नैतच्छिथिलया बुद्ध्या त्वं वेत्सि महदन्तरम् ॥ क्व च स्वजनसंवासः क्व च नीचपराश्रयः ॥ १४ ॥
गुणवान्वा परजनः स्वजनो निर्गुणोपि वा ॥ निर्गुणः स्वजनः श्रेयान्यः परः पर एव सः ॥ १५ ॥
यः स्वपक्षं परित्यज्य परपक्षं निषेवते ॥ स स्वपक्षे क्षयं प्राप्ते पश्चात्तैरेव हन्यते ॥ १६ ॥
[तस्माच्छृणुष्व दुर्बुद्धे राक्षसानां कुलाधम ॥ त्वां गृह्य बन्धुरूपेण रामो बुद्धिमतांवरः ॥
ज्ञात्वोपायं स्वया पूर्वं जेतुमस्मान्स राघवः ॥ १७ ॥
जित्वाऽस्मान्युधि शक्तश्चेत्पश्चात्त्वां च वधिष्यति ॥ शत्रुस्त्वमसि रामस्य रावणस्यानुजोसि यत् ॥१८॥]
निरनुक्रोशता चेयं यादृशी ते निशाचर ॥ स्वजनेन त्वया शक्यं परुषं रावणानुज ॥ १९ ॥
इत्युक्तो भ्रातृपुत्रेण प्रत्युवाच विभीषणः ॥ २० ॥
अजानन्निव मच्छीलं किं राक्षस विकत्थसे ॥ राक्षसेन्द्रसुतासाधो पारुष्यं त्यज गौरवात् ॥ २१ ॥
कुले यद्यप्यहं जातो रक्षसां क्रूरकर्मणाम् ॥ गुणोयं प्रथमो नॄणां तन्मे शीलमराक्षसम् ॥ २२ ॥
न रमे दारुणेनाहं न चाधर्मेण वै रमे ॥ भ्रात्रा विषमशीलेन कथं भ्राता निरस्यते ॥ २३ ॥
धर्मात्प्रच्युतशीलं हि पुरुषं पापनिश्चयम् ॥ त्यक्त्वा सुखमवाप्नोति हस्तादाशीविषं यथा ॥ २४ ॥
हिंसापरस्वहरणे परदाराभिमर्शनम् ॥ त्याज्यमाहुर्दुराचारं वेश्म प्रज्वलितं यथा ॥ २५ ॥

वानसीति व्यज्यते ॥ ११ ॥ प्रमाणं मर्यादानियामकं ॥ १२ ॥ शोच्यत्वादौ हेतुमाह—यस्त्वमिति ॥ १३ ॥ शिथिलया कोमलया, तुच्छया वा । अन्तरं तारतम्यं ॥ १४ ॥ ननु परस्य नीचत्वाभावान्न भवदुक्तदोष इत्यत्राह—गुणवानिति ॥ १५ ॥ तदेव वैषम्यं स्वरूपतो दर्शयति—य इति ॥ १६—१८ ॥ इयं होमविघातपूर्वकं लक्ष्मणस्य न्यग्रोधप्रवेशकरणरूपा । निरनुक्रोशता निर्दयता, यादृशी यथा घोरा तादृशं परुषं निर्दयत्वं । स्वजनेन बन्धुभूतेन त्वयैव कर्तुं शक्यं नान्येनेत्यर्थः । यद्वा स्वजने विषये त्वया न शक्यं न कर्तव्यं । अनुचितं कृतमिति भावः ॥ १९—२० ॥ गौरवात् । गुरोर्भावो गौरवं । पितृव्यत्वादित्यर्थः ॥ २१ ॥ रक्षसां कुले यद्यप्यहं जातः । तत् तथापि । मे शीलं अराक्षसं अक्रूरं । अयं मे शीलाख्यो गुणः नृणां सत्पुरुषाणां । प्रथमः मुख्यः ॥ २२ ॥ तन्मे शीलमराक्षसमित्युक्तमेव दर्शयति—न रम इति ॥ दारुणेन कर्मणा न रमे । अधर्मेण परपीडाकरेण च कर्मणा न रमे । न केवलं मय्येव दोषः रावणेपीत्याह—भ्रात्रेति । निरस्यते । 'त्वां तु धिक्कुलपांसनं' इति वचनेनेत्यर्थः ॥ २३ ॥ इन्द्रजिदुक्तस्वदोषपरिहाराय परित्यागहेतून् रावणदोषानाह—धर्मादित्यादिना ॥ २४ ॥ हिंसा च परस्वहरणं च ते हिंसापरस्वहरणे । हिंसादिरूपं दुराचाररूपं कर्म त्याज्यमाहुः । तद्युक्तस्त्याज्य इत्यर्थः ॥२५॥

स० एकैकएवप्रयोजकःप्रीतावेतन्मध्येऽन्यत्र । तेसर्वेपिलक्ष्यन्यथाजाताइत्याह—नज्ञातित्वमित्यादिना । जातिः राक्षसजातिः । प्रमाणं ज्येष्ठविरोधेनविरोध्याश्रयोनसंपाद्यइतिप्रवेदयत्प्रमाणं । सौदर्यं सोदरत्वं । त्रयाणामपिकैकसीपुत्रत्वात् । नचपद्मपुराणे—" निकषा पुत्रमाहूय " " निकषाचात्रवीद्रामं " इत्युक्तेःभागवतोत्तरकाण्डादौकैकसीपुत्रत्वंकथितंतदसंगतमितिवाच्यं । तस्माएवनामान्तरंतदित्यविरोधः ॥ १२ ॥ **शि०** निर्गुणोपिस्वजनःश्रेयान्भवति । परोयःसगुणोपिसपरएव । स्वकुलेनसहविरोधेभिन्न एवभवतीत्यर्थः ॥१५॥ **ती०** नृणां सज्जनानां । यःप्रथमः मुख्यः । गुणः साधित्वं । तत् मे अराक्षसं अक्रूरंशीलं ममगुणइत्यर्थः ॥ २२ ॥ **ती०** नरमइति । दारुणेनकर्मणानरमे । अधर्मेणचनरमे अन्यथा विषमशीलेन रावणाद्विलक्षणशीलेनभ्रात्रामया कथमयं भ्राता रावणः निरस्यते ॥ २३ ॥

[**पा०**] १ ङ. च. झ. ट. यातेः । २ तस्माच्छृणुष्वेत्यादयःअनुजोसियदित्यन्ताःश्लोकाः क. ख. च. छ. ज. पाठेषु दृश्यन्ते. ३ ग. ङ. ज.—ट. गुणोयः. ४ घ. छ.—ट. परस्वहरणेयुक्तंपरदाराभिमर्शकं त्याज्यमाहुर्दुरात्मानं.

परस्वानां च हरणं परदाराभिमर्शनम् ॥ सुहृदामतिशङ्का च त्रयो दोषाः क्षयावहाः ॥ २६ ॥
महर्षीणां वधो घोरः सर्वदेवैश्च विग्रहः ॥ अभिमानश्च कोपश्च वैरित्वं प्रतिकूलता ॥ २७ ॥
एते दोषा मम भ्रातुर्जीवितैश्वर्यनाशनाः ॥ गुणान्प्रच्छादयामासुः पर्वतानिव तोयदाः ॥ २८ ॥
दोषैरेतैः परित्यक्तो मया भ्राता पिता तव ॥ नेयमस्ति पुरी लङ्का न च त्वं न च ते पिता ॥२९॥
अतिमानी च बालश्च दुर्विनीतश्च राक्षस ॥ बद्धस्त्वं कालपाशेन ब्रूहि मां यद्यदिच्छसि ॥ ३० ॥
अद्य ते व्यसनं प्राप्तं किं मां त्वमिह वक्ष्यसि ॥ प्रवेष्टुं न त्वया शक्यो न्यग्रोधो राक्षसाधम ॥३१॥
धर्षयित्वा च काकुत्स्थौ न शक्यं जीवितुं त्वया ॥ युध्यस्व नरदेवेन लक्ष्मणेन रणे सह ॥
हतस्त्वं देवताकार्यं करिष्यसि यमक्षये ॥ ३२ ॥

निदर्शय स्वात्मबलं समुद्यतं कुरुष्व सर्वायुधसायकव्ययम् ॥
न लक्ष्मणस्यैत्य हि बाणगोचरं त्वमद्य जीवन्सबलो गमिष्यसि ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्ताशीतितमः सर्गः ॥ ८७ ॥

अष्टाशीतितमः सर्गः ॥ ८८ ॥

लक्ष्मणेन्द्रजितोर्वीरवादपुरस्सरंसमरप्रवर्तनम् ॥ १ ॥

विभीषणवचः श्रुत्वा रावणिः क्रोधमूर्च्छितः ॥ अब्रवीत्परुषं वाक्यं वेगेनाभ्युत्पपात ह ॥ १ ॥
उद्यतायुधनिस्त्रिंशो रथे सुसमलंकृते ॥ कालाश्वयुक्ते महति स्थितः कालान्तकोपमः ॥ २ ॥
महाप्रमाणमुद्यम्य विपुलं वेगवद्दृढम् ॥ धनुर्भीमं परामृश्य शरांश्चामित्रशातनान् ॥ ३ ॥
तं ददर्श महेष्वासो रथे सुसमलङ्कृतः ॥ अलङ्कृतममित्रघ्नं राघवस्यानुजं बली ॥
हनुमत्पृष्ठमासीनमुदयस्थरविप्रभम् ॥ ४ ॥

सुहृदामतिशङ्का सुहृत्स्वविश्वासः ॥ २६ ॥ दोषवत्तया यदि त्याज्यत्वं, तर्ह्यभिजनविद्यादिगुणवत्तया किमिति न ग्राह्यत्वमित्यत आह—महर्षीणामिति सार्धश्लोकद्वयमेकान्वयं ॥ अभिमानः गर्वः । वैरित्वं बद्धवैरत्वं । प्रतिकूलता परश्रेयोद्वेषित्वं । तथा चाभिजनविद्यादिगुणवत्त्वेपि परस्त्रीहरणादिदोषदूषिततया विषसंपृक्तमधुवन्न ग्राह्योयमिति भावः ॥२७-२८॥ नेयमस्तीत्यादि ॥ उत्तरक्षणे अवश्यं न शिष्यतीत्यर्थः ॥ २९-३१ ॥ देवताकार्यं यमदूतरूपदेवताकार्यं । नरकयातनानुभवं वा ॥ ३२-३३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्ताशीतितमः सर्गः ॥ ८७ ॥

अथेन्द्रजिल्लक्ष्मणयुद्धं—विभीषणवच इत्यादि ॥ अभ्युत्पपात अभिमुखमुज्जगाम ॥ १ ॥ कीदृग्भूतो भ्युज्जगामेत्यत्राह—उद्यतेत्यादिश्लोकद्वयेन ॥ सुसमलंकृते सुष्ठु समन्तात् अलंकृते । महाप्रमाणं महादी धनुरुद्यम्य शरान् परामृश्य गृहीत्वा । अभ्युज्जग अब्रवीच्चेत्यन्वयः । अमित्रान् शत्रून् शातयां खण्डयन्तीत्यमित्रशातनान् ॥ २—३ ॥ रथे सि

ति० प्रतिकूलता हितवक्तृषुप्रतिकूलबुद्धिता ॥२७॥ ति० अत्रहतः यमक्षयं यमगृहंगतःसन् देवताकार्यं सर्वदेवानां संतोषः करिष्यसि ॥ ३२ ॥ इतिसप्ताशीतितमःसर्गः ॥ ८७ ॥

ति० उद्यतायुधनिस्त्रिंशः उद्यतायुधोनिस्त्रिंशोनिर्घृणश्चेत्यर्थइतिकतकः । उद्यतान्यायुधानिनिस्त्रिंशश्चयेनसः । गोबलीवर्द योगइत्यन्ये ॥ स० उद्यतानिचतान्यायुधानिच । तैर्निस्त्रिंशोनिर्दयः । " निस्त्रिंशोनिर्दयेखड्गे " इतिविश्वः । गोबलीवर्दन्य

[पा०] १ ङ. झ. ट. यमक्षयं. २ ङ. झं. ट. क्रोधेन. ३ ङ. झ. धनुर्भीमबलोभीमंशरांश्चामित्रनाशनान्. ४ घ.—झ. ञ. ट. रथस्थःसमलंकृतः. ५ ख.—ङ. झ. ञ. ममित्रघ्नोरावणस्यात्मजोबली.

उवाचैनं समारब्धः सौमित्रिं सविभीषणम् ॥ तांश्च वानरशार्दूलान्पश्यध्वं मे पराक्रमम् ॥ ५ ॥
अद्य मत्कार्मुकोत्सृष्टं शरवर्षं दुरासदम् ॥ मुक्तं वर्षमिवाकाशे वारयिष्यथ संयुगे ॥ ६ ॥
अद्य वो मामका बाणा महाकार्मुकनिस्सृताः ॥ विधमिष्यन्ति गात्राणि तूलराशिमिवानलः ॥ ७ ॥
तीक्ष्णसायकनिर्भिन्नाञ्शूलशक्त्यष्टितोमरैः ॥ अद्य वो गमयिष्यामि सर्वानेव यमक्षयम् ॥ ८ ॥
क्षिपतः शरवर्षाणि क्षिप्रहस्तस्य मे युधि ॥ जीमूतस्येव नदतः कः स्थास्यति ममाग्रतः ॥ ९ ॥
रात्रियुद्धे मया पूर्वं वज्राशनिसमैः शरैः ॥ शायितौ स्थो मया भूमौ विसंज्ञौ सपुरस्सरौ ॥ १० ॥
स्मृतिर्न तेऽस्ति वा मन्ये व्यक्तं वा यमसादनम् ॥ आशीविषमिव क्रुद्धं यन्मां योद्धुं व्यवस्थितः ॥ ११ ॥
तच्छ्रुत्वा राक्षसेन्द्रस्य गर्जितं लक्ष्मणस्तदा ॥ अभीतवदनः क्रुद्धो रावणिं वाक्यमब्रवीत् ॥ १२ ॥
उक्तश्च दुर्गमः पारः कार्याणां राक्षस त्वया ॥ कार्याणां कर्मणा पारं यो गच्छति स बुद्धिमान् ॥ १३ ॥
स त्वमर्थस्य हीनार्थो दुरवापस्य केनचित् ॥ वचो व्याहृत्य जानीषे कृतार्थोस्मीति दुर्मते ॥ १४ ॥
अन्तर्धानगतेनाजौ यस्त्वयाऽऽचरितस्तदा ॥ तस्कराचरितो मार्गो नैष वीरनिषेवितः ॥ १५ ॥
यथा बाणपथं प्राप्य स्थितोऽहं तव राक्षस ॥ दर्शयस्वाद्य तत्तेजो वाचा त्वं किं विकत्थसे ॥ १६ ॥
एवमुक्तो धनुर्भीमं परामृश्य महाबलः ॥ ससर्ज निशितान्बाणानिन्द्रजित्समितिंजयः ॥ १७ ॥
ते निसृष्टा महावेगाः शराः सर्पविषोपमाः ॥ संप्राप्य लक्ष्मणं पेतुः श्वसन्त इव पन्नगाः ॥ १८ ॥

इति शेषः । अलंकृतं स्वतेजसा भूषितं । हनुमत्पृष्ठमासीनमित्यनुवादेन हनुमान् पूर्वं राक्षसैर्युद्ध्वा इन्द्रजित्यागते लक्ष्मणं स्वपृष्ठभागमारोप्य स्थितवानिति गम्यते । उदयस्थरविप्रभमित्यनेन हनुमतः काञ्चनाकृतित्वं लक्ष्मणस्य रविवर्णत्वं चोक्तं ॥ ४ ॥ उवाचैनमिति त्रिपादश्लोक एकान्वयः ॥ एतत् 'अब्रवीत्परुषं' इति पूर्वोक्तस्य विवरणं नभवति । तद्विभीषणमात्रंप्रति । इदं तु सर्वान्प्रति । तच्च परुषं । इदं तु पराक्रमविषयं । समारब्धः संरब्धः ॥ ५ ॥ मुक्तं मेघमुक्तं । वारयिष्यथेत्येतत् सापहासोक्तिः ॥ ६ ॥ वः युष्माकं । विधमिष्यन्ति धक्ष्यन्ति ॥ ७ ॥ तीक्ष्णसायकेति लुप्तविभक्तिकं पदं । तीक्ष्णसायकैरित्यर्थः । शूलशक्त्यष्टितोमरैरित्यत्र शक्तियष्टितोमरैरित्यर्थः । सन्धिरार्षः । तीक्ष्णसायकैः शूलशक्त्यष्टितोमरैश्च निर्भिन्नान् वः युष्मान् । यमक्षयं यमनिलयं । गमयिष्यामीत्यन्वयः ॥ ८ ॥ जीमूतस्येति नादमात्रे दृष्टान्तः ॥ ९ ॥ आग्रहातिशयेन मयेति द्विरुक्तिः ॥ १० ॥ यन्मां योद्धुं व्यवस्थितः अतः स्मृतिर्नास्तीति वा मन्ये । अथवा यमसादनं यमप्रापणं । व्यक्तं प्रत्यक्षं प्रत्यासन्नमिति यावत् । यद्वा सादनं सदनं । स्वार्थेण् प्रत्ययः ॥ ११ ॥ अभीतवदनः भयविकृतिशून्यवदनः ॥ १२ ॥ दुर्गमः दुर्लभः । कार्याणां यमप्रापणादीनां । पारः निर्वाहः । उक्तश्च उक्त एव, न कृतः । अतो दुर्बुद्धिरसीत्यर्थः । कस्तर्हि बुद्धिमानित्यत आह—कार्याणामिति । कार्याणां कर्मणां, आचरणेनेत्यर्थः ॥ १३ ॥ अर्थस्येति तादर्थ्यसंबन्धे षष्ठी । अर्थस्य वचः प्रयोजनार्थं वचः ॥ १४ ॥ दृष्टेप्यस्मत्पराक्रमे कथमित्थं कथ्यत इत्याशङ्क्य मायामयत्वान्न स वीरसंमत इत्याह—अन्तर्धानेति ॥ आजौ युद्धे ॥ १५ ॥ प्रत्यक्षेणापि योद्धुं शक्तोस्मीत्यत आह—यथेति ॥ यथा स्थितोस्मि तथैव, तत्तेजः पूर्वकृततेजः । दर्शयस्वेत्यन्वयः ॥ १६—१७ ॥ सर्पविषोपमाः सर्पविषवत् घोराः ।

श्वागतिकागतिः ॥ २ ॥ ति० एवमपियन्मांयोद्धुमुपस्थितोसि तत्प्रायःपूर्वस्यतेस्मृतिर्नास्ति । वा अथवा । व्यक्तंयातोयमक्षयं । आदिकर्मणिक्तः । यमक्षयं यमगृहं प्रयातुमुपक्रान्तोसि ॥ ११ ॥ ति० अभीतवदनः निर्भयप्रवृत्ताभिवदनव्यवहारः ॥ स० अभीतवदनः भीतं भीतिस्तद्वान्अनःप्राणोयस्यसः । सनभवतीत्यभीतवदनः । भीतस्यवदनं भीतवदनं । नविद्यतेभीतवदनंयस्य सवा ॥ १२ ॥ ती० हेदुर्मते हीनार्थः । शत्रुविजयरूपप्रयोजनहीनःसत्वं केनचित् केनापिदुरवापस्य अर्थस्यविजयरूपप्रयोजन-

[पा०] १ झ. शक्त्यृष्टि. २ ङ. झ. ट. व्यक्तंयातोयमक्षयं. ३ क. ख. घ. ङ. च. झ. ञ. विषसमं. ४ ख. ङ.—ट. योद्धुमुपस्थितः. ५ ङ. झ. ट. राघवस्तदा. ६ ङ. झ. ञ. ट. वाचाव्याहृत्य. ७ ख. तदा. ८ ङ. झ. ञ. ट. स्थितोस्मि.

शरैरतिमहावेगैर्वेगवान्रावणात्मजः ॥ सौमित्रिमिन्द्रजिद्युद्धे विव्याध शुभलक्षणम् ॥ १९ ॥
स शरैरतिविद्धाङ्गो रुधिरेण समुक्षितः ॥ शुशुभे लक्ष्मणः श्रीमान्विधूम इव पावकः ॥ २० ॥
इन्द्रजित्त्वात्मनः कर्म प्रसमीक्ष्याधिगम्य च ॥ विनद्य सुमहानादमिदं वचनमब्रवीत् ॥ २१ ॥
पत्रिणः शितधारास्ते शरा मत्कार्मुकच्युताः ॥ आदास्यन्तेऽद्य सौमित्रे जीवितं जीवितान्तगाः॥२२॥
अद्य गोमायुसङ्घाश्च श्येनसङ्घाश्च लक्ष्मण ॥ गृध्राश्च निपतन्तु त्वां गतासुं निहतं मया ॥ २३ ॥
[अद्य यास्यति सौमित्रे कर्णगोचरतां तव ॥ तर्जनं यमदूतानां सर्वभूतभयावहम्] ॥ २४ ॥
क्षत्रबन्धुं सदाऽनार्यं रामः परमदुर्मतिः ॥ भक्तं भ्रातरमद्यैव त्वां द्रक्ष्यति मया हतम् ॥ २५ ॥
विशस्तकवचं भूमौ व्यपविद्धशरासनम् ॥ हतोत्तमाङ्गं सौमित्रे त्वामद्य निहतं मया ॥ २६ ॥
इति ब्रुवाणं संरब्धं परुषं रावणात्मजम् ॥ हेतुमद्वाक्यमर्थ्यार्थं लक्ष्मणः प्रत्युवाच ह ॥ २७ ॥
वाग्बलं त्यज दुर्बुद्धे क्रूरकर्मासि राक्षस ॥ अथ कस्माद्वदस्येतत्संपादय सुकर्मणा ॥ २८ ॥
अकृत्वा कत्थसे कर्म किमर्थमिह राक्षस ॥ कुरु तत्कर्म येनाहं श्रद्ध्यां तव कत्थनम् ॥ २९ ॥
अनुक्त्वा परुषं वाक्यं किंचिदप्यनवक्षिपन् ॥ अविकत्थन्वधिष्यामि त्वां पश्य पुरुषाधम ॥ ३० ॥
इत्युक्त्वा पञ्च नाराचानाकर्णापूरिताञ्शितान् ॥ निजघान महावेगाँल्लक्ष्मणो राक्षसोरसि ॥ ३१ ॥
सुपत्रवाजिता बाणा ज्वलिता इव पन्नगाः ॥ नैर्ऋतोरस्यभासन्त सवितू रश्मयो यथा ॥ ३२ ॥
स शरैराहतस्तेन सरोषो रावणात्मजः ॥ सुप्रयुक्तैस्त्रिभिर्बाणैः प्रतिविव्याध लक्ष्मणम् ॥ ३३ ॥
स बभूव तदा भीमो नरराक्षससिंहयोः ॥ विमर्दस्तुमुलो युद्धे परस्परजयैषिणोः ॥ ३४ ॥
उभौ हि बलसंपन्नावुभौ विक्रमशालिनौ ॥ उभावपि सुविक्रान्तौ सर्वशस्त्रास्त्रकोविदौ ॥
उभौ परमदुर्जेयावतुल्यबलतेजसौ ॥ ३५ ॥
युयुधाते तदा वीरौ ग्रहाविव नभोगतौ ॥ ३६ ॥
बलवृत्राविवाभीतौ युधि तौ दुष्प्रधर्षणौ ॥ युयुधाते महात्मानौ तदा केसरिणाविव ॥ ३७ ॥
बहूनवसृजन्तौ हि मार्गणौघानवस्थितौ ॥ नरराक्षससिंहौ तौ ग्रहृष्टावभ्ययुध्यताम् ॥ ३८ ॥

पेतुः । भूमाविति शेषः ॥ १८ ॥ शरैरिति । अतिविव्याधेत्यन्वयः । " व्यवहिताश्च " इति व्यवहितप्रयोगः ॥ १९—२० ॥ अधिगम्य फलवत्त्वेन दृष्ट्वा ॥ २१—२५ ॥ विशस्तेति । विशस्तं भिन्नं कवचं यस्य तं त्वां रामो द्रक्ष्यतीत्यनुषङ्गेण योजना ॥ २६—२७ ॥ अथ इदानीं ॥ २८—३१ ॥ सुपत्रवाजिताः सुपत्रैः संजातवेगाः ॥ ३२—३३ ॥ विमर्दः संघर्षः ॥ ३४ ॥ उभौ हीत्यादिसार्धश्लोक एकान्वयः ॥ सुविक्रान्तौ सुष्ठुपराक्रमौ ॥ ३५ ॥ युयुधाते इत्याद्यर्धं ॥ ३६ ॥ बलशब्दो बलशक्त्विन्द्र-

---

स्यसंबन्धिवचोव्याहृत्य कृतार्थोस्मि कृतकृत्योस्मीतिजानीषइतियोजना ॥ १४ ॥ **ती०** पत्रिणःशितधाराइत्यादिश्लोकचतुष्टयस्य श्रुतार्थःस्पष्टः । वास्तवार्थस्तुहेसौमित्रे मत्कार्मुकच्युताःशराः अप्रयोजकशराइत्यर्थः । तेतवशितधाराः जीवितान्तकाःपत्रिणः । मत्तःजीवितमादास्यन्तइतिसंबन्धः ॥ **अद्येति** । हेलक्ष्मण त्वामुद्दिश्य मया लक्ष्म्या लक्ष्म्यैश्वर्येणसहगतासुं मामितिशेषः । गोमायवादयःनिपतन्त्वितिसंबन्धः ॥ क्षत्रबन्धुमिति । सदानार्यमित्यत्रसदा न आर्यमितिच्छेदः । हेसदान दानसहित दानशीलेत्यर्थः । क्षत्रबन्धुं क्षत्रस्यराघवस्यबन्धुं । अतःभ्रातरं अतएवार्यमयाअहतंत्वां परमदुर्मतिः परमदुष्टेष्वपिमतिःअनुग्रहरूपायस्यसःरामः अद्यद्रक्ष्यतीतिसंबन्धः ॥ विशस्तेति । हेसौमित्रे त्वां विनेतिशेषः । विशस्तकवचं हतोत्तमाङ्गं मयानिहतंसैन्यंत्वितिशेषः । रामोद्रक्ष्यतीतिपूर्वेणसंबन्धः ॥ २२—२६ ॥

[पा०] १ अयंश्लोकः ज. पाठेदृश्यते. २ घ. मन्वर्थं. ङ. च. छ. झ. ञ. ट. मर्थज्ञोलक्ष्मणः. ३ ङ. च. छ. झ. क्रूरकर्मन्हि. ४ ङ.—ट. श्रद्धेयं. ५ ख. त्वामद्यपुरुषान्तक. ग. ङ. झ. त्वांपश्यपुरुषादन. घ. ज. ञ. ट. त्वांपश्यपुरुषादक. ६ क. ख. पावकाः. ७ क.—घ. परस्परवधैषिणोः. ८ ङ. झ. ट. विक्रान्तौबलसंपन्नावुभौ. ९ झ. नरराक्षसमुख्यौतौ.

सुसंप्रहृष्टौ नरराक्षसोत्तमौ जयैषिणौ मार्गणचापधारिणौ ॥
परस्परं तौ प्रववर्षतुर्भृशं शरौघवर्षेण बलाहकाविव ॥ ३९ ॥
अभिप्रवृद्धौ युधि युद्धकोविदौ शरासिचण्डौ शितशस्त्रधारिणौ ॥
अभीक्ष्णमाविध्यधतुर्महाबलौ महाहवे शम्बरवासवाविव ॥ ४० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टाशीतितमः सर्गः ॥ ८८ ॥

एकोननवतितमः सर्गः ॥ ८९ ॥

लक्ष्मणेन्द्रजितोर्महायुद्धम् ॥ १ ॥

ततः शरं दाशरथिः संधायामित्रकर्शनः ॥ ससर्ज राक्षसेन्द्राय क्रुद्धः सर्प इव श्वसन् ॥ १ ॥
तस्य ज्यातलनिर्घोषं स श्रुत्वा रावणात्मजः ॥ विवर्णवदनो भूत्वा लक्ष्मणं समुदैक्षत ॥ २ ॥
तं विवर्णमुखं दृष्ट्वा राक्षसं रावणात्मजम् ॥ सौमित्रिं युद्धसंयुक्तं प्रत्युवाच विभीषणः ॥ ३ ॥
निमित्तान्यनुपश्यामि यान्यस्मिन्रावणात्मजे ॥ त्वर तेन महाबाहो भग्न एष न संशयः ॥ ४ ॥
ततः संधाय सौमित्रिर्बाणानग्निशिखोपमान् ॥ मुमोच निशितांस्तस्मिन्सर्पानिव महाविषान् ॥ ५ ॥
शक्राशनिसमस्पर्शैर्लक्ष्मणेनाहतः शरैः ॥ मुहूर्तमभवन्मूढः सर्वसंक्षुभितेन्द्रियः ॥ ६ ॥
उपलभ्य मुहूर्तेन संज्ञां प्रत्यागतेन्द्रियः ॥ ददर्शावस्थितं वीरं वीरो दशरथात्मजम् ॥ ७ ॥
सोभिचक्राम सौमित्रिं रोषात्संरक्तलोचनः ॥ अब्रवीच्चैनमासाद्य पुनः स परुषं वचः ॥ ८ ॥
किं न स्मरसि तद्युद्धे प्रथमे मत्पराक्रमम् ॥ निबद्धस्त्वं सह भ्रात्रा यदा भुवि विवेष्टसे ॥ ९ ॥
युवां खलु महायुद्धे शक्राशनिसमैः शरैः ॥ शायितौ प्रथमं भूमौ विसंज्ञौ सपुरस्सरौ ॥ १० ॥
स्मृतिर्वा नास्ति तें मन्ये व्यक्तं वा यमसादनम् ॥ गन्तुमिच्छसि यस्मात्त्वं मां धर्षयितुमिच्छसि॥ ११॥

परः । नामैकदेशे नामग्रहणात् ॥३७—३८॥ शरौघः मेघपक्षे जलौघः । शरशब्दो हि जलवाची । शरधिरिति समुद्रपर्यायात् ॥ ३९—४० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टाशीतितमः सर्गः ॥ ८८ ॥

अथ लक्ष्मणेन्द्रजितोः सुमहान्संप्रहारः—ततः शरमित्यादि ॥ १—२ ॥ सौमित्रिं प्रति उद्दिश्य ॥ ३ ॥ अस्मिन् यानि मुखवैवर्ण्यस्तब्धत्वादीनि निमित्तानि अनुपश्यामि, तैरयं भग्न इति जाने । तेन कारणेन त्वर त्वरस्व ॥ ४—५ ॥ सर्वसंक्षुभितेन्द्रियः संक्षुभितसर्वेन्द्रियः ॥ ६—८ ॥ त्वं भ्रात्रा सह निबद्ध इति यत् प्रथमे तद्युद्धे तस्मिन्युद्धे । मत्पराक्रमं त्वन्निबन्धनरूपं । न स्मरसि किं । यदा यत्र युद्धकाले । विवेष्टसे विवेष्टितवानसि ॥ ९ ॥ तमेव पराक्रमं विशिनष्टि—युवामिति ॥ १० ॥ व्यक्तं

ति० " नरराक्षसमुख्यौतौ " इत्युत्तरश्लोकद्वयंभिन्नवृत्तंप्रक्षिप्तं । तदुत्तरंसर्गविच्छेदश्चासंप्रदायः । तयोर्युद्धस्यैवाग्रेसत्त्वेनप्रकरणान्तराभावादितिकतकः ॥ स० सुसंप्रहृष्टावित्यादिश्लोकद्वयंसर्गव्यवच्छेदकत्वेनप्रक्षिप्तमितिसंप्रदायः ॥ ४० ॥ इत्यष्टाशीतितमःसर्गः ॥ ८८ ॥

स० यानि पराजयकालेतत्सूचकत्वेनगृहीतव्याप्तिकानि तानिनिमित्तानि वदनवैवर्ण्यादीनि अस्मिन्ननुपश्यामि । त्वर त्वरस्व ॥ ४ ॥ स० विषवैद्यः विषोल्बणान् सर्पान्पेट्व्यायथामुञ्चति तथाऽऽशीविषोपमान् शरान् । मुमोच । सर्पान् अनयतिचेष्टयतीतिसर्पान् विषवैद्यः । विषोल्बणान् सर्पानिवेतिवा । अस्मिन्पक्षेनाध्याहारः ॥ ५ ॥

[पा०] १ सुसंप्रहृष्टाविति, अभिप्रवृद्धाविति चश्लोकद्वयं झ. पाठेनदृश्यते. अत्रसर्गविच्छेदश्चनोपलभ्यते. २ ङ. झ. ञ. ट. शरान्दाशरथिः. ३ झ. ञ. ट. शरानाशीविषोपमान्. ४ ङ. च. झ. ट. विषोल्बणान्. ५ क. ङ. च. छ. झ. ट. युधिविचेष्टसे.

यदि ते प्रथमे युद्धे न दृष्टो मत्पराक्रमः ॥ अद्य ते दर्शयिष्यामि तिष्ठेदानीं व्यवस्थितः ॥ १२ ॥
इत्युक्त्वा सप्तभिर्बाणैरभिविव्याध लक्ष्मणम् ॥ दशभिस्तु हनूमन्तं तीक्ष्णधारैः शरोत्तमैः ॥ १३ ॥
ततः शरशतेनैव सुप्रयुक्तेन वीर्यवान् ॥ क्रोधाद्विगुणसंरब्धो निर्बिभेद विभीषणम् ॥ १४ ॥
तद्दृष्ट्वेन्द्रजिता कर्म कृतं रामानुजस्तदा ॥ अचिन्तयित्वा प्रहसन्नैतत्किंचिदिति ब्रुवन् ॥
मुमोच स शरान्घोरान्संगृह्य नरपुङ्गवः ॥ १५ ॥
अभीतवदनः क्रुद्धो रावणिं लक्ष्मणो युधि ॥ नैवं रणगताः शूराः प्रहरन्ते निशाचर ॥ १६ ॥
लघवश्चाल्पवीर्याश्च सुखा हीमे शरास्तव ॥ नैवं शूरास्तु युध्यन्ते समरे जयकाङ्क्षिणः ॥
इत्येवं तं ब्रुवाणस्तु शरवर्षैरवाकिरत् ॥ १७ ॥
तस्य बाणैः सुविध्वस्तं कवचं हेमभूषितम् ॥ व्यशीर्यत रथोपस्थे ताराजालमिवाम्बरात् ॥ १८ ॥
विधूतवर्मा नाराचैर्बभूव स कृतव्रणः ॥ इन्द्रजित्समरे वीरः प्ररूढ इव सानुमान् ॥ १९ ॥
ततः शरसहस्रेण संक्रुद्धो रावणात्मजः ॥ बिभेद समरे वीरं लक्ष्मणं भीमविक्रमः ॥ २० ॥
व्यशीर्यत महादिव्यं कवचं लक्ष्मणस्य च ॥ कृतप्रतिकृतान्योन्यं बभूवतुरभिद्रुतौ ॥ २१ ॥
अभीक्ष्णं निःश्वसन्तौ तौ युध्येतां तुमुलं युधि ॥ शरसंकृत्तसर्वाङ्गौ सर्वतो रुधिरोक्षितौ ॥ २२ ॥
सुदीर्घकालं तौ वीरावन्योन्यं निशितैः शरैः ॥ ततक्षतुर्महात्मानौ रणकर्मविशारदौ ॥ २३ ॥
बभूवतुश्चात्मजये यत्तौ भीमपराक्रमौ ॥ तौ शरौघैस्तदा कीर्णौ निवृत्तकवचध्वजौ ॥
स्रवन्तौ रुधिरं चोष्णं जलं प्रस्रवणाविव ॥ २४ ॥
शरवर्षं ततो घोरं मुञ्चतोर्भीमनिस्स्वनम् ॥ सासारयोरिवाकाशे नीलयोः कालमेघयोः ॥ २५ ॥
तयोरथ महान्कालो व्यत्ययाद्युध्यमानयोः ॥ न च तौ युद्धवैमुख्यं श्रमं वाऽप्युपजग्मतुः ॥२६॥
अस्त्राण्यस्त्रविदां श्रेष्ठौ दर्शयन्तौ पुनः पुनः ॥ शरानुच्चावचाकारानन्तरिक्षे बबन्धतुः ॥ २७ ॥
व्यपेतदोषमस्यन्तौ लघु चित्रं च सुष्ठु च ॥ उभौ तौ तुमुलं घोरं चक्रतुर्नरराक्षसौ ॥ २८ ॥
तयोः पृथक्पृथक्भीमः शुश्रुवे तलनिस्स्वनः ॥ प्रकम्पयञ्जनं घोरो निर्घात इव दारुणः ॥ २९ ॥
स तयोर्भ्राजते शब्दस्तदा समरसक्तयोः ॥ सुघोरयोर्निष्टनतोर्गगने मेघयोर्यथा ॥ ३० ॥

नूनमित्यर्थः ॥ ११—१३ ॥ क्रोधाद्विगुणसंरब्ध इति । लक्ष्मणादिविषयरोषापेक्षया विभीषणविषये द्विगुणं कुपित इत्यर्थः ॥ १४ ॥ तद्दृष्ट्वेत्यादिसार्धश्लोक एकान्वयः ॥ नैतत्किंचिदिति ब्रुवन् एतदकिंचित्करमिति ब्रुवन्नित्यर्थः ॥ १५ ॥ अभीतवदन इत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ अकिंचित्करत्वमेवाह—नैवमिति ॥ १६—१८ ॥ प्ररूढः प्ररूढवृक्षः ॥ १९—२० ॥ कृते प्रतिकृतं अन्योन्यं यस्मिन् कर्मणि तत्तथोक्तं ॥ २१ ॥ युध्येतां अयुध्येतां ॥ २२ ॥ ततक्षतुः अन्योन्यं बभञ्जतुः ॥ २३ ॥ यत्तौ यत्नवन्तौ ॥ २४ ॥ शरवर्षमित्यादिश्लोकद्वयमेकान्वयं ॥ सासारयोः सधारापातयोः । "धारासंपात आसारः" इत्यमरः ॥ २५—२७ ॥ व्यपेतदोषं व्यपगतमोहत्वदोषं । अस्यन्तौ बाणान्क्षिपन्तौ ॥ २८—३० ॥

स० व्यवस्थितः युद्धार्थनिश्चितः सन् । तिष्ठ । व्यवस्थितः अवस्थितस्संस्त्वांदर्शयिष्यामीतिवा । अनेनपूर्ववदन्तर्धानंनास्तीतिसूच्यते ॥ १२ ॥ ति० प्रत्यूषेभानुमानिवक्षतजरक्तवर्णत्वादितिभावः ॥ १९ ॥ स० उच्चावचाकारान् अनेकप्रभेदविशिष्टाकारान् ॥ २७ ॥

[पा०] १ क. ख. घ.—छ. झ. ञ. ट. अद्यत्वां. २ ज. रावणिंवाक्यमब्रवीत्. क. ख. रावणिंलक्ष्मणोब्रवीत्. च. रावणिंलक्ष्मणोवदत्. ३ ङ. झ. ञ. ट. युद्धकाङ्क्षिणः. ४ ङ. च. झ. ञ. ट. ब्रुवन्धन्वीशरैरभिववर्षह ख. वदन्वीरःशरैरभिववर्षह. ५ ङ. झ. ट. वीरः प्रत्यूषेभानुमानिव. ६ ख. च. ट. ररिंदमौ. ७ ग. ङ.—ट. व्यतीयात्. ८ झ. ञ. ट. तुमुलखनः. ९ ङ. झ. ट. सकंपंजनयामासनिर्घातइव. १० ङ. झ. ञ. ट. निस्स्वनतोः.

सुवर्णपुङ्खैर्नाराचैर्बलवन्तौ कृतव्रणौ ॥ प्रसुस्रुवाते रुधिरं कीर्तिमन्तौ जये धृतौ ॥ ३१ ॥
ते गात्रयोर्निपतिता रुक्मपुङ्खाः शरा युधि ॥ असृङ्मद्वा[1] विनिष्पत्य विविशुर्धरणीतलम् ॥ ३२ ॥
अन्ये सुनिशितैः शस्त्रैराकाशे संजघट्टिरे ॥ बभञ्जुश्चिच्छिदुश्चान्ये तयोर्बाणाः सहस्रशः ॥ ३३ ॥
स बभूव रणो घोरस्तयोर्बाणमयश्चयः ॥ अग्निभ्यामिव दीप्ताभ्यां सत्रे कुशमयश्चयः ॥ ३४ ॥
तयोः कृतव्रणौ देहौ शुशुभाते महात्मनोः ॥ सपुष्पाविव निष्पत्रौ वने शाल्मलिकिंशुकौ ॥ ३५ ॥
चक्रतुस्तुमुलं घोरं सन्निपातं मुहुर्मुहुः ॥ इन्द्रजिल्लक्ष्मणश्चैव परस्परवधैषिणौ[2] ॥ ३६ ॥
लक्ष्मणो रावणिं युद्धे रावणिश्चापि लक्ष्मणम् ॥ अन्योन्यं तावभिघ्नन्तौ न श्रमं प्रत्यपद्यताम्[3] ॥ ३७ ॥
बाणजालैः शरीरस्थैरवगाढैस्तरस्विनौ ॥ शुशुभाते महावीर्यौ प्ररूढाविव पर्वतौ ॥ ३८ ॥
तयो रुधिरसिक्तानि संवृतानि शरैर्भृशम् ॥ बभ्राजुः सर्वगात्राणि ज्वलन्त इव पावकाः ॥ ३९ ॥
तयोरथ महान्कालो व्यत्ययाद्युध्यमानयोः[4] ॥ न च तौ युद्धवैमुख्यं श्रमं वाऽप्युपजग्मतुः ॥ ४० ॥

अथ समरपरिश्रमं निहन्तुं समरमुखेष्वजितस्य लक्ष्मणस्य ॥
प्रियहितमुपपादयन्महौजाः[5] समरमुपेत्य विभीषणोऽवतस्थे ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोननवतितमः सर्गः ॥ ८९ ॥

नवतितमः सर्गः ॥ ९० ॥

विभीषणेन्द्रजितोर्युद्धम् ॥ १ ॥ हनुमदादीनांराक्षसैस्सहमहायुद्धम् ॥ २ ॥ पुनर्लक्ष्मणेन्द्रजितोर्युद्धम् ॥ ३ ॥ लक्ष्मणेनेन्द्रजित्सारथिवधः ॥ ४ ॥ प्रमाथिप्रमुखवानरैर्हयहननपूर्वकमिन्द्रजिद्रथविमथनम् ॥ ५ ॥

युध्यमानौ तु तौ दृष्ट्वा प्रसक्तौ नरराक्षसौ ॥ प्रभिन्नाविव मातङ्गौ परस्परवधैषिणौ ॥ १ ॥
तौ द्रष्टुकामः संग्रामे परस्परगतौ बली ॥ शूरः स रावणभ्राता तस्थौ संग्राममूर्धनि ॥ २ ॥
ततो विस्फारयामास महद्धनुरवस्थितः ॥ उत्ससर्ज च तीक्ष्णाग्रान्राक्षसेषु महाशरान् ॥ ३ ॥

धृतौ अवहितौ ॥ ३१—३२ ॥ तयोः अन्ये केचन बाणाः आकाशे सुनिशितैः शस्त्रैः संजघट्टिरे संघट्टिताः । अन्ये बाणाः बाणान् सहस्रशः बभञ्जुः । चिच्छिदुश्चेति संबन्धः ॥ ३३ ॥ रणः घोरो बभूव । यस्मिन् तयोर्बाणमयश्चयः सत्रे दीप्ताभ्यामग्निभ्यां सहितः कुशमयश्चय इवासीत् । अग्नी गार्हपत्याहवनीयौ ॥ ३४—३५ ॥ सन्निपातं युद्धं ॥ ३६ ॥ प्रत्यपद्यतां प्रत्यपद्येतां ॥ ३७—३८ ॥ बभ्राजुः । आर्षं परस्मैपदं ॥ ३९—४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोननवतितमः सर्गः ॥ ८९ ॥

अथेन्द्रजितो रथभङ्गः—युध्यमानौ त्वित्यादिश्लोकद्वयमेकान्वयं ॥ प्रभिन्नौ मत्तमातङ्गाविव परस्परगतौ परस्परं युद्धार्थं सङ्गतौ । तौ लक्ष्मणेन्द्रजितौ प्रथमं द्रष्टुकामः स विभीषणस्तौ दृष्ट्वा संग्राममूर्धनि योद्धुं तस्थावित्यन्वयः । स्वयं प्रथमं युद्धं कर्तुमुद्युक्तोपि तयोर्बलाधिक्यं द्रष्टुं तूष्णीं स्थितः । तयोर्बलतौल्ये दृष्टे स्वस्य रामविषयकिञ्चित्कारार्थमिदानीं युद्धाय तस्थावित्यर्थः ॥ १—२ ॥ धनुः तादात्विकं

तीo समरपरिश्रमं समरेपरिश्रमोयस्यतं । इन्द्रजितमितिशेषः ॥ ४१ ॥ इत्येकोननवतितमःसर्गः ॥ ८९ ॥

[पाo] १ ङ.—ट. असृग्दिग्धाविनिष्पेतुर्विविशुः. २ क. ख. ग. ङ.—ट. परस्परजयैषिणौ. ३ क. ग. ङ. च. झ. ञ. व्यतीयात्. ४ ख. च. छ. झ. ञ. ट. न्महात्मा.

ते शराः शिखिसंकाशा निपतन्तः समाहिताः ॥ राक्षसान्दारयामासुर्वज्राणीव महागिरीन् ॥ ४ ॥
विभीषणस्यानुचरास्तेऽपि शूलासिपट्टिशैः ॥ चिच्छिदुः समरे वीरान्राक्षसान्राक्षसोत्तमाः ॥ ५ ॥
राक्षसैस्तैः परिवृतः स तदा तु विभीषणः ॥ बभौ मध्ये ग्रहाणां कलभानामिव द्विपः ॥ ६ ॥
ततः संचोदयानो वै हरीन्रक्षोरणप्रियान् ॥ उवाच वचनं काले कालज्ञो रक्षसां वरः ॥ ७ ॥
एकोऽयं राक्षसेन्द्रस्य परायणमिव स्थितः ॥ एतच्छेषं बलं तस्य किं तिष्ठत हरीश्वराः ॥ ८ ॥
अस्मिन्विनिहते पापे राक्षसे रणमूर्धनि ॥ रावणं वर्जयित्वा तु शेषमस्य हतं बलम् ॥ ९ ॥
प्रहस्तो निहतो वीरो निकुम्भश्च महाबलः ॥ कुम्भकर्णश्च कुम्भश्च धूम्राक्षश्च निशाचरः ॥ १० ॥
जम्बुमाली महामाली तीक्ष्णवेगोशनिप्रभः ॥ सुप्तघ्नो यज्ञकोपश्च वज्रदंष्ट्रश्च राक्षसः ॥ ११ ॥
संह्रादी विकटो निघ्नस्तपनो दम एव च ॥ प्रघासः प्रघसश्चैव प्रजङ्घो जङ्घ एव च ॥ १२ ॥
अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च वीर्यवान् ॥ विद्युज्जिह्वो द्विजिह्वश्च सूर्यशत्रुश्च राक्षसः ॥ १३ ॥
अकम्पनः सुपार्श्वश्च चक्रमाली च राक्षसः ॥ कम्पनः सत्त्ववन्तौ तौ देवान्तकनरान्तकौ ॥ १४ ॥
एतान्निहत्यातिबलान्बहून्राक्षससत्तमान् ॥ बाहुभ्यां सागरं तीर्त्वा लङ्घ्यतां गोष्पदं लघु ॥ १५ ॥
एतावदेव शेषं वो जेतव्यमिह वानराः ॥ हताः सर्वे समागम्य राक्षसा बलदर्पिताः ॥ १६ ॥
अयुक्तं निधनं कर्तुं पुत्रस्य जनितुर्मम ॥ घृणामपास्य रामार्थे निहन्यां भ्रातुरात्मजम् ॥ १७ ॥
हन्तुकामस्य मे बाष्पं चक्षुश्चैव निरुध्यति ॥ तमेवैष महाबाहुर्लक्ष्मणः शमयिष्यति ॥
वानरा यत संभूय भृत्यानस्य समीपगान् ॥ १८ ॥
इति तेनातियशसा राक्षसेनाभिचोदिताः ॥ वानरेन्द्रा जहृषिरे लाङ्गूलानि च विव्यधुः ॥ १९ ॥
ततस्ते कपिशार्दूलाः क्ष्वेलन्तश्च मुहुर्मुहुः ॥ मुमुचुर्विविधान्नादान्मेघान्दृष्ट्वेव बर्हिणः ॥ २० ॥
जाम्बवानपि तैः सर्वैः स्वयूथैरपि संवृतः ॥ अश्मभिस्ताडयामास नखैर्दन्तैश्च राक्षसान् ॥ २१ ॥
निघ्नन्तमृक्षाधिपतिं राक्षसास्ते महाबलाः ॥ परिवव्रुर्भयं त्यक्त्वा तमनेकविधायुधाः ॥ २२ ॥
शरैः परशुभिस्तीक्ष्णैः पट्टिशैर्यष्टितोमरैः ॥ जाम्बवन्तं मृधे जघ्नुर्निघ्नन्तं राक्षसीं चमूम् ॥ २३ ॥
स संग्रहारस्तुमुलः संजज्ञे कपिरक्षसाम् ॥ देवासुराणां क्रुद्धानां यथा भीमो महास्वनः ॥ २४ ॥

किंचित् । विभीषणस्य केवलगदापाणित्वात् ॥ ३ ॥ वज्राणि अशनयः ॥ ४—७ ॥ परायणं गतिः ॥ ८—९ ॥ उक्तानुक्तांश्च राक्षसान् युद्धे हतान्कांश्चित्परिगणयत्युत्साहनाय—प्रहस्त इत्यादिना श्लोकपञ्चकेन ॥ अकम्पनः कम्पनश्च राक्षसौ सर्वत्र निहत इत्यनेनान्वयः । देवान्तकनरान्तकाविति तत्र निहताविति विपरिणामः कार्यः ॥ १०—१४ ॥ एतान् राक्षससत्तमान् निहत्य स्थितानां भवतां इन्द्रजितो हननं, बाहुभ्यां सागरं तीर्त्वा स्थितस्य पुंसो गोष्पदतरणमिव सुकरमिति निदर्शना । बाहुभ्यां सागरं तीर्त्वैव एतानतिबलान् बहून् राक्षससत्तमान् निहत्य स्थितैः भवद्भिः गोष्पदमिव लघु इन्द्रजिद्धननरूपं स्वल्पं कार्यं लङ्घ्यतामित्यन्वयः ॥ १५ ॥ एतावदेव इन्द्रजिन्मात्रमेव ॥१६॥ जनितुः जनयितुः । पितृव्यस्येत्यर्थः ॥ १७ ॥ बाष्पं कर्तृ । चक्षुः निरुध्यति निरुणद्धि ॥ १८—२३ ॥ यथा भीम इति । महास्वनो देवानां संग्रहारो यथा तथे-

---

ति० निहन्यां हननोपायप्रवर्तनेनेतिभावः ॥१७॥ शि० ननुतर्हित्वयैवनिहन्यतां किंलक्ष्मणयुद्धेनेत्यतआह—हन्विति ॥१८॥

[पा०] १ ग. ङ.—ट. वैज्राइव. २ ख. च. छ. ज. प्रसुप्तानां. ग. ङ. झ. ट. प्रधृष्टानां. ३ ङ. झ. ट. संचोदमानोवै. च. संचोदयामास. ४ ख. ङ.—ट. वधप्रियान्. ५ ङ. झ. तास्मिंश्चनिहते. ६ ख. ग. च. छ. ज. महाबलः. ७ ङ. च. झ. ज. ट. मन्दएवच. ८ ङ. झ. परिभर्त्स्यभर्तृ.

हनुमानपि संक्रुद्धः सालमुत्पाट्य वीर्यवान् ॥ [सं लक्ष्मणं स्वयं पृष्ठादवरोप्य महामनाः ॥]
रक्षसां कदनं चक्रे समासाद्य सहस्रशः ॥ २५ ॥
स दत्त्वा तुमुलं युद्धं पितृव्यस्येन्द्रजिद्युधि ॥ लक्ष्मणं परवीरघ्नं पुनरेवाभ्यधावत ॥ २६ ॥
तौ प्रयुद्धौ तदा वीरौ मृधे लक्ष्मणराक्षसौ ॥ शरौघानभिवर्षन्तौ जघ्नतुस्तौ परस्परम् ॥ २७ ॥
अभीक्ष्णमन्तर्दधतुः शरजालैर्महाबलौ ॥ चन्द्रादित्याविवोष्णान्ते यथा मेघैस्तरस्विनौ ॥ २८ ॥
न ह्यादानं न संधानं धनुषो वा परिग्रहः ॥ न विप्रमोक्षो बाणानां न विकर्षो न विग्रहः ॥ २९ ॥
न मुष्टिप्रतिसंधानं न लक्ष्यप्रतिपादनम् ॥ अदृश्यत तयोस्तत्र युध्यतोः पाणिलाघवात् ॥ ३० ॥
चापवेगविनिर्मुक्तबाणजालैः समन्ततः ॥ अन्तरिक्षे हि संछन्ने न रूपाणि चकाशिरे ॥ ३१ ॥
लक्ष्मणो रावणिं प्राप्य रावणिश्चापि लक्ष्मणम् ॥ अव्यवस्था भवत्युग्रा ताभ्यामन्योन्यविग्रहे ॥३२॥
ताभ्यामुभाभ्यां तरसा विसृष्टैर्विशिखैः शितैः ॥ निरन्तरमिवाकाशं बभूव तमसाऽऽवृतम् ॥ ३३ ॥
तैः पतद्भिश्च बहुभिस्तयोः शरशतैः शितैः ॥ दिशश्च प्रदिशश्चैव बभूवुः शरसंकुलाः ॥ ३४ ॥
तमसा संवृतं सर्वमासीद्भीमतरं महत् ॥ अस्तं गते सहस्रांशौ संवृतं तमसेव हि ॥ ३५ ॥
रुधिरौघमहानद्यः प्रावर्तन्त सहस्रशः ॥ क्रव्यादा दारुणा वाग्भिश्चिक्षिपुर्भीमनिस्स्वनम् ॥ ३६ ॥

त्यर्थः ॥ २४ ॥ हनुमानिति । अत्र हनुमतो युद्धकथनात् किंचिद्विश्रमार्थं तस्य पृष्ठादवरूढो लक्ष्मण इत्यवगम्यते । सहस्रशः कदनमित्यन्वयः ॥२५–२८॥ न ह्यादानमित्यादिश्लोकद्वयमेकान्वयं ॥ आदानं बाणस्य तूणादुद्धरणं । संधानं उद्धृतस्य बाणस्य धनुष्यवस्थापनं । धनुषो वा परिग्रहः सव्यापसव्यत्वेन कार्मुकग्रहणं । बाणानां विप्रमोक्षः विसर्जनं । विकर्षः आकर्णग्रहणं । विग्रहः आलीढाद्यवस्थानविशेषः, सावष्टम्भावस्थानं वा, धनुर्ज्यादीनां प्रविभागो वा । "विग्रहः समरे काये विरोधप्रविभागयोः" इति विश्वः । मुष्टिप्रतिसंधानं ज्याकार्मुकयोर्मुष्टिबन्धनं । लक्ष्यप्रतिपादनं लक्ष्यप्रापणं । लक्ष्यवेध इति यावत् ॥ २९—३० ॥ रूप्यन्त इति रूपाणि वस्तूनि । बाणव्यतिरेकेण न किंचित्तदानीं दृश्यत इति भावः ॥ ३१ ॥ लक्ष्मण इति ॥ लोकव्यवहारानुसारेणात्र क्रियाकारकसंबन्धः । लक्ष्मणो रावणिं रावणिश्चापि लक्ष्मणं प्राप्य ताभ्यामन्योन्यविग्रहे अन्योन्याभिभवे । उग्रा अव्यवस्था भवति । अन्योन्यप्राप्तावयमेनं निगृह्णाति अयं वा एनमिति निश्चयो नाभवदित्यर्थः । यद्वा रावणिं लक्ष्मणो रावणिश्चापि लक्ष्मणं प्राप्य अयुध्येतामिति शेषः । ताभ्यां तथा युद्धं कुर्वद्भ्यां । अन्योन्यविग्रहे परस्परप्रहारे क्रियमाणे । उग्रा अव्यवस्था भवति । क्षणे क्षणे जयपराजयनियमो नाभूदित्यर्थः ॥ ३२—३३ ॥ तैः पतद्भिरित्यादिश्लोकद्वयमेकान्वयं ॥ शरशतैः निमित्तभूतैः । महत् अत्यन्तं ॥ ३४—३५ ॥ चिक्षिपुः चक्रुः ॥ ३६ ॥

ति० लक्ष्मणं पृष्ठादवरोप्य विश्रमार्थंस्वारूढंलक्ष्मणंभूमावस्थाप्यविभीषणसहायार्थंहनुमान्कदनंचक्रे ॥ २५ ॥ ती० उष्णान्ते वर्षादौचन्द्रादित्याविवस्थितौ तरस्विनौ वेगवन्तौ । महाबलौलक्ष्मणेन्द्रजितौ मेघैर्यथा मेघैरिव । शरजालैरभीक्ष्णं अन्तर्दधतुः अदृश्यौबभूवतुः ॥ २८ ॥ ति० उग्राऽव्यवस्था तत्तद्वाणैरयुध्यद्वानरराक्षसवधरूपा भवति अभवदित्यर्थः । यत्तु " अयमेनं निगृह्णाति सएनंवेत्यनिश्चयरूपाव्यवस्था " इतिव्याख्यानं तच्चिन्त्यं । तस्याअव्यवस्थायाउग्रत्वस्यनिरूपयितुमशक्यत्वादुग्रेति विशेषणवैयर्थ्याच्च ॥ स० लक्ष्मणोरावणिंप्राप्य रावणिरपिलक्ष्मणंप्राप्येत्येवंस्थिताभ्यांताभ्यां अन्योन्यविग्रहेयुद्धे उग्रा दुःखकारणत्वात्क्रूरा अव्यवस्था इममिदानींजेष्यामीतिसंकल्पासिद्धिरूपाभवति अभूत् । एवंचोक्तरीत्याऽव्यवस्थायाउग्रत्वेसंभवतिसति । " उग्रत्वस्यनिरूपयितुमशक्यत्वात् " इतियन्नागोजिभट्टेनोक्तं तदसंगतं । उग्रत्वस्यनिरूपयितुमशक्यत्वादित्यनेनैववैयर्थ्यलाभे उग्रेतिविशेषणवैयर्थ्याच्चेतिदूषणान्तरतयाकथनंत्वसंगततरमितिज्ञेयं ॥ ३२ ॥ स० शरसंकुलाः जलसंकुलाः वर्षाकालेदिशःप्रदिशश्चयथातथा शरशतैःसंकुलाइतिबुद्ध्याविवेकेनान्वयः ॥ ३४ ॥

[पा०] १ घ.—ट. सानुमुत्पाट्यपर्वतात्. २ इदमर्धं ङ.—ट. पाठेषुदृश्यते. ३ क. ङ. झ. ञ. ट. दुरासादः. घ. दुरावारः. ख. शतशोथ. ४ ङ. च. झ. ञ. ट. स्येन्द्रजिद्बली. ५ ङ. झ. ञ. परवीरघ्नः. ६ क. ख. ग. च. छ. भीमनिस्स्वनाः. ङ. झ. ट. भीमनिस्स्वनान्.

न तदानीं ववौ वायुर्न च जज्वाल पावकः ॥ स्वस्त्यस्तु लोकेभ्य इति जजल्पुश्च महर्षयः ॥
संपेतुश्चात्र संप्राप्ता[1] गन्धर्वाः सह चारणैः ॥ ३७ ॥
अथ राक्षससिंहस्य कृष्णान्कनकभूषणान् ॥ शरैश्चतुर्भिः सौमित्रिर्विव्याध चतुरो हयान् ॥ ३८ ॥
ततोऽपरेण भल्लेन शितेन निशितेन च ॥ संपूर्णायतमुक्तेन सुपत्रेण[3] सुवर्चसा ॥ ३९ ॥
महेन्द्राशनिकल्पेन सूतस्य विचरिष्यतः ॥ स तेन बाणाशनिना तलशब्दानुनादिना ॥
लाघवाद्राघवः श्रीमाञ्शिरः कायादपाहरत् ॥ ४० ॥
स यन्तरि महातेजा हते मन्दोदरीसुतः ॥ स्वयं सारथ्यमकरोत्पुनश्च धनुरस्पृशत् ॥
तदद्भुतमभूत्तत्र सामर्थ्यं पश्यतां युधि ॥ ४१ ॥
हयेषु व्यग्रहस्तं तं विव्याध निशितैः शरैः ॥ धनुष्यथ पुनर्व्यग्रे हयेषु मुमुचे शरान् ॥ ४२ ॥
छिद्रेषु तेषु बाणेषु सौमित्रिः शीघ्रविक्रमः ॥ अर्दयामास बाणौघैर्विचरन्तमभीतवत् ॥ ४३ ॥
निहतं सारथिं दृष्ट्वा समरे रावणात्मजः ॥ प्रजहौ समरोद्धर्षं विषण्णः स बभूव ह ॥ ४४ ॥
विषण्णवदनं दृष्ट्वा राक्षसं हरियूथपाः ॥ ततः परमसंहृष्टा लक्ष्मणं चाभ्यपूजयन् ॥ ४५ ॥
ततः प्रमाथी शरभो रंभसो गन्धमादनः ॥ अमृष्यमाणाश्चत्वारश्चकुर्वेगं हरीश्वराः ॥ ४६ ॥
ते चास्य हयमुख्येषु तूर्णमुत्प्लुत्य[8] वानराः ॥ चतुर्षु समहावीर्या[12] निपेतुर्भीमविक्रमाः ॥ ४७ ॥
तेषामधिष्ठितानां तैर्वानरैः पर्वतोपमैः ॥ मुखेभ्यो रुधिरं रक्तं[13] हयानां समवर्तत ॥
ते हया मथिता भग्ना व्यसवो धरणीं गताः ॥ ४८ ॥
ते निहत्य हयांस्तस्य प्रमथ्य च महारथम् ॥ पुनरुत्पत्य वेगेन तस्थुर्लक्ष्मणपार्श्वतः[10] ॥ ४९ ॥
स हताश्वादवप्लुत्य रथान्मथितसारथेः[11] ॥ शरवर्षेण सौमित्रिमभ्यधावत रावणिः ॥ ५० ॥

ततो महेन्द्रप्रतिमः स लक्ष्मणः पदातिनं तं[12] निशितैः शरोत्तमैः ॥
सृजन्तमाजौ निशिताञ्शरोत्तमान्भृशं तदा बाणगणैर्न्यवारयत्[13] ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे नवतितमः सर्गः ॥ ९० ॥

अत्र युद्धस्थले । पूर्वं संप्राप्ताः गन्धर्वाः चारणैः सह संपेतुः । अन्यत्र गता इत्यर्थः । अतिघोरयुद्धदर्शनभयादिति भावः ॥ ३७—३८ ॥ ततोऽपरेणेत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ संपूर्णायतमुक्तेन संपूर्णाकृष्टमुक्तेन ॥ ३९—४२ ॥ छिद्रेषु रन्ध्रेषु । बाणेषु बाणप्रयोगेषु । शीघ्रविक्रम इत्यन्वयः ॥४३॥ समरोद्धर्षं युद्धगर्वं ॥ ४४—४६ ॥ समहावीर्याः महावीर्यसहिताः ॥ ४७ ॥ रक्तं शोणितं ॥ ४८—५० ॥ पदातिनं पदाभ्यामापतन्तं गच्छन्तं । "अत सातत्यगमने" इत्यस्माण्णिनिः ॥ ५१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने नवतितमः सर्गः ॥ ९० ॥

ति० संपूर्णायतमुक्तेन संपूर्णआकर्णपर्यन्तं आयतेन आकृष्टेन ततोमुक्तेन ॥ ३९ ॥ ति० तलशब्दानुनादिना तलं ज्याघातवारणं तस्यज्याघट्टनजोयश्शब्दः तस्यानुनादोयस्यास्तितेन ॥ ४० ॥ स० निहतैर्हयोत्तमैः तन्निमित्तंपदातिनं ॥ ५१ ॥ इति नवतितमःसर्गः ॥ ९० ॥

[पा०] १ ङ. झ. ञ. संतप्ताः. २ क. ग.—ट. पीतेन. ३ घ. सुपर्वेण. ४ क. ख. घ.—ट. छिन्नेषुतेषुबाणौघैः. ग. भिन्नेषुतेषुबाणौघैः. ५ ख.—ट. शीघ्रकृत्तमः. ६ ङ. झ. ञ. ट. समरेविचरन्तं. क. संकुद्धोविचरन्तं. ७ घ. गवयोगन्ध. ८ ख. ग. ङ. च. झ. ञ. ट. मुत्पत्य. ९ ख. ग. ङ. ज.—ट. व्यक्तं. १० घ. लक्ष्मणदक्षपथि. ११ झ. मथितसारथिः. १२ घ. ङ. च. झ. ञ. ट. निहतैर्हयोत्तमैः. १३ ख. ङ.—ट. बाणगणैर्व्यदारयत्. क. वज्रसमैर्व्यदारयत्.

एकनवतितमः सर्गः ॥ ९१ ॥

लक्ष्मणेनेन्द्रजिद्वधः ॥ १ ॥

स हताश्वो महातेजा भूमौ तिष्ठन्निशाचरः ॥ इन्द्रजित्परमक्रुद्धः संप्रजज्वाल तेजसा ॥ १ ॥
तौ धन्विनौ जिघांसन्तावन्योन्यमिषुभिर्भृशम् ॥ विजयेनाभिनिष्क्रान्तौ वने गजवृषाविव ॥ २ ॥
निर्बर्हयन्तश्चान्योन्यं ते राक्षसवनौकसः ॥ भर्तारं न जहुर्युद्धे संपतन्तस्ततस्ततः ॥ ३ ॥
ततस्तान्राक्षसान्सर्वान्हर्षयन्नावणात्मजः ॥ स्तुवानो[1] हर्षमाणश्च इदं वचनमब्रवीत् ॥ ४ ॥
तमसा बहुलेनेमाः संसक्ताः सर्वतो दिशः ॥ नेह विज्ञायते स्वो वा परो वा राक्षसोत्तमाः ॥ ५ ॥
धृष्टं[2] भवन्तो युध्यन्तु हरीणां मोहनाय वै ॥ अहं तु रथमास्थाय आगमिष्यामि संयुगम्[3] ॥ ६ ॥
तथा भवन्तः कुर्वन्तु यथेमे काननौकसः ॥ नैं[4] युध्येयुर्दुरात्मानः प्रविष्टे नगरं मयि ॥ ७ ॥
इत्युक्त्वा रावणसुतो वञ्चयित्वा वनौकसः ॥ प्रविवेश पुरीं लङ्कां रथहेतोरमित्रहा ॥ ८ ॥
स रथं भूषयित्वा तु रुचिरं हेमभूषितम् ॥ प्रासासिशतसंपूर्णं[5] युक्तं परमवाजिभिः ॥ ९ ॥
अधिष्ठितं हयज्ञेन सूतेनाप्तोपदेशिना ॥ आरुरोह महातेजा रावणिः समितिंजयः ॥ १० ॥
स राक्षसगणैर्मुख्यैर्वृतो मन्दोदरीसुतः ॥ निर्ययौ नगरात्तूर्णं कृतान्तबलचोदितः ॥ ११ ॥
सोभिनिष्क्रम्य नगरादिन्द्रजित्परवीरहा ॥ अभ्ययाज्जवनैरश्वैर्लक्ष्मणं सविभीषणम् ॥ १२ ॥
ततो रथस्थमालोक्य सौमित्री रावणात्मजम् ॥ वानराश्च महावीर्या राक्षसश्च विभीषणः ॥
विसयं परमं जग्मुर्लाघवात्तस्य धीमतः ॥ १३ ॥
रावणिश्चापि संक्रुद्धो रणे वानरयूथपान् ॥ पातयामास बाणौघैः शतशोथ सहस्रशः ॥ १४ ॥
स मण्डलीकृतधनू रावणिः समितिंजयः ॥ हरीनभ्यहनत्क्रुद्धः परं लाघवमास्थितः ॥ १५ ॥
ते वध्यमाना हरयो नाराचैर्भीमविक्रमाः ॥ सौमित्रिं शरणं प्राप्ताः प्रजापतिमिव प्रजाः ॥ १६ ॥
ततः समरकोपेन ज्वलितो रघुनन्दनः ॥ चिच्छेद कार्मुकं तस्य दर्शयन्पाणिलाघवम् ॥ १७ ॥
सोन्यत्कार्मुकमादाय सज्यं चक्रे त्वरन्निव ॥ तदप्यस्य [6]त्रिभिर्बाणैर्लक्ष्मणो निरकृन्तत ॥ १८ ॥
अथैनं छिन्नधन्वानमाशीविषविषोपमैः ॥ विव्याधोरसि सौमित्री रावणिं पञ्चभिः शरैः ॥ १९ ॥
ते तस्य कायं निर्भिद्य महाकार्मुकनिस्सृताः ॥ निपेतुर्धरणीं बाणा रक्ता इव महोरगाः ॥ २० ॥

अथेन्द्रजितद्वधः—स हताश्व इत्यादि ॥ १ ॥ विजयेनेति प्रयोजने तृतीया । विजयायेत्यर्थः । अभिनिष्क्रान्तौ बभूवतुरिति शेषः । गजवृषाविव गजश्रेष्ठाविव । यद्वा किंचिद्धीनबलत्वादिन्द्रजितो वृषभतुल्यत्वं ॥ २ ॥ संपतन्तः परितः संचरन्त इत्यर्थः ॥ ३ ॥ स्तुवानः स्तुवन् । आर्षः शानच् ॥ ४—५ ॥ मोहनाय मन्निर्गमनापरिज्ञानाय ॥ ६—८ ॥ स रथमित्यादिश्लोकद्वयमेकान्वयं भूषयित्वा स्वतेजसा भूषयित्वा । आप्तोपदेशिना हितोपदेशिना ॥ ९—१२ ॥ तत इत्यादिसार्धश्लोक एकान्वयः ॥ ततः तस्माद्युद्धप्रदेशात् ॥ १३—१७ ॥ त्वरन्निवेति । इवशब्दो वाक्यालंकारे । निरकृन्तत

ती० विजयेन विजयहेतुना । अभिनिष्क्रान्तौ अभिमुखावधावतां ॥ २ ॥ शि० वनौकसोवञ्चयित्वा तज्ज्ञानविषयत्वमप्राप्येत्यर्थः । रथहेतोर्लङ्कांविवेश ॥ ८ ॥ ति० हयज्ञेन अश्वहृदयज्ञेन ॥ स० आप्तश्चासौ उपदेशोस्यास्तीत्याप्तोपदेशी । साम-

[पा०] १ ङ. च. छ. झ. ट. स्तुन्वानो. क. ख. स्वयंप्रहर्षमाणश्च. २ घ. हृष्टाभवन्तो. ३ ङ. झ. ञ. ट. संयुगे. ४ क. ज. नबुध्येयुः. ५ ग. ङ. झ. ट. महात्मानः. ६ क. चापासि. ७ ङ. च. झ. शरसंयुक्तं. ८ ङ. झ. ट. त्वरमौजसा. ९ च. ञ. ट. शितैर्बाणैः.

स भिन्नवर्मा रुधिरं वमन्वक्त्रेण रावणिः ॥ जग्राह कार्मुकश्रेष्ठं दृढज्यं बलवत्तरम् ॥ २१ ॥
स लक्ष्मणं समुद्दिश्य परं लाघवमास्थितः ॥ ववर्ष शरवर्षाणि वर्षाणीव पुरन्दरः ॥ २२ ॥
मुक्तमिन्द्रजिता तत्तु शरवर्षमरिन्दमः ॥ अवारयदसंभ्रान्तो लक्ष्मणः सुदुरासदम् ॥ २३ ॥
दर्शयामास च तदा रावणिं रघुनन्दनः ॥ असंभ्रान्तो महातेजास्तदद्भुतमिवाभवत् ॥ २४ ॥
ततस्तान्राक्षसान्सर्वान्त्रिभिरेकैकमाहवे ॥ अविध्यत्परमक्रुद्धः शीघ्रास्त्रं संप्रदर्शयन् ॥
राक्षसेन्द्रसुतं चापि बाणौघैः समताडयत् ॥ २५ ॥
सोतिविद्धो बलवता शत्रुणा शत्रुघातिना ॥ असक्तं प्रेषयामास लक्ष्मणाय बहून्शरान् ॥ २६ ॥
तानप्राप्तान्शितैर्बाणैश्चिच्छेद रघुनन्दनः ॥ सारथेरस्य च रणे रथिनो रथसत्तमः ॥
शिरो जहार धर्मात्मा भल्लेनानतपर्वणा ॥ २७ ॥
अमूतास्ते हयास्तत्र रथमूहुरविक्लबाः ॥ मण्डलान्यभिधावन्तस्तदद्भुतमिवाभवत् ॥ २८ ॥
अमर्षवशमापन्नः सौमित्रिर्दृढविक्रमः ॥ प्रत्यविध्यद्धयांस्तस्य शरैर्विंत्रासयन्रणे ॥ २९ ॥
अमृष्यमाणस्तत्कर्म रावणस्य सुतो बली ॥ विव्याध दशभिर्बाणैः सौमित्रिं तममर्षणम् ॥ ३० ॥
ते तस्य वज्रप्रतिमाः शराः सर्पविषोपमाः ॥ विलयं जग्मुराहत्य कवचं काञ्चनप्रभम् ॥ ३१ ॥
अभेद्यकवचं मत्वा लक्ष्मणं रावणात्मजः ॥ ललाटे लक्ष्मणं बाणैः सुपुङ्खैस्त्रिभिरिन्द्रजित् ॥
अविध्यत्परमक्रुद्धः शीघ्रास्त्रं च प्रदर्शयन् ॥ ३२ ॥
तैः पृषत्कैर्ललाटस्थैः शुशुभे रघुनन्दनः ॥ रणाग्रे समरश्लाघी त्रिशृङ्ग इव पर्वतः ॥ ३३ ॥
स तथा ह्यर्दितो बाणै राक्षसेन महामृधे ॥ तमाशु प्रतिविव्याध लक्ष्मणः पञ्चभिः शरैः ॥
विकृष्येन्द्रजितो युद्धे वदने शुभकुण्डले ॥ ३४ ॥
लक्ष्मणेन्द्रजितौ वीरौ महाबलशरासनौ ॥ अन्योन्यं जघ्नतुर्बाणैर्विशिखैर्भीमविक्रमौ ॥ ३५ ॥
ततः शोणितदिग्धाङ्गौ लक्ष्मणेन्द्रजितावुभौ ॥ रणे तौ रेजतुर्वीरौ पुष्पिताविव किंशुकौ ॥ ३६ ॥

अच्छिनत् ॥ १८–२३ ॥ दर्शयामास पराक्रममिति शेषः ॥२४॥ ततस्तानित्यादिसार्धश्लोक एकान्वयः ॥ शीघ्रास्त्रं शीघ्रमस्त्रं ॥ २५ ॥ असक्तं अव्यासङ्गं अविलम्बितं वा ॥ २६ ॥ तानप्राप्तानित्यादिसार्धश्लोक एकान्वयः ॥ रथिनोस्य रावणेः सारथेरित्यन्वयः ॥ २७ ॥ अविक्लबाः अनाकुलाः । शिक्षापाटवातिशयादिति मन्तव्यं ॥ २८—३० ॥ विलयं नाशं ॥ ३१ ॥ अभेद्येत्यादिसार्धश्लोकः ॥ अभेद्यकवचमित्यनेन पूर्वकवचस्य भग्नत्वात् कवचान्तरं धृतमिति गम्यते । शीघ्रास्त्रं च प्रदर्शयन् । आत्मनः शीघ्रास्त्रत्वं प्रदर्शयन्नित्यर्थः ॥ ३२ ॥ समरं श्लाघत इति समरश्लाघी । समरप्रिय इत्यर्थः । पृषत्कैः बाणैः ॥ ३३ ॥ स तथेत्यादिसार्धश्लोकएकान्वयः ॥ विकृष्य धनुराकृष्य ॥ ३४ ॥ लक्ष्मणेन्द्रजिताविति । विशिखैः विविधशिखैः । करवीरपत्राद्याकारागैरि-

---

र्थ्यादाप्तिमूलत्वमुपदेशस्यलभ्यते । तेन ॥ १० ॥ **रामानु०** भिन्नवर्मेति । अनेनपुनश्चकवचान्तरमपिस्वीकृतवानित्यवगम्यते ॥ २१ ॥ **रामानु०** दर्शयामासेति । हस्तलाघवमितिशेषः ॥ रावणिंहस्तलाघवंदर्शयामासेतिसंबन्धः ॥ २४ ॥ **ति०** ननुकथं सर्वेराक्षसाःइन्द्रजितियुध्यतित्रिभित्रिभिर्बाणैर्वेद्धुंशक्यास्तत्राह—शीघ्रास्त्रमिति । प्रयोगमात्रेणसर्ववेधकमस्त्रंशीघ्रास्त्रं । यद्वा भावप्रधानो निर्देशः । अस्त्रविषयकशीघ्रप्रयोगसामर्थ्यरूपंशीघ्रास्त्रत्वंसंप्रदर्शयन्नित्यर्थः ॥ २५ ॥ **ति०** रथसत्तमोलक्ष्मणः ॥ २७ ॥

[पा०] १ ङ. ञ. छिन्नधन्वा. २ क. ग. घ. शत्रुतापिना. ३ ङ. ञ. ट. परवीरहा. ४ ख. ञ. ट. रघुसत्तमः. ५ क. ख. ङ. च. झ. ञ. ट. धावन्ति. ६ घ. र्विंध्यथयत्रणे. ७ क. ङ. झ. अमर्षमाणः. ८ ङ. झ. सुतोरणे. ९ ङ. झ. ञ. रोमहर्षणं. १० च. सपृषत्कैः. ११ घ. त्रिकूटइव. १२ ख. घ. ङ. च. झ. ञ. ट. तथाप्यर्दितो. १३ ख. महाहवे. १४ ङ. झ. जघ्नतुर्वीरौविशिखैः. १५ क. ख. ज. ट. भीमविक्रमैः.

तौ परस्परमभ्येत्य सर्वगात्रेषु धन्विनौ ॥ घोरैर्विव्यधतुर्बाणैः कृतभावावुभौ जये ॥ ३७ ॥
ततः समरकोपेन संयुक्तो रावणात्मजः ॥ विभीषणं त्रिभिर्बाणैर्विव्याध वदने शुभे ॥ ३८ ॥
अयोमुखैस्त्रिभिर्विद्ध्वा राक्षसेन्द्रं विभीषणम् ॥ एकैकेनाभिविव्याध तान्सर्वान्हरियूथपान् ॥ ३९ ॥
तस्य दृढतरं क्रुद्धो जघान गदया हयान् ॥ विभीषणो महातेजा रावणेः स दुरात्मनः ॥ ४० ॥
स हताश्वादवप्लुत्य रथान्निहतसारथेः ॥ रथशक्तिं महातेजाः पितृव्याय मुमोच ह ॥ ४१ ॥
तामापतन्तीं संप्रेक्ष्य सुमित्रानन्दवर्धनः ॥ चिच्छेद निशितैर्बाणैर्दशधा साऽपतद्भुवि ॥ ४२ ॥
तस्य दृढधनुः क्रुद्धो हताश्वाय विभीषणः ॥ वज्रस्पर्शसमान्पञ्च ससर्जोरसि मार्गणान् ॥ ४३ ॥
ते तस्य कायं निर्भिद्य रुक्मपुङ्खा निमित्तगाः ॥ बभूवुर्लोहितादिग्धा रक्ता इव महोरगाः ॥ ४४ ॥
स पितृव्याय संक्रुद्ध इन्द्रजिच्छरमाददे ॥ उत्तमं रक्षसां मध्ये यमदत्तं महाबलः ॥ ४५ ॥
तं समीक्ष्य महातेजा महेषुं तेन संहितम् ॥ लक्ष्मणोप्याददे बाणमन्यं भीमपराक्रमः ॥ ४६ ॥
कुबेरेण स्वयं स्वप्ने स्वयं दत्तं महात्मना ॥ दुर्जयं दुर्विषह्यं च सेन्द्रैरपि सुरासुरैः ॥ ४७ ॥
तयोस्ते धनुषी श्रेष्ठे बाहुभिः परिघोपमैः ॥ विकृष्यमाणे बलवत्क्रौञ्चाविव चुक्रुजतुः ॥ ४८ ॥

ताभ्यां तौ धनुषी श्रेष्ठे संहितौ सायकोत्तमौ ॥
विकृष्यमाणौ वीराभ्यां भृशं जज्वलतुः श्रिया ॥ ४९ ॥

तौ भासयन्तावाकाशं धनुर्भ्यां विशिखौ च्युतौ ॥ मुखेन मुखमाहत्य संनिपेततुरोजसा ॥ ५० ॥
सन्निपातस्तयोरासीच्छरयोर्घोररूपयोः ॥ सधूमविस्फुलिङ्गश्च तज्जोग्निर्दारुणोऽभवत् ॥ ५१ ॥
तौ महाग्रहसंकाशावन्योन्यं सन्निपत्य च ॥ संग्रामे शतधा यान्तौ मेदिन्यां विनिपेततुः ॥ ५२ ॥
शरौ प्रतिहतौ दृष्ट्वा तावुभौ रणमूर्धनि ॥ व्रीडितौ जातरोषौ च लक्ष्मणेन्द्रजितौ तदा ॥ ५३ ॥
सुसंरब्धस्तु सौमित्रिरस्त्रं वारुणमाददे ॥ ५४ ॥
रौद्रं महेन्द्रजिद्युद्धे व्यसृजद्युधि निष्ठितः ॥ तेन तद्विहतं त्वस्त्रं वारुणं परमाद्भुतम् ॥ ५५ ॥
ततः क्रुद्धो महातेजा इन्द्रजित्समितिंजयः ॥ आग्नेयं संदधे दीप्तं स लोकं संक्षिपन्निव ॥ ५६ ॥
सौरेणास्त्रेण तद्वीरो लक्ष्मणः प्रत्यवारयत् ॥ ५७ ॥
अस्त्रं निवारितं दृष्ट्वा रावणिः क्रोधमूर्च्छितः ॥ आसुरं शत्रुनाशाय घोरमस्त्रं समाददे ॥ ५८ ॥

त्यर्थः ॥ ३५—३६ ॥ जये कृतभावावित्यन्वयः ॥ ३७—४० ॥ रथशक्तिं रथेऽवस्थितां शक्तिं ॥ ४१—४२ ॥ दृढधनुः दृढधन्वा । समासान्तविधेरनित्यत्वात्साधुः ॥४३॥ निमित्तगाः लक्ष्यगाः । "वेध्यं लक्ष्यं शरव्यं च निमित्तं च समं विदुः" इति निघण्टुः ॥ ४४ ॥ रक्षसां मध्ये आदद इत्यन्वयः ॥ ४५ ॥ तं समीक्ष्येत्यादिश्लोकद्वयमेकान्वयं ॥ महात्मना अप्रमेयबुद्धिना । भाविवृत्तान्तज्ञेनेति यावत् ॥ ४६—४९ ॥ सन्निपेततुः संघर्षं प्राप्तौ ॥ ५० ॥ तज्जः सन्निपातजः ॥ ५१—५५ ॥ संक्षिपन् संहरन् ॥ ५६ ॥ सौरेण सूर्यदेवताकेन । "सूर्यतिष्यागस्त्य" इत्यादिना यलोपः ॥ ५७–५८ ॥

ति० अमितात्मना अपरिच्छिन्नमाहात्म्येन ॥ ४७ ॥ ति० महाग्रहः अङ्गारकशन्यादिः ॥ ५२ ॥ ति० व्रीडितौ स्वस्वप्रयुक्तशरस्यमोघत्वदर्शनेननसंजातलज्जौ । यद्यपिरावणेरेवव्रीडायुक्ता । लक्ष्मणस्यतुतद्बाणनिवारणायप्रयोक्तुःसार्थक्यसत्त्वेनव्रीडाभावः । तथापितन्निराकरणपूर्वकंरिपुवधपर्यन्तव्यापारेणोपादानात्तदभावेनतस्यापिलज्जेतिबोध्यं । छत्रिन्यायेनद्विवचनप्रयोगइतिकतकः ।

[पा०] १ ख. संक्रुद्धो. २ ख. ङ. च. झ. ञ. ट. रथान्मथितसारथिः. क. ग. घ. रथान्निहतसारथिः. ३ क. ख. ङ. च. ज.—ट. अथशक्तिं. ४ क. ख. घ. ज. नन्दिवर्धनः. ५ ख. घ. च. ञ. बाणैःशतधा. ६ ख. ङ. च. झ. ट. भित्त्वाततः. ७ क. ख. ङ. झ. पितृव्यस्य. ८ ङ. झ. ञ. ट. महाबलं. ९ क. ख. घ. ङ. च. झ. ञ. ट. यदत्तममितात्मना. १० क. रजसा. ११ ख. च. तत्राग्निः. ग. ततोग्निः.

तस्माच्चापाद्विनिष्पेतुर्भास्वराः कूटमुद्गराः ॥ शूलानि च भुशुण्ड्यश्च गदाः खड्गाः परश्वधाः ॥ ५९ ॥
तदृष्ट्वा लक्ष्मणः सङ्ख्ये घोरमस्त्रमथासुरम् ॥ अवार्यं सर्वभूतानां सर्वशत्रुविनाशनम् ॥
माहेश्वरेण द्युतिमांस्तदस्त्रं प्रत्यवारयत् ॥ ६० ॥
तयोः सुतुमुलं युद्धं संबभूवाद्भुतोपमम् ॥ गगनस्थानि भूतानि लक्ष्मणं पर्यवारयन् ॥ ६१ ॥
भैरवाभिरुते भीमे युद्धे वानररक्षसाम् ॥ भूतैर्बहुभिराकाशं विस्मितैरावृतं बभौ ॥ ६२ ॥
ऋषयः पितरो देवा गन्धर्वा गरुडोरगाः ॥ शतक्रतुं पुरस्कृत्य ररक्षुर्लक्ष्मणं रणे ॥ ६३ ॥
अथान्यं मार्गणश्रेष्ठं संदधे राघवानुजः ॥ हुताशनसमस्पर्शं रावणात्मजदारणम् ॥ ६४ ॥
सुपत्रमनुवृत्ताङ्गं सुपर्वाणं सुसंस्थितम् ॥ सुवर्णविकृतं वीरः शरीरान्तकरं शरम् ॥ ६५ ॥
दुरावारं दुर्विषह्यं राक्षसानां भयावहम् ॥ आशीविषविषप्रख्यं देवसङ्घैः समर्चितम् ॥ ६६ ॥
येन शक्रो महातेजा दानवानजयत्प्रभुः ॥ पुरा दैवासुरे युद्धे वीर्यवान्हरिवाहनः ॥ ६७ ॥
तदैन्द्रमस्त्रं सौमित्रिः संयुगेष्वपराजितम् ॥ शरश्रेष्ठं धनुःश्रेष्ठे नरश्रेष्ठोऽभिसंदधे ॥ ७८ ॥
संधायामित्रदलनं विचकर्ष शरासनम् ॥ सज्यमायम्य दुर्धर्षः कालो लोकक्षये यथा ॥ ६९ ॥
संधाय धनुषि श्रेष्ठे विकर्षन्निदमब्रवीत् ॥ लक्ष्मीवाँल्लक्ष्मणो वाक्यमर्थसाधकमात्मनः ॥ ७० ॥
धर्मात्मा सत्यसंधश्च रामो दाशरथिर्यदि ॥ पौरुषे चाप्रतिद्वन्द्वः शरैनं जहि रावणिम् ॥ ७१ ॥
इत्युक्त्वा बाणमाकर्ण विकृष्य तमजिह्मगम् ॥ लक्ष्मणः समरे वीरः ससर्जेन्द्रजितं प्रति ॥
ऐन्द्रास्त्रेण समायोज्य लक्ष्मणः परवीरहा ॥ ७२ ॥
स शिरः सशिरस्त्राणं श्रीमज्ज्वलितकुण्डलम् ॥ प्रमथ्येन्द्रजितः कायात्पातयामास भूतले ॥ ७३ ॥
तद्राक्षसतनूजस्य छिन्नस्कन्धं शिरो महत् ॥ तपनीयनिभं भूमौ ददृशे रुधिरोक्षितम् ॥ ७४ ॥
हतस्तु निपपाताशु धरण्यां रावणात्मजः ॥ कवची सशिरस्त्राणो विध्वस्तः सशरासनः ॥ ७५ ॥
चुक्रुशुस्ते ततः सर्वे वानराः सविभीषणाः ॥ हृष्यन्तो निहते तस्मिन्देवा वृत्रवधे यथा ॥ ७६ ॥

तस्मादिति । असुरास्त्रप्रयोगाद्धेतोः । चापात् इन्द्रजिद्धनुषोपादानात् । कूटमुद्गरादयो विनिष्पेतुरित्यन्वयः । भुशुण्ड्यः मुसलविशेषाः ॥ ५९ ॥ तदृष्ट्वेत्यादिसार्धश्लोक एकान्वयः ॥ क्रियाद्वयार्थं तदस्त्रमिति द्विरुक्तिः ॥ ६०—६१ ॥ भैरवाभिरुते भयंकरशब्दे ररक्षुः । जय जयेत्याद्युक्तिभिरित्यर्थः ॥६२—६४ ॥ सुपत्रमित्यादिचतुःश्लोक्येकान्वया ॥ अनुवृत्ताङ्गं वर्तुलस्वरूपं । सुसंस्थितं सुसंस्थानं । सुवर्णविकृतं सुवर्णविचित्रितं । हरिवाहनः हरितवर्णाश्वः । ऐन्द्रमस्त्रं ऐन्द्रास्त्रमन्त्रयोजितं ॥ ६५—६८ ॥ अमित्रदलनं शत्रुनाशनं । कालः यमः ॥ ६९—७१ ॥ इत्युक्त्वेत्यादिसार्धश्लोक एकान्वयः ॥ बाणमैन्द्रास्त्रमन्त्रेण समायोज्य ससर्जेत्यन्वयः । एको लक्ष्मणशब्दो लक्ष्मीयुक्तवचनः । "लक्ष्मीवाँल्लक्ष्मणः श्रीलः श्रीमान्" इत्यमरः ॥ ७२ ॥ सः बाणः ॥ ७३—७४ ॥ कवचीति । कवचादिभिः सह विध्वस्तः हतः

जातरोषौ रामाविशेषेविभीषणेबाणः प्रयुक्तइतिलक्ष्मणस्यरोषः । लक्ष्मणस्तंपरिहृतवानितिरावणेरोषः ॥ ५३ ॥ ति० संनिहितैतदस्त्रेणैवार्यंवध्यइतिनिश्चित्यैन्द्रास्त्रंसंदधइत्याह—अथेति । अत्रप्रत्यस्त्रंरावणेर्ब्रह्मशापवशान्नबुद्ध्यारूढं । वस्तुतोस्यप्रत्यस्त्रंनास्त्येवेति कतकः ॥ ६४ ॥ स० ऐन्द्रमस्त्रं । अनेनेन्द्रजितोहननंतत्पराजितेन्द्रदेवताकेनास्त्रेणकुर्वल्लक्ष्मणःस्वपक्षस्थेन्द्रापप्रथांवारयामासेति ध्वन्यते ॥ ६८ ॥ ति० अर्थसाधकमात्मनः कार्यसिद्धिहेतुभूतं इदं वक्ष्यमाणवचनंअस्त्राधिष्ठात्रींदेवतांप्रत्यब्रवीत् ॥ ७० ॥ स० पौरुषे पराक्रमे । अप्रतिद्वन्द्वः असदृशोयदि तर्हितेनसत्येन तमेनंजहि । अनेनरामगुणशपथपुरस्सरमस्त्रमोचनादस्यास्त्रस्याप्रति-

[पा०] १ ख. ङ. च. झ. ञ. ट. घोरमस्त्रंसुदारुणं. २ ख. च. शत्रुविदारणं. ३ क. ख. च. ट. स्तैर्भीमे. ४ घ. विकृतंघोरं. ५ क. ख. ग. ङ. झ. ञ. ट. दुर्विषहं. ६ ख. दानवानर्दयन्मुहुः. ७ ङ. च. झ. अथैन्द्रं. ८ क. ख. ङ. च. झ ञ. तच्छिरः. ९ ङ. झ. हतस्सनिपपाताथ. १० ङ. झ. विप्रविद्धशरासनः. ११ क. ङ. झ. हृष्यन्ते.

अथान्तरिक्षे देवानामृषीणां च महात्मनाम् ॥ अभिजज्ञे च सन्नादो गन्धर्वाप्सरसामपि ॥ ७७ ॥
पतितं तमभिज्ञाय राक्षसी सा महाचमूः ॥ वध्यमाना दिशो भेजे हरिभिर्जितकाशिभिः ॥ ७८ ॥
वानरैर्वध्यमानास्ते शस्त्राण्युत्सृज्य राक्षसाः ॥ लङ्कामभिमुखाः सप्तुर्नष्टसंज्ञाः प्रधाविताः ॥ ७९ ॥
दुद्रुवुर्बहुधा भीता राक्षसाः शतशो दिशः ॥ त्यक्त्वा प्रहरणान्सर्वे पट्टिशासिपरश्वधान् ॥ ८० ॥
केचिल्लङ्कां परित्रस्ताः प्रविष्टा वानरार्दिताः ॥ समुद्रे पतिताः केचित्केचित्पर्वतमाश्रिताः ॥ ८१ ॥
हतमिन्द्रजितं दृष्ट्वा शयानं समरक्षितौ ॥ राक्षसानां सहस्रेषु न कश्चित्प्रत्यदृश्यत ॥ ८२ ॥
यथास्तंगत आदित्ये नावतिष्ठन्ति रश्मयः ॥ तथा तस्मिन्निपतिते राक्षसास्ते गता दिशः ॥ ८३ ॥
शान्तरश्मिरिवादित्यो निर्वाण इव पावकः ॥ सँ बभूव महातेजा व्यपास्तगतजीवितः ॥ ८४ ॥
प्रशान्तपीडाबहुलो नष्टारिष्टः प्रतापवान् ॥ बभूव लोकः पतिते राक्षसेन्द्रसुते तदा ॥ ८५ ॥
हर्षं च शक्रो भगवान्सह सर्वैः सुरर्षभैः ॥ जगाम निहते तस्मिन्राक्षसे पापकर्मणि ॥ ८६ ॥
आकाशे चापि देवानां शुश्रुवे दुन्दुभिस्वनः ॥ नृत्यद्भिरप्सरोभिश्च गन्धर्वैश्च महात्मभिः ॥ ८७ ॥
ववृषुः पुष्पवर्षाणि तदद्भुतमभूत्तदा ॥ प्रशशंसुर्हते तस्मिन्राक्षसे क्रूरकर्मणि ॥
शुद्धा आपो दिशश्चैव जहृषुर्दैत्यदानवाः ॥ ८८ ॥
आजग्मुः पतिते तस्मिन्सर्वलोकभयावहे ॥ ऊचुश्च सहिताः सर्वे देवगन्धर्वदानवाः ॥
विज्वराः शान्तकलुषा ब्राह्मणा विचरन्त्विति ॥ ८९ ॥
ततोऽभ्यनन्दन् संहृष्टाः समरे हरियूथपाः ॥ तमप्रतिबलं दृष्ट्वा हतं नैर्ऋतपुङ्गवम् ॥ ९० ॥
विभीषणो हनूमांश्च जाम्बवांश्चर्क्षयूथपः ॥ विजयेनाभिनन्दन्तस्तुष्टुवुश्चापि लक्ष्मणम् ॥ ९१ ॥
क्ष्वेलन्तश्च नदन्तश्च गर्जन्तश्च प्लवङ्गमाः ॥ लब्धलक्षा रघुसुतं परिवार्योपतस्थिरे ॥ ९२ ॥
लाङ्गूलानि प्रविध्यन्तः स्फोटयन्तश्च वानराः ॥ लक्ष्मणो जयतीत्येवं वाक्यं विश्रावयंस्तदा ॥ ९३ ॥
अन्योन्यं च समाश्लिष्य कपयो हृष्टमानसाः ॥ चक्रुश्चावचगुणा राघवाश्रयजाः कथाः ॥ ९४ ॥

धरण्यां निपपातेत्यन्वयः ॥ ७५—८३ ॥ व्यपास्तगतजीवितः व्यपास्तो विक्षिप्ताङ्गो गतजीवितश्च, सः शान्तरश्मिरादित्य इव । निर्वाणः शान्तः । पावक इव च बभूव । निस्तेजस्कोऽभूदित्यर्थः ॥ ८४ ॥ प्रशान्तेति । इदमारभ्य लोकविशेषणं । प्रशान्तपीडाबहुलः प्रशान्तबहुलपीडः । प्रतापवान् सूर्यप्रकाशवान् । पूर्वं भयेन मन्दसूर्यत्वात् ॥ ८५—८६ ॥ अप्सरोभिर्गन्धर्वैश्च कृतनर्तनगानजन्यस्वनः शुश्रुव इत्यर्थः । नृत्यद्भिरित्यत्र ङीबभावः आर्षः ॥ ८७ ॥ ववृषुरिति । अत्रापि देवाः कर्तारः । ववृषुः प्रशशंसुश्च ॥ ८८ ॥ आजग्मुरित्यादिसार्धश्लोक एकान्वयः ॥ देवगन्धर्वदानवाः आजग्मुः विचरन्त्वित्यूचुश्चेति संबन्धः ॥ ८९—९२ ॥ विश्रावयन् व्यश्रा-

हततार्क्षेया ॥ ७१ ॥ **रामानु०** गतजीवितःसः शान्तरश्मिरादित्यइव बभूव । निर्वाणःपावकइवव्यपास्त अतिष्ठदितिसंबन्धः ॥ **ति०** व्यपास्तोविशेषधर्मैः । अतएवगतजीवितः ॥ **शि०** व्यपास्तेन धर्मत्यागेन गतजीवितः ॥ **स०** व्यपास्तेन स्वेनपूर्वमलक्ष्यतयानिरस्तेनलक्ष्मणेन गतंजीवितंयस्यसतथा ॥ ८४ ॥ **ति०** देवदानवाः दानवानामपितच्छत्रुत्वात्तेषामपिहर्षः ॥ ८८ ॥ **ति०** लब्धलक्षाः प्राप्तहर्षावसराः । रलयोरभेदात्प्राप्तरक्षणाइत्यपि । रघुसुतं रघुवंशजं ॥ ९२ ॥ इत्येकनवतितमः सर्गः ॥ ९१ ॥

[पा०] १ क. ग. घ. ङ. ञ. भूतानां. २ ख. च. ञ. ट. मृषीणांभावितात्मनां. ग. मृषीणांचमहास्वनः. ३ ङ. ञ. जज्ञेऽथजयसन्नादो. ४ ज. अतिष्ठत्समहातेजाः. ५ क. ग—च. ज.—ट. विनष्टारिः. ६ क. ख. ङ. च. ञ. ञ. ट. प्रशशामहते. ७ ञ. देवदानवाः. ८ ख. ङ. च. ज.—ट. सहितास्तुष्टादेव. ९ ङ. ञ. ट. राघवाश्रयसत्कथाः.

तदसुकरमथाभिवीक्ष्य हृष्टाः प्रियसुहृदो युधि लक्ष्मणस्य कर्म ॥
परमसुपलभन्मनःप्रहर्षं विनिहतमिन्द्ररिपुं निशम्य देवाः ॥ ९५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकनवतितमः सर्गः ॥ ९१ ॥

द्विनवतितमः सर्गः ॥ ९२ ॥

इन्द्रजिद्विजयहृष्टेनलक्ष्मणेन विभीषणादिभिः सह रामसमीपमेत्य तच्चरणयोः प्रणामः ॥१॥ विभीषणमुखाल्लक्ष्मणकृतेन्द्रजिद्वधश्रवणहृष्टेनरामेण लक्ष्मणस्यनिजाङ्कारोपणेनपरिष्वङ्गपूर्वकं प्रशंसनम् ॥ २ ॥ रामप्रेरणयासुषेणेनेन्द्रजिद्बाणविशकलीकृतानांलक्ष्मणादीनां समुचितचिकित्सयाविशल्यीकरणम् ॥ ३ ॥

रुधिरक्लिन्नगात्रस्तु लक्ष्मणः शुभलक्षणः ॥ बभूव हृष्टस्तं हत्वा शक्रजेतारमाहवे ॥ १ ॥
ततः स जाम्बवन्तं च हनुमन्तं च वीर्यवान् ॥ संनिहत्य[1] महातेजास्तांश्च सर्वान्वनौकसः ॥ २ ॥
आजगाम ततस्तीव्रं यत्र सुग्रीवराघवौ ॥ विभीषणमवष्टभ्य हनूमन्तं च लक्ष्मणः ॥ ३ ॥
ततो राममभिक्रम्य सौमित्रिरभिवाद्य च ॥ तस्थौ भ्रातुःसमीपस्थ इन्द्रस्येव बृहस्पतिः ॥ ४ ॥
निष्टनन्निव[3] चागम्य राघवाय महात्मने ॥ आचचक्षे तदा[4] वीरो घोरमिन्द्रजितो वधम् ॥ ५ ॥
रावणेस्तु शिरश्छिन्नं लक्ष्मणेन महात्मना ॥ न्यवेदयत रामाय तदा हृष्टो विभीषणः ॥ ६ ॥
श्रुत्वैतत्तु महावीर्यो लक्ष्मणेनेन्द्रजिद्वधम् ॥ प्रहर्षमतुलं लेभे राम[5]ो वाक्यमुवाच ह ॥ ७ ॥
साधु लक्ष्मण तुष्टोस्मि कर्मणा सुकृतं कृतम् ॥ रावणेर्हि विनाशेन जितमित्युपधारय ॥ ८ ॥
स तं शिरस्युपाघ्राय लक्ष्मणं लक्ष्मिवर्धनम् ॥ लज्जमानं बलात्स्नेहादङ्कमारोप्य वीर्यवान् ॥ ९ ॥

वयन् ॥ ९३—९४ ॥ असुकरं दुष्करं । सर्वेषां प्राणप्रतिष्ठापकमिति वा । प्रियसुहृदः सर्वप्रियसुहृदः । उपलभन्नित्यत्र अडाभ्यासनेपदाभावावार्षौ । देवाः इन्द्ररिपुं विनिहतं निशम्य परमं मनःप्रहर्षं उपलभन् उपालभन्त । अथ असुकरं तत् इन्द्रजिद्धननं । प्रियसुहृदः लक्ष्मणस्य । कर्म कृतिविषयभूतं । अभिवीक्ष्य हृष्टाः विस्मिताः । आसन्निति शेषः । "विस्मितप्रतिघातयोश्चेति वक्तव्यं" इति हृषेः पाक्षिक इडभावः । देवाश्चारणादिमुखेन प्रथममिन्द्रजिद्धननं श्रुत्वा संतुष्टाः सन्तः पश्चात्तस्यात्यन्ताशक्यत्वादतथ्यं मन्वाना युद्धभूमिमागत्य तत्प्रत्यक्षीकृत्य विस्मिता आसन्निति भावः ॥ ९५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकनवतितमः सर्गः ॥ ९१ ॥

अथ लक्ष्मणश्लाघनं—रुधिरक्लिन्नगात्रेत्यादि ॥१॥ तत इत्यादिश्लोकद्वयमेकान्वयं ॥ सन्निहत्य संघीभूय । अवष्टभ्य युद्धपारवश्यादवलम्ब्य ॥ २—३ ॥ इन्द्रस्येव बृहस्पतिरिति पारतन्त्र्यमात्रे साम्यं ॥ ४ ॥ निष्टनन् अव्यक्ताक्षरंवदन्नित्यर्थः । इवशब्दो वाक्यालंकारे । आयासस्याभिनयनमात्रेणालीकत्वद्योतनाय वा ॥ ५ ॥ रामसन्निधौ संकोचवता लक्ष्मणेनाविशेषेणेन्द्रजिद्वधकथनाद्विभीषणः स्पष्टतयाह—रावणेरिति ॥ यद्वा लक्ष्मणेन सूचनयोक्तावपि हर्षप्रकर्षेण विभीषणः पुनराह—रावणेरिति ॥ ६ ॥ महावीर्यो राम इत्यन्वयः ॥ ७ ॥ सुकृतं कृतं सुकर्तव्यं कृतं । कर्मणा युद्धकर्मणा ॥ ८ ॥ स तमित्यादिश्लोकद्वयमेकान्वयं ॥ आरोप्य आरोपणायाकृष्य । अवपीडितं शल्यपीडितं । गाढं यथा भवति तथेति वा । क्रिया-

---

ति० संनिपत्य संगृह्य ॥ २ ॥ ति ० अभिक्रम्य प्रदक्षिणीकृत्य शक्रस्येन्द्रानुजोयथा यथोपेन्द्रइन्द्रसमीपेतिष्ठति तद्वत् ॥४॥

[पा०] १ क. ख. घ.—ट. संनिपत्य. २ ङ. ज. झ. ट. समीपस्थःशक्रस्येन्द्रानुजोयथा. ३ च. निश्श्वसन्निवचागत्य. ङ. झ. ञ. ट. निष्टनन्निवचागत्य. ४ क. ख. घ. ट. महावीरो. ५ ङ. झ. वाक्यंचेदमुवाचह.

उपवेश्य तमुत्सङ्गे परिष्वज्यावपीडितम् ॥ भ्रातरं लक्ष्मणं स्निग्धं पुनःपुनरुदैक्षत ॥ १० ॥
शल्यसंपीडितं शस्तं निश्श्वसन्तं तु लक्ष्मणम् ॥ रामस्तु दुःखसंतप्तस्तदा निश्श्वसितो भृशम् ॥११॥
मूर्ध्नि चैनमुपाघ्राय भूयः संस्पृश्य च त्वरन् ॥ उवाच लक्ष्मणं वाक्यमाश्वास्य पुरुषर्षभः ॥ १२ ॥
कृतं परमकल्याणं कर्म दुष्करकर्मणा ॥ अद्य मन्ये हते पुत्रे रावणं निहतं युधि ॥
अद्याहं विजयी शत्रौ हते तस्मिन् दुरात्मनि ॥ १३ ॥
रावणस्य नृशंसस्य दिष्ट्या वीर त्वया रणे ॥ छिन्नो हि दक्षिणो बाहुः स हि तस्य व्यपाश्रयः ॥१४॥
विभीषणहनूमद्भ्यां कृतं कर्म महद्रणे ॥ अहोरात्रैस्त्रिभिर्वीरः कथंचिद्विनिपातितः ॥ १५ ॥
निरमित्रः कृतोस्म्यद्य निर्यास्यति हि रावणः ॥ बलव्यूहेन महता श्रुत्वा पुत्रं निपातितम् ॥ १६ ॥
तं पुत्रवधसंतप्तं निर्यान्तं राक्षसाधिपम् ॥ बलेनावृत्य महता निहनिष्यामि दुर्जयम् ॥ १७ ॥
त्वया लक्ष्मण नाथेन सीता च पृथिवी च मे ॥ न दुष्प्रापा हते त्वद्य शक्रजेतरि चाहवे ॥ १८ ॥
स तं भ्रातरमाश्वास्य परिष्वज्य च राघवः ॥ रामः सुषेणं मुदितः समाभाष्येदमब्रवीत् ॥ १९ ॥
सशल्योयं महाप्राज्ञ सौमित्रिर्मित्रवत्सलः ॥ यथा भवति सुखस्थस्तथा त्वं समुपाचर ॥ २० ॥
विशल्यः क्रियतां क्षिप्रं सौमित्रिः सविभीषणः ॥ ऋक्षवानरसैन्यानां शूराणां द्रुमयोधिनाम् ॥ २१ ॥
ये चाप्यन्येऽत्र युध्यन्ति सशल्या व्रणिनस्तथा ॥ तेऽपि सर्वे प्रयत्नेन क्रियन्तां सुखिनस्त्वया ॥ २२ ॥
एवमुक्तस्तु रामेण महात्मा हरियूथपः ॥ लक्ष्मणाय ददौ नस्तः सुषेणः परमौषधिम् ॥ २३ ॥
स तस्या गन्धमाघ्राय विशल्यः समपद्यत ॥ तथा निर्वेदनश्चैव संरूढव्रण एव च ॥ २४ ॥
विभीषणमुखानां च सुहृदां राघवाज्ञया ॥ सर्ववानरमुख्यानां चिकित्सां स तदाऽकरोत् ॥ २५ ॥
ततः प्रकृतिमापन्नो हृतशल्यो गतव्यथः ॥ सौमित्रिर्मुदितस्तत्र क्षणेन विगतज्वरः ॥ २६ ॥
तथैव रामः प्लवगाधिपस्तदा विभीषणश्चर्क्षपतिश्च जाम्बवान् ॥
अवेक्ष्य सौमित्रिमरोगमुत्थितं मुदा ससैन्याः सुचिरं जहर्षिरे ॥ २७ ॥

भेदात्तमिति द्विरुक्तिः ॥ ९—१० ॥ शल्यसंपीडितमित्यादिश्लोकद्वयमेकान्वयं ॥ शस्तं प्रहृतं । निश्वसितः स्वयंकृतनिश्वासः । त्वरन् संस्पृश्य । त्वरा च प्रहारव्यथापनयनायेति भावः ॥ ११—१२ ॥ कृतमित्यादिसार्धश्लोकः ॥ दुष्करकर्मणा त्वयेति शेषः ॥ १३ ॥ व्यपाश्रयः आलम्बनं ॥ १४ ॥ अहोरात्रैस्त्रिभिरिति । एकादशीद्वादशीत्रयोदशीभिरित्यर्थः ॥ १५ ॥ निरमित्र इत्यादि श्लोकद्वयमेकान्वयं ॥ १६—१७ ॥ नाथेन याचमानेन । "नाथृयाच्ञायां" इत्यस्मात्पचाद्यच् ॥ १८ ॥ समाभाष्य आमन्त्र्य ॥ १९ ॥ समुपाचर चिकित्सां कुरु ॥२०॥ विशल्य इति श्लोकद्वयमेकान्वयं ॥ ऋक्षवानरसैन्यानामिति निर्धारणे षष्ठी ॥ २१—२२ ॥ नस्तः नासिकायां ॥ २३ ॥ निर्वेदनः वेदनारहितः ॥ २४—२६ ॥ मुदा युक्तमिति शेषः । मुदा युक्तं सौमित्रिमवेक्ष्य इति जहर्षिर इति संबन्धः । जहर्षिर इत्यत्र

ति० हेलक्ष्मण नाथेन । उपलालनार्थंनाथशब्दप्रयोगः ॥ १८ ॥ ति० विशल्यइति । ओषधिपर्वतानयनोत्तरमोषध्यःसुषेणेनसंगृह्यस्थापिताइत्यनेनज्ञायते ॥ २४ ॥ इतिद्विनवतितमःसर्गः ॥ ९२ ॥

[पा०] १ ग. घ. क्षयोरणे. २ ङ. च. ज.—ट. हृतेतस्मिञ्शक्र. ३ ख. सुषेणमुद्दिश्यसमाहूयेदं. ४ ङ. झ. विशल्योयं महाप्राज्ञः. ५ ख. ङ. झ.—ट. समुदाचर. ६ ङ. झ. सौमित्रिर्मित्रवत्सलः. ७ च. ञ. ट. ततो. ८ घ. ङ. झ. ञ. ट. वीर्यवान्. ९ च. ञ. ट. परमं.

अपूजयत्कर्म स लक्ष्मणस्य सुदुष्करं दाशरथिर्महात्मा ॥
हृष्टा बभूवुर्युधि यूथपेन्द्रा निपातितं शक्रजितं निशम्य ॥ २८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विनवतितमः सर्गः ॥ ९२ ॥

त्रिनवतितमः सर्गः ॥ ९३ ॥

लक्ष्मणकृतेन्द्रजिद्वधश्रवणमुग्धेनरावणेनेन्द्रजितंप्रति शोचनपूर्वकं बहुधाविलापः ॥ १ ॥ तथामन्त्रिणःप्रति स्वप्रतापप्रशंसनेन रामादिवधप्रतिज्ञानम् ॥ २ ॥ तथा सीतावधप्रतिज्ञानेनाशोकवनिकांप्रतिजवादभिधावनम् ॥ ३ ॥ तदवलोकनभीतयासीतया बहुधाविलापः ॥ ४ ॥ अत्रान्तरे सुपार्श्वनाम्नासचिवेन युक्त्युपन्यासेनसान्त्वनपूर्वकं सीतावधोद्यमात्प्रतिनिवर्तनेन गृहंप्रतियापनम् ॥ ५ ॥

ततः पौलस्त्यसचिवाः श्रुत्वा चेन्द्रजितं हतम् ॥ आचचक्षुरभिज्ञाय दशग्रीवाय सव्यथाः ॥ १ ॥
युद्धे हतो महाराज लक्ष्मणेन तवात्मजः ॥ विभीषणसहायेन मिषतां नो महाद्युतिः ॥ २ ॥
शूरः शूरेण संगम्य संयुगेष्वपराजितः ॥ लक्ष्मणेन हतः शूरः पुत्रस्तु विबुधेन्द्रजित् ॥
गतः स परमाँल्लोकाञ्शरैः संतर्प्य लक्ष्मणम् ॥ ३ ॥
स तं प्रतिभयं श्रुत्वा वधं पुत्रस्य दारुणम् ॥ घोरमिन्द्रजितः सङ्ख्ये कश्मलं चाविशन्महत् ॥ ४ ॥
उपलभ्य चिरात्संज्ञां राजा राक्षसपुङ्गवः ॥ पुत्रशोकार्दितो दीनो विललापाकुलेन्द्रियः ॥ ५ ॥
हा राक्षसचमूमुख्य मम वत्स महारथ ॥ जित्वेन्द्रं कथमद्य त्वं लक्ष्मणस्य वशं गतः ॥ ६ ॥

गुण आर्षः ॥ २७—२८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्विनवतितमः सर्गः ॥ ९२ ॥

अथ सीतावधोद्योगपर्यन्तो रावणस्य पुत्रशोकातिशय उच्यते—ततः पौलस्त्यसचिवा इत्यादि ॥ पौलस्त्यसचिवाः रावणागारवर्तिनः सहायभूताः । इन्द्रजितंहतं श्रुत्वा स्वयमभिज्ञाय साभिज्ञानं दृष्ट्वा । सव्यथाःसन्तो रावणाय आचचक्षुः आचचक्षिरे । अथवा अभिज्ञायेति चतुर्थी । पूर्वमेव यज्ञविघ्नेन निश्चिततद्वधायेत्यर्थः । अवज्ञायेति पाठेपि चतुर्थीपक्षे अयमेवार्थः । पक्षान्तरे साक्षात्कारपर्यन्तदर्शनं प्राप्येत्यर्थः ॥ १ ॥ मिषतां नः अस्मासु पश्यत्सु सत्स्वित्यर्थः । अनन्तरयोजनायामस्मासु जीवत्स्वित्यर्थः । अनादरे षष्ठी ॥ २ ॥ शूर इत्यादिसार्धश्लोक एकान्वयः ॥ क्रियाभेदाच्छूरपदद्वयं । विबुधेन्द्रजित् देवेन्द्रजित् ॥ ३ ॥ दारुणं करुणं । घोरं तीक्ष्णं । कश्मलं मूर्च्छा । "मूर्च्छा तु कश्मलं मोहः" इत्यमरः

ति० सचिवाः अवशिष्टसुपार्श्वादिमन्त्रिणः । अवज्ञाय अवक्षिप्ता ज्ञा ज्ञानंयस्यतस्मै । पुत्रवधवृत्तान्तज्ञानरहितायेत्यर्थः । तीर्थंतु अवज्ञाय अभिज्ञाय दृष्ट्वा पूर्वंश्रुत्वापश्चाद्युद्धभूमिंगत्वाप्रत्यक्षीकृत्याचचक्षुरित्यर्थमाह । स० जानाति यः स ज्ञः सनभवतीत्यवज्ञः एतद्वार्तानभिज्ञस्तस्मै । लक्ष्मणेनावज्ञायहतइत्युत्तरत्रान्वयोवा । एतावतापिनसीताप्रदानप्रज्ञातवेतितमवज्ञाय तिरस्कृत्येतिवा । शि० अवज्ञाय सर्वसत्पुरुषानादरकर्त्रेदशग्रीवाय ॥ १ ॥ ति० मिषतांनइति । योद्धृराक्षसैर्दर्शनाच्छत्रिन्यायेनबोध्यं । स० अत्यासन्नैर्दृष्टत्वात्तैस्सहाद्रष्टृभिरपि मिषतांनइत्युक्तिःसंभवति ॥ २ ॥ स० हेविबुध इतउत्तरंकर्तव्यज्ञान । इन्द्रजित् विबुधैःसहित इन्द्रस्तंजयतीतिसतथावा । विबुधान्देवान् इन्द्रंचजयतीतिनागोजिभट्टव्याख्यानंतु सर्वथापीन्द्रशब्दस्यपूर्वनिपातस्यावर्जनीयत्वादुपेक्ष्यं । देवदेवेन्द्रोभयप्राधान्याच्चारस्याच्च । अस्मत्पक्षे "सहयुक्तेऽप्रधाने" इतिदेवाप्राधान्येन्द्रपारम्यलाभस्चारस्यात् ॥ ३ ॥

[पा०] १ ङ. च. झ. ञ. ट. चेन्द्रजितोवधं. २ ङ—ट. रवज्ञाय. ३ घ. राक्षसाः. ङ. झ. सत्वराः. ४ क.—च. ज. झ ट. पुत्रस्ते. ५ ख. ग. ङ. झ. संतर्प्य. ६ ख. ङ. झ. ट. प्राविशन्महत्.

ननु त्वमिषुभिः क्रुद्धो भिन्द्याः कालान्तकावपि ॥ मन्दरस्यापि शृङ्गाणि किं पुनर्लक्ष्मणं युधि ॥७॥
अद्य वैवस्वतो राजा भूयो बहुमतो मम ॥ येनाद्य त्वं महाबाहो संयुक्तः कालधर्मणा ॥ ८ ॥
एष पन्थाः सुयोधानां सर्वामरगणेष्वपि ॥ यः कृते हन्यते भर्तुः स पुमान्स्वर्गमृच्छति ॥ ९ ॥
अद्य देवगणाः सर्वे लोकपालास्तथर्षयः ॥ हतमिन्द्रजितं श्रुत्वा सुखं स्वप्स्यन्ति निर्भयाः ॥ १० ॥
अद्य लोकास्त्रयः कृत्स्ना पृथिवी च सकानना ॥ ऐकेनेन्द्रजिता हीना शून्येव प्रतिभाति मे ॥११॥
अद्य नैर्ऋतकन्यानां श्रोष्याम्यन्तःपुरे रवम् ॥ करेणुसङ्घस्य यथा निनादं गिरिगह्वरे ॥ १२ ॥
यौवराज्यं च लङ्कां च रक्षांसि च परंतप ॥ मातरं मां च भार्यां च क गतोसि विहाय नः ॥१३॥
मम नाम त्वया वीर गतस्य यमसादनम् ॥ प्रेतकार्याणि कार्याणि विपरीते हि वर्तसे ॥ १४ ॥
स त्वं जीवति सुग्रीवे लक्ष्मणे च सराघवे ॥ मम शल्यमनुद्धृत्य क गतोसि विहाय नः ॥ १५ ॥
एवमादिविलापार्तं रावणं राक्षसाधिपम् ॥ आविवेश महान्कोपः पुत्रव्यसनसंभवः ॥ १६ ॥
प्रकृत्या कोपनं ह्येनं पुत्रस्य पुनराधयः ॥ दीप्तं संदीपयामासुर्घर्मेऽर्कमिव रश्मयः ॥ १७ ॥
ललाटे भ्रुकुटीभिश्च संगताभिर्व्यरोचत ॥ युगान्ते सह नक्षत्रैस्तु महोर्मिभिरिवोदधिः ॥ १८ ॥
कोपाद्विजृम्भमाणस्य वक्त्राद्व्यक्तमभिज्वलन् ॥ उत्पपात सै भूयोग्निर्वृत्रस्य वदनादिव ॥ १९ ॥
स पुत्रवधसंतप्तः शूरः क्रोधवशं गतः ॥ समीक्ष्य रावणो बुद्ध्या वैदेह्या रोचयद्वधम् ॥ २० ॥
तस्य प्रकृत्या रक्ते च रक्ते क्रोधाग्निनाऽपि च ॥ रावणस्य महाघोरे दीप्ते नेत्रे बभूवतुः ॥ २१ ॥
घोरं प्रकृत्या रूपं तत्तस्य क्रोधाग्निमूर्च्छितम् ॥ बभूव रूपं क्रुद्धस्य रुद्रस्येव दुरासदम् ॥ २२ ॥
तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन्नस्रबिन्दवः ॥ दीप्ताभ्यामिव दीपाभ्यां सार्चिषः स्नेहबिन्दवः ॥ २३ ॥
दन्तान्विदशतस्तस्य श्रूयते दशनस्वनः ॥ यन्त्रस्यावेष्ट्यमानस्य महतो दानवैरिव ॥ २४ ॥
कालाग्निरिव संक्रुद्धो यां यां दिशमवैक्षत ॥ तस्यां तस्यां भयत्रस्ता राक्षसाः संविलिल्यिरे ॥२५॥

॥ ४—६ ॥ नन्वित्यामन्त्रणे । कालान्तकौ यमस्य मूर्तिभेदौ ॥ ७ ॥ भूयः अतिशयेन । कालधर्मणा मरणेन । आर्षोनिच् समासान्तः । संयुक्तः संयोजितः ॥ ८ ॥ युद्धमरणस्य सर्वाकाङ्क्षितत्वाद्युद्धहतं त्वां न शोचामीत्याह—एष इति ॥ एषः युद्धमरणरूपः पन्थाः ॥ एवं यशस्यत्वादशोच्यत्वमुक्त्वा स्वर्ग्यत्वादशोच्यत्वमाह—य इति ॥ ९—११ ॥ लोकास्त्रय इत्युक्तावपि पृथिव्याः पृथगुपादानं प्राधान्यात् । यथा ब्राह्मणा आगता वसिष्ठोप्यागत इत्यादौ ॥ १२ ॥ नः सर्वानिति योजनीयं ॥ १३—१६ ॥ प्रकृत्या कोपनमित्यस्य विवरणं दीप्तमिति । पुत्रस्य पुत्रसंबन्धिन्यः । पुत्रविषया इत्यर्थः । आधयः शोकाः । पुनः भूयः । संदीपयामासुः कोपयामासुः । अर्कपक्षे क्रूरयामासुरित्यर्थः ॥ १७ ॥ भ्रुकुटीभिरिति बहुवचनं दशशिरस्कत्वात् ॥ १८—२३ ॥ आवेष्ट्यमानस्य भ्राम्यमाणस्य । यन्त्रस्य तिलपीडनयन्त्रस्य । दानवैर्बलवद्भिरित्यर्थः ॥ २४ ॥ संविलिल्यिरे ।

ती० कालान्तकावपि कालः सर्वसंहारकः । अन्तकः कालाभिमानीपुरुषः ॥ ७ ॥ स० वैवस्वतोराजा प्रेतराजः । बहुमतः । एतादृशमपित्वांनिनायेतिश्लाघनीयइतिभावः । कालधर्मणा कालोमारणंधर्मोयस्यासौ कालधर्मा । तेन यमेनत्वमद्यसंयुक्तः मृतइतियावत् । शि० बहुभूयः अत्यधिकोममममतः ज्ञातः ॥ ८ ॥ ति० रावणंचसमाधिगमितिपाठे सम्यगाधिः समाधिः मनोव्यथा तांगच्छतीत्यर्थइतितीर्थः ॥ १६ ॥ ती० सपुत्रवधेत्यस्यप्रातीतिकार्थःस्पष्टः । वस्तुतस्तु—रावणः वैदेह्या हेतुभूतया वधं स्ववधंबुद्ध्यासमीक्ष्य इतःपरंरामोमामवश्यंवधिष्यतीतिनिश्चित्येत्यर्थः । अरोचयत् स्ववधमित्यनुषङ्गः ॥ २० ॥ ति० यन्त्रस्य

[पा] १ ख. ग. ङ. च. ज.—ट. दृष्ट्वासुखं. २ घ. मृतेनेन्द्रजिता. ३ ङ. झ. भार्याश्च. ४ ख. सर्वाणि. ५ क. ख. ग. च. सधूमोग्निः. ङ. झ. ट. सधूमाग्निः. घ. विधूमोग्निः. ६ ङ.—ट. व्यवस्थितं. ७ ङ. झ. ट. स्याकृष्यमाणस्य. ८ क. ख. ग. संनिलिल्यिरे.

तमन्तकमिव क्रुद्धं चराचरचिखादिषुम् ॥ वीक्षमाणं दिशः सर्वा राक्षसा नोपचक्रमुः ॥ २६ ॥
ततः परमसंक्रुद्धो रावणो राक्षसाधिपः ॥ अब्रवीद्रक्षसां मध्ये संस्तम्भयिषुराहवे ॥ २७ ॥
मया वर्षसहस्राणि चरित्वा दुश्चरं तपः ॥ तेषु तेष्ववकाशेषु स्वयंभूः परितोषितः ॥ २८ ॥
तस्यैव तपसो व्युष्ट्या प्रसादाच्च स्वयंभुवः ॥ नासुरेभ्यो न देवेभ्यो भयं मम कदाचन ॥ २९ ॥
कवचं ब्रह्मदत्तं मे यदादित्यसमप्रभम् ॥ देवासुरविमर्देषु न भिन्नं वज्रशक्तिभिः ॥ ३० ॥
तेन मामद्य संयुक्तं रथस्थमिह संयुगे ॥ प्रतीयात्कोऽद्य मामाजौ साक्षादपि पुरन्दरः ॥ ३१ ॥
यत्तदाऽभिप्रसन्नेन सशरं कार्मुकं महत् ॥ देवासुरविमर्देषु मर्म दत्तं स्वयंभुवा ॥ ३२ ॥
अद्य तूर्यशतैर्भीमं धनुरुत्थाप्यतां मम ॥ रामलक्ष्मणयोरेव वधाय परमाहवे ॥ ३३ ॥
स पुत्रवधसंतप्तः शूरः क्रोधवशं गतः ॥ समीक्ष्य रावणो बुद्ध्या सीतां हन्तुं व्यवस्यत ॥ ३४ ॥
प्रत्यवेक्ष्य तु ताम्राक्षः सुघोरो घोरदर्शनः ॥ दीनो दीनस्वरान्सर्वांस्तानुवाच निशाचरान् ॥ ३५ ॥
मायया मम वत्सेन वञ्चनार्थं वनौकसाम् ॥ किंचिदेव हतं तत्र सीतेयमिति दर्शितम् ॥ ३६ ॥
तदिदं तथ्यमेवाहं करिष्ये प्रियमात्मनः ॥ वैदेहीं नाशयिष्यामि क्षत्रबन्धुमनुव्रताम् ॥ ३७ ॥
इत्येवमुक्त्वा सचिवान्खड्गमाशु परामृशत् ॥ ३८ ॥
उद्धृत्य गुणसंपन्नं विमलाम्बरवर्चसम् ॥ निष्पपात स वेगेन सभार्यः सचिवैर्वृतः ॥ ३९ ॥
रावणः पुत्रशोकेन भृशमाकुलचेतनः ॥ संक्रुद्धः खड्गमादाय सहसा यत्र मैथिली ॥ ४० ॥
व्रजन्तं राक्षसं प्रेक्ष्य सिंहनादं प्रचुक्रुशुः ॥ ऊचुश्चान्योन्यमाश्लिष्य संक्रुद्धं प्रेक्ष्य राक्षसाः ॥ ४१ ॥

स्तम्भादिव्यवहिता बभूवुरित्यर्थः ॥ २५ ॥ चिखादिषुं संहर्तुमिच्छुमित्यर्थः । नोपचक्रमुः नोपसेदुः ॥२६॥ संस्तम्भयिषुराहवे युद्धभीतान्राक्षसान् युद्धे स्थापयितुकामः । सनि द्विर्वचनाभाव आर्षः ॥ २७ ॥ अवकाशेषु तपःसमाप्तिषु ॥२८॥ व्युष्ट्या समृद्ध्या । "व्युष्टिः फले समृद्धौ च" इत्यमरः । भयाभावे हेतुमाह—कवचमिति ॥ यत् यस्मात् । कवचमस्ति तस्मादिति पूर्वेणान्वयः ॥ २९–३० ॥ तेन कवचेन । संयुक्तं रथस्थं मां इह संयुगे कः प्रतीयात् आभिमुख्येनागच्छेत् । अद्य मामाजौ साक्षात्पुरन्दरोपि न प्रतीयादिति च योज्यं । अर्थसिद्धौ नञ् । क्रियापदमस्त्येव । अनेवंव्याख्याने अद्य मामाजाविति पुनरुक्तं स्यात् ॥ ३१ ॥ यत्तदेत्यादिश्लोकद्वयमेकान्वयं ॥ देवासुरविमर्देषु विमर्दकाल इत्यर्थः । अद्य तूर्यशतैरित्यनेन इतः पूर्वमिदं धनुर्न नीतमिति गम्यते ॥ ३२—३४ ॥ सुघोरः सुघोरप्रकृतिः ॥३५॥ मायायेत्यादिश्लोकद्वयमेकान्वयं ॥ सीतेयमिति दर्शितं किंचित् अलीकमेवेत्यर्थः ॥ ३६—३७ ॥ इत्येवमित्यर्धं ॥ परामृशत् आददे ॥ ३८ ॥ उद्धृत्येत्यादिश्लोकद्वयमेकं वाक्यं ॥ गुणसंपन्नं माल्यालंकृतं । विमलाम्बरवर्चसं विमलाकाशसदृशं । खड्गमादाय कोशादुद्धृत्य । यत्र मैथिली तं देशंप्रति निष्पपातेत्यन्वयः ॥ ३९—४० ॥ व्रजन्तमित्यादिसार्धश्लोकत्रयमेकान्वयं ॥ रत्नानि श्रेष्ठवस्तूनि । "रत्नं स्वजाति-

मन्दररूपमथनयन्त्रस्य । वासुकिना करणेन । दानवैः कृष्यमाणस्य मथ्नतः क्षीराब्धिमथनंकुर्वतोमन्दरस्येव ॥२४॥ स० तेन कवचेन । संयुक्तं संयुगे संयुगार्थं । रथस्थं इहाद्य मां आजौ रणभूमौ कःप्रतीयात् नकोपि । देवाधिपश्चेदागच्छेदित्यतआह—साक्षादिति । साक्षात्पुरन्दरश्चेदप्यद्यनप्रतीयादितिशेषः । तेननपुनरुक्तिः ॥३१॥ ती० वस्तुतस्तु सीतांहन्तुं गन्तुं सीतादर्शनार्थंगन्तुंव्यवस्यतेत्यर्थः । 'हनहिंसागत्योः' इति धातुः ॥ ३४ ॥ ति० क्षत्रबन्धुं वस्तुतोऽज्ञत्रियं । ती० मायायेत्यादिश्लोकद्वयस्यवास्तवार्थस्तु—ममवत्सेन बालेनापिसता इन्द्रजिता वनौकसांवञ्चनार्थं इयंसीतेतिकिंचिदेवालीकमेवहतंदर्शितं । अहं क्षत्रबन्धुं क्षत्राणांबन्धुंपरमासंराममनुव्रतां वैदेहीं तथ्यंयथाभवतितथानाशयिष्यामि यदितदिदमात्मानंप्रत्यप्रियमेवस्यात् । अतःकरिष्ये इतरराक्षससंतो-

[पा०] १ घ. तेषुचकालेषु. २ ङ. ञ. वज्रमुष्टिभिः. ३ ख. च. मयाप्राप्तंस्वयंभुवा. ४ ख. वैदेह्यारोचयद्वधं. ५ ख. च. सुघोरान्घोरदर्शनात. क. ज. ञ. ट. सुघोरोघोरदर्शनान्. ६ ङ. ञ. ट. उत्प्लुत्य. ख. घ. उद्गृह्य. ७ क. ख. ग. ङ. च. ञ. ञ. ट. मालिङ्ग्य. घ. मालोक्य. ८ ङ. च. ञ. ञ. ट. राक्षसं.

अद्यैनं तावुभौ दृष्ट्वा भ्रातरौ प्रव्यथिष्यतः ॥ लोकपाला हि चत्वारः क्रुद्धेनानेन निर्जिताः ॥४२॥
बहवः शत्रवश्चापि संयुगेषु निपातिताः ॥ त्रिषु लोकेषु रत्नानि भुङ्क्ते चाहृत्य रावणः ॥
विक्रमे च बले चैव नास्त्यस्य सदृशो भुवि ॥ ४३ ॥
तेषां संजल्पमानानामशोकवनिकां गताम् ॥ अभिदुद्राव वैदेहीं रावणः क्रोधमूर्च्छितः ॥ ४४ ॥
वार्यमाणः सुसंक्रुद्धः सुहृद्भिर्हितबुद्धिभिः ॥ अभ्यधावत संक्रुद्धः खे ग्रहो रोहिणीमिव ॥ ४५ ॥
मैथिली रक्ष्यमाणा तु राक्षसीभिरनिन्दिता ॥ ददर्श राक्षसं क्रुद्धं निस्त्रिंशवरधारिणम् ॥ ४६ ॥
[1]तं निशाम्य सनिस्त्रिंशं व्यथिता जनकात्मजा ॥ निवार्यमाणं बहुशः सुहृद्भिरनुवर्तिनम् ॥
सीता दुःखसमाविष्टा विलपन्तीदमब्रवीत् ॥ ४७ ॥
यथाऽयं मामभिक्रुद्धः समभिद्रवति स्वयम् ॥ वधिष्यति सनाथां [2]मामनाथामिव दुर्मतिः ॥ ४८ ॥
बहुशश्चोदयामास भर्तारं मामनुव्रताम् ॥ भार्या [3]मे रमस्वेति प्रत्याख्यातो ध्रुवं मया ॥ ४९ ॥
सोयं ममानुपस्थाने व्यक्तं नैराश्यमागतः ॥ क्रोधमोहसमाविष्टो निहन्तुं मां समुद्यतः ॥ ५० ॥
अथवा तौ नरव्याघ्रौ भ्रातरौ रामलक्ष्मणौ ॥ मन्निमित्तमनार्येण समरेऽद्य निपातितौ ॥ ५१ ॥
[भैरवो हि महान्नादो राक्षसानां श्रुतो मया ॥ बहूनामिह हृष्टानां तथा विक्रोशतां प्रियम् ॥]
अहो धिङ्मन्निमित्तोयं विनाशो राजपुत्रयोः ॥ ५२ ॥
अथवा पुत्रशोकेन अहत्वा[4] रामलक्ष्मणौ ॥ विधमिष्यति मां रौद्रो राक्षसः पापनिश्चयः ॥ ५३ ॥
हनूमतोपि यद्वाक्यं न कृतं क्षुद्रया मया ॥ ५४ ॥
यद्यहं तस्य पृष्ठेन तदा यायामनिन्दिता ॥ नाद्यैवमनुशोचेयं भर्तुरङ्कगता सती ॥ ५५ ॥
मन्ये तु हृदयं तस्याः कौसल्यायाः फलिष्यति ॥ एकपुत्रा यदा पुत्रं विनष्टं श्रोष्यते युधि ॥५६॥
सा हि जन्म च बाल्यं च यौवनं च महात्मनः ॥ धर्मकार्यानुरूपं च रुदन्ती संस्मरिष्यति ॥५७॥
निराशा निहते पुत्रे दत्त्वा श्राद्धमचेतना ॥ अग्निमारोक्ष्यते नूनमपो वाऽपि प्रवेक्ष्यति ॥ ५८ ॥
धिगस्तु कुब्जामसतीं मन्थरां पापनिश्चयाम् ॥ यन्निमित्तमिदं दुःखं कौसल्या प्रतिपत्स्यते ॥ ५९ ॥
इत्येवं मैथिलीं दृष्ट्वा विलपन्तीं तपस्विनीम् ॥ रोहिणीमिव चन्द्रेण विना ग्रहवशं गताम् ॥ ६० ॥
एतस्मिन्नन्तरे तस्य अमात्यो बुद्धिमाञ्शुचिः ॥ सुपार्श्वो नाम मेधावी [5]राक्षसो राक्षसेश्वरम् ॥
[6]निवार्यमाणं सचिवैरिदं वचनमब्रवीत् ॥ ६१ ॥

श्रेष्ठेपि" इत्यमरः ॥ ४१—४४ ॥ ग्रहः अङ्गारकः ॥ ४५—४७ ॥ यथा यस्मादित्यर्थः ॥ ४८—४९ ॥ अनुपस्थाने अनुपस्थानात् ॥ ५० ॥ तौ निहत्य तेन निस्त्रिंशेन सह प्रवेशनमपि संभवतीत्यभिप्रायेणाह—अथवेत्यादि ॥ ५१—५२ ॥ अत्र निमित्तान्तरमाशङ्कते—अथवा पुत्रशोकेनेति ॥ अहत्वा हन्तुमशक्तो भूत्वा ॥ ५३ ॥ हनूमत इत्यर्धं ॥ क्षुद्रया विचारमूढया ॥ ५४ ॥ यायामनुशोचेयमिति "हेतुहेतुमतोर्लिङ्"इति लिङ् ॥ ५५ ॥ प्रथमपक्षानुसारेण शोचति—मन्य इति ॥ ५६ ॥ धर्मकार्यानुरूपं धर्मकार्यानुरूपत्वं ॥ ५७ ॥ अचेतना मूर्च्छिता ॥ ५८—५९ ॥ मैथिलीं दृष्ट्वा रावणमब्रवीदित्यन्वयः ॥ ६०—

षार्थतस्याःकिंचित् दुःखमितिशेषः ॥ ३६—३७ ॥ ति० निवार्यमाणमप्यनिवर्तिनं । अनुवर्तिनमितिपाठे अभिमुखमागच्छन्तं ॥ ४७ ॥ ति० यदाश्रोष्यते तदा फलिष्यति स्फुटिष्यति । यदिरामोपिहन्यतइतिशेषः ॥ ५६ ॥ ति० सुपार्श्वोनामामात्यः शुचिः शुद्धव्रतः । तदितरसचिवैरेवंवक्तुमयोग्यमितिनिवार्यमाणोपि रावणंप्रतीदमब्रवीत् । अस्यैवाविन्ध्यइतिनामान्तरं । अत एवभारते "अशोकवनिकास्थांतांरामदर्शनलालसाम् । खड्गमादायदुष्टात्माजवेनापिपपातह । तद्बुद्ध्यातस्यदुर्बुद्धेरविन्ध्यःपापनिश्च-

[पा०] १ ख. सानिशम्य. २ झ. रनिवर्तिनं. ३ क. ख. ग. ङ. च. झ. ञ. ट. ममभवस्वेति. ४ अयंश्लोकः क. ख. ङ. च. झ. ञ. ट. पाठेषुदृश्यते. ५ क. घ. हत्वातौ. ६ क. ख. ग. ङ. च. झ. ञ. ट. रावणंराक्षसेश्वरं. ७ झ. निवार्यमाणः.

कथं नाम दशग्रीव साक्षाद्वैश्रवणानुज ॥ हन्तुमिच्छसि वैदेहीं क्रोधाद्धर्ममपास्य हि ॥ ६२ ॥
वेदविद्याव्रतस्नातः स्वकर्मनिरतः सदा ॥ स्त्रियाः कस्माद्वधं वीर मन्यसे राक्षसेश्वर ॥ ६३ ॥
मैथिलीं रूपसंपन्नां प्रत्यवेक्षस्व पार्थिव ॥ त्वमेव तु सहास्माभी राघवे क्रोधमुत्सृज ॥ ६४ ॥
अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्दशीम् ॥ कृत्वा निर्याह्यमावास्यां विजयाय बलैर्वृतः ॥ ६५ ॥
शूरो धीमान्रथी खड्गी रथप्रवरमास्थितः ॥ हत्वा दाशरथिं रामं भवान्प्राप्स्यति मैथिलीम् ॥ ६६ ॥
स तद्वुरात्मा सुहृदा निवेदितं वचः सुधर्म्यं प्रतिगृह्य रावणः ॥
गृहं जगामाथ ततश्च वीर्यवान्पुनः सभां च प्रययौ सुहृद्वृतः ॥ ६७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिनवतितमः सर्गः ॥ ९३ ॥

चतुर्नवतितमः सर्गः ॥ ९४ ॥

रामेण रावणमूलबलवधः ॥ १ ॥

स प्रविश्य सभां राजा दीनः परमदुःखितः ॥ निषसादासने मुख्ये सिंहः क्रुद्ध इव श्वसन् ॥ १ ॥
अब्रवीच्च स तान्सर्वान्बलमुख्यान्महाबलः ॥ रावणः प्राञ्जलिर्वाक्यं पुत्रव्यसनकर्षितः ॥ २ ॥
सर्वे भवन्तः सर्वेण हस्त्यश्वेन समावृताः ॥ निर्यान्तु रथसङ्घैश्च पादातैश्चोपशोभिताः ॥ ३ ॥
एकं रामं परिक्षिप्य समरे हन्तुमर्हथ ॥ वर्षन्तः शरवर्षेण प्रावृट्काल इवाम्बुदाः ॥ ४ ॥

---

६४ ॥ अभ्युत्थानं युद्धनिर्याणप्रारम्भं । चतुर्दशीं चतुर्दश्यां । अमावास्यां अमावास्यायां । अनेन त्रयोदशयुद्धदिनान्यतीतानीत्यवगम्यते । तथाहि "ततोऽस्तमगमत्सूर्यः संध्यया प्रतिरञ्जितः । पूर्णचन्द्रप्रदीपा च क्षपा समभिवर्तत" इति वचनात् । पौर्णमास्यां सुवेलाप्रवेशः । ततः कृष्णपक्षप्रथमायां युद्धस्यारम्भः । तस्यामेव रात्रौ नागपाशबन्धतद्विमोक्षौ । द्वितीयायां धूम्राक्षस्य वधः । तृतीयायां वज्रदंष्ट्रस्य । चतुर्थ्यामकम्पनस्य । प्रहस्तस्य पञ्चम्यां । षष्ठ्यां रावणमुकुटभङ्गः । सप्तम्यां कुम्भकर्णस्य वधः । अष्टम्यामतिकायादीनां । नवम्यां पुनरिन्द्रजिद्युद्धं । तस्यामेव रात्रौ कुम्भनिकुम्भादीनां वधः । दशम्यां मकराक्षस्य । एकादश्यां द्वादश्यां त्रयोदश्यां चेन्द्रजिद्वधः । वस्तुतस्तु नवम्यां युद्धारम्भात्तदारभ्य दिनद्वयेन रावणेन्द्रजिन्मूलबलव्यतिरिक्तराक्षसनिबर्हणात् एकादशीद्वादशीत्रयोदशीभिरिन्द्रजिद्वध इति चतुर्दश्यामभ्युत्थानवचनं युज्यत एव ॥ ६५—६७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिनवतितमः सर्गः ॥ ९३ ॥

अथ मूलबलयुद्धं—स प्रविश्येत्यादि ॥ १ ॥ रावणः प्राञ्जलिरिति । अनुनयार्थमञ्जलिकरणं ॥ २—३ ॥ परिक्षिप्य आवार्य । शरवर्षेण वृष्ट्या

यम् । शमयामाससंक्रुद्धंश्रूयतांयेनहेतुना"इत्युक्तं ॥ ६१ ॥ स० वैश्रवणानुज ऋषिवंशसंभवस्याधर्मप्रवृत्तिरनुचितेत्यनेनध्वन्यते ॥ ६२ ॥ ति० वेदविद्याग्रहापेक्षितब्रह्मचर्यव्रतपूर्वविद्यां गृहीत्वास्नातोगुरुकुलात्समावृत्तः तदनन्तरंदारग्रहणपूर्वकं नित्याग्निहोत्रादिस्वकर्मनिरतः ॥ ६३ ॥ ती० प्रत्यवेक्षस्व कालान्तरेमैथिलीवशगाभविष्यतीतिप्रत्यवेक्षस्वेत्यर्थः । ति० प्रत्यवेक्षस्व रामवधपर्यन्तमितिशेषः । त्वंतस्मिन्नेव राघवएवक्रोधमुत्सृज ॥ ६३ ॥ रामानु० रथी महारथइत्यर्थः ॥ ६६ ॥ इतित्रिनवतितमः सर्गः ॥ ९३ ॥

स० आहवेसर्वान्हताञ्छ्रुत्वाऽनुत्साहान्युद्धायप्रोत्साहयितुंप्राञ्जलिर्भूत्वाऽब्रवीदित्यर्थः ॥ २ ॥ स० शरवर्षाणि जलवर्षाणि

[पा०] १ ग. ङ. च. झ. ञ. ट. तस्मिन्नेवसहास्माभिराहवे. २ घ. ङ. झ. ञ. चतुर्दशी. ३ ख. सन्नद्धःकवचीखड्गी. ४ ङ. झ. भीमंभवान्. ५ क.—घ. ञ. प्रवृष्टाः. ङ. च. झ. ट. प्रहृष्टाःशरवर्षाणि.

अथ वाऽहं शरैस्तीक्ष्णैर्भिन्नगात्रं महारणे ॥ भवद्भिः श्वो निहन्तास्मि रामं लोकस्य पश्यतः ॥ ५ ॥
इत्येतद्राक्षसेन्द्रस्य वाक्यमादाय राक्षसाः ॥ निर्ययुस्ते रथैः शीघ्रैर्नानानीकैः[1] सुसंवृताः ॥ ६ ॥
परिघान्पट्टिशांश्चैव शरखड्गपरश्वधान् ॥ शरीरान्तकरान्सर्वे चिक्षिपुर्वानरान्प्रति ॥ ७ ॥
वानराश्च द्रुमाञ्शैलान्राक्षसान्प्रति चिक्षिपुः ॥ ८ ॥
स संग्रामो महान्भीमः सूर्यस्योदयनं प्रति ॥ रक्षसां वानराणां च तुमुलः समपद्यत ॥ ९ ॥
ते गदाभिर्विचित्राभिः प्रासैः खड्गैः परश्वधैः ॥ अन्योन्यं समरे जघ्नुस्तदा वानरराक्षसाः ॥ १० ॥
एवं प्रवृत्ते संग्रामे ह्युद्धूतं सुमहद्रजः ॥ रक्षसां वानराणां च शान्तं शोणितविस्रवैः ॥ ११ ॥
मातङ्गरथकूलाश्च वाजिमत्स्या ध्वजद्रुमाः ॥ शरीरसंघाटवहाः प्रसस्रुः शोणितापगाः ॥ १२ ॥
ततस्ते वानराः सर्वे शोणितौघपरिप्लुताः ॥ ध्वजवर्मरथानश्वान्नानाप्रहरणानि च ॥
आप्लुत्याप्लुत्य समरे राक्षसानां बभञ्जिरे ॥ १३ ॥
केशान्कर्णललाटांश्च नासिकाश्च प्लवङ्गमाः ॥ रक्षसां दशनैस्तीक्ष्णैर्नखैश्चापि न्यकर्तयन्[3] ॥ १४ ॥
एकैकं राक्षसं सङ्ख्ये शतं वानरपुङ्गवाः ॥ अभ्यधावन्त फलिनं वृक्षं शकुनयो यथा ॥ १५ ॥
तथा गदाभिर्गुर्वीभिः प्रासैः खड्गैः परश्वधैः ॥ निजघ्नुर्वानरान्घोरा[4]राक्षसाः पर्वतोपमाः ॥ १६ ॥
राक्षसैर्युध्यमानानां[5] वानराणां महाचमूः ॥ शरण्यं शरणं याता रामं दशरथात्मजम् ॥ १७ ॥
ततो रामो महातेजा धनुरादाय वीर्यवान् ॥ प्रविश्य राक्षसं सैन्यं शरवर्षं ववर्ष ह ॥ १८ ॥
प्रविष्टं तु तदा रामं मेघाः सूर्यमिवाम्बरे ॥ नाभिजग्मुर्महाघोरं निर्दहन्तं शराग्निना[6] ॥ १९ ॥
कृतान्येव सुघोराणि रामेण रजनीचराः ॥ रणे रामस्य ददृशुः कर्माण्यसुकराणि च ॥ २० ॥
चालयन्तं महानीकं विधमन्तं महारथान्[7] ॥ ददृशुस्ते न वै रामं वातं वनगतं यथा ॥ २१ ॥

हन्तुमर्हथेत्यन्वयः ॥ ४ ॥ स रामो यदि हन्तुं न शक्येत तथापि भवतां शरैः भिन्नगात्रः स्यात् तेन तस्य वधः सुकरो मे भवेदित्यभिप्रायेणाह—अथ वेति ॥ इदानीं यूयं तं हन्तुं न शक्ताश्चेदिदानीं तीक्ष्णैः शरैर्भवद्भिर्भिन्नगात्रं श्वो निहन्तास्मि ॥ ५—८ ॥ सूर्यस्योदयनं प्रति सूर्योदयमारभ्य अन्योन्यं जघ्नुरित्यत्र शिलावृक्षाणामप्युपलक्षणं । राक्षसेभ्योपहृतानि गदाखड्गादीनि राक्षसानामिव वानराणामपि संभवन्तीति वा तथोक्तमिति ज्ञेयं ॥ ९—११ ॥ शरीराण्येव संघाटाः प्लवाः तान् वहन्तीति शरीरसंघाटवहाः ॥ १२ ॥ ततस्ते वानराः सर्वे शोणितौघपरिप्लुता इत्यारभ्य राक्षसानां बभञ्जिर इत्यन्तं सार्धश्लोक एकान्वयः ॥ १३ ॥ रक्षसां केशानिति क्रमेणान्वयः । न्यकर्तयन् चिच्छिदुः ॥ १४—१६ ॥ राक्षसैरिति ॥ वानरसेनाशरणागतिरियं । राक्षसैर्वध्यमानानामित्याकिंचन्यानन्यगतिकत्वोक्तिः । शरण्यमिति दयाद्युक्तिः । राममिति परत्वोक्तिः । दशरथात्मज इति सौलभ्योक्तिः ॥ १७—१९ ॥ कृतान्येव ददृशुः नतु क्रियमाणानीत्यर्थः ॥ २० ॥ न केवलं हस्तलाघवातिशयेन

बाणवर्षाणीतिनीरदसेनोभयपक्षेपिक्रमादर्थोबोध्यः । ति० शरवर्षाणि वर्षयतेति शेषः ॥ ४ ॥ ति० सूर्यस्योदयनंप्रति चतुर्दशीसूर्योदयमारभ्येत्यर्थः । त्रयोदशीरात्रिशेषेरावणस्यसीतासमीपगमनमितिबोध्यं ॥ ९ ॥ स० गदाभिरन्योन्यमित्यादितुनिहतराक्षसानामाच्छिद्यस्थापितैरिदानीमानीतैरितिवावानरैरिदानीमाच्छिन्नैर्गदादिभिरितिवाज्ञेयं । अथवा वानराश्चद्रुमाञ्छैलानितिपूर्वस्मादभिलषितविभक्त्यन्ततयानुकर्षः । ततश्चद्रुमादिभिर्गदादिभिश्चान्योन्यंजघ्नुरित्यन्वयःसंभवतिचायमर्थःसमसमरसमारंभसमयत्वादितिमन्तव्यम् ॥ १० ॥ स० शरीराण्येवसंघाटाः काष्ठनिचयाः । वहन्तीतिवहास्तेषांवहाः । तान्वहन्तीतिनागोजिभट्टविप्रहृप्रदर्शनमदर्शनंज्ञापयतिकर्मण्यण्सूत्रस्य ॥ १२ ॥ स० वानराणांमहाचमूः तदभिन्नासेना ॥ १७ ॥

[पा०] १ ङ. ञ. ट. र्नानानीकैश्चसंयुताः. २ ख. च. छ. ट. व्यदारयन्. घ. ङ. ज. ञ. व्यकर्तयन्. ३ क.—ट. राक्षसैर्वध्यमानानां. ४ ख. ङ.—ट. नाधिजग्मुः. ५ घ. व्यथयन्तं. ६ ग. महाबलान्.

छिन्नं भिन्नं शरैर्दग्धं प्रभग्नं शस्त्रपीडितम् ॥ बलं रामेण ददृशुर्न रामं शीघ्रकारिणम् ॥ २२ ॥
प्रहरन्तं शरीरेषु न ते पश्यन्ति राघवम् ॥ इन्द्रियार्थेषु तिष्ठन्तं भूतात्मानमिव प्रजाः ॥ २३ ॥
एष हन्ति गजानीकमेष हन्ति महारथान् ॥ एष हन्ति शरैस्तीक्ष्णैः पदातीन्वाजिभिः सह ॥२४॥
इति ते राक्षसाः सर्वे रामस्य सदृशात्रणे ॥ अन्योन्यं कुपिता जघ्नुः सादृश्याद्राघवस्य ते ॥ २५ ॥
न ते ददृशिरे रामं दहन्तमरिवाहिनीम् ॥ मोहिताः परमास्त्रेण गान्धर्वेण महात्मनः ॥ २६ ॥
ते तु रामसहस्राणि रणे पश्यन्ति राक्षसाः ॥ पुनः पश्यन्ति काकुत्स्थमेकमेव महाहवे ॥ २७ ॥
भ्रमन्तीं काञ्चनीं कोटिं कार्मुकस्य महात्मनः ॥ अलातचक्रप्रतिमां ददृशुस्ते न राघवम् ॥ २८ ॥
शरीरनाभि सत्त्वार्चिः शरारं नेमिकार्मुकम् ॥ ज्याघोषतलनिर्घोषं तेजोबुद्धि गुणप्रभम् ॥ २९ ॥

कर्मणामदर्शनं रणसंचारलाघवातिशयेन कर्तारमपि न ददृशुरित्याह—चालयन्तमिति ॥ यथा चालनविधमनादिकार्यलिङ्गात् वायुरनुमितो भवति तद्वद्रामोप्यनुमितः। नतु प्रत्यक्षित इत्यर्थः ॥ २१ ॥ उक्तमर्थं विशदयति—छिन्नमिति ॥ छिन्नं खण्डितं। भिन्नं विदारितं। प्रभग्नं शकलीकृतं। शस्त्रपीडितं हृदयार्पितशल्यं ॥२२॥ इन्द्रियार्थेषु तिष्ठन्तं इन्द्रियार्थाननुतिष्ठन्तं अनुभवन्तं। तेनानुभवेनानुमीयमानमपि भूतात्मानं भूतस्य पञ्चभूतात्मकशरीरस्य आत्मानं जीवात्मानं। प्रजाः यथा न पश्यन्ति तथैव शरीरेषु प्रहरन्तं तेन प्रहारेणानुमीयमानमपि राघवं पुरतश्चक्षुषा नाद्राक्षुरित्यर्थः। यद्वा इन्द्रियार्थेषु प्रत्यक्षतोनुभूयमानेषु गन्धादिगुणेषु निराश्रयगुणावस्थानासंभवात् सौक्ष्म्येणानुवृत्तं भूतात्मानमिव पुष्पाद्यवयवभूतपृथिव्यादिस्वरूपमिवेत्यर्थः ॥ २३ ॥ एष हन्तीत्यादिश्लोकद्वयमेकान्वयं ॥ सदृशान् सादृश्येन प्रतीयमानान्। अन्योन्यं सादृश्यादेव हेतोर्जघ्नुश्चेत्यन्वयः ॥ २४—२५ ॥ राक्षसानां रामादर्शनकारणमाह—न त इति ॥ इदमुपलक्षणं। सादृश्यदर्शनमपि मोहनास्त्रेणेति द्रष्टव्यं। महात्मना महास्वभावेन ॥ २६ ॥ अदर्शनवत्सदृशदर्शनवच्चानेकत्वदर्शनं नास्त्रकृतं किंतु भीतिकृतमित्याह—ते त्विति ॥ तुशब्दः पूर्वस्माद्विशेषपरः। मारीचेनाप्युक्तं—"अपि रामसहस्राणि भीतः पश्यामि रावण" इति ॥ २७ ॥ भ्रमन्तीं रामस्य मण्डलाकारगतिविशेषेष्विति केचित्। निरन्तरज्याकर्षणादिति वयं। अलातचक्रप्रतिमां निर्व्वालं काष्ठं निरन्तरभ्रमणेनान्तरालाग्रहणाच्चक्रत्वेन प्रतीयमानामिवेत्यर्थः ॥ २८ ॥ अथ तत्र समरसमये मण्डलीकृतकार्मुकं रामं सकलरिपुनिघातिसुदर्शनत्वेन रूपयति—शरीरेत्यादिना ॥ "ज्वाला-

ति० इति एषहन्तीत्यादिप्रकारेण कुपिताःसर्वेतेराक्षसाः रामस्यसदृशान् सदृशत्वेनप्रतीयमानान्। राक्षसान् रामसादृश्यादन्योन्यंजघ्नुः। "सदृशारावणस्यैतेरणेराक्षससत्तमाः" इतिपूर्वार्धपाठेरावणेनदेवासुरयुद्धादौसाक्षात्साह्यार्थंमूलबलतयातेषांदृष्टप्रत्ययानामत्यूर्जितबलानामेवसंगृहीतत्वात्तेषांरावणसादृश्यं। स० इति इत्याकारकज्ञानेन। तेसर्वेराक्षसाः एकसैन्यस्थाः रणेराघवास्त्रेणमोहिताःसन्तः रामस्यसदृशाबभूवुः। ततश्चराघवस्यसादृश्यात्कुपिताःसन्तः अन्योन्यं अयंरामइतिसरामइतिपरस्परं जघ्नुः ॥ २५ ॥ स० एतदेवविशदयति—नतइति। सैन्यैकदेशस्थाः रामं अरिवाहिनींगान्धर्वास्त्रेणदहन्तं स्वस्थानेस्थितंतेनास्त्रेणमहात्मना कर्त्रामोहिताःसन्तः नददृशिरे इतियोजना ॥ २६ ॥ स० तत्रैवसैन्यान्तरेवृत्तंरामचरितमाह—तइति। ते रावणप्रेरिताराक्षसाः। रामसहस्राणि विश्वरूपत्वाद्रामस्यतद्गृहीतान्यनन्तरामरूपाणीत्यर्थः। रणेपश्यन्ति। उक्तंचभगवत्पादैः "सएवसर्वत्रचदृश्यमानो विदिक्षुदिक्षुप्रजघानसर्वशः" इति। पुनःक्षणान्तरे एकमेवपश्यन्ति। उक्तंचसंग्रहरामायणे—"अपाङ्गमात्रेणजगन्नियन्तानन्वेकरूपोपिरिपून्निहन्यात्। स्वैश्वर्यमेवंचनिदर्शयन्हिसविश्वरूपोकृतविश्वरूपम्" इत्याद्यारभ्य "एकीचकाराथसरामदेवोदीपाभिमानीहियथाग्निदेवः" इत्यन्तेन। यत्तुभारते "मायावीचासृजन्मायांरावणोराक्षसाधिपः" "अथभूयोपिमायांसव्यदधाद्राक्षसाधिपः" इत्यादिनारावणमायायाऽनेकराक्षसरामलक्ष्मणरूपनिर्माणकथनं तदविरुद्धमित्यत्रापिग्राह्यं ॥ २७ ॥ ति० लाघवातिशयान्मण्डलीकृतकार्मुकंराक्षसान्निघ्नन्तंरामंकालचक्रेणोपमिनोति—शरीरेति। शरीरंमध्यदेहएवनाभिश्चक्रस्येवमध्यंयस्यतत्। सत्वं बलमेवार्चिर्ज्वालायस्यतत्। शराएवाराः मध्यकाष्ठानियस्यतत्। नेमिर्वलयाकारोऽवयवविशेषःतद्रूपंकार्मुकंयस्यतत्। तलंज्याघातवारणं तेनतज्जोघोषोलक्ष्यते। ज्याघोषतलघोषावेवनिर्घोषोध्वनिर्यस्यतत्। तेजः प्रतापः बुद्धिर्ज्ञानं तद्रूपौगुणावेवप्रभायस्यतत् ॥ २९ ॥

[पा०] १ घ. सारथीन्वाजिभिः.

दिव्यास्त्रगुणपर्यन्तं निघ्नन्तं युधि राक्षसान् ॥ ददृशू रामचक्रं तत्कालचक्रमिव प्रजाः ॥ ३० ॥
अनीकं दशसाहस्रं रथानां वातरंहसाम् ॥ अष्टादश सहस्राणि कुञ्जराणां तरस्विनाम् ॥ ३१ ॥

नेम्यरनाभ्यक्षपुरुषाङ्गं सुदर्शनं" इत्युक्तरीत्या चक्रं षडङ्गं भवति। तत्र कोदण्डचक्रमध्यस्थत्वाद्दृढत्वाच्च शरीरं नाभित्वेन दर्शयति—शरीरेति। नाभिः चक्रमध्योन्नतप्रदेशः। शरीरमेव नाभिर्यस्य तत्तथोक्तं। सत्त्वं बलमेवार्चिः ज्वाला यस्य तत् सत्त्वार्चिः। "वह्नेर्द्वयोर्ज्वालकीलावार्चिर्हेतिः शिखा स्त्रियां" इत्यमरः। सत्त्वस्य परसन्तापहेतुत्वादर्चिष्ट्वेन निरूपणं। शरा एवारणि चक्रमध्यशलाकाः यस्य तच्छरारं। सुदर्शनस्य सहस्रारत्वाच्छराणामरत्वरूपणेन युगपत्सहस्रशरसंधानं व्यज्यते। नेमिः आधारश्चक्रप्रान्तः। नेमिभूतं मण्डलीकृतकार्मुकं यस्य तत्कार्मुकनेमीत्यर्थः। एतेन मण्डलीकृतदशायामपि नाभिभूतरामशरीरपरिवेषेण धनुषो महोन्नतत्वमुच्यते। सुदर्शनस्य ज्वालामालया निरन्तरघोषवत्त्वाज्ज्यातलघोषं तद्घोषत्वेन रूपयति—ज्याघोषतलनिर्घोषमिति। तलं ज्याघातवारणं तेन तद्घोषो लक्ष्यते। ज्याघोषतलघोषावेव निर्घोषो यस्य तत्तथोक्तं। तेजः पराक्रम एव बुद्धिः अक्षं यस्य तत्तेजोबुद्धि। यथा "प्लवगसैन्यमुलूकजिता जितं" इत्यत्र उलूकशब्दो लक्षणया कौशिकशब्दं लक्षयित्वा इन्द्रजितमाह, तथा बुद्धिशब्दो बुद्धिजनकाक्षलक्षणया अक्षप्रदेशमाह। गुणः शरीरकान्तिः स एव प्रभा यस्य तत्तथोक्तं। दिव्यास्त्राणां गुणः शक्तिः माहात्म्यं वा तदेव पर्यन्तो धारा यस्य तद्दिव्यास्त्रगुणपर्यन्तं। निघ्नन्तं निघ्नत्। लिङ्गव्यत्यय आर्षः। किंच कालचक्रं ज्योतिश्चक्रमिव स्थितं। विष्णुपुराणे 'यत्र कालचक्रं प्रतिष्ठितं' इति प्रयोगात्। रामचक्रं उक्तरीत्या चक्रमिव स्थितं रामं ददृशुः। ननु यदि रामो मोहनास्त्रेण राक्षसान्संहरेत्तदेन्द्रजितोस्य को विशेषः। उच्यते। नात्र गान्धर्वास्त्रेण मोहनं कृतं। अपितु गान्धर्वप्रयोगे सति वेगातिशयेनाज्ञातस्वपरविभेदतया मोहिताः परस्परं जघ्नुः। यत्र रामो दृष्टः तत्क्षणे तत्र तस्यादर्शनाद्राममुद्दिश्य क्षिप्ताः शराः स्वकीयानेव घ्नन्ति। वेगातिशयादेव नानादिक्षु चक्षुःप्रसरे नानात्वेन दर्शनं। अतएव 'न रामं शीघ्रकारिण'मित्युक्तिः। कार्मुककोटेरलातचक्रप्रतिमत्वं रामस्य चक्रत्वरूपणं च प्रयोगशैघ्र्यादेव संगच्छते। अतएव सुग्रीवादयो मायाबलत्वं शङ्केरन्निति परिहरिष्यति—एतदस्त्रबलमिति। न ते ददृशिर इत्यस्य श्लोकस्यैवं योजना। गान्धर्वास्त्रेण दहन्तं रामं मोहिताः सन्तो न ददृशिरे। मोहोत्र वेगादग्रहणं। गान्धर्वास्त्रं दाहमात्रे हेतुरिति बोध्यं ॥२९–३०॥ अनीकमित्यादि॥ "एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका। पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरं॥ सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः" इत्युक्तरीत्या दशसंख्यासंख्याता पत्तिः। पत्तितस्त्रिगुणं सेनामुखं। सेनामुखतस्त्रिगुणो गुल्मः। गुल्मतस्त्रिगुणो गणः। गणतस्त्रिगुणा वाहिनी। तत्त्रिगुणा पृतना। पृतनातस्त्रिगुणा चमूः। एवंच दशोनत्रिंशताधिकसप्तसहस्रसंख्यालक्षणा चमूरनीकशब्देनोच्यते। सहस्राण्येव साहस्राणि दश साहस्राण्यस्मिन्सन्तीति दशसाहस्रं। रथानां दशसहस्राण्यनीकानीत्यर्थः। एकोनत्रिंशल्लक्षाधिकसप्तकोटिसंख्यासंख्याता रथा इत्युक्तं भवति। रथाङ्गं ७ कोटि २९ लक्षं। अष्टादश सहस्राणीत्यनेन अनीकमित्येतद्विभक्तिविपरिणामेनानुषज्यते। अष्टादश सहस्राण्यनीकानीत्यर्थः। विंशतिसहस्राधिकद्वादशलक्षोत्तरत्रयोदशकोटिसंख्यासंख्याता स्तरस्विनः कुञ्जरा इत्यर्थः। गजाङ्गं १३ कोटि १२ लक्ष २०००० सहस्रं। चतुर्दश सहस्राणीत्यत्रापि अनीकमित्येतद्विपरिणाम्यानुषञ्जनीयम्। चतुर्दश सहस्राण्यनीकानीत्यर्थः। षष्टिसहस्राधिकविंशतिलक्षोत्तरदशकोटिसंख्यासंख्याताः सारोहा वाजिन इत्यर्थः। तुरङ्ग १० कोटि २० लक्ष सहस्रं ६०००। पूर्णे शतसहस्रे द्वे अनीकानीत्यर्थः। अशीतिलक्षोत्तरपञ्चचत्वारिंशत्कोट्यधिकशतकोटिसंख्यासंख्याताः पदातयो राक्षसा इत्यर्थः। पदाति १४५ कोटि ८० लक्षम्। वातरंहसामित्यादिविशेषण-

स० तत्सैन्यसंख्यामाह—**अनीकमिति**। अत्र एकोगजोरथश्चैकइत्याद्यारभ्यानीकगणनायांयावतीसंख्याभवति तावत्संख्याकानांरथानांपुनश्चदशसहस्रं। अनीकमित्येतद्विपरिणतंसत्सर्वत्रान्वेति। एवंचास्यसर्वस्यापिसैन्यस्यसंख्यानिर्णयस्तु "त्रिंशत्सहस्राणिमहौघकानामक्षौहिणीनामथषट्सहस्रं" इत्याचार्योक्तरीत्यानुसंधेयः॥ ३१॥



चतुर्दश सहस्राणि सारोहाणां च वाजिनाम् ॥ पूर्णे शतसहस्रे द्वे राक्षसानां पदातिनाम् ॥ ३२ ॥
दिवसस्याष्टमे भागे शरैरग्निशिखोपमैः ॥ हतान्येकेन रामेण रक्षसां कामरूपिणाम् ॥ ३३ ॥
ते हताश्वा हतरथाः शान्ता विमथितध्वजाः ॥ अभिपेतुः पुरीं लङ्कां हतशेषा निशाचराः ॥३४॥
हतैर्गजपदात्यश्वैस्तद्बभूव रणाजिरम् ॥ आक्रीडमिव रुद्रस्य क्रुद्धस्य सुमहात्मनः ॥ ३५ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ साधु साध्विति रामस्य तत्कर्म समपूजयन् ॥ ३६ ॥
अब्रवीच्च तदा रामः सुग्रीवं प्रत्यनन्तरम् ॥ विभीषणं च धर्मात्मा हनूमन्तं च वानरम् ॥ ३७ ॥
जाम्बवन्तं हरिश्रेष्ठं मैन्दं द्विविदमेव च ॥ एतदस्त्रबलं दिव्यं मम वा त्र्यम्बकस्य वा ॥ ३८ ॥
निहत्य तां राक्षसवाहिनीं तु रामस्तदा शक्रसमो महात्मा ॥
अस्त्रेषु शस्त्रेषु जितक्लमश्च संस्तूयते देवगणैः प्रहृष्टैः ॥ ३९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्नवतितमः सर्गः ॥ ९४ ॥

पञ्चनवतितमः सर्गः ॥ ९५ ॥

तत्रतत्रराक्षसीभिस्सङ्गीभूय बन्धुनिधनशोकेन रावणगर्हणपूर्वकंविलापः ॥ १ ॥

तानि तानि सहस्राणि सारोहाणां च वाजिनाम् ॥ रथानां त्वग्निवर्णानां सध्वजानां सहस्रशः ॥ १ ॥
राक्षसानां सहस्राणि गदापरिघयोधिनाम् ॥ काञ्चनध्वजचित्राणां शूराणां कामरूपिणाम् ॥ २ ॥
निहतानि शरैस्तीक्ष्णैस्तप्तकाञ्चनभूषणैः ॥ रावणेन प्रयुक्तानि रामेणाक्लिष्टकर्मणा ॥ ३ ॥

महिम्ना तद्भिन्ना रथगजतुरगपदातयोसंख्येया इति भावः । अत एवैवमनुसंदधते—"नागानामयुतं तुरङ्गनियुतं सार्धं रथानां शतं पादातं शतकोटि कर्तनविधावेकः कबन्धो रणे । एवं कोटिकबन्धकर्तनविधौ किंचिद्भनिः किंकिणी यामार्धं परमात्मनो रघुपतेः कोदण्डघण्टारवः" इति ॥ कामरूपिणां रक्षसां संबन्धीनि । रथादिचतुरङ्गबलानि एकेन रामेण दिवसस्याष्टमेभागे पादोनघटिकाचतुष्टये निहतानीत्यन्वयः ॥ ३१—३४ ॥ हतैरिति । हतगजाद्युपलक्षितं सुमहात्मनो रामस्य तद्रणाजिरं रुद्रस्य आक्रीडं क्रीडास्थानं श्मशानमिव बभूव । आर्षं नपुंसकत्वं । "अचिरेण पुरी लङ्का श्मशानसदृशी भवेत्" इति पूर्वोक्तेः ॥ ३५—३६ ॥ अब्रवीच्चेत्यादिश्लोकद्वयमेकान्वयं ॥ प्रत्यनन्तरं समीपस्थं । क्षणेनानेन रक्षःप्रतिक्षेपजनितां मायावित्वशङ्कां वारयति—एतदस्त्रबलमिति । अत्रान्ते इतिकरणं द्रष्टव्यं । अस्त्रबलं अस्त्रप्रयोगशक्तिः । न त्वस्त्रमपि, 'गान्धर्वेण च गान्धर्वं' इति रावणादेरपि तत्संभवकथनात् । त्र्यम्बकस्य वा संहारकाले अस्तीति शेषः ॥ ३७—३८ ॥ संस्तूयत इति वर्तमाननिर्देशेन स्तुतेरद्याप्यविच्छिन्नत्वमुच्यते ॥ ३९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्नवतितमः सर्गः ॥ ९४ ॥

अथ राक्षसीनां प्रलापः—तानितानीत्यादिचतुःश्लोकी ॥ वाजिनामित्येतद्रजानामप्युपलक्षणं । सह-

---

ति० दिवसस्याष्टभागेन चतुर्दशीसंबन्ध्यन्त्यमुहूर्तद्वयेन ॥ ३३ ॥ ति० ममवार्त्र्यंबकस्यवा । अनेनास्त्रस्यविष्णुत्वंसूचितं ॥ ३८ ॥ इतिचतुर्नवतितमःसर्गः ॥ ९४ ॥

[पा०] १ क. ग. ङ.—ट. दिवसस्याष्टभागेन. २ ग. घ. आक्रीडभूमीरुद्रस्यक्रुद्धस्येवमहात्मनः. क. ख. ङ. च. छ. झ. ञ. ट. आक्रीडभूमिःक्रुद्धस्यरुद्रस्येवमहात्मनः. ज. आक्रीडभूमीरुद्रस्यक्रुद्धस्येवपिनाकिनः. ३ ग. घ. ङ. झ. ञ. ट. बलंभीमं. क. ख. बलंसर्वं. ४ ख. ङ. च. छ. झ. ञ. राक्षसराजवाहिनींरामः. घ. राक्षससंघवाहिनीं. ५ क. ग. ङ. प्रहृष्टः. ६ क. ख. ङ. च. छ. झ. ञ. ट. तानिनागसहस्राणि. ७ घ. परिघशोभिनां.

दृष्ट्वा श्रुत्वा च संभ्रान्ता हतशेषा निशाचराः ॥ राक्षसीश्च समागम्य दीनाश्चिन्तापरिप्लुताः ॥ ४ ॥
विधवा हतपुत्राश्च क्रोशन्त्यो हतबान्धवाः ॥ राक्षस्यः सह संगम्य दुःखार्ताः पर्यदेवयन् ॥ ५ ॥
कथं शूर्पणखा वृद्धा कराला निर्णतोदरी ॥ आससाद वने रामं कन्दर्पमिव रूपिणम् ॥
सुकुमारं महासत्त्वं सर्वभूतहिते रतम् ॥ ६ ॥
तं दृष्ट्वा लोकनिन्द्या सा हीनरूपा प्रकामिता ॥ कथं सर्वगुणैर्हीना गुणवन्तं महौजसम् ॥
सुमुखं दुर्मुखी रामं कामयामास राक्षसी ॥ ७ ॥
जनस्थास्थाल्पभाग्यत्वाद्वलिनी श्वेतमूर्धजा ॥ अकार्यमप्रहास्यं च सर्वलोकविगर्हितम् ॥ ८ ॥
राक्षसानां विनाशाय दूषणस्य खरस्य च ॥ चकाराप्रतिरूपा सा राघवस्य प्रधर्षणम् ॥
तन्निमित्तमिदं वैरं रावणेन कृतं महत् ॥ ९ ॥
वधाय सीता सानीता दशग्रीवेण रक्षसा ॥ न च सीतां दशग्रीवः प्राप्नोति जनकात्मजाम् ॥
बद्धं बलवता वैरमक्षयं राघवेण च ॥ १० ॥
वैदेहीं प्रार्थयानं तं विराधं प्रेक्ष्य राक्षसम् ॥ हतमेकेन रामेण पर्याप्तं तन्निदर्शनम् ॥ ११ ॥
चतुर्दशसहस्राणि रक्षसां भीमकर्मणाम् ॥ निहतानि जनस्थाने शरैरग्निशिखोपमैः ॥ १२ ॥
खरश्च निहतः सङ्ख्ये दूषणस्त्रिशिरास्तथा ॥ शरैरादित्यसंकाशैः पर्याप्तं तन्निदर्शनम् ॥ १३ ॥
हतो योजनबाहुश्च कबन्धो रुधिराशनः ॥ क्रोधान्नादं नदन्सोथ पर्याप्तं तन्निदर्शनम् ॥ १४ ॥
जघान बलिनं रामः सहस्रनयनात्मजम् ॥ वालिनं मेरुसंकाशं पर्याप्तं तन्निदर्शनम् ॥ १५ ॥
ऋश्यमूके वसञ्शैले दीनो भग्नमनोरथः ॥ सुग्रीवः स्थापितो राज्ये पर्याप्तं तन्निदर्शनम् ॥ १६ ॥
[एको वायुसुतः प्राप्य लङ्कां हत्वा च राक्षसान् ॥ दग्ध्वा तां च पुनर्यातः पर्याप्तं तन्निदर्शनम् ॥१७॥
निगृह्य सागरं तस्मिन्सेतुं बद्ध्वा प्लवङ्गमैः ॥ वृतोऽतरत्तं यद्रामः पर्याप्तं तन्निदर्शनम् ॥ १८ ॥]
धर्मार्थसहितं वाक्यं सर्वेषां रक्षसां हितम् ॥ युक्तं विभीषणेनोक्तं मोहात्तस्य न रोचते ॥ १९ ॥
विभीषणवचः कुर्याद्यदि स धनदानुजः ॥ श्मशानभूता दुःखार्ता नेयं लङ्का पुरी भवेत् ॥ २० ॥

स्रशः सहस्राणि । राक्षसीः राक्षसस्त्रियः । समागम्य चिन्तापरिप्लुताः । आसन्निति शेषः ॥ १—४ ॥ संगम्य संघीभूय । परस्परमालिङ्गिता इत्यर्थः ॥ ५ ॥ कथमित्यादिसार्धश्लोकमेकं वाक्यं ॥ कराला विकटा ॥ ६ ॥ तं दृष्ट्वेत्यादिसार्धश्लोकमेकं वाक्यं ॥ प्रकामिता सा कथं कामयामास ॥ ७ ॥ जनस्थेत्यादिसार्धश्लोकद्वयमेकं वाक्यं ॥ वलयोस्याः सन्तीति वलिनी । पामादित्वान्नः । आर्षो ङीप् । अप्रतिरूपा अननुरूपा । तन्निमित्तं प्रधर्षणनिमित्तात् । शूर्पणखयाऽन्यथोक्तावपि तत्कामनादिकमकम्पनादिमुखात्सर्वैर्ज्ञातमिति ज्ञेयं ॥ ८—१० ॥ विराधं प्रेक्ष्य ज्ञात्वा स्थितानामस्माकं तत् विराधहननं । विरोधिनिरसनाय पर्याप्तं पूर्णं निदर्शनं ॥ ११ ॥ चतुर्दशेतिश्लोके पर्याप्तं तन्निदर्शनमित्यनुषज्यते ॥ उत्तरश्लोकेनैकवाक्यत्वे शरपदद्वयवैयर्थ्यं ॥ १२—१३ ॥ अथ खरवधानन्तरं । नादं शब्दं । नदन् कुर्वन् । सः

ति० वलिनी जरावशाज्जातवलिः । व्रीह्यादित्वादिनिः ॥ ८ ॥ शि० अक्षयंवैरंबलवतारावणेन । बद्धंरावणेनेतिशेषः । एतेनरावणस्यापिविघातोऽवश्यंभविष्यतीतिसूचितं ॥ १० ॥

[पा०] १ क. ग.—ट. राक्षस्यश्च. २ ख. ङ. च. छ. झ. ट. कंदर्पसमरूपिणं. ३ ग. ङ.—ट. लोकवध्या. ४ क.—ङ. छ. झ. ट. मेघसंकाशं. ५ ङ. झ. वसंश्चैवदीनो. ६ ङ. झ. ट. प्रापितो. ७ एतच्छ्लोकद्वयं क. पाठेदृश्यते. ८ घ. इत्थं. ९ ङ. झ. भविष्यति.

कुम्भकर्णं हतं श्रुत्वा राघवेण महाबलम् ॥ अतिकायं च दुर्धर्षं लक्ष्मणेन हतं पुनः ॥
प्रियं चेन्द्रजितं पुत्रं रावणो नावबुध्यते ॥ २१ ॥
[पुरा हनुमता लङ्कां दग्धां लाङ्गूलवह्निना ॥ हतमक्षकुमारं च दृष्ट्वाऽसौ नावबुध्यते ॥ २२ ॥]
मम पुत्रो मम भ्राता मम भर्ता रणे हतः ॥ इत्येवं श्रूयते शब्दो राक्षसानां कुले कुले ॥ २३ ॥
रथाश्चाश्वाश्च नागाश्च हताः शतसहस्रशः ॥ रणे रामेण शूरेण राक्षसाश्च पदातयः ॥ २४ ॥
रुद्रो वा यदि वा विष्णुर्महेन्द्रो वा शतक्रतुः ॥ हन्ति नो रामरूपेण यदि वा स्वयमन्तकः ॥२५॥
हतप्रवीरा रामेण निराशा जीविते वयम् ॥ अपश्यन्तो भयस्यान्तमनाथा विलपामहे ॥ २६ ॥
रामहस्तादृशग्रीवः शूरो दत्तमहावरः ॥ इदं भयं महाघोरमुत्पन्नं नावबुध्यते ॥ २७ ॥
न देवा न च गन्धर्वा न पिशाचा न राक्षसाः ॥ उपसृष्टं परित्रातुं शक्ता रामेण संयुगे ॥ २८ ॥
उत्पाताश्चापि दृश्यन्ते रावणस्य रणे रणे ॥ कथयिष्यन्ति रामेण रावणस्य निबर्हणम् ॥ २९ ॥
पितामहेन प्रीतेन देवदानवराक्षसैः ॥ रावणस्याभयं दत्तं मानुषेभ्यो न याचितम् ॥ ३० ॥
तदिदं मानुषं मन्ये प्राप्तं निस्संशयं भयम् ॥ जीवितान्तकरं घोरं रक्षसां रावणस्य च ॥ ३१ ॥
पीड्यमानास्तु बलिना वरदानेन रक्षसा ॥ दीप्तैस्तपोभिर्विबुधाः पितामहमपूजयन् ॥ ३२ ॥
देवतानां हितार्थाय महात्मा वै पितामहः ॥ उवाच देवताः सर्वा इदं तुष्टो महद्वचः ॥ ३३ ॥
अद्यप्रभृति लोकांस्त्रीन्सर्वे दानवराक्षसाः ॥ भयेन प्रावृता नित्यं विचरिष्यन्ति शाश्वतम् ॥ ३४ ॥
दैवतैस्तु समागम्य सर्वैश्चेन्द्रपुरोगमैः ॥ वृषध्वजस्त्रिपुरहा महादेवः प्रसादितः ॥ ३५ ॥
प्रसन्नस्तु महादेवो देवानेतद्वचोऽब्रवीत् ॥ उत्पत्स्यति हितार्थं वो नारी रक्षःक्षयावहा ॥ ३६ ॥
एषा देवैः प्रयुक्ता तु क्षुद्यथा दानवान्पुरा ॥ भक्षयिष्यति नः सीता राक्षसघ्नी सरावणान् ॥३७॥
रावणस्यापनीतेन दुर्विनीतस्य दुर्मतेः ॥ अयं निष्ठानको घोरः शोकेन समभिप्लुतः ॥ ३८ ॥
तं न पश्यामहे लोके यो नः शरणदो भवेत् ॥ राघवेणोपसृष्टानां कालेनेव युगक्षये ॥ ३९ ॥
नास्ति नः शरणं कश्चिद्भये महति तिष्ठताम् ॥ दवाग्निवेष्टितानां हि करेणूनां यथा वने ॥ ४० ॥

प्रसिद्धः कबन्धः ॥ १४—२० ॥ नावबुध्यते राम-प्रभावमिति शेषः ॥ २१—२२ ॥ कुले कुले गृहे गृहे । इदमपि राक्षसीवाक्यमेव ॥ २३-२५ ॥ वय-मित्येतदपेक्षया अपश्यन्त इति पुँलिङ्गं । विलपामहे इत्यात्मनेपदमार्षं ॥ २६—२७ ॥ उपसृष्टं उपद्रुतं ॥ २८ ॥ कथयिष्यन्ति इतः परमपि कानिचिन्नि-मित्तानि प्रादुर्भूय कथयिष्यन्तीत्यर्थः । वर्तमाने तात्पर्यमित्यप्याहुः ॥ २९ ॥ देवदानवराक्षसैः देव-दानवराक्षसेभ्यः ॥ ३० ॥ मानुषं मानुषादागतं । मन्ये मन्यामहे ॥ ३१ ॥ रक्षसा रावणेन । वरदा-नेन करणेन ॥ ३२—३३ ॥ दानवराक्षसा इत्युक्ते-र्मन्दोदरीसंबन्धेन दानवाश्च केचिद्राक्षसैः सह तिष्ठन्तीति ज्ञेयम् ॥ ३४—३६ ॥ क्षुद्यथा दानवा-न्पुरेति । देवेभ्योऽमृतप्रदानानन्तरमिति बोध्यं । अस्मच्छब्दापेक्षया सरावणानित्युक्तिः ॥ ३७ ॥ निष्ठानकः नाश इत्याहुः ॥ ३८ ॥ पश्यामह इत्या-

ति० दानवाराक्षसाश्चभयेनप्रभृताः देवेभ्योभयंबिभ्राणाएवविचरिष्यन्ति । देवाःस्वतःपरतोवाअस्मान्पीडयिष्यन्तीतिभययुक्ता एवभविष्यन्तीत्यर्थः ॥ ३४ ॥ **ति०** एवंब्रह्मणःप्रसादात्सभयत्वमात्रंप्राप्तं । संहाराधिकृतरुद्रप्रसादेनतुनाशएवास्माकमित्याहुः—दैवतैरिति ॥ ३५ ॥ **रामानु०** अपनीतेन अपनयेन । निष्ठानको विनाशः ॥ ३८ ॥

[**पा०**] १ ज. निपातितं. २ घ. नानुमन्यते. ३ अर्धश्लोकः च. छ. पाठयोर्दृश्यते. ४ क. ख. ग. ङ.—ट. इत्येष. ५ ख. ङ. च. ज. ट. राक्षसीनां. ६ ङ. झ. हताश्चापिपदातयः. ७ क. रावणस्यनिवेशने. ८ झ. ञ. ट. भयेनप्रभृताः. ख. तेभयैःप्रावृताः. ९ ङ. झ. प्रतोषितः. १० ङ. झ. नस्सर्वांत्राक्षसघ्नी. ११ ङ. झ. किंचिद्भयं.

प्राप्तकालं कृतं तेन पौलस्त्येन महात्मना ॥ यत एव भयं दृष्टं तमेव शरणं गतः ॥ ४१ ॥
इतीव सर्वा रजनीचरस्त्रियः परस्परं संपरिरभ्य बाहुभिः ॥
[1]विषेदुरार्ता भयभारपीडिता विनेदुरुच्चैश्च तदा सुदारुणम् ॥ ४२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चनवतितमः सर्गः ॥ ९५ ॥

षण्णवतितमः सर्गः ॥ ९६ ॥

राक्षसीगणविलापश्रवणरुष्टेनरावणेन राक्षसान्प्रतिसंनाहनचोदनपूर्वकं स्वप्रतापप्रशंसनेन रामादिवधप्रतिज्ञानम् ॥ १ ॥ तथा महापार्श्वादिभिःसह रथाधिरोहणेनरणधरणिंगतेनतेन बाणगणैर्वानरगणविदारणम् ॥ २ ॥

आर्तानां राक्षसीनां तु लङ्कायां वै कुले कुले ॥ रावणः करुणं शब्दं शुश्राव परिदेवितम् ॥ १ ॥
स तु दीर्घं [2]विनिश्वस्य मुहूर्तं ध्यानमास्थितः ॥ बभूव परमक्रुद्धो रावणो भीमदर्शनः ॥ २ ॥
संदश्य दशनैरोष्ठं क्रोधसंरक्तलोचनः ॥ राक्षसैरपि दुर्दर्शः [3]कालाग्निरिव मूर्च्छितः ॥ ३ ॥
उवाच च समीपस्थान्राक्षसान्राक्षसेश्वरः ॥ भयाँव्यक्तकथस्तत्र निर्दहन्निव चक्षुषा ॥ ४ ॥
महोदरमहापार्श्वौ विरूपाक्षं च राक्षसम् ॥ शीघ्रं वदत सैन्यानि निर्यातेति ममाज्ञया ॥ ५ ॥
तस्य तद्वचनं श्रुत्वा राक्षसास्ते भयार्दिताः ॥ चोदयामासुरव्यग्रान्राक्षसांस्तान्नृपाज्ञया ॥ ६ ॥
ते तु सर्वे तथेत्युक्त्वा राक्षसा घोरदर्शनाः ॥ कृतस्वस्त्ययनाः सर्वे रणायाभिमुखा ययुः ॥ ७ ॥
प्रतिपूज्य यथान्यायं रावणं ते निशाचराः ॥ तस्थुः प्राञ्जलयः सर्वे भर्तुर्विजयकाङ्क्षिणः ॥ ८ ॥
अथोवाच प्रहस्यैतान्रावणः क्रोधमूर्च्छितः ॥ महोदरमहापार्श्वौ विरूपाक्षं च राक्षसम् ॥ ९ ॥

लनेपदमार्षं ॥ ३९—४० ॥ प्राप्तकालं उचितं । पौलस्त्येनविभीषणेन । इतः परं तस्यैव पौलस्त्यकुलप्रतिष्ठापकत्वात्तच्छब्दप्रयोगः । अत्र पितामहादिवरप्रदानवृत्तान्तो राक्षसीभिर्मन्दोदरीसकाशाच्छ्रुत इति ज्ञेयं । सा च ज्ञानवृद्धेति वक्ष्यते ॥४१—४२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चनवतितमःसर्गः९५

अथ रावणनिर्याणं—आर्तानामित्यादि ॥ परिदेवितं परिदेवितरूपं शब्दं ॥ १—२ ॥ संदश्येत्यादिश्लोकत्रयमेकान्वयं ॥ मूर्च्छितः अभिवृद्धः, कालाग्निरिव स्थितः । भयाव्यक्तकथः भयादव्यक्तवचनः । ममाज्ञया वदतेत्युवाचेत्यन्वयः । इमौ महोदरमहापार्श्वौ सचिवौ । पूर्वहतौ तु मत्तप्रमत्तापरपर्यायौ रावणभ्रातरौ ॥ ३—८ ॥ प्रहस्येति । शत्रुषु तृणी-

ति० प्राप्तकालं कालोचितं । यतएव यस्माद्रामादेव । भयंदृष्टंस्वमन्त्रशक्तिवैभवेनेतिशेषः ॥४१॥ इतिपञ्चनवतितमःसर्गः ॥९५॥

स० करुणं करुणयतीति करुणस्तं । परिदेवितं प्रलापात्मकं ॥ रामानु० भयाव्यक्तकथः स्वानिष्टभयेनास्पष्टराक्षसकथ इत्यर्थः । भयाव्यक्तकथानितिचपाठः । स० भयाव्यक्तकथः भयेनरामभीत्या अव्यक्तामन्दा कथा कथनंयस्यसः । भयाव्यक्तकथ इतिपाठे व्यक्ता अबहिःप्रकाश्यार्थस्यापिप्रकाशिकाकथायस्य । आच्छाद्यानाच्छादनहेतुर्भीतिरितिभावः ॥ ४ ॥ शि० ममाज्ञयासैन्यानि यूयंनिर्यात निर्यापयत निस्सारयत इतिमहोदरादीन् शीघ्रंवदत । यदितुसैन्यशब्देन रिपुसेनागृह्येत तदानान्तर्भावितणिच्कल्पना ॥ ५ ॥ स० भयार्दिताः गमनेरामतोभीतिः भीतिश्चागमनेरावणादितिभयार्दिताः । अव्यग्रान् सहगामिभामिनीवन्निर्णीतमरणत्वेनाव्यक्तान् । यत्तुनागोजिभट्टेनरावणप्रोत्साहनेनत्यक्तभयानितिव्याख्यातं तत्तु सुपार्श्वादीनांनेतॄणांयदाभयार्दितत्वोक्तापूर्वं तन्नियम्यानांराक्षसानांरावणप्रोत्साहनेनाव्यग्रत्वोक्त्यसंभवादुपेक्ष्यं ॥ ६ ॥ स० सर्वे हिंसकेरामे तद्विषयेरणाभिमुखाः सर्वे कृतस्वस्त्ययनाययुः ॥ ७ ॥ ति० क्रोधजोत्रप्रहासः । स० प्रहस्य रोदनापरपर्यायोऽयंहासः ॥ ९ ॥

[पा०] १ क. च. छ. ञ. विलेपुरार्ताः. ङ. झ. ट. विषेदुरार्तातिभयाभिपीडिताः. २ समुच्छ्वस्य. ३ ङ. झ. कालाग्निरिवमूर्तिमान्. ४ ङ. झ. ट. क्रोधाव्यक्तकथः, ख. भियाऽव्यक्तकथः. ५ क. ङ.—ट. महोदरंमहापार्श्वं. ६ क.—ट. महारथाः.

अद्य बाणैर्धनुर्मुक्तैर्युगान्तादित्यसन्निभैः ॥ राघवं लक्ष्मणं चैव नेष्यामि यमसादनम् ॥ १० ॥
खरस्य कुम्भकर्णस्य प्रहस्तेन्द्रजितोस्तथा ॥ करिष्यामि प्रतीकारमद्य शत्रुवधादहम् ॥ ११ ॥
नैवान्तरिक्षं न दिशो न नद्यो नापि सागराः ॥ प्रकाशत्वं गमिष्यन्ति मद्बाणजलदावृताः ॥ १२ ॥
अद्य वानरमुख्यानां तानि यूथानि भागशः ॥ धनुषा शरजालेन विधमिष्यामि पत्त्रिणा ॥ १३ ॥
अद्य वानरसैन्यानि रथेन पवनौजसा ॥ धनुःसमुद्रादुद्भूतैर्मथिष्यामि शरोर्मिभिः ॥ १४ ॥
आकोशपद्मवक्त्राणि पद्मकेसरवर्चसाम् ॥ अद्य यूथतटाकानि गजवत्प्रमथाम्यहम् ॥ १५ ॥
सशरैरद्य वदनैः सङ्ख्ये वानरयूथपाः ॥ मण्डयिष्यन्ति वसुधां सनालैरिव पङ्कजैः ॥ १६ ॥
अद्य युद्धप्रचण्डानां हरीणां द्रुमयोधिनाम् ॥ मुक्तैनैकेषुणा युद्धे भेत्स्यामि च शतं शतम् ॥ १७ ॥
हतो भर्ता हतो भ्राता यासां च तनया हताः ॥ वधेनाद्य रिपोस्तासां करोम्यस्रप्रमार्जनम् ॥ १८ ॥
अद्य मद्बाणनिर्भिन्नैः प्रकीर्णैर्गतचेतनैः ॥ करोमि वानरैर्युद्धे यत्रावेक्ष्यतलां महीम् ॥ १९ ॥
अद्य गोमायवो गृध्रा ये च मांसाशिनोऽपरे ॥ सर्वांस्तांस्तर्पयिष्यामि शत्रुमांसैः शरार्पितैः ॥२० ॥
कल्प्यतां मे रथः शीघ्रं क्षिप्रमानीयतां धनुः ॥ अनुप्रयान्तु मां सर्वे येऽवशिष्टा निशाचराः ॥ २१॥
तस्य तद्वचनं श्रुत्वा महापार्श्वोब्रवीद्वचः ॥ बलाध्यक्षान्स्थितांस्तत्र बलं संत्वर्यतामिति ॥ २२ ॥
[बलाध्यक्षस्य तच्छ्रुत्वा महापार्श्वस्य भाषितम् ॥] बलाध्यक्षास्तु संरब्धा राक्षसांस्तान्गृहाद्गृहात् ॥
चोदयन्तः परिययुर्लङ्कायां तु महाबलाः ॥ २३ ॥
ततो मुहूर्तान्निष्पेतू राक्षसा भीमदर्शनाः ॥ नर्दन्तो भीमवदना नानाप्रहरणैर्भुजैः ॥ २४ ॥
असिभिः पट्टिशैः शूलैर्गदाभिर्मुसलैर्हुलैः ॥ शक्तिभिस्तीक्ष्णधाराभिर्महद्भिः कूटमुद्गरैः ॥ २५ ॥
यष्टिभिर्विमलैश्चक्रैर्निशितैश्च परश्वधैः ॥ भिण्डिपालैः शतघ्नीभिरन्यैश्चापि वरायुधैः ॥ २६ ॥
अथानयद्बलाध्यक्षः सत्वरो रावणाज्ञया ॥ [रथानां नियुतं साग्रं नागानां नियुतत्रयम् ॥ २७ ॥

कारात् ॥ ९—१० ॥ खरस्येत्यादिषु वधस्येति शेषः ॥ ११—१४ ॥ आकोशपद्मवक्त्राणि ईषद्विकसितपद्मभूतवक्त्राणि । पद्मकेसरवर्चसां वानराणामिति शेषः । प्रमथामि प्रमथ्नामि । आभाव आर्षः ॥ १५—१८ ॥ गतचेतनैः गतप्राणैः । यत्रावेक्ष्यतलामिति । नैरन्तर्येण भूमौ वानरान्पातयिष्यामीत्यर्थः ॥ १९—२० ॥ कल्प्यतां आकल्प्यतां । अलंक्रियतामित्यर्थः ॥ २१—२२ ॥ संरब्धा इति । पुनःपुनराह्वानेप्यनागमनात्कुपिताइत्यर्थः । परिययुः प्रतिरभ्यं ययुरित्यर्थः ॥ २३ ॥ तत इत्यादिश्लोकत्रयमेकान्वयं ॥ हुलैः द्विफलपत्राग्रायुधविशेषैः । "हुलं द्विफलपत्राग्रं"इति वैजयन्ती । भुजैरित्याद्युपलक्षणे तृतीया ॥ २४—२६ ॥ 'अथानयद्बलाध्यक्षः सर्वतो रावणाज्ञया । द्रुतं सूतसमायुक्तं युक्ताष्टतुरगं

स० यंरामं असादनंअसंहार्यमन्यध्वे तंराघवंलक्ष्मणंच । यमसादनं यमलोकं । "वस्तुतस्तु रामलक्ष्मणंचविनाऽन्यानितिशेषः" इतितीर्थस्य एकस्यापिकपेरनाशादत्रेवपूर्वत्रोत्तरत्रचवास्तविकीवस्तुतस्तुभ्रान्तिरितिनमनस्तदवलोकनायासेनखेदनीयंविदा । यथा वानराणांनैरोग्यस्यभाविलेपितद्धननोक्तिस्तथारामपक्षेपिसंभवात्तस्याः ॥ १० ॥

[पा० १ ख. धनुस्समुद्रनिर्मुक्तैः. २ क. ख. ग. ङ. ज.—ठ. व्याकोश. ३ घ. यूथप्रचण्डानां. ४ ङ. ञ. ट. हतोभ्राता चयेषांवैयेषांचतनयोहतः. ५ ङ. ञ. ट. स्तेषांकरोम्यश्रु. ६ ङ. ञ. ट. अद्यकाकाश्चगृध्राश्च. ७ ञ. शराहतैः. ग. घ. ज. शरार्दितैः क. सुशोणितैः. ८ ख. अद्यप्रयान्तु. ९ क. घ. ङ. ञ. मांयुद्धे. १० ङ. ञ. ट. येत्रशिष्टाः. ११ इदमर्धं क. च. छ. पाठेषुदृश्यते. १२ ङ. च. ज.—ट. संयुक्ताराक्षसांस्तान्गृहेगृहे. १३ क. घ. ङ. ज.—ट. लङ्कांलघुपराक्रमाः. १४ ङ. ञ. ट. मुसलैर्हलैः. ग. घ. मुसलैश्शरैः. १५ क. ग.—ट. अथानयन्बलाध्यक्षाश्चत्वारो. १६ रथानांनियुतमित्यादयः ज्वलन्तमिवपावकमित्यन्ताःश्लोकाः ग. ङ. च. छ. ञ. पाठेषुदृश्यन्ते.

अश्वानां षष्टिकोट्यस्तु खरोष्ट्राणां तथैव च ॥ पदातयस्त्वसंख्याता जग्मुस्ते राजशासनात् ॥
बलाध्यक्षाश्च संस्थाप्य राज्ञः सेनां पुरस्थिताम् ॥ २८ ॥
एतस्मिन्नन्तरे सूतः स्थापयामास तं रथम् ॥ दिव्यास्त्रवरसंपन्नं नानालङ्कारभूषितम् ॥ २९ ॥
नानायुधसमाकीर्णं किङ्किणीजालसंयुतम् ॥ नानारत्नपरिक्षिप्तं रत्नस्तंभैर्विराजितम् ॥ ३० ॥
जांबूनदमयैश्चैव सहस्रकलशैर्वृतम् ॥ तं दृष्ट्वा राक्षसास्सर्वे विस्मयं परमं गताः ॥ ३१ ॥
तं दृष्ट्वा सहसोत्थाय रावणो राक्षसेश्वरः ॥ कोटिसूर्यप्रतीकाशं ज्वलन्तमिव पावकम् ॥]
द्रुतं सूतसमायुक्तं युक्ताष्टतुरगं रथम् ॥ ३२ ॥
आरुरोह रथं भीमो दीप्यमानं स्वतेजसा ॥ ३३ ॥
ततः प्रयातः सहसा राक्षसैर्बहुभिर्वृतः ॥ रावणः सत्त्वगाम्भीर्याद्दारयन्निव मेदिनीम् ॥ ३४ ॥
[ततश्चासीन्महानादस्तूर्याणां च ततस्ततः ॥ मृदङ्गैः पटहैः शङ्खैः कलहैः सह रक्षसाम् ॥ ३५ ॥
आगतो रक्षसां राजा छत्रचामरसंयुतः ॥ सीतापहारी दुर्वृत्तो ब्रह्मघ्नो देवकण्टकः ॥
योद्धुं रघुवरेणेति शुश्रुवे कलहध्वनिः ॥ ३६ ॥
तेन नादेन महता पृथिवी समकंपत ॥ तं शब्दं सहसा श्रुत्वा वानरा दुद्रुवुर्भयात् ॥ ३७ ॥
रावणस्तु महाबाहुः सचिवैः परिवारितः ॥ आजगाम महातेजा जयाय विजयं प्रति ॥ ३८ ॥]
रावणेनाभ्यनुज्ञातौ महापार्श्वमहोदरौ ॥ विरूपाक्षश्च दुर्धर्षो रथानारुरुहुस्तदा ॥ ३९ ॥
ते तु हृष्टा विनर्दन्तो भिन्दन्त इव मेदिनीम् ॥ नादं घोरं विमुञ्चन्तो निर्ययुर्जयकाङ्क्षिणः ॥४०॥
ततो युद्धाय तेजस्वी रक्षोगणबलैर्वृतः ॥ निर्ययावुद्यतधनुः कालान्तकयमोपमः ॥ ४१ ॥
ततः प्रंजवनाश्वेन रथेन स महारथः ॥ द्वारेण निर्ययौ तेन यत्र तौ रामलक्ष्मणौ ॥ ४२ ॥
ततो नष्टप्रभः सूर्यो दिशश्च तिमिरावृताः ॥ द्विजाश्च नेदुर्घोराश्च संचचालेव मेदिनी ॥ ४३ ॥
ववर्ष रुधिरं देवश्चस्खलुस्तुरगाः पथि ॥ ध्वजाग्रे न्यपतद्गृध्रो विनेदुश्चाशिवं शिवाः ॥ ४४ ॥
नयनं चास्फुरद्वामं सैन्यो बाहुरकम्पत ॥ विवर्णं वदनं चासीत्किंचिदभ्रश्यत स्वरः ॥ ४५ ॥
ततो निष्पततो युद्धे दशग्रीवस्य रक्षसः ॥ रणे निधनशंसीनि रूपाण्येतानि जज्ञिरे ॥ ४६ ॥
अन्तरिक्षात्पपातोल्का निर्घातसमनिस्वना ॥ विनेदुरशिवा गृध्रा वायसैरनुनादिताः ॥ ४७ ॥
एतानचिन्तयन्घोरानुत्पातान्समुपस्थितान् ॥ निर्ययौ रावणो मोहाद्वधार्थी कालचोदितः ॥ ४८ ॥
तेषां तु रथघोषेण राक्षसानां महात्मनाम् ॥ वानराणामपि चमूर्युद्धायैवाभ्यवर्तत ॥ ४९ ॥
तेषां तु तुमुलं युद्धं बभूव कपिरक्षसाम् ॥ अन्योन्यमाह्वयानानां क्रुद्धानां जयमिच्छताम् ॥ ५० ॥

रथमिति पाठः ॥२७–३२॥ आरुरोहेत्यर्धमेकं वाक्यं॥ भीमः रावणः ॥ ३३ ॥ सत्त्वगाम्भीर्यात् बलातिशयात् ॥ ३४—४१ ॥ द्वारेणेति । उत्तरद्वारेणेत्यर्थः ॥ ४२ ॥ ततो नष्टप्रभ इत्यादिश्लोकचतुष्टयमेकान्वयं ॥ ४३–४५ ॥ रूपाणि दुर्निमित्तरूपाणि । ततः अनन्तरं । ततः उत्तरद्वारात् । निष्पततः निष्क्रमतः । सूर्यनष्टप्रभत्वादीनि रूपाणि जज्ञिर इतिसंबन्धः ॥ ४६–४९ ॥ आह्वयानानां आह्वयमानानां स्पर्धया

ति० अमायांसूर्योदयइदंरथारोहणं ॥ ३३ ॥ स० वायसैरभिमिश्रितागृध्राः पूर्वंकेवलानां गृध्राणामत्रतुवायससंमिश्रितानामितिनपुनरुक्तिः ॥ ४७ ॥

[पा०] १ ग. च. छ. झ. ट. दीप्यमानः. २ ततश्चासीदित्यादयःविजयंप्रतीत्यन्ताःश्लोकाः झ. पाठेदृश्यन्ते. ३ ङ. झ. ट. हृष्टाभिनर्दन्तो. ४ क. ङ. झ. ट. प्रजविताश्वेन. ५ ङ. च. झ. ञ. ट. चस्खलुश्चतुरङ्गमाः. ६ ङ. झ. ट. श्चाशिवाः. ७ ग.—छ. झ. ञ. ट. वामोबाहुः. ८ ङ. च. झ. ञ. ट. वायसैरभिमिश्रिताः. ९ ङ. झ. वधार्थं.

ततः क्रुद्धो दशग्रीवः शरैः काञ्चनभूषणैः ॥ वानराणामनीकेषु चकार कदनं महत् ॥ ५१ ॥
निकृत्तशिरसः केचिद्रावणेन वलीमुखाः ॥ केचिद्विच्छिन्नहृदयाः केचिच्छ्रोत्रविवर्जिताः ॥ ५२ ॥
निरुच्छ्वासा हताः केचित्केचित्पार्श्वेषु दारिताः ॥ केचिद्विभिन्नशिरसः केचिच्चक्षुर्विवर्जिताः ॥५३॥
दशाननः क्रोधविवृत्तनेत्रो यतो यतोऽभ्येति रथेन संख्ये ॥
ततस्ततस्तस्य शरप्रवेगं सोढुं न शेकुर्हरिपुङ्गवास्ते ॥ ५४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षण्णवतितमः सर्गः ॥ ९६ ॥

सप्तनवतितमः सर्गः ॥ ९७ ॥

सुग्रीवेण विरूपाक्षवधः ॥ १ ॥

तथा तैः कृत्तगात्रैस्तु दशग्रीवेण मार्गणैः ॥ बभूव वसुधा तत्र प्रकीर्णा हरिभिस्तदा ॥ १ ॥
रावणस्याप्रसह्यं तं शरसंपातमेकतः ॥ न शेकुः सहितुं दीप्तं पतङ्गा ज्वलनं यथा ॥ २ ॥
तेऽर्दिता निशितैर्बाणैः क्रोशन्तो विप्रदुद्रुवुः ॥ पावकार्चिःसमाविष्टा दह्यमाना यथा गजाः ॥३॥
प्लवङ्गानामनीकानि महाभ्राणीव मारुतः ॥ स ययौ समरे तस्मिन्विधमन्रावणः शरैः ॥ ४ ॥
कदनं तरसा कृत्वा राक्षसेन्द्रो वनौकसाम् ॥ आससाद ततो युद्धे राघवं त्वरितस्तदा ॥ ५ ॥
सुग्रीवस्तान्कपीन्दृष्ट्वा भग्नान्विद्रवतो रणे ॥ गुल्मे सुषेणं निक्षिप्य चक्रे युद्धेऽद्भुतं मनः ॥ ६ ॥
आत्मनः सदृशं वीरः स तं निक्षिप्य वानरम् ॥ सुग्रीवोऽभिमुखः शत्रुं प्रतस्थे पादपायुधः ॥ ७ ॥
पार्श्वतः पृष्ठतश्चास्य सर्वे यूथाधिपाः स्वयम् ॥ अनुजह्रुर्महाशैलान्विविधांश्च महाद्रुमान् ॥ ८ ॥
स नर्दन्युधि सुग्रीवः स्वरेण महता महान् ॥ पातयन्विविधांश्चान्यान्नागमोत्तमराक्षसान् ॥ ९ ॥
ममन्थ च महाकायो राक्षसान्वानरेश्वरः ॥ युगान्तसमये वायुः प्रवृद्धानगमानिव ॥ १० ॥
राक्षसानामनीकेषु शैलवर्षं ववर्ष ह ॥ अश्मवर्षं यथा मेघः पक्षिसङ्घेषु कानने ॥ ११ ॥
कपिराजविमुक्तैस्तैः शैलवर्षैस्तु राक्षसाः ॥ विकीर्णशिरसः पेतुर्निकृत्ता इव पर्वताः ॥ १२ ॥
अथ संक्षीयमाणेषु राक्षसेषु समन्ततः ॥ सुग्रीवेण प्रभग्नेषु पतत्सु निनदत्सु च ॥ १३ ॥

आह्वयतां । आगमशासनस्यानित्यत्वान्मुगागमाभावः ॥ ५०—५१ ॥ निकृत्तशिरस इत्यादिश्लोकद्वयं ॥ ५२—५४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षण्णवतितमः सर्गः ॥ ९६ ॥

अथ विरूपाक्षवधः—तथा तैरित्यादि ॥ १ ॥ एकतः एकस्य अद्वितीयस्य ॥ २—५ ॥ अद्भुतमिति क्रियाविशेषणं ॥ ६—७ ॥ महाद्रुमान् उत्पाट्येति शेषः । उत्पाट्य अस्य पार्श्वतः पृष्ठतश्चानुजह्रुरिति संबन्धः । यथा महाराजे युद्धाय गच्छति । तदाऽऽयुधानि भृत्या आहरन्ति ॥ तथा वानरराजे युद्धाय निष्क्रामति तदायुधभूतान् शैलवृक्षादीन् समये दातुं वानरा आजह्रुरिति भावः ॥ ८—९ ॥ अगमान् वृक्षान् । "पलाशी द्रुद्रुमागमाः" इत्यमरः ॥ १०—१२ ॥ संक्षीयमाणेषु हिंस्यमानेषु । " क्षि हिंसायां"

स० तेहरियूथपाः प्राक्तये समरसमर्थत्वेनप्रमितास्ते ॥ ५३ ॥ इतिषण्णवतितमःसर्गः ॥ ९६ ॥

[पा०] १ ङ. च. झ. ञ. ट. चक्षुर्विनाकृताः. २ घ. नशक्तायुधिवानरेन्द्राः. झ.—ठ. नशेकुर्हरियूथपास्ते. ३ क. हरिभिर्हतैः. ४ ज. शरसंघातं. ५ ग. ज. पतङ्गाइवपावकं. ६ ङ. तेहतानिशितैः. ७ ख. ङ. च. छ. झ. ञ. ट. न्विद्राविताव्रणे ८ घ. ङ. छ.—ट. युद्धेद्भुतंमनः. ९ ङ. झ. ट. सर्ववानरयूथपाः. १० ङ. झ. ञ. ट. ननर्दयुधि. ११ च. झ. ञ. ट. पोथयन्नपि. १२ ङ. च. छ. झ. ञ. ट. श्चान्यान्ममन्थोत्तम. १३ ङ. झ. ञ. ट. ममर्दच. १४ ङ. छ. झ. ञ. ट. पेतुर्विकीर्णाइव.

विरूपाक्षः स्वकं नाम धन्वी विश्राव्य राक्षसः ॥ रथादाप्लुत्य दुर्धर्षो गजस्कन्धमुपारुहत् ॥ १४ ॥
स तं द्विरदमारुह्य विरूपाक्षो महारथः ॥ विनदन्भीमनिर्ह्रादं वानरानभ्यधावत ॥ १५ ॥
सुग्रीवे स शरान्घोरान्विससर्ज चमूमुखे ॥ स्थापयामास चोद्विग्नान्राक्षसान्संप्रहर्षयन् ॥ १६ ॥
स तु विद्धः शितैर्बाणैः कपीन्द्रस्तेन रक्षसा ॥ चुक्रोध स महाक्रोधो वधे चास्य मनो दधे ॥ १७ ॥
ततः पादपमुद्धृत्य शूरः संप्रधनो हरिः ॥ अभिपत्य जघानास्य प्रमुखे तु महागजम् ॥ १८ ॥
स तु प्रहाराभिहतः सुग्रीवेण महागजः ॥ अपासर्पद्धनुर्मात्रं निषसाद ननाद च ॥ १९ ॥
गजात्तु मथितात्चूर्णमपक्रम्य स वीर्यवान् ॥ राक्षसोऽभिमुखः शत्रुं प्रत्युद्गम्य ततः कपिम् ॥ २० ॥
आर्षभं चर्म खड्गं च प्रगृह्य लघुविक्रमः ॥ भर्त्सयन्निव सुग्रीवमाससाद व्यवस्थितम् ॥ २१ ॥
स हि तस्याभिसंक्रुद्धः प्रगृह्य विपुलां शिलाम् ॥ विरूपाक्षाय चिक्षेप सुग्रीवो जलदोपमाम् ॥२२॥
स तां शिलामापतन्तीं दृष्ट्वा राक्षसपुङ्गवः ॥ अपक्रम्य सुविक्रान्तः खड्गेन प्राहरत्तदा ॥ २३ ॥
तेन खड्गप्रहारेण रक्षसा बलिना हतः ॥ मुहूर्तमभवद्वीरो विसंज्ञ इव वानरः ॥ २४ ॥
स तदा सहसोत्पत्य राक्षसस्य महाहवे ॥ मुष्टिं संवर्त्य वेगेन पातयामास वक्षसि ॥ २५ ॥
मुष्टिप्रहाराभिहतो विरूपाक्षो निशाचरः ॥ तेन खड्गेन संक्रुद्धः सुग्रीवस्य चमूमुखे ॥
कवचं पातयामास पद्भ्यामभिहतोपतत् ॥ २६ ॥
स समुत्थाय पतितः कपिस्तस्य व्यसर्जयत् ॥ तलप्रहारमशनेः समानं भीमनिस्स्वनम् ॥ २७ ॥
तलप्रहारं तद्रक्षः सुग्रीवेण समुद्यतम् ॥ नैपुण्यान्मोचयित्वैनं मुष्टिनोरस्यताडयत् ॥ २८ ॥
ततस्तु संक्रुद्धतरः सुग्रीवो वानरेश्वरः ॥ मोक्षितं चात्मनो दृष्ट्वा प्रहारं तेन रक्षसा ॥
स ददर्शान्तरं तस्य विरूपाक्षस्य वानरः ॥ २९ ॥
ततो न्यपातयत्क्रोधाच्छङ्खदेशे महत्तलम् ॥ ३० ॥
महेन्द्राशनिकल्पेन तलेनाभिहतः क्षितौ ॥ पपात रुधिरक्लिन्नः शोणितं च समुद्वमन् ॥
स्रोतोभ्यस्तु विरूपाक्षो जलं प्रस्रवणादिव ॥ ३१ ॥

इति धातुः ॥ १३—१७ ॥ संप्रधनः । बहुलमहणात् कर्तरि ल्युट् । प्रहर्तेत्यर्थः । प्रमुखे मुखे ॥ १८ ॥ धनुर्मात्रं धनुःप्रमाणं । "प्रमाणे द्वयसच्दघ्नमात्रचः" इत्यादिना मात्रचूप्रत्ययः ॥ १९ ॥ गजात्त्विति श्लोकद्वयमेकं वाक्यं ॥ व्यवस्थितं निश्चलतया स्थितं ॥ २०—२२ ॥ अपक्रम्य शिलापातपरिहारार्थमन्यतोपसृत्य प्राहरत् । सुग्रीवमिति शेषः ॥ २३—२५ ॥ मुष्टिप्रहारेत्यादिसार्धश्लोक एकान्वयः ॥ कवचमिति । अनेन सुग्रीवस्यापि कवचधारणमस्तीति गम्यते । पद्भ्यामिति । अभिहतः सन् पद्भ्यामपतदित्यन्वयः ॥ २६—२७ ॥ नैपुण्यात् शिक्षापाटवात् ॥ २८ ॥ ततस्त्विति सार्धश्लोकमेकं वाक्यं ॥ अन्तरं अवकाशं ॥ २९ ॥ तत इत्यर्धं ॥ शङ्खदेशे ललाटास्थिप्रदेशे । "शङ्खो निधौ ललाटास्थ्नि" इत्यमरः ॥ ३० ॥ महे-

---

ति० आर्षभं ऋषभकृत्तिपरिवीतंचर्मफलकं ॥ २१ ॥ ति० तस्यापि तेनापि । दत्तंप्रहारं संगृह्य गृहीत्वा ॥ २२ ॥ रामानु० सखड्गाभिहतोपतत् सखड्गश्चासावभिहतश्चसखड्गाभिहतः । विरूपाक्षप्रेरितखड्गसहितोपतदित्यर्थः । उत्तरत्रविरूपाक्षस्यमुष्टिनैवयुद्धाभिधानात् । ति० अभिहतःसुग्रीवः पद्भ्यामपतत् आकुञ्चितजानुरभवदित्यर्थः ॥ २६ ॥ इतिसप्तनवतितमः सर्गः ॥ ९७ ॥

[पा०] १ ङ. समत्तंद्विपमारुह्य. २ ङ. छ. झ. ञ. ट. ननर्दभीम. ३ ङ. झ. तस्यापिसंगृह्य. ४ ख. ङ. झ. ट. विरूपाक्षस्य. ५ ङ. झ. मभवद्भूमौ. ख. च. छ. ञ. ट. मभवद्दीनो. घ. मभवन्मूढो. ६ क. च. छ. ज. सखड्गाभिहतोपतत्. ट. पद्भ्यामभिहतोभवत्.

विवृत्तनयनं क्रोधात्सफेनं रुधिरप्लुतम् ॥ ददृशुस्ते विरूपाक्षं विरूपाक्षतरं कृतम् ॥ ३२ ॥
स्फुरन्तं परिवर्तन्तं पार्श्वेन रुधिरोक्षितम् ॥ करुणं च विनर्दन्तं ददृशुः कपयो रिपुम् ॥ ३३ ॥
तथा तु तौ संयति संप्रयुक्तौ तरस्विनौ वानरराक्षसानाम् ॥
बलार्णवौ सस्वनतुः सुभीमं महार्णवौ द्वाविव भिन्नवेलौ ॥ ३४ ॥
विनाशितं प्रेक्ष्य विरूपनेत्रं महाबलं तं हरिपार्थिवेन ॥
बलं समस्तं कपिराक्षसानामुन्मत्तगङ्गाप्रतिमं बभूव ॥ ३५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तनवतितमः सर्गः ॥ ९७ ॥

अष्टनवतितमः सर्गः ॥ ९८ ॥

सुग्रीवेण महोदरवधः ॥ १ ॥

हन्यमाने बले तूर्णमन्योन्यं ते महामृधे ॥ सरसीव महाघर्मे सोपक्षीणे बभूवतुः ॥ १ ॥
स्वबलस्य विघातेन विरूपाक्षवधेन च ॥ बभूव द्विगुणं क्रुद्धो रावणो राक्षसाधिपः ॥ २ ॥
प्रक्षीणं तु बलं दृष्ट्वा वध्यमानं वलीमुखैः ॥ बभूवास्य व्यथा युद्धे प्रेक्ष्य दैवविपर्ययम् ॥
उवाच च समीपस्थं महोदरमरिंदमम् ॥ ३ ॥
अस्मिन्काले महाबाहो जयाशा त्वयि मे स्थिता ॥ जहि शत्रुचमूं वीर दर्शयाद्य पराक्रमम् ॥
भर्तृपिण्डस्य कालोऽयं निर्देष्टुं साधु युध्यताम् ॥ ४ ॥
एवमुक्तस्तथेत्युक्त्वा राक्षसेन्द्रो महोदरः ॥ प्रविवेशारिसेनां तां पतङ्ग इव पावकम् ॥ ५ ॥
ततः स कदनं चक्रे वानराणां महाबलः ॥ भर्तृवाक्येन तेजस्वी स्वेन वीर्येण चोदितः ॥ ६ ॥
वानराश्च महासत्त्वाः प्रगृह्य विपुलाः शिलाः ॥ प्रविश्यारिबलं भीमं जघ्नुस्ते रजनीचरान् ॥ ७ ॥
महोदरस्तु संक्रुद्धः शरैः काञ्चनभूषणैः ॥ चिच्छेद पाणिपादोरून्वानराणां महाहवे ॥ ८ ॥
ततस्ते वानराः सर्वे राक्षसैरर्दिता भृशम् ॥ दिशो दश द्रुताः केचित्केचित्सुग्रीवमाश्रिताः ॥ ९ ॥
प्रभग्नां समरे दृष्ट्वा वानराणां महाचमूम् ॥ अभिदुद्राव सुग्रीवो महोदरमनन्तरम् ॥ १० ॥
प्रगृह्य विपुलां घोरां महीधरसमां शिलाम् ॥ चिक्षेप च महातेजास्तद्वधाय हरीश्वरः ॥ ११ ॥
तामापतन्तीं सहसा शिलां दृष्ट्वा महोदरः ॥ असंभ्रान्तस्ततो बाणैर्निर्बिभेद दुरासदाम् ॥ १२ ॥

न्द्राशनीत्यादि सार्धश्लोकमेकं वाक्यं ॥ स्रोतोभ्यः नासादिनवद्वारेभ्यः ॥ ३१ ॥ विरूपाक्षतरं नेत्रोद्गमनेनात्यन्तविकटाक्षं ॥ ३२ ॥ स्फुरन्तं ऊर्ध्वमुत्पतन्तं । परिवर्तन्तं परिवर्तमानं ॥ ३३ ॥ भिन्नवेलौ विदीर्णवेलौ ॥ ३४ ॥ उन्मत्तगङ्गा उद्वेलगङ्गा ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तनवतितमः सर्गः ॥ ९७ ॥

अथ महोदरवधः—हन्यमान इत्यादि ॥ सरसी इवेति वक्तव्ये सरसीवेति संधिरार्षः ॥ १—३ ॥ अस्मिन्काल इत्यादिसार्धश्लोक एकान्वयः ॥ भर्तृपिण्डस्येति संबन्धमात्रे षष्ठी । भर्तृपिण्डस्य निर्देष्टुं स्वामिदत्तवेतनमपाकर्तुमित्यर्थः ॥ ४—५ ॥ भर्तृवाक्येन चोदितः सन् स्वेन वीर्येण कदनं चक्र इत्यन्वयः ॥६—७॥ पाणिपादोरूनिति । एकवद्भावाभाव आर्षः ॥ ८—९ ॥ अनन्तरं समीपस्थं ॥ १०—१२ ॥

ती० सोपक्षीणे उपक्षीणं उपक्षयः तत्सहिते ॥ स० सूपक्षीणे अत्यन्तक्षीणे । सरसी वेतिपदं ॥ १ ॥

[पा०] १ ख. ङ. ञ. सुभीमौ. २ ख.—च. ञ. ट. सूपक्षीणे. ३ क. ङ. ञ. सेनांसपतङ्गः. ४ ङ. ञ. ट. सर्वराक्षसान्. ५ ञ. ञ. ट. ठ. पाणिपादोरु. ६ ङ. ञ. ट. राक्षसानांमहामृधे. ७ ङ. ञ. ट. निर्बिभेदततःशिलां.

रक्षसा तेन बाणौघैर्निकृत्ता सा सहस्रधा ॥ निपपात शिला भूमौ गृध्रचक्रमिवाकुलम् ॥ १३ ॥
तां तु भिन्नां शिलां दृष्ट्वा सुग्रीवः क्रोधमूर्च्छितः ॥ सालमुत्पाट्य चिक्षेप राक्षसे रणमूर्धनि ॥१४॥
शरैश्च विददारैनं शूरः पुरंजयः ॥ १५ ॥
स ददर्श ततः क्रुद्धः परिघं पतितं भुवि ॥ आविध्य तु स तं दीप्तं परिघं तस्य दर्शयन् ॥
परिघाग्रेण वेगेन जघानास्य हयोत्तमान् ॥ १६ ॥
तस्माद्रथाद्वीरः सोवप्लुत्य महारथात् ॥ गदां जग्राह संक्रुद्धो राक्षसोथ महोदरः ॥ १७ ॥
गदापरिघहस्तौ तौ युधि वीरौ समीयतुः ॥ नर्दन्तौ गोवृषप्रख्यौ घनाविव सविद्युतौ ॥ १८ ॥
ततः क्रुद्धो गदां तस्मै चिक्षेप रजनीचरः ॥ ज्वलन्तीं भास्कराभासां सुग्रीवाय महोदरः ॥ १९ ॥
गदां तां सुमहाघोरामापतन्तीं महाबलः ॥ सुग्रीवो रोषताम्राक्षः समुद्यम्य महाहवे ॥
आजघान गदां तस्य परिघेण हरीश्वरः ॥ २० ॥
पपात स गदोद्भिन्नः परिघस्तस्य भूतले ॥ २१ ॥
ततो जग्राह तेजस्वी सुग्रीवो वसुधातलात् ॥ आयसं मुसलं घोरं सर्वतो हेमभूषितम् ॥ २२ ॥
स तमुद्यम्य चिक्षेप सोप्यन्यां व्याक्षिपद्गदाम् ॥ भिन्नावन्योन्यमासाद्य पेततुर्धरणीतले ॥ २३ ॥
ततो भग्नप्रहरणौ मुष्टिभ्यां तौ समीयतुः ॥ तेजोबलसमाविष्टौ दीप्ताविव हुताशनौ ॥ २४ ॥
जघ्नतुस्तौ तदाऽन्योन्यं नेदतुश्च पुनः पुनः ॥ तलैश्चान्योन्यमाहत्य पेततुर्धरणीतले ॥ २५ ॥
उत्पेततुस्ततस्तूर्णं जघ्नतुश्च परस्परम् ॥ भुजैश्चिक्षिपतुर्वीरावन्योन्यमपराजितौ ॥
जग्मतुस्तौ श्रमं वीरौ बाहुयुद्धे परंतपौ ॥ २६ ॥
आजहार ततः खड्गमदूरपरिवर्तिनम् ॥ राक्षसश्चर्मणा सार्धं महावेगो महोदरः ॥ २७ ॥
तथैव च महाखड्गं चर्मणा पतितं सह ॥ जग्राह वानरश्रेष्ठः सुग्रीवो वेगवत्तरः ॥ २८ ॥
तौ तु रोषपरीताङ्गौ नर्दन्तावभ्यधावताम् ॥ उद्यतासी रणे हृष्टौ युधि शस्त्रविशारदौ ॥ २९ ॥
दक्षिणं मण्डलं चोभौ सुतूर्णं संपरीयतुः ॥ अन्योन्यमभिसंक्रुद्धौ जये प्रणिहितावुभौ ॥ ३० ॥
स तु शूरो महावेगो वीर्यश्लाघी महोदरः ॥ महाचर्मणि तं खड्गं पातयामास दुर्मतिः ॥ ३१ ॥

गृध्रचक्रं गृध्रसमूहः ॥१३-१४॥ शरैरित्यर्धं ॥ शूरः ॥ १९ ॥ गदां दृष्ट्वेति शेषः । समुद्यम्य । परिघमिति महोदरः एनं च सालं च शरैः विददारेत्यन्वयः ॥१५॥ सः सुग्रीवः । आविध्येति । आदायेति शेषः । तस्य महोदरस्य दर्शयन् । पाणिलाघवमिति शेषः ॥ १६—१८ ॥ भास्कराभासां भास्करवद्भासमानां सिद्धं ॥ २० ॥ पपात स गदोद्भिन्न इत्यर्धं ॥ उभावपि परस्परामिहतौ विशीर्णौ पेततुरिति भावः ॥ २१—२९ ॥ दक्षिणं प्रदक्षिणं चकारात् सव्यं च । सुतूर्णं संपरीयतुः अकुर्वतां ॥ ३० ॥ वीर्येण

स० गृध्रचक्रं शिलायाः शकलीभावात् ॥ १३ ॥ स० गोवृषप्रख्यौ वृषभश्रेष्ठसमौ ॥ १८ ॥ ती० गदापपात । सपरिघश्चोद्भिन्नइत्यर्थः ॥ २१ ॥ स० उद्यतासीरणइतिपदमेकं । उद्यतास्योः ईरणं परस्परंकंपनंतस्मिन्प्रदृष्टौ । युद्धेविशारदौ । अतो न रणपुनरीरणं ॥ २९ ॥ शि० ओः रुद्रस्येवभाययोस्तौ उभौ सुग्रीवमहोदरौ ॥ ३० ॥ स० दुर्मतिः ॥ असिरन्तर्गच्छेदितिज्ञानहीनः ॥ ३१ ॥

[पा०] १ ङ. ञ. ट. चिक्षेपतंसचिच्छेदनैकधा. २ ङ. च. ञ. ट. परबलार्दनं ञ. परबलार्दनः. ३ ङ. ञ. पपाततरभ्नः. ४ ङ. च. छ. ञ. ञ. ट. नदन्तौच. ५ ङ. च. छ. ञ. ट. मासाद्य. ६ ङ.—ट. जहारचतदाखड्गं. ७ छ. ञ. ञविशारदौ. ङ. ञ. युद्धे शस्त्रविशारदौ.

लग्नमुत्कर्षतः खड्गं खड्गेन कपिकुञ्जरः ॥ जहार सशिरस्त्राणं कुण्डलोपहितं शिरः ॥ ३२ ॥
निकृत्तशिरसस्तस्य पतितस्य महीतले ॥ तद्बलं राक्षसेन्द्रस्य दृष्ट्वा तत्र न तिष्ठते ॥ ३३ ॥
हत्वा तं वानरैः सार्धं ननाद मुदितो हरिः ॥ चुक्रोध च दशग्रीवो बभौ हृष्टश्च राघवः ॥ ३४ ॥
विषण्णवदनाः सर्वे राक्षसा दीनचेतसः ॥ विद्रवन्ति ततः सर्वे भयविस्रस्तचेतसः ॥ ३५ ॥
महोदरं तं विनिपात्य भूमौ महागिरेः कीर्णमिवैकदेशम् ॥
सूर्यात्मजस्तत्र रराज लक्ष्म्या सूर्यः स्वतेजोभिरिवाप्रधृष्यः ॥ ३६ ॥
अथ विजयमवाप्य वानरेन्द्रः समरमुखे सुरयक्षसिद्धसङ्घैः ॥
अवनितलगतैश्च भूतसङ्घैर्हरुषसमाकुलितैः स्तुतो महात्मा ॥ ३७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टनवतितमः सर्गः ॥ ९८ ॥

एकोनशततमः सर्गः ॥ ९९ ॥

अङ्गदेनमहापार्श्वभङ्गः ॥ १ ॥

महोदरे तु निहते महापार्श्वो महाबलः ॥ सुग्रीवेण समीक्ष्याथ क्रोधात्संरक्तलोचनः ॥
अङ्गदस्य चमूं भीमां क्षोभयामास सायकैः ॥ १ ॥
स वानराणां मुख्यानामुत्तमाङ्गानि सर्वशः ॥ पातयामास कायेभ्यः फलं वृन्तादिवानिलः ॥ २ ॥
केषांचिदिषुभिर्बाहून्स्कन्धांश्चिच्छेद राक्षसः ॥ वानराणां सुसंक्रुद्धः पार्श्वे केषां व्यदारयत् ॥ ३ ॥
तेऽर्दिता बाणवर्षेण महापार्श्वेन वानराः ॥ विषादविमुखाः सर्वे बभूवुर्गतचेतसः ॥ ४ ॥
निरीक्ष्य बलमुद्विग्नमङ्गदो राक्षसार्दितम् ॥ वेगं चक्रे महाबाहुः समुद्र इव पर्वणि ॥ ५ ॥
आयसं परिघं गृह्य सूर्यरश्मिसमप्रभम् ॥ समरे वानरश्रेष्ठो महापार्श्वे न्यपातयत् ॥ ६ ॥
स तु तेन प्रहारेण महापार्श्वो विचेतनः ॥ समूतः स्यन्दनात्तस्माद्विसंज्ञः प्रापतद्भुवि ॥ ७ ॥
सर्क्षराजस्तु तेजस्वी नीलाञ्जनचयोपमः ॥ निष्पत्य सुमहावीर्यः स्वाद्यूहान्मेघसंनिभात् ॥ ८ ॥
प्रगृह्य गिरिशृङ्गाभां क्रुद्धः सुविपुलां शिलाम् ॥ अश्वाञ्जघान तरसा स्यन्दनं च बभञ्ज तम् ॥ ९ ॥

श्लाघत इति वीर्यश्लाघी ॥ ३१ ॥ लग्नं चर्मलग्नं । उत्कर्षतः महोदरस्येति शेषः ॥ ३२ ॥ तत् शिरः । न तिष्ठते नातिष्ठत ॥ ३३–३४ ॥ विषण्णवदनाः अभवन्निति शेषः । अतः सर्वशब्दापौनरुक्त्यं ॥३५॥ लक्ष्म्या जयलक्ष्म्या ॥३६—३७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टनवतितमः सर्गः ॥ ९८ ॥

अथ महापार्श्ववधः—महोदरेत्यादि ॥ महोदरे सुग्रीवेण निहत इत्यन्वयः ॥ १—७ ॥ सर्क्षराज-

---

स० सर्वेसप्तम्यन्तं । हिंसायांसत्यां । भयं तत्साधनं ॥ ३५ ॥ ति० हर्षपदस्थाने हरुषेतिपाठश्छन्दोनुरोधात् ॥ बभूवेतिशेषः ॥ ३७ ॥ इत्यष्टनवतितमःसर्गः ॥ ९८ ॥

ति० सुग्रीवेणमहोदरेनिहतेसतितद्बधकर्तारंसुग्रीवंमहापार्श्वः समीक्ष्य ॥ स० सुग्रीवेण समीक्ष्य " लग्नमुत्कर्षतः खड्गं" इत्युक्तावसरं समीक्ष्य । महोदरेनिहतेसति क्रोधात्संरक्तलोचनोमहापार्श्वः चमूंक्षोभयामासेत्यन्वयः ॥ १ ॥

[पा०] १ ङ, छ. झ. भ. ट. समाकुलितैर्निरीक्ष्यमाणः. २ च. ञ. ट. राक्षसः. ३ ङ. झ. बाहूंश्चिच्छेदाथसराक्षसः. ४ ञ. ट. सुसंरब्धः. ५ ङ. छ. झ. ट. केषांचिदाक्षिपत्. ६ ङ.—ट. निशम्य.

मुहूर्ताल्लब्धसंज्ञस्तु महापार्श्वो महाबलः ॥ अङ्गदं बहुभिर्बाणैर्भूयस्तं प्रत्यविध्यत ॥ १० ॥
जाम्बवन्तं त्रिभिर्बाणैराजघान स्तनान्तरे ॥ ऋक्षराजं गवाक्षं च जघान बहुभिः शरैः ॥ ११ ॥
जाम्बवन्तं गवाक्षं च स दृष्ट्वा शरपीडितौ ॥ जग्राह परिघं घोरमङ्गदः क्रोधमूर्च्छितः ॥ १२ ॥
तस्याङ्गदः प्रकुपितो राक्षसस्य तमायसम् ॥ दूरस्थितस्य परिघं रविरश्मिसमप्रभम् ॥ १३ ॥
द्वाभ्यां भुजाभ्यां संगृह्य भ्रामयित्वा च वेगवान् ॥ महापार्श्वस्य चिक्षेप वधार्थं वालिनः सुतः ॥१४॥
स तु क्षिप्तो बलवता परिघस्तस्य रक्षसः ॥ धनुश्च सशरं हस्ताच्छिरस्त्रं चाप्यपातयत् ॥ १५ ॥
तं समासाद्य वेगेन वालिपुत्रः प्रतापवान् ॥ तलेनाभ्यहनत्क्रुद्धः कर्णमूले सकुण्डले ॥ १६ ॥
स तु क्रुद्धो महावेगो महापार्श्वो महाद्युतिः ॥ करेणैकेन जग्राह सुमहान्तं परश्वधम् ॥ १७ ॥
तं तैलधौतं विमलं शैलसारमयं दृढम् ॥ राक्षसः परमक्रुद्धो वालिपुत्रे न्यपातयत् ॥ १८ ॥
तेन वामांसफलके भृशं प्रत्यवपादितम् ॥ अङ्गदो मोक्षयामास सरोषः स परश्वधम् ॥ १९ ॥
स वीरो वज्रसंकाशमङ्गदो मुष्टिमात्मनः ॥ संवर्तयत्सुसंक्रुद्धः पितुस्तुल्यपराक्रमः ॥ २० ॥
राक्षसस्य स्तनाभ्याशे मर्मज्ञो हृदयंप्रति ॥ इन्द्राशनिसमस्पर्शं स मुष्टिं विन्यपातयत् ॥ २१ ॥
तेन तस्य निपातेन राक्षसस्य महामृधे ॥ पफाल हृदयं चाशु स पपात हतो भुवि ॥ २२ ॥
तस्मिन्निपतिते भूमौ तत्सैन्यं संप्रचुक्षुभे ॥ अभवच्च महान्क्रोधः समरे रावणस्य तु ॥ २३ ॥
वानराणां च हृष्टानां सिंहनादश्च पुष्कलः ॥ स्फोटयन्निव शब्देन लङ्कां साट्टालगोपुराम् ॥
महेन्द्रेणेव देवानां नादः समभवन्महान् ॥ २४ ॥

अथेन्द्रशत्रुस्त्रिदिवालयानां वनौकसां चैव महाप्रणादम् ॥
श्रुत्वा सरोषं युधि राक्षसेन्द्रः पुनश्च युद्धाभिमुखोऽवतस्थे ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनशततमः सर्गः ॥ ९९ ॥

स्त्वित्यादिश्लोकद्वयमेकान्वयं ॥ ऋक्षराजः जाम्बवान् तेन सहितः सर्क्षराजः गवाक्षः । जाम्बवन्तं गवाक्षं चेत्युत्तरत्र वक्ष्यमाणत्वात् ॥ ८—१० ॥ ऋक्षराजं जाम्बवन्तं त्रिभिर्बाणैराजघान । गवाक्षं च बहुभिः शरैर्जघानेत्यन्वयः ॥ ११—१२ ॥ तस्याङ्गद इत्यादिश्लोकद्वयमेकान्वयं ॥ दूरस्थितस्य तस्य वधार्थमित्यन्वयः ॥ १३—१७ ॥ तैलधौतं प्रतिदिनं तैलसेचनान्निष्कल्मषं । शैलसारमयं तद्वत्कठिनमित्यर्थः । दृढं अशिथिलं ॥ १८—१९ ॥ आत्मन इत्यस्य पितुस्तुल्यपराक्रम इत्यनेन संबन्धः । संवर्तयत् समवर्तयत् । भ्रामयामासेत्यर्थः ॥ २०—२३ ॥ स्फोटयन् दलयन् । वानराणां च सिंहनादः समभवत् । महेन्द्रेण सह देवानां नाद इव वानराणां च देवानां च नादः समभवदित्यर्थः । एतच्चानन्तरश्लोके स्फुटीभविष्यति ॥ २४—२५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनशततमः सर्गः ॥ ९९ ॥

ति० तस्यरक्षसोहस्तात् सशरंधनुः चात् एकंहस्तंशिरस्त्राणं चापातयत् ॥ अतएवाग्रेवक्ष्यति—एकेनकरेणेति ॥ १५ ॥ ति० मोक्षयामास मोघीचकार ॥ १९ ॥ ती० संवर्तयत् समवर्तयत् बबन्धेत्यर्थः ॥ स० संवर्तयत्सुसंक्रुद्धइतिपदमेकं । संवर्तयंश्चासौसुसंक्रुद्धश्चसः । विन्यपातयत् ॥ २०—२१ ॥ ति० वानराणांसिंहनादः लङ्कांस्फोटयन्निवउदभूदितिशेषः । इन्द्रेणसह देवानामिव अङ्गदेनसहवानराणांसिंहनादःसमभवत् ॥ २४ ॥ इत्येकोनशततमः सर्गः ॥ ९९ ॥

[पा०] १ क. घ. ङ. च. झ. ट. महापार्श्वाय. २ ग. निपपात. ३ ख. ग. ङ. झ. ञ. ट. प्रहृ[illegible] ४ ङ. झ. नादःसुपुष्कलः.

शततमः सर्गः ॥ १०० ॥

महोदरादिनिधनक्रुद्धेनरावणेन सूतंप्रति रामवधप्रतिज्ञानेनरथतुरगचोदनचोदनापूर्वकं लक्ष्मणातिक्रमणेनरामंप्रत्यभिया नम् ॥ १ ॥ रामरावणाभ्यां विचित्रास्त्रनिकरप्रयोगेण समरप्रवर्तनम् ॥ २ ॥

महोदरमहापार्श्वौ हतौ दृष्ट्वा तु राक्षसौ ॥ तेसिंश्च निहते वीरे विरूपाक्षे महाबले ॥
आविवेश महान्क्रोधो रावणं तं महामृधे ॥ १ ॥
सूतं संचोदयामास वाक्यं चेदमुवाच ह ॥ २ ॥
निहतानाममात्यानां रुद्धस्य नगरस्य च ॥ दुःखमेषोपनेष्यामि हत्वा तौ रामलक्ष्मणौ ॥ ३ ॥
रामवृक्षं रणे हन्मि सीतापुष्पफलप्रदम् ॥ प्रशाखा यस्य सुग्रीवो जाम्बवान्कुमुदो नलः ॥ ४ ॥
मैन्दश्च द्विविदश्चैव ह्यङ्गदो गन्धमादनः ॥ हनूमांश्च सुषेणश्च सर्वे च हरियूथपाः ॥ ५ ॥
सं दिशो दश घोषेण रथस्यातिरथो महान् ॥ नादयन्प्रययौ तूर्णं राघवं चाभ्यवर्तत ॥ ६ ॥
पूरिता तेन शब्देन सनदीगिरिकानना ॥ संचचाल मही सर्वा सवराहमृगद्विपा ॥ ७ ॥
तामसं स महाघोरं चकारास्त्रं सुदारुणम् ॥ निर्दहन्कपीन्सर्वांस्ते प्रपेतुः समन्ततः ॥ ८ ॥
उत्पपात रजो घोरं तैर्भग्नैः संप्रधावितैः ॥ न हि तत्सहितुं शेकुर्ब्रह्मणा निर्मितं स्वयम् ॥ ९ ॥
तान्यनीकान्यनेकानि रावणस्य शरोत्तमैः ॥ दृष्ट्वा भग्नानि शतशो राघवः पर्यवस्थितः ॥ १० ॥
ततो राक्षसशार्दूलो विद्राव्य हरिवाहिनीम् ॥ स ददर्श ततो रामं तिष्ठन्तमपराजितम् ॥ ११ ॥
लक्ष्मणेन सह भ्रात्रा विष्णुना वासवं यथा ॥ आलिखन्तमिवाकाशमवष्टभ्य महद्धनुः ॥
पद्मपत्रविशालाक्षं दीर्घबाहुमरिंदमम् ॥ १२ ॥
ततो रामो महातेजाः सौमित्रिसहितो बली ॥ वानरांश्च रणे भग्नानापतन्तं च रावणम् ॥
समीक्ष्य राघवो हृष्टो मध्ये जग्राह कार्मुकम् ॥ १३ ॥
विस्फारयितुमारेभे ततः स धनुरुत्तमम् ॥ महावेगं महानादं निर्भिन्दन्निव मेदिनीम् ॥ १४ ॥
रावणस्य च बाणौघै रामविस्फारितेन च ॥ शब्देन राक्षसास्ते च पेतुश्च शतशस्तदा ॥ १५ ॥

अथ रामरावणयुद्धारम्भः शततमे—महोदरेत्यादि ॥ तस्मिन् विरूपाक्षे निहते सति पश्चान्महोदरमहापार्श्वौ हतौ दृष्ट्वा स्थितमिति शेषः ॥ १—८ ॥ सहितुं सोढुं । आर्ष इडागमः ॥ ९—१० ॥ तत इत्यादिसार्धश्लोकद्वयेन रामस्यापराजितत्वं निरवधिकसौन्दर्यनिधित्वेन वैरं विहाय निरन्तरानुभाव्यत्वं रावणस्य दुर्बुद्धित्वं अमृतप्रवाहमावर्तेनेव महता धनुर्वरेणावर्तितं श्रीरामदेहलावण्यामृतपूरमनवगाहमानस्य तस्य दौर्भाग्यं चोच्यते ॥ ११—१२ ॥ ततो राम इत्यादिसार्धश्लोक एकान्वयः ॥ हृष्टः चिराद्वैरी समागत इति संतुष्टः । कार्मुकं जग्राह ॥ १३ ॥ विस्फारयितुमारेभ इत्यादि विलम्बोक्त्या किमिदानीमपिवा नतोभविष्यति रावण इति रामस्य दयालुतोच्यते ॥ १४ ॥ रावणस्य बाणौघैः रामवि-

---

ति० हतौदृष्ट्वासरावणः क्रुद्धोजातइतिशेषः ॥ १ ॥ ति० मूलोच्छेदंकरिष्यामीत्याशयेनरामंसर्वाश्रयंमहावृक्षत्वेननिरूपयति—रामवृक्षमिति । सीता पुष्पंयस्यसः । सचासौतेनैवपुष्पेण सर्वेषांवानराणांतत्तत्कर्मजफलप्रदस्तं । सुग्रीवादयः प्रशाखायस्यतं । प्रशाखासहितंहन्मीति शेषः ॥ रामानु० सीतापुष्पफलप्रदं सीता पुष्पंयस्यसः । सीतापुष्पश्चासौफलप्रदश्चतं ॥ ४ ॥ शि० तामसं राहुदेवताकमस्त्रं ॥ ८ ॥ रामानु० तेच वानराश्च ॥ १५ ॥

[पा०] १ ङ. झ. ट. दृष्ट्वासरावणः. २ ख. च. छ. ञ. ट. तस्मिन्विनिहते. ३ ङ.—झ. ट. दुःखमेवाप. ४ ख. घ. च. छ. ञ. ट. जांबवान्पनसो. ५ ज. एवमुक्त्वाथघोषेणरथस्यातिदिशोदश. ६ ङ. झ. ट. चाभ्यधावत. ७ ङ. झ. त्रस्तसिंहमृगद्विजा. ८ ङ. झ. रजोभूमौ. ९ ख. ग. च छ. ञ. निर्दहन्निव. १० ङ. रोदसी.

तयोः शरपथं प्राप्तो रावणो राजपुत्रयोः ॥ स बभौ च यथा राहुः समीपे शशिसूर्ययोः ॥ १६ ॥
तमिच्छन्प्रथमं योद्धुं लक्ष्मणो निशितैः शरैः ॥ मुमोच धनुरायम्य शरानग्निशिखोपमान् ॥ १७ ॥
तान्मुक्तमात्रानाकाशे लक्ष्मणेन धनुष्मता ॥ बाणान्बाणैर्महातेजा रावणः प्रत्यवारयत् ॥ १८ ॥
एकमेकेन बाणेन त्रिभिस्त्रीन्दशभिर्दश ॥ लक्ष्मणस्य प्रचिच्छेद दर्शयन्पाणिलाघवम् ॥ १९ ॥
अभ्यतिक्रम्य सौमित्रिं रावणः समितिंजयः ॥ आससाद ततो रामं स्थितं शैलमिवाचलम् ॥२०॥
स सङ्ख्ये राममासाद्य क्रोधसंरक्तलोचनः ॥ व्यसृजच्छरवर्षाणि रावणो राघवोपरि ॥ २१ ॥
शरधारास्ततो रामो रावणस्य धनुश्च्युताः ॥ दृष्ट्वैवाप्ततः शीघ्रं भल्लाञ्जग्राह सत्वरम् ॥ २२ ॥
ताञ्शरौघांस्ततो भल्लैस्तीक्ष्णैश्चिच्छेद राघवः ॥ दीप्यमानान्महाघोरान्क्रुद्धानाशीविषानिव ॥ २३ ॥
राघवो रावणं तूर्णं रावणो राघवं तदा ॥ अन्योन्यं विविधैस्तीक्ष्णैः शरैरभिववर्षतुः ॥ २४ ॥
चेरतुश्च चिरं चित्रं मण्डलं सव्यदक्षिणम् ॥ बाणवेगात्समुत्क्षिप्तावन्योन्यमपराजितौ ॥ २५ ॥
तयोर्भूतानि वित्रेसुर्युगपत्संप्रयुध्यतोः ॥ रौद्रयोः सायकमुचोर्यमान्तकनिकाशयोः ॥ २६ ॥
संततं विविधैर्बाणैर्बभूव गगनं तदा ॥ घनैरिवातपापाये विद्युन्मालासमाकुलैः ॥ २७ ॥
गवाक्षितमिवाकाशं बभूव शरवृष्टिभिः ॥ २८ ॥
महावेगैः सुतीक्ष्णाग्रैर्गृध्रपत्रैः सुवाजितैः ॥ शरान्धकारं तौ भीमं चक्रतुः समरं तदा ॥
गतेऽस्तं तपने चापि महामेघाविवोत्थितौ ॥ २९ ॥
बभूव तुमुलं युद्धमन्योन्यवधकाङ्क्षिणोः ॥ अनासाद्यमचिन्त्यं च वृत्रवासवयोरिव ॥ ३० ॥
उभौ हि परमेष्वासावुभौ शस्त्रविशारदौ ॥ उभावस्त्रविदां मुख्यावुभौ युद्धे विचेरतुः ॥ ३१ ॥
उभौ हि येन व्रजतस्तेनतेन शरोर्मयः ॥ ऊर्मयो वायुना विद्धा जग्मुः सागरयोरिव ॥ ३२ ॥
ततः संसक्तहस्तस्तु रावणो लोकरावणः ॥ नाराचमालां रामस्य ललाटे प्रत्यमुञ्चत ॥ ३३ ॥
रौद्रचापप्रयुक्तां तां नीलोत्पलदलप्रभाम् ॥ शिरसा धारयन्रामो न व्यथां प्रत्यपद्यत ॥ ३४ ॥

स्फारितेन च जातेन शब्देनेत्यर्थः ॥ १५ ॥ शशिसूर्ययोरिति । अमायामिति शेषः ॥ १६—१९ ॥ अभ्यतिक्रम्य एकस्यापि बाणस्य स्वस्मिन्नपतनादनादरेणातिक्रम्य ॥ २०—२५ ॥ यमान्तकनिकाशयोः यमतदन्तकौ यमरुद्रौ तत्तुल्ययोः ॥ २६ ॥ गगनं संततं निबिडं बभूवेत्यन्वयः ॥ २७ ॥ गवाक्षितमित्यर्धं ॥ गवाक्षितं संजातगवाक्षं ॥ २८ ॥ महावेगैरित्यादिसार्धश्लोक एकान्वयः ॥ गृध्रपत्रैः हेतुभिः। सुवाजितैः संजातशोभनपक्षैः । बाणैरिति शेषः ॥ २९ ॥ अनासाद्यं इतः पूर्वं केनापि दुर्लभं । अचिन्त्यं रावणस्यैवं भविष्यतीति चिन्तानर्हं ॥ ३०—३१ ॥ येन येन मण्डलचारेण ॥ ३२ ॥ संसक्तहस्तः बाणप्रयोगासक्तहस्तः ॥ ३३—३४ ॥

रामानु० तयोरिति । अतिक्रूरस्वभावस्यरावणस्यरामलक्ष्मणयोः समीपागमनं अमावास्यायांराहोश्चन्द्रसूर्यसमीपागमनमिवेति कृत्वादृष्टान्तदार्ष्टान्तिकयोरैकरूप्यं ॥ १६ ॥ ति० तपने सूर्ये । अस्तंगतेचापिशब्दादस्ताचलंप्राप्योदयाद्रिंगतेपीत्यर्थः । दिवापीतियावत् । यत्तु यथाश्रुतरीत्यारात्रावपीतिव्याचक्षते तत्रनकश्चिच्चमत्कारः ॥ स० तपने सूर्येच अस्तं तन्नामकंपर्वतं । गतेसति । प्रदोषसमयइतियावत् । उत्थितौ महामेघाविव । चन्द्रादिकमाच्छाद्यसतिमिरीकरणंचमत्कारइति "नकश्चिच्चमत्कारः" इतिनागोजिभट्टोक्तिरेवनिश्चमत्कारा । यद्वा तपनेसूर्येसति अस्तंगतइवयथातथामहामेघाविवचक्रतुः । चापिशब्दादित्यादिचमत्कृत्यपेक्षया चमत्कृतिरतिचमत्कृतिर्वानवेतिकृतिनोविदांकुर्वन्तु ॥ सूर्येऽस्तंगतेचाप्युदितेइत्येतन्मध्येऽस्तंगतइत्यस्याधिक्येनावक्तव्यत्वाच्च ॥२९॥

[पा०] १ ङ. ञ. शरान्धकारमाकाशंचक्रतुःप्रथमंतदा. २ क. ख. ग. च. छ. झ. ट. परमंतदा. ३ ङ. ञ. झ. ट. युद्धविशारदौ.

अथ मन्त्रानभिजपन्रौद्रमस्त्रमुदीरयन् ॥ शरान्भूयः समादाय रामः क्रोधसमन्वितः ॥
मुमोच च महातेजाश्चापमायम्य वीर्यवान् ॥ ३५ ॥
[तांश्छरान्राक्षसेन्द्राय चिक्षेपाच्छिन्नसायकः] ॥ ते महामेघसंकाशे कवचे पतिताः शराः ॥
अवध्ये राक्षसेन्द्रस्य न व्यथां जनयंस्तदा ॥ ३६ ॥
पुनरेवाथ तं रामो रथस्थं राक्षसाधिपम् ॥ ललाटे परमास्त्रेण सर्वास्त्रकुशलो रणे ॥ ३७ ॥
ते भित्त्वा बाणरूपाणि पञ्चशीर्षा इवोरगाः ॥ श्वसन्तो विविशुर्भूमिं रावणप्रतिकूलिताः ॥ ३८ ॥
निहत्य राघवस्यास्त्रं रावणः क्रोधमूर्च्छितः ॥ आसुरं सुमहाघोरमस्त्रं प्रादुश्चकार ह ॥ ३९ ॥
सिंहव्याघ्रमुखांश्चान्यान्कङ्ककाकमुखानपि ॥ गृध्रश्येनमुखांश्चाऽपि शृगालवदनांस्तथा ॥ ४० ॥
ईहामृगमुखांश्चान्यान्व्यादितास्यान्भयानकान् ॥ पञ्चास्याँल्लेलिहानांश्च ससर्ज निशिताञ्शरान् ॥४१॥
शरान्खरमुखांश्चान्यान्वराहमुखसंस्थितान् ॥ श्वानकुक्कुटवक्त्रांश्च मकराशीविषाननान् ॥ ४२ ॥
एतानन्यांश्च मायावी ससर्ज निशिताञ्शरान् ॥ रामं प्रति महातेजाः क्रुद्धः सर्प इव श्वसन् ॥४३॥
आसुरेण समाविष्टः सोस्त्रेण रघुनन्दनः ॥ ससर्जास्त्रं महोत्साहः पावकं पावकोपमः ॥ ४४ ॥
अग्निदीप्तमुखान्बाणांस्तथा सूर्यमुखानपि ॥ चन्द्रार्धचन्द्रवक्त्रांश्च धूमकेतुमुखानपि ॥ ४५ ॥
ग्रहनक्षत्रवक्त्रांश्च महोल्कामुखसंस्थितान् ॥ विद्युज्जिह्वोपमांश्चान्यान्ससर्ज निशिताञ्शरान् ॥ ४६ ॥
ते रावणशरा घोरा राघवास्त्रसमाहताः ॥ विलयं जग्मुराकाशे जग्मुश्चैव सहस्रशः ॥ ४७ ॥
तदस्त्रं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा ॥ हृष्टा नेदुस्ततः सर्वे कपयः कामरूपिणः ॥
सुग्रीवप्रमुखा वीराः परिवार्य तु राघवम् ॥ ४८ ॥

शरान् रौद्रास्त्रप्रपञ्चरूपान्बाणान् मुमोचेत्यन्वयः । मुमोच च महातेजाश्चापमायम्य वीर्यवानिति पाठः । तदनन्तरं । ते महामेघसंकाश इति श्लोकः । तदनन्तरं पुनरेवेति श्लोकः । तदनन्तरं ते भित्त्वेति श्लोकात्पूर्वं ग्रन्थपतनमस्ति तदन्वेष्टव्यं ॥ ३५ ॥ अवध्ये अभेद्ये । व्यथां न जनयन् नाजनयन् ॥ ३६ ॥ ललाटे विषये ललाटमुद्दिश्येत्यर्थः । यद्वा परमास्त्राणि विव्याधेति शेषः ॥ ३७ ॥ ते अस्त्रविकृतिरूपाः शराः बाणरूपाणि रावणास्त्राणि । भित्त्वा रावणप्रतिकूलिताः रावणेन निवारिताः सन्तः भूमिं विविशुः ॥ ३८—३९ ॥ आसुरास्त्रं प्रपञ्चयति—सिंहेत्यादि श्लोकचतुष्टयेन ॥ लेलिहानान् सर्पान् । तदाकारानिति यावत् । श्वानशब्दोप्यस्ति । मकराशीविषाननानित्यत्रआशीविषशब्दः पञ्चास्यसर्पेतरसर्पपरः ॥४०—४३॥ पावकं पावकसंबन्धि ॥४४॥ पावकास्त्रं प्रपञ्चयति—अग्नीत्यादिश्लोकद्वयेन ॥ महोल्कामुखसंस्थितान् महोल्कामुखेन वर्तमानान् । विद्युज्जिह्वोपमान् विद्युदर्चिःसदृशान् ॥ "कणा जिह्वास्त-

---

स० अच्छिन्नसायकः अधाराविच्छेदशरः ॥ अवध्ये तद्भेदनद्वाराव्यथांनाजनयन् ॥३६॥ **रामानु०** परमास्त्रेण श्रेष्ठास्त्रमन्त्रेण । योजितान्बाणान्मुमोचेत्यध्याहर्तव्यं । समनन्तरश्लोकेबाणबहुत्वाभिधानात् ॥ ३७ ॥ **रामानु०** श्वसन्तः पञ्चशीर्षाः उरगाइव स्थितास्तेबाणाः रावणप्रतिकूलिताः रावणेनप्रत्यस्त्रेणखण्डिताः । अतएवबाणरूपाणिभित्त्वा भूमिंविविशुरितियोजना ॥ **स०** तेशराः बाणरूपाणि बाणं कार्यरूपयन्तिसुन्दरीकुर्वन्तीतितानिकरायज्ञानिभित्त्वा पञ्चशीर्षाउरगाइव श्वसन्तः रावणप्रतिकूलिताः व्यंसिताः भूमिंविविशुः ॥ ३८ ॥ **स०** यदासुरमस्त्रंचकार प्रादुश्चकार तदेतान्ससर्ज ॥ ३९ ॥ पञ्चास्यान् सिंहमुखान् । पञ्चमुखान्शरानितिवा ॥ ४१ ॥ इतिशततमः सर्गः ॥ १०० ॥

[**पा०**] १ इदमर्धं झ. ञ. ट. ठ. पाठेषुपञ्च्यते. २ झ. ञ. ट. ठ. मन्यदस्त्रंचकारसः. ३ झ. कोकमुखानपि. ४ ङ. झ. सुग्रीवाभिमुखावीराःसंपरिक्षिप्यराघवं.

ततस्तदस्त्रं विनिहत्य राघवः प्रसह्य तद्रावणबाहुनिस्सृतम् ॥
मुदान्वितो दाशरथिर्महाहवे विनेदुरुच्चैर्मुदिताः कपीश्वराः ॥ ४९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे शततमः सर्गः ॥ १०० ॥

एकोत्तरशततमः सर्गः ॥ १०१ ॥

रामरावणयोर्युद्धावसरे मध्येलब्धावकाशेनलक्ष्मणेन रावणंप्रतियोधनम् ॥ १ ॥ तत्रलक्ष्मणेन रावणस्यध्वजसारथिधनुषांछेदनम् ॥ २ ॥ विभीषणेन गदया रावणरथहयहननम् ॥ ३ ॥ लक्ष्मणेन रावणेनविभीषणजिघांसया क्षिप्तायाः शक्तेः शरैः शकलीकरणम् ॥ ४ ॥ ततो रावणक्षिप्तयामहत्याशक्त्या वक्षसिगाढाभिहतेनलक्ष्मणेन मूर्च्छयाभूमौपतनम् ॥ ५ ॥ ततः कोपाद्रामेणशरगणवर्षणे पुरस्स्थातुमशक्नुवतारावणेन पलायनम् ॥ ६ ॥

तस्मिन्प्रतिहतेऽस्त्रे तु रावणो राक्षसाधिपः ॥ क्रोधं च द्विगुणं चक्रे क्रोधाच्चास्त्रमनन्तरम् ॥ १ ॥
मयेन विहितं रौद्रमन्यदस्त्रं महाद्युतिः ॥ उत्सृष्टुं रावणो घोरं राघवाय प्रचक्रमे ॥ २ ॥
ततः शूलानि निश्चेरुर्गदाश्च मुसलानि च ॥ कार्मुकाद्दीप्यमानानि वज्रसाराणि सर्वशः ॥ ३ ॥
मुद्गराः कूटपाशाश्च दीप्ताश्चाशनयस्तथा ॥ निष्पेतुर्विविधास्तीक्ष्णा वाता इव युगक्षये ॥ ४ ॥
तदस्त्रं राघवः श्रीमानुत्तमास्त्रविदां वरः ॥ जघान परमास्त्रेण गान्धर्वेण महाद्युतिः ॥ ५ ॥
तस्मिन्प्रतिहतेऽस्त्रे तु राघवेण महात्मना ॥ रावणः क्रोधताम्राक्षः सौरमस्त्रमुदैरयत् ॥ ६ ॥
ततश्चक्राणि निष्पेतुर्भास्वराणि महान्ति च ॥ कार्मुकाद्भीमवेगस्य दशग्रीवस्य धीमतः ॥ ७ ॥
तैरासीद्गगनं दीप्तं संपतद्भिरितस्ततः ॥ पतद्भिश्च दिशो दीप्ताश्चन्द्रसूर्यग्रहैरिव ॥ ८ ॥
तानि चिच्छेद बाणौघैश्चक्राणि स तु राघवः ॥ आयुधानि च चित्राणि रावणस्य चमूमुखे ॥ ९ ॥
तदस्त्रं तु हतं दृष्ट्वा रावणो राक्षसाधिपः ॥ विव्याध दशभिर्बाणै रामं सर्वेषु मर्मसु ॥ १० ॥
स विद्धो दशभिर्बाणैर्महाकार्मुकनिस्सृतैः ॥ रावणेन महातेजा न प्राकम्पत राघवः ॥ ११ ॥
ततो विव्याध गात्रेषु सर्वेषु समितिंजयः ॥ राघवस्तु सुसंक्रुद्धो रावणं बहुभिः शरैः ॥ १२ ॥
एतस्मिन्नन्तरे क्रुद्धो राघवस्यानुजो बली ॥ लक्ष्मणः सायकान्सप्त जग्राह परवीरहा ॥ १३ ॥
तैः सायकैर्महावेगै रावणस्य महाद्युतिः ॥ ध्वजं मनुष्यशीर्षं तु तस्य चिच्छेद नैकधा ॥ १४ ॥

र्षाधिषः" इति हलायुधः ॥ ४५—४८ ॥ तत् प्रसिद्धं । मुदान्वितः बभूवेति शेषः ॥ ४९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने शततमः सर्गः ॥ १०० ॥

अथ लक्ष्मणस्य शक्त्या पतनं—तस्मिन्नित्यादि ॥ क्रोधाच्चास्त्रमनन्तरमित्यत्रापि चक्र इत्यनुषज्यते ॥ १ ॥ किं तदस्त्रमित्यपेक्षायामाह—मयेनेति ॥ रौद्रं रुद्रदेवताकं ॥ २ ॥ ततः शूलानीत्यादिश्लोकद्वयमेकान्वयं ॥ कूटपाशाः कपटपाशाः ॥ ३—७ ॥ चन्द्रसूर्यग्रहैरिवेति । तत्समानाकारैरित्यर्थः ॥ ८—१२ ॥ एतस्मिन्नन्तरइति । एवं रावणं प्रहृत्य क्षणं रामे विश्राम्यति सतीत्यर्थः । लक्ष्मणः पूर्वं युद्धे प्रवृत्तो मध्ये रामेण युद्धकरणादवसरप्रतीक्ष इत्यर्थः । एवमव्याख्याने कथमन्येन युध्यमानमन्यो युध्येतेति महान्दोषः स्यात् ॥ १३ ॥ गृहीतानां सप्तबाणानां विनियोगप्रकारमाह—तैः सायकैरित्यादिश्लोकत्रयेण ॥ तैः सायकैरिति षष्ठ्यर्थेतृतीया । तेषां सायकानां मध्ये

ति० मनुष्यः शीर्षेयस्यतम् । मनुष्यशीर्षयुक्तमित्यर्थइत्यन्ये ॥ १४ ॥

[पा०] १ क.—ट. महात्मा. २ च. छ. ञ. तदस्त्रंनिहतंदृष्ट्वारावणो. ३ क्रोधंतंद्विगुणं. ४ घ. निहतंघोरं. ५ ङ. च. छ. झ. ञ. ट. भीमं.

सारथेश्चापि बाणेन शिरो ज्वलितकुण्डलम् ॥ जहार लक्ष्मणः श्रीमान्नैर्ऋतस्य महाबलः ॥ १५ ॥
तस्य बाणैश्च चिच्छेद धनुर्गजकरोपमम् ॥ लक्ष्मणो राक्षसेन्द्रस्य पञ्चभिर्निशितैः शरैः ॥ १६ ॥
नीलमेघनिभांश्चास्य सदश्वान्पर्वतोपमान् ॥ जघानाप्लुत्य गदया रावणस्य विभीषणः ॥ १७ ॥
हताश्वाद्वेगवान्वेगादवप्लुत्य महारथात् ॥ क्रोधमाहारयत्तीव्रं भ्रातरं प्रति रावणः ॥ १८ ॥
ततः शक्तिं महाशक्तिर्दीप्तां दीप्ताशनीमिव ॥ विभीषणाय चिक्षेप राक्षसेन्द्रः प्रतापवान् ॥ १९ ॥
अप्राप्तामेव तां बाणैस्त्रिभिश्चिच्छेद लक्ष्मणः ॥ अथोदतिष्ठत्सन्नादो वानराणां तदा रणे ॥ २० ॥
सा पपात त्रिधा च्छिन्ना शक्तिः काञ्चनमालिनी ॥ सविस्फुलिङ्गा ज्वलिता महोल्केव दिवश्च्युता ॥२१॥
ततः संभाविततरां कालेनापि दुरासदाम् ॥ जग्राह विपुलां शक्तिं दीप्यमानां स्वतेजसा ॥ २२ ॥
सा वेगिता बलवता रावणेन दुरासदा ॥ जज्वाल सुमहाघोरा शक्राशनिसमप्रभा ॥ २३ ॥
एतस्मिन्नन्तरे वीरो लक्ष्मणस्तं विभीषणम् ॥ प्राणसंशयमापन्नं तूर्णमभ्यवपद्यत ॥ २४ ॥
तं विमोक्षयितुं वीरश्चापमायम्य लक्ष्मणः ॥ रावणं शक्तिहस्तं वै शरवर्षैरवाकिरत् ॥ २५ ॥
कीर्यमाणः शरौघेण विसृष्टेन महात्मना ॥ स ग्रहर्तुं मनश्चक्रे विमुखीकृतविक्रमः ॥ २६ ॥
मोक्षितं भ्रातरं दृष्ट्वा लक्ष्मणेन स रावणः ॥ लक्ष्मणाभिमुखस्तिष्ठन्निदं वचनमब्रवीत् ॥ २७ ॥
मोक्षितस्ते बलश्लाघिन्यस्मादेवं विभीषणः ॥ विमुच्य राक्षसं शक्तिस्त्वयीयं विनिपात्यते ॥ २८ ॥
एषा ते हृदयं भित्त्वा शक्तिर्लोहितलक्षणा ॥ मद्बाहुपरिघोत्सृष्टा प्राणानादाय यास्यति ॥ २९ ॥
इत्येवमुक्त्वा तां शक्तिमष्टघण्टां महास्वनाम् ॥ मयेन मायाविहिताममोघां शत्रुघातिनीम् ॥ ३० ॥
लक्ष्मणाय समुद्दिश्य ज्वलन्तीमिव तेजसा ॥ रावणः परमक्रुद्धश्चिक्षेप च ननाद च ॥ ३१ ॥
सा क्षिप्ता भीमवेगेन शक्राशनिसमस्वना ॥ शक्तिरभ्यपतद्वेगाल्लक्ष्मणं रणमूर्धनि ॥ ३२ ॥
तामनुव्याहरच्छक्तिमापतन्तीं स राघवः ॥ स्वस्त्यस्तु लक्ष्मणायेति मोघा भव हतोद्यमा ॥ ३३ ॥
रावणेन रणे शक्तिः क्रुद्धेनाशीविषोपमा ॥ मुक्ताऽऽशूरस्यभीतस्य लक्ष्मणस्य ममज्ज सा ॥ ३४ ॥
न्यपतत्सा महावेगा लक्ष्मणस्य महोरसि ॥ जिह्वेवोरगराजस्य दीप्यमाना महाद्युतिः ॥ ३५ ॥

एकेन बाणेन ध्वजं, एकेन बाणेन सारथिशिरः, पञ्चभिर्धनुश्च चिच्छेदेत्यर्थः । निशितैः शरैरित्यत्र शरशब्दः काशदण्डविशेषमयत्वपरो बाणविशेषणं ॥ १४—१६ ॥ एवं धनुषि छिन्ने क्षणं तूष्णीं तिष्ठति रावणे विभीषणेन किंचित्कारमाह—नीलेति ॥ १७ —२१ ॥ संभाविततरां चन्दनादिभिरर्चितां ॥ २२ —२३॥ अभ्यवपद्यत तमाच्छाद्य स्वयमतिष्ठदित्यर्थः ॥ २४—२५ ॥ विमुखीकृतविक्रमः विमुखीकृतविभीषणविषयपराक्रमः ॥२६—२७॥ ते त्वया ॥२८॥ लोहितलक्षणा रुधिरचिह्ना । अनेन पूर्वमपि बहवो रिपवोऽनया हता इति व्यज्यते । लोहितलक्षणा सती यास्यतीति वा ॥ २९—३२ ॥ राघवः लक्ष्मणाय स्वस्त्यस्तु । त्वं हतोद्यमा नष्टहननोद्योगा मोघा भवेति तामनुव्याहरदित्यन्वयः ॥३३॥ क्षणाद्भस्मीकरणक्षमा शक्तिः रामेण मोघीकृता सती केवलमपतदित्याह—रावणेनेति ॥ मुक्तेति । आशु उरसि अभीतस्येति

ति० लोहितलक्षणा शत्रुरुधिरग्रहणस्वभावा ॥ २९ ॥ ति० आपतन्तीतांशक्तिं शक्त्यधिष्ठातृदेवतामुद्दिश्यानुव्याहरत् । तदेवाह—लक्ष्मणायस्वस्त्यस्तु । त्वंहतोद्यमा हतप्राणनाशोद्योगा । अतएवमोघा प्राणापहारांशेमोघाभव । तच्छक्तिस्तुपीडामात्रेचरितार्थास्त्वितिभावः । स्पर्शमात्रेणप्राणापहरणसामर्थ्ययुक्तायाः शक्तेरनेनस्वाक्येनमोघीकरणात्स्वस्यसत्यसंकल्पत्वंसूचितं ॥ ३३ ॥ ति० अभीतस्यभगवत्तत्त्वानुसंधानेननिर्भयस्य ॥ ३४ ॥ ति० मुक्ता आशु उरसीतिच्छेदस्यगूढत्वात्स्पष्टमेवाहकविः—न्यपतदिति ॥ ३५ ॥

[पा०] १ क. ङ.—ट. हताश्वात्तुतदावेगादवप्लुत्य. २ ख. ङ. च. झ. ञ. ट. शक्तिःप्रदीप्तामशनीमिव. ३ ङ. च. झ. ट. महारणे. ४ ख. सागृहीता. ५ क. ख. घ. ज. महात्मना. ङ. झ. दुरात्मना. ६ ङ. झ. ञ. ट. वज्राशनि.

ततो रावणवेगेन सुदूरमवगाढया ॥ शक्त्या निर्भिन्नहृदयः पपात भुवि लक्ष्मणः ॥ ३६ ॥
तदवस्थं समीपस्थो लक्ष्मणं प्रेक्ष्य राघवः ॥ भ्रातृस्नेहान्महातेजा विषण्णहृदयोऽभवत् ॥ ३७ ॥
स मुहूर्तमनुध्याय[1] बाष्पव्याकुललोचनः ॥ बभूव संरब्धतरो युगान्त इव पावकः ॥ ३८ ॥
न विषादस्य कालोऽयमिति संचिन्त्य राघवः ॥ चक्रे सुतुमुलं युद्धं रावणस्य वधे धृतः ॥
सर्वयत्नेन महता लक्ष्मणं सन्निरीक्ष्य[2] च ॥ ३९ ॥
स ददर्श ततो रामः शक्त्या भिन्नं महाहवे ॥ लक्ष्मणं रुधिरादिग्धं सपन्नगमिवाचलम् ॥ ४० ॥
तामपि प्रहितां शक्तिं रावणेन बलीयसा ॥ यत्नतस्ते हरिश्रेष्ठा न शेकुरवमर्दितुम् ॥
अर्दिताश्चैव बाणौघैः क्षिप्रहस्तेन रक्षसा ॥ ४१ ॥
सौमित्रिं सा विनिर्भिद्य प्रविष्टा धरणीतलम् ॥ ४२ ॥
तां कराभ्यां परामृश्य रामः शक्तिं भयावहाम् ॥ बभञ्ज समरे क्रुद्धो बलवान्विचकर्ष च ॥ ४३ ॥
तस्य निष्कर्षतः शक्तिं रावणेन बलीयसा ॥ शराः सर्वेषु गात्रेषु पातिता मर्मभेदिनः ॥ ४४ ॥
अचिन्तयित्वा तान्बाणान्समाश्लिष्य[3] च लक्ष्मणम् ॥ अब्रवीच्च हनूमन्तं सुग्रीवं[4] चैव राघवः ॥
लक्ष्मणं परिवार्येह तिष्ठध्वं वानरोत्तमाः ॥ ४५ ॥
पराक्रमस्य कालोऽयं संप्राप्तो मे चिरेप्सितः ॥ पापात्माऽयं दशग्रीवो वध्यतां पापनिश्चयः ॥
काङ्क्षितः स्तोककस्येव[5] घर्मान्ते मेघदर्शनम् ॥ ४६ ॥
अस्मिन्मुहूर्ते नचिरात्सत्यं प्रतिशृणोमि वः ॥ अरावणमरामं वा जगद्द्रक्ष्यथ वानराः ॥ ४७ ॥
राज्यनाशं वने वासं दण्डके परिधावनम् ॥ वैदेह्याश्च परामर्शं रक्षोभिश्च समागमम् ॥ ४८ ॥
प्राप्तं दुःखं महद्घोरं क्लेशं च निरयोपमम् ॥ अद्य सर्वमहं त्यक्ष्ये निहत्वा रावणं रणे ॥ ४९ ॥
यदर्थं वानरं सैन्यं समानीतमिदं मया ॥ सुग्रीवश्च कृतो राज्ये निहत्वा वालिनं रणे ॥ ५० ॥

पदानि । लक्ष्मणस्योरसि ममज्रेति संबन्धः ॥३४—३७॥ अनुध्याय तत्कालकर्तव्यं चिन्तयित्वा ॥ ३८ ॥ न विषादस्येति सार्धश्लोकमेकं वाक्यं । लक्ष्मणं सन्निरीक्ष्य महता सर्वयत्नेन रावणस्य वधे धृतः अवहितः सुतुमुलं युद्धं चक्र इत्यन्वयः । न केवलं सीताहरणात् किंतु लक्ष्मणदर्शनादपीति चशब्दार्थः ॥ ३९ ॥ कथं लक्ष्मणदर्शनं रावणवधकारणं भवतीत्यत्राह—स ददर्शेति ॥ तदानीं लक्ष्मणस्य तादृशशोच्यत्वदर्शनं रावणवधनिश्चयकारणं भवतीत्याशयः ॥४०॥ तामपीति ॥ अपिशब्दस्य यत्नतोपीत्युत्तरत्रान्वयः । बाणार्दितत्वेन सुतरां न शेकुरित्याह—अर्दिताश्चेति ॥४१॥ कारणान्तरमाह—सौमित्रिमिति ॥ ४२—४५ ॥ पराक्रमस्येत्यादिसार्धश्लोक एकान्वयः ॥ वध्यतामिति प्राप्तकाले लोट् । स्तोककस्य चातकस्य । "स्तोककश्चातकः समाः" इत्यमरः ॥ ४६ ॥ अस्मिन्मुहूर्ते तत्रापि न चिराद्द्रक्ष्यथेत्यन्वयः ॥ ४७ ॥ राज्यनाशमित्यादिश्लोकद्वयमेकान्वयं ॥ प्राप्तं पंपोपवनादौ । क्लेशं लक्ष्मणप्रहरणजन्यं ॥ ४८—४९ ॥ यदर्थमित्यादिश्लोकत्रयमेकान्वयं ॥ दृष्टिं दृष्टिविषयं । दृष्टौ विषं यस्यासौ दृष्टिविषः तस्य । केचिद्धि सर्पाः दर्शनमात्रेण मनुष्यान्मारयन्तीति प्रसिद्धिः ॥५०—

स० तदवस्थं साऽवस्थायस्थतं ॥ ३७ ॥ स० इवेनकविः स्वतः सर्वविदोध्यानं लोकानुकृतितइतिसूचयति ॥ ३८ ॥ ति० समाश्लिष्येति । समाश्लेषोऽयंसकलपीडानिवृत्तिफलकः स्वतादात्म्यावभासनरूपः ॥ ३९ ॥ ति० राज्यनाशं राज्यनाशजनितंदुःखं । वनेवासं वनवासजनितंदुःखं । एवमुत्तरत्रापिदुःखविशेषणानि । क्लेशंचनिरयोपमंअतिजुगुप्सितंदुःखं लक्ष्मणप्रहारजनितमित्यर्थः ॥ ४८ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. मुहूर्तमिवध्यात्वा. २ घ. ङ. झ. बाष्पपर्याकुलेक्षणः. ३ ङ. झ. परिवीक्ष्यच. ४ ङ. झ. ट. सुग्रीवंचमहाकपिं. ५ ङ. झ. ञ. ट. काङ्क्षितंचातकस्येव. क. ख. च. छ. ज. काङ्क्षतश्चातकस्येव.

यदर्थं सागरः क्रान्तः सेतुर्बद्धश्च सागरे ॥ सोयमद्य रणे पापश्चक्षुर्विषयमागतः ॥ ५१ ॥
चक्षुर्विषयमागम्य नायं जीवितुमर्हति ॥ दृष्टिं दृष्टिविषस्येव सर्पस्य मम रावणः ॥ ५२ ॥
स्वस्थाः पश्यत दुर्धर्षा युद्धं वानरपुङ्गवाः ॥ आसीनाः पर्वताग्रेषु ममेदं रावणस्य च ॥ ५३ ॥
अद्य रामस्य रामत्वं पश्यन्तु मम संयुगे ॥ त्रयो लोकाः सगन्धर्वाः सदेवाः सर्षिचारणाः ॥ ५४ ॥
अद्य कर्म करिष्यामि यल्लोकाः सचराचराः ॥ सदेवाः कथयिष्यन्ति यावद्भूमिर्धरिष्यति ॥
समागम्य सदा लोके यथा युद्धं प्रवर्तितम् ॥ ५५ ॥
एवमुक्त्वा शितैर्बाणैस्तप्तकाञ्चनभूषणैः ॥ आजघान दशग्रीवं रणे रामः समाहितः ॥ ५६ ॥
अथ प्रदीप्तैर्नाराचैर्मुसलैश्चापि रावणः ॥ अभ्यवर्षत्तदा रामं धाराभिरिव तोयदः ॥ ५७ ॥
रामरावणमुक्तानामन्योन्यमभिनिघ्नताम् ॥ शरैराणां च शराणां च बभूव तुमुलः स्वनः ॥ ५८ ॥
ते भिन्नाश्च विकीर्णाश्च रामरावणयोः शराः ॥ अन्तरिक्षात्प्रदीप्ताग्रा निपेतुर्धरणीतले ॥ ५९ ॥
तयोर्ज्यातलनिर्घोषो रामरावणयोर्महान् ॥ त्रासनः सर्वभूतानां संबभूवाद्भुतोपमः ॥ ६० ॥
स कीर्यमाणः शरजालवृष्टिभिर्महात्मना दीप्तधनुष्मताऽर्दितः ॥
भयात्प्रदुद्राव समेत्य रावणो यथाऽनिलेनाभिहतो बलाहकः ॥ ६१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोत्तरशततमः सर्गः ॥ १०१ ॥

द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

रामेणसुषेणंप्रति रावणशक्तिघातपतितलक्ष्मणप्रदर्शनपूर्वकं तस्यनिधनशङ्कया विषादेनबहुधाविलापः ॥ १ ॥ सुषेणेनरामंप्रति हेतूपन्यासेनलक्ष्मणप्राणधारणनिर्धारणोक्त्यासमाश्वासनपूर्वकं हनुमन्तंप्रति विशल्यकरण्याद्योषधिसमानयनचोदना ॥ २ ॥ ओषधिगिरिंगत्वेनहनुमता ओषधीनामन्तर्धानेकोपादुत्पाटनेनतच्छिखरस्यैव समानयनम् ॥ ३ ॥ सुषेणेनानान्यस्तमहौषधिक्षोदसमाघ्राणनमात्राद्विशल्येनलक्ष्मणेन स्वापादिव समुत्थानम् ॥ ४ ॥ सहर्षबाष्पंरामपरिष्वक्तेनलक्ष्मणेन तंप्रति सत्वरं रावणवधप्रार्थना ॥ ५ ॥

शक्त्या विनिहतं दृष्ट्वा रावणेन बलीयसा ॥ लक्ष्मणं समरे शूरं रुधिरौघपरिप्लुतम् ॥ १ ॥

---

५३ ॥ रामत्वं जगदेकवीरत्वं । आचार्यास्तु रामावतारप्रयोजनमित्याहुः ॥ ५४ ॥ अद्येत्यादिसार्धश्लोक एकान्वयः ॥ सदेवाः सचराचराः लोकाः जनाः । समागम्य संघीभूय । यथेदानीं युद्धं प्रवर्तितं तथा यावद्भूमिर्धरिष्यति तावत्कालं सदा नित्यशः । लोके यत्कर्म कथयिष्यन्ति तत्कर्माद्य करिष्यामीत्यन्वयः ॥ ५५—६१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोत्तरशततमः सर्गः ॥ १०१ ॥

अथ लक्ष्मणसंजीवनं द्विशततमे—शक्त्या विनिहतमित्यादिश्लोकद्वयमेकं वाक्यं ॥ विसृजन्नेवेत्यादि-

---

ति० रामस्यरामत्वं रमयतीतिरामइतिव्युत्पत्त्यापराक्रमेणापिरमयितृत्वमुच्यते ॥ ती० रामस्यरामत्वं त्रीँल्लोकान्सर्षिदेवान्धर्मेणसत्येनशौर्येणचरमयतीत्यन्वर्थंरामत्वं । तदुचितंकर्माद्यकरिष्यामीतिभावः ॥ स० रामस्यममरामत्वंपश्यन्तु । अन्यथानामेदं त्यक्ष्यामीतिभावः ॥ ५४ ॥ ति० यावद्भूमिर्धरिष्यति प्राणिनः ॥ ५५ ॥ वराणां शराणां श्रेष्ठानांशराणां । चान्मुसलानां ॥ ५८ ॥ ति० भयात् भ्रातृपीडाजनितकोपेनसर्वथामांहनिष्यत्येवेतिभयादित्यर्थः ॥ इदंपलायनममासार्यकाले ॥ ६१ ॥ इत्येकोत्तरशततमःसर्गः ॥ १०१ ॥

[पा०] १ क. ख. ङ. झ. ञ. सुखंपश्यत. २ ङ. च. छ. झ. ञ. ट. तथाप्रसिद्धैर्नाराचैः. ३ ज. अभ्यवर्षततंशैलं धाराभिरिव. ४ झ. ट. वराणांचशराणांच. घ. उद्यतानांशराणांच. ५ ङ. च. छ. झ. ञ. विच्छिन्नाविकीर्णाश्च. ६ ङ.—ट. विकीर्यमाणः.

स दृष्ट्वा तुमुलं युद्धं रावणस्य दुरात्मनः ॥ विसृजन्नेव बाणौघान्सुषेणं वाक्यमब्रवीत् ॥ २ ॥
एष रावणवीर्येण लक्ष्मणः पतितः क्षितौ ॥ सर्पवद्वेष्टते वीरो मम शोकमुदीरयन् ॥ ३ ॥
शोणितार्द्रमिमं वीरं प्राणैरिष्टतमं मम ॥ पश्यतो मम का शक्तिर्योद्धुं पर्याकुलात्मनः ॥ ४ ॥
अयं स समरश्लाघी भ्राता मे शुभलक्षणः ॥ यदि पञ्चत्वमापन्नः प्राणैर्मे किं सुखेन च ॥ ५ ॥
लज्जतीव हि मे वीर्यं भ्रश्यतीव कराद्धनुः ॥ सायका व्यवसीदन्ति दृष्टिर्बाष्पवशं गता ॥
अवसीदन्ति गात्राणि स्वप्नयाने नृणामिव ॥ ६ ॥
चिन्ता मे वर्धते तीव्रा मुमूर्षा चोपजायते ॥ भ्रातरं निहतं दृष्ट्वा रावणेन दुरात्मना ॥ ७ ॥
विनिष्टनन्तं दुःखार्तं मर्मण्यभिहतं भृशम् ॥ राघवो भ्रातरं दृष्ट्वा प्रियं प्राणं बहिश्चरम् ॥
दुःखेन महताऽऽविष्टो ध्यानशोकपरायणः ॥ ८ ॥
परं विषादमापन्नो विललापाकुलेन्द्रियः ॥ ९ ॥
न हि युद्धेन मे कार्यं नैव प्राणैर्न सीतया ॥ भ्रातरं निहतं दृष्ट्वा लक्ष्मणं रणपांसुषु ॥ १० ॥
किं मे राज्येन किं प्राणैर्युद्धे कार्यं न विद्यते ॥ यत्रायं निहतः शेते रणमूर्धनि लक्ष्मणः ॥ ११ ॥
देशे देशे कलत्राणि देशेदेशे च बान्धवाः ॥ तं तु देशं न पश्यामि यत्र भ्राता सदोहरः ॥ १२ ॥
[किंनु राज्येन दुर्धर्ष लक्ष्मणेन विना मम ॥ कथं वक्ष्याम्यहं त्वंबां सुमित्रां पुत्रवत्सलाम् ॥
उपालंभं न शक्ष्यामि सोढुं दत्तं सुमित्रया ॥ १३ ॥
किंनु वक्ष्यामि कौसल्यां मातरं किंनु कैकयीम् ॥ भरतं किंनु वक्ष्यामि शत्रुघ्नं च महाबलम् ॥
सह तेन वनं यातो विना तेनागतः कथम् ॥ १४ ॥
इहैव मरणं श्रेयो न तु बन्धुविगर्हणम् ॥ १५ ॥
किं मया दुष्कृतं कर्म कृतमन्यत्र जन्मनि ॥ येन मे धार्मिको भ्राता निहतश्चाग्रतः स्थितः ॥ १६ ॥
हा भ्रातर्मनुजश्रेष्ठ शूराणांप्रवर प्रभो ॥ एकाकी किंनु मां त्यक्त्वा परलोकाय गच्छसि ॥ १७ ॥
विलपन्तं च मां भ्रातः किमर्थं नावभाषसे ॥ उत्तिष्ठ पश्य किं शेषे दीनं मां पश्य चक्षुषा ॥ १८ ॥
शोकार्तस्य प्रमत्तस्य पर्वतेषु वनेषु च ॥ विषण्णस्य महाबाहो समाश्वासयिता मम ॥ १९ ॥]
इत्येवं विलपन्तं तं शोकविह्वलितेन्द्रियम् ॥ विवेष्टमानं करुणमुच्छ्वसन्तं पुनः पुनः ॥
राममाश्वासयन्वीरः सुषेणो वाक्यमब्रवीत् ॥ २० ॥

वर्तमाननिर्देशेन रावणपलायनानन्तरं लक्ष्मणयोगक्षेमानुसंधाने अविलम्बः सूचितः ॥ १—२ ॥ उदीरयन् जनयन् ॥ ३ ॥ प्राणैः प्राणेभ्यः ॥ ४—५ ॥ लज्जतीवेत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ लज्जतीव । आर्षं परस्मैपदं । स्वप्नयाने स्वप्नगमने । स्वप्ने हि गच्छतां पुरुषाणां पादाः पश्चादाकृष्टा भवन्ति । भ्रातरं निहतं दृष्ट्वेति पूर्वशेषः ॥ ६—७ ॥ विनिष्टनन्तमित्यादिसार्धश्लोकमेकं वाक्यं ॥ विनिष्टनन्तं निश्वसन्तं । ध्यानशोकपरायणः अभूदिति शेषः ॥ ८ ॥ परं विषादमित्यर्धं ॥ राघव इत्यनुषञ्जनीयं ॥ ९ ॥ दृष्ट्वा स्थितस्येति शेषः ॥ १० ॥ यत्र यतः ॥ ११—२० ॥

स० सहोदरः तत्तुल्यः । पायसस्यकौसल्याविभागादुद्भूतस्यसुमित्रायैप्रदानान्निमित्ताद्भ्रातृलक्ष्मणस्यसाहोदर्यं । सहोदरस्यमेलनं भवेत् असहोदरःसन्नेतादृशोभ्रातायत्रमिलेत्तंदेशंनपश्यामीत्यर्थोवा । भिन्नोदरेएतादृशंसौहार्दंदुर्लभमितिभावः ॥ १२ ॥

[पा०] १ झ. प्राणैःप्रियतरं. २ किंनुराज्येनेत्यादयः समाश्वासयितामम्मेत्यन्ताःश्लोकाः ङ. झ. ञ. ट. पाठेषुदृश्यन्ते. ३ इत्येवमित्यादीनां स्रस्तगात्रस्यभूतलइत्यन्तानांश्लोकानांस्थाने ङ. झ. ञ. ट. पाठेषु "राममेवंब्रुवाणंतुशोकव्याकुलितेन्द्रियम् । आश्वासयन्नुवाचेदंसुषेणःपरमंवचः । त्यजेमांनरशार्दूलबुद्धिर्वैक्लव्यकारिणीम् । शोकसंजननींचिन्तांतुल्यांबाणैश्चमूमुखे ।

न मृतोऽयं महाबाहो लक्ष्मणो लक्ष्मिवर्धनः ॥ न चास्य विकृतं वक्त्रं नापि श्यावं न निष्प्रभम् ॥२१॥
सुप्रभं च प्रसन्नं च मुखमस्याभिलक्ष्यते ॥ पद्मपत्रतलौ हस्तौ सुप्रसन्ने च लोचने ॥ २२ ॥
एवं न विद्यते रूपं गतासूनां विशांपते ॥ दीर्घायुषस्तु ये मर्त्यास्तेषां तु मुखमीदृशम् ॥ २३ ॥
नायं प्रेतत्वमापन्नो लक्ष्मणो लक्ष्मिवर्धनः ॥ मा विषादं कृथा वीर सप्राणोऽयमरिन्दमः ॥२४ ॥
आख्यास्यते प्रसुप्तस्य स्रस्तगात्रस्य भूतले ॥ सोच्छ्वासं हृदयं वीर कम्पमानं मुहुर्मुहुः ॥ २५ ॥
एवमुक्त्वा तु वाक्यज्ञः सुषेणो राघवं वचः ॥ हनुमन्तमुवाचेदं हनुमन्तमभित्वरन् ॥ २६ ॥
सौम्य शीघ्रमितो गत्वा शैलमोषधिपर्वतम् ॥ पूर्वं ते कथितो योसौ वीर जाम्बवता शुभः ॥२७ ॥
दक्षिणे शिखरे तस्य जातामोषधिमानय ॥ विशल्यकरणीं नाम विशल्यकरणीं शुभाम् ॥ २८ ॥
सवर्णकरणीं चापि तथा संजीवनीमपि ॥ संधानकरणीं चापि गत्वा शीघ्रमिहानय ॥
संजीवनार्थं वीरस्य लक्ष्मणस्य महात्मनः ॥ २९ ॥
इत्येवमुक्तो हनुमान्गत्वा चौषधिपर्वतम् ॥ चिन्तामभ्यगमच्छ्रीमानजानंस्तां महौषधिम् ॥ ३० ॥
तस्य बुद्धिः समुत्पन्ना मारुतेरमितौजसः ॥ इदमेव गमिष्यामि गृहीत्वा शिखरं गिरेः ॥ ३१ ॥
अस्मिन्हि शिखरे जातामोषधीं तां सुखावहाम् ॥ प्रतर्केणावगच्छामि सुषेणोप्येवमब्रवीत् ॥ ३२ ॥
अगृह्य यदि गच्छामि विशल्यकरणीमहम् ॥ कालात्ययेन दोषः स्याद्वैक्लव्यं च महद्भवेत् ॥ ३३ ॥

श्यावं कपिशं । विवर्णमिति यावत् । "श्यावः स्यात्कपिशः" इत्यमरः ॥ २१—२४ ॥ मुहुर्मुहुः कम्पमानं हृदयमेनं सोच्छ्वासं सप्राणं । आख्यास्यते आचष्टे । लडर्थे लृट् ॥ २५—२६ ॥ सौम्य शीघ्रमित्यादि सार्धश्लोकत्रयमेकान्वयं ॥ ओषधिपर्वतं ओषधिपर्वताख्यं । द्वितीयो विशल्यकरणीशब्दो गुणवचनः । विशल्याः क्रियन्तेनयेति विशल्यकरणी तां ॥ २७—३० ॥ तस्य बुद्धिरित्यादिश्लोकत्रयमेकान्वयं । प्रतर्केण अन्तःकरणप्रसादादिना लिङ्गेन । सुषेणोप्येवमब्रवीदिति । "दक्षिणे शिखरे तस्य जातामोषधिमानय" इति सुषेणवचनं । अगृह्य यदि गच्छामि । पुनः सुषेणं प्रष्टुमिति भावः । दोषः लक्ष्मणहानिरूपः । वैक्लव्यं निष्पौरुषत्वं । अन्ते इतिकरणेन पूर्वमन्वयः

ति० अत्र द्वितीयोहनुशब्दः प्रशस्तहनुवचनः ॥ यद्वा हनुशब्दोज्ञानवाची । "ज्ञानवान्हनुमान्स्मृतः" इतिशब्दार्णवे ॥ २६ ॥ स० अजानन् दृष्टपूर्वाणामप्योषधीनांपूर्ववन्निलीनानांज्ञानार्थं मार्गणेसमयोऽयंमयातीतोभवेद्भवेयंचराघवाश्लाघ्यइत्यजानन्निति वदन्सूचयतिकविरितिज्ञेयं । यत्तुनागोजिभट्टेन " पूर्वदृष्टानामप्यपरिचयेपुराणान्तरोक्तकालनेमियुद्धकृतचित्तचाञ्चल्यंहेतुरिति बोध्यमित्युक्तं तत्तुकालनेमिंदृष्ट्वागतवतश्चित्तप्राशस्त्यस्यैवसंभवदुक्तिकत्वादुपेक्ष्यं । यथोक्तमध्यात्मरामायणे " रामेणप्रेषितोवीरहनुमान्क्षीरसागरम् । गतोनेतुंलक्ष्मणस्यजीवनार्थंमहोदधिम् । कृत्वातच्चारवचनंराजाचिन्तापरोऽभवत् । जगामरात्रावेकाकी कालनेमिगृहंक्षणात्" इत्यारभ्य—"ततआगत्यमकरीमहाकायामहाकपिम् । त्वत्प्रसादादहंपाशान्मुक्तोह्यस्मिकपीश्वर । आश्रमेयस्तुतेदृष्टःकालनेमिर्महासुरः । रावणप्रहितोमार्गेविघ्नंकर्तुंतवानघ । मुनिवेषधरो नासौमुनिर्विघ्नविहिंसकः । जहिदुष्टंगच्छशीघ्रं द्रोणाचलमनुत्तमम् । गच्छाम्यहंब्रह्मलोकंत्वत्स्पर्शादूतकल्मषा" इतिगर्भीकृत्य—"गृहाणमत्तोमन्त्रंत्वंदेहिमेगुरुदक्षिणाम् । इत्युक्तो हनुमान्मुष्टिंदत्वंबद्ध्वाहराक्षसम् । गृहाणदक्षिणामेतामित्युक्त्वानिजघानतम् । जघानमुष्टिनाकीर्णभग्नमूर्धाममारसः" इत्यन्तेन । "अदृष्ट्वाचौषधीस्तत्रगिरिमुत्पाट्यसर्वतः" इतिच । विष्णुहतादयमन्यःकालनेमिरितिज्ञेयम् ॥ ३० ॥ स० विशल्यकरणीं विशल्यः लक्ष्मणप्राणसंशयात्मकशल्यरहितोरामः क्रियतेअनया चतुर्विधयौषध्येतिसा सुषेणभाषितसवौंषधिः । तामगृह्य अगृहीत्वा ।

[पा०] नैवपद्मत्वमापन्नो लक्ष्मणोलक्ष्मिवर्धनः । नह्यस्यविकृतंवक्त्रंनचश्यामत्वमागतम् । सुप्रभंचप्रसन्नंचमुखमस्यनिरीक्ष्यताम् । पद्मपत्रतलौहस्तौसुप्रसन्नेचलोचने । नेदृशंदृश्यतेरूपंगतासूनांविशांपते । विषादं माकृथावीर सप्राणोयमरिंदम । आख्यातितुप्रसुप्तस्यस्रस्तगात्रस्यभूतले" इत्येतेश्लोकाः पाठभेदवत्तयादृश्यन्ते.

१ ङ. ञ. ञ. ट. मुक्त्वामहाप्राज्ञः. २ ङ. ज.—ट. समीपस्थमुवाचेदंहनुमन्तंमहाकपिम्. ३ घ. याहिशैलं. ञ. ट. गत्वापर्वतंहिमहोदयं.

इति संचिन्त्य हनुमान्गत्वा क्षिप्रं महाबलः ॥ आसाद्य पर्वतश्रेष्ठं त्रिः प्रक्रम्य [1]गिरेः शिरः ॥३४॥
फुल्लनानातरुगणं समुत्पाट्य महाबलः ॥ गृहीत्वा हरिशार्दूलो हस्ताभ्यां समतोलयत् ॥ ३५ ॥
स नीलमिव जीमूतं तोयपूर्णं नभःस्थलात् ॥ [2]आपपात गृहीत्वा तु हनुमाञ्शिखरं गिरेः ॥ ३६ ॥
समागम्य महावेगः संन्यस्य शिखरं गिरेः ॥ विश्रम्य किंचिद्धनुमान्सुषेणमिदमब्रवीत् ॥ ३७ ॥
[3]ओषधीं नावगच्छामि तामहं हरिपुङ्गव ॥ तदिदं शिखरं कृत्स्नं गिरेस्तस्याहृतं मया ॥ ३८ ॥
एवं कथयमानं तं प्रशस्य पवनात्मजम् ॥ सुषेणो वानरश्रेष्ठो जग्राहोत्पाट्य चौषधीम् ॥ ३९ ॥
विस्मितास्तु बभूवुस्ते रणे वानरराक्षसाः ॥ दृष्ट्वा हनुमतः कर्म सुरैरपि सुदुष्करम् ॥ ४० ॥
ततः संक्षोदयित्वा तामोषधीं वानरोत्तमः ॥ लक्ष्मणस्य ददौ नस्तः सुषेणः सुमहाद्युतेः ॥ ४१ ॥
सशल्यस्तां समाघ्राय लक्ष्मणः परवीरहा ॥ विशल्यो विरुजः शीघ्रमुदतिष्ठन्महीतलात् ॥ ४२ ॥
तमुत्थितं ते हरयो भूतलात्प्रेक्ष्य लक्ष्मणम् ॥ साधुसाध्विति सुप्रीताः सुषेणं प्रत्यपूजयन् ॥ ४३ ॥
एह्येहीत्यब्रवीद्रामो लक्ष्मणं परवीरहा ॥ [4]संस्वजे स्नेहगाढं च बाष्पपर्याकुलेक्षणः ॥ ४४ ॥
अब्रवीच्च परिष्वज्य सौमित्रिं राघवस्तदा ॥ दिष्ट्या त्वां वीर पश्यामि मरणात्पुनरागतम् ॥ ४५ ॥
न हि मे जीवितेनार्थः सीतया चापि लक्ष्मण ॥ को हि मे विजयेनार्थस्त्वयि पञ्चत्वमागते ॥४६॥
इत्येवं वदतस्तस्य राघवस्य महात्मनः ॥ खिन्नः शिथिलया वाचा लक्ष्मणो वाक्यमब्रवीत् ॥ ४७ ॥
तां प्रतिज्ञां प्रतिज्ञाय पुरा सत्यपराक्रम ॥ लघुः कस्मिदिवासत्त्वो नैवं वक्तुमिहार्हसि ॥ ४८ ॥
न हि प्रतिज्ञां कुर्वन्ति वितथां साधवोऽनघ ॥ लक्षणं हि महत्त्वस्य प्रतिज्ञापरिपालनम् ॥ ४९ ॥
नैराश्यमुपगन्तुं ते तदलं मत्कृतेऽनघ ॥ वधेन रावणस्याद्य प्रतिज्ञामनुपालय ॥ ५० ॥

कार्यः ॥ ३१—३३ ॥ इति संचिन्त्येत्यादिश्लोकद्वयमेकान्वयं ॥ समतोलयत् उदक्षिपत् ॥ ३४—३६ ॥ संन्यस्य सेनामध्ये निक्षिप्य ॥३७—४४॥ अब्रवीदित्यादिश्लोकद्वयमेकान्वयं ॥ ४५—४७ ॥ तां प्रतिज्ञां रावणं हत्वा विभीषणमभिषेक्ष्यामीत्येवंरूपां ॥४८—४९॥ नैराश्यं सीतायां विजये चोपेक्षां ॥ ५० ॥

यदिगच्छामि तदादोषः स्यात् लक्ष्मणप्राणप्रणाशेनप्रत्यवेयां । वैक्लव्यं अचातुर्यप्रयोजकचित्तलोलता । यत्तुनागोजिभट्टेन 'विशल्यकरणीपदंतन्मात्रपरंरूढ्याव्याख्याय, लक्ष्मणस्यसप्राणत्वादवश्यमपेक्षितांययगृहीत्वाऽन्यांवातदाभासांगृहीत्वागच्छामितदा महद्वैक्लव्यं अचतुराज्ञत्वादिदोषः स्यात् । विचारकरणेतु कालात्ययेनलक्ष्मणस्यप्राणनाशोदोषः स्यात्' इतिव्याख्यातंतत्तु पूर्वंसुषेणेन चतस्रणामोषधीनामानयनविषयेस्पष्टमुक्तेरेकमात्रानधिकारिकत्वाद्धनूमांवानराणामेतच्चतुष्टययोग्यावस्थावत्त्वोज्जीवनादिवैचित्र्यदर्शनाच्च 'ओषधीर्नावगच्छामि' इत्युत्तरत्रोक्तेश्चासंभावितम् ॥ ३३ ॥ **ति०** त्रिः प्रकंप्य स्वेनपुरास्थापितस्यापिपुनरुत्पाटनार्थंत्रिः कंपनं । पूर्वंसंगृहीतौषधीनांमूर्च्छितयूथपेषुव्ययात्पुनरस्यप्रेषणमितिबोध्यं ॥ **स०** हनुमद्बलेनप्राक्तोपिटङ्कितवदतिश्लेषात्त्रिःकंपनमितिमन्तव्यं ॥ ३४ ॥ **स०** नभस्तलादितिबहुषुपुस्तकेषुपाठः । यत्तुनागोजिभट्टः स्थलान्नभउत्पपातेतिव्याख्यातवान् तत्तु पञ्चम्येव साक्षादितिभ्रान्त्येवयोजनाऽसामर्थ्येनचेतिज्ञेयं ॥ नभस्तलादितिल्यब्लोपनिमित्तापञ्चमी । नभस्तलंप्राप्योत्पपातेत्यन्वयः । स्थलशब्दोपिपदान्तरसापेक्षार्थइतिभ्वादिपदाभावाल्लक्षणयास्थलविशेषस्यकल्प्यत्वाच्च ॥ ३६ ॥ **रामानु०** "लक्ष्मणायददौनस्यंसुषेणः परमौषधं" इत्येतत्प्रकारेणेन्द्रजिद्युद्धेशल्यपीडितानांलक्ष्मणादीनांचिकित्सांकृतवतासंगृहीतौषधेनसुषेणेन " सौम्यशीघ्रमितोगत्वा शैलमोषधिपर्वतम्" इतिहनुमत्प्रेषणमनुपपन्नमिवप्रतीयते । अत्रलक्ष्मणविभीषणादिचिकित्सायामोषधिजातंसर्वविनियुक्तमितिपरिहारस्यवक्तुंशक्यत्वेपिअविस्मरणशीलस्यहनुमतः स्वेनैवाचिरस्थापितपर्वतविषयकंप्रतकेंणावगच्छामीत्यभिधानं त्रिःप्रकंप्योत्पाटनं चविरुद्धमिवप्रतीयते । अत्रपरिहारोविद्वद्भिश्चिन्तनीयः ॥ ४१ ॥ **स०** यंपूर्वमालिङ्ग्यबाष्पपर्याकुलेक्षणोऽभूत्तंगाढंसस्वजे ॥४४॥ **ति०** शिथिलयावाचाखिन्नः 'कोहिमेजीवितेनार्थः' इत्येवंरूपया रावणवधविभीषणराज्यदानप्रतिज्ञाशैथिल्यकरयावाचाखिन्नइत्यर्थः ॥ ४७ ॥ **स०** प्रतिज्ञां प्रतिज्ञायतइतिप्रतिज्ञा रावणवधादिः ॥ ४८ ॥

[पा०] १ ख. ग. श्रेष्ठमप्रकंप्योगिरेस्तटं. २ ग. घ. ङ. ञ. गिरेस्तटं. ३ ङ. ञ. ञ. ट. उत्पपात. ४ ञ.—ट. ओषधीर्नावगच्छामितामहं. ५ ङ. ञ. ञ. ट. सर्वेवानरपुङ्गवाः. घ. ऋक्षवानरपुङ्गवाः. ६ च. छ. ञ. ट. सस्वजेगाढमालिङ्ग्य.

न जीवन्यास्यते शत्रुस्तव बाणपथं गतः ॥ नर्दतस्तीक्ष्णदंष्ट्रस्य सिंहस्येव महागजः ॥ ५१ ॥
अहं तु वधमिच्छामि शीघ्रमस्य दुरात्मनः ॥ यावदस्तं न यात्येष कृतकर्मा दिवाकरः ॥ ५२ ॥
यदि वधमिच्छसि रावणस्य संख्ये यदि च कृतां त्वमिहेच्छसि प्रतिज्ञाम् ॥
यदि तव राजवरात्मजाभिलाषः कुरु च वचो मम शीघ्रमद्य वीर ॥ ५३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

त्र्युत्तरशततमः सर्गः ॥ १०३ ॥

रथान्तरारोहणेनपुनस्समरायसमागच्छति रावणे इन्द्रेण रामाय मातलिसनाथनिजरथप्रेषणम् ॥ १ ॥ रथस्थाभ्यां रामरावणाभ्यामद्भुतयुद्धप्रवर्तनम् ॥ २ ॥ तदा लोकभयावहमहोत्पातप्रादुर्भावः ॥ ३ ॥

लक्ष्मणेन तु तद्वाक्यमुक्तं श्रुत्वा स राघवः ॥ संदधे परवीरघ्नो धनुरादाय वीर्यवान् ॥
रावणाय शरान्घोरान्विससर्ज चमूमुखे ॥ १ ॥
अथान्यं रथमास्थाय रावणो राक्षसाधिपः ॥ अभ्यद्रवत काकुत्स्थं स्वर्भानुरिव भास्करम् ॥ २ ॥
दशग्रीवो रथस्थस्तु रामं वज्रोपमैः शरैः ॥ आजघान महाघोरैर्धाराभिरिव तोयदः ॥ ३ ॥
दीप्तपावकसंकाशैः शरैः काञ्चनभूषणैः ॥ निर्बिभेद रणे रामो दशग्रीवं समाहितम् ॥ ४ ॥
भूमौ स्थितस्य रामस्य रथस्थस्य च रक्षसः ॥ न समं युद्धमित्याहुर्देवगन्धर्वदानवाः ॥ ५ ॥
[ततो देववरः श्रीमाञ्श्रुत्वा तेषां वचोऽमृतम् ॥ आहूय मातलिं शक्रो वचनं चेदमब्रवीत् ॥ ६ ॥
रथेन मम भूयिष्ठं शीघ्रं याहि रघूत्तमम् ॥ आहूय भूतलं यातः कुरु देवहितं महत् ॥ ७ ॥
इत्युक्तो देवराजेन मातलिर्दैवसारथिः ॥ प्रणम्य शिरसा देवं ततो वचनमब्रवीत् ॥ ८ ॥
शीघ्रं यास्यामि देवेन्द्र सारथ्यं च करोम्यहम् ॥ ततो हयैश्च संयोज्य हरितैः स्यन्दनोत्तमम् ॥९॥]
ततः काञ्चनचित्राङ्गः किङ्किणीशतभूषितः ॥ तरुणादित्यसंकाशो वैडूर्यमयकूबरः ॥ १० ॥

यास्यते यास्यति ॥५१॥ कृतकर्मा कृतसंचारः ॥५२॥ कृतां निर्व्यूढां ॥ ५३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

अथेन्द्ररथमारुह्य संग्रामस्त्रिशततमे—लक्ष्मणेनेत्यादि ॥ १—९ ॥ तत इत्यादिसार्धश्लोकत्रयमेकान्वयं ॥ कूबरः युगाधारदारु । "कूबरस्तु युगंधरः" इत्यमरः । काञ्चनापीडैः काञ्चनालंकारैः । श्वेतप्रकीर्णकैः श्वेतचामरैः । "चामरं तु प्रकीर्णकं" इत्यमरः । हरिभिः हरितवर्णैः । रुक्मवेणुध्वजः कनकदण्डध्वजः । देवराजरथ इति । य इति शेषः ।

ति० कृतकर्मा अद्यतनकर्तव्यांशेकृतलोकानुग्रहः । यावदस्तंनयातीत्यनेनाश्विनशुक्लप्रतिपद्येषावार्तेतिगम्यते । स० कृतकर्मालोककृतकर्मसाक्षी ॥ ५२ ॥ इतिद्व्युत्तरशततमःसर्गः ॥ १०२ ॥

स० धनुरादायबाणान्संदधे । चमूमुखेरावणाय तस्य ॥ १ ॥ स्वर्भानुः राहुः अत्रापिनागोजिभट्टेन " अथान्यंरथमास्थाय " त्यनेनरावणेनशुक्राज्ञयाजयनिमित्तंनिर्कुंभिलायामारब्धहोमकर्मणोवानरद्वाराहिंसनंपुराणान्तरोक्तमत्रानुसंधेयमितिसूचितमितिवदता"शीघ्रंशुक्रान्तिकंययौ"इत्यारभ्य–"प्रविश्यान्तःपुरेवेश्मन्यङ्गदोवेगवत्तरः । समानयत्केशपाशेधृत्वामन्दोदरींशुभाम् ।" इत्यादिगर्भीकृत्य—"दृढंस्यन्दनमास्थाय"इत्यन्तमध्यात्मरामायणं संगृहीतमितिज्ञायते । तत्प्रामाण्येसंदिहतेमहान्तइतिनतदुक्तंज्ञापकं ।

[पा०] १ ङ. च. ञ. ञ. ट. बाणवशंगतः. २ क.—ङ. ञ. ञ. ट. राजसुताभिलाषश्चार्यकुरुच. ३ ख. ग. ङ. ञ. मास्थाय. ४ ङ. च. छ. ञ. ट. महाशैलंधाराभिरिव. ५ ततोदेववरइत्यादयः स्यन्दनोत्तममित्यन्ताःश्लोकाः ङ. च. छ. ञ. ञ. ट. पाठेषुदृश्यन्ते.

मदश्वैः काञ्चनापीडैर्युक्तः श्वेतप्रकीर्णकैः ॥ हरिभिः सूर्यसंकाशैर्हेमजालविभूषितैः ॥
कार्मुकवेणुध्वजः श्रीमान्देवराजरथो वरः ॥ ११ ॥
देवराजेन संदिष्टो रथमास्थाय मातलिः ॥ अभ्यवर्तत काकुत्स्थमवतीर्य त्रिविष्टपात् ॥ १२ ॥
अब्रवीच्च तदा रामं प्रतोदो रथे स्थितः ॥ प्राञ्जलिर्मातलिर्वाक्यं सहस्राक्षस्य सारथिः ॥ १३ ॥
सहस्राक्षेण काकुत्स्थ रथोयं विजयाय ते ॥ दत्तस्तव महासत्त्व श्रीमञ्शत्रुनिबर्हण ॥ १४ ॥
इदमैन्द्रं महच्चापं कवचं चाग्निसन्निभम् ॥ शराश्चादित्यसंकाशाः शक्तिश्च विमला शिता ॥ १५ ॥
आरुह्येमं रथं वीर राक्षसं जहि रावणम् ॥ मया सारथिना राजन्महेन्द्र इव दानवान् ॥ १६ ॥
इत्युक्तः संपरिक्रम्य रथं समभिवाद्य च ॥ आरुरोह तदा रामो लोकाँल्लक्ष्म्या विराजयन् ॥ १७ ॥
तद्बभूवाद्भुतं युद्धं तुमुलं रोमहर्षणम् ॥ रामस्य च महाबाहो रावणस्य च रक्षसः ॥ १८ ॥
स गान्धर्वेण गान्धर्वं दैवं दैवेन राघवः ॥ अस्त्रं राक्षसराजस्य जघान परमास्त्रवित् ॥ १९ ॥
अस्त्रं तु परमं घोरं राक्षसं राक्षसाधिपः ॥ ससर्ज परमक्रुद्धः पुनरेव निशाचरः ॥ २० ॥
ते रावणधनुर्मुक्ताः शराः काञ्चनभूषणाः ॥ अभ्यवर्तन्त काकुत्स्थं सर्पा भूत्वा महाविषाः ॥ २१ ॥
ते दीप्तवदना दीप्तं वमन्तो ज्वलनं मुखैः ॥ राममेवाभ्यवर्तन्त व्यादितास्या भयानकाः ॥ २२ ॥
तैर्बभूवुकिसमस्पर्शैर्दीप्तभोगैर्महाविषैः ॥ दिशश्च संतताः सर्वाः प्रदिशश्च समावृताः ॥ २३ ॥
तान्दृष्ट्वा पन्नगास्त्रामः समापतत आहवे ॥ अस्त्रं गारुत्मतं घोरं प्रादुश्चक्रे भयावहम् ॥ २४ ॥
ते राघवशरा मुक्ता रुक्मपुङ्खाः शिखिप्रभाः ॥ सुपर्णाः काञ्चना भूत्वा विचेरुः सर्पशत्रवः ॥ २५ ॥
ते तान्सर्वाञ्शराञ्जघ्नुः सर्परूपान्महौजवान् ॥ सुपर्णरूपा रामस्य विशिखाः कामरूपिणः ॥ २६ ॥
अस्त्रे प्रतिहते क्रुद्धो रावणो राक्षसाधिपः ॥ अभ्यवर्षत्तदा रामं घोराभिः शरवृष्टिभिः ॥ २७ ॥
ततः शरसहस्रेण राममक्लिष्टकारिणम् ॥ अर्दयित्वा शरौघेण मातलिं प्रत्यविध्यत ॥ २८ ॥
चिच्छेद केतुमुद्दिश्य शरेणैकेन रावणः ॥ पातयित्वा रथोपस्थे रथात्केतुं च काञ्चनम् ॥
ऐन्द्रानपि जघानाश्वाञ्शरजालेन रावणः ॥ २९ ॥
तं दृष्ट्वा सुमहत्कर्म रावणस्य दुरात्मनः ॥ विषेदुर्देवगन्धर्वा दानवाश्चारणैः सह ॥ ३० ॥

योस्ति तमारुह्येत्युत्तरत्रान्वयः । संदिष्टः चोदितः । त्रिविष्टपात् स्वर्गात् ॥ १०—१२ ॥ प्रतोदः अश्वप्रेरणकाष्ठं ॥ १३ ॥ सहस्राक्षेणेत्यादिश्लोकद्वयमेकान्वयं ॥ इदमिति ॥ अत्र चापादिषु यथायोग्यं दत्त इत्येतल्लिङ्गवचनविपरिणामेन योजनीयं ॥ १४—१६ ॥ संपरिक्रम्य प्रदक्षिणीकृत्य । लोकान् लक्ष्म्या विराजयन् चन्द्रप्रभयेव स्वकान्त्या सर्वलोकान् प्रकाशयन्नित्यर्थः ॥ १७—२१ ॥ व्यादितास्याः व्याप्ताननाः । भयानकाः भयंकराः ॥ २२ ॥ दीप्तभोगैः दीप्तफणैः । "भोगः सुखे रुयादिभृतावहेश्च फणकाययोः" इत्यमरः । प्रदिशः दिक्कोणाः ॥ २३ ॥ प्रादुश्चक्रे प्रयुयुजे ॥ २४ ॥ शिखिप्रभाः अग्निप्रभाः । सुपर्णाः गरुडाः ॥ २५—२८ ॥ चिच्छेदेत्यादिसार्धश्लोकमेकं वाक्यं ॥ केतुं ध्वजपटं । उद्दिश्य लक्षी-

---

अथान्यमित्यस्य पूर्वयुद्धकालेरथध्वजादीनांशैथिल्यादन्यमित्युक्तिसंभवेनोक्तार्थस्यासूचकत्वाच्च । ति० पूर्वरणात्पलायनोत्त्यारावणोद्देश्यकशरविसर्गस्मरणभूमावसंभवादाश्विनप्रतिपन्मध्याह्नेएतद्युद्धप्रवृत्तिः ॥ २ ॥ ति० देवराजेनसंदिष्टः शीघ्रंगच्छेत्याज्ञप्तो मातलिरित्यन्वयः । पूर्वाज्ञयावस्तुसज्जीकरणं । पुनराज्ञयामनुष्यलोकंप्रतिचलनमितिबोध्यम् ॥ १२ ॥ ति० द्वैरथं द्वौरथौयस्तौ द्विरथौ । तयोरिदंद्वैरथं ॥ १८ ॥

[पा०] १ ख. च. छ. झ. ट. द्वैरथंरोम. २ ज. न्महाविषान्. ३ च. ज. ञ. केतुमिन्द्रस्य.

राममार्तं तदा दृष्ट्वा सिद्धाश्च परमर्षयः ॥ व्यथिता वानरेन्द्राश्च बभूवुः सविभीषणाः ॥ ३१ ॥
रामचन्द्रमसं दृष्ट्वा ग्रस्तं रावणराहुणा ॥ प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियाम् ॥
समाक्रम्य बुधस्तस्थौ प्रजानामशुभावहः ॥ ३२ ॥
सधूमपरिवृत्तोर्मिः प्रज्वलन्निव सागरः ॥ उत्पपात तदा क्रुद्धः स्पृशन्निव दिवाकरम् ॥ ३३ ॥
शस्त्रवर्णः सुपरुषो मन्दरश्मिर्दिवाकरः ॥ अदृश्यत कबन्धाङ्कः संसक्तो धूमकेतुना ॥ ३४ ॥
कोसलानां च नक्षत्रं व्यक्तमिन्द्राग्निदैवतम् ॥ आक्रम्याङ्गारकस्तस्थौ विशाखामपि चाम्बरे ॥३५॥
दशास्यो विंशतिभुजः प्रगृहीतशरासनः ॥ अदृश्यत दशग्रीवो मैनाक इव पर्वतः ॥ ३६ ॥
निरस्यमानो रामस्तु दशग्रीवेण रक्षसा ॥ नाशक्नोदभिसंधातुं सायकान्रणमूर्धनि ॥ ३७ ॥
स कृत्वा भ्रुकुटिं क्रुद्धः किंचित्संरक्तलोचनः ॥ जगाम सुमहाक्रोधं निर्दहन्निव चक्षुषा ॥ ३८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्र्युत्तरशततमः सर्गः ॥ १०३ ॥

चतुरुत्तरशततमः सर्गः ॥ १०४ ॥

रामेण मातलिसमानीतेन्द्रशक्त्या रावणविसृष्टशूलविभेदनपूर्वकं रावणललाटोरसिबाणैः प्रहरणम् ॥ १ ॥

तस्य क्रुद्धस्य वदनं दृष्ट्वा रामस्य धीमतः ॥ सर्वभूतानि वित्रेसुः प्राकम्पत च मेदिनी ॥ १ ॥
सिंहशार्दूलवाञ्शैलः संचचाल चलद्रुमः ॥ बभूव चातिक्षुभितः समुद्रः सरितांपतिः ॥ २ ॥
खगाश्च खरनिर्घोषा गगने परुषा घनाः ॥ औत्पातिकानि नर्दन्तः समन्तात्परिचक्रमुः ॥ ३ ॥
रामं दृष्ट्वा सुसंक्रुद्धमुत्पातांश्च सुदारुणान् ॥ वित्रेसुः सर्वभूतानि रावणस्याभवद्भयम् ॥ ४ ॥
विमानस्थास्तदा देवा गन्धर्वाश्च महोरगाः ॥ ऋषिदानवदैत्याश्च गरुत्मन्तश्च खेचराः ॥ ५ ॥
ददृशुस्ते महायुद्धं लोकसंवर्तसंस्थितम् ॥ नानाप्रहरणैर्भीमैः शूरयोः संप्रयुध्यतोः ॥ ६ ॥
ऊचुः सुरासुराः सर्वे तदा विग्रहमागताः ॥ प्रेक्षमाणा महद्युद्धं वाक्यं भक्त्या प्रहृष्टवत् ॥ ७ ॥

कृत्य । रथात् रथावयवदण्डात् ॥ २९—३१ ॥ रामस्य तादृशदशादर्शनेन संजातानि दिव्यानि भौमानि च वैकृतान्याह-रामचन्द्रमसमित्यादिना ॥ प्राजापत्यं नक्षत्रं प्रजापतिदेवताकनक्षत्रभूतां रोहिणीं। बुधे रोहिणीं प्राप्ते जगत्पीडा भवतीति भावः ॥३२—३३ ॥ शस्त्रवर्णः असिश्यामः ॥ ३४ ॥ कोसलानां इक्ष्वाकूणां । विशाखायास्तन्नक्षत्रत्वमेतत्काण्डचतुर्थसर्गे दर्शितं ॥ ३५—३६ ॥ अभिसंधातुं धनुष्यारोपयितुं ॥ ३७ ॥ अथैतद्दर्शनेन रामकोपं दर्शयति-स कृत्वेति ॥ ३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्र्युत्तरशततमः सर्गः ॥ १०३ ॥

अथ रावणस्य शूलोद्धरणं चतुःशततमे-तस्येत्यादि ॥ १—२ ॥ औत्पातिकानि उत्पातसूचकानि । नर्दन्तः गर्जन्तः ॥ ३—४ ॥ विमानस्था इत्यादिश्लोकद्वयमेकान्वयं । लोकसंवर्तस्य प्रलयस्येव संस्थितं संस्थानं यस्य तत्तथोक्तं ॥ ५—६ ॥ विग्रहमागताः विग्रहं युद्धं उद्दिश्यआगताः । युद्धं द्रष्टुमागता इत्यर्थः । यद्वा विग्रहमागताः रामरावणपक्षपातात् परस्परं कलहाय-

---

ति० एतेउत्पातारामस्यतथामनुष्यधर्मनटनसूचकाइतिबोध्यं ॥ ३७ ॥ ती० क्रुद्धः सरामः सुमहाक्रोधंजगाम । सुमहाक्रोधप्राप्तौ स्वजनार्तिर्भूतवैपरीत्यंरावणपराक्रमश्चनिमित्तं ॥ ३८ ॥ इतित्र्युत्तरशततमःसर्गः ॥ १०३ ॥

स० उत्तरग्रन्थेनसहैकःखण्डःएकोनसप्ततिश्लोकात्मासर्गइतिकेचिदाहुः । सर्गान्तिमश्लोकवृत्तादिभेदस्यप्रायिकत्वात् 'तस्यक्रुद्धस्य'इतिसर्गप्रारंभपद्यमिति केचित् ॥ १ ॥

[पा०] १ ख. ग. ङ.—ट. तदायुद्धं.

दशग्रीवं जयेत्याहुरसुराः समवस्थिताः ॥ देवा राममथोचुस्ते त्वं जयेति पुनः पुनः ॥ ८ ॥
एतस्मिन्नन्तरे क्रोधाद्राघवस्य स रावणः ॥ प्रहर्तुकामो दुष्टात्मा स्पृशन्प्रहरणं महत् ॥ ९ ॥
वज्रसारं महानादं सर्वशत्रुनिबर्हणम् ॥ शैलशृङ्गनिभैः कूटैश्चितं दृष्टिभयावहम् ॥ १० ॥
सधूममिव तीक्ष्णाग्रं युगान्ताग्निचयोपमम् ॥ अतिरौद्रमनासाद्यं कालेनापि दुरासदम् ॥ ११ ॥
त्रासनं सर्वभूतानां दारणं भेदनं तदा ॥ प्रदीप्तमिव रोषेण शूलं जग्राह रावणः ॥ १२ ॥
तच्छूलं परमक्रुद्धो मध्ये जग्राह वीर्यवान् ॥ अनेकैः समरे शूरै राक्षसैः परिवारितः ॥ १३ ॥
समुद्यम्य महाकायो ननाद युधि भैरवम् ॥ संरक्तनयनो रोषात्स्वसैन्यमभिहर्षयन् ॥ १४ ॥
पृथिवीं चान्तरिक्षं च दिशश्च प्रदिशस्तथा ॥ प्राकम्पयत्तदा शब्दो राक्षसेन्द्रस्य दारुणः ॥ १५ ॥
अतिनादस्य नादेन तेन तस्य दुरात्मनः ॥ सर्वभूतानि वित्रेसुः सागरश्च प्रचुक्षुभे ॥ १६ ॥
स गृहीत्वा महावीर्यः शूलं तद्रावणो महत् ॥ विनद्य सुमहानादं रामं परुषमब्रवीत् ॥ १७ ॥
शूलोऽयं वज्रसारस्ते राम रोषान्मयोद्यतः ॥ तव भ्रातृसहायस्य सद्यः प्राणान्हरिष्यति ॥ १८ ॥
रक्षसामद्य शूराणां निहतानां चमूमुखे ॥ त्वां निहत्य रणश्लाघिन्करोमि तरसा समम् ॥
तिष्ठेदानीं निहन्मि त्वामेष शूलेन राघव ॥ १९ ॥
एवमुक्त्वा स चिक्षेप तच्छूलं राक्षसाधिपः ॥ २० ॥
तद्रावणकरान्मुक्तं विद्युज्ज्वालासमाकुलम् ॥ अष्टघण्टं महानादं वियद्गतमशोभत ॥ २१ ॥
तच्छूलं राघवो दृष्ट्वा ज्वलन्तं घोरदर्शनम् ॥ ससर्ज विशिखान्रामश्चापमायम्य वीर्यवान् ॥ २२ ॥
आपतन्तं शरौघेण वारयामास राघवः ॥ उत्पतन्तं युगान्ताग्निं जलौघैरिव वासवः ॥ २३ ॥
निर्ददाह स तान्बाणान्रामकार्मुकनिस्सृतान् ॥ रावणस्य महाशूलः पतङ्गानिव पावकः ॥ २४ ॥
दृष्ट्वातान्भस्मसाद्भूताञ्शूलसंस्पर्शचूर्णितान् ॥ सायकानन्तरिक्षस्थान्राघवः क्रोधमाहरत् ॥ २५ ॥
स तां मातलिनाऽऽनीतां शक्तिं वासवनिर्मिताम् ॥ जग्राह परमक्रुद्धो राघवो रघुनन्दनः ॥ २६ ॥

माना इत्यर्थः । भक्त्या प्रेक्षमाणाः सन्तः प्रहृष्टवद्वाक्यमूचुरिति संबन्धः ॥ ७ ॥ तद्वाक्यं विविच्य दर्शयति—दशग्रीवमिति ॥ यद्यप्यसुराणामपि रावणो बाधकः तथापि देवानामतिशयो मा भूदित्यसूयया रावणं वर्धयन्तीति बोध्यम् ॥ ८ ॥ एतस्मिन्नन्तर इत्यादिश्लोकचतुष्टयमेकान्वयं ॥ राघवस्य क्रोधात् राघवविषयक्रोधात् । प्रहरणं आयुधं । स्पृशन् परामृशन् । किं वेदानीं ग्रहीतुमुचितमिति क्षणं चिन्तयन्नित्यर्थः । कूटैः शिखराकारैरयःशङ्कुभिः चितं युक्तमित्यर्थः । अतिरौद्रं रौद्रं शूलमतिवर्तमानं । अनासाद्यं शत्रुभिरप्रधृष्यं । कालेन यमेन दारणं क्रकचवत्कृन्तनं । भेदनं द्विधाकरणं । दुष्टात्मा रावणः राघवस्य क्रोधात् प्रहर्तुकामः महत्प्रहरणं स्पृशन्सन् वज्रसारत्वादिविशिष्टं शूलं रोषेण प्रदीप्त इव स्थितो रावणो जग्राहेति संबन्धः ॥ ९—१६ ॥ विनद्येति । पूर्वं शूलोद्यमनजनितोत्साहकृतो नाद उक्तः । इह प्रक्षेपजनितोत्साहकृतो नाद इति विवेकः ॥ १७—१८ ॥ रक्षसामित्यादिसार्धश्लोकमेकान्वयं ॥ त्वां विनिहत्य रक्षोभिः समं करिष्यामीत्यर्थः । "तुल्यार्थैः" इत्यादिना षष्ठी ॥ १९—२० ॥ विद्युज्ज्वाला विद्युत्सदृ-

स० यद्यपि पूर्वंसुरासुराइतिसमीरणाद्देवाराममथोचुरितिपूर्वंदेवाः पूर्वदेवास्तुतदनन्तरमुदाहर्तव्याः । तथापि तेषांबाहुल्यात्तच्चायानैष्फल्यान्निर्देशमात्रेणमाननीयताभिप्रेणनाद्वाप्रथमतोनिर्देशः । तत्रापिसाधवोसुरारामपक्षपातिनःसन्तीतिविशेषद्योतनायव्युत्क्रमनिर्देशश्चेतिवारामपराजयरूपोव्युत्क्रमोन । अपितु निर्देशमात्रइतिज्ञापनायवाऽयंनिर्देशइतिज्ञेयम् ॥८॥ स० भ्रातृसहायस्य लक्ष्मणमात्रसहायकस्य मद्भ्रातृविभीषणसहायस्यवा ॥ १८ ॥

[पा०] १ क. ख. ङ. ञ. ट. कूटैश्चित्तदृष्टि. २ च. छ. भयावहैः. ३ क. ख. ङ. च. छ. ञ. ण. ट. जग्राहयुधि. ४ ङ. ञ. क्रोधमूर्च्छितः.

सा तोलिता बलवता शक्तिर्घण्टाकृतस्वना ॥ नभः प्रज्वालयामास युगान्तोल्केव सप्रभा ॥ २७ ॥
सा क्षिप्ता राक्षसेन्द्रस्य तस्मिञ्शूले पपात ह ॥ भिन्नः शक्त्या महाञ्शूलो निपपात हतद्युतिः ॥
[साधुसाध्विति भूतानि प्रशशंसुः रघूत्तमम् ॥ २८ ॥]
निर्बिभेद ततो बाणैर्हयानस्य महाजवान् ॥ रामस्तीक्ष्णैर्महावेगैर्वज्रकल्पैः शितैः शरैः ॥ २९ ॥
निर्बिभेदोरसि ततो रावणं निशितैः शरैः ॥ राघवः परमायत्तो ललाटे पत्रिभिस्त्रिभिः ॥ ३० ॥
स शरैर्भिन्नसर्वाङ्गो गात्रप्रस्रुतशोणितः ॥ राक्षसेन्द्रः समूहस्थः फुल्लाशोक इवाबभौ ॥ ३१ ॥
स रामबाणैरभिविद्धगात्रो निशाचरेन्द्रः क्षतजार्द्रगात्रः ॥
जगाम खेदं च समाजमध्ये क्रोधं च चक्रे सुभृशं तदानीम् ॥ ३२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुरुत्तरशततमः सर्गः ॥ १०४ ॥

पञ्चोत्तरशततमः सर्गः ॥ १०५ ॥

रामेणरावणंप्रति सीताहरणरूपकुकर्मानुव्याहरणेनगर्हणपूर्वकं बाणगणाभिवर्षणम् ॥ १ ॥ रामबाणगणाभिघातनिर्विण्ण-तया कर्तव्यमूढेसतिरावणे तत्सारथिना रणाङ्गणादन्यतोरथापवाहनम् ॥ २ ॥

स तेन तु तथा क्रोधात्काकुत्स्थेनार्दितो रणे ॥ रावणः समरश्लाघी महाक्रोधमुपागमत् ॥ १ ॥
स दीप्तनयनो रोषाच्चापमायम्य वीर्यवान् ॥ अभ्यर्दयत्सुसंक्रुद्धो राघवं परमाहवे ॥ २ ॥
बाणधारासहस्रैस्तैः सतोयद इवाम्बरात् ॥ राघवं रावणो बाणैस्तटाकमिव पूरयत् ॥ ३ ॥
पूरितः शरजालेन धनुर्मुक्तेन संयुगे ॥ महागिरिरिवाकम्प्यः काकुत्स्थो न प्रकम्पते ॥ ४ ॥
स शरैः शरजालानि वारयन्समरे स्थितः ॥ गभस्तीनिव सूर्यस्य प्रतिजग्राह वीर्यवान् ॥ ५ ॥
ततः शरसहस्राणि क्षिप्रहस्तो निशाचरः ॥ निजघानोरसि क्रुद्धो राघवस्य महात्मनः ॥ ६ ॥
स शोणितसमादिग्धः समरे लक्ष्मणाग्रजः ॥ दृष्टः फुल्ल इवारण्ये सुमहान्किंशुकद्रुमः ॥ ७ ॥
शराभिघातसंरब्धः सोपि जग्राह सायकान् ॥ काकुत्स्थः सुमहातेजा युगान्तादित्यतेजसः ॥
ततोऽन्योन्यं सुसंरब्धावुभौ तौ रामरावणौ ॥ शरान्धकारे समरे नोपालक्षयतां तदा ॥ ९ ॥
ततः क्रोधसमाविष्टो रामो दशरथात्मजः ॥ उवाच रावणं वीरः प्रहस्य परुषं वचः ॥ १० ॥

शज्वाला ॥२१—२८ ॥ बाणैः शब्दायमानैः । "अण बाण शब्दे" इत्यस्मात् पचाद्यच् । बाणशब्दः शरभेद-संज्ञेत्यप्याहुः ॥२९॥ पत्रिभिस्त्रिभिरिति प्रयोगभेदान्न-पुनरुक्तिः । पत्रिभिः पत्रवद्भिरित्येके ॥३०॥ समूहस्थः युद्धस्थः ॥ ३१ ॥ समाजे युद्धे ॥३२॥ इति श्रीगोवि-न्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुरुत्तरशततमः सर्गः ॥१०४॥

अथ श्रान्तस्य रावणस्य सूतेन रथापवाहनं पञ्च-शततमे—स तु तेनेत्यादि ॥ १—२ ॥ बाणधारास-हस्रैः हेतुभिः तोयद इव रावणः तैः धाराभूतैः बाणैः तटाकमिव रामं पूरयत् अपूरयत् ॥३—८॥ अन्योन्यं

स० बाणवद्भिः "वणशब्दे बाणेलेके" इत्युक्तेःशब्दायमानैः । बाणवद्भिः केषुचित्प्रधानेषुसाक्षाज्ज्याविसृष्टेष्विषुषु तेभ्योपिराम-माहात्म्येननिस्सरन्तिबाणाइतिबाणानांबाणवत्त्वंसंभवतीतिवातथोक्तिः ॥ २९ ॥ ति० समूहस्थः समूहतयास्थितः । बहुशिरः-पाणिलात्तथात्वं ॥ ३१ ॥ इतिचतुरधिकशततमःसर्गः ॥ १०४ ॥

[पा०] १ क. ङ.—ट. गतद्युतिः. ख. ग. महाद्युतिः. २ इदमर्धं क. ख. च. छ. पाठेषुदृश्यते. ३ ङ. ठ. रामः क्षिप्तैर्महावेगैर्बाणवद्भिरजिह्मगैः. ४ च. छ. ब. ट. सुभृशंदशास्यः. ५ ङ.—ट. भृशं. ६ ख. ङ.—ट. दीप्तनयनोमर्षाच्चापमुद्यम्य.

मम भार्या जनस्थानादज्ञानाद्राक्षसाधम ॥ हृता ते विवशा यस्मात्तस्मात्त्वं नासि वीर्यवान् ॥ ११ ॥
मया विरहितां दीनां वर्तमानां महावने ॥ वैदेहीं प्रसभं हृत्वा शूरोऽहमिति मन्यसे ॥ १२ ॥
स्त्रीषु शूर विनाथासु परदाराभिमर्शक ॥ कृत्वा कापुरुषं कर्म शूरोहमिति मन्यसे ॥ १३ ॥
भिन्नमर्याद निर्लज्ज चारित्रेष्वनवस्थित ॥ दर्पान्मृत्युमुपादाय शूरोऽहमिति मन्यसे ॥ १४ ॥
शूरेण धनदभ्रात्रा बलैः समुदितेन च ॥ श्लाघनीयं यशस्यं च कृतं कर्म महत्त्वया ॥ १५ ॥
उत्सेकेनाभिपन्नस्य गर्हितस्याहितस्य च ॥ कर्मणः प्राप्तुहीदानीं तस्याद्य सुमहत्फलम् ॥ १६ ॥
शूरोऽहमिति चात्मानमवगच्छसि दुर्मते ॥ नैव लज्जाऽस्ति ते सीतां चोरवद्व्यपकर्षतः ॥ १७ ॥
यदि मत्सन्निधौ सीता धर्षिता स्यात्त्वया बलात् ॥ भ्रातरं तु खरं पश्येस्तदा मत्सायकैर्हतः ॥१८॥
दिष्ट्याऽसि मम दुष्टात्मंश्चक्षुर्विषयमागतः ॥ अद्य त्वां सायकैस्तीक्ष्णैर्नयामि यमसादनम् ॥ १९ ॥
अद्य ते मच्छरैश्छिन्नं शिरो ज्वलितकुण्डलम् ॥ क्रव्यादा व्यपकर्षन्तु विकीर्णं रणपांसुषु ॥ २० ॥
निपत्योरसि गृध्रास्ते क्षितौ क्षिप्तस्य रावण ॥ पिबन्तु रुधिरं तर्षाच्छरशल्यान्तरोत्थितम् ॥ २१ ॥
अद्य मद्बाणभिन्नस्य गतासोः पतितस्य ते ॥ कर्षन्त्वन्त्राणि पतगा गरुत्मन्त इवोरगान् ॥ २२ ॥
[दुष्टोसि महतः कालाद्दिष्ट्या दृष्टिपथं गतः ॥ अद्य क्रोधं विमोक्ष्यामि सीताहरणसंभवम्] ॥२३॥
इत्येवं संवदन्वीरो रामः शत्रुनिबर्हणः ॥ राक्षसेन्द्रं समीपस्थं शरवर्षैरवाकिरत् ॥ २४ ॥
बभूव द्विगुणं वीर्यं बलं हर्षश्च संयुगे ॥ रामस्यास्त्रबलं चैव शत्रोर्निधनकाङ्क्षिणः ॥ २५ ॥
प्रादुर्बभूवुरस्त्राणि सर्वाणि विदितात्मनः ॥ प्रहर्षाच्च महातेजाः शीघ्रहस्ततरोऽभवत् ॥ २६ ॥
शुभान्येतानि चिह्नानि विज्ञायात्मगतानि सः ॥ भूय एवार्दयद्रामो रावणं राक्षसान्तकृत् ॥ २७ ॥
हरीणां चाश्मनिकरैः शरवर्षैश्च राघवात् ॥ हन्यमानो दशग्रीवो विघूर्णहृदयोऽभवत् ॥ २८ ॥
यदा च शस्त्रं नारेभे न व्यकर्षच्छरासनम् ॥ नास्य प्रत्यकरोद्वीर्यं विक्लवेनान्तरात्मना ॥ २९ ॥
क्षिप्ताश्चापि शरास्तेन शस्त्राणि विविधानि च ॥ न रणार्थाय वर्तन्ते मृत्युकालेऽभिवर्तते ॥ ३० ॥

नोपालक्षयतामित्यन्वयः ॥ ९—१० ॥ मम अज्ञानात् ममादर्शनात् त्वदविवेकादिति वा । ते त्वया ॥११—१२ ॥ कापुरुषं कापुरुषसंबन्धि ॥ १३—१४ ॥ शूरेणेत्यादि सोपहासोक्तिः ॥ १५ ॥ उत्सेकेन गर्वेण ॥ १६—१९ ॥ शिरो ज्वलितकुण्डलमित्यनेन तदानीमन्तकाले रावण एकशिरस्कः स्थित इति गम्यते ॥ २० ॥ तर्षः पिपासा । शरशल्यान्तरोत्थितं शरशल्यक्षतविवरादुत्थितमित्यर्थः ॥ २१–२७ ॥ राघवात् राघवस्य । विभक्तिव्यत्यय आर्षः । विघूर्णहृदयः भ्रान्तहृदयः ॥ २८ ॥ यदा चेत्यादिश्लोकत्रयमेकान्वयं । यदा शस्त्रं नारेभे शस्त्रं न प्रयुक्तवान् । शरासनं च न व्यकर्षत् । यदा च विक्लवेन विवशेन । अन्तरात्मना मनसा हेतुना । अस्य रामस्य वीर्यं स्ववीर्यं च न प्रत्यकरोत् न प्रतिजघान । तेन रावणेन क्षिप्ताः शरा अपि विविधानि शस्त्राणि च न रणार्थाय वर्तन्ते । छेदनभेदनादिरणप्रयोजनं कर्तुं यदा नाशक्नुवन् । तदा मृत्युकाले अभिवर्ततः अभिवर्तमानस्य अस्य रावणस्य । रथनेता सूतः असंभ्रान्तः सत् तदवस्थं पूर्वोक्तावस्थं रावणं समीक्ष्य तस्य रथं युद्धान् युद्धस्थलात् शनैः । अपवाहयत् अपावाहयत् । अन्य-

---

ति० अज्ञानात् अविवेकात् मत्स्वरूपाज्ञानाच्च ॥ ११ ॥ शस्त्रंनारेभे मोक्तुंनारब्धवान् । शरासनंयदानचकर्ष । विक्लवेन बलेनान्तरात्मना उपलक्षितोयमितिमतीरामोनास्यरावणस्यविषये वीर्यंप्रत्यकरोत् तत्संहारायनप्रदर्शितवानितिभावः । अनेन क्षिणिग्लानिमति मतिमता तदमतेन नतत्रशस्त्रास्त्रप्रयोगःकर्तव्यइतिनीतिमादर्शितवात्रामइतिसूचितंभवति ॥ २९ ॥ स० गार्थायेतिपाठेऽर्थोनिवृत्तिरित्यर्थः ॥ ३० ॥

पा०] १ ङ. ञ. चौरवत्. २ ख. ङ. च. छ. ञ. ट. क्षिप्तस्यसायकैः. ३ अयंश्लोकः क. ख. च. छ. पाठेषुदृश्यते. —ङ. ञ. ञ. ट. मरणार्थाय. ५ ख. ङ. च. छ. ञ. कालोऽभ्यवर्तत.

सूतस्तु रथनेताऽस्य तदवस्थं समीक्ष्य तम् ॥ शनैर्युद्धादसंभ्रान्तो रथं तस्यापवाहयत् ॥ ३१ ॥
[रामबाणविभिन्नाङ्गो रावणो राक्षसेश्वरः ॥ निरस्तविक्रमस्सङ्ख्ये रणे श्रान्तः पपात सः ॥ ३२ ॥
सूतस्तु व्यथितं बाणैः स्यन्दनस्थं निरीक्ष्य तम् ॥ तस्माद्रणादथोवाह रावणं हतपौरुषम् ॥ ३३ ॥
रथं च तस्याथ जवेन सारथिर्निवार्य भीमं जलदस्वनं तदा ॥
जगाम भीत्या समरान्महीपतिं निरस्तवीर्यं पतितं समीक्ष्य ॥ ३४ ॥]
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चोत्तरशततमः सर्गः ॥ १०५ ॥

षडुत्तरशततमः सर्गः ॥ १०६ ॥

अपवाहितरथंसारथिंप्रति क्रुद्धेनरावणेनभर्त्सनम् ॥ १ ॥ सारथिना तंप्रति रथापवहनस्यहेतुकत्वोक्त्यासमाश्वासनपूर्वकं तदाज्ञया पुनारामाभ्मतोरथानयनम् ॥ २ ॥

स तु मोहात्सुसंक्रुद्धः कृतान्तबलचोदितः ॥ क्रोधसंरक्तनयनो रावणः सूतमब्रवीत् ॥ १ ॥
हीनवीर्यमिवाशक्तं पौरुषेण विवर्जितम् ॥ भीरुं लघुमिवासत्त्वं विहीनमिव तेजसा ॥ २ ॥
विमुक्तमिव मायाभिरस्त्रैरिव बहिष्कृतम् ॥ मामवज्ञाय दुर्बुद्धे स्वया बुद्ध्या विचेष्टसे ॥ ३ ॥
किमर्थं मामवज्ञाय मच्छन्दमनवेक्ष्य च ॥ त्वया शत्रोः समक्षं मे रथोऽयमपवाहितः ॥ ४ ॥
त्वयाऽद्य हि ममानार्य चिरकालसमार्जितम् ॥ यशो वीर्यं च तेजश्च प्रत्ययश्च विनाशितः ॥ ५ ॥
शत्रोः प्रख्यातवीर्यस्य रञ्जनीयस्य विक्रमैः ॥ पश्यतो युद्धलुब्धोऽहं कृतः कापुरुषस्त्वया ॥ ६ ॥
यस्त्वं रथमिमं मोहान्न चोद्वहसि दुर्मते ॥ सत्योऽयं प्रतितर्को मे परेण त्वमुपस्कृतः ॥ ७ ॥
न हि तद्विद्यते कर्म सुहृदो हितकाङ्क्षिणः ॥ रिपूणां सदृशं चैतन्न त्वयैतत्स्वनुष्ठितम् ॥ ८ ॥
निवर्तय रथं शीघ्रं यावन्नोपैति मे रिपुः ॥ यदि वाऽध्युषितो वाऽसि स्मर्यन्ते यदि वा गुणाः ॥ ९ ॥
एवं परुषमुक्तस्तु हितबुद्धिरबुद्धिना ॥ अब्रवीद्रावणं सूतो हितं सानुनयं वचः ॥ १० ॥

त्रानयदिति योजना ॥२९—३४॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चोत्तरशततमः सर्गः ॥१०५॥

अथ रावणरथप्रत्यानयनं षट्शततमे—स तु मोहादित्यादि ॥ मोहात् अविवेकात् ॥ १ ॥ हीनवीर्यमिवेत्यादिश्लोकद्वयमेकान्वयं। यत्र यत्र इवशब्दो नास्ति तत्र तत्रानुषञ्जनीयः । हीनवीर्यमिव हीनबलमिव । अशक्तमिव निरुत्साहमिव । असत्त्वमिव अधीरमिव । तेजसा परिभवासहनेन ॥ २—३॥ मच्छन्दं मदभिप्रायं । "वशाभिप्राययोश्छन्दः" इत्यमरः ॥४॥ प्रत्ययः रावणस्य युधि पलायनं नास्तीति सर्वेषां विश्वासः । विनाशित इत्यस्य यशआदिषु लिङ्गविपरिणामः ॥ ५॥ शत्रोः पश्यतः शत्रौ पश्यति ॥ ६ ॥ यः नोद्वहसि अभिमुखं न प्रापयसि किं त्वपवाहयसि । स त्वं उपस्कृतः परेणोत्कोचादिना वशीकृत इत्ययं प्रतितर्कः सत्यः प्रतिभाति ॥ ७ ॥ न त्वयैतत् स्वनुष्ठितमिति । त्वयानुष्ठितमेतत् नतु स्वनुष्ठितं तत् ॥ ८ ॥ अध्युषितः सहवासी । सुहृदिति यावत् । उपधयोपसर्पितो वा । गुणाः सत्काराः ॥९—१०॥

स० सूतः "सारथीरथिकंरक्षेत्संग्रामेप्राणसंकटे" इत्याद्युक्तिज्ञमर्यादावेदितृखान्तरात्मप्रेरितः । रथनेता सारथिः । 'सूतःप्रसूतेप्रेरितेपिच' इतिविश्वः ॥ ३१ ॥ इतिपञ्चोत्तरशततमः सर्गः ॥ १०५ ॥

रामानु० अध्युषितः चिरकालंमत्समीपइतिशेषः । स्मर्यन्ते यदिवागुणाः मन्निष्ठाउपकर्तृत्वादिगुणाःस्मर्यन्ते यदि ॥ ९ ॥

[पा०] १ क. ख. ञ. ट. निरीक्ष्यतं. २ रामबाणविभिन्नाङ्गइत्यादयः, पतितंसमीक्ष्येत्यन्ताःश्लोकाः ङ. च. छ. झं. ञ. ट. पाठेषुदृश्यन्ते.



न भीतोऽसि न मूढोऽसि नोपजप्तोऽसि शत्रुभिः ॥ न प्रमत्तो न निस्स्नेहो विस्मृता न च सत्क्रिया ॥११॥
मया तु हितकामेन यशश्च परिरक्षता ॥ स्नेहप्रस्कन्नमनसा प्रियमित्यप्रियं कृतम् ॥ १२ ॥
नास्मिन्नर्थे महाराज त्वं मां प्रियहिते रतम् ॥ कश्चिल्लघुरिवानार्यो दोषतो गन्तुमर्हसि ॥ १३ ॥
श्रूयतां त्वभिधास्यामि यन्निमित्तं मया रथः ॥ नदीवेग इवाभोगे संयुगे विनिवर्तितः ॥ १४ ॥
श्रमं तवावगच्छामि महता रणकर्मणा ॥ न हि ते वीर सौमुख्यं प्रहर्षं वोपधारये ॥ १५ ॥
रथोद्वहनखिन्नाश्च त इमे रथवाजिनः ॥ दीना घर्मपरिश्रान्ता गावो वर्षहता इव ॥ १६ ॥
निमित्तानि च भूयिष्ठं यानि प्रादुर्भवन्ति नः ॥ तेषु तेष्वभिपन्नेषु लक्षयाम्यप्रदक्षिणम् ॥ १७ ॥
देशकालौ च विज्ञेयौ लक्षणानीङ्गितानि च ॥ दैन्यं खेदश्च हर्षश्च रथिनश्च बलाबलम् ॥ १८ ॥
स्खलनिम्नानि भूमेश्च समानि विषमाणि च ॥ युद्धकालश्च विज्ञेयः परस्यान्तरदर्शनम् ॥ १९ ॥
उपयानापयाने च स्थानं प्रत्यपसर्पणम् ॥ सर्वमेतद्रथस्थेन ज्ञेयं रथकुटुम्बिना ॥ २० ॥
तव विश्रमहेतोश्च तथैषां रथवाजिनाम् ॥ रौद्रं वर्जयता खेदं क्षमं कृतमिदं मया ॥
न मया स्वेच्छया वीर रथोऽयमपवाहितः ॥ २१ ॥
भर्तृस्नेहपरीतेन मयेदं यत्कृतं विभो ॥ २२ ॥
आज्ञापय यथातत्त्वं वक्ष्यस्यरिनिषूदन ॥ तत्करिष्याम्यहं वीर गतानृण्येन चेतसा ॥ २३ ॥
संतुष्टस्तेन वाक्येन रावणस्तस्य सारथेः ॥ प्रशस्यैनं बहुविधं युद्धलुब्धोऽब्रवीदिदम् ॥ २४ ॥
रथं शीघ्रमिमं सूत राघवाभिमुखं कुरु ॥ नाहत्वा समरे शत्रून्निवर्तिष्यति रावणः ॥ २५ ॥

नोपजप्तः उपजापं भेदं न गमितः । "भेदोपजापौ" इत्यमरः ॥ ११—१२ ॥ अस्मिन्नर्थे रथापवाहनरूपेऽर्थे कश्चित् कुत्रापि कुले जातः । लघुः अल्पबुद्धिः । अनार्यः दुष्टहृदय इव । मा दोषतः गन्तुं ज्ञातुं । नार्हसि । गत्यर्था ज्ञानार्थाः ॥ १३ ॥ यन्निमित्तं यत्कारणात् । "निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्" इति प्रथमा । आभोगे उन्नतप्रदेशे । आभोगान्नदीवेग इव रथः संयुगाद्विनिवर्तित इत्यर्थः । आभोगे संयुग इत्यत्र विभक्तिव्यत्ययः ॥ १४ ॥ सौमुख्यं सुमुखत्वं तन्मूलं प्रहर्षं ॥१५॥ रथेति अत्र आसन्निति शेषः ॥ १६ ॥ अभिपन्नेषु आविर्भूतेषु सत्सु । अप्रदक्षिणं प्रतिकूलं ॥१७॥ निमित्तानिकिमर्थं त्वया विचारणीयानीत्यतआह—देशेत्यादिना ॥ श्लोकत्रयमेकान्वयं । लक्षणानि शुभाशुभनिमित्तानि । इङ्गितानि मुखप्रसादवैगुण्यादीनि । दैन्यं अनुत्साहः । स्खलानि उन्नतप्रदेशाः । निम्नानि अवनतप्रदेशाः । समानि सर्वत्र समप्रदेशाः । विषमाणि निम्नोन्नतप्रदेशाः । युद्धकाल इति पूर्वोक्तानुवादः । अन्तरदर्शनं दृश्यत इति दर्शनं द्रष्टव्यं । द्रष्टव्यं रन्ध्रमित्यर्थः । अन्तरदर्शनं रन्ध्रदर्शनं कर्तव्यमित्यध्याहारो वा । उपयानं समीपगमनं । अपयानं पार्श्वतो गमनं । स्थानं स्थैर्येणावस्थानं । प्रत्यपसर्पणं अभिमुखस्थित्या पृष्ठतोपसरणं । रथकुटुम्बिना सारथिना ॥१८—२०॥ तवेत्यादिसार्धश्लोक एकान्वयः । तथा वाजिनां विश्रमहेतोश्चेत्यन्वयः । रौद्रं दुःसहं । वर्जयता अपनयता । हेतौ शतृप्रत्ययः । क्षमं युक्तं । स्वेच्छया अपनयननिमित्तं विना ॥२१॥ भर्तृस्नेहेत्यर्धं । मया यत्कृतं तदिदं भर्तृस्नेहपरीतेनैव कृतमित्यर्थः ॥ २२ ॥ यथातत्त्वं यत् कार्यस्वरूपं वक्ष्यसि तत्तथा गतानृण्येन आनृण्यं गतेन आनृण्यं कर्तव्यमिति कृतसंकल्पेन चेतसा मनसा । करिष्यामि ॥ २३—२४ ॥ निवर्तिष्यति

तीo यन्निमित्तं यस्मात्कारणात् । नदीवेगइवाभोगिः चन्द्रोदयादिनाप्रवृद्धसमुद्रांभोभिःनदीवेगइव संयुगाद्रथोविनिवर्तितः तच्छ्रूयतामितिसंबन्धः । नदीवेगइवाभोगइतिपाठे आभोगे उन्नतप्रदेशे पर्वताद्युन्नतप्रदेशेनदीवेगइवेत्यर्थः ॥ १४ ॥ इतिषड्डुत्तरशततमःसर्गः ॥ १०६ ॥

पाo] १ क. ग. ज. वीर. २ घ. ङ. छ. झ. ञ. ट. नय.

एवमुक्त्वा ततस्तुष्टो रावणो राक्षसेश्वरः ॥ ददौ तस्मै शुभं ह्येकं हस्ताभरणमुत्तमम् ॥ २६ ॥
श्रुत्वा रावणवाक्यं तु सारथिः संन्यवर्तत ॥ २७ ॥
ततो द्रुतं रावणवाक्यचोदितः प्रचोदयामास हयान्स सारथिः ॥
स राक्षसेन्द्रस्य ततो महारथः क्षणेन रामस्य रणाग्रतोऽभवत् ॥ २८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षडुत्तरशततमः सर्गः ॥ १०६ ॥

सप्तोत्तरशततमः सर्गः ॥ १०७ ॥

अगस्त्यर्षिणा श्रीरामायरावणवधसौकर्यायादित्यहृदयस्तोत्रोपदेशः ॥ १ ॥ श्रीरामकृतादित्यहृदयजपतुष्टेनसूर्येण तंप्रति रावणवधत्वरणम् ॥ २ ॥

आदित्यहृदयप्रारम्भः ॥

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ॥ रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥ १ ॥
दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ॥ उपागम्याब्रवीद्रामममगस्त्यो भगवानृषिः ॥ २ ॥
रामराम महाबाहो शृणु गुह्यं सनातनम् ॥ येन सर्वानरीन्वत्स समरे विजयिष्यसि ॥ ३ ॥

निवार्तिष्यते ॥२५—२७॥ महांश्चासौ रथश्च महारथ इति विग्रहः ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षडुत्तरशततमः सर्गः ॥ १०६ ॥

अथादित्यहृदयोपदेशः ॥ ततो युद्धपरिश्रान्तमित्यादिश्लोकद्वयमेकान्वयं ॥ रणं द्रष्टुं दैवतैः समागम्य आगतः दैवतैः सहागतः अगस्त्यः युद्धपरिश्रान्तं उपस्थितं रावणं दृष्ट्वा कथमेनं परत्वप्रकटनं विना जेष्यामीति चिन्तया स्थितं चिन्तयन्तं च रामं दृष्ट्वा उपागम्याब्रवीत् ॥ १—२ ॥ राम रामेत्यादिश्लोकत्रयमेकान्वयं ॥ रामस्य चिन्ताविष्टत्वात् स्वादरातिशयात्कार्यत्वरया च द्विरुक्तिः । महाबाहो इत्यनेन पूर्वकृतपराक्रमप्रकटनं । सनातनं वेदवन्नित्यं । गुह्यं रहस्यं । शृणु । तदेव रहस्यमाह—आदित्यहृदयमित्यादि ॥ आदित्यस्य हृदयं आदित्यमनःप्रसादकमित्यर्थः । पुण्यं पठतां पुण्यवर्धकं । सर्वशत्रुविनाशेपि तुल्यायव्ययन्यायेन कस्यचिन्न जयः स्यात् न तथा भवतीदमित्याह—जयावहमिति । अक्षय्यं अक्षय्यफलकं । परमं शिवं परमपावनं । सर्वमङ्गलमाङ्गल्यं सर्वमङ्गलानामपि मङ्गलं । मङ्गलानां च मङ्गलमितिवत् । स्वार्थे यत्प्रत्ययः । सर्वश्रेयः-

---

सी० ततोयुद्धपरिश्रान्तमित्यादिश्लोकद्वयमेकंवाक्यं । रणंद्रष्टुंदैवतैःसहसमागम्यागतोऽगस्त्यः ततः सर्वान्रयुद्धपरिश्रान्तस्य रावणस्यरथेसूतेनरणादपनीतेसति तदन्तरं प्रोद्यतिचभास्करेयुद्धपरिश्रान्तंसमरेचिन्तयास्थितं रावणवधोपायचिन्तयोपलक्षितंरामं अग्रतः समनन्तरकाले। युद्धाय युद्धंकर्तुं समुपस्थितंरावणंचदृष्ट्वा तदा रावणमद्यैवजेष्यसि माचिन्तापरोभूः॥ किंतुस्ववीर्योपबृंहणायादित्यहृदयाख्येनस्तोत्रेण एनंसूर्यमुपतिष्ठस्वेतिस्तोत्रमुपदेक्ष्यन्नन्तरिक्षादवनिमुपगम्यरामममन्त्रवीदित्यर्थः ॥१—२॥ **ति०** अथरावणवैभवंदृष्ट्वात्रस्तमिवभगवन्तंरामंभगवद्ब्रह्मदत्तरावणवैभवनिवर्तनस्यभगवद्ब्रह्मानुग्रहैकसाध्यत्वात्तदनुग्रहसिद्धयेविद्यामण्डलऋषिरगस्त्योब्रह्मरूपादित्यदेवताकत्वादादित्यहृदयाख्यंस्तोत्रमुपदिशतिस्मेत्याह—**ततोयुद्धेत्यादि** । अस्यस्तोत्रस्यागस्त्यऋषिः अनुष्टुप्छन्दः आदित्यहृदयभूतोभगवान्ब्रह्मादेवता । निरस्ताशेषविघ्नतयाब्रह्मविद्यासिद्धौसर्वत्रजयसिद्धौचविनियोगः । अस्यषडङ्गंप्रणवेन 'रश्मिमतेनमः' इत्यनेनवा । गायत्र्याषडङ्गमित्यन्ये । ततोयुद्धेत्यादि त्वरस्वेत्यन्तंस्तोत्रं । एवंभयनाटनं तन्मूलकमगस्त्यादुपदेशग्रहणंलोकानुग्रहाय । लोकस्यजयसाधनवस्तुप्रकाशनार्थमितितत्वं । युद्धपरिश्रान्तं अनेकाहोरात्रयुद्धपरिश्रान्तं तमिवस्थितं समरे समरविषये चिन्तया प्रबलोयमरिःकथंजेतव्यइतिचिन्तयायुक्तं । सारथिनापवाहितं । रावणं प्रातर्युद्धायअग्रतःरामसंमुखे समुपस्थितंदृष्ट्वास्थितं धनुरवष्टभ्यस्थितंरामं ॥ १ ॥ **ति०** सनातनं प्रवाहानादिभूतं अनेनस्वकल्पितत्वनिरासः ॥ ३ ॥

[पा०] १ क.—ट. तस्य. २ ख. ङ.—ट. भगवांस्तदा.

आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ॥ जयावहं जपेन्नित्यमक्षय्यं परमं शिवम् ॥ ४ ॥
सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ॥ चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम् ॥ ५ ॥
रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ॥ पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥ ६ ॥
सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः ॥ एष देवासुरगणाँल्लोकान्पाति गभस्तिभिः ॥ ७ ॥

साधनमित्यर्थः । सर्वपापप्रणाशनं सर्वपूर्वाघविनाशनं । चिन्ताशोकप्रशमनं आधिव्याधिनिवर्तकं । आयुर्वर्धनं विहितायुषोप्यधिकायुःप्रदं । उत्तमं जप्येषु श्रेष्ठं । आदित्यहृदयाख्यं स्तोत्रं जपेत् । आदित्यहृदयस्तोत्रजपे पुण्यादिवृद्धिर्भवति अतोवश्यं तत्कामस्तज्जपेदिति भावः ॥ ३—५ ॥ स्तोतव्यदेवतास्वरूपमाह—रश्मिमन्तमिति ॥ रश्मिमन्तं स्वर्णवर्णतया प्रशस्तकिरणं । समुद्यन्तं अर्घोदयादिकं विना सम्यगुदयं प्राप्नुवन्तं । इदं च ध्येयाभिप्रायेणोक्तं । न तु तदानीं सूर्योदयकालः । अगस्त्यागमनकालस्यापराह्णत्वात् । अतएव लक्ष्मणवचनं—"अहं तु वधमिच्छामि शीघ्रमस्य दुरात्मनः । यावदस्तं न यात्येष कृतकर्मा दिवाकरः" इति ॥ विवस्ते आच्छादयति तेजोन्तरमिति विवस्वान् तं । स्वभासा सर्वतेजसामाच्छादकमित्यर्थः । भास्करं भाः करोतीति भास्करः । "दिवाविभानिशाप्रभाभास्कारा—"इत्यादिना टः सकारश्च । भुवनेश्वरं वर्षातपाभ्यां समस्तभुवननियन्तारं । पूजयस्व आदित्यहृदयेन तोषयस्वेत्यर्थः ॥ ६ ॥ ननु सत्सु देवतान्तरेषु कथमस्यैव पूज्यत्वं तत्राह—सर्वदेवात्मक इति ॥ सर्वदेवात्मकः सर्वदेवानामात्मा । स्वार्थे कः । "सूर्य आत्मा जगतस्तस्थुषश्च" इति श्रुतेः । रश्मिभिर्लोकाननुभावयतीति रश्मिभावनः । रश्मिभिः रक्षतीत्यर्थः । एतदेवाह—एष इति । देवासुरगणान् लोकान् देवासुरगणरूपाञ्जनानित्यर्थः । पाति रक्षति । "याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति" इति श्रुतेः ॥ ७ ॥

तनि० आदित्यशब्देन तन्मण्डलमुच्यते । "यएषोन्तरादित्येहिरण्मयःपुरुषोदृश्यते" इत्यत्रादित्यशब्दवत् । तस्यहृदयं अन्तःतन्मण्डलमध्यवर्तीपुरुषः । यद्वा आदित्यः सूर्यः । तस्यहृदयं हृद्गतं । 'अयपयगतौ' इतिधातुः । "यआदित्येतिष्ठन् यआदित्यमन्तरोयमयति" इत्यादिश्रुतेः । तत्प्रतिपादनंस्तोत्रमित्यर्थः । **ति०** पुण्यं पुण्यजनकं । अनेनपारत्रिकंफलमुक्तं । सर्वशत्रुविनाशनं जयावहमित्यैहिकंफलं । जपं जप्यतइतिजपं स्तोत्रं । **स०** नित्यं अर्थतः । अक्षयं नविद्यतेक्षयोयस्मात् । परमं स्तोत्ररत्नं । शिवं मङ्गलरूपं ॥ ४ ॥ सर्वमङ्गलमाङ्गल्यं सर्वमङ्गलवस्तूनामपिमाङ्गल्ययंयस्मादितितथा ॥५॥ रश्मिमन्तं रश्मयः ज्ञानरूपाःप्रकाशरूपाश्चतद्वन्तं । यवादिरयं । जपसमयेप्रणवादिलंनमोन्तलंचसंपाद्यं । "जपे न्यासेनमोन्तस्तुस्वाहान्तोहोमकर्मणि" इत्यादेः । तथाच ॐ रश्मिमतेनमः' इतिमन्त्रनिष्पत्तिः । एवमुत्तरत्रापिज्ञेयं । समुद्यन्तं सृष्टिपालनादावुद्योगवन्तं । उदयपर्वतेसमुद्यन्तंवा । देवासुरनमस्कृतं सत्वप्रधानादेवाः । तमःप्रधानाअसुराः । उपलक्षणयारजःप्रधानामनुष्याअपिग्राह्याः । तैर्नमस्कृतं । भास्करं करोतीतिकरः भासांकरः भास्करः "तस्यभासासर्वमिदंविभाति"इत्यादेः । **तनि०** रश्मिमन्तं रश्मिशब्दोनित्यसूरिपरः । तद्वन्तं । तन्मध्येभासमानं । रश्मिरश्मीनांमध्येतपन्तं"इतिसुवर्णसूक्तोक्तेः । समुद्यन्तं नित्योदितदशावन्तं । यद्वा "यःपूर्व्यायवेधसे नवीयसे" इत्यादुक्तरीत्यानवंनवमुदितमिवस्थितं । **ति०** रश्मिमन्तं पञ्चेन्द्रियद्वाराऽनेकज्ञानरश्मिमन्तं । रश्मिमतेनमः । समुद्यन्तंलोकान्क्रियासुप्रवर्तयन्तं । समुद्यतेनमः । एवंनमोन्ताएतेऽस्यनमस्कारार्चनमन्त्राइत्युच्यन्ते । भुवनानां मूलादिब्रह्मरन्ध्रान्तयोगाधारभूमीनां ईश्वरं अधिष्ठातारं । भूराद्यशेषभुवनानांप्रकाशकतयेश्वरंच । भुवनेश्वरायनमः । **शि०** विवस्वन्तं विवस्वना विशेषमणिनाअन्यतेसंबध्यतेतं । नित्यंविशेषमणिधारिणमित्यर्थः । "वसु तोयेधनेमणौ" इतिकोशः ॥ ६ ॥ **तनि०** अत्रदेवासुरशब्दौ तत्तत्प्रकृतिपरौ । "दैवीसंपद्विमोक्षायनिबन्धायासुरीमता"इतिगीतोक्तेः । गभस्तिभिः तेजोलेशैः तेजोंशसंभवमित्युक्ततेजोलेशैः । **ती०** अस्यस्तोत्रस्यकथमेतावन्माहात्म्यमित्याशंक्यतत्प्रतिपाद्यस्यसर्वदेवतामयत्वात्संभवतीतितस्यसर्वदेवतामयत्वंप्रतिपादयति—सर्वदेवात्मकइत्यादिना । सर्वदेवात्मकः सर्वदेवशरीरः । "यःसर्वदेवेषुतिष्ठन्"इत्यादिश्रुतेः । तेजस्वी पराभिभवनसामर्थ्यवान् । रश्मिभावनः रश्मीन् नित्यमुक्तान्भावयतितत्सत्तांनिर्वहतीति तथोक्तः । तेषांभगवन्नित्येच्छाधीनसत्ताकत्वात् । "नित्यंप्रियास्तवतुकेचनतेहि नित्याः"इत्युक्तत्वात् । "एषदेवासुरगणाँल्लोकान्यातिगभस्तिभिः"इति "अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते । आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाः" इत्युक्तरीत्यावृष्ट्यन्नदानेन "देवान्भावयतानेनतेदेवाभावयन्तुवः" इतिपुरोडाशादिदानेनचसर्वान्पातीत्यर्थः । "याभिरादित्यस्तपतिरश्मिभिस्ताभिः पर्जन्योवर्षति"इत्यादिश्रुत्युक्तरीत्यागभस्तिभिःपातीत्युक्तं । **ति०** रश्मिमदादिशब्दप्रतिपाद्यस्यब्रह्मत्वंस्फुटयन्नाह—सर्वेति । हि यस्मात्सर्वदेवोपादानकारणत्वादेषसर्वदेवात्मकः । इदंसर्वात्मकत्वोपलक्षणं ।

[पा०] १ ज्ञ. ञ. ट. जपंनित्यं. २ क. घ. ङ. छ.—ट. माङ्गल्यं.

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः ॥ महेन्द्रो धनदः कालो यमः सोमो ह्यपां-पतिः ॥८॥
पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः ॥ वायुर्वह्निः प्रजाप्राण ऋतुकर्ता प्रभाकरः ॥ ९ ॥

सर्वदेवात्मकत्वमाह—एष ब्रह्मेत्यादिना ॥ अयमेव ब्रह्मादिसमस्तदेवताशरीरे वर्तत इत्यर्थः । प्रजापतिरिति जात्येकवचनं । नव प्रजापतय उच्यन्ते । कालशब्देन मृत्युरुच्यते । यमस्तु ततोन्यः । मरुतः आवहादिवायवः । वायुर्भूर्लोकसंचारी । प्राणः शरीरान्तःस्थो वायुः । ऋतुकर्तेति प्रभाकरविशेषणं ।

सर्वदेवात्मकायनमः । तेजस्वी सर्वभासनसमर्थतेजोयुक्तः । तेजस्विनेनमः । रश्मिभिः ज्ञानरश्मिभिः सर्ववस्तुजातं भावयति सत्तास्फूर्तिमत्संपादयतिसः । रश्मिभिर्योगिनोभावयति ब्रह्मलोकंप्रापयतीत्यर्थ इत्यन्ये । अत्रएषपातीत्युक्त्या सूर्यस्यपुरतःस्थितत्वनिर्देशेनसूर्योदयकालेएतत्स्तोत्रदानमितिलभ्यते । स० सर्वसत्ताप्रदत्वाच्चासावुपास्यइत्याह—सर्वेति । एषः सूर्यनारायणः । सर्वदेवात्मकः सर्वदेवसत्तानांभगवदधीनत्वात्तदात्मकत्वोक्तिः । सर्वदेवानामपि आत्मकं स्वरूपानन्दो यस्मादितिवा । शि० रश्मिभानां सूर्यकिरणदीप्तीनां अवनोरक्षकः । एषसूर्यान्तर्वर्तीरामः ॥ ७ ॥ तनि० स्कन्दःसंसारदुःखंस्कन्नंकरोतीतिस्कन्दः । महेन्द्रोवरुणइतिपाठे वरुणोवरुणपदाभिधेयः । "वरुणोवारुणोवृक्षः" इतिसहस्रनामोक्तेः । ती० "यएषोन्तरादित्येहिरण्मयः पुरुषोदृश्यते"इत्युक्तयोगिजनसाक्षात्कारेणएषइतिपुनःपुनर्निर्देशः । ब्रह्मा चतुर्मुखशरीरः । "तवान्तरात्माममचयेचान्येदेहिसंज्ञिताः"इतिशिवंप्रतिचतुर्मुखवचनात् । विष्णुः उपेन्द्रावतारः शिवः । शिवशरीरकः। "सब्रह्मासशिवःसहरिः सेन्द्रः" इत्युभयत्रापि श्रुतेः । स्कन्दः 'स्कन्दिर्गतिशोषणयोः' इतिधातोः शत्रून्शोषयतीतिस्कन्दः । षण्मुखशरीरकोवा । प्रजापतिः "प्रजापतिश्चरति गर्भे अन्तः" इत्युक्तप्रजापतिशब्दवाच्यः । महेन्द्रः स्वरूपतऐश्वर्यतश्चनिरवधिकः । "इन्द्रंनिचिक्युःपरमेव्योमन् इन्द्रोमायाभिः पुरुरूपईयते"इतिश्रुतेः । धनदः "अन्नादोवसुदान" इतिश्रुतिप्रसिद्धःसकलफलप्रदः । कालः जगत्संहारकः । "कालायमहाग्रासायवैनमः । अत्ताचराचरग्रहणात्" इतिश्रुतिसूत्राभ्यां 'अनादिर्भगवान्कालः'इतिपराशरस्मरणाच्च । यमः यमयति शिक्षयतीतियमः । 'यमोवैवस्वतोराज्ञायस्तवैषहृदिस्थितः'इतिमनुस्मरणात् । सूते अमृतमितिसोमः । 'षु प्रसवैश्वर्ययोः'इतिधातुः । 'सोमःपवतेजनिता मतीनां जनितादिवः'इत्यादुक्तसकलकारणसोमशब्दवाच्यः । अपांपतिः "आपोनाराइतिप्रोक्ताआपोवैनरसूनवः । अयनंतस्यताः पूर्वंतेननारायणःस्मृतः"इत्युक्तेः । 'अपएवससर्जादौ'इत्युक्तेश्चाप्छब्दवाच्यानांस्वामी ॥ ति० एषः 'एषोन्तरादित्येहिरण्मयः पुरुषः' इतिश्रुतेर्योगजनितसाक्षात्कारविषयःपुरोदृश्यमानश्च । ब्रह्मा निस्तुलैश्वर्यविद्यास्रष्टृत्वशक्तिः । ब्रह्मणेनमः । विष्णुः स्वसृष्टपरिपालनप्रयोजकतयापरिगृहीतविष्णुमूर्तिर्नारायणः । विष्णवेनमः । शिवः अपरिमितकल्याणपुण्यस्वभावः । मृगपरश्वादिचिह्नोभगवान्महादेवश्च । शिवायनमः । जीवज्योतिर्द्वारासर्वाणीन्द्रियाणिस्कन्दतीतिस्कन्दः । भगवान्मयूरवाहनश्च । स्कन्दायनमः । प्रजानां जन्यवस्तूनांस्वामी । स्वशक्तिद्वारासर्वोपादानत्वात् । दशयज्ञायुधचिह्नोभगवान्यज्ञेश्वरश्च । प्रजापतयेनमः । महेन्द्रः 'इदिपरमैश्वर्ये' "ष्टन्सर्वधातुभ्यः" परमैश्वर्यकाष्ठांप्राप्तः । वज्रहस्तत्वादिचिह्नोदेवराजश्च । महेन्द्रायनमः । धनंचैतन्यंसर्वानुग्रहायसर्वस्यान्तर्ददातिस्थापयतीतिधनदः । 'अन्नादोवसुदानः'इत्युक्तसकलफलदः । कुबेरश्च । धनदायनमः । कालः बुद्धिवृत्तिजातमपरोक्षतयाकलयतीतिकालः । मण्डलस्पन्दानुमेयक्रियापरिच्छेदकश्चकालः । कालायनमः । यमयतीतियमः सर्वान्तर्यामी । "यमोवैवस्वतोराजायस्तवैषहृदिस्थितः । तेनचेदविवादस्तेमागङ्गांमाकुरून्गमः ।" अविवादोऽभेदाभावइतिमनुः । पितृपतिश्च । यमायनमः । सोमः उमा उः केवलनिपातः । मा प्रभा उ सर्वदाप्रभयासहितःसोमोभगवानर्धनारीश्वरश्च । "सोमःपवतेजनिता मतीनां"इतिश्रुतेः सर्वकारणंसोमशब्दवाच्यं । उमयाशक्त्याप्रकृत्याख्ययासहितइत्यर्थमन्ये । सोमायनमः । आपःसत्त्वंचित्तात्मकं तस्यान्तःकरणोपाधिवृशतोऽनन्तस्यपतिः वरुणश्च । अपांपतयेनमः ॥ स० एषः प्रत्यक्षमण्डलान्तर्वर्ती । ब्रह्मा बृंहयति वर्धयतिभक्तानितितथा । "सर्ववेष्टयितृत्वाच्चविशिष्टबलतस्तथा । विष्णुरित्यभिधामह्यंसा नयुक्तादिवौकसाम्"इत्यैतरेयभाष्यादिशाप्यर्थोबोध्यः । शिवंमङ्गलमस्यास्तीतिशिवः । अर्शआद्यच् । शिवयतीतिवातथा । "तत्करोती"तिण्यन्तात्पचाद्यच् । "शःस्यान्नपुंसकेशास्त्रेयशसीन्द्रशरासने । तूष्णींगतेसुखे"इतिनानार्थरत्नमालोक्तेः । शंसुखमेषामस्तीतिशिनोमुक्ताः तान्वर्तयतीतिवा । स्कन्दनात् जलशोषणात् स्कन्दः । स्कन्दान्तर्गतत्वेनच्युतत्वात्स्कन्दः । "स्कन्नत्वात्स्कन्दतांप्राप्तः"इतिभारतदानधर्मोक्तेः ॥ प्रजापालकत्वात्प्रजापतिः । प्रकर्षेणजनयतीतिप्रजः । नविद्यतेपतिर्यस्यसोपतिः । प्रजश्चासावपतिश्चेतितथेतिवा ॥ ८ ॥ स० मनुः सर्वज्ञः । 'मनुअवबोधने'इतिधातुः । ती० पितरः अग्निष्वात्तादयः । सदावसन्तीतिवसवः । तेचाष्टौ । सिद्धिरेषामस्तीतिसाध्याः । अर्शआद्यच् । तेचद्वादश । अश्विनौ बडबारूपिण्यांआदित्यमहिष्यांसंज्ञयाऽश्वरूपयुक्तस्यादित्यस्यतस्यांजातावश्विनौ । म्रियन्तेन कदाचिदितिमरुतः । तेचवायुपुराणोक्ताः शुक्रज्योतिःप्रभृतय एकोनपञ्चाशत् । मननान्मनुः । "नान्योतोस्तिमन्ता'इतिश्रुतेः । वाति सुरभीकरोतीतिवायुः । 'वा गतिगन्धनयोः' इतिधातुः । "सर्वगन्धःसर्वरसः"इतिश्रुतेः । वहतिहव्यमितिवह्निः 'वहप्रापणे' । प्रजाप्राणः प्रजानांप्राणनहेतुः । इयर्तीतिऋतुः । 'ऋगतौ' । "ऋतुः सुदर्शनः कालः" इतिसहस्रनामपाठात् । कर्ता तेन

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ॥ सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः ॥१०॥

ऋतूनां वसन्तादीनां कर्ता एष प्रभाकरः ब्रह्मा चेत्यादिरीत्याऽन्वयः ॥ ८—९ ॥ एवमादित्यस्वरूपमुपदिश्य तद्विषयमादित्यहृदयस्तोत्रमुपदिशति–आदित्यः सवितेत्यादिना लोकसाक्षिण इत्यन्तेन ॥ तत्र आदित्यादिप्रथमान्तपदेषु त्वंपदमध्याहार्यं। अदितेरपत्यत्वेनावतीर्ण आदित्यः । "दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः" इति ण्यप्रत्ययः । अदितेः अखण्डितायाः भूमेरयं पतिरित्यादित्यः। सूते जगदिति सविता । सुवति प्रेरयति जनान् कर्मणीति सूर्यः। "पू प्रेरण" इति धातोः "राजसूयसूर्य—" इति निपातनात् क्यप्प्रत्ययो रुडागमश्च ॥ खे गच्छतीति खगः। लोकोपकारार्थमाकाशे संचरन्नित्यर्थः। वर्षेण पुष्णाति जगदिति पूषा । श्वन्नुक्षन्नित्यादौ निपातितः । गभस्तयः किरणाः अस्य सन्तीति गभस्तिमान् । सुवर्णसदृशः सुवर्णवर्णः । "हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्ण" इति श्रुतेः । भातीति भानुः । "दाभाभ्यां नुः" इति नुप्रत्ययः । हिरण्यं रेतो यस्य स हिरण्यरेताः हिरण्मयब्रह्माण्डकर्तेत्यर्थः । अक्षराधिक्यमार्षत्वात् । दिवा करोतीति दिवाकरः, दिवा अह्नि प्राणिनः चेष्टां करोतीति वा दिवाकरः ॥ १० ॥

विनातृणाग्रमपिनचलतीतिकृत्वासर्वभूतान्तःप्रवेशेनसकलकर्मकर्ता । प्रभाकरः प्रकृष्टज्ञानसाधनं ॥ ति० पितरोबीजप्रदाः तद्रूपोयंसर्वेषांबीजप्रदः । "तासांब्रह्ममहद्योनिरहंबीजप्रदःपिता"इत्युक्तेः । बहुत्वंपूजार्थं । कव्यवाहनादयः पितृदेवताश्च । वसुरहमर्थः अष्टौ वसवश्च । साध्याः प्राधान्येनयोगिनः । प्रसाधनीयत्वात्साध्याः । देवगणविशेषाश्च । अश्विनौ अश्नोतेर्वन्प्रत्ययान्तोश्वशब्दः । सर्वव्याप्तौदेवभिषजौच । मरुत् 'मृङ्प्राणत्यागे' । अस्यधातोरुतिप्रत्ययान्तंरूपं । अनर्थमारकः । एकोनपञ्चाशत्सैन्यमरुद्गणश्च । मनुतइतिमनुः सर्वज्ञः । आदिराजश्च । वातीतिवायुः 'वागतिगन्धनयोः' गतिर्ज्ञानंज्ञापनंच । ज्ञाताज्ञापकश्च । प्रपञ्चवृत्तिःप्राणश्च । बर्हेर्निः बर्हिः । स्वेनहिम्निस्वयंप्रतिष्ठितोभूत्वास्वस्मिन्सर्वसारंवहतीतिवर्हिः अग्निश्च । प्रजायन्तेजीवात्मनेतिप्रजाः । प्रकृष्टजनिमन्तोविभूत्यध्यायोक्ताः । देवाश्च । प्राणयतीतिप्राणः । "नप्राणेननापानेनमर्त्योजीवतिकश्चन । इतरेणतु जीवन्तियस्मिन्नेतावुपाश्रितौ"इतिश्रुतेः । प्राणयात्राप्रवर्तकः प्राणः । ऋतूनांज्ञानानांकर्तोपादानं वसन्तायृतुकर्तासंवत्सरात्मा कालश्च । प्रभाकरोभास्करवत् । शब्दस्याप्यर्थतादात्म्येनदेवतास्वरूपत्वाद्भास्करप्रभाकरयोःशब्दयोःशब्दभेदेनमूर्त्यन्तरत्वंज्ञेयं ॥९॥ **तनि०** सूर्यः स्थावरजङ्गमात्मकजगदन्तर्यामीसूर्यशब्दवाच्यः । "सूर्यआत्माजगतस्तस्थुषश्च"इतिश्रुतेः ॥ **ती०** अधुनास्तोत्रस्वरूपंदर्शयति—**आदित्यइत्यादिना** । अत्र प्रथमान्तेषुशब्देषुत्वंशब्दमध्याहृत्यत्वमादित्यस्त्वंसवितेत्येवंयोजनीयं । "यस्मात्सर्वमादत्तेतस्मादादित्यः"इत्यौपनिषदव्युत्पत्त्याअशेषविषयभोक्ता आदित्यइत्यर्थः । सविता सर्वस्यजगतः प्रसविता । सूते जगदितिवासविता । सुवतिप्रेरयतिजगदितिवासविता । सुवतिप्रेरयतिकर्मणीतिसूर्यः । सुष्ठुईरयतिप्रेरयतीतिवासूर्यः परमात्मा । प्रेरणसौष्ठवंचनिरुपाधिकत्वं । तच्चभगवतएव । 'अन्तःप्रविष्टःशास्ताजनानां'इत्यादिश्रुतेः । खं परमाकाशंगच्छतिअध्यास्तइतिखगः । 'योअस्याध्यक्षःपरमेव्योमन्'इतिश्रुतेः । पुष्णातीतिपूषा स्थितिकर्तेत्यर्थः । 'पुषपुष्टावि'तिधातुः । गभस्तिमान् गांदिशंव्याप्यभासयतिप्रकाशयतीतिगभस्तिः । 'भासृदीप्ता'वितिधातुः । पृषोदरादित्वात्साधुः । तथाचगभस्तिः सर्वव्यापिनीलक्ष्मीस्तद्वान् । लक्ष्मीनित्ययुक्तइत्यर्थः । नित्ययोगेमतुप् । लक्ष्म्याःसर्वव्यापित्वं "यथासर्वगतोविष्णुस्तथैवेयंद्विजोत्तम"इतिपराशरस्मरणात्सिद्धं । शोभनेपर्णेपक्षौयस्यससुपर्णःपरमात्मा । "द्वासुपर्णासयुजासखाया"इतिश्रुतेः । तपतीतितपनः । 'तपसन्तापे' । 'सुखसुप्तःपरंतपः' इतिस्मर्यते । सुवर्णसदृशइतिपाठेसुवर्णवर्णइत्यर्थः । "हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्वएवसुवर्णः"इतिश्रुतेः । भातीतिभानुः । 'तमेवभान्तं'इतिश्रुतेः । हिरण्यरेताः । हिरण्यं हिरण्मयं रेतः अण्डोत्पादकद्रव्यंयस्यसः । 'अपएवससर्जादौतासुवीर्यमवासृजत् । तदण्डमभवद्धैमंसहस्रांशुसमप्रभम् ।' इतिमनुस्मरणात् । अज्ञाननिवर्तनद्वारा दिवा द्युतिज्ञानंकरोतिव्युत्पादयतीतिदिवाकरः । हरिदश्वः हरतिमनइतिहरित् मनोहरः अश्वःवाहनंगरुडोयस्यसः । पृषदश्वइतिवत् । सहस्रार्चिः अर्च्यतइत्यर्चिः । अर्चिश्शब्देन पूज्यमङ्गलगुणाउच्यन्ते । अनन्तकल्याणगुणइत्यर्थः । सप्तसप्तिः सप्ताश्वयःसप्तिः अश्वोयस्यसः । "एकोअश्वोवहतिसप्तनामा" इतिश्रुतेः । अनेनकल्क्यवतारःसूचितः । मरीचिमान् म्रियन्तेशत्रवोऽनेनेतिमरीचिश्चक्रं । तद्वान् । उपलक्षणमेतत् । शङ्खचक्रगदाधरइत्यर्थः । तिमिरोन्मथनः ज्ञानोत्पत्तिप्रतिबन्धकदोषनिवर्तकः । "ह्यन्तःस्थोह्यभद्राणिविधुनोतिसुहृत्सतां"इतिस्मरणात् । शंसुखमस्माद्भवतीतिशंभुः । 'विश्वाक्षंविश्वशंभुवं'इतिस्मरणात् ॥ त्वष्णोति त्रिस्सप्तकृत्वःसक्षत्रियांभूमिमितित्वष्टा । 'तक्ष्लूक्ष्णूतनूकरणे'इतिधातुः । अनेनपरशुरामावतारःसूचितः । मृतं अचेतनंब्रह्माण्डंजीवयतीतिमार्ताण्डः । 'जीवाजीवमजीवयत्' इतिभागवतोक्तेः । अंशुमान् अन्तर्बहिर्व्याप्तिमान् । 'अशूव्याप्तौ'इतिधातुः । 'अन्तर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थितः'इतिश्रुतेः । हिरण्यं सकलजगदुत्पादकसमष्टिजीवजातंगर्भेयस्यसः हिरण्यगर्भः । "हिरण्यगर्भःसमवर्ततात्रे"इतिश्रवणात् । तापत्रयतप्तानांविश्रमस्थानत्वाच्छिशिरः । तपनः 'तपसंतापे' स्वाश्रितविरोधिनांतापकारीत्यर्थः । सर्ववस्तुसाक्षात्कारहेतुभूतालोककर्ता । रूयतेस्तूयतेसर्वै-

हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ॥ तिमिरोन्मथनः शंभुस्त्वष्टा मार्तण्ड अंशुमान् ॥ ११ ॥
हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः ॥ अग्निगर्भोदितेः पुत्रः शङ्खः शिशिरनाशनः ॥ १२ ॥

हरितः श्यामा अश्वा अस्य सन्तीति हरिदश्वः । सहस्रार्चिः सहस्रकिरणः । सप्तनामा सप्तिरश्वो यस्यासौ सप्तसप्तिः । "एको अश्वो वहति सप्तनामा" इति श्रुतेः । मरीचयोस्य सन्तीति मरीचिमान् । प्रकाशवानित्यर्थः । तिमिराण्युन्मथ्नातीति तिमिरोन्मथनः । शंसुखं भवत्यस्मादिति शंभुः । "डुप्रकरणे मितद्वादिभ्य उपसंख्यानम्" इति डुः । सर्वाणि रूपाणि त्वष्टा । सर्वसंहारक इत्यर्थः । मृतेण्डे जातो मार्तण्डः । सर्वसंहारे तत्सृष्टये पुनः प्रादुर्भूत इत्यर्थः । अंशवोस्य सन्तीत्यंशुमान् । प्रकाशमान इत्यर्थः ॥ ११ ॥ हिरण्यं हिरण्मयाण्डं । "तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्" इति स्मृतेः । तस्य गर्भो हिरण्यगर्भः । ब्रह्माण्डोदरवर्तीत्यर्थः । यद्वा हिरण्यं हितरमणीयं गर्भमन्तःकरणं यस्यासौ हिरण्यगर्भः । तापत्रयतप्तानां विश्रमस्थानत्वाच्छिशिरः । तपतीति तपनः । भासः करोतीति भास्करः । रूयते स्तूयते सर्वैरिति रविः । "अच इः" इतीप्रत्ययः । दिवा अग्निर्गर्भे यस्यासावग्निगर्भः । "उद्यन्तं वावादित्यमग्निरनुसमारोहति" इति श्रुतेः । अदितेः पुत्रः अदितेः पुत्रत्वेनावतीर्णः । शाम्यति स्वयमेव सायंकाल इति शङ्खः । "शिशिरं हिमं

रितिरविः । रौतिउपदिशतिवेदानितिवारविः । 'योवैवेदांश्चप्रहिणोतितस्मै'इतिश्रुतेः । अग्निःकालाग्निरुद्रोगर्भेयस्यसोग्निगर्भः । 'नारायणाद्ब्रह्मोजायते'इतिश्रुतेः । अदितेःपुमपत्यंपुरन्दरंत्रायतइत्यदितेः पुत्रः । शंसुखंखेआकाशेहृदयाकाशेयस्यसः शङ्खः । निरवधिकानन्दवानित्यर्थः । शिशिरनाशनः सूर्यरूपेणशिशिरंहिमंनाशयतीतितथा ॥ ति० आदित्यः अशेषविषयभोक्तामण्डलाभिमानीअदितिपुत्रश्च । सविता अन्तःकरणोपाधिनापरिमितचिदात्मवर्गस्रष्टा । रश्मिभिःपर्जन्यादिप्रवृत्त्यातत्तदन्नादिस्रष्टा । सर्तेः सूर्यः सर्वगः । 'सूर्यएकाकीचरति'इतिश्रुतेः । कर्मप्रेरकोवा । गभस्तिमान् रश्मिवत्समानार्थः । शब्दभेदान्मूर्तिभेदः । सुवर्णसदृशः 'आत्मलाभान्नपरंविद्यते'इतिश्रुतेः । सुवर्णसदृशनिधिलाभतुल्यकामः । यद्वा हिरण्यं तत्साधनंपारदएवरेतोयस्येत्यर्थः । अक्षराधिक्यमार्षं । दिवेत्यव्ययंप्रकाशवाचकं । प्रकाशंकरोतीतिदिवाकरः । हरितोदिशोश्नोतिव्याप्नोतीतिहरिदश्वः । श्यामवर्णश्च । सहस्राण्यनन्तानिअर्चींषिज्ञानानियस्यसः । यद्वा सहस्रसंख्याकान्यर्चींषिरश्मयोयस्यसः । सप्तसप्तिः सप्तशीर्षण्याःप्राणा इन्द्रियाणिद्वेचक्षुषीद्वेश्रोत्रेद्वेनासिकेवाक्चैकेति "सप्तप्राणाःप्रभवन्तितस्मात्"इतिश्रुतेः । सप्तप्राणानांसप्तिःप्रवृत्तिर्यतःसः । सप्तसंख्याश्च । मरीचिमच्छब्दोगभस्तिमच्छब्देनव्याख्यातः । अज्ञानलक्षणंतिमिरमुन्मथ्नातीतितिमिरोन्मथनः अन्धकारनाशनश्च ॥ हिरण्यगर्भः सकलजगदुत्पत्तिस्थितिलयकर्ता । ब्रह्मविष्णुरुद्ररूपोहिरण्यगर्भः । "भगवतेहिरण्यगर्भायनमः"इतिद्वादशाक्षरीआदित्यहृदयरहस्यमितिकतकः । शिशिरःशीतःसुखस्वभावः । तपनः 'तपऐश्वर्ये' स्वभावतएवसर्वेश्वरइत्यर्थः । दितिर्नाशोनविद्यतेयस्यास्साऽदितिर्ब्रह्मविद्या । तस्याःपुत्रः तल्लभ्यत्वात् । आदित्यश्च । शंचखंचशंखः । परमानन्दगगनात्मेत्यर्थः । शिशिरंजाड्यंमन्दबुद्धित्वं नाशयतीतिशिशिरनाशनः । हिमनाशकश्च ॥ स० आदित्यः आदौ अनादिकालमारभ्यवर्तमाने ल्ये आनन्दज्ञानेयस्यसः । तिश्च यंच ल्ये । 'आनन्दंतीतिवैवेदत्' येतिज्ञानंसमुद्दिष्टं'इतिसत्यशब्दव्याख्यापरभागवततात्पर्यात् । 'अदभक्षण'इत्यतआदिनोराक्षसाः । तांस्त्यजतीतिवा । त्यजविसर्गइत्यतोडःकर्तरि । "आदिनोराक्षसाःप्रोक्ताः" इतिभागवततात्पर्ये । अदितेरपत्यमितिवा । वामनरूपेणादित्यपत्यत्वाच्छ्रीपतेरादित्यता । आदितएवल्योव्याप्तः । तनोतेर्ज्यः । आदौविद्यमानइतिवा । सुवति सतःसत्कर्मणि असतोसत्कर्मणिचप्रेरयतीतिवा । 'षूप्रेरण'इतितौदादिकात्क्यपोरुट् । सूरिगम्यत्वात् ज्ञानिप्राप्यत्वाच्चेतिवा । निर्वचनलाद्रेफैकारलोपः । "सूर्यःससूरिगम्यत्वात्"इतीशावास्यभाष्योक्तेः । शंसुखंभावयतीतिशंभुः । यत्तुतीर्थनागोजिभट्टाभ्यां शंभवत्यस्मादितिव्युत्पत्तिप्रदर्शनंकृतं तत्तुमुकुटस्वामिव्याख्यानवत्कर्तरिकृतोभिधानेनापादानेडुप्रत्ययाभावादयुक्तं । मार्तण्डः मृतेअण्डेतथामात्रेणतत्राये परीक्षित्पेश्यण्डेभवतीतिसतथा । कृष्णरूपी । शकन्ध्वादिरयं । मार्ताण्डइतिवा । 'पुनर्मार्ताण्डमाभरत्'इतिमन्त्रात् । 'अथमार्तण्डमार्ताण्डौ'इतिनामनिधानाच्छब्दार्णवाच्च । मार्तण्डोवराहरूपीतिवा । 'मार्तण्डस्तपनेक्रोडे'इतिविश्वः । सूर्यान्तर्गतत्वाद्वा । सएवमार्ताण्डकः ॥ अग्निगर्भः अग्निर्गर्भेयस्यसः । 'उद्यन्तंवावादित्यमग्निःसमारोहति'इत्यादेर्मन्त्रवर्णात् । अग्नेर्गर्भः । 'अग्नौक्रियावतांविष्णुः'इत्यादेः । शंखः शंसुखं खं आकाशमिवव्याप्तंयस्य । शंसुखरूपाणिखानिइन्द्रियाणियस्येतिवा ॥ शि० हरिदश्वः हरेःसुग्रीवस्य देनराज्यप्रदानेनश्वयतिवर्धते ॥ मरीचयः उपलक्षणतयामरीचिप्रभृतयोमुनयोस्यसन्ति सेवकत्वेनेतिमरीचिमान् ॥ तक्षति महान्तमपिक्षीयानामपराधंतनूकरोतिनगणयतीत्यर्थः । त्वष्टा ॥ हिरण्योहिरण्यगर्भोगर्भेबालकइवयस्यसः । शिशिरः सर्वतापरहितत्वान्निर्व्यलक्षणशैत्यविशिष्टः ॥ अहोदिवसस्यतदुपलक्षितकालमात्रस्यकरःप्रवर्तकः । नरविःप्रकाशकोय-

[पा०] १ ङ. ञ. ट. मार्तण्डकोंशुमान्.

व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः ॥ घनवृष्टिरपां-मित्रो विन्ध्यवीथी प्लवङ्गमः ॥ १३ ॥
आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ॥ कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ॥ १४ ॥

नाशयतीति शिशिरनाशनः ॥ १२ ॥ व्योम्नो नाथो व्योमनाथः । तमः राहुं भेत्तुं शीलमस्यास्तीति तमोभेदी । ऋग्यजुःसाम्नां पारं गच्छतीति ऋग्यजुःसामपारगः । "ऋग्भिः पूर्वाह्णे दिवि देव ईयते । यजुर्वेदे तिष्ठति मध्ये अह्नः । सामवेदेनास्तमये महीयते । वेदैरशून्यस्त्रिभिरेति सूर्यः" इति श्रुतेः । घना वृष्टिर्यस्मादसौ घनवृष्टिः । "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" इति स्मृतेः । अत एवापां मित्रः । पुल्लिङ्गत्वमार्षं । दक्षिणायने विन्ध्यो वीथी संचारभूमिर्यस्यासौ विन्ध्यवीथिः । प्लवं यथा तथा गच्छतीति प्लवङ्गमः । विन्ध्यवीथीप्लवङ्गम इत्येकपदत्वेन पाठे विन्ध्यवीथी गगनमार्गः ॥ १३ ॥ आतपोस्यास्तीत्यातपी । मण्डलं वृत्ताकारो बिम्बोस्यास्तीति मण्डली । मृत्युः विरोधिनिवर्तकः । उदयसमये पिङ्गलवर्णत्वात् पिङ्गलः । सर्वानपि मध्याह्ने तापयतीति सर्वतापनः । कविः पण्डितः । व्याकरणादिसर्वशास्त्रप्रवर्तक इत्यर्थः । विश्वः विश्वनिर्वाहकः । महान्ति तेजांसि यस्य स

स्यारविः स्वयंप्रकाशइत्यर्थः ॥ १०—१२ ॥ **ती०** व्योमनाथः तामसाहङ्काररूपेणाकाशस्याप्यष्टेत्यर्थः । "आत्मनआकाशः संभूतः"इतिश्रुतेः । तमः भक्तानांतमोगुणंभिनत्तीतितमोभेदी । ऋग्यजुस्सामपारगः सकलवेदपर्यवसानभूमिः । "वेदैश्चसर्वैरहमेववेद्यः"इतिश्रुतेः । घनवृष्टिः घनावृष्टिः सकलकर्मफलरूपायस्मात्सः । 'अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवच' ।—'फलमतउपपत्तेः'इत्यादिप्रमाणात् । अपांमित्रः महार्णवशायी । 'यमन्तःसमुद्रेकवयोऽवयन्ति'इत्यादिश्रुतेः । विन्ध्यवद्दुर्गमायांवीथ्यांसुषुम्नामार्गेप्लवंशीघ्रंगमयतीतिविन्ध्यवीथीप्लवङ्गमः । मुक्तप्रापकइत्यर्थः । 'सएनान्ब्रह्मगमयति—हार्दानुगृहीतशताधिकया'इत्यादिश्रवणात् । आतपी आसमन्तात्तपःजगन्निर्माणसंकल्पोस्यास्तीत्यातपी । 'तपआलोचने'इतिधातुः । 'यस्यज्ञानमयंतपः'इतिश्रुतेः । मण्डयतेऽनेनेतिमण्डलंकौस्तुभादिः अस्यास्तीतिमण्डली । 'मडिभूषायां'इतिधातुः । मृत्युः । अत्रमृत्युशब्दः प्रकृतवाची । मृत्युशरीरकइत्यर्थः । 'यस्यमृत्युःशरीरं'इतिश्रुतेः । पिङ्गतिमिलतीतिपिङ्गलः । 'पिङ्गमेलने'इतिधातुः । मेलनंसुशीलस्यैवसंभवति । अतःपिङ्गलः । सौशील्यंनाममहात्मनोमूढैःसहनीरन्ध्रेणसंश्लेषः । सर्वतापः युगपत्सकलाण्डसंहारकः । कविः विदिताखिलवेद्यः । 'यःसर्वज्ञःसर्ववित्' इतिश्रुतेः । विश्वः विश्वशरीरकः । "विश्वमेवेदंपुरुषः"इतिश्रुतेः । महातेजाः महत् निरवधिकंतेजः पराभिभवनसामर्थ्ययस्यसः । रक्तः सर्वरञ्जकः । सर्वभवोद्भवः भवतीतिभवःकार्यवर्गः । सर्वोत्पत्तिहेतुरित्यर्थः । यद्वा सर्वेषांभवःसंसारो यस्मादुद्भवतिसतथा । नक्षत्रग्रहताराणामधिपः नक्षत्रग्रहताराणामन्तर्यामीत्यर्थः । "यश्चन्द्रतारकमन्तरोयमयती" इत्यादिश्रुतेः । विश्वभावनः विश्वस्थितिहेतुः । "द्यौःसचन्द्रार्कनक्षत्रंखंदिशोभूर्महोदधिः । वासुदेवस्यवीर्येणविधृतानिमहात्मनः"इतिश्रवणात् । तेजसामपितेजस्वी प्रशस्ततेजस्कइत्यर्थः । 'येनसूर्यस्तपतितेजसेद्धः'इतिश्रुतेः । 'सूर्यस्यापिभवेत्सूर्यः'इत्युक्तत्वाच्च । द्वादशात्मन् द्वादशमण्डलान्तर्वर्तिन् । ते तुभ्यंनमोस्तु ॥ **ति०** अपांसालिकानांमित्रः चैतन्यदानेनोपकर्ता । जलानामुत्पादकश्च । विन्ध्यवीथी सूर्यमार्गः तेनशीघ्रगन्ताच विन्ध्यवीथीप्लवङ्गमः । मृत्युः सर्वमृत्युसंपादकः । 'अमुमाहुःपरंमृत्युं' इतिश्रुतेः । पिङ्गलः पिङ्गलनाडीप्रवर्तनेनकर्ममार्गप्रवर्तकइत्यर्थः । पीतवर्णश्च । द्वादशात्मन् द्वादशमासस्वरूप । प्रागनुक्रान्तसर्वमूर्तिरूपायतुभ्यंनम इत्यर्थः । द्वादशात्मनेनमः ॥ **शि०** कविः इच्छामात्रेणगद्यपद्यादिनिर्माता ॥ **स०** विन्ध्यवीथीप्लवङ्गमः विन्ध्यस्थयावीथी अगस्त्यमुखतोदक्षिणभागेसंपादितातस्यांद्रुतगन्तेतिवा । यथोक्तंभारतेवनपर्वण्यागस्त्ये—'सूर्याचन्द्रमसोर्मार्गेनक्षत्राणांगतिंतथा । मार्गमिच्छाम्यहंदत्तंभवतापर्वतोत्तम । दक्षिणामभिगन्तास्मिदिशंकार्येणकेनचित् । यावदागमनंमह्यंतावत्त्वंप्रतिपालय । निवृत्तेमयिशैलेन्द्रततोवर्धस्वकामतः'इत्यादिना ॥ विश्वः जगत्प्रविष्टः । 'विशप्रवेशने' इत्यस्मात् 'अशूप्रुषिलटिकणिखटिविशिभ्यःक्वन्नि'ति क्वन्प्रत्ययेतस्यकित्त्वाद्गुणाभावेचरूपं ॥ 'तत्सृष्ट्वातदेवानुप्राविशत्'इतिश्रुतेः । सर्वत्रप्रविष्टत्वात् ज्ञानरूपत्वाद्विश्वः । 'विशप्रवेशन'इतिधातोःक्विप्रत्ययः । 'वागतिगन्धनयो'रितिधातोर्डप्रत्ययः । विश्वतद्वचेतिविग्रहः । 'विवेशभूतानिचराचराणि—विज्ञानमानन्दं ब्रह्म'इतिचश्रुतेः । विःपक्षीगरुडस्तेनश्वयतिगच्छतीतिवा । विशेषेणश्वयति व्याप्नोतीतिवा । विशेषेणवर्धतइतिवा । 'टुओश्विगतिवृद्ध्यो'रितिधातुव्याख्यानात् । विश्वंवायुंअन्तर्यामितयावर्तयतीतिवा । विश्वशब्दोपपदात् 'वृतुवर्तने'इत्यतोडः । 'लोपः समाने'तिवलोपः । "गुहाशयांनिहिताःसप्तसप्त"इतिवत् । विश्वंजगद्वर्तयतीतिवा । विश्वस्यकारणत्वाद्वा । 'कार्यकारणयोरेकशब्दव्यवस्थितिर्भवेत्' इतिशब्दनिर्णये । जीवनियामकत्वाद्वा । 'शरीरेषुप्रविष्टत्वाद्विश्वोजीवउदीर्यते । जीवस्यतदधीनत्वाद्विष्णुर्विश्वइतिस्मृतः'त्युक्तेः । प्रत्यहंसुप्तौमोक्षेप्रलयेचभूतान्यत्रप्रविशन्तीतिवा । 'यत्प्रयन्त्यभिसंविशन्ति'इतिश्रुतेः । विशिष्टसुखज्ञानरूपत्वाद्विशिष्टसुखबलरूपत्वाद्वा । 'विश्वंसुबलरूपत्वात्'इत्युक्तेः । अत्रप्रमाणेसुशब्दःसुखवाची । 'खित्यानन्दःसमुदिष्टः'इत्युक्तेः । सर्वभवोद्भवः

[पा०] १ ख. ग. घ. रविर्विश्वो.

नक्षत्रग्रहताराणामधिपो विश्वभावनः ॥ तेजसामपि तेजस्वी द्वादशात्मन्नमोस्तु ते ॥ १५ ॥
नमः पूर्वाय गिरये पश्चिमे गिरये नमः ॥ ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥ १६ ॥
जयाय जयभद्राय हर्यश्वाय नमोनमः ॥ नमोनमः सहस्रांशो आदित्याय नमोनमः ॥ १७ ॥
नम उग्राय वीराय सारङ्गाय नमोनमः ॥ नमः पद्मप्रबोधाय मार्ताण्डाय नमोनमः ॥ १८ ॥

महातेजः । रक्तः सर्वेष्वनुरक्तः । सर्वेषां भवः संसारः उद्भवत्यस्मादिति सर्वभवोद्भवः ॥ १४ ॥ नक्षत्राणां ग्रहाणां ताराणां चाधिपः । विश्वं भावयति स्थापयतीति विश्वभावनः । तेजसामग्न्यादीनां तेजसामपि तेजस्वी प्रशस्ततेजाः । द्वादश आत्मानो मूर्तयो यस्य स द्वादशात्मा । ते च दर्शिताः स्मृतौ—"इन्द्रो धाता भगः पूषा मित्रोथ वरुणोर्यमा । अंशुर्विवस्वांस्त्वष्टा च सविता विष्णुरेव च" इति ॥ एवंभूतस्त्वमसि । अतस्तुभ्यं नम इति योजना ॥ १५ ॥ नमः पूर्वायेत्यादिश्लोकषट्कमेकान्वयं ॥ पूर्वाय गिरये पूर्वभागस्थगिर्युपलक्षिताय । पश्चिमे गिरये पश्चिमभागस्थपर्वतोपलक्षिताय । जयाय उपासकानां जयकराय । जयतीति जयः जयी तस्मा इति वा । जयभद्राय जयभद्रयोः प्रदात्रे । हर्यश्वाय श्यामाश्वाय । अत्र स्तुतित्वान्नपुनरुक्तिश्चिन्त्या । आदरातिशयेन नमःशब्दस्य द्विरुक्तिः । उग्राय अनुपासकानामुग्राय । विविधमीरयति प्रेरयति प्राणिनश्चेष्टयतीति वीरः तस्मै । सारं शीघ्रं गच्छतीति सारङ्गः तस्मै । एकेन निमिषार्धेन द्विसहस्रयोजनं गच्छतीति पुराणप्रसिद्धिः । ब्रह्मेशानाच्युतेशाय ब्रह्मेशानाच्युतानां सृष्टिसंहारस्थितिकर्तृणामीशाय । परब्रह्मरूपत्वेन स्तूयते "असावादित्यो ब्रह्म" इति श्रुतिः । अथवा ब्रह्मेशानयोः ब्रह्मरुद्रयोः अच्युतेशः अच्युतनियन्ता । सर्वापत्स्वपि पालक इत्यर्थः । 'वेदापहारगुरुपातकदैत्यपीडाद्यापद्विमोचनमहिष्ठफलप्रदाता' इत्यर्थः । ब्रह्मेशायाच्युतेशायेत्यपि पाठः । तस्मै । आदित्यरूपं वर्चो दीप्तिर्यस्य तस्मै आदित्यवर्चसे । भा अस्यास्तीति भास्वान् तस्मै । सर्वभक्षाय सर्वसंहर्त्रे । अतएव तस्मिन्समये रौद्राय वपुषे । तमः अन्धकारं हन्तीति तमोघ्नः । आश्रितशत्रून् हन्तीति शत्रुघ्नः । अमितः अपरिच्छिन्नः आत्मा स्वरूपं यस्यासौ अमितात्मा । कृतघ्नं हन्तीतिकृतघ्नघ्नः । देवाय दीप्यमानाय । तप्तचामीकराभाय हिरण्यवपुषे । वह्नये अग्निरूपेण हव्यवाहनाय । विश्वं जगत् कर्म कर्तव्यं यस्य तस्मै विश्वकर्मणे । सर्वजगत्कर्त्रे इत्यर्थः । लोकसाक्षिणे लोकानां जनानां अन्तर्यामि-

जगद्व्याप्तित्वात्सर्वः । 'सर्वसमाप्नोषिततोसिसर्वः' इतिगीतोक्तेः । भवोद्भवेतिश्रुतिस्थपदानुवादः । मङ्गलरूपत्वाद्भवः । उद्भवः उद्गतसंसृतिः । उद्गमनंचात्रात्यन्ताभावोविवक्षितः । सचासौसच । विश्वभावनः विश्वभावोविश्वत्वं जगदभेदइतियावत् । न यस्यसविश्वभावनइतिवा ॥ १३—१५ ॥ **ती०** पूर्वायगिरये विष्णुपुराणोक्तरीत्यातत्तद्गिर्यन्तर्यामिणेइत्यर्थः । ज्योतिर्गणानांपतये ज्योतिर्गणान्मुक्तानांपतयेस्वामिने । सूर्यपर्यायनामानिसर्वाण्यपितदन्तर्यामिपर्यवसितानीतिहृदिनिधायाह—**दिनाधिपतयइत्यादि** । जयाय जयतीतिजयः अप्रतिहतपराक्रमस्तस्मै । जयन्त्यनेनभक्ताःसंसारमितिवाजयः । जयभद्राय उपासकानांरोगपापादिजयंभद्रंकल्याणंचप्रयच्छतीतिजयभद्रः । हर्यश्वाय हरिःहनुमान् अश्वःवाहनंयस्यसः । अनेनरामावतारःसूचितः । आदरातिशयेननमःपदस्यद्विरुक्तिः । सहस्राण्यंशवोजीवायस्यससहस्रांशुः । 'ममैवांशोजीवलोकेजीवभूतः' इतिस्मरणात् ॥ **ति०** जयाय ब्रह्मलोकान्तसकलजयप्रदाय जयाख्यब्रह्मद्वारपालमूर्तयेच । जयभद्राय ब्रह्मलोकादिजयप्राप्यंयद्भद्रं भूमानन्दस्तदात्मकाय । जयभद्राख्यद्वितीयद्वारपालमूर्तयेच । इमावेवशापवशतोऽवतीर्णौरावणकुंभकर्णौ । हर्यश्वोहरिदश्वपर्यायः । आदित्येतिनाम्नःप्राधान्यबोधनायतस्यद्विरुक्तिः ॥ **स०** ज्योतिर्गणानां अभ्यादिप्रकाशकवस्तूनांपतये । अलुक्षष्ठ्याः । तेनधिसंज्ञोपपत्तिः । आक्रोशश्च सर्वसुपर्ववर्यस्यज्योतिर्गणमात्रपतित्वोक्ताविति ज्ञेयं । दिनाधिपतये दिनाधिपस्यसूर्यस्य पतिः आनन्दोयस्मादितिसवा ॥ १६—१७ ॥ **ती०** उग्राय अनुपासकानामुग्ररूपाय । विविधमीरयतिप्रेरयतिप्राणिनश्चेष्टयतीतिवीरस्तस्मै । सारंशीघ्रंगच्छतीतिसारङ्गः । यद्वा सारग्राहिणे । यद्वा हंसावताराय । यद्वा सारंप्रणवःतेनप्रतिपाद्यतइतिसारङ्गः ब्रह्मेशानाच्युतेशाय ब्रह्मेशानाच्युतानां सृष्टिसंहारस्थितिकर्तृणां ईशःस्वामी । परब्रह्मणस्तादृशत्वात् । "सृष्टिस्थित्यन्तकरिणींब्रह्मविष्णुशिवात्मिकां । ससंज्ञांयातिभगवानेकएवजनार्दनः ।" इतिस्मरणात् । सर्वभक्षाय सर्वयज्ञभोक्त्रे । सर्वसंहर्त्रेवा । 'यस्यब्रह्मचक्षत्रंचोभेभवतओदनः'इतिश्रुतेः । शत्रुसंहारा-

[**पा०**] १ घ. रश्मिभावनः. २ ख. ङ. झ. ञ. ट. पश्चिमायाद्रयेनमः. घ. पश्चिमायनमोनमः. ३ घ. हरिदश्वायतेनमः- ४ ङ. झ. ञ. ट. प्रचण्डायनमोस्तुते.

ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे ॥ भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥ १९ ॥
तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ॥ कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥ २० ॥
तप्तचामीकराभाय वह्नये विश्वकर्मणे ॥ नमस्तमोभिनिघ्नाय रुचये लोकसाक्षिणे ॥ २१ ॥
नाशयत्येष वै भूतं तदेव सृजति प्रभुः ॥ पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥ २२ ॥
एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ॥ एष एवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ॥ २३ ॥
वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च ॥ यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः ॥ २४ ॥

तया सुकृतदुष्कृतकर्मसाक्षिणे ॥ १६—२१ ॥ एवमादित्यहृदयमुपदिश्य पुनरपितत्प्रतिपाद्यदेवतांस्तौति—नाशयतीत्यादिना श्लोकत्रयेण ॥ भवतीति भूतं जगत् नाशयति । महाप्रलये पुनस्तदेव सृजति । अत्ययकालनिवृत्तौ । प्रभुः पालकः । पालकत्वमेव प्रपञ्चयति—पायतीति । पायति शोषयति । "पै शोषणे" इति धातुः । सुप्तेषु भूतेषु प्राणिषु परिनिष्ठितः अन्तर्यामित्वेन स्थितः जागर्ति । सकलयज्ञकर्तृत्वफलप्रदत्वान्याह—एष इति ॥ वेदवेद्यत्वमाह—वेदा इति ॥ सर्वकर्मसमाराध्यत्वमाह—क्रतव इति । क्रतुफलप्रदत्वमाह—क्रतूनामिति । लौकिककर्मफलप्रदत्वमाह—यानीति । तेषामिति शेषः । सर्वः सर्वात्मको रविरेव प्रभुर्नियन्ता ॥ २२—२४ ॥

र्थेउग्रायवपुषे । अनेननृसिंहावतारःसूचितः । शत्रुघ्नाय शत्रुसंहर्त्रे । जितहृषीकायेत्यर्थः । अमितात्मने अपरिमितमहिम्ने । कृतघ्नान्हन्तीतिकृतघ्नाय । देवाय स्वयंप्रकाशाय । तप्तचामीकराभाय हिरण्मयपुरुषाय । वह्नये वसूनांपावकइतिस्मरणात् । हरय इतिपाठे हरत्यशेषमज्ञानंतत्कार्यंचेतिहरिः । विश्वकर्मणे विश्वंकर्मकार्यंयस्यसः । "सर्वकर्मासर्वकामः"इतिस्मृतेः । तमोभिनिघ्नाय तूलाज्ञाननाशकाय । रुचये रोचतइतिरुचिस्तस्मै । घृणयेलोकसाक्षिणेइतिपाठे—'घृक्षरणदीप्त्योः'इतिधातोः स्वयंप्रकाशैकतानत्वात् घृणिः । लोकसाक्षिणे सर्वसाक्षिणे । 'सर्वदेवात्मकोह्येष'इत्यारभ्यघृणयेलोकसाक्षिणेइत्येतदन्ताः अष्टोत्तरशतसंख्याआदित्यहृदयतोत्रनाममन्त्रावेदितव्याः ॥ स० वीराय विक्रान्ताय । विगरुडंगम्यस्थानंप्रतीरयतीतिवा विगतःईरःप्रेरकोयस्येतिवा विविधमीरयतीतिवावीरस्तस्मै । अरैःसहवर्ततइतिसारंकालचक्रं । तद्रूपयतीतिसारंगः । द्वितीयायाअलुक् । लोकसारंस्वात्मानंजनान्प्रतिगमयतिज्ञापयतीतिवासारंगः । पद्मप्रबोधाय कमलविकासकाय । पद्मोगजेन्द्रस्तस्यप्रबोधोगजत्वेपिजन्मान्तरानुस्मृतिर्यस्मात् । 'हर्यर्चनानुभावेनयद्गजत्वेप्यनुस्मृतिः'इतिभागवतोक्तेः । ब्रह्मेशानाच्युतेशाय ब्रह्मेशानयोःअच्युतश्चासावीशश्च नित्याच्युतस्वामीत्यर्थः । ब्रह्माचईशश्चअनोवायुश्च नच्यवतइत्यच्युता श्रीश्चब्रह्मेशानाच्युताः । तदीशइतिवा । सर्वभक्षाय सर्वंचराचरंभक्षयतीतिसतथा । 'अत्ताचराचरग्रहणात्'इतिसूत्रात् 'सर्वंवाअत्ती'तिश्रुतेश्च । सर्वाःहिंसकाः तद्रक्षायेतिवा । रुद्राय तदन्तर्गताय । रोगद्रावकायवा । 'रुजंद्रावयतेयस्माद्रुद्रस्तस्माज्जनार्दनः'इत्युक्तेः । निर्वचनत्वाद्वकारलोपः । वपुषे वंज्ञानंसद्वर्तिवा असाधारण्येनन्यायेन तत्पुष्णातीतिवपुद्र । तस्मै । विश्वकर्मणेव्याप्तव्यापाराय । विनागरुडेनशुवतिगच्छतीतिविशुः । विपूर्वात्सौत्रात्च्छुवतेरौणादिकोडुः । नवियतेकर्मबन्धकंयस्येतिवा नवियतेक्लिष्टंकर्मेतिवा अकर्मा । विशुश्चासावकर्माचेतिवा विश्वंकर्मयस्येतिवा । 'हरिरक्लिष्टकारित्वादकर्मा'इतिवचनात् । 'नक्रतेत्वत्कियतेकिंचनारे'इतिश्रुतेः । ति० रुद्दुःखंतन्मूलौरागद्वेषौतन्मूलाज्ञानंचविद्रावयतीतिरुद्रस्तस्मैदंरौद्रं अज्ञानसंहारसमर्थज्ञानाकारायेत्यर्थः । शत्रुर्देहाहंभावः । निजतत्वभगवदनुसंधानजसौख्येनतस्यशातनात्तस्यहन्ता । रिपुक्रणगदादिहन्ताच । कृतघ्नघ्नाय कृतं चेतनत्वलक्षणंभगवत्कृतमुपकारंघ्नन्तिविस्मरन्तियेतेकृतघ्नाः भगवद्विमुखाअज्ञाःसंसारिणः । तान्संसारानर्थप्रापणेनहन्तितादृशाय ॥ १८—२१ ॥ ति० एषइत्युक्तार्थः । भूतंप्रपञ्चं प्रतिसुप्ति नाशयति भूतंप्राणिजातंतत्तदायुरन्तेनाशयति । स्वदिनान्तेचनाशयति । तेन । तमेवोक्तमेवोक्तभूतंजगंगरादावहरादौचसृजति । प्रभुः प्रकर्षेणस्वशक्तिवैभवेनसकलप्रपञ्चात्मनाभवतीतिप्रभुः । सकलप्रपञ्चस्यसाक्षादधिष्ठाताच । पायतिशोषयतिगभस्तिभिः । पायतेनमः । तपतिनाशयति । तपतेनमः । वर्षतिसृजति । वर्षतेनमः ॥ २२ ॥ एषकरणेषु सुप्तेषु उपरतेषुस्वयमनुपरतशक्तिर्नित्यचिद्रूपोजागर्ति । निजमण्डलादर्शनतःप्राणिषुसुप्तेषु । तदगोचरदेशस्थेस्वमण्डलेजागर्तिच । सुप्तेषुजाग्रतेनमः । भूतेषुपरिनिष्ठितः अन्तर्यामितयास्थितः । अग्नयः पञ्चेन्द्रियलक्षणाःपञ्चाग्नयः तेषुहोत्रंहोमः तत्तद्विषयानुभवरूपः । अग्निहोत्रिणां बाह्याभ्यन्तराग्निहोत्रानुष्ठातृणांप्राप्यंयत्स्वर्गापवर्गरूपंफलंतत्प्रदश्च ॥ २३ ॥ ति० देवाः क्रतुदेवाः 'अष्टौवसवः एकादशरुद्रा'इत्यादिक्रमेणोपदिष्टात्रयस्त्रिंशद्देवाः । क्रतवः सोमाद्यश्वमेधान्ताः । क्रतुफलं श्रुत्युक्तंस्वर्गादि । किंचसर्वेषुलोकेषुप्राणिषुयानिकृत्यानिक्रियास्त-

[पा०] १ ङ. ञ. ट. सूराय. २ ङ. ञ. अ. हरयेविश्व. ३ च. छ. घृणये. क. ग. घ. रवयेलोक. ४ क. घ. ज. सृजतेपुनः. ५ ख. ङ. च. छ. ञ. ट. देवाश्च.

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ॥ कीर्तयन्पुरुषः कश्चिन्नावसीदति राघव ॥ २५ ॥
पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ॥ एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥ २६ ॥
अस्मिन्क्षणे महाबाहो रावणं त्वं वधिष्यसि ॥ एवमुक्त्वा तदाऽगस्त्यो जगाम च यथागतम् ॥२७॥
एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ॥ धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥ २८ ॥
आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान् ॥ त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥ २९ ॥
रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत् ॥ सर्वयत्नेन महता वधे तस्य धृतोऽभवत् ॥ ३० ॥
अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः ॥
निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ॥ ३१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तोत्तरशततमः सर्गः ॥ १०७ ॥

इदानीं स्तोत्रस्य फलमाह—एनमिति ॥ कृच्छ्रेषु कष्टेषु । कान्तारेषु भयेषु दुर्गममार्गेषु । भयहेतुषु सत्सु। कश्चिदित्यधिकारिनियमाभावो दर्शितः ॥ २५–२७ ॥ एतच्छ्रुत्वेत्यादिश्लोकद्वयमेकान्वयं ॥ त्रिराचम्येत्यन्त्याचमनमाद्याचमनस्याप्युपलक्षणं । धारयामास। जप्त्वेत्यत्र आदित्यहृदयमिति शेषः ॥ २८—२९ ॥ युद्धाय युद्धं कर्तुं । "तुमर्थाच्च भाववचनात्" इति चतुर्थी । सर्वयत्नेन सर्वप्रकारेण यत्नेन ॥ ३० ॥ प्रहृष्यमाणः प्रहृष्यन् । पुलकित इति यावत् । निशिचरपतिरिति । "तत्पुरुषे कृति बहुलं" इति सप्तम्या अलुक् । रविः आत्मानं स्तुवन्तं रामं निरीक्ष्य मुदितमनाः स्तोत्रेण संतुष्टमनाः प्रहृष्यमाणः सन् निशिचरपतेः संक्षयं विदित्वा अनुगृह्य सुरगणमध्यगतः सन् त्वर रावणवधं प्रति त्वरस्वेति वचोवदत् । अत्र सुरगणमध्यगत इत्यनेन युद्धदर्शनार्थं स्वमण्डलादवतीर्य रामसमीपे गगने स्थित्वा स्तोत्रफलमनुगृहीतवानित्युच्यते । ननूक्तरत्र ब्रह्मरुद्रादयः सर्वे एकवाक्यतया भवान्नारायणो देव इत्यादिना विष्णोरेव सर्वस्मात्परत्वं महता ग्रन्थेन प्रतिपादितवन्तः । अत्र सूर्यस्यैव सर्वोत्तरत्वमुच्यते कथमिदं संगच्छते । उच्यते । यथा मधुविद्यायामादित्यस्य परतया प्रतिपादनेपि तदन्तर्यामिण्येव परमात्मनि मधुविद्यायास्तात्पर्यमिति बादरायणो ब्रह्ममीमांसायामुक्तवान् । तथास्य मन्त्रस्यादित्यान्तर्यामिविषयतया सर्वमिदं संगच्छते । नारायणपरत्वं ह्युपक्रमप्रभृत्योपसंहारमविवादमिति पूर्वमेव बहुलं प्रतिपादितम् । ब्रह्मेशानाच्युतेशायेत्येतदपि मूर्तित्रयस्य परमात्मजन्यत्वादुपपद्यते । अयं च सर्गः केषुचित्कोशेषु न दृश्यते । उडारिणा न व्याख्यातश्च । आरम्भात्प्रभृति प्रबन्धप्रतिपादितनारायणपरत्वविरुद्धं चात्र प्रतिभाति सूर्यपरत्वं । अस्मिंश्चकाण्डे त्रिंशदुत्तरशतसर्गा उडारिणा गणिताः एतदन्तर्भावे एकत्रिंशदुत्तरशतसर्गास्तेन गणिता भवेयुः ॥ ३१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तोत्तरशततमः सर्गः ॥ १०७ ॥

त्साधनानिचक्रुर्विग्रयजमानसमिदाज्यपश्वादीनि । तैर्निजभक्तद्विजानांसंघटनेपरमप्रभुः परमसमर्थः । परमसमर्थायभगवतेब्रह्मणेनमः ॥ स० एवंपञ्चविंशत्युत्तरशतसंख्याभगवत्पूजारहस्यनाममन्त्राइतिकतकः । 'सर्वदेवात्मकोह्येषइत्यारभ्य—लोकसाक्षिणे' इत्यन्ताष्टोत्तरशतसंख्याएवादित्यहृदयस्तोत्रनाममन्त्राइतितीर्थः । कविनातुस्पष्टमिदंमुद्रणंनकृतमितिव्युत्पत्तिवित्त्यायथायथंनामानिज्ञेयानि । निरुक्तिवैचित्र्याच्चफलाधिक्यसंभवादितिमन्तव्यं ॥ २४ ॥ ति० एवंकथितस्यस्तोत्रस्यफलमाह—एनमिति आदित्यहृदयस्तवंकीर्तयन्नापदादिषुकश्चिदपिद्विजोनावसीदति नदुःखनिमग्नोभवति । यद्वा एनं आदित्यहृदयार्थभूतंसूर्यं । आपदादिनिमित्तेषुउक्तैर्नाममन्त्रैःविशिष्यकीर्तयन् स्तुवन् नावसीदति । अत्र आपत् अकालमृत्युः । कृच्छ्रं ज्वरादिदुःखं । भयं चोरादिनिमित्तं ॥ २५ ॥ ति० इदं शीघ्रसिद्धिकरंस्तोत्रं जप्त्वा हृष्टात्मा प्रातर्युद्धायागतंरावणंप्रेक्ष्यजयार्थंमनसाभगवन्तं अगमत् ध्यातवान् ॥ २९—३० ॥ इतिसप्तोत्तरशततमःसर्गः ॥ १०७ ॥

[पा०] १ च. छ. ज. जप्त्वात्रिः. झ. ञ. ट. जप्त्वेदं. २ झ. ञ. ट. जयार्थं.

अष्टोत्तरशततमः सर्गः ॥ १०८ ॥

स्वाभिमुखसमागच्छद्दशमुखरथावलोकिनादाशरथिना चोदितेनमातलिना दशमुखमुखाभिमुखतया निजरथचोदना ॥ १॥ ततोनिजसमरसमालोकनकुतूहलेन गगनाङ्गणमलंकुर्वाणेसुरमुखसुजनगणे निजविजयपरपराजयसूचकनिमित्तोदयदर्शिना दाशरथिना हर्षेणसमरोद्यमनम् ॥ २ ॥

स रथं सारथिर्हृष्टः परसैन्यप्रधर्षणम् ॥ गन्धर्वनगराकारं समुच्छ्रितपताकिनम् ॥ १ ॥
युक्तं परमसंपन्नैर्वाजिभिर्हेममालिभिः ॥ युद्धोपकरणैः पूर्णं पताकाध्वजमालिनम् ॥ २ ॥
ग्रसन्तमिव चाकाशं नादयन्तं वसुन्धराम् ॥ प्रणाशं परसैन्यानां स्वसैन्यानां प्रहर्षणम् ॥
रावणस्य रथं क्षिप्रं चोदयामास सारथिः ॥ ३ ॥
तमापतन्तं सहसा स्वनवन्तं महास्वनम् ॥ रथं राक्षसराजस्य नरराजो ददर्श ह ॥ ४ ॥
कृष्णवाजिसमायुक्तं युक्तं रौद्रेण वर्चसा ॥ [दीप्यमानमिवाकाशे विमानं सूर्यवर्चसम् ॥]
तडित्पताकागहनं दर्शितेन्द्रायुधायुधम् ॥ शरधारा विमुञ्चन्तं धारासारमिवाम्बुदम् ॥ ५ ॥
तं दृष्ट्वा मेघसंकाशमापतन्तं रथं रिपोः ॥ गिरेर्वज्राभिमृष्टस्य दीर्यतः सदृशस्वनम् ॥ ६ ॥
विस्फारयन्वै वेगेन बालचन्द्रनतं धनुः ॥ उवाच मातलिं रामः सहस्राक्षस्य सारथिम् ॥ ७ ॥
मातले पश्य संरब्धमापतन्तं रथं रिपोः ॥ ८ ॥
यथापसव्यं पतता वेगेन महता पुनः ॥ समरे हन्तुमात्मानं तथा तेन कृता मतिः ॥ ९ ॥
तदप्रमादमातिष्ठन्प्रत्युद्गच्छ रथं रिपोः ॥ विध्वंसयितुमिच्छामि वायुर्मेघमिवोत्थितम् ॥ १० ॥

अथ रावणदुर्निमित्तानि–स रथमित्यादिसार्धश्लोकत्रयमेकान्वयं ॥ अत्र द्वितीयसारथिशब्दः अनेकविशेषणव्यवधानात् पूर्वोक्ताविस्मरणाय । गन्धर्वनगराकारं गन्धर्वनगरसदृशं । तल्लक्षणमुक्तं मिहिरेण– "चित्रवर्णं चित्ररूपप्राकारगृहगोपुरम् । अलंकृतमनेकाभैर्वितानध्वजतोरणैः ॥ गन्धर्वनगरं दन्तिनृवाजिक्षययुद्धकृत् । दृश्यते चेन्महद्युद्धमन्योन्यं धरणीभुजां" इति ॥ युद्धोपकरणैः धनुःकवचादिभिः । पताकायुक्ताः ध्वजाः तैर्मालन्त इति पताकाध्वजमाली तं । "मल मल्ल धारणे" इत्यस्माण्णिनिः । ग्रसन्तमिव । स्वविस्तारेणेति भावः । प्रणाशयतीति प्रणाशं ॥ १–३ ॥ स्वनवन्तं शब्दवन्तं । महास्वनं । प्रतिध्वनियुक्तमित्यर्थः ॥ ४ ॥ कृष्णवाजिसमायुक्तमित्यादिसार्धश्लोकत्रयमेकान्वयं ॥ रौद्रेण उग्रेण । तडित्पताकागहनं तडित्तुल्यपताकावनं । दर्शितेन्द्रायुधायुधं दर्शितानीन्द्रायुधसदृशानि आयुधानि येन तं । यद्वा दर्शितेन्द्रायुधानि स्वप्रभाविशेषविरचितेन्द्रचापान्यायुधानि यस्मिन् दृश्यन्ते तादृशं । यद्वा आयुधं धनुः दर्शितेन्द्रधनुस्तुल्यधनुष्कं । धारासारं धारासमूहमित्यर्थः । वज्राभिमृष्टस्य वज्राहतस्य । अतएव दीर्यतः भिद्यमानस्य । बालचन्द्रनतं आरोपितमौर्वीकत्वेन बालचन्द्रवन्नतं ॥ ५—७ ॥ मातले इत्यर्धमेकं वाक्यं ॥ संरब्धं वेगवन्तं ॥ ८ ॥ यथापसव्यमिति । यथा आ अपसव्यमिति छेदः । अपसव्यं अप्रदक्षिणं यथा स्यात्तथा महता वेगेन पुनः आपतता आगच्छता तेन रावणेन समरे आत्मानं हन्तुं मतिः कृता । अपसव्यतया गमनं विनाशद्योतकमित्यर्थः ॥ ९ ॥ तत् अपसव्यगमनस्य विनाशहेतुत्वात्, अप्रमादमातिष्ठन् सावधानतामवलम्बमानः । अपसव्यतां परिहरन्नित्यर्थः । रिपोः रथं प्रत्युद्गच्छ ॥ १० ॥

ति० परमसंपन्नैः परमैःरथवहनोचिताश्वगुणैर्जवादिभिःसंपन्नैः । स० परमेतिभावप्रधानं परमत्वेनसंपन्नैः उत्तमैः ॥ २ ॥ रामानु० पताकायुक्तश्चासौध्वजश्चपताकाध्वजः । पताकाध्वजश्चमालाश्चपताकाध्वजमालं । तदस्यास्तीतिपताकाध्वजमालीतेन । द्वितीयरथसारथिशब्दावनेकविशेषणव्यवधानात्पूर्वोक्ताविस्मरणार्थौतदनुवादकावेव । स० सारथिर्मातलिःयंरथंचोदयामासतंप्रति रावणस्यसारथिःरथंप्रचोदयामासेत्यन्वयेनानयोरथसारथिशब्दयोःपुनरुक्ताभीत्याऽनुवादतांगीकरणप्रयासउभयोरफलः ॥ ३ ॥

[पा०] १ घ. परमसंहृष्टैः. २ इदमर्धं. क. ख. ङ. च. झ. ट. पाठेषुदृश्यते.

अविक्लबमसंभ्रान्तमव्यग्रहृदयेक्षणम् ॥ रश्मिसंचारनियतं प्रचोदय रथं द्रुतम् ॥ ११ ॥
कामं न त्वं समाधेयः पुरन्दररथोचितः ॥ युयुत्सुरहमेकाग्रः स्मारये त्वां न शिक्षये ॥ १२ ॥
परितुष्टः स रामस्य तेन वाक्येन मातलिः ॥ प्रचोदयामास रथं सुरसारथिसत्तमः ॥ १३ ॥
अपसव्यं ततः कुर्वन्रावणस्य महारथम् ॥ चक्रोत्क्षिप्तेन रजसा रावणं व्यवधानयत् ॥ १४ ॥
ततः क्रुद्धो दशग्रीवस्ताम्रविस्फारितेक्षणः ॥ रथप्रतिमुखं रामं सायकैरवधूनयत् ॥ १५ ॥
धर्षणामर्षितो रामो धैर्यं रोषेण लम्भयन् ॥ जग्राह सुमहावेगमैन्द्रं युधि शरासनम् ॥
शरांश्च सुमहातेजाः सूर्यरश्मिसमप्रभान् ॥ १६ ॥
तदोपोढं महद्युद्धमन्योन्यवधकाङ्क्षिणोः ॥ परस्पराभिमुखयोर्दृप्तयोरिव सिंहयोः ॥ १७ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ समेयुर्द्वैरथं द्रष्टुं रावणक्षयकाङ्क्षिणः ॥ १८ ॥
समुत्पेतुरथोत्पाता दारुणा रोमहर्षणाः ॥ रावणस्य विनाशाय राघवस्य जयाय च ॥ १९ ॥
ववर्ष रुधिरं देवो रावणस्य रथोपरि ॥ वाता मण्डलिनस्तीक्ष्णा ह्यपसव्यं प्रचक्रमुः ॥ २० ॥
महद्गृध्रकुलं चास्य भ्रममाणं नभःस्थले ॥ येनयेन रथो याति तेनतेन प्रधावति ॥ २१ ॥
संध्यया चावृता लङ्का जपापुष्पनिकाशया ॥ दृश्यते संप्रदीप्तेव दिवसेऽपि वसुंधरा ॥ २२ ॥
सनिर्घाता महोल्काश्च संप्रचेरुर्महास्वनाः ॥ विषादयंस्ते रक्षांसि रावणस्य तदाहिताः ॥ २३ ॥
रावणश्च यतस्तत्र संचचाल वसुंधरा ॥ रक्षसां च प्रहरतां गृहीता इव बाहवः ॥ २४ ॥
ताम्राः पीताः सिताऽश्वेताः पतिताः सूर्यरश्मयः ॥ दृश्यन्ते रावणस्याङ्गे पर्वतस्येव धातवः ॥२५॥

अविक्लबं अदीनं । असंभ्रान्तं अप्रमादं । अव्यग्रहृदयेक्षणं अव्याकुलमनोनयनं । रश्मिसंचारनियतं नियतरश्मिसंचारं । एतानि क्रियाविशेषणानि ॥ ११ ॥ न समाधेयः नोपदेष्टव्यः । अत्र हेतुः—पुरन्दररथोचित इति । अभ्यस्तपुरन्दररथ इत्यर्थः ॥ १२—१३ ॥ रावणस्य महारथमपसव्यं कुर्वन् स्वरथस्यापसव्यतां परिहरन्नित्यर्थः । चक्रोत्क्षिप्तेन रथचक्रोत्थापितेन रजसा रावणं व्यवधानयत् व्यवहितमकरोत् ॥१४॥ रथप्रतिमुखं सर्वथाभिमुखं । अवधूनयत् प्राहरत् ॥ १५ ॥ धर्षणेत्यादिसार्धश्लोकमेकं वाक्यं ॥ धैर्यं रोषेण लम्भयन् रोषेण निवृत्तधैर्यं इत्यर्थः । ऐन्द्रं मातलिनानीतं शरासनं शरांश्च जग्राहेति योजना ॥ १६ ॥ उपोढं प्रवृत्तं ॥ १७ ॥ द्वैरथं द्वाभ्यां रथाभ्यां प्रवर्तितं युद्धं ॥ १८ ॥ समुत्पेतुरिति । अत्रोत्पातानां राघवजयसूचकत्वं रावणवधद्वारा ॥ १९ ॥ दवेः पर्जन्यः । मण्डलिनो वाताः वात्याः । अपसव्यं अप्रदक्षिणं । प्रचक्रमुः चेरुः ॥ २० ॥ अस्य रावणस्य रथो येन मार्गेण याति स्म तेन मार्गेण महत् गृध्रकुलं नभःस्थले भ्रममाणं सत् प्रधावति स्म । अनेन रावणस्यासन्नमरणत्वं सूचितम् । तदुक्तं शकुनार्णवे—"आसन्नमृत्योर्निकटे चरन्ति गृध्रादयो मूर्ध्नि गृहोर्ध्वभागे" इति ॥२१॥ जपापुष्पनिकाशया संध्यया लङ्का आवृता । अतएव वसुंधरा लङ्कापर्यन्तभूमिः रात्रावग्निना संप्रदीप्तेव दिवसेपि संप्रदीप्ता दृश्यत इत्यर्थः ॥२२॥ सनिर्घाता महोल्काः संप्रचेरुः । ते उल्काः लिङ्गव्यत्ययः । रावणस्याहिताः प्रतिकूलाः सन्तः रक्षांसि विषादयन् व्यषादयन् ॥ २३ ॥ यतः यत्र रावणो गतः तत्र वसुंधरा संचचाल । रावणसमीप एव भूकम्पो जात इत्यर्थः । गृहीता इव बाहवः । कैश्चिद्गृहीता बाहवो यथा प्रहर्तुं न क्षमन्ते तथाभूवन्नित्यर्थः ॥ २४ ॥ सिता अश्वेताश्च सिताश्वेताः । पर्वतस्येवेति । पर्वतस्याङ्गे धातव

ति० अविक्लबत्वादिचतुर्गुणयुक्तंयथातथाद्रुतंरथंप्रचोदय । अविक्लबत्वमभीरुत्वं । असंभ्रान्तत्वंरणक्षोभादक्षुभितचित्तत्वं । अव्यग्रमश्वीयहृदयेक्षणंयत्र । रश्मिसंचारनियतं रश्मिसंचारेनैपुण्यं तत्तत्कालानुगुण्येनसंयमनमोचनव्यवस्थावत्त्वं । स० प्रचोदनक्रियान्वयद्वाराविक्लबत्वादीनांचतुर्णांसारथौतत्कर्तरिसंगततामन्तव्या ॥ ११ ॥ ती० ऐन्द्रंशरासनं 'इदिपरमैश्वर्ये'इतिधातोरिन्द्रः परमात्मा । तदीयंनिजायुधंजग्राहेत्यर्थः ॥ १६ ॥

[पा०] १ ङ. ञ. रावणस्याग्रे. क. ग. ज. रावणस्याङ्के.

गृध्रैरनुगताश्चास्य वमन्त्यो ज्वलनं मुखैः ॥ प्रणेदुर्मुखमीक्षन्त्यः संरब्धमशिवं शिवाः ॥ २६ ॥
प्रतिकूलं ववौ वायू रणे पांसून्समाकिरन् ॥ तस्य राक्षसराजस्य कुर्वन्दृष्टिविलोपनम् ॥ २७ ॥
निपेतुरिन्द्राशनयः सैन्ये चास्य समन्ततः ॥ दुर्विषह्यस्वना घोरा विना जलधरस्वनम् ॥ २८ ॥
दिशश्च प्रदिशः सर्वा बभूवुस्तिमिरावृताः ॥ पांसुवर्षेण महता दुर्दर्शं च नभोऽभवत् ॥ २९ ॥
कुर्वन्त्यः कलहं घोरं शारिकास्तद्रथं प्रति ॥ निपेतुः शतशस्तत्र दारुणं दारुणारुताः ॥ ३० ॥
जघनेभ्यः स्फुलिङ्गांश्च नेत्रेभ्योश्रूणि संततम् ॥ मुमुचुस्तस्य तुरगास्तुल्यमग्निं च वारि च ॥ ३१ ॥
एवंप्रकारा बहवः समुत्पाता भयावहाः ॥ रावणस्य विनाशाय दारुणाः संप्रजज्ञिरे ॥ ३२ ॥
रामस्यापि निमित्तानि सौम्यानि च शुभानि च ॥ बभूवुर्जयशंसीनि प्रादुर्भूतानि सर्वशः ॥ ३३ ॥
निमित्तानि च सौम्यानि राघवः स्वजयाय च ॥ दृष्ट्वा परमसंहृष्टो हतं मेने च रावणम् ॥ ३४ ॥

ततो निरीक्ष्यात्मगतानि राघवो रणे निमित्तानि निमित्तकोविदः ॥
जगाम हर्षं च परां च निर्वृतिं चकार युद्धे ह्यधिकं च विक्रमम् ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टोत्तरशततमः सर्गः ॥ १०८ ॥

नवोत्तरशततमः सर्गः ॥ १०९ ॥

रामरावणयोः समसमरः ॥ १ ॥

ततः प्रवृत्तं सुक्रूरं रामरावणयोस्तदा ॥ सुमहद्वैरथं युद्धं सर्वलोकभयावहम् ॥ १ ॥
ततो राक्षससैन्यं च हरीणां च महद्बलम् ॥ प्रगृहीतप्रहरणं निश्चेष्टं समतिष्ठत ॥ २ ॥

इवेति योजना ॥ २५ ॥ गृध्रैरनुगताः गृध्रसहिता इत्यर्थः । शिवाः गोमायवः मुखैर्ज्वलनं वमन्त्यः सत्यः अस्य रावणस्य मुखमीक्षन्त्यः । रावणाभिमुखा इत्यर्थः । संरब्धं कुपितं अशिवं अमङ्गलं च यथा भवति तथा प्रणेदुः । गृध्राणां साहित्यमात्रं नतु ज्वलनवमनादिकं ॥ २६ ॥ वायुः रणे पांसून् समाकिरन् तेन तस्य रावणस्य दृष्टिविलोपनं दृष्टिप्रतिघातं कुर्वन् प्रतिकूलं अभिमुखं ववौ ॥ २७ ॥ इन्द्राशनयः उल्काशनयः । उल्काशन्योः स्वरूपमुक्तं मिहिरेण—"उल्का शिरसि विशाला निपतन्ती वर्धते च तनुपुच्छा । अशनिः स्वनेन महता युक्ता नृगजाश्वतरुपशुमुखेषु ॥ निपतति विदारयन्ती धरातलं चक्रसंस्थाना" इति ॥ २८—२९ ॥ तद्रथं प्रति तद्रथोपरि ॥ ३० ॥ तुरगाः जघनेभ्यः स्फुलिङ्गान् नेत्रेभ्यः अश्रूणि च मुमुचुः । एवमग्निं च वारि च तुल्यं यथा भवति तथा मुमुचुः ॥ ३१—३२ ॥ एवं रावणपराजयसूचकदुर्निमित्तान्युक्तानि । इदानीं रामजयसूचकनिमित्तान्याह—रामस्यापीति ॥ सौम्यानि मनोज्ञानि । शुभानि शुभोदर्काणि । अत एव जयशंसीनि निमित्तानि प्रादुर्बभूवुः सत्तां लेभिरे । रामविषये किंचित्कारो हि सत्तालाभहेतुः ॥ ३३ ॥ जयाय निमित्तानि जयसूचकनिमित्तानीत्यर्थः ॥ ३४ ॥ रणे आत्मगतानि आत्मार्थं प्रादुर्भूतानि । हर्षं पुलकं निर्वृतिं सुखं च जगाम ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टोत्तरशततमः सर्गः ॥ १०८ ॥

द्वैरथं द्वाभ्यां रथाभ्यां प्रवृत्तं युद्धं प्रवृत्तमिति योजना ॥ १ ॥ निश्चेष्टं समतिष्ठत । युद्धाद्भुतदर्शन-

ति० परमसंहृष्टः लक्ष्मणोमातलिर्वेतिशेषः ॥ ३४ ॥ इत्यष्टोत्तरशततमःसर्गः ॥ १०८ ॥

[पा०] १ क. ख. ङ.—ट. न्समुत्किरन्. २ क.—ट. राघवस्यजयायवै. ३ च. छ. ज. सक्रूरं. घ. तत्क्रूरं. ४ ङ ञ. ट. समवर्तत.

संप्रयुद्धौ ततो दृष्ट्वा बलवन्नरराक्षसौ ॥ व्याक्षिप्तहृदयाः सर्वे परं विस्मयमागताः ॥ ३ ॥
नानाप्रहरणैर्व्यग्रैर्भुजैर्विस्मितबुद्धयः ॥ सर्पन्तं प्रेक्ष्य संग्रामं नाभिजग्मुः परस्परम् ॥ ४ ॥
रक्षसां रावणं चापि वानराणां च राघवम् ॥ पश्यतां विस्मिताक्षाणां सैन्यं चित्रमिवाबभौ ॥ ५ ॥
तौ तु तत्र निमित्तानि दृष्ट्वा रावणराघवौ ॥ कृतबुद्धी स्थिरामर्षौ युयुधाते ह्यभीतवत् ॥ ६ ॥
जेतव्यमिति काकुत्स्थो मर्तव्यमिति रावणः ॥ धृतौ स्वकीर्यसर्वस्वं युद्धेऽदर्शयतां तदा ॥ ७ ॥
ततः क्रोधादशग्रीवः शरान्संधाय वीर्यवान् ॥ मुमोच ध्वजमुद्दिश्य राघवस्य रथे स्थितम् ॥ ८ ॥
ते शरास्तमनासाद्य पुरन्दररथध्वजम् ॥ रथशक्तिं परामृश्य निपेतुर्धरणीतले ॥ ९ ॥
ततो रामोऽभिसंक्रुद्धश्चापमायम्य वीर्यवान् ॥ कृतप्रतिकृतं कर्तुं मनसा संप्रचक्रमे ॥ १० ॥
रावणध्वजमुद्दिश्य मुमोच निशितं शरम् ॥ महासर्पमिवासह्यं ज्वलन्तं स्वेन तेजसा ॥ ११ ॥
[रामश्चिक्षेप तेजस्वी केतुमुद्दिश्य सायकम् ॥] जगाम स महीं छित्त्वा दशग्रीवध्वजं शरः ॥
स निकृत्तोपतद्भूमौ रावणस्य रथध्वजः ॥ १२ ॥
ध्वजस्योन्मथनं दृष्ट्वा-रावणः सुमहाबलः ॥ [क्रोधेनाग्निना सङ्ख्ये प्रदीप्त इव पावकः ॥]
संप्रदीप्तोऽभवत्क्रोधादमर्षात्प्रदहन्निव ॥ १३ ॥
स रोषवशमापन्नः शरवर्षं महद्वमन् ॥ रामस्य तुरगान्दीप्तैः शरैर्विव्याध रावणः ॥ १४ ॥
ते विद्धा हरयस्तत्र नास्खलन्नापि बभ्रमुः ॥ बभूवुः स्वस्थहृदयाः पद्मनालैरिवाहताः ॥ १५ ॥
तेषामसंभ्रमं दृष्ट्वा वाजिनां रावणस्तदा ॥ भूय एव सुसंक्रुद्धः शरवर्षं मुमोच ह ॥ १६ ॥
गदाश्च परिघाश्चैव चक्राणि मुसलानि च ॥ गिरिशृङ्गाणि वृक्षांश्च तथा शूलपरश्वधान् ॥ १७ ॥
मायाविहितमेतत्तु शस्त्रवर्षमपातयत् ॥ तुमुलं त्रासजननं भीमं भीमप्रतिस्वनम् ॥ १८ ॥

कुतूहलादिति भावः ॥ २ ॥ एतदेव विवृणोति द्वाभ्यां—संप्रयुद्धाविति ॥ संप्रयुद्धौ सम्यग्योद्धुमुपक्रान्तौ । कर्मणि क्तः । बलवत् अत्यन्तं व्याक्षिप्तहृदयाः युद्धदर्शनसक्तचित्ताः ॥ ३ ॥ भुजैरित्युपलक्षणे तृतीया ॥ ४ ॥ रावणं पश्यतां विस्मिताक्षाणां विकसितनेत्राणां रक्षसां सैन्यं राघवं पश्यतां विस्मिताक्षाणां वानराणां सैन्यं च चित्रमिवाबभौ ॥ ५ ॥ निमित्तानि दुर्निमित्तानि शुभनिमित्तानिचेत्यर्थः । कृतबुद्धी निश्चितबुद्धी ॥ ६ ॥ निश्चयमेवाह—जेतव्यमिति ॥ जयोवश्यंभावीति । मर्तव्यमिति । मरणमवश्यंभावीति । आवश्यकत्वार्थे तव्यः । धृतौ धैर्यवन्तौ ॥ ७—८ ॥ रथशक्तिं रथबलं । परामृश्य प्राप्य । रथशक्तिप्रघातेन ध्वजमनासाद्य निपेतुरित्यर्थः ॥ ९ ॥ संप्रचक्रमे उद्युक्तवान् । संकल्पितवानित्यर्थः ॥ १० ॥ असह्यं दुर्दर्शमित्यर्थः ॥११॥ सः शरः ध्वजं छित्त्वा जगाम न तु केवलं जगाम ॥१२॥ क्रोधादमर्षाच्च प्रदहन्निव प्रदहन्नग्निरिव संप्रदीप्तः ज्वलितः अभवत् ॥ १३ ॥ शरवर्षं वमन् वमन्निवेत्यर्थः ॥ १४ ॥ हरयः हरितवर्णाः । इन्द्राश्वत्वादिति भावः ॥ १५—१६ ॥ गदाश्चेति । मुमोचेत्यनुषज्यते ॥ १७ ॥ धनुषा कथं गदादिमोचनमित्यत्राह—मायेति ॥ शस्त्रवर्षं गदादिवर्षं । मायाविहितं आश्चर्यकरशक्तिकृतं । तुमुलं नानाविधमित्यर्थः ॥ १८ ॥

ति० विस्मिताक्षाणां विस्मयपरवशेन्द्रियाणां ॥ ५ ॥ ति० निश्चयमाह—जेतव्यमिति मर्तव्यमिति । मृत्युरूपशत्रौप्रहर्तव्यमित्यर्थ इतिकतकः । स० स्वकीर्यसर्वस्वमित्यत्रारावणसंहारकारणंयावत्तावदत्रसर्वस्वपदेनरामपक्षेग्राह्यं । अन्यत्रानुपचरितोर्थः ॥७॥

[पा०] १ झ. तस्थुःप्रेक्ष्यचसर्वंतेनाभिजग्मुः. ङ.च. छ. ट. तस्थुः प्रेक्ष्यचतंसर्वंनाभि. ग. घ. तस्थुःप्रेक्ष्यचसर्वंतन्नाभि. ख. ज. तस्थुःप्रेक्ष्यचसंग्रामंनाभि. २ ख. ङ. च. छ. झ. ञ. ट. माकृष्य. ३ इदमर्धं ङ. च. छ. झ. ञ. ट. पाठेषुदृश्यते. ४ च. छ. झ. ञ. ट. भित्त्वा. ५ ख. ङ. च. छ. ञ. ट. पाठेष्विदमर्धंदृश्यते. ६ ख. ङ. च. छ. झ. ञ. ट. शरवर्षं ववर्षह. ७ ङ. झ. ञ. ट. तेदिव्याहरयः.

तद्वर्षमभवद्युद्धे नैकशस्त्रमयं महत् ॥ विमुच्य राघवरथं समन्ताद्वानरे बले ॥ १९ ॥
सायकैरन्तरिक्षं च चकाराशु निरन्तरम् ॥ सहस्रशस्ततो बाणानश्रान्तहृदयोद्यमः ॥
मुमोच च दशग्रीवो निःसङ्गेनान्तरात्मना ॥ २० ॥
व्यायच्छमानं तं दृष्ट्वा तत्परं रावणं रणे ॥ प्रहसन्निव काकुत्स्थः संदधे सायकाञ्शितान् ॥ २१ ॥
स मुमोच ततो बाणान्रणे शतसहस्रशः ॥ तान्दृष्ट्वा रावणश्चक्रे स्वशरैः खं निरन्तरम् ॥ २२ ॥
ततस्ताभ्यां प्रमुक्तेन शरवर्षेण भास्वता ॥ शरबद्धमिवाभाति द्वितीयं भास्वदम्बरम् ॥
[चक्राते तौ शरौघाभ्यां निरुच्छ्वासमिवांबरम्] ॥ २३ ॥
नानिमित्तोऽभवद्बाणो नातिभेत्ता न निष्फलः ॥ २४ ॥
अन्योन्यमभिसंहत्य निपेतुर्धरणीतले ॥ तथा विसृजतोर्बाणान्रामरावणयोर्मृधे ॥ २५ ॥
प्रायुध्यतामविच्छिन्नमस्यन्तौ सव्यदक्षिणम् ॥ चक्रतुश्च शरौघैस्तौ निरुच्छ्वासमिवाम्बरम् ॥ २६ ॥
[नान्तरं ददृशे किंचित्पश्यद्भिरनिमेषणम् ॥ भूमिष्ठैः कपिरक्षोभिः स्वस्थैर्वा देवदानवैः] ॥ २७ ॥
रावणस्य हयात्रामो हयात्रामस्य रावणः ॥ जघ्नतुस्तौ तथाऽन्योन्यं कृतानुकृतकारिणौ ॥ २८ ॥
एवं तौ तु सुसंक्रुद्धौ चक्रतुर्युद्धमद्भुतम् ॥ मुहूर्तमभवद्युद्धं तुमुलं रोमहर्षणम् ॥ २९ ॥

प्रयुध्यमानौ समरे महाबलौ शितैः शरै रावणलक्ष्मणाग्रजौ ॥
ध्वजावपातेन स राक्षसाधिपो भृशं प्रचुक्रोध तदा रघूत्तमे ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे नवोत्तरशततमः सर्गः ॥ १०९ ॥

नैकशस्त्रमयं अनेकशस्त्रप्रचुरं तद्वर्षं क्रोधातिशयेन प्रयुक्तै रामशरैर्निवारणाल्लक्ष्यभूतं राघवरथं विमुच्य वानरबले अभवत् । तत्रापतदित्यर्थः ॥ १९ ॥ सायकैरित्यादि सार्धश्लोक एकान्वयः ॥ ततः दशग्रीवः अश्रान्तहृदयोद्यमः अविच्छिन्नोत्साहः सन् निःसङ्गेन अव्यासक्तेन अन्तरात्मना मनसा उपलक्षितः सहस्रशो बाणान् मुमोच । सायकैरन्तरिक्षं च निरन्तरं चकार ॥ २० ॥ व्यायच्छमानं व्यायच्छन्तं । यत्नं कुर्वन्तं रणे तत्परं सक्तं । प्रहसन्निव संदधे अनायासेन संदधे ॥ २१—२२ ॥ शरवर्षेण भास्वत् अम्बरं शरबद्धं द्वितीयमम्बरमिवाभाति स्म ॥ २३ ॥ नानिमित्त इत्यर्धं ॥ अनिमित्तः लक्ष्यविशेषोद्देशरहितः । अतिभेत्ता अपेक्षितप्रमाणादधिकभेत्ता । निष्फलः लक्ष्ये पतितोपि प्रयोजनाकारी ॥ २४ ॥ तथा विसृजतोः उक्तप्रकारेण विसृजतोः । अत्र बाणा इत्यध्याहार्यं ॥ २५ ॥ अस्यन्तौ शरान् क्षिपन्तौ । इवशब्दो वाक्यालंकारे । निरुच्छ्वासं उच्छ्वासावकाशरहितं ॥ २६—२७ ॥ रावणस्येति । अत्र जघानेति वचनविपरिणामेनानुषज्यते । तौ अन्योन्यं कृतानुकृतकारिणौ कृतप्रतिक्रियाकारिणौ सन्तौ । तथा जघ्नतुः । हय इवान्यत्रापि सारथ्यादौ जघ्नतुरित्यर्थः ॥ २८—२९ ॥ प्रयुध्यमानाविति । यदा बभूवतुरित्युपस्कार्यं ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने नवोत्तरशततमः सर्गः ॥ १०९ ॥

ति० रथशक्तिं दिव्यरथवैभवं रथावयवविशेषवापरामृश्यप्राप्यतन्महिम्ना केवलं धरणीतले पेतुः ॥ ९ ॥ ति० निस्सङ्गेन प्राणाशासङ्गरहितेन ॥ २० ॥ ति० तुमुलंरोमहर्षणं । एतदनन्तरं 'प्रयुध्यमानौसमरेमहाबलौशितैःशरैरावणलक्ष्मणाग्रजौ । ध्वजावपातेनसराक्षसाधिपोभृशंप्रचुक्रोधतदारघूत्तमे ।' इत्येकंश्लोकंप्रक्षिप्यात्रसर्गावच्छेदंकुर्वन्ति । तदयुक्तं पश्चादपितुमुलयुद्धस्यैवसत्त्वादेकप्रकरणत्वाच्च । अनवच्छेदस्यैवबहुषुपुस्तकेषुदर्शनाच्चेतिकतकः ॥ २९ ॥ इतिनवोत्तरशततमःसर्गः ॥ १०९ ॥

[पा०] १ च. छ. ञ. बाणाऽशतशोथसहस्रशः. २ ख. च. ञ. विशिष्टैः. ३ ख. ङ. च. छ. ञ. ट. प्रयुक्तेन. झ. नियुक्तेन. ४ च. छ. ञ. द्वितीयमिवचांबरं. ५ इदमर्धं क. ख. च. पाठेषुदृश्यते. ६ ङ. ज. झ. ट. प्रायुङ्क्षेतां. ७ अयंश्लोकः क. ख. च. छ. पाठेषुदृश्यते. ८ ङ.—ट. युद्धमुत्तमं.

दशोत्तरशततमः सर्गः ॥ ११० ॥

रामेण रावणस्यैकैकशिरश्छेदे पुनः पुनः शिरोन्तरप्ररोहे एकोत्तरशतवारं तावच्छिरसांछेदनम् ॥ १ ॥

तौ तदा युध्यमानौ तु समरे रामरावणौ ॥ ददृशुः सर्वभूतानि विस्मितेनान्तरात्मना ॥ १ ॥
अर्दयन्तौ तु समरे तयोस्तौ स्यन्दनोत्तमौ ॥ परस्परमभिक्रुद्धौ परस्परमभिद्रुतौ ॥
परस्परवधे युक्तौ घोररूपौ बभूवतुः ॥ २ ॥
मण्डलानि च वीथीश्च गतप्रत्यागतानि च ॥ दर्शयन्तौ बहुविधां सूतसारथ्यजां गतिम् ॥ ३ ॥
अर्दयन्रावणं रामो राघवं चापि रावणः ॥ गतिवेगं समापन्नौ प्रवर्तननिवर्तने ॥ ४ ॥
क्षिपतोः शरजालानि तयोस्तौ स्यन्दनोत्तमौ ॥ चेरतुः संयुगमहीं सासारौ जलदौ यथा ॥ ५ ॥
दर्शयित्वा तथा तौ तु गतिं बहुविधां रणे ॥ परस्परस्याभिमुखौ पुनरेवावतस्थतुः ॥ ६ ॥
धुरं धुरेण रथयोर्वक्त्रं वक्त्रेण वाजिनाम् ॥ पताकाश्च पताकाभिः समेयुः स्थितयोस्तदा ॥ ७ ॥
रावणस्य ततो रामो धनुर्मुक्तैः शितैः शरैः ॥ चतुर्भिश्चतुरो दीप्तैर्हयान्प्रत्यपसर्पयत् ॥ ८ ॥
स क्रोधवशमापन्नो हयानामपसर्पणे ॥ मुमोच निशितान्बाणान्राघवाय निशाचरः ॥ ९ ॥
सोतिविद्धो बलवता दशग्रीवेण राघवः ॥ जगाम न विकारं च न चापि व्यथितोऽभवत् ॥ १० ॥
चिक्षेप च पुनर्बाणान्वज्रपातसमस्वनान् ॥ सारथिं वज्रहस्तस्य समुद्दिश्य निशाचरः ॥ ११ ॥
मातलेस्तु महावेगाः शरीरे पतिताः शराः ॥ न सूक्ष्ममपि संमोहं व्यथां वा प्रददुर्युधि ॥ १२ ॥
तया धर्षणया क्रुद्धो मातलेर्न तथाऽऽत्मनः ॥ चकार शरजालेन राघवो विमुखं रिपुम् ॥ १३ ॥
विंशतं त्रिंशतं षष्टिं शतशोथ सहस्रशः ॥ मुमोच राघवो वीरः सायकान्स्यन्दने रिपोः ॥ १४ ॥

अथ रावणशिरश्छेदः—तौ तदेत्यादि ॥ समरे युद्धभूमौ । तदा उत्पातकाले । अन्तरात्मना अन्तःकरणेन उपलक्षितानि ॥ १ ॥ अर्दयन्तावित्यादिसार्धश्लोकद्वयमेकान्वयं ॥ अर्दयन्तौ परस्परं पीडयन्तौ । रथयोः क्रोधादिकं रथिकद्वारा । मण्डलानि मण्डलगतीः । गतप्रत्यागतानि शत्रुरथं प्रति गमनं गतं पुनः स्थानं प्रत्यागमनं प्रत्यागतं तयोरावृत्त्या बहुवचनं । एवंप्रकारेण बहुविधां सूतसारथ्यजां सूतस्य यत् सारथ्यं सारथिकर्म तज्जां । गतिं संचारं दर्शयन्तौ तयोः रथौ घोररूपौ बभूवतुः ॥ २—३ ॥ रावणमर्दयन् रामो राघवमर्दयन् रावणश्चोभौ प्रवर्तननिवर्तने तद्रूपं गतिवेगं समापन्नौ । बभूवतुरिति शेषः ॥ ४ सासारौ सजलधारौ ॥ ५ ॥ तथा गतिं पूर्वोक्तगभेदं ॥ ६ ॥ धुरं युगं । धुरेण । अकारान्तत्वम स्थितयोः युद्धे गतिं विना स्थितयोः । तयोरिति ॥ ७ ॥ प्रत्यपसर्पयत् न्यवर्तयत् ॥ ८ ॥ अपसर्पणे विषये ॥९॥ विकारं वेदनासूचकमुखविकारं ॥१०॥ वज्रपातोशनिपातः ॥ ११ ॥ सूक्ष्मं अल्पं ॥ १२ ॥ यथा मातलेः तया धर्षणया क्रुद्धः तथा आत्मनो धर्षणया न क्रुद्धः । एवं क्रुद्धो रिपुं विमुखं चकार ॥ १३ ॥ विंशतमिति ॥ इकारलोपश्छान्दसः ॥१४॥

स० यौपरस्परमभिक्रुद्धौ परस्परवधेयुक्तौ समरे अर्दयन्तौरामरावणौ । तयोःस्यन्दनोत्तमावित्यन्वयः । मच्चाःक्रोशन्तीतिवद्गौणोवाप्रयोगः । सारथ्यंतत्कर्म । सूतं सम्यक्संबद्धं चिराभ्यस्तमितियावत् ॥ २—३ ॥ ति० प्रत्यपसर्पयत् प्रत्यपसर्प[illegible]त्यक्ताभिमुख्यानामेवपश्चार्धेनापसर्पणं ॥ ८ ॥ स० व्यथांनप्रददुः श्रीरामसांनिध्यात् । यत्तुनागोजिभट्टेन देवलेनदिव मत्त्वात् अपसर्पणकालेरावणेनप्रक्षिप्तानामतिवेधासामर्थ्यांचेतिव्याख्यातं । तत् यदा इन्द्रादीनां दशाननदत्ता वित्ता तदाहि यन्तेति वृत्तेसतिसमग्ररामायणंश्रुत्वापिसीता रामस्यकिंभाविनीत्याभाणकमनुकरोति ॥ १२ ॥

[पा०] १ ग. ङ. च. छ. झ. ट. सूतौसारथ्यजां. २ ख.—छ. ञ. ट. क्षिपन्तौशर. ३ क.—ट. जलदाविव. ख. घ—ट. दीप्तान्हयान्. ५ ङ. च. झ. ञ. ट. दशाननः. ६ ङ. झ. ट. न्वज्रसारसम. ७ ङ. च. झ. ञ. ट. दशा

रावणोपि ततः क्रुद्धो रथस्थो राक्षसेश्वरः ॥ गदामुसलवर्षेण रामं प्रत्यर्दयद्रणे ॥ १५ ॥
तत्प्रवृत्तं महद्युद्धं तुमुलं रोमहर्षणम् ॥ १६ ॥
गदानां मुसलानां च परिघाणां च निस्स्वनैः ॥ शराणां पुङ्खपातैश्च क्षुभिताः सप्त सागराः ॥१७॥
क्षुब्धानां सागराणां च पातालतलवासिनः ॥ व्यथिताः पन्नगाः सर्वे दानवाश्च सहस्रशः ॥ १८ ॥
चकम्पे मेदिनी कृत्स्ना सशैलवनकानना ॥ भास्करो निष्प्रभश्चासीन्न ववौ चापि मारुतः ॥ १९ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ चिन्तामापेदिरे सर्वे सकिन्नरमहोरगाः ॥ २० ॥
स्वस्ति गोब्राह्मणेभ्यस्तु लोकास्तिष्ठन्तु शाश्वताः ॥ जयतां राघवः सङ्ख्ये रावणं राक्षसेश्वरम् ॥२१॥
एवं जपन्तोपश्यंस्ते देवाः सर्षिगणास्तदा ॥ रामरावणयोर्युद्धं सुघोरं रोमहर्षणम् ॥ २२ ॥
गन्धर्वाप्सरसां सङ्घा दृष्ट्वा युद्धमनूपमम् ॥ २३ ॥
गगनं गगनाकारं सागरः सागरोपमः ॥ रामरावणयोर्युद्धं रामरावणयोरिव ॥
एवं ब्रुवन्तो ददृशुस्तद्युद्धं रामरावणम् ॥ २४ ॥
ततः क्रुद्धो महाबाहू रघूणां कीर्तिवर्धनः ॥ संधाय धनुषा रामः क्षुरमाशीविषोपमम् ॥ २५ ॥
रावणस्य शिरोच्छिन्दच्छ्रीमज्ज्वलितकुण्डलम् ॥ तच्छिरः पतितं भूमौ दृष्टं लोकैस्त्रिभिस्तदा ॥ २६ ॥

रथस्थः रथे निश्चलतया स्थित इत्यर्थः ॥ १५ ॥ तत्प्रवृत्तमित्यर्धमेकं वाक्यं ॥ १६ ॥ निस्स्वनैः वेगजैरिति शेषः ॥१७॥ क्षुब्धानामिति ॥ क्षुब्धेषु सागरेष्वित्यर्थः ॥ १८–२२ ॥ गन्धर्वेति ॥ गन्धर्वाप्सरसामित्यर्धानन्तरं गगनं गगनाकारमिति श्लोकः । तदनन्तरं एवं ब्रुवन्त इत्यर्धं । गन्धर्वाप्सरसां संघाः अनूपमं अनुपमं युद्धं दृष्ट्वा गगनं गगनाकारमित्येवं ब्रुवन्तः सन्तः पुनर्ददृशुरित्यन्वयः । अनुपमत्वमेवाह—गगनमिति ॥ यथा गगनसागरयोः सदृशवस्त्वन्तराभावः तथा रामरावणयुद्धस्य सदृशं युद्धं किंचिन्नास्तीत्यर्थः । सदृशान्तरनिवृत्तिफलकोनन्वयालंकारः । रामरावणं रामरावणसंबन्धि ॥२३–२४॥ ततः क्रुद्ध इत्यादिसार्धश्लोकपञ्चकमेकं वाक्यं ॥ क्षुरं क्षुराग्रबाणं । शिरः अच्छिन्दत् अच्छिनत् । एकवचनात्तदानीं रावण एकशिरा एव युद्धमकरोदिति गम्यते । अतएव वक्ष्यति—विक्षिप्य दीर्घौ निश्चेष्टौ भुजावङ्गदभूषितावित्यादिना । छिन्नमात्रं तु तच्छीर्षमिति । तच्छीर्षे छिन्ने तदानीमेवेत्यर्थः । एकशतं छिन्नं एकोत्तरशतवारं छिन्नमित्यर्थः । पुनः पुनः शिरश्छेदनं चिरतृषितशरतृष्णानिवृत्त्यर्थं । जीवितक्षये विषये, अन्तः अवधिः निश्चयो वा, न दृश्यते

ती० श्लोकद्वयमेकंवाक्यं । यथागगनसागरयोःसदृशवस्त्वन्तराभावाद्गगनंगगनेनैवोपमीयते सागरःसागरेणैवोपमीयते तथैवरामरावणयुद्धं रामरावणयोर्युद्धमिवाभवदित्येवंब्रुवन्तोगन्धर्वादयः रामरावणंरामरावणयोस्संबन्धितयुद्धंददृशुरित्यन्वयार्थौ । सागरंसागरोपममितिपाठे आर्षोलिङ्गव्यत्ययः । अनन्वयश्चात्रालङ्कारः । तदुक्तंकाव्यप्रकाशिकायां 'एकस्यैवोपमानोपमेयत्वेऽनन्वयोमतः' इति । राहोःशिरइतिवदभेदेपिभेदव्यवहारः । ति० वचनप्रकारमाह—गन्धर्वाप्सरसामिति । अनूपममितिदीर्घआर्षः । दृष्ट्वायुद्धमनूपममित्युत्तरंसागरंचांबरप्रख्यमंबरंसागरोपमम्' इतिपाठे सागरंनैल्यवैपुल्यादिना । अंबरप्रख्यं आकाशतुल्यं इतिवक्तुं शक्यं । एवमंबरमपिसागरोपममितिशक्यं । रामरावणयोर्युद्धंतु तदतिरिक्ताद्दशयुद्धासंभवात्स्वतुल्यमित्येववक्तुंशक्यं । तेनानुपमत्वं फलतीत्यनन्वयोत्रालङ्कारः । पूर्वार्धेतूपमेयोपमेतिकृतकः । सागरशब्देलिङ्गव्यत्ययआर्षः । अर्धचादिर्वासः । गगनंगगनाकारंसागरः सागरोपमः ।' इतिपाठेऽर्धद्वयेप्यनन्वयएवेतिबोध्यं । एवंब्रुवन्तोगन्धर्वादिसंघास्तद्युद्धंददृशुः । रामरावणं तत्कर्तृकमित्यर्थः । स० अनूपमं दीर्घआर्षः । उ उत्कृष्टा उपमा सर्वसाम्यं । नविद्यतेउपमायस्येतिवा । सागरं तत्समूहः ॥ २३—२४ ॥ ति० शिरोच्छिन्दत् एकैकशइतिशेषः । सकृद्दशशिरसांछेदेतुनपुनःप्ररोहइतिकृतकः । तस्यैवसदृशं यद्भूमौपतितं तस्यैवसदृशमित्यर्थः । स० शिरः एकवचनंजातावेकवचनमत्रोत्तरत्रच 'दशास्योविंशतिभुजःप्रगृहीतशरासनः । अदृश्यतदशग्रीवोमैनाकइवपर्वतः ।' इतीव 'तस्योत्तमाङ्गदशकंयुगपन्यकृन्तत् । कृत्तानितानिपुनरेवसमुत्थितानि' इत्याचार्यैरप्युक्तेः । पद्मपुराणेच 'दशग्रीवस्यच्छिन्नेदशिरांसि

[पा०] १ क. ख. ज. झ. प्रत्यर्पयत्. २ ङ. झ. ञ. ट. तत्प्रयुक्तंपुनर्युद्धं. ३ ङ. झ. ट. सागरंचांबरप्रख्यमंबरंसागरोपमम्. ४ क. ख. ज. रोमहर्षणं. ५ ङ. च. छ. झ. ञ. ट. क्रोधान्महाबाहुः. ६ च. छ. झ. ञ. ट. शरं.

तस्यैव सदृशं चान्यद्रावणस्योत्थितं शिरः ॥ तत्क्षिप्रं क्षिप्रहस्तेन रामेण क्षिप्रकारिणा ॥ २७ ॥
द्वितीयं रावणशिरश्छिन्नं संयति सायकैः ॥ छिन्नमात्रं तु तच्छीर्षं पुनरन्यत्स दृश्यते ॥ २८ ॥
तदप्यशनिसंकाशैश्छिन्नं रामेण सायकैः ॥ एवमेकशतं छिन्नं शिरसां तुल्यवर्चसाम् ॥ २९ ॥
न चैव रावणस्यान्तो दृश्यते जीवितक्षये ॥ ३० ॥
ततः सर्वास्त्रविद्वीरः कौसल्यानन्दवर्धनः ॥ मार्गणैर्बहुभिर्युक्तश्चिन्तयामास राघवः ॥ ३१ ॥
मारीचो निहतो यैस्तु खरो यैस्तु सदूषणः ॥ क्रौञ्चावने विराधस्तु कबन्धो दण्डकावने ॥ ३२ ॥
[यैः साला गिरयो भग्ना वाली च क्षुधितोऽम्बुधिः ॥] त इमे सायकाः सर्वे युद्धे प्रात्ययिका मम ॥
किंनु तत्कारणं येन रावणे मन्दतेजसः ॥ ३३ ॥
इति चिन्तापरश्चासीदप्रमत्तश्च संयुगे ॥ ववर्ष शरवर्षाणि राघवो रावणोरसि ॥ ३४ ॥
रावणोपि ततः क्रुद्धो रथस्थो राक्षसेश्वरः ॥ गदामुसलवर्षेण रामं प्रत्यर्दयद्रणे ॥ ३५ ॥
तत्प्रवृत्तं महद्युद्धं तुमुलं रोमहर्षणम् ॥ अन्तरिक्षे च भूमौ च पुनश्च गिरिमूर्धनि ॥ ३६ ॥
देवदानवयक्षाणां पिशाचोरगरक्षसाम् ॥ पश्यतां तन्महद्युद्धं सर्वरात्रमवर्तत ॥ ३७ ॥
नैव रात्रं न दिवसं न मुहूर्तं न च क्षणम् ॥ रामरावणयोर्युद्धं विराममुपगच्छति ॥ ३८ ॥

नादृश्यत ॥ २५—३१ ॥ मारीच इत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ क्रौञ्चावने कबन्धः । दण्डकावने विराध इत्यन्वयः । प्रात्ययिकाः विश्वस्ताः । त इमे रावणे विषये मन्दतेजसः अल्पशक्तिकाः । अभवन् । तत्कारणं किं नु न जानामीति शेषः ॥ ३२—३५ ॥ त्रिकूटशिखरे युध्यतोस्तयोराग्रहकृतगतिवशेन अन्तरिक्षे भूमौ च पुनश्च गिरिमूर्धनि त्रिकूटशिखरे च तन्महद्युद्धं प्रवृत्तमित्यर्थः ॥ ३६ ॥ देवदानवेति ॥ " यस्य च भावेन " इति भावलक्षणे षष्ठी । सर्वरात्रं अहोरात्रमित्यर्थः । सप्तरात्रमित्यपपाठः । वक्ष्यमाणदिनसंख्याविरोधात् । यद्वा सर्वरात्रमित्यपपाठः । सप्तरात्रमित्येव सम्यक्पाठः । फाल्गुनचतुर्दश्यां हनुमता लङ्कादाहः । पौर्णमास्यां रामस्य समुद्रतीरप्राप्तिः । प्रथमाद्वितीयातृतीयासु दर्भशयनं । अष्टम्यां सुवेलारोहणं । नवम्यां युद्धारम्भ इति सप्तरात्रं रामरावणयुद्धमिति । इदं च इतस्तु नवमेहनीत्यत्र विस्तृतं ॥ ३७ ॥ नैवरात्रमिति ॥ "कालाध्वनोरत्यन्तसंयोगे"

रघुनन्दनः । समुत्थितानिबहुशोवरदानान्ममांबिके' इति ॥ २६ ॥ ति० एवमेवशतंछिन्नमितिपाठः । तुल्यवर्चसां तुल्याकारणां । शिरसांशतं रामेणच्छिन्नं । एवंचभगवतःसर्वतोभद्रचक्रपदशतंरामेणरावणीयशिरश्शतकमलैः पूजितमितिकतकः ॥ २९ ॥ ति० क्रोञ्चावटे क्रौञ्चवनसंबन्धिनिअवटे श्वभ्रे । स० यैरितिजातौबहुवचनं । येन । एकेषुणेतिप्रतिज्ञाकालउक्तेः । वालीचभग्नइत्यन्वयः ॥ ३२ ॥ ति० प्रात्ययिकाः अमोघत्वेननिश्चिताः ॥ ३३ ॥ ति० अन्तरिक्षेचेत्यादि । रथयोःकामगत्वात्तत्रतत्रकियत्कालंस्थितेरितिभावः ॥ ३६ ॥ ती० देवादीनांपश्यतांसतांसप्तरात्रंमहद्युद्धमवर्ततेतिसंबन्धः । अगस्त्यागमनात्प्रागेवसिद्धस्ययुद्धस्यायमनुवादः । अस्मिन्पाठेसप्तरात्रकृतरामरावणयुद्धस्यास्मिन्नामायणे अश्रूयमाणत्वेनानुपपन्नत्वाच्च । सर्वरात्रमवर्ततेतिपाठःसम्यक् सर्वरात्रं अहोरात्रमित्यर्थः ॥ ति० सर्वरात्रं जातावेकवचनं । तेनानेकाहोरात्रानित्यर्थः । वस्तुतःशर्वर्गेसकारस्तृतीयः । तेनत्रयउच्यन्ते । यवर्गेचवकारश्चतुर्थः । तेनचत्वारउच्यते । मिलितासप्तरात्रमित्यर्थः । सप्तरात्रमेवचतयोर्द्वैरथंयुद्धमितिवक्ष्यमाणपाद्मकालिकापुराणयोःस्पष्टमितिदिक् ॥ ३७ ॥

[पा०] १ ज. छिन्नमात्रेतुतच्छीर्षं. २ ङ. च. छ. झ. ञ. ट. पुनरेवप्रदृश्यते. ३ ङ.—ट. रामस्य. ४ ङ. झ. क्रौञ्चावटे. घ. च. छ. ज. ट. क्रौञ्चारण्ये. ५ क. ङ. च. छ. झ. ञ. ट. पाठेष्विदमर्धंदृश्यते. ६ घ. ञ. ट. सप्तरात्रमवर्तत. ७ ज. मधिगच्छति.

दशरथसुतराक्षसेन्द्रयोर्जयमनवेक्ष्य रणे स राघवस्य ॥
सुरवररथसारथिर्महात्रणगतमेनमुवाच वाक्यमाशु ॥ ३९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे दशोत्तरशततमः सर्गः ॥ ११० ॥

एकादशोत्तरशततमः सर्गः ॥ १११ ॥

रावणस्य पूर्वपूर्वस्मिञ्छिरसिछिन्नेछिन्नेपि पुनः पुनः शिरोन्तरप्ररोहेसति मातलिसमुद्बोधितेन रामेण ब्रह्मास्त्रेण रावणहृदयविभेदनम् ॥ १ ॥ रावणेहते हर्षादिन्द्रादिभी रामस्योपरिपुष्पवर्षणम् ॥ २ ॥ सुग्रीवविभीषणादिभिर्हर्षाच्छ्रीरामाभिपूजनम् ॥ ३ ॥

अथ संस्मारयामास राघवं मातलिस्तदा ॥ अजानन्निव किं वीर त्वमेनमनुवर्तसे ॥ १ ॥
विसृजास्मै वधाय त्वमस्त्रं पैतामहं प्रभो ॥ विनाशकालः कथितो यः सुरैः सोद्य वर्तते ॥ २ ॥
ततः संस्मारितो रामस्तेन वाक्येन मातलेः ॥ जग्राह सशरं दीप्तं निश्वसन्तमिवोरगम् ॥ ३ ॥
यमस्त्रं प्रथमं प्रादादगस्त्यो भगवानृषिः ॥ ब्रह्मदत्तं महाबाणममोघं युधि वीर्यवान् ॥ ४ ॥
ब्रह्मणा निर्मितं पूर्वमिन्द्रार्थममितौजसा ॥ दत्तं सुरपतेः पूर्वं त्रिलोकजयकाङ्क्षिणः ॥ ५ ॥
यस्य वाजेषु पवनः फले पावकभास्करौ ॥ शरीरमाकाशमयं गौरवे मेरुमन्दरौ ॥ ६ ॥
जाज्वल्यमानं वपुषा सुपुङ्खं हेमभूषितम् ॥ तेजसा सर्वभूतानां कृतं भास्करवर्चसम् ॥ ७ ॥
सधूममिव कालाग्निं दीप्तमाशीविषं यथा ॥ परनागाश्ववृन्दानां भेदनं क्षिप्रकारिणम् ॥ ८ ॥
द्वाराणां परिघाणां च गिरीणामपि भेदनम् ॥ नानारुधिरसिक्ताङ्गं मेदोदिग्धं सुदारुणम् ॥ ९ ॥

इति द्वितीया ॥ ३८ ॥ दशरथेति । निर्धारणे षष्ठी । दशरथसुतराक्षसेन्द्रयोः रामरावणयोर्मध्ये । राघवस्य जयमनवेक्ष्य महान् महाबुद्धिरित्यर्थः । सुरवररथसारथिः एनं रामं उवाच ॥३९॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने दशोत्तरशततमःसर्गः ॥११०॥

अथ रावणवधः—अथ संस्मारयामासेत्यादिश्लोकद्वयमेकान्वयं ॥ अजानन्निव ब्रह्मास्त्रमजानन्निव एनं रावणं अनुवर्तसे अस्त्रस्य प्रत्यस्त्रप्रयोगमात्रं करोषि । विनाशकालः मानुषेण वध इत्युक्तः कालः ॥ १—२ ॥ ततः संस्मारित इत्याद्येकादश श्लोका एकान्वयाः ॥ ३—४ ॥ प्रथमं पूर्वं दण्डकारण्ये । ब्रह्मदत्तमित्येतद्विवृणोति—ब्रह्मणेत्यादिना ॥ ५ ॥ यस्य वाजेष्विति । पवनादीनामधिदेवतात्वेनावस्थानं । फले शल्ये । तेजसा सारांशेन कृतं ॥ ६—८ ॥ द्वाराणां रिपुगोपुराणां । नानारुधिरेति वध्यासुरभेदात् ।

ति० तयोर्मध्येराघवस्यजयमनवेक्ष्याऽदृष्ट्वाससुरवरस्यसारथिरिति । रणेरतोरणरतः । रणरतश्चासौरामश्च ॥ ३९ ॥ इतिदशोत्तरशततमःसर्गः ॥ ११० ॥

स० संस्मारयामास रावणस्यब्रह्मास्त्रवध्यतामितिशेषः । अजानन्निवेत्यनेन रामस्यसार्वज्ञंसूचयति ॥ १ ॥ ति० अस्यबाणस्य ब्रह्मानुग्रहवैशिष्ट्यमाह—यस्येति । वाजेषु वेगसाधनपक्षेषु । तत्रतत्रपवनादीनामधिदेवतात्वेनावस्थानंबोध्यं । शरीरं मध्यभागः । आकाशमयं आसमन्तात्काशतेप्रकाशतेइत्याकाशोब्रह्मभगवान् भूताकाशोवा । तेनव्याप्तिसामर्थ्यं । पवनवत्त्वेनगतिसामर्थ्यं । पावकादिमत्त्वेनदुस्सहत्वं । तर्हिलघुःस्यात्तत्राह—गौरवे इति ॥ ६ ॥ रामानु० द्वाराणां पुरद्वाराणां गोपुराणामितियावत् ॥

[पा०] १ क. ख. च.—ञ. राक्षसेन्द्रयोस्तयोर्जयं. २ ज. रणेपराजयंच. ३ क.—ट. महात्मारणरतरामसुवाच. ४ ख. च. छ. ञ. विनाशःकथितोरामसुरैःसोद्यप्रवर्तते. ५ ङ. झ. ट. यंतस्मै. ६ ज. मादाय. ७ क. ख. ङ. च, झ, ञ. ट. माशीविषोपमं. ८ झ. नरनागाश्व, ख, ङ, छ, ञ. ट. रथनागाश्व. ९ ग. ङ. च, छ. झ. ञ. ट. दिग्धाङ्गं.

वज्रसारं महानादं नानासमितिदारणम् ॥ सर्वत्रासनं भीमं श्वसन्तमिव पन्नगम् ॥ १० ॥
कङ्कगृध्रबलानां च गोमायुगणरक्षसाम् ॥ नित्यं भक्ष्यप्रदं युद्धे यमरूपं भयावहम् ॥ ११ ॥
नन्दनं वानरेन्द्राणां रक्षसामवसादनम् ॥ वाजितं विविधैर्वाजैश्चारुचित्रैर्गरुत्मतः ॥ १२ ॥
तमुत्तमेषुं लोकानामिक्ष्वाकुभयनाशनम् ॥ द्विषतां कीर्तिहरणं प्रहर्षकरमात्मनः ॥ १३ ॥
अभिमन्त्र्य ततो रामस्तं महेषुं महाबलः ॥ वेदप्रोक्तेन विधिना संदधे कार्मुके बली ॥ १४ ॥
तस्मिन्संधीयमाने तु राघवेण शरोत्तमे ॥ सर्वभूतानि वित्रेसुश्चचाल च वसुंधरा ॥ १५ ॥
स रावणाय संक्रुद्धो भृशमायम्य कार्मुकम् ॥ चिक्षेप परमायत्तस्तं शरं मर्मघातिनम् ॥ १६ ॥
स वज्र इव दुर्धर्षो वज्रिबाहुविसर्जितः ॥ कृतान्त इव चात्रार्यो न्यपतद्रावणोरसि ॥ १७ ॥
स विसृष्टो महावेगः शरीरान्तकरः शरः ॥ बिभेद हृदयं तस्य रावणस्य दुरात्मनः ॥ १८ ॥
रुधिराक्तः स वेगेन जीवितान्तकरः शरः ॥ रावणस्य हरन्प्राणान्विवेश धरणीतलम् ॥ १९ ॥
स शरो रावणं हत्वा रुधिरार्द्रीकृतच्छविः ॥ कृतकर्मा निभृतवत्स्वतूणीं पुनरागमत् ॥ २० ॥
तस्य हस्ताद्धृतस्याशु कार्मुकं तत्ससायकम् ॥ निपपात सह प्राणैर्भ्रश्यमानस्य जीवितात् ॥ २१ ॥
गतासुर्भीमवेगस्तु नैर्ऋतेन्द्रो महाद्युतिः ॥ पपात स्यन्दनाद्भूमौ वृत्रो वज्रहतो यथा ॥ २२ ॥
तं दृष्ट्वा पतितं भूमौ हतशेषा निशाचराः ॥ हतनाथा भयत्रस्ताः सर्वतः संप्रदुद्रुवुः ॥ २३ ॥
नर्दन्तश्चाभिपेतुस्तान्वानरा द्रुमयोधिनः ॥ [दशग्रीववधं दृष्ट्वा सर्वलोकप्रियं प्रियम् ॥ २४ ॥]
दशग्रीववधं दृष्ट्वा विजयं राघवस्य च ॥ अर्दिता वानरैर्हृष्टैर्लङ्कामभ्यपतन्भयात् ॥
गताश्रयत्वात्करुणैर्बाष्पप्रस्रवणैर्मुखैः ॥ २५ ॥
ततो विनेदुः संहृष्टा वानरा जितकाशिनः ॥ वदन्तो राघवजयं रावणस्य च तद्वधम् ॥ २६ ॥
अथान्तरिक्षे व्यनदत्सौम्यस्त्रिदशदुन्दुभिः ॥ दिव्यगन्धवहस्तत्र मारुतः ससुखो ववौ ॥ २७ ॥
निपपातान्तरिक्षाच्च पुष्पवृष्टिस्तदा भुवि ॥ किरन्ती राघवरथं दुरवापा मनोरमा ॥ २८ ॥
राघवस्तवसंयुक्ता गगनेऽपि च शुश्रुवे ॥ साधुसाध्विति वाग्म्या दैवतानां महात्मनाम् ॥ २९ ॥

मेदः मांसविशेषः ॥ ९ ॥ वज्रसारं वज्रतुल्यदार्ढ्यं । नानासमितिदारणं कपटयुद्धस्यापि निवर्तकं । सर्वत्रासनत्वे हेतुः—भीममिति । दीप्तं श्वसन्तमिति भेदादुपमानभेदः ॥१०—११॥ बलाः गृध्रविशेषाः । रक्षसां पिशाचसहचारिणां । यमरूपं यमतुल्यं यथा भवति तथा भयावहमिति वित्रासनाद्भेदः । गरुत्मतः वाजैः पत्रैः । वाजितं संजातपत्रं । गरुडपत्रकृतपत्रमित्यर्थः ॥ १२ ॥ लोकानां मध्ये उत्तमेषुं प्रहर्षकरमात्मन इत्यन्तस्य जग्राहेत्यनेन संबन्धः ॥ १३ ॥ ततः ग्रहणानन्तरं तं इषुं संदधे ॥ १४—१५ ॥ रावणाय चिक्षेपेत्यन्वयः ॥ १६ ॥ वज्रिबाहुविसर्जितो वज्र इवेत्यन्वयः ॥ १७—१९ ॥ निभृतवत् विनीतवत् ॥ २० ॥ प्राणैः सह जीवितात् प्राणधारणयत्नात् भ्रश्यमानस्य तस्य हस्तात् ससायकं कार्मुकं पपात ॥ २१—२३ ॥ नर्दन्तश्चेत्यर्धमेकं वाक्यं ॥२४॥ दशग्रीवेत्यादिसार्धश्लोक एकान्वयः ॥ मुखैः उपलक्षिताः । राक्षसा इति शेषः ॥ २५ ॥ तद्वधं तं वधं ॥ २६—२८ ॥ राघवस्तवसंयुक्ता वा-

---

परिघाणामित्येतत्सर्वायुधानामप्युपलक्षणं ॥ ९ ॥ ति० नानासमितिदारणमित्यन्वर्थनाम भगवत्कृतंरामबाणस्य ॥ १० ॥ ति० इक्ष्वाकूरामः । तत्पक्षाणांभयनाशनं । तमुत्तमेषुमभिमन्त्र्येत्यनेनान्वयः ॥ १३ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. गृध्रबकानांच. २ घ. यस्यरूपं. ३ ङ. झ. ट. संत्रेसुश्चचाल. ४ ज. महाघोरः. ५ क. ङ. च. छ. झ. ञ. ट. पुनराविशत्. ६ ङ. झ. चापिसायकं. ट. तस्यसायकं. ७ इदमर्धं घ. पाठेदृश्यते. ८ क. ङ. च. छ. झ. ञ. ट. हताश्रयत्वात्. ख. गताश्रयारात्रिचराबाष्प. ९ ख. च. छ. ञ. व्यनदद्घोषवान्देवदुन्दुभिः. १० ख. घ. ङ. झ. ञ. ट. सुसुखोववौ. ज. सुसुखंववौ. ११ ग. ङ. च. छ. झ. ञ. ट. मनोहरा.

आविवेश महाहर्षो देवानां चारणैः सह ॥ रावणे निहते रौद्रे सर्वलोकभयंकरे ॥ ३० ॥
ततः सकामं सुग्रीवमङ्गदं च महाबलम् ॥ चकार राघवः प्रीतो हत्वा राक्षसपुङ्गवम् ॥ ३१ ॥
ततः प्रजग्मुः प्रशमं मरुद्गणा दिशः प्रसेदुर्विमलं नभोऽभवत् ॥
मही चकम्पे न हि मारुतो ववौ स्थिरप्रभश्चाप्यभवद्दिवाकरः ॥ ३२ ॥
ततस्तु सुग्रीवविभीषणादयः सुहृद्विशेषाः सहलक्ष्मणास्तदा ॥
समेत्य हृष्टा विजयेन राघवं रणेऽभिरामं विधिना ह्यपूजयन् ॥ ३३ ॥
स तु निहतरिपुः स्थिरप्रतिज्ञः स्वजनबलाभिवृतो रणे रराज ॥
रघुकुलनृपनन्दनो महौजास्त्रिदशगणैरभिसंवृतो यथेन्द्रः ॥ ३४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकादशोत्तरशततमः सर्गः ॥ १११ ॥

गित्यन्वयः ॥ २९ ॥ चारणैःसह चारणैः सहितान् देवानित्यर्थः ॥ ३० ॥ तत इति । सुग्रीववयुवराजत्वेन प्रत्युपकारायाङ्गदेनापि रावणवधस्य काङ्क्षितत्वात्सकामत्वं ॥ ३१ ॥ प्रशमं प्रसादं । मरुद्गणाः देवगणाः । मही न चकम्पे महीकम्पाभावस्य शुभसूचकत्वादित्याहुः । रावणवधपर्यन्तं सकम्पा स्थिता मही तद्वधानन्तरं निष्कम्पाऽभवदिति चाहुः । ववौ सुखमिति शेषः ॥ ३२ ॥ सुहृद्विशेषाः जाम्बवदादयः । हिशब्दः पादपूरणे । विजयेन हृष्टा इत्यन्वयः । विधिना क्रमेण ॥ ३३—३४ ॥ फाल्गुनामावास्यायां रावणवधः । यद्वा चैत्रशुद्धप्रतिपदि शिष्टामावास्यायां प्रातःकाले रावणवधः । पूर्वं सर्वरात्रमवर्ततेत्युक्तेः ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकादशोत्तरशततमः सर्गः ॥ १११ ॥

ति० महीनचकंपे मारुतोनववौ क्रूरइतिशेषः । 'महीचकंपेनहि' इतिपाठे मारुतोववौ सुखइतिशेषः । स्थिरप्रभश्चेति । अनेनाश्विनशुक्लनवम्यांयामावशेषदिनइतिबोधितं ॥ ३२ ॥ ति० अत्रयुद्धदिवसगणनायांकतकतीर्थौ । पूर्वंसुवेलारोहणदिने 'ततोस्तमगमत्सूर्यःसन्ध्ययाप्रतिरञ्जितः । पूर्णचन्द्रप्रदीप्ताचक्षमासमतिवर्तते' इत्युक्तेस्तद्दिनंचतुर्दशीपूर्णिमान्यतरदितिस्पष्टं । ततःकृष्णप्रतिपदियुद्धारंभः । तस्यामेवरात्रौनागपाशबन्धतद्विमोक्षौ । द्वितीयायांधूम्राक्षवधः । तृतीयायांवज्रदंष्ट्रस्य । चतुर्थ्यामकंपनस्य । पञ्चम्यांप्रहस्तस्य । षष्ठ्यांरावणभङ्गः । सप्तम्यांकुंभकर्णवधः । अष्टम्यामतिकायादेः । नवम्यामिन्द्रजितोब्रह्मास्त्रप्रयोगः । दशम्यां दिवानिकुंभवधः । तद्रात्रौमकराक्षवधः । एकादश्यादित्रयोदश्यन्तदिनत्रयेणेन्द्रजिद्वधः । चतुर्दश्यांमूलबलवधः । अमायांरावणयुद्धारंभतद्वधावितिपञ्चदशदिनानिसर्वंयुद्धमिति । अत्रेदंवक्तव्यं—केयंकृष्णप्रतिपन्माघकृष्णस्यवाचैत्रकृष्णस्यवा । नाद्यः । चैत्रेपुष्यनक्षत्रेऽयोध्यातोवनंप्रतिरामस्यप्रस्थानमितिस्पष्टमयोध्याकाण्डे । चैत्रेपुष्यश्चशुक्लपक्षएव । तत्रापिनवम्यादिदिनत्रयएवेति स्पष्टमेवज्योतिषादौ । तत्रनवमी रिक्तात्वादभिषेकायोग्या । दशम्येवतुपूर्णात्वायोग्या । एवंच चैत्रशुक्लदशम्यांप्रस्थानं । तत्रमाघकृष्णामायांयुद्धसमाप्तौतदुत्तरपञ्चम्यांभरद्वाजाश्रमागमनं । 'पूर्णेचतुर्दशेवर्षेपञ्चम्यांलक्ष्मणाग्रजः । भरद्वाजाश्रमंप्राप्यववन्देनियतोमुनिम्' इतिवक्ष्यमाणत्वात् । तत्रचनचतुर्दशवर्षसमाप्तिरितिभगवतःप्रतिज्ञाहानिः । 'पूर्णेचतुर्दशेवर्षे' इत्युक्तेरसंगतिश्च । युद्धोत्तरंतावत्कालंलङ्कायामवस्थानस्यालाभाच्च । चैत्रशुक्लपञ्चम्यांतत्रागमनेपिपञ्चदिनन्यूनतैवेतितद्धानिस्तदवस्थैव । तदुत्तरद्वितीयदिन एवायोध्याप्रवेशस्यलाभात् अमान्तमानेन चैत्रकृष्णोत्तरपञ्चम्यांतदाश्रमगतावपि चतुर्दशवर्षतोबहुदिनाधिक्येन चतुर्दशवर्षसमाप्तिदिनेअयोध्यानागमेमयाप्राणादेयाइतिभरतप्रतिज्ञाहानिः । साचप्रतिज्ञाचित्रकूटेरामसंनिधावित्ययोध्याकाण्डान्तेस्पष्टम् । एतेन चैत्रकृष्णप्रतिपदियुद्धारंभः । तच्छुक्लप्रतिपदिरावणसंस्कारइतितीर्थोक्तश्चैत्रकृष्णस्येत्यन्योपिपरास्तः । पूर्णिमान्तमानेनतिथिबद्धद्वादशमासैर्वर्षगणनेपञ्चदिनानान्यूनत्वात् । अमान्तमानेनचैत्रकृष्णप्रहणेबहुदिनाधिक्यं । सावनमानेनषष्ट्युत्तरत्रिशतदिनैर्वर्षगणनेतुतिथिबद्धवर्षात्तत्रषड्दिनाधिक्येनचतुर्दशवर्षाणां चतुरशीत्यहोरात्रवृद्ध्याबहुदिनन्यूनतैव । किंचमहाभारतेयुधिष्ठिरवनवासेत्रयोदशवर्षमितेकिञ्चित्कालादर्वागेवतेषांप्राकट्येदुर्योधनेनतदसमाप्तावेषांप्राकट्येनपुनस्तावत्पर्यन्तमेतैर्वनवासःकर्तव्योभविष्य-

[पा०] १ क.—ट. महान्हर्षो. २ ख. ङ. च. छ. झ. ञ. ट. भयावहे. ३ क. ख. ङ. झ. ट. मङ्गदंचविभीषणं. ४ ग. श्रीमान्हत्वा. ५ झ. नच. ६ ङ. च. छ. झ. ञ. ट. सुग्रीवविभीषणाङ्गदाः. ७ ख.—ट. विधिनाभ्यपूजयन्. ८ ख. च. छ. ञ. कृतप्रतिज्ञः. ९ ङ. झ. ट. रणेबभूव. १० झ. महेन्द्रः.



तीतिभीष्मंप्रत्युक्तेभीष्मवाक्यंविराटपर्वणि—'पञ्चमेपञ्चमेवर्षेद्वौमासावुपजायतः । एषामप्यधिकामासाः'पञ्चचद्वादशक्षपाः । त्रयोदशानांवर्षाणामितिमेधीयतेमतिः । सर्वंयथावच्चरितंयद्यदेभिःप्रतिश्रुतम् । एवमेतद्ध्रुवंज्ञात्वाततोबीभत्सुरागतः । सर्वेचैवमहात्मानः सर्वेधर्मार्थकोविदाः । येषांयुधिष्ठिरोराजाकस्माद्धर्मेऽपराभ्युयुः ।' इति । एवंचेदशन्यवहारेतिथिबद्धद्वादशमासैरेववर्षगणनाधिकमासगणनाचोचितैव । एवंचाधिकमासगणनायांधर्महानौन्याय्यत्वेचस्थितेकस्माद्रामस्तानुपेक्षेत भरतोवातान्नगणयेत् । एवंचामान्तमानेन चतुर्दशी । याऽऽश्विनकृष्णेपूर्णिमान्तमानेनकार्तिककृष्णेषष्ठ्यांतत्समाप्तिरित्यायाति । अन्यथाचैत्रशुक्लदशम्यारब्धस्यवनवासस्यषष्ठ्यांचतुर्दशवर्षसमाप्तिर्नकथमप्युपपद्यते । तद्गणनेत्वेकादशदिनन्यूनषण्मासानांचतुर्दशवर्षेषुवृद्धावुपपद्यत एवसा । तस्माद्वाशदसमाप्त्युत्तरंत्रयोदशेकिञ्चिद्व्यतीतेअरण्यकाण्डोक्तास्रद्दीत्याफाल्गुनाष्टम्यांरावणकृतसीतापहारः । ततश्चतुर्दशेकिञ्चिद्व्यतीतेरामस्यलङ्कासमीपगनम् । 'वर्ततेदशमोमासोद्वौतुशेषौऽवङ्गम' इतिसीतोक्तिःसावनमानेनस्वहरणदिनतःकालगणनया । तत्र 'पूर्णचन्द्रप्रदीप्ताचे'तिरामोक्त्यापौषशुक्लचतुर्दश्यांपूर्णिमायांवात्रिकूटशिखरप्राप्तीरामस्य । किंचहनूमतोलङ्काप्रवेशोत्तरंसीतादर्शनकाले 'हिमव्यपायेनचशीतरश्मिरभ्युत्थितोनैकसहस्ररश्मिः'इतिवाक्येन 'द्वौमासौरक्षितव्यौमेयोऽवधिस्तेमयाकृतः' इतिरावणवाक्येन मार्गशुक्लदशम्युत्तरंहनुमतोलङ्काप्रवेशोदिनद्वयान्तरेलभ्यतइतिनिरूपितंसुन्दरकाण्डे । ततोमार्गकृष्णेऽष्टम्यांराघवप्रस्थानस्यान्यत्रोक्तत्वेनपौषपूर्णिमात्वमेवोचितंतत्प्राप्तिदिनस्य । ततोदशपञ्चदिनानिसेनानिवेशदूतप्रेषणादिनागतानि । ततोयुद्धारंभः तत्रतदारभ्य भाद्रश्रावणोभयामान्तंलङ्कापुराद्बहिःसेनयोःसंकुलंयुद्धं । ततोबहुराक्षसक्षयेणभीताराक्षसालङ्कांप्रविष्टाइतितद्दिनेऽवहारः । तदुत्तरप्रतिपदिरात्राविन्द्रजित्कृतशरबन्धइत्यादि । अतएवशरबद्धराघवदर्शनकालेसीतावाक्यं—'तीर्त्वासागरमक्षोभ्यंभ्रातरौगोष्पदेहतौ'इति । अनेनबहुदिनयुद्धेनबहुषुराक्षसेषुक्षयितेषुकतिपययूथपरूपेऽल्पावशिष्टेसैन्येतयोःशरबन्धइतिलभ्यते । तथा 'अयंतेसुमहान्कालः शयानस्यमहाबल'इतिकुंभकर्णप्रतिरावणोक्त्यासांप्रतंतन्निद्रायाःषण्मासाधिकत्वप्रतीतेरप्येवमेवोचितम् । निरूपितंचैतत्प्राक्सेतुबन्धादिवृत्तान्तंलंनजानीषइतिकुंभकर्णप्रतिरावणोक्त्यापूर्वमन्त्रकरणोत्तरंमध्येजागरणाभावस्यप्रतीतेः । किंचशरबन्धदिनंनकृष्णप्रतिपत् । तस्याःपूर्णिमोत्तरत्वेनसंपूर्णरात्रौचन्द्रसत्तया 'तस्मिंस्तमसिदारुणे'इत्याद्युक्तेरसंगत्यापत्तेः । अतःसाशुक्लप्रतिपद्वाच्या । एवंचामान्तपक्षमात्रंयुद्धमित्यस्यात्यन्तमसङ्गत्यापत्तिः । यत्तु—अमायामेवरावणवधइति तत्तुनयुक्तं । इन्द्रजिद्वधोत्तरं 'अभ्युत्थानंत्वमद्यैवकृष्णपक्षचतुर्दशीम् । कृत्वानिर्याह्यमावास्यांविजयायबलैर्वृतः' इतिरावणंप्रतिसुपार्श्वस्योक्त्याचतुर्दश्यांरावणप्रेषितबलवधोत्तरममायांनिर्गतरावणेनरामलक्ष्मणयोर्युद्धेरात्रौलक्ष्मणस्यशक्तिघातोत्तरंरावणलङ्काप्रवेशस्योक्ततयातत्तोलक्ष्मणचिकित्सोत्तरंपुनारामरावणयुद्धस्यवाल्मीकिनैवस्पष्टमुक्ततयातदसंभवात् । किंचादित्यहृदयस्य 'आदित्यंप्रेक्ष्यजप्त्वेदंपरंहर्षमवाप्तवान्'इत्यनेनसूर्यदर्शनोत्तरंजपस्योक्ततयारावणमरणोत्तरं 'स्थिरप्रभश्चाप्यभवद्दिवाकरः'इत्युक्त्यादिवातद्वधप्रतीत्याचचिरकालयुद्धोत्तरंलक्ष्मणेशक्तिघातस्य तदर्थमोषधिपर्वतानयनस्यचोक्तत्वेनामारात्रौशक्तिघातप्रतीत्यारणाद्रावणापगमस्यप्रतीत्याचतद्विरोधात् । तथापाद्मे—'ततोजज्ञेमहायुद्धंसंकुलंकपिरक्षसाम् । मध्याह्नेप्रथमंयुद्धंप्रारब्धंप्रतिपद्यभूत् । प्रतिपदि शुक्लप्रतिपदीत्यर्थः । उक्तयुक्तेः 'ततोनिशिसमागम्यमायावीशक्रजिद्बली । बबन्धनागपाशैस्तौराघवौचहरित्रजान्' । ततः चिरकालसंकुलयुद्धोत्तरं । अन्यथातस्यांनिशीत्येवबदेत् । अग्रेद्वितीयेऽह्निषष्ठ्यामितिचोक्त्यादारुणेतमसीतिरामायणोक्त्याचभाद्रश्रावणोभयोत्तरप्रतिपद्येतदितिबोध्यं । 'वैनतेयस्तदाभ्येत्य तानिचास्त्राण्यमोचयत् । द्वितीयेऽह्निधूम्राक्षंहनुमान्निजघानवै । तृतीयेऽह्निवज्रदंष्ट्रंखड्गाच्चिच्छेदचाङ्गदः । जघानहनुमान्भूयश्चतुर्थेऽहन्यकंपनम् । प्रहस्तंपञ्चमीतिथ्यांनीलश्चिच्छेदमूर्धनि । रावणःपरिभूतोऽभूत्षष्ठ्यांरामेणधन्विना । अथलङ्केश्वरःखिन्नःकुंभकर्णं सहोदरम् । शैलमुद्गरघाताश्वधावनाद्यैरबोधयत् । जघानतंकुंभकर्णंरामःसप्तमवासरे" । इदंबोधनंदिनद्वयेन । तंबोधितंकुंभकर्णं सप्तमवासरे बोधनोत्तरंसप्तमवासरेइत्यर्थः । यत्तुबोधनंषष्ठ्यांरात्रौ सप्तम्यांचैतद्वधइति । तन्न । तदुत्थापनेउक्तस्यातिप्रयासस्यरात्रिमात्रेणासंभवात् । रावणमन्दिरगमनकालेसूर्यप्रभयारावणमन्दिरस्यातिभास्वरत्ववर्णनेनमन्त्रादिनासप्तम्यांयुद्धासंभवात् इन्द्रजितो दिनत्रयेणवधोस्ययामषट्केनेत्यस्यासंगतत्वाच्च । एवंचभाद्रपूर्णिमायामेतद्वधः । "जघानलक्ष्मणोन्येद्युरतिकायंदशास्यजम् । बबन्धान्येद्युरिन्द्रारिर्ब्रह्मास्त्रेणनृपौकपीन् । हनूमतासमानीतोमहौषधमहीधरः । तस्यानिलस्पर्शवशात्सर्वएतेसमुत्थिताः । अन्येद्युःकपिराट्कुंभंनिकुंभंवायुजोऽवधीत् । तस्यांनिशिरघुश्रेष्ठोजघानमकरेक्षणम् । मायासीतावधंचक्रेशक्रजिद्रणमूर्धनि । तेनखिन्नोऽभवद्रामआश्वस्तोलक्ष्मणेनसः । त्रयोदशाहेसौमित्रिस्त्रिदिनंयोधयन्बली । जघानशक्रजेतारंरामध्यानेनहेतुना" अन्येद्युः अन्येषुदिवसेषु । अत्रातिकायग्रहणंत्रिशिरोदेवान्तकनरान्तकमहोदरमहापार्श्वोपलक्षणं । लक्ष्मणग्रहणमङ्गदहनूमतोरप्युपलक्षणम् । एवंषड्भिर्दिनैः षण्णांवधः। पूर्वैकमेणैवतद्वधोक्तेः। अन्येद्युः सप्तम्यां । पर्वतानयनमष्टम्यां । अन्येद्युर्नवम्यां तस्यांनिशि नवमीरात्रौ। तदन्तेमायासीतावधः । ततोदशमीचतुर्थयाममारभ्यत्रयोदशीचतुर्थयामपर्यन्तमिन्द्रजिद्वधः । "ततोऽवधीन्मूलबलंचतुर्दश्यांरघूद्वहः । दर्शेथनिर्ययौराजायोद्धुंरामेणसंयुगे । चतुरङ्गबलैःसार्धंमन्त्रिभिर्दशकन्धरः । छत्रचामरसंयुक्तःसर्वाभरणभूषितः । महारथगतोद्वारादुत्तरान्निर्ययौबहिः । आगतोरक्षसांराजाब्रह्मघ्नोदेवकण्टकः । योद्धुंरघुवरेणेतिशुश्रुवेकलहध्वनिः । तत्रयुद्धंसमभवद्वानराणांचरक्षसाम् । रामरावणयोश्चैवतथासौमित्रिणासह । शक्तिंचिक्षेपसंक्रुद्धःसोनुजंप्रतिरावणः । वक्षसाधारयामाससौमित्रिस्तांवियद्गताम् । तयासबाध्यमानःसन्पपातधरणीतले । हनूमताजीवितोऽभूदोषध्यानयनात्पुनः । ततःक्रुद्धोमहातेजाराघवोराक्षसान्तकः । जघानराक्षसा-

न्सर्वाञ्छरैःकालान्तकोपमैः । भयात्प्रदुद्रावरणेलङ्कांप्रतिनिशाचरः । जगद्राममयंपश्यन्निर्वेदात्स्वगृहंविशत् । निकुंभिलांततःप्राप्य होमंचक्रेजिगीषया । ध्वंसितंवानरेन्द्रैस्तदभिचारात्मकंरिपोः । पुनरुत्थायपौलस्त्योरामेणसहयोधितुं । दिव्यंस्यन्दनमारुह्यराक्षसैर्निर्ययौबहिः" इदंनिर्गमनमाश्विनशुक्लप्रतिपदि । "ततःशतमखोदिव्यंरथंहर्यश्वसंयुतम् । राघवायस्वसूतेनप्रेषयामासभक्तिमान् । तंतुमातलिनानीतमारुह्यरथसत्तमम् । स्तूयमानःसुरगणैर्युयुधेतेनरक्षसा । ततोयुद्धमभूद्घोरंरामरावणयोर्महत् । सप्ताह्निकमहोरात्रं शस्त्रास्त्रैरतिभीषणैः ।"इति । ततः मातलिरथागमनदिनोक्तरं । एवंचनवम्यांतद्वधः । तदुक्तंकालिकापुराणे—"रामस्यानुग्रहार्थं वैरावणस्यवधायच । रात्रावेवमहादेवीब्रह्मणाबोधितापुरा । ततस्तुत्यक्तनिद्रासानन्दायामाश्विनेसिते । जगामानगरींलङ्कांयत्रासीद्राघवःपुरा"आगतइतिशेषः । इदंचागमनंराज्यन्ते । तदैवमातलिरथागमनं । "तत्रगत्वामहादेवीतदातौरामलक्ष्मणौ । युद्धेनयोजयामासस्वयमन्तर्हितांबिका । राक्षसानांवानराणांजग्धवासामांसशोणितम् । रामरावणयोर्युद्धंसप्ताहंसान्ययोजयत् । व्यतीतेसप्तमे रात्रेनवम्यांरावणंततः । रामेणघातयामासमहामायाजगन्मयी । यावत्तयोःस्वयंदेवीयुद्धकेलिमुदैक्षत । तावत्तुअष्टरात्राणिसर्वैर्देवैः सुपूजिता । निहतेरावणेवीरेनवम्यांसकलैःसुरैः । विशेषपूजांदुर्गायाश्चक्रेलोकपितामहः ।" सकलैःसुरैरित्यस्यसहेतिशेषः । रामरावणबाणैस्तुयुद्धंचावेक्ष्यभीतिदम् । तृतीयायांतुलङ्कायाःपूर्वोत्तरदिशिस्थितम् । स्वातिनक्षत्रयुक्तायांभीतंसुरबलंमहत् । शान्त्यर्थं वारयामासदेवेन्द्रोवचनाद्धरेः" । शान्त्यर्थं भयशान्त्यर्थं । "ततस्तुश्रवणेनाथदशम्यांचण्डिकांशुभाम् । विसृज्यचक्रेशान्त्यर्थंबलनीराजनंहरिः ।" रिपुजनितभयशान्त्यर्थमित्यर्थः । "नीराजितबलःशक्रस्तत्रारामंसलक्ष्मणम् । संभाष्यप्रययौस्वर्गंसहदेवैःशचीपतिः । इतिवृत्तंपुराकल्पेमनोःस्वायंभुवेऽन्तरे । पुराकल्पेयथावृत्तंप्रतिकल्पंतथैवतु । प्रवर्ततेस्वयंदेवीदैत्यानांनाशनायवै ।" स्वायंभुवमन्वन्तररूपेपुराकल्पेइत्यर्थः । प्रतिकल्पं प्रतिमन्वन्तरमित्यर्थः । जलप्लवसामान्येनतत्रापिकल्पव्यवहारात् । "प्रतिकल्पंभवेद्रामोरावणश्चापिराक्षसः । तथैवजायतेयुद्धंतथैवत्रिदशागमः । एवंरामसहस्राणिरावणानांतथैवच । भक्षितव्यानिभूतानि तेषुदेवीप्रवर्तते । तांपूजन्तिसुराःसर्वेबलंनीराजयन्तिच । तथैवचनराःसर्वेकुर्युःपूजांतथाविधि । बलनीराजनंराजाकुर्याद्बलविवृद्धये ।" इति । इयंचब्रह्मबोधितामहादेव्यग्नौप्रविष्टासीतैवभगवच्छक्तिरूपेतिप्रतिभाति । अतएवब्रह्मवैवर्तेप्रथमेंशविभागे प्रतिकल्पंविष्णोश्चरितंकीदृशमितिनारदप्रश्नेब्रह्मवाक्यं— "सएवभगवान्नूनंप्रतिमन्वन्तरंमुने । वधायदुष्टदैत्यानांभूमिभारकृतांभुवि । कलिद्वापरयोः संधौभविष्यतिनसंशयः । प्रतिकल्पंत्वेवमेवभविष्यतिनसंशयः ।" इति । " सहस्रकृत्वोरामोपिभविताब्रह्मणोदिने " इतिब्रह्मवैवर्तेप्रथमविभागस्थेराधांप्रतिकृष्णवाक्ये । दिनइतिजातावेकवचनं । दिनेष्वित्यर्थः । पूर्वंप्रतिमन्वन्तरमित्युक्तेः । प्रतिचतुर्युगंरामावतारइतितुनयुक्तं । चतुर्विंशतितमचतुर्युग्यांरामावतारस्याष्टाविंशतितमचतुर्युग्यांकृष्णावतारस्यहरिवंशेपुराणान्तरेचप्रसिद्धत्वादितिदिक् । अग्निवेश्यरामायणमितिप्रसिद्धग्रन्थेतु—"रामःपञ्चदशेवर्षेभ्रुवंरामपिमैथिलीम् । उपयेमेलयोध्यायां द्वादशाब्दानुवासस्तः । सप्तविंशतिमेवर्षेवनवासमकल्पयत् । अष्टादशतुवर्षाणिसीतायास्तुतदाऽभवन् । त्रिरात्रमुदकाहारश्चतुर्थेऽह्निफलाशनः । पञ्चमेचित्रकूटेतुरामोवासमकारयत् । अथत्रयोदशेवर्षेपञ्चवट्यांमहामनाः । रामोविरूपयामासघोरांशूर्पणखांवने । ततोमाघेसिताष्टम्यांमुहूर्तेवृन्दसंज्ञके । राघवाभ्यांविनासीतांजहारदशकन्धरः । माघेशुक्लचतुर्दश्यामितिपाठान्तरं । मार्गशुक्लदशम्यांतुवसन्तींरावणालये । संपातिर्दर्शमेमासेआचख्यौवानरेषुताम् । एकादश्यांमहेन्द्राग्रात्पुप्लुवेशतयोजनम् । तद्रात्रिशेषेसीतायादर्शनंहिहनूमतः । द्वादश्यांशिंशुपावृक्षेहनूमान्पर्यवस्थितः । तस्यांनिशायांसीतायाविश्वासालापसत्कथाः । अक्षादिभिस्त्रयोदश्यांततोयुद्धमवर्तत । वधोह्यक्षकुमारस्यवनविध्वंसनंतथा । ब्रह्मास्त्रेणचतुर्दश्यांबद्धःशक्रजिताकपिः । वह्निनापुच्छयुक्तेनलङ्कायादहनंतथा । पौर्णमास्यांमहेन्द्राद्रौपुनरागमनंकपेः । मार्गासितप्रतिपदःपञ्चभिःपथिवासरैः । पुनरागम्यषष्ठेऽह्निध्वस्तंमधुवनंचतैः । सप्तम्यांप्रत्यभिज्ञानदानंशुद्धिनिवेदनं । अष्टम्युत्तरफल्गुन्यांमुहूर्तेविजयाभिधे । मध्यं प्राप्तेसहस्रांशौप्रस्थानंराघवस्यतु । वासरेसप्तमेभोधौस्कन्धावारनिवेशनम् । पौषशुक्लप्रतिपदस्तृतीयायावदंबुधेः । उपस्थानंससैन्यस्यराघवस्यबभूवह । विभीषणश्चतुर्थ्यांवैरामेणसहसंगतः । समुद्रतरणार्थायप्रवृत्तोमन्त्रउद्गमः । प्रायोपवेशनंचक्रेरामोदिनचतुष्टयम् । समुद्रवरलाभश्चसेतूपायप्रकीर्तनम् । सेतोर्दशम्यामारंभस्त्रयोदश्यांसमापनम् । चतुर्दश्यांसुवेलाग्रेरामःसैन्यंन्यवेशयत् । पौर्णमास्यांद्वितीयान्तंत्रिदिनैःसैन्यतारणम् । तृतीयायादशम्यन्तंमन्त्रोगुल्मनिवेशने । शुकसारणयोःसैन्यप्राप्तिरेकादशीदिने । माघेसितायांद्वादश्यांसैन्यसंख्याकृतातुवै । सारणेनकपीनांतुसारासारोपवर्णनम् । त्रयोदश्यांयमांयावल्लङ्कायांदिवसैस्त्रिभिः । रावणःसैन्यसंख्यानंरणायोत्साहनंतथा । ययावथाङ्गदोदूत्यंमाघशुक्लादिवासरे । माघशुक्लद्वितीयादिदिनैःसप्तभिरेवतु । रक्षसांवानराणांचयुद्धमासीत्सुदारुणम् । माघशुक्लनवम्यांतुरात्राविन्द्रजिताहरेःरामलक्ष्मणयोर्नागपाशैर्बन्धोबभूवह । नागपाशविमोक्षार्थंदशम्यांगरुडोभ्यगात् । अत्रावहारःकथितोदशम्यादिदिनद्वयम् । द्वादश्यामाज्ञनेयेनधूम्राक्षस्यवधःकृतः । त्रयोदश्यांतुतेनैवनिहतोकंपनोरणे । माघशुक्लचतुर्दश्यायावत्कृष्णादिवासरम् । त्रिदिनेनप्रहस्तस्यनीलेनविहितोवधः । माघासितद्वितीयायाश्चतुर्थ्यन्तंत्रिभिर्दिनैः । रामेणतुमुलेयुद्धे रावणोद्रावितोरणात् । पञ्चम्यास्त्वष्टमीयावद्रावणेनप्रबोधितः । कुंभकर्णःसमुत्तस्थावत्रयुद्धंचतुर्दिनम् । कुंभकर्णोदिनैःषड्भिर्नवम्यास्तुचतुर्दशीम् । रामेणनिहतोयुद्धेबहुवानरभक्षकः । अमावास्यादिनेशोकादवहारोबभूवह । फाल्गुनादिप्रतिपदश्चतुर्थ्यन्तदिनैस्ततः । नरान्तकप्रभृतयोनिहताःपञ्चराक्षसाः । पञ्चम्याःसप्तमीयावदतिकायवधरुग्यहात् । अष्टम्याद्वादशीयावन्निहतौदिनपञ्चकात् ।

द्वादशोत्तरशततमः सर्गः ॥ ११२ ॥

दुःखाद्रावणंप्रतिशोचनपूर्वकं विलपन्तंविभीषणंप्रति रामेणसमाश्वासनपूर्वकं रावणस्यौर्ध्वदैहिककरणाभ्यनुज्ञानम् ॥ १ ॥

भ्रातरं निहतं दृष्ट्वा शयानं रामनिर्जितम् ॥ शोकवेगपरीतात्मा विललाप विभीषणः ॥ १ ॥
वीर विक्रान्तविख्यात विनीत नयकोविद ॥ महार्हशयनोपेत किं शेषेऽद्य हतो भुवि ॥ २ ॥
विक्षिप्य दीर्घौ निश्चेष्टौ भुजावङ्गदभूषितौ ॥ मुकुटेनापवृत्तेन भास्कराकारवर्चसा ॥ ३ ॥
तदिदं वीर संप्राप्तं मया पूर्वं समीरितम् ॥ काममोहपरीतस्य यत्ते न रुचितं वचः ॥ ४ ॥
यन्न दर्पात्प्रहस्तो वा नेन्द्रजिन्नापरे जनाः ॥ न कुम्भकर्णोतिरथो नातिकायो नरान्तकः ॥
न स्वयं त्वममन्येथास्तस्योदर्कोऽयमागतः ॥ ५ ॥
गतः सेतुः सुनीतानां गतो धर्मस्य विग्रहः ॥ गतः सत्त्वस्य संक्षेपः प्रस्तावानां गतिर्गता ॥ ६ ॥

अथ भ्रातृवधदर्शनेन हठात्प्रवृत्तं प्रकृतिसंबन्धकृतं शोकं सोढुमशक्नुवन्विभीषणो विलपति—भ्रातरमित्यादि ॥ शयानं शयानमिव स्थितं । शोकवेगपरीतात्मा शोकवेगेन परीतमनस्कः । वेगशब्देन हठकृतः शोक इति द्योत्यते ॥ १ ॥ विनीत विद्यासुशिक्षित । विक्षिप्येत्यस्य श्लोकस्य पूर्वश्लोकेनान्वयः । भुजाविति नेनान्त्ययुद्धे द्विभुजस्थितिर्गम्यते । मुकुटेन उपलक्षितइति शेषः । अपवृत्तेन पतनवेगादीषच्चलितेन ॥ २—३ ॥ मया पूर्वं समीरितं यद्वचः काममोहपरीतस्य ते न रुचितं नेष्टमासीत् । तदिदं वचः संप्राप्तं त्वयानुभूतमित्यर्थः ॥ ४ ॥ यदित्यादिसार्धश्लोक एकान्वयः ॥ यत्पापकर्म प्रहस्तो दर्पात् नामन्यतेति विपरिणामेनानुषज्यते । एवं सर्वत्र योजनीयं । अतिरथ इत्यतिकायविशेषणं । अमन्येथाः अमन्यथाः । एत्वमार्षं । तृणीकृतवानसीत्यर्थः । तस्य सीताहरणरूपस्य उदर्कः फलमागतं ॥ ५ ॥ सुनीतानां नयानां । सेतुः मर्यादा । धर्मस्य विग्रहः विरोधः । यद्वा अधर्मस्येति छेदः । विग्रहः देहः । यद्वा धर्मस्य विग्रहः देहः । एषोग्निहोत्री च महातपाश्चेत्यादिना रावणस्य धार्मिकत्वकथनात् । सत्त्वस्य बलस्य संक्षेपः संग्रहः । प्रस्तावानां प्रकृष्टस्तुतीनां ।

निकुंभकुंभावूर्ध्वतुमकराक्षश्चतुर्दिनैः । फाल्गुनस्यद्वितीयायांकृष्णेशक्रजिताजितम् । तृतीयायास्तुसप्तम्यांहरयःपञ्चवासरात् । ओषध्यानयनेव्यग्रास्तदासीदवहारकः । तत्रत्रयोदशीयावद्दिनैःषड्भिस्तुशक्रजित् । लक्ष्मणेनहतोयुद्धेविघ्नितोऽभिचरन्क्रमात् । चतुर्दश्यांदशग्रीवरणदीक्षाविधिक्रमात् । अमावास्यांयशैवीरोयुद्धायदशकंधरः । चैत्रशुक्लप्रतिपदःपञ्चमीदिनपञ्चकैः । रावणस्यप्रधानानांयुध्यतामभवत्क्षयः । चैत्रषष्ठ्यष्टमीयावन्महापार्श्वादिमारणम् । चैत्रशुक्लनवम्यांतुसौमित्रेःशक्तिभेदनम् । द्रोणाद्रिराजनेयेन लक्ष्मणार्थमुपाहृतः । दशम्यामवहारोभूद्रात्रौयुद्धंनृरक्षसोः । एकादश्यांतुरामार्थंरथोमातलिसारथिः । अष्टादशदिनैरामोद्वैरथेरावणं वधीत् । द्वादश्याःशुक्लपक्षस्ययावत्कृष्णचतुर्दशीम् । माघशुक्लद्वितीयायाश्चैत्रकृष्णचतुर्दशीम् । अष्टाशीतिदिनंयुद्धंमध्येपञ्चदशाहकम् । युद्धावहारंसंग्रामस्त्रिसप्ततिदिनान्यभूत् । संस्कारोरावणादीनाममावास्यादिनेऽभवत् । वैशाखादितिथौरामःसुवेलंपुनरागमत् । अभिषिक्तोद्वितीयायांलङ्काराज्येविभीषणः । सीताशुद्धिस्तृतीयायांदेवेभ्योवरलंभनम् । वैशाखस्यचतुर्थ्यांतुरामःपुष्पकमास्थितः । पूर्णेचतुर्दशेवर्षेपञ्चम्यांमाधवस्यतु । भरद्वाजाश्रमंरामःससीतःपुनरागमत् । नन्दिग्रामेतुषष्ठ्यांवैभरतेनसमागतः । सप्तम्यामभिषिक्तोसावयोध्यायांरघूत्तमः । जानकीरामसहितारावणस्यनिवेशने । मनुमासान्स्थितापक्षदशवासरसंयुते" इति । तत्तुसर्वांशेअनिश्चितप्रामाण्यं । कालिकापुराणादिविरोधात् । इदंकल्पान्तरविषयमितिनयुक्तं । तद्विरोधादेव । तस्मात्क्रियाविरोधेपुराणेषूपसंहारएवन्याय्यः । शाखान्तरोक्ताङ्गोपसंहारवत् । यथाकुंभकर्णवधोत्ररामेणोक्तः भारतेलक्ष्मणेन । तादृशेविषये नतुकल्पभेदेनव्यवस्था । जन्मविषयएवतुहरिवंशोक्तासेतिबोध्यम् ॥ ३४ ॥ इत्येकादशोत्तरशततमःसर्गः ॥ १११ ॥

ति० सुहृत्तानां वीराणां ॥ ६ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. यन्मयापूर्वमीरितं. २ ङ. झ. ञ. ट. यत्तन्नरुचितंतव. ३ ङ. झ. ञ. ट. बहुमन्येथाः. च. छ. किंतुमन्येथाः. ग. तत्तुमन्येथाः. ४ ङ. झ. ट. सुहृत्तानां.

आदित्यः पतितो भूमौ मग्नस्तमसि चन्द्रमाः ॥ चित्रभानुः प्रशान्तार्चिर्व्यवसायो निरुद्यमः ॥
अस्मिन्निपतिते भूमौ वीरे शस्त्रभृतांवरे ॥ ७ ॥
किं शेषमिव लोकस्य हतवीरस्य सांप्रतम् ॥ रणे राक्षसशार्दूले प्रसुप्त इव पांसुषु ॥ ८ ॥
धृतिप्रवालः प्रसहाग्र्यपुष्पस्तपोबलः शौर्यनिबद्धमूलः ॥
रणे महात्राक्षसराजवृक्षः संमर्दितो राघवमारुतेन ॥ ९ ॥
तेजोविषाणः कुलवंशवंशः कोपप्रसादापरगात्रहस्तः ॥
इक्ष्वाकुसिंहावगृहीतदेहः सुप्तः क्षितौ रावणगन्धहस्ती ॥ १० ॥
पराक्रमोत्साहविजृम्भितार्चिर्निःश्वासधूमः स्वबलप्रतापः ॥
प्रतापवान्संयति राक्षसाग्निर्निर्वापितो रामपयोधरेण ॥ ११ ॥
सिंहर्क्षलाङ्गूलककुद्विषाणः पराभिजिद्गन्धनगन्धहस्ती ॥
रक्षोवृषश्चापलकर्णचक्षुः क्षितीश्वरव्याघ्रहतोऽवसन्नः ॥ १२ ॥

गतिः विषयः ॥ ६ ॥ आदित्य इत्यादिसार्धश्लोक एकान्वयः ॥ अस्मिन्निपतिते आदित्यः पतित इत्याद्यभेदातिशयोक्तिः । चित्रभानुः वह्निः । " सूर्यवह्नी चित्रभानू " इत्यमरः । व्यवसायो निरुद्यमः । रावणसदृशाश्रयाभावाद्व्यवसायः उत्साहशक्तिः । निर्व्यापारोभूदित्यर्थः ॥ ७ ॥ राक्षसशार्दूले रावणे पांसुषु प्रसुप्त इव स्थिते । मृत इति यावत् । सांप्रतं हतवीरस्य लोकस्य किमिव शेषं । सर्वं शून्यमभूदित्यर्थः ॥ ८ ॥ धृतिरेव प्रवालो यस्य स तथा । धैर्यं हि वृक्षस्य पल्लववत् प्रथमफलं । प्रसहत इति प्रसहः । पचाद्यच् । भावप्रधानो निर्देशः । स एव अग्र्यपुष्पं श्रेष्ठपुष्पं यस्य स तथा । प्रसहनं हि पुष्पवत्कार्यफलस्य अव्यवहितहेतुः । तप एव बलं स्थैर्यांशो यस्य स तथा । शौर्यमेव निबद्धमूलं निश्चलमूलं यस्य स तथा । शौर्यमूलत्वात्तपःप्रभृतीनां सर्वेषां ॥ ९ ॥ तेजः पराक्रम एव विषाणो यस्य स तथा । तेजो हि विषाणवत् परमर्मभेदि । कुलवंशवंशः कुलं पितृपितामहादयः तेषां वंशः सर्गः स एव वंशः पृष्ठावयवविशेषो यस्य स तथा । " वंशो वेणौ कुले वर्गे पृष्ठस्यावयवेपि च " इत्युभयत्रापि विश्वः । कुलेन हि वंशेनेव स्वाश्रितधारणं । कोप एवापरगात्रं शिरोव्यतिरिक्तशरीरं यस्य स तथा । प्रसाद एव हस्तो यस्य स तथा । कोपस्य बहुत्वादपरगात्रत्वेन रूपणं । इक्ष्वाकुः रामः स एव सिंहः तेन अवगृहीतदेहः रावणगन्धहस्ती रावण एव मत्तगजः क्षितौ सुप्तः । मृत इत्यर्थः ॥ १० ॥ पराक्रमोत्साहावेव विजृम्भितार्चिः विस्तृतज्वालः । निश्वास एव धूमो यस्य स तथा । स्वबलप्रतापः स्वबलोष्णः । प्रतापवान् तेजस्वी । राक्षसाग्निः रामपयोधरेण निर्वापितः ॥ ११ ॥ सिंहर्क्षा राक्षसाः ते एव लाङ्गूलककुद्विषाणानि यस्य स तथा । " सिंहर्क्षा राक्षसाः प्रोक्ता यक्षा उष्णीषिणो मताः " इति निघण्टुः । यद्वा सिंहर्क्षं मूलानक्षत्रं तच्च राक्षसनक्षत्रं । यथाह ज्योतिषे काश्यपः— " अग्निर्मघा विशाखा च आश्लेषा शततारका । धनिष्ठा चित्रया युक्ता ज्येष्ठा मूला च राक्षसाः " इति ॥ तत्संबन्धाद्राक्षसा अपि तच्छब्देनोच्यन्ते । राक्षससमृद्धेर्गर्वहेतुत्वेन लाङ्गूलादित्वेन रूपणं । परानभिजयतीति पराभिजित् । गन्धने परोत्सादने गन्धहस्ती मुख्यः । " गन्धनं सूचनोत्साहहिंसनेषु प्रकाशने " इति विश्वः । चापलं विषयलौल्यं तदेव

ती० प्रसहाग्र्यपुष्पः प्रसहतइतिप्रसहः । पचाद्यच् । भावप्रधानोनिर्देशः । प्रसहः प्रसहनं तदेवाग्र्यपुष्पंयस्यसः । प्रसवाग्र्यपुष्पइतिपाठे प्रसवः सन्तानं ॥ १ ॥ स० पराभिजिद्गन्धनगन्धहस्ती परानभिजयन्तीतिपराभिजितः । तद्गन्धने हिंसायां गन्धहस्ती मत्तगजतुल्यः । चापलकर्णचक्षुः चापलं चञ्चलंकर्णचक्षुर्यस्यसः । कर्णयोश्चापलं अश्राव्यशुर्पणखादिप्रलपितश्रवणेनतत्रचित्तप्रणिधानं । चक्षुषोःअनवलोकनीयपरदारसौन्दर्यदर्शनं ॥ १२ ॥

[पा०] १ ङ. ञ. गतसत्त्वस्य. ग. ब. ट. हतवीर्यस्य. २ क. ङ. ज. ञ. प्रसभाग्र्य. ३ घ. इक्ष्वाकुसिंहेनगृहीतदेहः. ४ ङ. ञ. गन्धवाहः.

वदन्तं हेतुमद्वाक्यं परिमृष्टार्थनिश्चयम् ॥ रामः शोकसमाविष्टमित्युवाच विभीषणम् ॥ १३ ॥
नायं विनष्टो निश्चेष्टः समरे चण्डविक्रमः ॥ अत्युन्नतमहोत्साहः पतितोऽयमशङ्कितः ॥ १४ ॥
नैवं विनष्टाः शोच्यन्ते क्षत्रधर्ममवस्थिताः ॥ वृद्धिमाशंसमाना ये निपतन्ति रणाजिरे ॥ १५ ॥
येन सेन्द्रास्त्रयो लोकास्त्रासिता युधि धीमता ॥ तस्मिन्कालसमायुक्ते न कालः परिशोचितुम् ॥१६॥
नैकान्तविजयो युद्धे भूतपूर्वः कदाचन ॥ परैर्वा हन्यते वीरः परान्वा हन्ति संयुगे ॥ १७ ॥
इयं हि पूर्वैः संदिष्टा गतिः क्षत्रियसंमता ॥ क्षत्रियो निहतः संख्ये न शोच्य इति निश्चयः ॥१८॥
तदेवं निश्चयं दृष्ट्वा तत्त्वमास्थाय विज्वरः ॥ यदिहानन्तरं कार्यं कल्प्यं तदनुचिन्तय ॥ १९ ॥
तमुक्तवाक्यं विक्रान्तं राजपुत्रं विभीषणः ॥ उवाच शोकसंतप्तो भ्रातुर्हितमनन्तरम् ॥ २० ॥

योऽयं विमर्देषु न भग्नपूर्वः सुरैः समेतैः सह वासवेन ॥
भवन्तमासाद्य रणे विभग्नो वेलामिवासाद्य यथा समुद्रः ॥ २१ ॥
अनेन दत्तानि सुपूजितानि भुक्ताश्च भोगा निभृताश्च भृत्याः ॥
धनानि मित्रेषु समर्पितानि वैराण्यमित्रेषु च यापितानि ॥ २२ ॥
एषोहिताग्निश्च महातपाश्च वेदान्तगः कर्मसु चाग्र्यवीर्यः ॥
एतस्य यत्प्रेतगतस्य कृत्यं तत्कर्तुमिच्छामि तव प्रसादात् ॥ २३ ॥

कर्णचक्षुषी यस्य स तथा । रक्षोवृषः रावणवृषभः क्षितीश्वरव्याघ्रेण रामशार्दूलेन हतः अवसन्नः मृतः ॥ १२ ॥ परिमृष्टार्थनिश्चयं कृतार्थनिश्चयं ॥ १३ ॥ अयं निश्चेष्टः निर्विक्रमः न विनष्टः अपि त्वयं समरे चण्डविक्रमः अत्युन्नतमहोत्साहः । अशङ्कितः पतितः विनष्टः ॥ १४ ॥ यदि समरे विक्रम्य नष्टः ततः किमित्यत्राह—नैवमित्यादि ॥ ये वृद्धिं परलोकवृद्धिं आशंसमानाः आकाङ्क्षमाणाः सन्तः रणाजिरे निपतन्ति । क्षत्रधर्ममवस्थिताः शूरधर्मव्यवस्थिताः । एवं विनष्टाः ते न शोच्यन्ते ॥ १५ ॥ न केवलं समरमरणादेव न शोच्यत्वं किंतु यशःप्रत्यासक्त्यापीत्याह येनेति ॥ येन त्रासिताः तस्मिन् रावणे कालसमायुक्ते शोचितुं न कालः नावसरः । तद्विषये शोको न युक्तः । वीरस्वर्गगमनादिति भावः ॥ १६ ॥ तथापि मरणे सति कथं न शोचितव्यमित्याशङ्क्य जयवत्पराजयोपि न शोकस्थानमित्याह—नैकान्तेति ॥ एकान्तविजयः न भूतपूर्वः इतः पूर्वं न भूतः । अनैकान्त्यमुपपादयति—परैर्वेति ॥ १७ ॥ क्षत्रधर्मपर्यालोचनेनापि न शोच्य इत्याह—इयं हीति ॥ क्षत्रियः शूरः ॥ १८ ॥ दृष्ट्वा ज्ञात्वा । तत्त्वमास्थाय परमार्थबुद्धिमवलम्ब्य । जनिमतामवश्यं मृत्युं ज्ञात्वेत्यर्थः । विज्वरः निःशोकः । यत् कार्यं कर्म । कल्प्यं अनुष्ठेयं । तदनुचिन्तय । कल्यमिति पाठे यत् कार्यं कल्यं । योग्यमित्यर्थः । "कल्यो योग्यश्च ते समाः" इति निघण्टुः ॥ १९—२० ॥ विमर्देषु समरेषु । अनेन महावीरतया सम्यक् संस्कारमर्हतीत्युक्तं ॥२१॥ धर्मशीलत्वाच्च तदर्हतीत्याह—अनेनेति ॥ दत्तानि दानानि कृतानि । सुपूजितानि गुरुदैवतानीति शेषः । निभृताः नितरां भृताः । यापितानि सफलीकृतानीत्यर्थः ॥ २२ ॥ आहिताग्न्यादित्वाच्च तदर्हतीत्याह—एषोहिताग्निरिति ॥ हिताग्निः आहिताग्निः । संधिरार्षः । वेदान्तं गच्छति जानातीति वेदान्तगः । कर्मसु चाग्र्यवीर्यः कर्मशूर इत्यर्थः । प्रेतग प्रेतत्वं गतस्य । इच्छामि । पुत्राणां विनष्टत्वेन भ्रा

स० यमःशङ्कितोभीतोयस्मादितिवा ॥ १४ ॥ ति० अयंसमरेनिश्चेष्टः अशक्तोभूत्वानविनष्टः । अपिचण्डविक्रमत्वादिगुणा एवायमशङ्कितोमृत्युशङ्कारहितएवदैवात्पतितः ॥ १५ ॥ ति० कालसमायुक्ते कालधर्मसंबद्धे । एवंदुर्गुणयुक्तस्यमरणमेवसम्यगितिभावः ॥ १६ ॥ ति० वनीपकेषुयाचकेषु । अनेनदत्तानि ॥ २२ ॥

[पा०] १ क.—ट. परिदृष्टार्थ. २ क.—ङ. ज.—ट. क्षत्रधर्मेव्यव. ३ क.—घ. च. छ. ञ. ट. अस्मिन्काल. ४ ङ. ञ. ट. समस्तैः. ५ ञ. दत्तानिवनीपकेषु. ६ क. ङ. ञ. निपातितानि.

स तस्य वाक्यैः करुणैर्महात्मा संबोधितः साधु विभीषणेन ॥
आज्ञापयामास नरेन्द्रसूनुः स्वर्गीयमाधानमदीनसत्त्वः ॥ २४ ॥
मरणान्तानि वैराणि निर्वृत्तं नः प्रयोजनम् ॥ क्रियतामस्य संस्कारो ममाप्येष यथा तव ॥ २५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्वादशोत्तरशततमः सर्गः ॥ ११२ ॥

त्रयोदशोत्तरशततमः सर्गः ॥ ११३ ॥

रावणान्तःपुराङ्गनाभीरणाङ्गणमेत्य तदङ्गपरिष्वङ्गेणबहुधाविलापः ॥ १ ॥

रावणं निहतं श्रुत्वा राघवेण महात्मना ॥ अन्तःपुराद्विनिष्पेतू राक्षस्यः शोककर्शिताः ॥ १ ॥
वार्यमाणाः सुबहुशो वेष्टन्त्यः क्षितिपांसुषु ॥ विमुक्तकेश्यो दुःखार्ता गावो वत्सहता इव ॥ २ ॥
उत्तरेण विनिष्क्रम्य द्वारेण सह राक्षसैः ॥ प्रविश्यायोधनं घोरं विचिन्वन्त्यो हतं पतिम् ॥ ३ ॥
राजपुत्रेतिवादिन्यो हा नाथेति च सर्वशः ॥ परिपेतुः कबन्धाङ्कां महीं शोणितकर्दमाम् ॥ ४ ॥
ता बाष्पपरिपूर्णाक्ष्यो भर्तृशोकपराजिताः ॥ करेण्व इव नर्दन्त्यो विनेदुर्हतयूथपाः ॥ ५ ॥

रेवाधिकारित्वादिति भावः ॥ २३ ॥ करुणैरित्यनेन दुःखातिशयादिदानीमेवमुक्तमिति द्योत्यते । वक्ष्यति हि नाहमस्य संस्कारं करिष्यामीति । स्वर्गीयं स्वर्गाय हितं । आधानं अन्त्येष्टिसंज्ञिकं कर्म ॥ २४ ॥ वैरातिरेकात् संस्कारे मम द्वेष इति न शङ्कनीयमित्याह—मरणेति ॥ मरणानन्तरमपि वैरकरणं निष्प्रयोजनमित्याह—निर्वृत्तमिति । प्रयोजनं सीतालाभरूपं । अस्य संस्कारः यायजूकोचितसंस्कारः । क्रियतां। ममाप्येष यथा तव । तव यथा भ्राता तथा ममापि भ्राता । मद्भ्रातृभूतस्य तव भ्रातृत्वात् । त्वमस्य दोषं दृष्ट्वा न करोषि चेदहमेव करिष्यामि । भ्रातृषु येनकेनापि कर्तव्यमिति भावः । अत्र श्लोके न इति गायत्र्यक्षरं । अत्राचार्या व्याचख्युः । मरणान्तानि वैराणि ऋषिजनस्थानभ्रंशमैथिलीहरणमत्प्राणभूतजटायुविध्वंसनप्रभृतिमद्द्वेषाचरणमितः परं कर्तुं न शक्नोति हीति भावः । निर्वृत्तं नः प्रयोजनं । यदि वा रावणः स्वयमिति वदता मयास्य विषये किंचिच्छुभं कर्तव्यमिति मनसि कृतं । तदनेन 'द्विधा भज्येयमप्येवं न नमेयं तु कस्यचित्'इति वदता प्रतिहतं । तत्करणस्येदानीमवसरः संजात इति भावः । क्रियतामस्य संस्कारः । मत्कृतहितप्रतिषेधानर्हावस्था इदानीमस्य संजाता अतोयं न त्याज्यः । अतः परं यत्कर्तव्यं तत्कार्यमेव । ममाप्येष यथा तव । अयं मच्चित्तानुकूलो जातः अतो मन्मित्रभूतो भवानपि तमनुवर्तितुमर्हति । अथवा एषः तव यथा तथा ममापि । अस्य संस्कारस्तव यथा प्राप्तः तथा ममापीत्यर्थः । भवानस्य संस्कारं न करोति चेदहमेव करोमि । बन्धुषु येन केनापि कर्तव्यं खल्विदं तद्दूरे तिष्ठ अहमेव करिष्यामीत्यर्थ इति ॥२५॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्वादशोत्तरशततमः सर्गः ॥ ११२ ॥

अथ रावणान्तःपुरस्त्रीविलापः—रावणमित्यादिश्लोकद्वयमेकान्वयं ॥ वत्सहताः हतवत्साः ॥१—२॥ उत्तरेणेत्यादिश्लोकद्वयमेकान्वयं ॥ शोणितैः कर्दमो यस्यास्तां शोणितकर्दमां ॥ ३—४ ॥ हतयूथपा इति करेणुविशेषणं । अतएव नर्दन्त्यः करेण्व इव विने-

---

ती० तवयथा ममापितथा । ममापिस्नेहविषयइत्यर्थः ॥ अतःसंस्क्रियतां शङ्कांमाकुर्वितिभावः ॥ स० निर्वृत्तं निष्पन्नं । तद्धर्मस्यैवप्रयोजनरूपत्वात् ॥ तथामम । तवममचसौभ्रात्रादितिभावः ॥ २५ ॥ इतिद्वादशोत्तरशततमःसर्गः ॥ ११२ ॥

ति० गावइति । अयमत्यन्तवियोगजशोकमात्रेदृष्टान्तः ॥ २ ॥

[पा०] १ च. सुसंधितः. २ घ. ज. झ. दृष्ट्वा. ३ ङ. ज. झ. ट. वेष्टन्त्योरणपांसुषु. ४ क.—ट. आर्यपुत्रेति. ५ ज. ट. मरेजुर्हत.

ददृशुस्तं महावीर्यं महाकायं महाद्युतिम् ॥ रावणं निहतं भूमौ नीलाञ्जनचयोपमम् ॥ ६ ॥
ताः पतिं सहसा दृष्ट्वा शयानं रणपांसुषु ॥ निपेतुस्तस्य गात्रेषु च्छिन्ना वनलता इव ॥ ७ ॥
बहुमानात्परिष्वज्य काचिदेनं रुरोद ह ॥ चरणौ काचिदालिङ्ग्य काचित्कण्ठेऽवलम्ब्य च ॥ ८ ॥
उद्धृत्य च भुजौ काचिद्भूमौ स्म परिवर्तते ॥ हतस्य वदनं दृष्ट्वा काचिन्मोहमुपागमत् ॥ ९ ॥
काचिदङ्के शिरः कृत्वा रुरोद मुखमीक्षती ॥ स्नापयन्ती मुखं बाष्पैस्तुषारैरिव पङ्कजम् ॥ १० ॥
एवमार्ताः पतिं दृष्ट्वा रावणं निहतं भुवि ॥ चुक्रुशुर्बहुधा शोकाद्भृयस्ताः पर्यदेवयन् ॥ ११ ॥
येन वित्रासितः शक्रो येन वित्रासितो यमः ॥ येन वैश्रवणो राजा पुष्पकेण वियोजितः ॥ १२ ॥
गन्धर्वाणामृषीणां च सुराणां च महात्मनाम् ॥ भयं येन महद्दत्तं सोयं शेते रणे हतः ॥ १३ ॥
असुरेभ्यः सुरेभ्यो वा पन्नगेभ्योपि वा तथा ॥ न भयं यो विजानाति तस्येदं मानुषाद्भयम् ॥१४॥
अवध्यो देवतानां यस्तथा दानवरक्षसाम् ॥ हतः सोयं रणे शेते मानुषेण पदातिना ॥ १५ ॥
यो न शक्यः सुरैर्हन्तुं न यक्षैर्नासुरैस्तथा ॥ सोयं कश्चिदिवासक्तो मृत्युं मर्त्येन लम्भितः ॥ १६ ॥
एवं वदन्त्यो बहुधा रुरुदुस्तस्य ताः स्त्रियः ॥ भूय एव च दुःखार्ता विलेपुश्च पुनः पुनः ॥ १७ ॥
अशृण्वता च सुहृदां सततं हितवादिनाम् ॥ मरणायाहृता सीता घातिताश्च निशाचराः ॥ १८ ॥
एताः सममिदानीं ते वयमात्मा च पातिताः ॥ ब्रुवाणोपि हितं वाक्यमिष्टो भ्राता विभीषणः ॥
धृष्टं परुषितो मोहात्त्वयाऽऽत्मवधकाङ्क्षिणा ॥ १९ ॥
यदि निर्यातिता ते स्यात्सीता रामाय मैथिली ॥ न नः स्याद्व्यसनं घोरमिदं मूलहरं महत् ॥ २० ॥
वृत्तकामो भवेद्भ्राता रामो मित्रकुलं भवेत् ॥ वयं चाविधवाः सर्वाः सकामा न च शत्रवः ॥२१॥
त्वया पुनर्नृशंसेन सीतां संरुन्धता बलात् ॥ राक्षसा वयमात्मा च त्रयं तुल्यं निपातितम् ॥२२॥
न कामकारः कामं वा तव राक्षसपुङ्गव ॥ दैवं चेष्टयते सर्वं हतं दैवेन हन्यते ॥ २३ ॥
वानराणां विनाशोऽयं रक्षसां च महाहवे ॥ तव चैव महाबाहो दैवयोगादुपागतः ॥ २४ ॥
नैवार्थेन न कामेन विक्रमेण न चाज्ञया ॥ शक्या दैवगतिर्लोके निवर्तयितुमुद्यता ॥ २५ ॥

दुरित्यन्वयः ॥ ५—७ ॥ बहुमानादित्यादिश्लोकत्रयमेकान्वयं ॥ परिवर्तते वेष्टते । ईक्षती ईक्षमाणा ॥ ८—१० ॥ चुक्रुशुरिति । क्रोशः निरक्षरध्वनिः । परिदेवनं साक्षरशब्दः ॥ ११—१३ ॥ मानुषाद्भयं । जातमिति शेषः ॥ १४—१५ ॥ कश्चिदि वयः कश्चित्पुरुष इव लम्भितः प्रापितः ॥ १६—१७ ॥ सुहृदां सुहृद्भ्यः । पञ्चम्यर्थे षष्ठी । वचनमितिवाशेषः । अशृण्वता त्वया ॥ १८ ॥ एताः वयं ते राक्षसाः आत्मा च समं युगपत् इदानीं पातिताः । मारिताइत्यर्थः । इष्टः प्रीतिमान् ॥ १९ ॥ यदीत्यादिश्लोकद्वयमेकान्वयं ॥ ते त्वया । निर्यातिता प्रत्यर्पिता । मूलहरं मूलभूतत्वत्पर्यन्तहरं । यदि सीता निर्यातिता स्यात्तदा भ्राता विभीषणो वृत्तकामः निष्पन्नमनोरथः भवेत् । स्ववाक्यकरणादिति भावः । तथा रामः मित्रकुलं कुलमित्रं । शत्रवः देवादयः ॥२०—२१॥ तुल्यमिति । युगपदित्यर्थः ॥ २२ ॥ एवं रावणस्वेच्छाचरणस्य राक्षसनाशहेतुतामभिधाय संप्रति तन्निरासपूर्वकं दैवकारितत्वं दर्शयति—न कामकार इति ॥ कामकारः स्वच्छन्दकरणं कामं प्रकामं । नास्ति । कुतः दैवं चेष्टयते सर्वं हतं दैवेन हन्यते । दैवेन हतमन्येन हन्यते ॥ २३—२४ ॥ उद्यता कार्योन्मुखी दैवगतिः अर्थादिना न निवर्तयितुं शक्या ।

स० असत्वः अल्पबलइत्यर्थः । अनुदराकन्येत्यत्रेव । मर्त्येन स्वकर्तृकमरणयोग्येनरामेण । लंभितः प्रापितः मृत्युं यमंप्रतीतिवा ॥ १६ ॥ स० दैवं अदृष्टप्रेरकोहरिरेव । सर्वं चराचरं चेष्टयते चेष्टयति । अतोऽन्येषां तत्खातन्त्र्यभ्रमइत्यर्थः । दैवेनहतमेव केनचिन्निमित्तेनहन्यते नत्वन्यथा ॥ २३ ॥ इति त्रयोदशाधिकशततमः सर्गः ॥ ११३ ॥

[पा०] १ ख. च. छ. ञ. निहतंदृष्ट्वा. २ च. अशृण्वतातु. ३ ङ. झ. राक्षसाश्चनिपातिताः.

विलेपुरेवं दीनास्ता राक्षसाधिपयोषितः ॥ कुर्यं इव दुःखार्ता बाष्पपर्याकुलेक्षणाः ॥ २६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रयोदशोत्तरशततमः सर्गः ॥ ११३॥

चतुर्दशोत्तरशततमः सर्गः ॥ ११४ ॥

मण्डोदर्या रणाङ्गणेरावणानुशोचनपूर्वकं शोकेनबहुधाविलापः ॥ १ ॥ विभीषणेन रामाज्ञया यथाविधिरावणसंस्करणम् ॥ २ ॥

तासां विलपमानानां तथा राक्षसयोषिताम् ॥ ज्येष्ठा[1] पत्नी प्रिया दीना भर्तारं समुदैक्षत ॥ १ ॥
दशग्रीवं हतं दृष्ट्वा रामेणाचिन्त्यकर्मणा ॥ पतिं मण्डोदरी तत्र कृ[3]पणा पर्यदेवयत् ॥ २ ॥
ननु नाम महाभाग[4] तव वैश्रवणानुज ॥ क्रुद्धस्य प्रमुखे स्थातुं त्रस्त्यपि पुरन्दरः ॥
ऋषयश्च महीदे[5]वा गन्धर्वाश्च यशस्विनः ॥ ३ ॥
ननु नाम तवोद्वेगाच्चारणाश्च दि[6]शो गताः ॥ स त्वं मानुषमात्रेण रामेण युधि निर्जितः ॥
न व्यपत्रपसे राजन्किमिदं राक्षसर्षभ ॥ ४ ॥
कथं त्रैलोक्यमाक्रम्य श्रिया वीर्येण चान्वितम् ॥ अविषह्यं जघान त्वां मानुषो वनगोचरः ॥ ५ ॥
[जहि वीर महावीर्यौ विस्मितौ रामलक्ष्मणौ ॥ ६ ॥]
मानुषाणामविषये चरतः कामरूपिणः ॥ विनाशस्तव रामेण संयुगे नोपपद्यते ॥ ७ ॥
न चैतत्कर्म रामस्य श्रद्दधामि चमूमुखे ॥ सर्वतः समुपेतस्य तव तेनाभिमर्शनम्[9] ॥ ८ ॥
यदैव[10] च जनस्थाने राक्षसैर्बहुभिर्वृतः ॥ खरस्तव हतो भ्राता तदेवासौ न मानुषः ॥ ९ ॥

कामेन स्वेच्छया ॥ २५ ॥ कुर्यः क्रौञ्च्यः ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रयोदशोत्तरशततमः सर्गः ॥ ११३ ॥

अथ मण्डोदरीप्रलापादि—तासामित्यादि ॥ विलपमानानां विलपन्तीनां । तथा विलपमानानामित्यन्वयः । दीना सती समुदैक्षत ॥ १ ॥ मण्डोदरी मण्डनभूतोदरी । कृशोदरीति यावत् । " मडि भूषायां " इति धातोर्भावे कप् प्रत्ययः । मण्डं सारं सुन्दरमिति यावत् । तादृशोदरीत्येके । मण्डा पृथुपिपीलिका तस्या इव उदरं यस्याः सा मण्डोदरीत्यप्याहुः ॥ २ ॥ यद्यपि समरमरणं शूराणां श्लाघ्यमिति न वीरपत्नी तच्छोचितुमर्हा, तथाप्यसमानान्मानुषात्प्राप्तमिदं लज्जावहमिति शोचति—ननु नाम तवेत्यादिना सार्धश्लोकेन ॥ नाम प्रसिद्धौ । महीदेवाः ब्राह्मणाश्च । त्रस्यन्तीत्यनुषङ्गः । स कथं मानुषेण जित इति शेषः ॥ ३ ॥ ननु नामेत्यादिसार्धश्लोक एकान्वयः ॥ चारणाश्च आकाशचारिणश्च । न व्यपत्रपसे । मानुषविजयेनेति शेषः । किमिदं किमेवमवस्थानकारणमित्यर्थः ॥ ४ ॥ वीर्येण त्रैलोक्यमाक्रम्य श्रियान्वितं त्वां मानुषस्तत्रापि वनगोचरः कथं जघान । अद्भुतमित्यर्थः ॥ ५—६ ॥ तदेवासंभावितत्वं निरूपयति—मानुषाणामिति ॥ अविषये अगम्यदेशे ॥ ७ ॥ सर्वतः समुपेतस्य सर्वयुद्धोपकरणैः पूर्णस्य । तव तेन रामेण अभिमर्शनं आक्रमणमिति यत् एतद्रामस्य न श्रद्दधामि रामसंबन्धिकर्मेति न श्रद्दधामि ॥ ८ ॥ रावणवधस्य मानुषे-

---

स० त्रस्यतिस्म ॥ ३ ॥ स० उद्वेगात् तंप्राप्य । शोकातिशयाद्विवेकाभावादनुदाहार्यस्यापिक्रुध्यादेरद्वेषिणोप्युद्वेगोक्तिरिति

[पा०] १ ख. च. छ. ञ. ट. रावणयोषितां. २ ख. ङ. ञ. ञ. ज्येष्ठपत्नी. ३ ज. कृपणं. ४ क.—ट. महाबाहो. ५ ख. च. छ. ञ. महात्मानो. ङ. ञ. ट. महान्तोपि. ६ घ. नभोगताः. ७ इदमर्धं घ. पाठेदृश्यते. ८ ङ. ज. मनुष्याणां. ९ ञ. तेनाभिमर्षणं. १० यदैवचजनस्थानइत्यादिश्लोकद्वयं ग. ङ. ञ. ञ. ट. पाठेषु इन्द्रियाणिपुराजित्वेतिश्लोकानन्तरंदृश्यते.

यदैव नगरीं लङ्कां दुष्प्रवेशां सुरैरपि ॥ प्रविष्टो हनुमान्वीर्यात्तदैव व्यथिता वयम् ॥ १० ॥
यदैव वानरैर्घोरैर्बद्धः सेतुर्महार्णवे ॥ तदैव हृदयेनाहं शङ्के रामममानुषम् ॥ ११ ॥
अथवा रामरूपेण कृतान्तः स्वयमागतः ॥ मायां तव विनाशाय विधायाप्रतितर्किताम् ॥ १२ ॥
अथवा वासवेन त्वं धर्षितोसि महाबल ॥ वासवस्य कुतः शक्तिस्त्वां द्रष्टुमपि संयुगे ॥
[महाबलं महावीर्यं देवशत्रुं महौजसम् ॥ १३ ॥]
व्यक्तमेष महायोगी परमात्मा सनातनः ॥ अनादिमध्यनिधनो महतः परमो महान् ॥ १४ ॥

णाकृतत्वे केन कृतः स्यादित्याशङ्क्य पक्षान्तरमुपक्षिपति—यदैवेत्यादिना ॥ ९—११ ॥ एवं सामान्यतो रामस्यामानुषत्वं प्रतिपाद्य उत्तरोत्तरोत्कृष्टयमेन्द्रादिदेवताविशेषत्वं प्रतिपादयति—अथवेत्यादिना ॥ मायां सीतारूपां । अप्रतितर्कितां अपरिमेयरूपलावण्यां ॥ १२—१३ ॥ यदैवेत्यादिना सामान्यतउपन्यस्तममानुषत्वमेकत्र व्यवस्थापयितुमाह—व्यक्तमित्यादिना ॥ महायोगित्वादिगुणविशिष्टो यो विष्णुः स एवैष राम इति स्त्रीवचनमुखेनैव विष्णोः सर्वदेवतापारम्यं भगवान्वाल्मीकिर्व्यवस्थापयति । महान् योगः लोकरक्षणोपायचिन्ता सोस्यास्तीति महायोगी । परमश्चासावात्मा च परमात्मा । सर्वजीवात्मभ्य उत्कृष्ट इत्यर्थः । परमत्वमस्य कथमित्याशङ्क्य षड्भावविकाररहितत्वादित्याह—सनातन इति। सदास्तित्वयुक्त इत्यर्थः।अनादिमध्यनिधनः जन्मवृद्धिविनाशशून्यः।शाश्वतः अपक्षयरहितः। ध्रुवः परिणामरहितः । एतैर्विशेषणैर्जीवगतषड्भावविकारशून्यत्वमुक्तं । तथोक्तं विष्णुपुराणे—"अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः। वर्जितः शक्यते वक्तुं यः सदास्तीति केवल" इति॥ परमात्मशब्दार्थं विवृणोति—महतः परमो महानिति । महान् इन्द्रादिः । तस्मान्महान् ब्रह्मादिः । तस्मादपि महानित्यर्थः । स्थानविशेषेणापि परमत्वमाह—तमस इति ॥ तमसः प्राकृतमण्डलस्य परमः परस्तादप्राकृते वैकुण्ठे विद्यमानः । " आदित्यवर्णं तमसः परस्तात् " " आदित्यवर्णं तमसस्तु पारे " इति श्रुतेः । सर्वत्र व्याप्तस्य कथं तत्रावस्थानमित्याशङ्क्य विग्रहद्वारेत्याह—शङ्खेत्यादिना । सदा शङ्खचक्रधारणप्रयोजनमाह—धाते-

ज्ञेयं ॥ ४ ॥ **तनिश्लोकी** व्यक्तमेषः परिशेषतःप्रमाणेननिश्चितोदशग्रीवहन्तारामः महायोगी महासन्नहनः आश्रितत्राणसंनाहवान् । महायोगी विविधविचित्रजगन्निर्माणोपायचतुरः । महायोगी ' बहुस्यांप्रजायेयेति ' इत्याद्युक्तबहुभवनसंकल्पवान् । ' सोभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाःप्रजाः ' इतिमनुस्मरणात् । महायोगी जगन्निर्माणोपयुक्तप्रकृतिपुरुषकारकर्मसंसर्गवान् । महायोगी शरणागतरक्षणादिष्वसंचाल्ययुक्तिमान् । ' योगःसन्नहनोपायध्यानसंगतियुक्तिषु ' इत्यमरः । परमात्मा चेतनाचेतनशरीरः । सकलशरीरत्वप्रसक्तदोषासंस्पर्शमाह—**सनातनइति** । अनादिमध्यनिधनः आदिमध्यान्तशून्यः । " महतः परमोमहान्—अणोरणीयान्महतोमहीयान् " इत्याद्युक्तपरममहत्त्ववान् । तमसःपरमः 'अक्षरात्परतःपरः " यस्मात्क्षरमतीतोऽहमक्षरादपिचोत्तमः" इतिश्रुतिस्मृतिभ्यां । तमसःपरमः " आदित्यवर्णंतमसःपरस्तात् " इत्युक्तपरमपदवासी । धाता भूतभविष्यद्वर्तमानकालावच्छिन्नसकलजगन्निर्माता । " सूर्याचन्द्रमसौधातायथापूर्वमकल्पयत् " इतिश्रुतेः । धाता स्थितिकर्ता । साचस्थितिरनेकरूपाजगद्विविधकरणेन । " डुधाञ् धारणपोषणयोः " इतिधातोः धारणं प्रशासनाधीनलोकत्वं । ' एतस्यवाअक्षरस्यप्रशासने ' इत्यादिश्रुतेः । एवंकारणस्वरूपमुपास्यं तदुपयुक्तागुणाश्चोक्ताः । अथदिव्यमङ्गलविग्रहयोगमाह—शङ्खचक्रगदाधरइति । अनेनोपास्यत्वानुगुणशरणागतविरोधिनिरसनजागरूकत्वमुक्तं । श्रीवत्सवक्षाः श्रीवत्सकौस्तुभादीनांनित्यत्वाद्रुद्रादिवैलक्षण्यमुक्तं । नित्यश्रीरिति । नित्या अनपायिनीश्रीर्यस्यसः । अत्रविग्रहनित्यत्वमेवोक्तं स्वरूपनित्यत्वस्यसाधारणप्राप्तत्वात् । नित्यैवैषाजगन्मातेतियावत् । श्रीसंबन्धादुत्तेजितपराभिभवनसामर्थ्यमाह—अजेयइति । "अप्रमेयंहितत्तेजोयस्यसाजनकात्मजा" इतिह्युक्तं । अजेयः उपायव्यतिरिक्तैर्जेतुमशक्यः । ' अप्रधृष्यश्चसंग्रामेसेन्द्रैरपिसुरासुरैः ' इत्याद्युक्तरीत्याजेतुमशक्यः । शाश्वतः त्रिविधपरिच्छेदरहितः विकारशून्यश्च । ध्रुवः अप्रकंप्यः । अत्रधातेतिरूढ्याविशेषणनिर्देशः । " अनादिनिधनोधाता " इतिसहस्रनामपाठात् । नित्यश्रीरितिच ॥ **ती०** महायोगी स्वाभाविकज्ञानशक्तियुक्तः " परास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाच " इतिश्रुतेः । **शि०** सनातनः सनंब्रह्माणमातनोतीतिसनातनः । सत्यपरानाक्रमते अतिसत्यवक्तेत्यर्थः ॥ **स०** सनादनः दस्तकारस्यनिर्वचनत्वात् । नादेन वेदवादादिनासहितःसनादः । सएवसनादनः । सएवसनातनः । यथोक्तंगीतातात्पर्येना-

[पा०] १ अयंश्लोकः झ. पाठेनदृश्यते. २ इदमर्धं क. ग. घ. ज. झ. पाठेषुदृश्यते.

तमसः परमो धाता शङ्खचक्रगदाधरः ॥ श्रीवत्सवक्षा नित्यश्रीरजय्यः शाश्वतो ध्रुवः ॥ १५ ॥
मानुषं वपुरास्थाय विष्णुः सत्यपराक्रमः ॥ सर्वैः परिवृतो देवैर्वानरत्वमुपागतैः ॥ १६ ॥
सर्वलोकेश्वरः साक्षाल्लोकानां हितकाम्यया ॥ सराक्षसपरीवारं हतवांस्त्वां महाद्युतिः ॥ १७ ॥
इन्द्रियाणि पुरा जित्वा जितं त्रिभुवनं त्वया ॥ स्मरद्भिरिव तद्वैरमिन्द्रियैरेव निर्जितः ॥ १८ ॥
क्रियतामविरोधश्च राघवेणेति यन्मया ॥ उच्यमानो न गृह्णासि तस्येयं व्युष्टिरागता ॥ १९ ॥
अकस्माच्चाभिकामोसि सीतां राक्षसपुङ्गव ॥ ऐश्वर्यस्य विनाशाय देहस्य स्वजनस्य च ॥ २० ॥
अरुन्धत्या विशिष्टां तां रोहिण्याश्चापि दुर्मते ॥ सीतां धर्षयता मान्यां त्वया ह्यसदृशं कृतम् ॥२१॥
वसुधायाश्च वसुधां श्रियः श्रीं भर्तृवत्सलाम् ॥ सीतां सर्वानवद्याङ्गीमरण्ये विजने शुभाम् ॥ २२ ॥
आनयित्वा तु तां दीनां छद्मनाऽऽत्मस्वदूषण ॥ अप्राप्य चैव तं कामं मैथिलीसंगमे कृतम् ॥
पतिव्रतायास्तपसा नूनं दग्धोसि मे प्रभो ॥ २३ ॥
तदैव यन्न दग्धस्त्वं धर्षयंस्तनुमध्यमाम् ॥ देवा बिभ्यति ते सर्वे सेन्द्राः साग्निपुरोगमाः ॥ २४ ॥

ति । धाता पोषकः । " डुधाञ् धारणपोषणयोः " इत्यस्मात्तृच् । सर्वदा रक्षणार्थमायुधधारणमित्यर्थः । तथोक्तमियुक्तैः—" पातु प्रणतरक्षायां विलम्बमसहन्निव । सदा पञ्चायुधीं बिभ्रत्स नः श्रीरङ्गनायकः " इति ॥ तस्य सर्वेश्वरत्वद्योतकं लक्षणमाह—श्रीवत्सवक्षा इति । श्रीकरो वत्सः श्रीवत्सः स च रक्तवर्णो मत्स्यविशेषः सः वक्षसि दक्षिणे यस्य स श्रीवत्सवक्षाः । जगद्रक्षणोपयोगिपुरुषकारसंबन्धमाह—नित्यश्रीरिति । नित्या अनपायिनी श्रीर्यस्यासौ नित्यश्रीः । " विष्णोः श्रीरनपायिनी " इत्यन्यत्रोक्तेः । अत एवाजय्यः जेतुमशक्यः । " क्षय्यजय्यौ शक्यार्थे " इति निपातनात् । एष रामः एवंभूतः परमात्मा व्यक्तं निश्चितमिति संबन्धः ॥१४—१५॥ एवंभूतस्य परमात्मनः किमर्थमेवं व्यापार इत्यत्राह द्वाभ्यां—मानुषमित्यादि ॥ सर्वलोकेश्वरः सर्वलोकानां नियन्ता अनिष्टनिवृत्तीष्टप्रापणयोः कर्ता । विष्णुः विष्णुसकाशादविनाशित्ववरं परिहर्तुं मानुषं वपुः आस्थाय परिगृह्य साक्षात् अव्यवधानेन लोकानां हितकाम्यया लोकहितेच्छया सर्वलोकविरोधिनं त्वां हतवान् । व्यक्तमित्यत्रानुषज्यते ॥ १६—१७ ॥ त्वद्दोषकृत एवायं वध इत्याह—इन्द्रियाणीति ॥१८॥ एवं सर्वज्ञा त्वं पूर्वं किमिति नोक्तवतीत्यत्राह—क्रियतामिति ॥ न गृह्णासि नागृह्णाः । व्युष्टिः फलं । " व्युष्टिः फले समृद्धौ च " इत्यमरः ॥ १९ ॥ अकस्मान्निर्हेतुकं सीतामुद्दिश्य अभिकामोसि अभिलाष्यसि तां प्रति त्वदभिलाषोऽयुक्त इत्यर्थः ॥२०॥ अयुक्ततामेवाह—अरुन्धत्या इति ॥ विशिष्टां उत्कृष्टां । मान्यामित्यनेन न केवलमरुन्धत्यादिवत्पातिव्रत्यमात्रं किंतु मातृत्वं चेत्युच्यते । असदृशं अनुचितं ॥ २१ ॥ सा पतिव्रता चेत् किमर्थं न दग्धवतीत्यत्राह—वसुधाया इत्यादिसार्धश्लोकद्वयेन ॥ वसुधायाश्च वसुधां अत्यन्तक्षमावतीमित्यर्थः । श्रीमित्यत्र इयङभाव आर्षः । सर्वसंपदधिष्ठात्रीमित्यर्थः । भर्तृवत्सलां पतिव्रतां । सर्वानवद्याङ्गीं अनवद्यसर्वाङ्गीं । अरण्ये विजने स्थितामिति शेषः । दीनां त्वदनमिलाषिणीमित्यर्थः । छद्मना मारीचमुखेन आनयित्वा । तं पूर्वमुक्तं । पतिव्रतायास्तस्यास्तपसा दग्धोसि । मे प्रभो इत्यनेन अस्य सर्वस्य मद्दौर्भाग्यमेव निमित्तमिति द्योत्यते । आत्मस्वदूषणेत्यनेन निजस्वभूताया मम त्यागे त्वद्दूषणमेवहेतुः न त्वस्मत्सौन्दर्यहानिरित्युच्यते ॥ २२—२३ ॥ तनुमध्यमां धर्षयन्सन् त्वं तदैव न दग्ध इति यत् तेन माहात्म्येन त्वत्तो देवा बिभ्यती-

देनसहवर्ततइतिसनादनः । सएवसनातनः । ' निषेधविधिपात्रत्वात्सनातनइतिस्मृतः ' इति ॥ १४—१५ ॥ ति० सराक्षसपरीवारं राक्षसरूपपरीवारसहितं । हतवानितिशेषः ॥ १७ ॥ ती० श्लोकान्तर्भूतस्यरावणस्यहननेसर्वलोकेश्वरस्यरामस्यवैषम्यनैर्घृण्येनस्तइत्याशयेनाह—इन्द्रियाणीति ॥ ति० देवशत्रुंभयावहमित्यनेनभगवतोवैषम्यनैर्घृण्येपरिहृते । अवतारप्रयोजनंरावणवधप्रयोजनंचदेवभयनिवृत्तिरूपंदर्शितं । पुरा भगवदुद्देशेनतपोनुष्ठानकाले ॥ १८ ॥ ति० मान्यां उपास्यदेवतां ॥ २१ ॥ शि० विजने

[पा०] १ क. ख. ङ. च. छ. झ. ञ. ट. रूपमास्थाय. २ ङ.—ट. श्रीमाँल्लोकानां. ३ झ. परीवारंदेवशत्रुंभयावहं.

अवश्यमेव लभते फलं पापस्य कर्मणः ॥ घोरं पर्यागते काले कर्ता नास्त्यत्र संशयः ॥ २५ ॥
शुभकृच्छुभमाप्नोति पापकृत्पापमश्नुते ॥ विभीषणः सुखं प्राप्तस्त्वं प्राप्तः पापमीदृशम् ॥ २६ ॥
सन्त्यन्याः प्रमदास्तुभ्यं रूपेणाभ्यधिकास्ततः ॥ अनङ्गवशमापन्नस्त्वं तु मोहान्न बुध्यसे ॥ २७ ॥
न कुलेन न रूपेण न दाक्षिण्येन मैथिली ॥ मयाऽधिका वा तुल्या वा त्वं तु मोहान्न बुध्यसे ॥२८॥
सर्वथा सर्वभूतानां नास्ति मृत्युरलक्षणः ॥ तव तावदयं मृत्युर्मैथिलीकृतलक्षणः ॥ २९ ॥
सीतानिमित्तजो मृत्युस्त्वया दूरादुपाहृतः ॥ ३० ॥
मैथिली सह रामेण विशोका विहरिष्यति ॥ अल्पपुण्या त्वहं घोरे पतिता शोकसागरे ॥ ३१ ॥
कैलासे मन्दरे मेरौ तथा चैत्ररथे वने ॥ देवोद्यानेषु सर्वेषु विहृत्य सहिता त्वया ॥ ३२ ॥
विमानेनानुरूपेण यायाम्यतुलया श्रिया ॥ पश्यन्ती विविधान्देशांस्तांस्तांश्चित्रस्रगम्बरा ॥
भ्रंशिता कामभोगेभ्यः साऽस्मि वीर वधात्तव ॥ ३३ ॥
सैवान्येवास्मि संवृत्ता धिग्राज्ञां चञ्चलाः श्रियः ॥ ३४ ॥
हा राजन्सुकुमारं ते सुभ्रु सुत्वक्समुन्नसम् ॥ कान्तिश्रीद्युतिभिस्तुल्यमिन्दुपद्मदिवाकरैः ॥ ३५ ॥
किरीटकूटोज्ज्वलितं ताम्रास्यं दीप्तकुण्डलम् ॥ मदव्याकुललोलाक्षं भूत्वा यत्पानभूमिषु ॥ ३६ ॥
विविधस्रग्धरं चारु वल्गुस्मितकथं शुभम् ॥ तदेवाद्य तवेदं हि वक्त्रं न भ्राजते प्रभो ॥ ३७ ॥
रामसायकनिर्भिन्नं सिक्तं रुधिरविस्रवैः ॥ विशीर्णमेदोमस्तिष्कं रूक्षं स्यन्दनरेणुभिः ॥ ३८ ॥

ति संबन्धः । भीता देवाः कथं ते धर्षणफलं दाहं दद्युरिति भावः ॥ २४ ॥ कर्ता घोरं पापस्य फलं काले पर्यागते प्राप्ते अवश्यं लभते नात्र संशयः ॥ २५ ॥ पापं दुःखं ॥ २६ ॥ तुभ्यं तव । ततः तस्याः सीतायाः । न बुध्यसे । अभ्यधिकत्वमिति शेषः ॥ २७ ॥ मैथिली मया कुलेन तुल्या अधिका वा न इत्येवं योज्यं । दाक्षिण्येन विद्यासामर्थ्येन ॥ २८ ॥ अलक्षणः निर्निमित्तः । मैथिल्याः कृतं मैथिलीकृतं मैथिल्यानयनमित्यर्थः । तदेव लक्षणं निमित्तं यस्य स तथा ॥२९—३१॥ कैलास इत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ याहं कैलासादिषु विहृत्य विमानेन विविधान्देशान्पश्यन्ती यामि अथ सा भ्रंशिताऽस्मीत्येवं संबन्धः ॥ ३२—३३ ॥ सैवेत्यर्धं ॥ सैव एवमुक्तभोगैव । अन्येव अस्पृष्टभोगेव ॥ ३४ ॥ एवं रावणस्य मतिं राज्यश्रियं च निन्दित्वा भर्तृसौन्दर्यवैपरीत्यं शोचति—हा राजन्नित्यादिश्लोकचतुष्टयमेकान्वयं ॥ सुत्वक् स्निग्धत्वक् । समुन्नसं समुन्नतनासिकं । कान्तिः प्रभा । श्रीः सौन्दर्यं । द्युतिः तेजः । किरीटकूटोज्ज्वलितं शिखरतुल्यकिरीटविराजितं । ताम्रास्यं रक्ताधरमित्यर्थः । चारु सुन्दरं तव यद्वक्त्रं मदव्याकुललोलाक्षं भूत्वा अभ्राजत तदेवेदं वक्त्रमद्य न भ्राजते । अप्रकाशनिमित्तमाह—रामेति ॥ विस्रवैः प्रवाहैः । मेदः वसा । मस्तिष्कं मांस-

विरुद्धजनसहिते ॥ २२ ॥ शि० मैथिली कुलादिनामयालक्ष्म्या अधिकैव नतुतुल्या । तदितिमोहात् मोहंप्राप्यविद्यमानोपित्वं नबुध्यसे काक्षाबुध्यसएवेत्यर्थः । एतेन पूजाबुद्ध्यैवतस्याःस्वीकारस्त्वयाकृतइतिसूचितं ॥ २८ ॥ ति० सैवाहंसौभाग्यलक्षणवत्येव तववधादन्येव विधवेवसंवृत्तेत्यर्थः । अत्रान्येवेतीवकारेणदेवस्थित्या । वस्तुतोऽवैधव्यंसूचितं ॥ ३४ ॥ ति० कान्तिराह्लादकारीप्रभा । तयाचन्द्रतुल्यं । श्रीरुज्ज्वलता । तयापद्मवत् । द्युतिः पराभिभवसामर्थ्यंतेजः । तेनरवितुल्यं ॥ ३५ ॥ स० ननुश्रीमन्महाभारतेवनपर्वणि ' शरीरधातवोह्यस्यमांसंरुधिरमेवच । नेशुर्ब्रह्मास्त्रनिर्दग्धंनचभस्माप्यदृश्यत ' इतिरावणशरीरभस्मनोप्यदर्शनोक्तेःकथमेवंतच्छिरोवर्णनमितिचेन्न । ब्रह्मास्त्रनिर्दग्धंमांसंरुधिरंचेत्येतेअस्यशरीरधातवोनेशुः अदर्शनंगताः । ब्रह्मास्त्रदाहेदेहस्यभस्मदृश्येत कथंशरीरस्यदर्शनमित्यतआह—नचेति । भस्मापि भस्मतु नदृश्यते विचित्रोऽयंदाहइतिभारतस्यैतदर्थकताङ्गीकारेणाविरोधोपपत्तेः । तथाचोक्तमाचार्यैः "बाणेनवज्रसदृशेनसभिन्नहृत्कोरक्तंवमन्यपतदाशुमहाविमानात्" इति । तथैवचपाद्मोत्त-

[पा०] १ ङ. भर्तःपर्यागते. क. घ. नूनंपर्यागते. २ ज. पापःपापं. ३ क. रूपेणाप्रतिमाभुवि. ४ च. छ. कीर्तिश्री.

हा पश्चिमा मे संप्राप्ता दशा वैधव्यकारिणी ॥ या मयाऽऽसीन्न संबुद्धा कदाचिदपि मन्दया॥३९॥
पिता दानवराजो मे भर्ता मे राक्षसेश्वरः ॥ पुत्रो मे शक्रनिर्जेता इत्येवं गर्विता भृशम् ॥ ४० ॥
दृप्तारिमर्दनाः शूराः प्रख्यातबलपौरुषाः ॥ अकुतश्चिद्भया नाथा ममेत्यासीन्मतिर्दृढा ॥ ४१ ॥
तेषामेवंप्रभावानां युष्माकं राक्षसर्षभ ॥ कथं भयमसंबुद्धं मानुषादिदमागतम् ॥ ४२ ॥
स्निग्धेन्द्रनीलनीलं तु प्रांशुशैलोपमं महत् ॥ केयूराङ्गदवैडूर्यमुक्तादामसगुज्ज्वलम् ॥ ४३ ॥
कान्तं विहारेष्वधिकं दीप्तं संग्रामभूमिषु ॥ [विनीतं गुरुपूजासु शान्तं शङ्करपूजने ॥]
भात्याभरणभाभिर्यद्विद्युद्भिरिव तोयदः ॥ ४४ ॥
तदेवाद्य शरीरं ते तीक्ष्णैर्नैकैः शरैश्चितम् ॥ पुनर्दुर्लभसंस्पर्शं परिष्वक्तुं न शक्यते ॥ ४५ ॥
श्वाविधः शल्लकैर्यद्वद्बाणैर्लग्नैर्निरन्तरम् ॥ स्वर्पितैर्मर्मसु भृशं संछिन्नस्नायुबन्धनम् ॥
क्षितौ निपतितं राजञ्श्यावं रुधिरसच्छवि ॥ ४६ ॥
वज्रप्रहाराभिहतो विकीर्ण इव पर्वतः ॥ ४७ ॥
हा स्वप्नः सत्यमेवेदं त्वं रामेण कथं हतः ॥ त्वं मृत्योरपि मृत्युः स्याः कथं मृत्युवशं गतः ॥४८॥
त्रैलोक्यवसुभोक्तारं त्रैलोक्योद्वेगदं महत् ॥ जेतारं लोकपालानां क्षेप्तारं शंकरस्य च ॥ ४९ ॥
दृप्तानां निगृहीतारमाविष्कृतपराक्रमम् ॥ लोकक्षोभयितारं च नादैर्भूतविराविणम् ॥ ५० ॥

विशेषः ॥ ३५—३८ ॥ मे वैधव्यकारिणी ते पश्चिमावस्था मृतिः संप्राप्ता ॥ ३९ ॥ अस्थिरस्य देहस्य विनाशः कुतो न संबुद्ध इत्यत्राह—पितेति ॥ दानवराजः मयः ॥ ४०—४१ ॥ तेषामिति ॥ तेषु युष्मास्वेवंप्रभावेष्वित्यर्थः । मयस्य मरणाभावेपि इदानीमकार्यकरत्वादेवमुक्तं । असंबुद्धं पूर्वमचिन्तितं ॥ ४२ ॥ स्निग्धेत्यादि सार्धश्लोकचतुष्टयमेकान्वयं ॥ प्रांशुशैलः उन्नतशैलः । अङ्गदवैडूर्यं वैडूर्यमयाङ्गदमिति केयूराद्भेदः । यच्छरीरं भाति आलिङ्गनयोग्यमभूत् । तदेव शरीरं दुर्लभसंस्पर्शं सत् पुनः परिष्वक्तुं न शक्यते । दुर्लभसंस्पर्शत्वमुपपादयति—श्वाविधः इत्यादिना ॥ श्वाविधं शल्यमृगस्य शललैः तल्लोमभिः यद्वत् यथा । कण्टकाकारश्वाविल्लोमतुल्यैरिति शरविशेषणं । मर्मसु स्वर्पितैः क्षिप्तैः । तत्रैव मर्मसु निरन्तरं लग्नैरिति योजना । श्यावं कपिशवर्णं । " श्वावित्तु शल्यस्तल्लोम्नि शलली शललं शलम्। 'श्याव: स्यात्कपिशः " इत्युभयत्राप्यमरः । स्नायवः धमन्यः । रुधिरसच्छवि रुधिरतुल्यकान्ति । स्वकान्तिं विहाय रुधिरकृतकान्त्यन्तरमित्यर्थः ॥४३-४६॥ वज्रेत्यर्धं ॥ असीति शेषः ॥ ४७ ॥ इदं ते मरणं स्वप्नः स्वप्नानुभवविषयः । सत्यमेव नात्र संशयः । तत्र हेतुमाह—त्वमिति । तत्रापि हेतुमाह—त्वं मृत्योरिति ॥ ४८ ॥ त्रैलोक्येत्यादि हतप्रियेत्यन्तं श्लोकाष्टकमेकं वाक्यं ॥ एवंभूतं भर्तारं दृष्ट्वा या इमं देहं धारयामि साहं स्थिरास्मि वज्रसारमय्यस्मि । कथमन्यथा न शीर्येदिति भावः । महदिति त्रैलोक्यवसुविशेषणं । यद्वा त्रैलोक्योद्वेगदं महद्वसु महत् यथा भवति तथा त्रैलोक्योद्वेगदमिति वा । उद्वेगो भयसंभ्रमः । शंकरस्य क्षेप्तारं कैलासचलनद्वारा । स्वयूथाः स्वबन्धवः निवातकवचा नाम केचनासुराः । तेषां संग्रहीतारं तैः सख्यकृतमित्यर्थः । स्वजनस्य स्वाश्रितजनस्य धर्मव्यवस्था आचारव्यवस्था । यज्ञकर्मभेक्तृत्वकथनेनातीव स्वतन्त्रत्वमुक्तं । कन्यानामिति । स्त्रीमात्रमुच्यते । स्वजनस्य नेतारमिति । पूर्वत्रानिष्टनिवर्तकत्वमुक्तं । अत्रेष्टप्रापकत्वं । भीमकर्मणां

रखण्डे " सगतासुर्महादैत्यःपपातचममारच " इत्यादि ॥ ३८ ॥ स० मुक्ताहारस्नगुज्ज्वलं मुक्तानांहाराः । स्रजः इतरामणिमय्यः । ताभिरुज्ज्वलं । यद्वा मुक्तानांहारः परस्परंसंघर्षजंयुद्धमिव । स यासांताःस्रजोमुक्तामालाः । तदुज्ज्वलं । 'हारोमुक्ताव-

[पा०] १ ङ. च. छ. झ. ञ. वैधव्यदायिनी. २ क.—ट. इत्यहं. ३ ख. च. छ. ज. नीलसदृशं. ज. ट. नीलसंकाशं. ४ इदमर्धं क. ख. च. छ. ज. पाठेषुदृश्यते. ५ ङ. च. छ. झ. ञ. शललैर्युक्तंलमैर्बाणैः. ६ ख. श्यामंशरीरंरुधिरच्छवि. ७ ङ. झ. साभ्रभूतविदारणं.

ओजसा दृप्तवाक्यानां वक्तारं रिपुसन्निधौ ॥ स्वयूथभृत्यवर्गाणां गोप्तारं भीमकर्मणाम् ॥ ५१ ॥
हन्तारं दानवेन्द्राणां यक्षाणां च सहस्रशः ॥ निवातकवचानां च संग्रहीतारमीश्वरम् ॥ ५२ ॥
नैकयज्ञविलोप्तारं त्रातारं स्वजनस्य च ॥ धर्मव्यवस्थाभेत्तारं मायास्रष्टारमाहवे ॥ ५३ ॥
देवासुरनृकन्यानामाहर्तारं ततस्ततः ॥ शत्रुस्त्रीशोकदातारं नेतारं स्वजनस्य च ॥ ५४ ॥
लङ्काद्वीपस्य गोप्तारं कर्तारं भीमकर्मणाम् ॥ अस्माकं कामभोगानां दातारं रथिनांवरम् ॥ ५५ ॥
एवंप्रभावं भर्तारं दृष्ट्वा रामेण पातितम् ॥ स्थिराऽस्मि या देहमिमं धारयामि हतप्रिया ॥ ५६ ॥
शयनेषु महार्हेषु शयित्वा राक्षसेश्वर ॥ इह कस्मात्प्रसुप्तोसि धरण्यां रेणुपाटलः ॥ ५७ ॥
यदा मे तनयः शस्तो लक्ष्मणेनेन्द्रजिद्युधि ॥ तदास्म्यभिहता तीव्रमद्य त्वय्यिनिपातिता ॥ ५८ ॥
नाहं बन्धुजनैर्हीना हीना नाथेन तु त्वया ॥ विहीना कामभोगैश्च शोचिष्ये शाश्वतीः समाः ॥५९॥
प्रपन्नो दीर्घमध्वानं राजन्नद्यासि दुर्गमम् ॥ नय मामपि दुःखार्तां नं जीविष्ये त्वया विना ॥६०॥
कस्मात्त्वं मां विहायेह कृपणां गन्तुमिच्छसि ॥ दीनां विलपितैर्मन्दां किंवा मां नाभिभाषसे ॥६१॥
दृष्ट्वा न खल्वसि क्रुद्धो मामिहानवकुण्ठिताम् ॥ निर्गतां नगरद्वारात्पद्भ्यामेवागतां प्रभो ॥ ६२ ॥
पश्येष्टदार दारांस्ते भ्रष्टलज्जावकुण्ठितान् ॥ बहिर्निष्पतितान्सर्वान्कथं दृष्ट्वा न कुप्यसि ॥ ६३ ॥
अयं क्रीडासहायस्तेऽनाथो लालप्यते जनः ॥ न चैनमाश्वासयसे किं वा न बहुमन्यसे ॥ ६४ ॥
यास्त्वया विधवा राजन्कृता नैकाः कुलस्त्रियः ॥ पतिव्रता धर्मपरा गुरुशुश्रूषणे रताः ॥
ताभिः शोकाभितप्ताभिः शप्तः परवशं गतः ॥ ६५ ॥
त्वया विप्रकृताभिर्यत्तदा शप्तं तदागतम् ॥ ६६ ॥
प्रवादः सत्य एवायं त्वां प्रति प्रायशो नृप ॥ पतिव्रतानां नाकस्मात्पतन्त्यश्रूणि भूतले ॥ ६७ ॥
कथं च नाम ते राजँल्लोकानाक्रम्य तेजसा ॥ नारीचौर्यमिदं क्षुद्रं कृतं शौण्डीर्यमानिना ॥ ६८ ॥

स्वशिरोहवनादीनां ॥ ४९—५७ ॥ शस्तः हतः । तदा अभिहता प्रहृता । अद्य अस्मिन् त्वद्धनने सति तीव्रं निपातिता । मारितेत्यर्थः ॥ ५८ ॥ बन्धुजनैः हीनाहं न शोचिष्ये यदि त्वं स्थितः स्याः । किंतु त्वया हीना अत एव कामभोगैर्हीना शोचिष्य इति योजना ॥ ५९ ॥ दीर्घमध्वानं वीरस्वर्गं ॥ ६० ॥ विलपितैः प्रलापैः । दीनां मन्दां अभाग्यां ॥६१॥ अनवकुण्ठितां अनावरणां । इहागतामित्यन्वयः ॥ ६२ ॥ इष्टदारेति संबुद्धिः । भ्रष्टलज्जावकुण्ठितान् हीनलज्जावकुण्ठितान् ॥६३॥ नाथो लालप्यत इति पाठे अनाथ इति छेदः ॥६४॥ यास्त्वयेत्यादिसार्धश्लोक एकान्वयः॥ परवश परवशत्वं । शत्रुवशत्वमिति यावत् ॥ ६५ ॥ त्वयेत्यर्धं ॥ त्वया विप्रकृताभिः परिभूताभिः । तदा भर्तृवधकाले यच्छप्तं तत् आगतं फलदमासीदित्यर्थः ॥ ६६ ॥ पतिव्रतानामश्रूणि अकस्मान्निर्हेतुकतया भूतले न पतन्ति । पतन्ति चेत् किंचित्कुर्वन्त्येव । इत्येवं प्रायशः प्रवादः जनवार्ता । त्वां प्रत्येव सत्यः यथार्थो जातः । पतिव्रतानामास्रपातकरणमनर्थावहमित्येवं जनवादः तथा कुर्वति त्वयि दृष्टफल आसीदित्यर्थः ॥ ६७ ॥ शौण्डीर्यमानिना

लौयुद्धे ' इतिविश्वः ॥ ४३ ॥ स० शस्तः विशस्तः । अभिहता अभिघातमात्रंप्राप्ता । अद्यतु निपातितास्मि । सतित्वयिमयि जायेततनयइत्याशासंभवादभिहतमात्रता मारणेइन्द्रजितः । इदानींतवनाशान्नाऽऽशाऽवकाशमासादयतीतिनिपातितेतिसंभवतीतिभावः ॥ ५८ ॥ स० शाश्वतीःसमाः यावदायुः ॥ ५९ ॥ स० नयमां नवियतेयमोयस्याःसा तामपिमां । नय त्वयासहेतिशेषः । इतित्रिकोर्थः ॥ ६० ॥

[पा०] १ घ. शक्रस्यशोक. २ ख. च. छ. नेतारंनिजसैनिकान्. ३ च. छ. हर्तारंबद्धवैरिणां. ४ ख. च. छ. ञ. स्थितास्म्यहंदेहं. ५ ङ. ञ. ञ. रेणुगुण्ठितः. ६ क.—ट. साहं. ७ ख. घ.—ञ. नवर्तिष्ये. ८ ङ. ञ. खल्वभिकुद्धो. ९ ङ. ञ. गुण्ठनान्.

अपनीयाश्रमाद्रामं यन्मृगच्छद्मना त्वया ॥ आनीता रामपत्नी सा तत्ते कातर्यलक्षणम् ॥ ६९ ॥
कातर्यं च न ते युद्धे कदाचित्संस्मराम्यहम् ॥ तत्तु भाग्यविपर्यासान्नूनं ते पक्वलक्षणम् ॥ ७० ॥
अतीतानागतार्थज्ञो वर्तमानविचक्षणः ॥ मैथिलीमाहृतां दृष्ट्वा ध्यात्वा निश्वस्य चायतम् ॥ ७१ ॥
सत्यवाक्स महाभागो देवरो मे यदब्रवीत् ॥ सोयं राक्षसमुख्यानां विनाशः पर्युपस्थितः ॥
कामक्रोधसमुत्थेन व्यसनेन प्रसङ्गिना ॥ ७२ ॥
निर्वृत्तस्त्वत्कृतेऽनर्थः सोयं मूलहरो महान् ॥ त्वया कृतमिदं सर्वमनार्यं राक्षसां कुलम् ॥ ७३ ॥
न हि त्वं शोचितव्यो मे प्रख्यातबलपौरुषः ॥ स्त्रीस्वभावात्तु मे बुद्धिः कारुण्ये परिवर्तते ॥ ७४ ॥
सुकृतं दुष्कृतं च त्वं गृहीत्वा स्वां गतिं गतः ॥ आत्मानमनुशोचामि त्वद्वियोगेन दुःखिता ॥७५॥
सुहृदां हितकामानां न श्रुतं वचनं त्वया ॥ भ्रातॄणां चापि कात्स्न्र्येन हितमुक्तं त्वयाऽनघ ॥७६॥
हेत्वर्थयुक्तं विधिवच्छ्रेयस्करमदारुणम् ॥ विभीषणेनाभिहितं न कृतं हेतुमत्त्वया ॥ ७७ ॥
मारीचकुम्भकर्णाभ्यां वाक्यं मम पितुस्तदा ॥ नँ श्रुतं वीर्यमत्तेन तस्येदं फलमीदृशम् ॥ ७८ ॥
नीलजीमूतसंकाश पीताम्बर शुभाङ्गद ॥ स्वगात्राणि विनिक्षिप्य किं शेषे रुधिराप्लुतः ॥
प्रसुप्त इव शोकार्तो किं मां न प्रतिभाषसे ॥ ७९ ॥
महावीर्यस्य दक्षस्य संयुगेष्वपलायिनः ॥ यातुधानस्य दौहित्र किं च मां नाभ्युदीक्षसे ॥ ८० ॥
उत्तिष्ठोत्तिष्ठ किं शेषे प्राप्ते परिभवे नवे ॥ अद्य वै निर्भया लङ्कां प्रविष्टाः सूर्यरश्मयः ॥ ८१ ॥
येन सूदयसे शत्रून्समरे सूर्यवर्चसा ॥ वज्रो वज्रधरस्येव सोयं ते सततार्चितः ॥ ८२ ॥
रणे शत्रुप्रहरणो हेमजालपरिष्कृतः ॥ परिघो व्यवकीर्णस्ते बाणैश्छिन्नः सहस्रधा ॥ ८३ ॥
प्रियामिवोपगुह्य त्वं शेषे समरमेदिनीम् ॥ अप्रियामिव कस्माच्च मां नेच्छस्यभिभाषितुम् ॥ ८४ ॥
धिगस्तु हृदयं यस्या ममेदं न सहस्रधा ॥ त्वयि पञ्चत्वमापन्ने फलते शोकपीडितम् ॥ ८५ ॥

शूरमानिना ॥ ६८ ॥ त्वया कर्त्रा मृगच्छद्मना मृगरूपकपटोपायेन । कातर्यलक्षणं कातर्यसूचनं ॥६९॥ ते युद्धे कातर्यं कदाचिदपि न स्मरामि न जानामीत्यर्थः । एवमकातरप्रकृतेस्तव भाग्यविपर्यासात् यत्कातर्यं चौर्यरूपमस्ति तत् पक्वलक्षणं पक्वलक्षणं विनाशज्ञापकमिति यावत् । महतो हीनकृत्यं हानिकरमिति लोकप्रवादादिति भावः ॥ ७० ॥ अतीतेत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ देवरो यदब्रवीत् अयं तद्वाक्यार्थभूतो विनाशः प्रसङ्गिना प्रसक्तेन व्यसनेन हेतुना पर्युपस्थितः ॥ ७१—७२ ॥ त्वत्कृते त्वन्निमित्तं । निर्वृत्तः प्रवृत्तः ॥ ७३ ॥ कारुण्ये दैन्ये ॥ ७४—७५ ॥ कात्स्न्र्येनोक्तं हितं त्वया न श्रुतमित्यनुषज्यते ॥ ७६ ॥ हेत्वर्थयुक्तं युक्तिप्रयोजनाभ्यां युक्तं । विधिवत् शास्त्रोक्तप्रकारवत् । श्रेयस्करं हितभूतं । अदारुणं सान्त्वपूर्वकं । विभीषणेनाभिहितं वचनं त्वया हेतुमद्युक्तिमद्यथा भवति तथा न गृहीतं । ज्ञातित्वेन मद्व्यसनं काङ्क्षसे इत्यादिना हेतूपपादनपूर्वकं न गृहीतमित्यर्थः ॥ ७७ ॥ मारीचकुम्भकर्णाभ्यां सह मम पितुर्मयस्य वाक्यं न श्रुतं । तस्य अश्रवणस्य ईदृशं फलं । आगतमिति शेषः । अत्रानुवादान्मयोप्यस्तीत्यवगन्तव्यं ॥ ७८ ॥ नीलेत्यादि सार्धश्लोक एकान्वयः ॥ विनिक्षिप्य भूमौ प्रसार्य प्रसुप्त इव शेषे, शोकार्तो मां च किमिति न प्रतिभाषस इत्यन्वयः ॥ ७९ ॥ यातुधानस्य माल्यवतः । सुमालिनो वा । तत्संबन्धकीर्तनमप्रतिहतकुलप्रभावप्रकटनार्थं ॥ ८०—८१ ॥ येनेत्यादिश्लोकद्वयमेकान्वयं ॥ ते त्वया । सततार्चितः बाणैः रामबाणैश्छिन्नः वज्रधरस्य वज्र इव स्थितः ते परिघः अद्य विशीर्णः ॥ ८२—८४ ॥ यस्या मम हृदयं न फलते न स्फुटति । तादृशीं मां धिगित्यन्वयः

[पा०] १ ङ. ञ. साऽपनीयचलक्ष्मणं. २ ट. महाबाहुर्देवरो. ३ क.—ट. अयं. ४ ङ. ञ. राक्षसंकुलं. ५ ङ. च. छ. ञ ञ. ट. लङ्घिनाशेन. ६ ख. ङ. ञ. ञ. ट. मुक्तंदशानन. ७ ङ. च. छ. ञ. ञ. नकृतं. ८ ङ. ञ. ञ. किंमांनप्रतिभाषसे.

इत्येवं विलपन्त्येव बाष्पव्याकुललोचना ॥ स्नेहावस्कन्नहृदया देवी मोहमुपागमत् ॥ ८६ ॥
कश्मलाभिहता सन्ना बभौ सा रावणोरसि ॥ संध्यानुरक्ते जलदे दीप्ता विद्युदिवासिते ॥ ८७ ॥
तथागतां समुत्पत्य सपत्न्यस्ता भृशातुराः ॥ पर्यवस्थापयामासू रुदन्त्यो रुदतीं भृशम् ॥ ८८ ॥
न ते सुविदिता देवि लोकानां स्थितिरध्रुवा ॥ दशाविभागपर्याये राज्ञां चञ्चलया श्रिया ॥ ८९ ॥
इत्येवमुच्यमाना सा सशब्दं प्ररुरोद ह ॥ स्रोपयन्ती त्वभिमुखौ स्तनावस्राम्बुविस्रवैः ॥ ९० ॥
एतस्मिन्नन्तरे रामो विभीषणमुवाच ह ॥ संस्कारः क्रियतां भ्रातुः स्त्रियश्चैता निवर्तय ॥ ९१ ॥
तं प्रश्रितस्ततो रामं श्रुतवाक्यो विभीषणः ॥ विमृश्य बुद्ध्या धर्मज्ञो धर्मार्थसहितं वचः ॥
रामस्यैवानुवृत्त्यर्थमुत्तरं प्रत्यभाषत ॥ ९२ ॥
त्यक्तधर्मव्रतं क्रूरं नृशंसमनृतं तथा ॥ नाहमर्होसि संस्कर्तुं परदाराभिमर्शिनम् ॥ ९३ ॥
भ्रातृरूपो हि मे शत्रुरेष सर्वाहिते रतः ॥ रावणो नार्हते पूजां पूज्योपि गुरुगौरवात् ॥ ९४ ॥
नृशंस इति मां कामं वक्ष्यन्ति मनुजा भुवि ॥ श्रुत्वा तस्यागुणान्सर्वे वक्ष्यन्ति सुकृतं पुनः ॥९५॥
तच्छ्रुत्वा परमप्रीतो रामो धर्मभृतां वरः ॥ विभीषणमुवाचेदं वाक्यज्ञो वाक्यकोविदम् ॥ ९६ ॥
तवापि मे प्रियं कार्यं त्वत्प्रभावाच्च मे जितम् ॥ अवश्यं तु क्षमं वाच्यो मया त्वं राक्षसेश्वरः ॥९७॥
अधर्मानृतसंयुक्तः कामं त्वेष निशाचरः ॥ तेजस्वी बलवाञ्शूरः संयुगेषु च नित्यशः ॥ ९८ ॥

॥ ८५ ॥ अवस्कन्नहृदया विलीनहृदया ॥ ८६ ॥ कश्मलेन अभिहता मूर्च्छिता । सन्ना कृशा ॥८७—८८ ॥ नेत्यादिश्लोकद्वयमेकान्वयं ॥ दशाविभागपर्याये दशानां बाल्यकौमारयौवनवार्धकाद्यवस्थानां विभागस्य भेदस्य पर्याये प्राप्तौ विषये लोकानामध्रुवा स्थितिः राज्ञां चञ्चलया श्रिया सह ते त्वया । सुविदिता नेति काकुः । सुविदितैवेत्यर्थः । लोकानां स्थितिरध्रुवेति राज्ञां श्रीश्चञ्चलेति च त्वया सुविदितैवेत्यर्थः । उच्यमाना बन्धुवृद्धादिभिरिति शेषः । अभिमुखौ उन्नतौ ॥ ८९—९१ ॥ प्रश्रितः विनयान्वितः । विमृश्य ' एतस्य यत्प्रेतगतस्य कृत्यं तत्कर्तुमिच्छामि तव प्रसादात् ' इत्युक्तमङ्गीकृतं विचिन्त्येत्यर्थः । रामस्यैवानुवृत्त्यर्थं रामेणानुज्ञातोस्मि चेत्तदा करिष्यामि नान्यथेत्येवमनुवृत्त्यर्थं ॥ ९२ ॥ त्यक्तेति । त्यक्तो धर्मो व्रतं च येन तं । अनृतं अनृतवादिनं ॥ ९३ ॥ गुरुगौरवात् गुरुरिति गौरवात् । पूज्योपि उक्तदोषान्मत्तः पूजां नार्हति ॥ ९४ ॥ भ्रातुः संस्काराकरणे त्वां नृशंसं लोका वक्ष्यन्तीत्याशङ्क्य वदन्तु नाम त एव पुनस्तद्गुणं विचारयन्तो मां युक्तकारिणं वक्ष्यन्तीत्याह—नृशंस इति ॥ संस्काराकरणे नृशंस इति मां कामं मनुष्या वक्ष्यन्ति । तस्य रावणस्य । अगुणान् दोषान् । श्रुत्वा असंस्कुर्वता विभीषणेन सुकृतं शोभनं कृतमिति वक्ष्यन्तीत्यर्थः ॥ ९५ ॥ परमप्रीतः सत्यवचनकथनादिति भावः । अप्रीत इति वा छेदः ॥ ९६ ॥ दोषसद्भावेपि गुणबाहुल्यादयं संस्कारयोग्य इत्याह—तवापीत्यादिना ॥ तव त्वया । मे प्रियमपि प्रियमेव । कार्यं । चो हेतौ । यस्मात्कारणात् त्वत्प्रभावात् मे मया जितं तस्मान्मया त्वं क्षमं हितमेव वाच्यः । मत्प्रियत्वात् त्वद्धितत्वाच्च रावणसंस्कारः क्रियतामित्यर्थः । यद्वा तवापि मे प्रियं कार्यं मद्वैरिणो रावणस्यासंस्करणं नाम मम पियं तवापि कर्तव्यमेव । त्वत्प्रभावाच्च मे जितं पूर्वं च तस्य जयसाहाय्यरूपं प्रियं त्वया कृतं । तथाप्यवश्यं तु क्षमं वाच्यः । यदर्हं तत्र नियोजनीयोसीत्यर्थः ॥ ९७ ॥ दोषिणः कथमर्हत्वमित्याशङ्क्य गुणाधिक्यादित्याह—अधर्मे-

ति० सुग्रीवस्येवतवापिप्रियं राज्याभिषेकलक्षणं । मयाकार्यं कर्तव्यं । हि यतःत्वत्प्रभावान्मयाजितं । तस्मादवश्यंक्षमं अभिषेकसंपादनयोग्यंयत्कृत्यं प्रेतनिर्हारलक्षणं तन्मयात्वंवाच्यः ॥ ९७ ॥

[पा०] १ ङ. झ. ञ. ट. विद्युदिवोज्ज्वला. २ ङ. झ. स्रापयन्तीतदाऽत्रेणस्तनौवक्रंसुनिर्मलं. ३ ङ. च. छ. झ. ञ. ट. नाहमर्हामि. ४ क.—घ. च. छ. ञ. ट. मांराम. ५ ग. ङ. झ. वाक्यकोविदः.

शतक्रतुमुखैर्देवैः श्रूयते न पराजितः ॥ महात्मा बलसंपन्नो रावणो लोकरावणः ॥ ९९ ॥
मरणान्तानि वैराणि निर्वृत्तं नः प्रयोजनम् ॥ क्रियतामस्य संस्कारो ममाप्येष यथा तव ॥ १००॥
[1]त्वत्सकाशाद्दशग्रीवः संस्कारं विधिपूर्वकम् ॥ प्राप्तुमर्हति[2] धर्मज्ञ त्वं यशोभाग्भविष्यसि ॥ १०१ ॥
राघवस्य वचः श्रुत्वा त्वरमाणो विभीषणः ॥ [3]संस्कारेणानुरूपेण योजयामास रावणम् ॥ १०२ ॥
[सँ प्रविश्य पुरीं लङ्कां राक्षसेन्द्रो विभीषणः ॥ रावणस्याग्निहोत्रं तु निर्यापयति सत्वरम् ॥१०३॥
शकटान्दारुरूपाणि अग्नीन्वै याजकास्तथा ॥ तथा चन्दनकाष्ठानि काष्ठानि विविधानि च ॥१०४॥
अगरूणि सुगन्धीनि गन्धांश्च सुरभींस्तथा ॥ मणिमुक्ताप्रवालानि निर्यापयति राक्षसः ॥ १०५ ॥
आजगाम मुहूर्तेन राक्षसैः परिवारितः ॥ ततो माल्यवता सार्धं क्रियामेव चकार सः ॥ १०६ ॥
सौवर्णीं शिबिकां दिव्यामारोप्य क्षौमवाससम् ॥ रावणं राक्षसाधीशमश्रुपूर्णमुखा द्विजाः ॥
तूर्यघोषैश्च विविधैः स्तुवद्भिश्चाभिनन्दितम् ॥ १०७ ॥
पताकाभिश्च चित्राभिः सुमनोभिश्च चित्रिताम् ॥ उत्क्षिप्य शिबिकां तां तु विभीषणपुरोगमाः ॥
दक्षिणाभिमुखाः सर्वे गृह्य काष्ठानि भेजिरे ॥ १०८ ॥
अग्नयो दीप्यमानास्ते तदाऽध्वर्युसमीरिताः ॥ शरणाभिगताःसर्वे पुरस्तात्तस्य ते ययुः ॥ १०९ ॥
अन्तःपुराणि सर्वाणि रुदमानानि सत्वरम् ॥ पृष्ठतोऽनुययुस्तानि प्लवमानानि सर्वतः ॥ ११० ॥
रावणं प्रयते देशे स्थाप्य ते भृशदुःखिताः ॥] चितां चन्दनकाष्ठानां पद्मकोशीरसंवृताम् ॥
ब्राह्मया [6]संवेशयांचक्रू राङ्कवास्तरणावृताम् ॥ १११ ॥
वैतते वेदविहितो राज्ञो वै पश्चिमः क्रतुः ॥ प्रचक्रू राक्षसेन्द्रस्य पितृमेधमनुक्रमम् ॥ ११२ ॥
वेदिं च दक्षिणप्राच्यां यथास्थानं च पावकम् ॥ घृतदाज्येन संपूर्णं स्रुवं सर्वे प्रचिक्षिपुः ॥ ११३॥

त्यादिना ॥ ९८ ॥ संयुगेष्वपराजितत्वमुदाहरति—शतक्रत्विति ॥ ९९ ॥ गुणबाहुल्येपि त्वद्वैरी कथं संस्कार्य इत्यत्राह—मरणेति ॥ यथायं तव बन्धुस्तथा ममापि त्वद्वत् बन्धुरेवायमित्यर्थः ॥ १०० ॥ यशोभागिति । पापकारिणमपि संस्कृतवानिति यशस्तव भविष्यतीत्यर्थः ॥ १०१ ॥ अनुरूपेण यायजूकानुगुणेन । अत्र संस्कारारम्भान् स्त्रीनिवर्तनमर्थसिद्धं ॥ १०२—११० ॥ चन्दनकाष्ठानां संबन्धिनौ । पद्मकमुशीरं च गन्धद्रव्यं प्रसिद्धं । ब्राह्मया वेदोक्तप्रक्रियया । रङ्कुः मृगविशेषः तत्संबन्धि चर्म राङ्कवं तदेवास्तरणं तेनावृतां चितां संवेशयाञ्चक्रुः योजयाञ्चक्रुः । रावणं ऋत्विज इति च शेषः ॥ १११ ॥ पश्चिमः क्रतुः अन्त्येष्टिः । वर्तते अवर्तत । चितानिर्माणानन्तरमन्तिमेष्टिं चक्रुरित्यर्थः । राक्षसेन्द्रस्य पितृमेधं पितृमेधसंस्कारं च अनुक्रमं यथाक्रमं प्रचक्रुः ॥ ११२ ॥ संग्रहेणोक्तं संस्कारं प्रपञ्चयति—वेदि-

ति० त्वच्छत्रुत्वादसंस्कार्यइतिचेत्तत्राह **मरणान्तानीति** । नः सात्विकानामस्माकं । प्रयोजनं वैरनिर्यातनरूपं । निर्वृत्तं संपन्नं । अतःपरंनवैरप्रयोजनमस्ति ॥ यदेवं अतः अस्य संस्कारःक्रियतामिति । एषयथातवभ्रातासंस्कारादिनातवानुग्राह्यः तथा ममाप्यनुग्राह्यएव । चतुर्विधमुक्तिष्वेकापिनास्य । तदुक्तंविष्णुपुराणे । " हिरण्यकशिपोर्विष्णुरयमित्येवंमनस्यभूत् । दशाननस्त्वेष्यनङ्गपराधीनतयाजानकीसमासक्तचेतसोदाशरथिरूपदर्शनमेवासीत् । नायमच्युतइत्यासक्तिः । विपद्यतोन्तःकरणस्यमानुषबुद्धिरेवकेवलमभूत् " इति । अतएव रावणकुंभकर्णयोःशिशुपालदन्तवक्त्रूपेणजन्मश्रूयते । नहिभगवत्सालोक्यंप्राप्तयोरपिजन्म भवति । किंतु ब्रह्मणासहमुक्तिरेवेतिसिद्धान्तः ॥ १०० ॥ ति० यशोभागिति । रामवाक्येनत्यक्तवैरोभ्रातरंसंस्कृतवानितिख्यातिरेवभविष्यतीत्यर्थः ॥ १०१ ॥ ति० द्विजाः राक्षसद्विजाः ॥१०७॥ ति० वेदिंचेत्यादि । दक्षिणाप्राचीं चितायादक्षिणाप्राग्दे-

[पा०] १ क. ख. घ.—ट. त्सकाशान्महाबाहोसंस्कारं. २ क.—घ. च. छ. झ. ञ. क्षिप्रमर्हति. ३ झ. संस्कारयितुमारेभेभ्रातरंरावणंहतं. ४ सप्रविश्यपुरींलङ्कामित्यादयः स्थाप्यतेभृशदुःखिताइत्यन्ताःश्लोकाः झ. पाठेदृश्यन्ते. ५ ङ. झ. ञ. ट. चन्दनकाष्ठैश्चपद्मकोशीरचन्दनैः. ६ ङ. झ. ट. संवर्तयामासू. ७ इदमर्धं झ. पाठेनदृश्यते. ८ क.—ट. मनुत्तमं. ९ ङ. च. झ. ञ. ट. दक्षिणप्राचीं. १० ज. पूर्णेनस्रुवंस्कन्धेप्रचि. क.—घ. च. छ. पूर्णेस्रुवंसर्वेप्रचि. ङ. झ. ञ. ट. संपूर्णेस्रुवंस्कन्धेप्रचि.

पादयोः शकटं प्रादुरन्तरूर्वोरुलूखलम् ॥ दारुपात्राणि सर्वाणि अरणिं चोत्तरारणिम् ॥ ११४ ॥
दत्त्वा तु मुसलं चान्यद्यथास्थानं विचक्षणाः ॥ शास्त्रदृष्टेन विधिना महर्षिविहितेन च ॥ ११५ ॥
तत्र मेध्यं पशुं हत्वा राक्षसेन्द्रस्य राक्षसाः ॥ परिस्तरणिकां राज्ञो घृताक्तां समवेशयन् ॥ ११६ ॥
गन्धैर्माल्यैरलंकृत्य रावणं दीनमानसाः ॥ विभीषणसहायास्ते वस्त्रैश्च विविधैरपि ॥
लाजैश्चावकिरन्ति स्म बाष्पपूर्णमुखास्तदा ॥ ११७ ॥
ददौ च पावकं तस्य विधियुक्तं विभीषणः ॥ ११८ ॥
स्नात्वा चैवार्द्रवस्त्रेण तिलान्दूर्वाभिमिश्रितान् ॥ उदकेन च संमिश्रान्प्रदाय विधिपूर्वकम् ॥११९॥
प्रदाय चोदकं तस्मै मूर्ध्ना चैनं नमस्य च ॥ ताः स्त्रियोऽनुनयामास सान्त्वमुक्त्वा पुनःपुनः ॥
गम्यतामिति ताः सर्वा विविशुर्नगरं तदा ॥ १२० ॥
प्रविष्टासु च सर्वासु राक्षसीषु विभीषणः ॥ रामपार्श्वमुपागम्य तदाऽतिष्ठद्विनीतवत् ॥ १२१ ॥

मित्यादिना ॥ दक्षिणप्राच्यां चिताया आग्नेयभागे वेदिं तत्र यथास्थानं पावकं च त्रेताग्निं च प्रचक्रुरित्यनुषज्यते । वेद्यां पश्चिमे गार्हपत्यं प्राच्यामाहवनीयं दक्षिणतो दक्षिणाग्निं च स्थापयामासुरित्यर्थः । पृषदाज्येन दधिमिश्रघृतेन । " पृषदाज्यं सदध्याज्यं " इत्यमरः । संपूर्णं स्रुवं होमपात्रं प्रचिक्षिपुः प्रतिपत्त्यर्थं चितायामिति शेषः ॥ ११३ ॥ यज्ञपात्रान्तराणामपि प्रतिपत्तिं दर्शयति—पादयोरित्यादिना श्लोकत्रयेण ॥ शकटं सोमराजानयनशकटम् । उलूखलं यज्ञीयव्रीह्यवहननसाधनं । अन्यत् स्थाल्यादिकं दारुपात्रादिकं । यथास्थानं दत्त्वा । शास्त्रदृष्टेन वेदविहितेन महर्षिविहितेन स्मृत्युक्तेन विधिना क्रमेण तत्र चितासमीपे मेध्यं पवित्रं पशुं छागं हत्वा । हननं होमपर्यन्तस्याप्युपलक्षणं । परिस्तरणिकां परिस्तरणानि । जात्येकवचनं । समवेशयन् चिक्षिपुरित्यर्थः ॥ ११४—११६ ॥ अथ शवालंकारमाह—गन्धैरित्यादिसार्धश्लोकमेकं वाक्यं ॥ अवकिरन्ति चितामिति शेषः ॥ ११७ ॥ अथ संस्कारमाह—ददाविति ॥ तस्य तस्मै रावणाय । विधियुक्तं मन्त्रयुक्तं ॥ ११८ ॥ स्नात्वेत्यादि गम्यतामितीतिपर्यन्तं किंचिदधिकं श्लोकद्वयमेकान्वयं ॥ दूर्वोदकमिश्रितान तिलान् प्रेतावाहनार्थं भूमौ प्रदाय तत्र तस्मै रावणाय उदकं दत्त्वा ताः स्त्रियः गम्यतामिति पुनः पुनः सान्त्वमुक्त्वा अनुनयामास पुरीं प्रापयामास ॥११९—१२० ॥ ताः सर्वा इत्युत्तरवाक्यादि ॥ रामपार्श्वमुपागम्येति । रणशिरसि हतत्वेन रावणस्याशौचाभावादागतः अतएवोत्तरदिने राज्याभिषेकोऽयोध्यागमनं चानुष्ठितं । प्रथमायां रावणसंस्कारः ॥

शेइत्यर्थः । यथास्थानंपावकंचप्रचक्रुः " दक्षिणपूर्वदेशेआहवनीयंनिदधाति । उत्तरपश्चिमेगार्हपत्यं । दक्षिणपश्चिमेदक्षिणाग्निं ।" इतिसूत्रोक्तस्थानमनतिक्रम्येत्यर्थः ॥ पृषदाज्येनसंपूर्णेनोपलक्षितंस्रुवंस्कन्धे स्कन्धदेशेप्रचिक्षिपुः । यद्यपि 'नासिकेस्रुवौ' इत्यापस्तंबेनोक्तं । तथापिसूत्रान्तरात्स्कन्धेपिनिक्षेपःस्रुवस्यबोध्यः । तथा " पादयोःशकटमूर्वोरुलूखलं " इतिचसूत्रान्तरादेवबोध्यं । स० स्रुवं स्कन्धे स्वस्कन्धेघृतांविचिक्षिपुः । नासिकयोरितिशेषः । " नासिकेस्रुवौ " इत्यापस्तंबोक्तेः । ऋष्यन्तरसूत्रान्तरंवास्कन्धइत्यत्रोत्तरत्रचोहनीयंवा ॥ ११३ ॥ ति० दारुपात्रादिसर्वंसूत्रोक्ततत्तत्स्थानेदत्त्वाऽन्यंमुसलं चातुर्मास्यमुसलंयथास्थानंदत्त्वाच विचक्रमुः पितृमेधंचक्रुः ॥ ११५ ॥ ती० अनुस्तरणिकां घृताक्तांसमवेशयन् । अनुस्तरणिकांराजगवीं । राजगवीमालभ्यतच्चर्मणायजमानमास्तृतवन्तइत्यर्थः । 'यथामृतायानुस्तरणींघ्नन्ति ' इतिश्रुतेः ॥ ति० परिस्तीर्यतेमुखमनयेतिपरिस्तरणिका वपा । तांराक्षसेन्द्रस्यमुखेसमवेशयन् । ' वपास्यमुखंप्रौर्णोति ' इतिसूत्रात् ॥ ११६ ॥ ति० विधिपूर्वकंप्रदाय स्थितइतिशेषः । ननु " निहतंरावणंदृष्ट्वारामेणाक्लिष्टकर्मणा । तत्यजुस्तंमहाभागंपञ्चभूतानिरावणम् । शरीरधातवोह्यस्यमांसंरुधिरमेवच । नेशुर्ब्रह्मास्त्रनिर्दग्धानचभस्माप्यदृश्यत" इतिमहाभारतउक्तत्वेनकथमस्यवाल्मीकिनास्मशाननयनपूर्वकंदाहउक्तइतिचेन्न । तस्यरामबाणतेजोवर्णनविषयेऽत्युक्त्यलङ्कारपरत्वादितिवदन्ति ॥ ११९ ॥ ति० गम्यतामित्युवाचेत्यर्थः । रावणपत्नीरितिशेषः ॥ अयंसंस्कारो नवम्यामेवसायंकाले ॥ १२० ॥

[पा०] १ च. छ. अनुस्तरणिकां. २ च. छ. झ. ञ. ट. तिलान्दर्भविमिश्रितान्. ३ ग. ङ. झ. ञ. ट. सान्त्वयित्वा. ४ ङ. झ. ट. प्रविष्टासुपुरींस्त्रीषुराक्षसेन्द्रोविभीषणः. ५ क. तदातिष्ठत्कृताञ्जलिः.

रामोपि सह सैन्येन ससुग्रीवः सलक्ष्मणः ॥ हर्षं लेभे रिपुं हत्वा यथा वृत्रं शतक्रतुः ॥ १२२ ॥
[ततो विमुक्त्वा सशरं शरासनं महेन्द्रदत्तं कवचं च तन्महत् ॥
विमुच्य रोषं रिपुनिग्रहात्ततो रामः स सौम्यत्वमुपागतोऽरिहा] ॥ १२३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्दशोत्तरशततमः सर्गः ॥११४॥

पञ्चदशोत्तरशततमः सर्गः ॥ ११५ ॥

लक्ष्मणेन रामाज्ञया विभीषणस्यलङ्काराज्येऽभिषेचनम् ॥ १ ॥ रामेण मैथिलींप्रति निजविजयकुशलनिवेदनाय हनुमत्प्रेषणम् ॥ २ ॥

ते रावणवधं दृष्ट्वा देवगन्धर्वदानवाः ॥ जग्मुः स्वैःस्वैर्विमानैस्ते कथयन्तः शुभाः कथाः ॥ १ ॥
रावणस्य वधं घोरं राघवस्य पराक्रमम् ॥ सुयुद्धं वानराणां च सुग्रीवस्य च मन्त्रितम् ॥ २ ॥
अनुरागं च वीर्यं च सौमित्रेर्लक्ष्मणस्य च ॥ [पतिव्रतात्वं सीताया हनूमति पराक्रमम् ॥]
कथयन्तो महाभागा जग्मुर्हृष्टा यथागतम् ॥ ३ ॥
राघवस्तु रथं दिव्यमिन्द्रदत्तं शिखिप्रभम् ॥ अनुज्ञाय महाभागो मातलिं प्रत्यपूजयत् ॥ ४ ॥
राघवेणाभ्यनुज्ञातो मातलिः शक्रसारथिः ॥ दिव्यं तं रथमास्थाय दिवमेवारुरोह सः ॥ ५ ॥
तस्मिंस्तु दिवमारूढे सुरसारथिसत्तमे ॥ राघवः परमप्रीतः सुग्रीवं परिषस्वजे ॥ ६ ॥
परिष्वज्य च सुग्रीवं लक्ष्मणेन प्रचोदितः ॥ पूज्यमानो हरिश्रेष्ठैराजगाम बलालयम् ॥ ७ ॥

॥ १२१—१२३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्दशोत्तरशततमः सर्गः ॥ ११४ ॥

अथ विभीषणाभिषेकः—ते रावणवधमित्यादि ॥ अत्र क्रियाभेदात्तच्छब्दद्वयं ॥ १ ॥ शुभाः कथाः कथयन्त इत्यस्यैव विवरणं—रावणस्य वधमित्यादि ॥ मन्त्रितं मन्त्रं । सौमित्रेरिति तन्मातुः श्लाघनव्यञ्जनाय अस्य जननी हि भाग्यवतीति ॥ २—३ ॥ इन्द्रदत्तं इन्द्रप्रेरितं । शिखिप्रभं अग्निप्रभं । प्रत्यपूजयत् उपचचार ॥ ४—६ ॥ प्रचोदितः विज्ञप्तः ।

स० सौम्यत्वमुपागतः । एतेनक्रोधमुपादातुंहातुंचशक्तोरामइतिख्यातत्र्यंद्योत्यते ॥१२३॥ इतिचतुर्दशोत्तरशततमःसर्गः ॥११४॥

ति० सुग्रीवस्यमन्त्रितं सेनासंमेलनसीतान्वेषणादिसर्वकार्यसाधकंमन्त्रसामर्थ्यं ॥ २ ॥ ति० अनुज्ञाप्य रथंनयेत्याज्ञांदत्वा । यद्यपिभारतेसीतायाआगमनोत्तरंरथादवतरणंभगवतंउक्तं । तथापितत्रपौर्वापर्यक्रमेतात्पर्याभावान्नक्षतिः । स० शिखिप्रभं अग्नितेजसं । ननुवनपर्वणि " दृष्ट्वारामंतुजानक्यासंगतंशक्रसारथिः । उवाचपरमप्रीतःसुहृन्मध्यइदंवचः । देवगन्धर्वयक्षाणांमानुषासुरभोगिनाम् । अपनीतंत्वया दुःखमिदंसत्यपराक्रम । सदेवासुरगन्धर्वायक्षराक्षसपन्नगाः । कथयिष्यन्तिलोकास्त्वांयावद्भूमिर्धरिष्यति । इत्येवमुक्त्वानुज्ञाप्यरामंशस्त्रभृतांवरम् । संपूज्यापाक्रमत्तेनरथेनादित्यवर्चसा " इतिसीतासंगमनानन्तरंरथस्यसमातलेःप्रेषणोक्तेरत्र पूर्वमेवतदुक्तेर्विरोधइतिचेत्सत्यं । भारतस्योत्तरत्वात्तदनुसारेणकथोद्घापउत्तरत्रात्रकार्यः । मातलिना दृष्टसीतारामसंगमेनगमनेसर्ववार्तायाइन्द्रंप्रतिप्रतिवक्तुंसुशकत्वगुणलाभाच्च । अथवासंकोचेनकथांकथयितुर्बादरायणस्यनिर्भरःपौर्वापर्यविषयइत्येवमुक्तिः । रावणहननानन्तरंसीतासंगत्यन्तरायस्यान्तराभावान्मातलिनास्वनाथंप्रतिप्रतिबोधयितुंशक्यत्वाच्चेतिवासमाधिरवधेयः ॥४॥ ति० अथ त्रिभिर्दिनैर्दशरात्रैकादशाहद्वादशाहकर्तव्यक्रियासमाप्तौ । चतुर्थेऽहनीत्यर्थः ॥ नात्रदशाहमाशौचमितिभ्रमितव्यं । "उद्यतैराहवे शस्त्रैःक्षत्रधर्ममृतस्यतु । सद्यःसंतिष्ठतेयज्ञस्तथाशौचमितिस्थितिः " इतिमनूक्तेः ॥ ७ ॥

[पा०] १ ङ. ञ. वृत्रंवज्रधरोयथा. २ अयंश्लोकः ङ. ञ. ञ. ट. पाठेषुदृश्यते. ३ च. छ. वधंदृष्ट्वा. ४ क. च. मित्रतां. ५ ख. ङ. च. ञ. ञ. ट. मारुतेर्लक्ष्मणस्यच. ६ इदमर्धं ङ. ञ. ट. पाठेषुदृश्यते. ७ ख. ग. च. शशिप्रभं. ८ ञ. अनुज्ञाप्य. ९ ङ. ञ. दिवमेवोत्पपातह. १० ङ. ञ. सरथेरथिनांवरः. ११ च. छ. लक्ष्मणेनाभिचोदितः. क. ख. ङ. ञ. ट. लक्ष्मणेनाभिवादितः.

[1]अब्रवीच्च तदा रामः [2]सेमीपपरिवर्तिनम् ॥ सौमित्रिं [3]सैत्यसंपन्नं लक्ष्मणं दीप्ततेजसम् ॥ ८ ॥
विभीषणमिमं सौम्य लङ्कायामभिषेचय ॥ अनुरक्तं च भक्तं च मम चैवोपकारिणम् ॥ ९ ॥
एष मे परमः कामो यदीमं रावणानुजम् ॥ लङ्कायां सौम्य पश्येयमभिषिक्तं विभीषणम् ॥ १० ॥
एवमुक्तस्तु सौमित्री राघवेण महात्मना ॥ तथेत्युक्त्वा तु संहृष्टः सौवर्णं घटमाददे ॥ ११ ॥
तं घटं वानरेन्द्राणां हस्ते दत्त्वा मनोजवान् ॥ आदिदेश महासत्त्वान्समुद्रसलिलानये ॥ १२ ॥
इति [5]शीघ्रं ततो गत्वा वानरास्ते [6]महाबलाः ॥ आगतास्तज्जलं गृह्य समुद्राद्वानरोत्तमाः ॥ १३ ॥
ततस्त्वेकं घटं गृह्य संस्थाप्य परमासने ॥ घटेन तेन सौमित्रिरभ्यषिञ्चद्विभीषणम् ॥ १४ ॥
लङ्कायां रक्षसां मध्ये राजानं रामशासनात् ॥ विधिना मन्त्रदृष्टेन सुहृद्गणसमावृतम् ॥
अभ्यषिञ्चत्स धर्मात्मा शुद्धात्मानं विभीषणम् ॥ १५ ॥
[[7]अभ्यषिञ्चंस्तदा सर्वे राक्षसा वानरास्तदा ॥ प्रहर्षमतुलं गत्वा तुष्टुवू राममेव हि] ॥ १६ ॥
तस्यामात्या जहृषिरे भक्ता ये चास्य राक्षसाः ॥ दृष्ट्वाऽभिषिक्तं लङ्कायां राक्षसेन्द्रं विभीषणम् ॥
[राघवः परमां प्रीतिमाजगाम सलक्ष्मणः] ॥ १७ ॥
स तद्राज्यं महत्प्राप्य रामदत्तं विभीषणः ॥ प्रकृतीः सान्त्वयित्वा च ततो राममुपागमत् ॥१८॥
अक्षतान्मोदकाँल्लाजान्दिव्याः सुमनसस्तदा ॥ आजहुरथ संहृष्टाः पौरास्तत्र निशाचराः ॥ १९ ॥
स तान्गृहीत्वा दुर्धर्षो राघवाय न्यवेदयत् ॥ [8]मङ्गल्यं मङ्गलं सर्वं लक्ष्मणाय च वीर्यवान् ॥ २० ॥

बलालयं शिबिरं ॥ ७ ॥ सत्यसंपन्नत्वादिविशेषणं यथोक्तकारित्वद्योतनाय ॥ ८ ॥ विभीषणमित्यादिश्लोकद्वयमेकान्वयं । लङ्कायामभिषेचय लङ्कायां गत्वाऽभिषेचय । समुद्रतीरएव लङ्काराज्याभिषेके कृतेपि पुनर्विधानं रावणसिंहासनेभिषेकार्थं । अनुरक्तमित्यनेन मित्रकृत्यमुक्तं । भक्तमित्यनेन दास्यकृत्यं । उपकारिणमित्यनेनानुरागभक्त्योः कार्यपर्यवसानमुक्तं । परमःकामइत्यनेन शरणागतविभीषणाभिमतपरिपूरणमेव विजयस्य प्रधानप्रयोजनमित्यवगम्यते ॥ ९—१० ॥ घटमिति जात्येकवचनं ॥ ११ ॥ आनये आनयने । हस्त इत्यत्रापि जात्येकवचनं । वानरेन्द्राणामिति बहुवचनप्रयोगात् ॥ १२ ॥ इतीति । आदेशाद्धेतोरित्यर्थः । "इति हेतुप्रकरणप्रकारादिसमाप्तिषु" इत्यमरः । वानरा वानरोत्तमा इति वचनं वानरोत्तमत्वेपि मानुषत्वव्यावर्तनाय । समुद्रात् समुद्रेभ्यः ॥ १३—१४ ॥ लङ्कायामित्यादिसार्धश्लोकएकान्वयः । अनेन रामनिदेशानन्तरमेव लक्ष्मणो विभीषणादिभिः सह लङ्कां प्रविष्टवानित्यवगम्यते । मन्त्रदृष्टेन मन्त्रेषु वेदेषु दृष्टेन स्पष्टमवगम्यमानेन विधिना प्रकारेण । शुद्धात्मानमित्यनेन रामाज्ञया अभिषेकमङ्गीकृतवान् । परमार्थस्तु रामकैङ्कर्य एवासक्तोभूदित्यवगम्यते । आज्ञाकैङ्कर्यं हि कर्तव्यं ॥ १५—१७ ॥ प्रकृतीः अमात्यप्रभृतीन् । सान्त्वयित्वा पुत्रमित्रादिविनाशजशोकापनोदनं कृत्वा । राममुपागमत् । लक्ष्मणेन सहेति शेषः ॥ १८—१९ ॥ मङ्गलमर्हतीति मङ्गल्यं । मङ्गलप्रयोजनमित्यर्थः । मङ्गलं हरिद्रादिमङ्गलद्रव्यं । सर्वं उक्ताक्षतादिभिन्नं । रामाय

स० लङ्कायां तत्सिंहासनइतिशेषः । एतेन पूर्वंविभीषणाभिषेकेपिसाक्षात्सिंहासनएवेदानींकरणान्नदोषइतिज्ञेयं ॥ ९ ॥ स० हस्ते जातावेकवचनं । समुद्रसलिलं पूर्वादिचतुस्समुद्रसलिलंप्रतिचतुर्दिग्गतमप्युदकंस्वल्पंस्वल्पमस्मिन्प्रस्थाप्यानयतेतिव्यादिदेश । उत्तरत्रैकंघटमित्युक्तेःपङ्क्तीभूयातिद्रुतमानयनार्थं बहूनामाज्ञापनं ॥ १२ ॥ स० समुद्रात् चतुस्समुद्राः । तस्याराज्याभिषेकोपयुक्तत्वस्यरामाद्यभिषेकस्थलेकथनात् । अन्यथा दक्षिणसमुद्रस्यातिसमीपगतत्वेनतदानेतॄणांबहुत्वकथनस्यमनोजवानितिविशेषणस्यवैयर्थ्यस्यात् ॥ १३ ॥ इतिपञ्चदशोत्तरशततमःसर्गः ॥ ११५ ॥

[पा०] १ ङ. झ. अथोवाचसकाकुत्स्थः. २ घ. समीपेसमुपस्थितं. ३ घ. ट. सौम्यसंपन्नं. क. ग. च. छ. ञ. सत्वसंपन्नं. ङ. झ. मित्रसंपन्नं. ४ ङ. झ. ट. लक्ष्मणंशुभलक्षणं. ५ क. ख. च.—अ. अतिशीघ्रं. ६ ङ. झ. मनोजवाः. ७ अयंश्लोकः ङ.—झ. पाठेषुदृश्यते. ८ इदमर्धं क. ङ. झ. अ. ट. पाठेषुदृश्यते. ९ घ. ङ झ. माङ्गल्यं.

कृतकार्यं समृद्धार्थं दृष्ट्वा रामो विभीषणम् ॥ प्रतिजग्राह तत्सर्वं तस्यैव प्रियकाम्यया ॥
[तत्प्रगृह्य परां प्रीतिं जगाम सहलक्ष्मणः] ॥ २१ ॥
ततः शैलोपमं वीरं प्राञ्जलिं पार्श्वतः स्थितम् ॥ अब्रवीद्राघवो वाक्यं हनुमन्तं प्लवङ्गमम् ॥ २२ ॥
अनुमान्य महाराजमिमं सौम्य विभीषणम् ॥ [प्रविश्य नगरीं लङ्कां कौशलं ब्रूहि मैथिलीम्] ॥२३॥
गच्छ सौम्य पुरीं लङ्कामनुज्ञाप्य यथाविधि ॥ प्रविश्य रावणगृहं विजयेनाभिनन्द्य च ॥ २४ ॥
वैदेह्यै मां कुशलिनं ससुग्रीवं सलक्ष्मणम् ॥ आचक्ष्व जयतांश्रेष्ठ रावणं च मया हतम् ॥ २५ ॥
प्रियमेतदुदाहृत्य मैथिल्यास्त्वं हरीश्वर ॥ प्रतिगृह्य च संदेशमुपावर्तितुमर्हसि ॥ २६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चदशोत्तरशततमः सर्गः ॥११५॥

षोडशोत्तरशततमः सर्गः ॥ ११६ ॥

हनुमताऽशोकवनमैत्यसीतांप्रति रामसंदेशनिवेदनपूर्वकं कृतागसांराक्षसीनां हिंसनाभ्यनुज्ञानप्रार्थना ॥ १ ॥ सीतया तदागसां परप्रयोज्यत्वाभिधानेन ऋक्षप्रोक्तश्लोकानुवादेनचक्षमाप्रशंसनपूर्वकं तन्निषेधनम् ॥ २ ॥ सीतया स्वस्यरामावलोकनाभिलाषं निवेदितेनहनुमता तत्समाश्वासनपूर्वकं पुनारामसमीपगमनम् ॥ ३ ॥

इति प्रतिसमादिष्टो हनुमान्मारुतात्मजः ॥ प्रविवेश पुरीं लङ्कां पूज्यमानो निशाचरैः ॥ १ ॥
[प्रविश्य च पुरीं लङ्कामनुज्ञाप्य विभीषणम् ॥ ततस्तेनाभ्यनुज्ञातो हनुमान्वृक्षवाटिकाम् ॥
संप्रविश्य यथान्यायं सीताया विदितो हरिः] ॥ २ ॥
प्रविश्य च महातेजा रावणस्य निवेशनम् ॥ ददर्श मृजया हीनां सातङ्कामिव रोहिणीम् ॥
वृक्षमूले निरानन्दां राक्षसीभिः समावृताम् ॥ ३ ॥
निभृतः प्रणतः प्रह्वः सोभिगम्याभिवाद्य च ॥ ४ ॥
दृष्ट्वा तमागतं देवी हनुमन्तं महाबलम् ॥ तूष्णीमास्त तदा दृष्ट्वा स्मृत्वा प्रमुदिताऽभवत् ॥ ५ ॥

लक्ष्मणाय च न्यवेदयत् ॥ २० ॥ तस्यैव प्रियकाम्यया न तु स्वभोगेच्छया ॥ २१—२२ ॥ अनुमान्येत्यादिसार्धश्लोकत्रयमेकान्वयं। विभीषणमनुमान्य लङ्कां गच्छ। विभीषणमनुज्ञाप्य रावणगृहं प्रविश्य। विजयेन विजयकथनेन। अभिनन्द्य सीतां तोषयित्वा। वैदेह्यै मां कुशलिनमाचक्ष्वेति संबन्धः। संदेशं सीतावाचिकं ॥ २३—२६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चदशोत्तरशततमः सर्गः ॥११५॥

अथ हनुमत्सीतासंवादः—इति प्रतिसमादिष्ट इत्यादि। मारुतात्मज इत्यनेन वेगातिशय उच्यते। पूज्यमान इति। मार्गप्रदर्शनादिभिः पूज्यमानत्वं ॥ १—२ ॥ प्रविश्येत्यादिसार्धश्लोक एकान्वयः। मृजया शरीरसंस्कारेण। सातङ्कां सग्रहपीडां ॥ ३ ॥ निभृत इत्यर्धं। अभिगम्य समीपं प्राप्य। अभिवाद्य स्वनाम संकीर्त्य। प्रणतः कृतप्रणामः सन्। निभृतः निश्चलः। प्रह्वः प्रकर्षेण संकुचितगात्रः। स्थित इति शेषः। आचार्यास्तु करणत्रयेणापि निश्चलो बभूवेत्यर्थ इति प्राहुः ॥ ४ ॥ तं दृष्ट्वा विस्मृत्य प्रथमं तूष्णीमास्त। पुनर्दृष्ट्वा स्मृत्वा प्रमुदिताऽभवत्। यद्वा सामान्यतो दृष्ट्वा तूष्णीमास्त। ततो विशेषतो दृष्ट्वा स्मृत्वा

स० दृष्ट्वा रामविजयादिकंदृष्ट्वैवसमागतं ननुश्रुत्वा एतादृशंहनुमन्तंदृष्ट्वातदातूष्णीमास्त किंवदिष्यतिवेति। स्मृत्वा रामानयनादिकंयथाप्रतिज्ञंतेनकृतंस्मृत्वाहृष्टाचाभवत्। एवमथांगीकारादेवदृष्ट्वेत्यनेनपौनरुक्त्यं ॥ ५ ॥

[पा०] १ इदमर्धं ग. झ. पाठयोर्दृश्यते. २ ग. ङ. झ. प्रणतंस्थितं. च. ञ. ट. पुरतःस्थितं. ३ इदमर्धं ङ. झ. पाठयोर्दृश्यते. ४ ङ. झ. ञ. वदतांश्रेष्ठ. ५ अयंश्लोकः ङ. झ. ट. पाठेषुदृश्यते. ६ क. ख. च. छ. ज. शशिनाहीनां. ७ ङ. झ. स्मृत्वाहृष्टाऽभवत्तदा.

सौम्यं दृष्ट्वा मुखं तस्या हनुमान्प्लवगोत्तमः ॥ रामस्य वचनं सर्वमाख्यातुमुपचक्रमे ॥ ६ ॥
वैदेहि कुशली रामः सहसुग्रीवलक्ष्मणः ॥ विभीषणसहायश्च हरीणां सहितो बलैः ॥ ७ ॥
कुशलं चाह सिद्धार्थो हतशत्रुररिंदमः ॥ ८ ॥
विभीषणसहायेन रामेण हरिभिः सह ॥ निहतो रावणो देवि लक्ष्मणस्य नयेन च ॥ ९ ॥
पृष्ट्वा तु कुशलं रामो वीरस्त्वां रघुनन्दनः ॥ अब्रवीत्परमप्रीतः कृतार्थेनान्तरात्मना ॥ १० ॥
प्रियमाख्यामि ते देवि त्वां तु भूयः सभाजये ॥ दिष्ट्या जीवसि धर्मज्ञे जयेन मम संयुगे ॥११॥
[तव प्रभावाद्धर्मज्ञे महान्रामेण संयुगे ॥] लब्धो नो विजयः सीते स्वस्था भव गतव्यथा ॥
रावणश्च हतः शत्रुर्लङ्का चेयं वशे स्थिता ॥ १२ ॥
मया ह्यलब्धनिद्रेण दृढेन तव निर्जये ॥ प्रतिज्ञैषा विनिस्तीर्णा बद्ध्वा सेतुं महोदधौ ॥ १३ ॥
संभ्रमश्च न गन्तव्यो वर्तन्त्या रावणालये ॥ विभीषणविधेयं हि लङ्काश्वर्यमिदं कृतम् ॥ १४ ॥
तदाश्वसिहि विश्वस्ता स्वगृहे परिवर्तसे ॥ अयं चाभ्येति संहृष्टस्त्वद्दर्शनसमुत्सुकः ॥ १५ ॥
एवमुक्ता समुत्पत्य सीता शशिनिभानना ॥ प्रहर्षेणावरुद्धा सा व्याजहार न किंचन ॥ १६ ॥
अब्रवीच्च हरिश्रेष्ठः सीतामप्रतिजल्पतीम् ॥ किंनु चिन्तयसे देवि किंनु मां नाभिभाषसे ॥ १७ ॥
एवमुक्ता हनुमता सीता धर्मे व्यवस्थिता ॥ अब्रवीत्परमप्रीता हर्षगद्गदया गिरा ॥ १८ ॥
प्रियमेतदुपश्रुत्य भर्तुर्विजयसंश्रितम् ॥ प्रहर्षवशमापन्ना निर्वाक्याऽस्मि क्षणान्तरम् ॥ १९ ॥
न हि पश्यामि सदृशं चिन्तयन्ती प्लवङ्गम ॥ मत्प्रियाख्यानकस्येह तव प्रत्यभिनन्दनम् ॥ २० ॥

हनुमानिति ज्ञात्वा प्रमुदिताऽभवत् । अथवा तं दृष्ट्वा स्मृत्वा प्रत्यभिज्ञाय । प्रमुदिताऽभवत् । प्रमोदातिरेकेण स्तब्धा सती तूष्णीमास्तेत्यर्थः ॥ ५ ॥ सौम्यं निजदर्शनेन विकसितं ॥ ६—१० ॥ रामसंदेशवाक्यमाह—प्रियमाख्यामीत्यादिश्लोकद्वयमेकान्वयं । हे देवि, ते प्रियमाख्यामि । त्वां तु भूयः भूयिष्ठं । सभाजये प्रीणये । धर्मज्ञे पातिव्रत्यधर्मज्ञे । त्वं दिष्ट्या जीवसि । अन्यथा मम जयो व्यर्थ एव स्यादिति भावः । मम जयेन मत्पराक्रमेण । नः संयुगे जयो लब्धः । गतव्यथा सती स्वस्था भवेति योजना ॥ ११—१२ ॥ हे सीते तव निर्जये शत्रुहस्तात्तव विमोचने । दृढेन एकाग्रचित्तेन । अतएव अलब्धनिद्रेण मया महोदधौ सेतुं बद्ध्वा एषा प्रतिज्ञा रावणं हनिष्यामीति प्रतिज्ञा । विनिस्तीर्णा प्रतिपालितेत्यर्थः ॥ १३ ॥ संभ्रमः व्यग्रता । वर्तन्त्या वर्तमानया ॥ १४ ॥ यस्मात् स्वगृहे परिवर्तसे तस्माद्विश्वस्ता सती आश्वसिहि विश्रान्ता भव । निवृत्तखेदा भवेत्यर्थः । अयं विभीषणः ॥ १५ ॥ समुत्पत्य हर्षेण समुत्थाय । अवरुद्धा अवरुद्धव्यापारा ॥ १६—१८ ॥ क्षणान्तरं क्षणमात्रं । निर्वाक्यास्मि । हर्षावरुद्धव्यापारत्वादिति भावः ॥ १९ ॥ निर्वाक्यास्मीत्यत्र हेत्वन्तरमाह—न हीत्यादि । सदृशं प्रत्यभिनन्दनं प्रति-

स० तवप्रभावात् त्वत्पातिव्रत्यमाहात्म्यात् । तत्स्तुतिकालत्वादेवमुक्तिः । तव त्वत्संबन्धिनारामेण । प्रभावात् स्वसामर्थ्यात् । अयंविजयोलब्धइतिवा ॥ १२ ॥ स० अत्रेदानीमभावेपिकालान्तरेदेशान्तरेदीयतामित्यतआह—नचेति । पृथिव्यांनास्तीत्यनेन मममातुर्गृहेऽभावेपिभर्तुर्गृहेसहभोगरूपमस्तीतिसूचयति ॥ २० ॥

[पा०] १ इदमर्धं ङ. ञ. पाठयोर्नदृश्यते. २ घ. धर्मज्ञेयत्नेमहतिसंयति. क. च. छ. धर्मज्ञेजयोमेप्रतिगृह्यतां. ३ इदमर्धं ङ. ञ. पाठयोर्दृश्यते. ४ ङ. ञ. लब्धोयंविजयः. ५ ख. च. ञ. रावणोनिहतःपापःसहामात्यसुतोमृधे. ६ ख. च. छ. प्रतिज्ञापालितादेवि. ७ क. ख. ङ. च. छ. झ. ञ. ट. नकर्तव्यो. ८ ङ. झ. विलब्धं. ९ ङ. झ. ट. व्याहर्तुनशशाकह. १० ङ. झ. ट. ततोऽब्रवीद्धरिवरः. ११ ङ. च. छ. झ. ट. किंत्वंचिन्तयसे. १२ ङ. झ. धर्मपथेस्थिता. १३ ङ. झ. बाष्पगद्गदया. १४ ङ. झ. आख्यानकस्यभवतोदातुं.

न हि पश्यामि तत्सौम्य पृथिव्यामपि वानर ॥ सदृशं मत्प्रियाख्याने तव दातुं भवेत्समम् ॥२१॥
हिरण्यं वा सुवर्णं वा रत्नानि विविधानि च ॥ राज्यं वा त्रिषु लोकेषु नैतदर्हति भाषितुम् ॥२२॥
एवमुक्तस्तु वैदेह्या प्रत्युवाच प्लवङ्गमः ॥ गृहीतप्राञ्जलिर्वाक्यं सीतायाः प्रमुखे स्थितः ॥ २३ ॥
भर्तुः प्रियहिते युक्ते भर्तुर्विजयकाङ्क्षिणि ॥ स्निग्धमेवंविधं वाक्यं त्वमेवार्हसि भाषितुम् ॥ २४ ॥
तवैतद्वचनं सौम्ये सारवत्स्निग्धमेव च ॥ रत्नौघाद्विविधाच्चापि देवराज्याद्विशिष्यते ॥ २५ ॥
अर्थतश्च मया प्राप्ता देवराज्यादयो गुणाः ॥ हतशत्रुं विजयिनं रामं पश्यामि सुस्थितम् ॥ २६ ॥
तस्य तद्वचनं श्रुत्वा मैथिली जनकात्मजा ॥ ततः शुभतरं वाक्यमुवाच पवनात्मजम् ॥ २७ ॥
अतिलक्षणसंपन्नं माधुर्यगुणभूषितम् ॥ बुद्ध्या ह्यष्टाङ्गया युक्तं त्वमेवार्हसि भाषितुम् ॥ २८ ॥
श्लाघनीयोऽनिलस्य त्वं पुत्रः परमधार्मिकः ॥ बलं शौर्यं श्रुतं सत्त्वं विक्रमो दाक्ष्यमुत्तमम् ॥२९॥
तेजः क्षमा धृतिर्धैर्यं विनीतत्वं न संशयः ॥ एते चान्ये च बहवो गुणास्त्वय्येव शोभनाः ॥३०॥
अथोवाच पुनः सीतामसंभ्रान्तो विनीतवत् ॥ प्रगृहीताञ्जलिर्हर्षात्सीतायाः प्रमुखे स्थितः ॥३१॥

प्रियवचनं ॥ २० ॥ सदृशंप्रदेयवस्त्वपि नपश्यामीत्याह–न हीत्यादिना । अत्र अपिशब्देन अन्तरिक्षस्वर्गौ समुच्चीयेते । त्रिष्वपि लोकेषु न पश्यामि । यत् मत्प्रियाख्याने विषये तव दातुं समं अत्यन्तसदृशं भवेत् ॥ २१ ॥ उक्तंविवृणोति–हिरण्यमिति । हिरण्यं रजतं । "रजतश्हिरण्यं"इति श्रुतेः । त्रिषु लोकेषु राज्यं त्रिलोकविषयराजत्वं । नैतदर्हति भाषितुं । हिरण्याद्येतत्सर्वमपि प्रियाख्यानसमत्वेन भाषितुंनार्हतीत्यर्थः ॥ २२ ॥ प्रमुखे अग्रे ॥ २३ ॥ प्रतिप्रियवचनं न पश्यामीत्यस्योत्तरमाह–भर्तुरिति । एवंविधं स्निग्धं वाक्यं भाषितुं त्वमेवार्हसि नान्या । अनेन सर्वोत्तरं प्रीतिप्रियवचनं मह्यं दत्तमित्युक्तं भवति ॥ २४ ॥ प्रियाख्यानसदृशं प्रदेयं वस्तु नास्तीत्यस्योत्तरमाह–तवेति । एतत् प्रत्यभिनन्दनं न पश्यामीत्येतत् । सारवत् प्रत्यभिनन्दनवचनराहित्यकथनेन मद्वचनस्य निरवधिकप्रीतिजनकत्वकथनान्महातात्पर्यवत् । स्निग्धं मयि प्रीतिपुरःसरं । एतद्वचनश्रवणेनैव मया सर्वोत्तरं वस्तु समुपलब्धमिति भावः ॥ २५ ॥ पूर्वमेव लब्धदेवराज्यादिकस्य तत्प्रदानं निरर्थकमित्याशयेनाह–अर्थत इति । रामं विजयिनं पश्यामीति यत् अस्मात् अर्थतः प्रयोजनात् । देवराज्यादयो गुणाः उत्कर्षाः प्राप्ताः । रामविजयदर्शनमेव राज्यादिकमित्यर्थः ॥ २६—२७ ॥ नानृग्वेदेत्यादिना राम इव स्वयमपि तद्वाक्यसौष्ठवं प्रशंसति—अतीति । अतिलक्षणसंपन्नं आकाङ्क्षायोग्यतासन्निधिमत्पदवत्त्वरूपवाक्यलक्षणसंपन्नं । "बहुव्याहरताऽनेन न किंचिदपशब्दितं" इत्युक्तशब्दसाधुत्वसंपन्नं । माधुर्यगुणभूषितं " संश्रवे मधुरंवाक्यम्" इत्युक्तरीत्या श्रवणमात्रेणानन्दजनकत्वरूपमाधुर्यगुणभूषितं । अष्टाङ्गया "ग्रहणं धारणं चैव स्मरणं प्रतिपादनम् । ऊहापोहोर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः " इत्युक्ताष्टाङ्गयुक्तया बुद्ध्या युक्तं । तादृशबुद्धिपूर्वकमित्यर्थः ॥ २८ ॥ न केवलं वाक्यतः गुणतोपि श्लाघ्योसीत्याह—श्लाघनीय इत्यादिना श्लोकद्वयेन । अनिलस्य श्लाघनीयः पुत्रः । अनिलादपि संजीवनकर इत्यर्थः । संजीवनं चानृशंस्यधर्मादित्याह—परमधार्मिक इति । बलं प्रयाससहिष्णुत्वं । शौर्यं युद्धोत्साहः । श्रुतं शास्त्रज्ञानं । " श्रुतं शास्त्रावधृतयोः " इत्यमरः । सत्त्वं शारीरः सारः । विक्रमः पराक्रमः । दाक्ष्यं सामर्थ्यं । उत्तममिति सर्वविशेषणं । तेजः पराभिभवनसामर्थ्यं । क्षमा अपराधसहिष्णुत्वं । धृतिः प्रभावः । धैर्यं क्षोभके सत्यक्षोभ्यत्वं । विनीतत्वं विनयवत्त्वं । विशिष्टनीतिमत्त्वं वा । एते चान्ये च दयादयो बहवो गुणाः त्वय्येव शोभनाः त्वामाश्रयमधिगम्य शोभमाना भवन्ति । न संशयः नाहमसतो गुणानारोप्य स्तौमीत्यर्थः ॥ २९—३१ ॥

शि० तत्रबलं शरीरसामर्थ्यं । सत्त्वमिन्द्रियसामर्थ्यं । विक्रमःपादविक्षेपविशेषइतिनपौनरुक्त्यं । श्लोकद्वयमेकान्वयि ॥ २८ ॥
ति० असंभ्रान्तः सुखाऽविकृतचित्तः । विनीतवत् विनीतार्हं ॥ ३१ ॥ इतिषोडशोत्तरशततमःसर्गः ॥ ११६ ॥

[पा०] १ ङ. ञ. ट. दलाभवेत्सुखं. २ ग. ङ. ञ. ण. ट. एतन्नार्हति. ३ ङ. ञ. ट. त्वमेवार्हस्यनिन्दिते.

इमास्तु खलु राक्षस्यो यदि त्वमनुमन्यसे ॥ हन्तुमिच्छाम्यहं सर्वा याभिस्त्वं तर्जिता पुरा ॥३२॥
क्लिश्यन्तीं पतिदेवां त्वामशोकवनिकां गताम् ॥ घोररूपसमाचाराः क्रूराः क्रूरतरेक्षणाः ॥
राक्षस्यो दारुणकथा वरमेतत्प्रयच्छ मे ॥ ३३ ॥
मुष्टिभिः पाणिभिः सर्वाश्चरणैश्चैव शोभने ॥ इच्छामि विविधैर्घातैर्हन्तुमेताः सुदारुणाः ॥ ३४ ॥
घातैर्जानुप्रहारैश्च दशनानां च पातनैः ॥ भक्षणैः कर्णनासानां केशानां लुञ्चनैस्तथा ॥ ३५ ॥
नखैः शुष्कमुखीभिश्च दारणैर्लङ्घनैर्हतैः ॥ [[2]विभिन्नशङ्खग्रीवांसपार्श्वकैश्च कलेवरैः ॥]
निपात्य हन्तुमिच्छामि तव विप्रिय[3]कारिणीः ॥ ३६ ॥
[4]एवंप्रकारैर्बहुभिर्विप्रकारैर्यशस्विनि ॥ हन्तुमिच्छाम्यहं देवि तवेमाः कृतकिल्बिषाः ॥ ३७ ॥
एवमुक्ता हनुमता वैदेही जनकात्मजा ॥ उवाच धर्मसहितं हनुमन्तं यशस्विनी ॥ ३८ ॥
राजसंश्रयवश्यानां कुर्वन्तीनां पराज्ञया ॥ विधेयानां च दासीनां कः कुप्येद्वानरोत्तम ॥ ३९ ॥
भाग्यवैषम्ययोगेन पुरादुश्चरितेन च ॥ मयैतत्प्राप्यते सर्वं स्वकृतं ह्युपभुज्यते ॥ ४० ॥
प्राप्तव्यं तु दशायोगान्मयैतदिति निश्चितम् ॥ दासीनां रावणस्याहं मर्षयामीह दुर्बला ॥ ४१ ॥
आज्ञप्ता [5]रावणेनैता राक्षस्यो मामतर्जयन् ॥ हते तस्मिन्[6] कुर्युर्हि तर्जनं वानरोत्तम ॥ ४२ ॥
अयं व्याघ्रसमीपे तु पुराणो धर्मसंस्थितः ॥ ऋक्षेण गीतः श्लोको मे तन्निबोध प्लवङ्गम ॥ ४३ ॥

इदं तु मे प्रियाख्यानपारितोषिकत्वेन देयमित्यर्थयते—इमा इत्यादिना । सार्धश्लोकद्वयमेकान्वयं । क्लिश्यन्तीं पतिदेवतां त्वां प्रति या राक्षस्यो दारुणकथा अब्रुवन् । पुरा याभिस्त्वं तर्जिता इमा राक्षस्यः राक्षसीः । यद्यनुमन्यसे हन्तुमिच्छामि । एतद्वरं मे प्रयच्छेति संबन्धः ॥ ३२—३३ ॥ हननप्रकारं स्वक्रोधानुरूपं दर्शयति—मुष्टिभिरित्यादिना । श्लोकत्रयमेकान्वयं । घातैः प्रहारैः । भक्षणैः खादनैः । लुञ्चनैः उन्मूलनैः । शुष्कमुखीभिः नखैः । दारणैः पीडनैः । कपोलताडनैर्वा । लङ्घनैः उत्प्लुत्योपरिपातनैः । हतैः हस्तैस्ताडनैः । निपात्य भूमौ पातयित्वा । मुष्ट्यादिभिर्हन्तुमिच्छामीत्यन्वयः ॥ ३४—३६ ॥ उक्तमर्थमावश्यकत्वज्ञापनाय पुनरपि संग्रहेण याचते—एवमिति ॥ ३७ ॥ धर्मसहितमिति क्रियाविशेषणं ॥ ३८ ॥ राजसंश्रयवश्यानां राजसेवापरवशानां । अतएव पराज्ञया कुर्वन्तीनां राज्ञोदितकार्यं कुर्वन्तीनां । विधेयानां चोदिताकरणे दण्डार्हाणां । रावणस्य दासीनां दासीभ्यः । कः कुप्येत् ॥ ३९ ॥ भाग्यवैषम्ययोगेन भाग्यविपर्ययोगेन । भाग्यस्यापरिपक्वतयेत्यर्थः । पुरादुश्चरितेन च पूर्वकृतदुष्कृतेन च एतत्तर्जनभर्त्सनादिकं प्राप्यते । तत्र हेतुमाह—स्वकृतमिति । हि यस्मात् । स्वकृतमुपभुज्यते स्वकृतकर्मफलं प्राप्यते लोकैः । अतो मयापि भुज्यत इत्यर्थः ॥ ४० ॥ रावणस्य दासीनां एतत्तर्जनादिकं । दशायोगात् अवस्थायोगात् । अनुभवयोग्यकालसंबन्धादिति यावत् । प्राप्तव्यमिति मया निश्चितं । दुर्बला पूर्वमेतादृशापन्निवारककर्मकरणाशक्ता । अतोहमिह राक्षसीविषये मर्षयामीति संबन्धः । दुर्बला कृपापरवशा वा । हते रावणे दौर्बल्यान्तराभावात् । परदुःखसहिष्णुत्वमेव हि तदानीं दौर्बल्यं ॥ ४१ ॥ राक्षसीनामपराधस्य राजाज्ञामूलकत्वमन्वयव्यतिरेकाभ्यां दर्शयति—आज्ञप्ता इति ॥ ४२ ॥ अथासां स्वातन्त्र्येणापकारकरणमभ्युपेत्य तथापि क्षन्तव्यमित्यत्र इतिहासं दर्शयति—अयमिति । पुरा किल कश्चिद्व्याधो व्याघ्रेणानुसृतो वृक्षमारूढः । वृक्षमूलगतो व्याघ्रो वृक्षोपरि स्थितमृक्षं वन्यमृगाणामस्माकं जात्या शत्रुरेषः । तस्मादेनं वृक्षात्पातयेत्यब्रवीत् । एवमुक्तो भल्लूकः स्वावासस्थानगतमेनं न पात-

---

[पा०] १ ख. च. छ. ञ. ट. कृन्तनैः. २ इदमर्धं क. ख. च. छ. ञ. पाठेषुदृश्यते. ३ क. ख. ञ. विप्रियकारिकाः. ४ एवंप्रकारैरित्यादिश्लोकद्वयस्यस्थाने एवंप्रकारैर्बहुभिःसंप्रहार्यंयशस्विनि । घातयेतीवरूपाभिर्याभिस्त्वंतर्जितापुरा । इत्युक्ता साहनुमताकृपणादीनवत्सला । हनूमन्तमुवाचेदंचिन्तयित्वाविमृश्यच । इतिश्लोकद्वयं ङ. झ. पाठयोर्दृश्यते. ५ ङ. झ. वैषम्यदोषेणपुरस्ताद्दुष्कृतेनच. ६ ङ. झ. ट. राक्षसेनेहराक्षस्यस्तर्जयन्तिमां. ७ ख. ङ. च. झ. ञ. नकुर्वन्ति.

न परः पापमादत्ते परेषां पापकर्मणाम् ॥ समयो रक्षितव्यस्तु सन्तश्चारित्रभूषणाः ॥ ४४ ॥
पापानां वा शुभानां वा वधार्हाणां प्लवङ्गम ॥ कार्यं [1]करुणमार्येण न कश्चिन्नापराध्यति ॥ ४५ ॥
लोकहिंसाविहाराणां रक्षसां कामरूपिणाम् ॥ कुर्वतामपि पापानि नैव कार्यमशोभनम् ॥ ४६ ॥
एवमुक्तस्तु हनुमान्सीतया वाक्यकोविदः ॥ प्रत्युवाच ततः सीतां [3]रामपत्नीं यशस्विनीम् ॥ ४७ ॥
युक्ता रामस्य भवती धर्मपत्नी [4]यशस्विनी ॥ प्रतिसंदिश मां देवि गमिष्ये यत्र राघवः ॥ ४८ ॥
एवमुक्ता हनुमता वैदेही जनकात्मजा ॥ अब्रवीद्रष्टुमिच्छामि भर्तारं वानरोत्तम ॥ ४९ ॥
तस्यास्तद्वचनं श्रुत्वा हनुमान्मारुतात्मजः ॥ हर्षयन्मैथिलीं वाक्यमुवाचेदं महाद्युतिः ॥ ५० ॥
पूर्णचन्द्राननं रामं [5]द्रक्ष्यस्यार्ये सलक्ष्मणम् ॥ स्थिरमित्रं हतामित्रं [6]शचीव त्रिदशेश्वरम् ॥ ५१ ॥
तामेवमुक्त्वा राजन्तीं सीतां साक्षादिव श्रियम् ॥ आजगाम [7]महावेगो हनुमान्यत्र राघवः ॥ ५२ ॥
[[8]संपदि हरिवरस्ततो हनूमान्प्रतिवचनं जनकेश्वरात्मजायाः ॥
कथितमकथयद्यथाक्रमेण त्रिदशवरप्रतिमाय राघवाय] ॥ ५३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षोडशोत्तरशततमः सर्गः ॥ ११६ ॥

यिष्यामि । तथात्वे धर्महानिः स्यादित्युक्त्वा सुष्वाप। तदनन्तरं त्वां रक्षिष्यामि सुप्तमृक्षं पातयेति व्याघ्रेण चोदितः सन् व्याधस्तमृक्षमपातयत् । स त्वभ्यासवशेन शाखान्तरमवलम्ब्य नापतत् । तदनु कृतापराधमेनं पातयेति पुनः पुनर्व्याघ्रेणोच्यमानोपि भल्लूको बहुशः कृतापराधमप्येनं तुभ्यं न दास्यामीत्यभिधाय ररक्षेति पौराणिकी गाथा ॥ ४३ ॥ तत्रत्यं श्लोकं पठति—न पर इति । सुग्रीवं प्रति रामः कपोतोपाख्यानमिव हनुमन्तमुद्दिश्य देव्यपि स्वाभिप्रेतेर्थे ऋक्षगीतं प्रमाणयतिस्म । परेषां पापकर्मणां परानुद्दिश्य पापं कुर्वतां । परः प्राज्ञः पुरुषः पापं प्रत्यपकाररूपं नादत्ते नाङ्गीकरोति । न करोतीत्यर्थः । समयः आचारः अपकर्तृष्वपि प्रत्यपकारवर्जनरूपः । रक्षितव्यस्तु रक्षितव्य एव । तथाहि सन्तश्चारित्रभूषणाः । सद्भिश्चारित्रभूषणैरिति वा पाठः ॥ ४४ ॥ अथ देव्या अभयप्रदानश्लोकः—पापानामिति । पापानां वा शुभानां वा त्वदभिप्रायेण पापानां वा अस्मदभिप्रायेण शुभानां वा । तदेव ममोद्देश्यं 'दोषो यद्यपितस्यस्यात्'इतिवत् ।मलिनस्य हि स्नानमपेक्षितं । तासां पापत्वादेवास्मदपेक्षा । किं शुभानामस्माभिः । तत्पुण्यानामेव तद्रक्षकत्वात् । तस्मात्तत्पापमेवास्माकमुद्देश्यं । ननु तर्हि दण्ड्या दण्डनीयाः नादण्ड्या इति धर्मशास्त्रं भवतीमासाद्य भज्येतेत्याशङ्क्य दुष्टोपि शरणागतो रक्षणीय इति विशेषशास्त्रं भवन्तमासाद्य किं भञ्जनीयमित्याह—वधार्हाणामिति । वधार्हाणामपीत्यर्थः । सप्तम्यर्थे षष्ठी । प्लवङ्गम अनभिलषितमेवाभिलषितवान् खलु भवान् । तेपु । आर्येण महता पुरुषेण । करुणं दयाकार्यं । तिष्ठतु । पुण्यं पापं च इदानीमेतद्दयनीयदशां पश्य । यद्वा शुभानामिति दृष्टान्तार्थं । शुभेषु वधार्हेषु यथा करुणं कार्यं तथा पापेषु वधार्हेष्वपि कार्यमित्यर्थः । सापराधादण्डनेतिप्रसङ्गःस्यादित्याशङ्क्याह—न कश्चिन्नापराध्यतीति । सर्वोप्यपराध्यतीत्यर्थः ॥ ४५ ॥ रक्षसां स्वजातिप्रयुक्तहिंसादेरदोषावहत्वाच्छास्त्रोक्तदण्डविषयत्वं नास्तीत्याह—लोकेति । अशोभनं दण्डनं ॥४६—४७॥ रामस्य युक्ता। किं पुनर्मद्विधो जन इति स्वस्योत्तमशरणत्वं प्रतिपादितवतो रामस्य शरण्यत्वादिगुणवत्तया सदृशीत्यर्थः। अनेन सर्गेण सीताया दयालुत्वं अपराधसहिष्णुत्वं घटकत्वं चोक्तमिति ध्येयम् ॥४८—५३॥ इच्छामीत्यत्र इतिकरणं द्रष्टव्यं ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षोडशोत्तरशततमः सर्गः॥११६॥

[पा०] १ ङ. च. ज. ञ. ट. कारुण्यमार्येण. २ झ. रामपत्नीमनिन्दितां. ३ ङ. झ. गुणान्विता. ४ ङ. झ. द्रक्ष्यस्यथ. ५ क. ग.—ट. स्थितमित्रं. ख. हितमित्रं. ६ ङ. झ. शचीवेन्द्रसुरेश्वरं. ७ ङ. च. छ. झ. ञ. ट. महातेजाहनुमान्. ८ अयंश्लोकः ङ.—ट. पाठेषुदृश्यते.

सप्तदशोत्तरशततमः सर्गः ॥ ११७ ॥

हनुमन्मुखात्सीतायाः स्वमुखावलोकनाभिलाषंनिवेदितेनरामेण विभीषणंप्रति स्नातालंकृतायाःसीतायाः स्वसमीपनयनचोदना ॥ १ ॥ विभीषणेन सीतायाः शिबिकारोपणेनरामसमीपप्रापणावसरे सरणिगतवानरगणदूरापसारणे तंप्रतिरामेण सरोषोपालम्भं पादचारेणसीतानयनचोदना ॥ २ ॥ तथासमागतयासीतया सुहृद्गणमध्यगतश्रीरामचन्द्रमुखावलोकनेन हर्षाधिगमः ॥ ३ ॥

स उवाच महाप्राज्ञमभिगम्य प्लवङ्गमः ॥ रामं वचनमर्थज्ञो वरं सर्वधनुष्मताम् ॥ १ ॥
यन्निमित्तोऽयमारम्भः कर्मणां च फलोदयः ॥ तां देवीं शोकसंतप्तां मैथिलीं द्रष्टुमर्हसि ॥ २ ॥
सा हि शोकसमाविष्टा बाष्पपर्याकुलेक्षणा ॥ मैथिली विजयं श्रुत्वा तव हर्षमुपागमत् ॥ ३ ॥
पूर्वकात्प्रत्ययाच्चाहमुक्तो विश्वस्तया तया ॥ भर्तारं द्रष्टुमिच्छामि कृतार्थं सहलक्ष्मणम् ॥ ४ ॥
एवमुक्तो हनुमता रामो धर्मभृतां वरः ॥ अगच्छत्सहसा ध्यानमीषद्बाष्पपरिप्लुतः ॥ ५ ॥
दीर्घमुष्णं विनिश्वस्य मेदिनीमवलोकयन् ॥ उवाच मेघसंकाशं विभीषणमुपस्थितम् ॥ ६ ॥
दिव्याङ्गरागां वैदेहीं दिव्याभरणभूषिताम् ॥ इह सीतां शिरस्स्नातामुपस्थापय मा चिरम् ॥ ७ ॥
एवमुक्तस्तु रामेण त्वरमाणो विभीषणः ॥ प्रविश्यान्तःपुरं सीतां स्वाभिः स्त्रीभिरचोदयत् ॥ ८ ॥
[ततः सीतां महाभागां दृष्ट्वोवाच विभीषणः ॥ मूर्ध्नि बद्धाञ्जलिः श्रीमान्विनीतो राक्षसेश्वरः ॥९॥]
दिव्याङ्गरागा वैदेहि दिव्याभरणभूषिता ॥ यानमारोह भद्रं ते भर्ता त्वां द्रष्टुमिच्छति ॥ १० ॥
एवमुक्ता तु वैदेही प्रत्युवाच विभीषणम् ॥ अस्नाता द्रष्टुमिच्छामि भर्तारं राक्षसाधिप ॥ ११ ॥
तस्यास्तद्वचनं श्रुत्वा प्रत्युवाच विभीषणः ॥ यदाह राजा भर्ता ते तत्तथा कर्तुमर्हसि ॥ १२ ॥

अथ सीतानयनं–स उवाचेत्यादि ॥१॥ आरम्भः उद्योगः । कर्मणां सेतुबन्धादिव्यापाराणां । फलोदयः रावणविजयश्च यन्निमित्तः यस्याः सीताया लाभार्थः। तां द्रष्टुमर्हसि ॥ २—३ ॥ पूर्वकात् पूर्वोत्पन्नात् । प्रत्ययात् विश्वासात् ॥ ४ ॥ रामः ईषद्बाष्पपरिप्लुतः सन् सहसा ध्यानमागच्छत् । रावणभवनोषितसीतापरिग्रहे महान् लोकापवादो भवेत् निर्दोषायास्तस्याः परित्यागे महान् दोषः स्यादित्येवं कार्यदौस्थ्यात् किं कर्तव्यमिति चिन्तयामासेत्यर्थः ॥ ५ ॥ निःश्वासदैर्घ्येण चिन्तादैर्घ्यं गृह्यते । औष्ण्येन कथं क्लिष्टां तां पुनः क्लेशयिष्यामीत्यन्तस्तापो व्यज्यते । भूमिं समवलोकयन्निति चिन्तापारवश्याभिनयः । मेघसंकाशमित्यनेन सीतानयने कृतत्वरत्वमुच्यते ॥ ६ ॥ दिव्याङ्गरागामिति । अलंकृत्यानयनादेशः उत्तरकालिकपरुषभाषणार्हताप्रतिपादनाय । नहि तादृशदशापन्नां दीनां परुषं भाषितुं युज्यते । तच्च तस्या न परित्यागार्थं किंतु चतुर्मुखादिदेवतामुखेन तस्याः पातिव्रत्यं ख्यापयितुं । मा चिरं बिलम्बो न कार्य इत्यर्थः ॥ ७ ॥ एवमित्यादिश्लोकद्वयमेकान्वयं । स्वाभिः स्त्रीभिरचोदयत् निजस्त्रीमुखेनाचोदयत् ॥ ८—११ ॥ प्रत्युवाच स्त्रीमुखेनेति शेषः । यथानियोगं कर्तव्यत्वे हेतुद्वयम्—राजा भर्तेति ॥ १२ ॥

ति० ध्यानमगच्छत् । वस्तुतोमुख्यसीतालाभोन्नेःकथंस्यादितिचिन्तात्र ॥ ५ ॥ ति० दिव्याङ्गरागामिति । तैस्तस्यारूपाधिक्याभिव्यक्तावीदृश्यर्थेऽयंमेउद्यमइतिसर्वोज्ञापयितुमेवंवादः ॥ ७ ॥ स० स्वाभिः स्त्रीभिः सरमात्रिजटादिभिः । सीतामवादयत् । राजस्त्रीत्वात्साक्षादसंभाषणमितिज्ञेयं ॥ ८ ॥ ती० भर्तात्वांद्रष्टुमिच्छतीति । स्वाभिःस्त्रीभिरचोदयदिति पूर्वेण संबन्धः ॥ १० ॥ ति० तस्यास्तद्वचनं स्नानाद्यनङ्गीकारवचनं । यथारामआह तथाकर्तुमर्हसि । " तांदृष्ट्वाचारुसर्वाङ्गींयानस्थांशोककर्शिताम् । मलोपचितसर्वाङ्गींजटिलांकृष्णवाससम् । उवाचरामोवैदेहींपरामर्शविशङ्कितः । " इति। भारतेतु मलोपचितेत्यर्धंपूर्वमितिशेषः ॥

[पा०] १ ख. प्राज्ञमभिवाद्य. ङ. झ. ट. प्राज्ञःसोभिवाद्य. २ ङ. झ. ट. रामंकमलपत्राक्षं. ३ ख. च. छ. ञ सीतां तांशोक. ४ ङ. झ. श्रुत्वाद्रष्टुंत्वामभिकाङ्क्षति. ५ ज. विश्वसितस्तदा. ६ ङ. झ. द्रष्टुमिच्छामिभर्तारमितिपर्याकुलेक्षण. ७ क. घ. ज. रवादयत्. ८ घ. ङ. च. छ. झ. ञ. ट. पाठेष्वयंश्लोकोदृश्यते.

तस्य तद्वचनं श्रुत्वा मैथिली भर्तृदेवता ॥ भर्तृभक्तिव्रता साध्वी तथेति प्रत्यभाषत ॥ १३ ॥
ततः सीतां शिरःस्नातां[1] युवतीभिरलंकृताम् ॥ महार्हाभरणोपेतां महार्हाम्बरधारिणीम् ॥ १४ ॥
आरोप्य शिबिकां दीप्तां परार्ध्याम्बरसंवृताम् ॥ रक्षोभिर्बहुभिर्गुप्तामाजहार विभीषणः ॥ १५ ॥
सोभिगम्य महात्मानं ज्ञात्वाऽपि ध्यानमास्थितम् ॥ प्रणतश्च प्रहृष्टश्च प्राप्तां सीतां न्यवेदयत् ॥१६॥
तामागतामुपश्रुत्य रक्षोगृहचिरोषिताम् ॥ हर्षो[3] दैन्यं च रोषश्च त्रयं राघवमाविशत् ॥ १७ ॥
ततः[4] पार्श्वगतं दृष्ट्वा सविमर्शं विचारयन् ॥ विभीषणमिदं वाक्यमहृष्टं[6] राघवोऽब्रवीत् ॥ १८ ॥
राक्षसाधिपते सौम्य नित्यं मद्विजये रत ॥ वैदेही सन्निकर्षं मे शीघ्रं समुपगच्छतु ॥ १९ ॥
सं[8] तद्वचनमाज्ञाय राघवस्य विभीषणः ॥ तूर्णमुत्सारणे यत्नं कारयामास सर्वतः ॥ २० ॥
कञ्चुकोष्णीषिणस्तत्र वेत्रजर्जरपाणयः ॥ उत्सारयन्तः पुरुषाः समन्तात्परिचक्रमुः ॥ २१ ॥
ऋक्षाणां वानराणां च राक्षसानां च सर्वशः ॥ वृन्दान्युत्सार्यमाणानि दूरमुत्सस्रुजुस्तदा ॥ २२ ॥
तेषामुत्सार्यमाणानां[12] सर्वेषां ध्वनिरुत्थितः ॥ वायुनोद्वर्तमानस्य[12] सागरस्येव निस्स्वनः ॥ २३ ॥
उत्सार्यमाणांस्तान्दृष्ट्वा[13] समन्ताज्जातसंभ्रमान् ॥ दाक्षिण्यात्तदमर्षाच्च वारयामास राघवः ॥ २४ ॥
संरब्धश्चाब्रवीद्रामश्चक्षुषा प्रदहन्निव ॥ विभीषणं महाप्राज्ञं सोपालम्भमिदं वचः ॥ २५ ॥
किमर्थं मामनादृत्य क्लिश्यतेऽयं त्वया जनः ॥ निवर्तयैनं[14] मुद्योगं जनोऽयं स्वजनो मम ॥ २६ ॥
न गृहाणि न वस्त्राणि न प्राकारास्तिरस्क्रियाः ॥ नेदृशा राजसत्कारा वृत्तमावरणं स्त्रियाः ॥२७॥
व्यसनेषु न कृच्छ्रेषु न युद्धेषु स्वयंवरे ॥ न क्रतौ न विवाहे च दर्शनं दुष्यति स्त्रियाः ॥ २८ ॥

अङ्गीकारेहेतुद्वयं भर्तृदेवता भर्तृभक्तिव्रतेति ॥ १३—१५ ॥ ज्ञात्वापि विभीषणागमनं विदित्वापि । अनेन चिन्तानुवृत्तिरुक्ता ॥ १६ ॥ तामिति । रावणवधपूर्वकसीतागमेन हर्षः । रावणभवनोषितत्वेन दैन्यं रोषश्च । अत्र रोषो भाविशपथोपयोगित्वादारोपित इति द्रष्टव्यं ॥ १७ ॥ सविमर्शं विचारयन् सवितर्कं चिन्तयन् । अहृष्टमिति क्रियाविशेषणं विभीषणविशेषणं वा ॥ १८—१९ ॥ उत्सारणे जननिवारणे ॥ २० ॥ कञ्चुकेति । कञ्चुकं वारबाणं । उष्णीषं शिरोवेष्टनं । वेत्रेण जर्जराः सदावलम्बनजनितपारुष्याः पाणयो येषां ते ॥२१॥ उत्सस्रुजुः अपचक्रमुः ॥ २२ ॥ उद्वर्तमानस्य उज्जृम्भमाणस्य ॥ २३ ॥ दाक्षिण्यात् वानरेषुदाक्षिण्यात् । अमर्षात् उत्सारणासहनात् ॥ २४ ॥ चक्षुषा प्रदहन्निवेति लोचनाभ्यां पिबन्निवेत्युक्तादरपात्रभूतस्य विभीषणस्यैवंविधदर्शनविषयताकरणं स्वजननिग्रहासहिष्णुत्वात् । सीताविषयसमारोपितरोषविशेषाद्वा ॥ २५—२६ ॥ तिरस्क्रियाः तिरस्करिण्यः । राजसत्काराः उत्सारणादिकं । वृत्तं आचारः ॥ २७ ॥ व्यसनेषु इष्टजनवियोगेषु । कृच्छ्रेषु राज्यक्षोभादिषु । युद्धे युद्धभूमौ

स० ननुभारते " तांदृष्ट्वाचारुसर्वाङ्गींयानस्थांशोककर्शिताम् । मलोपचितसर्वाङ्गींजटिलांकृष्णवाससम् " इत्युक्तेःकथमत्रैवंकथनमितिचेदुच्यते । स्वच्छन्देनाङ्गशोधनाद्यभावेनभारतेमलोपचितेत्याद्युक्तिः । अत्रतु रामाज्ञयातत्सजातत्वेनप्रतिकर्मणासंयुक्तामित्याद्युक्तिः । अथवा भारतवचनोत्तरार्धे हनुमद्वचनेनमलोपचितसर्वाङ्गींसंस्मरतोरामस्यतथैवदर्शनमितिपूर्वमेतादृशीमितिवार्थाङ्गीकारेणवाऽविरोधोपपत्तेः ॥१२॥ स० वहनोचितैः राजावरोधयानवहनोचितैः । राक्षसैः वृद्धैरविन्ध्यादिभिः । उक्तंचभारते— " ततःसीतांपुरस्कृत्येत्यारभ्य—अविन्ध्योनामसुप्राज्ञोवृद्धामात्योविनिर्ययौ " इति ॥ १५ ॥ ति० रोषं सर्वानर्थमूलयाऽनयाकिलसमुहृद्भ्रातृकेणेदंबहुदुःखमनुभूतमितिरोषः ॥ १७ ॥

[पा०] १ ख. ङ. ञ. स्नातांसंयुक्तांप्रतिकर्मणा. २ ङ. ञ. ट. सीतांराक्षसैर्वहनोचितैः ॥ राक्षसैर्बहुभिर्गुप्तां. ३ ङ. ञ. रोषंहर्षंचदैन्यंचराघवःप्रापशत्रुहा. ४ ज. राघवमागतं. ५ ङ. ञ. ट. ततोयानगतांसीतां. ६ क. घ. ङ. ज—ट. वाक्यमहृष्टो. ख. वाक्यंप्रहृष्टो. ७ ख. ङ. च. छ. ञ. ञ. ट. तस्यतद्वचनंश्रुत्वा. ८ ङ. ञ. तूर्णमुत्सारणंतत्र. ९ ङ. ञ. उत्सारयन्तस्तान्योधान्. १० ङ. ञ. ञ. ट. दूरमुत्तस्थुरन्ततः. ११ ङ. ञ. ट. निस्स्वनस्सुमहानभूत्. १२ ञ. वायुनोद्भूयमानस्य. १३ ङ. ञ. माणान्दृष्ट्वाथजगत्यांजात. १४ ङ. ञ. मुद्वेगं.

सैषा युद्धगता चैव कृच्छ्रे च महति स्थिता ॥ दर्शनेऽस्या न दोषः स्यान्मत्समीपे विशेषतः ॥२९॥
[विसृज्य शिबिकां तस्मात्पद्भ्यामेवापसर्पतु ॥ समीपे मम वैदेहीं पश्यन्त्वेते वनौकसः] ॥ ३० ॥
तदानय समीपं मे शीघ्रमेनां विभीषण ॥ सीता पश्यतु मामेषा सुहृद्गणवृतं स्थितम् ॥ ३१ ॥
एवमुक्तस्तु रामेण सविमर्शो विभीषणः ॥ रामस्योपानयत्सीतां सन्निकर्षं विनीतवत् ॥ ३२ ॥
ततो लक्ष्मणसुग्रीवौ हनुमांश्च प्लवङ्गमः ॥ निशम्य वाक्यं रामस्य बभूवुर्व्यथिता भृशम् ॥ ३३ ॥
कलत्रनिरपेक्षैश्च इङ्गितैरस्य दारुणैः ॥ अप्रीतमिव सीतायां तर्कयन्ति स्म राघवम् ॥ ३४ ॥
लज्जया त्ववलीयन्ती स्वेषु गात्रेषु मैथिली ॥ विभीषणेनानुगता भर्तारं साऽभ्यवर्तत ॥ ३५ ॥
सा वस्त्रसंरुद्धमुखी लज्जया जनसंसदि ॥ रुरोदासाद्य भर्तारमार्यपुत्रेति भाषिणी ॥ ३६ ॥
विस्मयाच्च प्रहर्षाच्च स्नेहाच्च पतिदेवता ॥ उदैक्षत मुखं भर्तुः सौम्यं सौम्यतराननाः ॥ ३७ ॥

अथ समपनुदन्मनःक्लमं सा सुचिरमदृष्टमुदीक्ष्य वै प्रियस्य ॥
वदनमुदितपूर्णचन्द्रकान्तं विमलशशाङ्कनिभानना तदानीम् ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तदशोत्तरशततमः सर्गः ॥ ११७ ॥

अष्टादशोत्तरशततमः सर्गः ॥ ११८ ॥

रामेणसीतांप्रति रावणवधावधिप्रयासस्य निजापयशःप्रमार्जनप्रयोजकत्वोक्तिपूर्वकं तच्चारित्र्यबुद्धिसंदेहरूपहेतूक्त्वा तत्परिग्रहानभिरोचनवचनम् ॥ १ ॥

तां तु पार्श्वस्थितां ह्रीमां रामः संप्रेक्ष्य मैथिलीम् ॥ हृदयान्तर्गतं क्रोधो व्याहर्तुमुपचक्रमे ॥ १ ॥
एषाऽसि निर्जिता भद्रे शत्रुं जित्वा मया रणे ॥ पौरुषाद्यदनुष्ठेयं तदेतदुपपादितम् ॥ २ ॥
गतोस्म्यन्तममर्षस्य धर्षणा संप्रमार्जिता ॥ अवमानश्च शत्रुश्च मया युगपदुद्धृतौ ॥ ३ ॥
अद्य मे पौरुषं दृष्टमद्य मे सफलः श्रमः ॥ अद्य तीर्णप्रतिज्ञत्वात्प्रभवामीह चात्मनः ॥ ४ ॥

॥ २८ ॥ कृच्छ्रे वक्ष्यमाणाग्निप्रवेशे ॥ २९—३१ ॥ सविमर्शः कृच्छ्रशब्दप्रयोगात्साशङ्कः ॥३२—३३॥ व्यथायां हेतुमाह—कलत्रेति ॥ ३४ ॥ अवलीयन्ती संकुचन्ती ॥ ३५–३६ ॥ विस्मयात् अघटितराम-पुनर्दर्शनाद्विस्मयः । प्रियस्य दर्शनेन प्रहर्षः । स्नेहः स्वाभाविकः । उदीक्षणकालिकमुखप्रसादमाह—सौम्येति ॥ ३७ ॥ उदितपूर्णचन्द्रेत्यनेन कोपरक्तत्व-मुक्तं। विमलशशाङ्केत्यनेन उत्तरकालिकक्षयः सूच्यते ॥३८॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तदशोत्तरशततमः सर्गः ॥ ११७ ॥

अथ रामपरुषोक्तिः—तां तु पार्श्वस्थितामित्यादि । ह्रीमां लज्जया नम्रां ॥ १ ॥ एषेति प्रत्यक्षेण दर्शयति। भद्रे इत्यसंबन्धनिवेदकसंबोधनं । पौरुषाद्यदनुष्ठेयं तदेव कृतं । नतु त्वल्लाभाय यत्नः कृत इति भावः ॥ २ ॥ अन्तं फलं । उद्धृतौ निर्मूलितौ ॥ ३ ॥ आत्मनः प्रभवामि स्वतन्त्रो भवामि ॥ ४ ॥

स० मनःक्लमंसमपनुदत् यद्वदनं तदुदीक्ष्यशशाङ्कनिभाननासीदित्यन्वयः ॥ एतेनसमपनुददित्यस्यसमपानुददित्याख्याततयाव्याख्यानंनागोजिभट्टस्यान्वयाप्रतिभासमूलं ॥ ३८ ॥ इतिसप्तदशोत्तरशततमःसर्गः ॥ ११७ ॥

[पा०] १ ङ. ञ. ट. सैषाविपद्गताचैवकृच्छ्रेणचसमन्विता. २ अयंश्लोकः ङ. ञ. ट. पाठेषुदृश्यते. ३ क. ङ. च. छ. ञ. ट. तदासीत्. ४ ख. च. छ. ट. गतद्वेषो.

या त्वं विरहिता नीता चलचित्तेन रक्षसा ॥ दैवसंपादितो दोषो मानुषेण मया जितः ॥ ५ ॥
संप्राप्तमवमानं यस्तेजसा न प्रमार्जति ॥ कस्तस्य पुरुषार्थोस्ति पुरुषस्याल्पतेजसः ॥ ६ ॥
लङ्घनं च समुद्रस्य लङ्कायाश्चावमर्दनम् ॥ सफलं तस्य तच्छ्लाघ्यं महत्कर्म हनूमतः ॥ ७ ॥
युद्धे विक्रमतश्चैव हितं मन्त्रयतश्च मे ॥ सुग्रीवस्य ससैन्यस्य सफलोऽद्य परिश्रमः ॥ ८ ॥
निर्गुणं भ्रातरं त्यक्त्वा यो मां स्वयमुपस्थितः ॥ विभीषणस्य भक्तस्य सफलोद्य परिश्रमः ॥ ९ ॥
इत्येवं ब्रुवतस्तस्य सीता रामस्य तद्वचः ॥ मृगीवोत्फुल्लनयना बभूवाश्रुपरिप्लुता ॥ १० ॥
पश्यैतस्यां तु रामस्य भूयः क्रोधो व्यवर्धत ॥ प्रभूताज्यावसिक्तस्य पावकस्येव दीप्यतः ॥ ११ ॥
स बद्ध्वा भ्रुकुटीं वक्त्रे तिर्यक्प्रेक्षितलोचनः ॥ अब्रवीत्परुषं सीतां मध्ये वानररक्षसाम् ॥ १२ ॥
यत्कर्तव्यं मनुष्येण धर्षणां परिमार्जता ॥ तत्कृतं सकलं सीते शत्रुहस्तादमर्षणात् ॥ १३ ॥
निर्जिता जीवलोकस्य तपसा भावितात्मना ॥ अगस्त्येन दुराधर्षा मुनिना दक्षिणेव दिक् ॥१४॥
विदितश्चास्तु ते भद्रे योऽयं रणपरिश्रमः ॥ स तीर्णः सुहृदां वीर्यान्न त्वदर्थे मया कृतः ॥ १५ ॥
रक्षता तु मया वृत्तमपवादं च सर्वशः ॥ प्रख्यातस्यात्मवंशस्य न्यङ्गं च परिरक्षता ॥ १६ ॥
प्राप्तचारित्रसंदेहा मम प्रतिमुखे स्थिता ॥ दीपो नेत्रातुरस्येव प्रतिकूलासि मे दृढम् ॥ १७ ॥

मया विरहिता या त्वं चलचित्तेन रक्षसा नीता । तया त्वया हेतुभूतया दैवसंपादितः दोषः अवमानः । मानुषेण प्रमार्जितः । दैवकृतं पुरुषयत्नेन निवारितमिति भावः ॥ ५ ॥ धर्षणाया अमार्जने दोषमाह—संप्राप्तमिति । प्रमार्जेति प्रमार्ष्टि ॥ ६ ॥ इदानीं हनुमदादिपौरुषस्यापि धर्षणावमार्जनहेतुत्वमाह—लङ्घनं चेत्यादिना । समुद्रस्य लङ्घनं लङ्कायाः अवमर्दनं इत्येवंरूपं हनुमतः श्लाघ्यं कर्मचाद्य सफलं । धर्षणापरिमार्जनेन सफलमित्यर्थः ॥ ७ ॥ मन्त्रयतः चिन्तयतः ॥ ८ ॥ निर्गुणमिति ॥ तस्येत्यध्याहार्यं ॥ ९ ॥ तद्वचः नैराश्येनोक्तं वचः । तस्य ब्रुवतः । तस्मिन् ब्रुवति सति ॥ १० ॥ पावकस्येति । पावकस्य क्रोधोतीव ज्वलनं ॥ ११ ॥ तिर्यक्प्रेक्षितलोचनः तिर्यक्प्रेक्षणं पुरतः सीतादर्शनासहिष्णुत्वकृतं ॥१२॥ यत्कर्तव्यमित्यादित्रिपादश्लोक एकान्वयः ॥ हे सीते धर्षणां परिमार्जता । "मृजेरजादौ विभाषा वृद्धिः" इति वृद्धिः । मनुष्येण यत्कर्तव्यं तत् सकलं कृतं । शत्रुहस्तादमर्षणादित्युत्तरशेषः ॥ १३ ॥ भावितात्मना ध्यातात्मस्वरूपेण । अगस्त्येन । इत्वलाक्रान्तत्वाज्जीवलोकस्य दुराधर्षा दुःसंचारा दक्षिणा दिगिव । अमर्षणात् अमर्षाद्धेतोः । शत्रुहस्तान्मया त्वं निर्जितेति संबन्धः ॥ १४ ॥ योयं रणपरिश्रमः सुहृदां वीर्यात्तीर्णः निर्व्यूढः सः त्वदर्थं मया न कृत इति विदितोस्तु ॥ १५ ॥ तर्हि किमर्थमेष परिश्रम इत्यत आह—रक्षतेति ॥ अत्र मया रणपरिश्रमः कृत इत्यनुषज्यते । वृत्तं रक्षता अपवादं न्यङ्गं अयशस्यं च परिरक्षता परिहरता निवारयता । मया रणपरिश्रमः कृतः ॥ १६ ॥ परगृहवासेन प्राप्तचारित्रसंदेहा त्वं नेत्रातुरस्य दीप इव प्रतिकूलासि । अनेनोपमानेन वस्तुतः सीताया दोषो नास्ति । स्वसंदेहेनाहं प्रतिकूलीकरोमीति व्यज्य-

---

स० हृदयप्रियां मनोहरां । श्रीवत्साश्रितरमारूपत्वाद्वा । एतादृशदैन्यदर्शनंस्वीकारहेतुः । जनवादः जनापवादः । द्विधा प्राप्यावाप्याज्यावेति ॥ ति० तद्रूपदर्शनादङ्गीकारबुद्धिः । जनवादभयात्त्यागबुद्धिः । भावसंधिरत्र ॥ इदंव्याख्यानद्वयंपाठान्तरस्थश्लोकद्वयस्य ॥ ११ ॥ इत्यष्टादशोत्तरशततमस्सर्गः ॥ ११८ ॥

[पा०] १ ग. दशग्रीवेणरक्षसा. २ ङ. झ. कस्तस्यपौरुषेणार्थोमहताप्यल्पचेतसः. ३ क. ख. घ. ङ. ज.—ट. तच्छ्लाघ्यमथकर्म. ४ पश्यतस्तांत्रिलिखादिश्लोकद्वयस्यस्थाने पश्यतस्तांतुरामस्यसमीपेहृदयप्रियां । जनवादभयाद्राज्ञोबभूवहृदयंद्विधा । सीतामुत्पलपत्राक्षींनीलकुञ्चितमूर्धजां । अवदद्वैदेहारोहांमध्येवानररक्षसां । इतिश्लोकद्वयं ङ. झ. पाठयोर्दृश्यते. ५ ख. च. छ. ञ. ट. मयापितत्कृतंसीते. ङ. झ. तत्कृतंरावणंहत्वामयेदंमानकाङ्क्षिणा. ६ ख. सीतेतवदुभद्रंतेयोयो. ७ ङ. झ. ट. परिमार्जता-

तद्गच्छ ह्यभ्यनुज्ञाता यथेष्टं जनकात्मजे ॥ एता दश दिशो भद्रे कार्यमस्ति न मे त्वया ॥ १८ ॥
कः पुमान्हि कुले जातः स्त्रियं परगृहोषिताम् ॥ तेजस्वी पुनरादद्यात्सुहृल्लेख्येन चेतसा ॥ १९ ॥
रावणाङ्कपरिभ्रष्टां दृष्टां दुष्टेन चक्षुषा ॥ कथं त्वां पुनरादद्यां कुलं व्यपदिशन्महत् ॥ २० ॥
तदर्थं निर्जिता मे त्वं यशः प्रत्याहृतं मया ॥ नास्ति मे त्वय्यभिष्वङ्गो यथेष्टं गम्यतामितः ॥२१॥
इति प्रव्याहृतं भद्रे मयैतत्कृतबुद्धिना ॥ लक्ष्मणे भरते वा त्वं कुरु बुद्धिं यथासुखम् ॥ २२ ॥
सुग्रीवे वानरेन्द्रे वा राक्षसेन्द्रे विभीषणे ॥ निवेशय मनः सीते यथा वा सुखमात्मनः ॥ २३ ॥
न हि त्वां रावणो दृष्ट्वा दिव्यरूपां मनोरमाम् ॥ मर्षयेत चिरं सीते स्वगृहे परिवर्तिनीम् ॥ २४ ॥

ततः प्रियार्हश्रवणा तदप्रियं प्रियादुपश्रुत्य चिरस्य मैथिली ॥
मुमोच बाष्पं सुभृशं प्रवेपिता गजेन्द्रहस्ताभिहतेव सल्लकी ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टादशोत्तरशततमः सर्गः ॥ ११८ ॥

एकोनविंशत्युत्तरशततमः सर्गः ॥ ११९ ॥

सीतयारामंप्रति स्वचारित्रशुद्धिप्रतिज्ञापूर्वकं लक्ष्मणंप्रत्यग्निप्रवेशनिर्धारणोक्त्याऽग्निकुण्डनिर्माणचोदना ॥ १ ॥ ततोरामेङ्गिताभिज्ञलक्ष्मणनिर्मिताग्निकुण्डे सशपथंप्रवेशः ॥ २ ॥

एवमुक्ता तु वैदेही परुषं रोमहर्षणम् ॥ राघवेण सरोषेण भृशं प्रव्यथिताऽभवत् ॥ १ ॥
सा तदश्रुतपूर्वं हि जने महति मैथिली ॥ श्रुत्वा भर्तृवचो रूक्षं लज्जया व्रीडिताऽभवत् ॥ २ ॥
प्रविशन्तीव गात्राणि स्वान्येव जनकात्मजा ॥ वाक्यशल्यैस्तैः सशल्येव भृशमश्रूण्यवर्तयत् ॥ ३ ॥
ततो बाष्पपरिक्लिष्टं प्रमार्जन्ती स्वमाननम् ॥ शनैर्गद्गदया वाचा भर्तारमिदमब्रवीत् ॥ ४ ॥
किं मामसदृशं वाक्यमीदृशं श्रोत्रदारुणम् ॥ रूक्षं श्रावयसे वीर प्राकृतः प्राकृतामिव ॥ ५ ॥
न तथाऽस्मि महाबाहो यथा त्वमवगच्छसि ॥ प्रत्ययं गच्छ मे येन चारित्रेणैव ते शपे ॥ ६ ॥

ते ॥ १७—१८ ॥ सुहृल्लेखेन सुहृल्लेखा रणरणकं सुहृल्लेखामर्हतीति सुहृल्लेख्यं तेन । रणरणकातिशययुक्तेनेत्यर्थः ॥ १९ ॥ व्यपदिशन् कीर्तयन् ॥ २० ॥ तदर्थं कुलार्थं । अभिष्वङ्गः आसक्तिः । अनुरागो वा ॥ २१ ॥ इति प्रव्याहृतमित्यादिश्लोकद्वयमेकान्वयं ॥ अत्र लक्ष्मणादौ मनःकरणं नाम अनाथाया रक्षकत्वेन तत्तद्गृहे वर्तनं । भर्त्रा परित्यक्तायाः स्त्रियो बन्धुगृहे वासविधानात् । "न स्त्री स्वातन्त्र्यमर्हति" इति स्मृतेः । न त्वत्रान्यथा ग्रहीतुं युक्तं । महापुरुषेण तादृशोक्त्ययोगात् ॥ २२—२४ ॥ सल्लकी गजभक्ष्यलताविशेषः ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टादशोत्तरशततमः सर्गः ॥ ११८ ॥

अथ सीताग्निप्रवेशः—एवमुक्त्वा त्विति ॥ १ ॥ जने महति महाजनमध्ये लज्जया व्रीडिता । अतिनम्रमुखी बभूवेत्यर्थः ॥ २ ॥ गात्राणि प्रविशन्ती संकुचन्तीत्यर्थः ॥ ३—४ ॥ असदृशं त्वया वक्तुं मया श्रोतुं चायोग्यं । रूक्षं परुषं । अतएव श्रोत्रदारुणं श्रवणकटु ॥ ५ ॥ चारित्रेण ममेति शेषः । ते तुभ्यं । "श्लाघह्नुङ्स्थाशपां—" इति संप्रदानत्वं । सुकृतेन शपमाना त्वां शापं ज्ञापयामीत्यर्थः ॥ ६ ॥

[पा०] १ ग. ङ. झ. ट. त्सुहृल्लोभेन. २ ङ. झ. शत्रुघ्नेवाथसुग्रीवेराक्षसेवाविभीषणे. ३ ङ. झ. ट. पर्यवस्थितां. ४ ङ. झ. ट. मानिनी. ५ ख. सुवेपिता. ६ ख.—ट. वल्लरी. ७ ख. च. छ. ट. भृशंप्रव्यथिताऽभवत्. ८ क. ख. ङ. च. छ. झ. ट. मेखेन.

पृथक्स्त्रीणां प्रचारेण [1]जातिं तां परिशङ्कसे ॥ [2]परित्यजेमां शङ्कां तु यदि तेऽहं परीक्षिता ॥ ७ ॥
यद्यहं गात्रसंस्पर्शं गताऽस्मि विवशा प्रभो ॥ कामकारो न मे तत्र दैवं तत्रापराध्यति ॥ ८ ॥
मदधीनं तु यत्तन्मे हृदयं त्वयि वर्तते ॥ पराधीनेषु गात्रेषु किं करिष्याम्यनीश्वरा ॥ ९ ॥
सह [3]संवृद्धभावाच्च संसर्गेण च मानद ॥ यद्यहं ते न विज्ञाता हता तेनास्मि शाश्वतम् ॥ १० ॥
प्रेषितस्ते यदा वीरो हनुमानवलोककः ॥ लङ्कास्थाऽहं त्वया वीर किं तदा न विसर्जिता ॥ ११ ॥
प्रत्यक्षं वानरेन्द्रस्य त्वद्वाक्यसमनन्तरम् ॥ त्वया संत्यक्तया वीर त्यक्तं स्याज्जीवितं मया ॥ १२ ॥
न वृथा ते श्रमोऽयं स्यात्संशये न्यस्य जीवितम् ॥ सुहृज्जनपरिक्लेशो न चायं निष्फलस्तव ॥१३॥
त्वया तु नरशार्दूल क्रोधमेवानुवर्तता ॥ लघुनेव मनुष्येण स्त्रीत्वमेव पुरस्कृतम् ॥ १४ ॥
[4]अपदेशेन जनकान्नोत्पत्तिर्वसुधातलात् ॥ मम वृत्तं च वृत्तज्ञ बहु तेन पुरस्कृतम् ॥ १५ ॥
न प्रमाणीकृतः पाणिर्बाल्ये बालेन पीडितः ॥ मम भक्तिश्च शीलं च सर्वं ते पृष्ठतः कृतम् ॥१६॥
एवं ब्रुवाणा रुदती बाष्पगद्गदभाषिणी ॥ [5]अब्रवील्लक्ष्मणं सीता दीनं ध्यानपरं स्थितम् ॥ १७ ॥
चितां मे कुरु सौमित्रे व्यसनस्यास्य भेषजम् ॥ [6]मिथ्योपघातोपहता नाहं जीवितुमुत्सहे ॥ १८ ॥
[7]अप्रीतस्य गुणैर्भर्तुस्त्यक्तायां जनसंसदि ॥ या क्षमा मे गतिर्गन्तुं प्रवेक्ष्ये हव्यवाहनम् ॥ १९ ॥

स्त्रीमात्रसाधारण्येन नाहं द्रष्टव्येत्याह—पृथक्स्त्रीणामिति ॥ पृथक्स्त्रीणां प्राकृतस्त्रीणां । प्रचारेण आचारेण हेतुना । सर्वामपि स्त्रीजातिं तथात्वेन शङ्कसे । अहं ते त्वया । यदि परीक्षिता ज्ञातस्वभावा तर्हीमां शङ्कां त्यज ॥ ७ ॥ त्वयि ज्ञातस्वभावायामपि रावणाङ्गस्पर्शलक्षणो दोषस्त्यागहेतुरित्याशङ्क्याह—यद्यहमित्यादि। यद्यपि अहं विवशा सती गात्रसंस्पर्शं गतास्मि तथापि तत्र मे कामकारः स्वेच्छाचरणं । नास्ति । तर्हि कस्यात्रापराध इत्यत्राह—दैवं तत्रेति ॥ ८ ॥ मदधीनं परैर्ग्रहीतुमशक्यं । यद्धृदयं तत्तु तस्मिन्काले त्वयि वर्तते अवर्तत । पराधीनेषु परैर्ग्रहीतुं शक्येषु गात्रेषु विषये। अनीश्वरा अस्वतन्त्रा । अहं किं करिष्यामि किं कुर्या ॥ ९ ॥ स्वभावपरिज्ञानहेतुभूतसहसंवर्धनसंसर्गावपि प्रत्ययं यदि नोत्पादयतः तर्हि न किमपि ते प्रत्ययमुत्पादयितुं शक्नुयादित्याशयेनाह—सह संवृद्धेति ॥ सह संवृद्धभावात् स्वभावपरिज्ञानहेतुना सह संवर्धनेन संसर्गेण संश्लेषेण च यद्यहं ते न विज्ञाता । ततः मत्स्वभावाज्ञानेन शाश्वतं अत्यर्थं । हतास्मि ॥ १० ॥ अवलोककः अवलोकितुं । अन्वेष्टुमिति यावत् । " तुमुन्ण्वुलौ क्रियायां क्रियार्थायां " इति ण्वुल्प्रत्ययः ॥ ११ ॥ तदात्वे को विशेष इत्यत आह—प्रत्यक्षमिति ॥ १२ ॥ एवं कृते न केवलं ममैव व्यथाभावः तव त्वत्सुहृदां च जयार्थप्रयासोपि न स्यादित्याह—न वृथेति ॥ जीवितं संशये न्यस्य कृतोयं श्रम इत्यर्थः ॥ १३—१४ ॥ अपदेशेन जनकात् जनकमपदिश्येत्यर्थः ॥ १५—१७ ॥ मिथ्योपघातः मिथ्यापवादः ॥१८॥ गुणैरप्रीतस्य विद्यमानैः पातिव्रत्यादिगुणैरपि अप्रीतस्य भर्तुस्त्यक्तायां मे या गन्तुं क्षमा गतिः प्रत्ययजननार्थं या योग्या गतिः । तं हव्यवाहनं प्रवेक्ष्य इति योजना ॥ १९ ॥

स० पृथक्स्त्रीणां मूर्खस्त्रीणां । पृथग्जनशब्दस्यमूर्खेप्रयोगवदयंप्रयोगः । यद्वा स्त्रीणांपृथक्त्वंनाम पतिबुद्धिविरुद्धबुद्धिमत्त्वं । विभिन्नयोरपिमत्यैक्येनैक्यव्यवहारदर्शनात् । तथाच स्वैरिणीनामितिफलितोर्थः । प्रचारेण आचारेण । जातिं सर्वस्त्रीसमूहं । यदि ते त्वयाऽहं परीक्षितास्यां तदेमांशङ्कांएकस्मायत्रक्वापिदुष्टत्वे सर्वांअपितादृग्यइतिविपरीतसंभावनां त्यज त्यक्ष्यसि ॥७॥ ति० स्वतोदोषजनकं कर्मतुमेनास्तीत्याह—**मदधीनमिति** । परैर्ग्रहीतुमशक्यमित्यर्थः । पराधीनेषु परैर्ग्रहीतुंशक्येषु दैवाधीनेषुच । यस्याश्छायास्मि तदधीनानिगात्राणि । तथैवतदर्थमेवैषांनिर्माणात् । हृदयंतुतदीयमेवात्रापीतिभावः ॥ ९ ॥ ति० तदाकिंनत्वयाविसर्जिता पुनरङ्गीकाराभावंकिमितिनश्रावित ॥११॥ ति० तदोक्तौ कोविशेषस्तत्राह—**प्रत्यक्षमिति** । एवंचतदैक्यजीवत्यागेएतावत्पर्यन्तंमहतीलज्जियंगव्यथानस्यादितिभावः ॥ १२ ॥ ति० जीवितंसंशयेन्यस्य युद्धेजयस्यसंदिग्धत्वात् ॥ १३ ॥

[पा०] १ क. ख. घ.—ट. जातिलं. २ ङ. झ. परित्यजैनां. ३ ङ. झ. ट. संवृद्धभावेन. ४ ङ. झ. ञ. ट. अपदेशोमे. ५ ङ. झ. ट. ब्रवाचलक्ष्मणं. ६ ङ. च. छ. झ. ञ. ट. मिथ्यापवादोपहता. ७ ङ. झ. ट. अप्रीतेनगुणैर्भर्त्रा.

एवमुक्तस्तु वैदेह्या लक्ष्मणः परवीरहा ॥ अमर्षवशमापन्नो राघवाननमैक्षत ॥ २० ॥
स विज्ञाय ततश्छन्दं रामस्याकारमुचितम् ॥ चितां चकार सौमित्रिर्मते रामस्य वीर्यवान् ॥ २१ ॥
[नै हि रामं तदा कश्चित्कालान्तकयमोपमम् ॥ अनुनेतुमथो वक्तुं द्रष्टुं वाऽप्यशकत्सुहृत् ॥२२॥]
अधोमुखं तदा रामं शनैः कृत्वा प्रदक्षिणम् ॥ उपासर्पत वैदेही दीप्यमानं हुताशनम् ॥ २३ ॥
प्रणम्य देवताभ्यश्च ब्राह्मणेभ्यश्च मैथिली ॥ बद्धाञ्जलिपुटा चेदमुवाचाग्निसमीपतः ॥ २४ ॥
यथा मे हृदयं नित्यं नापसर्पति राघवात् ॥ तथा लोकस्य साक्षी मां सर्वतः पातु पावकः ॥२५॥
यथा मां शुद्धचारित्रां दुष्टां जानाति राघवः ॥ तथा लोकस्य साक्षी मां सर्वतः पातु पावकः ॥२६॥
कर्मणा मनसा वाचा यथा नातिचराम्यहम् ॥ राघवं सर्वधर्मज्ञं तथा मां पातु पावकः ॥ २७ ॥
आदित्यो भगवान्वायुर्दिशश्चन्द्रस्तथैव च ॥ अहश्चापि तथा संध्ये रात्रिश्च पृथिवी तथा ॥
यथाऽन्येपि विजानन्ति तथा चारित्रसंयुताम् ॥ २८ ॥
एवमुक्त्वा तु वैदेही परिक्रम्य हुताशनम् ॥ विवेश ज्वलनं दीप्तं निस्सङ्गेनान्तरात्मना ॥ २९ ॥
जनः स सुमहांस्त्रस्तो बालवृद्धसमाकुलः ॥ ददर्श मैथिलीं तत्र प्रविशन्तीं हुताशनम् ॥ ३० ॥
सा तप्तनवहेमाभा तप्तकाञ्चनभूषणा ॥ पपात ज्वलनं दीप्तं सर्वलोकस्य सन्निधौ ॥ ३१ ॥
ददृशुस्तां महाभागां प्रविशन्तीं हुताशनम् ॥ सीतां कृत्स्नास्त्रयो लोकाः पुण्याामाज्याहुतीमिव ॥ ३२॥
प्रचुक्रुशुः स्त्रियः सर्वास्तां दृष्ट्वा हव्यवाहने ॥ पतन्तीं संस्कृतां मन्त्रैर्वसोर्धारामिवाध्वरे ॥ ३३ ॥
ददृशुस्तां त्रयो लोका देवगन्धर्वदानवाः ॥ शप्तां पतन्तीं निरये त्रिदिवादेवतामिव ॥ ३४ ॥
तस्यामग्निं विशन्त्यां तु हाहेति विपुलः स्वनः ॥ रक्षसां वानराणां च संबभूवाद्भुतोपमः ॥ ३५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनविंशत्युत्तरशततमः सर्गः ॥११९॥

अमर्षवशं दैन्यवशं ॥ २० ॥ आकारः भ्रूसंज्ञादिः । मते सिद्धान्ते । स्थित इति शेषः ॥२१—२२॥ अधोमुखमिति ॥ पतिव्रतायाः कथं निर्व्याजं प्रत्ययं पश्यामीति लज्जया मुखदर्शने दाक्षिण्यं भविष्यतीति बुद्ध्या चावनतमुखं । शनैः रामानुभवेन मन्दं यथा तथा ॥ २३—२५ ॥ यथा शुद्धचारित्रामेव मामन्यायेन दुष्टां जानाति । तथा चेत् अदुष्टां दुष्टेति जानाति चेत् । पावकः पातु । रामस्य मयि दोषज्ञानं यथार्थं चेत्पावित्यर्थः ॥ २६—२७ ॥ आदित्य इत्यादिसार्धश्लोक एकान्वयः ॥ आदित्यादयोन्ये च यथा मां चारित्रसंयुतां विजानन्ति तथा मां पातु पावक इति संबन्धः ॥ २८ ॥ परिक्रम्य प्रदक्षिणीकृत्य । निःसङ्गेन शरीरे निरभिलाषेण । अन्तरात्मना मनसा । उपलक्षणे तृतीया ॥ २९—३१ ॥ आज्याहुतीमिवेत्यादिदृष्टान्तेन देव्याः परमपावनत्वं द्योत्यते ॥ ३२ ॥ वसोर्धारां संततां घृतधारां । अनेनाभ्युज्जृम्भणं गम्यते ॥३३॥ देवाः स्वर्गवासिनः । गन्धर्वा भूलोकवासिनः । दानवाः पातालवासिनः । सकलभोगार्हरूपवत्याः सीतायाः अनलप्रवेशस्यानर्हत्वान्निरयपतनानर्हस्वर्गीयदेवतादृष्टान्तः ॥ ३४ ॥ अद्भुतोपमः अद्भुततुल्यः । रावणागमनमारभ्य एतावत्पर्यन्तं सीतायाः परमभागवतभूतलक्ष्मणापचार-

---

ति० राघवःशुद्धचारित्रां अदुष्टामेवमांयदिदुष्टांजानाति अहंतथाचेत् अदुष्टाचेत् पावकोमांसर्वतःपातु केशांबरादिकमपिमाधाक्षीदित्यर्थः ॥२६॥ ति० सातप्तेत्यादि । एतदर्थमेवस्नातायाअलङ्कारयुतायाआनयनंकारितं ॥ ३१ ॥ ति० सर्वाणिरूपाणि सर्वाणि भूतानि । "सर्वाणिरूपाणिविचित्यधीरः" इत्यादौतद्बोधकतयाप्रसिद्धोरूपशब्दः ॥३२॥ इत्येकोनविंशत्युत्तरशततमःसर्गः ॥११९॥

[पा०] १ ङ. ञ. ट. मनश्छन्दं. २ अर्धश्लोकः ङ. ञ. ञ. ट. पाठेषुदृश्यते. ३ ङ. ञ. ञ. ट. मैथिलींदीप्तां. ४ क. च. छ. ञ. ददृशुस्तांविशालाक्षींपतन्तींहव्यवाहनं. ५ सीतांसर्वाणिरूपाणिरुक्मवेदिंनिभांतदा. ६ ङ. ञ. ट. ऋषयोदेवगन्धर्वा यज्ञेपूर्णाहुतीमिव.

विंशत्युत्तरशततमः सर्गः ॥ १२० ॥

सीतायामग्निप्रविष्टायां विमानगणैर्व्योमाङ्गणमलंकुर्वाणैर्ब्रह्मरुद्रादिसुरगणैः श्रीरामंप्रति सीतायास्तत्सचक्रमेणलक्ष्मीनारायणस्वरूपत्वनिवेदनेनानेकप्रकारैःस्तवनपूर्वकं सीतात्यागस्यायुक्तत्वकथनम् ॥ १ ॥

ततो हि दुर्मना रामः श्रुत्वैवं वदतां गिरः ॥ दध्यौ मुहूर्तं धर्मात्मा बाष्पव्याकुललोचनः ॥ १ ॥
ततो वैश्रवणो राजा यमश्चामित्रकर्शनः ॥ सहस्राक्षो महेन्द्रश्च वरुणश्च परंतपः ॥ २ ॥
षडर्धनयनः श्रीमान्महादेवो वृषध्वजः ॥ कर्ता सर्वस्य लोकस्य ब्रह्मा ब्रह्मविदां वरः ॥ ३ ॥
एते सर्वे समागम्य विमानैः सूर्यसन्निभैः ॥ आगम्य नगरीं लङ्कामभिजग्मुश्च राघवम् ॥ ४ ॥
ततः सहस्राभरणान्प्रगृह्य विपुलान्भुजान् ॥ अब्रुवंस्त्रिदशश्रेष्ठाः प्राञ्जलिं राघवं स्थितम् ॥ ५ ॥
कर्ता सर्वस्य लोकस्य श्रेष्ठो ज्ञानवतां वरः ॥ उपेक्षसे कथं सीतां पतन्तीं हव्यवाहने ॥
कथं देवगणश्रेष्ठमात्मानं नावबुध्यसे ॥ ६ ॥
ऋतधामा वसुः पूर्वं वसूनां त्वं प्रजापतिः ॥ त्रयाणां त्वं हि लोकानामादिकर्ता स्वयंप्रभुः ॥ ७ ॥
रुद्राणामष्टमो रुद्रः साध्यानामसि पञ्चमः ॥ अश्विनौ चापि ते कर्णौ चन्द्रसूर्यौ च चक्षुषी ॥ ८ ॥

फलमुपपादितं । वस्तुतः सीताया रावणागमनकाले अग्नौ प्रविष्टत्वात्तस्याः पुनर्गमनार्थं मायासीताया रावणगृहीताया अग्नौ प्रवेश इत्यप्याहुः ॥ ३५ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनविंशत्युत्तरशततमः सर्गः ॥ ११९ ॥

अथ रामस्तवः—ततो हीत्यादि ॥ दुर्मनाः दुःखितमनाः । दध्यौ मनसा ध्यानं कृतवान् ॥१॥ तत इत्यादिश्लोकत्रयमेकं वाक्यं ॥ २—४ ॥ प्रगृह्य उद्धृत्य ॥ ५ ॥ कर्तेत्यादि ॥ पूर्वं ब्रह्मणः अद्वारकं कर्तृत्वं । अत्र सद्वारकं कर्तृत्वमिति न विरोधः । सर्वज्ञस्त्वं कथमज्ञ इवोपेक्षस इति भावः । देवगणश्रेष्ठं ब्रह्मादिदेवगणश्रेष्ठं ॥ ६ ॥ आत्मस्वरूपमेवाह—ऋतधामेत्यादिश्लोकत्रयमेकं वाक्यं ॥ ऋतधामाख्यो वसुरित्यर्थः । प्रजापतिः प्रजास्वामीति वसुविशेषणं । आदिकर्ता । अण्डाधिपतिपर्यन्ताद्वारकसृष्टिकर्तेत्यर्थः । स्वयं प्रभवतीति स्वयंप्रभुः । अनियाम्य इत्यर्थः । रुद्राणां मध्ये अष्टमो रुद्रः तथा साध्यानामित्यत्रापि । अन्ते प्रलये, आदौ सृष्टेः प्राक् दृश्यसे । अनेनोत्पत्तिविनाशराहित्यमुक्तं । एवं सर्वज्ञः सर्वशक्तिः सर्वेश्वरोपि सन् अज्ञ इव विदेहकुले प्रादुर्भूतां सीतां

ति० एवंवदतां हाहेतिवदतां । प्राकृतस्त्रीवत्सीतायेतदनर्हेतिद्वियोगतोबाष्पव्याकुललोचनोभूत्वा मुहूर्तंदध्यौ किमुक्तं किंकृतं किंचातःपरंकर्तव्यमितिचिन्तापरोबभूव ॥ १ ॥ ति० अत्रावसरेदिक्पालसहितोरुद्रोहिरण्यगर्भश्चरामानुग्रहायसमागतावित्याह—ततइति ॥ २ ॥ ति० षडर्धनयनः त्रिनेत्रइत्यर्थः ॥ सर्वलोकस्य ब्रह्मलोकपर्यन्तंसर्वलोकवर्तिपदार्थानांस्रष्टा । ब्रह्मविदां चतुर्मुखप्रजापतिविष्णुदेवराजादिदिक्पालवसिष्ठादृषितत्सन्तानजब्राह्मणाब्रह्मविदः । तेषांवरोज्येष्ठोहिरण्यगर्भः । 'योवैब्रह्माणंविदधाति पूर्वं योवैवेदांश्चप्रहिणोतितस्मै ' इतिश्रुतेः । ' हिरण्यगर्भःसमवर्तताग्रे ' इतिश्रुतेश्च ॥ ३ ॥ ति० प्रगृह्य उद्यम्य । भारतेतु—अग्निप्रवेशंसीतायाअनुक्त्वारामस्यचारित्रसंदेहेसीतादुःखंदृष्ट्वाब्रह्मादिभिस्तुत्यैवसीताङ्गीकारउक्तः । तत्रानुक्तोप्यग्निप्रवेशोमध्ये द्रष्टव्यइत्याहुः । पाद्मेतु—" सातेनगर्हितासाध्वीविवेशज्वलनंतदा । " इत्युक्तं ॥ ५ ॥ ति० कर्तासर्वस्येति । मनुष्यवेहेराघवे सर्वलोककर्तृत्वायुक्तिर्मूलस्वरूपाभिप्रायेण । ज्ञानविदामौपनिषदज्ञानवतां । देवगणा इन्द्रादयः तेषां श्रेष्ठं । ' विष्णुमुखावैदेवाः ' इतिश्रुतेः ॥ स० मूलरूपावतारररूपेषुभेदस्य ' एकमेवनेहनानास्तिकिंचन—पूर्णमदः ' इत्यादिश्रुतिनिषिद्धत्वेनसर्वथानिर्विशेषत्वमेवमन्तव्यमित्याह—कर्तेति । अन्यथादाशरथौ ' कर्तासर्वस्यलोकस्य ' इत्याद्ययुक्तंस्यात् ॥ ६ ॥ स० इदानींरामस्यविभूतिरूपाणिवक्तुंतद्विभूतीनां " नान्तोस्तिममदिव्यानांविभूतीनांपरंतप " इत्याद्युक्तरीत्याऽनन्तत्वेनसामस्त्येनवक्तुमशक्यत्वात्प्राधान्येनाह—ऋतधामेति । वसूनांमध्येपूर्वत्वं ऋतधामानामवसुः । विभूतिरूपेणतत्रसंनिहितइत्यर्थः । एवमुत्तरत्रप्रजापतीनांमध्यइतिपूरणीयं ॥ अष्टमःमहादेवाख्यः कैलासवासीशंकरोत्रविवक्षितः । पञ्चमोवीर्यवान्नाम ॥ ७ ॥ ति० विराड्रूपंवर्णयति । अश्विनौचेत्यादि ॥ स० इदानींसंकुच्यविश्वरूपमाह—अश्विनाविति । कर्णयोर्दिग्देवतानामिवाश्विनोरप्यभिमानादियमुक्तिः

[पा०] १ ङ. ञ. ट. यमश्चपितृभिस्सह. २ ङ. ञ. ट, वरुणश्चजलेश्वरः. ३ क. ग. ङ. ञ. ज्ञानविदांविभुः.

अन्ते चादौ च लोकानां दृश्यसे त्वं परंतप ॥ उपेक्षसे च वैदेहीं मानुषः प्राकृतो यथा ॥ ९ ॥
इत्युक्तो लोकपालैस्तैः स्वामी लोकस्य राघवः ॥ अब्रवीत्त्रिदशश्रेष्ठान्रामो धर्मभृतां वरः ॥ १० ॥
आत्मानं मानुषं मन्ये रामं दशरथात्मजम् ॥ योहं यस्य यतश्चाहं भगवांस्तद्ब्रवीतु मे ॥ ११ ॥
इति ब्रुवन्तं काकुत्स्थं ब्रह्मा ब्रह्मविदां वरः ॥ अब्रवीच्छृणु मे राम सत्यं सत्यपराक्रम ॥ १२ ॥
भवान्नारायणो देवः श्रीमांश्चक्रायुधो विभुः ॥ एकशृङ्गो वराहस्त्वं भूतभव्यसपत्नजित् ॥ १३ ॥
अक्षरं ब्रह्म सत्यं च मध्ये चान्ते च राघव ॥ लोकानां त्वं परो धर्मो विष्वक्सेनश्चतुर्भुजः ॥१४॥

किमर्थमुपेक्षस इत्यर्थः ॥ ७—९ ॥ लोकपालैः लोकरक्षकैः ॥ १० ॥ ब्रह्मादिभिः सामान्यतः स्तूयमानोपि सर्वदेवपूजनीयाच्चतुर्मुखान् स्वप्रभावं लोके प्रख्यापयितुं स्वसौशील्यं दर्शयति—आत्मानमिति ॥ आत्मानं मानुषं मन्ये । परत्वापेक्षया मानुषत्वाभिनय एव ममाभिमत इत्यर्थः । अत्रापि विशेषमाह—राममिति । रामं रामनामकं । ततोप्यतिशयमाह—दशरथात्मजमिति । अवतारापेक्षया चक्रवर्तिपुत्रत्वमेव प्रियतममिति भावः । स्वस्य विष्ण्ववतारत्वं सुग्रीवादिभिरनवगतमिति तत्प्रतिपत्त्यर्थं स्वस्वरूपं पृच्छति—योहमिति । योहमिति स्वरूपप्रश्नः । यस्येति संबन्धिप्रश्नः । यतइति प्रयोजनप्रश्नः । भगवांस्तद्ब्रवीत्विति । चक्रवर्तिपुत्रत्वमेव ममात्यन्तप्रियतमं । स्वयं सर्वज्ञतया ममानभिमतमपि परत्वं प्रकटयत्वित्यर्थः । आकारगोपनविवरणस्यानभिमतत्वेपि स्वयमनुमतिदानं रावणनिरसनेन निष्पन्नकार्यतया ॥११—१२॥ स्वरूपप्रश्नोत्तरमाह—भवानिति ॥ नाराः अयनं यस्यासौ नारायणः । "आपो नारा इति प्रोक्ता आपो वै नरसूनवः । ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः" इति मनुस्मरणात् । तेन जगत्कारणत्वमुक्तं । "एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी" इति श्रुतेः । अवाप्तसमस्तकामस्य जगद्व्यापारानुपपत्तिं परिहरति—देव इति । दीव्यतीति देवः क्रीडाप्रवृत्तः । लीलायाः प्रयोजनत्वात्परिपूर्णस्यापि व्यापारः संभवतीति भावः । एवं परत्वासाधारणं नामधेयमुक्त्वा पत्नीवैशिष्ट्यमाह—श्रीमानिति । नित्यं श्रीरस्यास्तीति श्रीमान् । नित्ययोगे मतुप् । असाधारणमायुधमाह—चक्रायुध इति । स्वरूपवैलक्षण्यमाह—विभुरिति । व्यापक इत्यर्थः । फलितं रक्षकत्वमाह—एकशृङ्गो वराह इति । प्रलयोदधिसंप्लवे वराहरूपं कृत्वा भूमेरुद्धारक इत्यर्थः । "उद्धृतासि वराहेण" इति श्रुतेः । अनिष्टनिवर्तकत्वमाह—भूतभव्यसपत्नजिदिति । भूताः सपत्नाः मधुकैटभादयः भव्याः सपत्नाः शिशुपालादयः तान् जयतीति तथोक्तः ॥ १३ ॥ अथ सर्वविद्योपसंहारार्थमाह—अक्षरमित्यादि ॥ न क्षरतीत्यक्षरं अश्नोति व्याप्नोतीति वा अक्षरं । "एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति" इति श्रुतेः । भवानित्यनुषज्यते । अक्षरं भवान् । एवमुत्तरत्राप्यनुषञ्जनीयं । बृहति बृंहयतीति च ब्रह्म । "बृहति बृंहयति तस्मादुच्यते

॥८॥ ती० दिक्पालैःस्तूयमानोपिैःपूजनीयाच्चतुर्मुखादात्मस्वरूपगुणविभूतीःस्वजनेषुप्रख्यापयितुंस्वसौशील्यंवर्णयति—आत्मानमिति । यः यत्स्वरूपः । यस्य यदीयः । यतः प्रयोजनाद्धेतोः उत्पन्नः ॥ तनि० अत्रसंप्रदायोदाहरणं । शङ्खचक्रगदापाणे इत्युक्त्यापरत्वव्यञ्जकतयातत्रानादरेणाधःकृतमुखत्वं द्वारकानिलयेत्यवतारोल्लेखनेनकिंचिदुत्तानमुखत्वं गोविन्दपुण्डरीकाक्षेतिगोपालपुत्रत्वश्रवणेनपरत्वापेक्षयावशुद्देवपुत्रत्वमेवाभिमतमिति विकसिताक्षत्वंचव्यज्यतइति ॥ ११ ॥ तनि० श्रीमानिति नित्ययोगेमतुप् । भवान्श्रीमानिति 'सीतालक्ष्मीर्भवान्विष्णुः' इत्युक्तश्रियःपतित्वंनित्यानपायित्वंचदर्शितं । एकशृङ्गोवराहः सवराहो रूपंकृत्वेतिश्रुत्युक्तोवराहस्त्वं ॥ ती० नारायणः नराणांसमूहोनारं । तस्यायनं प्राप्यभूतः । देवः स्वप्रकाशः । एकशृङ्गोवराहः आदिवराहः । तस्यैकशृङ्गतास्कान्देदर्शिता "दंष्ट्रयापर्वतेन्द्राणांचलनंकृतवान्महत् । ततस्तुष्टुवुर्देवाएकशृङ्गत्वसिद्धये । एकशृङ्ग वराहोभूत्तदाप्रभृतिमाधवः" इति ॥ ति० भूतभव्यसपत्नजित् भूतभव्यकालरूपोयःसपत्नः जनिमृतिहेतुत्वात् । तंजयतिसः । नित्यइतियावत् ॥ स० भूतभव्यसपत्नजित् भूताः हिरण्याक्षहिरण्यकशिप्वादयः । भव्याः शिशुपालदन्तवक्रकंसादयः । वर्तमानरावणखरदूषणादिशत्रुजयस्यप्रत्यक्षसिद्धत्वादनुक्तिः । यद्वा भूतभव्यशब्देनजन्ममरणहेतूकालावुच्येते । तद्रूपसपत्नजित् । आद्यन्तशून्यइत्यर्थः । मध्यकालजयस्यपूर्वोत्तरकालजयेनैवसिद्धेरनुक्तिः ॥ १३ ॥ ति० लोकानां धर्माधिकृतप्राणिनां त्वमेवपर-

[पा०] १ क. ख. घ.—ट. ब्रुवाणं.

शार्ङ्गधन्वा हृषीकेशः पुरुषः पुरुषोत्तमः ॥ अजितः खड्गधृद्विष्णुः कृष्णश्चैव बृहद्बलः ॥ १५ ॥
सेनानीर्ग्रामणीश्च त्वं बुद्धिः सत्त्वं क्षमा दमः ॥ प्रभवश्चाप्ययश्च त्वमुपेन्द्रो मधुसूदनः ॥ १६ ॥
इन्द्रकर्मा महेन्द्रस्त्वं पद्मनाभो रणान्तकृत् ॥ शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः ॥ १७ ॥

परं ब्रह्म " इति श्रुतिनिर्वचनात् । सत्यं अविपर्यस्तं । षड्भावविकारशून्यमित्यर्थः । अस्ति जायते परिणमते विवर्धते अपक्षीयते विनश्यतीति षड्भावविकाराः । मध्ये चान्ते चेति । चकारादादौ चेत्यर्थः । वर्तमानमिति शेषः । नित्यत्वमुक्तमनेन । लोकानां परो धर्मः सिद्धरूपो धर्मः । सर्वलोकश्रेयःसाधनीभूत इत्यर्थः । विष्वग्द्रीची सर्वगता सेना यस्य सः विष्वक्सेनः । सर्वस्वामीत्यर्थः । चतुर्भुजः युगपच्चतुर्विधपुरुषार्थप्रद इत्यर्थः ॥ १४ ॥ शृङ्गविकारः शार्ङ्गं धनुर्यस्य स शार्ङ्गधन्वा । " धनुषश्च " इत्यनङादेशः । अनेन रक्षणोपकरणवत्त्वमुक्तं । हृषीकाणां इन्द्रियाणां ईशः नियन्ता । सर्वेन्द्रियाकर्षकदिव्यविग्रह इत्यर्थः । पुरु सनोतीति पुरुषः । " षणु दाने " इत्यस्माद्धातोर्डप्रत्ययः । बहुप्रद इत्यर्थः । यद्वा पुरि हृदयगुहायां शेत इति पुरुषः । " पुरि शयं पुरुषमीक्षते " इति निर्वचनश्रुतेः । यद्वा येन जगत्पूर्णं स पुरुषः । "तेनेदं पूर्णं पुरुषेण सर्वं" इति श्रुतेः । यद्वा पुरातनत्वात् पुरुषः । " पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वं " इति श्रुतेः । पुरुषेभ्यः क्षराक्षरेभ्यः उत्तमः पुरुषोत्तमः । " यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः । अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" इति हि गीयते । यद्वा पुरुषेषु उत्तमः पुरुषोत्तमः । सप्तमीति योगविभागान्नागोत्तमादिवत्समासः । कैश्चिदपि न जित इत्यजितः । आश्रितसंरक्षणे कदाचिदपि भङ्गं न प्राप्नोतीत्यर्थः । खड्गं नन्दकाख्यं धरतीति खड्गधृत् । विष्णुः व्यापनशीलः । यो दयापदं प्राप्नोति तं तदा तत्रैव स्थितो रक्षतीत्यर्थः । कृष्णः भूनिर्वृतिहेतुः । " कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः " इति निर्वचनात् । बृहत् बलं धारणसामर्थ्यं यस्य सः बृहद्बलः ॥ १५ ॥ सेनां नयतीति सेनानीः । देवसेनानिर्वाहक इत्यर्थः । ग्रामं नयतीति ग्रामणीः । दिव्यजनपदादिपालक इत्यर्थः । बुद्धिः सत्त्वं क्षमा दम इति बुद्ध्यादिप्रवर्तक इत्यर्थः । "न देवा यष्टिमादाय रक्षन्ति पशुपालवत् । यं हि रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तं"इति वचनात् । "महान्प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः" इति श्रुतेश्च । प्रभवत्यस्माज्जगदिति प्रभवः उत्पत्तिस्थानं । सर्वोपादानमित्यर्थः । अप्ययः सर्वजगल्लयस्थानं । "कृष्ण एव हि भूतानामुत्पत्तिरपि चाप्ययः"इति श्रुतेः । उपेन्द्रः इन्द्रानुजत्वेन प्रथममवतीर्णः । मधुसूदनः वेदापहारकदैत्यसंहारी ॥१६॥ इन्द्रस्य कर्मेव कर्म यस्य स इन्द्रकर्मा । "तं विष्णुरन्वतिष्ठत"इति श्रुतेः । महेन्द्रः निरतिशयैश्वर्यसंपन्नः । पद्मं नाभौ यस्य स पद्मनाभः । ममापि जनक इत्यर्थः । वक्ष्यति हि—"पद्मे दिव्येर्कसंकाशे नाभ्यामुत्पाद्य मामपि । प्राजापत्यं त्वया कर्म सर्वं मयि निवेशितं" इति । रणे अन्तं शत्रुनाशं करोतीति रणान्तकृत् । शरण्यं शरणार्हं । तदुचितज्ञानशक्तिदयादिसंपन्नमित्यर्थः । शरणं रक्षणोपायं "उपाये गृहरक्षित्रोः शब्दः शरणमित्ययं" इति वचनात् । "सर्वस्य शरणं सुहृत्"

मोधर्मः ॥ " यज्ञोवैविष्णुः " इत्यादिश्रुतेरश्वमेधान्तधर्मस्त्वमेव ॥ १४ ॥ **ती०** शार्ङ्गधन्वा कालरूपंशार्ङ्गं धनुर्यस्यसः । पुरूणिफलानिसनोतीतितथा । 'षणु दाने' । पुरि हृदयपुण्डरीकेशेतइतिपुरुषः । पूर्णत्वाद्वापुरुषः । 'तेनेदंपूर्णंपुरुषेणसर्वं' इतिश्रुतेः । अजितः गुणैरैश्वर्येणचकेनाप्यजितः । विद्यामयंनन्दकाख्यंखड्गंधारयतीतिखड्गधृत् ॥ वृहद्बलः बृहन्तिवानरबलानियस्येतितथा ॥१५॥ **तनि०** क्षमा क्षमानिर्वाहकः । 'कीर्त्याःकीर्तिःक्षमाक्षमा' इत्युक्तत्वात् । दमः इन्द्रियजेता । प्रभावः उत्पत्तिमत्कार्यवर्गशरीरः । स्थूलचिदचिद्विशिष्टस्यकार्यत्वात् । ' बहुस्यां ' इत्यादिश्रुतेः ॥ **स०** इनेनपत्यासहिताःसेनाःहिरण्यगर्भमारभ्ययवसावसानाजीवास्तान् आसमन्तान्नयतीतिवा सेनानीः । सर्वं सर्वान्तर्यामी ॥ क्षमा भजकापराधसहनं । दमः इन्द्रियनिग्रहः । धर्माणांधर्मिणाऽभेदादियमुक्तिः ॥ प्रभवाप्ययौ सृष्टिविनष्टी । कार्यकारणभावापन्नत्वादयंवैलोकोमहानान्नीत्यादिवच्छब्दसांकर्य ॥ १६ ॥ **तनि०** इन्द्रस्येवकर्मयस्यसइन्द्रकर्मा । वृत्रादिवधस्येन्द्रान्तर्यामिकर्तृकत्वात् । महर्षयः अलौकिकतत्वसाक्षात्कारसमर्थाः । तत्रापिदिव्याः अवताररहस्यादिविशेषज्ञानवन्तोवाल्मीकिप्रभृतयः । यद्वा नित्यसूरयः । ' तद्विप्रासोविपन्यवोजागृवाँसः ' इति श्रुतेः ॥ **ति०** ' प्रजापतिरिन्द्रमसृजत ' इतिश्रुतेः इन्द्रः कर्म सृष्टिर्यस्य सः इन्द्रकर्मा ॥ **स०** रणान्तकृत् रणेअन्तः निर्णयः

[पा०] १ ठ. सर्व.

सहस्रशृङ्गो वेदात्मा शतजिह्वो महर्षभः ॥ त्वं त्रयाणां हि लोकानामादिकर्ता स्वयंप्रभुः ॥
सिद्धानामपि साध्यानामाश्रयश्चासि पूर्वजः ॥ १८ ॥
त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारः परन्तपः ॥ प्रभवं निधनं वा ते न विदुः को भवानिति ॥ १९ ॥
दृश्यसे सर्वभूतेषु ब्राह्मणेषु च गोषु च ॥ दिक्षु सर्वासु गगने पर्वतेषु वनेषु च ॥ २० ॥
सहस्रचरणः श्रीमाञ्शतशीर्षः सहस्रदृक् ॥ त्वं धारयसि भूतानि वसुधां च सपर्वताम् ॥ २१ ॥
अन्ते पृथिव्याः सलिले दृश्यसे त्वं महोरगः ॥ त्रींल्लोकान्धारयन्राम देवगन्धर्वदानवान् ॥ २२ ॥

इति श्रुतेः।महर्षयः अलौकिकतत्त्वसाक्षात्कारसमर्थाः। दिव्या महर्षयः सनकादयः। "यत्रर्षयः प्रथमजा ये पुराणा" इत्युक्ता नित्यसूरयो वा । नित्यनिर्दोषा वेदावा ॥ १७ ॥ सहस्रशृङ्ग इत्यादिसार्धश्लोक एकान्वयः ॥ सहस्रशृङ्गः सहस्रशाखारूपशृङ्गः । शतजिह्वः अनेकविधचोदनारूपजिह्वः । ऋषभः कर्मणामालोचयिता । "ऋष आलोचने" इति धातुः । महांश्चासावृषभश्च महर्षभः । एवंभूतो वेदात्मा त्वमित्यर्थः । आदिकर्ता समष्टिकर्ता । अनेन व्यष्टिकर्तुः स्वस्याव्यावृत्तिः । स्वयंप्रभुः अनन्यप्रेर्यः । "न तस्येशे कश्चन"इति श्रुतेः । सिद्धानां मुक्तानां । साध्यानां "यत्र पूर्वे साध्याः सन्ति देवा" इत्युक्तानां नित्यानामाश्रयः साम्यभोगप्रदः । पूर्वजः आश्रितापेक्षायाः पूर्वं तद्रक्षणाय जनितः ॥ १८ ॥ सर्वकर्मसमाराध्यत्वमाह—त्वं यज्ञ इति ॥ त्वं यज्ञः । "यज्ञो वै विष्णुः"इति श्रुतेः । यज्ञनिर्वाहकपशुहविराज्यस्रुक्स्रुवादिशरीरको यज्ञाराध्येन्द्रादिशरीरकश्चेत्यर्थः । "ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतं" इति हि गीयते । वषट्कार इत्युपलक्षणं । आश्रावयेति चतुरक्षरम्अस्तुश्रौषडिति चतुरक्षरम् यजेति द्व्यक्षरम् ये यजामह इति पञ्चाक्षरमित्युक्तानां सप्तदशाक्षराणां । तैराराध्य इत्यर्थः । तथोक्तं—"चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च। हूयते च पुनर्द्वाभ्यां स नो विष्णुः प्रसीदतु"इति ॥ ओंकारः प्रणववाच्यः । "ओमित्येकाक्षरं ब्रह्म"इति श्रुतेः । परन्तपः उत्कृष्टतप इत्यर्थः । उत्कृष्टतपःसमाराध्य इति यावत्। ते प्रभवं निधनं वा न विदुः, वेदा वैदिकाश्च को भवानिति च न विदुः । अपरिच्छिन्नमहिमत्वात् । "क इत्था वेद यत्र सः" इति श्रुतेः ॥१९॥ सर्वान्तर्यामित्वमाह—दृश्यस इति ॥ योगिभिरिति शेषः । अनेन संबन्धप्रश्नोत्तरमुक्तं ॥ २० ॥ पुरुषसूक्तार्थमाह—सहस्रेति ॥ अत्र शतशब्दः सहस्रवाचकः । "सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्"इति श्रुतेः । श्रीमानिति भूपतित्वस्याप्युपलक्षणं । "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ "इत्युत्तरनारायणोक्तेः । अथ सर्वाधारत्वमाह—त्वमिति । भूतानीति भूव्यतिरिक्तमहाभूतपरं । अनेनाधाराधेयभावसंबन्ध उक्तः ॥ २१ ॥ दैनंदिनप्रलयवृत्तान्तमाह—अन्त इति ॥ पृथिव्या अन्ते विनाशे । महानुरगः शेषो यस्य सः शेषशायी सन् । धारयन् कुक्षौ धारयन् दृश्यसे ।

अवश्यंयुद्धेसंनद्धाःस्यामेतियेषांतेरणान्ताः । तान्कर्तयति छिनत्तीतिकृत् ॥ १७ ॥ **तनि०** वेदात्मा वेदपुरुषान्तर्यामी । पूर्वजः 'पूर्वमेवाहमिहासं' इतिश्रुतेः । हिहेतौ । आदिकर्तृत्वेपूर्वजत्वंहेतुरित्यर्थः । सिद्धाद्याश्रयत्वेचायमेवहेतुः ॥ **ती०** सहस्रशृङ्गोवेदात्मा सहस्रशाखसामवेदस्वरूपः । 'सहस्रंसामवर्त्म'इतिप्रसिद्धेः । 'वेदानांसामवेदोस्मि' इतिस्मृतेः । शतजिह्वः नित्यनैमित्तिककाम्यरूपसामान्यविशेषचोदनारूपशतजिह्वः । शतशीर्षइति वा पाठः । आदिकर्ता ब्रह्मादीनामपिकर्ता । स्वयंप्रभुः अनन्यप्रेर्यः । साध्यन्ते आराध्यन्तइतिसाध्याः । तेषांसिद्धानांमुक्तानामपि आश्रयःप्राप्यः । पूर्वजः सृष्टेःपूर्वमपिस्थितः ॥ **कतक०** महर्षभः श्रेष्ठतमः शिशुमारप्रजापतिरूपइत्यर्थः ॥ **ति०** सिद्धानां आरूढानां । साध्यानां आरुरुक्षूणां । आश्रयः प्राप्यः । पूर्वजश्चासि ' अहमस्मिप्रथमजाऋतस्य ' इत्यादिश्रुतेः ॥ १८ ॥ **ती०** नविदुःकोभवानिति इदंतयानविदुरित्यर्थः ॥ १९ ॥ **तनि०** सर्वान्तर्यामित्वमाह—दृश्यसइति पण्डितैरितिशेषः । 'भूतानिविष्णुर्भुवनानिविष्णुर्वनानिविष्णुर्गिरयोदिशश्च । नद्यःसमुद्राश्चसएवसर्वंयदस्तियन्नास्तिचविप्रवर्य ॥ ' इतिहिस्मर्यते ॥ **ती०** सर्वात्मतयास्तौति—**दृश्यसइति** । सर्वभूतेषुगोषुच अन्तर्यामितयादृश्यसे । गोब्राह्मणयोर्विश्वान्तर्वर्तित्वेपिपृथगभिधानंविशिष्टाविर्भावस्थानतया । एवंसर्वजङ्गमान्तर्यामितामभिधायस्थावरान्तर्यामितामाह—दिक्ष्विति ॥ २० ॥ **ती०** इदानींसंकर्षणात्मनास्तौति—**अन्तइति** । महोरगः संकर्षणइत्यर्थः ॥ २२ ॥

[**पा०**] १ ङ. झ. ञ. ट. शतशीर्षो. २ ङ. च. छ. झ. ञ. ट. परात्परः. ३ ङ. झ. ट. नोविदुः. ४ ङ. झ. नदीषुच. ५ ज. महोरगे.

अहं ते हृदयं राम जिह्वा देवी सरस्वती ॥ देवा गात्रेषु रोमाणि निर्मिता ब्रह्मणः प्रभो ॥ २३ ॥
निमेषस्ते भवेद्रात्रिरुन्मेषस्ते भवेद्दिवा ॥ संस्कारास्तेऽभवन्वेदा न तदस्ति त्वया विना ॥ २४ ॥
जगत्सर्वं शरीरं ते स्थैर्यं ते वसुधातलम् ॥ अग्निः कोपः प्रसादस्ते सोमः श्रीवत्सलक्षणः ॥ २५ ॥
त्वया लोकास्त्रयः क्रान्ताः पुराणे विक्रमैस्त्रिभिः ॥ महेन्द्रश्च कृतो राजा बलिं बद्ध्वा महासुरम् ॥२६॥
सीता लक्ष्मीर्भवान्विष्णुर्देवः कृष्णः प्रजापतिः ॥ वधार्थं रावणस्येह प्रविष्टो मानुषीं तनुम् ॥ २७ ॥
तदिदं नः कृतं कार्यं त्वया धर्मभृतां वर ॥ निहतो रावणो राम प्रहृष्टो दिवमाक्रम ॥ २८ ॥
अमोघं बलवीर्यं ते अमोघस्ते पराक्रमः ॥ अमोघं दर्शनं राम न च मोघः स्तवस्तव ॥ २९ ॥

मार्कण्डेयादिभिरिति शेषः ॥ २२ ॥ अथ 'अङ्गान्यन्या देवताः'इत्युक्तसर्वदेवाद्यात्मकत्वं दर्शयति—अहं त इत्यादिना ॥ हृदयं वक्षः । ब्रह्मणः परब्रह्मणः । ते देवा गात्रेषु स्थिताः रोमाणीव स्थिताः तद्वदविनाभूताः ॥२३॥ दिवा अहः । वेदाः संस्काराः निःश्वसितभूता इत्यर्थः । "तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः "इत्यादि श्रुतेः । किं बहुना संग्रहेणोच्यत इत्याह—न तदस्ति विना त्वयेति । यत्त्वया विनाभूतं त्वदनन्तर्यामिकं । तन्नास्तीत्यर्थः ॥२४॥ एवं निषेधश्रुत्यर्थमुक्त्वा "सर्वं खल्विदं ब्रह्म, तत्त्वमसि"इत्यादिसामानाधिकरण्यश्रुत्यर्थमाह—जगदिति ॥ सर्वं जगत् ते शरीरं तव नियमेन आधेयं विधेयं शेषभूतं चेत्यर्थः । इदमेव हि शरीरलक्षणं । एवं जगतस्त्वच्छरीरत्वाच्छरीरगतविशेषणानित्वद्विशेषणानीत्याह—स्थैर्यमिति । वसुधातलं वसुधातलस्थैर्यं । "काठिन्यवान्यो बिभर्ति तस्मै भूम्यात्मने नमः"इति विष्णुपुराणोक्तेः । अग्निः अग्नितापः । ते कोपः । सोमः सोमगतप्रसादः । ते प्रसादः त्वत्प्रसाद इत्यर्थः ॥ २५ ॥ त्वया त्रिविक्रमेण । पुराणे पूर्वकाले । लोकाक्रमणफलमाह—महेन्द्र इति । राजा कृतः । त्रैलोक्यस्येति शेषः ॥ २६ ॥ प्रयोजनप्रश्नस्योत्तरमाह—वधार्थमिति ॥ २७—२९ ॥

ति० हेराम त्रींल्लोकान्धारयंस्त्वंविराट् । नारायणोसीत्यर्थः । एतेन यतश्चाहमुत्पन्नइतिप्रश्नस्योत्तरंदत्तं । एवंदेहत्वमुपदिश्यदेहित्वमुपदिशति—**अहंतेहृदयमिति** । हेराम ते रामोपग्रहस्य तवहृदयं सर्वाधारभूतं आन्तरं त्वदात्मतत्वमहमेवज्ञानस्वरूपः । महाकाशइवघटाकाशस्य । तवजिह्वामन्निर्मिता । वाग्देवीसरस्वती । **स०** तेहृदयं प्रीतिपात्रं । हृदयमाश्रितइति । सरस्वती जिह्वा तदाश्रिता । देवी द्योतमाना । देवाः रोमाणि तत्रस्थाओषध्याद्यभिमानिनः । एवंगात्रेषुअवयवेषु देवाः वाय्वादयः । ब्रह्मणा मया ॥ २३ ॥ **स०** निमेषोन्मेषौ रात्रिर्दिनंच । स्मृतेतिपुराणप्रसिद्धिमाह ॥ वेदास्तवसंस्काराःसंस्क्रियन्तेलोकाएभिरितिसंस्काराः कर्तव्याकर्तव्यव्यापारव्यवस्थापकाः ॥ २४ ॥ **तनि०** त्वयालोकास्त्रयःक्रान्ताइति बलेःप्रतिग्रहीतेत्यर्थः । एतेन वामनावतारोऽप्यजितः । विक्रमैःपादविन्यासैस्त्रिभिःक्रान्ताइति त्रिविक्रमावतारःकथितः । ' इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ' इतिश्रुतेः । पुराणे पूर्वकाले । महेन्द्रोराजाकृतः । बलिनापदान्निर्यासितइन्द्रः पुनस्त्वयाराजाकृतइत्यर्थः ॥ २६ ॥ **तनि०** भगवदवतारेषुलक्ष्म्याअनुवृत्तिमाह—सीतेति । कृष्णः भविष्यत्कृष्णावतारश्चत्वमेवेत्यर्थः । प्रजापतिः प्रजापतिशब्दवाच्यस्त्वमेव । अवतारप्रयोजनमाह—वधार्थमिति । मानुषीं मनुष्यसंस्थानरूपां । तनुं अप्राकृतशरीरं । **स०** प्रजापतिः सर्वप्रजापालकः । कृष्णः प्रलयेसर्वंजगत्स्वस्मिन्कर्षतीतितन्नामकोविष्णुर्देवोभगवान् । " कृष्णोमुक्तैरिज्यते " इतिमूलरूपेपिकृष्णशब्दप्रयोगात् । मानुषींतनुं कौसल्यादेहं । भगवद्देहस्यचिदानन्दमात्रत्वस्यस्थितत्वात् ॥ २७ ॥ **ति०** अथवृत्तानुष्ठानानुवादपूर्वकंवर्तिष्यमाणकर्तव्यमाह—निहतइति । रावणोनिहतः । एवंचावतारकार्यंनिर्वृत्तं । अतःपरंमहाराज्येनकिंचित्कालंप्रहृष्टःसन्दिवं परनाकाख्यंब्रह्मलोकमाक्रम प्रागुहि । एवंसिद्धकार्यत्वात्तेवीर्यंबलं अमोघं । तन्मूलाःपराक्रमाश्च नमोघाः ननिष्फलाः । अपितुसफलाएवेत्यर्थः ॥ **स०** दिवं वैकुण्ठं ॥ २८ ॥ **ति०** अथरामस्यसर्वोपास्यत्वंसर्वाभीष्टसिद्धिप्रदत्वंचाह—अमोघमिति । हेराम तेदर्शनं एवंमूर्तेस्तेदर्शनंसुग्रीवादीनाममोघं । एवंकालान्तरेश्रुत्वा चित्तत्वद्रष्टृणामप्यमोघंऐहिकामुष्मिकसकलफलसाधनं । तवसंस्तवः रामनारायणेत्येवंरूपः अमोघः सकलेष्टदः । येचत्वयिभक्तिमन्तः सोहमेवेतिगौणवृत्त्यात्वदुपासकाः तवाहमितिवोपासकाः तेप्यमोघं संसारमार्गमतिक्रान्ताः सत्यसंकल्पत्वादिमन्तःसन्तोमल्लोकप्राप्तिरूपामोघफलाभविष्यन्ति । किंपुनर्येसर्वात्मनात्वदभेदध्यानवन्त इत्यर्थः ॥ २९ ॥

[पा०] १ ठ. ब्रह्मणा. २ ङ. ञ. ट. रुन्मेषोदिवसस्तथा. ३ ङ. ञ. नैतदस्ति. ४ ख. घ. ङ. ञ. ट. पुराखैर्विक्रमैः.

अमोघास्ते भविष्यन्ति भक्तिमन्तश्च ये नराः ॥ ३० ॥
ये त्वां देवं ध्रुवं भक्ताः पुराणं पुरुषोत्तमम् ॥ प्राप्नुवन्ति सदा कामानिह लोके परत्र च ॥ ३१ ॥
इममार्षं स्तवं नित्यमितिहासं पुरातनम् ॥ ये नराः कीर्तयिष्यन्ति नास्ति तेषां पराभवः ॥ ३२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे विंशत्युत्तरशततमः सर्गः ॥ १२० ॥

एकविंशत्युत्तरशततमः सर्गः ॥ १२१ ॥

मूर्तीभूय सीतायाः स्वाङ्कारोपणपूर्वकंकुण्डादुद्धृतेनाग्निना रामंप्रति सीतायानिर्दोषत्वोद्घोषणेन तत्स्वीकारचोदना ॥ १ ॥ रामेणापि सीतायाअदोषत्वोत्कीर्तनपूर्वकमग्निप्रवेशोपेक्षणस्य लोकापवादपरिजिहीर्षामूलकत्वोक्त्या तत्स्वीकारः ॥ २ ॥

एतच्छ्रुत्वा शुभं वाक्यं पितामहसमीरितम् ॥ अङ्केनादाय वैदेहीमुत्पपात विभावसुः ॥ १ ॥
स विधूय चितां तां तु वैदेहीं हव्यवाहनः ॥ उत्तस्थौ मूर्तिमानाशु गृहीत्वा जनकात्मजाम् ॥ २ ॥
तरुणादित्यसंकाशां तप्तकाञ्चनभूषणाम् ॥ रक्ताम्बरधरां बालां नीलकुञ्चितमूर्धजाम् ॥ ३ ॥
अक्लिष्टमाल्याभरणां तथारूपां मनस्विनीम् ॥ ददौ रामाय वैदेहीमङ्के कृत्वा विभावसुः ॥ ४ ॥
अब्रवीच्च तदा रामं साक्षी लोकस्य पावकः ॥ ५ ॥

अमोघा इत्यर्धं ॥ अमोघाः अप्रतिबद्धफलाः ये त्वयि भक्तिमन्तः ते अविलम्बेन फलमभिमतं लभन्त इति इदं चावतारस्यैकं प्रयोजनं ॥ ३० ॥ इदमेव विवृणोति—य इति ॥ त्वामुद्दिश्येति शेषः । अनेन सर्वस्मादपि तपःप्रभृतेः रामभक्तिरेव परो धर्म इत्युक्तं । काम्यन्त इति कामाः भोगोपकरणानि । इह लोके परत्र च प्राप्नुवन्ति । सदेत्यनेन यावच्छरीरपातमत्र भोगान् भुक्त्वा शरीरावसाने परलोके सर्वान्कामान्प्राप्नुवन्तीत्यर्थः ॥ ३१ ॥ ये रामभक्तिं कर्तुमदक्षास्तेषामिदं स्तोत्रमेव तादृशफलप्रदमित्याह—इममिति ॥ ऋषिः वेदः तत्संबन्ध्यार्षं । अतएव पुरातनं । पराभवः पुनरावृत्तिः ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने विंशत्युत्तरशततमः सर्गः ॥ १२० ॥

विभावसुः अग्निः ॥ १ ॥ विधूय चितां शिथिलीकृत्य । मूर्तिमान् मनुष्यविग्रहवान् ॥ २ ॥ तरुणादित्येत्यादिश्लोकद्वयमेकान्वयं ॥ तथारूपां प्रवेशकालिकरूपवतीं । मनस्विनीं प्रसन्नमनस्कामित्यर्थः ।

ति० इदानींतत्परैतत्स्तोत्रपाठफलमुपदिशति—इममिति । ऋषिर्वेदः । तदुक्तसगुणनिर्गुणब्रह्मविद्याप्रतिपादकत्वात् । एवंभूतं ब्रह्मविद्यास्तवं येकीर्तयिष्यन्ति तेषांपराभवः परैः इहामुत्रलोकशत्रुभिःपुत्रदारादिभिःपापैश्चाभिभवःआक्रमणं नास्ति नभविष्यतिच ॥ स० ऋषिः वेदद्रष्टा । तद्दृष्टत्वादार्षोवेदः । तत्तुल्यंस्तवंस्तोत्रं । इतिहासं अनादिसिद्धकथाविषयत्वात् । पराभवः बाह्याभ्यन्तरशत्रुतिरस्करणंनास्ति ॥ ३२ ॥ इतिविंशत्युत्तरशततमःसर्गः ॥ १२० ॥

ति० पितामहसमीरितं शुभं परमशोभनं । निजब्रह्मत्वप्रतिपादकंवाक्यं । श्रुत्वा ध्यात्वाचप्रसन्नतयाऽवस्थानकालेइतिशेषः । अङ्केनादाय 'रयिंचपुत्रांश्चादादग्निर्मह्यं'इतिश्रुत्यर्थमपरोक्षमेवसंपादयन्नित्यर्थः ॥ स० शुभं स्वाभिलषितसीतारघुवरसंयोगसाधनत्वात् । अङ्केन आरोपितकलंकेनपतितांसीतां आदाय स्वयंस्वीकृत्य । अङ्केनस्वदक्षिणोत्सङ्गेनआदाय । तस्यपुत्रीभागत्वात् । यथोक्तं 'भागोहिदक्षोदुहितुःस्नषायाः'इति । अग्निपातानन्तरंजीवनेऽग्निजातत्वप्राप्त्यातत्पुत्रीत्वस्योचितत्वात् । अन्यथाअङ्केनेतिव्यर्थं । विभावसुरग्निः ॥ १ ॥ स० मूर्तिमान्'चत्वारिश्रृङ्गात्रयोअस्यपादाः'इत्याद्युक्तलक्षणशरीरवान् ॥ २ ॥ स० रक्तांबरधरां पूर्वविद्यमानपीतवस्त्रंविसर्जयित्वाविभीषणेनदत्तरक्तवस्त्रधरां ॥ ३ ॥ स० हेराम यापूर्वंरावणहरणकालेमयि प्रविश्यकैलासं गता सैषातेत्वदीयानिजपत्नी । अस्यांपापंत्वच्छङ्कितंनविद्यते । अत्रयदुक्तव्यंतत्सर्वमरण्यकाण्डव्याख्यायांकूर्मपुराणाद्युदाहरणेनोक्तंपुरस्तात् ॥ ति० तदा दानसमये । लोकस्य मनोवाक्कायैर्लोककृतपुण्यपापकर्मणः । साक्षी साक्षाद्द्रष्टा । सर्वदेहान्तर्वैश्वानरात्मनानित्यप्रतिष्ठितत्वादितिभावः । एषा या मयिरावणहरणकालेप्रविष्टासैव । एवंहिकूर्मपुराणानुसारेणव्याख्यातं । तच्चप्राङ्नि-

[पा०] १ क. ख. घ.—ट. विधूयाथ. २ क. शुक्लांबर. ३ ङ. झ. ट. तथारूपामनिन्दितां.

एषा ते राम वैदेही पापमस्यां न विद्यते ॥ ६ ॥
नैव वाचा न मनसा नानुध्यानान्न चक्षुषा ॥ सुवृत्ता वृत्तशौण्डीर न त्वामतिचचार ह ॥ ७ ॥
रावणेनापनीतैषा वीर्योत्सिक्तेन रक्षसा ॥ त्वया विरहिता दीना विवशा निर्जनाद्वनात् ॥ ८ ॥
रुद्धा चान्तःपुरे गुप्ता त्वच्चित्ता त्वत्परायणा ॥ रक्षिता राक्षसीसंघैर्विकृतैर्घोरदर्शनैः ॥ ९ ॥
प्रलोभ्यमाना विविधं भर्त्स्यमाना च मैथिली ॥ नाचिन्तयत तद्रक्षस्त्वद्गतेनान्तरात्मना ॥ १० ॥
विशुद्धभावां निष्पापां प्रतिगृह्णीष्व राघव ॥ न किंचिदभिधातव्यमहमाज्ञापयामि ते ॥ ११ ॥
ततः प्रीतमना रामः श्रुत्वैतद्वदतां वरः ॥ दध्यौ मुहूर्तं धर्मात्मा बाष्पव्याकुललोचनः ॥ १२ ॥
एवमुक्तो महातेजा द्युतिमान्दृढविक्रमः ॥ अब्रवीत्त्रिदशश्रेष्ठं रामो धर्मभृतां वरः ॥ १३ ॥
अवश्यं त्रिषु लोकेषु न सीता पापमर्हति ॥ दीर्घकालोषिता हीयं रावणान्तःपुरे शुभा ॥ १४ ॥
बालिशः खलु कामात्मा रामो दशरथात्मजः ॥ इति वक्ष्यन्ति मां सन्तो जानकीमविशोध्य हि ॥ १५ ॥
अनन्यहृदयां भक्तां मच्चित्तपरिवर्तिनीम् ॥ अहमप्यवगच्छामि मैथिलीं जनकात्मजाम् ॥ १६ ॥
प्रत्ययार्थं तु लोकानां त्रयाणां सत्यसंश्रयः ॥ उपेक्षे चापि वैदेहीं प्रविशन्तीं हुताशनम् ॥ १७ ॥
इमामपि विशालाक्षीं रक्षितां स्वेन तेजसा ॥ रावणो नातिवर्तेत वेलामिव महोदधिः ॥ १८ ॥
न हि शक्तः स दुष्टात्मा मनसाऽपि हि मैथिलीम् ॥ प्रधर्षयितुमप्राप्तां दीप्तामग्निशिखामिव ॥ १९ ॥

अङ्के कृत्वा अङ्केनादायेत्यर्थः ॥ ३—५ ॥ एषा या पूर्वं मयि प्रविष्टा सैषेत्यर्थः । एतेन मायासीताग्निं प्रविष्टा साक्षात्सीताग्निना दत्तेति प्रत्युक्तं । ते त्वदीयेत्यर्थः । एनां परिगृह्णीणेति शेषः ॥६॥ पापाभावमेवोपपादयति—नैवेत्यादिना ॥ अनुध्यानात् संकल्पात् । अत्यन्ताभिमतां देवीं निर्दोषां जानन्नपि स्ववृत्तावद्यत्वपरिहारार्थं वह्निं प्रावेशयदिति संतोषातिशयाद्वृत्तशौण्डीरेति संबोधनं ॥ ७ ॥ एतत्संमतिं विना कथं रावणः समानीतवानित्यत्राह—रावणेनेत्यादि ॥ ८ ॥ विवशा नीतेत्यत्र लिङ्गं दर्शयति—रुद्धेति ॥ त्वयि चित्तं यस्याः सा त्वच्चित्ता । त्वमेव परायणमुत्तमगतिर्यस्याः सा त्वत्परायणा ॥ ९–१० ॥ विशुद्धभावां विशुद्धहृदयां । अभिधातव्यं मद्वचनस्योत्तरमिति शेषः ॥ ११ ॥ दध्यौ न वृथैव सीता त्यक्तेत्यचिन्तयत् ॥ १२–१३ ॥ वस्तुतो निर्दोषत्वेपि अपवादोस्तीत्याह—अवश्यमिति ॥ १४ ॥ अपवादपरिहारार्थमयं मम प्रयत्न इत्याह—बालिश इति ॥ अविशोध्येति । परिग्रह इति शेषः ॥ १५ ॥ अनन्यहृदयां मय्येव सक्तहृदयां । मच्चित्तपरिवर्तिनीं मच्चित्तानुवर्तिनीं । त्यक्तस्वव्यापारामित्यर्थः । जनकात्मजामिति हेतुगर्भविशेषणं । जनकपुत्र्याः किमाचारसंपत्तिर्वक्तव्येति भावः ॥ १६ ॥ तर्हि किमर्थमुपेक्षितवानसीत्यत्राह—प्रत्ययार्थमिति ॥ प्रत्ययार्थं विश्वासजननार्थमित्यर्थः । सत्यसंश्रयः सत्यैकाश्रयः । यथावद्वृत्तप्रवर्तनाकाङ्क्षीत्यर्थः ॥ १७ ॥ एतादृशसुन्दरीं रावणः कथं नेक्षेतेत्यत्राह—इमामपीति ॥ १८ ॥ दृष्टान्तान्तरमाह—न हीति ॥ अप्राप्तां प्रधर्षणानर्हां ॥ १९ ॥

रूपितं । पापं रावणस्पर्शरूपमपि ॥ ५—६ ॥ ति० तद्रक्षोनाचिन्तयत नागणयत । तत्रहेतुरन्तरात्मनस्त्वद्गतत्वं । एवंचयत्प्रतिबिंबस्याप्येवंव्यवस्था तद्बिंबस्यशुद्धत्वंकिंवक्तव्यमितिध्वनिः ॥ १० ॥ ति० नकिंचिदिति । मन्नियोगानन्तरंप्रतिग्राह्यानवेतिसन्देहोनगृह्णामीतिनिषेधश्चनकर्तव्यइत्यर्थः । कुतएवंतत्राह—आज्ञापयामितइति । एवमुक्तिस्तुरामेणस्वस्वरूपाज्ञाननटनात्तदनुसारेणरुद्रमूर्तेर्भगवतोमेरपीतिमन्तव्यं ॥ ११ ॥ ति० मच्चित्तपरिरक्षिणीं मद्गतचित्तत्वेनात्मनोदोषपरिरक्षिणीं । स० मच्चित्तपरिरक्षिणीं मन्मनोनुकूलां ॥ १६ ॥

[पा०] १ ङ. झ. ञ. ट. नैववुद्ध्यानचक्षुषा. २ ङ. झ. ञ. वृत्तशौटीर्यनलामत्यचरच्छुभा. ३ ग. च. छ. ञ. निर्जनेवने. ङ. झ. निर्जनेसति. ४ ङ. झ. ट. राक्षसीभिश्चघोराभिर्घोरबुद्धिभिः. ५ ङ. झ. गृह्णीष्वमैथिलीं. ६ क. ख. ङ. च. छ. झ. ट. सीतापावनमर्हति. ७ ख. ट. सीतांमच्चित्तपरिरक्षिणी. ८ ञ. कर्मणा.

नेयमर्हति चैश्वर्यं रावणान्तःपुरे शुभा ॥ अनन्या हि मया सीता भास्करेण प्रभा यथा ॥ २० ॥
विशुद्धा त्रिषु लोकेषु मैथिली जनकात्मजा ॥ नै हि हातुमियं शक्या कीर्तिरात्मवता यथा ॥२१॥
अवश्यं तु मया कार्यं सर्वेषां वो वचः शुभम् ॥ स्निग्धानां लोकमान्यानामेवं च भुवतां हितम् ॥२२॥
इतीदमुक्त्वा विदितं महाबलैः प्रशस्यमानः स्वकृतेन कर्मणा ॥
समेत्य रामः प्रियया महाबलः सुखं सुखार्होऽनुबभूव राघवः ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकविंशत्युत्तरशततमः सर्गः ॥१२१॥

द्वाविंशत्युत्तरशततमः सर्गः ॥ १२२ ॥

महेश्वरेण रामप्रशंसनपूर्वकंतंप्रतिविमानस्थदशरथप्रशंसनेन तन्नमनचोदना ॥ १ ॥ दशरथेन स्वप्रणामिनोरामस्याङ्कारोपणेन सप्रशंसनपरिष्वङ्गमाशीर्वचनम् ॥ २ ॥ तथा रामप्रार्थनया कैकेयीशापापवदनपूर्वकं सीतालक्ष्मणौप्रति सप्रशंसनं रामसेवानुशासनेनस्वर्गगमनम् ॥ ३ ॥

एतच्छ्रुत्वा शुभं वाक्यं राघवेण सुभाषितम् ॥ इदं शुभतरं वाक्यं व्याजहार महेश्वरः ॥ १ ॥
पुष्कराक्ष महाबाहो महावक्षः परन्तप ॥ दिष्ट्या कृतमिदं कर्म त्वया शस्त्रभृतांवर ॥ २ ॥
दिष्ट्या सर्वस्य लोकस्य प्रवृद्धं दारुणं तमः ॥ अपावृत्तं त्वया संख्ये राम रावणजं भयम् ॥ ३ ॥
आश्वास्य भरतं दीनं कौसल्यां च यशस्विनीम् ॥ कैकेयीं च सुमित्रां च दृष्ट्वा लक्ष्मणमातरम् ॥ ४ ॥

तथाप्येषा तादृशमैश्वर्यं कथं जह्यात्तत्राह—नेरमिति । रावणैश्वर्यं नेयमर्हति किंतु ममैश्वर्यमर्हतीत्यर्थः । तत्र हेतुमाह—अनन्येति । मया अनन्या अभिन्ना । अविनाभूतेति यावत् ॥ २० ॥ अहमपि तया अनन्य इत्याह—विशुद्धेति ॥ २१ ॥ सीतापरिग्रहे भवद्वचनं तु प्रधानहेतुरित्याह—अवश्यमिति ॥ वचनकरणे स्नेहः सर्वपूज्यत्वं हितोपदेष्टृत्वं च हेतुरित्यर्थः ॥ २२ ॥ विदितं स्वेन विदितं । इदं उक्तं वचनं । उक्त्वा स्वकृतेन कर्मणा करणेन महाबलैः कर्तृभिः प्रशस्यमानः प्रियया समेत्य सीतां स्वसमीपमानीयेत्यर्थः ॥ २३ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकविंशत्युत्तरशततमः सर्गः ॥ १२१ ॥

देवकार्यस्य कृतत्वात्त्रिदिवमाक्रमेति ब्रह्मणोक्त्वा लोके धर्मसंस्थापनपरं रामहृदयं जानन् रुद्रस्तदनुमन्यते—एतच्छ्रुत्वेत्यादि ॥ १ ॥ पुष्कराक्ष पुण्डरीकाक्ष । अनेन तस्य "यथा कप्यासं पुण्डरीकमेवमक्षिणी, पुरुषः पुण्डरीकाक्ष" इति श्रुतिस्मृतिभ्यामुदीरितस्य परब्रह्मासाधारणचिह्नस्य रामेरुद्रेण प्रतिपादनाद्रामत्वेनावतीर्णो विष्णुरेव वेदान्तवेद्यं परब्रह्मेत्युक्तं । श्रीनिवासत्वेन महावक्षस्त्वं । दिष्ट्या भाग्येन । अस्माकमिति शेषः ॥ २ ॥ उक्तमेव विवृणोति—दिष्ट्येति ॥ सर्वस्य लोकस्य रावणजं भयमेव प्रवृद्धं तमः अपावृत्तं निरस्तं ॥ ३ ॥ आश्वास्येत्यादिश्लोकत्रयमेकान्वयं ॥ यशस्विनीमिति कैकेयीविशेषणं । तन्मूलत्वाद्रावणवधस्य तस्या यशस्वित्वं । लक्ष्मणमातरमित्यनेन सा लक्ष्मणस्नेहाद्विशेषतो वन्द्ये-

ति० वैक्लव्यं कातर्यपीडां । अनन्याहीति । 'अर्धोवाएषआत्मनोयत्पत्नी' इतिश्रुतेः ॥ शक्तिशक्तिमतोरभेदाच्च । अनेनाग्निदत्तायारावणस्पर्शाद्यभावःस्पष्टमेवोक्तः ॥ २० ॥ इत्येकविंशत्युत्तरशततमःसर्गः ॥ १२१ ॥

ति० एतद्वाक्यंश्रुत्वा युष्मदाज्ञयासीतामङ्गीकरोम्येवेत्युक्तंवाक्यंश्रुत्वा । ततः सीताग्रहणनियोगानुष्ठानानन्तरं ॥ स० अनुभाषितं स्ववचनमनुस्मृत्यभाषितं । ततः तदनन्तरं । शुभतरं रामवाक्यस्यशुभत्वोक्तेः तद्वच्युत्पादकवाक्येनप्रकृतोपयोगिनाऽतिशुभेनभवितव्यमितिशुभतरमित्युक्तमितिभावः ॥ १ ॥ स० दीनं पितृनाशेन स्वदर्शनेन च । कैकेयींचाश्वास्य अनेन रामप्रा-

[पा०] १ ङ. झ. वैक्लव्यं. २ ङ. झ. ट. भास्करस्य. ३ ङ. झ. ट. नविहातुंमयाशक्या. ४ ख. घ. ङ. झ. ञ. ट. वचोहितं. ५ ग. घ. लोकपालानामेवं. ६ ङ. झ. ट. इत्येवमुक्त्वाविजयीमहाबलः. ख. इत्येवमुक्त्वावचनंमहाबलं. ७ ङ. च. छ. झ. ट. राघवेणानुभाषितं. ८ ङ. च. छ. झ. ट. ततःशुभतरं. ९ ख. ङ. च. छ. झ. ट. धर्मभृतांवर.

प्राप्य राज्यमयोध्यायां नन्दयित्वा सुहृज्जनम् ॥ इक्ष्वाकूणां कुले वंशं स्थापयित्वा महाबल ॥ ५ ॥
इष्ट्वा तुरगमेधेन प्राप्य चानुत्तमं यशः ॥ ब्राह्मणेभ्यो धनं दत्त्वा त्रिदिवं गन्तुमर्हसि ॥ ६ ॥
एष राजा विमानस्थः पिता दशरथस्तव ॥ काकुत्स्थ मानुषे लोके गुरुस्तव महायशाः ॥ ७ ॥
इन्द्रलोकं गतः श्रीमांस्त्वया पुत्रेण तारितः ॥ लक्ष्मणेन सह भ्रात्रा त्वमेनमभिवादय ॥ ८ ॥
महादेववचः श्रुत्वा काकुत्स्थः सहलक्ष्मणः ॥ विमानशिखरस्थस्य प्रणाममकरोत्पितुः ॥ ९ ॥
दीप्यमानं स्वया लक्ष्म्या विरजोम्बरधारिणम् ॥ लक्ष्मणेन सह भ्रात्रा ददर्श पितरं विभुः ॥१०॥
हर्षेण महताऽऽविष्टो विमानस्थो महीपतिः ॥ प्राणैः प्रियतरं दृष्ट्वा पुत्रं दशरथस्तदा ॥ ११ ॥
आरोप्याङ्कं महाबाहुर्वरासनगतः प्रभुः ॥ बाहुभ्यां संपरिष्वज्य ततो वाक्यं समाददे ॥ १२ ॥
न मे स्वर्गो बहुमतः संमानश्च सुरर्षिभिः ॥ त्वया राम विहीनस्य सत्यं प्रतिशृणोमि ते ॥ १३ ॥
अद्य त्वां निहतामित्रं दृष्ट्वा संपूर्णमानसम् ॥ निस्तीर्णवनवासं च प्रीतिरासीत्परा मम ॥ १४ ॥
कैकेय्या यानि चोक्तानि वाक्यानि वदतां वर ॥ तव प्रव्राजनार्थानि स्थितानि हृदये मम ॥१५॥
त्वां तु दृष्ट्वा कुशलिनं परिष्वज्य सलक्ष्मणम् ॥ अद्य दुःखाद्विमुक्तोस्मि नीहारादिव भास्करः ॥१६॥
तारितोहं त्वया पुत्र सुपुत्रेण महात्मना ॥ अष्टावक्रेण धर्मात्मा तारितो ब्राह्मणो यथा ॥ १७ ॥

त्युक्तं । अयोध्यायां सुहृज्जनं नन्दयित्वेत्यन्वयः । वंशं पुत्रपौत्रादिपरम्परां । इक्ष्वाकूणां कुले इक्ष्वाकुकुलनिमित्तं । स्थापयित्वा । प्राप्य चानुत्तमं यश इति तुरगमेधफलोक्तिः । आश्वास्येत्यादिना " दशवर्षसहस्राणि दशवर्षशतानि च । वत्स्यामि मानुषे लोके" इत्यवतारात्पूर्वं तत्कृतां प्रतिज्ञामनुसृत्यरुद्रेणोक्तं ॥४—६ ॥ एष इत्यादिश्लोकद्वयमेकान्वयं ॥ देवदेहपरिग्रहेणापरिज्ञायमानत्वात् पुरस्थितोप्येष इत्यङ्गुल्या निर्दिश्यते । मानुषेलोके गुरुरित्यनेन, " पिता पुत्रेण पितृमान् योनियोनौ'इति श्रुतिरुपबृंहिता ॥ ७—१० ॥ हर्षेणेत्यादिश्लोकद्वयमेकान्वयं ॥ पुत्रं रामं ॥ ११—१२ ॥ सुरर्षिभिः संमानः देवर्षिभिः संमानोपि ॥ १३—१४ ॥ हृदये स्थितानि । न विस्मरामीत्यर्थः । तेन दुःखितोभूवमिति सूचितं ॥ १५ ॥ सलक्ष्मणमित्यनेन द्वितीयपरिष्वङ्गे लक्ष्मणोपि विषयीकृत इत्युच्यते ॥ १६ ॥ तारितोहं त्विति ॥ कहोलो नाम ऋषिरष्टावक्रेण तारित इतीयं कथा भार-

---

वण्यस्येवतदमात्सर्यस्यचनिस्सीमतयास्वानुभूतत्वेनैतदाश्वासनाशंसनंननुधामाधवस्तनुयादितिद्योतयति ॥ ४ ॥ **ति०** तुरगमेधेनेष्ट्वा भगवन्तंप्रजापतिमितिशेषः । अनुत्तमंयशः ' महद्यशः ' इत्यादिकंप्रजापतिनाम । ' तस्यनाममहद्यशः ' इतिश्रुतेः । अश्वमेधफलंचतत्प्राप्तिरेव । ' प्रजापतिंवाएषईप्सतीत्याहुः, योश्वमेधेनयजते ' इतिश्रुतेरितिकतकः । त्रिदिवं भूस्वःपदापेक्षया तृतीयंदिवंब्रह्मलोकं ॥ **स०** तुरगमेधेन अश्वमेधेन । इष्ट्वा संपूज्य । स्वात्मानमितिशेषः । अनुत्तमं महत् । यशः कीर्तिविशेषं । ' दिक्षुयानाद्यशःप्रोक्तं ' इतिच्छान्दोग्यभाष्योक्तेः । प्राप्य त्रिदिवं श्वेतद्वीपानन्तासनवैकुण्ठाख्यप्रकाशमानलोकत्रयं । अनुत्तमं यशः तन्नामकंप्रजापतिं स्वमेवेष्ट्वा हेप्राप्य सर्वैःसर्वकर्मभिःप्राप्यराम । शिष्टमविशिष्टं । ' तस्यनाममहद्यशः'—'प्रजापतिंवाएषईप्सतियोश्वमेधेनयजते ' इतिश्रुतिभ्यां ॥ ६ ॥ **स०** मानुषेलोके लीलागृहीतमानुषदेहविषये । तवपिता । मानुषेलोके मनुष्यलोकइतिवा । किंचिद्व्यत्यस्ताकारतयाएषइत्यङ्गुल्यानिर्देशइतिज्ञेयं । गुरुस्तवेतिरामसंबोधनं । गुरुस्तव ब्रह्मादिमहाजनस्तुत्य । एतेननगुर्विति तवेतिचाधिकमितिमन्तव्यं । गुरुस्तवमहायशाइतिदशरथविशेषणंवा । गुरुस्तवेषु बहुभिःस्तुतेषुमहायशाः तदपेक्षयाऽतियशस्वीतिवा । ' जनिताचोपनेताचयश्चविद्यांप्रयच्छति । अन्नदाताभयत्राताषञ्चैतेपितरःस्मृताः ' इतिगुरुत्वस्यपितृपदार्थतानतिरेकात् ॥ ७ ॥ **स०** सुरर्षिभैःसमानः बहुमानसहितोपियोऽहं तस्यमेस्वर्गोनबहुमतः ॥ १३ ॥ **स०** अष्टावक्रेण तन्नामकपुत्रेण । जनकसभायांस्वपितृपराजयकारिणंबन्दिनंजित्वाकहोलोब्राह्मणः तन्नामकोष्टावक्रपितायथातारितस्तथा । तदुक्तं-भारतेवनपर्वणि—'कहोलउवाच । इत्यर्थमिच्छन्तिसुताञ्जना जनक कर्मणा । यदहंनाशकंकर्तुंतत्पुत्रःकृतवान्मम । ' इति ॥१७॥

[**पा०**] १ ख. ग. ङ. छ. झ. ट. मयोध्यांच. २ ङ. च. छ. झ. ट. आरोप्याङ्के. ३ घ. महाबुद्धिर्वरा. ४ ख. ग. ङ. छ. झ. ञ. ट, समानश्चसुरर्षभैः, ५ ङ, च, छ, झ, ञ, ट. कहोळोब्राह्मणोयथा.

इदानीं तु विजानामि यथा सौम्य सुरेश्वरैः ॥ वधार्थं [1]रावणस्येदं विहितं पुरुषोत्तम ॥ १८ ॥
सिद्धार्था खलु कौसल्या या त्वां राम गृहं गतम् ॥ वनान्निवृत्तं संहृष्टा द्रक्ष्यत्यरिनिषूदन ॥१९॥
सिद्धार्थाः खलु ते राम नरा ये त्वां पुरीं गतम् ॥ जलार्द्रमभिषिक्तं च द्रक्ष्यन्ति वसुधाधिपम् ॥२०॥
अनुरक्तेन बलिना शुचिना धर्मचारिणा ॥ इच्छामि त्वामहं द्रष्टुं भरतेन समागतम् ॥ २१ ॥
चतुर्दश समाः सौम्य वने निर्यापितास्त्वया ॥ वसता सीतया सार्धं लक्ष्मणेन च धीमता ॥ २२॥
निवृत्तवनवासोसि प्रतिज्ञा सफला कृता ॥ रावणं च रणे हत्वा देवास्ते परितोषिताः ॥ २३ ॥
कृतं कर्म यशः श्लाघ्यं प्राप्तं ते शत्रुसूदन ॥ भ्रातृभिः सह राज्यस्थो दीर्घमायुरवाप्नुहि ॥
इति ब्रुवाणं राजानं रामः प्राञ्जलिरब्रवीत् ॥ २४ ॥
कुरु प्रसादं धर्मज्ञ कैकेय्या भरतस्य च ॥ सपुत्रां त्वां त्यजामीति यदुक्ता केकयी त्वया ॥ २५ ॥
स शापः केकयीं घोरः सपुत्रां न स्पृशेत्प्रभो ॥ २६ ॥
स तथेति महाराजो राममुक्त्वा कृताञ्जलिम् ॥ लक्ष्मणं च परिष्वज्य पुनर्वाक्यमुवाच ह ॥२७॥
रामं शुश्रूषता भक्त्या वैदेह्या सह सीतया ॥ कृता मम महाप्रीतिः प्राप्तं धर्मफलं च ते ॥ २८ ॥
धर्मं प्राप्स्यसि धर्मज्ञ यशश्च विपुलं भुवि ॥ रामे प्रसन्ने स्वर्गं च महिमानं तथैव च ॥ २९ ॥
रामं शुश्रूष भद्रं ते सुमित्रानन्दवर्धन ॥ रामः सर्वस्य लोकस्य शुभेष्वभिरतः सदा ॥ ३० ॥
एते सेन्द्रास्त्रयो लोकाः सिद्धाश्च परमर्षयः ॥ अभिगम्य महात्मानमर्चन्ति पुरुषोत्तमम् ॥ ३१ ॥
एतत्तदुक्तमव्यक्तमक्षरं ब्रह्म निर्मितम् ॥ देवानां हृदयं सौम्य गुह्यं रामः परन्तपः ॥ ३२ ॥

तोक्ता ॥१७॥ रावणस्य वधार्थं सुरेश्वरैरिदमभिषेकविघ्नादिकं कर्म यथा विहितं तथा इदानीमेव जानामि। पुरुषोत्तमेत्यनेन भवान्विष्णुरेव रावणवधार्थं मनुष्यत्वंगत इत्युच्यते ॥१८॥ सिद्धार्था कृतार्था। मम स्वर्गसुखादपि तस्याः सुखमधिकमिति भावः॥१९—२०॥ अनुरक्तेनेति ॥ अवश्यं राम भरतं प्राप्नुहीति भावः ॥ २१—२४ ॥ कैकेय्या भरतस्य च कैकेय्यां भरते चेत्यर्थः । संबन्धसामान्ये षष्ठी । यस्मादुक्ता तस्मात् प्रसादं कुर्विति संबन्धः ॥ २५ ॥ स शाप इत्यर्धमेकं वाक्यं ॥ शापः संबन्धविच्छेदरूपः ॥ २६—२७ ॥ सीतया सह रामं शुश्रूषतेत्यन्वयः ॥ २८ ॥ स्वर्गं सुखं। लक्ष्मणस्यापि विष्ण्ववतारत्वं न जानाति दशरथः । महिमानं महत्त्वं ॥ २९–३०॥ रामस्य सर्वोत्तमत्वं शिष्टाचारेण दर्शयति—एत इति। अर्चन्तीतिणिजभाव आर्षः । एत इति हस्तनिर्देशेन रुद्रोप्यन्तर्गतः ॥ ३१ ॥ देवानां हृदयं सर्वदेवान्तर्यामी । वेदानामिति पाठे वेदतात्पर्यभूतं । उभयथाप्यग्नीन्द्रादिरूपेण सर्वकर्मसमाराध्यमित्यर्थः । गुह्यं साक्षादुपनिषद्वेद्यं । अव्यक्तं भक्तिशून्यैर्दुर्ज्ञेयं । अक्षरं षड्भावविकाररहितं । तदेतत् ब्रह्म रामः रामरूपेण निर्मितं । रामरूपेणावतीर्णं । इति उक्तं । ब्रह्मादिभि-

---

ति० पिहितं पुरुषोत्तमं आच्छादितं । मत्पुत्रत्वेनेतिशेषः ॥ १८ ॥ स० रामेप्रसन्ने 'किमलभ्यंभगवतिप्रसन्नेश्रीनिकेतने' इत्यादेः ॥ २९ ॥ ति० एतत् रामरूपंवस्तु । तज्जानीहीतिशेषः । यद्देवानांहृदयमुक्तं 'देवानांहृदयंब्रह्मान्वविन्दत्' इतिश्रुत्यादेवहृदयत्वेनोपदिष्टं । तथादेवानांगुह्यं । 'एतद्वैमहोपनिषदंदेवानांगुह्यं' इतिश्रुत्यादेवगुह्यत्वेनोपदिष्टं । ब्रह्मसंमितं ब्रह्मणा 'अन्तरस्मिन्निमेलोकाः' इत्यादिश्रुत्याप्रतिपादितं । अक्षरं अशेषजगत्कारणतयानिर्लयंयद्ब्रह्मास्तिब्रह्मशब्दतन्त्रे ॥ ३२ ॥ ति०

[पा०] १ ङ. छ. झ. ञ. ट. रावणस्येहपिहितंपुरुषोत्तमं. ख. रावणस्येहप्रापितंपुरुषोत्तमं. २ क.—ञ. द्रक्ष्यतेशत्रुसूदन. ट. द्रक्ष्यतेशत्रुसूदनं. ३ ङ. ट. राज्येनैवाभिषिक्तंच. झ. राज्येचैवाभिषिक्तंचद्रक्ष्यन्ते. ४ ङ. ब्रह्मचारिणा. ५ ङ. झ. ट. मत्प्रीत्यालक्ष्मणेनच. ६ घ. निवृत्तवनवासश्च. ७ ग. वाक्यमभाषत. ८ ङ. ञ. ट. तथोत्तमं. झ. तथोत्तरं. ९ ङ. झ. ट. हितेष्वभिरतः. छ. ञ. सुखेष्वभिरतः. १० ङ. झ. ञ. अभिवाद्य. ११ घ. महात्मानंस्तुवन्ति. १२ ख. ग. घ. छ. ञ. मव्यग्रं. १३ ङ. झ. ञ. ट. ब्रह्मसंमितं.

अवाप्तं धर्मचरणं यशश्च विपुलं त्वया ॥ [1]रामं शुश्रूषता भक्त्या वैदेह्या सह सीतया ॥ ३३ ॥
स तथोक्त्वा महाबाहुर्लक्ष्मणं प्राञ्जलिं स्थितम् ॥ उवाच राजा धर्मात्मा वैदेहीं वचनं शुभम् ॥३४॥
कर्तव्यो न तु वैदेहि मन्युस्त्यागमिमं प्रति ॥ रामेण त्वद्विशुद्ध्यर्थं कृतमेतद्धितैषिणा ॥ ३५ ॥
[[2]सुदुष्करमिदं पुत्रि तव चारित्रलक्षणम् । कृतं यत्तेऽन्यनारीणां यशो ह्यभिभविष्यति] ॥ ३६ ॥
[3]न त्वं सुभ्रु समाधेया पतिशुश्रूषणं प्रति ॥ अवश्यं तु मया वाच्यमेष ते दैवतं परम् ॥ ३७ ॥
इति प्रतिसमादिश्य पुत्रौ [4]सीतां तथा स्नुषाम् ॥ इन्द्रलोकं विमानेन ययौ [5]दशरथो ज्वलन् ॥३८॥
[[6]विमानमास्थाय महानुभावः श्रिया च संहृष्टतनुर्नृपोत्तमः ॥
आमन्त्र्य पुत्रौ सह सीतया च जगाम देवप्रवरस्य लोकम् ॥ ३९ ॥]
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्वाविंशत्युत्तरशततमः सर्गः ॥ १२२ ॥

त्रयोविंशत्युत्तरशततमः सर्गः ॥ १२३ ॥

इन्द्रेण रामप्रार्थनयातंप्रति मृतविकलाङ्गवानरगणानांपुनर्जीवनावैकल्यस्वालयवर्तिसरित्तरुसार्वकालिकसलिलफलसमृद्धिसंभवरूपवरदानपूर्वकं सुरगणैः सहस्वर्गगमनम् ॥ १ ॥ रामेण सुरपतिसमुज्जीविताविकलवानरनिकरैः सह हर्षाधिगमः ॥ २ ॥

प्रीतियाते तु काकुत्स्थे महेन्द्रः पाकशासनः ॥ अब्रवीत्परमप्रीतो राघवं प्राञ्जलिं स्थितम् ॥ १ ॥
अमोघं दर्शनं राम तवास्माकं [7]परन्तप ॥ प्रीतियुक्ताः स्म तेन त्वं ब्रूहि यन्मनसेच्छसि ॥ २ ॥

रिति शेषः ॥ ३२—३६ ॥ न समाधेया नोपदेष्टव्या ॥ ३७—३९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्वाविंशत्युत्तरशततमः सर्गः ॥ १२२ ॥

अथेन्द्रानुशासनं—प्रतिप्रयात इत्यादि ॥ काकुत्स्थे दशरथे । महेन्द्रः लब्धमहेन्द्रभावः ॥ १ ॥ तवास्माकं दर्शनं । अस्मत्कर्तृकं दर्शनं दशरथपुत्रकामेष्टिकालिकं । अमोघं रावणवधपर्यन्तं जातमित्यर्थः । तेन प्रीतियुक्तत्वेन यत् प्रत्युपकाररूपं कार्यमिच्छसि

एवंभूतोरामोब्रह्मादिभिस्त्वत्समक्षमेवोक्तः । अतएनंशुश्रूषतालब्धयासर्वधर्माचरणंप्राप्तं । ब्रह्मज्ञधर्मेसर्वधर्मान्तर्भावस्यसंवर्गविद्यायामुक्तत्वादितिभावः ॥ ३३ ॥ इतिद्वाविंशत्युत्तरशततमःसर्गः ॥ १२२ ॥

ति० काकुत्स्थेदशरथे । महेन्द्रः तत्सहितोब्रह्मेत्यर्थः । सत्यसंकल्पत्वस्यतस्मिन्नेवप्रसिद्धेः । वानराणांसंकल्पमात्रेणोत्थानस्य वक्ष्यमाणत्वात् । भारतेपि " ततस्तेब्रह्मणाप्रोक्तेतथेतिवचनेतदा । समुत्तस्थुर्महाराजवानरालब्धचेतसः " । इत्युक्तं पाद्मेपि ' पितामहवरात्तूर्णंजीवयामासतान्नृप ' प्राञ्जलिंस्थितंराघवंप्रतीतिशेषः ॥ **स०** महेन्द्रःपाकशासनइत्यत्रमहेन्द्रशब्देनसर्वेस्वामित्वेनब्रह्माग्राह्यः । अत्रोत्तरश्लोकेषुचविद्यमानाःपाकशासनादयःशब्दाअर्शआद्यजन्ताः । तथाच पाकशासनसहितोब्रह्मोवाचेति लभ्यते । अतोनभारतादिविसंवादः । यथोक्तंभारते—" तमुवाचततोब्रह्मादेवैःशक्रपुरोगमैः । कौसल्यामातरिष्टांस्तेवरानद्यददामिकान् । वव्रेरामःस्थितिंधर्मेशत्रुभिश्चापराजयम् । राक्षसैर्निहतानांचवानराणांसमुत्थितिम् । ततस्तेब्रह्मणाप्रोक्तेतथेतिवचनेतदा । समुत्तस्थुर्महाराजवानरालब्धचेतसः ' इति । पाद्मेच—'पितामहवरात्तूर्णंजीवयामासतान्नृप ' इति । ननुभ्रूविभ्रममात्रेणचराचरजगत्सृष्ट्यादिकर्तृरामस्यकथंब्रह्मवराद्वानरोज्जीवनादिकमितिचेदुच्यते । प्रादुर्भावेषुब्रह्ममाननार्थंब्रह्मणेदत्तस्यवरस्यरक्षणार्थंचतथानटनस्यावश्यकत्वान्नेदमनुपपन्नं । यथोक्तंशान्तौमोक्षधर्मेषु ' मयासृष्टःपुराब्रह्मा ' इत्यारभ्य ' अनुशास्यस्त्वयाब्रह्मन्नियोज्यश्चसुतोयथा । एतांश्चान्यांश्चरुचिरान्ब्रह्मणेऽमिततेजसे । अहंदत्वावरान्प्रीतोनिवृत्तिपरमोऽभव ' इतिभगवद्वचनं । एतेनप्राञ्जलिंस्थितं'

[**पा०**] १ झ. एवंशुश्रूषताव्यग्रं. ञ. ट. रामंशुश्रूषताव्यग्रं. २ अयंश्लोकः ङ. झ. ट. पाठेषुदृश्यते. ३ ङ. झ. ट. नत्वंकामं. ४ ङ. झ. ट. सीतांचराघवः. ५ ङ. झ. ट. दशरथोनृपः. ६ अयंश्लोकः ङ. झ. ट. पाठेषुदृश्यते. ७ क.—ट. प्रतिप्रयाते. ८ ङ. झ. ट. नरर्षभ. ९ ङ. झ. ट. न्मनसेप्सितं.

एवमुक्तस्तु काकुत्स्थः प्रत्युवाच कृताञ्जलिः ॥ लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया ॥ ३ ॥
यदि प्रीतिः समुत्पन्ना मयि सर्वसुरेश्वर ॥ वक्ष्यामि कुरु ते सत्यं वचनं वदतां वर ॥ ४ ॥
मम हेतोः पराक्रान्ता ये गता यमसादनम् ॥ ते सर्वे जीवितं प्राप्य समुत्तिष्ठन्तु वानराः ॥ ५ ॥
मत्कृते विप्रयुक्ता ये पुत्रैर्दारैश्च वानराः ॥ मत्प्रियेष्वभियुक्ताश्च न मृत्युं गणयन्ति च ॥
त्वत्प्रसादात्समेयुस्ते वरमेतदहं वृणे ॥ ६ ॥
नीरुजो निर्व्रणांश्चैव संपन्नबलपौरुषान् ॥ गोलाङ्गूलांस्तथैवर्क्षान्द्रष्टुमिच्छामि मानद ॥ ७ ॥
अकाले चापि मूलानि फलानि च ॥ नद्यश्च विमलास्तत्र तिष्ठेयुर्यत्र वानराः ॥ ८ ॥
श्रुत्वा तु वचनं तस्य राघवस्य महात्मनः ॥ महेन्द्रः प्रत्युवाचेदं वचनं प्रीतिलक्षणम् ॥ ९ ॥
महानयं वरस्तात त्वयोक्तो रघुनन्दन ॥ द्विर्मया नोक्तपूर्वं हि तस्मादेतद्भविष्यति ॥ १० ॥
समुत्थास्यन्ति हरयो ये हता युधि राक्षसैः ॥ ऋक्षाश्च सहगोपुच्छा निकृत्ताननबाहवः ॥ ११ ॥
नीरुजो निर्व्रणाश्चैव संपन्नबलपौरुषाः ॥ समुत्थास्यन्ति हरयः सुप्ता निद्राक्षये यथा ॥ १२ ॥
सुहृद्भिर्बान्धवैश्चैव ज्ञातिभिः स्वजनैरपि ॥ सर्व एव समेष्यन्ति संयुक्ताः परया मुदा ॥ १३ ॥
अकाले पुष्पशबलाः फलवन्तश्च पादपाः ॥ भविष्यन्ति महेष्वास नद्यश्च सलिलायुताः ॥ १४ ॥
सव्रणैः प्रथमं गात्रैः संवृत्तैर्निर्व्रणैः पुनः ॥ १५ ॥
ततः समुत्थिताः सर्वे सुप्त्वेव हरिपुङ्गवाः ॥ बभूवुर्वानराः सर्वे किमेतदिति विस्मिताः ॥ १६ ॥
ते सर्वे वानरास्तस्मै राघवायाभ्यवादयन् ॥ १७ ॥
काकुत्स्थं परिपूर्णार्थं दृष्ट्वा सर्वे सुरोत्तमाः ॥ ऊचुस्ते प्रथमं स्तुत्वा स्तवार्हं सहलक्ष्मणम् ॥ १८ ॥
गच्छायोध्यामितो वीर विसर्जय च वानरान् ॥ मैथिलीं सान्त्वयस्वैनामनुरक्तां तपस्विनीम् ॥१९॥

तद्ब्रूहि । केचित्तुत्वत्कर्तृकमस्मद्विषयं दर्शनमित्यर्थ इत्याहुः ॥ २—५ ॥ मत्कृत इत्यादिसार्धश्लोकमेकं वाक्यं ॥ मत्प्रियेषु अभियुक्ता निरताः । समेयुरित्यत्र पुत्रैर्दारैश्चेत्यावर्तनीयं ॥ ६ ॥ नीरुजः निष्पीडान् ॥ ७ ॥ विमलाः विमलोदकाः ॥ ८ ॥ प्रीतिर्लक्ष्यतेनेनेति प्रीतिलक्षणं प्रीतिव्यञ्जकं ॥ ९ ॥ महानयं वर इति वरस्य महत्त्वं इतस्ततो विप्रकीर्णकरचरणपुच्छादिस्वसंस्थानसंधानलोकान्तरगतानयनादिरूपाघटितार्थघटितत्वं । द्विर्मयानोक्तपूर्वमिति । उक्तवचनस्य विपरीतं वचनान्तरं नोक्तपूर्वमित्यर्थः ॥ १०—१३ ॥ पुष्पशबलाः पुष्पैर्नानावर्णाः । सलिलायुताः सलिलैर्व्याप्ताः ॥ १४ ॥ ये निहताः सव्रणास्तेषां निर्व्रणत्वमनुगृह्णाति—सव्रणैरिति ॥ प्रथमं वरदानात्पूर्वं सव्रणैः अथ निर्व्रणैः संवृत्तैः निर्व्रणीभूतैः गात्रैरुपलक्षिताः । वानरा भविष्यन्तीत्यनुकृष्य योजना ॥ १५ ॥ तत इति । अत्र क्रियाभेदात्सर्वशब्दद्वयं । किमेतदिति । युद्धे मृतस्य कथमेवं जीवनमित्यर्थः ॥ १६—१८ ॥ गच्छायोध्यामित्यादिसा-

---

इत्यादिसमाहितं ॥ १ ॥ रामानु० राघवायाभ्यवादयन् राघवमभ्यवादयन्निल्यर्थः । व्यत्ययेनद्वितीयार्थेचतुर्थी । द्वितीयायांविभीषणाभिषेकसीताप्राप्तिदेवताप्रस्थापनानि ॥ १७ ॥

[पा०] १ एवमुक्तस्तुकाकुत्स्थइतिश्लोकस्यस्थाने एवमुक्तोमहेन्द्रेणप्रसन्नेनमहात्मना । सुप्रसन्नमनाहृष्टोवचनंप्राहराघवः. इतिश्लोको ङ. झ. ट. पाठेषुदृश्यते. २ ङ. झ. ट. विबुधेश्वर. ३ ख. घ.—ट. कुरुमे. ४ मत्कृतेविप्रयुक्ताइत्यर्धात्परं—तान्मीतमनसस्सर्वान्द्रष्टुमिच्छामिमानद । विक्रान्ताश्चापिशूराश्चनमृत्युंगणयन्तिच । कृतयत्नाविपन्नाश्चजीवयैतान्पुरन्दर । इत्यर्ध क. ख. ङ. च. छ. झ. ञ. ट. पाठेष्वधिकंदृश्यते. ५ ख. घ.—ट. ष्वभिरक्ताश्च. ६ छ. झ. ज. गणयन्तिते. क. गणयन्तिये. ७ क. ङ. छ. झ. ञ. ट. पुष्पाणि. ८ ङ. च. छ. झ. ञ. ट. समुत्तिष्ठन्तुतेसर्वेहतायेयुधि. गात्रैरिदानींनिर्व्रणैःसमैः. १० ख. ङ. छ. झ. ञ. किंत्वेतदिति. ११ ङ. झ. ञ. ट. अब्रुवन्परमप्रीताः ख. छ. ऊचुस्तेप्राञ्जलिंरामंसहसीतंसलक्ष्मणं.

शत्रुघ्नं च महात्मानं मातृः सर्वाः परन्तप ॥ १९ ॥
भ्रातरं पश्य भरतं त्वच्छोकाद्व्रतधारिणम् ॥ अभिषेचय चात्मानं पौरान्गत्वा प्रहर्षय ॥ २० ॥
एवमुक्त्वा तमामन्त्र्य रामं सौमित्रिणा सह ॥ विमानैः सूर्यसंकाशैर्हृष्टा जग्मुः सुरा दिवम् ॥२१॥
अभिवाद्य च काकुत्स्थः सर्वांस्तांस्त्रिदशोत्तमान् ॥ लक्ष्मणेन सह भ्रात्रा वासमाज्ञापयत्तदा ॥२२॥
ततस्तु सा लक्ष्मणरामपालिता महाचमूर्हृष्टजना यशस्विनी ॥
श्रिया ज्वलन्ती विरराज सर्वतो निशाप्रणीतेव हि शीतरश्मिना ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रयोविंशत्युत्तरशततमः सर्गः ॥१२३॥

चतुर्विंशत्युत्तरशततमः सर्गः ॥ १२४ ॥

विभीषणेन रात्रौसुखसुप्तोत्थितंरामंप्रति प्रभातेस्नीयवस्त्राभ्यङ्गाङ्गरागाद्युपचाराङ्गीकरणप्रार्थना ॥ १ ॥ रामेणतंप्रति सुग्रीवादीनांतदुपचारकरणचोदनपूर्वकं भरतेनविना भोगाननुभवनरूपस्वीयव्रतनिवेदनेनसहायोध्यांप्रति गमनत्वरानिवेदनम् ॥ २ ॥ विभीषणेनतंप्रति पुष्पकविमानेनसत्वरमयोध्याप्रापणप्रतिज्ञानपूर्वकं लङ्कायांद्वित्रदिनावस्थानप्रार्थनेनसह तत्समीपंप्रतिपुष्पकानयनम् ॥ ३ ॥

तां रात्रिमुषितं रामं सुखोत्थितमरिन्दमम् ॥ अब्रवीत्प्राञ्जलिर्वाक्यं जयं पृष्ट्वा विभीषणः ॥ १ ॥
स्नानानि चाङ्गरागाणि वस्त्राण्याभरणानि च ॥ चन्दनानि च दिव्यानि माल्यानि विविधानि च ॥२॥
अलंकारविदश्चेमा नार्यः पद्मनिभेक्षणाः ॥ उपस्थितास्त्वां विधिवत्स्नापयिष्यन्ति राघव ॥
प्रतिगृह्णीष्व तत्सर्वं मदनुग्रहकाम्यया ॥ ३ ॥
एवमुक्तस्तु काकुत्स्थः प्रत्युवाच विभीषणम् ॥ हरीन्सुग्रीवमुख्यांस्त्वं स्नानेनाभिनिमन्त्रय ॥ ४ ॥
स तु ताम्यति धर्मात्मा मम हेतोः सुखोचितः ॥ सुकुमारो महाबाहुः कुमारः सत्यसंश्रवः ॥ ५ ॥

धर्मश्लोकद्वयमेकान्वयं ॥ त्वच्छोकात् त्वद्वियोगशोकात् ॥ १९—२१ ॥ वासमाज्ञापयत् वानराणामिति शेषः ॥ २२ ॥ प्रणीता प्रकाशिता ॥ २३ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रयोविंशत्युत्तरशततमः सर्गः ॥ १२३ ॥

अथ रामस्य विभीषणसत्कारः—तां रात्रिमित्यादि । तां रात्रिं । यस्मिन्दिने ब्रह्मादयो निर्जग्मुः तां रात्रिमित्यर्थः ॥ १ ॥ स्नानानीत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ स्नानानि स्नानीयजलानि । अत्र सर्वत्रेमानीत्यनुषज्यते । अङ्गरागाणि कुङ्कुमादीनि । माल्यानि स्रजः । विधिवत् सोपचारमित्यर्थः ॥ २—३ ॥ सुग्रीवमुख्यान् सुग्रीवप्रमुखानेव हरीन् । स्नानेन स्नानेन हेतुना । अभिनिमन्त्रय ॥ ४ ॥ त्वां विनातेषामामन्त्रणे किंकारणमित्यतआह—सत्विति ॥ सः सर्वदा मनसि परिवर्तमानः । धर्मात्मा ताम्यति । धर्माचरणेनैव ताम्यतीति भावः । मम हेतोः मद्भा-

---

ति० येप्यमृतवृष्ट्याइन्द्रेणसर्वेसमुत्थानंकृतमितिवदन्तितत्पक्षेपिरावणसंस्कारदिनेसर्वरक्षसांदाहादिसंस्कारपूर्वकंभस्मनः समुद्रेप्रक्षेपान्नतदुत्थानशङ्का । पूर्वंयुद्धकालएवमृतानांसमुद्रेप्रक्षेपइतिमूलएवपूर्वमुक्तत्वाच्च । अन्येतु सश्लोकस्तत्राधुनिकप्रक्षिप्तः । नह्योषधिगन्धमात्रेणसर्वेषांविशल्यता । किंतुचूर्णीकृत्यतत्प्रदानेनेतिप्रागेवोक्तं । तथाचतदभावान्नतेषांविशल्यता । मृतानांगन्धाघ्राणाभावाच्च । रावणस्यतथाऽऽज्ञायाअश्रवणाच्चेत्याहुः ॥ २३ ॥ इतित्रयोविंशत्युत्तरशततमःसर्गः ॥ १२३ ॥

शि० सुखोदितं सुखकथनविशिष्टंयथाभवतितथा उषितंरामंजयंपृष्ट्वाऽब्रवीत् ॥ स० सुखोदितं सुखमुदितं उदयःखप्रबोधः

[पा०] १ ङ. ञ. ट. एवमुक्त्वासहस्राक्षोरामंसौमित्रिणासह । विमानैःसूर्यसंकाशैर्यथौहृष्टःसुरैस्सह. २ ख. सुखसुप्तमरिंदमं. ङ. ञ. न. ट. सुखोदितं. घ. च. सुखोषितं. ३ ङ. च. छ. ञ. न. ट. विदश्चैताः. ४ घ. न्सुग्रीवमिश्रांस्त्वं. ५ ङ. ञ. ट. महाबाहुर्भरतः.

तं विना केकयीपुत्रं भरतं धर्मचारिणम् ॥ न मे स्नानं बहुमतं वस्त्राण्याभरणानि च ॥ ६ ॥
इत एव पथा क्षिप्रं प्रतिगच्छामि तां पुरीम् ॥ अयोध्यामागतो ह्येष पन्थाः परमदुर्गमः ॥ ७ ॥
एवमुक्तस्तु काकुत्स्थं प्रत्युवाच विभीषणः ॥ अह्ना त्वां प्रापयिष्यामि तां पुरीं पार्थिवात्मज ॥८॥
पुष्पकं नाम भद्रं ते विमानं सूर्यसन्निभम् ॥ मम भ्रातुः कुबेरस्य रावणेनाहृतं बलात् ॥ ९ ॥
हृतं निर्जित्य संग्रामे कामगं दिव्यमुत्तमम् ॥ त्वदर्थे पालितं चैतत्तिष्ठत्यतुलविक्रम ॥ १० ॥
तदिदं मेघसंकाशं विमानमिह तिष्ठति ॥ तेन यास्यसि यानेन त्वमयोध्यां गतज्वरः ॥ ११ ॥
अहं ते यद्यनुग्राह्यो यदि स्मरसि मे गुणान् ॥ वस तावदिह प्राज्ञ यद्यस्ति मयि सौहृदम् ॥ १२ ॥
लक्ष्मणेन सह भ्रात्रा वैदेह्या चापि भार्यया ॥ अर्चितः सर्वकामैस्त्वं ततो राम गमिष्यसि ॥१३॥
प्रीतियुक्तस्य मे राम ससैन्यः ससुहृद्गणः ॥ सत्क्रियां विहितां तावद्गृहाण त्वं मयोद्यताम् ॥१४॥
प्रणयाद्बहुमानाच्च सौहृदेन च राघव ॥ प्रसादयामि प्रेष्योऽहं न खल्वाज्ञापयामि ते ॥ १५ ॥
एवमुक्तस्ततो रामः प्रत्युवाच विभीषणम् ॥ रक्षसां वानराणां च सर्वेषां चोपशृण्वताम् ॥ १६ ॥
पूजितोऽहं त्वया सौम्य साचिव्येन परन्तप ॥ सर्वात्मना च चेष्टाभिः सौहृदेनोत्तमेन च ॥ १७ ॥
न खल्वेतन्न कुर्यां ते वचनं राक्षसेश्वर ॥ तं तु मे भ्रातरं द्रष्टुं भरतं त्वरते मनः ॥ १८ ॥

भार्थमित्यर्थः । सत्यसंश्रयः । "चतुर्दशे हि संपूर्णे वर्षेऽहनि रघूत्तम । न द्रक्ष्यामि यदि त्वां हि प्रवेक्ष्यामि हुताशनं" इति कृतप्रतिज्ञः ॥ ५ ॥ तं विना स्नानोपकरणं विना । स्नानं कथं कार्यं । केकयीपुत्रं मध्यमाम्बा तस्मिन् यदुःखमकरोत् तत्किं मयापि कर्तव्यं । भरतं राज्ञा मया च विरहितं राज्यं सम्यक्कृतवन्तं । धर्मचारिणं मद्वियोगेन बहुव्रतपरे तस्मिन् कथं मया व्रतत्यागः कर्तुं युक्त इति भावः । न मे स्नानं बहुमतं । प्रथमं मे स्नानमेव नेष्टं कथं तदनन्तरभावीनि वस्त्रादीनि ॥ ६ ॥ इत एवेति । अनेन पथा येनाहमागतस्तेनेत्यर्थः । एष इति हस्तनिर्देशपूर्वकमुच्यते । अयोध्यां आगतः प्राप्तः अयमयोध्यामार्गः । तेन क्षिप्रं तां प्रति गच्छामीत्यर्थः । परमदुर्गमः अतिदूरत्वादिति भावः ॥ ७ ॥ मार्गस्य परमदुर्गमत्वमात्रं परिहर्तुमाह—एवमुक्तस्त्विति । अह्नात्वामित्यादिसार्धश्लोकत्रयमेकान्वयं ॥ किं रावणेन चौर्येणापहृतमित्यत्राह—आहृतं निर्जित्येति । तर्हि कुबेराय समागताय तत्किमर्थं न दत्तमित्यत्राह—त्वदर्थं इति ॥ त्वदर्थे त्वद्गमनार्थे । पालितमिति । न दत्तमित्यर्थः । यद्वा त्वदर्थे त्वत्पूजार्थमेव । मेघसंकाशमिति वेगे दृष्टान्तः ॥ ८—११ ॥ स्नानाकरणे द्वित्रदिनमात्रस्थितिं याचते—अहं त इत्यादिनाचतुःश्लोक्येकान्वया । गुणान् भक्त्यादिगुणान् । सर्वकामैः भूषणादिभिः । विहितां मया कृतां । उद्यतां । इतः परं नोद्योगः कार्यः येन विलम्बः स्यात् । किंतु पूर्वमेव समुद्युक्तामित्यर्थः । निर्बन्धदोषं परिहरति—प्रणयादिति । प्रणयात् मद्वाक्यमवश्यं श्रोष्यतीति विस्रम्भात् । बहुमानात् त्वत्कृतलालनात् । सौहृदेन भक्त्या । प्रसादयामि प्रार्थयामि ॥ १२—१५ ॥ उपशृण्वताम् उपशृण्वत्सु । भावलक्षणे षष्ठी ॥ १६ ॥ साचिव्येन साहाय्येन । चेष्टाभिः पौरुषैः । सर्वात्मना पूजित इत्यन्वयः ॥ १७ ॥ न खल्वेतदित्यातिश्लोकद्वयमेका-

---

सूर्योदयोवायस्यतं । सुखप्रबुद्धमित्यर्थः । जयंपृष्ट्वा जयेतिशब्दमुक्त्वा ॥ १ ॥ **ति०** लङ्कायांवर्तमानस्यापिपुष्पकस्यात्युन्नततत्वेनबहिःस्थितैरपिदृश्यमानत्वादिदमितिप्रत्यक्षवन्निर्देशः ॥ ११ ॥ **स०** हेराम प्रीतियुक्तस्यपुरुषस्य शास्त्रविहितां मयाउद्यतांकार्यतयाउद्युक्तां सत्क्रियां । मे अव्ययं । मत्तः । गृहाण । मे ममेतिवा । नचरामेत्यस्यामन्त्रितत्वेनाविद्यमानवद्भावेनापदत्वेनपदात्परत्वाभावात्कथंमइत्यादेशइतिवाच्यं । सत्क्रियामितिपदात्परत्वेनादेशसंभवात् ॥ **शि०** प्रीतियुक्तस्यमे प्रार्थनयेतिशेषः । मया उद्यतां प्रकृष्टां । विहितां उचितां सत्क्रियांगृहाण ॥ १४ ॥

[**पा०**] १ ञ. नवस्त्राभरणानिच. २ ङ. झ. ट. एतत्पश्ययथाक्षिप्रं. ३ ङ. झ. ट. अयोध्यांगच्छतोह्येष. ४ ङ. झ. ट. रावणेनबलीयसा. ५ ङ. झ. येन. ६ ज. गतव्यथः. ७ ङ. छ. झ. ञ. ट. प्रीतियुक्तस्यविहितांससैन्यस्ससुहृद्गणः । सत्क्रियां राममेतावत्. ८ क.—ङ. झ. ट. सर्वेषामेवशृण्वतां. ९ ख. ग. ङ.—ट. लयावीर. १० झ. ट. सौहार्देनपरेणच.

मां निवर्तयितुं योसौ चित्रकूटमुपागतः ॥ शिरसा याचतो यस्य वचनं न कृतं मया ॥ १९ ॥
कौसल्यां च सुमित्रां च कैकेयीं च यशस्विनीम् ॥ गुरूंश्च सुहृदश्चैव पौरांश्च तनयैः सह ॥ २० ॥
उपस्थापय मे क्षिप्रं विमानं राक्षसेश्वर ॥ कृतकार्यस्य मे वासः कथं स्विदिह संमतः ॥ २१ ॥
अनुजानीहि मां सौम्य पूजितोसि विभीषण ॥ मन्युर्न खलु कर्तव्यस्त्वरितं त्वाऽनुमानये ॥२२॥
राघवस्य वचः श्रुत्वा राक्षसेन्द्रो विभीषणः ॥ तं विमानं समादाय तूर्णं प्रतिनिवर्तत ॥ २३ ॥
ततः काञ्चनचित्राङ्गं वैडूर्यमयवेदिकम् ॥ कूटागारैः परिक्षिप्तं सर्वतो रजतप्रभम् ॥ २४ ॥
पाण्डुराभिः पताकाभिर्ध्वजैश्च समलंकृतम् ॥ शोभितं काञ्चनैर्हर्म्यैर्हेमपद्मविभूषितम् ॥ २५ ॥
प्रकीर्णं किङ्किणीजालैर्मुक्तामणिगवाक्षितम् ॥ घण्टाजालैः परिक्षिप्तं सर्वतो मधुरस्वनम् ॥ २६ ॥
यन्मेरुशिखराकारं निर्मितं विश्वकर्मणा ॥ बहुभिर्भूषितं हर्म्यैर्मुक्तारजतसंनिभैः ॥ २७ ॥
तलैः स्फाटिकचित्राङ्गैर्वैडूर्यैश्च वरासनैः ॥ महार्हास्तरणोपेतैरुपपन्नं महाधनैः ॥ २८ ॥
उपस्थितमनाधृष्यं तद्विमानं मनोजवम् ॥ निवेदयित्वा रामाय तस्थौ तत्र विभीषणः ॥ २९ ॥

[तत्पुष्पकं कामगमं विमानमुपस्थितं भूधरसंनिकाशम् ॥
दृष्ट्वा तदा विस्मयमाजगाम रामस्ससौमित्रिरुदारसत्वः ॥ ३० ॥]

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्विंशत्युत्तरशततमः सर्गः ॥ १२४ ॥

न्वयं ॥ विभीषणवचनाकरणे हेतुमाह—तं त्विति ॥ १८ ॥ त्वरायां हेतुमाह—शिरसेति ॥ १९ ॥ कौसल्यामिति । अत्रापि द्रष्टुं त्वरते मे मन इति संबध्यते । पौरांश्च तनयैः सहेत्यत्र पौरैरेव तनयशब्दोन्वेति ॥२०॥ द्वित्रदिनान्यत्र स्थातव्यमित्यस्योत्तरमाह—कृतेति । निर्वर्तितचतुर्दशवर्षप्रव्राजनस्य कृतकार्यस्य मे इह लङ्कायां । वासः संमतः कथं स्वित् । न संमत इत्यर्थः । अन्यथा भरतस्याग्निप्रवेशादिति भावः ॥ २१ ॥ पूजितोसि विमानप्रदानेनेति शेषः । प्रदत्तत्वेन स्वत्वादुत्तरत्र कुबेराय प्रेषयिष्यति । मन्युः दैन्यं कोपो वा । "मन्युर्दैन्ये क्रतौ क्रुधि" इत्यमरः । त्वरितं उक्तप्रकारेण त्वरावन्तं मामिति संबन्धः । यद्वा त्वरितं यथा भवति तथा अनुमानये । अनुमतिं कारये ॥ २२ ॥ राघवस्य वचः श्रुत्वेत्यादिश्लोकचतुष्टयमेकं वाक्यं ॥ प्रतिनिवर्तत प्रतिन्यवर्तत । काञ्चनचित्राङ्गं काञ्चनमयचित्रावयवं । कूटागारैः मण्डपैः । परिक्षिप्तं व्याप्तं । रजतप्रभं । रजतशब्देनात्र विशदत्वमुच्यते । पताकाभिः केवलध्वजैः । ध्वजैः सचिह्नैः । हर्म्यैः अवान्तरराजगृहैः । हेमपद्मानि लम्बमानानि तैर्विभूषितं । प्रकीर्णं व्याप्तं । मुक्तामणिगवाक्षितं मुक्तामणिनिर्मितगवाक्षयुक्तं । घण्टाजालैः परिक्षिप्तं चतुर्षु पार्श्वेषु किङ्किणीजालयुक्तं । कोणेषु घण्टाजालयुक्तं । अतएव मधुरस्वनं ॥२३—२६ ॥ यन्मेर्वित्यादिश्लोकत्रयमेकान्वयं ॥ मुक्तारजतसन्निभैः तद्वन्निर्मलैरित्यर्थः । स्फाटिकचित्राङ्गैः स्फटिकमयचित्रावयवैः । महाधनैः महामूल्यैः ॥२७—३०॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्विंशत्युत्तरशततमः सर्गः ॥ १२४ ॥

स० आजुहाव मनोनुकूलगतिमत्त्वात्तस्य ॥ २३ ॥ इतिचतुर्विंशत्युत्तरशततमःसर्गः ॥ १२४ ॥

[पा०] १ ङ. ञ. ट. गुहंचसुहृदंचैवपौराञ्जानपदैःसह. २ ङ. ञ. ट. कर्तव्यःसखेलांचानुमानये. ख. च. छ. ज. कर्तव्यस्त्वरितंयानमानय. ३ ङ. ञ. ट. एवमुक्तस्तुरामेणराक्षसेन्द्रोविभीषणः । विमानंसूर्यसंकाशमाजुहावत्वरान्वितः. ४ ख. ङ. च. ञ. ज. ट. हैमपद्मविभूषितैः. ५ घंटाजालैरित्यर्धस्यस्थाने घ. पाठे घंटाजालैःपरिक्षिप्तंसर्वतःस्यन्दनोत्तमं । स्निग्धगंभीरनिर्घोषंसर्वतोमधुरस्वनं इत्येकःश्लोकोदृश्यते. ६ ख. ग. ङ.—ट. तंमेरु. ७ ङ. ञ. ट. बृहद्भिर्भूषितं. ८ ङ. ञ. ट. रजतशोभितैः. ९ अयंश्लोकः ङ. ञ. ट. पाठेषुदृश्यते.

पञ्चविंशत्युत्तरशततमः सर्गः ॥ १२५ ॥

विभीषणेनरामंप्रति स्वसमानीतपुष्पकप्रदर्शनपूर्वकं स्वकर्तव्यनिवेदनप्रार्थना ॥ १ ॥ रामेणतंप्रति वानरकृतोपकारस्मारणपूर्वकं वस्त्रालंकारादिभिस्तत्संमाननचोदना ॥ २ ॥ तथा विभीषणेनपूजितेषुसत्सुतेषु सीतालक्ष्मणाभ्यांसह पुष्पकारोहणेन सुग्रीवविभीषणादीनां स्वस्वावासेषुसुखावस्थानचोदनपूर्वकं स्वस्यायोध्यागमनाभ्यनुज्ञानयाचनम् ॥ ३ ॥ तथा सुग्रीवविभीषणादिभिः स्वेषामयोध्याऽऽगमनेन स्वाभिषेकावलोकनकुतूहलनिवेदने स्वाज्ञयापुष्पकारूढैस्तैस्सहायोध्यांप्रति प्रस्थानम् ॥ ४ ॥

उपस्थितं तु तं दृष्ट्वा पुष्पकं पुष्पभूषितम् ॥ [1]अविदूरस्थितो रामं प्रत्युवाच विभीषणः ॥ १ ॥
स तु [2]बद्धाञ्जलिः प्रह्वो विनीतो राक्षसेश्वरः ॥ अब्रवीच्चरयोपेतः किं करोमीति राघवम् ॥ २ ॥
तमब्रवीन्महातेजा लक्ष्मणस्योपशृण्वतः ॥ विमृश्य राघवो वाक्यमिदं स्नेहपुरस्कृतम् ॥ ३ ॥
कृतप्रयत्नकर्माणो [3]विभीषण वनौकसः ॥ रत्नैरर्थैश्च [4]विविधैर्भूषणैश्चापि पूजय ॥ ४ ॥
[5]सैन्यैरजिता लङ्का निर्जिता राक्षसेश्वर ॥ हृष्टैः प्राणभयं त्यक्त्वा संग्रामेष्वनिवर्तिभिः ॥ ५ ॥
त इमे [6]कृतकर्माणः पूज्यन्तां सर्ववानराः ॥ धनरत्नप्रदानेन कर्मैषां सफलं कुरु ॥ ६ ॥
एवं संमानिताश्चैते [7]मानार्हा मानद त्वया ॥ भविष्यन्ति कृतज्ञेन निर्वृता हरियूथपाः ॥ ७ ॥
त्यागिनं संग्रहीतारं सानुक्रोशं यशस्विनम् ॥ [8]सर्वे त्वामवगच्छन्ति ततः संबोधयाम्यहम् ॥ ८ ॥
हीनं रतिगुणैः सर्वैरभिहन्तारमाहवे ॥ [9]त्यजन्ति नृपतिं सैन्याः संविग्नास्तं नरेश्वरम् ॥ ९ ॥
एवमुक्तस्तु रामेण वानरांस्तान्विभीषणः ॥ रत्नार्थैः संविभागेन [10]सर्वानेवाभ्यपूजयत् ॥ १० ॥
ततस्तान्पूजितान्दृष्ट्वा रत्नैरर्थैश्च यूथपान् ॥ आरुरोह ततो रामस्तद्विमानमनुत्तमम् ॥ ११ ॥

अथ वानरसेनासंमाननं—उपस्थितमित्यादि ॥ तं दृष्ट्वा दर्शयित्वा । तत्कृत्वेति वा पाठः । प्रत्युवाच विमानमागतमितीति शेषः । स त्विति द्वितीयश्लोकसंग्रहो वायं श्लोकः ॥ १ ॥ त्वरयोपेतः आदरोपेत इत्यर्थः । किं करोमीति । इतःपरं किं करवाणीत्यर्थः ॥ २ ॥ लक्ष्मणस्योपशृण्वतः लक्ष्मणसंमतिपूर्वकमित्यर्थः ॥ ३ ॥ प्रयत्नकर्म प्रयत्नसाध्यं कर्मेत्यर्थः । अर्थैः प्रयोजनैः वस्त्रादिभिरित्यर्थः ॥ ४ ॥ अजिता पूर्वं सुरादिभिरप्यजिता । तव लङ्काराज्यप्राप्तिरेव तदधीनेत्यर्थः । हृष्टैः मयि प्रीतिमद्भिरित्यर्थः ॥ ५ ॥ त इम इत्यर्धोक्तं भङ्ग्यन्तरेणाह—धनरत्नेति ॥ ६ ॥ निर्वृताः सुखिताः । निर्वृत्ता इति पाठे निष्पन्नाः । परिपूर्णा इति यावत् ॥ ७ ॥ अर्थव्ययेन खेदो मा भूदित्याह—त्यागिनमिति ॥ संग्रहीतारं धनप्रदानेन मित्रसंग्रहकारिणमित्यर्थः । संग्रहार्थं त्यागित्वमुक्त्वा दयया त्यागित्वमाह—सानुक्रोशमिति । यशस्विनं त्यागकृतयशोवन्तं । संबोधयामि न तु चोदयामीत्यर्थः ॥ ८ ॥ सैनिकसंमानाकरणे दोषमाह—हीनमिति ॥ नृपतिं स्वामिनमपि । रतिगुणैः प्रीतिकरैरौदार्यादिगुणैः हीनं । अभिहन्तारं हिंसनशीलं । प्रसादं विना क्रोधैकनिरतमिति यावत् । तं नरेश्वरं सैन्याः संविग्नाः आहवे त्यजन्तीति योजना ॥ ९ ॥ संविभागेन यथार्हमंशकल्पनया । समतया प्रदाने अधिकानां कोपप्रसङ्गादिति भावः ॥ १० ॥ तत इत्यादिश्लोकद्वयमेकान्वयं ॥ ततः पूजानन्तरं ततः पूजादर्शनादेव हेतोरिति ततःशब्दद्वययोजना ।

ति० सर्ववानरपूजार्थंदिनद्वयंवासः । भारतेपि "ततस्तीरेसमुद्रस्ययत्रशिश्येसपार्थिवः । तत्रैवोवासधर्मात्मासहितस्तत्रवानरैः । अथैतान्वानरान्दृष्ट्वाससंमान्याभिपूज्यच । विसर्जयामासतदारत्नैःसंतोष्यसर्वथा । " इत्युक्तं ॥ १० ॥

[पा०] १ ङ. झ. ट. तत्कृत्वा. २ ग. ङ. झ. ट. अविदूरेस्थितो. ३ ङ. झ. बद्धाञ्जलिपुटोविनीतो. ४ ङ. झ. ट. कर्माणःसर्वएववनौकसः. ५ ङ. झ. ट. विविधैःसंपूज्यन्तांविभीषण. ६ ङ. झ. ट. सहामीभिस्त्वयालङ्का. ७ ङ. झ. कर्माणः सवनौकसः. ख. च. ञ. ट. कर्माणःपूज्यन्तांसाधुवानराः. ८ ङ. च. झ. ञ. ट. नन्द्यमानायथात्वया. ९ ङ. झ. जितेन्द्रियं. १० क. घ. यतस्त्वां. ११ ङ. झ. ट. सेनात्यजतिसंविग्नानृपतिंतंनरेश्वर.

अङ्केनादाय वैदेहीं लज्जमानां यशस्विनीम् ॥ लक्ष्मणेन सह भ्रात्रा विक्रान्तेन धनुष्मता ॥ १२ ॥
अब्रवीच्च विमानस्थः पूजयन्सर्ववानरान् ॥ सुग्रीवं च महावीर्यं काकुत्स्थः सविभीषणम् ॥ १३ ॥
मित्रकार्यं कृतमिदं भवद्भिर्वानरोत्तमाः ॥ अनुज्ञाता मया सर्वे यथेष्टं प्रतिगच्छत ॥ १४ ॥
यत्तु कार्यं वयस्येन सुहृदा वा परन्तप ॥ कृतं सुग्रीव तत्सर्वं भवताऽधर्मभीरुणा ॥
किष्किन्धां प्रतियाह्याशु स्वसैन्येनाभिसंवृतः ॥ १५ ॥
स्वराज्ये वस लङ्कायां मया दत्ते विभीषण ॥ न त्वां धर्षयितुं शक्ताः सेन्द्रा अपि दिवौकसः ॥१६॥
अयोध्यां प्रतियास्यामि राजधानीं पितुर्मम ॥ अभ्यनुज्ञातुमिच्छामि सर्वांश्चामन्त्रयामि वः ॥१७॥
एवमुक्तास्तु रामेण वानरास्ते महाबलाः ॥ ऊचुः प्राञ्जलयो रामं राक्षसश्च विभीषणः ॥ १८ ॥
अयोध्यां गन्तुमिच्छामः सर्वान्नयतु नो भवान् ॥ उद्युक्ता विचरिष्यामो वनानि नगराणि च ॥१९॥
दृष्ट्वा त्वामभिषेकार्द्रं कौसल्यामभिवाद्य च ॥ अचिरेणागमिष्यामः स्वान्गृहान्नृपतेः सुत ॥ २० ॥
एवमुक्तस्तु धर्मात्मा वानरैः सविभीषणैः ॥ अब्रवीद्राघवः श्रीमान्ससुग्रीवविभीषणान् ॥ २१ ॥
प्रियात्प्रियतरं लब्धं यदहं ससुहृज्जनः ॥ सर्वैर्भवद्भिः सहितः प्रीतिं लप्स्ये पुरीं गतः ॥ २२ ॥
क्षिप्रमारोह सुग्रीव विमानं वानरैः सह ॥ त्वमध्यारोह सामात्यो राक्षसेन्द्र विभीषण ॥ २३ ॥
ततस्तत्पुष्पकं दिव्यं सुग्रीवः सह सेनया ॥ अध्यारोहत्त्वरञ्शीघ्रं सामात्यश्च विभीषणः ॥ २४ ॥
तेष्वारूढेषु सर्वेषु कौबेरं परमासनम् ॥ राघवेणाभ्यनुज्ञातमुत्पपात विहायसम् ॥ २५ ॥
ययौ तेन विमानेन हंसयुक्तेन भास्वता ॥ प्रहृष्टश्च प्रतीतश्च बभौ रामः कुबेरवत् ॥ २६ ॥
ते सर्वे वानरा हृष्टा राक्षसाश्च महाबलाः ॥ यथासुखमसंबाधं दिव्ये तस्मिन्नुपाविशन् ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चविंशत्युत्तरशततमः सर्गः ॥ १२५ ॥

लज्जमानां सदस्यङ्कारोहणाय लज्जन्तीं । रामेणाङ्कारोपणं च स्त्रीसहायरहितत्वात् । धनुष्मता रामधनुर्धारिणा ॥ ११—१३ ॥ अब्रवीच्चेत्यत्र संग्रहेणोक्तं विवृणोति–मित्रेत्यादिना ॥ वानरान्प्रत्याह–मित्रेति ॥ १४ ॥ सुग्रीवं प्रत्याह–यत्त्वित्यादिना ॥ सुहृदा शोभनहृदयेन । वाशब्द एवकारार्थः । अधर्मभीरुणेति च्छेदः ॥ १५ ॥ विभीषणं प्रत्याह–स्वेति ॥ स्वराज्ये वस । न तु परकीयं रावणवदाक्रमितव्यं । अतो जनस्थानरक्षिणः समानेतव्या इति भावः ॥ १६—१८ ॥ उद्युक्ताः सावधानाः । जनपदपीडामकुर्वन्त इत्यर्थः ॥ १९—२१ ॥ प्रियात्प्रियतरमिति ॥ सीतालाभः प्रियं । भरतदर्शनं प्रियात्प्रियं । भवद्भिः सह पुरप्रवेशः प्रियात्प्रियतरमित्यर्थः ॥ २२—२३ ॥ शीघ्रं शीघ्रगमिति विमानविशेषणं । त्वरन्निति सुग्रीवविशेषणात् ॥ २४ ॥ आसनं वाहनं ॥ २५ ॥ हंसयुक्तेन प्रतिमारूपहंसयुक्तेन । प्रतीतः श्लाघितः ॥ २६ ॥ यथासुखमसंबाधमिति पदद्वयेन दिव्यस्य पुष्पकस्य अपेक्षितावकाशप्रदत्वं गम्यते

स० अधर्मभीरुणा कृतप्रतिकरणाभावप्रत्यवायरूपाधर्मभीरुणा ॥ १५ ॥ ति० मुद्युक्ताः हर्षयुक्ताः ॥ १९ ॥ स० खगतेन आकाशगतेन । हंसयुक्तेन वाहकत्वेननिर्मितहंसप्रतिमायुक्तेन । सुन्दरकाण्डेराक्षसपिशाचादीनांतद्वाहकत्वोक्तिस्तुलीलयारावणनियुक्तराक्षसादीनपेक्ष्य । वस्तुतस्तु तद्विमानदेवस्यैवतादृशशक्तिमत्त्वेनस्वेच्छयैवान्यनिरपेक्षेणगतिरितिज्ञेयं ॥ प्रतीतः प्रसिद्धः ॥ २६ ॥ इतिपञ्चविंशत्युत्तरशततमःसर्गः ॥ १२५ ॥

[पा०] १ ङ. ञ. ट. मनस्विनीं. २ ङ. ञ. ट. स्निग्धेनचहितेनच. ३ ख. सेन्द्रास्सर्वेमरुद्गणाः. ४ ङ. ञ. ट. प्राञ्जलयस्सर्वे. ख. च. ञ. प्राञ्जलयोभूत्वा. ५ क. ङ. छ. ञ. ञ. ट. मुद्युक्ताः. ६ ङ. ञ. ञ. ट. अचिरादागमिष्यामः. ७ ङ. ञ. ट. अब्रवीद्वानरान्रामस्ससुग्रीव. ८ ङ. ञ. ट. ततस्सपुष्पकं. ९ ङ. ञ. ट. सहवानरैः. १० ङ. ञ. ट. आरुरोहमुदायुक्तः. ख. च. छ. ञ. आरुरोहततःश्रीमान्. ११ ङ. ञ. ट. खगतेनविमानेन. १२ ख. ङ. च. छ. ञ. ञ. ट. वानरक्षोश्च.

षड्विंशत्युत्तरशततमः सर्गः ॥ १२६ ॥

पुष्पकस्थेनरामेण सीतांप्रति लंकाकिष्किन्धयोर्मध्येविद्यमानयुद्धभूमिसेतुप्रभृतीनां प्रदर्शनम् ॥ १ ॥ किष्किन्धांदृष्टवत्यासीतया ताराप्रभृतिवानरनारीणांसहानयनंप्रार्थितेनरामेण सुग्रीवेणतासामानयनम् ॥ २ ॥ तथा पुनःसीतांप्रति किष्किन्धायोध्ययोर्मध्यस्थपंपादिप्रदर्शनपूर्वकमयोध्याप्रदर्शनम् ॥ ३ ॥ सीतयासुग्रीवादिभिश्च सहर्षकौतुकमयोध्यादर्शनम् ॥४॥

अनुज्ञातं तु रामेण तद्विमानमनुत्तमम् ॥ उत्पपात महामेघः श्वसनेनोद्धतो यथा ॥ १ ॥
पातयित्वा ततश्चक्षुः सर्वतो रघुनन्दनः ॥ अब्रवीन्मैथिलीं सीतां रामः शशिनिभाननाम् ॥ २ ॥
कैलासशिखराकारे त्रिकूटशिखरे स्थिताम् ॥ लङ्कामीक्षस्व वैदेहि निर्मितां विश्वकर्मणा ॥ ३ ॥
एतदायोधनं पश्य मांसशोणितकर्दमम् ॥ हरीणां राक्षसानां च सीते विशसनं महत् ॥ ४ ॥
अत्र दत्तवरः शेते प्रमाथी राक्षसेश्वरः ॥ तव हेतोर्विशालाक्षि रावणो निहतो मया ॥ ५ ॥
कुम्भकर्णोत्र निहतः प्रहस्तश्च निशाचरः ॥ धूम्राक्षश्चात्र निहतो वानरेण हनूमता ॥ ६ ॥
विद्युन्माली हतश्चात्र सुषेणेन महात्मना ॥ ७ ॥
लक्ष्मणेनेन्द्रजिच्चात्र रावणिर्निहतो रणे ॥ अङ्गदेनात्र निहतो विकटो नाम राक्षसः ॥ ८ ॥
विरूपाक्षश्च दुर्धर्षो महापार्श्वमहोदरौ ॥ अकम्पनश्च निहतो बलिनोऽन्ये च राक्षसाः ॥ ९ ॥
[त्रिशिराश्चातिकायश्च देवान्तकनरान्तकौ ॥ युद्धोन्मत्तश्च मत्तश्च राक्षसप्रवरावुभौ ॥ १० ॥
निकुंभश्चैव कुंभश्च कुंभकर्णात्मजो बली ॥ वज्रदंष्ट्रश्च दंष्ट्रश्च बहवो राक्षसा हताः ॥ ११ ॥
मकराक्षश्च दुर्धर्षो मया युधि निपातितः ॥ अकंपनश्च निहतः शोणिताक्षश्च वीर्यवान् ॥ १२ ॥
यूपाक्षश्च प्रजंघश्च निहतौ तु महाहवे ॥ विद्युज्जिह्वोत्र निहतो राक्षसो भीमदर्शनः ॥ १३ ॥
यज्ञशत्रुश्च निहतः सुप्तघ्नश्च महाबलः ॥ सूर्यशत्रुश्च निहतो ब्रह्मशत्रुस्तथाऽपरः ॥ १४ ॥]
अत्र मण्डोदरी नाम भार्या तं पर्यदेवयत् ॥ सपत्नीनां सहस्रेण सांस्रेण परिवारिता ॥ १५ ॥
एतत्तु दृश्यते तीर्थं समुद्रस्य वरानने ॥ यत्र सागरमुत्तीर्य तां रात्रिमुषिता वयम् ॥ १६ ॥
एष सेतुर्मया बद्धः सागरे सलिलार्णवे ॥ तव हेतोर्विशालाक्षि नलसेतुः सुदुष्करः ॥ १७ ॥

॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चविंशत्युत्तरशततमः सर्गः ॥ १२५ ॥

अथ विलासेन सीतायै तत्तद्देशप्रदर्शनं–अनुज्ञातं त्वित्यादि ॥ १ ॥ मैथिलीं राजपुत्रीत्वेन लालनीयत्वोक्तिः ॥ २—३ ॥ आयोधनं युद्धभूमिं । विशस्यन्तेस्मिन्निति विशसनं । अधिकरणे ल्युट् ॥ ४ ॥ दत्तवरः ब्रह्मणा दत्तवरः । प्रमाथी हिंसकः शेते । भस्मस्वरूपेणेत्यर्थः ॥ ५ ॥ प्रहस्तश्चेत्यत्र नीलेनेत्यध्याहार्यं ॥ ६ ॥ विद्युन्मालीति । पूर्वमनुक्तमप्यत्रानुवादाद्राह्यं । एवं विकट इत्यत्रापि ॥ ७—१५ ॥ तीर्थं उत्तरणस्थानं । यत्र तीर्थे तां रात्रिं सागरतरणरात्रिं ॥ १६ ॥ सागरे सगरखानिते । सलिलेति क्षीरोदादिव्यावृत्तिः । एष सेतुः नलसेतुः नलबद्धः । " षिञ् बन्धने " इति धातुः । एतेन नलसेतुः सेतुरित्युक्त्या पूर्वकल्पकृतसेत्वन्तरं व्यावर्त्यते इति प्रत्युक्तं । पूर्वमेव

ति० एषइतितद्दाहभूमिप्रदर्शनं । अग्रेपिसर्वत्रतत्तद्युद्धभूमिप्रदर्शनमेव । अत्युच्चस्थलाद्विमानस्यसर्वयुद्धभूमिप्रत्यक्षंयुगपत् ॥ स० एषइति प्रत्यक्षसिद्धलङ्कापतित्वेनप्रस्तुतः । अत्रशेते अशयत ॥ ५ ॥ रामानु० "अङ्गदेनात्रनिहतोविकटोनामराक्षसः"

[पा०] १ ख. ङ.—ट. हंसयुक्तंमहानादमुत्पपातविहायसं. २ क. ग.—ट. एषदत्तवरः. ३ ख.—ट. दुष्प्रेक्षो. ४ त्रिशिराश्चातिकायश्चेत्यादयः. ब्रह्मशत्रुस्तथापरइत्यन्ताःश्लोकाः क. ख. ङ.—ट. पाठेपुदृश्यन्ते. ५ ख, ङ. ज.—ट. साग्रेण. ६ ख. ङ.—ट. लवणार्णवे.

पश्य सागरमक्षोभ्यं वैदेहि वरुणालयम् ॥ अपारमभिगर्जन्तं शङ्खशुक्तिनिषेवितम् ॥ १८ ॥
हिरण्यनाभं शैलेन्द्रं काञ्चनं पश्य मैथिलि ॥ विश्रमार्थं हनुमतो भित्त्वा सागरमुत्थितम् ॥ १९ ॥
एतत्कुक्षौ समुद्रस्य स्कन्धावारनिवेशनम् ॥ २० ॥
एतत्तु दृश्यते तीर्थं सागरस्य महात्मनः ॥ सेतुबन्ध इति ख्यातं त्रैलोक्येनाभिपूजितम् ॥
एतत्पवित्रं परमं महापातकनाशनम् ॥ २१ ॥
अत्र पूर्वं महादेवः प्रसादमकरोत्प्रभुः ॥ २२ ॥

सेतुसत्त्वे पुनः सेतुकरणवैयर्थ्यात् ॥ १७ ॥ अपारं मध्ये द्वीपभूतपाररहितं ॥ १८ ॥ हिरण्यनाभं मैनाकं ॥ १९ ॥ एतदित्यर्धं ॥ कुक्षौ मध्ये । सेतूपरीति शेषः । स्कन्धावारनिवेशनं स्कन्धावारनिवेशनरूपस्थानं । स्कन्धावारः शिबिरं ॥ २० ॥ एतत्त्वित्यादिसार्धश्लोकमेकं वाक्यं ॥ पूजितं पूजितुमर्हं । पूर्वं सेतोर्दक्षिणकोटिरुक्ता । अत्रोत्तरकोटिरिति ज्ञेयं । अनुगृह्णाति—एतदिति । पवित्रं पावनं । महापातकनाशनं च । भविष्यतीति शेषः ॥ २१ ॥ एवं लङ्कामारभ्य सेतुबन्धपर्यन्तमुक्त्वा तत उत्तरे दर्भशयनस्थानं निर्दिशति—अत्र पूर्वमिति ॥ महादेव इति समुद्रराज उच्यते औचित्यात् । प्रभुः समुद्रजलाधिष्ठाता । प्रसादमकरोत् सागरं शोषयिष्यामीति कुपितस्य मे प्रसादं प्रसन्नत्वं । अकरोत् । " प्रसादस्तु प्रसन्नता " इत्यमरः । न त्वत्र रुद्रो महादेवः । तेन पूर्वं प्रसादकरणानुक्तेः । पूर्वोक्तानामेव ह्यत्रानुवादः कृतः । न चाङ्गदेन विकटनिरसनस्य पूर्वमनुक्तत्वेपि यथानुवादात्तत्सिद्धिः तथात्रापि भविष्यतीति वाच्यं तद्वदत्राविरोधाभावात् । उपलभ्यते हि विरोधः । तथाहि । तत्र प्रसादः किं सेतुनिर्माणकाले वा पुनरागमनकाले वा । नाद्यः । प्रसादकरणहेतुरावणवधादेरभावात् पूर्वसिद्धसमुद्रप्रसादेनैवोपपत्तेश्च महादेवसमाख्यायाः समुद्रप्रसादश्रुत्या बाधितुं युक्तत्वाच्च । न द्वितीयः । पूर्वशब्दविरोधात् । नच पूर्वमित्यस्य पूर्वकल्प इत्यर्थ इति वाच्यं । " आत्मानं मानुषं मन्ये " इति वदता सुग्रीवादिसन्निधौ स्वस्य विष्ण्ववतारत्वद्योतकपूर्ववृत्तोद्घाटनानौचित्यात् । पूर्वकल्पकृतसेतुसद्भावे पुनस्तन्निर्माणवैयर्थ्यात् । किंच अत्रेतिपदस्य पूर्वश्लोकोक्तनलकारितसेतुपरामर्शित्वमेवोचितं । नतु पूर्वकल्पकृतसेतुपरामर्शित्वं । तस्य सद्भावेप्यन्तरितत्वसंभवात् । ननु पुराणान्तरानुसारात्तदर्थपरत्वं युक्तं । तथाहि कूर्मपुराणे—" सेतुमध्ये महादेवमीशानं कृत्तिवाससम् । स्थापयामास वै लिङ्गं पूजयामास राघवः ॥ तस्य देवो महादेवः

इत्यनुक्तस्यविकटस्यात्रनिहतत्वानुवादान्येप्येतादृशाबहवोनिहताइत्यवगम्यते ॥ ८ ॥ स० मैनाकस्यैवहिरण्यनाभइतिनामान्तरमितिप्राग्व्याख्यातं । काञ्चनं तद्वर्णं तत्प्रचुरंवा । पूर्वसागरंभित्त्वाहनुमतोविश्रमार्थमुत्थितं इदानीमस्मद्दर्शनार्थमुत्थितमित्यर्थः । तेनहनुमद्दर्शनानन्तरंपुनःसागरप्रवेशोक्तिरुपपन्ना । हिरण्यनाभोत्थितिस्थलप्रदर्शनंवा ॥ १९ ॥ स० अत्र तीरे । पूर्वं सेतुबन्धप्रारंभसमये । महादेवः पूजितःसन् प्रसादं निर्विघ्नंसेतुसमाप्तिशत्रुवधाद्युपयोग्यनुग्रहं अकरोत् । तत्स्थलंसीतायैप्रदर्श्यविमानादवतीर्यतत्रलिङ्गस्थापनंरामश्चकार । क्षेत्रस्यत्रैनेत्रत्वात्प्राक्तत्प्रार्थनायुक्ता । अतःपूर्वमित्युक्तिरनुग्रहमात्रविषयिणी । नतुप्रतिष्ठापनपरेतिमन्तव्यं ॥ यथोक्तमामेयपुराणेएकोत्तराशीत्यध्याये— "धन्योस्मिकृतकृत्योस्मिपूज्योस्मिपुरुषोत्तम । यदद्राक्षं सुदुर्दर्शंत्वद्रूपंयोगिपुङ्गवैः । त्वदाज्ञयामयापूर्वंत्वद्भक्तिविमुखंहरे । शैवंपाशुपतंलैङ्गमसच्छास्त्रंप्रवर्तितम् । तदिदानींमहापापंदिव्यरूपस्यदर्शनात् । सर्वंविनष्टमेवेशतवरामप्रसादतः । तरेयमेवत्वन्मायांत्वन्नामस्मरणादहम् । तथाअनुगृह्णात्वंयथास्यात्संततं स्मृतिः । रामः । रावणोऽयंमहापापीगोब्राह्मणवधेरतः । निर्लज्जैवैपरदारार्थीवैदिकाचारदूषकः । एतद्ग्रामात्सकृत्पार्श्वेयदघंप्रतिपद्यते । तदघंसर्वतीर्थेषुस्नानेनापिननश्यति । अब्रह्मण्यस्यलुब्धस्यमूर्खस्याशास्त्रवेदिनः । भूमिराक्रम्यतेयेनसोपिस्यात्तादृशःक्षणात् । त्यजेद्देशंकृतयुगेत्रेतायांगृहमेवच । द्वापरेकुलमेकंतुकर्तारंतुकलौयुगे । एतद्देशविशुद्ध्यर्थमत्रसंनिहितःसदा । मयात्रस्थापितेलिङ्गेभुक्तिमुक्तिप्रदोभव । श्रीकृष्णः । इतिरामस्यतद्वाक्यंश्रुत्वातत्वार्थसंयुतं । कृताञ्जलिर्दाशरथिंप्रहसन्परमेश्वरः । श्रीमहादेवः । सर्वभूतसर्वभूतस्थःसर्वात्मासर्ववत्सलः । त्वमेवरामविश्वात्मन्विडंबयसिलीलया । त्वद्वाक्यमेवधार्यमेतथाप्यार्यमहाविभो । यदुक्तं तत्तथैवास्तुत्वन्नाम्नास्थापयेहमाम् । इत्युक्त्वातंपरिक्रम्यप्रणम्याथययौहरः । सखेपश्यन्तियेलिङ्गंरामनाथइतिश्रुतम् । ततःसंसारिणोनरयुःसत्यंसत्यंवदाम्यहम् । सेतुबन्धस्थितंलिङ्गंयेसेवन्तेसकृत्कलौ । महापातकलक्षाद्वामुच्यतेनात्रसंशयः । कुरुक्षेत्रेयजेद्यः

[पा०] १ ख. ङ. छ. झ. ञ. ट. शुक्तिसमाकुलं. २ क. घ. दयार्थयोहनुमतोहित्वासागरमुत्थितः.

अत्र राक्षसराजोऽयमाजगाम विभीषणः ॥ २३ ॥

पार्वत्या सह शङ्करः । प्रत्यक्षमेव भगवान्दत्तवान्वरमुत्तमम् ॥ ये त्वया स्थापितं लिङ्गं द्रक्ष्यन्तीह द्विजातयः । महापातकसंयुक्तास्तेषां पापं विनश्यति ॥ अन्यानि चैव पापानि तीरे तत्र महोदधेः । दर्शनादेव लिङ्गस्य नाशं यान्ति न संशयः ॥ यावत्स्थास्यन्ति तरवो यावदेव च मेदिनी । यावत्सेतुश्च तावच्च स्थास्याम्यत्र तिरोहितः ॥ स्नानं दानं जपः श्राद्धं भविष्यत्यक्षयं ततः । स्मरणादेव लिङ्गस्य दिनपापं प्रणश्यति ॥ इत्युक्त्वा भगवान्वाचं परिष्वज्य च राघवम् । सनन्दी सगणो रुद्रस्तत्रैवान्तरधीयत " इति ॥ पाद्मे पुराणेपि–रामः पुष्पकादवरुह्य महादेवं प्रतिष्ठापितवान् सोस्मै प्रसन्नोभूदित्युच्यते । एतादृशपुराणवचनानुसारेणायं श्लोकोलिङ्गप्रतिष्ठां बोधयतीति । मैवं । उक्तदोषानिस्तारात्, इतिहासो हि परिग्रहातिशयात्, ग्रन्थसौष्ठवाच्च, इतिहासपुराणं पञ्चममित्यादावधिकाक्षरत्वेपि पूर्वप्रयोगेणाभ्यर्हितत्वाच्च पुराणेभ्यो गरीयानिति ' वेदः प्राचेतसादासीत् ' इति वेदमयत्वोक्त्या चतुर्मुखवरप्रदानमूलतया च प्रबलतरः । तद्विरोधे तामसपुराणवचनानि न प्रमाणानि । किंच पुराणं सर्गप्रतिसर्गादिष्वन्यपरमिति नेतिहासवत्पुरावृत्तकथने तात्पर्यवत् । अथवा, अस्मिन्सर्गे श्लोकाः प्रायशो व्यत्यस्ता दृश्यन्ते इत्युडारिप्रभृतिभिरुक्तं । तथा चेदमर्धं अत्र मण्डोदरीति श्लोकानन्तरं पठितव्यं । तत्र च महादेवप्रसादः स्वपितृदर्शनमेव । अतएव भरतं प्रति हनुमत्प्रेषणावसरे वक्ष्यति—' महादेवप्रसादाच्च पित्रा मम समागमम् ' इति । पुराणान्तरं तु माहात्म्यप्रतिपादनपरं बोध्यमिति संक्षेपः ॥ २२ ॥ अत्र राक्षसराज इति ॥

ज्ञानश्चमेधादिकाञ्छतम् । यत्फलंलभतेसद्यःसेतुलिङ्गस्यदर्शनात् । अभक्ष्याश्यसमिद्भर्णीयोनग्निरमखोगृही । योवनीचरिरंसुः स्याद्यतिर्योभैक्षभुग्भवेत् । एतेसर्वेचपापिष्ठादंभात्स्वाश्रमदूषकाः । दृष्ट्वारामेश्वरंलिङ्गंसद्यःपूताभवन्तिहि । कावेर्यांतुतुलास्नानंयःकुर्याद्रङ्गसंनिधौ । भवेत्तस्यकृतार्थस्यरामेश्वरनिरीक्षणम् ।" इत्यादि । कूर्मपुराणेचैकोनविंशेऽध्याये—"सेतुमध्येमहादेवमीशानंकृत्तिवाससम् । स्थापयामासलिङ्गस्थंपूजयामासराघवः । तस्यदेवोमहादेवःपार्वत्यासहशङ्करः । प्रत्यक्षमेवभगवान्दत्तवान्वरमुत्तमम् । येत्वयास्थापितंलिङ्गंद्रक्ष्यन्तीहद्विजातयः । महापातकसंयुक्तास्तेषांपापंविनश्यतु । अन्यानिचैवपापानिस्नातस्यात्रमहोदधौ । दर्शनादेवलिङ्गस्यनाशंयान्तिनसंशयः । यावत्स्थास्यन्तिगिरयोयावदेवचमेदिनी । यावत्सेतुश्चतावच्चस्थास्याम्यप्यतिरोहितः । स्नानंदानंतपःश्राद्धंभविष्यत्यक्षयंमहत् । स्मरणादेवलिङ्गस्यदिनपापंप्रणश्यति । इत्युक्त्वाभगवान्साक्षात्परिष्वज्यचराघवम् । सनन्दी सगणोरुद्रस्तत्रैवान्तरधीयत ।" इति । स्कान्देसेतुमाहात्म्येत्रिंचत्वारिंशेऽध्याये—'रावणस्यसदाविप्रायत्पापंमथिविद्यते । तस्यमेनिष्कृतिंब्रूतरावणस्यवधस्यच । यत्कृत्वातेनपापेनमुच्येयंमुनिपुङ्गवाः । मुनयऊचुः । सत्यव्रतजगन्नाथजगद्रक्षाधुरंधर । सर्वलोकोपकारार्थंकुरुरामशिवार्चनम् । गन्धमादनशृङ्गेस्मिन्महापुण्येविमुक्तिदे । शिवलिङ्गंप्रतिष्ठाप्यलोकसंग्रहकाम्यया । कुरुरामदशग्रीववधदोषापनुत्तये । लिङ्गस्थापनजंपुण्यंचतुर्वक्त्रोपिभाषितुं । नशक्नोतिसतैर्वक्तुंकिंपुनर्मनुजेश्वराः। इत्यारभ्य मध्येहनुमत्प्रेषणादिप्रकारमुक्त्वा सुमुहूर्तेकिंचिदवकाशमासादयतिहनुमतिचिरायतिच "रामराममहाबाहोकालोयातिहिसांप्रतम् । जानक्यायत्कृतंलिङ्गंसैकर्तलीलयाविभो । तल्लिङ्गंस्थापयस्वाद्यमहालिङ्गमनुत्तमम् । इत्येवंसहितोरामःसीतयासहसत्वरम् । मुनिभिःसहितःप्रीत्याकृतकौतुकमङ्गलः । ज्येष्ठमासेसितेपक्षेसप्तम्यांबुधहस्तयोः । होरान्तेचव्यतीपातेकन्याचन्द्रेवृषेरवौ । दशयोगेमहापुण्येगन्धमादनपर्वते । सेतुमध्येमहादेवंलिङ्गरूपधरंहरम् । ईशानंकृत्तिवसनंगङ्गाचन्द्रकलाधरम् । रामोवैस्थापयामासशिवलिङ्गमनुत्तमम् । लिङ्गस्थंपूजयामासराघवस्तंसईश्वरम् । लिङ्गस्थःसमहादेवःपार्वत्यासहशंकरः । प्रत्यक्षमेवभगवान्दत्तवान्वरमुत्तमम् । सर्वलोकशरण्यायराघवायमहात्मने । त्वयात्रस्थापितंलिङ्गंयेपश्यन्तिरघूद्वह । महापातकयुक्ताश्चतेषांपापंप्रणश्यति । सर्वाण्यपिहिपापानिधनुष्कोटौनिमज्जनात् । दर्शनाद्रामलिङ्गस्यपातकानिमहान्त्यपि । विलयंयान्तिराजेन्द्ररामचन्द्रनसंशयः । प्रादादेवंहिरामायवरंपूर्णायशङ्करः ।" इत्यादि । नागोजिभट्टस्तु पूर्वभागमनसमयएवाहभूतपतिप्रतिष्ठापनं । 'अत्र सेतुमूले । पूर्वं सेतुबन्धनात्पूर्वंविभुर्महादेवःमम रामस्यप्रसादमकरोत् मत्स्थापितलेनात्रस्थितोभूत् । सेतोर्निर्विघ्नतासिद्ध्यैसमुद्रप्रसादानन्तरंशिवस्थापनं रामेणकृतमितिगम्यते । अत्रस्थलेमहात्मनःसागरस्यतीर्थंसेतुनिर्माणमूलप्रदेशत्वात्सेतुबन्धइतिख्यातं भविष्यतीतिशेषः । ' इति । इदंतुपुरुपुराणानवलोकनमूलमित्युपेक्ष्यं । तीर्थंतु—'महदितिजलं । तद्रूपीदेवोमहादेवःसमुद्रः । तदाह्वैजयन्ती 'गंभीरं गहनंरत्नंगह्वरंशरणंवपुः । ह्रेहः स्नेह्यंमहच्छुद्धंवरुणंसर्वतोमुखम् । पातालंस्वादुदिव्यंचतानिपञ्चादशाप्सुच'इति । यद्वामहादेवमूर्तिष्वन्यतमत्वात्समुद्रस्य महादेवशब्देनात्रसमुद्रएवोच्यते । पूर्वं सेतुबन्धात्पूर्वं । प्रसादमकरोत् जलोपरिसेतुधारणरूपमकरोत् । यद्वा प्रसादं स्वसंनिधानरूपं । 'दर्शयामासचात्मानंसमुद्रःसरितांपतिः ।' इत्युक्तत्वात् महादेवःसमुद्रएवेतिव्याचख्यौ । सोपितद्वन्माननीयः । केचित्तुअत्रपुरु

एषा सा दृश्यते सीते किष्किन्धा चित्रकानना ॥ सुग्रीवस्य पुरी रम्या यत्र वाली मया हतः ॥२४॥
अथ दृष्ट्वा पुरीं सीता किष्किन्धां वालिपालिताम् ॥ अब्रवीत्प्रश्रितं वाक्यं रामं प्रणयसाध्वसा ॥२५॥
सुग्रीवप्रियभार्याभिस्ताराप्रमुखतो नृप ॥ अन्येषां वानरेन्द्राणां स्त्रीभिः परिवृता ह्यहम् ॥
गन्तुमिच्छे सहायोध्यां राजधानीं त्वयाऽनघ ॥ २६ ॥
एवमुक्तोथ वैदेह्या राघवः प्रत्युवाच ताम् ॥ एवमस्त्विति किष्किन्धां प्राप्य संस्थाप्य राघवः ॥
विमानं प्रेक्ष्य सुग्रीवं वाक्यमेतदुवाच ह ॥ २७ ॥
ब्रूहि वानरशार्दूल सर्वान्वानरपुङ्गवान् ॥ स्वदारसहिताः सर्वे ह्ययोध्यां यान्तु सीतया ॥ २८ ॥
तथा त्वमपि सर्वाभिः स्त्रीभिः सह महाबल ॥ अभित्वरस्व सुग्रीव गच्छामः प्लवगेश्वर ॥ २९ ॥
एवमुक्तस्तु सुग्रीवो रामेणामिततेजसा ॥ वानराधिपतिः श्रीमांस्तैश्च सर्वैः समावृतः ॥ ३० ॥
प्रविश्यान्तःपुरं शीघ्रं तारामुद्वीक्ष्य भाषत ॥ ३१ ॥

अत्र समुद्रराजप्रसादप्रदेशादुत्तरतः ॥ २३ ॥ पम्पावनमधुवनाद्यपेक्षया चित्रकाननेत्युक्तिः ॥ २४ ॥ प्रणयसाध्वसा प्रणययुक्तसाध्वसवती । प्रणतसाध्वसेति पाठे उपनतसाध्वसा । सुग्रीवादिसन्निधानात्प्रणयसाध्वसेति प्रथमभाषणरूपत्वाद्वा ॥ २५ ॥ सुग्रीवेत्यादिसार्धश्लोक एकान्वयः ॥ अहं ताराप्रमुखतः ताराप्रमुखाभिः सुग्रीवप्रियभार्याभिः सह अन्येषां वानरेन्द्राणां स्त्रीभिश्च परिवृता सती त्वया सह अयोध्यां गन्तुं इच्छे इच्छामीति संबन्धः । आत्मनेपदमार्षम् ॥ २६ ॥ एवमित्यादिसार्धश्लोक एकान्वयः ॥ एवमस्त्विति सीतां प्रत्युवाच । अथ किष्किन्धां प्राप्य विमानं संस्थाप्य सुग्रीवं प्रेक्ष्योवाचेति संबन्धः ॥२७॥ यान्त्वित्यत्र इतिकरणं द्रष्टव्यं । सीतया निमित्तभूतया । सीताप्रियार्थमित्यर्थः ॥ २८ ॥ तथा त्वमपीति अत्र याहीति विपरिणामेन संबन्धः । अभित्वरस्व । किष्किन्धायां विलम्बो न कार्य इत्यर्थः ॥ २९ ॥ सर्वैः समावृतो वानराधिपतिरुक्त इत्यन्वयः ॥ ३० ॥ प्रविश्येति ॥ अर्धमेकं वाक्यं । प्रवेशः सुग्रीवस्यैव

भ्रपुभिर्नेत्रपुसदक्षुवर्णं । तद्वर्णौऊरूयस्याःसातथातत्संबुद्धिःहेसीते । अम्महादेवोवरुणइतिव्याचक्षाणानोदाहृतवैजयन्त्यवलोका इवाम्महादेवइत्येकपदोपरिपरिदर्शितसाहसाउदाहृतबहुपुराणश्रवणविकलादुराग्रहग्रहगृहीतास्ततोप्यवमवरुणकरुणपात्रतांसोद्वापिरामस्यसदाशिवप्रसादंस्वरसतःपयपद्यायातमवधूयविधुशेखरमवमन्यन्त इत्युपेक्ष्याः । 'यच्छौचनिस्सृतसरित्प्रवरोदकेनतीर्थेनमूर्ध्न्यधिधृतेनशिवःशिवोभूत् । सेशंपुनाज्जगदिदंयदहंणांभःसद्यःपुनातिसहचन्द्रललामलोकान्'इत्यादिभागवतादुदाहृतपुराणेषुच 'लोकसंग्रहकाम्यया'इत्याद्युक्तेश्चलीलेयंराघवस्येतिसर्वंचतुरश्रं । शि० अत्र अस्मिन्सेतुमूलभूतदेशे । महादेवः महाशंभुः। प्रसादं अतिप्रीतिं अकरोत् । एतेन नीलादिवन्महादेवोपिसेतुबन्धनसाहाय्यंकृतवानितिसूचितं । तेनशिवस्यरामेऽतिप्रीतिःसूचिता । अतएवस्वसाहाय्यसूचनार्थमिदानीमपितत्रतस्यस्थितिःप्रसिद्धा । यद्वा अत्र अस्मिन्देशे । महादेवः प्रसादं प्रकर्षेणसादंप्राप्तिं स्वनिस्वस्थितिमित्यर्थः । अकरोत् सेतुरक्षणार्थंममाज्ञयात्रैवस्थितइत्यर्थः । नचप्रसन्नतादौरूढस्यप्रसादशब्दस्यकथमुक्तोर्थइतिवाच्यं । योगवृत्तिस्वीकारेबाधकाभावात् । अतएव यौगिकार्थमादायपङ्कजशब्दादीनांशुक्तिकादौप्रवृत्तिःप्रदर्शितानैयायिकादिभिः । रामकर्तृकशिवस्थापनं पुराणेषुविस्तरतोनिरूपितं । अतएव 'शंभोःप्रीत्यैयोमयाकारिधर्मःखेखेकालेमाननीयोभवद्भिः । नानावर्णान्भाविनोभूमिपालान्भूयोभूयोयाचतेरामचन्द्रः" इतिरामकृतस्ताम्रपत्रलिखितः स्वतोविदीर्णदेवालयैकदेशान्निस्सृतः इदानीन्तनसार्वभौमेनवाराणसींप्रेषितः श्लोकोपिसंगच्छते । ननुपूर्वमनुक्तेरिदंनयुक्तमितितुनभ्रमितव्यं । पूर्वमनुक्तखेप्यनयैवोक्त्यापूर्ववृत्तस्यानुमानेनपूर्वोक्त्यभावस्याकिञ्चित्करत्वेनयुक्तत्वेबाधकाभावात् । अतएवजयन्तमारीचवृत्तादीनांपूर्वमनुक्तत्वेप्युत्तरत्रोक्तेर्नायुक्तम् । यद्वा अत्रस्थितःसन्महादेवः प्रसादं संशयास्पदीभूतरावणसाहाय्यगमननिरोधमकरोत् । तथाचमेदिनी " मूलेप्रत्यन्तशैलेच्चप्रसादस्त्वरोधने " इति । एतेन पूर्वंशंभुप्रसादानुक्त्याऽयमर्थोनयुक्तइत्याद्युक्तयआपाततोरमणीयाइतिदिक् ॥२२॥ ती० प्रणतसाध्वसेतिपाठे प्रणेतुं उपनेतुं प्राप्तं साध्वसंययासा । शि० प्रणयस्यसाधुनाशोभनतया असतिप्रक्राशतेसा प्रणयसाध्वसा । स० प्रणयसाध्वसा । प्रणयःस्नेहः । साध्वसंयथेच्छंकथनेकिंवदिष्यतिवारामइतिचिरंप्रियवियोगेनतत्स्वभावपरिज्ञानशून्यायाइवस्थितायाभयंच । प्रणयपूर्वंसाध्वसंयस्याःसा ॥ २५ ॥ ति० गन्तुमिच्छे इच्छामि । अत्रैतदर्थमेकदिनवासः । अतएवभारतेऽङ्गदस्ययौवराज्याभिषेकोप्येतद्दिनउक्तः ॥ २६ ॥ वानराणांनारीणांसह ताभिःसहेत्यर्थः । षष्ठ्यार्षी ॥ २७ ॥

[पा०] १ क.—ट. त्वयासह. २ क. ङ.—ञ, ट, मुद्वीक्ष्यसोब्रवीत्.

प्रिये त्वं सह नारीभिर्वानराणां महात्मनाम् ॥ राघवेणाभ्यनुज्ञाता मैथिलीप्रियकाम्यया ॥ ३२ ॥
त्वर त्वमभिगच्छामो गृह्य वानरयोषितः ॥ अयोध्यां दर्शयिष्यामः सर्वा दशरथस्त्रियः ॥ ३३ ॥
सुग्रीवस्य वचः श्रुत्वा तारा सर्वाङ्गशोभना ॥ आहूय चाब्रवीत्सर्वा वानराणां तु योषितः ॥ ३४ ॥
सुग्रीवेणाभ्यनुज्ञाता गन्तुं सर्वैश्च वानरैः ॥ मम चापि प्रियं कार्यमयोध्यादर्शनेन च ॥ ३५ ॥
प्रवेशं चापि रामस्य पौरजानपदैः सह ॥ विभूतिं चैव सर्वासां स्त्रीणां दशरथस्य च ॥ ३६ ॥
तारया चाभ्यनुज्ञाता सर्वा वानरयोषितः ॥ नेपथ्यं विधिपूर्वेण कृत्वा चापि प्रदक्षिणम् ॥
अध्यारोहन्विमानं तत्सीतादर्शनकाङ्क्षया ॥ ३७ ॥
ताभिः सहोत्थितं शीघ्रं विमानं प्रेक्ष्य राघवः ॥ ऋश्यमूकसमीपे तु वैदेहीं पुनरब्रवीत् ॥ ३८ ॥
दृश्यतेऽसौ महान्सीते सविद्युदिव तोयदः ॥ ऋश्यमूको गिरिश्रेष्ठः काञ्चनैर्धातुभिर्वृतः ॥ ३९ ॥
अत्राहं वानरेन्द्रेण सुग्रीवेण समागतः ॥ समयश्च कृतः सीते वधार्थं वालिनो मया ॥ ४० ॥
एषा सा दृश्यते पम्पा नलिनी चित्रकानना ॥ त्वया विहीनो यत्राहं विललाप सुदुःखितः ॥४१॥
अस्यास्तीरे मया दृष्टा शबरी धर्मचारिणी ॥ अत्र योजनबाहुश्च कबन्धो निहतो मया ॥ ४२ ॥
दृश्यते च जनस्थाने सीते श्रीमान्वनस्पतिः ॥ यत्र युद्धं महद्वृत्तं तव हेतोर्विलासिनि ॥
रावणस्य नृशंसस्य जटायोश्च महात्मनः ॥ ४३ ॥
खरश्च निहतो यत्र दूषणश्च निपातितः ॥ त्रिशिराश्च महावीर्यो मया बाणैरजिह्मगैः ॥

नतु वानराणां । भाषत अभाषत ॥ ३१ ॥ नारीभिः स्त्रीभिः सह अनुज्ञाता । अयोध्यागमनं प्रतीति शेषः। त्वं च वानरस्त्रियश्चानुज्ञाता इत्यर्थः । नारीणामिति पाठे तृतीयार्थे षष्ठी ॥ ३२ ॥ गृह्य गृहीत्वा । आनीयेति यावत् । दर्शयिष्यामः द्रक्ष्यामः । दशरथस्त्रियः दशरथस्त्रियश्च ॥ ३३ ॥ सर्वाङ्गशोभनेत्यनेन पूर्वं स्वयमलंकृतवतीति गम्यते ॥ ३४ ॥ सुग्रीवेणेत्यादिश्लोकद्वयमेकान्वयं ॥ सुग्रीवेण सर्वैर्वानरैः स्वस्वभर्तृभिर्वानरैः सह अयोध्यां गन्तुमभ्यनुज्ञाताः । यूयमिति शेषः । न केवलं सुग्रीवानुज्ञामात्रं मत्प्रियार्थं च भवतीभिरागन्तव्यमित्याह—मम चापीति । अयोध्यादर्शनेन मम यत्प्रियं तद्भवतीभिः सहागत्य कार्यमित्यर्थः । रामस्य प्रवेशं च दशरथस्य स्त्रीणां विभूतिं ऐश्वर्यं च । द्रक्ष्याम इति शेषः ॥३५—३६॥ तारयेत्याद्यर्धत्रयमेकान्वयं ॥ नेपथ्यं अलंकारं । विधिपूर्वेण मङ्गलालम्भनादिविधिपूर्वकमित्यर्थः । अत्रालंकरणाह्वानादिना दिनमेकं गतमित्याहुः । प्रदक्षिणं कृत्वा । विमानस्येति शेषः । प्रादक्षिण्येन गमनमात्रमत्र विवक्षितं । अतिविपुलस्य तस्य सद्यः प्रदक्षिणासंभवात् ॥ ३७ ॥ उत्थितमित्यनेन तारागमनपर्यन्तं भूमौ विमानं स्थितमिति ज्ञायते ॥ ३८—३९ ॥ समयः संकेतः ॥ ४० ॥ विललाप । लिङुत्तमैकवचनं ॥ ४१—४२ ॥ दृश्यते चेत्यादिसार्धश्लोकमेकं वाक्यं ॥ श्रीमान् वनस्पतिः जटायुनिवासभूतो वटः । तस्य श्रीमत्त्वं महात्मना जटायुषाधिष्ठितत्वात् ॥ ४३ ॥ खरश्चेत्यादिसार्धश्लोक

रामानु० सुग्रीवेणाभ्यनुज्ञाताः वयमितिशेषः । वानरैश्चाभ्यनुज्ञाताः यूयमितिशेषः । ममचापिप्रियंकार्यमित्यत्रभवतीभिरिति शेषः । **स०** अयोध्यादर्शनेनभवतीभिर्ममप्रियंकार्यं ॥ ३५ ॥ **स०** अध्यारोहन् । ननुपूर्वंरामस्यनागपाशबन्धसमयेरामदर्शनार्थं विमानेनानीतांसीतांप्रति तवपतिश्चेन्नजीवतितर्हिनेदंविमानंत्वांवहेदितिसरमावाक्येनपुष्पकस्याविधवावाहकत्वनियमोक्त्याकथमत्रतारायाविमानारोहणमितिचेदुच्यते । सरमावाक्यंनसीतायाविधवात्वपुरस्कारेणविपक्षेयानारोहनिषेधपरं । किंतु दृश्यमानरामस्यमरणेतवाशुचित्वेननेदंत्वामावहेदित्येवंपरं । यद्वा उक्तनियमाङ्गीकारेपिनक्षतिः । तारायारामवाक्यात्सुग्रीवपतिकत्वेनवाविमानारोहसंभवात् । "पुत्रिण्यविधवा" इतिस्मृतेःपुत्रेणवातस्याअविधवात्वंबोध्यं ॥ ३७ ॥ **ती०** ताभिःसहोत्थितमित्यनेन चतुर्थ्यांकिष्किंधायामुषित्वापश्चम्यांततःप्रस्थानमित्यवगम्यते । उपरिपश्चम्यां भरद्वाजाश्रमप्रवेशस्यवक्ष्यमाणत्वात् ॥ ३८ ॥
इतिषड्विंशत्युत्तरशततमोऽध्यायः ॥ १२६ ॥

[**पा०**] १ ङ. छ. झ. ञ. ट. नारीणांवानराणां. २ ख. प्रवेशंचापिपश्यामःपौर. ३ ङ. च. छ. झ. ञ. ट. दृश्यतेऽसौ.

एतत्तदाश्रमपदमस्माकं वरवर्णिनि ॥ ४४ ॥
पर्णशाला तथा चित्रा दृश्यते शुभदर्शना ॥ यत्र त्वं राक्षसेन्द्रेण रावणेन हृता बलात् ॥ ४५ ॥
एषा गोदावरी रम्या प्रसन्नसलिला शिवा ॥ अगस्त्यस्याश्रमो ह्येष दृश्यते पश्य मैथिलि ॥ ४६ ॥
दीप्तश्चैवाश्रमो ह्येष सुतीक्ष्णस्य महात्मनः ॥ ४७ ॥
वैदेहि दृश्यते चात्र शरभङ्गाश्रमो महान् ॥ उपयातः सहस्राक्षो यत्र शक्रः पुरन्दरः ॥ ४८ ॥
अस्मिन्देशे महाकायो विराधो निहतो मया ॥ ४९ ॥
एते हि तापसावासा दृश्यन्ते तनुमध्यमे ॥ अत्रिः कुलपतिर्यत्र सूर्यवैश्वानरप्रभः ॥
अत्र सीते त्वया दृष्टा तापसी धर्मचारिणी ॥ ५० ॥
असौ सुतनु शैलेन्द्रश्चित्रकूटः प्रकाशते ॥ यत्र मां केकयीपुत्रः प्रसादयितुमागतः ॥ ५१ ॥
एषा सा यमुना दूरादृश्यते चित्रकानना ॥ ५२ ॥
भरद्वाजाश्रमो यत्र श्रीमानेष प्रकाशते ॥ ५३ ॥
एषा त्रिपथगा गङ्गा दृश्यते वरवर्णिनि ॥ नानाद्विजगणाकीर्णा संप्रपुष्पितकानना ॥ ५४ ॥
शृङ्गिबेरपुरं चैतद्गुहो यत्र समागतः ॥ ५५ ॥
एषा सा दृश्यते सीते सरयूर्यूपमालिनी ॥ नानातरुशताकीर्णा संप्रपुष्पितकानना ॥ ५६ ॥
एषा सा दृश्यतेऽयोध्या राजधानी पितुर्मम ॥ अयोध्यां कुरु वैदेहि प्रणामं पुनरागता ॥ ५७ ॥
ततस्ते वानराः सर्वे राक्षसश्च विभीषणः ॥ उत्पत्योत्पत्य ददृशुस्तां पुरीं शुभदर्शनाम् ॥ ५८ ॥

ततस्तु तां पाण्डुरहर्म्यमालिनीं विशालकक्ष्यां गजवाजिसंकुलाम् ॥
पुरीमयोध्यां ददृशुः प्लवङ्गमाः पुरीं महेन्द्रस्य यथाऽमरावतीम् ॥ ५९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षड्विंशत्युत्तरशततमः सर्गः ॥ १२६ ॥

एकान्वयः ॥ तत् पञ्चवटीति प्रसिद्धं ॥४४—४५॥ एषा गोदावरीति । अयमेव पाठः सम्यक् । एषा मन्दाकिनीति पाठे अगस्त्याश्रमसमीपे मन्दाकिनीति काचिन्नद्यस्तीति ज्ञेयं । एतच्छ्लोकात्पूर्वं पर्णशालेति श्लोकः पठनीयः ॥ ४६ ॥ दीप्तश्चेत्यर्धं ॥ ४७ ॥ पुराणि शत्रुशरीराणि शत्रुपुराणि वा दारयतीति पुरन्दरः ॥ ४८ ॥ अस्मिन्देश इत्यर्धं ॥ ४९ ॥ एते हीत्यादिसार्धश्लोक एकान्वयः ॥ तापसावासाः । अस्माभिर्दश वर्षाणि यत्रोषितमिति भावः । तापसी अनसूया ॥ ५०—५१ ॥ एषा सेत्यर्धं ॥ ५२ ॥ भरद्वाजेत्यर्धं ॥ यत्र भरद्वाजाश्रमः । पूर्वं दृष्ट इति शेषः । श्रीमान् स एष प्रदेशः प्रकाशते । अदूरवर्तितया सम्यग्दृश्यते ॥ ५३ ॥ वरवर्णिनीति सीतासंबोधनं ॥ ५४ ॥ शृङ्गिबेरपुरमित्यर्धं ॥ यत्र गुहः समागतः तच्छृङ्गिबेरपुरं एतदित्यन्वयः ॥ ५५ ॥ यूपमालिनी इक्ष्वाकुभिस्तीरे यागानन्तरं कीर्त्यर्थं शिलाभिः कृतयूपवतीत्यर्थः ॥ ५६ ॥ अयोध्यामिति । उद्दिश्येति शेषः । विमानस्याकाशगतत्वेन दूरस्था अपि गङ्गाशृङ्गिबेरपुरसरय्वयोध्या दृष्टा इति बोध्यम् । भरद्वाजाश्रमे हि तदा स्थितिः ॥ ५७—५८ ॥ पाण्डुरेत्यादिस्वभावोक्तिः ॥ ५९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणेरत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षड्विंशत्युत्तरशततमः सर्गः १२६

[पा०] १ ङ. ञ. ट. अत्रमां. २ ङ. छ. ञ. ञ. राक्षसाःसविभीषणाः. ३ ङ. ञ. ट. संहृष्टास्तांपुरींददृशुस्तदा.

सप्तविंशत्युत्तरशततमः सर्गः ॥ १२७ ॥

रामेण भरद्वाजाश्रममेत्य तंप्रत्यभिवादनपूर्वकं भरतादिकुशलप्रश्नः ॥ १ ॥ तेन तंप्रति सकलजनकुशलनिवेदनपूर्वकं स्वस्यतपसैव तस्यपुरास्वाश्रमनिर्गमप्रभृतिपुनरागमनावधिकालमध्यवृत्तवृत्तान्तपरिज्ञाननिवेदनेनसह स्वीयातिथ्यस्वीकारेणपरेद्युरयोध्यागमनचोदना ॥ २ ॥ तथा रामप्रार्थनया वानरनिकरभोगायायोध्याध्वगततरुकुलेषु स्वतपोमहिम्नाऽमृतकल्पफलकुलनिष्पादनम् ॥ ३ ॥

पूर्णे चतुर्दशे वर्षे पञ्चम्यां लक्ष्मणाग्रजः ॥ भरद्वाजाश्रमं प्राप्य ववन्दे नियतो मुनिम् ॥ १ ॥

अथ भरद्वाजाश्रमवासः—पूर्ण इति ॥ पूर्णे चैत्रशुद्धपञ्चम्यामयोध्यातो निर्गमनं । तदारभ्य चतुर्दशवर्षे पूर्णे सति पञ्चम्यां चैत्रशुद्धपञ्चम्यां । तथा हि चैत्रशुद्धपञ्चम्यां निर्गमः । तद्रात्र्यां तमसातीरे निवासः । षष्ठ्यां शृङ्गिबेरपुरे । सप्तम्यां वनस्पतिमूले । अष्टम्यां भरद्वाजाश्रमे । नवम्यां यमुनातीरे । दशम्यां रामश्चित्रकूटं गमिष्यतीति गुहचारमुखेन विदितवृत्तान्तस्य सुमन्त्रस्य सायाह्ने अयोध्याप्रवेशः । तद्रात्रावेव दशरथस्य निर्याणं । एकादश्यां राज्ञस्तैलद्रोण्यां निक्षेपः । द्वादश्यां भरतं प्रति दूतप्रेषणं । ते च दूता मार्गे त्रयोदशीं चतुर्दशीं चापनीय पौर्णमास्यां रात्रौ केकयनगरं प्रविविशुः । प्रतिपदि भरतस्यायोध्यां प्रत्यागमनं । तत्र च मार्गे सप्त रात्रीरुषित्वा अष्टमे दिने त्वरातिशयेनाहोरात्रमागत्य नवम्यां सूर्योदये भरतस्यायोध्याप्रवेशः । तस्यामेव दशरथसंस्कारः । तदहरारभ्य त्रयोदशदिने वैशाखशुद्धपञ्चम्यां तत्पूर्वदिने च भरतेन राज्ञः श्राद्धकर्मकरणं । षष्ठ्यां तद्देशीयाचारसिद्धं दहनदेशशोधनं । सप्तम्यां मार्गशोधनाय कर्मान्तिकप्रेषणं । कर्मान्तिकैश्च दशमीपर्यन्तं चतुर्दिनं मार्गशोधनं । एकादश्यां भरतस्य रामसकाशं प्रति गमनं । तद्रात्रौ गङ्गातीरे निवासः । द्वादश्यां भरद्वाजाश्रमे । त्रयोदश्यां रामसमागमः । चतुर्दशीपौर्णमासीप्रतिपत्सु चित्रकूटे भरतस्य निवासः । वैशाखबहुलद्वितीयायां भरतस्यायोध्यां प्रति प्रयाणम् । चतुर्थ्यामयोध्याप्रवेशः । इत्येवं सार्धमासे गते वैशाखबहुलपञ्चम्यां रामस्य चित्रकूटान्निर्गमः अत्र्याश्रमप्रवेशश्च । एवमाश्रममण्डलवासेन सह सार्धमासेषु दशसंवत्सरेषु गतेषु अवशिष्टकाले पञ्चवटीवासे तत्र त्रयोदशवर्षेषु गतेषु ततश्चतुर्दशे वर्षे चैत्रमासे सीताहरणम् । वैशाखे सुग्रीवदर्शनम् । आषाढे वालिवधः । आश्वयुजे सैन्योद्योगः । फाल्गुने प्रायोपवेशः । फाल्गुनशुद्धचतुर्दश्यां लङ्कादाहः । फाल्गुनामावास्यायां रावणवधः । चैत्रशुद्धप्रतिपदि रावणसंस्कारादि । द्वितीयायां विभीषणाभिषेकः, सीताप्राप्तिर्देवताप्रस्थानानि च । तृतीयायां लङ्कातो निर्गमः । चतुर्थ्यां किष्किन्धायां वासः । पञ्चम्यां भरद्वाजाश्रमे वासः । अत्र वक्तव्योपपत्तयस्तत्र तत्र प्रदर्शिताः । अस्मिन् प्रकारे हनुमत्सन्निधाने, ' द्वौ मासौ रक्षितव्यौ मे ' इति रावणवचनं सीतासान्त्वनपरम् । ' मासादूर्ध्वं न जीविष्ये ' इति सीतावचनं तु सम्यक् संगच्छते । मासशब्दस्य वर्तमानमासपरत्वं चासकृदुक्तम् । रावणेन दश मासा गताः अविशिष्टौ द्वौ मासावित्युक्तिर्मधुपानमत्ततयाऽविवेककृता । सीताया मासादूर्ध्वमिति वचनं तु वर्तमानमासपरमिति विवेकः । भरद्वाजाश्रमं प्राप्येत्यनेन महतां स्थानमपि प्राप्यमित्यु-

---

ती० 'पूर्णेचतुर्दशेवर्षेपञ्चम्यांलक्ष्मणाग्रजः । भरद्वाजाश्रमंप्राप्य' इत्यनेनेदंप्रतिपाद्यते । फाल्गुनपूर्णिमायांसुवेलारोहणं । अत्रप्रमाणं 'ततोस्तमगमत्सूर्यःसन्ध्ययाप्रतिरञ्जितः । पूर्णचन्द्रप्रदीपाचक्षपासमभिवर्तत'इतिवचनं । ततोपरेद्युःकृष्णपक्षप्रथमायांयुद्धस्यप्रारंभः । तस्यामेवरात्रौनागपाशबन्धमोक्षौ । द्वितीयायांवज्रदंष्ट्रस्यवधः । चतुर्थ्यांमकराक्षस्यवधः । वस्तुतस्तुदशम्यामेवकुंभनिकुंभमकराक्षाणांवधः । एकादशीमारभ्यपुनरिन्द्रजितत्रिरात्रंयुद्धं । लक्ष्मणेनत्रयोदश्यामिन्द्रजिद्वधः । अत्रचप्रमाणं—'अहोरात्रैस्त्रिभिर्वीरःकथंचिद्विनिपातितः ।' इत्येतद्वचनं । चैत्रशुक्लप्रथमायांरावणस्यसंस्कारः । द्वितीयायांविभीषणस्याभिषेकः । तृतीयायांदेवीसमागमः । 'तांरात्रिमुषितंरामं' इत्युक्त्वाचतुर्थ्यांप्रतिप्रयाणंकिष्किन्धाप्राप्तिश्च । पञ्चम्यांभरद्वाजाश्रमप्राप्तिरिति । अस्यांपञ्चम्यांचतुर्दशवर्षैस्संपूर्णः । 'चतुर्दशेहिसंपूर्णेवर्षेऽहनिरघूत्तम । नद्रक्ष्यामियदित्वांतुप्रवेक्ष्यामिहुताशनम् । तथेतिचप्रतिज्ञाय संपरिष्वज्यसादरम्' इत्येतदत्रप्रमाणं । षष्ठ्यांनन्दिग्रामंप्राप्यजटाविशोधनंकृत्वाऽयोध्याप्राप्तिः । सप्तम्यांपुष्यनक्षत्रेश्रीरामचन्द्रस्य पट्टाभिषेकइत्येवंक्रमोवेदितव्यः ॥ १ ॥

सोपृच्छदभिवाद्यैनं भरद्वाजं तपोधनम् ॥ शृणोषि कच्चिद्भगवन्सुभिक्षानामयं पुरे ॥
कच्चिच्च युक्तो भरतो जीवन्त्यपि च मातरः ॥ २ ॥
एवमुक्तस्तु रामेण भरद्वाजो महामुनिः ॥ प्रत्युवाच रघुश्रेष्ठं स्मितपूर्वं प्रहृष्टवत् ॥ ३ ॥
पङ्कदिग्धस्तु भरतो जटिलस्त्वां प्रतीक्षते ॥ पादुके ते पुरस्कृत्य सर्वं च कुशलं गृहे ॥ ४ ॥
त्वां पुरा चीरवसनं प्रविशन्तं महावनम् ॥ स्त्रीतृतीयं च्युतं राज्याद्धर्मकामं च केवलम् ॥ ५ ॥
पदातिं त्यक्तसर्वस्वं पितुर्वचनकारिणम् ॥ सर्वभोगैः परित्यक्तं स्वर्गच्युतमिवामरम् ॥ ६ ॥
दृष्ट्वा तु करुणा पूर्वं ममासीत्समितिंजय ॥ कैकेयीवचने युक्तं वन्यमूलफलाशिनम् ॥ ७ ॥
सांप्रतं सुसमृद्धार्थं समित्रगणबान्धवम् ॥ समीक्ष्य विजितारिं त्वां मम प्रीतिरनुत्तमा ॥ ८ ॥
सर्वं च सुखदुःखं ते विदितं मम राघव ॥ ९ ॥
यत्त्वया विपुलं प्राप्तं जनस्थानवधादिकम् ॥ ब्राह्मणार्थे नियुक्तस्य रक्षितुः सर्वतापसान् ॥ १० ॥
रावणेन हृता भार्या बभूवेयमनिन्दिता ॥ मारीचदर्शनं चैव सीतोन्मथनमेव च ॥ ११ ॥
कबन्धदर्शनं चैव पम्पाभिगमनं तथा ॥ सुग्रीवेण च ते सख्यं यच्च वाली हतस्त्वया ॥ १२ ॥
मार्गणं चैव वैदेह्याः कर्म वातात्मजस्य च ॥ विदितायां च वैदेह्यां नलसेतुर्यथा कृतः ॥ १३ ॥
यथा वा दीपिता लङ्का प्रहृष्टैर्हरियूथपैः ॥ सपुत्रबान्धवामात्यः सबलः सहवाहनः ॥ १४ ॥
यथा विनिहतः संख्ये रावणो देवकण्टकः ॥ [यथा च निहते तस्मिन्रावणे देवकण्टके] ॥
समागमश्च त्रिदशैर्यथा दत्तश्च ते वरः ॥ १५ ॥

क्तम् । नियतः नियतकरणत्रयः ॥ १ ॥ स इत्यादिसार्धश्लोक एकान्वयः ॥ सुभिक्षानामयं । भिक्ष्यन्त इति भिक्षाः अन्नानि भिक्षाणां समृद्धिः सुभिक्षं । समृद्धावव्ययीभावः । आमयस्याभावोनामयं । प्रसज्यप्रतिषेधेपि समासस्येष्टत्वात्साधुः । सुभिक्षं चानामयं चेति विग्रहः । अनामयं आरोग्यं । " अनामयं स्यादारोग्यं " इत्यमरः । युक्तः प्रजापालने समाहितः ॥ २ ॥ प्रहृष्टवत् प्रहृष्टं । क्रियाविशेषणं । स्मितपूर्वं । सर्वज्ञोप्यजानान इव पृच्छतीति स्मितं । यद्वा किं भरतः प्रजापालनसंतुष्टो वर्तत इति प्रश्नसारं मत्वा परतन्त्रे तस्मिन् कथमित्थं संभवतीति स्मितकरणं ॥ ३ ॥ अतएव तदनुरूपमुत्तरयति—पङ्केति ॥ स्नानाभावात्पङ्कदिग्धत्वं । स्नानाभावेपि नित्यानुष्ठानं दीक्षितवद्गौणस्नानेन । स्नानाभावे निमित्तमाह—जटिल इति । जटिलः जटावान् । पिच्छादित्वादिलच् । जटिलानां वारुणस्नानं निषिद्धमिति भावः । " कथंन्वपररात्रेषु सरयूमवगाहते " इत्याद्युक्तिस्तु कादाचित्कस्नानपरत्वेप्युपपद्यते । यद्वा सदाऽनास्तृतभूमिशयनादिना वा तादृशत्वं । एवं व्रतनिष्ठो भरतस्ते पादुके राज्याय पुरस्कृत्य त्वां प्रतीक्षते । त्वदागमनाकाङ्क्षया वर्तत इत्यर्थः । कच्चिच्च युक्तो भरत इत्यस्योत्तरमुक्त्वा जीवन्त्यपि च मातर इत्यस्योत्तरमाह—सर्वं चेति । तव गृहे यद्यदस्ति तत्सर्वं कुशलं क्षेमयुक्तं । जीवन्त्यपि चेति समुच्चाय्य पृष्टाः सर्वे मातृपरिचारकादयो जीवन्तीत्यर्थः ॥ ४ ॥ त्वां पुरेत्यादिश्लोकत्रयमेकं वाक्यं ॥ पुराचीरवसनं पुरातनचीरवसनं । अतो न पूर्वपदेन पौनरुक्त्यं । करुणा दुःखं । परदुःखदुःखित्वं हि करुणा ॥ ५—७ ॥ सांम्प्रतं इदानीं तु त्वां समीक्ष्य । स्थितस्येति शेषः । प्रीतिः । जातेति शेषः । अनुत्तमेत्यनेन देवकार्यकरणहेतुत्वात्पूर्वमपि काचित्प्रीतिरासीदिति द्योत्यते ॥ ८ ॥ सर्वमित्यर्धं ॥ सुखं पञ्चवटीवासादिकृतं । दुःखं सीताहरणजं ॥ ९ ॥ यत्त्वयेत्यादिसार्धश्लोकषट्कमेकान्वयं । ब्राह्मणार्थे ऋषिजनरक्षणार्थे । नियुक्तस्य तैर्याचितस्य ।

[पा०] १ ङ. छ. झ. ञ. ट. आज्ञावशत्वेभरतो. २ ख. ङ.—ट. पितृनिर्देशकारिणं. ३ ङ. झ. ट. जनस्थाननिवासिना. ४ च. छ. ञ. तस्योन्मथनमेवच. ५ झ. ट. रावणोबलदर्पितः. ङ. च. छ. ञ. रावणोवरदर्पितः. घ: रावणोलोककण्टकः. ६ इदमर्धं ख. ग. ङ.—ट. पाठेषुदृश्यते.

सर्वं ममैतद्विदितं तपसा धर्मवत्सल ॥ [संपतन्ति च मे शिष्याः प्रवृत्त्याख्याः पुरीमितः ॥१६॥]
अहमप्यत्र ते दद्मि वरं शस्त्रभृतां वर ॥ अर्घ्यमद्य गृहाणेदमयोध्यां श्वो गमिष्यसि ॥ १७ ॥
तस्य तच्छिरसा वाक्यं प्रतिगृह्य नृपात्मजः ॥ बाढमित्येव संहृष्टो धीमान्वरमयाचत ॥ १८ ॥
अकाले फलिनो वृक्षाः सर्वे चापि मधुस्रवाः ॥ फलान्यमृतकल्पानि बहूनि विविधानि च ॥
भवन्तु मार्गे भगवन्नयोध्यां प्रति गच्छतः ॥ १९ ॥
तथेति च प्रतिज्ञाते वचनात्समनन्तरम् ॥ अभवन्पादपास्तत्र स्वर्गपादपसन्निभाः ॥ २० ॥
निष्फलाः फलिनश्चासन्विपुष्पाः पुष्पशालिनः ॥ शुष्काः समग्रपत्रास्ते नगाश्चैव मधुस्रवाः ॥
सर्वतो योजना त्रीणि गच्छतामभवंस्तदा ॥ २१ ॥
ततः प्रहृष्टाः प्लवगर्षभास्ते बहूनि दिव्यानि फलानि चैव ॥
कामादुपाश्नन्ति सहस्रशस्ते मुदान्विताः स्वर्गजितो यथैव ॥ २२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तविंशत्युत्तरशततमः सर्गः ॥ १२७ ॥

अष्टाविंशत्युत्तरशततमः सर्गः ॥ १२८ ॥

भरद्वाजाश्रमस्थेनरामेण हनुमन्तंप्रति गुहेस्वागमननिवेदनचोदनयासह नन्दिग्रामगंभरतंप्रति स्वागमननिवेदनादिचोदना ॥ १ ॥ हनुमता गुहभरतयोः श्रीरामसंदेशनिवेदनम् ॥ २ ॥

अयोध्यां तु समालोक्य चिन्तयामास राघवः ॥ चिन्तयित्वा हनूमन्तमुवाच प्लवगोत्तमम् ॥ १ ॥

अतएव रक्षितुः खरादिवधमुखेन पालयितुः । तव भार्या हृता बभूवेति यत् तच्चेति योजना । हृता हर्तुमीप्सिता । आशंसायां क्तः । अतो न सीतोन्मथनमित्यनेन पौनरुक्त्यं । वरः मृतवानरजीवनादिः ॥ १०—१६ ॥ वरं दद्मि ददामि । अत्र आश्रमे । अद्य अर्घ्यं पूजां । गृहाणेति संबन्धः ॥ १७ ॥ तस्येत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ बाढमिति प्रतिगृह्य तस्मिन् दिने तत्र पूजामङ्गीकृत्येत्यर्थः । धीमान् अद्यात्र स्थित्वा भरतं प्रति दूतप्रेषणमुचितमिति ज्ञानवानित्यर्थः । मधूनि स्रवन्तीति मधुस्रवाः । गच्छतः ममेति शेषः । मयि गच्छति सतीत्यर्थः । भवन्तु । अत्रेतिकरणं बोध्यं । इति वरमयाचतेति संबन्धः ॥ १८—१९ ॥ तथेति चेत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ योजना योजनानि । "सुपां सुलुक्" इत्यादिना पूर्वसवर्णादेशः । अत्यन्तसंयोगे द्वितीया । गच्छतां वानराणां फलिनश्चासन्निति क्रमेणान्वयः । इदं चोत्तरदिनकार्यं सौकर्याय ऋषिणा दर्शितं ॥ २० —२१ ॥ ते प्रस्थिताः । स्वर्गजितो यथा स्वर्गिण इव ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तविंशत्युत्तरशततमः सर्गः ॥ १२७ ॥

अथ भरतं प्रति हनुमत्प्रेषणमष्टाविंशत्युत्तरशततमे—अयोध्यां त्विति ॥ अर्धमेकं वाक्यं । समालोक्य

ति० इतः मदाश्रमात् । मेशिष्याः प्रवृत्त्याख्याः तवप्रवृत्तिमुदन्तं आचक्षते प्रवृत्त्याख्याः । तथाभूताःसन्तः तवपुरीं अयोध्यां । संपतन्ति । अतस्त्वत्पुरीवृत्तान्तोपिज्ञायतइतिशेषः ॥ १६ ॥ इतिसप्तविंशत्युत्तरशततमस्सर्गः ॥ १२७ ॥

ति० पञ्चम्यांचतुर्दशवर्षस्यपूर्णत्वात्तद्दिनेभरद्वाजाश्रमेविलंबस्यप्राप्तत्वाच्चतुर्दशसमाप्तौ यदित्वांनपश्यामितदाहुताशनंप्रवेक्ष्यामीति भरतोक्तेर्भरतस्यस्वागमननिवेदनायहनूमत्प्रेषणंकृतवानित्याह—अयोध्यांत्विति । समालोक्य भरद्वाजाश्रमेविमानादवतरणसमयइ-

[पा०] १ क. ख. ङ.—ट. पाठेष्विदमर्धंदृश्यते. २ ख. ङ. च. छ. झ. ट. संहृष्टःश्रीमान्वर. ३ ग. ङ.—ट. योजनास्त्रिलो. ४ ख. ङ. च. छ. झ.ट. मुदेव. ५ अस्यश्लोकस्यस्थाने. क. ख. ङ.—ट. पाठेषु अयोध्यांतुसमालोक्यचिन्तयामास राघवः । प्रियकामःप्रियंरामस्ततस्त्वरितविक्रमः । चिन्तयित्वाततोदृष्टिंवानरेषुन्यपातयत् । उवाचधीमांस्तेजस्वीहनूमन्तंप्लवंगमम् । अयोध्यांत्वरितोगत्वाशीघ्रंप्लवगसत्तम । इत्यर्धपञ्चकंदृश्यते.

जानीहि कच्चित्कुशली जनो नृपतिमन्दिरे ॥ २ ॥
शृङ्गिबेरपुरं प्राप्य गुहं गहनगोचरम् ॥ निषादाधिपतिं ब्रूहि कुशलं वचनान्मम ॥ ३ ॥
श्रुत्वा तु मां कुशलिनमरोगं विगतज्वरम् ॥ भविष्यति गुहः प्रीतः स ममात्मसमः सखा ॥ ४ ॥
अयोध्यायाश्च ते मार्गं प्रवृत्तिं भरतस्य च ॥ निवेदयिष्यति प्रीतो निषादाधिपतिर्गुहः ॥ ५ ॥
भरतस्तु त्वया वाच्यः कुशलं वचनान्मम ॥ सिद्धार्थं शंस मां तस्मै सभार्यं सहलक्ष्मणम् ॥ ६ ॥
हरणं चापि वैदेह्या रावणेन बलीयसा ॥ सुग्रीवेण च संसर्गं वालिनश्च वधं रणे ॥ ७ ॥
मैथिल्यन्वेषणं चैव यथा चाधिगता त्वया ॥ लङ्घयित्वा महातोयमापगापतिमव्ययम् ॥ ८ ॥
उपयानं समुद्रस्य सागरस्य च दर्शनम् ॥ यथा च कारितः सेतू रावणश्च यथा हतः ॥ ९ ॥
वरदानं महेन्द्रेण ब्रह्मणा वरुणेन च ॥ महादेवप्रसादाच्च पित्रा मम समागमम् ॥ १० ॥
उपयातं च मां सौम्य भरतस्य निवेदय ॥ सह राक्षसराजेन हरीणां प्रवरेण च ॥ ११ ॥
एतच्छ्रुत्वा यमाकारं भजते भरतस्तदा ॥ स च ते वेदितव्यः स्यात्सर्वं यच्चापि मां प्रति ॥ १२ ॥
जित्वा शत्रुगणान्रामः प्राप्य चानुत्तमं यशः ॥ उपयाति समृद्धार्थः सह मित्रैर्महाबलैः ॥ १३ ॥
ज्ञेयाश्च सर्वे वृत्तान्ता भरतस्येङ्गितानि च ॥ तत्त्वेन मुखवर्णेन दृष्ट्वा व्याभाषणेन च ॥ १४ ॥

समालोच्येत्यर्थः । आश्रमस्थस्य तदवलोकनासंभवात् । चिन्तयामास । कर्तव्यमिति शेषः ॥ १ ॥ जानीहीत्यर्धं ॥ नृपतिमन्दिरे जनः मात्रादिः ॥ २ ॥ गहनगोचरं वनचारिणं ॥ ३ ॥ गुहाय निवेदनस्य प्रयोजनमाह—श्रुत्वा त्विति ॥ विगतज्वरं मद्विश्लेषचिन्ताज्वररहितं यथा तथा भविष्यतीति क्रियाविशेषणं । आत्मसमः हीनजातिमनवेक्ष्य प्रेमातिशयेन गुहमिक्ष्वाकुकुलीनममन्यत ॥ ४ ॥ प्रवृत्तिं वृत्तान्तं ॥ ५ ॥ सिद्धार्थं निर्व्यूढपितृवचनपरिपालनरूपप्रयोजनं ॥ ६ ॥ हरणमित्यादिश्लोकपञ्चकमेकान्वयं ॥ रणे सुग्रीववालिनोर्युद्धे । वालिनो वध इत्यर्थः ॥७॥ यथा चेति । महातोयं अव्ययं । आपगापतिं लङ्घयित्वा त्वया सीता यथा अधिगता तथा शंसेत्यन्वयः ॥ ८ ॥ समुद्रस्योपयानं समुद्रं प्रति गमनमित्यर्थः । संबन्धसामान्ये षष्ठी । समीपयानं वा । सागरस्य समुद्रराजस्य ॥ ९ ॥ ब्रह्मणा वरुणेन चेति सहार्थे तृतीया । अनेन महेन्द्रेण वानरसमुत्थापनरूपवरप्रदाने ब्रह्माद्यनुमतिरस्तीति द्योतितं । पित्रा मम समागममित्येतदन्तस्य शंसेति पूर्वेण संबन्धः ॥ १० ॥ उपयातमिति । अन्यथा चतुर्ध्यामेव चतुर्दशवर्षातिक्रमात् सोऽग्निं प्रविशेदिति भावः । सौम्येत्यनेन मन्दं मन्दं कथय । अन्यथा हठान्मदागमनश्रवणे हर्षोऽस्य उन्मस्तको भवेदिति भावः ॥ ११ ॥ त्वमेव राज्यं पालयेति मयोक्ते भरतस्तदङ्गीकरोति न वेति तदाकारस्त्वया ज्ञातव्य इत्याह—एतच्छ्रुत्वेति ॥ एतत् उपयानं । आकारं मुखप्रसादादिकं । मां प्रति यत् इङ्गितचेष्टादिकं ॥ १२ ॥ जित्वा शत्रुगणानित्यादिश्लोकद्वयमेकान्वयं ॥ एतच्छ्लोकान्ते इत्युक्त्वेत्यध्याहर्तव्यं । ज्ञेया इति श्लोकेन पूर्वोक्तमेव विशेष्यते । तत्त्वेनेत्यस्य ज्ञेया इत्यनेन संबन्धः । अत्रापि पूर्ववद्राज्यं पालयेति मदुक्तिं भरतः किमङ्गीकरोतीति परीक्षस्वेतिभावः । अन्यथा भरतप्रकृतेः रामप्रकृतेश्च विरुद्धं स्यात् । यावेवमूचतुः । "न सर्वे भ्रातरस्तात भवन्ति भरतोपमाः" इति "यावन्न चरणौ भ्रातुः

तिभावः । सुग्रीवादीनांसम्यक्चिह्नाचारकरणायसुहृष्टरूपतदाकारज्ञानायचपूर्वंहनुमत्प्रेषणं । अतएवपाद्मे पञ्चम्यामेवविसृष्टहनुमत्प्रवेशसमयेभरतवर्णनमेवंकृतं । 'अग्निप्रवेशेसोद्योगकालेभ्रातुरनागमात् । न्यवेदयत्तदातस्मैश्रीरामागमनोत्सवम्' इति । किंच प्रियकामइति । सुग्रीवादीनांप्रियकामः अयोध्यायांसर्वतत्प्रियपूरणकामः । तेषांप्रियंयथाभवतितथाचिन्तयामास कर्तव्यजातमितिशेषः ॥ १ ॥

[पा०] १ क. श्रुत्वासमां. २ क. घ. ङ. च. ज.—ट. संवादं. ३ क. तमक्षोभ्यमापगापतिं. ४ ख. उपासनं. ५ क. च—ट. भरताय. ६ क. ङ. झ. ञ. ट. हरीणामीश्वरेणच. ७ ङ. च. छ. झ. ञ. ट. व्याभाषितेनच.

सर्वकामसमृद्धं हि हस्त्यश्वरथसंकुलम् ॥ पितृपैतामहं राज्यं कस्य नावर्तयेन्मनः ॥ १५ ॥
संगत्या भरतः श्रीमान्राज्यार्थी चेत्स्वयं भवेत् ॥ प्रशास्तु वसुधां कृत्स्नामखिलां रघुनन्दनः ॥१६॥
तस्य बुद्धिं च विज्ञाय व्यवसायं च वानर ॥ यावन्न दूरं याताः स्म क्षिप्रमागन्तुमर्हसि ॥ १७ ॥
इति प्रतिसमादिष्टो हनुमान्मारुतात्मजः ॥ मानुषं धारयन्रूपमयोध्यां त्वरितो ययौ ॥ १८ ॥
अथोत्पपात वेगेन हनुमान्मारुतात्मजः ॥ गरुत्मानिव वेगेन जिघृक्षन्भुजगोत्तमम् ॥ १९ ॥
लङ्घयित्वा पितृपथं भुजगेन्द्रालयं शुभम् ॥ गङ्गायमुनयोर्मध्यं सन्निपातमतीत्य च ॥ २० ॥
शृङ्गिबेरपुरं प्राप्य गुहमासाद्य वीर्यवान् ॥ स वाचा शुभया हृष्टो हनुमानिदमब्रवीत् ॥ २१ ॥
सखा तु तव काकुत्स्थो रामः सत्यपराक्रमः ॥ सहसीतः ससौमित्रिः स त्वां कुशलमब्रवीत् ॥२२॥
पञ्चमीमद्य रजनीमुषित्वा वचनान्मुनेः ॥ भरद्वाजाभ्यनुज्ञातं द्रक्ष्यस्यद्यैव राघवम् ॥ २३ ॥
एवमुक्त्वा महातेजाः संप्रहृष्टतनूरुहः ॥ उत्पपात महावेगो वेगवानविचारयन् ॥ २४ ॥
सोपश्यद्रामतीर्थं च नदीं वालुकिनीं तथा ॥ गोमतीं तां च सोपश्यद्धीमं सालवनं तथा ॥

पार्थिवव्यञ्जनान्वितौ ॥ शिरसा धारयिष्यामि न मे शान्तिर्भविष्यति " इति च ॥ १३—१४ ॥ ननु किं परीक्षणीयं सर्वस्यापि राज्याधिपत्यकाङ्क्षित्वादित्याशङ्क्याह—सर्वेति ॥ पितृपितामहशब्दौ कुलपरम्परोपलक्षकौ । पितृपितामहेभ्य आगतं । उत्तरपदवृद्धिरार्षी । नावर्तयेत् नाकर्षेत् । कस्य भरतादन्यस्यैवेत्यर्थः ॥ १५ ॥ एवं भरतेङ्गिते ज्ञाते तव किं कर्तव्यमित्यत्राह—संगत्येति । संगत्या अस्मत्संगत्या। यद्यपि पूर्वं सर्वात्मना न राज्यपालनमङ्गीकरोमीत्युक्तं । तथापि चतुर्दशवर्षपर्यन्तं मद्विरहातुरतया मद्दर्शनजहर्षप्रकर्षातिरेकेण त्वमभिषिक्तो भवेति मदुक्तिमङ्गीकरिष्यति किमिति भावः । भरतः मत्प्रीत्यर्थं पूर्वं राज्यभारमङ्गीकृतवान् खलु । स्वयं श्रीमान् स्वाभाविकपारतन्त्र्यश्रीमान् । भवेदित्याशंसायां लिङ् । प्रशास्तु वसुधां कृत्स्नां । ततो मदभिषेकसंभ्रमं न लब्धवान् । अहं तु भरताभिषेकमहोत्सवमनुभवेयं । अतएव ह्ययोध्याकाण्डेपि शनैर्जगाम सापेक्ष इत्युक्तं । भरताभिषेकदर्शनसापेक्ष इत्यर्थः । अखिलां खिलरहितां। समृद्धजनामित्यर्थः । कथमसौ भरणक्षम इत्यत्राह—रघुनन्दन इति । त्रैलोक्यभरणक्षमकुलोद्भूत इत्यर्थः ॥ १६ ॥ बुद्धिं मत्सन्निधाने कथंचिद्राज्यमङ्गीकरिष्यतीति बुद्धिं व्यवसायं सर्वात्मना नाङ्गीकरिष्यतीति व्यवसायं च ज्ञात्वा अङ्गीकरिष्यति चेदस्मादेशाद्यावद्दूरं न याताः स्म तावदागन्तुमर्हसि । अन्यथा नागच्छेति भावः । अत एव हनुमानपि तस्य व्यवसायं ज्ञात्वा नागतवानिति ज्ञेयं । केचित्तु भरतभावज्ञोपि रामः सर्वात्मना सुरक्तोपि राज्ञा परीक्षणीय इति लोके राजनीतिप्रवर्तनायैवमतिशङ्कावचनमुक्तवान् । वस्तुतः स्वस्य झटिति गमने भरतस्य हर्ष उन्मस्तको भवेदिति । तस्मात्सत्त्वाय हनुमन्तं प्रेषितवान् । तदाशयज्ञो हनुमानपि रामागमनमुक्त्वा भरतेन सहैवागतवानित्याहुः ॥ १७ ॥ प्रतिसमादिष्टः प्रतिकूलं समादिष्टः । अहृदयं समादिष्ट इत्यर्थः । ययौ यातुमुद्युक्तः ॥१८॥ अथ उद्योगानन्तरं । वेगेन जिघृक्षन्निवेत्यन्वयः ॥१९॥ लङ्घयित्वेत्यादिश्लोकद्वयमेकान्वयं ॥ पितृपथं स्वपितृपथं । वायुमार्गमित्यर्थः । भुजगेन्द्रालयमिति गङ्गायमुनासंगमविशेषणं ॥ २०—२२ ॥ पञ्चमीं पञ्चमीसंबन्धिनीं । अद्य रजनीं एतां रजनीं । उषित्वा । निर्गतमिति शेषः । भरद्वाजाभ्यनुज्ञातं । प्रातरिति शेषः । अद्यैव अचिरेणैव ॥ २३ ॥ संप्रहृष्टतनूरुहः । सकललोकानन्दकारिरामप्रत्यागमनं मया श्रावयितव्यं लब्धमित्यस्माद्धेतोरिति भावः । महावेगः महावेगस्वभावः । वेगवान् तादात्विकवेगवान् । अविचारयन् मार्गस्थवनगिरिनदीसौन्दर्यादिकमगणयन्निति भावः ॥ २४ ॥ सोपश्यदित्यादिसार्धश्लोकमेकं वाक्यं ॥

स० संगत्या चिरकालपरिचयेन कैकेयीसंगत्यावा । यदिकैकेयीवत्स्वयमपिराज्येनार्थीभवेत्तर्हि सएववसुधांशास्तु वयंयत्रकापितपसाकालंनेष्यामइतिशेषः ॥ १६ ॥ इत्यष्टाविंशत्युत्तरशततमस्सर्गः ॥ १२८ ॥

[पा०] १ क.—ट. राज्येनार्थीस्वयं. २ ङ. च. झ. ञ. ट. यमुनयोर्भीमसमतीत्यसमागमं. क. ख. घ. ज. यमुनयोर्भीमसंनिपातं. ३ ग.—छ. झ. ञ. ट. महावेगाद्वेगवान्. ज. महावेगोहनुमान्. ४ क. घ. ज. तांनदींवालुकींतदा. ग. तांनदींवालुकांतदा. ५ क. ख. ङ. छ. झ. ञ. ट. वरूथिनीमतींचैवभीमं.

प्रजाश्च बहुसाहस्राः स्फीताञ्जनपदानपि ॥ २५ ॥
स गत्वा दूरमध्वानं त्वरितः कपिकुञ्जरः ॥ आससाद द्रुमान्फुल्लान्नन्दिग्रामसमीपगान् ॥ २६ ॥
स्त्रीभिः सपुत्रैर्वृद्धैश्च रममाणैरलंकृतान् ॥ सुराधिपस्योपवने यथा चैत्ररथे द्रुमान् ॥ २७ ॥
क्रोशमात्रे त्वयोध्यायाश्चीरकृष्णाजिनाम्बरम् ॥ ददर्श भरतं दीनं कृशमाश्रमवासिनम् ॥ २८ ॥
जटिलं मलदिग्धाङ्गं भ्रातृव्यसनकर्शितम् ॥ फलमूलाशिनं दान्तं तापसं धर्मचारिणम् ॥ २९ ॥
समुन्नतजटाभारं वल्कलाजिनवाससम् ॥ नियतं भावितात्मानं ब्रह्मर्षिसमतेजसम् ॥ ३० ॥
पादुके ते पुरस्कृत्य शासन्तं वै वसुन्धराम् ॥ चातुर्वर्ण्यस्य लोकस्य त्रातारं सर्वतो भयात् ॥ ३१ ॥
उपस्थितममात्यैश्च शुचिभिश्च पुरोहितैः ॥ बलमुख्यैश्च युक्तैश्च काषायाम्बरधारिभिः ॥ ३२ ॥
न हि ते राजपुत्रं तं चीरकृष्णाजिनाम्बरम् ॥ परि भोक्तुं व्यवस्यन्ति पौरा वै धर्मवत्सलम् ॥३३॥
तं धर्ममिव धर्मज्ञं देहवन्तमिवापरम् ॥ उवाच प्राञ्जलिर्वाक्यं हनुमान्मारुतात्मजः ॥ ३४ ॥
वसन्तं दण्डकारण्ये यं त्वं चीरजटाधरम् ॥ अनुशोचसि काकुत्स्थं स त्वां कुशलमब्रवीत् ॥ ३५ ॥
प्रियमाख्यामि ते देवं शोकं त्यक्ष्यसि दारुणम् ॥ अस्मिन्मुहूर्ते भ्रात्रा त्वं रामेण सह सङ्गतः ॥३६॥
निहत्य रावणं रामः प्रतिलभ्य च मैथिलीम् ॥ उपयाति समृद्धार्थः सह मित्रैर्महाबलैः ॥ ३७ ॥

रामतीर्थं परशुरामतीर्थं । तां प्रसिद्धां । प्रजाः कोसलजनपदस्थाः ॥२५॥ स गत्वेत्यादिश्लोकद्वयमेकान्वयं ॥ फुल्लान् फुल्लपुष्पान् । स्त्रीभिः सपुत्रैर्वृद्धैश्च । स्त्रीबालवृद्धाविशेषेण सर्वेषामानन्दकरत्वादिति भावः । सुराधिपस्य उपवने नन्दनवने चैत्ररथे च स्थितान् द्रुमान् यथा तत्सदृशानित्यर्थः ॥ २६—२७ ॥ क्रोशमात्रे त्रिंत्यादिश्लोकपञ्चकमेकान्वयं ॥ क्रोशमात्रे घटिकाद्वयमात्रे घटिकाद्वयगन्तव्यभूमौ । क्रोशलक्षणमुक्तं ज्यौतिषदर्पणे—"यत्रोदरैरङ्गुलमष्टसंख्यैर्हस्तोङ्गुलैः षड्गुणितैश्चतुर्भिः । हस्तैश्चतुर्भिर्भवतीह दण्डः क्रोशः सहस्रद्वितयेन तेषां" इति । दीनं रामादर्शनेन ॥ २८ ॥ दान्तं बहिरिन्द्रियनिग्रहशालिनं ॥ २९ ॥ समुन्नतजटाभारमिति ॥ पूर्वं जटावत्त्वोक्तिः अत्र तद्भारस्य समुन्नतत्वोक्तिरिति वैषम्यं । वल्कलाजिनवाससमित्युत्तरीयोक्तिः । अतश्चीरकृष्णाजिनाम्बरमित्यनेन न पुनरुक्तिः । नियतं नियतवाचं । भावितात्मानं ध्यातात्मानमिति मनोनियमोक्तिः ॥३०॥ ते पूर्वं रामेण दत्ते । चातुर्वर्णस्य चतुर्वर्णरूपस्य । स्वार्थे ष्यञ् । लोकस्य जनस्य ॥ ३१ ॥ युक्तैः सन्नद्धैः । " योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु " इत्यमरः ॥३२॥ भ्रातृवियोगाद्भरतस्य वल्कलादिधारणमस्तु अमात्यादीनां तत् किंनिमित्तमित्याशङ्क्य तत्र कारणमाह—न हीति ॥ राजपुत्रं भरतं परिवर्जयित्वा भोक्तुं समीचीनवस्त्राभरणादीन्यनुभवितुं न व्यवस्यन्ति व्यवसायं न कुर्वन्ति । " अपपरी वर्जने " इति परेः कर्मप्रवचनीयसंज्ञा । आचार्याः प्राहुः परि परितो वर्तमाना अपि पौराः । भरतं भोक्तुं अनुभवितुं । द्रष्टुमिति यावत् । न व्यवस्यन्ति व्यवसायं न कुर्वन्ति । तद्दर्शने निराशा भवन्तीत्यर्थः । तत्र हेतुमाह—राजपुत्रमिति । रामविरहानन्तरक्षणे मृतस्य पुत्रः खल्वयं । अद्य रामानागमने किमयमस्माभिर्लभ्यत इति भावः । हेत्वन्तरमाह—धर्मवत्सलं धर्मार्थतया स्वात्मत्यागे पितृसदृशमित्यर्थः । चतुर्दशे वर्षे पूर्णेपि रामागमनादर्शनात् प्राणत्यागे व्यवसितं भरतमालोकयतां पौराणां खेदातिशयोनेन श्लोकेन सूच्यते ॥ ३३ ॥ देहवन्तमपरं धर्ममिव स्थितं । द्वितीय इवशब्दो वाक्यालंकारे ॥ ३४—३५ ॥ संगतः भविष्यसीति शेषः । अत्रापरिचितत्वाद्भरतं हनुमान्नावन्दत । यद्वा प्राञ्जलिरिति पदं वन्दनपूर्वकाञ्जलिपरं । अथवा भरतदशादर्शनेन प्रियाख्याने क्षणविलम्बेपि प्राणहानिशङ्कया सति कुड्य इति न्यायेन वन्दनोद्देश्यवस्तुनि शीर्यमाणे किं वन्दनेनेति तदुज्जीवकं प्रियाख्यानमेवाकरोत् । यद्वा तदशादर्शनेन स्वरूपं विसस्मार ॥ ३६ ॥ समृद्धार्थः संपूर्णमनोरथः ॥ ३७ ॥

[पा०] १ क. ङ. च. झ. साहस्रीः. २ क. ग. च. ज. समीपजान्. ३ ङ. च. झ. सपुत्रैःपौत्रैश्चरममाणैःस्वलंकृतैः. ४ ङ. च. छ. झ. ञ. ट. प्रशासन्तं. ५ ङ. च. छ. झ. ञ. ट. धर्मवत्सलाः. ६ घ. ङ. झ. ञ. ट. देहबन्धं. ७ घ. वीर.

लक्ष्मणश्च महातेजा वैदेही च यशस्विनी ॥ सीता समग्रा रामेण महेन्द्रेण यथा शची ॥ ३८ ॥
एवमुक्तो हनुमता भरतो भ्रातृवत्सलः ॥ पपात सहसा हृष्टो हर्षान्मोहं जगाम ह ॥ ३९ ॥
ततो मुहूर्तादुत्थाय प्रत्याश्वस्य च राघवः ॥ हनुमन्तमुवाचेदं भरतः प्रियवादिनम् ॥ ४० ॥
अशोकजैः प्रीतिमयैः कपिमालिङ्ग्य संभ्रमात् ॥ सिषेच भरतः श्रीमान्विपुलैरास्रबिन्दुभिः ॥४१॥
देवो वा मानुषो वा त्वमनुक्रोशादिहागतः ॥ प्रियाख्यानस्य ते सौम्य ददामि ब्रुवतः प्रियम् ॥४२॥
गवां शतसहस्रं च ग्रामाणां च शतं परम् ॥ सुकुण्डलाः शुभाचारा भार्याः कन्याश्च षोडश ॥४३॥
हेमवर्णाः सुनासोरूः शशिसौम्याननाः स्त्रियः ॥ सर्वाभरणसंपन्नाः संपन्नाः कुलजातिभिः ॥४४॥
निशम्य रामागमनं नृपात्मजः कपिप्रवीरस्य तदद्भुतोपमम् ॥
प्रहर्षितो रामदिदृक्षयाऽभवत्पुनश्च हर्षादिदमब्रवीद्वचः ॥ ४५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टाविंशत्युत्तरशततमः सर्गः ॥ १२८ ॥

एकोनत्रिंशदुत्तरशततमः सर्गः ॥ १२९ ॥

हनुमता भरतप्रश्नेनतंप्रति रामस्यनगरनिर्गमप्रभृतिपुनर्भरद्वाजाश्रमागमनावधिकालमध्यवृत्ततदीयसर्ववृत्तान्तनिवेदनम् ॥ १ ॥

बहूनि नाम वर्षाणि गतस्य सुमहद्वनम् ॥ शृणोम्यहं प्रीतिकरं मम नाथस्य कीर्तनम् ॥ १ ॥
कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे ॥ एति जीवन्तमानन्दो नरं वर्षशतादपि ॥ २ ॥
राघवस्य हरीणां च कथमासीत्समागमः ॥ कस्मिन्देशे किमाश्रित्य तत्त्वमाख्याहि पृच्छतः ॥ ३ ॥
स पृष्टो राजपुत्रेण बृस्यां समुपवेशितः ॥ आचचक्षे ततः सर्वं रामस्य चरितं वने ॥ ४ ॥
यथा प्रव्राजितो रामो मातुर्दत्तो वरस्तव ॥ यथा च पुत्रशोकेन राजा दशरथो मृतः ॥ ५ ॥

समग्रा संपूर्णमनोरथा । उपयात इति शेषः ॥ ३८ ॥ हृष्टः पपात हर्षान्मोहं जगामहेत्यनेन वार्ताश्रवणमात्रेणैतादृशावस्थे भरते झटिति रामागमने कावस्था भवेदिति ऋषिर्विस्मयते ॥३९-४०॥ भरतः कपिमालिङ्ग्य । अशोकजैः शोकजभिन्नैः । प्रीतिमयैः आनन्दजैरित्यर्थः । विपुलैः गुरुभिः ॥४१॥ देवो वेत्यादिश्लोकत्रयमेकान्वयं ॥ परिगृहीतमनुष्यदेहेपि हनुमति तेजोविशेषात्संशयः । अनुक्रोशात् दयया प्रियं ब्रुवतस्ते प्रियाख्यानस्य प्रियवचनस्य पारितोषिकत्वेन गवादिकं ददामि । भार्याः भरणार्हाः । कन्याः अनूढाःस्त्रियः ॥ ४२—४४ ॥ रामदिदृक्षया उपलक्षितो भरतः । अद्भुता उपमा यस्य तत् अद्भुतोपमं । निरुपममित्यर्थः । तद्रामगमनं । कपिप्रवीरस्य कपिप्रवरात् निशम्य । नटस्य शृणोतीतिवत्षष्ठी । प्रहर्षितोभवत् ॥ ४५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टाविंशत्युत्तरशततमः सर्गः ॥ १२८ ॥

बहूनीत्यादिश्लोकद्वयमेकान्वयं ॥ बहूनि वर्षाणि वनं गतस्येति संबन्धः । वर्षशतादपीत्यत्रेतिकरणं द्रष्टव्यं । वर्षशतात्परमिति शेषः ॥ १—२ ॥ राघवस्येति । अत्र वानरसमागमप्रश्नेन पूर्वं भरतः सामान्यतो वानरसेनासन्नाहं श्रुतवानिति गम्यते । किमाश्रित्य किं प्रयोजनमवलम्ब्य ॥ ३ ॥ बृस्यां तपस्विसमुचितासने । "व्रतिनामासनं बृसी" इत्यमरः ॥ ४ ॥ वक्ष्यमाणवृत्तान्ते प्रामाण्यसिद्धये तत्पूर्ववृत्तं संग्रहेणानुवदति—यथेत्यादिना ॥ अत्र यथेत्यस्य येन प्रकारेणेत्यर्थः । मातुः मात्रे राज्येन निमन्त्रित इत्यन्व-

---

[पा०] १ क. ख. ग. ङ.—ट. भरतःकैकयीसुतः. २ ङ. ञ. ट. मोहमुपागमत्. ३ क. भवतःप्रियं. ४ ग.—ट. तदाद्भुतोपमं. ५ क. घ. च. ञ. भातिमां. ६ ङ. ञ. ट. दत्तौवरौतव.

यथा दूतैस्त्वमानीतस्तूर्णं राजगृहात्प्रभो ॥ त्वयाऽयोध्यां प्रविष्टेन यथा राज्यं न चेप्सितम् ॥६॥
चित्रकूटं गिरिं गत्वा राज्येनामित्रकर्शन ॥ निमन्त्रितस्त्वया भ्राता धर्ममाचरता सताम् ॥ ७ ॥
स्थितेन राज्ञो वचने यथा राज्यं विसर्जितम् ॥ आर्यस्य पादुके गृह्य यथाऽसि पुनरागतः ॥ ८ ॥
सर्वमेतन्महाबाहो यथावद्विदितं तव ॥ त्वयि प्रतिप्रयाते तु यद्वृत्तं तन्निबोध मे ॥ ९ ॥
अपयाते त्वयि तदा समुद्भ्रान्तमृगद्विजम् ॥ परिधूनमिवात्यर्थं तद्वनं समपद्यत ॥ १० ॥
तद्वस्तिमृदितं घोरं सिंहव्याघ्रमृगायुतम् ॥ प्रविवेशाथ विजनं सुमहद्दण्डकावनम् ॥ ११ ॥
तेषां पुरस्ताद्बलवान्गच्छतां गहने वने ॥ निनदन्सुमहानादं विराधः प्रत्यदृश्यत ॥ १२ ॥
तमुत्क्षिप्य महानादमूर्ध्वबाहुमधोमुखम् ॥ निखाते प्रक्षिपन्ति स्म नदन्तमिव कुञ्जरम् ॥ १३ ॥
तत्कृत्वा दुष्करं कर्म भ्रातरौ रामलक्ष्मणौ ॥ सायाह्ने शरभङ्गस्य रम्यमाश्रममीयतुः ॥ १४ ॥
शरभङ्गे दिवं प्राप्ते रामः सत्यपराक्रमः ॥ अभिवाद्य मुनीन्सर्वाञ्जनस्थानमुपागमत् ॥ १५ ॥
ततः पश्चाच्छूर्पणखा रामपार्श्वमुपागता ॥ १६ ॥
ततो रामेण संदिष्टो लक्ष्मणः सहसोत्थितः ॥ प्रगृह्य खड्गं चिच्छेद कर्णनासं महाबलः ॥ १७ ॥
चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् ॥ हतानि वसता तत्र राघवेण महात्मना ॥ १८ ॥
एकेन सह संगम्य रणे रामेण सङ्गताः ॥ अह्नश्चतुर्थभागेन निःशेषा राक्षसाः कृताः ॥ १९ ॥
महाबला महावीर्यास्तपसो विघ्नकारिणः ॥ निहता राघवेणाजौ दण्डकारण्यवासिनः ॥ २० ॥
राक्षसाश्च विनिष्पिष्टाः खरश्च निहतो रणे ॥ २१ ॥
[दूषणं चाग्रतो हत्वा त्रिशिरास्तदनन्तरम् ॥] ततस्तेनार्दिता बाला रावणं समुपागता ॥ २२ ॥
रावणानुचरो घोरो मारीचो नाम राक्षसः ॥ लोभयामास वैदेहीं भूत्वा रत्नमयो मृगः ॥ २३ ॥
अथैनमब्रवीद्रामं वैदेही गृह्यतामिति ॥ अहो मनोहरः कान्त आश्रमो नो भविष्यति ॥ २४ ॥
ततो रामो धनुष्पाणिर्धावन्तमनुधावति ॥ स तं जघान धावन्तं शरेणानतपर्वणा ॥ २५ ॥
अथ सौम्य दशग्रीवो मृगं याते तु राघवे ॥ लक्ष्मणे चापि निष्क्रान्ते प्रविवेशाश्रमं तदा ॥ २६ ॥

यः। अमित्रकर्शनेत्यनेन राज्यकरणसामर्थ्ये स्वस्यसत्यपि ज्येष्ठानुवृत्त्यर्थं निमन्त्रित इति गम्यते ॥५—९॥ समुद्भ्रान्तेति। अपूर्वपुरुषदर्शनेनेति भावः। परिधूनं परितप्तं ॥ १० ॥ तत् प्रसिद्धं। हस्तिभिः वनगजैः मृदितं ॥११—१२॥ निखाते अवटे। प्रक्षिपन्ति स्मेति बहुवचनेन सीतयाऽपि तत्र किंचित्साहाय्यं कृतमिति गम्यते ॥१३—१५॥ ततः पश्चादित्यर्थः ॥१६॥ कर्णनासमित्यत्र प्राण्यङ्गत्वादेकवद्भावः ॥ १७—१८ ॥ संगताः पार्थक्येन विना सर्वे राक्षसाः परस्परं मिलिताः सन्तः। एकेन रामेण सह संगम्यः निःशेषाः कृता इत्यन्वयः। अह्नश्चतुर्थभागेनेत्यत्रअह्नश्चतुर्थो यामः। तस्य भागः त्रिपादघटिकान्यूनार्धांशः तेन। अन्यथा अर्धाधिकमुहूर्तेनेति पूर्वोक्तविरोधः प्रसज्येत ॥ १९ ॥ महाबला इति श्लोके तपसो विघ्नकारिण इत्युक्त्या राक्षसहननं तपोविघ्नशान्त्यर्थमिति दर्शितं ॥ २० ॥ राक्षसा इत्यर्धं ॥ २१ ॥ तत इत्यर्धं ॥ बाला मूर्खा। "मूर्खेऽर्भकेपि बालः स्यात्" इत्यमरः ॥ २२—२३ ॥ एनं रामं। गृह्यतां मृग इति शेषः ॥ २४—२५ ॥ निष्क्रान्त इति। क्रूरत्वान्निष्क्रान्तिकारणानुक्तिः। अतएवाह काम-

स० कर्णश्चनासाचकर्णनासं। पुनःकर्णश्चनासाचकर्णनासं। कर्णनासंचकर्णनासंचकर्णनासे। अतःप्राण्यङ्गताप्रयुक्तैकवद्भावाभावः कथमितिशङ्कानवकाशः ॥ १७ ॥ शि० अयंमृगः नः आश्रमः खेलनाश्रयोभविष्यति ॥ २४ ॥

[पा०] १ ङ. च. छ. झ. ट. मृगाकुलं. २ इदमर्धं क. ख. ङ.—ट. पाठेषुदृश्यते. ख. दूषणश्चहतोमूर्खस्त्रिशिराः. ३ क. ख. घ. च. छ. ज. ट. सारामम्रवीद्भृष्टावैदेही. ङ. झ. ञ. सारामम्रवीद्दृष्ट्वावैदेही. ४ ङ. झ. ट. अयंमनोहरः ५ ङ.—ट. धनुष्पाणिर्मृगंतमनु.

जग्राह तरसा सीतां ग्रहः खे रोहिणीमिव ॥ त्रातुकामं ततो युद्धे हत्वा गृध्रं जटायुषम् ॥ २७ ॥
प्रगृह्य सीतां सहसा जगामाशु स रावणः ॥ २८ ॥
ततस्त्वद्भुतसंकाशाः स्थिताः पर्वतमूर्धनि ॥ सीतां गृहीत्वा गच्छन्तं वानराः पर्वतोपमाः ॥
ददृशुर्विस्मितास्तत्र रावणं राक्षसाधिपम् ॥ २९ ॥
[ततः शीघ्रतरं गत्वा तद्विमानं मनोजवम् ॥ आरुह्य सह वैदेह्या पुष्पकं स महाबलः ॥]
प्रविवेश ततो लङ्कां रावणो लोकरावणः ॥ ३० ॥
तां सुवर्णपरिक्रान्ते शुभे महति वेश्मनि ॥ प्रवेश्य मैथिलीं वाक्यैः सान्त्वयामास रावणः ॥ ३१ ॥
तृणवद्भाषितं तस्य तं च नैर्ऋतपुङ्गवम् ॥ अचिन्तयन्ती वैदेही अशोकवनिकां गता ॥ ३२ ॥
न्यवर्तत ततो रामो मृगं हत्वा महावने ॥ निवर्तमानः काकुत्स्थोऽदृष्ट्वा गृध्रं प्रविव्यथे ॥ ३३ ॥
गृध्रं हतं ततो दग्ध्वा रामः प्रियसखं पितुः ॥ मार्गमाणस्तु वैदेहीं राघवः सहलक्ष्मणः ॥
गोदावरीमन्वचरद्वनोद्देशांश्च पुष्पितान् ॥ ३४ ॥
आसेदतुर्महारण्ये कबन्धं नाम राक्षसम् ॥ ३५ ॥
ततः कबन्धवचनाद्रामः सत्यपराक्रमः ॥ ऋश्यमूकं गिरिं गत्वा सुग्रीवेण समागतः ॥ ३६ ॥
तयोः समागमः पूर्वं प्रीत्या हार्दोऽव्यजायत ॥ भ्रात्रा निरस्तः क्रुद्धेन सुग्रीवो वालिना पुरा ॥३७॥
इतरेतरसंवादात्प्रगाढः प्रणयस्तयोः ॥ ३८ ॥
रामस्य बाहुवीर्येण स्वराज्यं प्रत्यपादयत् ॥ वालिनं समरे हत्वा महाकायं महाबलम् ॥ ३९ ॥
सुग्रीवः स्थापितो राज्ये सहितः सर्ववानरैः ॥ रामाय प्रतिजानीते राजपुत्र्याश्च मार्गणम् ॥ ४० ॥
आदिष्टा वानरेन्द्रेण सुग्रीवेण महात्मना ॥ दश कोट्यः प्लवङ्गानां सर्वाः प्रस्थापिता दिशः ॥ ४१ ॥

न्दकः—" प्रियं पथ्यं च तथ्यं च वदेद्धर्मार्थमेव च । अश्राव्यमयशस्यं च परोक्षे कटु चोत्सृजेत् " इति ॥ २६ ॥ तरसा बलात्कारेण । ग्रहः अङ्गारक इति यावत् ॥ २७—२८ ॥ ततस्त्वित्यादिसार्धश्लोक एकान्वयः ॥ अद्भुतसंकाशाः अद्भुताकाराः ॥२९—३० ॥ सुवर्णपरिक्रान्ते सुवर्णानुलिप्ते ॥ ३१ ॥ तस्य रावणस्य । भाषितं तृणवत् । मत्वेति शेषः । तं च नैर्ऋतपुङ्गवं अचिन्तयन्ती वैदेही अशोकवनिकां गता । तत्रैव स्थितेत्यर्थः ॥ ३२ ॥ अदृष्ट्वेति च्छेदः । सीतामिति शेषः । सीतां गृध्रं चादृष्ट्वा प्रविव्यथ इत्यन्वयः ॥३३॥ गृध्रमित्यादिसार्धश्लोक एकान्वयः॥ ततो वैदेहीं मार्गमाणो राघवः पितुः प्रियसखं हतं गृध्रं दग्ध्वा गोदावरीं तद्वनोद्देशांश्चान्वचरत् । पुष्पितानित्यनेन पुष्पलोभेन किं सीताऽत्र गतेति मतिर्व्यज्यते ॥ ३४ ॥ आसेदतुरित्यर्धमेकं वाक्यं ॥ राघवाविति शेषः ॥३५—३६॥ तयोः रामसुग्रीवयोः । पूर्वं दर्शनात्प्रागेव । हार्दः समागमः मानसः संबन्धः । व्यजायत । मनसा परस्परं सख्यमाचकाङ्क्षाते इत्यर्थः । सुग्रीवस्य कुतः सख्यापेक्षेत्यत्र आह—भ्रात्रेति ॥ ३७ ॥ इतरेतरसंवादात् अन्योन्यप्रयोजनकथनात् प्रणयः । प्रगाढः अतिशयितः । अभूत् ॥ ३८ ॥ रामस्येति । अत्र सुग्रीव इति शेषः । सुग्रीवः रामस्य बाहुवीर्येण वालिनं हत्वा स्वराज्यं प्रत्यपादयत् समपादयदिति संबन्धः ॥३९॥ राज्ये स्थापितः सुग्रीवः सर्ववानरैः सहितोभूत् । रामायेति । सुग्रीव इति शेषः । प्रतिजानीते प्रतिज्ञातवान् ॥ ४० ॥ आदिष्टाः मार्गणायादिष्टाः दिशः प्रस्थापिताश्च ॥ ४१ ॥

ति० सुवर्णपरिष्कारे सुवर्णप्राकारे ॥ ३१ ॥ स० रामः स्वराज्यं स्वेनद्रव्येणसहितंचतद्राज्यंचेतितत् । राज्ञिमृतेसमरेस्वस्वामिकमितिस्वराज्यंवा । प्रत्यपादयत् दत्तवान् ॥ ३९ ॥

[पा०] १ ख. ङ. च. छ. झ. ञ. ट. पाठेष्विदंपद्यंदृश्यते. २ ङ. च. झ. ट. राक्षसेश्वरः. ३ झ. परिष्कारे. ४ ङ. झ. ञ. ट. सविव्यथे. ५ ङ. च. झ. ञ. ट. तदादृष्ट्वारामःप्रियतरं. ६ ङ. च. छ. झ. ट रामःस्वबाहु.

तेषां नो विप्रकृष्टानां विन्ध्ये पर्वतसत्तमे ॥ भृशं शोकाभितप्तानां महान्कालोत्यवर्तत ॥ ४२ ॥
भ्राता तु गृध्रराजस्य संपातिर्नाम वीर्यवान् ॥ समाख्याति स्म वसतिं सीताया रावणालये ॥४३॥
सोहं शोकपरीतानां दुःखं तज्ज्ञातिनां नुदन् ॥ आत्मवीर्यं समास्थाय योजनानां शतं प्लुतः ॥४४॥
तत्राहमेकामद्राक्षमशोकवनिकां गताम् ॥ कौशेयवस्त्रां मलिनां निरानन्दां दृढव्रताम् ॥ ४५ ॥
तया समेत्य विधिवत्पृष्ट्वा सर्वमनिन्दिताम् ॥ अभिज्ञानं च मे दत्तमर्चिष्मान्स महामणिः ॥४६॥
[मां दृष्ट्वा मैथिली हृष्टा प्रशंसे च जीवितम् ॥ ४७ ॥
रावणस्य मनःकान्तामशोकवनिकां तदा ॥ विध्वंसयित्वा समरे हत्वा राक्षसपुङ्गवान् ॥ ४८ ॥
लङ्कां च भस्मसात्कृत्वा प्रहृष्टेनान्तरात्मना ॥] अभिज्ञानं मणिं लब्ध्वा चरितार्थोऽहमागतः ॥४९॥
मया च पुनरागम्य रामस्याक्लिष्टकर्मणः ॥ अभिज्ञानं मया दत्तमर्चिष्मान्स महामणिः ॥ ५० ॥
श्रुत्वा तु मैथिलीं हृष्टस्त्वाशंसे च जीवितम् ॥ जीवितान्तमनुप्राप्तः पीत्वाऽमृतमिवातुरः ॥ ५१ ॥
उद्योजयिष्यन्नुद्योगं दध्रे कामं वधे मनः ॥ जिघांसुरिव लोकान्ते सर्वाल्लोकान्विभावसुः ॥ ५२ ॥
ततः समुद्रमासाद्य नलं सेतुमकारयत् ॥ अतरत्कपिवीराणां वाहिनी तेन सेतुना ॥ ५३ ॥
प्रहस्तमवधीन्नीलः कुम्भकर्णं तु राघवः ॥ लक्ष्मणो रावणसुतं स्वयं रामस्तु रावणम् ॥ ५४ ॥
स शक्रेण समागम्य यमेन वरुणेन च ॥ महेश्वरस्वयंभूभ्यां तथा दशरथेन च ॥ ५५ ॥
तैश्च दत्तवरः श्रीमानृषिभिश्च समागतः ॥ सुरर्षिभिश्च काकुत्स्थो वरान्लेभे परन्तपः ॥ ५६ ॥
स तु दत्तवरः प्रीत्या वानरैश्च समागतः ॥ पुष्पकेण विमानेन किष्किन्धामभ्युपागमत् ॥ ५७ ॥
तं गङ्गां पुनरासाद्य वसन्तं मुनिसन्निधौ ॥ अविघ्नं पुष्ययोगेन श्वो रामं द्रष्टुमर्हसि ॥ ५८ ॥

तेषां स्थापितानां विप्रकृष्टानां बहुकालविलम्बितानां । यद्वा स्वयंप्रभाबिले प्रविष्टतया दूरं गतानां ॥४२-४३॥ ज्ञातिनामिति नकारान्तत्वमार्षं । प्लुतः समुद्र इति शेषः ॥४४॥ तत्र रावणालये ॥ ४५ ॥ अनिन्दितां सीतां । सर्वं वृत्तान्तं पृष्ट्वा । प्रच्छिर्द्विकर्मकः । पृष्ट्वा स्थिताय मे मह्यं । सः प्रसिद्धः । महामणिः अभिज्ञानं । दत्तं ॥४६—४९॥ क्रियाभेदान्मयाशब्दद्वयं प्रयुक्तं॥५०॥ जीवितमाशंसे ततः पूर्वं जीविते निराशः स्थित इति व्यक्तं । जीवितान्तं प्राप्तः, आतुरः अमृतं पीत्वा यथा जीवितमाशास्ते तथेत्यर्थः ॥ ५१ ॥ उद्योगमुद्योजयिष्यन् उद्योगं कुर्वन् । ओदनपाकं पचतीतिवत् । विभावसुः अग्निः ॥ ५२ ॥ नलं सेतुमकारयत् नलेन सेतुमकारयत् ॥ ५३—५७ ॥ पुनर्गङ्गामासाद्य मुनिसन्निधौ भरद्वाजसमीपे अध्यवसन्तं तं अविघ्नं यथा भवति तथा श्वः पुष्ययोगेन द्रष्टुमर्हसि । पुष्ययोगलाभार्थं अद्य गङ्गातीरे रामः स्थित इति

स० यद्वा ज्ञातं भावेक्तः ज्ञानं संपातिमुखतएषामस्तितेज्ञातिनस्तेषां । शि० तज्ज्ञातिनां संपातिवचनेनसीतास्थितिज्ञानवतां । दुःखं अतिदुर्गमलङ्कायां सीतायाःस्थितत्वेनसीतादर्शनाशक्यताज्ञानजनितखेदंनुदन् । एतेनज्ञातिनामित्यत्रदीर्घाभावआर्षइतिभट्टाद्युक्तिश्चिन्त्या ॥ ४४ ॥ रामानु० मेमया समहामणिः रामदत्ताभिज्ञानस्याङ्गुलीयकरूपत्वेपितद्युक्तमणिप्राधान्यान्मणिशब्दप्रयोगः ॥ ४६ ॥ स० आतुरोरोगी । जीवितान्तं आसन्नप्राणविनाशमनुप्राप्तः अमृतं मृतिहरमौषधंपीत्वायथाजीवनं लब्धमितिशंसतितथेत्यर्थः ॥ ५१ ॥ ति० उद्युज्यतेजयोऽनेनेत्युद्योगं बलं । तत् उद्योजयिष्यन् प्रोत्साहयिष्यन् । स० लङ्कावधे तत्संहारे । लङ्कामवतीतितदवोरावणः तस्य धं बन्धनंतस्मिन्वा । 'धंबन्धने'इतिविश्वः ॥ ५२ ॥ ति० मुनिसंनिधावद्यवसन्तंश्वोद्रष्टुमर्हसि । आश्विनशुक्लचतुर्दश्यामश्विनीतद्वर्षे इतिषष्ठ्यांपुष्यस्यसंभवः । पूर्णिमायामश्विन्यामप्येकक्षेक्षयेणवा ॥ ५८ ॥ इत्येकोनत्रिंशदुत्तरशततमः सर्गः ॥ १२९ ॥

[पा०] १ ङ.—ट. वसतींसीतांरावणमन्दिरे. २ क. ङ.—ट. अभिज्ञानंमयादत्तंरामनामाङ्गुलीयकं. ३ मांदृष्ट्वेत्यादयः प्रहृष्टेनान्तरात्मनेत्यन्ताः श्लोकाः क. च. ज. पाठेषुदृश्यन्ते. ४ ग.—छ. झ. ञ. ट. तांमैथिलीं. ५ ख. पीत्वौषधमिवा. ६ क. ख. ग. ङ.—ञ. लङ्कावधेमनः. ७ ङ. च. छ. झ. ट. समागतैः. ८ क. घ. ज. मुनिभिश्च. ९ क. ग. ङ.—ञ. तांगङ्गां.

ततस्तु सत्यं हनुमद्वचो महन्निशम्य हृष्टो भरतः कृताञ्जलिः ॥
उवाच वाणीं मनसः प्रहर्षिणीं चिरस्य पूर्णः खलु मे मनोरथः ॥ ५९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनत्रिंशदुत्तरशततमः सर्गः ॥ १२९ ॥

त्रिंशदुत्तरशततमः सर्गः ॥ १३० ॥

हनुमतोरामागमनंश्रुतवताभरतेन शत्रुघ्नंप्रत्ययोध्यामार्गशोधननगरालंकरणगणिकागणतूर्यसेवादिसहितनागरिकजनप्रत्युद्गमनादिचोदनचोदना ॥ १ ॥ कौसल्यादिभिः सकलनागरिकैश्चसह सवाद्यघोषंप्रत्युद्गतवताभरतेन रामागमनानुपलंभखेदेन हनुमन्तंप्रति तत्रहेतुप्रश्ने तेनतंप्रति तदागमनचिह्ननिवेदनसमयसमागतविमानप्रदर्शनम् ॥ २ ॥ पुष्पकावलोकनहर्षेणसमुद्भुष्यत्सुपौरनिकरेषु भरतेचदूरादभिवन्दमाने रामेण स्वाज्ञयाधरणितलमवतीर्णेपुष्पके भरतस्यसमारोपणम् ॥ ३ ॥ तथा पुनर्निजचरणप्रणामिनोभरतस्य सहर्षपरिष्वङ्गः ॥ ४ ॥ भरतेन लक्ष्मणसमागमपूर्वकं सीताचरणप्रणामः ॥ ५ ॥ शत्रुघ्नेन सीतारामलक्ष्मणचरणप्रणामः ॥ ६ ॥ रामेण कौसल्यादिमातृप्रभृतिपादाभिवादनम् ॥ ७ ॥ रामेण पुनर्विमानेनभरताश्रममेत्य कुबेरंप्रति पुष्पकप्रेषणम् ॥ ८ ॥

श्रुत्वा तु परमानन्दं भरतः सत्यविक्रमः ॥ हृष्टमाज्ञापयामास शत्रुघ्नं परवीरहा ॥ १ ॥
दैवतानि च सर्वाणि चैत्यानि नगरस्य च ॥ सुगन्धमाल्यैर्वादित्रैरर्चन्तु शुचयो नराः ॥ २ ॥
सूताः स्तुतिपुराणज्ञाः सर्वे वैतालिकास्तथा ॥ सर्वे वादित्रकुशला गणिकाश्चापि संघशः ॥
अभिनिर्यान्तु रामस्य द्रष्टुं शशिनिभं मुखम् ॥ ३ ॥
भरतस्य वचः श्रुत्वा शत्रुघ्नः परवीरहा ॥ विष्टीरनेकसाहस्राश्चोदयामास वीर्यवान् ॥ ४ ॥
समीकुरुत निम्नानि विषमाणि समानि च ॥ स्थलानि च निरस्यन्तां नन्दिग्रामादितः परम् ॥ ५ ॥
सिञ्चन्तु पृथिवीं कृत्स्नां हिमशीतेन वारिणा ॥ ततोऽभ्यवकिरन्त्वन्ये लाजैः पुष्पैश्च सर्वशः ॥ ६ ॥
समुच्छ्रितपताकास्तु रथ्याः पुरवरोत्तमे ॥ शोभयन्तु च वेश्मानि सूर्यस्योदयनं प्रति ॥ ७ ॥
स्रग्दामभिर्मुक्तपुष्पैः सुगन्धैः पञ्चवर्णकैः ॥ राजमार्गमसंबाधं किरन्तु शतशो नराः ॥ ८ ॥

भावः ॥ ५८ ॥ सत्यं अविरुद्धभङ्ग्या सत्यत्वेन ज्ञातं । मनोरथ इत्यनन्तरमितिकरणं द्रष्टव्यं ॥५९॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनत्रिंशदुत्तरशततमः सर्गः ॥ १२९ ॥

परमानन्दं परमानन्दकरं । वच इति शेषः ॥१॥ चैत्यानि चतुष्पथमण्डपान् । अर्चन्तु अर्चयन्तु ॥२॥ सूता इत्यादिसार्धश्लोक एकान्वयः ॥ सूताः स्तुतिशीलाः । वैतालिकाः बन्दिनः ॥ ३ ॥ भरतस्येत्यादिश्लोकपञ्चकमेकान्वयं ॥ विष्टीः भृतिं विना कर्मकरान् । नन्दिग्रामादितः परं । अयोध्यापर्यन्तमित्यर्थः । अन्ये पुरुषाः हिमवच्छीतेन वारिणा सिञ्चन्तु । ततः सेचनानन्तरं लाजादिभिः किरन्तु । रथ्याः समुच्छ्रितपताकाः कुर्वन्त्विति शेषः । सूर्यस्योदयनं प्रति सूर्यस्योदयमारभ्य । यावत्सूर्योदयमिति वा । स्रजः मालिकाः तासां दाममिः पङ्क्तिभिः । मुक्तपुष्पैः असूत्रबद्धपद्मकुवलयादिमिश्च वेश्मानि शोभयन्तु । सुगन्धैः पञ्चवर्णकैः पञ्चविधवर्णद्रव्यचूर्णैः । राजमार्गं किरन्तु । राजमार्गे वर्णद्रव्यचूर्णैः नानाविधलतापद्मादिचित्ररेखाः कुर्वन्त्वित्यर्थः ॥ ४—८ ॥

स० परमानन्दं परमआनन्दोजन्यत्वेनयस्यतत् वचइतिशेषः ॥ १ ॥ ति० विरलपुष्पबन्धाः स्रजः । निबिडपुष्पबन्धं दाम ।

[पा०] १ ख. ङ. च. छ. झ. ञ. ट. ततस्सवाक्यैर्मधुरैर्हनूमतोनिशम्य. २ ज. देवालयाश्चसर्वाणिचैत्यानिनगराणिच. ३ ज. शशिनिभाननं. ४ घ. च. छ. स्रग्दाममुक्तपुष्पैश्चसुवर्णरजतैरपि. ख. ङ. झ. ट. स्रग्दाममुक्तपुष्पैश्चसुवर्णैः. ज. स्रग्दाममुक्तपुष्पैश्चसुगन्धैः.

राजदारास्तथाऽमात्याः सैन्याः सेनागणाङ्गनाः ॥ ब्राह्मणाश्च सराजन्याः श्रेणीमुख्यास्तथा गणाः॥९॥
धृष्टिर्जयन्तो विजयः सिद्धार्थो ह्यर्थसाधकः ॥ अशोको मन्त्रपालश्च सुमन्त्रश्चापि निर्ययुः ॥
मत्तैर्नागसहस्रैश्च शातकुम्भविभूषितैः ॥ १० ॥
अपरे हेमकक्ष्याभिः सगजाभिः करेणुभिः ॥ निर्ययुस्तुरगाक्रान्तै रथैश्च सुमहारथाः ॥ ११ ॥
शक्त्यृष्टिप्रासहस्तानां सध्वजानां पताकिनाम् ॥ तुरगाणां सहस्रैश्च मुख्यैर्मुख्यनरान्वितैः ॥
पदातीनां सहस्रैश्च वीराः परिवृता ययुः ॥ १२ ॥
ततो यानान्युपारूढाः सर्वा दशरथस्त्रियः ॥ कौसल्यां प्रमुखे कृत्वा सुमित्रां चापि निर्ययुः ॥१३॥
कैकेय्या सहिताः सर्वा नन्दिग्राममुपागमन् ॥ १४ ॥
कृत्स्नं च नगरं तत्तु नन्दिग्राममुपागमत् ॥ १५ ॥
अश्वानां खुरशब्देन रथनेमिस्वनेन च ॥ शङ्खदुन्दुभिनादेन संचचालेव मेदिनी ॥ १६ ॥
द्विजातिमुख्यैर्धर्मात्मा श्रेणीमुख्यैः सनैगमैः ॥ माल्यमोदकहस्तैश्च मन्त्रिभिर्भरतो वृतः ॥ १७ ॥
शङ्खभेरीनिनादैश्च बन्दिभिश्चाभिवन्दितः ॥ आर्यपादौ गृहीत्वा तु शिरसा धर्मकोविदः ॥ १८ ॥
पाण्डुरं छत्रमादाय शुक्लमाल्योपशोभितम् ॥ शुक्ले च वालव्यजने राजार्हे हेमभूषिते ॥ १९ ॥
उपवासकृशो दीनश्चीरकृष्णाजिनाम्बरः ॥ भ्रातुरागमनं श्रुत्वा तत्पूर्वं हर्षमागतः ॥
प्रत्युद्ययौ ततो रामं महात्मा सचिवैः सह ॥ २० ॥
समीक्ष्य भरतो वाक्यमुवाच पवनात्मजम् ॥ २१ ॥
कच्चिन्न खलु कापेयी सेव्यते चलचित्तता ॥ न हि पश्यामि काकुत्स्थं राममार्यं परन्तपम् ॥

अथ परेद्युः प्रातः रामभक्त्यतिशयेन सर्वेषां निर्गमनं दर्शयति—राजदारा इत्यादिना ॥ श्रेणीमुख्याः श्रेणीमुखाः । तथा गणाः । श्रेणी श्रेणय इति यावत् । अत्र श्लोके निर्ययुरिति वक्ष्यमाणमनुषज्यते ॥ ९ ॥ अमात्यान्विशिष्य दर्शयति—धृष्टिरित्यादिना ॥ सार्धश्लोक एकान्वयः । अत्र धृष्ट्यादयो गजारूढा ययुरित्यर्थः ॥ १० ॥ अपरे राजान्तरङ्गाः पुरुषाः करेणुभिर्निर्ययुः ॥ ११ ॥ शक्तीत्यादिसार्धश्लोक एकान्वयः ॥ उक्तविशेषणानां तुरगाणां सहस्रैः पदातीनां सहस्रैश्च परिवृता वीरा ययुः ॥ १२ ॥ प्रमुखे अग्रे ॥१३॥ कैकेय्येति । अत्र भरतेनोपेक्षयानाहूतत्वात् पश्चान्निर्गत्य कैकेय्या नन्दिग्रामप्राप्तिकाले साहित्यमुच्यते ॥ १४ ॥ कृत्स्नमित्यर्थः । अत्र नगरशब्देन तत्रत्यजना लक्ष्यन्ते ॥ १५ ॥ संचचाल कम्पितेव ॥ १६ ॥ अथोक्तपरिवारैः सह भरतस्य नन्दिग्रामान्निर्गमं दर्शयति—द्विजातिमुख्यैरित्यादिभिः सार्धैश्चतुर्भिः श्लोकैः ॥ ततो महात्मा भरतः सर्वैर्वृतः प्रत्युद्ययाविति वाक्यार्थः । सनैगमैः सवणिग्भिः । " वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक् " इत्यमरः । मन्त्रिभिः वसिष्ठादिभिः । सचिवैः सुमन्त्रादिभिः । आर्यपादौ रामपादुके । हेमभूषिते हेमदण्डभूषिते । तत्पूर्वं श्रवणादिहर्षमागतः । श्रवणात्पूर्वं तु नास्य हर्षोभूदित्यर्थः ॥ १७—२० ॥ समीक्ष्येत्यर्धं ॥ समीक्ष्य समन्ताद्रामगमनं निरीक्ष्य ॥ २१ ॥ कच्चिदित्यादि सार्धश्लोक एकान्वयः ॥ कच्चिदिति प्रश्ने ।

मुक्तपुष्पाणि बन्धनरहितानि पुष्पाणि ॥ ८ ॥ स० सेनाङ्गनागणाः सपतिकयोषिज्जनाः सुवासिन्यइतियावत् । सेनोपयुक्तानपत्याङ्गनासंघाइतिवा । 'वंध्याभार्यावहुप्रदोराजा' इत्यादेः । सेनागणाः अङ्गनागणा इतिवा ॥ ९ ॥ स० रामपादौ तच्चिह्नितत्वात्तत्त्वेनव्यपदेशः पादुके ॥ १८ ॥ स० प्रत्युद्ययौ अनेनेदृशींदशामापन्नस्यापिभरतस्यतस्यागमनवार्तैवश्रमशामिकेतिद्योत्यते ॥ २० ॥ स० 'यावन्नदूरयातोस्मिक्षिप्रमागन्तुमर्हसि'इत्यत्र भारतेचवनपर्वणि 'लक्षयित्वेङ्गितंसर्वंप्रियंतस्मैनिवेद्यच । वायुपुत्रेपुनः

[पा०] १ अयंश्लोकः क.—ट. पाठेषु अभिनिर्यान्तुरामस्येत्यर्धात्पूर्वंदृश्यते. २ क.—ट. सेनाङ्गनागणाः. ३ ङ. च. ञ. ञ. ट. सध्वजैःसुविभूषितैः. ४ क. ङ. च. छ. झ. मुख्यतरान्वितैः. ५ ठ. रामपादौ.

कच्चिन्न खलु दृश्यन्ते वानराः कामरूपिणः ॥ २२ ॥
अथैवमुक्ते वचने हनुमानिदमब्रवीत् ॥ अर्थं[1] विज्ञापयन्नेव भरतं सत्यविक्रमम् ॥ २३ ॥
सदाफलान्कुसुमितान्वृक्षान्प्राप्य मधुस्रवान् ॥ भरद्वाजप्रसादेन मत्तभ्रमरनादितान् ॥ २४ ॥
तस्य चैष वरो दत्तो वासवेन परन्तप ॥ ससैन्यस्य तथाऽऽतिथ्यं कृतं सर्वगुणान्वितम् ॥ २५ ॥
निस्स्वनः श्रूयते भीमः प्रहृष्टानां वनौकसाम् ॥ मन्ये वानरसेना सा नदीं तरति गोमतीम् ॥२६॥
रजोवर्ष समुद्भूतं पश्य वालुकिनीं प्रति ॥ मन्ये सालवनं रम्यं लोलयन्ति प्लवङ्गमाः ॥ २७ ॥
तदेतदृश्यते दूराद्विमलं चन्द्रसन्निभम् ॥ विमानं पुष्पकं दिव्यं मनसा ब्रह्मनिर्मितम् ॥
रावणं बान्धवैः सार्धं हत्वा लब्धं महात्मना ॥ २८ ॥
तरुणादित्यसंकाशं विमानं रामवाहनम् ॥ धनदस्य प्रसादेन दिव्यमेतन्मनोजवम् ॥ २९ ॥
एतस्मिन्भ्रातरौ वीरौ वैदेह्या सह राघवौ ॥ सुग्रीवश्च महातेजा राक्षसश्च विभीषणः ॥ ३० ॥
ततो हर्षसमुद्भूतो निस्स्वनो दिवमस्पृशत् ॥ स्त्रीबालयुववृद्धानां रामोऽयमिति कीर्तिते ॥ ३१ ॥
रथकुञ्जरवाजिभ्यस्तेऽवतीर्य महीं गताः ॥ ददृशुस्तं विमानस्थं नराः सोममिवाम्बरे ॥ ३२ ॥
प्राञ्जलिर्भरतो भूत्वा प्रहृष्टो राघवोन्मुखः ॥ स्वागतेन यथार्थेन ततो राममपूजयत् ॥ ३३ ॥
मनसा ब्रह्मणा सृष्टे विमाने भरताग्रजः ॥ रराज पृथुदीर्घाक्षो वज्रपाणिरिवापरः ॥ ३४ ॥
ततो विमानाग्रगतं भरतो भ्रातरं तदा ॥ ववन्दे प्रयतो[2] रामं मेरुस्थमिव भास्करम् ॥ ३५ ॥
ततो रामाभ्यनुज्ञातं तद्विमानमनुत्तमम् ॥ हंसयुक्तं महावेगं निष्पपात[3] महीतले ॥ ३६ ॥

सेव्यते । त्वयेति शेषः । तत्र हेतुमाह—न हीति । रामस्य दूरागमनेपि नासीरचारिणः कपयो दृश्येरन् तेषां कामरूपित्वेन स्वरूपेणादर्शनेपि रूपान्तरेण वा दृश्येरन् । तदपि नास्तीत्यर्थः ॥ २२ ॥ अर्थं विलम्बहेतुं । " अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने । व्यवहारे धने शास्त्रे वस्तुहेतुनिवृत्तिषु "इति वैजयन्ती ॥ २३ ॥ भरद्वाजप्रसादेन सदाफलानिति संबन्धः । प्राप्य वानराः हृष्यन्तीति च शेषः ॥२४॥ ससैन्यस्य रामस्य वासवेन एष वरो दत्तः अकालफलित्ववरो दत्तः । तथा सर्वगुणान्वितं आतिथ्यं मधुस्रवत्वरूपं भरद्वाजेन कृतं । अतोऽकालफलित्वं मधुस्रवत्वं च वनस्य युक्तमित्यर्थः ॥ २५ ॥ एवं विलम्बहेतुमुक्त्वा समीपागमनचिह्नं दर्शयति—निस्स्वन इति ॥ इदानीं वानरसेना गोमतीं नदीं तरतीति मन्ये । यस्मात् भीमो निस्स्वन इति भावः ॥ २६ ॥ ततोपि सन्निकर्षमाह—रज इति ॥ समुद्भूतं रजोवर्षं पश्य । तस्माद्वालुकिनीं नदीं प्रति यातीति मन्ये ॥ क्षिप्रं वानरसेनाया अनागमने हेतुमाह—मन्य इति ॥ तस्मात्तस्याः विलम्बः ॥ २७ ॥ विमानं तु दृश्यत इत्याह—तदेतदिति ॥ पुष्पकं विमानं पुष्पकाख्यं विमानम् ॥ २८ ॥ दिव्यं मनोजवं तरुणादित्यसंकाशं रामवाहनमेतद्विमानं । प्रसादेन धनदस्य ब्रह्मप्रसादेन धनदस्य लब्धमित्यर्थः । " परेण तपसा लेभे यत्कुबेरः पितामहात् " इति सुन्दरकाण्डोक्तेः ॥ २९ ॥ एतस्मिन्निति ॥ आसत इति शेषः ॥ ३०—३२ ॥ यथार्थेन स्वागतेन चतुर्दशे वर्षे पूर्णे अवश्यमागमिष्यामीति प्रतिज्ञानुसारिणा स्वागमनेनेत्यर्थः । अपूजयत् अश्लाघयत् ॥ ३३—३६ ॥

प्राप्तेनन्दिग्राममुपागमत् ' इत्युक्तेः पाद्मेपि ' पुनरागत्यकाकुत्स्थंहनुमान्त्सर्वमब्रवीत् ' इत्युक्तेश्चमध्येपुनारामंगत्वोक्त्वाचभरतरीतिं पुनर्हनुमान्भरतमुपागतइतिकथा 'कच्चिन्नखलुकापेयी' इत्यतःपूर्वमनुसंधेया । कापेयी कपिसंबन्धिनीचलचित्तता । नसेव्यतेकचित् । कुतस्तवशङ्क्येत्यतआह—नहीति । पश्चादायातुनश्चार्यः किंकपयोपिनोपयाताःपुरतइतिपृच्छति—**कच्चिदिति** ॥ २२ ॥ **ती०** मनसाब्रह्मनिर्मितं विश्वकर्मणामनसाब्रह्मार्थंनिर्मितं । **ति०** ब्रह्मनिर्मितं ब्रह्मणा स्रष्टृत्वसाम्याद्विश्वकर्मणा ॥ २८ ॥

[पा०] १ ङ. ञ. ञ. ट. अर्थ्यं. २ ख. ग. ङ. च. छ. झ. ञ. रिवामरः. ३ ख. घ. ङ. च. ज.—ट. प्रणतो. ४ क. ख. ग. च.—ट. निपपात.

आरोपितो विमानं तद्भरतः सत्यविक्रमः ॥ राममासाद्य मुदितः पुनरेवाभ्यवादयत् ॥ ३७ ॥
तं समुत्थाप्य काकुत्स्थश्चिरस्याक्षिपथं गतम् ॥ अङ्के भरतमारोप्य मुदितः परिषस्वजे ॥ ३८ ॥
ततो लक्ष्मणमासाद्य वैदेहीं[1] चाभ्यवादयत् ॥ अभिवाद्य ततः प्रीतो भरतो नाम चाब्रवीत् ॥३९॥
सुग्रीवं केकयीपुत्रो जाम्बवन्तं तथाऽङ्गदम् ॥ मैन्दं च द्विविदं नीलमृषभं परिषस्वजे ॥ ४० ॥
सुषेणं च नलं चैव गवाक्षं गन्धमादनम् ॥ शरभं पनसं चैव भरतः परिषस्वजे ॥ ४१ ॥
ते कृत्वा मानुषं रूपं वानराः कामरूपिणः ॥ कुशलं पर्यपृच्छंस्ते प्रहृष्टा भरतं तदा ॥ ४२ ॥
अथाब्रवीद्राजपुत्रः सुग्रीवं वानरर्षभम् ॥ परिष्वज्य महातेजा भरतो धर्मिणां वरः ॥ ४३ ॥
त्वमस्माकं चतुर्णां तु भ्राता सुग्रीव पञ्चमः ॥ सौहृदाज्जायते मित्रमपकारोरिलक्षणम् ॥ ४४ ॥
विभीषणं च भरतः सान्त्ववाक्यमथाब्रवीत् ॥ दिष्ट्या त्वया सहायेन कृतं कर्म सुदुष्करम् ॥४५॥
शत्रुघ्नश्च तदा राममभिवाद्य सलक्ष्मणम् ॥ सीतायाश्चरणौ पश्चाद्विनयादभ्यवादयत् ॥ ४६ ॥

आरोपित इति । अत्र भरतस्य विमानारोपणं सर्वेषां प्रदर्शनार्थमिति बोध्यं ॥ ३७—३८ ॥ लक्ष्मणमासाद्य कृतनमस्कारं लक्ष्मणमालिङ्गनेन संभाव्य । इदं च लक्ष्मणस्य कनिष्ठत्वात् । लक्ष्मणेन चिकीर्षितो नमस्कारो रामसन्निधौ भरतेन प्रतिषेधित इति चाहुः । वैदेहीं चाभ्यवादयत् । चकारो रामनमस्कारं समुच्चिनोति । " न संख्ये भरतानुजः "इत्युक्तेः । " सीतामादाय गच्छ त्वमग्रतो भरताग्रज "इत्यत्र बहुव्रीहिरित्युक्तं । न च वैपरीत्यं शङ्क्यम् । 'पुष्ये जातस्तु भरतः, सार्पे जातौ तु सौमित्री' इति जन्मक्रमोक्तेः । पायसप्रदाने विवाहे च प्राथम्यं तत्र परिहृतं । लक्ष्मणासादनानन्तरं सीतानमस्काराभिधानात् सीता तारादिभिः सह रामसमीप एव किंचिदन्यत्र स्थितेत्यवगम्यते ॥ ३९—४१ ॥ मानुषं रूपं कृत्वा स्थिता इति शेषः ॥ ४२—४६ ॥

ति० लक्ष्मणमासाद्य वन्दमानंलक्ष्मणंपरिष्वङ्गादिनासंभाव्य । 'अन्येद्युःपाञ्चजन्यात्माकैकेय्यांभरतोऽभवत् । तदन्येद्युःसुमित्रायामनन्तात्माचलक्ष्मणः । सुदर्शनात्माशत्रुघ्नोद्वौजातौयुगपत्प्रिये ।' इतिपाद्मेशिवोक्तेः । वैदेहीं अभ्यवादयत् अभ्यवन्दत् । परेतु—यद्यपिलक्ष्मणोभरतात्कनिष्ठोवयसा । स्पष्टंचेदंजन्मप्रकरणे । तथापिज्येष्ठानुवर्तनेनस्वापेक्षयाऽधिकगुणत्वेनस्वव्यवहारेण ज्येष्ठानुवृत्तिरेवंकर्तव्येतिभरतंप्रत्युपदेशदानेनचगुरुत्ववुद्ध्यातस्यनतिरुचितैव । किंच कौसल्यायैप्रथमंदत्तपायसांशजलाल्लक्ष्मणस्य ज्येष्ठत्वंततोहिकैकेय्यैपायसार्धदानंतदंशजश्चशत्रुघ्नइतिसएवभरतात्कनिष्ठः । अतएववैदेहींचेतिचकारः स्वरसतःसंगच्छते । अतएवशत्रुघ्नकृतोलक्ष्मणनमस्कारउपपद्यते । तयोर्युगपदुत्पन्नत्वादित्याहुः । स० ततः रामनमनानन्तरं । लक्ष्मणं आसाद्य प्राप्य । सीतांचासाद्यनामच भरतोऽहंभोअभिवादयामीतिस्वनामाब्रवीत् । अथाभ्यवादयत् ननाम । अत्रसंप्रदायद्वयं । तथाहि । भरतोज्येष्ठः कनिष्ठोलक्ष्मणइति वैपरीत्येनचेति । लक्ष्मणआसाद्यस्वयंतेनसत्कृतस्तमालिङ्ग्य अथवैदेहीमभ्यवादयत् । 'अन्येद्युः पाञ्चजन्यात्माकैकेय्यांभरतोभवत् । तदन्येद्युः सुमित्रायामनन्तात्मासलक्ष्मणः । सुदर्शनात्माशत्रुघ्नोद्वौजातौयुगपत्प्रिये' इतिपाद्मेशिववचनात् । 'ततोदाशरथिर्वीरोधर्मज्ञोलोकविश्रुतः । भरतोलक्ष्मणश्चैवशत्रुघ्नश्चमहाबलः' इतिकूर्मपुराणेलक्ष्मणात्प्राग्भरतग्रहणाच्चात्रापितत्रत. त्रभरतज्यैष्ठ्यस्यस्पष्टप्रतिभानाच्चभरतज्यैष्ठ्यंकेचिन्मन्वते । अन्येतु लक्ष्मणंवैदेहींचासाद्याभ्यवादयदित्यन्वयेविनामूलपीडांलक्ष्मणज्यैष्ठ्यावगतेरुदाहृतपुराणादेस्तदन्येद्युरित्यस्यएतदन्यत्वंतस्यैवतदन्यत्वमेतस्यैतित्तत्पूर्वदिनस्यापितत्परेद्युश्शब्दवाच्यतासंभवात् । एतावद्राघवकीर्तिहेतुत्वात्कैकेय्यास्तत्पुत्रत्वेनप्रथमतउक्तिसंभवाच्च । पायससंविभागेनापिलक्ष्मणज्यैष्ठ्यस्यैवसंभवयुक्तिकत्वात् । भरतस्यादितोग्रहणंतुक्वाचित्कमितिबहुलस्थललक्ष्मणप्रागुक्तिपर्यावर्तनचतुरैर्भरतज्यैष्ठ्यवादिभिरनायासेनसमाधातुंशक्यंनवयंयतामहेतत्रेतिपायसस्योदरप्रवेशविवक्षयायुगपदित्युक्त्युपपत्तेरितिचमन्यन्ते । अत्रवक्तव्यं । प्रकरणानुरोधेनास्माभिःपूर्वंव्याख्यातमनुसन्धेयम् । शि० भरतोलक्ष्मणमासाद्य अभ्यवादयत् लक्ष्मणेनप्रणाममकारयत् । हेतुमतिणिच् । अथवैदेहीमासाद्य अभ्यवादयत् अवन्दत । अत्रस्वार्थेणिच् । उभयार्थलाभस्तुशब्दावृत्त्या ॥ ३९ ॥ ति० पञ्चमोभ्राता भ्रातृविषयकपञ्चत्वसंख्यापूरणः । सौहृदात् तत्पूर्वकोपकारात् ॥ ४४ ॥

[पा०] १ क.—ङ. छ. झ. ट. वैदेहींचपरंतपः. २ ङ.—ट. अथाभ्यवादयत्प्रीतो. ३ ज. सान्त्वयन्वाक्यमब्रवीत्. ४ क. घ. ज. पश्चाद्वन्देविनयान्वितः. ङ. च. छ. झ. ञ. ट. वीरोविनयादभ्यवादयत्.

रामो मातरमासाद्य विषण्णां शोककर्शिताम् ॥ जग्राह प्रणतः पादौ मनो मातुः प्रसादयन् ॥४७॥
अभिवाद्य सुमित्रां च कैकेयीं च यशस्विनीम् ॥ स मातृश्च ततः सर्वाः पुरोहितमुपागतम् ॥४८॥
स्वागतं ते महाबाहो कौसल्यानन्दवर्धन ॥ इति प्राञ्जलयः सर्वे नागरा राममब्रुवन् ॥ ४९ ॥
तान्यञ्जलिसहस्राणि प्रगृहीतानि नागरैः ॥ व्याकोशानीव पद्मानि ददर्श भरताग्रजः ॥ ५० ॥
पादुके ते तु रामस्य गृहीत्वा भरतः स्वयम् ॥ चरणाभ्यां नरेन्द्रस्य योजयामास धर्मवित् ॥
अब्रवीच्च तदा रामं भरतः स कृताञ्जलिः ॥ ५१ ॥
एतत्ते रक्षितं राजन्राज्यं निर्यातितं मया ॥ अद्य जन्म कृतार्थं मे संवृत्तश्च मनोरथः ॥ ५२ ॥
यस्त्वां पश्यामि राजानमयोध्यां पुनरागतम् ॥ अवेक्षतां भवान्कोशं कोष्ठागारं पुरं बलम् ॥
भवतस्तेजसा सर्वं कृतं दशगुणं मया ॥ ५३ ॥
तथा ब्रुवाणं भरतं दृष्ट्वा तं भ्रातृवत्सलम् ॥ मुमुचुर्वानरा बाष्पं राक्षसश्च विभीषणः ॥ ५४ ॥
ततः प्रहर्षाद्भरतमङ्कमारोप्य राघवः ॥ ययौ तेन विमानेन ससैन्यो भरताश्रमम् ॥ ५५ ॥
भरताश्रममासाद्य ससैन्यो राघवस्तदा ॥ अवतीर्य विमानाग्रादवतस्थे महीतले ॥ ५६ ॥
अब्रवीच्च तदा रामस्तद्विमानमनुत्तमम् ॥ वह वैश्रवणं देवमनुजानामि गम्यताम् ॥ ५७ ॥
ततो रामाभ्यनुज्ञातं तद्विमानमनुत्तमम् ॥ उत्तरां दिशमागम्य जगाम धनदालयम् ॥ ५८ ॥
[विमानं पुष्पकं दिव्यं संगृहीतं तु रक्षसा ॥ अगमद्धनदं वेगाद्रामवाक्यप्रचोदितम्] ॥ ५९ ॥
पुरोहितस्यात्मसमस्य राघवो बृहस्पतेः शक्र इवामराधिपः ॥
निपीड्य पादौ पृथगासने शुभे सहैव तेनोपविवेश राघवः ॥ ६० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिंशदुत्तरशततमः सर्गः ॥ १३० ॥

मनो मातुः प्रसादयन्निति पूर्वं त्वद्वाक्यं नाश्रौषमिति त्वया मनस्तापो न कार्य इत्येवं प्रसन्नामकरोदित्यर्थः ॥ ४७ ॥ यशस्विनीं । रावणजयस्य तन्मूलत्वात् । सर्वैः प्रशस्यमानामित्यर्थः । पुरोहितं वसिष्ठं । अभिवाद्येत्यनुषज्यते । अभिवाद्योपागमदित्यन्वयः ॥ ४८—५१ ॥ एतत्त इत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ हे राजन् मया रक्षितं न्यासत्वेन पालितं एतद्राज्यं ते निर्यातितं तुभ्यं निवेदितं । कोष्ठागारं धान्यशालां । दशगुणत्वं रामनिर्गमनकालिककोशापेक्षया ॥ ५२—५३ ॥ मुमुचुरिति । स्वकुलीनेष्वेतादृशभ्रातृवृत्त्यदर्शनादिति भावः ॥ ५४ ॥ भरताश्रमं नन्दिग्रामं ॥ ५५—५६ ॥ गम्यतामित्यनन्तरमितिकरणं बोध्यं ॥ ५७ ॥ दिशमागम्य दिशमुद्दिश्य ॥ ५८—५९ ॥ आत्मसमस्य स्वानुरूपस्य । पृथगासने तेन सहैवोपविवेश । पृथगासने युगपदे-

---

रामानु० कैकेय्यायशस्विनीमितिविशेषणंदेवकार्यहेतुभूतत्वादृषिःप्रायुङ्क्त । **ति०** यशस्विनीं अस्यामनोदार्ढ्येनराजानरकात्तारितः । देवाब्रह्मर्षयश्चपरमंसुखंप्राप्ताः । रामस्यचयशोजातं । अतएषायशस्विन्येव । **स०** यशस्विनीं भरतरूपसत्पुत्रप्रसवित्रीतिकीर्तिमतीं । 'सूत्वातुभरतंनैषागच्छेतनिरयानिति ।' इत्यादेः । स्वयशस्साधनीभूतेतियशस्विनीतिवा ॥ ४८ ॥ **ति०** पुरोहितस्येति । वसिष्ठपुत्रस्यसुयज्ञस्येत्यर्थः । आत्मसमस्येति पाठान्तरं । ब्रह्मज्ञत्वादितिभावः । वसिष्ठस्येत्यर्थइतितीर्थः ॥ ६० ॥ इतित्रिंशदुत्तरशततमःसर्गः ॥ १३० ॥

[**पा०**] १ ङ. ञ. ञ. ट. विवर्णां. २ क. ग. ङ. च. ञ. ञ. ट. प्रहर्षयन्. ३ ज. तदासर्वाःपुरोहितमुपागमत्. ४ ङ. च. छ. एतत्तेसकलंराज्यंन्यासंनिर्यातितं. ५ ङ. च. छ. ञ. ञ. ट. दिशमुद्दिश्य. ६ ख. ग. ङ. च. छ. ञ. ञ. ट. पाठेष्वयं श्लोकोदृश्यते. ७ ङ. ञ. ट. स्वात्मसखस्य. ८ क. ग. ङ. च. छ. ञ. ट. वीर्यवान्.

एकत्रिंशदधिकशततमः सर्गः ॥ १३१ ॥

भरतेनरामंप्रति हेतूक्तिपूर्वकंराज्यस्वीकारप्रार्थना ॥ १ ॥ तत्प्रार्थनांसफलीकृतवतारामेण भरतलक्ष्मणाभ्यांसह जटाशोधनमाङ्गलिकाभ्यङ्गस्नानालंकरणादिकरणपूर्वकं भरतप्रेर्यमाणरथारोहणेन पौरनारीनरनिकरैर्मानुषवेषधारिभिर्वानरतन्नारीनिकरैरप्यनुगम्यमानेन राजोपचारैरुपचर्यमाणेनचसताऽयोध्याप्रवेशेन राजवीथीपरिक्रमणेनदशरथगृहप्रवेशः ॥ २ ॥ वामदेवादिमहर्षिभिस्सहितेनवसिष्ठेन श्रीसीतयासहश्रीरामभद्रस्य भद्रतररत्नपीठोपवेशनपूर्वकं नानामणिगणखचितसुवर्णघटपूर्णहनुमदादिसमानीतनदीसमुद्रशुभसलिलैः पट्टाभिषेकः ॥ ३ ॥ रामेण निजराज्याभिषेकोत्सवे ब्राह्मणादिभ्योनानामणिगणादिवितरणम् ॥ ४ ॥ सुग्रीवादीनां यथार्हसंमानम् ॥ ५ ॥ सीतया हनुमते रामानुमत्यास्वकण्ठस्थहारप्रदानम् ॥ ६ ॥ श्रीरामेण विभीषणसुग्रीवादीनांयथार्हसंमाननेनस्वस्वावासप्रेषणपूर्वकं भरतस्ययौवराज्याभिषेकः ॥ ७ ॥ श्रीरामेणाश्वमेधादियजनपूर्वकं सुखेनप्रजापरिपालनम् ॥ ८ ॥

शिरस्यञ्जलिमाधाय कैकेय्यानन्दवर्धनः ॥ बभाषे भरतो ज्येष्ठं रामं सत्यपराक्रमम् ॥ १ ॥
पूजिता मामिका माता दत्तं राज्यमिदं मम ॥ तद्ददामि पुनस्तुभ्यं यथा त्वमददा मम ॥ २ ॥
धुरमेकाकिना न्यस्तामृषभेण बलीयसा ॥ किशोरवद्गुरुं भारं न वोढुमहमुत्सहे ॥ ३ ॥
वारिवेगेन महता भिन्नः सेतुरिव क्षरन् ॥ दुर्बन्धनमिदं मन्ये राज्यच्छिद्रमसंवृतम् ॥ ४ ॥
गतिं खर इवाश्वस्य हंसस्येव च वायसः ॥ नान्वेतुमुत्सहे रामं तव मार्गमरिन्दम ॥ ५ ॥

वोपविविशतुरित्यर्थः ॥ ६० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिंशदुत्तरशततमः सर्गः ॥१३०॥

एवं पुष्पकं धनदाय प्रेषयित्वा वसिष्ठेन च समागम्य भरतानुज्ञां विना नायोध्या प्रवेष्टव्येति तात्पर्येण नन्दिग्राम एवासनोपविष्टे रामे निविष्टेषु च पौरवर्गेषु सन्निहितासु च मातृषु तादात्विकसूक्ष्मेङ्गितदर्शननिपुणो भरतः स्वहृदयमग्रजाय निवेदयति—शिरस्यञ्जलिमित्यादिना ॥ शिरस्यञ्जलिमाधायेत्यनेन पूर्वकृता प्रपत्तिः स्मार्यते । अनन्यगतिकत्वसूचिका मुद्रा ह्यञ्जलिः । कैकेय्यानन्दवर्धन इत्यनेन भरतवचने कैकेयीसन्तोषो मुखप्रसादादिनाऽवगम्यत इति द्योत्यते ॥ १ ॥ रामस्य राज्यपरिग्रहे अपरिहार्यं हेतुं दर्शयति—पूजितेति ॥ मामिका मत्संबन्धिनी माता पूजिता । राज्यपरित्यागपूर्वकवनवासाङ्गीकारेण त्वया तोषिता । अनन्तरमिदं राज्यं मम मयि चित्रकूटे दत्तं । तद्राज्यं त्वं यथा येन प्रकारेण । ममाददाः तेन प्रकारेण तुभ्यं ददामि । न्यासरूपेण मयि स्थापितं राज्यं न्यासरूपत्वाप्रहाणेनैव पुनर्ददामीत्यर्थः ॥ २ ॥ अयोध्यायां राज्यभोगान् यथाकामं भोक्ष्ये राज्यं त्वमेव परिपालयेत्याकाङ्क्षायामाह—धुरमिति ॥ यद्वा पुनरर्थनपर्यन्तं न्यासधारणे नदोष इत्याशङ्क्याह—धुरमिति ॥ एकाकिना असहायेन । बलीयसा ऋषभेण न्यस्तां धुरं किशोरवत् बालवत्स इव । गुरुं भारं वोढुं नोत्सहे ॥ ३ ॥ तर्हि कथमेतावत्पर्यन्तं सोढमित्यत आह—वारीति ॥ महता वारिवेगेन भिन्नः अतएव क्षरन् बहिर्निःसरन् जलसेतुरिव इदं राज्यच्छिद्रं छिद्रवद्राज्यं असंवृतं संवरणरहितं सत् दुर्बन्धनं मन्ये । यथा महता वारिवेगेन भिन्नः क्षरन् सेतुर्वारिवेगाहतिनिरोधकतृणपुलशाखापुञ्जादिसंवरणं विना न बद्धुं शक्यते । एवं बहुविधच्छिद्रं राज्यमपि मन्त्रगोपनादिराजगुणावरणं विना पालितुं न शक्यमिति भावः ॥ ४ ॥ अहमिव भवानपि लोकान् गुणैर्वशीकरोत्वित्यत्राह—

[पा०] १ क. ख. घ. ङ. छ. झ. कैकेयीनन्दिवर्धनः. २ च. ज. भिन्नसेतुरिव. ३ क. ज. दुर्बन्धमिवमन्येऽहं. ४ ख. घ.—छ. झ, ट. वीरतव.

यथा चारोपितो वृक्षो जातश्चान्तर्निवेशने ॥ महांश्च सुदुरारोहो महास्कन्धप्रशाखवान् ॥ ६ ॥
शीर्येत पुष्पितो भूत्वा न फलानि प्रदर्शयन् ॥ तस्य नानुभवेदर्थं यस्य हेतोः स रोप्यते ॥ ७ ॥
एषोपमा महाबाहो त्वदर्थं वेत्तुमर्हसि ॥ यद्यस्मान्मनुजेन्द्र त्वं भक्तान्भृत्यान्न शाधि हि ॥ ८ ॥
जगदद्याभिषिक्तं त्वामनुपश्यतु सर्वतः ॥ प्रतपन्तमिवादित्यं मध्याह्ने दीप्ततेजसम् ॥ ९ ॥
तूर्यसङ्घातनिर्घोषैः काञ्चीनूपुरनिस्वनैः ॥ मधुरैर्गीतशब्दैश्च प्रतिबुध्यस्व राघव ॥ १० ॥
यावदावर्तते चक्रं यावती च वसुन्धरा ॥ तावत्त्वमिह सर्वस्य स्वामित्वमनुवर्तय ॥ ११ ॥
भरतस्य वचः श्रुत्वा रामः परपुरञ्जयः ॥ तथेति प्रतिजग्राह निषसादासने शुभे ॥ १२ ॥
ततः शत्रुघ्नवचनान्निपुणाः श्मश्रुवर्धकाः ॥ सुखहस्ताः सुशीघ्राश्च राघवं पर्युपासत ॥ १३ ॥
पूर्वं तु भरते स्नाते लक्ष्मणे च महाबले ॥ सुग्रीवे वानरेन्द्रे च राक्षसेन्द्रे विभीषणे ॥ १४ ॥

गतिमिति ॥ ५ ॥ तर्हि ममैवोपोद्बलेन भवानेव राज्यं परिपालयत्वित्याशङ्क्य तर्हि तातेन भवत्पोषणं विफलं स्यादित्याह—यथा चेत्यादिश्लोकत्रयेण ॥ अन्तर्निवेशने आरोपितः उप्तः वृक्षः महान् जातः सुदुरारोहो महास्कन्धप्रशाखवान् पुष्पितोपि भूत्वा फलानि न प्रदर्शयन् यथा शीर्येत अफलो भवति । यथा च यस्य फलस्य हेतोर्येन रोप्यते सः रोपयिता तस्य वृक्षस्य अर्थं तत्फलं । नानुभवेत् । मनुजेन्द्र भक्तान् भृत्यान् अस्मान्न शाधि यदि । महाबाहो एषोपमा त्वदर्थमुक्तेति वेत्तुमर्हसीति योजना । अत्र वृक्षरामयोरारोपयितृदशरथयोश्च उपमानोपमेयभावः । बीजावापस्य पुत्रेष्ट्यादेश्च महास्कन्धस्य सभ्रातृकत्वस्य च प्रशाखवत्त्वस्य सुग्रीवादिमित्रगणस्य च पुष्पाणां कल्याणगुणानां च राज्याकरणस्य फलाभावस्य च साम्यं द्योत्यते ॥ ६—८ ॥ भवतस्तु राज्यपरिपालने महती शक्तिरित्याह—जगदिति ॥ ९ ॥ सर्वभोगार्हस्त्वमेव भोगान् भुङ्क्ष्वेत्याह—तूर्येति । काञ्चीनूपुरनिस्वनैरित्यनेन प्रबोधकललितनृत्यं गम्यते ॥ १० ॥ मध्ये स्वस्य राज्याशानुद्गमं द्योतयन्नाह—यावदिति ॥ चक्रं ज्योतिश्चक्रमिति यावत् । यावती यावत्कालस्थितिः। तावत् तावत्कालम् । सर्वस्य राज्यस्य स्वामित्वमनुवर्तय । स्वामित्वानुवर्तनं हि पालनमेव ॥११॥निषसादेति । भरत इति शेषः ॥१२॥ श्मश्रुवर्धकाः श्मश्रुकर्तकाः । " वर्धनछेदनेथ द्वे आनन्दनसभाजने " इत्यमरः । सुशीघ्राः अभिषेकमुहूर्तातिलङ्घनं विना शीघ्रं कर्तुं समर्थाः । उपासत श्मश्रूण्यवर्धन्त । भरतलक्ष्मणापेक्षया श्मश्रुवर्धकानां बहुवचनं । राघवमिति भरतलक्ष्मणयोःप्रदर्शनार्थं ॥ १३ ॥ पूर्वमित्यादिश्लोकद्वयमेकान्वयं ॥ " न मे स्नानं बहुमतं तं विना केकयीसुतं "इत्युक्त्या प्रथमं स्नानं भरतस्य सुग्रीवस्यापि किष्किन्धानिर्गमनप्रभृतिस्नानाभावादद्य स्नानं । तथा विभीषणस्यापि

ती० एतदुक्तंभवति—केनचित्कुटुंबिनाकुटुंबार्थंसमारोपितोवृक्षःपुष्पितोमूलायदिनफलेत् तदातस्यकुटुंबस्यतद्वृक्षान्नप्रयोजनंभवेत् । एवंपित्राजनितःसर्वगुणसंपन्नोयदिलंलोकंनरक्षेःतदालोकस्यत्वयानप्रयोजनमिति । स० यथाचारोपितः बीजावापादिद्वारा । अन्तर्निवेशनेमूलस्य भूम्यन्तर्निवेशने जाते मूलप्रवेशने जाते । वृक्षोमहाञ्जातः । भाविसंज्ञांगृहीत्वेयमुक्तिः । महास्कन्धः प्रशाखवान् । 'शाखावेदविभागेचपादपान्नेन्तिकेपिच' इतिविश्वात्प्रशाखावानितियद्यपिवक्तव्यं । तथापि 'अपिमाषंमषंकुर्याच्छन्दोभङ्गंनकारयेत्' इत्युक्तेर्हस्वः । यद्वा महास्कन्धः प्रकृष्टाःशाखायस्यसप्रशाखःमहास्कन्धः । तद्वान्जातः । पुष्पितः । तारकादिरयं । यस्यहेतोःयेनकारणेनआरोपितः ॥ ६ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. महानपिदुरारोहो. २ ख. च. छ. झ. ञ. सरोपितः. ३ ख. ङ.—ञ. त्वमर्थं. ४ ग. ङ. झ. ञ. ट. भर्ताभृत्यान्नशाधिहि. ५ ख. ङ. च. छ. झ. ञ. ट. राघव. ज. सर्वशः. ६ क. ख. ग. ङ.—ट. बुध्यस्वशेष्वच. ७ ख.—च. झ. ञ. ट. लोकस्य. ८ क. ज. मभिवर्तय. ९ क. दासनेचसः. १० ख. ङ. ज.—ट. वर्धनाः. क. कर्तकाः. ११ क. ङ. च. झ. ञ. ट. पर्यवारयन्.

विशोधितजटः स्नातश्चित्रमाल्यानुलेपनः ॥ महार्हवसनो रामस्तस्थौ तत्र श्रिया ज्वलन् ॥ १५ ॥
प्रतिकर्म च रामस्य कारयामास वीर्यवान् ॥ लक्ष्मणस्य च लक्ष्मीवानिक्ष्वाकुकुलवर्धनः ॥ १६ ॥
प्रतिकर्म च सीतायाः सर्वा दशरथस्त्रियः ॥ आत्मनैव तदा चक्रुर्मनस्विन्यो मनोहरम् ॥ १७ ॥
ततो वानरपत्नीनां सर्वासामेव शोभनम् ॥ चकार यत्नात्कौसल्या प्रहृष्टा पुत्रलालसा ॥ १८ ॥
ततः शत्रुघ्नवचनात्सुमन्त्रो नाम सारथिः ॥ योजयित्वाऽभिचक्राम रथं सर्वाङ्गशोभनम् ॥ १९ ॥
अर्कमण्डलसंकाशं दिव्यं दृष्ट्वा रथोत्तमम् ॥ आरुरोह महाबाहू रामः सत्यपराक्रमः ॥ २० ॥
सुग्रीवो हनुमांश्चैव मेहेन्द्रसदृशद्युती ॥ स्नातौ दिव्यनिभैर्वस्त्रैर्जग्मतुः शुभकुण्डलौ ॥ २१ ॥
वरांभरणसंपन्ना ययुस्ताः शुभकुण्डलाः ॥ सुग्रीवपत्न्यः सीता च द्रष्टुं नगरमुत्सुकाः ॥ २२ ॥
अयोध्यायां तु सचिवा राज्ञो दशरथस्य ये ॥ पुरोहितं पुरस्कृत्य मन्त्रयामासुरर्थवत् ॥ २३ ॥
अशोको विजयश्चैव सुमन्त्रश्चैव सङ्गताः ॥ मन्त्रयन्तो मनृद्ध्यर्थमृद्ध्यर्थं नगरस्य च ॥ २४ ॥
सर्वमेवाभिषेकार्थं जयार्हस्य महात्मनः ॥ कर्तुमर्हथ रामस्य यद्यन्मङ्गलपूर्वकम् ॥ २५ ॥
इति ते मन्त्रिणः सर्वे संदिश्य तु पुरोहितम् ॥ नगरान्निर्ययुस्तूर्णं रामदर्शनबुद्धयः ॥ २६ ॥
हरियुक्तं सहस्राक्षो रथमिन्द्र इवानघः ॥ प्रययौ रथमास्थाय रामो नगरमुत्तमम् ॥ २७ ॥
जग्राह भरतो रश्मीञ्शत्रुघ्नश्छत्रमाददे ॥ लक्ष्मणो व्यजनं तस्य मूर्ध्नि संपर्यवीजयत् ॥ २८ ॥
श्वेतं च वालव्यजनं जग्राह पुरतः स्थितः ॥ अपरं चन्द्रसंकाशं राक्षसेन्द्रो विभीषणः ॥ २९ ॥
ऋषिसङ्घैस्तदाऽऽकाशे देवैश्च समरुद्गणैः ॥ स्तूयमानस्य रामस्य शुश्रुवे मधुरध्वनिः ॥ ३० ॥

लङ्कानिर्गमनप्रभृतिस्नानाभावात् । शत्रुघ्नस्य स्नानाश्रवणमधिकर्तृत्वेन तदानीमवसराभावात् । पूर्वं व्रतग्रहणानुक्तेश्च । " नन्दिग्रामे जटां हित्वा भ्रातृभिः सहितोनघ " इति संक्षेपोक्तेरत्रापि शत्रुघ्नस्नानमर्थसिद्धमित्याहुः । जटाशोधनं शुद्धकेशीकरणं । स्नात इति कर्तरिक्तः । नानावर्णपुष्पयुक्तत्वेन चित्रमाल्यत्वं । कुङ्कुमकर्पूरकस्तूर्यादिवस्तुभेदेन चित्रानुलेपनत्वं । महार्हवसनं पीताम्बरं । श्रिया इति अलंकारश्रिया । तत्र सिंहासने ज्वलन् प्रकाशमानः तस्थौ ॥ १४—१५ ॥ प्रतिकर्म हारादालंकरणं । इक्ष्वाकुकुलवर्धनः शत्रुघ्नः ॥ १६ ॥ आत्मनैव स्वयमेव ॥ १७ ॥ शोभनं प्रतिकर्मेत्यर्थः ॥ १८—२० ॥ दिव्यनिभैः दिव्यवस्त्रसदृशैः वस्त्रैरुपलक्षितावितिशेषः ॥ २१—२२ ॥ अयोध्यायामिति । गत्वेति शेषः । मन्त्रयामासुः अभिषेकोपयोगिमङ्गलद्रव्यसंपादनार्थं एवं कर्तव्यमिति मन्त्रयामासुः ॥ २३ ॥ उक्तमर्थं विवृणोति—अशोक इति ॥ मन्त्रयन् अमन्त्रयन् ॥ २४ ॥ सर्वमित्यादिश्लोकद्वयमेकान्वयं ॥ अर्हथेति पूजायां बहुवचनं ॥ २५—२६ ॥ हरियुक्तं हरितवर्णयुक्ताश्वयुक्तं ॥ २७ ॥ जग्राहेत्यादिश्लोकद्वयमेकान्वयं ॥ रश्मीन् जग्राह सारथ्यमकरोत् । लक्ष्मण इति । पुरतः स्थितो लक्ष्मणः व्यजनं तालवृन्तकं । मूर्ध्नि संपर्यवीजयत् । श्वेतं वालव्यजनं च जग्राह । अहं सर्वं करिष्यामीति त्वरया उभयग्रहणं । अपरं चन्द्रसंकाशमित्यत्र जग्राहेत्यनुषज्यते ॥२८—२९॥ समरुद्गणैः सवायुगणैः । रामस्य मधुर-

[पा०] १ ख. ङ. च. छ. झ. ञ. ट. वसनोपेतस्तस्थौ. २ ख. ङ.—ट. पुत्रवत्सला. ३ घ. ङ. च. छ. झ. ञ. ट. आर्यकामलसंकाशं. ४ क. ख. ङ. च. छ. झ. ञ. ट. रथंस्थितं. ५ ख. ङ. च. छ. झ. ञ. ट. रामःपरपुरंजयः. ६ क. ज. दिव्यांबरधरौजग्मतुः. ७ स. घ.—छ. झ. ञ. ट. सर्वाभरणजुष्टाश्वययुः. ८ ख. ङ. च. छ. झ. ञ. ट. सिद्धार्थाश्चसमाहिताः. ९ ङ. च. छ. झ. ञ. ट. मृद्ध्यर्थमृद्ध्यर्थनगरस्यच. १० क. घ. व्यजने. ११ च. छ. ञ. संवीजयत्तदा. ङ. झ. ट. संवीजयंस्तदा. १२ क. ग. ङ. च. छ. झ. ञ. ट. जग्राहेपरितःस्थितः, ख. जग्राहोपरिसंस्थितं.

ततः शत्रुञ्जयं नाम कुञ्जरं पर्वतोपमम् ॥ आरुरोह महातेजाः सुग्रीवः प्लवगर्षभः ॥ ३१ ॥
नवनागसहस्राणि ययुरास्थाय वानराः ॥ मानुषं विग्रहं कृत्वा सर्वाभरणभूषिताः ॥ ३२ ॥
शङ्खशब्दप्रणादैश्च दुन्दुभीनां च निस्स्वनैः ॥ प्रययौ पुरुषव्याघ्रस्तां पुरीं हर्म्यमालिनीम् ॥ ३३ ॥
ददृशुस्ते समायान्तं राघवं सपुरस्सरम् ॥ विराजमानं वपुषा रथेनातिरथं तदा ॥ ३४ ॥
ते वर्धयित्वा काकुत्स्थं रामेण प्रतिनन्दिताः ॥ अनुजग्मुर्महात्मानं भ्रातृभिः परिवारितम् ॥३५॥
अमात्यैर्ब्राह्मणैश्चैव तथा प्रकृतिभिर्वृतः ॥ श्रिया विरुरुचे रामो नक्षत्रैरिव चन्द्रमाः ॥ ३६ ॥
स पुरोगामिभिस्तूर्यैस्तालस्वस्तिकपाणिभिः ॥ प्रव्याहरद्भिर्मुदितैर्मङ्गलानि ययौ वृतः ॥ ३७ ॥
अक्षतं जातरूपं च गावः कन्यास्तथा द्विजाः ॥ नरा मोदकहस्ताश्च रामस्य पुरतो ययुः ॥ ३८ ॥
सख्यं च रामः सुग्रीवे प्रभावं चानिलात्मजे ॥ वानराणां च तत्कर्म राक्षसानां च तद्बलम् ॥
विभीषणस्य संयोगमाचचक्षे च मन्त्रिणाम् ॥ ३९ ॥
श्रुत्वा तु विस्मयं जग्मुरयोध्यापुरवासिनः ॥ ४० ॥
द्युतिमानेतदाख्याय रामो वानरसंवृतः ॥ हृष्टपुष्टजनाकीर्णामयोध्यां प्रविवेश ह ॥ ४१ ॥
ततो ह्यभ्युच्छ्रयन्पौराः पताकास्ते गृहे गृहे ॥ ४२ ॥
ऐक्ष्वाकाध्युषितं रम्यमाससाद पितुर्गृहम् ॥ ४३ ॥
अथाब्रवीद्राजसुतो भरतं धर्मिणां वरम् ॥ अर्थोपहितया वाचा मधुरं रघुनन्दनः ॥ ४४ ॥
पितुर्भवनमासाद्य प्रविश्य च महात्मनः ॥ कौसल्यां च सुमित्रां च कैकेयीमभिवाद्य च ॥ ४५ ॥
यच्च मद्भवनं श्रेष्ठं साशोकवनिकं महत् ॥ मुक्तावैडूर्यसंकीर्णं सुग्रीवाय निवेदय ॥ ४६ ॥
तस्य तद्वचनं श्रुत्वा भरतः सत्यविक्रमः ॥ पाणौ गृहीत्वा सुग्रीवं प्रविवेश तमालयम् ॥ ४७ ॥

ध्वनिः रावणनिरसनापदानकथनध्वनिः ॥३०–३२॥ शङ्खशब्दप्रणादैः शङ्खशब्दैः । जनहर्षप्रणादैश्चेत्यर्थः ॥ ३३ ॥ ये नगरं प्रविश्य वसिष्ठं पुरस्कृत्य रामाभिषेकममन्त्रयन् ते सुमन्त्रादयः ॥ ३४—३५ ॥ प्रकृतिभिः पौरजनैः ॥ ३६ ॥ तूर्यैः तूर्यवादकैः । स्वस्तिको वाद्यविशेषः । मङ्गलानि प्रव्याहरद्भिः मङ्गलपाठकैः ॥ ३७ ॥ अक्षतं जातरूपमिति ॥ हरिद्रया जातरूपमक्षतं । वहद्भिरिति शेषः ॥ ३८ ॥ सख्यं चेत्यादिसार्धश्लोकमेकं वाक्यं ॥ सख्यं जातमिति शेषः । मन्त्रिणां मन्त्रिभ्यः ॥ ३९ ॥ श्रुत्वेत्यर्धं । श्रुत्वा सुग्रीवसख्यादिकमिति शेषः ॥ ४०—४१ ॥ अभ्युच्छ्रयन् अभ्युदश्राययन् । उन्नम्य स्थापितवन्तः ॥ ४२ ॥ ऐक्ष्वाकेत्यर्धं । राम इति शेषः ॥ ४३ ॥ अथाब्रवीदित्यादिश्लोकद्वयमेकान्वयं । अथ रघुनन्दनः महात्मनः पितुर्भवनमासाद्य प्रविश्य च कौसल्याप्रभृतीरभिवाद्य च भरतमब्रवीदिति योजना ॥४४–४५ साशोकवनिकं अन्तःपुरोद्यानसहितं ॥ ४६—४७ ॥

ति० शङ्खशब्दप्रणादैः शङ्खशब्दैर्जनानां हर्षप्रणादैश्चेत्यर्थः । तदुक्तंपाद्मे—'आगतोरावणद्वेषीकुंभकर्णखरान्तकः । अतिकायेन्द्रजिच्छेत्तामहर्षिजनरक्षकः । समाप्तदेवताकार्यःसीतेशोलक्ष्मणानुजः । सत्यैकनिरतःशास्तापरदारसहोदरः । सुग्रीवराज्यदो धन्वीरावणानुजराज्यदः । शरणागतसंत्राताधर्मस्थापनतत्परः । रामोदाशरथिःश्रीमान्भगवान्भरताग्रजः । शरण्योरामइत्येवं शुश्रुवेकाहलध्वनिः' । इति ॥ ३३ ॥ ति० पितुर्भवनमासाद्यतत्रमहात्मनःसुग्रीवादीन्मुख्यान्प्रवेश्य कौसल्याद्याअभिवादय । वानरैरितिशेषः । इतिभरतमब्रवीदितिसंबन्धः । तत्रपूर्वंसुग्रीवादिप्रवेशबीजमुक्तंपाद्मे—'स्वंश्रीमद्भवनंरामोभक्तपादाब्जरेणुभिः । शुद्धीकर्तुमनाराजाहनूमन्तमकल्मषम् । विभीषणंचसुग्रीवंगृहंप्रावेशयत्तदा ।' इति । आपाततस्तुकौसल्यादिप्रणामकरणंफलमितिभाति । आन्तरंमुख्यंतुपाद्मोक्तंबोध्यं । पूर्वंतुरामेणैकान्तएवतद्वन्दनंकृतं नतुसर्वसमक्षमितिगम्यते ॥ ४५ ॥

[पा०] १ घ. शङ्खभेरीप्रणादैश्च. ख. शङ्खवंशप्रणादैश्च. २ च. विभ्राजमानं. ३ झ. प्रवेश्यच. ४ झ. मभिवादय.

ततस्तैलप्रदीपांश्च पर्यङ्कास्तरणानि च ॥ गृहीत्वा विविशुः क्षिप्रं शत्रुघ्नेन प्रचोदिताः ॥ ४८ ॥
उवाच च महातेजाः सुग्रीवं राघवानुजः ॥ अभिषेकाय रामस्य दूतानाज्ञापय प्रभो ॥ ४९ ॥
सौवर्णान्वानरेन्द्राणां चतुर्णां चतुरो घटान् ॥ ददौ क्षिप्रं स सुग्रीवः सर्वरत्नविभूषितान् ॥ ५० ॥
यथा प्रत्यूषसमये चतुर्णां सागराम्भसाम् ॥ पूर्णैर्घटैः प्रतीक्षध्वं तथा कुरुत वानराः ॥ ५१ ॥
एवमुक्ता महात्मानो वानरा वारणोपमाः ॥ उत्पेतुर्गगनं शीघ्रं गरुडा इव शीघ्रगाः ॥ ५२ ॥
जाम्बवांश्च हनूमांश्च वेगदर्शी च वानरः ॥ ऋषभश्चैव कलशाञ्जलपूर्णानथानयन् ॥ ५३ ॥
नदीशतानां पञ्चानां जलं कुम्भेषु चाहरन् ॥ ५४ ॥
पूर्वात्समुद्रात्कलशं जलपूर्णमथानयत् ॥ सुषेणः सत्त्वसंपन्नः सर्वरत्नविभूषितम् ॥ ५५ ॥
ऋषभो दक्षिणात्पूर्णं समुद्राज्जलमाहरत् ॥ रक्तचन्दनशाखाभिः संवृतं काञ्चनं घटम् ॥ ५६ ॥
गवयः पश्चिमात्तोयमाजहार महार्णवात् ॥ रत्नकुम्भेन महता शीतं मारुतविक्रमः ॥ ५७ ॥
उत्तराच्च जलं शीघ्रं गरुडानिलविक्रमः ॥ आजहार स धर्मात्मानलः सर्वगुणान्वितः ॥ ५८ ॥
ततस्तैर्वानरश्रेष्ठैरानीतं प्रेक्ष्य तज्जलम् ॥ अभिषेकाय रामस्य शत्रुघ्नः सचिवैः सह ॥
पुरोहिताय श्रेष्ठाय सुहृद्भ्यश्च न्यवेदयत् ॥ ५९ ॥

विविशुः । परिचारिका इति शेषः ॥ ४८—५० ॥ हे वानराः चतुर्णां सागराम्भसां चतुर्भिः सागराम्भोभिः पूर्णैर्घटैः उपलक्षिताः प्रत्यूषसमये यथा प्रतीक्षध्वं यथास्मान् प्रतीक्षिष्यध्वे तथा कुरुतेति योजना । सागरजलानयननियोगो नदीजलानयननियोगस्याप्युपलक्षकः ॥ ५१—५३ ॥ जलपूर्णानथानयन्नित्युक्तमेवार्थं विवृणोति—नदीशतानामिति ॥ ५४ ॥ एवं जाम्बवद्धनुमद्वेगदर्शर्षभैर्नदीजलानयनमुक्त्वा सुषेणर्षभगवयानलैः सागरजलानयनं दर्शयति—पूर्वादिति ॥५५॥ ऋषभो दक्षिणादिति । अयं चर्षभः पूर्वस्मादन्यः ॥५६–५८॥ तत इत्यादिसार्धश्लोक एकान्वयः । तत् प्रसिद्धं । तज्जलं तेषां

ति० जांबवांश्चेति । अत्रचकारैः सुषेणगवयादिपञ्चशतवानरपरिग्रहः । तद्वक्ष्यति—'नदीशतानांपञ्चाना'मिति । अतएवसुषेणगवयोःसमुद्रजलाहर्तृत्वेनवक्ष्यमाणेननविरोधः ॥५३॥ स० सुषेणश्चतुर्णामाज्ञानन्तरमाज्ञापितः । एवंगवयोपि । अतोनपूर्वोक्तिविरोधः ॥ ५५ ॥ ति० आनिलः हनुमान् । स० उत्तरसमुद्रस्यबहुदूरगतत्वेनशीघ्रंतस्माज्जलमानिनायेतिगरुडानिलविक्रमइतितत्स्तुतिः । आनिलः अनिलसुतः ॥ ५८ ॥

[पा०] १ क. ङ. च. छ. झ. ञ. ट. जलंकुंभैरुपाहरन्. २ क. ङ. च. छ. झ. ञ. ट. चन्दनकर्पूरैः. ३ ङ. झ. ञ. ट. धर्मात्मानिलः.

श्रीरामस्य पट्टाभिषेकघट्टः ।



ततः स प्रयतो वृद्धो वसिष्ठो ब्राह्मणैः सह ॥ रामं रत्नमये पीठे सहसीतं न्यवेशयत् ॥ ६० ॥
वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः ॥ कात्यायनः सुयज्ञश्च गौतमो विजयस्तथा ॥ ६१ ॥
अभ्यषिञ्चन्नरव्याघ्रं प्रसन्नेन सुगन्धिना ॥ सलिलेन सहस्राक्षं वसवो वासवं यथा ॥ ६२ ॥
ऋत्विग्भिर्ब्राह्मणैः पूर्वं कन्याभिर्मन्त्रिभिस्तथा ॥ योधैश्चैवाभ्यषिञ्चंस्ते संप्रहृष्टाः सनैगमैः ॥ ६३ ॥

नदीसागराणां जलं ॥ ५९–६२ ॥ ते वसिष्ठादयः | ऋत्विगादिभिः सहाभ्यषिञ्चन्निति योजना ॥६३॥

[पा०] १ च. छ. झ. ञ. ट. ससीतंसंन्यवेशयत्. ङ. ससीतंसमवेशयत्. २ क. ख. ङ. च. छ. झ. ञ. ट. वसिष्ठो विजयश्चैव. ३ क. घ. ङ. झ. ञ. ट. कात्यायनोगौतमश्च वामदेवस्तथैवच. ४ ङ. च. छ. झ. ञ. ट. संप्रहृष्टैः. ज. संप्रहृष्टाः-सनैगमाः.



सर्वौषधिरसैर्दिव्यैर्दैवतैर्नभसि स्थितैः ॥ चतुर्भिर्लोकपालैश्च [1]सर्वैर्देवैश्च संगतैः ॥ ६४ ॥
[ब्रह्मणा निर्मितं पूर्वं किरीटं रत्नशोभितम् ॥ अभिषिक्तः पुरा येन मनुस्तं दीप्ततेजसम् ॥ ६५ ॥
तस्यान्ववाये राजानः क्रमाद्येनाभिषेचिताः ॥ सभायां हेमकक्षायां शोभितायां [3]महाजनैः ॥
रत्नैर्नानाविधैश्चैव चित्रितायां सुशोभनैः ॥ ६६ ॥
नानारत्नमये पीठे कल्पयित्वा यथाविधि ॥ किरीटेन ततः पश्चाद्वसिष्ठेन महात्मना ॥
[4]ऋत्विग्भिर्भूषणैश्चैव [5]समयोक्ष्यत राघवः ॥ ६७ ॥]
छत्रं तु तस्य जग्राह शत्रुघ्नः पाण्डुरं शुभम् ॥ श्वेतं च बालव्यजनं सुग्रीवो वानरेश्वरः ॥
अपरं चन्द्रसंकाशं राक्षसेन्द्रो विभीषणः ॥ ६८ ॥
मालां ज्वलन्तीं वपुषा काञ्चनीं शतपुष्कराम् ॥ राघवाय ददौ वायुर्वासवेन प्रचोदितः ॥ ६९ ॥
सर्वरत्नसमायुक्तं [6]मणिरत्नविभूषितम् ॥ मुक्ताहारं नरेन्द्राय ददौ शक्रप्रचोदितः ॥ ७० ॥
प्रजगुर्देवगन्धर्वा ननृतुश्चाप्सरोगणाः ॥ अभिषेके तदर्हस्य तदा रामस्य धीमतः ॥ ७१ ॥
भूमिः सस्यवती चैव फलवन्तश्च पादपाः ॥ गन्धवन्ति च पुष्पाणि बभूवू राघवोत्सवे ॥ ७२ ॥
सहस्रशतमश्वानां धेनूनां च गवां तथा ॥ ददौ शतं वृषान्पूर्वं द्विजेभ्यो मनुजर्षभः ॥ ७३ ॥
त्रिंशत्कोटीर्हिरण्यस्य ब्राह्मणेभ्यो ददौ पुनः ॥ नानाभरणवस्त्राणि महार्हाणि च राघवः ॥ ७४ ॥
अर्करश्मिप्रतीकाशां काञ्चनीं मणिविग्रहाम् ॥ सुग्रीवाय स्रजं दिव्यां प्रायच्छन्मनुजर्षभः ॥ ७५ ॥
वैडूर्यमणिचित्रे च [7]वज्ररत्नविभूषिते ॥ वालिपुत्राय धृतिमानङ्गदायाङ्गदे ददौ ॥ ७६ ॥
मणिप्रवरजुष्टं च मुक्ताहारमनुत्तमम् ॥ सीतायै प्रददौ रामश्चन्द्ररश्मिसमप्रभम् ॥ ७७ ॥
अरजे वाससी दिव्ये शुभान्याभरणानि च ॥ अवेक्षमाणा वैदेही प्रददौ वायुसूनवे ॥ ७८ ॥
अवमुच्यात्मनः कण्ठाद्धारं जनकनन्दिनी ॥ अवैक्षत हरीन्सर्वान्भर्तारं च मुहुर्मुहुः ॥ ७९ ॥

सर्वौषधिरसैरित्यत्रापि अभ्यषिञ्चंस्त इत्यनुषज्यते ॥६४—६८॥ शतपुष्करां शतपद्मां ॥६९॥ सर्वरत्नैः नवरत्नैः समायुक्तं । मणिरत्नेन मणिश्रेष्ठेन नायकेन मध्ये विराजन्तं । मुक्ताहारं मुक्ताप्रचुरहारं ददौ । वायुरित्यनुषज्यते ॥ ७०—७१ ॥ पूर्वं रामविश्लेषे 'अपि वृक्षाः परिम्लाना' इत्युक्तावस्थं वस्तुजातं रामसंश्लेषे तादृगवस्थां विहाय प्रहृष्टतममभूदित्याह—भूमिरिति ॥ ७२ ॥ धेनूनां नवप्रसूतिकानां "धेनुः स्यान्नवसूतिका" इत्यमरः । पूर्वं हिरण्यदानादेः पूर्वं सुग्रीवादिभ्यः पूर्वं वा ॥ ७३—७४ ॥ मणिविग्रहां मणिप्रचुरां ॥ ७५ ॥ धृतिमान् प्रीतिमान् ॥ ७६ ॥ सीतायै प्रददौ हनुमते दातव्यमित्याशयेन ददौ ॥७७॥ अरजे निर्मले । अकारान्तत्वमार्षं । अवेक्षमाणा भर्तारमिति शेषः । स्त्रियाः स्वातन्त्र्याभावात् भर्त्रनुज्ञां काङ्क्षितवतीति भावः॥७८॥हारं रामदत्तं । सदसि मह्यं हारप्रदानं कस्मैचित् पारितोषिकतया दापयितुमिति निश्चित्य अयं हारःएषु कस्मै देय इत्याशयेनावैक्षतेत्यर्थः

स० वपुषा रामशरीरेण ज्वलन्तीं शतपुष्करांकाञ्चनींसुवर्णरूपिणींमालां । अनेनकायकान्तिरधिकेतिसूचितंभवति । यथोक्तं संग्रहे—'परस्परालंक्रियतेतिमिथ्यासभूषणंसर्वविभूषणानाम्'इति ॥ ६९ ॥

[पा०] १ ङ. छ. झ. सर्वदेवैश्च. २ ब्रह्मणानिर्मितमित्यादयः समयोक्ष्यतराघवइत्यन्ताःश्लोकाः क. ख. ङ.—ञ. पाठेषुदृश्यन्ते. ३ क. ख. ङ. च. ज. झ. ञ. महाधनैः. ४ क. च. छ. ज. ऋलिग्भिर्ऋषिभिश्चैव. ५ क. ज. सहितेनाभिषेचितः. ६ क. मणिविद्रुमभूषितं. ७ ङ. च. छ. झ. ञ. ट. चन्द्ररश्मिविभूषिते.

तामिङ्गितज्ञः संप्रेक्ष्य बभाषे जनकात्मजाम् ॥ प्रदेहि सुभगे हारं यस्य तुष्टासि भामिनि ॥
पौरुषं[1] विक्रमो बुद्धिर्यस्मिन्नेतानि सर्वशः[2] ॥ ८० ॥
ददौ सा वायुपुत्राय तं हारमसितेक्षणा ॥ हनुमांस्तेन हारेण शुशुभे वानरर्षभः ॥
चन्द्रांशुचयगौरेण श्वेताभ्रेण यथाऽचलः ॥ ८१ ॥
ततो द्विविदमैन्दाभ्यां नीलाय च परन्तपः ॥ सर्वान्कामगुणान्वीक्ष्य प्रददौ वसुधाधिपः ॥ ८२ ॥
सर्वे[3]वानरवृद्धाश्च ये चान्ये वानरेश्वराः ॥ वासोभिर्भूषणैश्चैव यथार्हं प्रतिपूजिताः ॥ ८३ ॥
विभीषणोथ सुग्रीवो हनुमाञ्जाम्बवांस्तथा ॥ सर्ववानरमुख्याश्च रामेणाक्लिष्टकर्मणा ॥ ८४ ॥
यथार्हं पूजिताः सर्वैः कामै रत्नैश्च पुष्कलैः ॥ प्रहृष्टमनसः सर्वे जग्मुरेव यथागतम् ॥ ८५ ॥
नत्वा[4] सर्वे महात्मानं ततस्ते प्लवगर्षभाः ॥ विसृष्टाः पार्थिवेन्द्रेण किष्किन्धामभ्युपागमन्[5] ॥ ८६ ॥
सुग्रीवो वानरश्रेष्ठो दृष्ट्वा रामाभिषेचनम् ॥ [पूजितश्चैव रामेण किष्किन्धां प्राविशत्पुरीम्[6]] ॥ ८७ ॥
[रामेण सर्वकामैश्च यथार्हं प्रतिपूजितः[7]] ॥ लब्ध्वा[8] कुलधनं राजा लङ्कां प्रायाद्विभीषणः[9] ॥ ८८ ॥

॥ ७९ ॥ तामिङ्गितज्ञ इत्यादिसार्धश्लोक एकान्वयः । यस्य यस्मिन् । पौरुषं बलं समुद्रलङ्घनेन । विक्रमो लङ्कादहनेन । बुद्धिः अशोकवनिकाप्रवेशेन । सर्वशः सर्वाणि यस्मिन् सन्तीति यस्य संतुष्टासि तस्मै देहीति योजना । अन्यथा अन्येषां निन्दोक्तिरेव स्यात् ॥ ८० –८१ ॥ कामगुणान् काम्यन्त इति कामाः प्रार्थनीयाः गुणाः येषांते तान् आभरणादिवस्तुविशेषान् ॥ ८२—८३ ॥ बिभीषणोथेति। अत्र संभावितपरिगणने प्रथमं कीर्तनाल्लब्ध्वा कुलधनमित्यनुवादाच्च आदावेव विभीषणः संभावित इति बोध्यं॥ ८४—८६ ॥ सुग्रीव इत्यर्धं॥ अत्रापि वचनव्यत्ययेन किष्किन्धामभ्युपागमदित्यनुषज्यते॥ ८७ ॥ लब्ध्वेत्यर्धं। कुलधनं इक्ष्वाकुकुल-

रामानु० कुलधनं इक्ष्वाकुकुलधनंश्रीरङ्गसंज्ञकंविमानमितिसन्तोवदन्ति । विभीषणकुलक्रमागतं लङ्काराज्यमितिकेचित् । ती० अत्रकुलधनशब्देनपूर्वमेवरामाभ्यनुज्ञातंराक्षसकुलधनं लङ्काराज्यंलब्ध्वेतिऋषिणानुवादःक्रियते । केचित्तु कुलधनमित्यत्रकुलधनशब्दस्यार्थं इक्ष्वाकुकुलदैवतंरङ्गविमानमितिवर्णयन्ति । तन्नोपपद्यते । कुतः कुलधनमित्यत्रेक्ष्वाकुकुलधनस्याश्रूयमाणत्वात् । अवतारसमाप्तिसमयेविभीषणायइक्ष्वाकुकुलदैवतंरङ्गविमानदानस्योत्तरश्रीरामायणेवक्ष्यमाणत्वाच्च । तथाहिविभीषणंप्रतिश्रीरामवचनं—'किंचान्यद्वक्तुमिच्छामिराक्षसेन्द्रमहाबल । आराधयजगन्नाथमिक्ष्वाकुकुलदैवतम्' इति । पाद्मपुराणेचावतारसमाप्तिसमये समागतंविभीषणंप्रतिश्रीरामवचनं 'यावच्चन्द्रश्चसूर्यश्चयावत्तिष्ठतिमेदिनी । तावद्रमस्वराज्यस्थःकालेममपदंव्रज । इत्युक्त्वाप्रददौ तस्मैस्वविश्लेषासहिष्णवे । श्रीरंगशायिनंस्वाचर्यमिक्ष्वाकुकुलदैवतम् । रङ्गंविमानमादायलङ्कांप्रायाद्विभीषणः' इत्यवतारसमाप्तिकालेरङ्गविमानदानश्रवणात् । कुलधनशब्देनराक्षसकुलधनंलङ्काराज्यमेवोक्तमितिवेदितव्यमिति । स० कुलधनं कुलस्य इक्ष्वाकुकुलस्यधनरूपं श्रीरामं लब्ध्वा सखित्वेनेतिशेषः । यत्तुकुलधनं इक्ष्वाकुकुलधनरूपं श्रीरङ्गविमानमितिव्याख्यानं तत्तुपाद्मवचनविरुद्धं । तथाहिपाद्मपुराणेउत्तरखण्डेकालाख्यब्रह्मदूतसंवादलक्ष्मणपरित्यागादिकमुक्त्वा 'अभिप्रायंतुरामस्यज्ञात्वाचारमुखात्तदा । आजग्मुर्वानराःक्षाराजानोराक्षसाद्विजाः । विभीषणोगुहोनीलः' इत्यादिनाविभीषणादीनांपुनरागमनंचोक्त्वापरलोकगमनप्रस्तावे 'अथैवाचमहातेजाराक्षसेन्द्रंविभीषणम् । राज्यंप्रशाधिधर्मेणमद्वाक्यंमावृथाकृथाः । यावच्चन्द्रश्चसूर्यश्चयावत्तिष्ठतिमेदिनी । तावद्रम

[पा०] १ पौरुषंविक्रमोबुद्धिः ददौसावायुपुत्राय इत्यर्धद्वयस्यस्थाने ङ. च. छ. झ. ञ. ट. पाठेषु अथसावायुपुत्रायतं हारमसितेक्षणा । तेजोधृतिर्यशोदाक्ष्यंसामर्थ्यंविनयोनयः । पौरुषंविक्रमोबुद्धिर्यस्मिन्नेतानिसर्वशः । इत्यर्धत्रयं पौर्वापर्यभेदेन अधिकैकार्धवत्तयाचदृश्यते. २ क. वानरयोधाश्च. ३ क. ख. घ. ङ. च. ज. झ. ट. दृष्ट्वासर्वे. ४ ङ. झ. ञ. ट. किष्किन्धां समुपागमन्. ५ इदमर्धं क. झ. पाठयोर्दृश्यते. ६ क. प्राविशद्बली. ७ इदमर्धं. औत्तराहपाठएवदृश्यते. ८ लब्ध्वाकुलधनमित्यर्धात्पूर्वं. क. ख. घ. च.—ट. पाठेषु विभीषणोपि धर्मात्मा सहतैर्नैर्ऋतर्षभैः इत्यर्धमधिकंदृश्यते. ९ क. ख. घ. च.—ट. प्रायान्महायशाः.

स राज्यमखिलं शासन्निहतारिर्महायशाः ॥ राघवः परमोदारः शशास परया मुदा ॥ ८९ ॥
उवाच लक्ष्मणं रामो धर्मज्ञं धर्मवत्सलः ॥ ९० ॥

आतिष्ठ धर्मज्ञ मया सहेमां गां पूर्वराजाध्युषितां बलेन ॥
तुल्यं मया त्वं पितृभिर्धृता या तां यौवराज्ये धुरमुद्वहस्व ॥ ९१ ॥
सर्वात्मना पर्यनुनीयमानो यदा न सौमित्रिरुपैति योगम् ॥
नियुज्यमानोपि च यौवराज्ये ततोऽभ्यषिञ्चद्भरतं महात्मा ॥ ९२ ॥

पौण्डरीकाश्वमेधाभ्यां वाजपेयेन चासकृत् ॥ अन्यैश्च विविधैर्यज्ञैरयजत्पार्थिवर्षभः ॥ ९३ ॥
राज्यं दश सहस्राणि प्राप्य वर्षाणि राघवः ॥ शताश्वमेधानाजह्रे सदश्वान्भूरिदक्षिणान् ॥ ९४ ॥
आजानुलम्बबाहुः स महास्कन्धः प्रतापवान् ॥ लक्ष्मणानुचरो रामः पृथिवीमन्वपालयत् ॥९५॥

धनं श्रीरङ्गविमानमिति संप्रदायः ॥ ८८ ॥ शासन् दुष्टनिग्रहं कुर्वन् शशास बुभुज इत्यर्थः । धातूनामनेकार्थत्वात् ॥ ८९—९० ॥ 'लक्ष्मणेमां मया सार्धं प्रशाधि त्वं वसुन्धरां' इति पूर्वाभिषेकारम्भे भरतासन्निधाने प्रतिज्ञानात् 'रामो द्विर्नाभिभाषत' इति नियमाल्लक्ष्मणमेव यौवराज्ये नियुङ्क्ते—आतिष्ठेति । पूर्वराजैः मन्वादिभिः अध्युषितां। आतिष्ठ पालय । पितृभिः पितृपितामहप्रपितामहैः या धृता तां धुरं मया तुल्यं यथा भवति तथा यौवराज्ये स्थित्वा उद्वहस्व ॥ ९१ ॥ यौवराज्ये नियुज्यमानः यौवराज्यमङ्गीकुरुष्वेति नियम्यमानः। पर्यनुनीयमानः पुनःपुनरनुनयेन पृच्छ्यमानः सन्नपि च सर्वात्मना सर्वप्रकारेणापि यदा योगं संमतिं नोपैति । स्वशेषत्वविरुद्धत्वज्ञानाज्ज्येष्ठे भरते विद्यमाने स्वस्य तदनुचितत्वज्ञानाच्चेति भावः । तदा भरतं अत्यन्तपरतन्त्रं यौवराज्ये अभ्यषिञ्चत् ॥ ९२ ॥ पौण्डरीकेति । अत्रोत्तरकृत्वारम्भोक्तिर्वनवासात्परमग्न्याधानपूर्वकं पूर्वकृतवोपि रामेण

राज्यस्थःकालेममपदंव्रज । इत्युक्त्वाप्रददौतस्मैस्वविश्लेषासहिष्णवे । श्रीरङ्गशायिनंस्वार्च्यमिक्ष्वाकुकुलदैवतम् । रङ्गविमानमादायलङ्कांप्रायाद्विभीषणः' इतिवचनात् । नचस्कान्दपुराणेउमासंहितायांद्वादशाध्यायेऽभिषेकोत्सवप्रस्तावे 'उपित्वावत्सरंसर्वैरक्षसाधानराक्षथा । अनुज्ञातोराघवेणलङ्कांप्रायाद्विभीषणः । मध्याह्नेविष्णुपूजार्थंकावेर्यामध्यतोहरिम् । निधायविधिवत्स्नानंनिर्लंसर्वं समाप्यच । मञ्जूषामध्यगंविष्णुंपूजयामासभक्तितः । तस्मिन्क्षणेपरिणतंविमानंप्रणवाकृति' इत्यादिनाऽभिषेकानन्तरमेवश्रीरङ्गनाथविमानदानस्योक्तत्वात्तद्रीत्यात्रापितदेवप्राप्यमितिवाच्यं । स्कान्दवचनानांसंकुचितकथाप्रबन्धरूपत्वेनागामिनींकथांपुरस्तादेवाकथयदितिस्वीकारेबाधकाभावात् । अन्यथापूर्वमेवतद्दानेश्रीरामस्यस्वकुलदैवश्रीरङ्गनाथार्चनेनैवैकादशसहस्राब्दावस्थानापत्तेः । नचेष्टापत्तिरेवेतिवाच्यं । पाद्मेसर्वत्रनित्याह्निकप्रस्तावेश्रीरङ्गनाथार्चनस्यवर्णितत्वात् । यथोक्तंपाद्मे नित्याह्निके—'गृहंगत्वाऽनलेहुत्वानत्वाश्रीरङ्गशायिनम् ।' इति । तथान्यत्र 'उत्थायकृतमध्याह्नस्नानोरङ्गेदसमर्पितम् । भुक्त्वाऽन्नं' इत्यादिपूर्वोदाहृतपाद्मवचननिरवकाशत्वस्यस्फुटत्वाच्च । अतउक्तएवार्थइत्यलम् ॥ ८८ ॥ **ती०** आत्मनासहवनवासदुःखानुभवाद्राज्येसहसुखानुभवार्थं लक्ष्मणंप्रतियौवराज्यप्रार्थनेतिभावः ॥ ९१ ॥ **स०** सर्वात्मनासर्वप्रकारेण पर्यनुनीयमानः मयासहचिरंवनवासप्रयासानुभवाद्यौवराज्यसौख्यमनुभुङ्क्ष्वेतिपुनःपुनःप्रार्थितोपि सौमित्रिः योगं यौवराज्याधिपत्यं । यदानोपैति ज्येष्ठेभरतेसतिनाहंतदर्हइतिस्वीकरोति-ज्येष्ठत्वात्त्वमेवयौवराज्यंकुर्वितिबहुशःनियुज्यमानोपिउक्तोपि भरतोबहुक्लेशभागितिसएवतत्करोत्वितिवा योगं यदानोपैति ततोनन्तरंभुवियौवराज्ये भरतमभ्यषिञ्चत् ॥ ९२ ॥ **ति०** पौण्डरीकाश्वमेधेत्यादुत्तरकाण्डार्थसंक्षेपः । पौण्डरीकाश्वमेधाभ्यामितिसामान्यतउक्तत्वातत्रैवविशेषमाह—वाजिमेधेनचासकृदिति ॥ ९३ ॥

[पा०] १ ख. च. ञ. रराज. २ ङ. झ. ट. तुल्यंयथात्वंपितृभिःपुरस्तात्तैर्यौवराज्ये. ३ क. ख. घ.—ज. ट. नियुज्यमानोभुवि. ४ ङ. च. झ. ञ. ठ. वाजिमेधेन. ५ घ. यैरिष्टवानाप्तदक्षिणैः. क. ख. ङ. च. झ. ञ. ट. यज्ञैरयजत्पार्थिवात्मजः. ६ क. छ.—ट. आजानुलम्बिबाहुः.

राघवश्चापि धर्मात्मा प्राप्य राज्यमनुत्तमम् ॥ ईजे बहुविधैर्यज्ञैः ससुहृज्ज्ञातिबान्धवः ॥ ९६ ॥
न पर्यदेवन्विधवा न च व्यालकृतं भयम् ॥ न व्याधिजं भयं वाऽपि रामे राज्यं प्रशासति ॥९७॥
निर्दस्युरभवल्लोको नानर्थः कंचिदस्पृशत् ॥ न च स्म वृद्धा बालानां प्रेतकार्याणि कुर्वते ॥ ९८ ॥
सर्वं मुदितमेवासीत्सर्वो धर्मपरोऽभवत् ॥ राममेवानुपश्यन्तो नाभ्यहिंसन्परस्परम् ॥ ९९ ॥
आसन्वर्षसहस्राणि तथा पुत्रसहस्रिणः ॥ निरामया विशोकाश्च रामे राज्यं प्रशासति ॥ १०० ॥
रामो रामो राम इति प्रजानामभवन्कथाः ॥ रामभूतं जगदभूद्रामे राज्यं प्रशासति ॥ १०१ ॥
नित्यपुष्पा नित्यफलास्तरवः स्कन्धविस्तृताः ॥ काले वर्षी च पर्जन्यः सुखस्पर्शश्च मारुतः ॥१०२॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा लोभविवर्जिताः ॥ स्वकर्मसु प्रवर्तन्ते तुष्टाः स्वैरेव कर्मभिः ॥१०३॥
आसन्प्रजा धर्मरता रामे शासति नानृताः ॥ सर्वे लक्षणसंपन्नाः सर्वे धर्मपरायणाः ॥ १०४ ॥
दश वर्षसहस्राणि दश वर्षशतानि च ॥ भ्रातृभिः सहितः श्रीमान्रामो राज्यमकारयत् ॥ १०५ ॥
धन्यं यशस्यमायुष्यं राज्ञां च विजयावहम् ॥ आदिकाव्यमिदं त्वार्षं पुरा वाल्मीकिना कृतम् ॥
यः पठेच्छृणुयाल्लोके नरः पापाद्विमुच्यते ॥ १०६ ॥
पुत्रकामस्तु पुत्रान्वै धनकामो धनानि च ॥ लभते मनुजो लोके श्रुत्वा रामाभिषेचनम् ॥ १०७ ॥

कृता इत्यस्योपलक्षणं ॥ ९३—९५ ॥ चापीति निपातसमुदायोऽवधारणार्थोऽभिन्नक्रमः । ससुहृज्ज्ञातिबान्धव एवेत्यर्थः ॥ ९६ ॥ न पर्यदेवन्निति । नपर्यदेवयन्निति पाठे विलापयन्तीत्यर्थः ॥ ९७—९८ ॥ राममेवेति । अन्योन्यनिर्मूलनवैरे सत्यपि रामसुखं म्लानं भविष्यतीति मत्वा परस्परं नाभ्यहिंसन् । परमधार्मिकं राममेवानुचिन्तयन्तोऽन्योन्यवैरं प्रजहुरित्यर्थः ॥ ९९–१०५ ॥ अथ रामायणपठने फलं दर्शयति—धन्यमित्यादिसार्धश्लोकमेकं वाक्यं ॥ ऋषिः वेदः तत्संबन्धि । वेदोपबृंहणमिति यावत् । पुरा अवतारात्पूर्वं । रामोत्तरतापनीयमूलत्वेन पुरातनमितिवार्थः । यद्वा पुरा सर्वकविभ्यः पूर्वं । न त्ववतारात्पूर्वमित्यर्थः । "प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवानृषिः। चकार चरितं कृत्स्नं विचित्रपदमात्मवान्" इति रामे प्राप्तराज्ये सति चकारेत्युपक्रमात् "रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान्" इति राज्यप्राप्तिपर्यन्तं भूततया निर्दिश्य ततः परं ब्रह्मलोकं प्रयास्यतीत्येतदन्तं भविष्यत्तयानिर्देशात् 'कोन्वस्मिन्सांप्रतं लोके' इत्यादौ सांप्रतशब्दप्रयोगात् "रामभूतं जगदभूद्रामे राज्यं प्रशासति" इति सकललोकविदितरामविषयप्रश्नानुपपत्तेः सर्वथा परिहृतत्वात् । 'इतिहासं पुरातनम्' इत्यस्य आदिकाव्यत्वात्सङ्गतेरन्येषामपि विरोधाभासानां सुपरिहार्यत्वाच्चायमेवार्थः ॥१०६॥ पुत्रकामस्त्वित्यादिसार्धश्लोकद्वयमेकं वाक्यं॥ रामाभिषेचनं रामाभिषेकावधिकं । अधितिष्ठति

स० धर्मात्मापि साक्षाद्यज्ञपुरुषनारायणात्मापि । यदर्थकत्वादिकरणं तदात्मासत्रपीतियावत् । लोकशिक्षायाइतिभावः । राघवः बहुविधैर्यज्ञैरीजे "स्वात्मानंयज्ञपुरुषंयज्ञेनायजताथसः ।" इत्यादेः ॥ ९६ ॥ स० दशवर्षशतानिचेत्यनेनैकादशसहस्रसंख्यालभ्यते अस्याएवमानभेदात् 'एवंत्रयोदशसहस्र—' इत्याद्युक्तिरितिनविरोधः ॥ १०५ ॥ ति० रामाभिषेचनं तदवधिकमित्यर्थः

[पा०] १ ङ. झ. ट. ससुतभ्रातृबान्धवः. क. ख. घ. च. ज. ञ. ससुहृद्भ्रातृबान्धवः. २ क ङ.—ट. भयंचासीद्रामे. ३ ङ.—ट. नानर्थकश्चित्. ४ ङ. झ. ट. कामवर्षीच. ५ ङ. छ. झ. ञ. ट. धर्म्यं. ६ क. ख. च.—ट. यःशृणोतिसदालोकेनरःपापात्प्रमुच्यते.

महीं विजयते राजा रिपूंश्चाप्यधितिष्ठति ॥ राघवेण यथा माता सुमित्रा लक्ष्मणेन च ॥ १०८ ॥
भरतेनेव कैकेयी जीवपुत्रास्तथा स्त्रियः ॥ [भविष्यन्ति सदानन्दाः पुत्रपौत्रसमन्विताः] ॥१०९॥
श्रुत्वा रामायणमिदं दीर्घमायुश्च विन्दति ॥ रामस्य विजयं चैव सर्वमक्लिष्टकर्मणः ॥ ११० ॥
शृणोति य इदं काव्यमार्षं वाल्मीकिना कृतम् ॥ श्रद्दधानो जितक्रोधो दुर्गाण्यतितरत्यसौ ॥१११॥
समागमं प्रवासान्ते लभते चापि बान्धवैः ॥ प्रार्थितांश्च वरान्सर्वान्प्राप्नुयादिह राघवात् ॥ ११२ ॥
श्रवणेन सुराः सर्वे प्रीयन्ते संप्रशृण्वताम् ॥ विनायकाश्च शाम्यन्ति गृहे तिष्ठन्ति यस्य वै ॥११३॥
विजयेत महीं राजा प्रवासी स्वस्तिमान्व्रजेत् ॥ स्त्रियो रजस्वलाः श्रुत्वा पुत्रान्सूयुरनुत्तमान् ॥११४॥
पूजयंश्च पठंश्चेममितिहासं पुरातनम् ॥ सर्वपापात्प्रमुच्येत दीर्घमायुरवाप्नुयात् ॥ ११५ ॥
प्रणम्य शिरसा नित्यं श्रोतव्यं क्षत्रियैर्द्विजात् ॥ ऐश्वर्यं पुत्रलाभश्च भविष्यति न संशयः ॥ ११६ ॥
रामायणमिदं कृत्स्नं शृण्वतः पठतः सदा ॥ प्रीयते सततं रामः स हि विष्णुः सनातनः ॥११७॥
आदिदेवो महाबाहुर्हरिर्नारायणः प्रभुः ॥ [साक्षाद्रामो रघुश्रेष्ठः शेषो लक्ष्मण उच्यते] ॥११८॥

कुटुम्बवृद्धिं धनधान्यवृद्धिं स्त्रियश्च मुख्याः सुखमुत्तमं च ॥
श्रुत्वा शुभं काव्यमिदं महार्थं प्राप्नोति सर्वां भुवि चार्थसिद्धिम् ॥ ११९ ॥
आयुष्यमारोग्यकरं यशस्यं सौभ्रातृकं बुद्धिकरं सुखं च ॥
श्रोतव्यमेतन्नियमेन सद्भिराख्यानमोजस्करमृद्धिकामैः ॥ १२० ॥
[वस्त्रेण दिव्येन धनेन चैव धान्येन भूम्याभरणेन वेश्मना ॥
संतर्पयेद्वाचकमर्थजालैर्न चेत्फलं विन्दति वित्तशाठ्यकृत् ॥ १२१ ॥]

एवमेतत्पुरावृत्तमाख्यानं भद्रमस्तु वः ॥ प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम् ॥ १२२ ॥
देवाश्च सर्वे तुष्यन्ति ग्रहणाच्छ्रवणात्तथा ॥ रामायणस्य श्रवणात्तुष्यन्ति पितरस्तथा ॥ १२३ ॥

आक्रम्य तिष्ठतीत्यर्थः। माता कौसल्या। जीवपुत्राः भवन्तीति शेषः॥ १०७—११० ॥ शृणोति य इत्यादिश्लोकद्वयमेकान्वयं ॥ दुर्गाणि दारिद्र्यादीनि ॥ १११—११२ ॥ विनायकाः विघ्नकरा ग्रहाः ॥ ११३—११५ ॥ ब्राह्मणवत् क्षत्रियस्यापि पाठप्राप्तौ नियममाह—प्रणम्येति। वैश्यादीनां कैमुतिकसिद्धं ब्राह्मणात् प्रणमनपूर्वकं श्रवणं ॥ ११६—११९॥ सौभ्रातृकं सौभ्रातृकरं सुखं सुखकरं ॥ १२०—१२३॥

॥ १०७ ॥ **ती०** संप्रशृण्वतां संक्षिप्यशृण्वतां। **ति०** विनायकाः विघ्नकारिणोदेवगणविशेषाः। **स०** विनायकाः विघ्नाः। 'विनायकस्तुहेरंबेविघ्नेताक्ष्येजिनेगुरौ'इतिविश्वः ॥ ११३ ॥ **ति०** स्त्रियोरजस्वलाः शुद्धिस्नानानन्तरंषोडशदिनावधि ॥ ११४ ॥

[**पा०**] १ इदमर्धं औत्तराहपाठएवदृश्यते. २ ङ. च. छ. झ. ञ. ट. काव्यंपुरा. ३ ङ.—ट. समागम्यप्रवासान्तेरमस्तेसहबांधवैः. ४ ख. घ.—ट. तेप्रार्थितान्वरान्सर्वान्प्राप्नुवन्तीह. ५ ङ. परिशृण्वतां. ६ ङ. च. छ. झ. ञ. ट. स्वस्तिमान्भवेत्. ७ इदमर्धं औत्तराहपाठेदृश्यते. ८ ख. घ.—ट. शुभंच. ९ अयंश्लोकः क. पाठेदृश्यते.

भक्त्या रामस्य ये चेमां संहितामृषिणा कृताम् ॥ लेखयन्तीह च नरास्तेषां वासस्त्रिविष्टपे ॥ १२४॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशतिसहस्रिकायां संहितायां युद्धकाण्डे श्रीरामपट्टाभिषेको नाम एकत्रिंशदुत्तरशततमः सर्गः ॥ १३१ ॥

इति युद्धकाण्डः समाप्तः ॥ ६ ॥

संहितातुल्यत्वात् संहितेति व्यपदेशः ॥ १२४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकत्रिंशदुत्तरशततमः सर्गः ॥ १३१ ॥

इत्थं श्रीमच्छठारेश्चरणसरसिजद्वन्द्वसेवातिरेकादुद्भूतोद्दामबोधः कुशिकसुतकुलापाम्पतेरोषधीशः । श्रीमान्गोविन्दराजो वरदगुरुसुतो भावनाचार्यवर्यप्रेम्णैव प्रेर्यमाणो व्यतनुत विपुलां युद्धकाण्डस्य टीकाम् ॥ १ ॥

तीo रामस्यसंहितांरामायणमित्यर्थः । संहितालक्षणसप्तकाण्डवत्साद्दश्यादस्यसंहितेतिव्यपदेशः । लेखयन्ति चकारालिखन्तिच । तिo अत्रफलश्रुतिश्लोकाःकतकव्याख्यानेनोपलभ्यन्ते ॥ १२४ ॥ इत्येकत्रिंशदधिकशततमःसर्गः ॥ १३१ ॥

इदं युद्धकाण्डं कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम् । शकाब्दाः १८३५ सन १९१३.